CC-0. In Public Domain. Digitization by eGangotri

Almira 2
Shelf 1
16

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रंथ का दाता - पं. केदारनाथ शर्मणा ने.सं. महाविद्यालय-पुस्तकालयाय समर्पितम्। मूल्य रु. २००।

विद्योदयो निराकुर्यादविद्यातिमिरं सदा
सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः

श्रीकाशीविश्वेश्वरो विजयते

महाभाष्यम्

भाष्यप्रदीपेनाभिनवटिप्पण्या च सहितम्

इदं श्रीकाश्यां विद्योदयनाम्नि यन्त्रालये मुद्रयितुमुपक्रान्तम्
का० सु० १ संवत् १९२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूमिका

एषु दिवसेषु पाणिनीयव्याकरणस्य परश्शतैः प्राचीनार्वाचीनाचार्यनिर्मितोत्तमतमनिबन्धैरत्यन्तमुपचितस्य पठनपाठनादिपरमप्रचुरप्रचारस्य यदुपजीव्य सर्वे निर्णयाः प्रावर्तन्त यच्च सर्वैर्निबन्धकारैर्मूर्द्धाभिषिक्तप्रमाणतयाऽत्यर्थमाद्रियते यत्र च दृढो व्यवसायो लोकोत्तरपाण्डित्याय प्रकल्पते यच्च साक्षान्नारायणमूर्तिना मुनिवृन्दवन्दितचरणकमलेन भगवत्पतञ्जलिमहर्षिणा जगदुपकाराय स्वयं विनिर्मितं तदिदं महाभाष्यं नाम केवलं पुस्तकैर्दोर्लभ्यमात्रेण क्रमशः पठनपाठनाभ्यासाद्यगोचरीभूय विलुप्तप्रचारं चेत्स्यान्मूल एव कुठार इति संभाव्य भूयसां तदभ्यासरसिकानां पण्डितवराणां विद्यार्थिगणानां च प्रार्थनेन श्रीमत्काशिकसंस्कृतपाठशालाप्रधानाध्यक्षास्मत्प्रभुवरश्रीयुतग्रिफिथसाहिबकृतप्रोत्साहनेन च तन्मुद्रणाय वयं सोल्लासं प्रावर्तिष्महि। पुरा चैतत्पाठशालाध्यक्षेणाधुना यशोमात्रावशेषेण बालण्टेनमहाशयेन महतोत्साहेनेदं प्रदीपविवरणाभ्यां सहमुद्रयितुं प्रारब्धं तस्य च पत्राणामायामविस्तारावतिमहान्ताविति तद् बहुभ्यो न व्यरोचिष्टेत्यतीव न्यूना ग्राहकसंख्याऽभूत्। ततश्च सुविपुलकालद्रव्यव्ययसाध्यतन्मुद्रणोत्साहस्य मन्दीभावेन नवाह्निकमेव तदुपरतम्। संप्रति चास्माभिर्विवरणस्यातिविस्तृतत्वेन तन्मुद्रणस्य भूयःसमयद्रव्यव्ययापेक्षत्वात् प्रायस्तस्य शब्देन्दुशेखरमञ्जूषादिभिर्गतार्थत्वात् केवलं भाष्यकैयटयोः कुत्रकुत्र चिद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योजनायामेव प्रधानोपयोगित्वात्तन्मुद्रणं नातीवोपयुज्यत इति ततः किंचित् किंचिदुपयोगिभूतमादाय स्वयमपि बहुत्राभिनवान् प्रकारान् कल्पयित्वाऽत्यन्तं लघीयसी टिप्पणी विरचिता। कैयटं विना भाष्यस्य योजनमेवाशक्यमिति तन्मुद्रणं त्वावश्यकमेव। सीसाक्षराणि चात्र सूक्ष्माण्येव चारूण्युपलभ्यन्ते न स्थूलानीति स्थूलाक्षरप्रियैरस्माभिः शिलाक्षरैरेवास्मिन्नभिनवे विद्योदयनाम्नि यन्त्रालये महताऽऽयासेन परमप्राचीनानि भाष्यकैयटपुस्तकानि संपाद्य तेभ्यो व्याख्याभ्यश्च पाठान्निर्णीय संशोध्याभिनवनिर्मितटिप्पण्यासह तन्मुद्रणमारब्धम्। अत्र च टिप्पण्यां यद्यत् प्राचीननिबन्धेभ्य उद्ध्रियते तत्रतत्र च तत्तन्नाम प्रदर्श्यते विवरणस्य तु द्योतकं वि० इति। यच्चाभिनवं लिख्यते तन्निबन्धनं प्रथममिति कुत्रकुत्रचिद् यदि सुपरिष्कृतं न स्यात् तर्हि न तावतैव हेयत्वमस्याष्टिप्पण्या भवितुमर्हति यतः कस्यापि प्रथममेव निबन्धनं सर्वांशे साधु न भवतीति व्यक्तमेव केवलं व्युत्पन्नजनमनांसि निकषोपलस्थाने कल्पयित्वा तेभ्य इदमुपायनीक्रियते ते च निसर्गसुजनाः सारासारविवेकपुरःसरमवश्यं गुणदोषौ निरूपयेयुरिति दृढमाशास्महे। प्रीयतां चानेन व्यापारेण सर्वान्तर्यामी भगवान् परमेश्वर इति सविनयं प्रार्थयामहे॥

काशीस्थराजकीयपाठशालायाम्

धर्मशास्त्राचार्यो राजारामशास्त्री
सांख्यशास्त्राध्यापको बालशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः॥ सर्वाकारंनिराकारं विश्वाध्यक्षमतीन्द्रियम्॥ सदसद्रूपतातीतमद्वयंमाययावृतैः॥१॥ ज्ञान
लोचनसंलक्ष्यंनारायणमजंविभुम्॥ प्रणम्यपरमात्मानंसर्वविद्याविधायिनम्॥२॥ पुरुषाः प्रतिपद्यन्तेदेव
त्वंयदनुग्रहात्॥ सरस्वतीं च तांनत्वासर्वविद्याधिदेवताम्॥३॥ पदवाक्यप्रमाणानांपारंयातस्यधीमतः॥
गुरोर्महेश्वरस्यापिकृत्वाचरणवन्दनम्॥४॥ महाभाष्यार्णवावारपारीणंविवृतिप्लवम्॥ यथागमंविधा-
स्येहंकैयटोजैयटात्मजः॥५॥ भाष्याब्धिः क्वातिगम्भीरः क्वाहंमन्दमतिस्ततः॥ छात्राणामुपहास्यत्वंयास्या
मिपिशुनात्मनाम्॥६॥ तथापिहरिबद्धेनसारेणग्रन्थसेतुना॥ क्रममाणः शनैः पारंतस्यप्राप्तास्मिपङ्गुव

श्रीपतञ्जलयेनमः॥ अथशब्दानुशासनम्॥

त्॥७॥ महाभाष्यकारोविवरणकारत्वाद्व्याकरणस्यसाक्षात्प्रयोजनमाह। अथशब्दानुशासनमि-
ति। प्रयोजनप्रयोजनानितुरक्षोहादीनिपश्चाद्वक्ष्यन्ते॥

श्रीगणेशायनमः॥ आलोकालोकआलोकान्तरंनापेक्षतेयथा॥ एवंवृत्त्याप्तिमात्रेणयत्स्फूर्तिस्तत्परंमहः॥१॥
प्रयोजनमाहेति॥ साधवः शब्दास्तेषामसाधुभ्योविवेकोवाविषयोऽनेनप्रदर्श्यतइतितुयुक्तम्॥ स्वतःपुरुषार्थतद्वारा-
दुपकारकाणामेवप्रयोजनतायाऔचित्येनरक्षादीनामेवप्रधानप्रयोजनतायायुक्तत्वात्॥ प्रयोजननिरूपणस्या
ध्ययनानुकूलप्रवृत्तिंप्रतीष्टसाधनत्वज्ञानजननमात्रेणैवार्थवत्त्वादध्ययनस्यचविवेकज्ञानपर्यन्तत्वाज्ज्ञानस्या
ध्ययनान्तर्गतत्वेनप्रयोजनतायाः कथमपिवक्तुमशक्यत्वाच्च। प्रथमंविषयंनिरूप्यरक्षोहेत्यादिनाविस्तरेणप्रयोज
नानिप्रतिपाद्य ततः किंपुनरितिप्रभृत्याक्षेपतत्प्रतिक्षेपमुखेनाधिकारीनिरूप्यतइतिसंदर्भशुद्धेश्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्ववाक्यं व्याख्यातुं तदवयवमथशब्दं तावद्व्याचष्टे। अथेत्ययमिति। इति शब्दोऽथशब्दस्य स्वरूपेऽवस्थापनाय प्रयुक्तः। एवं हि पदान्तरैः सामानाधिकरण्येन संबन्धे सत्यथशब्दो व्याख्यातुं शक्यते। स्वरूपे व्यवस्थितश्च सर्वनाम्ना परामृश्यते। अयमिति। शब्द इति स्वरूपकथनं विस्पष्टप्रतिपत्त्यर्थम्। अधिकारार्थ इति। अधिकारः प्रस्तावो द्योत्यत्वेनास्य प्रयोजनमित्यर्थः। निपातानां च द्योतकत्वं वाक्यपदीये निर्णीतम्। अथशब्दस्याधिकारार्थत्वे यो वाक्यार्थः संपद्यते तं दर्शयति। शब्दानुशासनमिति। अनेकक्रियाविषयस्यापि शब्दानुशासनस्य प्रारभ्यमाणताऽथशब्दसन्निधाने प्रतीयते। व्याकरणस्य चेदमन्वर्थं नाम शब्दानुशासनमिति। अत्र चाचार्यस्य कर्तुः प्रयोजनाभावादनुपादानादुभयप्राप्त्यभावान्नोभयप्राप्तौ कर्मणीत्यनेन षष्ठी। अपि तु कर्तृकर्मणोः कृतीत्यनेन नेतिकर्मणि चेति समासप्र

अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्। केषां शब्दानाम्॥

तिषेधात्प्रसङ्गादिध्मप्रव्रश्चनादिवत्समासः। शब्दशब्दस्य सामान्यशब्दत्वाद्धि ना प्रकरणादिना विशेषावस्थानाभावात्तन्त्रीशब्दकाकवाशितादीनामप्यनुशासनप्रसङ्ग इति मत्वा पृच्छति। केषामिति। उत्तरपदार्थान्तर्गतस्यापि पूर्वपदार्थस्य बुद्ध्या प्रविभागात्किमा प्रत्यवमर्शः यथा राजपुरुष इत्युक्ते कस्य राज्ञ इति॥

प्रस्तावः। प्रारम्भः। वि०। द्योतकत्वमिति। विवरणकारास्तु वाचकत्वमेवेच्छन्ति। न च वाचकत्वपक्षेऽधिकारं जानातीत्यर्थेऽथ जानातीति प्रयोगापत्तिः। तस्याधिक्रियमाणार्थकतायाः स्वसमभिव्याहृतप्रथमान्तपदार्थान्वयबोधं प्रत्येव साकाङ्क्षतायाश्च स्वीकारात्। अत एव शब्दानुशासनस्य प्रारम्भ इत्यर्थे शब्दानुशासनस्याथेति न प्रयोगः॥ द्योतकत्वपक्षे त्वधिक्रियत इत्यस्याध्याहार एव तात्पर्यग्राहकताऽत्राथशब्दस्य न दाहानेकेति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा० कै० सिद्धान्तवादीतुव्याकरणस्यवेदाङ्गत्वात्सामर्थ्याद्विशेषावगतिरितिमत्वाह।लौकिकानामिति।लोकेविदिताइति १ १ १
३ लोकसर्वलोकाट्ठञितिठञ्।अथवाभवार्थेऽध्यात्मादित्वाट्ठञ्।एवंवेदेभवावैदिकाः वैदिकानामपिलौकिकत्वेऽ
पिप्राधान्यख्यापनायपृथगुपादानम्।यथाब्राह्मणाआयातावसिष्ठोप्यायातइतिवसिष्ठस्य।तेषांतुप्राधान्यंयत्ने
नापभ्रंशपरिहारात्।अथवाभाषाशब्दानामेवलौकिकत्वमितिभेदेननिर्देशः।तत्रलोकेपदानुपूर्वीनियमाभावा
त्पदान्येवदर्शयति।गौरश्वइति।वेदेत्वानुपूर्वीनियमाद्वाक्यान्युदाहरति।शन्नइति।अयंगौरयंशुक्लइतिशब्दार्थ
लौकिकानांवैदिकानांच।तत्रलौकिकास्तावत्।गौरश्वःपुरुषोहस्तीशकुनिर्मृगोब्राह्मणइति।वैदिकाःखल्व
पि।शन्नोदेवीरभिष्टये।इषेत्वोर्जेत्वा।अग्निमीळेपुरोहितम्।अग्नआयाहिवीतयइति।अथगौरित्यत्रकःशब्दः॥
योरभेदेनलोकेव्यवहारदर्शनाच्छब्दस्वरूपनिर्धारणायपृच्छति।अथेति।गौरितिविज्ञानेप्रतिभासमानेष्ववस्तुषुकःशब्द
इत्यर्थः॥

शन्नइतीति।अथक्रमेणर्ग्यजुःसामाथर्वणामादीनांप्रदर्शनमकृत्वाऽथर्वयजुर्ऋक्साम्नांशन्नइत्यादिक्रमेणादीनप्रद
र्शयतोभगवतःकआशयः।उच्यते ।त्रेतासाध्यानुश्रविककर्मण्यथर्ववेदस्याभिचारादिप्रधानस्यानुपयोगित्वेनविहार
निर्माणादितदुपकरणसंपादनाङ्गभूतरक्षःपिशाचादिनिराससाधनीभूतानांमन्त्रविशेषाणांकर्मविशेषाणांचतत्रसद्भावेनप्र
थमंतस्योपयोगात्प्रथममुपस्थितिः।ततउपक्रमप्रभृतिप्रधानाध्वर्युकर्ममन्त्रप्रदर्शकस्यभित्तिस्थानीयस्ययजुर्वेदस्य।ततश्चि ३
त्रस्थानीययोर्ऋक्सामयोर्मध्येप्रकृतिभूतदर्शपूर्णमासहौत्रोपयोगिनऋग्वेदस्य।ततःसोमाद्युपयोगिनस्सामवेदस्येत्युपस्थि
तिक्रमानुसारेणोचितंतथाप्रदर्शनमिति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान्येव वस्तूनि क्रमेण दर्शयति। किं यत्तदिति। उद्दिश्यमानप्रतिनिर्दिश्यमानयोरेकत्वमापादयन्ति सर्वनामानि पर्या
येण तल्लिङ्गमुपाददते इति कामचारः। ततः स शब्द इति पुल्लिङ्गेन निर्देशः। नेत्याहेति। भिन्नेन्द्रियग्राह्यत्वान्न द्रव्यं श
ब्द इति प्रतीतमपि तु द्रव्यमिति। यदि हि द्रव्यानुशासनं विवक्षितमभविष्यद् अथ द्रव्यानुशासनमित्येवावक्ष्यत्
। अनेनैव न्यायेन गुणक्रियासामान्यानां निराकृतेऽपि शब्दत्वे प्रपञ्चार्थं तच्चोद्यपूर्वकं निराकरोति। यत्तर्हीति। गो
शब्दार्थे चैषां संभवाच्छब्दत्वमाशङ्क्यते। परिहारस्तु पूर्ववत्। तत्रेङ्गितमभिप्रायस्य सूचकः शरीरव्यापारः। चेष्टितं का
यपरिस्पन्दः। निमिषितमक्षिव्यापारः। शुक्लो नील इति। द्रव्यस्य प्रागुपन्यासाद्गुणमात्राभिधायिनोऽत्र शुक्लादयो द्रष्ट

किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः। नेत्याह। द्रव्यं नाम तत्। यत्तर्हि तदिङ्गि
तं चेष्टितं निमिषितमिति स शब्दः। नेत्याह। क्रिया नाम सा। यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत
इति स शब्दः। नेत्याह। गुणो नाम सः। यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः। नेत्याह।

व्याः। भिन्नेष्वभिन्नमिति। अनेन सामान्यस्यैकत्वं कथ्यते। छिन्नेष्वच्छिन्नमिति। अनेन तु नित्यत्वम्। सामान्यभूतमिति। सत्ताख्यं म
हासामान्यं गोत्वादेः सामान्यस्योपमानं निर्दिष्टम्। सामान्यमिव सामान्यभूतम्। भूतशब्द उपमार्थो। यथा पितृभूत इति॥

वस्तूनीति। अथ गुणक्रिययोः क्व गौरिति विज्ञाने प्रतिभास इति चेद् गुणक्रियासमूहो द्रव्यमिति तस्य भाव इति सूत्रभाष्यसं
मते पक्षे समूहस्य प्रत्येकानतिरिक्तत्वेन समुदायात्मकद्रव्यभानस्य गुणादिभाननान्तरीयकतया तद्भानस्य सिद्धिरिति वि०
। यत्तदिति समुदायोऽयमिदन्त्वार्थे वर्तते। यद्वा तच्छब्दः प्रसिद्धौ। वि०। भिन्नेन्द्रियेति। श्रोत्रेन्द्रियेत्यर्थः। द्रव्यं नाम गुणो नामे
त्यादौ श्रोत्राग्राह्यत्वेन द्रव्यगुणयोर्विशेषणान्मतभेदेन शब्दस्य द्रव्यत्वे गुणत्वे वा नेत्याह द्रव्यं नाम तदित्यादेर्नो सङ्गतिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैयाकरणवर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाच १ १ १
भा० कै० द्रव्यादिषु निरस्तेषु पृच्छति। कस्तर्हीति। उत्तरमाह। येनोच्चारितेनेति। वैयाकरणवर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाच
४ कत्वमिच्छन्ति। वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात्। आनर्थक्ये तु प्रत्येकमुत्पत्तिपक्षे यौगप
द्येनोत्पत्त्यभावात्। अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुदायाभावादेकस्मृत्युपारूढानां वाचकत्वे सरो रस इत्यादा
वर्थप्रतिपत्त्यविशेषप्रसङ्गात्तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापितः। उच्चारितेन। प्र
काशितेनेत्यर्थः। अथवेति। अन्यत्र ध्वनिस्फोटयोर्भेदस्य व्यवस्थापितत्वादिहाभेदेन व्यवहारेऽपि न दोषः। द्रव्यादयो न शब्द
शब्दवाच्या इत्यत्र तात्पर्यात्। ध्वनिं कुर्वन्निति। विधिनिषेधयोरप्रवृत्तविषयत्वात्कथमस्य त्रिभिः संबन्धः। उच्यते। शब्दं

आकृतिर्नाम सा। कस्तर्हि शब्दः। येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स श
ब्दः। अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा शब्दं कुरु मा शब्दं कार्षीः शब्दकार्ययं
माणवक इति। ध्वनिं कुर्वन्नेवमुच्यते। तस्माद्ध्वनिः शब्दः। कानि पुनः शब्दानुशासनस्य प्रयोजनानि॥

कुर्वन्नपि शब्दं कुर्वित्युच्यते विरामाशङ्कायां तन्निवृत्तये। तथानभिमतशब्दश्रवणोद्विजितेनोच्यते मा शब्दं कार्षीरिति। का
निपुनरिति। किं संध्योपासनादिवद्व्याकरणाध्ययनं नित्यं कर्माथ काम्यमिति प्रश्नः॥

आनर्थक्ये तु प्रत्येकमिति। प्रत्येकस्यावाचकत्वमित्यर्थः। इत उत्तरं तथा च समुदायस्य वाचकत्वमुपेयं तदपि न शक्यते व ॥ रामः
क्तुमिति शेषः॥ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पारंपर्येणपुरुषार्थसाधनतामस्याह।रक्षेति।लोकेलोपाद्यदृष्टंवेदेदृष्ट्वाश्मप्यद्वैयाकरणः।वैयाकरणस्तुनभ्रम
ति।वेदार्थंचाध्यवस्यति।तत्रलोपागमयोरुदाहरणम्।देवा अदुह्रेति।दुहेर्लङोझस्यादादेशेकृतेलोपस्तआत्मनेपदे
ष्वितितलोपः।बहुलंछन्दसीतिरुडितिरूपमेतत्।वर्णविकारोयथा।उद्ग्राभंचनिग्राभंचेति।हृग्रहोर्भश्छन्दसिहस्ये
तिवक्तव्यमितिहस्यभकारः।उदिग्रहइत्यत्रउद्ग्राभनिग्राभौचच्छन्दसि स्रुगुद्यमननिपातनयोरितिवचनादुन्निपूर्वाद्ग्र
हेर्घञ्।ऊहःखल्वपीति।ऊहयस्मिन्यागेइतिकर्तव्यतोपदिष्टायागान्तरेणोपजीव्यतेसाप्रकृतिः।येनोपजीव्यतेसाविकृ

रक्षोहागमलघ्वसन्देहाःप्रयोजनम्।रक्षार्थंवेदानामध्येयंव्याकरणम्।लोपागमवर्णविकारज्ञोहिस
म्यग्वेदान्परिपालयिष्यतीति।ऊहःखल्वपि।नसर्वैर्लिङ्गैर्नचसर्वाभिर्विभक्तिभिर्वेदेमन्त्रानिगदिताः।तेचा
वश्यंपुरुषेणयज्ञगतेनयथायथंविपरिणमयितव्याः।तान्नावैयाकरणःशक्नोतियथायथंविपरिणम
यितुम्।तस्मादध्येयंव्याकरणम्।आगमःखल्वपि।ब्राह्मणेननिष्कारणोधर्मःषडङ्गोवेदोध्येयोज्ञेयश्चेति॥

तिः।प्रकृतिवद्विकृतिःकर्तव्येतिमीमांसकैर्व्यवस्थापितेन्यायेप्रकृतिप्रत्ययादीनामूहंवैयाकरणःसम्यग्विजानाति।तत्रा
ग्नेर्मन्त्रोस्ति।अग्नयेत्वाजुष्टंनिर्वपामीति।तत्रसौर्यंचरुंनिर्वपेद्ब्रह्मवर्चसकामइतिसौर्येचरौमन्त्रऊह्यतेसूर्यायत्वाजुष्टंनि
र्वपामीति।विस्तरेणतुभर्तृहरिणाप्रदर्शितऊहः।आगमइति।आगमःप्रयोजकःप्रवर्तकोनित्यकर्मतांव्याकरणाध्ययन
स्यदर्शयति।प्रयोजनशब्देनचफलंप्रयोजकश्चोच्यते।निष्कारणइति।दृष्टंकारणमनपेक्ष्येत्यर्थः॥

प्रयोजकश्चेति।अन्येत्वत्रागमपदंवेदबोधितपरम्।भवतिचवेदबोधितंफलंसंध्योपासनस्येवप्रत्यवायपरिहाररूपंव्याक ॥
रणाध्ययनस्य।तथाचफलमेवप्रयोजनपदेन विवक्षणीयमित्याहुः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ कै॰ प्रधानंचेति। पदपदार्थावगमस्यव्याकरणनिमित्तत्वात्तन्मूलत्वाद्वाक्यवाक्यार्थावसायस्येतिभावः। लघ्वर्थमिति। १११
५ लाघवेनशब्दज्ञानमस्यप्रयोजनम्। ब्राह्मणेनेति। अध्यापनंब्राह्मणस्यवृत्तिः। नचाशब्दज्ञमुपाश्लिष्यन्तिशिष्याइ
ति। असंदेहार्थमिति। सन्देहस्यप्रागभावोऽत्रवेदितव्यः। नतुप्रध्वंसाभावः। नहिवैयाकरणस्यसंशयउत्पद्यविन

प्रधानंचषडङ्गेषुव्याकरणम्। प्रधानेचकृतोयत्नःफलवान्भवति। लघ्वर्थंचाध्येयंव्याकरणम्। ब्राह्मणेनावश्यंशब्दाज्ञेयाइति। नचान्तरेणव्याकरणंलघुनोपायेनशब्दाःशक्याविज्ञातुम्। असन्देहार्थंचाप्यध्येयंव्याकरणम्। याज्ञिकाःपठन्ति। स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेतितस्यांसन्देहः। स्थूलाचासौपृषतीचस्थूलपृषती। स्थूलानिवापृषन्तियस्याःसेयंस्थूलपृषती। तांनावैयाकरणः स्वरतोऽध्यवस्यति। यदिपूर्वपदप्रकृतिस्वरत्वंततोबहुव्रीहिः। अथसमासान्तोदात्तत्वंततस्तत्पुरुषः॥

श्यति। इतरस्यैवतदुत्पादात्। स्वरतइति। पूर्वपदप्रकृतिस्वराद्बहुव्रीह्यर्थावसायइत्यर्थः॥

प्रागभावइति। प्रागभावस्य चाजन्यत्वात्प्रयोज्यत्वरूपं फलत्वमत्रविवक्षितम्। तदपि प्रतियोगिसामग्र्याः सर्वदा वि
घटनेन तस्य परिरक्षणरूपम्। यथोपस्कारमते दुःखप्रागभावस्याविनाशिनो मोक्षत्वं तत्परिरक्षकता च तत्त्वज्ञानस्य। यु रामः
क्तंत्वत्र संदेहात्यन्ताभावस्यैवासंदेहपदार्थत्वम्। संदेहकारणस्याज्ञानस्याभावात्मकज्ञानस्य प्रयोज्यतायाः संदेहाभावे का ५
र्याभावत्वेन सूपपादत्वात्॥

CC-0. In Public Domain. Digitization by eGangotri

मुख्यानिप्रयोजनानिप्रदर्श्यआनुषङ्गिकाणिप्रदर्शयति। इमानिचेति। भूयइति। पुनरित्यर्थः। आनुषङ्गिकत्वा
च्चैषांवर्गद्वयोपादानम्। तेसुराइति। निन्दार्थवादेननम्लेच्छितवाइतिम्लेच्छनंनिषिध्यते। तत्रकेचिदाहुः। हेहे
प्रयोगेहेहयोरिति प्लुतेप्रकृतिभावेचकर्त्तव्येतदकरणंम्लेच्छनमिति। पदद्विर्वचनेकार्येवाक्यद्विर्वचनंलत्वंच

इमानिचभूयः शब्दानुशासनस्यप्रयोजनानि। तेसुराः। दुष्टःशब्दः। यदधीतम्। यस्तुप्रयुङ्क्ते।
अविद्वांसः। विभक्तिंकुर्वन्ति। योवाइमाम्। चत्वारि। उतत्वः। सक्तुमिव। सारस्वतीम्। दशम्यांपुत्र
स्य। सुदेवोऽसिवरुणइति। तेऽसुराः। तेऽसुराहेलयोहेलयइतिकुर्वन्तःपराबभूवुस्तस्माद्ब्राह्मणे
ननम्लेच्छितवैनापभाषितवैम्लेच्छोहवाएषयदपशब्दः। म्लेच्छामाभूमेत्यध्येयंव्याकरणम्।
तेसुराः। दुष्टःशब्दः। दुष्टःशब्दःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह। सवाग्वज्रोयज
मानंहिनस्ति

म्लेच्छनमित्यपरे। नम्लेच्छितवाइत्यस्यपर्यायोनापभाषितवाइति। कृत्यार्थेइतितवैप्रत्ययः। म्लेच्छइति
कर्म्मणिघञ्। दुष्टःशब्दइति। स्वरेणस्वरतः। आद्यादित्वात्तसिः। मिथ्याप्रयुक्तइति। यदर्थप्रतिपादनायप्रयु
क्तस्ततोर्थान्तरंस्वरवर्णदोषात्प्रतिपादयन्नभिमतमर्थंनाहेत्यर्थः। वागेववज्रोहिंसकत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· यथेन्द्रशत्रुशब्दः स्वरदोषाद्यजमानं हिंसितवानित्यर्थः। इन्द्रस्याभिचारो वृत्रेणारब्धः। तत्रेन्द्रशत्रुर्वर्द्धस्वेति मन्त्र
६ ऊहितः। तत्रेन्द्रस्य शमयिता शातयिता भवेति क्रियाशब्दोऽत्र शत्रुशब्द आश्रितो न तु रूढिशब्दः तदाश्रयणे हि बहुव्री
हितत्पुरुषयोरर्थाभेदः। तत्रेन्द्रामित्रत्वे सिद्धे सति इन्द्रस्य शत्रुर्भवेत्यत्रार्थे प्रतिपाद्येऽन्तोदात्ते प्रयोक्तव्ये आद्युदात्तं ऋत्वि
जा प्रयुक्तं इत्यर्थान्तराभिधानादिन्द्र एव वृत्रस्य शातयिता संपन्नः। इन्द्रशत्रुत्वस्य च विधेयत्वात्संबोधनविभक्तेरनुवा
द्यविषयत्वादिहाभावः। यथा राजा भव युध्यस्वेति। ऊह्यमानस्य चामन्त्रत्वाद्यज्ञकर्मणि तिजपादिपर्युदासेन मन्त्राणामे
कश्रुतिर्विधीयमानेह न भवति। अविज्ञातमिति। अविदितस्वरादिसंस्कारत्वादर्थापरिज्ञानाद्वा। निगदेनेति। पाठमात्रेण

यथेन्द्रशत्रुः स्वरतोऽपराधादिति॥ दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्। दुष्टः शब्दः। यद
धीतम्। यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥ तस्माद
नर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्। यदधीतम्। यस्तु प्रयुङ्क्ते। यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दा
न्यथावद्व्यवहारकाले। सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः॥

।न तज्ज्वलतीति। निष्फलं भवति। अनर्थकम्। निष्प्रयोजनम्। यस्तु प्रयुङ्क्ते इति। अनेनाभ्युदयहेतुत्वं व्याकरण
स्य दर्शयति। विशेष इति। स एव शब्दः क्वचिदर्थे केनचिन्निमित्तेन प्रयुक्तः साधुः। अन्यथा त्वसाधुः। यथाश्वेऽश्वशब्दो
धनाभावनिमित्तकः साधुः जातिनिमित्तकोऽसाधुः। गवि च गोणीशब्दः साधर्म्यात्प्रयुक्तः साधुः। जातिप्रयुक्तस्त्वसाधुः॥

वृत्रेणेति। अत्र विवरणकारेण वृत्रेणेति फलेहेतौ तृतीयेति व्याख्यातं तस्यायं भावः। तैत्तिरीये विश्वरूपवधात्कुपितेन त्वष्ट्राऽऽरब्धे राम:
वीन्द्रे सोमेऽनुपहूते नैवेन्द्रेण पीतस्य सोमस्यावशेषं क्रुद्धस्त्वष्टाऽऽहवनीयमुपप्रावर्तयत्स्वाहेन्द्रशत्रुर्वर्धस्वेति ततो वृत्र उदभूदि ६
ति श्रूयते ततश्चाभिचारकर्तृत्वं त्वष्टुरेव प्रतीयते न वृत्रस्येति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कइति। वाग्योगविदः श्रुतत्वाद्दोषदर्शनाच्च प्रश्नः। प्रष्टेव परमतमाशङ्क्याह। वाग्योगविदेवेति। एवमपशब्दज्ञानेपीति। यथा श्लेष्मिकद्रव्यसेवया श्लेष्मिको व्याधिर्भवति। तद्विपरीतसेवया त्वारोग्यं तथात्रापि यथोक्तं न्याय्यमिति भावः। भूयांसोल्पीयांस इति। परमतापेक्षया प्रकर्षप्रत्ययः। यद्विमन्यसे बहवः शब्दा अल्पे अपशब्दा अङ्गभूयस्त्वाच्च फलभूयस्त्वमिति। तन्न। यस्माद्भूयांसोऽपशब्दाः। अल्पीयांसः शब्दाः। अज्ञानमिति। यथा च तिरश्चां ब्रह्महत्यादि फल

कः। वाग्योगविदेव। कुत एतत्। यो हि शब्दाञ्जानाति अपशब्दानप्यसौ जानाति। यथैव हि शब्दज्ञाने धर्मः। एवमपशब्दज्ञानेप्यधर्मः। अथवा भूयानधर्मः प्राप्नोति। भूयांसोऽपशब्दाः अल्पीयांसः शब्दाः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा। गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः। अथ योऽवाग्योगवित्। अज्ञानं तस्य शरणम्। विषम उपन्यासः। नात्यन्तायाज्ञानं शरणं भवितुमर्हति। यो ह्यजानन्वै ब्राह्मणं हन्यात्सुरां वा पिबेत्सोपि मन्ये पतितः स्यात्। एवं तर्हि सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः। कः। अवाग्योगविदेव। अथ यो वाग्योगविद्विज्ञानं तस्य शरणम्। क्व पुनरिदं पठितम्। भ्राजा नाम श्लोकाः॥

भावः। नात्यन्तायेति। पुरुषाणां विधिनिषेधयोरधिकारात्तत्परिज्ञाने प्रयत्नस्यान्याय्यत्वात्तत्करणात्सामर्थ्ये बलीयइत्याह। अवाग्योगविदिति। वाग्योगविच्च भयज्ञोपि शब्दान्प्रयुङ्क्ते नापशब्दानिति ज्ञानपूर्वकप्रयोगादभ्युदयभाग्भवति। श्लोकस्याप्रसिद्धत्वात्पृच्छति। क्वपुनरिति। प्रातिपदिकार्थप्रश्न एवात्र तात्पर्यं किं तदस्ति यत्रेदं पठितमित्यर्थः। अतएव श्लोका इति प्रथमान्तेनोत्तरम्। अन्यथा श्लोकेष्विति वक्तव्यं स्यात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ के ७ आंप्रोक्तत्वापरिज्ञानादाह। किंचभो इति। यदुदुम्बरेति। अयंश्लोकः सौत्रामणीयागेसुरापानस्यदुष्टत्वमुद्भावयति। प्रमत्त १११
गीत इति। प्रमादेनविप्रतिपन्नत्वेनगीतइत्यर्थः। कात्यायनोपनिबद्धभ्राजाख्यश्लोकमध्यपठितस्य त्वस्य श्रुतिरनु
ग्राहिकास्ति। एकः शब्दः सम्यग्ज्ञातः सुष्ठुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति। स्त्रीष्विवेति। प्रत्यभिवादेहिगुरुणा
प्लुतः कार्यः। यस्तुप्लुतंकर्तुंनजानातिसस्त्रीवद्वक्तव्योयमहमितिनत्वभिवादयेदेवदत्तोहमित्यादिनासंस्कृतवाक्येनेत्य

किंचभोः श्लोकाअपिप्रमाणम्। किंचातः। यदिश्लोकाअपिप्रमाणम्। अयमपिप्रमाणंभवितुमर्हति। यदुदु
म्बरवर्णानांघटीनांमण्डलंमहत्। पीतंनगमयेत्स्वर्गंकिंतत्क्रतुगतंनयेदिति। प्रमत्तगीतएषतत्र
भवतोयस्त्वप्रमत्तगीतस्तत्प्रमाणम्। यस्तुप्रयुङ्क्ते। अविद्वांसः। अविद्वांसः प्रत्यभिवादेनाम्नोयेनप्लुतिं
विदुः। कामंतेषुतुविप्रोष्यस्त्रीष्विवायमहंवदेत्। अभिवादेस्त्रीवन्माभूमेत्यध्येयंव्याकरणम्। अविद्वां
सः। विभक्तिंकुर्वन्ति। याज्ञिकाः पठन्ति। प्रयाजाः सविभक्तिकाः कार्या इति। नचान्तरेणव्याकरणंप्रया
जाः सविभक्तिकाः शक्याः कर्तुम्। विभक्तिंकुर्वन्ति। योवाइमाम्। योवाइमांपदशः स्वरशोऽक्षरशोवा
चंविदधातिस आर्त्विजीनोभवति। आर्त्विजीनाः स्यामेत्यध्येयंव्याकरणम्। योवाइमाम्॥

र्थः। प्रयाजा इति। प्रयाजादिमन्त्रा ऊह्यमाना अग्निशब्दप्रकृतिकविभक्तियुक्ता इत्यर्थः। यथासमिधोऽग्न आज्यस्यव्यन्तु
अग्नेऽग्न इति। पदश इति। पदंपदमितिसंख्यैकवचनाच्चवीप्सायामितिशस्। स्वरश इति। स्वर उदात्तादिः। अक्षरश इति। राम॰
अक्षरंव्यञ्जनसहितोऽच्। आर्त्विजीन इति। ऋत्विजमर्हत्यार्त्विजीनोयजमानः। ऋत्विक्कर्मार्हतीतियाजकोवार्त्विजीनः। ७
ऋत्विग्भ्यांघखञाविति सूत्रेणयज्ञर्त्विग्भ्यांतत्कर्मार्हतीतिचोपसंख्यानमितिवार्त्तिकेनचखञ्। विद्वान्यजेतविद्वान्या
जयेदितिद्वयोरपिविदुषोरधिकारात्॥

CC-0. In Public Domain. Digitization by eGangotri

चत्वारीतिशब्दस्यवृषत्वेननिरूपणम्। त्रयःकालाइति। लडादिविषयाः। नित्यःकार्यश्चेति। व्यङ्ग्यव्यञ्जकभेदेन। सप्तविभक्तयइति। सुपइत्यर्थः। केचित्तुतिङामपरिग्रहप्रसङ्गात्सहशेषेणसप्रकारकाणिविभक्तिशब्दाभिधेयानीतिव्याचक्षते। वर्षणादिति। कामानांज्ञानपूर्वकानुष्ठानफलत्वात्। महतेति। परेणब्रह्मणेत्यर्थः। चत्वारीत्यनेनैकदेशे

चत्वारि। चत्वारिशृङ्गात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य। त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ
आविवेशेति। चत्वारिशृङ्गाणिचत्वारिपदजातानिनामाख्यातोपसर्गनिपाताश्च। त्रयोअस्यपादाः।
त्रयःकालाःभूतभविष्यद्वर्तमानाः। द्वेशीर्षे। द्वौशब्दात्मानौ। नित्यःकार्यश्च। सप्तहस्तासोअस्य। सप्तवि
भक्तयः। त्रिधाबद्धः। त्रिषुस्थानेषुबद्धः। उरसिकण्ठेशिरसीति। वृषभोवर्षणात्। रोरवीतिशब्दंकरोति।
कुतएतत्। रौतिःशब्दकर्मा। महोदेवोमर्त्याँआविवेशेति। महान्देवःशब्दोमर्त्यामरणधर्माणोमनु
ष्याः। तानाविवेश। महतादेवेननःसाम्यंयथास्यादित्यध्येयंव्याकरणम्। अपरआह। चत्वारिवा
क्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः। गुहात्रीणिनिहितानेङ्गयन्तितुरीयंवाचोम
नुष्यावदन्ति। चत्वारिवाक्परिमितापदानि। चत्वारिपदजातानिनामाख्यातोपसर्गनिपाताश्च। ता
निविदुर्ब्राह्मणायेमनीषिणः। मनसईषिणोमनीषिणः॥

नवाक्यान्तरमपिसूच्यतइत्याह। अपरआहेति। परिमितानीतिप्राप्तेशेश्छन्दसिबहुलमितिशेर्लोपेपरिमितेतिभवति। परिमितानिपरिच्छिन्नान्येतावन्त्येवेत्यर्थः। मनीषिशब्दःपृषोदरादित्वात्साधुः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

कथंमनीषिणएवविदन्तीत्याह। गुहेति। अज्ञानमेवगुहातस्यामित्यर्थः। सुपांसुलुगितिसप्तम्यालुक्। व्याकरणप्रदीपेनतुतानिप्रकाशन्ते। तत्रचतुर्णांपदजातानामेकैकस्यचतुर्थभागंमनुष्याअवैयाकरणावदन्ति। नेङ्गयन्तीत्यस्यैवव्याख्यानंनचेष्टन्तेननिमिषन्तीति। उतत्वइति। त्वशब्दोऽन्यवाची। उतशब्दोपिशब्दस्यार्थेसचभिन्नक्रमः। प्रत्यक्षे

गुहात्रीणिनिहितानेङ्गयन्ति। गुहायांत्रीणिनिहितानिनेङ्गयन्ति। नचेष्टन्तेननिमिषन्तीत्यर्थः। तुरीयंवाचोमनुष्यावदन्ति। तुरीयंवा एतद्वाचोयन्मनुष्येषुवर्ततेचतुर्थमित्यर्थः। चत्वारि। उतत्वः। उतत्वःपश्यन्नददर्शवाचमुतत्वःशृण्वन्नशृणोत्येनाम्। उतोत्वस्मैतन्वंविसस्रेजायेवपत्यउशतीसुवासाः। अपित्वल्वेकःपश्यन्नपिनपश्यति। अपित्वल्वेकः शृण्वन्नपिनशृणोति एनामिति। अविद्वांसमाहार्द्धम्। उतोत्वस्मैतन्वंविसस्रे। तनुंविवृणुते। जायेवपत्यउशतीसुवासाः। तद्यथा। जायापत्येकामयमानासुवासाःस्वमात्मानंविवृणुते। एवंवाक् वाग्विदेस्वात्मानंविवृणुते। वाङ्मेविवृणुयादात्मानमित्यध्येयंव्याकरणम्। उतत्वः। सक्तुमिव। सक्तुमिवतितउनापुनन्तोयत्रधीरामनसावाचमक्रत। अत्रासखायःसख्यानिजानतेभद्रैषांलक्ष्मीर्निहिताऽधिवाचि। सक्तुःसचतेर्दुर्धावोभवतिकसतेर्वाविपरीताद्विकसितोभवति॥

णशब्दस्वरूपमुपलभमानोऽप्यर्थापरिज्ञानान्नपश्यतीत्यर्थः। उतोइति। उतउइतिनिपातसमाहारः। अविद्वांसमाहार्द्धमिति। अविद्वल्लक्षणमर्थमर्द्धर्चआहेत्यर्थः। सचतेरिति। षचसेचनइत्यस्य। दुर्धावइति। दुःशोधः। यथातितउनासक्तोस्तुषाद्यपनीयतेतथाव्याकरणेनवाचोपशब्दाइत्यर्थः। कसतेरिति। पृषोदरादित्वाद्वर्णव्यत्ययः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ततवदिति। विस्तारयुक्तमित्यर्थः। तुन्नवदिति। बहुच्छिद्रम्। धीरा इति। वैयाकरणाः। वाचमक्रतेति। अपशब्देभ्यो वि
विक्तां कृतवन्तः। मन्त्रे घसेति लेर्लुकि सत्यक्रतेति रूपम्। अत्रा सखाय इति। ऋचि तुनुघेति दीर्घः। सखायः समानख्यात
योभेदग्रहस्य निवृत्तत्वात्सर्वमेकमिति मन्यन्ते। सख्यानीति। सायुज्यानीत्यर्थः। एकगम्य इति। ज्ञानेनैव प्राप्यः। वाची
ति। वेदाख्ये ब्रह्मणि या लक्ष्मीर्वेदान्तेषु परमार्थसंविद्वक्षणा सैषां निहितेत्यर्थः। प्रायश्चित्तीयामिति। भवार्थे वृद्ध

तितउ परिपवनं भवति। ततवद्वा तुन्नवद्वा। धीरा ध्यानवन्तो मनसा प्रज्ञानेन वाचमक्रत अकृष
त। अत्रा सखायः सख्यानि जानते। अत्र सखायः सन्तः सख्यानि जानते। क। एष दुर्गो मार्गः। एकगम्यो
वाग्विषयः। के पुनस्ते। वैयाकरणाः। कुत एतत्। भद्रैषां लक्ष्मीर्निहिताधि वाचि। एषां वाचि भद्रा ल
क्ष्मीर्निहिता भवति। लक्ष्मीर्लक्षणाद्भासनात्परिवृढा भवति। सक्तुमिव। सारस्वतीम्। याज्ञिकाः पठ
न्ति। आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति। प्रायश्चित्तीया मा भूमेत्य
ध्येयं व्याकरणम्। सारस्वतीम्। दशम्यां पुत्रस्य। याज्ञिकाः पठन्ति। दशम्युत्तरकालं पुत्रस्य जातस्य
नाम विदध्यात्॥

च्छः। प्रायश्चित्तीया इति। प्रायश्चित्ताय पापशोधनाय श्रुतिस्मृतिविहिताय कर्मणे हिता तन्निमित्तोत्पादनाः मा भू
मेत्यर्थः। दशम्युत्तरकालमिति। दशम्या उत्तर इति पञ्चमीति योगविभागात्समासः। ततः कालशब्देन बहुव्रीहिः। क्रिया
विशेषणं चैतत्। दशादिनान्याशौचं भवतीति दशम्युत्तरकालमित्युक्तम्। यदपि गृह्यकाराः पठन्ति दशम्यां पुत्रस्ये ॥
ति। तदपि दशम्यामिति सामीपिकमधिकरणं व्याख्येयम्॥

घोषवदादीति। घोषवन्तो ये वर्णाः शिक्षायां प्रदर्शिताः तदादि। अन्तरन्तस्थामिति। मध्ये यरलवा यस्य तदित्यर्थः। त्रिपुरुषानूकमिति। नामकरणे योधिकारी पिता तस्य ये त्रयः पुरुषास्ताननुकायत्यभिधत्त इति त्रिपुरुषानूकम्। अन्येषामपि दृश्यते इति दीर्घः। सुदेवो असीति। वरुणस्येयं स्तुतिः। यतो हेतोर्व्याकरणज्ञानाद्वरुणस्त्वं सत्यदेवोसि ततो हेतोरन्येऽपि सत्यदेवा भवन्तीत्यर्थः। सिन्धव इति। नद्य इव विभक्तय इत्यर्थः। अनुक्षरन्तीति। तास्त्वनु प्राप्य प्रका

घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा नामकृतं कुर्यान्न तद्धितमिति। न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्। दशम्यां पुत्रस्य। सुदेवो असि। सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव। सुदेवो असि वरुण सत्यदेवोसि यस्य ते सप्त सिन्धवः सप्त विभक्तयः। अनुक्षरन्ति। काकुदं तालु। काकुर्जिह्वा सास्मिन्नुद्यते इति काकुदम्। सूर्म्यं सुषिरामिव। तद्यथा। शोभनां सूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति। एवं ते सप्त सिन्धवः सप्त विभक्तयस्तात्वनुक्षरन्ति तेनासि सत्यदेवः। सत्यदेवः स्यामित्यध्येयं व्याकरणम्। सुदेवो असि। किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः

शस्त इत्यर्थः। सास्मिन्नुद्यत इति। अनेकार्थत्वाद्धातूनामुत्क्षिप्यत इत्यर्थः। सूर्म्यमिति। सूर्मीमिति प्राप्ते अमि पूर्व इत्यत्र वा छन्दसीत्यनुवृत्त्या यणादेशः। किं पुनरिति। ननु कानि पुनरस्येति येन पृष्टं स एव कथं पृच्छति किं पुनरिति। एवं तर्हि भाष्यकारः प्रयोजनान्वाख्यानस्य विषयविभागं दर्शयति। पुरा वेदाध्ययनात्पूर्वं व्याकरणमधीयते ते बाल्यात्प्रष्टुमसमर्था इति न प्रयोजनमन्वाख्येयम्। अद्यत्वे तु स्वल्पायुष्ट्वात्पूर्वं वेदं प्रधानमधीयते ततः प्रष्टुं समर्थत्वाद्व्याकरणाध्ययनस्य प्रयोजनं पृच्छन्तीत्यवश्यान्वाख्येयं प्रयोजनम्॥

॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपुनरन्यदितिवेदमप्यधिजिगांसमानेभ्यइत्यर्थः। ॐमित्युक्त्वेति। अभ्युपगम्येत्यर्थः। वृत्तान्तशइति। वृत्तान्तः प्रपाठकउच्यते। वृत्तान्तंवृत्तान्तंपठन्तीत्यर्थः। अद्यत्वइति। अद्यत्वेशब्दोनिपातोस्मिन्कालइत्यस्यार्थेवर्तते। त्वरितादृति। विवाहादौ। उभयोपदेशइति। हेयोपादेयोपदेशेस्पष्टाप्रतिपत्तिर्भवतीत्युभयोपदेशउद्भावितः। यद्यपिप्रतिपत्तिःस्पष्टागौरवंतुभवतीत्याह।

प्रयोजनमन्वाख्यायते नपुनरन्यदपिकिंचित्। ॐमित्युक्त्वावृत्तान्तशः शमित्येवमादीन्शब्दान्पठन्ति। पुराकल्पएतदासीत्। संस्कारोत्तरकालंब्राह्मणाव्याकरणंस्माधीयते। तेभ्यस्तत्तत्स्थानकरणनादानुप्रदानज्ञेभ्योवैदिकाः शब्दाउपदिश्यन्ते। तदद्यत्वेनतथा। वेदमधीत्यत्वरितावक्तारोभवन्ति। वेदान्नोवैदिकाःशब्दाः सिद्धालोकाच्चलौकिकाः। अनर्थकंव्याकरणमिति। तेभ्यएवंविप्रतिपन्नबुद्धिभ्योध्येतृभ्यः सुहृद्भूत्वा आचार्यइदं शास्त्रमन्वाचष्टे। इमानिप्रयोजनान्यध्येयं व्याकरणमिति। उक्तः शब्दः स्वरूपमप्युक्तम्। प्रयोजनान्यप्युक्तानि। शब्दानुशासनमिदानींकर्तव्यम्। तत्कथंकर्तव्यम्। किंशब्दोपदेशः कर्तव्य आहोस्विदपशब्दोपदेशआहोस्विदुभयोपदेश इति। अन्यतरोपदेशेनकृतंस्यात्। तद्यथा। भक्ष्यनियमेनाभक्ष्यप्रतिषेधोगम्यते॥

अन्यतरेति। शब्दापशब्दयोरित्यर्थः। अन्यतरान्यतमशब्दावव्युत्पन्नौस्वभावाद्द्विबहुविषयेनिर्द्धारणेवर्तेते॥

। अभ्युपगम्येत्यर्थइति। वस्तुतस्तु ओमिति ब्राह्मणः प्रवक्ष्यन्नाहेति श्रौतोपनिषदावेदपाठारम्भे प्रणवोच्चारणस्य विधानात्तदनुसारेणेदमोमित्युक्त्वेति भाष्यमितिबोध्यम्॥

भा०कै० पञ्चेति।अर्थित्वाद्भक्षणंप्राप्तंपञ्चसुपञ्चनखेषुनियम्यमानंसामर्थ्यादन्येभ्योनिवर्तते।नत्वयंविधिः।अप्राप्तेरभावा १११

१० त्।किंपुनरिति।उभयोपदेशाद्गुरोर्द्वावपिप्रश्नस्योतयोःकोन्याय्यानित्यर्थः।इष्टेति।साधुशब्दप्रयोगाद्धर्मावाप्तेरि

पञ्चपञ्चनखाभक्ष्याइत्युक्तेगम्यतेएतदतोन्येऽभक्ष्याइति।अभक्ष्यप्रतिषेधेनवाभक्ष्यनियमः।
तद्यथा।अभक्ष्योग्राम्यकुक्कुटः।अभक्ष्योग्राम्यसूकरइत्युक्तेगम्यतएतदारण्योभक्ष्यइति।ए
वमिहापि।यदितावत्शब्दोपदेशःक्रियतेगौरित्येतस्मिन्नुपदिष्टेगम्यतएतद्गाव्यादयोपश
ब्दाइति।अथाप्यपशब्दोपदेशःक्रियतेगाव्यादिषूपदिष्टेषुगम्यतएतद्गौरित्येषशब्दइति।
किंपुनरत्रज्यायः।लघुत्वाच्छब्दोपदेशः।लघीयाञ्छब्दोपदेशः।गरीयानपशब्दोपदेशः।एकै
कस्यशब्दस्यबहवोपभ्रंशाः।तद्यथा।गौरित्यस्यगावीगोणीगोतागोपोतलिकेत्येवमादयोपभ्रं
शाः।इष्टान्वाख्यानंखल्वपिभवति।अथैतस्मिन्शब्दोपदेशेसतिकिंशब्दानांप्रतिपत्तौप्रति
पदपाठःकर्तव्यः।गौरश्वःपुरुषोहस्तीशकुनिर्मृगोब्राह्मणइत्येवमादयःशब्दाःपठितव्याः।
नेत्याह।अनभ्युपायएषशब्दानांप्रतिपत्तौप्रतिपदपाठः।एवंहिश्रूयते।बृहस्पतिरिन्द्रा
यदिव्यंवर्षसहस्रंप्रतिपदोक्तानां राम:

त्यर्थः।अथवाउपादेयोपदेशात्साक्षात्प्रतिपत्तिर्भवतीतिभावः।बृहस्पतिरिन्द्रायेति।प्रतिपदपाठस्याशक्य १०
त्वंप्रतिपादयितुमयमर्थवादः॥ ॥

शब्दानामिति। शब्दपारायणशब्दोयोगरूढःशास्त्रविशेषस्य। तत्रप्रतिपदोक्तानामितिविशेषणाभिधाना
यगम्यमानार्थस्यापिशब्दानामित्यस्यप्रयोगः। एकदेशोपयोगादपिलोकेउपयुक्तमित्युच्यते। यथौषधसंस्कृत
घृतमात्रैकदेशोपयोगेउपयुक्तंघृतमितिव्यवहारः। नथेहनेतिप्रतिपादयति। चतुर्भिरिति। आगमकालोग्रह

शब्दानांशब्दपारायणंप्रोवाचनान्तंजगाम। बृहस्पतिश्चप्रवक्ताइन्द्रश्चाध्येतादिव्यंवर्षसह
स्रमध्ययनकालः नचान्तंजगाम। किंपुनरद्यत्वेयःसर्वथाचिरंजीवतिसवर्षशतंजीवति।
चतुर्भिश्चप्रकारैर्विद्योपयुक्ताभवति। आगमकालेनस्वाध्यायकालेनप्रवचनकालेनव्यव
हारकालेनेति। तत्रचास्यागमकालेनैवायुःकृत्स्नंपर्युपयुक्तंस्यात्। तस्मादनभ्युपायःशब्दानां
प्रतिपत्तौप्रतिपदपाठः। कथंतर्हीमेशब्दाःप्रतिपत्तव्याः। किंचित्सामान्यविशेषवल्लक्षणंप्र
वर्त्यंयेनाल्पेनयत्नेनमहतोमहतःशब्दौघान्प्रतिपद्येरन्। किंपुनस्तत्। उत्सर्गापवादौ। कश्चि
दुत्सर्गःकर्तव्यः। कश्चिदपवादः। कथंजातीयकःपुनरुत्सर्गःकर्तव्यः। कथंजातीयकोपवा
दः। सामान्येनोत्सर्गःकर्तव्यःविशेषतोपवादः। तद्यथा। कर्मण्यण्। तस्यविशेषेणापवादः।
तद्यथा। आतोनुपसर्गेकः॥

णकालः। स्वाध्यायकालोऽभ्यासकालः। प्रवचनकालोऽध्यापनकालः। व्यवहारोयज्ञकर्मणि। किंचिदिति।
सामान्यविशेषोयस्मिंस्तत्सामान्यविशेषवत्। कर्मण्यण्आतोनुपसर्गेकइत्यादि॥

भा॰ कै॰ सकलशास्त्रव्यवस्थैकतरपक्षाश्रयणेनसिध्यतीतिपक्षद्वयाश्रयणंप्रश्नपूर्वकंकरोति।किंपुनरिति।आकृति १११
११ पक्षेकेवलेआश्रीयमाणेसकृद्गतौविप्रतिषेधइत्यादिनोपपद्यते।केवलेपिव्यक्तिपक्षेपुनःप्रसङ्गविज्ञानादि
तिनघटते।तस्मात्सर्वस्यसिद्धयेक्वचित्प्रदेशेकश्चित्पक्षःपरिगृह्यते।अत्रजातिवादिनआहुः।जातिरेवशब्देनप्र
तिपाद्यतेव्यक्तीनामानन्त्यात्संबन्धग्रहणासंभवात्।साचजातिःसर्वव्यक्तिष्वेकाकारप्रत्ययदर्शनादस्तीत्यव
सीयते।तत्रगवादयःशब्दाभिन्नद्रव्यसमवेतांजातिमभिदधति।तस्यांप्रतीतायांतदावेशात्तदवच्छिन्नंद्रव्यं
प्रतीयते।शुक्लादयःशब्दागुणसमवेतांजातिमाचक्षते।गुणेतुतत्संबन्धात्प्रत्ययः।द्रव्येसंबन्धिसम्बन्धात्।

किंपुनराकृतिःपदार्थआहोस्विद्द्रव्यम्।उभयमित्याह।कथंज्ञायते।उभयथाह्याचार्येणसूत्रा
णिपठितानि।आकृतिंपदार्थंमत्वाजात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामित्युच्यते।
द्रव्यंपदार्थंमत्वासरूपाणामित्येकशेषआरभ्यते॥

।संज्ञाशब्दानामप्युत्पत्तिप्रभृत्याविनाशात्पिण्डस्यकौमारयौवनाद्यवस्थाभेदेपिसएवायमित्यभिन्नप्रत्ययनि
मित्ताडित्थत्वादिकाजातिर्वाच्या।क्रियास्वपिजातिर्विद्यतेसैवधातुवाच्या।पठतिपठतःपठन्तीत्यादेरभिन्नस्यप्रत्यय
स्यसद्भावात्तन्निमित्तजात्यभ्युपगमः।व्यक्तिवादिनस्त्वाहुः।शब्दस्यव्यक्तिरेववाच्या।जातेस्तूपलक्षणभावेनाश्रयणादान
न्त्यादिदोषानवकाशः॥

उपलक्षणभावेनेति।व्यक्तिशाब्दबोधस्यसधर्मितावच्छेदककत्वनिर्वाहायासाधारणधर्माणांतत्प्रकारतयाभानस्यावश्यकतया रामः
ऽपूर्वव्यक्तिभानोपपत्तयेशक्तिज्ञानेशक्यतावच्छेदकानांतेषामनुगतेनकेनचिद्रूपेणप्रवेशस्यावश्यवक्तव्यतयागोपदादि ११
शक्यतावच्छेदकानांसामानाधिकरण्येनगोत्वादेरशक्यस्यैवानुगमकत्वेनाश्रयणमितिभावः॥ ॥

किंपुनरिति। विप्रतिपत्त्या संशयः। केचिद्ध्वनिव्यङ्ग्यं वर्णात्मकं नित्यं शब्दमाहुः। अन्ये वर्णव्यतिरिक्तं पदस्फोटमिच्छन्ति। वाक्यस्फोटमपरे संगिरन्ते। अन्ये तु ध्वनिरेव शब्दः स च कार्यस्तद्व्यतिरेकेणान्यस्यानुपलम्भादित्याचक्षते। संग्रह इति। ग्रन्थविशेषे। कथं पुनरिति। किमाचार्य एव स्रष्टा शब्दार्थसंबन्धानामथ स्मर्तेति प्रश्नः। सिद्ध इति। तत्र नित्यः शब्दो जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा। कार्यशब्दिकानामपि मते प्रवाहनित्यतया। अर्थस्यापि जातिलक्षणस्य नित्यत्वम्। द्रव्यपक्षेपि सर्वशब्दानामसत्योपाध्यवच्छिन्नं ब्रह्म वाच्यमिति नित्यता प्रवाहनित्यतया वा। संबन्धस्यापि व्यवहारपरंपरया अनादित्वान्नित्यता। सिद्धशब्दस्य नित्यानित्ययोर्दर्शनात्पृच्छति। अथेति। नित्ये

किं पुनर्नित्यः शब्द आहोस्वित्कार्यः। संग्रह एतत्प्राधान्येन परीक्षितं नित्यो वा स्यात्कार्यो वेति। तत्रोक्ता दोषाः प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः। यद्येव नित्यः। अथापि कार्यः। उभयथापि लक्षणं प्रवर्त्यमिति। कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्। सिद्धे शब्दार्थसंबन्धे। सिद्धे शब्देऽर्थे संबन्धे चेति। अथ सिद्धशब्दस्य कः पदार्थः। नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते। यत्कूटस्थेष्वविचालिषु भावेषु वर्तते। तद्यथा। सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमिति ॥

ति। नित्यलक्षणस्यार्थस्य पर्यायेण वाचकत्वमेवार्थं कदाचिन्नित्यशब्द आह कदाचित्सिद्धशब्द इत्यर्थः। कूटस्थेष्विति। अविनाशिषु। अविचालिष्विति। देशान्तरप्राप्तिरहितेषु ॥

ग्रन्थविशेष इति। संग्रहो व्याडिकृतो लक्षश्लोकसंख्यो ग्रन्थ इति प्रसिद्धिः। वि० ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· ननुचेति। सिद्धशब्दात्क्रियानिष्पन्नोप्यर्थोवगम्यतइत्यर्थः। संग्रहेतावदिति। तत्रहिकिंकार्यःशब्दोऽथसिद्धइ १११
१२ तिपक्षद्वयविचारःकृतः। तत्रकार्यप्रतिपक्षार्थाभिधायीसामर्थ्यात्सिद्धशब्दइतिस्थितम्। तत्समानतन्त्रत्वादिहा
पितथैवयुक्तमित्यर्थः। अथवेति। एवशब्दप्रयोगेहिपदमवधारणम्। द्योतकत्वेनएवशब्दस्यापेक्षणात्। यदातुद्यो
तकमन्तरेणसामर्थ्यादवधारणंगम्यतेतदातदेकपदमित्युच्यते। तत्रसर्वएवापोभक्षयन्तीत्यब्भक्षश्रुतिःसामर्थ्या
न्नियममवगमयत्यपएवभक्षयतीति। इहापिनित्यानित्यव्यतिरेकेणराश्यन्तराभावात्सिद्धशब्दोपादानान्नियमोव

ननुचभोःकार्येष्वपिवर्तते। तद्यथा। सिद्धओदनःसिद्धःसूपःसिद्धायवागूरिति। यावताकार्येष्व
पिवर्तते। तत्रकुतएतन्नित्यपर्यायवाचिनोग्रहणम्। नपुनःकार्येयःसिद्धशब्दइति। संग्रहेताव
त्कार्यप्रतिद्वन्द्विभावान्मन्यामहेनित्यपर्यायवाचिनोग्रहणमिति। इहापितदेव। अथवासन्त्येक
पदान्यप्यवधारणानि। तद्यथा। अब्भक्षोवायुभक्षइति। अपएवभक्षयति वायुमेवभक्षयतीति
गम्यते। एवमिहापिसिद्धएवनसाध्यइति। अथवापूर्वपदलोपोत्रद्रष्टव्यः॥

गम्यते। सिद्धएवेति। कार्याणांतुपदार्थानांप्रागभावप्रध्वंसाभावयोरपिसत्त्वात् सिद्धतानास्तीतिनतेऽपिसिद्धाए
व। अथवेति। कथंपुनर्देवदत्तशब्देसंज्ञात्वेनविनियुक्तेएकदेशःप्रयुज्यते। नह्यसौसंज्ञात्वेनविनियुक्तः। नचै
कदेशात्स्मर्यमाणस्यसमुदायस्यवाचकत्वमुपपद्यते। प्रतीयमानस्यप्रत्यायकत्वासंभवादुच्चार्यमाणस्यैव राम:
वाचकत्वात्। एवंतर्हिवृनिष्पादिन्योऽवयवसरूपाःसंज्ञाविनियोगकालेविनियुक्ताएव। लोपस्तुवर्णानांसा १२
धुत्वंमाभूदित्यन्वाख्यायते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहापि नित्यानित्ययोर्निष्पन्नत्वाविशेषात्सिद्धश्रुतिरूपात्तां प्रकर्षं गमयति। अत्यन्तसिद्ध इति। न्यायाद्धि नित्यत्वं शब्दादी नां स्थितमित्याह। अथवेति। न हि संदेहमात्रादलक्षणता भवति पुनः प्रमाणान्तरेण निश्चयोत्पादात्। वर्ण्येनेति। प्रयत्नव्या ख्यातव्येनेत्यर्थः। माङ्गलिक इति। अगर्हिताभीष्टार्थसिद्धिर्मङ्गलं तत्प्रयोजन आचार्यो माङ्गलिकः। प्रथन्त इति। अध्ययन स्याविच्छेदात्। वीरपुरुषाणीति। श्रोतॄणां परैरपराजयात्। आयुष्मत्पुरुषाणीति। शास्त्रानुष्ठाने धर्मोपचयादायुर्वे

अत्यन्तसिद्धः सिद्ध इति। तद्यथा। देवदत्तो दत्तः सत्यभामा भामेति। अथवा व्याख्यानतो विशेष प्रतिपत्तिर्न हि संदेहादलक्षणमिति। नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः। किं पुनरने न वर्ण्येन किं न महता कण्ठेन नित्यशब्द एवोपात्तः। यस्मिन्नुपादीयमानेऽसंदेहः स्यात्। मङ्गलार्थम्। माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शा स्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च अध्येतारश्च सिद्धार्था यथा स्युरिति। अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते। किं तर्ह्याभीक्ष्ण्येऽपि वर्तते। तद्य था। नित्यप्रहसितो नित्यप्रजल्पित इति। यावता आभीक्ष्ण्येऽपि वर्तते। तत्राप्यनेनैवार्थः स्यात्। व्या ख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। पश्यति त्वाचार्यो मङ्गलार्थश्चैव सिद्धशब्द श्चादितः प्रयुक्तो भविष्यति शक्ष्यामि चैनं नित्यपर्यायं वर्णयितुमिति। अतः सिद्धशब्द एवोपात्तो न नि त्यशब्दः। अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते सिद्धे शब्देऽर्थे संबन्धे चेति। आकृतिमित्याह। कु त एतत्। आकृतिर्हि नित्या। द्रव्यमनित्यम्॥

र्द्धिनात्। सिद्धार्था इति। अध्ययननिष्पत्तिरेव तेषां सिद्धिः। नावश्यमिति। ततश्चाभीक्ष्ण्येन ये शब्दाः प्रयुज्यन्ते। आगोपालाङ्गनं तेषामेवान्वा ख्यानं स्यान्नतु विरलप्रयोगाणाम्। विनापि च क्रियापदप्रयोगेणाभीक्ष्ण्यवृत्तिर्नित्यशब्दः प्रयुज्यते। यथा आश्चर्यमनित्ये नित्यवीप्सयोरिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अर्थसंबन्धेचेति।द्रव्यपक्षेद्रव्यस्यानित्यत्वादर्थग्रहणंसंबन्धविशेषणार्थमुपात्तम्।अनित्येऽर्थेकथंसंबन्धस्यनित्य
तेतिचेत्।योग्यतालक्षणत्वात्संबन्धस्य।तस्याश्चशब्दाश्रयत्वात्शब्दस्यचनित्यत्वाददोषः।द्रव्यंहिनित्यमिति।अ
सत्योपाध्यवच्छिन्नंब्रह्मतत्त्वंद्रव्यशब्दवाच्यमित्यर्थः।आकृतिरिति।संस्थानम्।ब्रह्मदर्शनेचगोत्वादिजातेरप्यस-

अथद्रव्येपदार्थेकथंविग्रहः कर्तव्यः।सिद्धेशब्दे अर्थसंबन्धेचेति।नित्योह्यर्थवतामर्थैरभिसं
बन्धः।अथवाद्रव्यएवपदार्थेएषविग्रहोन्याय्यः।सिद्धेशब्देअर्थसंबन्धेचेति।द्रव्यंहिनित्यमा
कृतिरनित्या।कथंज्ञायते।एवंहिदृश्यतेलोके।मृत्कयाचिदाकृत्यायुक्तापिण्डोभवति।।पिण्डाकृति
मुपमृद्यघटिकाः क्रियन्ते।घटिकाकृतिमुपमृद्यकुण्डिकाःक्रियन्ते।तथासुवर्णंकयाचिदाकृत्या
युक्तंपिण्डोभवति।पिण्डाकृतिमुपमृद्यरुचकाःक्रियन्ते।रुचकाकृतिमुपमृद्यकटकाःक्रियन्ते।
कटकाकृतिमुपमृद्यस्वस्तिकाःक्रियन्ते।पुनरावृत्तःसुवर्णपिण्डःपुनरपरयाआकृत्यायुक्तःखदि
राङ्गारसदृशेकुण्डलेभवतः।आकृतिरन्याचान्याचभवतिद्रव्यंपुनस्तदेव।आकृत्युपमर्देनद्रव्य
मेवावशिष्यते।आकृतावपिपदार्थेएषविग्रहोन्याय्यः।सिद्धेशब्देअर्थसंबन्धेचेति।ननुचोक्तमा
कृतिरनित्येति।नैतदस्ति।नित्याआकृतिः।कथम्।नक्वचिदुपरतेतिकृत्वा सर्वत्रोपरताभवति।द्रव्यान्त
रस्थात्तूपलभ्यते॥

त्वादनित्यत्वम्।आत्मैवेदंसर्वमितिवचनात्।नक्वचिदुपरतेति।अनभिव्यक्तेत्यर्थः।अद्वैतेनलोकेव्यवहाराभावा-
द्व्यवहारेचाकृतेरेकाकारपरामर्शहेतुत्वान्नित्यत्वम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। असत्यत्वेऽपि तत्त्वतो लोकव्यवहाराश्रयणेन जातेर्नित्यत्वं साध्यते। त्रिविधा चानित्यता। संसर्गानित्यता यथा स्फटिकस्य लाक्षाद्युपधाने स्वरूपतिरोधानेन पररूपभासः। उपधानापगमे स्वरूपप्रतिभासात्परिणामाभावः। परिणामानित्यता यथा बदरीफलस्य श्यामतातिरोभावे लौहित्यस्याविर्भावः। प्रध्वंसानित्यता सर्वात्मना विनाशः। एतत्त्रिविधानित्यताप्रतिक्षेपेण नित्यतां प्रतिपादयितुमुक्तं ध्रुवमित्यादि। तत्र ध्रुवं कूटस्थमिति संसर्गानित्यतापरिहृता। अविचालीति परिणामा-

अथवा नेदमेव नित्यलक्षणम्। ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्यययोगि यत्तन्नित्यमिति। तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते। किं पुनस्तत्त्वम्। तद्भावस्तत्त्वम्। आकृतावपि तत्त्वं न विहन्यते। अथवा किं न एतेनेदं नित्यमिदमनित्यमिति। यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते सिद्धे शब्देऽर्थे संबन्धे चेति। कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः संबन्धश्चेति। लोकतः। यल्लोकेऽर्थमर्थमुपादाय शब्दान्प्रयुञ्जते नैषां निर्वृत्तौ यत्नं कुर्वन्ति। ये पुनः कार्या भावा निर्वृत्तौ तावत्तेषां यत्नः क्रियते। तद्यथा। घटेन कार्यं करिष्यन्कुम्भकारकुलं गत्वाऽऽह कुरु घटं कार्यमनेन करिष्यामीति। न तद्वच्छब्दान्प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाऽऽह कुरु शब्दान्प्रयोक्ष्य इति॥

नित्यता। अनपायेत्यादिना प्रध्वंसानित्यता। यन्नित्यमिति। बुद्धिप्रतिभासः शब्दार्थो यदा यदा शब्द उच्चारितस्तदा तदर्थाकारा बुद्धिरुपजायत इति प्रवाहनित्यत्वादर्थस्य नित्यत्वमित्यर्थः। लोकत इति। अन्यथा कार्येषु वस्तुषु लोकव्यवहारोऽन्यथा नित्येषु। शब्दश्च व्यवहारोऽनादिवृद्धपरंपराव्युत्पत्तिपूर्वक इति शब्दादीनां नित्यत्वम्। घटादयस्त्वर्थक्रियार्थिभिरन्यत आनीयन्ते। उत्पादविनाशयुक्ताश्चोपलभ्यन्ते नैवं शब्दादयः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा०कै० तावत्स्वेवार्थमिति। बुद्ध्या वस्तु निरूप्येत्यर्थः। अत्र भाष्यकारेण संभवन्तीमप्येकवाक्यतामनाश्रित्य वाक्यत्रयं व्यवस्था १११
१५ पितम्। सिद्धे शब्दार्थसंबन्धे शास्त्रं प्रवृत्तमित्येकं वाक्यम्। कथं ज्ञायत इति प्रश्ने लोकतो ज्ञायत इति द्वितीयम्। लो-
कत इत्यस्यावृत्त्या लोकतोर्थप्रयुक्त इत्यादि तृतीयम्। शब्दप्रयोग इति। प्रयोगग्रहणेन प्रयोगाद्धर्मो न तु ज्ञानमात्रा
दित्युक्तं भवति। अर्थेन आत्मप्रत्यायनाय प्रयुक्तोऽर्थप्रयुक्तः। धर्मायनियम इति। चतुर्थ्या तादर्थ्यं प्रतिपाद्यते। संबन्ध
सामान्ये तु षष्ठीं विधाय समासः कर्तव्यः। चतुर्थीसमासस्य प्रकृतिविकारभाव एव विधानात्। धर्मार्थ इति। धर्मार्थत्वान्निय

तावत्स्वेवार्थमुपादाय शब्दान्प्रयुञ्जते। यदि तर्हि लोक एषु शब्देषु प्रमाणं किं शास्त्रेण क्रियते। लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः। लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते। किमिदं धर्मनियम इति। धर्माय नियमो धर्मनियमः। धर्मार्थो वा नियमो धर्मनियमः। धर्मप्रयोजनो वा नियमो धर्मनियमः। यथा लौकिकवैदिकेषु। प्रियतद्धिता दाक्षिणात्याः। यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते॥

मएव धर्मशब्देनाभिधीयत इति कर्मधारयः समासः। धर्मप्रयोजन इति। लिङादिविषयेपनियोगाख्येन धर्मेण प्र
युक्त इत्यर्थः। प्रियतद्धिता इति। नायमपशब्दः किंतु ये लोकवेदयोर्भवा अवयवास्ते लोकवेदशब्दाभ्यामभिधातुं रामः
शक्यन्ते। आधाराधेयभावकल्पनया तु तद्धितप्रयोगः प्रियतद्धितत्वनिमित्तः। यथा कश्चिद्वनस्पतय इति प्रयुं १४
क्ते। कश्चिद्वानस्पत्यमिति समूहप्रत्ययान्तम्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

नं० ५९२४

अथवेति। नात्रावयवावयविविभागः किं तर्हि लोकवेदव्यतिरिक्तसिद्धान्तप्रसिद्धार्थो भवत्पद इत्यर्थः। लौकिकः स्मृत्युपनिबद्धः। वैदिकः श्रुत्युपनिबद्धः। शक्यं चानेनेति। शकेः कर्मसामान्ये लिङ्गसर्वनामनपुंसकयुक्ते कृत्यप्रत्ययः। ततः पदान्तरसंबन्धादुपजायमानमपि स्त्रीत्वं बहिरङ्गत्वादन्तरङ्गसंस्कारं न बाधत इति शक्यं क्षुदित्युक्तम्। यदा तु पूर्वमेव विशेषविवक्षा तदा शक्या

अथवा युक्त एवात्र तद्धितार्थः। यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावद् अभक्ष्यो ग्राम्यकुक्कुटः। अभक्ष्यो ग्राम्यसूकर इत्युच्यते। भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते। शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्। तत्र नियमः क्रियते। इदं भक्ष्यमिदमभक्ष्यमिति। तथा खेदात् स्त्रीषु प्रवृत्तिर्भवति। समानश्च खेदविगमो गम्यायां चागम्यायां च। तत्र नियमः क्रियते। इयं गम्येयमगम्येति। वेदे खल्वपि। पयोव्रतो ब्राह्मणो यवागूव्रतो राजन्य आमिक्षाव्रतो वैश्य इत्युच्यते। व्रतं च नामाभ्यवहारार्थमुपादीयते। शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम्। तत्र नियमः क्रियते। तथा बैल्वः खादिरो वा यूपः स्यादित्युच्यते। यूपश्च नाम पश्वनुबन्धार्थमुपादीयते। शक्यं चानेन यत् किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्द्धुं तत्र नियमः क्रियते। तथाऽग्नौ कपालान्यधिश्रित्याभिमन्त्रयते। भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वमिति। अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि संतापयति। तत्र च नियमः क्रियते। एवं क्रियमाणमभ्युदयकारि भवतीति॥

क्षुदिति भवत्येव। यदा तु प्रतिघातस्यैव क्षुत्कर्म शकेस्तु प्रतिघातस्तदा क्षुधं प्रतिहन्तुं शक्यमिति भवति। खेदादिति। खेदयतीति खेदो रागः। इन्द्रियनियमासामर्थ्यं वा खेदः। पयोव्रत इति। सत्यामर्थितायां पय एव व्रतयतीति नियमोऽयं न तु विधिः। अर्थित्वाभावे कारणाभावात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 समानायामिति। यद्यपि साक्षादपभ्रंशा न वाचकास्तथापि स्मर्यमाणसाधुशब्दव्यवधानेनार्थं प्रत्याययन्ति। केचित्त्वा
पभ्रंशाः परंपरया निरूढिमागताः साधुशब्दान्स्मारयन्त एव तमर्थं प्रत्याययन्ति। अन्ये तु मन्यन्ते साधुशब्दवद-
पभ्रंशा अपि साक्षादर्थस्य वाचका इति। अस्त्यप्रयुक्त इति। प्रयोगमूलत्वादस्याः स्मृतेरप्रयुक्तानामन्वाख्यानस्याप्रा
माण्यमाशङ्क्यते यथा घटादीनां विनाऽप्यर्थक्रियया सत्त्वं गम्यते नैवं शब्दानां ते हि सर्वदा व्यवहाराय प्रयुज्यमानाः

एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते। शब्देनैवार्थोऽभिधेयो
नापशब्देनेति। एवं क्रियमाणमभ्युदयकारि भवतीति। अस्त्यप्रयुक्तः। सन्ति वै शब्दा अप्रयुक्ताः। तद्य
था। ऊषतेरचक्रपेचेति। किमतो यत्सन्त्यप्रयुक्ताः। प्रयोगाद्धि भवाञ्छब्दानां साधुत्वमध्यवस्यति। य
इदानीमप्रयुक्ताः नामी साधवः स्युः। इदं तावद्विप्रतिषिद्धम्। यदुच्यते सन्ति वै शब्दा अप्रयुक्ता इति।
यदि सन्ति नाप्रयुक्ताः अथाप्रयुक्ता न सन्ति सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम्। प्रयुञ्जान एव खलु भ
वानाह सन्ति शब्दा अप्रयुक्ता इति। कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात्।
नैतद्विप्रतिषिद्धम्। सन्तीति तावद्ब्रूमः। यदेताञ्छास्त्रविदः शास्त्रेणानुविदधते। अप्रयुक्ता इति ब्रूमः।
यल्लोकेऽप्रयुक्ता इति। यदप्युच्यते। कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः
स्यादिति। न ब्रूमोऽस्माभिरप्रयुक्ता इति। किं तर्हि लोकेऽप्रयुक्ता इति। ननु च भवानप्यभ्यन्तरो लोके। अ
भ्यन्तरोऽहं लोके न त्वहं लोकः॥

सन्तः सत्त्वेनादर्शीयन्त इत्याह। इदमिति। कश्चेदानीमिति। उपहासपरम्। उत्तरं तु शास्त्रदृष्ट्या प्रकृतिप्रत्ययादिसंभवादनु
मितिसत्त्वात्। व्यवहारे तु न दृश्यन्त इत्युक्तम्। न त्वहं लोक इति। यथा लोकोऽर्थावगमाय शब्दान्प्रयुङ्क्ते नैवं मयैते ऽर्थे प्रयुक्ता
अपि तु स्वरूपपदार्थका इत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थेशब्दप्रयोगादिति। अर्थसद्भावः शब्दप्रयोगे लिङ्गं नहि विना शब्देनार्थप्रत्यायनमुपपद्यते। इतरोऽन्यथासिद्ध
तामाह। अप्रयोग इति। यतोऽन्ये तेषामर्थानां सन्ति वाचकास्ततो नैषामनुमानमुपपद्यते। यद्यप्यूषेत्यस्य उषिता
इति समानार्थो न भवति परोक्षतादेर्विशेषस्यानवगमात्तथापि तत्प्रत्यायनाय पदान्तरसहितः प्रयुज्यते। संप्र

अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात्। अस्त्यप्रयुक्त इति चेत्। तन्न। किं कारणम्। अर्थे शब्द
प्रयोगात्। अर्थे शब्दाः प्रयुज्यन्ते। सन्ति चैषां शब्दानामर्थाः येष्वर्थेषु प्रयुज्यन्ते॥ अप्रयोगः प्रयो
गान्यत्वात्। अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः। कुतः। प्रयोगान्यत्वात्। यदेतेषां शब्दानामर्थे
अन्याञ्छब्दान्प्रयुञ्जते। तद्यथा। ऊषेत्यस्य शब्दस्यार्थे क्व यूयमुषिताः। तेरेत्यस्यार्थे क्व यूयं तीर्णाः। चक्रे
त्यस्यार्थे क्व यूयं कृतवन्तः। पेचेत्यस्यार्थे क्व यूयं पक्ववन्त इति। अप्रयुक्ते दीर्घसत्रवत्। यद्यप्यप्रयुक्ता
अवश्यं दीर्घसत्रवल्लक्षणेनानुविधेयाः। तद्यथा। दीर्घसत्राणि वार्षशतिकानि वार्षसहस्रिकाणि च।
न चाद्यत्वे कश्चिदपि व्यवहरति। केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदध
ते। सर्वे देशान्तरे। सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते। न चैवोपलभ्यन्ते। उपलब्धौ यत्नः क्रि
यताम्। महान्शब्दस्य प्रयोगविषयः॥

त्यप्रयुज्यमानानामपि पूर्वं प्रयुक्तत्वादनुशासनं कर्तव्यमित्याह। अप्रयुक्ते इति। ऋषिसंप्रदाय इति। वेदाध्ययन
मित्यर्थः। सर्वे इति। इदमत्र तात्पर्यं यस्य कस्यचिद्वचनात्प्रयोगाप्रयोगौ न व्यवतिष्ठेते अपि तु शिष्टानामेव वचनात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ वाकोवाक्यमिति।वाकोवाक्यशब्देनोक्तिप्रत्युक्तिरूपोग्रन्थउच्यते।यथाकिंस्विदावपनंमहदूभूमिरावपनंमहदिति
१६ ।पूर्वचरितसंकीर्तनमितिहासः।वंशाद्यनुकीर्तनंपुराणम्।विकारइति।जीवतोमृतावस्थाविकारस्तत्रेत्यर्थः।किंपुन
रिति।एकःशब्दःसम्यग्ज्ञातःसुप्रयुक्तःस्वर्गेलोकेकामधुग्भवतीतिश्रुतिः।तत्रकिंसम्यग्ज्ञातःकामधुग्भवतिसुप्रयो

सप्तद्वीपावसुमतीत्रयोलोकाश्चत्वारोवेदाःसाङ्गाःसरहस्याःबहुधाभिन्नाःएकशतमध्वर्युशाखाःसह
स्रवर्त्मासामवेदःएकविंशतिधाबाह्वृच्यंनवधाआथर्वणोवेदःवाकोवाक्यमितिहासःपुराणंवैद्यकमि
त्येतावाञ्छब्दस्यप्रयोगविषयःएतावन्तंशब्दस्यप्रयोगविषयमननुनिशम्यसन्त्यप्रयुक्ताइतिवचनं
केवलंसाहसमात्रमेव।एतस्मिंश्चातिमहतिशब्दस्यप्रयोगविषयेतेतेशब्दास्तत्रतत्रनियतविषयादृ
श्यन्ते।तद्यथा।शवतिर्गतिकर्माकम्बोजेष्वेवभाषितोभवति।विकारएनमार्याभाषन्तेशवइति।हम्मतिः
सुराष्ट्रेषुरंहतिःप्राच्यमध्येषुगमिमेवत्वार्याःप्रयुञ्जते।दातिर्लवनार्थेप्राच्येषुदात्रमुदीच्येषुयेचाप्य
तेभवतोऽप्रयुक्ताअभिमताःशब्दाएतेषामपिप्रयोगोदृश्यते।क्व।वेदे।तद्यथा।सप्तास्येरेवतीरेवदू
ष।यद्वोरेवतीरेवत्यांतमूष।यन्मेनरःश्रुत्यंब्रह्मचक्र।यत्रानश्चक्राजरसंतनूनामिति॥किंपुनःशब्द-
ज्ञानेधर्मआहोस्वित्प्रयोगे।कश्चात्रविशेषः।ज्ञानेधर्मइतिचेत्तथाधर्मः।ज्ञानेधर्मइतिचेत्तथाअ- राम॰
धर्मःप्राप्नोति॥

गात्तुसम्यग्ज्ञातत्वानुमानमित्यर्थः।आहोस्वित्सुप्रयुक्तःकामधुग्भवतिसुप्रयुक्तत्वंतुसम्यग्ज्ञानादित्यर्थइतिप्र १६
श्नः।ज्ञानेधर्मइतिचेदिति।यथाश्लेष्मणःप्रकोपनंस्निग्धद्रव्यंरूक्षंतुवायोस्तथेहापिप्राप्तमितिभावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचारे। प्रयोगे। ऋषिर्वेदः। नचप्रयत्नइति। यदिप्रयत्नेनविनाफलंस्यात्प्रयत्नवैयर्थ्यमापद्येतेत्यर्थः। व्यतिरेक-

योहिशब्दाञ्जानात्यपशब्दानप्यसौजानाति। यथैवशब्दज्ञानेधर्मः। अथवाभूयानधर्मःप्राप्नोति। भूयांसोह्यपशब्दाः अल्पीयांसःशब्दाः। एकैकस्यशब्दस्यबहवोपभ्रंशाः। तद्यथा। गौरित्यस्यगावीगोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशाः। आचारेनियमः। आचारेपुनर्ऋषिर्नियमंवेदयते। तेसुराहेलयोहेलयइतिकुर्वन्तःपराबभूवुरिति। अस्तुतर्हिप्रयोगे। प्रयोगेसर्वलोकस्य। यदिप्रयोगेधर्मःसर्वोलोकोभ्युदयेनयुज्येत। कश्चेदानींभवतोमत्सरःयदिसर्वोलोकोभ्युदयेनयुज्येत। नखलुकश्चिन्मत्सरः। प्रयत्नानर्थक्यंतुभवति। फलवताचनामप्रयत्नेनभवितव्यम्। नचप्रयत्नःफलाद्व्यतिरेच्यः। ननुचयेकृतप्रयत्नास्तेसाधीयःशब्दान्प्रयोक्ष्यन्ते। तएवसाधीयोभ्युदयेनयोक्ष्यन्तेकोपिवेलक्ष्यते। दृश्यन्तेहिकृतप्रयत्नाश्चाप्रवीणाः अकृतप्रयत्नाश्चप्रवीणाः। तत्रफलव्यतिरेकोपिस्यात्। एवंतर्हिनापिज्ञानएवधर्मोनापिप्रयोगएव। किंतर्हि। शास्त्रपूर्वकेप्रयोगेऽभ्युदयस्तत्तुल्यंवेदशब्देन। शास्त्रपूर्वकंयःशब्दान्प्रयुङ्क्ते सोभ्युदयेनयुज्यते। तत्तुल्यंवेदशब्देन। वेदशब्दाअप्येवमभिवदन्ति। योग्निष्टोमेनयजते। यउचैनमेवंवेद। योग्निंनाचिकेतंचिनुतेयउचैनमेवंवेद॥

इति। परिहासः। तत्तुल्यमिति। वेदःशब्दोयस्यार्थस्यसवेदशब्दः। तस्ययथाज्ञात्वानुष्ठानंतथाशब्दानामपिप्रकृत्यादिविभागज्ञानपूर्वकःप्रयोगइत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अपर आहेति। वेदश्चासौ शब्दश्च वेदशब्द इति कर्मधारयः। अथवेति। अपशब्दज्ञानान्तरीयकत्वाच्छब्दज्ञान

१७ अपर आह। तत्तुल्यं वेदशब्देनेति। यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्ति। एवं यः शा
स्त्रपूर्वकं शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति। अथवा पुनरस्तु ज्ञान एव धर्म इति। ननु चोक्तं ज्ञाने
धर्म इति चेत्तथाऽधर्म इति। नैष दोषः। शब्दप्रमाणका वयम्। यच्छब्द आह तदस्माकं प्रमाणम्।
शब्दश्च शब्दज्ञाने धर्ममाह नापशब्दज्ञानेऽधर्ममाह। यच्च पुनरशिष्टाप्रतिषिद्धं नैव तद्दोषाय भव
ति नाभ्युदयाय। तद्यथा। हिक्कितहसितकण्डूयितानि नैव तद्दोषाय भवन्ति नाभ्युदयाय। अथवाऽभ्युपा
य एवापशब्दज्ञानं शब्दज्ञाने। योऽप्यपशब्दाञ्जानाति शब्दानप्यसौ जानाति। तदेवं ज्ञाने धर्म इति ब्रु
वतोऽर्थादापन्नं भवति अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति। अथ वा कूपखानकवदेत
द्भविष्यति। तद्यथा। कूपखानकः कूपं खनन्यद्यपि तदीयमृदापांसुभिश्चावकीर्णो भवति सोऽप्सु संजा
तासु तत एव तं गुणमासादयति येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति। एवमिहा
पि। यद्यप्यपशब्दज्ञानेऽधर्मः तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन स च दोषो निर्घानिष्यते भूयसा चा-
भ्युदयेन योगो भविष्यति। यदप्युच्यते आचारे नियम इति। याज्ञे कर्मणि स नियमः अन्यत्रानियमः॥ १७

स पृथक्फलमपशब्दज्ञानस्य नास्तीत्यर्थः। दोष इति। उत्कृष्टधर्मफलावाप्तौ स्वल्पमधर्मफलमुत्पन्नमप्यनुत्पन्न
कल्पं भवतीत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यक्षधर्माणइति।योगिप्रत्यक्षेणसर्वंविदितवन्तः।परावरज्ञाइति।विद्याविद्याप्रविभागज्ञाः।अथेति।उक्तमिदं
नचान्तरेणव्याकरणमित्यादि।तत्रपक्षद्वयेपिदोषदर्शनात्प्रश्नः।षष्ठ्यर्थइति।द्वाभ्यामपिशब्दाभ्यामष्टाध्या।
य्याःप्रतिपादनाद्व्यतिरेकाभावः।सामान्यविशेषशब्दतयातुद्वयोःसहप्रयोगोनविरुध्यते।यदात्वष्टाध्याय्ये

एवंहिश्रूयते।यर्वाणस्तर्वाणोनामऋषयोबभूवुः।प्रत्यक्षधर्माणःपरावरज्ञाःविदितवेदितव्या
अधिगतयाथातथ्याः।तेतत्रभवन्तः।यद्वानस्तद्वानइतिप्रयोक्तव्येयर्वाणस्तर्वाणइतिप्रयुञ्जते।या
ज्ञकर्मणिपुनर्नापभाषन्ते।तैःपुनरसुरैर्याज्ञेकर्मण्यपभाषितंततस्तेपराभूताः।अथव्याकरण
मित्यस्यशब्दस्यकःपदार्थः।सूत्रम्।सूत्रेव्याकरणेषष्ठ्यर्थोनुपपन्नः।सूत्रेव्याकरणेषष्ठ्यर्थोनो
पपद्यतेव्याकरणस्यसूत्रमिति।किंतर्हितदन्यत्सूत्राद्व्याकरणंयस्यादःसूत्रंस्यात्।शब्दाप्रतिपत्तिः
।शब्दानांचाप्रतिपत्तिःप्राप्नोति।व्याकरणाच्छब्दान्प्रतिपद्यामहइति।नहिसूत्रतएवशब्दा
न्प्रतिपद्यन्ते।किंतर्हिव्याख्यानतश्च।ननुचतदेवसूत्रंविगृहीतंव्याख्यानंभवति।नकेवला
निचर्चापदानिव्याख्यानम्।वृद्धिःआत्ऐजिति।किंतर्ह्युदाहरणंप्रत्युदाहरणंवाक्याध्याहा
रइत्येतत्समुदितंव्याख्यानंभवति।एवंतर्हिशब्दः।शब्देल्युडर्थः।यदिशब्दोव्याकरणंल्युड
र्थोनोपपद्यते।व्याक्रियन्तेशब्दाअनेनेतिव्याकरणंनहिशब्देनकिंचिद्व्याक्रियतेकेनतर्हि।सूत्रेण॥

कदेशःसूत्रशब्देनोच्यतेतदाषष्ठ्यर्थोप्युपपद्यते।शब्दाप्रतिपत्तिरिति।नहिव्याख्यानरहितसूत्रमात्रश्रवणाच्छ
ब्दाःप्रतीयन्ते।समुदितमिति।समुदायादेवार्थावसायोत्पादादित्यर्थः।शब्दइति।करणेल्युड्विधीयते।शब्दस्यव्याक्रि
यमाणत्वात्कर्मनतुकरणमितिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भवे चेति। शब्देऽप्यन्वाख्यायमानत्वेन भवो योग इति चेन्मीमांसादियोगस्यापि शब्दं प्रति विचारकत्वाद्वैयाकरणत्वप्रस
ङ्गः। न चेदानीमिति। लक्षणप्रपञ्चाभ्यां मूलसूत्रवद्वार्त्तिकानामुपपत्त्या दोषाभावः। प्रस्कन्दनमिति। यद्यप्ययं भीमादिस्त
थापि कृत्यल्युटो बहुलमित्यस्यैव भीमादयोपादान इत्ययं प्रपञ्च इति भावः। गोरित्युक्त इति। सास्नादिमति यदा कंचित्प्र

भवे। भवे च तद्धितो नोपपद्यते। व्याकरणे भवो योगो वैयाकरण इति। न हि शब्दे भवो योगः। क्व तर्हि। सूत्रे। प्रोक्तादयश्च तद्धिताः। प्रोक्तादयश्च तद्धिता नोपपद्यन्ते। पाणिनिना प्रोक्तं पाणिनीयम्। आपिशलं काशकृत्स्नमिति। न हि पाणिनिना शब्दाः प्रोक्ताः। किं तर्हि। सूत्रम्। किमर्थमिदमुभयमुच्यते। भवे प्रोक्तादयश्च तद्धिता इति। न प्रोक्तादयश्च तद्धिता इत्येव भवेऽपि तद्धितश्चोदितः स्यात्। पुरस्तादिदमाचार्येण दृष्टं भवे च तद्धित इति तत्पठितम्। तत उत्तरकालमिदं दृष्टं प्रोक्तादयश्च तद्धिता इति। तदपि पठितम्। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति। अयं तावददोषः। यदुच्यते शब्दे ल्युडर्थ इति। नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते। किं तर्हि। अन्येष्वपि कारकेषु। कृत्यल्युटो बहुलमिति। तद्यथा। प्रस्कन्दनं प्रपतनमिति। अथवा शब्दैरपि शब्दा व्याक्रियन्ते। तद्यथा। गौरित्युक्ते सर्वे संदेहा निवर्तन्ते नाश्वो न गर्दभ इति। अयं तर्हि दोषः। भवे प्रोक्तादयश्च तद्धिता इति। एवं तर्हि लक्ष्यलक्षणे व्याकरणम्। लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति। किं पुनर्लक्ष्यं लक्षणं च। शब्दो लक्ष्यः सूत्रं लक्षणम् ॥

त्ययं गौरित्युच्यते तदा तत्र वाचकान्तराणां निवृत्तिः कृता भवति। एवमेकस्मिन्नुदाहरणे उपन्यस्ते सर्वाणि तत्स
दृशानि शब्दान्तराणि प्रतीयन्ते ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

पूर्वेपञ्चाला इति। जनपदान्तरनिवृत्तिविवक्षायामेकदेशेऽपि समुदायरूपारोपात्प्रयोगः। तैलमिति। यदौषधसंस्कृ-
ताद्घृततैलमात्रा भवति तदेदमुदाहरणम्। आकृतिवाचित्वे तु घृततैलशब्दयोः संस्थानप्रमाणनिरपेक्षा सर्वत्र मु
ख्या वृत्तिः। शुक्ल इति। अशुक्लोऽप्यवयवेऽवयवान्तरस्य शौक्ल्यात्समुदायस्य शुक्लत्वे सत्यारोपात्प्रयोगः। व्यपदे

एवमप्ययं दोषः। समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते। सूत्राणि चाप्यधीयान इष्य
ते वैयाकरण इति। नैष दोषः। समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तन्ते। तद्यथा। पूर्वे पञ्चा-
लाः। तैलं भुक्तम्। घृतं भुक्तम्। शुक्लो नीलः कृष्ण इति। एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवय
वेऽपि प्रवर्तते। अथवा पुनरस्तु सूत्रम्। ननु चोक्तं सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्न इति। नैष दोषः। व्य
पदेशिवद्भावेन भविष्यति। यदप्युच्यते शब्दाप्रतिपत्तिरिति। न हि सूत्रत एव शब्दान्प्रतिपद्यन्ते किं
तर्हि व्याख्यानतश्चेति। परिहृतमेतत्। तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति। ननु चोक्तं न केवला
नि चर्चापदानि व्याख्यानं वृद्धिः आत् ऐजिति। किं तर्हि उदाहरणं प्रत्युदाहरणं वाक्याध्याहारश्चेत्ये
तत्समुदितं व्याख्यानं भवतीति। अविजानत एतदेवं भवति। सूत्रत एव हि शब्दान्प्रतिपद्यन्ते। आ
तश्च सूत्रत एव। यो ह्युत्सूत्रं कथयेन्नादो गृह्येत॥

शिवद्भावेनेति। यथा राहोः शिर इत्येकस्मिन्नपि वस्तुनि शब्दार्थभेदाद्भेदव्यवहारः। एवमिहापि व्याकरणशब्देन
शास्त्रस्य व्याकृतिक्रियायां करणरूपत्वमुच्यते। सूत्रशब्देन तु समुदायरूपतेति भेदव्यवहार उपपद्यते। सूत्रत ए
वेति। पदच्छेदादिभिः सूत्रार्थस्यैवाभिव्यञ्जनात्। आत इति निपातः। अतश्च हेतोरित्यर्थः। नाद इति। नैतदित्यर्थः।
अथवा नादोऽर्थरहितत्वाद्घोषमात्रमेवेत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना॰कै॰ किमर्थमिति।नहिवर्णोपदेशेनकस्यचित्साधुशब्दस्यानुशासनमितिभावः।वृत्तिसमवायार्थइति।लाघवेनशास्त्रप्र
१९ वृत्त्यर्थइत्यर्थः।धर्मनियमवत्समासः।वृत्त्यर्थइति।शास्त्रप्रवृत्तिप्रत्यासन्नत्वंसमवायस्यदर्शयति।इग्यणइत्यादौ
हियथासंख्यशास्त्रंवर्णसन्निवेशमात्रादेवावतिष्ठते।वृत्तिप्रयोजनइति।पारंपर्येणशास्त्रप्रवृत्तावस्याङ्गत्वम्।

अथकिमर्थोवर्णानामुपदेशः।वृत्तिसमवायार्थउपदेशः।वृत्तिसमवायार्थोवर्णानामुपदेशःकर्तव्यः।किमिदंवृत्तिसमवायार्थइति।वृत्तयेसमवायोवृत्तिसमवायः।वृत्त्यर्थोवासमवायोवृत्तिसमवायः।वृत्तिप्रयोजनोवासमवायोवृत्तिसमवायः।कापुनर्वृत्तिः।शास्त्रप्रवृत्तिः।अथकःसमवायः।वर्णानामानुपूर्व्येणसन्निवेशः।अथकउपदेशः।उच्चारणम्।कुतएतत्।दिशिरुच्चारणक्रियः।उच्चार्यहिवर्णानाहउपदिष्टाइमेवर्णाइति।अनुबन्धकरणार्थश्च।अनुबन्धकरणार्थश्चवर्णानामुपदेशःकर्तव्यः।अनुबन्धानासंक्ष्यामीति।नह्यनुपदिश्यवर्णाननुबन्धाःशक्याआसङ्क्तुम्।सएषवर्णानामुपदेशोवृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च।वृत्तिसमवायश्चानुबन्धकरणंचप्रत्याहारार्थम्।प्रत्याहारोवृत्त्यर्थः।इष्टबुद्ध्यर्थश्च।इष्टबुद्ध्यर्थश्चवर्णानामुपदेशः।इष्टान्वर्णान्भोत्स्यतइति।नह्यनुपदिश्यवर्णानिष्टाःवर्णाःशक्याविज्ञातुम्।इष्टबुद्ध्यर्थश्चेतिचेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः।इष्टबुद्ध्यर्थश्चेतिचेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशःकर्तव्यः।एवंगुणाअपिहिवर्णाइष्यन्ते॥

सतिहिसमवायेइत्संज्ञाततआदिरन्त्येनेतिततोहलोपइत्यादिशास्त्रप्रवृत्तिः।प्रत्याहारार्थमिति।प्रत्याहारशब्देनाणादिकाः रामः
संज्ञाउच्यन्ते।इष्टबुद्ध्यर्थश्चेति।सतिह्युपदेशेकलादिदोषरहितायेवर्णानिर्दिष्टास्तेतथैवप्रयोक्तव्याइत्युक्तंभवति।एक १९
श्रुत्याहिसूत्राणांपाठात्सर्वेषामुदात्तादीनामुपदेशःकर्तव्यइत्याह।इष्टबुद्ध्यर्थश्चेतिचेदिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकृत्युपदेशादिति।उपात्तोपिविशेषोनान्तरीयकत्वाज्जातिप्राधान्यविवक्षायामविवक्षितइत्यर्थः।संवृतादीनामिति।ए-
कारादीनांसंवृतत्वंदोषोनत्वकारस्य।तस्यसंवृतगुणत्वात्।तत्रसंध्यक्षरेषुविवृततमेषूच्चार्येषुसंवृतत्वंदोषः।कलः
स्थानान्तरनिष्पन्नःकाकलीत्वेनप्रसिद्धः।ध्मातःश्वासभूयिष्ठतयाह्रस्वोपिदीर्घइवलक्ष्यते।एणीकृतोऽविशिष्टः।कि
मयमोकारअथौकारइतियत्रसन्देहः।अम्बूकृतोयोव्यक्तोप्यन्तर्मुखइवश्रूयते।अर्द्धकोदीर्घोपिह्रस्वइव।ग्रस्तो
जिह्वामूलेनिगृहीतः।अव्यक्तइत्यपरे।निरस्तोनिष्ठुरः।प्रगीतःसामवदुच्चारितः।उपगीतःसमीपवर्णान्तरगीत्यानुरक्तः।

आकृत्युपदेशात्सिद्धम्।आकृत्युपदेशात्सिद्धमेतत्।अवर्णाकृतिरुपदिष्टासर्वमवर्णकुलंग्रहीष्य
ति।तथेवर्णाकृतिस्तथोवर्णाकृतिः।आकृत्युपदेशात्सिद्धमितिचेत्संवृतादीनांप्रतिषेधः।आकृत्युप
देशात्सिद्धमितिचेत्संवृतादीनांप्रतिषेधोवक्तव्यः।केपुनःसंवृतादयः।संवृतःकलोध्मातःएणीकृ
तोम्बूकृतोऽर्द्धकोग्रस्तोनिरस्तःप्रगीतउपगीतःक्ष्विण्णोरोमशइति।अपरआहग्रस्तंनिरस्तमविल-
म्बितंनिर्हतमम्बूकृतंध्मातमथोविकम्पितम्।संदष्टमेणीकृतमर्द्धकंद्रुतंविकीर्णमेताःस्वरदोष
भावनाइति।अतोन्येव्यञ्जनदोषाः।नैषदोषः।गर्गादिपाठात्संवृतादीनांनिवृत्तिर्भविष्यति।अस्त्य-
न्यद्गर्गादिबिदादिपाठेप्रयोजनम्।किम्।समुदायानांसाधुत्वंयथास्यादिति॥

।क्ष्विण्णःकम्पमानइव।रोमशोगम्भीरः।अविलम्बितोवर्णान्तरासंभिन्नः।निर्हतोरूक्षः।संदष्टोवर्द्धितइव।वि
कीर्णोवर्णान्तरेप्रसृतः।एकोप्यनेकनिर्भासीत्यपरे।स्वरदोषभावनाइति।स्वरदोषगोत्राणि।अनन्ताहिदोषाअ
शक्तिप्रमादकृताः।अस्त्यन्यदिति।गर्गइत्यादिनैवसन्निवेशेनगर्गादीनांसाधुत्वंयथास्यात्।गार्ग्यइत्यादीनांमाभूत्।
ततश्चगर्गादिस्थानामेवाकारादीनांदोषनिवृत्तिःकृतास्यात्।नतुसमुदायान्तरस्थानाम्।यद्यपिप्रत्ययविध्यर्थो
गर्गादीनांपाठस्तथापिप्रसङ्गात्समुदायसाधुत्वायापिभवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

 निवृत्त कलादिकामिति। अकारस्य संवृततत्वा निवृत्त संवृततत्वादिकामिति नोक्तम्। अकारस्य निदर्शनार्थत्वात्सर्वेव
र्णानां ग्रहणात्ते प्रत्यापत्तिरित्यर्थः। यदनुबन्धैरिति। यथा स्वरितत्वमधिकारार्थमेवमात्मनेपदाद्यर्थं कलादिकं प्रति-
ज्ञाय कलादात्मनेपदमित्यादि करिष्यते। नत्वनुदात्तङित इत्यादि। । ननु चानुबन्धाभावे कथमणादिकाः संज्ञा

एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि। सा तर्हि वक्तव्या। लिङ्गा-
र्था तु प्रत्यापत्तिः। लिङ्गार्था सा तर्हि भवति। तत्तर्हि वक्तव्यम्। यद्यप्येतदुच्यते। अथवैतर्हि। अनेकम
नुबन्धशतं नोच्चार्यम्। इत्संज्ञा च न वक्तव्या लोपश्च न वक्तव्यः। यदनुबन्धैः क्रियते तत् कलादिभिः क
रिष्यते। सिध्यत्येवम पाणिनीयं तु भवति। यथान्यासमेवास्तु। ननु चोक्तमाकृत्युपदेशात्सिद्धमिति चेत्सं
वृतादीनां प्रतिषेध इति। परिहृतमेतत्। गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति। ननु चान्य
द्गर्गादिबिदादिपाठे प्रयोजनमुक्तम्। किम्। समुदायानां साधुत्वं यथा स्यादिति। एवं तर्ह्युभयमनेन
क्रियते पाठश्चैव विशेष्यते। कलादयश्च निवर्त्यन्ते। कथं पुनरेकेन यत्नेनोभयं लभ्यम्। लभ्यमित्याह॥

उपपद्यन्ते। आदिरन्त्येनेत्यत्रादिः कलैः सहेत्युक्त्वा अइउ इत्यादिकाः संज्ञाः करिष्यन्ते। स्वरसंधिश्चासन्देहाय नक-
रिष्यत इत्यदोषः। उभयमिति। यथाभूता गर्गादिस्था अकारादयस्तथाभूता एव सर्वत्र प्रयोक्तव्या इति प्रतिपाद्यत इ-
त्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विगताइति। द्वावर्थौगताः प्रयोजनद्वयसंपादकाइत्यर्थः। तथावाक्यान्यपीति। पूर्वस्याप्यर्थे वद्विगतत्वमित्यर्थः। अथवेति। केवलानांवर्णानांलोकेप्रयोगाभावाद्लादीनांचशुद्धानांपाठात्तत्त्वलाच्चवर्णानांनकश्चिद्दोषः।

द्विगताअपिहेतवोभवन्ति। तद्यथा। आम्राश्चसिक्ताः पितरश्चप्रीणिताइति। तथावाक्यान्यपिद्विष्ठानिभवन्ति। श्वेतोधावति। अलम्बुसानांयातेति। अथवाइदंतावदयंप्रष्टव्यः। क्वेमेसंवृतादयःश्रूयेरन्निति। आगमेषु। आगमाःशुद्धाःपठ्यन्ते। विकारेषुतर्हि। विकाराःशुद्धाःपठ्यन्ते। प्रत्ययेषुतर्हि। प्रत्ययाःशुद्धाःपठ्यन्ते। धातुषुतर्हि। धातवोपिशुद्धाःपठ्यन्ते। प्रातिपदिकेषुतर्हि। प्रातिपदिकान्यपिशुद्धानिपठ्यन्ते। यानितर्हिग्रहणानिप्रातिपदिकानि। एतेषामपिस्वरवर्णानुपूर्वीज्ञानार्थउपदेशःकर्तव्यः। शशःषषइतिमाभूत्पलाशःपलाषइतिमाभूत्। मञ्चकोमञ्जकइतिमाभूत् आगमाश्चविकाराश्चप्रत्ययाःसहधातुभिः। उच्चार्यन्तेततस्तेषुनेमेप्राप्ताःकलादयः॥ इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येप्रथमस्याध्यायस्यप्रथमेपादेप्रथमान्हिकम् ॥१॥

यानितर्हीति। डित्थादीनि। एतेषामपीति। शिष्टप्रयुक्तत्वेनोणादीनांपृषोदरादीनांचसाधुत्वाभ्यनुज्ञानात्सर्वेषामत्रसंग्रहःसिद्धः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृतेमहाभाष्यप्रदीपेप्रथमस्याध्यायस्यप्रथमेपादेप्रथमान्हिकम्॥शुभंभवतु॥ श्रीरस्तु॥कल्याणमस्तु॥ श्रीपतञ्जलयेनमः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा० कै० अइउण्॥ ॥सर्वेवर्णानविशेषेणविचार्यविशेषेणात्रविचारःक्रियते।अकारस्येति।अत्राकारादीनांस्वरूपेणानु ११२
२१ कार्येणावासतोप्यर्थवत्त्वस्याविवक्षितत्वाद्विभक्त्यनुत्पत्तिः।स्वरसंधिस्तुनप्रवर्तते।वर्णोपदेशकालेऽजादिसंज्ञाना
मनिष्पादात्।तत्राकारस्यसंवृतत्वाद्दीर्घप्लुतयोर्विवृतत्वात्प्रयत्नभेदात्सवर्णसंज्ञायाअप्रसङ्गात्तद्देशेथकारेण-
दीर्घप्लुतयोर्ग्रहणंनप्राप्नोतीतिविवृतत्वमस्योपदिश्यते।विवृतस्यगुणस्योपदेशोविवृतोपदेशः।तत्रगुणस्यनि-
त्यसापेक्षत्वादकारापेक्षत्वेपिसमासः।यथादेवदत्तस्यगुरुकुलमिति।आकारग्रहणार्थइति।विवृतोपदेशआ-
कारग्रहणार्थइतिसामानाधिकरण्येननिर्देशादाकारग्रहणंविवृतोपदेशस्यप्रयोजनमितिसामर्थ्यादवगमाच्चो

अइउण्॥ ॥अकारस्यविवृतोपदेशआकारग्रहणार्थः।अकारस्यविवृतोपदेशःकर्तव्यः।किंप्र
योजनम्।आकारग्रहणार्थः।अकारःसवर्णग्रहणेनाकारमपियथागृह्णीयात्।किंचकारणंनगृ
ह्णीयात्।विवारभेदात्।किमुच्यतेविवारभेदादिति।नपुनःकालभेदादपि।यथैवह्ययंविवारभि-
न्नएवंकालभिन्नोपि॥

द्यानुरूपमुत्तरंनभवतीतिनचोदनीयम्।सवर्णग्रहणेनेति।येनशास्त्रेणाणुदित्सवर्णस्येत्यनेनसवर्णागृह्यन्तेते
नकरणेनेत्यर्थः।किंचकारणमिति।आकृतिपक्षाश्रयेणग्रहणकशास्त्रस्यप्रत्याख्यानादाकारस्याप्यत्वजातिस
द्भावात्सिद्धंग्रहणमितिभावः।अत्रचनिमित्तकारणहेतुषुसर्वासांप्रायदर्शनमितिप्रथमाकृता।तेनकस्मात्कार राम:
णादित्यर्थःसंपद्यते।विवारभेदादित्यत्रतुकारणशब्दप्रयोगाभावात्प्रायग्रहणादसर्वनाम्नोवाप्रथमाद्वितीययो २१
रभावाद्विभाषागुणेस्त्रियामितिपञ्चमीविहिता।विवारयतिविकासयतिआस्यमितिविवारःप्रयत्नःव्यक्तिपक्षेग्र-
हणकशास्त्रारम्भाद्दोषापत्तिः।व्यक्तिपक्षेभेदान्तरसद्भावादाह।किमुच्यतइति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बाह्यश्चेति। प्रयत्नाभिनिर्वृत्तत्वात्कालस्य प्रयत्नत्वमभ्युपगम्य बाह्यत्वेन परिहारः। प्रसिद्धपरिमाणवस्त्वन्तरगतपरिच्छेदकक्रियान्तरापेक्षणात्कालव्यवहारस्य बाह्यत्वं कालस्य। यथा व्रीहिः प्रस्थादिव्यवहारः परिमाणद्रव्यकृत एवमत्रापि मात्रादिव्यपदेशो निमेषादिक्रियाभेदकृतः। अथवा नाभिप्रदेशादेवविशिष्टप्रयत्नारम्भाद्दीर्घादिनिष्पत्त्या नाभेश्वासाद्बाह्यत्वात्कालस्य बाह्यत्वम्। विवृतत्वादीनां चास्यवर्तिप्रयत्ननिष्पाद्यत्वादाभ्यन्तरत्वम्। द्रुतादिवृत्तयस्तु यथा न भेदिकास्तथा तपरसूत्रे वक्ष्यते। किंपुनरिति। किं सूत्रकारेणैव विवृतोपदेशः कृतो वार्तिककारेण तु तस्य प्रयोजनमुक्तम्। अथाकृत एव विवृतोपदेशो वार्तिककृता चोद्यत्वेनो-

सत्यमेवमेतत्। वक्ष्यति तुल्यास्यप्रयत्नं सवर्णमित्यत्रास्य ग्रहणस्य प्रयोजनम्। आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञका भवन्तीति। बाह्यश्च पुनरास्यात्कालः। तेन स्यादेव कालभिन्नस्य ग्रहणं न पुनर्विवारभिन्नस्य। किंपुनरिदं विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते

पन्यस्तद् इति प्रश्नः दुरवधारत्वादुपदिष्टोपि विवृतो व्याख्यानेन विना न शक्यते ज्ञातुमिति प्रत्यक्षेप्यकारे प्रश्नोयं नासमञ्जसः ॥

प्रसिद्धपरिमाणेति क्रियान्तरस्य विशेषणम्। वि० दुरवधारत्वादिति। अन्ये तु किंपुनरिति प्रश्नस्यायं भावः सूत्रकारेण पाणिनिना अइउणित्यत्र बोधकत्वेन तात्पर्यविषयत्वं विवृते बुद्ध्वा शास्त्रं प्रणीतमाहोस्वित्संवृत इति। किमयं स्वतः सिद्धः संवृतोऽथवा विवृतस्य स्थाने ऽ अइति सूत्रनिष्पन्न इति परमार्थः। उच्चरितादन्यस्मिन्नप्युच्चरितेन प्रतिसन्धीयमानेत्रेत्वयद् इत्यत्र त्रिशब्दे बोधकत्वेन तात्पर्यविषयतायादृष्टत्वात्। उपदिश्यमानस्येत्यस्य पाणिनिं प्रतिबोध्यमानस्येत्यर्थः। पूर्वत्राप्युपदेश इत्यस्य बोधनमित्यर्थः। तत्र पाणिनिं प्रति विवृत एव भगवता बोधितः संवृते हि बोधिते विवृतस्य कलादीनामिव वार्णसाधुत्वस्यैवाभावेन प्रसङ्गस्यैवाभावात्तस्य स्थाने पाणिनिनासंवृतस्य विधानमनुपपन्नं स्यादिति पूर्वस्य पक्षस्याश्रयणम्। नन्वेवं संवृतस्य वार्णसाधुत्वानापत्तिः। वर्णसमाम्नायस्य तद्बोधकस्यासंवृतेऽप्रवृत्तेरिति चेन्नैवम्। प्रत्यापत्त्यैव तद्बोधनात्। वर्णसमाम्नाये संवृतपाठेन तदनुमानाच्च। इत्थं च प्रत्यक्षेऽप्यकारे स्ववधारत्वेपि विवृतत्वस्य प्रश्नस्यसामञ्जस्ये विवृतत्वादेरप्रत्यक्षत्वमभिमन्यमाने प्रदीपविवरणे चिन्त्य इत्याहुः ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र प्रत्यापत्त्या पूर्वः पक्ष आश्रितः। अन्यथा शास्त्रान्ते प्रत्यापत्तिवचनमनर्थकं स्यात्। स्वं रूपमच्यवाभावात्। अस्ति ह्यन्यदिति। प्रयोगएव साम्ये विवृतत्वे संवृतत्वप्रत्यापत्तिः स्यादित्यज्ञापकमेतदित्यर्थः। नन्विहासति विवृतोपदेशे सावर्ण्याभावादकारेणाकारस्याग्रहणाद् वृत्त्वाभावात्कथमतिखट्व इति ह्रस्वः। नैष दोषः। उदीचामातः स्थान इति ज्ञापकाद्वृत्त्याकारस्य ह्रस्वः। नैव लोक इति। प्रयुक्तानामनुशासनात् प्रयोगे च विवृतस्याकारस्यासंभवात्संवृत एव भविष्यतीति प्रत्यापत्तिर्ज्ञापिकैव॥

आहोस्वित्संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते। विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते। कथं ज्ञायते। यदयम् अ अ इत्यकारस्य विवृतस्य संवृततां प्रत्यापत्तिं शास्ति। नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्। अतिखट्वः अतिमाल इत्यत्रान्तर्यतो विवृतस्य विवृतः प्राप्नोति संवृतः स्यादित्येवमर्था प्रत्यापत्तिः। नैतदस्ति। नैव लोके न च वेदेऽकारो विवृतोऽस्ति। कस्तर्हि संवृतः। योऽस्ति स भविष्यति। तदेतत्प्रत्यापत्तिवचनं ज्ञापकमेव भविष्यति। विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इति॥

भाष्ये नैव लोके न च वेद इति। प्रत्याहारे संवृतोपदेशे तस्यैवाण्ग्रहणादिसंज्ञासु सतीषु अतिमालादौ सवर्णदीर्घादेरेवाभावेन टाबादिस्थस्यास्याकारस्य संवृतस्यैव संविज्ञानेनोक्तोदाहरणे संवृतस्यैव सवर्णदीर्घस्य वा सत्त्वेन तत्स्थाने संवृतस्यैव प्राप्त्या तद्वैयर्थ्येन-ज्ञापकत्वं सम्यगेवेति भावः। दीर्घप्लुतवचने चेति तृतीयवार्तिके प्रयोजनकथनं तु अन्यत्र विवृतोपदेशाशयम्। तेन तत्प्रत्याख्याने नैव लोके न च वेद इत्यस्यापि एवमेव तात्पर्यम्। न पुनर्ह्रस्वस्य विवृताकारस्य दीर्घप्लुतयोश्च संवृतयोरत्यन्तासत्त्वविषयकम्। कृतिचेत्यादाववसाने ह्रस्वविवृतस्य साम्प्रतिकैर्बह्वृचादिवैदिकैः पठ्यमानस्य प्रत्यक्षसिद्धत्वात्। एवं दीर्घप्लुतयोः संवृतावर्णयोरुच्चारणस्य सुज्ञकत्वस्य स्पष्टत्वात्। नच दीर्घस्यैवाकारस्य द्रुतवृत्त्या तथोच्चारणमात्रं तथा ह्रस्वसंवृताकारस्य विलम्बितवृत्त्या दीर्घत्वादि-प्रतिभास इति वाच्यम्। इकारादिषु द्रुतादिवृत्त्याऽवर्णइव वैलक्षण्यानुपलम्भेन तत्प्रतिभासस्य द्रुतादिवृत्तिप्रयोज्यताया वक्तुमशक्यत्वात्। कैयटस्यापि विवृतह्रस्वाकारादीनामसाधुत्वएवाभिप्रायो न पुनरत्यन्तासत्त्व इत्यपि शक्यते वक्तुम्। अतएव धात्वादिस्थ इतीति प्रतीकमुपादाय विवृतोच्चारणप्रयत्नस्य गौरवमुद्भावितवान्न त्वसंभवम्। एतदनुरोधेन यत्स्तत्तत्रेतीति प्रतीके दीर्घप्लुतयोः संवृतयोरुच्चारणस्याशक्यत्वं कैयटेनोक्तं तस्यापि कलध्मातादीनामिव वाणे साधुत्वाभावादशक्यत्वे एवाभिप्रायो वर्णनीय इति दिक्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सतस्त्वन्येति। अप्रकाशत्वाद्दीर्घप्लुतयोः संवृतयोरुच्चारणस्येत्यर्थः। एवमपीति। असति विवृतत्वप्रतिज्ञाने संवृतस्याकारस्य संवृतत्वे
वदीकारोकारौ प्राप्नुतः। प्लुतः संवृता अन्यत्रार्भवसाम्न इति केचिदीकारोकारयोः संवृतत्वस्याभ्युपगमात्। तत्रानुवृत्तिनिर्देश इति
। अकः सवर्णे दीर्घ इत्यादावयमेवाकारोऽनुवृत्त इति ककारादिना चिन्हेन ज्ञायते। ततश्चाणत्वात्तस्य ग्राहकत्वमस्तु। अस्य च्वा-
वित्यादौ त्वकारस्यानण्त्वाद्ग्राहकत्वं न प्राप्नोतीत्यर्थः। वृत्तिः शास्त्रस्य लक्ष्ये प्रवृत्तिः। तदनुगतो निर्देशोऽनुवृत्तिनिर्देशः॥ एक-

विषम उपन्यासः। युक्तं यत्र तत्र तत्र प्रक्लृप्तिर्भवति। सन्ति हि यणः सानुनासिका निरनुनासिकाश्च। दीर्घप्लु
तौ पुनर्नैव लोके न च वेदे संवृतौ स्तः। कौ तर्हि। विवृतौ। यौ स्तस्तौ भविष्यतः॥ एवमपि कुत एतत्तुल्यस्थानौ
प्रयत्नभिन्नौ भविष्यतः। न पुनस्तुल्यप्रयत्नौ स्थानभिन्नौ स्याताम्। ईकार ऊकारौ वेति। वक्ष्यति स्थानेऽन्तरतम
इत्यत्र स्थान इत्यनुवर्तमाने पुनः स्थानग्रहणस्य प्रयोजनं यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं ब-
लीयो भवतीति॥ तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात्। तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्रा
प्नोति। अस्य च्वौ यस्येति च। किं कारणम्। अनण्त्वात्। न ह्येतेऽणो येऽनुवृत्तौ। के तर्हि। येऽक्षरसमाम्नाय उप
दिश्यन्ते॥ एकत्वादकारस्य सिद्धम्। एकोऽयमकारो यश्चाक्षरसमाम्नाये यश्चानुवृत्तौ यश्च धात्वादिस्थः॥
अनुबन्धसंकरस्तु। अनुबन्धसंकरस्तु प्राप्नोति। कर्मण्यण्। आतोऽनुपसर्गे क इति केऽपि णित्कृतं प्राप्नोति॥

त्वादकारस्येति। एकैवाकारव्यक्तिः। उदात्तादिभेदप्रतिभासस्तु व्यञ्जकध्वनिकृतः। खड्गतैलादर्शादिभेदे प्रतिबिम्बप्रतिभा
सभेदवत्। अकारस्य निदर्शनार्थत्वादिकारादीनामप्येकत्वं बोद्धव्यम्॥ अनुबन्धसंकर इति। एकत्वे काण्टगादीनां भेदाभा-
वाद्गोदादौ ङीबादिः प्राप्नोति॥

प्लृत इति। ईऊऋत् एते इत्यर्थः। क्वचित्तु प्लुत इति पाठः। वि०॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

 किरिणोति। नगोऽश्वन्तावर्वर्णेति प्रतिषेधादकारो नोदाहृतः। घटेनेति। एक एवाकारो द्विरुच्चार्यत इति द्युच्चाभावः। ठं खलु-
बाहुकादिषुक्तार्थः। द्रव्यवदिति। उपचारो व्यवहारः। यथैकेन घटेनोदकाहरणादिक्रियां युगपदनेको न करोतीति तथै-
वैकमकारं युगपदनेको नोच्चारयेदित्यर्थः। विषयेणेति। वार्तिककारेण करणत्वेन सामान्यरूपतयाचाभेदेन विषयो-
निर्दिष्टः। भाष्यकारस्त्वधिकरणत्वं व्यक्तिभेदाद्बहीष्वाञ्च प्रतिपादयति। विषये विषय इति। सर्वगुणमिति। गुणाअनुब-

एकाजनेकाज्ग्रहणेषु चानुपपत्तिः। एकाजनेकाज्ग्रहणेषु चानुपपत्तिर्भवति। तत्र को दोषः। किरि
णा गिरिणेत्येकाजूलक्षणमन्तोदात्तत्वं प्राप्नोति। इह च घटेन तरति घटिक इति द्व्यज्लक्षणः ष्ठन्न प्राप्नो
ति॥ द्रव्यवच्चोपचाराः। द्रव्यवच्चोपचाराः प्राप्नुवन्ति। तद्यथा। द्रव्येषु नैकेन घटेनानेको युगपत्कार्यं क
रोति। एवमिममकारं नानेको युगपदुच्चारयेत्॥ विषयेण तु नानालिङ्गकरणात्सिद्धम्। यदयं विषये वि
षये नानालिङ्गमकारं करोति। कर्मण्यण्। आतोऽनुपसर्गे क इति। तेन ज्ञायते नानुबन्धसंकरोऽस्तीति। यः-
दि हि स्यादिह नानालिङ्गकरणमनर्थकं स्यात्। एकमेवायं सर्वगुणमुच्चारयेत्। नैतदस्ति ज्ञापकम्। इत्सं
ज्ञाप्रक्लृप्त्यर्थमेतत्स्यात्। नह्ययमनुबन्धैः पुल्यकवच्छक्य उपचेतुम्। इत्संज्ञायां हि दोषः स्यात्। आ
यस्य हि द्वयोरित्संज्ञा स्यात्। कयोः। आद्यन्तयोः॥

न्धाः कार्याश्रितत्वादुपकारकत्वात्तत्र कर्मणि क ङिदिति ब्रूयादित्यर्थः। पुल्यकवदिति। पुल्यकः प्राणिविशेषः। स यथा क
ण्टकतुल्यैः पक्षैर्व्याप्यते नैवं सर्वानुबन्धयुक्तोऽकारः प्रक्यो निर्देष्टुम्। आद्यन्तयोरेवेत्संज्ञाविधानान्मध्यपतितानां श्रव
णप्रसङ्गादित्संज्ञैवायच्छते व्याप्रियत इत्येककर्तृकत्वादायम्येत्युक्तम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कः पुनरिति। विवृतोपदेश इत्यत्र कृत इति वा कर्तव्य इति वा वाक्यशेषोध्याहारेण कश्चिद्विशेष इत्यर्थः। आहोपुरुषिकेति। अहो अहं पुरुष इत्यहंकारवानहोपुरुषस्तस्य भाव इति मनोज्ञादित्वाद्वुञ्। अहंकारवत्त्वमित्यर्थः। तस्येति। यदा प्रत्याहारे विवृतोकार उपदिष्टस्तदा प्रयत्नभेदात्तेन संवृतस्याकारस्य ग्रहणाभावादच्कार्यं न स्यादिति तत्सिद्धये सर्वस्याकारस्य विवृतत्वं कर्तव्यमित्यर्थः। तेन प्राप्स्यतीत्यादौ दीर्घादि सिध्यति। ननु च सर्वेषामकाराणां यत्सामान्यं तदनुकरणमत्राकारः

कः पुनरत्र विशेषः। विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायेत संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्येतेति। न खलु कश्चिद्विशेषः। आहोपुरुषिकामात्रं तु भवानाह संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यत इति। वयं तु ब्रूमो विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इति। तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः। तस्यैतस्याक्षरसमाम्नायिकस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः कर्तव्यः। क्वान्यत्र। धातुप्रातिपदिकप्रत्ययनिपातस्थस्य। किं प्रयोजनम्। सवर्णग्रहणार्थः। आक्षरसमाम्नायिकेनास्य ग्रहणं यथा स्यात्। किं च कारणं न स्यात्। विवारभेदादेव। आचार्यप्रवृत्तिर्ज्ञापयति भवत्याक्षरसमाम्नायिकेन धात्वादिस्थस्य ग्रहणमिति। यदयमकः सवर्णे दीर्घ इति प्रत्याहारेऽको ग्रहणं करोति। कथं कृत्वा ज्ञापकम्। न हि द्वयोराक्षरसमाम्नायिकयोर्युगपत्समवस्थानमस्ति॥

तस्य च विवृतत्वे प्रतिज्ञायमाने सर्वेषां तत्प्रतिज्ञातं भवतीति किमुच्यते तस्य विवृतोपदेशादिति। एवं तर्हि यदा कस्यचिदेवाकारस्येदमनुकरणं स्वरूपपदार्थको वाऽकारः तदेदमुच्यत इत्यदोषः। यदयमिति। अत्र हि ककारेण चिह्नेन प्रत्याहारस्थो विवृतो निर्दिष्टः। तेन च संवृतस्याग्रहणेऽकः सवर्ण इति वत्प्रसङ्गः न हि द्वयोरिति। यद्यप्येकोपि विवृतो नास्ति तथापि द्व्यधिष्ठानत्वादेकादेशस्य द्वयोरित्युक्तम्॥

CC-0. In Public Domain. Digitization by eGangotri

नैतदिति। अकइत्यकारेण विवृतेन दीर्घस्य विवृतस्य ग्रहणादज्ञापकमेतदित्यर्थः। कएषयत्नइति। धात्वादयः पठितास्तत्राकारो विवृतः पठ्यतां न हि किंचिद्गौरवं भवति तत्किमुच्यतेऽन्यत्रापि विवृतोपदेशः कर्तव्य इति प्रश्नः। यानीति। प्रतिपद-पाठस्याशक्यत्वात्तस्य विवृतोपदेशादित्यनेन सर्वस्याकारस्य विवृतोपदेशः कार्यतया चोद्यत इत्यर्थः। धात्वादिस्थ इति। अग्रहणप्रातिपदिकार्थे विवृतत्वेऽवश्यचोदनीये धात्वादिस्थस्यापि संवृतस्यैव पठितस्य कार्यार्थे विवृतत्वं प्रति

नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्। यस्याक्षरसमाम्नायिकेन ग्रहणमस्ति तदर्थमेतत्स्यात्। खट्वाढकं मालाढकमिति। सति प्रयोजने न ज्ञापकं भवति। तस्माद्विवृतोपदेशः कर्तव्यः। कएष यत्नश्चोद्यते विवृतोपदेशो नाम। विवृतो वोपदिश्येत संवृतो वा। कोन्वत्र विशेषः। सएष सर्व एव मर्थो यत्नः क्रियते यान्येतानि प्रातिपदिकान्यग्रहणानि तेषामेतेनाभ्युपायेनोपदेशश्चोद्यते तद्गुरु भवति। तस्माद्वक्तव्यं धात्वादिस्थश्च विवृत इति॥ दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः। दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थो विवृतोपदेशः कर्तव्यः। दीर्घप्लुतौ संवृतौ मा भूतामिति। वृक्षाभ्यां देवदत्ता३ इति। नैव लोके न च वेदे दीर्घप्लुतौ संवृतौ स्तः। कौ तर्हि। विवृतौ। यौ स्तस्तौ भविष्यतः॥ स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणम्। संवृतः स्थानी संवृतौ दीर्घप्लुतौ प्रकल्पयेत्। अनुस्वारो यथा यणम्। तद्यथा। सय्यँन्ता सव्वँत्सरः यल्ँलोकं तल्ँलोकमिति। अनुस्वारः स्थानी यणमनुनासिकं प्रकल्पयति॥

ज्ञेयम्। अन्यथा दोषरूपविवृतोच्चारणप्रयत्नस्य गौरवं स्यात्॥ विवृतत्वप्रतिज्ञाने प्रयोजनान्तरमाह। दीर्घेति। असति विवृतत्वप्रतिज्ञाने संवृतस्याकारस्य स्थाने सावर्ण्यात्संवृतयोरेव दीर्घप्लुतयोः प्रसङ्ग इत्यर्थः। नैव लोक इति। असत्यपि सावर्ण्ये लिङ्गादकारस्य संवृतस्य विवृतौ दीर्घप्लुतौ भविष्यतः। यदयमतो दीर्घो यञि अतो रोरप्लुतादप्लुत इत्याहेति भावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं तर्हीति। विषयेणेत्येतदन्यथा व्याचष्टे। नानाशब्दमपनीय पुनःशब्दं पठित्वा। यद्यनुबन्धसंकरः स्याद्दकारमेव श्निवा
दिभ्यो विदध्यात्। अथोच्येत णित्करणमेव यथा स्यादूनित्करणं मा भूदिति नियमार्थमेतत्स्यात्। तन्न। नियमाद्धि धेर्बली
यस्त्वात्। अथवेति। न ब्रूमः सर्वगुणमुच्चारयेदिति किं तर्हि यथा लोके इह मुण्डो भव इह जटिलो भव इह नग्नो भवेति
यद्गुणको यत्रोच्यते तद्गुणक एव तत्र भवति। एवमिहापि याभ्यः प्रकृतिभ्यो यदनुबन्धविशिष्टो विधीयते तासु तदनुब

एवं तर्हि विषयेण तु पुनर्लिङ्गकरणात्सिद्धम्। यदयं विषये विषये पुनर्लिङ्गमकारं करोति श्नाप्त्री व्य
तोणश्निवादिभ्यो णिति। तेन ज्ञायते नानुबन्धसंकरोऽस्तीति। यदि हि स्यात्पुनर्लिङ्गकरणमनर्थकं
स्यात्। अथवा पुनरस्तु विषयेण तु नानालिङ्गकरणात्सिद्धमित्येव। ननु चोक्तमित्संज्ञाप्रसङ्गस्त्वर्थमे
तत्स्यादिति। नैष दोषः। लोकत एतत्सिद्धम्। तद्यथा। लोके कश्चिद्देवं देवदत्तमाह इह मुण्डो भव
इह जटिलो भव इह शिखी भवेति। यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपतिष्ठते। एवमयमका
रो यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपस्थास्यते। यदप्युच्यते एकाजनेकाज्ग्रहणेषु चानुपपत्तिरिति
। एकाजनेकाज्ग्रहणेष्वावृत्तिसंख्यानात्। एकाजनेकाज्ग्रहणेष्वावृत्तेः संख्यानादनेकाच्त्वं भविष्यति।

न्ध निमित्तमेव कार्यं संपादयति। आवृत्तिसंख्यानादिति। यथा विकृतियागे त्रयोदश सामिधेन्यः प्रथमोत्तमयोस्त्रिरा
वृत्त्या सप्तदश संपद्यन्ते। तथा घटेन तरतीति द्व्यज्लक्षणः ष्ठन् भवति। ननु मुख्ये विषये कृतार्थत्वाद्वचनस्य गौणं द्व्य
च्त्वं कथं कार्यनिमित्तम्। उच्यते। गोद्व्यचद्रत्यत्राश्वशब्दप्रतिषेधाल्लिङ्गादावृत्तिभेदेनापि भेदाश्रयकार्यप्रवृत्तिः ॥

CC-0. In Public Domain. Digitization by eGangotri

 भवेदिति। गिरिणेत्यादावावृत्तिभेदेऽपि मुख्यमेकाच्त्वं न निवर्तत इति भावः। एतदपीति। लोके पूर्वसंख्या संख्यान्तरेण मु
ख्येन गौणेन च बाध्यत इत्यर्थः। ऋषिसहस्रमिति। वित्तेन क्रीत्वा प्रत्येकं दत्त्वा सहस्रदक्षिणा ऋषयः संपन्ना इत्यर्थः
। ऋषयः सहस्रमिति कर्मधारये संपन्ना इत्यस्य साक्षादृषिभिः संबन्धः। षष्ठीसमासे तु सामर्थ्यलक्षणः संबन्धः। यथा

तद्यथा। सप्तदशसामिधेन्यो भवन्तीति त्रिः प्रथमामन्वाह त्रिरुत्तमामित्यावृत्तितः सप्तदशत्वं
भवति। एवमिहाप्यावृत्तितोऽनेकाच्त्वं भविष्यति। भवेदावृत्तितः कार्यपरिहतम्। इह तु खलु
किरिणा गिरिणेत्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोत्येव। एतदपि सिद्धम्। कथम्। लोकतः। तद्यथा।
ऋषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो दत्त्वा तया सर्वे ते सहस्रदक्षिणाः संपन्नाः। एवमि
हाप्यनेकाच्त्वं भविष्यति। यदप्युच्यते द्रव्यवच्चोपचाराः प्राप्नुवन्तीति। भवेद्यदसंभवि कार्यं तन्नानेको
युगपत्कुर्यात्। यत्तु खलु संभवि कार्यमनेकोऽपि तद्युगपत्करोति। तद्यथा। घटस्य दर्शनं स्पर्शनं वा।
संभवि चेदं कार्यमकारस्योच्चारणं नामानेकोऽपि तद्युगपत्करिष्यति॥

ब्राह्मणपूतं भोज्यतामिति भुजेर्ब्राह्मणैः सह। संभवि चेति। एकस्यैवाकारस्य युगपत्स्थानकरणनिष्पन्नध्वनिव्यङ्ग्यत्वा
त्सर्वैरित्यर्थः॥

वित्तेनेति। वस्तुतस्तु दानप्रतिग्रहमात्रात्सहस्रेण सहस्रदक्षिणत्वोपपादनं युक्तम्। ऋषीणां गोविक्रयस्य स्मृतिप्रतिषिद्ध
स्य कल्पनाया अन्याय्यत्वादिति बोध्यम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं परिहृतेष्वपि दोषेषु तन्त्रन्यायेनाकारस्य भेदं साधयति। आन्यभाव्यमिति। अन्यस्य भावोऽन्यभावः। ततो ब्राह्मणादिषु स्वार्थे विधानार्थात्पाठात्स्वार्थे ष्यञ्। अथवान्यो भावोऽन्यद्वस्तु तस्य भाव इति भावे ष्यञ्। इह कालशब्दाभ्यां व्यवधानं भिन्नानां दृष्टम्। यथा असंहितायाम् अ इ उ इत्यादीनां कालव्यवायः। इतिरित्यादौ शब्दव्यवायः। तत्र तकारेणाकारेकारयोर्व्यवधानात्। एकत्वे तु व्यवधानं न दृष्टम्। यथा अ इति केवलाकार उच्चार्यते तस्मादुदात्तादिगुणभेदात्कालशब्दव्यवायाच्च नानात्वमकारस्य। प्रत्यभिज्ञानं चात्वादिसामान्यनिबन्धनम्। यद्यपि शब्दव्यवायेऽपि कालव्यवायोऽस्ति तथापि कालव्यवाय एव द्विधा द

आन्यभाव्यं तु कालशब्दव्यवायात्। आन्यभाव्यं त्वकारस्य। कुतः। कालशब्दव्यवायात्। कालव्यवायात् शब्दव्यवायाच्च। कालव्यवायात्। दण्ड अग्रम्। शब्दव्यवायात्। दण्डः। न चैकस्यात्मनो व्यवायेन भवितव्यम्। भवति चेद्भवत्यान्यभाव्यमकारस्य। युगपच्च देशपृथक्त्वदर्शनात्। युगपच्च देशपृथक्त्वदर्शनान्मन्यामहे आन्यभाव्यमकारस्येति। यदयं युगपद्देशपृथक्त्वेषूपलभ्यते। अश्वः अर्कः अर्थ इति। नह्येको देवदत्तो युगपत्स्रुघ्ने च भवति मथुरायां च॥ यदि पुनरिमे वर्णाः शकुनिवत्स्युः। तद्यथा। शकुनय आशुगामित्वात्पुरस्तादुत्पतिताः पश्चाद्दृश्यन्ते। एवमकारो द इत्यत्र दृष्टोऽग्र इत्यत्र दृश्यते। नैवं शक्यम्॥

र्शितः। शब्दशून्यः शब्दवांश्च। यदि पुनरिति। कालशब्दाभ्यां व्यञ्जकानामेव ध्वनीनां व्यवायो न व्यङ्ग्यस्येति व्यक्तिस्फोटवादिनो भावः। यथा शकुनिः पङ्क्त्यादौ स्थित आशुसंचारात्तदन्ते भवति। एवं व्यञ्जकध्वनिसन्निधानासन्निधानाभ्यामकारस्योपलम्भानुपलम्भावित्यर्थः। ॥

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ जातिस्फोटवादी व्यक्तिस्फोटवादिनं पर्यनुयुङ्क्ते। अनित्यत्वमिति। भवता जातिस्तावन्नाभ्युपगम्यते व्यक्तेरेवैकत्वप्रतिज्ञानात्त ११२
२६ स्यैकत्वं नित्यत्वं नोपपद्यते। दण्ड इत्युदात्तानुदात्तस्वरभेदेन भिन्नत्वान्नह्येकस्यैवोदात्तत्वपरित्यागेनानुदात्तत्वं युक्तम्। रूपान्तरपरिग्रहा
दनित्यत्वप्रसङ्गात्। तस्माद्भिन्ना एवानित्या एवाकाराः प्रत्यभिज्ञा लत्वनिबन्धनेति जातिस्फोटपक्षोत्र स्थितः। व्यक्तिस्फोटवाद्याह। अ
कारमपीति। श्रोत्रोपलब्धिरिति। श्रोत्रोपलब्ध्या आकाशदेशत्वं शब्दस्य प्रतिपादयति। आकाशप्रदेशविशेषस्य श्रोत्रत्वादिन्द्रि-
याणामसंबद्धविषयाग्रहणात् श्रोत्रस्य च निष्क्रियत्वाद्गमनाभावादाकाशदेशत्वं शब्दस्यावश्यमभ्युपेयम्। बुद्धिनिर्ग्राह्य इ

अनित्यत्वमेवं स्यात्। नित्याश्च शब्दाः। नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपज
नविकारिभिः। यदि चायं दइत्यत्र दृष्टो ण्ड इत्यत्र दृश्येत नायं कूटस्थः स्यात्। यदि पुनरिमे वर्णा आदि
त्यवत्स्युः तद्यथा। एक आदित्योनेकाधिकरणस्थो युगपद्देशपृथक्त्वेषूपलभ्यते। विषम उपन्यासः
। नैको द्रष्टा आदित्यमनेकाधिकरणस्थं युगपद्देशपृथक्त्वेषूपलभते। अकारं पुनरुपलभते। अका
रमपि नोपलभते। किं कारणम्। श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः
शब्दः। एकं च पुनराकाशम्। आकाशदेशा अपि बहवः। यावता बहवः तस्माद्दान्यभाव्यमकारस्य।

ति। पूर्वपूर्वध्वन्युत्पादिताभिव्यक्तिजनितसंस्कारपरंपराप्राप्तपरिपाकान्त्यबुद्धिनिर्ग्राह्य इत्यर्थः। प्रयोगेणेति। प्रयु
ज्यत इति प्रयोगो ध्वनिः तेनाभिव्यक्तः देशभेदेन तु प्रतिभासो भिन्नदेशावस्थितपुरुषोदीरिताभिव्यञ्जकध्वनिकृ रा॰म॰
तः। भेदं वाद्याह। आकाशदेशा इति। यथा पृथिव्या एकत्वेपि स्रुघ्नमथुरादिदेशव्यवहारः। एवमाकाशस्यापि संयोगि २६
घटादिपदार्थावच्छेदे नभेदव्यवहार इत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंव्यक्तिस्फोटपक्षेनिराकृतेजातिस्फोटपक्षएवाश्रीयते।आकृतिग्रहणादिति।अकारजातिःसर्वप्रदेशेषुनिर्दिश्यते।नान्तरीयकस्तुव्यक्तिनिर्देशः।तत्रप्रत्याहारेऽकारजातेर्निर्देशात्तस्याश्चविवृतत्वप्रतिज्ञानाच्छास्त्रान्तेतस्याएवप्रत्यापत्तिविधानम्।तदेवंजातिनिर्देशादनुवृत्तिनिर्देशस्थेनाकारेणाग्रहणमाकारस्येतिसिद्धम्।अष्टनआविभक्तावित्यत्रसत्यपिजातिनिर्देशेदीर्घोच्चारणसामर्थ्याद्ध्रस्वस्यग्रहणंनभवति।अन्यथाह्रस्वमेवोच्चारयेत्।प्लुतश्चविषयेस्मृतइतिन्यायात्प्लुतस्याग्रहणम्।तद्वच्चेति।सआकृतिपक्षोयत्राश्रितस्तद्वत्।अथवावक्ष्यन्नमेतत्तद्वत्।तत्रन्यायेनाकृतिपक्षस्यस्थापितत्वात्परेष्वपिसएवपक्षःस्थितइत्यर्थः।-

आकृतिग्रहणात्सिद्धम्।अवर्णाकृतिरुपदिष्टासर्वमवर्णकुलंग्रहीष्यति।तथेवर्णाकृतिस्तथोवर्णाकृतिः।तद्वच्चतपरकरणम्।एवंचकृत्वातपराःक्रियन्ते।आकृतिग्रहणेनातिप्रसक्तमिति।ननुचसवर्णग्रहणेनातिप्रसक्तमितिकृत्वातपराःक्रियेरन्।प्रत्याख्यायतेतत्सवर्णेऽणग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वाच्चेति।हल्ग्रहणेषुच।किम्।आकृतिग्रहणात्सिद्धमित्येव।झलोझलि।अवात्ताम्।अवात्तम्।अवात्त।यत्रैतन्नास्तिअणसवर्णान्गृह्णातीति।रूपसामान्याद्वा।रूपसामान्याद्वासिद्धमेतत्।तद्यथा।तानेवशाटकानाच्छादयामःयेमथुरायाम्।तानेवशालीन्भुञ्ज्महेयेमगधेषु।तदेवेदंभवतःकार्षापणंयन्मथुरायांगृहीतम्।अन्यस्मिंश्चान्यस्मिंश्चरूपसामान्यात्तदेवेदमितिभवति।

।एवमिहापिरूपसामान्यात्सिद्धम्॥

हल्ग्रहणेषुचेति।अवश्याश्रयणीयतामाकृतिपक्षस्यदर्शयति।व्यक्तिपक्षेह्येकस्यैवतकारस्यानुकरणंखफछठथेत्यत्रतदितिद्वयोस्तकारयोर्झल्त्वंनस्यात्।अपित्वेकस्यैवेत्यवात्तामित्यत्रसिज्लोपोनस्यात्।अभित्थाइत्यादावेव-स्यात्।रूपसामान्यादिति।व्यक्तिनिर्देशेऽपिभेदापरामर्शेनलोकवदभेदव्यवहारोऽस्तीतिसिद्धमिष्टम्।व्यक्तिव्यतिरिक्तं॥सामान्यंभवतुवामाभूत्सर्वथालोकइवशास्त्रेव्यवहारइत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा०कै० ऋलृक्॥ अल्पीयानिति। ऋकारापेक्षयात्र प्रकर्षः। ऋकारस्याल्पः प्रयोगस्ततोऽप्यस्याल्पतर इत्यर्थः। अल्पप्रयोगस्यापि का ११२
२७ र्यार्थमप्युपदेशः कर्तव्य इत्याशङ्क्याह। यश्चापीति। तत्र ऋकारावस्थायामेवोदात्तादिषु कृतेषु स्थानेऽन्तरतम इति स्थानिसदृ
शो लृकारो भविष्यति। यदृच्छेति। अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः प्रयोक्त्रभिप्रायेणैव प्रवर्तते स यदृच्छाश-
ब्दो डित्थादिः। ऋकारलृकारयोः सवर्णविधिरित्यस्य वार्तिककारवाक्यत्वात्सूत्रकारेणानाश्रितत्वादत्र लृकारोपदेशः

ऋलृक्॥ अथ लृकारोपदेशः किमर्थः। किं विशेषेण लृकारोपदेशश्चोद्यते न पुनरन्येषामपि वर्णानामुपदेशश्चोद्यते। यदि किंचिदन्येषामपि वर्णानामुपदेशे प्रयोजनमस्ति। लृकारोपदेशस्यापि तद्भवितुमर्हति। को वा विशेषः। अयमस्ति विशेषः। अस्य हि लृकारस्याल्पीयांश्चैव प्रयोगविषयः। यश्चापि प्रयोगविषयः सोऽपि क्लृपिस्थस्यैव क्लृपेश्च लत्वमसिद्धम्। तस्यासिद्धत्वादृकारस्यैवाच्कार्याणि भविष्यन्तीनार्थं लृकारोपदेशेन। अत उत्तरं पठति। लृकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुताद्यर्थः। लृकारोपदेशः क्रियते। यदृच्छाशब्दार्थोऽशक्तिजानुकरणार्थः प्लुताद्यर्थश्च। यदृच्छाशब्दार्थस्तावत्। यदृच्छया कश्चिल्लृतको नाम तस्मिन्नच्कार्याणि यथा स्युः। दध्य्लृतकाय देहि। मध्व्लृतकाय देहि। उदङ्कूङ्लृतकोगमत्। प्रत्यङ्कूलृतकोगमत्। चतुष्टयी शब्दानां प्रवृत्तिः। जातिशब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चतुर्थाः। अशक्तिजानुकरणार्थः॥

कृतः। अर्थवत्सूत्रारम्भाच्चाव्युत्पन्ना यदृच्छाशब्दाः सन्तीत्यवगम्यते। गाव्यादीनां तु गवादिभिर्निवर्तितत्वादसाधुत्व रामः
म्। ऋतकशब्दस्त्वर्थाश्रयेणैव विनियुक्त इति लृतकशब्दस्यानिवर्तकः। अशक्तिजेति। अशक्तिजानुकरणस्य जा २९
तिशब्दत्वमिच्छन्ति। यस्मादनुक्रियमाणे शब्दे या जातिः समवेता तत्संबद्धमनुकार्यमनुकरणं प्रत्याययति॥ ॥

अर्थवत्सूत्रारम्भाच्चेति। चिन्त्यमिदं बहुचूर्वेतस्य चारितार्थ्यादिति दीक्षितनागेशौ। परमगार्ग्यायणः शिवभागवत इत्यत्र च चारितार्थ्यमिति वयम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्याय्यभावादिति। ऋतकशब्दो न्याय्यः। ऋदन्तं नाम कुर्यादिति स्मृतावुक्तत्वात्। ऋतिः सौत्रो धातुः। तत औणादिकः कुन् शिल्पिसंज्ञयोरपूर्वस्यापीति कुन्प्रत्ययः। संज्ञादिष्विति। आदिशब्देनैतद्दर्शयति जातिगुणक्रियानिमित्ता अपि शास्त्रान्विताः प्रयोक्तव्या इति। सर्वशब्दव्युत्पत्तिपक्षे किमर्थवत्सूत्रेणेति चेत् शिष्टप्रयुक्तानामेवाव्युत्पत्तिपक्षोप्यस्तीति ज्ञापनार्थमर्थवत्सूत्रोपादानमनुकरणशब्दानामव्युत्पन्नत्वात्तदर्थं च। अपर आह।

अशक्त्या कयाचिद्ब्राह्मण्या ऋतक इति प्रयोक्तव्ये लृतक इति प्रयुक्तं तस्यानुकरणं ब्राह्मणी लृतक इत्याह। कुमारी लृतक इत्याह। प्लुत्याद्यर्थश्च लृकारोपदेशः कर्तव्यः। के पुनः प्लुत्यादयः। प्लुतिद्विर्वचनस्वरिताः। क्लृ३प्तशिखः। क्लृप्तः प्रक्लृप्तः। प्लुत्यादिषु कार्येषु क्लृपेर्लत्वं सिद्धं तस्यासिद्धत्वादच्कार्याणि न सिध्यन्ति। तस्माद् लृकारोपदेशः क्रियते। नैतानि सन्ति प्रयोजनानि। न्याय्यभावात्कल्पनं संज्ञादिषु। न्याय्यस्य ऋतकशब्दस्य तावत्कल्पनं संज्ञादिषु साधु मन्यन्ते। ऋतक एवासौ न लृतक इति। अपर आह। न्याय्य ऋतकशब्दः शास्त्रान्वितोस्ति स कल्पयितव्यः साधुः संज्ञादिषु ऋतक एवासौ न लृतकः। अयं तर्हि यदृच्छाशब्दोऽपरिहार्यः। लृफिडः लृफिड्डश्चेति। एषोपि ऋफिडः ऋफिड्डश्च। कथम्॥

ति। पूर्वमुक्तमृतकशब्द एव न्याय्यत्वात्प्रयोक्तव्यो न तु लृतकशब्द इति। इदानीं तु ऋतकशब्दस्यैवायमपभ्रंशोऽशक्तिजत्वाद् लृतक इत्युच्यते। अयं तर्हीति। ऋतकशब्दोन्वाख्यातत्वाद्भवतु लृतकशब्दस्य निवर्तकः ऋफिडऋफिड्ड इत्येतौ त्वनन्वाख्याताविति कथम्लृफिडलृफिड्ड इत्येतयोर्निवर्तकौ स्यातामिति भावः। एषोपीति। उणादयो बहुलमित्येवान्वाख्यातावित्यर्थः॥ ॥

भा·कै· अर्तिप्रवृत्तिरिति।अर्त्तेःप्रकृतित्वेनप्रवृत्तिरित्यर्थः।नसन्तीति। अद्य त्वेपियदानामक्रियतेतदाप्रशस्यरूपाक्रियागु ११२
२८ णोवाध्यारोप्यतेइतिभावः।अन्यथाकृत्वेति।अव्युत्पत्तिपक्षाश्रयेणाचार्येणोपदिष्टस्तत्कारः वार्त्तिककारस्तुव्युत्प
त्तिपक्षाश्रयेणप्रत्याचष्टे।समानेचेति।इहचभिन्नार्थत्वम्।ऋतकशब्दोहियदासंज्ञात्वेनविनियुज्यतेक्वचित्पिण्डेतदा
तच्छब्दस्वरूपाध्यासः।ऋतकेतुविपर्ययःभिन्नस्वरूपौचैतौशब्दौइतिभावः।पक्षान्तरैरपीति।यथाद्रव्यपक्षेस

अर्तिप्रवृत्तिश्चैवल्लोकेलक्ष्यते।फिडफिड्डौवौणादिकौप्रत्ययौ।त्रयीचशब्दानांप्रवृत्तिः।जातिशब्दा
गुणशब्दाःक्रियाशब्दाइति। नसन्तियदृच्छाशब्दाः।अन्यथाकृत्वाप्रयोजनमुक्तमन्यथाकृत्वापरि
हारः।सन्तियदृच्छाशब्दाइतिकृत्वाप्रयोजनमुक्तम्।नसन्तीतिकृत्वापरिहारः।समानेचार्थेशास्त्रा
न्वितोऽशास्त्रान्वितस्यनिवर्तकोभवति।तद्यथा।देवदत्तशब्दोदेवदिन्नशब्दंनिवर्तयति।नगाव्यादी
न्।नैषदोषः।पक्षान्तरैरपिपरिहाराभवन्ति॥अनुकरणंशिष्टाशिष्टाप्रतिषिद्धेषुयथालौकिकवैदि
केषु।अनुकरणंहिशिष्टस्यसाधुभवति।अशिष्टाप्रतिषिद्धस्यवानैवतद्दोषायभवतिनाभ्युदयाय।
यथालौकिकवैदिकेषु।यथालौकिकेषुवैदिकेषुचकृतान्तेषु।लोकेतावत्।यएवमसौददातियएव
मसौयजतेयएवमसावधीतइतितस्यानुकुर्वन्दद्याच्चयजेतचाधीयीतचसोप्यभ्युदयेनयुज्यते॥

रूपाणामित्यस्यारम्भः।जातिपक्षेतुप्रत्याख्यानम्।एवमसापीत्यर्थः।अव्युत्पन्नसंज्ञाशब्दपक्षेपिपारंपर्यागताःशिष्टप्र- रा·म·
युक्ताएवसंज्ञाःकर्त्तव्याः।प्रयोजनान्तरमपिवार्त्तिककारःप्रत्याचष्टे।अनुकरणमिति।अनुकार्यस्यदुष्टत्वादनुकरणस्या २८
पिदुष्टत्वंमन्यतेसुरापानानुकरणवत्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषमइति।नह्यनुकार्यस्यदोषेणानुकरणस्यदुष्टत्वमितिदर्शयति।यश्चेति।विहितकरणाद्धर्मोत्पत्तिः प्रतिषिद्धाचरणाच्चाधर्मोत्पत्तिः।नत्वनुमानेनधर्माधर्मयोर्व्यवस्थेतिमन्यते।सुरापानादौतुतस्याएवक्रियायाअनुष्ठानात्तादृश्याभावान्नास्तिअनुकरणत्वम्।दानादीनांस्मार्तत्वाल्लौकिकत्वमुच्यते।स्नातानुलिप्तइति।स्वस्थचित्तत्वंदर्शयति।अस्वस्थे

वेदेपियएवंविश्वसृजःसत्राण्यध्यासतइतितेषामनुकुर्वन्तद्वत्सत्राण्यध्यासीतसोऽभ्युदयेनयुज्यते।अशिष्टाप्रतिषिद्धंयएवमसौहिक्कतियएवमसौहसतियएवमसौकण्डूयतीतितस्यानुकुर्वन्हिक्केच्चहसेच्चकण्डूयेच्चनैवतद्दोषायस्यान्नाभ्युदयाय।यस्तुखल्वेवमसौब्राह्मणंहन्तिएवमसौसुरांपिबतीतितस्यानुकुर्वन्ब्राह्मणंहन्यात्सुरांवापिबेत्सोपिमन्येपतितःस्यात्।विषमउपन्यासः।यश्चैवंहन्तियश्चानुहन्तिउभौतौहतः।यश्चापिपिबतियश्चानुपिबतिउभौतौपिबतः।यस्तुखल्वेवमसौब्राह्मणंहन्तिएवमसौसुरांवापिबतीतितस्यानुकुर्वन्स्नातानुलिप्तोमाल्यगुणकण्ठःकदलीस्तम्भंछिन्द्यात्पयोवापिबेत्नसमन्येपतितःस्यात्।एवमिहापियएवमसावपशब्दंप्रयुङ्क्तेइतितस्यानुकुर्वन्नपशब्दंप्रयुञ्जीतसोप्यपशब्दभाक्स्यात्।अयंत्वन्योपशब्दपदार्थकःशब्दोयदर्थउपदेशःकर्तव्यः।नचापशब्दपदार्थकःशब्दोपशब्दोभवति।अवश्यंचैतदेवंविज्ञेयम्।योहिमन्यतेऽपशब्दपदार्थकःशब्दोपशब्दोभवतीति॥

नहिचित्तेन   अकार्यंक्रियते।माल्यगुणकण्ठइति।लोकमध्येप्रकाशतइत्यर्थः।अकार्यंह्यप्रकाशंक्रियते।तत्रलृतकशब्दोपियदाकृतकार्येप्रयुज्यतेतदापशब्दः।यदात्वनुकार्यंप्रत्याययतितदासाधुरेव।अर्थभेदात्।अस्वगोण्यादिवत्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

भा० कै० अपशब्द इत्येवेति। अस्य हि गाव्यादयोऽपभ्रंशा वाच्याः। अयमिति। असाधोरनुकरणमित्येतदप्यत्र नास्तीति भा ११२
२९ वः। भवेदिति। प्रयोगस्यैवेदमनुकरणम्। प्रयोगे च नास्ति पूर्वत्रासिद्धमिति भावः। प्रकृतिवदिति। तत्र यथा क्लृपे
र्लत्वस्यासिद्धत्वादृकारद्वारेण ऌकारस्याच्कार्यं तथानुकरणस्यापीत्यर्थः। द्विरिति। पचन्तु पचन्त्विति केनचिदु
क्ते द्विः पचन्त्वित्यनुकरणम्। एतच्च क्रियासाधनाद्यनभिधानात्तिङन्तं न भवति। एवमग्नी इत्यनुकरणं द्व्यर्थान

अपशब्द इत्येव तस्यापशब्दः स्यात्। न चैषोपशब्दः। अयं खल्वपि भूयोनुकरणशब्दोऽपरिहा
र्यः यदर्थ उपदेशः कर्तव्यः। साध्वॢकारमधीते। मध्वॢकारमधीत इति। कस्य स्य पुनरेतदनुकर
णम्। क्लृपिस्थस्य। यदि क्लृपिस्थस्य क्लृपेश्च लत्वमसिद्धं तस्यासिद्धत्वादृकार एवाच्कार्याणि
भविष्यन्ति। भवेत्तदर्थेन नार्थः स्यात्। अयं त्वन्यः क्लृपिस्थपदार्थकः शब्दः यदर्थ उपदेशः कर्तव्यः
। न कर्तव्यः। इदमवश्यं कर्तव्यम्। प्रकृतिवदनुकरणं भवतीति। किं प्रयोजनम्। द्विः पचन्त्वि-
त्याह। तिङ् तिङ इति निघातो यथा स्यात्। अग्नी इत्याह। ईदूदेद्द्विवचनं प्रगृह्यं संज्ञं भवतीति
प्रगृह्यसंज्ञा यथा स्यात्। यदि प्रकृतिवदनुकरणं भवतीत्युच्यते। अपशब्द एवासौ भवति कु
मार्य्लृतक इत्याह ब्राह्मण्य्लृतक इत्याह। अपशब्दो ह्यस्य प्रकृतिः॥

भिधानान्न हि वचनान्तम्। ननु गम्लृ सृप्लृ इत्यादिस्थस्य यदानुकरणं तदा कथं प्रकृतिवद्भावः। द्युताद्युदित इ ए मः
ति ऌकारे परतो यणादेशकरणादित्संज्ञानुवादाच्च धात्वनुबन्धस्य ऌकारस्याच्कार्याण्यनुमीयन्ते। ततस्तद २९
नुकरणस्य सिद्धः प्रकृतिवद्भावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचापशब्द इति। सिद्धान्तवादी। प्रकरणाद्धि शास्त्रीया प्रकृतिराश्रीयते। शास्त्रनिबन्धनं च कार्यमतिदिश्यते। अपशब्दश्च न शास्त्रीया प्रकृतिरनुपदिष्टत्वात्। न चापशब्दत्वं शास्त्रीयं कार्यं नापि तदतिदेष्टुं शक्यम्। न हि साधोरसाधुत्वातिदेदेशो युक्तिमान्। एवं भाष्यकारेण शक्तिजानुकरणार्थत्वम् ऌकारोपदेशस्य स्थापितम्। एकदेशविकृतस्येति। ऋकारे रेफभागस्य लेकृते स एव ऋकार इति प्रत्यभिज्ञानादिति भावः। षष्ठीनिर्दिष्टस्येति। राज्ञः क च इत्यत्र राजन्शब्दः षष्ठीनि-

नचापशब्दः प्रकृतिः। न ह्यपशब्दा उपदिश्यन्ते। न चानुपदिष्टा प्रकृतिरस्ति। एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः। एकदेशविकृतमनन्यवद्भवतीति प्लुत्यादयोऽपि भविष्यन्ति। यद्येकदेशविकृतमनन्यवद्भवतीत्युच्यते। राज्ञः क च। राजकीयम्। अल्लोपोऽन इति लोपः प्राप्नोति। एकदेशविकृतमनन्यवत् षष्ठीनिर्दिष्टस्य। यदि षष्ठीनिर्दिष्टस्येत्युच्यते क्लृ३प्तशिख इति प्लुतो न प्राप्नोति। न ह्यत्र ऋकारः षष्ठीनिर्दिष्टः। कस्तर्हि। रेफः। ऋकारोऽप्यत्र षष्ठीनिर्दिष्टः। कथम्। अविभक्तिको निर्देशः। कृप उः रः लः कृपो रो ल इति। अथवा पुनरस्तु अविशेषेण। ननु चोक्तं राज्ञः क च। राजकीयम्। अल्लोपोऽन इति प्राप्नोतीति। नैष दोषः। वक्ष्यत्येतत् श्वादीनां संप्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थमिति। तत्प्रकृतमुत्तरत्रानुवर्तिष्यते। अल्लोपोऽनः नकारान्तस्येति। इह तर्हि क्लृ३प्तशिखः। अनृत इति प्रतिषेधः प्राप्नोति। रवत्प्रतिषेधाच्च। रवत्प्रतिषेधाच्चैतत्सिध्यति॥

र्दिष्टः न त्वन् इति लोपाभावः। यद्येवं कृपो रो ल इत्यत्रापि ऋकारः षष्ठ्या न निर्दिष्ट इत्यनन्यत्वं न प्राप्नोतीत्याह। यदीति। अथवेति। षष्ठीनिर्दिष्टस्येति नापेक्ष्यते। नकारान्तस्येति। न च राजन्शब्दः कादेशे कृते नकारान्तो भवति श्ववपुच्छे छिन्नेन पुच्छवानिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कौ॰ अरवतइति। रोऽस्यास्तीति नित्यमिति नित्ययोगे मतुप्। तेन ऋकार एव रवान्न तु वर्तक इत्यादावकारः। न रवान् अरवा-
३० निति समासः। नित्ययोगप्रतिपादनाय बहुव्रीहिर्न कृतो गुरोररस्येति। ह्रस्वस्येति। तेन ह्रस्वस्यैवारवतः प्लुतनिषेधो
न दीर्घस्य। वार्त्तिककारस्य लृकारप्रत्याख्यानं निष्प्रयोजनमित्याह। सैषेति। एओङ्। ऐऔच्। इदं विचार्यत इति।
तपरा तपरसंध्यक्षरोपदेशो विचार्यत इत्यर्थः। तत्रोपदिश्येरन्नित्यत्रासत्त्वभूतायद्यपि क्रियाभिधीयते तथापि
बुद्ध्या परामृष्टा सत्त्वरूपतामापादिता विचारक्रियायां कर्मभावमनुभवति। यथा पश्य मृगो धावतीति स्मरणं द्रष्ट

गुरोररवत इति वक्ष्यामि। यद्यरवत इत्युच्यते। होतृ ऋकारः होत्लृ ३कारः अत्र न प्राप्नोति। गुरोरर
वतः ह्रस्वस्येति वक्ष्यामि। स एष सूत्रभेदेन लृकारोपदेशः प्लुत्याद्यर्थः सन्प्रत्याख्यायते सैषा महतो
वंशस्तम्बाल्लट्वानुकृष्यते॥ एओङ्। ऐऔच्। इदं विचार्यते। इमानि संध्यक्षराणि तपराणि वोप
दिश्येरन्। एत् ओत् ङ्। ऐत् औत् च् इति। अतपराणि वा यथान्यासमिति। कश्चात्र विशेषः। संध्य
क्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम्। संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणं कर्तव्यम्। प्लुता
दिष्वज्विधिः। प्लुतादिष्वज्ञाश्रयो विधिर्न सिध्यति। गो ३ त्रात नौ ३ त्रात इत्यत्रानचि च अच इत्युत्तरस्य
यरो द्वे भवत इति द्विर्वचनं न प्राप्नोति। इह प्रत्यङ्ङ् ३ इति का ३ यन उदङ्ङ् ३ उपगव इति अचीति ङमुडागमो न प्राप्नोति

ने। कस्मान्नेति। कार्यकोविशेष इति प्रश्नः। तपरोपदेशश्चेदिति। यद्यप्युपदेश उच्चारणं तथापि तपरोपदेशफलं चे
दस्ति ततस्तपरोच्चारणं कर्तव्यमित्यर्थः। संध्यक्षराणीत्यन्वर्था पूर्वाचार्यसंज्ञा संधीयमानावयवत्वात्। प्लुतादि
ष्विति। प्लुतमभ्युपगम्याच्कार्याणि न सिध्यन्तीत्युच्यते॥

रोऽस्यास्तीति। इदं चिन्त्यम्। अवयवादावेवमत्वर्थो नानन्तरादाविति वर्त्तक इत्यादौ रवत्त्वस्योपपादयितुमशक्यत्वान्नित्ययो रा॰म॰
गपर्यन्तं धावनमफलमिति विवरणमेव चिन्त्यम्। उरण्रपर इति शास्त्रेण रेफेऽवयवत्वस्य बोधनेन वर्तक इत्यादावकारे रव ३०
त्त्वस्य सूपपादत्वादिति गुरुवर जगन्नाथशास्त्रिणः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्लुत एव न प्राप्नोतीति दर्शयितुमाह। प्लुतसंज्ञा चेति। त्रिमात्रस्याचः प्लुतसंज्ञा विधीयते। तपरत्वे च त्रिमात्रस्याग्रहणाद-
च्त्वाभावः। तत्रैव चाप्लुतो विधीयमान इकारोकाराभ्यां गृहीत ईकार ऊकारश्च स्यात्। अतपर इति। असतीह तपरत्वे एकारौ-
काराभ्यां मात्रिकयोरर्द्धैकारार्द्धौकारयोर्ग्रहणादच्त्वाद्ध्रस्वत्वाद्विधानं स्यादिति सूत्रं कर्तव्यम्। तपरत्वे तु तयोरग्रहणान्ना-
स्य भावः। ननु चेति। सूत्रारम्भं प्रति न कश्चिद्विशेष इत्यर्थः। अतपरत्वे एच इति वक्तव्यं तपरत्वे त्वेच इति। ऐचोर्विश्लि-

प्लुतसंज्ञा च। प्लुतसंज्ञा च न सिध्यति। ऐ३तिकायन। औ३पगव। ऊकालोऽज्झ्रस्वदीर्घप्लुत इति संज्ञो भवती-
ति प्लुतसंज्ञा न प्राप्नोति। सन्तु तर्ह्यतपराणि। अतपर एच इग्घ्रस्वादेशे। यद्यतपराणि एच इग्घ्रस्वादेश इ-
ति वक्तव्यम्। किं प्रयोजनम्। एचो ह्रस्वादेशशासने स्वर्द्ध एकार अर्द्ध ओकारो वा माभूदिति। ननु च य-
स्यापि तपराणि तेनाप्येतद्वक्तव्यम्। इमावैचौ समाहारवर्णौ मात्रावर्णस्य मात्रेवर्णोवर्णयोः तयोर्ह्र-
स्वादेशशासनेषु कदाचिदवर्णः स्यात् कदाचिदिवर्णोवर्णौ मा कदाचिदवर्णो भूदिति। प्रत्याख्यायते
एतत्। ऐचोश्चोत्तरभूयस्त्वादिति। यदि प्रत्याख्यानपक्षः इदमपि प्रत्याख्यायते। सिद्धमेङः सस्थान-
त्वादिति। ननु चैङः सस्थानतरावर्द्ध एकारोऽर्द्ध ओकारः। न तौ स्तः। यदि हि तौ स्यातां तावेवायमुपदिशे-
त्। ननु च भो श्छन्दोगानां सात्यमुग्रिराणायनीया अर्द्धमेकारमर्द्धमोकारं चाधीयते।

ष्टावर्णत्वात्संश्लिष्टावर्णावर्द्ध एकारोऽर्द्ध ओकारो न भवतः। ऐचोश्चेति। अर्द्धमात्रावर्णस्याध्यर्द्धमात्रे वर्णोवर्णयोः। भूयसा
च व्यपदेशो मल्लग्रामादिवदितीकारोकारावेव भविष्यतः। सिद्धमेङ इति। अर्द्धैकारार्द्धौकारौ न स्तः। तत्र तालव्य एकार-
ओष्ठ्य ओकार इति तयोः स्थाने इकारोकारावेव भविष्यतः। तावेवेति। ताभ्यामुपदिष्टाभ्यां दीर्घप्लुतयोरपि ग्रहणं सिध्यती-
ति भावः। गुणसंज्ञायां तु दीर्घावेकारौकारौ निर्दिश्येते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· सुजातेइति।अन्तःपादस्थस्याव्यपरस्याकारस्याईमेकारमईमोकारंचविदधति।पारिषदकृतिरिति।गीतिवशान्तयोच्चा ११२
३१ रणमित्यर्थः।आन्तर्यतइति।अन्यस्यासंभवादिदमत्रनास्तिप्लुतश्चविषयेस्मतइत्यर्थः।अस्येकइति।प्रथमयोरिति-
सिद्धेएतदपिकिमर्थमुच्यतेइतिचेत्वाछन्दसीत्यत्रानुवृत्त्यर्थम्।तस्मात्पूर्वश्रुतिःपूर्वरूपार्थासैवोत्तरत्रानुवर्ततइ

सुजातेएअश्वसूनृते।अध्वर्योओअद्रिभिःसुतम्।शुक्रंतेएअन्यद्यजतंतेएअन्यदिति।पारिषदकृ
तिरेषातत्रभवतांनैवहिलोकेनान्यस्मिन्वेदेऽर्द्धएकारोर्द्धओकारोवास्ति।एकादेशेदीर्घग्रहणम्।ए
कादेशेदीर्घग्रहणंकर्तव्यम्।आद्गुणोदीर्घोवृद्धिरेचिदीर्घइति।किंप्रयोजनम्।आन्तर्यतस्त्रिमात्र
चतुर्मात्राणांस्थानिनांत्रिमात्रचतुर्मात्राआदेशामाभूवन्निति।खट्वाइन्द्रःखट्वेन्द्रःखट्वाउदकंखट्वोद
कंखट्वाईषाखट्वेषाखट्वाऊढाखट्वोढाखट्वाएलकाखट्वैलकाखट्वाओदनः खट्वौदनःखट्वाऐतिका
यनःखट्वैतिकायनःखट्वाऔपगवःखट्वौपगवइति।तत्तर्हिदीर्घग्रहणंकर्तव्यम्।नकर्तव्यम्।उपरि
ष्टाद्योगविभागःकरिष्यते।अकःसवर्णेएकोभवतिततोदीर्घः।दीर्घश्चसभवतियःसएकःपूर्वपरयो
रित्येवंनिर्दिष्टइति।इहापितर्हिप्राप्नोति।पशुंविद्धंपचन्तीति।नैषदोषः।इहतावत्पशुमितिअस्येक
इतीयतासिद्धंसोयमेवंसिद्धेसतियत्पूर्वग्रहणंकरोतितस्यैतत्प्रयोजनंयथाजातीयकःपूर्वस्त
थाजातीयकउभयोर्यथास्यादिति।विद्धमिति।पूर्वइत्येवानुवर्तते।अथवाआचार्यप्रवृत्तिर्ज्ञाप-
यतिनानेनसंप्रसारणस्यदीर्घोभवतीति।

तिविद्धमितिपूर्वरूपंभविष्यति।अथवेति।विधिनियमसंभवेविधिरेवबलीयानितिविधेर्बलीयस्त्वान्नियमोनभव राम:
तिहलएवदीर्घत्वंयथास्यादुइतइत्यादौमाभूदिति॥ ॥ ३१

CC-0. In Public Domain. Digitization by eGangotri

तपरे इति। तपरसंज्ञिसहचरिते गुणवृद्धिसंज्ञे इत्यर्थः। तादपीति। तन्त्रन्यायाश्रयणादेकस्यैव द्विशक्तित्वादेकशेषाश्रयणाद्वा अनेकार्थाभिधानमिति भावः। बहुव्रीहिवादी चोदयति। किं दकार इति। समासद्वयवादी तं प्रत्याह। अथ किं तकार इति। तवकेवलबहुव्रीहिवादिनो निष्प्रयोजनं तपरत्वम्। ऋकारस्यानण्त्वाद्भिन्नकालानां ग्रहणप्रसङ्गाद्गुणानां चाभेदकत्वात्तत्त्वार्थत्वाभावात्। अथ तवाऽसंदेहार्थो मुखसुखार्थो वा तकार एवं मम दकार इत्यर्थः। तित्स्वरितमित्यत्र त्वभाष्ये

यदयं हलउत्तरस्य संप्रसारणस्य दीर्घत्वं शास्ति। पचन्तीत्यतो गुणे पर इतीयता सिद्धं सोयमेवं सिद्धे सति यद्रूपग्रहणं करोति तस्यैतत्प्रयोजनं यथाजातीयकं परस्य रूपं तथाजातीयकमुभयोर्यथा स्यादिति। इह तर्हि खट्वर्श्यो मालर्श्य इति दीर्घवचनाद्कारेण। अनान्तर्यादेकारेकारेण। तत्र को दोषः। विगृहीतस्याश्रवणं प्रसज्येत। न ब्रूमो वयं यत्र क्रियमाणे दोषः तत्र कर्तव्यमिति। किं तर्हि। यत्र क्रियमाणे न दोषः तत्र कर्तव्यमिति। क्व च क्रियमाणे न दोषः। संज्ञाविधौ। वृद्धिरादैजू दीर्घः अदेङ्गुणो दीर्घ इति। तत्तर्हि दीर्घग्रहणं कर्तव्यम्। न कर्तव्यम्। कस्मादेवान्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति। तपरे गुणवृद्धी। ननु च तः परो यस्मात्सोयं तपरः। नेत्याह। तादपि परस्तपर इति। यदि तादपि परस्तपरः ऋदोरबितीहैव स्यात्। यवः स्तवः। लवः पव इत्यत्र न स्यात्। नैष तकारः। कस्तर्हि। दकारः। किं दकारे प्रयोजनम्। अथ किं तकारे। यद्यसंदेहार्थस्तकारः दकारोपि। अथ मुखसुखार्थस्तकारः दकारोपीति॥

णास्यविरोधः। तत्र हि तितिमस्य यग्रहणं चोदितम्। इह माभूत्। दिवउत् द्युभ्यामिति। ततो दित्त्वाश्रयणेन प्रत्याख्यातम्। तपरसूत्रे दकारश्चर्त्वभूतो निर्दिश्यते तेन तत्कालस्य ग्राहको दकार इत्युक्तम्। इह च दकाराभ्युपगमेन लवादिषु दोषः परिहृतः। अत्राहुः। थकारस्थानिको धकारस्थानिको वा दकारोत्र विवक्षितः। कस्तर्हि दकार इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा. कौ. वर्णान्तरसमानाकृतय इति। आकारादिष्वकारादिसदृशावयवा ऋकारऌकारयो रेफलकारसदृशावयवौ। संध्यक्षरेष्व १ १ २
३२ कारेकारोकारसदृशाः। तत्र केवलवर्णकार्यमवयवेषु भवति न वेति विचारः। इह हि समुदाया अपीति। ऋऌएओऐऔइ
ति। अवयवा अपीति। अइउण्ऋऌकिति। तत्र समुदायपरे निर्देशे सन्निहिता अप्यवयवा नान्तरीयकत्वादेजादिसंज्ञां
न लभन्ते। अवयवपरे च निर्देशे समुदायो न संज्ञाभाक्। यथा दयवेत्यादावनच्कस्य हलो दुःखेनोच्चार्यत्वान्निर्दिष्टोप्य-
कारोन्यत्र प्राधान्येन निर्देशाद्धलादिसंज्ञां न प्रतिपद्यत इति दध्यत्रेत्यादावनच्क एव यणादेशः प्रवर्तते। तत्रास्त्याम-
पेजादिसंज्ञायामयादयः समुदायादेशा अपि नान्तरीयकत्वादवयवान्निवर्तयन्ति। एवं स्थिते अग्न इन्द्र इत्यादौ यत्रा-
वयवकार्यं प्राप्नोति समुदायकार्यं च तत्रान्तरङ्गत्वात्तत्र च साक्षाच्चोदितत्वात्प्रत्यक्षत्वात्परत्वाच्चावयवकार्यप्रसङ्गः।

इदं विचार्यते। य एते षु वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतयः एतेषामवयवग्रहणेन ग्रहणं स्या
द्वा न वेति। कुतः पुनरियं विचारणा। इह हि समुदाया अप्युपदिश्यन्ते अवयवा अपि। अभ्यन्तरश्च
समुदायेऽवयवः। तद्यथा। वृक्षः प्रचलन्सहावयवैः प्रचलति। तत्र समुदायस्थस्यावयवस्यावयव
ग्रहणेन ग्रहणं स्याद्वा न वेति जायते विचारणा। कश्चात्र विशेषः।

अवयवावगतिपूर्वकत्वाद्धि समुदायावगमस्य समुदायकार्यं बहिरङ्गम्। अयादीनां चावकाशः। अग्न आयाहीति
। नन्वत्र यणादेशोवयवस्य प्राप्नोति। येन नाप्राप्त इति वा मध्येपवादा इति वा यण एवायादयो बाधकाः स्युः। तत्र यथा
दधीन्द्र इत्यत्र दधिशब्दस्य इकारः सवर्णदीर्घत्वं प्रतिपद्यते एवमेकारस्थोपि प्रतिपद्येत। प्रत्याहारे एओङ् ऐऔ
जित्यत्रावयवानां प्राधान्येनानिर्देशादित्येवं ग्रहणपक्षाशङ्काबीजमुपन्यस्तम्। इदानीमग्रहणपक्षाशङ्काबीज राम:
मुपन्यस्यते। अभ्यन्तरश्चेति। तिरोहितत्वादवयवानां समुदायकार्यपारतन्त्र्यात्स्वकार्ये स्वाप्रयोजकत्वान्नरसिं- ३२
हवज्जात्यन्तरयोगाद्वर्णान्तरसारूप्यमात्रेण तत्कार्याप्रवर्तनादित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानाक्षरेति। समानशब्देन पूर्वाचार्यनिर्द्दिष्टादकोऽभिधीयन्ते। दश समाना इति वचनात्। तेन सवर्णे कार्यं प्राप्नोतीत्यर्थः।

वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षरविधिप्रतिषेधः। वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षराश्रयो विधिः प्राप्नोति स प्रतिषेध्यः। अग्न इन्द्र। वायो उदकम्। अकः सवर्णे दीर्घ इति दीर्घत्वं प्राप्नोति॥ दीर्घे ह्रस्वविधिप्रतिषेधः॥ दीर्घे ह्रस्वाश्रयो विधिः प्राप्नोति स प्रतिषेध्यः। आलूय। प्रलूय। ह्रस्वस्य पिति कृति तुग्भवतीति तुक् प्राप्नोति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न दीर्घे ह्रस्वाश्रयो विधिर्भवतीति। यदयं दीर्घाच्छे तुकं शास्ति। नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्। पदान्ताद्वेति विभाषां वक्ष्यामीति। यत्तर्हि योगविभागं करोति। इतरथा हि दीर्घात्पदान्ताद्वेत्येव ब्रूयात्। इह तर्हि खट्वाभिः मालाभिः अतो भिस ऐस् इत्यैस्भावः प्राप्नोति। तपरकरणसामर्थ्यान्न भविष्यति। इह तर्हि याता वाता अतो लोप आर्द्धधातुक इत्यकारलोपः प्राप्नोति। ननु चात्रापि तपरकरणसामर्थ्यादेव न भविष्यति। अस्ति ह्यन्यत्तपरकरणे प्रयोजनम्। किम्। सर्वस्य लोपो मा भूदिति। अथ क्रियमाणेऽपि तपरे परस्य लोपे कृते पूर्वस्य कस्मान्न भवति। परलोपस्य स्थानिवद्भावादसिद्धत्वाच्च। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न आकारस्थस्याकारस्य लोपो भवतीति। यदयमातोऽनुपसर्गे क इति ककारमनुबन्धं करोति। कथं कृत्वा ज्ञापकम्। कित्करणे परस्य अकारस्य लोपे कृते द्वयोरकारयोः पररूपे हि सिद्धं रूपं स्यात् गोदः कम्बलद इति। पश्यति त्वाचार्यो नाकारस्थस्याकारस्य लोपः स्यादिति। अतः ककारमनुबन्धं करोति। नैतदस्ति ज्ञापकम्। उत्तरार्थमेतत्स्यात्। तुन्दशोकयोः परिमृजापनुदोरिति।

असिद्धत्वाच्चेति। असिद्धवदत्राभादित्यनेन। एतत्प्रयोजनं कितीत्याकारलोपो यथा स्यादिति। यद्याकारस्थस्याकारस्य लोपः स्यात् कित्करणमनर्थकं स्यात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्तर्हीति। नन्वसतिकित्वे आकारस्य स्याकारस्यलोपे कृते द्वयोरकारयोः पररूपस्य धातुं प्रत्यन्तवद्भावाच्छन्दो गायेत्यत्रातो धातोरित्याकारलोपप्रसङ्गः। नैष दोषः। सन्निपातपरिभाषयालोपो न भविष्यति। अकारं ह्याश्रित्य यण्प्रवृत्तः कृते लोपस्यानिमित्तम्। दीर्घत्वं तु कष्टायेति निपातनाद्भवति॥ एकवर्णवदिति। अवयवसंख्याश्रयणेन वा कृण्प्रवृत्तस्य द्व्यच्त्वात्तन्निमित्तं कार्यं प्राप्नोतीत्येकवर्णवदित्यतिदेशः क्रियते। गोनोग्रहणं ज्ञापकमिति। सामान्येन ज्ञापकं वर्णावयवाश्रयकार्याभावस्य। अग्न एहीत्यादावेङः पदान्तादतीत्याद्यपि न भवति। नाव्यपवृक्तस्येति। व्यपवर्गो व्यपवृक्तं भेदः। तेनाव्यपवृक्तस्याभिन्नबुद्धिविषयस्यैकत्वालम्बनज्ञानग्राह्यस्य समुदायस्य योवयवस्तस्मिंस्तद्विधिः पृथग्भूतवर्णविधिर्न भवतीत्यर्थः। अव्यपवृ

यत्तर्हि गापोष्टगित्यनन्यार्थं ककारमनुबन्धं करोति॥ एकवर्णवच्च॥ एकवर्णवच्च दीर्घो भवतीति वक्तव्यम्। किं प्रयोजनम्। वाचा तरतीति द्व्यज्लक्षणष्ठन्मा भूदिति। इह च वाचो निमित्तं तस्य निमित्तं संयोगोत्पाताविति अनुवर्तमाने गोद्व्यचइति द्व्यज्लक्षणो यन्मा भूदिति। अत्रापि गोनोग्रहणं ज्ञापकं दीर्घाद्व्यज्लक्षणो विधिर्न भवतीति। अयं तु सर्वेषामेव परिहारः॥ नाव्यपवृक्तस्यावयवस्य तद्विधिर्यथा द्रव्येषु॥ नाव्यपवृक्तस्याव यवस्यावयवाश्रयो विधिर्भवति यथा द्रव्येषु। तद्यथा द्रव्येषु सप्तदश सामिधेन्यो भवन्तीति न सप्तदशारत्निमात्रं काष्ठमग्नावभ्याधीयते। विषम उपन्यासः। प्रत्यृचं चैव हि तत्कर्म चोद्यते। असंभवश्चाग्नौ वेद्यां च।

क्तस्य अवयवस्येति व्यधिकरणे षष्ठ्यौ अव्यपवृक्तस्य समुदायस्य योवयवस्तस्येत्यर्थः। न हि संभवमात्रेण कार्याणि क्रियन्तेऽपि तु यत्र तद्बुद्धिरस्ति तत्रैवेत्यर्थः। माषा न भोक्तव्या इति निषेधस्तु मिश्रेष्वपि प्रवर्त्तते तत्र तद्बुद्धिस्तद्रसास्वादनसंभवात्। सप्तदशेति। सामिधेनीशब्द ऋचां वाचक उपचारात्काष्ठेषु वर्त्तते तत्र सप्तदशहस्तं काष्ठं सप्तदशकाष्ठानीति बुद्धेरभावान्न तस्याभिधानम्। असंभव इति। अर्द्धचतुर्हस्ता हि वेदिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा तर्हीति। अल्पप्रमाणत्वात्स्यात्संभव इति भावः। अव्यपवृक्तमिति। व्यपवर्गस्याभावेनेत्यर्थः। यत्र तर्हीति। ऐऔ इत्यत्र हि स्फुटोऽकारप्रतिभासोऽस्ति। विवृततरत्वादिति। अकारस्य विवृतोपदेशादत्र प्रकर्षो विवक्षितस्तदाह। विवृततरमिति। तत्र प्रयत्नभेदादसावर्ण्यादकारेण संध्यक्षरावयवस्य ग्रहणं नास्तीत्यर्थः। तदेवमाकारादिस्थस्यावयवस्य भेदेनाग्रह-

यथा तर्हि सप्तदशप्रादेशमात्रीराश्वत्थीः समिधोऽभ्यादधीतेति न सप्तदशप्रादेशमात्रं काष्ठमग्नावभ्याधीयते। अत्रापि प्रतिप्रणवं चैतत्कर्म चोद्यते। तुल्यश्चासंभवोऽग्नौ वेद्यां च। यथा तर्हि तैलं न विक्रेतव्यं मांसं न विक्रेतव्यमिति व्यपवृक्तं च न विक्रीयते। अव्यपवृक्तं गावः सर्षपाश्च विक्रीयन्ते। तथा लोमनखं स्पृष्ट्वा शौचं कर्तव्यमिति व्यपवृक्तं स्पृष्ट्वा नियोगतः कर्तव्यम्। अव्यपवृक्ते कामचारः। यत्र तर्हि व्यपवर्गोऽस्ति। क्व च व्यपवर्गोऽस्ति। संध्यक्षरेषु। संध्यक्षरेषु विवृततरत्वात्। यदत्रावर्णं विवृततरं तदन्यस्मादवर्णाद्येऽपीवर्णोवर्णे विवृततरे ते अन्याभ्यामिवर्णोवर्णाभ्याम्। अथवा पुनर्न गृह्यन्ते। अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणम्। अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणं कर्तव्यम्। तस्मान्नुड् द्विहलः ऋकारे चेति वक्तव्यम्। इहापि यथा स्यात्। आनृधतुः आनृधुरिति। यस्य पुनर्गृह्यन्ते द्विहल इत्येव तस्य सिद्धम्। यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। द्विहल्ग्रहणं न करिष्यते। तस्मान्नुड् भवतीत्येव। यदि न क्रियते। आटतुः आटुरित्यत्रापि प्राप्नोति। अश्नोतिग्रहणं नियमार्थं भविष्यति।

णादग्रहणं संध्यक्षरस्थस्य त्वसावर्ण्यात्। ऋकारस्थस्तु रेफो भेदेन प्रतिभासाद्गृह्यत इति नुडादिसिद्धिः। अथवेति। नरसिंहवद्वर्णान्तरत्वात्सादृश्याच्च प्रत्यभिज्ञानात्तत्त्वासिध्या पृथगुपलब्ध्यानां वर्णानां समुदायेनास्तित्वम्। समुदायवाचोयुक्तिरपि तत्र वर्णान्तरे न तात्त्विकी भ्रान्तिवशात्त्ववयवसद्भावाश्रयेण प्रवृत्ता। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अश्नोतेरेवेति। सामान्येनावर्णोपधो निवर्त्यते न त्वश्नातिरेव। सामान्यापेक्षत्वान्नियमज्ञापकस्य। अविभक्तिक इति। तत्र ऋकारनिर्दे-
श सामर्थ्याद्विभागं प्रकल्प्यादेशो विधीयते। स्फोटमात्रमिति। जातिस्फोट इत्यर्थः। ततश्चान्तर्भू तानन्तर्भूतरेफलकारव्यङ्ग्यं
सामान्यं स्थान्यादेशभावेनाश्रीयते। यत्तदिति। रेफाद् इक्ते रिति समानाधिकरणे पञ्चम्यौ। अड्व्यवाय इति। ऋकारेण यथा दीर्घो ग्र

अश्नोतेरेवावर्णोपधस्य नान्यस्यावर्णोपधस्येति। लादेशे च ऋकारग्रहणं कर्त्तव्यम्। कृपो रो लः ऋकारस्य
चेति वक्तव्यम्। इहापि यथा स्यात्। क्लृप्तः क्लृप्तवानिति। यस्य पुनर्गृह्यन्ते रइत्येव तस्य सिद्धम्। यस्यापि न गृह्य
न्ते तस्याप्येष न दोषः। ऋकारोऽप्यत्र निर्दिश्यते। कथम्। अविभक्तिको निर्देशः। कृप उः रः लः कृपो रो ल इति।
अथवा उभयतः स्फोटमात्रं निर्दिश्यते। रश्रुतेर्लश्रुतिर्भवतीति। विनाप्येवमृकारग्रहणं कर्त्तव्यम्। रषाभ्यां
नो णः समानपदे ऋकाराच्चेति वक्तव्यम्। इहापि यथा स्यात्। मातॄणां पितॄणामिति। यस्य पुनर्गृह्यन्ते रः
षाभ्यामित्येव तस्य सिद्धम्। न सिध्यति। यत्तद्रेफात्परं भक्तेः तेन व्यवहितत्वान्न प्राप्नोति। मा भूदेवम्। अ-
ड्व्यवाय इत्येव सिद्धम्। न सिध्यति। वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते। ये व्यपवृक्ता अपि वर्णा भवन्ति।
यच्चापि रेफात्परं भक्तेः न तत्क्वचिदपि व्यपवृक्तं दृश्यते। एवं तर्हि योगविभागः करिष्यते। रषाभ्यां नो णः
समानपदे। ततो व्यवाये। व्यवाये च रषाभ्यां नो णो भवतीति। ततोऽट्कुप्वाङ्नुम्भिरिति। इदमिदानीं किम
र्थम्। नियमार्थम्। एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैरिति। यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। आ
चार्यप्रवृत्तिर्ज्ञापयति। भवत्यृकारान्नो णत्वमिति। यदयं क्षुभ्नादिषु नृनमनशब्दं पठति। नैतदस्ति
ज्ञापकम्। वृद्ध्यर्थमेतत्स्यात्। नार्नमनिः। यत्तर्हि तृप्नोतिशब्दं पठति। यच्चापि नृनमनशब्दं पठति।
ननु चोक्तं वृद्ध्यर्थमेतत्स्यात्। बहिरङ्गा वृद्धिः अन्तरङ्गं णत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे।

ह्यते एवमृकारभागोऽपीत्यर्थः। न सिध्यतीति। तस्य भागस्य स्फुटप्रतिभासाविषयत्वाज्जात्यभिव्यक्तिहेतुत्वाभावाच्चेति भावः। एतैरेवेति
। आकारादयोऽप्यकारादिभिः प्रत्यायितत्वादाक्षरसमाम्नायिकाः। भक्तिस्तु न प्रत्याय्या न प्रत्यायिकेति नियमेन न निवर्त्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरोष्टेरिति। ऐकारो गुरुस्तस्य टेरिति सिद्धम्। तन्त्रन्यायाश्रयणाच्च गुरोरपि स्थाने प्लुतो भवति देवद३त्तेति। क्रियते न्यास एवेति। अवश्यकर्तव्यतां दर्शयति। व्यपवृक्तेपि भागयोर्विवृततरत्वात्। प्रयत्नभेदादिकारोकाराभ्यामग्रहणाद् च्वाभावात्। तुल्यरूपेति। तुल्यरूपावयवत्वात्संयोगस्तुल्यरूपः। तस्यैकवर्णत्वं पूर्वपक्षे। सिद्धान्ते तु वर्णद्वयरूपता। आम्रूच्चारणात्तु भ्रा.

अथवोपरिष्टाद्योगविभागः करिष्यते। ऋतः। नो णो भवति। ततश्छन्दस्यवग्रहात्। ऋत इत्येव। प्लुतावैच इदुतौ। एतच्च वक्तव्यम्। यस्य पुनर्गृह्यन्ते गुरोष्टेरित्येव प्लुत्या तस्य सिद्धम्। यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। क्रियते न्यास एव॥ तुल्यरूपे संयोगे द्विव्यञ्जनविधिः॥ तुल्यरूपे संयोगे द्विव्यञ्जनाश्रयो विधिर्न सिध्यति। कुक्कुटः। पिप्पली। पित्तमिति। यस्य पुनर्गृह्यन्ते तस्य द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ। यस्यापि न गृह्यन्ते तस्यापि द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ। कथम्। मात्राकालोत्र गम्यते। न च मात्रिकं व्यञ्जनमस्ति। अनुपदिष्टं सत्कथं शक्यं विज्ञातुम्। असच्च कथं शक्यं प्रतिपत्तुम्। यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रैतन्नास्त्यण्सवर्णान्गृह्णातीति। इह तु कथम्। सँय्यन्ता। सँव्वत्सरः। यँल्लोकम्। तँल्लोकमिति। यत्रैतदस्त्यण्सवर्णान्गृह्णातीति। अत्रापि मात्राकालो गृह्यते। न च मात्रिकं व्यञ्जनमस्ति। अनुपदिष्टं सत्कथं शक्यं विज्ञातुमसच्च कथं शक्यं प्रतिपत्तुम्॥ हयवरट्॥ सर्वे वर्णाः सकृदुपदिष्टाः अयं हकारो द्विरुपदिश्यते। पूर्वश्चैव परश्च। यदि पुनः पूर्व एवोपदिश्येत पर एव वा। कश्चात्र विशेषः॥ हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणम्॥ हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणं कर्तव्यम्। आतोटि नित्यम्। शश्छोटि। दीर्घादटि समानपादे। हकारे चेति वक्तव्यम्। महाँ हि सः।

त्तमेकत्वज्ञानमिति शिष्टसमाचारः। अत्रापीति। सानुनासिकनिरनुनासिकौ द्वावत्र वर्णावित्यर्थः॥ हयवरट्॥ पूर्वश्चेति। पूर्वपरोच्चारणक्रियाभेदादेकस्यैव हकारस्य पूर्वपरव्यपदेशः। शश्छोटीति। हकारपरशकारस्यासंभवात्प्रसङ्गोच्चारितमेतत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 उत्वे चेति। अश्रुत्वार्थमपि वक्तव्यं मोहसतीतिरोर्यत्वार्थम्। यदि च किंचिदिति। प्रयोजनार्थो हि वर्णानामुपदेशो न स्वरूपप्रतिपत्त्यर्थः। इदमिति। उभयत्रापि दोषप्रयोजनसङ्ख्या वास्त्रश्नः। स्वर्नयतीति। णकारोऽत्र प्राप्नोति। नह्यत्र सवर्णग्रह-

उत्वे च॥ उत्वे च हकारग्रहणं कर्तव्यम्। अतो रोरप्लुतादप्लुते। हशि च। हकारे चेति वक्तव्यम्। इहापि यथा स्यात्। पुरुषो हसति ब्राह्मणो हसतीति। अस्तु तर्हि पूर्वोपदेशः॥ पूर्वोपदेशे कित्त्वक्त्वेड्विधयो झल्ग्रहणानि च॥ यदि पूर्वोपदेशः कित्त्वं विधेयम्। स्निहित्वा स्नेहित्वा। सिस्निहिषति। सिस्नेहिषति। रलो व्युपधाद्धलादेरिति कित्त्वं न प्राप्नोति। क्त्वविधिः। क्त्वश्च विधेयः। अघुक्षत्। अलिक्षत्। शल इगुपधादनिटः क्स इति क्सो न प्राप्नोति। इड्विधिः। इट् च विधेयः। रुदिहि। स्वपिहि। वलादिलक्षण इण्न प्राप्नोति। झल्ग्रहणानि च। किम्। अहकाराणि स्युः। तत्र को दोषः। झलो झलीति ह न स्यात्। अदाग्धाम्। अदाग्धम्। तस्मात्पूर्वश्चैवोपदेष्टव्यः परश्च। यदि च किंचिदन्यत्राप्युपदेशे प्रयोजनमस्ति तत्राप्युपदेशः कर्तव्यः। इदं विचार्यते। अयं रेफो यकारवकाराभ्यां पूर्व एवोपदिष्टः सन् हयवरडिति। पर एव वा यथान्यासमिति। कश्चात्र विशेषः॥ रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः॥ रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णानां प्रतिषेधो वक्तव्यः। अनुनासिकस्य। स्वर्नयति। प्रातर्नयति। यरोऽनुनासिकेऽनुनासिको वेत्यनुनासिकः प्राप्नोति। द्विर्वचनस्य। मद्रह्रदो भद्रह्रदः। यर इति द्विर्वचनं प्राप्नोति।

णमस्ति। मद्रह्रद इति। द्विर्वचने कृते तस्यासिद्धत्वाद्रोरीति रेफलोपो नास्ति। हलो यमामिति लोपस्तु पाक्षिक इति पक्षे रेफद्वयश्रवणप्रसङ्गः।

अश्वार्थमपीति। इदमिण्त्वस्याप्युपलक्षणं। तेन लिलिहिढ्वे इत्यादौ ढत्वविकल्पसिद्धिः। वि॰। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुण्डं रथेनेति। अनुनासिकेनैव परसवर्णेन भाव्यमिति नियमाभावाद्रेफः प्राप्नोति। तस्य चासिद्धत्वाद्रोरीति लोपो नास्ति रेफो भ्रणामिति। अनुनासिकपरसवर्णविधाने हि स्थानेन्तरतमपरिभाषोपस्थानाद्दोषाभावः। न हि रेफस्य णकारोन्तरतमः। नाप्यनुस्वारस्य रेफः। नेमौ रहाविति। हकारवद्रेफोपि नकार्यीत्यर्थः। तत्रैकवाक्यतायां सामान्यविशेषविध्योर्लोकव्यवहारादेव शब्दार्थसंबन्धपरिज्ञानात्सामान्यविधेर्विशेषविधिर्बाधकः। प्रत्यक्षश्च विशेषविधिः सामान्यविधिस्त्वनुमेय इति रेफस्य

परसवर्णस्य। कुण्डं रथेन। वनं रथेन। अनुस्वारस्य ययीति परसवर्णः प्राप्नोति। अस्तु तर्हि पूर्वोपदेशः॥ पूर्वोपदेशे कित्वप्रतिषेधो व्यलोपवचनं च॥ यदि पूर्वोपदेशः कित्वं प्रतिषेध्यम्। देवित्वा दिदेविषति। रलो व्युपधादिति कित्वं प्राप्नोति। नैष दोषः। नैवं विज्ञायते रलो व्युपधादिति किं तर्हि रलः अवू व्युपधादिति। किमिदमवू व्युपधादिति। अवकारान्ताद्व्युपधादव्युपधादिति। व्यलोपवचनं च। व्योश्च लोपो वक्तव्यः। गोधेरःपचेरन्। यजेरन्। जीवेरदानुक्। जीरदानुः। वलीति लोपो न प्राप्नोति। नैष दोषः। रेफोप्यत्र निर्दिश्यते। लोपो व्योर्वली ति रेफे च वलि चेति। अथवा पुनरस्तु परोपदेशः। ननु चोक्तं रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेध इति। अनुनासिकपरसवर्णयोस्तावत्प्रतिषेधो न वक्तव्यः। रेफोष्मणां सवर्णा न सन्ति। द्विर्वचनेपि। नेमौ रहौ कार्यिणौ द्विर्वचनस्य। किं तर्हि। निमित्तमिमौ रहौ द्विर्वचनस्य। तद्यथा। ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषातामिति। नेदानीं तौ भुञ्जाते।

कार्यित्वं निमित्तत्वेन बाध्यते। दध्युदकादौ तु स्थानित्वेन निमित्तत्वमिकस्तस्मादित्युत्तरस्येत्यादेर्ज्ञापकान्न बाध्यते। लक्ष्यस्थित्यपेक्षणाद्वा बाध्यबाधकभावेन क्वचिदपेक्षानास्ति। यथा चिचीषतीति दीर्घत्वद्विर्वचनयोः।

दोषाभाव इति। सप्तम्यन्तपाठाभावे तु अनुनासिकविधौ सवर्णपदापकर्षपरं भाष्यम्। वि॰ परसवर्णविधौ त्वण इत्यतोनुनासिक इत्यस्य संबन्धात्कुण्डं रथेनेत्यादावदोष इति बृहद्विवरणे। न बाध्यत इति। विवरणकारास्तु तक्रकौण्डिन्यन्यायस्यानवकाशविषयत्वं वदन्त उत्सर्गविषयेऽपवादस्य चारितार्थ्याभावे एव बाधकत्वमिच्छन्ति। तत्रोत्सर्गविषयत्वं च तत्प्राप्तितत्प्रवृत्त्यन्यतररूपम्। प्राप्तिश्च तात्कालिकज्ञानगोचरया वदुद्देश्यतावच्छेदकाक्रान्तिः। प्रवृत्तिश्च विधेयतावच्छेदकसंबन्धेन विधेयवैशि

CC-0. In Public Domain. Digitization by eGangotri

ष्यम्। सर्वआमूइत्यवस्थायांनुटःप्राप्तेःसर्वनामिति स्थितौ प्रवृत्तेश्चसत्त्वेननुटःपूर्वंतदुत्तरंच तद्विषयत्वमक्षतमेवेतिशु-
टोनवकाशत्वंसूपपादमेव। प्रकृतेपियत्रयत्ररेफेद्वित्वनिमित्तत्वं तत्रतत्रानचिचेतिद्वित्वकार्यित्वमस्त्येवेतितन्न्यायविष-
यत्वमक्षतमेव। परंलक्ष्यानुरोधादत्रबाध्यसामान्यचिन्ताश्रयणेनद्वित्वकार्यित्वमात्रस्यबाधइतिमद्र्ह्रदौधात्रंशइत्या-
दावचोरहाभ्यांयणोमयइत्यपिनभवतः। इकोयणचीत्यत्रतुकार्यित्वंनानवकाशमितिनकथमपितस्यनिमित्तत्वबाधक-
ताशक्योत्प्रेक्षितुमितितस्मादित्युत्तरस्येत्यादेर्ज्ञापकान्नबाध्यतइतिकैयटश्चिन्त्यइति॥ अत्रब्रूमः। सत्यमेतदिकोयणची
त्यादौनतक्रकौण्डिन्यन्यायस्यविषयइति परंत्वन्यएवायंमाठरपरिवेषणन्यायस्तक्रकौण्डिन्यन्यायाद्येनदध्युदकादौय
णप्रवृत्तिःप्रदीपकारेणोत्प्रेक्ष्यते। तमेवचावलम्ब्यनेमौरहावित्यादिभाष्यंप्रवर्तते। यतोमद्र्ह्रदइत्यादौद्वित्ववारणंतक्रकौ-
ण्डिन्यन्यायेनकथमपिवक्तुमशक्यम्। तन्न्यायेनहिव्याप्यविषयतायैर्यैर्धर्मैरवच्छिद्यतेयैर्यैश्चविशेष्यदलप्रविष्टैःपदार्थैःसं
कोच्यतेतत्सकलविशेषितस्वप्रयोजकपदप्रतिपाद्येतरपरत्वंस्वाश्रयेतरपरत्वंवाव्यापकविषयताप्रयोजकपदस्यसिद्ध्य-
ति। नपुनर्व्याप्यविषयतावच्छेदकधर्मावच्छिन्नेतरपरत्वम्। तथासतिप्रथमद्विर्वचनीयैकाच्पदघटकाच्पदप्रयोज्यविष-
यतायाद्वितीयद्विर्वचनीयाजादिपदप्रयोज्यविषयत्वापेक्षयाव्यापकत्वेनतत्प्रयोजकाच्पदस्याद्यज्भिन्नाच्परत्वेजाटआट-
तुरित्यादौद्वित्वानापत्तेः। इत्थंचानचिचेत्यत्रयर्पदस्याचःपरोयरःपूर्वश्चयोरेफस्तदितरयर्परत्वेप्यर्हेणेत्यादौरेफस्यद्वित्वंप्रा-
प्नोति। एवंतथार्थकस्यैवाचोरहाभ्यामित्यत्रसंबन्धेपिमद्र्ह्रदइत्यादौद्वित्वंप्राप्नोत्येव। किंचस्ववैयर्थ्यसंपादकत्वंयत्रानेकशा-
स्त्राणांतत्रतेषां सर्वेषांबाधोबाध्यसामान्यचिन्ता। नह्यचोरहाभ्यामित्यत्रयर्त्वावच्छिन्नविषयत्वरेफत्वावच्छिन्नविषयत्व-
योःसामानाधिकरण्यमपियेनबाध्यबाधकभावोऽवकाशमासादयेत्। यणोमयइत्यत्रापियणत्वावच्छिन्नोद्देश्यतायारेफ
त्वावच्छिन्ननिमित्ततयासमंसामानाधिकरण्यमसंभव्येवेतिलक्ष्यानुरोधादत्रबाध्यसामान्यचिन्तेत्यादिचिन्त्यमेव। तस्मादत्र
द्वित्ववारणोपयोगीभिन्नएवतक्रकौण्डिन्यन्यायान्माठरपरिवेषणन्यायोवाच्यः। सचविषयतयोर्व्याप्यव्यापकभावंनापेक्ष रामः
ते किंतूद्देश्यतावच्छेदकधर्मयोरेव। परंतुययोर्बाध्यबाधकभावस्तयोरेकप्रकरणस्थत्वमपेक्षितम्। तत्त्वंचयत्किंचिद ३६
नुगतरूपावच्छिन्नस्यप्रतिपाद्यत्वेनविषयत्वंयस्यामिच्छायांतत्प्रयोज्यकृतिविषयत्वम्। भवतिचवर्णद्वित्वप्रतिपादन-
विषयकमहेच्छापूर्वकावान्तरेच्छाधीनकृतिगोचरत्वमचोरहाभ्यामित्यारभ्यदीर्घादाचार्याणामित्यन्तसूत्रवार्तिककद
म्बकस्येतितद्घटकयर्यणपदयोरेफेतरस्वार्थपरतासूपपादैव। इदंचनेरजिकोयणचीत्यादीनांभिन्नभिन्नप्रकरणस्थाना
मितिनतत्रास्यविषयः। इत्थंचतस्मादित्युत्तरस्येत्यादेर्ज्ञापकान्नबाध्यतइतिकैयटग्रन्थोरमणीयएवेतिदिक्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदमिति। विधानादेषां साधुत्वं स्यात् प्रत्याहारप्रतिबद्धं तु कार्यं न प्राप्नोति। के पुनरिति। तत्स्वरूपप्रश्नः। कथमिति। प्रवृत्तिनिमि
त्तप्रश्नः। अयुक्ता इत्यस्यैव हेतुकथनमनुपदिष्टाश्चेति। अयुक्ताः प्रत्याहारलक्षणेन। पाठाभावादसंबद्धा इत्यर्थः। उपदेशो
द्विविधः। पाठो ग्रहणकशास्त्रेण प्रत्यायनं च। स द्विविधोऽप्येषां नास्तीत्यर्थः। चशब्दो हेतौ। यतोऽनुपदिष्टास्ततोऽयुक्ता इत्य

इदं विचार्यते। इमेऽयोगवाहा न क्वचिदुपदिश्यन्ते। श्रूयन्ते च। तेषां कार्यार्थ उपदेशः कर्तव्यः। के पुन
रयोगवाहाः। विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारयमाः। कथं पुनरयोगवाहाः। यदयुक्ता वहन्ति
। अनुपदिष्टाश्च श्रूयन्ते। क्व पुनरेषामुपदेशः कर्तव्यः। अयोगवाहानामट्सु णत्वम्। अयोगवाहानामट्
सूपदेशः कर्तव्यः। किं प्रयोजनम्। णत्वम्। उरःकेण। उरᳵकेण। उरःपेण। उरᳶपेण। अड्व्यवाय इति णत्वं
सिद्धं भवति। शर्षु जश्भावषत्वे। शर्षूपदेशः कर्तव्यः। किं प्रयोजनम्। जश्भावषत्वे। अयमुब्जिरुपध्मा-
नीयोपधः पठ्यते। तस्य जश्त्वे कृते उब्जिता उब्जितुमित्येतद्रूपं यथा स्यात्। यद्युब्जिरुपध्मानीयोपधः पठ्य
ते उब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोति। दकारोपधे पुनर्नन्द्राः संयोगादय इति प्रतिषेधः-
सिद्धो भवति। यदि दकारोपधः पठ्यते का रूपसिद्धिः। उब्जिता उब्जितुमिति। असिद्धे भ उब्जेः। इदमस्ति-
स्तोश्चुनाश्चुरिति ततो वक्ष्यामि। भ उब्जेः। उब्जेश्चुनासन्निपाते भो भवतीति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्॥

र्थः। क्वचित्तु चशब्दो न पठ्यते। शर्ष्विति। शर्षु पाठे झल्त्वमिति झलां जश् झशीति जश्त्वं सिध्यति। उपध्मानीयादेरिति। य-
दि द्विर्वचने पूर्वत्र कर्तव्ये जश्त्वमसिद्धं तथापि पूर्वत्रासिद्धीयमद्विर्वचन इति सिद्धं सर्वथो बिब्जिषतीति प्राप्नोति। ॥

भा·कै·
३० निपातनादिति।द्विर्वचनं कथम्।निपातनाद्वाक्यशेषोनुमीयते।असिद्धप्रकरणेत्तोभ्युरित्यत्रोञ्जेर्भइति।तत्रनन्द्राइतिदका ११२
रस्यद्विर्वचननिषेधःकर्तव्योनतुद्विर्वचनमितिपूर्वत्रासिद्धीयमद्विर्वचनइत्यस्याप्रवृत्त्याभत्वस्यासिद्धत्वादिष्टद्विर्वचनसि
द्धिः।अथापिनवाक्यशेषानुमानंनिपातनमेवप्रतिपादकंतथापिदकारोपदेशसामर्थ्याद्विर्वचनेकृतेदकारस्यवत्वंप्रव-
र्तते।अकुत्वविषयइति।विशिष्टविषयमनुमानमित्यर्थः।अवश्यमिति।अनुस्वारस्यशर्व्यवायेषत्वेसिद्धेनुम्ग्र-

निपातनादेवसिद्धम्।किन्निपातनम्।भुजन्युब्जौपाण्युपतापयोरिति।इहापितर्हिप्राप्नोति।अभ्युद्गः
समुद्गइति।अकुत्वविषयेनिपातनम्। अथवानैतदुब्जेरूपंगमेरेतद्व्युपसर्गाड्डो।विधीयते।अभ्युद्गतः
अभ्युद्गः।समुद्गतःसमुद्गइति।षत्वंचप्रयोजनम्।सर्पिःषुधनुःषु।शर्व्यवायइतिषत्वंसिद्धंभवति।नुम्
विसर्ज्जनीयशर्व्यवायेपीतिविसर्जनीयग्रहणंनकर्तव्यंभवति।नुमश्चापितर्हिग्रहणंशक्यमकर्तुम्।
कथंसर्पींषिधनूंषि।अनुस्वारेकृतेशर्व्यवायइत्येवसिद्धम्।अवश्यंनुमोग्रहणंकर्त्तव्यम्।अनुस्वार
विशेषणंनुम्ग्रहणंनुमोयोनुस्वारस्तत्रयथास्यादिहमाभूत्पुंस्विति। अथवाअविशेषेणोपदेशः कर्त्त
व्यः।किंप्रयोजनम्। अविशेषेणसंयोगोपधासंज्ञालोन्त्यद्विर्वचनस्यानिवद्भावप्रतिषेधः।अविशेषेणसं
योगसंज्ञाप्रयोजनम्।उऊञ्जक ।हलोनन्तराःसंयोगइतिसंयोगसंज्ञासंयोगेगुर्विंतिगुरुसंज्ञागुरोरि
तिप्लुतोभवति।उपधासंज्ञाचप्रयोजनम्।दुष्कृतम्।निष्कृतम्।दुष्पीतम्।निष्पीतम्।इदुदुपधस्यचा

हणंनियमार्थंनुमोयोनुस्वारस्तत्रैवयथास्यादन्यत्रमाभूत्पुंस्विति।अविशेषेणेति।प्रयोजनविशेषमनपेक्ष्यसकलप्रयोजनो रामः
द्देशेनयत्रयत्रप्रदेशेप्रयोजनंकिञ्चित्तत्रतत्रोपदेशःकार्यइत्यर्थः।उञ्जकइति।उपध्मानीयस्यजश्त्वेसंयोगसंज्ञायांतस्या ३०
सिद्धत्वात्संयोगसंज्ञाभावाद्गुरुत्वाभावात्प्लुतोनस्यात्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

महोरस्केनेति॰ पूर्वत्रासिद्धे न स्थानिवदितिनिषेधः अचः परस्मिन्पूर्वविधावित्यस्य। नतुस्थानिवदादेशादित्यस्य। इदानी-

प्रत्ययस्येतिषत्वं सिद्धं भवति। नैतदस्तिप्रयोजनम्। नइदुदुपधग्रहणेन विसर्जनीयो विशेष्यते। किंत
र्हि। सकारो विशेष्यते। इदुदुपधस्य सकारस्य यो विसर्जनीय इति। अथवोपधाग्रहणं न करिष्यते। इदु
द्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः। इदुद्भ्यामुत्तरस्य विसर्जनीयस्येति। अलोन्त्यविधिश्च प्रयोज
नम्। वृक्षस्तरति प्लक्षस्तरति अलोन्त्यस्य विधयो भवन्तीत्यलोन्त्यस्य सत्वं सिद्धं भवति। एतदपि नास्ति प्रयोजनम्। निर्दिश्यमा
नस्यादेशा भवन्तीति विसर्जनीयस्यैव भविष्यति। द्विर्वचनं प्रयोजनम्। उरꣳकः। उरꣳपः। अनचिच।
अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं सिद्धं भवति। स्थानिवद्भावप्रतिषेधश्च प्रयोजनम्। यथेह
भवति उरꣳकेण उरःपेणेत्यड्व्यवाय इति णत्वम्। एवमिहापि स्थानिवद्भावात्प्राप्नोति। व्यूढोरस्के
न महोरस्केनेति। तत्रानल्विधाविति प्रतिषेधः सिद्धो भवति॥ किं पुनरिमे वर्णा अर्थवन्त आहोस्वि
दनर्थकाः। अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्। अ-
र्थवन्तो वर्णाः। कुतः। धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्। धातव एक
वर्णा अर्थवन्तो दृश्यन्ते। एति। अध्येति। अधीत इति। प्रातिपदिकान्येकवर्णान्यर्थवन्ति। आभ्या
म्। एभिः। एषु। प्रत्यया एकवर्णा अर्थवन्तः। औपगवः कापटवः। निपाता एकवर्णा अर्थवन्तः। अ
अपेहि। इइन्द्रं पश्य। उउत्तिष्ठ। अअपक्राम। धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थ
दर्शनान्मन्यामहे अर्थवन्तो वर्णा इति॥

मन्यदपि वर्णगतं वस्तु विचार्यते। किं पुनरिति। पक्षद्वयेपि प्रतिवर्णं विभक्त्यनुत्पत्तिज्ञानं विचारस्य प्रयोजनम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णव्यत्ययइति। एकवर्णस्याभ्युपगमेन्यापगमोव्यत्ययः। सककारस्येति। तस्यैवान्वयव्यतिरेकावनुविधत्तेऽर्थावसायइत्यर्थः। वर्णानुपलब्धौचेति। अर्थान्तरावगमात्प्रकृतोर्थोनगम्यतेइतिविवक्षितम्। इतरस्त्वर्थावगत्यभावमात्रमनेनोक्तमितिमत्वाएच्छति। किंतर्हीति। नसाधीयइति। परमतापेक्षयाप्रकर्षःआरोप्यते। यथानकिंचिदयंतत्रकरोत्युक्तेकश्चिदाहस्तुत

वर्णव्यत्ययेचार्थान्तरगमनात्। वर्णव्यत्ययेचार्थान्तरगमनान्मन्यामहेअर्थवन्तोवर्णाइति। कूपःसूपोयूपइति। कूपइतिसककारेणकश्चिदर्थोगम्यते। सूपइतिककारापायेसकारोपजनेचार्थान्तरंगम्यते। यूपइतिककारसकारापायेयकारोपजनेऽर्थान्तरंगम्यते। तेनमन्यामहे यःकूपेकूपार्थःसककारस्य। यःसूपेसूपार्थःससकारस्य। योयूपेयूपार्थःसयकारस्येति। वर्णानुपलब्धौचानर्थगतेः। वर्णानुपलब्धौचानर्थगतेर्मन्यामहेऽर्थवन्तोवर्णाइति। वृक्षःऋक्षःकाण्डीरःआण्डीरः। वृक्षइतिसवकारेणकश्चिदर्थोगम्यतेऋक्षइतिवकारापायेसोर्थोनगम्यते। काण्डीरइतिसककारेणकश्चिदर्थोगम्यतेआण्डीरइतिककारापायेसोर्थोनगम्यते। किंतर्ह्युच्यतेऽनर्थगतेरिति। नसाधीयोह्यत्रार्थस्यगतिर्भवति। एवंतर्हीदंपठितव्यंस्यात्वर्णानुपलब्धौचातदर्थगतेरिति। किमिदमतदर्थगतेरिति। तस्यार्थस्तदर्थः तदर्थस्यगतिःतदर्थगतिः नतदर्थगतिःअतदर्थगतिःअतदर्थगतेरिति। अथवासोर्थस्तदर्थःतदर्थस्यगतिःतदर्थगतिःनतदर्थगतिः अतदर्थगतिः अतदर्थगतेरिति। सतर्हितथानिर्देशःकर्तव्यः। नकर्तव्यः। उत्तरपदलोपोत्रद्रष्टव्यः॥

रामयंकरोतीति। एवंतर्हीति। प्रकृतोर्थोनगम्यतेअर्थान्तरंतुगम्यतेइत्यर्थः। तस्यार्थइति। वर्णस्यपरंप्रतिवर्णानामर्थवत्त्वमसिद्धमितिकथंतस्येतिवर्णःपरामृश्यतेइत्याह। सोर्थइति। प्रकृतोर्थइत्यर्थः॥ रामः ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उष्ट्रमुखवदिति। गतार्थत्वादप्रयोग एव हीतीयमुखशब्दस्य लोपो विधीयते। अत्र हि उष्ट्रो मुखमस्येत्येव विग्रहः। न च प्राणी प्राण्य
न्तरस्य मुखं भवतीति विशिष्टावयववृत्तिरुष्ट्रशब्दः सादृश्यान्मुखं विशिनष्टि। एवमिहाप्यनर्थगतेरित्यत्रार्थशब्देन प्रक्रान्तो
र्थ उच्यते। न अर्थमात्रमित्यर्थः। नलोपादीनीति। अवर्णां तु विभक्तेर्न भवति। यतो यदेवावयवानां प्रातिपदिकसंज्ञा प्रवर्तते तदे
व समुदायस्यापि तत्र तदन्तर्गतत्वाद्विभक्तेर्लुका भवितव्यम्। समासग्रहणेन च तुल्यजातीयस्य सुबन्तावयवसमुदायस्य प्रा

तद्यथा। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। खरमुखः। एवमतदर्थगतेरनर्थगतेरिति। संघातार्थवत्त्वा
च्च। संघातार्थवत्त्वाच्च मन्यामहेऽर्थवन्तो वर्णा इति। येषां संघाता अर्थवन्तः। अवयवा अपि तेषामर्थवन्तः।
येषां ह्यवयवा अर्थवन्तः समुदाया अपि तेषामर्थवन्तः। तद्यथा। एकश्चक्षुष्मान्दर्शने समर्थः तत्समुदा
यश्च शतमपि समर्थम्। एकश्च तिलस्तैलदाने समर्थः तत्समुदायश्च खार्यपि तैलदाने समर्था। येषां पुनर
वयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः। तद्यथा। एकोऽन्धो दर्शनेऽसमर्थस्तत्समुदायश्च शतमप्य
समर्थम्। एका च सिकता तैलदानेऽसमर्था तत्समुदायश्च खारीशतमप्यसमर्थम्। यदि तर्हीमे वर्णा अर्थव
न्तः अर्थवत्कृतानि प्राप्नुवन्ति। कानि ।अर्थवत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा। प्रातिपदिकादिति स्वा —
द्युत्पत्तिः। सुबन्तं पदमिति पदसंज्ञा। तत्र को दोषः। पदस्येति नलोपादीनि प्राप्नुवन्ति। धनं वनमिति। संघात
स्यैकार्थ्यात्सुबभावो वर्णात्। संघातस्यैकत्वमर्थः तेन वर्णात्सुबुत्पत्तिर्न भविष्यति॥

तिपदिकसंज्ञा निवार्यते न त्वर्थवत्समुदायमात्रस्य येनैव वार्थेन समुदायस्यार्थवत्त्वं तेनैव तदवयवानामपीति विभक्त्यु
त्पत्तिश्चोद्यते। अत्र परिहारमाह। संघातस्येति। वृक्ष इत्यत्रैकत्वं विभक्त्या द्योत्यते तच्चैकमित्येकैव विभक्तिरुत्पद्यते। य
था बहवो द्रष्टारो दृश्यमर्थमेकेनैव प्रदीपेन पश्यन्ति। सा चोत्पद्यमाना समुदायादेव तन्त्रेण सर्वानुग्राहिण्युत्पद्यते। समुदा
यद्विवचनवत्। पदसंज्ञा तु समुदायस्यैव भवति न प्रत्ययविधिरित्यनुवर्तनादसुबन्तत्वात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

अनर्थकास्त्विति। धात्वादिव्यतिरिक्ता वर्णाः पक्षीक्रियन्ते। अन्यथा प्रागुक्तविरोधः प्राप्नोति। किमिति। असमासशङ्कया प्रश्नः समासेन तूत्तरम्। तेनैव वीप्साद्योतिते इति द्विर्वचनं न भवति। वर्णव्यत्यय इति। यदुक्तं वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपल

अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः। अनर्थकास्तु वर्णाः। कुतः। प्रतिवर्णमर्थानुपलब्धेः। न हि प्रतिवर्णमर्था उपलभ्यन्ते। किमिदं प्रतिवर्णमिति। वर्णं वर्णं प्रति प्रतिवर्णम्। वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात्। वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनान्मन्यामहेऽनर्थका वर्णा इति। वर्णव्यत्यये। कृतेस्तर्कुः। कसेः सिकताः। हिंसेः सिंहः। वर्णव्यत्ययो नार्थव्यत्ययः। अपायो लोपः। हतः घ्नन्ति घ्नन्तु अघ्नन्। वर्णापायो नार्थापायः। उपजन आगमः। लविता। लवितुम्। वर्णोपजनो नार्थोपजनः। विकार आदेशः। घातयति। घातकः। वर्णविकारो नार्थविकारः। यथैव वर्णव्यत्ययापायोपजनविकारा भवन्ति तद्वदर्थव्यत्ययापायोपजनविकारैर्भवितव्यम्। न चेह तद्वत्। अतो मन्यामहेऽनर्थका वर्णा इति। उभयमिदं वर्णेषूक्तम्। अर्थवन्तोऽनर्थका इति च। किमत्र न्याय्यम्। उभयमित्याह। कुतः। स्वभावतः। तद्यथा। समानमीहमानानां चाधीयानानां केचिदर्थैर्युज्यन्ते। अपरे न। न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुं कश्चिद्वानर्थक इति कृत्वा सर्वैरनर्थकैः। तत्र किमस्माभिः शक्यं कर्तुम्। यद्धातुप्रत्ययप्रातिपदिकनिपाता एकवर्णा अर्थवन्तः अतोऽन्येऽनर्थका इति। स्वाभाविकमेतत्। कथं य एष भवता वर्णानामर्थवत्तायां हेतुरुपदिष्टः। अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेः संघातार्थवत्त्वाच्चेति॥

ब्धौ चानर्थगतेरिति तस्यानैकान्तिकत्वमुद्भाव्यते। उभयमित्याहेति। यत्रान्वयव्यतिरेकाभ्यामर्थवत्ता शक्यते कल्पयितुं तत्रैवासावभ्युपगन्तव्या न सर्वत्रेत्यर्थः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

संघातान्तराणीति।तदुक्तम्।नकूपसूपयूपानामन्वयोर्थस्यविद्यतेअतोर्थान्तरवाचित्वंसंघातस्यैवगम्यतेइति।एतस्यापी-
ति।दृष्टोह्यतदर्थेनगुणेनगुणिनोर्थभावःसुराङ्गवदूथाङ्गवच्चेति।आचारादिति।आचारोव्यवहारः।तृषिमृषिकृषेरिति-
यण्नकृतः।अप्रधानत्वादिति।प्रधानाप्रधानसन्निधौप्रधानमेवकार्याणांप्रयोजकमितिपरार्थानामनुबन्धानामच्संज्ञान

संघातान्तराण्येवैतान्येवंजातीयकानिअर्थान्तरेषुवर्तन्ते।कूपःसूपोयूपइति।यदिहिवर्णव्यत्ययकृत
मर्थान्तरगमनंस्याद्भूयिष्ठःकूपार्थःसूपेस्यात्सूपार्थश्चकूपेकूपार्थश्चयूपेयूपार्थश्चकूपेसूपार्थश्चयूपे-
यूपार्थश्चसूपे।यतस्तुखलुनकिंचित्सूपस्यवायूपेयूपस्यवाकूपेकूपस्यवायूपेसूपस्यवाकूपेकूपस्यवासू
पेयूपस्यवासूपे अतोमन्यामहेसंघातान्तराण्येतान्येवंजातीयकान्यर्थान्तरेषुवर्तन्तइति।इदंखल्वपिभव
तावर्णानामर्थवत्त्वंब्रुवतासाधीयोनर्थकत्वंद्योतितम्।योहिमन्यतेयःकूपेकूपार्थःसककारस्ययःसूपेसूपा
र्थःससकारस्ययोयूपेयूपार्थःसयकारस्येति।ऊपशब्दस्तस्यानर्थकःस्यात्।तत्रेदमपरिहृतंसंघातार्थवत्त्वा
च्चेति।एतस्यापिप्रातिपदिकसंज्ञायांपरिहारंवक्ष्यति॥अइउण्ऋऌक्एओङ्ऐऔच्।प्रत्याहारेऽनुबन्धा
नांकथमज्ग्रहणेषुन॥यएतेऽच्षुप्रत्याहारार्थाअनुबन्धाःक्रियन्तेएतेषामज्ग्रहणेनग्रहणंकस्मान्नभव
ति।किंचस्यात्।दधिणकारीयतिमधुणकारीयति।इकोयणचीतियणादेशःप्रसज्येत॥आचारात्॥कि
मिदमाचारादिति।आचार्याणामुपचारात्।नैतेष्वाचार्याअज्कार्याणिकृतवन्तः॥अप्रधानत्वात्॥अप्र-
धानत्वाच्च।नखल्वप्येतेषामच्षुप्राधान्येनोपदेशःक्रियते।कतर्हिहल्षु।कुतएतत्।एषाह्याचार्यस्यशै
लीलक्ष्यते।यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति।अचोऽच्षुहलोहल्षु॥

प्रवर्ततइत्यर्थः।शैलीति।शीलेभवाशैलीसमवधानपूर्विकाप्रवृत्तिः।यथालोकेब्राह्मणैःसहब्राह्मणाभोज्यन्तेक्षत्रियैः
सहक्षत्रियाइति।एवमिहाप्याचार्येणवर्णानिर्दिष्टाइत्यर्थः। ॥

CC-0. In Public Domain. Digitization by eGangotri

लोपश्चेति। परत्वान्नित्यत्वाद्वा। आदिरन्त्येनेत्यनेनाच्संज्ञाविधानकालेऽनुबन्धानां लोपादसन्निधानादच्संज्ञा न प्रवर्तते।
अनुबन्धा ह्युच्चारणएव सन्ति। इत्संज्ञा प्रतिबद्धं कार्यमसन्त एव प्रतिपादयन्ति। स्वतस्तु न किंचित्कार्यं प्रतिपद्यन्ते। ऊका
लोऽजिति। सिद्धेऽच्त्वे योगविभागेन कालविशेषावच्छिन्नस्याच्त्वं नियम्यते। ततोऽनुबन्धानामूकालत्वाभावादच्त्वाभावः।
एवमपीति। ककारा कृते रूपदेशान्मात्रिकस्याच्त्वं मन्यते। अत्र चयद्यप्ययं परिहारोऽस्ति द्वावेतौ ककारेन चवर्गो हूये

लोपश्च बलवत्तरः॥ लोपः खल्वपि तावद्भवति। ऊकालोऽजिति वा योगस्तत्कालानां यथा भवेत्। अचां ग्र
हणमच्कार्यं तेनैषां न भविष्यति। अथवा योगविभागः करिष्यते। ऊकालोऽच्। उऊउ३ इत्येवंकालोऽज्भ
वति। ततो ह्रस्वदीर्घप्लुतः। ह्रस्वदीर्घप्लुतसंज्ञश्च भवति ऊकालोऽच्। एवमपि कुक्कुटइत्यत्रापि प्राप्नोति। त-
स्मात्पूर्वोक्त एव परिहारः। एषएवार्थः अपर आह ह्रस्वादीनां वचनात्प्राग्यावत्तावदेवयोगोऽस्तु। अच्का
र्याणि यथा स्युस्तत्कालेष्वस्तु कार्याणि॥ अथ किमर्थमन्तस्थानामण्सूपदेशः क्रियते। इह सँय्यन्ता सँव्वत्स
रः यँल्लोकं तँल्लोकमिति परसवर्णस्यासिद्धत्वादनुस्वारस्यैव द्विर्वचनम्। तत्र परस्य परसवर्णे कृते त
स्य यय्ग्रहणेन ग्रहणात्पूर्वस्यापि परसवर्णो यथा स्यात्। नैतदस्ति प्रयोजनम्। वक्ष्यत्येतत्। द्विर्वचने
परसवर्णत्वं सिद्धं वक्तव्यमिति। यावता सिद्धत्वमुच्यते परसवर्ण एव तावद्भवति। परसवर्णे तर्हि कृते त
स्य यय्ग्रहणेन ग्रहणाद्द्विर्वचनं यथा स्यात्। मा भूत्द्विर्वचनम्। ननु च भेदो भवति। सति द्विर्वचने त्रियका
रकमसति द्विर्वचने द्वियकारकम्। नास्ति भेदः। सत्यपि द्विर्वचने द्वियकारकमेव। कथम्। हलो यमां यमि लोप इत्ये
वमेकस्य लोपेन भवितव्यम्। एवमपि भेदः। सति द्विर्वचने कदाचिद्द्वियकारं कदाचित्त्रियकारकम्। असति द्वियकारकमेव।

नैकाजातिर्व्यज्यतेइति तथापि पूर्वमेव मात्राकालोऽत्र गम्यते न च मात्रिकं व्यञ्जनमस्तीत्युक्तत्वात्पुनरिह नोक्तः। अथ किमर्थ- राम॰
मिति। अज्जुदित्सवर्णस्येति कस्मान्नकृतमिति प्रश्नः। इण्ग्रहणेऽग्रहणार्थं त्वन्तस्थानामत्रावश्यकर्तव्यउपदेशः। गीर्षियादे। ४०
मूर्द्धन्यो यथा स्यादिति। ननु च भेदइति। श्रुतिकृतोऽस्त्येव भेदः सूक्ष्मत्वात्तु दुर्लक्ष्यः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेतद्धिति।ज्ञापकत्वमस्यविघटयतिआचार्योपदेशपारंपर्यानुज्ञायतेअनुवर्त्ततेविभाषेति।तस्मात्त्रिव्यञ्जनसंयोग
श्चवर्णायानुदितिणाकारेणप्रत्याहारःकृतोनचकारेणेतिस्थितम्॥लण्॥संदेहोभवतीति।किंप्रत्यासत्तिराश्रीयतेऽ

तएषकथंभेदोनस्यात्‌यदिनित्योलोपःस्यात्‌विभाषाचसलोपः।यथाऽभेदस्तथास्तु।अनुवर्त्ततेविभाषाप्रो
चियद्वारयत्ययंद्वित्वम्।यदयंपूरोचीतिद्विर्वचनप्रतिषेधंशास्तितज्ज्ञापयत्याचार्यः।अनुवर्त्ततेविभाषेति।
कथंकृत्वाज्ञापकम्।नित्येहितस्यलोपेप्रतिषेधार्थोनकश्चित्स्यात्‌।यदिनित्योलोपःस्यात्‌प्रतिषेधवचन
मनर्थकंस्यात्‌।अस्त्वत्रद्विर्वचनम्।झरोझरिसवर्णेइतिलोपोभविष्यति।पश्यतित्वाचार्यःविभाषासलोपइ
तिततोद्विर्वचनप्रतिषेधंशास्ति।नैतदस्तिज्ञापकम्।नित्येपितस्यलोपेसप्रतिषेधोपोमविष्यति।पश्यतित्वा
चार्यःविभाषासलोपइतिततोद्विवचनप्रतिषेधंशास्ति।नैतदस्तिज्ञापकम्।नित्येपितस्यलोपेसप्रतिषेधो
वश्यंवक्तव्यः।यदेतदचोरहाभ्यामितिद्विर्वचनंलोपापवादःसविज्ञायते।कथम्।परद्दत्युच्यते।एताव
न्तश्चयरः।यदुतझरोवायमोवा।यद्दिचात्रलोपःस्याद्द्विर्वचनमनर्थकंस्यात्‌।किंतर्हितयोर्योगयोरुदा
हरणंयदकृतेद्विर्वचनेत्रिव्यञ्जनःसंयोगः।प्रत्तम्‌ मवत्तम्‌ आदित्यः।इहेदानीकर्त्ताहर्त्तेतिद्विर्वचन
सामर्थ्याल्लोपोनभवति।एवमिहापिलोपोनस्यात्कर्षतिहर्षतीति।तस्मान्नित्येपिलोपेवश्यंसप्रतिषेधो
वक्तव्यः।तदेतदत्यन्तंसंदिग्धंवर्त्ततेआचार्याणांविभाषानुवर्त्ततेनवेति॥ ॥लण्॥ ॥अयंणकारो
द्विरनुबध्यते।पूर्वश्चैवपरश्च।तत्राणग्रहणेष्विणग्रहणेषुचसंदेहोभवतिपूर्वेणवास्युःपरेणवेति।
कतमस्मिंस्तावदणग्रहणेसंदेहः।ढ्लोपेपूर्वस्यदीर्घोणइति।असंदिग्धंपूर्वेणनपरेण।कुतएतत्‌।
परणाभावात्‌।नहिढ्लोपेपरेणःसन्निनानुचायमस्ति।आतृढआटृढइति।एवंतर्हिसामर्थ्यात्पूर्वेणनप
रेण।यद्दिहिपरेणस्यादणग्रहणमनर्थकंस्यात्‌।ढ्लोपेपूर्वस्यदीर्घोचइत्येवब्रूयात्‌।

यव्याप्तिरितिसंदेहः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नहि के परइति। नन्वल्लोपानदुपानत्केति ह्रस्वे कर्तव्ये नहोध इत्यस्यासिद्धत्वादस्ति के परतो हकारः। तथाग्नीद्धेत्यादौ रे
फः। अत्राहुः। नमुन इत्यत्र नेति योगविभागेन धत्वादीनामसिद्धत्वाभावात् तेषु च कृतेषु हकारादीनामभावः। नहि पदान्ता-
इति। ननु च भोभगो इत्यत्राण्ग्रहणस्य प्रयोजनं वक्ष्यते वृक्षवृकरोतीत्यत्र हलि सर्वेषामिति लोपो मा भूदिति तत्क-
थमुच्यते नहि पदान्ता इति। उच्यते। अप्रगृह्यस्येति पर्युदासेनाच एवानुनासिकेन भाव्यं न तु हल इत्युक्तं नहि पदान्ता इ

अथवैतदपि न ब्रूयात्। अचो ह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति। अस्मिंस्तर्ह्यण्ग्रहणे संदेहः केण इति। अ
संदिग्धं पूर्वेण न परेण। कुत एतत्। पराभावात्। नहि केपरेणः सन्ति। ननु चायमस्ति गोकानो केति। एवं त
र्हि सामर्थ्यात्पूर्वेण न परेण। यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात्। केच इत्येव ब्रूयात्। अथवैतदपि
न ब्रूयात्। अचो ह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति। अस्मिंस्तर्ह्यण्ग्रहणे संदेहः। अणोऽप्रगृह्यस्यानुनासिक इ
ति। असंदिग्धं पूर्वेण न परेण। कुत एतत्। पराभावात्। नहि पदान्ताः परेऽणः सन्ति। ननु चायमस्ति। कर्त्तृ ह
र्तृ। एवं तर्हि सामर्थ्यात्पूर्वेण न परेण। यदि हि परेण स्यात् अण्ग्रहणमनर्थकं स्यात्। अचोऽप्रगृह्यस्यानुना
सिक इत्येव ब्रूयात्। अथवैतदपि न ब्रूयात्। अच एव हि प्रगृह्या भवन्ति। अस्मिंस्तर्ह्यण्ग्रहणे संदेहः। उर-
ण्रपर इति। असंदिग्धं पूर्वेण न परेण। कुत एतत्। पराभावात्। नह्युः स्थाने परेणः सन्ति।

ति कार्यभाज इत्यर्थः। अचोऽप्रगृह्यस्येति। हलो हि न भाव्यमित्यत्राण्ग्रहणसामर्थ्यात्पूर्वेणेति स्थितम्। तत्र वृक्षं वृश्चती
ति क्विपि कृते वृक्षवृश्च मा च ष इति णिचि टिलोपे च कृते वृक्षवयतेर्विचि कृते वृक्षवृ इति भवति। क्विपि तु वौ लुप्तं वौ-
विधिं प्रति च न स्थानिवदिति निषेधात्संप्रसारणप्रसङ्गः। लोपो व्योर्वलीति लोपप्रसङ्गश्च। विचि तु स्थानिवद्भावाद्धल् निमि
त्तो लोपो न भवति। हलि सर्वेषामित्यनेन तु लोपे क्रियमाणे पूर्वत्रासिद्धे न स्थानिवदिति स्थानिवत्त्वनिषेधाद्धलोपः प्राप्तो-
ऽण्ग्रहणानुवृत्त्या निवर्त्यते।
॥

CC-0. In Public Domain. Digitization by eGangotri

अजर्घा इति। गृधेर्यङ्लुकि रुगागमेऽभ्यासस्य कृते लङि सिपि शब्लुकि गुणे रपरत्वे सिब्लोपे भष्भावे जश्त्वे रुत्वे रलोपे दीर्घत्वे रूपम्। इहापि तर्हीति। धातुग्रहणेन हि लिङ्गेन धातोरेव रपरत्वं निवर्तितम्। धातो रुरपरत्वे सत्यनन्त्यत्वान्न प्राप्नोतीति-

ननु चायमस्ति। कर्त्रर्थे हर्त्रर्थमिति। किं च स्यात्। यद्यत्र रपरत्वं स्यात् द्वयो रेफयोः श्रवणं प्रसज्येत। हलो यमां यमि लोप इत्येवमेकस्यात्र लोपो भविष्यतीति। विभाषा स लोपः। विभाषा श्रवणं प्रसज्येत। अयं तर्हि नित्यो लोपः रो रीति। पदान्तस्येत्येवं सः। न शक्यः स पदान्तस्येत्येवं विज्ञातुम्। इह हि लोपो न स्यात्। जर्गृधेर्लङ्। अजर्घाः। पास्पर्द्धेः। अपास्पा इति। इह तर्हि मातॄणां पितॄणामिति रपरत्वं प्रसज्येत। आचार्यप्रवृत्तिर्ज्ञापयति नात्र रपरत्वं भवतीति यदयमृत इद्धातोरिति धातुग्रहणं करोति। कथं कृत्वा ज्ञापकम्। धातुग्रहणस्यैतत्प्रयोजनम्। इह माभूत्। मातॄणां पितॄणामिति। यदि चात्र रपरत्वं स्याद्धातुग्रहणमनर्थकं स्यात्। रपरत्वे कृतेऽनन्त्यत्वादित्त्वं न भविष्यति। पश्यति त्वाचार्यो नात्र रपरत्वं भवतीति ततो धातुग्रहणं करोति। इहापि तर्हीत्त्वं न प्राप्नोति। चिकीर्षति जिहीर्षतीति। माभूदेवम्। उपधायाश्चेत्येवं भविष्यति। इहापि तर्हि प्राप्नोति मातॄणाम् पितॄणामिति। तस्मात्तत्र धातुग्रहणं कर्तव्यम्। एवं तर्हि सामर्थ्यात्पूर्वेण न परेण। यदि परेण स्यादणग्रहणमनर्थकं स्यात्। उरज्रपर इत्येव ब्रूयात्। अस्मिंस्त्वण्ग्रहणे संदेहः। अणुदित्सवर्णस्य चाप्रत्यय इति। असंदिग्धं परेण न पूर्वेण। कुत एतत्।

प्रश्नः। इहापीति। तस्माद्धातुग्रहणस्य सप्रयोजनत्वान्न ज्ञापकत्वमित्यर्थः।

इति प्रश्न इति। परे तु ततो धातुग्रहणं करोतीत्येतदुत्तरमथ यदागमन्यायेन कॄ इत्यत्र ऋत्त्वातिदेशादित्त्वं प्राप्नोत्येव। मैवम्। तस्या नित्यत्वादिति शङ्कासमाधाने अत्र शेषरूपेण पूरयित्वेहापि तर्हीति भाष्यं योजनीयमित्याहुः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सवर्णेइति।अचीहृतदितिऋकारस्यऋकारएवयथास्यात्ऋकारोमाभूदित्येवमर्थंतपरत्वंक्रियते।यदिचपूर्वेणणा-
कारेणाण्ग्रहणंस्याद्ऋकारोनण्त्वाद्भिन्नकालस्यग्राहकएवनभवतीतिऋकारोनैवस्थानीनाप्यादेशःप्रसजतीतिकिंतप
रत्वेन।कृतंतज्ज्ञापकंपरेणणग्रहणस्य।अर्द्धचतस्रइति।अर्द्धेनचतस्रः।चतुर्थीहिमात्रातत्रार्द्धेति।किंपुनरितिव

सवर्णेऽण्ग्रहणंतपरंत्वृकेतु।यदयमुकेदित्य्कारेतपरकरणंकरोतितज्ज्ञापयत्याचार्यःपरेणन
पूर्वेणेति।इण्ग्रहणेषुतर्हिसंदेहः।असंदिग्धंपरेणनपूर्वेण।कुतएतत्।य्वोरन्यत्रपरेणस्यात्।यत्रे
च्छतिपूर्वेणसंप्रत्ययग्रहणंतत्रकरोतिय्वोःश्विति।तच्चगुरुभवति।कथंकृत्वाज्ञापकम्।तत्रविभक्तिनिर्देशे
संप्रत्ययग्रहणेऽर्द्धचतस्रोमात्राः।प्रत्याहारग्रहणेपुनस्तिस्रोमात्राः।सोयमेवंलघीयसान्यासेनसिद्धेस
तियद्गरीयांसंयत्नमारभतेतज्ज्ञापयत्याचार्यःपरेणनपूर्वेणेति।किंपुनर्वर्णोत्सत्ताविवायंणकारोहि
रनुबध्यते।एतज्ज्ञापयत्याचार्योभवत्येषापरिभाषाव्याख्यानतोविशेषप्रतिपत्तिर्नहिसंदेहादलक्ष
णमिति।अणुदित्सवर्णंपरिहायपूर्वेणाण्ग्रहणंपरेणेण्ग्रहणमितिव्याख्यास्यामः॥ ॥ञमङणा
नम्।झभञ्॥ ॥किमर्थमिमौमुखनासिकावचनावुभावनुबध्येते।नञकारएवानुबध्येत।कथम्।
यानिमकारेणप्रत्याहारग्रहणानिहल्वोयमांयमिल्वोपइति।सन्तुञकारेणहल्वोयञांयञिल्वोपइति।
नैवंशक्यम्।झकारभकारपरयोरपिझकारभकारयोर्लोपःप्रसज्येत।नझकारभकारौझकारभकार
परौ स्तः।कथंपुमःखय्यम्परइति।एतदप्यस्तुञकारेणपुमःखय्यञ्परइति।नैवंशक्यम्।झकारभका
रपरेपिहिखयिरुःप्रसज्येत।

र्णोत्सत्तिर्वर्णोच्छेदः।वर्णान्तरमनुबन्धःकिंनक्रियतेइत्यर्थः।व्याख्यानतइति।न्यायादागमाद्वाप्रबद्धशक्तिरनुस
रणीयेत्यर्थः॥ ॥झभञ्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नञ्मकारेति। भकारस्य पदान्तस्य जश्त्वेन भाव्यमिति तस्याभावः। उञ्ज्ञेंड्गकारः संयोगान्तस्येति लुप्यते इति तस्याप्यभावः। सन्तु तावदिति। उद्देशानुदेशाभ्यां संख्यासाम्याद्यथासंख्येन लब्धे त्रयोगे यस्यागमस्यागमी विद्यते स प्रवर्त्तते नान्य इत्यर्थः। किमिदमिति। अक्षरसमाम्नाय इति व्यवहाराद्योवाङ्मां स्वरशोक्षरश इति चोक्तत्वात् प्रश्नः। अक्षरं न क्षरमिति। क्रियाशब्दोयं नित्यस्यार्थस्य वाचक इति दर्शयति। अत्र क्षियः क्षरतेर्वा विनाशार्थस्य नञ्पूर्वस्य रूपम्। तच्च ब्रह्मतत्वं

नञ्मकारभकारपरः खयस्ति। कथं ङमो ह्रस्वादचिङमुण्नित्यमिति। एतदप्यस्तु नकारेण ङञो ह्रस्वादचिङञुण्नित्यमिति। नैवं शक्यम्। ञ्मकारभकारयोरपि हि पदान्तयोर्ञ्मकारभकारावागमौ स्याताम्। नञ्मकारभकारौ पदान्तौ स्तः। एवमपि पञ्चागमास्त्रय आगमिनो वैषम्यात् संख्यातानुदेशो न प्राप्नोति। सन्तु तावद्येषामागमानामागमिनः सन्ति। ञ्मकारभकारौ पदान्तौ न स्त इति कृत्वा आगमावपि न भविष्यतः॥ अथ किमिदमक्षरमिति। अक्षरं न क्षरं विद्यात्। नक्षीयते न क्षरतीति वा अक्षरम्। अश्नोतेर्वा सरोक्षरम्। अश्नोतेर्वा पुनरयमौणादिकः सरन् प्रत्ययः। अश्नुत इत्यक्षरम्। वर्णं वाहुः पूर्वसूत्रे। अथ वा पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते॥

परमार्थतो नित्यम्। व्यवहारनित्यतया तु वर्णपदवाक्यस्फोटानां जातिस्फोटस्य वा॥ अश्नोतेर्वेति। सरन्प्रत्ययस्यानुबन्धलोपे कृते अनुकरणं सर इति। तत्रार्थमश्नुते व्याप्नोतीत्यक्षरं पदं वाक्यं वा। वर्णं वाहुरिति। रूढिरियं वर्णस्येत्यर्थः। पूर्वसूत्रे इति। व्याकरणान्तरे वर्णा अक्षराणीति वचनात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमर्थमिति।वर्णानांसाधुत्वस्याप्रतिपाद्यत्वात्तदर्थैवसाधुत्वान्वाख्यानात्प्रश्नः।वर्णज्ञानमिति।वर्णायेनशास्त्रेणज्ञायन्ते
तद्वाचोविषयःशास्त्रेणवाग्विषीयतेआबध्यतेशास्त्रेणतस्याःपरिज्ञानादित्यर्थः।यत्रचेति।ब्रह्मवेदःशब्देवर्त्ततेतस्यचशा
स्त्रविषयःलौकिकानांवैदिकानांचशास्त्रंविषयइत्यर्थः।तदर्थमिति।शास्त्रप्रवृत्त्यर्थमित्यर्थः।इष्टबुद्ध्यर्थमिति।कत्वादि
दोषरहितवर्णज्ञानार्थमित्यर्थः।लघ्वर्थमिति अनुबन्धकरणार्थमित्यर्थः।वाक्समाम्नायइति।एतावद्भिरेववर्णैर्वाग्व्य
वहारइत्यर्थः।पुष्पितःफलितइति।दृष्टादृष्टफलाभ्यामभ्युदयनिःश्रेयसाभ्यांच।चन्द्रतारकवदिति।अनादित्वान्नित्य

किमर्थमुपदिश्यते।अथकिमर्थमुपदेशःक्रियते॥वर्णज्ञानंवाग्विषयोयत्रचब्रह्मवर्त्तते।तदर्थमि
ष्टबुद्ध्यर्थंलघ्वर्थंचोपदिश्यते।सोऽयमक्षरसमाम्नायोवाक्समाम्नायःपुष्पितःफलितश्चन्द्रतारकवत्प्र
तिमण्डितोवेदितव्योब्रह्मराशिः।सर्ववेदपुण्यफलावाप्तिश्चास्यज्ञानेभवति।मातापितरौचास्यस्वर्गे
लोकेमहीयेते॥ ॥इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येप्रथमस्याध्यायस्यप्र
थमेपादेद्वितीयमाह्निकम्॥

त्वंवाग्व्यवहारस्यसूचयति।ब्रह्मराशिरिति।ब्रह्मतत्त्वमेवशब्दरूपतयाप्रतिभातीत्यर्थः।सर्ववेदेति।सर्ववेदाध्यय
नकृतस्यपुण्यस्ययत्फलंतत्प्राप्नोतीत्यर्थः।मातापितराविति।माहात्म्यातिशयःशास्त्रस्यप्रत्याहारमात्रफलाख्यान
द्वारेणान्वाख्यायते।महीयेतेइतिपूज्येतेइत्यर्थः।महीयशब्दःकण्ड्वादियगन्तः॥ ॥इत्युपाध्यायजैयटपुत्रकैयट
कृतेप्रथमस्याध्यायस्यप्रथमेपादेद्वितीयमाह्निकम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृद्धिरादैच्। कुत्वं कस्मान्न भवतीति। अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनि विनियोगान्नित्यत्वाच्च सर्वे संज्ञा-
नां लौकिकत्वादादैच्छब्दस्यानुकरणशब्दत्वाज्जातिशब्दत्वाद्वा शास्त्रप्राप्तिरस्तीति प्रश्नः। तत्र कुशब्दः पञ्च-
सु वर्णेष्वासक्तरूपो वाचकत्वेन विनियुक्त इति शब्दस्वरूपे प्रवृत्तिनिमित्ते भावप्रत्ययः। छन्दोवदिति। न वै शेषि

वृद्धिरादैच्॥ कुत्वं कस्मान्न भवति। चोः कुः पदस्येति। भत्वात्। कथं भसंज्ञा। अयस्मयादीनि छ-
न्दसीति। छन्दसीत्युच्यते। न चेदं छन्दः। छन्दोवत्सूत्राणि भवन्ति। यदि भसंज्ञा वृद्धिरादैजदेङ्गु-
ण इति जश्त्वमपि न प्राप्नोति। उभयसंज्ञान्यपि छन्दांसि दृश्यन्ते। तद्यथा। स सुष्टुभा स ऋक्वता गणे-
न। पदत्वात्कुत्वम्। भत्वाज्जश्त्वं न भवति। एवमिहापि पदत्वाज्जश्त्वं भत्वात्कुत्वं न भविष्यति। किं पु-
नरिदं तद्भावितग्रहणं वृद्धिरित्येवं ये आकारैकारौकारा भाव्यन्ते तेषां ग्रहणमाहोस्विदादैज्मात्रस्य।
किं चातः। यदि तद्भावितग्रहणं शालीयो मालीय इति वृद्धलक्षणश्छो न प्राप्नोति। आम्रमयं शालमय-
म्। वृद्धलक्षणो मयण्न प्राप्नोति। आम्रगुप्तायनिः शालगुप्तायनिः। वृद्धलक्षणः फिञ्न प्राप्नोति। अ-
थादैज्मात्रस्य ग्रहणम्। सर्वो भासः सर्वभास इत्युत्तरपदवृद्धौ सर्वं चेत्येष विधिः प्राप्नोति। इह तावती भा-
र्या यस्य तावद्भार्यः यावद्भार्यः। वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः प्राप्नोति। अस्तु तर्हि आदैज्मात्रस्य
ग्रहणम्। ननु चोक्तं सर्वो भासः सर्वभास इत्युत्तरपदवृद्धौ सर्वं चेत्येष विधिः प्राप्नोतीति। नैष दोषः। नैवं
विज्ञायते उत्तरपदस्य वृद्धिरुत्तरपदवृद्धिरुत्तरपदवृद्धाविति। कथं तर्हि।

कसूत्राणि। अपिलङ्गत्वाद्व्याकरणसूत्राण्येवादृष्टिश्चेयं छन्दोवदिति। किं पुनरिति। उभयथा शास्त्रे दर्शनात्प-
क्षद्वये च दोषसंभवात्प्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

उत्तरपदस्येत्येवमिति। तत्र ह्रिवृद्धौ सर्वे चेत्यप्युच्यमाने वृद्धिमात्रस्योत्तरपदत्वाभावात्सामर्थ्याद्वृद्धिमदुत्तरपदं ग्रहीष्य-
तइत्यतिरिच्यमानमुत्तरपदग्रहणं सामर्थ्यादुत्तरपदाधिकारमवगमयति। वृद्धेर्निमित्तं यस्मिन्निति। निमित्तशब्दोपादा
नसामर्थ्याद्व्यधिकरणपदो बहुव्रीहिराश्रीयते। अन्यथा वृद्धेस्तद्धितस्येत्येवं ब्रूयात्। वृद्धिनिमित्तत्वाच्च तद्धितस्य तद्धित
एव वृद्धिशब्देनाभिधायिष्यते। अथवा वृद्धेः संबन्धी यस्तद्धित इति वैयधिकरण्येन संबन्ध आश्रयिष्यते। योसौ ककार इ
ति। कञ्रणेषु सत्सु वृद्धिर्भवतीति तेषामेव निमित्तत्वम्। अथवेति। निमित्तशब्दोपादानादेवाश्रितबहुत्वसंख्यो वृद्धिशब्दः

उत्तरपदस्येत्येवं प्रकृत्य या वृद्धिस्तद्वत्युत्तरपद इत्येवमेतद्विज्ञायते। अवश्यं चैतदेवं विज्ञेयम्। तद्भावि
तग्रहणे सत्यपीह प्रसज्येत। सर्वः कारकः सर्वकारक इति। यदप्युच्यते। इह तावती भार्या यस्य तावद्भार्यः
यावद्भार्य इति। वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः प्राप्नोतीति। नैष दोषः। नैवं विज्ञायते। वृद्धेर्निमित्तं वृद्धि
निमित्तं वृद्धिनिमित्तस्येति। किं तर्हि। वृद्धेर्निमित्तं यस्मिन्सोयं वृद्धिनिमित्तः। वृद्धिनिमित्तस्येति। किं च वृद्धेर्नि
मित्तम्। योसौ ककारो ञकारो णकारो वा। अथवा यः कृत्स्नाया वृद्धेर्निमित्तम्। कश्च कृत्स्नाया वृद्धेर्निमित्तम्
। यस्त्रयाणामाकारैकारौकाराणाम्॥ संज्ञाधिकारः संज्ञासंप्रत्ययार्थः॥ अथ संज्ञेत्येवं प्रकृत्य वृद्ध्यादयः
शब्दाः पठितव्याः। किं प्रयोजनम्। संज्ञासंप्रत्ययार्थः। वृद्ध्यादीनां शब्दानां संज्ञेत्येष संप्रत्ययो यथा स्या
त्। इतरथा ह्यसंप्रत्ययो यथा लोके। अक्रियमाणे हि संज्ञाधिकारे वृद्ध्यादीनां संज्ञा इत्येष संप्रत्ययो न स्यात्।

समस्यते वृद्धीनां निमित्तं वृद्धि — निमित्तमिति। संज्ञाधिकार इति वार्त्तिकम्। तस्य व्याख्यानमथ संज्ञेत्येवमिति। अथ
शब्दः संज्ञायाः प्रस्तावद्योतनार्थः। वृद्ध्यादीनामिति। संप्रत्यय इत्येतदपेक्षया कर्मणि षष्ठी। वृद्ध्यादयः संज्ञात्वे
न यथा प्रतीयेरन्नित्यर्थः। यथा लोक इति। कात्यायनेनासंप्रत्यये लोको दृष्टान्तत्वेनोपात्तः। भाष्यकारस्तु वाक्या
ध्याहारेणानर्थकत्वे लोकं दृष्टान्तत्वेन योजयति। राम: ५५

तत्रहीति। आऽवतीत्योः सर्वसोः सर्वौरित्यादौ तु न चारितार्थ्यमुद्भाव्यम्। अनभिधानात्। स्वरितत्वात् ऽधिकारार्थलाभः। वि॰। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बहुसूत्रमिति। बहुव्रीहिः। प्रकरणं चान्यपदार्थः। समाहारे द्विगुर्वा। अर्थवन्ति चेति। यथा लोकोर्थवन्ति प्रयुङ्क्ते एवमनर्थकान्यपीत्यर्थः। यावदाप्तत्वमाचार्यस्य न साधितं तावदनर्थकत्वाशङ्का। दृष्टिति समन्वयानवगमात्। दशदाडिमानीति। पदार्थानां समन्वयाभावादत्रानर्थक्यम्। आचार्याचारादिति। आचार्याणां व्यवहारादित्यर्थः। वृद्धिशब्दः संज्ञेति। वृद्धिशब्दस्य प्रत्याय

इदमिदानीं बहुसूत्रमनर्थकं स्यात्। अनर्थकमित्याह। कथम्। यथा लोके। लोके ह्यर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते। अर्थवन्ति तावत्। देवदत्त गामभ्याज शुक्लां दण्डेन देवदत्त गामभ्याज कृष्णामिति। अनर्थकानि। दशदाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन इति। संज्ञासंज्ञ्यसंदेहश्च॥ क्रियमाणेपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्यः। कुतो ह्येतत्। वृद्धिशब्दः संज्ञा आदैचः संज्ञिन इति। न पुनरादैचः संज्ञा वृद्धिशब्दः संज्ञीति। यत्तावदुच्यते संज्ञाधिकारः कर्तव्यः संज्ञासंप्रत्ययार्थ इति। न कर्तव्यः॥ आचार्याचारात्संज्ञासिद्धिः॥ आचार्याचारात्संज्ञासिद्धिर्भविष्यति। किमिदमाचार्याचारादिति। आचार्याणामुपचारात्। यथा लोकिकवैदिकेषु। तद्यथा लोकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते देवदत्तो यज्ञदत्त इति। तयोरुपचारादन्येपि जानन्तीयमस्य संज्ञेति। वेदेपि याज्ञिकाः संज्ञां कुर्वन्ति स्फ्यो यूपश्चषाल इति। तत्रभवतामुपचारादन्येपि जानन्तीयमस्य संज्ञेति। एवमिहापि। इहैव तावत्केचिद्व्याचक्षाणा आहुः। वृद्धिशब्दः संज्ञा आदैचः संज्ञिन इति। अपरे पुनः सिचि वृद्धिरित्युक्त्वा आकारैकारौकारानुदाहरन्ति तेन मन्यामहे यया प्रत्याय्यन्ते सा संज्ञा ये प्रतीयन्ते ते संज्ञिन इति।

न शक्तिर्व्याख्यानेनैव प्रकाश्यते। यथादैचां वर्णानामिति वर्णत्वम्। अपर इति। प्रदेशाद्वा संज्ञासंज्ञ्यभिव्यक्तिः संज्ञासूत्रार्थो-ह्यप्रदेशार्थस्य व्यवस्थेति भावः॥

द्विगुरिति। पात्रादित्वात्स्त्रीत्वाभावः।

भा॰कै॰ अनाकृतिरिति। आकृत्यासाहचर्याद्भेदोलक्ष्यतेतेनायमर्थः। वृद्धिशब्दएकत्वात्संज्ञा। आदैचांबहुत्वात्संज्ञित्वम्। लाघवा ११२
५५ र्थंहिसंज्ञाकरणम्। यथासर्वादीनिसर्वनामानीत्यनेकस्यैकासंज्ञाक्रियतेनत्वेकस्यानेकासंज्ञा प्रयोजनाभावात्। आकृतिमतइति। अवस्थाभेदेष्वपिसएवायमितिप्रत्यभिज्ञानिमित्तकंदेवदत्तत्वादिकंसामान्यमस्तीत्याकृतिमतइत्युक्तम्। लिङ्गेनवेति। कलादिनावर्णदोषेणेत्यर्थः। तमेवोपालभ्येति। योहिसूत्रकारमुपालभतेऽगमकंतेसूत्रमितिसकथंवृत्तिकारादीन्प्रमाणयेनाश्रयतीत्यर्थः। अपरितुष्यन्निति। त्वयापिपरिहारान्तरंब्रुवताआचार्याचारेणप्रमाणत्वेनाश्रितइत्यर्थः। तच्चापीति।

यदप्युच्यते। क्रियमाणेपिसंज्ञाधिकारेसंज्ञासंज्ञिनोरसंदेहोवक्तव्यइतिसंज्ञासंज्ञ्यसंदेहश्च। संज्ञासंज्ञिनोश्चासंदेहःसिद्धः। कुतः। आचार्याचारादेव। उक्तआचार्याचारः॥ अनाकृतिः॥ अथवाअनाकृतिःसंज्ञा आकृतिमन्तःसंज्ञिनः। लोकेपिह्याकृतिमतोमांसपिण्डस्यदेवदत्तइतिसंज्ञाक्रियते॥ लिङ्गेनवा॥ अथवाकिंचिल्लिङ्गमासज्यवक्ष्यामीत्थंलिङ्गासंज्ञेति। वृद्धिशब्देचतल्लिङ्गंकरिष्यतेनादैच्शब्दे। इदंतावद्युक्तंयदुच्यतेआचार्याचारादिति। किमत्रायुक्तम्। तमेवोपालभ्यागमकंतेसूत्रमितितस्यैवपुनःप्रमाणीकरणमित्येतदयुक्तम्। अपरितुष्यन्खल्वपिभवाननेनपरिहारेणानाकृतिलिङ्गेनवेत्याह। तच्चापिवक्तव्यम्। यद्यप्येतदुच्यते। अथवैतर्हिइत्संज्ञानवक्तव्यालोपश्चनवक्तव्यः।

लिङ्गेनवेत्येतद्वक्तव्यमित्यर्थः। अनाकृतिःसंज्ञेत्येतन्न्यायसिद्धत्वान्नवक्तव्यम्। अथवैतर्हीति। एवंसतीत्यर्थः। ङकारादि- रामः
ष्वनुबन्धेषुकलादिकमासङ्क्ष्यते। ततस्तेषांसंज्ञात्वेसतिङिदात्मनेपदमितिकरिष्यतेसंज्ञाश्चसंज्ञिनंप्रत्याय्यस्वयंनिव ५५
र्तन्तइतीत्संज्ञालोपश्चनवक्तव्योभवतइत्यर्थः।

CC-0. In Public Domain. Digitization by eGangotri

प्रमाणभूत इति। प्रामाण्यं प्राप्त इत्यर्थः। भू प्राप्तावित्यस्याधृषाद्वेति णिजभावे रूपम्। वृत्तिविषये च प्रमाणशब्दः प्रामाण्ये वर्तते। दर्भपवित्रेति। प्रमादाभावं दर्शयति। प्राङ्मुख इति। प्राच्या अभ्युदयहेतुत्वात्। महतेति। मनःप्रणिधानं दर्शयति। एतच्च सर्वमागमाद्बोद्धव्यम्। एवमानर्थक्ये परिहृते संज्ञासंप्रत्ययाय पक्षान्तराणि प्रश्नमुखेन प्रक्षिपति। किमत इति। कृतमनयोरिति। आदैच्छब्दस्य द्वन्द्वत्वादनयोरिति द्विवचननिर्देशः। आदैच इति। तेषां च द्वन्द्वनिर्देशो यमादैच्छब्द इ

संज्ञालिङ्गमनुबन्धेषु करिष्यते। न च संज्ञाया निवृत्तिरुच्यते। स्वभावतः संज्ञा संज्ञिनं प्रत्याय्य स्वयं निवर्तते। तेनानुबन्धानामपि निवृत्तिर्भविष्यति। सिद्धं त्वेवम्। अपाणिनीयं तु भवति। यथान्यासमेवास्तु। ननु चोक्तं संज्ञाधिकारः संज्ञासंप्रत्ययार्थ इतरथा ह्यसंप्रत्ययो यथा लोक इति। न च यथा लोके तथा व्याकरणे। प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्रं प्रणयति स्म तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण। किमतो यदशक्यम्। अतः संज्ञासंज्ञिनावेव। कुतो नु खल्वेतत् संज्ञासंज्ञिनावेवेति। न पुनः साध्वनुशासनेऽस्मिञ्शास्त्रे साधुत्वमनेन क्रियते। कृतमनयोः साधुत्वम्। कथम्। वृद्धिरस्याविशेषेणोपदिष्टः प्रकृतिपाठे तस्मात् क्तिन्प्रत्ययः। आदैचोऽप्यक्षरसमाम्नाय उपदिष्टाः। प्रयोगनियमार्थं तर्हीदं स्यात्। वृद्धिशब्दात्पर आदैचः प्रयोक्तव्या इति। नेह प्रयोगनियम आरभ्यते। किं तर्हि।

त्यर्थः। प्रयोगनियमार्थमिति। आदैज्वृद्धिरिति प्रयोगो मा भूदित्यर्थः। नेहेति। प्रयुज्यत इति प्रयोगस्तस्य स्वतन्त्रस्य पदस्य प्रयुज्यमानस्य नियमो नारभ्यतेऽपि तु पदावयवस्य प्रकृतिप्रत्ययोपसर्जनागमादिरूपस्य। लोके च केवल एव वृद्धिशब्दः प्रयुज्यत इति न तस्यानेन नियमः क्रियते। लोके प्रयुक्तानामिदमनुशासनम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै॰ षष्ठीनिर्दिष्टस्येति। स्थानशब्दोऽर्थवाची। तिष्ठन्त्यस्मिन्शब्दा इति स्थानम्। न च वृद्धिशब्दार्थमादैचो वक्तुं शक्यास्तेनात्र ११३
५६ षष्ठ्यर्थाभावादिति तात्पर्यम्। तथाहि। षष्ठ्यभावेपि तदर्थसद्भावाद्भवत्येव स्थान्यादेशभावो यथा नाभिनभं च परस्त्रीपर
मुंचेति। आगमा अपीति। अत्राप्यर्थोपेक्ष्यते। अनागमकानामर्थे सागमका इत्यर्थः। लिङ्गेन चेति। देशविशेषप्रतिप
त्तये टकारादिलिङ्गं तत्र क्रियत इत्यर्थः। इदं खल्वपीति। विशेषणविशेष्यभावनिराकरणेन संज्ञापक्षं स्थापयति। दे
वदत्तः पचतीत्यत्र हि सामानाधिकरण्यं न त्वेकविभक्तित्वम्। गौरश्व इत्यत्र त्वेकविभक्तित्वं न तु सामानाधिकरण्यमि

संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसंबन्धो भवति। तद्यथा। आहर पात्रं पात्रमाहरे
ति। आदेशास्तर्हीमे स्युः। वृद्धिशब्दस्यादैच आदेशाः षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते। न चात्र षष्ठीं प-
श्यामः। आगमास्तर्हीमे स्युः। वृद्धिशब्दस्यादैच आगमाः। आगमा अपि षष्ठीनिर्दिष्टस्यैवोच्यन्ते। लि
ङ्गेन च। न चात्र षष्ठीं न खल्वप्यागमलिङ्गं पश्यामः। इदं खल्वपि भूयः सामानाधिकरण्यमेकविभक्तित्वं च
द्वयोश्चैतद्भवति। कयोः विशेषणविशेष्ययोर्वा संज्ञासंज्ञिनोर्वा।

स्तूभयोरुपादानम्। संज्ञासंज्ञिनोरप्यस्ति विशेषणविशेष्यत्वं प्रसिद्धाप्रसिद्धिवशात्तु भेदेनोपादानम्। तत्तु सामाना
धिकरण्यं शब्दयोरेव केचिदिच्छन्ति। द्वाभ्यां शब्दाभ्यां भिन्नप्रवृत्तिनिमित्ताभ्यामेकस्याधिकरणस्याभिधेयस्य प्रतिपाद एमः
नाद्विशेषणविशेष्यार्थप्रतिपादनाच्च विशेषणविशेष्यत्वम्। अन्ये तु नीलोत्पलमिति प्रवृत्तिनिमित्तयोर्जातिगुणयोरे ५६
कमधिकरणमाश्रय इति सामानाधिकरण्यं विशेषणविशेष्यत्वमर्थयोरेवमन्यन्ते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचादैच्छब्द इति। नह्यस्य कश्चिल्लौकिकोऽर्थः प्रसिद्ध इत्यर्थः। आवर्तिन्य इति। देवदत्तादिशब्दा हि दानादिप्रतिपादनाय आवर्तन्ते। अथ वेति। सत्यसति वा संज्ञिनि बुद्ध्या विषयीकृते शब्देन पूर्वं निर्दिष्टे संज्ञा प्रवर्तते इत्यर्थः। ततश्चादेङ्गुण इत्यादावदेङादयः संज्ञिनो गुणादयः संज्ञाः। इह तु मङ्गलार्थोऽन्यथा पाठक्रमः। आर्थस्त्वन्यथा क्रमः। अन्ये तु सिद्धिहेतवो

तत्रैतत्स्याद्विशेषणविशेष्ये इति। तच्च न। द्वयोर्हि प्रतीतपदार्थकयोर्विशेषणविशेष्यभावो भवति। न चादैच्छब्दः प्रतीतपदार्थकः। तस्मात्संज्ञासंज्ञिनावेव। तत्र त्वेतावान्संदेहः कः संज्ञी का संज्ञेति। स चापि क्व संदेहः। यत्रोभे समानाक्षरे। यत्र त्वन्यतरल्लघु सा संज्ञा यद्गुरु स संज्ञी। कुत एतत्। लघ्वर्थं हि संज्ञाकरणम्। तत्राप्ययं नावश्यं गुरुलघुतामेवोपलक्षयितुमर्हति। किं तर्हि। अनाकृतितामपि। अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिनः। लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते। अथ वा आवर्तिन्यः संज्ञा भवन्ति। वृद्धिशब्दश्चावर्तते नादैच्शब्दः। तद्यथा। इतरत्रापि देवदत्तशब्द आवर्तते न मांसपिण्डः। अथ वा पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा। कुत एतत्। सतो हि कार्यिणः कार्येण भवितव्यम्। तद्यथा। इतरत्रापि सतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते।

भविष्यन्ति। अएक्तएकाल्लिति परिभाषा न संज्ञेति नास्ति व्यभिचारः। अएक्तशब्दे नैकाकी कथ्यत इत्यनेनानियमेन ग्रहणे प्राप्ते नियमः क्रियते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा· कै· अस्थानइति। अन्तरेणापि संज्ञाशब्दप्रयोगं लोकव्यवहारवदत्र संज्ञासंज्ञिसंबन्धः सिध्यतीत्यर्थः। सतो वृद्ध्यादि ११२
४७ ष्विति। विधौ चायं दोषो नानुवादे वृद्धिर्यस्येत्यादौ। तत्र च संज्ञाविधानस्य चरितार्थत्वान्मृजेर्वृद्धिरित्यादौ वृद्धिशब्द

कथं वृद्धिरादैजिति। एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम्। माङ्गलिक आचार्यो महतः शास्त्रौघ-
स्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायु
ष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति। सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चा
रिता संज्ञा। अदेङ्गुण इति यथा। दोषवान्त्वल्वपि संज्ञाधिकारः। अष्टमेपि हि संज्ञाः क्रियन्ते तस्य परमा
म्रेडितमिति तत्रापीदमनुवर्त्यं स्यात्। अथवा अस्थानेयं यत्नः क्रियते न हीदं लोकाद्भिद्यते। यदीदं
लोकाद्भिद्येत ततो यत्नार्हं स्यात्। तद्यथा। अगोज्ञाय कश्चिद्गां सक्थनि कर्णे वा गृहीत्वोपदिशति
अयं गौरिति। न चास्मा आचष्टे इयमस्य संज्ञेति। भवति चास्य संप्रत्ययः। तत्रैतत्स्यात्कृतः पूर्वैर
भिसंबन्ध इति। इहापि कृतः पूर्वैरभिसंबन्धः। कैः। आचार्यैः। तत्रैतत्स्यात्। यस्मै तर्हि संप्रत्युपदिश्य
ति तस्याकृत इति। लोकेपि यस्मै संप्रत्युपदिशति तस्याकृतः। अथ तत्र कृतः। इहापि कृतो द्रष्टव्यः
॥ सतो वृद्ध्यादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः॥ सतः संज्ञिनः संज्ञाभावात्तदा
श्रये संज्ञिनि वृद्ध्यादिष्वितरेतराश्रयत्वादप्रसिद्धिः। का इतरेतराश्रयता। सतामादैचां संज्ञया
भवितव्यं संज्ञया चादैचो भाव्यन्ते। तदेतदितरेतराश्रयं भवति इतरेतराश्रयाणि च कार्याणि न प्र राम:
कल्पन्ते। तद्यथा नौर्नावि बद्धा नेतरत्राणाय भवति। ४७

॥

एवादेत्त्वं प्राप्नोति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु च भोः इति। नौशाकटस्याभिमतदेशान्तरप्राप्तिरितरेतराश्रयेति चोद्यम्। सामग्र्यन्तरानुप्रवेशेन चोत्तरम्। सिद्धं त्विति। न हि मृजेरपूर्व आकारो भाव्यते किं तु मृजावुपदिष्टे मार्ष्टीत्यादीनामसाधुत्वबुद्धिः प्राप्नोतीति तेषां साधुत्वान्वाख्यानं क्रियते। प्रत्येकमिति। यद्यपि नित्यशब्दत्वे नैतदपि व्यवतिष्ठते तथापि न्यायव्युत्पादनायोपन्यासः। समुदाये मा भूतामिति। अन्यथा मृजेर्वृद्धिरित्यादौ समुदाय आदेशः प्राप्नोति। समुदायावयवसन्निधौ कतात्पर्यं कस्य चनान्तरीयकत्वमिति विचार्यते। अन्यत्रे

ननु च भोः इतरेतराश्रयाण्यपि कार्याणि दृश्यन्ते। तद्यथा। नौः शाकटं वहति शाकटं च नावं वहति। अन्यदपि तत्र किंचिद्भवति जलं स्थलं वा। स्थले शाकटं नावं वहति जले नौः शाकटं वहति। यथा तर्हि त्रिविष्टब्धकम्। तत्रापि अन्ततः सूत्रकं भवति। इदं पुनरितरेतराश्रयमेव। सिद्धं तु नित्यशब्दत्वात्। सिद्धमेतत्। कथम्। नित्यशब्दत्वात्। नित्याः शब्दाः। नित्येषु शब्देषु सतामादैचां संज्ञा क्रियते न संज्ञया आदैचो भाव्यन्ते। यदि तर्हि नित्याः शब्दाः किमर्थं शास्त्रम्। किमर्थं शास्त्रमिति चेत् निवर्तकत्वात्सिद्धम्। निवर्तकं शास्त्रम्। कथम्। मृजिरस्माय अविशेषेणोपदिष्टस्तस्य सर्वत्र मृजिबुद्धिः प्रसक्ता तत्रानेन निवृत्तिः क्रियते। मृजेरक्ङित्सु प्रत्ययेषु मृजिप्रसङ्गे मार्जिः साधुर्भवतीति॥ प्रत्येकं गुणवृद्धिसंज्ञे भवत इति वक्तव्यम्। किं प्रयोजनम्। समुदाये मा भूतामिति। अन्यत्र सहवचनात्समुदाये संज्ञाऽप्रसङ्गः॥ अन्यत्र सहवचनात्समुदाये वृद्धिगुणसंज्ञयोरप्रसङ्गः।

ति। यत्नसाध्या समुदायप्रतिपत्तिरिति यत्नाभावेन भवतीत्यर्थः। ननु सहग्रहणं नियमार्थं स्यात्समुदायस्यैव समाससंज्ञा यथा स्यान्नावयवानामिति। नैतदस्ति। उभयत्र तात्पर्याभावाद्युगपदुभयत्र प्रसङ्गाभावाल्लिङ्गत्वमेव सहग्रहणस्यान्यत्र समुदाये तात्पर्यं नास्तीत्यस्यार्थस्य। उभे अभ्यस्तं सहेति। अत्र सहग्रहणं वार्तिककारस्य कर्तव्यत्वेन स्थितम्। भाष्यकारस्तु भेग्रहणस्यैतत्प्रयोजनं स्थापयिष्यति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यवयवं चेति। अत्र वाक्यशब्देन वाक्यार्थफलमुच्यते। तच्च देवदत्तादीनां भोजनम्। तस्य चैतद्देवरूपं यत्प्रत्येकपरिसमाप्त्या संपद्यते। अन्नादनादिरूपत्वात्तृप्तिफलत्वाच्च भोजनस्य। नात्यक्रियात्तु समुदाये समाप्यते। गीतादिक्रियासमुदायरूपत्वात्तस्याः संयोगसंज्ञात्वन्वर्थत्वात्समुदाये प्रवर्तते। वृद्धिसंज्ञा तु लक्ष्ये पृथगादेशदर्शनात्। मालादीनां चेति लिङ्गाच्च प्रत्येकं व्यवतिष्ठते। गर्गाः शतं दण्ड्यन्तामिति। अत्र शतस्येप्सिततमत्वात्प्राधान्यमपादानस्थानप्राप्ता गर्गा गुणाः कर्म। न च गुणभेदेन प्रधानस्य भेद इति शतदण्डनं समूहे परिसमाप्यते। अर्थिनश्चेति। शतस्य प्राधान्यं प्रतिपाद्यते। दण्डपरायां हि चोदनायां शतस्य प्रा-

यत्नेच्छति सहभूतानां कार्यं करोति तत्र सहग्रहणम्। तद्यथा। सह सुपा। उभे अभ्यस्तं सहेति॥ प्रत्यवयवं च वाक्यपरिसमाप्तेः॥ प्रत्यवयवं च वाक्यपरिसमाप्तिर्दृश्यते। तद्यथा। देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति। न चोच्यते प्रत्येकमिति। प्रत्येकं च भुजिः परिसमाप्यते। ननु चायमप्यस्ति दृष्टान्तः। समुदाये वाक्यपरिसमाप्तिरिति। तद्यथा। गर्गाः शतं दण्ड्यन्तामिति। अर्थिनश्च राजानो हिरण्येन भवन्ति। न च प्रत्येकं दण्डयन्ति। सत्येतस्मिन्दृष्टान्ते यदि तत्र सहग्रहणं क्रियते। इहापि प्रत्येकमिति वक्तव्यम्। अथ तत्रान्तरेण सहग्रहणं सहभूतानां कार्यं भवति। इहापि नार्थः प्रत्येकमिति वचनेन। अथ किमर्थमाकारस्तपरः क्रियते। आकारस्य तपरकरणं सवर्णार्थम्।

धान्यमतो वाक्यादवगम्यते। अथ तत्रान्तरेणेति। न्यायादन्वर्थत्वाच्च समाससंज्ञायाः समुदाये परिसमाप्तौ सिद्धायां योगविभागार्थं तत्र सहग्रहणं स्थितमिति तत्रान्तरेणेत्युक्तम्। अथ किमर्थमिति। किमाकृतिपक्षे भिन्नकालनिवृत्त्यर्थमथ- रामः

वा व्यक्तिपक्षे गुणान्तरयुक्तानां ग्रहणार्थमिति प्रश्नः। आकारस्येति। व्यक्तिः पदार्थो भेदकाश्च गुणा इति दर्शने यद्गुणस्यैवो- ४८

च्चारणं तद्गुणस्यैव संज्ञाप्रसङ्गे गुणान्तरयुक्तानामपि संज्ञाप्रतिपत्त्यर्थं तपरत्वमित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

किंचकारणमिति।अभेदकाहिगुणाः।मुण्डेनहिछत्तेचौर्येकुन्तलिलावस्थायामपिचौरोयमितिव्यपदिश्यतइतिप्रश्नः।
भेदकत्वादिति।सर्वगुणसङ्ग्रहार्थंगुणग्रहणंकर्तव्यमित्यर्थः।एकोयमिति।उदकत्वजातियोगादत्रैकत्वंनविवक्षि
तंकिंतर्हिविशिष्टभाजनस्थमेकमुदकद्रव्यंतदेवचगुणान्तरयोगादन्यत्वेनलोकेव्यपदिश्यते।उभयमिति।आम्ना

आकारस्यतपरकरणंक्रियते।किंप्रयोजनम्।सवर्णार्थम्।तपरस्तत्कालस्येतितत्कालानांसवर्णानां
ग्रहणंयथास्यात्।केषाम्।उदात्तानुदात्तस्वरितानाम्।किंचकारणंनस्यात्।भेदकत्वात्स्वरस्य।भेद
काउदात्तादयः।कथंपुनर्ज्ञायतेभेदकाउदात्तादयइति।एवंहिदृश्यतेलोके।यउदात्तेकर्तव्येअनु
दात्तंकरोतिखण्डिकोपाध्यायस्तस्मैचपेटांददातिअन्यत्त्वंकरोषीति।अस्तिप्रयोजनमेतत्।किंत-
र्हीति।भेदकत्वाद्गुणस्येतिवक्तव्यम्।किंप्रयोजनम्।आनुनासिक्यंनामगुणःतद्भिन्नस्यापिग्रहणं
यथास्यात्।किंचकारणंनस्यात्।भेदकत्वाद्गुणस्य।भेदकागुणाः।कथंपुनर्ज्ञायतेभेदकागुणाइति।
एवंहिदृश्यतेलोके।एकोयमात्माउदकंनामतस्यगुणभेदादन्यत्वंभवति।अन्यदिदंशीतमन्यदि
दमुष्णमिति।ननुचभोःअभेदकाअपिगुणादृश्यन्ते।तद्यथा।देवदत्तोमुण्ड्यपिजट्यपिशिख्यपि
स्वामाख्यांनजहाति।तथाबालोयुवावृद्धःवत्सोदम्योबलीवर्दइति।उभयमिदंगुणेषूक्तम्।भेदका
अभेदकाइति।किंपुनरत्रन्याय्यम्।अभेदकागुणाइत्येवन्याय्यम्।कुतएतत्।

यत्राव्यानियतस्वराइतिवेदेगुणानांभेदकत्वम्।लोकेतूभयथाव्यवहारः।गोपिण्डोहिवत्साद्यवस्थाभेदात्क्रयविक्र-
यादिषुमूल्यादिभेदाद्भेदेनव्यवह्रियतेसएवायमितिप्रत्यभिज्ञानादभेदेनापीतिप्रश्नः।किंपुनरिति।अत्रेति।शास्त्रे। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰वै॰ उदात्तमेवेति।तस्माद्गुणरहितस्योच्चारणाभावान्नान्तरीयकत्वादुच्चार्यमाणोपिगुणः प्रयत्नमन्तरेणनविवक्षितइत्य ११२
४९ र्थः।यद्येवंकथमन्यत्रोक्तमुदात्तनिपातनंकरिष्यतइतियावतातत्राप्यविवक्षाप्राप्नोति।नैषदोषः।तत्रापिस्थानेन्त
रतमवचनादादेशस्ययःस्वरःप्राप्तस्तस्मिन्नुच्चारयितव्येउदात्तोच्चारणंप्रयत्नेनविवक्षार्थंविज्ञायते।एवमनु-
नासिकस्यप्रयत्नाधिक्येनोच्चारणंतद्विवक्षार्थमेव।ऊञः ऊँ इति यथा।अन्येत्वाहुः।एकश्रुत्यासूत्राणिपठ्यन्तेइ

यदयमस्थिदधिसक्थ्यक्ष्णामनङुदात्तइत्युदात्तग्रहणंकरोति।तज्ज्ञापयत्याचार्योऽभेदकागु
णाइति।यद्यभेदकागुणाःस्युःउदात्तमेवोच्चारयेत्।यदितर्ह्यभेदकागुणाःअनुदात्तादेरन्तोदात्ता
च्चयदुच्यतेतत्स्वरितादेःस्वरितान्ताच्चप्राप्नोति।नैषदोषः।आश्रीयमाणोगुणोभेदकोभवति।तद्य
था।शुक्लमालभेतकृष्णमालभेत।तत्रयःशुक्लेआलब्धव्येकृष्णमालभतेनहितेनयथोक्तंकृतं
भवति।असंदेहार्थस्तर्हितकारः।ऐजित्युच्यमानेसंदेहःस्यात् किमिमावैचावेवाहोस्विदाकारो-
प्यत्रनिर्दिश्यतइति।संदेहमात्रमेतद्भवति।सर्वसंदेहेषुचेदमुपतिष्ठते।व्याख्यानतोविशेषप्रति
पत्तिर्नहिसंदेहादलक्षणमिति।त्रयाणांग्रहणमितिव्याख्यास्यामः।अन्यत्रापिह्ययमेवंजातीय
केषुसंदेहेषुन कंचिद्यत्नंकरोति।तद्यथा।औतोम्शसोरिति।

तिक्वचिदुदात्तोच्चारणंतद्विवक्षार्थमिति।अनुदात्तादेरिति।अजुपलक्षणार्थोनुदात्तश्रुतिःस्यादितिप्रश्नः।उत्तरेत्वज्ग्र राम:
हणमेवकुर्यादित्यभिप्रायः।व्याख्यानतइति।प्रस्थेदृढमित्याद्युदात्तत्वेसिद्धेमालादीनांचेतिमालाशब्दस्यदृढार्थ- ४९
त्वादुपादानस्याकारप्रश्लेषनिश्चयइत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं तर्हीति। ननु भाव्यमानत्वादादैचोऽत्र ग्राहका न भविष्यन्ति। नैतदस्ति। नह्यत्र संज्ञाविधावादैचो भाव्यन्ते किं त्वैजिभि
रणत्वात्रिमात्रचतुर्मात्राणां ग्रहणात् संज्ञाप्रसङ्गाद्वृद्धिगुणविधौ च तेषामपि प्रसङ्गात्तन्निषेधाय तपरत्वम्। एवं स्थिते
चोदयन्ति। यद्येजर्थस्तकारस्तेनाकारस्य संबन्धाभावात् कथमादित्येतत्पदम्। उच्यते। तात्पर्येणैजर्थत्वं तका
रस्योच्यते आनुषङ्गिकं त्वाकारार्थत्वं तकारस्योच्यते। ज्ञापकद्वारेणह्याकारप्रश्लेषे विज्ञायमाने प्रतिपत्तिगौ

इदं तर्हि प्रयोजनम्। आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्नि
ति। खट्वा इन्द्रः। खट्वेन्द्रः। खट्वा उदकं खट्वोदकम्। खट्वा ईषा खट्वेषा। खट्वा ऊढा खट्वोढा। खट्वा एल
का खट्वैलका। खट्वा ओदनः खट्वौदनः। खट्वा ऐतिकायनः खट्वैतिकायनः। खट्वा औपगवः खट्वौपगव इति
। अथ क्रियमाणेऽपि तकारे कस्मादेव त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति।
तपरस्तत्कालस्येति नियमात्। ननु तः परो यस्मात्सोऽयं तपरः। नेत्याह। तादपि परस्तपरः। यदि तादपि
परस्तपरः ऋदोरबिति इहैव स्यात्। यवः स्तवः। लवः पव इत्यत्र न स्यात्। नैष तकारः। कस्तर्हि। दकारः।
किमत्र दकारे प्रयोजनम्। अथ किं तकारे। यद्यसंदेहार्थस्तकारः दकारोऽपि। अथ मुखसुखार्थस्तका
रः दकारोऽपि॥ वृद्धिरादैच्॥ इको गुणवृद्धी॥ इग्ग्रहणं किमर्थम्॥ इग्ग्रहणमात्संध्यक्षरव्यञ्जननिवृ-
त्त्यर्थम्॥ इग्ग्रहणं क्रियते। किं प्रयोजनम्। आकारनिवृत्त्यर्थं संध्यक्षरनिवृत्त्यर्थं व्यञ्जननिवृत्त्यर्थं च।

एवं भवति। सति तु तकारे आकारस्य स्वरूपप्रतिपत्तिः स्पष्टा भवतीति तकारसहितस्याकारस्यासंदिग्धानुकार्यप्रति
पादनार्थं वक्त्वाद्विभक्तेरुत्पत्तौ सत्यामादित्येतत्पदं सिद्धम्॥ इको गुणवृद्धी। इग्ग्रहणमिति वक्ष्यमाणज्ञापकवशा-
दाकारादिनिरासादिक एव गुणवृद्धी भविष्यत इति प्रश्नः। आत्संध्यक्षरेति। आकारादीनां स्थानित्वस्य निवृत्त्यर्थमित्यर्थः।

भी० कै० आकारस्याङ्गान्त्यस्य वृद्धिविधावभावाद्विशेषाभावाच्चाकारस्य चातो लोप इति लोपविधानादाकारस्य गुणप्रसङ्ग- ११३
५० मुदाहरति। यातेति। ग्लायतीति। एचां द्विमात्रत्वाविशेषात् प्रयत्नाधिक्याभावादेकारोपदेशेप्येकारो गुणः स्यात्। उ
म्भितेति। भकारस्यौष्ठ्यत्वादोकारो गुणः स्यात्। पररूपेणेति। अतो लोपस्तु न भवति। आर्धधातुकोपदेशे यदकारान्तं त

आकारनिवृत्त्यर्थं तावत्। याता वाता। आकारस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति। सन्ध्यक्षरनिवृत्त्यर्थम्। ग्लायति। म्लायति। सन्ध्यक्षरस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति। व्यञ्जननिवृत्त्यर्थम्। उम्भिता। उम्भितुम्। उम्भितव्यम्। व्यञ्जनस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति। आकारनिवृत्त्यर्थेन तावन्नार्थः। आचार्यप्रवृत्तिर्ज्ञापयति नाकारस्य गुणो भवतीति। यदयमातोऽनुपसर्गे क इति ककारमनुबन्धं करोति। कथं कृत्वा ज्ञापकम्। कित्करणे एतत्प्रयोजनं क्ङितीत्याकारलोपो यथा स्यात्। यदि चाकारस्य गुणः स्यात् कित्करणमनर्थकं स्यात्। गुणे कृते द्वयोरकारयोः पररूपेण सिद्धं रूपं स्याद्गोदः कम्बलद इति। पश्यति त्वाचार्यो नाकारस्य गुणो भवतीति। ततः ककारमनुबन्धं करोति। सन्ध्यक्षरनिवृत्त्यर्थेनापि नार्थः। उपदेशसामर्थ्यात्सन्ध्यक्षरस्य गुणो न भविष्यति। व्यञ्जन-निवृत्त्यर्थेनापि नार्थः। आचार्यप्रवृत्तिर्ज्ञापयति न व्यञ्जनस्य गुणो भवतीति। यदयं जनेर्डं शास्ति। कथं कृत्वा ज्ञापकम्। डित्करणे एतत्प्रयोजनं डितीति टिलोपो यथा स्यात्। यदि व्यञ्जनस्य गुणः स्याद् डित्करणमनर्थकं स्यात्।

स्य लोपविधानात्। उपदेशसामर्थ्यादिति। प्रतिपत्तिलाघवार्थमेकारमेवोपदिशेदित्यर्थः। यदयं जनेरिति। यद्येवं मि रामः
देर्गुणो विधीयमानो ज्ञापकेन व्यञ्जनस्य निरस्तत्वादिग्ग्रहणाभावाच्च सर्वादेशः प्राप्नोति। मिदइर्मिदिरित्याश्रयणा ५०
दिकारस्यैव भविष्यतीत्यदोषः। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्तावदिति। विशेषप्रतिपादनाय सकलज्ञापकाक्षेपः। केचिदाहुः। टकः किलेन ज्ञापकेनाकारनिवृत्त्यर्थत्वेन निराकृते यदप्यु-
च्यत इति ज्ञापकाक्षेपो ग्रन्थच्छायां न पुष्णाति। तस्मादार्थेन क्रमेण सर्वज्ञापकभङ्गोपन्यासं कृत्वा यथासंभवं ज्ञापक
समर्थनं कर्त्तव्यम्। आयादयोपीति। ऐकारोच्चारणस्याविकृतरूपश्रवणार्थत्वादिति भावः। यं विधिमिति। आयादेश

गुणे कृते त्रयाणामकाराणां पररूपेण सिद्धं रूपं स्यादुपसरजोमन्दुरज इति। पश्यति त्वाचार्यो न
व्यञ्जनस्य गुणो भवतीति ततो जनेर्डं शास्ति। नैतानि सन्ति ज्ञापकानि। यत्तावदुच्यते। किल्करणं ज्ञा
पकं नाकारस्य गुणो भवतीति। उत्तरार्थमेतत्स्यात्। तुन्दशोकयोः परिमृजापनुदोरिति। यत्तर्हि गापोष्टगित्यनन्यार्थं क-
कारमनुबन्धं करोति। यदप्युच्यते। उपदेशसामर्थ्यात्सन्ध्यक्षरस्य गुणो न भविष्यतीति। यदि यद्यत्सं
ध्यक्षरस्य प्राप्नोति तत्तदुपदेशसामर्थ्याद्बाध्यते आयादयोपि तर्हि न प्राप्नुवन्ति। नैष दोषः। यं विधिं
प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते। यस्य तु विधेर्निमित्तमेव नासौ बाध्यते। गुणं च प्रत्युपदेशोऽनर्थ
कः। आयादीनां पुनर्निमित्तमेव। यदप्युच्यते जनेर्डवचनं ज्ञापकं न व्यञ्जनस्य गुणो भवतीति। सि
द्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति। न च जनेर्गुणेन सिध्यति। कुतो ह्येतत्। जनेर्गुण उच्यमानो
ऽकारो भवति न पुनरेकारो वा स्यादोकारो वेति। आन्तर्यतोऽर्धमात्रिकस्य व्यञ्जनस्य मात्रिकोऽका
रो भविष्यति। एवमप्यनुनासिकः प्राप्नोति। पररूपेण शुद्धो भविष्यति।

स्यैकार एव निमित्तमिति आयादेशो न बाध्यते। न हि ग्लायित्येवं पाठः शक्यः कर्तुम्। त्वया ग्लायत इत्यादि
रूपासिद्धिप्रसङ्गात्। न ध्याख्येति निपातनाच्चालंगुणवन्न बाधिष्यते। पररूपेणेति। रूपग्रहणस्येदमेव प्र
योजनं यादृक्परस्य रूपं तादृगेव यथा स्यादिति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ गमेरप्ययमिति। सप्तम्यां जनेर्ड इत्यतोऽन्येष्वपि दृश्यत इत्यत्र डोऽनुवर्तमानो गमेरपि विधीयत इत्यज्ञापकं डित्वमिति ११२
५१ व्यञ्जननिवृत्त्यर्थं सूत्रं स्थितम्। संज्ञयेति। गुणवृद्ध्यनुवृत्त्यैव गुणवृद्ध्योरिकः सिद्धत्वाद् द्वितीयं गुणवृद्धिग्रहणमाश्रि-
तगुणवृद्धिशब्दव्यापारार्थं विज्ञायते। तेन गुण इत्येवं यो गुणः वृद्धिरित्येवं या वृद्धिरिति विज्ञायते। अथवा गुणवृद्धिमा
त्रग्रहणे गुणवृद्ध्यधिकारादेव सिद्धे पुनर्गुणवृद्धिग्रहणं गुणवृद्धिशब्दव्यापाराश्रयणार्थं विज्ञायते। अदेङामिति
। पूर्वसूत्रे संज्ञासंज्ञिसंबन्धायोपात्तो यादृशो वृद्धिशब्दस्तादृश एवोत्तरत्रानुवर्तत इत्यदेङामित्युक्तम्। तेनैतन्न

एवं तर्हि गमेरप्ययं डो वक्तव्यः। गमेश्च गुण उच्यमान ओकारः प्राप्नोति। तस्मादिग्ग्रहणं कर्तव्यम्।
यदीग्ग्रहणं क्रियते। द्यौः पन्थाः सइममिति एते पीकः प्राप्नुवन्ति॥ संज्ञया विधाने नियमः॥ संज्ञया
ये विधीयन्ते तेषु नियमः। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। गुणवृद्धिग्रहणसाम
र्थ्यात्। कथं पुनरन्तरेण गुणवृद्धिग्रहणमिको गुणवृद्धी स्याताम्। प्रकृतं गुणवृद्धिग्रहणमनुव
र्तते। क्व प्रकृतम्। वृद्धिरादैजदेङ्गुण इति। यदि तदनुवर्तते। अदेङ्गुणो वृद्धिश्चेत्यदेङां वृद्धिसं
ज्ञा प्राप्नोति। संबन्धमनुवर्तिष्यते। वृद्धिरादैच्। अदेङ्गुणः वृद्धिरादैच्। तत इको गुणवृद्धी इति
। गुणवृद्धिग्रहणमनुवर्तते। अदेङादैज्ग्रहणं निवृत्तम्। अथवा मण्डूकगतयोऽधिकाराः। य
था मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः।

चोदनीयं वृद्धिशब्दोऽनुवर्तमान आदैचः प्रत्याययतीत्यादैचां गुणसंज्ञा प्राप्नोतीति। संबन्धमिति। संबध्यत इति संब
न्धः। कर्मणि घञ्। नपुंसकस्याभिधेयत्वान्नपुंसकनिर्देशः। आदैज्ग्रहणसंबद्धं वृद्धिग्रहणमदेङ्गुण इत्यत्रानुवर्तते ते राम:
नादेङ्भिर्न संबध्यते। इह त्वनुवृत्तमादैचो जहाति। कान्तारोत्तरणाय सार्थसेवत्या गोपादाने। अथवेति। वृद्धिशब्दस्येहा ५१
काङ्क्षावशादुपस्थानं न त्वदेङित्यत्र। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवैकयोगइति।एकोभवतिरध्याह्रियतेवृद्धिरादैजदेङ्गुणोभवतीत्येकवाक्यत्वंसंपद्यते।यद्यपिप्रतिपत्तिकालेभ
वतिक्रियाभिद्यतेतथाप्येककालाप्रतिपत्तिरित्यादैचूसंबद्धावृद्धिसंज्ञाअदेङ्संबद्धागुणसंज्ञेतिनास्तिवृद्धिसंज्ञाया-
अदेङ्भिःसंबन्धः।अथवान्यवचनादिति।यथाकप्रत्ययेनाणबाध्यते।असंदिग्धत्वादनवकाशत्वात्तात्पर्याच्चकवि-
धेः।अणस्तुविपर्ययात्।एवमदेङ्गुणइत्यत्रवृद्धिग्रहणमनुवृत्तंसत्संदिह्यतेकिमुत्तरार्थेवेहास्यानुवृत्तिरथेहार्थापीति।
सावकाशाचवृद्धिसंज्ञातात्पर्यंचनास्ति।गुणसंज्ञातुतात्पर्यादसंदेहान्निरवकाशत्वाच्चवृद्धिसंबन्धमदेङांबाधते।प्र
त्ययसंज्ञातुसंज्ञिविशेषेणसंयुक्ताधिकारेणैवविधीयमानाकृत्यादिसंज्ञाविषयेपिप्रवर्तते।अथवेति। विभाषा-

अथवाएकयोगःकरिष्यते।वृद्धिरादैजदेङ्गुणः।ततइकोगुणवृद्धीइति।नचैकयोगेनुवृत्तिर्भवति
॥अथवान्यवचनाच्चकाराकरणाच्चप्रकृतापवादोविज्ञायतेयथोत्सर्गेणप्रसक्तस्या
पवादोबाधकोभवति॥अन्यस्याःसंज्ञायावचनाच्चकारस्यचानुकर्षणार्थस्याकरणात्प्रकृतायावृद्धि
संज्ञायागुणसंज्ञाबाधिकाभविष्यति। यथोत्सर्गेणप्रसक्तस्यापवादोबाधकोभवति।अथवावक्ष्यत्ये
तत्।अनुवर्तन्तेचनामविधयोनचानुवर्तनादेवभवन्ति।किंतर्हियत्नाद्भवन्तीति।अथवाउभयंनि
वृत्तंतदपेक्षिष्यामहे॥

तिलमाषेत्यत्रह्युमाभङ्गयोरधान्यत्वात्खञोप्राप्तौचोदितायांखञ्ग्रहणस्यानुवृत्तिराश्रिता।अनुवर्तमानस्यखञ्
यत्नाभावाद्व्रीहिशाल्यादिभिर्नसंबध्यते।अपितुविभाषाश्रुत्यायत्नेनतिलादिभिरेवसंबध्यते।तथेहापिवृद्धिग्रहण
मदेङ्गुणइत्यत्रानुवर्तमानमपियत्नाभावाददेङ्भिर्नसंबध्यते।इहतुपुनर्गुणवृद्धिग्रहणंयत्नोभवति।अथवेति।
अपेक्षालक्षणंलौकिकमधिकारमाश्रयति।समुदायस्यचापेक्षायांनास्त्येतदनन्तरस्यविधिर्वाभवतिप्रतिषेधो- ॥
वेतिगुणस्यैवापेक्षायुक्तेति।समुदायस्यभेदाभावात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ किंपुनरिति। उभयथासंभवाद्दोषदर्शनाच्च प्रश्नः। तत्राङ्गस्य गुण इति षष्ठीनिर्देशाल्लिङ्गादलोन्त्यस्येत्युपतिष्ठते गुणश्रु ११२
५२ त्यात्विक इति। तत्र यदि पूर्वमिकाङ्गं विशेष्यते। इगन्ताङ्गस्य गुणो भवतीति स च भवन्नलोन्त्यस्येत्यन्त्यस्य भवति तदा सोस्य
शेषो भवति। यदा त्वङ्गस्येति पूर्वमेवान्त्यमलं षष्ठी नीयते अङ्गान्त्यस्य गुण इति पश्चादिकान्त्योल् विशेष्यते तदा च
यं तस्य विशेषणत्वात्तच्छेषो भवति। अथ त्वङ्गस्येति गुणवृद्धिविधौ न स्थानषष्ठी। किं तर्हि। इगपेक्षयाऽवयवष
ष्ठी। तदा स्थानषष्ठ्यभावादलोन्त्यस्येत्यस्यानुपस्थानमिति तदपवादपक्षो भवति। अत्रास्यानुमानमेव हि बाधो वच
नेन प्राप्तस्य बाधायोगात्। ततश्चाङ्गावयवस्य यत्र तत्र स्थितस्येको गुणवृद्धी इत्यर्थः संपद्यते। समुच्चयस्त्वसंभवा

किंपुनरयमलोन्त्यशेषः। आहोस्विदलोन्त्यापवादः। कथंचायं तच्छेषः स्यात् कथं वा तदपवादः।
यद्येकं वाक्यं तच्चेदं च। अलोन्त्यस्य विधयो भवन्ति। इको गुणवृद्धी अलोन्त्यस्येति। ततो यं तच्छे
षः। अथ नानावाक्यम्। अलोन्त्यस्य विधयो भवन्ति। इको गुणवृद्धी अन्त्यस्य चानन्त्यस्य चेति। ततोयं
तदपवादः। कश्चात्र विशेषः॥ वृद्धिगुणावलोन्त्यस्येति चेन्मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षि-
प्रक्षुद्रेष्विग्ग्रहणम्॥ वृद्धिगुणावलोन्त्यस्येति चेन्मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रे
ष्विग्ग्रहणं कर्तव्यम्।

न्नोपन्यस्तः। नहि युगपद्द्वौ षष्ठ्यर्थौ संभवतः स्थानेयोगोऽवयवयोगश्चेति। विकल्पोपि न भवति एकत्वात्षष्ठ्यर्थस्य। त
स्मात्तच्छेषतदपवादपक्षावेवात्राशङ्कितौ। यद्येकमिति। अनेकयोगव्यवहितयोरप्येकस्मिन्कार्यप्रदेशे स्वस्वनिमि
त्तसन्निधापितयोरङ्गाङ्गिभावाद्विशेषणविशेष्यभावादेकवाक्यतोपपत्तिः। अथ नानेति। अङ्गस्येतीगपेक्षयावय
वषष्ठ्यामिकः स्थानित्वात्तद्विशेषणत्वादङ्गस्यानुपस्थानमलोन्त्यस्येत्यस्य। ततश्चानयोर्भिन्नविषयत्वान्नानावा एमः
क्यत्वम्। वृद्धिगुणाविति। मिदादीनामनिगन्तत्वादलोन्त्यस्येत्येतदङ्गमिग्ग्रहणं न सन्निपततीति तेषु प्रदेशेष्विग्ग्र ५२
हणं कर्तव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दोषान्तरमप्याह। सर्वादेशप्रसङ्गश्चेति। अङ्गस्येत्येतद्भेदेन सर्वाङ्गेषु व्याप्रियते। तत्रेगन्तेष्वेवालोन्त्यस्येति विधिः। अन्यत्र तु षष्ठ्यान्त्येल्यनुपसंहाराद्यातावातेति सर्वादेशः प्राप्नोति। यथैव हीति। अङ्गस्येति षष्ठ्युच्चारितैवान्त्यमलं नीतेति नास्या

मिदेर्गुणः। इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। मृजेर्वृद्धिः। इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। पुगन्तलघूपधस्य गुणः। इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। ऋच्छेर्लिटि गुणः। इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। ऋदृशोऽङि गुणः। इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। क्षिप्रक्षुद्रयोर्गुणः। इक इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति॥ सर्वादेशप्रसङ्गश्चानिगन्तस्य॥ सर्वादेशश्च गुणोऽनिगन्तस्य प्राप्नोति। याता। वाता। किं कारणम्। अलोन्त्यस्येति षष्ठी चैव ह्यन्त्यमिकमुपसंक्रान्ता। अङ्गस्येति च स्थानषष्ठी। तद्यदिदानीमनिगन्तमङ्गं तस्य सर्वादेशः प्राप्नोति। नैष दोषः। यथैव ह्यलोन्त्यस्येति षष्ठी अन्त्यमिकमुपसंक्रान्ता एवमङ्गस्येत्यपि स्थानषष्ठी। तद्यदिदानीमनिगन्तमङ्गं तत्र षष्ठ्येव नास्ति कुतो गुणः कुतः सर्वादेशः। एवं तर्हि नायं दोषसमुच्चयः। पूर्वापेक्षोयं दोषः। स्वर्थे चायं चः पठितः। मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं सर्वादेशप्रसङ्गो ह्यनिगन्तस्येति। मिदेर्गुणः इक इति वचनादन्त्यस्य न। अलोन्त्यस्येति वचनादिको न। उच्यते च गुणः स सर्वादेशः प्राप्नोति। एवं सर्वत्र। अस्तु तर्हि तदपवादः॥ इग्ग्रहणात्रस्येति चेज्जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधः॥

अपरं रूपमस्तीति नास्ति सर्वादेशगुणप्रसङ्गः। पूर्वापेक्षोयमिति। मिदादिष्विग्ग्रहणं कर्तव्यमित्यत्रैवार्थे हेतुत्वेनेदमुपात्तमि त्यर्थः। उच्यते चेति। मिदेरिति चोदनया।

इग्ग्रात्रस्येति। यद्यङ्गस्येत्यपेक्ष्यावयवषष्ठी तदालोन्त्यस्येत्यस्य निमित्ताभावादनुपस्थानं स्थानषष्ठीहितस्योपस्थाननिमित्तत्वा‌त्‌ अङ्गावयवस्या

न्त्यस्यानन्त्यस्य चेको गुणः प्राप्नोतीति दोषः। ह्रस्वस्य गुण इति। समानन्यायत्वादेतदुक्तम्। अङ्गस्यावयवो यो ह्रस्वस्तस्य गुण इति। न त्वत्रैव परिभाषोपतिष्ठते निर्दिष्टस्थानिकत्वात्। अन्ये त्वाहुः। अत्रापि परिभाषोपस्थाने सति ह्रस्वेनेग्विशेष्यते ह्रस्वस्येको गुणो यथा स्याद् दीर्घस्य माभूदिति। ओर्गुण इत्यत्राप्यस्या उपस्थानमनन्त्यस्याप्युकारस्य गुणार्थम्। असति ह्य

इग्ग्रात्रस्येति चेज्जुसि सार्वधातुकार्द्धधातुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधो वक्तव्यः। जुसि गुणः। स यथेह भवति अजुहवुः। अबिभयुरिति। एवमनेनिजुः पर्यवेविषुः अत्रापि प्राप्नोति। सार्वधातुकार्द्धधातुकयोर्गुणः। स यथेह भवति कर्ता हर्ता नयति तरति भवति। एवमीहिताईहितुम् ईहितव्यमित्यत्रापि प्राप्नोति। ह्रस्वस्य गुणः। स यथेह भवति। हे अग्ने हे वायो इति। एवं हे अग्निचित्। हे सोमसुत्। इत्यत्रापि प्राप्नोति। जसि गुणः। स यथेह भवति। अग्नयो वायव इति। एवं अग्निचितः सोमसुत इत्यत्रापि प्राप्नोति। ऋतो ङि सर्वनामस्थानयोर्गुणः। स यथेह भवति। कर्तरि कर्तारौ कर्तार इति। एवं सुकृति सुकृतौ सुकृत इत्यत्रापि प्राप्नोति। घेर्ङिति गुणः स यथेह भवति। अग्नये वायव इति। एवमग्निचिते सोमसुते इत्यत्रापि प्राप्नोति। ओर्गुणः। स यथेह भवति बाभ्रव्यो माण्डव्य इति। एवं सुश्रुत् सौश्रुत इत्यत्रापि प्राप्नोति। नैष दोषः। पुगन्तलघूपधग्रहणमनन्त्यनियमार्थम्। पुगन्तलघूपधग्रहणमनन्त्यनियमार्थं भविष्यति। पुगन्तलघूपधस्यैवानन्त्यस्य नान्यस्यानन्त्यस्येति।

स्या उपस्थाने ङ्गस्येति स्थानषष्ठी स्याद‌ङ्गं चोकारेण विशेष्येत इत्युकारान्तस्यैवाङ्गस्य गुणः स्यात्। पुगन्तेति। भेत्तेत्यादौ गुणे सिद्धे पुनः श्रुतिर्नियमार्थेति गुरूपधस्येहितेत्यादौ न भविष्यति नापि हे अग्निचिदित्यादौ। उभयनियमाश्रयणादिति भावः। ननु भेत्तेति दकारस्य ह्रेपयतीति पकारस्य च यथा स्यादिति विध्यर्थमेतत्स्यात्। नैतदस्ति। पुकि अन्तः पुगन्तो लघ्वी उपधा लघूपधा ततः समाहारद्वन्द्वनिर्देशादित्यस्य गुणेन न भाव्यम्। ॥

प्रकृतस्येति। एकेन वाक्येन नियमद्वयस्यालाभात्प्रकृतस्यैव गुणस्य नियमः स्यात् पुगन्तलघूपधस्यैव सार्वधातुकार्द्ध
धातुकयोरिति न तु सार्वधातुकार्द्धधातुकयोरेव पुगन्तलघूपधस्येति। अथापीति। अनन्तरस्य विधिर्वेति परिभाषाय
दिनाश्रीयत इत्यर्थः। अथापीति। अभ्युपगम्यवादेनोच्यते। आदृत्यादिन्यायाश्रयणेन वा। एकस्मिंस्तु वाक्ये नियमद्व
यं न लभ्यते। अनेनिजुरिति। अत्र लघूपधं चाङ्गं सार्वधातुकं चास्तीति जुसि चेति गुणः प्राप्नोति। हे पिच व्यहे बुद्धेहे-

प्रकृतस्यैष नियमः स्यात्। किंच प्रकृतम्। सार्वधातुकार्द्धधातुकयोरिति। तेन भवेदिह नियमान्न स्यात्
ईहितार्ईहितुम्। ईहितव्यमिति। ह्रस्वाद्योर्गुणस्त्वनियतः सोनन्त्यस्यापि प्राप्नोति। अथाप्येवं निय
मः स्यात्। पुगन्तलघूपधस्य सार्वधातुकार्द्धधातुकयोरेवेति। एवमपि सार्वधातुकार्द्धधातुकयोर्गु
णोनियतः सोनन्त्यस्यापि प्राप्नोति। ईहितार्ईहितुम्। ईहितव्यमिति। अथाप्युभयतो नियमः स्यात्। पु
गन्तलघूपधस्यैव सार्वधातुकार्द्धधातुकयोः सार्वधातुकार्द्धधातुकयोरेव पुगन्तलघूपधस्येति। एवम
प्ययं अयं जुसि गुणोऽनियतः सोनन्त्यस्यापि प्राप्नोति। अनेनिजुः पर्यवेविषुरिति। एवं तर्हि नायं तच्छे
षः नापि तदपवादः। अन्यदेवेदं परिभाषान्तरमसंबद्धमनया परिभाषया। परिभाषान्तरमिति च मत्वा
क्रोष्ट्रीयाः पठन्ति। नियमादिको गुणवृद्धी भवतो विप्रतिषेधेनेति। यदि चायं तच्छेषः स्यात्तेनैव त-
त्स्यायुक्तो विप्रतिषेधः।

बुद्ध्यद्यादौ चालघूपधत्वादनन्त्यस्य गुणोऽपरिहृतः। एवं तर्हीति। परस्परानपेक्षयोः स्वस्वनिमित्तप्रयुक्तसन्नि
धानयोर्द्वयोः परिभाषयोः प्रदेशेषु स्वस्वकार्यप्रतिपादनम्। तत्र यदि कथंचिदेकविषये सन्निपातो भवति नैतावता पर
स्परापेक्षा भवतीत्यर्थः। अन्यदेवेति। अन्तरशब्दो विशेषवाचीत्यन्यान्तरशब्दयोरविरुद्धः सहप्रयोगो पर्यायत्वात्।

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· चयनमिति। अलोन्त्यपरिभाषायाः प्रयोजनाभावादत्रानुपस्थानमित्याशयः। चायकइति। कथमिक्परिभाषात्रोपतिष्ठ ११३
५७ तेयावताचइतिस्थानीनिर्दिष्टः। अत्राहुः। अचइत्यस्याङ्गविशेषणतयोपयोगादचः स्थानित्वाभावाद्वृद्धिग्रहणेनलि
ङ्गेनेकूपरिभाषात्राप्युपतिष्ठतएवामेद्यतीति। इकइतिवचनादिकारस्यप्राप्नोति। अलोन्त्यस्येतिवचनाद्दकारस्याने
षयुक्तइति। इष्टसिद्धयइत्यर्थः। यथोद्देशपक्षेचपरिभाषयोः पौर्वापर्यंनतुकार्यकालतायाम्। द्विकार्ययोगइति। द्वा

अथापितदपवादः। उत्सर्गापवादयोरप्ययुक्तोविप्रतिषेधः। तत्रनियमस्यावकाशः। राज्ञः कच। राजकीयम्। इकोगुणवृद्धीइत्यस्यावकाशः। चयनंचायकोलवनंलावकइति। इहोभयंप्राप्नोतिमेद्यतिमार्ष्टीति। इकोगुणवृद्धीइत्येतद्भवतिविप्रतिषेधेन। नैषयुक्तोविप्रतिषेधः। विप्रतिषेधेपरमित्युच्यते। पूर्वश्चायंयोगः परोनियमः। इष्टवाचीपरशब्दः। विप्रतिषेधेपरंयदिष्टंतद्भवतीति। एवमप्ययुक्तोविप्रतिषेधः। द्विकार्ययोगोहिविप्रतिषेधः। नचात्रैकोद्विकार्ययुक्तः। नावश्यंद्विकार्ययोगएवविप्रतिषेधः किंतर्ह्यसंभवोपि। सचास्त्यत्रासंभवः। कोसावसंभवः। इहतावद्वृक्षेभ्यः प्लक्षेभ्यइति। एकः स्थानीद्वावादेशौ। नचास्तिसंभवः। यदेकस्यस्थानिनोद्वावादेशौस्याताम्। इहेदानींमेद्यतिमेद्यतः मेद्यन्तीति। द्वौस्थानिनौएकआदेशः। नचास्तिसंभवः। द्वयोःस्थानिनोरेकआदेशःस्यादित्येषोऽसंभवः। सत्येतस्मिन्नसंभवेयुक्तोविप्रतिषेधः।

भ्यांकार्याभ्यांयोगोस्यस्थानिनः सविप्रतिषेधविषयत्वाद्विप्रतिषेधः। नावश्यमिति। द्विकार्ययोगत्वाभावेकेवलोप्य
संभवोविप्रतिषेधइत्यर्थः। इहतावदिति। दीर्घत्वंयञ्यनन्तरेविधीयतएत्वंचझल्यनन्तरेनचसंभवोस्तियद्द्वयोः स्वे राम:
नस्वेननिमित्तेनानन्तर्यंस्यात्। इहेदानीमिति। मिदेरित्येकाषष्ठीसायद्यवयवसंबन्धेतदेकारस्यगुणेनभाव्यम्। अथ- ५४
स्थानषष्ठीतदालोन्त्यस्येतिवचनाद्दकारस्य। नचास्तिसंभवोयुगपदुभयोर्गुणस्येत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमपीति। यदीदं नारभ्येत गुणवृद्धी कस्य स्याताम्। अलोन्त्यस्येति चेद्येन नाप्राप्तिन्यायेन तदपवादत्वाद्विप्रतिषेधानुपपत्तिरित्यर्थः। एवं च क्रोष्ट्रीयमतमसंबद्धपरिभाषान्तरपक्षश्च नोपपद्यते। एवं तर्हीति। प्रदेशार्थत्वादनयोः परिभाषयोर्गुणत्वात्परस्परेण संबन्धाभावात्प्रदेशवाक्यपर्यालोचनया वाक्यार्थस्यावस्थानमित्यर्थः। अथ वेति। तच्छेषप-

एवमप्ययुक्तः। द्वयोर्हि सावकाशयोः समवस्थितयोर्विप्रतिषेधो भवति। अनवकाशश्चायं योगः। ननु चेदानीमेवास्यावकाशः प्रक्लृप्तः। चयनं चायकः। लवनं लावक इति। अत्रापि नियमः प्राप्नोति। नाप्राप्ते नियमे यं योग आरभ्यते। यावता च नाप्राप्ते नियमेऽयं योग आरभ्यते ततस्तस्यापवादो यं योगो भवति। उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः। अथापि कथंचिदिको गुणवृद्धी इत्यस्यावकाशः स्यात्। एवमपि यथेह विप्रतिषेधादिको गुणो भवति मेद्यति मेद्यतः मेद्यन्तीति। एवमिहापि प्राप्नोति। अनेनिजुः पर्यवेविषुरिति। एवं तर्हि वृद्धिर्भवति गुणो भवतीति यत्र ब्रूयादिक इति तत्रोपस्थितं द्रष्टव्यम्। किं कृतं भवति। द्वितीया षष्ठी प्रादुर्भाव्यते। तत्र कामचारः। गृह्यमाणेन वेकं विशेषयितुमिका वा गृह्यमाणम्। यावता कामचारः। इह तावन्मिदिमृजिपुगन्तलघूपधच्छिदृशिक्षिप्रक्षुद्रेषु गृह्यमाणेनेकं विशेषयिष्यामः। एतेषां य इगिति। इहेदानीं जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्विका गृह्यमाणं विशेषयिष्यामः। एतेषां गुणो भवति इकः। इगन्तानामिति। अथ वा सर्वत्रैवात्र स्थानी निर्दिश्यते। इह तावन्मिदेरित्यविभक्तिको निर्देशः। मिद् एः मिदेः। मिदेरिति। अथ वा षष्ठीसमासो भविष्यति। मिद इः मिदिः मिदेरिति। पुगन्तलघूपधस्येति नैवं विज्ञायते। पुगन्ताङ्गस्य लघूपधस्य चेति। कथं तर्हि। पुकि अन्तः पुगन्तः। लघ्वी उपधा लघूपधा। पुगन्तश्च लघूपधा च पुगन्तलघूपधं पुगन्तलघूपधस्येति। अवश्यं चैतदेवं विज्ञेयम्। अङ्गविशेषणे सतीह प्रसज्येत। भिनत्ति छिनत्तीति।

क्षोक्तदोषपरिहारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिप्रक्षुद्रयोरपीति। अत्र च योगविभागः क्रियते। स्थूलादीनां यणादिपरं लुप्यते। ततः पूर्वस्य च गुण इति। अत्र च स्वरितत्वात् क्षिप्रक्षुद्रत्रयं द्वावेवानुवर्तेते स्थूलादयो निवृत्तास्तेषां तु यणादिलोपे सत्यो गुण इति गुणो भवति। असिद्धवदत्राभादित्यसिद्धत्वमनित्यत्वान्न भवति। तत्र क्षिप्रक्षुद्रयोर्यण आदिः पकारो दकारश्च तस्माद्यणादेः परं लुप्यते तस्मादेव च यणादेः पूर्वस्य गुण इति सिद्धं क्षेपिष्ठः क्षोदिष्ठ इति। यणादिपरमिति। पञ्चमीसमासः। यदि तर्हि पुगन्तलघू

ऋच्छेरपि प्रश्लिष्टनिर्देशोयम्। ऋच्छति ऋ ऋ ऋृ ताम्। ऋच्छ सृतामिति। दृशेरपि योगविभागः क्रियते। उरङि गुणः। ऊः अङि गुणो भवति। ततो दृशः। दृशेश्चाङि गुणो भवति। उरित्येव। क्षिप्रक्षुद्रयोरपि यणादिपरं गुण इतीयता सिद्धम्। सोयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनम् इको यथा स्यादनिको मा भूदिति। अथ वृद्धिग्रहणं किमर्थम्। किं विशेषेण वृद्धिग्रहणं चोद्यते न पुनर्गुणग्रहणमपि। यदि किंचिद्गुणग्रहणस्य प्रयोजनमस्ति वृद्धिग्रहणस्यापि तद्भवितुमर्हति। को वा विशेषः। अयमस्ति विशेषः। गुणविधौ न क्वचित्स्थानी निर्दिश्यते। तत्रावश्यं स्थानिनिर्देशार्थं गुणग्रहणं कर्तव्यम्। वृद्धिविधौ पुनः सर्वत्रैव स्थानी निर्दिश्यते। अचो ञ्णिति। अत उपधायाः। तद्धितेष्वचामादेरिति। अत उत्तरं पठति। वृद्धिग्रहणमुत्तरार्थम्। वृद्धिग्रहणं क्रियते। किं प्रयोजनम्। उत्तरार्थम्। क्ङिति प्रतिषेधं वक्ष्यति स वृद्धेरपि यथा स्यात्। कश्चेदानीं क्ङिन्निमित्तायेषु वृद्धेः प्रसङ्गः। यावता ञ्णितीत्युच्यते। तत्र मृज्यर्थम्।

पधस्येति स्थानी निर्दिश्यते तच्छेषपक्षाश्रयणाच्चात्रेक्परिभाषा नोपतिष्ठते तदा तस्य गुणस्यानिग्लक्षणत्वाद्भिन्नं-छिन्नमित्यादौ क्ङिति चेति गुणनिषेधो न प्राप्नोति। यथा लैगवायन इति। नैष दोषः। कुसनोः कित्वविधानाज्ज्ञापकादनिग्लक्षणत्वेपि लघूपधगुणस्य प्रतिषेधो भविष्यति। गुणविधाविति। क्वचिन्न निर्दिश्यत इति नञो व्यवहितेन संबन्धः। क्वचिन्निर्दिश्यत एव। ओर्गुण इत्यादौ। राम: ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृजेर्वृद्धिरिति। तत्रसूत्रेभिमतस्यान्यतुपादानादलोन्त्यपरिभाषयान्त्यस्यैवस्यादित्यर्थः।अटोपीति।नन्वडागमात्पूर्वमे
वपरत्वाद्वृद्धिर्भविष्यतीतिलक्षणस्यप्रवृत्तत्वादटिकृतेपुनर्लक्षणंनप्रवर्तिष्यते।एवंतर्हिविप्रतिषेधानपेक्षयैवात्र

मृजेर्वृद्धिरविशेषेणोच्यतेसाक्ङितिमाभूत्।मृष्टः।मृष्टवानिति।इहार्थंचापिमृज्यर्थंवृद्धिग्रहणंकर्तव्यम्।
मृजेर्वृद्धिरविशेषेणोच्यतेसेकोयथास्यादनिकोमाभूदिति।।मृज्यर्थमितिचेद्योगविभागात्सिद्धम्।।मृज्य
र्थमितिचेद्योगविभागःकरिष्यते।मृजेर्वृद्धिरचः।ततोञ्णिति।ञितिणितिचवृद्धिर्भवति।अचइत्येव।
यद्यचोवृद्धिरुच्यते।न्यमार्ट्। अटोपिवृद्धिःप्राप्नोति।अटिचोक्तम्।किमुक्तम्।अनन्त्यविकारेन्त्यसदे-
शस्यकार्यंभवतीति॥वृद्धिप्रतिषेधानुपपत्तिस्त्विक्प्रकरणात्॥वृद्धेस्तुप्रतिषेधोनोपपद्यते।किंकार
णम्।इक्प्रकरणात्।इग्लक्षणयोर्गुणवृद्ध्योःप्रतिषेधः।नचैवंसतिमृजेरिग्लक्षणावृद्धिर्भवति।
तस्मान्मृजेरिग्लक्षणावृद्धिरेषितव्या।एवंतर्हि।इहान्येवैयाकरणामृजेरजादौसंक्रमेविभाषावृद्धि-
मारभन्ते।परिमृजन्ति।परिमार्जन्ति।परिममृजतुः।परिममार्जतुरित्याद्यर्थम्।तदिहापिसाध्यम्।तस्मि
न्साध्येयोगविभागः करिष्यते।मृजेर्वृद्धिरचोभवति।ततोचिक्ङिति।अचिक्ङितिमृजेर्वृद्धिर्भवति।परि
मार्जन्ति।परिममार्जतुः।किमर्थमिदम्।नियमार्थम्।अजादावेवक्ङितिनान्यत्र।क्वान्यत्रमाभूत्।मृष्टः
।मृष्टवानिति।ततोवा।वाचिक्ङितिमृजेर्वृद्धिर्भवति।परिमृजन्ति।परिमार्जन्ति।परिममृजतुः।परिम-
मार्जतुरिति।इहार्थमेवतर्हिसिजर्थंवृद्धिग्रहणंकर्तव्यम्।सिचिवृद्धिरविशेषेणोच्यतेसेकोयथा-
स्यादनिकोमाभूदिति।कस्यपुनरनिकः प्राप्नोति।अकारस्य।अचिकीर्षीत्।अजिहीर्षीत्।नैतदस्ति।
लोपोत्रबाधकोभविष्यति।आकारस्यतर्हिप्राप्नोति।

चोद्यपरिहारावुक्तौ।अचिकीर्षीदिति।पूर्वविप्रतिषेधादतोलोपोयथाचिकीर्षकइत्यादौ। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अयासीदिति। परत्वादत्र सगिटोः कृतयोरनन्त्यत्वादाकारस्य नास्ति वृद्धिप्रसङ्ग इति यद्यपि परिहारोऽस्ति तथापि विशेषाभा
वेन परिहृतत्वान्नायमाश्रितः। उदवोढामिति। ढलोपादीनामसिद्धत्वात्पूर्वं हलन्तलक्षणा वृद्धिस्ततो ढलोपादिषु कृते
पुनर्लोपस्यासिद्धत्वादोकारस्य न भविष्यति। गोशब्दादाचारक्विपि कृते ऽगवीदिति संध्यक्षरमन्त्यमस्ति तस्य कस्माद्वृद्धि
र्न भवति। उच्यते। सिचि वृद्धिरित्यत्र धातुग्रहणमृतद्धातोरित्यत औपदेशिकधातुग्रहणार्थमनुवर्तत इत्यदोषः। लक्ष
णं हीति। नेटीति लक्षणमविशेषेण वृद्धिग्रहणमात्रस्य निषेधं कथयतीति ध्वनतीत्युच्यते। यो ह्यव्यक्तं कथयति स ध्वनती

अयासीत्। अवासीत्। नास्त्यत्र विशेषः। सत्यां वृद्धावसत्यां वा। संध्यक्षरस्य तर्हि प्राप्नोति। नैवं संध्य
क्षरमन्त्यमस्ति। ननु चेदमस्ति ढलोपे कृते उदवोढाम्। उदवोढम्। उदवोढेति। नैतदस्ति। असिद्धो ढ
लोपः। तस्यासिद्धत्वान्नैतदन्त्यं भवति। व्यञ्जनस्य तर्हि प्राप्नोति। अभैत्सीत्। अच्छैत्सीत्। हलन्तलक्ष
णा वृद्धिर्बाधिका भविष्यति। यत्र तर्हि सा प्रतिषिध्यते नेटीति। अकोषीत्। अमोषीत्। सिचि वृद्धेरप्ये
ष प्रतिषेधः। कथम्। लक्षणं हि नाम ध्वनति भ्रमति मुहूर्तमपि नावतिष्ठते। अथवा सिचि वृद्धिः पर
स्मैपदेष्विति सिचि वृद्धिः प्राप्नोति। तस्या हलन्तलक्षणा वृद्धिर्बाधिका। तस्या अपि नेटीति प्रतिषे
धः। अस्ति पुनः क्वचिदन्यत्रापि अपवादे प्रतिषिद्धे उत्सर्गोऽपि न भवति।

त्युच्यते। एवमिहापि अस्या एव वृद्धेर्निषेध इति नास्ति व्यक्तिः। स्यादेतत्। प्रतिषेधस्यैकनिषेधे चरितार्थत्वात्पुनः
प्रतिषेध्यान्तरे प्रवृत्तिर्न स्यादित्याह। भ्रमतीति। सर्वत्र व्याप्रियत इत्यर्थः। स्यादेतत्। यावदेकनिषेधे स्य व्यापारस्ताव-
देव द्वितीयो विधिः प्रवृत्तः प्रवृत्तस्य च निषेधो ऽशक्यः कर्तुमित्याह। मुहूर्तमिति। उभयत्रापि व्यापारान्नैकत्र विश्रा
म्यतीत्यर्थः। तस्या अपीति। अपिशब्दात्सिचि वृद्धेरपि। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तीत्याहेति। नान्तःपादमव्यपर इति पाठमाश्रित्यैवमुक्तम्। यद्येवं त्वक्षावित्यत्र नादिचीत्यनेन पूर्वसवर्णदीर्घव द्वृद्धेरपि निषेधप्रसङ्गः। नैष दोषः। संयोगाद्वावित्यादेर्लोपकादनन्तरस्य नादिचीति निषेधात्। अन्तरङ्गत्वादिति। उवङादेशोः- सिचमेवापेक्षते। वृद्धिस्तु सिच्यरस्मैपदे। लुप्तनिर्दिष्ट इति। लोपो व्योर्वलीति भावः। किमत्र प्रमाणमिति चेत्। अभियु

अस्तीत्याह। सुजाते अश्वसूनृते अध्वर्यो अद्रिभिः सुतम्। शुक्रं ते अन्यदिति पूर्वरूपे प्रतिषिद्धेऽयादयोऽपि न भवन्ति। उत्तरार्थमेव तर्हि सिजर्थं वृद्धिग्रहणं कर्तव्यम्। सिचि वृद्धिरविशेषेणोच्यते। सा क्ङिति माभूत्। न्यनुवीत्। नैतदस्ति प्रयोजनम्। अन्तरङ्गत्वादत्रोवङादेशे कृतेऽनन्त्यत्वाद्वृद्धिर्न भविष्यति। यदि तर्हि सिच्यन्तरङ्गं भवति। अकार्षीत्। गुणे कृते रपरत्वे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति। माभूदेवं हलन्तस्येत्येवं भविष्यति। इह तर्हि न्यस्तारीत्। न्यदारीत्। गुणे कृते रपरत्वे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति। हलन्तलक्षणायाश्च नेटीति प्रतिषेधः। माभूदेवम्। ल्रान्तस्येत्येवं भविष्यति। इह तर्हि अलावीत्। अयावीत्। गुणे कृतेऽवादेशे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति। हलन्तलक्षणायाश्च नेटीति प्रतिषेधः। माभूदेवम्। ल्रान्तस्येत्येवं भविष्यति। ल्रान्तस्येत्युच्यते। न चेदं ल्रान्तम्। ल्रान्त इत्यत्र वकारोऽपि निर्दिश्यते। किं वकारो न श्रूयते। लुप्तनिर्दिष्टो वकारः। यद्येवं माभवानवीत्। माभवानमवीत्। अत्रापि प्राप्नोति। अविमव्योर्नेति वक्ष्यामि। तद्वक्तव्यम्। न वक्तव्यम्। णिश्विभ्यां तो- निमातव्यौ। यद्यप्येतदुच्यते। अथवैतर्हि णिश्व्योः प्रतिषेधो न वक्तव्यो भवति गुणे कृतेऽयादेशे च यान्तानां नेत्येव प्रतिषेधो भविष्यति।

तोस्मरणमेव। णिश्विभ्यामिति णिश्विग्रहणमकृत्वा अविमवी प्रतिषेधार्थं वक्तव्यौ। एवं सति गौरवाभावः। निमातव्याविति। मेङो रूपम्। परिवर्तनीयावित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कौ· नसिचीति।न्यायादप्येतत्सिद्ध्यति।येननाप्राप्तिन्यायेनान्तरङ्गस्यवृद्ध्याबाधनात्।प्रयोजनंचचिरिजिर्योर्यङ्लुगन्ता ११२
५० नांचनयस्मादीनामचिरायीत्।अजिरायीत्।अनेनायीत्।अचेचायीत्।इत्यादौसिचिवृद्धिः।अन्यथागुणायादेशा
योःकृतयोर्यान्तत्वाद्वृद्धिप्रतिषेधःस्यात्।षष्ठ्याइति।स्वतन्त्रमिदंगुणवृद्ध्योर्विधायकमितिपूर्वःपक्षः।अन्यत
रार्थमिति।नन्वनिकोपियथास्यादितिविध्यर्थंस्यान्ननतुनियमार्थम्।नियमाद्विधेर्बलीयस्त्वात्।एवंमन्यतेद्वितीयं-

एवंतर्ह्याचार्यप्रवृत्तिर्ज्ञापयति।नसिच्यन्तरङ्गंभवतीति।यदयमतोहलादेर्लघोरित्यकारग्रहणंकरोति।कथंकृत्वाज्ञापकम्।अकारग्रहणस्यैतत्प्रयोजनम्।इहमाभूत्।अकोषीत्।अमोषीत्।यदिसिच्यन्तरङ्गंस्यात्।कारग्रहणमनर्थकंस्यात्।गुणेकृतेअलघुत्वाद्वृद्धिर्नभविष्यति।पश्यतित्वाचार्योनसिच्यन्तरङ्गंभवतीति।ततोऽकारग्रहणंकरोति।नैतदस्तिज्ञापकम्।अस्त्यन्यदेतस्यवचनेप्रयोजनम्।किम्।यत्रगुणःप्रतिषिध्यतेतदर्थमेतत्स्यात्।न्यकुटीत्।न्यपुटीत्।यत्तर्हिणिश्व्योःप्रतिषेधंशास्तितेननेहान्तरङ्गमस्तीतिदर्शयति।यच्चकरोत्यकारग्रहणंलघोरितिकृतेपि।तस्मादिग्लक्षणावृद्धिः।तस्मादिग्लक्षणावृद्धिरास्थेया॥षष्ठ्याःस्थानेयोगत्वादिग्निवृत्तिः॥षष्ठ्याःस्थानेयोगत्वात्सर्वेषामिकांनिवृत्तिःप्राप्नोति।अस्यापिप्राप्नोति दधि।मधु।पुनर्वचनमिदानींकिमर्थंस्यात्।अन्यतरार्थंपुनर्वचनं।अन्यतरार्थमेतत्स्यात्।सार्वधातुकार्द्धधातुकयोर्गुणएवेति।प्रसारणेच।प्रसारणेचसर्वेषांयणांनिवृत्तिःप्राप्नोति।

गुणवृद्धिग्रहणमनुवर्तते।तेनवृद्धिप्रदेशेषुइकइत्यस्योपस्थानान्नास्त्यनिकःप्रसङ्गः।प्रसारणेचेति।तुल्य रामः
न्यायत्वादुपन्यासः।इग्यणइत्यत्रयणइतिस्थानषष्ठी।तेनयणःस्थानेइग्भवति सचसंप्रसारणसंज्ञइतिवा- ५०
क्यार्थःस्यात्।वाक्यभेदेनचकार्यद्वयंविधीयते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तृहर्त्रिति। अन्तरतमस्याभावात्सर्वेष्वणः पर्यायेण प्राप्नुवन्ति। सिद्धमिति॥ स्वातन्त्र्यमेषां निवर्तयति। तेन यत्र
षष्ठी तत्रैषामुपस्थानम्। अङ्गस्य वच्यादीनां ऋत इद्धातोरित्यादौ। इमावपीति। स्वरितत्वादनयोरत्राऽनुवर्तिभि-
श्चायोग्यत्वात्संबन्धाभावः। अथवेति। षष्ठीस्थानेयोगेत्यत्र योगविभागः करिष्यते। षष्ठीयदेतदनुक्रान्तं तद्यत्र ष
ष्ठी तत्रोपतिष्ठत इत्यर्थः॥ तत्र योग्यत्वादनयोरेवापेक्षा नान्येषाम्। ततः स्थानेयोगेति। षष्ठीत्येतदुपतिष्ठते। अ-
थवेति। अन्यतरार्थं पुनरितिवदताऽवश्यमेवं संबन्धः कर्तव्यः यत्र गुणवृद्धिशब्दोच्चारणेन गुणवृद्धी विधीयेते

अस्यापि प्राप्नोति। याता। वाता। पुनर्वचनमिदानीं किमर्थं स्यात्॥ विषयार्थं पुनर्वचनम्। विषया
र्थमेतत्स्यात्। वचिस्वपियजादीनां कित्येवेति॥ उरण्रपरे च॥ उरण्रपरे च सर्वेषाम्काराणां नि
वृत्तिः प्राप्नोति। अस्यापि प्राप्नोति। कर्तृ हर्तृ॥ सिद्धं तु षष्ठ्यधिकारे वचनात्॥ सिद्धमेतत्। कथ
म्। षष्ठ्यधिकार इमे योगाः कर्तव्याः। एकस्तावत्क्रियते। तत्रैवेमावपि योगौ षष्ठ्यधिकारमनु
वर्तिष्येते। अथवा षष्ठ्यधिकार इमौ योगावपेक्षिष्यामहे। अथवेदं तावदयं प्रष्टव्यः। सार्वधातु
कार्धधातुकयोर्गुणो भवतीति। इह कस्मान्न भवति। याता। वाता। इदं तत्रापेक्षिष्यते। इको गुणवृद्धी
इति। यथैव तर्हि इदं तत्रापेक्षिष्यते। एवमिहापि तदपेक्षिष्यामहे। सार्वधातुकार्धधातुकयोरि
को गुणवृद्धी इति॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे
पादे तृतीयमाह्निकम्॥

तत्रैक उपतिष्ठत इति। अन्यथा याता वातेत्यादिष्वविध्यर्थत्वे संभवति कथमन्यतरार्थं पुनर्वचनं स्यादित्युच्यते। अव
श्यकर्तव्यायां चापेक्षायामेकवाक्यतयैवापेक्षास्तु। तेनैकरूप एवार्थो न तु वाक्यभेदेन स्वातन्त्र्यं पारतन्त्र्यं च तदपे
क्षिष्यामह इति। अस्य स्वातन्त्र्यं निरस्तितुमित्यर्थः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथ
माध्यायस्य प्रथमे पादे तृतीयमाह्निकम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥श्रीः॥ नधातुलोपआर्द्धधातुके॥ गुणवृद्ध्योः प्राधान्यादयं निषेधो न तु तद्गुणाभावादिक्परिभाषायाः। दीधीवेवी
टामिति चासंबद्धं परिभाषायां निषेधे स्यात्। कृत्स्नस्य धातोर्लोपे गुणवृद्धिप्रसङ्गाभावादनर्थको निषेधः स्यादिति सा
मर्थ्याद्धात्वेकदेशलोपोऽत्र धातुलोपोऽभिमतः। अवयवक्रियया पि समुदायस्य व्यपदेशदर्शनात्। यथा पटो दग्ध इ
ति। अथवा समुदायशब्दोऽवयवे तद्रूपारोपाद्वर्तते। धातुग्रहणमिति। उपसर्जनस्यापि यथा परामर्शस्तथा केषांशब्दा
नामित्यत्र प्रतिपादितम्। विनापि धातुग्रहणेन लोपविशेषणमार्द्धधातुकग्रहणं विज्ञास्यते। अनुबन्धलोपस्य चानैमि-
त्तिकत्वाल्लुवितेति गुणनिषेधो न भविष्यतीति प्रश्नः। सिद्धान्ते तु गुणवृद्धिविशेषणमार्द्धधातुकग्रहणमित्यभिप्रायः। अ

श्रीः॥ नधातुलोपआर्द्धधातुके॥ ॥धातुग्रहणं किमर्थम्। इह माभूत्। लूञ्। लविता। लवितुम्। पूञ्।
पविता। पवितुम्। आर्द्धधातुक इति किमर्थम्। त्रिधा बद्धो वृषभो रोरवीति। किंपुनरिदमार्द्धधातुकग्र
हणं लोपविशेषणम्। आर्द्धधातुकनिमित्ते लोपे सति ये गुणवृद्धी प्राप्नुतस्ते न भवत इति। आहोस्विद्गु
णवृद्धिविशेषणमार्द्धधातुकग्रहणं धातुलोपे सत्यार्द्धधातुकनिमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति।
किंचातः। यदि लोपविशेषणम्। उपेद्धः प्रेद्धः। अत्रापि प्राप्नोति। अथ गुणवृद्धिविशेषणम्। क्नोपयती-
त्यत्रापि प्राप्नोति। यथेच्छसि तथास्तु। अस्तु लोपविशेषणम्। कथम्। उपेद्धः प्रेद्ध इति।

नुबन्धो न धात्वेकदेशः। यस्मादुपदेश एवेत्संज्ञा। प्रयोगे तु लूशब्द एव धातुसंज्ञः केवलमसौ ञित्कार्यं लभते। लूशब्द
स्यैव हि क्रियावाचित्वमिति तस्यैव धातुसंज्ञा युक्ता। रोरवीतीति। सत्यार्द्धधातुकग्रहणे शब्दकत्वादन्यपदार्थस्य बहुव्री
हिः संदिग्धो भवति नान्यथा। क्रमेण सूत्रप्रत्याख्यानायार्द्धधातुकस्य च लोपविशेषणत्वे धातुग्रहणानर्थक्यप्रतिपाद
नाय प्रत्युदाहरणोपन्यासः। किंपुनरिति। आर्द्धधातुकं लोपविशेषणं वा गुणवृद्धिविशेषणं वा बहुव्रीहिपक्षे तूभयवि रामः
शेषणं वेति पक्षत्रयसंभवात् प्रश्नः। प्रेद्ध इति। नन्वाद्गुणोऽनिग्लक्षणादिति तन्निषेधो न भविष्यति। परिहारान्तराभिधा ५८
नादेतन्नाश्रितमित्यदोषः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बहिरङ्ग इति। यदा पूर्वं प्रत्ययः पश्चादुपसर्गयोगस्तदा प्रतिषेधोऽन्तरङ्गः। गुणो बहिरङ्गः। यदा तु पूर्वमुपसर्गयोगस्तदा गुणोऽन्तरङ्गः। पश्चात्प्रत्ययोत्पत्तौ निषेधो बहिरङ्गः। सर्वथा बहिरङ्गस्यासिद्धत्वादिष्टसिद्धिः। ननु नाजानन्तर्ये इति निषेधात्कथं परिभाषाप्रवृत्तिः। यत्र कार्यविधावानन्तर्येण चोराश्रयणं तत्र निषेधादनुपस्थानं परिभाषाया यथाऽक्षद्यूरिति। तत्र हीको यणचीति वचनादिगचोराश्रयणम्। अस्मिंस्तु प्रतिषेधसूत्रे नास्त्यचोराश्रयणमित्यदोषः। यङ्यक्यस्य वलोप इति। व इत्यत्राकारोऽपि विवक्षितः। तेन धातुपाठे योऽकारान्तः पठितस्तस्य ग्रहणम्। अन्यथा स्त्रिविः कथं निवार्येत। बे

बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः। असिद्धं बहिरङ्गमन्तरङ्गे। यद्येवं नार्थो धातुग्रहणेन। इह कस्मान्न भवति। लूञ्। लविता। लवितुम्। आर्द्धधातुकनिमित्ते लोपे प्रतिषेधः। न चैष आर्द्धधातुकनिमित्तो लोपः। अथवा पुनरस्तु गुणवृद्धिविशेषणम्। ननु चोक्तम्। क्नोपयतीत्यत्रापि प्राप्नोतीति। नैष दोषः। निपातनात्सिद्धम्। किं निपातनम्। चेलेक्नोपेरिति परिगणनं कर्तव्यम्। यङ्यक्यवलोपे प्रतिषेधः॥ यङ्यक्यवलोपे प्रतिषेधो वक्तव्यः। यङ्। बेभिदिता। मरीमृजः। यक्। कुषुभिता। मगधकः। क्य। समिधिता। दृषदकः। वलोपे। जीरदानुः। किं प्रयोजनम्। नुम्लोपस्त्रिव्यनुबन्धलोपे प्रतिषेधार्थम्। नुम्लोपे त्रिव्यनुबन्धलोपे च प्रतिषेधो मा भूदिति। नुम्लोपे। अभाजि। रागः। उपबर्हणम्। ।

भिदितेति। बेभिद्यतेस्तृच्। यस्य हल इति यलोपः। मरीमृज इति। यङोऽचि चेति यङो लुक्। कुषुभ मगध शब्दौ कण्ड्वादिगणपठितौ धातू ताभ्यां यक्। ण्वुल्तृचौ। यस्य हल इति यलोपः। समिद्दृषच्छब्दाभ्यां क्यजन्ताभ्यां प्रत्ययः। क्यस्य विभाषेति यलोपः। नुम्लोप इति। नुमिति नकारस्य पूर्वाचार्यसंज्ञा। उपबर्हणमिति। बृहि वृद्धौ। इदित्वान्नुम्। बृंहेरच्यनिटीति वार्तिकेन नलोपः। ॥

CC-0. In Public Domain. Digitization by eGangotri

आस्त्रेमाणमिति। अस्त्रेमाणमित्यपि वेदे पठ्यते। तत्र नञ्पूर्वात् स्निवेर्मनिन् प्रत्ययः। वकारलोपः। ऊडादेश्चाच्छान्दसत्वान्न भवति। परिगणने सति धातुग्रहणं न कर्तव्यं भवतीत्यनुबन्धलोपः प्रयोजनत्वेन पठितः। दृक्प्रकरणादिति। ।तेन यत्रैकपरिभाषास्थान्यन्तरनिवृत्तये व्याप्रियते तत्रायं निषेधः। प्रत्ययाश्रयत्वादिति। लोपविशेषणमार्द्धधातुक

स्निवेः आस्त्रेमाणम्। अनुबन्धलोपे। लूञ्। लविता। लवितुम्। यदि परिगणनं क्रियते। स्यदः। प्रश्रथः। हिमश्रथ इत्यत्रापि प्राप्नोति। वक्ष्यत्येतत्। निपातनात्स्यदादिष्विति। तत्तर्हि परिगणनं कर्तव्यम्। न कर्तव्यम्। नुम्लोपे कस्मान्न भवति॥ इक्प्रकरणान्नुम्लोपे वृद्धिः॥ इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चैषेग्लक्षणा वृद्धिः। यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। स्यदः। प्रश्रथः। हिमश्रथ इत्यत्र न प्राप्नोति। इह च प्राप्नोति। अवोदः। एधः। ओद्म इति॥ निपातनात्स्यदादिषु॥ निपातनात्स्यदादिषु प्रतिषेधो भविष्यति। न च भविष्यति। यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः स्निव्यनुबन्धलोपे कथम्। प्रत्ययाश्रयत्वादन्यत्र सिद्धम्। आर्द्धधातुकनिमित्ते लोपे प्रतिषेधः। न चैष आर्द्धधातुकनिमित्तो लोपः। यद्यार्द्धधातुकनिमित्ते लोपे प्रतिषेधः। जीरदानुः। अत्र न प्राप्नोति। रक्किज्यः संप्रसारणम्। नैतज्जीवे रूपम्। रक्येतज्ज्यः संप्रसारणं भवति। यावता चेदानीं रक्किजीवेरपि सिद्धं भवति। कथमुपबर्हणम्। वृद्धिः प्रकृत्यन्तरम्। कथं विज्ञायते वृहिः प्रकृत्यन्तरमिति। अचीति हि लोप उच्यते। अनजादावपि दृश्यते। निवृह्यते। अनिटीति चोच्यते। इडादावपि दृश्यते। निबर्हिता। निबर्हितुमिति। अजादावपि न दृश्यते। वृंहयति। वृंहकः। तस्मान्नार्थः परिगणनेन। यदि परिगणनं न क्रियते।

ग्रहणमित्यर्थः। जीरदानुरिति। वर्णनिमित्तोऽत्र वकारलोपो न प्रत्ययनिमित्तः। रक्किज्य इति। एवं च जीरेत्यवग्रहः सिद्ध्यति। बहुव्रीहित्वाच्च जीरदानुशब्दे रेफाकार उदात्तः। वृहिरिति। वृह वृहि वृद्धाविति पाठात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेद्यत इति। गुणो णिलोपश्चार्द्धधातुकनिमित्त इति पक्षद्वयेपि दोषः। अपवादविषयपरिहाराच्चान्तरङ्गोपि गुणो-
त्र न प्रवर्तत इत्युपन्यासः। कथं तर्हीति। बहुव्रीहौ सत्येकार्द्धधातुकनिमित्तत्वं लोपस्य गुणवृद्ध्योश्चाश्रितमिति मेद्य-
त इत्यादौ भिन्ननिमित्तत्वाद्गुणो न निषिध्यते। यत्र हलचोरादेशादिति। लुकाकृतत्वो यङ्लुग्यत इत्यान्वयः। अत्रापीति।

मेद्यते छेद्यते। अत्रापि प्राप्नोति। नैष दोषः। धातुलोप इति नैवं विज्ञायते। धातोर्लोपो धातुलोप इ-
ति। कथं तर्हि। धातोर्लोपो यस्मिंस्तदिदं धातुलोपं धातुलोपे इति। तस्मादिग्लक्षणा वृद्धिः। यदि तर्हीग्लक्ष-
णयोर्गुणवृद्ध्योः प्रतिषेधः। पापचकः। पापठकः। मगधकः। दृषदकः। अत्र न प्राप्नोति॥ अल्लोपस्य
स्थानिवत्त्वात्॥ अकारलोपे कृते तस्य स्थानिवद्भावाद्गुणवृद्धी न भविष्यतः। अनारम्भो वा॥ अ-
नारम्भो वा पुनरस्य योगस्य न्याय्यः। कथं बेभिदिता। मरीमृजकः। कुषुभिता। समिधिता इति। अत्रा-
प्यकारलोपे कृते तस्य स्थानिवद्भावाद्गुणवृद्धी न भविष्यतः। यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थ-
मयं योगो वक्तव्यः। क्व च स्थानिवद्भावो नास्ति। यत्र हलचोरादेशः। लोलुवः। पोपुवः। मरीमृजः।
सरीसृप इति। अत्राप्यकारलोपे कृते तस्य स्थानिवद्भावाद्गुणवृद्धी न भविष्यतः। लुकि कृते न प्रा-
प्नोति। इदमिह संप्रधार्यम्। लुक् क्रियतामल्लोप इति। किमत्र कर्तव्यम्। परत्वादल्लोपः। नित्यो लु-
क्। कृतेप्यल्लोपे प्राप्नोत्यकृतेपि प्राप्नोति। लुगप्यनित्यः। कथम्। अन्यस्य कृते प्राप्नोति। अन्यस्या-
कृते। शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति।

कृतेप्यकारलोपे एकदेशविकृतमनन्यवद्भवतीति यकारः प्रत्ययसंज्ञो भवत्येवेति भावः। नित्यो लुगिति। लुक्शा-
स्त्रप्रवृत्तिर्नित्या।

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनवकाशइति। नाप्राप्तेलोपेलुगारम्भात्। सावकाशादिति। भिन्नविषयौलुग्लोपौ अकारस्यलोपोयकारस्यलुक्। ततश्चनास्तियेननाप्राप्तिन्यायः। अथापीति। यङोचिचेत्यत्रयकाराकारसमुदायस्ययङ्इतिनिर्दिष्टस्यविवक्षितत्वादवयवेचयङ्व्यपदेशस्यगौणत्वादितिभावः। समानाश्रयइति। तुल्यकालत्वादितिभावः। नोनावेत्यत्रतुबहुलग्रहणानुवृत्त्याअनैमित्तिकोन्तरङ्गोलुक्प्रागेवप्रत्ययोत्पत्तेर्भवति॥ निकुचितइति। कित्वसंयोगेननलोपेस

अनवकाशस्तर्हिलुक्। सावकाशोलुक्। कोवकाशः। अवशिष्टः। अथापिकथंचिदनवकाशोलुक्स्यादेवमपिनदोषः। अल्लोपेयोगविभागःकरिष्यते। अतोलोपः। ततोयस्य। यस्यचलोपोभवति। अतइत्येव। किमर्थमिदम्। लुकंवक्ष्यतितद्बाधनार्थम्। ततोहलः। हलउत्तरस्ययस्यचलोपोभवति। इहतर्हिपरत्वाद्योगविभागाद्वालोपोलुकंबाधेत। छन्नोनोनावद्वृषभोयदीदम्। नोनूयतेर्नोनाव। समानाश्रयोलुग्लोपेनबाध्यते। कश्चसमानाश्रयः। यःप्रत्ययाश्रयः। अत्रचप्रागेवप्रत्ययोत्पत्तेर्लुग्भवति। कथंस्यदः। प्रश्रथः। हिमश्रथः। जीरदानुः। निकुचितइति। उक्तंशेषे। किमुक्तम्। निपातनात्स्यदादिषु। प्रत्ययाश्रयत्वादन्यत्रसिद्धम्। रकिज्यःसंप्रसारणम्। निकुचितेप्युक्तम्। किम्। सन्निपातलक्षणोविधिरनिमित्तंतद्विघातस्येति॥

तिउदुपधत्वमितिनिमित्तमकित्त्वस्यनभवति। यदितर्ह्येकारलोपःक्रियतेतदाजङ्गमइत्यत्रतस्यस्थानिवद्भावादुपधालोपःप्राप्नोति। नैषदोषः। अनङीतिप्रतिषेधात्। अनर्थकोयमङितिचेत्। लोपस्यापितर्ह्यप्राप्तिः। अजादौप्रत्ययेतस्यविधानात्। ननुलोलुवादिषुवङादयःस्थानिवद्भावेननसिद्ध्यन्तितेषांस्थानिन्यदर्शननात्संभवमात्रेणाप्यतिदेशोभवतीत्यदोषः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥क्ङिति च॥ क्ङिति प्रतिषेध इति। इक इत्यनुवर्तते गुणवृद्धी इति च। तत्र यदीक् क्ङितीत्यनेन न विशेष्यते क्ङिति परतो यद् इगिति तदा तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानान्निर्दिष्टग्रहणस्य चानन्तर्यार्थत्वाच्चितं स्तुतमित्यादावेव निषेधः स्यादिह तु भिन्नो भिन्नवानित्यादाविति तन्निमित्तग्रहणं कर्तव्यम्। यदा तु क्ङिद्ग्रहणं गुणवृद्धिविशेषणं तदा परसप्तम्या अप्रसङ्ग एव नहि विहितयोर्निषेधः। अपि त्वनभिनिर्वृत्तयोरेवेति परिभाषानुपस्थानान्निमित्तसप्तम्येव क्ङितीति भवति क्ङिन्निमित्ताहितयोः प्रवृत्तिः। उपधारोरवीत्यर्थमिति। उपधाया अपीकः प्रतिषेधार्थं रोरवीते यङ्निमित्तप्रतिषेधनिवृत्त्यर्थम्। अ-

क्ङिति च॥ ॥क्ङिति प्रतिषेधे तन्निमित्तग्रहणम्। क्ङिति प्रतिषेधे तन्निमित्तग्रहणं कर्तव्यम्। क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति वक्तव्यम्। किं प्रयोजनम्। उपधारोरवीत्यर्थम्॥ उपधार्थं रोरवीत्यर्थं च। उपधार्थं तावत्। भिन्नः। भिन्नवानिति। किं पुनः कारणं न सिध्यति। क्ङितीत्युच्यते। यत्र क्ङित्यनन्तरो गुणो भाव्यस्ति तत्रैव स्यात्। चितम्। स्तुतम्। इह तु न स्याद् भिन्नः। भिन्नवानिति॥ ननु च यस्य गुण उच्यते तं क्ङित्परत्वेन विशेषयिष्यामः। पुगन्तलघूपधस्याङ्गस्य गुण उच्यते तच्चात्र क्ङित्परम्। पुगन्तलघूपधस्येति नैवं विज्ञायते पुगन्ताङ्गस्य लघूपधस्य चेति। कथं तर्हि। पुकि अन्तः पुगन्तः लघ्वी उपधा लघूपधा पुगन्तश्च लघूपधा च पुगन्तलघूपधं पुगन्तलघूपधस्येति। अवश्यं चैतदेवं विज्ञेयम्। अङ्गविशेषणे सतीह प्रसज्येत। भिनत्ति। छिनत्तीति॥

त्र हि तिब्निमित्तो गुणो न यङ्निमित्तः। ननु चेति। आकाङ्क्षया पुगन्तलघूपधस्येति सन्निधानं मन्यते। तथा हि। क्ङिति गुणवृद्धी न भवत इत्युक्ते कस्येत्याकाङ्क्षायां यस्य प्राप्ते इत्यस्ति पुगन्तलघूपधस्यापेक्षा। अथवा क्ङितीति प्रत्ययग्रहणात्प्रत्ययेनाङ्गं सन्निधाप्यते ततश्च क्ङिति भिन्नमित्यादौ लघूपधस्यानन्तर्यात्सिद्धो निषेधः। लघूपधेति। ततश्च समुदायस्य निर्देशादवयवस्य चैकोऽव्यवधानात्तदवस्थैवाप्राप्तिरित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ तन्निमित्तपक्षस्यापि दुष्टतामाह। आचङन्ते दोष इति। सार्वधातुकनिमित्तस्य गुणस्य निषेधेपि लघूपधलक्षणनिषेधाप्र ११४
६१ सङ्ग इत्यर्थः। रियति पियति धियतीति। रि पि गतौ धि धारणे इति तुदादौ पाठः। हतो हथ इति। यथैवादिप्रभृतिभ्यः शप इ-
ति शब्निवर्त्यते एवमकारोपि निषेधेन निवर्त्यते त्याशयः। नन्विग्लक्षणोयं गुणो न भवतीति निषेधाप्रसङ्गः। सत्यम्।
परिहारान्तरसंभवान्नैतदाश्रितं प्रसक्तस्येति। सामान्यलक्षणे न विशेषलक्षणापरामर्शेन यत्नात् पुनर्विशेषलक्षण
परामर्शेनात्मरूपेणानभिनिर्वृत्तस्य निवृत्तिः क्रियते। परमार्थतस्तूत्सर्गापवादयोरेकवाक्यतायामप्राप्तस्यनुमानं वा

रोरवीत्यर्थे च। त्रिधा बद्धो वृषभो रोरवीति। यदि तन्निमित्तग्रहणं क्रियते। आचङन्ते दोषः॥ रियति। पिय
ति। धियति। प्रादुद्रुवतुः। प्रासुस्रुवतुः। अत्र न प्राप्नोति॥ आचङन्तस्यान्तरङ्गलक्षणत्वात् सिद्धम्॥ अन्तरङ्ग-
लक्षणत्वादत्रैयङुवङोः कृतयोरनुपधात्वाद्गुणो न भविष्यति। एवं क्रियते चेदं तन्निमित्तग्रहणं न
च कश्चिद्दोषो भवति। इमानि च भूयस्तन्निमित्तग्रहणस्य प्रयोजनानि। हतो हथः। उपोयते। औयत। लौ
यमानिः। पौयमानिः। नेनिक्त इति। नैतानि सन्ति प्रयोजनानि। इह तावत् हतो हथ इति। प्रसक्तस्यानभि
निर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुम्। अयं च धातूपदेशावस्थायामेवाकारः।

ध इति सिद्धान्तः। चितमित्यादौ च प्रसक्तानभिनिर्वृत्तगुणनिषेधवचनस्य चरितार्थत्वाद् हतो हथ इति भूताकारनिवृत्ता
वव्यापारः। अदिप्रभृतिभ्य इत्यनेन तु गत्यन्तराभावात् सन्नेव प्रक्रियादशायां शब्निवर्त्यते। नन्वेवं भवत इत्यादौ प्र राम॰
सक्तोऽनभिनिर्वृत्त एव शबकारः कस्मादनेन न निवर्त्यते। नैष दोषः। शब्भवतीत्यस्यां चोदनायां गुणरूपेण चोदनात् ६१
यं गुणनिषेधविषयः।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपोयतइति। वेञोयकि संप्रसारणे कृते उभयपदाश्रितत्वाद्बहिरङ्गो गुणः। औयतेत्यादौ बहिरङ्गाश्रयत्वाद्वृद्धेर्बहिर
ङ्गा। नेनिक्तइति। क्ङित्परत्वेनाङ्गस्यविशेषणादङ्गस्यचकार्यित्वात्पूर्वपक्षः। उत्तरत्वभ्यासस्यकार्यित्वात्तस्यचपररूपे
णाव्यवधानादिति। धातुंक्ङित्परत्वेनेति। नधातुलोपइत्यत्रोपसर्जनेपिधातौधातुशब्दमात्रस्यस्वरितत्वादिहा-
नुवृत्तिरित्यर्थः। यदीति। क्ङित्यनन्तरस्यधातोर्गुणवृद्धीनभवतइतिवाक्यार्थंमत्वाप्रश्नः। धातोरेवेति। धातोर्विहितस्यक्ङित्य
नन्तरेणेतिमत्वाप्रश्नः। धातोर्विहितइति। धातोर्विहितेक्ङित्यनन्तरोयोधातुर्विकरणोवातस्यप्रतिषेधइत्यर्थः। अथवेति। यत्रगु

इह चोपोयते औयतत्लौयमानिः पौयमानिरिति। बहिरङ्गे गुणवृद्धी। अन्तरङ्गः प्रतिषेधः। असिद्धं बहिरङ्गमन्त
रङ्गे। नेनिक्तइति पररूपेणाव्यवहितत्वान्नभविष्यति। उपधार्थेनतावन्नार्थः। धातोरितिवर्तते। धातुंक्ङित्परत्वेन
विशेषयिष्यामः। यदिधातुर्विशेष्यते विकरणस्यनप्राप्नोति। चिनुतः। सुनुतः। लुनीतः। पुनीतइति। नैषदोषः। विहि
तविशेषणंधातुग्रहणम्। धातोर्योविहितइति। धातोरेवतर्हिनप्राप्नोति। नैवंविज्ञायते धातोर्विहितस्यक्ङितीति।
कथंतर्हि। धातोर्विहितेक्ङितीति। अथवाकार्यकालंसंज्ञापरिभाषंयत्रकार्यंतत्रद्रष्टव्यम्। पुगन्तलघूपधस्येत्यु-
पस्थितमिदंभवतिक्ङितिनेति। अथवायदेतस्मिन्योगेक्ङिद्ग्रहणंतदनवकाशंतस्यानवकाशत्वाद्गुणवृद्धीनभवि
ष्यतः। अथवाचार्यप्रवृत्तिर्ज्ञापयतिभवत्युपधालक्षणस्यप्रतिषेधइति। यदयंत्रसिगृधिधृषिक्षिपेःक्नुः। इ
कोझल्। हलन्ताच्चेतिक्नुसनौकितौकरोति।

णवृद्धीविधीयेतेतत्रक्ङितिनेत्युपतिष्ठतेइत्येवमियंपरिभाषाभवति। तत्रपुगन्तलघूपधस्येत्यत्रास्याउपस्थानेसतियेन
नाव्यवधानमितिभिन्नमित्यादौनिषेधोभविष्यति। अथवेति। माभूत्परिभाषातथापिप्रतिषेधस्यप्रतिषेध्यापेक्षायांयाव
न्तोयादृशाःप्रतिषेद्धव्यास्तावन्तिप्रतिषेधसूत्राणीतिपुगन्तलघूपधगुणेप्रतिषेध्येनवकाशःप्रतिषेधोव्यवहितेपिप्रवर्त-
ते। अथवायथोद्देशपक्षाश्रयेणभाष्यम्। तथाहिप्रधानान्यात्मसंस्कारायसन्निधीयमानानिगुणाभेदंप्रयुञ्जतेइतियदेत-
स्मिन्नित्युक्तम्। अथवेति। लिङ्गान्निर्दिष्टाङ्गविकल्पात्तस्मिन्नितिपरिभाषोपतिष्ठतइत्यर्थः। अनेकपरिहारोपन्यासोन्यायव्यु-
त्पादनार्थः।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहिरङ्ग इति। ततश्चासिद्धत्वान्निषेधानुपपत्तिरित्यर्थः। अथवेति। ननु बहुव्रीह्यर्थमुभयविशेषणायार्द्धधातुकग्रहणं स्यादि
तिकथमनवकाशत्वम्। उच्यते। विनाप्यार्द्धधातुकग्रहणेन बहुव्रीहिर्लभ्यते यथैकाचो ह्रेद इत्यत्र। रोरवीत्यत्रानैमित्तिकत्वा
ल्लोपस्य गुणनिषेधः पूर्वेण न प्राप्नोतीत्यार्द्धधातुकग्रहणसामर्थ्यात्सूत्रान्तरप्राप्तोपि निषेधो बाध्यत इत्यर्थः। यङ्निमि
त्तश्च निषेधोन्तरङ्गत्वाद्बाध्यते न सार्वधातुकनिमित्त इति रोरुतइत्यादौ निषेधो भवत्येव। एतच्च छान्दसत्वमभ्युपेत्य-

कथं कृत्वा ज्ञापकम्। किल्करण एतस्य योजनं गुणः कथं न स्यादिति। यदि चात्र गुणप्रतिषेधो न स्यात् कि
त्करणमनर्थकं स्यात्। पश्यति त्वाचार्यो भवत्युपधालक्षणस्यापि गुणस्य प्रतिषेध इति। ततः क्नुसनौ कि
तौ करोति। रोरवीत्यर्थे नापि नार्थः। क्ङिती त्युच्यते। न चात्र किंतं ङितं वा पश्यामः। प्रत्ययलक्षणेन प्राप्नोति।
न लुमता तस्मिन्निति प्रत्ययलक्षणप्रतिषेधः। अथापि न लुमताङ्गस्येत्युच्यते एवमपि न दोषः। कथम्।
न लुमतालुप्तेङ्गाधिकारः प्रतिनिर्दिश्यते। किं तर्हि यो सौ लुमता लुप्यते तस्मिन्यदङ्गं तस्य यत्कार्यं तन्न
भवतीति। अथाप्यङ्गाधिकारः प्रतिनिर्दिश्यते। एवमपि न दोषः। कथम्। कार्यकालं संज्ञापरिभाषं यत्र-
कार्यं तत्र द्रष्टव्यम्। सार्वधातुकार्द्धधातुकयोर्गुणो भवतीत्युपस्थितमिदं भवति क्ङितिनेति। अथवा
छान्दसमेतत्। दृष्टानुविधिश्छन्दसि भवति। अथवा बहिरङ्गो गुणोन्तरङ्गः प्रतिषेधः। असिद्धं बहि
रङ्गमन्तरङ्गे। अथवा पूर्वस्मिन्योगे यदार्द्धधातुकग्रहणं तदनवकाशं तस्यानवकाशत्वाद्गुणो भविष्यति।

यङ्लुकी भाष्यकारेणोक्तम्। भाषाविषयत्वे तु यङ्लुको बहूनि प्रयोजनान्यार्द्धधातुकग्रहणस्य संभवन्ति। तोतोर्ति। तोथोर्ति।
दोदोर्ति। दोधोर्ति। जोहोर्ति। मोमोर्ति। इत्यादिषु तुर्वी थुर्वी दुर्वी धुर्वी त्यादिभ्यो यङ्लुकि तिपि वकारच्छकारयो राल्लोप इति लो
पे कृते ऽसत्यार्द्धधातुकग्रहणे बहुव्रीहावप्याश्रितेन धातुलोप इति गुणनिषेधः प्राप्नोति स माभूदित्येवमर्थमार्द्धधातु-
कग्रहणं स्यात्। अनेन चात्र व्यवधानान्नास्ति निषेध इति प्रतिप्रयोजने कथमनवकाशं स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इग्लक्षणयोरिति। इक इत्येवं ये गुणवृद्धी तयोर्निषेध इत्यर्थः। लकारस्येति॥ अनुबन्ध इत्संज्ञकत्वाल्लोपात्स्थानिनि नस-
न्निधीयत इत्यनल्विधाविति निषेधो न प्रवर्तते। पिच्च ङिन्न भवति ङिच्च पिन्न भवतीति भाष्यकारस्य कल्पनानवार्तिककार
स्येति दोषोपन्यासः। कथं नित्यं ङित इति। ननु ङितो लकारस्येति तत्रार्थः स्थितो न तु ङित आदेशस्येति। अन्यथा पचावः प-
चन्तीति लोपः स्यात्। एवं मन्यते। यासुटो ङित्त्वेन ज्ञापकेन स्थानिन एव लकारस्य ङिद्व्यपदेश उच्छिद्यते। ङकारोच्चारणं

इह कस्मान्न भवति। लैगवायनः। कामयते॥ तद्धितकाम्योरिक्प्रकरणात्॥ इग्लक्षणयोर्गुणवृद्ध्योः प्रति-
षेधः। न चैते इग्लक्षणे॥ लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसङ्गः॥ लकारस्य ङित्त्वादादेशेषु स्था
निवद्भावः प्राप्नोति। अचिनवम्। असुनवम्। अकरवम्। लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्र
सङ्ग इति चेद्यासुटो ङिद्वचनात्सिद्धम्। यदयं यासुटो ङिद्वचनं शास्ति तज्ज्ञापयत्याचार्यो न ङिदादेशा
ङितो भवन्तीति। यद्येतज्ज्ञाप्यते कथं नित्यं ङितः इतश्चेति। ङितो यत्कार्यं तद्भवति। ङिति यत्कार्यं तन्न
भवतीति। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। यासुट एव ङिद्वचनात्।

तु लुङ् लङ् लृङ् क्ष्वित्यादौ विशेषणार्थं स्यात्। ङितो यदिति। स्थानिवद्भावेन लादेशे ङिति यत्कार्यं पूर्वस्य तन्न भव
तीति ज्ञाप्यते न तु स्थानिन एव ङिद्व्यपदेश उच्छिद्यते। अन्यथा नित्यं ङित इति निर्विषयं स्यात्। यासुट एवेति। ङि
तो यत्कार्यं तद्यासुटो न किंचिदतिदेष्टव्यमस्ति किं तु ङिति यत्कार्यं विधीयते संप्रसारणादिकं तदतिदिश्यते। त
च्चेत्स्थानिवद्भावेन स्यादतिदेशोऽनर्थकः स्यादित्यतिदेशः क्रियमाणो ङिति यत्कार्यं तदभावस्यैव ज्ञापकः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपर्याप्तश्चेति। समुदायस्य ङिद्व्यपदेशो कर्तव्यो यासुड समर्थः। यासुट एव ह्यनेन ङित्त्वं क्रियते न समुदायस्य। क्ङिति चेत्यत्र
तन्निमित्तग्रहणस्य प्रत्याख्यातत्वाद् गुणनिमित्तेऽपि यासुटि ङितिगुणनिषेधः सिध्यति। यदि समुदायस्यानिवद्भावेन ङि-
त्कार्यमभविष्यद् यासुटो ङित्त्वं नव्यधास्यद्विहितं तज्ज्ञापयति ङितियत्कार्यं तत्स्थानादेशे न भवतीति। केषांचित्पाठः सु
पर्याप्तश्चेवहीति। तत्रावयवङित्त्वद्वारेण समुदाये ङित्त्वं विधीयत इति व्याख्येयम्। एवं क्ङितीति निमित्तसप्तमीपक्षेऽपि
गुणनिषेधः सिध्यति। अस्मिन्पक्षे ङित्त्वं चैनं करोतीति समुदायः परामृश्यते॥ दीधीवेवीटाम्। छन्दोविषयत्वादिति। भा-

अपर्याप्तश्चेवहि यासुट् समुदायस्य ङित्त्वे ङित्त्वं चैनं करोति। तस्यैतत्प्रयोजनं ङितो यत्कार्यं तद्यथा स्या
दङितियत्कार्यं तन्माभूदिति॥ क्ङिति च॥ दीधीवेवीटाम्॥ ॥किमर्थमिदमुच्यते गुणवृद्धी माभूतामिति।
आदीध्यनम्। आदीध्यकः। आवेव्यनम्। आवेव्यकः। अयं योगः शक्योऽकर्तुम्। कथम्। दीधीवेव्योश्छ
न्दोविषयत्वाद्दृष्टानुविधित्वाच्च छन्दसः। अदीधेद्दीधयुरिति गुणदर्शनादप्रतिषेधः॥ दीधीवेव्योश्छ
न्दसो विषयौ दृष्टानुविधिश्च छन्दसि भवति। दीधीवेव्योश्छन्दोविषयत्वाद्दृष्टानुविधित्वाच्च छन्दसः। अ
दीधेद्दीधयुरित्यत्र च गुणस्य दर्शनादप्रतिषेधः अनर्थकः प्रतिषेधः। अप्रतिषेधः। प्रजापतिर्वै यत्किंचन मनसा
अदीधेत्। होत्रायवृतः कृपयन्नदीधेत्। अदीधयुर्दाशराज्ञे वृतासः॥ भवेदिदं युक्तमुदाहरणम् अदीधेदिति।

षायामेतयोः प्रयोगाभावात्। दृष्टानुविधित्वाच्चेति। यद्यपि भाषायामपि दृष्टमेवानुविधीयते सिद्धे शब्दार्थसंब-
न्धइति न्यायात् तथाप्यादीध्यनमित्यादिप्रयोगश्छन्दसि नास्ति दृष्टस्यैव छन्दस्यनुविधानमित्यर्थः। न तु छन्द
स्येव दृष्टानुविधानमिति। अथवा दृष्टानुविधिरित्यस्यायमर्थः। गुणश्छन्दसि दृश्यते न तु सर्वत्र गुणनिषेध इ
ति। अदीधेदिति॥ लङ्। व्यत्ययेन तिप्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदीधयुरिति। जक्षित्यादयः षडित्यभ्यस्तत्वाज्जुसादेशो ऽज्झेः। प्रकृत्याश्रयश्चायमिति। ततश्चान्तरङ्गत्वादनेनैव भाव्यमित्यर्थः। येन नाप्राप्तइति। कार्यविशेषचिन्तापेक्षायामयं न्यायो न तु कार्यसामान्यं बाध्यमित्यस्यापेक्षायां न्यायावतारः। कथं दीध्यदिति। लेटिति। इतश्च लोपः परस्मैपदेष्विति इकारलोपः। लेटोडाटावित्यडागमः। श्यन्व्यत्ययेनेति। श्यनो ङित्त्वाद्गुणाभावः। यीवर्णयोर्दीधीवेव्योरितीकारलोपः। क्वचित्तु शब्व्यत्ययेनेति पाठः। तत्र शस्य ङित्त्वाद्गुणाभावः। एरनेकाच इति यणादेशः। इडिति वर्तमाने इति। नेड्वशिकृतीत्यतः। पिपठीरिति। पिपठिषतेः क्विप्।

इदं त्वयुक्तम्। अदीधयुरिति। अयं जुसि गुणः प्रतिषेधविषय आरभ्यते स यथैव क्ङिति चेत्येनं बाधते। एवमेनमपि बाधेत। नैष दोषः। जुसि गुणः प्रतिषेधविषय आरभ्यमाणस्तुल्यजातीयं प्रतिषेधं बाधते। कश्च तुल्यजातीयः। प्रत्ययाश्रयः। प्रकृत्याश्रयश्चायम्। अथवा येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते क्ङिति नेत्येतस्मिन्प्रतिषेधे जुसि गुण आरभ्यते। अस्मिन्पुनः प्राप्ते चाप्राप्ते च। यदि तर्ह्ययं योगो नारभ्यते। कथं दीध्यदिति॥ दीध्यदिति च श्यन्व्यत्ययेन। दीध्यदिति च श्यन्व्यत्ययेन भविष्यति। इटश्चापि ग्रहणं शक्यमकर्तुम्। कथमकणिषम् अरणिषम्। कणिता श्वः रणिता श्व इति। आर्द्धधातुकस्येड्वलादेरित्यत्र इडित्यनुवर्तमाने पुनरिड्ग्रहणस्य प्रयोजनम्। इडेव यथा स्यात् यदन्यत्प्राप्नोति तन्माभूदिति। किं चान्यत्प्राप्नोति। गुणः। यदि नियमः क्रियते। पिपठिषतेरप्रत्ययः पिपठीः। दीर्घत्वं न प्राप्नोति। नैष दोषः। आङ्गं यत्कार्यं तन्नियम्यते न चैतदाङ्गम्।

प्। अतो लोप इत्यकारलोपः षत्वस्यासिद्धत्वात्ससजुषो रुरिति रुत्वम्। पूर्वत्रासिद्धे न स्थानिवदिति अल्लोपस्य रुत्वे स्थानिवद्भावाभावः। आङ्गमिति। अङ्गस्येत्यनुवर्तनादङ्गाधिकारविहितं यद्रूपान्तरमिटस्तदेव निवार्यते इडेव यथा स्यादिति नियमेनेत्यर्थः। र्वोरुपधाया इति च दीर्घत्वं नाङ्गम्। यत्तु ग्रहो ऽलिटि दीर्घ इति दीर्घत्वं तद्वचनाद्भवति। पिपठिषिब्राह्मणकुलानीत्यत्र त्वकारलोपस्य स्थानिवद्भावात् झलन्तत्वाभावान्नुमभावस्तेन पिपठीषीति कथं सान्तमहतः संयोगस्येति दीर्घत्वमिति न चोदनीयम्। क्वौ विधिं प्रति न स्थानिवदित्यर्थो व्यवस्थापयिष्यते न तु क्वौ लुप्तं न स्थानिवदिति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। इडे वेत्यस्मिन्नियमे दीर्घत्वस्यासिद्धत्वान्नास्ति नियमेन व्यावृत्तिः। ततश्च व्याख्याने दृष्टा अविकृतरूप एवेटां प्रयोग एव तु विकृतः। अलावीदित्यत्र तु सिज्लोप एकादेशे सिद्ध इत्यसिद्धत्वनिषेधवचनात्सवर्णदीर्घत्वं भवति॥ हलोनन्तराः संयोगः॥ ॥कथमिति। किमन्तरशब्दस्य नञा बहुव्रीहिः अथवा अनन्तराशब्दस्येति प्रश्नः। अन्तरं विवरम्। वर्णशून्यकाल इत्यर्थः। अविद्यमा नादिति। मध्ये येषामन्ये वर्णा अविद्यमाना इत्याधेयस्य निषेधो न त्वाधारस्य। अवग्रह इति। अर्द्धमात्राकालोऽवग्रह इष्यते। अर्द्धमात्राकालं स्थित्वा वर्णान्तरं समुच्चार्यते तत्र गुरोरनृ

अथवा असिद्धं दीर्घत्वं तस्यासिद्धत्वान्नियमो न भविष्यति। हलोनन्तराः संयोगः॥ ॥अनन्तरा इति। कथमिदं विज्ञायते। अविद्यमानमन्तरं येषामिति। आहोस्विदविद्यमाना अन्तरा एषामिति। किं चातः। यदि विज्ञायते अविद्यमानमन्तरं येषामिति। अवग्रहे संयोगसंज्ञा न प्राप्नोति। अप्स्वित्यप्सु इति। विद्यते ह्यत्रान्तरमिति। अथ विज्ञायते अविद्यमाना अन्तरा एषामिति न दोषो भवति। यथा न दोषस्तथास्तु। अथवा पुनरस्तु अविद्यमानमन्तरं येषामिति। ननु चोक्तम्। अवग्रहे संयोगसंज्ञा न प्राप्नोति अप्स्वित्यप्सु इति। विद्यते ह्यत्रान्तरमिति। नैव दोषो न प्रयोजनम्॥ संयोगसंज्ञायां सहवचनं यथान्यत्र॥ संयोगसंज्ञायां सहग्रहणं कर्तव्यम्। हलोनन्तराः संयोगः सहेति वक्तव्यम्। किं प्रयोजनम्। सहभूतानां संयोगसंज्ञा यथा स्यादेकैकस्य मा भूदिति। यथान्यत्र।

तइति प्लुतो न भवेत्। नैव दोष इति। दोषनिवृत्तये संज्ञा क्रियते प्रयोजनाभिनिर्वृत्तये वा इह चोभयाभावः। अधिकरणावृत्तेर्दूरादूत संबन्धाभावात्। विचार्यमाणानामित्यादौ तु वाक्यस्य टेरित्यनुवर्त्तते न गुरोरनृत इति। अप्स्व्यत्राब्दे दोष इति चेदू नैवंविधे विषये प्रकृत्यवयवस्यावग्रहं पदकाराः कुर्वन्ति। अप्सुयोनिरित्यादावपि समासघटकपदानामन्तोऽवगृह्यत इति सुत्राब्दात्पूर्वस्य नास्त्यवग्रहः। संयोगसंज्ञायामिति। वृद्धिसंज्ञावदानन्तर्येव्यवस्थितानां हलां प्रत्येकं संयोग- रामः
संज्ञा प्राप्नोति ॥ ६४

॥

CC-0. In Public Domain. Digitization by eGangotri

किंच स्यादिति। द्वयोरानन्तर्ये एकैकस्यापि संयोगसंज्ञायां गुरुसंज्ञाप्रतिबद्धकार्यसिद्धिरिति प्रश्नः। निर्यायादिति। सति रेफे यकारः संयोग इत्येत्वप्राप्तिः। ननु समुदायस्यापि संज्ञित्वे अचो रहाभ्यां द्वे इति यकारस्य द्विर्वचने कृते कस्मादेत्वं न भवति यथा निर्ग्ल्येयादिति। एत्वे कर्तव्ये पूर्वत्रासिद्धमिति द्विर्वचनस्यासिद्धत्वान्नायं दोषः। त्राक्तेति। तकारे झलि परतः-

तद्यथा। अन्यत्रापि यत्रेच्छति सहभूतानां कार्यं करोति तत्र सहग्रहणम्। तद्यथा। सह सुपा। उभे अभ्यस्तं सहेति। किंच स्यात्। यद्येकैकस्य संयोगसंज्ञा स्यात्। इह निर्यायात्। निर्वायात्। वान्यस्य संयोगादेरित्येत्वं प्रसज्येत। इह च संहृषीष्टेति ऋतश्च संयोगादेरितीट् प्रसज्येत। इह च संह्रियत इति गुणोर्तिसंयोगाद्योरिति गुणः प्रसज्येत। इह च दृषत्करोति समित्करोतीति संयोगान्तस्येति लोपः प्रसज्येत। इह च त्राक्ता वस्तेति स्कोः संयोगाद्योरन्ते चेति लोपः प्रसज्येत। इह च निर्यातो निर्वातः संयोगादेरातो धातोरिति निष्ठानत्वं प्रसज्येत। नैष दोषः। यत्तावदुच्यते इह तावन्निर्यायात् निर्वायात्। वान्यस्य संयोगादेरित्येत्वं प्रसज्येतेति। नैवं विज्ञायते। संयोग आदिर्यस्य सोऽयं संयोगादिः संयोगादेरिति। कथं तर्हि। संयोगौ आदी यस्य सोऽयं संयोगादिः संयोगादेरिति। एवं तावत्सर्वमाङ्गं परिहृतम्। यदप्युच्यते। इह च दृषत्करोति समित्करोति। संयोगान्तस्येति लोपः प्रसज्येतेति। नैवं विज्ञायते संयोगोऽन्तो यस्य तदिदं संयोगान्तं संयोगान्तस्येति। कथं तर्हि। संयोगावन्तावस्य तदिदं संयोगान्तं संयोगान्तस्येति।

ककारः संयोगो भवत्यादिश्चेति लोपप्रसङ्गः। संयोगाविति। कथं द्वन्द्वावुपसर्जनार्थस्य द्वित्वावगतिरिति चेद् आदिग्रहणसामर्थ्यात्। अन्यथा संयोगादिति वक्तव्यं स्यात्। संयोगात्परो य आकारस्तदन्तस्याङ्गस्येत्वमित्यर्थलाभात्। संयोगावन्ताविति। अत्रापि संयोगलोप इत्येव संयोगेन पदस्य विशेषणात्तदन्तविधौ लब्धेऽन्तग्रहणमाश्रितसंख्याभेदः संयोगो यथा गृह्येतेत्येवमर्थं विज्ञायते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संयोगयोरिति। षष्ठीसमास आश्रीयते इत्यर्थः। संयोगयोरिति द्विवचननिर्देशः स्कोर्द्वित्वात्तत्समीपयोरपि हलोर्द्वित्वात्स्क
तः। तेनायमर्थः। झलि परतो यः संयोगः पदान्ते च यः संयोगः तस्यादिः समीपो यः ककारः सकारश्च तयोर्लोप इति। न चैवं
सति शक्तावस्तेत्यत्र लोपः प्राप्नोति। संयोगादेरात इत्यत्रापि संयोगादात इत्येव संयोगात्परो य आकारस्तदन्ताद्धातोर्नत्व।

यदप्युच्यते। इह च शक्तावस्तेति स्कोः संयोगाद्योरिति लोपः प्रसज्येतेति। नैवं विज्ञायते संयोगावादी सं
योगादी संयोगाद्योरिति। कथं तर्हि। संयोगयोरादी संयोगादी संयोगाद्योरिति। यदप्युच्यते। इह च नि
र्यातो निर्वात इति संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं प्रसज्येतेति। नैवं विज्ञायते संयोग आ
दिर्यस्य सोयं संयोगादिः संयोगादेरिति। कथं तर्हि। संयोगावादी यस्य सोयं संयोगादिः संयोगादेरिति
। कथं कृत्वा एकैकस्य संयोगसंज्ञा प्राप्नोति। प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति। तद्यथा वृद्धिगुणसं
ज्ञे प्रत्येकं भवतः। ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिरिति। तद्यथा। गर्गाः शतं
दण्ड्यन्ताम् अर्थिनश्च राजानो हिरण्येन भवन्ति। न च प्रत्येकं दण्डयन्ति। सत्येतस्मिन्दृष्टान्ते
यदि तत्र प्रत्येकमित्युच्यते इहापि सहग्रहणं कर्तव्यम्। अथ तत्रान्तरेण प्रत्येकमिति वचनं प्र
त्येकं गुणवृद्धिसंज्ञे भवतः। इहापि नार्थः सहग्रहणेन। अथ यत्र बहूनामानन्तर्यं किं तत्र द्वयोर्द्व
योः संयोगसंज्ञा भवति आहोस्विदविशेषेण। कश्चात्र विशेषः॥ समुदाये संयोगादिलोपो मस्जेः।
समुदाये संयोगादिलोपो मस्जेर्न सिद्ध्यति।

मिति सिद्धे आदिग्रहणं द्वित्वसंख्याश्रयणार्थम्। कथं कृत्वेति। संयोगसंज्ञाया अन्वर्थत्वात्संयुज्यन्तेऽस्मिन्वर्णा इति
समुदायः संयोग इत्यर्थस्याश्रयणात्सहग्रहणं न कर्तव्यमित्यर्थः। आहोस्विदिति। द्वयोरित्यस्य विशेषस्यानाश्रयणाद्ब
हूनामेवेत्यर्थः। यथा पपाचेत्यत्र समुदायस्यैकाचो द्विर्वचनं नावयवस्यैकाचः। यदा तु द्वयोरेव हलोरानन्तर्यं तदा द्वयो
र्भवत्येव। हल इति जातौ बहुवचननिर्देशात्।

CC-0. In Public Domain. Digitization by eGangotri

मङ्क्तेति। मस्जिनशोर्झलीतिनुमिकृतेनसज्जानांसंयोगसंज्ञानतुसजयोरितिसलोपाप्रसङ्गः। निर्ग्लेयादिति। यःसंयो
गोनामसावङ्गादिःयश्चाङ्गादिर्गकाररलकारसमुदायोनासौसंयोगः। इन्दिद्रीयिषतीति। अत्रद्वौसंयोगौनदौदरौच। त
त्रदकारस्यसंयोगादित्वाद्द्विर्वचननिषेधप्रसङ्गः। नवाज्विधेरिति। अजाश्रयःप्रतिषेधविधिर्ज्विधिः। अजादेरितिकर्म

मङ्क्ता। मङ्क्तुम्। इहचनिर्ग्लेयात्। निर्ग्लायात्। निर्म्लेयात् निर्म्लायात्। वान्यस्यसंयोगादेरित्येत्वंनप्राप्नोति। इहचसं
स्वरिषीष्टेतिऋतश्चसंयोगादेरितीट्नप्राप्नोति। इहचसंस्वर्यतेइतिगुणोर्त्तिसंयोगाद्योरितिगुणोनप्रा
प्नोति। इहचगोमान्करोति यवमान्करोतीतिसंयोगान्तस्यलोपइतिलोपोनप्राप्नोति। इहचनिर्ग्लानो
निर्म्लानइतिसंयोगादेरातोधातोर्यण्वतइतिनिष्ठानत्वंनप्राप्नोति। अस्तुतर्हिद्वयोर्द्वयोःसंयोगसंज्ञा
॥द्वयोर्हलोःसंयोगइतिचेद्द्विर्वचनम्॥ द्वयोर्हलोःसंयोगइतिचेद्द्विर्वचनंनसिध्यति। इन्द्रमिच्छतिइ
न्द्रीयति। इन्द्रीयतेःसन्। इन्दिद्रीयिषति। नन्द्राःसंयोगादयइतिदकारस्यद्विर्वचनंनप्राप्नोति॥ नवाज्
विधेः॥ नवाएषदोषः। किंकारणम्। अज्विधेः। न्द्राःसंयोगादयोनद्विरुच्यन्ते। अजादेरितिवर्तते। अथय
द्येवंबहूनांसंयोगसंज्ञाअथापिद्वयोर्द्वयोःकिंगतमेतदियतासूत्रेण। आहोस्विदन्यतरस्मिन्पक्षे
भूयःसूत्रंकर्तव्यम्। गतमित्याह। कथम्। यदातावद्बहूनांसंयोगसंज्ञातदैवंविग्रहःकरिष्यते। अवि
द्यमानमन्तरमेषामिति। यदाद्वयोर्द्वयोःसंयोगसंज्ञातदैवंविग्रहःकरिष्यते।

धारयः तेनाचआदेःपरेऽनन्तरान्द्रानद्विरुच्यन्ते। इन्द्रशब्देतुदकारोनकारेणव्यवहितत्वाद्द्विरुच्यतएव। अविद्य
मानमिति। बहूनांचानन्तरत्वेसमुदायद्विर्वचनवद्बहूनामेवसंयोगसंज्ञानद्वयोर्द्वयोः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· अविद्यमानादिति। मध्येयआधेयः सद्वयोर्द्वयोरेकमध्येभवतीतिसंसर्गवद्विप्रयोगस्यापिविशेषावगतिहेतुत्वाद्बहु ११४
६६ षुद्वयोर्द्वयोः संयोगसंज्ञाभवतीतिपक्षः। द्वयोश्चैवान्तरेति। अन्तरान्तरेणयुक्ते इतिद्वितीयाकस्मादत्रनभवति। उच्य
ते। यदामध्यापेक्षयानियतावधिरूपत्वंविवक्ष्यते। त्वांचमांचान्तराकमण्डलुः। अग्नीअन्तराधवखदिरावन्तरेतित
दाद्वितीया। यदातुनियतावधित्वंनविवक्ष्यतेअपितुसंबन्धमात्रंतदाषष्ठ्येवभवति। तदाहिनज्ञायतेकिंतयोरेवाव
धित्वमुतान्यसहितयोरित्यवधिनियमाभावाद्वितीयायायुक्तग्रहणान्नियतावधिविवक्षाविषयायाअभावः। यान्ही
ति। एषामितिबहुवचननिर्देशादितिनबोद्धव्यम्। बहुत्वस्याविवक्षणात्। अन्यथाशिक्षेत्यादौद्वयोर्नस्यात्। तस्मा
द्योसावन्तरेणसद्वयोर्भवतिनवेतियदुक्तंतत्रोच्यते। यदाद्वयोरन्तरानभवतितदाबहवोऽनन्तराइतितेषामेवप्राप्नो

अविद्यमानाअन्तराएषामिति। द्वयोश्चैवान्तराकश्चिद्विद्यतेवानवा। एवमपिबहूनामेवप्राप्नोति। या
न्हीहिभवानत्रषष्ठ्याप्रतिनिर्दिशतिएतेषामन्येनव्यवायेनभवितव्यम्। अस्तुतर्हिसमुदायेसंज्ञा। ननु
चोक्तंसमुदायेसंयोगादिलोपोमस्जेरिति। नैषदोषः। वक्ष्यत्येतत्। अन्त्यात्पूर्वोमस्जेर्मिदनुषङ्गसंयो
गादिलोपार्थमिति॥ अथवाऽविशेषेणसंयोगसंज्ञाविज्ञास्यतेद्वयोरपिबहूनामपितत्रद्वयोर्यासंज्ञा
तदाश्रयोलोपोभविष्यति॥

ति। यदाहिबहूनांमध्येभिन्नजातीयोऽभवतितदामाभूत्। तदभावेतुप्रवर्तितव्यमेवबहूनांसंज्ञयासमुदायद्विर्वे
चनवदित्यर्थः। अन्त्यात्पूर्वइति। तच्चानुषङ्गलोपार्थमवश्यंवक्तव्यम्। अन्त्यादचःपरेनुमिसत्यनुपधात्वान्मग्नइ
त्यत्रनलोपोनस्यात्। कृतेपिसंयोगादिलोपेतस्यासिद्धत्वादनुपधात्वमेवनकारस्य। अविशेषेणेति। बहुष्वनन्तरेषुद्व
योर्द्वयोरपिभवतिबहूनामपीत्ययमिदानीमविशेषः। कार्यार्थत्वात्संयोगसंज्ञायाविरोधाभावादेकयासंज्ञयासर्वेषामनु राम:
ग्रहासिद्धाद्विर्वचनेनवैषम्यादविशेषेणेत्युक्तम्। बहूनांसंनिधौबहूनामेवसंयोगसंज्ञेत्यस्मिन्पक्षेआश्रीयमाणे ६६
मस्जेर्दोषोन्त्यात्पूर्वइतिपरिहृतः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषान्दोषान्परिहर्तुमाह। यदप्युच्यत इति। पाठक्रमादार्थक्रमो बलीयानिति मत्वेरित्यस्यानन्तरमिदं द्रष्टव्यम्। निर्ग्लेयादित्यादिषु यद्यपि त्रयो हलः सन्निहितास्तथापि कार्यार्थत्वात्संज्ञायास्त्रिषु कार्याभावादङ्गपदधात्ववयवस्य संयोगस्य तेषु तेषु लक्षणेष्वाश्रितत्वात्समुदाये कार्याभावे चावयवानां स्वकार्यारम्भाद् द्वयोरेव संज्ञा प्रवर्तत इति भाष्यार्थः। व्याख्यानान्तरमत्र क्लिष्टत्वान्नोक्तम्। पचति पनसमिति। हल इति वचनादचा सह सकारमकारयोर्मा भूत्सं-

यदप्युच्यते। इह निर्ग्लेयात्। निर्ग्लायात्। निर्म्लेयात्। निर्म्लायात्। वान्यस्य संयोगादेरित्येत्वं न प्राप्नोतीति। अङ्गेन संयोगादिं विशेषयिष्यामः। अङ्गस्य संयोगादेरिति। एवं तावत्सर्वमाङ्गं परिहृतम्। यदप्युच्यते। इह च गोमान्करोति यवमान्करोतीति संयोगान्तलोपो न प्राप्नोतीति। पदेन संयोगान्तं विशेषयिष्यामः। पदस्य संयोगान्तस्येति। यदप्युच्यते। इह च निर्ग्लानो निर्म्लान इति संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं न प्राप्नोतीति। धातुना संयोगादिं विशेषयिष्यामः। धातोः संयोगादेरिति॥ स्वरानन्तर्हितवचनम्॥ स्वरैरनन्तर्हिता हलः संयोगसंज्ञा भवन्तीति वक्तव्यम्। किं प्रयोजनम्। व्यवहितानां मा भूत्। पचति पनसम्। ननु चानन्तरा इत्युच्यते तेन व्यवहितानां न भविष्यति। दृष्टमानन्तर्यं व्यवहितेऽपि। व्यवहितेऽप्यनन्तरशब्दो दृश्यते। तद्यथा। अनन्तरावेतौ ग्रामावित्युच्यते। तयोश्चैवान्तरा नद्यश्च पर्वताश्च भवन्तीति। यदि तर्हि अनन्तरशब्दो व्यवहितेऽपि भवत्यानन्तर्यवचनमिदानीं किमर्थं स्यात्। आनन्तर्यवचनं किमर्थमिति चेदेकप्रतिषेधार्थम्॥ एकस्य हलः संयोगसंज्ञा मा भूदिति।

।किं च स्यात्।

ज्ञातयोरेव तु प्राप्नोति। ततश्च सलोपप्रसङ्गः। एकप्रतिषेधार्थमिति। अनन्तरा इत्यनेन संज्ञाया विषयो निर्दिश्यते। यत्रानन्तरव्यवहारस्तत्र संज्ञा न चैकाकिन्यनन्तरव्यवहार इति भावः। एकप्रतिषेधस्य च प्रयोजनम्। इयेषेत्यादाविजादेरित्यामो निवृत्तिः। गुरुमद्वचनमितीयायेत्यादिनिवृत्त्यर्थं स्यात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृषलकुलमिति। यद्यपि ब्राह्मणकुलमपि तयोर्व्यवधायकं तथापि भिन्नजातीयकमव्यवधायकमिति यदुक्तं तद
नेन निवर्त्यते। ग्रामशब्दोयमिति। केचिदर्थभेदेन शब्दभेदमिच्छन्ति। प्रत्यभिज्ञानं तु सामान्यनिबन्धनम्। अन्ये तु एक
शब्दत्वं तत्र चानेकशक्तियोगः एकशक्तित्वं वेति दर्शनविकल्पः तत्र यदा एकशब्दत्वपक्षस्तदा तद्यः सारण्यके इति
भाष्यं शक्तिभेदादुपचरितभेदाश्रयम्। भेदपक्षे तु ग्रामशब्दोयं बह्वर्थ इति भाष्यम्। अभिन्नसामान्यनिमित्तकत्वाध्य

यद्येकस्य हलः संयोगसंज्ञा स्यात्। इयेष। उवोख। इजादेश्च गुरुमतोनृच्छ इत्याम् प्रसज्येत न वाऽ
तज्जातीयव्यवायात्। न वा एष दोषः। किं कारणम्। अतज्जातीयव्यवायात्। अतज्जातीयकं हि
लोके व्यवधायकं भवति॥ कथं पुनर्ज्ञायते। अतज्जातीयकं हि लोके व्यवधायकं भवतीति। एवं हि
कंचित्कश्चित्पृच्छति अनन्तरे एते ब्राह्मणकुले इति। स आह। नानन्तरे। वृषलकुलमनयोरन्तरे
ति। किं पुनः कारणं क्वचिदतज्जातीयकं हि लोके व्यवधायकं भवति क्वचिन्न। सर्वत्रैव ह्यतज्जातीय
कं व्यवधायकं भवति। कथमनन्तरा विमौ ग्रामाविति। ग्रामशब्दोयं बह्वर्थः। अस्त्येव शालासमुदाये
वर्तते। तद्यथा ग्रामो दग्ध इति। अस्ति वाटपरिक्षेपे। तद्यथा ग्रामं प्रविष्ट इति। अस्ति मनुष्येषु वर्तते।
तद्यथा ग्रामो गतो ग्राम आगत इति। अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते। तद्यथा। ग्रामो ल
ब्ध इति। तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्यैतत्प्रयुज्यतेऽनन्तरा विमौ ग्रामावि
ति। सर्वत्रैव ह्यतज्जातीयकं व्यवधायकं भवति॥ मुखनासिकावचनोनुनासिकः॥ किमिदं मुखनासिकावचनम्। मुखं
च नासिका च मुखनासिकम्। मुखनासिकं वचनमस्य सोयं मुखनासिकावचनः। यद्येवं मुखनासिकवचन इति प्राप्नोति।

वसायाश्रयम्। तद्यः सारण्यक इति। ततश्च ग्रामशब्दार्थे नदीनां पर्वतानां चान्तर्भावाद्व्यवधायकत्वाभावादानन्तर्यं ग्रामयोरुच्य
ते॥ ग्रामे नाध्येयमित्यत्र तु ग्रामशब्दो वाटपरिक्षेपवृत्तिः। शुचौ देशेऽध्ययनप्रतिपादनतात्पर्यात् ततः सीमन्यधीयत एव॥ मुख
नासिकावचनोनुनासिकः। प्राण्यङ्गत्वात्समाहारद्वन्द्वे ह्रस्वत्वेन भाव्यम्। अवचनमिति नञ्समासाश्रयणेऽर्थो न संगच्छत इत्याशङ्क्य। किमिदमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निपातनादिति।प्रसङ्गेनास्यलौकिकशब्दस्यसाधुत्वंक्रियते।निपातनानांचबाधकत्वान्मुखनासिकवचनमितिनभाव्यम्।
अबाधकत्वपक्षेतुभाव्यमेव।ईषद्वचनमिति।भागस्यमुखेनोच्चारणाद्भागस्यनासिकया।अस्मिन्पक्षेमुखनासिकवच-
नइत्यपिभवति।योहीषदुच्यतेसउच्यतेएव।यथाईषच्छुक्लोपिशुक्लएव।मुखद्वितीयेति।मुखसहायेत्यर्थः।तत्रना
सिकामुखसाहचर्यान्मुखशब्देनोच्यते।मुखंचतन्नासिकाचमुखनासिकासावचनमस्येति।मुखोपसंहितेति।मुखस्य
नासिकायाश्चयदन्तरालंस्थानान्तरमेवानुनासिकस्यदर्शयति।तत्रसामीप्यान्मुखंचतन्नासिकाचेत्युभाभ्यामन्तरालंव्यप
दिश्यते।पदसंस्कारपक्षेतुमुखनासिकापदनिरपेक्षंवचनमित्येतत्पदंलिङ्गसर्वनामनपुंसकाश्रयेणसंस्क्रियते।पश्चा
त्स्त्रीत्वस्यपदान्तरसंबन्धेनप्रतीयमानत्वाद्बहिरङ्गत्वान्ङीप्प्रत्ययोनभवति।यदातुस्त्रीत्वाश्रयेणवचनीतिपदंव्युत्पा

निपातनाद्दीर्घत्वंभविष्यतिअथवामुखनासिकमावचनमस्यसोयंमुखनासिकावचनः।अथकिमि
दमावचनमितिईषद्वचनमावचनमिति।किंचिन्मुखवचनंकिंचिन्नासिकावचनम्।मुखद्वितीयावानासि
कावचनमस्यसोयंमुखनासिकावचनः।मुखोपसंहितावानासिकावचनमस्यसोयंमुखनासिकावचनः।
अथमुखग्रहणंकिमर्थम्।नासिकावचनोनुनासिकइतीयत्युच्यमानेयमानुस्वाराणामेवप्राप्नोति।मु
खग्रहणेपुनःक्रियमाणेनदोषोभवति।

द्यतेतदामुखनासिकावचनीकइत्येवभवति।अत्रचानेकदर्शनम्।अनुनासिकस्यपूर्वःपरोवाभागोमुखेनोच्चार्यतेभा
गोनासिकया।तत्रनासिकावचनभागानुरागवशाद्मुखवचनोपिभागोनासिकावचनइवलक्ष्यते।यथासँयन्तेत्यत्रानुना
सिकयकारानुरागादकारोनुनासिकइवप्रतिभाति।अत्रचप्रासादवासिन्यायोनास्तिभागस्यैवमुखेननासिकयाचोच्चा
रणान्नतुसमग्रस्य।अन्येषांतुदर्शनंमुखनासिकान्तरालंस्थानान्तरमेवास्येति।अत्रापिनास्तिप्रासादवासिन्यायः।यदासर्वए
ववर्णोमुखेननासिकयाचोच्चार्यतेतदाप्रासादवासिन्यायेनभाष्यकारोमुखग्रहणंप्रत्याचष्टे।यथाभ्राष्ट्रेणोखयाच
पक्वःसूपउभाभ्यांव्यपदिश्यते।यमानुस्वाराणामेवेति।प्रासादवासिन्यायानवतारपक्षइतिभावः।तत्रविधिप्रदेशेषुय-
मानुस्वाराएवादेशाःस्युःविड्वनोरनुनासिकस्यादित्यादिषुत्वनुवादप्रदेशेषुयमानुस्वाराणामसंभवादप्रतिपत्तिःस्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा· कै· कचटतपानामिति।पक्षमितिचकारलोपप्रसङ्गः।ओदनपगित्यत्रानुनासिकस्यक्विझलोःक्ङितीतिदीर्घप्रसङ्गः।प्रा- ११४
६८ सादवासिन्यायेनेति।अयंन्यायःक्रियाशब्देष्वेवनरूढिशब्देषु।नैवदोषइति।अनुवादेतावद्यमानुस्वाराणामसंभ

अथनासिकाग्रहणंकिमर्थम्।मुखवचनोनुनासिकइतीयत्युच्यमानेकचटतपानामेवप्राप्नोति।नासिकाग्रहणेपुनःक्रियमाणेनदोषोभवति।मुखग्रहणंशक्यमकर्तुम्।केनेदानीमुभयवचनानांसिद्धं-भविष्यति।प्रासादवासिन्यायेन।तद्यथा।केचित्प्रासादवासिनःकेचिद्भूमिवासिनःकेचिदुभयवासिनः।तत्रयेप्रासादवासिनोगृह्यन्तेतेप्रासादवासिग्रहणेनयेभूमिवासिनोगृह्यन्तेतेभूमिवासिग्रहणेन।येतूभयवासिनःगृह्यन्तेतेप्रासादवासिग्रहणेनभूमिवासिग्रहणेनच।एवमिहापिकेचिन्मुखवचनाःकेचिन्नासिकावचनाःकेचिदुभयवचनाः।तत्रयेमुखवचनागृह्यन्तेतेमुखग्रहणेन।येनासिकावचनाःगृह्यन्तेतेनासिकाग्रहणेन।येउभयवचनागृह्यन्तेतेमुखग्रहणेननासिकाग्रहणेनच।भवेदुभयवचनानांसिद्धम्।यमानुस्वाराणामपिप्राप्नोति।नैवदोषोनप्रयोजनम्।इतरेतराश्रयंतुभवति।काइतरेतराश्रयता।सतोनुनासिकस्यसंज्ञयाभवितव्यम्।संज्ञयाचानुनासिकोभाव्यतेतदितरेतराश्रयंभवति।इतरेतराश्रयाणिचकार्याणिनप्रकल्पयन्ते।अनुनासिकसंज्ञायाम् इतरेतराश्रयेउक्तम्।किमुक्तम्।सिद्धंतुनित्यशब्दत्वादिति।नित्याःशब्दाःनित्येषुशब्देषुसतोनुनासिकस्यसंज्ञाक्रियते।नसंज्ञयाअनुनासिकोभाव्यते।यदितर्हिनित्याःशब्दाः।किमर्थंशास्त्रम्।किमर्थंशास्त्रमितिचेन्निवर्तकत्वात्सिद्धम्।निवर्तकंहिशास्त्रम्।कथम्।आङ्साअविशेषेणोपदिष्टोऽननुनासिकस्तस्यसर्वत्राननुनासिकबुद्धिःप्रसक्ता।तत्रानेननिवृत्तिःक्रियते।छन्दस्यचिपरतआङोऽननु राम:
नासिकस्यप्रसङ्गेऽनुनासिकःसाधुर्भवतीति॥ ६८

वएवविधावप्यान्तरतम्यान्मुखवचनस्योभयवचनोभविष्यतिनतुकेवलोनासिकावचनः। ॥

CC-0. In Public Domain. Digitization by eGangotri

तुल्यास्यप्रयत्नं सवर्णम्॥ चत्वारोऽत्र पक्षाः संभवन्ति। द्वन्द्वगर्भो बहुव्रीहिः त्रिपदो बहुव्रीहिः। तुल्यास्यशब्दयोस्तत्पुरुषस्ततो बहुव्रीहिः। आस्यप्रयत्नशब्दयोस्तत्पुरुषः ततो बहुव्रीहिरिति। तत्र द्वन्द्वगर्भो बहुव्रीहिरिति पक्षे वार्तिकस्यावतार इति तमेव भाष्यकारः पूर्वं दर्शयति। तुलया संमितमिति। व्युत्पत्त्यर्थमेव तुलोपादीयते। रूढिशब्दस्त्वयं सदृशपर्यायः। यथा प्रवीणः कुशलः प्रतिलोमोऽनुलोम इत्यवयवार्थाभावः। एवं तुल्यशब्देऽपि। किं पुनरास्यमिति। किं मुखमथ तत्र भवं ताल्वादि कं स्थानमिति प्रश्नः। लौकिकमिति। पन्नुरपत्यं देवतेत्यादिवत् प्रसिद्धमित्यर्थः। यद्यपि ताल्वादिकमपि लौकिकमास्यं तथापि तत्र योगवशादास्यशब्दो वर्तते इति झटिति न तत्प्रसिद्धमिति मुखमेव प्रसिद्धत्वाल्लौकिकमुक्तम्। तस्यैव च शाख्यत्वाद्ग्रहणं युक्तमित्यर्थः। ओष्ठादिति। काकलकं हि नाम ग्रीवायामुन्नतप्रदेशः। कथं पुनरिति। यदि निमित्तवशात्प्रवर्तते। ततस्ताल्वा

तुल्यास्यप्रयत्नं सवर्णम्॥ तुलया सम्मितं तुल्यम्। आस्यं च प्रयत्नश्च आस्यप्रयत्नम्। तुल्यास्यं च तुल्यप्रयत्नं च सवर्णसंज्ञं भवति। किं पुनरास्यम्। लौकिकमास्यम्। ओष्ठात्प्रभृति प्राक्काकलकात्। कथं पुनरास्यम्। अस्यन्त्यनेन वर्णानिति आस्यम्। अन्नमेतदास्यन्दत इति वा आस्यम्। अथ कः प्रयत्नः। प्रयतनं प्रयत्नः। प्रपूर्वाद्यततेर्भावसाधनो नङ्प्रत्ययः। यदि लौकिकमास्यम्। किमास्योपादाने प्रयोजनम्। सर्वेषां हि तत्तुल्यम्। वक्ष्यत्येतत्। प्रयत्नविशेषणमास्योपादानमिति।

दिष्वपि प्रवर्तिष्यत इति प्रश्नः। अस्यन्त्यनेनेति। सत्यपि निमित्ते रूढिवशान्मुख एव प्रवर्तते न ताल्वादिष्वित्यर्थः। कृत्यल्युटो बहुलमिति करणे ण्यत्। असनमत्र जातिस्फोटपक्षे अभिव्यक्तिः। व्यक्तिस्फोटपक्षे तूत्पत्तिः। अन्नमेतदिति। आङ्पूर्वात्स्यन्दतेरन्येष्वपि दृश्यत इति डः। एतदास्यं कर्म अन्नं कर्तृ आस्यन्दते द्रवीकरोति अन्नप्रक्षेपणेन मुखस्य द्रवत्वोत्पादनात्। कः प्रयत्न इति। किं प्रयतनं प्रयत्नः अथ प्रारम्भो यत्नस्येति प्रश्नः। भावसाधन इति। भावेऽभिधेये नङ्प्रत्ययः क्रियते तेन नङ्शब्दस्य भावः साधनं भवति। किमास्योपादान इति। आस्य एव सर्ववर्णानां निष्पादादिति भावः। नासिकापि न बाह्या वर्णोत्पत्तिनिमित्तं किं तर्ह्यास्यान्तश्चर्मवितत मस्तितत्संबद्धा रेखा नासिका तस्यां वाय्वभिघाताद्वर्णोत्पत्तिः। विसर्जनीयस्यैकीयमतेनोरस्यत्वात्तावत्यभावेऽपि न दोषः। वक्ष्यतीति। नास्य परीक्षावसर इति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सवर्णसंज्ञायामिति। द्वन्द्वे प्रयत्नस्यास्येनाविशेषणान्मुखप्रयत्नयोस्तुल्यत्वाद्भिन्नस्थानानामपि प्रसङ्गः। भाष्ये शकारः प्र
त्याहारपाठवशात्पठितः। अत्र प्रत्याहारे जबगडदानां प्राप्नोतीत्यर्थः। शकारस्य तु विवृतत्वात्स्पर्शानां स्पृष्टत्वादप्रसङ्ग
एवाततश्छकुर्जइत्यादौ झरो झरीति लोपप्रसङ्गः। एवमपीति। आस्ये येषां तुल्यो देश इत्यास्येन देशो विशे विशेष्यते। तत्र-
व्यभिचाराभावादास्येन देशस्य विशेषणमयुक्तमित्यर्थः। प्रयत्नविशेषणमिति। तस्य संभवव्यभिचारसद्भावादित्यर्थः। बा-

सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः॥ प्रयत्नसामान्यात्। सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गो भवति। जबगडदशाम्। किं कारणम्। प्रयत्नसामान्यात्। एतेषां हि समानः प्रयत्नः। सिद्धं त्वास्ये तुल्यदेशप्रयत्नं सवर्णम्॥ सिद्धमेतत्। कथम्। आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्तीति वक्तव्यम्। एवमपि किमास्योपादाने प्रयोजनं सर्वेषां हि तत्तुल्यम्। प्रयत्नविशेषणमास्योपादानम्। सन्ति ह्यास्याद्बाह्याः प्रयत्नाः। ते ह्यापिता भवन्ति। तेषु सत्स्वसत्स्वपि सवर्णसंज्ञा सिद्धा भवति। के पुनस्ते। विवारसंवारौ। श्वासनादौ। घोषवदघोषवत्ता। अल्पप्राणता महाप्राणतेति। तत्र वर्गाणां प्रथमद्वितीया विवृतकण्ठाः श्वासानुप्रदाना अघोषाश्च। एकेऽल्पप्राणा इतरे महाप्राणाः। तृतीयचतुर्थाः संवृतकण्ठा नादानुप्रदाना घोषवन्तः। एकेऽल्पप्राणाः। अपरे महाप्राणाः। यथा तृतीयास्तथा पञ्चमाः। आनुनासिक्यवर्जम्। आनुनासिक्यमेषामधिको गुणः। एवमप्यवर्णस्य सवर्णसंज्ञा न प्राप्नोति। बाह्यं ह्यास्यात्स्थानमवर्णस्य। सर्वमुखस्थानमवर्णस्य एके इच्छन्ति॥

ह्यप्रयत्नव्युदासाच्चत्वार आभ्यन्तरा गृह्यन्ते। स्पृष्टतेषत्स्पृष्टतासंवृतताविवृतताख्याः। बाह्यं ह्यास्यादिति। काक
लकस्याधस्तादुपजत्रुस्थानमवर्णस्यैक इच्छन्ति। सति च बाह्यदेशसंभवे तद्व्यवच्छेदायास्येन देशो विशेष्यत इ-
ति प्रश्नः। सर्वमुखेति। अवर्णनिष्पत्तौ सर्वमेव मुखं व्याप्रियत इति नास्य बाह्यस्थानता॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

एवमपीति। अवर्णस्यास्यमेवदेशोनत्वास्येदेशः। व्यपदेशिवद्भावेनेति। सर्वावस्थायुक्तमास्यमास्यशब्देनोच्यतेदेशशब्दे नतुविशिष्टैवावस्थावर्णोत्पादनहेतुः। तत्रबुद्धिकृतभेदाश्रयेणव्यपदेशः। नहीति। प्राथमकल्पिकमित्यर्थः। यौगिकस्यतु व्यवहितस्यग्रहणम्। स्थानमिति। ताल्वादि। करणमिति। स्पृष्टतादिजिह्वायाअग्रोपाग्रमध्यमूलानिवा। यद्येवंप्रयत्नग्रहणंन कर्तव्यंतस्याप्यास्यभवत्वाद्आस्यग्रहणेनग्रहणात्। सत्यमेतत्। प्रत्येकंतुव्यापारनिरासार्थमुभयोरुपादानंतेनद्वयोस्तुल्यत्वे सवर्णसंज्ञाभवति। अविशेषितइति। आस्येनेत्यर्थः। द्वन्द्वपक्षएवात्रस्थितइतिप्रश्नः। ततश्चबाह्याःप्रयत्नानत्यक्ताःस्युः।

एवमपिव्यपदेशोनप्रकल्पते। आस्येयेषांतुल्योदेशइति। व्यपदेशिवद्भावेनव्यपदेशोभविष्यति। सिध्यति। सूत्रंतर्हिभिद्यते। यथान्यासमेवास्तु। ननुचोक्तंसवर्णसंज्ञायांभिन्नदेशेष्वतिप्रसङ्गः। प्रयत्नसामान्यादिति। नैषदोषः। नहिलौकिकमास्यम्। किंतर्हि। तद्धितान्तमास्यम्। आस्येभवमास्यम्। शरीरावयवाद्यत्। किंपुनरास्येभवम्। स्थानंकरणंच। एवमपिप्रयत्नःअविशेषितोभवति। प्रयत्नश्चविशेषितः। कथम्। नहिप्रयतनंप्रयत्नः। किंतर्हि। प्रारम्भोयत्नस्यप्रयत्नः। यदिप्रारम्भोयत्नस्यप्रयत्नः। एवमप्यवर्णस्यएङोश्चसवर्णसंज्ञाप्राप्नोति। प्रश्लिष्टावर्णावेतौ। अवर्णस्यतर्ह्यैचोश्चसवर्णसंज्ञाप्राप्नोति। विवृततरावर्णावेतौ। एतयोरेवतर्हिमिथःसवर्णसंज्ञाप्राप्नोति। नैतौतुल्यस्थानौ। उदात्तादीनांतर्हिसवर्णसंज्ञानप्राप्नोति। अभेदकाउदात्तादयः॥

प्रारम्भोयत्नस्येति। अत्रपूर्वंस्पृष्टतादयश्चत्वारःपश्चान्मूर्ध्निप्रतिहतेनिवृत्तेप्राणाख्येवायौविवारादयोबाह्याएकादशप्रयत्नाउत्पद्यन्ते। एवमपीति। संध्यक्षरेषुप्रथमभागस्याकारेणसादृश्यात्सवर्णसंज्ञाप्राप्तिरितिप्रश्नः। प्रश्लिष्टावर्णाविति। नात्रभागविवेकोस्तिपांसूदकवदित्यर्थः। अवर्णस्येति। विभागोत्रसुलभइतिप्रश्नः। ततश्चनाव्यमित्यत्र यस्येतिलोपप्रसङ्गः। एतयोरिति। ततश्चएतऐइत्यौकारोपिस्यात्। भाव्यमानेनाऽपिक्वचित्सवर्णग्रहणदर्शनात्। अभेदकाइति। लिङ्गैर्नैतत्प्रतिपादितंनञाख्येएतेस्वराश्चोपादानमन्तरेणकार्येषुभिद्यन्तइतितेषांप्रारम्भभेदेप्युदात्तादीनांमिथःसवर्णसंज्ञाभविष्यति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्समानमिति। स्पृष्टत्वस्य समानत्वाद्वर्ग्याणां बाह्यप्रयत्नभेदेपि सवर्णसंज्ञा भविष्यति। किं सतीति। स्पृष्टताद्यभेदाद्विवारा-
दिभेदेपि यथा भवति तथा स्पृष्टतादिभेदेपि विवाराद्यभेदात्प्राप्नोतीति प्रश्नः। सत्येवेति। झरो झरि सवर्णे इत्यन्यथा ब्रूयात्। यथा सं-
ख्यनिरासार्थं हि तत्र सवर्णग्रहणं कृतम्। त्रिण्ढि इत्यत्र डकारस्य ढकारे परतो लोपार्थम्। यदि च यत्र सर्वं समानं तत्रैव सव-
र्णसंज्ञा स्याद् डकारढकारयोर्भेदात्सवर्णत्वं नास्तीति सवर्णग्रहणमनर्थकं स्यात्। सर्वमिति। वर्गाणां प्रथमद्वितीयादय इत्यस्यां

अथवा किं न एतेन प्रारम्भो यत्नस्य प्रयत्न इति। प्रयतनमेव प्रयत्नः तदेव च तद्धितान्तमास्यम्। यत्समानं त
दाश्रयिष्यामः। किं सति भेदे सतीत्याह। सत्येव हि भेदे सवर्णसंज्ञया भवितव्यम्। कुत एतत्। भेदाधिष्ठाना-
हि सवर्णसंज्ञा। यदि हि यत्र सर्वं समानं तत्र स्यात्सवर्णसंज्ञावचनमनर्थकं स्यात्। यदि तर्हि सति भेदे किं-
चित्समानमिति कृत्वा सवर्णसंज्ञा भविष्यति। शकारछकारयोः षकारठकारयोः सकारथकारयोः सवर्ण-
संज्ञा प्राप्नोति। एतेषां हि सर्वमन्यत्समानं करणवर्जम्। एवं तर्हि प्रयतनमेव प्रयत्नः तदेव हि तद्धितान्त
मास्यं न त्वयं द्वन्द्वः। आस्यं च प्रयत्नश्च आस्यप्रयत्नमिति। किं तर्हि त्रिपदोयं बहुव्रीहिः। तुल्य आस्ये प्रयत्न
एषामिति। अथवा पूर्वं तत्पुरुषस्ततो बहुव्रीहिः। तुल्य आस्ये तुल्यास्यः। तुल्यास्यः प्रयत्न एषामिति॥

शिक्षायां पठितमघोषत्वादि। करणं तु भिन्नम्। वर्ग्याणां स्पृष्टताद् ऊष्मणां च विवृतत्वात्। सति च सवर्णत्वे निश्छ्य्य निष्
छुरं निस्स्थानं मधुलिट्स्थानमित्यत्र झरो झरि इति लोपः प्राप्नोतीति। छ इत्यनेन निष्क्रान्तमिति प्रादिसमासः। अनचि चेति शकार
स्य द्विर्वचनम्। तुल्य आस्य इति। तद्धितान्त आस्य शब्दो न त्वाङ्गवाच्येवेत्यमूर्द्धमस्तकादित्यलुङ् भवति। तद्धितान्तास्य-
शब्दाश्रयणसामर्थ्यादेवास्य इत्येकत्वं विवक्ष्यते। तेनैकस्मिन्नेव स्थाने ययोस्तुल्यः प्रयत्न इत्याश्रीयते।

एकत्वं विवक्ष्यत इति। चिन्त्यमिदम्। एकवचनार्थैकत्वस्याविवक्षणेपि तस्य सजातीयद्वितीयराहित्यरूपतया समानत्वस्याला-
भात्। प्रकृते च समान एव स्थाने इत्याद्यर्थस्यापेक्षितत्वात्। तस्मात्स्यात् सत्यात् तज्ज्ञा भद इति बोध्यम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। मयूरव्यंसकादित्वात्समस्यन्तोत्तरपदस्तत्पुरुषः। तस्येति। यत्तदोर्नित्याभिसंबन्धादाह। योयस्येति। अन्यथा-वर्णान्तरापेक्षया तुल्यास्यप्रयत्नत्वे न सवर्णत्वेलब्धे तदाश्रयमन्यस्यापि कार्यं प्राप्नोति। हलन्तारम्भस्तु रेफोष्मणां निवृत्त्यर्थः स्यात्। तस्यावचनमिति। तस्येत्ययमनुकरणशब्दः तस्येत्यस्यावचनमित्यर्थः। सवर्णसंज्ञावचनमिति। नचैवं

अथवा परस्तत्पुरुषस्ततो बहुव्रीहिः। आस्ये प्रयत्न आस्यप्रयत्नः। तुल्य आस्यप्रयत्न एषामिति। तस्या। न तस्येति तु वक्तव्यम्। किं प्रयोजनम्। योयस्य तुल्यास्यप्रयत्नः स तस्य सवर्णसंज्ञो यथा स्यात्। अन्यस्य तुल्यास्यप्रयत्नः अन्यस्य सवर्णसंज्ञो मा भूत्। तस्यावचनं वचनप्रामाण्यात्। तस्येति न वक्तव्यम्। अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः कस्मान्न भवति। वचनप्रामाण्यात्। सवर्णसंज्ञावचनसामर्थ्यात्। यदि हि अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः स्यात्। सवर्णसंज्ञावचनमनर्थकं स्यात्॥ संबन्धिशब्दैर्वा तुल्यम्॥ संबन्धिशब्दैर्वा पुनस्तुल्यमेतत्। तद्यथा संबन्धिशब्दाः। मातरि वर्तितव्यं पितरि शुश्रूषितव्यमिति। न चोच्यते स्वस्यां मातरि स्वस्मिन्पितरीति। संबन्धाच्चैतद्गम्यते। या यस्य माता यश्च यस्य पितेति। एवमिहापि तुल्यास्यप्रयत्नं सवर्णमित्यत्र संबन्धिशब्दावेतौ। तत्र संबन्धादेतद्गन्तव्यम्। यं प्रति यत्तुल्यास्यप्रयत्नं तं प्रति तत्सवर्णसंज्ञं भवतीति॥

फोष्मणां निवृत्त्यर्थं वचनं रेफस्यापि रेफः सवर्णो भवत्येव। एवमूष्मसु द्रष्टव्यम्। एवं वचनसामर्थ्याद्दोषं परिहृत्य शब्दन्यायेन परिहर्तुमाह संबन्धिशब्दैरिति। संबन्धिशब्दाविति। तुल्यास्यप्रयत्नशब्दस्य संबन्धिशब्दत्वात्तत्समानार्थोपि प्रदेशवाक्यस्थः सवर्णशब्दः संबन्धिशब्दः। यथा तुल्याय कन्या दातव्येत्युक्ते न शूद्रेण तुल्याय ब्राह्मणः कन्यां ददाति। अपि त्वात्मना तथेहापीत्यर्थः।

तुल्यास्येति सूत्रस्य सवर्णपदस्य स्वरूपपरत्वात्संबन्धिशब्दत्वकथनं नोपपद्यत इत्यत आह। तुल्यास्येति अयमर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तुल्यास्यप्रयत्नं सवर्णपदवाच्यमित्येतत्सूत्रार्थः ततश्च प्रदेशस्थं सवर्णपदं तुल्यास्यप्रयत्नार्थकमित्यकः सवर्ण इत्या- ११४
७१ दौ पूर्वाकः सावर्ण्यमेवाचि दीर्घप्रवृत्तिं प्रतिप्रयोजयति तु कस्यचित् एतेन कौमुद्यां तुल्यास्यप्रयत्नमित्यस्य वृत्तौ मिथः
पदं प्रमादपतितं बोद्धव्यम् तत्र सवर्णपदस्य सवर्णपरत्वेन तत्प्रतिपाद्यतावच्छेदककुक्षौ सादृश्यस्याप्रवेशेन मि-
थः पदप्रतिपाद्यपरस्परप्रतियोगिकत्वस्य तत्रान्वयासंभवात् विवरणे तु द्वन्द्वनिर्देशलभ्यौ तुल्यास्यतुल्यप्रयत्नशब्दा-
वित्यर्थो भाष्यस्य· सवर्णशब्दो हि प्रदेशेऽपि सवर्णपदेक्परेण न तु तुल्यास्यप्रयत्नत्वप्रवृत्तिनिमित्तक इति तस्य संबन्धि-
शब्दत्वं दुरुपपादमित्याद्युक्तम् तच्चिन्त्यम् प्रदेशस्थसवर्णपदस्य सवर्णपदवत्परत्वे संबन्धिशब्दैर्वा तुल्यमित्या-
दिसमाधानासंगतेः तत्रत्यसवर्णशब्दस्य संबन्धिशब्दत्वाभावात् ततश्च सवर्णपदवत्त्वस्याव्यावर्तकतया दध्यत्रेत्यादा-
वपि दीर्घापत्तिः। किंच संबन्ध्याचैतदन्यतदृत्यादेरयमर्थः। समानवाक्यार्थप्रविष्टयोर्द्वयोः संबन्धिनोर्मध्ये एकतरस्य सं-
बन्धपुरस्कारेण प्रतीतौ स संबन्धः स्वसमानवाक्यार्थघटकप्रतियोगिक एव प्रतीयत इति। यथा तातेन तुल्यश्चैत्र इत्या-
दौ जनकत्वरूपं तातत्वं चैत्रनिरूपितमेव प्रतीयते। एवं तु तुल्यास्यप्रयत्नं सवर्णमित्यत्र नैतद्विषयः। सादृश्यप्रतियो-
गिनस्तद्वाक्यार्थे केनापि रूपेणाप्रवेशात्। इत्थं च तस्येति वक्तव्यं संबन्धिशब्दैर्वा तुल्यमित्यादिभाष्यं प्रदेशाभिप्राय-
कत्वेनैव योजनीयमिति दिक्। अन्ये तु सवर्णपदमत्र सदृशवर्णत्वसमानाधिकरणसवर्णपदवत्परमिति योगरूढम्।
तत्र योगार्थतावच्छेदककुक्षौ सादृश्यस्य प्रवेशात्सवर्णशब्दस्य संबन्धिशब्दत्वं स्पष्टमेव· ततश्च भाष्यमक्लिष्टयो- राम:
जनमेव· ऋकारलृकारयोः सावर्ण्यविधेर्नाज्झलावित्यादेश्च नासंगतिः। एवं तु मिथः सवर्णसंज्ञमिति कौमुदीयु- ७१
क्तैवेत्याहुः ॥

CC-0. In Public Domain. Digitization by eGangotri

ऋकारऌकारयोरिति। स्थानभेदान्नप्राप्नोतीत्यारम्भः। अत्र चानयोरेव श्रुतत्वान्मिथः सवर्णसंज्ञा विज्ञायते न त्वेत-
योरन्येन सहेति बोध्यम्। वक्ष्यत्येतदिति। तत्र ऌवावचनमित्यत्र दीर्घ इत्यनुवर्तते। तत्र ऌति ऌ वा इति विकल्पिते ऽ
प्राप्त एव पक्षे दीर्घो भविष्यति। स च भवन् ऌवर्णस्य दीर्घाभावाद् वर्णस्यान्तरतम्याद्दीर्घ ऋकारो भविष्यति। तत्स-
वर्ण इति। यद्यविधाय सवर्णसंज्ञां तदुच्यते अ ऋत्र स ऌति तत्कार्यं स्यात्। दध्यृकारेति तस्माद्विधेया सवर्णसं-
ज्ञा। ऋत इति वक्ष्यामीति। ऋकारस्य ऋकारः सवर्ण इति ऋत्येवं भवति। ततः ऌति। ऋत इत्येव। इदं चासव-
र्णार्थम्। तेन ऌति रूपद्वयं सिद्धम्। तत्रासंहितायां ऋकारे होतृ ऋकार इति रूपं संहितायामपि ऋत्यक इति-

ऋकारऌकारयोः सवर्णविधिः॥ ऋकारऌकारयोः सवर्णसंज्ञा विधेया। होतृ ऌकारः। होतॄकार इति।
किं प्रयोजनम्। अकः सवर्णे दीर्घ इति दीर्घत्वं यथा स्यात्। नैतदस्ति प्रयोजनम्। वक्ष्यत्येतत्। सवर्णे दी-
र्घत्वे ऋति ऋ वावचनं ऌति ऌ वावचनमिति। तत्सवर्णे यथा स्यात्। इह मा भूत्। दध्यृकारः। मध्वृकार
—— इति। यदेतत्सवर्णे दीर्घत्वे ऋतीति एतद्धतदिति वक्ष्यामि। ततः ऌति। ऌकारे परतः ऌकारो वा भ-
वतीति। ऋत इत्येव। तन्न वक्तव्यं भवति। अवश्यं तद्वक्तव्यम्। ऊकालोऽज्ह्रस्वदीर्घप्लुत संज्ञो भवतीत्युच्यते
। न च ऋकारो ऌकारो वा जस्ति॥

शाकलप्रकृतिभावे एतदेव रूपम्। शाकलाभावे होतृकारः होतॄकार इति रूपद्वयम्। ऌकारे ऽसंहितायां संहिता-
यां च शाकले होतृ ऌकार इति। शाकलाभावे होतॄकारो होतॢकार इति रूपद्वयम्। तन्न वक्तव्यमिति। द्वावप्येतौ दी-
र्घौ ॠ ॡ इति तत्र ऋकारे कदाचिदृ इति दीर्घः कदाचिदॢ इति॥ ऌकारेपि ॠ ॡ इत्येतौ भविष्यतः सत्यां सवर्णसंज्ञा-
यामिति भावः। न चेति। अर्धतृतीयमात्रत्वादिति केचिदाहुः। अन्ये तु ईषत्स्पृष्टकरणत्वादनयोॠकारऌकारयोश्च वि-
वृतत्वात्ताभ्यां तयोरग्रहणाद् न त्वमाहुः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ अच्त्वं वक्ष्यामीति। सत्यच्त्वे दीर्घसंज्ञानयोर्भविष्यति। येषां तु मतमर्द्धतृतीयमात्रावेतावितिते षां मते सत्यप्यच्त्वे- ११४
७२ द्विमात्रत्वाभावादेतयोर्दीर्घसंज्ञा न प्राप्नोति। तस्माद्द्विमात्रावेतावभ्युपगन्तव्यौ। तच्चावश्यमिति। त्वयापि ऋत्वा
वचनमृत्वावचनमिति ब्रुवताऽवश्यमनयोर्वक्तव्यम्। अन्यथा विधानमात्रमनयोः स्यादनाच्कार्यं प्लुतः। सति-
त्वच्त्वे ताभ्यां त्रिमात्रयोरपि सावर्ण्याद्ग्रहणे सति प्लुतसंज्ञा भविष्यतीति प्लुतसिद्धिः। किं पुनरिति। एकैकस्मिन्संहितायां
शाकलीभावपक्षे रूपद्वयं साध्यम्। तच्चोभयथापि सिध्यति। तत्र सवर्णसंज्ञायामसत्यां यथा सिध्यति तथा पूर्वमेवोक्तम्।

ऋकारस्य लृकारस्य चाच्त्वं वक्ष्यामि। तच्चावश्यं वक्तव्यम्। प्लुतो यथा स्यात्। होतृ ऋकारः। होतॄकारः। होतृ३कार इति। होतृ लृकारः। होत्लृकारः। होत्लृ३कार इति। किं पुनरत्र ज्यायः। सवर्णसंज्ञावचनमेव ज्यायः। दीर्घत्वं ह्येवं हि सिद्धं भवति॥ अपि च ऋकारग्रहणे लृकारग्रहणं संनिहितं भवति। ऋत्यकः। खट्व ऋश्यः। माल ऋश्यः। इदमपि सिद्धं भवति। खट्व लृकारः। माल लृकार इति। वा सुप्यापिशलेः। उपर्कारीयति। उपार्कारीयति॥ इदमपि सिद्धं भवति। उपल्कारीयति। उपाल्कारीयति। यदि तर्हि ऋकारग्रहणे लृकारग्रहणं संनिहितं भवति। उरण् रपरः। लृकारस्यापि रपरत्वं प्राप्नोति। लृकारस्य लपरत्वं वक्ष्यामि। तच्चावश्यं वक्तव्यम्।

असत्यां तु यथा सिध्यति तथोच्यते। अकः सवर्णे दीर्घ इत्यत्रान्तरतमत्वदीर्घत्वयो रूपादेयविशेषणयोर्विवक्षितत्वा-
दुभयविशिष्टेकासंभवाद्विकल्पः। यस्मादन्तरतमो नासौ दीर्घो यश्च दीर्घो नासावन्तरतम इति द्वयोर्ऋकारयोरेफद्वय-
युक्तत्वाद्विवृतत्वाच्च कदाचिद्रेफद्वययुक्त ऋ भवति कदाचिद्विवृत ॠकारः। लृकारे पि कदाचिदृकारान्तरतम राम:
ॠकारः कदाचिल्लृकारान्तरतमल्कार इति साम्यमुभयोः पक्षयोः। लपरत्वमिति। व्याख्यास्यामीत्यर्थः। रपर इत्य- ७२
त्र र इति लकाराकारेण प्रत्याहार आश्रीयते। तत्रान्तरतम्याद्धकारस्याण् रपरः लृकारस्य लपरः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असत्यामिति। असत्यां सवर्णसंज्ञायामुरण्परइत्यत्र ऌकारग्रहणं कर्तव्यं भवति। प्रक्लृप्यमानमिति। कृत्यच
इति णत्वप्रसङ्गः। त्रिभिश्चेति। पूर्वस्मादयं विशेषः। पूर्वत्र त्वाचारस्तभूतोऽपि षकारः साक्षात् णत्वनिमित्तत्वाद् व्यवधापक-
त्वेन नाश्रीयते इह तु तस्यानुपादानमेव। वर्णैकदेशा इति। अवयवस्य स्वव्यापारानिवर्तनात्। अग्रहणपक्षे तु क्षु-
भ्नादेराकृतिगणत्वाण्णत्वाभावः। ऋदितामॢदितां च भेदेनानुबन्धनिर्देशाद्भेदेन चोपादानादनुबन्धकार्येषु प

असत्यां सवर्णसंज्ञायां विध्यर्थम्॥ तदेव सत्यां रेफबाधनार्थं भविष्यति। इह तर्हि रषाभ्यां नो णः समा
नपदे इत्यत्र ऋकारग्रहणं चोदितं मातॄणां पितॄणामित्येतदर्थम्। तदिहापि प्राप्नोति। क्लृप्यमानं
पश्येति। अथासत्यामपि सवर्णसंज्ञायां इह कस्मान्न भवति। प्रक्लृप्यमानं पश्येति। चुटुतुलशर्व्यवा
येनेति वक्ष्यामि॥ अपर आह। त्रिभिश्च मध्यमैर्वर्गैर्लशसैश्च व्यवाये नेति वक्ष्यामीति॥ वर्णैकदेशा
श्च वर्णग्रहणेन गृह्यन्त इति योसौ ऌकारे लकारस्तदाश्रयः प्रतिषेधो भविष्यति॥ यद्येवं नार्थो रषा
भ्यां णत्वे ऋकारग्रहणेन। वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्त इति योसौ ऋकारे रेफः तदाश्रयं ण
त्वं भविष्यति॥ तुल्यास्यप्रयत्नं सवर्णम्॥ नाज्झलौ॥ अज्झलोः प्रतिषेधे शाकारप्रतिषेधोऽज्झलत्वात्
॥ अज्झलोः प्रतिषेधे शाकारस्य शाकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति। किं कारणम्। अज्झल
त्वात्। अच्चैव हि शाकारो हल् च। कथं तावदच्त्वम्॥

रस्परग्रहणाभावाद्व्यतिकराभावः॥ नाज्झलौ॥ अकारहकारयोरिकारशाकारयोश्च तुल्यस्थानप्रयत्नत्वात्सव
र्णसंज्ञा प्राप्ता निषिध्यते। अत एव निर्देशादचामज्भिर्हलां हल्भिः सवर्णत्वानिषेधः। अज्झलोरिति। प्रकृतत्वात्स
वर्णसंज्ञाया इति बोध्यम्। शाकारप्रतिषेध इति। द्विवचनान्तस्य समासो भेदाधिष्ठानत्वात्सवर्णसंज्ञायाः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इकारइति। अत्रसूत्रेअजितीकारोगृह्यमाणःसवर्णंगृह्णातीतिऌकारस्यापिग्रहणमस्ति। स्वात्मनिक्रियाविरोधादस्मिन्नेवसूत्रेइदंनव्याप्रियतइतिसवर्णत्वनिषेधइकारऌकारयोर्नास्ति। यद्येतिचेत्यादौतुऌकारइकारेणनगृह्यतेअनेनसवर्णत्वनिषेधात्। इहतुस्वात्मनिव्यापारोनास्ति। अस्तिचपूर्वेणसवर्णत्वमिकारऌकारयोरितिभावः। प्रकल्प्यचापवादविषयमितिन्यायोत्रनास्ति। अपवादत्वस्यैवासंपत्त्या। परत्वात्तानीति। ऌतात्पराणिऌताधिकानीत्यर्थः। कर्तृकरणेकृताबहुलमितिबहुलवचनात्समासः।पारस्करादित्वात्सुडागमः। सकारस्यष्टुत्वम्। अनचिचेतिद्विर्वचनम्।झरोझरीतिलोपप्रसङ्गात्त्रिऌकारकमश्रवणप्रसङ्गः। ऌणोच्यनचिचेत्यत्रत्विकारेण ऌकारोनगृह्यते। अनेनसवर्णत्वनिषेधादित्यस्तिऌकारस्यद्विर्वचनम्।सिद्धमनच्त्वादिति। सूत्रप्रत्याख्यान

इकारःसवर्णग्रहणेनऌकारमपिगृह्णातीत्येवमच्त्वंहल्सुचोपदेशाद्धल्त्वम्। तत्रकोदोषः॥तत्रसवर्णलोपेदोषः॥तत्रसवर्णलोपेदोषोभवति॥परत्वात्तानिकार्याणि॥झरोझरिसवर्णइतिलोपोनप्राप्नोति॥सिद्धमनच्त्वात्॥सिद्धमेतत्। कथम्।अनच्त्वात्। कथमनच्त्वम्। स्पृष्टंकरणंस्पर्शानाम्।ईषत्स्पृष्टमन्तःस्थानाम्।विवृतमूष्मणाम्।ईषदित्येवानुवर्तते।स्वराणांच विवृतम्।ईषदितिनिवृत्तम्॥वाक्यापरिसमाप्तेर्वा॥वाक्यापरिसमाप्तेर्वापुनःसिद्धमेतत्॥

साधारणमुक्तम्।प्रयत्नभेदादऌलोःसवर्णसंज्ञायाःप्राप्तिरेवनास्तीत्यर्थः। वाक्येति। भवतुवातुल्यास्यप्रयतत्वंतथापीहेकारेणऌकारोनगृह्यते।सवर्णसंज्ञायाश्चास्मिन्सूत्रेऽनिष्पादात्। अस्मिन्हिसूत्रेनिष्पन्नेसत्यपवादविषयपरिहारेणइष्टेविषयेसवर्णसंज्ञाप्रवर्तते। नत्वेतत्सूत्रनिष्पत्त्यवस्थायाम्।ततश्चाङ्गेषूपदेशसंज्ञाप्रत्याहारसवर्णत्वेषुनिष्पन्नेषुअणुदित्सवर्णस्येत्येतदस्यचाविद्यादौप्रवर्तते। नत्वङ्गेषूपदेशादिषु।नापिस्वात्मनि।ततश्चात्रसूत्रेङ्गानिष्पत्त्याणुदित्सूत्रस्याप्रवर्तनादिकारेणऌकारस्य ग्रहणात्सवर्णत्वंऌकारयोःसिद्धम्।एवमीकारोप्यत्रेकारेणनगृह्यतइतीकारऌकारयोःसवर्णत्वमस्तीतिकुमारीऌतेइत्यत्रसवर्णदीर्घत्वंप्राप्तमचीत्यनुवृत्त्यानिवार्यते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र क्व ग्रहणकशास्त्रं प्रवर्तते क्व नेति विषयविभागप्रदर्शनाय चोद्यं करोति। यथैव तर्हीति। ईकारस्यापि ह्यत्र ग्राहकत्वं दृष्टमित्यकः सवर्णे दीर्घ इत्यत्रापि प्राप्नमिति प्रश्नः। अनच्त्वमेव वाक्यापरिसमाप्त्या साध्यते न तु प्रयत्नभेदेनेत्याह।अपर आहेति। अस्मिन्पक्ष इति। एकत्र हि साध्ये हेतुविकल्पो भवति। इह तु साध्यभेदः सिद्धावनच्त्वं हेतुरन-

किमिदं वाक्यापरिसमाप्तेरिति॥ वर्णानामुपदेशस्तावत् इ उपदेशोत्तरकाला इत्संज्ञा इत्संज्ञोत्तरकाल आदिरन्त्येन सहेतेति प्रत्याहारः प्रत्याहारोत्तरकाला सवर्णसंज्ञा सवर्णसंज्ञोत्तरकालमणुदित्सवर्णस्य चाप्रत्यय इति सवर्णग्रहणम्। एतेन सर्वेण समुदितेनान्यत्र सवर्णानां ग्रहणं भवति। न चात्रेकारः शकारं गृह्णाति यथैव तर्हीकारः शकारं न गृह्णाति एवमीकारमपि न गृह्णीयात्। तत्र को दोषः।कुमारी ईहते कुमारीहते। अकः सवर्णे इति दीर्घत्वं न प्राप्नोति। नैष दोषः। यदेतदकः सवर्णे इत्यत्र प्रत्याहारग्रहणं तत्रेकार ईकारं गृह्णाति। शकारं न गृह्णाति। अपर आह॥ अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात्॥ अज्झलोः प्रतिषेधे शकारस्य इकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति। किं कारणम्। अज्झल्त्वात्। अच्चैव हि शकारो हल्त्वं च। कथं तावदच्त्वम्। इकारः सवर्णग्रहणेन शकारमपि गृह्णातीत्येवमच्त्वम्। हल्त्वमुपदेशाद्धल्त्वम्। तत्र को दोषः। तत्र सवर्णलोपे दोषः। तत्र सवर्णलोपे दोषो भवति। परश्शतानि कार्याणि। झरो झरि सवर्णे इति लोपो न प्राप्नोति। सिद्धमनच्त्वात्। सिद्धमेतत्। कथम्। अनच्त्वात्। कथमनच्त्वम्। वाक्यापरिसमाप्तेर्वा। उक्ता वाक्यापरिसमाप्तिः।

च्त्वस्य वाक्यापरिसमाप्तिः। एतच्चेति। अस्तु वा ग्रहणमिकारेण शकारस्येति वाक्यशेषाध्याहारात् प्रतिज्ञाविकल्पार्थो वाशब्द इत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ननुचेति। अभ्युपगम्योच्यते। स एष कथं भेदो नेत्यन्नैव वक्ष्ये दः। भेद एवेत्यर्थः। इतर आह॥ स्याद्भेदो यदि नित्यलोपः स्यात्। विभाषा तु स लोप इति ततो नास्ति भेद इत्यर्थः। द्विर्वचनमपि विभाषा। यरोऽनुनासिकेऽनुनासिको वेत्यतो वेत्यनुवर्तनात्। लोपोऽपि विभाषा झयो होऽन्यतरस्यामित्यतोऽन्यतरस्यामित्यनुवर्तनादित्यर्थः॥ः॥ इतिम

अस्मिन्पक्षे वेत्येतदसमर्थितं भवति। एतच्च समर्थितम्। कथम्। अस्तु वात्राकारस्य त्राकारेण सवर्णसंज्ञा वा मा भूत्। ननु चोक्तं परस्यासिद्धत्वात् निकार्याणि झरो झरीति लोपो न प्राप्नोतीति। मा भूल्लोपः। ननु च भेदो भवति सति लोपे द्वित्राकारकम् असति लोपे त्रित्राकारकम्। नास्ति भेदः। असत्यपि लोपे द्वित्राकारकमेव। कथम्। विभाषा द्विर्वचनम्। एवमपि भेदः। असति लोपे कदाचिद्द्वित्राकारकं कदाचित्त्रित्राकारकम्। सति लोपे द्वित्राकारकमेव स एष कथं भेदो न। स्याद्भेदो यदि नित्यो लोपः विभाषा तु स लोपः यथाऽभेदस्तथास्तु॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे चतुर्थमाह्निकम्॥

ह्योपाध्यायजैयटपुत्रकैयटकृते व्याकरणमहाभाष्यप्रदीपे प्रथमाध्यायस्य प्रथमे पादे चतुर्थमाह्निकम्॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदूदेद्द्विवचनं प्रगृह्यम्॥ किमर्थमिति। ईदूतोरनण्त्वादिना कालनिवृत्त्यर्थं नोपपद्यते तपरत्वम्। उदात्तादीनाम-
भेदकत्वाद्गुणान्तरयुक्तानां सवर्णानां ग्रहणार्थमपि नोपपद्यते॥ जातिपक्षेपि दीर्घोच्चारणात्प्रयत्नाधिक्याद्ध्रस्वा-
नां न भविष्यति प्लुतानां चेष्यत एवेति दृष्टव्याघातं प्रत्युत तपरत्वं करोतीति प्रश्नः। तपर इति। व्यक्तिपक्षे भेदका-
श्च गुणा इति भावः। केषामिति। प्लुतानामग्रहणप्रसङ्गात्प्रश्नः। उदात्तेति॥ क्वचिदनुनासिकग्रहणमस्ति तद्गुणप्र-
सङ्गेनोच्चारितं न हि प्रगृह्योनुनासिकः संभवति अणोऽप्रगृह्यस्यानुनासिक इति निषेधात्। प्लुतानां त्विति। व्यक्तिपक्षाश्र-
यणादयं दोषो न तु तपरत्वात्॥ असिद्ध इति। त्राद्याक्षिप्याश्रयणात्प्लुतबुद्धावसत्यां प्रगृह्यत्वे विधीयमाने हि मात्र-

ईदूदेद्द्विवचनं प्रगृह्यम्॥ किमर्थमीदादीनां तपराणां प्रगृह्यसंज्ञोच्यते। तपरस्तत्कालस्येति तत्काला-
नां सवर्णानां ग्रहणं यथा स्यात्। केषाम्। उदात्तानुदात्तस्वरितानाम्। अस्ति प्रयोजनमेतत्। किं तर्हीति
॥ प्लुतानां तु प्रगृह्यसंज्ञा न प्राप्नोति। किं कारणम्। अतत्कालत्वात्। न हि प्लुतास्तत्कालाः। असिद्धः प्लुतः
तस्यासिद्धत्वात्तत्काला एव भवन्ति। सिद्धः प्लुतः स्वरसन्धिषु। कथं ज्ञायते। यदयं प्लुतः प्रकृत्येति प्लुतस्य
प्रकृतिभावं शास्ति। कथं कृत्वा ज्ञापकम्। सतो हि कार्यिणः कार्येण भवितव्यम्। किमेतस्य ज्ञापने प्र-
योजनम्। अप्लुतादप्लुत इत्येतन्न वक्तव्यम्। किमतो यत्सिद्धः प्लुतः स्वरसन्धिषु।

विषया बुद्धिः प्रवर्तते। तथा हि वक्ष्यति। असिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थं चेति। य-
द्यमिति॥ असिद्धत्वे प्लुतप्रकृत्येत्येवमाश्रयणायोगात् कार्यित्वेनाश्रयणादसिद्धत्वाभावोनुमीयते। सामान्ये-
न स्वरसंधिप्रकरणविषयं सिद्धत्वं ज्ञाप्यते। न तु प्रकृतिभाव एव। यथा रोरुत्व एव सोत्सर्गे सापवादं च प्रक-
रणमिति प्रकृतिभावेपि प्रगृह्यत्वहेतुके सिद्धत्वमुच्यते। किमेतस्येति॥ प्रकृतिभाव एवाश्रयात्सिद्धत्वमस्तीति प्रश्नः
। इतरो लाघवं दर्शयति। अप्लुतादिति। सिद्धे हि प्लुतेऽतोतीति तपरत्वादप्रसङ्गः॥ किमत इति। यथोद्देशे संज्ञापरि-
भाषे प्रगृह्यसंज्ञा स्वरसंधिप्रकरणमध्यपतिता न भवतीति प्रश्नः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यकालमिति। कार्यार्थत्वाद्गुणानां कार्यस्य च प्रधानत्वात् प्रधानदेशत्वस्य न्याय्यत्वादिति भावः। उपस्थिते ही-
ति। उपस्थितमनार्ष इतिकरणः। अग्नी इतीत्यत्र प्लुताश्रये प्रकृतिभावे प्रतिषिद्धे प्रगृह्याश्रयः प्रकृतिभावः दृश्यते तदा
ह। पठिष्यतीति। यत्र प्रगृह्यसंज्ञा नास्ति स प्लुताश्रयप्रकृतिभावप्रतिषेधविषयः। देवदत्ता३ इति देवदत्तेति। य-
दि पुनरिति। ननु व्यक्तिपक्षाश्रयणात्प्लुतानां न सिध्यति न पुनस्तपरत्वात्। अयमत्राशयः। आकृतिपक्ष आश्र-
यिष्यते। दीर्घोच्चारणे प्रयत्नाधिक्याद्ध्रस्वानां न भविष्यति। प्लुतानां तु प्रवर्तिष्यते। एवमपीति। अयं भावः। आकृ-

संज्ञाविधावसिद्धः तस्यासिद्धत्वात्तत्काला एव भवन्ति। संज्ञाविधौ च सिद्धः। कथम्। कार्यकालं संज्ञा
परिभाषम्। यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्। प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति। ईदूदेद्द्विव
चनं प्रगृह्यमिति। किं पुनः प्लुतस्य प्रगृह्यसंज्ञावचने प्रयोजनम्। प्रगृह्याश्रयः प्रकृतिभावो यथा
स्यात्। मा भूदेवम्। प्लुतः प्रकृत्येत्येवं भविष्यति। नैवं शक्यम्। उपस्थिते हि दोषः स्यात्। अप्लुतवदु
पस्थित इत्यत्र। पठिष्यति ह्याचार्यः। वद्वचनं प्लुतकार्यप्रतिषेधार्थम्। प्लुतप्रतिषेधे हि प्रगृह्यप्लु
तप्रतिषेधप्रसङ्गोऽन्येन विहितत्वादिति। तस्मात्प्लुतस्य प्रगृह्यसंज्ञैषितव्या प्रगृह्याश्रयः प्रकृति
भावो यथा स्यात्। यदि पुनर्दीर्घाणामतपराणां प्रगृह्यसंज्ञोच्यते एवमप्येकार एव एकः सवर्णा
न्गृह्णीयात्। ईकारोकारौ न गृह्णीयाताम्। किं कारणम्। अनण्त्वात्। यदि पुनर्ह्रस्वानामतपराणां
प्रगृह्यसंज्ञोच्यते। नैवं शक्यम्। इहापि प्रसज्येत। अकुर्व हि अत्र। अकुर्वह्यत्रेति॥

तिपक्षे यथा ह्रस्वानां प्रयत्नाधिक्यान्न भवति तथा दीर्घोच्चारणसामर्थ्याद्विशिष्टव्यक्तिस्थैवाकृतिर्गृह्यत इति प्लुतानां
न स्यात्। यथा स्थूलं गामानयेत्युक्तेन कृशस्यानयनं भवतीति। आकृतिपक्षेऽपि विशिष्टैवाकृतिर्दीर्घा व्यक्तिर्गृह्यते त रा·म·
था चानण्त्वादीदूतौ ग्राहकौ न स्याताम्। यदि पुनरिति। ह्रस्वसाहचर्यादेकारोऽपि ह्रस्वशब्देनाभिधीयत इति ह्रस्वाना ७५
मिति बहुवचनम्। तत्र ह्रस्वनिर्देशे अण्त्वादाकृतिपक्षे वा यत्नाधिक्याभावाद्भिन्नकालानां ग्रहणं सिध्यतीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्लुतभावीति।प्लुतोभावी यस्यसःप्लुतभावीस्थानीप्रकृतःतस्यैवप्रकृतिभावः।ननुप्लुतस्यासिद्धत्वात्स्थान्यपिप्लुतभावि-
त्वात्प्लुतव्यपदेशंकथंलभते।नैषदोषः।प्लुतोह्यस्यभावीतिबुद्ध्याप्रकल्पनमेतत्।नचतत्रप्लुतस्यासिद्धत्वम्।अन्य-
थाप्लुतोऽसिद्धइत्ययमपिव्यवहारोनस्यात्।कार्यकालपक्षमाश्रित्याह।एवमपीति।ततश्चाग्नीइत्यत्राप्रगृह्यस्येत्य-
नुनासिकप्रतिषेधेक्रियमाणेप्लुतस्यासिद्धत्वात्प्रगृह्यलाभाभावादनुनासिकःस्यात्।यथोद्देशपक्षाश्रयेणपरिहारः।क-
थंपुनरयंपक्षोयावताकार्यार्थत्वात्संज्ञापरिभाषस्यकार्यकालतैवन्याय्या।नैषदोषः।यदानुद्दिश्यप्रयोजनविशे-

तस्माद्दीर्घाणामेवतपराणांप्रगृह्यसंज्ञावक्तव्या।दीर्घाणांचोच्यमानाप्लुतानांनप्राप्नोति।एवंतर्हिकिं
नएतेनयत्नेनयत्सिद्धःप्लुतःस्वरसंधिष्विति।असिद्धःप्लुतस्तस्यासिद्धत्वात्तत्कालाएवभवन्तीति।कथंय-
त्तज्ज्ञापकमुक्तंप्लुतप्रगृह्याअचीति।प्लुतभावीप्रकृत्येत्येवमेतद्विज्ञायतेकथंयत्तत्प्रयोजनमुक्तम्।
क्रियतेतन्न्यासएव॥अप्लुतादप्लुतइति॥एवमपियत्सिद्धेप्रगृह्यकार्यंतत्प्लुतस्यनप्राप्नोति।अग्नीऽप्र-
गृह्यस्यानुनासिकइति।एवंतर्हिकिंनएतेनयत्नेनकार्यकालंसंज्ञापरिभाषमितियथोद्देशमेवसंज्ञा-
परिभाषम्।अत्रचासावसिद्धः।तस्यासिद्धत्वात्तत्कालाएवभवन्ति॥कथंपुनरिदंविज्ञायतेईदादयो
यद्द्विवचनमाहोस्विदीदाद्यन्तंयद्द्विवचनमिति।कश्चात्रविशेषः।ईदादयोयद्द्विवचनंप्रगृह्याइ-
तिचेदन्त्यस्यविधिः॥

षंप्रयोजनमात्रमभिसंधायभविष्यतिकिंचिदनेनप्रयोजनमितिसंज्ञापरिभाषंप्रणीयते।तदासंभवत्येवायंपक्षोय-
थाश्रुतग्राहिप्रतिपत्त्रपेक्षः।महावाक्यार्थपर्यालोचनप्रवृत्तप्रतिपत्त्रपेक्षस्तुकार्यकालपक्षः॥कथंपुनरिति।ईदा-
दयोयदिसंज्ञिनस्तद्विशेषणंतुद्विवचनंतदाद्विवचनान्तत्वमीदादीनांनसंभवतीतिद्विवचनानामेवेदादीनांसंज्ञया
भाव्यम्।अथद्विवचनंसंज्ञितद्विशेषणमीदादयस्तदातदन्तविधिरप्रधानेनप्रधानस्येतिईदाद्यन्तंद्विवचनमि-
तिपक्षः।तत्रोभयोरपिपक्षयोर्दोषदर्शनात्प्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पचेतेइति। एकारोऽत्र द्विवचनं न भवति अपि तु तस्यान्तः। वचनादिति। द्विवचनावयवे द्विवचनशब्दो वर्तिष्यत इत्यर्थः। अस्तीति। मुख्ये संभवति गौणस्य ग्रहणमन्याय्यमित्यर्थः। खट्वे इतीति। अन्तादिवच्चेत्यादिवद्भावादेकारो द्विवचनम्। एकस्येति। असहायस्येत्यर्थः। ईदूतोः केवलयोरेव संभव इति वचनसामर्थ्यात्तयोरेव सिद्ध्यति। एकारान्तस्य द्विवचनस्य पचेते इत्यादौ संभवात्खट्वे इत्यत्र न सिध्यतीति दोषः। येन विधिस्तदन्तस्येत्यत्र स्वस्य च रूपस्येति नाश्रितमिति दोषोपन्यासः। अथवेति। प्रत्ययग्रहणे यस्मादिति द्विवचनेन तदन्तविधिः। पश्चाद्द्विवचनान्तमीदादिभिर्विशेष्यत इत्ययं तृतीयः पक्षो भवति। ईदाद्यन्तं यद्द्विवचनान्तमिति। ननु संज्ञाविधौ प्रत्ययग्रहणे न तदन्तविध्यभावः। सु

ईदादयो यद्द्विवचनं प्रगृह्याइति चेद् अन्त्यस्य प्रगृह्यसंज्ञाविधेया। पचेते इति। पचेथे इति। वचनाद्भविष्यति। अस्ति वचने प्रयोजनम्। किम्। खट्वे इति माले इति। अस्तु तर्हि ईदाद्यन्तं यद्द्विवचनमिति। ईदाद्यन्तं यद्द्विवचनमिति चेदेकस्य विधिः॥ ईदाद्यन्तं द्विवचनमिति चेदेकस्य प्रगृह्यसंज्ञा विधेया। खट्वे इति माले इति। न वाद्यन्तवत्त्वात्। न वा एष दोषः। किं कारणम्। आद्यन्तवत्त्वात्। आद्यन्तवदेकस्मिन्कार्यं भवतीत्येवमेकस्यापि भविष्यति। अथवा एवं वक्ष्यामि। ईदाद्यन्तं यद्द्विवचनान्तमिति॥ ईदाद्यन्तं यद्द्विवचनान्तमिति चेल्लुकि प्रतिषेधः॥ ईदाद्यन्तं यद्द्विवचनान्तमिति चेल्लुकि प्रतिषेधो वक्तव्यः। कुमार्योरगारं कुमार्यगारम्। वध्वोरगारं वध्वगारम्। एतद्धीदाद्यन्तं श्रूयते द्विवचनान्तं च भवति प्रत्ययलक्षणेन।

सुप्तिङन्तं पदमित्यत्रान्तग्रहणेन ज्ञापितत्वादिति कथमेतत्पक्षोपपत्तिः। चतुर्थपक्षप्रतिक्षेपाय वक्ष्यत्येवैतद्भाष्यकार इति नैतदपूर्वं चोद्यम्। दोषान्तरेणेमं पक्षं निराकर्तुमाह। लुकि प्रतिषेध इति। दोषसद्भावेनैवास्य पक्षस्य निराकरणात्तदन्तविध्यभावोऽत्र नोक्तः। कुमार्यगारमिति। कथं पुनरस्य द्विवचनान्तस्य समासः। यावता द्वित्वसंख्याविशेषो न गम्यते। नैष दोषः। यथा तावकीन इत्यादावादेशेन संख्याविशेषो व्यज्यते तथेहापि सत्यां प्रगृह्यसंज्ञायां प्रकृतिभावेन द्वित्वं व्यज्येतेति दोषोपन्यासः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सप्तम्यामिति। ई दूतौ सप्तमीत्येव तदन्तविधौ सति प्रत्ययलक्षणेन सोमो गौरी अधिश्रित इत्यादौ सिद्धायां प्रगृह्य
संज्ञायामर्थग्रहणं ज्ञापयति। प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणं न भवतीति। न तर्हीति। आद्यन्तवद्भावेनाश्रयणाय त-
तीयः पक्षः परिगृहीतः। तत्र च दोषप्रतिविधानार्थमधिकमर्थग्रहणं कर्तव्यं भवतीति प्रुतं गौरवं भवतीत्यर्थः। ईदादि
भिरिति॥ अत्र पक्षे कुमार्यै गार मित्यत्राप्रसङ्गः। न ह्यत्रेदूदेदन्तं द्विवचनम्। किं तर्हि औ इति सकारान्तम्। तदन्तमिति द्वि
वचनान्तम्। ईदाद्यन्तमिति। ईदादिभिः साक्षात्समुदायस्य संबन्धाभावादीदादिशब्देनेदाद्यन्तमुच्यते तेनेदाद्यन्तान्त-

सप्तम्यामर्थग्रहणं ज्ञापकं प्रत्ययलक्षणप्रतिषेधस्य यदयमी दूतौ च सप्तम्यर्थ इत्यर्थग्रहणं करोति
तज्ज्ञापयत्याचार्यो न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवतीति। न तर्हि ज्ञापकार्थमर्थग्रहणं कर्तव्यम्। न
कर्तव्यम्। ईदादिभिर्द्विवचनं विशेषयिष्यामः ईदादिविशिष्टेन च द्विवचनेन तदन्तविधिर्भविष्यति। ई
दाद्यन्तं यद्द्विवचनं तदन्तमीदाद्यन्तमिति। एवमप्यशुक्ले वस्त्रे शुक्ले संपद्येतां शुक्ल्यास्तामिति। अत्र प्रा
प्नोति। अत्र हीदादि च द्विवचनं तदन्तं च भवति प्रत्ययलक्षणेन। अत्राप्यकृते स्त्रीभावे लुग्भविष्यति।
इदमिह संप्रधार्यम् लुक् क्रियतां स्त्रीभाव इति। किमत्र कर्तव्यं परत्वात्स्त्रीभावः नित्यो लुक्। कृते स्त्रीभा
वे प्राप्नोत्यकृतेपि प्राप्नोति।

मित्यर्थः। शुक्ल्यास्तामिति॥ शुक्लशब्दाद्द्विवचनमौ तस्य नपुंसकाच्चेति शीभावः ततश्च्विप्रत्ययः। शीशब्दस्य सुपड्-
तिलुक्। अस्य च्वावितीत्वं तद्धितान्तत्वात्सुपस्तस्याव्ययादिति लुक्। अत्र हि शीशब्द ईकारान्तं द्विवचनं तदन्तश्च स
मुदायः प्रत्ययलक्षणेनेति प्रगृह्यसंज्ञा प्राप्नोति। अत्र हीदादि च द्विवचनमिति ईदादिशब्देनेदाद्यन्तमुच्यते॥ क्वचि
त्तु पाठः ईदाद्यन्तं च श्रूयत इति तत्रैवं व्याख्येयम् ईदाद्यन्तं च श्रूयते सूत्रे तदन्तविधिरीदादिभिर्द्विवचनस्याश्रीय
त इत्यर्थः। यस्त्वयमस्य च्वावितीकारः स द्विवचनस्य न कश्चिदिति न तदभिप्रायेण भाष्यं व्याख्येयम्। ॥

CC-0. In Public Domain. Digitization by eGangotri

भा॰ वै॰ अथापि कथं चिदिति। स्थानिविशेषानपेक्षायां कृताकृतप्रसङ्गित्वेन लुक्शास्त्रस्य प्रवर्तनादित्यर्थः। अथवा नित्यत्वेन १२५
७७ बाधकत्वं लक्ष्यते तेनान्तरङ्गानपीति न्यायेन शीभावस्य लुग्बाधक इत्यर्थः। एवमपि दोष इति। पक्षस्योत्थानमेव ना
स्तीति तत्पक्षासंभव एव दोषः। अवश्यमिति। यदाश्रयणभयादयं पक्षोऽङ्गीकृतः। तस्याद्यन्तवद्भावस्यास्मिन्नपि पक्षेऽ
वश्यमाश्रयणमङ्गीकृतम्। अग्नी इत्यत्र हीकार एव द्विवचनं न त्वीकारान्तम्। तस्मादिति॥ द्वितीय एव पक्षोऽस्त्वित्यर्थः
। मणीवादीनां प्रतिषेधो वक्तव्य इति भाष्यवार्त्तिककाराभ्यामपठितत्वादप्रमाणमेतत्। मणीवोष्ट्रस्येति तु प्रयोगो वा
शब्दस्योपमानार्थस्य। रोदसीवेत्यादिस्तु छान्दसः प्रयोगः॥ छन्दसि तु सर्वे विधयो विकल्प्यन्ते॥ अदसो मात्॥ मात्प्रगृ

अनित्यो लुगन्यस्याकृते शीभावे प्राप्नोत्यन्यस्य कृते। शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति। शीभा
वोऽप्यनित्यः न हि कृते लुकि प्राप्नोति। उभयोरनित्ययोः परत्वाच्छीभावः। शीभावे कृते लुक्। अथापि क
थं चिन्नित्यो लुक् स्यादेवमपि दोषः। वक्ष्यत्येतत्। पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रह
णे तदन्तविधिप्रतिषेधार्थमिति। इदं चापि प्रत्ययग्रहणमयं चापि संज्ञाविधिः। अवश्यं खल्वस्मिन्पक्षे
आद्यन्तवद्भाव एषितव्यः। तस्मादस्तु स एव मध्यमः पक्षः॥ अदसो मात्॥ मात्प्रगृह्यसंज्ञायां तस्यासि
द्धत्वादयावेकादेशाप्रतिषेधः। मात्प्रगृह्यसंज्ञायां तस्येदूत्वस्य उत्वस्य चासिद्धत्वादयावेकादेशाः प्राप्नुव
न्ति तेषां प्रतिषेधो वक्तव्यः। अमी अत्र। अमू अत्र। अमी आसते। अमू आसाते॥

ह्येति। अस्मिन्सूत्रन्यास इत्यर्थः। उत्वस्य चेति। चशब्दान्मत्वस्य च। शास्त्रस्यासिद्धत्वाच्च स्थानिलक्षणमेव कार्यं प्रा
प्नोति नातिदेशलक्षणमित्ययादिप्रसङ्गः। अमी आसत इत्ययादेशः प्राप्नोति अमू आसाते इत्यावादेशो ऽमीअ
त्रेत्यत्र एकादेशः। ननु च द्विपदाश्रयत्वाद्बहिरङ्गा अयादयोऽन्तरङ्गेष्वीत्वादिष्वसिद्धा इति पूर्वाभावे कथं पूर्वत्रासि राम:
द्धमितीत्वादीनामसिद्धत्वं स्यात्॥ नैष दोषः। नाजानन्तर्ये इति बहिरङ्गपरिभाषानिषेधात्। ॥ ७७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्विति। यथोद्देशपक्षे आश्रयात्सिद्धत्वं भविष्यतीत्यर्थः। कार्यकालपक्षमाश्रित्याह। वचनार्थो हीति। वचनस्य प्र-
योजनमित्यर्थः। नैकमिति। अनेककार्यसिद्ध्यर्थं संज्ञासूत्रं नैकेन प्रयुज्यत इत्यर्थः। अन्यत्तु सूत्रमेकेनापि प्रयुज्य-
ते मुञ्जादणि त्यादि। तत्रैवायमिति॥ न च तत्रेदूदेद्‌ग्रहणं कर्तव्यं मादिति वा। यस्मादणोऽनुनासिकोऽत्र स्थाने वि-
धीयते पूर्वेणाणकारेणाणग्रहणमिति अमी अमुके अमुकाभ्यामित्यादावनुनासिकस्याप्रसङ्ग एव। तदेवं कार्य-
कालेऽपि संज्ञापरिभाषे प्रकरणोत्कर्षेण विधीयमाना प्रगृह्यसंज्ञा सर्वप्रगृह्यकार्यार्था सती असिद्धत्वं बाधिष्यत

ननु च प्रगृह्यसंज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति। वचनार्थो हि सिद्धे। नेदं वचनाल्लभ्यम्। अ-
स्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्। यत्सिद्धे प्रगृह्यकार्यं तदर्थमेतत्स्यात्। अणोऽप्रगृह्यस्यानु
नासिक इति। नैकं प्रयोजनं योगारम्भं प्रयोजयति। यद्येतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयादणोऽप्रगृह्यस्या
नुनासिको दसो नेति॥ विप्रतिषेधाद्वा॥ अथवा प्रगृह्यसंज्ञा क्रियताम् अयादयो वेति। प्रगृह्यसंज्ञा भ
विष्यति विप्रतिषेधेनेति। नैष युक्तो विप्रतिषेधः। विप्रतिषेधे परमित्युच्यते पूर्वा च प्रगृह्यसंज्ञा परेऽ
यादयः। परा प्रगृह्यसंज्ञा करिष्यते। सूत्रविपर्यासः कृतो भवति। एवं तर्हि परैव प्रगृह्यसंज्ञा। कथम्।
कार्यकालं संज्ञापरिभाषम्। यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्। प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भव
ति अदसो मादिति॥ एवमप्ययुक्तो विप्रतिषेधः।

इत्यर्थः॥ विप्रतिषेधाद्वेति॥ अयावेकादेशप्रतिषेधो वक्तव्यः। विप्रतिषेधाद्वा प्रगृह्यसंज्ञेति विकल्पार्थो वाशब्दः
नैकं प्रयोजनमित्यादिस्तु परिहारो भाष्यकारेणोक्तो न वार्त्तिककारेणेति न तदपेक्षो विकल्पः। नैष युक्त इति। दृष्टसि
द्धयेदिति भावः। करिष्यत इति। आश्रयिष्यत इत्यर्थः। इतरस्त्वगृहीताभिप्राय आह। सूत्रविपर्यास इति। अभिप्रायं
प्रकाशयितुमाह। एवं तर्हीति।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कौ॰ द्विकार्ययोगो हीति। द्वाभ्यां कार्याभ्यां योयुज्यते स विप्रतिषेधविषयत्वाद्विप्रतिषेधः। असंभवोपीति॥ असंभव एव- ११५
७८ विप्रतिषेधः स तु कदाचिद्द्विकार्ययोगो भवति कदाचित्केवलोपि। तथा हि। सति संभवे द्विकार्ययोगो न विप्रतिषेधः। य-
थैकस्य दधातेरडागमद्विर्वचने भवतः। अदधादिति क्वचिदेकस्य द्विकार्ययोगाभावेप्यसंभवोस्ति। यथात्र पूर्णमि-
त्यत्रनुम्रुटोः प्रकृतिप्रत्ययभक्तयोः परस्परनिमित्तव्याघातात्। अयादीन्बाधत इति। प्रकृतिभावविधानात्। नि-
मित्तमिति। ईत्वमूत्वं च। आश्रयात्सिद्धत्वमिति। प्रगृह्यसंज्ञायां कार्यित्वेनाश्रयणादसिद्धत्वाभावादीत्वादीनां तेषा-

कथम्। द्विकार्ययोगो हि विप्रतिषेधः। न चात्रैको द्विकार्ययुक्तः। एचामयादयः। ईदूतोः प्रगृह्यसंज्ञा।
नावश्यं द्विकार्ययोग एव विप्रतिषेधः किं तर्ह्यसंभवोपि। स चास्त्यत्रासंभवः। कोसावत्रासंभवः। प्रगृ-
ह्यसंज्ञाभिनिर्वर्तमाना अयादीन्बाधते। अयादयोभिनिर्वर्तमाना प्रगृह्यसंज्ञाया निमित्तं विघ्न-
न्तीत्येषोऽसंभवः। सत्यसंभवे युक्तो विप्रतिषेधः। एवमप्ययुक्तो विप्रतिषेधः सतोर्हि विप्रतिषेधो
भवति न चात्रैत्वोत्वे स्तः। नापि मकारः। उभयमप्यसिद्धम्। आश्रयात्सिद्धत्वं यथा रोरुत्वे। आश्रया-
त्सिद्धत्वं भविष्यति। तद्यथा। रुरुत्वे आश्रयात्सिद्धो भवति। किं पुनः कारणं रुरुत्वे आश्रयात्सिद्धो भवति
न पुनर्यत्रैव रुः सिद्धः तत्रैवोत्वमप्युच्यते। नैवं शक्यम्। असिद्धे ह्युत्वे आद्गुणाप्रसिद्धिः॥ असिद्धे ह्यु-
त्वे आद्गुणस्याप्रसिद्धिः स्यात्। वृक्षोत्र। प्लक्षोत्र। तस्मात्तत्राश्रयात्सिद्धत्वमेषितव्यम्। यथा तत्रा-
श्रयात्सिद्धत्वं भवति। एवमिहाप्याश्रयात्सिद्धत्वं भविष्यति।

मयादीनां च विप्रतिषेधो निरूप्यते। तथा हि। सतोर्हि विप्रतिषेधो भवतीति पूर्वपक्षे ईदादीनामेव विप्रतिषेध आ-
क्षिप्तः। तत्रायादीनां चयनं लावकः। अग्नेऽत्रेत्यत्रावकाशः। ईदादीनां तु यत्रायादीनामप्रसङ्गः सोवकाशः। अमी-
स्थिता अमूस्थितौ अमीभ्यदूति। अमी अत्रेत्यादावुभयप्रसङ्गे परत्वादीदादय एव भवन्ति। अत्र व्याख्यानान्तरं क्लिष्ट- राम॰
त्वान्नोपन्यस्तम्॥ न पुनर्यत्रैवेति। रोः सुपीत्यस्यानन्तरमत उरतीति वक्तव्यम्। एवं चासिद्धत्वं न बाधितं भवति। अत्र ७८
पाठक्रमेऽसिद्धत्वस्य प्राप्त्यभावात्प्लुतस्य चोत्वे सिद्धत्वात्तत्कालत्वाभावादप्लुतादप्लुते इति न वक्तव्यं भवति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। यथोद्देशपक्षाश्रयेणोक्तदुच्यते। कार्यकालपक्षे त्वाह। अथवेति। अदस इति संबन्धसामान्ये षष्ठी। अदसः संबन्धिनि ईदूदेत इति॥ इहापीति। अदस् टा अदस ओः। अत्वं टापूर्ववर्णो दीर्घत्वम्। आङिचापइत्येत्वम्। अदे आ अदे ओस् इति स्थिते अदस इत्यत्र मादिति विशेषणाभावात् प्रगृह्यसंज्ञायां सत्यामयादेशाप्रसङ्गः। अमुकेत्रेति। अदस इत्यनेन न प्राप्नोति। एदन्तमिति। ईदूतोरेव स्वरितत्वप्रतिज्ञानादिति भावः। अननुवृत्तिरेन च निवृत्तिः। यद्येवं माङ्ग्रहणं न कर्तव्यम्। एद्ग्रहणनिवृत्त्यैवामुकेत्रेत्यत्राप्रसङ्गात्। नैतदस्ति। सति माङ्ग्रहणे योगविभागो भवति।

अथवा प्रगृह्यसंज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति। अथवा योगविभागः करिष्यते। अदसः। अदसः परे ईदादयः प्रगृह्यसंज्ञा भवन्तीति॥ ततो मात्। माच्च परे ईदादयः प्रगृह्यसंज्ञा भवन्तीति। अदस इत्येव। किमर्थं योगविभागः। एको यत्तत्सिद्धे प्रगृह्यकार्यं तदर्थः। अपरो यदसिद्धे। इहापि तर्हि प्राप्नोति। अमुया अमुयोरिति। किं च स्यात्। यद्यत्र प्रगृह्यसंज्ञा स्यात् प्रगृह्याश्रयः प्रकृतिभावः प्रसज्येत। नैष दोषः। पदान्तप्रकरणे प्रकृतिभावः। न चैष पदान्तः। एवमप्यमुकेत्र अत्रापि प्राप्नोति। द्विवचनमिति वर्तते। यदि द्विवचनमिति वर्तते अमी अत्र अत्र न प्राप्नोति। एवं तर्हि एदन्तमिति निवृत्तम्। अथवाऽऽहायमदसो मादिति। न चई त्वो त्वे स्तः। नापि मकारः। तत एवं विज्ञास्यामः। मार्थादीदादयर्थानामिति। उक्तं वा। किमुक्तम्। अदसईत्वोत्वे स्वरे बहिष्पदलक्षणे सिद्धे वक्तव्ये।

न्यथा। एकयोगे परिहारान्तरमप्याह॥ अथवेति। मार्थादिति। मार्थ एव स्थानी मशब्देनोक्तः ईदूदेदर्थश्च दूदेदिति। न चास्यां कल्पनायामसिद्धत्वं भवति। बुद्धिपरिकल्पनायामसिद्धत्वस्योक्तत्वात्। उक्तं वेति। असिद्धत्वमेवात्र प्रतिषिद्धमित्यर्थः। स्वरे इति। अचीत्यर्थः। बहिष्पदलक्षण इति। द्वितीयपदव्यवस्थित इत्यर्थः। तेनैकपदव्यवस्थितेऽचि असिद्धे ई त्वो त्वे। तेनामुयाऽमुयोरित्यत्रायादेशो भवत्येव। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रगृह्यसंज्ञायां चेति॥ प्रगृह्यसंज्ञायामेव सिद्धत्वे न सिद्धे लक्ष्ये प्रपञ्चार्थः पूर्ववाक्योपन्यासः। तत्र सकिदोष इति। मात्यरं यदीदाद्यन्तमिति दोषोपन्यासः। पूर्वसूत्रे हि तदन्तं गृहीतमितीहापि तदन्तस्यैवानुवृत्तिरिति भावः। स्वरितत्वेन शब्दमात्रमनुमीयत इति उत्तरे भिप्रायः। तत्र माङ्ग्रहणे न गृह्यमाणमिदूदेद्विशेष्यते। तेनामुके त्यत्र व्यवधानाद्दोषाभाव एव। योगविभागे दोषप्रसङ्गादेदन्तमिति निवृत्तमित्युक्तम्। एकयोगे तु तन्निवृत्त्या न प्रयोजनमिति न वा ग्रहणविशेषणत्वादित्युत्तरमुक्तम्। दे॥ इह कस्मादिति॥ अत्र हि प्रत्यक्षमेव शेइतिरूपम्। युष्मेअस्मेइत्यत्र तु शाकारस्यानुबन्धस्य स्मरणादनुमेयमिति प्रश्नः। शेऽर्थवद्ग्रहणादिति। त्वं शब्दस्येत्येवान्तरङ्गत्वादहेयत्वादसाधारणत्वाच्च रूपपरिग्रहे सिद्धे रूपवदर्थस्याप्यङ्गीकरणार्थं रूप

ग्रगृसंज्ञायां चेति। तत्र सकिदोषः॥ तत्र सककारे दोषो भवति। अमुकेत्र। न वा ग्रहणविशेषणत्वात्। न वा एष दोषः। किं कारणम्। ग्रहणविशेषणत्वात्। न माङ्ग्रहणेन ईदाद्यन्तं विशेष्यते किं तर्हि ईदादयो विशेष्यन्ते मात्परे ये ईदादय इति॥ शे॥ ॥इह कस्मान्न भवति काशेकुशेवंशेइति। शेऽर्थवद्ग्रहणात्॥ अर्थवतः शेशब्दस्य ग्रहणं न चैषोर्थवान्। एवमपि हरिशे बभ्रुशेइत्यत्रापि प्राप्नोति। एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति। अथवा पुनरस्तु अर्थवद्ग्रहणेनानर्थकस्येति। कथं तर्हि हरिशेबभ्रुशेइति। एकोत्र विभक्त्यर्थेनार्थवान्। अपरस्तद्धितार्थेन। समुदायोनर्थकः॥

ग्रहणं कृतम्। अत्र च शेशब्दोऽनर्थकः। सप्तम्येकवचनं त्वर्थवत्। तयोः समुदायो र्थान्तराप्रादुर्भावादनर्थकः। एवमपीति। अत्र हि मत्वर्थीयसप्तम्येकवचनयोरर्थवतोः समुदायोर्थवानेव। अवयवधर्मानुविधानात्समुदायस्येति प्रश्नः। लक्षणेति। प्रतिपदोक्ते हि झटिति प्रतिपत्तिर्भवति। लाक्षणिके तु लक्षणानुसंधानद्वारेण बहिरङ्गेति न तस्य ग्रहणम्। अथवेति॥ अर्थवत्समुदायस्यापि कस्यचिदानर्थक्यम्। यथा दश दाडिमादिवाक्यस्य पदार्थानां परस्परसमन्वयाभावादिहापि हरिशब्दवाच्यार्थगतसंख्याधिकरणशक्तिप्रतिपादनाय प्रवृत्ता सप्तमी नञ्प्रत्ययमात्रप्रतिपद्येनार्थेनान्वेतीति शेशब्दस्यानर्थक्यम्॥ ॥ रामः ७९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निपात एकाजनाङ्। निपात इति किमर्थमिति। निपातस्यैवैकाचोऽर्थवत्त्वात् प्रत्ययस्य केवलस्याप्रयोगाभावादानर्थ-
क्यात् कल्पितरूपत्वात् कल्पनायाश्च नियमाभावात् प्रश्नः। चकारोऽत्रेति। अन्वयव्यतिरेकाभ्यां प्रत्ययस्याप्यर्थवत्त्वमि
तिभावः। निपातोऽपि केवलो न प्रयुज्यते द्योतकत्वादिति साम्यमेव निपातप्रत्यययोः। अततेर्डः। अ आगच्छ आगच्छे
त्यपि प्रत्युदाहरणम्। एकाजिति किमर्थमिति। एकग्रहणसामर्थ्याद्बहुव्रीहिं मन्यते। ततश्च प्रेदं ब्रह्मेत्यनिष्टनिवृत्तिर्न कृ
तेति प्रश्नः। तत्पुरुषोऽयमिति। अन्तरङ्गत्वाद्वृत्तिपदार्थप्राधान्यादिति भावः। नैव दोष इति। ननु पुरोऽहिरिति हलन्तस्य
प्रकृतिभावाद्गोरुत्वं न स्यात्। नैष दोषः। प्रगृह्यसंज्ञायां रुत्वस्यासिद्धत्वात्। सकारस्य च कार्यान्तरप्रसङ्गात्। उत्वे तु रुत्वमा

निपात एकाजनाङ्। निपात इति किमर्थम्। चकारात्र जहारात्र। एकाजिति किमर्थम्। प्रेदं ब्रह्म प्रेदं क्षत्र
म्। एकाजित्युच्यमानेऽत्रापि प्राप्नोति। एषोऽपि ह्येकाच्। एकाजिति नायं बहुव्रीहिः। एकोऽज् यस्मिन् सोऽ
यमेकाच् एकाजिति। किं तर्हि। तत्पुरुषोऽयं समानाधिकरणः। एकः अच्। एकाच्। एकाजिति। यदि तत्पु
रुषोऽयं समानाधिकरणो नार्थ एकग्रहणेन। इह कस्मान्न भवति। प्रेदं ब्रह्म। प्रेदं क्षत्रम्। अजेव यो निपात
इत्येवं विज्ञायते। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। अज्ग्रहणसामर्थ्यात्। यदि हि अच्चान्य
च्च तत्र स्याद् अज्ग्रहणमनर्थकं स्यात्। अस्ति ह्यन्यदज्ग्रहणस्य प्रयोजनम्। किम्। अजन्तस्य यथा स्याद्ध
लन्तस्य मा भूत्। नैव दोषो न प्रयोजनम्। एवमपि कृत एतत्।

अयास्तिद्म्। एवमपीति। अन्यतरनिवृत्त्याऽज्ग्रहणस्यार्थवत्त्वादज्मात्रं गृह्यते तदन्तं निरस्यते विपर्ययस्तु न भव
तीति विशेषाभावात् प्रश्नः। पारार्थ्यसाम्यात् संज्ञातिदेशोपरिभाषाशब्देनोक्तौ। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सावकाशयोरिति। निरवकाशस्य बाधकत्वादेवमुक्तम्। तत्र तदन्तविधेरवकाशः। ओरावश्यके लाव्यं पाव्यम्। आद्यन्तवद्भावस्यावकाशः। मिदचोऽन्त्यात्परः। तानि यानीति। अत्र हि साक्षादन्त्यग्रहणमस्तीति तदन्तविध्यभावः। समवस्थितयोरिति। इह प्राप्तयोः। आचार्यप्रवृत्तिरिति। यदि तर्हि लिङ्गेन तदन्तविधिर्निराक्रियते तदा तन्मूलाद्यन्तवत्परिभाषा कथं प्रवर्तेत। नैष दोषः। आद्यन्तवदित्यस्योपस्थानाय तदन्तविधिः प्रथमं संनिधीयते पश्चात्तु लिङ्गात्परित्यज्यते। अथवा लिङ्गादज्ग्रहणं निपातेन विशेष्यते इति विशेषणेन च तदन्तविधेरभावादतिदेशस्यापि माभूत्प्रवृत्तिस्तत्फलसंपत्त्यात्तूक्तं परिभाषा भविष्यतीति॥ एवं तर्हीति। संज्ञाया विधीयमानत्वात्प्राधान्यात्संज्ञिनो गुणत्वा-

द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोराद्यन्तवदेकस्मिन् येन विधिस्तदन्तस्येति च। इयमिह परिभाषा भविष्यति आद्यन्तवदेकस्मिन्निति। इयं च न भविष्यति येन विधिस्तदन्तस्येति। आचार्यप्रवृत्तिर्ज्ञापयति। इयमिह परिभाषा भवति आद्यन्तवदेकस्मिन्निति। इयं च न भवति येन विधिस्तदन्तस्येति। यदयमनाङिति प्रतिषेधं शास्ति॥ एवं तर्हि सिद्धे सति यदज्ग्रहणे क्रियमाणे एकग्रहणं करोति तज्ज्ञापयत्याचार्यः। अन्यत्र वर्णग्रहणे जातिग्रहणं भवतीति॥ किमेतस्य ज्ञापने प्रयोजनम्। दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धमिति यदुक्तं तदुपपन्नं भवति। अनाङिति किमर्थम्। आ उदकान्तात्। ओदकान्तात्।

त्पशुना यजेतेतिवत्संख्याविवक्षायां सिद्धायामेकग्रहणमन्यत्र जातिसंप्रत्ययार्थम्। अच्समुदायग्रहणशङ्कानिरासार्थं ह्येकग्रहणं ज्ञापनफलं संपद्यते। किं पुनः स्याद्यद्यत्राच्समुदायस्य ग्रहणं स्यात्। उच्यते। इह अइउ अपेहीति समुदायस्यैकाच्संज्ञा स्यान्नावयवानां समुदायैकाज्द्विर्वचनवदित्यन्त्यस्यैव प्रकृतिभावाद्यणादेशो न स्यात्। पूर्वयोस्तु स्वरसंधिः स्यात्। अच्समुदायपरिग्रहानुरोधित्वाच्च निपातसमुदायो गृह्येत। एकनिपातस्याच्समुदायस्याभावात्। अनाङिति किमर्थमिति। ङिदङितोराकारयोर्विषयविभागप्रदर्शनाय प्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इह कस्मादिति। अनुबन्धनिवृत्तौ विशेषापरिज्ञानात् प्रश्नः। अर्थवशाद्विशेषावसाय इत्युत्तरम्। ईषदर्थे। आउष्णमो-
ष्णमिति। आङीषदर्थ इति चोक्तम्। क्रियायोगे। आहृतः। एतः। प्रादिषु हि ङित् पठ्यते। आङ् मर्यादाभिविध्योरिति
समासविधौ ङिन्निर्दिष्टः। आ उदकान्तात् ओदकान्तात्। आ अहिच्छत्रात् आहिच्छत्रादिति। विना तेनेति मर्यादा
। सह तेनेत्यभिविधिः। पूर्वप्रक्रान्तस्य वाक्यार्थस्यान्यथात्वद्योतनायाऽऽकारः प्रयुज्यते। आ एवं नु मन्यसे। नैवं पूर्व-
ममंस्थाः संप्रति मन्यस इति वाक्यारम्भसूचनायाऽऽकार इत्यपरे। तथा स्मृतेः सूचक आकारः प्रयुज्यते। ततः स्मृ-
तोऽर्थो निर्दिश्यते। आ एवं किल तदिति। ओत्। निपातसमाहारोऽयमिति। अनर्थकानामपि निपातानां कमीमिदु इ-

इह कस्मान्न भवति। आ एवं नु मन्यसे आ एवं किल तदिति। सानुबन्धकस्येदमाकारस्य ग्रहणम्। अ-
ननुबन्धकश्चात्राऽऽकारः। क्व पुनरयं सानुबन्धकः। क्व निरनुबन्धकः। ईषदर्थे क्रियायोगे मर्यादाभि-
विधौ च यः। एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्। ओत्। किमुदाहरणम्। आहो इति उताहो
इति। नैतदस्ति प्रयोजनम्। निपातसमाहारोऽयम्। आह उ आहो इति। उत आह उ उताहो इति। तत्र
निपात एकाजनाङित्येव सिद्धम्। एवं तर्हि के निपाता इमे। अथ वा प्रतिषिद्धार्थोऽयमारम्भः। ओ
षु यातं मरुतः। ओ षु यातं बृहती शक्वरी च। ओ चित्सखायं सख्या ववृत्याम्। ओतश्च्वि प्रतिषेधः।
ओदन्तो निपात इत्यत्र च्व्यन्तस्य प्रतिषेधो वक्तव्यः। अनदः। अदः अभवत्। अदोऽभवत्।

त्यादीनां दर्शनादर्थभेदाभावेऽपि निपातसमाहारत्वमुक्तम्। एवं तर्हीति। चादिषु तथा पाठादिति भावः। ओ षु यातमिति।
आ उ ओ इत्यत्रान्तवद्भावादिवत्त्वं यमाङिति अनाङिति प्रतिषेधः प्राप्नोति। पर्युदासे तु सति न दोषः। तत्र ह्याङ्सदृशस्योका-
रस्याङसदृशेऽकादेशे आदिवद्भावादुकारग्रहणेन ग्रहणमिति सिध्यत्येव प्रगृह्यसंज्ञा। तस्याश्च प्रयोजनं क्वचिच्छाखायामो
आयातमिति पाठे प्रकृतिभावः। अदोऽभवदिति। च्व्यन्तत्वेनात्र निपातत्वम्। ऊर्यादिच्विडाचश्चेत्यत्र निपाताधिकारात्। प्रतिषिद्धार्थत्वा-
दस्य कथमत्र प्राप्तिरिति चेद्, उभयार्थत्वाददोषः। तथा ह्योदन्तस्य निपातस्य प्रगृह्यसंज्ञा विधीयमाना प्रतिबन्धाभावाददोऽभव-
दित्यत्रापि भवति ओ षु यातमित्यत्रापि परत्वादनाङिति प्रतिषेधं बाधते इति प्रतिषिद्धार्थमपि स्यादिति को विरोधः। ओकारस्य
प्रतिपदोक्तस्य ग्रहणमित्युत्तरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमपीति। ओकारस्यात्र प्रतिपदोक्तत्वमस्ति। गमेर्डोरिति साक्षादुच्चारणात्। यस्य हि साक्षादुच्चारणं नास्ति आद्गुण इत्यादिसामान्यलक्षणेन यद्रूपं निष्पाद्यते तल्लाक्षणिकमुच्यते। एवं तर्हीति। गुणादागतो गौणः। यथा गोशब्दस्य जाड्यादिगुणनिमित्तोऽर्थो वाहीकः। मुखमिव प्रधानत्वान्मुख्यम्। तत्र स्वं रूपमित्यत्र रूपग्रहणेनार्थपरिग्रहस्य ज्ञापितत्वादर्थवतः कार्येण भवितव्यम्। स चार्थः प्राथम्यान्मुख्य एव गृह्यते। गौणो ह्यर्थे शब्दः प्रवर्तमानो मुख्यार्थारोपेणैव प्रवर्तते। अनियतश्च गौणोऽर्थः। तस्माल्लौकिकोऽयं न्यायो गौणमुख्ययोरिति। गोऽभवदित्यत्र च जाड्यादिना धर्मेण गोत्वमारोपितमिति गौणत्वमर्थस्य। गोऽभवदित्यत्र वृत्तौ प्रकृतेः कर्तृत्वं संपद्यते भवन्ति ब्राह्मणा इति बहुवचनदर्शनात्। प्रकृतौ च गोत्वमारोपितं न तु

तिरोऽभवत्। न वक्तव्यः। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्येत्येवं न भविष्यति। एवमपि अगौः गौः समपद्यत गोऽभवत्। अत्र प्राप्नोति। एवं तर्हि गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति। तद्यथा। गौरनुबन्ध्योऽजोऽग्नीषोमीय इति। न वाहीकोऽनुबध्यते। कथं तर्हि वाहीके वृद्ध्यात्वे भवतः। गौस्तिष्ठति गामानयेति। अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति। शब्दाश्रये च वृद्ध्यात्त्वे॥ उञः॥ इह कस्मान्न भवति। आहो इति उताहो इति। उञ इत्युच्यते न चात्रोञं पश्यामः। उञोऽयमन्येन सहैकादेश उञ्ग्रहणेन गृह्यते। आचार्यप्रवृत्तिर्ज्ञापयति नोञ एकादेश उञ्ग्रहणेन गृह्यत इति।

मुख्यमिति प्रगृह्यत्वाभावः। शब्दाश्रये चेति। स्वार्थे वृत्तात् प्रातिपदिकाद्धि भक्तावुत्पन्नायां कार्ये प्रकृते शब्दान्तरसन्निधानाद्गौणत्वं प्रतीयते। तस्य च स्वार्थस्य मुख्यव्यपदेशो नास्ति गौणापेक्षया संबन्धिशब्दत्वान्मुख्यव्यपदेशस्य गौणाभावेऽभावाच्छब्दाश्रये चेत्युक्तं न त्वत्रार्थो नापेक्ष्यते। तत्र यथाश्वेतं छागमालभेतेति गुणद्रव्ययोः श्रौतः क्रियासंबन्धः। वाक्यीयात्तु न्यायात् पश्चात् परस्परेण। एवं गां वाहीकमानयेति पूर्वं क्रियाभिसंबन्धापेक्षया विभक्तावुत्पन्नायां वाक्यीयात्तु न्यायात् सामानाधिकरण्याद्गौणार्थप्रादुर्भावो भवतीति पदकार्येष्वेवायं न्यायो न प्रातिपदिककार्येष्वित्युक्तं शब्दाश्रये चेति॥ उञः॥ इह कस्मादिति। निपातसमाहारं मत्वा प्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यमिति। एकादेशे कृते आदिवद्भावात् संज्ञासिद्धिः। इह रूपत्रयं साध्यम्। उ इति। विति। ऊँ इति। तच्चैकयोगेन न सिध्यति। एकयोगे ह्युञ इति श्रुतिरादेशेन श्रुतत्वात् संबध्यते न प्रगृह्यसंज्ञया सा तु निपात एकाजनाङिति नित्यैवास्य भवति शाकल्यश्रुत्यनुवृत्त्या चादेशे विकल्पिते रूपद्वयं स्यात्। उ इति। ऊँ इति। न तु वितीति। तदर्थमाह। उञ इति योगविभाग इति। उञ इत्यत्र शाकल्यस्येतौ प्रगृह्यमिति चानुवर्तते तत्र प्रगृह्यसंज्ञैव शाकल्यस्य मतेन विधीयते नान्येषामिति सत्यन्तरानुसन्धानद्वारेण विभाषा संपद्यते। उ इति विती ति। ऊँ इत्यत्र यदि शाकल्यस्येति नापेक्ष्यते तदा प्र

यद्यमोदित्योदन्तस्य निपातस्य प्रगृह्यसंज्ञां शास्ति। नैतदस्ति ज्ञापकम्। उक्तमेतत्। प्रतिषिद्धार्थोऽयमारम्भ इति। दोषः खल्वपि स्याद्यद्युञ्येकादेश उञ्ग्रहणेन गृह्येत। जानु उ अस्य रुजति। जानू अस्य रुजति। जान्वस्य रुजति। मयउञो वो वेति वत्वं न स्यात्। एवं तर्ह्येकनिपाताविमौ। अथवा द्वावुकाराविमौ। एकोऽननुबन्धकः। अपरः सानुबन्धकः। तद्योऽननुबन्धकस्तस्यैष एकादेशः। उञ इति योगविभागः॥ उञ इति योगविभागः कर्तव्यः। उञः शाकल्यस्याऽऽचार्यस्य मतेन प्रगृह्यसंज्ञा भवति। उ इति विति। ततऊँ। उञ ऊँ इत्ययमादेशो भवति शाकल्यस्याऽऽचार्यस्य मतेन। दीर्घोऽनुनासिकः प्रगृह्यसंज्ञकश्च ऊँ इति। किमर्थो योगविभागः। ऊँ वा शाकल्यस्य। शाकल्यस्याऽऽचार्यस्य मतेन ऊँ विभाषा यथा स्यात्। ऊँ इति उ इति। अन्येषामाचार्याणां मतेन विति।

गृह्यसंज्ञो नित्यमादेशः स्यात्। ततश्च विति ऊँ इति एते द्वे एव रूपे स्याताम्। तस्माच्छाकल्यग्रहणानुवृत्त्या आदेशविकल्पे सति त्रीणि रूपाणि सिध्यन्ति। ऊँ वा शाकल्यस्येति। शाकल्यस्य श्रुतेरेव फलं वाग्रहणेन प्रतिपादयति। एतदेव व्याचष्टे। शाकल्यस्य विभाषा यथा स्यादिति। प्रगृह्यसंज्ञाऽऽदेशश्च। तत्र यद्यपि पूर्वसूत्रे फलरूपतया निर्देशात् प्रदेशेष्विव प्रगृह्यशब्दो द्विवचनाद्यभिधेयः। तथापीहोञ इति षष्ठीनिर्देशात् स्वरूपपदार्थकः संपद्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ ईदूतौ च सप्तम्यर्थे। ईदूतौ सप्तमीत्येवेति। सप्तमीसहचरितं यदीदूदन्तं सप्तम्यां वा परतस्तत्प्रगृह्यसंज्ञं भवतीत्ये ११५
८२ वं प्रत्ययलक्षणेन लुप्तायामपि सप्तम्यां सोमो गौरी अधिश्रितइत्यादौ भविष्यति प्रगृह्यसंज्ञेति प्रश्नः। लुप्तइति।
संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधादसत्यर्थग्रहणे सप्तम्या एवसंज्ञिनीत्वादसत्याश्च कार्याभावात्प्र
त्ययनिमित्तं यत्रान्यस्य कार्यं विधीयते तत्रैव प्रत्ययलक्षणसद्भावाद्गौरीइत्यत्राप्रसङ्गादर्थग्रहणं कृतम्। अर्थ
ग्रहणे सति अर्थनिमित्ता संज्ञेयं भवति न प्रत्ययश्रवणनिमित्तेति लोपेऽपि सिध्यति। पूर्वसवर्णइति। सति च पूर्वस

ईदूतौ च सप्तम्यर्थे॥ ईदूतौ सप्तमीत्येव। ईदूतौ सप्तमीत्येव सिद्धं नार्थोऽर्थग्रहणेन। लुप्तेऽर्थग्रहणाद्भ
वेत्। लुप्तायां सप्तम्यां प्रगृह्यसंज्ञा न प्राप्नोति। क्व। सोमो गौरी अधिश्रितः। दृश्यते चात्रापि स्यादिति त
च्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमर्थग्रहणम्। नात्र सप्तमी लुप्यते। किं तर्हि। पूर्वसवर्णोऽत्र भवति
॥पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते॥ यदि पूर्वसवर्ण आडाम्भावश्च प्राप्नोति। एवं तर्हि
आहायमीदूतौ सप्तमीति। न चास्ति सप्तमी ईदूतौ। तत्र वचनाद्भविष्यति। वचनाद्यत्र दीर्घत्वम्। नेदं व
चनाल्लभ्यम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्। यत्र सप्तम्या दीर्घत्वमुच्यते। दृतिं न शुष्कं
सरसी शयानमिति। सति प्रयोजने इह न प्राप्नोति। सोमो गौरी अधिश्रितइति। तत्रापि सरसी यदि। तत्रा
पि सिद्धम्। कथम्। यदि सरसीशब्दस्य प्रवृत्तिरस्ति।

वर्णे एकादेशे चादिवद्भावादिवतीकारः सप्तमीति सिद्धा संज्ञा। आडाम्भावइति। एकादेशं बाधित्वाऽऽडामौ स्याता
म्। वचनादिति। सर्वत्रैव सप्तमी लुप्यतइति वचनसामर्थ्यात्सप्तमीशब्देन सप्तमीसहचरितस्य ग्रहणान्मुख्य
कल्पनाऽसंभवे गौणी कल्पना गृह्यतइत्याश्रयणात्सिध्यतीति भावः। मुख्यकल्पनासंभवत्येवेत्याह। यत्रेति।
सरसीत्यत्र सरःशब्दात्परस्य ङिशब्दस्य याडियाजीकाराणामुपसंख्यानमिति कारे कृते भवतीकारः सप्तमीति त रा॰म॰
त्रैव स्यान्न तु गौरीत्यत्रेति भावः। सरसीयदीति। यदीति संभावनायाम्। तस्मात्स्थितमेतद्वचनात्सर्वत्र लुप्तायामपि ८२
सप्तम्यां भविष्यतीति नार्थोऽर्थग्रहणेन।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञापकमिति। ईदूदेदित्यत्र तृतीयचतुर्थपक्षयोरित्यर्थः। इह प्रगृह्यसंज्ञाप्रकरणे यदि प्रत्ययलक्षणं स्यात् तदेदूतौ च सप्तमीत्येव सप्तमीसहचरितं सप्तम्यां वा परतो यदीदूदन्तं तत् प्रगृह्यसंज्ञमिति प्रत्ययलक्षणेन लुप्तायामपि सप्तम्यां संज्ञा भविष्यतीति किमर्थग्रहणेन तत् क्रियमाणं प्रत्ययलक्षणाभावं सूचयति। संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेरभावात् तदन्तपक्षस्तत्र नैव स्थित इति ज्ञापनफलाभावादाह। मावेति। वाप्यश्वो नद्यातिरिति। संज्ञायामिति समासे कृते सप्तमीसहचरितमीकारान्तं पूर्वपदमिति स्यात् प्रगृह्यसंज्ञेति तदर्थमर्थग्रहणम्। अर्थेति। अस्त्येवात्र सप्तम्यर्थ इति प्रश्नः। जहत्स्वार्थेति। समासस्यैवार्थवत्त्वात् पूर्वोत्तरपदयोर्वर्ण

अस्ति च लोके सरसीशब्दस्य प्रवृत्तिः। कथम्। दक्षिणापथे हि महान्ति सरांसि सरस्य इत्युच्यते। ज्ञापकं स्यात् तदन्तत्वे। एवं तर्हि ज्ञापयत्याचार्यो न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। कुमार्योरगारं कुमार्यगारम्। वध्वोरगारं वध्वगारम्। प्रत्ययलक्षणेन प्रगृह्यसंज्ञा न भवति। मा वा पूर्वपदस्य भूत्। अथ वा पूर्वपदस्य मा भूदित्येवमर्थमर्थग्रहणम्। वाप्यामश्वो वाप्यश्वः। नद्यामातिर्नद्यातिः। अथ क्रियमाणेऽप्यर्थग्रहणे कस्मादेवात्र न भवति। जहत्स्वार्था वृत्तिरिति। अथाजहत्स्वार्थायां वृत्तौ दोष एव। अजहत्स्वार्थायां च न दोषः। समुदायार्थोऽभिधीयते। ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद्भवेत्। पूर्वस्य चेत् सवर्णोऽसावाडाम्भावः प्रसज्यते ॥१॥ वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि। ज्ञापकं स्यात् तदन्तत्वे मा वा पूर्वपदस्य भूत् ॥२॥

वदानर्थक्यात् सप्तम्यर्थो नास्तीत्यर्थः। समुदायार्थ इति। वृत्तौ हि पूर्वपदं स्वार्थमप्यभिधत्ते प्रधानार्थमपीति स्वार्थसंसृष्टस्य प्रधानार्थस्याभिधानात् पांसूदकवत् स्वार्थस्य विवेकानवगमात् समुदायार्थो वृत्तौ संसृष्टरूपेणैवाभिधीयते। सप्तम्यर्थग्रहणेन यावानर्थो वाक्ये सप्तम्यन्तेनाभिधीयते केवलोऽसंसृष्ट उद्भूतस्तस्यैवेह ग्रहणमिति समासे न भवति प्रगृह्यसंज्ञा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ दाधाघ्वदाप्॥ दाधाशब्दयोर्घुसंज्ञा विधीयमाना रूपान्तरयुक्तानां दोदेङ्धेटां न प्राप्नोतीत्याह। घुसंज्ञायामिति। किंप्रयो ११५
८३ जनमिति। दोदेङ्धेटामेजन्तानामनुकरणानि व्यवस्थाप्याऽऽत्वे कृते ददातिदधातियच्छत्यनुकरणानां चैकशेषे कृते द्व
न्द्वनिर्देशात् सिद्धा दोदेङ्धेटामपि घुसंज्ञा कृतात्वानां चैषां स्थानिवद्भावेन सिद्धेति प्रश्नः। आत्वभूतानामिति। भवतेः प्राप्त्यर्था
दाधृषाद्धेति विभाषितणिचः कर्तरि कर्मणि वा क्तप्रत्ययः। तत्र आत्वंभूता आत्वेन वा भूता आकारान्ता इत्यर्थः। न लक्षणे-
न कृतात्वा इति विज्ञेयम्। अस्यायमभिप्रायः। एजन्तानुकरणत्वे प्रमाणाभावात् प्रक्रियागौरवाच्च प्रयोगा एव ये आ

दाधाघ्वदाप्॥ घुसंज्ञायां प्रकृतिग्रहणं शिदर्थम्। घुसंज्ञायां प्रकृतिग्रहणं कर्तव्यम्। दाधाप्रकृतयो घुसंज्ञा भवन्तीति वक्तव्यम्। किंप्रयोजनम्। आत्वभूतानामियं संज्ञा क्रियते। सा आत्वभूतानामेव स्यात्। अनात्वभूतानां न स्यात्। ननु च भूयिष्ठानि घुसंज्ञाकार्याणि आर्धधातुके तत्र चैत आत्वभूता दृश्यन्ते। शिदर्थम्। शिदर्थं प्रकृतिग्रहणं कर्तव्यम्। शित्यात्वं प्रतिषिध्यते तदर्थम्। प्रणिदयते प्रणिद्यति प्रणिधयतीति। भारद्वाजीयाः पठन्ति। घुसंज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थम्। घुसंज्ञायां प्रकृतिग्रहणं कर्तव्यम्। किंप्रयोजनम्। शिदर्थं विकृतार्थं च। शित्तूदाहृतम्। विकृतार्थं खल्वपि। प्रणिदाता प्रणिधाता। किं पुनः कारणं न सिध्यति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति प्रतिपदं ये आत्वभूतास्तेषामेव स्यात्। लक्षणेन ये आत्वभूतास्तेषां न स्यात्। अथ क्रियमाणेऽपि प्रकृतिग्रहणे कथमिदं विज्ञायते दाधाः प्रकृतय इति आहोस्विद्दाधां प्रकृतय इति।

कारान्ताः प्रयुज्यन्ते तदनुकरणानामयमेकशेषनिर्देशः। सामान्यानुकरणं वा दा इति धा इति पृथक्पदं निर्दिष्ट
मिति। प्रणिदयत इति। घुसंज्ञायां सत्यां नेर्गदेति णत्वं भवति। प्रणिदातेति द्यतेर्देङो वा रूपं प्रणिधातेति धेटः। लक्ष राम॰
णेति। लाक्षणिके हि लक्षणानुसन्धानद्वारेण प्रतिपत्तिर्बहिरङ्गा प्रतिपदोक्ते त्वन्तरङ्गा। कथमिति। दाधाप्रकृतय इ ८३
ति षष्ठीसमासः कर्मधारयो वा उभयथाप्यव्याप्तिरिति प्रश्नः। दाधाः प्रकृतय इति। दीयत इत्यादावीत्वादेः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्त्वभूतानामिति।दाण्दाञ्धाञामू प्रकृतयश्चैषामिति।प्रत्यासत्त्यैषामितिलभ्यते।अर्थइतीति।एतद्धितीयंवाक्यम्।संनिधानाच्चदाधामर्थेयोवर्ततेसघुसंज्ञइतिप्रकृतीनामपिसिध्यति।तत्तुरत्नादिति।नेर्गदेतिसूत्रेघुमाप्राद्धयो

किंचातः।यदिविज्ञायतेदाधाःप्रकृतयइतिसएवदोषः।आत्त्वभूतानामेवस्यात्।अनात्त्वभूतानांनस्यात्।अथविज्ञायतेदाधांप्रकृतयइति।अनात्त्वभूतानामेवस्यादात्त्वभूतानांनस्यात्।एवंतर्हिनैवं-विज्ञायतेदाधाःप्रकृतयइतिनापिदाधांप्रकृतयइति।कथंतर्हि।दाधाघुसंज्ञाभवन्तिप्रकृतयश्चैषामिति।तत्तर्हिप्रकृतिग्रहणंकर्तव्यम्।नकर्तव्यम्।इदंप्रकृतमर्थग्रहणमनुवर्तते।क्वप्रकृतम्।ईदूतौचसप्तम्यर्थेइति।ततोवक्ष्यामिदाधाघ्वदाप्।अर्थइति।नैवंशक्यम्।ददातिनासमानार्थानुरातिरासतिदासतिमंहतिप्रीणातिप्रभृतीनाहुः।तेषामपिघुसंज्ञाप्राप्नोति।तस्मान्नैवं-शक्यम्।नचेदेवंप्रकृतिग्रहणंकर्तव्यमेव।नकर्तव्यम्।लिङर्थेनतावन्नार्थःप्रकृतिग्रहणेन।अवश्यंतत्रमार्थंप्रकृतिग्रहणंकर्तव्यम्।प्रणिमयतेप्रणयमयतेइत्येवमर्थम्।तत्पुरस्तादपकृष्यतेघुप्रकृतौमाप्रकृतौचेति।यदिप्रकृतिग्रहणंक्रियतेप्रनिमिनोतिप्रनिमीनाति।अत्रापिप्राप्नोति।अथाक्रियमाणेऽपिप्रकृतिग्रहणेइहकस्मान्नभवति।प्रनिमाताप्रनिमातुंप्रनिमातव्यमिति।आकारान्तस्यङितोग्रहणंविज्ञायते।यथैवतर्हिअक्रियमाणेप्रकृतिग्रहणेआकारान्तस्यङितोग्रहणंविज्ञायते।एवंक्रियमाणेऽपिप्रकृतिग्रहणेआकारान्तस्यङितोग्रहणंविज्ञास्यते।विकृतार्थेनचापिनार्थः।दोषएवैतस्याःपरिभाषायाः।लक्षणप्रतिपदोक्तयोःप्रतिपदोक्तस्यैवेति।

मिध्येप्रकृतिग्रहणंकर्तव्यंतदुभाभ्यामभिसंभन्त्स्यते।प्रनिमिनातीति।मीनातिमिनोतिदीङांल्यपिचेत्यात्त्वविधानाद्भवतिमाप्रकृतित्वमनयोः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· ८५ ११५

गामादाग्रहणेष्विति। अस्य चार्थस्य देपः पित्त्वमदाविति पित्प्रतिषेधे सामान्यग्रहणार्थे लिङ्गम्। अन्यथाऽस्य लाक्षणिकत्वादत्र ग्रहणं न भविष्यतीति किं प्रतिषेधार्थेन पित्त्वेन। सामान्यापेक्षया च निरनुबन्धकग्रहण इति लक्षणप्रतिपदोक्तयोरिति च परिभाषाद्वयानुपस्थानमिह ज्ञापयतीति धेटोऽपि सिध्यति। दोदद्घोरित्यत्र वा दद्इत्येव धेटोनिवृत्त्यर्थं तद्धेटो घुसंज्ञां ज्ञापयति न हि दधातिनिवृत्त्यर्थं दद्इत्येतत्। तस्य दधातेर्हिरिति ह्यादेशविधानाद्दद्भावाऽप्रसङ्गात्। समानशब्दानामिति। समानश्रुतीनामित्यर्थः। प्रनिदारयति प्रनिधारयतीति। दङ्धृङोर्णिचि वृद्ध्यावाकारे कृते दाधाशब्दौ संपद्येते तौ चार्थवन्तौ पश्चात्तु रपरत्वं क्रियमाणमागमभूतत्वादन्यत्वं न करोतीति

गामादाग्रहणेष्वविशेष इति॥ समानशब्दप्रतिषेधः॥ समानशब्दानां प्रतिषेधो वक्तव्यः। प्रनिदारयति। प्रनिधारयति। दाधा घुसंज्ञा भवन्तीति घुसंज्ञा प्राप्नोति॥ समानशब्दाप्रतिषेधोऽर्थवद्ग्रहणात्॥ समानशब्दानामप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। घुसंज्ञा कस्मान्न भवति। अर्थवद्ग्रहणात्। अर्थवतोर्दाधोर्ग्रहणात्। न चैतावर्थवन्तौ॥ अनुपसर्गाद्वा॥ अथ वा यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा भवन्ति। न चैतौ दाधौ प्रति क्रियायोगः। यद्येवम्। इहापि तर्हि न प्राप्नोति। प्रणिदापयति प्रणिधापयतीति। अत्रापि नैतौ दाधावर्थवन्तौ नाप्येतौ दाधौ प्रति क्रियायोगः।

भा॰तिः। अर्थवद्ग्रहणादिति। अर्थवद्ग्रहणे नानर्थकस्येत्यस्य स्वं रूपमित्यनेन ज्ञापितत्वात्। उरण्रपर इति चाणिविधीयमान एव रपरो भवतीति वृद्धिः क्रियमाणा रपरा भवतीति दार्धारोरेवार्थवत्त्वं न तु तदवयवयोरिति नास्ति घुसंज्ञा। अनुपसर्गाद्वेति। अभ्युपगम्य घुसंज्ञां दोषं परिहरति। घुसंज्ञकापेक्षया यस्योपसर्गत्वं तस्मात्परस्य नेर्घोपरतो णत्वं विधीयते। अत्र दाधापेक्षया नास्ति प्रशब्दस्योपसर्गत्वं किं तु दार्धारोरपेक्षयेत्यदोषः। इहापि तर्हीति। अत्रापि पुकि कृते पकारान्तोऽर्थवान् न केवलो दाशब्दः पुगन्तमेव च प्रत्युपसर्गत्वं न दाशब्दं प्रतीति प्रश्नः। ॥

रामः ८४

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवाऽर्थवत इति। लब्धात्मकस्य भावस्य निमित्तवशादुपचयापचयौ व्यपदेशहानिं न कुरुतः। यथा देवदत्तस्याङ्गाधिक्याङ्गच्छेदौ। इहाप्यन्तरङ्गत्वात् कृतायां दाधोर्घुसंज्ञायां पश्चादुत्पन्नः पुगागमो घुव्यपदेशं न निवर्तयति नाप्यर्थवत्त्वमित्यदोषः। अनर्थकस्याप्यागमो व्यपदेशहानिं न करोति यथा सत्यपि रेफे अकाराकारयोर्गुणवृद्धिव्यपदेशाहानिः। इह त्वर्थवतो ग्रहणादर्थवत इत्युक्तम्। यदा च प्रकृत्यर्थः प्रेणाविशेष्यते तदाऽयं परिहारः। णयर्थविशेषणत्वे तु प्रस्य दाधो प्रत्यनुपसर्गत्वात्सत्त्वं न भवत्येव। तद्गुणीभूत इति। प्रयोगसंपादन उपकारक इत्यर्थः। युक्तं पुनरिति। ततश्च नित्येष्वागमविरोधात् तद्द्वारेणाऽऽदेशविधानाद्वा पूः शब्द एवार्थवान्न दाशब्द इति तदवस्थो दोष

नवाऽर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते यथाऽन्यत्र॥ नवा एष दोषः। किं कारणम्। अर्थवत आगमस्तद्गुणीभूतोऽर्थवद्ग्रहणेन गृह्यते। यथाऽन्यत्र। तद्यथा। अन्यत्रापि अर्थवत आगमोऽर्थवद्ग्रहणेन गृह्यते। क्वाऽन्यत्र। लविता चिकीर्षितेति। युक्तं पुनर्यन्नित्येषु नाम शब्देष्वागमशासनं स्यात्। न नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः। आगमश्च नामाऽपूर्वः शब्दोपजनः। अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः। बाढं युक्तम्। शब्दान्तरैरिह भवितव्यम्। तत्र शब्दान्तराच्छब्दान्तरस्य प्रतिपत्तिर्युक्ता। आदेशास्तर्हीमे भविष्यन्ति। अनागमकानां सागमकाः। तत्कथम्। सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।

इति भावः। अथ युक्तमिति। तत्रापि स्थानिनमपनीयाऽऽदेशः क्रियत इत्यनित्यत्वप्रसङ्गः। यश्चोभयोर्दोषो न तमेकश्चोद्यः। बाढमिति। प्रसङ्गवाची स्थानशब्दो न निवृत्तिवाची ततश्च सन्त एव प्रयोगे नित्याः शब्दा बुद्ध्युन्मज्जननिमज्जनद्वारेण प्रतिपाद्यन्ते। आगमस्त्ववस्थितस्याऽपूर्वः क्रियमाणो नित्यत्वविरुद्धः। आदेशास्तर्हीमे इति। इड् भवतीत्येतद्द्वारेण तव्यस्येतव्यादेशः क्रियते। सर्व इति। आगमा अपीत्यर्थः। सर्वपदादेशा इति। पदशब्देन न सुप्तिङन्तं गृह्यतेऽपितु कार्यं प्रतिपद्यमानं प्रकृतिप्रत्ययादि तत्सर्वं पदम्॥

CC-0. In Public Domain. Digitization by eGangotri

 एकदेशविकारे हीति। यद्यपि सर्वविकारेऽप्यनित्यत्वं यथा पिठरस्थस्य पयसः पाकादिषु। तथापि विकाराभावप्रति
पादनपरमेतत्। बुद्धिविपरिणाममात्रं स्थान्यादेशाऽऽगमाऽऽगमिभावद्वारेण क्रियत इत्यर्थः। यद्येवं दाप्शब्दस्य
दाप्शब्द आदेशः क्रियत इति दाप्शब्दस्याऽऽनर्थक्यप्रसङ्गः। नैष दोषः। नित्यतासमर्थनायाऽऽदेशपक्ष आश्रितः
। प्रक्रियायां तु कल्पितायामागमाऽऽगमिभाव एव। अन्यथाऽऽगमादेशयोर्भेदेन व्यवहारो न स्यात्। दीङ इति।
उपादीस्त इति स्थिते मीनाति मिनोतीत्यात्त्वे कृते दारूपत्वादर्थवत्त्वाच्च घुसंज्ञाप्रसङ्गः। इह खल्विति। एचो विषये
आत्त्वविधानाद्दीशब्द एव दाप्रकृतिरिति दोषः। न चेयमिति। एच एव स्थाने आत्त्वविधानादित्यर्थः। सन्निपातेति।

एकदेशविकारे हि नित्यत्वं नोपपद्यते॥ दीङः प्रतिषेधः स्थाघ्वोरित्त्वे। दीङः प्रतिषेधः स्थाघ्वोरित्त्वे वक्तव्यः। उपादास्ताऽस्य स्वरः शिक्षकस्येति। मीनाति मिनोतीत्यात्त्वे कृते स्थाघ्वोरिच्चेतीत्त्वं प्राप्नोति। कुतः पुनरयं दोषो जायते। किं प्रकृतिग्रहणादाहोस्विद्रूपग्रहणात्। रूपग्रहणादित्याह। इह खलु प्रकृतिग्रहणाद्दोषो जायते उपदिदीषते। सनि मीमाघुरभलभेति। नैष दोषः। दाप्रकृतिरित्युच्यते। न चेयं दाप्रकृतिः। आकारान्तानामेजन्ताः प्रकृतयः। एजन्तानामपीकारान्ताः। न च प्रकृतेः प्रकृतिः प्रकृतिग्रहणेन गृह्यते। स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। घुसंज्ञा कस्मान्न भवति। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येत्येवं न भविष्यति। दाप्प्रतिषेधेन दैप्यनेजन्तत्वात्।

अकित्त्वसन्निपातेनात्त्वं क्रियते यदि चात्र घुसंज्ञा स्यात् स्थाघ्वोरिच्चेति कित्त्वं स्यादित्यकित्त्वस्य व्याघातः स्यादिति घुसं
ज्ञां प्रति नैवाकार आत्मानं दर्शयतीति घुसंज्ञा न प्रवर्तते। अत्र केचिदाहुः। दीङस्तु जादावात्त्वे घुसंज्ञा भवत्येवेति
प्रणिदातेति णत्वं भवति। अत एव वार्त्तिककारेण स्थाघ्वोरित्त्व इति विशेषो निर्दिष्टः। अन्ये त्वाहुः। निर्देश एवैज
न्तानामनुकरणानामात्त्वे कृते दाणदाञ्धाञ्जां चैकशेषे द्वन्द्वे च दाधा इति निर्देशाद्दीङो नास्ति प्राप्तिः। न हि तद
नुकरणस्याऽऽत्त्वमस्ति अगुणविषयत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दापूप्रतिषेध इति। दापूलवने इत्यस्यैव निषेधः स्यादित्यर्थः। अवदातमिति। तत्वमत्र प्राप्नोति। एकं तावदिति। दा पू दैपो धातुषु वान्तौ पठितव्यौ। तावत्येवेति। इत्संज्ञायां सत्यामेव प्रयोगे दाप् इत्येवायं पित्कार्यं तु लभत इत्यर्थः। अथवेति। अनुबन्धानामेकान्तत्वपक्षे उपदेश एव जन्तानामात्त्वमुच्यमानं दैपो न प्राप्नोतीति ज्ञापकोपन्यासः

दापप्रतिषेधे दैपि प्रतिषेधो न प्राप्नोति। अवदातं मुखम्। ननु चाऽऽत्वे कृते भविष्यति। तस्यात्त्वं न प्राप्नोति। किं कारणम्। अनेजन्तत्वात्। सिद्धमनुबन्धस्याऽनेकान्तत्वात्। सिद्धमेतत्। कथम्। अनुबन्धस्याऽनेकान्तत्वात्। अनेकान्ता अनुबन्धाः। पित्प्रतिषेधाद्वा। अथवा दाधाघ्वपिदिति वक्ष्यामि। तच्चाऽवश्यं वक्तव्यम्। अदाबिति ह्युच्यमाने इहाऽपि प्रसज्येत प्रणिदापयतीति। एकं तावदनेनादाबिति ब्रुवता वान्तस्य प्रतिषेधो विज्ञातुम्। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं दापप्रतिषेधे न दैपीति। परिहृतमेतत्। सिद्धमनुबन्धस्यानेकान्तत्वादिति। अथैकान्तेषु दोष एव। एकान्तेष्वपि न दोषः आत्वे कृते भविष्यति। ननु चोक्तं तस्यात्त्वं न प्राप्नोति किं कारणम् अनेजन्तत्वादिति। पकारलोपे कृते भविष्यति। न ह्ययं तदा दाप् भवति। भूतपूर्वगत्या भविष्यति। एतच्चात्र युक्तम्। यत्सर्वेष्वेव सानुबन्धकग्रहणेषु भूतपूर्वगतिर्विज्ञायते। अनैमित्तिको ह्यनुबन्धलोपस्तावत्येव भवति। अथवा आचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमनेजन्तत्वमिति। यदयमुदीचां माङो व्यतीहार इति मेङः सानुबन्धकस्याऽऽत्वभूतस्य ग्रहणं करोति। अथवा दाबेवायं न दैबस्ति। कथमवदायतीति। श्यन्विकरणो भविष्यति।

।माङ इति। मेङो ग्रहणं न माङः। मेङो व्यतिहारेण नित्ययोगात्। माङस्तु विवक्षावशाद् व्यतिमिमीत इति कादाचित्कत्वाद् व्यतिहारयोगस्य। प्रणिदानं व्यतिहार इत्येकोऽर्थः। उदीचां मेङ इति तु न कृतम्। एवं हि नाऽनुबन्धकृतमनेजन्तत्वमिति न ज्ञापितं स्यात्। अथवेति। दिवादिषु दाप् शोधने इति पठिष्यत इत्यर्थः। ॥

CC-0. In Public Domain. Digitization by eGangotri

आद्यन्तवदेकस्मिन्। एकशब्दोऽसहायवाची न संख्यावाची। बहुष्वपि व्यवस्थितस्यैकत्वसंख्याऽस्तीति किमेकस्मिन्नित्यनेन कृतं स्यात्। एकस्मिन्नित्युपमेये सप्तमीनिर्देशादाद्यन्तवदित्युपमानात् सप्तम्यन्ताद्वतिर्विज्ञायते यथा मथुरावत् पाटलिपुत्रे प्राकार इति। द्वयोर्ह्युपमानोपमेययोराधाराऽऽधेयसंबन्धप्रतिपादनाय वाक्यं प्रयुज्यते। यदि च तयोर्भिन्नविभक्तिकत्वं स्यात् उपमानोपमेयभाव एव न गम्येत। सर्वोऽतिदेशानां कार्योऽतिदेशस्य प्राधान्यात्तस्यैवेहाऽऽश्रयणम्। किमर्थमिति। व्यपदेशिवद्भावेनैव सिद्धत्वान्न कर्तव्यमित्यर्थः। इतरो मुख्ये संभवति-

आद्यन्तवदेकस्मिन्॥ किमर्थमिदमुच्यते॥ सत्यन्यस्मिन्नाद्यन्तवद्भावादेकस्मिन्नाद्यन्तवद्वचनम्॥ सत्यन्यस्मिन् यस्मात् पूर्वं नास्ति परमस्ति स आदिरित्युच्यते। सत्यन्यस्मिन् यस्मात् परं नास्ति पूर्वमस्ति सोऽन्त इत्युच्यते। सत्यन्यस्मिन्नाद्यन्तवद्भावादेतस्मात् कारणादेकस्मिन्नाद्यन्तापदिष्टानि कार्याणि न सिध्यन्ति। इष्यन्ते च स्युरिति। तान्यन्तरेण यत्नं न सिध्यन्तीत्येकस्मिन्नाद्यन्तवद्वचनम्। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्र व्यपदेशिवद्वचनम्॥ तत्र व्यपदेशिवद्भावो वक्तव्यः। व्यपदेशिवदेकस्मिन् कार्यं भवतीति वक्तव्यम्। किं प्रयोजनम्। एकाचो द्वे प्रथमार्थम्। वक्ष्यत्येकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देशादिति। तस्मिन् क्रियमाणे इहैव स्यात् पपाच पपाठ। इयाय आरेत्यत्र न स्यात्। व्यपदेशिवदेकस्मिन् कार्यं भवतीत्यत्रापि सिद्धं भवति। षत्वे चाऽऽदेशसंप्रत्ययार्थम्। वक्ष्यत्यादेशप्रत्यययोरित्यत्र यवषष्ठ्येवेति। एतस्मिन् क्रियमाणे इहैव स्यात् करिष्यति हरिष्यति। इह न स्यात् इन्द्रो मा वक्षत् स देवान्यक्षदिति। व्यपदेशिवदेकस्मिन् कार्यं भवतीत्यत्रापि सिद्धं भवति।

गौणे न स्यादित्याह। सत्यन्यस्मिन्निति। आद्यन्तौ विद्येते यस्मिन् प्रसङ्गे तदाद्यन्तवत् तस्याभावात् प्रवर्तनादित्यर्थः। क्वचिदाद्यन्तभावादिति पाठः। तत्र व्यपदेशिवद्वचनमिति। सर्वकार्यसिद्ध्यर्थं व्यापकं कर्तव्यमित्यर्थः। तत्र निमित्तसद्भावान्मुख्यो व्यपदेशो यस्याऽस्ति स व्यपदेशी यस्तु व्यपदेशहेत्वभावादविद्यमानव्यपदेशः स तेन तुल्यं वर्तते कार्यं प्रतीति व्यपदेशिवद्भवतीत्युच्यते। वक्षदिति। वचूलेट् तिप् इतश्च लोप इतीकारलोपो लेटोडाटावित्यडागमः सिप् कुत्वम्। अत्र सकारमात्रं प्रत्ययो न तु प्रत्ययस्यावयवः सकार इति षत्वं न स्यात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवचनादिति। अवचनं वचनरहितं यल्लोकविज्ञानं तस्माल्लोकव्यवहारादित्यर्थः। इह तावदियायेति। इण् धातुः प्रयो
गभेदाद्बहुरूपः। एति। इतः। यन्ति। अयनम्। आयकः। अगात्। गमयतीति। तस्यायमेकोऽजवयवइवलक्ष्यते। अथवाऽ
र्थवतो धातोरयं वर्णरूप एकोऽजित्यर्थस्य त्यागोपादानाभ्यां भवति व्यपदेश एकाजिति। एवं शिलापुत्रकस्य शरीरमि
ति अनेकक्रियाविषयस्याऽवस्थातुरिदमेकावस्थायुक्तं शरीरमित्यस्ति व्यपदेशः। एवं सिप्प्रत्यय इट् सहितोऽपिदृ
ष्टो जोषिषदित्यादौ वक्षदित्यादौ केवलोऽपीति तस्यायं सकार इति व्यपदिश्यते। लोकनिरूढश्चायं व्यवहार इ

स तर्हि व्यपदेशिवद्भावो वक्तव्यः। न वक्तव्यः॥ अवचनाल्लोकविज्ञानात् सिद्धम्॥ अन्तरेणापि वचनं लोक
विज्ञानात् सिद्धमेतत्। तद्यथा लोके शालासमुदायो ग्राम इत्युच्यते। भवति चैतदेकस्मिन्नप्येकशा
लो ग्राम इति। विषम उपन्यासः। ग्रामशब्दोऽयं बह्वर्थः। अस्त्येव शालासमुदाये वर्तते। तद्यथा। ग्रामो दग्ध
इति। अस्ति वाटपरिक्षेपे वर्तते। तद्यथा। ग्रामं प्रविष्ट इति। अस्ति च मनुष्येषु वर्तते। तद्यथा। ग्रामो गतो
ग्राम आगत इति। अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते। तद्यथा। ग्रामो लब्ध इति। तद्यः सारण्य
के ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्यैतत्प्रयुज्यते एकशालो ग्राम इति। यथा तर्हि वर्णसमुदा
यः पदं पदसमुदायश्च ऋक् ऋक्समुदायः सूक्तमित्युच्यते। भवति चैतदेकस्मिन्नप्येकवर्णं पदम् एकप
दा ऋक् एकर्चं सूक्तमिति। अत्राप्यर्थेन युक्तो व्यपदेशः। पदं नामार्थः ऋङ् नामार्थः सूक्तं नामार्थ इति। यथा
तर्हि। बहुषु पुत्रेष्वेतदुपपन्नं भवति। अयं मे ज्येष्ठोऽयं मे मध्यमोऽयं मे कनीयानिति।

ति लोकवच्छास्त्रेऽपि व्यवहाराद्गौणमुख्यन्यायोऽत्र नावतरति। पदसमुदाय इति। पादपर्यायः पदशब्दः। तथा चैक
पदा ऋगिति पाद एव विवक्षितः। न तु ऋचः कस्याश्चिदप्येकमेव पदं भवति। अत्राऽप्यर्थेनेति। पदादीनां योऽर्थः
सोऽन्यपदार्थ इत्यर्थः। अभेदोपचाराच्चार्थ एव पदादिभिरभिधीयते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमेवमेज्येष्ठइति। प्रथमरूपतयाध्यवसायान्मध्यमकार्यकरणाच्चमध्यमइतिव्यपदिश्यते। अन्योनजनितेतिबुद्ध्याकनीयानितिव्यपदिश्यते। असूतायामिति। बहुकृत्वोऽपिप्रसूताप्रथमपुत्रेणकाचिद्धन्यतेतथायाप्रसोष्यतेसाऽपिकाचित्पूर्वोत्पन्नेनपुत्रेणहन्यतइत्युभयोरुपादानम्। नाऽपिप्रसूतानाऽपिप्रसोष्यतेकुक्षिस्थेनैवगर्भेणहताप्रथमगर्भेणहतेत्युच्यते। अपत्यपर्यायोगर्भशब्दः। तत्रतस्याएवयोग्यताध्यवसायेनभाविगर्भविवक्षयाप्रथमगर्भेणहतेत्युच्यतेस्त्र्यन्तरेषुबहुपुत्रत्वेसतिआद्यगर्भस्यप्रथमव्यवहारदर्शनात् तथाविधस्यप्रथमगर्भव्यवहारः। अनेत्येति। बहुकृत्वोऽप्यागतःपूर्वमागमनंस्मृत्वाप्रथमव्यपदेशंतत्रमुख्यंकरोत्येव। आजिगमिषु-

भवतिचैतदेकस्मिन्नपिअयमेवमेज्येष्ठोऽयमेवमेमध्यमोऽयमेवमेकनीयानिति। तथाऽसूतायामसोष्यमाणायांचभवतिप्रथमगर्भेणहतेति। तथाऽनेत्याऽनाजिगमिषुराहेदंमेप्रथममागमनमिति। आद्यन्तवद्भावश्चशक्योऽवक्तुम्। कथम्। अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोःसिद्धमेकस्मिन्। अपूर्वलक्षणआदिरनुत्तरलक्षणोऽन्तएतच्चैकस्मिन्नपिभवति। अपूर्वानुत्तरलक्षणत्वादेतस्मात्कारणादेकस्मिन्नाद्यन्तापदिष्टानिकार्याणिभविष्यन्तीतिनार्थआद्यन्तवद्भावेन। गोनर्दीयस्त्वाहसत्यमेतत्सतित्वन्यस्मिन्निति।

र्भावीन्यागमनानिबुद्ध्याव्यवस्थाप्यकुर्यादेवप्रथमव्यवहारंयस्तुसकृदेवागतःसोऽपिकरोतिप्रथमव्यवहारमितिप्रतिपादनार्थमनेत्यानाजिगमिषुरित्युपात्तम्। तत्रान्यसंबन्धिषुबहुष्वप्यागमनेषुआद्यस्यप्रथमव्यवहारदर्शनात् तथाविधत्वात् स्यादेकस्मिन्नप्यागमनेप्रथमव्यवहारः। इदानींयोगंप्रत्याख्यातुमाह। अपूर्वेति। यद्यपिबहुष्ववस्थितेष्वाद्यन्तशब्दौप्रयुज्येतेतथाप्यपूर्वानुत्तरत्वमात्रमेतयोःप्रवृत्तिनिमित्तंतच्चैकस्मिन्नप्यस्तीतिनार्थःसूत्रेण। भाष्यकारस्त्वाह। सतित्वन्यस्मिन्निति। नह्यनपेक्षितयोगिनोराद्यन्तयोःप्रवृत्तिरित्यर्थः। तस्मादेकस्मिन्मुख्यआद्यन्तव्यपदेशोनास्तीतिकर्तव्योऽयंयोगः। यद्यपिलौकिकेनव्यपदेशिवद्भावेनाद्यन्तव्यपदेशएकस्मिन्नपिसिध्यति। तथापिगौणत्वात्कार्येणनभवितव्यमितियस्यभ्रान्तिःस्यात्तंप्रतियोगोऽयमारब्धः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रत्ययञ्ञिदाद्युदात्तत्वे इति। प्रत्ययस्याद्युदात्तत्वं ञ्निति चाद्युदात्तत्वमित्यर्थः। कथं पुनर्भिन्नविभक्त्योर्द्वन्द्व उच्य
ते। प्रत्ययस्य यदाद्युदात्तत्वं तस्य प्रत्ययोऽपि विषय इति प्रत्ययेऽपि तदुच्यते। यद्वा। ञ्निति यदाद्युदात्तत्वं तद्
ञ्नितोऽपि संबन्धि भवतीति नाऽस्ति भिन्नविभक्तित्वम्। ऋदोरबित्याद्युदात्तत्वनिवृत्त्यर्थापित्त्वाद्धिङ्गादेकाचो
ऽपि प्रत्ययस्याद्युदात्तत्वं भविष्यतीति चेदकारविषयमेव लिङ्गं स्यादितीकारयोः प्रत्यययोराद्युदात्तत्वं न स्यात्।
विशेषणार्थं वापित्करणं स्यात्। थाथादिसूत्रे इत्यज्ञापकं स्यात्। गार्ग्य इति। अत्र परत्वाद्यस्येति लोपे कृते आ-

कानि पुनरस्य योगस्य प्रयोजनानि॥ आदिवत्त्वे प्रयोजनं प्रत्ययञ्ञिदाद्युदात्तत्वे॥ प्रत्ययस्यादिरुदा
त्तो भवतीति। इहैव स्यात् कर्तव्यं तैत्तिरीयः। औपगवः कापटव इत्यत्र न स्यात्। ञ्नित्यादिर्नित्यमिति।
इहैव स्याद् अहिचुम्बकायनिः। आग्निवेश्यः। गार्ग्यः कृतिरित्यत्र न स्यात्। वलादेरार्धधातुकस्येट्
प्रयोजनम्। आर्धधातुकस्येड्वलादेरितीहैव स्यात् करिष्यति हरिष्यति। जोषिषद् मन्दिषदित्यत्र
न स्यात्। यस्मिन्विधिस्तदादित्वे प्रयोजनम्। वक्ष्यति यस्मिन्विधिस्तदादावल्ग्रहण इति। तस्मिन्
क्रियमाणेऽजचि श्नुधातुभ्रुवां य्वोरियङुवङौ इहैव स्यात् श्रियः भ्रुवः। श्रियौ भ्रुवौ इत्यत्र न स्या
त्। अजाद्याट्त्वे प्रयोजनम्। आडजादीनाम् इहैव स्याद् ऐहिष्ट ऐक्षिष्ट। ऐष्ट अध्यैष्टेत्यत्र न स्या
त्। अथान्तवत्त्वे कानि प्रयोजनानि। अन्तवद् द्विवचनान्तप्रगृह्यत्वे प्रयोजनम्। ईदूदेद्द्विवच
नं प्रगृह्यमितीहैव स्यात् पचेते इति पचेथे इति। खट्वे इति माले इतीत्यत्र न स्यात्।

दित्वाभावात्प्रकृतेराद्युदात्तत्वं न प्राप्नोति। स्वरविधौ स्थानिवद्भावप्रतिषेधाच्च नास्ति ह्यच्त्वम्। स्वरविधौ व्यञ्ज
नस्याऽविद्यमानत्वान्नास्ति हलपेक्षमप्यादित्वम्। कृतिरिति। क्तिनो नित्त्वं तादौ च निति कृत्यतावित्येवमर्थं स्यात्।
सौवर्यः सप्तम्यस्तदन्तसप्तम्य इत्येतदनाश्रित्येतदुक्तम्। जोषिषदिति। लिङर्थे लेट्। इट ईटीति च ज्ञापकं सिज्विष
यमेव स्यादिति सिप इडा न स्यात्। यस्मिन्विधिरिति। स्वस्य च रूपस्येति नानुवर्तते इति प्रयोजनत्वेनोपन्यासः। अजा-
द्याट्त्वे इति। सूत्रकाराऽपेक्षया प्रयोजनोपन्यासः। वार्तिककारस्तु अजादीनामटा सिद्धमित्याह। अन्तवदिति। येन ॥
विधिस्तदन्तस्येत्यनेनैव गतार्थं प्रपञ्चार्थोऽयमुपन्यासः।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा· कै· ८८ कुरुत इति। अर्थवताव्यपदेशिवद्भावात् तपरत्वेऽकारस्यानर्थकत्वादिह प्रयोजनत्वेनोपन्यासः। आभ्यामिति। अत्र ११५
द्वे अन्तवत्त्वे उपयुज्येते। अकारान्तस्याङ्गस्य अलोऽन्त्यस्य दीर्घो भवतीति पृथक् प्रयोजनत्वेनोपन्यासः। एयमि-
ति। ईङो रूपम्। इणस्तु इत्यमिति भवति॥ तरप्तमपौ घः॥ आतिशायनिकप्रत्ययप्रकरण एव तादीघः पितौ घ इति
वा कर्तव्ये प्रकरणोत्कर्षेण संज्ञाकरणं स्वार्थेऽपि तरबस्तीति सूचनार्थम्। तेनाल्पाचूतरमिति सिद्धं भवतीत्याहुः।
नदीतर इति। तरते ऋदोरप् इत्यप्। सर्वत्र चाऽनुबन्धाः समर्थमाणा एव कार्यं प्रति हेतुत्वं लभन्त इति घसंज्ञाप्रा

मिदचोऽन्त्यात्परः प्रयोजनम्। इहैव स्यात् कुण्डानि वनानि। तानि यानीत्यत्र न स्यात्। अचोऽन्त्यादि टि
प्रयोजनम्। टित आत्मनेपदानां टेरे इतीहैव स्यात् कुर्वाते कुर्वाथे। कुरुते कुर्वे इत्यत्र न स्यात्। अलो
ऽन्त्यस्य प्रयोजनम्। अतो दीर्घो यञि सुपि च इहैव स्यात् पटाभ्यां घटाभ्यामिति। आभ्यामित्य
त्र न स्यात्। येन विधिस्तदन्तत्वे प्रयोजनम्। अचो यत् इहैव स्यात् चेयम् जेयम्। एयम् अध्येयम्
इत्यत्र न स्यात्। आद्यन्तवदेकस्मिन् कार्यं भवतीत्यत्रापि सिद्धं भवति॥ तरप्तमपौ घः॥ घसंज्ञायां न
दीतरे प्रतिषेधः॥ घसंज्ञायां नदीतरे प्रतिषेधो वक्तव्यः। नद्यास्तरो नदीतरः। घसंज्ञायां नदीतरेऽप्रति
षेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। घसंज्ञा कस्मान्न भवति। तरब्ग्रहणं ह्यौपदेशिकम्। औप
देशिकस्य तरपो ग्रहणम्। न चैष उपदेशे तरप् शब्दः। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं
गंस्यते। इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते।

प्तिः। साहचर्यं चेह व्यवस्थाहेतुः सर्वत्र नाश्रीयते। तथाहि। द्वित्रिश्चतुरिति कृत्वोऽर्थे इति कृत्वोऽर्थग्रहणं चतुश्शब्द
विशेषणार्थं कृतमन्यथा हि त्रिशब्दसाहचर्याच्चतुश्शब्दोऽपि कृत्वोऽर्थ एव गृहीष्यत इति किं कृत्वोऽर्थ राम:
ग्रहणेन। अप्रतिषेध इति। न प्रतिषेध इति प्रतिषेधनक्रिया नञा निषिध्यते। भाष्यकारस्तु वस्त्वर्थं व्या- ८८
चष्ट अनर्थकः प्रतिषेध इति। औपदेशिकमिति। उपदेशः प्रयोजनमस्य तत्र वा भव औपदेशिकम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यन्नास्येति। अनुबन्धयुक्तमित्यर्थः। नचैषइति। काल्यनिकमस्यतरपूत्वंनतुसाक्षान्निर्दिष्टम्। समानाधिकरणे
ष्विति। आतिशायनिकश्च स्वार्थिकत्वात्समानाधिकरणः। यदातर्हीति। ननुतीर्णेरितिभवितव्यम्। एवं तर्हीति-
येतइतितरइतिसामान्येनपदंसंस्क्रियतेपश्चान्नद्याविशेष्यतेइतिनदोषः। स्त्रीलिङ्गेष्विति। स्वार्थिकश्च प्रकृति
लिङ्गानुविधानात्स्त्रीलिङ्गः। महिषीरूपमिवेति। इवशब्दोभिन्नक्रमः। तेनाऽयमर्थः। महिषीइवेयमाकृतिरि

यन्नास्यैतद्रूपमिति। रूपनिर्ग्रहश्च शब्दस्यनान्तरेणलौकिकंप्रयोगम्। तस्मिंश्च लौकिकेप्रयोगेसानु
बन्धकानांप्रयोगोनास्तीतिकृत्वाद्वितीयःप्रयोगउपास्यते। कोऽसौ। उपदेशोनाम। नचैषउपदेशेत
रपूशब्दः। अथवाऽस्त्वस्यघसंज्ञाकोदोषः। घादिषुनद्याह्रस्वोभवतीतिह्रस्वत्वंप्रसज्येत। समानाधि
करणेषुघादिष्वित्येवंतत्। यदातर्हिसैवनदीसएवतरस्तदाप्राप्नोति। स्त्रीलिङ्गेषुघादिष्वित्येवंत
त्। अवश्यंचैतदेवंविज्ञेयम्। समानाधिकरणेषुघादिष्वित्युच्यमानेइहप्रसज्येत। महिषीरूपमि
वब्राह्मणीरूपमिवेति॥ बहुगणवतुडतिसंख्या॥ संख्यासंज्ञायांसंख्याग्रहणम्॥ संख्यासंज्ञायांसं
ख्याग्रहणंकर्तव्यम्। बहुगणवतुडतयःसंख्यासंज्ञाभवन्ति। संख्याचसंख्यासंज्ञाभवतीतिव
क्तव्यम्। किंप्रयोजनम्। संख्यासंप्रत्ययार्थम्। एकादिकायाःसंख्यायाःसंख्याप्रदेशेषुसंख्येत्येष
संप्रत्ययोयथास्यात्। ननुचैकादिकासंख्यालोकेसंख्येतिप्रतीतातेनास्याःसंख्याप्रदेशेषुसंख्या
संप्रत्ययोभविष्यति। एवमपिकर्तव्यम्॥ किंप्रयोजनम्। इतरथाह्यसंप्रत्ययोऽकृत्रिमत्वाद्यथालोके। अ
क्रियमाणेहिसंख्याग्रहणेएकादिकायाःसंख्यायाःसंख्येत्येषसंप्रत्ययोनस्यात्। किंकारणम्। अकृ
त्रिमत्वात्। बह्वादीनांकृत्रिमासंज्ञा।

ति। तत्रसुप्सुपेतिसमासेकृतेह्रस्वत्वंस्यात्। बहुगणवतुडतिसंख्या। संख्यासंप्रत्ययार्थमिति। संख्यायाएकादिकायाःसंख्या
प्रदेशेषुसंप्रत्ययार्थमित्यर्थः। ननुचेति। यथापशुरपत्यंदेवतेतिलौकिकोऽर्थोगृह्यतेतथैकादिकाऽपिसंख्याग्रहीष्यतइत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्रिमाऽकृत्रिमयोरिति। न्यायोऽयम्। तथाहि। सर्वार्थाऽभिधानशक्तियुक्तः शब्दो यदा विशिष्टेऽर्थे संव्यवहाराय नियम्यते तदा तत्रैव प्रतीतिं जनयति नान्यत्र। नदीपौर्णमासीति। यूस्त्र्याख्यौ नदीति संज्ञाविधानात् संज्ञिनो ग्रहणं प्राप्तं न तु स्वरूपस्य। अशब्दसंज्ञेति निषेधात्। पौर्णमासीति। नियमार्थं पौर्णमास्याग्रहायणीग्रहणमीकारान्तानां न स्यादिति चेत्। एवमप्यृ पौर्णमास्याग्रहायणीभ्य इति वक्तव्यं स्यादूकारग्रहणेन च नदीसंज्ञकमेवो-

कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति। यथा लोके। तद्यथा लोके गोपालकमानय कटजकमानयेति। यस्यैषा संज्ञा भवति स आनीयते न यो गाः पालयति यो वा कटे जातः। यदि तर्हि कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति। नदीपौर्णमास्याग्रहायणीभ्य इति अत्रापि प्रसज्येत। पौर्णमास्याग्रहायणीग्रहणसामर्थ्यान्न भविष्यति। तद्धि शेषेभ्यस्तर्हि प्राप्नोति गङ्गायमुनेइति। एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति न तद्धि शेषेभ्यो भवतीति। यदयं विपाट्शब्दं शरत्प्रभृतिषु पठति। इह तर्हि प्राप्नोति। नदीभिश्चेति। बहुवचननिर्देशान्न भविष्यति। स्वरूपविधिस्तर्हि प्राप्नोति। बहुवचननिर्देशादेव न भविष्यति। एवं च नचेदमकृतं भवति कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्यय इति। न च कश्चिद्दोषो भवति॥ उत्तरार्थं च॥ उत्तरार्थं च संख्याग्रहणं कर्तव्यम्। ष्णान्ता षट्। षकारनकारान्ता याः संख्या याः षट्संज्ञा यथा स्यात्। इह माभूत्। पामानो विप्रुष इति॥

कारान्तं पौर्णमास्याग्रहायणीशब्दसाहचर्याद्गृहीष्यते। तद्धि शेषेभ्य इति। गङ्गादिभ्यः। यदयमिति। नित्यार्थः पाठः स्यादिति चेत्। व्यवस्थितविभाषया विपाट्शब्दस्य नित्यष्टज् भविष्यतीत्यदोषः। बहुवचनेति। अन्यथाऽऽशनद्यादूत्यादौ यथैकवचनेन निर्देशस्तथेहाऽपि कर्तव्यः स्यात्। नचेदमकृतमिति। अनाश्रितमित्यर्थः
। उत्तरार्थं चेति। अयं हि सूत्रोपात्तः संख्याशब्दः स्वरूपपदार्थकः। उत्तरत्र संज्ञिनिर्देशेन प्रयोजनम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहार्थेनेति। इहार्थो यस्येति सामान्यविशेषभावान्नपौनरुक्त्यम्। आतश्चेति। इतश्चेत्यर्थः। अर्थः सामर्थ्यम्। यथा गोपालकमानय माणवकमध्यापयिष्यतीति यष्टिहस्तस्याध्यापनाऽसंभवात्संज्ञिनो ग्रहणम्। प्रकरणं प्रस्तावो यथा भोजनप्रकरणे सैन्धवमानयेति लवणे प्रतीतिर्गमनप्रकरणे त्वश्वे। ग्राम्यमिति। ऊहितुमसमर्थम्। पांशुलपादमिति। अचिरोषितम्। अत एवाऽप्रकरणज्ञम्। उभयगतिरिति। किं संज्ञेयं यस्य कस्यचिन्निर्दिष्टा स्यादुत यष्टिहस्तोऽस्य विवक्षितः स्यादिति संदेहवान्भवतीत्यर्थः। साधीयो वेति। यो मम प्रसिद्धः सोऽनेन चोदितो न च ममैवं संज्ञकः प्रसिद्ध इत्ये

इहार्थेन तावन्नार्थः संख्याग्रहणेन। ननु चोक्तम्। इतरथा ह्यसंप्रत्ययोऽकृत्रिमत्वाद्यथा लोक इति। नैष दोषः। अर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति। अर्थो वाऽस्यैवं संज्ञकेन भवति प्रकृतं वा तत्र भवति। इदमेवं संज्ञकेन कर्तव्यमिति। आतश्चार्थात्प्रकरणाद्वा। अङ्ग हि भवान्ग्राम्यं पांशुलपादमप्रकरणज्ञमागतं ब्रवीतु गोपालकमानय कटजकमानयेति। उभयगतिस्तस्य भवति साधीयो वा यष्टिहस्तं गमिष्यति। यथैव तर्ह्यर्थात्प्रकरणाद्वा लोके कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति। एवमिहापि प्राप्नोति। जानाति ह्यसौ बह्वादीनामियं संज्ञा कृतेति। न यथा लोके तथा व्याकरणे। उभयगतिः पुनरिह भवति। अन्यत्राऽपि नावश्यमिहैव। तद्यथा। कर्तुरीप्सिततमं कर्मेति कृत्रिमा कर्मसंज्ञा। कर्मप्रदेशेषु चोभयगतिर्भवति।

वं मन्यते। लोके च गोपालकशब्दः संज्ञिनि नियम्यमानः संज्ञ्यन्तरं निवर्तयति क्रियानिमित्तं त्वर्थं न निरस्यति तुल्यजातीयविषय एव हि नियमो भवति। एवमिहापीति। बह्वादय एवाऽत्र संख्यात्वेन प्रकृता इति भावः। न यथा लोक इति। संख्याशब्दो हि बह्वादिप्रतिपादनाय संज्ञात्वेन विनियुक्तो न त्वेकादिसंख्यानिरासाय। अधिकार्थप्रतिपत्त्यर्थत्वादिह संज्ञाकरणस्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मणि द्वितीयेति। ङ्याप्प्रातिपदिकादनभिहिते कर्मणि संख्यायां द्वितीयादिधीयते। न च क्रियायाः संख्या संभव-
तीति सामर्थ्यात्कारकस्य ग्रहणम्। कर्तरि कर्मव्यतिहार इत्यत्र तु धातोः साक्षात्क्रियायां वृत्त्या क्रियाया एव ग्रहण-
म्। कण्वमेघेभ्यः करण इति। तव्यादिप्रत्यययोस्त्वर्थधातुसंज्ञा क्रियते क्रियावाचिनश्च तव्यादयः साधने उत्पद्य-
न्त इति सामर्थ्यात् क्रियाग्रहणम्। विप्रतिषिद्धमिति। द्वन्द्वावयवानां प्रत्ययनभिधायित्वादधिकरणद्रव्यं गृह्य

कर्मणि द्वितीयेति कृत्रिमस्य ग्रहणम्। कर्तरि कर्मव्यतिहार इत्यत्राऽकृत्रिमस्य। तथा साधकतमं क-
रणमिति कृत्रिमा करणसंज्ञा। करणप्रदेशेषु चोभयगतिर्भवति। कर्तृकरणयोस्तृतीयेति कृत्रिमस्य
ग्रहणम्। शब्दवैरकलहाभ्रकण्वमेघेभ्यः करण इत्यत्राऽकृत्रिमस्य। तथा आधारोऽधिकरणमिति
कृत्रिमा अधिकरणसंज्ञा। अधिकरणप्रदेशेषु चोभयगतिर्भवति। सप्तम्यधिकरणे चेति कृत्रिमस्य
ग्रहणम्। विप्रतिषिद्धं चानधिकरणवाचीत्यत्राऽकृत्रिमस्य। अथवा नेदं संज्ञाकरणं तद्वदतिदेशो
ऽयम्। बहुगणवतुडति संख्यावद्भवन्तीति। स तर्हि वतिनिर्देशः कर्तव्यः। न कर्तव्यः। नह्यन्तरेण
वतिमतिदेशो गम्यते। अन्तरेणापि वतिमतिदेशो गम्यते। तद्यथा। एष ब्रह्मदत्तः। अब्रह्मदत्तं ब्र-
ह्मदत्त इत्याह। ते न मन्यामहे ब्रह्मदत्तवदयं भवतीति। एवमिहाप्यसंख्यां संख्येत्याह। संख्याव-
दिति गम्यते। अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति। भवत्येकादिकायाः संख्यायाः संख्याप्रदेशेषु संप्र-
त्यय इति। यदयं संख्याया अतिशदन्तायाः कन्निति तिशदन्तायाः प्रतिषेधं शास्ति। कथं कृत्वा ज्ञा-
पकम्। नहि कृत्रिमा त्यन्ता शदन्ता वा संख्याऽस्ति। ननु चेयमस्ति डतिः। यत्तर्हि शदन्तायाः प्रतिषे-
धं शास्ति। यच्चाऽपि त्यन्तायाः प्रतिषेधं शास्ति। ननु चोक्तं डत्यर्थमेतत्स्यात्। अर्थवद्ग्रहणे नानर्थकस्येति।

ते। तद्वदतिदेशोऽयमिति। संख्याकार्यातिदेशोऽयमित्यर्थः। यदि हि संज्ञा स्याद् घुभादिसंज्ञावदेकादयः क्रि- राम:
येत तस्माद्धेतोः किं कार्याभिधायी संख्याशब्द उपादीयमानोऽतिदेशार्थत्वमस्य बोधयति। अथवेति। गुरुसंज्ञाकर- ९०
णादेकादयः संख्याशब्देन प्रदेशेषु न त्यज्यन्त इति लिङ्गेनाप्यनुमीयत इत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थवदिति। ननूभयसंभवे द्वयं परिभाषोपतिष्ठते। डत्यन्ता च कृत्रिमास्ति। डतेश्चातिशब्दोऽनर्थक एवेति तस्यैव निषेधः स्यादित्यज्ञापकस्त्यन्तायाः प्रतिषेधः। नैष दोषः। अतिशदन्ताया इत्युच्चारणकाल एवार्थवतस्तिशब्दस्य ग्रहणमिति प्रतीतिरिति ज्ञापकत्वमेव प्रतिषेधस्य। अथवेति। ननु महत्याः संज्ञायाः करणं तदर्थानुगतानामुपात्तानामेव संज्ञिनां भवतु संज्ञा यथा सर्वादीनामेव सर्वनामसंज्ञा न त्वधिकानाम्। तेन बहुगणशब्दयोः संघवैपुल्यवाचिनोः संज्ञा मा भूदेकादीनां तु कथं स्यात्। नैष दोषः। इहाऽन्वर्थसंज्ञाकरणेन तावदनुरूपः संज्ञी सर्व आक्षिप्यते। तेनैका-

अर्थवतस्तिशब्दस्य ग्रहणं न च डतेस्तिशब्दोऽर्थवान्। अथवा महतीयं संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनम्। अन्वर्थसंज्ञा यथा विज्ञायेत। संख्यायतेऽनयेति संख्या। एकादिकया चापि संख्यायते। उत्तरार्थेन चापि नार्थः संख्याग्रहणेन। इदं प्रकृतमुत्तरत्राऽनुवर्तिष्यते। इदं वै संज्ञार्थमुत्तरत्र च संज्ञिविशेषणेनार्थः। न चान्यार्थं प्रकृतमन्यार्थं भवति। न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति। नहि गोधा सर्पन्ती सर्पणादहिर्भवति। यत्तावदुच्यते न चाऽन्यार्थं प्रकृतमन्यार्थं भवतीति। अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा। शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयते उपस्पृश्यते च शालयश्च भाव्यन्ते। यदप्युच्यते न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति नहि गोधा सर्पन्ती सर्पणादहिर्भवतीति। भवेद्द्रव्येष्वेतदेवं स्यात्।

दीनां तावद्ग्रहणं भवति पश्चाद्बहुगणवतुडतीति भूर्यादिनिवृत्त्यर्थं नियमार्थं व्याख्यायते। अत एव संघवैपुल्यवृत्त्योर्बहुगणशब्दयोः संज्ञा न भवति। तद्वदतिदेशपक्षेऽपि परस्परसाहचर्यादेव संख्यावाचिनोरेव भूर्यादिनिवृत्तये नियमायाऽतिदेशः क्रियत इति अतिप्रसङ्गो न भवति। संज्ञिविशेषणेनार्थ इति। शान्तेत्यनेन विशिष्टं संज्ञिनं प्रतिपादयितुमुपयोग इत्यर्थः। न चान्यार्थमिति। एकशब्दत्वदर्शनादिति भावः। भवतु तर्हि प्रतियोगं शब्दभेद इत्याह। न खल्वपीति। यथा गोधा देशान्तरगमनमात्रेण गोधात्वं न जहाति एवं शब्दोऽपि रूपान्तरं न गृह्णात्येवेत्यर्थः। अन्यार्थमपीति। पदार्थानां शक्तिवैचित्र्यात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दस्त्विति। स्वरितत्वाद्वाक्यान्तरे शब्दान्तरं वाक्यार्थोऽनुग्राहि वस्तुप्रतिपादनयोग्यमनुमीयते। सादृश्यात्तु तत्त्वाऽध्यवसाय इत्यर्थः। सापेक्षोऽयमिति। स्त्रीलिङ्गेन निर्देशः कृतः। तत्र प्रकृतत्वादन्यपदार्थत्वेन संख्या स्वरितत्वेन विनाऽप्यपेक्ष्यत इत्यर्थः। अध्यर्धग्रहणं चेति। वार्तिके संख्याग्रहणं कर्तव्यत्वेन स्थितं तदपेक्षया समुच्चयार्थश्चशब्दः। विध्यर्थं चेदं ग्रहणम्। अध्यर्धशब्दस्य त्रिभागचतुर्भागादिशब्दवदसंख्यावाचित्वात्। अर्धशब्दश्चैकदेशवाची न संख्यावाची। एकदेशादिशब्दवत्। तस्याऽधिशब्देन समासे कृते यौगिकोऽर्थः प्रतीयते न संख्या। अध्यर्धशूर्पमिति। अध्यर्धेन शूर्पेण क्री-

शब्दस्तु खलु येन येन विशेषणाभिसंबध्यते तस्य तस्य विशेषको भवति। अथवा सापेक्षोऽयं ष्णान्तेति निर्देशः क्रियते। न चाऽन्यत्किंचिदपेक्ष्यमस्ति तेन संख्यामेवापेक्षिष्यामहे। अध्यर्धग्रहणं च समासकन्विध्यर्थम्॥ अध्यर्धग्रहणं च कर्तव्यम्। किं प्रयोजनम्। समासकन्विध्यर्थम्। समासविध्यर्थम्। कन्विध्यर्थं च। समासविध्यर्थं तावत्। अध्यर्धशूर्पम्। कन्विध्यर्थम्। अध्यर्धकम्। लुकि चाऽग्रहणम्। लुकि चाऽध्यर्धग्रहणं न कर्तव्यं भवति। अध्यर्धपूर्वद्विगोर्लुगसंज्ञायामिति। द्विगोरित्येव सिद्धम्॥ अर्धपूर्वपदश्च पूरणप्रत्ययान्तः॥ अर्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासंज्ञो भवतीति वक्तव्यम्। किं प्रयोजनम्। समासकन्विध्यर्थमेव। समासविध्यर्थं कन्विध्यर्थं च। समासविध्यर्थं तावत्। अर्धपञ्चमशूर्पम्। कन्विध्यर्थम्। अर्धपञ्चमकम्॥ अधिकग्रहणं चालुकि समासोत्तरपदवृद्ध्यर्थम्॥ अधिकग्रहणं चालुकि कर्तव्यम्। किं प्रयोजनम्। समासोत्तरपदवृद्ध्यर्थम्। समासविध्यर्थमुत्तरपदवृद्ध्यर्थं च।

तमिति दिक्संख्ये इत्यनुवर्तमाने तद्धितार्थेति समासः। ततः शूर्पादञन्यतरस्यामिति अञ्ठञौ वा अध्यर्धपूर्वेति लुक्। अध्यर्धकमिति। संख्याया अतिशदन्तायाः कन्निति कन्। द्विगोरित्येव सिद्धमिति। समासविध्यर्थमिति सम्बन्धसामान्ये षष्ठी। तेन समासे विधीयमाने समासनिमित्ते चान्यस्मिन्कार्ये विधीयमान इत्यर्थः। तेन द्विगुनिमित्तो लुगपि लभ्यते। अन्ये त्वाहुः। अध्यर्धशब्दः संख्यावाच्येव। तथा हि गण्यते। एकोऽध्यर्धो द्वौ अध्यर्धौ अर्द्धतृतीय इति। तन्मते नियमार्थमध्यर्धशब्दस्यैव संख्यात्वेन ग्रहणं यथा स्यात् सार्धादीनां माभूदिति। वाक्यभेदेन च द्वितीयो नियमस्तस्य च समासकन्विध्यर्थं संख्यात्वं न कार्यान्तरार्थमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिकषाष्टिक इति। अधिकया षष्ट्या क्रीत इति संख्याविशेषणमधिकशब्दो न संख्येति वचनम्। तद्धितार्थेति समासः। प्राग्वतेष्ठञ्। अलुकीति वचनात्तु किं कर्तव्ये संख्यासंज्ञा नास्तीत्यध्यर्धपूर्वेति लुङ् न भवति। ततः संख्यायाः संवत्सरसंख्यस्य चेति उत्तरपदवृद्धिः। ननूत्तरपदवृद्ध्यर्थमिति वचनाल्लुङ् न भविष्यति किमलुकीत्यनेन। नैतदस्ति। अर्हत्यर्थादुपरेष्वर्थेषु यः प्रत्ययस्तस्य लुगभावात्तत्रैवोत्तरपदवृद्धिः स्यात्। ज्ञापकात्सिद्धमिति। एकादिवन्नियतसंख्यावाचित्वं बह्वादीनां नास्तीति ज्ञापकाश्रयः। योगापेक्षमिति। अस्य योगस्य प्रत्याख्यानादेतद्योगापेक्षमिति न बोद्धव्यम्। किं तु योगानपेक्षं तदिति योगापेक्षम्। यद

समासविध्यर्थं तावत्। अधिकषाष्टिकः। अधिकसाप्ततिकः। उत्तरपदवृद्ध्यर्थम्। अधिकषाष्टिकः। अधिकसाप्ततिकः। अलुकीति किमर्थम्। अधिकषाष्टिकः। अधिकसाप्ततिकः। बहुव्रीहौ चाग्रहणम्। बहुव्रीहौ चाधिकशब्दस्य ग्रहणं न कर्तव्यं भवति। संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येय इति। संख्येत्येव सिद्धम्। बह्वादीनामग्रहणम्। बह्वादीनां ग्रहणं शक्यमकर्तुम्। केनेदानीं संख्याप्रदेशेषु संख्यासंप्रत्ययो भविष्यति। ज्ञापकात्सिद्धम्। ज्ञापकं किम्। यदयं वतोरिडिति संख्याया विहितस्य कनो वत्वन्तादिटं शास्ति। वतोरेवतज्ज्ञापकं स्यात्। नेत्याह। योगापेक्षं ज्ञापकम्॥ ॥ष्णान्ता षट्॥ षट्संज्ञायामुपदेशवचनम्॥ षट्संज्ञायामुपदेशग्रहणं कर्तव्यम्। उपदेशे षकारनकारान्ता संख्या षट्संज्ञा भवतीति वक्तव्यम्॥ किं प्रयोजनम्। शताद्यष्टनोर्नुम्नुडर्थम्। शतानि सहस्राणि। नुमि कृते ष्णान्ता षडिति षट्संज्ञा प्राप्नोति। उपदेशग्रहणान्न भवति। अष्टानामित्यत्राऽऽत्वे कृते षट्संज्ञा न प्राप्नोति।

यं बहुपूगगणसङ्घस्य तिथुक् षट्कतीति डटि परत आगमं शास्ति तज्ज्ञापयति भवति संख्याकार्यमिति॥ ॥ष्णान्ता॥ षट्संज्ञायामिति। प्रकृतिप्रत्ययादिविभागेन प्रतिपादनं गुरोः श्रापणमुपदेशः। तेन प्रकृतिप्रत्ययाद्युपदेशे या षकारनकारान्ता संख्या सा षट्संज्ञेत्यर्थः। नुम्नुडर्थमिति। अर्थशब्दः प्रयोजनवाची तत्र नुमि शतानीत्यादौ षट्संज्ञानिवृत्तिः प्रयोजनम्। नुटि तु विधीयमाने षट्संज्ञाप्रवृत्तिः प्रयोजनम्। अष्टानामिति। परत्वान्नित्यत्वाच्चाऽऽत्वे कृते नुटोऽप्राप्तिः कार्यकालत्वात्संज्ञायाः प्रवृत्तेर्नास्त्यन्तरङ्गत्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टनो दीर्घेति। तत्र हि दीर्घग्रहणमष्टस्विति सुप उदात्तत्वनिवृत्त्यर्थं क्रियते। यदि च कृतात्वस्य षट्संज्ञा न स्यात्तदाऽष्टस्विति परत्वात् षट्स्वरो झल्लुपोत्तममिति भविष्यतीति किं दीर्घग्रहणेन। कृतं च तत् कृतात्वस्याऽपि षट्संज्ञां ज्ञापयति तत-श्चाऽपवादत्वात् षट्स्वरोऽनेन बाध्यत इति दीर्घपक्ष इवादीर्घपक्षेऽपि विभक्तेः स्वरः स्यादिति कर्तव्यं दीर्घग्रहणम्॥ एकाल्लादिति। संख्यावाचित्वाऽभ्युपगमवादी व्यत्ययेन बहुवचनं मन्यते। अन्यवाचित्वाश्रयं तूत्तरम्। इह तर्हीति। द्वाभ्यामिति। षट्स्वरः स्यात्। सप्तमइति। अष्टाभ्य इति। कृतात्वानुकरणादौश्त्वविधानसामर्थ्याच्च लुङ् विधीयते॥ हलीति। त

उपदेशग्रहणाद्भवति। उक्तं वा। किमुक्तम्। इह तावच्छतानि सहस्राणीति सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति। अष्टनोऽप्युक्तम्। किमुक्तम्। अष्टनो दीर्घग्रहणं षट्संज्ञाज्ञापकमाकारान्तस्य नुडर्थमिति॥ अथवा आकारोऽप्यत्र निर्दिश्यते षकारान्ता नकारान्ता आकारान्ता च संख्या षट्संज्ञा भवतीति। इहापि तर्हि प्राप्नोति। सधमादो द्युम्न एकास्ताः। एका इति। नैष दोषः। एकशब्दोऽयं बह्वर्थः। अस्त्येव संख्यापदम्। तद्यथा। एको द्वौ बहव इति। अस्त्यसहायवाची। तद्यथा। एकाग्नयः। एकहलानि। एकाकिभिः क्षुद्रकैर्जितमिति। असहायैरित्यर्थः। अस्त्यन्यार्थे वर्तते। तद्यथा। प्रजामेका रक्षत्यूर्जमेकेति। अन्येत्यर्थः। सधमादो द्युम्न एकास्ताः। अन्या इत्यर्थः। तद्योऽन्यार्थे वर्तते तस्यैष प्रयोगः। इह तर्हि प्राप्नोति। द्वाभ्यामिष्टये विंशत्या चेति। एवं तर्हि सप्तमे योगविभागः करिष्यते। अष्टाभ्य औश्। ततः षड्भ्यः। षड्भ्यश्च यदुक्तम्। अष्टाभ्योऽपि तद्भवति। ततो लुक्। लुक् च भवति। षड्भ्य इति। अथवा उपरिष्टाद्योगविभागः करिष्यते। अष्टन आ विभक्तौ। ततो रायः। रायश्च विभक्तावाकारादेशो भवति। हलीत्युभयोः शेषः॥

तश्चाष्टानामिति नुटि कृते आत्वं भवति। जश्शसोस्त्वष्टाभ्य इति कृतात्वनिर्देशाज्ज्ञापकादात्वं भवति। कृतात्वस्य हि निर्देशस्य प्रयोजनं यत्रात्वं तत्रौश्त्वं यथा स्यादिति। यदि ह्येतत्कृतात्वनिर्देशस्य प्रयोजनं न स्यात्स्वाद्यवार्थमष्टभ्य औशिति ब्रूयात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।यथालक्षणमिति। यस्य विप्रिष्टः प्रयोगो न स्मर्यते तेनाऽपि प्रयोगनिषेधस्मृतिः। तद्यथालक्षणमनुगन्तव्यम्। तदत्र
माभूदात्वमित्यर्थः। नैव वालक्षणमप्रयुक्ते प्रवर्तते। प्रयुक्तानामेव लक्षणेनाऽन्वाख्यानात्॥ इतिच॥ यदितावदिति
।तत्र वतुना साहचर्यात्तद्धित एव डतिर्गृह्यते न तु पाते र्डतिः क्रतु। अथेति। तत्र संख्याया अनुवर्तनादन्वर्थत्वाच्च सं
ज्ञायाः संख्याप्रश्नविषय एव डतिर्गृह्यते न त्वौणादिको डतिः॥ क्तक्तवतूनिष्ठा॥ इहाऽनुबन्धाः कार्यार्थमुपादी
यन्ते। प्रयोगस्त्वेषां लुप्तत्वान्नास्ति। यत्र च सारूप्यं तत्र संदेहः। कथमस्याऽनुबन्धकार्यं कृतम्। अस्य तु न कृतमि

यथालक्षणमप्रयुक्ते॥ ॥इतिच॥ इदं डतिग्रहणं द्विः क्रियते संख्यासंज्ञायां षट्संज्ञायां च। एकं
शक्यमकर्तुम्। कथम्। यदि तावत् संख्यासंज्ञायां क्रियते षट्संज्ञायां न करिष्यते। कथम्। ष्णान्ता
षडित्यत्र डतीत्यनुवर्तिष्यते। अथ षट्संज्ञायां क्रियते संख्यासंज्ञायां न करिष्यते। इति चेत्यत्र संख्या
संज्ञाऽप्यनुवर्तिष्यते॥ क्तक्तवतूनिष्ठा॥ निष्ठासंज्ञायां समानशब्दप्रतिषेधः॥ निष्ठासंज्ञायां
समानशब्दानां प्रतिषेधो वक्तव्यः। लोतोगर्तइति।

ति पूर्वपक्षाऽभिप्रायः। सिद्धान्तवादी तु मन्यते। अधुवेणानुबन्धेन नियतसन्निधाना अर्थाः कारककालाद
यो लक्ष्यन्ते। तद्दर्शनादनुबन्धस्मृतौ च तदुपलक्षितानां कार्याणां साधुत्वं विज्ञायते। तत्र यदा देवदत्तेन लू
नः शालिरिति कश्चित्प्रयुङ्क्ते तदा लक्षणज्ञः कर्मभूतकालाऽवगमात् क्तप्रत्ययं मन्यते। यदा तु लो
तमालभेतेति प्रयोगस्तदा मेषवाची लोतशब्दस्तन्प्रत्ययान्तः प्रयुक्त इति मन्यते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धविपर्यासइति।सिद्धोविपर्यासःसंशयइत्यर्थः।इदंतद्गृहमिति।बुद्धेरनवस्थितत्वमनेनप्रतिपाद्यते।नत्वेतद्द्विर्व-
चनंवीप्साद्यर्थाभावात्।प्राकीर्षेति।अत्रभूतकालोऽस्तीतिभावः।दृष्टमन्तेऽत्रेति।सिजादीत्यादिशब्दःप्रकारे।तत्रप्राभित्त-
घटंदेवदत्तइतिप्रयोगेकर्त्रैकत्वाद्यवगमाल्लुङन्तस्यायंप्रयोगोननिष्ठान्तस्येतिप्रतिपद्यते।अञ्जिघृषिघृषिभ्यःक्तइत्य

निष्ठासंज्ञायांसमानशब्दाप्रतिषेधः॥निष्ठासंज्ञायांसमानशब्दानामप्रतिषेधः।अनर्थकःप्रतिषेधः।अप्रतिषेधः।निष्ठासं-
ज्ञाकस्मान्नभवति।अनुबन्धोऽन्यत्वकरः।अनुबन्धःक्रियते।सोऽन्यत्वंकरिष्यति।अनुबन्धोऽन्यत्वकरइतिचेन्न-
लोपात्।अनुबन्धोऽन्यत्वकरइतिचेत्तन्न।किंकारणम्।लोपात्।लुप्यतेऽत्रानुबन्धः।लुप्तेऽत्रानुबन्धेनान्यत्वं
भवति।तद्यथा।कतरद्देवदत्तस्यगृहम्।अदोयत्राऽसौकाकइति।उत्पतितेकाकेनष्टंतद्गृहंभवति।एवमिहा-
पिलुप्तेऽनुबन्धेनष्टःप्रत्ययोभवति।यद्यपिलुप्यतेजानातित्वसौसानुबन्धकस्येयंसंज्ञाकृतेति।तद्यथा।इत-
रत्रापिकतरद्देवदत्तस्यगृहम्।अदोयत्रासौकाकइति।उत्पतितेकाकेयद्यपिनष्टंतद्गृहंभवति।अन्ततस्त-
मुद्देशंजानातीति॥सिद्धविपर्यासश्च॥सिद्धश्चविपर्यासः।यद्यपिजानातिसंदेहस्तुतस्यभवतिअयंसतश-
ब्दोलोतोगर्तइतिअयंसतशब्दोलूनोगीर्णइति।तद्यथा।इतरत्रापिकतरद्देवदत्तस्यगृहम्अदोयत्रासौ
काकइति।उत्पतितेकाकेयद्यपितमुद्देशंजानातिसंदेहस्तस्यभवतिइदंतद्गृहमिदंतद्गृहमिति॥एवंतर्हि
कारककालविशेषात्सिद्धम्॥कारककालविशेषावुपादेयौ।भूतेयस्तशब्दःकर्मणिकर्तरिभावेचेति।
तद्यथा।इतरत्रापियएषमनुष्यःप्रेक्षापूर्वकारीभवतिसोऽध्रुवेणनिमित्तेनध्रुवंनिमित्तमुपादत्तेवेदि-
कांपुण्डरीकंवा।एवमपिप्राकीर्षेत्यत्रापिप्राप्नोति।लुङि·सिजादिदर्शनात्।लुङि·सिजादिदर्शनान्न
भविष्यति।यत्रतर्हिसिजादयोनदृश्यन्ते।प्राभित्तेति।दृश्यन्तेऽत्रापिसिजादयः।किंवक्तव्यमेतत्।नहि।
कथमनुच्यमानंगंस्यते।यथैवायमनुपदिष्टान्कारककालविशेषानवगच्छति।एवमेतदप्यवगन्तुमर्हति।यत्रसि-
जादयोनेति॥इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येप्रथमाध्यायस्यप्रथमेपादेपञ्चममाह्निकम्॥ राम:

स्यनिष्ठासंज्ञानभवति।उणादीनामव्युत्पन्नत्वाद्वाहुलकाद्वाअन्यथानिष्ठाचद्व्यजनादित्याद्युदात्तत्वंस्यात्॥इति५आह्निकम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वादीनि सर्वनामानि। कोऽयमिति। ननु नपुंसकबहुवचननिर्देशादेव बहुव्रीहिनिश्चयात् समासान्तरशङ्कैव नास्तीति प्रश्नाऽनुपपत्तिः। एवं तर्हि किमयं बहुव्रीहिरेवाऽऽहोस्विद् बहुव्रीहितत्पुरुषयोरेकशेषः। यथा कृतन्तेभ्यः कृणवादिभ्य इति चेति प्रश्नः। तत्र सारूप्यार्थं सर्वश्चासावादिश्च सर्वादिरित्यत्राऽऽदिशब्द उपादीयते न त्वस्य प्रयोजनान्तरमस्तीति तत्र नपुंसकमनपुंसकेनेति वा स्वरभिन्नानां यस्योत्तरस्वरविधिः स शिष्यत इति वा बहुव्रीहेः शेषः। वक्ष्यमाणेन न्यायेन विनाऽप्येकशेषेण सर्वशब्दस्य संज्ञा सिध्यतीति मत्वाह। बहुव्रीहिरिति। एवमपि संदेहः किं प्राथमकल्पिको बहुव्रीहिः। अथ बहुव्रीहितत्पुरुषयोरेकशेषेण बहुव्रीहिरिति पृच्छति। कोऽस्य विग्रह इति। तानीमानीति। अन्यपदार्थस्य प्राधान्यं प्रदर्श्यते। अन्यथा यथा चित्रा गावोऽस्येति गवां विशेष्यत्वं तद्वत् स्वविशेषणत्वमवगम्यते तथेहाऽप्यवगम्येत। अत्र चार्थे बहुव्रीहिर्नेष्यते। यदा तु स्वामिनः प्राधान्यं गवां विशेषणभावस्तदा तु बहुव्रीहिः। अत एव चित्रा गावो यस्य स चित्रगुरि-

सर्वादीनि सर्वनामानि॥ सर्वादीनीति कोऽयं समासः। बहुव्रीहिरित्याह। कोऽस्य विग्रहः। सर्वशब्द आदिर्येषां तानीमानीति। यद्येवं सर्वशब्दस्य सर्वनामसंज्ञा न प्राप्नोति। किं कारणम्। अन्यपदार्थत्वाद् बहुव्रीहेः। बहुव्रीहिरयमन्यपदार्थे वर्तते। तेन यदन्यत् सर्वशब्दात्तस्य सर्वनामसंज्ञा प्राप्नोति। तद्यथा। चित्रगुरानीयतामित्युक्ते यस्य ता गावो भवन्ति स एवानीयते न गावः।

तिस्वामिनः प्राधान्यं प्रदर्श्यते। तानीमानीति सर्वनामद्वयोपादानेन प्रत्यक्षविषयत्वादिदंशब्दस्य गणपठितेषु सर्वशब्दस्यान्तर्भावात्तद्गुणसंविज्ञानं सूचयति। तस्याऽन्यपदार्थस्य गुणा उपलक्षणानि तेषामपि कार्ये संविज्ञानं तद्गुणसंविज्ञानम्। तत्र चित्रगुरानीयतामिति स्वस्वामिसंबन्धः षष्ठ्यर्थ इति स्वविशेषोपलक्षितस्य स्वामिन एवानयनं न तु गवाम्। दण्डी विषाणी चानीयतामित्यत्र तु संयोगसमवायलक्षणेन संबन्धेन संबन्धिनि कार्ये विज्ञायमाने उपलक्षणस्याऽप्यन्तर्भावो भवति। द्वित्र्यादिशब्दस्याऽवयववाचित्वाद् उद्भूताऽवयवभेदस्समुदायस्समासार्थः। तस्य च समुदायस्य युगपद्वृत्त्यैप्रयोगाभावात्तदन्तर्भूतानामेव पृथक्प्रयोगत्वात् कार्यार्थं यासंज्ञया भवितव्यमिति सर्वशब्दस्यापि सा सिध्यति। यथा देवदत्तशालायां ब्राह्मणा आनीयन्तामित्युक्ते देवदत्तोऽपि यदि ब्राह्मणो भवति स शालास्थश्चेत्तदा सोऽप्यानीयत एव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णत्वं प्राप्नोतीति। राजपुरुषादिवत्संज्ञाशब्दा अपि शास्त्रप्रक्रियायां सन्तमसन्तं वाऽवयवार्थमाश्रित्य व्युत्पाद्यन्त इति
णत्वप्रसङ्गः। प्रयोगे च सणत्वा अणत्वाश्च नित्या एव शब्दाः। तत्र संज्ञायां सणत्वा एव साधवोऽसंज्ञायामणत्वा एवेति शास्त्रव्यापारेण णत्वं प्राप्नोत्येव। सर्वार्थाभिधानयोग्यशब्दस्य शक्तिनियममात्रं संज्ञाकरणमिति शब्दार्थसम्बन्धनित्यत्वस्याऽपि न विरोधः। निपातनादिति। लोकेऽप्ययं णत्वरहित एव प्रयुज्यते तस्याऽत्र प्रसङ्गे न साधुत्वं प्रतिपाद्यते। किमेतदिति। भवत्वस्य साधुत्वं णत्वप्रतिषेधे त्वस्य तात्पर्याभावाद्विकल्पः प्राप्नोतीति भावः।

नैष दोषः। भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि। तद्यथा। चित्रवाससमानय लोहितोष्णीषा ऋत्विजः प्रचरन्तीति। तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति। इह सर्वनामानीति पूर्वपदात्संज्ञायामग इति णत्वं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः॥ सर्वनामसंज्ञायां निपातनाण्णत्वाभावः॥ सर्वनामसंज्ञायां निपातनाण्णत्वं न भविष्यति। किमेतन्निपातनं नाम। अथ कः प्रतिषेधो नाम। अविशेषेण किंचिदुक्त्वा विशेषेण नेत्युच्यते। तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यत इदं न भवतीति। निपातनमप्येवंजातीयकमेव। अविशेषेण णत्वमुक्त्वा विशेषेण निपातनं क्रियते। तत्र व्यक्तमाचार्यस्याऽभिप्रायो गम्यत इदं न भवतीति। ननु च निपातनाद्याऽणत्वं स्यात् यथाप्राप्तं च णत्वम्। किमन्येऽप्येवंविधयो भवन्ति। इको यणचीति वचनाद्यण् स्यात्। यथाप्राप्तश्चेक्श्रूयेत। नैष दोषः। अस्त्यत्र विशेषः। षष्ठ्याऽत्र निर्देशः क्रियते। षष्ठी च पुनः स्थानिनं निवर्तयति।

इतरः प्रतिषेधेन साम्यं प्रतिपादयितुं पर्यनुयुङ्क्ते। अथ क इति। सर्वत्रैव ह्यप्राप्त्यनुमानं बाधः। निपातनं चाऽपि णत्वाप्राप्त्यनुमानमिति भावः। ननु चेति। प्रतिषेधस्य निवृत्तावेव तात्पर्यम्। निपातनस्य तु तद्रूपसाधुत्वप्रति
पादने न तु रूपान्तरनिवृत्ताविति भावः। इको यणचीति। यणो हि साधुत्वं प्रतिपाद्यते न त्विग्निवृत्तिरित्यर्थः। षष्ठ्या
ऽत्रेति। ततश्च संहिताविषये स्वाभाविकोऽप्रयोग इकः षष्ठीनिर्देशेन प्रतिपाद्यते। यथा दर्भाणां स्थाने शरैः प्रस्तरितव्यमिति न तत्र दर्भाः प्रस्तीर्यन्ते।

॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इह तर्हीति। विकल्पः प्राप्नोतीति भावः। समुच्चयस्तु न भवति एकेन परदेशस्याऽवष्टब्धत्वाद्धातुसार्वधातुकयोश्चाऽर्था-
भिधाने एकेनैव साहायकस्य संपादनात्। शबादेशा इति। श्यनश्च श्लुत्करणं ज्ञापकं स्यान्निवद्भावाभावस्य। तेन करो-
तीत्युप्रत्ययस्याऽपित्त्वादनुदात्तत्वं न भवति कुर्वतीत्यत्र शप्श्यनोर्नित्यमिति नुमागमो न भवति। आदित्यधिकारा-
द्वा। रुधादिभ्यः श्नमित्यत्र रुधादीनां श्नुतत्वात्तेषामेवान्त्यादचः परः श्नम् भवति न तु शपः परः। यथा च भ्रस्जो रोपध-

इह तर्हि कर्तरि शप् दिवादिभ्यः श्यन्निति वचनाच्च श्यन् स्यात्। यथाप्राप्तश्च शप् श्रूयेत। नैष दोषः। शबा-
देशाः श्यनादयः करिष्यन्ते। तत् तर्हि शपो ग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्।
कर्तरि शबिति। तद्वै प्रथमानिर्दिष्टम्। षष्ठीनिर्दिष्टेन चेहार्थः। दिवादिभ्य इत्येषा पञ्चमी शबिति प्रथ-
मायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति। प्रत्ययविधिरयम्। न च प्रत्ययविधौ पञ्चम्यः प्रक-
ल्पिका भवन्ति। नायं प्रत्ययविधिः। विहितः प्रत्ययः प्रकृतश्चानुवर्तते। इह तर्हि अव्ययसर्वनाम्नाम-
कच् प्राक् टेरिति वचनाच्चाकच् स्याद् यथाप्राप्तश्च कः श्रूयेत। नैष दोषः। नाप्राप्ते हि केऽकजारभ्यते स
बाधको भविष्यति। निपातनमप्येवंजातीयकमेव। नाप्राप्ते णत्वे निपातनमारभ्यते तद्बाधकं भविष्य-
ति। यदि तर्हि निपातनान्यप्येवंजातीयकानि भवन्ति। समस्तते दोषो भवति। इहान्ये वैयाकरणाः स-
मस्तते विभाषा लोपमारभन्ते समो हितततयोर्वेति। सततम्। संततम्। सहितम्। संहितम्। इह पुनर्भवा-
न्निपातनाच्च लोपमिच्छति। अपरस्पराः क्रियासातत्ये इति। यथाप्राप्तं चाऽलोपम्। संततमित्येतन्न
सिध्यति। कर्तव्योऽत्र यत्नः। बाधकान्येव हि निपातनानि भवन्ति॥

योरन्यतरस्यामिति रमागमो रोपधयोर्निवर्तकः एवं शपः श्नम्। इह तर्हीति। देशभेदाद्विरोधाभावेऽपि काऽक-
चोरेकार्थत्वाद्विकल्प एव चोद्यते न समुच्चयः। कर्तव्योऽत्र यत्न इति। लुम्पेदवश्यम इत्ययं श्लोकोऽन्यार्थमवश्यं-
पठितव्यस्तेनैव सततं संततमिति च सिध्यति न तु निपातनेनेत्यर्थः। सांतत्यमिति चानभिधानात् ष्यञन्तस्य प्रयोगा-
भावः। पुराणशब्देन पुरातनशब्दस्य बाधः प्राप्तः पृषोदरादित्वान्न भवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ संज्ञोपसर्जनीभूतानामिति। येविषयान्तरेदृष्टास्तएवेमामवस्थांप्राप्ताइतिविवक्षयाच्विप्रत्ययनिर्देशः। सर्वायदेहीति
९५ पदकार्येषुगौणमुख्यन्यायोनतुप्रातिपदिककार्येष्विति शब्दाश्रयेचवृद्ध्यात्वेइत्यत्रोक्तमितिप्रसिद्ध्यप्रसिद्धिव- १२६
शात्संभवन्नपीहसनोक्तः। समासकृत्तद्धिताव्ययसर्वनामाऽसर्वलिङ्गाजातिरेकद्रव्योपनिवेशिनीसंज्ञेत्येतदनपेक्ष्य
संज्ञाप्रतिषेधः। तत्रह्यपेक्षितेपरयापूर्वासंज्ञाबाध्यतइतिसंज्ञासंज्ञयासर्वनामसंज्ञायाबाधनात्प्रसङ्गाभावः।-
अतिसर्वायेति। प्रादिसमासोऽयंबहुव्रीहौसंज्ञाप्रतिषेधात्। प्रयोजनंसर्वनामाव्ययसंज्ञायामितितदन्तविधिःपरम

संज्ञोपसर्जनप्रतिषेधः॥ संज्ञोपसर्जनीभूतानांसर्वादीनांप्रतिषेधोवक्तव्यः। सर्वोनामकश्चित्तस्मैस
र्वायदेहि। अतिसर्वायदेहि। सकथंकर्तव्यः॥ पाठात्पर्युदासः पठितानांसंज्ञाकरणम्॥ पाठादेवपर्यु
दासःकर्तव्यः। शुद्धानांपठितानांसंज्ञाकर्तव्या। सर्वादीनिसर्वनामसंज्ञानिभवन्ति। संज्ञोपसर्जनीभूता
निनसर्वादीनि। किमविशेषेण। नेत्याह। विशेषेणच। किंप्रयोजनम्। सर्वाद्यानन्तर्यकार्यार्थम्। स-
र्वादीनामानन्तर्येणयदुच्यतेकार्यंतदपिसंज्ञोपसर्जनीभूतानांमाभूदिति। किंप्रयोजनम्॥ प्रयोज
नंडतरादीनामद्भावे॥ डतरादीनामद्भावेप्रयोजनम्। अतिक्रान्तमिदंब्राह्मणकुलंकतरद्‌अ
तिकतरंब्राह्मणकुलमिति॥ त्यदादिविधौच॥ त्यदादिविधौचप्रयोजनम्। अतिक्रान्तोऽयंब्राह्म
णात्तमतितद्ब्राह्मणइति। संज्ञाप्रतिषेधस्तावन्न वक्तव्यः। उपरिष्टाद्योगविभागःकरिष्यते।
पूर्वपरावरदक्षिणोत्तरापराधराणिव्यवस्थायाम्।

सर्वस्मादित्याद्यर्थआश्रितः। पाठादिति। यथातिङोगोत्रादीनीत्यत्रकुत्सनाभीक्ष्ण्यग्रहणंगोत्रादिपाठविशेषणं
तथेहापिसर्वादिसंनिवेशोविशेष्यतेअसंज्ञोपसर्जनानिसर्वादीनिगणसंनिविष्टानिनान्यानीत्यर्थः। किमविशेषे-
णेति। किंयत्सर्वेषांसर्वादीनांकार्यंतदर्थमेवेतिप्रश्नः। विशेषेणचेति। चशब्दादविशेषेणेत्यर्थः। यद्गणपाठोपल- रा॰ म॰
क्षितंविशिष्टंकार्यंत्यदादीनामःअद्डतरादिभ्यइत्यादितदर्थमपिपाठविशेषणमित्यर्थः। यत्तुक। येयुष्मदस्मद्भ्यां ९५
णादिकयोः। ङसोऽशित्यादिस्वरूपमात्राश्रयंनसंनिवेशापेक्षंतदविशेषेणभवति। तत्रहिनगणपठितयोर्युष्मदस्मदोर्निर्देशोऽपितु
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुपसर्जनादिति। ननु प्रधानेन तदन्तविध्यर्थो योग आरब्धव्यः कौम्भकारेय इति यथा स्यादिति न चा॥ तिद्ग्र-
हणं तद्धितोऽप्यणस्तीति। नैतदस्ति। स्त्रीप्रत्यये चानुपसर्जने नेति तदादिनियमाभावात् कारशब्दादपि ङीपि कुम्भ-
कारीशब्दात् स्त्रीभ्यो ढगिति ढग्भविष्यति। अनुपसर्जन अ अदिति। सुपां सुलुगिति षष्ठ्या लुक्। अ अ अदिति। अका
रेण कारान्ता रो विशेष्यते। अकारात्परो यावकारान्ता रो तावनुपसर्जनस्येत्यर्थः। पञ्चम्या अदित्ययं तु युष्मदस्मद्
भ्यामनकारान्ताभ्यां विधीयत इति परिभाषानुपस्थानादुपसर्जनाभ्यामपि भवति। त्यदादीनामः इत्ययमकारात्पर
स्य हलः स्थाने विधीयत इति अकारान्तात्परोऽकारो भवतीति परिभाषोपस्थानादतितद् इत्यत्र न भवति। एवं तु प्रि
ततोऽसंज्ञायामिति। सर्वादीनीत्येवं यान्यनुक्रान्तानि असंज्ञायां तानि द्रष्टव्यानि। उपसर्जन प्रतिषेध
श्च न कर्तव्यः। अनुपर्जनादित्येष योगः प्रत्याख्यायते तमेव मभिसंभन्त्स्यामः। अनुपसर्जन अ अदिति
। किमिदम् अ अदिति। अकारान्तो रो ऽशिष्यमाणावनुपसर्जनस्य द्रष्टव्यौ। यद्येवम् अतियुष्मद् अत्य-
स्मद् इति न सिध्यति। प्रश्लिष्टनिर्देशोऽयम्। अनुपसर्जन अ अ अदिति। अकारान्ताद् अकारान्तो रो ऽशि
ष्यमाणावनुपसर्जनस्य द्रष्टव्यौ। अथवा अङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवति।

यौष्मावस्येति बहुव्रीहौ कृते अकारान्ताद्विधानात् परिभाषानुपस्थानादत्वं प्राप्नोति। तदोः सः सावितिच सत्वमविशे
षितमित्युपसर्जनस्यापि प्राप्नोति। तत्रायं समाधिः। त्यदादीनामः इत्यत्र त्यदादिषु परिभाषोपस्थानादनुपसर्जनानां
तेषां ग्रहणं तस्माद् चर्याद् इति शब्दोऽपि तथाविध एव गृह्यते। सत्वविधौ च तथाविधानामेवानुवृत्तिरित्यत्रापि न
दोषः। अतिसर्वायेत्यादौ त्वविशेषकार्यमपरिहृतमेव। गृह्यमाणविभक्तेरिति। गृह्यमाणानां त्यदादीनां डतरादी-
नां च स्वार्थद्वारेण सम्बन्धिनी या विभक्तिस्तदर्थगतसंख्याकर्मादिवाचिनी तस्या इत्यर्थः। ॥

अपरिहृतमेवेति। विवरणकारास्तु इदं समाधानं सर्वाद्यानन्तर्यकार्यार्थं प्रतिषेधो वक्तव्य इत्यस्यैवार्थस्येत्याहुः। इतरे तु भाष्येऽनुपसर्जनेत्याद्युप
लक्षणं डाबुभाभ्यामित्यतोऽन्यतरस्यांग्रहणानुवृत्तेः तत्र चान्यतरस्येति छित्वात् तस्यार्थ आद्यजन्तत्वं परिकल्प्यान्यतरशब्दघटितसर्वादिसमुदाय
परत्वेसिद्धे गत्यर्थस्यामतेर्ज्ञानार्थत्वादामूशब्देन यत्र संज्ञाविधावन्यतरशब्दघटितसमुदायस्योपादानं तत्रानुपसर्जनस्य तस्य ग्रहणं बोद्धव्यमि
त्यर्थस्य कथंचिल्लाभेनातिसर्वायेत्यादावविशेषकार्यमपि तु परिहरमेवेत्याहुः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्येवमिति। गृह्यमाणाद्विहिता या विभक्तिरित्येवं संबन्धं मन्वानस्य प्रश्नः। आर्थः संबन्धोऽत्र गृहीत इत्युत्तरेऽभिप्रायः। यद्येवं पञ्चकाः शकुनय इति कनः स्वार्थिकत्वाज्जसो लुक् प्राप्नोति। उच्यते। कनि कृते शब्दान्तरत्वान्नान्तत्वाभावान्नायं षट्संज्ञक इत्यदोषः। युष्मदस्मद्भ्यां ङसोऽशित्यत्र त्वङ्गेन विभक्तिर्विशेष्यत इत्युपसर्जनाभ्यामपि सिध्यति। प्रियसक्थ्नेति। सक्थिशब्दः प्रकृतावयववचनोऽन्नेति बहुव्रीहौ सक्थ्यक्ष्णोरिति समासान्तो न कृतः। प्रकृतविभ

यद्येवं परमपञ्च परमसप्त षड्भ्यो लुगिति लुङ् न प्राप्नोति। नैष दोषः। षट्प्रधान एष समासः। इह तर्हि प्रियसक्थ्ना ब्राह्मणेन अनङ् न प्राप्नोति। सप्तमीनिर्दिष्टे यदुच्यते प्रकृतविभक्तौ तद्भवति। यद्येवमतितद् अतितदौ अतितद इति अत्वं प्राप्नोति। तच्चापि वक्तव्यम्। न वक्तव्यम्। इह तावड्डतरादिभ्यः पञ्चम्य इति पञ्चमी अङ्गस्येति षष्ठी तत्राशक्यं भिन्नविभक्तित्वाड्डतरादिभ्य इति पञ्चम्याऽङ्गं विशेषयितुम्। तत्र किमन्यच्छक्यं विशेषयितुमन्यदतो विहितात्प्रत्ययाड्डतरादिभ्यो यो विहित इति। इहेदानीमस्थिदधिसक्थ्यक्ष्णामनङुदात्त इति। त्यदादीनामो भवतीति। अस्थ्यादीनामित्येषा षष्ठी अङ्गस्येत्यपि। त्यदादीनामित्यपि षष्ठी अङ्गस्येत्यपि। तत्र कामचारः। गृह्यमाणेन वा विभक्तिं विशेषयितुमङ्गेन वा। यावता कामचारः। इह तावदस्थिदधिसक्थ्यक्ष्णामनङुदात्त इत्यङ्गेन विभक्तिं विशेषयिष्यामः। अस्थ्यादिभिरनङम्। अङ्गस्य विभक्तावनङ् भवति अस्थ्यादीनामिति। इहेदानीं त्यदादीनामो भवतीति गृह्यमाणेन विभक्तिं विशेषयिष्यामः। अङ्गेनाकारम्। त्यदादीनां विभक्तावो भवति अङ्गस्येति। यद्येवमतितः। अत्वं न प्राप्नोति। नैष दोषः। त्यदादिप्रधान एष समासः। अथवा नेदं संज्ञाकरणं पाठविशेषणमिदम्।

क्ताविति। अङ्गार्थसंबन्धिन्यां विभक्तावित्यर्थः। तच्चापीति। गृह्यमाणविभक्तेरिति सप्तमीनिर्दिष्टे यदुच्यत इति चाडतरादिभ्यो यो विहित इति। अर्थद्वारकं विधानमाश्रयितव्यम्। तेन परमकतरदित्यत्रापि भवति। युष्मदस्मद्भ्यां ङसोऽशित्यत्र त्वङ्गेन विभक्तिर्विशेष्यते अर्थद्वारेण युष्मदस्मद्भ्यां तु परत्वमात्रेणेत्यतियुष्मदित्यादावपि कार्यं भवति। अतिसदिति। शोभनः सदिति प्रादिसमासः। नञ्समासेऽप्यसः। अषट्। अकतरदिति भवति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेषां यानीति। स्वविषयापेक्षया सर्वनामत्वं बोद्धव्यम्। यथा गोत्वादेः स्वविषयापेक्षं सर्वगतत्वं न तु सर्वादीनि परस्परं पर्यायतां यान्ति। भिन्नार्थत्वात्। एतेषां चापीति। ततश्च सर्वस्मिन्नोदनद्र्योदनशब्दस्यापि सर्वनामकार्यं प्राप्नोति। सामानाधिकरण्यादनयोः ननु प्रतिनियतवस्तुभागाभिनिवेशित्वाच्छब्दानां सर्वत्वमोदनशब्देनाभिहितम्। ओदनत्वमपि सर्वशब्देनेति कुतोऽयं प्रसङ्गः। तत्रेदं दर्शनम्। सर्वशब्दोऽपि ओदनार्थावग्रहेण प्रवृत्त ओदनशब्दोऽपि सर्वशब्दार्थावग्रहेण। प्रतिपत्ता तु केवलात् सर्वशब्दाद्विशेषं न प्रतिपद्यते रूपसादृश्यान्नाप्योदनशब्दादिति तत्प्रतिपत्त्यर्थमुभयोरुपादानम्। तत्रैकस्य सर्वनामकार्यं भवति नापरस्येति प्रमाणाभावादतिप्रसङ्ग उद्भावितः। एकशेषनिर्दे

सर्वेषां यानि नामानि तानि सर्वादीनि। संज्ञोपसर्जने च विशेषेऽवतिष्ठेते। यद्येवं संज्ञाश्रयं यत्कार्यं तन्न सिध्यति। सर्वनाम्नः स्मै। आमि सर्वनाम्नः सुडिति। अन्वर्थग्रहणं तत्र विज्ञास्यते। सर्वेषां यन्नाम तत्सर्वनाम सर्वनाम्न उत्तरस्य ङेः स्मै भवति। सर्वनाम्न उत्तरस्यामः सुड् भवति। यद्येवं सकलं कृत्स्नं जगदित्यत्रापि प्राप्नोति। एतेषां चापि शब्दानामेकैकस्य समस्तविषयः। तस्मिंस्तस्मिन्विषये यो यः शब्दो वर्तते तस्य तस्य तस्मिंस्तस्मिन्वर्तमानस्य सर्वनामकार्यं प्राप्नोति। एवं तर्ह्युभयमनेन क्रियते पाठश्चैव विशेष्यते संज्ञा च। कथं पुनरेकेन यत्नेनोभयं लभ्यम्। लभ्यमित्याह। कथम्। एकशेषनिर्देशात्। एकशेषनिर्देशोऽयम्। सर्वादीनि च सर्वादीनि च सर्वादीनि। सर्वनामानि च सर्वनामानि च सर्वनामानि। सर्वादीनि सर्वनामसंज्ञानि भवन्ति। सर्वेषां यानि च नामानि तानि सर्वादीनि। संज्ञोपसर्जने च विशेषेऽवतिष्ठेते।

शइति। ननु सहविवक्षाया अभावात् कथमेकशेषः। एकशेषफलत्वात्तन्त्रन्यायआवृत्तिर्वैकशेषशब्देनोच्यते। अथवा आकृत्यभिधानपक्षे एकस्यैव प्रयोगे सिद्धे प्रत्याख्यातमेकशेषशास्त्रं संज्ञापरिभाषावच्छास्त्रप्रक्रियासंपादनार्थं भवतीति सहविवक्षामन्तरेणापि भवत्येकशेषः। संज्ञोपसर्जने चेति। यदा सर्वशब्दः संज्ञात्वेन विनियुज्यते तदा प्रसिद्धप्रवृत्तिनिमित्तपरित्यागेन स्वरूपमात्रोपकारी प्रवर्तते इति विशेष एवावतिष्ठते। उपसर्जनमपि जहत्स्वार्थमजहद्वा अतिक्रान्तार्थविशेषणतामापन्नमतिक्रान्तार्थवृत्ति भवत्यतिसर्वायेत्यत्र। वाक्ये त्वसंसृष्टार्थत्वात् स्वार्थमात्रं प्रतिपादयतो न विशेषेऽवस्थानम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यतोनलघीयइति।शब्दव्यवहारोलघुस्ततोऽपिलघीयोनाम।तत्रगुरुसंज्ञाकरणात्सर्वादीनांविशिष्टोधर्मोऽनुमीयते
नूनमेतानिसंज्ञाप्रवृत्तिनिमित्तेनसर्वनामत्वेनयुक्तानि।यतस्तदनुरूपातेषांसंज्ञाकृतेतिसर्वनामकार्यमन्तर्गणका
र्यंचसर्वनामत्वयुक्तानामेवभवतिनसंज्ञोपसर्जनानाम्।।अन्याभावइति।टाब्विषयत्वमपिनद्विवचनादन्यत्रबोद्ध
व्यम्।तत्रोभादुदात्तोनित्यमित्यत्रनित्यग्रहणस्येदंप्रयोजनंवृत्तिविषयेउभशब्दप्रयोगोमाभूत्।उभयशब्दस्यैव-

अथवामहतीयंसंज्ञाक्रियते।संज्ञाचनामयतोनलघीयः।कुतएतत्।लघ्वर्थंहिसंज्ञाकरणम्।तत्र
महत्याःसंज्ञायाःकरणएतत्प्रयोजनम्।अन्वर्थसंज्ञायथाविज्ञायेत।सर्वादीनिसर्वनामसंज्ञानिभवन्ति
सर्वेषांनामानीतिचातःसर्वनामानि।संज्ञोपसर्जनेचविशेषेऽवतिष्ठेते। अथोभस्यसर्वनामत्वेकोऽर्थः।
उभस्यसर्वनामत्वेऽकजर्थः।।उभस्यसर्वनामत्वेऽकजर्थःपाठःक्रियते।उभकौ।किमुच्यतेऽकजर्थइतिन
पुनरन्यान्यपिसर्वनामकार्याणि।।अन्याभावोद्विवचनटाब्विषयत्वात्।।अन्येषांसर्वनामकार्याणामभा
वः।किंकारणम्।द्विवचनटाब्विषयत्वात्।उभशब्दोऽयंद्विवचनटाब्विषयः।अन्यानिचसर्वनामका
र्याण्येकवचनबहुवचनेषूच्यन्ते।यदापुनरयमुभशब्दोद्विवचनटाब्विषयःकइदानीमस्यान्यत्रभवति
।।उभयोऽन्यत्र।।उभयशब्दोऽस्यान्यत्रभवति।उभयेदेवमनुष्याः।उभयोमणिरिति।किञ्चस्याद्यद्यत्रा
कज्नस्यात्।कःप्रसज्येत।कश्चेदानीकाकचोर्विशेषः।

यथास्यादित्युभयपुत्रइत्यादिभवति।द्विदण्ड्यादिभ्यश्चेत्यत्रनिपातनादुभाबाहवीत्यादयःसाधवः। कश्चेदानीमि
ति।रूपेस्वरेचनास्तिविशेषः।अवग्रहेचनास्त्यादरोनहिलक्षणेनपदकाराअनुवर्त्याः।उभकाभ्यांहेतुभ्यामुभक
योर्हेत्वोरितिषष्ठीतृतीयेसिद्धे।निमित्तकारणहेतुषुसर्वासांप्रायदर्शनमितिवचनात्। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभशब्दोऽयमिति। द्विवचनेऽनन्तरे श्रूयमाणे उभशब्देन साधुना भाव्यं न तु स्थानेन व्यवहिते। के पुनः सतीति। पूर्वस्य-
द्विवचनस्य लुप्तत्वाद् परस्य केन व्यवधानात्। तत्र क विषये व्यवहितद्विवचनविषय उभशब्दः साधुर्भवतीति वक्त
व्यम्। यथैव तर्हीति। ननु द्विवचनटाब्विषयत्वादित्यत्र टापडपान्तत्वाच्चोद्यानुपपत्तिः। एवं तर्हि टाब्विषयत्वमेक-
वचनबहुवचनयोर्माभूदित्येवमर्थमप्यपि द्विवचनपरता वक्तव्येत्युक्तम्। अवचनादिति। स्वार्थिकत्वादपडभा
र्थस्याहानादपि सिद्धा द्विवचनपरतेत्यर्थः। केऽपि तुल्यमिति। द्विवचनविषयत्वादित्यत्र द्विवचनशब्देन प्रत्ययो

उभशब्दोऽयं द्विवचनटाब्विषय इत्युक्तम्। तत्राकचि सत्यकच स्वमध्ये पतितत्वाच्छक्यते एतद्वक्तुं द्विवच
नपरोऽयमिति। के पुनः सति नायं द्विवचनपरः स्यात्। तत्र द्विवचनपरता वक्तव्या। यद्येवं तर्हि के सति ना
यं द्विवचनपरः एवमप्यपि सति नायं द्विवचनपरः स्यात्। तत्रापि द्विवचनपरता वक्तव्या॥ अवचना
दापि तत्परविज्ञानम्॥ अन्तरेणापि वचनमपि द्विवचनपरोऽयं भविष्यति। किं वक्तव्यमेतत्। नहि। क
थमनुच्यमानं गंस्यते। एकादेशे कृते द्विवचनपरोऽयमन्तादिवद्भावेन॥ अवचनादापि तत्परविज्ञा
नमिति चेत्केऽपि तुल्यम्॥ अवचनादापि तत्परविज्ञानमिति चेत्केऽपि अन्तरेण वचनं द्विवचनपरो भ
विष्यति। कथम्। स्वार्थिकाः प्रत्ययाः प्रकृतितोऽविशिष्टा भवन्तीति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रह
णं भवति। अथ भवतः सर्वनामत्वे कानि प्रयोजनानि॥ भवतोऽकच्छेषात्वानि॥

न गृह्यते किं तर्हि द्व्यर्थोऽभिधानसमर्थ इत्यर्थः। उभयत उभयत्रेति त्रतसोरव्ययत्वाद् द्वित्वाऽभिधानसामर्थ्येना
स्तीत्यभेदविषय उभयशब्द एव प्रयुज्यते न तूभशब्दः। एवं प्रत्याख्यातोऽकजर्थ उभशब्दस्य पाठः। सर्वनाम्नस्तृ-
तीया चेति षष्ठी तृतीयार्थः पाठ इति केचित्। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वचनात्तदर्थोऽपि पा
ठो न कर्तव्य इत्यन्ये। अथ भवत इति। अनकारान्तत्वात् स्मायाद्यभावात्प्रश्नः। ॥

उभयत इत्यादि। तयोर्विभक्त्यनीयस्वार्थिकत्वेनाधिकरणादिशक्तिप्रधानत्वात्. द्विवचनं चटाप्चाहचर्यात्तस्यैव-तेनोभयोर्भाविस्येवेति वि०। इदं श्वेस्वरविरुद्धत्वान्न नागेशा
भिप्रेतमिति गाडेगिलजगन्नाथशास्त्रिचरणाः॥ स्वतन्त्रास्तु प्रकृतितो, विशिष्टा भवन्ति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणं भवतीति भाष्यस्वारस्येनागमानां मध्यपतितानां वा यथा
ऽनन्यादिग्रहणेन ग्रहणं तथैव स्वार्थिकानामपि स्वप्रकृतिग्रहणेन ग्रहणमित्येव सिद्ध्यति. ततश्चोभशब्दत्वस्योभकश द्वेपि सत्त्वेन तस्य च द्विवचनपरत्वेन नायं क्षतिः। त्रलादेस्तु सप्तम्याद्यन्तं
प्रकृतिरिति नाद्विशिष्टे सप्तम्याद्यन्तवृत्तिधर्मारोपेपुभशब्दत्वादेरारोपाभावात्तदन्तस्याव्ययत्वेन विभक्तेर्लुका लुप्यमानत्वाच्च न द्विवचनपरत्वसंभावनेति सिद्धं उभयत्रेत्यादावयच्. उभयोर्भाविस्त्र
तुभवत्येवाकच्। जराशब्दात्केतद्विशिष्टस्य जरसादेशस्तु तस्यानिर्दिश्यमानत्वान्न. श्वश्रुरकादिशब्दाद्यदादेरनिष्टत्वेऽनभिधानाद्वारणीय इति वदन्ति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ प्रोष इति। पाठे सतित्यदादित्वाच्छेषो भवति। तृतीयादयोऽपीति। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमित्यनपे- ११६
९८ क्ष्यैतदुक्तम्। इदं तु प्रयोजनम्। भावतायनिः। भवद्ग्रहणं भवन्मयः। पूर्वनिपातश्च। भवन्मित्रः। भवतष्ठक्छसाविति-
वृद्धत्वाट्ठक्छसौ। गुणवचनसंज्ञाबाधनं च। भवतो भावो भावत्वमिति मा भूत्॥ विभाषा दिक्समासे बहुव्रीहौ॥ दिग्-
ग्रहणमिति। एकस्मिन्विषये विकल्पप्रतिषेधयोरसंभवात्सामर्थ्याद्विषयभेद आश्रयितव्य इति प्रश्नः। वचनमन्त-
रेणाऽभिमतो विषयभेदो न लभ्यत इत्युत्तरम्। समास एवेति। मुख्य इत्यर्थः। अन्यस्तु तत्कार्यलाभाय तद्व्यपदेशं ल-

भवतोऽकच्छेषात्वानि प्रयोजनानि। अकच्। भवकान्। शेषः। स च भवांश्च भवन्तौ। आत्वम्। भवादृगिति। किं पुनरिदं परि-
गणनमाहोस्विदुदाहरणमात्रम्। उदाहरणमात्रमित्याह। तृतीयादयोऽपि हि प्रयस्यन्ते। सर्वनाम्नस्तृतीया च। भवता हेतुना
भवतो हेतोरिति॥ विभाषा दिक्समासे बहुव्रीहौ॥ दिग्ग्रहणं किमर्थम्। न बहुव्रीहाविति प्रतिषेधं वक्ष्यति। तत्र न ज्ञाय-
ते क्व विभाषा क्व प्रतिषेध इति। दिग्ग्रहणे पुनः क्रियमाणे न दोषो भवति। दिगुपदिष्टे विभाषा अन्यत्र प्र-
तिषेधः। अथ समासग्रहणं किमर्थम्। समास एव यो बहुव्रीहिस्तत्र यथा स्याद् बहुव्रीहिवद्भावेन यो ब-
हुव्रीहिस्तत्र मा भूदिति। दक्षिणदक्षिणस्यै देहि। अथ बहुव्रीहिग्रहणं किमर्थम्। द्वन्द्वे मा भूत्। दक्षि-
णोत्तरपूर्वाणामिति। नैतदस्ति प्रयोजनम्। द्वन्द्वे चेति प्रतिषेधो भविष्यति। नाप्राप्ते प्रतिषेध इयं विभाषा
आरभ्यते सा यथैव न बहुव्रीहावित्येतं प्रतिषेधं बाधत एवं द्वन्द्वे चेत्येतमपि बाधेत। न बाधेत। किं का-
रणम्। येन नाप्राप्ते तस्य बाधनं भवति।

भत इत्यमुख्यः। दक्षिणोत्तरपूर्वाणामिति। द्वन्द्वे चेत्यनेन सर्वाद्यन्तस्य द्वन्द्वस्य सर्वनामसंज्ञाप्रतिषेधो नावयवा-
नामिति सर्वनाम्नो वृत्तिमात्र इति पुंवद्भावः। येन नाप्राप्त इति। अयमत्रार्थः। न बहुव्रीहावित्यनेन सर्वः स्वविषयो-
व्याप्तः। द्वन्द्वे चेत्यनेन तु न व्याप्तः। विभाषा जसीति जसि विकल्पविधानात्। यदि चानेन द्वन्द्वे विभाषा स्याद् जस्य- राम:
नुवाददोषः प्रसज्येत। बहुव्रीहौ त्वनुवाददोषमलभमाना कृतार्था सती परत्वादियं विभाषा द्वन्द्वे चेत्यनेन बाध्यते। ९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षणप्रतिपदोक्तयोरिति। दिक्समासद्वतिव्यपदेशो दिङ्नामानीतिविहितस्यन्याय्यः। तत्रहि दिक्शब्दोऽस्तिव
स्त्रान्तरेति। उपसर्जनप्रतिषेधो वार्तिककारस्य न सूत्रकारस्य नबहुव्रीहावित्यारम्भात् तन्मते नेदं प्रयोजनमु-

नचाप्राप्तेनबहुव्रीहावित्येतस्मिन्प्रतिषेधेइयंविभाषाआरभ्यते। द्वन्द्वेचेत्येतस्मिन्पुनःप्राप्तेचाप्रा
प्तेच। अथवापुरस्तादपवादाअनन्तरान्विधीन्बाधन्तेनोत्तरानित्येवमियंविभाषा नबहुव्रीहावित्ये
तंप्रतिषेधंबाधिष्यते। द्वन्द्वेचेत्येतंप्रतिषेधंनबाधिष्यते। अथवाइदंतावदयंप्रष्टव्यः। इहकस्मा
न्नभवति। यापूर्वासोत्तराअस्योन्मुग्धस्यसोऽयंपूर्वोत्तरउन्मुग्धः। तस्मैपूर्वोत्तरायदेहीति। लक्षणप्र
तिपदोक्तयोःप्रतिपदोक्तस्यैवेति। यद्येवंनार्थोबहुव्रीहिग्रहणेन। द्वन्द्वेकस्मान्नभवति। लक्षणप्र
तिपदोक्तयोःप्रतिपदोक्तस्यैवेति। उत्तरार्थंतर्हिबहुव्रीहिग्रहणंकर्तव्यम्। नकर्तव्यम्। क्रियतेतत्रैव
नबहुव्रीहाविति। द्वितीयंकर्तव्यम्। बहुव्रीहिरेवयोबहुव्रीहिस्तत्रैवयथास्याद्बहुव्रीहिवद्भावेन
योबहुव्रीहिस्तत्रमाभूत्। एकैकस्मैदेहि। एतदपिनास्तिप्रयोजनम्। समासइतिवर्तते। तेनबहुव्री
हिंविशेषयिष्यामः। समासोयोबहुव्रीहिरिति। इदंतर्हिप्रयोजनम्। अवयवभूतस्याऽपिबहुव्रीहेःप्र
तिषेधोयथास्यात्। इहमाभूत्। वस्त्रमन्तरमेषांतइमेवस्त्रान्तराः। वसनमन्तरमेषांतइमेवसनान्तराः
। वस्त्रान्तराश्चवसनान्तराश्चवस्त्रान्तरवसनान्तराः॥ नबहुव्रीहौ॥ किमुदाहरणम्। प्रियविश्वाय। नै
तदस्तिप्रयोजनम्। सर्वादयन्तस्यबहुव्रीहेःप्रतिषेधेनभवितव्यम्। वक्ष्यतिचैतत्। बहुव्रीहौसर्वनामसं
ख्ययोरुपसंख्यानमिति। तत्रविश्वप्रियायेतिभवितव्यम्।

क्तम्॥ नबहुव्रीहौ॥ प्रियविश्वायेति। प्रियशब्दस्यविश्वविशेषणत्वात्पूर्वनिपातंमन्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्व्यन्यायेति। संख्यायाः संख्येयपरतन्त्रत्वाद्विशेषणत्वं सर्वनाम्न एवेति नियमः कथमिति चेदुच्यते। विशेषणत्वात्सं-ख्यायाः पूर्वनिपाते प्राप्ते एवमर्थमुपसंख्यानं स्यात् सर्वनामसंख्ययोः सन्निपाते सर्वनाम्न एव पूर्वनिपातः स्यादिति। वक्ष्यत्येतदिति। नैष वाक्यार्थो यस्त्वयाकल्पित इत्यर्थः। व्यञ्जनान्तेष्विति। उपलक्षणमेतत्। द्विकपुत्रो द्विकपुत्र इत्यत्राऽपि विशेषदर्शनात्। कथं पुनरिति। अन्तरङ्गत्वात्संज्ञानिमित्तेनाऽकचा तावद्भाव्यं पश्चात्तदान्तरसंनि-

इदं तर्हि द्व्यन्याय त्र्यन्याय। ननु चात्रापि सर्वनाम्न एव पूर्वनिपातेन भवितव्यम्। नैष दोषः। वक्ष्यत्येतत्। संख्यासर्वनाम्नोर्यो बहुव्रीहिः परत्वात्तत्र संख्यायाः पूर्वनिपातो भवतीति। इदं चाप्युदाहरणम्। प्रियविश्वाय। ननु चोक्तं विश्वप्रियायेति भवितव्यमिति। वक्ष्यत्येतत्। वा प्रियस्येति। न खल्वप्यवश्यं सर्वाद्यन्तस्यैव बहुव्रीहेः प्रतिषेधेन भवितव्यम्। किं तर्हि। असर्वाद्यन्तस्यापि भवितव्यम्। किं प्रयोजनम्। अकज् माभूदिति। किं च स्याद् यद्यत्राकच् स्यात्। को न स्यात्। कश्चेदानीमकचो विशेषः। व्यञ्जनान्तेषु विशेषः। अहकंपिता अस्य मकत्पितृकः। त्वकंपिता अस्य त्वकत्पितृक इति प्राप्नोति। मत्कपितृकः। त्वत्कपितृक इति चेष्यते। कथं पुनरिच्छताऽपि भवता बहिरङ्गेण प्रतिषेधेनाऽन्तरङ्गो विधिः शक्यो बाधितुम्। अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधते। गोमत्प्रिय इति यथा। क्रियते तत्र यत्नः। प्रत्ययोत्तरपदयोश्चेति। ननु चेहापि क्रियते न बहुव्रीहाविति। अस्त्यन्यदेतस्य वचने प्रयोजनम्। किम्। प्रियविश्वाय। उपसर्जनप्रतिषेधेनाप्येतत्सिद्धम्।

धाने वर्तिपदार्थविशेषणाऽन्यपदार्थविवक्षायां बहिरङ्गेण बहुव्रीहिणेत्यर्थः। अन्तरङ्गानपीति। प्रत्ययोत्तरपदयोश्चेति सामान्येन ज्ञापकम्। बहिरङ्गोऽपि समासाश्रयो विधिरन्तरङ्गं बाधत इत्यस्यार्थस्येति भावः। क्रियते तत्रेति। लुग्विषयमेव तज्ज्ञापकमित्यर्थः। अस्त्यन्यदिति। अत्र हि विधिप्रतिषेधौ समानकालौ कार्यकालत्वात्संज्ञाया इति मन्यते।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयं खल्वपीति। सूत्रोपारूढ एवायमर्थ इति प्रतिपादयति। अप्रयोगसमवायियत्वक्रियावाक्यं तत्राऽयं प्रतिषेधो न-
लौकिके वाक्ये प्रयोगार्हे। तस्य पृथगेव प्रयोगात्तादर्थ्याभावात्। गोनर्दीयस्त्वाहेति। सूत्रप्रत्याख्यानमेतद् यथोत्तरं
हि मुनित्रयस्य प्रामाण्यम्। स्वरः स्वाङ्गशिटामदन्तानामित्याद्युदात्तत्वम्। आढ्यपूर्वायेति। अबहुव्रीह्यर्थं वचनम्। न
चाऽत्रेति। प्राधान्येनेति भावः अत्र हि पूर्वत्वमाढ्यत्वस्य विशेषणम्। यथाऽतिपूर्वायेति पूर्वोऽर्थोऽतिक्रान्तस्येत्युपसर्जन

अयं खल्वपि बहुव्रीहिरस्त्येव प्राथमकल्पिकः। यस्मिन्नैकपद्यमैकस्वर्यमैकविभक्तिकत्वं च। अस्ति ताद
र्थ्यात्ताच्छब्द्यम्। बहुव्रीह्यर्थानि पदानि बहुव्रीहिरिति। तद्यत्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणम्। गोनर्दीय
स्त्वाह। अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ। त्वकत्पितृको मकत्पितृक इत्येव भवितव्यमिति॥ प्रति
षेधे भूतपूर्वस्योपसंख्यानम्॥ प्रतिषेधे भूतपूर्वस्योपसंख्यानं कर्तव्यम्। आढ्यो भूतपूर्व आढ्यपूर्वः। आ
ढ्यपूर्वाय देहीति। प्रतिषेधे भूतपूर्वस्योपसंख्यानाऽनर्थकं पूर्वादीनां व्यवस्थायामिति वचनात्। प्रतिषे
धे भूतपूर्वस्योपसंख्यानमनर्थकम्। किं कारणम्। पूर्वादीनां व्यवस्थायामिति वचनात्। पूर्वादीनां व्यव
स्थायां सर्वनामसंज्ञोच्यते न चाऽत्र व्यवस्था गम्यते॥ तृतीयासमासे। समास इति वर्तमाने पुनः समासग्रह
णं किमर्थम्। अयं तृतीयासमासोऽस्त्येव प्राथमकल्पिकः। यस्मिन्नैकपद्यमैकस्वर्यमैकविभक्तिकत्वं चे
ति। अस्ति च तादर्थ्यात्ताच्छब्द्यम्। तृतीयासमासार्थानि पदानि तृतीयासमास इति। तद्यत्तादर्थ्यात्ताच्छ
ब्द्यं तस्येदं ग्रहणम्। अथवा समास इति वर्तमाने पुनः समासग्रहणस्यैतत्प्रयोजनम्।

त्वात् पूर्वार्थस्य न भवति संज्ञा। मयूरव्यंसकादित्वाच्चाऽत्र समासः॥ तृतीयासमासे। अत्र तादर्थ्यात्ताच्छब्द्यलाभे सति प्र
योगार्हस्य लौकिकस्य वाक्यस्य ग्रहणे सति मासेन पूर्वायेति प्रयोगः साधुः। वाक्यभेदेन च मुख्ये समासे निषेधः। अथ वे
ति। पर्युदासाश्रयणात् समाससदृशस्य वाक्यस्य ग्रहणम्। पूर्वसदृशेति च प्रतिपदोक्तस्तृतीयासमासो गृह्यते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ विभाषा जसि॥ जसः कार्यं प्रतीति। जस इ जसीति निर्देशादिकारेण ईकारस्य ग्रहणादित्याहुः। अन्ये तु कार्यकालत्वात्संज्ञा- ११६
१०० याजसः शीत्यत्रैवोपस्थानमन्यन्ते॥ पूर्वपरा॥ अवरादीनां चेति। किमर्थं प्रतिपदं पूर्वादीनि जसि विभाषार्थं पठितानि याव
ता गण एवार्थविशेषेण विशिष्टानि नित्यं सर्वनामसंज्ञार्थं पठ्यन्ते। तत्र पूर्वादीनि नवेत्येवं सूत्रं पठितव्यम्। प्राप्तविभा
षा चेयं भविष्यति तेषामेवाऽत्र प्रत्यभिज्ञानाद्गण एवार्थनिर्देशः पाठविशेषणं भविष्यति। यथा तिङो गोत्रादीनीत्य-
त्र कुत्सनाभीक्ष्ण्यग्रहणं गोत्रादिपाठविशेषणमिति वार्तिककाराऽभिप्रायः। अवरादीनामित्यत्र प्रकारार्थ आदिशब्द-
स्तेन पूर्वपरशब्दावपि गृह्येते। कथं पुनरिति। पूर्वं गणपाठो नियतसन्निवेशो व्यवस्थितः पश्चात्तु सूत्रपाठ इत्यत्र प्रमा

योगाङ्गं यथा विज्ञायेत। सति च योगाङ्गे योगविभागः करिष्यते। तृतीया। तृतीयासमासे सर्वादीनि सर्वना
मसंज्ञानि न भवन्ति। मासपूर्वाय देहि। संवत्सरपूर्वाय देहि। ततोऽसमासे। असमासे च तृतीयायाः सर्वादीनि
सर्वनामसंज्ञानि न भवन्ति। मासेन पूर्वाय देहि। संवत्सरेण पूर्वाय देहीति॥ विभाषा जसि॥ जसः कार्यं प्रति
विभाषा अकज्जिन भवति। द्वन्द्वे चेति प्रतिषेधात्॥ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसं-
ज्ञायाम्॥ अवरादीनां च पुनः सूत्रपाठे ग्रहणमनर्थकं गणे पठितत्वात्॥ अवरादीनां च पुनः सूत्रपाठे ग्र
हणमनर्थकम्। किं कारणम्। गणे पठितत्वात्। गणे ह्येतानि पठ्यन्ते। कथं पुनर्ज्ञायते स पूर्वः पाठः। अ
यं पुनः पाठ इति।

णाभावात्। आदिशब्दः प्रकारवाची दृष्टो व्यवस्थावाची च तत्र सर्वादीनीत्यत्राऽऽदिशब्दस्य प्रकारार्थताऽपि संभ
वति। प्रकारार्थताप्रदर्शनाय पश्चादभियुक्ता गणानुपठन्ति। यदुक्तम्। श्रेण्यादयः पठ्यन्ते कृतादिराकृतिगण राम:
इति। कृतादयश्च वृत्तिकारैर्निदर्शनार्थं पठिताः। तत्र वेदे मध्यमस्यामवमस्यामिति प्रयोगदर्शनात्प्रकारार्थताऽऽ १००
दिशब्दस्य सर्वादीनीत्यत्र संभाव्यत इति प्रश्नः।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानिहिपूर्वादीनीति।पूर्वकालपठितत्वात्पूर्वशब्देनसर्वशब्दोऽभिधीयते।तेनाऽयमर्थः।सर्वादीनीत्यत्रव्यवस्थावा
च्यादिशब्दः।प्रकारवाचित्वेहिकृत्स्नादीनामपिसंज्ञास्यात्।मध्यमस्यामितितुव्यत्ययेनच्छान्दसःप्रयोगः।इमा
न्यवरादीनीति।अवरकालपाठात्पूर्वशब्दोऽवरशब्देनोच्यते।तेनपूर्वंगणपाठःपश्चात्सूत्रपाठइत्यर्थः।हेत्वभि
धानमन्तरेणाऽशक्योऽयमर्थःप्रतिपत्तुमित्याह।इमान्यपीति।नवग्रहणमिति।तत्रहिनवग्रहणंत्यदादीनांनिरा-
सार्थंक्रियते।यदिचनियतसंनिवेशोगणपाठःपूर्वस्ततोऽधिकव्यवच्छेदायनवग्रहणंकर्तव्यम्।इदंतर्हीति।प्र
तिनियतविशेषणाभिधानायप्रतिपदपाठइत्यर्थः।एवंविशिष्टान्येवेति।पाठविशेषणंगणेऽर्थनिर्देशइत्यर्थः।

तानिहिपूर्वादीनिइमान्यवरादीनि।इमान्यपिपूर्वादीनि।एवंतर्ह्याचार्यप्रवृत्तिर्ज्ञापयतिसपूर्वःपाठः।
अयंपुनःपाठइति।यदयंपूर्वादिभ्योनवभ्योवेतिनवग्रहणंकरोति।नवैवहिपूर्वादीनि।इदंतर्हिप्रयो
जनम्।व्यवस्थायामसंज्ञायामितिवक्ष्यामीति।एतदपिनास्तिप्रयोजनम्।एवंविशिष्टान्येवैतानिग
णेपठ्यन्ते।इदंतर्हिप्रयोजनम्।द्व्यादिपर्युदासेनपर्युदासोमाभूदिति।एतदपिनास्तिप्रयोजनम्।
आचार्यप्रवृत्तिर्ज्ञापयति।नैषांद्व्यादिपर्युदासेनपर्युदासोभवतीति।यदयंपूर्वत्रासिद्धमितिनिपात
नंकरोति।वार्तिककारश्चपठतिजश्भावादितिचेदुत्तरत्राभावादपवादप्रसङ्गइति।इदंतर्हि
प्रयोजनम्।जसिविभाषांवक्ष्यामीति॥

द्व्यादिपर्युदासेनेति।त्यदादीनिपठित्वागणेकैश्चित्पूर्वादीनिपठितानि।तत्राऽद्व्यादिभ्यइतितसिलादीनांप्रतिषे
धःप्राप्नोति।तत्रपुनःसर्वनामसंज्ञातसिलादिविधानार्थंविधीयते।तेनद्व्यादिपर्युदासोबाध्यते।यथाअनुर्लक्षणइ
तिपुनर्विधानेनहेतुतृतीयाबाध्यते।वाक्यभेदेनचविभाषाजसिविधीयते।यथाऽमिपूर्वःसंप्रसारणाच्चेत्यत्रवाक्यभे
देनवाछन्दसीतिसंबन्धाच्छन्दसिविकल्पःक्रियतइतिभावः।इदंतर्हीति।यदिपूर्वादीनिनवेत्युच्येततदागणपाठेऽ
र्थनिर्देशस्यनित्यसंज्ञाविधानएवोपयुक्तत्वात्पाठविशेषणेप्रमाणाभावादप्राप्तविभाषेयमर्थान्तरेपूर्वादीनांजसि
विज्ञायेत।प्राप्तविभाषायामुक्तानुवाददोषप्रसङ्गादप्राप्तविभाषायामपूर्वविधानाद्वाविभाषामिति।प्राप्तविभाषामित्य
र्थः।प्रतिपदपाठंचान्तरेणाऽसंकरेणाऽर्थनिर्देशोऽशक्यःकर्तुमितिभाष्यकारेणप्रतिपदपाठःसमर्थितः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वमज्ञा॥ आत्माऽऽत्मीयज्ञातिधनवचनः स्वशब्दः। आमिनिज्विषयस्त्वैश्वर्यवाची। आख्याग्रहणमिति। स्वेपुत्राः स्वेगा
वइत्यत्र स्वशब्द आत्मीयत्वमेवाह पुत्रादिशब्दस्तु ज्ञातिधनयोर्वर्तते तेन स्वशब्दइति प्रतिषेधो न भविष्यतीति प्रश्नः।
तस्य यथा स्यादिति। प्रतिषेध इति शेषः। इह माभूदिति। असत्याख्याग्रहणे स्वेपुत्रा इत्यादौ स्यादेव प्रतिषेधः। अत्राप्या
त्मीयत्वं प्रवृत्तिनिमित्तमुपादाय स्वशब्दो ज्ञातिधनयोर्वर्तते पुत्रादिभिः सामानाधिकरण्याद् आख्याग्रहणे तु सति न
दोषः। स्वशब्दो ह्यत्रात्मीयस्याऽऽख्यान तु ज्ञातिधनयोरिति विधिः सिद्धः॥ अन्तरम्॥ बहिरित्यनावृतदेश उच्यते। तेन
योगो बहिर्योगः। स च बाह्यस्य भवतीत्यन्तरे गृहा इति नगरबाह्याश्चाण्डालादिगृहा उच्यन्ते। यदा तु बहिश्शब्देन बा

स्वमज्ञातिधनाख्यायाम्॥ आख्याग्रहणं किमर्थम्। ज्ञातिधनपर्यायवाची यः स्वशब्दस्तस्य यथा स्या
दिह माभूत्। स्वेपुत्राः स्वाः पुत्राः। स्वेगावः स्वागावः॥ अन्तरं बहिर्योगोपसंव्यानयोः॥ उपसंव्यानग्रहण
मनर्थकं बहिर्योगेण कृतत्वात्॥ उपसंव्यानग्रहणमनर्थकम्। किं कारणम्। बहिर्योगेण कृतत्वात्।
बहिर्योग इत्येव सिद्धम्॥ न वा शाटकयुगाद्यर्थम्॥ न वाऽनर्थकम्। किं कारणम्। शाटकयुगाद्यर्थम्।
शाटकयुगाद्यर्थं तर्हीदं वक्तव्यम्। यत्रैतन्न ज्ञायते किमन्तरीयं किमुत्तरीयमिति। अत्रापि य एष मनु-
ष्यः प्रेक्षापूर्वकारी भवति निर्ज्ञातं तस्य भवति इदमन्तरीयमिदमुत्तरीयमिति॥

ह्य उच्यते बाह्येन योगो बहिर्योग इति तदा नगराभ्यन्तरे ये गृहास्त उच्यन्ते। उभयथाऽपिस्वर्यते। उपसंव्यानशब्दोऽपि
कर्मकरणार्थभेदाद्भिन्नार्थः। ततः सर्वथा बहिर्योगात् सिद्धिं मत्वाह। उपसंव्यानेति। न वेति। समानप्रमाणे शाटकयु
गे अपरिहिते इदं न ज्ञायते किमुत्तरीयं किमन्तरीयमेतदित्यर्थः। अत्रापीति। यथोपसंव्यानत्वं भाविबुद्ध्या व्यवस्थाप्य
ते तथा बहिर्योगोऽपीत्यर्थः। अन्ये त्वाहुः। आदिशब्दो वार्तिके शाटकयुगाद्यर्थमित्यत्रोपात्तस्तत्र शाटकानां त्रये चतुष्टये
वा तृतीयचतुर्थयोर्बहिर्योगाभावादुपसंव्यानग्रहणं कर्तव्यम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपुरीति। गणसूत्रमेतत्कर्तव्यम्। लिङ्गविशिष्टपरिभाषया ग्रहणप्रसङ्गात्। इह त्वनेन नार्थः। अत इति जसः शी विधानादाबन्तात्तस्याभावात्। पूः कस्मिंश्चिद्देशे प्राकाराभ्यन्तरे क्रियते क्वचित्प्राकाराद्बहिरिति अस्ति पुरो बहिर्योगः॥ स्वरादिनिपातमव्ययम्॥ किमर्थमिति। स्वरादिषु किंचित्क्रियाप्रधानं किंचित्साधनप्रधानमिति असत्त्ववचनत्वाच्चादिष्वेव स्वरादीनि पठितव्यानीति मत्वा प्रश्नः। स्वरादीनां पुनरिति। स्वस्ति वाचयति स्वः पश्येति क्रियासंबन्धेऽनेकशक्तिदर्शनात्सत्त्ववाचित्वनिश्चयः। लोहितगङ्गमित्यादीनामव्ययानां सत्त्वधर्मनपुंसकत्वदर्शनाद्युक्तमेव सत्त्ववाचित्व

अपुरीति वक्तव्यम्॥ इह माभूत्। अन्तरायां पुरि वसति॥ वाप्रकरणे तीयस्य ङित्सूपसंख्यानम्॥ वाप्रकरणे तीयस्य ङित्सूपसंख्यानं कर्तव्यम्। द्वितीयायै द्वितीयस्यै। तृतीयायै तृतीयस्यै। विभाषा द्वितीयातृतीयाभ्यामित्येतन्न वक्तव्यं भवति। किं पुनरत्र ज्यायः। उपसंख्यानमेवाऽत्र ज्यायः। इदमपि सिद्धं भवति। द्वितीयाय द्वितीयस्मै। तृतीयाय तृतीयस्मै॥ स्वरादिनिपातमव्ययम्॥ किमर्थं पृथग्ग्रहणं स्वरादीनां क्रियते न चादिष्वेव पठ्येरन्। चादीनां वै असत्त्ववचनानां निपातसंज्ञा स्वरादीनां पुनः सत्त्ववचनानामसत्त्ववचनानां च। अथ किमर्थमुभे संज्ञे क्रियेते न निपातसंज्ञैव स्यात्। नैवं शक्यम्। निपात एकाजनाङिति प्रगृह्यसंज्ञोक्ता सा स्वरादीनामप्येकाचां प्रसज्येत। क इव क्वेवा एवं तर्ह्यव्ययसंज्ञैवास्तु तच्चाऽशक्यम्। वक्ष्यत्येतत्। अव्यये नञ्कुनिपातानामिति। तद्गरीयसा न्यासेन परिगणनं कर्तव्यं स्यात्। तस्मात् पृथग्ग्रहणं कर्तव्यम्। उभे च संज्ञे कर्तव्ये॥

म्। न निपातसंज्ञैवेति। प्राग्रीश्वरान्निपाताः स्वरादीनि चादयोऽसत्त्वे इति सूत्रन्यासः कार्य इत्यर्थः। स्वरादीनामिति। किमोऽदिति अत्प्रत्ययो दक्षिणादाजित्याचूकेनूप्रभृतयस्तुकृतएकाचः सन्तीति भावः। तच्चाऽशक्यमिति। अव्ययसंज्ञायामेव सत्याम् अव्ययमेकाजनाङिति सूत्रं कर्तव्यं ततश्चात्प्रभृतीनामपि प्रगृह्यसंज्ञाप्रसङ्गः प्राप्नोति। अथ चादय एकाजनाङिति क्रियते तदा चादीनामसत्त्ववचनत्वविशेषणमलभ्यम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ १०२ तद्धितश्चाऽसर्वविभक्तिः॥ इह संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधाद् यद्यपि केवलस्य प्रत्ययस्य ग्रहणं त ११६
थापि प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वाचनिकस्तदन्तविधिरस्तीति तदन्तस्याव्ययसंज्ञा विज्ञायते। तत्र वृत्तिका
रेण व्याख्यातम्। असर्वा विभक्तिर्यस्मात् सोऽसर्वविभक्तिरिति। तत्र यदाऽयमर्थः यस्मात्तद्धितस्याऽसर्वा विभक्तिः का
र्या यस्मान्न सर्वा विभक्तिरुत्पद्यते इति तदा न दोषः। यदा तु यस्य तद्धितस्योत्पत्तौ निमित्तत्वेनाऽसर्वा विभक्तिराश्रिता
सोऽसर्वविभक्तिः। यथा सर्वैकान्येति दाप्रत्ययस्य सप्तम्येवोत्पत्तिनिमित्तमित्यस्मिन् सूत्रार्थे विनानानेत्यस्याव्ययसंज्ञा
न सिध्यति नहि विनञ्भ्यामित्यत्र प्रतिनियता काचिद्विभक्तिराश्रितेत्याह। असर्वविभक्ताविति। अतिव्याप्तिश्चाऽ
स्मिन् सूत्रार्थे दाक्षिरितीञः षष्ठ्येव निमित्तमिति संज्ञाप्रसङ्गात्। अविभक्तिनिमित्तस्येति। अश्रूयमाणविभक्तिक

तद्धितश्चासर्वविभक्तिः॥ असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानम्॥ असर्वविभक्तावविभ
क्तिनिमित्तस्योपसंख्यानं कर्तव्यम्। विनानाना। किं पुनः कारणं न सिध्यति। सर्वविभक्तिर्ह्यविशेषात्
। सर्वविभक्तिर्ह्येष भवति। किं कारणम्। अविशेषेण विहितत्वात्॥ त्रलादीनां चोपसंख्यानम्॥ त्रला
दीनां चोपसंख्यानं कर्तव्यम्। तत्र। यत्र। ततः। यतः। ननु च विशेषेण एते विधीयन्ते। पञ्चम्यास्तसिल् सप्तम्या
स्त्रलिति। वक्ष्यत्येतद् इतराभ्योऽपि दृश्यन्त इति। यदि पुनरविभक्तिः शब्दोऽव्ययसंज्ञो भवतीत्युच्यते॥

मव्ययमविभक्तीत्युच्यते तन्निमित्तस्य यस्येष्यते न च प्राप्नोति तस्योपसंख्यानं कर्तव्यम्। न तु सामान्येनाऽविभक्तिनि-
मित्तस्य संज्ञा विधेया विशालविशङ्कटादीनामपि प्रसङ्गात्। किं पुनरिति। एकवचनमुत्सर्ग इति वचनात् क्रमव्यति
क्रमे कारणाभावाद् विनानानेत्यत्रापि असर्वा विभक्तिरुत्पत्तौ निमित्तमिति प्रश्नः। सर्वविभक्तिरिति। अविशेषेणोत्प
द्यन्ते उत्पन्नानां नियमः क्रियत इत्यव्ययात् सर्वा विभक्तय उत्पद्यन्त इत्यर्थः। अविशेषादिति। विशेषस्याऽनाश्रय
णादित्यर्थः। त्रलादीनां चेति। आदिशब्दस्य प्रकारवाचित्वात्तसिलपि गृह्यते। वक्ष्यत्येतदिति। भवदादिप्रयोग रा॰ म॰
एवाऽप्राप्तिश्चोद्यत इत्यर्थः। यदि पुनरिति। प्रयोगे योऽश्रूयमाणविभक्तिः सोऽव्ययमित्यर्थः। न च दधिमध्विन्य १०२
त्रातिप्रसङ्गो दध्नीत्यादौ विभक्तिश्रवणात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविभक्ताविति। अव्ययत्वादविभक्तित्वमविभक्तित्वादव्ययत्वमितिदोषः। अलिङ्गमसंख्यमिति। अविभक्तिर
व्ययमित्यस्यलक्षणस्यदूषितत्वाद् अत्राऽपितदेवदूषणमितिप्रदर्शनार्थोवाशब्दः। अलिङ्गसंख्यत्वस्यलौ-
किकत्वान्नात्रेतरेतराश्रयत्वमितिपूर्वपक्षः। एवमपीति। अर्थमपिकश्चित्कचित्शास्त्रादेवप्रतिपद्यतइ-
तिभावः। सिद्धंत्विति। वार्तिककारस्येतरेतराश्रयदोषःस्थितएवेतितुशब्दोविशेषप्रदर्शनार्थः। भाष्यकारे

अविभक्तावितरेतराऽऽश्रयत्वादप्रसिद्धिः। अविभक्तावितरेतराश्रयत्वादप्रसिद्धिःसंज्ञायाः। काइ
तरेतराश्रयता। सत्यविभक्तित्वेसंज्ञयाभवितव्यम्। संज्ञयाचाऽविभक्तित्वंभाव्यते। तदेतदितरेतरा
श्रयंभवति। इतरेतराश्रयाणिचकार्याणिनप्रकल्पन्ते॥ अलिङ्गमसंख्यमितिवा॥ अथवाऽलिङ्ग
मसंख्यमव्ययसंज्ञंभवतीतिवक्तव्यम्। एवमपीतरेतराश्रयमेवभवति। काइतरेतराश्रयता। स
त्यलिङ्गासंख्यत्वेसंज्ञयाभवितव्यम्। संज्ञयाचाऽलिङ्गासंख्यत्वंभाव्यते। तदेतदितरेतराश्रयंभ
वति। इतरेतराश्रयाणिचकार्याणिनप्रकल्पन्ते। नेदंवाचनिकमलिङ्गताअसंख्यताच। किंतर्हि।
स्वाभाविकमेतत्। तद्यथा। समानमीहमानानांचाधीयानानांचकेचिदर्थैर्युज्यन्तेअपरेन। तत्रकि
मस्माभिःकर्तुंशक्यम्। स्वाभाविकमेतत्। तत्तर्हिवक्तव्यमलिङ्गमसंख्यमिति। नवक्तव्यम्। सिद्धं
तुपाठात्। पाठाद्वासिद्धमेतत्। कथंपाठःकर्तव्यः। तसिलादयःप्राक्पाशपः। शस्प्रभृतयःप्रा
क्समासान्तेभ्यः। मान्तः। तसिवती। कृत्वोऽर्थः। नानाञाविति। अथवापुनरस्त्वविभक्तिशब्दोऽव्य
यसंज्ञोभवतीत्येव। ननुचोक्तमविभक्तावितरेतराश्रयत्वादप्रसिद्धिरिति॥

णाल्वितरेतराश्रयदोषःपरिहृतइतिवाशब्दार्थस्तुशब्दोव्याख्यातः। यएवप्रकारवचनेथाल्सएवप्रत्नादि
भ्योविधीयतइतिनाऽव्याप्तिः। मान्तइति। आम्अम्। तसिःप्रतियोगेपञ्चम्यास्तसिःतेनैकदिक्तसिश्चेति। कृत्वो
ऽर्थाःकृत्वसुच्सुच्धाः। अथवेति। वृद्धव्यवहारादेवशब्दार्थसंबन्धाऽवगमादेकत्वादिव्यवहारवदलिङ्गाऽ
संख्यत्वमप्यव्ययार्थस्यप्रसिद्धमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रैवोपपत्तिमाह। तद्यथेति। किंचिदिति। अव्ययानां द्वैविध्यमेवेति प्रतिपाद्यते अलिङ्गासंख्यत्वप्रतिपादनाय। अन्यत्वात्कुः। किंचिदव्ययं क्रियाप्रधानं किंचित्साधनप्रधानम्। अन्यत्तु नापि क्रियाप्रधानं नापि साधनप्रधानम्। यथा स्वःपपूप्य। लोहितगङ्गम्। उन्मत्तगङ्गं देश इति। तथा चाऽत्र नपुंसकत्वम् अव्ययीभावश्चेत्यन्वाख्यायते पूर्वं च भाष्यकारेणोक्तं स्वरादीनां पुनः सत्त्ववचनानामसत्त्ववचनानां चेति। तस्माद्बाहुल्याभिप्रायेणाऽलिङ्गमसंख्यमव्ययमित्युच्यते। उच्चैर्नीचैरिति सप्तम्यर्थे वर्तते इति साधनप्रधानता। हिरुक्पृथगिति। क्रियाविशेषणत्वादे

नैष दोषः। इदं तावदयं प्रष्टव्यः। यद्यपि तावद्वैयाकरणा विभक्तिलोपमारभमाणा अविभक्तिकाञ्छब्दान्प्रयुञ्जते। ये त्वेते वैयाकरणेभ्योऽन्ये मनुष्याः कथं तेऽविभक्तिकाञ्छब्दान्प्रयुञ्जत इति। अभिज्ञाश्च पुनर्लौकिका एकत्वादीनामर्थानाम्। आतश्चाभिज्ञाः। अन्येन हि वस्त्रेणैकं गां क्रीणन्ति। अन्येन द्वावन्येन त्रीन्। अभिज्ञाश्च न च प्रयुञ्जते। तदेवं संदृश्यताम्। अर्थरूपमेवैतदेवंजातीयकं येनाऽत्र विभक्तिर्न भवतीति। तद्यथैतदेवमनुगम्यमानं दृश्यताम्। किंचिदव्ययं विभक्त्यर्थप्रधानं किंचित्क्रियाप्रधानम्। उच्चैर्नीचैरिति विभक्त्यर्थप्रधानम्। हिरुक्पृथगिति क्रियाप्रधानम्। तद्धितश्चाऽपि कश्चिद्विभक्त्यर्थप्रधानः। कश्चित्क्रियाप्रधानः। तत्र यत्रेति विभक्त्यर्थप्रधानः। विनानानेति क्रियाप्रधानः। न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोऽस्ति। अथाऽप्यसत्त्वविभक्तिरित्युच्यते। एवमपि न दोषः। कथम्।

षां क्रियाप्राधान्यम्। क्रियापदप्रयोगमन्तरेणापि पृथगेवदत्त इत्यादिप्रयोगः क्रियाऽऽक्षेपादुपपद्यते। शब्दशक्तिस्वाभाव्याच्चैकस्मिन्नर्थे विधीयमानयोस्तेनैकदिक्तसिश्चेत्यणतसोर्भिन्नधर्मत्वम्। तत्र पीलुमूलमिति द्रव्यप्राधान्येनाभिधीयते। पीलुमूलत इति तु द्रव्योपसर्जनस्तृतीयार्थ इति तस्य साधनप्रधानता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तदिति। सूत्रारम्भकालइत्यर्थः। पूर्वं हि न्यासान्तराऽऽश्रयेण सूत्रं प्रत्याख्यातम्। अतिबह्विति। एकस्मिन्नित्यपनीय एकवचनमिति सूत्रं कर्तव्यम्। ततो द्विबह्वोर्द्विवचनबहुवचने इत्येवं कर्तव्यम्। तेन द्वित्वबहुत्वयोर्द्विवचनबहुवचने भविष्यतः। एकवचनं त्वेकस्मिन्नपि भविष्यति अलिङ्गसंख्येभ्योऽव्ययेभ्यश्च। ननु कर्मणि द्वितीयेत्यादीनां कर्मादिषु द्वितीयादीनां नियतत्वात्कथमेकवचनमव्ययेभ्यः स्यात्। नैष दोषः। एतदर्थमेवैकवचनमित्येतत् क्रियते अप्राप्तप्रापणार्थम्। तेन कर्माद्यभावेऽपि भवति। द्वित्वबहुत्वयोस्तु प्राप्तं द्विवचनबहुवचनाभ्यां बाध्यते। न सर्वा विभक्तय उत्पत्तौ निमित्तमस्येति येन वृत्तिकारेण व्याख्यातं तन्मतं दूषितम्। इदानीं वृत्तिकारान्तरमतं विशेषदर्शनेन संक्षिप्यते। न चाप्येवमिति। एवं विग्रहे सर्वशब्दस्य प्रकारकार्त्स्न्येऽपि वर्तनादेकवचनमात्रोत्पत्तावपि सर्वा विभक्तयः समस्ता अव्ययेभ्य उत्प

इदं चाऽप्यद्यत्वे अतिबहु क्रियते। एकस्मिन्नेकवचनम्। द्वयोर्द्विवचनम्। बहुषु बहुवचनमिति। कथं तर्हि। एकवचनमुत्सर्गः करिष्यते। तस्य द्विबह्वोरर्थयोर्द्विवचनबहुवचने बाधके भविष्यतः। न चाप्येवं विग्रहः करिष्यते। न सर्वाः असर्वाः। असर्वा विभक्तयो यस्मादिति। कथं तर्हि। न सर्वा असर्वा असर्वा विभक्तिरस्मादिति। त्रिकं पुनर्विभक्तिसंज्ञम्।

द्यन्ते इति न स्यादसर्वविभक्तित्वम्। कथं तर्हीति। द्रव्यकार्त्स्न्ये वृत्तिः सर्वशब्दः। एकवचनमात्रोत्पत्तौ निरवशेषा विभक्तिर्नोत्पन्ना भवतीति भवत्येवाऽसर्वविभक्तित्वम्। यदा त्वयं न्यायः प्रथमाऽतिक्रमे कारणाभावात्प्रथमाया एवैकवचनमव्ययेभ्य उत्पद्यत इति तदा असर्वा विभक्तयो यस्मादित्यपि विग्रह आश्रितेन दोषः। यदा तु खलेकपोतिकान्यायेन सर्वैकवचनोत्पत्तिपक्षस्तदैतदुक्तम्। अव्ययीभावादप्येकवचनमात्रमेवोत्पद्यते। तावतैव तृतीयासप्तम्योर्बहुलमित्यस्योपपादनात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं गतइति। यदा असर्वा विभक्तिरस्मादिति विग्रह आश्रीयते। तदेवं विज्ञाते सत्येतावल्लक्षणमस्त्वसर्वविभक्त्यव्यय
मिति पञ्च सूत्री न कर्तव्या। एतदसर्वविभक्तित्वं कृत्यपि तुल्यम्। यस्य कृन्मेजन्तइत्यनेनाऽव्ययसंज्ञेष्यते। मान्तस्ये
ति। सूत्रोपलक्षणम्। ततः परइति। कृन्मेजन्तइत्यस्मात् सूत्रात्परे कृदर्थाः कृत्संज्ञाविषयाः क्त्वातोसुन्कसुनइत्यर्थः।
ग्रहणेनोच्चारणेन प्रतिपदमित्यर्थः। योगाश्च न कर्तव्याः स्वरादिनिपातमव्ययमित्येवमादयः पञ्चेत्युपसंहारः। इदा
नीमतिव्याप्तिपरिहारार्थं तद्धितग्रहणं कर्तव्यं तस्मिन् कृते कृन्मेजन्तइत्याद्यपि कर्तव्यमिति दर्श्यते। कृत्तद्धिताना-

एवं गते कृत्यपि तुल्यमेतन्मान्तस्य कार्यं ग्रहणं न तत्र। ततः परे चाभिमता न कार्या स्त्रयः कृदर्था ग्रहणेन
योगाः॥१॥ कृत्तद्धितानां ग्रहणं तु कार्यं संख्याविशेषं ह्यभिनिश्रिता ये। तेषां प्रतिषेधो भवतीति वक्तव्यम्
। इह माभूत्। एको द्वौ बहवइति। तस्मात् स्वरादिग्रहणं च कार्यं कृत्तद्धितानां ग्रहणं च पाठे नेयमव्यय
संज्ञा क्रियते सेह न प्राप्नोति। परमोच्चैः परमनीचैरिति। तदन्तविधिना भविष्यति। इहापि तर्हि प्राप्नोति। अ
त्युच्चैः। अत्युच्चैसौ। अत्युच्चैसइति। उपसर्जनस्य नेति प्रतिषेधो भविष्यति। स तर्हि प्रतिषेधो वक्तव्यः। न वक्त
व्यः। सर्वनामसंज्ञायां प्रकृतः प्रतिषेध इहानुवर्तिष्यते। स वै तत्र प्रत्याख्यायते। यथा स तत्र प्रत्याख्यायते
इहापि तथा शक्यः प्रत्याख्यातुम्। कथं च स तत्र प्रत्याख्यायते। महतीयं संज्ञा क्रियतइति। इहापि च म
हती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः
करण एतत्प्रयोजनम्। अन्वर्था संज्ञा यथा विज्ञायेत। न व्येतीत्यव्ययमिति।

मिति। संख्याविशेषमिति। तन्निष्ठ स्यर्थमित्यर्थः। तेषामिति। असतितद्धितग्रहण एकादीनामतद्धितान्तानामप्यसर्वविभक्तित्वात्प्र-
तिषेधो वक्तव्यः स्यादिति तद्धितग्रहणं कर्तव्यम्। तस्मिन् कृते स्वरादिग्रहणं कर्तव्यम्। स्वरादीनामतद्धितान्तत्वात्। ननूभयप्राद्यस्य द्विवच
नानुत्पादादसर्वविभक्तित्वं तयागो देवरणाइति तन्न एषामपि तद्धितश्चाऽसर्वविभक्तिरित्यव्ययसंज्ञाप्रसङ्गइत्याह। कृत्तद्धितानामिति।
प्रतिपदं तद्धिताः पठितव्या येषामव्ययसंज्ञेष्यतइत्यर्थः। तस्माद्गणपाठ एवाश्रयितव्यः प्रपञ्चार्थस्तु सूत्रारम्भः। तदन्तविधिनेति। प्रयोज
नं सर्वनामाव्ययसंज्ञायामितिवचनेनेति भावः। अत्युच्चैसाविति। शक्तिप्रधानान्यप्यव्ययानि वृत्तिविषये शक्तिमत्प्रधानानि भवन्ति। यथा दो-
षामन्यमहः। दोषाभूतमहरिति। ततउच्चैःशब्दस्य प्रक्रियायां द्वितीयान्तस्य समासः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्व पुनरिति। श्लोके सप्तमीनिर्देशात्प्रश्नेऽपि सप्तमी निर्दिष्टा। सदृशमिति। लिङ्गविशेषप्रतिपादने सामर्थ्याभावात्। विभक्तिष्विति। कारकेषु। तत्र यानि साधनप्रधानानि अव्ययानि तेषां प्रकृत्यन्तरानावेशात् क्रियाप्रधानानां च प्रकृतिसंबन्धाभावात्सर्वासु च विभक्तिष्वित्युक्तम्। वचनेष्विति। एकत्वादिषु। अव्ययीभावस्य प्रकृतिलिङ्गविशेषयोगेऽपि वचनादव्ययत्वम्। यथा स्वत्यादीनां कर्मप्रवचनीयसंज्ञा। तत्र यान्यसत्त्वभूतार्थाभिधायीन्यव्ययानि तेषां लिङ्गादिभिरयोगः। तेषां द्रव्यधर्मत्वात्। सत्त्ववाचिनामपि शब्दप्रकृतिस्वाभाव्यात्तदयोगो यथा युष्मदस्मदोर्लिङ्गाऽयोगः। केचित्तु लिङ्गादिविशेषणाऽयोगात्तत्सामान्येन तु योगमव्ययानामाहुः। तदयुक्तम्। लिङ्गादिसामान्यसद्भावे प्रमाणाभावात्। यन्न व्येतीति। नानात्वं न गच्छतीति सत्त्वधर्मान्न गृह्णातीत्यर्थः॥ कृन्मेजन्तः॥ कथमिति। किं मेजन्तग्रहणेन कृद्विशेष्यते पूर्वं पश्चात्तु कृतात तदन्त-

क्व पुनर्न व्येति। स्त्रीपुंनपुंसकानि सत्त्वगुणाः। एकत्वद्वित्वबहुत्वानि च। एतानर्थान्केचिद्वियन्ति केचिन्न वियन्ति। ये न वियन्ति तदव्ययम्॥ सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥ कृन्मेजन्तः॥ कथमिदं विज्ञायते। कृद्यो मान्त इति आहोस्वित् कृदन्तं यन्मान्तमिति। किं चातः। यदि विज्ञायते कृद्यो मान्त इति कारयांचकार हारयांचकारेत्यत्र न प्राप्नोति। अथ विज्ञायते कृदन्तं यन्मान्तमिति। प्रतामौ प्रतामः। अत्रापि प्राप्नोति। यथेच्छसि तथास्तु। अस्तु तावत्कृद्यो मान्त इति। कथं कारयांचकार हारयांचकारेति। किं पुनरत्राऽव्ययसंज्ञया प्रार्थ्यते। अव्ययादिति लुग्यथा स्यादिति।

विधिः। आहोस्वित्पूर्वं कृतात तदन्तविधिः पश्चात्तु कृदन्तं मेजन्तग्रहणेन विशेष्यत इति प्रश्नः। प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वचनात्तदन्तविधिः। अथवा अन्वर्थसंज्ञाऽऽश्रयणात्प्रत्ययग्रहणे संज्ञाविधावप्यत्र तदन्तविधिर्भवति। न हि केवलस्य प्रत्ययस्याऽप्रयोगार्हस्य नानागमनमनानागमनं वाऽर्थं भवति। कारयांचकारेति। लिडत्र कृत्। स च मान्तो न भवति। प्रतामाविति। क्विपि लुप्ते प्रत्ययलक्षणेन कृदन्तमेतद्भवति श्रुत्या च मान्तम्। अव्ययादिति लुगिति। ननु हल्ङ्यादिलोपेन सिद्धत्वात् किं लुका प्रयोजनम्। यदा तर्ह्यनुप्रयोगवशाद्द्वित्वबहुत्वाऽवगतिस्तदाऽस्ति द्विवचनबहुवचनोत्पत्तिरिति लुगेषितव्यः। अकच्तु न भवत्यपरिसमाप्तार्थत्वादज्ञातादिभिर्योगाभावाच्च। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृश्यते चेति। पूर्वोक्ताद्धेतोस्तरबाद्यनुत्पादादनुप्रयोग एव तरबाद्युत्पत्तिः समासार्थस्य प्रकर्षादियोगादित्यर्थः। तत्रै-
वार्थे ज्ञापकमाह। आतश्चेति। तत्र ह्युक्तं व्यवहितनिवृत्त्यर्थं चेति। प्रशानृशब्दमिति। तस्य मो नो धातोरिति नत्वस्याऽसि-
द्धत्वात्सिद्धमव्ययत्वमिति भावः। तुल्यजातीयस्य धातोर्नियमेन व्यावृत्तिः क्रियत इति कारयांचकारेति भवत्येवमान्त-
स्याव्ययसंज्ञा। प्रशानते जन इत्यस्य तु प्रशानिति रूपं न भवति। तस्य क्विबन्तस्य प्रयोगादर्शनात्। लावयते लौरित्य-
स्याऽपि न भवति। अस्मादेव ज्ञापकाल्लाक्षणिकत्वाद्यौकारस्य। अनिकारोकारेति। एच एतद्धि प्रूषणं न मकार-

माभूदेवम्। आम इत्येवं भविष्यति। न सिध्यति। लि ग्रहणं तत्राऽनुवर्तते। लि ग्रहणं तत्र निवर्तिष्य-
ते। यदि निवर्तते प्रत्ययमात्रस्य लुक् प्राप्नोति। इष्यते च प्रत्ययमात्रस्य। आतश्चेष्यते। एवं ह्याह। कृ-
ञ् चाऽनुप्रयुज्यते लिटीति। यदि च प्रत्ययमात्रस्य लुग्भवति तत एतदुपपन्नं भवति। अथवा पुनरस्तु
कृदन्तं यन्मान्तमिति। कथं प्रतामौ प्रताम इति। आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेनाव्यय-
संज्ञा भवतीति। यदयं प्रशानृशब्दं स्वरादिषु पठति॥ कृन्मेजन्तश्चानिकारोकारप्रकृतिः॥ कृन्मे-
जन्तश्चानिकारोकारप्रकृतिरिति वक्तव्यम्। इह माभूत्। आधये आधेः। चिकीर्षवे चिकीर्षोरिति॥
अनन्यप्रकृतिरिति वा॥ अथवा अनन्यप्रकृतिः कृदव्ययसंज्ञो भवतीति वक्तव्यम्। किं पुनरत्र ज्यायः। अन-
न्यप्रकृतिरिति वचनमेव ज्यायः। इदमपि सिद्धं भवति कुम्भकारेभ्यो नगरकारेभ्य इति। तत्तर्हि वक्तव्यम्॥ न
वा संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति॥ न वा वक्तव्यम्। किं कारणम्। संनिपातलक्षणो विधिर-
निमित्तं तद्विघातस्येत्येषा परिभाषा कर्तव्या। कः पुनरत्र विशेषः। एषा वा परिभाषा क्रियेत। अनन्यप्रकृति-
रिति वोच्येत। अवश्यमेषा परिभाषा कर्तव्या। बहून्येतस्याः परिभाषायाः प्रयोजनानि।

स्यव्यवच्छेद्याऽसंभवात्। आधय इति। गुणे कृते अन्तरङ्गबहिरङ्गयोरिति न्यायादव्ययसंज्ञा स्यान्नलयादयः। अन्तरङ्गत्वा-
देव च सुब्लुक् स्यात्। परिभाषान्तरप्रयोजनकथनार्थं लक्षणप्रतिपदोक्तयोरित्येतदनाश्रितम्। लाक्षणिकं ह्यनुमेयं प्रतिपदोक्तं
तु प्रत्यक्षमिति तस्यैव ग्रहणं न्याय्यम्। संनिपातलक्षण इति। संनिपातः संश्लेषः। तन्निमित्तो यो विधिः स तद्विघातस्याऽनिमित्तं संनिपातं-
यो विहन्ति तस्येत्यर्थः॥

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रामणिकुलमिति। इकोह्रस्व इति पूर्वोत्तरपदसंनिपातनिमित्तं ह्रस्वत्वं तुकोननिमित्तम्। तुकि हि सति पूर्वोत्तरपदयोरानन्तर्यविघातः। यदा तु ह्रस्वमात्रस्य तुगागमो न तदन्तस्य अवयवावयवश्च समुदायावयवो न भवति तदैतत्प्रयोजनं नत्वन्यथा। बहिरङ्गमिति। द्विपदाश्रयत्वात्। यदपि ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वं तदपि अर्थाश्रयत्वाद्बहिरङ्गम्। तुक् तु वर्णाश्रयत्वादन्तरङ्गः। यदि तु संनिपातलक्षणादृत्याश्रीयते तदा ग्रामणिच्छत्रमित्यत्रापि तु न स्यात्। ह्रस्वत्वतुगागमयोस्तत्र साम्याद् अन्तरङ्गत्वबहिरङ्गत्वं नास्तीति च्छेलक्षणस्तुक् सिद्धो भवति। असिद्धो नलोप इति। नलोपः

कानि पुनस्तानि। प्रयोजनं ह्रस्वत्वं तुग्विधे ग्रामणिकुलम्। ग्रामणिकुलं सेनानिकुलमित्यत्र ह्रस्वत्वे कृते ह्रस्वस्य पिति कृति तुगिति तुक् प्राप्नोति। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। नैतदस्ति प्रयोजनम्। बहिरङ्गं ह्रस्वत्वम् अन्तरङ्गः तुक्। असिद्धं बहिरङ्गमन्तरङ्गे। नलोपो वृत्रहभिः। वृत्रहभिर्भ्रूणहभिरित्यत्र नलोपे कृते ह्रस्वस्य पिति कृति तुगिति तुक् प्राप्नोति। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। एतदपि नास्ति प्रयोजनम्। असिद्धो नलोपः। तस्यासिद्धत्वान्न भविष्यति॥ उदुपधत्वमकित्त्वस्य निकुचिते॥ उदुपधत्वमकित्त्वस्यानिमित्तम्। क्व। निकुचिते। निकुचितमित्यत्र नलोपे कृते उदुपधाद्भावादिकर्मणोरन्यतरस्यामित्यकित्त्वं प्राप्नोति। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। एतदपि नास्ति प्रयोजनम्। अस्त्वत्राऽकित्त्वम्। न धातुलोप आर्द्धधातुक इति प्रतिषेधो भविष्यति॥ नाभावो यञि दीर्घत्वस्यामुना॥ नाभावो यञि दीर्घत्वस्यानिमित्तम्। क्व। अमुना।

सुप्स्वरेत्यसिद्धं बहिरङ्गमिति वा। निकुचितइति। कुञ्चेर्भावे क्तप्रत्ययः। अनिदितामिति नलोपः। तत्र कित्त्वनिमित्तमुदुपधत्वमुदुपधादित्यकित्त्वस्यानिमित्तमिति गुणो न भवति। अमुनेति। न मुन इत्यस्यायमर्थः। नेकर्तव्ये मुभावः सिद्धो भवति न तु ने परतः। यदि दीर्घत्वं प्राप्नोति तत्र तथा च मुभावस्यासिद्धत्वाददकारान्तत्वाद्दीर्घप्रसङ्गः। तस्मिन्कृते अदसोऽसेरिति दीर्घस्य दीर्घ ऊकारः प्राप्नोति ततश्चामूनेति स्यात्। उकारसंनिपातनिमित्तस्तु नाभावो दीर्घत्वस्याऽनिमित्तमिति सिद्धममुनेति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ १०६ नमुटादेशादिति। अनेकविभक्त्यन्तस्तत्र समास आश्रितः। टाया आदेशः टायामादेश इति। उपादास्तेति। एज्विषयआ- ११६
त्वविधानादकित्त्वसंनिपातनिमित्तमात्वं स्याद्घ्वोरिच्चेति कित्त्वस्याऽनिमित्तं कित्त्वसंनियुक्तं चेत्त्वमिति कित्त्वाभावेन भव-
ति। यदयमिति। ननु समस्तार्थमेतत्स्यात्। प्रियतिसॄणां ब्राह्मणानामिति। अत्र ह्युङ् पुंसि वर्तत इति नास्ति ङीपः प्राप्तिरि-
ति केचित्। तदयुक्तम्। न हि ङीब्विधानेऽङ्गाधिकारोऽस्ति तत्राऽवयवस्य स्त्रीत्ववृत्तित्वाद् ङीपः प्राप्तिः केन वार्यत इति-

नाभावे कृते अतो दीर्घो यञि सुपि चेति दीर्घत्वं प्राप्नोति। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। एतदपि नास्ति प्रयोजनम्। वक्ष्यत्येतत्। न मु टादेशादिति॥ आत्त्वं कित्त्वस्योपादास्त॥ आत्त्वं कित्त्वस्यानिमित्तं स्यात्। क्व। उपादास्तास्य स्वरः शिक्षकस्येति। आत्त्वे कृते स्थाघ्वोरिच्चेतीत्त्वं प्राप्नोति। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। एतदपि नास्ति प्रयोजनम्। उक्तमेतत्। दीङः प्रतिषेधः स्थाघ्वोरित्त्व इति॥ तिसृचतसृत्वं ङीब्विधेः॥ तिसृचतसृत्वं ङीब्विधेरनिमित्तम्। क्व। तिस्रस्तिष्ठन्ति चतस्रस्तिष्ठन्तीति। तिसृचतसृभावे कृते ऋन्नेभ्यो ङीबिति ङीप् प्राप्नोति। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति न तिसृचतसृभावे कृते ङीब् भवतीति। यदयं न तिसृचतसृ इति नामीति दीर्घत्वस्य प्रतिषेधं शास्ति। इमानि तर्हि प्रयोजनानि। पूतानि सह स्राणि। नुमि कृते ष्णान्ता षडिति षट्संज्ञा प्राप्नोति। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति।

ज्ञापकमेव। ज्ञापकादेव च सिद्धत्वात् तत्र स्त्रादिष्वनयोः पाठो न कर्तव्यो भवति। पूतानीति। विभक्तिसंनिपातनिमित्तो नु- रा॰म॰
मागमः षट्संज्ञाहेतुकस्य विभक्तिलुको न निमित्तम्। ष्णान्ता षडित्यन्तग्रहणमौपदेशिकप्रतिपत्त्यर्थमित्यत्र न भविष्य- १०६
तीति चेत्। संख्यासंप्रत्ययार्थं बहुव्रीह्यर्थं तत्स्यादित्यदोषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शकटाविति। विभक्तिसंनिपातकृतमलं यदि टापो निमित्तं स्यात् आनन्तर्यं विहन्येत। शार्ङ्गीये च कार्ये ऽन्तादिवद्भावेनाऽनन्तर्ये लौकिके ऽपि च सति शकटायामिति स्यात्। अत्र द्वयोरिति तपरकरणेनाऽप्यत्र टाबुन्निवर्तयितुं शक्यत इत्युक्तो हि स्थाने मात्रिक एवाकारो भविष्यति भाव्यमानत्वाद्धि सवर्णस्याकारो ग्राहको न भविष्यतीति लक्षणान्तरेणाऽपि प्राप्तस्य दीर्घत्वस्य निराकरणार्थं तपरकरणं संपद्यते। इयेषेति। आमि सति लुक् स्यादिति प्रकृतिप्रत्ययसंनिपातस्य विघातः स्यात्। उषविदेति विकल्प ओषांचक्रतुः ऊषतुरित्यादौ सावकाश इत्युवोषेति नित्य आम् प्रसज्येत। प्रतिपदविधेस्तु बलवत्त्वात् परत्वाच्चात्रापि विकल्पेनैव भाव्यमित्यनुदाहरणमेतत्। गुरुमत इति नित्ययोगे मतुबाश्रयणाद्

शकटौ पद्धतौ। अत्त्वे कृते अत इति टाप् प्राप्नोति। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। इयेष उवोष। गुणे कृते इजादेश्च गुरुमतोऽनृच्छ इत्याम् प्राप्नोति। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति॥ तस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्य॥ तस्येति तस्य लक्षणस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यात्। क्व। अत इञ् दाक्षिः। दाक्षिः। न प्रत्ययः संनिपातलक्षणः। अङ्गसंज्ञा तर्हि निमित्तं स्यात्॥ आत्त्वं पुग्विधेः ज्ञापयति॥ आत्त्वं पुग्विधेरनिमित्तं स्यात्। क्व। ज्ञापयतीति॥

पिष्कयोऽत्राभावः प्रतिपादयितुम्। दाक्षिरिति। प्रयोगे व्यवस्थितस्यैवेकारस्याऽन्वाख्यानमनेन क्रियत इति संनिपातलक्षणत्वं प्रत्ययस्य संभाव्यते। न प्रत्यय इति। कल्पितप्रकृतिप्रत्ययविभागेनाऽन्वाख्यानात् प्रकृतेरविद्यमान एव प्रत्यय उत्पाद्यत इत्याशयः। अङ्गसंज्ञेति। सत्यामङ्गसंज्ञायामकारलोप इति स्यादानन्तर्यविघातः तत्र वर्णविचालस्याऽनिमित्तं स्यादिति अङ्गसंज्ञाद्वारेणेत्यर्थः। अत्र केचिद्वर्णाश्रय इति व्याचक्षते। तेषामात्रेयाद्युदाहरणम्। अन्ये त्ववर्णाश्रय इत्यकारप्रश्लेषमाहुः। ज्ञापयतीति। णिचि वृद्धौ कृतायामात्त्वं पुको न निमित्तं स्यात्। अङ्गस्य य आकारस्तस्य पुगित्यवयवभक्तं पुकं मत्वा दोषोपन्यासः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· अग्निमानिति। पूर्वमुदात्तमाश्रित्य मतुप उदात्तत्वं क्रियमाणं पूर्वस्य निघातं न कुर्यात्। परमवाचेति। अन्तोदात्तादुत्तर ११६
१०७ पदादिति विभक्त्युदात्तत्वं विधीयमानं पूर्वनिघातस्याऽनिमित्तं स्यात्। माभूदिति। हलुङ्याादिसूत्रे दीर्घग्रहणमदृष्टे।

पुगृह्यत्वस्यादीदपत्॥ पुगृह्यत्वस्याऽनिमित्तं स्यात्। क्व। अदीदपदिति॥ त्यदाद्यकारष्टाब्विधेः॥ त्यदाद्यकारष्टाब्विधेरनिमित्तं स्यात्। क्व। यासेति। इड्विधिराकारलोपस्य ययिवान्। इड्विधिराकारलोपस्याऽनिमित्तं स्यात्। क्व। ययिवान् तस्थिवानिति॥ मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्य॥ मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्याऽनिमित्तं स्यात्। क्व। अग्निमान् वायुमान् परमवाचा परमवाचेइति॥ नदीह्रस्वत्वं संबुद्धिलोपस्य॥ नदीह्रस्वत्वं संबुद्धिलोपस्याऽनिमित्तं स्यात्। क्व। नदि कुमारि किशोरि ब्राह्मणि ब्रह्मबन्धु इति। नदीह्रस्वत्वे कृते एङ्ह्रस्वात्सम्बुद्धेरिति संबुद्धिलोपो न प्राप्नोति। माभूदेवम्। ङ्यन्तादित्येवं भविष्यति। न सिध्यति। दीर्घादित्युच्यते ह्रस्वान्ताच्च न प्राप्नोति। इदमिह संप्रधार्यम्। ह्रस्वत्वं क्रियतां संबुद्धिलोप इति। किमत्र कर्त्तव्यम्। परत्वाद्ध्रस्वत्वम्। नित्यः संबुद्धिलोपः। कृते ह्रस्वत्वे प्राप्नोति अकृतेऽपि। अनित्यः संबुद्धिलोपः। न हि कृते ह्रस्वत्वे प्राप्नोति। किं कारणम्। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति।

दमुच्यते। तत्र कृतेऽपि ह्रस्वत्वे स्थानिवद्भावाद्भविष्यतीति भावः। ब्रह्मबन्धुप्रयोगापेक्षया चैतदुच्यते। तस्माङ्याबन्तत्वात्। नित्य इति। कार्यतावनित्यम्। तद्येन केनचिल्लक्षणेन भवत्विति भावः। संबुद्धिलोपस्यावकाशो हे देवदत्तेति। ॥ राम:
१०७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूयांसो वेति। दुष्टत्वप्रतिपादनाय प्रकर्षारोपः। सर्वादिषु समशब्दस्य सर्वशब्दपर्यायस्य सर्वनामसंज्ञाविधानात्तुल्य-
वाचिनोऽत्र समादिति प्रयोगः। अस्ति समशब्दः सर्वपर्यायः। यथा समरं राज्यं वर्तते सर्वेषां राज्यं वर्तत इत्यर्थः। वेदेऽपि
मानः समस्य दूह्यइति प्रयोगः। सर्वस्य दुर्धियो मान इत्यर्थः। तत्र प्रयोजनानामल्पत्वात्तान्येवोपसंख्यातव्यानीत्यर्थः
। प्रतिविधेयमिति। तत्र विधानसामर्थ्यादाङ्गो वर्णविचालो भविष्यति। कष्टायेति ज्ञापकाद्घशब्दे दीर्घो भविष्यति। न
यासयोरिति लिङ्गाद्वाद् भविष्यति। यथिवानिति वस्त्रेकाजादित्ययं नियम इटो न त्वपूर्वोऽयं विधिरिति आकारस्य

एते दोषाः समा भूयांसो वा। तस्मान्नार्थो नया परिभाषया। न हि दोषाः सन्तीति परिभाषा न कर्तव्या लक्षणं
वा न प्रणेयम्। न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। न च मृगाः सन्तीति यवा नोप्यन्ते। दोषाः खल्व
पि साकल्येन परिगणिताः। प्रयोजनानामुदाहरणमात्रम्। कुत एतत्। न हि दोषाणां लक्षणमस्ति। तस्मा
द्यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्तव्या प्रतिविधेयं दोषेषु॥ अव्ययीभावस्य
॥ अव्ययीभावस्याऽव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचाराः॥ अव्ययीभावस्याऽव्ययत्वे प्रयोजनम्। किम्।
लुङ्मुखस्वरोपचाराः। लुक्। उपाग्नि प्रत्यग्नि। अव्ययादिति लुक् सिद्धो भवति। मुखस्वरः। उपाग्निमुखः
प्रत्यग्निमुखः। नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्य इत्येष प्रतिषेधः सिद्धो भवति। उप-
चारः। उपपयः कारः। उपपयः काम इति। अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्येति
प्रतिषेधः सिद्धो भवति। किं पुनरिदं परिगणनमाहोस्विदुदाहरणमात्रम्। परिगणनमित्याह।

लोपः। क्नापयतीत्याकारान्तभक्तः पुग्व्यवधायकः। अदीदपदिति लिङ्गाद्ध्रस्वः। यदयं मारणतोषणेति जानातेर्मि
त्वमुपधाह्रस्वार्थं शास्ति तज्ज्ञापयति पुकि कृते उपधाह्रस्वत्वं भवतीति न हि जानातेरकृते पुकि ह्रस्वभाविन्युपधा भ
वति। अग्निमानिति अनुदात्तं पदमेकवर्जमिति परिभाषा स्वरविषया संनिपातपरिभाषां बाधते। एङ्ह्रस्वादित्यत्रापि
गुणात्संबुद्धेरिति वक्तव्ये ह्रस्वग्रहणसामर्थ्यात्संनिपातपरिभाषाऽभावः। दवीत्यत्र च्छन्दसि गुणाभावपक्षे छान्दसो
लुग्भविष्यति॥ अव्ययीभावस्य। प्रयोजनमिति। मुखस्वरोपचारो निदर्श्यमानौ प्रयोजनम्। यथा मशकार्थो धूम इति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपिखल्विति। एवंखल्वित्यर्थः। परिगणनमनेनदृढीक्रियते। उपाग्न्यधीयानेति। अग्निसमीपे अधीयाने त्यर्थः। तत्र षष्ठ्या ११६
मन्त्रितकारकवचनमितिपराङ्गवद्भावोभवति। नचैकमिति। सामान्यलक्षणमेकप्रयोजनार्थंनकर्तव्यमित्यर्थः। तत्रैवायमिति। नचो
क्तंतस्मात्सुखस्वरेणात्रभवितव्यमित्याहुः। अन्येतुवर्णयन्ति। अनव्ययमव्ययंभवतीत्यन्वर्थसंज्ञानोत्सुखस्वरनिवृत्तिर्भवतीतिनार्थः
सूत्रेणेति। केचित्तुस्वरादिपाठात्सिद्धायामव्ययसंज्ञायां पुनर्वचनमनित्यत्वज्ञापनार्थंतेनकतिपयान्येवाव्ययकार्याणिभवन्तीति

अपिखल्वप्याहुः। यदव्ययीभावस्याऽव्ययत्वंतत्प्राप्नोतितस्यप्रतिषेधोवक्तव्यइति। किंपुनस्तत्। पराङ्गवद्भा
वः। पराङ्गवद्भावेऽव्ययप्रतिषेधश्चोदितः। उच्चैरधीयाननीचैरधीयानेत्येवमर्थम्। सइहापिप्राप्नोति। उपाग्न्यधीया
नप्रत्यग्न्यधीयान। अकच्यव्ययग्रहणंक्रियतेउच्चकैर्नीचकैरित्येवमर्थम्। तदिहापिप्राप्नोति। उपाग्निकंप्रत्यग्निक
मिति। मुमिअव्ययप्रतिषेधश्चोद्यते। दोषामन्यमहर्दिवामन्यारात्रिरित्येवमर्थम्। सइहापिप्राप्नोति। उपकुम्भंमन्यउ
पमणिकंमन्यइति। अस्यच्वौ। अव्ययप्रतिषेधश्चोद्यते। दोषाभूतमहर्दिवाभूतारात्रिरित्येवमर्थम्। सइहापिप्राप्नो
ति। उपकुम्भीभूतम्। उपमणिकीभूतम्। यदिपरिगणनंक्रियतेनार्थोऽव्ययीभावस्याऽव्ययसंज्ञया। कथंयान्यव्ययी
भावस्याव्ययत्वेप्रयोजनानि। नैतानिसन्ति। यत्तावदुच्यतेलुगिति। आचार्यप्रवृत्तिर्ज्ञापयति। भवत्यव्ययीभावाल्लु
गिति। यदयंनाव्ययीभावादतइतिप्रतिषेधंशास्ति। उपचारइति। अनुत्तरपदस्थस्येतिवर्तते। तत्रमुखस्वरएकःप्रयो
जयति। नचैकंप्रयोजनंयोगारम्भंप्रयोजयति। यद्येतावत्प्रयोजनंस्यात्तत्रैवायंब्रूयात्चाव्ययादव्ययीभावाच्चेति॥ शि
सर्वनामस्थानम्॥ सुडनपुंसकस्य॥ शिसर्वनामस्थानंसुडनपुंसकस्येतिचेज्जसिशिप्रतिषेधः॥ शिसर्वनामस्थानं
सुडनपुंसकस्येतिचेज्जसिशिप्रतिषेधःप्राप्नोति। कुण्डानितिष्ठन्ति। वनानितिष्ठन्ति॥ असमर्थसमासश्च॥ असम
र्थसमासश्चाऽयंद्रष्टव्योऽनपुंसकस्येति। नहिनञोनपुंसकेनसामर्थ्यम्। केनतर्हि। भवतिना। नभवतिनपुंसकस्येति।
नार्थःपरिगणनेनेत्याहुः। तेषांवचनमन्तरेणविशेषप्रमाणाभावः॥ शिसर्व॥ सुडनपुंसकस्येतिचेदिति। अस्मिन्सूत्रन्यासेदोषः
। सुट्स्त्रीपुंसयोरित्यस्मिन्न्यासेनदोषइत्यर्थः। प्रसज्यप्रतिषेधाश्रयेणपूर्वपक्षः। पर्युदासाश्रयेणसिद्धान्तः॥ ॥ राम॰
१०८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अप्राप्तेर्वेति। प्रसज्यप्रतिषेधेऽप्यदोषः। तत्र सुडित्यनेन या प्राप्तिस्सा निषिध्यते न तु शिस्सर्वनामस्थानमिति प्राप्तिः। अन्यथा शिः सर्वनामस्थानमिति निरवकाशं स्यात्। नपुंसकस्यैव हि शिः संभवति। ननु चेयमिति। परत्वादित्यर्थः। प्रतिषेधयुक्तायुक्तत्वाच्च विरोधसद्भावः। तत्र परत्वात् सुडिति प्राप्तिः पूर्वां प्राप्तिं बाधते तामपि प्रतिषेध इति दोषः। नोत्सहत इति। अपवादविषयपरिहारेणाऽस्याः प्रवर्तनादित्यर्थः। अथ वेतर्हीति। इदानीमित्यर्थः। तत्र स्त्रीपुंसयोरिति वक्तव्ये अनपुंसकस्येति

यत्तावदुच्यते। शिः सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शिप्रतिषेध इति॥ नाप्रतिषेधात्॥ नायं प्रसज्यप्रतिषेधो नपुंसकस्य नेति। किं तर्हि। पर्युदासोऽयं यदन्यन्नपुंसकादिति। नपुंसके न व्यापारः। यदि केन चित्प्राप्नोति तेन भविष्यति। पूर्वेण च प्राप्नोति॥ अप्राप्तेर्वा॥ अथ वा अनन्तरा या प्राप्तिः सा निषिध्यते। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते। नोत्सहते प्रतिषिद्धा सती बाधितुम्। यदप्युच्यते। असमर्थसमासश्चायं द्रष्टव्य इति। यद्यपि वक्तव्यः। अथ वेतर्हि बहूनि प्रयोजनानि। कानि। असूर्यंपश्यानि मुखानि। अपुनर्गेयाः श्लोकाः। अश्राद्धभोजी ब्राह्मण इति॥ नवेति विभाषा॥ नवेति विभाषायामर्थसंज्ञाकरणम्॥ नवेति विभाषायामर्थस्य संज्ञा कर्तव्या। नवाशब्दस्य योऽर्थस्तस्य संज्ञा भवतीति वक्तव्यम्।

वचनं ज्ञापकं प्रसज्यप्रतिषेधेऽपि नञ्समासोऽस्तीति॥ नवेति॥ नवेति विभाषायामिति। समुदायस्यानुकरणत्वादनुकरणस्य चानुकार्येणार्थवत्त्वात्प्रातिपदिकत्वे सति विभक्त्युत्पत्तिः। स्त्रीप्रत्यये च तदादिनियमाभावाच्चाडामौ भवतः। अथ वा न वेत्युच्चार्यैव या विभाषा कृता तस्यामिति व्याख्या। तत्र लोके क्रियापदसंनिधाने नवाशब्दयोर्योऽर्थो द्योत्यो विकल्पप्रतिषेधलक्षणः स संज्ञीत्यर्थः। अन्यथा विभाषाप्रदेशेषु नवाशब्दादेवाऽऽदेशौ स्याताम्।

CC-0. In Public Domain. Digitization by eGangotri

घुग्रहणेष्विति। शब्दस्य संज्ञाकरणात्तदेशेषु तस्यैव संप्रत्ययइत्यर्थः। इतिकरणइति। क्रियतइतिकरणः कर्मणिल्यु
ट्। इतिश्चासौ करणश्चेति समासः। क्रियतइति सामान्यविशेषभावेन निर्देशः। शब्दाधिक्यादिति। उपहासपरमेत-
च्चोद्कस्य वचनम्। अशब्दार्थस्यालाभादिति भावः। गौरित्ययमाहेति। यद्यपि नित्ये शब्दार्थसंबन्धेउपात्तस्यार्थस्य
त्यागो नास्ति तथापि प्रसिद्धिवशादेतदभिधीयते। अर्थपदार्थकतायाः प्रच्युतइति। तच्च तस्मादा वेवस्वरूपपदा

किंप्रयोजनम्॥ शब्दसंज्ञायां ह्यर्थोऽसंप्रत्ययो यथाऽन्यत्र॥ शब्दसंज्ञायां हि सत्यामर्थस्याऽसंप्रत्ययः स्या
त्। यथाऽन्यत्र। अन्यत्रापि हि शब्दसंज्ञायां शब्दस्यैव संप्रत्ययो भवति नार्थस्य। क्वाऽन्यत्र। दाधाघ्वदाप्।
तरप्तमपौ घइति॥ घुग्रहणेषु॥ घग्रहणेषु च शब्दस्य संप्रत्ययो भवति नाऽर्थस्य। तत्तर्हि वक्तव्यम्। न वक्त
व्यम्॥ इतिकरणोऽर्थनिर्देशार्थः॥ इतिकरणः क्रियते सोऽर्थनिर्देशार्थो भविष्यति। किं गतमेतदितिना।
आहोस्विच्छब्दाधिक्यादर्थाधिक्यम्। गतमित्याह। कुतः। लोकतः। तद्यथा। लोके गौरित्ययमाहेति गो
शब्दादितिकरणः प्रयुज्यमानो गोशब्दं स्वस्मात्पदार्थात्प्रच्यावयति। सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो याऽ
सावर्थपदार्थकता तस्याः शब्दपदार्थकः संपद्यते। एवमिहापि न वा शब्दादितिकरणः प्रयुज्यमानो
न वा शब्दं स्वस्मात्पदार्थात्प्रच्यावयति सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो याऽसौ शब्दपदार्थकता तस्या
लौकिकमर्थं प्रत्याययति। न वेति यद्गम्यते न वेति यत्प्रतीयतइति॥ समानशब्दप्रतिषेधः॥ समान
शब्दानां प्रतिषेधो वक्तव्यः। न वा कुण्डिका न वा घटिकेति। किं च स्यात्। यद्येतेषामपि विभाषासंज्ञा स्यात्।

र्थको गोशब्दः प्रयुक्तः। स्वादृश्याच्युतमर्थमनभिव्यक्तमिति शब्दो द्योतयतीति पदार्थविपर्यासकृदिति रुच्यते। अर्थप
दार्थकतेति। संबन्धे भावप्रत्ययः। संबन्धात्प्रच्युतोऽर्थादपि प्रच्युतो भवति। समानशब्दप्रतिषेधइति। समानः शब्दो वा
चको येषामर्थानां तेषामित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभाषादिक्समासइति।विभाषाशब्देनाभिनवलक्षणोऽर्थःप्रत्याय्यतेतत्रप्रत्यग्रवाचीयोदिक्समासइतिसंप्रत्ययःस्यात्।
तत्रदिशोनित्यत्वान्नवपुराणत्वासंभवात्तन्निमित्तोयदाशालायांव्यपदेशःदक्षिणपूर्वाशालासाचाभिनवातदासंज्ञास्या-
दित्यर्थः।संज्ञाकार्यंव्यङ्ग्यंचप्रत्यग्रत्वंस्यात्।नवाविधिपूर्वकत्वादिति।प्रदेशवाक्यार्थपर्यालोच्येयंसंज्ञाव्यवस्थाप्य-
ते।प्रदेशेषुचकार्याणिविधायविभाषाशब्दउच्चारितोनवार्थंगमयति।तत्रलोकवन्निपातार्थावगतिर्भवति।नतुप्रत्यग्रा

विभाषादिक्समासेबहुव्रीहौ।दक्षिणपूर्वस्यांशालायाम्।अचिरकृतायांसंप्रत्ययःस्यात्॥नवाविधिपूर्व-
कत्वात्प्रतिषेधसंप्रत्ययोयथालोके॥नवाएषदोषः।किंकारणम्।विधिपूर्वकत्वात्।विधायकिंचिन्न-
वेत्युच्यते।तेनप्रतिषेधवाचिनःसंप्रत्ययोभवति।तद्यथालोके।ग्रामोभवतागन्तव्योनवा।नेतिगम्यते।अ-
स्तिकारणंयेननवेतिलोकेप्रतिषेधवाचिनःसंप्रत्ययोभवति।किंकारणम्।विलिङ्गंहिभवान्लोकेनिर्दे-
शंकरोति।अङ्गहिसमानलिङ्गेननिर्देशःक्रियतांप्रत्यग्रवाचिनःसंप्रत्ययोभविष्यति।तद्यथा।ग्रामोभवता
गन्तव्योनवा।प्रत्यग्रइतिगम्यते।एतच्चैवनजानीमः।क्वचिद्व्याकरणेसमानलिङ्गोनिर्देशःक्रियतइति।अ-
पिचात्रकामचारःप्रयोक्तुःशब्दानामभिसंबन्धे।तद्यथा।यवागूर्भवताभोक्तव्यानवा।यदायवागूशब्दोभु-
जिनासंबध्यतेभुजिर्नवाशब्देनतदाप्रतिषेधवाचिनःसंप्रत्ययोभवति।यवागूर्भवताभोक्तव्यानवा।नेतिग-
म्यते।यदातुनवाशब्दोयवागूशब्देनाऽभिसंबध्यतेनभुजिनातदाप्रत्यग्रवाचिनःसंप्रत्ययोभवति।यथा
यवागूर्नवाभवताभोक्तव्या।प्रत्यग्रेतिगम्यते।

र्थोऽवगतिरित्यर्थः।विलिङ्गमिति।भिन्नलिङ्गंव्यधिकरणमित्यर्थः।विलिङ्गत्वेनवैयधिकरण्यंलक्ष्यतेनतुप्रतिषेध-
वाचिनोनवाशब्दस्यलिङ्गयोगोऽस्ति।एतच्चैवेति।नैवक्वचिद्व्याकरणेसमानलिङ्गोनिर्देशइत्यर्थः।विभाषासेनासुरेतिय-
द्यपिसमानलिङ्गोनिर्देशः।तथापिभिन्नविभक्तित्वात्सामानाधिकरण्याऽभावः।अपिचेति।तत्रसामर्थ्याद्विशेषावगतिः।यदा
अप्राप्तेयवागूभोजनेवाक्यमुदीर्यतेतदाप्रत्यग्रार्थावगतिः।यदात्वातुरंप्रतियवागूभोजनंनिषेधार्थमुच्यतेतदानिषेधावगतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै न चेहेति। क्रियायाः प्राधान्यात्तैव विभाषाग्रहणेन संबध्यते न तु तदङ्गमित्यर्थः। तदेवं स्थितमेतत्। न वा विधिपूर्वकत्वा- ११६
११० दिति। विध्यनित्यत्वमिति। विकल्प इत्यर्थः। नवाशब्द एक एव निपातः प्रतिषेधवाची तस्येहोपादानादिति भावः। परि

न चेह वयं विभाषाग्रहणेन सर्वादीन्यभिसंबध्नीमः। दिक्समासे बहुव्रीहौ सर्वादीनि विभाषा भवन्तीति। किं तर्हि। भवतिरभिसंबध्यते। दिक्समासे बहुव्रीहौ सर्वादीनि भवन्ति विभाषेति॥ विध्यनित्यत्वमनुपपन्नं प्रतिषेधसंज्ञाकरणात्॥ विधेरनित्यत्वं नोपपद्यते। शुशाव शुशुवतुः शुशुवुः। शिश्वाय शिश्वियतुः शिश्वियुः। किं कारणम्। प्रतिषेधसंज्ञाकरणात्। प्रतिषेधस्येयं संज्ञा क्रियते। तेन विभाषाप्रदेशेषु प्रतिषेधस्यैव संप्रत्ययः स्यात्॥ सिद्धं तु प्रसज्यप्रतिषेधात्॥ सिद्धमेतत्। कथम्। प्रसज्यप्रतिषेधात्। विधाय किंचिन्न वेत्युच्यते। तेनोभयं भविष्यति। विप्रतिषिद्धं तु। विप्रतिषिद्धं तु भवति। अत्र न विज्ञायते केनाभिप्रायेण प्रसजति केन निवृत्तिं करोतीति॥ न वा प्रसङ्गसामर्थ्यादन्यत्र प्रतिषेधविषयात्॥ न वा एष दोषः। किं कारणम्। प्रसङ्गसामर्थ्यात्। प्रसङ्गसामर्थ्याच्च विधिर्भविष्यति। अन्यत्र प्रतिषेधविषयात्। प्रतिषेधसामर्थ्याच्च प्रतिषेधो भविष्यति। अन्यत्र विधिविषयात्। तदेतत् क्व सिद्धं भवति। या अप्राप्ते विभाषा। या हि प्राप्ते विभाषा कृतसामर्थ्यस्तत्र पूर्वेणैव विधिरिति कृत्वा प्रतिषेधस्यैव संप्रत्ययः स्यात्। एतदपि सिद्धम्। कथम्।

हारान्तराऽभिधानाय तु न बहुव्रीहावित्यसंबद्धं स्यादिति नोक्तम्। सिद्धं त्विति। प्रतिषेधाद्विधिरनुमास्यते ततो विकल्पः से- राम:
त्स्यतीत्यर्थः। विप्रतिषिद्धं त्विति। एकविषययोर्विधिप्रतिषेधयोर्विरोधादित्यर्थः। न वा प्रसङ्गेति। सामर्थ्याद्विधिप्रतिषे- ११०
धयोः पर्यायो भविष्यतीत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महतीसंज्ञेति।तेनह्यावत्र संज्ञिनौविकल्पप्रतिषेधावित्यर्थः।यदिहि केवलः प्रतिषेधः संज्ञी स्यात् संज्ञाकरणमनर्थकं स्या
द्विभाषाप्रदेशेषु नेत्येव ब्रूयात्।तत्र समुदायस्येयं संज्ञेति विभाषाप्रदेशेषु विकल्पप्रतिषेधावुपतिष्ठेते।अप्राप्तविभा
षासु च प्राप्त्यभावात्प्रतिषेधस्याव्यापाराद्विकल्प एवोपतिष्ठते।एवमपीति।यद्यपि विरुद्धयोरेका संज्ञा क्रियते तथापि
प्रदेशेषु युगपद्विरोधाद्भावाभावौ विधातुं न शक्येते इत्यर्थः।सिद्धं त्विति।उभयत्र विभाषासु प्रतिषेधेन समीकृते विष-
ये पश्चाद्विकल्पः प्रवर्तत इत्यर्थः।यदि तु पूर्वं विकल्पः प्रवर्तते पश्चात्प्रतिषेधस्ततो विकल्पप्रवृत्तिरनर्थिकैव स्यात्।
आनुपूर्वी च या संज्ञाविधावाश्रिता सैव प्रदेशवाक्येष्वाश्रीयते।उभयत्र विभाषार्थौ चेयं संज्ञा।प्राप्तविभाषायामप्राप्त-

विभाषेति महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः।कुत एतत्।लघ्वर्थं हि संज्ञाकरणम्।तत्र मह
त्याः संज्ञायाः करण एतत्प्रयोजनम्।उभयोः संज्ञा यथा विज्ञायेत।नेति च वेति च।तत्र यावदप्राप्ते विभा
षा तत्र प्रतिषेध्यं नास्तीति कृत्वा वेत्यनेन विकल्पो भविष्यति।या हि प्राप्ते विभाषा तत्रोभयमुपस्थितं भवति।
नेति च वेति च।तत्र नेत्यनेन प्रतिषिद्धे वेत्यनेन विकल्पो भविष्यति। एवमपि विधिप्रतिषेधयोर्युगपद्वच
नाऽनुपपत्तिः। विधिप्रतिषेधयोर्युगपद्वचनं नोपपद्यते।शुशाव शुशुवतुः शुशुवुः।शिश्वाय शिश्वियतुः
शिश्वियुः।किं कारणम्। भवतीति चेन्न प्रतिषेधः। भवतीति चेत् प्रतिषेधो न प्राप्नोति। नेति चेन्न विधिः। ने
ति चेद्विधिर्न सिध्यति। सिद्धं तु पूर्वस्योत्तरेण बाधितत्वात्। सिद्धमेतत्।कथम्।पूर्वो विधिमुत्तरो विधिर्बाध
ते।इति करणोऽर्थनिर्देशार्थ इत्युक्तम्॥

विभाषायां च संज्ञाकरणस्यानुपयोगात्।तथा हि।प्राप्तविभाषासु पक्षे निवृत्तिः क्रियते पक्षे तु प्रवृत्तिः स्थितैव।अप्राप्तवि
भाषासु च पक्षे कार्यस्य प्रवृत्तिः क्रियते पक्षान्तरे त्वप्रवृत्तिः स्थितैवेति नास्ति तत्र संज्ञाफलम्।विभाषा श्वेरित्यत्र तु यदि विधि
मुखेन विभाषाश्रुतिः प्रवर्तते पित्स्वेव संप्रसारणं विभाषा स्यात्।कित्सु यजादित्वान्नित्यमेव स्यात्।अथ प्रतिषेधमुखेन प्रवृ
त्तिस्तदा कित्स्वेव विकल्प इति पित्सु न स्यात्।संज्ञाकरणे तु पूर्वं प्रतिषेधे कित्सु प्रवृत्तिः पश्चाद्विधिमुखेन सर्वत्र पक्षे संप्रसा
रणस्य प्रवर्तनादिष्टं सिध्यति।यदा तु प्रतिलक्ष्यं भेदेन विभाषा श्वेरित्यस्य व्यापारः क्वचिद्विधिमुखेन क्वचित्प्रतिषेधमुखेन त
दा संज्ञाकरणमन्तरेणाऽपि सिध्यतीति अशिष्योऽयं योग इति वक्ष्यते अशिष्यो वा विदितत्वादिति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्यपुनरिति।अनादित्वाच्छब्दव्यवहारस्यनित्यत्वपक्षेनास्तिप्रयोक्तृनियमः।केवलंगालवःस्मर्तृत्वेनस्मृतोऽस्यशा-
स्त्रस्यप्रामाण्यंप्रतिपादयितुमितिपूजार्थमाचार्यग्रहणम्।शास्त्रस्यह्यनाद्यर्थप्रतिपादकत्वात्पूजाभवति।कीर्त्यर्थमिति।
कीर्तौसत्यांतेषांस्वर्गाद्यवस्थानंचिरंभवति।यथेन्द्रद्युम्नादीनाम्।ननुचयस्यापीति।कार्यपक्षेपिपूजाप्रकथ्यतेव्याख्यातुं
यस्माद्गालवेनह्रस्वत्वंप्रयुक्तंतस्मात्त्वमपिप्रयुङ्क्ष्वेतिस्तुत्यर्थोऽर्थवादःस्यादित्यर्थः।इदानींकार्यपक्षेदूषणमाह।त-
त्कीर्तनइति।कार्यपक्षेऽयमर्थःस्यात्।यस्माद्गालवेनह्रस्वत्वंप्रयुक्तंतस्मात्प्रयोक्तव्यमिति।ततश्चह्रस्वत्वस्यविकल्पोन

यस्यपुनर्नित्याःशब्दाःगालवग्रहणंतस्यपूजार्थंदेशग्रहणंचकीर्त्यर्थम्।ननुचयस्यापिकार्याःशब्दा-
स्तस्यापिगालवग्रहणंपूजार्थंदेशग्रहणंचकीर्त्यर्थम्।तत्कीर्तनेद्वैधाअप्रतिपत्तिः।तत्कीर्तनेचद्वैधंशब्दाना-
मप्रतिपत्तिः।इच्छामश्चपुनराचार्यग्रहणेषुदेशग्रहणेषुचद्वैधंशब्दानांप्रतिपत्तिःस्यादितितच्चनसि-
ध्यति।अशिष्योवाविदितत्वात्।अशिष्योवापुनरयंयोगः।किंकारणम्।विदितत्वात्।यदनेनयोगेन
प्रार्थ्यतेतस्यार्थस्यविदितत्वात्।येपिह्येतांसंज्ञांनारभन्तेतेपिविभाषेत्युक्तेऽनित्यत्वमवगच्छन्ति।याज्ञि-
काःखल्वपिसंज्ञामनारभमाणाविभाषेत्युक्तेऽनित्यत्वमवगच्छन्ति।तद्यथामेध्यःपशुर्विभाषितोमेध्यो
नड्वान्विभाषितइति।आलब्धव्योनालब्धव्यइतिगम्यते।आचार्यःखल्वपिसंज्ञामारभमाणोभूयिष्ठ-
मन्यैरेवशब्दैरेतमर्थंसंप्रत्यापयतिबहुलमन्यतरस्यामुभयथावाएकेषामिति।

स्यात्।नित्यत्वपक्षेतुगालवोह्रस्वत्वस्यस्मर्तान्योदीर्घस्येतिस्मृत्यन्तरानुसन्धानद्वारेणविकल्पःसिध्यतीतिनित्यप-
क्षएवयुक्तः।अशिष्योवेति।वाशब्दोविकल्पे।तेनाकृतिपक्षेउभयत्रविभाषार्थंसूत्रंकर्तव्यम्।व्यक्तिपक्षेतुलक्ष्यभे- रा॰म॰
देनलक्षणभेदात्क्वचित्किंचिल्लक्षणंविधिमुखेनप्रवर्ततेक्वचिन्निषेधमुखेनप्रवर्ततेइतीष्टसिद्ध्यासूत्रंनकर्त- ११२
व्यमित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्राप्ते इति। अधिकारोऽयम्। त्रिसंख्याया इति। त्रिष्वर्थेषु संख्या योयास्तु तास्त्रिसंख्यायाः। द्वन्द्वे चेति। प्रकरणोपलक्षणार्थमे तदुपात्तम्। प्रथमचरमतयेत्यत्र तयग्रहणे संख्यायः। तत्र तयशब्दस्य प्रयोजनं सर्वनामान्वयसंज्ञायामिति वान्वर्थ-संज्ञाविज्ञानाद्वा केवलस्य प्रयोगाभावात्तदन्तस्यैव सर्वनामत्वसंभवात्प्रत्ययग्रहणइति परिभाषया तदन्तविधिः। तत्र यदि सर्वादिग्रहणेन तयन्तं विशेष्यते नेमशब्दोऽव्यभिचारात्प्रथमादयस्त्वसंभवान्न विशेष्यन्ते। तदोभयशब्दस्य जसि नित्या संज्ञा विभाष्यत इति प्राप्तविभाषा स्यात्। अथ सर्वादीनीति निवृत्तं पूर्वविप्रतिषेधश्च तदा प्राप्तविभाषा। अ

अप्राप्ते त्रिसंख्यायाः। इत उत्तरं या विभाषा अनुक्रमिष्याम अप्राप्ते ताः द्रष्टव्याः। त्रिसंख्यायास्तु भवन्ति। प्राप्तेऽप्राप्ते उभयत्र वेति। द्वन्द्वे च विभाषा जसि प्राप्तेऽप्राप्ते उभयत्रेति संदेहः। कथं प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। उभयशब्दः सर्वादिषु पठ्यते तयपश्चायजादेशः क्रियते तेन वा नित्ये प्राप्तेऽन्यत्र वाप्राप्ते उभयत्र वेति। अप्राप्ते। अयच् प्रत्ययान्तरम्। यदि प्रत्ययान्तरमुभयीति ईकारो न प्राप्नोति। मा भूदेवं मात्रजित्येवं भविष्यति। कथम्। मात्रजिति नेदं प्रत्ययग्रहणम्। किं तर्हि प्रत्याहारग्रहणम्। क्व संनिविष्टानां प्रत्याहारः। मात्रशब्दात्प्रभृति आ अयचश्चकारात्। यदि प्रत्याहारग्रहणम्। कतितिष्ठन्ति। अत्रापि प्राप्नोति। अतइति वर्तते। एवमपि तैलमात्रा घृतमात्रा अत्रापि प्राप्नोति। सदृशस्याप्यसंनिविष्टस्य न भविष्यति प्रत्याहारेण ग्रहणम्। उर्णोतेर्विभाषा। प्राप्ते अप्राप्ते उभयत्रेति संदेहः।

थ परविप्रतिषेधस्तदोभयत्र विभाषा। प्रत्ययान्तरमिति। आदेशपक्षे पूर्वविप्रतिषेधो वक्तव्य इति प्रत्ययान्तरपक्ष आश्रितः। उभादुदात्त इत्यत्र तयस्येति नानुवर्तते तदा प्रत्ययान्तरमयज्भवति। तैलमात्रेति। प्रत्याहारे सति चकारेण-मात्रशब्दो न विशेषित इति हुयामाश्रुभसिवसिभ्यस्त्रन्निति त्रन्नन्तादपि मात्रशब्दान्ङीप्प्रसङ्गः। सदृशस्यापीति। प्रमाणे वर्तमानात्प्रमेये यो मात्रज्विहितः स प्रत्याहारेण गृह्यत इत्यर्थः। उर्णोतेर्विभाषेति। विभाषोर्णोरिति सूत्रं यद्यसंयोगाल्लिट् किदित्यत्रानुवर्तते उर्णुश्चासंयोगान्त एवेत्यसंयोगग्रहणाद्वाक्यभेदेनोर्णोः परस्येडादेर्लिटो नित्यं कित्त्वं प्राप्तं विकल्प्यते ततः प्राप्तविभाषा। इडुपजीवनार्थं तु स्थानान्तरे सूत्रं पठितम्। अथ तत्र सूत्रं नानुवर्तते परविप्रतिषेधश्च ततोऽप्राप्तविभाषा। अथ पूर्वविप्रतिषेधस्तदोभयत्रेति संशयः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· अन्यद्वीति। व्यपदेशातिदेशोयमितिकित्त्वङित्त्वयोर्भेदः। एकंचेदिति। कार्यातिदेशपक्षेगुणनिषेधस्यकार्यस्यैकत्वा ११६
११३ देकत्वमनयोरित्यर्थः। प्रोर्णुवीति। लङुत्तमैकवचनम्। सार्वधातुकमपिदित्यत्रविभाषोर्णोरित्येतद्वाक्यभेदेनसंब-
ध्यतेततःप्राप्तविभाषा। अथासंबन्धःपूर्वविप्रतिषेधश्चतदोभयत्रविभाषापरविप्रतिषेधेत्वप्राप्ते। विभाषोपयमन
इति। यदागन्धनाङ्गःमुपयमनंतत्रगृह्यतेतदाप्राप्ते। पूर्वविप्रतिषेधेत्वप्राप्ते। परविप्रतिषेधेउभयत्रवेतिसंदेहः।—

कथंप्राप्तेकथंवाअप्राप्तेकथंवोभयत्र। असंयोगाल्लिट्किदितिवानित्येप्राप्तेअन्यत्रवाप्राप्तेउभय
त्रवेति। अप्राप्तेअन्यद्धिकित्त्वमन्यद्धिङित्त्वम्। एकंचेन्ङित्किती। यद्येकंङित्कितौततःसंदेहः। अ
थहिनानानास्तिसंदेहः यद्यपिनाना,एवमपिसंदेहः। प्रोर्णुवीति। सार्वधातुकमपिदितिनित्येप्राप्तेऽ
न्यत्रवाप्राप्तेउभयत्रवेति। अप्राप्ते। विभाषोपयमने। प्राप्तेऽप्राप्तेउभयत्रवेतिसंदेहः। कथंप्राप्तेक
थंवाअप्राप्तेकथंवाउभयत्र। गन्धनइतिवानित्येप्राप्तेऽन्यत्रवाप्राप्तेउभयत्रवेति। अप्राप्तेगन्धनइ
तिनिवृत्तम्। अनुपसर्गाद्वा। प्राप्तेऽप्राप्ते उभयत्रवेतिसंदेहः। कथंप्राप्तेकथंवाअप्राप्तेकथंवोभयत्र।
वृत्तिसर्गतायनेषुक्रमइतिवानित्येप्राप्तेऽन्यत्रवाप्राप्तेउभयत्रवेति। अप्राप्ते। वृत्त्यादिष्वितिनिवृत्त
म्। विभाषावृक्षमृगादीनांप्राप्तेऽप्राप्तेउभयत्रवेतिसंदेहः। कथंप्राप्तेकथंवाअप्राप्तेकथंवोभयत्र
। जातिरप्राणिनामितिवानित्येप्राप्तेऽन्यत्रवाप्राप्तेउभयत्रेति। अप्राप्तेजातिरप्राणिनामितिनिवृत्त
म्। उषविदजागृभ्योऽन्यतरस्याम्। प्राप्तेऽप्राप्तेउभयत्रवेतिसंदेहः। कथंप्राप्तेकथंवाअप्राप्तेकथं
वोभयत्र। प्रत्ययान्तादितिवानित्येप्राप्तेऽन्यत्रवाप्राप्तेउभयत्रवेति।

जातिरिति। चर्मादिमयास्तदामृगादयोग्राह्याःनिवृत्तमिति। तन्निवृत्तौचगौणत्वाच्चर्मादिमयानामग्रहणम्। प्रत्य
यान्तादितिवेति। कथंपुनःप्रत्ययान्ताःशब्दाःरूपान्तरयुक्ताउषादिव्यपदेशंलभन्ते। उच्यते। सनाद्यन्ताधातवइत्य- रोमः
स्ययदाऽयमर्थोव्याख्यायतेधातवःसनाद्यवयवाभवन्तिधातूनामन्तावयवाःसनादयोभवन्ति। यथासमासान्ता ११३
टजादयस्तदापूर्वोक्तचोद्याभावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययान्ताइति। सनाद्यन्ताधातवइत्ययंयोगः संज्ञासंज्ञिसंबन्धार्थइतिभावः। भावकर्मणोरिति। चिण्भावकर्मणोरि
ति सूत्रे यदि दीपजनेत्येतत्सूत्रमनुवर्त्य वाक्यभेदेन संबन्धः क्रियते एथवषा ठसामर्थ्यात्तदाप्राप्तविभाषा। अथनानु
वर्तते परविप्रतिषेधश्च तदाप्राप्तविभाषा पूर्वविप्रतिषेधेतूभयत्रविभाषेति संशयः। अकर्मकाश्चेति। यद्यपि बुधिः

अप्राप्ते प्रत्ययान्ताधात्वन्तरणिदीपादीनां विभाषा। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं प्राप्ते कथं
वा अप्राप्ते कथं वोभयत्र। भावकर्मणोरिति वा नित्ये प्राप्तेऽन्यत्र वा प्राप्ते उभयत्र वेति। अप्राप्ते। कर्तरी
ति हि वर्तते। एवमपि संदेहः। न्याय्ये वा कर्तरि कर्मकर्तरि वेति। नास्ति संदेहः। सकर्मकस्य कर्ता कर्मैव
भवति। अकर्मकाश्च दीपादयः। अकर्मका अपि वै सोपसर्गाः सकर्मका भवन्ति। कर्मोपदिष्टा विधयः क
र्मस्थभावकानां कर्मस्थक्रियाणां वा भवन्ति। कर्तृस्थभावकाश्च दीपादयः। विभाषाग्रे प्रथमपूर्वेषु। प्रा
प्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। आभीक्ष्ण्य इति वा नित्ये प्रा
प्ते अन्यत्र वा प्राप्ते उभयत्र वेति। अप्राप्ते। आभीक्ष्ण्य इति निवृत्तम्। तृन्नादीनां विभाषा। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः
। कथं च प्राप्ते कथं वाऽप्राप्ते कथं वोभयत्र। आक्रोश इति वा नित्ये प्राप्तेऽन्यत्र वा प्राप्ते उभयत्र वेति।
अप्राप्ते। आक्रोश इति निवृत्तम्। एकहलादौ पूरयितव्येऽन्यतरस्याम्। प्राप्तेऽप्राप्ते उभयत्र वेति सं
देहः। कथं प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। उदकस्योदः संज्ञायामिति वा नित्ये प्राप्तेऽन्यत्र वा अप्रा
प्ते उभयत्र वेति। अप्राप्ते संज्ञायामिति निवृत्तम्। ष्वादेरिञि पदान्तस्यान्यतरस्याम्। प्राप्तेऽप्राप्ते उभ
यत्र वेति संदेहः। कथं च प्राप्ते कथं वाऽप्राप्ते कथं वोभयत्र।

सकर्मकस्तथापि एकपरिहारोपन्यासार्थमविशेषेणोक्तम्। सोपसर्गा इति। अर्थान्तरवृत्तित्वादनुभव तिवदिति
भावः। कर्तृस्थभावकाश्चेति। अत्र कर्तृयकी त्यत्र जायते तस्य यमेवेत्युदाहृतं तस्य एयर्थवृत्तित्वात्कर्मस्थभावकत्वमि
ति नास्ति तेनास्य विरोधः। आभीक्ष्ण्य इति निवृत्तमिति। पूर्वविप्रतिषेधश्चेति भावः। तृन्नादीनामिति। आक्रोश इत्यत्र यद्य-
सौ नानुवर्तते ततोऽयं संशयः। एकहलादाविति। पूरयितव्यस्य चास्ति संज्ञा उदपानमिति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा०कौ० चादिभिरिति। प्रतिषेधस्याप्राप्तविभाषा स्थाप्यते। विधेस्तु प्राप्तविभाषैव। यङीति वेति। यङ्लुकि कृते अजादिः परः संभवति। निजेगि ११६
११५ लद् इत्यत्र पचाद्यचि कृते यङोचि चेति लुक्। प्राप्ते चेति। प्रकृतानुवृत्त्या प्राप्तविभाषा व्यवतिष्ठते। अन्यत्र वेति। विप्रवदन्ति शकुन

इन्नीति वा नित्ये प्राप्तेऽन्यत्र वाऽप्राप्ते उभयत्र वेति। अप्राप्ते इन्नीति निवृत्तम्। सपूर्वायाः प्रथमाया विभाषा। प्राप्तेऽप्राप्ते
उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वाऽप्राप्ते कथं वोभयत्र। चादिभिर्योग इति वा नित्ये प्राप्ते अन्यत्र वाऽप्राप्ते उभ
यत्र वेति। अप्राप्ते चादिभिर्योग इति निवृत्तम्। ग्रो यङि चि विभाषा। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते
कथं वाऽप्राप्ते कथं वोभयत्र। यङीति वा नित्ये प्राप्तेऽन्यत्र वाऽप्राप्ते उभयत्र वेति। अप्राप्ते। यङीति निवृत्तम्। प्राप्ते च
इत उत्तरं या विभाषा अनुक्रमिष्यामः प्राप्ते ता द्रष्टव्याः। त्रिसंप्रयास्तु भवन्ति। प्राप्तेऽप्राप्ते उभयत्र वेति। विभा
षा विप्रलापे। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। व्यक्तवाचामिति वा
नित्ये प्राप्तेऽन्यत्र वाऽप्राप्ते उभयत्र वेति। प्राप्ते। व्यक्तवाचामिति हि वर्तते। विभाषोपपदेन प्रतीयमाने। प्राप्तेऽ
प्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। स्वरितञित इति वा नित्ये प्राप्तेऽन्यत्र
वाऽप्राप्ते उभयत्र वेति। प्राप्ते। स्वरितञित इति हि वर्तते। तिरोऽन्तर्द्धौ विभाषा कृञि। प्राप्ते अप्राप्ते उभयत्र वेति
संदेहः। कथं प्राप्ते कथं वाऽप्राप्ते कथं वोभयत्र। अन्तर्द्धाविति वा नित्ये प्राप्ते अन्यत्र वाऽप्राप्ते उभयत्र वेति। प्राप्ते
ऽन्तर्द्धाविति हि वर्तते। अधिरीश्वरे विभाषा कृञि। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्रा
प्ते कथं वोभयत्र। ईश्वर इति वा नित्ये प्राप्तेऽन्यत्र वाऽप्राप्ते उभयत्र वेति। प्राप्तेऽधिरीश्वर इति वर्तते। दिव
स्तदर्थस्य विभाषोपसर्गे। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। तद
र्थस्येति वा नित्ये प्राप्ते अन्यत्र वाऽप्राप्ते उभयत्र वेति। रामः

यद्यत्र पूर्वविप्रतिषेधश्च यदीति भावः। विभाषोपपदेन प्रतीयमाने इति। कर्त्रभिप्राये क्रियाफलविषये आत्मनेपदं भव ११५
तीत्येवं प्राप्तविभाषा व्यवतिष्ठते। अथ तु तदर्थद्योतनायात्मनेपदं क्रियते तदोपपदेनैव द्योतितत्वादप्राप्तविभाषा स्यात्।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गतिबुद्धीति। तत्र विपूर्वो हरतिर्गत्यर्थोऽभ्यवपूर्वः प्रत्यवसानार्थः। करोतिः क्वचिदकर्मको यथा विकुर्वते सैन्धवा इति। यदीति वेति। प्रतिषेधे

प्राप्ते। तदर्थं सेति वर्तते। उभयत्र चाद्युत उत्तरं या विभाषा अनुक्रमिष्यामः उभयत्र ताः द्रष्टव्याः। त्रिसंप्रायास्तु
भवन्ति। प्राप्तेऽप्राप्ते उभयत्र वेति। हृक्रोरन्यतरस्याम्। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं प्राप्ते कथं वाऽप्रा
प्ते कथं वोभयत्र। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णाविति वा नित्ये प्राप्तेऽन्यत्र
वाप्राप्ते उभयत्र वेति संदेहः। उभयत्र। प्राप्ते तावत्। अभ्यवहारयति सैन्धवान्। अभ्यवहारयति सैन्ध
वैः। विकारयति सैन्धवान्। विकारयति सैन्धवैः। अप्राप्ते हरति भारं देवदत्तः। हारयति भारं देवदत्तम्। हारयति
भारं देवदत्तेन। करोति कटं देवदत्तः। कारयति कटं देवदत्तेन। कारयति कटं देवदत्तम्। न यदि विभाषा सा काङ्क्षा। प्रा
प्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। यदीति वा नित्ये प्राप्तेऽन्यत्र वाऽप्राप्ते उ
भयत्र वेति। उभयत्र प्राप्ते तावत्। अभिजानासि देवदत्त यत्कश्मीरेषु वत्स्यामः। यत्कश्मीरेष्ववसाम। यत्तत्रौ
दनं भोक्ष्यामहे। यत्तत्रौदनमभुञ्ज्महि। अप्राप्ते अभिजानासि देवदत्त यत्कश्मीरान् गमिष्यामः। कश्मीरानगच्छा
म तत्रौदनं भोक्ष्यामहे तत्रौदनमभुञ्ज्महि। विभाषा श्वेः। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा
अप्राप्ते कथं वोभयत्र। क्तीति वा नित्ये प्राप्तेऽन्यत्र वाऽप्राप्ते उभयत्र वेति। उभयत्र प्राप्ते तावत्। शुशुवतुः शु
शुवुः। शिश्वियतुः शिश्वियुः। अप्राप्ते। शुशुविथ। शुशुविथ शिश्वयिथ। विभाषा संघुषास्वनाम्। सं
पूर्वाद्घुषेः प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वाऽप्राप्ते कथं वोभयत्र। घुषिरविशब्दन इ
ति वा नित्ये प्राप्तेऽन्यत्र वाऽप्राप्ते उभयत्र वेति। उभयत्र प्राप्ते तावत्। संघुष्टा रज्जुः संघुषिता रज्जुः। अप्रा
प्ते संघुष्टं वाक्यमाह संघुषितं वाक्यमाह। आङ्पूर्वात्स्वनेः प्राप्तेऽन्यत्र वाप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वाऽ
प्राप्ते कथं वोभयत्र। मनसीति वा नित्ये प्राप्तेऽन्यत्र वा अप्राप्ते उभयत्र वेति। उभयत्र प्राप्ते तावत्। आस्वान्तं मनः। आस्वनि
तं मनः। अप्राप्ते। आस्वनितो देवदत्तः आस्वान्तो देवदत्त इति॥ इति श्रीषष्ठमाह्निकम्॥

प्राप्ते इत्यर्थः। लटं तु यदि प्रतिषिद्धः देवयज्ञीत्यादि न विचारितं तस्माद्धिङ्गुमात्रप्रदर्शनार्थं कृतम्॥ इति ६ आह्निकम्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

 चादिभिरिति। प्रतिषेधस्याप्राप्तविभाषात्वात्स्थाप्यते। विधेस्तु प्राप्तविभाषैव। यङीतिवेति। यङ्लुकि कृते अजादिः परः संभवति। निजेगि
 लइत्यत्र पचाद्यच्चि कृते यङोचि चेति लुक्। प्राप्ते चेति। प्रकृतानुवृत्त्या प्राप्तविभाषा व्यवतिष्ठते। अन्यत्र वेति। विप्रवदन्ति शाकुन

इत्रीति वा नित्ये प्राप्तेऽन्यत्र वा प्राप्ते उभयत्र वेति। अप्राप्ते इञीति निवृत्तम्। सपूर्वायाः प्रथमाया विभाषा। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वाऽप्राप्ते कथं वोभयत्र। चादिभिर्योगइति वा नित्ये प्राप्ते अन्यत्र वाऽप्राप्ते उभयत्र वेति। अप्राप्ते चादिभिर्योग इति निवृत्तम्। ग्रो यङ्यचि विभाषा। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वाऽप्राप्ते कथं वोभयत्र। यङीति वा नित्ये प्राप्तेऽन्यत्र वाप्राप्ते उभयत्र वेति। अप्राप्ते। यङीति निवृत्तम्। प्राप्ते च। इत उत्तरं या विभाषा अनुक्रमिष्यामः प्राप्ते ता द्रष्टव्याः। त्रिसंप्रयास्तु भवन्ति। प्राप्तेऽप्राप्ते उभयत्र वेति। विभाषा विप्रलापे। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। व्यक्तवाचामिति वा नित्ये प्राप्तेऽन्यत्र वाप्राप्ते उभयत्र वेति। प्राप्ते। व्यक्तवाचामिति हि वर्तते। विभाषोपपदेन प्रतीयमाने। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। स्वरितञितइति वा नित्ये प्राप्तेऽन्यत्र वाप्राप्ते उभयत्र वेति। प्राप्ते। स्वरितञित इति हि वर्तते। तिरोऽन्तर्द्धौ विभाषा कृञि। प्राप्ते अप्राप्ते उभयत्र वेति संदेहः। कथं प्राप्ते कथं वाऽप्राप्ते कथं वोभयत्र अन्तर्द्धाविति वा नित्ये प्राप्ते अन्यत्र वाऽप्राप्ते उभयत्र वेति। अप्राप्तेऽन्तर्द्धाविति हि वर्तते। अधिरीश्वरे विभाषा कृञि। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। ईश्वर इति वा नित्ये प्राप्तेऽन्यत्र वाप्राप्ते उभयत्र वेति। प्राप्तेऽधिरीश्वर इति वर्तते। द्वितदर्थस्य विभाषोपसर्गे। प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। तदर्थस्येति वा नित्ये प्राप्ते अन्यत्र वाप्राप्ते उभयत्र वेति।

यद्दत्यत्र पूर्वविप्रतिषेधश्चयदीति भावः। विभाषोपपदेन प्रतीयमाने इति। कर्त्रभिप्राये क्रियाफलविषये आत्मनेपदं भव
तीत्येवं प्राप्तविभाषा व्यवतिष्ठते। अथ तु तदर्थद्योतनायात्मनेपदं क्रियते तदोपपदेनैव द्योतितत्वादप्राप्तविभाषा स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतिबुद्धीति।तत्र विपूर्वो हरतिर्गत्यर्थोऽभ्यवपूर्वः प्रत्यवसानार्थः।करोतिः क्वचिदकर्मको यथा विकुर्वते सैन्धवा इति।यदीति वेति।प्रतिषेधे

प्राप्ते।तदर्थस्येति वर्तते। उभयत्र वा इत्युत्तरं या विभाषा अनुक्रमिष्यामः उभयत्र ताः द्रष्टव्याः।त्रिसंप्रयाश्च

भवन्ति।प्राप्तेऽप्राप्ते उभयत्र वेति।हृक्रोरन्यतरस्याम्।प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः।कथं प्राप्ते कथं वाऽप्रा

प्ते कथं वोभयत्र।गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णाविति वा नित्ये प्राप्तेऽन्यत्र

वाप्राप्ते उभयत्र वेति संदेहः।उभयत्र।प्राप्ते तावत्।अभ्यवहारयति सैन्धवान्।अभ्यवहारयति सैन्ध

वैः। विकारयति सैन्धवान् विकारयति सैन्धवैः।अप्राप्ते हरति भारं देवदत्तः हारयति भारं देवदत्तम्।हारयति

भारं देवदत्तेन।करोति कटं देवदत्तः।कारयति कटं देवदत्तेन कारयति कटं देवदत्तम्।न यदि विभाषा साकाङ्क्षे।प्रा

प्तेऽप्राप्ते उभयत्र वेति संदेहः।कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र।यदीति वा नित्ये प्राप्तेऽन्यत्र वाऽप्राप्ते उ

भयत्र वेति।उभयत्र प्राप्ते तावत्।अभिजानासि देवदत्त यत्कश्मीरेषु वत्स्यामः।यत्कश्मीरेषु वसाम।यत्तत्रौ

दनं भोक्ष्यामहे।यत्तत्रौदनमभुञ्ज्महि।अप्राप्ते अभिजानासि देवदत्त यत्कश्मीरान् गमिष्यामः।कश्मीरान् गच्छा

म तत्रौदनं भोक्ष्यामहे तत्रौदनमभुञ्ज्महि।विभाषा श्वेः।प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः।कथं च प्राप्ते कथं वा

अप्राप्ते कथं वोभयत्र।कितीति वा नित्ये प्राप्तेऽन्यत्र वाऽप्राप्ते उभयत्र वेति।उभयत्र प्राप्ते तावत्।शुशुवतुः शु

शुवुः।शिश्वियतुः शिश्वियुः।अप्राप्ते।शुशुविथ शिश्वायिथ शिश्वयिथ।विभाषा संघुषास्वनाम्।सं

पूर्वाद् घुषेः प्राप्तेऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वाऽप्राप्ते कथं वोभयत्र।घुषिरविशब्दन इ

ति वा नित्ये प्राप्तेऽन्यत्र वाऽप्राप्ते उभयत्र वेति।उभयत्र प्राप्ते तावत्।संघुष्टा रज्जुः संघुषिता रज्जुः।अप्रा

प्ते संघुष्टं वाक्यमाह संघुषितं वाक्यमाह।आङ्पूर्वात्स्वनेः प्राप्तेऽन्यत्र वाप्राप्ते उभयत्र वेति संदेहः।कथं च प्राप्ते कथं वाऽ

प्राप्ते कथं वोभयत्र।मनसीति वा नित्ये प्राप्तेऽन्यत्र वा अप्राप्ते उभयत्र वेति।उभयत्र प्राप्ते तावत्।आस्वान्तं मनः।आस्वनि

तं मनः।अप्राप्ते।आस्वनितो देवदत्तः आस्वान्तो देवदत्त इति॥ इति श्रीषष्ठमाह्निकम्॥

प्राप्त इत्यर्थः।लट् तु यदि प्रतिषिद्धः। देवयज्ञीत्यादि न विचारितं तस्माद्दिङ्मात्रप्रदर्शनार्थं कृतम्॥ इति ६ आह्निकम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इग्यणः संप्रसारणम् पक्षद्वयेऽपि लिङ्गदर्शनाद्युगपच्चोभयोः संज्ञित्वस्यैकस्मिन्वाक्येऽनुपादानादेकतरपक्षाश्रयणे सर्व
कार्यासिद्धिप्रसङ्गात्प्रश्नः। किमियमिति। वाक्यशब्देन वाक्यार्थ उच्यते। इग्यणा इत्यत्र भवतीत्यध्याहारादिग्यणो भवती
ति यो यं वाक्यार्थस्तस्येयं संज्ञेत्यर्थः। अथवा वाक्यस्यैवेयं संज्ञा तत्प्रतिपादितं च वाक्यस्यार्थमपि प्रतिपादयति। यणः-
स्थाने यद् इग्वर्णः स संप्रसारणसंज्ञ इति वर्णसंज्ञापक्षः। वर्णविधिरिति। वर्णाश्रयो विधिर्दीर्घादिः। नहीति। वाक्यार्थे नपौ

इग्यणः संप्रसारणम्॥ किमियं वाक्यस्य संप्रसारणसंज्ञा क्रियते। इग्यणा इत्येतद्वाक्यं संप्रसारणसंज्ञं
भवतीति। आहोस्विद्वर्णस्य इग्यो यणः स्थाने वर्णः स संप्रसारणसंज्ञो भवतीति। कश्चात्र विशेषः॥ संप्रसा
रणसंज्ञायां वाक्यस्य संज्ञा चेद्वर्णविधिः॥ संप्रसारणसंज्ञायां वाक्यस्य संज्ञा चेद्वर्णविधिर्न सिध्यति। संप्रसा
रणात्परः पूर्वो भवतीति संप्रसारणस्य दीर्घो भवति। नहि वाक्यस्य संप्रसारणसंज्ञायामेष निर्देश उपपद्य
तेनाप्येतयोः कार्ययोः संभवोऽस्ति। अस्तु तर्हि वर्णस्य॥ वर्णसंज्ञा चेन्निर्वृत्तिः॥ वर्णसंज्ञा चेन्निर्वृत्तिर्न सिध्य
ति। ष्यङः संप्रसारणमिति स एव हि तावदिग् दुर्लभः यस्य संज्ञा क्रियते। अथापि कथंचिल्लभ्येत केना
सौ यणः स्थाने स्यात्। अनेन चैव ह्यसौ व्यवस्थाप्यते तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च
कार्याणि न प्रकल्प्यन्ते। विभक्तिविशेषनिर्देशस्तु ज्ञापकः उभयसंज्ञात्वस्य। यदयं विभक्तिविशे-
षैर्निर्देशं करोति संप्रसारणात्परः पूर्वो भवतीति संप्रसारणस्य दीर्घो भवति ष्यङः संप्रसारणं भवति
इति तेन ज्ञायत उभयोः संज्ञा भवतीति। यत्तावदाह। संप्रसारणात्परः पूर्वो भवतीति संप्रसारणस्य दी
र्घो भवति। तेन ज्ञायते वर्णस्य भवतीति। यदप्याह ष्यङः संप्रसारणमिति तेन ज्ञायते वाक्यस्य संज्ञा भवतीति।

र्वापर्याभावात्तस्य चासत्त्वभूतस्य स्थानित्वासंभवादित्यर्थः। दुर्लभ इति। कार्यपक्षे न लभ्यते नित्यपक्षे तु लभ्यत इति दुर्ल
भत्वमुक्तम्। केनासाविति। लोके इगेव नित्यं प्रयोगेऽस्ति तस्य तु यणः स्थानिकत्वं शास्त्रसमधिगम्यमित्यर्थः। भाविसं-
ज्ञाविज्ञानं तु परिहारान्तराभिधानायेन तावदत्रोक्तम्। उभयसंज्ञात्वस्येति। उभयोः संज्ञा उभयसंज्ञा तस्याः भाव उभय-
संज्ञात्वम्। तत्र तत्रा इत्येकशेषाणामन्यतमाश्रयणे नोभयोः संज्ञा सिध्यति। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा काकादिति नानुकाकत्वाभिसंबन्धात्काकः। अन्यत्र चोक्तम्। येनैकः काकस्तेनैवापरोपीति। नैष दोषः। यदानुपजातजात्यभिव्यञ्जकसंस्थानविशेषः काको भवति निर्ज्ञातं च तस्य काकाज्जन्म तदैतदुक्तम्। एवमिहापि संप्रसारणाज्जातत्वादुपचाराद्वर्णोपि तच्छब्दं लभत इति भावः। प्रविशेति। प्रवेशनक्रियाकर्मयोग्यमाक्षिपति तत्र पिण्ड्याः प्रवेशसंभवाद्

अथवा पुनरस्तु वाक्यस्यैव ननु चोक्तं संप्रसारणसंज्ञायां वाक्यस्य संज्ञा चेद्गुणविधिर्न सिध्यतीति। नैष दोषः। यथा काकाज्जातः काकः श्येनाज्जातः श्येनः एवं संप्रसारणाज्जातं संप्रसारणं तस्मात्परः पूर्वो भवति तस्य दीर्घो भवतीति। अथवा दृश्यन्ते हि वाक्येषु वाक्यैकदेशान्प्रयुञ्जानाः पदेषु पदैकदेशान्प्रयुञ्जानाः। वाक्येषु तावद्वाक्यैकदेशान्। प्रविश पिण्डीं प्रविश तर्पणम्। पदेषु पदैकदेशान्। देवदत्तो दत्तः सत्यभामा भामेति। एवमिहापि संप्रसारणनिर्वृत्तात्संप्रसारणनिर्वृत्तस्येति। एतस्य वाक्यस्यार्थे संप्रसारणात्संप्रसारणस्येत्येष वाक्यैकदेशः प्रयुज्यते तेन निर्वृत्तस्य विधिं विज्ञास्यामः। संप्रसारणनिर्वृत्तात्संप्रसारणनिर्वृत्तस्येति। अथवा आहायं संप्रसारणात्परः पूर्वो भवतीति संप्रसारणस्य दीर्घो भवतीति न च वाक्यस्य संप्रसारणसंज्ञायां सत्यामेष निर्देश उपपद्यते नाप्येतयोः कार्ययोः संभवोस्तीति तत्र वचनाद्भविष्यति। अथवा पुनरस्तु वर्णस्य। ननु चोक्तं वर्णसंज्ञा चेन्निर्वृत्तिरिति। नैष दोषः। इतरेतराश्रयमात्रमेतच्चोदितम्। सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि सिद्धं तु नित्यशब्दत्वादिति। नेदं तुल्यमन्यैरितरेतराश्रयैः। न हि तत्र किंचिदुच्यतेऽस्य स्थाने ये आकारैकारौकारा भाव्यन्ते ते वृद्धिसंज्ञा भवन्तीति। इह हि पुनरुच्यत इग्यो यणः स्थाने वर्णः स संप्रसारणसंज्ञो भवतीति।

हृप्रतिपत्तिः। एवं पिण्डीमिति कर्मयोग्यां क्रियामाक्षिपद्भक्षणक्रियां प्रकरणवशात्प्रत्याययति। एवं संप्रसारणादित्येतन्निर्वृत्तार्थमाक्षिपतीत्यर्थः। यथा च पदैकदेशप्रयोगस्तथा सिद्धे शब्दार्थसंबन्धे इत्यत्र प्रतिपादितम्। अथवेति। यथा ब्राह्मणशतं भोज्यतामित्युक्ते सामर्थ्यात्संख्येया ब्राह्मणा भोज्यन्ते तथेहापि संप्रसारणादित्युक्ते वाक्यार्थे न पौर्वापर्याभावात्तत्फलस्य वर्णस्य प्रतीतिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ भाविनीति। ष्यङः संप्रसारणमिति विधिप्रदेशेषु भाविसंज्ञा विज्ञानमित्यर्थः। सिद्धं तु नित्यशब्दत्वादित्येतत्समर्थनार्थ- ११·७
११६ माह। अथ वेति। बुद्धिविपरिणाममात्रं स्थान्यादेशभावइत्यर्थः। असाध्वभिमतस्येति। प्राक्संप्रसारणशास्त्रादिति भावः। य
थासंख्यसंबन्धाददुहितरमितिइकारस्य संप्रसारणसंज्ञा न भवति। दिव उदित्युत्त्वे यणादेशे कृते हलइति दीर्घत्वं त
परकरणान्न भवति द्युभ्यामिति। असत्यु वाविति यत्र संप्रसारणं चेति पूर्वैकादेशो न भवति अचः पश्चात्सन्निधानात्। अथ

एवं तर्हि भाविनी संज्ञा विज्ञास्यते। तद्यथा कश्चित्कंचित्तन्तुवायमाह अस्य सूत्रस्य शाटकं वयेति स पश्यति
यदि शाटको न वातव्यः। अथ वातव्यो न शाटकः। शाटको वातव्यश्चेति विप्रतिषिद्धम्। भाविनी खल्वस्य सं
ज्ञाऽभिप्रेता स मन्ये वातव्यो यस्मिन्नुते शाटक इत्येतद्भवतीति। एवमिहापि स यणः स्थाने भवति यस्याभिनि
र्वृत्तस्य संप्रसारणमित्येषा संज्ञा भविष्यति। अथ वा इजादियजादिप्रवृत्तिश्चैव हि लोके लक्ष्यते। यजादयुप
देशात्तु इजादिनिवृत्तिः प्रसक्ता। प्रयुञ्जते च पुनर्लोका इष्टमुप्तमिति ते मन्यामहे अस्य यणः स्थाने इ
ममिकं प्रयुञ्जत इति। तत्र तस्यासाध्वभिमतस्य शास्त्रेण साधुत्वमन्वाख्यायते किति साधुर्भवति ङिति
साधुर्भवतीति॥ आद्यन्तौ टकितौ॥ समासनिर्देशोऽयं तत्र न ज्ञायते क आदिः कोऽन्त इति। तद्यथा। अजाविधनौ
देवदत्तयज्ञदत्तावित्युक्ते तत्र न ज्ञायते कस्याजा धनं कस्याऽवय इति। यद्यपि तावल्लोक एष दृष्टान्तः दृष्टान्तस्याऽपि
तु पुरुषारम्भो निवर्तको भवति। अस्ति चेह कश्चित्पुरुषारम्भः। अस्तीत्याह। कः। संख्यातानुदेशो नाम। कोऽपुनष्टकितावा
द्यन्तौ भवतः। आगमावित्याह। युक्तं पुनर्यन्नित्येषु नाम शब्देषु आगमशासनं स्यात्। न नित्येषु नाम शब्देषु कूटस्थैरविचा
लिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः। आगमश्च नामाऽपूर्वः शब्दोपजनः। अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः।
बाढं युक्तम्। शब्दान्तरैरिह भवितव्यम्। तत्र शब्दान्तराच्छब्दान्तरस्य प्रतिपत्तिर्युक्ता। आदेशास्तर्हीमे भविष्यन्ति। अनागमकानां सागमकाः

वा वर्णादाङ्गस्य बलीयस्त्वात्॥ आद्यन्तौ॥ लोकव्यवहारादत्र क्रमव्यवस्था न सिध्यति अपि तु शास्त्रेणैवेति प्रदर्शनाय पूर्वपक्षः
। समासनिर्देशोऽयमिति। अभिन्नस्याऽर्थस्य समासेन प्रतिपादनादित्यर्थः। यद्यपीत्येवं देवदत्तस्य यज्ञदत्तस्य चाऽजा अवयश्च धनमितिवा रामः
क्येऽपि क्रमव्यवस्था नास्ति तथापि समासे तु तरां नास्तीति प्रतिपादयितुं समासनिर्देश इत्युक्तम्। यद्यपीति। दर्शनं दृष्टं तस्यान्तो नि- ११६
श्चयः। यद्यपि लोक एतद्दर्शनमित्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संज्ञाधिकारोऽयमिति। यद्येवं संज्ञासंज्ञिप्रत्यायनार्थो संज्ञिनं प्रत्याय्य स्वयमेव निवर्तत इति किमिङ्ग्रहणेन टकावित्येवास्तु
। नैष दोषः। इत्संज्ञत्वेन देशविशेष उपलक्ष्यते। तेनेत्संज्ञकस्य यो देशस्तद्देशावस्थितौ टकौ संज्ञे भवत आल्लजाटचावि
त्याटच्प्रत्यये टकारः संज्ञा न भवति। तत्रेड्ग्रहणेनेकारादिः शब्दो गृह्यते स्थानेऽन्तरतमश्चाऽऽदेशो भवतीति तव्यस्य
इतव्यो भवतीति सिद्धमिष्टम्। अङ्गस्योदात्तत्वमिति। तच्चालोऽन्त्यस्येत्यन्त्यस्य स्यात्। त्रिपदोऽयमिति। विशेषणस्याप्यु-
दात्तस्य सौत्रत्वान्निर्देशस्य परनिपातः। यत्र तर्हीति। तत्र ह्युदात्तग्रहणमेवानुवर्तत इत्यशक्यो बहुव्रीहिराश्रयितुमि-

तत्कथम्। संज्ञाधिकारोऽयम्। आद्यन्तौ चेह संकीर्त्येते टकारककारावितावुदाह्रियेते तत्राऽऽद्यन्तयो
ष्टकारककारावितौ संज्ञे भविष्यतः। तत्रार्द्धधातुकस्येड्वलादेरित्युपस्थितमिदं भवति आदिरिति ते
नेकारादिरादेशो भविष्यति। एतावदिह सूत्रमिडिति। कथं पुनरियता सूत्रेणेकारादिरादेशो ल-
भ्यः। लभ्य इत्याह। कथम्। बहुव्रीहिनिर्देशात्। बहुव्रीहिनिर्देशोऽयम्। इकार आदिरस्येति। यद्यपि ता
वदत्रैतच्छक्यते वक्तुम्। इह तु कथम्। लुङ्लङ्लृङ्क्ष्वडुदात्त इति। अत्राशक्यमुदात्तग्रहणेना
कारो विशेषयितुम्। तत्र को दोषः। अङ्गस्योदात्तत्वं प्रसज्येत। नैष दोषः। त्रिपदोऽयं बहुव्रीहिः। तत्र वाक्य
एवोदात्तग्रहणेनाकारो विशेष्यते। अकार उदात्त आदिरस्येति। यत्र तर्ह्यनुवृत्त्यैतद्भवति। आडजादीनामि
ति। वक्ष्यत्येतत्। अजादीनामटा सिद्धमिति॥ अथवा यत्तावदयं सामान्येनोपदेष्टुं शक्नोति तत्तावदुपदि
शति प्रकृतिं ततो वलाद्यार्द्धधातुकं ततः पश्चादिकारं तेनाऽयं विशेषेण शब्दान्तरं समुदायं प्रतिपद्यते।
। तद्यथा। खदिरबर्बुरयोः। खदिरबर्बुरौ गौरकाण्डौ सूक्ष्मपर्णौ। ततः पश्चादाह। कण्टकवान्खदिर इ
ति। तेनाऽसौ विशेषेण द्रव्यान्तरं समुदायं प्रतिपद्यते॥

ति भावः। वक्ष्यत्येतदिति। सूत्रस्यैव प्रत्याख्यानाददोष इत्यर्थः॥ अथवेति। परिभाषापक्षेऽपि न दोष इत्यर्थः। न ह्यव्यव
स्थितस्य तव्यस्य पश्चादिकारोऽवयव आगच्छति येनाऽनित्यत्वं स्यात्। किं तर्हि। नित्यं पदमनेनोपायेनाऽन्वाख्यायते।
खदिरबर्बुरयोरिति निर्द्धारणे षष्ठी तयोः कण्टकवान्खदिर इत्युक्ते द्रव्यान्तरं खदिरं प्रतिपद्यते न तत्र कण्टकास्तदानी
मारोप्यन्ते प्रतिपादनोपाय एवाऽयमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। एतदाह अस्तिस्तएधीतितत्त्वतोरूपार्थान्वयाभावात्कल्पिताभ्यामेवान्वयव्यतिरेकाभ्यामर्थवत्तामाश्रित्याऽसत्यप्र-
कृतिप्रत्ययोपदेशेन सत्यस्य पदस्य व्युत्पादनं क्रियते रेखागवयेनेव सत्यगवयस्य। प्रत्ययप्रतिषेध इति। प्रत्ययपरत्वस्या-
ऽप्ययमपवादः प्राप्नोतीति भावः। परवचनादिति। पुरस्तादपवादन्यायेन स्थानेयोगत्वमेवाऽनेन बाध्यते न प्रत्ययपरत्वमि-
ति भावः। नापवादत्वादिति। बाध्यमात्रापेक्षायां पुरस्तादपवादन्यायो नास्तीति भावः। सर्वापवाद वायमाह। प्रयोजनमिति।

अथवा एतयाऽऽनुपूर्व्याऽयं शब्दान्तरमुपदिशति। प्रकृतिं ततो वलाद्यार्धधातुकं ततः पश्चादिकारं यस्मिं-
स्तस्याऽऽगमबुद्धिर्भवति॥ टकितो एयन्तविधाने प्रत्ययप्रतिषेधः॥ टकितो एयन्तविधाने प्रत्ययस्य प्रतिषे-
धो वक्तव्यः प्रत्यय आदिरन्तो वा मा भूदिति। चरेष्टः। आतोऽनुपसर्गे कः इति। परवचनात्सिद्धम्। परवचना-
त्प्रत्यय आदिरन्तो वा न भविष्यति। परवचनात्सिद्धमिति चेन्नाऽपवादत्वात्। परवचनात्सिद्धमिति चेन्न।
किं कारणम्। अपवादत्वात्। अपवादोऽयं योगः। तद्यथा। मिदचोऽन्त्यात्पर इत्येष योगः स्थानेयोगत्वस्य प्र-
त्ययपरत्वस्य चापवादः। विषम उपन्यासः। युक्तं तत्र यदनवकाशं मित्करणं स्थानेयोगत्वं प्रत्ययपरत्वं च-
बाधते। इह तु पुनरुभयं सावकाशम्। कोऽवकाशः। टित्करणस्याऽवकाशः। टित इति ईकारो यथा स्यात्।
कित्करणस्याऽवकाशः। कितीत्याकारलोपो यथा स्यात्। प्रयोजनं नाम तद्वक्तव्यं यन्नियोगतः स्यात्। य-
दि चायं नियोगतः परः स्यात्तत एतत्प्रयोजनं स्यात्। कुतो नु खल्वेतत्। टित्करणादयं परो भविष्यति
न पुनरादिरिति कित्करणाच्च परो भविष्यति न पुनरन्त इति। टितः खल्वप्येष परिहारः। यत्र नास्ति संभ-
वः। यत्परश्च स्यादादिश्च। कितस्तु परिहारः। अस्ति हि संभवो यत्परश्च स्यादन्तश्च। तत्र को दोषः। उपस-
र्गे घोः किः आध्योः प्रध्योः नोङ्धात्वोरिति प्रतिषेधः प्रसज्येत।

सति परत्वे प्रयोजनमेतत्स्यात् परत्वमेव ——— त्वलभ्यमित्यर्थः। टित्करणादिति। ङीबर्थादित्यर्थः। कित्करणादिति। आ- रामः
कारलोपार्थात्। प्रयोजनमभ्युपेत्याह। टित इति। कितस्त्विति। ननु परत्वाऽवयवत्वयोर्विरोधात्कथमुच्यते परश्च स्यादन्त- ११७
श्चेति। नैष दोषः। परस्य सतोऽन्तवत्कार्यप्राप्त्या अन्तत्वमुच्यते। यथा समासान्तानाम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टितश्चापीति। पूर्वोक्तमेव समर्थयते अधिकं वक्तुम्। गापोष्टगिति। अत्र किं त्वात्परत्वादन्तत्वमिति टिदन्तमेतद्भवतीति ङी
पोऽयमवकाशः। ततश्च चरेष्ट इत्ययमादिः स्यात्। षष्ठ्यधिकार इति। यत्र स्थानषष्ठी प्राप्ता तत्रोपस्थानमस्य न तु प्रत्ययप
रत्वबाधनाय। आद्यन्तयोर्वेति। षष्ठ्याः प्रयोजकावाद्यन्तौ। षष्ठ्यभावाच्चाऽऽद्यन्ताभावावगतिरित्यर्थः। युक्तं पुनरिति। श
ब्दभावाभावाभ्यामर्थभावाभावयोः शब्दनिमित्तकत्वमर्थस्य प्राप्तं तच्च पुनर्न युक्तम्। ज्ञापको हि शब्दोऽर्थस्य न तु कार
कः सर्वेण सर्वस्यार्थस्य क्रियाप्रसङ्गादिति भावः। अर्थनिमित्तक एवेति। अर्थ एव शब्दस्य प्रयोजकस्तत्प्रतिपादनाय श

टितश्चाऽप्यपरिहारः। स्यादेव ह्ययं टित्करणादादिर्न पुनः परः। क्व तर्हीदानीमिदं स्यात्। टित ईकारो भव
तीति। यदुभयवान् गापोष्टगिति। सिद्धं तु षष्ठ्यधिकारे वचनात्। सिद्धमेतत्। कथम्। षष्ठ्यधिकारेऽयं यो
गः कर्तव्यः आद्यन्तौ टकितौ षष्ठीनिर्दिष्टस्येति। आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावेऽसंप्रत्ययः। आद्यन्त
योर्वा षष्ठ्यर्थत्वात्तदभावे षष्ठ्या अभावे असंप्रत्ययः स्यात्। आदिरन्तो वा न भविष्यति। युक्तं पुनर्यच्छ
ब्दनिमित्तको नामार्थः स्यात्। नार्थनिमित्तकेन नाम शब्देन भवितव्यम्। अर्थनिमित्तक एव शब्दः। त
त्कथम्। आद्यन्तौ षष्ठ्यर्थौ। नैवाऽत्र षष्ठीं पश्यामः। तेन मन्यामहे आद्यन्तावेवाऽत्र न स्तस्तयोरभावे
षष्ठ्यपि न भवतीति॥ मिदचोऽन्त्यात्परः॥ किमर्थमिदमुच्यते। मिदचोऽन्त्यात्परः स्थानपरप्रत्ययस्याऽ
पवादः। मिदचोऽन्त्यात्पर इत्युच्यते स्थानेयोगत्वस्य प्रत्ययपरत्वस्य चापवादः। स्थानेयोगत्वस्य तावत्।

ब्दप्रयोगः। अप्रयोगाच्चाऽनुमीयते नूनम् अर्थ एवात्र प्रयोजको नास्ति शब्दप्रयोगं यः प्रयुञ्जीतेत्यर्थः। चरेष्ट इत्यत्र पर
श्चेत्यधिकारात् एवं अन्येद्युक्ता गापोष्टग् व्रीहिशाल्योर्ढगित्यादावप्यानन्तर्यसंबन्धे षष्ठी न त्ववयवावयविसंबन्धे। प्र
त्ययपरत्वेन प्रतियोगसंनिहितेनाकाङ्क्षाविच्छेदादनर्थित्वादस्या अनुपस्थानात्। पुरस्तादपवादन्यायस्तु यथोद्देशपक्षे
संभवति न कार्यकालपक्ष इति नाश्रितः॥ मिदचोऽन्त्यात्परः॥ किमर्थमिति। किमनेन व्यावर्त्यत इति प्रश्नः। स्थानेति। पर-
स्य सतः प्रत्ययस्यापवादस्तेन सामर्थ्यादयमर्थः प्रत्ययपरत्वस्याऽपवाद इति। ॥

CC-0. In Public Domain. Digitization by eGangotri

कुण्डानीति। नपुंसकस्य झलचइत्यनेन झलजन्तस्य नपुंसकस्य तदन्तविधिरिति अत्ति स्थाने योगत्वस्य प्रसङ्गः। मित्त्वात्
लस्मिन्नुपस्थितेन नपुंसकस्याऽङ्गस्येत्यवयवषष्ठी संपद्यते। स्थाने चेति। ततश्च सकारस्य स्थाने नुम् भवत्वित्यर्थः। दृष्टान्त
इति। निश्चय इत्यर्थः। तत्र दृष्टव्यवहारादौ दृष्टेव वाक्यार्थेऽनुत्पत्तिर्यत्सामान्यविहितो विशेषविहितेन बाध्यते न स

कुण्डानि वनानि पयांसि यशांसि। प्रत्ययपरत्वस्य। भिनत्ति छिनत्ति। भवेदिदं युक्तमुदाहरणम्। कुण्डा
नि वनानि यत्र नास्ति संभवो यदयमचोऽन्त्यात्परश्च स्यात् स्थाने चेति। इदं त्वयुक्तम् पयांसि यशांसीति। अ
स्ति हि संभवो यदयमचोऽन्त्यात्परश्च स्यात् स्थाने चेति। एतदपि युक्तम्। कथम्। नैवेश्वर आज्ञापयति
नापि धर्मसूत्रकाराः पठन्ति। अपवादैरुत्सर्गा बाध्यन्तामिति। किं तर्हि। लौकिकोऽयं दृष्टान्तः। लोके हि
सत्यपि संभवे बाधनं भवति। तद्यथा। दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति। सत्यपि संभवे दधि
दानस्य तक्रदानं निवर्तकं भवति। एवमिहापि सत्यपि संभवेऽचामन्त्यात्परत्वं षष्ठीस्थानेयोगत्वं बा
धिष्यते॥ अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम्॥ अन्त्यात्पूर्वो मस्जेर्मिद्वक्तव्यः। किं प्रयोज
नम्। अनुषङ्गसंयोगादिलोपार्थम्। अनुषङ्गलोपार्थं संयोगादिलोपार्थं च। अनुषङ्गलोपार्थं ताव
त्। मग्नः। मग्नवान्। संयोगादिलोपार्थम्। मङ्क्ता मङ्क्तुम् मङ्क्तव्यम्॥ भर्जिमर्च्योश्च॥ भर्जिमर्च्यो
श्चाऽन्त्यात्पूर्वो मिद्वक्तव्यः। भरूजा मरीचय इति। स तर्हि वक्तव्यः। न वक्तव्यः। निपातनात् सिद्धम्।
किं निपातनम्। भरूजाशब्दोऽङ्गुल्यादिषु पठ्यते मरीचिशब्दो बाह्वादिषु। किं पुनरयं पूर्वान्तः।
आहोस्वित् परादिः। आहोस्विदभक्तः। कथं वाऽयं पूर्वान्तः स्यात् कथं वा परादिः कथं वाऽभक्तः। य
द्यन्त इति वर्तते ततः पूर्वान्तः।

मुच्चीयते नापि विकल्प्यते। भर्जिमर्च्योश्चेति। भ्रस्जी भर्जन इत्यस्यौणादिकेऽचि कृते गुणे रपरत्वे च जकारात्पूर्वे ऊमा
गमः मर्चशब्दार्थ इत्यस्य चौरादिकस्य णिच्यचइरिति इप्रत्यये णिलोपे चकारात् पूर्व ईमागमः। पूर्वान्त इति। संघातस्य पू
र्वस्य भक्तो न तदेकदेशस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथादिरिति। नहि संभवोऽस्ति यदचोऽन्यात्परश्च स्यात् पूर्वस्य चादिरिति सामर्थ्यात्परादित्वं विज्ञायते। कुण्डानीति। नान्तमङ्गं न भवतीति दीर्घत्वाऽप्राप्तिः। ननु तदादिवचनं स्यादिनुमर्थमित्युक्तम्। एवं तर्हि तत्स्मर्तव्यं भवतीति गौरवापत्तिः। सर्वाणीति। नुमा सुपो व्यवधानात् स्वरो न सिध्यति। क्रियते एतन्न्यास एवेति। उत्तरपदस्य प्रातिपदिकस्यान्तस्तन्न नकारो गृह्यते ग

अथादिरिति वर्तते ततः परादिः। अथोभयं निवृत्तं ततोऽभक्तः। कश्चाऽत्र विशेषः। अभक्ते दीर्घनलोपस्वरणत्वाऽनुस्वारश्रीभावाः। यद्यभक्तो दीर्घत्वं न प्राप्नोति। कुण्डानि वनानि। नोपधायाः सर्वनामस्थाने चासंबुद्धाविति दीर्घत्वं न प्राप्नोति। दीर्घ। नलोप। नलोपश्च न सिध्यति। अग्ने त्री ते वाजिना त्री षधस्थाता तापि एडानाम्। नलोपः प्रातिपदिकान्तस्येति नलोपो न प्राप्नोति। नलोप। स्वर। स्वरश्च न सिध्यति। सर्वाणि ज्योतींषि। सर्वस्य सुपीत्याद्युदात्तत्वं न प्राप्नोति। स्वर। णत्व। णत्वं च न सिध्यति। माषवापाणि व्रीहिवापाणि। पूर्वान्ते प्रातिपदिकान्तनकारस्येति सिद्धम्। परादौ विभक्तिनकारस्येति। अभक्ते नुमो ग्रहणं कर्तव्यम्। न कर्तव्यम्। क्रियते एतन्न्यास एव। प्रातिपदिकान्तनुम्विभक्तिषु चेति। णत्व। अनुस्वार। अनुस्वारश्च न सिध्यति। द्विषन्तपः परन्तपः। मोऽनुस्वारो हलीत्यनुस्वारो न प्राप्नोति। माभूदेवम्। नश्चापदान्तस्य झलीत्येवं भविष्यति। यस्तर्हि न झल्परः। वहंलिहो गौः। अभ्रंलिहो वायुः। अनुस्वार। श्रीभाव। श्रीभावश्च न सिध्यति। त्रपुणी जतुनी तुम्बुरुणी। नपुंसकादुत्तरस्यौङः श्रीभावो भवतीति श्रीभावो न प्राप्नोति। एवं तर्हि परादिः करिष्यते। परादौ गुणवृद्ध्यौत्त्वदीर्घनलोपाऽनुस्वारश्रीभावेन नकारप्रतिषेधाः। यदि परादिः। गुणः प्रतिषेध्यः। त्रपुणे जतुने तुम्बुरुणे। घेर्ङितीति गुणः प्राप्नोति। गुण। वृद्धि। वृद्धिः प्रतिषेध्या।

गौणां भगिनी गर्गभगिनीत्यत्र णत्वं माभूदित्यवश्यं कर्तव्यं नुमो ग्रहणम्। स हि समुदायभक्तत्वादुत्तरपदस्यान्तो न भवतीति। द्विषं तप इति। प्रसङ्गोच्चारितमेतत्। अत्र हि तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति मुमो द्विषग्रहणेन ग्रहणमस्ति। त्रपुणी इति। नित्यत्वात् परत्वाच्च नुमि कृते व्यवधानमिति भावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिसखीनीति। बहुव्रीहिः। द्विषन्तपइति। परादिपक्षे तकारस्य मकारो भक्तस्तकारश्च पदान्त इति मकारोऽपि तद्भक्तत्वात्
पदान्त इति सिद्धोऽनुस्वार इत्याहुः। अन्ये तु तद्भक्तत्वात्तकारग्रहणेनाऽस्य ग्रहणं भवतु न तु पदान्तत्वम्। न हि द्वयोर्मकार-
तकारयोः पदान्तत्वमुपपद्यत इत्याहुः। णीभावेन नकारप्रतिषेध इति। णीभावे विधीयमाने नकारस्य स्थानित्वप्रतिषेधो व-

अतिसखीनि ब्राह्मणकुलानि। सख्युरसम्बुद्धाविति णित्वे अचो ञ्णितीति वृद्धिः प्राप्नोति। वृद्धि। औत्व। औ
त्वं च प्रतिषेध्यम्। त्रपुणि जतुनि तुम्बुरुणि। इदुद्भ्यामौदच्च घेरित्यौत्त्वं प्राप्नोति। औत्त्व। दीर्घ। दीर्घत्वं च न
सिध्यति। कुण्डानि वनानि। नोपधायाः सर्वनामस्थाने चासंबुद्धाविति दीर्घत्वं न प्राप्नोति। माभूदेवम्। अतो दी
र्घो यञि सुपि चेत्येवं भविष्यति। इह तर्हि अस्थीनि दधीनि प्रियसखीनि ब्राह्मणकुलानि। दीर्घ। नलोप। न
लोपश्च न सिध्यति। अग्ने त्री ते वाजिना त्री षधस्थाता। तापिण्डानाम्। नलोपः प्रातिपदिकान्तस्येति नलोपो
न प्राप्नोति। नलोप। अनुस्वार। अनुस्वारश्च न सिध्यति। द्विषन्तपः परन्तपः। मोऽनुस्वारो हलीत्यनुस्वारो न प्रा
प्नोति। माभूदेवम्। नश्चाऽपदान्तस्य झलीत्येवं भविष्यति। यस्तर्हि न झल्परः। वहंलिहो गौः। अभ्रंलिहो वायुः
। अनुस्वार। णीभावेन कारप्रतिषेधः। णीभावे नकारस्य प्रतिषेधो वक्तव्यः। त्रपुणी जतुनी तुम्बुरुणी। सनुमु-
कस्य णीभावः प्राप्नोति। नैष दोषः। निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यति॥ यस्तर्हि निर्दिश्यते तस्य न
प्राप्नोति। कस्मात्। नुमा व्यवहितत्वात्। एवं तर्हि पूर्वान्तः करिष्यते। पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्वि
गुस्वरश्च। यदि पूर्वान्तः क्रियते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च न सिध्यति। नपुंसकोपसर्जनह्रस्व
त्वम्। आराशस्त्रिणी। धानाशष्कुलिनी। निष्कौशाम्बिनी। निर्वाराणसिनी। द्विगुस्वर। पञ्चारत्निनी दशार
त्निनी। नुमि कृते अनजन्तत्वादेते विधयो न प्राप्नुवन्ति।

क्तव्य इत्यर्थः। निर्दिश्यमानस्येति। यथा पादः पदिति पद्भावः पाच्छब्दस्यैव भवति न तदन्तस्य॥ यस्तर्हीति। यो निर्दिश्यते तस्य न- रा·म·
प्राप्नोति श्रुतिसन्निपाति यद्रूपं णीइति तन्नकारेणाभक्तेनाऽपि तत्त्वतो व्यवहितमित्यर्थः। धानाशष्कुलिनीइति। नित्यत्वात् पूर्वं नुमं म ११९
न्यते तन्न कृतेऽनजन्तत्वाद्ध्रस्वाप्राप्तिः। निष्कौशाम्बिनीइति। नपुंसकह्रस्वत्वमुपसर्जनह्रस्वत्वेन परत्वाद्बाध्यते तदपि नुमि
कृते तथैव न प्राप्नोति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवेति। नित्यादप्यन्तरङ्गो बलीयानिति स्वरह्रस्वौ च विभक्तिनिरपेक्षत्वादन्तरङ्गौ तदत्र निर्दोषत्वात्पूर्वोन्त पक्षः स्थित एव। कि
मर्थमिति। विनापि सूत्रेणेष्टसिद्धिरिति प्रश्नः। एङ इति। एङः प्रश्लिष्टावर्णत्वात् प्रश्लिष्टावर्णावर्धैकारौकारौ प्राप्नुतः। न
तु विश्लिष्टावर्णयो रै चौ रिति भावः। समाहारवर्णाविति। समाह्रियमाणावयवत्वात्। मात्रावर्णस्येति। अष्टादशप्रभेद
भिन्नस्यावर्णस्य मात्राऽवयवभेद इति भेदसद्भावात् षष्ठ्या निर्देशः। दीर्घास्त्विति। स्वतन्त्रमिदं निर्वर्तकमिति भावः। भा

नवा बहिरङ्गलक्षणत्वात्। नवा एष दोषः। किं कारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गो नुम्। अन्तरङ्गा
एते विधयः। असिद्धं बहिरङ्गमन्तरङ्गे। द्विगुस्वरे भूयान् परिहारः। संघातभक्तोऽसौ नोत्सहते अवयवस्य ग
त्ततां विहन्तुमिति कृत्वा द्विगुस्वरो भविष्यति। भिदं चोऽन्त्यात्परः॥ एच इग्घ्रस्वादेशे॥ किमर्थमिदमुच्यते। ए
च इग्वचनं सवर्णाकारनिवृत्त्यर्थम्। एच इग्भवतीत्युच्यते सवर्णनिवृत्त्यर्थमकारनिवृत्त्यर्थं च। सवर्णनि
वृत्त्यर्थं तावत्। एङो ह्रस्वादेशे शासनेषु अर्ध एकारोऽर्ध ओकारो वा माभूदिति। अकारनिवृत्त्यर्थं च। ऐ
मावैचौ समाहारवर्णौ। मात्रावर्णस्य मात्रेवर्णोवर्णयोः। तयोर्ह्रस्वशासनेषु कदाचिदवर्णः स्यात् कदाचि
दिवर्णोवर्णौ मा कदाचिदवर्णो भूदित्येवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। दीर्घप्रसङ्गः। दी
र्घास्तु कः प्राप्नुवन्ति। किं कारणम्। स्थानेऽन्तरतमो भवतीति। ननु च ह्रस्वादेश इत्युच्यते तेन दीर्घा न भवि
ष्यन्ति। विषयार्थमेतत् स्यात्। एचो ह्रस्वप्रसङ्गे इग्भवतीति।

व्यमानस्यापि सवर्णग्रहणं दृश्यते अमूभ्यामित्यादाविति दोषोपन्यासः॥ ननु चेति। अयं हि वाक्यार्थः। एचो ह्रस्वप्रसङ्गे
इगेव ह्रस्व इति। विषयार्थमिति। यत्र ह्रस्वो विधीयते तत्रैवास्योपस्थानं यथा स्यात्। देवदत्ते ति प्लुतादिविधावुपस्था
नं मा भूद् अस्मिंश्चोपस्थिते वाक्यभेदेनैच इको विधीयमाना अन्तरतमा दीर्घा एव प्राप्नुवन्ति ह्रस्वस्य बाधितत्वाद्दी-
र्घेषु कृतेषु पुनर्ह्रस्वाप्रसङ्गः।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवर्तकत्वादिति। एकवाक्यभावेनैचइगेवह्रस्वो भवति नान्यइत्येवमनिको व्यावर्त्यन्ते। यदि तर्ह्येकवाक्यता एज्व्यतिरे ११७
केणान्यस्य ह्रस्वो न प्राप्नोति नैष दोषः। पूर्वं ह्रस्वश्रुत्याऽच उपस्थानाद्ध्रस्वत्वं क्रियते तत्रैचोऽप्यन्तर्भावाद्ध्रस्वे क्रियमाणे
एच इगित्यस्योपस्थानम्। सिद्धमेङ इति। एकारस्य तालव्यस्य तालव्य इकार ओकारस्यौष्ठ्यस्योकार ओष्ठ्यो भवि-
ष्यतीत्यर्थः॥ ऐचोश्चेति। ऐकारः कण्ठ्यतालव्य औकारः कण्ठ्यौष्ठ्यः। न च तथाविधो ह्रस्वोऽस्तीति अवयवान्तरतमे

दीर्घप्रसङ्गस्तु निवर्तकत्वात्॥ दीर्घाणां प्लुतानां च प्रसङ्गः। किंकारणम्। निवर्तकत्वात्। नानेनेको निर्व
र्त्यन्ते। किं तर्हि। अनिको निवर्त्यन्ते। सिद्धा ह्यत्र ह्रस्वा इकश्चानिकश्च। तत्रानेनानिको निवर्त्यन्ते। सवर्ण
निवृत्त्यर्थेन तावन्नार्थः। सिद्धमेङः सस्थानत्वात्। सिद्धमेतत्। कथम्। एङः सस्थानत्वादिकारोका
रौ भविष्यतः॥ अर्ध एकारोऽर्ध ओकारो वा न भविष्यति। ननु चैङः सस्थानतरावर्धैकारार्धौकारौ।
न तौ स्तः। यदि हि तौ स्यातां तावेवायमुपदिशेत्। ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्ध
मेकारमर्धमोकारं चाधीयते। सुजाते एअश्वसूनृते अध्वर्यो ओअद्रिभिः सुतं शुक्रं ते एअन्यद्य
जतं ते एअन्यदिति। पार्षदकृतिरेषा तत्रभवताम्। नैव लोके नान्यस्मिन्वेदेऽर्ध एकारोऽर्ध ओकारो वास्ति।
अकारनिवृत्त्यर्थेनापि नार्थः। ऐचोश्चोत्तरभूयस्त्वात्। ऐचोश्चोत्तरभूयस्त्वादवर्णो न भविष्यति। भूयसी मात्रे
वर्णो वर्णयोरल्पीयस्यवर्णस्य। भूयस एव ग्रहणानि भविष्यन्ति। तद्यथा। ब्राह्मणग्राम आनीयतामित्युच्यते त
त्र चावरतः पञ्चकारुकी भवति॥ षष्ठी स्थानेयोगा॥ किमिदं स्थानेयोगेति। स्थाने योगोऽस्याः सेयं स्थानेयोगा। स-
प्तम्यलोपो निपातनात्।

न भावत्वं भूयसा चाऽवयवेन व्यपदेशो भवति। तदात्मकत्वं हि समुदायो लक्ष्यत इति द्वितावेव भविष्यतः। ब्राह्मणग्राम इति। ब्रा रा॰म॰
ह्मणानां वास्तव्यत्वे उदाहरणं न तु स्वामित्वे॥ षष्ठी॥ किमिदमिति। समासे विभक्तेः श्रवणाप्रसङ्गः। असमासेऽपि युक्तिरिति प्राप्ने ११२०
ति न तु योगेति प्रश्नः। स्थाने योगोऽस्या इति। स्थाननिमित्तसंबन्धेत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तृतीयायावेति। निपातनादिति योज्यम्। यथा देवदत्तस्य यज्ञदत्त इति पुत्रत्वादिद्वारकः संबन्धोऽवगम्यते। एवमस्तेर्भूरित्यत्रापि अस्यां परिभाषायां सत्यां स्थाननिमित्तः संबन्धोऽवसीयते। स्थानमर्थ इति केचिदाहुः। तिष्ठन्त्यस्मिन् शब्दा इति स्थानम्। अर्थे च शब्दास्तिष्ठन्तीति तेनास्तेरर्थे भूरित्यर्थः। अन्ये त्वाहुः। भ्रस्जो रोपधयोरमन्यतरस्यामित्यादौ रोपधादीनामानर्थक्याद्भावसाधनः प्रसङ्गवाची स्थानशब्द आश्रीयते। तेनास्तेः प्रसङ्गे अस्तेः प्राप्तौ भूः प्रयुज्यत इत्यर्थः संपद्यते। स्वाभाविकोऽस्तेरप्रयोग आर्धधातुके भूशब्दस्य च प्रयोगोऽनेन प्रकारेणान्वाख्यायते। किमर्थमिति। विनापि सूत्रेणेष्टं सिध्यति आरब्धेऽप्यतिप्रसङ्ग इ-

तृतीयायां वा एत्वम्। स्थानेन योगोऽस्याः सेयं स्थानेयोगेति॥ किमर्थं पुनरिदमुच्यते। षष्ठी स्थानेयोगवचनं नियमार्थम्। नियमार्थोऽयमारम्भः। एकशतं षष्ठ्यर्था यावन्तो वा सन्ति ते सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवन्ति। इष्यते च व्याकरणे या षष्ठी सा स्थानेयोगैव स्यादिति तच्चाऽन्तरेण यत्नं न सिध्यतीति षष्ठ्याः स्थानेयोगवचनं नियमार्थम्। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। अवयवषष्ठ्यादिष्वतिप्रसङ्गः शासेगोह इति। अवयवषष्ठ्यादयस्तु न सिध्यन्ति। तत्र को दोषः। शास इदङ्हलोरिति। शासेश्चान्त्यस्य स्यादुपधामात्रस्य च। ऊदुपधाया गोह इति गोहेश्चान्त्यस्य स्यादुपधामात्रस्य च। अवयवषष्ठ्यादीनां चाऽप्राप्तिर्योगस्याऽसन्दिग्धत्वात्। अवयवषष्ठ्यादीनां च नियमस्याप्राप्तिः। किं कारणम्। योगस्यासन्दिग्धत्वात्। संदेहे नियमः। न चावयवषष्ठ्यादिषु संदेहः। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। लौकिकोऽयं दृष्टान्तः। तद्यथा। लोके कश्चित् कंचित् पृच्छति। ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशत्विति। स तस्मा आचष्टे अमुष्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्यः। अमुष्मिन्नवकाशे हस्तवाम इति। यस्तत्र तिर्यक्पथो भवति न तस्मिन् संदेह इति कृत्वा नासावुपदिश्यते। एवमिहापि संदेहे नियमः। न चाऽवयवषष्ठ्यादिषु संदेहः।

ति प्रश्नः। एकशतमिति। षष्ठीदण्डकपाठाश्रयेणोक्तम्। यावन्तो वेति। शब्दे यावतां संभव इत्यर्थः। अवयवेति। नियमेन संबन्धान्तराणां निवर्तनादिति भावः। उपधामात्रस्य चेति। शासिना संबन्धाभावात् पचादिसंबन्धिनोऽपीत्यर्थः। तत्र ह्यनिदिताम् इत्यत उपधाया इत्यनुवर्तते। असंदिग्धत्वादिति। अनियमप्रसङ्गे हि नियमः क्रियते न तु प्रागेवावस्थिते नियमे। हस्तदक्षिण इति। हस्तो दक्षिणो यस्येति बहुव्रीहिः। भाष्यकारवचनात् सर्वनाम्नोऽपि परनिपातः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ एकार्थस्येति। सादृश्यहेतुधर्मोपलक्षणमेतत्। तेन प्रयत्नादयोऽपि धर्मा गृह्यन्ते। यत्रानेकमिति। स्थानग्रहणेऽनुवर्त- ११७
१२२ माने वाक्यभेदः क्रियते। स्थानेऽन्तरतमो भवति यत्र चाऽनेकमान्तर्यमस्ति तत्र स्थानकृतमेवाऽन्तर्यमाश्रीयत इति वा
क्यभेदस्य च तमब्ग्रहणमेव लिङ्गम्। स्थानकृत एव हि सादृश्ये गृह्यमाणे सादृश्यान्तरपरित्यागात्तमग्रहणमनर्थकमे

इदं तर्हि तस्थस्थमिपां तांतंतामः इति। एकार्थस्यैकार्थः। द्व्यर्थस्य द्व्यर्थः। बह्वर्थस्य बह्वर्थो यथा स्यादिति।
ननु च एतदपि संख्यातानुदेशेनैव सिद्धम्। इदं तर्ह्यकः सवर्णे दीर्घ इति। दण्डाग्रम्। क्षुपाग्रम्। दधीन्द्रो
मधूष्णः। कण्ठस्थानयोः कण्ठस्थानस्तालुस्थानयोस्तालुस्थान ओष्ठस्थानयोरोष्ठस्थानो यथा स्यात्
। अथ स्थान इति वर्तमाने पुनः स्थानग्रहणं किमर्थम्। यत्राऽनेकमान्तर्यं तत्र स्थानत एवान्तर्यं ब
लीयो यथा स्यात्। किं पुनस्तत्। चेता। स्तोता। प्रमाणतोऽकारो गुणः प्राप्नोति। स्थानत एकारौकारौ। पुनः
स्थानग्रहणादेकारौकारौ भवतः॥ अथ तमग्रहणं किमर्थम्। झयो होऽन्यतरस्यामित्यत्र सोष्मणः सोष्माण
इति द्वितीयाः प्रसक्ताः। नादवतो नादवन्त इति तृतीयाः प्रसक्ताः। तमब्ग्रहणाद्ये सोष्माणो नादवन्तश्च ते भवन्ति
चतुर्थाः। वाग्घसति त्रिष्टुब्भसति। किमर्थं पुनरिदमुच्यते। स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च सर्वप्र
सङ्गस्तस्मात् स्थानेऽन्तरतमवचनं नियमार्थम्। स्थान्येकत्वेन निर्दिश्यते अक इति अनेकश्च पुनरादेशः प्रति
निर्दिश्यते दीर्घ इति। स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च सर्वप्रसङ्गः। सर्वे सर्वत्र प्राप्नुवन्ति इष्यन्ते चा
न्तरतमा एव स्युरिति तच्चान्तरेण यत्नं न सिध्यति तस्मात् स्थानेऽन्तरतमवचनं नियमार्थम्। एवमर्थमिदमुच्यते॥

वस्यात्। सोष्मण इति। ऊष्मत्वगुणयुक्तस्येत्यर्थः। तमग्रहणादिति। ईषत्सदृशेऽपि लोके सदृशव्यवहारदर्शनादिह तमब्ग्र- राम:
हणं कृतम्। किमर्थमिति। यदीदं नोच्येत तदा किं स्यादिति प्रश्नः। स्थानिन इति। यद्यपि अक इत्यनेन स्थानिनो बहव उपात्तास्त १२२
थापि प्रयोगे एकैकः स्थानीति तस्य पर्यायेण बहवो दीर्घा आदेशाः प्राप्नुवन्तीत्यर्थः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

यथापुनरिति। येनप्रकारेण संहितापाठलक्षणेनेत्यर्थः। प्रतिसूत्रंतुविच्छिद्यपाठेसंधृण्याभावः। पदप्रकृतिः संहितेतिसंहि-
तायाएवनित्यत्वात्ततःपदापोद्धारेक्रियमाणेऽन्तरतमपृच्छः किंसप्तम्यन्तोऽपोद्ध्रियतेअथप्रथमान्तइतिप्रश्नः। तत्रसप्त-
म्यन्तपक्षेषष्ठीतिवर्ततेअन्तरतमोयआदेशस्तस्थानी तत्रैवषष्ठी यत्रैवषष्ठीतत्रादेशइतिप्रकृतिर्नियम्यते। प्रथमान्तप-
क्षेतुअन्तरतमआदेशोभवतीत्यादेशोनियम्यते। इहैवेति। यणामर्धमात्रिकाणांसदृशाइकोमात्रिकानतुदूरविप्रकृष्टादी

अस्तिप्रयोजनमेतत्। किंतर्हीति। यथापुनरियमन्तरतमनिर्वृत्तिःसाकिंप्रकृतितोभवतिस्थानिन्यन्तरतमेषष्ठी
तिआहोस्विदादेशतःस्थानेप्राप्यमाणानामन्तरतमआदेशोभवतीति। कुतःपुनरियंविचारणा। उभयथाहितु
ल्यासंहिता। स्थानेऽन्तरतमउरणरपरइति। किंचातः। यदिप्रकृतितः। इकोयणचीतियणांयेअन्तरतमाइकस्त
त्रषष्ठीयत्रषष्ठीतत्रादेशाभवन्तीतीहैवस्यात्। दध्यत्रमध्वत्र। कुमार्य्यर्थंब्रह्मबन्ध्वर्थमित्यत्रनस्यात्। आदेश
तःपुनरन्तरतमनिर्वृत्तौसत्यांसर्वत्रषष्ठीयत्रषष्ठीतत्राऽऽदेशाभवन्तीतिसर्वत्रसिद्धंभवतीति। तथाइकोगुण
वृद्धीगुणवृद्ध्योर्येअन्तरतमाइकस्तत्रषष्ठीयत्रषष्ठीतत्राऽऽदेशाभवन्तीतीहैवस्यात्। नेतालविता नायको
लावकः। चेतास्तोताचायकःस्तावकइत्यत्रनस्यात्। आदेशतःपुनरन्तरतमनिर्वृत्तौसत्यांसर्वत्रषष्ठीयत्रषष्ठी
तत्राऽऽदेशाभवन्तीतिसर्वत्रसिद्धंभवतीति। तथाऋवर्णस्यगुणवृद्धिप्रसङ्गेगुणवृद्ध्योर्यदन्तरतमम्ऋवर्णं
तत्रषष्ठीयत्रषष्ठीतत्राऽऽदेशाभवन्तीतीहैवस्यात्। कर्ताहर्ता। आस्तारकः निपारकइति। आस्तरिता निपरि
ताकारकोहारकइत्यत्रनस्यात्। आदेशतःपुनरन्तरतमनिर्वृत्तौसत्यांसर्वत्रषष्ठीयत्रषष्ठीतत्राऽऽदेशाभ
वन्तीतिसर्वत्रसिद्धंभवतीति। आदेशतोऽन्तरतमनिर्वृत्तौसत्यामयंदोषः॥

र्योरितिभावः। आदेशनियमपक्षेचैतदुदाहरणत्वेनदूषितंप्रकृतिनियमपक्षेतुभवत्येवैतदुदाहरणम्। चायकइति।
अचोञ्णितीत्यत्राऽपिअयमेवदोषइत्युपन्यासः। ऋवर्णस्येति। ऋकारस्यह्रस्वस्यैवगुणःस्याद् दीर्घस्यैवचवृद्धिरितिवि-
शेषप्रदर्शनायऋवर्णस्यपृथगुपन्यासः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· वान्तो यीति। एच इत्यनुवर्तनात् सर्वेषां वान्तादेशप्रसङ्गः। यदा त्वेवं व्याख्यायते यादृशो वान्त आदेशः पूर्वं दृष्टस्तादृशो यि ११७
१२३ प्रत्यये भवति। ओकारस्थानिकोऽवादेशो दृष्ट औकारस्थानिकश्चावादेश इति तदा न दोषः। उभयत इति। योगविभा
गेनेति भावः। इहापीति। सामान्येन नियम इति प्रश्नः। तुल्यजातीयस्येति। कण्ठ्यतालव्यस्येत्यर्थः॥ रायमिच्छतीति। ए
कारस्यैव नियमेन व्यावृत्तिः कृतान्नैकारस्येति प्रश्नः। छान्दस इति। क्यजन्तस्य रैशब्दस्य भाषायां नास्ति प्रयोगः। अ

वान्तो यि प्रत्यये। स्थानिनिर्देशः कर्तव्यः। ओकारौकारयोरिति वक्तव्यम्। एकारैकारयोर्माभूदिति। प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यां वान्तादेशस्य एषु या अन्तरतमा प्रकृतिस्तत्र षष्ठी यत्र षष्ठी तत्राऽऽदेशा भवन्तीत्यन्तरेण स्थानिनिर्देशं सिद्धं भवति। आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः। कथम्। वान्तग्रहणं न करिष्यते। यि प्रत्यये एचोऽयादयो भवन्तीत्येव। यदि न क्रियते। चेयं जेयमित्यत्रापि प्राप्नोति। क्षय्यजय्यौ शक्यार्थ इत्येतन्नियमार्थं भविष्यति। क्षिज्योरेवैच इति। तयोस्तर्हि शक्यार्थादन्यत्रापि प्राप्नोति। क्षेयं पापं जेयो वृषलः। उभयतो नियमो विज्ञास्यते। क्षिज्योरेवैच तयोश्च शक्यार्थ एवेति। इहापि तर्हि नियमान्न प्राप्नोति। लव्यं पव्यम्। अवश्यलाव्यम्। अवश्यपाव्यमिति। तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः। यथाजातीयकः क्षिज्योरेच्। कथंजातीयकः क्षिज्योरेच्। एकारः। एवमपि रायमिच्छति रैयतीत्यत्रापि प्राप्नोतीति। रायिच्छान्दसः। दृष्टानुविधिश्छन्दसि भवति। ऊदुपधाया गोहः। आदेशतोऽन्तरतमनिर्वृत्तौ सत्यामुपधाग्रहणं कर्तव्यम्। प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यामूकारस्य गोहो याऽन्तरतमा प्रकृतिस्तत्र षष्ठी यत्र षष्ठी तत्राऽऽदेशा भवन्तीत्यन्तरेणोपधाग्रहणं सिद्धं भवति। आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः। क्रियते एतन्न्यास एव।

न्यत्र तु वियत एवेति व्याचक्षते। क्यचि त्वैकारान्ता नास्ति गोसमानाक्षरनान्तादिति वचनात्। अन्ये तु भाषायां रैशब्दस्य
प्रयोग एव नास्तीत्याहुः। गोह इति। एतत्परिभाषोपस्थाने सति गोह इति षष्ठ्यन्तरतमे स्थानिन्युपसंह्रियते। न्यास एवेति। रामः
अन्यथा परत्वादलोऽन्त्यस्येत्यनेन गोह इति षष्ठ्यऽन्ते ल्युपसंह्रियेतेति भावः॥ १२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रदाभ्यामिति। चरितमित्यादौ व्यवधानान्न भवति। निष्ठाया इति। षष्ठ्यास्तकार एवोपसंहारात्तस्यैवाऽऽनन्तर्येण नत्वविधा
नात्। क्रियत एतन्न्यास एवेति। अन्यथा हि भिन्नवद्भ्यामित्यत्र दकारस्य नत्वं स्यात्। स हि नकारस्य सुसदृशः। यथा तृतीया
स्तथा पञ्चमा इति वचनात्। किंपुनरिति। किं स्वतन्त्रमिदं लक्षणम्। आहोस्विल्लक्षणान्तरेणाभिनिर्वृत्तानामनेन निय-
मः क्रियते अथ लक्षणान्तरशेषभूतमिति प्रश्नः। स्थानिनिवृत्तिरिति। दधिशब्दस्य यदि दधिशब्द आदेशः क्रियते तदा
प्रयोजनाभावः। भिन्नरूपत्वादेशस्तदर्थस्याऽप्रत्यायक इति शब्दव्यवहारोत्साद एवेति भावः। अस्त्विति। वचनसा-

रदाभ्यां निष्ठातो नः पूर्वस्य च दः। आदेशतोऽन्तरतमनिर्वृत्तौ सत्यां तकारग्रहणं कर्तव्यम्। प्रकृतितः पुनरन्त
रतमनिर्वृत्तौ सत्यां नकारस्य निष्ठायां या अन्तरतमा प्रकृतिस्तत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेणापि
तकारग्रहणं सिद्धं भवति। आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः। क्रियत एतन्न्यास एव। किंपुनरिदं
निर्वर्तकम्। अन्तरतमा अनेन निर्वर्त्यन्ते आहोस्वित् प्रतिपादकम्। अन्येन निर्वृत्तानामनेन प्रतिपत्तिः। कश्चा
त्र विशेषः। स्थानेऽन्तरतमनिर्वर्तके सर्वस्थानिनिवृत्तिः। स्थानेऽन्तरतमनिर्वर्तके सर्वस्थानिनां निवृत्तिः प्राप्नो
ति। अस्यापि प्राप्नोति। दधि मधु। अस्तु। न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते तत्रान्तर्यतो दधिशब्दस्य दधिश
ब्द एव मधुशब्दस्य मधुशब्द एवादेशो भविष्यति। यदि चैवं क्वचिद्वैरूप्यं तत्र दोषः स्यात्। बिसं मुसलमिति। इ
णकोरादेशप्रत्यययोरिति षत्वं प्राप्नोति। अपि च दृष्टा व्यवस्था न प्रकल्प्येत। तद्यथा। तप्ते भ्राष्ट्रे तिलाः प्रक्षिप्ता
मुहूर्तमपि नावतिष्ठन्ते एवमिमे वर्णा मुहूर्तमपि नावतिष्ठेरन्।

मर्थ्याच्छब्दव्यवहारस्य चानादित्वादिति भावः। क्वचिद्वैरूप्यमिति। यदा बिसशब्दस्य बिसशब्द आदेशस्तदा षत्वं नास्ति-
न हि तदा सकार आदेशः। यदा तु सकारस्य सकार आदेशस्तदा षत्वप्रसङ्ग इति वैरूप्यप्राप्तिः। अस्तेर्भूरित्यादयस्तु विशे
षविहितत्वादस्य बाधकाः। अपि चेति। पुनरन्येनान्येनाऽऽदेशेन भवितव्यमिति भावः। प्रयोजनमन्तरेण प्रवृत्तौ सत्यामसकृ
दपि प्रवृत्तिः स्यात् तत्र च सर्वस्य निवृत्त्यभिमुखत्वात् साधुत्वस्य व्यवस्था नोपपद्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तुतर्हीति।निर्वृत्तेषुलक्षणाऽन्तरेणाऽऽदेशेषुनियमोऽनेनक्रियतेतत्राऽन्तरतमःसाधुर्नान्यइत्यर्थः।निर्वृत्तिरि
ति।अभिमतस्यप्राप्तस्येत्यर्थः।इष्टाव्यवस्थेति।अकःसवर्णेदीर्घइत्यनेनलक्षणेनयदासर्वेदीर्घाःकृतास्तदाते
षांसाधुत्वंविज्ञातंनचाऽनेनतेषामेवाऽसाधुत्वंशक्यंप्रतिपादयितुमितिभावः। उक्तंवेति।इकोगुणवृद्धीइ
त्यत्रयत्रषष्ठीतत्रेदमुपतिष्ठतेतेनैकवाक्यताऽनेनसूत्रेणविधिवाक्यानामितिविधानकालएवाऽन्तरतमआ

अस्तुतर्हिप्रतिपादकम्।अन्येननिर्वृत्तानामनेनप्रतिपत्तिः।निर्वृत्तप्रतिपत्तौनिर्वृत्तिः। निर्वृत्तप्रतिपत्तौनि
र्वृत्तिर्नसिध्यति।सर्वेसर्वत्रप्राप्नुवन्ति।किंतर्ह्युच्यते निर्वृत्तिर्नसिध्यतीति।नसाधीयोनिर्वृत्तिःसिद्धाभवति।
नब्रूमोनिर्वृत्तिर्नसिध्यतीति।किंतर्हि।इष्टाव्यवस्थानप्रकल्पेत।नसर्वेसर्वत्रेष्यन्ते।इदमिदानींकिमर्थंस्यात्।
अनर्थकंच।अनर्थकमेतत्स्यात्।योहिभुक्तवन्तंब्रूयान्माभुक्थाइतिकिंतेनकृतंस्यात्।उक्तंवा।किमुक्तम्।
सिद्धंतुषष्ठ्यधिकारेवचनादिति।षष्ठ्यधिकारेऽयंयोगःकर्तव्यः।स्थानेऽन्तरतमःषष्ठीनिर्दिष्टस्येति।प्रत्या
त्मवचनंच।प्रत्यात्ममितिचवक्तव्यम्।किंप्रयोजनम्।योयस्यान्तरतमःसतस्यस्थानेयथास्यात्।अन्यस्या
न्तरतमोऽन्यस्यस्थानेमाभूदिति। प्रत्यात्मवचनमशिष्यंस्वभावसिद्धत्वात्। प्रत्यात्मवचनमशिष्यम्।किंका
रणम्।स्वभावसिद्धत्वात्।स्वभावतएतत्सिद्धम्।तद्यथा।समाजेषुसमाशेषुसमवायेषुचाऽऽस्यतामित्युक्ते
नचोच्यतेप्रत्यात्ममितिप्रत्यात्मंचासते। अन्तरतमवचनंचअन्तरतमवचनंचाशिष्यम्।योगश्चाप्ययमशि
ष्यः।कुतः।स्वभावसिद्धत्वादेव।तद्यथा।

देशोविधीयते।प्रत्यात्ममिति।आत्मानमात्मानंप्रतीतिसमासः।स्थान्यात्मनोऽन्तरतमइत्यर्थः।स्वभावसिद्धत्वादिति।तुल्य
न्यायतयासूत्रप्रत्याख्यानायैतदुक्तंनतुसंबन्धिशब्दत्वादिति।समाजेष्विति।समाजउत्सवेषुसंघातः।समाशःसहभो
जनम्।समवायःकस्यांचित्क्रियायांमेलनम्॥

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैवकृष्णाद्विति। गुणप्रमाणकृतसादृश्यपरिहारेण विद्याद्यर्थकृतमानन्तर्यं लोकआश्रीयतइत्यर्थः। एवमिहापियदीयम- र्थं यः शक्नोति वक्तुं तस्य स्थाने स एव भवति। गावइति। तिरश्चामप्ययं व्यवहारः संकीर्णो नाम संकरलक्षणः। एवं चोदनायां संकीर्णे अप्यादेशा असंकरेण प्रवर्त्स्यन्ति। तथा यानीति। यथा तत्र सादृश्याद्गुणीभवनं विच्छिन्नसादृश्यानामपि भवति त- था स्थान्यादेशानां स्थानादिना सादृश्येन वर्णीभवनमित्यर्थः। अचेतनेष्वपीति। न्यायस्य व्याप्तिप्रतिपादनमेतत्। अब्विकारइ-

समाजेषु समाशेषु समवायेषु चास्यतामित्युक्ते नैव कृष्णाः कृशैः सहासते न पाण्डवः पाण्डुभिः। येषामेव किंचि दर्थकृतमानन्तर्यं तैरेव सहासते। तथा गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति तेन सह शेरते। तथा या न्येतानि गोयुक्तकानि संघुष्टकानि भवन्ति तान्यन्योन्यमपश्यन्ति शब्दं कुर्वन्ति। एवं तावच्चेतनावत्सु। अचेत नेष्वपि। तद्यथा लोष्ठः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग् गच्छति नोर्द्ध्वमारोहति पृथिवीविकारः पृथिवीमेव गच्छ त्यान्तर्यतः। तथा या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः स धूम आकाशे निवाते नैव तिर्यग्ग च्छति नाऽर्वागवरोहति। अब्विकारोऽप एव गच्छत्यान्तर्यतः। तथा ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते सुप्रज्वलितं नैव तिर्यग्गच्छति नाऽर्वागवरोहति। ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः। व्य ञ्जनस्वरव्यतिक्रमे च तत्कालप्रसङ्गः। व्यञ्जनव्यतिक्रमे स्वरव्यतिक्रमे च तत्कालता प्राप्नोति। व्यञ्जनव्यति क्रमे। दृष्टम्। उप्तम्। आन्तर्यतोऽर्धमात्रिकस्य व्यञ्जनस्याऽर्धमात्रिक इक् प्राप्नोति। नैव लोके नैव वेदे अर्ध मात्रिक इगस्ति। कस्तर्हि। मात्रिकः। योऽस्ति स भविष्यति। स्वरव्यतिक्रमे। दध्यत्र मध्वत्र कुमार्य्यर्थं ब्रह्मबन्ध्वर्थ म्। आन्तर्यतो मात्रिकस्य द्विमात्रिकस्य को मात्रिको द्विमात्रिको यण् प्राप्नोति। नैव लोके नैव वेदे मात्रिको द्विमा त्रिको वा यणस्ति॥

ति। अन्तरिक्षे सूक्ष्मः समुद्रोऽस्तीति तद्विकारः सर्वा आपइति काष्ठादिस्थानामपामग्निसंयोगाद्धूमो विकारः। सूर्यवि कारोऽर्चिः सूर्यमेव गच्छति। लोकव्यवहाराऽऽश्रयणेन प्रत्याख्याते सूत्रे तदनाश्रयेण योगारम्भे दोषमाह। व्यञ्जनेति। व्यतिक्रमः। स्थानित्वेन निवृत्तिः। इदमेव शास्त्रं निर्वर्तकमिति भावः। नैव लोकइति। नित्याः शब्दा अन्वाख्यायन्ते निर्दिष्ट विषयेऽप्युच्चारणस्याऽशक्यत्वादिति भावः। नैव लोकइति। कुक्कुटादिषु द्व्यञ्जने न त्वेकमात्रिकमिति भावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ अर्धतृतीयमात्रमिति।अत्वैकादेशयोः कृतयोरिष्टभावइतियदाप्रक्रियेतिभावः।भाष्यमाणेनेति।नैवलोकइत्ययंप- ११७
१२५ रिहारोनोक्तः।यदाविशेषविहितत्वादत्वमिष्टभावेनबाध्यतइतिन्यायस्तदात्रिमात्रस्यत्रिमात्रसंभवात्स्यादेवप्लुतः।प्लु
तात्प्लुतप्रसङ्गेचप्लुतश्चविषयेस्मृतइत्युच्यते।अत्रतुप्लुतस्यैवप्राप्तिः।खट्वेन्द्रइति।संज्ञयाऽत्रगुणवृद्ध्योर्भावनंसं-

कस्तर्हि।अर्धमात्रिकः योऽस्तिसभविष्यति।अक्षुचानेकवर्णादेशेषु।अक्षुचानेकवर्णादेशेषुतत्काल
ताम्प्राप्नोति।इदमदृशः।आन्तर्यतोऽर्धतृतीयमात्रिकस्येदमःस्थानेऽर्धतृतीयमात्रमिवर्णंप्राप्नोति।नै
षदोषः।भाष्यमाणेनसवर्णानांग्रहणंनेत्येवंनभविष्यति। गुणवृद्ध्येज्भावेषुच॥गुणवृद्ध्योरेज्भा
वेषुचतत्कालताम्प्राप्नोति।खट्वाइन्द्रः खट्वेन्द्रः।खट्वाउदकम् खट्वोदकम्।खट्वाईषाखट्वेषा।खट्वाऊ
ढाखट्वोढा।खट्वाएलकाखट्वैलका।खट्वाओदनःखट्वौदनः।खट्वाऐतिकायनःखट्वैतिकायनः।खट्वा
औपगवःखट्वौपगवइति।आन्तर्यतस्त्रिमात्रचतुर्मात्राणांस्थानिनांत्रिमात्रचतुर्मात्राआदेशाःप्राप्नुव
न्ति।नैषदोषः।तपरेगुणवृद्धी। ननुचतःपरोयस्मात्सोऽयंतपरः।नेत्याह।तादपिपरस्तपरइति।यदि
तादपिपरस्तपरः।ऋदोरबितिइहैवस्यात्।यवःस्तवः।लवःपवइत्यत्रनस्यात्।नैषतकारः।कस्तर्हि।
दकारः।किंदकारेप्रयोजनम्।अथकिंतकारे।यद्यसंदेहार्थस्तकारः दकारोऽपि।अथमुखसुखार्थस्त
कारः।दकारोऽपि।एज्भावे।कुर्वीतेकुर्वीथे।आन्तर्यतोऽर्धतृतीयमात्रस्यटिसंज्ञकस्याऽर्धतृतीयमा
त्रएच्प्राप्नोति।नैवलोकेनचवेदेअर्धतृतीयमात्रएजस्ति।

त्वाचभिन्नकालानामपिस्यादितिभाष्यमाणेनेतिपरिहारस्याऽत्रासंभवः। एज्भावइति।प्रत्याहारःपूतक्रतोरैचमनो रामः
रौवेत्यादिसंग्रहार्थः।तत्रहिमात्रिकएवैकारओकारश्चस्यात्। ॥ १२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋवर्णस्येति। अत्र ह्रस्वस्याकार एव गुणः स्यात्स चेष्यत एव दीर्घस्य त्वेङौ स्यातां तुल्यप्रमाणत्वात्। तथा ह्रस्वस्य दीर्घस्य च सर्वे वृद्धिसंज्ञकाः प्राप्नुवन्ति। समुदायापेक्षया तु सर्वप्रसङ्ग इत्युच्यते। नवेति। उरण्रपर इत्यनेन गुणवृद्धि प्राप्त्यस्यैकवाक्यतायां विधीयमान एवाण् रपरो भवतीति ऋश्रुतिस्थानेऽणोऽक्रियमाणो गुणवृद्धी भवत इत्यर्थः। सर्वादेश इति। ऋवर्णस्य स्थानेऽणोऽक्रियमाणवलोऽन्त्यस्येत्येतद्बाधेनानेकाल्त्वात्सर्वादेशो प्राप्नुतः। नवेति। अङ्गस्येति षष्ठी पूर्वमेवाऽन्त्यमिकमुपसंह्रियते ततश्च ऋवर्णस्य स्थानित्वे विज्ञाते रपरत्वमानुपूर्व्यासिद्धत्वात् पूर्वप्रवृत्तमलोऽन्त्यस्येत्यस्युपसंहारं न बाधत इत्यर्थः। अथवेति। निर्वृत्तस्याऽणो रपरत्वविधानेऽपि न दोष इत्यर्थः। अनान्तर्यमेवेति। न

ऋवर्णस्य गुणवृद्धि प्रसङ्गे सर्वप्रसङ्गोऽविशेषात्॥ ऋवर्णस्य गुणवृद्धिप्रसङ्गे सर्वप्रसङ्गः। सर्वे गुणवृद्धि प्रसङ्गः। सर्वे गुणवृद्धिसंज्ञका ऋवर्णस्थाने प्राप्नुवन्ति। किं कारणम्। अविशेषात्। न हि कश्चिद्विशेष उपादीयते एवंजातीयको गुणवृद्धिसंज्ञक ऋवर्णस्य स्थाने भवतीति। अनुपादीयमाने विशेषे सर्वप्रसङ्गः। न वा ऋवर्णस्य स्थाने रपरप्रसङ्गाद वर्णस्यानन्तर्यम्। न वा एष दोषः। किं कारणम्। ऋवर्णस्य स्थाने रपरप्रसङ्गात्। उः स्थाने अण् प्रसज्यमान एव रपरो भवतीत्युच्यते तत्र ऋवर्णस्याऽन्तर्यतो रेफवतो रेफवानकार एवान्तरतमो भवति॥ सर्वादेशप्रसङ्गस्त्वनेकाल्त्वात्। सर्वादेशस्तु गुणवृद्धिसंज्ञक ऋवर्णस्य प्राप्नोति। किं कारणम्। अनेकाल्त्वात्। अनेकाल्शित्सर्वस्येति। न वानेकाल्त्वस्य तदाश्रयत्वाद वर्णादेशस्याऽविघातः। न वा एष दोषः। किं कारणम्। अनेकाल्त्वस्य तदाश्रयत्वात्। यदायमुः स्थानेऽण् तदाऽयमनेकाल्। अनेकाल्त्वस्य तदाश्रयत्वाद वर्णादेशस्य विघातो न भविष्यति। अथवा अनान्तर्यमेवैतयोरान्तर्यम्॥ एकस्याऽप्यन्तरतमा प्रकृतिर्नास्त्यपरस्यान्तरतम आदेशो नास्ति। एतदेवैतयोरान्तर्यम्।

हि स्थानार्थगुणप्रमाणकृतमेवान्तर्यं परिभाषितं रूपान्तरेणाऽपि सादृश्यस्य संभवात्परिग्रहाच्चेति भावः। ऋवर्णस्य मात्रिकोऽकारो गुणोऽन्तरतमोऽस्त्येवेति चेत्। तदर्थस्य यत्नस्याऽकरणाददोष एव। दीर्घस्य तुल्यप्रमाणत्वादेकारावन्तरतमौ स्त इति चेत्। भवेदेतद्यदा भेदापेक्षा क्रियते। ऋवर्णमात्रस्य ह्रस्वाद्यवान्तरभेदानपेक्षायां स्थानकृतमान्तर्यं न केनचिदस्तीत्यनान्तर्यमेवेत्याद्युक्तम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्रयोगो वेति। यदा स्थानेऽन्तरतम इत्येतत्प्रत्याख्यातमित्यर्थः। अवर्णप्रधानत्वादिति। इममेव वह्निन्यायमाश्रित्यो-
क्तमेचो श्चोत्तरभूयस्त्वादिति। उभयान्तर्यादिति। ह्रस्वप्रशमने ह्येचः समुदायान्तरतमाभावादेचो श्चेत्युक्तम्। इह तु सम्भ
वत्येव स्थानेन समुदायान्तरतम इत्यर्थः॥ उरण्॥ किमिदमिति। षष्ठीप्रकरणाद्यत्र षष्ठी तत्रेदमुपतिष्ठते तत्र किमादे
शान्तराणां बाधकमणं निर्वर्तयति तस्य च वाक्यभेदेन रपरत्वम्। आहोस्विद्रपरत्वमात्रमनेन क्रियते उःस्थाने लक्ष

संप्रयोगो वा नष्टाश्वदग्धरथवत्। अथवा नष्टाश्वदग्धरथवत्सह संप्रयोगो भवति। तद्यथा। तवाऽश्वो
नष्टो ममापि रथो दग्ध उभौ संप्रयुज्यावहा इति। एवमिहापि तवाप्यन्तरतमा प्रकृतिर्नास्ति ममाप्यन्तर
तम आदेशो नास्ति अस्तु नौ संप्रयोग इति। विषम उपन्यासः। चेतनावत्स्वर्थात्मकरणाद्धि लोके संप्रयो
गो भवति। वर्णाश्च पुनरचेतनाः। तत्र किंकृतः संप्रयोगः। यद्यपि वर्णा अचेतनाः यस्त्वसौ प्रयुङ्क्ते स
चेतनावान्। एजवर्णयोरादेशोऽवर्णस्थानिनोऽवर्णप्रधानत्वात्। एजवर्णयोरादेशोऽवर्णस्य प्राप्नो
ति। खट्वैलकामालोपगवः। किं कारणम्। स्थानिनोऽवर्णप्रधानत्वात्। स्थानिनोऽवर्णप्रधानत्वात्।-
स्थानी ह्यत्रावर्णप्रधानः। सिद्धन्तूभयान्तर्यात्। सिद्धमेतत्। कथम्। उभयोर्योऽन्तरतमस्तेन भवितव्यम्।
न चाऽवर्णमुभयोरन्तरतमम्॥ उरण् रपरः॥ किमिदमुरण् रपरवचनमन्यनिवृत्त्यर्थम्। उःस्थाने अणे
व भवति रपरश्चेति। आहोस्विद्रपरत्वमात्रमनेन विधीयते। उःस्थाने अण् च अनण् च। अण् तु रपर इ
ति। कश्चात्र विशेषः॥ उरण् रपरवचनमन्यनिवृत्त्यर्थमिति चेदुदात्तादिषु दोषः। उरण् रपरवचनमन्यनि
वृत्त्यर्थं चेदुदात्तादिषु दोषो भवति। के पुनरुदात्तादयः। उदात्तोऽनुदात्तः स्वरितानुनासिकाः प्लुतिः। हृतिः।

णान्तरेण निष्पन्नो योऽण्स रपर इति प्रश्नः। तत्र केषांचित्पाठोऽणेव भवति रपरश्चेति तत्राऽपूर्वोऽण् विधीयमान आदे
शान्तराणां बाधकः। अन्येषां तु पाठोऽणेव भवतीति तत्र सामर्थ्याद्वाऽन्यनिवृत्तिः। सैवैवकारेण प्रदर्श्यते। उदात्तादि-
ष्विति। अन्तरतमस्य बाधकोऽण् प्रसज्यत इति भावः। स चोदात्तादिगुणो नवेति सर्वथा दोषः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नॄँः पाहीति। यद्यप्यस्मिन् पक्षे पूर्वसवर्णो ऋकारो न लभ्यते तथापि न्ॄन् प इति निपातनाद्भवति नकारस्य तु रुत्वे कृते ऽनु
नासिको विधीयमानो ऽण एव स्यान्न तु ऋकार इति दोषः। प्रतिपदविहितै रित्वोत्वादिभिरयं हि बाध्यत इति तेषां रपर
त्वं न स्यात्। गुणवृद्ध्यो रिति। भूतस्य चेदणो रपरत्वं क्रियते तदा तु गुणवृद्धिविधावण एव दुर्लभ इति दोषः। किंहि साधी
य इति। किं साधुतरं कारणमित्यर्थः। न पुनरिति। ततश्चाऽवर्णस्यैव नियमेनाऽप्रतिपत्तिरिति व्याख्येयम्। अथ मतमि

कृतं हृतं प्रकृतं प्रहृतं न्ॄँः पाहि। अस्तु तर्ह्युः स्थाने अण् चानण् च अण् तु रपर इति। यद्युः स्थानेऽणस्सर
पर इति चेद्गुणवृद्ध्योरवर्णाऽप्रतिपत्तिः। यद्युः स्थाने अणस्सरपर इति चेद्गुणवृद्ध्यो रवर्णस्याऽप्रतिप
त्तिः। कर्त्ता हर्त्ता वार्षगण्यः। किं हि साधीयः। ऋवर्णस्याऽसवर्णो यदवर्णस्यान्न पुनरेङैचौ। पूर्वस्मिन्न
पि पक्षे एष दोषः। किं हि साधीयः। तत्रापि ऋवर्णस्यासवर्णो यदवर्णस्यान्न पुनरिकारोकारौ। अथ मत
मेतत्। उः स्थाने अणश्चाऽनणश्च प्रसङ्गे ——— अणेव भवति रपरश्चेति सिद्धा पूर्वस्मिन् पक्षेऽवर्ण-
स्याप्रतिपत्तिः। यत्तु तदुक्तमुदात्तादिषु दोष इति। स इह दोषो जायते। न जायते। जायते स दोषः। कथ
म्। उदात्त इत्यनेनाणोऽपि प्रतिनिर्दिश्यन्ते अनणोऽपि। यद्यपि अणोऽपि प्रतिनिर्दिश्यन्ते न तु प्राप्नुव
न्ति। किं कारणम्। स्थानेऽन्तरतमो भवतीति। कुतो नु खल्वेतत्। द्वयोः परिभाषयोः सावकाशयोः समव
स्थितयोः स्थानेऽन्तरतम इति उरण् रपर इति च स्थानेऽन्तरतम इत्यनया परिभाषया व्यवस्था भवि
ष्यति न पुनरुरण् रपर इति। अतः किम्। अत एष दोषो जायते उदात्तादिषु दोष इति॥

ति। स एव पक्षाक्षेपवाद्याह। नानेनाऽन्येषां बाधकोऽपूर्वो ऽण् विधीयते। किन्त्वणानणोः प्रसङ्गेऽणेव भवतीति नि-
यमः क्रियते स च रपरः। न च गुणवृद्धिप्रसङ्गे इकारोकारयोः प्राप्तिः। यत्तु तदुक्तमिति। किं भवान्मन्यत इति विचारय
ति। स एव युक्तियुक्तं पक्षं गृह्णाति जायत इति। कुतो नु खल्विति। अन्तरतमपरिभाषाया अवकाशः अकः सवर्णे दी-
र्घः। स्त्र्यो हो ऽन्यतरस्यामिति। उरण् रपर इत्यस्याऽवकाशः कर्ता हर्तेति। इहोभयं प्राप्नोति। कृतिरिति। परत्वादियमेव-
प्राप्नोतीति दोषः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येचाप्येतइति। यत्रह्यनियमप्रसङ्गस्तत्रानेन नियमः क्रियते तत्र तच्छेषभूतं रपरत्वं भवति न त्वन्यत्र प्रतिपदविधा ११७
विति दोषः। सिद्धं त्विति। विधिवाक्यैरस्यैकवाक्यतायां विधानकाल एवाणो रपरत्वं क्रियत इत्यर्थः। यद्येवमिति।
नह्यनेनोः स्थानेऽण् विधीयते अपि तु लक्षणान्तरेण तत्र विध्यङ्गभूता षष्ठी स्थाने योगेति परिभाषा नोपतिष्ठते-
तथा चोदीचामातः स्थाने इत्यत्र स्थानग्रहणं कृतम्। तत उः समीपे योऽण् तस्यापि रपरत्वप्रसङ्ग इति स्थानग्र-
हणाऽनुवृत्त्या उः स्थाने य आदेशोऽणिति तावल्लभ्यते न तु प्रसज्यमान इति। आदेश इति। प्रसज्यमानत्वेने

येचाऽप्येते ऋवर्णस्य स्थाने प्रतिपदमादेशा उच्यन्ते तेषु रपरत्वं न प्राप्नोति। ऋत इद्धातोरुदोष्ठ्य
पूर्वस्येति। सिद्धं तु प्रसङ्गे रपरत्वात्। सिद्धमेतत्। कथम्। प्रसङ्गे रपरत्वात्। उः स्थाने अण् प्रसज्यमा
न एव रपरो भवति। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। स्थान इति वर्तते। स्थानशब्द-
श्च प्रसङ्गवाची। यद्येवमादेशोऽविशेषितो भवति। आदेशश्च विशेषितः। कथम्। द्वितीयं स्थान
ग्रहणं प्रकृतमनुवर्तते। तत्रैवमभिसंबन्धः करिष्यते। उः स्थाने अण् स्थान इति। उः प्रसङ्गे अण्
प्रसज्यमान एव रपरो भवति। अथाण्ग्रहणं किमर्थं न उरपरो भवतीत्येवोच्येत। रपर इतीयत्यु
च्यमाने क इदानीं रपरः स्यात्॥

त्यर्थः। अथवा स्थानग्रहणाऽनुवृत्त्या प्रसज्यमान इत्येषोऽर्थो लभ्यते न तूः स्थान इति। ततश्चाण आदेशरूपता
नियमेन न लभ्यत इति सामीप्यलक्षणोऽपि संबन्धोऽवगम्यत इत्यर्थः। द्वितीयमिति। तच्चार्थात् प्रथमान्तं संपद्य
ते अथवा सप्तम्यन्त एव तस्मिन्नयमर्थो भवति प्रसङ्ग एवाऽत्राण् रपरो भवतीति। इदानीमुदात्तादिषु दोषो ना रामः
स्ति स्थानेऽन्तरतम इत्यनया परिभाषया कृतिरित्यादावृकारस्य ऋकार एव प्रवर्तत इत्यणः प्रसङ्ग एव नास्ति। १२७
गुणवृद्धी च ऋकारस्य विधीयमाने अरारावेवान्तरतम्याद्भवत इत्यवर्णप्रतिपत्तिरप्यस्ति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रीरिविधिष्विति। बहुवचननिर्देशाद्रीरिशब्दावुपलक्षणमिति एच्छति। के पुनरिति। पैतृष्वसेय इति। लोपव-
चनं तु सर्वादेशार्थं स्यात्। होतापोताराविति। रेफस्य संयोगान्तलोपे कृते तस्यासिद्धत्वान्नलोपो न स्यात्। एकादेश
स्येति। पूर्वपरयोरिति समुदायस्य स्थानित्वेन चोदितत्वात्तस्य च ऋवर्णरूपत्वाऽभावादिति भावः। अवयवग्रह
णादिति। पूर्वपरयोरित्यनेनोद्भूतावयवभेदः समुदायो निर्दिश्यते अवयवावेव चाऽपेक्षितपरस्परौ समुदा

यः स्थाने भवति। कश्च स्थाने भवति। आदेशः॥ आदेशो रपर इति चेद्रीरिविधिषु रपरप्रतिषेधः॥ आ
देशो रपर इति चेद्रीरिविधिषु रपरत्वस्य प्रतिषेधो वक्तव्यः। के पुना रीरिविधयः। अकङ्लोपाऽऽ
नङनङ्रीङ्रिङादेशाः। अकङ्। सौधातकिः। अकङ्। लोप। पैतृष्वसेयः। लोप। आनङ्। होतापोतारौ
। आनङ्। अनङ्। कर्ता हर्ता। अनङ्। रीङ्। मात्रीयति पित्रीयति। रीङ्। रिङ्। क्रियते ह्रियते। रिङ्। उदा
त्तादिषु च। उदात्तादिषु च किम्। रपरत्वस्य प्रतिषेधो वक्तव्यः। कृतिः। हृतिः। कृतं हृतम्। प्रकृतम्। प्र
हृतम्। नॄः पाहि। तस्मादण्ग्रहणं कर्तव्यम्॥ एकादेशस्योपसंख्यानम्॥ एकादेशस्योपसंख्यानं कर्त
व्यम्। खट्वर्श्यः। मालर्श्यः। किं पुनः कारणं न सिध्यति। उः स्थाने अण् प्रसज्यमान एव रपरो भवतीत्युच्य
ते। न चायमुरेव स्थाने अण् शिष्यते। किं तर्हि। उश्चान्यस्य च। अवयवग्रहणात्सिद्धम्। यदत्र ऋवर्णं त
दाश्रयं रपरत्वं भविष्यति। तद्यथा। माषा न भोक्तव्या इत्युक्ते मिश्रा अपि न भुज्यन्ते। अवयवग्रहणात्सि
द्धमिति चेदादेशे रान्तप्रतिषेधः। अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तस्य प्रतिषेधो वक्तव्यः। होता
पोतारौ॥

य इति भवत्ययमृवर्णस्य स्थान इति भावः। रान्तप्रतिषेध इति। आनङि विधीयमाने आकारस्याणोऽभावादित्यर्थः। त
स्मादवयवग्रहणादित्यस्यातिव्यापकत्वाद्यत्र साक्षादवर्णस्याऽण् विधीयते तत्रैवेदमुपतिष्ठत इत्येकादेशस्योपसं ॥
ख्यानं कर्तव्यमेव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 यदि पुनरिति। उरितिवर्णग्रहणाद्वर्णग्रहणाच्च सर्वत्र तदन्तविधिं प्रयोजयतीति न्यायाद् वर्णान्तस्य ग्रहणं खट्वर्श्य इत्यत्र च समुदाय ऋवर्णान्तो भवतीति सिद्धं रपरत्वम्। कर्तेति। अङ्गस्येति षष्ठी अन्त्यमल्मुपसंहृतेति ऋवर्णस्य गुणो न भाव्यम्। न च ऋवर्ण ऋवर्णान्तो भवतीति दोषः। न चेह तदन्तविधिरस्ति उरणिति भूतानुवादात्। न च प्रदेशेषु तदन्तस्य कार्यम्। अन्त्यस्यैवानुसंहारेण स्थानित्वप्रतिपादनादिति भावः। अर्थवतेति। यथैवेयायेत्यत्रै-काचूत्वम्। अर्थसहितयागोपादानाभ्यां वर्णरूपता धातुरूपता च व्यवस्थाप्यते। इह चेति। उपसंख्यानस्याऽतिव्याप्ते-

यथैवोष्ठ्याऽन्यस्य च स्थानेऽण् रपरो भवतीति। एवं यउः स्थानेऽण् चानण् च सोऽपि रपरः स्यात्। यदि पुनर्ऋवर्णान्तस्य स्थानिनो रपरत्वमुच्यते खट्वर्श्यः मालर्श्यः। नैवं शक्यम्। इह न प्रसज्येत। कर्ता हर्ता किरति गिरति। ऋवर्णान्तस्येत्युच्यते न चैतद् वर्णान्तम्। ननु च एतदपि व्यपदेशिवद्भावेन ऋवर्णान्तम्। अर्थवता व्यपदेशिवद्भावः। न चैषोऽर्थवान्। तस्मान्नैवं शक्यम्। न चेदेवमुपसंख्यानं कर्तव्यम्। इह च रपरत्वस्य प्रतिषेधो वक्तव्यः। मातुः पितुरिति। उभयं न वक्तव्यम्। कथम्। ययोर्द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति। लभतेऽसावन्यतरतो व्यपदेशम्। तद्यथा। देवदत्तस्य पुत्रः। देवदत्तायाः पुत्र इति। कथं मातुः पितुरिति। अस्त्वत्र रपरत्वं का रूपसिद्धिः। रात्सस्येति सकारस्य लोपः। रेफस्य विसर्जनीयः। नैवं शक्यम्। इह हि मातुः करोति पितुः करोतीति। अप्रत्ययविसर्जनीयस्येति षत्वं प्रसज्येत॥

त्यर्थः। मातुरिति। रपरत्वे कृते विभक्तिसकारस्य रुत्वं पूर्वस्य रो रीति लोपः। ढ्रलोप इति दीर्घत्वम्। तत्र मातूरिति प्राप्नोतीति भावः। द्वयोरिति। अवयवावेवात्रापेक्षितपरस्य रौ स्थानिनौ। अत एवैकग्रहणं स्थानिभेदादादेशभेदनिवृत्त्यर्थं कृतम्। अन्यतरत इति। तृतीयान्तादाद्यादित्वात्तसिः। तद्यथेति। एकः पुत्र उभाभ्यामपि यथा व्यपदिश्यते तथेहापि पूर्वपराभ्यां तत्स्थानिकत्वेनादेशस्य व्यपदेशः। अकङादेस्तु समुदायस्यादेशत्वं नाण इति रपरत्वाभावः। प्रत्यये
ति। असित्ययं समुदायः प्रत्ययो न त्वकार इति तदादेशोऽप्यप्रत्यय इति भावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययेति। प्रत्ययाऽवयवत्वादकारोऽपि प्रत्ययः। अतस्तदादेशोऽपि प्रत्यय इति भावः। लुप्यत इति। सकारः सन्निधि कालेऽकारेणैव लब्धप्रत्ययसंज्ञासमुदायसंनिवेशिनीत्वात् तस्मादिति कुतस्तदादेशस्तां लप्स्यते। उत्वे च कृते ऽवशिष्टः सकार एव प्रत्ययसंज्ञः स च लुप्त इति भावः। एकादेशनिमित्तादिति। एकादेशशास्त्रं निमित्तं यस्य तस्मा-

त्प्रत्ययविसर्जनीयस्येत्युच्यते प्रत्ययविसर्जनीयस्याऽयम्। लुप्यतेऽत्र प्रत्ययो रात्सस्येति। एवं तर्हि भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात् षत्वप्रतिषेधस्य। यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति तज्ज्ञापयत्याचार्यः। नैकादेशनिमित्तात् षत्वं भवतीति। किं पुनरयं पूर्वान्तः आहोस्वित्परादिः आहोस्विदभक्तः। कथं चाऽयं पूर्वान्तः स्यात् कथं वा परादिः कथं वा अभक्तः। यद्यन्त इति वर्तते। ततः पूर्वान्तः। अथादिरिति वर्तते। ततः परादिः। अथोभयं निवृत्तम्। ततोऽभक्तः। कश्चात्र विशेषः। अभक्ते दीर्घलत्वयगभ्यस्तस्वरहलादिःशेषविसर्जनीयप्रतिषेधः प्रत्ययाऽव्यवस्था च। यद्यभक्तः। दीर्घत्वं न प्राप्नोति। गीः पूः। रेफवकारान्तस्य धातोरिति दीर्घत्वं न प्राप्नोति। किं पुनः कारणं रेफवकाराभ्यां धातुर्विशेष्यते न पुनः पदं विशेष्यते। रेफवकारान्तस्य पदस्येति। नैवं शक्यम्। इहापि प्रसज्येत। अग्निर्वायुरिति। एवं तर्हि रेफवकाराभ्यां पदं विशेषयिष्यामो धातुनेकम्। रेफवकारान्तस्य पदस्येको धातोरिति। एवं प्रियंग्रामणिकुलमस्य प्रियग्रामणिः प्रियसेनानिः। अत्राऽपि प्राप्नोति। तस्माद्धातुरेव विशेष्यते। धातौ च विशेष्यमाण इह दीर्घत्वं न प्राप्नोति। गीः पूः। दीर्घ। लत्वं। लत्वं च न सिध्यति। निजेगिल्यते। ग्रो यङीति लत्वं न प्राप्नोति। नैष दोषः। ग्र इत्यनन्तरयोगेषा षष्ठी।

त्परस्येत्यर्थः। यद्यन्त इति। यद्यपि परपर इत्यत्राऽन्यपदार्थस्य प्राधान्यं तथापि रेफस्य विधेयतया प्राधान्यात्तस्यैवान्तत्वं विशेषणमिति भावः। यद्यपि प्रसज्यमान एवाणूरपरो विधीयते। तथाप्यानङ्वत्साक्षादत्रार् आरित्येवमविधानात्तात्पर्यपर्यालोचनन्यायेन केवलाऽवस्थानात्पक्षत्रयविमर्शः। लत्वं चेति। ग्र इत्यवयवषष्ठीति चोद्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पिपरुरिति। पृलङ्घि शपूर्व्लुर्द्विर्वचनमर्तिपिपर्त्योश्चेती त्वं सिजभ्यस्तेतिजुसर्जुसिचेतिगुणः। वर्तत इति। अभ्यासा-
वयवस्यानादेर्हलोनिवृत्त्याभाव्यमितिरेफस्यनिवृत्त्यसिद्धिः। नार्कुट इति। यस्मात्सुपूतिङ्विधिस्तदादिसुबन्तंतिङन्तं
चेतिरेफान्तस्यपदत्वाद्विसर्जनीयप्रसङ्गः। किरत इति। एकवचनेकिरतीतिनित्यत्वात्पूर्वविकरणः। आङ्ङ्तुका येम

एवमपिस्त्वर्जेगित्यतद्द्त्यत्रापिप्राप्नोति। एवंतर्हि यङआनन्तर्ये विशेषयिष्यामः। अथवा ग्रइतिप
ञ्चमी। तत्त्व। यकूस्वर। यकूस्वरश्चनसिध्यति। गीर्यतेस्वयमेवपूर्यतेस्वयमेव। अचः कर्तृयकीत्येष-
स्वरोनप्राप्नोति। रेफेणव्यवहितत्वात्। नैषदोषः। स्वरविधौव्यञ्जनमविद्यमानवद्भवतीतिनास्तिव्य
वधानम्। यकूस्वर। अभ्यस्तस्वर। अभ्यस्तस्वरश्चनसिध्यति। माहिस्मतेपिपरुः। माहिस्मतेबिभरुः। अ
भ्यस्तानामादिरुदात्तोभवतिअजादौलसार्वधातुकेइत्येषस्वरोनप्राप्नोति। रेफेणव्यवहितत्वात्।
नैषदोषः। स्वरविधौव्यञ्जनमविद्यमानवद्भवतीतिनास्तिव्यवधानम्। अभ्यस्तस्वर। हलादिःशेष।
हलादिःशेषश्चनसिध्यति। वर्ततेववृधे। अभ्यासस्येतिहलादिःशेषोनप्राप्नोति। हलादिःशेष। वि
सर्जनीय। विसर्जनीयस्यप्रतिषेधोवक्तव्यः। नार्कुटोना पैत्यः। खरवसानयोर्विसर्जनीयइतिविसर्जे
नीयः प्राप्नोति। विसर्जनीय। प्रत्ययाव्यवस्थाच। प्रत्ययेचव्यवस्थानप्रकल्पेत। किरतः गिरतः। रेफोऽ
प्यभक्तः प्रत्ययोऽपितत्रव्यवस्थानप्रकल्पते। एवंतर्हिपूर्वान्तःकरिष्यते। पूर्वान्तेर्वेवधारणंविसर्जे
नीयप्रतिषेधोयकूस्वरश्च। यदिपूर्वान्तःरोरवधारणंकर्तव्यम्। रोःसुपिरोरेवसुपिनान्यस्यसर्पिष्षु
। धनुष्षु।

नित्यम्। अकृतेहिविकरणेगुणःप्राप्नोतिकृतेत्वित्वमिति। द्विवचनेतुद्वयोरपिनित्यत्वात्परत्वादित्त्वंतत्ररेफोऽभक्तत्वा
न्नधातवयवइतिविकरणोनस्यात्। सहिधातोःपरोविधीयतेअथविकरणात्परोरेफस्तदाऽप्यणःपरोनस्यादितिव्यव
स्थाद्वयोर्नप्रकल्पतेअथव्यवहितेऽपिपरशब्दस्यप्रवृत्तिस्तथापिसमीहिताव्यवस्थानप्रकल्पतइतिप्रत्ययाव्यवस्थोक्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गीर्ष्विति।परादौ।षुब्ग्रहणेन गृह्यत इति न पदान्तत्वमिति भावः। अभक्तपक्षेऽपि तदादिवचनात्प्राप्तिरिति कर्तव्यमवधारणं कल्पिपदेऽपि न कल्पशब्दादि जि वृद्धौ चरेफः प्रत्ययसमुदायस्य कल्पिशब्दस्य भक्तत्वादवयवो न तु कल्पशब्दस्य। ततश्च न शब्दस्य कल्पशब्दे परतः पदसंज्ञा विधीयमाना तदादीत्यधिकाराद्रेफान्तस्य भवतीति विसर्जनीयप्रसङ्गः। पदशब्देन च पद्यतेऽनेनार्थ इति प्रत्यय उच्यते तेन प्रत्ययसमुदायभक्तो रेफः कल्पिशब्दे परतो व्यवस्थितो न कल्पशब्दस्यावयव इति तयोः पौर्वापर्यमस्त्येवेति अवयवस्यात्मन एव पदान्ततां विहन्तुं नोत्सहत इत्यर्थः। क्वचित्तु कल्पपदसंघात

इह मा भूत्। गीर्षु पूर्षु। परादावपि सत्यवधारणं कर्तव्यं चतुर्ष्वित्येवमर्थम्॥ विसर्जनीयप्रतिषेधः॥ विसर्जनीयस्य च प्रतिषेधो वक्तव्यः। नार्कुटः। नार्पत्यः। खरवसानयोर्विसर्जनीय इति विसर्जनीयः प्राप्नोति। परादावपि विसर्जनीयस्य प्रतिषेधो वक्तव्यः नार्कल्पिरित्येवमर्थम्। कल्पिपदसंघातभक्तोऽसौ नोत्सहतेऽवयवस्य पदान्ततां विहन्तुमिति विसर्जनीयः प्राप्नोति। यकुल्वरा यकुल्वरश्च न सिध्यति। गीर्यते स्वयमेव। अचः कर्तृयकीत्येष स्वरो न प्राप्नोति। नैष दोषः। उपदेश इति वर्तते। अथवा पुनरस्तु परादिः। परादावकारलोपो ल्पुकू प्रतिषेधश्च ञ्चुपधाह्रस्वत्वमिटो व्यवस्थाऽभ्यासलोपोऽभ्यस्तादिस्वरो दीर्घत्वञ्च। यदि परादिः अकारलोपः प्रतिषेध्यः। कर्ता हर्ता। अतो लोप आर्द्धधातुक इत्यकारलोपः प्राप्नोति। नैष दोषः। उपदेश इति वर्तते। यद्युपदेश इति वर्तते। धिनुतः कृणुतः। अत्र लोपो न प्राप्नोति। नोपदेशग्रहणेन प्रकृतिरभिसंबध्यते। किं तर्हि। आर्धधातुकमभिसंबध्यते आर्धधातुकोपदेशे यदकारान्तमिति। अकारलोप। औत्व। औत्वं च प्रतिषेध्यम्। चकार जहार। आत औ णल इत्यौत्वं प्राप्नोति। नैष दोषः। निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यति।

भक्त इति पाठस्तत्रायमर्थः। कल्पशब्दस्य संबन्धि यस्य दंनार्कल्पिरिति तस्य पदस्य योऽवयवः प्रत्ययसंघातः कल्पिशब्दस्तद्भक्त इत्यर्थः। धिनुत इति। एकवचने अस्त्यप्यकारलोपे आद्गुणेन वा विकरणस्य वा गुणे पररूपे णधिनोतीति सिध्यतीति द्विवचनं समुदाहृतम्। आर्धधातुकोपदेश इति। सन्नियोगेन चाऽकारस्य विधानादार्धधातुकप्रतिपत्तिकालेऽकारान्तप्रतिपत्त्या सिद्धो लोपः निर्दिश्यमानस्येति। नन्वादेः परस्येति रेफस्यौत्वेन भाव्यम्। नैष दोषः। णल इत्यनेन यत्प्रत्यायितं प्रयोगविषयमकारमात्रं तस्याकारान्तादङ्गादुत्तरस्यादेशः प्रवर्तते सरेफस्य त्वनुमीयमानत्वादादेशाभावः। प्रत्याय्यप्रत्यायकाभेदविवक्षया षष्ठी निर्दिष्टस्यादेशा इत्युच्यते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै
१३०

रेफेणेति। यद्रूपं षष्ठ्या निर्दिष्टमकारमात्रं तद्व्यवहितमित्यर्थः। यदि तु प्रत्ययस्येत्युच्यते लिट इति वा तदा व्यवधानाऽभावात्
स्यादेवादेशः। आस्तरितेति। नित्यत्वाद्गुणे रपरत्वे च कृते नेड्वशि कृतीति प्रतिषेधादप्रवृत्तिलक्षणेटोऽव्यवस्था। प्रवृत्तौ वा रे- ११७
फात्पूर्व इडिति अनिष्टाव्यवस्था प्राप्नोति॥ गीरिति। अन्तरङ्गत्वाद्धलोपे कृते इत्वे रपरत्वे च सुपोऽयमादीरेफ इति कल्प-

यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति। रेफेण व्यवहितत्वात्। औत्व। पुक्प्रतिषेध। पुक्च प्रतिषेध्यः। का
रयति हारयति। आतः पुगिति पुक् प्राप्नोति। पुक्प्रतिषेध। चङ्युपधाह्रस्वत्व। चङ्युपधाह्रस्वत्वं च न सिध्य
ति। अचीकरत् अजीहरत्। णौ चङ्युपधाया ह्रस्व इति ह्रस्वत्वं न प्राप्नोति। इटो व्यवस्था। इटश्च व्यवस्थान
कल्पते। आस्तरिता निपरिता। इडपि परादीरेफोऽपि तत्र व्यवस्थानं प्रकल्पते। अभ्यासलोप। अभ्यासलो
पश्च वक्तव्यः। ववृते ववृधे। अभ्यासस्य हलादिशेषो न प्राप्नोति। अभ्यासलोप। अभ्यस्तस्वर। अभ्यस्त
स्वरश्च न सिध्यति। मा हि स्मते पिपरुः। मा हि स्मते बिभरुः। अभ्यस्तानामादिरुदात्तो भवत्यजादौ लसा
र्वधातुक इत्येष स्वरो न प्राप्नोति। अभ्यस्तस्वर। तादिस्वर। तादिस्वरश्च न सिद्ध्यति। प्रकर्ता प्रकर्तुम्। तादौ
च निति कृत्यतौ इत्येष स्वरो न प्राप्नोति। नैष दोषः। उक्तमेतत्। कृदुपदेशे वा ताद्यर्थमिडर्थमिति। तादिस्व
र। दीर्घ। दीर्घत्वं च न सिध्यति। गीः पूः। रेफवकारान्तस्य धातोरिति दीर्घत्वं न प्राप्नोति॥ अलोऽन्त्यस्य॥ किमिद
मल्ग्रहणमन्त्यविशेषणम्। आहोस्विदादेशविशेषणम्। किं चातः। यद्यन्त्यविशेषणम्। आदेशोऽ
विशेषितो भवति। तत्र को दोषः। अनेकाल्यादेशोऽन्त्यस्य प्रसज्येत। यदि पुनरलन्त्यस्येत्युच्यते तत्रा
ऽयमप्यर्थः। अनेकाल्शित्सर्वस्येत्येतन्न वक्तव्यं भवति।

नायं रात्सस्येति सलोपे कृते दीर्घत्वं न स्यादिति पूर्वान्तपक्षोऽत्र स्थितः। अलोऽन्त्यस्य॥ किमिदमिति। षष्ठीप्रथमयोर्निर्देश
स्य साम्यात्प्रश्नः। यदि पुनरिति। प्रथमा बहुवचनम् अल इति यदि व्याख्यायेतेत्यर्थः। अस्मिंश्च पक्षे रहो रजसां लोप रामः
श्चेति लोपः सर्वादेशः प्राप्नोति। विरजीकरोतीति। १३०
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंनियमार्थमिति।अन्त्यस्याऽऽदेशा भवन्तीत्यलोऽन्त्यात्क्षेपादलुग्रहणमनलन्त्या वृत्त्यर्थमिति भावः। वाक्यस्यापीति।दोषपरत्वादेवमुक्तम्। नतुवाक्यंषष्ठीनिर्दिष्टमस्तिपदस्यतुपरमानङ्कृत्यामित्यत्राऽनङ्छन्दस्याऽन्त्यस्यसर्वस्यदत्वंप्राप्नोति। यदिखल्वपीति।अवश्यकर्तव्योऽसौयोगोऽपवादविप्रतिषेधार्थः।अथलाघवमात्रेआदरस्तत्राप्युच्यते।अन्त्यविशेषणोऽपीति।स्थानेविज्ञातस्येति।षष्ठीस्थानेयोगेत्यनुवर्तते। तेनयाषष्ठीस्थानेयोगत्वेनविज्ञातासान्त्यमलमनुसंह्रियते।आदेशोवा योनिश्चितःसोऽन्त्यस्यालःस्थानेइत्यनुसंह्रियते। इतरथेति।यदिषष्ठीमात्रमनुसंह्रियेतेत्यर्थः।

इदंनियमार्थंभविष्यति। अलेवान्त्यस्यभवतिनान्यदिति।एवमप्यन्त्योऽविशेषितोभवति।तत्रकोदोषः।वाक्यस्याऽपिपदस्याऽप्यन्त्यस्यप्रसज्येत। यदिखल्वप्येषोऽभिप्रायस्तन्नक्रियेतिअन्त्यविशेषणोऽपिसतितन्नकरिष्यते।कथम्।ङिच्चअलोऽन्त्यस्येत्येतन्नियमार्थंभविष्यति।ङिदेवाऽनेकालन्त्यस्यभवतिनान्यदिति।किमर्थंपुनरिदमुच्यते।अलोऽन्त्यस्येतिस्थानेविज्ञातस्याऽनुसंहारः।अलोऽन्त्यस्येत्युच्यतेस्थानेविज्ञातस्यानुसंहारःक्रियते स्थानेप्रसक्तस्येति। इतरथाह्यनिष्टप्रसङ्गः।इतरथाह्यनिष्टंप्रसज्येत।टित्किन्मितोऽप्यन्त्यस्यस्युः।यदिपुनरयंयोगशेषोविज्ञायेत।योगशेषेच किम्।

तत्रलवितेतितच्चकारात्पूर्वमिट्प्राप्नोतीतिदोषः।दापयतीतिपुगाकारस्यस्यात्।ततश्चयदुक्तमर्थवतोह्यागमइतितन्नयुज्यते।यदिपुनरिति।षष्ठीस्थानेयोगेत्यनेनाऽस्यैकवाक्यता।अत्रतुप्रकरणेकरणंङिच्चेत्यादेःसंबन्धार्थंतत्रायमर्थोभवति।शास्त्रेयाषष्ठीसाऽन्त्येऽलिसाचस्थानेयोगेवेतिनतुस्थानेविज्ञातस्यपश्चादनुसंहारःप्रतिपत्तिगौरवप्रसङ्गादितिभावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनिष्टमिति। आद्यन्तौ टकितौ मिदचोऽन्त्यात्पर इत्येताभ्यां स्थाने योगत्वमेव बाध्यते तुल्यजातीयत्वात्संबन्धस्य संबन्धान्त
रेण बाधोपपत्त्या षष्ठ्यास्तु यद्रूपं तदन्त्य एवाऽन्यव्यवस्थितमिति पूर्ववद्दोषप्रसङ्गः। अनुसंहारः पुनरनुसंहारान्तरेणादेः
परस्याऽनेकाल्शित्सर्वस्येत्यनेन बाध्यते॥ ङिच्च॥ विप्रतिषेधादिति। नन्वयमपवादोऽनेकाल्शिदित्युत्सर्गः। उत्सर्गाप
वादयोश्चायुक्तो विप्रतिषेधः। नैतदस्ति। ङित्त्वस्यान्यार्थत्वसंभवे सति दौर्बल्यात्तद्विध्योपस्थानोऽयं योग इत्यपवादत्वमे

अनिष्टं प्रसज्येत। टिकिन्मितोऽप्यन्त्यस्य स्युः। तस्मात्सूच्यते अलोऽन्त्यस्येति स्थाने विज्ञातस्याऽनुसंहा
र इतरथा ह्यनिष्टप्रसङ्ग इति॥ ङिच्च॥ तातङन्त्यस्य स्थाने कस्मान्न भवति ङिच्चाऽलोन्त्यस्येति प्राप्नोति। ता
तङिङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशः। तातङिङित्करणं सावकाशम्। कोऽवकाशः। गु
णवृद्धिप्रतिषेधार्थो ङकारः। नातङिङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशो भविष्यति। प्रयो
जनं नाम तद्वक्तव्यं यन्नियोगतः स्यात्। यदि चायं नियोगतः सर्वादेशः स्यात्तत एतत्प्रयोजनं स्यात्।
कुतो नु खल्वेतत् ङित्करणादयं सर्वादेशो भविष्यति न पुनरन्त्यस्य स्यादिति। एवन्तर्ह्येतदेव ज्ञाप
यति न तातङन्त्यस्य स्थाने भवतीति। यदेतं ङितं करोति। इतरथा हि लोट एरुप्रकरण एव ब्रूयात्तुति
ह्योस्तातङाशिष्यन्यतरस्यामिति॥ आदेः परस्य॥ अलोऽन्त्यस्यादेः परस्यानेकाल्शित्सर्वस्येत्यपवाद
विप्रतिषेधात्सर्वादेशः। अलोन्त्यस्येत्युत्सर्गः। तस्यादेः परस्यानेकाल्शित्सर्वस्येत्यपवादौ। अपवाद
विप्रतिषेधात्सर्वादेशो भविष्यति। आदेः परस्येत्यस्यावकाशः। द्व्यन्तरुपसर्गेभ्योऽप ईत्। द्वीपम्। अ
न्तरीपम्। अनेकाल्शित्सर्वस्येत्यस्याऽवकाशः। अस्तेर्भूः। भविता भवितुम्। इहोभयं प्राप्नोति। अतो भिस ऐस्।
अनेकाल्शित्सर्वस्येत्येतद्भवति विप्रतिषेधेन। शित्सर्वस्येत्यस्याऽवकाशः। इदम इश्। इतः। इह। आदेः पर
स्येत्यस्याऽवकाशः सस एव। इहोभयं प्राप्नोति। अष्टाभ्य औश्। शित्सर्वस्येत्येतद्भवति विप्रतिषेधेन।

वान्न विषयेऽस्य नास्ति। प्रयोजनं नामेति। सति सर्वादेशत्वे ङित्करणं गुणवृद्धिप्रतिषेधार्थं स्यात्तदेव तु सर्वादेशत्वमलभ्यं
ङित्त्वादन्त्यस्यैव प्रसङ्गादिति भावः। ङित्करणादिति। गुणवृद्धिप्रतिषेधार्थादिति भावः। एवन्तर्हीति। अन्तरेणाऽपि ङित्त्वमेरु
रित्यत्र प्रकरणे तातिविधीयमानेऽन्त्यादेशत्वं सिद्धमिति ङित्त्वादेव गुणवृद्धिप्रतिषेधार्थं ङित्त्वमिति विज्ञायते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेकाल्। शित्करणादेवेति। सति शकारेऽनेकाल्त्वादिति भावः। अनेकाल्त्वसंपादनेन च कृतार्थः शकार इतीत्संज्ञकत्वा-
त्लुप्यत एव। अष्टाभ्य औशिति। आदेः परस्येत्यादेः प्राप्त इति भावः। अन्त्यस्याऽयमिति। ननु सर्वनाम्नो नपुंसकादिति च पञ्च-
मीनिर्देशादादेः परस्येत्यादेर्भाव्यं तत्किमुच्यतेऽन्त्यस्याऽयं भवन्निति। एवं तर्हि सर्वनाम्न इति षष्ठी मन्यते नपुंसकादिति च
विहितविशेषणमिति ज्ञापकत्वमेव शित्करणस्य। अथवाऽसत्यपीह शिद्ग्रहणेऽनेकाल्त्वादादेः परस्येति बाधित्वा सर्वा-

अनेकाल्शित्सर्वस्य॥ शित्सर्वस्येति किमुदाहरणम्। इदम इश्। इतः। इह। नैतदस्ति प्रयोजनम्। शित्करणा-
देवाऽत्र सर्वादेशो भविष्यति। इदं तर्हि अष्टाभ्य औश्। ननु चात्रापि शित्करणादेव सर्वादेशो भविष्यति।
इदं तर्हि जसः शी। जश्शसोः शिः। ननु चात्रापि शित्करणादेव सर्वादेशो भविष्यति। अस्त्यन्यच्छित्करणे प्रयो-
जनम्। किम्। विशेषणार्थः शकारः। क्व विशेषणार्थेनार्थः। शि सर्वनामस्थानम्। विभाषा ङिश्योरिति। शि-
त्सर्वस्येति शक्यमकर्तुम्। कथम्। अन्त्यस्याऽयं स्थाने भवन्न प्रत्ययः स्यात्। असत्यां प्रत्ययसंज्ञायामित्सं-
ज्ञा न स्यात्। असत्यामित्संज्ञायां लोपो न स्यात्। असति लोपेऽनेकाल्। यदानेकाल्। तदा सर्वादेशः। यदा
सर्वादेशः। तदा प्रत्ययः। यदा प्रत्ययस्तदेत्संज्ञा यदेत्संज्ञा तदा लोपः। एवं तर्हि सिद्धे सति यच्छित्सर्वस्येत्याह तज्ज्ञा-
पयत्याचार्यः अस्त्येषा परिभाषा नानुबन्धकृतमनेकाल्त्वं भवतीति। किमेतस्य ज्ञापने प्रयोजनम्।
तत्राऽसरूपसर्वादेशदाप्प्रतिषेधेषु पृथङ्निर्देशोऽनाकारान्तत्वादित्युक्तं तन्न वक्तव्यं भवति। इति
श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे सप्तममाह्निकम्॥

देशो भविष्यतीति किं शिद्ग्रहणेनेति पुनरपि ज्ञापकमेव शिद्ग्रहणम्। अनेकान्तेषु चानुबन्धेषु नास्त्येव नानुबन्धकृत-
मनेकाल्त्वमिति एकान्तेषु च तेषु ज्ञापकेन प्रयोजनम्। इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमाध्या-
यस्य प्रथमे पादे सप्तममाह्निकम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थानिवत्॥ वल्करणमिति। विनापिवतिनातदर्थलाभो यथाङिक्लिदितिभावः। नचस्थान्यादेशाद्इत्युच्यमाने स्थानिरूप-
मादेशः प्रतिपद्यतेइति कल्पनाऽऽश्रयितुंयुक्ता। अस्तेर्भूरित्यादेशविधानवैयर्थ्यप्रसङ्गात्। नच वचनद्वयप्रामाण्या
द्विकल्पः वालिटीति विकल्पारम्भात्। संज्ञाधिकारइति। संज्ञाप्रस्तावइत्यर्थः। तत्र कोदोषइति। आदेशेकार्यसिद्ध्यर्थो
ऽतिदेशः। तच्चाऽऽदेशेकार्यसंज्ञासंज्ञिसंबन्धेनापि सिद्ध्यतीतिप्रश्नः। वधेरेवेति। संज्ञाहि प्रदेशेषु संज्ञिप्रत्यायनार्थो-
संज्ञिनंप्रत्याय्यनिवर्ततेनतुस्वतःकार्यंप्रतिपद्यतइतिभावः। बहुगणेत्यत्र तु संख्येत्यन्वर्थताऽऽश्रयणाद्धन्तोकिका-
र्यग्रहणाद्विनाऽपिवतिनाऽतिदेशपक्षउपन्यस्तः। वल्करणात्त्विहातिदेशेन स्थानिकार्यंण्यादेशेक्रियन्ते नतु स्था-
निनिनिवर्त्यन्तइत्यदोषः। ङिक्लिदितितु संज्ञा न भवति नस्कासेङितिप्रतिषेधात्। नहिस्कः कित्संज्ञाविहितायात्र-

स्थानिवदादेशोऽनल्विधौ॥ वत्करणंकिमर्थम्। स्थान्यादेशोऽनल्विधावितीयत्युच्यमाने संज्ञाधिकारो
ऽयं तत्रस्थानीआदेशस्य संज्ञास्यात्। तत्रकोदोषः। आङोयमहनः। आत्मनेपदंभवतीतिवधेरेवस्यात्।
हन्तेर्नस्यात्। वत्करणेपुनः क्रियमाणेनदोषोभवति स्थानिकार्यमादेशेअतिदिश्यते गुरुवद्गुरुपु
त्रइतियथा। अथादेशग्रहणंकिमर्थम्। स्थानिवदनल्विधावितीयत्युच्यमाने कइदानीं स्थानिव
त्स्यात्। यः स्थानेभवति। कश्चस्थानेभवति। आदेशः।

तिषिध्येत। किकिनौलिट्चेत्यत्रतु संज्ञाप्रकरणाभावात्तद्वदतिदेशः। स्थानिकार्यमित्यनेनकार्यातिदेशोऽयमिति
प्रदर्शयति। शास्त्राद्यतिदेशापेक्षयाकार्याऽतिदेशस्य प्राधान्यादितरेषांकार्यार्थत्वादितिभावः। आदेशग्रहण
मिति। स्थानिशब्दस्य संबन्धिशब्दत्वादादेशोलभ्यतएव यथापितृवदधीतइत्युक्ते पुत्रइतिभावः। कइदानी-
मिति। द्विविधआदेशः प्रत्यक्षश्चास्तेर्भूरित्यादिः। आनुमानिकश्चैरुरित्यादि। अत्रहिइकारेणोकारान्तःस्थान्य
नुमीयते। उकारेणोकारान्तश्चादेशः। ततस्तेस्तुरितिसंपद्यते। तत्रप्रत्यक्षस्यैवग्रहणं स्याद्नाऽनुमानिकस्येति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदेशमात्रमिति। प्रत्यक्षमनुमितं चेत्यर्थः। एहरित्यत्र प्रत्यक्षमुकारस्यादेशत्वमिकारस्य च स्थानित्वम्। न च किंचिदिकारस्य कार्यमस्ति यदुकारेऽतिदिश्येत। तिशब्दकार्यं तु तुशब्दस्यातिदिश्यत इति पदत्वसिद्धिः। सर्वविभक्त्यन्त इति। सर्वविभक्त्यन्तोऽवयवोऽस्यास्तीति मत्वर्थीयोऽकारः। बहुत्वप्रतिपादनपरमेतत्। नह्यत्र सप्त विभक्तयः संभवन्ति तत्र संबन्धमात्रे षष्ठ्युपादानेऽनेकविभक्त्यर्थान्तर्भावात् फलतः सर्वविभक्त्यन्तता संभवति। अथवाऽल्विधिशब्दवाच्योऽल्विधिरिति विशिष्टप्रवृत्तिनिमित्ताश्रयणात् सर्वविभक्त्यन्तत्वम्। सति च विधिशब्दे समासभावादेतद्वस्तुलाभः। केवलस्त्वल्शब्द उपादीयमानो यद्विभक्तिरुच्चार्येत तदर्थोपक्षय एव स्यात्। तत्रालः परस्य विधिः। द्योः पन्थाः हल्ङ्याद्[ि]सुलोपो न भवति। अलि परतो विधिः। कद्रूष्टः सद्रूष्टः। हशि

इदं तर्हि प्रयोजनम्। आदेशमात्रं स्थानिवद्यथा स्यात्। एकदेशविकृतस्योपसंख्यानं चोदयिष्यति तन्न वक्तव्यं भवति। अथ विधिग्रहणं किमर्थम्। सर्वविभक्त्यन्तः समासो यथा विज्ञायेत। अलः परस्य विधिः। अल्विधिः। अलो विधिः। अल्विधिः। अलि विधिः। अल्विधिः। अला विधिरल्विधिरिति। नैतदस्ति प्रयोजनम्। प्रातिपदिकनिर्देशोऽयम्। प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति। न कांचित्प्राधान्येन विभक्तिमाश्रयन्ति। तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्या। इदं तर्हि प्रयोजनम्। उत्तरपदलोपो यथा विज्ञायेत।

चेत्युत्वं न भवति। अलो विधिः। द्युकामद्इति। लोपो व्योर्वलीति लोपो न भवतीति। उत्वं लऽवलि स्यादकार्श्यादह र्विमलद्युइति। अला विधिः। महोरस्केनेति। अयोगवाहानामट्स्वुपदेशात्सत्वं न भवतीति। प्रातिपदिकनिर्देशाश्चेति। अनल्वित्येतावदेवोच्यताम्। अत्र शब्दसंस्कारायकेवलं प्रथमाविभक्तिरुपादीयते न तु तदर्थो विवक्ष्यते। यथा भावद्त्यत्र लिङ्गसंख्येद्इति भावः। उत्तरपदलोपइति। अनल्वित्युच्यमाने यत्र कार्यं स्यात् क्रमेणालाश्रीयते तत्रैव निषेधः स्यात्। कद्रूष्टः सद्रूष्टइत्यादौ। प्रदीव्येत्यादौ इटः प्रतिषेधो न स्यात्। न हीड्विधौ वलः स्वातन्त्र्येणाश्रयणं वलादेरित्यन्यपदार्थस्य प्राधान्याद्गुणभावाद्वलः। उत्तरपदलोपे त्वलाश्रयत्वादिड्विधेः प्रतिषेधसिद्धिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कौ॰ १३२

स्थानिवत्॥ वत्करणमिति। विनापि वतिना तदर्थलाभो यथा ङि·क्किदिति भावः। न च स्थान्यादेश इत्युच्यमाने स्थानिरूप- १ १७
मादेशः प्रतिपद्यत इति कल्पनाऽऽश्रयितुं युक्ता। अस्तेर्भूरित्यादेशविधानवैयर्थ्यप्रसङ्गात्। न च वचनद्वयप्रामाण्या-
द्विकल्पः वा लिटीति विकल्पारम्भात्। संज्ञाधिकार इति। संज्ञाप्रस्ताव इत्यर्थः। तत्र को दोष इति। आदेशे कार्यं सिद्ध्यर्थो
ऽतिदेशः। तत्राऽऽदेशे कार्यं संज्ञासंज्ञिसंबन्धेनापि सिद्ध्यतीति प्रश्नः। वधेरेवेति। संज्ञा हि प्रदेशेषु संज्ञिप्रत्यायनार्थो-
संज्ञिनं प्रत्याय्य निवर्तते न तु स्वतः कार्यं प्रतिपद्यत इति भावः। बहुगणेत्यत्र तु संख्येत्यन्वर्थताऽऽश्रयणाद्धेतोः किं का-
र्यग्रहणाद्विनाऽपि वतिनाऽतिदेशपक्ष उपन्यस्तः। वत्करणात्त्विहातिदेशे न स्थानिकार्याण्यादेशे क्रियन्ते न तु स्था-
निनि निवर्त्यन्त इत्यदोषः। ङि·क्किदिति तु संज्ञा न भवति नस्कासे ङिति प्रतिषेधात्। न हि स्कः कित्संज्ञाविहिता याप्र-

स्थानिवदादेशोऽनल्विधौ॥ वत्करणं किमर्थम्। स्थान्यादेशोऽनल्विधावितीयत्युच्यमाने संज्ञाधिकारो
ऽयं तत्र स्थानी आदेशस्य संज्ञा स्यात्। तत्र को दोषः। आङो यमहनः। आत्मनेपदं भवतीति वधेरेव स्यात्।
हन्तेर्न स्यात्। वत्करणे पुनः क्रियमाणे न दोषो भवति स्थानिकार्यमादेशे अतिदिश्यते गुरुवद्गुरुपु
त्र इति यथा। अथादेशग्रहणं किमर्थम्। स्थानिवदनल्विधावितीयत्युच्यमाने क इदानीं स्थानिव
त्स्यात्। यः स्थाने भवति। कश्च स्थाने भवति। आदेशः।

तिषिध्येत। किकिनौ लिट्चेत्यत्र तु संज्ञाप्रकरणाभावात्तद्वदतिदेशः। स्थानिकार्यमित्यनेन कार्यातिदेशोऽयमिति
प्रदर्शयति। शास्त्रातिदेशापेक्षया कार्यातिदेशस्य प्राधान्यादितरेषां कार्यार्थत्वादिति भावः। आदेशग्रहण
मिति। स्थानिशब्दस्य संबन्धिशब्दत्वादादेशो लभ्यत एव यथा पितृवदधीत इत्युक्ते पुत्र इति भावः। क इदानी-
मिति। द्विविध आदेशः प्रत्यक्ष आस्तेर्भूरित्यादिः। आनुमानिकश्चेरुरित्यादि। अत्र हि इकारेणाकारान्तः स्थान्य रामः
नुमीयते उकारेणाकारान्तश्चादेशः। ततस्तेस्तुरिति संपद्यते। तत्र प्रत्यक्षस्यैव ग्रहणं स्यान्नाऽनुमानिकस्येति। १३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदेशमात्रमिति। प्रत्यक्षमनुमितं चेत्यर्थः। एरुरित्यत्र प्रत्यक्षमुकारस्यादेशत्वमिकारस्य च स्थानित्वम्। न च किंचिदिकारस्य कार्यमस्ति यदुकारेऽतिदिश्येत। तिशब्दकार्यं तु तुशब्दस्यातिदिश्यत इति पदत्वसिद्धिः। सर्वविभक्त्यन्त इति। सर्वविभक्त्यन्तोऽवयवोऽस्यास्तीति मत्वर्थीयोऽकारः। बहुत्वप्रतिपादनपरमेतत्। न ह्यत्र सप्त विभक्तयः संभवन्ति तत्र संबन्धमात्रे षष्ठ्युपादानेऽनेकविभक्त्यर्थान्तर्भावात् फलतः सर्वविभक्त्यन्तता संभवति। अथवाऽल्विधिशब्दवाच्योऽल्विधिरिति विशिष्टप्रवृत्तिनिमित्तानाश्रयणात् सर्वविभक्त्यन्तत्वम्। सति च विधिशब्दे समासभावादेतद्बहुलाभः। केवलस्त्वल्शब्द उपादीयमानो यद्विभक्तिरुच्चार्येत तदर्थोपक्षय एव स्यात्। तत्रालः परस्य विधिः। द्यौः पन्थाः हल्ङ्यादिसुलोपो न भवति। अलि परतो विधिः। कद्रूष्टः सद्रूष्टः। हशि

इदं तर्हि प्रयोजनम्। आदेशमात्रं स्थानिवद्यथा स्यात्। एकदेशविकृतस्योपसंख्यानं चोदयिष्यति तन्न वक्तव्यं भवति। अथ विधिग्रहणं किमर्थम्। सर्वविभक्त्यन्तः समासो यथा विज्ञायेत। अलः परस्य विधिः। अल्विधिः। अलो विधिः। अल्विधिः। अलि विधिः। अल्विधिः। अला विधिरल्विधिरिति। नैतदस्ति प्रयोजनम्। प्रातिपदिकनिर्देशोऽयम्। प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति। न कांचित्प्राधान्येन विभक्तिमाश्रयन्ति। तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्या। इदं तर्हि प्रयोजनम्। उत्तरपदलोपो यथा विज्ञायेत।

चेत्युत्वं न भवति। अलो विधिः। द्युकाम इति। लोपो व्योर्वलीति लोपो न भवतीति। उत्वं त्वऽवलि सावकाशं स्यादहर्विमलद्युरिति। अला विधिः। महोरस्केनेति। अयोगवाहानामट्सूपदेशात्सत्वं न भवतीति। प्रातिपदिकनिर्देशश्चेति। अनलीत्येतावदेवोच्यताम्। अत्र शब्दसंस्काराय केवलं प्रथमाविभक्तिरुपादीयते न तु तदर्थो विवक्ष्यते। यथाभावदित्यत्र लिङ्गसंख्ये इति भावः। उत्तरपदलोप इति। अनलीत्युच्यमाने यत्र कार्यं स्यात्तस्यैवानलाश्रीयेत तत्रैव निषेधः स्यात्। कद्रूष्टः सद्रूष्ट इत्यादौ। प्रदीव्येत्यादौ ऊठः प्रतिषेधो न स्यात्। न हीड्विधौ वलः स्वातन्त्र्येणाश्रयणं वलादेरित्यन्यपदार्थस्य प्राधान्याद्गुणभावाद्वलः। उत्तरपदलोपे त्वलाश्रयणादिड्विधेः प्रतिषेधसिद्धिः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अलमाश्रयत इति। अर्थप्रदर्शनमेतत्। एवं ह्यलाश्रय इति स्यात्। तस्मादाश्रीयत इत्याश्रयः। एरच्। अलाश्रयो यस्येति अ
लाश्रयो विधिरल्विधिः। अलाश्रयत्वाद्विधिरेवाल्विधिरुच्यत इति गतार्थत्वादप्रयोग एव उत्तरपदस्य लोपः। किमर्थमिति। त-
त्स्थानापत्त्या तद्धर्मलाभात् स्थानिकार्याण्यादेशाः प्राप्स्यन्तीति भावः। स्थान्यादेशपृथक्त्वादिति। स्थानिस्वरूपाश्रयं यत्कार्यं त-

अलमाश्रयते अलाश्रयः। अलाश्रयो विधिः। अल्विधिरिति। यत्र प्राधान्येनालाश्रीयते। तत्रैव प्रतिषेधः स्यात्। य
त्र विशेषणत्वेनाऽलाश्रीयते तत्र प्रतिषेधो न स्यात्। किं प्रयोजनम्। प्रदीव्य प्रसीव्येति। वलादिलक्षण इड् माभू
दिति। किमर्थं पुनरिदमुच्यते। स्थान्यादेशपृथक्त्वादादेशे स्थानिवदनुदेशो गुरुवद्गुरुपुत्र इति यथा। अन्यः
स्थानी अन्य आदेशः। स्थान्यादेशपृथक्त्वादेतस्मात्कारणात् स्थानिकार्यमादेशो न प्राप्नोति। तत्र को दोषः। आङो य
महन इत्यात्मनेपदं भवतीति हन्तेरेव स्यात् वधेर्न स्यात् इष्यते च वधेरपि स्यादिति। तच्चान्तरेण यत्नं न सिध्यती
ति तस्मात् स्थानिवदनुदेशः। एवमर्थमिदमुच्यते गुरुवद्गुरुपुत्र इति यथा। तद्यथा। गुरुवद्गुरुपुत्रे वर्तितव्यमिति
गुरौ यत्कार्यं तद्गुरुपुत्रे अतिदिश्यते। एवमिहापि स्थानिवत्कार्यमादेशे अतिदिश्यते। नैतदस्ति प्रयोजनम्।
लोकत एतत् सिद्धम्। तद्यथा। लोके यो यस्य प्रसङ्गे भवति लभतेऽसौ तत्कृतानि कार्याणि। तद्यथा। उपाध्या
यस्य शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते। यद्यपि तावल्लोक एष दृष्टान्तः। दृष्टान्तस्यापि तु पु
रुषारम्भो निवर्तको भवति। अस्ति चेह कश्चित्पुरुषारम्भः। अस्तीत्याह। कः। स्वरूपविधिर्नाम। हन्तेरात्म-
नेपदमुच्यमानं हन्तेरेव स्यात् वधेर्न स्यात्। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति स्थानिवदादेशो भवतीति। यद
यं युष्मदस्मदोरनादेश इत्यादेशे प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्। युष्मदस्मदोर्विभक्तौ कार्यमुच्यमानं
कः प्रसङ्गो यदादेशेऽपि स्यात्। पश्यति त्वाचार्यः स्थानिवदादेशो भवतीति अत आदेशे प्रतिषेधं शास्ति। इदं त
र्हि प्रयोजनम्।

द्भिन्नरूपत्वादादेशे न सिध्यतीति भावः। लोकत इति। लोके हि वचनमन्तरेणापि तत्स्थानापत्त्या तद्धर्मलाभो दृष्टः। उपाध्या
यस्येति। प्रसङ्गापेक्षेयं षष्ठी न तु शिष्यस्य विशेषणमेतद्व्यभिचाराभावात्। ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रतिषेधं वक्ष्यामीति। न ह्यप्रदर्शितविषयः प्रतिषेधः शक्यो विधातुमिति भावः। एवं तावल्लिङ्गेनाभिमतोऽर्थः सिद्ध इति प्रदर्शितम्। इदानीं क्रियमाणेऽपि सूत्रेऽनल्विधाविति न कर्तव्यमित्याह। अल्विधौ प्रतिषेध इति। प्रदीव्येतीड् न भवतीति। इड्विधौ वलादेरिति विशेषणमाश्रितम्। तच्च क्त्वो ल्यबिति वस्तुस्थित्या संनिहितमपि वलादित्वं स्थानिन्यविवक्षितत्वादनाश्रितम्। तथा हीडादिरपि क्त्वा भवत्येव क्त्वा केवलोऽपि आकारान्तोऽपि स्नात्वीतीकारान्तोऽपि दत्त्वायेति च यगन्तोऽपि इष्ट्वीनमिति मान्तोऽपि तत्र क्त्वामात्रप्रतिबद्धं यत्कार्यं कित्त्वप्रत्ययत्वाव्ययत्वादि तदादेशेऽतिदिश्यतां न तु वलादित्वमिति ल्यपो न स्वतो नापि स्थानितो वलादित्वमि

अनल्विधाविति प्रतिषेधं वक्ष्यामीति। इह मा भूत्। द्योः पन्थाः स इति। एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति। अल्विधौ स्थानिवद्भावो न भवतीति। यदयमदो जग्धिर्ल्यप्ति किति इति किति इत्येव सिद्धे ल्यब्ग्रहणं करोति। तस्मान्नार्थोऽनेन योगेन। आरभ्यमाणेऽप्येतस्मिन्योगे अल्विधौ प्रतिषेधे विशेषणेऽप्राप्तिस्तस्यादर्शनात्। अल्विधौ प्रतिषेधेऽसत्यपि विशेषणे समाश्रीयमाणे असति तस्मिन्विशेषणे अप्राप्तिर्विधेः। प्रदीव्य प्रसीव्य। किं कारणम्। तस्यादर्शनात्। वलादेरित्युच्यते न चात्र वलादिं पश्यामः। ननु चैवमर्थ एवायं यत्नः क्रियते। अन्यस्य कार्यमुच्यमानमन्यस्य यथा स्यादिति। सत्यमेवमर्थो न तु प्राप्नोति। किं कारणम्। सामान्यातिदेशे हि विशेषानतिदेशः। सामान्ये ह्यतिदिश्यमाने विशेषो नातिदिष्टो भवति। तद्यथा। ब्राह्मणवदस्मिन्क्षत्रिये वर्तितव्यमिति सामान्यं यद्ब्राह्मणकार्यं तत्क्षत्रियेऽतिदिश्यते। यद्विशिष्टं माठरे कौण्डिन्ये वा न तदतिदिश्यते। एवमिहापि यत्सामान्यं प्रत्ययकार्यं तदतिदिश्यते यद्विशिष्टं वलादेरिति न तदतिदिश्यते।

तीड्भावः सिद्ध एवेति भावः। ब्राह्मणवदिति। सामान्यशब्दोपादानेन यत्र कार्यमतिदिश्यते तत्र हि विशेषस्याशब्दार्थत्वाद्विशेषाश्रयकार्यानतिदेशः। यत्र तु विशेषशब्दोपादानेनातिदेशस्तत्र विशेषातिदेशो भवत्येव। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अग्रहीदिति। ग्रहोऽलिटि दीर्घ इति दीर्घे कृते इति भावः। दीर्घविधौ ह्यच्परिभाषोपस्थानादच एव स्थानित्वम्। इट्त्वजन्तराणां व्यावर्तक इतीट्कार्यं विशेषकार्यत्वान्न प्राप्नोति। तथा प्रदीव्येति गुणप्रतिषेधो न प्राप्नोति। देविलेत्यादावकितोऽपि क्त्वाप्रत्ययस्य संभवात्। किन्त्वस्यापि वलादित्ववन्न स्यादतिदेशः। तस्माद्विशेषकार्यातिदेशज्ञापनार्थमनल्विधाविति कर्तव्यमिति भावः। अनुबन्धकार्येषु चानल्विधाविति प्रतिषेधो न प्रवर्तते स्थानिन्यनुबन्धस्यासन्निधानादसन्त एवानुबन्धाः कार्यस्य विशेषका इति सिद्धान्तव्यवस्थापनात्। विशिष्टं ह्येषोऽनलमिति। इट ईटीति सलोपे समुदायरूपेणाऽऽश्रयणाद्ग्रहोऽलि

यद्येवमग्रहीत् इट ईटीति सिचो लोपो न प्राप्नोति। अनल्विधाविति पुनरुच्यमाने इहापि प्रतिषेधो भविष्यति। प्रदीव्य प्रसीव्येति। विशिष्टं ह्येषोऽलमाश्रयते वलं नाम। इह च प्रतिषेधो न भविष्यति अग्रहीदिति। विशिष्टं ह्येषोऽनलमाश्रयते इटं नाम। यदि तर्हि सामान्यमप्यतिदिश्यते विशेषश्च सत्याश्रये विधिरिष्टः। सति च वलादित्वे इटा भवितव्यम्। अरुदिताम्। अरुदितम्। अरुदित। किमतो यत्सति भवितव्यम्। प्रतिषेधस्तु प्राप्नोति अल्विधित्वात्। प्रतिषेधस्तु प्राप्नोति। किं कारणम्। अल्विधित्वात्। अल्विधिरयं भवति। तत्रानल्विधाविति प्रतिषेधः प्राप्नोति। न वानुदेशिकस्य प्रतिषेधादितरेणाभावः। न वा एष दोषः। किं कारणम्। आनुदेशिकस्य प्रतिषेधात्। अस्त्वत्राऽऽनुदेशिकस्य वलादित्वस्य प्रतिषेधः। स्वाश्रयमत्र वलादित्वं भविष्यति। नैतद्विवदामहे वलादिर्न वलादिरिति। किं तर्हि स्थानिवद्भावात् सार्वधातुकत्वमेषितव्यम्। तत्राऽनल्विधाविति प्रतिषेधः प्राप्नोति।

टिदीर्घ इत्यत्रापि इट एव स्थानित्वं नाचः। अनियमप्रसङ्गान्नियमफलाया अच्परिभाषाया अनुपस्थानात्। सत्याश्रय इति। आश्रीयत इत्याश्रयः। यथा वलादित्वमिड्विधौ। तन्नेडागमस्याल्विधित्वादनल्विधौ च स्थानिवद्भावविधानादरुदितामिति स्थानिकार्यमिडागमो न प्राप्नोतीति। न वेति। अतिदेश एवानुदेशः स प्रयोजनं यस्य तदानुदेशिकम्। तत्र स्वाश्रयं वलादित्वमाश्रित्य स्थान्याश्रयं च सार्वधातुकत्वमिति द्विधा स्यते। तत्राऽनल्विधाविति। इडागमार्थमत्र स्थानिवद्भावः प्रार्थ्यते इट् चाल्विधिरिति अनल्विधाविति प्रतिषेधात् सार्वधातुकत्वस्याऽपीडर्थत्वादिड् न प्राप्नोतीति। ॥

CC-0. In Public Domain. Digitization by eGangotri

दृढनीयथात्र प्रतिषेधो न प्रवर्तेते तथा विचारपूर्वकं प्रतिपादयितुमाह। किंपुनरिति। आदेशोऽस्यास्तीत्यादेशी स्थानी। किं स्थान्यला-
श्रये कार्ये स्थानिवत्त्वनिषेधो थाल्मात्राश्रयइति विचारः किंप्रत्यासत्तिराश्रीयतेऽथवाव्याप्तिरिति भावः। वधकइति। हन्तेर्ण्वुलि-
बहुलं संज्ञाछन्दसोरिति वक्तव्यमन्नवधकगात्रविचक्षणाजिराद्यर्थमिति वधादेशः। स च हलन्तइति दोषोपन्यासः। अदन्तत्वे-
त्वल्लोपस्य स्थानिवद्भावाद्वृद्ध्यभावः। सुप्तिङ्कृदतिदिष्टेष्विति। आदिष्टएवातिदिष्टो विवक्षितः। उपलक्षणं चैतत्। तद्धितादे-
शेष्वपि न प्राप्नोति लैगवायन इति अत्र हि स्वाश्रयमजादित्वं स्थानिवद्भावात्तद्धितत्वम्। किंपुनरिति। न्यायापेक्षः प्रकर्षः। कः पक्षो-

किंपुनरादेशिन्यल्याश्रीयमाणे प्रतिषेधो भवत्याहोस्विदविशेषेण आदेशे आदेशिनि च। कश्चात्र विशेषः। आदे-
श्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः। आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्ध्योः प्रति-
षेधो वक्तव्यः। कुर्विति। अत्र स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयं च लघूप-धत्वं तत्र लघूपधगुणः प्राप्नोति। वधकइत्य-
त्र स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयं चादुपधत्वं तत्र वृद्धिः प्राप्नोति। पिबेत्यत्र स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयं च ल-
घूपधत्वं तत्र लघूपधगुणः प्राप्नोति। अस्तु तर्ह्यविशेषेण आदेशे आदेशिनि च। आदेश्यादेशइति चेत्सुप्तिङ्-
कृदतिदिष्टेषूपसंख्यानम्। आदेश्यादेशइति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानं कर्तव्यम्। सुप्। वृक्षाय प्ल-
क्षाय स्थानिवद्भावात्सुप्संज्ञा स्वाश्रयं यञादित्वं तत्र प्रतिषेधः प्राप्नोति। सुप्। तिङ्। अरुदिताम्। अरुदितम्।
अरुदित। स्थानिवद्भावात्सार्वधातुकसंज्ञा स्वाश्रयं च वलादित्वं तत्र प्रतिषेधः प्राप्नोति। तिङ्। कृदतिदिष्टम्।
भुवनं सुवनं धुवनम्। स्थानिवद्भावात्प्रत्ययसंज्ञा स्वाश्रयं चाजादित्वं तत्र प्रतिषेधः प्राप्नोति। किंपुनरत्र ज्यायः
। आदेशिन्यल्याश्रीयमाणे प्रतिषेध इत्येतदेव ज्यायः।

न्यायोपपन्नइत्यर्थः। आदेशिनीति। प्रत्यासत्त्येति भावः। यत्कार्यमादेशः स्वतो न प्रतिपद्यते तस्य तत्र स्यादतिदेशाकाङ्क्षा। तच्छे-
षश्च प्रतिषेधस्तद्द्वारकएव कार्ये युक्तः। अरुदितामित्यत्र त्वादेशस्य स्वतो वलादित्वान्न तत्रातिदेशाकाङ्क्षा। सार्वधातुकत्वं स्व-
तो नास्तीति तदेवातिदेशेन प्राप्यते। यथा गुरुपुत्रो गुरुत्वे सति नातिदेशमपेक्षते तथा वलादित्वं प्रत्यादेशस्य नास्त्यतिदेशापेक्षे- ॥
त्येतावता दृष्टान्तः सार्वधातुकत्वं प्रत्यस्यैवातिदेशापेक्षा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ कै॰ करोताविति।अकारस्यह्यकारोमात्रिकएवन्याय्यइतिशास्त्रान्तरेणापिप्राप्तस्यभिन्नकालस्यनिवृत्त्यर्थंतपरत्वमित्यर्थः।अन्यो ११८
१३५ यमिति।हनोवधचेतिक्वुन्प्रत्ययः।एकदेशविकृतस्येति।एकदेशेनविकृतइतितृतीयासमासः।तद्यथेति।छिन्नेपिपुच्छेशि-
ष्टावयवसन्निवेशःश्वत्वजातेरभिव्यञ्जकः।एवंपचत्वित्यत्रैकारस्यविकारेपितकारस्तिङ्त्वस्यव्यञ्जकः।तथाचैकारलो
पेप्यपचदितितकारमात्रस्यतिङ्त्वमर्थप्रतीतिहेतुत्वंचास्ति।नाश्वइति।अवयवापगमेपिनतस्यजात्यन्तरेणयोगःकिंत-

कुतएतत्।तथाह्ययंविशिष्टंस्थानिकार्यमादेशेऽतिदिशतिगुरुवद्गुरुपुत्रेइतियथा।तद्यथा।गुरुवदस्मि
न्गुरुपुत्रेवर्तितव्यमन्यत्रोच्छिष्टभोजनात्पादोपसंग्रहणाच्चेति।यदिचगुरुपुत्रोपिगुरुर्भवतितदपिक
र्तव्यंभवति।अस्तुतर्ह्यादेशिन्यत्वात्रीयमाणोप्रतिषेधः।ननुचोक्तमादेशप्रत्ययविधिप्रतिषेधेकुरुवधपिबांगु
णवृद्धिप्रतिषेधइति।नैषदोषः।करोतौतपरनिर्देशात्सिद्धम्।पिबिरदन्तः।वधकइतिनायंण्वुल्।अन्यो
यमकशब्दःकिदौणादिकःरुचकइतियथा।एकदेशविकृतस्योपसंख्यानम्।एकदेशविकृतस्योपसं-
ख्यानंकर्तव्यम्।किंप्रयोजनंपचतुपचन्तुतिङ्ग्रहणेनग्रहणंयथास्यात्।एकदेशविकृतस्यानन्यत्वा
त्सिद्धम्।एकदेशविकृतमनन्यवद्भवतीतितिङ्ग्रहणेनग्रहणंभविष्यति।तद्यथाश्वाकर्णेपुच्छेवाच्छिन्ने
श्वैवभवतिनाश्वोनगर्दभइति। अनित्यविज्ञानंतु। अनित्यविज्ञानंतुभवति।नित्याःशब्दाःनित्येषुनाम
शब्देषुकूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः।तत्रसएवायंविकृतश्चेत्येतन्नि
त्येषुशब्देषुनोपपद्यतेतस्मादुपसंख्यानंकर्तव्यम्।भारद्वाजीयाःपठन्ति।एकदेशविकृतेषूपसंख्यानम्।
एकदेशविकृतेषूपसंख्यानंकर्तव्यम्।किंप्रयोजनम्।पचतुपचन्तु।तिङ्ग्रहणेनग्रहणंयथास्यात्।किं
चकारणंनस्यात्।अनादेशत्वादादेशःस्थानिवदित्युच्यते।

र्हिश्वत्वेनव्यवहारः। अनित्यविज्ञानमिति।अवस्थितेतकारेइकारस्यउकारइत्यनित्यत्वंशुनइवप्राप्नोतीतिभावः।उपसं-
ख्यानेतुक्रियमाणेनास्त्यनित्यत्वम्।एरुरितिस्थान्यादेशभावातिशब्दतुशब्दयोरनुमीयमानत्वात्तेःप्रसङ्गेतोर्विधानात्।तत्रादे राम:
शग्रहणादुपसंख्यानाद्वाआनुमानिकस्याप्यादेशस्यस्थानिवद्भावःसिद्धः। ॥ १३५

नचेमेइति। तुशब्दादयः एह इत्यत्र साक्षात्समुदायानुपादानात्। रूपान्यत्वाच्चेति। यद्यप्यवयवादेशो रूपं न भिन्द्यात्तस्या
देव प्रत्यभिज्ञानात्तिङ्त्वम्। यतस्तु भेदको रूपस्य ततस्मान्नास्ति तिङ्त्वमिति भावः। योत्रादेश इति। इकारस्य उकारेणासा-
वाश्रीयते पदसंज्ञायाम्। सा हि तिशब्दनिबन्धना नावयवनिबन्धना। यश्चेति। तुशब्दः साक्षादविधानान्नादेशः पदसंज्ञा
निमित्तभावेन चाश्रीयत इत्यर्थः। तत्रोत्तरमाह। नैतदिति। तिप्तस्झि इति तिसन्निवेशे इकारतकारावपि सन्निविष्टावि

नचेमे आदेशाः। रूपान्यत्वाच्च। अन्यत्वत्वपि रूपं पद्यतीति अन्यत्यचलितिति। इमेप्यादेशाः। कथम्। आदि
श्यते यः स आदेशः। इमे चाप्यादिश्यन्ते। आदेशः स्थानिवदिति चेन्नानाश्रितत्वात्। आदेशः स्थानिवदिति चे
त्तन्न। किंकारणम्। अनाश्रितत्वात्। योत्रादेशो नासावाश्रीयते यश्चाश्रीयते नासावादेशः। नैतन्मन्तव्यं स
मुदाये आश्रीयमाणेऽवयवो नाश्रीयत इति। अभ्यन्तरो हि समुदायस्यावयवः। तद्यथा। वृक्षः प्रचलन्सहा
वयवैः प्रचलति। आश्रय इति चेदल्विधिप्रसङ्गः। आश्रय इति चेदल्विधिरयं भवति। तत्रानल्विधाविति प्र
तिषेधः प्राप्नोति। नैष दोषः। नैवं सति कश्चिदनल्विधिः स्यादुच्यते चेदमनल्विधाविति। तत्र प्रकर्षगतिर्विज्ञा
स्यते साधीयो योऽल्विधिरिति कश्च साधीयः। यत्र प्राधान्येनाल् आश्रीयते। यत्र नान्तरीयकोऽल् आश्रीयते नासावल्
विधिरिति। अथ चोक्तमादेशग्रहणस्य प्रयोजनम् आदेशमात्रं स्थानिवद्यथा स्यादिति। अनुपपन्नं
स्थान्यादेशत्वं नित्यत्वात्। स्थानी आदेश इत्येतन्नित्येषु शब्देषु नोपपद्यते। किंकारणम्। नित्यत्वात्। स्था
नी हि नाम भूत्वा यो न भवति। आदेशो हि नाम यो अभूत्वा भवति। एतच्च नित्येषु शब्देषु नोपपद्यते। यत्सतो
नाम विनाशः स्यादसतो वा प्रादुर्भाव इति।

तीकारस्य तिङ्त्वात्तदादेशस्याप्युकारस्य तिङ्त्वमिति सिद्धा पदसंज्ञा। अल्विधिप्रसङ्ग इति। इकारस्य पदसंज्ञानिमित्तत्वा
दल्विधिः पदसंज्ञा स्यादित्यर्थः। यत्र प्राधान्येनेति। यत्र साक्षादल् निर्दिष्टः तत्र प्रतिषेधो नानुमीयमाने संभवमात्रेणेत्य
र्थः। प्राधान्यग्रहणं प्रत्यक्षोपलक्षणम्। आदेशमात्रमिति। आनुमानिकमपीत्यर्थः। अनुपपन्नमिति। एकदेशविकारे
पि यत्र नित्यत्वहानिस्तत्र सर्वविकारे कुतो नित्यत्वम्। यत्रान्वयोपि कस्यचिन्नास्तीत्यर्थः। ॥

CC-0. In Public Domain. Digitization by eGangotri

सोमस्येति। सोमस्तृणविशेषः। तदसन्निधौ पूतीकतृणानि प्रतिनिधीयन्ते। कार्याबुद्धिरिति। अन्यस्यात्र विपरिणामासंभवात्सा
मर्थ्यात्कार्यत्वेन बुद्धिर्गृह्यते न तु कार्यशब्दो बुद्धिपर्यायः। सन्तीति। ङ्यापोरित्यत्र बहुलग्रहणात्। भूतपूर्वे चापीति। न च
नित्यत्वविरोधः। बुद्धिधर्माः केवलमर्थेषु प्रतिपत्तृवशादारोप्यन्ते न तु तद्वशादर्थानां तथावस्थानम्। प्राचीनमिति। प्राचि दे

सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वेऽपि स्थानशब्दप्रयोगात्। सिद्धमेतत्। कथम्। यथा लौकिकवैदिके
षु कृतान्तेषु अभूतपूर्वेऽपि स्थानशब्दः प्रयोगो वर्तते। लोके तावदुपाध्यायस्य स्थाने शिष्य इत्युच्यते न च तत्र उ
पाध्यायो भूतपूर्वो भवति। वेदेऽपि सोमस्य स्थाने पूतीकतृणान्यभिषुणुयादित्युच्यते। न च तत्र सोमो भूतपू
र्वो भवति। कार्यविपरिणामाद्वा सिद्धम्। अथवा कार्यविपरिणामात्सिद्धमेतत्। किमिदं कार्यविपरिणामा
दिति। कार्या बुद्धिः सा विपरिणम्यते। ननु च कार्याविपरिणामादिति भवितव्यम्। सन्ति चैवौत्तरपदिकानि
ह्रस्वत्वानि। अपि च बुद्धिः संप्रत्यय इत्यनर्थान्तरम्। कार्या बुद्धिः कार्यः संप्रत्ययः कार्यस्य संप्रत्ययस्य वि
परिणामः कार्यविपरिणामः कार्यविपरिणामादिति। परिहारान्तरमेवेदं मत्वा पठितं कथं चेदं परिहारान्त
रं स्यात्। यदि भूतपूर्वे स्थानशब्दो वर्तते॥ भूतपूर्वे चापि स्थानशब्दो वर्तते। कथम्। बुद्ध्या। तद्यथा। कश्चित्कं
चिदुपदिशति। प्राचीनं ग्रामादाम्रा इति। तस्य सर्वत्राम्रबुद्धिः प्रसक्ता। ततः पश्चादाह। ये क्षीरिणोऽवरोहवन्तः
पृथुपर्णास्ते न्यग्रोधा इति। स तत्राम्रबुद्ध्या न्यग्रोधबुद्धिं प्रतिपद्यते। स ततः पश्यति बुद्ध्या आम्रांश्चापकृ
ष्यमाणान्न्यग्रोधांश्चाधीयमानान्। नित्या एव च स्वस्मिन्विषये आम्राः नित्याश्च न्यग्रोधाः। बुद्धिस्त्वस्य विपरि
णम्यते। एवमिहाप्यस्तिरस्मा अविशेषेणोपदिष्टस्तस्य सर्वत्रास्तिबुद्धिः प्रसक्ता। सोऽस्तेर्भूरित्यनेनास्तिबुद्ध्या
भवतिबुद्धिं प्रतिपद्यते। स ततः पश्यति बुद्ध्या अस्तिं चापकृष्यमाणं भवतिं चोपादीयमानं नित्य एव च स्वस्मिन्विषयेऽ
स्तिर्नित्यो भवतिश्च। बुद्धिस्त्वस्य विपरिणम्यते। अपवादप्रसङ्गस्तु स्थानिवत्त्वात्। अपवादे उत्सर्गकृतं च प्राप्नोति।

शे प्राक्। ततो विभाषाश्वेरदिक्स्त्रियामिति स्वार्थे खः। तत्र सप्तम्यर्थस्याभिहितत्वादन्तर्भूतत्वाच्च प्रथमैव कृता। आम्रबुद्ध्या इति।
अस्या अनन्तरमित्यर्थः। अपवादप्रसङ्गस्त्विति। बुद्धिविपरिणाममात्रं यदि स्यान्न्यादेशभाव इति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मण्यणिति। सर्वत्रैव बुद्धिः प्रसक्ता आतोऽनुपसर्गे क इति कबुद्ध्या निवर्त्यते इति केऽप्यणः कृतप्रसङ्गः। विषयेणात्विति। तुशब्दः पुनरर्थे यदयं गापोष्टगिति कापवादस्य टकः कित्त्वं शास्ति तज्ज्ञापयति नोत्सर्गकृतमपवादे भवतीति। षष्ठीनिर्दिष्टस्येति। न चाऽपवादः षष्ठीनिर्दिष्टस्य स्थाने विधीयते नाभिनमं चेत्यादौ षष्ठ्याः स्थाने प्रथमाया विधानादस्ति षष्ठी। विश्रवणरवणेति तु शब्दान्तरं प्रत्ययविषयं विज्ञेयम्। यथोक्तं वालवायो विदूरं च प्रकृत्यन्तरमेव वेति। विश्रवः शब्दात्त्वनभिधानात् प्रत्ययाभावः। यदयमिति। न च पित्त्वनिवृत्त्यर्थं नियमार्थं शित्त्वम्। श्यनो नित्त्वाद् ज्ञापकात् पित्त्वनिवृत्तेः सिद्धत्वात्। न ह्यत्र पित्त्वस्य नित्त्वस्य वा वि-

कर्मण्यण् आतोऽनुपसर्गे कः इति केऽपि अणि कृतं प्राप्नोति। किं कारणम्। स्थानिवत्त्वात्। उक्तं वा। किमुक्तम्। विषयेणातु नानालिङ्गकरणात् सिद्धमिति। अथवा सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात्। सिद्धमेतत्। कथम्। षष्ठीनिर्दिष्टस्यादेशः स्थानिवदिति वक्तव्यम्। तत्तर्हि षष्ठीनिर्दिष्टग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। षष्ठी स्थानेयोगेति। अथवा आचार्यप्रवृत्तिर्ज्ञापयति नाऽपवादे उत्सर्गकृतं भवतीति। यदयं श्यन्नादीन् कांश्चिच्छितः करोति श्यन् श्नम् श्ना शः श्नुरिति। तस्य दोषस्तयादेशादुभयप्रतिषेधः। तस्यैतस्य लक्षणस्य दोषः। तयादेशादुभयप्रतिषेधो वक्तव्यः। उभये देवमनुष्याः। तयपो ग्रहणेन ग्रहणाज्जसि विभाषा प्राप्नोति। नैष दोषः। अयच् प्रत्ययान्तरम्। यदि प्रत्ययान्तरम् उभयीति ईकारो न प्राप्नोति। माभूदेवम्। मात्रच इत्येवं भविष्यति। कथम्। मात्रजिति नेदं प्रत्ययग्रहणम्। किं तर्हि। प्रत्याहारग्रहणम्। क्व सन्निविष्टानां प्रत्याहारः। मात्रशब्दात् प्रभृति आ अयचश्चकारात्। यदि प्रत्याहारग्रहणं कतितिष्ठन्ति। अत्रापि प्राप्नोति। अत इति वर्तते। एवमपि तैलमात्रा घृतमात्रा अत्राऽपि प्राप्नोति।

शेषोऽस्तीति केचिदाहुः। तदयुक्तम्। ताच्छील्यादौ विषये चानशि श्यनो नित्त्वं प्रकृतेराद्युदात्तार्थं स्यात्। तस्मादिष्टसिद्धये सामान्येन ज्ञापकं शित्त्वमाश्रीयते अपवादे उत्सर्गकृतं न भवतीति। कतितिष्ठन्तीति। परिहारान्तरसद्भावान्न षट्सङ्ख्यादिभ्य इति प्रतिषेधोऽत्र नोक्तः। तैलमात्रेति। चकारस्य प्रत्याहारार्थस्योपादानात्तस्याऽविशेषकत्वाद् मात्रशब्दमात्रग्रहणप्रसङ्गः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सद्भावस्येति। प्रत्ययानुकरणमात्रमाब्द इति प्रातिपदिकस्याऽग्रहणमित्यर्थः। जात्याख्यायामिति। एकस्मिन् यत्प्राप्तमेक वचनं तस्य प्रसङ्गे बहुवचनमादेशाद्इति कल्पनाऽऽश्रयेणादोषोपन्यासः। भूतपूर्वद्इति। अनुबन्धकार्ये सर्वत्र भूतपूर्वग

सद्भावस्याप्यसंनिविष्टस्य न भवति प्रत्याहारग्रहणेन ग्रहणम्॥ जात्याख्यायां बहुवचनातिदेशे स्थानि वद्भावप्रतिषेधः॥ जात्याख्यायां बहुवचनातिदेशे स्थानिवद्भावस्य प्रतिषेधो वक्तव्यः। व्रीहिभ्य आगत इत्यत्र घेर्ङितीति गुणः प्राप्नोति। नैष दोषः। उक्तमेतत्। अर्थातिदेशात्सिद्धमिति। ङ्याब्ग्रहणेऽदीर्घः॥ ङ्याब्ग्रहणेऽदीर्घ आदेशो न स्थानिवदिति वक्तव्यम्। किं प्रयोजनम्। निष्कौशाम्बिः। अतिखट्वः। ङ्या ब्ग्रहणेन ग्रहणात्सुलोपो मा भूदिति। ननु च दीर्घादित्युच्यते। तन्न वक्तव्यं भवति। किं पुनरत्र ज्यायः। स्थानिवद्भावप्रतिषेध एव ज्यायान्। इदमपि सिद्धं भवति। अतिखट्वाय अतिमालाय। याडापइति याड् न भवति। अथेदानीमसत्यपि स्थानिवद्भावे दीर्घत्वे कृतेऽपि च्चासौ भूतपूर्व इति कृत्वा याट् कस्मान्न भवति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। ननु चेदानीं सत्यपि स्थानिवद्भावे एतया परिभाषया शक्यमिहोपस्थातुम्। नेत्याह। न तर्हीदानीं क्वचिदपि स्थानिवद्भावः स्यात्। तत्तर्हि वक्त व्यम्। न वक्तव्यम्। प्रश्लिष्टनिर्देशात्सिद्धम्। प्रश्लिष्टनिर्देशोऽयम्। ङी ई ई कारान्तात्। आ आप् आकारान्तादिति॥ आहिभुवोरीट्प्रतिषेधः॥ आहिभुवोरीट्प्रतिषेधो वक्तव्यः। आत्थ अभूत्। अस्तिब्रू ग्रहणेन ग्रहणादीट् प्राप्नोति। आहेस्तावन्न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति। नाऽऽहेरीड् भवती ति। यदयमाहस्थ इति झलादिप्रकरणे थत्वं शास्ति। नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेत स्य वचने प्रयोजनम्। किम्। भूतपूर्वगतिर्यथा विज्ञायेत। झलादिर्यो भूतपूर्व इति। यद्येवं थवच नमनर्थकं स्यात्॥

त्याश्रयणादाद्इति च रूपसद्भावात्। लक्षणेति। अत्र चान्तरङ्गत्वे कृते समएवायमिति बुद्धेर्विच्छेदः। झलादिरिति। णलादिषु थत्वे भूतपूर्वो झलादिरिति भावः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

आथिमिति।तिबाद्यो हि सर्वेज्ञत्वाद्यदृतिणत्वाद्योभूतपूर्वोज्ञत्वाद्यदृतिभावः।आवधिषीष्टेति।यदा यच्छब्दप्रयोगः
यदावधिषीष्टेति तदा तिङ्ङतिङ इति निघातः प्राप्तो निपातैर्यद्यदीति प्रतिषिद्धत्वादेतदुदाहरणम्।क्वाचन्तु यदा वधिषीष्टेति पाठः॥

आथिमेवायमुच्चारयेत्।ब्रुवः पञ्चानामादित आथो ब्रुवइति।भवतेश्चापि न वक्तव्यः।अस्तिसिचोऽपृ
क्त इति द्विसकारको निर्देशः।अस्तेः सकारान्तादिति॥वध्यादेशे वृद्धितत्वप्रतिषेधः॥वध्यादेशे वृद्धित
त्वयोः प्रतिषेधो वक्तव्यः।वधकं पुष्करमिति।स्थानिवद्भावाद्वृद्धितत्वे प्राप्नुतः।नैष दोषः।उक्तमेतत्।
नाऽयं ण्वुल्।अन्योऽयमकशब्दः किदौणादिको रुचकइति यथेति।इड्विधिश्च।इड्विधेयः।आवधि
षीष्ट।एकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः प्राप्नोति।नैष दोषः।आद्युदात्तनिपातनं करिष्यते।स-
निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति।एवमप्युपदेशिवद्भावो वक्तव्यः।यथैव हि निपातन
स्वरः प्रकृतिस्वरं बाधत एवं प्रत्ययस्वरमपि बाधेत।आवधिषीष्टेति।नैष दोषः।आर्धधातुकीयाः सामान्येन
भवन्ति अनवस्थितेषु प्रत्ययेषु।तत्रार्धधातुकसामान्ये वधिभावे कृते सति शिष्टत्वात्प्रत्ययस्वरो भविष्यति
।आकारान्तानुक्पुक्प्रतिषेधः।आकारान्तानुक्पुकोः प्रतिषेधो वक्तव्यः।विलापयति।भापयते।लीभी
ग्रहणेन ग्रहणान्नुक्पुकौ प्राप्नुतः।लीभियोः प्रश्लिष्टनिर्देशात्सिद्धम्।लीभियोः प्रश्लिष्टनिर्देशोऽयम्।
ली ईईकारान्तस्येति।भी ईईकारान्तस्येति॥लोडादेशे णाभावजभावधित्वहिलोपैत्वप्रतिषेधः॥एषां लो
डादेशे प्रतिषेधो वक्तव्यः।शिष्टात्।हतात्।भिन्तात्।कुरुतात्।स्तात्।लोडादेशे कृते णाभावो जभावो धि
त्वं हिलोप एत्वमित्येते विधयः प्राप्नुवन्ति।नैष दोषः।इदमिह संप्रधार्यम्।लोडादेशः क्रियतामेते वि
धय इति।किमत्र कर्तव्यम्।परत्वाल्लोडादेशः।अथेदानीं लोडादेशे कृते पुनः प्रसङ्गविज्ञानात्क
स्मादेते विधयो न भवन्ति।सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति कृत्वा॥त्रयादेशे स्रन्तप्रतिषेधः॥
।त्रयादेशे स्रन्तस्य प्रतिषेधो वक्तव्यः।तिसृभावे कृते त्रेस्त्रय इति त्रयादेशः प्राप्नोति।नैष दोषः।इदमिह
संप्रधार्यं तिसृभावः क्रियतामाहोस्वित्त्रेस्त्रय इति।किमत्र कर्तव्यम्।परत्वात्तिसृभावः।अथेदानीं तिसृभा
वे कृते पुनः प्रसङ्गविज्ञानात्त्रयादेशः कस्मान्न भवति।सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उकारान्तप्रभृतीति। तनादिकृञ्भ्यउरित्यत्रतत्रचवस्वरन्तर्भूतः। यदीति। श्नाप्रत्ययस्यप्रत्याहारान्तर्भावात्। शतायइति। न
चात्रश्नाशतुःकृतइत्यनुमेवशता। मुञ्चतेति। शत्रन्तस्यसनुम्कत्वादितिभावः। तस्मादागमग्रहणेऽपिशतैवविशेषणी-

आम्विधौच। आम्विधौस्त्र्यन्तस्यप्रतिषेधोवक्तव्यः। चतस्रस्तिष्ठन्ति। चतसृभावेकृतेचतुरनडुहोरामुदात्तइत्या
म्प्राप्नोति। नैषदोषः। इदमिहसंप्रधार्यंचतसृभावःक्रियताम् आहोस्विच्चतुरनडुहोरामुदात्तइत्यामिति
। किमत्रकर्तव्यम्। परत्वाच्चतसृभावः। अथेदानींचतसृभावेकृतेपुनःप्रसङ्गविज्ञानादाम् कस्मान्नभ
वति। सकृद्गतौविप्रतिषेधेयद्बाधितंतद्बाधितमेवेति॥ स्वरेवसादेशेप्रतिषेधः॥ स्वरेवसादेशेप्रतिषेधोव
क्तव्यः। विदुषःपश्य। शतुरनुमोनद्यजादीअन्तोदात्तादित्येषस्वरःप्राप्नोति। नैषदोषः। अनुमइतिप्रतिषेधो
भविष्यति। अनुमइत्युच्यतेनचाऽत्रानुमंपश्यामः। अनुमइतिनेदमागमग्रहणम्। किंतर्हि। प्रत्याहारग्र
हणम्। क्वसन्निविष्टानांप्रत्याहारः। उकारात्प्रभृत्यानुमोमकारात्। यदिप्रत्याहारग्रहणंलुनतापुनताअ
त्रापिप्राप्नोति। नानुम्ग्रहणेनशत्रन्तंविशेष्यते। किंतर्हि। शतैवविशेष्यतेशतायोऽनुम्कइति। अवश्यं
चैतदेवंविज्ञेयम्। आगमग्रहणेहिसतीहप्रसज्येत। मुञ्चतामुञ्चतइति॥ गोःपूर्वणित्वात्वस्वरेषु॥ गोः
पूर्वणित्वात्वस्वरेषुप्रतिषेधोवक्तव्यः। चित्रग्वग्रंशबलग्वग्रम्। सर्वत्रविभाषागोरितिविभाषापूर्वत्वं
प्राप्नोति। नैषदोषः। एङइतिवर्ततेतत्राऽनल्विधावितिप्रतिषेधोभविष्यति। एवमपीहचित्रगोअग्रम्
इत्यत्रप्राप्नोति। णित्वम्। चित्रगुः। चित्रगू। चित्रगवः। गोतोणिदितिणित्वंप्राप्नोति। आत्वम्। चित्रगुंपश्य
शबलगुंपश्य। आओतइत्यात्वंप्राप्नोति। नैषदोषः। तपरकरणात्सिद्धम्। तपरकरणसामर्थ्यात् णित्वा-
त्वेनभविष्यतः॥

यइतिप्रत्याहारग्रहणेऽपिशतैवविशेष्यतइत्यदोषः। सर्वत्रेति। प्रकृतिभावोऽनेनविधीयतेनतुपूर्वत्वंतस्मादेङःपदान्ता रामः
दतीतिपूर्वत्वंप्राप्नोतीतिवाच्यम्। यदाऽत्रप्रकृतिभावस्तदाऽयंप्रसङ्गउक्तः। उत्तरंत्वल्विधित्वात्स्थानिवत्त्वाभावः॥ ॥ १३८

बहुषुपुस्तकेषूपलभ्यमानोऽपिआओतइत्यपाठः। अल्विधित्वेनैवस्थानिवद्भावाप्राप्तेः। किंत्वागोतइतिपाठइतियामेश्वरपण्डिताः।

CC-0. In Public Domain. Digitization by eGangotri

अचः परस्मिन्॥ अल्विध्यर्थमिदम्। तथाहि। वव्रश्चेति उरदत्वे कृते न संप्रसारणमिति वकारस्य संप्रसारणनिषेधः स्यान्यलाश्रयः। ए
वमचितीकः। सुचितीकः। बहुचितीक इति चितेः कपीति दीर्घे कृते ह्रस्वान्तेऽन्त्यात्पूर्वमिति स्यान्यलाश्रयः स्वरोऽस्माद्वचनाद्भवति।
वार्त्तानि प्रत्युदाहरणानि कानिचिच्छक्यप्रतिविधानानीति प्रश्नः अच इति किमिति। अन्तरङ्गत्वादिति। अत एव युगपत्प्रा-
प्त्यभावाद्वर्णादाङ्गं बलीय इत्येतदत्र नास्ति। यत्र हि युगपदाङ्गवार्णयोः प्राप्तिर्यथा कारकमिति वृद्धियणादेशयोः यथा चकि
रतः किरन्तीति यणित्वयोस्तत्रैतदुपतिष्ठते। तत्रायं यत्नः। च्छ्वोः शूडिति तकारछकारयोः समुदायनिर्देशात्तुक्छकारः स्था
नी समुदायनिर्देशसामर्थ्याच्चालोऽन्त्यस्येत्यस्याऽनुपस्थानमनर्थकत्वात्। एवं च नङोडित्करणं विश्न इत्यत्र गुणनिषे-

स्वरः। बहुगुमान्। न गोश्वन्साववर्णे ति प्रतिषेधः प्राप्नोति॥ करोतिपिबत्योः प्रतिषेधः॥ करोतिपिबत्योः प्रति
षेधो वक्तव्यः। कुरु पिबेति। स्थानिवद्भावाद्धि लघूपधगुणः प्राप्नोति। उक्तं वा। किमुक्तम्। करोतौ तपरकरणनि
र्देशात्सिद्धं पिबिरदन्त इति॥ अचः परस्मिन्पूर्वविधौ। अच इति किमर्थम्। प्रश्नो विश्नः। द्यूत्वा। स्यूत्वा। आ
क्राष्टाम्। आगत्य। प्रश्नो विश्न इत्यत्र छकारस्य शकारः परनिमित्तकस्तस्य स्थानिवद्भावाच्छे चेति तुक्
प्राप्नोति। अच इति वचनान्न भवति। नैतदस्ति प्रयोजनम्। क्रियमाणेऽपि अज्ग्रहणे अवश्यमत्र तुगभा
वे यत्नः कर्तव्यः। अन्तरङ्गत्वाद्धि तुक् प्राप्नोति। इदं तर्हि प्रयोजनम्। द्यूत्वा स्यूत्वा। वकारस्य ऊठ् परनिमित्त
कः। तस्य स्थानिवद्भावादचीति यणादेशो न प्राप्नोति। अच इति वचनाद्भवति। नैतदप्यस्ति प्रयोजनम्। स्वा
श्रयमत्राऽचूत्वं भविष्यति। अथवा योऽत्रादेशो नाऽसावाश्रीयते यश्चाऽऽश्रीयते नाऽसावादेशः।

धार्थमर्थवद्भवति। स्वाश्रयमिति। न ह्यतिदेशेन स्वाश्रया धर्मा निवर्त्यन्ते। यथा ब्राह्मणवदस्मिन्क्षत्रिये वर्तितव्यमिति क्ष
त्रियस्य क्षत्रियधर्माः। वाय्वोरित्यादौ तु सत्यपि स्वाश्रये वलत्वे बहिरङ्गत्वाद्यणोऽसिद्धत्वाद्वलि लोपाभावः। द्यूत्वेत्यत्र तु ना
ऽजानन्तर्य इति असिद्धत्वनिषेधाद्यण् प्रवर्तते। ऊठः स्थानिवत्त्वाद्वलोपः कथं नाशङ्कितः इति चेत्। योऽनादिष्टादच इत्ये
व मर्यादाऽनुग्रहणस्य स्थापयिष्यमाणत्वात्। योऽत्रादेश इति। समुदायरूप ऊठ्। यश्चाश्रीयत इति। यणि विधावच्। नासा
वादेश इति। समुदायस्यादेशत्वात्। न चाऽऽदेशस्याऽवयव आदेशो गृह्यते। मुख्यसंभवे गौणग्रहणस्याऽयुक्तत्वात्। ख्या
ञादीनां तर्हि अनुबन्धवियुक्तानां धातुसंज्ञा आदेशावयवत्वान्न प्राप्नोति। घस्लादेशस्य लृदित्वादङ्थोज्ज्ञापकाद्धातुकार्या
णि भविष्यन्तीत्यदोषः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युवजानिरिति। अव्युत्पन्नत्वादुणादीनां जाया इत्यस्याऽऽकारलोपो न भवति। अन्यथाऽऽकारस्य निङि कृते यलोपे च निङः स्थानिवद्भावात्प्रत्ययत्वादाकारलोपः स्यात्। न चाऽसिद्धवदत्राभादित्याकारलोपे कर्तव्येऽसिद्धत्वमात्वस्याव्याश्रयत्वात्। पुनरि

इदं तर्हि प्रयोजनम्। आक्राष्टाम्। क्षिचोर्लोपः परनिमित्तकस्तस्य स्थानिवद्भावात् षढोः कस्सीति कत्वं प्राप्नोति। अचइति वचनान्न भवति। एतदपि नास्ति प्रयोजनम्। वक्ष्यत्येतत् पूर्वत्रासिद्धे न स्थानिवदिति। इदं तर्हि प्रयोजनम्। आगत्य। अभिगत्य। अनुनासिकलोपः परनिमित्तकस्तस्य स्थानिवद्भावाद्ध्रस्वस्येति तुङ् न प्राप्नोति। अचइति वचनाद्भवति। अथ परस्मिन्निति किमर्थम्। युवजानिः। वधूजानिः। द्विपदिका। वैयाघ्रपद्यः। आदीध्ये। युवजानिः वधूजानिरिति जायाया निङ् अपरनिमित्तकः। तस्य स्थानिवद्भावाद्वलीति यलोपो न प्राप्नोति। परस्मिन्निति वचनाद्भवति। नैतदस्ति प्रयोजनम्। स्वाश्रयमत्र वलत्वं भविष्यति। अथवा योऽत्राऽऽदेशो नाऽसावाश्रीयते यश्चाऽऽश्रीयते नाऽसावादेशः। इदं तर्हि प्रयोजनम्। द्विपदिका। त्रिपदिका। पादस्य लोपोऽपरनिमित्तकस्तस्य स्थानिवद्भावात्पद्भावो न प्राप्नोति। परस्मिन्निति वचनाद्भवति। एतदपि नाऽस्ति प्रयोजनम्। पुनर्लोपवचनसामर्थ्यात् स्थानिवद्भावो न भविष्यति। इदं तर्हि प्रयोजनम्। वैयाघ्रपद्यः। ननु चात्राऽपि पुनर्वचनसामर्थ्यादेव न भविष्यति। अस्ति ह्यन्यत्पुनर्लोपवचने प्रयोजनम्। किम्। यत्र भसंज्ञा न व्याघ्रपात् श्येनपादिति।

ति। यस्येति लोपे सिद्धे पादः पत् तस्येत्यत्र पुनर्लोपवचनं स्थानिवत्त्वनिषेधार्थम्। पुनर्लोपवचने सति लुप्यत एवाकारः कार्येणाऽऽश्रीयत इत्यर्थः। ननु चाऽत्रापीति। यस्येति लोपे सिद्धे पादस्य लोप इति पुनर्लोपवचनादित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदीध्यइति। इट एत्वे कृते लोपः प्राप्नोति विकरणश्च तत्र नित्यत्वाद्विकरणस्य लुक्कृतस्य स्थानिवद्भावेन एरनेकाचइति यण्न प्रवर्तते। क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेष्विति स्थानिवत्त्वनिषेधात्। यदयमिति। अग्नेवायोइति स्थानिवत्त्वात्ह्रस्वादित्येव लोपः सिद्धः। खट्वे मालेइत्यादौ हल्ङ्याब्भ्यइति। नयत्यादीनां विजन्तानां विविगुणेनेलोइति कयं संबुद्धिलोपइति चेन्नैतेभ्यो विच् दृश्यते।। बाभ्रवीयाइति। सन्निपातपरिभाषाया अनित्यत्वाद्यशब्दसन्निपातनिमित्तो

इदं चाऽप्युदाहरणम्। आदीध्ये आवेव्ये। इकारस्यैकारेण परनिमित्तकः। तस्य स्थानिवद्भावाद् यीवर्णयोर्दीधीवेव्योरिति लोपः प्राप्नोति। परस्मिन्निति वचनान्न भवति। अथ पूर्वविधाविति किमर्थम्। हे गौः। बाभ्रवीयाः। नैधेयः। हे गौरित्यौकारः परनिमित्तकस्तस्य स्थानिवद्भावादेङ्ह्रस्वात्संबुद्धेरिति लोपः प्राप्नोति। पूर्वविधाविति वचनान्न भवति। नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति न संबुद्धिलोपे स्थानिवद्भावो भवतीति। यदयमेङ्ह्रस्वात्संबुद्धेरित्येङ्ग्रहणं करोति। नैतदस्ति ज्ञापकम्। गोऽर्थमेतत्स्यात्। यत्तर्हि प्रत्याहारग्रहणं करोति इतरथा ह्योह्रस्वादित्येव ब्रूयात्। इदं तर्हि प्रयोजनम्। बाभ्रवीयाः। माधवीयाः। वान्तादेशः परनिमित्तकस्तस्य स्थानिवद्भावाद्धलस्तद्धितस्येति यलोपो न प्राप्नोति पूर्वविधाविति वचनाद्भवति। एतदपि नास्ति प्रयोजनम्। स्वाश्रयमत्र हल्त्वं भविष्यति। अथवा योऽत्रादेशो नासावाश्रीयते यश्चाऽऽश्रीयते नाऽसावादेशः। इदं तर्हि प्रयोजनम्। नैधेयः। आकारलोपः परनिमित्तकस्तस्य स्थानिवद्भावाद्द्व्यज्लक्षणो ढग्न प्राप्नोति पूर्वविधाविति वचनाद्भवति।

वान्तादेशो यलोपनिमित्ततां प्रतिपद्यते। योऽत्रादेशइति। वान्तः समुदायः। यश्चेति। लोपं प्रति निमित्तत्वेन वकारः। नैधेयइति। स्थानिवद्भावाद् अच्त्वव्यपदेशे सति विरोधात्स्वाश्रयं ह्यच्त्वं न लभ्यते। यदविरुद्धं स्वाश्रयं तदतिदेशेन न बाध्यते विरुद्धं तु बाध्यत एव। असंख्याकृतस्तु व्यपदेशः परस्परपरिहारेण लोके स्थितः। न हि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ अथेति। अचः परस्मिन्पूर्वस्येत्येवं षष्ठ्या विज्ञानार्थ आक्षितः पूर्वस्य कार्ये कर्तव्य इति कार्ये च विधिरिति प्रश्नः। बेभिदितेति। बेभि ११८
१५० द्यशब्दात्तच्। नित्यत्वादल्लोपयलोपौ। तत एकाच इतीट्प्रतिषेधः प्राप्नोति। उपदेशग्रहणं द्वयोरपि विशेषणम्। उपदेशे एकाच उपदेशेऽनुदात्तादिति। द्विः प्रयोगश्च द्विर्वचनम्। अल्लोपस्य तु स्थानिवत्त्वे व्यवधानादिट्प्रतिषेधाभावः। माथितिक इति। यदाठस्येक इति संघातग्रहणं तदा स्थानिवद्भावादिकस्य कादेशः प्राप्नोति वर्णनिर्देशे त्वल्विधित्वात् कादेशप्रसङ्गः सन्निपातपरिभाषा चानाश्रित्यैतदुक्तम्। अपीपचन्निति। झेरितश्चेतीकारलोपे कृते एकदेशविकृतमनन्य

अथ विधिग्रहणं किमर्थम्। सर्वविभक्त्यन्तः समासो यथा विज्ञायेत। पूर्वस्य विधिः पूर्वविधिः पूर्वस्माद्विधिः पूर्वविधिरिति। कानि पुनः पूर्वस्माद्विधौ स्थानिवद्भावस्य प्रयोजनानि। बेभिदिता चेच्छिदिता। माथितिकः। अपीपचन्। बेभिदिता चेच्छिदितेति अकारलोपे कृते एकाज्लक्षण इट्प्रतिषेधः प्राप्नोति। स्थानिवद्भावान्न भवति। माथितिक इत्यकारलोपे कृते तान्तात्क इति कादेशः प्राप्नोति। स्थानिवद्भावान्न भवति। अपीपचन्नित्येकादेशे कृते अभ्यस्ताज्झेर्जुस्भवतीति जुस्भावः प्राप्नोति स्थानिवद्भावान्न भवति। नैतानि सन्ति प्रयोजनानि। प्रातिपदिकनिर्देशोऽयं प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति न कांचित्प्राधान्येन विभक्तिमाश्रयन्ति। तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्या। इदं तर्हि प्रयोजनम्। विधिमात्रे स्थानिवद्भावो यथा स्यात्।

वद्भवतीति झिरेवायम्। तत्रान्तादेशे कृते चङ्कारस्य च पररूपे कृते तस्यादिवद्भावाज्जुस् प्राप्नोति। स्थानिवद्भावे तु णिलोपस्य पररूपस्य च व्यवधानान्न भवति। ननु पूर्वस्मादपि विधौ स्थानिवद्भावे कथं द्योरित्यादि सिध्यति। उच्यते। अचो यः पूर्वस्तस्य निमित्तत्वेनाश्रितादित्याश्रयणात्। तथाहि। गोशब्दे ओकारात्पूर्वो गकारो न च तस्माद्विधिरस्ति। विधिमात्र- एमः
इति। अचः परस्मिन्पूर्वस्येत्यनेन स्थानिवद्भावे विहिते पुनर्विधाविति वचनं नियमार्थं स्थानिवदेव यथा स्यादमा भूत्स्वाश्रयमित्यर्थः॥ ॥ १५०

CC-0. In Public Domain. Digitization by eGangotri

अनाश्रीयमाणायामिति। कार्येनिमित्तत्वेनेत्यर्थः। आयन्निति। अजादेरेवाङ्गविधानात्स्वविधिराट्। दध्यत्रेति। पूर्वत्राऽसिद्धेनस्थानिवदित्येतदत्रनास्ति। तस्यदोषः संयोगादिलोपलत्वणत्वेष्वित्यत्रसंयोगादिलोपस्यसंयोगोपलक्षितलोपोपलक्षणार्थत्वात्। पदान्तविधिंप्रतिनेत्ययमपिप्रतिषेधोऽत्रनास्ति। पदान्तेविधातव्येसप्रतिषेधोनचलोपोऽभावात्मकत्वात्पदान्तः। चक्रतुरिति। अत्रसाचूकस्यद्विर्वचनमितिस्वविधिर्भवति। ततश्चद्विर्वचनेऽचीत्येतन्नवक्तव्यंभवति। नन्व

अनाश्रीयमाणायामपिप्रकृतौवाय्वोरध्वर्य्योर्लोपोव्योर्वलीतियल्लोपोमाभूदिति। अस्तिप्रयोजनमेतत्। किंतर्हीति। अपरविधावितितुवक्तव्यम्। किंप्र‾योजनम्। स्वविधावपिस्थानिवद्भावोयथास्यात्। कानिपुनःस्वविधौस्थानिवद्भावस्यप्रयोजनानि। आयन्। आसन्। धिन्वन्ति। कृण्वन्ति। दध्यत्र। मध्वत्र। चक्रतुः। चक्रुः। इहतावदायन्नासन्निति। इणस्त्योर्यणल्लोपयोःकृतयोरनजादित्वादाडजादीनामितिआड्नप्राप्नोतिस्थानिवद्भावाद्भवति। धिन्वन्तिकृण्वन्ति। यणादेशेकृतेवलादिलक्षणइट्प्राप्नोति। स्थानिवद्भावान्नभवति। दध्यत्रमध्वत्र। यणादेशेकृतेसंयोगान्तस्यलोपःप्राप्नोतिस्थानिवद्भावान्नभवति॥ चक्रतुःचक्रुः। यणादेशेकृतेअनचूकत्वाद्द्विर्वचनंनप्राप्नोति। स्थानिवद्भावाद्भवति। यदितर्हिस्ववि-धावपिस्थानिवद्भावोभवतिद्वाभ्यांदेयंलवनम्। अत्रापिप्राप्नोति। द्वाभ्यामित्यत्रात्वस्यस्थानिवद्भावाद्दीर्घत्वंनप्राप्नोति। देयमितिईत्वस्यस्थानिवद्भावाद्गुणोनप्राप्नोति। लवनमित्यत्रगुणस्यस्थानिवद्भावादवादेशोनप्राप्नोति। नैषदोषः॥

परविधावित्युच्यमानेकथंबेभिदितेत्यादयःसंगृह्यन्ते। उच्यते। निमित्ताऽपेक्षापरत्वविज्ञानात्। तथाहिबेभिदितेत्यत्राऽकारलोपस्यनिमित्तमार्द्धधातुकंनचतस्मात्परस्यविधिः किंतर्हितस्यैवेतिसिद्धःस्थानिवद्भावः। एवंमाथितिकः। अपीपचन्नित्यत्रबोद्धव्यम्। द्वेगौरित्यत्रतुस्थानिवद्भावःप्राप्तएङितिप्रत्याहारग्रहणान्नभवति। बाभ्रवीयाइत्यत्रयोऽन्नादेशोनासावाश्रीयतइतिपरिहारः। नैधेयइत्यत्रतुनिमित्तात्परस्यढकोविधिरितिस्थानिवत्त्वाभावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 स्वाश्रयादिति। विधिग्रहणं स्वाश्रयनिवृत्त्यर्थं व्याख्यातमिति स्वाश्रयादित्यन्यथा व्याख्यायते शब्दानां स्वं लक्षणं तेन-
ज्ञापकाश्रयादित्यर्थः। द्वयोरेकस्य इतरच्चूदे यमणो किरतौ लवन इत्यादि ज्ञापकमादेशाश्रयकार्यभावस्य निमित्तमि-
ति। आयन्नित्यादिषु च निमित्तात् पूर्वस्य विधिरिति सिद्धः स्थानिवद्भावः। मूर्द्धाभिषिक्तमिति। सर्ववृत्तिषूदाहृतत्वात्।

स्वाश्रयाश्चैते विधयो भविष्यन्ति। तत्तर्हि वक्तव्यमपरविधाविति। न वक्तव्यम्। पूर्वविधावित्येव सिद्धम्। कथम्। न पूर्वग्रहणेनाऽऽदेशोऽभिसंबध्यते। अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति कुतः पूर्वस्मादेशादिति। किं तर्हि निमित्तमभिसंबध्यते। अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति कुतः पूर्वस्य निमित्तादिति। अथ निमित्तेऽभिसंबध्यमाने यत्तदस्य योगस्य मूर्द्धाभिषिक्तमुदाहरणं तदपि संगृहीतं भवति। किं पुनस्तत्। पद्व्या मृद्व्येति। बाढं संगृहीतम्। ननु चेकारयणा व्यवहितत्वान्नाऽसौ निमित्तात् पूर्वो भवति। व्यवहितेऽपि पूर्वशब्दो वर्तते। तद्यथा। पूर्वं मथुरायाः पाटलिपुत्रमिति। अथवा पुनरस्त्वादेश एवाभिसंबध्यते। कथं यानि स्वविधौ स्थानिवद्भावस्य प्रयोजनानि। नैतानि सन्ति। इह तावदायन्। आसन्। धिन्वन्ति कृण्वन्तीति। अयं विधिशब्दोऽस्त्येव कर्मसाधनो विधीयते विधिरिति। अस्ति भावसाधनः। विधानं विधिरिति। तत्र कर्मसाधनस्य विधिशब्दस्योपादानेन सर्वमिष्टं संगृहीतमिति कृत्वा भावसाधनस्य विधिशब्दस्योपादानं विज्ञास्यते। पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति पूर्वः स्यादिति स्थानिवद्भवतीति। एवमाट् भविष्यति। इह च न भविष्यति। दध्यत्र मध्वत्र चक्रतुश्चक्रुरिति परिहारं वक्ष्यति। कानि पुनरस्य योगस्य प्रयोजनानि।

पटु ई आ इति स्थिते परयणादेशेनाऽऽकारस्य व्यवधानात्प्रश्नः। नन्विति। व्यवहितेऽपीति। पूर्वशब्दस्य साक्षान्नि-
र्देशात्तस्मिन्निति निर्दिष्टेत्यस्यानुपस्थानादिति भावः॥ भावसाधनस्येति। भावसाधन एव विधिशब्दो व्यापकत्वा-
दाश्रीयते पूर्वस्येति च षष्ठीसंबन्धसामान्ये विज्ञायते। इट् चेति। विधिग्रहणं स्वाश्रयनिवारणार्थमितीड्भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तोष्यामीति। कथयिष्यामीत्यर्थः। पादिकमिति। पादोऽस्यास्तीति ठन्। दीव्यत्यादिषु वार्थेषु ठक्। चरत्यर्थे तु पादिकइत्येवम्भवति पर्पादित्वात्। पद्भावे इके चरतावुपसंख्यानमिति पद्भावः। उदकं वहतीत्यण्संज्ञायामुदभावः। अपरोइत्र। शिवोभूतिर्नाम शिष्यः। तस्याऽऽमन्त्रणम्। शातनपातनशब्दाभ्यां गौरादित्वाद्ङीष्। नेतारविति। शिष्ययोरामन्त्रणम्। नयेते गुरुमु-

स्तोष्याम्यहं पादिकमौदवाहिं ततः श्वोभूते शातनीपातनीचानेतारावाऽऽगच्छतं धारणिं रावणिं च ततः पश्चात्स्रंस्यते ध्वंस्यते चाद्गहतावत् पादिकमौदवाहिं शातनीपातनी धारणिं रावणिमिति। अकारलोपे कृते पद्भावङ्ठक् अल्लोपः टिलोप इत्येते विधयः प्राप्नुवन्ति। स्थानिवद्भावान्न भवन्ति। स्रंस्यते ध्वंस्यते। णिलोपे कृते अनिदितां हल उपधायाः क्ङितीति नलोपः प्राप्नोति। स्थानिवद्भावान्न भवतीति। नैतानि सन्ति प्रयोजनानि। असिद्धवदत्राभादित्यनेनाप्येतानि सिद्धानि। इदं तर्हि प्रयोजनम्। याज्यते वाप्यते। णिलोपे कृते यजादीनां कितीति संप्रसारणं प्राप्नोति स्थानिवद्भावान्न भवतीति। एतदपि नास्ति प्रयोजनम्। यजादिभिरत्र कितं विशेषयिष्यामः। यजादीनां यः किदिति। कश्च यजादीनां कित्। यजादिभ्यो यो विहित इति। न चाऽयं यजादिभ्यो विहित इति। इदं तर्हि प्रयोजनम्। पट्व्याम्मृद्व्येति। परस्य यणादेशे कृते पूर्वस्य न प्राप्नोति। ईकारयणा व्यवहितत्वात्। स्थानिवद्भावाद्भवति। किं पुनः कारणं परस्य तावद्भवति न पुनः पूर्वस्य। नित्यत्वात्। नित्यः परयणादेशः कृतेऽपि पूर्वयणादेशे प्राप्नोत्यकृतेऽपि प्राप्नोति। नित्यत्वात्परस्य यणादेशे कृते पूर्वस्य न प्राप्नोति। स्थानिवद्भावाद्भवति। एतदपि नाऽस्ति प्रयोजनम्। असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे इत्यसिद्धत्वाद्बहिरङ्गलक्षणस्य यणादेशस्यान्तरङ्गलक्षणः पूर्वयणादेशो भविष्यति। अवश्यं चैषा परिभाषा आश्रयितव्या स्वरार्थम्।

स्वात्शास्त्रार्थमिति नेतारौ। धारणरावणशब्दाभ्यामिञ्। असिद्धं बहिरङ्गेति। नित्यादप्यन्तरङ्गं बलीय इति न्यायात्प्रथमं पूर्वस्य यणिति भावः। अवश्यं चेति। स्थानिवद्भावाऽऽश्रयणेऽपीत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्र्येति। कर्तृ ई आ इति स्थिते यदि नित्यत्वात् पूर्वं परयणादेशः स्यात्तस्य स्थानिवद्भावात् पूर्वस्य यण्। ततउदात्तयणोऽनन्तर आकारेन भवतीत्युदात्तत्वं न स्यादु यदा त्वन्तरङ्गत्वात् पूर्वं पूर्वस्य यणादेशस्तदाऽङीप उदात्तयणादु इति उदात्तत्वं तस्याऽपि यणि कृते आकारस्योदात्तत्वमिति सिद्धमिष्टम्। अनेनापीति। सति स्थानिवत्त्वे पूर्वयणादेशस्यापि नित्यत्वादित्यर्थः इतर आह। परयणादेशोऽपीति। स एवाऽऽह। परश्चाऽसाविति। शब्दपरविप्रतिषेधात् स एव प्राप्नोति। एकमपि यण्लक्षणं पूर्वपरविषयभेदा-

कर्त्र्याहर्त्र्येति। उदात्तयणो हल्पूर्वादित्येष स्वरो यथा स्यात्। अनेनाऽपि सिद्धः स्वरः। कथम्। आरभ्यमाणे नित्योऽसौ। आरभ्यमाणे त्वस्मिन्योगे नित्यः पूर्वयणादेशः। कृतेऽपि परयणादेशे प्राप्नोत्यकृतेऽपि। परयणादेशोऽपि नित्यः। कृतेऽपि पूर्वयणादेशे प्राप्नोति अकृतेऽपि। परश्चाऽसौ व्यवस्थया। व्यवस्थया चाऽसौ परः। युगपत्संभवो नास्ति। न चास्ति योगपद्येन संभवः। कथं च सिध्यति। बहिरङ्गेण सिध्यति। असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे इत्यनेन सिध्यति। एवं तर्हि योऽत्रोदात्तयणस्तदाश्रयः स्वरो भविष्यति। ईकारयणा व्यवहितत्वान्न प्राप्नोति। स्वरविधौ व्यञ्जनमविद्यमानवद्भवतीति नाऽस्ति व्यवधानम्। सा तर्हि एषा परिभाषा कर्तव्या। ननु चेयमपि कर्तव्या असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे इति। बहुप्रयोजनैषा परिभाषा। अवश्यमेवैषा कर्त्तव्या। सा चाऽप्येषा लोकतः सिद्धा। कथम्। प्रत्यङ्गवर्त्ती लोको लक्ष्यते॥ तद्यथा पुरुषोऽयं प्रातरुत्थाय यान्यस्य प्रतिशरीरं कार्याणि तानि तावत्करोति ततः सुहृदां ततः संबन्धिनाम्।

क्रियते। एकस्य च कार्यित्वनिमित्तत्वयोर्विरोधात् परत्वेन व्यवस्था। प्रत्यङ्गवर्त्तीति। प्रत्यासन्नवाची प्रत्यङ्गशब्दः। अङ्गशब्देन प्रत्यासत्तिर्लक्ष्यते अङ्गानां प्रत्यासन्नत्वाद्। अङ्गमङ्गं प्रति प्रत्यङ्गमित्यव्ययीभावः॥ प्रतिशरीरमिति। शरीरस्य भोगायतनत्वात्। ततः सुहृदामिति। सौहार्दस्यासत्तिहेतुत्वात्। ततः संबन्धिनामिति। अवश्यकर्तव्यत्वात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामान्यभूत इति। नित्येऽपि शब्दार्थसंबन्धे अक्रमेऽप्यर्थप्रतिपादनेऽपायभावेनाऽसत्यमपि क्रमं प्रकृत्याद्यर्थे चाऽऽश्रित्योपेयव्यवस्थापनात्। तत्र नाऽगृहीतविशेषणा विशेष्ये बुद्धिरुत्पद्यत इत्यादौ सामान्यमभिधीयते ततस्तदनुरक्तद्रव्ये प्रतीतिः। लिङ्गसंख्याशक्तीनां चाश्रयो द्रव्यमिति तत्पूर्वमभिधातव्यम्। ततः संख्याऽपेक्षया लिङ्गं समा नमिति तदभिधीयते। द्व्यादिसंख्या हि वस्त्वन्तरापेक्षोपजायते। एकत्वसंख्याऽपि वस्त्वन्तरापेक्षद्वित्वादिव्यवच्छेदं करोतीति बहिरङ्गा। साऽपि सजातीयपदार्थापेक्षत्वादन्तरङ्गा कर्मादीनि तु विजातीयक्रियापेक्षणाद्बहिरङ्गाणीति न्यायप्राप्तक्रमः। बाह्येनेति। कर्मत्वादिना। तद्धि क्रियापेक्षणात् बाह्यम्। योऽनादिष्टादिति। अकृत एवाऽऽ

प्रातिपदिकं चाप्युपदिष्टं सामान्यभूतेऽर्थे वर्तते। सामान्ये वर्तमानस्य व्यक्तिरुपजायते व्यक्तस्य सतो लिङ्गसंख्याभ्यामन्वितस्य बाह्येनार्थेन योगो भवति। यथैव चाऽऽनुपूर्व्याऽर्थानां प्रादुर्भावस्तथैव शब्दानामपि तद्वत्कार्यैरपि भवितव्यम्। इमानि तर्हि प्रयोजनानि। पटयति लघयति अवधीत् बहुखट्वकः। पटयति लघयतीति णिचि टिलोपे कृते अत उपधाया इति वृद्धिः प्राप्नोति स्थानिवद्भावान्न भवति। अवधीदित्यकारलोपे कृते अतो हलादेर्लघोरिति विभाषा वृद्धिः प्राप्नोति। स्थानिवद्भावान्न भवति। बहुखट्वक इति आपोऽन्यतरस्यामिति ह्रस्वे कृते ह्रस्वान्तेऽन्त्यात्पूर्वमित्येष स्वरः प्राप्नोति स्थानिवद्भावान्न भवति। इह वैयाकरणः सौवश्व इति य्वोः स्थानिवद्भावादायावौ प्राप्नुतस्तयोः प्रतिषेधो वक्तव्यः ॥ अचः पूर्वविज्ञानादैचोः सिद्धम्॥ योऽनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः आदिष्टाच्चैषोऽचः पूर्वः। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। अच इति पञ्चमी। अचः पूर्वस्य। यद्येवमादेशोऽविशेषितो भवति। आदेशश्च विशेषितः। कथम्। न ब्रूमो यत् षष्ठीनिर्दिष्टमजग्रहणं तत्पञ्चमीनिर्दिष्टं कर्तव्यमिति। किं तर्हि। अन्यत्कर्तव्यम्। अन्यच्च न कर्तव्यम्। यदेवाऽदः षष्ठीनिर्दिष्टमजग्रहणं तस्य दिक्शब्दैर्योगे पञ्चमी भविष्यति। अजादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवद्भवति। कुतः पूर्वस्य अच इति। तद्यथा। आदेशः प्रथमानिर्दिष्टः। तस्य दिक्शब्दयोगे पञ्चमी भवति॥

देशे अचो यः पूर्व इत्यर्थः। अजपेक्षस्य पूर्वत्वस्येहाश्रयणात्। आदेशनमादिष्टं तद्यस्य नास्ति सोऽनादिष्टः। आदेश इति। ततश्च हलादेशोऽपि स्थानिवत्स्यात्। यदेवाद इति। शाब्दप्यादेवमुक्तं शब्दान्तरमेव तु पञ्चम्यन्तमपेक्षते। तद्यथेति। यथादेशापेक्षया पूर्वत्वे आश्रीयमाणे विभक्तिविपरिणामस्तथा स्थान्यपेक्षयाऽपीत्यर्थः। धिन्वन्तीत्यत्रोकारात्पूर्वं यदङ्गं तस्मान्निमित्तत्वेनाश्रिता द्विधिरिति सिद्धः स्थानिवद्भावः। वैयाकरणादिष्वत्र तु तन्न भवति। न हीकारात्पूर्वो यो वकारः स कश्चिन्निमित्तत्वेनाऽऽश्रितः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ तत्रेति। अतिदेशेन पराश्रयं कार्यं प्राप्यते न तु स्वाश्रयं निवर्त्यते। भाष्यकारेण तु विधिग्रहणात् स्वाश्रयकार्याभावः साधितः। उत्स ११८
१४३ र्गेति। उत्सर्गः स्थानी स ह्यादेशेनापवादेनेव निवर्त्यते। नन्वीकारयणोऽसिद्धत्वाद् विभक्तावेव यण् भविष्यति। नैतदस्ति। पूर्व-
विधावसिद्धत्वमुच्यते न त्वानन्तर्ये लौकिके यथा प्रयोग इति नास्ति विभक्तेरानन्तर्यम्। अनुदेश इति। अतिदेश इत्यर्थः। ननु चै

अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवतीति कुतः पूर्वस्य आदेशादिति। तत्रादेशलक्षणप्रतिषेधः॥
तत्रादेशलक्षणं कार्यं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः। वाय्वोः। अध्वर्य्वोः। लोपो व्योर्वलीति लोपः प्राप्नोति। असि
द्धवचनात्सिद्धम्। अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रत्यसिद्धो भवतीति वक्तव्यम्। असिद्धवचनात्सिद्धमि
ति चेदुत्सर्गलक्षणानामनुदेशः॥ असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः कर्तव्यः। पट्व्या मृद्व्ये
ति। ननु चैतदप्यसिद्धवचनात्सिद्धम्। असिद्धवचनात्सिद्धमिति चेन्नान्यस्यासिद्धवचनादन्यस्य भावः। असिद्धव
चनात्सिद्धमिति चेत्तन्न। किं कारणम्। नान्यस्यासिद्धवचनादन्यस्य भावः। न ह्यन्यस्याऽसिद्धत्वादन्यस्य प्रादुर्भा
वो भवति। तद्यथा। न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति। तस्मात्स्थानिवद्वचनमसिद्धत्वं च।
तस्मात्स्थानिवद्भावो वक्तव्यः। असिद्धत्वं च पट्व्या मृद्व्येति स्थानिवद्भावः। वाय्वोरध्वर्य्वोरित्यत्रासिद्धत्वम्। उक्तं
वा। किमुक्तम्। स्थानिवद्वचनानर्थक्यं शास्त्राऽसिद्धत्वादिति। विषम उपन्यासः। युक्तं तत्र यदेकादेशशास्त्रं तु-
क्छास्त्रे असिद्धं स्याद् अन्यदन्यस्मिन्। इह पुनरयुक्तम्। कथं हि तदेव नाम तस्मिन्नसिद्धं स्यात्। तदेव चापि
तस्मिन्नसिद्धं भवति। वक्ष्यति ह्याचार्यः। चिणो लुकि तग्रहणानर्थक्यं संघातस्याऽप्रत्ययत्वात्तलोपस्य चा
ऽसिद्धत्वादिति। चिणो लुक् चिणो लुक्येवासिद्धो भवति। काममतिदिश्यतां वा सच्चासच्चाऽपि नेह भारोऽ
स्ति। कल्प्यो हि वाक्यशेषो वाक्यं च वक्तर्यधीनं हि। अथवा वतिनिर्देशोऽयं कामचारश्च वतिनिर्देशे वाक्यशेषं स
मर्थयितुम्।

तदपीति। शास्त्राऽसिद्धत्वाश्रयणात्। नान्यस्येति। कार्याऽसिद्धत्वाश्रयमेतत्। उक्तं वेति। शास्त्रासिद्धत्वमाश्रयणीयमित्यर्थः।
तदेवेति। सकृत्पाठापेक्षयैतदुच्यते। विषयभेदात्तु भेदाश्रयणादसिद्धत्वमाश्रीयते। नेह भारोऽस्तीति। नह्यभावातिदेशेऽधिकं सू राम:
त्रं पठनीयं विधिशब्दं चान्तरेण सिध्यति। अधीनमिति। अध्युत्तरपदात् खविधानाद्व्युत्पन्न आयत्तार्थवृत्तिरधीनशब्दः। ॥ १४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्यथेति। येनोपमानेयवानांसत्ताऽवगतासमन्तीतिवाक्यशेषंप्रकल्पयति। असत्ताऽवगतौनसन्तीति। एवमस्यापिलक्षणस्यप्रतिलक्ष्यंभेदात्क्वचिद्भावोऽतिदिश्यतेक्वचिदभावः। किंपुनरिति। अमीषांब्राह्मणानामन्यास्तूर्दमानयेत्यत्रानन्तरेपूर्वेशब्दोदृष्टः। मथुरायाःपूर्वंपाटलिपुत्रमितिव्यवहितइतिप्रश्नः। तत्रयद्यविषयभेदाल्लक्षणंभिद्यतेतदायादृशंयत्रपूर्वत्वंसंभवतितादृशंतत्राऽऽश्रीयतइतिव्यवहितस्याऽपिग्रहणम्। यदात्वेकमेवलक्षणंतदाकिमित्यव्यवहितसंभवेव्यवहितमाश्रीयतइतिअनन्तरस्यैवग्रहणेनभाव्यम्। लुनीह्यत्रेति। हेरपित्वादुदात्तत्वम्। तत्रयणादेशेकृतेउदात्तस्याऽभावाद्वर्ज्यमानस्वरेणस्यात्।

तद्यथा। उशीनरवन्मद्रेषुयवाःसन्तिनसन्तीति। मातृवदस्याःकलाःसन्तिनसन्तीति। एवमिहापिस्थानिवद्भवतिस्थानिवन्नभवतीतिवाक्यशेषंसमर्थयिष्यामहे। इहतावत्सङ्ग्राम्य्चेतियथास्थानिनियणादेशोभवतिएवमादेशोऽपिभवति। इहेदानींवाय्वोरध्वर्य्वोरितियथास्थानिनियलोपोनभवतिएवमादेशोऽपिनभवतीति॥ किंपुनरनन्तरस्यविधिंप्रतिस्थानिवद्भावआहोस्वित्पूर्वमात्रस्य। कश्चात्रविशेषः। अनन्तरस्यचेदेकानुदात्तद्विगुस्वरगतिनिघातेषूपसंख्यानम्॥ अनन्तरस्येतिचेदेकानुदात्तद्विगुस्वरगतिनिघातेषूपसंख्यानंकर्तव्यम्। एकानुदात्त। लुनीह्यत्रपुनीह्यत्र। अनुदात्तंपदमेकवर्जमित्येषस्वरोनप्राप्नोति। द्विगुस्वर। पञ्चारत्न्यःदशारत्न्यः। इगन्तकालेत्येषस्वरोनप्राप्नोति। गतिनिघात। यत्प्रलुनीह्यत्रयत्प्रपुनीह्यत्र। तिङिचोदात्तवतीत्येषस्वरोनप्राप्नोति। अस्तुतर्हिपूर्वमात्रस्य। पूर्वमात्रस्येतिचेदुपधाह्रस्वत्वम्। पूर्वमात्रस्येतिचेदुपधाह्रस्वत्वंवक्तव्यम्। वादितवन्तंप्रयोजितवान्। अवीवदद्वीणांपरिवादकेन। किंपुनःकारणंनसिध्यति। योऽसौणौणिर्लुप्यतेतस्यस्थानिवद्भावाद्ध्रस्वत्वंनप्राप्नोति। गुरुसंज्ञाच। गुरुसंज्ञाचनसिध्यति।

स्थानिवद्भावात्तुयथास्थानिनिस्वरोभवतिएवमादेशेऽपिसिद्धःस्वरः। पञ्चारत्न्यइति। जसादिषुच्छन्दोवावचनंप्राङ्णौचङ्युपधायाइतिजसिचेतिगुणश्छन्दसिविकल्पितत्वान्नभवतीतियणिकृतेइगन्तत्वाऽभावात्पूर्वपदप्रकृतिस्वराऽप्रसङ्गः। यत्प्रलुनीह्यत्रेति। यद्वृत्तप्रयोगोनिघातप्रतिषेधार्थः। तत्रयणिकृतेउदात्तवत्त्वाऽभावाद्गतिनिघाताऽप्रसङ्गः। एतत्सर्वमनाश्रित्यान्तरङ्गबहिरङ्गभावमुक्तम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 श्लेष्मघ्न इति। कार्यार्थत्वात्संयोगसंज्ञाया व्यवहितस्याऽत्रश्रुतविधिरिति पूर्वपक्षः। ननु चेति। यद्योद्देश्यपक्षे प्रत्येकं च संयोगसंज्ञेति पक्षे आनन्तर्याश्रयेऽपि दोष इत्यर्थः। न वेति। समुदायः संज्ञीति भावः। पूर्वमात्रस्येति पक्षोऽत्र स्थितः। अचीवददिति तु च ङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधो वक्ष्यते। एकादेशस्येति। परस्मिन्नित्येतदवधारणार्थमुपात्तं तथा ह्यनुपादीयमानेऽपि परस्मिन्नित्यस्मिन् परनिमित्तकस्यस्थानिवद्भावो लभ्यत एव। तत्रानेन यथा अपरनिमित्तकस्य स्थानिवद्भावो निवार्यते वैयाघ्रपद्यः आदीध्य इति एवं परस्मिन्नेव य आदेश इत्यवधारणादुभयनिमित्तस्याप्राप्तिरिति भावः। श्वायसादिभ्योऽणन्तेभ्य औ

श्लेष्मघ्न उभपित्तघ्न उदध्य ध्वम उध्वस्व। हलोऽनन्तराः संयोग इति संयोगसंज्ञा संयोगे गुर्विति गुरुसंज्ञा गुरोरिति प्लुतो न प्राप्नोति। ननु च यस्याऽप्यनन्तरस्य विधिं प्रति स्थानिवद्भावस्तस्याऽप्यनन्तरलक्षणो विधिः संयोगसंज्ञा विधेया। न वा संयोगस्याऽपूर्वविधित्वात्। न वा एष दोषः। किं कारणम्। संयोगस्यापूर्वविधित्वात्। न पूर्वविधिः संयोगः। किं तर्हि। पूर्वपरविधिः संयोगः॥ एकादेशस्योपसंख्यानम्॥ एकादेशस्योपसंख्यानं कर्तव्यम्। श्वायसो गोमतो वातुरो आनडुहो पादे उदवाहे। एकादेशे कृते नुमामौ पद्भाव ऊडित्येते विधयः प्राप्नुवन्ति। किं पुनः कारणं न सिध्यन्ति। उभयनिमित्तत्वात्। अजादेशः परनिमित्तक इत्युच्यते। उभयनिमित्तश्चायं। उभयादेशत्वाच्च। अच आदेश इत्युच्यते अचोश्चायमादेशः। नैष दोषः। यत्तावदुच्यते। उभयनिमित्तत्वादिति। इह यस्य ग्रामे नगरे वा अनेकं कार्यं भवति शक्नोत्यसौ ततोऽन्यतरतो व्यपदेष्टुम्। तद्यथा। गुरुनिमित्तं वसाम इति अध्ययननिमित्तं वसाम इति। यदप्युच्यते। उभयादेशत्वाच्चेति॥

प्रत्यये कृते एकादेशे च तस्यादिवद्भावान्नुमामौ प्राप्नुतः। पादे उदवाहे इत्यत्र ङावेकादेशे कृते आदिवत्त्वात्भसंज्ञायां सत्यां पद्भाव ऊठ् च प्राप्नुतः। अचोश्चेति। अच इति गुणत्वादेकत्वसंख्यायाः पशुना यजेतेतिवद्विवक्षितत्वात्। इह यस्येति। अन्वयव्यतिरेकाभ्यां निमित्तत्वावधारणाद्भवत्येव परस्य निमित्तता। अयोगव्यवच्छेदेन परस्मिन् य आदेश इति विशेषणात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वयोरिति। वर्णनिर्देशेतावज्जातिग्रहणान्नास्तिसंख्याविवक्षा भवतु वा तथापि न दोष इति भावः। अथहलचोरिति। उभयथाशास्त्रेव्यवहारदर्शनात्प्रश्नः। उरणरपर इत्यत्राऽणानणसमुदायोऽकङादिरादेशोरपरो न भवति। नाग्लोपीत्यत्रलत्यरराजदिति हलचोर्लोपे अग्लोपित्वाण्णयणादुपधाह्रस्वत्वनिषेधो भवति। अस्तिह्यत्राकोदर्शनमिति। विंशकमिति। विंशतित्रिंशद्भ्यामितिड्वुन्। विंशमिति। शदन्तविंशतेश्चेतिडः। विंशइति। तस्यपूरणेडट्। स्यवीयानिति। गुणलोपयोस्तुल्यकालत्वादुगुणस्यकथमनादिष्टादचः पूर्वत्वमिति चेत्। स्थानिनोऽनादिष्टादचः पूर्वत्वात्तद्वारेणगुणस्याऽपिभविष्यतीत्यदोषः। तत्रस्थानिवद्भावे सति लशब्देन व्यवधानाद्वादेशाऽप्रसङ्गः। केकयइति।

इहयोह्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति लभतेऽसावन्यतरतो व्यपदेशम्। तद्यथा। देवदत्तस्यपुत्रः देवदत्तायाः पुत्रइति। अथ हलचोरादेशः स्थानिवद्भवति उताहो न। कश्चाऽत्र विशेषः। हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोपएकादेशः। हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोपे एकादेशो वक्तव्यः। विंशकं विंशं शतं विंशः॥ स्थूलादीनां यणादिलोपेऽवादेशः॥ स्थूलादीनां यणादिलोपे कृते अवादेशो वक्तव्यः। स्यवीयान् दवीयान्। केकयमित्रय्वोरियादेशएत्वम्। केकयमित्रय्वोरियादेशे एत्वं न सिध्यति। कैकेयः। मैत्रेयः। अचीत्येत्वं न सिध्यति। उत्तरपदलोपे च। उत्तरपदलोपे च दोषो भवति। दध्युपसिक्ताः सक्तवो दधिसक्तवः। अचीति यणादेशः प्राप्नोति। यङ्लोपे यणियङुवङः। यङ्लोपे यणियङुवङो न सिध्यन्ति। चेच्यः। नेन्यः। चेक्षियः। चेक्रियः। लोलुवः। पोपुवः। अचीति यणियङुवङो न सिध्यन्ति। अस्तु तर्हि न स्थानिवत्।

नन्वच्मात्रेगुणो विधीयते न त्वजादौ तेन योऽत्राश्रीयते नाऽसावादेशः। यश्चादेशः समुदायो नाऽसावाश्रीयत इतिन्यायान्नाऽस्तिदोषः। नैतदस्ति। स्थानिवन्न भवतीत्यभावातिदेशाऽऽश्रयणपक्षेदोषः स्यादेव। परिहारान्तरस्याभिधास्यमानत्वाद्वैतन्नाश्रितम्। दधिसक्तवइति। समानाधिकरणाधिकारे कृस्तृतीयापूर्वपदउत्तरपदलोपश्चेति लोपस्यपरनिमित्तता। यद्यप्यत्र पदान्तविधौ नेति सिध्यति। तथापि परिहारान्तरस्याऽभिधास्यमानत्वादेतन्नोक्तम्। चेच्यः। नेन्यइति। उतोऽचीत्येतदनाश्रयणादुपन्यासः। अस्तु तर्हीति। अच इत्युपादानात्साक्षादेव यस्याचः स्थानित्वेनोपात्तस्तस्यैव स्थानिवद्भावो न तु हलजादेशस्येत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मा॰कै॰ किंपुनरिति। यत्र कार्ये स्थान्याश्रितः किं तत्रैव स्थानिवद्भाव उत यत्राऽप्यनाश्रित इति प्रश्नः। गुरुविधिरिति। कार्यार्थत्वात्
१४५ संयोगसंज्ञाया गुरुविधिरित्युच्यते। लोपयणादेशयोः स्थानी संयोगसंज्ञायां नाश्रीयते। द्विर्वचनादयश्चेति। द्विर्वचनादाव- ११८
पि स्थानी नाश्रीयते। अनचीति पर्युदासाश्रयणात्तत्सदृशस्य हलो द्विर्वचनादावाश्रयणं नत्वचः। एवं यलोपेऽपि। अरेरित्याकार
लोपे विधीयमाने प्रकृतिराश्रितैवाचिकितीति। भाष्ये तु वरे शब्दोऽपि पठितस्तत्राऽयंभावः। यङ एव समुदायस्य प्रत्ययत्वं न तद
वयवस्याकारस्येत्यजादौ प्रत्यये आकारलोपविधानादत्राप्रसङ्ग एवेति। अदुग्धेति। क्सस्य अलोऽन्त्यस्येति लोपे कृते तस्य

अस्थानिवत्त्वे यङ्लोपे गुणवृद्धिप्रतिषेधः॥ अस्थानिवत्त्वे यङ्लोपे गुणवृद्ध्योः प्रतिषेधो वक्तव्यः। लोलुवः
पोपुवः सरीसृपो मरीमृज इति। नैष दोषः। न धातुलोप आर्धधातुक इति प्रतिषेधो भविष्यति। किं पुनराश्रीय
माणायां प्रकृतौ स्थानिवद्भवति आहोस्विदविशेषेण। कश्चात्र विशेषः। अविशेषेण स्थानिवदिति चेल्लोपय
णादेशे गुरुविधिः। अविशेषेण स्थानिवदिति चेल्लोपयणादेशयोर्गुरुविधिर्न सिध्यति। प्लेक्ष्म उ प्रपित्त उ प्रद उ
ध्यश्वम उध्वपूर्व। हलोऽनन्तराः संयोग इति संयोगसंज्ञा संयोगे गुर्विति गुरुसंज्ञा गुरोरिति प्लुतो न प्राप्नोति। द्विर्व
चनादयश्च प्रतिषेधे॥ द्विर्वचनादयश्च प्रतिषेधे वक्तव्याः॥ द्विर्वचनवरे यलोप इति॥ क्सलोपे लुग्वचनम्॥
क्सलोपे लुग्वक्तव्यः। अदुग्ध अदुग्धाः। लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्य इति॥ हन्तेर्घत्वम्॥ हन्ते
र्घत्वं वक्तव्यम्। घ्नन्ति घ्नन्तु अघ्नन्। अस्तु तर्ह्याश्रीयमाणायां प्रकृताविति॥ ग्रहणेषु स्थानिवदिति चेज्जग्ध्या-
दिषादेशप्रतिषेधः॥ ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिषु आदेशस्य प्रतिषेधो वक्तव्यः। निराद्यसमाद्यास
दो जग्धिर्ल्यप्तिकितीति अदो जग्धिभावः प्राप्नोति।

स्थानिवद्भावाज्झलो झलीति लोपो न स्यादिति लुग्वचनम्। अदुग्ध्वमित्येवमर्थस्त्ववश्यं वक्तव्यो वकारस्याझल्त्वात्। घ्नन्ती
ति। अल्लोपस्य स्थानिवत्त्वादनन्तरो नकारो न भवतीति घत्वाऽप्रसङ्गः। वचनसामर्थ्याद्व्यवधानाश्रयणे तु हननादिष्वति
प्रसङ्गः। निराद्येति। आदयतेर्णिलोपे कृते एकदेशविकृतस्याऽनन्यत्वाददिरेवाऽयमिति जग्धिः प्राप्नोति। न च जग्धौ णि- रामः
राश्रितः। आदिग्रहणाद् घात्वादिति वधादेशप्रसङ्गः॥ १४५
॥

CC-0. In Public Domain. Digitization by eGangotri

यणादेशादिति। बहिरङ्गपरिभाषाऽनाश्रयणे नैतदुच्यते। अजज्ञीति। जनजनन इत्यस्माद्व्यत्ययेनाऽऽत्मनेपदम्। जनीप्रादुर्भाव इत्यस्माद्वा श्यन्। छान्दसत्वात् श्नुः॥ सौर्यीति। तेनैकदिगित्यण्। ततो मत्वर्थीय इनिः। सौर्यै इत्यत्र तु यलोपो न प्राप्नोति। यस्येत्यादौ षष्ठ्या प्रतिषेध इति वचनात्। सूर्यमत्स्ययोर्ङ्यामिति परिगणनानाश्रयेणैतदुच्यते। गा

यणादेशे युलोपेत्वानुनासिकात्वप्रतिषेधः॥ यणादेशे युलोपेत्वानुनासिकात्वानां प्रतिषेधो वक्तव्यः। यलोप। वाय्वोः अध्वर्य्वोः। लोपो व्योर्वलीति यणादेशे लोपः प्राप्नोति। उलोपः। अकुर्वि आशाम्। अकुर्व्याशाम्। नित्यं करोतेः ये चेत्युकारलोपः प्राप्नोति। इत्वम्। अलुनि आशाम्। अलुन्याशाम्। ई हल्यघोरितीत्वं प्राप्नोति। अनुनासिकात्व। अजज्ञि आशाम्। अजज्ञ्याशाम्। ये विभाषेत्यनुनासिकात्वं प्राप्नोति॥ रायात्वप्रतिषेधश्च॥ रायात्वस्य च प्रतिषेधो वक्तव्यः। रायि आशाम्। राय्याशाम्। रायो हलीत्यात्वं प्राप्नोति॥ दीर्घयलोपप्रतिषेधः॥ दीर्घयलोपस्य प्रतिषेधो वक्तव्यः। सौर्ये नाम हिमवतः शृङ्गं तद्वान् सौर्यी हिमवानिति सो इन्नाश्रये दीर्घत्वे कृते सूर्यतिष्येति यलोपः प्राप्नोति॥ अतो दीर्घे यलोपं वचनम्॥ अतो दीर्घे यलोपो वक्तव्यः। गार्गाभ्यां वात्साभ्याम्। दीर्घे कृते आपत्यस्य च तद्धितेऽनातीति प्रतिषेधः प्राप्नोति। नैष दोषः। आश्रीयते तत्र प्रकृतिस्तद्धित इति। सर्वेषामेष परिहारः। उक्तं विधिग्रहणस्य प्रयोजनम्। विधिमात्रे स्थानिवद्यथा स्यादनाश्रीयमाणायां प्रकृताविति। अथवा पुनरस्त्वविशेषेण स्थानिवदिति। ननु चोक्तम् अविशेषेण स्थानिवदिति चेल्लोपयणादेशगुरुविधिः। द्विर्वचनादयश्च। क्सलोपे लुग्वचनं महन्ते दीर्घत्वमिति। नैष दोषः। यत्तावदुच्यते। अविशेषेण स्थानिवदिति चेल्लोपयणादेशगुरुविधिरिति। उक्तमेतत्। न वा संयोगस्यापूर्वविधित्वादिति।

र्गाभ्यामिति। गोत्रस्त्रियाः इति णः सङ्घाङ्कलक्षणेष्वित्यण् वा। अनातीति प्रसज्यप्रतिषेधाऽऽश्रयेणाचोद्यं पर्युदासाश्रयेण तु सदृशतद्धिताश्रयेण परिहारः। सर्वेषामिति। आश्रीयमाणायां प्रकृतावित्यस्मिन्नेव पक्षे आश्रीयमाणे विधिग्रहणादधिकाद्यत्नात्त्वाश्रयनिवृत्त्यर्थात्तु सिध्यन्तीति भावः। अत एव पक्षान्तरोपन्यासः। अथवेति। न वा संयोगस्येति। संयोगसंज्ञायां समुदायाश्रयत्वादपूर्वविधित्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उच्यन्त इति। अत एव लिङ्गादविशेषेण स्थानिवद्भावः। क्रियत इति। अदुह्लहृद्यर्थमव श्यकर्तव्यमेवेति भावः। सप्तम इति। श्रु
तिकृतमानन्तर्यमाश्रीयते स्थानिवद्भावकृतं तु व्यवधानं वचनसामर्थ्यादविघातकम्॥ नपदान्त॥ वेतस्वानिति। भावसाध
नविधिशब्दाश्रयेणोच्यते वेतसशब्दात् कुमुदनडवेतसेभ्यो ड्मतुबिति ड्मतुपि टिलोपे कृते स्वादौ पूर्वपदमिति पदसं-
ज्ञायां सकारः पदान्तत्वं प्रतिपद्यत इति पदान्ततायाविधायमानत्वात् स्थानिवत्त्वनिषेधादुत्वप्रसङ्गः। तसौ मत्वर्थ इति। तदस्मि
न्नस्तीत्यत्रैवार्थे ड्मतुपूननिर्दृत्तादिषु अनभिधानादित्येतदाश्रित्यैतदुच्यते। अकारान्तमिति। भसंज्ञां प्रति स्थानिवत्त्वनिषे-
धाऽभावात् सकारान्तत्वाभावान्नास्ति भसंज्ञा पदान्तत्वे तु विधीयमाने स्थानिवत्त्वनिषेधात् सकारान्तस्य पदत्वादुत्वप्रसङ्गः

यदप्युच्यते द्विर्वचनादयश्च प्रतिषेधे वक्तव्या इति। उच्यन्ते न्यासस्य एव। क्सलोपे लुग्वचनमिति। क्रियते न्या
स एव। हन्तेर्घत्वमिति सप्तमे परिहारं वक्ष्यति॥ नपदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्वि-
धिषु॥ पदान्तविधिं प्रति न स्थानिवदित्युच्यते। तत्र वेतस्वानिति रुः प्राप्नोति। नैष दोषः। भसंज्ञाऽत्र बाधिका भविष्य
ति। तसौ मत्वर्थ इति। अकारान्तमेतद् भसंज्ञां प्रति पदसंज्ञां प्रति तु सकारान्तम्। ननु चैवं विज्ञायते यस्मं प्रतिपदा
न्त इति। कर्मसाधनस्य विधिशब्दस्योपादाने एतदेवं स्यात्। अयं च विधिशब्दोऽस्त्येव कर्मसाधनः। विधीयत इ
ति विधिरिति। अस्ति च भावसाधनो विधानं विधिरिति। तत्र भावसाधनस्य विधिशब्दस्योपादाने एष दोषो भवति
। इदं च ब्रह्मबन्ध्वा ब्रह्मबन्ध्वै धकारस्य जश्त्वं प्राप्नोति। अस्ति पुनः किंचिद्भावसाधनस्य विधिशब्दस्योपादा
ने सतीष्टं संगृहीतम्। आहोस्विद्दोषान्तमेवेति।

। ननु चेति। स्थानिवत्त्वनिषेधाद्धि नायः सिद्धः पदान्तत्वस्य विधौ स्थानिवत्त्वनिषेधः। यथा कौस्तः कानि सन्तीति। इह तु सकारः
स्थानिवत्त्वनिषेधाद्धि ना पदान्तत्वे नाऽसिद्ध इति भवत्येव स्थानिवद्भाव इत्यपदान्तत्वात् सकारस्य रुत्वाऽभावः। ब्रह्मबन्ध्वे
ति। ब्रह्मबन्धुशब्दादूङ्। ऊङ नूङो रेकादेश आदिव   द्भावादूङ्ग्रहणेन गृह्यत इति तस्मिन् स्वादिष्विति पदसंज्ञायां ध
कारस्य पदान्तताविधेयेति स्थानिवत्त्वनिषेधाज्जश्त्वं स्यात्। भसंज्ञां तु प्रत्येकादेशस्य स्थानिवत्त्वादूकारान्तमेतदिति भि
न्नावधिकत्वाद् पदसंज्ञयोर्नास्ति बाध्यबाधकभावः। यणादेशो स्वारणां चाऽतन्त्रम्। एकादेशस्यैवोदाहरणत्वात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कानिसन्तीति।पक्षद्वयसाधारणमिदंप्रयोजनम्।भावसाधनपक्षेऽपिसिध्यत्येवेतितूपन्यस्तम्।यकारइति।यकारवकारौविधीयमानावेवपदान्तौभवतइत्यस्तिपदान्ततयाविधानम्।इदानीमसाधारणंप्रयोजनमाह।षडिकइति।षडङ्गुलिपूर्वाद्वहूचोमनुष्यनाम्नष्ठज्वेतिठचिकृतेठजादावूर्ध्वमितिङ्गुलिशब्दस्यलोपेयस्येतिलोपेषषित्ययंशब्दोऽन्तर्वर्तिन्याविभक्त्यासिद्धःपदत्वेनेतिपदान्ततयाअविधानान्नास्तिस्थानिवत्त्वनिषेधइत्यकारलोपस्यस्थानिवद्भावादकारान्तस्यभसंज्ञा।पदसंज्ञात्वन्तर्वर्तिविभक्त्याश्रयेणषकारान्तस्येतिसिद्धंजश्त्वम्।कर्मसाधनेतुषषःषकारःपदान्तत्वेनसिद्धइतिस्थानिवत्त्वनिषेधात्षकारान्तस्यैवभसंज्ञेतितुल्यावधिकयाभसंज्ञयापदसंज्ञायाएकसंज्ञाधिकाराद्बाधनाज्जश्त्वासिद्धिः। वाचिकस्त्विति।चकारस्यपदान्तत्वात्कुत्वप्रसङ्गात्।कथंपुनःषडिकस्यसिद्धिः।यावतो कं योऽसौपदान्तोयकारइतितद्वदिहापिडकारस्यपदान्तस्यविधेयत्वात्पदान्ततयाविधिरितिस्थानिवत्त्वनिषेधप्रसङ्गः।नैषदोषः।पूर्वमेवजश्त्वेनडकारस्यनिष्प

अस्तीत्याह।इहकानिसन्तियानिसन्तिकोस्तःयौस्तइति।योऽसौपदान्तोयकारोवकारोवाश्रूयतेसनश्रूयते।षडिकश्चाऽपिसिद्धोभवति। वाचिकस्तुनसिध्यति।अस्तुतर्हिकर्मसाधनः।यदिकर्मसाधनः।षडिकोनसिध्यति।अस्तुतर्हिभावसाधनः।वाचिकोनसिध्यति।वाचिकषडिकौनसंवदेते।कर्तव्योऽत्रयत्नः।कथंब्रह्मबन्धावब्रह्मबन्धौ।उभयतआश्रयणेनान्तादिवदिति।

न्नत्वान्नेदानींविधिरितिभावसाधनेषडिकसिद्धिः।कर्मसाधनेतुडकारस्यपदान्तत्वेनप्रसिद्धस्यभत्वात्पदत्वनिवृत्तौषकारक्तपापत्तिर्विधेयेतिस्थानिवत्त्वनिषेधात्तुल्यावधिकयाभसंज्ञयापदसंज्ञायाबाधनाज्जश्त्वनिवृत्तौषडिकासिद्धिः।नचभावसाधनेषकारापत्तिर्माव्येतिशङ्क्यतेवक्तुंतस्याअपदान्तरूपत्वात्पदान्तत्वेहिजश्त्वंस्यात्।नचजश्त्वविधिनिमित्तस्थानिवत्त्वनिषेधः।यत्रस्थानिवत्त्वनिषेधाज्जश्त्वंविधीयतेसम्बिर्बध्यामितिसोऽस्यविषयः।इहतुपूर्वमेवजश्त्वंकृतंस्थानिवत्त्वनिषेधात्तुतन्निवृत्तिराशङ्क्यतेपूर्वत्रासिद्धेनस्थानिवदित्यस्याप्ययमविषयः।नह्यत्रपूर्वत्रासिद्धीयंकिंचित्कार्यंविधेयम्।कर्तव्योऽत्रयत्नइति।एकाक्षरपूर्वपदानामुत्तरपदलोपोवक्तव्यइतिवाचिकःसिद्धः।षडिकस्तुपषष्ठाजादावितिलोपेयस्येतिलोपेचसिद्धः।उभयतइति।यस्मात्स्वादिविधिस्तत्वादौपदमितिपूर्वपरोभयाश्रयणम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पदेऽन्तइति। नचङ्गन्तुपूमत्ययःपदम्। एवंषडिकेइकप्रत्ययोनपदमितिनास्तिस्थानिवत्त्वनिषेधः। यथेवेति। यचिभमित्यत्र ११८
तसीमत्वर्थइत्यत्रचपदमितिवर्ततेतेनपदंसद्भंभवतीतिलब्धेपदत्वेतन्निबन्धनरुत्वप्रतिबन्धायोभसंज्ञातद्विषयत्वात्पु
दान्तविधिरितिस्थानिवत्त्वनिषेधइतिभत्वाद्रुत्वाऽभावःसिद्धः। कण्डूयतेरिति। क्यजन्तात्क्विपूयगन्तात्तुक्विन्नभवति। उ-
क्तंहिभाष्येनैतेभ्यःक्विब्दृश्यतइति। सौरीति। एकोऽणयकारलोपोद्वितीयईकारेतयोःस्थानिवत्त्वाद्यकारस्योपधात्वं न-

कथंवेतस्मात्। नैवंविज्ञायतेपदस्यान्तःपदान्तः। पदान्तस्यविधिःपदान्तविधिः। पदान्तविधिंप्रतीति। कथंत
र्हि। पदेअन्तः। पदान्तः। पदान्तस्यविधिःपदान्तविधिःपदान्तविधिंप्रतीति। अथवायथैवान्यान्यपिपदकार्या
एयुपपन्नवन्तेरुत्वंजश्त्वंचएवमिदमपिपदकार्यमुपपन्नोष्यते। किम्। भसंज्ञानाम। वरेयलोपविधिंप्रतिनस्था
निवद्भवतीत्युच्यतेतत्रतेऽप्सुयायावरःप्रवपेतपिण्डान्। अवर्णलोपविधिंप्रतिस्थानिवत्स्यात्। नैषदोषः। नैवं
विज्ञायतेवरेयलोपविधिंप्रतिनस्थानिवद्भवतीति। कथंतर्हि। वरेअयलोपविधिंप्रतीति। किमिदमयलोपविधिं
प्रतीति। अवर्णलोपविधिंप्रतियलोपविधिंचप्रतीति। अथवायोगविभागःकरिष्यतेवरेलुप्तंनस्थानिवत्। त
तोयलोपविधिंप्रतिनस्थानिवदिति। यलोपेकिमुदाहरणम्। कण्डूयतेरप्रत्ययःकण्डूरिति। नैतदस्तिक्वौ
लुप्तंनस्थानिवत्। इदंतर्हिप्रयोजनम्। सौरीबलाका। नैतदस्तिउपधात्वविधिंप्रतिनस्थानिवत्। इदंतर्हि
प्रयोजनम्। आदित्यः। नैतदस्तिपूर्वत्रासिद्धेनस्थानिवत्। इदंतर्हिकण्डूतिर्वल्गूतिः। नैतदस्तिप्रयोजनम्।
कण्डूयावल्गूयाइतिभवितव्यम्। इदंतर्हिकण्डूयतेःक्तिच्। ब्राह्मणकण्डूतिःक्षत्रियकण्डूतिः॥ प्रति
षेधेस्वरदीर्घयलोपेषुलोपाजादेशोनस्थानिवत्॥ प्रतिषेधेस्वरदीर्घयलोपविधिषुलोपाजादेशोन
स्थानिवदितिवक्तव्यम्।

स्यात्। स्थानिवत्त्वनिषेधेद्वितीयलोपस्यसमानाश्रयत्वादसिद्धत्वादणिलोपस्यव्याश्रयत्वात्सिद्धत्वाद्यकारस्यउपधात्वा-
ल्लोपःसिध्यति। आदित्यइति। अदितेःणाऽस्यदेवतेत्यन्नार्थेण्यस्तेनाभवादावर्थेद्वितीयोण्यः। हलोयमांयमीतिलोपइ
ष्यतेसचस्थानिवत्त्वनिषेधात्सिध्यति। ब्राह्मणकण्डूतिरिति। षष्ठीसमासःकर्मधारयेकण्डूतिशब्दस्यपूर्वनिपातप्रसङ्गः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकर्षिक इति। चरत्यर्थे आकर्षात् ष्ठलिति ष्ठल्। यस्येति लोपस्य स्थानिवत्त्वात् ककाराकारस्योदात्तत्वं न स्यात् ककारक इ-
त्यादौ च स्वरविधौ व्यञ्जनमविद्यमानवदिति व्यञ्जनस्याविद्यमानवत्त्वादनन्तरस्य स्वरभाजः संभवादन्यव्यवधानेन स्या-
त्। यत्र तु व्यवहितेऽपि पूर्वशब्दो वर्तते तत्राप्यऽवध्यवधिमतोरानन्तर्यासंभवादन्तरालस्यानुसतोऽप्यर्थानानाद्दत्स्य व्य-
वहारः। यत्र त्वानन्तर्यसंभवस्तत्र व्यवहितं नैवाश्रीयते। ष्ठलो लित्करणाद्व्यवधानेऽपि भविष्यतीति चेत्। आकारस्या-
पि पक्षे स्यादिति स्थानिवत्त्वनिषेधः। प्रतिदीव्नेति। रेफवकारान्तस्य भस्य न भकुर्छुरामिति दीर्घत्वनिषेध इत्यत्र न प्रवर्तते
। इह हि लोपोऽपीति। प्रकृतः। प्रस्तुतः। आनुपूर्व्येणेति। तत्र पदार्थानां समन्वयावगमात्। इह तु लोपो यप्राद्धेन संबद्धः।

स्वर। आकर्षिकः। चिकीर्षकः। जिहीर्षकः। योऽह्यन्य आदेशः स्थानिवद्देवासौ भवति। पञ्चारत्न्यो दशारत्न्यः।
स्वर। दीर्घ। प्रतिदीव्ना। प्रतिदीव्ने। योऽह्यन्य आदेशः स्थानिवद्देवासौ भवति। किर्योः। गिर्योः। दीर्घ। यलोप। ब्राह्मण
कण्डूतिः। क्षत्रियकण्डूतिः। योऽह्यन्य आदेशः स्थानिवद्देवासौ भवति। वाय्वो रध्वर्य्वोरिति। तत्तर्हि वक्तव्यम्।
न वक्तव्यम्। इह हि लोपोऽपि प्रकृत आदेशोऽपि विधिग्रहणमपि प्रकृतमनुवर्तते दीर्घादयोऽपि निर्दिश्यन्ते।
केवलं तत्राभिसम्बन्धमात्रं कर्तव्यम्। स्वरदीर्घयलोपविधिषु लोपाजादेशो न स्थानिवदिति। आनुपूर्व्येण
संनिविष्टानां यथेष्टमभिसंबन्धः शक्यते कर्तुम्। न चैतान्यानुपूर्व्येण संनिविष्टानि अनानुपूर्व्येणापि सं-
निविष्टानां यथेष्टमभिसंबन्धो भवति। तद्यथा। अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीन
मभिधावन्तमद्राक्षीरिति। तस्य यथेष्टमभिसंबन्धो भवति उदहारि भगिनि या त्वं कुंभं हरसि शिरसा अनड्वा-
हं साचीनमभिधावन्तमद्राक्षीरिति॥

सकृच्छ्रुतो द्विधा चास्योपयोग इष्यते स्वरदीर्घयलोपाश्च विक्षिप्ताः कथं समुच्चीयन्तामिति भावः। अनानुपूर्व्येणापीति।
लोपशब्द आवर्तते। तत्र लोपाजादेश इति ज्ञायते। तत्र द्विर्वचनविधौ लोपाजादेशस्याऽसंभवात्सवर्णादिविधौ तु तस्यैवासं-
भवान्न तत्राऽऽदेशस्य लोपो विशेषणम्। पदान्ते तु यद्यपि संभवव्यभिचारौ स्तस्तानि सन्ति कानि सन्तीति। तथापि न पदान्ते-
ति योगविभागात् तद्विधौ लोपो न विशेषणमिति पारिशेष्यात् स्वरदीर्घयलोपेषु लोपाऽजादेशो न स्थानिवदिति विज्ञायते।
स्मृतिशास्त्रत्वाच्चाऽस्य एतावन्तोऽर्थाः संनिहिता इत्येतावत्प्रतीयते। ग्रहणकवाक्यानुलक्ष्यसंस्कारकं प्रक्रियावाक्यम्
उपन्नवत् इति सिद्धमिष्टम्। अनड्वाहमिति। पाठक्रमादार्थक्रमो बलीयानिति यथेष्टमत्राभिसंबन्धः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लौरिति। णिलोपस्य स्थानिवत्त्वादूठ् न स्यात्। अकृत्वेति। णयल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषिद्धमिति णिलोपस्ततो वृद्धिरावादेशौ लुवर्णाश्रयत्वात्प्रत्ययलक्षणेन न भवति यथा गोहितमित्यवादेशः। एतच्चान्तरङ्गत्वमनाश्रित्योक्तम्। तत्र त्वाश्रितेऽन्तरङ्गबहिरङ्गयोर्विप्रतिषेधाभावः। लवमाचष्ट इति। क्वौ विधिं प्रति न स्थानिवदित्यस्याऽर्थस्य प्रदर्शनायेदमुदाहृतम्। इदं तु क्वौ लुप्तस्योदाहरणं देवयतेर्द्युरिति। बिम्बमिति। बिम्बी बदरीशब्दाभ्यां ङीषन्ताभ्यामनुदात्तादेश्चेत्यञ्। तस्य फले लुक्। लुक् तद्धितलुकीति ङीषो लुकि तस्य स्थानिवद्भावाद्यस्येति लोपः प्राप्नोतीति

क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम्॥ क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानं कर्तव्यम्। क्वौ किमुदाहरणम्। कण्डूयतेरप्रत्ययः कण्डूरिति। नैतदस्ति। यलोपविधिं प्रति न स्थानिवत्त्वात्। इदं तर्हि पिपठिषतेरप्रत्ययः। पिपठीः। नैतदस्ति। दीर्घविधिं प्रति न स्थानिवत्त्वात्। इदं तर्हि। लावयतेर्लौः। पावयतेः पौः। नैतदस्ति। अकृत्वा वृद्ध्यावादेशौ णिलोपः। प्रत्ययलक्षणेन वृद्धिर्भविष्यति। इदं तर्हि लवमाचष्टे लवयति। लवयतेरप्रत्यये लौः। स्थानिवद्भावाच्छ्वोरूठ् न प्राप्नोति। क्वौ लुप्तं न स्थानिवदिति भवति। एवमपि न सिध्यति। कथम्। क्वौ णिलोपो णावकारलोपस्तस्य स्थानिवद्भावादूठ् न प्राप्नोति। नैष दोषः। नैवं विज्ञायते। क्वौ लुप्तं न स्थानिवदिति। कथं तर्हि। क्वौ विधिं प्रति न स्थानिवदिति। लुकि किमुदाहरणम्। बिम्बं बदरम्। नैतदस्ति पुंवद्भावेनाप्येतत्सिद्धम्। इदं तर्हि आमलकम्। नैतदस्ति। वक्ष्यत्येतत् फले लुग्वचनानर्थकं प्रकृत्यन्तरत्वादिति।

प्रतिषेध उच्यते तद्धितस्य स्थानिनः परत्वाल्लुकोऽपि परत्वाऽऽश्रयणात्परनिमित्तकत्वं स्त्रीप्रत्ययलुक आश्रीयते। अन्यथाऽभावेन पौर्वापर्याभावात्कुतः परनिमित्तकत्वम्। अथवा बुद्धिपरिकल्पितमभावेनापि पौर्वापर्यं भवति। पुंवद्भावेनेति। भस्याढे तद्धित इति पुंवद्भावः। अत्र च भाषितपुंस्कत्वं नाश्रीयत इत्येवमुक्तम्। तदाश्रये तु नास्ति पुंवद्भावः। आमलकमिति। वृद्धत्वान्मयटो विधानाद्वुलाभावः। प्रकृत्यन्तरत्वादिति। बिम्बबदरामलकादयो न यौगिकाः शब्दाः किं तर्हि विशिष्टफलजातिवाचिन इत्यर्थः। ॥

CC-0. In Public Domain. Digitization by eGangotri

पञ्चभिरिति। आर्हादिति ठक् तस्याध्यर्धपूर्वेति लुक्। लुक् तद्धितलुकीति ङीपो लुक्। अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इति यणादेशः पूर्वं न प्रवर्तते। कृते तु लुकि तस्य स्थानिवत्त्वाद्यणः प्रसङ्ग इति स्थानिवत्त्वनिषेध उच्यते। अव्ययिकन्यायेन पटुशब्दान्तादेव ठग्भविष्यति न तु पट्वीशब्दान्तादिति चेत् अतिपत्तिगौरवप्रसङ्गः। वर्णाश्रय इति। यद्यपि पुंवद्भावे सिद्धः प्रत्ययविधावित्यस्ति तथापि यत्र भाविभत्वं तत्र पुंवद्भावः। इह तु लुकि भत्वाभावात् कुतः पुंवद्भावः। किं तर्ह्यन्योऽपीति। यत्र पुंवद्भावो नास्ति पञ्चेन्द्र इति। साऽस्य देवतेत्यण् तस्य द्विगोर्लुगनपत्य इति लुक् ततो ङीपो लुक् तस्य स्थानिवत्त्वाद् ङीप्संनियुक्त आनु-

इदं तर्हि पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुर्दशपटुरिति। ननु चैतदपि पुंवद्भावेनैव सिद्धम्। कथं पुंवद्भावः। भस्याढे तद्धिते पुंवद्भवतीति। भस्येत्युच्यते यजादौ च संज्ञा भवति। न चात्र यजादिं पश्यामः। प्रत्ययलक्षणेन यजादिः। वर्णाश्रये नास्ति प्रत्ययलक्षणम्। एवं तर्हि ठक्छसोश्चेत्येवं भविष्यति। ठक्छसोश्चेत्युच्यते। न चात्र ठक्छसौ पश्यामः। प्रत्ययलक्षणेन। न लुमताऽस्मिन्निति प्रत्ययलक्षणस्य प्रतिषेधः। न खल्वप्यवश्यं ठगेव क्रीतप्रत्ययः। क्रीताद्यर्थाः खल्वपि तद्धिताः। किं तर्ह्यन्येऽपि तद्धिता ये लुकं प्रयोजयन्ति। पञ्चेन्द्राण्यो देवता अस्येति पञ्चेन्द्रः। दशेन्द्रः। पञ्चाग्निः। दशाग्निः। उपधात्वे किमुदाहरणम्। पिपठिषतेरप्रत्ययः पिपठीरिति। नैतदस्ति। दीर्घविधिं प्रति न स्थानिवत्। इदं तर्हि सौरी बलाका। नैतदस्ति। यलोपविधिं प्रति न स्थानिवत्। इदं तर्हि पारिखीयः। चङ्परनिर्ह्रासे चोपसंख्यानं कर्तव्यम्। वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन। किं पुनः कारणं न सिध्यति। योऽसौ णौ णिर्लुप्यते तस्य स्थानिवद्भावाद्ध्रस्वत्वं न प्राप्नोति। ननु चैतदप्युपधात्वविधिं प्रति न स्थानिवदित्येवं सिद्धम्। विशेषत एवैतद्वक्तव्यम्। क्व। प्रत्ययविधाविति। इह मा भूत् पटयति लघयति। कुत्वे चोपसंख्यानं कर्तव्यम्। अर्चयतेरर्कः। मर्चयतेर्मर्कः। नैतद् घञन्तम्। औणादिक एष कप्रत्ययः तस्मिन्नाष्टमिकं कुत्वम्। एतदपि णिचाव्यवहितत्वान्न प्राप्नोति। पूर्वत्रासिद्धे च। पूर्वत्रासिद्धे च न स्थानिवदिति वक्तव्यम्। किं प्रयोजनम्।

क् श्रूयते यथेन्द्राणीति तथा पञ्चाग्नाय्यो देवता अस्य पञ्चाग्निरिति ऐकारः श्रूयेत समानायामाकृतौ भाषितपुंस्कत्वाभावाद्वर्णाश्रयत्वाद्भत्वाभावाच्च पुंवद्भावो नास्ति। अथ वा यस्येति लोपप्रसङ्गः। लुकि च स्थानिवत्त्वनिषेधादादीध्य इति परस्मिन्नित्यस्य पूर्वसूत्रे प्रत्युदाहरणमुपपद्यते। ण्वुलि कृते टेरेलस्य स्थानिवद्भावादव्यवधानाच्च लोपप्रसङ्गात्। पारिखीय इति। परिखाशब्दाच्चातुरर्थिकेऽणि कृते आकारलोपस्य स्थानिवत्त्वात् पारिखि भवतीति वृद्धादके कान्तखोपधादिति छो न स्यात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·क· क्सलोप इति। अदुग्ध इत्यर्थं लुग्वचनं कर्तव्यमेव। तदर्थं लुग्ग्रहणं नेतीदं कुर्वन्ति। कर्तव्यं भवतीत्युत्तरम्। अवश्यकार्यमित्यर्थः। ११८
१४९ चकारेण कर्तव्य इति। झषन्तत्वात् पूर्वैर्णैव सिद्धत्वात्। पापक्ति रिति। क्तिचुः संयोगान्तलोपादयः पदान्तविधौ स्थानिवत्त्वनिषेधा
त्सिद्धा इति भाष्येनोदाहृताः। स्कन्दयतेः स्कन्नुः काष्ठं तक्षयतीति काष्ठतक्। संयोगादिलोपलत्वणत्वेष्विति वचनात् संयोगादि-
लोपेऽस्थानिवत्वात्तदभावात्तत्र संयोगान्तलोपः। दोहयतेर्धोक्। लेहयतेर्लेट्। उणादीनामव्युत्पन्नत्वात् किं योगिर्योरित्यत्र-

क्सलोपः सलोपे। क्सलोपः सलोपे प्रयोजनम्। अदुग्ध अदुग्धाः। लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्य इति लुग्ग्रहणं न कर्तव्यम् भवति। दध आकारलोप आदिचतुर्थत्वे प्रयोजनं धत्से धद्ध्वे धद्ध्वमिति। दधस्तथोश्चेति चकारेण कर्तव्यो भवति। हलो यमां यमि लोपे प्रयोजनम्। आदित्यः। हलो यमां यमि लोपः सिद्धो भवति। अल्लोपणिलोपौ संयोगान्तलोपप्रभृतिषु प्रयोजनम्। पापच्यतेः पापक्तिः। यायज्यतेर्यायष्टिः। पाचयतेः पाक्तिः। याजयतेर्याष्टिः। द्विर्वचनादीनि च प्रयोजनानि न पठितव्यानि भवन्ति पूर्वत्रासिद्धेनैव सिद्धानि भवन्ति। किमविशेषेण। नेत्याह। वरे यलोपस्वरवर्जम्। वरे यलोपं स्वरं च वर्जयित्वा। तस्य दोषः संयोगादिलोपलत्वणत्वेषु॥ । तस्यैतस्य लक्षणस्य दोषः संयोगादिलोपलत्वणत्वेषु। संयोगादिलोपे। काक्यर्थं वासर्थम्। स्कोः संयोगाद्योरिति लोपः प्राप्नोति। लत्वम्। निगार्यते निगाल्यते। अचि विभाषेति लत्वं न प्राप्नोति। णत्वम्। माषवपनी। व्रीहिवपनी। प्रातिपदिकान्तस्येति णत्वं प्राप्नोति। न पदान्तद्विर्वचन॥ द्विर्वचनेऽचि॥ आदेशः स्थानिवदनुदेशात्तद्वतो द्विर्वचनम्। आदेशः स्थानिवदनुदेशात्तद्वतः। किंवतः। आदेशवतो द्विर्वचनं प्राप्नोति। तत्र को दोषः। तत्राभ्यासरूपम्। तत्राभ्यासरूपं न सिध्यति॥

दीर्घाभावः। माषवपनीति। समासान्तस्य नकारस्य णत्वं विधीयमानमल्लोपस्य स्थानिवत्त्वनिषेधाद्ङीबुत्पत्तेः प्राक् समासवि-
धानात् प्राप्नोति॥ द्विर्वचने॥ अचः परस्मिन्नित्यत्र योऽनादिष्टादचः पूर्व इति स्थितम्। साचुकस्य च द्विर्वचनमिति पूर्वविधित्वाभा राम:
वादप्राप्तं स्थानिवत्त्वं विधीयते। अथाऽपि निमित्तात् पूर्वमित्यस्मिन् पक्षे प्राप्तिः स्यात्। तथापि न पदान्तद्विर्वचनेति प्रतिषेधप्र १४९
सङ्गादिदं वचनम्। आदेश इति। कार्यातिदेश इति पूर्वः पक्षः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्रतुरित्यत्र यणादेशे कृते एकाचो विधीयमानं द्विर्वचनमनच्कत्वादप्राप्तमिति स्थानिवत्त्वाद्यणा युक्तस्यैव प्राप्नोति। अथहीति। कार्यातिदेशे हि घ्री घ्रीति भाव्यमेव द्विर्वचनेनेति किमज्ग्रहणेन। नन्वज्ग्रहणस्य प्रयोजनं मसेः क्वसौ घस्तिमसो र्हलीत्युपधालोपे कृते द्विर्वचनं मा भूदिति नैतदस्ति। सत्यसति वा द्विर्वचने प्तानिति श्रुतौ विशेषाऽभावात्। छान्दसत्वाच्चोपधालोपः। छन्दसि च दृष्टानुविधिः। रूपस्थानिवत्त्वे च निन्यतुरित्यत्र पूर्वमियङादेशे कृते स्थानिरूपातिदेशाद् नीनीति द्विर्वचने एरनेकाच इति यणा बाधितत्वात्पुनरियङ् न प्रवर्तते। अधिजग इति। कृते एशादेशे गाङिति प्रक्रियाश्रयेणाचोद्यम्।

चक्रतुश्चक्रुरिति। अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य। यदयमज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो रूपं स्थानिवद्भवतीति। कथं कृत्वा ज्ञापकम्। अज्ग्रहणस्यैतत्प्रयोजनम्। इह मा भूत्। जेघ्रीयते। देध्मीयते। यदि च रूपं स्थानिवद्भवतीति ततोऽज्ग्रहणमर्थवद्भवति अथ हि कार्यं नार्थोऽज्ग्रहणेन भवत्येवात्र द्विर्वचनम्। तत्र गाङ्प्रतिषेधः॥ तत्र गाङः प्रतिषेधो वक्तव्यः। अधिजगे। इवर्णाभ्यासता प्राप्नोति। न वक्तव्यः। गाङ् लिटीति द्विलकारको निर्देशः। लिटि लकारादाविति। कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपम्। कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपं न सिध्यति। कृति। अचिकीर्तत्। एजन्त। जग्ले मम्ले। दिवादि। दुद्यूषति सुस्यूषति। नामधातु। भवनमिच्छति भवनीयति भवनीयतेः सन् बिभवनीयिषति। एवं तर्हि प्रत्यय इति वक्ष्यामि। प्रत्यय इति चेत् कृत्येजन्तनामधातुष्वभ्यासरूपम्। प्रत्यय इति चेत् कृत्येजन्तनामधातुष्वभ्यासरूपं न सिध्यति। दिवादय एके परिहृताः। एवं तर्हि द्विर्वचननिमित्ते अच्यजादेशः स्थानिवदिति वक्ष्यामि। स तर्हि निमित्तशब्द उपादेयः। न ह्यन्तरेण निमित्तशब्दं निमित्तार्थो गम्यते। अन्तरेणापि निमित्तशब्दं निमित्तार्थो गम्यते। तद्यथा। दधि त्रपुसं प्रत्यक्षो ज्वरः। ज्वरनिमित्तमिति गम्यते। नड्वलोदकं पादरोगः। पादरोगनिमित्तमिति गम्यते। आयुर्घृतम्। आयुषो निमित्तमिति गम्यते।

ङकारस्यानुबन्धत्वादिकारस्य गाङ् भवत्यजादेशः। कृत्येजन्तेति। अचि योऽजादेशः स द्विर्वचने कर्तव्ये स्थानिवदिति सूत्रार्थमाश्रित्यैतदुच्यते। जग्ल इति। शित्सदेशे आत्त्वमित्यत्र पक्षेऽयं दोषः। द्विर्वचननिमित्त इति। अस्मिन्पक्षे जग्ल इत्यपरिहृतम्। उत्तरत्र तु परिहरिष्यते। दधि त्रपुसमिति। समाहारद्वन्द्वः कर्मधारयो वा दध्येव विशिष्टावस्थायुक्तं त्रपुसमुच्यते तत्र द्विर्वचननिमित्तत्वात्तद्रूपाऽऽरोपेणाजेव द्विर्वचनमुच्यते। अथवा अधिकरणे ल्युट्। द्विरुच्यतेऽस्मिन्निति द्विर्वचनम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ एतदप्रतिपद्यमानं प्रति परिहारान्तरमाह। अथवा अकार इति। एवमपीति। एकत्वाद्द्विर्वचनशब्दस्य चाज्विशेषणेउप ११८
१५० युक्तत्वात् कालावधारणाभावः। एवं तर्हीति। स्थानिवदिति नानुवर्तत इति भावः। प्रत्यये चेति। द्विर्वचनेन प्रत्ययस्याक्षि-
प्तत्वात्तद्विशेषणं द्विर्वचनम् अचीत्येतच्च तस्य तदादिविधिर्भवत्यजादाविति। कथं पुनरिति। विरुद्धत्वादनयोरर्थयोरे-
केन द्विर्वचन इत्यनेन पदेनानुपादानादिति भावः। एकशेषनिर्देश इति। सहविवक्षाभावेऽपि सरूपाणामित्येकशेषः
संज्ञापरिभाषावल्लक्ष्यलक्षणाङ्गत्वात्तस्येति प्रागेवोक्तम्। विभक्त्यन्तयोश्चैकशेषविधानादप्रातिपदिकत्वाच्च द्विवचना-

अथवा अकारो मत्वर्थीयः। द्विर्वचनमस्मिन्नस्ति सोऽयं द्विर्वचनः। द्विर्वचने इति। एवमपि न ज्ञायते कियन्तमसौ कालं स्थानिवद्भवतीति। यः पुनराह द्विर्वचने कर्तव्य इति। कृते तस्य द्विर्वचने स्थानिवन्न भविष्यति। एवं तर्हि प्रतिषेधः प्रकृतः सोऽनुवर्तिष्यते। क्व प्रकृतः। न पदान्तद्विर्वचनेति। द्विर्वचननिमित्ते अचि अजादेशो न भवतीति। एवमपि न ज्ञायते कियन्तमसौ कालमजादेशो न भवतीति। यः पुनराह द्विर्वचने कर्तव्य इति कृते तस्य द्विर्वचने अजादेशो भविष्यति। एवं तर्हि उभयमनेन क्रियते। प्रत्ययश्च विशेष्यते द्विर्वचनं च। कथं पुनरेकेन यत्नेनोभयं लभ्यम्। लभ्यमित्याह। कथम्। एकशेषनिर्देशात्। एकशेषनिर्देशोऽयं द्विर्वचनं च द्विर्वचनश्च द्विर्वचने। द्विर्वचने कर्तव्ये द्विर्वचनेऽचि प्रत्यय इति। द्विर्वचननिमित्तेऽचि स्थानिवदिति चेण्णौ स्थानिवद्वचनम्। द्विर्वचननिमित्तेऽचि स्थानिवदिति चेण्णौ स्थानिवद्भावो वक्तव्यः। अवनुनावयिषति अवचुक्षावयिषति। न वक्तव्यः। ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्य। यदयम् ओः पुयण्ज्यपर इत्याह तज्ज्ञापयत्याचार्यो भवति णौ स्थानिवद्भाव इति। यद्येतज्ज्ञाप्यते। अचिकीर्तत्। अत्रापि प्राप्नोति। तुल्यजातीयस्य ज्ञापकम्॥

भावः। अथवैकशेषेण समानफलत्वात्तन्त्रमावृत्तिर्वा लक्ष्यते। ओः पुयण्जिष्विति। नहि णौ कृतस्य स्थानिवद्भावम-
न्तरेण पुयण्जिषु सर्वेष्ववर्णपरेषु उवर्णान्तोऽभ्यासः संभवति। पिपविषते यियविषते यियविषतीत्यत्रैवाऽनेन स्थानिवद्भावा-
त्तत्र पु इति पवर्गग्रहणं यणिति प्रत्याहारग्रहणं ज्ग्रहणं च ज्ञापकाण्णौ कृतस्य स्थानिवद्भावोऽनुमीयते। ननु तत्र णाविति- एम:
नास्ति तत्कथं तत्रैव स्थानिवत्त्वानुमानं न तु बिभवनीयिषति दिदवनीयिषतीत्यादावपि। नैतदस्ति। येन नाव्यवधानमित्येकेनैव १५०
प्रत्ययेन तत्र व्यवधानाश्रयणात्सेरेव केवलस्य व्यवधायकस्यासंभवात्॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कानि पुनरिति। अन्यथासिद्धत्वात्प्रश्नः। पूर्वविप्रतिषेधेनापीति। अपूर्वो वाचनिकः पूर्वविप्रतिषेधः। नहि नित्यानामाल्लोपादीनामनि
त्येन द्विर्वचनेन चन्याय्यो विप्रतिषेधः। अथ निन्युतुरिति कथं नह्यत्र यङ्परिगणितः। एवं तर्हि प्रकल्प्य चापवादविषयमिति न्या-
याद् यणोऽत्र भवितव्यमिती यङ् न प्रवर्तत इति द्विर्वचने कृते एरनेकाच इति यणा सिद्धम्। ओदौदादेशस्येति। ओदौतोरादेशो
यस्मिन्नङ्गे तस्य योऽभ्यासस्तस्य टुतुप्रादिरल्स्य योऽकारस्तस्योकारादेशो भवतीत्यर्थः। यथा चुक्षावयिषति ऊर्णुनावयिषति नुना
वयिषति तुतावयिषति पुप्लावयिषति। पुस्फारयिषति। अत्र चिस्फुरोर्णावित्यौकारस्यात्वम्। अत्र च यद्यपि स्वयः प्रेषे कृते अभ्या

कश्च तुल्यजातीयः। यथाजातीयकाः पुयण्जयः। कथंजातीयकाश्चैते। अवर्णपराः। कथं जग्ले मम्ले। अनैमि
त्तिकमात्त्वं शितीति तु प्रतिषेधः। कानि पुनरस्य योगस्य प्रयोजनानि। पपतुः पपुः। तस्थतुः तस्थुः। जग्मतुः जग्मुः। आटि
टद् आशिशत्। चक्रतुश्चक्रुरिति। आल्लोपोपधालोपणिलोपयणादेशेषु कृतेष्वनच्कत्वाद् द्विर्वचनं न प्राप्नोति।
स्थानिवद्भावाद् भवति। नैतानि सन्ति प्रयोजनानि। पूर्वविप्रतिषेधेनाप्येतानि सिद्धानि। कथम्। वक्ष्यति ह्याचार्यः। द्वि
र्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्त्वेभ्य इति। स पूर्वविप्रतिषेधो न पठितव्यो भवति।
किं पुनरत्र ज्यायः। स्थानिवद्भाव एव ज्यायान्। पूर्वविप्रतिषेधे हीदं वक्तव्यं स्यात्। ओदौदादेशस्य उद्भवति चुटुतुप्र
रादेरभ्यासस्येति। ननु च त्वयापीत्त्वं वक्तव्यम्। परार्थं मम भविष्यति सन्यतद्भवतीति। ममापि तर्ह्युत्त्वं परार्थं भ
विष्यति उत्परस्यातस्तिचेति।

सस्य प्रादित्वं नास्ति तथाप्यभ्याससंज्ञाप्रवृत्तिसमयेऽस्ति एतेष्वन्तरङ्गत्वात् प्रागेव द्विर्वचनाद् वृद्ध्यावादेशयोः प्रवर्तनादिवर्णान्त
तायामभ्यासस्य प्रासायामुत्त्वं विधीयते। ननु च त्वयापीति। ओः पुयण्जिष्विति ज्ञापनार्थमवश्यं वाच्यमित्यर्थः। उत्त्ववादी तु ओः
पुयण्ज्या इति न पठति सन्यतद्रतीत्त्वस्य सिद्धत्वात्। परार्थमिति। इत्त्वार्थं प्रसङ्गात् ज्ञापकत्वाय च पूर्वमुत्त्वं वक्तव्यमित्यर्थः। म-
मापीति। उत्त्वमप्यन्यार्थं वक्तव्यं तदेवाधिकविषये उपजीव्यत इत्यर्थः। तत्रायं न्यासः। उत्परस्यातः। तिच ओदौदादेशस्य चुटुतु- ॥
प्रादेरिति अभ्यासस्येति वर्तते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ दूत्वमपीति। यत्रान्तरङ्गत्वं नास्ति समानाश्रयत्वात्। पवतेर्यौ ते श्व सनि स्मि॰ पूङ्रञ्ज्वशां सनि सनीवन्तर्द्धेति चेटि कृते परत्वा- ११९
१५१ द्गुणः पूर्वविप्रतिषेधादवादेशात् पूर्वं द्विर्वचनमितीत्वं वक्तव्यम्। तथा जिजावयिष॰ तीत्यत्रेत्वविधानार्थं वक्तव्यम्। तस्मादि
ति। नन्वस्त्यस्मिन्सूत्रे ओः पुयण्जीति ज्ञापकमेवं समर्थयिष्यते अन्तरङ्गो नित्यश्च विधिर्द्विर्वचनेन प्रतिषिध्यत इति तत्र द्वि
र्वचने कृते यथाप्राप्तं भविष्यति। तदयुक्तम्। यदि सामान्येन ज्ञापकमाश्रीयते अचिकीर्तदित्यत्रापि पूर्वं द्विर्वचनप्रसङ्गादनिष्ट
रूपप्राप्तिः। अथ तुल्यजातीयापेक्षं ज्ञापकं व्याख्यायते यथोक्तं भाष्यकारेण तथा सति चक्रुरित्यादि न सिध्यतीति सूत्रमेव कर्त-

इत्वमपित्वणावक्तव्यम्। यत्समानाश्रयं तदर्थम्। उत्पिपविषते सं यियविषतीत्येवमर्थम्। तस्मात्स्थानिव
दित्येष एव पक्षो ज्यायान्। द्विर्वचनेऽचि॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्या
ध्यायस्य प्रथमे पादेऽष्टममाह्निकम्॥ अदर्शनं लोपः॥ अर्थस्य संज्ञा कर्तव्या शब्दस्य मा भूदिति। इतरेतराश्र
यं च भवति। का इतरेतराश्रयता। सतोऽदर्शनस्य संज्ञया भवितव्यम्। संज्ञया चादर्शनं भाव्यते। तदेतदितरे
तराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। लोपसंज्ञायामर्थसतो रुक्तम्। किमुक्तम्। अ
र्थस्य तावदुक्तम् इतिकरणोऽर्थनिर्देशार्थ इति। सतोऽप्युक्तं सिद्धं तु नित्यशब्दत्वादिति। नित्याः शब्दाः। नि-
त्येषु शब्देषु च सतोऽदर्शनस्य संज्ञा क्रियते न संज्ञयाऽदर्शनं भाव्यते। सर्वप्रसङ्गस्तु सर्वस्यान्यत्रादृष्टत्वात्।
सर्वप्रसङ्गस्तु भवति सर्वस्यादर्शनस्य लोपसंज्ञा प्राप्नोति।

व्यं यत्तु तेन न सिध्यति तदर्थं ज्ञापकमाश्रयणीयं तुल्यजातीयापेक्षमिति सर्वेष्टलक्ष्यसिद्धिः॥ इत्युपाध्यायजैयटपुत्रकैय
टकृते महाभाष्यप्रदीपे प्रथमाध्यायस्य प्रथमे पादेऽष्टममाह्निकम्॥ अदर्शनं लोपः॥ अर्थस्येति। स्वरूपमिति वचनाच्छब्दस्यै
व संज्ञा प्राप्नोतीति भावः। इतरेतराश्रयमिति। विधिप्रदेशेष्वेतच्चोद्यं नानुवादे चादिलोपे विभाषेत्यादौ। इतिकरण इति। इहापि राम:
स एवानुवर्तते लोप इत्यन्वर्थसंज्ञाविज्ञानाद्वाऽर्थस्य संज्ञा न शब्दस्य। सर्वप्रसङ्गस्त्विति। यदि स्वभावतोऽप्रयुक्तस्यान्वाख्यान १५१
मात्रं क्रियते तदा सर्वस्य स्वविषयादन्यत्राप्रयोगाददर्शनमिति लोपसंज्ञाप्रसङ्गः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ञ्णित्यङ्गस्येति। अङ्गसंज्ञा च विधानप्रतिबद्धा न चात्र प्रत्ययस्य णितो विधानम्। यस्मात्त्वेति। त्रपुशब्दात्तस्य विधानम्। न तत्प्रत्यय
इति। ञ्णितिवृद्धिनिमित्तइत्यर्थः। यच्चेति। सुप्शब्दे। न तस्मादिति। तस्मात्त्रपुशब्दात्तोरन्यस्याणो विधानं नास्तीत्यर्थः। अन
ङ्गकार्यं चोदयति। क्विप इति। त्रपुइत्यत्र क्विपोऽदर्शनमस्ति स च कृदिति तुक्प्रसङ्गः। सिद्धं त्विति। शास्त्रादर्थाद्वा प्रसक्तस्य यदद
र्शनं तल्लोपसंज्ञं भवति। स्थाने ग्रहणमिहाप्यनुवर्तते। स्थानं च प्रसङ्गः। तेन प्रसङ्गे यददर्शनमिति लभ्यते। ग्रामणीरिति। अ

किं कारणम्। सर्वस्यान्यत्रादृष्टत्वात्। सर्वो हि शब्दो यो यस्य प्रयोगविषयः स ततोऽन्यत्र न दृश्यते। त्रपुजतुइ
त्यत्राणोऽदर्शनं तत्रादर्शनं लोप इति लोपसंज्ञा प्राप्नोति। तत्र को दोषः। तत्र प्रत्ययलक्षणप्रतिषेधः। तत्र प्र
त्ययलक्षणं कार्यं प्राप्नोति। तस्य प्रतिषेधो वक्तव्यः। अचो ञ्णितीति वृद्धिः प्राप्नोति। नैष दोषः। ञ्णित्यङ्गस्याचो
वृद्धिरुच्यते। यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं भवति। यस्माच्च प्रत्ययविधिर्न तत्प्रत्यये परतः। यच्च
प्रत्यये परतः न तस्मात्प्रत्ययविधिः। क्विपस्तर्ह्यदर्शनम्। तत्रादर्शनं लोप इति लोपसंज्ञा प्राप्नोति। तत्र को दो
षः। तत्र प्रत्ययलक्षणप्रतिषेधः। तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति। तस्य प्रतिषेधो वक्तव्यः। ह्रस्वस्य पिति
कृति तुगिति तुक् प्राप्नोति। सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञत्वात्। सिद्धमेतत्। कथम्। प्रसक्तादर्शनं लो
पसंज्ञं भवतीति वक्तव्यम्। यदि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यते। ग्रामणीः सेनानीः। अत्र वृद्धिः प्रा-
प्नोति। प्रसक्ताऽदर्शनं लोपसंज्ञं भवति षष्ठीनिर्दिष्टस्य। यदि षष्ठीनिर्दिष्टस्येत्युच्यते। चाह लोप एवेत्यव
धारणम्। चादिलोपे विभाषा। अत्र लोपसंज्ञा न प्राप्नोति। अथ प्रसक्ताऽदर्शनं लोपसंज्ञं भवतीत्युच्यमाने
कथमेवैतत्सिध्यति। को हि शब्दस्य प्रसङ्गः। यत्र गम्यते चाऽर्थो न च प्रयुज्यते। अस्तु तर्हि प्रसक्ताऽदर्श
नं लोपसंज्ञं भवतीत्येव। कथं ग्रामणीः सेनानीः। योऽत्राऽणः प्रसङ्गः क्विपाऽसौ बाध्यते॥

र्थोपपदधातुसंनिधानादर्थाच्छास्त्राच्चाणः प्रसङ्गोऽस्तीति भावः। षष्ठीनिर्दिष्टस्येति। षष्ठीग्रहणमप्यनुवर्तते। चादिलोप इति।
ततश्च शुक्ला व्रीहयो भवन्ति श्वेता गा आज्यायदुहन्तीति निघातविकल्पो न स्यात्। अथेति। अत्राऽपि चादीनां शास्त्रान्नास्ति प्रस
ङ्गः। क्विपाऽसौ बाध्यत इति। सत्सूद्विषेति क्विपो विधानादणोऽत्र प्रसङ्गाऽभावः॥ ॥

त्रपुइत्यत्रेति। सोमसुत्रपुइत्यस्योपलक्षणमिदम्। यत्तु विवरणेऽनियमप्रसक्त्यभावान्न प्रत्ययग्रहणपरिभाषया तदाद्युपस्थितिरित्युक्तं त-
च्चिन्त्यम्। अतदादावतिप्रसङ्गस्यैवानियमप्रसक्तित्वेन तदुपस्थितेर्निष्प्रत्यूहत्वात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· प्रत्ययस्य। प्रत्ययग्रहणमिति। लुगादिविधौ क्वचित्प्रत्ययः साक्षान्निर्दिश्यते क्वचिदनुवर्तते क्वचित्सामर्थ्यात्प्रतीयत इति प्र ११९
१५२ श्नः। अप्रत्ययस्येति। अविद्यमानः प्रत्ययोऽस्मिन्नदर्शने इति तदप्रत्ययम्। गोरपीति। पञ्चेन्द्र इत्यादौ तु निर्दिश्यमानस्या
देशा भवन्तीति वचनात्स्त्रीप्रत्ययस्यैव लुग्भविष्यति न तदन्तस्य। गोरतद्धितलुकीत्यत्र गोर्लुकि कृते पञ्चगुरित्यादौ गो
शब्दान्तत्वाऽभावात्समासान्ताऽप्राप्तावतद्धितलुकीति प्रतिषेधोऽनर्थकः स्यादिति चेत्। कृते समासान्ते लुक् स्यादित्यर्थ

प्रत्ययस्य लुक्श्लुलुपः। प्रत्ययग्रहणं किमर्थम्। लुमति प्रत्ययग्रहणमप्रत्ययसंज्ञाप्रतिषेधार्थम्। लुमति प्रत्ययग्रहणं क्रियते। अप्रत्ययस्यैताः संज्ञा माभूवन्निति। किं प्रयोजनम्। प्रयोजनं तद्धितलुकि कंसीयपरशव्ययोर्लुकि च गोप्रकृतिनिवृत्त्यर्थम्। तद्धितलुकि गोनिवृत्त्यर्थम्। कंसीयपरशव्ययोश्च लुकि प्रकृतिनिवृत्त्यर्थम्। लुक्तद्धितलुकीति गोरपि लुक् प्राप्नोति। प्रत्ययग्रहणान्न भवति। कंसीयपरशव्ययोर्यञञौ लुक् चेति प्रकृतेरपि लुक् प्राप्नोति प्रत्ययग्रहणान्न भवति। गोनिवृत्त्यर्थेन तावन्नार्थः। योगविभागात्सिद्धम्। योगविभागः करिष्यते। गोरुपसर्जनस्य। गोन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति। ततः स्त्रियाः। स्त्रीप्रत्ययान्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति। ततो लुक् तद्धितलुकि। स्त्रिया इति वर्तते गोरिति निवृत्तम्। कंसीयपरशव्ययोर्विशिष्टनिर्देशात्सिद्धम्। कंसीयपरशव्ययोर्विशिष्टनिर्देशः कर्तव्यः। कंसीयपरशव्ययोर्यञञौ भवतः छयतोश्च लुग्भवतीति। स चावश्यं विशिष्टनिर्देशः कर्तव्यः। क्रियमाणेऽपि वै प्रत्ययग्रहणे उकारसकारयोर्माभूदिति। कमेः सः कंसः। परान् शृणातीति परशुरिति। नैष दोषः। उणादयोऽव्युत्पन्नानि प्रातिपदिकानि॥

वानेव प्रतिषेधः। ननु स्वभावतोऽप्रवृत्तस्याऽदर्शनं लुक्संज्ञं न च तत्र गोशब्दस्य स्वभावतोऽप्रवृत्तिः। नैष दोषः। शास्त्राऽनु
सारिभिरस्यार्थस्य दुर्ज्ञानत्वात्। प्रकृतेरपीति। समुदायस्य षष्ठीनिर्देशात्। योगविभागादिति। एकयोगनिर्दिष्टानामप्येकदे णमः
शाऽनुवृत्तिरित्येतत्प्रकारान्तरेण प्रतिपाद्यते। विशिष्टनिर्देशादिति। ब्रयतावेवाऽत्र निर्दिष्टव्यावित्यर्थः। उणादय इति। अतः १५२
कृकमिकंसकुम्भेति कंसशब्दस्य भेदेनोपादानात्क्वचिदुणादयो व्युत्पत्तिकार्यं न लभन्त इत्यर्थः। यञञोस्तु विधानसाम-
र्थ्याल्लुगभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स एषोऽनन्यार्थ इति। प्रकृतिनिवृत्त्यर्थ एव न तु प्रत्ययान्तरनिवृत्त्यर्थोऽपीत्यर्थः। षष्ठीनिर्देशार्थं लिति। विशिष्टस्य षष्ठ्यर्थस्य स्थाने योगत्वस्य निर्देशार्थमित्यर्थः। असति प्रत्ययस्येत्येतस्मिन् यः कश्चिदानन्तर्यादिः संबन्धः स्यात् ततश्च जनपदे लुबिति पञ्चालाः शोभना इत्यादौ जनपदवाचिनोऽनन्तरस्य शोभनादेरपि लुप् स्यात्। सर्वादेशार्थं वेति। षष्ठीनिर्देशार्थत्वं तु स्थितमेवेति वार्तिककारेण विकल्पार्थो वा शब्दः प्रयुक्तः। आगस्त्यकौण्डिन्ययोरित्यत्र हि यदि लुगनुवर्तते तदैकैकस्यात्र यञादेशाः स्युः। अथ नानुवर्तते द्वावेवादेशौ विधीयेते तदागस्त्यादेशेन सर्वत्र भाव्यमिति आग

स एषोऽनन्यार्थो विशिष्टनिर्देशः कर्तव्यः प्रत्ययग्रहणं वा कर्तव्यम्। उक्तं वा। किमुक्तम्। ङ्याप्प्रातिपदिकग्रहणमङ्गभपदसंज्ञार्थं यच्छयोश्च लुगर्थमिति। षष्ठीनिर्देशार्थं तु। षष्ठीनिर्देशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम्। षष्ठीनिर्देशो यथा प्रकल्प्येत। अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः। अक्रियमाणे हि प्रत्ययग्रहणे षष्ठ्यर्थस्याप्रसिद्धिः स्यात्। कस्याः स्थाने योगत्वस्य। क्व पुनरिह षष्ठीनिर्देशेनार्थः। प्रत्ययग्रहणे न यावता सर्वत्रैव षष्ठ्युच्चार्यते अणिञोस्तद्राजस्य यञञोः श्पद इति। इह न काचित् षष्ठी जनपदे लुबिति। अत्रापि प्रकृतं प्रत्ययग्रहणमनुवर्तते। क्व प्रकृतम्। प्रत्ययः परश्चेति। तद्वै प्रथमानिर्दिष्टम्। षष्ठीनिर्दिष्टेन चेहार्थः। ङ्याप्प्रातिपदिकादित्येषा पञ्चमी प्रत्यय इति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति। प्रत्ययविधिरयं न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति। नायं प्रत्ययविधिः। विहितः प्रत्ययः प्रकृतश्चानुवर्तते। सर्वादेशार्थं वा वचनप्रामाण्यात्। सर्वादेशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम्। लुक्श्लुलुपः सर्वादेशा यथा स्युः।

लीयाच्छात्रा इति न सिध्यति। अवृद्धत्वात् प्रकृतेः। प्रत्ययस्येति तूच्यमाने गोत्रेऽलुगचीति लुकि प्रतिषिद्धे संनियोगशिष्टत्वात् लुगभावादगस्त्यादेशाभावादागस्तीया इति सिध्यतीति। भाष्यकारस्तु तर्ह्यर्थे वा शब्दं व्याचक्षाणः षष्ठीनिर्देशार्थत्वं नेच्छति। स ह्येवं मन्यते आगस्त्यकौण्डिन्ययोरित्यत्र यस्कादिभ्यो गोत्र इत्यतो गोत्रग्रहणमनुवर्तते लुगिति च तेनागस्त्यकौण्डिन्ययोर्योगे त्रे विहितस्य लुक् परिशिष्टस्य तु प्रकृतिभागस्य यथासंख्यमगस्तिकुण्डिनचावादेशाविति सूत्रार्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथक्रियमाणेऽपीति। अलोऽन्त्यस्येतिवचनात्प्रत्ययस्ययोऽन्त्यस्तस्यैवप्राप्नुवन्तीतिभावः। वचनप्रामाण्यादिति। प्रत्ययस्येति
वचनसामर्थ्यादलोन्त्यस्येतिबाध्यते। वचनप्रामाण्यादितिब्रुवतो वार्तिककारस्यापिषष्ठीनिर्देशार्थत्वमनभिप्रेतमेवषष्ठीनिर्देशार्थ
त्वेहिप्रत्ययस्येत्यस्यचरितार्थत्वात्कथमलोऽन्त्यविधिर्बाध्येतेति। यदयमिति। विपर्ययस्तुनकल्प्यतेअनुपसंजातविरोधित्वात्लोप
स्तावदन्त्यादेशः स्थितस्ततोलुगारभ्यमाणोयद्यन्त्यस्यस्याल्लोपानुवृत्त्यैवसिद्धत्वाल्लुकंनविदध्यात्। विहितस्तुसर्वादेशत्वस्यज्ञा
पकःसंपद्यते। द्वितीयमिति। लोपविशेषणापेक्षया द्वितीयंपाठापेक्षयातुतृतीयंभवति। एकदेशलोपइति। अवयवक्रियास
मुदायेऽप्युपदिश्यते। यथापटोदग्धइति। अवयवेहिपटाख्योऽवयवीसमवेतइतितस्याप्यसौदाहः। नत्वयंगौणव्यपदेशः

अथक्रियमाणेऽपिप्रत्ययग्रहणेकथमिवलुक्श्लुलुपःसर्वादेशालभ्याः। वचनप्रामाण्यात्। प्रत्ययग्रहण
सामर्थ्यात्। एतदपिनास्तिप्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयतिलुक्श्लुलुपःसर्वादेशाभवन्तीति। यद
यंलुग्वादुहदिहलिहगुहामात्मनेपदेदन्त्यइतिलोपेप्रकृतेलुकंशास्ति। उत्तरार्थंतु। उत्तरार्थंतर्हिप्रत्य
यग्रहणंकर्तव्यम्। क्रियतेतत्रैवप्रत्ययलोपेप्रत्ययलक्षणमिति। द्वितीयंकर्तव्यम्। कृत्स्नप्रत्ययलोपेप्रत्य
यलक्षणंयथास्यात्। एकदेशलोपेमाभूदिति। आघ्नीतसंशयस्योपेणग्मीयेति॥ प्रत्ययलोपेप्रत्ययलक्ष
णम्॥ प्रत्ययग्रहणंकिमर्थम्। लोपेप्रत्ययलक्षणमितीयत्युच्यमानेसौरथीवेहतीतिगुरूपोत्तमलक्षणः
ष्यङ्प्रसज्येत॥

। गौणत्वेहिसतिमुख्यस्यैवसंप्रत्ययान्नकर्तव्यमेवप्रत्ययग्रहणंस्यात्। आघ्नीतेति। परत्वादुपधालोपेकृतेपुनःप्रसङ्गविज्ञाना
दनुनासिकलोपःस्यात्॥ प्रत्यय॥ प्रत्ययग्रहणमिति। प्रत्ययनिमित्तंकार्यंलोपेभवतीत्युक्तेप्रत्यासत्त्याप्रत्ययस्यैवलोपइतिविज्ञा
स्यतइतिभावः। सौरथीति। प्रत्ययस्यलक्षणंदर्शनंप्रादुर्भावइत्यर्थंपरिकल्प्येतदुच्यते। सुरथस्यविहतस्यचापत्यंगोत्रंस्त्रीति-
इञिकृतेमकारनकारयोर्भावेयथागुरूपोत्तमत्वात्ष्यङ्भवतिएवंलोपेऽपिस्यात्। प्रत्ययग्रहणेतुसतिविरुद्धत्वान्नायम
र्थोभवतिप्रत्ययस्यलोपेकृतेतस्यैवपुनःप्रादुर्भावइति। एवंहिलोपविधानमनर्थकंस्यात्। तस्मात्प्रत्ययनिमित्तंकार्यंप्रत्य
यलोपेभवतीतिवाक्यार्थआश्रीयते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैवमिति। संदेहेऽपि व्याख्यानात्करणसाधनो लक्षणशब्द आश्रयिष्यते। अन्यथा क्रियमाणेऽपि प्रत्ययग्रहणे भावसाधनाश्रङ्कानिवर्तते प्रत्ययलोपे प्रत्ययान्तरस्य प्रादुर्भाव इति। यथा ग्रामणीरिति क्विपो लोपे स्वाद्युत्पत्तिः। ततश्चाधो गित्यत्र पदसंज्ञा न स्यादिति करणसाधनत्वे व्याख्यानमेव शरणमिति भावः। लक्षणशब्दोपादानसामर्थ्याद्वा करणसाधनो लक्षणशब्दः। अन्यथा लोपे प्रत्यय इत्येव वक्तव्यं स्यात्। सति प्रत्यय इति। प्रत्ययग्रहणेऽन्नलुप्तसप्तमीको निर्दिश्यते तेन प्रत्यये सति यत्कार्यं

नैष दोषः। नैवं विज्ञायते लोपे प्रत्ययलक्षणं भवति प्रत्ययस्य प्रादुर्भाव इति। कथं तर्हि प्रत्ययो लक्षणं यस्य कार्यस्य तल्लुप्तेऽपि भवति। इदं तर्हि प्रयोजनम्। सति प्रत्यये यत्प्राप्नोति तत्प्रत्ययलक्षणं यथा स्यात्। लोपोत्तरकालं यत्प्राप्नोति तत्प्रत्ययलक्षणं मा भूदिति। किं प्रयोजनम्। ग्रामणिकुलं सेनानिकुलमित्यत्रोत्तरपदिके ह्रस्वत्वे कृते ह्रस्वस्य पिति कृति तुगिति तुक् प्राप्नोति स मा भूदिति। यदि तर्हि यत्सति प्रत्यये प्राप्नोति तत्प्रत्ययलक्षणेन भवति लोपोत्तरकालं यत्प्राप्नोति तन्न भवति। जगत् जनगदित्यत्र तुगन्न प्राप्नोति। लोपोत्तरकालं ह्यत्र तुगागमः। तस्मान्नार्थ एवमर्थेन प्रत्ययग्रहणेन। कस्मान्न भवति ग्रामणिकुलं सेनानिकुलम्। बहिरङ्गं ह्रस्वत्वम्। अन्तरङ्गः तुक्। असिद्धं बहिरङ्गमन्तरङ्गे।

इष्टं तल्लोपे सति भवति न च ग्रामणीरित्यत्र क्विपि सति तुगदृष्टः। ह्रस्वाभावात्। कृते क्विलोपे ह्रस्वत्वे च तुक्प्राप्तिः। जगदिति। द्युतिगमिजुहोत्यादीनां द्वे चेति गमेः क्विप्। अत्रान्तरङ्गत्वात्पूर्वं विलोपः। गमः क्वावित्ययं हि लोपोऽङ्गविशेषापेक्षत्वाद्बहिरङ्गः। भिन्नविषयत्वाच्च येन नाऽप्राप्तिन्यायो न भवति सति त्वस्मिन्न्याये नैव विलोपः स्यात्। तस्मात्सति क्विपि नाऽन्तुकः प्राप्तिः। अपि तु विलोपे कृते। ॥

भिन्नविषयत्वादिति। वार्तिकमते एतत्। भाष्यरीत्या विषयभेदेऽपि तत्त्वे तु लोपेनानुत्पत्तेरेवान्वाख्यानेनापवादत्वं नेति बोध्यमिति विवरणम्। अन्ये तु भिन्नविषयत्वादित्यस्यैतदतिरिक्तविषयत्वादित्यर्थः। अनित्यत्वादत्राप्रवृत्तिरिति यावत्। अनित्यत्वे ज्ञापकं चेदमो म इति सूत्रम्। अनुत्पत्तेरन्वाख्यानं तु न बाधं प्रतिभाति। तुकोऽप्यनुत्पत्तेरन्वाख्यानेनान्तरङ्गाणां प्राप्तेरेवाभावेऽन्तरङ्गानपि विधीन्नित्यादेरुक्तिसंभवस्यैव विलयापत्तेः। तस्मादनित्यत्वेनैवात्राप्रवृत्तिर्न्यायस्य वक्तव्या। प्रवृत्तौ दोषमाह। सतीति। इति व्याचख्युः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ कै॰ अन्यतरदिति। एकमेवप्रत्ययग्रहणंसामर्थ्यात्कृत्स्नप्रत्ययलोपप्रतिपादनेसमर्थम्। वर्णलक्षणमिति। प्रत्ययलोपेतल्ल
१५४ क्षणमित्युच्यमानेप्रत्ययस्ययत्रकार्येनिमित्तभावःप्रत्ययरूपाऽऽश्रयेणवर्णरूपताऽऽश्रयेणवातत्सर्वंस्यात्। सर्वेना-
म्नोवस्तुमात्रपरामर्शित्वात्। प्रत्ययग्रहणेसतिप्रत्ययनिमित्तमेवकार्यंप्रत्ययलोपेभवतिनवर्णरूपतानिमित्तम्। रैकुल
मिति। अवयवद्वारेणाऽत्रप्रत्ययस्याप्यादेशंप्रतिनिमित्तत्वमस्त्येवप्रत्ययाश्रयस्त्वायादेशोनभवतीतितिनप्रवर्तते। अनेन-
न्यायेननधातुलोपआर्धधातुकइत्यत्रधिन्विकृण्व्योर्विचिलोपोव्योर्वलीतिवलोपस्यवल्निमित्तत्वादार्धधातुकनिमित्त

इदंतर्हिप्रयोजनम्। कृत्स्नप्रत्ययलोपेप्रत्ययलक्षणंयथास्यादेकदेशलोपेमाभूदिति। आघ्नीतसंग-
यस्लोपेणाग्नीय। पूर्वस्मिन्नपियोगेप्रत्ययग्रहणस्यैतत्प्रयोजनमुक्तम्। अन्यतरच्छक्यमकर्तुम्। अ
यहृतीयंप्रत्ययग्रहणंकिमर्थम्। प्रत्ययलक्षणंयथास्यात्। वर्णलक्षणंमाभूदिति। गवेहितंगोहितम्
। राय:कुलंरैकुलमिति। किमर्थंपुनरिदमुच्यते। प्रत्ययलोपेप्रत्ययलक्षणवचनंसदन्वाख्यानाच्छा
स्त्रस्य। सचूड्शास्त्रेणान्वाख्यायतेसतोवा
स्त्रस्य। प्रत्ययलोपेप्रत्ययलक्षणमित्युच्यतेसदन्वाख्यानाच्छास्त्रस्य। उगिदचांसर्वनामस्थानेधातोरितिदृहेवस्यात्गोम
शास्त्रमन्वाख्यायकंभवति। सदन्वाख्यानाच्छास्त्रस्य। उगिदचांसर्वनामस्थानेधातोरितिदृहेवस्यात्गोम
न्तौ। गोमान्यवमानित्यत्रनस्यात्। इष्यतेचस्यादिति। तच्चान्तरेणायत्नंनसिध्यतीत्यतःप्रत्ययलोपेप्रत्य-
यलक्षणवचनमित्येवमर्थमिदमुच्यते। अस्तिप्रयोजनमेतत्। किंतर्हीति। लुक्युपसंख्यानम्। लुक्युप
संख्यानंकर्तव्यम्। पञ्चसप्त। किंपुनःकारणंनसिध्यति। लोपेहिविधानम्। लोपेहिप्रत्ययलक्षणंविधी
यतेतेनलुकिनप्राप्नोति।

त्वाभावाद्गुणप्रतिषेधोनभवति। तेनसुधेसुकरितिभवतिनतुसुधीसुकोरिति। किमर्थमिति। स्थानिवद्भावेनसिद्धमितिभावः
। सदन्वाख्यानादिति। शास्त्रंकर्तृकरणंवाशेषत्वेनविवक्षितमितिषष्ठीकृता। सचूड्शास्त्रेणेति। शास्त्रेणाकरणेनाचार्यःस्म
र्तासद्विद्यमानंवस्तुनिमित्तत्वेनान्वाचष्टे। सतोवेति। शास्त्रस्यैवाविच्छेदेनप्रवर्तमानस्यस्वतन्त्रत्वमन्वाख्यानेइतिपूर्वस्मा एमः
द्व्याख्यानादस्यविशेषः। नचस्थानिवद्भावेनसिध्यति। अतएवाडित्त्वादावल्विधित्वात्। लुक्युपसंख्यानमिति। तत्रकौण्डिन्यच्या १५४
येनलोपसंज्ञायालुगादिसंज्ञयाबाधनादितिभावः। लुग्ग्रहणस्योपलक्षणार्थत्वात्श्लुलुपावपिगृह्येते॥

CC-0. In Public Domain. Digitization by eGangotri

नवाऽदर्शनस्येति। अदर्शनमात्रस्य लोपसंज्ञा विधीयमाना लुगादिसंज्ञाविषयमप्यवगाहते न च संज्ञानां बाध्यबाधकभावः
समावेशदर्शनात्तासामिति कडारसूत्रे वक्ष्यते। लोपस्य संज्ञि लोपसंज्ञि तस्य भावो लोपसंज्ञित्वं तस्मादित्यर्थः। प्रत्ययादर्शनं
त्विति। लुक्श्लुलुप्संज्ञानां संकरः प्राप्नोतीत्यर्थः। तत्र लुकि श्लुविधिरिति। उपलक्षणं चैतत्। तेन श्लावपि लुग्विधिः प्राप्नोति। जुहो
तीति उतो वृद्धिर्लुकि हलीति। लुप्यपि लुग्विधिप्रसङ्गः। हरीतकीति। लुक्तद्धितलुकीति। तथा लुकि लुप्विधिः। लवणः सूप इति
। युक्तवद्भावः स्यात्। नवा पृथगिति। एकयैव संज्ञया प्रदेशवाक्येषु संज्ञिप्रत्यायने सिद्धेऽनेकसंज्ञाविधानसामर्थ्यात्तद्भावित

नवाऽदर्शनस्य लोपसंज्ञित्वात्। नवा कर्तव्यम्। किं कारणम्। अदर्शनस्य लोपसंज्ञित्वात्। अदर्शनं लोपसंज्ञं
भवतीत्युच्यते। लुमत्संज्ञाश्चाऽप्यदर्शनस्य क्रियन्ते। तेन लुक्यपि भविष्यति। यद्येवम्। प्रत्ययादर्शनं तु लुम
त्संज्ञम्। प्रत्ययादर्शनं तु लुमत्संज्ञमपि प्राप्नोति। तत्र को दोषः। तत्र लुकि श्लुविधिः प्रतिषेध्यः। तत्र लुकि श्लु
विधिः प्राप्नोति स प्रतिषेध्यः। अत्ति हन्ति। श्लाविति द्विर्वचनं प्राप्नोति। नवा पृथक्संज्ञाकरणात्। नवा ए
ष दोषः। किं कारणम्। पृथक्संज्ञाकरणात्। पृथक्संज्ञाकरणसामर्थ्याल्लुकि श्लुविधिर्न भविष्यति। तस्मा
ददर्शनसामान्याल्लोपसंज्ञा लुमत्संज्ञा अवगाहते। यथैव तर्हि अदर्शनसामान्याल्लोपसंज्ञा लुमत्संज्ञा अव
गाहते। एवं लुमत्संज्ञा अपि लोपसंज्ञामवगाहेरन्। तत्र को दोषः॥

ग्रहणं विज्ञायते। तत्राश्रितस्वरूपव्यापारास्ते लुगादय आश्रीयन्ते आवृत्तिर्वा लुगादिशब्दानामाश्रीयत इति तद्भावितग्रह
णं सिध्यति। विधिप्रदेशेषु चेतरेतराश्रयदोषानवतारो नित्यशब्दाश्रयणाद्भाविसंज्ञाविज्ञानाद्वा। यथैवेति। तिसृणां संज्ञानां
विधानसामर्थ्यात्परस्परविषयावगाहनं तासां मा भूत्। लोपसंज्ञाविषये तु ताः प्रवर्तेरन्॥

तद्भावितेति। अत्रेदं तत्त्वम्। लुगादिपदानां लुगादिपदप्रयोज्येऽदर्शने च खण्डशः शक्तिः। खण्डशः शक्तिस्थले च प्रमुष्टखण्डा
न्तरस्याप्यन्वयबोधस्य प्रसिद्धत्वात्प्रकृते विधेयताप्रयोजकत्वेन तात्पर्यविषयेभ्यो लुगादिपदेभ्योऽदर्शनमात्रावगाही बोधः।
अन्यत्र तु खण्डद्वयावगाह्येवेति न काप्यनुपपत्तिरिति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

गोमतीति। च्वेर्लोपे कृते लुक्संज्ञायां सत्यां लुकृतद्धितलुकीति लुक् प्राप्नोतिपुंवद्भावस्त्वत्र न भवति वैयधिकरण्यात्। महद्भू-
ताब्राह्मणीत्यत्र तु भवति सामानाधिकरण्याद् नित्यत्वाद्धि शब्दानां क्वचिद्विकारस्यजनिकर्तृत्वं क्वचित्प्रकृतेः। ननु चात्रापी
ति। लुगादिसंज्ञानां भेदेनोपादानात्तद्भावितग्रहणमित्यर्थः। अस्त्यन्यदिति। प्रत्ययाप्रत्ययादर्शनस्य लोपसंज्ञा यथा स्यादि
ति। लोपमात्रे मा भूदिति। यथा गोमतीभूतेति च्वेर्लोपे कृते लुक्तद्धितलुकीति न भवति तस्माल्लोपसंज्ञायां नास्ति तद्भावित
ग्रहणम्। सतो निमित्ताभावादिति। निमित्तशब्देन निमित्तत्वमुच्यते तेन यस्य सतः कार्यं प्रति निमित्तत्वं नाभूत्तल्लुप्तोऽप्य
निमित्तं स्यादित्यर्थः। राज्ञ इति। सति ङसि भसंज्ञायां स्वादिष्विति पदसंज्ञा बाधितेति न लोपो नाभूदल्लोपश्चाभूदिति लुप्तेऽ

अगोमती गोमती सम्पन्ना गोमतीभूतेति लुकृतद्धितलुकीति ङीपो लुक् प्रसज्येत। ननु चात्रापि न वा पृथ-
क्संज्ञाकरणादित्येव सिद्धम्। यथैव तर्हि पृथक्संज्ञाकरणसामर्थ्यादत्र लुमत्संज्ञा लोपसंज्ञां नावगाहन्ते एवं
लोपसंज्ञापि लुमत्संज्ञां नावगाहेत। तत्र स एव दोषो लुक्युपसंख्यानमिति। अस्त्यन्यल्लोपसंज्ञायाः पृथक्क
रणे प्रयोजनम्। किम्। लुमत्संज्ञासु यदुच्यते तल्लोपमात्रे मा भूदिति। लुमति प्रतिषेधाद्वा। अथवा यदयं न लु
मताङ्गस्येति प्रत्ययलक्षणप्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवति लुकि प्रत्ययलक्षणमिति। सतो निमित्ता
भावात्पदसंज्ञाभावः। सन्नु प्रत्ययो येषां कार्याणामनिमित्तं राज्ञः पुरुष इति स लुप्तोऽप्यनिमित्तं स्याद् राजपु
रुष इति। अस्तु तस्या अनिमित्तं यास्वादौ पदमिति पदसंज्ञा या तु सुबन्तं पदमिति पदसंज्ञा सा भविष्यति।
सत्येतत्प्रत्यय आसीत्।

पि तस्मिन्न लोपो न स्यादल्लोपश्च स्यात्। अस्तु तस्यादिति। द्वे चात्र पदसंज्ञे। एका स्वादिष्विति अवयवस्य सा च भसंज्ञया बाधिता
। द्वितीया सुबन्तत्वेन समुदायस्य सा च लुप्तेऽपि स्थितैव। अल्लोपस्तु न लुमताङ्गस्येति प्रतिषेधान्न भवति। सत्येतदिति।—
कालविप्रकर्षप्रतिपादनायानद्यतनप्रत्ययप्रयोगः। राज्ञ इत्यत्राऽवधिभेदाद् संज्ञयाऽवयवस्यैव पदसंज्ञा बाध्यते न स
मुदायस्य सुबन्तत्वनिमित्ता। लुप्ते प्रत्ययेऽवधिभेदाभावात्प्रत्ययलक्षणेन प्राप्तया भसंज्ञया द्वे अपि पदसंज्ञे बाधितव्ये। ए
काऽपवादत्वेन द्वितीया परत्वेनेति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनयेति। पदसंज्ञाद्वयमनेन दर्शितम्। भसंज्ञा प्रत्ययलक्षणेन वर्णाश्रयाऽपि भवति। यथा अतृणेडिति मागमः। तुग्दीर्घत्वयोश्चेति। अनेनैव प्रत्ययनिमित्तानि कार्याणि लुप्तेऽपि प्रत्यये विधीयन्ते इति क्रमाभावात्पौर्वापर्यैन प्रकल्प्य ते कार्यस्य प्राधान्यात्तानेन शास्त्रव्यपदेशो विधीयेते। सिद्धं त्विति। अन्यो भावोऽन्यद्वस्तु। स्थान्यपेक्षयाऽऽदेशः। अन्यभाव एवान्यभाव्यमिति स्वार्थे ष्यञ्। तत्र परिवीरिति स्थानिनः क्विपो या संज्ञा यो व्यपदेशः पितृकृत्प्रत्ययइत्यादिः स लोपस्थानेन विधीयते ततस्सन्ति

अनया भविष्यत्यनया न भविष्यतीति। लुप्त इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसंज्ञा तावत एव सुबन्तं पदमिति। अस्ति च प्रत्ययलक्षणेन यजादिपरत्वे तिह्कृत्वा भसंज्ञा प्राप्नोति। तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात् परिवीरिति। तुग्दीर्घत्वयोश्च विप्रतिषेधो नोपपद्यते। क्व। परिवीरिति। किं कारणम्। एकयोगलक्षणत्वात्। एकयोगलक्षणे हि तुग्दीर्घत्वे। इह लुप्ते प्रत्यये सर्वाणि प्रत्ययाश्रयाणि कार्याणि पर्यवपन्नानि भवन्ति तान्येतेन प्रत्युत्थाप्यन्ते। अनेनैव तुगनेनैव च दीर्घत्वमिति। तदेकयोगलक्षणं भवति। एकयोगलक्षणानि च न प्रकल्पन्ते। सिद्धं तु स्थानिसंज्ञानुदेशादन्यभाव्यस्य। सिद्धमेतत्। कथम्। स्थानिसंज्ञाऽन्यभूतस्य भवतीति वक्तव्यम्। किं कृतं भवति। सत्तामात्रमनेन क्रियते। यथाप्राप्ते तुग्दीर्घत्वे भविष्यतः। तद्वक्तव्यं भवति। यद्यप्येतदुच्यते अथ वैतर्हि स्थानिवद्भावो नारभ्यते। स्थानिसंज्ञाऽन्यभूतस्यानल्विधाविति वक्ष्यामि। यद्येवमाङो यमहन आत्मनेपदं भवतीति हन्तेरेव स्यात्वधेर्न स्यात्। न हि काचिद्धन्तेः संज्ञाऽस्ति यावधेरतिदिश्येत। हन्तेरपि संज्ञाऽस्ति। का। हन्तिरेव।

बन्धनं प्राप्तं प्रवर्तत इति सिद्धो विप्रतिषेधः। सत्तामात्रमिति। कृदादिव्यपदेशास्येत्यर्थः। यद्येवमिति। हन्तिं स्वरूपेणोपादायात्मनेपदं विधीयते। न तु कांचित्संज्ञामाश्रित्येति भावः। नहीति। यद्यपि धातुसंज्ञाऽस्ति तथापि न तदुपादानेनात्मनेपदं विधीयते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हन्तेरपीति। आङो यमहन इति सूत्रोपात्तो हन्तिः संज्ञाप्रयोगस्य स्तु संज्ञीति वधेरपि हन्तिसंज्ञाऽतिदिश्यते। चित्रायां जाते
ति। चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानमित्यणो लुक्। टिड्ढाणञित्यत्रातदर्थ्यधिकारात् ङीपोऽल्विधित्वम्। वतण्डी-
ति। यथा आवट्यायनीति चापं बाधित्वा सर्वत्र ग्रहणापकर्षात् ष्फो भवत्येवं शार्ङ्गरवादिपाठात् प्राप्तं ङीनं बाधित्वा प्राचां ष्फः

कथम्। स्वंरूपं शब्दस्याशब्दसंज्ञेति वचनात्स्वंरूपं शब्दस्य संज्ञा भवतीति हन्तेरपि हन्तिः संज्ञा भ
विष्यति। भसंज्ञाङीप्ष्फगोरात्वेषु च सिद्धम्। भसंज्ञाङीप्ष्फगोरात्वेषु च सिद्धं भवति। भसंज्ञा। राज्ञः पुरु
षः। राजपुरुषः। प्रत्ययलक्षणेन यचीति भसंज्ञा प्राप्नोति। स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न
भवति। ङीप्। चित्रायां जाता चित्रा। प्रत्ययलक्षणेनाणन्तादितीकारः प्राप्नोति। स्थानिसंज्ञान्यभूत
स्यानल्विधाविति वचनान्न भविष्यति। ष्फ। वतण्डी। प्रत्ययलक्षणेन यञन्तादिति ष्फः प्राप्नोति स्था
निसंज्ञान्यभूतस्यानल्विधाविति वचनान्न भवति। गोरात्वम्। गामिच्छति। गव्यति। प्रत्ययलक्षणेनामि
औतोऽम्शसोरित्यात्वं प्राप्नोति। स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न भवति। तस्य दोषो ङेन
कारलोपेत्वेम्विधयः। तस्यैतस्य लक्षणस्य दोषः। ङे नकारलोपः। आर्द्रे च र्मन्। लोहिते चर्मन्। प्रत्यय
लक्षणेन यचीति भसंज्ञा सिद्धा भवति। स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न प्राप्नोति। इत्वम्।
आग्नीः। प्रत्ययलक्षणेन हलीतीत्वं सिद्धं भवति। स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न प्राप्नोति। इम्। अ
तृणेट्। प्रत्ययलक्षणेन हलीति इम् सिद्धो भवति। स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न भ
विष्यति। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं सतो निमित्ताभावात्पदसंज्ञाभावस्तु दीर्घत्वयोश्च
विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात्परिवीरिति। नैष दोषः। वक्ष्यत्यत्र परिहारम्। इहापि प-
रिवीरिति।

स्यात्। अतदर्थ्यधिकाराद् हल्विधिः ष्फः। गव्यतीति। औतोऽम्शसोरित्यत्राचीत्यनुवर्तनादल्विधिरात्वम्। चर्मन्निति। सु-
पां सुलुगिति ङेर्लुकि अत्र भसंज्ञाया अभावान्नलोपः प्राप्नोतीति न ङिसंबुद्ध्योरिति वक्तव्यं जायते॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

परत्वाद्दीर्घत्वमिति।सतिप्रत्ययेयत्कार्यंदृष्टंतल्लुक्तेऽपिभवतीतिसूत्रार्थः।परिवीयेत्यादौचसतिप्रत्ययेदीर्घोदृष्टोनतुणिति
परिवीरित्यत्रापिदीर्घएवभवति।प्रयोजनमिति।यद्यप्यल्विध्यर्थमिदमत्रणेडित्यादौतथापिविशेषविहितत्वान्नुमाद-
योऽप्यस्यैवोदाहरणानीतिभावः।अनड्वानिति।पूर्वंसंबुद्धिलोपमाश्रित्यैतदुक्तम्।यदितुविशेषविहितत्वादम्बुद्धा-

प्राप्त्वपरविप्रतिषेधेनपरत्वाद्दीर्घत्वंभविष्यति।कानिपुनरस्यप्रयोजनानि।प्रयोजनमएक्तशिलो
पेनु मामौगुणवृद्धीदीर्घत्वेमडाट्स्नम्विधयः।अएक्तलोपेशिलोपेचकृतेनुम्अमामौगुणवृ
द्धीदीर्घत्वमिम्अडाटौस्नम्विधिरितिप्रयोजनानि।नुम्।अग्नेत्रीतेवाजिनात्रीषधस्याताताःपिण्डा
नाम्।अमामौ।हेअनड्वन्।अनड्वान्।गुणः।अधोक्।अलेट्।वृद्धिः।न्यमार्ट्।दीर्घत्वम्।अग्नेत्रीतेवा-
जिनात्रीषधस्याताताःपिण्डानाम्।इम्।अतृणेट्।अडाटौ।अधोक्।अलेट्।ऐयः।औनः।स्नम्वि
धिः।अभिनोऽत्र।अच्छिनोऽत्र।अएक्तशिलोपयोःकृतयोरेतेविधयोनप्राप्नुवन्ति।प्रत्ययल
क्षणेनभवन्ति।नैतानिसन्तिप्रयोजनानि।स्थानिवद्भावेनाप्येतानिसिद्धानि।नसिध्यन्ति।आदेशःस्था
निवदित्युच्यतेनचलोपआदेशः।लोपोऽप्यादेशः।कथम्।आदिश्यतेयःसआदेशः।लोपोऽप्यादिश्य
ते।दोषःखल्वपिस्यात्।यदिलोपोनादेशःस्यात्।इहाचःपरस्मिन्पूर्वविधावित्येतस्यभूयिष्ठानिलोप
उदाहरणानितानिनस्युः।यत्रतर्हिस्थानिवद्भावोनास्तितदर्थमयंयोगोवक्तव्यः।क्वचस्थानिवद्भावोना
स्ति।योऽल्विधिः।किंप्रयोजनम्।प्रयोजनंङीनकारलोपेत्वम्विधयः।भसंज्ञाङीपूष्कगोणत्वेषुचदो
षः।भसंज्ञाङीपूष्कगोणत्वेषुचदोषोभवति।भसंज्ञायांतावन्नदोषः।आचार्यप्रवृत्तिर्ज्ञापयतिनप्रत्य
यलक्षणेनभसंज्ञाभवतीतियदयंनङिसंबुद्ध्योरितिङौप्रतिषेधंशास्ति॥

वितिपूर्वमम्प्रवर्ततेतदासंबुद्धिलोपोनस्यात्॥ऐयइति।इयर्तेर्लङितिपूर्शपःश्लुर्द्विर्वचनमर्त्तिपिपर्त्योश्चेतीत्वमभ्यास
स्यासवर्णेइतीयङ्।औनइति।उन्देर्लङिसिपूश्नम्श्नान्नलोपोदश्चेतिरुत्वम्।नचलोपइति।दिशिरुच्चारणक्रियोनचलो ॥
पउच्चार्यते।अभावरूपत्वात्।लोपोऽपीति।प्रतिपादनक्रियोऽत्रदिशिरितिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ अण्योऽकार इति। अकारेणाण्णन्तं न विशेष्यते किं तर्ह्यणैव। सर्वस्याणः अकार एवेति विशेषणसामर्थ्याच्छ्रूयमाणाका- ११९
१५७ ररूपादणादिति विज्ञायते। अथवाऽण्योऽकार इति अणोऽकारो विशेष्यत इति वर्णनिमित्तो ङीप् न तु प्रत्ययनिमित्त इति प्र
त्ययलक्षणाभावः। यञ्ञ्योऽकार इति। अकारावयवादित्यर्थः। अथवा यञवयवे यञ्शब्दोऽत्र वर्तते यञवयवो योऽकार
इत्यर्थः। पूर्ववदेतद्व्याख्येयम्। अच्यमीति। अच्प्रधानं तद्विशेषणममीति तदादिविध्यभावः। तत्र वर्णनिमित्तमा
त्वं न प्रत्ययनिमित्तमिति दोषाभावः। क्रियत एतदिति। त्वयापि ज्ञापनार्थमवश्यं वक्तव्यमिति भावः। शास इत्त्वे इति।
कृतेऽप्यस्मिन् सूत्रे नियमार्थमेतद्वक्तव्यमाशास्त इत्यादौ मा भूत्। अकृते तु विध्यर्थम्। आशास्त इत्यादौ तु न भवति

ङीप्यपि नैवं विज्ञायते अणन्तादकारान्तादिति। कथं तर्हि अण्योऽकार इति। फ्केऽपि नैवं विज्ञायते। यञ
न्तादकारान्तादिति। कथं तर्हि। यञ्ञ्योऽकार इति। गोण्यत्वेऽपि नैवं विज्ञायते अमि अचीति। कथं तर्हि। अ
च्यमीति। प्रयोजनान्यपि तर्हि नैतानि सन्ति। यत्तावदुच्यते ङौ नकारलोप इति। क्रियत एतन्न्यास एव। न-
ङिसंबुद्ध्योरिति। इत्त्वमपि वक्ष्यत्येतत्। शास इत्त्वे आशासः क्वाविति। इग्विधिरपि हलीति निवृत्तम्। यदि
हलीति निवृत्तं तदेतानि अत्रापि प्राप्नोति। एवं तर्ह्यचि नेत्यनुवर्तिष्यते। न तर्हीदानीमयं योगो वक्तव्यः
। वक्तव्यश्च। किं प्रयोजनम्। प्रत्ययं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन यथा स्यात्। शब्दं गृहीत्वा यदुच्य
ते तत्प्रत्ययलक्षणेन मा भूदिति। किं प्रयोजनम्। शोभना दृषदोऽस्य ब्राह्मणस्य सुदृषद् ब्राह्मणः। सोर्म
नसी अलोमोषसी इत्येष स्वरो मा भूत्॥

शासु अनुशिष्टावित्यस्यैव तत्र ग्रहणात्। प्रत्ययं गृहीत्वेति। स्थानिवद्भावेन सिद्धे सत्ययं योगो नियमार्थः। प्रत्यय एव यस्य ल
क्षणं तत्प्रत्ययलोपे यथा स्यात्। सोर्मनसीत्यत्र मनिनसन्ग्रहणानि चेति वचनादसुप्रत्ययस्याप्रत्ययस्य च गृह्यत इति
सुदृषदित्यत्र स्थानिवद्भावाभावादुत्तरपदाद्युदात्तत्वाभावेन ञ्सुभ्यामित्यन्तोदात्तत्वं भवति। तत्र चोत्तरपदादिरित्यधि राम:
कारादसन्तमुत्तरपदं गृह्यत इति सुदृषदित्यत्रापि स्थानिवद्भावादसन्तत्वमुत्तरपदस्य स्यात्॥ ॥ १५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न लुमताङ्गस्य। लुमतीति। लुमत्संज्ञया प्रतिपादितमदर्शनं लुमत् तत्र यः प्रतिषेधस्तस्मिन्नित्यर्थः। एकपदस्वरस्येति। एकपदाश्रयो यः स्वरस्तस्येत्यर्थः। यत्तु पदस्य पदादिति पदद्वयाश्रयः स्वरस्तत्र प्रत्ययलक्षणं भवत्येव। दधितिष्ठति तिङ् तिङ इति निघातः। अङ्गस्येत्यङ्गाधिकारनिर्देशाद् ञ्निति कित्स्वरस्य चानाङ्गत्वात् प्रतिषेधस्याऽप्राप्तिरिति भावः। सर्वस्तोम इति। सर्वस्य सुपीति यदाद्युदात्तत्वं तदेव बहुव्रीहौ प्रकृत्येति विधीयत इत्येकपदस्वरो भवत्येव। सर्पिरिति। सर्पिःशब्दोऽन्तोदात्तः प्रत्ययस्वरेण। घृतादित्वाद्वा सप्तन्शब्दोऽपि घृतादित्वादन्तोदात्तः। निस्वरेणत्वाद्युदात्तत्वे विशेषो न स्यात्। माहि दातामिति। गातिस्था-

न लुमताङ्गस्य॥ लुमति प्रतिषेध एकपदस्वरस्योपसंख्यानम्॥ लुमति प्रतिषेध एकपदस्वरस्योपसंख्यानं कर्तव्यम्। एकपदस्वरे च लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्। किमविशेषेण। नेत्याह। सर्वामन्त्रितसिज्लुक्स्वरवर्जम्। सर्वस्वरमामन्त्रितस्वरं सिज्लुक्स्वरं च वर्जयित्वा। सर्वस्वर। सर्वस्तोमः सर्वपृष्ठः। सर्वस्य सुपीत्याद्युदात्तत्वं यथा स्यात्। आमन्त्रितस्वर। सर्पिरागच्छ सप्ताऽऽगच्छत। आमन्त्रितस्य चेत्याद्युदात्तत्वं यथा स्यात्। सिज्लुक्। माहि दाताम् माहि धाताम्। आदिः सिचोऽन्यतरस्यामित्येष स्वरो यथा स्यात्। किं प्रयोजनम्। प्रयोजनं ञ्निति किल्लुकि स्वराः। ञ्निति कित्स्वरा लुकि प्रयोजयन्ति। गर्गा वत्सा विदा उर्वाः। उष्ट्रग्रीवा वामरज्जुः। ञ्नितीत्याद्युदात्तत्वं माभूदिति। इह चात्रयः। कित इत्यन्तोदात्तत्वं माभूदिति। पथिमथोः सर्वनामस्थाने लुकि। पथिमथोः सर्वनामस्थाने लुकि प्रयोजनम्। पथिमथोः सर्वनामस्थाने लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्।

घ्विति लेर्लुकि विधातव्ये सिचो लुग्विधानं प्रत्ययलक्षणार्थम्। ञ्निति किल्लुकीति। इकार उच्चारणार्थः। ञ्नितिकितां प्रत्ययानां लुकि कृते स्वरा निवर्त्यमानतया प्रयोजनमिति पदानां संबन्धः। भाष्यकारस्तु वस्त्वर्थं व्याचष्टे। ञ्निति कित्स्वरा इति प्रतिषेधमित्यध्याहारः। उष्ट्रग्रीवा वामरज्जुरिति। देवपथादित्वात्कनो लुप्। असंज्ञायां चेदमुदाहरणं संज्ञायां तु संज्ञायामुपमानमिति भवितव्यमाद्युदात्तत्वेन। अत्रय इति। एणादिभ्यां त्रिप् अदेस्त्रिनिश्चेति त्रिबन्तोऽत्रिशब्द-
आद्युदात्तः।

॥

CC-0. In Public Domain. Digitization by eGangotri

पथिप्रियो मथिप्रिय इति। पूर्वपदप्रकृतिस्वरेणान्तोदात्तौ पथिमथिशब्दौ भवतः। अहर्ददातीति। असुपीति प्रसज्यप्रतिषेधः पर्युदासे तु दीर्घोह्नो निदाघ इत्यत्रापि सुप्शब्दे निदाघशब्दे परतो रत्वं स्यात् रुत्वं चेष्यते। लोपशब्देन सोर्लुप्तत्वात् प्रत्ययलक्षणेन सुपि नेति रत्वप्रतिषेधाद्रुत्वे यत्वे तस्य च लोपे दीर्घोह्नो निदाघ इति सिध्यति। लुकि तु प्रत्ययलक्षणप्रतिषेधाद्रुत्वे सत्सु-त्वाभावादहर्ददातीत्यादि सिध्यति। उत्तरपदत्वे चेति। उत्तरपदम् उत्तरशब्देनोच्यते पदैकदेशलोपात्। तेनोत्तरपदस्य पदत्वे पदव्यपदेशे कर्तव्ये प्रत्ययलक्षणं न भवतीत्यर्थः। परमवाचेति। समासार्था या विभक्तिः कृता तां प्रत्ययलक्षणेनाश्रित्य पदत्वनिबन्धनानि कुत्वादीनि प्राप्नुवन्ति भसंज्ञा तु यस्माद् यजादिविधिरिति समुदायस्यैव न त्ववयवस्यात् दधिसेचा

पथिप्रियो मथिप्रियः। पथिमथोः सर्वनामस्थान इत्येषस्वरो मा भूदिति॥ अह्नो रविधौ॥ अह्नो रविधाने लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्। अहर्ददाति अहर्भुङ्क्ते। रोऽसुपीति प्रत्ययलक्षणेन प्रतिषेधो मा भूदिति॥ उत्तरपदत्वे चापदादिविधौ॥ उत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्। परमवाचा परमवाचे। परमगोदुहा परमगोदुहे। परमश्वलिहा परमश्वलिहे। पदस्येति प्रत्ययलक्षणेन कुत्वादीनि मा भूवन्निति। अपदादिविधाविति किमर्थम्। दधिसेचौ दधिसेचः। सात्पदाद्यो रिति प्रतिषेधो यथा स्यात्। यद्यपदादिविधावित्युच्यते। उत्तरपदाधिकारो न प्रकल्पेत। तत्र को दोषः। कर्णो वर्णलक्षणादित्येवमा दिविधिर्न सिध्यति। यदि पुनर्न लोपादिविधौ लुत्यन्ते लुमता लुप्ते प्रत्ययलक्षणं न भवतीत्युच्येत। नैवं शक्यम्। इह हि राजकुमार्यौ राजकुमार्य इति शाकलं प्रसज्येत। नैष दोषः। यदेतत् सिति शाकलं नेति। एतत् प्रत्यये शाकलं नेति वक्ष्यामि।

विति। दध्नः सेचौ विति षष्ठीसमासः। उपपदसमासे तु प्राक्सुबुत्पत्तेः समासविधानात् सेचृशब्दस्य पदसंज्ञाया अभावात् सादित्वं सकारस्य न स्यात्। अनभिधानाच्च सोपपदाद्धिज भावाद् धिषेचावित्यादिप्रयोगाभावात्। कर्णो वर्णलक्षणादिति। नन्वपदादिविधावित्युच्यते स्वरश्चायं पदादिविधिः। ककारोऽन्त्यादिर्न लकार इत्यदोषः स्वरविधौ व्यञ्जनमविद्यमानवदन्तत्वादित्यपदेशे। सूत्रं चासमासार्थं स्यात्। कर्णशब्दाद् वर्ण आदित्वादचि कृते शुङ्क्षः कर्ण इत्याद्युदा राम॰

त्तत्वं यथा स्यात्। यदि पुनरिति। तेन पूर्वस्मिन् परत्र च भवत्येव प्रत्ययलक्षणम्। राजकुमार्याविति। इकोऽसवर्ण इत्य १५८

त्रैङः पदान्तादतीत्यतः पदग्रहणमनुवर्तते तत्र प्रत्ययलक्षणेन पदान्तत्वाच्छाकलप्रसङ्गः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दधि अधुनेति। अधुना प्रत्यय इद्धमो विधीयते तत इदम् इदूपस्येति लोपः। यस्माद्यदिति। प्रत्यासत्त्येति भावः। राजकुमार्यो वि
त्यत्र यद्यपि समुदायाद्विहितस्तथाप्यवयवादप्यसौ विहित इति बुद्धिर्भवत्येव। समुदाये द्विर्वचनेऽवयवद्विर्वचनबुद्धिवत्। उक्त
मिति। उक्तविधावेङः पदान्तादिति पदाधिकारः। वचनादिति। समासे ह्युत्तरपदं भवति न च कर्णप्राब्दो अचूप्रत्ययान्तोऽस्ति अ-
पूआदिषु हि स्वाङ्गाद्धीनादिति पठ्यते तेन खञ्जादिभ्य एव हीनस्वाङ्गवाचिभ्योऽचूप्रत्ययो भवति न च कर्णप्राब्दो हीनस्वाङ्गवा

यदि प्रत्यये णत्वाकलनं नेत्युच्यते दधि अधुना मधु अधुना अत्राऽपि न प्राप्नोति। प्रत्यये नण्णाकत्वं भवति कतर
स्मिन्। यस्माद्यः प्रत्ययो विहित इति। इह तर्हि परमदिवा परमदिवौ। दिव उदित्युत्वं प्राप्नोति। अस्तु तर्ह्यवि-
शेषेण। ननु चोक्तम् उत्तरपदाधिकारेण प्रकल्प्येतेति। वचनादुत्तरपदाधिकारो भविष्यति। तत्तर्हि वक्तव्यम्। न
वक्तव्यम्। अनुवृत्तिः करिष्यते। इदमस्ति यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्। सुप्तिङन्तं पदम्। यस्मात्सु-
प्तिङ्विधिस्तदादि सुबन्तं तिङन्तं च। नः क्ये। नान्तं क्ये पदसंज्ञं भवतीति यस्मात्क्यविधिस्तदादि सुबन्तं च। सि
ति च पूर्वं पदसंज्ञं भवति यस्मात्सिद्विधिस्तदादि सुबन्तं च। स्वादिष्वसर्वनामस्थाने। स्वादिषु सर्वनामस्थाने पूर्वं प
दसंज्ञं भवति। यस्मात्स्वादिविधिस्तदादि सुबन्तं च। यचि भम्। यजादि प्रत्यये पूर्वं भं भवति। यस्माद्यजादिविधि
स्तदादि सुबन्तं च। इह तर्हि परमवाक्। असर्वनामस्थान इति प्रतिषेधः प्राप्नोति। अस्तु तस्याः प्रतिषेधः। या
स्वादौ पदमिति पदसंज्ञा। या तु सुबन्तं पदमिति पदसंज्ञा सा भविष्यति। सत्येतत्प्रत्यये आसीत्। अनया भवि
ष्यत्यनया न भविष्यतीति। लुप्त इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसंज्ञा तावत एवावधेः
सुबन्तं पदमिति।

ची। तत्तर्हीति। उत्तरपदत्वे चापदादिविधावित्येतत्। यचि भमिति। ततश्च परमवाचेत्यत्र वाक्शब्दस्य भत्वात्पदत्वाऽभावः। इ
ह तर्हीति। असर्वनामस्थान इति प्रसज्यप्रतिषेधं मन्यते ततश्च सर्वनामस्थाने परतो यस्मात्स्वादिविधिस्तदादि सुबन्तं च पद
संज्ञं न भवतीति प्रत्ययलक्षणेन सर्वनामस्थानपरत्वात्पदत्वप्रतिषेधात् कुत्वाप्राप्तिः स सैतदिति। अवधिभेदात्संज्ञिनां भेदात्।

CC-0. In Public Domain. Digitization by eGangotri

बलीयांसइति। विप्रतिषेधे परं कार्यमित्यस्मात्परशब्दस्य पूर्वपदार्थे नित्यत्वे तन्मूलनरूपत्वात्। एवं तर्हीति। योगविभागे सति सर्वाप्राप्तिः प्रतिषिध्यत इति दोषाभावः। असर्वनामस्थानइति। नञः क्रियापदेन संबन्धादुत्तरपदेनासंबन्धोऽयचीत्येतच्च सर्वनामस्थानविशेषणं तेनायमर्थो भवति यजादौ सर्वनामस्थाने परतः पदसंज्ञा न भवतीति। हलादौ तु सुप्राब्धे भवत्येव। भाष्ये तु वस्तुमात्रमुपन्यस्तम्। सर्वनामस्थाने अयचीति।

अस्ति च प्रत्ययलक्षणेन सर्वनामस्थान परतेति कृत्वा प्रतिषेधाच्च बलीयांसो भवन्तीति प्रतिषेधः प्राप्नोति। नाप्रतिषेधात्। नायं प्रसज्यप्रतिषेधः सर्वनामस्थाने नेति। किं तर्हि पर्युदासोऽयं यदन्यत्सर्वनामस्थानादिति सर्वनामस्थाने अव्यापारः। यदि केन चित्प्राप्नोति तेन भविष्यति। पूर्वेण च प्राप्नोति। अप्राप्तेर्वा। अथवा अनन्तरा या प्राप्तिः सा प्रतिषिध्यते। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधेत। नोत्सहते प्रतिषिद्धा सती बाधितुम्। यद्येवं परमवाचो परमवाच इति सुप्तिङन्तं पदमिति पदसंज्ञा प्राप्नोति। एवं तर्हि योगविभागः करिष्यते। स्वादिषु पूर्वं पदसंज्ञं भवति। ततः सर्वनामस्थाने अयचि। पूर्वं पदसंज्ञं भवति। ततो भम्। भसंज्ञं भवति यजादावसर्वनामस्थानइति। यदि तर्हि स्वादपि पदं भवति प्रत्ययः प्लुतविकारे पदान्तग्रहणं चोदयिष्यति। इह माभूत्। भद्रं करोषि गौरिति तस्मिन्क्रियमाणेऽपि प्राप्नोति। वाक्यपदयोरन्त्यस्येत्येवं तत्। इह तर्हि दधिसेचः सात्पदाद्योरिति पदादिलक्षणः षत्वप्रतिषेधो न प्राप्नोति। माभूदेवं पदस्यादिः पदादिः पदादेर्नेति। कथं तर्हि पदादादिः पदादिः पदादेर्नेत्येवं भविष्यति। नैवं शक्यम्। इहापि प्रसज्येत कस्त्वा सुकुमारीषु किशोरीष्विति। सात्प्रतिषेधो ज्ञापकः स्वादिषु पदत्वेन येषां पदसंज्ञा न तेभ्यः प्रतिषेधो भवतीति। इह तर्हि बकुसे चौबकुसेचः। बकुजं यत्प्रत्ययः। अत्र पदादादिः पदादिः पदादेर्नेत्युच्यमानेऽपि न सिध्यति। एवं तर्हि उत्तरपदत्वे च पदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं भवतीति वक्ष्यामि। तन्नियमार्थं भविष्यति पदादिविधावेव न पदान्तविधाविति॥

यजादौ सर्वनामस्थाने पदसंज्ञानिषेधात्सामर्थ्यादयमर्थः संपद्यते अयजादौ सर्वनामस्थाने पदसंज्ञा भवतीति। वाक्यपदयोरिति। गोरित्योकारो वाक्यान्तो न भवतीत्यप्लुतो न भवतः। पदादादिरिति। पञ्चमीति योगविभागात्समासः॥ राम: १५९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथं बहुसे चाविति। समासाभावान्नोत्तरपदत्वं नापि पूर्वपदत्वम्। द्वन्द्वेऽन्त्यस्येति। उत्तरपदत्वे चेत्यनेनैव सिद्धे नियमार्थमिदमन्त्यस्यैवेति मध्यमपदस्यापि पूर्वपदापेक्षयोत्तरपदत्वसंभवात्प्रत्ययलक्षणप्रतिषेधप्रसङ्गात्। मुख्ये तूत्तरपदे संभवति कथं मध्यमपदस्य ग्रहणं स्यादिति चिन्त्यमेतत्। आकारप्रकरणादिति। आकारस्य नियमार्थत्वेन प्रस्तावादित्यर्थः। अथवाऽऽकारे प्रकरणादातदित्यत्र सिचः प्रकृतत्वादित्यर्थः। इति युष्मत्पुत्र इति। पदादुत्तरयोर्युष्मदस्मदोरादेशविधानादिति शब्दप्रयोगः। श्रूयमाणविभक्तिविशेषणमिति। षष्ठीचतुर्थीद्वितीयास्थित्येव सिद्धे स्थग्रहणे सत्ययमर्थो भवति। तासु येत्ववस्थिते यु

कथं बहुसेचौ बहुसेचः। बहुचूपूर्वस्य च -पदादिविधावेव न पदान्तविधाविति। द्वन्द्वेऽन्त्यस्य। द्वन्द्वेऽन्त्यस्य लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्। वाक्त्वक्चम्। इहाभूवन्निति प्रत्ययलक्षणेन जुस्भावः प्राप्नोति। सिचि जुसोऽप्रसङ्ग आकारप्रकरणात्। सिचि जुसोऽप्रसङ्गः। किं कारणम्। आकारप्रकरणात्। आतद्इति वर्तते तन्नियमार्थं भविष्यति। आत एव सिज्लुगन्तान्नान्यस्मात्सिज्लुगन्तादिति। इह च इति युष्मत्पुत्रो ददाति इत्यस्मत्पुत्रो ददातीत्यत्र प्रत्ययलक्षणेन युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावाविति वान्नावादयः प्राप्नुवन्ति। युष्मदस्मदोः स्थग्रहणात्। स्थग्रहणं तत्र क्रियते तच्छ्रूयमाणविभक्तिविशेषणं विज्ञास्यते। अस्त्यन्यत्स्थग्रहणस्य प्रयोजनम्। किम्। सविभक्तिकस्य वान्नावादयो यथा स्युरिति। नैतदस्ति प्रयोजनम्।

ष्मदस्मदी इति श्रूयमाणासु चावस्थानं भवति न तु लुप्तासु लुप्तस्याधारत्वासंभवात्। अस्त्यन्यदिति। तिष्ठतिरत्रानावपि वर्तते यथा तपसि स्थितः तपो न जहातीत्यर्थः। तथा समये तिष्ठ सुग्रीवेति समयं मा हासीरित्यर्थः। तेन सति स्थग्रहणे तत्सहितयोः-कार्यं विज्ञायते। अथवा यथा रथस्थ आनीयतामिति सरथ आनीयते तथा षष्ठ्यादिसहितयोर्युष्मदस्मदोः कार्यं भवतीति विज्ञायते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पदस्येतिवर्ततइति। केवलयोःपदत्वाभावात्तद्वयवंपदंगृह्यतेइति भावः। यत्रत्विति। अत्रहितेएवपदेइतितयोरेवादेश
प्रसङ्गः। सर्वग्रहणमपीति। अनेकाल्त्वात्सर्वादेशत्वेलब्धेसर्वग्रहणमनुवृत्तंषष्ठ्यन्तंविपरिणाम्यमानंसर्वस्यपदस्यविभ
क्तिसहितस्यस्थानित्वमवगमयतीत्यर्थः। याजयांचकारेति। परत्वात्तिबादिषुकृतेषुआमइतिलुकिप्रत्ययलक्षणेनया
जयामित्यस्यतिङन्तत्वमितिपूर्वःपक्षः। आमिलिलोपादिति। नाप्राप्तेषुतिबादिषुलुगारभ्यमाणस्तेषांबाधकः। अङ्गाधि

पदस्येतिवर्तते। विभक्त्यन्तंचपदंतत्राऽन्तरेणाऽपिसर्वग्रहणंसविभक्तिकस्यैवभविष्यन्ति। भवेत्सिद्धं यत्र
विभक्त्यन्तंपदंयत्रतुखल्वविभक्तौपदंतत्रनसिध्यति। ग्रामोवांदीयतेग्रामोनौदीयते। सर्वग्रहणमपिप्रकृ
तमनुवर्ततेतेनसविभक्तिकस्यैवभविष्यन्ति। इहचशुक्लामंयाजयांचकारेतितिङ्ङः तिङ्इतितस्यचनि
घातस्तस्माच्चानिघातःप्राप्नोति। आमिलिलोपात्तस्यचानिघातस्तस्माच्चनिघातःसिद्धोभविष्यति। अङ्गा
धिकारेद्वौविधिप्रतिषेधौ। अङ्गाधिकारेद्वौविधिप्रतिषेधौनसिध्यतः। जिगमिषसंविवृत्सा। अङ्गस्येतीटो
विधिप्रतिषेधौनप्राप्नुतः। क्रमेर्दीर्घत्वंच। किंच। इटश्चविधिप्रतिषेधौ। नेत्याह। अदेशोऽयंचःपठितः। क्रमेश्च
दीर्घत्वम्। उत्क्रामसंक्रामेति। इहकिंचिदङ्गाधिकारेलुमतालुप्तेप्रत्ययलक्षणेनभवतिकिंचिच्चान्यत्र-
नभवति॥

कारइति। अङ्गस्येतिस्वर्यतेतेनाङ्गाधिकारविहितंयत्कार्यंतल्लुमतालुप्तेप्रत्ययेनभवतीतिसूत्रार्थेदोषोपन्यासः। जिग
मिषेति। अतोहरितिलुकिकृतेगमेरिट्परस्मैपदेष्वितीड्नप्राप्नोति। संविवृत्सेति। नवृद्भ्यश्चतुर्भ्यइतीट्प्रतिषेधः। क्रमेरि
ति। कार्यसमीपेश्रूयमाणश्चकारःकार्यमेवसमुच्चिनुयादित्यभिप्रायेण। किंचेति। अदेशइति। कार्यस्यसमुच्चेतव्यस्याभा
वात्सामर्थ्यात्प्रकृतिसमुच्चयइत्यर्थः। किंचिच्चेति। जुनिलित्स्वराः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न लुमता तस्मिन्निति। लुमता यो लुप्तः — प्रत्ययस्तस्मिन्यत्कार्यमाङ्गमनाङ्गं वा तन्न भवतीत्यर्थः। अत्र यद्यत्र स्वरो न भवति तद्धितस्यैव कितोऽन्तोदात्तत्वविधानाल्लुकि कृते कार्यिणोऽसत्त्वात्। प्रत्ययलक्षणं हि यदन्यस्य कार्यं तत्प्रत्ययलोपेऽपि भवति न तु यत्प्रत्ययस्यैव कार्यं तदपि न हि वचनेनासतः कार्यं शक्यते प्रतिपादयितुम्। तद्विशेषणमिति। विशेषणएवोपक्षीणत्वात्कार्यं प्रति निमित्तभावो नास्तीत्यर्थः। हनिणिङादेशादिति। लुका लुङो विषयत्वापहाराद्विषयसप्तम्याश्रयणेऽप्यसिद्धिः। तद्विशेषणं लुङ्ग्रहणमिति। तेन लुङ्परे चिण्यादेशविधानम्। न लुमतेति।

यदि पुनर्न लुमता तस्मिन्नित्युच्यते। अथ न लुमता तस्मिन्नित्युच्यमाने किं सिद्धमेतद्भवति। द्वौ विधिप्रतिषेधौ क्रमे दीर्घत्वं च। बाढं सिद्धम्। न द्वौ विधिप्रतिषेधौ परस्मैपदेष्वित्युच्यते। कथं तर्हि। सकारादाविति तद्विशेषणं परस्मैपदग्रहणम्। न खल्वपि क्रमे दीर्घत्वं परस्मैपदेष्वित्युच्यते। कथं तर्हि। शितीति तद्विशेषणं परस्मैपदग्रहणम्। न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तल्लोपे। न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तल्लोपे न सिध्यन्ति। अवधि भवता दस्युः। अगायि भवता ग्रामः। अध्यगायि भवताऽनुवाकः। तल्लोपे कृते लुङीति हनिणिङादेशा न प्राप्नुवन्ति। नैष दोषः। न लुङीति हनिणिङादेशा उच्यन्ते। किं तर्हि। आर्धधातुक इति तद्विशेषणं लुङ्ग्रहणम्। इह च सर्वस्तोमः सर्वपृष्ठः सर्वस्य सुपीत्याद्युदात्तत्वं न प्राप्नोति। तच्चापि वक्तव्यम्। न वक्तव्यम्। न लुमताङ्गस्येत्येव सिद्धम्। कथम्। न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते। किं तर्हि। योऽसौ लुमता लुप्यते तस्मिन्यदङ्गं तस्य यत्कार्यं तन्न भवति। एवमपि सर्वस्वरो न सिध्यति। कर्तव्योऽत्र यत्नः॥ अलोऽन्त्यात्पूर्व उपधा॥ किमिदमल्ग्रहणमन्त्यविशेषणम्। एवं भवितुमर्हति।

अङ्गस्येत्यस्य स्वरितत्वाप्रतिज्ञानात्तत्र लुमता लुप्ते प्रत्यये यदङ्गं तस्य यत्कार्यं प्रत्ययाश्रयमाङ्गमनाङ्गं वा तन्न भवतीत्यर्थः। कर्तव्योऽत्र यत्न इति। सर्वशब्दार्थं वचनं कर्तव्यम्॥ अलोऽन्त्यात्॥ किमिदमिति। प्रथमा पञ्चमी वेति संदेहात्प्रश्नः। एवमिति। प्रथमायामभिप्रेतायामसंदेहार्थमलित्येकवचनं वक्तव्यं स्यात्। अन्त्यादिति पञ्चमीसाहचर्याच्चाऽलित्यपि पञ्चम्यन्तमिति भावः। अल्ग्रहणमिति। निर्दिश्यतेऽभिधीयतेऽनेनेति निर्देशः। यद्यन्त्यः प्रत्याय्यत इत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संघातप्रतिषेध इति। पूर्वस्याऽविशेषितत्वात् समुदायाऽवयवसन्निधौ च समुदायस्यैव कार्यित्वादेकाज्द्विर्व-
चन इवेति भावः। अन्त्यविशेषणत्वे वर्णनिर्देशे जातिग्रहणेऽप्यलइत्युपादानसामर्थ्यात् संख्या विवक्ष्यते। यदि-
पुनरिति। अत्राप्यल्ग्रहणसामर्थ्यात् संख्या विवक्ष्यते पिबेरदन्तत्वप्रतिज्ञानाच्च लिङ्गादल्समुदायस्य संज्ञि-
त्वे गुणस्य प्राप्तिरेव नास्ति किमदन्तत्वप्रतिज्ञानेन। सूत्रं चेति। अलन्त्यादिति पठ्यमान इत्यर्थः। अन्त्यविज्ञा-

उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्संघातप्रतिषेधः। उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्संघातस्य प्रतिषेधो वक्तव्यः।
संघातस्योपधासंज्ञा प्राप्नोति। तत्र को दोषः। शास इदङ्हलोः शिष्टात् शिष्टाम्। संघातस्येत्त्वं प्राप्नोति। यदि
पुनरलन्त्यादित्युच्यते। एवमप्यन्त्योऽविशेषितो भवति। तत्र को दोषः। संघातादपि पूर्वस्योपधासंज्ञा प्रस-
ज्येत। तत्र को दोषः। शास इदङ्हलोः शिष्टः शिष्टवान्। शकारस्येत्त्वं प्रसज्येत। सूत्रं च भिद्यते। यथान्यासमे-
वास्तु। ननु चोक्तमुपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्तु संघातप्रतिषेध इति। नैष दोषः। अन्त्यविज्ञाना-
त्सिद्धम्। सिद्धमेतत्। कथम्। अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति। अन्त्यविज्ञानात्सिद्धमिति
चेन्नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे। अन्त्यविज्ञानात्सिद्धमिति चेत्तन्न। किं कारणम्। नानर्थकेऽलो-
न्त्यविधिरनभ्यासविकारे। अनर्थकेऽलोन्त्यस्य विधिर्नेत्येषा परिभाषा कर्तव्या। किमविशेषेण। नेत्याह। अन-
भ्यासविकारे। अभ्यासविकारान्वर्जयित्वा। भृञामित्। अर्तिपिपर्त्योश्चेति। कान्येतस्याः परिभाषायाः प्रयोज-
नानि। प्रयोजनमव्यक्तानुकरणस्यात इतौ। अव्यक्तानुकरणस्यात इतावित्यन्त्यस्य प्राप्नोति। अनर्थकेऽ-
लोन्त्यविधिर्न भवतीति न दोषो भवति। नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति नान्त्यस्य पररूपं
भवतीति। यदयं नाम्रेडितस्यान्त्यस्य तु वेत्याह। घ्वसोरेद्धावभ्यासलोपश्च। घ्वसोरेद्धावभ्यासलोपश्चे-
त्यन्त्यस्य प्राप्नोति। अनर्थकेऽलोऽन्त्यविधिर्नेति न दोषो भवति। एतदपि नास्ति प्रयोजनम्।

नादिति। उपधाया इति षष्ठ्यन्त्यमलं नीयत इत्यर्थः। अनभ्यासविकार इति। अभ्यासोऽनर्थकः शब्दस्वरूपावृत्तिर्नार्थस्य। अ-
व्यक्तानुकरणस्येति। अव्यक्तानुकरणस्य योऽच्छब्दस्तस्येतौ पररूपमिति सूत्रार्थः। यदयमिति। आम्रेडितस्य वेत्येव वक्त-
व्यसात्। घ्वसोरिति। अनभ्यासविकार इ विप्रतिषेधो रूपवत्त्वादेशो लोपस्तु नीरूपः। तथा च पस्पशायां लोपागमवर्णविकारज्ञ इति लोपविकारौ भेदेन निर्दिष्टौ।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनर्लोपवेति। लोपो यीत्यतो लोपग्रहणोऽनुवर्तमान इति भावः। तत्र घ्वसोरेद्धावभ्यासलोपश्चेति वक्तव्यं तत्र व्याख्यानादभ्यासस्य
लोप एव भविष्यति न त्वेत्त्वं योगविभागो वा करिष्यते घ्वसोरेद्धौ ततोऽभ्यासस्येति तत्र च लोपोऽनुवर्तिष्यते तत्र पुनर्लोप-
वचनात् सर्वापहारार्थादलोऽन्त्यस्येति बाध्यते। द्विशकारको निर्देश इति। लोपशब्दात् कृदन्तात् संज्ञिनार्थेनार्थवत्त्वाद्वि
भक्तौ कृतायां शकारः प्रतिनिर्दिश्यते तस्य चेत्संज्ञायां सत्यां सर्वादेशो लोपो भवति इत्संज्ञोपदेश एव प्रवर्तते तत्कार्यं
तु प्रयोग इत्येष सिद्धान्तः। तिष्ठतिसूत्रमिति। लक्ष्यलक्षणभावस्याविवक्षितत्वात् तिष्ठतु सूत्रमिति न कृतम्। तत्राय-

पुनर्लोपवचनसामर्थ्यात् सर्वस्य भविष्यति। अथवा शित्लोपः करिष्यते स शित् सर्वस्येति सर्वादेशो भवि
ष्यति। स तर्हि शकारः कर्तव्यः। न कर्तव्यः। क्रियते न्यास एव। द्विशकारको निर्देशः। घ्वसोरेद्धावभ्यासलो
पश्चेति। आपिलोपोऽकोऽनचि। तिष्ठतिसूत्रम्। अन्यथा व्याख्यायते। आपि हलि लोप इत्यन्त्यस्य
प्राप्नोति। अनर्थकेऽलोन्त्यविधिर्नेति न दोषो भवति। एतदपि नास्ति प्रयोजनम्। अत एव लोपं वक्ष्या
मि। तदनो ग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। अनाप्यक इति। तच्च प्रथ
मानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। हलीत्येषा सप्तमी अनिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति। तस्मि
न्निति निर्दिष्टे पूर्वस्येति। अत्र लोपोऽभ्यासस्य। अन्त्यस्य प्राप्नोति। नानर्थकेऽलोऽन्त्यविधिरिति न
दोषो भवति। एतदपि नास्ति प्रयोजनम्। अत्र ग्रहणसामर्थ्यात् सर्वस्य भविष्यति। अस्त्यन्यदत्र ग्रह
णस्य प्रयोजनम्। किम्। सन्नधिकारोऽपेक्ष्यते। इह मा भूत्। दधौ ददौ। अन्तरेणाप्यत्र ग्रहणं सन्न
धिकारमपेक्षिष्यामहे। सं तर्हि सकारादिरपेक्ष्यते सनि सकारादाविति।

मर्थं तिष्ठतिसूत्रं न प्रत्याख्यायते तत्तु अन्यथा व्याख्यायते। तत्रानचीत्यनेन हलीत्यस्यार्थो व्याख्यातः। आप्यक
इत्यनुवृत्तिर्दर्शिता। अत एवेति। अनाप्यक इति सामान्येनाऽनादेशं विधाय हलादौ तु तस्यैव लोपो विधीयत इ
त्यर्थः। येन नाव्यवधानमिति त्यदाद्यत्वेन व्यवधानमाश्रीयते। अत्र ग्रहणसामर्थ्यादिति। मीमादीनामधिकारादेव
सिद्धेरत्र ग्रहणादयमर्थ आश्रीयते योऽभ्याससत्वेन निर्ज्ञातस्तस्य समग्रस्य लोपो न त्वलोऽन्त्यस्येति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाजातीयकोऽन्त्य इति। एतच्च षष्ठीवतापञ्चमीपक्ष एवाश्रितः। षष्ठीप्रथमयोरपि न दोषः। षष्ठीपक्षे निर्धारणे षष्ठी निर्धारणं च तुल्यजातीयस्य भवतीति अलां मध्ये योऽन्त्योऽल् तस्मात्पूर्व उपधासंज्ञ इत्यलेवोक्तान्न्यायात्प्रतीयते। प्रथमाबहुवचनपक्षेऽप्ययमर्थः। अन्त्यात्पूर्वोऽलुपधासंज्ञ इति। अल इति जातौ बहुवचनम्। अवधिमत्तुल्यजातीयश्चाऽवधिरिति अलोऽन्त्यादिति विज्ञायते॥ तस्मिन्निति॥ किमुदाहरणमिति। इतिकरणस्य गोरित्ययमाहेत्यादौ स्वरूपपदार्थकत्वेन व्यवस्थापकत्वदर्शनात्प्रश्नः। दध्यत्रेति। यदि तस्मिन्नणि चेति तस्माच्छस इति चात्रै

इह माभूत्। जिज्ञपयिषतीति। अन्तरेणाप्यत्र ग्रहणं सनं सकारादिमपेक्षिष्यामहे। प्रकृतयस्तर्ह्यपेक्ष्यन्ते एतासां प्रकृतीनां लोपो यथा स्यात्। इह माभूत्। पिपक्षति यियक्षति। अन्तरेणाप्यत्र ग्रहणमेताः प्रकृतीरपेक्षिष्यामहे। विषयस्तर्ह्यपेक्ष्यते। मुचोऽकर्मकस्य गुणो वेति। इह माभूत्। मुमुक्षति गामिति। अन्तरेणाप्यत्र ग्रहणमेतं विषयमपेक्षिष्यामहे। कथम्। अकर्मकस्येत्युच्यते तेन यत्रैवायं मुचिरकर्मकस्तत्रैव भविष्यति। तस्मान्नार्थोऽनया परिभाषया नानर्थकेऽलोऽन्त्यविधिरिति। अलोऽन्त्यात्पूर्वोऽलुपधेति वा। अथवा व्यक्तमेव पठितव्यम्। अलोऽन्त्यात्पूर्वोऽलुपधासंज्ञा भवतीति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। अवचनाल्लोकविज्ञानात्सिद्धम्। अन्तरेणापि वचनं लोकविज्ञानात्सिद्धमेतत्। तद्यथा। लोके अमीषां ब्राह्मणानामन्त्यात्पूर्व आनीयतामित्युक्ते यथाजातीयकोऽन्त्यस्तथाजातीयकोऽन्त्यात्पूर्व आनीयते॥ तस्मिन्निति निर्दिष्टे पूर्वस्य॥ तस्मादित्युत्तरस्य॥ किमुदाहरणम्। इह तावत् तस्मिन्निति निर्दिष्टे पूर्वस्येति इको यणचि। दध्यत्र। मध्वत्र। इह तस्मादित्युत्तरस्येति द्व्यन्तरुपसर्गेभ्योऽप ईत्। द्वीपम् अन्तरीपं समीपम्॥

वेते परिभाषे उपास्थास्येतां तदा तत्रैव पूर्वग्रहणमुत्तरग्रहणं चाकरिष्येतामिति भावः। अत्र व्यवच्छेद्यमस्ति यौष्माकीणः अस्मभ्यं देहि आस्माकीन युष्मभ्यं दीयतामिति खञः परयोर्युष्मदस्मदोरादेशेन भवतः। वृक्षानित्यत्र च पूर्वसवर्णदीर्घभूताच्छसः पूर्वस्य षकारस्य नत्वं न भवति। अथ प्रास इति स्थानषष्ठीति व्याख्यानात्षकारस्य न भवतीत्युच्यते एवमप्युच्चरत आनुपलभत इत्यादौ पूर्वसवर्णदीर्घात्पूर्वस्य प्रासो नत्वं व्यवच्छेद्यमेव॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यथाजातीयकेनेति। इतिकरणात्स्वरूपग्रहणे नैव भाव्यमिति भावः। थालाप्रकारमात्रमभिधीयते इति तद्वतोऽभि-
धानाय जातीयर् प्रत्ययः कृतः। लौकिके प्रयोगे लाघवानादरप्रदर्शनाय प्रत्ययद्वयप्रयोगः। केवलेनापि जातीयराप्रकार-
वानवगम्यत एव। इदं चाऽपीति सिद्धान्तवादी। इतिकरणोऽत्रार्थनिर्देशार्थः एवं स्वरूपमिति वचनात्स्वरूपग्रहणे प्राप्ते।
सर्वनाम्नाऽयमिति। सूत्रान्तरोपात्तस्य तस्मिन्नित्यस्य तस्मादित्यस्य च नैतदनुकरणं किं तर्हि सर्वनाम्ना निर्देश इत्यर्थः।
एतेन यत्र सप्तम्यर्थे निर्देशः पञ्चम्यर्थे निर्देशश्च तत्रोभयोरुपस्थानम्। विशेषा अपीति। अपिः संभावनायां न समुच्चये
न हि विशेषपरित्यागेनेह शास्त्रे सामान्यमस्ति यदुदाहरणं स्यात् तस्मात् सर्वे विशेषा इहोदाहरणमित्यर्थः। सामान्य-

अन्यथाजातीयकेन शब्देन निर्देशः क्रियते अन्यथाजातीयक उदाह्रियते। किं तर्ह्युदाहरणम्। इह
तावत् तस्मिन्निति निर्दिष्टे पूर्वस्येति तस्मिन्नणि च युष्माकास्माकाविति तस्मादित्युत्तरस्येति तस्माच्छ-
सो नः पुंसीति। इदं चाप्युदाहरणम्। इको यणचि द्व्यन्तरुपसर्गेभ्योऽप ईदिति। कथम्। सर्वनाम्नाऽ-
यं निर्देशः क्रियते। सर्वनाम च सामान्यवाची तत्र सामान्ये निर्दिष्टे विशेषा अप्युदाहरणानि भवन्ति। किं
पुनः सामान्यं को विशेषः। गौः सामान्यं कृष्णो विशेषः। न तर्हीदानीं कृष्णः सामान्यं गौर्विशेषो भवति। भव-
ति च। यदि तर्हि सामान्यमपि विशेषो विशेषोऽपि सामान्यं सामान्यविशेषौ न प्रकल्पेते। प्रकल्पेते च।
कथम्। विवक्षातः। यदाऽस्य गोः सामान्येन विवक्षितो भवति कृष्णो विशेषत्वेन तदा गौः सामान्यं कृष्णो
विशेषः। यदाऽस्य कृष्णः सामान्येन विवक्षितो भवति गौर्विशेषत्वेन तदा कृष्णः सामान्यम् गौर्विशेषः। अपर
आह। प्रकल्पेते च। कथम्। पितापुत्रवत्। तद्यथा। स एव कंचित्प्रति पिता भवति कंचित्प्रति पुत्रो भवति॥

स्य सर्वे विशेषेषु भावात्। किं पुनरिति। सामान्यविशेषभावस्याऽनवस्थानात्प्रश्नः। कदाचिद्गुणाङ्गोत्वमात्रग्रहणं
पश्चात्कृष्णादिविशेषाऽवगमः कदाचित्तु पूर्वं कृष्णादेर्ग्रहणं पश्चाद्गोत्वादेः। गौः सामान्यमिति। यद्विशेष्यं प्रधानं तत्सामान्यम्
। यत्तु विशेषणत्वेन परोपकारितया निर्दिश्यते स विशेष इति तात्पर्यम्। इहापि तस्मिन्नित्यनेन सप्तम्यर्थः सामान्यं निर्दिष्टमभि-
हितीत्यादयस्तु विशेषाः। पितापुत्रवदिति। जन्यजनकशक्तिद्वययोगवदेकस्यैव विशेषणविशेष्यशक्तिद्वययोगात्कदाचित्का- ॥
चिच्छक्तिराश्रीयते। सप्तमीनिर्दिष्टे पूर्वस्येत्येव कस्मान्नोच्यत इत्याह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· १६३ एते खल्वपीति। नैर्देशिकानां निर्देशप्रयोजनानां मध्ये वार्त्ततरका युक्ततरका इत्यर्थः। भाष्यकारवचनप्रामाण्यादत्र तरप्प्रत्ययः। तमपा ह्यत्र भाव्यम्। एतैर्हीति। यदि हि सप्तमीनिर्दिष्ट इत्युच्यते तदा सप्तमीशब्देन यो निर्दिष्ट इति प्रतीयेतेति भावः। किमर्थमिति। किमर्थमुपसर्गयुक्तस्य धातोर्निर्देशः क्रियते तस्मिन्निति पूर्वस्येति कस्मान्नोच्यत इति भावः। ननु निर्दिष्ट इत्येवोच्यतामिति प्रश्नः केवलस्य दिशेर्दानार्थत्वादिहानुपयोगात्। शब्द इति। अन्तरेणापि निर्दिष्टग्रहणं तस्मिन्निति पूर्वस्येत्येव निर्दिष्टत्वे लब्धे पुनर्निर्दिष्टशब्द उपादीयमानो बहिर्भावं गमयति शब्दाच्च बहिर्भूतः शब्द एव भवतीति। जनपद इति। तत्रायमर्थः स्याद् जनपदवाचिनि शब्दे परतश्चातुरर्थिकस्य लुब् भवती- ११९

एवमिहापि स एव कंचित्प्रति सामान्यं कंचित्प्रति विशेषः। एते खल्वपि नैर्देशिकानां वार्त्ततरका भवन्ति ये सर्वनाम्ना निर्देशाः क्रियन्ते। एतैर्हि बहुतरकं व्याप्यते। अथ किमर्थमुपसर्गनिर्देशः क्रियते। शब्दे सप्तम्यां निर्दिष्टे पूर्वस्य कार्यं यथा स्यात् अर्थे मा भूत्। जनपदे अतिशायन इति। किं गतमेतदुपसर्गेण आहो स्विच्छब्दाधिक्यादर्थाधिक्यम्। गतमित्याह। कथम्। निरयं बहिर्भावे वर्तते। तद्यथा। निष्क्रान्तो देशाद् निर्देशो बहिर्देश इति गम्यते। शब्दश्च शब्दाद्बहिर्भूतः। अर्थोऽबहिर्भूतः। अथ निर्दिष्टग्रहणं किमर्थम्। निर्दिष्टग्रहणमानन्तर्यार्थम्। निर्दिष्टग्रहणं क्रियते। आनन्तर्यार्थम्। आनन्तर्यमात्रे कार्यं यथा स्यात्। इको यणचि। दध्यत्र। मध्वत्र। इह मा भूत्। समिधौ समिधः। दृषदौ दृषदः। किमर्थं पुनरिदमुच्यते॥

ति। अथेति। ननु प्रयोजनस्योक्तत्वात् पुनः प्रश्नानुपपत्तिः। अयं भावः। जनपदे लुबित्यत्रार्थेन पौर्वापर्याभावाज्जनपदे यः प्रत्यय उत्पन्नस्तस्य लुबिति तथातिशायने वर्तमानात्तमबादयः इत्यर्थनिर्देशे षष्ठ्युपस्थानं न भविष्यति। यद्येवैतत्प्रयोजनं तदा तस्मिन्निति शब्दे पूर्वस्येति वक्तव्यम्। निर्दिष्टग्रहणमिति। पूर्वोक्तप्रयोजनाभावादिति भावः। निःशब्दश्चानैरन्तर्ये वर्तते दिशिश्चोच्चारणक्रियः। तेन निरन्तरोच्चारिते कार्यं लभ्यते। समिधाविति। ननु संहितायामित्युच्यते न च व्यवहितयोः संहितास्ति अचीति चाधिकरणमौपश्लेषिकं निर्दिष्टं न च व्यवहितमुपश्लिष्टं भवति। नैष दोषः। वर्णानां परः संनिकर्षः संहिता सा चात्रास्ति अ- रामः
चीति सत्सप्तमी विज्ञायते व्यवहितेऽपि पूर्वशब्दो वर्तते इति यत्र विषये यथाभूत इक् संभवति अन्तरो व्यवहितो वा तथाभूत- १६३
स्यैव यणादेशः स्यात्। किमर्थमिति। किं नियमार्थमथ षष्ठीप्रक्लृप्त्यर्थमिति प्रश्नः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वोत्तरयोरिति।कर्मणिषष्ठीयोगःसंबन्धः।तदयमर्थः।अच्युपश्लिष्टस्यैकोयणाभाव्यम्।यथाचपरस्मिन्पूर्वउपश्लि
ष्टएवंपूर्वस्मिन्नपिपरः।तिङ्ङतिङ इत्यत्रापियथातिङन्तात्परंतिङन्तंभवत्येवंपूर्वमपितत्रषष्ठीप्रकृतिपक्षेषष्ठ्यनुवर्तयि
तव्येतिगौरवप्रसङ्गान्नियमार्थमित्युक्तम्।योगयोरिति।युज्येतेइतियोगौकर्मणिघञ्।अचीतिसत्सप्तमीपक्षेऽप्यनियमप्रस
ङ्गः।अचिपूर्वस्येति।उपपदविभक्तेःकारकविभक्तिर्बलीयसीतिन्यायादधिकरणसप्तमीकृतानतुदिग्योगलक्षणापञ्चमीत
त्रदध्युदकमित्यादौपर्यायप्रसङ्गः।नहियुगपदेकस्यस्थानित्वंनिमित्तत्वंचोपपद्यतइतिनियमार्थंवचनंपूर्वस्यैवाऽनन्तरस्ये

तस्मिन्नतस्मादितिपूर्वोत्तरयोर्योगाविशेषान्नियमार्थंवचनंदध्युदकंपचत्योदनम्।तस्मिंस्तस्मादितिपूर्वोत्तर
योर्योगयोरविशेषान्नियमार्थोऽयमारम्भः।ग्रामेदेवदत्तःपूर्वःपरइतिसंदेहः।ग्रामाद्देवदत्तःपूर्वःपरइतिसंदेहः
।एवमिहापिदध्युदकंपचत्योदनम्।उभाविकौउभावचौ।अचिपूर्वस्यअचिपरस्येतिसंदेहः।तिङ्ङतिङ इति।
अतिङःपूर्वस्यअतिङःपरस्येतिसंदेहः।इष्यतेचाचिपूर्वस्यस्यात्।अतिङश्चपरस्येति।तच्चान्तरेणवचनंनसि
ध्यतीतिनियमार्थंवचनम्।एवमर्थमिदमुच्यते।अस्तिप्रयोजनमेतत्।किंतर्हीति।अथयत्रोभयंनिर्दिश्यते
किंतत्रपूर्वस्यकार्यंभवतिआहोस्वित्परस्येति।।उभयनिर्देशेविप्रतिषेधात्पञ्चमीनिर्देशः।।उभयनिर्देशे
विप्रतिषेधात्पञ्चमीनिर्देशोभविष्यति।किंप्रयोजनम्।प्रयोजनमतोल्सार्वधातुकानुदात्तत्वे।वक्ष्यतितता
स्यादिभ्योऽनुदात्तत्वेसप्तमीनिर्देशोऽभ्यस्तसिजर्थइति।तस्मिन्क्रियमाणेतास्यादिभ्यःपरस्यलसार्वधा
तुकस्यलसार्वधातुकेपरतस्तास्यादीनामितिसंदेहः।तास्यादिभ्यःपरस्यलसार्वधातुकस्य।बहोरिष्ठादीना
मादिलोपे।बहोरुत्तरेषामिष्ठेमेयसामिष्ठेमेयःसुपरतोबहोरितिसंदेहः।बहोरुत्तरेषामिष्ठेमेयसाम्।

वभवतीतिद्वयंचानेनक्रियतेपरनिवृत्तिर्व्यवहितनिवृत्तिश्च।संदेहस्तूपक्रममात्रतयोपन्यस्तः।नहिसंदेहादलक्षणमितिन्याया-
त्पर्यायप्रसङ्गात्।अथयत्रेति।यथाबहोर्लोपइत्यत्रयुगपच्चैकस्यकार्यित्वनिमित्तत्वासंभवात्प्रश्नः।विप्रतिषेधादिति।सू-
त्रपाठापेक्षयापरस्यव्यवस्थापकत्वमित्यर्थः।किंप्रयोजनमिति।विभक्तिविशेषनिर्देशस्यानवकाशत्वाद्दृश्यमाणोऽभिप्रा-
यः।संदेहइति।संदेहाच्चपर्यायप्रसङ्गः।इष्ठेमेयःस्विति।तदाचबहुशब्दस्यलोपभूभावौपर्यायेणस्याताम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कौ· गोतो णिदिति। यदि गोशब्दस्य णित्त्वं स्यात्तदा तिष्ठति गौरित्यत्र वचनसामर्थ्यादनङ्गस्यापि वृद्धिः स्यात्। ङमो ह्रस्वादिति। ङमो- २१९
१६४ ङमुडागमे सति कुर्वन्नास्ते इत्यत्र णत्वप्रसङ्गः। पदस्य चैकोऽनकारोऽन्तो न तु द्वाविति णत्वनिषेधो नास्ति। विभक्तीति। पूर्वोपात्तेषु सू-
त्रेषु सप्तमीनिर्देशस्य क्वचित्पूर्वार्थत्वात् क्वचिदुत्तरार्थत्वात् सावकाशत्वम्। पञ्चमी तु निरवकाशेति परस्य कार्यित्वं बोधयिष्य-
तीति भावः। यथार्थं वेति। यथाविषयमित्यर्थः। प्रदेशेषु कार्यिणः षष्ठ्यैव निर्देष्टव्याः। प्रकल्पकमिति चेदिति। यत्र षष्ठी नास्ति

गोतो णित्। गोतः परस्य सर्वनामस्थानस्य सर्वनामस्थाने परतो गोत इति संदेहः। गोतः परस्य सर्वनामस्थानस्य। रुदादिभ्यः सार्वधातुके। रुदादिभ्यः परस्य सार्वधातुकस्य सार्वधातुके परतो रुदादीनामिति संदेहः। रुदादिभ्यः परस्य सार्वधातुकस्य। आने मुक्। ईदासः। आस उत्तरस्यानस्याने परत आस इति संदेहः। आस उत्तरस्यानस्य। आमि सर्वनाम्नः सुट्। सर्वनाम्न उत्तरस्यामः आमि परतः सर्वनाम्न इति संदेहः। सर्वनाम्न उत्तरस्यामः। घेर्ङिति। आण्नद्याः। नद्या उत्तरेषां ङितां ङित्सु परतो नद्या इति संदेहः। नद्या उत्तरेषां ङितामाट्। याडापः। आप उत्तरस्य ङितो ङिति परत आप इति संदेहः। आप उत्तरस्य ङितः। ङमो ह्रस्वादचि ङमुण्नित्यम्। ङम उत्तरस्याचोऽचि परतो ङम इति संदेहः। ङम उत्तरस्याचः। विभक्तिविशेषनिर्देशानवकाशत्वाद्विप्रतिषेधः। विभक्तिविशेषनिर्देशस्यानवकाशत्वादयुक्तो विप्रतिषेधः। सर्वत्रैवात्र कृतसामर्थ्या सप्तमी अकृतसामर्थ्या पञ्चमीति कृत्वा पञ्चमीनिर्देशो भविष्यति। यथार्थं वा षष्ठीनिर्देशः। यथार्थं वा षष्ठीनिर्देशः कर्तव्यः। यत्र पूर्वस्य कार्यमिष्यते तत्र पूर्वस्य षष्ठी कर्तव्या। यत्र परस्य कार्यमिष्यते तत्र परस्य षष्ठी कर्तव्या। स तर्हि तथा निर्देशः कर्तव्यः। न कर्तव्यः। अनेनैव प्रक्लृप्तिर्भविष्यति। तस्मिन्निति निर्दिष्टे पूर्वस्य षष्ठी तस्मादित्युत्तरस्य षष्ठीति। तत्तर्हि षष्ठीग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। षष्ठी स्थानेयोगेति। प्रकल्पकमिति चेन्नियमाभावः। प्रकल्पकमिति चेन्नियमस्याभावः। उक्तं चैतन्नियमार्थोऽयमारम्भ इति। प्रत्ययविधौ खल्वपि पञ्चम्यः प्रकल्पिकाः स्युः। तत्र को दोषः। गुप्तिज्किद्भ्यः सन्। गुप्तिज्किद्भ्य इत्येषा पञ्चमी सन्निति प्रथमायाः षष्ठीं प्रकल्पयेत्। तस्मादित्युत्तरस्येति। अस्तु न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्राऽऽन्तर्यतः सनः सन्नेव भविष्यति। नैवं शक्यम्। इत्संज्ञा न प्रकल्पेत। उपदेशे इति इत्संज्ञोच्यते। राम:

तत्र तस्याः प्रक्लृप्तिः क्रियते यत्र षष्ठ्युच्चारिता इको यणचीत्यादौ तत्रानेन नियमो न क्रियते न हि व्यापारद्वयमुपपद्यते येन षष्ठीप्रक्लृप्तिस्तस्या नियमश्चेति १६४
भावः। इत्संज्ञेति। आदेशस्योपदेशाभावात्तस्येत्संज्ञा न सिध्यतीत्यर्थः। स्थानी चोच्चारितकाल एव निवृत्त्यभिमुखतया प्रतिपन्न इति स्थानिन्यपीत्संज्ञा नास्ति। ॥

CC-0. In Public Domain. Digitization by eGangotri

यणीति प्रथमाया इति। ततश्चैकः स्थाने यणं न लभ्येतेइकोऽप्यन्य आदेशः स्यादयणोऽप्यन्य इत्यभिमतास्थान्यादेशभावव्यवस्था न स्यात्। उभयकार्यप्रसङ्ग इति। विरोधाभावाद्योगपद्येनोभयोः कार्यं प्राप्नोति। मा भून्नियम इति। षष्ठीप्रक्लृप्त्यैव तत्फलस्य लब्धत्वादिति भावः। यत्र षष्ठी नास्ति तत्रासौ प्रकल्प्यते। यत्र त्वस्ति कोयणचीति तत्रापि पूर्वस्यैव षष्ठी न परस्येति प्रकल्प्यते। कृतायामि

प्रकृतिविकाराऽव्यवस्था च। प्रकृतिविकारयोश्च व्यवस्थानं प्रकल्प्यतेइकोयणचि अचीत्येषा सप्तमी यणीति प्रथमायाः षष्ठीं प्रकल्पयेत् तस्मिन्निति निर्दिष्टे पूर्वस्येति। सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठी प्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्गः। सप्तमीपञ्चम्योश्च भावादुभयत्रैव षष्ठी प्राप्नोति। तास्यादिभ्य इत्येषा पञ्चमी लसार्वधातुक इत्यस्याः सप्तम्याः षष्ठीं प्रकल्पयेत्। तस्मादित्युत्तरस्येति। तथा लसार्वधातुक इत्येषा सप्तमी तास्यादिभ्य इति पञ्चम्याः षष्ठीं प्रकल्पयेत् तस्मिन्निति निर्दिष्टे पूर्वस्येति। तत्र को दोषः। तत्रोभयकार्यप्रसङ्गः। तत्र उभयोः कार्यं प्राप्नोति। नैष दोषः। यत्तावदुच्यते। प्रकल्पकमिति चेन्नियमाभाव इति। मा भून्नियमः। सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्यते पञ्चमीनिर्दिष्टे परस्य। यावता सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्यते पञ्चमीनिर्दिष्टे परस्य नोत्सहते सप्तमीनिर्दिष्टे परस्य कार्यं भवितुं नापि पञ्चमीनिर्दिष्टे पूर्वस्य। यदप्युच्यते प्रत्ययविधौ पञ्चम्यः प्रकल्पिकाः स्युरिति। सन्तु प्रकल्पिकाः। ननु चोक्तं गुप्तिज्किद्भ्यः सन्नित्येषा पञ्चमी सन्निति प्रथमायाः षष्ठीं प्रकल्पयेत् तस्मादित्युत्तरस्येति। परिहृतमेतत्। न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते तत्रान्तर्यतः सनः सन्नेव भविष्यति। ननु चोक्तं नैवं शक्यमित्संज्ञा न प्रकल्पेत उपदेश इति इत्संज्ञोच्यते। स्यादेष दोषो यदीत्संज्ञा आदेशं प्रतीक्षेत। तत्र खल्वकृतायामित्संज्ञायां लोपे च कृते आदेशो भविष्यति। उपदेश इति हीत्संज्ञोच्यते। अथवा नानुत्पन्ने सनि प्रक्लृप्त्या भवितव्यं यदा चोत्पन्नः सन् तदा कृतसामर्थ्या पञ्चमीति कृत्वा प्रक्लृप्तिर्न भविष्यति। यदप्युच्यते प्रकृतिविकाराव्यवस्था चेति। अत्राऽपि प्रकृतौ षष्ठी इक इति विकृतौ प्रथमा यणिति।

संज्ञायामिति। सूत्र एवोच्चारितस्य इत्संज्ञेति प्रयोगे स शब्द एव सन्नित्कार्यं लभत इत्यर्थः। अथवेति। परत्वविशिष्टस्य सन उत्पादने ऽपेक्षया तत्प्रवृत्त्यन्तराभावान्नास्ति पञ्चम्याः प्रकल्पकत्वमित्यर्थः। प्रकृतौ षष्ठीति। इको यणचीति श्रुतयोरेव स्थान्यादेशभावोपपादनान्नास्ति षष्ठीप्रकल्पनम्। अपेक्षाया अभावादित्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यद्यमिति। यद्युभयनिर्देशात्परस्य षष्ठी प्रकल्पने सति ग्रहणकवाक्याद्वाक्यान्तरमनुमीयते तास्यादिभ्योल सार्वधातुकस्य लसार्व-
धातुके तास्यादीनामनुदात्तत्वं भवतीति तदाऽऽद्गुणाद्त्याद्यवपि तथैव प्रक्लृप्तिर्भविष्यतीति किं पूर्वपरयोरित्यनेनेत्यर्थः। तत्र-
परत्वानवकाशत्वाभ्यां नियमपक्षवत् षष्ठी प्रकल्पनपक्षे व्यवस्था। दीर्घाच्छे तुग्भवतीत्यत्र षष्ठी स्थाने व्यत्ययेन पञ्चमीति व्याख्या-
नात् शुराच्छायेत्यादेर्वोज्ञापकाद्दीर्घसे वतुग्भवति न तु च्छस्य॥ स्वं रूपं शब्द॥ स्वरूपस्य पर्यायाणां तद्विशेषाणां च ग्रहणे प्राप्ते नि-
यमार्था परिभाषेयमिति केचिदाहुः। अन्ये तु लिङ्गाभावाद्विध्यन्तरशेषभावाभावाच्च नेयं परिभाषा अपि तु संज्ञा सूत्रमिदमिति
प्रतिपन्नाः। देवदत्तादयश्च संज्ञाशब्दा नियमार्था इति सिद्धान्तः। सर्वार्थप्रत्यायनशक्तियुक्तो हि शब्दः सर्वशब्दप्रत्याय्यशक्ति

यत्र च नाम सौत्री षष्ठी नास्ति तत्र प्रक्लृप्त्या भवितव्यम्। अथवाऽस्तु तावद्दिको यणीति यत्र नाम सौत्री षष्ठी
यदि चेदानीमचीत्येषा सप्तमी यणीति प्रथमायाः षष्ठी प्रकल्पयेत् तस्मिन्निति निर्दिष्टे पूर्वस्येति। अस्तु न क-
श्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्राऽऽन्तर्यतो यणो यणेव भविष्यति। यदप्युच्यते सप्तमी पञ्चम्योश्च भावा-
दुभयत्र षष्ठी प्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्ग इति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति नोभे युगपत्प्रकल्पि-
के भवत इति। यदयमेकः पूर्वपरयोरिति पूर्वपरग्रहणं करोति। तस्मिन्निति निर्दिष्टे पूर्वस्य तस्मादित्युत्त-
रस्य॥ स्वं रूपं शब्दस्याशब्दसंज्ञा॥ रूपग्रहणं किमर्थं न स्वं शब्दस्याशब्दसंज्ञा भवतीत्येव रूपं शब्दस्य सं-
ज्ञा भविष्यति न ह्यन्यत्स्वं शब्दस्यास्त्यन्यदतो रूपात्।

युक्त एवार्थ इति व्यवहाराय नियमः क्रियते। रूपशब्देन चेहाग्निशब्दत्वादिकं शुकसारिकापुरुषोदीरितभिन्नशब्दव्यक्तिस-
मवेतं सामान्यमभिधीयते तत्र व्यक्तेः सामान्यं संज्ञा सामान्यस्य वा व्यक्तिरिति व्याख्याने कामचारः। व्यक्तिः कार्यं प्रतिपद्यमाना सा-
मान्यप्रतिबद्धैव प्रतिपद्यते सामान्यमपि कार्यं प्रतिपद्यमानं व्यक्तिद्वारेणैव प्रतिपद्यत इति फलेन कश्चिद्भेदः। रूपग्रहणमिति। प्र-
तीतावुपदेशानपेक्षत्वादन्तरङ्गत्वादहेयत्वादसाधारणत्वाच्च रूपमेव गृहीष्यते अर्थो हि सं बन्धग्रहणमपेक्षते अनुकरण-
शब्देषु नाऽर्थः प्रतीयते साधारणश्च पर्यायैरपि प्रत्यायनात्। न चार्थः संज्ञा शक्यते वक्तुं संज्ञित्वे चार्थस्य सूत्रमनर्थकमिति प्रश्नः।

CC-0. In Public Domain. Digitization by eGangotri

एवं तर्हीति। यत एवेह रूपग्रहणस्य व्यावर्त्यं नास्ति तत एतज्ज्ञापकं सति तु व्यावर्त्ये तत्रैवोपक्षयान्न ज्ञापकं स्यात्। अर्थवद्ग्रहणे इति। अर्थयुक्तं रूपं गृह्यत इत्यर्थः। तेन काष्ठे कुष्ठे इत्यत्र ष्ठे इति प्रगृह्यसंज्ञा न भवति यत्र चार्थवता रूपेण शब्देनाश्रीयते तत्रेदं नोपतिष्ठते यथा वर्णग्रहणेषु टेरेत्वे चेति पचेते इत्यत्रानर्थकस्यापि टेरेत्वं भवति। किमर्थमिति। वक्ष्यमाणोऽभिप्रायः। शब्देनार्थगतेरिति। कात्यायनवचनप्रामाण्याद स्त्रियामिति प्रतिषेधस्यानित्यत्वाद्विभाषा गुणेऽस्त्रियामिति पञ्चमी। इह योग्य-

एवं तर्हि सिद्धे सति यद्रूपग्रहणं करोति तज्ज्ञापयत्याचार्यः। अस्त्यन्यद्रूपात्स्वं शब्दस्येति। किं पुनस्तत्। अर्थः। किमेतस्य ज्ञापने प्रयोजनम्। अर्थवद्ग्रहणे नानर्थकस्येत्येषा परिभाषा न कर्तव्या भवति। किमर्थं पुनरिदमुच्यते। शब्देनार्थगतेरर्थे कार्यस्यासंभवात्तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वरूपवचनम्। शब्देनोच्चारितेनार्थो गम्यते गामानय दध्यशानेति अर्थ आनीयते अर्थश्च भुज्यते। अर्थे कार्यस्यासंभवादिह च व्याकरणे अर्थे कार्यस्यासंभवः। अग्नेर्ढगिति न शक्यतेऽङ्गारेभ्यः परो ढक् कर्तुम्। शब्देनार्थगतेरर्थे कार्यस्यासंभवाद्यावन्तस्तद्वाचिनः शब्दास्तावद्भ्यः सर्वेभ्य उत्पत्तिः प्राप्नोति। इष्यते च तस्मादेव स्यादिति। तत्स्वान्तरेण यत्नं न सिध्यतीति तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वरूपवचनम्। एवमर्थमिदमुच्यते। न वा शब्दपूर्वको ह्यर्थे संप्रत्ययस्तस्मादर्थनिवृत्तिः। न वा एतत्प्रयोजनमस्ति। किं कारणम्। शब्दपूर्वको ह्यर्थे संप्रत्ययः। आतश्च शब्दपूर्वकः। योऽपि ह्यसावाहूयते नाम्ना। नाम च यदानेन नोपलब्धं भवति तदा पृच्छति किं भवानाहेति। शब्दपूर्वकश्चार्थस्य संप्रत्ययः।

तालक्षणेन संबन्धेन शब्दोऽर्थं लोके प्रत्याययति व्याकरणेऽपि पशुरपत्यं देवता प्राञ्च उदञ्चो भरता इत्यर्थ एव गृह्यते। अग्नेर्ढगित्यादौ त्वर्थस्य प्रत्ययेन पौर्वापर्यासंभवात्साहचर्यात्सर्वस्य तद्वाचिनः संप्रत्ययः स्यादिति सूत्रारम्भः संज्ञाप्रतिषेधार्थमिति। संज्ञासंप्रत्यय उच्यते। न वेति। शब्द उपलब्धोऽर्थं प्रत्याययति न सत्तामात्रेण। चक्षुरादीनि तु सत्तामात्रेण विषयमवगमयन्ति अर्थस्य शास्त्रीये कार्ये क्वचिदयोग्यत्वात्प्रत्यासत्त्या स एवोपात्तः शब्दो ग्रहीष्यते न तु विप्रकृष्टं शब्दान्तरमिति भावः। शब्दपूर्वक इति। अस्योपलब्धुः शब्दपूर्वक इत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशब्दसंज्ञेति। न्यायात्स्वरूपग्रहणे सिद्धे शब्दसंज्ञायां स्वरूपग्रहणं माभूदित्येवमर्थमिदमित्यर्थः। अन्यथोपसर्गे घोः किरिति किप्रत्ययो घोर्धातोः शब्दार्थात्स्यान्नतु दाधाभ्यः। कुमारीघ इत्यत्र घरूपे तिह्रस्वः प्रसज्येत। ई हल्यघोरित्यत्रतु घशब्दस्याकारान्तत्वाभावाद्दाधामेव ग्रहणं सिध्यति। वचनप्रामाण्यादिति। प्रदेशेषु संज्ञिप्रत्यायनार्थं संज्ञाकरणमिति सामर्थ्यात्स्वरूपग्रहणं न भविष्यति। ननु चेति। उभयगतिरिह शास्त्रे दृष्टा संख्याकर्मकरणादिष्विति इहापि स्वरूपस्य संज्ञिनश्च प्रदेशेषु ग्रहणं स्या-

दिह च व्याकरणे शब्दे कार्यस्यासंभवः। अर्थेऽसंभवस्तस्मादर्थनिवृत्तिर्भविष्यति। इदं तर्हि प्रयोजनम्। अशब्दसंज्ञेति वक्ष्यामीति इह माभूत् दाधाघ्वदाप् तरप्तमपौ घ इति। शब्दसंज्ञाप्रतिषेधानर्थक्यं वचनप्रामाण्यात्। शब्दसंज्ञायाः प्रतिषेधोऽनर्थकः। शब्दसंज्ञायां स्वरूपविधिः कस्मान्न भवति। वचनप्रामाण्यात्। शब्दसंज्ञावचनसामर्थ्यात्। ननु च वचनप्रामाण्यात्संज्ञिनां संप्रत्ययः स्यात्स्वरूपग्रहणाच्च संज्ञायाः। एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति शब्दसंज्ञायां न स्वरूपविधिर्भवतीति। यदयं ष्णान्ता षडिति षकारान्तायाः षट्संज्ञां शास्ति। इतरथा हि वचनप्रामाण्याच्च नकारान्तायाः संख्यायाः संप्रत्ययः स्यात्स्वरूपग्रहणाच्च षकारान्तायाः। नैतदस्ति ज्ञापकम्। नहि षकारान्ता संज्ञा। का तर्हि। डकारान्ता। असिद्धं जश्त्वं तस्यासिद्धत्वात्षकारान्ता। मन्त्राद्यर्थं तर्हीदं वक्तव्यम्। मन्त्रे ऋचि यजुषीति यदुच्यते यदुच्यते तन्मन्त्रशब्दे ऋक्शब्दे यजुःशब्दे च माभूत्। मन्त्राद्यर्थमिति चेच्छास्त्रसामर्थ्यादर्थगतेः सिद्धम्। मन्त्राद्यर्थमिति चेत्तन्न। किं कारणम्। शास्त्रस्य सामर्थ्यादर्थस्य गतिर्भविष्यति॥

त्। नहीति। षड्भ्यो लुगित्यादावुच्चारितेति भावः। का तर्हीति। तत्र डकारान्तः शब्द उच्चारितो जश्शासोश्च षकारान्ताद्धु कृ कर्तव्यः। षष्णामिति च नुट्। असिद्धमिति। डकारान्तः श्रूयमाणोऽपि डत्वस्यासिद्धत्वात्षकारान्तस्यस्वरूपस्य ग्राहको भविष्यतीत्यर्थः। मन्त्राद्यर्थमिति। मन्त्रादयः शब्दस्य संज्ञा। शास्त्रसामर्थ्यादिति। दिवसुभयोरित्यादौ क्यजादीनां निमित्तत्वेनोपादानाद्यजुषि ऋचि मन्त्र इति च स्वरूपं न ग्रहीष्यते न च तथाविधं लक्ष्यमस्तीति भावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्त्रादिसहचरित इति। साहचर्यं चशब्दादनुविद्धस्यैवार्थस्यावगमात्। सित्तद्विशेषाणामिति। वृक्षसमृगस इत्येवं निर्देशः कर्तव्यः। एतदपि न्यायसिद्धं तुल्यजातीयानां द्वन्द्व एकवद्भवतीति वक्ष्यते। पर्यायाणां च युगपत्प्रयोगाभावात् सामान्यविशेषाणां चार्थाभावात् सामान्यशब्देन सर्वविशेषाणामाक्षेपाद्बहुवद्भावमिति द्वन्द्वाभावाद्विशेषाणामेव प्लक्षन्यग्रोधादी

मन्त्रे ऋचि यजुषीति यदुच्यते मन्त्रशब्दे ऋक्शब्दे यजुःशब्दे च तस्य कार्यस्य संभवो नास्तीति कृत्वा मन्त्रादिसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात्। सित्तद्विशेषाणां वृक्षाद्यर्थम्। सिन्निर्देशः कर्तव्यः। ततो वक्तव्यं तद्विशेषाणां ग्रहणं भवतीति। किं प्रयोजनम्। वृक्षाद्यर्थम्। विभाषा वृक्षमृगेति। प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः॥ पित्पर्यायवचनस्य च स्वाद्यर्थम्॥ पिन्निर्देशः कर्तव्यः। ततो वक्तव्यम्। पर्यायवचनस्य च तद्विशेषाणां च ग्रहणं भवति स्वस्य च रूपस्येति। किं प्रयोजनम्। स्वाद्यर्थम्। स्वे पुषः। स्वपोषं पुष्यति। रैपोषम्। धनपोषम्। अश्वपोषम्। गोपोषम्॥ जित्पर्यायवचनस्यैव राजाद्यर्थम्॥ जिन्निर्देशः कर्तव्यः। ततो वक्तव्यम्। पर्यायवचनस्यैव ग्रहणं भवति। किं प्रयोजनम्। राजाद्यर्थम्। सभा राजामनुष्यपूर्वा। इनसभम्। ईश्वरसभम्। तस्यैव न भवति। राजसभा। तद्विशेषाणां च न भवति। पुष्यमित्रसभा चन्द्रगुप्तसभा॥ झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम्॥ झिन्निर्देशः कर्तव्यः। ततो वक्तव्यम्। तस्य च ग्रहणं भवति तद्विशेषाणां चेति। किं प्रयोजनम्। मत्स्याद्यर्थम्। पक्षिमत्स्यमृगान् हन्ति। मात्स्यिकः। तद्विशेषाणाम्। शाफरिकः शाकुलिकः। पर्यायवचनानां न भवति। अजिह्मान् हन्ति अनिमिषान् हन्तीति। अस्यैकस्य पर्यायवचनस्येष्यते। मीनान् हन्ति मैनिकः।

नां ग्रहणं सिद्धम्। पित्पर्यायवचनस्य चेति। चशब्दात् स्वरूपस्य विशेषाणां च ग्रहणम्। इदं वाचनिकमेव। जित्पर्यायेति। इदं न्यायसिद्धमित्याहुः। अराजेति पर्युदास आश्रीयते तेन राजसदृशानां तत्पर्यायाणामेव ग्रहणं सिध्यति। झित्तस्य चेति। इदं वाचनिकमेव। मत्स्याद्यर्थमिति। मृगपक्षिणोस्तु पिन्निर्देशस्तत्फललाभार्थः कर्तव्यः। अस्यैकस्येति। इयमिष्टिरेव॥

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अणुदित्॥ अप्रत्यय इति किमर्थमिति। किं यस्य प्रत्ययसंज्ञा विहिता तस्य प्रतिषेध उत यः प्रतीयते विधीयते इति यौगिकः ११९
प्रत्ययस्तस्यापीति प्रश्नः। इत इति। विशेषविहितत्वात्तुल्यदाद्यत्वं बाधित्वा त्रिमात्र आदेशः प्राप्नोति। बभूवेति। अनुनासिकः प्राप्नो
ति। अनड्वानिति। आमपि पक्षे प्राप्नोति। यदयमिति। ग्रहेरेव दीर्घो नान्येभ्य इति नियमाभावादिति भावः। नियमार्थमिति। ग्रहेर्दीर्घ
एव न ह्रस्व इत्येवमर्थं स्यादित्यर्थः। वृतो वेति। ननु ववरिथेति लिटि दीर्घो मा भूदित्येवमर्थमेतत् स्यादिति कथं ज्ञापकम्। एवं
तर्हि वृ इत्यत्रापि अलिटीत्यनुवर्तनाल्लिटि दीर्घनिषेधादन्यत्र उभयस्मिन् सिद्धे वा ग्रहणं ज्ञापकमीट इटाग्रहणाभावस्याप्र
त्यये भूयानिति। साधारणोऽसाधारणश्चेत्यर्थः। प्रत्यय इत्यन्वर्था संज्ञा कृता येनार्थं प्रतियन्ति स प्रत्ययः। न च दीर्घप्लुतयोरर्थे

अणुदित्सवर्णस्य चाप्रत्ययः॥ अप्रत्यय इति किमर्थम्। सनाशंसभिक्ष उः। असांप्रतिको। अस्त्यत्वमिद
मुच्यते अप्रत्यय इति। अप्रत्ययादेशटित्किन्मित इति वक्तव्यम्। प्रत्यये उदाहृतम्। आदेशे इदमद्भ्यः
इतः। इह। टितिलविता लवितुम्। कितिबभूव। मितिहे अनड्वन्। टितः परिहारः। आचार्यप्रवृत्तिर्ज्ञा
पयति न टितां सवर्णानां ग्रहणं भवतीति। यदयं ग्रहोऽलिटि दीर्घत्वं शास्ति। नैतदस्ति ज्ञापकम्। निय
मार्थमेतत् स्यात्। ग्रहोऽलिटि दीर्घ एवेति। यत्तर्हि वृतो वेति विभाषां शास्ति। सर्वेषामेव परिहारः। भा
व्यमानेन सवर्णानां ग्रहणं नेत्येवं न भविष्यति। प्रत्यये भूयान् परिहारः। अनभिधानात्प्रत्ययः सवर्णा
न्न ग्रहीष्यति। यान् हि प्रत्ययः सवर्णान् ग्रहीष्यति न तैरर्थस्याभिधानं स्यात्। अनभिधानान्न भविष्यति
। इदं तर्हि प्रयोजनम्। इह केचित्प्रतीयन्ते केचित्प्रत्याय्यन्ते। ह्रस्वाः प्रतीयन्ते। दीर्घाः प्रत्याय्यन्ते। याव
च्च ब्रूते प्रत्याय्यमानेन सवर्णानां ग्रहणं नेति तावदप्रत्यय इति।

स्याभिधानमस्ति। ह्रस्वा इति। प्रतीयन्ते श्रूयन्ते उच्चार्यन्ते अणादिचोदनास्वित्यर्थः। दीर्घा इति। ह्रस्वैर्गृहीतैरणत्वाद्दी
र्घाणां ग्रहणात्। तत्राष्टन आ विभक्तावित्यत्राकारो ग्राहको मा भूदित्यर्थः। यथैव हि अणत्वादाकारो रपरत्वादिकार्यं राम॰
प्रतिपद्यते तथा ग्राहकत्वमपि प्रतिपद्येतेति भावः। कथं पुनरप्रत्यय इत्यस्याप्रत्याय्यमान इत्यर्थः। अन्तर्भावितण्य- १६७
र्थादेतेः कर्मण्यच्विधानात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्नाधिक्यादिति। ननु च ह्रस्वोच्चारणे अर्धमात्रिकस्य मात्रिक एव स्यादिति दीर्घोच्चारणमुभयार्थं स्यात्। एतत्तु न निरूपितं
न्याय्य एवात्र परिहारो विधास्यते। अनणत्वादिति। अत्र हि सूत्रे प्रत्याहारसन्निविष्टा एव गृह्यन्ते स्वात्मनि क्रियाविरोधादनि
ष्यादाद्ग्रहणकशास्त्रान्तराभावाच्च अत्र सूत्रे अकारादिभिराकारादीनां ग्रहणासंभवोऽन्येषु प्रदेशेषु अनेन सूत्रेणाकारा
दिभिराकारादयो गृह्यमाणा अणादिकार्याणि लभन्ते। भाव्यमानेनेति। प्रतीयते विधीयत इति यौगिकस्यात्र प्रत्ययस्य ग्र-
हणमिति भावः। किमर्थं पुनरिति। आकृतिनिर्देशात् सिद्धमिति प्रश्नः। अणः सवर्णस्येति। उदिद्ग्रहणस्याऽविचारयिष्य

कं पुनर्दीर्घः सवर्णग्रहणेन गृह्णीयात्। ह्रस्वम्। यत्नाधिक्यान्न भविष्यति। प्लुतं तर्हि गृह्णीयात्। अनण
त्वान्न ग्रहीष्यति। एवं तर्हि सिद्धे सति यदप्रत्यय इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभा
षा भाव्यमानेन सवर्णानां ग्रहणं नेति। किमर्थं पुनरिदमुच्यते। अणः सवर्णस्येति स्वराऽनुनासिक्यकाल
भेदात्। अणः सवर्णस्येत्युच्यते। स्वरभेदादानुनासिक्यभेदात्कालभेदाच्चाणः सवर्णान्न गृह्णीयादिष्य
ते च ग्रहणं स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति
। तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशात्। तत्र प्रत्याहारग्रहणे सवर्णानां ग्रहणं न प्राप्नोति अ
कः सवर्णे दीर्घ इति। किं कारणम्। अनुपदेशात्। यथाजातीयकानां संज्ञा कृता तथाजातीयकानां संप्र
त्यायिका स्यात् ह्रस्वानां च क्रियते ह्रस्वानामेव संप्रत्यायिका स्याद्दीर्घाणां न स्यात्। ननु च ह्रस्वाः प्रती
यमाना दीर्घान् संप्रत्याययिष्यन्ति।

माणत्वादेवमुक्तम्। व्यक्तिनिर्देशे कालादिभिन्नस्य ग्रहणं न प्राप्नोतीति भावः। प्रत्याहारग्रहण इति। अकोऽचीति यत्र संज्ञ
याप्रत्यायनमिकारादीनां तत्र तैरन्येषां ग्रहणं न स्यात् यद् यत्र स्वरूपेणोच्चार्यन्ते अस्य च्वौ यस्येति चेति च तं तत्रैवैषां ग्राहकत्वं
स्यात्। अनुपदेशादिति। अनुच्चारणादित्यर्थः। न हि प्रत्याहारे दीर्घा उच्चारिता यतोऽगादिचोदनाभिर्गृह्येरन्। अथवा अ
कोऽचीत्यादावनुच्चारिता इकारादयो दीर्घाणां प्रत्यायका न स्युरित्यर्थः। ननु चेति। उच्चार्यमाणैरेव प्रत्यायकैर्भवितव्य-
मिति नास्ति। सन्निहितास्तु प्रत्यायकास्तच्च सन्निधानं यथायोगमस्त्येवेत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ उच्चार्यमाणोति। प्रतीयमानो हि प्रधानं स कथमन्यप्रत्यायनेऽङ्गभावं तदैव गच्छेदित्यर्थः। शब्दस्यावचनमिति। प्रतीयमान ११९
१६८ शब्देनान्यस्याप्रत्यायनमित्यर्थः। ऋगित्युक्त इति। यद्यपि प्रकरणवशाद्धि शिष्टसन्निवेशापि ऋक्शब्देन ऋक्प्रत्याय्यते
तथापि सा स्वार्थं न प्रत्याययतीत्यर्थः। एवं तर्हीति। अइउणिति प्रत्याहारस्थाकारादिभिरकारादीनां ग्रहणात्तेषामण्
गादिसंज्ञाभिर्ग्रहणं भविष्यतीत्यर्थः। उपदेश इति। प्रत्यायनमित्यर्थः। करिष्यत इति। व्याख्यास्यते। अवरकालत्वादि-

ह्रस्वसंप्रत्ययादिति चेदुच्चार्य माणशब्दसंप्रत्यायकत्वाच्छब्दस्यावचनम्। ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणश्शब्दस्संप्रत्यायको भवति न संप्रतीयमानः। तद्यथा। ऋगित्युक्ते संपाठमात्रं गम्यते। एवं तर्हि वर्णपाठ एवोपदेशः करिष्यते। वर्णपाठ उपदेश इति चेदवरकालत्वात्परिभाषाया अनुपदेशः। वर्णपाठक्रम उपदेश इति चेदवरकालत्वात्परिभाषाया अनुपदेशः। किंपरास्त्रात्क्रियत इत्यतोऽवरकाला। नेत्याह। सर्वेषाऽवरकालैव। वर्णानामुपदेशस्तावत्। उपदेशोत्तरकालेत्संज्ञा। इत्संज्ञोत्तरकाल आदिरन्त्येन सहेतेति प्रत्याहारः। प्रत्याहारोत्तरकाला सवर्णसंज्ञा। सवर्णसंज्ञोत्तरकालमणुदित्सवर्णस्य चाऽप्रत्यय इति। सैषाऽवरकाला उपदेशोत्तरकाला वर्णानामुत्पत्तौ निमित्तत्वाय कल्पयिष्यत इत्येतन्न। तस्मादुपदेशः कर्तव्यः। तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनणत्वात्। तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति। अस्य च्वौ यस्येति च। किं कारणम्। अनणत्वात्। न ह्येतेऽणो येऽनुवृत्तिनिर्देशे। के तर्हि। येऽक्षरसमाम्नाय उपदिश्यन्ते। एवं तर्ह्यनणत्वादनुवृत्तौ न अनुपदेशाच्च प्रत्याहारेण। उच्यते चेदमणस्सवर्णान्गृह्णातीति तत्रवचनाद्भविष्यति।

ति। निष्पन्नेष्वङ्गेष्वनयाऽन्यत्राऽस्य च्वावित्यादौ सवर्णानां ग्रहणं भवति नाङ्गेषु नाऽपि स्यात्तनि अनिष्पन्नत्वादिति भावः।
सर्वथेति। आर्थक्रमेणाऽपि न शब्दक्रमेणैवेत्यर्थः। वर्णानामुत्पत्ताविति। अइउणित्यत्र इयमेव वर्णानाकारादीनुत्पा रामः
दयतीत्येतन्नास्ति तस्मादिति। प्रत्याहार एव दीर्घप्लुता अपि पठनीया इत्यर्थः॥ तत्रानुवृत्तीति। व्यक्तिपक्षे सत्यपि सूत्रा १६८
रम्भेऽवान्तरभेदसंभवाद्ग्रहणं न सिध्यतीत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचनादिति। अणसवर्णोऽणीतिग्रहीष्यतइत्यर्थः। यत्रेति। अनन्तरोक्तमुभयं यत्र नास्ति अकोऽचीत्यादौ। अत्र ह्यनुबन्धेन चिह्नेन प्रत्याहारस्य एव निर्दिष्ट इत्यणत्वमुच्चारणं चास्ति। तत्राकार उच्चारित आदिरन्त्येन सहेते तिमध्यपातिनां स्वरूपस्य च ग्राहकोऽस्माच्च वचनात्सवर्णानामपीत्यर्थः। एवं व्यक्तिपक्षेऽस्त्यपि सूत्रारम्भे नास्तीष्टसिद्धिराकृतिपक्षे तु सूत्रं न कर्तव्यमित्याह। सवर्णइति। प्रत्याहारे अनुवृत्तिनिर्देशे च सर्वत्र जातिरुपदिश्यते नान्तरीयकं व्यक्त्युच्चारणम्। अत्वं च ह्रस्वदीर्घप्लुतेषु विद्यते यथा गोत्वं कृष्णे गोपिण्डे स्थूले शुक्ले कृष्णे चेति भावः। ननु चान्येति। श्रुतिभेदाद्भेद इति मन्यमानस्य प्रश्नः। अनन्य

वचनाद्यत्र तन्नास्ति। नेदं वचनाल्लभ्यम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्। य एते प्रत्याहाराणामादितो वर्णास्तैः सवर्णानां ग्रहणं यथा स्यात्। एवं तर्हि सवर्णेऽणग्रहणमपरिभाष्यमाकृतिग्रहणात्। सवर्णेऽणग्रहणमपरिभाष्यम्। कुतः। आकृतिग्रहणात्। अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति। तथेवर्णाकृतिस्तथोवर्णाकृतिः। ननु चान्याकृतिरकारस्यान्याऽऽकारस्य च। अनन्यत्वाच्च। अनन्याकृतिरकारस्याऽऽकारस्य च। अनेकान्तो ह्यनन्यत्वकरः। यो ह्यनेकान्तेन भेदो नासावन्यत्वं करोति। तद्यथा। न यो गोश्च गोश्च भेदः सोऽन्यत्वं करोति। यस्तु खलु गोश्चाऽश्वस्य च भेदः सोऽन्यत्वं करोति। अपर आह। सवर्णेऽणग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वम्। सवर्णेऽणग्रहणमपरिभाष्यम्। आकृतिग्रहणादनन्यत्वं भविष्यति। अनन्याकृतिरकारस्याऽऽकारस्य च। अनेकान्तो ह्यनन्यत्वकरः। यो ह्यनेकान्तेन भेदो नासावन्यत्वं करोति। तद्यथा। न यो गोश्च गोश्च भेदः सोऽन्यत्वं करोति यस्तु खलु गोश्चाश्वस्य च भेदः सोऽन्यत्वं करोति॥

त्वाच्चेति। सत्यपि श्रुतिभेदे एकाकृतियोगोऽस्त्येव यथा कृष्णे स्थूलेऽपि च गोपिण्डे गोत्वयोगः। यो हीति। अभेदस्यापि प्रत्यभिज्ञानात्तद्भावइत्यर्थः। यस्त्विति। अत्रापि यदा ब्राह्मणो न हन्तव्य इति प्राणित्वेनाश्रयणं तदा अभेद एव गवाश्वरूपाश्रये तु भेद इति भावः। अष्टन आ विभक्तावित्यत्र तु यत्नाद्दीर्घव्यक्तिसमवेतं सामान्यं गृह्यते। यथा पूर्ववयाब्राह्मणः प्रत्युत्थेय इति विशिष्टव्यक्तिस्थं ब्राह्मण्यमाश्रीयते। अपर आहेति। व्यक्तिरेव शब्दार्थः। जातिस्तु शब्दार्थोऽप्यभेदप्रत्ययहेतुरस्तीति सर्वथा व्यक्तीनामभेदाश्रयणादेकव्यक्तिनिर्देशेऽपि सर्वव्यक्तीनां ग्रहणं सिध्यतीत्यर्थः। अत्र पक्षे आकृतिग्रहणमाकृतेरेकाकारप्रत्ययनिमित्तत्वेन प्रतिपत्तिरुच्यते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तद्वच्चेति। यथाऽऽकृतिग्रहणादणसु कार्यं सिध्यति तथा हल्ष्वपि आकृतिग्रहणादेव सिध्यति। व्यक्तिनिर्देशपक्षे तु एकै
वतकारव्यक्तिर्हल्व्यपदेशमासादयेत् पूर्वापरावेत्य वात्ताम् इति लोपो न स्यात्। अबुद्धेत्यादावेव तु स्यात्। धातुप्रत्ययाव
यवयोस्तकारयोर्भेद एवेति चेत्। तत्राह। अनेकान्त इति। द्रुतेति। हल्ग्रहणेष्वेवेदमुच्यते। यत्रैतन्नास्ति। अणसवर्णा-
न्गृह्णातीति। अणसु तु व्यक्तिनिर्देशेऽपि ग्रहणकशास्त्रेणास्यादेव वृत्तिभिन्नस्य ग्रहणम्। वृत्तिपृथक्त्वमिति। ह्रस्वदीर्घा-
दिप्रमाणलक्षणापि वृत्तिर्न भेदिका स्यादिति खट्वाभिरित्यत्रैस्स स्यादिति भावः। क्रियत इति। अवश्यकर्तव्यतां दर्शयति।
व्यक्तिपक्षेऽणसवर्णान्गृह्णातीति प्रसङ्गः। सूत्रप्रत्याख्याने त्वाकृतिग्रहणात्। उदिद्ग्रहणं कर्तव्यमेव न हि वर्ग्याणामे
काकृतियोगोऽस्ति। कृते तु सूत्रे कुहोश्चुरित्यादौ भाव्यमानस्य उदित्त्वसामर्थ्यादप्रत्यय इति निषेधो नावतरतीत्यणस्वेवा

तद्वच्च हल्ग्रहणेषु। एवं च कृत्वा हल्ग्रहणेषु सिद्धं भवति। झलो झलि। अवात्ताम्। अवात्तम्। अवात्त। यत्रै
तन्नास्ति। अणसवर्णान्गृह्णातीति। अनेकान्तो ह्यनन्यत्वकर इत्युक्तार्थम्। द्रुतविलम्बितयोश्चानुपदेशान्म
न्यामहे आकृतिग्रहणात्सिद्धमिति। यद्ययं कस्यांचिद्वृत्तौ वर्णानुपदिश्य सर्वत्र कृती भवति। अस्ति प्रयोजन
मेतत्। किं तर्हीति। वृत्तिपृथक्त्वं तु नोपपद्यते। वृत्तेः पृथक्त्वं नोपपद्यते। तस्मात्तपरनिर्देशात्सिद्धम्। तस्मात्तत्र
तपरनिर्देशः कर्तव्यः। न कर्तव्यः। क्रियते न्यास एव। अतो भिस ऐसिति॥ अणुदित्सवर्णस्य चाप्रत्ययः॥ तपर
स्तत्कालस्य॥ अयुक्तोऽयं निर्देशस्तत्कालस्येति। तदित्यनेन कालः प्रतिनिर्दिश्यते तदित्ययं च वर्णः।

यं निषेधः। प्रत्याख्यानपक्षे भाव्यमानेषु यथाश्रुतं रूपमूह्यत इत्याकृतिग्रहणेऽपि भिन्नकालानां ग्रहणं न भवति यथा पशुना यजेत
पशुमालभेते त्युस ति वाक्यत्वात् संख्या विवक्ष्यते। उदात्तादयस्त्वभेदका इत्युक्तम्। अनुवादे तु नान्तरीयकत्वादेकव्यक्त्युच्चारणेऽपि
सकलव्यक्तिग्रहणम्। यथा ग्रहं संमार्ष्टीति सर्वेषां ग्रहाणां प्राजापत्यान् वग्रहा इत्यादिभ्यो ज्ञातानां संमार्जनम्॥ तपरः॥ अयुक्त
इति। न्यायेनासंबद्ध इत्यर्थः। न्यायशब्दस्य प्रयोगः प्रसिद्धत्वान्न कृतः। कदाचिदप्रसिद्धार्थस्याऽपि प्रयोगो दृश्यते न्यायेनायु
क्तमिति। धात्वर्थेऽन्तर्भूतस्य प्रयोगाभावः। न हि भवति जीवति प्राणानिति। तदित्यनेनेति। स कालो यस्येति कालसामानाधिक
रण्येन तच्छब्दोपादानात्। तदित्ययं च वर्ण इति। परामृष्ट इत्यर्थः। तपरशब्दवाच्यस्याऽर्थस्य तच्छब्देन परामर्शात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णस्येति।वर्णवाचिनस्तच्छब्दस्येत्यर्थः।कालेनेति।कालवाचिनेत्यर्थः।कालोहिप्रसिद्धपरिमाणाक्रियाऽप्रसिद्धपरिमाण
स्यक्रियान्तरस्यपरिच्छेदिकायथादिवसमधीतइतिदिवसशब्देनोदयादिरस्तमयान्तआदित्यगतिप्रबन्धउच्यतेसचाऽध्य
यनस्यपरिच्छेदकत्वात्कालः।वर्णेषुक्रियात्मकोनभवति। तस्यकालइति।यैवएकस्यवर्णस्यपरिच्छेदिकाक्रियानिमेषादिःसै
वयस्यपरस्यसतत्कालकालः।उष्ट्रमुखइति।गम्यमानार्थत्वाद्द्वितीयमुखशब्दाऽप्रयोगः।उष्ट्रोमुखमस्योष्ट्रमुखः।नच
प्राणिप्राण्यन्तरस्यमुखमितिसामर्थ्यात्सादृश्यप्रतीतिः।समग्रेणचोष्ट्रेणमुखस्यसादृश्याभावादुष्ट्रशब्दोऽवयवेवर्ततेमुखे

तत्राऽयुक्तंवर्णस्यकालेनसहसामानाधिकरण्यम्। कथंतर्हिनिर्देशः कर्तव्यः।तत्कालकालस्येति।किमि
दंतत्कालकालस्येति।तस्यकालस्तत्कालः।तत्कालःकालोयस्येतिसोऽयंतत्कालकालस्तत्कालकालस्येति।सत
र्हितथानिर्देशः कर्तव्यः।नकर्तव्यः।उत्तरपदलोपोऽत्रद्रष्टव्यः।तद्यथा।उष्ट्रमुखमिवमुखमस्यसोऽयमुष्ट्रमुखः।खर
मुखः।एवंतत्कालकालस्तत्कालस्तत्कालस्येति।अथवासाहचर्यात्ताच्छब्द्यंभविष्यति।कालसहचरितोवर्णः।व
र्णोऽपिकालएव।किंपुनरिदंनियमार्थम्। आहोस्वित्प्रापकम्।कथंचनियमार्थंस्यात्कथंवाप्रापकम्।यद्य
त्राऽण्ग्रहणमनुवर्ततेततोनियमार्थम्।अथनिवृत्तंततःप्रापकम्।कश्चात्रविशेषः। तपरस्तत्कालस्ये
तिनियमार्थमितिचेद्दीर्घग्रहणेस्वरभिन्नाग्रहणम्। तपरस्तत्कालस्येतिनियमार्थमितिचेद्दीर्घग्रहणे
स्वरभिन्नानांग्रहणंनप्राप्नोति।केषाम्।उदात्तानुदात्तस्वरितानुनासिकानाम्।अस्तुतर्हिप्रापकम्।

नेवमुखस्यसादृश्यंप्रसिद्धमितिसामर्थ्यादुष्ट्रमुखमिवमुखमस्येत्यर्थोगम्यते।एवमिहाऽपिवर्णःकालोनभवतीतिसामर्थ्यात्त-
दीयाक्रियाक्रियान्तरपरिच्छिन्नासतीक्रियान्तरस्यपरिच्छेदिकेतिवर्णएवपरिच्छेदकउच्यते।अथवेति।वर्णसहचरिता-
यांक्रियायांतच्छब्दोवर्ततेसकालोयस्येतितद्वर्णसमवेताक्रियापरिच्छेदिकाऽस्येत्यर्थः।यथाऽश्मादिद्रव्यंद्रव्यान्तरपरिच्छि
न्नंसुवर्णादीनांपरिच्छेदकंतद्वत्क्रियापीत्यर्थः। दीर्घग्रहणइति।भेदकाउदात्तादयइतिभावः।तत्रवृद्धिरादैजितिषण्णामा
काराणांवृद्धिसंज्ञेष्यतेएकस्यैवतुदीर्घस्यस्यात्तपरकरणंत्वैजर्थमेवस्यात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रस्वग्रहणादिति। अतो भिस ऐस् इत्यकारग्रहणे पूर्वसूत्रेण दीर्घप्लुतयोर्ग्रहणं प्राप्नोति। इदं हि सूत्रमनण्ग्रहणे चरितार्थम्। ११९
विप्रतिषेधादिति। विरोधो ह्यत्र विद्यते यदि पूर्वसूत्रेणाकारः सवर्णानां ग्राहकस्तदाऽष्टादशानां ग्रहणप्रसङ्गोऽनेन तु षण्णाम्। तत्र परत्वादनेनैव तपरोऽणः सवर्णानां तत्कालानां स्वरूपस्य च ग्राहकः। नन्वत इति तकारोच्चारणसामर्थ्यादनेनैव ग्रहणं भविष्यति किं विप्रतिषेधाश्रयेण। नैतदस्ति। मुखसुखार्थस्यापि तकारस्य दर्शनात्। ऋतइद्धातोरिति यथा। यद्येवमिति। य

प्रापकमिति चेद् ह्रस्वग्रहणे दीर्घप्लुतप्रतिषेधः। प्रापकमिति चेद् ह्रस्वग्रहणे दीर्घप्लुतयोः प्रतिषेधो वक्तव्यः। न वक्तव्यः। विप्रतिषेधात् सिद्धम्। अणः सवर्णान् गृह्णातीत्येतदस्तु तपरस्तत्कालस्येत्येतद्भवति विप्रतिषेधेन। अणः सवर्णान् गृह्णातीत्यस्यावकाशः। ह्रस्वा अतपरा अणः। तपरस्तत्कालस्येत्यस्यावकाशः। दीर्घास्तपराः। ह्रस्वेषु तपरेषूभयं प्राप्नोति। तपरस्तत्कालस्येत्येतद्भवति विप्रतिषेधेन। यद्येवं द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात्। द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यं तथा मध्यमायां द्रुतविलम्बितयोस्तथा विलम्बितायां द्रुतमध्यमयोः। किं पुनः कारणं न सिध्यति। कालभेदात्। ये हि द्रुतायां वृत्तौ वर्णास्त्रिभागाधिकास्ते मध्यमायाम्। ये च मध्यमायां वर्णास्त्रिभागाधिकास्ते तु विलम्बितायाम्। सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते। सिद्धमेतत्। कथम्। अवस्थिता वर्णा द्रुतमध्यमविलम्बितासु। किंकृतस्तर्हि वृत्तिविशेषः। वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते। वक्ता कश्चिदाशुवभिधायी भवति आशु वर्णानभिधत्ते कश्चिच्चिरेण कश्चिच्चिरतरेण कश्चिच्चिरतमेन। तद्यथा। तमेवाध्वानं कश्चिदाशु गच्छति कश्चिच्चिरेण कश्चिच्चिरतरेण कश्चिच्चिरतमेन। रथिक आशु गच्छति आश्विकश्चिरेण पदातिश्चिरतेण पिपिपुश्चिरतमेन।

द्यं योगस्तत्कालान् प्रतिपादयन् भिन्नकालान् निवर्तयतीत्यर्थः। त्रिभागाधिका इति। द्रुतं श्लोकमृचं वोच्चारयति वक्तरि नाडिकाया यस्या नव पानीयपलानि स्रवन्ति तस्या एव मध्यमायां वृत्तौ द्वादश पलानि स्रवन्ति। नवानां त्रिभागास्त्रीणि पलानि तदधिकानि नव द्वादश संपद्यन्ते विलम्बितायां तु वृत्तौ षोडश पलानि स्रवन्ति। सिद्धं त्विति। सर्वासु वृत्तिषु न वर्णानामुपचयापचयौ। यथा गन्तॄणां मालस्यादिभेदात् गतिभेदेऽपि न मार्गभेद इत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषमइति।वर्णाः प्रयत्नजन्याः।तद्भेदेवृत्तिभेदाद्भिन्नकाला एव।अध्वातुव्यवस्थितएवनगन्तृक्रियाजन्यः।एवंतर्हीति।-
व्यक्तिस्फोटोऽत्राविवक्षितःसचनित्यः।एतच्चयेनोच्चारितेनेत्यत्रपस्पशायांविचारितमितिततएवबोद्धव्यम्। शब्दगुणइति।
शब्दस्यगुण उपकारकोव्यञ्जकत्वेनेत्यर्थः।तद्यथा।घटःपुनःपुनर्दृश्यमानोऽपिनभेदमवलम्बतेतथाविलम्बितायांवृ-
त्तावकारएवपुनःपुनरुपलभ्यतइतिवृत्तिभेदेऽपिवर्णस्यभेदोनगृह्यतेइतिसर्ववृत्तिषुतत्कालत्वम्।ह्रस्वदीर्घप्लुताञ्जु
स्वतएवभिन्नाभिन्नैर्ध्वनिभिर्व्यज्यन्तइतितेषांकालभेदः ।भेर्याघातइति।भेरीमाहन्तीतिभेर्याघातः।उपलब्धिसामा-
न्येदृष्टान्तः।यथाप्रयत्नवशादुत्पन्नोभेरीशब्दःकश्चिदल्पकालमुपलभ्यतेकश्चिच्चिरंचिरतरंच।एवंवृत्तिषूपलब्धीनांका।

विषमउपन्यासः।अधिकरणमत्राऽध्वाव्रजिक्रियायाः।तत्राऽयुक्तंयदधिकरणस्यवृद्धिह्रासौस्याता
म्।एवंतर्हिस्फोटःशब्दः। ध्वनिःशब्दगुणः।कथम्।भेर्याघातवत्। तद्यथाभेर्याघातः भेरीमाहत्य
कश्चिद्विंशतिपदानिगच्छतिकश्चित्त्रिंशत्कश्चिच्चत्वारिंशत्।स्फोटस्तावानेवभवतिध्वनिकृतावृद्धिः
।ध्वनिःस्फोटश्चशब्दानांध्वनिस्तुखलुलक्ष्यते।अल्पोमहांश्चकेषांचिदुभयंतत्स्वभावतः।।तपरस्त-
त्कालस्य॥ आदिरन्त्येनसहेता॥ आदिरन्त्येनसहेतेत्यसंप्रत्ययःसंज्ञिनोऽनिर्देशात्।आदिरन्त्येनस
हेतेतिअसंप्रत्ययः।किंकारणम्।संज्ञिनोऽनिर्देशात्। नहिसंज्ञिनोनिर्दिश्यन्ते।सिद्धंत्वादिरितासह
तन्मध्यस्येतिवचनात्।सिद्धमेतत्।कथम्।आदिरन्त्येनसहेतागृह्यमाणःस्वस्यचरूपस्यग्राहकस्तन्म
ध्यानांचेतिवक्तव्यम्।

त्वभेदोविषयस्यत्वभेदएव।स्फोटस्तावानेवेति।दार्ष्टान्तिकोपन्यासः।ध्वनिःस्फोटश्चेति।व्यञ्जकोव्यङ्ग्यश्चेत्यर्थः।शब्दानांव्य
ङ्ग्यानांसबन्धीव्यञ्जकत्वेनयोध्वनिःसएवमहानल्पश्चलक्ष्यतेव्यङ्ग्यस्त्वभिन्नकालएवेत्यर्थः।उभयमिति।व्यङ्ग्योव्यञ्जक
श्चप्रमाणेनस्वभावतःस्वरूपेणसिद्धादित्यर्थः।केषांचिदिति।व्यक्तानामुभयंगृह्यतेअव्यक्तानांतुध्वनिरेव॥ आदिरन्त्येन॥ असं
प्रत्ययइति।अप्रतिपत्तिरित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संबन्धिशब्दैर्वेति। संज्ञयैवाक्षिप्तः संज्ञीत्यर्थः। आद्यन्तौ च मध्यापेक्षाविति मध्यमानामेव संज्ञित्वम्। स्वं रूपमित्यनुवर्तनात्स्वस्य च रूपस्य च। सहग्रहणादाद्यन्तौ समुदितौ संज्ञेती कोयणचीति समुदायादेव विभक्त्युत्पत्तिर्नोदिमात्रात्। स्वं रूपं त्वादेरेव गृह्यते नान्त्यस्य तस्याप्राधान्यादिति दध्यत्रेति केवल एव यकार आदेशः प्रवर्तते न तु णकारसहितः। येन॥ इह कस्मादिति। शब्दानुशासनप्रस्तावात् शब्दरूपमिका विशेष्यत इत्यस्ति तदन्तस्य प्रसङ्गः। येऽनेकाल इति ततश्च चयनजयनादिष्वयनमिति प्राप्नोति। प्रकरणादिवशाच्चाक्षादिष्विवार्थविशेषावगतिः स्यात्। निर्दिश्यमानस्यादेशा इत्यनाश्रितं परिहारान्तरविवक्षया। यदि चैवमिति। आद्गुणादित्यादौ। अत्र ह्यादित्यकारान्तो गृह्यते अचीति चाजादिस्तेन खट्वेन्द्र इत्यादाववर्णान्तस्य समुदायस्याजादेश्च गुणप्रसङ्गा द्वैरूप्यप्रसङ्गः। षष्ठ्यनिर्दे

संबन्धिशब्दैर्वा तुल्यम्। संबन्धिशब्दैर्वा तुल्यमेतत्। तद्यथा। संबन्धिशब्दाः मातरि वर्तितव्यम्। पितरि शुश्रूषितव्यमिति। न चोच्यते स्वस्यां मातरि स्वस्मिन् पितरीति। संबन्धाच्चैतद्गम्यते या यस्य माता यो यस्य पितेति। एवमिहाप्यादिरन्त्य इति संबन्धिशब्दावेतौ। तत्र संबन्धादेतद्गन्तव्यम्। यं प्रति य आदिरन्त्य इति च भवति तस्य ग्रहणं भवति स्वस्य च रूपस्येति॥ येनविधिस्तदन्तस्य॥ इह कस्मान्न भवति इको यणचि। दध्यत्र। मध्वत्र। अस्तु। अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति। नैवं शक्यम्। येऽनेकाल आदेशास्तेषु दोषः स्यात्। एचोऽयवायाव इति। नैष दोषः। यथैव प्रकृतितस्तदन्तविधिर्भवति एवमादेशतो भविष्यति। तत्रैजन्तस्यायाद्यन्ता आदेशा भविष्यन्ति। यदि चैवं क्वचिद्द्वैरूप्यं तत्र दोषः स्यात्। ब्रह्मबन्धूः ब्रह्मोदकम्। अपि चान्तरङ्गबहिरङ्गे न प्रकल्प्येयाताम्। तत्र को दोषः। स्योनः स्योना।

शाच्च निर्दिश्यमानस्येत्यपि नास्ति। स्योन इति। षिवेर्बाहुलकादौणादिकेन प्रत्यये गुणो वलोप ऊठिति कार्यत्रयप्रसङ्गः। तत्रापवादत्वादूठा वलोपो बाध्यते गुणस्त्वन्तरङ्गत्वाद्बाध्यते। गुणो ह्यङ्गसंबन्धिनीमिग्लक्षणां लघ्वीमुपधामार्धधातुकं चाश्रयति ऊठ् तु वकारान्तमङ्गमनुनासिकादिं च प्रत्ययमित्यल्पापेक्षत्वादन्तरङ्गः। तत्कृते गुणश्च प्राप्नोति यणादेशश्च। तत्र वर्णमात्रापेक्षत्वाद्यणादेशोऽन्तरङ्गः प्रवर्तते नानाश्रयत्वाद्वार्णादाङ्गं बलीय इत्येतन्नास्ति यत्रैकाश्रयेवार्णाङ्गे यथाकार इति धनाश्रये यणवृद्धी तत्रैवास्य प्रवृत्तिः। यदि च इको यणचीत्यत्र तदन्ततदादिविधी स्यातां तदा यणादेशस्यान्तरङ्गत्वाभावात् परत्वाद्गुणादेशः स्यात्। अन्तरङ्गलक्षणस्येति। असति तदन्ततदादिविधित्वे योऽन्तरङ्गस्तस्येत्यर्थः। एवं बहिरङ्गलक्षणो गुण इति व्याख्येयम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अल्विधिश्चेति। अलोऽन्त्यस्येत्यत्रापि तदन्तविधिसद्भावादन्त्यालन्त्यस्य समुदायस्य कार्येण भाव्यमिति द्योः पन्था इत्यत्रालोऽन्त्यस्यादे
शो न प्राप्नोतीत्यर्थः। तत्र कदाचित्पथिन्नित्यस्याकारः स्यात् कदाचित् पथिन्नित्यस्य। अनेकाल्शित्सर्वस्येत्येतत्तु सर्वस्यैवेति नियमार्थं
स्यात्। प्रकृतं इति। प्रस्तुते। प्रस्तावश्च क्वचित्साक्षात् तदन्तविधिभाजो निर्देशात्। यथेदूदेद्द्विवचनं प्रगृह्यमित्यत्र द्विवचनस्य। क्व-
चिदधिकाराद् यथेरजित्यत्र धातोः। क्वचिदाक्षेपाद् यथेकोझलित्यत्र सनाधातोः। करणे एषेति। विधिशब्दः कर्मसाधनो येन क
रणेन कार्यं विधीयते स शब्दस्तदन्तस्य संज्ञेत्यर्थः। तेन विशेषणेन विशेष्यस्य तदन्तविधिर्भवति नान्यथा। इको यणचीत्यादौ च-

अन्तरङ्गलक्षणस्य यणादेशस्य बहिरङ्गलक्षणो गुणो बाधकः प्रसज्येत। ऊनशब्दमाश्रित्य यणादेशो न श
ब्दमाश्रित्य गुणः। अल्विधिश्च न प्रकल्पेत। द्योः पन्थाः स इति। तस्मात् प्रकृते तदन्तविधिरिति वक्तव्यम्। न वक्त
व्यम्। येनेति करणे षष्ठी तृतीया। अन्येन चान्यस्य विधिर्भवति। तद्यथा। देवदत्तस्य समांशशरावैरोदनेन च यज्ञ
दत्तः प्रतिविधत्ते। तथा संग्रामं हस्त्यश्वरथपदातिभिः। एवमिहाप्यचा धातोर्यं तं विधत्ते अकारेण प्रातिपदिकस्य
इञं विधत्ते। येन विधिस्तदन्तस्येति चेद् ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गः। येन विधिस्तदन्तस्येति चेद् ग्रह
णोपाधीनां तदन्तोपाधिताप्रसङ्गः। ये ग्रहणोपाधयस्ते तदन्तोपाधयः स्युः। तत्र को दोषः। उतश्च प्रत्ययादसंयो
गपूर्वादिति असंयोगपूर्वग्रहणमुकारान्तविशेषणं स्यात्। तत्र को दोषः। असंयोगपूर्वग्रहणेन इहैव पर्यु
दासः स्यात्। अक्षणुहीति। इह न स्यात्। आप्नुहि शक्नुहीति। तथोदोष्ठ्यपूर्वस्येति ओष्ठ्यपूर्वग्रहणमृकारा
न्तविशेषणं स्यात्। तत्र को दोषः। ओष्ठ्यपूर्वग्रहणेन इह प्रसज्येत। संकीर्णं संगीर्णमिति। इह च न स्याद्
निपूर्तीः पिण्डा इति।

विशेष्यस्यासन्निधानात्तदन्तविधेरभावः। हस्त्यश्वरथपदातिभिरिति। बहुप्रकृतित्वाभावादेकवद्भावाभावः। ग्रहणोपाधी
नामिति। गृह्यत उच्चार्यत इति ग्रहणं तस्य ये उपाधय इष्यन्ते तदन्तस्य संज्ञिनः प्राप्नुवन्ति संज्ञा हि संज्ञिप्रत्यायने विशेषणभाव
मापन्ना कथमात्मनो विशेषणसंबन्धमनुभवेत्। संकीर्णमिति। ओष्ठ्यः पूर्वो यस्मादृकारान्ताद्धातोस्तस्योत्त्वमित्येव सूत्रार्थः स्यात्।
तत्र च सूत्रार्थे धात्ववयवत्वमोष्ठ्यस्याऽऽश्रयितुं न युज्यते अवधित्वावयवित्वयोरेकस्य विरोधात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धं त्विति। वृद्ध्यादिसंज्ञा गुणप्रधानभावानपेक्षा एव प्रदेशेषु संज्ञिनं प्रत्याययन्ति इयं तु संज्ञा गुणप्रधानभावापेक्षत्वात् कार्यकालात् तत्रोतश्च प्रत्ययादित्यादौ विशेषणसंबन्धमनुभूय विशेष्येण संबन्धमुकारादिरनुभवतीति यथोक्तदोषाऽभावः। समासेति। श्रितादिभिः सुबन्तस्य विशेषणे सति प्राप्तस्तदन्तविधिः प्रतिषिध्यते प्रतिषेधद्वारेण चैतत् प्रदर्श्यते श्रितादयः प्राधान्येनाऽऽश्रयितव्याः तद्विशेषणत्वेन च सुपेति। कष्टं परमश्रित इति। श्रितान्तमेतत् सुबन्तं न भवतीति संबुद्ध्यन्तमुदाहर्तव्यं परमश्रितेति। एतत् प्रत्ययलक्षणेन सुबन्तं भवति श्रितान्तं च श्रूयते सौत्रनाडिरिति। अनुशतिकादित्वादुभयपदवृद्धिः। नडादीनि प्रातिपदिके

सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वात्। सिद्धमेतत्। कथम्। यथेष्टं विशेषणविशेष्ययोर्योगो भवति। यावता यथेष्टम् इह तावदुतश्च प्रत्ययादसंयोगपूर्वादिति नासंयोगपूर्वग्रहणेन उकारान्तं विशेष्यते किं तर्हि उकार एव विशेष्यते उकारो योऽसंयोगपूर्वस्तदन्तात्प्रत्ययादिति। तथा उदोष्ठ्यपूर्वस्येति नौष्ठ्यपूर्वग्रहणेन ऋकारान्तं विशेष्यते ऋकारान्तो यो धातुरोष्ठ्यपूर्व इति किं तर्हि ऋकार एव विशेष्यते ऋकारो य ओष्ठ्यपूर्वस्तदन्तस्य धातोरिति॥ समासप्रत्ययविधौ प्रतिषेधः॥ समासविधौ प्रत्ययविधौ च प्रतिषेधो वक्तव्यः। समासविधौ तावत्। द्वितीया श्रितादिभिः समस्यते। कष्टश्रितः। नरकश्रितः। कष्टं परमश्रित इत्यत्र मा भूत्। प्रत्ययविधौ। नडस्यापत्यं नाडायनः। इह न भवति सूत्रनडस्यापत्यं सौत्रनाडिः। किमविशेषेण। नेत्याह॥ उगिद्वर्णग्रहणवर्जम्॥ उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वा। उगिद्ग्रहणम्। उगितश्च भवती अतिभवती महती अतिमहती। वर्णग्रहणम्। अत इञ् दाक्षिः प्लाक्षिः। अस्ति चेदानीं कश्चित्केवलोऽकारः प्रातिपदिकं यदर्थो विधिः स्यात्। अस्तीत्याह। अततेर्डः अस्तस्यापत्यमिः॥ अकच्श्मन्वतः सर्वनामाव्ययधातुविधावुपसंख्यानम्॥ अकज्वतः सर्वनामाव्ययविधौ अश्मन्वतो धातुविधावुपसंख्यानं कर्तव्यम्॥

न विशेष्यन्त इति तदन्तविध्यभावः। अतिमहतीति। महान्तमतिक्रान्तेति प्रादिसमासः। तत्र यद्यपि गौरादिषु बृहद् महदिति पठ्यते तथापि अनुपसर्जनाधिकारात् तत्र ङीष् न भवतीति उगिल्लक्षणो ङीप् प्रार्थ्यते। अन्ये तु गौरादिष्वेतयोः प्रमादपाठमाहुः। तथा चोक्तं न्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानमिति। ङीषि सति उदात्तस्य सिद्धत्वात् किं नद्या उदात्तविधानेन। अत इञिति। तदन्तविधौ असति त्रिकरणमुत्तरार्थं स्यात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वकइति। अकचिकृते शीभावो न स्यात्। उच्चकैरिति। तथैवाकचिकृते लुग्न स्यात्। उच्चकैरधीयानेत्यव्ययानां प्रतिषेध इति प राङ्गवद्भावनिषेधो न स्यात्। उच्चकैर्मुखमिति नाव्ययदिक्शब्देति मुखस्वरनिषेधो न स्यात्। भिनत्तीति धातो रन्त उदात्तो भवती- ति उदात्तत्वं न स्यात्। प्रत्ययस्वरेण तु तत्सिध्यतीत्यभिनोऽत्रेति दृश्चेति धातोर्विधीयमानं रुत्वं न स्यादिति वक्तव्यम्। अन्ये त्वा हुः। भिनत्तीत्यत्रागमानुदात्तत्वेन प्रत्ययस्वरस्य बाधितत्वात् सति शिष्टः स्वरो धातुस्वर एष्टव्यः। सिद्धं त्विति। सर्वशब्दस्य योऽन्तो ऽकारः सोऽन्तः सर्वकशब्दस्य। एवमन्यत्रापि योज्यम्। तत्र सर्वनामानीत्यन्वर्थसंज्ञाक्षिप्तः संज्ञी सर्वादिभिर्विशेष्यते। अव्ययसंज्ञा क्षिप्तः स्वरादिभिः। धातुसंज्ञाभाजो वा प्रकारभूवादिभिरिति भावः। उत्तरपदलोपइति। वाचनिकोऽत्र लोपो न तु सामर्थ्याद्गम्यमा-

अकज्वतः। सर्वके विश्वके। अव्ययविधौ। उच्चकैः नीचकैः। श्नम्वतः। भिनत्ति छिनत्ति। किं पुनः कारणं न सिध्यति। इह तस्य वा ग्रहणं भवति तदन्तस्य वा न चेदं तद् नापि तदन्तम्। सिद्धं तु तदन्तान्तवचनात्। सिद्धमेतत्। कथम्। तदन्ता न्तवचनात्। तदन्तान्तस्येति वक्तव्यम्। किमिदं तदन्तान्तस्येति। तस्यान्तस्तदन्तस्तदन्तोऽन्तो यस्य तदिदं तदन्तान्तं तदन्तान्त स्येति। स तर्हि तथा निर्देशः कर्तव्यः। न कर्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः ख रमुखः। एवमिहापि तदन्तः अन्तो यस्य सोयं तदन्तस्तदन्तस्येति। तदेकदेशविज्ञानाद्वा सिद्धम्। तदेकदेशविज्ञानाद्वा पु. नः सिद्धमेतत्। तदेकदेशभूतस्तद्ग्रहणेन गृह्यते। तद्यथा। गङ्गा यमुना देवदत्तेति। अनेकानदी गङ्गां यमुनां च प्रविष्टा गङ्गा यमुना ग्रहणेन गृह्यते। देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते। विषम उपन्यासः।

नार्थस्य निवृत्तिरित्याहुः। अन्ये तु वर्णयन्ति यथाऽवयवदर्शनाद्गौरित्यवयविविषया बुद्धिरुदेति तथेहापि सर्वशब्दस्य योऽव यवोऽन्त्यस्तन्नैव सर्वशब्दविषयबुद्ध्युत्पत्त्या तदवयवान्तः सर्वशब्दान्त इति व्यपदिश्यते। अथवाऽवयवे समुदायरूपारोपात् तदन्तता भविष्यति। गौणेनापि ह्यर्थेन शास्त्रव्यवहारो दृश्यते। छत्रपार्श्वीयः शूलदण्डाजिनशीतोष्णादृश्यादिषु। तदेकदेशवि- ज्ञानादिति। मध्यपातिनोऽकजादयस्तदेकदेशा इति तत्त्वबुद्धिं न विघ्नन्ति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा. कै. अक्तपरिमाणानामिति। परिच्छिन्नपरिमाणानामित्यर्थः। यावदेवेति। अल्पमधिकं वेत्यर्थः। इमाश्चापीति। सर्वाद्युपादानेन संज्ञाः ११९
१७३ क्रियमाणाः कथं सर्वकादीनां भवन्ति नित्या हि शब्दा विकारोपजनरहिता इति सर्वशब्दः सर्वकशब्द इति न वक्तुं शक्यत इत्यर्थः।
एवं तर्हीति। यद्यपि नित्याः शब्दास्तथापि प्रक्रियायामकजादयो विधीयमाना ज्ञापकाद् व्यतिरेकन्त इत्यर्थः। प्रयोजनमिति।-
अन्वर्थसंज्ञाक्षिप्तः संज्ञी सर्वादिभिर्विशेष्यते अपूर्वो वा तदन्तविधिरुपसंख्यायते। एवमुत्तरत्र विज्ञेयम्। उपपदविधाविति। भ-

इह केचिच्छब्दा अक्तपरिमाणानामर्थानां वाचका भवन्ति। य एते संख्याशब्दाः परिमाणशब्दाश्च। पञ्च सप्तेति ए
केनाप्यपायेन भवन्ति। द्रोणः खारी आढकमिति नैवाधिके भवन्ति न न्यूने। केचिद्यावदेव तद्भवति तावदेवाहुः। य
एते जातिशब्दा गुणशब्दाश्च तैलं घृतमिति खार्यामपि भवन्ति द्रोणेऽपि। शुक्लो नीलः कृष्ण इति हिमवत्यपि भ
वति वटकणिकामात्रेऽपि द्रव्ये। इमाश्चापि संज्ञा अक्तपरिमाणानामर्थानां क्रियन्ते ताः केनाधिकस्स्युः। एवं त
र्ह्याचार्यप्रवृत्तिर्ज्ञापयति तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति। यदयं नेदमदसोरकोरिति सककारयोरिदमद
सोः प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्। इदमदसोः कार्यमुच्यमानं कः प्रसङ्गो यत्सककारयोः स्यात्। पश्यति-
त्वाचार्यस्तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति ततः सककारयोः प्रतिषेधं शास्ति। कानि पुनरस्य योगस्य प्रयोज
नानि। प्रयोजनं सर्वनामाव्ययसंज्ञायाम्। सर्वे परमसर्वे विश्वे परमविश्वे उच्चैः परमोच्चैः नीचैः परमनीचैरिति।
उपपदविधौ भयाढ्यादिग्रहणम्। प्रयोजनम्। भयंकरः। अभयंकरः। आढ्यंकरणं स्वाढ्यंकरणम्। ङीब्वि
धावुगिद्ग्रहणम्। प्रयोजनम्। भवती अतिभवती। महती अतिमहती। प्रतिषेधे स्वस्रादिग्रहणम्। प्रयोजनम्।
स्वसा परमस्वसा। दुहिता परमदुहिता। अपरिमाणबिस्ताचितग्रहणं च प्रतिषेधे। प्रयोजनम्। अपरिमाणबिस्ता
चितकम्बल्येभ्यो न तद्धितलुकीति। द्विबिस्ता द्विपरमबिस्ता। त्रिबिस्ता त्रिपरमबिस्ता। द्व्याचिता द्विपरमाचिता॥

याढ्यादिभिः कर्म विशेष्यते। क्षेमप्रियमद्रेण्चेत्यत्र तु कर्मणा क्षेमादय इति तदन्तविध्यभावः। प्रतिषेध इति। विधीयत इति- राम:
विधिः सामान्येन गृह्यत इति प्रतिषेधेपि तदन्तविधिर्भवति। स्वस्रादिभिः प्रातिपदिकस्य विशेषणात्। द्विपरमबिस्तेति। द्विगुना १७३
संनिधापितमुत्तरपदं बिस्तादिभिर्विशेष्यत इति तदन्तविधिः। ॥

CC-0. In Public Domain. Digitization by eGangotri

दितिग्रहणं चेति। परमदित्यादिभ्यस्त्वनभिधानाद्ण्यो न भवति। तस्य चेति। स्वं रूपमित्यस्यानुवृत्तिं वार्त्तिककारो नेच्छतितथाचाद्यन्तवदित्यत्र येन विधिस्तदन्तत्वद्व्इति प्रयोजनमवोचत्। व्यपदेशिवद्भावोऽप्रातिपदिकेनेति। ननु रोणीशब्दो न प्रातिपदिकं प्रत्ययान्तत्वात्। नैष दोषः। अप्रातिपदिकेनेत्यत्र वाक्ये प्रातिपदिकग्रहणे लिङ्गविशिष्टस्याऽपि ग्रहणमिति वचनात्स्त्रीप्रत्ययान्तैरपि व्यपदेशिवद्भावो न भवति। न च लिङ्गविशिष्टपरिभाषा स्वरूपविधिविषयैवेति प्रातिपदिकसूत्रे वक्ष्यते। स

दितिग्रहणं च। प्रयोजनम्। दितेरपत्यं दैत्यः। अदितेरपत्यमादित्यः। दित्यदित्यादित्येत्यदितिग्रहणं न कर्तव्यं भवति। रोण्या अण्। रोण्या अण्ग्रहणं च प्रयोजनम्। आजकरौणः। सैंहिकरौणः॥ तस्य च॥ तस्य चेति वक्तव्यम्। रौणः। किं पुनः कारणं न सिध्यति न तदन्ताच्च तदन्तविधिना सिद्धं केवलाच्च व्यपदेशिवद्भावेन। व्यपदेशिवद्भावोऽप्रातिपदिकेन। किं पुनः कारणं व्यपदेशिवद्भावोऽप्रातिपदिकेन। इह सूत्रान्ताट्ठग्भवति दशान्ताड्डो भवतीति केवलादुत्पत्तिर्मा भूदिति। नैतदस्ति प्रयोजनम्। सिद्धमत्र तदन्ताच्च तदन्तविधिना केवलाच्च व्यपदेशिवद्भावेन। सोऽयमेवं सिद्धे सति यदन्तग्रहणं करोति तज्ज्ञापयत्याचार्यः सूत्रान्तादेव दशान्तादेवेति। नात्र तदन्तादुत्पत्तिः प्राप्नोति। इदानीमेव ह्युक्तं समासप्रत्ययविधौ प्रतिषेध इति। स्यात्तर्ह्येषा परिभाषा कर्तव्या। न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति। व्यपदेशिवद्भावोऽप्रातिपदिकेनेति। यदयं पूर्वादिनिः सपूर्वाच्चेत्याह। नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्। सपूर्वादिनिं वक्ष्यामीति। यत्तर्हि योगविभागं करोति इतरथा पूर्वात्सपूर्वादिनिरित्येव ब्रूयात्। किं पुनरयमस्त्यैव शेषस्तस्य चेति। नेत्याह। यच्चानुक्रान्तं यच्चानुक्रंस्यते सर्वस्यैव शेषस्तस्य चेति। रथसीताहलेभ्यो यद्विधौ।

पूर्वादिनिमिति। पूर्वग्रहणे त्युक्ते सपूर्वादिनिरित्युच्यमाने सर्वस्मात्सपूर्वात्प्राप्नोतीति कथं ज्ञापकमित्यर्थः। यच्चानुक्रान्तमिति। अप्रातिपदिकेनेति तु निषेधो यत्रान्तग्रहणं सूत्रे शेषो वोपात्तं तत्र। यथा दशान्ताड्ड इति दशाधिका अस्मिन् शत इत्यत्र न भवति। यद्विधाविति। ठग्विधौ तु तदन्तविधेरभावात्पारमहलिक इति ठग्न भवति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ ऋतोरिति। ऋतुवाचिनः शब्दाद्यो वृद्धिमान्प्रत्ययस्तद्विधानेऽवयवानां तदन्तविधिः। शारदः पूर्वो भागः पूर्वशारत् तत्र भवमि- ११९
१२४ ति ऋतुलक्षणोऽण्। तत्र वृद्धिमदिति वचनात्प्रावृषेण्य इत्यत्र तदन्तविधिर्न भवति तेन ऋत्वणेव भवति पूर्वप्रावृषमि-
ति। प्रावृट्शब्दो वर्षापर्यायः। अवयवानामिति किम्। पूर्वस्यां शारदि भवं पौर्वशारदिकमित्यण्न भवति कालाट्ठञित्येव भव
ति। तत्र हि यथाकथंचित्कालवाचिनो गृह्यन्ते। द्विषाष्टिकमिति। द्वे षष्टी परिमाणमस्येति समासे कृते आर्हादिति ठञ् भव-
ति संख्यायास्तदन्तविधौ सति संख्यात्वादपि ठकः प्रतिषेधात्तेन प्राग्वतेरिति ठञ् भवति। अध्यर्धपूर्वेति लुग्न भवति। सोऽस्यां

प्रयोजनम्। रथ्यः परमरथ्यः। सीत्यं परमसीत्यं। हल्या परमहल्या। सुसर्वार्धदिक्शब्देभ्यो जनपदस्य। प्रयोजनम्। सु। सुपाञ्चालकः सुमागधकः। सु। सर्व। सर्वपाञ्चालकः सर्वमागधकः। सर्व। अर्ध। अर्धपाञ्चालकः। अर्धमागधकः। अर्ध। दिक्शब्द। पूर्वपाञ्चालकः। अपरपाञ्चालकः। पूर्वमागधकः। अपरमागधकः। ऋतोर्वृद्धिमद्विधावयवानाम्। प्रयोजनम्। पूर्वशारदम्। अपरशारदम्। पूर्वनैदाघम्। अपरनैदाघम्। ठञ्विधौ संख्यायाः। प्रयोजनम्। द्विषाष्टिकं पञ्चषाष्टिकम्। धर्मान्नञः। प्रयोजनम्। धर्मं चरति धार्मिकः। अधर्मं चरति आधर्मिकः। अधर्माच्चेति न वक्तव्यं भवति॥ पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च॥ पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति वक्तव्यम्। पदाधिकारे किं प्रयोजनम्। प्रयोजनम् इष्टकेषीकामालानां चिततूलभारिषु। इष्टकचितं चिन्वीत पक्वेष्टकचितं चिन्वीत। इषीकतूलेन मुञ्जेषीकतूलेन। मालभारिणी कन्या उत्पलमालभारिणी कन्या। अङ्गाधिकारे किं प्रयोजनम्। प्रयोजनं महदप्स्वसृनप्तॄणां दीर्घविधौ। महान् परममहान्। महत्।

प्रवस्त्रभृतय इत्यतः सोऽस्येत्यनुवर्तमाने तदस्य परिमाणमित्यत्र पुनः प्रत्ययार्थसमर्थविभक्तिनिर्देशात्कृते वा लुकि पुनस्त-
न्निर्देशसामर्थ्यात्पुनः प्रत्ययः। तद्विधानसामर्थ्याच्च पुनर्लुगभावः। पदाङ्गाधिकार इति। पदशब्देनोत्तरपदं गृह्यते पदैकदे- एमः
शलोपात्। उत्तरपदेन सामर्थ्यादाक्षिप्तं पूर्वपदमिष्टकादिभिर्विशेष्यते। महदप्स्विति। महदादिभिरङ्गं विशेष्यते । १२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वापइति। नपूजनादितिसमासान्तनिषेधः। अपोभीतितत्त्वमपि स्वाद्भिरितिभवति। द्विपदइति। पादः पत्। इत्यत्रपाच्छब्देना
ङ्गं विशेष्यते। पादस्यपदेति। ननु पद्भावेतदन्तविधिरुक्तोऽयं तु पद्भावविधिः। नैषदोषः। पादशब्देन पूर्वपदस्य विशेषणा
त्पद्भावेतदन्तविधिः। अनेनैव न्यायेन पद्भावेऽपि तदन्तविधिप्रसङ्गः। यथाभूतः पूर्वसूत्रे पादशब्दो निर्दिश्यते तथाभूत
स्योत्तरत्रानुमानात्। एवं तर्हीति। एवं च परमपादेन कषतीति विवक्षायां परमपादकाषीति भवति यदा तु परमः पत्का-

अप्। आपस्तिष्ठन्ति स्वापस्तिष्ठन्ति। अप्। स्वसृ। स्वसा स्वसारौ स्वसारः परमस्वसा परमस्वसारौ परमस्वसारः। स्वसृ।
नप्तृ। नप्ता नप्तारौ नप्तारः। एवं परमनप्ता परमनप्तारौ परमनप्तारः। पद्युष्मदस्मदस्थ्याद्यनडुहोनुम्। पद्भावः प्र
योजनम्। द्विपदः पश्य। अस्ति चेदानीं कश्चित्केवलः पाच्छब्दो यदर्थो विधिः स्यात्। नास्तीत्याह। एवं तर्हि अ
ङ्गाधिकारे प्रयोजनं नास्तीति कृत्वा पदाधिकारस्य प्रयोजनमुक्तम्। हिमकाषिहतिषु च। यथा पत्काषिणौ प
त्काषिणः। एवं परमपत्काषिणौ परमपत्काषिणः। यदि तर्हि पदाधिकारे पादस्य तदन्तविधिर्भवति। पादस्य
पदाज्यातिगोपहतेषु यथेह भवति। पादेनोपहतं पदोपहतम्। अत्रापि स्यात्। द्विग्धपादेनोपहतं द्विग्ध
पादोपहतमिति। एवं तर्ह्यङ्गाधिकार एव प्रयोजनम्। ननु चोक्तं न केवलः पाच्छब्द इति। अयमस्ति पाद
यतेरप्रत्ययः पात्। पदः पदा पदे। पत्। युष्मत्। अस्मत्। यूयं वयम्। परमयूयं परमवयम्। अस्थ्यादि। अस्थ्
नादध्ना सक्थ्ना। परमास्थ्ना परमदध्ना परमसक्थ्ना। अनडुहो नुम्। अनड्वान् परमानड्वान्। सुपथिम
थिपुंगोसखिचतुरनडुत्रिग्रहणम्। प्रयोजनम्। द्यौः सुद्यौः। पन्थाः सुपन्थाः। मन्थाः परममन्थाः। पुमान्
परमपुमान्। गौः सुगौः॥

षीति विवक्षा तदा परमपत्काषीति भवति। पादयतेरिति। पदेर्ण्यन्तादित्यर्थः। परमपथ्यादिति क्वचित्पाठः। सत्त्वयु-
क्तः समासान्तविधानात्। न पूजनादित्यत्र पूजायां स्वतिग्रहणमिति वचनान्नास्ति निषेधः। तस्मात्सुपथ्यादिति पाठः। पर
मगौरित्यपपाठः। गोरतद्धितलुकीति टज्विधानात् तस्मात्सुगौरिति पाठः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमसखायावितिबहुव्रीहिः। तत्पुरुषेतुटचाभाव्यम्। अनडुच्छब्दस्येहप्रपञ्चार्थः पाठः। अनडुहोनुमित्यतएववचनादादित्यधिकारादसामोः कृतयोर्नुम्विधानान्नुम्विधौतदन्तविधिनाअसामोरपितदन्तविधेराक्षेपात्। अन्येत्वाहुः। असतीहपुनर्ग्रहणेयत्रैवनुम्क्रियतेतत्रैवामामौतदन्तस्यस्याताम्। परमानड्वाहइत्यत्रत्वाम्नस्यादितिपुनःपाठः कर्तव्यः पूर्वत्रापिपाठोनुमर्थः कर्तव्यः। अन्यथाअसामोरेवतदन्तविधिःस्यान्नतुनुम्विधौ। अतिसइति। शोभनःसइत्यर्थः। उपसर्जनेतुतच्छब्दार्थेअतितदितिभवति। बहुभस्त्रिकेति। नञ्पूर्वाणामपीतिनवक्तव्यंभवति। वर्णग्रहणंचेति। यद्येवमुगिद्वर्णग्रहणवर्जमित्यत्रकिमर्थंवर्णग्रहणम्। उच्यते। प्रत्ययविधौतदन्तविधिप्रतिषेधाद्वर्णग्रहणेप्रत्ययविधौप्रतिषेधाशङ्कानिरासार्थम्। प्रत्ययग्रहणंचापञ्चम्याइति। प्रत्ययग्रहणेयस्मात्सविहितइतिसिद्धेतदन्तविधावपञ्च

सखासखायौसखायः। सुसखासुसखायौसुसखायः। परमसखापरमसखायौ। चत्वारः परमचत्वारः। अनड्वाहः परमानड्वाहः। त्रयाणां परमत्रयाणाम्। त्यदादिविधिभस्त्रादिस्त्रीग्रहणम्। प्रयोजनम्। सः। अतिसः। भस्त्रकाभस्त्रिका। बहुभस्त्रकाबहुभस्त्रिका। निर्भस्त्रकानिर्भस्त्रिका। स्त्रीग्रहणंचप्रयोजनम्। स्त्रियौस्त्रियः। राजस्त्रियौराजस्त्रियः। वर्णग्रहणंचसर्वत्र। प्रयोजनम्। क्वसर्वत्र। अङ्गाधिकारेचान्यत्रच। अन्यत्रोदाहृतम्। अङ्गाधिकारे। अतोदीर्घोयञिसुपिचाइहैवस्यात्। आभ्याम्। घटाभ्यामित्यत्रनस्यात्। प्रत्ययग्रहणंचापञ्चम्याः। प्रत्ययग्रहणंचअपञ्चम्याः प्रयोजनम्। यञिञोःफग्भवति। गार्ग्यायणः। वात्स्यायनः॥

म्याइतिप्रतिषेधार्थंवचनम्। यत्रपञ्चम्यन्तात्परःप्रत्ययः कार्यान्तरविधानायपरिगृह्यतेतत्रतदन्तविधिर्माभूद्यथारदाभ्यामित्यत्र। तत्रहितदन्तविधौरेफदकाराभ्यामुत्तरोयोनिष्ठान्तस्तस्यनत्वंस्यात्। नचसंज्ञाविधौप्रत्ययग्रहणेतदन्तविधिर्नास्तीतिनिषेधावतारः यत्रहिसंज्ञाविधानंतत्रायंनिषेधः। इहतुनिष्ठानुवादेननत्वविधिः। संज्ञाविधौतर्हितदन्तविधिनिषेधस्यकिंफलम्। उच्यते। यदिसंज्ञाविधौप्रत्ययग्रहणेतदन्तस्यसंज्ञास्यात्प्रदेशेषुपुनस्तदन्तविधिःस्यादितिप्रत्ययान्तान्तंगृह्येततस्मात्संज्ञाविधावपितदन्तविधिनिषेधोरदाभ्यामित्यत्रच। अपञ्चम्याइत्यस्यनायमर्थः। यत्रपञ्चम्यन्तात्प्रत्ययोविधीयतेतत्रतदन्तविधिर्नभवतीति। एवंहिव्याख्यायमानेञितश्चतत्प्रत्ययादित्यत्रतत्प्रत्ययादेवाञिविधीयमानेतस्यैवाङ्गसंज्ञायांवृद्धिस्वरौस्याताम्। नतुतदन्तस्येतीति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमगार्ग्यायणादिति। तत्र गार्ग्यायणादित्येवोदाहरणम्। गार्ग्यशब्दाद्यञन्तादूफग्विधानान्न त्वत्र परमगार्ग्यशब्दात्प्रत्ययस्तस्य यञन्तत्वाभावात्। तस्माच्च फकि विधीयमाने पारमगार्ग्यायणादित्यनिष्टरूपप्रसङ्गः। तस्मादेतन्न्यायव्युत्पादनार्थं परमगार्ग्यायणादित्युपन्यस्तम्। उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविध्यभावो लेखग्रहणेन ज्ञापितः। तत्र रदाभ्यामित्यत्र निष्ठायाः प्राधान्येनाश्रयणात्तदन्तविध्यभावः। स्यतासी लृलुटोरित्यत्र धातोरित्यधिकारादपञ्चम्यादिति निषेधाल्लृलुटोर्वा प्राधान्येनाश्रयणात्तदन्तविध्यभावः। अलैवानर्थकेनेति। अर्थवद्ग्रहणेनानर्थकस्येति वर्णनिर्देशेषु नाश्रीयत इति स्थितम्। वर्णरूपतया यस्य शब्दस्याश्रयणं नार्थवत्तोह्यपमाश्रीयते। तत्र वर्णग्रहणं च सर्वत्रेत्यत्र वर्णग्रहणे जातिग्रहणाद्वर्णसमुदायग्रहणेऽप्यनर्थकस्य ग्रहणं प्राप्तमनेन नियमेन निवार्यते। अलैवेति चैकत्वसंख्या गुणत्वाद्विवक्ष्यते। नियमविधानसामर्थ्याद्। हन्ग्रहणादिति। तेन ज्ञीहानावितिदीर्घो भवति। उद्ग्रहणादिति।

परमगार्ग्यायणः परमवात्स्यायनः। दाक्षायणः परमदाक्षायणः। अपञ्चम्यादिति किमर्थम्। दृषत्तीर्णा परिषत्तीर्णा ॥अलैवाऽनर्थकेन॥ नान्येनानर्थकेनेति वक्तव्यम्। किं प्रयोजनम्। हन्ग्रहणे ज्ञीहन्ग्रहणं मा भूत्। उद्ग्रहणे गर्मुद्ग्रहणम्। स्त्रीग्रहणे ष्टस्त्रीग्रहणम्। संग्रहणे पायसंकरोतीति मा भूत्। किमर्थमिदमुच्यते न पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य चेत्येव सिद्धम्। न चेदं तदङ्गं नापि तदुत्तरपदम्॥

।उदः स्थास्तम्भोरित्यत्र। तेन गर्मुत्स्थास्यतीति पूर्वसवर्णाभावः। ष्टस्त्रीग्रहणमिति। तेन ष्टस्त्र्यावितिस्त्रियादिति यङ् न भवति। पायसंकरोतीति। संपर्युपेभ्यः इति सुण्न भवति। तत्र हन्ग्रहणे स्त्रीग्रहणे चाङ्गस्य विशेष्यत्वात्स्यात्तदन्तविधिः उदः स्थेत्यत्र तो रित्यधिकारात् तवर्गान्तस्योच्छब्देन विशेषणात् स्यात्तदन्तविधिः। प्रतिषेधविज्ञाने तु न भवति उद एव तवर्गेण विशेष्यत्वात् तो रित्यस्य वा निवृत्तत्वात्। संग्रहणे पदप्रकरणात्तदन्तविधिः स्यादिति निवार्यते। पदेन समादयो विशेष्यन्त इति तदन्तविध्यभावः। पायसं करोतीति करोतेर्भूषणार्थवृत्तिता संभवतीति सुट् स्यात्। किमर्थमिति। अलैवानर्थकेनेत्येतदाक्षिप्यते। अस्य हि नियमस्य ज्ञीहानावित्यादि प्रयोजनं तच्चान्यथा सिध्यति अङ्गाधिकारे हन्ग्रहणं स्त्रीग्रहणं चास्ति एङः पदान्तादतीति पदाधिकारे संग्रहणं वा पदान्तस्येत्यतः पदग्रहणानुवर्तनादुदः स्थास्तम्भोरिति पूर्वसवर्णः पदाधिकारे विधीयते पदाङ्गाधिकार इत्यत्र च केवलपदाधिकारोऽपि गृह्यते उत्तरपदाधिकारोऽपि ततश्च ज्ञीहानावित्यादिषु दोषो न भवति न हि ज्ञीहानावित्यत्र हन्नित्यङ्गं नापि तदुत्तरपदमिति प्रश्नः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कै. तन्नवक्तव्यमिति। पदाङ्गाधिकारइत्येतदित्यर्थः। अलेवाऽनर्थकेनेतिवचनेनाऽर्थवतातदन्तविधिसद्भावादितिभावः। तदन्तवि- ११९
१७६ धिरेवेति। प्राथमकल्पिकःसूत्रेणैवतदन्तविधिःसएवललेवानर्थकेनेतिनियम्यते। परमातिमहानिति। परमश्चासावतिमहानिति
समासः। तत्रपरमादिर्महच्छब्दोनभवतिनापिमहच्छब्दोत्तरपदः। अतिमहच्छब्दोत्तरपदत्वादितिसान्तमहतइतिदीर्घत्वंन
स्यात्। अनेनैवन्यायेनोगित्लक्षणोनुमागमोऽपिनस्यात्तदन्तविधिनातुभवति। सुश्रोताइति। अनागमकानांसागमकाआदेशा
इत्याश्रयणादत्रासआनर्थक्यमर्थवतोह्यागमइतिन्यायाश्रयेणर्थवानेवाऽसूशब्दः। यस्मिन्विधिरिति। तदन्तविध्यपवादस्तदादि
विधिः। अतएवविशेषणेनभवतिनान्येन॥ वृद्धिर्यस्य। वृद्धिग्रहणमिति। असतिवृद्धिग्रहणेकथंसर्वस्यवृद्धसंज्ञानभवतीतिचे

तन्नवक्तव्यंभवति। किंपुनरत्रज्यायः। तदन्तविधिरेवज्यायान्। इदमपिसिद्धंभवति। परमातिमहान्। एतद्धि
नैवतदन्ताऽपितदुत्तरपदम्॥ अनिनस्मन्ग्रहणानिच॥ अर्थवताचानर्थकेनचतदन्तविधिंप्रयोजयन्ति। अन्
। राज्ञेत्यर्थवतासाम्नेत्यनर्थकेन। अन्। इन्। दण्डीत्यर्थवतावाग्मीत्यनर्थकेन। इन्। अस्। सुपयाइत्यर्थवतासु
स्रोताइत्यनर्थकेन। अस्। मन्। सुषर्मेत्यर्थवतासुप्रथिमाइत्यनर्थकेन। मन्॥ यस्मिन्विधिस्तदादावल्ग्रह
णे॥ यस्मिन्विधिस्तदादाविति वक्तव्यम्। किंप्रयोजनम्। अचिश्नुधातुभ्रुवांय्वोरियङुवङाविति इहैवस्यात् श्रियौभ्रुवौ। श्रियो
भ्रुवइत्यत्रनस्यात्॥ वृद्धिर्यस्याचामादिस्तद्वृद्धम्॥ वृद्धिग्रहणंकिमर्थम्। यस्याचामादिस्तद्वृद्धमितीयत्युच्य
मानेदात्ताःक्षिताःअत्रापिप्रसज्येत। वृद्धिग्रहणेपुनःक्रियमाणेनदोषोभवति। अथयस्यग्रहणंकिमर्थ
म्। यस्येतिव्यपदेशाय। अथाज्ग्रहणंकिमर्थम्। वृद्धिर्यस्यादिस्तद्वृद्धमितीयत्युच्यमानेइहैवस्यात्। ऐतिका
यनीयाः। औपगवीयाः।

त्। यस्याचामादिर्भिन्नजातीयोहल्तद्वृद्धमित्यजादिव्यावर्तितंस्यात्। दात्ताइति। असतिवृद्धिग्रहणेनिर्धारणहेतो
र्धर्मस्यानुपादानादादिशब्दःसमीपार्थोविज्ञायेतदत्तशब्दोरक्षितशब्दश्चात्रक्रियाशब्दोद्रष्टव्यः। नामधेयस्यतु
पक्षेभवत्येववृद्धसंज्ञा। प्रत्येऽवृद्धमित्यत्रयदानामधेयत्वादवृद्धाःपक्षेकर्या दयस्तदर्थंप्रतिषेधःस्यात्। य राम:
स्येतिव्यपदेशायेति। संज्ञिनइतिशेषः। अन्यथातच्छब्देनकिंप्रत्यवमृश्येततदित्यस्यानुपादानेचवृद्धेरेववृद्धसंज्ञाप्रसङ्गः। १७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गार्गीयादृति। नहिगार्ग्यशब्दस्य वृद्धिरादिः किंतर्हिहलू। मालादीनांचेत्येतत्तुनामधेयार्थंस्यात्। समासंनयनइति। सतिचेहादि-
ग्रहणेआद्यन्तवत्सूत्रएकग्रहणस्यसमासंनयनशब्दः प्रत्युदाहरणम्। असतितुहादिशब्देदरिद्रातेरिवर्णान्तलक्षणस्याचो
ऽभावएकग्रहणस्यप्रयोजनम्। अचामितितुबहुत्वंसंख्याविवक्षार्थंस्यात्। नह्यचामिति। सर्वस्यप्रातिपदिकस्याज्झलसमुदा
यरूपत्वात्। अचामित्यनेननचकेवलानामचांसमुदायः संनिवेशरूपोनिर्दिष्टः। पौर्वापर्येणावस्थानंसंनिवेशः सचकेवलाना
मचांनास्ति। ननुचैवमिति। अचांसंनिवेशस्यासंभवादचांमध्येऽजपेक्षयायस्यवृद्धिरादिरितिविज्ञास्यतइत्यर्थः। नैवंशक्य
मिति। वृद्धिविशेषणार्थानिर्द्धारणेषष्ठीस्यात्। अचांमध्येअन्तरूपायावृद्धिरित्याकारस्यनिवृत्तिप्रसङ्गः। आकारोह्यनजेवसन्
नकेवलमचूकार्याणिग्रहणकशास्त्रेणलभतेततश्चाप्लवनायनइत्यत्रनस्यात्। गार्ग्यइत्यत्रचाकारस्यानच्त्वात्समुदाया-

इहनस्यात्। गार्गीयावात्सीयाइति। अज्ग्रहणेपुनः क्रियमाणेनदोषोभवति। अथादिग्रहणंकिमर्थम्। वृ
द्धिर्यस्याचांतद्वृद्धमितीयत्युच्यमानेसमासंनयनेभवः सामासंनयनइत्यत्रापिप्रसज्येत। आदिग्रहणेपुनः क्रि
यमाणेनदोषोभवति। वृद्धसंज्ञायामजसंनिवेशादनादित्वम्। वृद्धसंज्ञायामजसंनिवेशादादिरित्येतन्नोपप
द्यते। नह्यचांसंनिवेशोऽस्ति। ननुचैवंविज्ञायतेअजेवादिरिति। नैवंशक्यम्। इहैवप्रसज्येत। औपगवीयाःइ
हनस्यात्। गार्गीयाः। एकान्तादित्वंतर्हिविज्ञायते। एकान्तादित्वेचसर्वप्रसङ्गः। इहापिप्रसज्येत। समासन्नयने
भवः सामासन्नयनइति। सिद्धमजाकृतिनिर्देशात्। सिद्धमेतत्। कथम्। अचआकृतिर्निर्दिश्यते। एवमपिव्य
ञ्जनैर्व्यवहितत्वान्नप्राप्नोति।

नादित्वाच्चनस्यात्। एकान्तादित्वेचेति। एकान्ताअवयवाअचः प्रातिपदिकस्यतेषामचाम्। आदिर्वृद्धिर्यस्यतद्वृद्ध
मित्यर्थः। सर्वप्रसङ्गइति। नह्यत्रविशेषउपादीयतेसर्वेषामचामादिर्वृद्धिरितितत्रश्चमध्येऽपिवर्तमानआकारोऽ
न्याजपेक्षयाआदिरितिसमासन्नयनेसंज्ञाप्रसङ्गः। आदिग्रहणंत्वन्यनिवृत्त्यर्थंस्यात्। खट्वेति। सिद्धमिति। उभयरूप
त्वेऽपिप्रातिपदिकस्याऽजाकृतिरचामितिवचनादाश्रीयते। विद्यमानापिहलाकृतिर्नविवक्ष्यते। तेनाऽयमर्थः। यस्यश
ब्दस्यसकलाऽजपेक्षयावृद्धिरादिस्तद्वृद्धमिति। यथापङ्क्तौब्राह्मणानामादिमानयेत्युक्तेसतोऽपिशूद्रादीननादृत्य-
ब्राह्मणजातीयापेक्षयायोब्राह्मणआदिःसआनीयते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यञ्जनस्येति। आचामितिवचनाद्विद्यमानान्यपिव्यञ्जनानिनविवक्षितानीत्यर्थः। यथान्यत्रेति। यथास्वरविधावयोग्यत्वा-
द्व्यञ्जनमविद्यमानवदेवमिहाप्यचामितिवचनादित्यर्थः। ह्रस्वनुड्भ्यामितिस्वरविधौनुड्ग्रहणलिङ्गाद्व्यञ्जनंव्यवधाय-
कमेवेत्युदश्वित्वानितिमतुपउदात्तत्वंनप्रवर्तते। वानामधेयस्येति। पौरुषेयंनामगृह्यते। कम्बलचारायणीयाइति। कम्ब
लप्रियस्यचारायणस्यशिष्याइत्यर्थः। ओदनपाणिनीयाइति। पणिनोऽपत्यमित्यणाथिविदथीतिप्रकृतिभावाट्टिलोपाभा

व्यञ्जनस्याऽविद्यमानत्वंयथान्यत्र॥ व्यञ्जनस्याविद्यमानवद्भावोवक्तव्योयथाऽन्यत्रापिव्यञ्जनस्याविद्यमान
वद्भावोभवति। कान्यत्रस्वरे॥ वानामधेयस्य॥ वृद्धसंज्ञावक्तव्या। देवदत्तीयाः। दैवदत्ताः। यज्ञदत्तीयाः। याज्ञद
त्ताः॥ गोत्रोत्तरपदस्यच॥ गोत्रोत्तरपदस्यचवृद्धसंज्ञावक्तव्या। कम्बलचारायणीयाः। ओदनपाणिनीयाः। घृ
तरौढीयाः॥ गोत्रान्ताद्वाऽसमस्तवत्॥ गोत्रान्ताद्वाअसमस्तवत्प्रत्ययोभवतीतिवक्तव्यम्। एतान्येवोदाहरणा
नि। किमविशेषेणेत्याह॥ जिह्वाकात्यहरितकात्यवर्जम्॥ जिह्वाकात्यंहरितकात्यंचवर्जयित्वा। जैह्वाका
ताहरितकाताः। किंपुनरत्रज्यायः। गोत्रान्ताद्वाऽसमस्तवदित्येवज्यायः। इदमपिसिद्धंभवति। पिङ्गलका
ण्वस्यछात्राः पैङ्गलकाण्वाः॥ त्यदादीनिच॥ यस्याचामादिग्रहणमनुवर्ततेउताहोन। किंचातः। यद्यनुव
र्ततेइहचप्रसज्येतत्वत्पुत्रस्यछात्रास्त्वात्पुत्राः। इहचनस्यात्त्वदीयोमदीयइति। अथनिवृत्तम्एङ्प्रा-
चांदेशेयस्याचामादिग्रहणंकर्तव्यम्। एवंतर्ह्यनुवर्तते। कथंत्वात्पुत्रामात्पुत्राइति।

वः। पाणिनस्यापत्यंयुवेतीञ्तस्यछात्राइतिविवक्षितेयूनिलुगितीञोलुकृतेनेञश्चेत्यणनभवतीतिछोभवति। पैङ्ग
लकाण्वाइति। कण्वादिभ्योगोत्रइत्यणवृद्धसंज्ञायांतुलुक्स्यात्॥ त्यदादीनिच॥ त्वात्पुत्राइति। आदिग्रहणानुवृत्त्याऽ
न्यथानुपपत्त्योपसर्जनानामपित्यदादित्वंस्यादितिभावः। अचामित्यस्यतूत्तरार्थैवानुवृत्तिःस्यात्तत्संबन्धस्येहायो-
ग्यत्वान्निर्द्धारणस्यसमानजातीयविषयत्वात्। त्वदीयइति। व्यपदेशिवद्भावोऽत्रनास्तिअप्रातिपदिकेनेतिनिषेधात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संबन्धमिति। द्वितीयान्तमेतत्। संबन्धमनुरोत्स्यते न हास्यतीत्यर्थः। अथवा संबध्यत इति संबन्धः कर्मणि घञ् नपुंसकेऽपि बाधकाभावाद्भवति। वृद्धिग्रहणसंबद्धमादिग्रहणमिहानुवर्तत इति नास्ति तस्य त्यदादिभिः संबन्धः। तद्यथेति। एतद्दर्शयति। स्वरितत्वप्रतिज्ञानादुत्तरसूत्र एव योग्यत्वाद्यस्याचामादिरिति संबध्यते एङ् यस्याचामादिस्तद्वृद्धमिति वाक्यार्थसंपादनाय। इह त्वयोग्यत्वात् संबन्धानुपपत्तिः। तुल्यजातीयस्य निर्द्धारणात् त्यदादीनां चाज्रूपत्वाभावाद्यस्याऽचामादयस्त्यदादय इति तत्संबन्धाभावात्॥ एङ् प्राचाम्। कुणिना प्राग्ग्रहणमाचार्यनिर्देशार्थं व्यवस्थितविभाषात्वं चेति व्याख्यातं तेन क्रोडो नामोदग्ग्रामस्तत्र भवः क्रौड इत्यणेव भवति। अन्येन तु प्राग्ग्रहणं देशविशेषणं व्याख्यातं तेन देवदत्तो नाम-

संबन्धमनुवर्तिष्यते। वृद्धिर्यस्याचामादिस्तद्वृद्धं त्यदादीनि च वृद्धसंज्ञानि भवन्ति। वृद्धिर्यस्याचामादिस्तद्वृद्धम्। एङ् प्राचां देशे यस्याचामादिग्रहणमनुवर्तते वृद्धिग्रहणं निवृत्तम्। तद्यथा। कश्चित्कान्तारे समुपस्थिते सार्थमुपादत्ते स यदा निष्क्रान्तकान्तारो भवति तदा सार्थं जहाति॥ एङ् प्राचां देशे॥ एङ् प्राचां देशे शैषिकेष्विति वक्तव्यम्। सैपुरिकी सैपुरिका। स्कौनगरिकी स्कौनगरिकेति॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे नवममान्हिकम् पादश्चायं समाप्तः॥

वाहीकेषु ग्रामस्तत्र भवो देवदत्त इत्यवृद्धत्वाट्ठञ्ञिठौ न भवतः। भाष्यकारस्तु कुणिदर्शनमशिश्रियत्। सैपुरं स्कौनगरं च वाहीकग्रामौ। तत्र वृद्धत्वाद्वाहीकग्रामेभ्यश्चेति ठञ्ञिठौ भवतः। शैषिकेष्विति वचनादपत्यविकारयोर्वृद्धलक्षणप्रत्ययाभावः। क्रोडदेवदत्तयोस्त्वप्राग्देशवाचिनोर्व्यवस्थितविभाषया न भवतीति प्राग्देशवाचिनस्तु देवदत्तस्य वृद्धसंज्ञत्वात् काश्यादित्वात् वृद्धलक्षणौ ठञ्ञिठौ भवतः॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमाध्यायस्य प्रथमे पादे नवममाह्निकम् पादश्चायं समाप्तः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥विद्योदयो निराकुर्याद्‌विद्यातिमिरं सदा॥

॥इति नवममाह्निकम्॥

॥सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ विद्योदयो निराकुर्योदविद्यातिमिरं सदा ॥

॥ श्रीसंकष्टनाशिन्यै नमः ॥

॥ अथ प्रथमाध्यायस्य द्वितीयः पादः ॥

॥ श्रीविश्वेश्वराय नमः ॥

॥ सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥श्रीगणेशायनमः॥ गाङ्कुटादिभ्यः॥चत्वारोऽत्र पक्षाउपक्षिप्ता भाष्ये। ङित्त्वकित्त्वसंबन्धप्रतिपादनं भावनासंज्ञाकरण
मतिदेशश्चेति। तत्राद्यपक्षनिराकरणायवार्तिकमुपन्यस्यति। ङित्किद्वचनइति। सताहीति। विद्यमानेनवस्तुनासंबन्धो
र्थस्यशक्यतेवक्तुम्। नचगाङ्कुटादिभ्यःपरस्य प्रत्ययस्यङकारइत्संज्ञकोस्तियेनतस्यङिदितिव्यपदेशःस्यात्। सत्त्वे-
वाभूतानुवादेप्रयोजनाभावादप्रामाण्यमापतति। नचगाङ्कुटादिभ्यश्चङादेर्ङितोऽनेनविधानमुपपद्यते अञ्णि
द्ग्रहणानर्थक्यप्रसङ्गात्। भाष्येतेइति। गाङ्कुटादिभ्यःपरोयोऽञ्णित्प्रत्ययःसङिद्भवतिङकारइत्संज्ञकस्तस्यभवती

॥श्रीगणेशायनमः॥ गाङ्कुटादिभ्योऽञ्णिन्ङित्॥ ।ङित्किद्वचनेतयोरभावादप्रसिद्धिः॥ङित्कि
द्वचनेतयोरभावात्ङकारककारयोरभावात्ङित्त्वकित्त्वयोरप्रसिद्धिः। सताह्यभिसंबन्धःशक्यतेकर्तु
म्। नचात्रङकारककारावितौपश्यामः। तद्यथा। चित्रगुर्देवदत्तइतियस्यतागावोभवन्तिसएताभिःश
क्यतेभिसंबन्धुम्। भाष्येतेतर्ह्यनेन गाङ्कुटादिभ्योऽञ्णिन्ङिद्भवतीति। असंयोगाल्लिट्किद्भवतीति
॥भवतीतिचेदादेशाप्रतिषेधः॥भवतीतिचेदादेशस्यप्रतिषेधोवक्तव्यःङकारककारावितावादे
शौप्राप्नुतः।

त्यर्थः। सतुङकारआदौमध्येअन्तेवेतिदेशविशेषंनापेक्षतेइत्संज्ञाकान्तस्यैवविधानात्। इतांचधर्मोऽश्रूयमा-
णानामपिकार्यंप्रतिविशेषकत्वम्। भवतीतिचेदिति। टित्त्वकित्त्वमित्त्वानामभावात्ङइदनन्तरोस्येति। अनन्तरा-
र्थेबहुव्रीह्यभावाच्चादेःपरस्येत्यादेःस्थानेङकारआदेशःप्राप्नोतीत्यर्थः। ङइत्ङिदितितत्पुरुषएवन्याय्यःत्वप
दार्थप्राधान्येनतस्यान्तरङ्गत्वाद्बहुव्रीह्यर्थानुपादानाच्च। कुटितेत्यादौप्रसिद्धङित्वाच्चङादयोयद्यादेशाःक्रिय
न्तेतदानैतेतदर्थाभिधानेसमर्थास्तङादयश्चनेहशास्त्रेप्रसिद्धाः। अथास्मादेववचनादपूर्वाःक्रियेरन्तदाङि
च्चेत्यन्त्यस्यस्युः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथं पुनरिति। इत्संज्ञो ह्यसन्नेव कार्यमात्रं प्रतिपादयति आदेशस्तु भावरूपोऽन्यस्य प्रसङ्गे भवति। किं हीति। लोपस्य य-
थादेशत्वं तथाङकारस्यापीत्संज्ञकस्य भविष्यतीत्यर्थः। तत्रस्थानिनं निवर्त्य ङकारो निवर्तते। संज्ञाकरण इति। अ-
क्तपरिमाणा संज्ञा कृतेति न्यूनातिरिक्तशब्दोच्चारणे संज्ञास्वरूपानुपलम्भात् संज्ञिनाम संप्रत्ययः। ङित्संज्ञाकरणं तु-
व्यचेः कुटादित्वमनसीति वचनात्संप्रसारणार्थं स्यात्। लिटः कित्संज्ञा चवचिस्वपीति संप्रसारणार्था स्यात्। गाङ्कुटा

कथं पुनरित्संज्ञो नामादेशः स्यात्। किं हि वचनान्न भवति। एवं तर्हि षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते। न चा-
त्र षष्ठीं पश्यामः। गाङ्कुटादिभ्य इत्येषा पञ्चमी अञ्णिदिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादि-
त्युत्तरस्येति। संज्ञाकरणं तर्हीदं गाङ्कुटादिभ्यः अञ्णिन्ङित्संज्ञो भवतीति। असंयोगाल्लिड् कित्सं-
ज्ञो भवतीति। संज्ञाकरणे क्ङिद्ग्रहणे संप्रत्ययः शब्दभेदात्। संज्ञाकरणे क्ङिद्ग्रहणे असंप्रत्ययः
स्यात्। किं कारणम्। शब्दभेदात्। अन्यो हि शब्दः क्ङितीति। अन्यः कितीति ङितीति च। तथा किद्ग्रहणे-
षु ङिद्ग्रहणेषु चानयोरेव संप्रत्ययः स्यात्। तद्वदतिदेशस्तर्ह्ययम्। गाङ्कुटादिभ्यः अञ्णिन्ङिद्वद्भवती-
ति असंयोगाल्लिट्किद्वद्भवतीति। स तर्हि वतिनिर्देशः कर्तव्यः। न कर्तव्यः। न ह्यन्तरेण वतिमतिदेशो ग-
म्यते। अन्तरेणापि वतिमतिदेशो गम्यते। तद्यथा। एष ब्रह्मदत्तः। अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्-
यामहे ब्रह्मदत्तवदयं भवतीति। एवमिहाप्यङितं ङिदित्याह ङिद्वदिति गम्यते। अकितं किदि-
त्याह किद्वदिति गम्यते॥

दिभ्यस्तर्हि ङित्संज्ञा किमर्था स्यात् अनर्थिका भवतु न्यायानुगतेऽर्थे किं कुर्मः। क्ङिति चेत्यादिषु यौगिकस्यैव ग्रहणं
स्याद् यस्य ककारो ङकारश्चेत्संज्ञकः। अनयोरेवेति कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्यय इति न्यायात्। च
ङादीनां ङित्करणं क्ङिदादेशेषु ग्रहणार्थं स्यात् यत्र संज्ञारूपानुपलब्धिः। एष ब्रह्मदत्त इति। निर्ज्ञाते भेदे तत्कार्यप्रा-
प्त्यै तद्रूपारोपणं क्रियत इत्यतिदेशगतिः।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अक्ङिद्विधिप्रसङ्ग इति। कार्यातिदेशे तत्प्रतिबद्धानि कार्याणि व्यपदेशमन्तरेणापि भवन्तीति गुणनिषेधादीनामेवातिदेशः। अ
मागमस्तु स्वाश्रयत्वात्तेन न निवार्यते। यथा ब्राह्मणवदतिदिष्टः क्षत्रियस्य स्वाश्रयं युद्धादि न निवर्तयति। अक्ङितीति च पर्युदास
आश्रयणात्किंत्वतिबद्धकार्याभावात्स्वाश्रयोऽमागमः स्यात्। सिद्धं त्विति। प्रसज्यप्रतिषेधे अमागमनिषेध एव क्ङित्कार्यम्। सिद्धं तु
पूर्वस्येति। विशिष्टमत्र ङित्कार्यमतिदिश्यते न सर्वमित्यर्थः। सप्तम्यर्थेपि वतिरिति। सप्तम्यर्थे वर्तमानाद्विवार्थे वतिरित्यर्थः।
ननु नेह वतिरुपात्तः तत्कथमयं परिहारः। अयं भावः। यथा न सर्वकार्यप्राप्त्यर्थ एवात्र ब्रह्मदत्ते ब्रह्मदत्तत्वारोपः। अपि तु कस्य-

तद्वदतिदेशेऽकिद्विधिप्रसङ्गः। तद्वदतिदेशे अकिद्विधिरपि प्राप्नोति। सृजिदृशोर्झल्यमकिति। सिसृक्षति। दिदृक्षते। अकित्त्वलक्षणोऽमागमः प्राप्नोति। सिद्धं तु प्रसज्यप्रतिषेधात्। सिद्धमेतत्। कथम्। प्रसज्यायं प्रतिषेधः क्रियते किति नेति। सर्वत्र सन्नन्तादात्मनेपदप्रतिषेधः। सर्वेषु पक्षेषु सन्नन्तादात्मनेपदं प्राप्नोति। उच्चुकुटिषति। निचुकुटिषति। ङितद्भावादात्मनेपदं प्राप्नोति। तस्य प्रतिषेधो वक्तव्यः। सिद्धं तु पूर्वस्य कार्यातिदेशात्। सिद्धमेतत्। कथम्। पूर्वस्य यत्कार्यं तदतिदिश्यते। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। सप्तम्यर्थेपि वतिर्भवति। तद्यथा। मधुरायामिव मधुरावत्पाटलिपुत्र इव पाटलिपुत्रवत्। एवं ङितीव ङिद्वत्। कितीव किद्वत्। अथ किमर्थ एष ङ्क्ङितोः क्रियते न सर्वं किदेव स्यात् ङिदेव वा॥

चिदेव कार्यस्य लाभार्थः। एवमिहापि व्याख्यानाद्विशिष्टङित्कार्यातिदेशार्थ एवाश्रितः प्रत्ययस्य तद्रूपाप्रसङ्गः। उपदे-
शग्रहणानुवृत्त्या चोपदेशे यो ङित्तस्मादात्मनेपदमिति सामर्थ्यात्पूर्वस्य कार्यातिदेशोऽयम्। अथ किमर्थमिति। कार्यार्थत्वा
दनुबन्धासङ्गस्यैकेनैवानुबन्धेन गुणनिषेधादेः सिद्धत्वादनुबन्धभेदोऽनर्थक इति प्रश्नः। एकस्य चानुबन्धस्य करणे तु तिदे
शोऽपि भेदेन न कर्तव्यः।

॥

CC-0. In Public Domain. Digitization by eGangotri

आवसथइति।रुदिविदिभ्यांङित्इति अतोङित्इति वर्तमाने उपसर्गे वसेरित्यथप्रत्ययः।जाग्रइति।कितिगुणइष्यतेनङिति।
एवंच विषयविभागः पृथगनुबन्धोपादानादेवलभ्यते।नुवितेति।नुस्तुतौ। धुवितेति धुविधूनने।कितीति सप्तमीनिर्देशात्-

पृथगनुबन्धत्वेप्रयोजनं नवचित्स्वपियजादीनामसंप्रसारणं सार्वधातुके चङादिषु। पृथगनुबन्धत्वे प्रयोजनं नवचित्स्वपियजादीनामसंप्रसारणं सार्वधातुके चङादिषु च।सार्वधातुके प्रयोजनम्।यथेह भवति सुप्तः सुप्तवानित्येवं स्वपितः स्वपिथइत्यत्रापि प्राप्नोति। चङादिषु च प्रयोजनम्।केपुनश्चङादयः।चङ्‌ङ्‌जिङ्‌ङ्‌निबथङ्‌नङः।चङ्।यथेह भवति शूनः शूनवानित्येवमशिश्वियदत्रापि प्राप्नोति।अङ्।यथेह भवति शूनउक्तइत्येवमश्वदवोचदत्रापि प्राप्नोति।नजिङ्।यथेह भवति सुप्तः सुप्तवानित्येवं स्वप्नगित्यत्रापि-प्राप्नोति।ङ्निप्।यथेह भवतीष्टमिष्टवानित्येवं यज्वात्रापि प्राप्नोति।अथङ्।यथेह भवत्सुषितइत्येवमावसथः अत्रापि प्राप्नोति।नङ्।यथेह भवतीष्टमित्येवं यज्ञः अत्रापि प्राप्नोति ।जाग्रोगुणविधिः। जागर्तेरगुणविधिः प्रयोजनम्।यथेह भवति जागृतः जागृथइत्यङितीति पर्युदासः।एवं जागरितवानित्यत्रापि प्राप्नोति ।अपरआह ।जाग्रोगुणविधिः। जागर्तेर्गुणविधिः प्रयोजनम्।यथेह भवति जागरितः जागरितवानित्येवं जागृतः जागृथइत्यत्रापि प्राप्नोति ।कुटादीनामिट्प्रतिषेधः। कुटादीनामिट्प्रतिषेधः प्रयोजनम्।यथेह भवति लूत्वा पूत्वाइति श्रुकः कितीतीट्प्रतिषेधो भवत्येवं नुविता धुविता अत्रापि प्राप्नोति। क्त्वायां कित्प्रतिषेधश्च। किंचेट्प्रतिषेधः।नेत्याह।अदेशोयंचः पठितः। क्त्वायां च कित्प्रतिषेधइति।यथेह भवति देवित्वा सेवित्वेति न क्त्वा सेडिति कित्त्वप्रतिषेधः। ॥

इट्प्रतिषेधस्याप्यतिदेशः स्यादित्युपन्यासः।नत्विट्प्रतिषेधः पूर्वस्य कार्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा· कै· कुटित्वेति। न क्त्वा सेडिति निषेधो विशेषानुपादानादौपदेशिकवदातिदेशिकस्यापि कित्त्वस्य स्यात्‌। अथवा यदप्राप्तं कार्यं १२१
१८१ तदतिदिश्यत इति क्त्वाप्रत्यये कित्त्वातिदेश एव न स्यात्‌। नुवित्वेति। ङित्त्वेनात्र कित्त्वं येन नाप्राप्तिन्यायेन बाध्यत इति भा
वः। सत्यपीति। विरोधाभावादतिदेशेन स्वाश्रयस्य कित्त्वस्यानिवर्तनाद्‌ येन नाप्राप्त इति न्यायाभावाच्चानहि कुटिता कुटि

एवं कुटित्वा पुटित्वा अत्रापि प्राप्नोति। अथवा देश एवायं चः पठितः। क्त्वायां कित्प्रतिषेधश्चेट्‌ प्रतिषेधश्च। कित्प्रतिषेध उदाहृतः। इट्‌ प्रतिषेधो यथेह भवति लूत्वा पूत्वा श्रुकः कितीति एवं नुवित्वा धुवित्वा अत्रापि प्राप्नोति। स्यादेतत्‌ प्रयोजनं यद्यस्य नियोगत आतिदेशिकेन ङित्त्वेनौपदेशिकं कित्त्वं बाध्येत। सत्यपि ङित्त्वे कि देवैषः। तस्मान्नूत्वा धूत्वेत्येव भवितव्यम्‌॥ ॥सार्वधातुकमपित्‌॥ ॥सार्वधातुकग्रहणं किमर्थम्‌। अपिन्ङिदितीयत्युच्यमाने आर्धधातुकस्याप्यनेनापितो ङित्त्वं प्रसज्येत। कर्ता हर्ता। नैष दोषः। आ-चार्यप्रवृत्तिर्ज्ञापयति नानेनार्धधातुकस्यापितो ङित्त्वं भवतीति। यदयमार्द्धधातुकीयान्‌ कांश्चिद्‌ ङितः करोति। चङ्‌ अङ्‌ जिङ्‌ इङ्‌ निवथङ्‌ नङः। सार्वधातुकेप्येतज्ज्ञापकं स्यात्‌। नेत्याह। तुल्यजातीयस्य ज्ञापकम्‌। कश्च तुल्यजातीयः। यथाजातीयकाश्चङङ्‌ जिङ्‌ इङ्‌ निवथङ्‌ नङः। कथंजातीयकाश्चैते। आर्द्धधातुकीयाः।

तुमित्यादौ कित्त्वे प्राप्ते ङित्त्वारम्भः॥ सार्वधातुकमपित्‌॥ लिङ्गाद्व्याप्तिरतिव्याप्तिर्वेति प्रदर्शनाय सार्वधातुकग्रहण
स्याक्षेपप्रतिसमाधाने भाष्यकारेणोपन्यस्ते। आर्धधातुकीयानिति। आर्द्धधातुकेषु भवा इति ठञन्तत्वादन्तोदात्तत्वाभावा एमः
द्बह्वचोन्तोदात्ताट्ठञिति ठञभावे वृद्धाच्छो भवति। तातङस्तु ङित्त्वं तिपः पित्त्वादप्राप्तमित्यज्ञापकं सार्वधातुकाङित्त्व- १८१
स्याङ्‌ निपो ङित्त्वमज्ञापकमस्य हि पित्त्वात्‌ ङित्त्वाप्राप्तिः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्यवन्तेऽप्लवन्त इति। गुणात्पूर्वं नित्यत्वादन्तरङ्गत्वाच्चैकादेशः। तत्र कृते परस्येहापित आश्रितत्वात्परस्य कार्यं प्रत्यादिवद्भावाद्गुणनिषेधः स्यात्। साधारणपरिहाराभिधानाय वार्या दाङ्मितिनाश्रितं प्रसज्यप्रतिषेधे तु ङित्त्वनिषेधः। पूर्वस्य कार्यमिति। पूर्वं प्रत्ययान्तवत्त्वान्नङित्त्वाभावः। यद्यपि सार्वधातुकावयवस्याकारस्यैकादेशः तथापि परं प्रत्यादिवत्त्वादन्तरङ्गः सार्वधातुकमपिद्भवतीति स्यादेव ङित्त्वं च्यवेदिति चोत्तमैकवचने सर्वस्यैव सार्वधातुकस्यैकादेशादिति ङित्त्वप्र-

यद्येतदस्ति तुल्यजातीयस्य ज्ञापकमिति चङ्डौ लुग्विकरणानां ज्ञापकौ स्यातां नजिङ्वर्तमानकालानां ङित् नि भूतकालानाम यङ् श्नाद्भू ओणादिकानां नङ् श्नाद्भोपनयीनाम्। तस्मात्सार्वधातुकग्रहणं कर्तव्यम्। किं पुनरयं पर्युदासः यदन्यत्पित इत्याहोस्वित्प्रसज्यायं प्रतिषेधः पिन्नेति। कश्चात्र विशेषः। अपिद्ङिदिति चेत् शबेकादेशप्रतिषेध आदिवत्त्वात्। अपिन्ङिदिति चेच्छबेकादेशे प्रतिषेधो वक्तव्यः। च्यवन्तेऽप्लवन्त। किं कारणम्। आदिवत्त्वात्। पिदपितोरेकादेशो पित आदिवत्स्यात्। अस्यान्यत्पित इति कृत्वा ङित्त्वं प्राप्नोति। अस्तु तर्हि प्रसज्यप्रतिषेधः पिन्नेति। न पिन्ङिदिति चेदुत्तमैकादेशप्रतिषेधः। न पिन्ङिदिति चेदुत्तमैकादेशे प्रतिषेधः प्राप्नोति। तुदानि लिखानि। किं कारणम्। आदिवत्त्वादेव। पिदपितोरेकादेशः पित आदिवत्स्यात्तत्र पिन्नेति प्रतिषेधः प्राप्नोति। यथेच्छसि तथास्तु। ननु चोक्तमुभयथा च दोष इति। उभयथा च न दोषः। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानम्॥

सङ्गः। तुदानीति। यद्यप्युत्तमस्य पित्त्वं तथापि तद्युक्तत्वादाटः पिदवयवस्यैकादेशः पित उत्तमस्यादिवदिति स्यान्नङित्त्वनिषेधः। तुदै इत्यत्र च सर्वस्यैव पित एकादेशः पित आदिवदिति ङित्त्वप्रतिषेधप्रसङ्गः। स्थानिवद्भावादिति। यथा स्थानिकाले यथायोगं गुणप्रवृत्तिनिवृत्ती तथादेशेऽपि कृते व्यवधानबुद्ध्या भवतः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ असंयोगात्॥ ॥ऋदुपधेभ्य इति। बिभिदतुः बिभिदुरित्यादौ कित्त्वं नित्यं गुणस्त्वनित्यः। ववृते इत्यादौ तु द्वयोरप्यनित्यत्वं त
१८२ त्र परत्वाद्गुणप्रसङ्गः पूर्वविप्रतिषेधाश्रयेण निवार्यते। नवा क्वसस्येति। यथा क्वसस्य कित्करणसामर्थ्याद्गुणो बाध्यते त
थेहातिदेशसामर्थ्यादित्यर्थः। युक्तं तत्रेति। क्वसः कित्करणे प्रयोजनान्तराभावः। इह तु संप्रसारणविधौ कृतार्थत्वाद्दु
र्बलेनातिदेशेन प्राप्यमाणो गुणनिषेधो दुर्बलत्वान्न तद्विधिना सह स्पर्धते तातङ्न्यायेन। इष्टवाचीति। सूत्रकारेणे
वायमर्थः संगृहीतः स तु स्मर्तव्य इत्यर्थः॥ इन्धि॥ ॥किमर्थमिति। विनापि सूत्रेणेष्टं सिध्यति सत्यपि चेष्टं न सिध्यति। बभूवे

असंयोगाल्लिट् कित्॥ ॥ऋदुपधेभ्यो लिटः कित्त्वं गुणाद्विप्रतिषेधेन॥ ऋदुपधेभ्यो लिटः कित्त्वं गुणा
द्भवति पूर्वविप्रतिषेधेन। ववृते। ववृधे। उक्तं वा। किमुक्तम्। नवा क्वस्यानवकाशत्वादपवादो गुणस्येति।
विषम उपन्यासः। युक्तं तत्र यदनवकाशं कित्करणं गुणं बाधते इह पुनरुभयं सावकाशम्। कित्करण
स्यावकाशः। ईजतुः। ईजुः। गुणस्यावकाशः। वर्तिता। वर्धिता। इहोभयं प्राप्नोति। ववृते। ववृधे। परत्वाद्गु
णः प्राप्नोति। इदं तर्ह्युक्तमिष्टवाची परशब्द इति विप्रतिषेधे परं यदिष्टं तद्भवतीति॥ इन्धिभवतिभ्यां च॥
॥किमर्थमिदमुच्यते। इन्धेः संयोगार्थं ग्रहणं भवतेः पिदर्थम्। अयं योगः शक्योऽवक्तुम्। कथम्। इन्धे
श्छन्दोविषयत्वाद् भुवो वुको नित्यत्वात् ताभ्यां लिटः किद्वचनानर्थक्यम्। इन्धेश्छन्दोविषयो लिट्।

त्यज्लक्षणत्वाद्वृद्धेरिग्लक्षणत्वाभावात्प्रतिषेधाप्रसङ्गात्। गुणमात्रनिषेध एवं तु बभूविथ अहं बभूवेति च णित्वाभा
वपक्षे स्यादिति प्रश्नः। इन्धेरिति। भाषायां लिट आमा व्यवधानाच्छन्दस्य मन्त्र इत्याम्प्रतिषेधादेतदुक्तम्। न तस्य भा- राम॰
षायां प्रयोगाभावः। तत्र छन्दस्युभयथेति लिटः सार्वधातुकत्वात् समीध इति ङित्त्वान्नलोपः। आर्धधातुकत्वाच्च श्रमभा १८२
वः। व्यत्ययो बहुलमिति वचनाद्वा। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निन्योवुगिति। ओः सुपीत्यत ओरितिनानुवर्ततइतिभावः। एकदेशविकृतस्यानन्यत्वाच्च शब्दान्तरप्राप्त्यभावः। सत्यामपि
वा शब्दान्तरप्राप्तौ कृताकृतप्रसङ्गित्वाद्वुको नित्यत्वं वुकि कृते गुणस्य प्राप्तिरेव नास्तीति नैतयोस्तुल्यबलत्वम्। मृडामृडादिभ्य
एवेति। विपरीतनियमस्तु व्याख्यानान्न भविष्यति मृडादिभ्यः क्त्वैव किद्भवतीति। नह्यनिष्टार्था शास्त्रप्रवृत्तिर्लक्ष्यमूलक
त्वाद्व्याकरणस्मृतेः। लूत्वेति। क्त्वाप्रत्ययमात्रस्य नियमः स्यात्। कित्त्वं तु क्त्वातोसुन्कसुन इत्यादौ विशेषणार्थं स्यात्। एवम

नह्यन्तरेण क्त्वं न्द इन्धेरनन्तरो लिट्लभ्यः। आमा भाषायां भवितव्यम्। भुवो वुको नित्यत्वाद्भवतेरपि नित्यो वुक्
कृते गुणे प्राप्नोति अकृते पि प्राप्नोति। ताभ्यां किद्वचनानर्थक्यम्। ताभ्यामिन्धिभवतिभ्यां किद्वचनमनर्थकम्॥ ॥

मृडमृदगुधकुषक्लिश वदवसः क्त्वा॥ ॥किमर्थं मृडादिभ्यः परस्य क्त्वः कित्त्वमुच्यते। न। किदेव हि क्त्वा। न क्त्वा सेडि
ति प्रतिषेधः प्राप्नोति तद्बाधनार्थम्। यदि तर्हि मृडादिभ्यः परस्य क्त्वः कित्त्वमुच्यते नार्थो न क्त्वा सेडिति कित्त्वप्रतिष
धेन। इदं नियमार्थं भविष्यति। मृडादिभ्य एव परस्य क्त्वः कित्त्वं भवति नान्येभ्य इति। यदि नियमः क्रियते इहापित
र्हि नियमान्न प्राप्नोति। लूत्वा पूत्वा। अत्राप्यकित्त्वं प्राप्नोति। तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः। यथा
जातीयको मृडादिभ्यः परः क्त्वा। कथं जातीयकश्च मृडादिभ्यः परः क्त्वा। सेट्। एवमप्यत्रास्ति कश्चिद्विभाषितेट्
सो निटां नियामकः स्यात्। अस्तु तावद्ये सेटस्तेषां ग्रहणं नियमार्थं भविष्यति। यदिदानीं विभाषितेट् तस्य ग्रहणं
विध्यर्थं भविष्यति॥ ॥रुदविदमुषग्रहिस्वपिप्रच्छः संश्च॥ ॥स्वपिप्रच्छयोः सन्नर्थं ग्रहणं किदेव हि क्त्वा॥

पीति। क्लिशः क्त्वानिष्ठयोरिति विकल्पेनेड्विधानात्। अस्तु तावदिति। मृडमृदवदवसां क्त्वः कित्त्वविधानं नियमार्थं गुधकुषक्लिशां
नां तु रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थम्। तत्र विधिसंभवे क्लिशेरनिटः क्त्वः कित्त्वविधानं नियमार्थं न भवति॥ रुदविद॥
सन्नर्थमिति। तत्र चरितार्थत्वादनिटः क्त्वः कित्त्वविधानं नियमार्थं न भवति। ॥

Nepal Saṇskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इको॥ किमर्थमिति। इकोझल् हलन्ताच्चेत्येक एव योगः कर्तव्यः किमर्थो योगविभाग इति प्रश्नार्थः। वक्ष्यमाणश्चात्राभिप्रायः। दीर्घत्वमिति। अञ्झनगमां सनीति दीर्घत्वं नाप्राप्ते गुण आरभ्यमाणं तस्य बाधकमिति भावः। कृते भवेदिति। शास्त्रमावर्तमानं धर्मसाधनं जपादिवदिति भावः। अनर्थकं त्विति। शास्त्रपूर्वकात्प्रयोगाद्धर्मो न तु शास्त्रप्रवृत्तिमात्रादिति भावः। ह्रस्वार्थमिति। ह्रस्वानामेव दीर्घविधानसामर्थ्याद्गुणो न स्यात्। दीर्घाणां तु प्रागेव तादृप्याद्रूपविशेषसम्पत्तिफलत्वाच्छास्त्रस्य दीर्घशास्त्राप्रव-

इकोझल्॥ ॥किमर्थमिकः परस्य सनः कित्त्वमुच्यते। इकः कित्त्वं गुणो मा भूत्। इकः कित्त्वं क्रियते गुणो मा भूदिति चिचीषति। तुष्टूषति। नैतदस्ति प्रयोजनम्। दीर्घारम्भात्। दीर्घत्वमत्र बाधकं भविष्यति। कृते भवेत्। कृते खलु दीर्घत्वे गुणः प्राप्नोति। अनर्थकं तु। अनर्थकमेवं सति दीर्घत्वं स्यात्। नानर्थकम्। ह्रस्वार्थम्। ह्रस्वानां दीर्घवचनसामर्थ्याद्गुणो न भविष्यति। भवेद्ध्रस्वानां दीर्घवचनसामर्थ्याद्गुणो न स्यात्। दीर्घाणां तु प्रसज्यते। दीर्घाणां तु खलु गुणः प्राप्नोति दीर्घाणामपि दीर्घत्ववचनसामर्थ्याद्गुणो न भविष्यति। न दीर्घाणां दीर्घाः प्राप्नुवन्ति। किं कारणम्। न हि भुक्तवान् पुनर्भुङ्क्ते कृतश्मश्रुश्च पुनः श्मश्रूणि कारयति। ननु च पुनः प्रवृत्तिरपि दृष्टा भुक्तवानपि पुनर्भुङ्क्ते कृतश्मश्रुश्च पुनः श्मश्रूणि कारयति। सामर्थ्याद्धि पुनर्भाव्यम्। सामर्थ्याद्धि पुनः प्रवृत्तिर्भवति। भोजनविशेषाच्छिल्पिविशेषाद्वा।

र्तनाद्गुणप्रसङ्गः। दीर्घाणामपीति। गुणापाकरणार्थं दीर्घेष्वपि दीर्घशास्त्रं प्रवर्तेत एवेत्यर्थः। न हि भुक्तवानिति। तृप्तिफलं भोजनं फले संपन्ने पुनर्न प्रवर्तते। ननु चेति। तृप्तोपि पुनर्भुङ्क्त इत्यर्थः। भाव्यमिति। कर्तव्यं भोजनं तृप्तिविशेषार्थिभिरित्यर्थः। न किंचिदिति। न हि दीर्घाणां दीर्घतरः संपद्यत इत्यर्थः। अग्निवदिति। दग्धस्यायोग्यत्वाद्दाहद्वैतभावः। इहाप्ययोग्यत्वा दीर्घेषु दीर्घशास्त्रेण न प्रवर्तितव्यमिति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीर्घाणामपीति। ह्रस्वेष्वपूर्वदीर्घरूपसंपादनार्थं दीर्घशास्त्रं प्रवर्तते दीर्घेषु तु रूपप्रतिबन्धिगुणनिवर्तनेन स्वरूपप्रत्यापत्त
ये। यथा मो राजि समः क्वाविति मकारस्य मकार इति भावः। ततश्च ह्रस्वानामिव दीर्घाणामपि येन नाप्राप्तिन्यायेन दीर्घेण गुणो बा
ध्यत एव। यथैवेति। दीर्घारम्भादविकृते नैव दीर्घेण स्थातव्यमिति भावः। ऋद्दित्वमिति। यद्यन्तरेण दीर्घविधानं प्राप्नुयाद्दित्वं
तदा तद्दीर्घेण बाध्येत यत् तु दीर्घाश्रयमेव ऋद्दित्वं तदा तदेव फलं दीर्घस्य संजातमिति ऋद्दित्वं प्रवर्तिष्यते। तथा चोक्त-

दीर्घाणां पुनर्दीर्घत्ववचनेन किंचित्प्रयोजनमस्ति। अकृतकारि खल्वपि शास्त्रमग्निवद्भवति। तद्यथा। अग्निर्य
ददग्धं तद्दहति यद्दग्धं तन्न दहति। दीर्घाणामपि दीर्घवचन एतत्प्रयोजनं गुणो मा भूदिति। कृतकारि खल्व
पि शास्त्रं पर्जन्यवत्। तद्यथा पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति। यथैव तर्हि दीर्घत्ववचनसामर्थ्याद्गुणो
न भवति। एवमृद्दित्वमपि न प्राप्नोति। चिकीर्षति जिहीर्षति। ऋद्दित्वं दीर्घसंश्रयम्। नाकृते दीर्घे ऋद्दित्वं प्रा
प्नोति किं कारणम्। ऋत इद्धात्वोरित्युच्यते। भवेद्ध्रस्वानां नाकृते दीर्घे ऋद्दित्वं स्याद्दीर्घाणां तु खल्वकृतेऽपि दीर्घ
त्वे ऋद्दित्वं प्राप्नोति। दीर्घाणां नाकृते दीर्घे। दीर्घाणामपि नाकृते दीर्घत्वे ऋद्दित्वं प्राप्नोति। यद्यदीर्घत्वेन ग
र्भो बाधितः तत उत्तरकालमृद्दित्वं भवति। णिलोपस्तु प्रयोजनम्। इदं तर्हि प्रयोजनम्। णिलोपो यथा। स्या
त्। ज्ञीप्सति। क्वास्ताः क्व निपतिताः क्व कित्त्वं क्व णिलोपः को वाभिसंबन्धः। यत्सति कित्त्वे णिलोपः स्यादस
ति कित्त्वे न स्यात्।

ते। यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यत इति। दीर्घाणामिति। इक्कोत्वाभ्यां गुणवृ
द्धी भवतो विप्रतिषेधेनेति गुणप्रसङ्गादिति भावः। ज्ञीप्सतीति। असति कित्त्वे गुणवणिलोपस्यापि विशेषाभावाद्दीर्घत्वं बाध
कं स्यादित्यर्थः। क्वास्ता इति। यथान्यत्र क्षिप्तानां शरादीनामन्यत्र निपातोऽसंभाव्यः। एवं कित्त्वणिलोपयोरपि संबन्धो न संभा
व्यत इत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कौ· एषोमिसंबन्धइति।ज्ञीप्सतीतिणेर्गुणलोपदीर्घत्वानिप्राप्नुवन्ति।तत्रासतिकित्वेऽनवकाशत्वाद्विशेषाभावाच्चगुणवण्णिलो
१८५ पस्यापिदीर्घत्वंबाधकंस्यात्।अथवापुरस्तादपवादाअनन्तरान्विधीन्बाधन्तेनोत्तरानितिणिलोपस्यैवबाधकंतत्स्यात्।गुण-
स्तुस्यादेवसतिकित्वेतेनैवगुणोबाधितइतिचिचीषतीत्यादौलब्धावकाशंदीर्घत्वंपरत्वाण्णिलोपेनबाध्यते।नन्वसत्यपिकि
त्वेयेननाप्राप्तइतिन्यायेनगुणस्यैवबाधकंदीर्घत्वंभविष्यतिनणिलोपस्यगुणबाधनेनचसावकाशंदीर्घत्वंपरत्वाण्णिलोपे
नबाधिष्यतइतिनार्थःकित्वेन।नैतदस्ति।यदाबाध्यंभेदेनापेक्ष्यतेइदंसर्वत्रप्राप्तमिदंतुक्वचिदेवेतितदायंन्यायः।यदातुबाध्य
मात्रमपेक्ष्यतेविध्यन्तरेणाव्याप्तोविषयोनकश्चिदस्तीतितदासर्वस्यैवबाधयाभवितव्यम्।असत्यपीति।मीनातिमिनोत्योःस
न्यनवकाशत्वाद्गुणंबाधित्वादीर्घःप्रवर्ततेततोमीग्रहणेनग्रहणादिस्भावेनप्रतिपदविहितेनगुणोबाध्यते।कृतेचेस्भा-

एषोमिसंबन्धः।यत्सतिकित्वेसावकाशंदीर्घत्वंपरत्वाण्णिलोपोबाधते।असतिपुनःकित्वेनवकाशंदीर्घ
त्वंयथैवगुणंबाधतेएवंणिलोपमपिबाधेत।तत्रणिलोपस्यावकाशः।कारणा।हारणा।दीर्घत्वस्यावकाशः।चि
चीषतितुष्टूषति।इहोभयंप्राप्नोति।ज्ञीप्सति।परत्वाण्णिलोपः॥असत्यपिकित्वेसावकाशंदीर्घत्वम्।कोवका
शः।इस्भावः।निमित्सति।प्रमित्सति।मीनातिमिनोत्योर्दीर्घत्वेकृतेमीग्रहणेनग्रहणंयथास्यात्॥

वेहलन्ताच्चेतिकित्वाल्लघूपधगुणाभावस्तत्रसामान्यग्रहणेचरितार्थत्वाद्दीर्घविधानस्यज्ञीप्सतीतिपरत्वाण्णिलोपोभ
विष्यतीतिनार्थःकित्वेन।ननुलाक्षणिकत्वान्मिनोतेर्मीरूपस्यमीग्रहणेनग्रहणंनप्राप्नोति।नैषदोषः।यत्रलक्षणाभि-
निर्वृत्तत्वेनशाब्दंरूपमपेक्ष्यतेतत्रलक्षणप्रतिपदोक्तयोरितिपरिभाषोपस्थानंनतुयत्रप्रयोगरूपाश्रयणंतत्र।नन्वेव
मसत्यपिमीग्रहणेनग्रहणेमीनातीत्यादिनाऽऽत्वेकृतेगामादाग्रहणेष्वविशेषइतिमाग्रहणेनग्रहणादिस्भविष्यतीतिसा- रामः
मान्यग्रहणमपिदीर्घस्यप्रयोजनंनोपपद्यते।एवंतर्हिदोषान्तराभिधानेनास्यपूर्वपक्षस्यनिराकरणाद्भाष्यकारेणैतत्सु १८४
ष्ठुनिरूपितम्। ॥

ना
नैतत्सुष्ठुनिरूपितमिति।अन्यत्तुक्तंत्वयोर्मीग्रहणेनग्रहणंनसंभवति।इस्भावेकृतेहलन्ताच्चेतिकित्वप्राप्त्याऽऽत्वनिमित्तभू
तेज्विषयंत्वस्यनङ्क्ष्यमाणत्वेनोपजीव्यविरोधात्।तस्मात्सुष्ठ्वेवैतन्निरूपितमित्याहुः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवदोषान्तरमाह। यथैवेति। सामान्यग्रहणे उपयुक्तत्वाद्दीर्घत्वस्यनास्त्यनवकाशत्वमितिद्वाभ्यामपिगुणणिलोपाभ्यां दीर्घत्वंबाध्यतइतिकर्त-
व्यंकित्वम्। नचदीर्घविधानस्यकुङ्शब्दइतिधातुरवकाशः चुकूषतइति। यस्मात्कूङ्शब्दइतिपाठस्तत्रकुटादित्वाङ्कि-
त्वेसतिगुणाभावाद्दीर्घस्यश्रवणंसिद्धम्। वेदलोकयोश्चाकूतशब्दस्य प्रयोगोदृश्यते। गुधुवावयकाराविति चे-
दुःऊहनिगमामितिब्रूयात्। किंप्रत्याहारेण॥ हलन्ताच्च॥ ॥अयुक्तइति। अन्तशब्दमवयववचनंमत्वापर्यनुयुङ्क्ते। अन्य-
यथैवत हसितिकित्त्वेसावकाशंदीर्घत्वंपरत्वाण्णिलोपोबाधतेएवंगुणोपिबाधेततस्मात्कित्त्वंवक्त-
व्यम्॥ इकः कित्त्वंगुणोमाभूद्दीर्घारम्भात्कृतेभवेत्। अनर्थकंतुह्रस्वार्थंदीर्घाणांतुप्रसज्यते॥ सामर्थ्याद्धिपुनर्भाव्यमृदित्त्वंदीर्घसंश्र
यम्। दीर्घाणांनाकृतेदीर्घेणिलोपस्तुप्रयोजनम्॥ इकोझल्॥ हलन्ताच्च॥ अयुक्तोयंनिर्देशः। कथंहिइकोना
महलन्तस्यादन्यस्यान्यःकथंतर्हिनिर्देशःकर्तव्यः। इग्वतोहलइति। यद्येवंपियक्षति। अत्रापिप्राप्नोति। ए
वंतर्हिइगुपधाद्धलन्तादितिवक्ष्यामि। एवमपिदम्भेर्नप्राप्नोतिसूत्रंचभिद्यते। यथान्यासमेवास्तु। ननुचो-
क्तमयुक्तोयंनिर्देशइति। नायुक्तः। अयमन्तशब्दोस्त्येवावयववाची। तद्यथा। वस्त्रान्तः वसनान्तइति। वस्त्रा
वयवोवसनावयवइतिगम्यते। अस्तिसामीप्येवर्तते। तद्यथा। उदकान्तंगतइति। उदकसमीपंगतइतिग-
म्यते। तद्यस्सामीप्येवर्ततेतस्येदंग्रहणम्।

स्यान्यइति। अत्यन्तभेदमनेनदर्शयति। अवयवावयविनोस्तुभेदविवक्षापिभवतितन्तूनांपटइति। अभेदविवक्षापिपटी
भवन्तितन्तवइति। इग्वतोहलइति। हलन्तादित्यर्थः। यियक्षतीति। अत्रसंप्रसारणप्रसङ्गः। तद्यः सामीप्यइति। एवंचह-
ल्वासावन्तश्चेतिकर्मधारयः। निपातनाच्चविशेषणस्यपरनिपातः। एवमपीति। व्यक्तिनिर्देशाइतिभावः। असतिचकित्त्वेन-
लोपोनस्यात्।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दम्भेरिति। वर्णग्रहणे जातिग्रहणमिति निपात एकाजनाङित्यत्रैकग्रहणेन ज्ञापितत्वात्। न चात्र व्यक्तिगतमेकत्वमपि तु जातेः स्वगतम्। तत्र यदा तावद्व्यक्तिव्यतिरिक्ता जातिस्तस्याश्च व्यक्तिद्वारकाः सामीप्यादयो धर्मास्तदा तस्या एकत्वादिकं समीपत्वं सनश्च परत्वं तदपेक्षमस्तीति सिद्धं धिप्सतीति कित्त्वम्। हकारादिषु चाभिन्नप्रत्ययाभिधानाद्धल्त्वजातेः सद्भावः। यदापि व्यक्तिभेदाव्यक्त्य एव जातिरिति पक्षस्तदाभेदव्युदासादभेदाश्रयणादिष्टसिद्धिः॥ लिङ्सि॥ कथमिति। आत्मनेपदेष्विति सप्तम्यास्तस्य अर्थद्वयं न लभ्यते। तत्र यदि निर्द्धारणसप्तमी तदा तुल्यजातीयस्य निर्धारणाल्लिङेव विशेषितः स्याद् लिङ्त्वा

एवमपि दम्भेर्न सिध्यति। यो ह्यत्रेक्समीपो हल् न तस्मादुत्तरः सन्यस्मादुत्तरः सन् नासाविक्समीपे। एवं तर्हि दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम्। हल्जातिर्निर्दिश्यते इक उत्तरा या हल्जातिरिति॥ हलन्ताच्च॥

लिङ्सिचावात्मनेपदेषु॥ कथमिदं विज्ञायते। आत्मनेपदं यौ लिङ्सिचाविति। आहोस्विदात्मनेपदेषु परतो यौ लिङ्सिचाविति। किं चातः। यदि विज्ञायते आत्मनेपदं यौ लिङ्सिचाविति लिङ् विशेषितः सिज विशेषितः। अथ विज्ञायते आत्मनेपदेषु परतो यौ लिङ्सिचाविति सिज्विशेषितः। लिङ् विशेषितः। यथेच्छसि तथास्तु। अस्तु तावदात्मनेपदं यौ लिङ्सिचाविति। ननु चोक्तं लिङ् विशेषितः सिज विशेषित इति। सिच्च विशेषितः। कथम्। आत्मनेपदं सिज्नास्तीति कृत्वा आत्मनेपदपरे सिचि कार्यं विज्ञास्यते। अथ वा पुनरस्तु चात्मनेपदेषु परतो यौ लिङ्सिचाविति। ननु चोक्तं सिज्विशेषितो लिङ् विशेषित इति। लिङ् विशेषितः। कथम्।

ब्देन लिङादेशानां ग्रहणात्। अथ परसप्तमी तदा सिजेव विशेष्यते न लिङ्। सीयुडादिसमुदायो लिङ्शब्देन गृह्यत इति तस्यात्मनेपदपरत्वाभावः। न चानयोर्भिन्नयोरर्थयोः सह विवक्षा संभवतीत्येकशेषस्याप्रयोगः। सिच्च विशेषित इति। आत्मनेपदपरत्वादुपचारात्सिजेवात्मनेपदमुच्यते गौणमुख्यार्थयोरात्मनेपदशब्दयोः सारूप्यमात्रप्रतिबद्ध एकशेषः करिष्यत इति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनेपदेलिङीति।अवयवगतंपौर्वापर्यंसमुदायआश्रयिष्यतइतिभावः अथवातन्त्रेणशब्दद्वयोच्चारणादर्थद्वयंलभ्यते।
नैववेति।संभवव्यभिचाराभ्यांसिजेवविशेष्यतेनलिङिन्त्यर्थः॥स्याध्वोरिच॥इच्चकस्येति।कथंपुनरत्रषष्ठी।यावताहेतुशब्दः
श्लोकेनप्रयुक्तइतिहेतुतृतीययाभाव्यम्।नैषदोषः।हेतुरूपतायाअविवक्षणात्।संबन्धिरूपेणविवक्षितत्वाद्यथामदीयाः
पुत्राइतिशैषिकःप्रत्ययस्तदुत्पत्तिकालेअपत्यरूपस्याविवक्षणात्।तकारइत्तकारेतूतस्यभावस्तकारेत्त्वंकिमर्थंक्रियते।दी

आत्मनेपदेपरतोलिङ्गात्सीतिकृत्वात्मनेपदेलिङिकार्यंविज्ञास्यते।नैववापुनरर्थोलिङ्विशेषणेनात्मने
पदग्रहणेन।किंकारणम्।झलितिवर्तते।आत्मनेपदेषुचैवलिङ्झलादिःनपरस्मैपदेषु।तदेतस्मिन्विशे
षणमात्मनेपदग्रहणम्।अथसिज्विशेषणेआत्मनेपदग्रहणेसतिकिंप्रयोजनम्।इहमाभूत्।अपाक्षीत्।
अवाप्सीत्।नैतदस्ति।इकइतिवर्तते।एवमप्यचैषीत्।अनैषीत्।अत्रापिप्राप्नोति।हलन्तादितिवर्तते।ए
वमपिअकोषीत्।अमोषीदत्रापिप्राप्नोति। ।नैतदस्ति।झलितिवर्तते।एवमप्यभैत्सीत्।अच्छैत्सी
त्।अत्रापिप्राप्नोति।नैतदस्ति।इग्लक्षणयोर्गुणवृद्ध्योःप्रतिषेधः।नचैषेग्लक्षणावृद्धिः।इदंतर्हिप्रयो
जनम्।इहमाभूत्।अस्राक्षीदद्राक्षीदिति।किंचस्यादकित्त्वलक्षणःअमागमोनस्यात्॥स्याध्वोरिच॥
॥इच्चकस्यतकारेत्त्वम्॥कस्यहेतोरिकारस्तपरःक्रियते।दीर्घोमाभूत्।दीर्घोमाभूदिति।ऋतेपिसः।
अन्तरेणाप्यारम्भंसिद्धोत्रदीर्घः।घुमास्थागापाजहातिसांहलीति॥

र्घोमाभूदिति।आन्तरतम्यात्प्राप्नोतीतिभावः।भाव्यमानोणुसवर्णान्नगृह्णातीत्येषतुपरिहारोनित्यत्वान्नोक्तः।क्वचिद्भा
व्यमानेनापिसवर्णग्रहणात्।यथाऽमूभ्यामित्यादावूकारोदीर्घस्यभवति।परिहारान्तराभिधानाद्वा।अन्तरेणापीति।इका
रविधानेनविनापीत्यर्थः।किंत्वितुकर्तव्यमेव।तेनविनाईत्वस्यप्राप्त्यभावात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनन्तर इति। असदृशा आदेशो क्रियमाण इत्यर्थः। प्लुतश्च विषय इति। अनेन तपरत्वं प्रत्याख्यायते यद्यनेन प्लुतो विधीयेत तत्
दा यत्रापि विषयेऽनन्त्यस्यापि प्रश्नाख्यानयोरित्यादिना प्लुतो विहितस्तत्राप्यनेन विधीयेत अस्मिन्कर्तव्ये पूर्वत्रासिद्धमित्या
दृमिकस्य प्लुतस्यासिद्धत्वात्तत्र च पक्षे नुवाददोषः प्राप्नोतीति ह्रस्व एव भविष्यति। अन्ये तु तपरत्वमनेन समर्थितमिति व्या-
चक्षते। अनन्तरे ह्यादेशो श्रूयमाणे दीर्घ एव स्यात्। ननु सिद्ध एव दीर्घ इत्युक्तं सिद्धस्यापि पुनर्विधानं प्लुतनिवृत्त्यर्थं स्यादि मा

अनन्तरे प्लुतो मा भूत्। इदं तर्हि प्रयोजनमनन्तरे प्लुतो मा भूदिति। कुतो नु खल्वेतत्। अनन्तरार्थ आरम्भे ह्र-
स्वो भविष्यति न पुनः प्लुत इति। प्लुतश्च विषये स्मृतः॥ विषये प्लुत उच्यते। यदा च स विषयो भवितव्यमेव तदा प्लु
तेन॥ इच्चकस्य तकारेत्त्वं दीर्घो मा भूदृतेपि सः। अनन्तरे प्लुतो मा भूत् प्लुतश्च विषये स्मृतः॥ स्वाघ्वोरिच्च॥ न-
क्त्वा सेट्॥ ॥ न सेडिति क्ते ऽकित्त्वे। न सेडित्येव सिद्धं नार्थः क्त्वाग्रहणेन। निष्ठायामपि तर्हि प्राप्नोति। गुधितः।
गुधितवानिति। निष्ठायामवधारणात्। निष्ठायामवधारणान्न भविष्यति। किमवधारणम्। निष्ठा शीङ् स्विदि
मिदि क्ष्विदि धृष इति। परोक्षायां तर्हि प्राप्नोति। किं च स्यात्। पपिव। पपिम। क्ङितीत्याकारलोपो न स्यात्। मा भू
देवमिटीत्येवं भविष्यति। इदं तर्हि जगृभिव। जघ्निव। क्ङितीत्युपधालोपो न स्यात्। ज्ञापकान्न परोक्षायाम्।
ज्ञापकात्परोक्षायां न भविष्यति। किं ज्ञापकम्। स निङ्क्त्वग्रहणं विदुः। यदयमिको झलिति झल्ग्रहणं करो
ति तज्ज्ञापयत्याचार्य औपदेशिकस्य कित्त्वस्य प्रतिषेधो नातिदेशिकस्येति। कथं कृत्वा ज्ञापकम्। झल्ग्रह
णस्यैतत्प्रयोजनं झलादौ यथा स्यात्। ॥

भूत प्लुत इति चेत्। तन्न। प्लुतश्च विषये स्मृत इति। स चासति तपरत्वेन प्राप्नोतीति दीर्घनिवृत्त्यर्थं तपरत्वं स्थितम्। प्लुतविधौ
तु वाक्यस्य टेरित्यधिकारात्कथमिकारस्य प्लुतः स्यादिति चिन्त्यमेतत्। न क्त्वा॥ क्ते ऽकित्त्वे इति। अकारप्रश्लेषः। निष्ठायामिति
। शीङादिभ्य एव परा निष्ठा न किदिति नियमः। विपरीतस्तु निष्ठैवेति व्याख्यानान्न भवति। परोक्षायामिति पूर्वाचार्यप्रसिद्ध्या प
रोक्षा लिडुच्यते। ॥

CC-0. In Public Domain. Digitization by eGangotri

अस्त्वत्रेति । प्राप्नोतु कित्त्वमित्यर्थः । न तु निर्वृत्तस्य निषेधः कर्तुं शक्यः । उपास्थायिषातामिति । स्थास्स् आतामिति स्थिते इट्त्वं च प्राप्नोति
चिण्वद्भावश्च तत्र परत्वाच्चिण्वद्भावे युक्प्राप्नोति वृद्धिश्च तत्र वृद्ध्यपवादो युगागमः तत्र कृते यकारस्येत्वप्रसङ्गः । न च पुन-
र्वृद्धिर्लभ्यते । पूर्वमेव युका बाधितत्वादिति भावः । असति कित्त्व इति । झल्ग्रहणस्य ज्ञापकत्वं न तावत्स्थितमिति आतिदेशि
कस्यापि कित्त्वस्य न सेडिति निषेधो भवतीत्यभिप्रायः । सुधीवनीति । अनो वकुन्नीहेरिति प्रकृतस्यैव ङीपो निषेधो न तु रेफस्यापि-

इह मा भूत् । शिशयिषत इति । यदि चात्रातिदेशिकस्यापि कित्त्वस्य प्रतिषेधः स्यात् । झल्ग्रहणमनर्थकं स्यात्
। अस्त्वत्र कित्त्वं न सेडिति प्रतिषेधो भविष्यति । पश्यति त्वाचार्य औपदेशिकस्य कित्त्वस्य प्रतिषेधो नातिदेशिक
स्येति । ततो झल्ग्रहणं करोति । नैतदस्ति ज्ञापकमुत्तरार्थमेतत्स्यात् । स्याध्वोरिच्च झलादौ यथा स्यादिह मा भू
त् । उपास्थायिषाताम् । उपास्थायिषत इत्वं कित्त्वसंनियोगेन । कित्त्वसंनियोगेनेत्वमुच्यते । तेनासति कित्त्व इत्वं न
भविष्यति । रेण तुल्यं सुधीवनि । तद्यथा । सुधीवा सुपीवेति । ङीप्संनियोगेन र उच्यमानोऽसति ङीपि न भवति । अ
थवास्त्वत्रेत्वं कारूपसिद्धिः । वृद्धौ कृतायामायादेशो भविष्यति । वस्वर्थम् । वस्वर्थं तर्हि झल्ग्रहणं कर्तव्यम् ।
वसोर्ह्यौपदेशिकं कित्त्वम् । किं च स्यात् । पपिवान् तस्थिवान् । क्ङितीत्याकारलोपो न स्यात् । मा भूदेवमिटी त्वे
वं भविष्यति । इदं तर्हि जग्मिवान् जघ्निवान् क्ङितीत्युपधालोपो न स्यात् । किदतिदेशात् । अस्त्वत्रोपदेशि
कस्य कित्त्वस्य प्रतिषेधः । आतिदेशिकमत्र कित्त्वं भविष्यति । यत्र तर्हि तत्प्रतिषिध्यते ।

स तु सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यपाय इति न्यायान्निवर्तते अयं न्यायो बिल्वकादिभ्यश्छस्य लुगित्यत्र छग्रहणे
न ज्ञापितः अस्त्वत्रेति । यकारस्य कृते इत्वे वृद्धिर्भविष्यति युगागमे न ह्याकारस्य वृद्धिर्बाध्यते न त्विकारस्यापि । ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आजिवानिति। इदं नोपपद्यते। अत्र हि नलोपे कृते द्विर्वचने एकादेशे च वस्वेकाजाद्घसामितीडागमः। तत्र हि कित्त्वप्रतिषेधान्न १२१
लोपनिवृत्तौ हि हल्त्वान्नुटि सत्येकाच्त्वाभावादिण्निवृत्तौ नलोपादीनां चक्रकप्राप्तिः। चक्रकेषु चेष्टतो व्यवस्था। भाष्यकारेण तु
परिहारान्तरसद्भावाद्दोषपरिहारो नाश्रितः। निगृहीतिरिति। ति तु नेद्वशग्रहादीनामितीडागमः। क्त्वा च विग्रहादिति। विग्रहो विभा

अञ्जेः आजिवानिति। एवं तर्हि छान्दसः क्वसुः। लिट् च च्छन्दसि सार्वधातुकमपि भवति। तत्र सार्वधातुकम
पिन्ङिद्भवतीति ङित्त्वादुपधालोपो भविष्यति। निगृहीतिः प्रयोजनम्। इदं तर्हि प्रयोजनम्। इहमाभूत्। नि
गृहीतिः। उपस्निहितिः। निकुचितिः। तत्तर्हि क्त्वाग्रहणं कर्तव्यम्। न कर्तव्यम्। क्त्वा च विग्रहात्। उपरिष्टाद्यो
गविभागः करिष्यते। न सेट्। निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः। मृषस्तितिक्षायाम्। उदुपधाद्भावादिकर्म
णोरन्यतरस्याम्। ततः पूङः। पूङश्च निष्ठा सेट् किन्न भवति। ततः क्त्वा च। क्त्वा च सेट् किन्न भवति। पूङ इति
निवृत्तम्। न सेडिति कृते किति निष्ठायामवधारणात्। ज्ञापकान्न परोक्षायां सनि झल्ग्रहणं विदुः॥ इत्थं
कित्त्वं नियोगेन रेणा तुल्यं सुधीवनि। वस्वर्थं किदतीदेशान्निगृहीतिः क्त्वा च विग्रहात्॥ ॥उदुपधाद्भावादिक
र्मणोरन्यतरस्याम्॥ इह कस्मान्न भवति। गुधितः गुधितवान्। उदुपधाच्छपः। शब्विकरणेभ्य इष्यते॥ पूङः
क्त्वा च॥ पूङः क्त्वानिष्ठयोरिड्विा प्रसङ्ग सेट्प्रकरणात्॥ पूङः क्त्वानिष्ठयोरिड्विभाषा कित्त्वं प्राप्नोति।
किं कारणम्। सेट्प्रकरणात्। सेडिति वर्तते।

गो योगस्य करिष्यत इत्यर्थः॥ उदु॥ उदुपधाच्छप इति शपः संबन्धी शब्विकरणो यस्तस्मादित्यर्थः॥ पूङः॥ पूङ इति। सेडित्य
न्यतरस्यामिति चानुवर्तनात्सेटोरेव क्त्वानिष्ठयोः कित्त्वविकल्पः स्यात् ततश्च पुवित्वा पुवित इति पक्षे स्यात्। अस्ति चेडाग रामः
मः पूङश्चेति विकल्पेनेड्विधानात्। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवेति। इड्ढिधोपूङ्श्चेतिसूत्रंवार्तिककारः प्रत्याचष्टे। तत्रानिटोरेव क्त्वानिष्ठयोरनेनकित्त्वं विकल्प्यते। तत्रयदाकित्त्वंतदाश्रु
कः कितीतिइट्प्रतिषेधात्पूत्वापूतइतिभवति। यदात्वकित्त्वंतदेड्गुणयोः पवित्वापवितइतिभवति। भारद्वाजीयाइति। लाघव
मनादृत्यसूत्रकारेणपूङ्श्चेतीड्ढिधोपठितम्। इहतुविकल्पोनानुवर्ततेउत्तरत्रवाग्रहणादितिसिध्यतीष्टमितिभावः। उत्तरा-
र्थमिति। न क्त्वासेडितिकित्त्वप्रतिषेधस्यसिद्धत्वात्॥ तृषि॥ पूजार्थमिति। शास्त्रस्यपूजापारंपर्यप्रतिपादनेनानादित्वात्तामा

नवासेट्त्वस्याकिदाश्रयत्वादनिटिवाकित्त्वम्। नवाएषदोषः। किंकारणम्। सेट्त्वस्याकिदाश्रयत्वादकि
दाश्रयंसेट्त्वम्। यदाअकित्त्वंतदेटाभवितव्यम्। सेट्त्वस्याकिदाश्रयत्वादनिट्येवविभाषाकित्त्वंभविष्यति। इ
ड्ढिधोपूङोग्रहणंक्रियते। तेनवचनादिट्सेट्प्रकरणाच्च। इड्येवविभाषाकित्त्वंप्राप्नोति। इड्ढिधोह्यग्रहणम्।
इड्ढिधौहिपूङोग्रहणंनकर्तव्यंभवति। भारद्वाजीयाःपठन्ति। नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थम्
॥ नित्यमकित्त्वमिडाद्योः क्त्वानिष्ठयोः सिद्धम्। कथम्। विभाषामध्येयंयोगः क्रियते। विभाषामध्येचयेविध
यस्तेनित्याभवन्ति। किमर्थंतर्हि क्त्वाग्रहणम्। क्त्वाग्रहणमुत्तरार्थम्। उत्तरार्थं क्त्वाग्रहणंक्रियते। नोपधा-
त्थफान्ताद्वावञ्चिलुञ्चृतश्चेति॥ तृषिमृषिकृषेःकाश्यपस्य॥ काश्यपग्रहणंकिमर्थम्। काश्यपग्रहणंपू
जार्थम्। वेत्येवहिवर्तते॥ तृषिमृषि कृषेःकाश्यपस्य॥ रलोव्युपधाद्धलादेःसंश्च॥ किमिदंरलः क्त्वासनोः
कित्त्वंविधीयते। आहोस्वित्प्रतिषिध्यते। किंचातः। यदिविधीयते क्त्वाग्रहणमनर्थकम्। किदेवहि क्त्वा। अथ
प्रतिषिध्यतेसन्ग्रहणमनर्थकम्। अकिदेवहिसन्।

र्यप्रतिपादनात्॥ रलो॥ ॥किमिदमिति। किमियमप्राप्तेविभाषाआहोस्वित्प्राप्तइतिप्रश्नः। तत्राप्राप्तविभाषायांसनएवाप्रा
प्तंकित्त्वंपक्षेविधीयतइति क्त्वानुवृत्तिरनर्थिका। नहितस्याकित्त्वंविधेयंस्वतएवभावात्। अथप्राप्तविभाषातदा क्त्वः कित्त्वम-
स्तीतितस्यैवपक्षेनिषेधःकर्तव्यइतिसन्ग्रहणंनकार्यंनहितस्यकित्त्वमस्तियत्पक्षेनिषिध्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 रलइति। अप्राप्तविभाषेयमेकेनैवरूपेणव्यवस्थितेत्यर्थः। एकरूपत्वप्रदर्शनाय च विचारः कृतः। न ह्युभयत्रविभाषानस-
न्तिप्रतिलक्ष्यं व्यापाराश्रयणेतासां सिद्धत्वात्॥ ऊकालः॥ अयुक्तोयमिति। तपरत्वात्कालस्येत्यत्र व्याख्यातत्वादिह नव्याख्या
यते। ह्रस्वादिष्विति। उइत्येकस्यैव पाठ्यत्स्योच्चारणाद्भेदानवगमात्संज्ञिविशेषणस्यैकत्वे सति संज्ञिनोप्येकत्वात्संज्ञानां

अतउत्तरं पठति। रलः क्त्वासनोःकित्वारम्भः। रलः क्त्वासनोःकित्त्वं विधीयते तन्नु चोक्तं क्त्वाग्रहणमनर्थ
कमिति। नानर्थकम्। न क्त्वासेडिति प्रतिषेधः प्राप्नोति तद्बाधनार्थम्। रलोव्युपधाद्धलादेः संश्च॥ ऊकालो-
ज्झस्वदीर्घप्लुतः॥ अयुक्तोयंनिर्देशः। ऊइत्यनेन कालः प्रतिनिर्दिश्यते। ऊइत्ययं च वर्णः। तत्रायुक्तं वर्णेन
कालस्य सह सामानाधिकरण्यम्। कथं तर्हि निर्देशः कर्तव्यः। ऊकालकालइति। किमिदम् ऊकालकालइ
ति। ऊइत्येतस्य कालऊकालः ऊकालः कालो यस्य सऊकालकालइति। स तर्हि तथानिर्देशः कर्तव्यः। नक
र्तव्यः। उत्तरपदलोपोत्र द्रष्टव्यः। तद्यथा। उष्ट्रमुखमिवमुखमस्य उष्ट्रमुखः। खरमुखः। एवम् ऊकालकाल
ऊकालइति। अथवा साहचर्यात्ताच्छब्द्यं भविष्यति। कालसहचरितो वर्णोपि कालएव॥ ह्रस्वादिषु सम
संख्याप्रसिद्धिर्निर्देशवैषम्यात्। ह्रस्वादिषु समसंख्यत्वस्याप्रसिद्धिः। किं कारणम्। निर्देशवैषम्यात्। ति
स्रः संज्ञाएकः संज्ञी। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। सिद्धं तु समसंख्यत्वात्। सिद्धमेतत्। कथम्।
समसंख्यत्वात्। कथं समसंख्यात्वम्। त्रयाणां हि विकारनिर्देशः। त्रयाणामयं प्रश्लिष्टनिर्देशः।

चत्रित्वात्संख्यातानुदेशाप्रसङ्गः। सिद्धं त्विति। त्रयाणां कृतैकादेशानां निर्देशाद्विशेषणत्रयावच्छिन्नत्वात्संज्ञिनामपि
त्रित्वाद्यथासंख्यं संबन्धः सिद्धइत्यर्थः। अर्थतश्च साम्यं यथासंख्यसूत्रे आश्रीयते न पाठतएव। अथवा शब्दतः साम्याश्र ॥
यणेपि संहितावशादेक्यमिव प्राप्तास्त्रयः शब्दा उच्चारिता इत्यदोषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंपुनरिति। प्रत्यक्षेणैकस्यैवत्र्यादेःस्वरस्य श्रवणादेदोवगमे प्रमाणाभावइतिभावः। तिसृणामिति। अनुमानादेदोवसायइतिभा
वः। अयंतावदिति। लौकिकव्यवहाराश्रयणेन प्लुतत्वंह्रस्वत्वंचसिद्धमाश्रित्यैतदुच्यते। यत्तावदिति। शास्त्रास्थितायांह्रस्वादिव्यवस्था

कथंपुनर्ज्ञायतेत्रयाणामयंप्रश्लिष्टनिर्देशइति। तिसृणांसंज्ञानांकरणसामर्थ्यात्। यद्यपितावत्तिसृणांसं
ज्ञानांकरणसामर्थ्याद्ज्ञायतेत्रयाणामयंप्रश्लिष्टनिर्देशइति। कुतस्त्वेतदेतेनानुपूर्व्येणसंनिविष्टानांसंज्ञा
भविष्यतीति। आदौमात्रिकस्ततोद्विमात्रस्ततस्त्रिमात्रइति। नपुनर्मात्रिकोमध्येवान्तेवास्यात्। तथाद्विमात्र
आदौवास्यादन्तेवा। तथात्रिमात्रआदौवामध्येवास्यात्। अयंतावत्त्रिमात्रोऽशक्यआदौवामध्येवाकर्तुम्।
कुतः। प्लुताश्रयोहिप्रकृतिभावःप्रसज्येत। मात्रिकद्विमात्रिकयोरपिद्यन्तंपूर्वंनिपततीतिमात्रिकस्यपूर्वंनिपा
तोभविष्यति। यत्तावदुच्यते। अयंतावत्त्रिमात्रोऽशक्यआदौमध्येवाकर्तुंप्लुताश्रयोहिप्रकृतिभावःप्रसज्येते
ति। प्लुताश्रयःप्रकृतिभावःप्लुतसंज्ञाचानेनैव। यदिचत्रिमात्रआदौवामध्येवास्यात्प्लुतसंज्ञैवास्यनस्यात्
। कुतःप्रकृतिभावः। यदप्युच्यतेमात्रिकद्विमात्रिकयोरपिद्यन्तंपूर्वंनिपततीतिमात्रिकस्यपूर्वंनिपातोभवि
ष्यतीति। ह्रस्वाश्रयाहिघिसंज्ञाह्रस्वसंज्ञाचानेनैव। यदिचमात्रिकोमध्येवान्तेवास्यात्ह्रस्वसंज्ञैवास्यन
स्यात्। कुतोघिसंज्ञाकुतःपूर्वनिपातः। एवमेषाव्यवस्थानप्रकल्पते। एवंतर्ह्याचार्यप्रवृत्तिर्ज्ञापयतिन
मात्रिकोन्तेभवतीति। यदयंविभाषापृष्टप्रतिवचनेहेरितिमात्रिकस्यप्लुतंशास्ति। कथंकृत्वाज्ञापकम्।
योन्तेसप्लुतसंज्ञः। यदिचमात्रिकोन्तेस्यात्प्लुतसंज्ञास्यस्यात्। तत्रहिमात्राकालस्यमात्राकालवचनमन
र्थकंस्यात्। मध्येतर्हिस्यादिति।

यांलोकेह्रस्वादिव्यवहारोनान्यथेतिभावः। यदयमिति। अनन्तरमादेशविधानार्थमेतत्स्यादितिचेत्तत्रनहिस्थानेन्तरतमइ
त्यस्याःपरिभाषायाःप्रत्यक्षायाःबाधायुक्तेतिविशिष्टानुपूर्वीप्रतिपत्तौलिङ्गत्वमेवप्लुतविधानस्य॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मात्रिकेणेति। लिङ्ग इयेनान्तमध्याभ्यां मात्रिकस्यापकृष्टत्वादित्यर्थः। दीर्घप्लुतयोस्त्विति। उकारेणत्वाद्द्विमात्रत्रिमात्रयोः स्वरूपस्य ग्राहकइति ह्रस्वसंज्ञा त्रयाणामपि प्राप्नोति। नच दीर्घप्लुतसंज्ञाभ्यां द्विमात्रत्रिमात्रयोर्ह्रस्वसंज्ञा बाध्यते। संज्ञानां समावेशाभ्युपगमात् आकडारादेकासंज्ञेति वचनात्। द्विमात्रत्रिमात्रौ त्वनणत्वाद्भिन्नकालानां न ग्राहकाविति न तत्र दोषः। याव-

अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति न मात्रिको मध्ये भवतीति। यदयमतो दीर्घो यञि सुपि चेति दीर्घत्वं शास्ति। कथं कृत्वा ज्ञापकम्। यो मध्ये स दीर्घसंज्ञकः। यदि च मात्रिको मध्ये स्याद्दीर्घसंज्ञास्य स्यात्। तत्र मात्राकालस्य मात्राकालवचनमनर्थकं स्यात्। द्विमात्रस्तर्ह्यन्ते स्यादिति। अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति न द्विमात्रोऽन्ते भवतीति। यदयमो मभ्यादान इति द्विमात्रिकस्य प्लुतं शास्ति। कथं कृत्वा ज्ञापकम्। योऽन्ते स प्लुतसंज्ञः। यदि च द्विमात्रोऽन्ते स्यात् प्लुतसंज्ञास्य स्यात्। तत्र द्विमात्राकालस्य द्विमात्राकालवचनमनर्थकं स्यात्। मात्रिकेण चास्य पूर्वनिपातो बाधितइति कृत्वा कान्यत्रोत्सहते भवितुमन्यदतो मध्यात्। एवमेषां व्यवस्था प्रक्लृप्ता भवेद्। व्यवस्था च प्रक्लृप्ता। दीर्घप्लुतयोस्तु पूर्वसंज्ञाप्रसङ्गः। दीर्घप्लुतयोरपि पूर्वसंज्ञा प्राप्नोति। का। ह्रस्वसंज्ञा। किं कारणम्। अणसवर्णान्गृह्णातीति। सिद्धं तु तपरनिर्देशात्। सिद्धमेतत्। कथम्। तपरनिर्देशः कर्तव्यः। उदूकाल इति। यद्येवं द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात्। द्रुतादिषु चोक्तम्। किमुक्तम्। सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यन्त इति। स तर्हि तपरनिर्देशः कर्तव्यः। न कर्तव्यः। इह कालग्रहणं क्रियते। यावच्च तपरकरणं तावच्च कालग्रहणम्।

चेति। एककार्यत्वादेतदुक्तम्। ऊ अजित्येव कालार्थो लभ्यते। उकारादयो ह्यच्त्वं न व्यभिचरन्तीति नाच्त्वेन ते विशेष्यन्ते अपि तु तैरच्। तत्रोकारादिकालत्वादुकारादिसदृशोज्ग्रहीष्यत इति नार्थः कालग्रहणेन। तत्क्रियते श्रूयमाणेनैवोकारेण कालं विशेषयितुमिति सवर्णग्रहणं न भविष्यति। तत्रैतत्स्यात्। ॥

CC-0. In Public Domain. Digitization by eGangotri

उकारात्परः कालशब्दोनश्रूयतइत्याह।प्रत्येकंचेति।षण्मात्रस्याचोऽसंभवात्संज्ञात्रयकरणाच्चेतिभावः।अशब्दसंज्ञायामिति।ह्रस्व
संज्ञाचशब्दसंज्ञेतितद्विधानेउकारःसवर्णान्नग्रहीष्यति।उदात्तादयस्तुगुणानभेदकाइतितद्भिन्नस्यापिह्रस्वसंज्ञाभविष्यति।उ
दात्तादिसंज्ञास्वज्ग्रहणंनिवृत्तमितिदीर्घप्लुतानामपिताभविष्यन्ति।हलांलयोग्यत्वात्तदभावः।इकोयणचीतितुनशब्दसंज्ञा
विधानंअपितुआदिरन्त्येनेतिविहितसंज्ञानुवादइतिसवर्णग्रहणंभविष्यति।अथवाह्रस्वसंज्ञेति।त्रयाणांचेद्ध्रस्वसंज्ञात

प्रत्येकंचकालशब्दःपरिसमाप्यते।उकालऊकालऊ३कालइति।अथवाएकसंज्ञाधिकारेयंयोगःकर्तव्यः
।तत्रैकासंज्ञाभविष्यतियापराअनवकाशाचेतिएवंहिदीर्घप्लुतयोःपूर्वसंज्ञानभविष्यति।अथवास्वं
रूपंशब्दस्याशब्दसंज्ञेत्ययंयोगःप्रत्याख्यायते।तत्रयदेतदशब्दसंज्ञेतिएतत्तृतीयाविभक्त्यानिर्दिश्यमा
नमर्थवद्भवतितयानिर्दिष्टमुत्तरत्रानुवर्तिष्यते।अणुदित्सवर्णस्यचाप्रत्ययः।अशब्दसंज्ञायामिति।अ
थवाह्रस्वसंज्ञावचनसामर्थ्याद्दीर्घप्लुतयोःपूर्वसंज्ञानभविष्यति।ननुचेदंप्रयोजनंस्यात्संज्ञयाविधाने
नियमंवक्ष्यामीतिह्रस्वसंज्ञयायदुच्यतेतदचःस्थानेयथास्यादिति।स्यादेतत्प्रयोजनंयदिकिंचित्करा
णिह्रस्वशासनानिस्युः।यतस्तुखलुयावदज्ग्रहणंतावद्ध्रस्वग्रहणमतोकिंचित्कराणिह्रस्वशासनानि।
इदंतर्हिप्रयोजनम्।एचइग्घ्रस्वादेशादितिवक्ष्यामीति।अनुच्यमानेह्येतस्मिंस्त्रिह्रस्वप्रदेशेषुएचइग्भव
तीतिवक्तव्यंस्यात्।ह्रस्वोनपुंसकेप्रातिपदिकस्यएचइग्भवतीति।णौचङ्युपधायाह्रस्वएचइग्भवतीति।
ह्रस्वःहलादिःशेषःएचइग्भवतीति।संज्ञाचनामयतोनलघीयः।कुतएतत्।लघ्वर्थंहिसंज्ञाकरणम्।ल
घीयश्चत्रिह्रस्वप्रदेशेषुएचइग्भवतीति।नपुनःसंज्ञाकरणम्।त्रिह्रस्वप्रदेशेषु।

शःह्रस्वप्रदेशेषुत्रयःसंतिनउपतिष्ठन्तेतत्रान्तरतमादेशविधानेह्रस्वसंज्ञाविधानमनर्थकमेवस्यात्।अथवचनाद
नन्तरतमोभवेत्।एवमपिह्रस्वप्रदेशेषुअज्ग्रहणमेवकुर्यादित्यर्थः।इदंतर्हीति।असत्यांह्रस्वसंज्ञायांह्रस्वादेशाइ-
तिकर्तुंनयुज्यतेततश्चह्रस्वविधिप्रदेशेषुबहुकृत्वएचइगितिवक्तव्यंतद्गुरुभवति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रहणानीति। गृह्यतेनेनार्थइति ग्रहणं पदमुच्यते। ह्रस्वादेशादित्याङः प्रश्लेषनिर्देशात्तथस्य योगाभावादाङ्‌गणितः। ननु
मितां ह्रस्व इत्यत्र हेडवेष्टन इत्यस्य हिडयतीत्यर्थमेचइगिति वक्तव्यम्। तथा खित्यनव्ययस्येत्यत्रापि परमनुमन्य इत्य

एचइग्भवतीति षड्ग्रहणानि। संज्ञाकरणे पुनरेषो। ह्रस्वसंज्ञा वक्तव्या निर्दिष्टप्रदेशेषु ह्रस्वग्रहणं कर्तव्यं
ह्रस्वो ह्रस्वो ह्रस्व इति। एचइग्घ्रस्वादेशादिति। सोयमेवं लघीयसान्यासेन सिद्धे सति यद्गरीयांसं यत्नमा
रभते तस्यैतत्प्रयोजनं दीर्घप्लुतयोस्तु पूर्वसंज्ञा माभूदिति॥ अचश्च॥ ॥किमयमलोन्त्यशेष आ
होस्विदलोन्त्यापवादः। कथं चायं तच्छेषः स्यात् कथं वा तदपवादः। यद्येकं वाक्यं तच्चेदं च। अलो
न्त्यस्य विधयो भवन्त्यचो ह्रस्वदीर्घप्लुता अन्त्यस्येति ततोयं तच्छेषः। अथ नानावाक्यं अलोन्त्य
स्य विधयो भवन्ति। अचो ह्रस्वदीर्घप्लुता अन्त्यस्य चानन्त्यस्य चेति। ततोयं तदपवादः। कश्चात्र वि
शेषः। ह्रस्वादिविधिरलोन्त्यस्येति चेदिचि प्रच्छिग्रामादिप्रभृति हनिगमि दीर्घेषु ज्ग्रहणम्। ह्रस्वा
दिविधिरलोन्त्यस्येति चेदिचि प्रच्छिग्रामादिप्रभृति हनिगमि दीर्घेषु ज्ग्रहणं कर्तव्यम्। क्विपि वचि
प्रच्छ्योर्दीर्घः अच इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। ग्रामादीनां दीर्घः अच इति वक्तव्यम्। अ
नन्त्यत्वाद्धि न प्राप्नोति। हनिगम्योर्दीर्घः अच इति वक्तव्यम्। अनन्त्यत्वाद्धि न प्राप्नोति। अस्तु तर्हि तदप
वादः। अचश्चेन्नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वनन्त्यप्रतिषेधः। अचश्चेन्नपुंसकह्रस्वाकृ
त्सार्वधातुकनामि दीर्घेष्वनन्त्यस्य प्रतिषेधो वक्तव्यः। ह्रस्वो नपुंसके प्रातिपदिकस्य। यथेह भवति रि।
अतिरि। नो। अतिनु। एवं सुवाक् ब्राह्मणकुलमित्यत्रापि प्राप्नोति। अकृत्सार्वधातुकयोर्दीर्घः। यथे
ह भवति। चीयते। स्तूयते।

र्थमिति गौरवप्रसङ्गः। एवं तर्ह्येचइगिति पञ्चकृत्वोप्युच्चार्यमाणे प्रतिपत्तिलाघवं भवतीति लाघवोपलक्षणपरं भाष्यं द्र- ग्रामः
ष्टव्यम्। ह्रस्वदीर्घप्लुत इति सौत्रत्वान्निर्देशस्य लिङ्गव्यत्ययेन पुंस्त्वम्॥ अचश्च॥ इको गुणवृद्धी इत्यनेन समानमिदम्। ग्रा १९०
मादिप्रभृतीति। प्रभृतिग्रहणेन ष्ठिवुक्लम्वादयो गृह्यन्ते॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

मिद्यतइति। यकारादौ यदङ्गं तस्य यो वयवो जित्येवमत्र प्रसङ्गः। यदा त्वजेव यकारादिना विशेष्यते तदा त्र्यव्यवधानान्नास्ति प्रसङ्गः। एवमन्यत्रापि ज्ञेयम्। अजिति हि वर्ततइति। ततश्च ह्रस्वादिशब्दाद्इहानुवृत्तानाचमुपस्थापयन्ति तस्य स्वयमुपस्थानादित्या

एवं छिद्यते भिद्यते अत्रापि प्राप्नोति। नामि दीर्घः। यथेह भवति अग्नीनाम्। वायूनाम्। एवं षण्णामित्यत्रापि प्राप्नोति। नैष दोषः। नोपधाया इत्येतन्नियमार्थं भविष्यति। प्रकृतस्यैष नियमः स्यात्। किं च प्रकृतम्। नामीति। तेन भवेदिह नियमान्न स्यात् षण्णामिति। अन्यते। तन्यतइति। अत्रापि प्राप्नोति। अथाप्येवं नियमः स्यात् नोपधाया नाम्येवेति। एवमपि भवेदिह नियमान्न स्यात् अन्यते तन्यतइति षण्णामित्यत्र प्राप्नोति। अथाप्युभयतो यं नियमः स्यात् नोपधाया एव नामि नाम्येव नोपधाया इति। एवमपि भिद्यते छिद्यते सुवाकूग्राम्णकुल-मित्यत्रापि प्राप्नोति। एवं तर्हि ह्रस्वो दीर्घः प्लुतइति यत्र ब्रूयादच इत्येतत्तत्रोपस्थितं द्रष्टव्यम्। किं कृतं भवति। द्वितीया षष्ठी प्रादुर्भाव्यते। तत्र कामचारः। गृह्यमाणेन वाचं विशेषयितुमचा वा गृह्यमाणम्। याव ता कामचारः। इह तावद्दधि प्रच्छि शामादि प्रभृति ह निगमि दीर्घेषु गृह्यमाणेनाचं विशेषयिष्यामः। एतेषां दीर्घो भवति अचइति। इहेदानीं नपुंसक ह्रस्वा कृत्सार्वधातुक नामि दीर्घेष्वचा गृह्यमाणं विशेषयिष्यामः। नपुंसकस्य ह्रस्वो भवत्यचः अजन्तस्येति। अकृत्सार्वधातुकयोर्दीर्घो भवत्यचः अजन्तस्येति। नामि दीर्घो भवत्यचः अजन्तस्येति। ।इह कस्मान्न भवति द्यौः पन्थाः सइति॥ संज्ञया विधाने नियमः॥ संज्ञया ये विधीयन्ते तेषु नियमः। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। अजिति हि वर्तते। तत्रैवमभिसंबन्धः करिष्यते। अचः अज्भवति। ह्रस्वो दीर्घः प्लुतइत्येवं भाव्यमानइति। अथ पूर्वस्मिन्योगे अज्ग्रहणे सति किं प्रयोजनम्॥

श्रितस्वरूपव्यापारा आश्रीयन्ते तेन ह्रस्वइत्येवं यो चु सो चः स्थाने भवतीत्यर्थः संपद्यते। एवं दीर्घप्लुतयोरपि। अथेति। इहैव तदज्ग्रहणं क्रियतां पूर्वसूत्रे तु न वक्तव्यमिति प्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· प्रतक्ष्येति। यथाप्रत्याहारे अप्लुता आकारादयो दीर्घप्लुतसंज्ञे लभन्ते तथा संयोगोपि ह्रस्वसंज्ञः स्यादिति तुक्प्रसङ्गः। तितउच्छत्रमि १२९
१९१ ति। परत्वाद्दीर्घलक्षणे वा तुकि सति सकृद्गतौ विप्रतिषेध इति न्यायाद्ध्रस्वलक्षणः पुनर्न प्रवर्तते। न चैवंविधे विषये पुनःप्रसङ्ग-
विज्ञानमस्ति। नित्यविकल्पयोर्विरोधात्। पूर्वेण परस्य बाधप्रसङ्गात्। यत्र हि पूर्वो विधिः परं न बाधते तत्र पुनःप्रसङ्गविज्ञानं कचि
दाश्रीयते। समुदाये वा कार्यं प्रति व्याप्रियमाणे अवयवानां पारतन्त्र्याद्व्यापारान्नैव ह्रस्वलक्षणतुक्प्रसङ्गः। ननु क्रियमाणेप्य
ज्ग्रहणे वर्णग्रहणे जातिग्रहणादच्समुदायस्यापि दीर्घसंज्ञाप्रसङ्गः। नैष दोषः। ऊकाल इति विशेषणाद्धि व्यक्तिराश्रीयते। न
हि जातेः परिमाणमस्ति। व्यक्तिद्वारकं वा जातेः परिमाणमाश्रीयते। एकैकव्यक्तिव्यङ्ग्या हि जातिर्न समुदायव्यङ्ग्या॥ उच्चैः॥ षष्ठीनिर्दि

अज्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थम्। अज्ग्रहणं क्रियते संयोगनिवृत्त्यर्थम्। अच्समुदायनिवृत्त्य
र्थं च। संयोगनिवृत्त्यर्थं तावत्। प्रतक्ष्य प्ररक्ष्य। ह्रस्वस्यापि तिकृति तुङ्मा भूदिति। अच्समुदायनिवृत्त्यर्थं
ति तउच्छत्रं तितउच्छाया। दीर्घात्पदान्ताद्वेति विभाषा तुङ्मा भूदिति॥ अचश्च॥ उच्चैरुदात्तः॥ नीचैरनुदात्तः॥ ॥ष
ष्ठीनिर्दिष्टमज्ग्रहणमनुवर्तते। उताहो न। किं चातः। यद्यनुवर्तते हल्स्वरप्राप्तौ व्यञ्जनमविद्यमान
वद्भवतीत्येषा परिभाषा न प्रकल्प्यते। कथं हलो नाम स्वरप्राप्तिः स्यात्। एवं तर्हि निवृत्तम्। बहून्येतस्याः
परिभाषायाः प्रयोजनानि।

शृमिति। उच्चैर्नीचैरित्येते अव्यये अधिकरणशक्तिप्रधाने। तत्राच इत्यनुवृत्तौ सत्याम यमर्थो भवति उच्चैःस्थाने उपलभ्यमा
न उदात्तसंज्ञः स चाचः स्थान इति। हल्स्वरप्राप्तावितिसत्यां च इत्यस्यानुवृत्तौ समासस्येत्यन्तोदात्तत्वं राजपुरुष इत्या
दावेव स्यात्। न तु राजदृषदित्यादौ षकारात्काररस्य। असत्यां त्वनुवृत्तौ समासस्य योन्तोदकारस्तस्य स्वरप्राप्ताववि द्यमा
नत्वाद्कारस्य स्वरः। एषा च परिभाषा यतो नावद्ध्यत्र नानावदिति प्रतिषेधेन ज्ञापिता। अन्यथा नाव्यमित्यत्र नकारस्या राम:
योग्यत्वाद्दाकारस्य चानादित्वादुदात्तत्वं न भविष्यतीति किमनावदिति प्रतिषेधेन। ॥ १९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ प्रथमानिर्दिष्टमिति। ननु को विशेषः। यावता यत्र स्वरो विधीयते तत्र व्यञ्जनस्याविद्यमानत्वादच एव भविष्यत्यनुदात्तादेरजित्यादावनुवादेऽपि न दोषः। स्वत एव हलोऽनुदात्तत्वं भवतु अजुपरागवशाद्वा तदनुवादेन कार्यविधानेन कश्चिद्विशेषः। एवं तर्हि न्याय्यत्वादनार्थ एवायं विचारः। ननु चेति। बाधकाभावाच्च भ्रान्त्यसिद्धिः। नैतदिति। अन्यथाप्युपालम्भोपपत्तेरिति भावः। अन्तरेणापि व्यञ्जनमिति। आप्यायध्वमिति यथा। अत्र ह्याकार उदात्तस्तिङन्तस्य निघातः। ततश्चान्वयव्यतिरेकाभ्यामच एवैते गुणाः। यदि तु हलामप्येते गुणा अभविष्यन् तदा हलामचां च भिन्नस्वरताप्युपालप्स्यत यस्मात्स्वचामेव

अथ प्रथमानिर्दिष्टमज्ग्रहणमनुवर्तते। उताहो न। किं चार्थोऽनुवृत्त्या। बाढमर्थः। यद्येते व्यञ्जनस्यापि गुणाः स्युः। ननु च प्रत्यक्षमुपलभ्यन्ते। दृषत्त्वोर्जे त्वा। नैते व्यञ्जनस्य गुणाः। किं त्वच एव। तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यते। तद्यथा। द्वयो रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते। बदरपिटके रिक्तको लोहकंसस्तद्गुण उपलभ्यते। कुतो नु खल्वेतत्। अच एते गुणाः स्युः। तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यते न पुनर्व्यञ्जनस्यैते गुणाः स्युस्तत्सामीप्यादजपि तद्गुण उपलभ्येतेति। अन्तरेणापि व्यञ्जनमच एवैते गुणा लक्ष्यन्ते न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति। अन्वर्थं खल्वपि निर्वचनम्। स्वयं राजन्त इति स्वराः अन्वग्भवति व्यञ्जनमिति॥

उच्चनीचस्यानवस्थितत्वात्संज्ञाऽप्रसिद्धिः। इदं तु उच्चनीचमनवस्थितपदार्थकं तदेव हि किंचित्प्रत्युच्चैर्भवति किंचित्प्रति नीचैः। एवं हि कश्चित्कंचिदधीयानमाह किमुच्चै रोरूयसे उच्चैर्वर्ततामिति। तमेव तथाऽधीयानमपर आह। किमन्तर्दन्तकेनाधीषे उच्चैर्वर्ततामिति। एवमुच्चनीचमनवस्थितपदार्थकं तस्यानवस्थितत्वात्संज्ञाया अप्रसिद्धिः।

स्वरमनुविदधति न हलः। तस्मान्न हलां स्वयं स्वरोऽस्तीति निश्चयः। अन्वग्भवतीति। अनुगच्छतीत्यर्थः। शिष्टसमाचाराच्चेदं निर्वचनमभिहितं न त्वत्र वर्णस्यादृश्यं किंचिदस्ति। अथवा गतिरपि व्यञ्जेरर्थः विविधं गच्छत्युपरागवशादिति व्यञ्जनमित्ययमर्थः पर्यायान्तरेण भाष्यकारेणाभिहितः। उपरागश्च पूर्वपरसंनिधानेऽपि परेणाचा हलो भवति न पूर्वेण। उच्चनीचस्येति। श्रुतिप्रकर्षापकर्षलक्षणोच्चनीचत्वाश्रयः पर्यनुयोगः। न चानवस्थितवस्त्वाश्रयेण साधुत्वं व्यवतिष्ठते।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदपीति। श्रोता हि वक्त्रगतानायामादीन्धर्मान्कार्याद्वस्यति कार्यं च संकीर्णम्। तथा हि। महाप्राणो नीचैरप्युच्चारयन्नुच्चै रेण महान्तं देशं व्याप्नोति। अल्पप्राणस्तूच्चैरपि वदन्नल्पं देशं व्याप्नोति। सिद्धं त्विति। प्रक्रम्यन्तेऽस्मिन्वर्णा इति प्रक्रमः स्थानमुच्यते। तेनायमर्थः। एकस्मिंस्ताल्वादिके स्थाने ऊर्ध्वाधरभागयुक्ते ऊर्ध्वभागेनोच्चार्यमाण उदात्तोऽधरभागनिष्पन्नोऽनुदात्तः। एवं चोच्चैरित्यनेनोर्ध्वभागो गृह्यते नीचैरित्यधरभागः। अभ्यासस्समधिगम्यश्चायं स्वरविशेषः षड्जादिवद्विज्ञेयः॥ समाहारस्येति। समाहरणं समाहार इति भावसाधनं मत्वा कस्येति प्रश्नः॥ अचोरिति। तयोः समाहार उपश्लेषरूपः। अन्यत्र लौ

एवं तर्हि लक्षणं करिष्यते। आयामो दारुण्यमणुता खस्येति उच्चैःकराणि शब्दस्य। आयामो गात्राणां निग्रहः। दारुण्यं स्वरस्य दारुणता रूक्षता। अणुता खस्य कण्ठस्य संवृतता। उच्चैःकराणि शब्दस्य। अन्ववसर्गो मार्दवमुरुता खस्येति नीचैःकराणि शब्दस्य। अन्ववसर्गो गात्राणां शिथिलता। मार्दवं स्वरस्य मृदुता स्निग्धता। उरुता खस्य महत्ता कण्ठस्येति नीचैःकराणि शब्दस्य। एतदप्यनैकान्तिकम्। यद्ध्यल्पप्राणस्य सर्वोच्चैस्तद्धि महाप्राणस्य सर्वनीचैः। सिद्धं तु समानप्रक्रमवचनात्। सिद्धमेतत्। कथम्। समाने प्रक्रम इति वक्तव्यम्। कः पुनः प्रक्रमः। उरः कण्ठः शिर इति॥ उच्चैरुदा ॥ समाहारः स्वरितः॥ ॥समाहार स्वरित इत्युच्यते। कस्य समाहारः स्वरितसंज्ञो भवति। अचोरित्याह॥ समाहारो चोश्चेन्नाभावात्॥ समाहारोऽचोश्चेत्तन्न। किं कारणम्। अभावात्। नह्यचोः समाहारोऽस्ति। नन्वयमस्ति गाङ्‍ऽनूप इति। नैषोऽचोः समाहारः। अन्योऽयमुदात्तानुदात्तयोः स्थाने एक आदिश्यते। एवं तर्हि गुणयोः।

त राधयेद्रूपोऽपि संभवति। गाङ्गेऽनूप इति। स्थानिनोरेकारएकारयोरुदात्तानुदात्तयोः समाहारात्स्थानिधर्मेणादेशस्यापि तथा व्यपदेशः। समाहारोऽचोश्चेदिति। कार्यैककन्यादित्यादौ स्थानिद्वारकोऽपि समाहारव्यपदेशो नास्ति यत्राप्यस्ति गाङ्गेऽनूप इति। तत्राप्यसौ गौणः। गाङ्गशब्दो णन्तत्वादन्तोदात्तः। सप्तम्येकवचनेन सुप्त्वादनुदात्तेन सहैकादेश उदात्तः। अनूपशब्दः अनोरप्रधानकनीयसी इत्यन्तोदात्तत्वादनुदात्तादिस्तत एकादेशः स्वरितो वानुदात्ते पदादाविति स्वरितः। एवं तर्हीति। गुणयोर्नैरन्तर्येणोपलम्भादस्ति समाहारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अच्प्रकरणादिति। प्रकरणं प्रस्तावो न तु स्वरितत्वादनुवृत्तिः। तस्याः पूर्वं प्रत्याख्यानात्। तदयमर्थः। पूर्वसूत्रयोः सामर्थ्यात्क्षिप्तो
जेवसंज्ञी उदात्तानुदात्तशब्दयोरिति। ताविह्यानुवृत्तावचं प्रत्यापयतो न तु गुणम्। सिद्धं त्विति। गुणिनोरचोः समाहारासंभवात्सा
मर्थ्याद्गुणयोः समाहाराश्रयणमित्यर्थः। कथंपुनरिति। स्वरित इत्यनया संज्ञया योग्यत्वादच् संज्ञिलेनाक्षिप्तः। न चाचूसमा
हारो भवति। मतुब्लोप इति। गुणगुणिनोरभेदोपचारादृम्यमानार्थस्य मतुपोऽप्रयोग इत्यर्थः। अकार इति। अन्नी आदेराकृति

गुणयोश्चेन्नाचूप्रकरणात्। गुणयोः समाहार इति चेन्न। किं कारणम्। अचूप्रकरणात्। अजिति वर्तते। सि
द्धं त्वचूसमुदायस्याभावात्तद्गुणसंप्रत्ययः। सिद्धमेतत्। कथम्। अचूसमुदायो नास्तीति कृत्वा तद्गुणस्याचः
समाहारगुणस्य संप्रत्ययो भविष्यति। कथं पुनः समाहार इत्यनेनाच्छक्यः प्रतिनिर्देष्टुम्। मतुब्लोपोऽत्र द्रष्टव्यः
। तद्यथा। पुष्यकाएषां ते पुष्यकाः। कालकाएषां ते कालका इति। एवं समाहारवान् समाहारः। अथवा अका
रो मत्वर्थीयः। तद्यथा तुन्दो घाट इति। यद्येवं त्रैस्वर्यं न प्रकल्पते। तत्र को दोषः। त्रैस्वर्येणाधीमह इत्येतन्नोप
पद्यते। नैतद्गुणापेक्षम्। किं तर्हि। अजपेक्षमेतत्। त्रैस्वर्येणाधीमहे त्रिप्रकारैरज्भिरधीमहे केश्चिदुदात्त
गुणैः केश्चिदनुदात्तगुणैः केश्चिदुभयगुणैः। तद्यथा। शुक्लगुणः शुक्लः कृष्णगुणः कृष्णः। यइदानीमुभयगु
णः सत्‌ तीयामाख्यां लभते। कल्माष इति वा सारङ्ग इति वा। एवमिहापि उदात्त उदात्तगुणः अनुदात्त अनु
दात्तगुणः। यइदानीमुभयगुणः सत्‌ तीयामाख्यां लभते स्वरित इति॥ समाहारः स्वरितः॥ ॥ तस्यादित उ
दात्तमर्धह्रस्वम्॥ ॥ अर्द्धह्रस्वमित्युच्यते। तत्र दीर्घप्लुतयोर्न प्राप्नोति।

गणत्वात्। त्रैस्वर्यमिति। उदात्तानुदात्तगुणव्यतिरेकेण स्वरितत्वस्याभावात्त्रैस्वर्यव्यवहारो न स्यात्। अस्ति चायं व्यवहारः
। अजपेक्षमिति। स्वरशब्देनाच उच्यन्ते। त्रय एव स्वरा इति त्रैस्वर्यमिति स्वार्थे ष्यञ्॥ तस्यादित उदात्त॥ ॥ अक्तपरिमाणस्य ह्र
स्वसंज्ञाकृतानाव्यपदेशस्येति न्यायाद्दीर्घप्लुतावयवो ह्रस्वग्रहणेन न गृह्यत इत्यालोच्याह। अर्धह्रस्वमिति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा० कै० कन्येति। कन्याराजन्यमनुष्याणामन्त इति स्वरितः। शक्तिके ३ शक्तिके इति। स्वरितमाम्रेडिते सूयेति स्वरितः प्लुतः। मात्र च इति। अर्द्ध १२१
१९३ ह्रस्वशब्दः प्रमाणवाची रूढिशब्दः। व्युत्पत्त्यर्थं तु ह्रस्वस्योपादानम्। अर्द्धमात्रात्वेनाभिधीयते ततः प्रमेये मात्रचं विधाय तस्य प्र
माणे लइति लोपः क्रियते। तत्र यथा ह्रस्वबुद्ध्यार्द्धमात्रा विभज्यते एवं दीर्घप्लुतयोरपीति। किमर्थमिति। नैवंभूतमिहान्वा–

कन्या। शक्तिके ३ शक्तिके। नैष दोषः। मात्रचोत्र लोपो द्रष्टव्यः। अर्धह्रस्वमात्रमर्धह्रस्वमिति। किमर्थं पुनरिद–
मुच्यते। आमिश्रीभूतमिवेदं भवति। तद्यथा। क्षीरोदके संपृक्ते आमिश्रीभूतत्वान्न ज्ञायते कियत्क्षीरं किय–
दुदकं कस्मिन्नवकाशे क्षीरं कस्मिन्नुदकमिति। एवमिहाप्यामिश्रीभूतत्वान्न ज्ञायते कियदुदात्तं कियद
नुदात्तं कस्मिन्नवकाशे उदात्तं कस्मिन्ननुदात्तमिति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे इयदुदात्तमियदनु–
दात्तमस्मिन्नवकाश उदात्तमस्मिन्नवकाशेनुदात्तमिति। यद्ययमेवं सुहृत्किमन्यान्यप्येवंजातीयकानि
नोपदिशति। कानि पुनस्तानि। स्थानकरणानुप्रदानानि। व्याकरणं नामेयमुत्तरा विद्या। सोसौ छन्दःशा–
स्त्रेष्वभिविनीत उपलब्ध्याधिगन्तुमुत्सहते। यद्येवं नार्थोनेन। इदमप्युपलब्ध्याधिगमिष्यति। संज्ञाक
रणं तर्हीदम्। तस्य स्वरितस्यादितोर्धह्रस्वमुदात्तसंज्ञं भवतीति। किं कृतं भवति। त्रिरुदात्तप्रदेशेषु स्व
रितग्रहणेन कर्तव्यं भवति। उदात्तस्वरितपरस्य सन्नतरः। उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य। नो
दात्तस्वरितोदयमगार्ग्यकाश्यपगालवानामिति। एतदपि नास्ति प्रयोजनम्। संज्ञाकरणेनापि ह्येतावानयं यत्नः
तोनल्पघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणम्। लघीयश्च त्रिरुदात्तप्रदेशेषु स्वरितग्रहणम्
न पुनः संज्ञाकरणम्। त्रिरुदात्तप्रदेशेषु स्वरितग्रहणेन वाक्षराणि। संज्ञाकरणे पुनरेकादश।

ख्यानं दृश्यते संध्यक्षरादिविषयस्यापि विभागस्यान्वाख्यानप्रसङ्गादिति प्रश्नः। आमिश्रीभूतमिवेति। तत्त्वतोस्त्येव विभाग इ–
ति इवशब्द उपात्तः। क्षीरोदके इति। नियतव्यक्तिविवक्षायां जातिपरत्वाभावादेकवद्भावो न कृतः। उत्तरा विद्येति। पुराकल्पे पूर्वो एमः
अध्येतॄत्तरे तिपस्खन्यायामाख्यातम्। संज्ञाकरणमिति। प्रदेशेषु चैकदेशप्रत्यायनात्समुदाय आक्षिप्यत इति भावः। ॥ १९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उभयमिति। सत्यप्यक्षरगौरवे महतोऽर्थस्याव्याप्तिर्भवति सुखेनादेभागस्यापि परिज्ञानान्। उदात्तादेरिति। उदात्तादेः प्रतिपादकं यच्छास्त्रमाद्युदात्तश्चे
ति तत्स्वरितादेरपि प्रतिपादकं प्राप्नोतीति ततश्च प्रत्ययः कदाचित्स्वरितादिरपि स्यादित्यर्थः। अन्वाख्यानमेवेति। न केवलमिदं सूत्र
म्। यावदुच्चैरुदात्त इत्यादिसंज्ञाकरणमपि मन्दबुद्धिप्रतिपादनार्थम्। सिद्धो हि वेदाध्यायिनां शिक्षायामेवोदात्तादिव्यवहारः। स्वरित
स्येति। आ अर्धह्रस्वोदात्ता दित्याकारप्रश्लेषः। इयंनवसूत्युदात्तादनुदात्तस्य स्वरित इत्येतस्मात्परा कर्तव्या। तेन स्वरितात्संहिताया

एवं तर्ह्युभयमनेन क्रियते। अन्वाख्यानं च संज्ञा च। कथं पुनरेकेन यत्नेनोभयं लभ्यम्। लभ्यमित्याह। कथ
म्। अन्वर्थग्रहणात्। अन्वर्थग्रहणं विज्ञास्यते। तस्य स्वरितस्यादितोऽर्धह्रस्वमुदात्तसंज्ञं भवति। ऊर्ध्वमा
त्तमिति चातउदात्तम्। यदि तर्हि संज्ञाकरणम्। उदात्तादेर्यदुच्यते तत्स्वरितादेरपि प्राप्नोति। अन्वाख्या
नमेव तर्हीदं मन्दबुद्धेः। स्वरितस्यार्धह्रस्वोदात्तादोदात्तस्वरितपरस्य सन्नतरादूर्ध्वमुदात्तादनुदात्तस्य स्व
रितात्कार्यं स्वरितादिति सिध्यर्थम्। स्वरितस्यार्धह्रस्वोदात्ता द्आउदात्तस्वरितपरस्य सन्नतर इत्येत
स्मात्सूत्रादिदं सूत्रकाण्डमूर्ध्वमुदात्तादनुदात्तस्य स्वरित इत्यतः कर्तव्यम्। किं प्रयोजनम्। स्वरितादिति
सिध्यर्थम्। स्वरितादिति सिद्धिर्यथा स्यात्। स्वरितात्संहितायामनुदात्तानामिति। इमं मे गङ्गे यमुने सरस्व
ति शुतुद्रि। क्व तर्हि स्यात्। यः सिद्धः स्वरितः। कार्यम्। देवदत्त यज्ञदत्तौ। स्वरितोदात्तार्थं च। स्वरितोदात्तार्थं
च तन्नैव कर्तव्यम्। न सुब्रह्मण्यायां स्वरितस्य तूदात्तः। इन्द्र आगच्छ। ॥

मनुदात्तानामित्येकश्रुतौ विधीयमानायामुदात्तादिति स्वरितस्य सिद्धत्वं भवति। तेन मे शब्दात्स्वरितात्परेषां गङ्गे यमु
नानामामन्त्रितत्वादनुदात्तानामेकश्रुतिर्भवति। क्व तर्हीति। आश्रयात्सिद्धत्वं स्वरितस्य भविष्यतीत्यभिप्रायः। कार्यमिति।
अत्रापि स्वरितमिति स्वरितत्वं तच्च सिद्धमित्यत्रैव स्यात्। स्वरितोदात्तार्थमिति। स्वरितस्य य उदात्तो विधीयते स आरम्भिकस्या
सिद्धत्वान्न प्राप्नोति।

CC-0. In Public Domain. Digitization by eGangotri

भा· कै· सुब्रह्मण्योमिति। सुब्रह्मणि साधुरिति यत्प्रत्ययस्तित्वात्स्वरितः। ततश्चाबेकादेशः स्वरितानुदात्तयोरान्तरतम्यात्स्वरितः। तत ओमा १२१
१९५ ङ्गोश्चेत्युदात्तस्वरितयोरेकादेशः स्वरित एव तस्यासिद्धत्वादुदात्तत्वम्। सुब्रह्मण्यामिति च स्वरूपमेव गृह्येत न तु निगदो लक्ष्यते। स्वरि
तोदात्तश्चेति। आगच्छेत्यत्र गशब्दाकारस्य स्वरितस्योदात्तत्वे कृते उदात्तादनुदात्तस्य स्वरित इति च्छशब्दाकारस्य स्वरितत्वं प्राप्नो
ति। न्यङ्क्विति। न्यधी चेति पूर्वपदप्रकृतिस्वरस्तत उदात्तस्वरितयोर्यण इत्यकारः स्वरितस्तस्यासिद्धत्वात्पूर्वस्य सन्नतरो न स्यात्। दे
वब्रह्मणोरिति। लिङ्गात्पाठक्रमबाधेन क्रमान्तरमाश्रीयतेऽन्यथा स्वरितस्यासिद्धत्वादनुदात्तस्यानुदात्तविधानमनर्थकं स्यात्। य

क्व तर्हि स्याद्यः सिद्धः स्वरितः। सुब्रह्मण्योमिन्द्रागच्छ। स्वरितोदात्तश्चास्वरितार्थम्। स्वरितोदात्तश्चास्वरितार्थं तत्रैव कर्तव्यम्। इन्द्रागच्छ हरिव आगच्छ। स्वरितपरसन्नतरार्थं च। स्वरितपरसन्नतरार्थं च तत्रैव कर्तव्यम्। उदात्तस्वरितपरस्य सन्नतरः। माणवक जटिलकाध्यापक न्यङ्। क्व तर्हि स्यात्। यः सिद्धः स्वरितः। माणवक जटिलकाभिरूपक। क्व तत्तर्हि वक्तव्यम्। न वक्तव्यम्। देवब्रह्मणोरनुदात्तवचनं ज्ञापकं सिद्ध इह स्वरितस्त्विति। यद्येतज्ज्ञाप्यते स्वरितोदात्तात्परस्यानुदात्तस्य स्वरितत्वं प्राप्नोति। ननु भो देवब्रह्मणोरनुदात्तवचनं ज्ञापकं सिद्ध इह स्वरितस्त्विति। किं तर्हि। परमेतत्सूत्रकाण्डमिति॥ तस्यादित उदात्तमर्धह्रस्वम्॥ एकश्रुति दूरात्संबुद्धौ॥ किमिदं पारिभाषिक्याः संबुद्धेर्ग्रहणमेकवचनं संबुद्धिरिति। आहोस्विदन्वर्थग्रहणं संबोधनं संबुद्धिरिति। किं चातः। यदि पारिभाषिक्याः संबुद्धेर्ग्रहणं देवा ब्रह्माणः अत्र न प्राप्नोति। अथान्वर्थग्रहणं न दोषो भवति। यथा न दोषस्तथास्तु॥

द्येतदिति। स्वरितस्यैव सिद्धत्वमनेन लिङ्गेन ज्ञाप्यत इत्यर्थः। ननु भ इति। संनिवेशान्तरज्ञापनार्थं लिङ्गं व्याख्यायत इत्यर्थः।
॥एक॥ किमिति। कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय इत्युभयगतिरिह न्यायो भवतीति च न्यायद्वयसंभवात्प्रश्नः। यथा न दो राम:
ष इति। न हि दूरादिति विशेषणमेकवचनस्योपपद्यते। संबोधनस्य तु क्रियारूपत्वादपादानतया दूरादिति विशेषणसंभ १९५
वो व्याप्तिश्चान्वर्थग्रहणे भवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंपुनरिति। उदात्तानुदात्तानुरागवत्त्वात्प्रश्नः। यावदुच्चैरिति। यदि चोदात्तैकश्रुतिरभविष्यत्तदा यज्ञकर्मणीत्येकश्रुतेः सिद्धत्वादुच्चैस्तरांवावषट्कार इति सूत्रं नाकरिष्यदित्यर्थः। तावत्सन्नतर इति। तत्रैकश्रुत्यनुवृत्त्यैव सिद्धत्वात्सन्नतरविधानमनर्थकस्यात्। अन्तरालं ह्रियत इति। हरतेर्हि कर्मकत्वात्प्रधाने कर्मणि लकारः। क्षीरोदकवदुदात्तानुदात्तयोर्भेदतिरोधानमेकश्रुतिरित्यर्थः। स्वरिते तु विभागेन तयोरुपलब्धिः। उच्चैर्दृष्टेति। सोमस्याग्नेवीही वौषट् इत्यत्र मन्त्रे यज्ञकर्मणीत्यनेनैकश्रुतिर्विहिता तदपेक्षया वौषट्शब्दस्योदात्ततरत्वं विधीयते सति चैकश्रुतेरुदात्तानुरागे तदपेक्षः प्रकर्षो युज्यते। यथा मलिने वस्त्रे रौक्ष्या

किंपुनरियमेकश्रुतिरुदात्ता आहोस्विदनुदात्ता। नोदात्ता। कथं ज्ञायते। यदयमुच्चैस्तरांवावषट्कार इत्याह। कथंकृत्वा ज्ञापकम्। अतन्त्रं तरनिर्देशः। यावदुच्चैस्तावदुच्चैस्तराम्। यदि तर्हि नोदात्ता। अनुदात्ता। अनुदात्ता च न। कथं ज्ञायते। यदयमुदात्तस्वरितपरस्य सन्नतर इत्याह। कथंकृत्वा ज्ञापकम्। अतन्त्रं तरनिर्देशः। यावत्सन्नस्तावत्सन्नतरः। सैषा ज्ञापकाभ्यामुदात्तानुदात्तयोर्मध्यमेकश्रुतिरन्तरालं ह्रियते। अपर आह। किमयमेकश्रुतिरुदात्ता आहोस्विदनुदात्ता। उदात्ता। कथं ज्ञायते यदयमुच्चैस्तरांवावषट्कार इत्याह। कथंकृत्वा ज्ञापकम्। तन्त्रं तरनिर्देशः। उच्चैर्दृष्ट्वा उच्चैस्तरामित्येतद्भवति। यदि तर्ह्युदात्ता। नानुदात्ता। अनुदात्ता च। कथं ज्ञायते। यदयमुदात्तस्वरितपरस्य सन्नतर इत्याह। कथंकृत्वा ज्ञापकम्। तन्त्रं तरनिर्देशः। सन्नं दृष्ट्वा सन्नतर इत्येतद्भवति। तदेते तन्त्रे तरनिर्देशे सप्त स्वरा भवन्ति। उदात्तः। उदात्ततरः। अनुदात्तः। अनुदात्ततरः। स्वरितः। स्वरिते य उदात्तः सोऽन्येन विशिष्टः। एकश्रुतिः सप्तमः। एकश्रुति दूरात्संबुद्धौ॥

नुवेद्यसद्भावात्तदपेक्षो वस्त्रान्तरेषु शुक्लतरव्यपदेश इत्यर्थः। सन्नं दृष्ट्वेति। एकश्रुतिगतमित्यर्थः। सोऽन्येनेति। अनुदात्तेनोपरक्तः यथा शुक्लः पटो वर्णान्तरयुक्तेन द्रव्येणेत्यर्थः। कस्यचित्तु स्वरितस्योदात्तस्य भागो नानुदात्तेनानुरज्यत इति पृथक्स्वरितो- निर्दिष्टः। स्वरितस्य भेदा जात्यस्वरादयोऽष्टाविति भाष्यकारेण प्रकृतत्वादिह नोक्ताः। इयं चैकश्रुतिराप्लुतात्संबोधनवाक्यस्य भवति। प्लुतस्तूदात्त एव विधानसामर्थ्यात्॥

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 नसु॥ ओकार इति। नेदमपूर्वविधानं सूत्रव्यापार एव तु प्रदर्श्यते। यथा चोदात्त ओकारस्तथा तस्यादित इत्यत्रोक्तम्। ओम-
स्यादानद्वितुप्लुतोदात्तत्वं न भवति। तस्यायज्ञकर्मविषयत्वादित्याहुः। इन्द्र आगच्छेति। इन्द्रशब्द आमन्त्रितत्वादाद्यु-
दात्तः। तस्य द्वितीयो वर्णो वर्ज्यमानस्वरेणानुदात्तः स उदात्तादनुदात्तस्य। स्वरित इति स्वरितस्तस्य स्थाने नोदात्तत्वम्। आकार आख्यात
इति। तिङन्ते गच्छशब्दे परत आकार उपसर्गत्वादुदात्तः। परादिश्चेति। आकारात्परस्य गच्छेत्यस्यादिरुदात्तः। तिङ्ङतिङ इति

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः॥ सुब्रह्मण्यायामोकार उदात्तः॥ सुब्रह्मण्यायामोकार उदात्तो भवति सुब्रह्म-
ण्योम्। आकार आख्याते परादिश्च॥ आकार आख्याते परादिश्चोदात्तो भवति। इन्द्र आगच्छ हरिव आगच्छ। वा
क्यादौ च द्वे द्वे॥ वाक्यादौ च द्वे द्वे उदात्ते भवतः। इन्द्र आगच्छ हरिव आगच्छ। मघवन्चर्जम्॥ आगच्छ मघवन्। सु
त्यापराणामन्तः॥ सुत्यापराणामन्त उदात्तो भवति। त्र्यहे सुत्यां त्र्यहे सुत्याम्॥ असावित्यन्तः॥ असावित्यन्त उदात्तो
भवति। गार्ग्यो यजते वात्स्यो यजते॥ अमुष्येत्यन्तः॥ अमुष्येत्यन्त उदात्तो भवति। दाक्षेः पिता यजते॥ स्यान्तस्यो
पोत्तमं च॥ स्यान्तस्योपोत्तममुदात्तं भवति। अन्त्यश्च॥ गार्ग्यस्य पिता यजते वात्स्यस्य पिता यजते॥ वा नामधेय
स्य॥ वा नामधेयस्य स्यान्तस्योपोत्तममुदात्तं भवति। देवदत्तस्य पिता यजते॥

निघाते पूर्ववत्स्वरिते च कृते तेनेनोदात्तविधानात्। वाक्यादौ चेति। अनन्तरोक्तप्रक्रिययेति भावः। मघवन्चर्जमिति। मघवन्नित्यस्या
मन्त्रितस्येति निघातविधानात्। सुत्यापराणामिति। सुत्याशब्दः परो येभ्यस्तेषामित्यर्थः। त्र्यह इति टजन्तत्वादन्तोदात्तत्वम्।
असावित्यन्त इति। इदं वाचनिकम्। असाविति प्रथमान्तोपलक्षणम्। गार्ग्य इति। ञित्वादाद्युदात्तत्वे प्राप्ते अन्तोदात्तत्वविधिः। अ
मुष्येति षष्ठ्यन्तोपलक्षणमेतत्। दाक्षेरिति पूर्ववदाद्युदात्तत्वं प्राप्तम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देव॥ अनुदात्तत्वमेकइति। येदेवाब्रह्माणइतिपदयोर्वैयधिकरण्यमाकुत्तदाहिपूर्वस्यामन्त्रितस्याविद्यमानत्वादूद्वयोरपिपद-
योरामन्त्रिताद्युदात्तत्वेशेषनिघातेचस्वरितत्वेचकृतेऽनेनानुदात्तः क्रियते यदातुदेवाः ब्रह्माणइत्यनयोः सामानाधिकरण्यंत
दाविभाषितंविशेषवचनेबहुवचनमितिपक्षेविद्यमानत्वादामन्त्रितस्येतिनिघातस्यसिद्धत्वान्नानेनार्थइत्यन्येषांमतमितिम
तभेदप्रदर्शनार्थमेकइत्युक्तम्॥ स्वरि॥ द्व्येकयोरिति। पशुनायजेतेतिवत्संख्याया विवक्षितत्वात्। आग्निवेश्यइतियञन्तत्वा
दादिरुदात्तः। शेषनिघातः ततोद्वितीयोवर्णउदात्तादितिस्वरितः। तस्मात्परौद्वावनुदात्तौ। पचतीति। धातुरुदात्तःशपिपाव नुदात्तौ

देवब्रह्मणोरनुदात्तः॥ ॥देवब्रह्मणोरनुद। त्तत्वमेके॥ देवब्रह्मणोरनुदात्तत्वमेकइच्छन्ति। देवाब्रह्माणः देवाब्रह्मा
णः॥ स्वरितात्संहितायामनुदात्तानाम्॥ ॥स्वरितात्संहितायामनुदात्तानामितिचेद् द्व्येकयोरेकश्रुत्यवचनम्॥
स्वरितात्संहितायामनुदात्तानामितिचेद् द्व्येकयोरेकश्रुत्यंवक्तव्यम्। आग्निवेश्यः पचतीति। किंपुनःकारणंन
सिध्यति। बहुवचनेनेनंनिर्देशः क्रियते तेन बहूनामेवैकश्रुत्यंस्याद् द्व्येकयोर्नस्यात्। नैषदोषः। नात्रबहुवच
नेननिर्देशस्तन्त्रम्। कथंपुनस्तेनैवचनामनिर्देशः क्रियते। तच्चातन्त्रंस्यात्। तत्कारीचभवांस्तद्द्वेषीच। ना
न्तरीयकत्वादत्रबहुवचनेननिर्देशः क्रियते। अवश्यंकयाचिद्विभक्त्याकेनचिद्वचनेननिर्देशः कर्तव्यइति।
तद्यथा। कश्चिदन्नार्थीशालिकलापंसपलालंसतुषमाहरतिनान्तरीयकत्वात्।

ततः प्राबकारः स्वरितः ततः परएकोनुदात्तः। द्व्येकयोरित्यत्रद्विशब्देनद्वित्वंएकशब्देनचैकत्वंतेनद्वित्वेएकत्वेचसतीत्य
र्थः। नात्रेति। तन्त्रशब्दोत्रप्रधानवाची यथागृहंसंमार्ष्टीतिसंख्यानविवक्ष्यतेतथेहापीत्यर्थः। तत्कारीति। असत्यांबहुत्वसं
ख्यायांबहुवचनमेवनस्यादितितद्विवक्षणीयम्। नात्रनिर्देशस्तन्त्रमितिवचनात्तदेवाविवक्षितमितिविरोधइत्यर्थः। ना
न्तरीयकत्वादिति। शब्दसंस्कारार्थमेवात्रबहुत्वंविवक्ष्यतेनतुकार्यसिध्यर्थमित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तुषपलालानीति। तुषसहितानि पलालानीति तत्पुरुषः। द्वन्द्वे तु जातिवाचित्वादेकवद्भावप्रसङ्गः। एवं शकलकणकानीति।
व्यवहितानामिति। स्वरितादिति पञ्चमीनिर्देशादनन्तरस्यैव कार्येण भाव्यमिति। इमं मे गङ्गे इत्यत्र मेशब्दात्स्वरितात्पर-
स्यैकस्यैवानन्तरस्य स्यादिति द्वितीयादीनां व्यवधानादित्यर्थः। एकशेषनिर्देशोऽयमिति। योगारम्भपक्षे वर्गत्रयोपादाने नैकशेषः
क्रियते। अनुदात्तयोरनुदात्तानामिति च कृते एकशेषे पुनरेकशेषः कर्तव्यः। आकृतिपक्षाश्रयेण प्रत्याख्याते सूत्रे जात्याख्या-
यामिति बहुवचनं कृतं ततश्चैकद्विबहुषु स्वरितात्परस्या जातेरानन्तर्येणोपलम्भात्सर्वेषामेकश्रुत्यस्य सिद्धत्वाद्दोषाभावः।

स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चिन्मांसार्थी मत्स्यान् सकण्टकान् सशकलाना
हरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय शकलकण्टकानुत्सृजति। एवमिहापि नान्तरीयकत्वाद्
बहुवचननिर्देशः क्रियते। अविशेषेणैकश्रुत्यं भवति। अविशेषेणैकश्रुत्यमिति चेद्व्यवहितानामप्रसि
द्धिः। अविशेषेणैकश्रुत्यमिति चेद्व्यवहितानामैकश्रुत्यं न प्राप्नोति। इमं मे गङ्गे यमुने सरस्वति शुतुद्रि।
अनेकमपीति तु वचनात्सिद्धम्। अनेकमप्येकमपि स्वरितात्परं संहितायामेकश्रुतिर्भवतीति वक्तव्य
सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं स्वरितात्संहितायामनुदात्तानामिति चेद्द्व्येकयो
रेकवचनमविशेषेण व्यवहितानामप्रसिद्धिरिति। नैष दोषः। कथम्। एकशेषनिर्देशोऽयम्। अनुदात्तस्य
चानुदात्तयोश्चानुदात्तानां चानुदात्तानां चा———नुदात्तानामिति। एवमपि षट्प्रभृतीनामेव प्रा
प्नोति। षट्प्रभृतिषु ह्येकशेषः परिसमाप्यते। प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति द्व्येकयोरपि भविष्य
ति॥ स्वरितात्संहितायाम्॥ ॥अपृक्त एकाल्प्रत्ययः॥ ॥अपृक्तसंज्ञायां हल्ग्रहणं स्वादिलोपे हलोऽग्रह
णार्थम्। अपृक्तसंज्ञायां हल्ग्रहणं कर्तव्यम्। एकहल्प्रत्ययोऽपृक्तसंज्ञो भवतीति वक्तव्यम्।

एवमपीति। सहविवक्षायामेकशेषविधानात्समुदितानां कार्यप्रसङ्गः। प्रभृतिग्रहणेन चैकशेषवाक्येऽनुदात्तानामित्यने
नैव चतुरादयोऽप्यनुदात्ता गृह्यन्त इति दर्शयति। प्रत्येकमिति। निर्देश एव सहविवक्षा। कार्यप्रवृत्तिस्तु प्रत्येकं यथा देवद- राम:
त्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्युक्ते देवदत्तादयः पृथगेव भुञ्जते॥ अपृक्त॥ स्वादिलोपइति विभेदेति णलोऽपृक्त- १९६
ग्रहणेनैव निवृत्तिः सिध्यतीत्यर्थः। ॥

CC-0. In Public Domain. Digitization by eGangotri

अणिञो रिति। पदद्वयोच्चारणमेव गौरवमिति भावः। णवचनेति। लुगपवादो णो दिश्यते न्यथा ण एव लुकि सिद्धे ण विधानमनर्थकं स्यादित्यर्थः। फङ्ङिवृत्त्यर्थमिति। यञिञोश्चेति प्राप्तस्य फको बाधनार्थं णवचनं स्यात् तस्य च लुक्स्यादेवेत्यर्थः।

किंप्रयोजनम्। स्वादिलोपे हलो ग्रहणार्थम्। एवं हि स्वादिलोपे हलो ग्रहणं न कर्तव्यं भवति। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हलिति। अपृक्तस्येत्येव सिद्धम्। अणिञोर्लुगर्थमलूग्रहणम्। अणिञोर्लुगर्थमलूग्रहणं कर्तव्यम्। किंप्रयोजनम्। अणिञोर्लुकि ग्रहणं न कर्तव्यं भवति। ण्यक्षत्रियार्षञितो यूनि लुगणिञोरिति। अपृक्तस्येत्येव सिद्धम्। अणिञोर्लुगर्थमिति चेण्णिति प्रसङ्गः। अणिञोर्लुगर्थमिति चेत् णेति प्रसङ्गो भवति। इहापि प्राप्नोति। फाण्टाहृतेरपत्यं माणवकः फाण्टाहृत इति। णवचनसामर्थ्यान्न भविष्यति। वचनप्रामाण्यादिति चेत्फङ्ङिवृत्त्यर्थं वचनम्। वचनप्रामाण्यादिति चेत् फङ्ङिवृत्त्यर्थमेतत्स्यात्। फगतो माभूदिति। पैलादिषु वचनात्सिद्धम्। यद्येतावत्प्रयोजनं स्यात् पैलादिष्वेवास्य पाठं कुर्वीत। तत्र पाठादन्येषामपि फको निवृत्तिर्भवति। एवं सिद्धे सति यदयं णं शास्ति तज्ज्ञापयत्याचार्यो नास्य लुग्भवतीति। तान्येतानि त्रीणि ग्रहणानि भवन्ति अपृक्तसंज्ञायां हल्ग्रहणं कर्तव्यम्। स्वादिलोपे हल्ग्रहणं न कर्तव्यम्। अणिञोर्लुकि ग्रहणं कर्तव्यम्। अल्ग्रहणेपि वै क्रियमाणे तान्येव त्रीणि ग्रहणानि भवन्ति अपृक्तसंज्ञायामल्ग्रहणं कर्तव्यम्। स्वादिलोपे हल्ग्रहणं कर्तव्यम्। अणिञोर्लुकि ग्रहणं न कर्तव्यं भवति। अपृक्तग्रहणं कर्तव्यं तत्र नास्ति लाघवकृतो विशेषः। अयमस्ति विशेषः। अल्ग्रहणे क्रियमाणे एकग्रहणं न करिष्यते। कस्मान्न भवति। दर्विर्जागृविः। अलेव यः प्रत्ययः। किं वक्तव्यमेतत्। नहि कथमनुच्यमानं गंस्यते।

कस्मान्न भवतीति। प्रत्ययस्य विशेषणमल्ग्रहणमिति तदन्तविधिसद्भावदृतिमत्वाप्रश्नः। इदं त्वनाश्रितमनुनासिकपरत्वादिति।

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अल्ग्रहणसामर्थ्यादिति। यद्यलन्तस्य स्यात्केवलस्य चाद्यन्तवद्भावात्तदाल्ग्रहणेन न किंचिद्व्यावर्तितं स्यात्। दर्विरिति। ननु हलन्तत्वाभावादत्र प्राप्तिरेव नास्ति। नैष दोषः। अयं सांप्रतिको विशब्द इति क्विवादिषु भूतपूर्वगतिर्न लभ्यते तत्राएङ्संज्ञायां हल्ग्रहणे न हल्वानुगृह्यते। यथा गुरोश्च हल इत्यत्र गुरुमान्। हलवेति। हलः प्राधान्यात्प्रत्ययस्य च विशेषणत्वादित्यर्थः। क्विवादिषु भूतपूर्वगत्याश्रयणाद्गौणी चेत्कल्पना। अत्र हल्शब्देन तद्वतो ग्रहणे किं न गौणी। हल्ग्रहणसामर्थ्यादिति। क्विबादयोपि हल्वन्तो दर्विरित्यादौ विप्रत्ययोपीति किमनेन व्यवच्छिन्नं स्यादित्यर्थः। हलन्तस्य यथा स्यादिति त

अल्ग्रहणसामर्थ्यात्। यदि च योल् चान्यश्च तत्र स्यात्। अल्ग्रहणमनर्थकं स्यात्। हल्ग्रहणेपि वै क्रियमाणे एकग्रहणं न करिष्यते। कस्मान्न भवति। दर्विः जागृविः। हलेव यः प्रत्ययः। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। हल्ग्रहणसामर्थ्यात्। यदि च यो हल् चान्यश्च तत्र स्यात्। हल्ग्रहणमनर्थकं स्यात्। अस्त्यन्यद्धल्ग्रहणस्य प्रयोजनम्। किम्। हलन्तस्य यथा स्यादजन्तस्य मा भूदिति। एवं तर्हि सिद्धे सति यदल्ग्रहणे क्रियमाणे एकग्रहणं करोति तज्ज्ञापयत्याचार्यः। अन्यत्र वर्णग्रहणे जातिग्रहणं भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धमित्युक्तं तदुपपन्नं भवति॥ अएङ्॥ ॥

तश्चास्त्येकग्रहणे हन्यादित्यादौ तिलोपः स्यादिति कर्तव्यं हल्ग्रहणे क्रियमाणे एकग्रहणम्। अल्ग्रहणे तु क्रियमाणे न कर्तव्यं कृतं तु ज्ञापनार्थं तद्दर्शितं भाष्ये। यद्यप्ययमर्थो निपात एकाजनाङित्यत्रैकग्रहणेन ज्ञापितस्तथापि मन्दबुद्धीनामनुग्रहाय पुनरिह ज्ञापितः। अएङ्प्रदेशेषु हल्ग्रहणेनैव सिद्धे संज्ञाविधानं विस्पष्टार्थम्। वृद्धिरादैजित्यत्रास्य परिभाषात्वं व्यवस्थापितमिह कथं संज्ञात्वेन व्यवहारः। परार्थसामान्यात्परिभाषासंज्ञात्वेन व्यवह्रियते इत्यदोषः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र॥ समासैकार्थत्वादिति। भिन्नप्रवृत्तिनिमित्तप्रयुक्तस्यानेकस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमुच्यते। नीलोत्पलादिश्च तत्पुरुष एक एवेति सामानाधिकरण्यमनुपपन्नम्। वर्तिपदानां तु सामानाधिकरण्यमुपपद्यते तत्पुरुषत्वं तु तेषां नास्ति। ऐकपद्यमिति। पदशब्देनार्थ उच्यते। ऐकार्थ्यमित्यर्थः। अथवा समासाद्विभक्त्युत्पत्तौ सत्यामैकपद्यमुच्यते। एकविभक्तित्वमिति। एककारकत्वमित्यर्थः। तद्यद्वृति। ननु मुख्यस्य तत्पुरुषस्य पदान्तरेण सामानाधिकरण्यं संभवत्येव राजपुरुषः शोभन इत्यादौ तत्कथं गौणस्य ग्रहणम्।

तत्पुरुषः समानाधिकरणः कर्मधारयः॥ ॥तत्पुरुषस्समानाधिकरणः कर्मधारय इति चेत्समासैकार्थत्वाद प्रसिद्धिः॥ तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत् समासैकार्थत्वात् संज्ञाया अप्रसिद्धिः। एकोयमर्थस्तत्पुरुषो नाम। अनेकार्थाश्रयं च सामानाधिकरण्यम्। सिद्धं तु पदसामानाधिकरण्यात्। सिद्धमेतत्। कथम्। तत्पुरुषस्समानाधिकरणपदः कर्मधारयसंज्ञो भवतीति वक्तव्यम्। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत् समासैकार्थत्वादप्रसिद्धिरिति। नैष दोषः। अयं तत्पुरुषोस्त्येव प्राथमकल्पिको यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तित्वं च। अस्ति तादर्थ्यात्ताच्छब्द्यं तत्पुरुषार्थानि पदानि तत्पुरुष इति। तद्यस्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणम्॥ तत्पुरुषः॥

नैष दोषः। तत्पुरुषस्य पदान्तरेण सामानाधिकरण्यं बहिरङ्गमन्तरङ्गं तु वर्तिपदानामिति तदेवाश्रीयते। ततश्च सामर्थ्यात्तत्पुरुषशब्दो गौणार्थवृत्तिः परिगृह्यते तेन समासावयवानामेव पदानां कर्मधारयसंज्ञा विधीयते समुदाये च वाक्यपरिसमाप्त्या पदसमुदायस्यैकैव कर्मधारयसंज्ञा न तु प्रत्येकम्। तत्पुरुषसंज्ञाप्रकरणे इयं संज्ञा न कृता एकसंज्ञाधिकारात् तत्पुरुषसंज्ञाया बाधा मा भूदिति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथम॥ अनिर्देशात्प्रथमाया इति। समासे किं प्रथमानिर्दिष्टं भवितुमर्हति यस्मात्समासे प्रथमा विधीयते। न च तया भूतस्य संभवः। समासे कृते तत एव प्रथमोत्पद्यते न तु तदवयवात्। अन्तर्वर्तिन्या च विभक्त्या प्रथमानिर्दिष्टत्व आश्रीयमाणे कष्टश्रित इत्यत्र श्रितं त्राब्दस्यैवोपसर्जनसंज्ञा स्यान्न कष्टशब्दस्य निर्दिष्टग्रहणं चानर्थकं स्यात्। समासे प्रथमान्तमुपसर्जनमिति वक्तव्यं स्यात्। न वेति। मुख्यार्थासंभवाद्गौणोर्थो गृह्यत इत्यर्थः। यस्य विधाविति। निर्देशापेक्षया समासस्याधारत्वात्प्रथमानिर्दिष्टस्य सर्वत्रोपसर्जनसंज्ञा प्राप्नोतीति भावः। राजकुमारीमिति। सत्युपसर्जनत्वे ह्रस्वः स्यात् पूर्वनिपातव्यवस्था च। सिद्धं त्विति। यस्य श्रितादेः समासविधौ तं-

प्रथमानिर्दिष्टं समास उपसर्जनम्॥ ॥प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात् प्रथमायाः समासे संज्ञाप्रसिद्धिः। प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात् प्रथमायाः समासे उपसर्जनसंज्ञाया अप्रसिद्धिः। न हि कष्टादीनां समासे प्रथमां पश्यामः। सिद्धं तु समासविधाने वचनात्। सिद्धमेतत्। कथम्। समासविधाने प्रथमानिर्दिष्टमुपसर्जनसंज्ञं भवतीति वक्तव्यम्। तत्तर्हि वक्तव्यम्। न वा तादर्थ्यात्ताच्छब्द्यम्। न वा वक्तव्यम्। किं कारणम्। तादर्थ्यात्ताच्छब्द्यं भविष्यति। समासार्था शास्त्रं समास इति। यस्य विधौ प्रथमानिर्देशस्ततोऽन्यत्रोपसर्जनसंज्ञाप्रसङ्गः। यस्य विधौ प्रथमानिर्देशः क्रियते ततोऽन्यत्रापि तस्योपसर्जनसंज्ञा प्राप्नोति। राज्ञः कुमारी राजकुमारी श्रितः। श्रितादिसमासे द्वितीयान्तं प्रथमानिर्दिष्टं तस्य षष्ठीसमासेऽप्युपसर्जनसंज्ञा प्राप्नोति। सिद्धं तु यस्य विधौ तं प्रतीति वचनात्। सिद्धमेतत्। कथम्। यस्य विधौ यत्प्रथमानिर्दिष्टं तं प्रति तदुपसर्जनसंज्ञं भवतीति वक्तव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। उपसर्जनमिति हि महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणम्।

श्रितादिकं प्रतीत्यर्थः। महती संज्ञेति। लोके चाप्रधानमुपसर्जनमुच्यते इहापि तथैवाश्रीयत इत्यर्थः। यद्येवं पूर्वकायो ह्रेपिप्पलीपुरुषव्याघ्र इत्यादिषु उपसर्जनसंज्ञा प्रधानस्य न प्राप्नोति। नैष दोषः। अन्वर्थसंज्ञा हि यत्र सोऽर्थः संभवतीत्यत्र प्रवृत्तिनिमित्तापेक्षाः प्रवर्तन्ते अन्यत्र तु विधानसामर्थ्यान्निरपेक्षाः। यथा कर्मप्रवचनीयसंज्ञा स्त्यादीनामिति प्रथमानिर्देशसामर्थ्यादर्द्धादीनां संज्ञा प्रवर्तते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथयत्रेति। परिहारान्तरसद्भावादेतदुच्यते। अन्वर्थाश्रयणेन ह्येतदपि सिध्यति। षष्ठ्यन्तयोश्चेति। पूर्वनिपातप्रकरण इदमुक्तम्।
तत्र हि पूर्वनिपातः प्रत्याख्यायते न वा निष्ठादर्शनादिति। अथाप्यारभ्यते तथापि राजशब्दस्यैव पूर्वनिपातो न पुरुषशब्दस्य।
एवं हि वाक्यापेक्षया समासस्यैकार्थता भवति अन्यथा वाक्यसमासयोर्भिन्नार्थता स्यादित्यर्थः। तथा हि। पुरुषार्थो राजापेक्ष
या प्रधानमेवात्रेति। नासौ भिद्यते राजापेक्षया न व्यतिरिच्यत इत्यर्थः। ततो प्रधानस्यैवात्र राज्ञः पूर्वनिपातः। शब्दशब्दार्था
विति। नन्वेतत्तत्र प्रत्याख्यातं परमयुवतिरित्यादौ दोषोतिशब्दौ स्यातामिति। एवं तर्हि अन्वर्थाश्रयेणास्य परिहारस्योक्तत्वाद

तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत। अप्रधानमुपसर्जनमिति। प्रधानमुप
सर्जनमिति च संबन्धिशब्दावेतौ। तत्र संबन्धादेतद्गन्तव्यं यं प्रति यदप्रधानं तं प्रति तदुपसर्जनसंज्ञं भवतीति।
अथ यत्र द्वे षष्ठ्यन्ते कस्मात्तत्र प्रधानस्योपसर्जनसंज्ञा न भवति। राज्ञः पुरुषस्य राजपुरुषस्येति। षष्ठ्यन्तयो
श्चोपसर्जनत्वे उक्तम्। किमुक्तम्। षष्ठ्यन्तयोः समासेऽर्थाभेदात् प्रधानस्यापूर्वनिपात इति। एवं न चेदम
कृतं भवति उपसर्जनं पूर्वमिति। अर्थश्चाभिन्न इति कृत्वा प्रधानस्य पूर्वनिपातो न भविष्यति। यद्यपि ताव
देतदुपसर्जनकार्यं परिहृतमिदमपरं प्राप्नोति राज्ञः कुमार्याः राजकुमार्याः। गोस्त्रियोरुपसर्जनस्येति-
ह्रस्वत्वं प्राप्नोति। उक्तं वा। किमुक्तम्। परवल्लिङ्गमिति। शब्दशब्दार्थाविति। तत्रोपदेशिकस्य ह्रस्वत्व
मातिदेशिकस्य श्रवणं भविष्यति॥ प्रथमानिर्दिष्टम्॥ ॥एकविभक्ति चापूर्वनिपाते॥

त्रसूत्रेमोक्षिकानकृता। एक॥ समास इति वर्तते। मुख्य एव चेह समासो गृह्यते समासे विधातव्ये यदेकविभक्ति तिसमासार्थे
वाक्ये वा समासो गृह्यते सर्वस्य च शब्दस्यैकविभक्तित्वमिति विशेषणोपादानसामर्थ्यात् तस्य पर्यायेणापि न सर्वविभक्तित्वं त
दुपसर्जनसंज्ञं यथा निष्कौशाम्बिरित्यत्र कौशाम्बीशब्दो निष्क्रमणक्रियापेक्षयापादानशक्तिसंबन्धात् पञ्चम्यन्त एवानन्य-
स्य क्रियान्तरापेक्षः शक्त्यन्तराविर्भावः। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· द्वितीयादीनामिति। कष्टश्रितादिषु कष्टश्रितादयः श्रितादिविशेषणत्वादेकविभक्तिकाद्वत्यनेनोपसर्जनसंज्ञा तेषां प्राप्नोति। १२१
१९९ ततश्चापूर्वनिपातइतिप्रतिषेधः प्राप्नोति। पूर्वसूत्रस्य तु नीलोत्पलादिः समानाधिकरणसमासोवकाशः। ननु चेयमिति।
प्रतिषेधयुक्तत्वायुक्तत्वेनविरोधात्परत्वादिति भावः। नोत्सहतइति। अपवादविषयं प्रकल्प्योत्सर्गस्य प्रवर्तनात्। पञ्च

द्वितीयादीनामप्यनेनोपसर्जनसंज्ञा प्राप्नोति। तत्र को दोषः। तत्रापूर्वनिपातइतिप्रतिषेधः प्रसज्येत। ना
प्रतिषेधात्। नायं प्रसज्यप्रतिषेधः पूर्वं निपातेनेति। किं तर्हि। पर्युदासोयम्। यदन्यत्पूर्वनिपातादिति। पूर्व
निपातेऽव्यापारः। यदि केन चित्प्राप्नोति तेन भविष्यति। पूर्वेण च प्राप्नोति तेन भविष्यति। अप्राप्तेर्वा। अथवा
अनन्तरायाप्राप्तिः सा प्रतिषिध्यते। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रति-
षिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते। नोत्सहते प्रतिषिद्धा सती बाधितुम्॥ एकविभक्ताव
षष्ठ्यन्तवचनम्॥ एकविभक्तावषष्ठ्यन्तानामिति वक्तव्यम्। इह माभूत्। अर्धं पिप्पल्याः अर्धपिप्पलीति।
उक्तं वा। किमुक्तम्। परवल्लिङ्गमिति शब्दशब्दार्थाविति तत्रोपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य श्रवणं
भविष्यति। कानि पुनरस्य योगस्य प्रयोजनानि। प्रयोजनं द्विगुप्राप्तापन्नालंपूर्वोपसर्गाः। क्तार्थे द्विगुः पञ्च
भिर्गोभिः क्रीतः पञ्चगुः दशगुः। प्राप्तापन्नः। प्राप्तो जीविकां प्राप्तजीविकः। आपन्नो जीविकामापन्नजीवि
कः। अलंपूर्वः। अलंकुमार्यै अलंकुमारिः। उपसर्गाः क्तार्थे। निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः निर्वाराणसिः॥ ॥इति श्रीमह
भाष्ये प्रथमस्याध्यायस्य द्वितीयपादे प्रथमाह्निकम्॥

गुरिति। द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्य इति वचनात्परवल्लिङ्गं न भवति। अलंकुमारिरिति। पर्यादयो ग्ला राम:
नाद्यर्थे चतुर्थ्येति समासः॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे प्रथमस्याध्यायस्य द्वितीये पादे प्रथमाह्निकम्॥ ॥ १९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थवदधातुरप्रत्ययः प्रातिपदिकम्॥ अभिधेयवचनोऽत्रार्थशब्द आश्रीयते तत्राधातुरप्रत्यय इति पर्युदासाश्रयणाद-
र्थवत एव संज्ञा भविष्यति नार्थोऽर्थवद्ग्रहणेनेत्याशङ्क्याह। अर्थवदिति व्यपदेशायेति। संज्ञिन इति वाक्यशेषः। पर्युदासाश्रय
णे केनधर्मेण सादृश्यमाश्रीयत इत्यप्रतिपत्तिः स्यादिति भावः। वर्णानां माभूदिति। विशिष्टसंज्ञिव्यपदेशफलं दर्शयति। क्वचि-
द्वर्णानां चेति पाठः। तत्र चशब्देन पदसमुदायोऽनर्थको दशदाडिमानीत्यादिः समुच्चीयते। किंच स्यादिति। संख्याकर्मादिषु स्वादीनां
विधानादनर्थकेभ्यः स्वाद्युत्पत्तिर्न भविष्यतीति प्रश्नः। वनमिति। नन्वधातुरिति नान्तस्य प्रतिषेधो भविष्यति। नैतदस्ति। प्रतिवर्णमत्र वि
भक्त्युत्पत्तिप्रसङ्गः। न च प्रतिवर्णं धातुसंज्ञासमावेशः। अयं भावः। अविशेषेण स्वादय उत्पद्यन्ते तेषूत्पन्नेष्वर्थनियमः प्रकृतार्थापे-
क्षया वा प्रत्ययनियम इति स्यादेव स्वाद्युत्पत्तिः। अव्ययादिवत्। यदुक्तं संघातस्यैकार्थ्यात्सुबभावो वर्णादिति तद्वर्णानामर्थवत्त्वापक्षे
। तत्र हि तन्त्रेणैकैकवविभक्तिः। समुदायावयवार्थगतमेकत्वं प्रत्याययिष्यति। एकमेव हि तदेकत्वं तच्चैकैकेनैव हि सुपा प्रत्यायितमित्य

अर्थवदधातुरप्रत्ययः प्रातिपदिकम्॥ अर्थवदिति व्यपदेशाय वर्णानां माभूदिति। किंच स्यात्। वनं धन
मिति। नलोपः प्रातिपदिकान्तस्येति नलोपः प्रसज्येत। अधातुरिति किमर्थम्। अहन्वृत्रम्। अधातुरिति
शावयमवक्तुम्। कस्मान्न भवति अहन्वृत्रमिति। आचार्यप्रवृत्तिर्ज्ञापयति न धातोः प्रातिपदिकसंज्ञा भवती-
ति। यदयं सुपो धातुप्रातिपदिकयोरिति धातुग्रहणं करोति।

वयवेभ्यो विभक्तिर्न स्यात्। अनर्थकस्य तु प्रातिपदिकसंज्ञायां प्रकाशयितव्यस्यार्थस्याभावात्समुदायादिव प्रतिवर्णं विभक्त्युत्प
त्तिप्रसङ्गः। नलोप इति। विभक्तेर्लुग्श्रवणं न भवति समुदायस्य पृथक् प्रातिपदिकसंज्ञायां तदन्तर्भावाद् लुको भावाद् नलोप-
स्योपलक्षणार्थत्वाज्जपूत्वादीनामपि प्रसङ्गः। अहन्निति। विशेषविहितत्वाल्लङाद्युत्पत्तौ सत्यामडागमस्य धातुभक्तत्वात्प्राति
पदिकसंज्ञायां सत्यां नलोपप्रसङ्गः। न चाप्रत्यय इति प्रत्ययलक्षणप्रतिषेधः। नङिसंबुद्ध्योरिति ज्ञापनाद् नलोपे विधीयमा
ने प्रत्ययलक्षणेनाप्रत्यय इति निषेधाभावात् धातुग्रहणं करोतीति। पुत्रीयतीत्यादौ प्रातिपदिकत्वादेव लुक् सिद्ध इति
भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्येनायतइति। अत्राप्रत्ययइतिनिषिद्धा प्रातिपदिकसंज्ञा॥ कृत्तद्धित॥ तद्धितग्रहणमत्र नियमार्थं कृद्ग्रहणं तु प्रतिषिद्धार्थमिद्धिरिति। अत्र ह्यधातुरितिप्रतिषेधप्रसङ्गः। अनेकपदप्रसङ्ग इति। अनेकं पदमस्मिन्नित्यनेकपदः समुदायस्तस्य संज्ञाप्रसङ्ग इत्यर्थः। अनेकस्यापिपदस्येति। समुदितस्येतिबोद्धव्यम्। प्रतिपदं तु नैवसंज्ञाप्राप्नोत्यप्रत्ययइतिनिषेधात्। समुदायस्य तु निषेधो न प्रवर्तते प्रत्ययग्रहणे यस्मात्सविहितइति वचनात्समुदायाच्च प्रत्ययस्याविधानात् प्रत्ययान्तत्वाभावात्। न विद्यते प्रत्ययो यस्मिन्सोयमप्रत्यय इत्यप्यस्त्र

नैतदस्तिज्ञापकं प्रतिषिद्धार्थमेतत्स्यात्। अपि काकः श्येनायतइति। अप्रत्ययइति किम्। काण्डेकुड्ये। अप्रत्ययइतिशक्यमवक्तुम्। कस्मान्न भवति काण्डेकुड्यइति। कृत्तद्धितग्रहणं नियमार्थं भविष्यति। कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति। अर्थवत्यनेकपदप्रसङ्गः। अर्थवदिति प्रातिपदिकसंज्ञायामनेकस्यापिपदस्य प्रातिपदिकसंज्ञा प्राप्नोति। दशदाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन इति। समुदायोत्रानर्थकः। समुदायोनर्थक इति चेदवयवार्थवत्त्वात्समुदायार्थवत्त्वं यथा लोके। समुदायोनर्थक इति चेदवयवार्थवत्त्वात्समुदायार्थवत्त्वम्। अवयवैरर्थवद्भिः समुदाया अर्थवन्तो भवन्ति यथा लोके। तद्यथा लोके आढ्यमिदं नगरं गोमदिदं नगरमित्युच्यते न च सर्वे तत्राढ्या भवन्ति सर्वे वा गोमन्तः। यथा लोके इत्युच्यते लोके चावयवा एवार्थवन्तो न समुदायाः। आतश्चावयवा एवार्थवन्तो न समुदायाः। यस्य हि यद्द्रव्यं भवति स तेन कार्यं करोति। यस्य च या गावो भवन्ति स तासां क्षीरं घृतमुपभुङ्क्ते। अन्यैरेतद्द्रष्टुमशक्यम्। का तर्हीयं वाचोयुक्तिराढ्यमिदं नगरं गोमदिदं नगरमिति। एषैषा वाचोयुक्तिः। इहतावदाढ्यमिदं नगरमित्यकारो मत्वर्थीयः।

यिलुं न युज्यते बहुपरवदित्यस्यापि समुदायस्य निषेधप्रसङ्गात् स्वरे दोषप्रसङ्गात्। समुदायोत्रानर्थक इति। पदार्थानां समन्वयाभावात्। अवयवार्थवत्त्वादिति। अवयवधर्माणां च समुदाये व्यपदेशात्। सति च प्रातिपदिकत्वे सुब्लुक्प्रसङ्गः। एषैषेति। एषा या वाचोयुक्तिः सैषा एतत्प्रमाणेत्यर्थः। अकारो मत्वर्थीय इति। ततश्च नावयवधर्मेण समुदाये व्यपदेशः किं तर्हि दण्डयादिवद्यौगिक इत्यर्थः। ॥ राम॰ २००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मत्वन्तादिति। मत्वन्तान्मतुब्न भवति सरूपः प्रत्ययो नेष्ट इति वचनात्तस्मादेकगोपूर्वादिति ठञ्। भाष्यकारवचनप्रामाण्याल्लो-
पः। अत इति च तत्र निवृत्तं गौत्रिकादिसिद्ध्यर्थं गवां समूहो गोत्रा सास्मिन्नस्तीति गौत्रिकम्। अथवा मत्वन्तान्मत्वर्थीयो लुप्यत इ-
ति। अनेनावयवधर्मस्य समुदाये उपचारमाह। इह तु मुख्येऽर्थवत्त्वे संभवत्युपचरितत्वस्याश्रयो न युक्तः। अर्थवद्वाक्यमिदा-
नीं दर्शयति। एवमपीति। अर्थवद्धीति। पदार्थानां समन्वयावगमात्। नवै पदार्थादिति। पदानि स्वं स्वमर्थं प्रतिपादयन्ति वाक्य-
म्। पदार्था एव त्वाकाङ्क्षायोग्यतासन्निधिवशात् परस्परसंसृष्टा वाक्यार्थ इत्यर्थः। न तु वाक्यं वाक्यार्थो वा पृथगस्तीति भावः।

आढ्या अस्मिन्सन्तीति तदिदमाढ्यमिति गोमदिदं नगरमिति मत्वन्तात्तु मत्वर्थीयो लुप्यते। एवमपि वाक्यप्र-
तिषेधोऽर्थवत्त्वात्। वाक्यस्य प्रातिपदिकसंज्ञायाः प्रतिषेधो वक्तव्यः। देवदत्त गामभ्याज शुक्लां देवदत्त गा-
मभ्याज कृष्णामिति। किं कारणम्। अर्थवत्त्वात्। अर्थवद्ध्येतद्वाक्यम्। नवै पदार्थादन्यस्यार्थस्योपलब्धिर्भ-
वति वाक्ये। पदार्थादन्यस्यानुपलब्धिरिति चेत्पदार्थाभिसंबन्धस्योपलब्धिः। पदार्थादन्यस्यानुपलब्धि-
रिति चेदिदमुच्यते। पदार्थाभिसंबन्धस्योपलब्धिर्भवति वाक्ये। इह देवदत्त इत्युक्ते कर्ता निर्दिष्टः क-
र्म क्रिया गुणौ चानिर्दिष्टौ। गामित्युक्ते कर्म निर्दिष्टं कर्ता क्रिया गुणौ चानिर्दिष्टौ। अभ्याजेत्युक्ते क्रिया निर्दिष्टा
कर्तृकर्मणी गुणश्चानिर्दिष्टः। शुक्लामित्युक्ते गुणो निर्दिष्टः कर्तृकर्मणी क्रिया चानिर्दिष्टा। इहेदानीं देवद-
त्त गामभ्याज शुक्लामित्युक्ते सर्वं निर्दिष्टं देवदत्त एव कर्ता नान्यः गामेव कर्म नान्यत्। अभ्याजेव क्रिया ना-
न्या शुक्लामेव न कृष्णामिति। येषां पदानां सामान्ये वर्तमानानां यद्विशेषे वस्थानं स वाक्यार्थः।

पदार्थाभिसंबन्धस्येति। ध्वनिव्यङ्ग्यं नित्यं वाक्यं विशिष्टस्यार्थस्य पदार्थसंसर्गरूपस्य वाचकम्। अन्यथा ह्यशब्दो वाक्यार्थः
स्यात्। कर्ता निर्दिष्ट इति। संबोधनविषयमनियतक्रियं कर्तृमात्रमित्यर्थः। यद्विशेषे वस्थानमिति। पदार्थसंसर्गरूपे वाक्या-
र्थ इत्यर्थः। अत एव वाक्यमेव मुख्यः शब्दो वाक्यार्थ एव मुख्यः शब्दार्थः। सादृश्यात्त्वन्वयव्यतिरेकौ कल्पितौ लाघवार्थमा-
श्रित्य पदार्थव्यवस्थापनं क्रियते। प्रतिवाक्यं व्युत्पत्त्यसंभवाच्छाब्दव्यवहाराभावप्रसङ्गात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुपटवदिति। योऽस्येनार्थेनार्थवान्प्रत्ययः। प्रकृतिस्तु वाच्येनेत्यर्थवत्समुदायोऽयं भवति। उच्चकैरिति। तन्मध्यपतितस्तद्ग्रह-
णेन गृह्यत इति यदा नाश्रीयते तदाप्यकच् अप्यस्ति तदा अयं दोषः। तदा हि सुबन्तस्याकचि कृते अव्ययादिति सुब्लुगभावा
त्सुपो धातुप्रातिपदिकयोरिति लुगिष्यते स च न प्राप्नोति। किं पुनरत्रेति। उच्चकैरित्यादावन्यथा सिध्यतीति प्रश्नः। इतरो ब-
हुपटवदिति न सिध्यतीति मन्यमान आह। प्रातिपदिकादिति स्वर इति। बहुपटवदिति वकाराकारस्योदात्तत्वं प्राप्नोति टकारा
कारस्य चेष्यते। प्रकृत्यनेकदेशत्वादिति। न ह्यसौ प्रकृतेरेकदेश इत्यर्थः। अप्रत्ययइति प्रतिषेधं न्याय्यत्युक्ते कश्चिन्ब्रूया

तस्मात्प्रतिषेधः। तस्मात्प्रतिषेधो वक्तव्यः। न वक्तव्यः। अर्थवत्समुदायानां समासग्रहणं नियमार्थम्। अर्थवत्समुदायानां समासग्रह
णं नियमार्थं भविष्यति। समास एवार्थवतां समुदायानां प्रातिपदिकसंज्ञो भवति नान्य इति। यदि नियमः क्रियते प्रकृतिप्र
त्ययसमुदायस्य प्रातिपदिकसंज्ञा न प्राप्नोति बहुपटव. उच्चकै नीचकैरिति। किं पुनरत्र प्रातिपदिकसं
ज्ञया प्रार्थ्यते। प्रातिपदिकादिति स्वाद्युत्पत्तिर्यथा स्यादिति। नैष दोषः। यथैवात्राप्रातिपदिकत्वात्सुबुत्प
त्तिर्न भवति एवं लुगपि न भविष्यति। तत्र यैवासावन्तवर्तिनी विभक्तिस्तस्या एव श्रवणं भविष्यति। नैवं श
क्यं स्वरे दोषः स्यात्। बहुपटवदित्येवं स्वरः स्यात्। बहुपटवदिति चेष्यते। पठिष्यति ह्याचार्यः। चितः सप्र
कृतेर्बह्वकजर्थमिति। तस्याः पुनर्लुप्तायां यान्या विभक्तिरुत्पद्यते तस्याः प्रकृत्यनेकदेशत्वादन्तोदा
त्तत्वं न भविष्यति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवति प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञे
ति। यदयमप्रत्यय इति प्रतिषेधं शास्ति। स च तदन्तप्रतिषेधः। सतर्हि ज्ञापकार्थः प्रत्ययप्रतिषेधो वक्तव्यः।

बहुपटवदित्यत्राप्रत्यय इति निषेधः प्राप्नोतीत्यत आह। स च तदन्तप्रतिषेध इति। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तविधिः। सं
ज्ञाविधौ च प्रत्ययग्रहणे तदन्तविधिर्निवारितः। अप्रत्यय इत्ययं तु प्रतिषेधविधिः। पटुशब्दाच्चात्र जस् उत्पन्नो न बहुपटुशब्दादिति रामः
बहुपटवदित्येतदप्रत्ययान्तमेव। अथवा अप्रत्यय इति बहुव्रीह्याश्रयणात् प्रत्ययादेरपि बहुपटवदित्यस्य निषेधः प्राप्नोतीत्या २०१
ह स चेति। अप्रत्यय इति तत्पुरुष आश्रीयते तस्य उत्तरपदार्थप्रधानत्वेनान्तरङ्गत्वादिति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्त्यर्थ इति। प्रतिषेधप्राप्त्यर्थ इत्यर्थः। स एषोऽनन्यार्थ इति। ज्ञापनार्थ एवेत्यर्थः। सुबन्तानामिति। एतच्चोपलक्षणं भेदसंसर्ग-
द्वारकार्थवत्त्वयुक्तानाम्। यस्मात्सुबन्तासुबन्तानामपि समासो दृश्यते। अश्वक्रीतीत्यादौ गतिकारकोपपदानां कृद्भिः सह
समासवचनं प्राक् सुबुत्पत्तेरिति वचनात्। देवदत्तो ग्रामं गत इत्यादेः सुबन्तसमुदायस्यैव वाक्यस्य नियमेन निवृत्तिः स्यादि
त्यभिप्रायेणाह सुप्तिङ्समुदायस्येति। जहि कर्मणेति। ननु समाससंज्ञेयं समासान्तोदात्तार्था। नैष दोषः। समासत्वादेव प्रातिपदिक

ननु चायं प्राप्त्यर्थोऽपि वक्तव्यः। नार्थः प्राप्त्यर्थेन। कृत्तद्धितग्रहणं नियमार्थं भविष्यति। कृत्तद्धितान्तस्यैव प्रत्ययान्त
स्य प्रातिपदिकसंज्ञा भविष्यति नान्यस्य प्रत्ययान्तस्येति। स एषोऽनन्यार्थः प्रत्ययप्रतिषेधो वक्तव्यः। प्रकृतिप्रत्य
यसमुदायस्य वा प्रातिपदिकसंज्ञा वक्तव्या। उभयं न वक्तव्यम्। तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः।
यथाजातीयकानां समासः। कथंजातीयकानां समासः। सुबन्तानाम्। सुप्तिङ्समुदायस्य तर्हि प्रातिपदिकसं
ज्ञा प्राप्नोति। सुप्तिङ्समुदायस्यापि प्रातिपदिकसंज्ञा आरभ्यते। जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं
चाभिदधातीति। तन्नियमार्थं भविष्यति। एतस्यैव सुप्तिङ्समुदायस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति। तिङ्
समुदायस्य तर्हि प्रातिपदिकसंज्ञा प्राप्नोति। तिङ्समुदायस्यापि प्रातिपदिकसंज्ञाऽऽरभ्यते। आख्यातमाख्यातेन
क्रियासातत्य इति। तन्नियमार्थं भविष्यति। एतस्यैव तिङ्समुदायस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति। अर्थ
वत्ता नोपपद्यते केवलेनावचनात्। अर्थवत्ता नोपपद्यते वृक्षशब्दस्य। किं कारणम्। केवलेनावचनात्। न केव
लेन वृक्षशब्देनार्थो गम्यते। केन तर्हि। सप्रत्ययकेन।

त्वमिति तत्तुल्यजातीयताप्रतिपादनार्थमेतदुपन्यस्तम्। तिङ्समुदायस्येति पश्य धावतीत्यादि। ततश्च प्रातिपदिकान्तोदात्तत्वप्र
सङ्गः। आख्यातमिति। ततश्च समासेन तुल्यजातीयानां सर्वेषां वाक्यानां नियमान्निवृत्तिः सिद्धेत्यर्थः। अर्थवत्तेति। अर्थवत्ता संज्ञानि-
मित्तत्वेनेष्टा। सा च वाक्यस्यैव पदस्य वा केवलस्य लोके प्रयुज्यमानस्योपपद्यते। न तु प्रकृतिभागस्य केवलस्य प्रयोगाभावाद्वर्ण-
वदन्यवहार्यत्वात्।

भा· कै· नवेति।अन्यथासिद्धः केवलस्याप्रयोगः।नकेवलाप्रकृतिः प्रयोक्तव्यानचकेवलः प्रत्ययइति नियमात्।अर्थवत्तात्वन्वयव्यतिरे १२२
२०२ काभ्यामस्त्येवेतिभावः। अन्वयव्यतिरेकाभ्यामिति।अन्वयोऽनुगमः सति शब्देऽर्थावगमः।व्यतिरेकः शब्दाभावेतदर्थानवगमः।
विषमइति।यद्येकः शब्द एकस्मिन्नर्थे नियतः स्यात्ततएतद्युज्येतवक्तुं यतस्त्वनियमः ततः प्रकृतेरेवसर्वेअर्थाःस्युः।यथाद

नवाप्रत्ययेन नित्यसंबन्धात्केवलस्याप्रयोगः। नवाएषदोषः।किंकारणम्।प्रत्ययेननित्यसंबन्धात्।नित्यसंबन्धावेतावर्थौप्रकृतिः प्रत्ययइति।प्रत्ययेननित्यसंबन्धात्केवलस्याप्रयोगोनभविष्यति।अन्यइदानींस्त्वष्टोन्यदाचष्टे।आम्रान्पृष्टः कोविदारानाचष्टे।अर्थवत्तानोपपद्यतेकेवलेनावचनादितिभवानस्मानिश्चोदितः केवलस्याप्रयोगेहेतुमाह।एवंचकिलनामकृत्वाचोद्यतेसमुदायस्यार्थेप्रयोगादवयवानामप्रसिद्धिरिति। सिद्धंत्वन्वयव्यतिरेकाभ्याम् सिद्धमेतत्। कथम्।अन्वयाद्व्यतिरेकाच्च।कोसावन्वयः।व्यतिरेकोवा।इहवृक्षइत्युक्तेकश्चिच्छब्दः श्रूयते।वृक्षशब्दः। अकारान्तः।सकारश्चप्रत्ययः।अर्थोपिकश्चिद्गम्यतेमूलस्कन्धफलपलाशवान्।एकत्वंच।वृक्षावित्युक्तेकश्चिच्छब्दोहीयतेकश्चिदुपजायते।कश्चिदन्वयीसकारोहीयते।औकारउपजायते।वृक्षशब्द अकारान्तोन्वयी।अर्थोपिकश्चिद्धीयतेकश्चिदन्वयी।एकत्वंहीयतेद्वित्वमुपजायते।मूलस्कन्धफलपलाशवानन्वयी।तेनमन्यामहेयः शब्दोहीयतेतस्यासावर्थोयोहीयते।यः शब्दउपजायतेतस्यासावर्थोयोर्थउपजायते।यः शब्दोन्वयीतस्यासावर्थोयोर्थोन्वयी। विषमउपन्यासः।बहवोहिशब्दाएकार्थाभवन्ति।तद्यथा।इन्द्रः शक्रः पुरुहूतः पुरन्दरः कन्दुः कोष्ठः कुसूलइति।एकश्चशब्दोबहूर्थः।तद्यथा।अक्षाः पादाः माषाइति।अतः किंनसाधीयोर्थवत्तासिद्धाभवति।नब्रूमः।अर्थवत्तानसिध्यतीति।वर्णिताअर्थवत्तान्वयव्यतिरेकाभ्यामेव।तत्रकृतएतदयंप्रकृत्यर्थोयंप्रत्ययार्थइति।नपुनः प्रकृतिरेवोभावर्थौब्रूयात्॥

धिमध्यधिचिदिति।प्रत्ययस्तुक्वचिद्द्योतकः।प्रत्ययस्यैववासर्वेअर्थाःस्युः।इयानधुनेतियथा।प्रकृतिस्त्वर्थाभिधानेसाहायक ॥ रमः
मात्रंकुर्यात्।अतः किंनसाधीयइति।प्रकृतिः सर्वानर्थानभिदधाति।द्योतकास्तुविभक्त्यइति सिद्धे वार्थवत्ता॥ २०२

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययस्यैवेति।ततश्च प्रकृते।रर्थवत्त्वानसिध्यतीतितदवस्थोदोषइत्यर्थः।सामान्यशब्दाइति।प्रकृतिश्चेत्सर्वोनर्थोनमिदध्या
वृक्षइत्युक्तेसर्वसंख्याप्रतीयेत।प्रत्ययोवासर्वस्यप्रातिपदिकस्यार्थंप्रत्यापयेदित्यर्थः।यतस्तुखल्विति।प्रकरणादिनाविने

प्रत्ययएववा।सामान्यशब्दाएतेएवंस्युः।सामान्यशब्दाश्चनान्तरेणविशेषंप्रकरणंवाविशेषेष्ववतिष्ठन्ते।य
तस्तुखलुनियोगतोवृक्षइत्युक्तेस्वभावतःकस्मिंश्चिदर्थेप्रतीतिरुपजायते।अतोमन्यामहेनेमेसामान्यश-
ब्दाइति।नचेत्सामान्यशब्दाःप्रकृतिःप्रकृत्यर्थेवर्ततेप्रत्ययःप्रत्ययार्थे।किंपुनरिमेवर्णाअर्थवन्तःआहोस्वि
दनर्थकाः।वर्णस्यार्थवदनर्थकत्वेउक्तम्।किमुक्तम्।अर्थवन्तोवर्णाधातुप्रातिपदिकप्रत्ययनिपातानामेकव
र्णानामर्थदर्शनाद्वर्णव्यत्ययेचार्थान्तरगमनाद्वर्णानुपलब्धौचानर्थगतेःसंघातार्थवत्त्वाच्चसंघातस्यैका
र्थत्वात्सुबभावोवर्णात्।अनर्थकास्तुप्रतिवर्णमर्थानुपलब्धेर्वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शना
दिति।तत्रेदमपरिहृतम्।संघातार्थवत्त्वाच्चेति।तस्यपरिहारःसंघातार्थवत्त्वाच्चेतिचेद्दृष्टोह्यतदर्थेन
गुणेनगुणिनोर्थभावः।संघातार्थवत्त्वाच्चेतिचेद्दृश्यतेहिपुनरतदर्थेनगुणेनगुणिनोर्थभावः।तद्यथा।
एकस्तन्तुस्त्वक्त्राणेअसमर्थः।तत्समुदायश्चकम्बलःसमर्थः।एकश्चतण्डुलःक्षुत्प्रतिघातेऽसमर्थः।त
त्समुदायश्चवर्द्धितकंसमर्थम्।एकश्चबल्वजोबन्धनेअसमर्थःतत्समुदायश्चरज्जुःसमर्थाभवति।
विषमउपन्यासः।भवतिहितत्रयाचयावतीचार्थमात्रा।भवतिहिकंचित्प्रत्येकस्तन्तुस्त्वक्त्राणेसमर्थः।ए
कश्चतण्डुलःक्षुत्प्रतिघातेसमर्थः।एकश्चबल्वजोबन्धनेसमर्थः।इमेपुनर्वर्णाअत्यन्तमेवानर्थकाः
।यथातर्हिरथाङ्गानिविहृतानिप्रत्येकंव्रजिक्रियांप्रत्यसमर्थानिभवन्तितत्समुदायश्चरथःसमर्थः।

वेतिभावः।अतदर्थेनेति।अतत्प्रयोजनेनेत्यर्थः।गुणेनेति।अवयवेन।सह्यवयविनउपकारकत्वाद्गुणः।अवयवी
तुगुणी।अर्थभावःप्रयोजनोत्पत्तिः।बल्वजस्तृणविशेषः।याचयावतीचेति।अयंसमुदायःकाचिदित्यस्यार्थेवर्तते।वि
हृतानीति।विक्षिप्तानीत्यर्थः।॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनर्थकस्येति। निपातानां द्योतकत्वादभिधेयार्थाभावेपि द्योत्यार्थसद्भावाद्येषामर्थवत्त्वं तेषां सिध्यत्येव संज्ञा। यस्य तु द्योत्योप्यर्थो नास्ति तदर्थं वचनं निघातो यथा स्यादिति। अर्थवदनर्थकयोरसत्यपि सामर्थ्ये संज्ञाविधानसामर्थ्यान्निघातो भवतीत्येके। समानवाक्यतानिमित्तो निघातो न सामर्थ्यनिमित्तः स चेहास्ति आख्यातं साव्ययकारकविशेषणं वाक्यमिति परिभाषणाद्वाक्यस्येत्यपरे॥ नहीति। स्वादिविधिवाक्यस्य संख्याविधिवाक्येनैकवाक्यत्वात्। अविशेषेणेति। नानावाक्यताश्रयणात्। नियमश्चार्थानां

एवमेषां वर्णानां समुदाया अर्थवन्तः। अवयवा अनर्थका इति॥ निपातस्यानर्थकस्य प्रातिपदिकत्वम्॥ निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या। स्वञ्जति। निस्वञ्जति। लम्बते। प्रलम्बते। किं पुनरत्र प्रातिपदिकसंज्ञया प्रार्थ्यते। प्रातिपदिकादिति स्वाद्युत्पत्तिः। सुबन्तं पदमिति पदसंज्ञा। पदस्य पदादिति निघातो यथा स्यात्। नैतदस्ति प्रयोजनम्। सत्यामपि प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिर्न प्राप्नोति। किं कारणम्। न हि प्रातिपदिकसंज्ञायामेव स्वाद्युत्पत्तिः प्रतिबद्धा। किं तर्हि। एकत्वादिष्वर्थेषु स्वादयो विधीयन्ते। न चैषामेकत्वादयः सन्ति। नैष दोषः। अविशेषेणोत्पद्यन्ते। उत्पन्नानां नियमः क्रियते। अथवा प्रकृतानर्थानपेक्ष्य नियमः। के च प्रकृताः। एकत्वादयः। एकस्मिन्नेवार्थ एकवचनं न द्वयोर्न बहुषु। द्वयोरेवार्थयोर्द्विवचनं नैकस्मिन्न बहुषु। बहुष्वेवार्थेषु बहुवचनं नैकस्मिन्न द्वयोरिति। अथवाचार्यप्रवृत्तिर्ज्ञापयति अनर्थकानामप्येतेषां भवत्यर्थवत्कृतमिति। यदधिपरी अनर्थकावित्यनर्थकयोर्गत्युपसर्गसंज्ञा बाधिकां कर्मप्रवचनीयसंज्ञां शास्ति। किं पुनरयं पर्युदासो यदन्यत्प्रत्ययादिति। आहोस्वित्प्रसज्यायं प्रतिषेधः प्रत्ययो नेति। कश्चात्र विशेषः।

न प्रत्ययानामित्यनर्थकेभ्योपि ते भवन्ति। अथ वेति। प्रत्ययनियमेपि दोषाभाव इत्यर्थः। अधिपरी इति। क्रियायोगे गत्युपसर्गसंज्ञयोर्विधानादनर्थकयोः क्रियायोगाभावात्प्राप्तिरेव नास्तीति संज्ञाविधानं यथोक्तार्थस्य ज्ञापकं संपद्यते। आनर्थक्यं च निपातस्य धातुनिपातयोः साधारणार्थतयाधिकद्योत्यार्थाभावादुच्यते। न तु सर्वात्मनार्थाभावात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिबेकादेश इति। तिपत्तिशब्दादारभ्य सुपः पकारेण प्रत्याहारः। अन्तवत्त्वादिति। पूर्वस्य प्रत्ययस्य दृश्यत्वप्रातिपदिकसंज्ञाकार्यमिति पूर्वप्रत्ययान्तवद्भावः। आदिवत्त्वादिति। परकार्यप्रतिषेधे कर्तव्ये परं प्रत्येकादेशस्यादिवद्भावः। यदयमिति। अथवा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति स्वादयउत्पद्यन्ते। ङ्ङिति। तत्रान्तरङ्गत्वात्प्रत्ययोत्पत्तेः प्रागेव ब्रह्मबन्धूशब्दस्य प्रवृत्ता प्रातिपदिकसंज्ञे त्यूङेकादेशस्य पूर्वप्रत्ययान्तवद्भावादस्त्येव प्रातिपदिकत्वमिति न कश्चिद्दोषः। राजेति। तत्र नलोपो न स्यात्। अत्राप्य

अप्रत्यय इति चेत्तिबेकादेशे प्रतिषेधोऽन्तवत्त्वात्। अप्रत्यय इति चेत्तिबेकादेशे प्रतिषेधो वक्तव्यः। काण्डे कुड्ये। किं कारणम्। अन्तवत्त्वात्। तिबतिपोरेकादेश अतिपोऽन्तवत्स्यात्। अस्त्यन्यत्तिप इति कृत्वा प्रातिपदिकसंज्ञा प्राप्नोति। अस्तु तर्हि प्रसज्यप्रतिषेधः प्रत्ययो नेति। न प्रत्यय इति चेदूङेकादेशे प्रतिषेध आदिवत्त्वात्। न प्रत्यय इति चेदूङेकादेशे प्रतिषेधः प्राप्नोति। ब्रह्मबन्धूः। किं कारणम्। आदिवत्त्वात्। प्रत्ययाप्रत्यययोरेकादेशः प्रत्ययस्यादिवत्स्यात्। तत्र प्रत्ययो नेति प्रतिषेधः प्राप्नोति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति उत्पद्यन्ते ङ्यन्तात् अद्यइति। यदयं नोङ्धात्वोरिति विभक्तिस्वरस्य प्रतिषेधं शास्ति। अथ यादेशे प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि। तत्रावयवस्य या प्रातिपदिकसंज्ञा तयान्तवद्भावात्स्वाद्युत्पत्तिर्भविष्यति। सुब्लोपे च प्रत्ययलक्षणत्वात्। सुब्लोपे च प्रत्ययलक्षणेन प्रतिषेधः प्राप्नोति। राजा। तक्षा। प्रत्ययलक्षणेन प्रत्ययो नेति प्रतिषेधः प्राप्नोति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेन प्रतिषेधो भवतीति। यदयं नङिसंबुद्ध्योरिति प्रतिषेधं शास्ति। अथवा पुनरस्तु पर्युदासः। ननु चोक्तमप्रत्यय इति चेत्तिबेकादेशे प्रतिषेधोऽन्तवत्त्वादिति।

न्तरङ्गत्वात्पूर्वमेव प्रवृत्ता प्रातिपदिकसंज्ञा बहिरङ्गेण प्रतिषेधेन न शक्यते निवर्तयितुमिति परिहारोऽस्ति। नङिसंबुद्ध्योरिति। ननु हे सुराजन्निति समासप्रातिपदिकसंज्ञार्थः प्रतिषेधः स्यात्। न चोत्तरप्राप्तेरप्रत्यय इति प्रतिषेधः। मध्येऽपवादा इति न्यायात्। एवं तर्हि समासेऽप्यप्रत्यय इति वर्तते। अन्यथा सुराजाऽतिराजेत्यादौ विध्यर्थतायां संभवत्यां नियमार्थं समासग्रहणं न स्यात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ कै॰ २०४ यत्तस्येति। विभक्त्यन्तं च शक्तिसंख्याप्रधानं न च तयोर्लिङ्गयोगः। न वान्तवद्भावेनार्थः शक्योतिदेष्टुमिति न भवति ह्रस्वः। अथवा न १२२
पुंसकत्वं प्रातिपदिकार्थस्यैव संभवतीति प्रातिपदिकग्रहणं मुख्यप्रातिपदिकपरिग्रहार्थमित्यन्तवद्भावेन यत्प्रातिपदिकं तस्य
ह्रस्वाभावः। अत्र च सूत्रे यदव्युत्पन्नमर्थवत्तदुदाहरणं व्युत्पत्तौ तु कृदन्तत्वादेव सिध्यतीति पृथगस्यारम्भो नर्थकः स्यात्। अव्यु
त्पत्तिपक्षस्य चेदमेव सूत्रं ज्ञापकमित्याहुः॥ ह्रस्वो नपुंसके॥ प्रातिपदिकग्रहणमिति। नपुंसकलिङ्गं द्रव्यस्यैव संभवति। द्रव्यवाचित्वं तु
प्रातिपदिकस्यैव संभवति न तु सुबन्तस्य शक्तिप्रधानत्वान्नापि तिङन्तस्य क्रियाप्रधानत्वादिति प्रश्नः। काण्डे इति। द्वयोरपि शक्ति-

प्रसज्यप्रतिषेधेप्येष दोषः। हि स्यात्र प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि। गृह्यते च प्रातिपदि
कप्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणेन। तस्मादुभाभ्यामपि वक्तव्यं स्यात्। ह्रस्वो नपुंसके यत्तस्ये
ति। किं च नपुंसके। नपुंसकं यस्य गुणः। कस्य च नपुंसकं गुणः। प्रातिपदिकस्य॥ अर्थवदधातुरप्रत्ययः प्राति
पदिकम्॥ कृत्तद्धितसमासाश्च॥ ॥समासग्रहणं किमर्थम्। समासग्रहण उक्तम्। किमुक्तम्। अर्थवत्समु
दायानां समासग्रहणं नियमार्थमिति। कृत्तद्धित॥ ह्रस्वो नपुंसके प्रातिपदिकस्य॥ प्रातिपदिकग्रहणं किम
र्थम्। नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिन्निवृत्त्यर्थम्। नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं क्रियते ति
न्निवृत्त्यर्थं तिबन्तस्य ह्रस्वत्वं मा भूत्। काण्डे कुड्ये रमते ब्राह्मणकुलमिति॥ अव्ययप्रतिषेधः॥ अव्ययानां
प्रतिषेधो वक्तव्यः। इह मा भूत्। दोषा ब्राह्मणकुलं दिवा ब्राह्मणकुलमिति। स तर्हि वक्तव्यः। न वक्तव्यः। नात्राव्ययं न
पुंसके वर्तते।

शक्तिमतोरभिधानादस्ति नपुंसकार्थवृत्तित्वं सुबन्तस्यापीति भावः। रमते ब्राह्मणकुलमिति। यथैव साधनाश्रया संख्याभि-
ख्यातमुपादत्ते तथा तल्लिङ्गमपि। अव्ययप्रतिषेध इति। यथोपवर्णितन्यायेनाव्ययस्यापि लिङ्गयोगात्प्राप्तिः। दोषा ब्राह्म
णकुलमिति। दोषासहचरितत्वाद्ब्राह्मणकुलमेव दोषाशब्देनोच्यत इति ह्रस्वप्रसङ्गः। नात्राव्ययमिति। दोषाशब्दो रात्रा
वित्यर्थे वर्तते दिवाशब्दोप्यहनीत्यत्रेति। ब्राह्मणकुलं साधनानां क्रियाणामधिकरणं कालो भवन्ब्राह्मणकुलस्याधिकर- एम:
णं भवति। दोषा दृश्यते चरत्यधीते वेति। आधेयव्यवधानेनाधिकरणस्य क्रियाधारणात्॥ ॥ २०४

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काण्डीभूतमिति। प्रकृतिविकारयोरभेदविवक्षायां च्विप्रत्ययः। द्वयोरप्यत्र तयोर्नपुंसकत्वाद्ध्रस्वप्रसङ्गः। कृते ह्रस्वत्वे-
च्वौ चेति दीर्घो भविष्यतीति चेत्। ह्रस्वस्य बहिरङ्गत्वाद्दीर्घे कर्तव्येऽसिद्धत्वाद्दीर्घाप्रसङ्गः। एवं रमते इत्यत्रापि ह्रस्वे सति टे
रेत्त्वस्याप्रसङ्गः। न वेति। असत्त्ववाचित्वादव्ययस्य न तेन लिङ्गं प्रतिपाद्यत इत्यर्थः। न चैतयोरिति। आख्यातस्य त्रा-
त्याश्रयद्रव्यसंख्याप्रतिपादने सामर्थ्यं न तु तल्लिङ्गप्रतिपादने विचित्रत्वाद्वाचकशक्तीनाम्। काण्डे तिष्ठतीत्यत्रापि

किं तर्हि। अधिकरणमात्राव्ययं नपुंसकस्य। इह तर्हि प्राप्नोति। काण्डीभूतं वृषलकुलं कुड्यीभूतं वृषल-
कुलमिति। न वा लिङ्गाभावात्। न वा वक्तव्यम्। किं कारणम्। लिङ्गाभावात्। अलिङ्गमव्ययम्। किं पुनरव्य-
यस्यैव परिहारः आहोस्वित्तिङन्तस्यापि परिहारः। तिङन्तस्यापीत्याह। कथम्। अव्ययं हि किंचिद्विभ-
क्त्यर्थप्रधानं किंचित्क्रियाप्रधानम्। उच्चैर्नीचैरिति विभक्त्यर्थप्रधानम्। हिरुक् पृथगिति क्रियाप्रधानम्।
तिङन्तं चापि किंचिद्विभक्त्यर्थप्रधानं किंचित्क्रियाप्रधानम्। काण्डे कुड्ये इति विभक्त्यर्थप्रधानं रमते ब्रा-
ह्मणकुलमिति क्रियाप्रधानम्। न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोऽस्ति। अवश्यं चैतदेवं विज्ञेयम्।
क्रियमाणेऽपि हि प्रातिपदिकग्रहणे इह प्रसज्येत। काण्डे कुड्ये। द्वे ह्यत्र प्रातिपदिकसंज्ञे। अवयवस्या-
पि समुदायस्यापि।

संख्यायाः प्राधान्यान्नपुंसकत्वायोगः। अवश्यमिति। यद्यवयवधर्मेण समुदायो व्यपदिश्यत इत्यर्थः। यत्तस्येति। साक्षा-
त्तस्यैव यदा नपुंसकत्वं तदा ह्रस्वः। यस्य त्ववयवद्वारकं तस्य मा भूत्। अथ वा तस्यैवानुपजातव्यतिरेकस्येत्यर्थः। विभक्त्य-
न्तं चोपजातव्यतिरेकमिति ह्रस्वाभावः। सूत्रकारेण तु प्रातिपदिकग्रहणं मुख्यप्रातिपदिकपरिग्रहार्थं कृतं प्रातिपदि-
कस्यैव नपुंसके वृत्तिसंभवात्। तेनान्तवद्भावादतिदिष्टप्रातिपदिकस्य ह्रस्वाभावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 युगवरत्राायेति। दीर्घे कृते पुनर्ह्रस्वः। पुनर्दीर्घ इति चक्रकप्रसङ्गः॥ गोस्त्रियोरुपसर्जनस्य॥ कृन्निवृत्त्यर्थमिति। धातुस्त्रि
याअपि कृदन्तत्वाद्वदेनानिर्देशाः। भाष्यकारस्तु तदेव विभज्य व्याचष्टे। कृत्स्त्रियाश्चेति। स्वरितेनेति। स्वरितेनाधिकार इ

गृह्यते च प्रातिपदिकाप्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणेन। तस्मादुभाभ्यामिति वक्तव्यं स्या
द्ध्रस्वो नपुंसके यत्तस्येति। किं च नपुंसके। नपुंसकं यस्य गुणः। कस्य च नपुंसकं गुणः। प्रातिपदिकस्य
॥ यञेकादेशादीर्घेत्वेषु प्रतिषेधः॥ यञेकादेशादीर्घेत्वेषु प्रतिषेधो वक्तव्यः॥ युगवरत्राय। युगवर-
त्रार्थम्। युगवरत्रेभ्यः। यञेकादेशादीर्घेत्वेषु बहिरङ्गलक्षणत्वात्सिद्धम्। बहिरङ्गा एते विधयः।
अन्तरङ्गं ह्रस्वत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे॥ गोस्त्रियोरुपसर्जनस्य॥ ॥ उपसर्जनह्रस्वत्वे च। किम्। यञेकादे
शादीर्घेत्वेषु प्रतिषेधो वक्तव्यः। अतिखट्वाय। अतिखट्वार्थम्। अतिखट्वेभ्यः। उपसर्जनह्रस्वत्वे च। कि
म्। बहिरङ्गलक्षणत्वात्सिद्धमित्येव। बहिरङ्गा एते विधयः। अन्तरङ्गं ह्रस्वत्वम्। असिद्धं बहिर
ङ्गमन्तरङ्गे। गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम्। गोटाङ्ग्रहणं कर्तव्यम्। किमिदं टाङिति। प्रत्याहारग्र
हणम्। क्व संनिविष्टानां प्रत्याहारः। टापः प्रभृत्या ष्यङो ङकारात्। किं प्रयोजनम्। कृन्निवृत्त्यर्थम्। कृ
त्स्त्रिया धातुस्त्रियाश्च ह्रस्वत्वं माभूदिति। अतितन्त्रीः। अतिश्रीः। अतिलक्ष्मीरिति। तत्तर्हि वक्तव्यम्। न व
क्तव्यम्। स्त्रीग्रहणं स्वर्यते। स्वरितेनाधिकारगतिर्भवति। स्त्रियामित्येवं प्रकृत्य ये विहितास्तेषां
ग्रहणं विज्ञास्यते स्वरितेनाधिकारगतिर्भवतीति न दोषो भवति यद्येवं प्रत्ययग्रहणमिदं भवति तत्र
प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीतीह न प्राप्नोति। अतिराजकुमारिः। अतिसेनानीकुमा
रिरिति।

तियोगोनेकधा व्याख्यातः। ततश्च यत्र स्वरितत्वं प्रतिज्ञायते तत्र तदधिकारो गृह्यत इत्ययमपि तस्यार्थः। स्त्रियां
क्तिन्नित्येतत्प्रकरणविहितानां तु ह्रस्वभाविलाभावादग्रहणम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्त्रीप्रत्ययेनेत्येवं तदिति। ननुष्यङः संप्रसारणमित्यत्रातिकारीषगन्ध्यापुत्र इत्यत्र संप्रसारणाभावार्थमनुपसर्जन स्त्री
प्रत्ययविषयस्तदादिनियमप्रतिषेधः प्रदर्शितः तदृत्युपसर्जनत्वादिह नियमेन भाव्यम्। नैष दोषः। क्वचिदुपसर्जनेपित
दादिनियमो न भविष्यति। हलङ्याब्भ्य इत्यत्र दीर्घग्रहणात्। अन्यथा निष्कौशांबिरतिखट्व इत्यादाउपसर्जनत्वाद-
ङ्याबन्तत्वात्सुलोपो न भविष्यतीति किं दीर्घग्रहणेन। कथं तर्ह्यनुपसर्जनादित्यत्र कौम्भकारेयो न सिद्ध्यतीत्युक्तं यावता
कारीशब्दादपि ङीपि कृते तदादिनियमाभावात् कुम्भकारीशब्दादढक् भविष्यति। नैष दोषः। तदादिनियमाभावे कारीश
ब्दादपि कदाचिदढक् स्यात्। पुंवद्वचनमिति। यथा पुंविषये ईकारः श्रूयते न तु ह्रस्वत्वं प्रतिपद्यते तथेयसोपि पर इत्य

अस्त्रीप्रत्ययेनेत्येवं तत्॥ ईयसो बहुव्रीहौ पुंवद्वचनम्॥ ईयसो बहुव्रीहौ पुंवद्भावो वक्तव्यः। बह्व्यः श्रे
यस्योऽस्य बहुश्रेयसी विद्यमानश्रेयसी॥ पूर्वपदस्य च प्रतिषेधो गोसमासनिवृत्त्यर्थम्॥ पूर्वपदस्य च
प्रतिषेधो वक्तव्यः। किं प्रयोजनम्। गोसमासनिवृत्त्यर्थम्। गोनिवृत्त्यर्थं समासनिवृत्त्यर्थं च। गोनिवृत्त्य
र्थं तावत् गोकुलं गोक्षीरं गोपालक इति। समासनिवृत्त्यर्थम्। राजकुमारीपुत्रः सेनानीकुमारीपुत्र इ
ति। किमुच्यते समासनिवृत्त्यर्थमिति न पुनरसमासोपि किंचित्पूर्वपदं यदर्थः प्रतिषेधः स्यात्। स्त्र्य
न्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते। न चान्तरेण समासं स्त्र्यन्तं प्रातिपदिकमु
पसर्जनमस्ति। ननु चेदमस्ति खट्वापादो मालापाद इति। एकादेशे कृते न्तादिवद्भावात्प्राप्नोति।
उभयत आश्रयेनान्तादिवत्।

र्थः। गोकुलमिति। प्रथमानिर्दिष्टमिति गोशब्दस्योपसर्जनत्वम्। राजकुमारीपुत्र इति। राजकुमारीशब्दः समासप्रातिपदिकम्
। इह तु कुमारीपुत्र इति कुमारीशब्दस्य प्रत्ययान्तत्वात् प्रातिपदिकत्वाभावः। उभयत इति। प्रातिपदिकस्त्रीप्रत्ययश्चेहाश्री-
यते। तत्र यदि प्रातिपदिकस्यान्तवत्तदा स्त्रीप्रत्ययः परो नास्ति। अथ स्त्रीप्रत्ययस्यादिवत्। तदा प्रातिपदिकत्वाभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गोन्तस्येति। उपसर्जनग्रहणेन गोस्त्रियौ विशेष्येते पश्चात्ताभ्यां प्रातिपदिकमिति तदन्तविधिः। ग्रहणवतेत्येतच्च प्रत्ययवि
धिविषयत्वादिह नोपतिष्ठते। व्यपदेशिवद्भाव इति। ननु येण्या अण् तस्य चेत्यत्र तस्य चेति सर्वस्य शेष इति व्याख्यानात्
स्वरूपमित्यस्यानुवृत्त्यनुज्ञानात् गोकुलमितिह्रस्वः प्राप्नोत्येव। नैष दोषः। स्वं रूपमिति नानुवर्तते। तथा चाद्यन्तवत्सूत्रे ये
न विधिस्तदन्तत्वे इति। प्रयोजनमुक्तं तस्य चेत्येतत्तु तत्र त्यवार्तिकस्य शेषो न तु सूत्रस्य। अगोपुत्र इत्यत्रापि न भव

गोनिवृत्त्यर्थेन तावन्नार्थः। गोन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते। न चैतद्गोन्तम्। न
नु चैतदपि व्यपदेशिवद्भावेन गोन्तम्। व्यपदेशिवद्भावो प्रातिपदिकेन। समासनिवृत्त्यर्थेन चापि नार्थः
। स्त्र्यन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते। अप्रधानमुपसर्जनमिति च संबन्धिशब्दावे
तौ। तत्र संबन्धादेतद्गन्तव्यं यं प्रति यदप्रधानं तस्य चेत्सोन्तो भवतीति। अवश्यं चैतदेवं विज्ञेयम्। उच्यमा
ने पि हि प्रतिषेधे इह प्रसज्येत। पञ्चकुमार्यः प्रिया अस्य पञ्चकुमारीप्रियः। दशकुमारीप्रिय इति॥ कपि च॥
कपि च प्रतिषेधो वक्तव्यः। बहुकुमारीकः। बहुवृषलीकः। द्वन्द्वे च। द्वन्द्वे च प्रतिषेधो वक्तव्यः। कुक्कुटमयू
र्यौ। उक्तं वा। किमुक्तम्। कपि तावदुक्तं न कपीति प्रतिषेध इति। नैतदस्त्युक्तम्। केण इति या ह्रस्वप्राप्तिस्त
स्याः प्रतिषेध इति। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। अवश्यं चैतदेवं विज्ञेयम्। यो
हि मन्यते याश्चयावती ह्रस्वप्राप्तिस्तस्याः सर्वस्याः प्रतिषेध इति। इहापि तस्य प्रतिषेधः प्रसज्येत। प्रियं ग्रा
मणि ब्राह्मणकुलमस्य प्रियग्रामणिकः। प्रियसेनानिकः।

ति। अत्र ह्यन्यत्प्रातिपदिकं गोन्तम्। अन्यत्प्रति गोशब्दस्योपसर्जनत्वम्। पञ्चकुमारीप्रिय इति। त्रिपदे बहुव्रीहौ कृते द्वयोः
पदयोर्द्विगुसमास इति पञ्चकुमारीशब्दः पूर्वपदं भवति। कपि चेति। अन्तरङ्गत्वाद्ध्रस्वः प्राप्नोति ततः कबिति भावः। कपीति च
विषयसप्तमी। कुक्कुटमयूर्याविति। समासार्थे अवयवार्थस्याप्राधान्यादनेकमित्यस्यानुवृत्त्या प्रथमानिर्दिष्टत्वाच्च मयूरीशब्द
स्योपसर्जनत्वम्।

॥

CC-0. In Public Domain. Digitization by eGangotri

अनन्त्यत्वादिति। समासान्त इति वचनात् कबेव समासस्यान्त इति स्त्रीप्रत्ययान्तं समासप्रातिपदिकं न भवतीति परत्वात्कबिति। सा
वकाशश्च कप् बहुयवागूक इत्यादौ। अन्तरङ्गमिति। उपसर्जनस्त्रीप्रत्ययान्तप्रातिपदिकमात्रापेक्षत्वात् कप्तु समासविशेषं
बहुव्रीहिं नद्युत्तरपदमपेक्षत इति बहिरङ्गः। अन्तरङ्गतर इति। पराभ्युपगमापेक्षया प्रकर्षप्रत्ययः। तादर्थ्यादिति। ततश्चा
वयवापेक्षत्वात्कपः समुदायापेक्षो ह्रस्वो बहिरङ्गः। द्वन्द्वेप्युक्तमिति। परिहारान्तरमप्यत्रास्ति। अवयवार्था वै वपरस्परस-

इदं तर्ह्युक्तम्। कपि कृते अनन्त्यत्वाद्ध्रस्वत्वं न भविष्यति। इदमिह संप्रधार्यं कप् क्रियतां ह्रस्वत्वमिति। कि
मत्र कर्तव्यम्। परत्वात् कप्। अन्तरङ्गं ह्रस्वत्वम्। अन्तरङ्गतरः कप्। ननु चायं कप् समासान्त इत्युच्यते। ताद
र्थ्यात्ताच्छब्द्यं भविष्यति। येषां पदानां समासः न तावत्तेषामन्यद्भवति। कपं तावत्प्रतीक्षते। द्वन्द्वेप्युक्तम्।
किमुक्तम्। परवल्लिङ्गमिति। शब्दशब्दार्थाविति। तत्रौपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य च वर्णं भ
विष्यति॥ गोस्त्रियोः॥ लुक्तद्धितलुकि॥ तद्धितलुक्यवन्त्यादीनां प्रतिषेधो वक्तव्यः॥ अवन्ती। कुन्ती। कु
रूः। तद्धितलुक्यवन्त्यादीनां प्रतिषेधोऽलुक्परत्वात्। तद्धितलुक्यवन्त्यादीनां प्रतिषेधः। अनर्थ-
कः प्रतिषेधोऽप्रतिषेधः। लुक्कस्मान्न भवति। अलुक्परत्वात्। लुकीत्युच्यते न चात्र लुकं पश्यामः। लु
कीति नैषा परसप्तमी शक्या विज्ञातुम्। नहि लुका पौर्वापर्यमस्ति। का तर्हि। सत्सप्तमी। लुकि सतीति। सत्स
प्तमी चेत्प्राप्नोति। एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति। किम्। उपसर्जनस्येति वर्तते।

हितौ द्वन्द्वार्थ इति प्राधान्यादुपसर्जनत्वाभाव इति॥ लुक्तद्धित॥ अवन्त्यादीनामिति। अवन्तीत्यत्र भवत्यवन्तिशब्द उपस
र्जनं स्त्रीप्रत्ययश्चास्ति लुक् तद्धितस्य कृत इत्यस्ति लुक्प्राप्तिः। अलुक्परत्वादिति। यत्र स्त्रीप्रत्ययान्तात् परस्य तद्धित-
स्य लुक् तत्र लुका भाव्यम्। अत्र तु कृते लुकि स्त्रीप्रत्ययः कृतः। नहीति। लुको नीरूपत्वाद्बुद्धिपरिकल्पितं तु लुकः परत्व- ॥
माश्रित्य वार्त्तिककृतोक्तमलुक्परत्वादिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नचजातिरिति। उपसर्जनग्रहणेनस्त्रीप्रत्ययोविशेष्यते। अप्रधानंचेहोपसर्जनंगृह्यते नत्राख्नीयमसंभवात्। अवन्तीत्यत्र-
चापत्यलक्षणाजातिःस्त्रीत्वयुक्ताप्राधान्येनाभिधीयतइत्यर्थः। अप्रातिपदिकत्वाच्चात्रह्रस्वाभावः। आमलकमित्यादौतु
तद्धितान्तत्वात्प्रातिपदिकसंज्ञालिङ्गविशिष्टस्यैवेहोपादानात्लिङ्गविशिष्टपरिभाषायाउपस्थानाभावः। कुरूरित्यत्रापिउ
भयतआश्रयणेनान्तादिवदित्यप्रातिपदिकत्वम्। इद्गोण्याः॥ इतिवावचनइतिइतीतिसप्तमी। इच्छब्देप्युच्यमानेगौरवाभा
वइत्यर्थः। गोणिरिति। यदामात्रचोलुक्क्रियतेतदा लुकिप्रतिषिद्धेसिद्धत्येवह्रस्वत्वम्। तस्मात्प्रथमाविधानेपरिमाणग्रहण

नचजातिरुपसर्जनम्। लुक्तद्धि॥ इद्गोण्याः॥ ॥इद्गोण्यानेतिवक्तव्यम्। गोण्यानेत्येवंसिद्धम्। नार्थइत्ले
न। कारूपसिद्धिः। पञ्चगोणिर्दशगोणिः ह्रस्वताहिविधीयते। ह्रस्वत्वमत्रविधीयते। गोस्त्रियोरुपस
र्जनस्येति। इतिवावचनेतावत्। इदित्येवोच्यतनेतिवा। कोन्वत्रविशेषः। मात्रार्थंवाकृतंभवेत्। अथ
वामात्रार्थमिदंवक्तव्यम्। गोणीमात्रमिदम्। गोणिः। अपरआह। गोण्याइत्त्वंप्रकरणात्। अशिष्यंगोण्या
इत्त्वम्। किंकारणम्। प्रकरणात्। प्रकृतंह्रस्वत्वम्। ह्रस्वइतिवर्तते। ननुसूच्याः। सूच्याद्यर्थमथापिवा
। सूच्याद्यर्थमिदंद्रष्टव्यम्। पञ्चसूचिः। दशसूचिः। इद्गोण्यानेतिवक्तव्यं ह्रस्वताहिविधीयते। इतिवाव
चनेतावन्मात्रार्थंवाकृतंभवेत्। गोण्याइत्त्वंप्रकरणात्सूच्याद्यर्थमथापिवा॥

स्यप्रयोजनम्। तद्धितमन्तरेणापियदापरिमाणशब्दःपरिमेयेवर्ततेतदापिप्रथमायथास्यादिति। एवंचानुपसर्जनत्वाद
भेदोपचारेणप्रमेयवृत्तित्वादप्राप्तोह्रस्वइतिइत्वंविधीयते। सर्वत्रतर्हिगोण्याइत्वप्रसङ्गः। एवंतर्ह्युपसर्जनस्येतिवर्त
तेनतुतद्धितलुकीति। तेनयत्रस्वार्थोपसर्जनमर्थान्तरंप्रत्याय्यतेतत्रेत्त्वविधिर्ह्रस्वत्वंतुनस्यादप्रातिपदिकत्वात्।
अशिष्यमिति। गोस्त्रियोरित्यस्यानन्तरंगोण्याइतिलुगपवादह्रस्वार्थंवक्तव्यम्। ननुसूच्यादिति। इत्त्वंप्राप्नोतीतिशे
षः। क्वचित्तुननुसूच्याइतिपाठः। तत्रेत्त्वमिष्यतइत्यध्याहारः। इद्ग्रहणेप्रतियोगविभागोलभ्यते। गोणिरितितुमात्रचो
लोपेनसिद्ध्यति॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लुपि॥ प्रकृत्यर्थसंबन्धिनौ लिङ्गसंख्ये प्रत्ययार्थे अतिदिश्येते। शिरीषादितिवरणादित्वाद्णो लुप्। ग्रामवाचित्वाद्वनस्पतिवाचित्वाभावा... त्वाभावः। फलीवनस्पतिर्ज्ञेय इत्ययं भेदो णत्वविधौ नाश्रित इति फलाभावेपि शिरीषस्यास्ति वनस्पतित्वम्। षष्ठीति। प्रकृत्यर्थगतस्य व्यतिरेकस्य प्रत्ययार्थे तिदेशात् षष्ठीप्रसङ्गः। षष्ठ्यपीति। वचनशब्देन ह्येकवचनादयः प्रत्यया उच्यन्ते तत्र वाक्यावस्थायां षष्ठीदर्शनात्तस्या एवार्थातिदेशः प्राप्नोति। नेदमिति। एकवचनादिसंज्ञाविधानकाले अनुनिष्पादीवचनशब्दोपि संज्ञात्वेन न नियुक्त इति प्रत्ययः पारिभाषिकं वचनमुच्यते। अन्वर्थग्रहणमिति। संख्यालक्षणोर्थोतिदिश्यत इत्यर्थः। षष्ठ्यपि ह्युच्यत इति। संख्यातिदेशे तद्वचनेन शब्देन प्रवर्तितव्यम्। षष्ठ्यपि संख्यायाः

लुपियुक्तवद्व्यक्तिवचने॥ व्यक्तिवचने इति किमर्थम्। शिरीषाणामदूरभवो ग्रामः शिरीषाः तस्य ग्रामस्य वनं शिरीषवनम्। किंच स्याद्विभाषौषधिवनस्पतिभ्य इति णत्वं प्रसज्येत। अपर आह। कटुबदर्या अदूरभवो ग्रामः कटुबदरी। षष्ठीयुक्तवद्भावेन माभूदिति। अथ व्यक्तिवचने इत्युच्यमाने कस्मादेवात्र न भवति। षष्ठ्यपि हि वचनम्। नेदं पारिभाषिकस्य वचनस्य ग्रहणम्। किं तर्हि। अन्वर्थग्रहणमुच्यते वचनमिति। एवमपि षष्ठी प्राप्नोति। षष्ठ्यपि ह्युच्यते। लुपोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यम्। किं कारणम्। उक्तार्थानामप्रयोग इति। आतिदेशिकी तर्हि प्राप्नोति। एवं तर्हि प्रागपि वृत्तेर्युक्तं वृत्तं चापीह यावता युक्तम्।

प्रातिपदिकेति भावः। षष्ठीशब्देन च षष्ठ्यर्थः संख्यालक्षणोभिधीयते। अथवा षष्ठ्यप्युच्यते संख्याप्रतिपादनार्थमित्यर्थः। लुपोक्तत्वादिति। लुप्सहचरितेन शब्देनोक्तत्वादित्यर्थः। षष्ठ्यर्थः संख्या। अभिहितः सोर्थोन्तर्भूतः प्रातिपदिकार्थः संपन्न इति कृत्वा व्यतिरेकाभावद् इत्यर्थः। आतिदेशिकीति। संख्यायामतिदिष्टायां तद्वाची शब्दः प्रयोक्तव्यः। वाक्ये च षष्ठी दृश्यत इति तस्या एव प्रसङ्गः। प्रागपीति। प्रत्ययार्थेन प्रकृतिवाच्यं वस्तु संबद्धं वाक्यावस्थायां वृत्त्यवस्थायां चेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मा॰ कै॰ वक्तुश्चेति। चशब्दो भिन्नक्रमः प्राग्वृत्तेरित्यस्यानन्तरं द्रष्टव्यः। ततश्चायमर्थः। प्राग्वृत्तेर्ये लिङ्गसंख्ये चशब्दाद् वृत्तस्य १२२
२०८ ये ते अतिदेष्टुं कामचारः। वृत्तस्येति। प्रत्यासत्त्येतिभावः। वृत्तावुपसर्जनस्यापि क्वचित्संख्याविशेषावगतिर्भवति। यथा-
तावकीनो मामकीन इत्यादेः शब्दात् संख्याभेदावगमः। तथेह प्रत्ययार्थे अतिदिष्टसंख्यावगमात् प्रकृत्यर्थे तदवसायः। यथा आ-
देशेऽप्रथमासामानाधिकरण्यदर्शनात् लटि तदवगतिः। तत्र च वृत्तावुपसर्जनं प्रधानार्थमभिधत्त इति व्यतिरेकाभावात् सं-
ख्यामात्रमतिबद्धा प्रातिपदिकार्थे प्रथमैवेति। क्वचिदधिको ग्रन्थः पठ्यते। अथवा प्राग्वृत्तेर्ये लिङ्गसंख्ये ते अतिदेक्ष्येते
। षष्ठी कस्मान्न भवति सामान्यातिदेशो विशेषानतिदेशादिति। तत्रायमर्थः। वाक्यावस्थायां प्रकृत्यर्थस्य ये लिङ्गसंख्ये ते अ-

वक्तुश्च कामचारः प्राग्वृत्तेर्लिङ्गसंख्ये ये। प्रागपि वृत्तेर्युक्तं वनस्पतिभिर्नगरं वृत्तं चापि युक्तं वनस्पतिभि-
र्नगरम्। वृत्ते च युक्तवद्भावो विधीयते। कामचारश्च प्रयोक्तुः प्राग्वृत्तेर्ये लिङ्गसंख्ये ते अतिदेष्टुम्। वृत्तस्य
वा ये लिङ्गसंख्ये ते। यावता कामचारः। वृत्तस्य लिङ्गसंख्ये ते अतिदेक्ष्येते न प्राग्वृत्तेर्ये। किमर्थं पुनरि-
दमुच्यते। अन्यत्राभिधेयस्य व्यक्तिवचनाभावाल्लुपि युक्तवदनुदेशः। अन्यत्राभिधेयवल्लिङ्गव-
चनानि भवन्ति। क्वान्यत्र। लुकि। लवणः सूपः। लवणा यवागूः। लवणं शाकमिति। अन्यत्राभिधेयव-
द्व्यक्तिवचनानि भवन्ति लुकि। इहाप्यभिधेयवल्लिङ्गवचनानि प्राप्नुवन्ति इष्यन्ते चाभिधानवत्स्युरि-
ति। तच्चान्तरेण यत्नं न सिध्यतीति लुपि युक्तवदनुदेशः।

तिदिश्येते षष्ठी तु व्यतिरेकनिबन्धना न चेह प्रत्ययार्थस्य व्यतिरेकोऽस्ति। न च व्यतिरेकसहिता संख्या अतिदिश्यते।
संख्यामात्रातिदेशो संबन्धसहितसंख्यातिदेशाभावात्। किमर्थमिति। अन्तरेणाप्यतिदेशं लिङ्गसंख्ये सिद्धे। यथा ग-
पोदारादित्यादाविति प्रश्नः। अन्यत्रेति। अभेदं लिङ्गसंख्ययोराश्रित्य वार्त्तिककारेण पठितम्। भाष्यकारस्तु वाच- रामः
कभेदनिबन्धनभेदावसायेन वर्तिना व्याचष्टे अभिधेयवदिति। अभिधानवदिति। अभिधानशब्देनोपसर्ज- २०८
नमभिधीयते। तेन हि प्रधानार्थोऽभिधीयते। तस्य चार्थद्वारको लिङ्गसंख्यायोगः। ॥

CC-0. In Public Domain. Digitization by eGangotri

नवादर्शनस्येति। अभावरूपत्वादितिभावः। योगाभावादिति। अदर्शनेन प्रकृत्यर्थेन युक्त इत्यर्थः। मधुरापञ्चालादिति। व-
र्तिपदार्थ एवापेक्षितपरस्परद्वन्द्वार्थ इति सिद्धे नियमः क्रियते। अत एव मधुरागोदादिति भवति न तु मधुरागोदाविति। द्व
न्द्वेपि गोदार्थस्याद्वित्वानतिक्रमात्॥ विशेष॥ कथमिति। किं सामानाधिकरण्येन संबन्धः। विशेषणानां युक्तवद्व्यक्तिवचने।

एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। लुपोऽदर्शनसंज्ञित्वादर्थगतिर्नोपपद्यते। लुम्नामे
यमदर्शनस्य संज्ञा क्रियते। न चाऽदर्शनस्य लिङ्गसंख्ये शक्ये ते अतिदेष्टुं लुपो ऽदर्शनसंज्ञित्वादर्थगति
र्नोपपद्यते। नवाऽदर्शनस्याशक्यत्वादर्थगतिः साहचर्यात्। नवा एष दोषः। किं कारणम्। अदर्शनस्याश
क्यत्वात्। अदर्शनस्य लिङ्गसंख्ये अशक्ये अतिदेष्टुमिति कृत्वा अदर्शनसहचरितो योर्थस्तस्य गतिर्भ
विष्यति। साहचर्यात्। योगाभावाच्चान्यस्य। अदर्शनेन योगो नास्तीति कृत्वा अदर्शनसहचरितो योर्थस्त
स्य गतिर्भविष्यति साहचर्यात्॥ समासउत्तरपदस्य बहुवचनस्य लुपः॥ समासे उत्तरपदस्य बहुवचन-
स्य लुपि युक्तवद्भावो वक्तव्यः। मधुरापञ्चालाः। किं प्रयोजनम्। नियमार्थम्। समासउत्तरपदस्यैव। क्व मा
भूत्। पञ्चाला मधुरेति॥ लुपि युक्तवत्॥ ॥विशेषणानां चाजातेः॥ ॥कथमिदं विज्ञायते जातिर्यद्वि
शेषणमिति आहोस्विज्जातेर्यानि विशेषणानीति। किं चातः। यदि विज्ञायते जातिर्यद्विशेषणमिति। सिद्धं
पञ्चाला जनपद इति। सुभिक्षः संपन्नपानीयः बहुमाल्यफल इति न सिद्ध्यति। अथ विज्ञायते जातेर्यानि
विशेषणानीति। सिद्धं सुभिक्षः संपन्नपानीयः बहुमाल्यफल इति। पञ्चाला जनपद इति न सिद्ध्यति॥

जातिर्यदा विशेषणं तदा नेति। अथ वैयधिकरण्येन जातेर्यानि विशेषणानि तेषां नेति। अजातेरिति चासमर्थसमासो भ-
वति। नानञः संबन्धात्। उभयथा चाव्याप्तिः प्रतिषेधस्येति प्रश्नः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आजातिप्रयोगादिति। सूत्रे आङः प्रश्लेषो न तु नञः। अत्रायमर्थः। तावद्युक्तवद्भावो यावज्जातिर्न प्रक्रान्ता यदा तु जातिः प्रक्रम्य
ते विशेषणत्वेन विशेष्यत्वेन वा तदा युक्तवद्भावो न भवतीति। बदरी सूक्ष्मकण्टकेति। मधुरादीनां विशेषणानां बदर्युपनिपाते त-
ल्लिङ्गसंख्यायोगः। वृक्षोपनिपाते तु वृक्षाश्रयलिङ्गसंख्यायोगः। आविष्टलिङ्गेति। आविष्टं लिङ्गं यया सा ऽविष्टलिङ्गा नियत
लिङ्गेत्यर्थः। सर्वत्र सर्वेषां लिङ्गानां सद्भावे ऽपि केन चिच्छब्देन किंचिल्लिङ्गं प्रत्याय्यत इति शब्दविशेषापेक्षया ऽविष्टलिङ्गत्व
मुच्यते। उत्पत्तिप्रभृत्या विनाशादिति। जातेरुत्पत्तिविनाशायोगात्। शब्दव्यवहारगतावुत्पत्तिविनाशौ गृह्येते तेनासंसा
रं यावच्छब्दो व्यवहारस्तावज्जातेर्नियतलिङ्गत्वमित्यर्थः। गुणवचनानामिति। पदसंस्कारपक्षे वाचनिकमेतत्। पदे हि

एवं तर्हि नैवं विज्ञायते जातिर्यद्विशेषणमिति नापि जातेर्यानि विशेषणानीति। कथं तर्हि। विशेषणानां यु-
क्तवद्भावो भवति। आजातेः। आजातिप्रयोगात्। किमर्थं पुनरिदमुच्यते। विशेषणानां वचनं जातिनिवृ
त्त्यर्थम्। जातिनिवृत्त्यर्थो ऽयमारम्भः। किमुच्यते जातिनिवृत्त्यर्थ इति। न पुनर्विशेषणानामपि युक्तव
द्भावो यथा स्यादिति। समानाधिकरणत्वात्सिद्धम्। सामानाधिकरण्याद्धि विशेषणानां युक्तवद्भावो भविष्य-
ति। यद्येवं नार्थो ऽनेन। लुपो ऽन्यत्रापि जातेर्युक्तवद्भावो न भवति। क्वान्यत्र। बदरी सूक्ष्मकण्टका मधुरा वृक्ष इति
। किं पुनः कारणमन्यत्रापि जातेर्युक्तवद्भावो न भवति। आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्तते। उ
त्पत्तिप्रभृत्या विनाशान्न तल्लिङ्गं जहाति। न तर्हीदानीमयं योगो वक्तव्यः। वक्तव्यश्च। किं प्रयोजनम्। इदं
तत्र तत्रोच्यते। गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीति। तदनेन क्रियते॥

पदान्तरनिरपेक्षे संस्क्रियमाणे नपुंसकं लिङ्गं सर्वनाम प्राप्तमेकत्वं च वस्त्वन्तरनिरपेक्षत्वात्सन्निहितमिति प्रुक्तं प्रागिति
प्राप्ते भाविनो बहिरङ्गस्याश्रयस्य संबन्धिनौ लिङ्गसंख्ये ऽनेन प्रतिपाद्येते। विशेषणानां गुणवचनानामित्यर्थः। युक्तवद्व्य-
क्तिवचने आश्रयवल्लिङ्गसंख्ये इत्यर्थः। यदा तु वाक्यसंस्कारस्तदायमनुवाद एवाश्रयविशेषस्य पूर्वमेव प्रक्रमे विशे- राम:
षणानामपि तन्निष्ठत्वात्। तद्गतयोर्लिङ्गसंख्ययोः सिद्धत्वात्। यदा तु जातिविशेषणं तदा न भवति युक्तवद्भावः। ॥ २०९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरीतक्यादीति। नियमार्थमेतत्। तेन वचनमभिधेयाश्रयं भवति। खलतिकइति। खलतिको नाम पर्वतस्तस्यादूरभवानि वनानीति लिङ्गमभिधेयाश्रयमेव भवति। मनुष्यलुपीति। विशेषणानामयं प्रतिषेधः। तेन चञ्चाभिरूपइत्यभिधेयाश्रये लिङ्गसंख्ये भवतः। तृणमयः पुरुषश्चञ्चातत्सदृशो मनुष्यश्चञ्चा। संज्ञायामिति विहितस्य कनो लुम्मनुष्यइति लुप्॥ तदशिष्यम्॥ किं यस्एताइति। प्रत्यासत्त्याश्रयेण प्रश्नः। नेत्याहेति। प्रत्यासत्तेः सामर्थ्यं बलवत्। न हि टिघुभादिसंज्ञानां प्रमाणत्वं युक्तवद्भाववचनस्याशिष्यत्वे हेतुरुपपद्यते संबन्धाभावात्। संज्ञानमिति। अवगमः संप्रत्यय इत्यर्थः। तत्र यथा पोदाएः सिकतावर्षादइत्युक्ते लिङ्गसंख्याविशेषावगतिरुत्पद्यमाना प्रमाणम्। एवं पञ्चालावरणादित्यादावपि। न च पञ्चालादयो

हरीतक्यादिषु व्यक्तिः॥ हरीतक्यादिषु व्यक्तिर्भवति युक्तवद्भावेन। हरीतक्याः फलानि हरीतक्यः फलानि॥ खलतिकादिषु वचनम्॥ खलतिकादिषु वचनं भवति युक्तवद्भावेन। खलतिकस्य पर्वतस्यादूरभवानि वनानि खलतिकं वनानि॥ मनुष्यलुपि प्रतिषेधः॥ मनुष्यलुपि प्रतिषेधो वक्तव्यः। चञ्चा अभिरूपः। वध्रिका दर्शनीयः॥ तदशिष्यं संज्ञाप्रमाणत्वात्॥ किं या एताः कृत्रिमाष्टिघुभादिसंज्ञास्तत्प्रामाण्यादशिष्यम्। नेत्याह। संज्ञानं संज्ञा॥ जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्॥ ॥इदमयुक्तं वर्तते। किमत्रायुक्तम्। बहवस्तेऽर्थाः। तत्र युक्तं बहुवचनम्। तद्यदेकवचने शासितव्ये बहुवचनं शिष्यते एतदयुक्तम्। बहुष्वेकवचनमिति नाम वक्तव्यम्। अत उत्तरं पठति। जात्याख्यायां सामान्याभिधानादैकार्थ्यम्॥ जात्याख्यायां सामान्याभिधानादैकार्थ्यं भविष्यति। यत्तद्व्रीहौ व्रीहित्वम्। यवे यवत्वम्।

यौगिका अपि तु जनपदादीनां संज्ञास्ततो योगानवगमात्तद्धितो नोत्पद्यत इति लुबपि न वक्तव्यः। तत्र सर्वेषां लिङ्गानां सर्वत्र भावात्केनचिच्छब्देन प्रत्याय्यमानं वस्तु कस्यचिल्लिङ्गस्य व्यञ्जकमिति दारादिषु नियतलिङ्गता सिद्धा। बहुत्वमप्यवयवगतं शक्तिगतं चान्यत्र समारोप्यत इति संख्यायोगोऽपि सिद्धः। एकास्मिन्नेत्याद्यपि शिष्टप्रयोगदर्शनात्सिध्यति॥ जात्या॥ जातिरुपलक्षणम्। द्रव्यं तु शब्दार्थ इति दर्शनाश्रयेणाह। इदमयुक्तमिति। बहुष्वेकवचनमिति। अत्र पक्षे जातेरुपलक्षणत्वेनाख्या जात्याख्येति व्याख्यातम्। जातिपदार्थपक्षाश्रयेणोत्तरमाह। जात्याख्यायामिति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गार्ग्येगार्ग्यत्वमिति। गोत्रस्यापि जातित्वाभ्युपगमादेतदुक्तम्। बहुषु गर्गेषु गार्ग्यत्वस्याभिन्नस्य भावात्। एकस्मिंस्तु पिण्डे अवस्थाभेदानुगताडित्थत्वादिका जातिर्जात्याख्यायामिति वचनसामर्थ्यान्न गृह्यते। जातिपदार्थवादिमते हि सर्वे शब्दा जात्यर्थाभिधायिन इति सामर्थ्याद्भिन्नपिण्डविषया जातिराश्रीयते। बहूनामिति। बहूनामर्थानां बहुत्वमेवोच्यत इत्येकस्मिन्नर्थे बहुत्वमने

गार्ग्ये गार्ग्यत्वम्। तदेकं तच्च विवक्षितं तस्यैकत्वादेकवचनमेव प्राप्नोति। इष्यते च बहुवचनं स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति जात्याख्यायामेकस्मिन् बहुवचनमेवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्रैकवचनादेशे उक्तम्। किमुक्तम्। व्रीहिभ्य आगत इत्यत्र घेर्ङितीति गुणः प्राप्नोतीति। नैष दोषः। अर्थातिदेशात्सिद्धम्। अर्थातिदेशोऽयम्। नेदं पारिभाषिकस्य वचनस्य ग्रहणम्। किं तर्ह्यन्वर्थग्रहणम्। उच्यते वचनम्। बहूनामर्थानां वचनं बहुवचनमिति। यावद्ब्रूयादेकोऽर्थो बहुवद्भवतीति तावदेकस्मिन् बहुवचनमिति॥ संख्याप्रयोगे प्रतिषेधः॥ संख्याप्रयोगे प्रतिषेधो वक्तव्यः। एको व्रीहिः संपन्नः सुभिक्षं करोति। एको यवः संपन्नः सुभिक्षं करोति॥ अस्मदो नामयुवप्रत्यययोश्च॥ अस्मदो नामप्रयोगे युवप्रत्ययप्रयोगे च प्रतिषेधो वक्तव्यः। नामप्रयोगे अहं देवदत्तो ब्रवीमि। अहं यज्ञदत्तो ब्रवीमि। युवप्रत्ययप्रयोगे अहं गार्ग्यायणो ब्रवीमि। अहं वात्स्यायनो ब्रवीमि। युवग्रहणेन नार्थः। अस्मदो नामप्रत्ययप्रयोगे नेत्येव। इदमपि सिद्धं भवति। अहं गार्ग्यो ब्रवीमि। अहं वात्स्यो ब्रवीमि। अपर आह। अस्मदः सविशेषणस्य प्रयोगे नेत्येवेदमपि सिद्धं भवति। अहं पटुर्ब्रवीमि। अहं पण्डितो ब्रवीमि। अशिष्यं वा बहुवत्पृथक्त्वाभिधानात्। अशिष्यो बहुवद्भावः। किं कारणम्। पृथक्त्वाभिधानात्। पृथक्त्वेन हि द्रव्याण्यभिधीयन्ते।

नातिदिश्यत इति बहुत्वाद्बहुवचनं भवतीति नास्ति स्थान्यादेशभावः। एवं तिष्यपुनर्वस्वोरित्यत्रापि द्विवचनबहुवचनशब्दाभ्यां द्वित्वबहुत्वयोरभिधानादर्थातिदेशात्स्थान्यादेशभावाभावः। संख्याप्रयोग इति। एकस्यैव बहुत्वातिदेशः क्रियमाण एकशब्दप्रयोगेऽपि प्राप्नोतीति प्रतिषेध उच्यते। उभयपदार्थपक्षाश्रयेण प्रत्याख्यातुमाह। अशिष्यमिति। तत्र कदाचिज्जातेः प्राधान्यं कदाचिद्व्यक्तेरिति यथेष्टं प्रयोग उपपद्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्मदः॥ तद्यदेति। एकेन्द्रियप्रवृत्तौ चेन्द्रियान्तराणामौदासीन्येन संविधानत्वात्। कर्तृत्वविवक्षेति वयं पश्याम इत्यादि सिद्धम्। शरीरद्वेन्द्रियेष्वप्यहंकारोपादानाद्वयमित्यनेनेन्द्रियाणामभिधानात्। पारतन्त्र्यविवक्षायां त्विन्द्रियाणामहं ब्रवीमीत्येकवचनं सिद्धम्। युष्मदस्मदोश्चैकशेषे स्मदोऽर्थद्वयाभिधानाद्द्विवचनमिति नार्थो योगेन। संप्रत्ययप्रामाण्याच्च युष्मदि गुरौ पक्षे बहु

बहवस्तेऽर्थास्तत्र युक्तं बहुवचनम्। किमुच्यते पृथक्त्वाभिधानादिति। यावतेदानीमेवोक्तं जात्याख्यायां सामान्याभिधानादेकार्थ्यमिति। जातिशब्देन हि द्रव्याभिधानम्। जातिशब्देन हि द्रव्यमभिधीयते जातिरपि। कथं पुनर्ज्ञायते जातिशब्देन द्रव्यमभिधीयत इति। एवं हि कश्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति। अस्त्यत्र कांचिद्गां पश्यसीति। स पश्यति। पश्यति चायं गाः पृच्छति च कांचिदत्र गां पश्यसीति। नूनमस्य द्रव्यं विवक्षितमिति। तद्यदा द्रव्याभिधानं तदा बहुवचनं भविष्यति। यदा सामान्याभिधानं तदैकवचनं भविष्यति॥ जात्याख्यायाम्॥ अस्मदो द्वयोश्च॥ अयमपि योगः शक्योऽवक्तुम्। कथम्। अहं ब्रवीमि। आवां ब्रूवः। वयं ब्रूमः। इमानीन्द्रियाणि कदाचित्स्वातन्त्र्येण विवक्षितानि भवन्ति। तद्यथा। इदं मे अक्षि सुष्ठु पश्यति। अयं मे कर्णः सुष्ठु शृणोतीति। कदाचित्पारतन्त्र्येण विवक्षितानि भवन्ति। अनेनाक्ष्णा सुष्ठु पश्यामि। अनेन कर्णेन सुष्ठु शृणोमीति। तद्यदा स्वातन्त्र्येण विवक्षा तदा बहुवचनं भविष्यति। यदा पारतन्त्र्येण तदैकवचनद्विवचने भविष्यतः॥ अस्मदो॥ ॥फल्गुनीप्रोष्ठपदानां च नक्षत्रे॥ अयमपि योगः शक्योऽवक्तुम्। कथम्। उदिते पूर्वे फल्गुन्यौ। उदिताः पूर्वाः फल्गुन्यः। उदिते पूर्वे प्रोष्ठपदे। उदिताः पूर्वाः प्रोष्ठपदाः। फल्गुनीसमीपगते चन्द्रमसि फल्गुनीशब्दो वर्तते। बहवस्तेऽर्थास्तत्र युक्तं बहुवचनम्। यदा तयोरेवाभिधानं तदा द्विवचनं भविष्यति। फल्गुनी॥ छन्दसि पुनर्वस्वोरेकवचनम्॥ विशाखयोश्च॥ ॥इमावपि योगौ शक्याववक्तुम्। कथम्। पुनर्वसुविशाखयोः सुपां सुलुक्पूर्वसवर्णेति सिद्धम्। पुनर्वसुविशाखयोः सुलुक्पूर्वसवर्ण इत्येव सिद्धम्॥

वचनं सिद्धम्॥ फल्गुनी॥ ॥बहवस्तेऽर्था इति। अमावास्यायामप्यादित्यमण्डलं प्रविष्टेन चन्द्रेण नक्षत्राणां योगोऽस्त्येवेति तदापि बहुवचनमर्हद्भिः छत्रिण इत्यादिन्यायेन सिद्धम्। एकस्यां तु तारायां फल्गुनीशब्दो न वर्तत इति एकवचनाभावः। सर्वत्र लौकिकः प्रयोगः प्रामाण्येनाश्रीयत इत्यनवस्था न भवति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तिष्य॥ नक्षत्र इति किमर्थमिति। तिष्यपुनर्वसवो माणवका इत्यत्र गौणार्थत्वान्न भविष्यतीति प्रश्नः। उत्तरवाक्ये नित्वयमभिप्रायः। तिष्येण युक्तः कालस्तिष्यस्तिष्ये जातो माणवक इति यौगिकत्वान्नास्ति गौणार्थत्वम्। ज्योतिषि वर्त्तत इति। तान्वन्वेकेनैव नक्षत्रग्रहणेन कालमाणवकयोर्निवृत्तिः सिद्धा तत्र किं द्वितीयेन नक्षत्रग्रहणेन। नैतदस्ति। अन्तरङ्गः कालः बहिरङ्गस्तु माणवक इत्यन्तरङ्गस्यैव कालस्यैकेन नक्षत्रग्रहणेन निवृत्तिः स्यात्। यथाऽकर्मकधातुत्वान्तरङ्गं द्रव्यकर्म निषिध्यते न कालकर्मेति मासमास्यते देवदत्तेनेत्यत्रापि भावे लकारः सिद्धो भवति। द्वितीयेन तु नक्षत्रग्रहणेन बहिरङ्गोऽपि माणवको निवर्त्यते। ननु नक्ष-

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्॥ तिष्यपुनर्वस्वोरिति किमर्थम्। कृत्तिकारोहिण्यः। नक्षत्र इति किमर्थम्। तिष्यश्च माणवकः पुनर्वसू च माणवकौ तिष्यपुनर्वसवः। अथ नक्षत्र इति वर्तमाने पुनर्नक्षत्रग्रहणं किमर्थम्। अयं तिष्यपुनर्वसुशब्दोऽस्त्येव ज्योतिषि वर्तते। अस्ति च कालवाची। तद्यथा बहवस्तिष्यपुनर्वसवो ऽतिक्रान्ताः कतरेण तिष्येण गत इति। तद्यो ज्योतिषि वर्त्तते तस्येदं ग्रहणम्। अथवा नक्षत्र इति वर्तमाने पुनर्नक्षत्रग्रहणस्यैतत्प्रयोजनम्। विदेशस्थमपि तिष्यपुनर्वस्वोः कार्यं तदपि नक्षत्रस्यैव यथा स्यात्। तिष्यपुष्ययोर्नक्षत्राणि यलोपो वक्तव्य इति नक्षत्रग्रहणं न कर्तव्यं भवति। अथवा नक्षत्र इति वर्त्तमाने पुनर्नक्षत्रग्रहणस्यैतत्प्रयोजनं तिष्यपुनर्वसुपर्यायवाचिनामपि यथा स्यात्। तिष्यपुनर्वसू। सिध्यपुनर्वसू॥

त्रद्वन्द्व इत्युक्ते अर्थाद्द्वयोरपि कालमाणवकयोर्निवृत्तिः सिद्धैवेत्याह। अथवेति। तिष्यपुनर्वस्वोरिति योगविभागः क्रियते नक्षत्र इति चानुवर्त्तते तेन यत्किंचित्तिष्यपुनर्वस्वोः कार्यं तन्नक्षत्रवृत्त्योरेव भवतीत्यर्थः। यलोपे कृतमेव नक्षत्रग्रहणमित्यमिप्रायेणाऽऽह। हायवेति। स्वरूपग्रहणे प्राप्ते पर्यायग्रहणार्थं द्वितीयं नक्षत्रग्रहणम्। पुनर्नक्षत्रग्रहणे सत्यर्थस्यैवायमनपेक्षितोपात्तशब्दस्याऽतिदेश इति पर्यायाणामपि ग्रहणसिद्धिः॥ ॥ राम:
२११

CC-0. In Public Domain. Digitization by eGangotri

तिष्यपुनर्वसवउन्मुग्धा इति। केचिदाहुः। पुरुषा अन्यपदार्थः नक्षत्राणांतु बहुव्रीहिरिति द्विवचनप्रसङ्गः। अन्ये त्वाहुः। नक्ष-
त्रवृत्तेः समासस्य ग्रहणे पुरुषाणामन्यपदार्थत्वेऽपि प्रसङ्गः एव नास्तीत्यवयवेन विग्रहः। समुदायः समासार्थ इति तिष्यादय ए
व विपर्यासविषया बहुव्रीहिणोच्यन्त इत्यस्ति प्रसङ्गः। जातिद्वन्द्व इति। कथमनयोर्जातिशब्दत्वम्। यावता जातिप्रदेशेषु
भिन्नाधारा जातिर्गृह्यते न त्ववस्थाभेदकल्पितभेदैकवस्तुविषया। एवं तर्हि प्रतिमन्वन्तरे भिन्नानि नक्षत्राणि दर्शने भिन्ना
धारा जातिः संभवतीति न कश्चिद्दोषः। सर्वो द्वन्द्व इति। अप्राणिजातिद्वन्द्वो नित्यमेकवद्भवति। प्राणिद्वन्द्वस्तु विकल्पे

अथ द्वन्द्व इति किमर्थम्। यस्तिष्यस्तौ पुनर्वसू येषां त इमे तिष्यपुनर्वसव उन्मुग्धाः। बहुवचनस्येति
किमर्थम्। उदितं तिष्यपुनर्वसू। कथं वात्रैकवचनम्। जातिद्वन्द्व एकवद्भवतीति। अप्राणिनामिति प्र
तिषेधः प्राप्नोति। एवं तर्हि सिद्धे सति यद्बहुवचनग्रहणं करोति तज्ज्ञापयत्याचार्यः सर्वो द्वन्द्वो वि
भाषयैकवद्भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। बाभ्रवशालङ्कायनं बाभ्रवशालङ्कायना इत्येतत्सि
द्धं भवति। अथवा नात्र भवन्तः प्राणिनः प्राणा एवात्र भवन्तः॥ इति द्वितीयपादे द्वितीयमाह्निकम्॥ ॥

नान्यायसिद्धश्चार्थो बहुवचनग्रहणेन लिङ्गेन सूच्यते। एकवद्भावप्रकरणं हि विषयविभागार्थमारब्धम्। प्राण्यङ्गादी
नां समाहार एव न तु प्राण्यङ्गादीनामेव समाहार इति। ततस्तत्प्रकरणानुपात्तानां समाहारेतरेतरयोर्योगयोर्द्वन्द्वः सिद्ध ए
व। अथवेति। न ह्येतेषु लोके प्राणिव्यवहारः प्रसिद्ध इति भावः। प्राणा एवेति। तदधीनस्थितित्वात्प्राणिनामेत एव प्राणा उ-
च्यन्ते॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्य द्वितीये पादे द्वितीयमाह्निकम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कौ सरूप॥ रूपग्रहणमिति। रूपस्यान्तरङ्गत्वादहेयत्वादुपदेशानपेक्षणाच्च तत्कृतमेव समानत्वं ग्रहीष्यते। प्रतिपत्तिला ०.२३
२१२ घवं च समानानामित्युच्यमाने भवति। रूढशब्दत्वात्समानशब्दस्य तुल्यार्थत्वावगमात्। सरूपाणामिति पुनरुच्यमाने
परहृयार्थावगमपूर्वकान्यपदार्थावगमात् प्रतिपत्तिगौरवं भवतीति भावः। शब्दोर्थश्चेति। स्वं रूपमित्यत्र रूपग्रह-
णेन ज्ञापितं व्याकरणे रूपवदर्थोप्यङ्गीक्रियत इति। ततश्चार्थरूपाभ्यां समानत्वं गृह्येतेत्यर्थः। शब्दानुशासनप्रस्तावाच्छब्द
संबन्धि रूपं गृह्यते न तु च सुग्रीवाणमित्याह। श्रुतौ चेति। श्रोत्रोपलब्धावित्यर्थः। अथवा श्रोत्रेन्द्रियं श्रुतिरुच्यते। एकग्रहण
मिति। शेषणं शेष इति भावसाधनपक्षे प्राथम्यादेकस्यैव शेषो भविष्यति। शिष्यत इति कर्मसाधनपक्षे पेकत्वसंख्याया वि-
वक्षितत्वादेक एवावशिष्यत इति प्रश्नः। द्विबह्वोरिति। द्वित्वबहुत्वविषयस्यानेकस्य शब्दस्येत्यर्थः। तत्र भावसाधनप

सरूपाणामेकशेष एकविभक्तौ॥ रूपग्रहणं किमर्थम्। समानानामेकशेष एकविभक्तावितीयत्युच्य
माने यत्रैव सर्वं समानं शब्दोर्थश्च तत्रैव स्यात्। वृक्षाः प्लक्षा इति। इह न स्यात्। अक्षाः पादा माषा इति।
रूपग्रहणे पुनः क्रियमाणे न दोषो भवति। रूपं निमित्तत्वेनाश्रीयते। श्रुतौ च रूपग्रहणम्। अथैकग्र
हणं किमर्थम्। सरूपाणां शेष एकविभक्तावितीयत्युच्यमाने द्विबह्वोरपि शेषः प्रसज्येत। एकग्रहणे
पुनः क्रियमाणे न दोषो भवति। अथ शेषग्रहणं किमर्थम्। सरूपाणामेक एकविभक्तावितीयत्युच्य
माने आदेशोयं विज्ञायेत। तत्र को दोषः। अश्वश्चाश्वश्चाश्वौ। आन्तर्यतो ह्युदात्तवतः स्थानितो ह्यु
दात्तवानादेशः प्रसज्येत। लोप्यलोपिता च न प्रकल्प्येत। तत्र को दोषः।

शेष्याशिन्यायाश्रयेणानेकस्यापि शेषः स्यात्। कर्मसाधनपक्षेपि संस्कार्यत्वादप्राधान्यात्संख्याया अविवक्षा स्यात्।
यथा ग्रहं संमार्ष्टीति भावः। शेषग्रहणमिति। सरूपाणामेकः साधुर्भवतीति वाक्यशेषो ध्याहरिष्यत इति भावः। आदे-
शोयमिति। षष्ठीस्थानेयोगेति नियमात्। तत्र को दोष इति। अन्तरतम एक आदेशः प्रवर्तिष्यत इति भावः। इतरस्तु-
स्वरे दोषमाह। अश्वश्चाश्वश्चेति। ह्युदात्तवत इति। द्वावुदात्तवन्तावश्वशब्दौ यस्य समुदायस्य स ह्युदात्तवान्समु राम:
दायः। आदेशोपि ह्यवुदात्तवन्तावुदात्तगुणयुक्तावकारौ यस्येति ह्युदात्तवानुच्यते। एतच्चोपलक्षणं तेन ह्यनुदात्त २१२
स्यह्यनुदात्त आदेशः प्राप्नोति। लोप्यलोपितेति। लोपनाय स्य लोपित्वं लोपसंबन्धो न प्राप्नोतीत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गर्गा इति। प्रकृतिरर्थभेदादेकैव। यञ्प्रत्ययास्तु बहवः। यञान्तेभ्यश्च एकत्वाद्व्यवधानाभावादनेकस्यापि प्रत्ययस्य परत्वं न विरुध्यते। तत्र गर्गीय य य इति स्थिते यदा गर्गशब्दमुक्त्वा प्रत्ययानामेवैको यशब्दश्चादेशः क्रियते तदा तस्य बह्वर्थत्वाल्लुक् सिध्यति। यदा तु विरूपाणामपि समानार्थानामेकशेषवदेक आदेशः सप्रकृतिकः क्रियते तत्र गर्गीय इत्यस्यान्ययोश्च यशब्दयोर्गर्गीयशब्द आदेशः। तत्र यशब्दान्तस्य बहुषु वृत्तिः न तु प्रत्ययमात्रस्येति भावः। यञन्तं यद् बहुष्विति। आदेशपक्षेऽपि वचनसामर्थ्यात् सारूप्यात् यञन्तबुद्ध्युत्पादाद्यञन्तमेतदित्याश्रीयते। काश्यपा इति। काश्यप इवायं तत्प्रतिकृतिरितीवे प्रतिकृताविति-विहितस्य कनो जीविकार्थे चापण्य इति लुप् ततः काश्यपश्च काश्यपश्च काश्यपश्चेति प्रतिकृतिप्रचयविवक्षायामेकः का

गर्गा वत्सा विदा उर्वाः। यञ्भ्यो बहुषु यञ्भ्यो बहुष्वित्युच्यमानो लुङ् प्राप्नोति। माभूदेवम्। यञन्तं यद् बहुष्वञन्तं यद् बहुष्वित्येवं भविष्यति। नैवं शक्यम्। इह हि दोषः स्यात्। काश्यपाः। एकविभक्ताविति किमर्थम्। पयः पयो जरयति वासो वासः सञ्छादयति ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहीति। किमर्थं पुनरिदमुच्यते। प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानम्। प्रत्यर्थं शब्दा अभिनिविशन्ते। किमिदं प्रत्यर्थमिति। अर्थमर्थं प्रति प्रत्यर्थं प्रत्यर्थं शब्दनिवेशादेतस्मात्कारणान्नैकेन शब्देनानेकस्याभिधानं प्राप्नोति। त तत्र को दोषः। तत्रानेकार्थाभिधानेऽनेकशब्दत्वम्। तत्रानेकार्थाभिधानेऽनेकशब्दत्वं प्राप्नोति। इष्यते च एकेनाप्यनेकस्याभिधानं स्यादिति। तच्चान्तरेण यत्नं न सिध्यति। तस्मादेकशेषः। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति॥

यशब्दः प्रयुज्यते स च बह्वर्थो यञन्तश्चेति लुक्प्रसङ्गः। लौकिकस्य गोत्रस्य तत्र ग्रहणमिति परिहार उत्तरत्र वक्ष्यते इतीह नोक्तः। पय इति। उत्तरत्रार्थविप्रतिषेधादिति प्रत्याख्यानं करिष्यते। किमर्थं पुनरिति। जातिः शब्दार्थः। तस्याश्चैकत्वादनेकशब्दाप्रयोगः। आश्रयगतसंख्याप्रतिपादनाय द्विवचनबहुवचने भविष्यत इति प्रश्नः। द्रव्यपदार्थ उपलक्षणं त्वाकृतिरिति दर्शने सूत्रमारब्धमित्याह। प्रत्यर्थमिति। यावन्ति द्रव्याणि विशिष्टगुणक्रियाविषयतया विवक्षितानि तावतां शब्दानामेकैकार्थोपक्षयाणां प्रयोगे प्राप्ते एकशेषारम्भ इत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमिदमिति। यदिहेतुरहितं दृष्टान्तमाश्रित्य विरूपानेकशब्दप्रयोगदर्शनात्सरूपैकशेष आरभ्यते तदा सरूपैकशब्दप्र
योगदर्शनाद्विरूपानेकशेषः किमिति नारभ्यत इति प्रश्नः। प्रयोगानुशब्दशक्तावनुगम्यमानायां न किंचिदारब्धव्यम्। द्रव्यप
दार्थपक्षेपि स्वभावादेकः शब्दो नेकमर्थं द्यादिवत्प्रत्याययिष्यति। अन्यथा एकशेषारम्भेपि कथं प्रत्यायकः स्यात्। नहि स्वतो
ऽसतीशक्तिराचार्येण कर्तुं शक्यते। मन्दबुद्धिव्युत्पादनार्थं च यथास्थितप्रयोगानुसरणे कोनुरोधः सरूपैकशेषारम्भे न पुनर्वि-
रूपानेकशेषारम्भे। लाघवायैकशेषारम्भश्चेत्तन्न। लघीयसी विरूपप्रतिपत्तिः। तत्र हि प्रवृत्तिविषया बुद्धिरेकरूपैव भवति।
एकशेषे तु प्रवृत्तिनिवृत्तिविषयेति प्रतिपत्तिगौरवप्रसङ्गः। अवरतो द्वयोरिति। यदा त्रयाणामेकः शिष्यते तदा द्वयोर्निवृ
त्तिर्वक्तव्या व्याख्येयेत्यर्थः। शेषशब्दस्य निवृत्तिविशिष्टावस्थानवाचित्वात्। यदा तु द्वयोरेकशेषस्तदैकस्य निवृत्तिः। चतुष्प्रभृ

किमिदं प्रत्यर्थं शब्दा अभिनिविष्टा इत्येतं दृष्टान्तमास्थाय सरूपाणामेकशेष आरभ्यते न पुनः प्र
त्यर्थं शब्दा अभिनिविष्टा इत्येतं दृष्टान्तमास्थाय विरूपाणामनेकशेष आरभ्यते। तत्रैतत्स्यात्। ल
घीयसी सरूपनिवृत्तिः। गरीयसी विरूपप्रतिपत्तिः। तच्च न। लघीयसी विरूपप्रतिपत्तिः। किं कारणम्।
यत्र हि बहूनां सरूपाणामेकः शिष्यते तत्रावरतो द्वयोः सरूपयोर्निवृत्तिर्वक्तव्या स्यादेवमप्येतस्मि-
न्सति किंचिदाचार्यः सुकरतरकं चैकशेषारम्भं मन्यते। किं पुनरयमेकविभक्तावेकशेषो भवति। एवं
भवितुमर्हति। एकविभक्ताविति चेत्। नाभावाद्विभक्तेः।

तीनां त्वेकशेषे त्रिप्रभृतीनां निवृत्तिरिति प्रवृत्तिनिवृत्तिलक्षणविषयभेदाद्बुद्धिगौरवापत्तिरित्यर्थः। सुकरतरकं चे-
ति। एवं हि प्रकरणमभिन्नरूपं भवति वृद्धो यूनेत्यादिभिः सूत्रैरेकशेषस्य विधानात्। अनेकशेषारम्भे त्विह पृथक्प्र-
स्थानतया गौरवं स्यादित्यर्थः। किं पुनरिति। किमयमेकशब्दः संख्यावाची तुल्यतावाची वेति प्रश्नः। एवं भवितुमिति। सं-
ख्यावाचित्वेनैकशब्दस्य प्रसिद्धतरत्वात्। नाभावादिति। ङ्याप्प्रातिपदिकाद्दित्यत्रैकवचनान्तानामेव द्वन्द्वः क्रियते। वर्तिप
दार्थानां सर्वत्र संख्याभेदावगमे प्रमाणाभावात्। गुणे च संख्या विवक्ष्यते यथा पशुना यजेतेति। एवं चैकैकस्मात्प्राति
पदिकात्स्वादिभिरुत्पत्तव्यं न तु समुदायात्। यत्र क्वचिद्गुणेपि संख्या न विवक्ष्यते यथा कर्तुरीप्सिततममिति द्वयोर्बहू- राम:
नां वेप्सिततमस्य कर्मसंज्ञाप्रवर्ततेतत्र नान्तरीयकसंख्याया उपादानमिति लक्ष्यसिद्ध्यर्थमाश्रीयते। ॥ २९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु चेति। अवयवार्थव्यतिरेकेण परस्परापेक्षायां सत्यां समुदायार्थोपजननात् सरूपसमुदायाभिनिवेशिन्येका प्रातिपदिकसंज्ञास्तीति तया सरूपसमुदाय एकं प्रातिपदिकमिति स्वाद्युत्पत्तिरविरुद्धा। अर्थवत्समुदायानामिति। अविशेषेण नियमो ननु सुबन्तानामेवेति मन्यते। इदानीं तुल्यपर्यायमेकशब्दमाश्रित्याह। यदि पुनरिति। पृथक् सर्वेषामिति। वृक्षस्वृक्षस्वृक्षस् इति स्थिते विभक्तौ परतो यानि सरूपाणि तेषामेकशेष उच्यमाने विभक्तिनिमित्तत्वात् प्रकृतिनिवृत्तेः केवलानां विभक्तीनां प्रयोगप्रसङ्ग इत्यर्थः। संयोगान्तलोपेनेति। वृक्षस्स्स् इति स्थिते संयोगान्तलोपो भविष्यति। ननु संयोगान्तस्य पदस्य लोप उच्यते तत्र पूर्वेष-

एकविभक्ताविति चेत्तन्न। किं कारणम्। अभावाद्विभक्तेः। न हि समुदायात्परा विभक्तिरस्ति। किं कारणम्। अप्रातिपदिकत्वात्। ननु चार्थवत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा भविष्यति। नियमान्न प्राप्नोति। अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति। यदि पुनः पृथक्सर्वेषां विभक्तिपराणामेकशेष उच्यते। पृथक्सर्वेषामिति चेदेकशेषे पृथग्विभक्त्युपलब्धिस्तदाश्रयत्वात्। पृथक्सर्वेषामिति चेदेकशेषे पृथग्विभक्त्युपलब्धिः प्राप्नोति। किमुच्यते एकशेषे पृथग्विभक्त्युपलब्धिरिति। यावता समयः कृतः न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्यय इति। तदाश्रयत्वात् प्राप्नोति। यत्र हि प्रकृतिनिमित्ता प्रत्ययनिवृत्तिस्तत्राप्रत्ययिकायाः प्रकृतेः प्रयोगो भवति। अग्निचित्सोमसुदिति यथा। यत्र च प्रत्ययनिमित्ता प्रकृतिनिवृत्तिस्तत्राप्रकृतिकस्य प्रयोगो भवत्यधुना इयानिति यथा। अस्तु। संयोगान्तलोपेन सिद्धम्। कुतो नु खल्वेतत् परयोर्वृक्षशब्दयोर्निवृत्तिर्भविष्यति न पुनः पूर्वयोरिति। तत्रैतत्स्यात्पूर्वनिवृत्तावपि सत्यां संयोगादिलोपेन सिद्धमिति। न सिध्यति।

दं सकारान्तं द्वौ सकारौ पदे इति पदत्रयं संपद्यत इति कुतो लोपः। संयोगान्तलोपस्य चापवादः संयोगादिलोपस्तेन भाव्यम्। पूर्वत्रासिद्धमिति वचनाद्धल्ङ्यादिलोपेनैव च भाव्यम्। अत्र व्याचक्षते। संयोगस्य योऽन्तः सकारस्तस्य लोपः स च हल्ङ्याब्भ्य इत्यनेनेति। संयोगादिलोपेनेति। अत्राप्येकपदस्य संयोगस्यादिर्नास्तीति हल्ङ्यादिलोपमेव संयोगादिलोपं प्रतिपन्नाः। संयोगस्यासौ प्रत्येकं हलां संयोगसंज्ञेति पक्षाश्रये आदिश्च वृक्षशब्दापेक्षया तस्य लोपो हल्ङ्याबित्यनेनेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवरतइति। सदृक्षस्थितिप्राप्नोतिदुष्टत्वप्रतिपादनपरंचैतत्तत्पुनः कदाचित्त्रयाणांश्रवणप्रतिपादनार्थम्। द्विवचनबहुवचनयो रिति। येत्वभावादेवद्विवचनबहुवचनान्ताःप्रयुज्यन्तेगोदौदाराःसिकताइत्यादयः तत्रद्विवचनबहुवचनेषुपरत एकशेषेसति द्विवचनबहुवचनानांश्रवणप्रसङ्गः। कृतेकशेषाणांवापुनरेकशेषेक्रियमाणेद्विवचनबहुवचनश्रवणप्रसङ्गः। कश्चिद्वचनलो पइति। यस्त्वयाकश्चिद्वचनलोपउक्तः सपरिहृतःअथवासुपांपरिहृतोनतिङामित्यर्थः। स्वरसमासान्तेष्विति। समासेकृतेसमा सान्तोदात्तत्वेचयदिपूर्वशेषस्तदासर्वानुदात्तत्वंप्राप्नोत्यथपरशेषस्तदाश्वशब्दस्यान्तोदात्तत्वप्रसङ्गः। परत्वादिति। ननुप्राप्ते समासान्तोदात्तत्वेआरभ्यमाणएकशेषस्तस्यबाधकः। नैतदस्ति। निरवकाशोहिबाधकोभवति। कृतेचसमासान्तोदात्तत्वेए

तत्रावरतोद्वयोस्तकारयोःश्रवणंप्रसज्येतयत्रचसंयोगान्तलोपोनास्तितत्रचनसिध्यतिकुचसंयोगा न्तलोपोनास्तिद्विवचनबहुवचनयोः। यदिपुनःसमासएकशेषउच्यतेकिंकृतंभवतिकश्चिद्वचनलोपः परिहृतोभवति। तत्तर्हिसमासग्रहणंकर्तव्यम्। नकर्तव्यम्। प्रकृतमनुवर्तते। क्वप्रकृतम्। तिष्यपुन र्वस्वोर्नक्षत्रद्वन्द्वेबहुवचनस्यद्विवचनंनित्यमितिसमासइतिचेत्स्वरसमासान्तेषुदोषः। समासइतिचेत्स्वरसमासान्तेषुदोषो भवतिस्वर। अश्वश्च। अश्वश्च अश्वौ। समासान्तोदात्तत्वेकृतेएकशेषःप्राप्नोति। इदमिहसंप्रधार्यम्। समासान्तोदा त्तत्वंक्रियतामेकशेषइति। किमत्रकर्तव्यम्। परत्वात्समासान्तोदात्तत्वम्। समासान्तोदात्तत्वेचदोषोभवति स्वरसमासान्त। ऋक्च ऋक्च ऋचौ। समासान्तेकृतेअसारूप्यादेकशेषोनप्राप्नोति। इदमिहसंप्रधार्यम् । समासान्तः क्रियतामेकशेषइति। किमत्रकर्तव्यम्। परत्वात्समासान्तः। समासान्तेचदोषोभवति।

कशेषस्यप्रवर्तनाद्विरोधाभावाच्चनास्त्युत्सर्गापवादभावः। ऋक्चेति। ऋचूऋचूअइतिस्थितेअन्तर्वर्तिन्याविभक्तेर्लुका लुप्तत्वात्प्रत्ययलक्षणप्रतिषेधान्नास्त्येकविभक्तिपरतेतिएकशेषनिमित्तंसमुदायाद्विभक्तिरुत्पाद्यातस्यांचनास्ति सारूप्यंएकोहिऋक्शब्दःअपरऋचशब्दःसमासान्तः। समासस्यैवावयवोनोत्तरपदस्येतिचेत्तर्हितेनव्यवधानात्स मासविभक्तेरेकशेषोनस्यात्। समासार्थस्योत्तरपदस्यान्तःसमासान्तइत्यपिभाष्यकारस्यदर्शनमितिऋगृचशब्दयो र्वैरूप्यमाश्रित्यभाष्यकृतादोषउद्भावितः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अङ्गाश्रये चेति। चशब्दादनङ्गाश्रयेपि। यथा नौश्च नावौ चेति। स्वसा च स्वसारौ चेति। किमर्थमेकमेकवचनान्तं द्वितीयं तु द्वि
वचनान्तमिति चेत् सर्वथा वैरूप्यप्रतिपादनाय। तथाहि। यद्यन्तर्वर्तिन्यां विभक्तौ लुप्तायामपि वचनसामर्थ्यात् प्रत्ययल
क्षणमाश्रीयते तदा न वैरूप्यमथापि समासविभक्त्यैकविभक्तिपरत्वं तथापि वैरूप्यं तिङ्समास इति। समासस्यैकशेषे
विधीयमाने तिङ्समासेप्येकशेषो वक्तव्यः। स च तिङ्समासो वक्तव्य इत्यर्थः। एकमिति। विनापि तेनार्थस्यावगमात् प्र
कृत इति। आख्यातमाख्यातेनेत्यत्र द्वन्द्वश्च सरूपाणामिति वक्तव्यम्। यदि पुनरिति। दोषान्तराभिधानाय पुनरुपन्या
सः। तदर्थमिति। पूर्वं दोषमात्रमुपन्यस्तं केवलाया विभक्तेः श्रवणं प्राप्नोतीति। इदानीं तु तत्प्रतिविधानाय वचने क्रियमाणे गौ

अङ्गाश्रये चैकशेषवचनम्। अङ्गाश्रये च कार्ये एकशेषो वक्तव्यः। स्वसा च स्वसारौ च स्वसारः। अङ्गाश्रये कृ
तेऽसारूप्यादेकशेषो न प्राप्नोति। इदमिह संप्रधार्यम् अङ्गाश्रयं क्रियतामेकशेष इति। किमत्र कर्तव्यम्। परत्वा
दङ्गाश्रयम्। तिङ्समासे तिङ्समासवचनम्। तिङ्समासे तिङ्समासो वक्तव्यः। एकं तिङ्ग्रहणमनर्थकम्। समासे
तिङ्समास इत्येव। नानर्थकम्। तिङ्समासे प्रकृते तिङ्समासो वक्तव्यः। तिङ्विधिप्रतिषेधश्च। तिङ् कश्चिद्विधेयः कश्चि
त्प्रतिषेध्यः। पचति च पचति च पचतः। तश्शब्दो विधेयः तिशब्दः प्रतिषेध्यः। यदि पुनरसमासस्यैकशेष उच्येत। असमासे वचन
लोपः। यद्यसमासे वचनलोपो वक्तव्यः। ननु चोक्तं तत्रैव वचनलोपं चोदिताऽस्मः। द्विवचनबहुवचनविधिं द्वन्द्व
प्रतिषेधं च वक्ष्यति तदर्थं पुनश्चोद्यते। द्विवचनबहुवचनविधिः। द्विवचनबहुवचनानि विधेयानि। वृक्ष
श्च वृक्षश्च वृक्षौ वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति। द्वन्द्वप्रतिषेधश्च। द्वन्द्वस्य च प्रतिषेधो वक्तव्यः। वृक्ष
श्च वृक्षश्च वृक्षौ वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति। चार्थे द्वन्द्व इति द्वन्द्वः प्राप्नोति। नैष दोषः। अनव
काश एकशेषो द्वन्द्वं बाधिष्यते। सावकाश एकशेषः। कोऽवकाशः। तिङन्तान्यवकाशः।

रवमापद्यत इत्येतत्प्रतिपाद्यते तिङन्तान्यवकाश इति। कारकभेदात् क्रियाभेदादनेकतिङन्तप्रसङ्गे एकशेषो विधेयः त
त्र च परत्वात् सरूपाणामेकशेषं बाधित्वा द्वन्द्वः प्राप्नोति सकृद्गतौ विप्रतिषेध इति पुनरेकशेषो न प्राप्नोति सत्यपि वा पुनः प्र ॥
सङ्गविज्ञाने स्वरसमासान्तेषु दोष एव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰वै॰ यदिपुनरिति। सप्तमीनिर्देशेप्रकृतिमात्रनिवृत्तौप्रत्ययश्रवणप्रसङ्गः षष्ठीनिर्देशेतुविभक्त्यन्तानांनिवृत्त्याभाव्यमितिनास्तिके १२३
२१५ वलविभक्तिश्रवणप्रसङ्गः। कश्चिदिति। शिष्यमाणस्यह्येकवचनश्रवणप्रसङ्ग एव। एकविभक्त्यन्तानामिति। सप्तमीनिर्देशमप-
पास्यषष्ठीनिर्देशः कर्तव्यइत्यर्थः। किंप्रयोजनमिति। एकग्रहणस्यप्रयोजनप्रश्नः षष्ठीनिर्देशस्यतुप्रयोजनमुक्तमेवकश्चिद्वचन
लोपः परिहृतइति। नवेति। एकविभक्त्यन्तानामितिनकर्तव्यमेवप्रयोजनाभावात्तत्रश्चानुत्पन्नायामेवविभक्तौप्रातिपदिकाना
मेकशेषेकृतेशिष्यमाणस्यनिवर्तमानार्थाभिधानाद्विवचनबहुवचनसिद्धिः। विप्रतिषिद्धाविति। चतुर्थ्यन्तस्यशेषेब्राह्मणे-

यदिपुनः एथक्त्वैषांविभक्त्यन्तानामेकशेषउच्येत। किंकृतंभवति। कश्चिद्वचनलोपः परिहृतोभवति। विभ
क्त्यन्तानामेकशेषेविभक्त्यन्तानामेवतुनिवृत्तिर्भवति एकविभक्त्यन्तानामितितुपृथग्विभक्तिप्रतिषेधार्थम्।
एकविभक्त्यन्तानामितितुवक्तव्यम्। किंप्रयोजनम्। पृथग् विभक्तिप्रतिषेधार्थंपृथग्विभक्त्यन्तानांमाभूत्। ब्रा
ह्मणाभ्यांचदेहिब्राह्मणेभ्यांचकृतम्। नवार्थविप्रतिषेधाद्युगपद्वचनाभावः। नवाएषदोषः। किंकारणम्। अर्थ
विप्रतिषेधात्। विप्रतिषिद्धावेतावर्थौकर्तासंप्रदानमिति। अशक्यौयुगपन्निर्देष्टुंतयोर्विप्रतिषिद्धत्वाद्युगप
द्वचनंनभविष्यति। अनेकार्थाश्रयश्चपुनरेकशेषः। अनेकमर्थंसंप्रत्याययिष्यामीतिएकशेषआरभ्यते। तस्मा
न्नैकशब्दत्वम्। तस्मादेकशब्दत्वंनभविष्यति। अयंतर्हिदोषः। कश्चिद्वचनलोपोद्विवचनबहुवचनविधिर्द्वन्द्व
प्रतिषेधश्चेति। यदिपुनःप्रातिपदिकानामेकशेषउच्येत। किंकृतंभवति। वचनलोपः परिहृतोभवति।

भ्यइत्युक्तेचकर्तृत्वंनप्रतीयते। तृतीयान्तस्यशेषेब्राह्मणैरित्युक्तेसंप्रदानत्वंनगम्यतेयश्चशब्दोनेकार्थप्रत्यायनायप्रभवति
सशिष्यतेनान्यः। अयंतर्हीति। एकविभक्त्यन्तानामितितुक्रियमाणेप्रत्युतदोषः। कश्चिदिति। शिष्यमाणस्यैकवचनस्यलोपोव
क्तव्यः। यदिपुनरिति। एकविभक्ताविति नक्रियतेह्रस्वोनपुंसकइत्यतःप्रातिपदिकग्रहणमनुवर्त्यानुत्पन्नायामेवविभक्तौ राम॰
सरूपाणांप्रातिपदिकानामेकशेषः क्रियते। तिङन्तेषुकथम्। उच्यते। लावस्थायामेवपचत्पचत्इतिस्थितेकृदन्तत्वात् २१५
प्रातिपदिकत्वेसत्येकशेषः।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातृमात्रोरिति। कथमयं निर्देशः यावतैकशेषेण भाव्यम्। एकशेषे सति विवक्षितार्थानवगमात् तदभावः। एवं ह्यत्रार्थो विवक्षितः जननीवाचिनः परिच्छेत्तृवाचिनश्च मातृशब्दस्यैकशेषप्रतिषेधो वक्तव्य इति। एष चार्थो मात्रोरित्युक्तेन गम्यते। अथ मतमेतदिति। अर्थविप्रतिषेधादत्रैकशेषो न भवति। कृते ह्येकशेषे ताभिरित्यनुप्रयोगे पुमर्थो न प्रतीयते तैरिति चोक्ते स्त्र्यर्थो न वगतिः। अभ्युपगम्यवादेन त्वेतदुच्यते विभक्त्यन्तानां सारूप्य इति। प्रातिपदिकावस्थायां सर्वदा सारूप्यात् सर्वत्रैकशेषः स्यात्। विभक्त्यन्तानां तु सरूपाणामेकशेषे यत्रैव तृतीयादौ विभक्तौ सारूप्यं तत्रैवैकशेषो न प्रथमाद्वितीययोरित्यर्थः। हरिते

प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधः सरूपत्वात्। प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्यः माता च जनयित्री मातारौ च धान्यस्य मातृमातारः। किं कारणम्। सरूपत्वात्। सरूपाणि ह्येतानि प्रातिपदिकानि। किमुच्यते प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्य इति न पुनर्यस्यापि विभक्त्यन्तानामेकशेषस्तेनापि मातृमात्रोः प्रतिषेधो वक्तव्यः स्यात्। तस्यापि ह्येतानि कानिचिद्विभक्त्यन्तानि सरूपाणि मातृभ्यां च मातृभ्यां चेति। अथ मतमेतद्विभक्त्यन्तानां सारूप्ये भवितव्यमेवैकशेषेणेति प्रातिपदिकानामेवैकशेषे दोषो भवति। एवं च कृत्वा चोद्यते॥ हरितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानम्॥ हरितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानं कर्तव्यम्। हरितस्य स्त्री हरिणी हरिणस्यापि हरिणी हरिणी च हरिणी च हरिण्यौ। श्येतस्य स्त्री श्येनी श्येनस्यापि स्त्री श्येनी श्येनी च श्येनी च श्येन्यौ। रोहितस्य स्त्री रोहिणी रोहिणस्यापि रोहिणी रोहिणी च रोहिणी च रोहिण्यौ॥ न वा पदस्यार्थे प्रयोगात्॥ न वा एष दोषः।

ति। एषां प्रातिपदिकावस्थायां वैरूप्यमित्येकशेषो न प्राप्नोति विभक्तौ तु सारूप्यसद्भावात् सिध्यत्येकशेषः। हरितस्य स्त्रीति। नानेन पुंयोगः प्रतिपाद्यते तत्र हि ङीषा भाव्यं हरितीति किं तर्हि अयमर्थः हरितशब्दस्य हरिणी सा च स्त्री। नवेति। प्रातिपदिकग्रहणं विच्छिन्नत्वादिह नानुवर्तते। सारूप्यं चेहाश्रीयते। न च प्रातिपदिकानि लोके प्रयुज्यन्ते किं तर्हि पदान्येव। शास्त्रेऽपि प्रकृत्याद्युपदेशो नानुमेयत्वात् प्रातिपदिकानां प्रयोगाभावः। तेन पदावस्थायां मातृमातार इति वैरूप्यादेकशेषाभावः। हरिण्याविस्यादौ तु भवतीति दोषप्रतिविधानं कृतम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ अपर आहेति। पक्षासंभवप्रतिपादनार्थमिदमुक्तमित्यर्थः। इदानीं भाष्यकार एनं पक्षं समर्थयितुमाह। अथानेनेति। विभ-
२९६ क्तिः सारूप्येणेति। एकविभक्तिर्नैकशेषनिमित्तत्वेनेहोपात्ता किं तर्हि सारूप्योपलक्षणार्था एकविभक्तौ लौकिके प्रयोगे यानि-
सरूपाणि दृष्टानि तेषामेकशेषः स चानैमित्तिकत्वाद्विभक्तिं नापेक्षते भाष्ये प्रातिपदिकग्रहणस्योपलक्षणार्थत्वात् ङ्यन्ता-
दीनामपि हरिण्यादीनामेकशेषो भवति। स्वरभिन्नानामिति वचनाङ्कीबन्तस्य हरिणीशब्दस्य शेषः। येत्वाहुर्हरितहरिणयो-
रेवैकशेषे कृते उभयवाचित्वेऽप्यन्यतरस्य वर्णवाचित्वं जातिवाचित्वं चाश्रित्य स्त्रीप्रत्ययः क्रियत इति तेषां पक्षे स्वरभे

किं कारणम्। पदस्यार्थे प्रयोगात्। पदमर्थे प्रयुज्यते। विभक्त्यन्तं च पदम्। रूपं चेहाश्रीयते रूपनिर्ग्रह-
श्च शब्दस्य नान्तरेण लौकिकं प्रयोगम्। तस्मिंश्च लौकिके प्रयोगे सरूपाण्येतानि। अपर आह न वा पद-
स्यार्थे प्रयोगात् न वा एष पक्ष एवास्ति प्रातिपदिकानामेकशेष इति। किं कारणम्। पदस्यार्थे प्रयो-
गात्। पदमर्थे प्रयुज्यते विभक्त्यन्तं च पदम्। रूपं चेहाश्रीयते रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकि-
कं प्रयोगम्। तस्मिंश्च लौकिके प्रयोगे प्रातिपदिकानां प्रयोगो नास्ति। अथानेन पक्षेणार्थः स्यात्प्राति-
पदिकानामेकशेष इति। बाढमर्थः। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। एतेनैवाभिहि-
तं सूत्रेण सरूपाणामेकशेष एकविभक्ताविति कथम्। विभक्तिः सारूप्येणाश्रीयते। अनैमित्तिक ए-
कशेषः एकविभक्तौ लौकिके प्रयोगे यानि सरूपाणि तेषामेकशेषो भवति। क्व। यत्र वा तत्र वेति
। अथानेन पक्षेणार्थः स्याद्विभक्त्यन्तानामेकशेष इति। बाढमर्थः। किं वक्तव्यमेतत्। न हि। कथमनु-
च्यमानं गंस्यते। एतदप्येतेनैवाभिहितं सूत्रेण। सरूपाणामेकशेष एकविभक्ताविति। कथम्। नेदं पारि-
भाषिक्या विभक्तेर्ग्रहणं किं तर्हि अन्वर्थग्रहणं विभागो विभक्तिरिति। एकविभागे यानि सरूपाणि ते-
षामेकशेषो भवतीति।

दप्रसङ्गः। मातृमात्रोस्तु क्वचित्सारूप्येऽप्यर्थविप्रतिषेधादेकशेषाभावः। यत्र वेति। अनेनानैमित्तिकत्वमेव प्रतिपाद्यते। राम:
विभाग इति। कर्मादिकारकमिह विभक्तिशब्देनोच्यते तेन हि प्रातिपदिकार्थो विभागेनावस्थाप्यते। तत्र कस्मिंश्चित्कारके २९६
विवक्षिते तन्निमित्तया विभक्त्या भाव्यमित्येकविभक्त्यन्तानां सरूपाणामेकशेषः सिध्यति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कश्चिदिति। अवस्थितस्य वचनस्य लोपो वक्तव्यः। तस्मिन्नपि कृते प्रत्ययलक्षणेन प्रत्ययान्तत्वात् प्रातिपदिकसंज्ञाया अभावाद् द्विवचनबहुवचनेन सिध्यत इति। अपि वक्तव्ये नङिसंबुद्ध्योरिति तु ज्ञापकं नलोपविषयमेव। ऽथाप्यविशेषेण तु प्रत्ययस्य प्रातिपदिकसंज्ञायां ज्ञापकम्। एवमप्येकार्थत्वाच्छिष्यमाणस्य द्विवचनबहुवचनासिद्धिरेवासहविवक्षायामिति। एवं चैकैकस्यानेकार्थाभिधानाद् द्विवचनबहुवचनान्तानामेवैकशेषः। न तर्हीति। नित्येनैकशेषेण भवितव्यमिति वाक्यं न प्राप्नोतीत्यर्थः। इतरेभिन्नार्थत्वाद् एकशेषवृत्त्या वाक्यं न बाध्यत इत्याह। नैतदिति। प्रत्येकमत्र विवक्षेत्यर्थः। बालास्तु प्रक्रियावाक्येनैव व्युत्पाद्यन्त इत्याह। ऽथापीति। यथाजातीयकानामिति। द्रव्यवाचिनामित्यर्थः।

ननु चोक्तं कश्चिद्वचनलोपो द्विवचनबहुवचनविधिर्द्वन्द्वप्रतिषेधश्चेति। नैष दोषः। यत्तावदुच्यते। कश्चिद्वचनलोपो द्विवचनबहुवचनविधिरिति। सहविवक्षायामेकशेषः। युगपद्विवक्षायामेकशेषेण भवितव्यम्। न तर्हीदानीमिदं भवति वृक्षश्च वृक्षौ। वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति। नैतत् सहविवक्षायां भवति। अथापि निदर्शयितुं बुद्धिरेवं निदर्शयितव्यम्। वृक्षौ च वृक्षौ च वृक्षौ। वृक्षाश्च वृक्षाश्च वृक्षाश्च वृक्षा इति। यदप्युच्यते द्वन्द्वप्रतिषेधश्च वक्तव्य इति। नैष दोषः। अनवकाश एकशेषो द्वन्द्वं बाधिष्यते। ननु चोक्तं सावकाश एकशेषः। कोऽवकाशः। तिङन्तान्यवकाश इति। न तिङन्तान्येकशेषारम्भं प्रयोजयन्ति। किं कारणम्। यथाजातीयकानां द्वितीयस्य पदस्य प्रयोगे सामर्थ्यमस्ति तथाजातीयकानामेकशेषः। न च तिङन्तानां द्वितीयपदस्य प्रयोगे सामर्थ्यमस्ति। किं कारणम्। एका हि क्रिया। एकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति। यदि तर्ह्येका क्रिया द्विवचनबहुवचनानि न सिध्यन्ति पचतः पचन्तीति। नैतानि क्रियापेक्षाणि। किं तर्हि साधनापेक्षाणि।

एका हीति। आख्यातवाच्या क्रिया सर्वैव निवृत्तभेदा प्रतीयते। भवद्भिरास्यत इत्यादौ वस्तुस्थित्या कर्तृभेदाद् भेदेऽपि तिङन्ताद् भेदस्यानवगमात्। प्रकर्षाभ्यावृत्त्यादयस्तु भेदनिबन्धना आश्रयप्रकर्षाभ्यावृत्त्यादिभेदनिमित्ता नैकत्वं क्रियायां विघ्नन्ति। नैतानीति। कर्तृकर्मसमवेतसंख्याभिधायिनी द्विवचनबहुवचने इत्यर्थः। ननु कर्तृकर्मणोर्लविधानादनेकस्मिन् कारके अनेकेनैव लकारेण भवितव्यम्। भवत्वनेको लकारः लकारजातेरव्यवधानाल्लस्येत्यत्र लजात्याश्रयादनेकस्यापि लस्य स्थाने अर्थत आन्तर्याद् द्विवचनबहुवचने भविष्यत इत्यदोषः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुल्यजातीयस्येति। अवयवानांसमुदायार्थतन्त्रत्वात्समुदायविभक्त्यैवावयवार्थस्यसंख्यावगमात्पृथगवयवेभ्योवि-
भक्तिर्नोत्पद्यतेविरूपसमुदायेतुसुबन्तानांद्वन्द्ववचनेनायंन्यायोबाध्यतेइत्यवयवेभ्यएवविभक्त्युत्पत्तिः। सुबन्तानामि
ति। यद्यपिगतिकारकोपपदानांकृद्भिःसहसमासवचनंप्राक्सुबुत्पत्तेरित्युच्यतेतथापिपूर्वपदंतत्रसुबन्तमेवेतिसोपितद
पेक्षयासुबन्तानामेवसमासः। अन्यथानलोपादीनिपदकार्याणिपूर्वपदेनस्युः। उत्तरपदंभवतुतत्रासुबन्तम्। इहराज-
नूराजनूऔइतिस्थितेपरत्वान्नित्यत्वाच्चोपधावादीर्घेकृतेवैरूप्यादेकशेषोनप्राप्नोति। उच्यते। विरूपाणामपिसमाना
र्थानामितिभविष्यति अन्तरङ्गत्वाद्वा। दीर्घत्वंहिनान्तरङ्गम्। उपधांविभक्तिविशेषमसंबुद्धिंसर्वनामस्थानमपेक्षतइतिब-
हिरङ्गम्। सर्वत्रेति। षट्पक्षाइहोपक्षिप्ताः पृथग्विभक्तौपरतएकशेषः। एकवचनान्तानांवासमासाद्वैकस्यांविभक्तौपरतःसरूप-

अथवापुनरस्त्वेकविभक्ताविति। ननुचोक्तमेकविभक्ताविति चेन्नाभावाद्विभक्तेरिति। नैषदोषः। परिहृतमेतत्।
अर्थवत्प्रातिपदिकमितिप्रातिपदिकसंज्ञाभविष्यतीति। ननुचोक्तंनियमान्नप्राप्नोतिअर्थवत्समुदायानांसमा
सग्रहणंनियमार्थमिति। नैषदोषः। तुल्यजातीयस्य.नियमः। कश्चतुल्यजातीयः। यथाजातीयकानांसमासः। क
थंजातीयकानांसमासः। सुबन्तानाम्   ॥ सर्वत्रापत्यादिषूपसंख्यानम्॥ सर्वेषु पक्षेष्वपत्यादिषूपसंख्यानं
कर्तव्यम्। भिक्षाणांसमूहोभैक्षमिति। सर्वत्रेत्युच्यतेप्रातिपदिकानांचैकशेषेसिद्धम्। अपत्यादिष्वित्युच्य
तेबहवश्चापत्यादयः। गर्गस्यापत्यंबहवोगर्गाः।

समुदायाद्वाविहितायामेकविभक्तौपरतः प्रातिपदिकानांवासहविवक्षायांप्रत्येकंद्विवचनबहुवचनान्तानामिति। तत्रपश्चिमं
पक्षत्रयमङ्गीकृतम्। तत्रभिक्षाभिक्षाभिक्षाआम्अइतिस्थितेसर्वविधिभ्योलुग्विधेर्बलवत्त्वाद्लुकिकृतेविभक्त्यभावादे
कविभक्तौपरतोविधीयमानएकशेषोनप्राप्नोतिप्रत्ययलक्षणंचनास्तिनलुमताङ्गस्येतिप्रतिषेधात्प्रातिपदिकैकशेषपक्षे
समर्थयदङ्याप्प्रातिपदिकंतस्मात्तद्धिताइत्याबन्तादणिकृतेपरत्वादादिवृद्धौकृतायांवैरूप्यादेकशेषाप्रसङ्गः। यदातुस
हविवक्षायांविभक्त्यन्तानामेकशेषः सुबन्ताच्चतद्धितइत्ययंपक्षस्तदासुबन्तसमुदायात्तद्धिताभावात्पूर्वमेकशेषःपश्चा
त्तद्धितइतिनकश्चिद्दोषः। प्रातिपदिकानांचेति। अनैमित्तिकत्वादन्तरङ्गत्वात्पूर्वमेकशेषःपश्चाद्वृद्धिरथवातद्धितएवप रामः
श्चादुत्पद्यतइतिभावः।   ॥ २१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बह्वश्वयञ इति। प्रत्ययार्थशब्दनिवेशाद् बहुष्वपत्येषु बह्वो यञ उत्पाद्याः। तत्र गार्ग्य य य य इति स्थिते समुदायस्य तद्धितान्तत्वा
त् प्रातिपदिकत्वात्तत एकाविभक्तिस्तत्र प्रथमस्य यशब्दस्य प्रकृतिसंनिपातकृतं वैरूप्यमित्येकशेषो न प्राप्नोति। ननु प्रकृतिं
विहाय यशब्दानां सारूप्यादेकशेषो विधास्यते। नैतदस्ति। विभक्त्युत्पत्तावभ्यन्तरीकृता प्रकृतिर्विभक्तिलक्षितसारूप्या-
श्रये एकशेषे कथं हातुं शक्यते। न च यञां प्रकृत्यर्थोनपेक्षः समुदायार्थः तत्कथं प्रकृतिवर्ज्यता। यदापि सह विवक्षायां वि
भक्त्यन्तानामेकशेष इति पक्षः तदा गार्ग्य य अस् य अस् य अस् इति स्थिते पूर्वस्य यअस्शब्दस्य प्रकृतिसन्निपाताद्वै-
रूप्यं प्रातिपदिकैकशेषपक्षेऽपि तथैव वैरूप्यमित्येकशेषो न प्राप्नोति। एवं प्रकृतयोऽपीति। एकैकस्यापत्यस्य प्रकृत्य-

एका प्रकृतिर्बह्वश्वयञः। असारूप्यादेकशेषो न प्राप्नोति। ननु च यथैव बह्वो यञः एवं प्रकृतयोऽपि ब
ह्व्यः स्युः। नैवं शक्यमिह हि दोषः स्याद् गर्गा वत्सा बिदा उर्वा इति। यञ्यो बहुषञ्यो बहुष्वित्युच्यमानो लुङ्
प्राप्नोति। माभूदेवम्। यञन्तं यद्बहुषु यञन्तं यद्बहुष्वित्येवं भविष्यति। ननु चोक्तं नैवं शक्यमिह हि दोषः स्या
त्काश्यपप्रतिकृतयः काश्यपा इति। नैष दोषः। लौकिकस्य तत्र गोत्रस्य ग्रहणं न चैतल्लौकिकं गोत्रम्।
अथवा पुनरस्तु एका प्रकृतिर्बह्वश्वयञः। ननु चोक्तमसारूप्यादेकशेषो न प्राप्नोतीति। सिद्धं तु स
मानार्थानामेकशेषवचनात्।

र्थेन योगात् प्रधानभेदे च गुणस्याऽऽवृत्त्या गार्ग्यशब्दानामेवैकशेषः क्रियत इत्यर्थः। यञ्यो बहुष्विति। यदा यञामेवैकशे
षः क्रियते तदाशिष्यमाणो यशब्दो बहुषु वर्तत इति लुक् सिध्यति गार्ग्यशब्दानां त्वेकशेषे यशब्दो बहुषु न वर्तते किं त
र्हि यशब्दान्त इति लुङ् न सिध्यति। यञन्तं यदिति। तेनैवं चेत्कृतं बहुत्वमित्यपि तदन्तेनेति व्याख्यायते। काश्यपा इति।
एकस्मिन् काश्यपापत्येऽञि कृते तत्प्रतिकृति ति बहुत्वे काश्यपशब्दानामेकशेषे कृते अञन्तं बहुषु वर्तत इति लु
क्प्रसङ्गः। लौकिकस्येति। अपत्यस्येत्यर्थः। न चैतदिति। प्रतिकृतिवृत्तित्वान्नैतदञन्तमपत्यवाचि। एका प्रकृति
रिति। प्रकृत्यर्थस्यैकत्वात् तेन च बहूनामप्यपत्यानां संबन्धसंभवात्।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सिद्धं त्विति। सत्यपि प्रकृतिसंनिपातकृते एकस्यैवेह येषां सर्वेषां प्रकृत्यर्थविशिष्टापत्याभिधायित्वात् समानार्थत्वमस्ति। वक्रद-
ण्डश्च कुटिलदण्डश्चेति द्वन्द्वनिवृत्त्यर्थमेतद्वक्तव्यं तेनैवान्यो बहुव्रीह्यपि पक्षे आश्रीयमाणे द्वन्द्वं सिध्यति। यदा त्वजन्तं यद्व बहु-
व्रीह्याश्रीयते तदा व्यविकन्यायाश्रयणात् वक्रदण्डश्च कुटिलदण्डश्चेति वाक्यमेव भवति न तु द्वन्द्व इति न वक्तव्यो विरू-
पाणामेकार्थानामेकशेषः। स्वरभिन्नानामिति। स्वरेण भिन्नानामित्यर्थः। अक्षश्चेति। एको क्षशब्दोऽच्प्रत्ययान्त इति प्रत्ययान्त-
त्वादन्तोदात्तः द्वितीयस्तु घञन्तत्वादाद्युदात्तस्तस्यैव शेषो भवति एको मीमांसकशब्दो ण्वुलन्तत्वान्मध्योदात्तः परस्तु मीमां

सिद्धमेतत्। कथम्। समानार्थानामेकशेषो भवतीति वक्तव्यम्। यदि समानार्थानामेकशेष उच्यते। कथमक्षाः
पादा माषा इति। नानार्थानामपि सरूपाणाम्। नानार्थानामपि सरूपाणामेकशेषो वक्तव्यः। एकार्था-
नामपि विरूपाणाम्। एकार्थानामपि विरूपाणामेकशेषो वक्तव्यः। वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ
कुटिलदण्डाविति वा॥ स्वरभिन्नानां यस्योत्तरस्वरविधिः॥ स्वरभिन्नानां यस्योत्तरः स्वरविधिस्तस्यैकशेषो व-
क्तव्यः। अक्षश्च अक्षश्च अक्षौ मीमांसकश्च मीमांसकश्च मीमांसकौ। इह कस्मान्न भवति। एकश्च एक-
श्च द्वौ च द्वौ चेति। संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाच्चानेकशेषः। संख्याया अर्थासंप्रत्ययादेकशे-
षो न भविष्यति। न ह्येकावित्यनेनार्थो गम्यते। अन्यपदार्थत्वाच्च संख्याया एकशेषो न भविष्यति। एकश्च
एकश्चेत्यस्य द्वावित्यर्थः। द्वौ च द्वौ चेत्यस्य चत्वार इत्यर्थः। नैतौ स्तः परिहारौ। यत्तावदुच्यते संख्याया अर्था-
संप्रत्ययादिति। अर्थासंप्रत्ययेपि हि सत्येकशेषो भवति। तद्यथा।

सकधीते इत्येतस्मात् क्रमादिभ्यो वुन्नित्याद्युदात्तस्तस्य शेषः। एकश्चेति। द्वन्द्वो यत्रानभिधानान्न भवति। अर्थासंप्रत्ययादिति। यत्रैकः
शब्दो नेकमर्थमभिधातुं शक्नोति तत्रैकशेषो नान्यत्र। प्रयुक्तानामन्वाख्यानात्। एकाविति चोक्तेऽसहायादिरर्थो गम्यते न
तु द्वावित्यर्थः। अन्यपदार्थत्वाच्चेति। असंदिग्धेन पदान्तरेण यमर्थः प्रत्याय्यत इत्यर्थः। ॥

CC-0. In Public Domain. Digitization by eGangotri

गार्ग्याविति। गार्ग्यश्च गार्ग्यश्चेत्यस्याप्यर्थस्य संभवात् संदेहादर्थासंप्रत्ययः। उत्तरकालं तु प्रकरणादिवशात् संदेहनिवृत्तिः। ननु वृद्धो यूनेति वचनात् संदेहेऽप्येकशेषः स्यात् अस्य तु निःसंदेहविषयसंभवात्कथं संदिग्धविषये प्रवृत्तिः। नैतदस्ति। अक्षादिष्वपि संदेहविषयेष्वस्य प्रवृत्तिदर्शनात्। एवं तर्हीति। अर्थासंप्रत्यये सत्यन्यपदार्थत्वादित्ययं हेत्वर्थः। यदि तर्हीति। प्रत्यर्थं शब्दनिवेशादेकशेषे सति एकस्यानेकार्थत्वं संभवति। यदा तु समुदायवाचित्वं द्व्यादीनामभ्युपगम्यते तदा वनादिवदेकवचनप्रसङ्गः। यत्तु वनानीति बहुवचनं तत्समुदायप्रचयविवक्षायां न त्ववयवभेदविवक्षायाम्। समुदायादिति। समुदायवाचिन इत्यर्थः। किंकृतमिति। एकश्चैकश्चेति विग्रहे कथं द्विशब्दः प्रवर्तत इति प्रश्नः। अन्योन्यकृतमिति। प

गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। न चोच्यते वृद्धयुवानाविति भवति चैकशेषः। यदप्युच्यते अन्यपदार्थत्वाच्चेति। अन्यपदार्थेऽप्येकशेषो भवति। तद्यथा। विंशतिश्च विंशतिश्च विंशती इति। तयोश्चत्वारिंशदित्यर्थः। एवं तर्हि नेमौ पृथक्परिहारौ एकपरिहारोऽयम्। संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाच्चेति। यत्र ह्यर्थासंप्रत्यय एव वा अन्यपदार्थत्वं वा भवति तत्रैकशेषः गार्ग्यौ विंशती इति यथा। अथवा नेमे एकशेषशब्दाः। यदि तर्हि नेमे एकशेषशब्दाः समुदायशब्दास्तर्हि भवन्ति। तत्र को दोषः। एकवचनं प्राप्नोति एकार्था हि समुदाया भवन्ति यथा यूथं शतं वनमिति। सन्तु तर्ह्येकशेषशब्दाः। किंकृतं सारूप्यम्। अन्योन्यकृतं सारूप्यम्। सन्ति पुनः केचिदन्येऽपि शब्दाः येषामन्योन्यकृतो भावः। सन्तीत्याह। माता पिता भ्रातेति। विषम उपन्यासः। सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्तन्ते। इह पुनरेकेनाप्यपाये न भवति चत्वार इति। अन्यदिदानीमेतदुच्यते सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्तन्त इति।

रस्परापेक्षया द्वित्वोत्पत्तौ सत्यां प्रक्रियावाक्यमिदं भवति द्वौ च द्वौ चेति। तत्रैको द्विशब्दः शिष्यते। मातेति। यथा सुतं जन्मनः प्रागलब्धमातृव्यपदेशं स्त्री पश्चाल्लभते एवं संख्यान्तरापेक्षायां सत्यां पूर्वमप्रवृत्तो द्विशब्दः पश्चात्प्रवर्तत इत्यर्थः। अपायेष्वपीति। पुत्रविनाशेऽपि पितृव्यपदेशो न निवर्तते पितृविनाशे पुत्रव्यपदेशः। चतुर्णां त्वेकापायेनास्ति चतुःशब्दस्य प्रवृत्तिः। अन्यदिदानीमिति। अवश्यं साधर्म्ये सति वैधर्म्येणाभाव्यम्। अन्यथा तत्त्वमेव स्यान्न तु साधर्म्यम्। यत्र साधर्म्यं तत्र वैधर्म्योद्भावनेन कश्चिदपि हेतुः स्यादित्यर्थः। मात्रादयश्च शब्दाः संबन्ध्यन्तरापेक्षयैकस्मिन्नाश्रये वर्तन्त इति संबन्ध्यन्तरविनाशेऽपि आश्रयसद्भावाद्युक्तं यत्प्रवर्तन्ते। द्व्यादयस्तु समुदायनिवेशिन एकापाये तत्समुदायाभावात्कथं प्रवर्तेरन्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतच्चवार्तमिति। एतद्युक्तम्। यदाश्रयसंनिधानादेकापायेपिमात्रादयस्तदपेक्षाः प्रवर्तन्त इत्यर्थः। इदानीमेतद्वैध-म्यैरहितं द्वितीयं दृष्टान्तं वक्ति। एकैक इति। यथोद्यन्तृणां परस्परसंनिधिकृतं कर्तृत्वमेकैकापाये च निवर्तते तथा-द्यादिव्यपदेशोपीत्यर्थः। कथं तत्रेति। न्यायमित्यध्याहारः। एकैक इति। कर्तृत्वमेकैकापाये परस्परनिरपेक्षमित्यर्थः। कारणमुद्यमनं चेदि-ति। कर्तृत्वप्रतीताविस्यर्थः। कार्यकल्पितत्वाच्छक्तीनामेवमुक्तम्। तत्तुल्यमिति। तेनोद्यन्त्रा तुल्यं द्वितीयमुद्यन्तारमन्तरे-णेत्यर्थः। अथवा तत्तुल्यमिति द्व्यादिशब्देष्वपि तत्तुल्यमित्यर्थः। प्रथमेति। एकस्मिन् पुरुषे क्रियाया एकत्वान्ना-

यत्तु भवानस्मांश्चोदयति सन्ति पुनः केचिदन्येपि शब्दा येषामन्योन्यकृतो भाव इति तत्रैते स्माभिरुपन्य-स्ताः तत्रैतद्भवानाह सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्तन्त इति। एतच्च वार्तम्। एकैको नोद्यन्तुं भारं शक्नोति यत्कथं तत्र। एकैकः कर्ता स्यात्सर्वे वास्तु कथं युक्तम्। कारणमुद्यमनं चेन्नोद्यच्छति चान्तरे-ण तत्तुल्यम्। तस्मात्पृथक्पृथक्शक्तेः कर्तारः सव्यपेक्षास्तु। प्रथममध्यमोत्तमानामेकशेषोऽसरूपत्वात्। प्रथ-ममध्यमोत्तमानामेकशेषो वक्तव्यः। पचति च पचसि च पचथः। पचसि च पचामि च पचावः। पचति च प-चसि च पचामि च पचामः। किं पुनः कारणं न सिध्यति। असरूपत्वात्। द्विवचनबहुवचनाप्रसिद्धिरेका-र्थत्वात्। द्विवचनबहुवचनयोश्चाप्रसिद्धिः। किं कारणमेकार्थत्वादेकोयमवशिष्यते तेनानेन तदर्थे-न भवितव्यम्। किमर्थेन। यदर्थ एकः। किमर्थश्चैकः। एक एकपदार्थः। नैकार्थ्यम्। नायमेकार्थः। किं तर्हि। द्व्यर्थो बह्वर्थश्च नैकार्थ्यमिति चेदारम्भानर्थक्यम्। नैकार्थ्यमिति चेदेकशेषारम्भोनर्थकः स्यात्। इह हि शब्दस्य स्वाभाविकी वानेकार्थता स्यात्।

स्यैकशेषः पुरुषभेदेन तु प्रत्यक्षपरोक्षादिभेदे विरोधात् क्रियाया अनेकत्वादेकशेषो वक्तव्यः। कृते चैकशेषे प्रकर-णादिवशादर्थविशेषावसायः। यदा तु युष्मदस्मदी एवानेकार्थाभिधानसमर्थे इति पक्षः। अत्रापि च निवृत्तभेदाया एव क्रियाया आख्यातेनाभिधानं तदेकशेषो न वक्तव्यः। द्विवचनेति। प्रत्यर्थं शब्दनिवेशे एकैकः शब्दः एकैकार्था-भिधायीति सहविवक्षायां निवृत्तेषु शब्दान्तरेषु शिष्यमाणेन शब्देन स्वस्मिन्नेवैकत्रार्थे अवस्थेयमिति भावः। स-

र्वेषु पक्षेष्वयं दोषः प्रातिपदिकैकशेषे द्विवचनबहुवचनानुत्पत्तिप्रसङ्गः। विभक्त्यन्तानां विभक्तौ वापरत एकशेषेऽ-र्थाभावात् द्विदचनबहुवचनयोर्निवृत्तिप्रसङ्गः। अथ स्वभावतः शिष्यमाणोऽनेकार्थः किमेकशेषेण॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचनिकी वेति। यद्यपि सर्वमेव स्वाभाविकं तथापि यत्र प्रयोगविप्रयोगौ दृश्येते तत्र विप्रयोगनिवारणाय यदुच्यते तद्वाचनि
कमभिधीयते। स च द्व्यर्थ इति। सरूपाणामेकशेषोऽनेकार्थश्चैकविभक्ताविति वक्तव्यमित्यर्थः। सिद्धमिति। एकशेषारम्भसामर्थ्या
दयमर्थो गम्यते शिष्यमाणः शब्दोऽनेकार्थाभिधायीति। एकेन ह्यनेकार्थाऽभिधानायैकशेषः क्रियते। एकार्थाभिधाने त्वने-
कशब्दाप्रसङ्गादनर्थक एकशेषः स्यादित्यर्थः। इतर एतत्सामर्थ्यमजानन्नाह। कथमिति। तच्चैकशेषकृतमिति। एकशेषवि

वाचनिकी वा। तद्यदि तावत्स्वाभाविकी अशिष्य एकशेष एकेनोक्तत्वात्। अशिष्य एकशेषः। किं कारणम्। एके
नोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति। अथ वाचनिकी तद्वक्तव्यमेको
यमवशिष्यते। स च द्व्यर्थो भवति बह्वर्थश्चेति। न वक्तव्यम्। सिद्धमेकशेष इत्येव। कथं पुनरेकोयमवशिष्यत इ
त्यनेन द्व्यर्थता बह्वर्थता च शक्या लब्धुम्। तच्चैकशेषकृतं न ह्यन्तरेण तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य
गतिर्भवति। पश्यामश्च पुनरन्तरेणापि तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भवतीति। अग्निचित्सोम
सुदिति यथा। ते मन्यामहे लोपकृतमेतद्येनात्र अन्तरेणापि तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भ
वतीति। एवमिहाप्येकशेषकृतमेतद्येनात्रैकोयमवशिष्यत इत्यनेन द्व्यर्थता बह्वर्थता च भवति। उच्येत तर्हि नत्वनु
गम्येत। यो हि गामश्व इति ब्रूयादश्वं वा गौरिति न जातुचित्संप्रत्ययः स्यात् तेनानेकार्थाभिधाने यत्नं कु
र्वता वश्यं लोकः पृष्ठतोऽनुगन्तव्यः। केष्वर्थेषु लौकिकाः कान् शब्दान्प्रयुञ्जत इति। लोके चैकस्मिन्वृ
क्ष इति प्रयुञ्जते द्वयोर्वृक्षौ बहुषु वृक्षा इति। यदि तर्हि लोकोऽवश्यं शब्देषु प्रमाणं किमर्थमेकशेष आरभ्य
ते। अथ किमर्थं लोप आरभ्यते। प्रत्ययलक्षणमाचार्यः प्रार्थयमानो लोपमारभते एकशेषारम्भे पुनरस्य न
किंचित्प्रयोजनमस्ति। ननु चोक्तं प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानमिति। यदि चैकेनानेकस्याभि
धानं स्यात् न प्रत्यर्थं शब्दनिवेशः कृतः स्यात्।

धानेनैतत्प्रतिपादितमित्यर्थः। लोपकृतमिति। लोपद्वारेणैतत्संगृहीतमित्यर्थः। अनेनेति। एकशेषविधानेन। उच्येतेति। व
चनादनेकार्थकार्याणि प्रवर्तन्ताम्। यथा जात्याख्यायामेकस्मिन्निति। न त्वेकार्थः शब्द एकशेषविधानेनानेकार्थः संपद्यत इत्य
र्थः। गामश्व इति। अश्वधर्मसमारोपः केवलं प्रतीयते न तु तात्त्विकमश्वत्वमित्यर्थः। यदि तर्हीति। यदि च लोकः प्रमाणमि
त्यर्थः। उच्येत तत्रेतः प्रभृति सर्वो ग्रन्थ एकशेषप्रत्याख्यानवादिनः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तदपिप्रत्यर्थमेवेति। अर्थो ह्यभिधेयमुच्यते यश्च द्यावार्थः शब्दो नासौ ह्यर्थं तं जहाति न हूर्थश्च बहूर्थं तां रोदसी द्यावापृथिव्यौ इति यथेत्यर्थः। यावना
मिति। प्लक्षश्च न्यग्रोधश्चेति दर्शनादनारब्धस्य एकशेषे अनेकार्थत्वे कस्य न स्यात्। एकेनापीति। सहविवक्षायामेक एव शब्द उद्भूतावय
वभेदं समुदायमभिधत्त इत्यर्थः। प्लक्षन्यग्रोधाविति। अत्रापि सहविवक्षायां समुदायार्थप्रादुर्भावादेकेनैव समुदायस्य प्रति
पादनाद् द्वितीयस्य प्रयोगो न प्राप्नोतीत्यर्थः। अनुक्तत्वादिति। प्लक्षावित्युक्ते प्लक्षस्य प्लक्षान्तरेण सहत्वं गम्यते न तु न्यग्रोधे-

प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानादप्रत्यर्थमिति चेत्तदपि प्रत्यर्थमेव। प्रत्यर्थं शब्दनिवेशान्नै
केनानेकस्याभिधानाद् अप्रत्यर्थमिति चेदेवमुच्यते। यद्यप्येकेनानेकस्याभिधानं भवति तदपि प्रत्य
र्थमेव। यदपि ह्यर्थावर्थौ प्रति तदपि प्रत्यर्थमेव। यदपि ह्यर्था नर्थान्प्रति तदपि प्रत्यर्थमेव। यावतामभिधा
नं तावतां प्रयोगो न्याय्यः। यावतामर्थानामभिधानं भवति तावतां शब्दानां प्रयोग इत्येव पक्षो न्याय्यः। या
वतामभिधानं तावतां प्रयोगो न्याय्य इति चेदेकेनाप्यनेकस्याभिधानम्। यावतामभिधानं तावतां प्रयो
गो न्याय्य इति चेदेवमुच्यते। एषोऽपि पक्षो न्याय्य एव यद्यप्येकेनानेकस्याभिधानं भवति। यदि तर्ह्येकेनाने
कस्याभिधानं भवति प्लक्षन्यग्रोधौ। एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः। एकेनोक्तत्वात्तस्यार्थस्याप
रस्य प्रयोगेण न भवितव्यम्। किं कारणमुक्तार्थानामप्रयोग इति। एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इ
ति चेदनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः। एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तः
प्लक्षेण न्यग्रोधार्थ इति कृत्वा न्यग्रोधशब्दः प्रयुज्यते। कथमनुक्तः। यदिदानीमेवोक्तमेकेनाप्यनेकस्याभि
धानं भवतीति। सरूपाणामेकेनाप्यनेकस्याभिधानं भवति न विरूपाणाम्। किं पुनः कारणं सरूपाणामेके
नाप्यनेकस्याभिधानं भवति न पुनर्विरूपाणाम्। किं कारणम्। अभिधानस्वाभाव्यात्। अभिधानं पुनः स्वाभाविकम्। स्वा
भाविकमभिधानं भवति। उभयदर्शनाच्च। उभयं खल्वपि दृश्यते विरूपाणामप्येकेनानेकस्याभिधानं भवति। तद्यथा।
द्यावा ह क्षामा द्यावा चिदस्मै पृथिवी नमेते इति।

नेत्यर्थः। उभयदर्शनाच्चेति। सरूपस्य विरूपस्य चैकस्यानेकार्थाभिधायित्वदर्शनादित्यर्थः। द्यावेति। द्योशब्देन द्यावापृ
थिव्योरभिधानात् ततः परस्यौकारस्य सुपां सुलुगित्याकारः गोतो णिदित्यौकारान्तग्रहणपूर्णित्वाद्वृद्धिरावादेशश्च। पृथि
वी इति। द्विवचनान्तवाच्छन्दसीति पूर्वसवर्णदीर्घः। पृथिवीशब्देनात्र दिवस्पृथिव्योरभिधानम्। ॥

विरूपाणामिति। प्रकरणादिवशाद्यत्रार्थविशेषावसायस्तत्र प्रवृत्तिनिमित्तभेदेऽपि विरूपोऽनेकार्थाभिधायी दृश्यते तत्र सरूपः कथं न स्याद्यत्रैकं प्रवृत्तिनिमित्तमित्यर्थः। तदेवं द्रव्याभिधानपक्षेऽपि प्रत्याख्यात एकशेषः। अनेकार्थप्रक्रमे अनेकार्थ एक एव वृक्षशब्दः प्रयुज्यते न तु द्वन्द्वः। अनभिधानात्। इदानीमाकृतिपक्षाश्रयेण प्रत्याख्यानं करोति। आकृत्यभिधानादिति। जातिः पदार्थः तस्या एकत्वादनेकशब्दप्रयोगप्रसङ्ग एव नास्ति किमेकशेषेणेत्यर्थः। कथं पुनरिति। द्रव्यातिरेकेणाकृतेरनुपलम्भादभावं मन्यमानस्य प्रश्नः। प्रख्याविशेषादिति। प्रख्या बुद्धिः तस्या अविशेषादेकरूपत्वात् तद्विषयस्याप्यैक्यं प्रतीयते। गुणप्रमाणादिभिन्नेष्वपि पिण्डेषु गौर्गौरित्येकाकारप्रत्ययोदयादवश्यमेकेनालम्बनेन सामान्येन भाव्यमिति जातिसद्भाव एकत्वं चावसीयते। गौरित्युक्त इति। गौरित्येतेन शब्देनोक्ते प्रत्यायिते सामान्यलक्षणेऽर्थे विशेषानवधारणादेकं सामान्यस्यावसीयत इत्यर्थः। कुतस्त्वेतदिति। भवतु सामान्यमेकं तस्य तु वाहदोहादिकायामर्थक्रियायामयोग्यत्वाद् द्रव्यस्यैव योग्यत्वा

विरूपाणां किल नामैकेनानेकस्याभिधानं स्यात् किं पुनः सरूपाणाम्। आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायनः। आकृत्यभिधानाद्वा एकं शब्दं विभक्तौ वाजप्यायन आचार्यो न्याय्यं मन्यते। एका आकृतिः सा चाभिधीयत इति। कथं पुनर्ज्ञायते एका आकृतिः सा चाभिधीयत इति। प्रख्याविशेषात्। न हि गौरित्युक्ते विशेषः प्रख्यायते। शुक्ला नीला कपिला कपोतिकेति। यद्यपि तावत् प्रख्याविशेषाद् ज्ञायते एका आकृतिरिति कुतस्त्वेतत् साभिधीयत इति। अव्यपवर्गगतेश्च। अव्यपवर्गगतेश्च मन्यामहे आकृतिरभिधीयत इति। न हि गौरित्युक्ते व्यपवर्गो गम्यते शुक्ला नीला कपिला कपोतिकेति।

दभिधानं न्याय्यमिति मत्वा प्रश्नः। अव्यपवर्गगतेश्चेति। अव्यपवर्गोऽभेदः अविच्छेदः अविशेषस्तस्य गतिः प्रतीतिरित्यर्थः। जातौ चाभिधीयमानायां द्रव्यद्वारका वाहदोहादय उपपद्यन्ते जातितद्वतोश्चाभेदोपचाराद् गौः शुक्ल इति सामानाधिकरण्यादिव्यवहारोऽप्युपपद्यते। अथ प्रख्याविशेषादव्यपवर्गगतेश्चेति किमर्थमुभयोरुपादानम्। एकेनापि हेतुनैकत्वाभिधानयोः सिद्धत्वान्नैष दोषः। अनभिधीयमानापि जातिः संनिधिमात्रेण प्रख्याऽविशेषे निमित्तं भवतीति प्रख्याऽविशेषेण प्रत्यभिज्ञाप्रत्ययरूपेणैकत्वमेव प्रतिपादितं नाभिधानम्। तथा वनमिति सर्वविशेषाभ्यन्तरीकरणेनाव्यपवर्गगतावपि प्रख्याया अविशेषो नास्ति भिन्नवृक्षालम्बनत्वाद्वनमिति प्रत्ययस्य। ॥

CC-0. In Public Domain. Digitization by eGangotri

भा· कै· २२१ एकोपदिष्टमिति। एकस्मिन्नुपदिष्टं गौरयं त्वया पदा न स्प्रष्टव्य इत्यादि वस्तु। अथवैकमुपदिष्टं यस्य तदेकोपदिष्टं सकृदुप १.२.३
दिष्टं गोत्वादि सर्वत्र ज्ञायत इत्यर्थः। उपोद्बलकमिति। उद्गतं बलं प्रत्यक्षं तत्पूर्वकत्वादनुमानस्य उद्बलस्य समीपमनुमान
मित्यर्थः। प्रख्याविशेषादित्यनेन प्रत्यक्षं जात्यालम्बनं प्रमाणमुपन्यस्तम्। ततो विप्रतिपन्नप्रतिपादनायानुमानमिह जा
तिसद्भावे ज्ञायते चैकोपदिष्टमित्यनेनोक्तं देशकालावस्थापिण्डान्तरेष्वबाधितप्रत्यभिज्ञाप्रत्ययोदयान्यथानुपपत्त्या सामान्य
सद्भावोऽनुमीयत इत्यर्थः। अथ वा बलमुद्दीपयत्युपोद्बलकमुपष्टम्भकमुच्यते। धर्मशास्त्रं च तथेति। अनेनैतद्दर्शयति। न सादृश्ये
कार्थक्रियाकारित्वादिनिमित्ताभावात्प्रत्यभिज्ञा सर्वत्रेति ग्राह्यं किं तर्हि अभिन्नविषयनिमित्ता स्मृतिकाराणामप्यविगीतः

ज्ञायते चैकोपदिष्टम्। ज्ञायते खल्वप्येकोपदिष्टम्। गौरस्य कदाचिदुपदिष्टो भवति स तमन्यस्मिन्देशेऽन्य
स्मिन्काले व्यस्यां च वयोऽवस्थायां दृष्ट्वा जानात्ययं गौरिति। कः पुनरस्य विशेषः प्रख्याविशेषादि
त्यतः। तस्यैवोपोद्बलकमेतत्प्रख्याविशेषाद् ज्ञायते चैकोपदिष्टमिति। धर्मशास्त्रं च तथा। एवं च
कृत्वा धर्मशास्त्रं प्रवृत्तं ब्राह्मणो न हन्तव्यः सुरा न पेयेति ब्राह्मणमात्रं न हन्यते सुरामात्रं च न पीय
ते। यदि द्रव्यं पदार्थः स्यात्। एकं ब्राह्मणमहत्वा एकां च सुरामपीत्वान्यत्र कामचारः स्यात्। कः पुनर
त्र विशेषः अव्यपवर्गगतेश्चेत्यतः। तस्यैवोपोद्बलकमेतद् अव्यपवर्गगतेश्च धर्मशास्त्रं च तथेति। अ
स्ति चैकमनेकाधिकरणस्थं युगपत्। अस्ति खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यते। अस्तीत्या
ह। किम्। आदित्यः। तद्यथा। एक आदित्योऽनेकाधिकरणस्थो युगपदुपलभ्यते। विषम उपन्यासः। नै
को द्रष्टा आदित्यमनेकाधिकरणस्थं युगपदुपलभते।

प्रमाणाभावस्त्वनुपनिबद्धवचनानां जात्याश्रयेण सर्वव्यवहारप्रवर्तनादित्यर्थः। एकं ब्राह्मणमिति। एकस्यैव द्रव्यस्य ब्राह्म
णशब्दवाच्यत्वादिति भावः। तस्येति। अव्यपवर्गगतिरभ्रान्ता। स्मृतिकाराणामपि तथैव व्यवहारदर्शनादित्यर्थः। नन्वेकमने
कस्थं कथं भवति। न हि देवदत्तो युगपन्मथुरायां स्रुघ्ने च भवतीत्यत आह। अस्ति चेति। अवयवी यद्यप्यनेकावयवस्थः तथापि तत्त राम:
द्भावे विवादान्नासौ दृष्टान्तत्वेनोपात्तः। २२१

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इतीन्द्रवद्विषय इति। एकस्याप्यनेकद् इति वाक्यशेषः। शब्दप्रादुर्भावे व्ययीभावे कृते वतिः प्रत्ययः। सर्वत्रेति। सर्वेषु यागेषु द्रव्यवद् अङ्गतां प्रतिपद्यत इत्यर्थः। एकशेषेपीति। यद्येकस्यानेकसंबन्धो नाभ्युपगम्यते तदैकः शब्दोऽनेकमर्थं संबन्धाभावान्न प्रत्याययेदित्यर्थः। उक्तमेवार्थं समर्थयितुमाह। द्रव्याभिधाने हीति। श्रुतिविहितानां सर्वव्यवहाराणामप्रवृत्तिः स्यादित्यर्थः। ननु चेति। सर्वविषया चेदाकृतिश्चोद्यते तदा सर्वव्यक्तिविषयमनुष्ठानं विना वैगुण्यमेव स्यादित्यर्थः। अथानुष्ठानसिद्ध्यर्थमेकद्रव्यविषयमेव कर्म क्रियते तत्राप्युच्यते एकाकृतिरिति चेति। चशब्दस्तु शब्दस्यार्थे वक्ष्यमाणपक्षापेक्षया समुच्चये वा। स चेदानीमिति। एकत्वजातेरेकशब्दप्रवृत्तेः सिद्धत्वादेकशेषारम्भः प्रत्याख्यायते अनेकत्वे त्वारब्धव्य एवैकशेष इत्यर्थः। एवं तर्हीति।

एवं तर्हि इतीन्द्रवद्विषयः। तद्यथा। एक इन्द्रोऽनेकस्मिन् क्रतुशते आहूतो युगपत्सर्वत्र भवति। एवमाकृतिर्युगपत्सर्वत्र भविष्यति। अवश्यं चैतदेवं विज्ञेयम्। एकमनेकाधिकरणस्थं युगपदुपलभ्यत इति। नेकमनेकाधिकरणस्थं युगपदिति चेत्तथैकशेषो। यो हि मन्यते नैकमनेकाधिकरणस्थं युगपदुपलभ्यत इति एकशेषे तस्य दोषः स्यात्। एकशेषेपि नैको वृक्षशब्दोऽनेकमर्थं युगपदभिदधीत। अवश्यं चैतदेवं विज्ञेयमाकृतिरभिधीयत इति। द्रव्याभिधाने ह्याकृत्यसंप्रत्ययः। द्रव्याभिधाने सत्याकृतेरसंप्रत्ययः स्यात्। तत्र को दोषः। तत्रासर्वद्रव्यगतिः। तत्रासर्वद्रव्यगतिः प्राप्नोति। असर्वद्रव्यगतौ को दोषः। गौरनुबन्ध्योऽजोऽग्नीषोमीय इति एकः शास्त्रोक्तं कुर्वीत अपरोऽशास्त्रोक्तम्। अशास्त्रोक्ते च क्रियमाणे विगुणं कर्म भवति विगुणे च कर्मणि फलानवाप्तिः। ननु च यस्याप्याकृतिः पदार्थस्तस्यापि यद्यनवयवेन चोद्यते न चानुबध्यते। विगुणं कर्म भवति विगुणे च कर्मणि फलानवाप्तिः। एका आकृतिरिति च प्रतिज्ञा हीयेत। यच्चास्य पक्षस्योपादाने प्रयोजनमेकशेषो न वक्तव्य इति स चेदानीं वक्तव्यो भवति। एवं तर्ह्यनवयवेन चोद्यते प्रत्येकं च परिसमाप्यते। यथा आदित्यः। ननु च यस्यापि द्रव्यं पदार्थस्तस्याप्यनवयवेन चोद्यते प्रत्येकं च परिसमाप्यते।

सर्वाभिर्व्यक्तिभिः संबन्धस्य तुल्यत्वात् सर्वत्रैवाभिन्नबुद्ध्युत्पादनात् प्रत्येकं परिसमाप्तत्वादेकस्मिन्नपि द्रव्ये तत्कर्म क्रियमाणं जातौ कृतमेव भवतीत्यर्थः। यथादित्य इति। प्रतिदेशं यथा सर्वात्मनादित्य उपलभ्यते तथा जातिरपीत्यर्थः। ननु चेति। द्रव्येपि पदार्थे जातिरनभिधेया या या उपलक्षणत्वेनाश्रयणात् परित्यक्तभेदं द्रव्यमात्रं विशिष्टजातियुक्तं शब्देनोच्यते। प्रत्येकं च परिसमाप्यत इति। शास्त्रभिरध्याहारः। अथवा जातिरुपलक्षणभूता प्रत्येकं परिसमाप्यत इति व्याख्येयम्। ॥

CC-0. In Public Domain. Digitization by eGangotri

एकशेषस्त्वयेति। जात्युपलक्षितस्य द्रव्यस्य शब्देनाभिधाने सत्यभिधेयानेकत्वेनाऽनेकशब्दत्वप्रसङ्गादित्यर्थः। त्वयापीति। - जातेरेकत्वाद् द्वित्वबहुत्वनिबन्धनानि द्विवचनबहुवचनानि न सिध्यन्तीति भावः। एवं भाष्यकारेण पक्षयोः साम्यं दर्शितम्। वाक्यकारस्तु जातिपक्षाश्रयणस्य प्रयोजनानि समुच्चयेनाचष्टे। चोदनायां चैकस्येति। सामान्यस्याग्नेयादेः। उपाधिवृत्तेरिति। अष्टाकपालत्वादिरुपाधिः तस्य वृत्तिः प्रवृत्तिः एतदुक्तं भवति। यदि आग्नेयादि शब्देन सामान्यमभिधीयते तदा तेनाशेषद्रव्याणामाक्षेपात् प्रतिद्रव्यमष्टाकपालत्वमुपाधिर्युज्यते। द्रव्ये तु पदार्थे एकेनैव यजमानेन सकृदेवाष्टाकपालः पुरोडाशो निरूप्येत नान्येन नाप्यन्यदेत्यर्थः। कः पुनरिति। गोरनुबन्ध्य इत्याग्नेयमष्टाकपाल

एकशेषस्त्वयावक्तव्यः त्वयापि तर्हि द्विवचनबहुवचनानि साध्यानि। चोदनायां चैकस्य उपाधिवृत्तेः। चोदनायां चैकस्योपाधिवृत्तेर्मन्यामहे आकृतिरभिधीयत इति। आग्नेयमष्टाकपालं निर्वपेत्। एकं निरूप्य द्वितीयस्तृतीयश्च निरूप्यते। यदि द्रव्यं पदार्थः स्यादेकं निरूप्य द्वितीयस्य तृतीयस्य च निर्वपणं न प्रकल्पेत। कः पुनरेतयोर्जातिचोदनयोर्विशेषः। एका निर्वृत्तेन अपरा निर्वर्त्येन। द्रव्याभिधानं व्याडिः। द्रव्याभिधानं व्याडिराचार्यो न्याय्यं मन्यते द्रव्यमभिधीयत इति। तथा च लिङ्गवचनसिद्धिः। एवं च कृत्वा लिङ्गवचनानि सिद्धानि भवन्ति। ब्राह्मणी ब्राह्मणः ब्राह्मणौ ब्राह्मणा इति। चोदनासु च तस्यारम्भात्। चोदनासु च तस्यारम्भान्मन्यामहे द्रव्यमभिधीयत इति। गोर — नुबन्ध्यो जोऽग्नीषोमीय इति। आकृतौ चोदितायां द्रव्ये आरम्भणाल — म्भनप्रोक्षणविशसनादीनि क्रियन्ते। न चैकमनेकाधिकरणस्थं युगपत्। न खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यते। न ह्येको देवदत्तो युगपत्स्रुघ्ने भवति मथुरायां च। विनाशे प्रादुर्भावे च सर्वं तथा स्यात्। किम्।

मिति चानयोरित्यर्थः। एका निर्वृत्तेनेति। निष्पन्नो हि पशुर्यागसाधनायोपादीयते। अपरा निर्वर्त्येनेति। आग्नेयोष्टाकपाल इत्यादिचोदनायां वोत्पाद्यते न तु चोदनायाः पूर्वं निष्पन्न इत्यर्थः। तत्र निर्वृत्ते भेदाग्रहणात् द्रव्यान्तरेऽपि प्रवृत्तिः स्यान्न तु निर्वर्त्ये सादृश्याग्रहणादित्यव्याप्याश्रयणीया जातिः। द्रव्याभिधानमिति। जातेर्वृत्तिविकल्पाक्षमत्वेनाभावं मन्यमानो व्याडिर्द्रव्यमेव शब्देनाभिधीयत इति मन्यते। आकृतौ चोदितायामिति। आकृतिवादिपक्षे शब्देनाकृतिः प्रत्याय्यते द्रव्ये तु कार्यं प्रवर्तते। अयुक्तं चैतत्। न ह्यन्यचोदनेऽन्यस्य कार्ये क्रियमाणे यथोक्तं कृतं भवति। तस्माद् द्रव्यमेव शब्देनोच्यत इति न्याय्यम्। न चैकमिति। न च हेतुरहितेनादिति दृष्टान्तेन साध्यसिद्धिर्भवति देवदत्तदृष्टान्तेन विपर्ययस्यापि साधनात्। रामः २२२

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चामृतइति।अभिव्यञ्जकविनाशेजातेस्तिरोभावात्तुपिण्डान्तरेऽश्वेतिप्रत्ययोनस्यात्।पूतप्रत्ययइवैकाश्रायइत्यर्थः।यद्वाऽऽश्र
याश्रायेआश्रितस्याप्यपायः अवयवाश्रायेअवयविनइवेतिजातेर्विनाशप्रसङ्गइत्यर्थः।गोर्जातइति।जातेनगोपिण्डेनगोत्वम
भिव्यक्तंतच्चसर्वाश्रयवर्तीतिएकगोपिण्डप्रत्यक्षत्वेसर्वगोपिण्डप्रत्यक्षत्वप्रसङ्गः।अनवकाशमिति।पदार्थान्तरप्रत्यय-
स्यावकाशाभावात्।अथवासर्ववस्तुव्यापिगोत्वमेष्टव्यम्।अन्यथा।नायातिनचतत्रासीदस्तिपश्चान्नचांशवत्।जहाति
पूर्वनाधारमहोव्यसनसन्ततिरितिदोषापत्तिः।ततश्चव्यक्तौचैकत्रसाव्यक्ताऽभेदात्सर्वत्रगायदिजातिर्दृश्येतसर्वत्रेतिस
र्वेषुपदार्थेषुगोप्रत्ययप्रसङ्गः।अस्तिचवैरूप्यमिति।तस्माद्द्रव्यमेवास्तुनतुसामान्यंनह्येकस्यभेदाभेदौविरुद्धौउपपद्येतेइ-
त्यर्थः।एकार्थक्रियाकारित्वादिनिमित्तस्तुप्रत्यभिज्ञाप्रत्ययः।गौश्चेति।भेदाधिष्ठानःसमुच्चयःसामान्यस्यैकत्वाभिधेयत्वयो

विनश्येच्चप्रादुर्भ्याच्चाश्वामृतइतिश्वानामलोकेनप्रचरेत्।गोर्जातइतिसर्वगोभूतमनवकाशंस्यात्।
अस्तिचवैरूप्यम्।अस्तित्वल्पपिवैरूप्यम्।गौश्चगौश्चखण्डोमुण्डइति।तथाचविग्रहः।एवंचकृत्वाविग्र
हउपपन्नोभवतिगौश्चगौश्चेति।व्यर्थेषुचमुक्तसंशयम्।व्यर्थेषुचमुक्तसंशयंभवति।आकृतावपिपदा
र्थएकशेषोवक्तव्यः।अक्षाःपादामाषाइति।लिङ्गवचनसिद्धिर्गुणस्यानित्यत्वात्।लिङ्गवचनानिसि
द्धानिभवन्ति।कुतः।गुणस्यानित्यत्वात्।अनित्यागुणाउपायिनोऽपायिनश्च।किंपुनरेतेशुक्लादयः
।नेत्याह।स्त्रीपुंनपुंसकानिसत्त्वगुणाः।एकत्वद्वित्वबहुत्वानिच।कदाचिदाकृतिरेकत्वेनयुज्यते
कदाचिद्द्वित्वेनकदाचिद्बहुत्वेनकदाचित्स्त्रीत्वेनकदाचित्पुंस्त्वेनकदाचिन्नपुंसकत्वेन।

नेत्यादित्यर्थः।आकृतावपीति।यदर्थआकृतिपक्षपरिग्रहःतदेवनसिद्ध्यतिनहिशकटाक्षदेवनाक्षादिष्वेकाकृतिस
द्भावः।इदानीमाकृतिवादीदोषानुपरिहर्तुमाह।लिङ्गेति।आकृतिसद्भावःपूर्वमेवप्रत्यक्षानुमानागमप्रवृत्तिभिःप्रतिपा
दितः।सर्वगतत्वेपिपदार्थानांविचित्रशक्तियोगात्।कश्चित्पदार्थःकांचिदेवाकृतिमभिव्यनक्तिनतुसर्वोसर्वः।गुणाश्चा
त्रद्वित्वस्त्रीत्वादयोविवक्षिताःतैश्चाकृतेरेकार्थसमवायलक्षणःसंबन्धइत्याकृतावपिपदार्थेलिङ्गसंख्यासिद्धिरित्य
र्थः।अनित्याइति।कदाचित्स्त्रीत्वयुक्तेनपिण्डेनाकृतिर्व्यज्यतेकदाचित्पुंस्त्वयुक्तेनकदाचिदेकाधारस्थाप्रतिपाद्यतेकदा
चिदनेकाधारस्थेत्यर्थः।किंपुनरेतइति।तेहिगुणत्वेनप्रसिद्धानचतदनित्यत्वंलिङ्गवचनसिद्धौहेतुरुपपद्यतइतिप्रश्नः।प्र
करणादर्थनिश्चयइत्याह।नेत्याहेति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचनपरिहारस्त्विति। लिङ्गपरिहारेण किंचिद्दुष्यति वचनपरिहारे त्वभिधीयमाने एकाकृतिरिति प्रतिज्ञाहानिः द्वित्वबहुत्वसंबन्धस्याप्यभ्युपगमात्। द्विवचनबहुवचनवदनेकशब्दत्वमपि प्राप्नोतीत्येकशेषोपि वक्तव्य इत्यर्थः। गुणविवक्षानित्यत्वादिति। स्वत आकृतेरेकत्वं द्रव्यगतद्वित्वबहुत्वविवक्षायां तु द्विवचनबहुवचने भवतः। आश्रयधर्मैराश्रितानां व्यपदेशः। यथा संपन्नो यवो विनष्टो यव इति संपत्तिविनाशाभ्यां द्रव्यगताभ्यां जातिर्व्यपदिश्यते तथा लिङ्गसंख्याभ्यामपीत्यर्थः। भवेदिति। अभ्युपगमविरोधाभावात्। वचनपरिहारस्त्वभ्युपगमविरुद्धः द्वित्वबहुत्वयोरभ्युपगते कत्व

भवेल्लिङ्गपरिहार उपपन्नः वचनपरिहारस्तु नोपपद्यते। यदि हि कदाचिदाकृतिरेकत्वेन युज्यते कदाचिद्द्वित्वेन कदाचिद्बहुत्वेन। एका आकृतिरिति च प्रतिज्ञा हीयेत। यच्चास्य पक्षस्योपादाने प्रयोजनमुक्तमेकशेषो न वक्तव्य इति स चेदानीं वक्तव्यो भवति। एवं तर्हि लिङ्गवचनसिद्धिर्गुणविवक्षानित्यत्वात्। लिङ्गवचनानि सिद्धानि भवन्ति। कुतः। गुणविवक्षाया अनित्यत्वात्। अनित्या गुणविवक्षा। कदाचिदाकृतिरेकत्वेन विवक्षिता भवति कदाचिद्द्वित्वेन कदाचिद्बहुत्वेन कदाचित्पुंस्त्वेन कदाचित्स्त्रीत्वेन कदाचिन्नपुंसकत्वेन। भवेल्लिङ्गपरिहार उपपन्नः। वचनपरिहारस्तु नोपपद्यते। यदि कदाचिदाकृतिरेकत्वेन विवक्षिता भवति कदाचिद्द्वित्वेन कदाचिद्बहुत्वेन एका आकृतिरिति च प्रतिज्ञा हीयेत। यच्चास्य पक्षस्योपादाने प्रयोजनमुक्तमेकशेषो न वक्तव्य इति स चेदानीं वक्तव्यो भवति। लिङ्गपरिहारश्चापि नोपपद्यते। किं कारणम्। आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्तते उत्पत्तिप्रभृत्या विनाशात्तल्लिङ्गं न जहाति। तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम्। अवश्यं कश्चित्स्वकृतान्त आस्थेयः। कोसौ स्वकृतान्तः।

ह्यानादनेकशब्दत्वप्रसङ्गाच्चेत्यर्थः। लिङ्गपरिहारश्चापीति। विशेषणानां चाजातेरित्यत्रोक्तमाविष्टलिङ्गा जातिरिति। ततश्चैकमेवाश्रयगतं लिङ्गमुपादत्ते सर्वदा जातिः यथा ग्राम्यपशुजातयः संघे स्त्रीत्वमेवोपाददते गाव इमा इति अन्यास्तु पुंस्त्वमेव ब्राह्मणा इम इति यथेत्यर्थः। तस्मादिति। सिद्धान्तवादी युक्तं पक्षमाश्रयति। लौकिकमिति। स्तनकेशादिसंबन्ध इत्यर्थः। तस्मिन्नाश्रीयमाणे लिङ्गान्तरेण संबन्धो न स्यात्। तस्मात्स्वसिद्धान्तव्यवस्थाश्रीयते। गुणानां सत्त्वरजस्तमःपरिणामरूपाणां शब्दादीनां वृद्धिह्राससमध्यस्थावस्थाः शब्दैकगोचराः लिङ्गत्वेन परिगृह्यन्ते। आत्मनस्त्वपरिणामिरूपत्वात्प्रवृत्तिधर्मत्वेप्यन्यप्रवृत्त्यनुयायित्वाल्लिङ्गयोगः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचनिकानीति। संकीर्णप्रयोगोपलम्भात्। असंकरार्थो यथा द्रव्यपदार्थकस्य वाचनिको वचननियमः। तथाकृतिवादिनोपि। सत्येवं व्याचष्टे एकाश्रयसंबन्धविवक्षायामाकृतेरेकवचनं यथा पशुना यजेतेति। अनेकाश्रयसंबन्धविवक्षायां द्विवचनबहुवचने। ननु द्रव्यस्यानभि

संस्त्यानप्रसवौ लिङ्गम्। संस्त्यानप्रसवौ लिङ्गमास्थेयौ। किमिदं संस्त्यानप्रसवाविति। संस्त्याने स्त्यायतेर्ड्रट् स्त्री। सूतेः सप् प्रसवे पुमान्। ननु च लोकेपि स्त्यायतेरेव स्त्री सूतेश्च पुमान्। अधिकरणसाधना लोके स्त्री। स्त्यायत्यस्यां गर्भ इति। कर्तृसाधनश्च पुमान्। सूते पुमानिति। इह पुनरुभयं भावसाधनं स्त्यानं प्रवृत्तिश्च। कस्य पुनः स्त्यानं स्त्री प्रवृत्तिर्वा पुमान्। गुणानाम्। केषाम्। शब्दस्पर्शरूपरसगन्धानाम्। सर्वाश्च पुनर्मूर्तय एवमात्मिकाः संस्त्यानप्रसवगुणाः शब्दस्पर्शरूपरसगन्धवत्यः। यत्राल्पीयांसो गुणास्तत्रावरतस्त्रयः शब्दः स्पर्शो रूपमिति। रसगन्धौ न सर्वत्र। प्रवृत्तिः खल्वपि नित्या। नहीह कश्चित्स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते। वर्धते यावदनेन वर्धितव्यमपचयेन वा युज्यते। तच्चोभयं सर्वत्र। यद्युभयं सर्वत्र कुतो व्यवस्था। विवक्षातः। संस्त्यानविवक्षायां स्त्री प्रसवविवक्षायां पुमान् उभयोरप्यविवक्षायां नपुंसकम्। तत्र लिङ्गवचनसिद्धिर्गुणविवक्षानित्यत्वादिति लिङ्गपरिहार उपपन्नः। वचनपरिहारस्तु नोपपद्यते। वचनपरिहारश्चाप्युपपन्नः। इदं तावदयं प्रष्टव्यः। अथ यस्य द्रव्यं पदार्थः कथं तस्य एकवचनद्विवचनबहुवचनानि भवन्तीति। एवं स वक्ष्यति एकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनमिति। यदि तस्यापि वाचनिकानि न स्वाभाविकानि अहमप्येवं वक्ष्यामि एकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनमिति॥ नह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः द्रव्यपदार्थकस्य वा आकृतिर्न पदार्थः। उभयोरुभयं पदार्थः। कस्यचित्किंचित्प्रधानभूतं किंचिद्गुणभूतम्। आकृतिपदार्थकस्य आकृतिः प्रधानभूता द्रव्यं गुणभूतम्। द्रव्यपदार्थकस्य द्रव्यं प्रधानभूतमाकृतिर्गुणभूता। गुणवचनवद्वा। गुणवचनवद्वा लिङ्गवचनानि भविष्यन्ति। तद्यथा। गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति। शुक्लं वस्त्रं शुक्ला शाटी शुक्लः कम्बलः शुक्लौ कम्बलौ शुक्लाः कम्बला इति।

धेयत्वात्कथं तत्कृत आकृतेर्वचनोपकार इत्याह। नहीति। तत्र यथा पचति पचतः पचन्तीति क्रियाप्राधान्येपि साधनसंख्याकृतो वचनभेदः एवमाकृतिप्राधान्येपि द्रव्यसंख्याकृत इत्यदोषः।

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१२३
मा॰ कै॰ यदसाविति। जातितद्वतोरभेदाध्यवसायाद्द्रव्यात्मा जातिः प्रतीयमाना तद्गतलिङ्गसंख्याग्राहिणीत्यर्थः। चोदनासु च तस्यारम्भादिति यदु
२२४ क्तं तस्य परिहारार्थमाह अधिकरणगतिरिति। यथाग्निरानीयतामित्युक्ते केवलस्याग्नेरानयनासंभवान्नान्तरीयकत्वाद्चोदितमपि पात्रमानीय
ते एतदेवाग्नेरानयनं यत्पात्रस्य स्यात्तथा आकृतावारम्भणादीनि चोद्यमानानि सामर्थ्यात्साहचर्याद्द्रव्यमभिनिविशन्ते। सर्व एवा-
कृतेः क्रियायोगोऽन्तर्भावितद्रव्यायास्तदेति द्रव्यद्वारकः संपद्यते। अनाश्रितत्वादिति। यथा गुणानां द्रव्याधीनस्थितित्वादाश्रितत्वं
नैवमाकृतेः अन्यत्रापि प्रत्ययाभिधानयोराकृतिनिमित्तयोर्भावान्नित्यत्वं तस्यादित्यर्थः। इतरः संबन्धमात्रमाश्रितत्वं मत्वाएच्छति।

यदसौ द्रव्ये श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं तद्गुणस्यापि भवति। एवमिहापि यदसौ द्रव्यं श्रिता आकृति
स्तस्य यल्लिङ्गं वचनं च तदाकृतेरपि भविष्यति। अधिकरणगतिः साहचर्यात्। आकृतावारम्भणादीनां संभवो
नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आरम्भणादीनि भविष्यन्ति। न चैकमनेकाधिकरणस्थं युगपदित्या
दित्यवद्विषयः। न खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यत इत्यादित्यवद्विषयो भविष्यति। तद्यथा।
एक आदित्योनेकाधिकरणस्थो युगपदुपलभ्यते। विषम उपन्यासः। नैको द्रष्टानेकाधिकरणस्थमादित्यं
युगपदुपलभते। एवं तर्हीन्द्रवद्विषयः। तद्यथैक इन्द्रोनेकस्मिन्क्रतुशत आहूतो युगपत्सर्वत्र भवत्येव
माकृतिर्युगपत्सर्वत्र भवेदिति। अविनाशो नाश्रितत्वात्। द्रव्यविनाशे आकृतेरविनाशः। कुतः। अना
श्रितत्वात्। अनाश्रिता आकृतिर्द्रव्यम्। किमुच्यते अनाश्रितत्वादिति। यदिदानीमेवोक्तम् अधिकरण
गतिः साहचर्यादिति। एवं तर्हि अविनाशो नैकात्स्यात्। द्रव्यविनाशे आकृतेरविनाशः। कुतः। अनैका
त्म्यात्। अनेक आत्मा आकृतेर्द्रव्यस्य च। तद्यथा। वृक्षस्थो वतानो वृक्षे छिन्नेपि न विनश्यति। वैरूप्यवि
ग्रहो द्रव्यभेदात्।

किमुच्यत इति। अनैकात्म्यादिति। पूर्वोक्त एवार्थो विप्रिष्यानेनत्र तिपाद्यते नित्या आकृतिरेका सर्वत्रगा तद्विपरीतं द्रव्य रामः
मिति भेदाद्द्रव्यविनाशेपि न जातेर्विनाशः। गुणानां तु द्रव्याधीनस्थित्युत्पत्तित्वादाश्रयनाशेऽवश्यनाश इति न तैर्व्यभिचारः। ॥ २२४
वृक्षस्थो वतान इति। यथा वृक्षस्योपरि द्राक्षादिलतावतानः स्थितो न वृक्षविनाशमनु विनश्यति तथा जातिरपीत्यर्थः।

CC-0. In Public Domain. Digitization by eGangotri

वैरूप्यविग्रहाविति। द्रव्याणां स्वगतभेदप्रतिबद्धौ वैरूप्यविग्रहावित्यर्थः। तत्र द्रव्यगतभेदोपचारादेकस्यामप्याकृतौ समुच्चयोपपत्त्या विग्रहो न विरुध्यते। क्रियासामान्यादिति। भिन्नासु क्रियासु अभिन्नप्रत्ययाभिधाननिमित्तं यत्सामान्यं तद्देवद्रव्येष्वपि तन्निमित्तं भवति। यथा पाचकद्रव्याश्रयान्तरगतमपि हि सामान्यं समवेतसमवायाद्द्रव्येऽउपकरोति। यथा गैरिकादिगतं लोहित्यं संयुक्तसमवायात्पटे लौहित्यप्रत्ययमादधाति। पुराकल्प इति। पुराकल्पे प्रसिद्धोऽर्थः संप्रति निमित्ताभावेऽपि तथैव व्यपदिश्यते। माषसंवद्ध इति। तत्र षोडशभागत्वेन माषः प्रसिद्धः तथैव कार्षापणो माषः षोडशभाग इति षोडशभागत्वं-नाम सामान्यमुपादत्ते माषशब्द इति सिद्धमेकशब्दत्वम्। संख्यासामान्यादिति। संख्यैव सामान्यमभिन्नप्रत्ययहेतुत्वात्। ननु षोडशसंख्या षोडशसु पदार्थेषु व्यासज्य स्थिता नत्वेकस्मिन् षोडशे। एवं तर्हि षोडशसंख्यापूरणत्वं नाम यत्सामान्यं तत्संख्यामूलत्वात्संख्यासामान्यमुच्यत इत्यदोषः। अथ डित्थ इति भिन्नेषु संज्ञिष्वेकाकृत्ययोगात्कथमेकशब्दवाच्यत्वम्। उच्यते। भिन्नडित्थशब्दगतं डित्थशब्दत्वं नाम यथा शब्देष्वभिन्नप्रत्ययाभिधानहेतुः तथा सोऽयमिति शब्दार्थयोरभेदाध्य

वैरूप्यविग्रहावपि द्रव्यभेदाद्भविष्यतः। व्यर्थेषु च सामान्यात्सिद्धम्। विभिन्नार्थेषु च सामान्यात्सिद्धम्। सर्वत्र अश्नातेरसः पद्यतेः पादः मिमीतेः माषः। तत्र क्रियासामान्यात्सिद्धम्। अपरस्त्वाह। पुराकल्प एतदासीत्षोडश माषाः कार्षापणं षोडश पणाः पलाश्च माषसंवद्यः। तत्र संख्यासामान्यात्सिद्धम्। सरूपाणाम् ॥ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः॥ इह कस्मान्न भवति। अजश्च बर्करश्च अश्वश्च किशोरश्च उष्ट्रश्च करभश्चेति।

वसायाद्ध्यस्तडित्थशब्देषु संज्ञिष्वपि संबन्धिसंबन्धादभिन्नप्रत्ययाभिधाननिमित्तं सिद्धमेकशब्दवाच्यत्वम्। तथा तावित्येतावितिपरोक्षत्वप्रत्यक्षत्वादिकं सामान्यमाश्रयणीयम्। गोत्वाश्वत्वे सामान्ये इति व्यावृत्तेष्वनुवृत्तप्रत्ययहेतुसामान्या नाम पि सामान्यमाश्रयितव्यम्। अथवा निःसामान्यानि सामान्यानीति तार्किकदर्शनं न वैयाकरणैर्नियोगत आस्थेयम्। कार्योन्नीयमाना हि तेषां पदार्था इति सामान्येष्वपि सामान्यमस्ति। अभावाश्चत्वार इत्यत्रापि निरुपाख्यत्वं सामान्यं कल्पनीयम्। तदेवं सर्वत्राकृतिसद्भावात्सिद्धमेकशब्दत्वम्। वृद्धो। इह कस्मादिति। उभयगतिरिह शास्त्रे संभवतीति मत्वा प्रश्नः। अथवा वृद्धशब्द इह शास्त्रे अपत्यविशेषेण परिभाषित इति सतां वृद्धयोर्वाची गृह्यते। तत्साहचर्याद्युवशब्दोऽपि तथैवेति प्रश्नः। अजो ह्यश्वशब्दानां जातिशब्दत्वे यत्र शब्दान्तरसंनिधानादुद्भावस्याभिधायित्वं द्रष्टव्यम्। अन्यथा सामान्यविशेषशब्दानां द्वन्द्वो न स्यात्। सामान्यशब्देन सर्वविशेषाणामाक्षेपाद्विशेषैः सह समुच्चयाभावात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ वक्ष्यमाणंमनसिकृत्वाह।तल्लक्षणश्चेदिति।इतरोऽगृहीताभिप्रायआह।तल्लक्षणइति।परिहारस्तुउत्तरत्रवक्ष्यते॥स्त्रीपुं १२३
२२५ वच्च॥इदमिति।यदिस्त्रीशब्दस्यस्वरितत्वंप्रतिज्ञायते।तदास्त्र्यधिकारविहितटाबादिप्रत्ययग्रहणम्।ततश्चायमर्थः।पुंवत्स्त्रीप्रत्ययोनभवतीत्यभावातिदेशः क्रियते।स्वरितत्वाभावेतुशब्दग्रहणमर्थग्रहणंवा।तत्रशब्दग्रहणपक्षेस्त्रीशब्दस्यपुंशब्दस्येवरूपंभवतीतिस्त्रीत्वमनिवृत्तमेव।अर्थग्रहणपक्षेतुपुमर्थातिदेशेतदर्थप्रतिबद्धानांकार्याणां-

तल्लक्षणश्चेदेवविशेषइत्युच्यतेनचात्रतल्लक्षणएवविशेषः।तल्लक्षणएवविशेषोयत्समानायामाकृतौशब्दभेदः॥स्त्रीपुंवच्च॥इदंसर्वेष्वेवस्त्रीग्रहणेषुविचार्यते।स्त्रीग्रहणेषुस्त्रीप्रत्ययग्रहणंवास्यात् स्त्र्यर्थग्रहणंवास्त्रीशब्दग्रहणंवेति।किंचातः।यदिप्रत्ययग्रहणंवाशब्दग्रहणंवागार्गीचगार्ग्यायणीचगर्गाः केनयशब्दोनश्रूयते।अस्त्रियामितिहिलुगुच्यते।इहचगार्गीचगार्ग्यायणीचगर्गान्पश्य।तस्माच्छसोनःपुंसीतिनत्वंनप्राप्नोति।अथार्थग्रहणम्।नदोषोभवति।यथानदोषस्तथास्तु।इहकस्मान्नभवति।अजाचबर्करश्चवडवाचकिशोरश्चउष्ट्रीचकरभश्चेति।तल्लक्षणश्चेदेवविशेषइत्युच्यतेनचात्रतल्लक्षणएवविशेषः।तल्लक्षणएवविशेषःयत्समानायामाकृतौशब्दभेदः॥पुमान्स्त्रिया॥ इहकस्मान्नभवति हंसश्चवरटाचकच्छपश्चडुलिश्चऋश्यश्चरोहिच्चेति।तल्लक्षणश्चेदेवविशेषइत्युच्यतेनचात्रतल्लक्षणएवविशेषः।तल्लक्षणएवविशेषोयत्समानायामाकृतौशब्दभेदः॥भ्रातृपुत्रौस्वसृदुहितृभ्याम्॥किमर्थमिदमुच्यतेनपुमान् स्त्रियेत्येवसिद्धम्।नसिध्यति।तल्लक्षणश्चेदेवविशेषइत्युच्यतेनचात्रतल्लक्षणएवविशेषः।तल्लक्षणएवविशेषोयत्समानायामाकृतौशब्दभेदः।एवंतर्हिसिद्धेसतियदिमंयोगंशास्तितज्ज्ञापयत्याचार्यः।

सिद्धिः।तत्रार्थस्यप्राधान्याददुष्टत्वाच्चार्थपक्षएवाश्रीयते।अस्त्रियामितीति।यदायंप्रसज्यप्रतिषेधः तदादोषः।प रामः
र्युदासेतुशिष्यमाणःशब्दोनिवर्त्यमानार्थाभिधायीत्यस्तिस्त्रीसदृशोर्थइतिलुक्सिध्यति।गर्गान्पश्येति।स्त्रीत्वस्या २२५
निवृत्तत्वात्।नायंपुंबहुत्वेशसइत्यन्नइतिनत्वंनसिध्यति।भ्रात॰।यत्समानायामिति।एकापत्यत्वंनामसमानाकृतिरस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊर्ध्वमिति। यत्रैकाप्रत्ययप्रकृतिरन्यत्तु वैरूप्यं तत्रैकशेष इत्यर्थः। त्यदादीनि सर्वैर्नित्यमित्येतद्वर्जयित्वा सर्वत्र सरूपाणामित्यस्या
नुवृत्त्या अयणादिद्वयोरेकार्थलाभः। अत्रैवार्थ एतत्सूत्रं लिङ्गम्। पदान्तरगम्येऽपि तल्लक्षणविशेषे पुमान् स्त्रियेत्येकशेषो भवति। य-
था गोश्चायं गौश्चेयमित्येतौ गावौ चरत इति। वरटा चेति। वरटा हंसी। पूर्वसूत्र इति। पूर्वाचार्यकृते व्याकरणे अपत्यमन्तर्हितं वृद्धमि
ति पौत्रप्रभृतेरपत्यस्य वृद्धसंज्ञा कृता। वृद्धो यूनेत्यत्र च कृत्रिमस्य जीवति तु वंश्ये युवेत्यस्य ग्रहणं तत्साहचर्याद् वृद्धस्यापत्य
स्य ग्रहणमित्यर्थः। असरूपाणामिति। गर्गापत्यत्वं सामान्यं वृद्धयूनोर्विवक्षितमिति सिद्धमेकशब्दत्वम्। आरभ्यमाणेऽप्येकशेषे-
गार्ग्यौ इति विशेषो नावधार्यते किं वृद्धयुवानौ प्रक्रान्तौ उत वृद्धौ इति। प्रकरणाद्यपेक्षस्तु विशेषावसायः सामान्योपक्रमेऽपि तथैव

यत्रोर्ध्वं प्रकृतेस्तल्लक्षण एव विशेषः तत्रैकशेषो भवति। किमेतस्य ज्ञापने प्रयोजनम्। हंसश्च वरटा च कच्छपश्च
दुलिश्च कूर्मश्च रोहिच्चेति। अत्रैकशेषो न भवति। पूर्वयोर्योगयोर्भूयान्परिहारः। यावद्ब्रूयाद्गोत्रं यूनेति तावद्वृ
द्धो यूनेति। पूर्वसूत्रे गोत्रस्य वृद्धमिति संज्ञा क्रियते। असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषस्याविवक्षित
त्वात् सामान्यस्य च विवक्षितत्वात्सिद्धम्। असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषश्चाविवक्षितः सामान्यं
च विवक्षितम्। विशेषस्याविवक्षितत्वात्सामान्यस्य च विवक्षितत्वात्सरूपाणामेकशेष एकविभक्तावित्येव सि
द्धम्। पुमान् स्त्रियेह कस्मान्न भवति। ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेति। ब्राह्मणवत्साब्राह्मणीवत्सयोर्लि
ङ्गस्याविभक्तिपरस्य विशेषवाचकत्वादनेकशेषः। ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्य अविभक्तिपरस्य
विशेषवाचकत्वादेकशेषो न भविष्यति। यत्र लिङ्गं विभक्तिपरमेव विशेषवाचकं तत्रैकशेषो भवति। नात्र
लिङ्गं विभक्तिपरमेव विशेषवाचकम्। यदि तर्हि यत्र लिङ्गं विभक्तिपरमेव विशेषवाचकं तत्रैकशेषो भव
पि। इह न प्राप्नोति कारकश्च कारिका च कारकौ। न ह्यत्र लिङ्गं विभक्तिपरमेव विशेषवाचकं किं तर्हि द्वित्वमपि।

विशेषोऽवसायिष्यत इति नार्थ एकशेषारम्भेण। द्वन्द्वोऽपि गार्ग्यगार्ग्यायणावित्यनभिधानान्न भविष्यति। स्त्रीपुंसयोरपि मृगक्षीरव
ज्जातिमात्रविवक्षायां ब्राह्मणावित्यादिप्रयोगसिद्धिः ब्राह्मणवत्सा चेति। अस्त्यत्र प्रकृतेरूर्ध्वं तल्लक्षणो विशेषः न चात्र कश्चिद्वि
शेषः स्त्रीपुंसयोरुपात्तः। अविभक्तिपरस्येति। एकविभक्तावित्यनुवर्तते तेन एकशेषनिमित्ते विभक्तौ परतो यत्र स्त्रीपुंस्कृ
तो विशेषस्तत्रैकशेषः। इह तु तस्यां चान्तर्वर्तिन्यां च विभक्तावित्येकशेषाभावः। कारिका चेति। द्वित्वमप्यत्र विशेषस्य वाचकं त
त्त्वनेकशेषनिमित्ते विभक्तौ परतोऽनन्तरमिति दोषः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एतत्समाधानार्थं विचारयति। कथमिति। अर्थ इति। अर्थस्त्रियाः शब्दद्वारकं विभक्तिपरत्वम्। कारिका चेति। शब्दस्त्रिया टापा न कृतमित्वमिति सिध्यति नार्थपक्षे। पश्यार्थेन टापकृतः तथाप्यधिकमित्वमस्ति न च तदर्थं स्त्रीकृतमिति दोषः। गोमती चेति। नात्र शब्दस्त्रियाः कश्चिद्विशेषः कृतः। अर्थपक्षे त्वत्र सिध्यति। अर्थेनेकारस्य विशेषस्य कृतत्वात्। पट्वी चेति। नात्र यणादेशस्य लक्षणवाक्ये शब्दस्त्री निमित्तत्वेनोपात्ता। अज्रूपताश्रयणेन यणादेशविधानात्। न च तदभावे भवतस्तन्निमित्तत्वं नाप्यर्थस्त्री यणादेशस्य निमित्तमिति दोषः। शब्दार्थाविति। नात्र योगपद्येनोभयोर्ग्रहणम्। अनियमस्त्वनेन प्रदर्श्यते। तेन क्वचिच्छब्दस्त्रीकृतविशेषपरिग्रहः क्वचिदर्थस्त्रीकृतविशेषाश्रयणम्। पट्वीत्यत्र च भवतीकारो यणादेशस्य निमित्तमस्मिन्विषये तद्भावभा

कथं पुनरिदं विज्ञायते शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष इति आहोस्विदर्थो या स्त्री तल्लक्षणश्चेदेव विशेष इति। किं चातः। यदि विज्ञायते शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष इति सिद्धं कारकश्च कारिका च कारकौ। इदं तु न सिध्यति गोमांश्च गोमती च गोमन्तौ। अथ विज्ञायते अर्थो या स्त्री तल्लक्षणश्चेदेव विशेष इति सिद्धं गोमांश्च गोमती च गोमन्तौ। इदं तु न सिध्यति कारकश्च कारिका च कारकौ। उभयथापि पटुश्च पट्वी च पटू इत्येतन्न सिध्यति। एवं तर्हि नैवं विज्ञायते शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष इति नाप्यर्थो या स्त्री तल्लक्षणश्चेदेव विशेष इति। कथं तर्हि शब्दार्थौ या स्त्री तद्भावेन च तल्लक्षणो विशेष आश्रीयते। एवं च कृत्वा इहापि प्राप्तिः ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेति। एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति। किम्। तदित्यनुवर्तते। तदित्यनेन प्रकृतौ स्त्रीपुंसौ प्रतिनिर्दिश्येते। कौ च प्रकृतौ। प्रधाने। प्रधानं या शब्दस्त्री प्रधानं या अर्थस्त्रीति॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्॥ अयं योगः शक्योवक्तुम्। कथम्। शुक्लश्च कम्बलः शुक्लं च वस्त्रं तदिदं शुक्लं ते इमे शुक्ले।

त्वादर्थोपि पारंपर्येण भवत्येव निमित्तमित्ययणादेशयोः। एवं तर्हीति। विस्पष्टं न व्यपदिशतीत्यर्थः। सूत्रोपात्त एवायमर्थो येनात्र न भवत्येकशेष इत्याह। तदित्यनेनेति। स्त्रीपुंसयोः सहविवक्षायामेकशेषः स च प्रधानयोरेव भवतीति यत्र प्रधानस्त्रीपुंसकृतो विशेषस्तत्रैकशेषः। इहाप्रधानकृतोपीत्येकशेषाभावः॥ नपुंस॥ शुक्ला च शुक्लं चेत्येकविभक्तौ विभक्त्यन्तानां च वैरूप्यादेकशेषो न प्राप्नोति शुक्लश्च शुक्लं चेत्यत्रापि विभक्त्यन्तानामसारूप्यात्। एकविभक्तौ तु सरूपाणामेकशेषे पुंनपुंसकयोः पर्यायेण प्राप्नोतीति वचनमिदमेकवद्भावार्थं च। ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रधानेकार्यसंप्रत्ययादिति। शब्देनार्थस्याभिधानमिह कार्यम्। तच्चनपुंसकानपुंसकसंनिधौ नपुंसकस्यैव भविष्यतीति नार्थः सूत्रेणे
त्यर्थः। कथमिति। यथा लोके बहुषु गच्छत्सु राजा गच्छतीति प्रधानं राजा व्यपदिश्यते। राज्ञश्च प्राधान्यं तदधीनप्रवृत्तिनिवृत्तित्वा
दन्येषाम्। इह तु नपुंसकस्य किंकृतं प्राधान्यमिति प्रश्नः। एवं हि लोके दृश्यत इति। व्यापित्वान्नपुंसकस्य प्राधान्यमाह। स्थि
तिर्नपुंसकं सा च सर्वत्र विद्यत इति स्थितिरूपत्वेन वस्त्रीपुंसयोरपि विवक्षायां सिद्धो नपुंसकशब्दप्रयोगः। अनिर्ज्ञातेर्थ इ
ति। सामान्यरूपेण ज्ञाते स्त्रीत्वादिना तु विशेषेणानिर्ज्ञात इत्यर्थः। गुणसंदेह इति। गुणाः स्त्रीत्वादयः। इयं चैवेति। यद्य-
पि नपुंसकस्य जन्म तथापि यत्प्रजननासमर्थं तन्नपुंसकमिति नेह नपुंसकलक्षणं किं तर्हि शब्दैकगोचरत्वमेव लिङ्गल

शुक्लश्च कम्बलः शुक्ला च बृहतिका शुक्लं च वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानि। प्रधानेकार्यसंप्रत्यया
च्छेषः। प्रधानेकार्यसंप्रत्ययाच्छेषो भविष्यति। किं च प्रधानम्। नपुंसकम्। कथं पुनर्ज्ञायते नपुंसकं प्रधान
मिति। एवं हि दृश्यते लोके अनिर्ज्ञातेर्थे गुणसंदेहे च नपुंसकलिङ्गं प्रयुज्यते। किं जातमित्युच्यते। इयं चैव
हि जायते। स्त्री वा पुमान्वा। तथा हि दूरे अव्यक्तरूपं दृष्ट्वा वक्तारो भवन्ति महिषीरूपमिव ब्राह्मणीरूपमिव।
प्रधानेकार्यसंप्रत्ययान्नपुंसकस्य शेषो भविष्यति। इदं तर्हि प्रयोजनम्। एकवच्चास्यान्यतरस्यामिति वक्ष्या
मीति। एतदपि नास्ति प्रयोजनम्। आकृतिवाचित्वादेकवचनम्। आकृतिवाचित्वादेकवचनं भविष्यति। यदा
द्रव्याभिधानं तदा द्विवचनबहुवचने भविष्यतः॥ भ्रातृपुत्रौ स्वसृदुहितृभ्याम्॥ पिता मात्रा॥ श्वशुरः श्वश्र्वा॥ कि
मर्थमिदमुच्यते। न पुमान् स्त्रियेत्येव सिद्धम्।

क्षणम्। तथा च नपुंसको भवतीति प्रयोग उपपद्यते। महिषीरूपमिति। रूपशब्दः संस्थानवचनः। यत्र दूराद्दृश्यमाने वस्तु-
नि निश्चयो नास्ति केवलं संभावनारूपः संदेहस्तत्रैकस्यापि शब्दस्य प्रयोगो भवति स्थाणुरयं स्यादिति। एवमिहापि महिषी वैतत्सं
स्थानमित्यस्मिन्नर्थे महिषीरूपमिवेति प्रयुक्तम्। रूपशब्दोत्र नपुंसकलिङ्गो दृष्टान्तत्वेनोपात्तः। यत्र तु विशेषस्य निर्ज्ञानं शुक्लः
शाटः शुक्लाः कम्बला इति तत्र नास्ति नपुंसकप्रयोगः। सत्यारम्भे अरण्यारण्यान्यावित्यत्रैवकारानुवर्तनान्महत्त्वस्योपाधेरा
धिक्यादेकशेषाभावः॥ पिता॥ किमर्थमिति। वृत्तिविषये भ्रात्रादिशब्दानां स्वस्रादिष्वपि वृत्त्या सिद्ध एकशेष इति मत्वा प्रश्नः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणादिति। भिन्नं च प्रवृत्तिनिमित्तं भ्रातृशब्दस्य स्वसृशब्दस्य चेति भ्रातृशब्देन न स्वसुरभिधानं प्राप्नोति। एकशेषविषयमिति। आरब्धे एकशेषेऽवश्यं भ्रातृशब्देन स्वसाभिधेया अन्यथैकशेषारम्भोऽनर्थकः स्यात्। एवमनारब्धेप्येकशेषे नित्यत्वाच्छब्दार्थसम्बन्धस्य सह विवक्षायामेव भ्रातृशब्दः स्वसुरभिधायको भविष्यति। न ह्यविद्यमानसम्बन्धस्य शक्तिः शास्त्रेण नियम्यते। अनभिधानाच्च भ्रातृपुत्रशब्दयोः स्वसृदुहितृभ्यां द्वन्द्वाभावः। मातापितरौ श्वश्रूश्वशुराविति द्वन्द्व इष्यत एव। त्यदादी॥ त्यदादित इति। षष्ठ्या व्याश्रय इति तसिः। आद्यादित्वाद्वा। सा चेति। स्त्रीत्वे प्राप्ते पुंस्त्वं विधीयते। पुंन

भ्रातृपुत्रपितृश्वशुराणां कारणाद्द्रव्ये शब्दनिवेशः। भ्रातृपुत्रपितृश्वशुराणां कारणाद्द्रव्ये शब्दनिवेशो भवति। भ्रातृपुत्रपितृश्वशुराणां कारणाद्द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात्सिद्धम्। यदि तावद्बिभर्तीति भ्राता स्वसर्यप्येतद्भवति। तथा यदि पुनातीति प्रीणातीति वा पुत्रः दुहितर्यप्येतद्भवति। तथा यदि पाति पालयतीति वा पिता मातर्यप्येतद्भवति। तथा यद्याश्वाप्तव्यः श्वशुरः श्वश्र्वामप्येतद्भवति। दर्शनं वै हेतुः। न हि स्वसरि भ्रातृशब्दो दृश्यते। दर्शनं हेतुरिति चेत्तुल्यमेतद्भवति। स्वसर्यपि भ्रातृशब्दो दृश्यतां तुल्यं हि कारणम्। न वै एष लोके सम्प्रत्ययः। न हि लोके भ्राता आनीयतामित्युक्ते स्वसा आनीयते। तद्विषयं च। तद्विषयं चैतद्द्रष्टव्यं भवति स्वसरि भ्रातृत्वं ~ किंविषयम्। एकशेषविषयम्। युक्तं पुनर्यन्नियतविषया नाम शब्दाः स्युः। बाढं युक्तम्। अन्यत्रापि तद्विषयदर्शनात्। अन्यत्रापि नियतविषयाः शब्दा दृश्यन्ते। तद्यथा। समाने रक्ते वर्णे गौर्लोहित इति भवति अश्वः शोण इति। समाने च काले वर्णे गौः कृष्ण इति भवति अश्वो हेम इति। समाने च शुक्ले वर्णे गौः श्वेत इति भवत्यश्वः कर्क इति॥ त्यदादीनि सर्वैर्नित्यम्॥ त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि॥ त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि भवन्ति। सा च देवदत्तश्च तौ। सा च कुण्डे च तानि॥ अद्वन्द्वतत्पुरुषविशेषणानाम्॥ अद्वन्द्वतत्पुरुषविशेषणानामिति वक्तव्यम्। इह मा भूत्। स च कुक्कुटः सा च मयूरी कुक्कुटमयूर्यौ ते। अर्द्धपिप्पल्यास्तदर्द्धपिप्पली च साऽर्द्धपिप्पल्यौ ते। अयमपि योगः शक्योऽवक्तुम्। कथम्। त्यदादीनां सामान्यार्थत्वात्।

पुंसकयोस्त्वेकशेषे शब्दपरविप्रतिषेधान्नपुंसकत्वं भवति। अद्वन्द्वतत्पुरुषविशेषणानामिति। न्यायसिद्धमिदम्। परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति समासार्थस्य लिङ्गातिदेशात्तद्विशेषणस्यापि सर्वनाम्नस्तल्लिङ्गस्य सिद्धत्वात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामान्यमर्थ इति। वस्तुमात्रं त्यदादिभिः परामृश्यत इति तदेवैषामर्थः। परस्येति। द्वन्द्वे सति प्राप्तः परविप्रतिषेधः प्राकृते आश्रयितुम्। पूर्वशेषदर्शनाच्चेति। सति त्वारम्भे पूर्वशेषो न स्यादिति दोषप्रसङ्गः। द्वन्द्व इति। तद्देवदत्तावित्यादिप्रयोगो मा भूदित्यर्थः। आभीर इति। ब्राह्मणादुग्रकन्यायामाभीरो नाम जायते। माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपादिति स्मृतिः।–

त्यदादीनां सामान्यमर्थः। आतश्च सामान्यं देवदत्तेऽपि हि स इत्येतद्भवति यज्ञदत्तेऽपि। त्यदादीनां सामान्यार्थत्वात् शेषो भविष्यति। इदं तर्हि प्रयोजनम्। परस्य शेषं वक्ष्यामीति। परस्य चोभयवाचित्वात्। उभयवाचि परम्। पूर्वशेषदर्शनाच्च। पूर्वस्य खल्वपि शेषो दृश्यते। स च यश्च तावानया। यावानय इति। इदं तर्हि प्रयोजनम्। द्वन्द्वो मा भूदिति। एतदपि नास्ति प्रयोजनम्। सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात् सिद्धम्। सामान्यविशेषवाचिनोश्च द्वन्द्वो न भवतीति वक्तव्यम्। यदि सामान्यविशेषवाचिनोर्द्वन्द्वो न भवतीत्युच्यते शूद्राभीरं गोबलीवर्दं तृणोलपमिति न सिध्यति। नैष दोषः। इह तावच्छूद्राभीरमिति। आभीरा जात्यन्तराणि। गोबलीवर्दमिति गाव उत्कालितपुंस्का वाहाय च विक्रयाय च स्त्रिय एवावशिष्यन्ते। तृणोलपमिति अपामुलपमिति नामधेयम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। सामान्येनोक्तत्वाद्विशेषस्य प्रयोगो न भविष्यति। सामान्येनोक्तत्वात् तस्यार्थस्य विशेषस्य प्रयोगेण न भवितव्यम्। किं कारणम्। उक्तार्थानामप्रयोग इति। न तर्हीदानीमिदं भवति तं ब्राह्मणमानय गार्ग्यमिति। भवति यदा नियोगतस्तस्यैवानयनं भवति।

स्त्रिय एवेति। ततश्चात्र गोशब्दः स्त्रीगवीनामेव वाचकः। सामान्येनेति। सामान्येन ——— सर्वविशेषाणां व्याप्तत्वान्नास्ति सामान्यविशेषयोः समुच्चय इत्यर्थः। तं ब्राह्मणमिति। तमित्यनेन गतत्वाद्ब्राह्मणशब्दस्य प्रयोगो न प्राप्नोति ब्राह्मणमित्यनेन गतत्वाच्च गार्ग्यशब्दस्येति भावः। भवतीति। सामान्योपक्रमे विशेषाभिधानमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 येनैवेति। यथा सामान्यविशेषयोर्विशेषणविशेष्यभावो दृश्यते तथा विशेषसंनिधौ तद्वर्जितेषु विशेषान्तरेषु सामान्यशब्द
स्य वृत्तिर्दृश्यते। ब्राह्मणा आयाता वसिष्ठोऽप्यायात इति तस्मात्तथाविधे विषयेऽयं वाचनिको द्वन्द्वनिषेधः। तस्मिंश्च सत्य
यमेकशेषो न वक्तव्य इत्यर्थः॥ ग्राम्य॥ स्त्रीपुंसात्मकस्य संघस्य स्त्रीशब्देनाभिधानं यथा स्यादिति सूत्रारम्भः। उभयात्मक
त्वमशक्यमन्वाह। अयमिति। स्त्रिय एवेति। यद्यपि तत्र वृषभस्यास्ति संभवः। तथापि महत्त्वग्रामवद्भूयस्त्वात् स्त्रीभिर्व्यपदे

एवं तर्हि येनैव खल्वपि हेतुना एतद्वाक्यं भवति। तं ब्राह्मणमानय गार्ग्यमिति तेनैव हेतुना वृत्तिरपि
प्राप्नोति। तस्मात् सामान्यविशेषवाचिनोश्च द्वन्द्वो न भवतीति वक्तव्यम्॥ ग्राम्यपशुसंघेष्वतरुणेषु स्त्री॥
अयमपि योगः शक्योऽवक्तुम्। कथम्। गाव इमाश्चरन्ति अजा इमाश्चरन्ति। गाव उत्कालितपुंस्का वा
हाय च विक्रयाय च। स्त्रिय एवावशिष्यन्ते। इदं तर्हि प्रयोजनम्। ग्राम्येष्विति वक्ष्यामीति। इह माभूत्। न्य
ङ्कव इमे सूकरा इमइति। कः पुनरर्हति अग्राम्याणां पुंस उत्कालयितुं ये ग्रहीतुमशक्याः। कुत एव वाह
य च विक्रयाय च। इदं तर्हि प्रयोजनम्। पशुष्विति वक्ष्यामीति। इह माभूत्। ब्राह्मणा इमे वृषला इमे।
कः पुनरर्हत्यपशूनां पुंस उत्कालयितुं येऽशक्या वाहाय च विक्रयाय च। इदं तर्हि प्रयोजनम्। संघेष्विति
वक्ष्यामीति। इह माभूत्। एतौ गावौ चरतः। कः पुनरर्हति निर्ज्ञातेर्थे अन्यथा प्रयोक्तुम्। इदं तर्हि प्रयोज
नम्। अतरुणेष्विति वक्ष्यामीति। इह माभूत्। तरुणका इमे वर्करा इमइति। कः पुनरर्हति तरुणानां पुंस उ
त्कालयितुं ये अशक्या वाहाय च विक्रयाय च॥ अनेकशफेष्विति वक्तव्यम्॥ इह माभूत्। अश्वा इमे चरन्ति
गर्दभाश्चरन्तीति॥ ॥इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य द्वि
तीयपादे तृतीयमाह्निकम्॥ ३॥ पादश्च समाप्तः॥

शो भवति। अग्राम्यादिषु तु मिश्रत्वात् संघस्येति पुमान् स्त्रियेति पुंसः शेषः। अनेकशफेष्विति। उष्ट्राणां वारणकत्वात् स्त्रीशे
षाभावः। तत्रानेन प्रकरणेन प्रयोगस्यानियतत्वाद् जातिः क्वचिदाश्रयलिङ्गेन स्त्रीत्वेन व्यपदिश्यते क्वचित्पुंस्त्वेनेत्युक्तं भ
वति॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य द्वितीये पादे तृतीयमाह्निकम्॥ समाप्तः। पादः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूवादयो धातवः॥ कुतोयमिति। लक्षणाभावं मत्वा कस्मान्निमित्ताद्वकार इति पृच्छति। यदि तावदिति। यणादेशेने कोनि
वर्तितत्वात्। अथासंहितयेति। अभ्युपगम्यवादोयम्। न ह्येकस्मिन्पदेऽसंहितास्ति। संहितैकपदे नित्येति वचनात्। तस्मात्सर्वथा-
निर्देशोयं न संभवतीत्येवं परमेतत्। भूवादीनामिति। सत्त्वोच्चारिते भूवादिशब्दे इत्यर्थो विवक्षितः। तत्र वाचकसंबन्धी भू
वादीनां भूवादिशब्दवाच्यानां वकार इति व्यपदिश्यते। मङ्गलार्थ इति। ननु निमित्ते पृष्टे प्रयोजनेनैतत्प्रस्तुतम्। नैष दोषः
प्रयोजनकथनेन निमित्तस्यापि कथनात्। अत एव निपातनादागमरूपोत्र वकारः कृतः। न चायमसाधुः। वैयाकरण-
निकाये प्रसिद्धत्वात्। तस्य च मङ्गलं प्रयोजनमित्यनेन प्रतिपादितं भवति। अपूर्वस्य हि लाभोदय्यादेर्लोके मङ्गलं स्मृ

भूवादयो धातवः॥ कुतोयं वकारः। यदि तावत्संहितया निर्देशः क्रियते भ्वादय इति भवितव्यम्। अथासं
हितया भूआदय इति भवितव्यम्। अत उत्तरं पठति। भूवादीनां वकारोयं मङ्गलार्थः प्रयुज्यते। माङ्गलिक आ
चार्यो महतः शास्त्रौघस्य मङ्गलार्थं वकारमागमं प्रयुङ्क्ते। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्रा
णि प्रथन्ते वीरपुरुषाणि भवन्ति आयुष्मत्पुरुषाणि च अध्येतारश्च मङ्गलयुक्ता यथा स्युरिति। अथादिग्रह
णं किमर्थम्। यदि तावत्पठ्यन्ते नार्थ आदिग्रहणेन। अन्यत्रापि ह्ययं पठन्नादिग्रहणं न करोति। क्वान्यत्र। मृडमृ
दगुधकुषक्लिशवदवसः क्त्वेति। अथ न पठ्यन्ते न तरामर्थ आदिग्रहणेन। न ह्यपठिताः शक्या आदिग्रहणेन
विशेषयितुम्। एवं तर्हि सिद्धे सति यदादिग्रहणं करोति तज्ज्ञापयत्याचार्योऽस्ति च पाठो बाह्यश्च सूत्रादिति।
किमेतस्य ज्ञापने प्रयोजनम्। पाठेन धातुसंज्ञेत्येतदुपपन्नं भवति।

चयति। तथेहाप्यागमो वकारो मङ्गलार्थः संपद्यते। अथवा सति वकारेऽविकृते भूशब्दे उच्चार्यमाणे महाव्याहृतिस्मरणं मङ्ग
लं भवतीति पारंपर्येण वकारो मङ्गलार्थकः संपद्यते। नार्थ इति। भूवादय इति पठितत्वात्ते धातव इति वक्तव्यम्। यथा तेतद्राजा-
इति। न तरामिति। सति पाठे गतार्थत्वान्न कर्तव्यम् असति तु संबन्धादित्यर्थः। अत एव प्रतिषेधप्रकर्षः संबन्धाभावे त्वन्तमेवा
करणमित्यस्यार्थस्य प्रतिपत्तये निर्दिष्टः। एवं तर्हीति। सूत्रेषु ये पठ्यन्ते मृडमृदादयः तान्समाप्य ते धातव इति वचनेन सिद्धे
सतीत्यर्थः। अस्ति च पाठ इति। अनेनासंबद्धत्वं परिहृतम्। बाह्यश्चेत्यनेन गतार्थत्वं निराकृतम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाठेनेति। धातुपाठे ये पठितास्तेषामेव धातुसंज्ञा। तेषां च पाठो नोपलक्षणार्थः। अपि तु द्वयत्वाप्रतिपादनार्थः। तत्र यदि क्रियावाची धातुरित्येतल्लक्षणं क्रियेत तर्हि आणवयति वट्टयतीत्यादीनामपि धातुसंज्ञा स्यात्। अथ सूत्रपठितानामनन्तरं ते धातवइत्युच्येत तदा तत्रापठितानां न स्यात्। तस्माद्भूवादय इत्युक्तम्। तत्र सूत्रवार्तिकभाष्यगणेषु ये पठ्यन्ते तेपि सूत्रकारादिप्रामाण्याद्धातुत्वेनाश्रयणीयाः। समानशब्दानामिति। समानश्रुतीनामिष्टविपरीतानामक्रियावाचिनामित्यर्थः। तव्यदादीनामिति। यथैव दिवं पश्येति बाह्यक्रियापेक्षे कर्मणि द्वितीया भवति एवं तव्यदादयोपि-

पाठेन धातुसंज्ञायां समानशब्दप्रतिषेधः॥ पाठेन धातुसंज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः। या इति धातुर्यी इत्याबन्तः। वा इति धातुर्वा इति निपातः। नु इति धातुः नु इति प्रत्ययश्च निपातश्च। दिवु इति धातुः दिविति प्रातिपदिकम्। किं च स्यात् यद्येतेषामपि धातुसंज्ञा स्यात्। धातोरिति तव्यदादीनामुत्पत्तिः प्रसज्येत। नैष दोषः। साधने तव्यदादयो विधीयन्ते साधनं च क्रियायाः। क्रियाभावात्साधनाभावः। साधनाभावात्तस्यामपि धातुसंज्ञायां तव्यदादयो न भविष्यन्ति। इदं तर्हि याः पश्य। आतो धातोरिति लोपः प्रसज्येत। नैष दोषः। अनाप इत्येवं सः। अस्य तर्हि वाशब्दस्य निपातस्य धातुरिति प्रातिपदिकसंज्ञायाः प्रतिषेधः प्रसज्येत। अप्रातिपदिकत्वात्स्वाद्युत्पत्तिर्न स्यात्। नैष दोषः। निपातस्यानर्थकस्य प्रातिपदिकत्वं चोदितं तत्रानर्थकग्रहणं न करिष्यते। निपातः प्रातिपदिकमित्येव। इह तर्हि नस्नू इति। अचि श्नुधातुभ्रुवां य्वोरियुवङावित्युवङादेशः प्रसज्येत।

स्युरित्यर्थः। साधन इति। अन्तरङ्गधातुवाच्यक्रियापेक्षे साधने तव्यदादयः सावकाशाः बाह्यक्रियापेक्षसाधनेनोत्पद्यन्ते इत्यर्थः। योपि शाकधृषेति स्वार्थिकस्तुमुन्सोप्यनभिधानान्न भविष्यति। याः पश्येति। यच्छब्दो न धातुरिति विभक्तिरुत्पद्यते तस्यामत्वे टापि च कृते धातुसंज्ञायामातो धातोरिति लोपप्रसङ्गः। नस्नू इति। नु णु धातुषु पठितः। न चास्य तेन सारूप्यम्। नैष दोषः। प्रयोगे तु शब्द एव धातुस्तेन चास्य सारूप्यमस्त्येव। यद्यपि चायं सानुबन्धकस्तथापि धातुष्वननुबन्धकपरिभाषा केश्चिन्नाश्रीयते। अथ वोपलक्षणार्थमिदं तेन स्याणवेणू इत्युदाहरणम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अक्षद्यूरिति। अत्र कृदन्तत्वात्प्रातिपदिकत्वम्। न वै अत्रेष्यत इति। शिष्टप्रयोगाभावात्। तस्माद्दिव औदिति ज्ञापकमेव। इत
रो ज्ञापकत्वं विघटयति। अनिष्टं चेति। एवं तर्हीति। धातुः सानुबन्धक इति भावः। एवमपीति। अधातुरिति प्रातिपदिकसंज्ञा
निषेधान्निरनुबन्धकात्सोरसंभव उभयसंभवे चास्याः परिभाषाया उपस्थानं नान्यथा। इयानवधिरिति। अवधिमानवधि-
नोपलक्ष्यते। तेन विशिष्टावधिपरिच्छिन्नस्य धातुसंज्ञा विधेयेत्यर्थः। श्वेध शब्द इति। ततश्च श्वेधशब्दाल्लुङादिप्रसङ्गः। न
चार्थपाठः परिच्छेदकः। तस्यापाणिनीयत्वात्। अभियुक्तैरुपलक्षणतयोपात्तत्वादनेकार्थत्वदर्शनादर्थस्य नियामकत्वा

नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययस्यावङादेशो भवतीति। यदयं तत्र श्नुग्रहणं करोति। अस्य तर्हि
दिव्शब्दस्याधातुरिति प्रातिपदिकसंज्ञायाः प्रतिषेधः प्रसज्येत। अप्रातिपदिकत्वात्स्वाद्युत्पत्तिर्न स्यात्।
नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयत्युत्पद्यन्ते दिव्शब्दात्स्वादय इति। यदयं दिवः सावौत्त्वं शास्ति। नैतदस्ति ज्ञा
पकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्। दिव्शब्दोयः प्रातिपदिकं तदर्थमेतत्स्यात्। अक्षद्यू
रिति। न वै अत्रेष्यते। अनिष्टं च प्राप्नोतीष्टं च न सिध्यति। एवं तर्ह्यननुबन्धकग्रहणे न सानुबन्धकस्येत्येव
मेतस्य न भविष्यति। एवमप्यननुबन्धको दिव्शब्दो नास्तीति कृत्वा सानुबन्धकस्य ग्रहणं विज्ञास्यते।
परिमाणग्रहणं च। परिमाणग्रहणं च कर्तव्यम्। इयानवधिर्धातुसंज्ञो भवतीति वक्तव्यम्। कुतो ह्येतत्।
भूशब्दो धातुसंज्ञो भविष्यति न पुनः श्वेधशब्द इति। यदि पुनः क्रियावचनो धातुरित्येतल्लक्षणं क्रि
येत। का पुनः क्रिया। ईहा। का पुनरीहा। चेष्टा। का पुनश्चेष्टा। व्यापारः। सर्वथा भवाञ्छब्देरेव शब्दा
नाचष्टे न किंचिदर्थजातं निदर्शयत्येवंजातीयका क्रियेति॥

भावात्। क्रियावचन इति। एवं सति समानशब्दानां प्रतिषेधो न वक्तव्यः। नापि परिमाणग्रहणम्। न हि श्वेधशब्दसमुदायः क्रि
यावाची। का पुनरिति। द्रव्यव्यतिरेकेण तस्याः सत्तामसंभावयतः प्रश्नः। ईहेति। ईहाचेष्टाशब्दयोरन्यत्र व्यापारविशेषवच
नत्वेपीह व्यापारमात्रवचनत्वं बोद्धव्यम्। कस्यचित्केनचिच्छब्देन सोऽर्थः प्रसिद्ध इत्यनेकपर्यायोपादानम्। सर्वथेति
। यावद्द्रव्यव्यतिरेकेण क्रियासद्भावे प्रमाणं नोक्तं तावत्पर्यायोपादानमात्रेण तस्याः स्वरूपं न निश्चीयत इत्यर्थः। अर्थ
जातमिति। अर्थस्वरूपमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशक्येति।आख्यातपदवाच्यापूर्वापरीभूतावयवासाध्यमानावस्थाभूतभविष्यद्वर्तमानसदसदनेकावयवसमूहरूपासा
वस्तुविषयेन्द्रियग्राह्यज्ञानभवतीत्यर्थः।पिण्डीभूतेति।यथापरमाणवःपिण्डीभूताउपलभ्यन्तेनकेवला एवंपिण्डीभावाभावा
त्क्रियानप्रत्यक्षेत्यर्थः।गर्भोनिर्लुठितइति।यथाकुक्षिस्थोगर्भोऽप्रत्यक्षस्तथाक्रियेत्यर्थः।अथवायथानिर्लुठितोनिर्गतःकु
क्षेर्गर्भःप्रत्यक्षोनैवंक्रियेतिवैधर्म्येणदृष्टान्तः।सासाविति।यापूर्वमुक्तासासावनुमानेनप्रतीयतइत्यर्थः।कोसाविति।योभा
वेल्युट्नपुंसकः।अन्यत्रत्वभिधेयवल्लिङ्गनियतलिङ्गः।अथवामन्यतेर्घञ्यनुमानइतिरूपम्।यस्मिन्संनिहितेइति।
यस्मिन्वस्तुनिसंनिहितेसतिपचतीत्येतत्प्रयुज्यतेनासतिसाक्रिया।क्वचित्तुयस्मिन्साधनेसंनिहितेइतिपाठः।तत्रायम-
र्थः।यस्मिन्संनिहितेसतिपचतीत्येतत्साधनविषयेभवतीति।स्यादेतत्।मृगतृष्णिकाविषयजलज्ञानवत्पचतीत्येतदस-

क्रियानामेयमत्यन्तापरिदृष्टाअशक्यापिण्डीभूतानिदर्शयितुम्।यथागर्भोनिर्लुठितः।सासावनुमा
नगम्या।कोसावनुमानः।इहसर्वेषुसाधनेषुसंनिहितेषुकदाचित्पचतीत्येतद्भवतिकदाचिन्नभवति
।यस्मिन्संनिहितेपचतीत्येतद्भवतिसानूनंक्रिया।अथवायया देवदत्तइहभूत्वापाटलिपुत्रेभवतिसा
नूनंक्रिया। कथंपुनर्ज्ञायतेक्रियावचनाःपचादयइति।यदेतेषांकरोतिनासामानाधिकरण्यम्।किं
करोतिपचतिकिंकरिष्यतिपक्ष्यतिकिमकार्षीत् अपाक्षीदिति।तत्रक्रियावचनेउपसर्गप्रत्ययप्रति
षेधः॥क्रियावचनेधातावुपसर्गेप्रत्यययोःप्रतिषेधोवक्तव्यः।पचतिप्रपचति।

त्यविषयमेवज्ञानमित्याशङ्क्याह।अथवेति।देशान्तरप्राप्तिलक्षणेनकार्येणाऽबाधितेनक्रियाख्यंकारणमनुमीयत
इत्यर्थः।ननुप्रत्यक्षाप्रवृत्तौसंबन्धग्रहणाभावात्कथंक्रियाविषयमनुमानंप्रवर्तते।नैषदोषः।धातुवाच्यस्यसमू
हस्ययुगपदसंनिधानादप्रत्यक्षत्वेप्येकैकस्यतुक्षणस्यप्रत्यक्षत्वंबुद्ध्यातान्क्षणान्संकलय्यपचतीतिप्रयुज्यते।
यद्वाप्येकस्मिन्क्षणेपचतीतिप्रयोगस्तदातत्रसमूहरूपारोपणात्।शब्दशक्तिस्वभावाच्चैकःक्षणोनैवधातुवाच्यः। किंकरो-
तिपचतीति।सामान्यविशेषभावेनसामानाधिकरण्यात्क्रियाविशेषवचनाःपचादयःप्रतीयन्तइत्यर्थः।यदातुकिंकरोती रामः
तिपृष्टेनकरोत्यास्तएवकेवलमितिप्रतिवचनंतदाव्यापारमात्रस्यावश्यंभावित्वाद्विशेषविषयःप्रश्नःप्रतिवचनंतुविशे २३०
षनिराकरणेनेतिबोद्धव्यम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संघातेनेति।संघातस्यैवप्रयोगादर्थवत्त्वम्।केवलानांतुधातूनामप्रयोगादानर्थक्यम्।अतिशब्दश्चेति।यद्यप्ययंप्रत्ययसमुदायस्तथापिप्रकृतिभागावबोधपरत्वात्प्रत्ययभागपर्यालोचनेनादरादेवमुक्तम्।अथवापूर्वाचार्यैःकैश्चिदतिःप्रत्यय

किंपुनःकारणंप्राप्नोति।संघातेनार्थगतेः।संघातेनह्यर्थोगम्यतेसप्रकृतिकेनसप्रत्ययकेनसोपसर्गेणच।अस्तिभवतिविद्यतीनांचधातुत्वम्।अस्तिभवतिविद्यतीनांचधातुसंज्ञावक्तव्या।यथाहिभवताकरोतिनापचादीनांसामानाधिकरण्यंदृष्टंनतथास्त्यादीनांनिदर्श्यते।नहिभवतिकिंकरोत्यस्तीति।प्रत्ययार्थस्याऽव्यतिरेकात्प्रकृत्यन्तरेषु।प्रत्ययार्थस्याव्यतिरेकात्प्रकृत्यन्तरेषुमन्यामहेधातुरेवक्रियामाहेति।पचतिपठति।प्रकृत्यर्थोन्यश्चान्यश्च।प्रत्ययार्थःसएव।धातोश्चार्थाभेदात्प्रत्ययान्तरेषु।धातोश्चार्थाभेदात्प्रत्ययान्तरेषुमन्यामहेधातुरेवक्रियामाहेति।पक्तिःपचनंपाकइति।प्रत्ययार्थोन्यश्चान्यश्चभवति।प्रकृत्यर्थःसएव।कथंपुनर्ज्ञायतेऽयंप्रकृत्यर्थोऽयंप्रत्ययार्थइति।अन्वयव्यतिरेकाभ्याम्।अन्वयाच्चव्यतिरेकाच्च।कोसावन्वयोव्यतिरेकोवा।इहपचतीत्युक्तेकश्चिच्छब्दःश्रूयतेपच्छब्दश्चकारान्तः।अतिशब्दश्चप्रत्ययः।अर्थोपिकश्चिद्गम्यतेविक्लित्तिःकर्तृत्वमेकत्वंच।पठतीत्युक्तेकश्चिच्छब्दोहीयतेकश्चिदुपजायतेकश्चिदन्वयी।पच्छब्दोहीयतेपठ्शब्दउपजायतेअतिशब्दोन्वयी।अर्थोपिकश्चिद्धीयतेकश्चिदुपजायतेकश्चिदन्वयी।विक्लित्तिर्हीयतेपठिक्रियोपजायतेकर्तृत्वंचैकत्वंचान्वयी।तेनमन्यामहेयःशब्दोहीयतेतस्यासावर्थःयोर्थोहीयते।यःशब्दउपजायतेतस्यासावर्थःयोर्थउपजायते।यःशब्दोन्वयीतस्यासावर्थःयोर्थोन्वयी।विषमउपन्यासः।बहवोहिशब्दाएकार्थाभवन्ति।तद्यथा।इन्द्रःशक्रःपुरुहूतःपुरंदरः।कन्दुःकोष्ठःकुसूलइति।एकश्चशब्दोबह्वर्थः।तद्यथा।अक्षाःपादामाषाइति।अतःकिंनसाधीयोऽर्थवत्तासिद्धाभवति।

लेनकल्पितइतितदपेक्षयेतदुक्तम्।किंनसाधीयइति।यदाप्रकृतिरेवक्रियांसाधनंचाहतदासिद्धमेवप्रकृतेःक्रियावाचित्वम्।प्रत्ययएवेति।ततश्चप्रकृतेर्नस्यात्क्रियावाचित्वम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिरुपरिभावइति। ततश्चाधीतइत्यस्य विशिष्टार्थयुक्तानां शब्दानां पठनं विधिपूर्वकं वा करोतीत्यर्थः। अध्येतीत्यत्र वि-
शिष्टस्मरणरूपं ज्ञानं धात्वर्थः। शेषमिति। अन्यत्रापि प्रयोगात्। ततश्चान्यत्रास्य योऽर्थो द्योत्यः स एवेहापीत्यनुमीयते। अ-
नेकार्थत्वाद्धातूनां तिष्ठतिरेव गतिवाचीति निर्णयः। भाववचनइति। भावशब्दः क्रियामात्रवाची। यथा यस्य च भावेने-

नापि ब्रूमोऽर्थवत्त्वानसिध्यतीति। वर्णिता ह्यर्थवत्ताऽन्वयव्यतिरेकाभ्यामेव। तत्र कु‾त एतदयं प्रकृत्य
र्थोऽयं प्रत्ययार्थ इति। न पुनः प्रकृतिरेवो भावमर्थं ब्रूयात्प्रत्यय एव वा। सामान्यशब्दा एते एवं स्युः। सामान्य
शब्दाश्च नान्तरेण प्रकरणं विशेषणं वा विशेषेष्ववतिष्ठन्ते। यतस्तु खल्वनियोगतः पचतीत्युक्ते स्वभा
वतः कस्मिंश्चिद्विशेषे पचिशब्दो वर्तते ऽतो मन्यामहे नेमे सामान्यशब्दा इति। न चेत्सामान्यशब्दाः प्रकृ
तिः प्रकृत्यर्थे वर्तते प्रत्ययः प्रत्ययार्थे। क्रियाविशेषक उपसर्गः। पचतीत्यत्र क्रिया गम्यते तां प्रो विशिन
ष्टि। यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्र धातुरुपसर्गं व्यभिचरति। यत्र न खलु तं व्यभिचरति तत्र कथ
म्। अध्येति अधीत इति। यद्यप्यत्र धातुरुपसर्गं न व्यभिचरति उपसर्गस्तु धातुं व्यभिचरति तं मन्यामहे
य एवास्याधेरन्यत्रार्थः स इहापीति। कः पुनरन्यत्राधेरर्थः। अधिरुपरिभावे वर्तते। इह तर्हि व्यक्तम
र्थान्तरं गम्यते तिष्ठति प्रतिष्ठत इति। तिष्ठतीति व्रजिक्रियायाः निवृत्तिः प्रतिष्ठत इति व्रजिक्रिया गम्य
ते ते मन्यामहे उपसर्गकृतमेतद्येनात्र व्रजिक्रिया गम्यत इति। प्रोऽयं दृष्टापचारः आदिकर्मणि वर्तते। न
चेदं नास्ति बह्वर्था अपि धातवो भवन्तीति। तद्यथा। वपिः प्रकरणे दृष्टश्छेदने चापि वर्तते। केशश्मश्रु व
पतीति। ईडिः स्तुतिचोदनायाच्ञासु दृष्टः प्रेरणे चापि वर्तते। अग्निर्वा इतो वृष्टिमीट्टे मरुतोऽमुतश्च्याव
यन्तीति। करोतिरभूतप्रादुर्भावे दृष्टः निर्मलीकरणे चापि वर्तते। पृष्ठं कुरु पादौ कुरु उन्मृदानेति गम्य
ते। निक्षेपणे चापि वर्तते कटे कुरु घटे कुरु अश्मानमितः कुरु स्थापयेति गम्यते। एवमिहापि तिष्ठति
रेव व्रजिक्रियामाह तिष्ठतिरेव व्रजतिक्रियायाः निवृत्तिम्। अयं तर्हि दोषः। अस्ति भवति विद्यतीनां धा
तुत्वमिति। यदि पुनर्भाववचनो धातुरित्येतल्लक्षणं क्रियेत। कथं पुनर्ज्ञायते भाववचनाः पचादय इति। श्रमः

तिभावे घञ् इति च। तेन पचादीनामपि धातुसंज्ञा सिद्धा। अस्तिभवतिविद्यतीनामपि भावरूपार्थाभिधायित्वात्। ॥ २३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवतिपचतीति। आत्मभरणवचनो भवतिः। तच्चात्मभरणं विरुद्धैकार्थसमवायैः पाकत्वादिभिरविरुद्धैकार्थसमवायम्। यथा शुक्लं रूपमिति शुक्ले गुणे शुक्लत्वं रूपत्वं चास्तीति शुक्लादयो रूपवचनाः एवं पचादयो भाववचना इत्यर्थः। कः पुनरिति। यद्वि त्रिये च भावस्तदा पक्षान्तरोपादानमनर्थकमथान्यस्तदाऽव्याप्तिरिति प्रश्नः। स्वपदार्थ इति। स्वग्रहणमुपचरितार्थनिवृत्त्यर्थं गौणोऽपि पदार्थो भवति न तु स्वो व्यभिचारात्। पदग्रहणं प्रकरणाद्यनपेक्षत्वप्रतिपादनार्थम्। भवनं भाव इति विग्रहः कर्तृसाधननिवृत्त्यर्थः। भेद इति। विनाशो भेदश्छेदश्च घटरज्ज्वादेः स च भावविरोधीति भावः। सर्वान्पुरुषानिति। किं करोषि पचामि किं करोमि पचेत्यादौ विपरीतापि पुरुषानुवृत्तिः सर्वग्रहणेन विवक्षिता। भवतिः

यदेतेषां भवतिना सामानाधिकरण्यं भवति पचति भवति पक्ष्यति भवति अपाक्षीदिति। कः पुनर्भावः। भवतेः स्वपदार्थो भवनं भाव इति। यदि भवतेः स्वपदार्थो भवनं भावः विप्रतिषिद्धानां धातुसंज्ञा न प्राप्नोति। भेदः छेदः। अन्यो हि भावः। अन्योऽभावः। आतश्चान्यो भावः अन्योऽभाव इति। यो हि यस्य भावमिच्छति स न तस्याभावम्। यस्य चाभावं न तस्य भावम्। पचादीनां च धातुसंज्ञा न प्राप्नोति। यथा हि भवता क्रियावचने धातौ करोतिना पचादीनां सामानाधिकरण्यं निदर्शितं न तथा भाववचने धातौ निदर्श्यते करोतिः पचादीनां सर्वान्कालान्सर्वान्पुरुषान्सर्वाणि वचनान्यनुवर्तते। भवतिः पुनर्वर्तमानकालत्वं चैकत्वं च। कातर्हीयं वाचोयुक्तिः भवति पचति भवति पक्ष्यति भवत्यपाक्षीदिति। एषैषा वाचोयुक्तिः पचादयः क्रियाः भवतिक्रियायाः कर्त्र्यो भवन्ति। यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रान्या चान्या च क्रिया। यत्र तु खलु सैव क्रिया तत्र कथम्।

पुनरिति। न हि भवति भविष्यति पक्ष्यत्यभूदपाक्षीद्भवतः पचतो भवन्ति पचन्तीति। कातर्हीति कथं संबन्ध इति प्रश्नः। एषैषेति। या एषा त्वया एष्टा सैषा वर्ण्यमानस्वरूपेत्यर्थः। पचादय इति। साध्यसाधनभावः संबन्धो न तु सामान्यविशेषभाव इत्यर्थः। नन्वन्यत्रोक्तं तिङभिहितो भावः क्रियया समवायं न गच्छतीति। न हि भवति पठति पचतीइति। ततश्च तेनैतद्विरुध्येत। तत्राङ्कर्तृकर्मभावेन क्रिया आख्यातवाच्यक्रियया संबध्यत एव। भवति पचति पश्यमृगो धावतीति। करणादिभावेन तु न संबध्यते। तथा प्रयोगादर्शनात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भवेदपि भवेदिति। एकस्याः क्रियायाः आत्मापेक्षः साध्यसाधनभावो विरुद्ध इति भावः। कालभेदादिति। स्वाभाविकमन्यत्वं
कालसाधनभेदेन व्यज्यते। एकस्येति। अपि भवेदित्यत्र यो भवतिस्तस्यारोप्यादिविशिष्टदेवदत्तादिकर्तृका सत्ता वर्तमा-
नार्थस्तथा भूता हि सत्ता प्रार्थ्यते इति वर्तमानकालः प्रत्ययः स्यातु सत्ता भवेदित्यस्याः सत्तायाः कर्तृत्वेन निर्दिष्टेति भेदोस्त्ये-
व। अस्त्वयमिति। भेदाद्द्वयोपि भवन्तीति तद्वचनानां सिध्यति धातुसंज्ञा। एतान्यपीति। एतत्प्रातिपाद्यानि वस्तूनीत्यर्थः। भा-
व्यते यः स भाव इति। तेन साध्यमानार्थवाचिनां धातुसंज्ञेत्यर्थः। स्वभावसिद्धमिति। शब्दशक्त्यनुसारेणैतदुच्यते।
कृतता क्रियमाणता कर्तव्यता युक्तान्यपि द्रव्याणि सिद्धरूपाण्येव प्रातिपदिकेनाभिधीयन्ते। शब्दान्तरेण तु तेषाम

भवेदपि भवेत् स्यादपि स्यादिति। अत्राप्यन्यत्वमस्ति। कुतः। कालभेदात्साधनभेदाच्च। एकस्यात्र भव
तेर्भवतिः साधनं सर्वकालश्च प्रत्ययः। अपरस्य बाह्यं साधनं वर्तमानकालश्च प्रत्ययः। यावता त्वत्रा
प्यन्यत्वमस्ति पश्चाद्द्वयश्च क्रियाः भवति क्रियायाः कर्त्र्यो भवन्तीति। अस्त्वयं कर्तृसाधनः भवतीति भाव
इति। किं कृतं भवता विप्रतिषिद्धानां धातुसंज्ञा सिद्धा भवति भवेदिव्रतिषिद्धानां धातुसंज्ञा सिद्धा स्यात्प्रातिपदि
कानामपि तु प्राप्नोति वृक्षः प्लक्ष इति। किं कारणम्। एतान्यपि हि भवन्ति। एवं तर्हि कर्मसाधनो भवि
ष्यति। भाव्यते यः स भाव इति। क्रिया चैव हि भाव्यते। स्वभावसिद्धं तु द्रव्यम्। एवमपि भवेत्केषांचिन्नस्या
त्। यानि न भाव्यन्ते। ये त्वेते संबन्धिशब्दास्तेषां प्राप्नोति माता पिता भ्रातेति । सर्वथा वयं प्रातिपदिकप
र्युदासं न मुच्यामहे। पठिष्यति ह्याचार्यः भूवादिपाठः प्रातिपदिकाणवयत्यादिनिवृत्त्यर्थ इति। या
वता पठिष्यति पश्चाद्द्वयश्च क्रियाः भवति क्रियायाः कर्त्र्यो भवन्तीति अस्त्वयं कर्तृसाधनो भवतीति भा
व इति। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। एतेनैवाभिहितं सूत्रेण भूवादयो धातव इति।
कथम्। नेदमादिग्रहणम्। वदेर्णादिक इकः कर्तृसाधनः।

वस्थान्तरं प्रतिपाद्यते। मातेति। मातृत्वं पुत्रजन्मना भाव्यते सर्वथेति। पाठाश्रये समानशब्दानां प्रसङ्गः कर्तृसाधने भवशब्दे
वृक्षादीनां प्रसङ्गः कर्मसाधने मात्रादीनामित्यर्थः। इदानीं समाधानमाह। पठिष्यतीति। पठितानामेव भाववचनानां धातुसं
ज्ञा नान्येषामित्यर्थः। अस्त्वयमिति। भवतीति भूरिति कर्तरि क्विब्लिनतु कर्मणि। अर्थस्त्वभिन्न एव। यो हि भवति स एव-
भाव्यते नान्यः। नेदमिति। वृद्धिशब्दस्य मङ्गलार्थस्य प्रयुक्तत्वाद्वकारो मङ्गलार्थो नोपयुज्यते। ॥

CC-0. In Public Domain. Digitization by eGangotri

भुवमिति। जायमानमर्थं येऽभिदधति ते धातव इत्यर्थः। भवतिरत्र जन्मवाची गृह्यते न तु सत्तावाचीति सिद्धार्थाभिधायिनां संज्ञा न भवति। शिप्रेप इति। भावार्थाभिधायित्वात्प्रत्ययस्य धातुसंज्ञाप्रसङ्गादात्वं प्राप्नोति। तच्च नैमित्तिकं शितितु प्रतिषिध्यते। एकारोच्चारणं तु यदा कर्तृकर्मणोर्लकारस्तदर्थम्। पाठस्तु न तावदस्य मनसि वर्तते। इतरेतराश्रयं चेति। प्राक्शास्त्रव्यापारात्समुदाय एव नास्ति कुतोऽन्वयव्यतिरेकाभ्यामर्थस्य प्रविभागः। तस्मिंश्चासति भाववचनत्वापरिज्ञानाद्धातुत्वं न व्यवतिष्ठत इत्यर्थः। सिद्धं त्विति। व्यवस्थिता एव पचत्यादयः समुदायाः संसृष्टार्थाभिधायिनः केवलं समुत्प्रेक्ष्योत्प्रेक्ष्य प्रक्रियायामर्थविभागः शब्दविभागश्चापोद्ध्रियत इत्यर्थः। अनाश्रित्येति। पारमार्थिकं नाश्रीयते परिकल्पितं त्वाश्रीयत एव। तत्त्वतो

भुवं वदन्तीति भूवादय इति। भाववचने धातौ तदर्थप्रत्ययप्रतिषेधः। भाववचने धातौ तदर्थस्य प्रत्ययस्य प्रतिषेधो वक्तव्यः। शिप्रेप इति। किं च स्यात्। अशितीत्यात्वं प्रसज्येत। तद्विधातोर्विहितम्। इतरेतराश्रयं च प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः इतरेतराश्रयं च भवति। का इतरेतराश्रयता। प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः। उत्पन्ने हि प्रत्यये भाववचनत्वं गम्यते स च तावद्भाववचनादुत्पाद्यः। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। सिद्धं तु नित्यशब्दत्वादनाश्रित्य भाववचनत्वं प्रत्ययः। सिद्धमेतत्। कथम्। नित्यशब्दत्वात्। नित्याः शब्दाः। नित्येषु च शब्देषु अनाश्रित्य भाववचनत्वं प्रत्यय उत्पद्यते। प्रथमभावग्रहणं च। ——— प्रथमभावग्रहणं च कर्तव्यम्। प्रथमं यो भावमाहेति। कुतः पुनः प्राथम्यम्। किं शब्दत आहोस्विदर्थतः। किं चातः। यदि शब्दतः सनादीनां धातुसंज्ञा न प्राप्नोति। पुत्रीयति वस्त्रीयतीति। अथार्थतः सिद्धा सनादीनां धातुसंज्ञा। स एव तु दोषः। भाववचने तदर्थप्रत्ययप्रतिषेध इति। एवं तर्हि नापि शब्दतो नाप्यर्थतः।

हि शब्दान्त एवये वार्थान्तरेषु प्रयुज्यन्ते। प्रथमभावग्रहणं चेति। तदर्थप्रत्ययपरिहारोऽयम्। प्राथम्यस्यापेक्षिकत्वात्पृच्छति कुत इति। पुत्रीयतीति। नात्र प्रथममुच्चार्यमाणः पुत्रशब्दो भावमाह। सनाद्यन्ता धातव इत्यस्य प्रत्याख्यानेऽयं दोषः। सिद्धेति। प्रथम आद्यो भावोऽप्रथमेनापि क्वचाभिधीयते न तु द्वितीयः। शिप्रेप इत्यत्र तु प्राप्नोति। स्वार्थिकेन प्रत्ययेन प्रथम एव भावोऽभिधीयते न तु द्वितीयः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अभिधानतइति। अन्येनानभिहितं भावं य आह स धातुः। श्निपूयेदित्यत्र तु प्रकृत्यभिहितं भावं प्रत्यय आहेति न तस्य धातु संज्ञाप्रवृत्तिः। यथा प्रथममयं राजानं पश्यतीत्यस्यायमर्थो यदन्येनादृष्टं पश्यतीति तथेहापि प्राथम्यमभिधानक्रियापेक्षमाश्रीयते अन्येभ्यो भावाभिधायिभ्यो यः प्रथमं भावमाहेति। सुमध्यमइति। द्वौ शब्दार्थपक्षौ दुष्टत्वात्परित्यज्योपादीयमानमभिधानं मध्यममिति व्यपदिश्यते। तदेव निर्दोषत्वाच्छोभनत्वेन विशेष्यते। चिकीर्षतीत्यत्र करोत्यर्थोपसर्जनामिच्छामन्येनानभिहितां सन्प्रत्यय आहेति प्रवर्तते धातुसंज्ञा। अत्र पक्षे यथा श्निपूयदिति प्रत्ययस्य धातुसंज्ञा न भवति तथा स्वार्थिकानामायादीनामपि न प्राप्नोति गोपायति कामयतेइति। तदर्थं सनाद्यन्ता धातवइति पठितव्यमेव। इहेति। तदर्थं प्रत्ययप्रतिषेध इतरेतराश्रयं च। प्रथमभावग्रहणं च सिद्धं तु नित्यशब्दत्वादिति च। केवलं प्रथमभावग्रहणमपनीय प्रथमक्रियाग्रहणं चेति क्रियाग्रहणं कर्तव्यम्। तत्रेदमिति।

किं तर्ह्यभिधानतः। सुमध्यमेभिधाने यः प्रथमं भावमाह। इह ये एव भाववचने धातौ दोषास्ते क्रियावचनेपि। तत्र त एव परिहाराः। तत्रेदमपरिहृतम्। अस्ति भवति विद्यतीनां धातुत्वमिति। तस्य परिहारः। कां पुनः क्रियां भवान्मत्वाह अस्ति भवति विद्यतीनां धातुसंज्ञा न प्राप्नोतीति। किं यत्तद्देवदत्तः कंसपात्र्यां पाणिनौदनं भुङ्क्ते इति। नन्वेमः कारकाणि क्रियेति। किं तर्हि कारकाणां प्रवृत्तिविशेषः क्रिया। अन्यथा च कारकाणि भुक्तौदने प्रवर्तन्ते अन्यथा च मांसौदने। यद्येवं सिद्धास्तिभवतिविद्यतीनां धातुसंज्ञा। अन्यथा हि कारकाण्यस्तौ प्रवर्तन्तेऽन्यथा हि म्रियतौ।

किं करोतीति प्रश्नेऽस्त्यादिभिः प्रतिवचनाभावादक्रियावचनत्वमेषामिति मन्यते। यच्चाप्युक्तमिह सर्वेषु साधनेषु संनिहितेषु कदाचित्पचतीत्येतद्भवति कदाचिन्नेति तदस्त्यादिषु नास्ति। नह्यस्तीति कदाचिद्भवत्यपि तु सर्वदेतिपाकादिभिर्वैधर्म्यम्। यथा च पचतितरामिति प्रकर्षो भवति नैवमस्तितरामिति। किं यत्तदिति। यत्तच्छब्दाभ्यां कारकवैचित्र्यं निर्दिश्यते। प्रवृत्तिविशेषइति। सर्वा प्रवृत्तिः प्रवृत्त्यन्तराद्भिद्यतइत्यस्त्येव सर्वस्याः क्रियात्वम्। अन्यथेति। भुक्तौदनेमन्दप्रयत्नः प्रवर्तते मांसौदने तु संवेगेन। यथा च भोजनक्रियाणां परस्परवैलक्षण्यात्प्रवृत्तिविशेषत्वं नैवमस्त्यादीनाम्। यद्येवमिति। अत्रापि प्रवृत्त्यन्तरापेक्षयास्त्येव प्रवृत्तिविशेषरूपत्वमित्यर्थः। अन्यथेति। अस्त्यात्मभरणरूपा प्रवृत्तिर्म्रियतौ तत्त्यागरूपा। उत्पत्तिप्रभृत्याविनाशाच्च सत्तानुषङ्गादस्तीति प्रत्ययस्य संनिहितेषु साधनेषूत्पत्तिरव्यपेक्षं भाविनीति कादाचित्काभावः। प्रकर्षप्रत्ययोपि दृश्यते विद्यतेतरामिहधान्यमिति। ॥

CC-0. In Public Domain. Digitization by eGangotri

अत्रैवार्थे आगममाह। षड्भावविकारा इति। भावस्य क्रियायाः षट्प्रकारा इत्यर्थः। तेषु चास्तिः पठित इति तस्यापि क्रियात्वमित्यर्थः। अथवा भावस्य सत्ताया एते प्रकाराः। सत्तैवानेकक्रियात्मिका साधनसंबन्धाद्व्यवसीयमानसाध्यरूपा जन्मादिरूपतया विभासते। एते च भावविकारा निरुक्ते निपुणं व्याख्याताः। इह तु प्रकृतानुपयोगान्न व्याख्यायन्ते। सर्वथेति। भावविकारपरिसंख्यानस्याव्यापकत्वमित्यर्थः। एवं तर्हीति। अनुमाने नस्यानस्य क्रियात्वं प्रतिपादयति। अन्यथास्थित इत्युक्ते वृद्धिक्षयनिवृत्तिर्न प्रतीयेत। अथवेति। क्रियान्तरधर्मसमन्वयेनास्त्यादीनां क्रियात्वं प्रतिपाद्यते। घट इत्युक्ते कालविशेषावगति-

षड्भावविकारा इति ह स्माह वार्ष्यायणिः। जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति। सर्वथा स्थित इत्यत्र धातुसंज्ञा न प्राप्नोति। वा ह्येते भ्यस्तिष्ठतिः। एवं तर्हि क्रियायाः क्रियानिवर्तिका भवति द्रव्यं द्रव्यस्य निवर्तकम्। एवं हि कश्चित्कंचित्पृच्छति किमवस्थो देवदत्तस्य व्याधिरिति। स आह वर्द्धत इति। अपर आह। अपक्षीयत इति। अपर आह। स्थित इति। स्थित इत्युक्ते वर्द्धतेश्चापक्षीयतेश्च निवृत्तिर्भवति। अथवा नान्तरेण क्रियां भूतभविष्यद्वर्तमानाः कालाः व्यज्यन्ते। अस्त्यादिभिरपि भूतभविष्यद्वर्तमानकालाः व्यज्यन्ते। अथवा नान्यत्स्पृष्टेनान्यदाख्येयमूते न नभविष्यति किं करोत्यस्तीति। अथ यद्येव क्रियावचनो धातुरित्येष पक्षोऽथापि भाववचनो धातुरिति। किं गतमेतदियता सूत्रेणाहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम्। गतमित्याह। कथम्। अयमादिशब्दोऽस्त्येव व्यवस्थायां वर्तते। तद्यथा। देवदत्तादीन्समुपविष्टानाह देवदत्तादय आनीयन्तामिति तेऽत्स्याप्यानीयन्ते। अस्ति प्रकारे वर्तते। तद्यथा। देवदत्तादय आढ्या अभिरूपा दर्शनीयाः पटवन्तः। देवदत्तप्रकारा इति गम्यते। प्रत्येकं चादिशब्दः परिसमाप्यते। भ्वादय इति च वादय इति च। तद्यदा तावत्क्रियावचनो धातुरित्येष पक्षः तदा भू इत्यत्र य आदिशब्दः स व्यवस्थायां वर्तते वा इत्यत्र य आदिशब्दः स प्रकारे भू इत्येवमादयो वा इत्येवंप्रकारा इति॥

न्नास्ति। अस्ति अभूद्भविष्यतीति कालविशेषावगमात्साध्यमानस्य चार्थस्य कालेन योगात्क्रियात्वावसायः। अथवेति। निर्ज्ञातायां सत्तायां किं करोतीति प्रश्नासंभवादस्तीति प्रतिवचनाभावः। न तु क्रियात्वाभावादित्यर्थः। यदा तु प्रत्यासन्नविनाशाशङ्क्या देवदत्तः किं करोतीति प्रश्नः। तदास्ति तावदिति प्रतिवचनं भवत्येव। अथ यद्येवेति। परिस्पन्दापरिस्पन्दरूपतया क्रियाभावयोर्भेदेनोपन्यासः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तदावेत्यत्रेति। अदादीनामादौ वा गतिगन्धनयोरिति पठितव्यम्। अदादिगणो गणानामादौ। तेन सर्वे धातुपाठसंनिविष्टा
गृहीता भवन्ति। यदि तर्हीति। क्रियावचनो धातुरिति भाववचनो धातुरिति वा लक्षणं क्रियते नार्थः पाठेनेत्यर्थः। भूवादिपा
ठ इति। यथा भोक्तुं पाक इति क्रियाश्रयाणि तुमुनादीनि भवन्ति तथा धातुसंज्ञापि स्यादिति पाकादीनां धातुत्व्यादीनां च प्रा
तिपदिकानां पाठेनासौ निवर्त्यते। तथा हि रुकुपृथगित्यादीनां च क्रियाप्रधानानामव्ययानाम्। एतेषामपीति। तेषामपाठे
निवृत्तिराणवयत्यादिवत्स्यात्तस्मादाणवयत्यादिषेषां निवृत्तिर्यथा स्यात्तु तन्मध्ये मा प्रविक्षन्नित्येवमर्थं तेषामपिपा

यदा तु भाववचनो धातुरित्येष पक्षस्तदा वेत्यत्र य आदिशब्दः स व्यवस्थायां भू इत्यत्र य आदिशब्दः स
प्रकारे वा इत्येवमादयो भू इत्येवं प्रकारा इति। यदि तर्हि लक्षणं क्रियते नेदानीं पाठः कर्तव्यः। कर्तव्यश्च।
किं प्रयोजनम्। भूवादिपाठः प्रातिपदिकाणवयत्यादिनिवृत्त्यर्थः। भूवादिपाठः कर्तव्यः। किं प्रयोजन
म्। प्रातिपदिकाणवयत्यादिनिवृत्त्यर्थः। प्रातिपदिकनिवृत्त्यर्थ आणवयत्यादिनिवृत्त्यर्थश्च। के पुनरा
णवयत्यादयः। आणवयति। वट्टति। वड्डयतीति। स्वरानुबन्धज्ञापनाय च। स्वरानुबन्धज्ञापनाय च पाठः क
र्तव्यः। स्वराननुबन्धांश्च ज्ञास्यामीति। न ह्यन्तरेण पाठं स्वरा अनुबन्धा वा शक्या विज्ञातुम्। ये त्वेते न्याय्यवि
करणा उदात्ता अननुबन्धकाः पठ्यन्ते तेषां पाठः शक्योऽकर्तुम्। एतेषामप्याणवयत्यादिनिवृत्त्यर्थः पाठः क
र्तव्यः। शिष्टप्रयोगादाणवयत्यादीनां निवृत्तिर्भविष्यति। स चावश्यं शिष्टप्रयोग उपास्यः ये ऽपि पठ्यन्ते तेषाम
पि विपर्यासनिवृत्त्यर्थः। लोके हि कृष्यर्थे कसिं प्रयुञ्जते दिग्धर्थे च दिसिम्। उपदेशोऽजनुनासिक इत्॥ ॥उपदे
श इति किमर्थम्। अभ्र आँ अपः। उद्देशो योऽनुनासिकस्तस्य मा भूदिति।

ठः कर्तव्य इत्यर्थः। शिष्टप्रयोगादिति। प्रयुक्तानामिदमन्वाख्यानं न चाणवयत्यादयः शिष्टैः प्रयुज्यन्त इति नास्ति तेषां शास्त्रेणानुवि
धानमिति भावः। एतेनैव न्यायेन प्रातिपदिकनिवृत्त्यर्थोऽपि पाठो न प्रयुज्यते न हि पाकादयः शब्दाः धातुविहितप्रत्ययपरा लोके
प्रयुज्यन्ते॥ उपदेशे॥ ॥उद्देशोपदेशशब्दयोरुपसर्गभेदेऽपि अभिन्नार्थत्वं प्रक्रमत उपक्रमत इत्येतयोरिव मन्यमानः पृच्छति।
उपदेश इति किमर्थमिति। अभ्र आँ अप इति। अयं नोपदिष्टः किं तर्हि आङो ऽनुनासिकश्छन्दसीति लक्षणेनान्तरतम आङः स्था
स्थाने विहितः। यदि त्वाङ् आँ छन्दसीत्यवक्ष्यत्तदाऽभविष्यदेषोऽप्युपदेशोऽनुनासिकः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यक्षमाख्यानमिति। इन्द्रियगोचरार्थस्य यदाख्यानं स उपदेश इत्यर्थः। प्रसिद्धधर्मोपादानेन तु यत्प्रतिपादनं स उद्देशः। प्रत्यक्षमाख्यातमिति क्वचित्पाठः। तत्राख्यानमाख्यातमिति भावक्तो विज्ञेयः। ईदृश इति। एतैःशब्दैर्योऽदृष्टो बुद्धावर्थः प्रतिभासते तेनादृष्टो ग्राह्य इत्यर्थः। लक्षणेनेति। लक्ष्यतेऽनेनेति लक्षणं गुणास्तेनाप्युपदेशो भवतीत्यर्थः। इषेत्वकमधीष्वेति। इषेत्वकमित्येतत्

कः पुनरुद्देशोपदेशयोर्विशेषः। प्रत्यक्षमाख्यानमुपदेशः। गुणैः प्रापणमुद्देशः। प्रत्यक्षं तावदाख्यानमुपदेशः। तद्यथा। अगोज्ञाय कश्चिद्गां सक्थनि कर्णे वा गृहीत्वोपदिशत्ययं गौरिति। स प्रत्यक्षमाख्यातमाह उपदिष्टो मे गौरिति। गुणैः प्रापणमुद्देशः। तद्यथा। कश्चित्कंचिदाह देवदत्तं मे भवानुद्दिशत्विति। स इहस्थः पाटलिपुत्रस्थं देवदत्तमुद्दिशति अङ्गदी कुण्डली किरीटी व्यूढोरस्को वृत्तबाहुर्लोहिताक्षस्तुङ्गनासो विचित्राभरण ईदृशो देवदत्त इति स गुणैः प्राप्यमाणमाहोद्दिष्टो मे देवदत्त इति। इत्संज्ञायां सर्वप्रसङ्गोऽविशेषात्। इत्संज्ञायां सर्वप्रसङ्गः। सर्वस्यानुनासिकस्येत्संज्ञा प्राप्नोति। अस्यापि प्राप्नोति। अभ्रं आँ अपः। किं कारणम्। अविशेषात्। न हि कश्चिद्विशेष उपादीयते। एवंजातीयकस्यानुनासिकस्येत्संज्ञा भवतीति। अनुपादीयमाने विशेषे सर्वप्रसङ्गः। किमुच्यतेऽनुपादीयमाने विशेष इति। कथं नाम नोपादीयते यदोपदेश इत्युच्यते। लक्षणेनाप्युपदेशः। संकीर्णबुद्देशोपदेशौ। प्रत्यक्षमप्याख्यानमुद्देशः गुणैश्च प्रापणमुपदेशः। प्रत्यक्षं तावदाख्यानमुद्देशः। तद्यथा। कश्चित्कंचिदाह अनुवाकं मे भवानुद्दिशत्विति। स तस्मा आचष्टे इषेत्वकमधीष्व पूर्णां नोदेवीयकमधीष्वेति। स प्रत्यक्षमाख्यातमाह उद्दिष्टो मेऽनुवाकस्तमध्येष्य इति। गुणैश्च प्रापणमुपदेशः। तद्यथा कश्चित्कंचिदाह ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशत्विति। स तस्मा आचष्टेऽमुष्मिन्नवकाशे हस्तदक्षिणो गृहीतव्योऽमुष्मिन्हस्तवाम इति स गुणैः प्राप्यमाणमाह उपदिष्टो मे पन्था इति। एवमेतौ संकीर्णबुद्देशोपदेशौ। एवं तर्हीत्कार्याभावादत्रेत्संज्ञा न भविष्यति। ननु च लोप एवेत्कार्यं स्यात्।

पूर्वेण संबध्यते स तस्मा आचष्टे इषेत्वकमिति। इषेत्वाशब्दो यस्मिन्ननुवाके स्थितमाचष्ट इत्यर्थः। गोषदादिभ्यो वुन्निति वुन्प्रत्ययः। किमर्थमाचष्ट इत्याह। अधीष्वेति। अध्ययनार्थमाचष्ट इत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकार्यत्वेलोपइति। यदिलोपोभिमतोऽभविष्यदाङोलोपमेवाग्रहीष्यन्नावक्ष्यदित्यर्थः। अनन्तरलक्षणायामिति। यदाअनेका-
न्ताअनुबन्धास्तदाअनन्तरइत्संज्ञकः कार्यस्यविशेषकोभवतीतिधातोरादित्वादिट्प्रतिषेधप्रसङ्गः। उपदेशेनइति। तेनशा-
स्त्रेयउच्चारितोऽनुनासिकःसइत्संज्ञइत्यर्थः। परत्वादिति। परत्वेनबाधकत्वंलक्ष्यते। तेनानवकाशत्वाल्ल्युट्प्राप्नोतीत्यर्थः। ह
लश्चेति। अयंल्युटोबाधकोघञ्। प्रायवचनादिति। हलश्चेत्यत्रसंज्ञायांप्रायेणेतिचानुवर्तते। संज्ञयाचप्रायग्रहणमभिसं
बध्यते। प्रायेणसंज्ञायांघञ्भवतिकचिदसंज्ञायामपीत्यर्थः। संज्ञायामेवेति। प्रत्ययस्यविधेयत्वात्प्राधान्यात्प्रायग्रहणं

अकार्यत्वेलोपः। इहहिशब्दस्यस्थार्थउपदेशः। कार्यार्थोभवत्युपदेशःश्रवणार्थोवा। कार्यंचेहनास्ति। का
र्येचासतियदिश्रवणमपिनस्यादुपदेशोऽनर्थकःस्यात्। इदमस्तीकार्यम्। इहअभ्रआँअटितः। अ
नन्तरलक्षणायांसत्यामित्संज्ञायामादितश्चेतीट्प्रतिषेधःप्रसज्येत। सिद्धंतूपदेशेऽनुनासिकवचना
त्। सिद्धमेतत्। कथम्। उपदेशेयोऽनुनासिकःसइत्संज्ञोभवतीतिवक्तव्यम्। किंपुनरुपदेशेन
नुनासिकवचनेन सिध्यति। सूत्रंतर्हिभिद्यते। यथान्यासमेवास्तु। ननुचोक्तमित्संज्ञायांसर्वप्रसङ्गोऽविशेषा
दिति। नैषदोषः। उपदेशइतिघञयंकरणसाधनः। नसिध्यति। परत्वाल्ल्युट्प्राप्नोति। नञ्मोऽकर्तरि
चकारकेसंज्ञायामिति। किंतर्हि। हलश्चेति। तत्रापिसंज्ञायामिति वर्ततेनचैषासंज्ञा। प्रायवचनादसंज्ञाया
मपिभविष्यति। प्रायवचनात्संज्ञायामेवस्याद्वानवा। नह्युपाधेरुपाधिर्भवतिविशेषणस्यवाविशेष
णम्। यदिनोपाधेरुपाधिर्भवतिविशेषणस्यवाविशेषणम्। कल्याण्यादीनामिनङ्कुलटायावाइनङ्वि
भाषानप्राप्नोति। इनङेवात्रप्रधानम्। विहितःप्रकृतःप्रत्ययश्चानुवर्तते। इहतर्हिवाकिनादीनांकुक्चपुत्र
त्वादन्यतरस्यामितिकुग्विभाषानप्राप्नोति।

प्रत्ययेनैवसंबध्यतेनतुगुणेनसंज्ञयेत्यर्थः। उपाधिविशेषणयोश्चवाच्यत्वावाच्यत्वाभ्यांविशेषः। तथाहि। इतिहरिरितिप्रत्ययेनपशुः
कर्ताभिधीयतेइतिपशुरुपाधिः। गार्गिकयाश्लाघतइतिश्लाघावुञानाभिधीयतइति विशेषणमुच्यते। इनङ्विभाषेति। राम: २३५
प्रत्ययस्यविधेयतयाप्राधान्यात्तादर्थ्येनप्रकृतेर्गुणत्वात्तदादेशस्येनङोपिगुणत्वादुपाधित्वमित्यर्थः। इनङेवात्रेति। अ
पूर्वोपदेशत्वात्तस्यैवप्राधान्यमित्यर्थः। ढक्चत्वाभ्योढगित्येवसिद्धः। तदनुवादेनेनङ्विधीयते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुगेवेति। उदीचां वृद्धादगोत्रादित्यनेन फिञ्विहितस्तदनुवादेन कुकोऽविधानात्। न चेदमकृतमिति। आश्रितमेवेत्यर्थः। गुण-
प्रधानसन्निधौ यत्र प्रधानमर्थिविशेषणेन भवति तस्यैव विशेषणं न्याय्यं न तु गुणस्य। एवं च कृत्वेति। एवं स्थित्वेत्यर्थः। तेन घञ्
वन्यायवर्णत्वसंज्ञायां प्रायेणातिष्ठति स एवात्र न प्राप्नोतीति समानकर्तृकत्वात्क्त्वाप्रत्यय उपपद्यते। एवं तर्हीति। बहुलग्रहणादसं-
ज्ञायामपि घञ् भविष्यतीत्यर्थः। हलन्त्यम्॥ अन्तेऽवसाने भवमन्त्यम्। सर्वो हि हलिति। सर्वस्य हलोऽवसानेन संबन्धात्। अन्त्यग्रहणं
त्वादिनिवृत्त्यर्थं स्यात्। सिद्धं त्विति। व्यवसिताः परिच्छिन्ना ये समुदायाः धातुत्वप्रत्ययत्वादिना धर्मेण तेषां योऽन्त्य इत्यर्थः। अवयवा-
नुसमुदायतन्त्रत्वान्नान्तरीयकोपदेशत्वाद्धातुत्वादिना न परिच्छिन्नाः। तत्र प्रकर्षगतिरिति। आदिनिवृत्त्यर्थत्वादन्त्यशब्दस्य कथं

अत्रापि कुगेव प्रधानम्। विहितः प्रकृतः प्रत्ययश्चानुवर्तते। एवं न चेदमकृतं भवति नोपाधेरुपाधिर्विशेष
णस्य वा विशेषणमिति न च कश्चिद्दोषो भवति। एवं च कृत्वा घञ् प्राप्नोति। एवं तर्हि कृत्यल्युटो बहुलमित्येव
मत्र घञ् भविष्यति॥ ॥हलन्त्यम्॥ ॥हलन्त्ये सर्वप्रसङ्गः सर्वान्त्यत्वात्। हलन्त्ये सर्वप्रसङ्गः। सर्वस्य हल इत्संज्ञा
प्राप्नोति। किं कारणम्। सर्वान्त्यत्वात्। सर्वो हि हल् तं तमवधिं प्रत्यन्त्यो भवति। सिद्धं तु व्यवसितान्त्यत्वात्। सिद्धमे
तत्। कथम्। व्यवसितान्त्यत्वात्। व्यवसितान्त्यो हलित्संज्ञो भवतीति वक्तव्यम्। के पुनर्व्यवसिताः। धातुप्रातिपदि
कप्रत्ययनिपातागमादेशाः। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं हलन्त्ये सर्वप्रसङ्गः सर्वा
न्त्यत्वादिति। नैष दोषः। आहायं हलन्त्यमित्संज्ञं भवतीति सर्वश्च हल् तं तमवधिं प्रत्यन्त्यो भवति। तत्र प्रकर्ष
गतिर्विज्ञास्यते। साधीयो योऽन्त्य इति। कश्च साधीयः। व्यवसितानां योऽन्त्यः। अथवा सापेक्षोऽयं निर्देशः क्रियते।
न चान्यत्किंचिदपेक्ष्यमस्ति। तेन व्यवसितानेवापेक्षिष्यामहे॥

प्रकर्षगतिः। उच्यते। आदेरप्युच्चारणानन्तरमवसानसंबन्धादन्त्यत्वमनिवार्यमिति नास्ति तन्निवृत्तिरिति सामर्थ्यात्प्रकर्ष आ-
श्रीयते। व्यवसितानां योऽन्त्य इति। आदिमध्यानां च काल्पनिकमन्त्यत्वं सर्वान्त्यस्य तु नित्यमेवेति तस्यैव युक्तं ग्रहणम्। अथवे-
ति। पूर्वं समुदायावयवसन्निधौ समुदायापेक्षमन्त्यत्वमाश्रयितुं युक्तमिति परिहृतम्। इदानीं तु समुदायार्थत्वादुपदेशस्याव
यवानामसत्त्वात्तदपेक्षणं दूरोत्सारितमिति मत्वा परिह्रियते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ लकारस्येति। इतरेतराश्रयं मन्यते। णषसर् हल् इत्यत्र लकारस्य सत्यामित्संज्ञायां हलिति प्रत्याहारः। सति च प्रत्याहारे लणित्यत्र ल १३१
२३६ कारस्य हल्त्वात् तस्यैव णषसर् हलित्यत्रान्ते निर्दिष्टत्वादित्संज्ञेति प्रत्याहाराश्रयादित्संज्ञा तदाश्रयश्च प्रत्याहारः। लकारश्चेति। पूर्वलकारस्येत्संज्ञा विधेया तेन हलिति प्रत्याहार उपपद्यते। तत्र हल् च लश्चेति समाहारद्वन्द्वं कृत्वा संयोगान्तस्य लोप इति लकारो लुप्यते। हल् चेति। हस्य ल् हल्। हल् इत्येकः षष्ठीतत्पुरुषः। द्वितीयः प्रत्याहारः। नपुंसकमनपुंसकेनेति चैकशेषः। एकस्य पुल्लिङ्गत्वादपरस्य नपुंसकत्वात्। अथ वेति। णषसर् हलित्यत्र हलन्त्यमित्यत्र च लकारस्यैकादेशो लपरत्वं च क्रियते। नन्वेवमपीतरेतराश्रयमेव। लकारस्य सत्यामित्संज्ञायां हलिति प्रत्याहारः सति च प्रत्याहारे ऐऔजिति चकारस्येत्संज्ञा तस्यां सत्यामजि-

लकारस्यानुबन्धात्वाज्ञापितत्वाद्धल्ग्रहणाप्रसिद्धिः। लकारस्यानुबन्धत्वेन अज्ञापितत्वाद्धल्ग्रहणस्याप्रसिद्धिः। हलन्त्यमित्संज्ञं भवतीत्युच्यते। लकारस्यैव तावदित्संज्ञा न प्राप्नोति। सिद्धं तु लकारनिर्देशात्। सिद्धमेतत्। कथम्। लकारनिर्देशः कर्तव्यः। हलन्त्यमित्संज्ञं भवति लकारश्चेति वक्तव्यम्। एकशेषनिर्देशाद्वा। अथवा एकशेषनिर्देशोऽयम्। हल् च हल् च हल्। हलन्त्यमित्संज्ञं भवतीति। अथवा लकारस्यैवेदं गुणभूतस्य ग्रहणं तस्य चोपदेशेऽजनुनासिक इतीत्संज्ञा भविष्यति। अथवा आचार्यप्रवृत्तिर्ज्ञापयति भवति लकारस्येत्संज्ञेति। यदयं णलं लितं करोति। प्रातिपदिकप्रतिषेधोऽकृत्तद्धिते। अकृत्तद्धितान्तस्य प्रातिपदिकस्य प्रतिषेधो वक्तव्यः। उदश्वित्प्रकृदिति। अकृत्तद्धितान्तस्येति किमर्थम्। कुम्भकारेण नगरकारः औपगवः कापटव इति।

ति प्रत्याहारः अजिति प्रत्याहारे सति लकारस्येत्संज्ञा। एवं तर्हि ल्रदित इति ज्ञापकात् लकारस्येत्संज्ञाकार्यं भविष्यतीति नास्तीतरेतराश्रयमिति भगवतो भाष्यकारस्याभिप्रायः। अथ वेति। णलो लकारः स्वरार्थः कृतः असत्यां चेत्संज्ञायां कुतः स्वरः। श्रवणार्थस्तु णलो न लकारः। हल्ङ्याबिति सूत्रे हल्ग्रहणं णल्व्यावृत्त्यर्थात्। तत्र हि बिभेदेति णल्व्यावृत्त्यर्थं हल्ग्रहणं कृतम्। लकारस्य श्रवणेऽपृक्तत्वाभावाल्लोपस्याप्राप्तिरिति किं हल्ग्रहणेन। प्रातिपदिकप्रतिषेध इति। यदामज्जकादिनिवृत्त्यर्थः प्रातिपदिकानामुपदेशः क रामः
र्तव्य इति पक्षस्तदायं प्रतिषेधः। अन्यथा उपदेशाभावात् प्राप्त्यभावादनर्थकः प्रतिषेधः स्यात्। कुम्भकार इति। अपवादविषय २३६
परिहारेणोत्संज्ञायाः प्रवर्तनात्पूर्वं प्रातिपदिकसंज्ञेति प्रतिषेधे प्राप्तेऽकृत्तद्धित इति प्रतिषेधः क्रियते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययग्रहणमिति। उदश्चित् प्राक्छदिति चैतावव्युत्पन्नौ। प्राक्छदिति प्राके ऋच्छतीन्द्र इति यद्यपि व्युत्पाद्येते तथाप्युपदेशे पोत्तकारोन्त्यो
न भवतीति संज्ञा न प्रवर्तते। राजातक्षेति। नन्वव्युत्पत्तिपक्षे प्यनयोरवग्रहमाद्युदात्तत्वमेष्टव्यम्। तत्राद्युदात्तस्याद्युदात्तत्वे किं
प्रयोजनं येन संज्ञा स्यात्। उच्यते। आमन्त्रितनिघातप्रतिषेधार्थमाद्युदात्तत्वं स्यात्। नङि संबुद्ध्योरिति नलोपस्य प्रतिषेधो
ने संज्ञाया इति तत्रातिवद्धः स्वरः स्यात्। व्यपवर्गाभावादिति। नित्यशेनास्तीति भावः। यदा तु सौवर्यः सत्तम्यस्तदन्तस प्रस्य
इति पक्षस्तदापि निर्देवायं न तु निर्दन्त इति नास्ति स्वरः। अत्र तु पक्षेऽत्रा नियन्तेति यदा वाक्यार्थे पदवचनं तदा स्वरो न सिध्य

इदर्थाभावात्सिद्धम्। इत्कार्याभावादत्रेत्संज्ञा न भविष्यति। इदमस्तीत्कार्यम्। तित्स्वरितमिति स्वरितत्वं यथा स्यात्। नैतदस्ति। प्रत्ययग्रहणं तत्र चोदयिष्यति। इह तर्हि राजातक्षाग्निती त्याद्युदात्तत्वं यथा स्यात्। ञ्नितीत्युच्यते तत्र व्यपवर्गाभावान्न भविष्यति। इदं तर्हि स्वर्। उपोत्तमं रितीत्येष स्वरो यथा स्यात्। स्वरितकरणसामर्थ्यान्न भविष्यति। न्यङ्स्वरौ स्वरिताविति। इह तर्हि अन्तर्। उत्तमपूर्वादिस्त्रिप्रभृतिषु वर्तते न चात्र त्रिप्रभृतयः सन्ति। इह तर्हि सनुतर्। उपोत्तमं रितीत्येष स्वरो यथा स्यात्। अन्तोदात्तनिपातनं करिष्यते। स निपातनस्वरो रित्स्वरस्य बाधको भविष्यति। एतच्चात्रयुक्तं यदित्कार्याभावादित्संज्ञा न स्यात्। यत्रेत्कार्यं भविष्यति तत्रेत्संज्ञा। तद्यथा। आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनजिति॥ ॥नविभक्तौ तुस्माः॥ ॥विभक्तौ तवर्गप्रतिषेधोऽतद्धिते। विभक्तौ तवर्गप्रतिषेधोऽतद्धित इति वक्तव्यम्। इह माभूत्। किमोत्। क्वप्रेष्मन्दीव्यसे। काईमासादिति। स तर्हि वक्तव्यः। न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति न विभक्तौ तद्धितप्रतिषेधो भवतीति। यदयमिदमस्थमुरिति मकारस्येत्संज्ञापरित्राणार्थमुकारमनुबन्धं करोति॥

ति। यदा तु छन्दसः श्रोत्रभावः घंश्च प्रत्ययस्तदा निदन्तत्वात्स्वरसिद्धिः। तद्यथागस्त्येति। प्रत्ययस्य लुक्किञ्कृते परिशिष्टस्य कु
ण्डिनजादेशः। तत्र प्रत्ययलक्षणेन तद्धितान्तत्वात्प्रातिपदिकत्वादित्संज्ञानिषेधः स्यात्। न चायं चकारस्तद्धितसंबन्धी यतोऽक
त्तद्धित इति निषेधः स्यात्॥ ॥नविभक्तौ तुस्माः॥ ॥इत्संज्ञापरित्राणार्थमिति। इत्संज्ञायाः परित्राणमिति साधनं कृतेति पञ्च
मीतत्पुरुषः। शेषविवक्षायां वा षष्ठीसमासः। अनेनोकारेणानुमीयते येषां प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञा तेषां न विभक्तावि
तीत्संज्ञा न निषिध्यते इति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रेति। इदानीमित्यत्र। अर्थेष्विति। यथेष्टमवधिमकल्पनेत्यर्थो वधिमत्त्वेनाश्रीयते। तत्रानुत्पन्न एव प्रत्यये इदमूभावः ततः प्रत्ययः। यदि तु पूर्वं प्रत्ययः स्यात्तदामित्वाद् चोन्त्यात्परे दानीमिकृते तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्सर्वादेः प्राद् इशिस्ततिदानीविधानमनर्थकमेव स्यात्। तदोप्ययमिति। तदो दा चेति चकारेणानुकर्षणात्। ननु चेति। सप्तम्यां विभक्तावुत्पन्नायामत्वे कृते दानीमिति भावः। तद्धीति। प्राग्दिशोर्थेष्विति पूर्वमभिधानात्सप्तम्यर्थवृत्तेः कालवाचिनो मित्वान्मध्ये दानीमाभाव्यमिति तदानीमित्यस्यासिद्धिरेवेत्यर्थः। यकारान्त इति। यकारोन्त्यत्वमनुभवन्मकारस्यान्त्यत्वं प्रतिबध्नाति। यकारस्य च संयोगान्तस्य लोप इति

यद्येतज्ज्ञाप्यते इदानीमित्यत्र प्राप्नोति। इत्कार्याभावादत्रेत्संज्ञा न भविष्यति। इदमस्तीत्कार्यं मिदचोन्त्यात्पर इत्यचामन्त्यात्परो यथा स्यात्। इदमूभावे कृते नास्ति विशेषः। मिदचोन्त्यात्पर इति वा परत्वे प्रत्ययः पर इति वा। स एव तावदिशभावो न प्राप्नोति। किं कारणम्। प्राग्दिशः प्रत्यय इत्युच्यते। कः पुनरर्हति शभावं प्राग्दिशः प्रत्ययेषु वक्तुम्। किं तर्हि। प्राग्दिशोर्थेष्विशभावः। किंसर्वनामबहुभ्योऽद्व्यादिभ्यः प्रत्ययोत्पत्तिः। एवं तर्हि तदोप्ययं वक्तव्यः। तदश्च मिदचोन्त्यात्परत्वेन न सिद्ध्यति। ननु चात्राप्यत्वे कृते नास्ति विशेषः। मिदचोन्त्यात्पर इति वा परत्वे प्रत्ययः पर इति वा। तद्धि अत्वं न प्राप्नोति। किं कारणम्। विभक्तावित्युच्यते। एवं तर्हि यकारान्तो दानीं करिष्यते। किं यकारो न श्रूयते। लुप्तनिर्दिष्टो यकारः॥ ॥चुटू॥ ॥चुष्टुपूचणपोश्च कारप्रतिषेधः॥ चुष्टुपूचणपोश्च कारस्य प्रतिषेधो वक्तव्यः। केशचुञ्चुः। केशचणः। इदर्थाभावात्सिद्धम्। इत्कार्याभावादत्रेत्संज्ञा न भविष्यति। इदमस्तीत्कार्यम्। चितः अन्त उदात्तो भवतीति अन्तोदात्तत्वं यथा स्यात्। पित्करणमिदानीं किमर्थं स्यात्। पित्करणं किमर्थमिति चेत्स्वर्यार्थम्। पित्करणं किमर्थमिति चेत्स्वर्यार्थमेतत्स्यात्। एवं तर्हि यकारादी चुञ्चुपूचणपौ। किं यकारो न श्रूयते। लुप्तनिर्दिष्टो यकारः।

लोपः क्रियते। यद्येवं मकार एवोपदेशेऽन्त्यः श्रूयत इति प्राप्नोत्येव मकारस्येत्संज्ञा। नैतदस्ति। पूर्वत्रासिद्धमिति मकारस्येत्संज्ञायां यलोपस्यासिद्धत्वादन्त्यत्वाभावात्॥ ॥चुटू॥ ॥लुप्तनिर्दिष्ट इति। पूर्वं निर्दिष्टः पश्चाल्लुप्यत इत्यर्थः। राजदन्तादेराकृतिगणत्वाद्भाष्यकारवचनाद्वा पूर्वकालस्य परनिपातः। अथ वा लुप्तो यमिति ज्ञातो लुप्तनिर्दिष्टः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इर उपसंख्यानमिति। इरितो वेत्यत्र इरिति समुदायानुकरणम्। इर् इत् यस्य सोयमिरित्। समुदायस्य चाऽनर्थकत्वादप्राप्तादित्संज्ञोपसंख्यायते। समुदायस्यैवेत्संज्ञासंबन्धेऽवयवाः पारतन्त्र्यादित्संज्ञां न लभन्त इतीदित्वाभावान्नुमभावः। नन्वेवं सति स्वरितेतइत्यात्मनेपदं न प्राप्नोतीति नैष दोषः। स्वरितत्वप्रतिज्ञानसामर्थ्यादवयवगतं स्वरितत्वं समुदाय आरोपयिष्यते। अवयवग्रहणादिति। इरावितौ यस्य स इरिदित्येवमित्संज्ञकत्वेनावयवावेवाश्रीयेते न तु समुदाय इत्यर्थः। यदि पुनरिति। यस्य च कुम्भीस्थादन्यन्निहितं धान्यं नास्ति स कुम्भीधान्यः। यद्यपि नुम्विधावस्य न्यायस्य निमित्तं नास्ति तथापि दोषेरो वतन्न्यायानाश्रयणमाह। नायमिति। इकार इति। इदिता धातुर्विशेष्यत इति तदन्तविधिः। ऋकारस्येति। ऋत इद्धातोरिती त्वे रपरत्वे च भिदिरित्यादिनिर्देशः। अनङ्गस्य निपातनादित्वम्। तत्र च भिदृश

इर उपसंख्यानम्। इर उपसंख्यानं कर्तव्यम्। रुधिर्। अरुधत्। अरौत्सीत्। अवयवग्रहणात्सिद्धम्। रेफस्यात्र हलन्त्यमिति भविष्यति इकारस्योपदेशे ऽजनुनासिक इदिति। अवयवग्रहणादिति चेदिदिद्विधिप्रसङ्गः। अवयवग्रहणादिति चेदिदिद्विधिरपि प्राप्नोति भेत्ता छेत्ता। इदितो नुम् धातोरिति नुम् प्राप्नोति। यदि पुनरयमिदिद्विधिः कुम्भीधान्यन्यायेन विज्ञायेत। तद्यथा। कुम्भीधान्यः श्रोत्रिय इत्युच्यते। यस्य कुम्भ्यामेव धान्यं स कुम्भीधान्यः। यस्य पुनः कुम्भ्यां चान्यत्र च धान्यं नासौ कुम्भीधान्यः। नायमिदिद्विधिः कुम्भीधान्यन्यायेन शक्यो विज्ञातुम्। इह हि दोषः स्यात्। उनदि। नन्दथुरिति। एवं तर्हि नैवं विज्ञायते इकार इद् यस्य सोयमिदित् तस्येदित इति। कथं तर्हि इकार इत् इदित् इदिदन्तस्येति। अथवा ऋकारस्यैवेदमित्त्वभूतस्य ग्रहणम्। तस्य चोपदेशे ऽजनुनासिक इतीत्संज्ञा भविष्यति। अथवा आचार्यप्रवृत्तिर्ज्ञापयति। नैवंजातीयकानामिदिद्विधिर्भवति। यदयमिरितः कांश्चिन्नुमनुषक्तान्पठति।

द्वेपूर्वमृकारस्येत्संज्ञा। तत इत्वरत्वे। इरितो वेत्यत्रापि ऋइ इदस्येति समासे कृते निपातनादित्वरपरत्वयोः कृतयोरिरित इति निर्देशः। नुमनुषक्तानिति। नुमा नकारो लक्ष्यते नकारयुक्तानित्यर्थः। न च लोपाभावार्थो नकारोपदेशः इति वक्तुं शक्यम्। अनकारोपदेशेपीदित्वान्नलोपस्याप्रसङ्गः। तस्मान्नकारोपदेशेनेरितामिदित्कार्याभावो ज्ञाप्यते। न दृशः इति क्त्वादेः प्रतिषेधेनापीरितामिदित्कार्याभावो ज्ञायते। अन्यथा दृशेरिदित्वान्नुमि सति इगुपधत्वाभावात्प्राप्तिरेव क्त्वस्य नास्तीति किं तन्निषेधेन। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अन्त इति। गोः पादान्त इत्यतः। तेनान्तेदितां धातूनां नुमागमो न तु मध्येदिताम्॥ तस्य लोपः॥ ॥ तस्य ग्रहणमिति। अभावो लोपः स च
भावोपाधिरेव प्रतीयते नान्यथेति प्रकरणादित्संज्ञस्यैव लोपो भविष्यतीति प्रश्नः। विभक्तिविपरिणाम इति। सादृश्यात्तत्वाध्यवसा-
यादि परिणामत्यवहारः। वाक्यान्तरे तु योग्यविभक्त्यन्तं परमार्थतः शब्दान्तरमेव संनिधीयते। तस्य ग्रहणसामर्थ्यादिति। अलो-

उबुन्दिर् निशामने। स्कन्दिर् गतिशोषणयोः। अथवा आचार्यप्रवृत्तिर्ज्ञापयति इद्रूपाद्यस्येत्संज्ञा भवतीति यद
यमिरितो वेत्याह। अथवान्त इति वर्तते॥ तस्य लोपः॥ ॥ तस्य ग्रहणं किमर्थम्। इत्संज्ञकः प्रतिनिर्दिश्यते। नैतद
स्ति प्रयोजनम्। प्रकृतमिदिति वर्तते। क्व प्रकृतम्। उपदेशेऽजनुनासिक इदिति। तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टे
न चेहार्थः। अर्थाद्विभक्तिविपरिणामो भविष्यति। तद्यथा। उच्चानि देवदत्तस्य गृहाणि। आमन्त्रयस्वैनं देवदत्तमि
ति गम्यते। देवदत्तस्य गावोश्वा हिरण्यं च। आढ्यो वैधवेयः देवदत्त इति गम्यते। पुरस्तात्षष्ठीनिर्दिष्टं सदर्थाद्वि
तीयानिर्दिष्टं प्रथमानिर्दिष्टं च भवति। एवमिहापि पुरस्तात्प्रथमानिर्दिष्टं सदर्थात्षष्ठीनिर्दिष्टं भविष्यति। इदं त
र्हि प्रयोजनम्। ये अनेकाल इत्संज्ञास्तेषां लोपः सर्वादेशो यथा स्यात्। अथ क्रियमाणेपि वै तस्य ग्रहणे कथमिव-
लोपः सर्वादेशो लभ्यः। लभ्य इत्याह। कुतः। वचनप्रामाण्यात्। तस्य ग्रहणसामर्थ्यात्॥ इतो लोपे णलु क्त्वानि
निष्ठासूपसंख्यानमित्प्रतिषेधात्। इतो लोपे णलु क्त्वा निष्ठासूपसंख्यानं कर्तव्यम्। णलु। अहं पपच। क्त्वा। देवि
त्वा सेवित्वा। निष्ठा। श्वयितः श्वयितवान्। किं पुनः कारणं न सिद्ध्यति। इत्प्रतिषेधात्। प्रतिषिध्यते तत्रेत्संज्ञा। ण
लुत्तमो णिद्वा भवति। क्त्वा सेण् न किद्भवति। निष्ठा सेण् न किद्भवतीति। सिद्धं तु णलादीनां ग्रहणाप्रतिषेधात्। सिद्ध
मेतत्। कथम्। णलादीनां ग्रहणानि प्रतिषिध्यन्ते। णलुत्तमो वा णिद् ग्रहणे न गृह्यते। क्त्वा सेण् न किद् ग्रहणे न गृ
ह्यते। निष्ठा सेण् न किद् ग्रहणे न गृह्यत इति। निर्दिष्टलोपाद्वा। निर्दिष्टलोपाद्वा सिद्धमेतत्। अथवा निर्दिष्टस्या
यं लोपः क्रियते। तस्मात्सिद्धमेतत्।

न्त्यस्येत्यन्त्यस्य लोपे प्रसक्ते तस्य ग्रहणेन समुदायस्य लोपः प्रतिपाद्यते। ग्रहणप्रतिषेधादिति। नैतेषामित्संज्ञा प्रतिषिध्य
तेऽपि तु तत्प्रतिबद्धं कार्यमित्यर्थः। निर्दिष्टलोपाद्वेति। तस्येत्यनेनेत्संज्ञाप्रकरणे निर्दिष्टस्य परामर्शाद्दसत्यामपीत्संज्ञायां
लोपो भवतीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुस्मानामिति। यद्यस्त्यामपीत्संज्ञायां लोपो भवति तदा तुस्मानामपि प्राप्नोति। ते हि हलन्त्यमित्यत्र निर्दिष्टाः। नवेति। इत्संज्ञाप्रतिषेधादेषामित्कार्यं नास्ति। यदि चानेन लोपः स्यादुपदेशे पाठस्तेषामनर्थकः स्यात्। अनुबन्धलोप इति। यथा कश्चिद्वक्ति घटोऽस्तीति पुनश्च वक्ति नास्तीति तथानुबन्धानामुच्चारणाद्भावानुज्ञानं लोपविधानाच्चाभावानुज्ञेति विरोधादप्रामाण्यप्रसङ्गः। सिद्धमिति। यथाऽणां को बाधते तथा कार्ये चरितार्थमुच्चारणमतस्तं भावं लोपोऽनन्यार्थो बाधते। एकान्त इति। एकदेशः। अवयव इत्यर्थः। अनेकान्तस्तूपलक्षणमेव केवलम्। यथा गृहस्य काकः। तत्रोपलभ्यमानस्य

तत्र तुस्मानां प्रतिषेधः। तत्र तुस्मानां प्रतिषेधो वक्तव्यः। तस्मात्। तस्मिन्। यस्मात्। यस्मिन्। वृक्षाः। प्लक्षाः। अचिनवम्। असुनवम्। अकरवम्। न वोच्चारणसामर्थ्यात्। न वा वक्तव्यः। किं कारणम्। उच्चारणसामर्थ्यादत्र लोपो न भविष्यति। अनुबन्धलोपे भावाभावयोर्विप्रतिषेधादप्रसिद्धिः। अनुबन्धलोपे भावाभावयोर्विरोधादप्रसिद्धिः। न ज्ञायते केनाभिप्रायेण प्रसजति केन निवृत्तिं करोतीति। सिद्धं त्वपवादन्यायेन। सिद्धमेतत्। कथम्। अपवादन्यायेन। किं पुनरिह तथा यथोत्सर्गापवादौ। भावो हि कार्यार्थोऽनन्यार्थो लोपः। कार्यं करिष्यामीत्यनुबन्ध आसज्यते कार्यादन्यत्र मा भूदिति लोपः। अथ यस्यानुबन्ध आसज्यते किं स तस्यैकान्तो भवत्याहोस्विदनेकान्तः। एकान्तस्तत्रोपलब्धेः। एकान्त इत्याह। कुतः। तत्रोपलब्धेः। तत्रस्थो ह्यसावुपलभ्यते। तद्यथा। वृक्षस्य शाखा वृक्षैकान्ता उपलभ्यते। तत्रासरूपसर्वादेशदाप्प्रतिषेधेपृथक्निर्देशोऽनाकारान्तत्वात्। तत्रासरूपविधौ दोषो भवति। कर्मण्यण्। आतोऽनुपसर्गे कः इति। कविषयेऽणपि प्राप्नोति।

रूपद्वयदर्शनाद्वृक्षे शाखाबलाकयोरिवेति प्रश्नः। एकान्तस्तत्रोपलब्धेरिति। ननु यदेव संशयनिमित्तं स एव कथं निश्चयहेतुः। उच्यते। सामर्थ्यादवधारणमाश्रीयते तत्रैवोपलब्धेरिति। अवयवस्तत्रैवोपलभ्यते। अनवयवस्तु तत्र चान्यत्र च। ननु वकारस्य वनग्रहणे वृक्षादिषु बहुशः उपलब्धिः। न चासावनवयवः। नैष दोषः। भिन्नसमुदायविषयं वर्णान्तरमेवतदिति शकुनिभाष्ये प्रतिपादितम्। तत्रासरूपेति। अनाकारान्तत्वादित्येतद्दाप्प्रतिषेध इत्यनेनैव सामर्थ्यात्संबध्यते। कविषय इति। एकान्तत्वे वैरूप्यात्समावेशप्रसङ्गः। अनेकान्तत्वे तूभावप्यकाराविति सारूप्यादसमावेशः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· अनेजन्तत्वादिति। यथा ढौकतेः ककारस्यैकान्तत्वादात्वं न भवत्येवं देपोपि न प्राप्नोति। उपदेशग्रहणाच्च स्तुतेपि पकारेन– १३१
२३९ प्राप्नोति। अस्तु तर्हीति। कार्यलक्षणाय केवलमनुबन्ध उपात्तो न तु तस्यावयवः। वृत्तिविशेष इति। बहुव्रीहिर्न सिद्ध्यति। अनेकान्तत्वे कद्व्यस्येति संबन्धाभावात्। अनन्तर इति। यद्यप्यनन्तरादिषु बहुव्रीहिर्न भवति तथापीह वचनसामर्थ्याद्भवति। व्यवसितपाठादिति। व्यवसितानां विच्छिन्नानां पाठः कर्तव्यः। ततः पूर्वस्यैवासावनन्तरः न तु परस्य। कालव्यवधा–

सर्वोदेशे च दोषो भवति। दिव औत्। ओत्सर्वादेशः प्राप्नोति। दाप्प्रतिषेधे पृथङ्निर्देशः कर्तव्यः। अदाब्दैपाविति वक्तव्यम्। किं पुनः कारणं न सिद्ध्यति। अनाकारान्तत्वात्। ननु चात्वे कृते भविष्यति। तद्वात्वं न प्राप्नोति। किं कारणम्। अनेजन्तत्वात्। अस्तु तर्ह्यनेकान्तः। अनेकान्ते वृत्तिविशेषः। यदि अनेकान्ता वृत्तिविशेषो न सिद्ध्यति। किति णितीति कार्याणि न सिद्ध्यन्ति। किं हि सतस्तद्भवति येनेत्कृतं स्यात्। एवं तर्ह्यनन्तरः। अनन्तर इति चेत्पूर्वोत्तरयोरित्कृतप्रसङ्गः। अनन्तर इति चेत्पूर्वोत्तरयोरित्कृतं प्राप्नोति। वुञ्छण्। सिद्धं तु व्यवसितपाठात्। सिद्धमेतत्। कथम्। व्यवसितपाठः कर्तव्यः। वुञ्छण्। स चावश्यं पाठः कर्तव्यः। इतरथा ह्येकान्तेपि संदेहः। अक्रियमाणे व्यवसितपाठे एकान्तेपि संदेहः स्यात्। तत्र न ज्ञायते किमयं पूर्वस्य भवत्याहोस्वित्परस्येति। संदेहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। पूर्वस्येति व्याख्यास्यामः। वृत्ताद्वा। वृत्ताद्वा सिद्धमेतत्। वृद्धिमन्तमाद्युदात्तं दृष्ट्वा ञिदिति व्यवसेयम्। अन्तोदात्तं दृष्ट्वा किदिति। युक्तं पुनर्यद्वृत्तनिमित्तको नामानुबन्धः स्यान्नानुबन्धनिमित्तकेन नाम वृत्तेन भवितव्यम्।

नात्। व्याख्यानत इति। एकान्तपक्षे एकोवयवो द्वयोर्न भवतीति संदेहे व्याख्यानान्निश्चयः। अनेकान्तत्वे त्वानन्तर्यस्योभयापेक्षस्य विरोधाभावाद्व्यवसितपाठ एव कर्तव्यः। वृत्ताद्वेति। वृत्तं प्रयोगः। नन्वाचार्यो भवतु वृत्तज्ञः शिष्यास्तु कथं प्रतिपद्यन्ते। व्याख्यानाच्चेत्। पूर्वमेवैतदुक्तम्। वृत्ताद्वेत्यनेन किं तदेवोच्यते। नैष दोषः। पूर्वं हेतुरहितं व्याख्यानमुक्तम्। वृत्ताद्वेत्यनेन तु हेतुरुच्यते। तस्मिन्प्रतिपन्ने साध्यं स्वयमेवावैति। भाष्यकारेण वा तदुक्तमिदं वार्तिककारेण॥ ॥ राम: २३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेङ इति। यद्यप्यनेकान्तपक्षस्यापि ज्ञापकमेतद्व्याख्यातुं युज्यते तथापि हेतुरहितत्वादिहानेकान्तपक्षो भाष्यकृता त्यक्तः। प्रदेशान्तरे त्वनेकान्तपक्षेणापि व्यवह्रियते सिद्धमनुबन्धस्यानेकान्तत्वादिति॥ यथासंख्यम्॥ संख्यासंख्यानं गणनमुच्यते। अनुदेशशब्दस्य संबन्धिशब्दत्वादुद्देश्याक्षिप्तः। तेनायमर्थः। समानां समसंख्यानां मध्ये यथागणनमुद्देशिभिः सहानुदेशिनः संबध्यन्ते। इकोयणचीति। इक्शब्देन चत्वारः स्थानिनः प्रत्याय्यन्ते यण्शब्देनापि चत्वार आदेशा

इति निमित्तक एवानुबन्धः। इत्तज्ज्ञो ह्याचार्योऽनुबन्धानासजति। उभयमिदमनुबन्धेषूक्तमेकान्ता अनेकान्ता इति। किमत्र न्याय्यम्। एकान्तादित्येव न्याय्यम्। कुत एतत्। अत्र हि हेतुर्व्यपदिष्टः यच्च नाम सहेतुकं तन्न्याय्यम्। ननु चोक्तं तत्रासरूपसर्वादेशदाप्प्रतिषेधे पृथक्त्वनिर्देशोऽनाकारान्तत्वादिति। असरूपविधौ तावन्न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमसारूप्यं भवतीति यदयं ददाति दधात्योर्विभाषां शास्ति। यदप्युक्तं सर्वादेश इति। तत्राप्याचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमनेकाल्त्वं भवतीति यदयं शित्सर्वस्येत्याह। यदप्युक्तं दाप्प्रतिषेधे पृथक्त्वनिर्देशः कर्तव्य इति। न कर्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमनेजन्तत्वं भवतीति। यदयमुदीचां माङो व्यतीहार इति मेङः सानुबन्धकस्यात्वभूतस्य ग्रहणं करोति॥ ॥यथासंख्यमनुदेशः समानाम्॥ ॥किमिहोदाहरणम्। इकोयणचि। दध्यत्र मध्वत्र। नैतदस्ति। स्थानेऽन्तरतमेनाप्येतत्सिद्धम्। कुत आन्तर्यम्। तालुस्थानस्य तालुस्थान ओष्ठस्थानस्यौष्ठस्थानो भविष्यतीति। इदं तर्हि तस्थस्थमिपां तांतंतामः इति। ननु चैतदपि स्थानेऽन्तरतम इत्येव सिद्धम्। कुत आन्तर्यम्। एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थो भविष्यतीति। इदं तर्हि तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यक इति। किमर्थमिदमुच्यते।

इत्यर्थतोऽस्ति संख्यासाम्यम्। पश्चात्तु यद्यपीकारादिभिर्बहूनां ग्रहणाद्वैषम्यं तथापि प्रथमतोऽस्त्येव संख्यासाम्यम्। इदं तर्हीति। नात्र स्थानकृतमान्तर्यमस्ति। नाप्यादेशप्रवृत्तिकालेऽर्थकृतान्तर्यसंप्रत्ययः। प्रवृत्तानामादेशानां स्थान्यर्थाभिधानात्। ननु चेति। नित्यानां शब्दानां प्रयोगादर्थकृतमान्तर्यमस्त्येवेति भावः। किमर्थमिति। पाठक्रमेणैव संबन्धो भविष्यतीति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 संज्ञासमासनिर्देशादिति। परस्मैपदानां णलतुसित्यत्र संज्ञया सर्वेषां युगपत्प्रत्याय्यन्त इति नास्ति पाठक्रमाद्व्यवस्था। लो-
केप्यजाविधनौ देवदत्तयज्ञदत्ताविति समासनिर्देशे नास्ति क्रमनियमः। द्वन्द्वेऽनेकावयवात्मकः समुदाय एवैकेन श-
ब्देन प्रत्याय्यत इति कुतः क्रमनियमः स्यात्। किंपुनरिति। तिपो णल् तसोऽतुस् सिप्यादिकस्मान्न क्रियत इति प्रश्नः।
विदो लटो वेति। पृथङ्निर्देशे क्रियमाणे मसो म इत्येवानन्तर्यात्संबध्येतेत्यर्थः। व्यवहितानामपि स्वरितत्वादनुवृत्ताव-

संज्ञासमासनिर्देशात्सर्वप्रसङ्गोऽनुदेशस्य तत्र यथासंख्यवचनं नियमार्थम्। संज्ञया समासेन च निर्देशाः क्रियन्ते।
संज्ञया तावत्। परस्मैपदानां णलतुसुस्थलथुसणल्वमा इति। समासेन। तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्य-
क इति। संज्ञासमासनिर्देशादेतस्मात्कारणात्सर्वप्रसङ्गः। सर्वस्योद्देशस्य सर्वोऽनुदेशः प्राप्नोति। इष्यते च समसं-
ख्यं यथा स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति तत्र यथासंख्यवचनं नियमार्थम्। एवमर्थमिदमुच्यते। किंपु-
नः कारणं संज्ञया च समासेन च निर्देशाः क्रियन्ते। संज्ञासमासनिर्देशः पृथग्विभक्तिसंश्रयोच्चारणार्थः। संज्ञया च
समासेन च निर्देशाः क्रियन्ते पृथग्विभक्तीः संश्रिनश्चमोच्चीचरमिति। प्रकरणे च सर्वसंप्रत्ययार्थः। प्रकरणे च
सर्वेषां संप्रत्ययो यथा स्यात्। विदो लटो वेति। किंपुनः शब्दतः साम्ये संख्यातानुदेशो भवत्याहोस्विदर्थतः। क-
श्चात्र विशेषः। संख्यासाम्यं शब्दतश्चेण्णलादयः परस्मैपदानां डारौरसः प्रथमस्य अयवायावएच इत्यनिर्दे-
शः। संख्यासाम्यं शब्दतश्चेण्णलादयः परस्मैपदानां डारौरसः प्रथमस्य अयवायावएच इत्यनिर्देशो भवति। अग-
मको निर्देशोऽनिर्देशः। परस्मैपदानां णलतुसुस्थलथुसणल्वमा इति णलादयो बहवः परस्मैपदानामित्येकः
शब्दः। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। डारौरसः प्रथमस्य। डारौरसो बहवः प्रथमस्येत्येकः शब्दो वैषम्यात्सं-
ख्यातानुदेशो न प्राप्नोति। एचोऽयवायावः। अयवायावो बहवः एच इत्येकः शब्दो वैषम्यात्संख्यातानुदे-
शो न प्राप्नोति।

श्रीयमाणायां प्रतिपत्तिगौरवप्रसङ्गः। किंपुनरिति। यद्यप्यर्थे शब्दस्य गुणभावादर्थत एव साम्यं न्याय्यं तथापि शब्दधर्मेणाप्यर्थ-
स्य व्यपदेशो दृश्यते यथा भ्रमरशब्दस्य द्विरेफत्वाद्द्विरेफो भ्रमरः। तथा द्व्यक्षरं मांसं द्व्यक्षरमस्थि। तस्माच्छब्दतोपि साम्यम-
त्राशङ्कितम्। णलादय इति। परस्मैपदशब्देन प्रकृतानामेव नवानां ग्रहणं न तु शतृक्वसोरित्यर्थतः साम्यमस्ति न तु शब्दतः
। डारौरस इति। यदा डारौरसश्च डारौरसश्चेत्येकशेषः क्रियते तदार्थतः संख्यासाम्यमस्ति। अगमक इति। संख्यासाम्यस्यानवबोधक इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्लुटोरिति। ल शब्दस्य लङ् लटावर्थौ विति साम्याभावः। यदा तु लरूपं सामान्यमर्थो ल शब्दस्येति पक्षस्तदा त्वेवं साम्यमिति दोषाभावः। नन्वादिश्चपञ्चावयवेन विग्रहः समुदायः समासार्थ इत्याश्रीयमाणे समुदाये यत्र यापेक्षया प्रत्ययत्रयस्य साम्यसद्भावाद्दोषः। आत्मनेपदेति। नन्वात्मनेपदसंज्ञा न तङ् शब्दस्य किं तु तस्य तस्याथितानां नवानां तादीनामिति नास्त्यर्थतः

अस्तु तर्ह्यर्थतः। अर्थतश्चेल्ल्लुटोर्नन्द्यरीहणसिन्धुतक्षशिलादिषु दोषः। अर्थतश्चेल्ल्लुटोर्नन्द्यरीहणसिन्धुतक्षशिलादिषु दोषो भवति। स्यतासी ल्लुटोः। स्यतासी द्वौ। ल्लुटोरित्यस्यत्र योर्थाः। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः। नन्द्यादयो बहवः। ल्युणिन्यचस्त्रयः। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। अरीहणादयो बहवः। वुञादयः सप्तदश। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। सिन्धुतक्षशिलादिभ्योऽणञौ। सिन्धुतक्षशिलादयो बहवः। अणञौ द्वौ। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। आत्मनेपदविधिनिष्ठासार्वधातुकद्विग्रहणेषु। आत्मनेपदविधिनिष्ठासार्वधातुकद्विग्रहणेषु च दोषो भवति। आत्मनेपदविधिश्च न सिध्यति। अनुदात्तङित आत्मनेपदम्। अनुदात्तङितौ द्वौ। आत्मनेपदमित्यस्य द्वावर्थौ। तत्र संख्यातानुदेशः प्राप्नोति। निष्ठा। रदाभ्यां निष्ठातो नः पूर्वस्य च द इति रेफदकारौ द्वौ। निष्ठेत्यस्य द्वावर्थौ। तत्र संख्यातानुदेशः प्राप्नोति। सार्वधातुकद्विग्रहणेषु च दोषो भवति। श्नसोरल्लोपः। श्नमस्ती द्वौ। सार्वधातुकमित्यस्य द्वावर्थौ। तत्र संख्यातानुदेशः प्राप्नोति। एङः पूर्वरूपत्वे प्रतिषेधः। एङः पूर्वरूपत्वे प्रतिषेधो वक्तव्यः। एङः पदान्तादति। ङसिङसोश्च। ङसिङसौ द्वौ। एङित्यस्य द्वावर्थौ। तत्र संख्यातानुदेशः प्राप्नोति। अस्तु तर्हि शब्दतः। ननु चोक्तं संख्यासाम्यं शब्दतश्चेत्सलादयः परस्मैपदानां डारौरसः प्रथमस्य यावा यावरेचद्वित्यनिर्देशादिति।

साम्यम्। नैष दोषः। तङ्रूपापन्नास्तादय आत्मनेपदशब्देन प्रत्याय्यन्त इत्यस्ति साम्यम्। सार्वधातुकद्विग्रहणेष्विति। द्विग्रहणे इति ये श्रुतानि द्विग्रहणानि सार्वधातुकस्य द्विग्रहणानीति समासः। सार्वधातुकमपि तेषु गृह्यत इति तेन विशेष्यन्ते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संवृतावर्णइति। यद्यपि प्राग्वेऽकारस्य विवृतोपदेशः कृतस्तथापि लौकिकप्रयोगापेक्षयैतदुक्तम्। क्ङितौ द्वाविति। क्ङिच्छब्दस्यैकत्वेपि ककारङकारयोर्द्वित्वादस्ति प्राप्तिरतः साम्यम्। उदि कूलइति। द्वन्द्वोयम्। आगन्तुनाचेकारेण निर्देश इति चोद्यम्। उदीति पञ्चम्याः स्थाने सप्तमीकृता। उदः पराभ्यां रुजिवहीभ्यामिति परिहारः। धातुत्रिग्रहणेष्विति। त्रीणि ग्रहणानि येषां ते त्रिग्रहणा धातवस्त्रिग्रहणा येषु तच्छीलादिषु इति पुनर्बहुव्रीहिः। कर्तृकर्मणोरिति। भवतेरकर्मक

नैष दोषः। स्थानेन्तरतम इत्यनेन व्यवस्था भविष्यति। कुत आन्तर्यम्। एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थः बह्वर्थस्य बह्वर्थः। संवृतावर्णस्य संवृतावर्णः विवृतावर्णस्य विवृतावर्णः। अतिप्रसङ्गो गुणवृद्धिप्रतिषेधे क्ङिति। अतिप्रसङ्गो भवति गुणवृद्धिप्रतिषेधे क्ङिति। गुणवृद्धी द्वे। क्ङितौ द्वौ। तत्र संख्यातानुदेशः प्राप्नोति। नैष दोषः। गकारोप्यत्र निर्दिश्यते। तद्गकारग्रहणं कर्तव्यम्। न कर्तव्यम्। क्रियते न्यास एव। ककारे गकारश्चर्त्वभूतो निर्दिश्यते ग्क्ङिति क्ङितीति। उदि कूले रुजिवहोः। उदि कूले द्वे। रुजिवहौ द्वौ। तत्र संख्यातानुदेशः प्राप्नोति। नैष दोषः। नोदिरुपपदम्। किं तर्हि विशेषणं रुजिवहोः उत्पूर्वाभ्यां रुजिवहिभ्यां कूल उपपद इति। तच्छीलादिषु धातुत्रिग्रहणेषु। तच्छीलादिषु धातुत्रिग्रहणेषु दोषो भवति। विदिभिदिच्छिदेः कुरच्। विदिभिदिच्छिदयस्त्रयः। तच्छीलादयस्त्रयः तत्र संख्यातानुदेशः प्राप्नोति। घञादिषु द्विग्रहणेषु। घञादिषु द्विग्रहणेषु दोषो भवति। निरभ्योः पूल्वोः। निरभी द्वौ। पूल्वौ द्वौ। तत्र संख्यातानुदेशः प्राप्नोति। नैष दोषः। इष्यते चात्र संख्यातानुदेशः। निष्पावः अभिलाव इति। एवं तर्हि अकर्तरि च कारके भावे चेति द्वौ। पूल्वौ द्वौ। तत्र संख्यातानुदेशः प्राप्नोति। अवे तॄस्त्रोः करणाधिकरणयोः। तॄस्त्रौ द्वौ। करणाधिकरणे द्वे। तत्र संख्यातानुदेशः प्राप्नोति। कर्तृकर्मणोश्च भूकृञोः। कर्तृकर्मणी द्वे। भूकृञौ द्वौ। तत्र संख्यातानुदेशः प्राप्नोति। अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि। अनवक्लृप्त्यमर्षौ द्वौ। किंवृत्ताकिंवृत्ते द्वे। तत्र संख्यातानुदेशः प्राप्नोति। कृभ्वोः क्त्वाणमुलौ। कृभ्वौ द्वौ क्त्वाणमुलौ द्वौ। तत्र संख्यातानुदेशः प्राप्नोति।

त्वात्कर्तैवोपपदम्। करोतेस्तूपपदद्वयेखनिष्यते। अन्ये तु भास्यर्थस्य भवतेरुपपदद्वये प्रत्ययमिच्छन्ति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छन्दोब्राह्मणानीति। गोबलीवर्दन्यायेन च्छन्दःशब्देन मन्त्राणां ग्रहणम्। यथा जुष्टार्पिते च च्छन्दसीति ब्राह्मणानां ग्रहणं नित्यं मन्त्र इति मन्त्रग्रहणात्। छन्दोग्रहणेनैव तु ब्राह्मणानां ग्रहणे सिद्धे ब्राह्मणविशेषप्रतिपत्त्यर्थं पुनर्ब्राह्मणग्रहणं कृतम्। तेन याज्ञवल्क्यानि ब्राह्मणानीति तद्विषयता न भवति। न वेति। अनुदेश उच्चारणम्। योगान्तरे तु शब्दान्तरस्यानुमानं न तूच्चारणमिति न्यायप्राप्तस

अधीयानविदुषोश्छन्दोब्राह्मणानि। छन्दोब्राह्मणानीति द्वौ। अधीते वेदेति च द्वौ। तत्र संख्यातानुदेशः प्राप्नोति। रोपधेतोः पथिदूतयोः। रोपधेतोः प्राचां तद्गच्छति पथिदूतयोः। रोपधेतौ द्वौ। पथिदूतौ द्वौ। तत्र संख्यातानुदेशः प्राप्नोति। तत्रभवस्तस्य व्याख्यानः क्रतुयज्ञेभ्यश्च। तत्रभवस्तस्य व्याख्याने द्वौ। क्रतुयज्ञौ द्वौ। तत्र संख्यातानुदेशः प्राप्नोति। संघादिषु च प्रभृतयः। संघादिषु च प्रभृतयः संख्यातानुदेशेन न सिध्यन्ति। नैष दोषः। घोषग्रहणमपि तत्र कर्तव्यम्। वेशोयशआदेर्भगाद्यल्खौ। वेशोयशआदी द्वौ। यल्खौ द्वौ। तत्र संख्यातानुदेशः प्राप्नोति। ङसिङसोः ख्यत्यात्परस्य। ङसिङसौ द्वौ। ख्यत्यौ द्वौ। तत्र संख्यातानुदेशः प्राप्नोति। न वा समानयोगवचनात्। न वा एष दोषः। किं कारणम्। समानयोगवचनात्। समानयोगे संख्यातानुदेशं वक्ष्यामि। तस्य दोषो विदो लटो वा। तस्यैतस्य लक्षणस्य दोषः विदो लटो वेति संख्यातानुदेशेन प्राप्नोति। ध्माधेटोः नाडीमुष्ट्योश्च। ध्माधेटोः नाडीमुष्ट्योश्च संख्यातानुदेशेन प्राप्नोति। खलगोरथादिनित्रकट्यचश्च। संख्यातानुदेशेन प्राप्नोति। सिन्धुपकराभ्यां कन्। अणञौ च संख्यातानुदेशेन प्राप्नोति। युष्मदस्मदोश्चादेशाः। युष्मदस्मदोश्चादेशाः संख्यातानुदेशेन न सिध्यन्ति। तस्माद्यस्मिन्पक्षेऽल्पीयांसो दोषाः तमास्थाय प्रतिविधेयं दोषेषु। अथवैवं वक्ष्यामि। यथासंख्यमनुदेशः समानां स्वरितेन। ततोऽधिकारः। अधिकारश्च भवति स्वरितेनेति। एवमपि स्वरितं दृष्ट्वा संदेहः स्यात्। न ज्ञायते किमयं समसंख्यार्थः आहोस्विदधिकारार्थ इति। संदेहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। समसंख्यार्थ इति व्याख्यास्यामः॥

वायमर्थः। विदो लटो वेति। अत्र तु लब्धयथासंख्यानामनुमानाददोषः। युष्मदस्मदोश्चेति। बहुवचनस्य वस्नसावित्यादिषु योगेष्वनुमीयमानत्वाद्युष्मदस्मदोर्यथासंख्यं न प्राप्नोति। यस्मिन्पक्ष इति। शब्दतः साम्यमेकयोगे चेत्येष पक्ष आश्रयितव्य इत्याकूतः। दोषप्रतिविधानं तु क्वचिदानन्तर्याद्व्यवस्था क्वचिदनभिधानाभिधानाभ्यामिति कर्तव्यम्। अथवेति। यत्र स्वरितत्वं प्रतिज्ञायते तत्रैव शब्दतोऽर्थतो वा साम्याश्रयणेन यथासंख्यं नान्यत्र सत्यपि संख्यासाम्ये॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ स्वरितेन॥ ॥स्वरितेनेतीत्थंभूतलक्षणे तृतीया। स्वरितेनाधिकारो लक्ष्यत इत्यर्थः। स्वरितत्वं सूत्रस्थानां केवलमधिकार- १३१
२४२ त्वानार्थं प्रतिज्ञायते न तु प्रयोगसमवायि। अधिकारशब्दो भावसाधनः कर्मसाधनो वा। विनियोगो लोकेऽधिकार उच्यते
स एवेह गृह्यते। किमर्थमिति। आकाङ्क्षादिवशात्प्रकृतस्य संबन्धो लोकवद्भविष्यतीति प्रश्नः। किंगतमिति। कि
मयमर्थोऽधिकारशब्देन परिगृहीतोऽथ नेति प्रश्नः। शब्देनेति। नहि परिस्पन्दरूपः शब्दस्य व्यापारोऽस्ति। नवेति। वचन
रहितात्लोकव्यवहारादेतत्साध्योऽर्थः सिद्ध इत्यर्थः। यज्ञदत्तायेति। संप्रदानविभक्त्या संनिहिता गोकर्मिका ददातिक्रि-

स्वरितेनाधिकारः॥ ॥किमर्थमिदमुच्यते। अधिकारः प्रतियोगं तस्यानिर्देशार्थः। अधिकारः क्रियते प्रतियोगं
तस्यानिर्देशार्थ इति। किमिदं प्रतियोगमिति। योगं योगं प्रतिप्रतियोगम्। योगे योगे तस्य ग्रहणं माकार्षमिति।
किंगतमेतदियता सूत्रेण। गतमित्याह। कुतः। लोकतः। तद्यथा। लोकेऽधिकृतोऽसौ ग्रामेऽधिकृतोऽसौ नगर इत्यु
च्यते यो यत्र व्यापारं गच्छति। शब्देन चाप्यधिकृतेन कोऽन्यो व्यापारः शक्योऽवगन्तुम् अन्यदतो योगे योगे उ
पस्थानात्। न वा निर्दिश्यमानाधिकृतत्वाद्यथा लोके। न वा एतत्प्रयोजनमस्ति। किं कारणम्। निर्दिश्यमाना
धिकृतत्वात्। यथा लोके। निर्दिश्यमानमधिकृतं गम्यते। तद्यथा। देवदत्ताय गौर्दीयतां यज्ञदत्ताय विष्णुमित्रा
येति। गौरिति गम्यते। एवमिहापि पदरुजविशस्पृशो घञ् स्थिरे भावे। घञिति गम्यते। अन्यनिर्देशस्तु निवर्त
कस्तस्मात्परिभाषा। अन्यनिर्देशस्तु लोके निवर्तको भवति। तद्यथा देवदत्ताय गौर्दीयतां विष्णुमित्राय कम्बल
इति कम्बलो गोर्निवर्तको भवति। एवमिहाप्यभिविधौ भाव इनुण् घञो निवर्तकः स्यात्। तस्मात्परिभाषा क
र्तव्या। अधिकारपरिमाणाज्ञानं तु। अधिकारपरिमाणाज्ञानं तु भवति।

यापेक्ष्यते। अश्रुतकल्पनायाः श्रुतापेक्षणस्य लाघवात्। घञो निवर्तकः स्यादिति। ततश्चाक्रोशे अवन्योर्ग्रहः इत्यादिषु अनन्तरइनुणः स्या
त्। सति सूत्रे घञः स्वरितत्वप्रतिज्ञानादनुवृत्तिर्भवति न त्विनुणो विपर्ययात्। अधिकारपरिमाणाज्ञानं त्विति। यथा धातोरिति किं-
प्राग्लादेशेभ्योऽथाध्यायपरिसमाप्तेः। अङ्गाधिकारः प्रागभ्यासविकारेभ्योऽथासप्तमपरिसमाप्तेरिति। स्वरितं दृष्ट्वेति। प्रकृतस्याधि-
कारनिवृत्तये शब्दान्तरस्य स्वरितत्वं प्रतिज्ञायते। तेन विंशतिकात्खइत्यत्र स्वरितत्वदर्शनाद्विद्विपूर्वादित्यस्य निवृत्तिरनुमीयते। रामः
२४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावतिथइति।द्वित्रिपूर्वान्निष्कादित्यत्रइकारेणानुबन्धःकर्तव्यः।तेनद्वयोर्योगयोरनुवृत्तिर्भवति।एवमन्यत्रापिवेदितव्यम्।अल्पीयांसइति।कथंपुनर्भिन्नजातीयापेक्षयाप्रकर्षप्रत्ययः।परमतापेक्षया।अल्पेयोगाइतिचेन्मन्यसेतत्राल्पीयांसोऽलः।अ

नज्ञायतेकियन्तमवधिमधिकारोनुवर्ततइति।अधिकारपरिमाणज्ञानार्थंतु।अधिकारपरिमाणज्ञानार्थएवतर्ह्ययंयोगोवक्तव्यः।अधिकारपरिमाणंज्ञास्यामीति।कथंपुनःस्वरितेनाधिकारइत्यनेनाधिकारपरिमाणंशक्यंविज्ञातुम्।एवंवक्ष्यामि।स्वरितेनाधिकारइति।स्वरितंदृष्ट्वाधिकारोनभवतीति।केनेदानीमधिकारोभविष्यति।लौकिकोधिकारः।नाधिकारइतिचेदुक्तम्।किमुक्तम्।अन्यनिर्देशस्तुनिवर्तकस्तस्मात्परिभाषेति।अधिकारार्थमेवतर्ह्ययंयोगोवक्तव्यः।ननुचोक्तमधिकारपरिमाणज्ञानंत्विति।यावतिथोऽलनुबन्धस्तावतोयोगानितिवचनात्सिद्धम्।यावतिथोऽलनुबध्यतेतावतोयोगानधिकारोनुवर्ततइतिवक्तव्यम्।अथेदानींयत्राल्पीयांसोऽलःभूयसश्चयोगानधिकारोनुवर्ततेकथंतत्रकर्तव्यम्।भूयसिप्राग्वचनम्।भूयसिप्राग्वचनंकर्तव्यम्।प्रागमुतइतिवक्तव्यम्।तत्तर्हिवक्तव्यम्।नवक्तव्यम्।संदेहमात्रमेतद्भवति।सर्वसंदेहेषुचेदमुपतिष्ठतेव्याख्यानतोविशेषप्रतिपत्तिर्नहिसंदेहादलक्षणमिति।प्रागमुतइतिव्याख्यास्यामः।यद्येवंनार्थोनेन।केनेदानीमधिकारोभविष्यति।लौकिकोधिकारः।ननुचोक्तंनाधिकारइतिचेदुक्तम्।किमुक्तम्।अन्यनिर्देशस्तुनिवर्तकस्तस्मात्परिभाषेति।संदेहमात्रमेतद्भवति।सर्वसंदेहेषुचेदमुपतिष्ठतेव्याख्यानतोविशेषप्रतिपत्तिर्नहिसंदेहादलक्षणमित्युक्तम्।इदुण्घञिति संदेहेघञितिव्याख्यास्यामः।नतर्हीदानीमयंयोगोवक्तव्यः।वक्तव्यश्च।किंप्रयोजनम्।स्वरितेनाधिकारगतिर्यथाविज्ञायेत।अधिकारगतिः।अधिकःकारः।अधिकंकार्यम्।गोस्त्रियोरुपसर्जनस्येत्यत्रगोटाङ्ग्रहणंचोदितंतन्नकर्तव्यंभवति।स्त्रीग्रहणंस्वरयिष्यतेस्वरितेनाधिकारगतिर्भविष्यतीतिस्त्रियामित्येवंप्रकृत्ययेविहितास्तेषांग्रहणंविज्ञास्यते।तत्रस्वरितेनाधिकारगतिर्भवतीतिनदोषोभवति॥

यत्रह्यपोऽलइतिचेद्भूयांसोयोगाः।भूयसीति।अङ्गस्यप्राग्भ्रेरित्यादिवक्तव्यम्।तत्तर्हीति।यावतिथोऽलिति भूयसिप्राग्वचनंचेत्यर्थः।घञितिव्याख्यास्यामइति।ननुचेदुण आनन्तर्यात्संदेहाभावः।उच्यते।घञोनुवृत्तिसामर्थ्यादिदुण्भ्यामानन्तर्यमितिनिमित्तसद्भावात्संदेहः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सांकाश्यकेभ्य इति। बुद्ध्या समीहितैकत्वाः प्रकर्षाश्रयेण पाटलिपुत्रका विभज्यन्त इति मुख्यापायाभावादपादानसंज्ञा न-
स्यात्। ध्रुवमपाय इत्यत्र तु स्वरितत्वे प्रतिज्ञाते सति बुद्धिपरिकल्पितापायाश्रयणेनापि भवति। कृत्स्न आधारात्मेति। सर्वैर-
वयवा यत्र व्याप्ता इत्यर्थः। गङ्गायां गाव इति। गङ्गाशब्दोऽत्र न ग्रामे वर्तते न तु तत्समीपदेशे। तस्य हि मुख्यमेवाधारत्वमि-
त्यप्रयोजनमेतत्स्यात्। न चास्तु तत्सामीप्याद्घोषाणामाधारत्वमिति यत्नात्संज्ञासिद्धिः। पूर्व इति। विप्रतिषेधे परं कार्यमिति व-
चनात्पूर्वो बाध्यः स्वरितत्वप्रतिज्ञानेन बाधकः संपद्यते। तुल्यजातीयस्य बाधकः न तु नित्यत्वादियुक्तस्य॥ इत्युपाध्याय

अधिकं कार्यम्। अपादानमाचार्यः किं न्याय्यं मन्यते यत्र प्राप्यनिवृत्तिः। तेनेह हैव स्याद्ग्रामादागच्छ-
ति। सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र न स्यात्। स्वरितेनाधिकं कार्यं भवतीत्यत्रापि
सिद्धं भवति। तथा अधिकरणमाचार्यः किं न्याय्यं मन्यते यत्र कृत्स्न आधारात्मा व्याप्तो भवति तेनेहैव स्या-
त् तिलेषु तैलं दध्नि सर्पिरिति। गङ्गायां गावः कूपे गर्गकुलमित्यत्र न स्यात्। स्वरितेनाधिकं कार्यं भवती-
त्यत्रापि सिद्धं भवति। अधिकं कार्यम्। अधिकः कारः। पूर्वविप्रतिषेधाश्च न पठितव्या भवन्ति। गुणवृद्ध्यौत्व-
तृज्वद्भावेभ्यो नुम् पूर्वविप्रतिषिद्धं नुमचिरतृज्वद्भावेभ्यो नुडिति। नुम्नुटौ स्वरयिष्येते। तत्र स्वरितेनाधि-
कः कारो भवतीति नुम्नुटौ भविष्यतः। कथं पुनरधिकः कार इत्यनेन पूर्वविप्रतिषेधाः शक्या न पठितुम्।
लोकतः। तद्यथा। लोकेऽधिकमयं कारं करोतीत्युच्यते यो यं दुर्बलः सन्बलवद्भिः सह भारं वहति एवमि-
हाप्यधिकमयं कारं करोतीत्युच्यते यो यं पूर्वः सन्परं बाधते। अधिकारगतिस्वर्यो विशेषायाधिकं
कार्यम्। अथ योऽन्योऽधिकः कारः पूर्वविप्रतिषेधार्थः सः॥२॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्य तृ-
तीयपादे प्रथममाह्निकम्॥ अनुदात्तङित आत्मनेपदम्॥ ॥विकरणेभ्यः प्रतिषेधो वक्तव्यः। चिनुतः सुनुतः लुनीतः। ङित
इत्यात्मनेपदं प्राप्नोति। नैष दोषः। नैवं विज्ञायते ङकार इद्यस्य सोऽयं ङिद्ङित इति। कथं तर्हि ङकार इद्ङिद्ङित इति।

जैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्य तृतीये प्रथममाह्निकम्॥ अनुदात्त॥ ॥ विकरणेभ्य इति। लादेशेषु कृतेषु नियमात्पूर्वं नित्यत्वाद्विक-
रणाः। तेषां सार्वधातुकमपिदिति ङित्त्वातिदेशादात्मनेपदनियमोऽनेन प्राप्नोतीति। ङकार इदिति। अन्यपदार्थापेक्षणाद्बहिरङ्गो बहुव्रीहिः। तत्पुरुषस्तु वर्तिपदार्थप्रधा-
नत्वादन्तरङ्ग इति स एवाश्रीयते। केवलाच्च ङकारादित आत्मनेपदासंभवात्सामर्थ्यात्तदन्तविधेर्वाऽत्र ङिदन्त आश्रीयते। तेन ङिदन्तादात्मनेपदमित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। तेनोपदेशे योऽङित्तस्मादात्मनेपदं नत्वातिदेशिकङित्त्वेभ्यः। एवं तर्हीति। अत्रापि पक्षे उच्चुकुटिषतीत्यतिप्रसङ्ग निवारणा
र्थं सिद्धं तु पूर्वस्य कार्यातिदेशादित्यपाश्रयणीयम्। किमर्थमिति। किं विहितानां लादेशानामनेन नियमः क्रियते। अथवा क्वैकवा
क्यतया विधिरिति प्रश्नः। नियमार्थ इति। एकवाक्यतायां भाविनी संज्ञाश्रयणीयेति वाक्यभेद एवाश्रीयते। तेन नियमोऽयं संप
द्यते। परत्वादिति। विकरणानामवकाशः अलादेशाश्चानशादयः। नियमस्यावकाशः लिङ्लिटावार्द्धधातुकसंज्ञौ। स्पर्द्धत इत्या
दावुभयप्रसङ्गे परत्वाद्विकरणास्तेन व्यवधानान्नियमाप्रसङ्गः। अनवकाश इति। सर्वत्र विकरणानां व्यवधायकत्वादिति भावः।

अथवोपदेश इति वर्तते। अथवोक्तमेतत् सिद्धं तु पूर्वस्य कार्यातिदेशादिति। सर्वथा चङ्ङ्भ्यां प्राप्नोति। एवं
तर्हि धातोरिति प्रकृतं वर्तते। क्व प्रकृतम्। भूवादयो धातव इति। तद्वै प्रथमानिर्दिष्टं पञ्चमीनिर्दिष्टेन चेहार्थः।
अर्थाद्विभक्तिविपरिणामो भविष्यति। तद्यथा। उच्चानि देवदत्तस्य गृहाणि। आमन्त्रयस्वैनं देवदत्तमिति गम्यते।
देवदत्तस्य गावोऽश्वा हिरण्यं च आढ्यो वैधवेयः देवदत्त इति गम्यते। पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्रथमानिर्दिष्टं
द्वितीयानिर्दिष्टं च भवति। एवमिहापि पुरस्तात्प्रथमानिर्दिष्टं सदर्थात्पञ्चमीनिर्दिष्टं भविष्यति। किमर्थं पुनरिद
मुच्यते। आत्मनेपदवचनं नियमार्थम्। नियमार्थोऽयमारम्भः। किमुच्यते नियमार्थोऽयमिति न पुनर्विध्यर्थोऽपि स्यात्।
लविधानाद्विहितम्। लविधानाद्ध्यात्मनेपदं परस्मैपदं च विहितम्। अस्ति प्रयोजनमेतत्। किं तर्हीति। विकरणैस्तु
व्यवहितत्वान्नियमो न प्राप्नोति। इदमिह संप्रधार्यं विकरणाः क्रियन्तां नियम इति। किमत्र कर्तव्यम्। परत्वाद्विक
रणाः। नित्याः खल्वपि विकरणाः कृतेऽपि नियमे प्राप्नुवन्त्यकृतेऽपि प्राप्नुवन्ति। नित्यत्वाच्च परत्वाच्च विकरणेषु कृतेषु विकर
णैर्व्यवहितत्वान्नियमो न प्राप्नोति। नैष दोषः। अनवकाशो नियमः। सावकाशः। कोऽवकाशः। यत्रैते लुग्विकरणा
श्लुविकरणाश्च लिङ्लिटौ च। यदि पुनरियं परिभाषा विज्ञायेत।

यदि पुनरिति। आत्मनेपदपरस्मैपदाभ्यां लिङ्गाभ्यामिदं प्रकरणं लादेशविधावुपतिष्ठते। तत्र महावाक्येन विहितेषु ला-
देशेषु विकरणा इति दोषाभावः। स्यादिषु कथम्। ते हि लावस्थायामेव विधीयन्त इति तैर्व्यवधानान्नियमो न प्राप्नोति। उच्य
ते। लमात्रापेक्षत्वादन्तरङ्गत्वाल्लादेशेषु कृतेषु लकारविशेषापेक्षया बहिरङ्गाः स्यादयो भविष्यन्ति। येन नाप्राप्तिन्यायेन श
बादीन्बाधित्वा। शबादिविधावनुवर्तनाद्वा॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमपीति। एकवाक्यतापक्षे विहितालादेशा न सन्तीति येन तेषां सतामात्मनेपदपरस्मैपदसंज्ञे स्यातामत्र तश्चेत्तत्परिभाषोपस्थाने स
ति संज्ञाश्रयं लादेशविधानं लादेशविधानाश्रया च संज्ञेति भावः। परस्मैपदानुक्रमणमिति। नन्वसति परस्मैपदानुक्रमणे परस्मैप
दमनुदात्तङितः प्राप्नोति नैष दोषः। आत्मनेपदसंबन्धावगमेन तेषां परस्मैपदसंबन्धस्य बाधनाच्छेषादेव परस्मैपदमवस्थास्य-
ते। अवश्यमिति। आत्मनेपदबाधनार्थमित्यर्थः। यदयमिति। कृतनियमानामसंकरेणास्थितानां हि निमित्तभावोपपत्तिः। अ-

किं कृतं भवति। कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम्। लस्य तिबादयो भवन्तीत्युपस्थितमिदं भवति
अनुदात्तङित आत्मनेपदं शेषात्कर्तरि परस्मैपदमिति। एवमपीतरेतराश्रयं भवति। का इतरेतराश्रयता। अ
भिनिर्वृत्तानां लस्य स्थाने तिबादीनामात्मनेपदपरस्मैपदसंज्ञया भवितव्यम्। संज्ञया च तिबादयो भाव्यन्ते। तदि
तरेतराश्रयं भवति इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। परस्मैपदेषु तावन्नेतरेतराश्रयं भवति। परस्मैपदानुक्रमणं
न करिष्यते। अवश्यं कर्तव्यमनुपराभ्यां कृञ इत्येवमर्थम्। ननु चैतदप्यात्मनेपदानुक्रमण एव करिष्यते स्व
रितञितः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति कर्तर्यनुपराभ्यां कृञो नेति। आत्मनेपदेषु चापि नेतरेत
राश्रयं भवति। कथम्। भाविनी संज्ञा विज्ञास्यते सूत्रशाटकवत्। तद्यथा। कश्चित्कंचित्तन्तुवायमाह अस्य सू
त्रस्य शाटकं वयेति। स पश्यति यदि शाटको न वातव्यः अथ वातव्यो न शाटकः शाटको वातव्यश्चेति विप्रतिषि
द्धम्। भाविनी खल्वस्य संज्ञाभिप्रेता स मन्ये वातव्यो यस्मिन्नुते शाटक इत्येतद्भवतीति। एवमिहापि स लस्य स्था
ने कर्तव्यः यस्याभिनिर्वृत्तस्यात्मनेपदमित्येषा संज्ञा भविष्यति। अथ वा पुनरस्तु नियमः। ननु चोक्तं विकरणेभ्यो
हि तत्वान्नियमो न प्राप्नोति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति विकरणेभ्यो नियमो बलीयानिति। यदयं विकरणवि
धावात्मनेपदपरस्मैपदान्याश्रयति. पुषादिद्युताद्य्लृदितः परस्मैपदेषु आत्मनेपदेष्वन्यतरस्यामिति नैतदस्ति ज्ञापकम्।
अभिनिर्वृत्तानि हि लस्य स्थाने आत्मनेपदानि परस्मैपदानि च। यत्तर्ह्यनुपसर्गाद्वेति विभाषां शास्ति।

भिनिर्वृत्तानीति। प्रागपि नियमात्तेषां संभवमात्रेण निमित्तत्वाविरोधात्। यत्तर्हीति। एतत्तु लिङ्लिडर्थं स्यात्। चक्रमे चक्राम राम: २५४
कम्यात् क्रंसीष्टेति। तस्माज्ज्ञापकद्विकमुदर्शिता भाष्यकृता। ज्ञापकं तु वृद्भ्यः स्यसनोरित्यत्रस्थे विकल्पविधानम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

किंपुनरिति। उभयनियमस्तावन्न संभवति। अनेकस्मिन्नर्थे वाक्यस्यैकस्य तात्पर्यायोगात्। तस्मादन्यतरनियमसंभवात्प्रश्नः। ननु प्राधान्यात्प्रत्ययानां नियमो युक्तः। एवं तर्हि प्रधानोपरोधो मा भूदिति प्रकृत्यर्थे नियमोऽपि संभवति। भावकर्मणोरेवे-ति। ननु पूर्वेण नियमाद्भावकर्मणोरिति सूत्रं विध्यर्थं न्याय्यं न तु नियमार्थम्। नैष दोषः। समस्तमात्मनेपदप्रकरणमेकं वा-क्यमिति तदपेक्षयैतदुक्तम्। क्वचिदिति। वा क्वचिदिति परस्मैपदे विकल्पिते आत्मनेपदस्यानुदात्तङिदादिषु नियतत्वा-दप्राप्तत्वाल्लकारस्यश्रवणप्रसङ्गः। उच्यते चेति। लकारे तिबादिभिर्निवर्तिते नियमः प्रवर्तते तत्र परस्मैपदस्य सिद्धत्वा।

किंपुनरयं प्रत्ययनियमः अनुदात्तङित एवात्मनेपदं भवति भावकर्मणोरेवात्मनेपदं भवतीति। आहोस्वित्प्रकृ-त्यर्थनियमः। अनुदात्तङित आत्मनेपदमेव भावकर्मणोरात्मनेपदमेवेति। कश्चात्र विशेषः। तत्र प्रत्ययनियमे शेषवचनं परस्मैपदस्यानिवृत्तत्वात्। तत्र प्रत्ययनियमे शेषग्रहणं कर्तव्यं परस्मैपदनियमार्थम्। शेषात्क-र्तरि परस्मैपदमिति। किं कारणम्। परस्मैपदस्यानिवृत्तत्वात्। प्रत्ययानियताः प्रकृत्यर्थावनियतौ तत्र परस्मैपद-मपि प्राप्नोति तत्र शेषग्रहणं कर्तव्यं परस्मैपदनियमार्थम्। शेषादेव परस्मैपदं भवति नान्यत इति। क्यष-आत्मनेपदवचनं तस्यान्यत्र नियमात्। क्यष आत्मनेपदं वक्तव्यम्। लोहितायति लोहितायते। किं पुनः का-रणं न सिध्यति। तस्यान्यत्र नियमात्। तद्ध्यन्यत्र नियम्यते। उच्यते च न च प्राप्नोति तद्वचनाद्भविष्यति। अस्तु तर्हि प्रकृत्यर्थनियमः। प्रकृत्यर्थनियमेऽन्याभावः। प्रकृत्यर्थनियमे अन्येषां प्रत्ययानामभावः। अनुदात्त-ङितस्तङादयो न प्राप्नुवन्ति नैष दोषः। अनवकाशास्तङादयः। उच्यन्ते च ते वचनाद्भविष्यन्ति। सावकाशा-स्तङादयः। कोऽवकाशः। परस्मैपदिनोऽवकाशः। तत्रापि नियमान्न प्राप्नुवन्ति। तव्यदादयस्तु तर्हि भावकर्म-णोर्नियमान्न प्राप्नुवन्ति। तव्यदादयोऽप्यनवकाशाः। ते वचनाद्भविष्यन्ति।

द्वा वचनेन तस्मिन्विकल्प्यमाने वचनमनर्थकं स्यात्। केवलायाः प्रकृतेरप्रयोगाद्धेत्वाच्छब्दमन्तरेणार्थस्य प्रतिपादयितु-मशक्यत्वात्प्रयोगविकल्पायोगात्। तस्मादात्मनेपदमेव विकल्पेन विधीयते। तव्यदादयोऽपीति। यद्यपि स्नानीयं चूर्णमि-त्यादौ करणादीन्यवकाशः तथापि तयोरेवेति चोदनया भावकर्मणोर्यद्विधानं तदनवकाशम्।

CC-0. In Public Domain. Digitization by eGangotri

भा· कै· चिण्तर्हीति।ननुभावकर्मणोःसार्वधातुकस्यार्थेनचिण्तत्कथमप्राप्तिश्चोद्यते।सहाभिधानपक्षेचिणोऽपिभावकर्मणोअ १३२
२४५ र्थावित्यदोषः।घञ्तर्हीति।अकर्तरिविधीयमानोऽपादानादिषुघञ्स्यावकाशः।उपपदविशेषणमिति। सप्तमीस्थस्यसामान्य
स्यकर्मणीत्यनेनविशेषस्याप्रतिपादनादुपपदविशेषणमुच्यते।एवमभिधेयविशेषणेनेतिव्याख्येयम्।कर्तरिचेति।यदाक

चिण्तर्हिभावकर्मणोर्नियमान्नप्राप्नोति।चिण्वचनाद्भविष्यति।घञ्तर्हिभावकर्मणोर्नियमान्नप्राप्नोति।
तत्रापिप्रकृतंकर्मग्रहणमनुवर्तते।क्वप्रकृतम्।अण्कर्मणिचेति। तद्धैतत्रोपपदविशेषणम्।अभिधेयवि
शेषणेनचेहार्थः।नचान्यार्थंप्रकृतमन्यार्थंभवति।नखल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति।नहिगोधा
प्रसर्पन्तीसर्पणादहिर्भवति।यत्तावदुच्यते।नान्यार्थंप्रकृतमन्यार्थंभवतीति।अन्यार्थमपिप्रकृतमन्या
र्थंभवति।तद्यथा।शाल्यर्थंकुल्याःप्रणीयन्तेताभ्यश्चपानीयंपीयतेउपस्पृश्यतेशालयश्चभाव्यन्ते।यद
प्युच्यतेनखल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवतिनहिगोधाप्रसर्पन्तीसर्पणादहिर्भवतीति।भवेद्द्रव्येषु
तदेवंस्यात्।शब्दस्तुखलुयेनयेनाभिसंबध्यतेतस्यतस्यविशेषकोभवति।शेषवचनंच।शेषवचनंचकर्त
व्यम्।शेषात्कर्तरिपरस्मैपदमिति।किंप्रयोजनम्।शेषनियमार्थम्।प्रकृत्यर्थौनियतौप्रत्ययाअनियतास्ते
शेषेपिप्राप्नुवन्ति।तत्रशेषग्रहणंकर्तव्यम्।शेषात्कर्तरिपरस्मैपदमेवनान्यदिति।कर्तरिचात्मनेपदविष
येपरस्मैपदप्रतिषेधार्थंद्वितीयंशेषग्रहणंकर्तव्यम्।शेषाच्छेषइतिवक्तव्यम्।इहमाभूत्।भिद्यतेकुसूलः
स्वयमेवेति।कतरस्मिन्पक्षेऽयंदोषः।प्रकृत्यर्थनियमपक्षे।प्रकृत्यर्थनियमेतावन्नदोषः।प्रकृत्यर्थौनियतौ
प्रत्ययाअनियताः।तत्रनार्थःकर्तृग्रहणेन। कर्तृग्रहणञ्चैषदोषः।प्रत्ययनियमेतर्ह्ययंदोषः।प्रत्ययानिय
ताःप्रकृत्यर्थावनियतौतत्रकर्तृग्रहणंकर्तव्यंभावकर्मणोर्निवृत्त्यर्थम्।कर्तृग्रहणञ्चैषदोषः।प्रकृत्यर्थ
नियमेशेषग्रहणंशक्यमकर्तुम्।कथम्।प्रकृत्यर्थौनियतौप्रत्ययाअनियताः।

मेवद्वित्ययंशास्त्रातिदेशः।तदाकर्मकर्तरिपरत्वात्परस्मैपदंप्राप्नोति।शुद्धौतुकर्मकर्तरिउभयोरवकाशो।कार्यातिदेशेतुपरत्वा रामः
दात्मनेपदंसिध्यति। प्रकृत्यर्थौनियताविति।भावकर्मणोरात्मनेपदमेवेतिनियमादन्तरेणापिकर्तृग्रहणंकर्तर्येवपरस्मैपदं २४५
लभ्यतइतिनार्थःकर्तृग्रहणेन।कर्तृग्रहणञ्चेति।परस्तात्तुपरिहरिष्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परस्मैपदमिति। सिद्धे परस्मैपदे पुनर्विधानमात्मनेपदनिवृत्त्यर्थं संपद्यत इत्यर्थः। नास्य किंचिदिति। पीडारूपं भावस्वभावं व
स्त्वित्यर्थः। यदि तर्हि कर्मणि कर्तर्यात्मनेपदं भवति हन्यमानो हन्तीत्यत्र प्राप्नोति। नैष दोषः। प्रत्यासत्त्यैकधातुविषयं कर्मक
र्तृत्वं विज्ञायते। यस्य स्वाश्रयं कर्तृत्वं कर्मणाख्यातिदेशाच्चौपचारिकं कर्मत्वं तत्रैव भवति। अनुपराभ्यां कृञ इत्येवम
र्थमिति। एष हि योगो व्यवहितः। कस्यान्तरप्राप्तत्वादात्मनेपदापवादत्वाच्च बलवानिति न शक्यते योगविभागेन
बाधितुम्। ननु चैतदपीति। प्राप्तिमात्रं योगविभागेन बाध्यते। ननु चेयमिति। पूर्वविप्रतिषेधेनेति भावः। शेषादि

ततो वक्ष्यामि परस्मैपदं भवतीति। तन्नियमार्थं भविष्यति। यत्र परस्मैपदं चान्यच्च प्राप्नोति तत्र परस्मैपदमेव भ
वतीति। तत्तर्हि प्रत्ययनियमे द्वितीयं शेषग्रहणं कर्तव्यम्। न कर्तव्यम्। योगविभागः करिष्यते। अनुदात्तङित आ
त्मनेपदम्। भावकर्मणोः। ततः कर्तरि। कर्तरि चात्मनेपदं भवति भावकर्मणोः। ततः कर्मव्यतिहारे। कर्तरीत्येव।
भावकर्मणोरिति निवृत्तम्। यद्येवं तर्हि कर्मणि कर्तरि भवत्येवं भावेऽपि कर्तरि प्राप्नोति। एति जीवन्तमानन्दः। ना
स्य किंचिद्रुजतीति। द्वितीयो योगविभागः करिष्यते। अनुदात्तङित आत्मनेपदम्। ततः भावे। ततः कर्मणि। क
र्मणि चात्मनेपदं भवति। ततः कर्तरि। कर्तरि चात्मनेपदं भवति। कर्मणीत्यनुवर्तते भावग्रहणं निवृत्तम्। ततः कर्म
व्यतिहारे। कर्तरीत्येव। कर्मणीति निवृत्तम्। एवमपि शेषग्रहणं कर्तव्यम्। अनुपराभ्यां कृञ इत्येवमर्थम्। इ
ह माभूत्। अनुक्रियते स्वयमेव पराक्रियते स्वयमेव। ननु चैतदपि योगविभागादेव सिद्धम्। न सिध्यति। अनन्त
रा या प्राप्तिः सा योगविभागेन शक्या बाधितुम्। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। परा प्राप्ति
रप्रतिषिद्धा तया प्राप्नोति। ननु चेयं प्राप्तिः परां प्राप्तिं बाधते। नोत्सहते प्रतिषिद्धा सती बाधितुम्।

त्यस्यावकाशः यातिवातीति। अनुपराभ्यामित्यस्यावकाशः। अशेषः कर्त्रभिप्रायक्रियाफलविषयः अनुकरोतीति। कर्मकर्तर्युभयप्रस
ङ्गे पूर्वविप्रतिषेधेन शेषादिति प्राप्तिर्भवति। सापि योगविभागेन बाध्यते। नोत्सहत इति। शेषादिति प्राप्तिर्योगविभागेनापवादेन कर्मकर्तृ
विषयाद्विषयान्तरं नीता नोत्सहते परां प्राप्तिं बाधितुमित्यर्थः। अथवेयं योगविभागप्राप्तिरविशेषादनुपराभ्यामित्येतामपि प्रा
प्तिं बाधिष्यत इत्यर्थः। नोत्सहत इति। अपवादापवादत्वादनुपराभ्यामित्येतया प्राप्त्या प्रतिषिद्धा नोत्सहते तामेव बाधितुमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तैवयः कर्त्रेति। यस्य व्यपदेशान्तरं नास्तीत्यर्थः। यद्येवमसिश्छिनत्तीति करणकर्तरि न प्राप्नोति। नैष दोषः। कर्त्रवस्थायां क-
रणत्वाभावात्। भिद्यते कुसूलः स्वयमेवेत्यत्र तु स्वाश्रयं कर्तृत्वमातिदेशिकं तु कर्मत्वमिति न भवति परस्मैपदम्॥ कर्तरि॥
॥क्रियाव्यतिहार इति वक्तव्यमिति। प्रत्यासन्नत्वात्कृत्रिमस्यैव साधनकर्मणो ग्रहणं प्राप्नोति। साधनकर्मणि च धातोर्हरत्यसं-
भवाद्धात्वर्थस्य तद्विषयत्वं विज्ञायेत। देवदत्तस्य धान्यमिति। देवदत्तस्वामिकं धान्यं लवनेन स्वीकुर्वन्तीत्यर्थः। क्रियाणां सा-
ध्यैकस्वभावानां कथं व्यतिहार इति चेत्। योग्यतावशाद्देशयं क्रियासाध्या तस्यादुदं साधनमिति निर्ज्ञाते साध्यसाधनभावे योग्य

एवं तर्हि कर्तरि कर्मव्यतिहार इत्यत्र कर्तृग्रहणं प्रत्याख्यायते तत्प्रकृतमुत्तरत्रानुवर्तिष्यते शेषात्कर्तरि कर्तरीति।
किमर्थमिदं कर्तरि कर्तरीति। कर्तैव यः कर्ता तत्र यथा स्यात्। कर्ता चान्यश्च यः कर्ता तत्र मा भूदिति। ततः अनुपरा-
भ्यां कृञः कर्तरि कर्तरीत्येव॥ कर्तरि कर्मव्यतिहारे॥ ॥क्रियाव्यतिहार इति वक्तव्यम्। कर्मव्यतिहार इत्युच्यमा-
न इहापि प्रसज्येत। देवदत्तस्य धान्यं व्यतिलुनन्तीति। इह च न स्यात्। व्यतिलुनते व्यतिपुनत इति। तत्तर्हि वक्त-
व्यम्। न वक्तव्यम्। क्रियां हि लोके कर्मेत्युपचरन्ति। कां क्रियां करिष्यसि किं कर्म करिष्यसीति। एवमपि कर्तव्यम्।
कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति। क्रियापि कृत्रिमं कर्म। न सिद्ध्यति। कर्तुरीप्सिततमं कर्मेत्युच्यते।
कथं च क्रिया नाम क्रियया ईप्सिततमा स्यात्। क्रियापि क्रियया ईप्सिततमा भवति। कया क्रियया। संपश्यतिक्रिय-
या प्रार्थयतिक्रियया अध्यवस्यतिक्रियया च। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत्कं-
चिदर्थं संपश्यति संदृष्टे प्रार्थना प्रार्थितेऽध्यवसायः अध्यवसाये आरम्भः आरम्भे निर्वृत्तिः निर्वृत्तौ फलावाप्तिः।

त्यासः स क्रियाव्यतिहारः। परस्परकरणमपि कचित्क्रियाव्यतिहारः। यथा संप्रहरन्ते राजान इति। अत्रैकैव क्रिया संचारिणी क-
ल्प्यते। क्रियामिति। लौकिकाश्चार्था इहानूद्यन्ते। कथं च क्रियेति। द्वयोरपि साध्यत्वात्परस्परासंबन्धं मत्वा प्रश्नः। क्रियापीति। भो-
क्तुमिच्छति भोक्तुं जानातीति दर्शनात्। कया क्रिययेति। क्रियान्तरवाचिप्रयोगाभावात्प्रश्नः। संपश्यतिक्रिययेति। संदर्शनादी-
नामव्यभिचारात्प्रतीयमानत्वात्प्रतीयमानक्रियापेक्षया च प्रविश पिण्डीमित्यादौ कर्मादिभावदर्शनात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहकर्तरीति।क्रियायाःसाध्यत्वात्प्राधान्यात्क्रिययाप्राप्तुमिष्टतमत्वात्तादर्थ्येनक्रियाप्रवर्तनात्कर्मणोऽपिप्राधान्यादुभयव्यतिहारेल
ब्धेकर्मग्रहणात्क्रियाव्यतिहारोऽयंगृह्यतेक्रियायाःधातुवाच्यत्वादन्तरङ्गत्वात्।तत्रप्रतिषेधइति।कर्मव्यतिहारेनगतिहिंसार्थेभ्य
इत्यनेनप्रतिषेधइत्यर्थः॥ ॥नगति॥हसादीनामिति।हसिप्रकाराणांशब्दक्रियाणामित्यर्थः। हरिवह्योरिति।हरतेर्हिंसार्थत्वा
द्वहतेर्गत्यर्थत्वात्प्राप्तिः।ततःसंप्रहरिष्यन्तौदृष्ट्वाकर्णधनंजयावित्यत्रव्यतिहारोनविवक्षितः।किंतर्हियोत्स्यमानावित्येता

एवंक्रियापिकृत्रिमंकर्म।एवमप्युभयोःकृत्रिमयोरुभयगतिःप्रसज्येत।तस्मात्क्रियाव्यतिहारइतिवक्तव्यम्। नवक्तव्यम्।इह
कर्तरिव्यतिहारइतीयतासिद्धम्।सोऽयमेवंसिद्धेसतियत्कर्मग्रहणंकरोतितस्यैतत्प्रयोजनंक्रियाव्यतिहारेयथास्यात्कर्मव्यति
हारेमाभूदिति।अथकर्तृग्रहणंकिमर्थम्।कर्मव्यतिहारादिषुकर्तृग्रहणंभावकर्मनिवृत्त्यर्थम्।कर्मव्यतिहारादिषुकर्तृग्रहणं
क्रियतेभावकर्मणोरनेनात्मनेपदंमाभूदिति।इतरथाहितत्रप्रतिषेधेभावकर्मणोःप्रतिषेधः।अक्रियमाणेकर्तृ
ग्रहणेभावकर्मणोरप्यात्मनेपदमनेनप्रसज्येत।तत्रकोदोषः।तत्रप्रतिषेधेभावकर्मणोःप्रतिषेधः।तत्रप्रतिषे
धेभावकर्मणोरप्यनेनात्मनेपदस्यप्रतिषेधःप्रसज्येत।व्यतिगम्यन्तेग्रामाःव्यतिहन्यन्तेदस्यवइति।नवानन्त
रस्यप्रतिषेधात्। नवाएषदोषः।किंकारणम्।अनन्तरस्यप्रतिषेधात्।अनन्तरंयदात्मनेपदविधानंतस्यप्रति
षेधात्।कुतएतत्।अनन्तरस्यविधिर्वाभवतिप्रतिषेधोवेति।पूर्वाप्राप्तिरप्रतिषिद्धातयाभविष्यति।ननुचेयं
प्राप्तिःपूर्वांप्राप्तिंबाधते।नोत्सहतेप्रतिषिद्धासतीबाधितुम्।उत्तरार्थंतर्हिकर्तृग्रहणंकर्तव्यम्।नकर्तव्यम्।क्रियतेत
त्रैवशेषात्कर्तरिपरस्मैपदमिति।द्वितीयंकर्तृग्रहणंकर्तव्यम्।किंप्रयोजनम्।कर्तैवयःकर्तातत्रयथास्यात्।कर्ता
चान्यश्चयःकर्तातत्रमाभूदिति।कर्तरिकर्म॥ ॥नगतिहिंसार्थेभ्यः॥प्रतिषेधेहसादीनामुपसंख्यानम्॥प्रतिषेधेहसादीनामुप
संख्यानंकर्तव्यम्।व्यतिहसन्ति।व्यतिजल्पन्ति।व्यतिपठन्ति॥हरिवह्योरप्रतिषेधः॥संप्रहरन्तेराजानः।संविवहन्तेगर्गै
रिति।नवहिर्गत्यर्थः।देशान्तरप्रापणक्रियोऽत्रवहिः॥नगति॥ ॥इतरेतरान्योन्योपपदाच्च॥परस्परोपपदाच्च॥परस्प
रोपपदाच्चेतिवक्तव्यम्।परस्परस्यव्यतिलुनन्ति।परस्परस्यव्यतिपुनन्ति॥इतरेत॥

वहिर्विवक्षितम्।देशान्तरप्रापणक्रियइति।भारंवहतीत्यादौदेशान्तरप्राप्त्युपसर्जनंप्रापणमस्यवाच्यम्।तत्रतुगतिर्नान्तरीयकत्वात्प्रतीयतेनत्व
सौधात्वर्थः।अस्यैवन्यायसिद्धार्थस्यानुवादकमर्थग्रहणम्।गर्गाणांतुप्रापणंकन्याद्वारकमितिविवहेगत्यर्थत्वाभावः॥ ॥इतरेतर॥लौकिके
शब्दव्यवहारेलाघवानादरादितरेतरादिशब्दाउपसर्गाश्चकर्मव्यतिहारद्योतनायप्रयुज्यन्ते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· विपराभ्यां जेः॥ विशब्द इति। पक्षिवाची तु यो विशब्दः तस्य नपुंसकत्वाभावात्पुंसि विभक्त्या व्यवधानादेरनन्तरो जयतिर्न संभव १२२
२५७ ति। बहुविजयति वनमित्यत्र जहत्स्वार्थायां वृत्तौ वेरानर्थक्यादिह चार्थवतो ग्रहणादजहत्स्वार्थायामपि तदर्थस्योपसर्जनत्वादग्र
हणम्। संबुद्ध्यन्तं तु वेइति रूपान्तरयुक्तत्वान्न गृह्यते। एकदेशविकृतस्यानन्यत्वाद्विशब्द एवायमिति चेत्। विरित्यस्य विभ-
क्त्यन्तस्य वेइति विकारो न तु विशब्दस्येत्यदोषः। वीजयत इत्यत्र एकादेशस्य पूर्वं प्रत्यन्तवद्भावाद्विशब्दात्परो जयतिः संभव-
त्येवेति चेत्। पूर्वस्य कार्ये कर्तव्येन्तवद्भावः न चात्र पूर्वस्य किंचित्कार्यमित्यदोषः। अस्य गोरिति। द्वितीयशब्दो लोके प्रयुज्यमानो
यदपेक्षं द्वितीयत्वं तत्तुल्यजातीयस्यैव संप्रत्ययं करोति। एवमिहापि विशब्दसाहचर्यात्पराशब्दोऽप्युपसर्गो गृह्यते। पक्षिवा
चिनो विशब्दस्य संभवे तु द्वयोरपि दृष्टापचारत्वात्परस्परसाहचर्यादुपसर्गग्रहणं व्याख्येयम्॥ आङो दो॥ ॥अव्यसनक्रि

विपराभ्यां जेः॥ उपसर्गग्रहणं कर्तव्यम्। इह माभूत्। परा जयति सेनेति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। यद्यपि ता
वदयं पराशब्दो दृष्टापचार उपसर्गश्चानुपसर्गश्च। अयं खलु विशब्दोऽदृष्टापचार उपसर्ग एव तस्यास्य को
न्यो द्वितीयः सहायो भवितुमर्हत्यन्यदत उपसर्गात्। तद्यथा। अस्य गोर्द्वितीयेनार्थ इति गौरेवोपादीयते नाश्वो न गर्दभ
इति। विपराभ्याम्॥ आङो दो नास्यविहरणे॥ ॥आङो दोऽव्यसनक्रियस्य॥ आङो दोऽव्यसनक्रियस्येति वक्तव्यम्। इ
हापि यथा स्यात्। विपादिकां व्याददाति कूलं व्याददातीति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। इहाङो दो नास्य इतीय
ता सिद्धम्। सोयमेवं सिद्धे सति यद्विहरणग्रहणं करोति तस्यैतत्प्रयोजनम्। आस्यविहरणसमानक्रियादपि यथा स्यात्।

यस्येति। व्यसनं विभागः विकासनमित्यर्थः। केवलो विहरणशब्द उपादीयमानः पादविहरणं गमयतीत्यास्यग्रहणं सूत्रे कृतम्। के
वलो व्यसनशब्दो दुःखादिषु वर्तत इति वार्तिके क्रियाग्रहणं कृतम्। आङो दो नास्य इति। आस्यसमवायिन्यां क्रियायां ददातिर्वर्तमा
न आस्यवृत्तिर्भवति। यथा लोमविषयहर्षणवृत्तिर्हृषिर्लोमसु वर्तत इत्युच्यते। ददातेरेवास्ये वृत्तिसंभवो नान्येषां दारूपाणामिति ते
षामिह ग्रहणाभावः। यद्येवं स्वं मुखमादत्त इत्यत्रापि मुखविषयत्वाद्दादानस्य प्रतिषेधः प्राप्नोति। नैष दोषः। आस्यसमवेतैव या क्रि- रा·म·
या तस्यां वृत्तौ ददातिरास्ये वृत्तो भवति। ग्रहणं तु ग्राह्यग्रहीतृविषयम्। अनास्य इति च पर्युदासः। आस्यानास्यसमुदायश्चास्यसदृशा २५७
इति विधिरेव तत्र भवति। सोयमिति। आस्यग्रहणं विहरणविशेषोपलक्षणार्थमित्यस्यत्यप्यास्ये विहरणसद्भावान्निषेधो भवति।

CC-0. In Public Domain. Digitization by eGangotri

स्वाङ्गकर्मकादिति। स्वमङ्गं स्वाङ्गं न तु पारिभाषिकमद्रवं मूर्तिमत्स्वाङ्गमिति। तेन परकीयास्य विहरणे विधिरेव भवति॥ ॥क्रीडोनु॥ ॥
अनुक्रीडतीति। तृतीयार्थ इत्यनुः कर्मप्रवचनीयसंज्ञः। माणवकेन सह क्रीडतीत्यर्थः। एतच्च समासाहचर्याल्लभ्यते। आगमयस्वे
ति। सह स्वकं चित्कालं मा त्वरिष्ठा इत्यर्थः। शिक्षेरिति। केचिदाहुः शकिः सन्नन्तो गृह्यते इति विध्यर्थमिदम्। क्रियाविषयश्च श-
किः प्रयुज्यते। भोक्तुं शक्नोति धारयितुं शक्नोतीति प्रयोगदर्शनात्। इह तु जिज्ञासाविषयः शकिर्गृह्यते। विद्यां जिज्ञासितुं घटत इ
त्यर्थः। आत्मनेपदे नैव जिज्ञासाया अवगमाद् जिज्ञासितुमिति न प्रयुज्यते। अन्ये तु शिक्षविद्योपादान इत्यस्य ग्रहणं निय

यथाजातीयकाश्चास्य विहरणक्रिया तथाजातीयकात्रापि॥ स्वाङ्गकर्मकाच्च॥ स्वाङ्गकर्मकाच्चेति वक्तव्यम्। इह मा भूत्। व्याददते पिपीलिकाः पतङ्गस्य मुखमिति॥ आङो॥ ॥क्रीडोनुसंपरिभ्यश्च॥ ॥उपसर्गग्रहणं कर्तव्यम्। इह मा भूत्। अनुक्रीडति माणवकमिति। समोऽकूजने॥ समोऽकूजन इति वक्तव्यम्। इह मा भूत्। संक्रीडन्ति शकटानि॥ आगमेः क्षमायाम्॥ आगमेः क्षमायामुपसंख्यानं कर्तव्यम्। माणवक आगमयस्व तावत्॥ शिक्षेर्जिज्ञासायाम्॥ शिक्षेर्जिज्ञासायामुपसंख्यानं कर्तव्यम्। विद्यासु शिक्षते। धनुषि शिक्षते॥ किरतेर्हर्षजीविकाकुलायकरणेषु॥ किरतेर्हर्षजीविकाकुलायकरणेषूपसंख्यानं कर्तव्यम्। अपस्किरते वृषो हृष्टः। अपस्किरते कुक्कुटो भक्षार्थी॥ अपस्किरते श्वा आश्रयार्थी॥ हरतेर्गतताच्छील्ये॥ हरतेर्गतताच्छील्ये उपसंख्यानं कर्तव्यम्। पैतृकमश्वा अनुहरन्ते। मातृकं गावोऽनुहरन्ते॥ आशिषि नाथः॥ आशिषि नाथ उपसंख्यानं कर्तव्यम्। सर्पिषो नाथते मधुनो नाथते॥ आङि नुप्रच्छ्योः॥ आङि नुप्रच्छ्योरुपसंख्यानं कर्तव्यम्।

मार्थं वर्णयन्ति। विधेरेव तु जायत्वात्सन्नन्तशकिग्रहणं न्याय्यम्। किरतेरिति। विक्षेपार्थः किरतिः। हर्षादयस्तु विषयत्वेनोपात्ताः।
हर्षादिष्वेव अपाच्चतुष्पादिति सुड्विधीयते। हरतेरिति। गतं प्रकारः। पैतृकमिति। पितुरागतं प्रकारं सततं शीलयन्तीत्यर्थः। मातुर
नुहरतीत्यत्र सादृश्यमात्रं विवक्षितं न तु प्रकारस्ताच्छील्यमित्यात्मनेपदं तद्धितार्थे इत्यत्र भाष्यकारेण न कृतम्। आशिषि नाथ इ
ति। आशिष्येव नाथ इति नियमार्थमिदम्। सर्पिषो नाथते इति। सर्पिर्मे भूयादित्याशास्त इत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनुत इति। उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थः। शप उपलम्भन इति। उपलम्भनं प्रकाशनम्। देवदत्ताय शपत इति। श्ला-
घह्नुङ्स्थाशपामिति संप्रदानसंज्ञा। ज्ञीप्स्यमाने विवदन्ते। केचिदाहुः। यस्मा आख्यायते स संप्रदानं य आख्यायते स इत्यन्ये॥ उदोनू॥ ॥उदईहा-
यामिति। ईहा विशिष्टचेष्टा कायपरिस्पन्दात्मिका गृह्यते। उत्तिष्ठति सेनेति। उत्पद्यते जायते सेनेत्यर्थः॥ ॥उपान्मन्त्र॥ ॥उपाद्देव
पूजेति। अमन्त्रकरणार्थमिदम्। अर्कमुपतिष्ठत इति। देवपूजां मन्त्रात्मने पदं कृतम्। चापलमेतन्न पूजनमिति न कृतमपरत्र अ

आनुते शृगालः। आपृच्छते गुरुमिति॥ शप उपलम्भने॥ शप उपलम्भन उपसंख्यानं कर्तव्यम्। देवदत्ताय शपते।
यज्ञदत्ताय शपते क्रीडोनु॥ ॥समवप्रविभ्यस्थः॥ आङःस्थः प्रतिज्ञाने॥ आङःस्थः प्रतिज्ञान इति वक्तव्यम्। अ
स्तिं सकारमातिष्ठते। आगमौ गुणवृद्धी आतिष्ठते। विकारौ गुणवृद्धी आतिष्ठते॥ समव॥ उदोनूर्ध्वकर्मणि॥
॥उदईहायाम्॥ उदईहायामिति वक्तव्यम्। इहमाभूत्। उत्तिष्ठति सेनेति। उदो॥ ॥उपान्मन्त्रकरणे॥
॥उपाद्देवपूजासंगतकरणयोः॥ उपाद्देवपूजासंगतकरणयोरिति वक्तव्यम्। आदित्यमुपति
ष्ठते। चन्द्रमसमुपतिष्ठते। संगतकरणे। रथिकानुपतिष्ठते। अश्वारोहानुपतिष्ठते। बहूनामप्यचित्तानामे
को भवति चित्तवान्। पश्य वानरसैन्येस्मिन्यदर्कमुपतिष्ठते॥ मैवं मंस्थाः सचित्तोयमेषोपि हि यथा वयम्। एत
द्ध्यस्य कापेयं यदर्कमुपतिष्ठति। अपर आह। उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वक्तव्यम्।
देवपूजासंगतकरणयोरुदाहृतम्। मित्रकरणे। रथिकानुपतिष्ठते॥ अश्वारोहानुपतिष्ठते। पथिषु। अयं प-
न्थाः स्रुघ्नमुपतिष्ठते। अयं पन्थाः साकेतमुपतिष्ठते। वा लिप्सायाम्। वा लिप्सायामिति वक्तव्यम्। भिक्षुको
ब्राह्मणकुलमुपतिष्ठते। भिक्षुको ब्राह्मणकुलमुपतिष्ठति। उपान्मन्त्रक॥ ॥उद्विभ्यां तपः॥ ॥अकर्मकादित्येव।
उत्तपति सुवर्णं सुवर्णकारः॥ स्वाङ्गकर्मकाच्च॥ स्वाङ्गकर्मकाच्चेति वक्तव्यम्। उत्तपते पाणी वितपते पाणी। उत्तपते पृष्ठं वितपते पृष्ठम्॥

पर आहेति। संगतकरणमुपश्लेषमात्रं मित्रकरणं त्वनुपश्लिष्टस्यापि मैत्रीसंबन्धः। अयं पन्थाः स्रुघ्नमुपतिष्ठत इति। स्रुघ्नं- रामः
प्राप्नोतीत्यर्थः। भिक्षुक इति। लिप्सया हेतुभूतया ब्राह्मणकुलमुपगच्छतीत्यर्थः॥ ॥उद्विभ्याम्॥ भासने वर्तमानस्तपिरद्विपू- २५८
र्वोऽकर्मकः। स्वाङ्गमिहेतरत्र च पूर्वसूत्रवत्स्वमङ्गं गृह्यत इतीह न भवति। देवदत्तो यज्ञदत्तस्य पाणिमुत्तपतीति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain: Digitization by eGangotri

अथेति। किमयं विधिरथ नियम इत्यभिप्रायेण प्रश्नः। उद्विभ्यां तप आत्मनेपदमेव न यगादीति नियमोऽनेन क्रियत इत्याह। निष्पद्यत इति। विधिनियमसंभवे विधिरेव ज्यायानिति मत्वाह। किं पुनरिति। विधिर्न संभवतीति मत्वाह। तपिरिति। भास्ते दीप्यत इत्यत्रार्थेऽकर्मक इत्यर्थः। अकर्मकाश्चेति। अनेकार्थत्वाद्धातूनामन्तर्भावितण्यर्थत्वाद्वेति भावः। ततश्च तापने वर्तमानस्तपिः सकर्मकः। पुनः प्रयोजकव्यापाराविवक्षायां कर्तुः कर्मवद्भावात्सिद्धमात्मनेपदमिति पुनर्विधानं नियमार्थं संपद्यत इत्यन्यत्राप्यात्मनेपदं भवत्येव। इदानीं विधिपक्षं वाऽऽह। अन्तरेणापीति। तदेवं ज्वलनवृत्तिस्तपिरकर्मकः। संतापने विलापने च सकर्मकः।—

अथो द्विभ्यामित्यत्र किं प्रत्युदाह्रियते। निष्टप्यते इति। किं पुनः कारणमात्मनेपदमेवोदाह्रियते न पुनः परस्मैपदं प्रत्युदाहार्यं स्यात्। तपिरयमकर्मकः। अकर्मकाश्चापि सोपसर्गाः सकर्मका भवन्ति। न चान्तरेण कर्मकर्तारं सकर्मका अकर्मका भवन्ति। यदुच्यते न चान्तरेण कर्मकर्तारं सकर्मका अकर्मका भवन्तीति। अन्तरेणापि कर्मकर्तारं सकर्मका अकर्मका भवन्ति। तद्यथा। नदी वहतीत्यकर्मकः। भारं वहतीति सकर्मकः। तस्मान्निष्टपतीति प्रत्युदाहार्यम्। उद्विभ्याम्॥ आङो यमहनः॥ अकर्मकादित्येव। आयच्छति रज्जुं कूपात्। आहन्ति वृषलं पादेन॥ स्वाङ्गकर्मकाच्च॥ स्वाङ्गकर्मकाच्चेति वक्तव्यम्। आयच्छते पाणी। आहते उदरमिति। आङो यमहनः॥ ॥समो गम्यृच्छिभ्याम्॥ ॥समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानम्॥ समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानं कर्तव्यम्। संवित्ते। संपृच्छते। संस्वरते॥ अर्तिश्रुदृशिभ्यश्च। अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम्। मा समृत। मा समृषाताम्। मा समृषत। अर्ति। श्रु। संशृणुते। दृशि। संपश्यते॥ उपसर्गादस्यत्यूह्योर्वा वचनम्। उपसर्गादस्यत्यूह्योर्वेति वक्तव्यम्। निरस्यति। निरस्यते। समूहति। समूहते॥ आङ उद्गमने॥ ॥ज्योतिषामुद्गमने॥ ज्योतिरुद्गमने इति वक्तव्यम्। इह मा भूत्। आक्रामति धूमो हर्म्यतलादिति॥

कर्मकर्तरि तु यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थीति वचनेन यक्चिणौ प्रतिषिद्धौ॥ ॥समः॥ ॥समो गम्यृच्छिभ्यामित्येतावत्सूत्रमिति वार्तिकमारब्धम्। उपसर्गादिति। अत्राकर्मकादिति न संबध्यते॥ आङः॥ ॥ज्योतिषामिति। उद्गमने वर्तमानोऽकर्मकः क्रमिः। इह तु नभः समाक्रामतीति न भवत्यात्मनेपदम्। अत्र हि क्रमिर्व्याप्तौ वर्तते न तूद्गमने॥ १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्यक्तवाचाम्॥ ॥सर्वएवेति। येवदन्त्यर्थस्य कर्तारः वदव्यक्तायां वाचीति पाठादिति भावः। अथवेति। विनापि प्रकर्षगत्या व्यधिकरणपद बहुव्रीह्याश्रयणान्मनुष्या एव गृह्यन्ते। व्यक्ता वाचीति। वाचि अकारादयो वर्णा येषां व्यक्तास्तेषामित्यर्थः। शुकसारिकादीनां न सर्ववर्णविषयं स्वाभाविकं व्यक्तवाक्त्वमपि तु पुरुषप्रयत्नवशेन कतिपयवर्णविषयमिति तत्रात्मनेपदाभावः॥ ॥अवाद्गः॥ न चावपूर्वस्येति। नियतविषयत्वात्केषांचित्क्रियाविशेषणानाम्। यथोर्यादयः कृभ्वस्तिविषया एवेति भावः॥ समः॥ धातोस्तृतीयायोगासंभवात्तदर्थेन योगे भाव्यमात्मनेपदेन। स च सर्वत्र चरत्यर्थे संभवतीत्यभिप्रायेणाह तृतीयायुक्तादिति किमर्थमिति। सर्व

व्यक्तवाचां समुच्चारणे॥ व्यक्तवाचामिति किमर्थम्। वरतनु संप्रवदन्ति कुक्कुटाः। व्यक्तवाचामित्युच्यमाने प्यत्र प्राप्नोति। एतेपि हि व्यक्तवाचः। आतश्च व्यक्तवाचः। कुक्कुटेनोदिते उच्यते कुक्कुटो वदतीति। एवं तर्हि व्यक्तवाचामित्युच्यते सर्व एव हि व्यक्तवाचस्तत्र प्रकर्षगतिर्विज्ञास्यते। साधीयो ये व्यक्तवाच इति। के च साधीयः।

येषां वाचि अकारादयो वर्णाः व्यज्यन्ते। न चैतेषां वाचि अकारादयो वर्णा व्यज्यन्ते· एतेषामपि वाचि अकारादयो वर्णा व्यज्यन्ते। आतश्च व्यज्यन्ते। एवं ह्याहुः कुक्कुटाः कुक्कुडिति। नैवं त आहुः। अनुकरणमेतत्तेषाम्। अथवा नैवं विज्ञायते व्यक्ता वाग्येषां त इमे व्यक्तवाच इति। कथं तर्हि व्यक्तायां वाचि वर्णा येषां त इमे व्यक्तवाच इति। व्यक्तवाचां समुच्चारणे॥ ॥अवाद्गः॥ अवाद्गो गिरतेः॥ अवाद्ग इत्यत्र गिरतेरिति वक्तव्यम्। गृणातेर्माभूत्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। प्रयोगाभावात्। अवाद्ग इत्युच्यते न चावपूर्वस्य गृणातेः प्रयोगोस्ति। अवाद्गः॥ समस्तृतीयायुक्तात्॥ ॥तृतीयायुक्तादिति किमर्थम्। उभौ लोकौ संचरसि इमं चामुं च देवल। तृतीयायुक्तादित्युच्यमाने प्यत्र प्राप्नोति। अत्रापि तृतीयया योग इति। एवं तर्हि तृतीयायुक्तादित्युच्यते। सर्वत्र च तृतीयया योगः। तत्र प्रकर्षगतिर्विज्ञास्यते। साधीयो यत्र तृतीयायोग इति। क्व च साधीयः। यत्र तृतीया श्रूयते समस्तृ॥ ॥

त्रेति। केचित्सर्वक्रियापेक्षमेतदुक्तमिति मन्यन्ते। यथा असिना छिनत्ति असिस्तैक्ष्ण्येन छिनत्ति तैक्ष्ण्यमात्मना छिनत्तीति। यत्रापि करणाभिधायि पदं न श्रूयते तत्रापि केनचित्करणेन भाव्यमन्तत एकस्यैव पदार्थस्य भेदविवक्षायामात्माकरणम्। अन्ये तु चरतिक्रियापेक्षमेवमुक्तमित्याहुः। नहि संचरणं करणेन विना संभवति। यत्रेति। तत्र ह्यन्तरङ्गा करणप्रतीतिः। अन्यत्र तु करणस्य परिकल्प्यत्वाद्बहिरङ्गा॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दाणश्च॥ ॥अशिष्टव्यवहार इति। अशिष्टानां संकीर्णाचाराणां यो व्यवहारस्तस्मिन्नित्यर्थः। तत्र चेच्छब्दं चार्थे व्याचक्षाणा अनेनैवोभयं संगृहीतमित्याहुः। सह युक्त इति। दास्यै विश्राण्य। तया सह उपभुङ्क्ते इत्ययं वाक्यार्थः। उपाद्यमः॥ ॥स्वस्य स्वत्वेन स्थितस्याग्रहणादिकं करणं स्वकरणं गृह्यते इति मत्वा प्रश्नः। इहेति। अस्वमिति। अन्तरङ्गत्वान्निष्पादनलक्षणोऽत्र करोत्यर्थो गृह्यते। नातद्इति। चेविकल्पेन विधानादिति केचिदाहुः। प्रकृतेरविवक्षितत्वात्कार्यमात्रविवक्षायां नास्ति सिद्धिरित्यपरे॥ ॥नानोर्ज्ञः॥ ॥औषधस्येति।

दाणश्च सा चेच्चतुर्थ्यर्थे॥ ॥सा चेत्तृतीया चतुर्थ्यर्थे इत्युच्यते। कथं नाम तृतीया चतुर्थ्यर्थे स्यात्। एवं तर्ह्यशिष्टव्यवहारे तृतीयानेन च विधीयते आत्मनेपदं च। दास्याः संप्रयच्छते वृषल्याः संप्रयच्छते। यः शिष्टव्यवहारः ब्राह्मणीभ्यः संप्रयच्छतीत्येवं तत्र भवितव्यम्। यद्येवं नार्थोऽनेन। केनेदानीं तृतीया भविष्यत्यात्मनेपदं च। सह युक्ते तृतीया स्यात् व्यतिहारे तङो विधिः। सह युक्तेऽप्रधान इत्येवं तृतीया भविष्यति कर्तरि कर्मव्यतिहार इत्यात्मनेपदम्। दाणश्च॥ उपाद्यमः स्वकरणे॥ ॥इह कस्मान्न भवति। स्वं शाटकान्तमुपयच्छतीति। अस्वं यदा स्वं करोति तदा भवितव्यम्। यद्येवं स्वीकरण इति प्राप्नोति। विचित्रास्तद्धितवृत्तयः। नातस्तद्धित उत्पद्यते। उपाद्यमः स्वकरणे॥

॥नानोर्ज्ञः॥ अनोर्ज्ञः प्रतिषेधे सकर्मकवचनम्॥ अनोर्ज्ञः प्रतिषेधे सकर्मकग्रहणं कर्तव्यम्। इह मा भूत्। औषधस्यानुजिज्ञासत इति। न वाऽकर्मकस्योत्तरेण विधानात्॥ न वा कर्तव्यम्। किं कारणम्। अकर्मकस्योत्तरेण विधानात्। अकर्मकाज्ज्ञानातेरुत्तरेण योगेनात्मनेपदं विधीयते पूर्ववत्सन इति। प्रतिषेधः पूर्वस्य चापूर्वस्य चायं प्रतिषेधः। स च सकर्मकार्थ आरम्भः। कथं पुनर्ज्ञायते पूर्वस्यायं प्रतिषेध इति। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। कथं पुनर्ज्ञायते सकर्मकार्थ आरम्भ इति। अकर्मकाज्ज्ञानातेः सन आत्मनेपदवचने प्रयोजनं नास्तीति कृत्वा सकर्मकार्थो विज्ञायते। नानोर्ज्ञः॥ ॥शदेः शितः॥ ॥शदेः शितः परस्मैपदाश्रयत्वादात्मनेपदाभावः। शदेः शितः परस्मैपदाश्रयत्वादात्मनेपदस्याभावः। शीयते शीयेते शीयन्ते॥

औषधेन प्रवर्तितुमिच्छतीत्यर्थः। न वेति। पूर्वेण सकर्मकाज्ज्ञानातेः सन्नन्तादात्मनेपदं विधीयते। अकर्मकात्तु परत्वात्पूर्ववत्सन इत्यनेन॥ ॥शदेः शितः॥ ॥शदेरिति। शिद्धिकरणे सत्तेः पूर्वमात्मनेपदनिमित्ताभावाच्छेषत्वात्परस्मैपदेन भाव्यम्। तत्र कृते शित्प्रत्ययेनानेन विहितं परस्मैपदं निवर्तयितुं शक्यत इत्यप्रतिपादकत्वलक्षणमप्रामाण्यमस्य सूत्रस्य प्राप्तम्॥

भा·कै
२५०

किं च भो इति। सार्वधातुकसंशब्दनेन शितो विधानं न परस्मैपदसंशब्दनेन। न खल्विति। सामर्थ्यादिति भावः। कः पुनरिति। समस्तमेवात्मनेपदप्रकरणं महावाक्यं नियमार्थम्। तत्र नियमेन लादेशेषु कृतेषु शिति विकरणे कृते नियमोऽयं प्रवर्तते। शदेः शित एव न तु शत्स्यतीत्यादाविति भावः। एवमपीति। यद्यपि तात्पर्यपर्यालोचनेन प्रकरणस्य नियमार्थत्वं तथाप्येकैकसूत्रार्थपर्यालोचनकालेऽवान्तरव्यापारसंभवाद्विध्यर्थतासंभवत्येव। अनारम्भे शेषपक्षे निक्षेपादारम्भे तत उद्धारात्। लङादीनामिति। आ १.३.१२

किं च भोः शदेः शित्परस्मैपदेष्वित्युच्यते। न खलु परस्मैपदेष्वित्युच्यते परस्मैपदेषु तु विज्ञायते। कथम्। अनुदात्तङित आत्मनेपदं भावकर्मणोरात्मनेपदमित्येतौ द्वौ योगावुक्त्वा शेषात्कर्तरि परस्मैपदमित्युच्यते। एवं च न परस्मैपदे घूच्यते परस्मैपदेषु विज्ञायते। कः पुनरर्हत्येतौ योगावुक्त्वा शेषात्कर्तरि परस्मैपदं वक्तुम्। किं तर्हि अविशेषेण सर्वमात्मनेपदप्रकरणमनुक्रम्य शेषात्कर्तरि परस्मैपदमित्युच्यते। एवमपि परस्मैपदाश्रयो भवति। कथम्। इदं तावदयं प्रष्टव्यः यदीदं नोच्येत किमिह स्यादिति। परस्मैपदमित्याह। परस्मैपदमिति चेत्परस्मैपदाश्रयोऽयं भवति। सिद्धं तु लङादीनामात्मनेपदवचनात्। सिद्धमेतत्। कथम्। शदेर्लङादीनामात्मनेपदं भवतीति वक्तव्यम्। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं शदेः शितः परस्मैपदाश्रयत्वादात्मनेपदाभाव इति। नैष दोषः। शित इति नैषा पञ्चमी। का तर्हि। संबन्धे षष्ठी। शितो यः शदिः। कश्च शितः शदिः। प्रकृतिः। शदेः शित्प्रकृतेरिति। अथवा हायं शदेः शित इति। न च शदिः शिदस्ति। त एवं विज्ञास्यामः शदेः शिद्विषयादिति। अथवा यद्यपि तावदेतदन्यत्र भवति विकरणेभ्यो नियमो बलीयानिति। इहैतन्नास्ति। विकरणो हीहाश्रीयते शित इति। उपसर्गपूर्वनियमेऽड्व्यवाय उपसंख्यानम्। उपसर्गपूर्वनियमेऽड्व्यवाय उपसंख्यानं कर्तव्यम्।

दिशब्दः प्रकारे येषु शिता भाव्यन्ते लङादयः शित्प्रकृतेरिति। योग्यतया शित्प्रकृतित्वमाश्रित्य प्रागेव शिदुत्पत्तेरात्मनेपदं विधीयते। शिद्विषयादिति। शिद्विषयत्वाच्छदिरेव शिच्छब्देनाभिधीयते। अथवेति। प्रकरणं नियमार्थम्। तत्र नियमात्पूर्वमात्मनेपदपरस्मैपदान्यनियमेन प्रवृत्तानि तत्रैतत्सूत्रारम्भसामर्थ्यात्पूर्वं विकरणः प्रवर्तते पश्चाच्छितस्तद्वशादेवात्मनेपदमिति नियमः। ॥

राम:
२५०

CC-0. In Public Domain. Digitization by eGangotri

न्यविप्लुतेति।ननुविकरणेभ्योनियमोबलीयानितिप्रागेवविकरणोत्पत्तेर्नियमेनभाव्यंततोनित्यत्वात्पूर्वंविकरणाःततोऽडागमइतिकिं
वार्तिकेन।उच्यते।एतदनाश्रित्यैतदुक्तम्।शब्दान्तरस्येति।विकरणास्तुशब्दान्तरादपिप्राप्नुवन्तोनानित्याः।कृतेप्यटीति।धातु
भक्तत्वादटस्तद्ग्रहणेनग्रहणाद्व्यवधानाभावात्।अडागमस्त्वनित्यः।सहिलादेशेषुकृतेषुविकरणेनिसत्तात्प्रतिबध्यते।वि
करणेषुकृतेषुशब्दान्तरप्राप्त्याअनित्यः।नित्यनिमित्तत्वादिति।कृतेपिलादेशेस्थानिवद्भावाच्छुडादिव्यपदेशोऽस्तीतिप्रद
र्शनार्थंनिमित्तग्रहणमुपात्तम्।यद्यपिलादेशेकृतेविकरणेननित्यत्वादड् बाध्यतेतथापियस्यचलक्षणान्तरेणनिमित्तं

न्यविप्लुतव्यक्रीणीत।किंपुनःकारणंनसिद्ध्यति।अटाव्यवहितत्वात्।ननुचायमड्धातुभक्तोधातुग्रहणेनग्र
हीष्यते।नसिद्ध्यति।अङ्गस्यह्यड्उच्यतेविकरणान्तंचाङ्गं।सोऽसौसंघातभक्तोनशक्योधातुग्रहणेनग्रहीतुम्।एवं
तर्हीदमिहसंप्रधार्यमट्क्रियतांविकरणइति।किमत्रकर्तव्यम्।परत्वादडागमः।नित्याविकरणाः।कृतेप्यटिप्रा
प्नुवन्त्यकृतेपि।अडपिनित्यः।कृतेष्वपिविकरणेषुप्राप्नोत्यकृतेष्वपिप्राप्नोति।अनित्योऽट्।अन्यस्यकृतेषुविकर
णेषुप्राप्नोत्यन्यस्याकृतेषु।शब्दान्तरस्यचप्राप्नुवन्विधिरनित्योभवति।एवंतर्हीदमिहसंप्रधार्यम्।अट्क्रि
यतांलादेशइति।किमत्रकर्तव्यम्।परत्वादडागमः।नित्योलादेशः।कृतेप्यटिप्राप्नोत्यकृतेपिप्राप्नोति।नित्य
त्वाल्लादेशःस्यात्मनेपदएवाडागमोभविष्यति।नित्यत्वाल्लादेशस्यात्मनेपदेऽडागमइतिचेदटोनित्य
निमित्तत्वादात्मनेपदाभावः।नित्यत्वाल्लादेशस्यात्मनेपदेऽडागमइतिचेदेवमुच्यतेअडपिनित्यनिमित्तः
कृतेपिलादेशेप्राप्नोत्यकृतेपिप्राप्नोति।अटोनित्यनिमित्तत्वादात्मनेपदस्याभावः।तस्मादुपसंख्यान
म्।तस्मादुपसंख्यानंकर्तव्यम्।अन्तरङ्गस्तर्हिलादेशः।

विहन्यतेननतदनित्यम्।तत्रोभयोर्नित्ययोःपरत्वादट्प्राप्नोति।ननुभवतुपरत्वादडागमःतस्यतुधातुभक्तत्वादव्यवधा
यकत्वात्सिद्ध्यत्यात्मनेपदम्।नैषदोषः।तत्रह्यन्तरङ्गत्वाल्लादेशेषुकृतेषुनियमात्पूर्वंनित्यत्वाद्विकरणेषुकृतेषुअडाग
मोविकरणान्तभक्तत्वाद्धातोर्व्यवधायकइतिन्यादिभ्यःपरेविप्र्यादयोनिरन्तरानसंभवन्तीत्यात्मनेपदाप्रसङ्गइत्येवं-
भाष्येचोद्यंव्यवस्थाप्यते।अन्तरङ्गस्तर्हीति।लकारमात्रापेक्षत्वात्।अडागमस्तुलकारविशेषापेक्षत्वाद्बहिरङ्गः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ २५१ नैतदिति। नलादेशेन सह संप्रधारणा किंतु नियमेन सहेति भावः। तत्तु न लभ्यमिति। ननु पूर्वमेव ज्ञापकादिकरणेभ्यो नियमस्य बलीयस्त्वं प्रतिपादितं तत्किमुच्यते तत्तु न लभ्यमिति। उच्यते। अन्यथापि तज्ज्ञापकं समर्थयितुं शक्यते। कृतेऽपि विकरणे नव्यवधायक इति। यद्येवं नित्य एव नियमः। नैतदस्ति। यत्र केवलो विकरणो व्यवधायकस्तत्र भवतु नित्यो नियमः यथा निवेक्ष्यते निविशत इति। यत्र तु विकरणे कृतेऽडागमस्तत्राटो व्यवधायकत्वान्नियमो न प्राप्नोति। तरतदिति। अत्र पूर्वमित्वे सति रूपं न सिद्ध्यति। आ- १।३।२

नैतद्विवदामहेऽन्तरङ्गो नान्तरङ्ग इति। अस्त्वयं नित्यश्चान्तरङ्गश्च। तत्र खलु लादेशे कृते त्रीणि कार्याणि युगपत्प्राप्नुवन्ति। विकरणाः अडागमः नियम इति। तद्यदि सर्वतो नियमो लभ्येत कृतं स्यात्तत्तु न लभ्यम्। अथापि विकरणात्पूर्वमडिति अड् लभ्येत एवमपि कृतं स्यात्। तत्तु न लभ्यम्। किं कारणम्। आङ्गात्पूर्वं विकरणा एषितव्यास्तरतस्तरन्तीत्येवमर्थम्। अडाड्भ्यामप्यन्यदाङ्गं पूर्वमेषितव्यमुपार्च्छदित्येवमर्थम्। तत्र स्याट्टिकृते साट्कस्य ऋच्छिभावः प्राप्नोति। ननु च ऋच्छिभावे कृते शब्दान्तरस्य कृत आडिति कृत्वा पुनराड् भविष्यति। पुनर्ऋच्छिभावः पुनराडिति चक्रकमव्यवस्था प्राप्नोति। नैष दोषः। यत्तावदुच्यते। आङ्गात्पूर्वं विकरणा एषितव्याः तरतः तरन्तीत्येवमर्थमिति। भवेत्सिद्धं यत्र विकरणा नित्या आङ्गमनित्यं तत्राङ्गात्पूर्वं विकरणाः स्युः। यत्र तु खलूभयं नित्यं परत्वात्तत्राङ्गं तावद्भवति। यदप्युच्यते अडाड्भ्यामप्यन्यदाङ्गं पूर्वमेषितव्यमुपार्च्छदित्येवमर्थमिति। अस्त्वत्राट् आटि कृते साट्कस्य ऋच्छिभावः। ऋच्छिभावे कृते शब्दान्तरस्य कृत आडिति कृत्वा पुनराड् भविष्यति।

टिकृत इति। आटश्चेति वृद्धिरेकादेशः प्राप्नोति ऋच्छिभावश्च। तत्र वर्णमात्राश्रयत्वादेकादेशोऽन्तरङ्गः। नानाश्रयत्वाद्वार्णादाङ्गं बलीय इति नास्ति। ततश्चैकादेशे कृते तस्यादिवद्भावादृच्छिभावः प्राप्नोति। ततश्च च्छदिति स्यान्न त्वार्च्छदिति। रामः

ननु चेति। वस्तवस्त्वकृत्या कार्यमिह शास्त्रे संभवतीति भावः। यत्तावदिति। तरत इत्यत्र नित्यमित्वं विकरणास्तु नित्या इति स एव प्रवर्तते। यत्र त्विति। यथा तरतीति। अस्त्वत्राडिति। परत्वादृच्छिना भाव्यम्। अभ्युपगम्यवादेन त्वेतदुच्यते। २५१

चक्रके स्थितिः। व्यवस्थाकारिणा शास्त्रेणाभाव्यमित्यव्यवस्थाहेतुः पुनः प्रवृत्तिर्न भविष्यतीत्यर्थः। तदेवं स्थितमेतदन्तरङ्गत्वात्त्वादेशेषु कृतेषु परत्वादडागमः। न चायं नियमः। शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति न तु शब्दान्तरादिति। यतोऽडागमस्यानित्यत्वं स्याद् विकरणस्यानित्यत्वम्। कृताकृतप्रसङ्गित्वात्तु द्वयोरपि नित्यत्वम्। अङ्गत्वाकृत्यान्वयणाद्धा नास्ति शब्दान्तरप्राप्तिरटः। नेर्यो विशिरिति व्यवहितस्याप्यर्थद्वारेण विशेष्यत्वात्संबन्धी भवतीत्यर्थः। अथवेति। नेर्विशाद् इत्यस्यायमर्थः। निशब्दात्परमात्मनेपदान्तं विश्यवयवपदं साधु भवतीति सत्यप्यडागमे नेः पदमनन्तरमेवेति दोषाभावः। विशिरपीति। विशिशब्देन विश्यवयवः समुदाय उपचारादभिधीयते। पदविधिश्चेति। न्यायप्राप्तार्थानुवादोयं न त्वेतत्प्रकृत उपयुज्यत इत्याहुः॥ ॥पूर्ववत्सनः॥ ॥पूर्वशब्दः संबन्धिशब्दत्वादवधिमपेक्षते तत्र कोऽत्रावधिरभिप्रेत इति पृच्छति किमिदमिति। येभ्य इति। योगस्थेभ्यो धातुभ्यो विधानाद् योगेभ्यो विहितमित्युच्य

ननु चोक्तं पुनर्ऋच्छिभावः पुनराडिति चक्रकमव्यवस्था प्राप्नोतीति। नैष दोषः। चक्रके स्थिते व्यवस्था। अथवा नेरिति नैषा पञ्चमी का तर्हि विशेषणषष्ठी नेर्यो विशिः कस्य नेर्विशिः विशेष्यः। व्यवहितस्यापि शक्यते विशेषयितुम्। अथवा निरपि पदं विशिरपि पदम्। पदविधिश्च समर्थानाम्। व्यवहितेपि सामर्थ्यं भवति। शदेः शितः॥ ॥पूर्ववत्सनः॥ किमिदं पूर्वग्रहणं सनपेक्षं प्राक् सनो येभ्य आत्मनेपदमुक्तं तेभ्यः सन्नन्तेभ्योपि भवतीति। आहोस्विद् योगापेक्षम्। प्रागेतस्माद्योगाद्येभ्यो योगेभ्य आत्मनेपदमुक्तं तेभ्यः सन्नन्तेभ्योपि भवतीति। किं चातः। यदि सनपेक्षं निमित्तमविशेषितं भवति पूर्ववत्सनः न ज्ञायते किमन्ताद् भवितव्यमिति। अथ योगापेक्षमुत्तरत्र विधिर्न प्रकल्पेत बुभुक्षते उपयुयुक्षत इति। यथेच्छसि तथास्तु। अस्तु तावत्सनपेक्षम्। ननु चोक्तं निमित्तमविशेषितं भवतीति।

तापक्षद्वयेपि तेन तुल्यमिति तृतीयान्ताद्वतिः न तु पञ्चम्यन्तात्। लक्षणाभावात्। तुल्यार्थैरिति विहितात्तृतीया सर्वविभक्त्यर्थो नन्त्वभीवयतीति पञ्चम्यर्थस्यात्र ग्रहणमुपपन्नमेव। यथा ब्राह्मणवद्वैश्यादधीत इति ब्राह्मणादिव वैश्यादधीत इत्यर्थः॥ वैश्यस्यापादानकस्याध्ययनस्य ब्राह्मणापादानकमध्ययनमुपमानम्। तत्र च ब्राह्मणशब्दो वर्तते। तेन ब्राह्मणेन तुल्यं वैश्यादधीत इति तृतीयान्ताद्वतिरेवमिहापि पूर्ववदिति द्रष्टव्यम्। किमन्तादिति। ततश्चाप्रतिपत्तिः स्यात्। यदि नामात्मनेपदनियमविधानसामर्थ्यादनेन सर्वधातुभ्य आत्मनेपदं भवतीत्येतल्लभ्येत विषयविभागस्तु न ज्ञायेत इति भावः। ॥

CC-0. In Public Domain. Digitization by eGangotri

सनमेवेति। प्रत्यासत्त्येतिभावः। उत्तरत्रापीति। उत्तरेष्वपि योगेषु वाक्यभेदेन पूर्ववत्सनइत्येतत्संबध्यते। प्रोपाभ्यां युजेरात्मनेपदं –
भवति। ततः पूर्ववत्सनइति। किमर्थमिति। विधिनिषेधोभयपक्षसंभवादारम्भः। यथापूर्वयोरिति। नानोर्ज्ञः प्रत्याङ्भ्यां श्रुवइत्ये –
निमित्तं च विशेषितम्। कथम्। सनमेवात्र निमित्तत्वेनापेक्षिष्यामहे। पूर्ववत्सन आत्मनेपदं भवति। कुतः। सनइ
ति। अथवा पुनरस्तु योगापेक्षम्। ननु चोक्तमुत्तरत्र विधिर्न प्रकल्प्येतेति। विधिश्च प्रक्लृप्तः। कथम्। उत्तरत्रापि
पूर्ववत्सनइत्येवानुवर्तिष्यते। किमर्थं पुनरिदमुच्यते पूर्ववत्सनइति। शदिम्रियत्यर्थम्। शदिम्रियत्यर्थो
ऽयमारम्भः। शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं माभूदिति। इतरथा हि ताभ्यां सन्नन्ताभ्यामात्मने
पदप्रतिषेधः। इतरथा हि अनुच्यमानेऽस्मिन् शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदस्य प्रतिषेधो वक्तव्यः स्यात्।
शिशत्सति। मुमूर्षति। कथं पुनः पूर्ववत्सनइत्यनेन शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदस्य प्रतिषेधः शक्यो
विज्ञातुम्। वतिनिर्देशोऽयम्। कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम्। तद्यथा। उशीनरवन्मद्रेषु यवाः
सन्ति न सन्तीति। मातृवदस्याः कलाः सन्ति न सन्तीति। एवमिहापि पूर्ववद्भवति न भवतीति। न भवतीत्येवं वाक्य
शेषं समर्थयिष्यामहे। यथापूर्वयोर्योगयोः सन्नन्ताभ्यामात्मनेपदं न भवति। एवमिहापि शदिम्रियतिभ्यां स
न्नन्ताभ्यामात्मनेपदं न भवतीति। यदि तर्हि शदिम्रियत्यर्थोऽयमारम्भः विधिर्न प्रकल्प्यते। आशिशिषते। शिशयि
षते। अथ विध्यर्थः। शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं प्राप्नोति। यथेच्छसि तथास्तु। अस्तु तावत्प्रतिषे
धार्थः। ननु चोक्तं विधिर्न प्रकल्प्यत इति। विधिश्च प्रक्लृप्तः। कथम्। एतदेव ज्ञापयति सन्नन्तादात्मनेपदं भव
तीति। यदयं शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदस्य प्रतिषेधं शास्ति। अथवा पुनरस्तु विध्यर्थः। ननु चोक्तं
शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं प्राप्नोतीति। नैष दोषः। प्रकृतं सनो नेत्यनुवर्तिष्यते। क प्रकृतम्। ज्ञाश्रुस्मृदृशां
सनः। नानोर्ज्ञः। सकर्मकात्सनो न भवति। प्रत्याङ्भ्यां श्रुवः सनो न। शदेः शितः। सनो न। म्रियतेर्लुङ्लिङोश्च। सनो नेति। इह
इदानीं पूर्ववत्सनइति सनइत्यनुवर्तते नेति निवृत्तम्। एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं निमित्तमविशेषितं भवतीति।

तयोः। इह च शदिम्रियती अनुवर्तेते इति भावः। यथेच्छसीति। निषेधपक्षेऽपि निषेधादेव सन्नन्तात्पूर्ववद्विधिरनुमीयते। वि
धिपक्षे शदिम्रियत्योः सनो नेत्यनुवृत्त्या न भविष्यति। एवं च कृत्वेति। द्वितीयसनूग्रहणस्येहानुवृत्त्येतिभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न च शदेरेवेति। सामग्र्याः कारणत्वं न केवलस्य शदेः। सा चेह सामग्री नास्ति। सनः पूर्वस्य शदेः शितोऽभावात्। अथापीति। शिता विशे
ष्यमाणत्वाच्छदेरेव प्राधान्यात्। यत्र तर्हीति। म्रियतेर्ङित्त्वात् पूर्ववत्सनन्त इति सन्नन्तात्प्राप्नोत्येवेति भावः। अत्रापीति। म्रियतेर्लुङ्लि
ङोश्चेति नियमार्थमारब्धमिति भावः। किं पुनरिति। किमयं कार्यातिदेशः। यथा पूर्वस्मादात्मनेपदं विधीयते तथा सन्नन्तादपीति। आहो
स्विन्निमित्तातिदेशः पूर्वस्य यन्निमित्तं ङित्त्वादि तत्सन्नन्तस्यातिदिश्यते। निमित्ते चातिदिष्टे तत्प्रयुक्तत्वादेव कार्यं भवतीति प्रश्नः। न

नैष वा पुनरत्र शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं प्राप्नोति। किं कारणम्। शदेः शितः इत्युच्यते। न च शदिरेवात्मने
पदस्य निमित्तम्। किं तर्हि शिदपि निमित्तम्। अथापि शदिरेव। शित्परस्तु निमित्तम्। न चायं सन्परः शित्परो भवति। यत्र त
र्हि शिन्नाश्रीयते म्रियतेर्लुङ्लिङोश्चेति। अत्रापि न म्रियतिरेवात्मनेपदस्य निमित्तं किं तर्हि लुङ्लिङावपि निमित्तम्।
अथापि म्रियतिरेव लुङ्लिङ्परस्तु निमित्तम्। न चायं सन्परः लुङ्लिङ्परो भवति। किं पुनः पूर्वस्य यदात्मनेपदद
र्शनं तत्सन्नन्तस्यातिदिश्यते। एवं भवितुमर्हति। पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदभाव इति चेज्जुगुपा
दिषु प्रसिद्धिः॥ पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदं भवतीति चेज्जुगुपादिषु प्रसिद्धिः। गुपादीनां न प्राप्नो
ति। जुगुप्सते मीमांसत इति। न ह्येतेभ्यः प्राक्सन आत्मनेपदं नापि परस्मैपदं पश्यामः। सिद्धं तु पूर्वस्य लिङ्गातिदेशा
त्। सिद्धमेतत्। कथम्। पूर्वस्य यदात्मनेपदलिङ्गं तत्सन्नन्तस्यातिदिश्यते। ज्ञादिषु तु लिङ्गप्रतिषेधः। ज्ञा
दिषु तु लिङ्गस्य प्रतिषेधो वक्तव्यः। अनुचिकीर्षति पराचिकीर्षतीति। अस्तु तर्हि प्राक्सनो येभ्य आत्मनेपदं दृष्टं
तेभ्यः सन्नन्तेभ्योऽपि भवतीति। ननु चोक्तं पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदभाव इति चेज्जुगुपादिषु प्रसि
द्धिरिति। नैष दोषः। अनुबन्धकरणसामर्थ्याद्भविष्यति। अथवा अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति।

ष्टं तेभ्य इति। नित्यसन्विषयत्वात्। ज्ञादिष्विति। अनुपराभ्यां कृञ इत्यनेन परस्मैपदमेव विधीयते न तु ङित्त्वं निवर्त्यते। पूर्व-
कार्यत्वातिदिश्यमाने अत्र दोषाभावः। परस्मैपदेनात्मनेपदस्य बाधितत्वात्। पूर्वस्यात्मनेपदकार्यदर्शनात्सन्नन्तस्याप्रस-
ङ्गात्। अनुबन्धेति। तत्सामर्थ्यात्सन्नव्यवधायकः। अथवेति। समुदाये लिङ्गासङ्गस्य उपायोऽवयवे लिङ्गासङ्गः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

 प्रत्ययग्रहणमिति। यद्येवमतिप्रसङ्गः पणायति पनायतीति। तत्र केचिदाहुः। पूर्ववद्‌णिङ्‌यक्सनद्‌ इति प्रत्ययविशेषा एव निर्देष्टव्याः।
अन्ये त्वाहुः। एवं पाठे भाष्यं वार्तिकं च न व्याख्यातं भवतीति हेतुमण्णिचः प्रतिषेध इत्यतिप्रसङ्गविषयोपलक्षणार्थं हेतुमण्णिज्ग्रहणम्॥
॥आम्प्रत्यय॥ ॥कृञ्ग्रहणमिति। कृञ एवानुप्रयोगो विहितो नान्यस्येति भावः। अथेह कस्मादिति। स्वरितञित इत्यनेनेति भावः।
ननु संविधानेऽनेनात्मनेपदं विधीयते यथा च यात्यादयः संविधाने न वर्तन्ते तथोञ्ज्ञादयोऽपि। तदर्थानुपाती च करोतिरप्यत्र विषये

तद्यथा। गोः सक्थनि कर्णे वा कृतं लिङ्गं समुदायस्य विशेषकं भवति। यद्यवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति। जुगुप्सयति मीमांसयतीत्यत्रापि प्राप्नोति। नैष दोषः। अवयवे कृतं लिङ्गं कस्य समुदायस्य विशेषकं भवति यं समुदायं योऽवयवो न व्यभिचरति। सनं च न व्यभिचरति। णिचं च पुनर्व्यभिचरति। तद्यथा। गोः सक्थनि कर्णे वा कृतं लिङ्गं गोरेव विशेषकं भवति न गोमण्डलस्य॥ प्रत्ययग्रहणं णियगर्थम्॥ प्रत्ययग्रहणं कर्तव्यम्। पूर्ववत्सन्यादिति वक्तव्यम्। किं प्रयोजनम्। णियगर्थम्। णियगन्तादपि यथा स्यादिति। आकुस्मयते। विकुस्मयते। हृणीयते महीयते इति। तत्र को दोषः। तत्र हेतुमण्णिचः प्रतिषेधः। तत्र हेतुमण्णिचः प्रतिषेधो वक्तव्यः। आसयति शाययतीति। सूत्रं च भिद्यते। यथान्यासमेवास्तु। कथमाकुस्मयते विकुस्मयते हृणीयते महीयते इति। अनुबन्धकरणसामर्थ्याद्‌ भविष्यति। अथवा अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति। तद्यथा। गोः सक्थनि कर्णे वा कृतं लिङ्गं समुदायस्य विशेषकं भवति। यद्यवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति हृणीययति महीययतीत्यत्रापि प्राप्नोति। अवयवे कृतं लिङ्गं कस्य समुदायस्य विशेषकं भवति यं समुदायं योऽवयवो न व्यभिचरति। यकं च न व्यभिचरति णिचं तु व्यभिचरति। तद्यथा। गोः सक्थनि कर्णे वा कृतं लिङ्गं गोरेव विशेषकं भवति न गोमण्डलस्य॥ पूर्ववत्सनः॥ आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य॥ कृञ्ग्रहणं किमर्थम्। इह मा भूत्। ईहामासईहामासतुः ईहामासुः। कथं चीत्रास्तेरनुप्रयोगो भवति। प्रत्याहारग्रहणं हि तत्र विज्ञायते। कथं पुनर्विज्ञायते तत्र प्रत्याहारग्रहणमिति। इह कृञ्ग्रहणात्। इह कस्मात्प्रत्याहारग्रहणं न भवति। इहैव कृञ्ग्रहणात्। अथेह कस्मान्न भवति।

संविधाने न वर्तते इत्यात्मनेपदस्याप्रसङ्गः। नैष दोषः। संविधान एवात्र विषये यदोञ्ज्ञादयो वर्तन्ते शब्दशक्तिस्वाभाव्यात्तदर्थाभिव्य
क्तये तदा करोतिः प्रयुज्यमानः संविधानविषय इति मत्वा चोद्यमुपन्यस्तम्। परिहृतं च पूर्ववद्ग्रहणानुवृत्त्या वाक्यभेदेन। तत्रैकेन वा-
क्येन विधिः क्रियते द्वितीयेन नियमः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोपाभ्याम्॥ स्वराद्यन्तोपसृष्टादिति। समूनिसृदुरुद्ध्येतान्निरस्य सर्वे उपसर्गाः संगृहीताः॥ ॥भुजोऽनवने॥ ॥यस्य भुजेरिति। संसर्गवद्धि
प्रयोगोपाधिर्विशेषस्य स्मृतिहेतुः। यथा द्रोग्ध्रीपर्यायो धेनुशब्द उपादीयमानः संसर्गिभिर्विशेषे व्यवस्थाप्यते। सवत्सा धेनुरानीयतां सकिशोरा सस-
करभा सवर्करेति। एवमवत्सा अकिशोरा अकरभा अवर्करेति विशिष्टैव धेनुः प्रतीयते। यस्या येन दृष्टः संसर्गः सैव तद्रहिताऽऽनीयते॥
णेरणौ॥ ॥एकस्मिन्वाक्ये कर्मान्तरनिवृत्तिरलभ्येति णेरिति वार्तिकारम्भः। एकवाक्यतायां ह्ययमर्थः। ण्यन्तादात्मनेपदं भवति अ-
ण्यन्तावस्थायां यत्कर्म ण्यन्तावस्थायां यदि स कर्ता भवत्याध्यानादन्यत्रेति। भवति च कर्मान्तरसद्भावेऽपि णौ कर्म णौ कर्ता। भाष्यका-
रस्तु वाक्यभेदाश्रयेणैतमर्थं साधयति। णेरात्मनेपदं भवतीत्येकं वाक्यम्। ततोऽणौ यत्कर्म णौ चेदिति द्वितीयम्। अत्र वाक्येय

उदुम्भांचकार। उदुब्जांचकार। ननु चाम्प्रत्ययवदित्युच्यते न चात्राम्प्रत्ययादात्मनेपदं पश्यामः। न ब्रूमो नेनेति। किं
तर्हि। स्वरितञितः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवतीति। नैष दोषः। इदं नियमार्थं भविष्यति। आम्प्रत्ययव
देवेति। यदि नियमार्थं विधिर्न प्रकल्पते। ईहांचक्रे ऊहांचक्रे इति। विधिश्च प्रक्लृप्तः। कथम्। पूर्ववदिति वर्तते। आ
म्प्रत्ययवत्पूर्ववच्चेति॥ आम्प्रत्यय॥ प्रोपाभ्यां युजेरयज्ञपात्रेषु॥ स्वराद्युपसृष्टादिति वक्तव्यम्। उद्युङ्क्ते। अनुयु
ङ्क्ते। अपर आह। स्वराद्यन्तोपसृष्टादिति वक्तव्यम्। प्रयुङ्क्ते। विनियुङ्क्ते॥ प्रोपाभ्याम्॥ समः क्ष्णुवः॥ ॥किमर्थं
विदेशस्थस्य ग्रहणं क्रियते न समो गमादि–ष्वित्येवोच्येत। समः क्ष्णुवः सकर्मकार्थं वचनम्। सकर्मकार्थोऽयमारम्भः।
अकर्मकादिति तत्रानुवर्तते॥ समः॥ भुजोऽनवने॥ ॥अनवनकौटिल्ययोरिति वक्तव्यम्। इहापि यथा स्यात्
। प्रभुजति वाससी। निभुजति जानुशिरसी इति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। यस्य भुजेरवनमनवनं चार्थस्तस्य
ग्रहणं न चास्य भुजेरवनमनवनं चार्थः॥ भुजोऽनवने॥ णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने॥ ॥णेरात्मनेपद
विधानेऽण्यन्तस्य कर्मणस्तत्रोपलब्धिः॥

तदोर्नित्यसंबन्धाद्यच्छब्देन तच्छब्द आक्षिप्यते। धर्मान्तरस्य चानिर्देशात्कर्मत्वमेव संनिधानात्प्रतिनिर्दिश्यते। अणौ यत्कर्म
णौ चेत्तत्कर्मेति। प्रतिनिर्देशेन च कर्मान्तरव्यावृत्तिः क्रियते न त्वणौ कर्मणो णौ कर्मत्वसद्भावः प्रतिपाद्यते। स कर्तेति वाक्यान्तरेणात
स्य कर्तृत्वप्रतिपादनाद्युगपदेकक्रियापेक्षया कर्मत्वकर्तृत्वविरोधादेकस्यायथेष्टं वाक्यपूर्वपक्षपरिकल्पनादणौ यत्कर्म णौ चेत्त
देव कर्मेत्येवकाराध्याहारात्कर्मान्तरनिवृत्तिलाभः। ततः स कर्तेति तृतीयं वाक्यमणौ कर्मणो णौ कर्तृत्वप्रतिपादनपरम्। एवमे
षां वाक्यानामेकवाक्यत्वे महावाक्यं लक्ष्यसंस्कारकं संपद्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 यद्येवमिति। यथा लुनाति केदारं देवदत्तः लूयते केदारः स्वयमेवेति केदारः कर्मकर्ता तथा ण्यन्तेऽपि भवति लावयते केदारः स्वयमे
वेति। कथमिति चेत् उच्यते। लुनातिर्लावद्विधाभवनोपसर्जने द्विधाभावने वर्तते। लुनाति केदारं देवदत्तः द्विधाभवन्तं द्विधाभावयती
त्यर्थः। यदा तु केदारस्य सौकर्यातिशयविवक्षायां देवदत्तस्य व्यापारो न विवक्ष्यते तदा द्विधाभवनमात्रे लुनातिर्वर्तते अनेका-
र्थत्वाद्धातूनाम्। भिन्नाश्च वा धातवो भिन्नार्थाः सारूप्यात्तु तत्त्वाध्यवसायः। तत्र द्विधाभवने केदारस्य कर्तुः कर्मवत्कर्मणा —
तुल्यक्रियः इति कर्मकार्याण्यतिदिश्यन्ते। तेन लूयते केदारः स्वयमेवेत्यादयः प्रयोगा उपपद्यन्ते। अत्रापि स्वयमित्यस्य यदा आ
त्मनेत्यर्थस्तदा आत्मापेक्षया कर्मत्वमस्त्येवेति लूयते केदार इत्येतावदुदाहार्यम्। वृत्तिकाराणां तु स्वयमिति वचनं कर्त्रन्तरव्यु
दासपरं विज्ञेयम्। अथवा स्वयमित्यनेन करणत्वमात्मनः प्रतिपाद्यते न तु कर्तृत्वम्। ततो यदा द्विधाभवनवृत्तेर्लुनातेर्देव
दत्तादिप्रयोजकव्यापारे णिज् उत्पद्यते तदा य एवार्थो लुनाति केदारं देवदत्त इति स एवार्थो लावयति केदारं देवदत्त
इति। पुनः केदारस्य सौकर्यातिशयविवक्षायामविवक्षिते देवदत्तस्य व्यापारे द्विधाभवनमात्रवृत्तिर्लावयतिः संपद्यते। ततश्च

णेरात्मनेपदविधाने ऽण्यन्तस्य यत्कर्म यद्यण्यन्ते तदेव कर्म भवति तदा आत्मनेपदं भवतीति वक्तव्यम्। इत
रथा हि सर्वप्रसङ्गः। इतरथा हि सर्वत्र प्रसङ्गः स्यात्। इहापि प्रसज्येत। आरोहन्ति हस्तिनं हस्तिपकाः आरोह
यमाणो हस्ती स्थलमारोहयति मनुष्यान्। तत्र हि वक्तव्यम्। न वक्तव्यम्। एवं वक्ष्यामि। णेरात्मनेपदं भवति।
ततः अणौ यत्कर्म णौ चेत्। अण्यन्ते यत्कर्म णौ चेत् णौ यदि तदेव कर्म भवति। ततः स कर्ता। कर्ता चेत्स भवति
णाविति। यद्येवं कर्मकर्तायं भवति तत्र कर्मकर्तृत्वात् सिद्धम्।

य एवार्थो लूयते केदारः स्वयमेवेति स एव लावयते केदारः स्वयमेवेति। न च प्रयोज्यप्रयोजकभावनिवृत्तौ णिचो निवृत्तिः। उपाय
निवृत्तावप्युपेया निवर्तनात्। सिद्धशब्दव्युत्पत्तये हि प्रकृतिप्रत्ययविभागकल्पना आश्रीयते। अर्थस्योपादानं त्यागश्च क्रिय
ते। लौकिके तु व्यवहारे सौकर्यमात्रविवक्षायां लावयते केदार इति प्रयुज्यते। एवं तावन्निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजु
च्यते इत्येतत्पक्षाश्रयेण कर्मकर्ता व्याख्यातः। अपरः कल्पः। लुनाति केदारं देवदत्तः। लुनन्तं देवदत्तं सौकर्यातिशयात्केदा
रः प्रयुङ्क्ते इति केदारव्यापारे णिज् उत्पद्यते लावयति केदारो देवदत्तेनेति। पुनः प्रयोज्यप्रयोजकभावाविवक्षायां लावयते के
दारः स्वयमेवेति प्रयुज्यते। तत्र पूर्वप्रक्रियाश्रयेण कर्मवत्कर्मणा तुल्यक्रियः इति सिद्धमात्मनेपदम्। तथा हि। लावयति-
केदारं देवदत्त इत्यत्र यस्मिंल्लावयतौ धातौ यादृशी कर्मावस्थायां केदारस्य द्विधाभवनलक्षणा क्रिया तस्मिन्नेव धातौ
तादृशी कर्त्रवस्थायामिति सिद्धं लावयते केदारः स्वयमेवेति। द्वितीया तु प्रक्रिया सूत्रे —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतस्मिन्नारब्धे संभवतीति प्रदर्शितान्तु तस्यां कर्मवद्भावः प्राप्नोति। लावयतीं केदारस्य कर्मत्वाभावात् कर्मणा समानधातौ तुल्य
क्रियत्वाभावात्। यक्चिणोर्निवृत्त्यर्थमिति। अणौ यत्कर्म णौ चेत्स कर्ता तदा णेरात्मनेपदमेव नान्यदिति नियमार्थमेतदित्यर्थः। उदपुपु-
च्छत पुच्छमिति। कथं पुनरत्राणौ कर्म विद्यते यावता पुच्छशब्दो द्रव्यवचनः। अत्राहुः। अस्मिन्नेव विषये पुच्छशब्दः पुच्छकर्मिका
यामुदसनक्रियायां वर्तते। तस्मात् त्वार्थे णिङ्प्रत्ययः। ततो यदा भ्राम्यमाणं पुच्छं संस्कारवशाच्चक्रमिव भ्रमणक्रियायां भूता
यां स्वातन्त्र्येण विवक्ष्यते तदा उदपुपुच्छते त्यात्मनेपदमेव णिङन्तात् यथा स्यादित्येवमर्थमिदं सूत्रं संपद्यते। गणयति गणा इति
। गणो णावेव कर्म णावेव कर्तृत्वस्य नियमस्याव्यापारात् श्रन्थिग्रन्थीति वक्तव्य एव प्रतिषेधः। तस्यैव चव्यापकत्वान्नार्थो

कर्मकर्तृत्वात्सिद्धमिति चेद्यक्चिणोर्निवृत्त्यर्थं वचनम्। कर्मकर्तृत्वात्सिद्धमिति चेद् यक्चिणोर्निवृत्त्यर्थमि
दं वक्तव्यम्। कर्मोपदिष्टौ यक्चिणौ मा भूतामिति। न वा यक्चिणोः प्रतिषेधात्। न वा एष दोषः। किं कारणम्। यक्
चिणोः प्रतिषेधात्। प्रतिषिद्ध्येते अत्र यक्चिणौ। यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानमिति। यस्तर्हि
न हेतुमण्णिच् तदर्थमिदं वक्तव्यम्। तस्य कर्मोपदिष्टौ यक्चिणौ मा भूतामिति। उदपुपुच्छत पुच्छं स्वयमेव।
अत्रापि यथा भारद्वाजीयाः पठन्ति तथा भवितव्यं प्रतिषेधेन। यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्मने
पदाकर्मकाणामुपसंख्यानमिति। स चावश्यं प्रतिषेध आश्रयितव्यः। इतरथा हि यत्र नियमस्ततोऽन्यत्र प्रति
षेधः। अनुच्यमाने ह्येतस्मिन्यत्र नियमस्ततोऽन्यत्र तेन यक्चिणोः प्रतिषेधो वक्तव्यः स्यात्। गणयति गणं
गोपालकः। गणयति गणः स्वयमेव॥ आत्मनेपदस्य च॥ आत्मनेपदस्य च प्रतिषेधो वक्तव्यः। गणयति ग
णः स्वयमेव॥ आत्मनेपदप्रतिषेधार्थं तु॥ आत्मनेपदप्रतिषेधार्थमिदं वक्तव्यम्। गणयति गणः स्वयमेव।

नेन सूत्रेणेत्यर्थः। कथं पुनरत्र कर्मवद्भावप्राप्तिः यावता कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्मवद्भावो विधीयते। गणानं
च संख्यानिमित्तकः परिच्छेदो ज्ञानविशेषः कर्तरि वर्तते। नैष दोषः। भागशो व्यवस्थापनेऽपि गणिर्वर्तते। भागशो वतिष्ठमा
नं गणं गोपालकोऽवस्थापयति। तत्रानुकूलत्वाद्गणस्यैव कर्तृत्वविवक्षायामस्ति कर्मस्थभावकत्वात्कर्मवद्भावः। आत्म
नेपदप्रतिषेधार्थमिति। अणौ कर्मणो णौ कर्तृत्वे आत्मनेपदं यथा स्याद् णौ तु कर्मणो णौ कर्तृत्वे मा भूदित्येवमर्थमिदमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ नचैतस्मादिति। नित्यत्वाण्णिचः केवलानां चुरादीनां प्रयोगाभावाद्णौ कर्मणोऽसंभवात्सेरिति हेतुमण्णिचो ग्रहणम्। प्रतिषेधोऽण्यणाविति १३२
२५५ तस्यैव प्रत्यासत्त्या न्याय्यत्वात् हेतुमण्णिजन्तस्य कर्मत्वं हेतुमण्णौ कर्तृत्वमिति सूत्रस्यायं विषयो भवत्येवेति कथमत्रानेनात्मनेपदं नि
वार्यते इत्यर्थः। इदं तर्हीति। न चानिर्दिष्टविषयः प्रतिषेधः शक्यते विधातुमिति सर्वमेव सूत्रं क्रियते। वनगुल्मस्येति। कर्मोपलक्षण-
मेतत्। अत्र हि वनगुल्मस्य शेषत्वेन विवक्षितत्वात्कर्मत्वाभावः। तस्मात्स्मरति वनगुल्ममिति प्रदर्शनीयम्। स्मरयत्येनमिति। ए
तदप्युपलक्षणम्। अत्र ह्येनमिति कर्मणः सद्भावात् कर्मवदकर्मकाणामिति वचनात्कर्मवद्भावप्राप्तिर्नास्ति। नाप्यनेनात्मनेप
दस्य। कर्मान्तरसद्भावात्। तस्मात्स्मरयति वनगुल्मः स्वयमेवेति प्रदर्शनीयम्। भवत्येवंजातीयकानामिति। येषामण्यन्तानां
यत्कर्म तेषां ण्यन्तानां यदा स कर्ता तदा कर्तृस्थभावकक्रियत्वेऽप्यात्मनेपदं भवतीत्यर्थः। एवं च ब्रुवता भाष्यकारेण सूत्रमेत
द्विध्यर्थमित्यर्थादुक्तं भवति। तेनारोहयते हस्ती इत्यादावनेनैवात्मनेपदं सिद्धं भवति। तथा हि। रुहिर्गतिविशेषवचन इति य

दृश्यत एवात्मनेपदम्। किमिष्यत एव आहोस्वित्प्राप्नोत्यपि। दृश्यते च प्राप्नोति च। कथम्। अणावितिकस्ये
दं णेर्ग्रहणं यस्मात्सेः प्राक्कर्म वा कर्ता वा विद्यते। नचैतस्मात्सेः प्राक्कर्म कर्ता वा विद्यते। इदं तर्हि प्रयोजनम्। अ
नाध्यान इति वक्ष्यामीति। इह माभूत्। स्मरति वनगुल्मस्य कोकिलः। स्मरयत्येनं वनगुल्मः स्वयमेवेति। एतद
पि नास्ति प्रयोजनम्। कर्मोपदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाणां वा भवन्ति। कर्तृस्थभावकश्चाय
म्। एवं तर्हि सिद्धे सति यदनाध्यान इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः भवत्येवंजातीयकानामात्मनेपदमि
ति। किमेतस्य ज्ञापने प्रयोजनम्। पश्यन्ति भृत्या राजानम्।

इतु परं छन्दसीत्यत्र भाष्यकारो वक्ष्यति। एवं च कर्तृस्थक्रियत्वान्नास्त्यत्र कर्मवद्भावः। एवं चारुह्यते हस्ती स्वयमेवेति ये कर्म-
वद्भावं प्रदर्शयन्ति तेन्यायं भाष्यं च बाधमाना अवधीरणीयाः। तथा हि। विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता। क्रियाव्य
वस्थात्वन्येषां शब्दैरेव प्रकल्पितेति। विशेषदर्शनेन शब्दार्थानुसारेणावातात्स्थ्यं कथ्यते क्रियायाः। एतच्च कारणद्वयमारोह
णस्य कर्तृस्थतां प्रतिपादयति न कर्मस्थताम्। तथा हि। हस्तिनमारोहति वृक्षमारोहति पर्वतमारोहतीत्यादौ कर्मभेदेऽपि नारो
हणस्यरूपभेदः प्रतीयते नचैतेषु प्रयोगेषु क्रियाकृतः कर्मणि कश्चिद्विशेषो दृश्यते। धातुना च कर्तृगतैव क्रिया प्रतिपाद्यते न क राम॰
र्मगता। केवलं कर्मणः कारकत्वादवश्यं क्रियया भाव्यमिति क्रियानुमीयते। सर्वाणि हि कारकाणि स्वं स्वं व्यापारमनुतिष्ठन्ति प्रधान २५५
क्रियां संपादयन्ति। बहु वक्तव्यश्चायमर्थः किंचित्तु प्रकृतोपयोगादुक्तमिति प्रकृतमनुसरामः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्शयते भृत्यान् राजेति। ननु कर्मान्तरसद्भावादत्रात्मनेपदेन न भाव्यम्। उच्यते। अस्मादेवोदाहरणाद् ग्रन्थकारस्यायमभिप्राय ऊह्यते ऽ
ण्यन्तावस्थायां ये कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावे आत्मनेपदं न भवति यथा स्थलमारोहयति मनुष्यानिति। इह त्वण्यन्ताव
स्थायां कर्तृणां भृत्यानां णौ कर्मत्वमिति भवत्येवात्मनेपदम्। एवं च स्मरयत्येनं वनगुल्मः स्वयमेवेति कोकिलस्य कर्मत्वेऽपि प्रत्युदा
हरणं युज्यते। आत्मनः कर्मत्वे इति। यदेकमेव वस्तु बुद्ध्या विभज्य कर्मत्वेन कर्तृत्वेन च विवक्ष्यते तदा प्रतिषेध इत्यर्थः। न वेति। वस्तुत
एवात्र आत्मभेदो न त्वेकस्यैव कर्मत्वं कर्तृत्वं चेत्यर्थः। अन्तरात्मेति। सांख्यपक्षे त्वन्तःकरणमन्तरात्मा तस्यैव कर्तृत्वसंभवा-
त्पुरुषस्याकर्तृत्वात्। नैयायिकादीनां तु मते पुरुषस्य कर्तृत्वात्स एवान्तरात्मा विवक्षितः। शरीरात्मा सुखदुःखे इति। शरीरस्या
चेतनत्वात्सुखदुःखहेतुभ्यां शरीरं संबध्यत इति व्याख्येयम्। स्वरितञितः। इदमात्मनेपदं संविधानवृत्तिभ्यो धातुभ्यो भवतीति
केचिद्व्याचक्षते। पचते पाचयतीत्यर्थः। यजते याजयतीत्यर्थः। अनेकार्थत्वाद्धातूनां प्रकृतिरेव यदा संविधाने वर्तते तदा तस्य द्योत

दर्शयते भृत्यान् राजा। अत्रात्मनेपदं सिद्धं भवति। आत्मनः कर्मत्वे प्रतिषेधः। आत्मनः कर्मत्वे प्रतिषेधो वक्तव्यः। हन्त्या
त्मानम्। घातयत्यात्मा इति। स तर्हि वक्तव्यः। न वा ण्यन्तेऽन्यस्य कर्तृत्वात्। न वा वक्तव्यः। किं कारणम्। ण्यन्तेऽन्यस्य
कर्तृत्वात्। अन्यदत्राण्यन्ते कर्म अन्यो ण्यन्तस्य कर्ता। कथम्। द्वावात्मानौ। अन्तरात्मा शरीरात्मा च। अन्तरात्मा तत्क
र्म करोति येन शरीरात्मा सुखदुःखे अनुभवति। शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवतीति णे
रणौ॥ स्वरितञितः कर्त्रभिप्राये क्रियाफले॥ स्वरितञित इति किमर्थम्। याति वाति द्राति प्साति। स्वरित
ञित इति शक्यमकर्तुम्। इह कस्मान्न भवति। याति वाति द्राति प्सातीति।

कमात्मनेपदं भवतीति। यदा तु प्रकृत्यानभिहितं संविधानं तदा तदभिधानाय णिजुत्पद्यते पाचयतीति। यदा णिच् श्वेति ण्यन्तादा
त्मनेपदं भवति तदा द्वितीये संविधाने ण्यन्तस्य वृत्तिः परिकल्पनीया यथा राजा पाचयते इति। कर्त्रभिप्राये क्रियाफल इत्यनेन संवि
धानलक्षणस्य क्रियाविशेषस्य उपलक्ष्यते। शीर्णो वपते धत्ते विनुत इति च शिष्टप्रयोगेषु एषोऽर्थोऽवगम्यते। स्वरितञित एव सं
विधाने शब्दशक्तिस्वाभाव्याद्वर्तन्ते नान्ये धातव इति स्वरितञिद्ग्रहणं भाष्ये प्रत्याख्यातम्। अन्ये त्वाहुः स्वार्थे यः क्रियामारभते
तत्रात्मनेपदं परार्थारम्भे तु परस्मैपदम्। सा च स्वार्थपरार्थता विवक्षानिमित्ता लौकिके प्रयोगे स्वरितञिद्विषये वनपात्यादिवि-
षयेऽत्यत्रापि पक्षे स्वरितञिद्ग्रहणस्य प्रत्याख्यानम्। एवं पञ्चभिर्हलैः कृषतीति विभाषोपपदेन प्रतीयमान इति पक्षे आत्मनेप
दाभावः। स्वामिदासो पचत इति क्रियामात्रविवक्षायां परस्मैपदम्। यदा तु स्वामिगतो धर्मो दासे आरोप्यते तदा स्वामिदासो पचते
इति आत्मनेपदं भवत्येव। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेषांचेति।सर्वत्रसंविधानस्यसंभवात्सर्वत्रचस्वार्थानुष्ठानसंभवादितिभावः।येषामिति।संभवेव्यभिचारेचसतिप्रकारान्तरव्य-
वच्छेदेनविशिष्टेकार्येविधानायविशेषनिर्देशः क्रियतइतिभावः।नचैतेषामिति।यत्यादयःसंविधानेवर्तितुंनशक्नुवन्तीत्यर्थः।अ-
थवास्वाभिधेयमात्रवृत्तयोयत्यादयःनैषांस्वार्थताविशिष्टक्रियावाचित्वसंभवः। तथाजातीयकाइति।प्रकारमात्रेथाल्विधाय
प्रकारवतिजातीयर्विहितः।अथेति।कर्तारमेतिप्राप्नोतीतिकर्त्रीयमितिसिद्धस्यैवविवक्षितोर्थइतिप्रश्नः।यमेवेति।केचिदा
हुः।वर्तमानकालविवक्षास्यादिति।तदयुक्तम्।कालसामान्येऽस्यविधानात्।तस्मादयमर्थः।द्विविधंयागादिफलं दृष्टमदृ
ष्टंच।दृष्टमन्नपुत्रवृष्टिशत्रुवधादिकम्।अदृष्टंस्वर्गादि।तत्रपूर्वंप्रत्यासन्नमवश्यंभावीतिप्रधानम्।इतरत्तुविधुरप्रत्य

कर्त्रभिप्रायेक्रियाफलेइत्युच्यते।सर्वेषांचकर्त्रभिप्रायंक्रियाफलमस्ति।तएवंविज्ञास्यामः।येषांकर्त्रभिप्रायमकर्त्रभि
प्रायंचक्रियाफलमस्तितेभ्यआत्मनेपदंभवतीति।नचैतेषांकर्त्रभिप्रायंचाकर्त्रभिप्रायंचक्रियाफलमस्ति।
तथाजातीयकाःखल्वाचार्येणस्वरितञितःपठिताःयेउभयवन्तःयेषांकर्त्रभिप्रायंचाकर्त्रभिप्रायंचक्रिया
फलमस्ति।अथाभिप्रग्रहणंकिमर्थम्।स्वरितञितःकर्त्रायेक्रियाफलइतीयत्युच्यमानेयमेवसंप्रत्येति
क्रियाफलंतत्रैवस्यात्।लूञ्।लुनीते।पूञ्।पुनीते।इहनस्यात्।यज्।यजते।वप्।वपते।अभिप्रग्रहणेपुनःक्रि
यमाणेनदोषोभवति।अभिराभिमुख्येवर्तते।प्रआदिकर्मणि।तेनयंचाभिप्रैतियंचाभिप्रैष्यतियंचाभिप्राग
न्तत्रसर्वत्राभिमुख्यमात्रेसिद्धंभवति।कर्त्रभिप्रायेक्रियाफलइतिकिमर्थम्।पचन्तिभक्तकराः।कुर्वन्तिकर्मकराः।य
जन्तियाजकाः।कर्त्रभिप्रायेक्रियाफलइत्युच्यमानेपिप्राप्नोति।अत्रापिक्रियाफलंकर्तारमभिप्रैति।याजकाय
जन्तिगांलप्स्यामहइति।कर्मकराःकुर्वन्तिपादिकमहर्लप्स्यामहइति। एवंतर्हिकर्त्रभिप्रायेक्रियाफलइत्युच्य
तेसर्वत्रचकर्तारंक्रियाफलमभिप्रैतितत्रप्रकर्षगतिर्विज्ञास्यते।साधीयोयत्रकर्तारंक्रियाफलमभिप्रैति।

योपनिपातसंभवेव्यभिचारसंभवाद्विप्रकृष्टत्वाच्चाप्रधानमितितस्येहग्रहणंनस्यात्।अभिप्रग्रहणात्तुतस्यापिग्रहणम्।
आभिमुख्यंफलस्ययदाकर्ताबुद्ध्याध्यवस्यतिक्रियारम्भेतदाआत्मनेपदमित्ययमर्थोभिप्रग्रहणेसतिलभ्यते।वपतइ
ति।केशश्मश्रुवपतइत्यत्रैवासन्नेफलेस्यात्।धान्यंवपतइत्यत्रतुविप्रकृष्टेफलेनस्यादित्यर्थः।यंचाभिप्रागादिति।अ रमः
यष्टेत्यादौ।एतत्तुकालनिर्देशप्रसङ्गेनोक्तंनत्वत्राप्राप्तेर्निमित्तमस्ति।पादिकमहरिति।पादोभृतिरस्येत्यत्रार्थेऽसमासेनिष्का २५६
दिभ्यइतिठक्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचान्तरेणेति। नहिस्वर्गादिफलंयागमन्तरेणभवतितदुद्देशेनैवयागप्रवर्तनात्। याजकाइति। प्रतिग्रहेणापीतिभावः। तथाचहरिणोक्तम्। यस्यार्थस्यप्रसिद्ध्यर्थमारभ्यन्तेपचादयः। तत्प्रधानंफलंतेषांनलाभादिप्रयोजनमिति॥ ॥शेषात्कर्तरि॥ ॥म्रियतेकुसूलइति। कुसूलस्यकर्मवत्त्वातिदेशेऽपिस्वाश्रयंकर्तृत्वमनिवृत्तमितिपरत्वात्परस्मैपदंप्राप्नोति। सत्यमन्यन्तेनतुशेषशब्देनकर्तरिविधीयमानेकर्मकर्तुःकर्मवद्भावेनकर्मत्वातिदेशादात्मनेपदविधानुपयोगादशेषत्वात्परस्मैपदाभावः। सप्तम्याचेदिति। प्रत्ययनियमेप्रकृतीनामनियमादनुदात्तङितःपरस्मैपदमपिप्राप्नोति। अनुक्रियतइति। अनुपराभ्यांकृञइत्येत

नचान्तरेणयजिंयजिफलंवपिंवावपिफलंलभन्ते। याजकाःपुनरन्तरेणापियजिंगालभन्तेभृतकाश्चपादिकमिति॥
स्वरितात्। शेषात्कर्तरिपरस्मैपदम्॥ ॥शेषवचनंपञ्चम्याचेदर्थेप्रतिषेधः॥ शेषवचनंपञ्चम्याचेदर्थेप्रतिषेधोवक्तव्यः। म्रियतेकुसूलःस्वयमेव। छिद्यतेरज्जुःस्वयमेवेति। एवंतर्हिशेषेइतिवक्ष्यामि॥ शेषवचनंसप्तम्याचेत्प्रकृतेःप्रतिषेधः॥ शेषवचनंसप्तम्याचेत्प्रकृतेःप्रतिषेधोवक्तव्यः। आस्तेशेतेच्यवन्तेप्लवन्ते। सिद्धंतूभयनिर्देशात्। सिद्धमेतत्। कथम्। उभयनिर्देशःकर्तव्यः। शेषाच्छेषइतिवक्तव्यम्। कर्तृग्रहणमिदानींकिमर्थंस्यात्। कर्तृग्रहणमनुपराद्यर्थम्। अनुपराद्यर्थमेतत्स्यात्। इहमाभूत्अनुक्रियतेस्वयमेवपराक्रियतेस्वयमेवेति। सिध्यति। सूत्रंतर्हिभिद्यते। यथान्यासमेवास्तु। ननुचोक्तंशेषवचनंपञ्चम्याचेदर्थेप्रतिषेधइति। नैषदोषः। कर्तरिकर्मव्यतिहारइत्यत्रकर्तृग्रहणंप्रत्याख्यायतेतत्प्रकृतमिहानुवर्तिष्यते शेषात्कर्तरिकर्तरीति। कर्तैवयःकर्तातत्रयथास्यात्कर्ताचान्यश्चयःकर्तातत्रमाभूदितिशेषात्कर्तरि॥ ॥अनुपराभ्यांकृञः॥ ॥किमर्थमिदमुच्यते। परस्मैपदप्रतिषेधात्कृञादिषुविधानम्। परस्मैपदप्रतिषेधात्कृञादिषुपरस्मैपदंविधीयते। प्रतिषिध्यतेतत्रपरस्मैपदंस्वरितञितःकर्त्रभिप्रायेक्रियाफलेआत्मनेपदंभवतीति।

दशेषार्थमारब्धम्। गन्धनादिषुकर्त्रभिप्रायेक्रियाफलेचपरस्मैपदार्थम्। तत्रासतीहकर्तृग्रहणेकर्मकर्तर्यपिपरस्मैपदप्रसङ्गः। सतितुकर्तृग्रहणेउत्तरत्रशेषग्रहणस्यकर्तृग्रहणस्यचानुवृत्तौसत्यांशेषेकर्तरिपरस्मैपदविधानात्कर्मकर्तरिनभवति॥ अनुपराभ्यांकृञः॥ ॥तत्रात्मनेपदप्रतिषेधइति। अयमभिप्रायः। अशेषत्वात्कृञःपूर्वेणनियमादप्राप्तंपरस्मैपदमनेनप्रतिप्रसूयतइति अनुपरापूर्वात्करोतेर्मौलेनविधिवाक्येनआत्मनेपदपरस्मैपदप्रसङ्गः। विधीयतइति। नियमापाकरणद्वारेणप्रतिप्रसूयतइत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा· वै· नवेति।द्युद्भ्यो लुङीत्यत्रान्तरेणापि वावचनानुवृत्तिं परस्मैपदप्रतिप्रसवादुभयस्मिन्निष्टे स्वरितत्वेन वावचनानुवृत्तिर्लिङ्गं परस्मैप १।३२
२५७ दप्रतिप्रसवे आत्मनेपदाभावस्य।आत्मनेपदनियमे वेति।साक्षादात्मनेपदनिषेधे क्रियमाणे मूलविधेः प्रतिप्रसवाशङ्का न भ
वति।यथैवतर्हीति।आत्मनेपदापवादः परस्मैपदं विधीयते न तु प्रतिप्रसवद्वारेण नियमः प्रतिपाद्यत इति भावः॥ ॥बुधयुधन
शजनेङ्प्रुद्रुस्रुभ्यो णेः॥ ॥सकर्मकार्थमिति।अकर्मका अपि धातवः सोपसर्गा वा अर्थान्तरवृत्तित्वे सति सकर्मका भवन्ति।अन्तर्भा
वितण्यर्था वा प्रयोज्यकर्मणा।अचित्तवत्कर्तृकार्थं वेति।वा शब्दश्चार्थे।तेनाकर्मकाणामचित्तवत्कर्तृकार्थग्रहणम्।चित्तवत्कर्तृका

अस्तिप्रयोजनमेतत्।किं तर्हीति।तत्रात्मनेपदप्रतिषेधोऽप्रतिषिद्धत्वात्।तत्रात्मनेपदस्य प्रतिषेधो वक्तव्यः।किं
कारणम्।अप्रतिषिद्धत्वात्।न ह्यात्मनेपदं प्रतिषिध्यते किं तर्हि परस्मैपदमनेन विधीयते।न वा द्युतादिभ्यो वावच
नात्।न वा एष दोषः।किं कारणम्।द्युतादिभ्यो वावचनात्।यदयं द्युतादिभ्यो वावचनं करोति तज्ज्ञापयत्याचार्यः न परस्मै
पदविषये आत्मनेपदं भवतीति॥ आत्मनेपदनियमे वाप्रतिषेधः।आत्मनेपदनियमे वाप्रतिषेधो वक्तव्यः।स्वरितञितः
कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति कर्तरि अनुपराभ्यां कृञो नेति।सिध्यति।सूत्रं तर्हि भिद्यते।यथान्यासमे
वास्तु।ननु चोक्तं तत्रात्मनेपदप्रतिषेधोऽप्रतिषिद्धत्वादिति।परिहृतमेतत्।न वा द्युतादिभ्यो वावचनादिति।अथ
वा इदं तावदयं प्रष्टव्यः स्वरितञितः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवतीति परस्मैपदं कस्मान्न भवति।आ
त्मनेपदेन बाध्यते।यथैव तर्ह्यात्मनेपदेन परस्मैपदं बाध्यत एवं परस्मैपदेनाप्यात्मनेपदं बाधिष्यते॥ ॥बुधयु
धनशजनेङ्प्रुद्रुस्रुभ्यो णेः॥ ॥बुधादिषु ये अकर्मकास्तेषां ग्रहणं सकर्मकार्थमचित्तवत्कर्तृकार्थं वा॥ अणाव
कर्मकाच्चित्तवत्कर्तृकात्॥ ॥अणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदवचनम्।अणा
वकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदं वक्तव्यम्।

णां तु सकर्मकार्थमित्यर्थः॥ अणावकर्मकाच्चित्तवत्कर्तृकात्॥ ॥अणाविति णिमात्रस्य पर्युदासात् चुरादिण्यन्तो योऽकर्मक
श्चित्तवत्कर्तृकश्च तस्माद्धेतुमण्यन्तादप्राप्तं परस्मैपदमिष्यत इति वार्तिकमारब्धम्।चुरादिणिचो ण्यन्तादिति।चुरादि राम:
ण्यन्ताद्द्वितीयहेतुमण्यन्तादित्यर्थः। ॥ २५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकर्मकग्रहणमिति। अणावित्यस्य पदस्यापि प्रयोजनमस्ति आरोहयमाणं प्रयुङ्क्ते। आरोहयते हस्त्यत्रानेन मा भूत्परस्मैपदम्। तथापि प्रयोजनान्तरमप्यस्तीति भाष्यकारो दर्शयति। सिद्धं त्वतस्मिन्निति। तच्छब्देन हेतुमण्णिज्निर्दिश्यते तस्यैव पूर्वसूत्र उपादानाद्बुधादिभ्यस्तस्यैव संभवात्। तेनायमर्थः। अहेतुमण्ण्यन्तो यो ऽकर्मकश्चित्तवत्कर्तृकश्च तस्माद्धेतुमण्ण्यन्तात्परस्मैपदं भवति। तेन चेतयतीत्यत्रापि सिद्ध्यति। यस्मात्सेति। एतच्चाणावित्यत्रोक्तं तदेव पुनः प्रकृतौ प्रयोगाद्भाष्य-

इहापि यथा स्यात्। चेतयमानं प्रयोजयति चेतयति। यदि तर्हि तत्रापीष्यते अणिग्रहणमिदानीं किमर्थं स्यात्। अकर्मकग्रहणमण्यन्तविशेषणं यथा विज्ञायेत। अथाक्रियमाणे अणिग्रहणे अकर्मकग्रहणं कस्य विशेषणं स्यात्। णेरिति वर्तते। ण्यन्तविशेषणं स्यात्। तत्र को दोषः। इहैव यथा स्यात् चेतयमानं प्रयोजयति चेतयति। इह न स्यात्। आसयति। शाययतीति। सिद्धं त्वतस्मिन्णाविति वचनात्। सिद्धमेतत्। कथम्। अतस्मिन्णौ यः अकर्मकस्तन्नेति वक्तव्यम्। सिद्ध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तमणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदवचनमिति। नैष दोषः। अणाविति कस्येदं णेर्ग्रहणं यस्मात्सः प्राक्कर्मकर्ता वा विद्यते। न चैतस्मात्सः प्राक्कर्मकर्ता वा विद्यते॥ ॥न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः॥ पादिषु धेट उपसंख्यानम्॥ पादिषु धेट उपसंख्यानं कर्तव्यम्। धापयेते शिशुमेकं समीची॥ ॥लुटि च क्लृपः॥ ॥किमर्थश्चकारः। स्यसनोरित्येतदनुकृष्यते। यदि तर्हि नान्तरेण चकारमनुवृत्तिर्भवति द्युद्भ्यो लुङीत्यत्रापि चकारः कर्तव्यः विभाषेत्यनुकर्षणार्थः। अथेदानीमन्तरेणापि चकारमनुवृत्तिर्भवति। इहापि नार्थश्चकारेण। एवं सर्वे चकाराः प्रत्याख्यायन्ते॥ ॥इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य तृतीये पादे द्वितीयमाह्निकम्॥ पादश्च समाप्तः॥

कारेण स्मारितम्॥ ॥न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः॥ ॥समीचीइति। प्रथमाद्विवचने वाच्छन्दसीति पूर्वसवर्णदीर्घः॥ ॥लुटि च क्लृपः॥ ॥स्वरितत्वादनुवृत्त्या च शब्दप्रतिपाद्यस्यार्थस्य सिद्धत्वाद्भाष्यकारः सर्वानेव च शब्दान्प्रत्याचष्टे॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम्॥ पादश्च तृतीयः समाप्तः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. कै. आकडारादेकासंज्ञा। किमर्थमिति। आकडारात्परा निरवकाशाश्च संज्ञेष्यन्ते। तत्रान्तरेणापि सूत्रं विप्रतिषेधे परमिति वचनात्परा भविष्य १, ४ २,
२५८ ति न पूर्वा। निरवकाशापि हि सावकाशं विशेषविहितत्वादेव बाधित्वा भविष्यति कौण्डिन्यवद्दधिदानमिव तक्रदानमिति प्रश्नः। अन्य
त्रेति। विप्रतिषेधे परं कार्यमुच्यते। न च संज्ञानां विरोधः। युगपत्प्रवृत्तिसंभवात्। न च बाध्यबाधकभावः। भिन्नफलत्वाद्विरो-
धाभावाच्च। दधितक्रयोरभिन्नं फलमोदनसेक इति तयोर्बाध्यबाधकभावः। अष्टाश्रिर्यूपो भवति वाजपेयस्य चतुरस्र इ-
त्यष्टाश्रित्वचतुरस्रत्वयोस्तु विरोधात्। इन्द्रः शक्र इति। यद्यप्यत्र फलभेदो नास्ति तथापि समावेशोऽस्तीति प्रतिपादनायो
दाहरणोपन्यासः। कर्तव्यमिति। प्रत्ययसंज्ञायाः प्रयोजनं धातोरङ्गसंज्ञा कृत्संज्ञायाः प्रयोजनं प्रातिपदिकत्वं कृत्य-
संज्ञायास्तयोरेवेति कर्मणि विधानम्। उभयथेति। तत्र गुणदोषविचारः कर्तव्य इत्यर्थः। तत्रैकासंज्ञेत्यस्मिन्पाठे क्वचित्संज्ञा

आकडारादेकासंज्ञा॥ ॥किमर्थमिदमुच्यते। अन्यत्र संज्ञासमावेशान्नियमार्थं वचनम्। अन्यत्र संज्ञासमावेशो
भवति। क्वान्यत्र। लोके व्याकरणे च। लोके तावत्। इन्द्रः शक्रः पुरुहूतः पुरंदरः। कन्दुः कोष्ठः कुसूल इति। एकस्य
द्रव्यस्य बह्व्यः संज्ञा भवन्ति। व्याकरणेपि कर्तव्यं हर्तव्यमित्यत्र प्रत्ययकृत्कृत्यसंज्ञानां समावेशो भवति।
पाञ्चालः वैदेहः वैदर्भ इति प्रत्ययतद्धिततद्राजसंज्ञानां समावेशो भवति। अन्यत्र संज्ञासमावेशादेतस्मात्कारणा
त् आकडारादपि संज्ञानां समावेशः प्राप्नोति। इष्यते चैकैव संज्ञा स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति नियमार्थं वच
नम्। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। कथं त्वेतत्सूत्रं पठितव्यम्। किमाकडारादेका संज्ञेति आहो
स्वित्प्राक्कडारात्परं कार्यमिति। कुतः पुनरयं संदेहः। उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः।

समावेशार्थो यत्नः कर्तव्यः। परं कार्यमित्यस्मिंस्तु पाठे समावेशः सिद्ध्यति। अत्र हि पाठे अयमर्थः। प्राक्कडारात्संज्ञाख्यं कार्यं परं भव-
तीति। संज्ञाप्रकरणात्संज्ञैवात्र सूत्रे कार्यशब्देन विवक्षिता। तत्र यस्याः संज्ञायाः परस्याः पूर्वया बाधः प्राप्नोति सा परानेन भाव्यत इति
विध्यर्थं सूत्रं भवति न नियमार्थम्। एतदेव च परसंज्ञाविधानं ज्ञापकमत्र प्रकरणे संज्ञानां बाध्यबाधकभावस्य। तेन परयानवका- राम:
शया सावकाशा पूर्वा बाध्यते द्वयोश्च सावकाशयोर्विप्रतिषेधे परया पूर्वा बाध्यत इत्येतदत्र वस्तुतत्त्वम्॥ ॥ २५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकडारादेकेति। संज्ञाप्रकरणादेकेति स्त्रीलिङ्गनिर्देशः संज्ञाशब्दानुच्चारणेऽपि न विरुद्धः। अस्माच्च सूत्रात्परं सरूपाणामेकशेष एकविभक्ताविति प्रकरणं कर्तव्यम्। तत्रैकेत्यस्य शब्दस्य स्वरितत्वादनुवृत्तौ लिङ्गविपरिणामेन संबन्धः स्यात्। एकग्रहणं पुनर्न कर्तव्यं भवतीत्यर्थः। सार्पिष्क इति। असत्यामङ्गसंज्ञायामङ्गस्योच्यमाना वृद्धिर्न स्यात्। अङ्गसंज्ञा च कर्तव्यमित्यादिषु सावकाशा यत्र पूर्वस्य भपदसंज्ञे न स्तः। ननु तद्धितेष्वचामादेः किति चेत्यङ्गस्य वृद्धिविधानसामर्थ्यात्समावेशो भविष्यति। नैतदस्ति। वचनादनङ्गस्यापि वृद्धिः स्यात्। ततश्च देवदत्तो गार्ग्य इत्यत्रापि यञिपरतो देवदत्तादेः समुदायस्यापि वृद्धिः प्रसज्येत। यथा डित्यभस्याप्यनुबन्धकरण

केचिदाकडारादेकासंज्ञेति। केचित्प्राक्कडारात्परं कार्यमिति। कश्चात्र विशेषः। तत्रैकसंज्ञाधिकारे तद्वचनम्। तत्रैकसंज्ञाधिकारे तद्वक्तव्यम्। किम्। एका संज्ञा भवतीति। ननु च यस्यापि परं कार्यत्वं तेनापि परग्रहणं कर्तव्यम्। परार्थं मम भविष्यति विप्रतिषेधे चेति। ममापि तर्ह्येकग्रहणं परार्थं भविष्यति। सरूपाणामेकशेष एकविभक्ताविति। संज्ञाधिकारश्चायम्। तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः संज्ञायाः। तत्रैतावद्वाच्यम्। आकडारादेका। किम्। एका संज्ञा भवतीति। अङ्गसंज्ञया भपदसंज्ञयोरसमावेशः। अङ्गसंज्ञया भपदसंज्ञयोः समावेशो न प्राप्नोति। सार्पिष्कः। बार्हिष्कः। याजुष्कः। धानुष्कः। बाभ्रव्यः। माण्डव्य इति। अनवकाशे भपदसंज्ञे अङ्गसंज्ञां बाधेयाताम्। परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथम्। पूर्वे तस्य भपदसंज्ञे परा अङ्गसंज्ञा। कथम्। एवं स वक्ष्यति। यस्मात्प्रत्ययविधिस्तदादि सुप्तिङन्तं पदम्। नः क्ये। सिति च। स्वादिष्वसर्वनामस्थाने। यचि भम्। तस्यान्ते प्रत्ययेङ्गमिति। तत्रारम्भसामर्थ्याच्च भपदसंज्ञे परं कार्यत्वाच्चाङ्गसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधिकारस्तस्याप्यङ्गसंज्ञापूर्विके भपदसंज्ञे। कथम्। अनुवृत्तिः क्रियते।

सामर्थ्यात् कुमुद्वानित्यादौ टिलोपः। परं कार्यत्वमिति। परं कार्यमित्येतदेकदेशस्यानुकरणं परं कार्यशब्दस्तस्यानुकार्येणार्थेनार्थवत्त्वात्प्रातिपदिकत्वात्तद्धितोत्पत्तिः। अनुवृत्तिः क्रियत इति। ततस्तत्पूर्वकत्वं लभ्यते। अङ्गं सद्भपदसंज्ञमित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रोत्तरमाह। पर्यायः प्रसज्येतेति। एकासंज्ञेतिवचनादङ्गसंज्ञायानित्यबाधे प्राप्ते पर्यायार्थानुवृत्तिः स्यात्। एवं नियमो न बाधितो-
भवति अनुवृत्तिश्च सफला भवति। ननु नपदान्तेत्यत्र सूत्रे भाष्यकारेणोक्तं चेतस्वानित्यस्य सिद्धये यथैवान्यानि पदकार्याण्युपप्ल-
वन्ते रुत्वं जश्त्वं च एवमिदमप्युपप्लोष्यते भसंज्ञा नामेति। तत्र च पदं सद्भसंज्ञं भवतीति विज्ञायते। भसंज्ञायां पदसंज्ञानुवृत्तावपि
भसंज्ञया पदसंज्ञाया बाधः पदकार्यनिवृत्तयेऽभ्युपगन्तव्यः। इह त्वङ्गसंज्ञानुवृत्तौ पर्याय उक्त इति विरोधः। नैष दोषः। अङ्ग-
संज्ञानुवृत्तेः प्रयोजनान्तराभावात् पर्याय इहोक्तः। पदसंज्ञानुवृत्तेस्तु भसंज्ञायां प्रयोजनं पदकार्यत्वं भसंज्ञाया यथा स्यादि-
ति ततश्च नपदान्तेति स्थानिवत्त्वनिषेधादकारलोपस्य तसौ मत्वर्थ इति भसंज्ञायां सत्यां पदत्वप्रयुक्तरुत्वाभावे वेतस्वानि-
ति सिध्यति। कथमिति चेत्। उच्यते। भसंज्ञाविधौ पदमिति वर्तते। तत्रानुवृत्तिसामर्थ्यात् पूर्वं पदसंज्ञा प्रवर्तते तेन पदकार्यं भ-

पर्यायः प्रसज्येत। एकासंज्ञेति वचनान्नास्ति योगपद्येन संभवः। कर्मधारयत्वे तत्पुरुषग्रहणम्। कर्मधा-
रयत्वे तत्पुरुषग्रहणं कर्तव्यम्। तत्पुरुषः समानाधिकरणः कर्मधारय इति। एकसंज्ञाधिकार इति चो-
दितम्। अक्रियमाणे हि तत्पुरुषग्रहणेऽनवकाशा कर्मधारयसंज्ञा तत्पुरुषसंज्ञां बाधेत। परवचने
हि नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः
सिद्धः। कथम्। पूर्वा तस्य कर्मधारयसंज्ञा परा तत्पुरुषसंज्ञा। कथम्। एवं स वक्ष्यति। पूर्वकालैकसर्वज-
रत्पुराणनवकेवलाः समानाधिकरणेन कर्मधारय इति। एवं सर्वं कर्मधारयप्रकरणमनुक्रम्य तस्यान्ते
श्रितादिभिस्तत्पुरुष इति।

संज्ञा भवति नान्यथा। एतावदेव चानुवृत्तेः प्रयोजनं ततः प्रवृत्तया भसंज्ञया पदसंज्ञा बाध्यते एकासंज्ञेति नियमात्। कर्म-
धारयत्व इति। एकसंज्ञावादिनं प्रत्युच्यते त्वया कर्मधारयसंज्ञायामेकसंज्ञाधिकारे अन्यत्र वा क्रियमाणायां तत्पुरुषग्र-
हणं कर्तव्यम्। एकसंज्ञाधिकारे संज्ञासमावेशार्थम्। प्रदेशान्तरे तु समासान्तरस्य कर्मधारयसंज्ञायानिवृत्त्यर्थम्। मया त्व-
स्मिन्नेव प्रकरणे कर्मधारयसंज्ञा क्रियते समावेशश्च सिध्यतीति तत्पुरुषग्रहणं न कर्तव्यं भवतीति लाघवं भवति। तस्या-
न्त इति। यद्येवं समानाधिकरणस्य कथं तत्पुरुषसंज्ञा सिध्यति। उच्यते। पाठक्रमादर्थक्रमो बलीयानिति पूर्वं तत्पुरुष इति-
कर्तव्यम्। ततो द्वितीया श्रितेति। तत्पुरुष इत्यत्र च पूर्वकालेत्यादीनि सूत्राण्यनुवर्त्य तत्पुरुषसंज्ञा विधीयते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु च यस्यापीति। व्यधिकरणानां तत्पुरुषसंज्ञां विधाय समानाधिकरणस्य तत्पुरुषसंज्ञानुवृत्त्या तत्पूर्विका कर्मधारयसंज्ञा विधायिष्यत इत्यर्थः। समावेशस्य च कारक गवीति पुंवद्भावसमासान्तौ प्रयोजनम्। द्विगुं च ग्रहणमिति। द्विगोः संबन्धिन श्चशब्दस्य ग्रहणं कर्तव्यमित्यर्थः। नन्वेकसंज्ञापक्षे द्विगुश्चेति सर्वमेव सूत्रं कर्तव्यं तत्र किं च शब्द एव चोद्यते। तत्राहुः। द्विगुश्चेति सूत्रं द्वयोरपि पक्षयोर्न कर्तव्यम्। एकसंज्ञापक्षे तु संख्यापूर्वो द्विगुश्चेति च शब्दः समावेशार्थः कर्तव्यो न पक्षान्तर इत्येत

तत्रारम्भसामर्थ्याच्च कर्मधारयसंज्ञापरं कार्यत्वाच्च तत्पुरुषसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि तत्पुरुषसंज्ञापूर्विका कर्मधारयसंज्ञा। कथम्। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति योगपद्येन संभवः।, तत्पुरुषत्वे द्विगुं च ग्रहणम्। तत्पुरुषत्वे द्विगुं च ग्रहणं कर्तव्यम्। तत्पुरुषः द्विगुश्चेति चकारः कर्तव्यः। अक्रियमाणे हि चकारग्रहणेऽनवकाशा द्विगुसंज्ञा तत्पुरुषसंज्ञां बाधेत। परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथम्। पूर्वा तस्य द्विगुसंज्ञा परा तत्पुरुषसंज्ञा। कथम्। एवं स वक्ष्यति। तद्धितार्थोत्तरपदसमाहारे च संख्यापूर्वो द्विगुरिति। एवं सर्वं द्विगुप्रकरणमनुक्रम्य तस्यान्ते श्रितादिस्तत्पुरुष इति। तत्रारम्भसामर्थ्याच्च द्विगुसंज्ञापरं कार्यत्वाच्च तत्पुरुषसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि तत्पुरुषसंज्ञापूर्विका द्विगुसंज्ञा। कथम्। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति योगपद्येन संभवः। गतिर्दिवः कर्महेतुमत्सु च ग्रहणम्। गतिर्दिवः कर्महेतुमत्सु च ग्रहणं कर्तव्यम्। उपसर्गाः क्रियायोगे गतिश्चेति चकारः कर्तव्यः। अक्रियमाणे हि चकारेऽनवकाशा उपसर्गसंज्ञा गतिसंज्ञां बाधेत। परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः।

वार्तिककारस्याविवक्षितम्। भाष्य मध्ये वं व्याख्यायते तत्पुरुषः द्विगुश्चेति चकारः कर्तव्य इति। तद्धितार्थेत्यनेन यः संख्यापूर्वः समासस्तत्पुरुषो द्विगुश्च भवतीति संज्ञाद्वयं लभत इति यावत्। एतदर्थश्चकारः कर्तव्य इत्यर्थः। अयमेवार्थः परस्तात्स्फुटी भविष्यति। तस्यान्त इत्यादि भाष्यं पूर्ववत्क्रमविपर्ययेण व्याख्येयम्। गतिसंज्ञामिति। ऊर्यादिषु सावकाशामिति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रादीनांयागतिसंज्ञेति।गतिश्चेत्यत्रासत्यपिचकारेसमावेशः सिद्ध्यति।गतिरित्यत्रयोगेप्रादीनामनुवृत्त्यागतिसंज्ञाविधीयते।त
त्रवचनसामर्थ्यात्पर्यायेलब्धेसतिउपसर्गसंज्ञानुवृत्तिःसमावेशार्थाभविष्यतीत्यर्थः।समावेशस्यचप्रणीतमभिषिक्तमित्य
त्रगतिस्वरोणत्वषत्वेचप्रयोजनम्। दिवः कर्मचेति ।समावेशस्यचप्रयोजनमक्षैर्देवयतेदेवदत्तोयज्ञदत्तेनेति।प्रयोज्य-
कर्तुर्गतिबुद्धीतिनियमात्कर्मसंज्ञानिवृत्तिःअणावकर्मकादितिपरस्मैपदाभावश्चायद्येवमक्षान्दीव्यतीतिद्वितीयानप्रा-
प्नोति।तृतीययापरत्वाद्बाधितत्वात्।विभक्तिद्वयंचेष्यते।कर्मसंज्ञाचसावकाशाअकर्मकव्यपदेशव्यावृत्त्यर्थत्वात्।कर

यस्यपुनःपरंकार्यत्वंनियमानुपपत्तेस्तस्योभयोःसंज्ञयोर्भावःसिद्धः।कथम्।पूर्वोतस्योपसर्गसंज्ञापरागतिसं
ज्ञा।तत्रारम्भसामर्थ्याच्चोपसर्गसंज्ञापरंकार्यत्वाच्चगतिसंज्ञाभविष्यति।ननुचयस्याप्येकसंज्ञाधिकारस्त
स्याप्युपसर्गसंज्ञापूर्विकागतिसंज्ञा।कथम्।अनुवृत्तिःक्रियते।पर्यायःप्रसज्येत।एकासंज्ञेतिवचनान्नास्ति
यौगपद्येनसंभवः।गतिसंज्ञाप्यनवकाशावचनाद्भविष्यति।सावकाशागतिसंज्ञा।कोऽवकाशः।ऊर्यादीन्य
वकाशः।प्रादीनांयागतिसंज्ञासानवकाशा।गति। दिवःकर्म।साधकतमंकरणम्।दिवःकर्मचाचकारःकर्तव्यः
।अक्रियमाणेहिचकारेऽनवकाशाकर्मसंज्ञाकरणसंज्ञांबाधेत।परवचनेहिनियमानुपपत्तेरुभयसंज्ञा
भावः।यस्यपुनःपरं कार्यत्वंनियमानुपपत्तेस्तस्योभयोःसंज्ञयोर्भावःसिद्धः।कथम्।पूर्वोतस्यकर्मसंज्ञापरा
करणसंज्ञा।कथम्।एवंसवक्ष्यति।दिवःसाधकतमंकर्मततःकरणम्।करणसंज्ञंचभवतिसाधकतमम्।दि
वइतिनिवृत्तम्।तत्रारम्भसामर्थ्याच्चकर्मसंज्ञापरंकार्यत्वाच्चकरणसंज्ञाभविष्यति।ननुचयस्याप्येकसं
ज्ञाधिकारस्तस्यापिकरणसंज्ञापूर्विकाकर्मसंज्ञा।कथम्। अनुवृत्तिःक्रियते।पर्यायःप्रसज्येत।एकासंज्ञे
तिवचनान्नास्तियौगपद्येनसंभवः।दिवःकर्म।हेतुमत्।स्वतन्त्रःकर्ता।तत्प्रयोजकोहेतुश्च।चकारःकर्तव्यः।

णसंज्ञापिदेवनाअक्षाइतिल्युडर्थो।अत्राहुः।कार्यकालंसंज्ञापरिभाषमितिपक्षोत्राश्रीयते।तेनकर्मणिद्वितीयेत्यत्रकार्येयत्कर्म
संज्ञायाउपस्थानंतदनवकाशमितिद्वितीयाभविष्यति।अक्षाणांदेवितेत्यादौतुकृत्प्रयोगेषष्ठ्याद्वितीयापवादत्वाद्बाध्यतेतृती-
यातुपरत्वात्।हेतुमदिति।हेतुसंज्ञायस्मिन्सूत्रेविद्यतेतद्धेतुमत्तत्रचग्रहणंकर्तव्यम्।समावेशस्यचप्रयोजनंकारयतीतिहेतुम
ण्णिच्कर्तरिल्लकारः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुलघुसंज्ञे इति। यदा घिनदीसंज्ञे वर्णमात्रस्य क्रियेते तदायं दोषः। यदा तु तदन्तस्य तदा भिन्नविषयत्वात्सिद्धः समावेशः। तस्य तु प्रयोजनं वात्सीबन्धुरित्यत्र नदीबन्धुनीति पूर्वपदान्तोदात्तत्वं नदीसंज्ञानिबन्धनं भवति। वात्सीबन्ध्वो इति गुरोरनृत इति प्लुतो गुरुसंज्ञानिबन्धनः। घिलघुसंज्ञासमावेशस्य च प्रयोजनं विभ्वना च विनरा विति घिलक्षणः पूर्वनिपातः। विन्नौ भीवौ वेन्नमिति इगन्ताच्च लघुपूर्वादित्यण्। द्वन्द्वमनोज्ञादित्वाद् वुञ्प्राप्तेस्तदभावश्चिन्त्यः। विनरा वाचष्ट इति णिचि टिलोपे च कृते

अक्रियमाणे हि चकारे ऽनवकाशा हेतुसंज्ञा कर्तृसंज्ञां बाधेत। परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथम्। पूर्वा तस्य हेतुसंज्ञा परा कर्तृसंज्ञा। कथम्। एवं स वक्ष्यति। स्वतन्त्रः प्रयोजको हेतुरिति। ततः कर्ता। कर्तृसंज्ञश्च भवति स्वतन्त्रः। प्रयोजक इति निवृत्तम्। तत्रारम्भसामर्थ्याच्च हेतुसंज्ञा परं कार्यत्वाच्च कर्तृसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि कर्तृसंज्ञापूर्विका हेतुसंज्ञा। कथम्। अनुवृत्तिः क्रियते पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः। गुरुलघुसंज्ञे नदीघिसंज्ञे। गुरुलघुसंज्ञे नदीघिसंज्ञे बाधेयाताम्। गार्गीबन्धुः वात्सीबन्धुः। वैन्नं विविनय्य। परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथम्। पूर्वे तस्य नदीघिसंज्ञे परे गुरुलघुसंज्ञे। तत्रारम्भसामर्थ्याच्च नदीघिसंज्ञे परं कार्यत्वाच्च गुरुलघुसंज्ञे भविष्यतः। ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि नदीघिसंज्ञापूर्विके गुरुलघुसंज्ञे। कथम्। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः।

विविनय्येति ल्यपि लघुपूर्वादित्ययादेशः। नदीघिसंज्ञापूर्विके इति। ननु विशेषविषये नदीघिसंज्ञे गुरुलघुसंज्ञे तु सामान्यविषये ते कथं नदीघिसंज्ञापूर्विके युज्येते। एवं मन्यते। वाक्यभेदेन संबन्धः करिष्यते। ह्रस्वमक्षरं लघुसंज्ञं भवति। ततो घि। घिसंज्ञं च लघुसंज्ञमिति। एवं दीर्घं गुरुसंज्ञं भवति ततो नदी। नदीसंज्ञं च गुरुसंज्ञमिति। पर्याय इति। नदीघिसंज्ञाभ्यां गुरुलघुसंज्ञयोर्नित्ये बाधे प्राप्ते तयोरनुवृत्तिः पर्यायार्थैव स्यादित्यर्थः।

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परस्मैपदसंज्ञामिति। ततश्चक्रामतीत्यादौ दीर्घत्वं न स्यात्। पृतर्थैवतु स्यात्। ननु च क्षिचित्वद्धिरिति ज्ञापकात्समावेशो भविष्य-
ति। नैतदस्ति। अस्माद्वचनादस्मिन्कार्ये पर्यायः स्यान्न समावेशः। ततश्च पाक्षिकी वृद्धिः स्यात्। परस्मैपदसंज्ञापीति। ततश्च पर्यायेल-
ब्धे अनुवृत्तिः समावेशार्था भविष्यतीतिभावः। ऋत्विग्यदिति। भसंज्ञायां सत्यां गोर्गुणः स्यात्। पदसंज्ञात्वबग्रहार्था स्यात्। गति
बुद्ध्यादीनामिति। एकसंज्ञाधिकारे गत्यादिसूत्रं कर्मसंज्ञायां सिद्धायां नियमार्थम्। तथाहि। प्रयोज्यः स्वव्यापारे स्वतन्त्रः प्रयोज
कव्यापारेणाचाप्यते इति संज्ञाद्वयप्रसङ्गे एकसंज्ञाधिकारादन्यतरया भाव्यम्। तत्र प्रत्ययार्थप्राधान्यात्तत्प्रयुक्तया कर्मसंज्ञया

परस्मैपदसंज्ञां पुरुषसंज्ञा। परस्मैपदसंज्ञां पुरुषसंज्ञा बाधेत। परवचने हि नियमानुपपत्तेरुभयसं
ज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथम्। पूर्वा तस्य पुरु
षसंज्ञा परा परस्मैपदसंज्ञा। कथम्। एवं सवक्ष्यति। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमा इति। एवं सर्वं
पुरुषनियममनुक्रम्यत स्यात्तेलः परस्मैपदमिति। तत्रारम्भसामर्थ्याच्च पुरुषसंज्ञापरं कार्यत्वाच्च पर
स्मैपदसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि परस्मैपदसंज्ञापूर्विका पुरुषसंज्ञा। क
थम्। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः। परस्मैपदसंज्ञा
प्यनवकाशा वचनाद्भविष्यति। सावकाशा परस्मैपदसंज्ञा। कोऽवकाशः। पृतत्वक्तम्। अवकाशः। परवचने
सितिपदं भम्। परवचने सितिपदं भसंज्ञमपि प्राप्नोति। अयं ते योनिर्ऋत्वियः। प्रजां विन्दाम ऋत्वियः।
आरम्भसामर्थ्याच्च पदसंज्ञा परं कार्यत्वाच्च भसंज्ञा प्राप्नोति। गतिबुद्ध्यादीनां ण्यन्तानां कर्मकर्तृसंज्ञम्
। गतिबुद्ध्यादीनां ण्यन्तानां कर्मकर्तृसंज्ञमपि प्राप्नोति।

प्रवर्त्यम्। गुणप्रधानसंनिधौ प्रधानस्य प्रयोजकत्वे संभवति पृथग्गुणास्तद्विरुद्धं स्वकार्ये न प्रयुञ्जते। ततश्च सिद्धायां प्रयोज्य
स्य कर्मसंज्ञायां गत्यर्थादीनामेव ण्यन्तानां कर्ता ण्यन्तानां कर्मसंज्ञो भवति नान्येषामिति नियमः क्रियते। तेन पाचयत्योदनं देव
दत्तो यज्ञदत्तेनेति कर्मसंज्ञा न भवति। प्रधानप्रयुक्तकर्मसंज्ञाऽभावे च गुणक्रियानिमित्ता कर्तृसंज्ञा प्रवर्तते। यदा तु परं का
र्यमिति पाठस्तदाऽविरोधात्सर्वत्र संज्ञाद्वयप्रसङ्गे गत्यर्थादीनामेवेति नियमेन ण्यन्तधात्वन्तरप्रयोज्यात्कर्मसंज्ञा व्यावर्त्य
ते। गत्यर्थादिप्रयोज्यस्य तु संज्ञाद्वयप्रसङ्ग इत्यर्थः। ॥

CC-0. In Public Domain. Digitization by eGangotri

यद्यमिति। यदि तु गत्यर्थादिप्रयोज्यस्य संज्ञाद्वयं प्रावर्त्स्यत्तर्ह्येवमुक्तेऽहृक्तावकरिष्यतां नाकरिष्यतान्यतरस्यांग्रहणमित्यर्थः।
शकट्ये इति। शकटिशब्दान्ङे प्रत्यये कृते परत्वान्नदीसंज्ञानिमित्ते आटि कृते तत्स्याङ्ङ इति कृत्वा ह्रस्वे ङि इति गुणः प्राप्नोति। नवासं
भवादिति। अयं भावः। यद्यत्र घिसंज्ञा प्रवर्तेत तदान्तरङ्गत्वात्पूर्वमेव तस्याः प्रवृत्तिः स्यात्। नदीसंज्ञा तु ङित्प्रत्ययापेक्षा ब
हिरङ्गा। तत्र घिलक्षणे गुणे कृते ह्रस्वाभावादल्विधित्वाच्च स्थानिवत्त्वाभावान्नदीसंज्ञा नैव प्रवर्तेतेति नदीसंज्ञाविधानं ह्र

आरम्भसामर्थ्याच्च कर्मसंज्ञा परं कार्यत्वाच्च कर्तृसंज्ञा प्राप्नोति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न क
र्मसंज्ञायां कर्तृसंज्ञा भवतीति। यदयं हृक्रोरन्यतरस्यामित्यन्यतरस्यां ग्रहणं करोति। शेषवचनं च घिसंज्ञा
निवृत्त्यर्थम्। शेषवचनं च कर्तव्यम्। शेषो घ्यसखि। किं प्रयोजनम्। घिसंज्ञानिवृत्त्यर्थम्। नदीसंज्ञायां
घिसंज्ञा मा भूदिति। शकट्यै पद्धत्यै बुद्ध्यै धेन्वै। इतरथा हि परं कार्यत्वाच्च घिसंज्ञा आरम्भसामर्थ्याच्च ङि
ति ह्रस्वश्चेति नदीसंज्ञा। नवासंभवात्। नवा कर्तव्यम्। नदीसंज्ञायां घिसंज्ञा कस्मान्न भवति। असंभ
वात्। कोऽसावसंभवः। ह्रस्वलक्षणा हि नदीसंज्ञा घिसंज्ञायां च गुणः। ह्रस्वलक्षणा हि नदीसंज्ञा घिसंज्ञा
यां च गुणेन भवितव्यम्। तत्र वचनप्रामाण्यान्नदीसंज्ञायां घिसंज्ञाभावः। तत्र वचनप्रामाण्यान्नदी
संज्ञायां घिसंज्ञा न भविष्यति। किं कारणम्। आश्रयाभावात्। आश्रयाभावान्नदीसंज्ञायां घिसंज्ञानिवृ
त्तिरिति चेद्यणादेशाभावः। आश्रयाभावान्नदीसंज्ञायां घिसंज्ञानिवृत्तिरिति चेदेवमुच्यते यणादेशो
ऽपि न प्राप्नोति। नैष दोषः। नद्याश्रयत्वाद्यणादेशस्य ह्रस्वस्य नदीसंज्ञाभावः। नद्याश्रयो यणादेशः। य
दा नदीसंज्ञया घिसंज्ञा बाधिता ततउत्तरकालं यणादेशेन भवितव्यम्। नद्याश्रयत्वाद्यणादेशस्य
ह्रस्वस्य नदीसंज्ञा भविष्यति। बहुव्रीह्यर्थं तु। बहुव्रीहिप्रतिषेधार्थं तु शेषग्रहणं कर्तव्यम्। शेषो बहु
व्रीहिरिति। किं प्रयोजनम्। प्रयोजनमव्ययीभावोपमानद्विगुकृत्त्वोपेषु। अव्ययीभावे।

स्वस्यानर्थकमेव स्यात्। तस्मान्नदीसंज्ञाविधानसामर्थ्यादत्र घिसंज्ञा न भवतीत्यर्थः। नद्याश्रयत्वादिति। यं विधिं प्रत्युपदेशोऽनर्थ
कः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यत इति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उन्मत्तगङ्गमिति। अत्र बहुव्रीहिसंज्ञायां सत्यां पूर्वपदप्रकृतिस्वरः पाक्षिकश्च कप्समासान्तः प्राप्नोति। शस्त्रीश्यामेति। यदा श्यामाशब्दः शस्त्र्यामेव उपमाने वर्तते उपमेयं तु समासवाच्यं तदान्यपदार्थवृत्तित्वाद्बहुव्रीहिसंज्ञाप्रसङ्गात्तन्निबन्धनः पाक्षिकः कप्प्रसङ्गः। स्वरस्तु तत्पुरुषे तुल्यार्थेति विधीयत इति तत्र नास्ति विशेषः। पञ्चगवमिति। यदा समाहारो भावरूपो वाच्यः तदान्यपदार्थसद्भावः। समाह्रियमाणार्थत्वे तु तदभावः। बहुव्रीहिसंज्ञायां सत्यां तन्निबन्धनस्वरप्रसङ्गः। कपस्त्वशेषत्वात्प्रसङ्गाभावः। नन्वत्र टच् श्विकरणाद्बहुव्रीहिस्वरो न भविष्यति। एवं तर्ह्युदाहरणदिगियम्। इदं त्वत्रोदा

उन्मत्तगङ्गम्। लोहितगङ्गम्। उपमान। शस्त्रीश्यामा। कुमुदश्येनी॥ द्विगु। पञ्चगवं दशगवम्। कृल्लोपे। निष्कोशाम्बिः निर्वाराणसिः। तत्र शेषवचनाद्दोषः संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहिप्रतिषेधः। तत्र शेषवचनाद्दोषो भवति। संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहेः प्रतिषेधः प्राप्नोति। संख्या। द्वीरावतीको देशः। त्रीरावतीको देशः। समानाधिकरण। वीरपुरुषको ग्रामः। नञ्समासे। अब्राह्मणको देशः। अवृषलको देशः। कृल्लोपे च शेषवचनात्प्रादिभिर्न बहुव्रीहिः। कृल्लोपे च शेषवचनात्प्रादिभिर्बहुव्रीहिर्न प्राप्नोति। प्रपतितपर्णः प्रपर्णकः। प्रपतितपलाशः प्रपलाशक इति। अथैकसंज्ञाधिकारे कथं सिध्यति। एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिः। एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिर्भविष्यति॥ एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत्क्त्वार्थे प्रतिषेधः॥ एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत्क्त्वार्थे प्रतिषेधो वक्तव्यः।

हरणं पञ्चपात्रमिति। निष्कौशाम्बिरिति। क्रान्तस्यान्यपदार्थस्य समासवाच्यत्वे बहुव्रीहिसंज्ञायां तन्निबन्धनो नदीलक्षणः कप्प्रसङ्गः। यदा तु पूर्वपदमेव क्रान्ताद्यर्थवृत्ति तदान्यपदार्थाभावः। क्रियमाणेऽपि विशेषग्रहणे दोषान्तरप्रसङ्गमाह। तत्रेति। एकसंज्ञावादी तु शेषग्रहणं न करोति अनवकाशाभिरव्ययीभावादिसंज्ञाभिर्बहुव्रीहिसंज्ञाभावस्य सिद्धत्वात्। द्वीरावतीकादिषु तु परत्वाद्बहुव्रीहिर्भविष्यति। द्वीरावतीक इति। नदीभिश्चेत्यव्ययीभावः प्राप्नोति। तस्य त्ववकाशः पञ्चनदमिति यदा समाह्रियमाणोर्थो वाच्यः। प्रपतितपर्णः प्रपर्णक इति। प्रपर्णक इत्युदाहरणम्। कृल्लोपप्रदर्शनार्थं तु प्रपतितपर्ण इत्युक्तम्। यथा निष्कौशाम्बिरिति तत्पुरुषसंज्ञा भवति एवं प्रपर्णक इत्यत्रापि स्यादित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्पुरुषोऽत्रेति। परिगणनं मनसि कृत्वाह। इतरो विशेषमप्रतिपद्याह। तत्पुरुष इतीति। सिद्धं त्विति। क्तार्थो यत्र समासार्थस्तत्र तत्पुरुषसंज्ञा। अपर्णक इत्यत्र तु क्तार्थः पर्णविशेषणं समासार्थस्त्वन्य एवेति बहुव्रीहिर्भवति। कानि पुनरिति। अस्मिन्प्रकरणे पठितानां यासां समावेशो नेष्यते ताः प्रयोजनम्। प्रकरणान्तरविहिताऽप्यनिष्यमाणसमावेशा उपसंख्या तथात्वेन प्रयोजनानि भवन्तीति प्रश्नपूर्वकं दर्शयितुमाह। ह्रस्वसंज्ञामिति। ऊकालोज्ह्रस्वसंज्ञ इत्युक्तमुकारश्चाणत्वाद्द्विमात्रत्रिमात्रयोर्ग्राहक इति तयोरपि ह्रस्वसंज्ञा प्राप्ता दीर्घप्लुतसंज्ञाभ्यां बाध्यते स च बाधस्तत्रैव सूत्रे विस्तरेण प्रतिपादितः। तिङ्सार्वधातुकमिति। लिङ्लिटोरस्य सार्वधातुकसंज्ञायां सत्यां तन्निबन्धनाः शबादयः प्राप्नुवन्ति। आर्द्धधातुकसंज्ञा तु तन्निबन्धनेडाद्यर्था। छन्दस्युभयथेति तु

निष्कौशाम्बिः। निर्वाराणसिः। तत्पुरुषोऽत्र बाधको भविष्यति। तत्पुरुष इति चेदन्यत्र क्तार्थात्प्रतिषेधः। तत्पुरुष इति चेदन्यत्र क्तार्थात्प्रतिषेधो वक्तव्यः। प्रपतितपर्णः प्रपर्णकः। प्रपतितपलाशः प्रपलाशक इति। सिद्धं तु प्रादीनां क्तार्थे तत्पुरुषवचनात्। सिद्धमेतत्। कथम्। प्रादीनां क्तार्थे तत्पुरुषो भवतीति वक्तव्यम्। कानि पुनरस्य योगस्य प्रयोजनानि। प्रयोजनं ह्रस्वसंज्ञां दीर्घप्लुतौ। ह्रस्वसंज्ञां दीर्घप्लुतसंज्ञे बाधेते। तिङ्सार्वधातुकं लिङ्लिटोरार्धधातुकम्। तिङ्सार्वधातुकसंज्ञां लिङ्लिटोरार्धधातुकसंज्ञा बाधते। अपत्यं वृद्धं युवा। अपत्यं वृद्धं युवसंज्ञा बाधते। घिर्नदी। घिसंज्ञां नदीसंज्ञा बाधते। लघु गुरु। लघुसंज्ञां गुरुसंज्ञा बाधते। पदं भम्। पदसंज्ञां भसंज्ञा बाधते। अपादानमुत्तराणि। अपादानसंज्ञामुत्तराणि कारकाणि बाधन्ते। क्व। धनुषा विध्यति कंसपात्र्यां भुङ्क्ते गां दोग्धि धनुर्विध्यति। धनुषा विध्यतीत्यपाययुक्तत्वाद्ध्रुवमपायेऽपादानमित्यपादानसंज्ञा प्राप्नोति साधकतमं करणमिति च करणसंज्ञा।

तिङामार्द्धधातुकसंज्ञार्थं शेषस्यापि सार्वधातुकसंज्ञार्थं स्यादित्यज्ञापकमसमावेशस्य। अपत्यं वृद्धमिति। अत्र समावेशे सति शालङ्केः पैलस्य च यूनश्छात्रा इति विवक्षिते गोत्रेऽलुगचीति फक्फिञोरलुक्प्रसज्येत। फक्फिञोरन्यतरस्यामित्ययं तु लुग्विकल्प आनन्तर्ये यूनि लुगित्येतमेव लुकं बाधते न तु पैलादिभ्यश्चेत्येतमपि। घिर्नदीति। शकट्यै इत्यत्र घिलक्षणगुणाभावः। लघ्विति। अततक्षदित्यादौ सन्वद्भावाभावः। धनुषा विध्यतीति। अपायविवक्षया विना धनुषो व्यधेः साधकतमत्वाभावात्। संज्ञाद्वयप्रसङ्गे परत्वात्करणसंज्ञा भवति।। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्युपसर्गसंज्ञेइति। तेनसुसिक्तमित्यादौषत्वंनभवतिस्तूयमानानुक्तइति॥नैसंज्ञकसुप्राद्व्याश्रयमन्तोदात्तत्वंच। पूर्वपदप्रकृति-
स्वरएवतुभवति। परस्मैपदसंज्ञामिति। तेनाच्योष्टाक्रमतइत्यादौवृद्धिदीर्घोद्यभावः। समाससंज्ञाश्चेति। तेनलोहितगङ्गमित्य-
व्ययीभावएव। द्वौराजवतीकइतिबहुव्रीहिरेवभवति। गुणवचनंचेति। एकविषयत्वात्कारकरणत्वगुणवचनप्रातिपदिकसंज्ञयोःस
मावेशोभवति। उत्तरासुचसंज्ञासुप्रातिपदिकमित्यनुवर्तनात्ताभिःप्रातिपदिकसंज्ञासमाविशति। गुणवचनसंज्ञातुत्वामिर्वी

करणसंज्ञासापराभवति। कंसपात्र्यांभुङ्क्ते इत्यत्रापाययुक्तत्वाद्ध्रुवमपायेऽपादानमित्यपादानसंज्ञाप्रा
प्नोति। आधारोऽधिकरणमितिचाधिकरणसंज्ञा। अधिकरणसंज्ञासापराभवति। गांदोग्धीत्यत्रापाययु-
क्तत्वात्त्वापादानसंज्ञाप्राप्नोतिकर्तुरीप्सिततमंकर्मेतिकर्मसंज्ञा। कर्मसंज्ञापरासाभवति। धनुर्विध्यती
त्यत्रापाययुक्तत्वात्त्वापादानसंज्ञाप्राप्नोति। स्वतन्त्रःकर्तेतिकर्तृसंज्ञा। कर्तृसंज्ञासापराभवति। क्रुध
द्रुहोरुपसृष्टयोः कर्मसंप्रदानम्। क्रुधद्रुहोरुपसृष्टयोःकर्मसंज्ञासंप्रदानसंज्ञांबाधते। करणंपराणि।
करणसंज्ञांपराणिकारकाणिबाधन्ते। क। धनुर्विध्यति। असिश्छिनत्तीति। अधिकरणंकर्म। अधिकर
णसंज्ञांकर्मसंज्ञाबाधते। क। गेहंप्रविशतीति। अधिकरणंकर्ता। अधिकरणसंज्ञांकर्तृसंज्ञाबाधते।
क। स्थालीपचतीति। अध्युपसृष्टंकर्म। अध्युपसृष्टंकर्मअधिकरणसंज्ञांबाधते। गत्युपसर्गसंज्ञेकर्म
प्रवचनीयसंज्ञा। गत्युपसर्गसंज्ञेकर्मप्रवचनीयसंज्ञाबाधते। परस्मैपदमात्मनेपदम्। परस्मैपदसंज्ञामा
त्मनेपदसंज्ञाबाधते। समाससंज्ञाश्च। समाससंज्ञाश्चयायाःपराअनवकाशाश्चतास्ताःपूर्वाःसावकाशाश्च
बाधन्ते। अर्थवत्प्रातिपदिकम्। अर्थवत्प्रातिपदिकसंज्ञंभवति। गुणवचनंच। गुणवचनसंज्ञंचभवत्य
र्थवत्। समासकृत्तद्धिताव्ययसर्वनामाऽसर्वलिङ्गाजातिः। समासः। समाससंज्ञावक्तव्या। कृत्। कृत्संज्ञाचवक्तव्या।

ध्यतेतस्याश्चप्रत्यग्विधिःप्रयोजनम्। ब्राह्मणादिग्रहणंतुसमासादिसंज्ञाविषयार्थप्राणभृज्जात्यादिलक्षणप्रत्ययबाधना
र्थंयुवाद्यणसमावेशार्थंच। असर्वलिङ्गाजातिरिति। लिङ्गानांचनसर्वभागितिलक्षणलक्षितांजातिमाश्रयति। चित्रगुत्वंकारक
त्वमौपगवत्वमुच्चैस्त्वंसर्वत्वंगोत्वंबहुत्वंपञ्चत्वंडित्थत्वमिति गुणवचनसंज्ञायाःसमासादिसंज्ञाभिर्बाधनात्त्वन्नभवति। ऐ
कंराजपौरुष्यमित्यादौतुब्राह्मणादित्वात्ष्यञ्॥ ॥ रामः २६३

विप्रतिषेधे परं कार्यम्॥ ॥आचार्यवचनानां सर्वेषां प्रामाण्याभ्युपगमाल्लौकिकार्थस्य विरोधवाचिनो विप्रतिषेधशब्दस्येह ग्र-
हणं न संभवतीति मत्वा पृच्छति विप्रतिषेध इति कोयं शब्द इति। इतरस्तु लौकिकार्थव्यतिरेकोपात्तो न ह्यस्यात्रान्योर्थः परिभाषि-
त इति मत्वाह विप्रतिपूर्वादिति। कर्मव्यतिहार इति। सिधेर्विपूर्वस्य व्यतिहारविशिष्टक्रियावचनात्सेधतेर्भावे घञि स्वार्थः।
इतरेतरप्रतिषेधोन्योन्यप्रतिषेध इति। स एवार्थः पर्यायाभ्यां प्रदर्श्यते। यद्वा पर्यायाप्रतिपत्तौ शब्दद्वयेन प्रदर्श्यते। विरोधं-
पूर्वोक्तेन न्यायेनासंभावयन्पुनः पृच्छति कः पुनरिति। द्वौ प्रसङ्गाविति। सर्वस्याचार्यवचनस्य प्रामाण्येपि लब्धावकाशयोर्द्व

तद्धिता। तद्धितसंज्ञा च वक्तव्या। अव्ययम्। अव्ययसंज्ञा च वक्तव्या। सर्वनाम। सर्वनामसंज्ञा च वक्तव्या। अस
र्वलिङ्गा जातिरिति। एतच्च वक्तव्यम्। संख्या। संख्यासंज्ञा च वक्तव्या। डु च। डुसंज्ञा च वक्तव्या। का पुनर्डुसं
ज्ञा। षट्संज्ञा। एकद्रव्योपनिवेशिनी संज्ञा। एकद्रव्योपनिवेशिनी संज्ञा इत्येतच्च वक्तव्यम्। किमर्थमि
दमुच्यते। यथान्यास्सएवभूयिष्ठाः संज्ञाः क्रियन्ते। सन्ति चैवात्र काश्चिदपूर्वाः संज्ञा अपि। एतेनानुपूर्व्ये
ण संनिविष्टानां बाधनं यथा स्यात्। गुणवचनसंज्ञायाश्चैताभिः संज्ञाभिर्बाधनं यथा स्यादिति। आकडा
रात्॥ विप्रतिषेधे परं कार्यम्॥ विप्रतिषेध इति कोयं शब्दः। विप्रतिपूर्वात्सिधेः कर्मव्यतिहारे घञ्। इ
तरेतरप्रतिषेधो विप्रतिषेधः। अन्योन्यप्रतिषेधो विप्रतिषेधः। कः पुनर्विप्रतिषेधः। द्वौ प्रसङ्गावन्यार्थौ
वेकस्मिन्स विप्रतिषेधः। द्वौ प्रसङ्गौ यदान्यार्थौ भवत एकस्मिंश्च युगपत्प्राप्नुतः स विप्रतिषेधः। क्व पुन
रन्यार्थौ क्व चैकस्मिन्युगपत्प्राप्नुतः। वृक्षाभ्यां वृक्षेष्वित्यन्यार्थौ वृक्षेभ्य इत्यत्र युगपत्प्राप्नुतः। किं च स्या
त्। एकस्मिन्युगपदसंभवात्पूर्वपरप्राप्तेरुभयप्रसङ्गः। एकस्मिन्युगपदसंभवात्पूर्वस्याश्च परस्या
श्च प्राप्तेरुभयप्रसङ्गः। इदं विप्रतिषिद्धं यदुच्यते एकस्मिन्युगपदसंभवात्पूर्वपरप्राप्तेरुभयप्रसङ्ग इति।
कथं ह्येकस्मिंश्च युगपदसंभवः स्यात्पूर्वस्याश्च परस्याश्च प्राप्तेरुभयप्रसङ्गश्च स्यात्। नैतद्विप्रतिषिद्धम्।

नयोरेकस्मिन्विषये विरुद्धकार्यद्वयसमर्पणादस्त्येव विरोधः। प्रसज्येते इति प्रसङ्गौ विधी। अन्यार्थाविति। अन्यत्र लब्धावकाशौ। स
विप्रतिषेध इति। युगपच्चासौ प्राप्तिः सा विरोधनिमित्तत्वादभेदोपचाराद्विप्रतिषेधशब्देनोक्ता। किं च स्यादिति। यदीदं नारभ्येते-
तिभावः। इतरो व्यक्तिपदार्थाश्रयेण पर्यायमाह। एकस्मिन्निति॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ २६४ अनवयवप्रसङ्गादिति। सर्वव्यक्त्युद्देशेन शास्त्रस्य प्रवर्तनादित्यर्थः। प्रतिपदविधेश्चेति। अनेनोत्सर्गापवादवैधर्म्यं दर्शयति। नह्युत्सर्गः प्रतिपदं विधीयते। तत्र पर्यायप्रसङ्गे नियमार्थमिदं परमेव भवति न पूर्वमिति। एतत्सूत्रारम्भाच्च पूर्वस्य लक्षणस्य लत्वानारम्भोऽनुमीयते। तदुच्यते सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति। इदानीं जातिपक्षाश्रयेणाह। अप्रतिपत्तिर्वेति

यदुच्यत एकस्मिन्युगपदसंभवादिति। कार्ययोर्युगपदसंभवः शास्त्रयोरुभयप्रसङ्गः। तजादिभिस्तुल्यम्। तजादिभिस्तुल्यं पर्यायः प्राप्नोति। तद्यथा तजादयः पर्यायेण भवन्ति। किं पुनः कारणं तजादयः पर्यायेण भवन्ति। अनवयवप्रसङ्गात्। प्रतिपदविधेश्च। अनवयवेन प्रसज्यन्ते प्रतिपदं च विधीयन्ते। अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात्। अप्रतिपत्तिर्वा पुनरुभयोः शास्त्रयोः स्यात्। किं कारणम्। तुल्यबलत्वात्। तुल्यबले ह्युभे शास्त्रे। तद्यथा। द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं करोति। यदा तु तमुभौ युगपत्प्रेषयतो नानादिक्षु च कार्ये भवतस्तदा यद्यसावविरोधार्थी भवति उभयोर्न करोति। किं पुनः कारणमुभयोर्न करोति। यौगपद्यासंभवात्। नास्ति यौगपद्येन संभवः। तत्र प्रतिपत्त्यर्थं वचनम्। तत्र प्रतिपत्त्यर्थमिदं वक्तव्यम्। तव्यदादीनां त्वप्रसिद्धिः। तव्यदादीनां तु कार्यस्याप्रसिद्धिः। न हि किंचित्तव्यदादिषु नियमकारि शास्त्रमारभ्यते येन तव्यदादयः स्युः। यच्च भवता हेतुर्व्यपदिष्टः अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति तुल्यः स तव्यदादिषु। नैष दोषः। अनवकाशास्तव्यदादयः। उच्यन्ते च ते वचनाद्भविष्यन्ति। यच्च भवता हेतुर्व्यपदिष्टः तजादिभिस्तुल्यं पर्यायः प्राप्नोतीति तुल्यः स तव्यदादिषु एतावदिह सूत्रं विप्रतिषेधे परमिति। पठिष्यति ह्याचार्यः सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति। पुनश्च पठिष्यति। पुनःप्रसङ्गविज्ञानात्सिद्धमिति। । किं पुनरियता सूत्रेणोभयं लभ्यम्। लभ्यमित्याह। कथम्। इह भवता द्वौ हेतू व्यपदिष्टौ तजादिभिस्तुल्यं पर्यायः प्राप्नोतीति। अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति च। तद्यदा तावदेष हेतुस्तजादिभिस्तुल्यं पर्यायः प्राप्नोतीति तदा विप्रतिषेधे परमित्यनेन किं क्रियते। नियमः। विप्रतिषेधे परमेव भवतीति। तदैतदुपपन्नं भवति।

। अत्र पक्षे विध्यर्थमिदम्। परं भवतीति। तस्मिन्कृते यदि पूर्वस्य प्राप्तिनिमित्तमस्ति तन्तत्तदपि प्रवर्तते। तदुच्यते पुनःप्रसङ्गविज्ञानात्सिद्ध- रा॰ म॰ मिति। तव्यदादीनां तु कार्यस्येति। परत्वादेः साधुत्वस्य वेत्यर्थः। एकवाक्योपात्तत्वादनवकाशत्वाच्च नाल्येषां परत्वेन व्यवस्था। तजादिभि २६४ रिति। आदिशब्दस्य प्रकारार्थत्वात्तजादिभ्यस्तव्यदादयो न भिन्ना इत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सकृद्गताविति।यथाकुरुतात्त्वमितिहेर्लुकिचप्राप्नोतितातङ्चेतिपरत्वात्तातङ्।तस्यस्थानिवद्भावाद्धुडुनप्रवर्तते।द्वारमिति।अ
प्रतिपत्त्यपनयनेनपरशास्त्रप्रवृत्तेर्द्वारमुपायःक्रियतइतियावत्।पुनःप्रसङ्गविज्ञानादिति।ईजतुरितिपरत्वात्संप्रसारणेकृते
द्विर्वचनंभवति।लक्ष्यानुरोधेनचव्यक्त्याकृतिपदार्थाश्रयणादनयोःपरिभाषयोर्विषयविभागोऽवसेयः।तद्यदिष्टवाचीति।इ
ष्टानिष्टविभागश्चव्याख्यानाद्बोध्यः। अन्तरङ्गंचेति।अन्तर्मध्येऽङ्गानिनिमित्तानिपार[illegible]यस्यतदन्तरङ्गमित्युच्यते।एवंबहि

सकृद्गतौविप्रतिषेधेयद्बाधितंतद्बाधितमेवेति।यद्यप्येषहेतुरप्रतिपत्तिरुभयोस्तुल्यबलत्वादिति।तदा
विप्रतिषेधेपरमित्यनेनकिंक्रियते।द्वारम्।विप्रतिषेधेपरंतावद्भवति।तस्मिन्कृतेयदिपूर्वमपिप्राप्नोति
तदपिभवति।तदेतदुपपन्नंभवति।पुनःप्रसङ्गविज्ञानात्सिद्धमिति।विप्रतिषेधेपरमित्युक्त्वाङ्गाधिकारेपू
र्वमितिवक्तव्यम्।किंकृतंभवति।पूर्वविप्रतिषेधानपठितव्याभवन्ति।गुणवृद्ध्यौत्त्वतृज्वद्भावेभ्योनुम्पूर्वविप्रति
षिद्धम्।नुमचिरतृज्वद्भावेभ्योनुडिति।अङ्गाधिकारेकथंयेपरविप्रतिषेधाः।इत्त्वोत्त्वाभ्यांगुणवृद्धीभवतो
विप्रतिषेधेनेति।सूत्रंचभिद्यते।यथान्यासमेवास्तु।कथंयेपूर्वविप्रतिषेधाः।विप्रतिषेधेपरमित्येवसि
द्धम्।कथम्।परशब्दोऽयंबह्वर्थः।अस्त्येवव्यवस्थायांवर्तते।तद्यथा।पूर्वःपरइति।अस्त्यन्यार्थेवर्तते।प
रपुत्रःपरभार्या।अन्यपुत्रोऽन्यभार्येतिगम्यते।अस्तिप्राधान्येवर्तते।तद्यथा।परमियंब्राह्मण्यस्मिन्कु
टुम्बे।प्रधानमितिगम्यते।अस्तीष्टवाचीपरशब्दः।तद्यथा।परंधामगतः।इष्टंधामगतइतिगम्यते।तद्यइ
ष्टवाचीपरशब्दस्तस्येदंग्रहणंविप्रतिषेधेपरंयदिष्टंतद्भवतीति॥अन्तरङ्गंच॥अन्तरङ्गंचबलीयोभ
वतीतिवक्तव्यम्।किंप्रयोजनम्।यणेकादेशणत्वोत्त्वानिगुणवृद्धिद्विर्वचनाल्लोपस्वरेभ्यः।गुणाद्यणा
देशः।स्योनः।स्योना।गुणश्चप्राप्नोतियणादेशश्च।परत्वाद्गुणःस्यात्।यणादेशोभवत्यन्तरङ्गतः।वृद्धेर्यणादेशः।

रङ्गानियस्यतद्बहिरङ्गम्।एतच्चन्यायसिद्धमेवानूदितम्।कार्यमित्यत्रार्हेकृत्यः।कारणार्हंकार्यंतुल्यबलंचकरणार्हमितिनित्या
नित्योत्सर्गापवादान्तरङ्गबहिरङ्गेष्वस्यसूत्रस्याव्यापारः।स्योनइति।सिवेर्बाहुलकान्नप्रत्ययेकृतेऽपवादत्वाद्वलोपंबाधित्वागुण
[illegible]मन्तरङ्गत्वादूठ्भवति।तत्रकृतेऽन्तरङ्गत्वाद्यणागुणोबाध्यते। बहिरङ्गस्याप्यूठोयणादेशेकर्तव्येऽसिद्धत्वंनभवति।ना
जानन्तर्यइतिवचनात्। ॥

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· द्यौकामिरिति। ननु कृतयणादेशात्तद्धितोत्पत्तौ वृद्ध्याभाव्यमिति नास्ति युगपद्यण्वृद्ध्योः प्राप्तिः। एवं तर्ह्यकृतव्यूहाः पाणिनी १४१
२६५ याइति दिउकाम इति स्थिते अत्र यण्वृद्ध्योर्युगपत्प्रसङ्गः। अथ वा द्यौकामिरिति पदं यदा विभज्यान्वाख्यायते। दिवूकाम इ इति
तदा दिव उदित्युत्वे कृते यण्वृद्धी प्राप्नुतः। दुद्यूषतीति। दिवेः सन्। सनीवन्तर्ध इति पक्षे इडभावः। हलन्ताच्चेति कित्त्वम्। ऊडादे-
शः। तत्र यण् च प्राप्नोति द्विर्वचनं च। नित्यत्वाद्द्विर्वचनं स्यात्। एतद्भाष्यं दूषयन्ति। द्विः प्रयोगो द्विर्वचनं षाष्ठिकं व्यवस्थापितम्। त
त्र पूर्वान्तरप्राप्त्या द्विर्वचनमनित्यं यणादेस्तु नित्य इति वदन्तः। अल्लोपस्येति। ननु गाण्डीवधन्वनेत्यत्रास्ति संप्रधारणा। गाण्डी
वधनु अन् आ इति स्थिते यदि पूर्वं यणादेशः ततो न संयोगाद्वमन्तादित्यल्लोपनिषेधाद्रूपं सिध्यति। अथ तु परत्वादल्लोपः स्या
त्ततो यण् न स्यात्। एवं तर्हि नित्यत्वात्पूर्वमत्र यण् भवतीति मन्यते। कृतेप्यल्लोपे तस्य स्थानिवत्त्वाद्यणः प्राप्त्या नित्यत्वम्। य-

द्यौकामिः स्यौकामिः। वृद्धिश्च प्राप्नोति यणादेशश्च। परत्वाद्वृद्धिः स्यात्। यणादेशो भवत्यन्तरङ्गतः। द्वि
र्वचनाद्यणादेशः। दुद्यूषति। सुस्यूषति। द्विर्वचनं च प्राप्नोति यणादेशश्च। नित्यत्वाद्द्विर्वचनं स्यात्।
यणादेशो भवत्यन्तरङ्गतः। अल्लोपस्य च यणादेशस्य च नास्ति संप्रधारणा। स्वराद्यणादेशः। द्यौका
मिः स्यौकामिः। स्वरश्च प्राप्नोति यणादेशश्च। परत्वात्स्वरः स्याद्यणादेशो भवत्यन्तरङ्गतः। गुणादेकादेशः। काद्रवेयो मन्त्रम
पश्यत्। गुणश्च प्राप्नोत्येकादेशश्च। परत्वाद्गुणः स्यात्। एकादेशो भवत्यन्तरङ्गतः। वृद्धेरेकादेशः। वैक्षमाणिः सौस्थितिः
। वृद्धिश्च प्राप्नोत्येकादेशश्च। परत्वाद्वृद्धिः स्यादेकादेशो भवत्यन्तरङ्गतः। द्विर्वचनादेकादेशः।

णि कृते नास्यल्लोपः प्रतिषेधादिति तस्यानित्यत्वम्। द्यौकामिरिति। दिउकाम इ इति स्थिते यण् च प्राप्नोति ञ्नित्यादिर्नित्यमिति स्वर
श्च। तत्र यदि पूर्वं स्वरः स्यात्तदोदात्तस्वरितयोर्यण इत्योकारः स्वरितः स्यादुदात्तश्चेष्यते। द्युकाम इति पूर्वपदप्रकृतिस्वरेपि यण्
अन्तरङ्गत्वाद्बाध्यते तथैव दिव उदित्युत्वेन च। काद्रवेय इति। कद्रुशब्दात्स्त्रियामित्यूङि कृते स्त्रीभ्यो ढक् द्व्यच इति ढकि एका
देशो ढे लोपोऽकद्र्वा इति लोपप्रतिषेधाद्गुण इति गुणश्च प्राप्नोत्येकादेशश्च। नन्वकृत एकादेशेऽप्रत्यय इति निषेधात्- रामः
प्रातिपदिकत्वाभावात्तद्धित एव न स्यात्। कृते त्वेकादेशे तस्यान्तवद्भावात्प्रातिपदिकत्वात्तद्धितोत्पत्तिरित्यानुपूर्व्यासिद्धत्वादप्र २६५
योजनमेतदित्याहुः। अत्रोच्यते। अकृतेप्येकादेशे नोङ्धात्वोरिति ढे लोपोऽकद्र्वा इति निषेधाज्ज्ञापकाद्भविष्यति तद्धित इत्यदोषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्नुनेति। ननु श्वयुवेति संप्रसारणे कृते तस्यासिद्धवदत्रेत्यसिद्धत्वान्न संयोगाद्वमन्तादिति निषेधादल्लोपस्य नास्ति प्राप्तिः। एवं तर्हि आ
भादित्यसिद्धत्वमाश्रित्यैतदुक्तम्। प्रयोजनप्रत्याख्यानवाद्याह। नैतदस्तीति। प्रयोजनवाद्याह। अयमस्तीति। प्रत्याख्यानवाद्याह। ना
त्रेति। प्रयोजनवाद्याह। नैष इति। स एवाह। यत्र तर्हीति। यत्र पुनरित्यर्थः। श्नुनः पश्येति। अत्र हि न गोश्वन्निति प्रतिषेधाभावादल्लो
पे सत्युदात्तनिवृत्तिस्वरप्रसङ्गः। तस्मात्पूर्वमेकादेश एष्टव्यः। प्रत्याख्यानवाद्याह। एवं तर्हीति। प्रयोजनवाद्याह। यत्र तर्हीति। ब-
हुश्नुनीति। बहोर्नञ्वदुत्तरपदभूम्नीत्यन्तोदात्तस्तस्मान्ङीपि कृते ऽल्लोपे क्रियमाण उदात्तनिवृत्तिस्वरः स्यात्। प्रत्याख्यानवाद्या
ह। यदि पुनरिति। प्रयोजनवाद्याह। नैवं शक्यमिति। कुमारश्वश्रूः साववर्णान्त इति ङीप उदात्तस्वरो न स्यात्। प्रत्याख्यानवाद्याह। ए

ज्ञाया ओदनः ज्ञौदनः। ज्ञौदनमिच्छति ज्ञौदनीयति। ज्ञौदनीयतेः सन्। जुज्ञौदनीयिषति। द्विर्वचनं च प्राप्नोत्येका
देशश्च। नित्यत्वाद्द्विर्वचनं स्यादेकादेशो भवत्यन्तरङ्गतः। अल्लोपादेकादेशः। श्नुना श्नुने अल्लोपश्च प्राप्नोत्ये
कादेशश्च। परत्वादल्लोपः स्यादेकादेशो भवत्यन्तरङ्गतः। नैतदस्ति प्रयोजनम्। नास्त्यत्र विशेषः। अल्लोपेन
वा निवृत्तौ सत्यां पूर्वत्वेन वा। अयमस्ति विशेषः। अल्लोपेन निवृत्तौ सत्यामुदात्तनिवृत्तिस्वरः प्रसज्येत। नात्रो
दात्तनिवृत्तिस्वरः प्राप्नोति। किं कारणम्। न गोश्वन्साववर्ण इति प्रतिषेधात्। नैष उदात्तनिवृत्तिस्वरस्य प्र
तिषेधः। कस्य तर्हि। तृतीयादिस्वरस्य। यत्र तर्हि तृतीयादिस्वरो नास्ति। श्नुनः पश्येति। एवं तर्हि न लाक्ष
णिकस्य प्रतिषेधं शिष्मः। किं तर्हि येन केनचित्प्राप्तस्य विभक्तिस्वरस्य प्रतिषेधः। यत्र तर्हि विभक्तिर्ना
स्ति बहुश्नुनीति। यदि पुनरयमुदात्तनिवृत्तिस्वरस्यापि प्रतिषेधो विज्ञायेत। नैवं शक्यम्। इहापि प्रसज्ये
त कुमारीति। एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति नोदात्तनिवृत्तिस्वरः श्नुन्यवतरतीति॥

वं तर्हीति। श्नुनीत्यत्र ङीप उदात्तनिवृत्तिस्वरस्यासिद्धत्वात्किं ङीब्विधानेनेत्यर्थः। तदेवमल्लोपादेकादेशस्य स्वरार्थत्वं दूषि
तम्। प्रयोजनान्तरं त्वस्त्येव। यद्यत्राल्लोपो भवति तदा ऽन उपधालोपिन इति ङीपि सति बहुश्नुनीति भवति। यदा त्वेकादेशे
नाल्लोपो बाध्यते तदोपधालोपित्वाभावान्ङीबभावाद्बहुश्नेति। गौरादिलक्षणो ङीष् नास्ति। अनुपसर्जनादित्यधिकारात्। भाष्ये तु
बहुश्नुनीति प्रत्याख्यानवादिमतेनोपन्यस्तम्। तत्पक्षे किल ङीपा भाव्यमिति। न्यायमूलं चेदमन्तरङ्गं बलीय इति। न च
न्यायस्यात्र केनचिद्बाधोऽस्तीति बहुश्नेत्येव भाव्यमिति न्यायविद आहुः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौस्थितिरिति। सुउस्थितइत्ति स्थिते यद्यत्र पूर्वमुकारस्योदात्तत्वं स्यात् तदा स्वरितो वानुदात्ते पदादाविति पक्षे स्वरितत्वं प्रसज्येत। पूर्वत्वेकादेशे कृते नित्यमाद्युदात्तमेतद्भवति। गुणस्येति। परत्वाद्वृद्धिगुणेन भाव्यम्। स्तेर्णिरिति। विभज्या ‾ न्वाख्यानेस्त्वतद्- इति स्थितेन्तरङ्गत्वादिट्वं ततोवृद्धिः। स्वरइति। स्तेर्णिरिति यदि पूर्वं स्वरः ततइत्वं तथाप्यान्तरतम्यादुदात्तत्वं सिध्यति। नवेति। दण्डाग्रमित्याद्गुणः प्राप्नोति। कुमारी ई इत इत्यादौ यणादेशइत्यवपूर्वं सवर्णदीर्घत्वेन विध्यन्तरं बाध्यम्। नैतदिति। एकनि

यदयंश्वनुशब्दं गौरादिषु पठति अन्तोदात्तार्थयत्नं करोति। सिद्धं हि स्यान्ङीपैव। स्वरादेकादेशः। सौस्थितिः वैक्षमाणिः। स्वरश्च प्राप्नोत्येकादेशश्च। परत्वात्स्वरः स्यादेकादेशो भवत्यन्तरङ्गतः। गुणस्य चेत्वोत्वयो श्च नास्ति संप्रधारणा। वृद्धेरित्वोत्वे। स्तेर्णिः पौर्तिः। वृद्धिश्च प्राप्नोतीत्वोत्वे च। परत्वाद्वृद्धिः स्यादित्वोत्वे भवतोन्तरङ्गतः। द्विर्वचनादित्वोत्वे। आतेस्तीर्यते। आपोपूर्यते। द्विर्वचनं च प्राप्नोतीत्वोत्वे च। नित्यत्वाद्द्विर्वच नं स्यात्। इत्वोत्वे भवतोन्तरङ्गतः। अभ्यासस्य चेत्वोत्वयोश्च नास्ति संप्रधारणा। स्वरे नास्ति विशेषः। इणाङिश्री नामाद्गुणः सवर्णदीर्घत्वात्। इणङिशीनामाद्गुणः सवर्णदीर्घत्वात्। प्रयोजनम्। अयजइन्द्रम् अवपइन्द्रम्। वृक्षइन्द्रं प्लक्षइन्द्रं तदिन्द्रं यइन्द्रम्। आद्गुणश्च प्राप्नोति सवर्णदीर्घत्वं च। परत्वात्सवर्ण दीर्घत्वं स्यात्। आद्गुणो भवत्यन्तरङ्गतः। नवा सवर्णदीर्घत्वस्यानवकाशत्वात्। नवा एतदन्तरङ्गेणापि सिध्यति। किं कारणम्। सवर्णदीर्घत्वस्यानवकाशत्वात्। अनवकाशं सवर्णदीर्घत्वमाद्गुणं बाधेत। नैत दन्तरङ्गेस्ति। अनवकाशं परमिति। इहापि स्योनः स्योनेति शक्यं वक्तुं नवा परत्वाद्गुणस्येति। ऊङापोरेकादे शईत्वलोपाभ्याम्। ऊङापोरेकादेशईत्वलोपाभ्यां भवत्यन्तरङ्गतः। प्रयोजनम्। ईत्वादेकादेशः। खट्वीयति मालीयति। ईत्वं च प्राप्नोत्येकादेशश्च। परत्वादीत्वं स्यादेकादेशो भवत्यन्तरङ्गतः॥

मित्तप्राप्तविध्यन्तरबाधनेन सावकाशः सवर्णदीर्घोन्तरङ्गं बाधितुं न शक्नोतीति भावः। निरवकाशेन तु विध्यन्तरेण सावकाशोन्त रङ्गोपि विधिर्बाध्यते यथा गोत्रेऽलुगचीत्यलुका लुक्। नवा परत्वादिति। यथा त्वत्र परत्वेन न व्यवस्था अपि त्वन्तरङ्गत्वेन त- था आद्गुणोपि समानकक्ष्यो दीर्घेण बाध्यते नत्वन्तरङ्ग इति भावः। खट्वीयतीति। खट्वआयइति स्थिते यदि पूर्वमीत्वं स्यात् ततआद्गुणः प्रसज्येत। नन्वा ‾ कारस्य कृते ईत्वे यस्येति लोपो भविष्यति। नैतदस्ति। पूर्वविधाविति तस्य स्थानिवद्भावात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न लोपे त्वाभ्यामिति। ङुङ इत्त्वासंभवादयं क्रमोऽयुक्त आश्रयितुमिति भावः। यद्वा प्रजाद्यदन्तमिति ईत्वग्रहस्य पूर्वनिपातो-
न्याय्यः। तथापि लक्षणे प्रायेण मौनाद्रियते। चोडिरिति। पूर्वमाकारलोपे सति तस्य स्थानिवत्त्वादसिद्धत्वाच्चाकारलोपाभावा-
दाद्गुण इति गुणस्य प्रसङ्गः। ग्लानीयमिति। विभज्यान्वाख्याने ग्लै अनीय इति स्थितेऽनैमित्तिकत्वादात्वमन्तरङ्गं भवति
ग्लाच्छत्रमिति। ग्ला म्ला इति क्विबन्तम्। अत्रापि तथा विभज्यान्वाख्याने ग्ले छत्रमिति स्थिते यदि पूर्वं तुक् स्यात्तदैजन्त-

लोपादेकादेशः। कामण्डलेयः। माद्रवाहेयः। लोपश्च प्राप्नोत्येकादेशश्च। परत्वाल्लोपः स्यादेकादेशो भव-
त्यन्तरङ्गतः। अथ किमर्थमीत्त्वलोपाभ्यामित्युच्यते नलोपेत्वाभ्यामित्येवोच्येत। संख्यातानुदेशो माभू-
दिति। आपो य्येकादेशो लोपे प्रयोजयति। चोडिः बालाकिः। आत्त्वनपुंसकोपसर्जनह्रस्वत्वानि अयवाया-
वेकादेशस्तुग्विधिभ्यः। आत्त्वनपुंसकोपसर्जनह्रस्वत्वानि अयवायावेकादेशतुग्विधिभ्यो भवन्त्यन्त-
रङ्गतः। वेञ्। वानीयम्। ग्लै। ग्लानीयम्। म्लै। म्लानीयम्। ग्लाच्छत्रम्। म्लाच्छत्रम्। आ-
त्वं च प्राप्नोत्येते च विधयः। परत्वादेते विधयः स्युः। आत्त्वं भवत्यन्तरङ्गतः। नपुंसकोपसर्जनह्रस्व-
त्वं च प्रयोजनम्। अतिर्यत्र। अतिन्वत्र। अतिरिच्छत्रम्। अतिनुच्छत्रम्। आराशस्त्रीदम्। धाना-
शष्कुलीदम्। निष्कौशाम्बीदम्। निर्वाराणसीदम्। निष्कौशाम्बिच्छत्रम्। निर्वाराणसिच्छत्रम्। नपुंसकोप-
सर्जनह्रस्वत्वं च प्राप्नोत्येते विधयश्च। परत्वादेते विधयः स्युः। नपुंसकोपसर्जनह्रस्वत्वं भवत्यन्तरङ्गतः। तुग्य-
णेकादेशगुणवृद्ध्यौत्वदीर्घत्वमुमेत्त्वरीविधिभ्यः। यणेकादेशगुणवृद्ध्यौत्वदीर्घत्वेत्वमुमेत्वरीविधिभ्यस्तुग्भव-
त्यन्तरङ्गतः। यणादेशः। अग्निचिदत्र। सोमसुदत्र। एकादेशस्तु। अग्निचिदिदम्। सोमसुदुदकम्। गुणस्तु। अग्निचिते। सो-
मसुते। वृद्धिः। प्रकृच्छकः। प्राच्छकः। औत्वात्। अग्निचिति सोमसुति। दीर्घत्वात्। जगद्ग्राम्। जनगद्ग्राम्। ईत्वात्। जगत्यति जनगत्यति।

त्वाभावादात्वं न स्यादिद यथा ढौकितेति। उपदेशग्रहणानपेक्षया चैतदुदाहरणम्। अतिर्यत्रेति। अतिरि अत्र इति स्थिते आ-
यादेशस्त्यनजन्तत्वाद्ध्रस्वो न स्यात्। आराशस्त्रीदमिति। आराशस्त्री इदमिति स्थिते यद्यत्र पूर्वमेकादेशः स्यात्तदा तस्या-
न्तवद्भावाद्ध्रस्वे कृते रूपं न सिद्ध्येत्। अग्निचिदत्रेति। पदसमुदायस्य विभज्यान्वाख्याने अग्निचि अत्र इति स्थिते यदि पूर्वं यण्
स्यात्तदा तुङ् न स्यात्। नपुंसकं चात्राग्निचिदिति द्रष्टव्यम्। पुंसि विभक्त्याव्यवधानात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुकृद्दुष्कृताविति। कथं पुनरत्रानङ् प्राप्नोति। यावता विद्यायोनिसंबन्धवाचिनामृदन्तानां द्वन्द्वे स विहित इति चिन्त्यमेत
त्। धियतीति। धिधारणे इति धिधो कृते ति बाश्रयो गुणः प्राप्नोति। विकरणाश्रय इयङ् भवत्यन्तरङ्गत्वात्। यणादेशश्चे
ति। एरनेकाच इति यण्। जुहुवतुरिति। ह्वा अतुस्। ह्वः संप्रसारणमभ्यस्तस्य चेति संप्रसारणे कृते यद्याकारस्य लोपः
स्यात्तदा स्थानिवत्त्वाद्दसिद्धवदत्राभादित्यसिद्धत्वाद्वोवङ् न स्यात्। औपगवीति। उपगोरियमित्यणि ङीपि च कृते य

मुमः। अग्निचिन्मन्यः। सोमसुन्मन्यः। रुत्वात्। जगद्भ्रः। जनगद्भ्रः। रीविधेः। सुकृत्यति। पापकृत्यति। अनङानङ्भ्यां चे
ति वक्तव्यम्। अनङ्। सुकृत्। आनङ्। सुकृद्दुष्कृतौ। तुक्च प्राप्नोत्येते विधयश्च। परत्वादेते विधयः स्युः।
तुग्भवत्यन्तरङ्गतः। इयङादेशो गुणात्। इयङादेशो गुणाद्भवत्यन्तरङ्गतः। प्रयोजनम्। धियति। रियति। इय
ङादेशः प्राप्नोति गुणश्च। परत्वाद्गुणः स्यात्। इयङादेशो भवत्यन्तरङ्गतः। उवङादेशश्चेति वक्तव्यम्। प्राद्रुद्रुवत्। प्रासु
स्रुवत्। श्वेः संप्रसारणं पूर्वत्वं यणादेशात्। श्वेः संप्रसारणपूर्वत्वं यणादेशाद्भवत्यन्तरङ्गतः। प्रयोजनम्। शु
शुवतुः। शुशुवुः। पूर्वत्वं च प्राप्नोति यणादेशश्च। परत्वाद्यणादेशः स्यात्। पूर्वत्वं भवत्यन्तरङ्गतः। ह्व आकारलो
पात्। ह्व आकारलोपात्पूर्वत्वं भवत्यन्तरङ्गतः। प्रयोजनम्। जुहुवतुः। जुहुवुः। पूर्वत्वं च प्राप्नोत्याकारलोप
श्च। परत्वादाकारलोपः स्यात्। पूर्वत्वं भवत्यन्तरङ्गतः। स्वरो लोपात्। स्वरो लोपाद्भवत्यन्तरङ्गतः। प्रयोजन
म्। औपगवी। सौदामनी। स्वरश्च प्राप्नोति लोपश्च। परत्वाल्लोपः स्यात्। स्वरो भवत्यन्तरङ्गतः। प्रत्ययविधिरेका
देशात्। प्रत्ययविधिरेकादेशाद्भवत्यन्तरङ्गतः। प्रयोजनम्। अग्निरिन्द्रः। वायुरुदकम्। प्रत्ययविधिश्च प्राप्नोत्ये
कादेशश्च। परत्वादेकादेशः स्यात्। प्रत्ययविधिर्भवत्यन्तरङ्गतः। यणादेशाच्च। यणादेशाच्चेति वक्तव्यम्। अ
ग्निरत्र। वायुरत्र। लादेशो वर्णविधेः। लादेशो वर्णविधेर्भवत्यन्तरङ्गतः।

दि प्रत्ययाद्युदात्तत्वात्परिदनुदात्तत्वाद्वा पूर्वं लोपः स्यात्तदोदात्तनिवृत्तिस्वर ईकारस्य न स्यात्। अग्निरिन्द्र इति। यद्यपि प्रत्यय
रहितायाः प्रकृतेः प्रयोगो नास्ति तथापि वाक्यस्य विभज्यान्वाख्याने क्रियमाणेऽयं विचारः क्रियते। यद्यपि प्रत्ययस्यानित्यत्वं तथा
प्यन्तरङ्गेणैव सिद्धत्वान्न तदाश्रितम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पचलत्रेति। यद्यत्र पूर्वं यण् स्याद् अनल्विधाविति स्थानिवत्त्वनिषेधादुत्वं न स्यात्। पूर्वशालाप्रिय इति। पूर्वा शाला प्रिया अस्येति त्रिपदे बहुव्रीहौ कृते तद्धितार्थेति द्विगुयोः पदयोस्तत्पुरुषः। तत्र त्रिपदाश्रयबहुव्रीहिनिमित्तः पूर्वपदप्रकृतिस्वरो बहिरङ्गत्वान्न प्रवर्तते। तेन तत्पुरुषसमासाश्रयं शालाशब्दस्यान्तोदात्तत्वं भवति। पूर्वशब्दः स्वाङ्गशिटामदन्तानामित्याद्युदात्तः। पचावेदमिति। अन्तरङ्गबलीयस्त्वेनैतन्न सिद्ध्यति। बहिरङ्गे कृते आद्गुणे एत ऐदिति प्राप्नोति। अनयैवेति। इयं हि व्यापिका। पूर्वो

प्रयोजनम्। पचत्वत्र पठत्वत्र। लादेश उत्वं प्राप्नोति यणादेशश्च। परत्वाद्यणादेशः स्याल्लादेशो भवत्यन्तरङ्गतः। तत्पुरुषान्तोदात्तत्वं पूर्वपदप्रकृतिस्वरात्। तत्पुरुषान्तोदात्तत्वं पूर्वपदप्रकृतिस्वराद्भवत्यन्तरङ्गतः। प्रयोजनं पूर्वशालाप्रियः अपरशालाप्रियः। तत्पुरुषान्तोदात्तत्वं च प्राप्नोति पूर्वपदप्रकृतिस्वरत्वं च। परत्वात्पूर्वपदप्रकृतिस्वरत्वं स्यात्। तत्पुरुषान्तोदात्तत्वं भवत्यन्तरङ्गतः। एतान्येतस्याः परिभाषायाः प्रयोजनानि यदर्थमेषा परिभाषा कर्तव्या। यदि सन्ति प्रयोजनानीत्येषा क्रियते। ननु चेयं च कर्तव्या असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणादिति। किं प्रयोजनम्। पचावेदम्। पचामेदम्। बहिरङ्गलक्षणगुणस्यान्तरङ्गलक्षणमैत्वं मा भूदिति। उभे तर्हि कर्तव्ये। नेत्याह। अनयैव सिद्धम्। इहापि स्योनः स्योनेति असिद्धत्वाद्बहिरङ्गलक्षणस्य गुणस्यान्तरङ्गलक्षणो यणादेशो भविष्यति। यद्यसिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणादित्युच्यते। अक्षद्यूः हिरण्यद्यूः असिद्धत्वाद्बहिरङ्गलक्षणस्योठोऽन्तरङ्गलक्षणो यणादेशो न प्राप्नोति। नैष दोषः। असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणादित्युक्त्वा ततो वक्ष्यामि नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिरिति। सा तर्ह्येषा परिभाषा कर्तव्या। न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति। यदयं षत्वतुकोरसिद्ध इत्याह। इयं तर्हि परिभाषा कर्तव्या। असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणादिति। एषा च न कर्तव्या आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति।

क्तप्रयोजननिष्पादनात्। शास्त्रासिद्धत्वाश्रयणाद्बहिरङ्गलक्षणं न तावत्प्रवर्तते। अन्तरङ्गलक्षणे तु प्रवृत्ते यत्र निमित्तसद्भावस्तत्र बहिरङ्गलक्षणप्रवृत्तिः। नाजानन्तर्य इति। अचोरानन्तर्यमाश्रित्य यत्र कार्यं विधीयते तत्रैषा परिभाषा नोपतिष्ठते। यदयमिति। कोऽसिचदधीत्येति बहिरङ्गस्यैकादेशस्यासिद्धत्वात्षत्वं न भविष्यति तुक् तु प्रवर्तिष्यत इति किमसिद्धवचनेन। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 यदयमिति। द्वित्यवाह अस् इति स्थिते वाहः संप्रसारणमेव कर्तव्यम्। तत्र कृते पूर्वैकादेशे चण्याश्रये गुणो वृद्धिरेचीति वृद्धौ सि
द्धं द्वित्यौह इति। अनकारान्ते चोपपदे वहे श्छन्दसि ण्विर्न दृश्यते। प्रयोगदर्शने वा सत्यूहतेः क्विपि प्रयोगो भविष्यति किमूठा
देशविधानेनेति परिभाषाया ज्ञापकमूठ् विधिः। तस्यां हि सत्यां बहिरङ्गस्य संप्रसारणस्यासिद्धत्वादन्तरङ्गो गुणो न स्यादित्यू
ठ् विधीयते। पूर्वेषुकामशमइति। पूर्व इषुकामशमी अ इति स्थिते यद्यन्तरङ्गत्वादाद्गुणः स्यात्तदा पूर्वोत्तरपदयोर्व्यपवर्गा-
भावादुभयत आश्रयणोन्तादिवद्भावनिषेधाच्च दिशोमद्राणां प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिर्न स्यात्। उत्तरपदवृद्धौ
सर्वं चेति च शब्दाद्दिक्शब्दाश्चेति तथैव पूर्वपदान्तोदात्तत्वं न स्यात्। सावकाशं चैतदुभयं पूर्वकार्षमृत्तिक इति। गुडोदक-

यदयं वाह ऊठ् इति ऊठं शास्ति। तस्य दोषः पूर्वपदोत्तरपदयोर्वृद्धिस्वरावेकादेशात्। तस्यैतस्य लक्षणस्य दोषः पूर्वोत्तरपदयोर्वृद्धिस्वरावेकादेशादन्तरङ्गतो मिनिर्वृत्तात् न प्राप्नुतः। पूर्वेषुकामशमः। अपरेषुकामशमः। गुडोदकं तिलोदकम्। उदकेकेवले इति पूर्वोत्तरपदयोर्व्यपवर्गाभावान्न स्यात्। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति पूर्वोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति। यदयं नेन्द्रस्य परस्येति प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्। इन्द्रे द्वावचौ। तत्रैकोयस्येति लोपेनापह्रियतेऽपर एकादेशेन ततोऽनच्कइन्द्रः संपन्नः तत्र कः प्रसङ्गो वृद्धेः। पश्यति त्वाचार्यः पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति। ततो नेन्द्रस्य परस्येति प्रतिषेधं शास्ति। यणादेशादियुवौ। यणादेशादियुवोअन्तरङ्गतो मिनिर्वृत्तात् न प्राप्नुतः। वैयाकरणः। सौवश्व इति। लक्षणं हि भवति। य्वोरचि वृद्धिप्रसङ्गे इयुवौ भवत इति। नैष दोषः। अनवकाशौ इयुवौ। अचीत्युच्यते। किं पुनः कारणमचीत्युच्यते। इह माभूताम्। ऐतिकायनः औपगव इति। स्तामत्रेयुवौ लोपो व्योर्वलीति लोपो भविष्यति। यत्र तर्हि लोपो नास्ति। श्रेयमेधः श्रैयङ्गव इति। उसिपररूपाच्च। उसिपररूपाच्चान्तरङ्गतो मिनिर्वृत्तादियादेशो न प्राप्नोति। पचेयुः यजेयुः। नैष दोषः। नैवं विज्ञायते याद् इत्येतस्य इयुभवतीति।

मिति। उदकेकेवले इति पूर्वपदान्तो——दात्तत्वं न स्यात्। उदश्विदुदकमित्यादावेव तु स्यात्। प्रसङ्गेन व्याकरणान्तरे लक्षणं
विचारयितुमाह। यणादेशादिति। लोपो भविष्यतीति। ननु बहिरङ्गत्वादियुवोरसिद्धत्वाल्लोपो न प्राप्नोति। अत्राहुः। समुदाय
स्यासिद्धत्वं नावयवस्येति। समुदायस्यासिद्धत्वे सामर्थ्यात्तदवयवस्याप्यसिद्धत्वमिति चिन्त्यमेतत्। पचेयुरिति। पच् अ या उ
स् इति स्थिते यद्यत्रान्तरङ्गत्वात्पररूपं क्रियेत तदा व्यपवर्गाभावादियादेशो न स्यात्। एकादेशस्यान्तवत्त्वाद्भविष्यतीति चेद्
एवमपि रूपं न सिद्ध्येत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यासित्यस्येति। सलोपापवादइ्यादेशः। अकृते सलोपेनास्तिपररूपप्रसङ्गः। गोमत्प्रियइति। यद्यत्र लोपः स्यात्तदा प्रत्ययल
क्षणेन नुमादिः स्यात्। ग्रामणिकुलमिति। यणादिषु कृतेषु लुकि सति रूपं न सिद्ध्येत्। इकादिति। पूर्वमेकादेशे कृते तस्यादि
वद्भावात्लुकि सति रूपं न सिद्ध्येत्। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इत्यस्य प्रत्ययोत्तरपदयोश्चेत्यत्र ज्ञापित-
त्वात्सिद्धम्॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम्॥ यू
स्त्र्याख्यौ नदी॥ यूइति किमर्थमिति। स्त्र्याख्यं नदीत्येतावदेवास्तु। ज्ञापकादापो न भविष्यतीति प्रश्नः। एषस्वरइति। पूर्वप

कथं तर्हि यासित्येतस्य इयू भवतीति। लुकूलोपयणयवायाऽवेकादेशेभ्यः॥ लोपयणयवायाऽवेकादेशे
भ्यो लुकूबलीयानिति वक्तव्यम्। लोपात्। गोमान्प्रियो यस्य स गोमत्प्रियः। गोमानिवाचरति गोमत्यते यवमत्य
ते। यणादेशात्। ग्रामण्यः कुलं ग्रामणिकुलम्। सेनान्यः कुलं सेनानिकुलम्। अयवायावेकादेशेभ्यः। गवे हितं
गोहितम्। रायः कुलं रैकुलम्। नावः कुलं नौकुलम्। इकादेशं इकमयम्। लुक्प्राप्नोत्येते विधयश्च। परत्वादे
ते विधयः स्युः। लुग्बलीयानिति वक्तव्यम्। लुकू यथा स्यात्॥ ॥इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याक
रणमहाभाष्ये प्रथमस्याध्यायस्य चतुर्थपादे प्रथममाह्निकम्॥ यू स्त्र्याख्यौ नदी॥ यूइति किमर्थम्। खट्वा
। माला। किं च स्यात्। खट्वाबन्धुः मालाबन्धुः। नदीबन्धुनीत्येष स्वरः प्रसज्येत। इह च बहुखट्वक इति। नद्यृतश्चे
ति नित्यः कप्प्रसज्येत। नैष दोषः आचार्यप्रवृत्तिर्ज्ञापयति नापो नदीसंज्ञा भवतीति। यदयं ङेराम्नद्याम्नी
भ्य इति पृथगापू ग्रहणं करोति। इह तर्हि मात्रे मातुरित्याण्नद्या इत्याट् प्रसज्येत। किं पुनरिदं दीर्घयोर्ग्रह
णमाहो स्विद्ध्रस्वयोः। किं चातः। यदि दीर्घयोर्ग्रहणं यूइति निर्देशो नोपपद्यते। दीर्घाद्धि पूर्वसवर्णदीर्घः प्रतिषिध्यते।

दप्रकृतिस्वरं बाधित्वा पूर्वपदान्तोदात्तत्वमित्यर्थः। दृश्यते च पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वम्। खट्वाशब्दस्य नित्स्वरेणा
द्युदात्तत्वात्। मातुरिति। मातृशब्दः संबन्धिवचनः स्त्रीविषय एवेति नाख्याग्रहणेन निवर्त्यते। परिच्छेत्तृवाची त्वन्य एव मातृश
ब्दः। नद्यृतश्चेति कप् इहाग्रहणं स्त्र्यर्थं स्याद्बहुपितृक इत्यज्ञापकमृकारान्तानां नदीसंज्ञाभावस्य। किं पुनरिति। ननु समानधर्मानुप
पत्त्या संदेहाभावात्प्रश्नानुपपत्तिः। न हि दीर्घनिर्देशो यूइति निर्देशोपपत्तिः। एवं तर्हि युक्तायुक्तत्वनिरूपणाय प्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तरत्रेति। ह्रस्वनिर्देशे ह्रस्वद्व्येकत्वस्याविवक्षितत्वाद्यूह्रस्वावितिविशेषणाविशेष्यभावोपपत्तिः। असतितुविशेषणेमात्रे मातुरित्यत्रापिप्रसङ्गः। अथह्रस्वयोरिति। दीर्घयोरप्यणसवर्णान्हस्वातीतिसिद्ध्यति। ननुचोकालइत्यत्रोक्तमणुदित्सवर्ण स्येत्यत्राशब्दसंज्ञाग्रहणमनुवर्ततोततश्चसवर्णग्रहणेननभाव्यम्। नैषदोषः। नेयङुवङ्स्थानावस्त्रीतिप्रतिषेधात्सव- र्णग्रहणंभविष्यतीति। नहिह्रस्वद्व्यङुवङ्स्थानःस्त्र्याख्योऽस्ति। अस्त्रीत्ययमपिनिषेधपर्युदासःसवर्णग्रहणस्यज्ञापकः ॥ अवश्यमत्रेति। तत्रदीर्घग्रहणपक्षेशकटिशब्दस्याप्राप्तपक्षेनदीसंज्ञाविधेया। ह्रस्वपक्षेतुनित्यप्राप्तपक्षेबाध्येतिनास्ति विशेषः। अथतुबहुाद्विशकटिशब्दो विभाषाङीषर्थःपक्षेतेनदादीर्घनिर्देशपक्षेपाक्षिकेङीषिहेशकटिइतिभवतिशक

उत्तरत्रचसंज्ञिविशेषणंनप्रकल्प्येत यूह्रस्वाविति। यदियूनह्रस्वौअथह्रस्वौनयूयूह्रस्वौचेतिविप्रति षिद्धम्। अथह्रस्वयोः। हेशकटे। अत्रापिप्रसज्येत। नैषदोषः। अवश्यमत्रविभाषानदीसंज्ञैषितव्या ।उभयंहीष्यते। हेशकटिहेशकटेइतिच। इहतर्हिशकटिबन्धुरितिनदीबन्धुनीत्येषस्वरःप्राप्नोति। इ हचबहुशकटिरितिनद्युतश्चेतिकप्प्रसज्येत। नैषदोषः। ङितिह्रस्वश्चेत्ययंनियमार्थोभविष्यति। ङि त्येवयूह्रस्वौनदीसंज्ञौभवतःनान्यत्रेति। केमर्थ्यान्नियमोभवतिविधेयंनास्तीतिकृत्वा। ।इहचा स्तिविधेयम्। किम्। नित्यानदीसंज्ञाप्राप्तासाविभाषाविधेया। तत्रापूर्वोविधिरस्तुनियमोवास्त्विति। अ पूर्वएवविधिर्भविष्यतिननियमः। अथायंनित्योयोगःस्यात्प्रकल्प्येतनियमः। बाढंप्रकल्प्येत। नित्यस्त र्हिभविष्यति। तत्कथम्। योगविभागःकरिष्यते। इदमस्ति यूस्त्र्याख्यौनदी। नेयङुवङ्स्थानावस्त्री। वामि। त तोङिति। ङितिचेयङुवङ्स्थानौयूवाअस्त्रीनदीसंज्ञौनभवतः। ततोह्रस्वौ। ह्रस्वौचयूस्त्र्याख्यौङितिनदीसं ज्ञौभवतः। इयङुवङ्स्थानौवानेतिनिवृत्तम्।

टिशब्दस्यहेशकटेइति॥ ह्रस्वनिर्देशेतुङीषिसत्यसत्यपिहेशकटीतिप्राप्नोतीत्यस्तिभेदः। एषस्वरइति। पूर्वपदान्तोदात्तत्व म्। पूर्वपदप्रकृतिस्वरेणतुशकटिशब्देत्रयोप्यचःपर्यायेणउदात्ताभवन्ति। शकटिशकट्योरक्षरमक्षरंपर्यायेणेतिवचनात्। इहचेति। शेषाद्विभाषेतिविभाषाकरिष्यतेनित्यश्चप्राप्नोति। केमर्थ्यादिति। कोर्थोस्येतिकिमर्थंतस्यभावःकेमर्थ्यम्। प्रश्न- विषयविषयिणोःसंबन्धोभावप्रत्ययेनोच्यते। यत्रतत्साध्यस्यार्थस्यसिद्धत्वात्किमर्थमितिप्रश्नस्तस्यैवनियमार्थत्वंन तुप्रयोजनेसतीत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्येवं प्राकटयदिति। नित्यया नदीसंज्ञया घिसंज्ञाया बाधितत्वात्। ततो घीति। एकविषयत्वाच्च घिनदीसंज्ञयोरेकसंज्ञाधि-
काराच्च पर्यायेण प्रवृत्तौ प्राकट्यै प्राकटयेदिति च सिद्ध्यति। अविशेषेणेति। ह्रस्वयोर्दीर्घयोश्चेत्यर्थः। बाध्यत्वादुत्सर्गे सामान्या
दुत्सर्गादित्युक्तम्। परत्वात्तु पुन्नपुंसकयोः कृतार्था घिसंज्ञा नदीसंज्ञाया बाधिका। तस्यामिति। अङिति तु प्राकटि बन्धुर्ब
हुप्राकटिरित्यादौ घिसंज्ञया नदीसंज्ञाया बाधितत्वाद्दोषाभावः। छन्दोवदिति। तादर्थ्यात्सूत्रेष्वपिच्छन्दःशब्दो वर्तत

यद्येवं शकटये अत्र गुणो न प्राप्नोति। द्वितीयो योगविभागः करिष्यते। शेषग्रहणं न करिष्यते। कथमिदमस्ति। यू
स्त्र्याख्यौ नदी। नेयङुवङ्स्थानावस्त्री। वामि। ततो ङिति। ङिति च इयङुवङ्स्थानौ यूवाऽस्त्री नदीसंज्ञौ न भवतः। ततः ह्र
स्वौ। ह्रस्वौ च यू स्त्र्याख्यौ ङिति नदीसंज्ञौ भवतः। इयङुवङ्स्थानौ वा नेति निवृत्तम्। ततो घि। घिसंज्ञौ भवतः स्त्र्याख्यौ यू ह्र
स्वौ ङिति। ततोऽसखि। सखिवर्जितौ च यू ह्रस्वौ घिसंज्ञौ भवतः। स्त्र्याख्यौ ङितीति च निवृत्तम्। यदि तर्हि शेषग्रहणं क्रियते नार्थ
एकेनापि योगविभागेन। अविशेषेण नदीसंज्ञोत्सर्गः। तस्याः ह्रस्वयोर्घिसंज्ञा बाधिका। तस्यां नित्यं प्राप्तायामियं ङि
ति विभाषाऽऽरभ्यते। अथवा पुनरस्तु दीर्घयोः। ननु चोक्तं निर्देशो नोपपद्यत इति। दीर्घाद्धि पूर्वसवर्णदीर्घः प्रतिषिध्य
त इति। नैष दोषः। वा छन्दसीत्येवं भविष्यति। छन्दसीत्युच्यते। न चेदं छन्दः। छन्दोवत्सूत्राणि भवन्तीति। यदप्यु
च्यते। उत्तरत्र विशेषणं न प्रकल्पेत यू ह्रस्वाविति। यदि यू न ह्रस्वौ अथ ह्रस्वौ न यू यू ह्रस्वाविति च विप्रतिषिद्धमि
ति। नैतद्विप्रतिषिद्धम्। आहायं यू ह्रस्वाविति। यदि यू न ह्रस्वौ अथ ह्रस्वौ न यू त एवं विज्ञास्यामः। य्वोर्यौ ह्रस्वावि
ति। कौ च य्वोर्ह्रस्वौ। सवर्णौ। अथ स्त्र्याख्याविति कोऽयं शब्दः। स्त्रियमाचक्षाते स्त्र्याख्यौ। यद्येवं स्त्र्याख्यायाविति प्राप्नो
ति। अनुपसर्गे हि को विधीयते। न तर्हीदानीमिदं भवति। यस्मिन्दशसहस्राणि पुत्रे जाते गवां ददौ। ब्राह्मणेभ्यः प्रि
याख्येभ्यः सोऽयमुञ्छेन जीवति। छन्दोवत्कवयः कुर्वन्ति।

इति छन्दोविषयं कार्यं सूत्रेष्वपि प्रवर्तते। गौणमुख्यन्यायश्छन्दःप्रदेशेषु निर्देशान्यथानुपपत्त्या नाश्रीयते। अथेति
। यथार्थोऽभिप्रेतस्तथा न शब्दसंस्कारोऽस्तीति प्रश्नः। अनुपसर्गे हीति। यत्त्वातश्चोपसर्ग इति कः स परत्वात्कर्मण्यणित्यणा बा
ध्यते। न तर्हीति। शिष्टप्रयोगादस्मिन्विषये कप्रत्ययस्य साधुत्वमेष्टव्यमिति भावः। छन्दोवत्कवय इति। तेन च्छान्दसत्वादुविषयति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नह्येषेति। असाधवएवैवमादयः। नतुतत्प्रामाण्यात्साधुत्वव्यवस्था। आख्यायेतइति। घञर्थेकविधानमितिकप्रत्ययः। साधनंकृतेतिसप्तमीसमासः। कृत्स्त्रियाइति। नहितयोरीकारोकारौस्त्रियांविहितौयथाङ्यूङाविति भावः। एवंतर्हीति। आख्यानमाख्या। आतश्चोपसर्गइत्यङ्। स्त्रियामाख्यानमनयोरितिबहुव्रीहिः। अत्रपक्षेसूत्रेणैवप्रत्ययःसमासश्चसिद्ध्यतीतिभावः। स्त्रियांस्त्रीविषयेआख्याप्रतिपादनमित्यर्थः। एवमपीति। नहितस्याःस्त्रियांविधानमित्यर्थः। एवंतर्हीति। असरूपत्वादणापक्षेविजन्नबाध्यते। समुदायधर्मस्यावयवआरोपात्कृत्स्त्रियाअप्यत्रपक्षेसंज्ञासिद्ध्यति। आख्याग्रहणमिति। विच्पक्षेआख्याशब्दएवायम्। कप्रत्ययपक्षेतुप्रवृत्तिनिमित्तनिर्देशः। यूस्त्रियामित्येवस्त्र्यर्थवृत्तित्वंलभ्यतइतिप्रश्नः॥ स्त्रीविषयार्थमिति। आख्याग्रहण

नह्येषादृष्टिः। एवंतर्हिकर्मसाधनोभविष्यति। स्त्रियामाख्यायेतेस्त्र्याख्यौ। यदिकर्मसाधनः। कृत्स्त्रियाधातुस्त्रियाश्चनसिद्ध्यति। तन्त्र्यैलक्ष्म्यैश्रियैभ्रुवै। एवंतर्हिबहुव्रीहिर्भविष्यति। स्त्रियामाख्याअनयोःस्त्र्याख्यौ। एवमपिकृत्स्त्रियाधातुस्त्रियाश्चनसिध्यति। तन्त्र्यैलक्ष्म्यैश्रियैभ्रुवे। एवंतर्हिविच्भविष्यति। अथवापुनरस्तुकएव। स्त्रियमाचक्षातेस्त्र्याख्याविति। ननुचोक्तंस्त्र्याख्यायाविति प्राप्नोति अनुपसर्गेहिकोविधीयतइति। मूलविभुजादिपाठात्कोभविष्यति। एवंचकृत्वासोप्यदोषोभवति। यदुक्तम्। यस्मिन्दशसहस्राणिपुत्रेजातेगवांददौ। ब्राह्मणेभ्यःप्रियाख्येभ्यःसोयमुञ्छेनजीवतीति॥ अथाख्याग्रहणंकिमर्थम्। नदीसंज्ञायामाख्याग्रहणंस्त्रीविषयार्थम्। नदीसंज्ञायामाख्याग्रहणंक्रियतेस्त्रीविषयार्थम्। स्त्रीविषयावेवयौनित्यंतयोरेवनदीसंज्ञायथास्यात्। इहमाभूत्। ग्रामण्येसेनान्येस्त्रियेइति॥ प्रथमलिङ्गग्रहणंच॥ प्रथमलिङ्गग्रहणंचकर्तव्यम्। प्रथमलिङ्गेयौस्त्र्याख्यौइतिवक्तव्यम्। किंप्रयोजनम्।

सामर्थ्यान्नियमआश्रीयते। स्त्रियमेवयावाचक्षातेनतुलिङ्गान्तरयुक्तमपीत्यर्थः। ग्रामण्येइति। ग्रामणीशब्दःक्रियाशब्दत्वात्त्रिलिङ्गत्वात्स्त्रीविषयोनभवतीतिस्त्रियामपिवर्तमानोनदीसंज्ञोनभवति। यद्येवमिषुप्रभृतीनामुभयलिङ्गानांपद्मादीनांचगुणवचनत्वात्सर्वलिङ्गानांस्त्रीविषयत्वाभावात्स्त्रियांवृत्तौङितिह्रस्वश्चेतिनदीसंज्ञानप्राप्नोति। एवंतर्हिङितिह्रस्वश्चेत्यत्रैवंविधोनियमोनाश्रीयते। केवलस्यस्त्रीशब्दस्यानुवर्तनादित्यदोषः। प्रथमलिङ्गग्रहणमिति। यःशब्दःप्रथमंस्त्रीत्वविशिष्टार्थमाहपश्चात्तुप्रकारान्तरेणार्थान्तरंलिङ्गान्तरयुक्तंतस्यतदानीमस्त्र्याख्यत्वादप्राप्तानदीसंज्ञानेनविधीयते। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्विबिति। कुमारीमिच्छत्यात्मनः कुमारीयति। ततः कर्तरि क्विप्। अथवा कुमारीवाचरतीत्याचारे क्विपं विधाय कर्तरि क्विब्विधेयः। खरकुटीइति। खरकुटीवेतीवार्थे संज्ञायामिति कनो लुम्मनुष्य इति लुप्। यद्यप्यत्र युक्तवद्भावात्स्त्रीत्वमस्ति तथापि स्त्र्याश्रयस्य पुंस्त्वस्यानिवर्तनान्नायं स्त्रियामेव वर्तते किं तर्हि पुंस्यपीत्याख्याग्रहणान्नियमार्थादप्राप्तानदीसंज्ञा विधीयते। अतितन्त्र्यै इति। तन्त्रीमतिक्रान्त इति तत्पुरुषः। अवयवस्त्रीविषयत्वादिति। अन्तरङ्गत्वात्पूर्वमेव स्त्र्याख्यत्वात्स्त्रवृत्ता नदीसंज्ञा पश्चादुपजायमाने लिङ्गान्तरयोगे बहिरङ्गेन न निवर्त्तत इति भावः। आध्यै इति। आध्यायतीति ध्यायतेः संप्रसारणं चेति क्विप् संप्रसारणं च। अत्रावयवो धीशब्द इयङ्स्थानः। समुदायस्य त्वेरनेकाच इति यणा बाधितत्वादियङ्स्थानत्वाभावः। न चाधी-

प्रयोजनं क्विब्लुप्समासाः। क्विप्। कुमार्यै ब्राह्मणाय। लुप्। खरकुट्यै ब्राह्मणाय। समासः। अतितन्त्र्यै ब्राह्मणाय। अतिलक्ष्म्यै ब्राह्मणाय। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। अवयवस्त्रीविषयत्वात्सिद्धम्। अवयवोऽत्र स्त्रीविषयः। तदाश्रया नदीसंज्ञा भविष्यति। अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङ्वङ्स्थानप्रतिषेधे यण्स्थानप्रतिषेधप्रसङ्गोऽवयवस्येयङ्वङ्स्थानत्वात्। अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङ्वङ्स्थानप्रतिषेधप्रसङ्गे यण्स्थानयोरपि स्त्रियोः प्रतिषेधः प्रसज्येत। आध्यै ब्राह्मण्यै। किं कारणम्। अवयवस्य इयङ्स्थानत्वात्। अवयवोऽत्र इयङ्स्थानः। सिद्धं त्वङ्गरूपग्रहणाद्यस्याङ्गस्येयुवौ तत्प्रतिषेधात्। सिद्धमेतत्। कथम्। अङ्गरूपं गृह्यते यस्याङ्गस्य इयुवौ भवतस्तस्येदं ग्रहणम्। न चैतस्याङ्गस्य इयुवौ भवतः। ह्रस्वे युवुस्थानप्रवृत्तौ च स्त्रीवचने॥

प्रधीशब्दौ क्रियाशब्दत्वात्त्रिलिङ्गत्वात्स्त्रीविषयौ न भवतः। यथैव ग्रामणीसेनानीशब्दाविति नदीसंज्ञया न भाव्यमिति पूर्वापरव्याघातदर्शनाच्चिन्त्यमेतत्। सिद्धं त्विति। अचि श्नुधात्वित्यनेनाङ्गस्येयङ्वङ्विधानात्सामर्थ्याक्षिप्तमत्राङ्गम्। तेन यस्याङ्गस्येयङ्वङौ निर्वर्त्येते तत्स्य नदीसंज्ञानिषेधः। आध्यै इत्यत्रावयवस्याङ्गत्वं नास्ति। अङ्गस्य तु एरनेकाच इति यण्विधानादियङ्वङ्स्थानता नास्तीति निषेधाभावः। एतदर्थमेव स्थानग्रहणं कृतम्। इयङ्वङोर्यदा स्थितिस्तदा प्रतिषेधो यथा स्यादि यदा त्वपवादेन बाधस्तदा माभूत्। ह्रस्वेति। अवयवस्त्रीविषयत्वात् सिद्धमित्यस्यापवादः। ह्रस्वे इयङ्वङ्स्थानानां प्रवृत्तिरर्थान्तरसंक्रान्तिस्तस्यां सत्यां स्त्रीवचन एव संज्ञा भवति न लिङ्गान्तरवचनो च शब्दादप्रवृत्तौ चेति ज्ञेयम्। एतदेव प्राक्प्रवृत्तेरिति भाष्ये स्पष्टीकृतम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपर आहेति। चशब्दोत्र न पठ्यत इति पूर्वस्माद्विशेषः। नहि प्राक् प्रवृत्तेः किंचिदनिष्टमापद्यते यदर्थः समुच्चयः क्रियते। पठ्यमानोपि च शब्दः स्त्रीवचनशब्देन संबध्यते स च नियमार्थः। क्वचिद्भाष्ये पठ्यते। स्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यम्। शकट्यै अतिशकट्यै ब्राह्मण्याय। क्व माभूत्। शकटये अतिशकटये ब्राह्मण्यै इत्यादि। एष त्वपपाठः। उपसंहारस्यान्यथाभि-

ह्रस्वौ च इयुवस्थानौ च प्रवृत्तौ च प्राक् च प्रवृत्तेः स्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यम्। शकट्यै अतिशकट्यै ब्राह्मण्यै। क्व माभूत्। शकटये अतिशकटये ब्राह्मणाय। धेन्वै अतिधेन्वै ब्राह्मण्यै। क्व माभूत्। धेनवे अतिधेनवे ब्राह्मणाय। श्रियै अतिश्रियै ब्राह्मण्यै। क्व माभूत्। श्रियै अतिश्रियै ब्राह्मणाय। भ्रुवै अतिभ्रुवै ब्राह्मण्यै। क्व माभूत्। भ्रुवे अतिभ्रुवे ब्राह्मणाय। अपर आह। ह्रस्वौ च इयुवस्थानौ च प्रवृत्तावपि स्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यम्। किं प्रयोजनम्। शकट्यै अतिशकट्यै ब्राह्मण्यै। क्व माभूत्। शकटये अतिशकटये ब्राह्मणाय। धेन्वै अतिधेन्वै ब्राह्मण्यै। क्व माभूत्। धेनवे अतिधेनवे ब्राह्मणाय। श्रियै अतिश्रियै ब्राह्मण्यै। क्व माभूत्। श्रियै अतिश्रियै ब्राह्मणाय। भ्रुवै अतिभ्रुवै ब्राह्मण्यै। क्व माभूत्। भ्रुवे अतिभ्रुवे ब्राह्मणाय। किमर्थं पुनरिदमुच्यते। प्रथमलिङ्गग्रहणं चोदितम्। तद्धृष्यं विजानीयात्स्वैमेतद्विकल्पत इति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे ह्रस्वौ चेयुवस्थानौ च प्रवृत्तौ च प्राक् च प्रवृत्तेः स्त्रीवचनावेवेति॥ षष्ठीयुक्तश्छन्दसि वा॥ ॥योगविभागः कर्तव्यः। षष्ठीयुक्तश्छन्दसि। षष्ठीयुक्तः पतिशब्दश्छन्दसि घिसंज्ञो भवति। ततो वा। वा छन्दसि सर्वे विधयो भवन्ति। सुपां व्यत्ययः। तिङां व्यत्ययः। वर्णव्यत्ययः। लिङ्गव्यत्ययः। कालव्यत्ययः। पुरुषव्यत्ययः। आत्मनेपदव्यत्ययः। परस्मैपदव्यत्ययः। सुपाम्। युक्ता माता सीद्धुरि दक्षिणायाः। दक्षिणायामिति प्राप्ते। तिङां व्यत्ययः। चषालं ये अश्वयूपाय तक्षति। तक्षन्तीति प्राप्ते॥ वर्णव्यत्ययः। त्रिष्टुभौजः शुभितमुग्रवीरम्। सुहितमिति प्राप्ते। लिङ्गव्यत्ययः। मधोस्तृप्ता इवासते। मधोर्गृह्णाति। मधुन इति प्राप्ते।

धानात्॥ षष्ठीयुक्तः॥ ॥योगविभाग इति। तेन परिभाषा संपद्यते। यावदिह शास्त्रे कार्यं तच्छन्दसि वा भवति। तत्रानयैव सिद्धत्वाद् दुद्दुस्त्वं छन्दसीत्यादि न वक्तव्यम्। एतदर्थश्च व्यत्ययो बहुलमित्यत्र योगविभागो न व्याख्येयः। उभयत्र विभाषा चेयं विज्ञेया। सुपामिति। कर्मणि द्वितीयेत्यादेर्नियमस्य विकल्पनादनियमोपि छन्दसि भवतीति सुपां व्यत्ययसिद्धिः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालव्यत्ययइति। कालविहितप्रत्ययव्यत्ययइत्यर्थः॥ यस्मात्प्रत्ययविधिः॥ ॥यस्मादितिव्यपदेशायेति। संज्ञिनइतिशेषः। सतिहि
यस्मादित्यस्मिंस्तदादीत्यनेनसंज्ञीनिर्देष्टुंशक्यतेनान्यथा। परामृष्टव्यसंज्ञ्यनिर्देशेतदितिपरामर्शाभावात्तदादीत्यसंबद्धमेवस्या
त्। स्त्रीयतीति। स्त्रीशब्दात्क्युशब्दस्यतल्लोपस्यचविधिरस्तीत्यङ्गसंज्ञास्यादङ्गसंज्ञाचेतिसंज्ञाद्वयनिमित्तोयस्येतिलोपःप्रसज्येत। ई
शइदमादेशस्ययस्येतिलोपस्यासिद्धवदत्राभादित्यसिद्धत्वंनास्ति। शाभ्भादसिद्धत्वमितिकेषांचिदभ्युपगमात्। पदान्तरनिरपेक्ष
पदसंस्कारपक्षेस्थानिवद्भावोनास्ति नानादिष्टादचःपूर्वःस्त्रीशब्दइति। अथेति। यस्मात्प्रत्ययइत्यत्रविधीयतइत्यध्याहारि-

कालव्यत्ययः। श्वोऽग्नीनाधास्यमानेन। श्वःसोमेनयक्ष्यमाणेन। श्वआधाता। श्वोयष्टेतिप्राप्ते। पुरुषव्यत्ययः। अधास
वीरैर्दशभिर्वियूयाः। वियूयादितिप्राप्ते। आत्मनेपदव्यत्ययः। ब्रह्मचारिणमिच्छते। इच्छतीतिप्राप्ते। परस्मैपद
व्यत्ययः। प्रतीपमन्यऊर्मिर्युध्यति। अन्वीपमन्यऊर्मिर्युध्यति। युध्यतइतिप्राप्ते॥ यस्मात्प्रत्ययविधिस्तदादिप्रत्य
येऽङ्गम्॥ ॥यस्मादितिव्यपदेशाय। अथप्रत्ययग्रहणंकिमर्थम्। यस्माद्विधिस्तदादिप्रत्ययेऽङ्गमितीयत्युच्यमा
नेस्त्रीइयतीस्त्रीयतीत्यत्रापिप्रसज्येत। प्रत्ययग्रहणेपुनःक्रियमाणेनदोषोभवति। अथविधिग्रहणंकिम-
र्थम्। यस्मात्प्रत्ययस्तदादिप्रत्ययेऽङ्गमितीयत्युच्यमानेदधिअधुनामधुअधुनाअत्रापिप्रसज्येत। विधिग्रह
णेपुनःक्रियमाणेनदोषोभवति। तदेतत्प्रत्ययग्रहणेनविधिग्रहणेनचसमुदितेनक्रियतेसंनियोगः। य
स्माद्यःप्रत्ययोविधीयतेतदादितस्मिन्नङ्गसंज्ञंभवतीति। अथतदादिग्रहणंकिमर्थम्। अङ्गसंज्ञायांतदा
दिग्रहणंस्यादिनुमर्थम्। अङ्गसंज्ञायांतदादिग्रहणंक्रियतेस्याद्यर्थंनुमर्थंच।

ध्यतइतिप्रश्नः। दधिअधुनेति। असतिविधिग्रहणेपरशब्दस्याप्यध्याहारःस्यात्। इदमोयदाअधुनाप्रत्ययोनिपात्यतेइद
मादेशस्यचेशोयस्येतिलोपस्तदेदंप्रत्युदाहरणम्। यदात्विदमोऽशभावःधुनाचप्रत्ययः। तदास्त्रीयतीत्येतदेवप्रत्युदा
हरणम्। ननुक्रियमाणेपिविधिग्रहणेऽत्राङ्गसंज्ञाप्राप्नोति। अस्तिहिदधिशब्दात्सुप्रत्ययविधिरधुनाप्रत्ययश्चपरः। ततश्चा
ङ्गसंज्ञायांभसंज्ञायांचसत्यांयस्येतिलोपःप्राप्नोतीत्याह। तदेतदिति। प्रत्यासत्तिन्यायाश्रयणाद्यस्माद्यःप्रत्ययोविहितस्त-
स्मिन्नेवप्रत्ययेपरतस्तदाद्यङ्गमित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

करिष्यावद्ब्रिति। विकरणान्तस्याङ्गसंज्ञायां सत्यां तन्निबन्धनमतो दीर्घो यञीति दीर्घत्वं भवति। अन्यथा पापावइत्यादावेव स्यात्। पय्
धातोर्यङ्लुगन्तस्य वस्सिलोपो व्योर्वलीति यलोपे दीर्घत्वे च रूपम्। कुण्डानीति। यदानुम्परादिस्तदा नुसुपि चेति दीर्घत्वं सिद्ध्यति। द
धीनीत्यादौ तु अनकारान्तत्वान्न सिध्यति। पूर्वान्तपक्षे सामानीत्यादि न सिध्यति। यदा त्वभक्तत्वपक्षस्तदेदं प्रयोजनमादिग्रहणस्य
। पूर्वान्तपक्षस्तु स्थापित इत्यप्रयोजनमेतत्। मित्कुटोरिति। मित्कुटोः कृतयोरित्यर्थः। भाष्यकारस्तु वस्तुतोऽर्थं व्याचष्टे। मित्वत इति। भिन
त्तीति स्वोदाहरणमेतत्। कार्योदाहरणं च अभिनदिति। नित्यत्वाच्छ्नमि कृते अङ्गसंज्ञायामसत्यामडागमो न स्यादित्यङ्गसंज्ञोप
संख्यायते। संचस्करतुरिति। द्विर्वचने कृतेऽडभ्यासव्यवायेऽपीति सुट्चानङ्गत्वादृतश्च संयोगादेरिति गुणो न स्यात्। यदा तु पूर्वं
धातुरुपसर्गेण युज्यत इत्येष पक्षस्तदान्तरङ्गत्वात्सुटि कृते तदङ्गकस्य तद्ग्रहणेन ग्रहणात्स्कृशब्दादेव प्रत्ययविधिरित्यङ्गसं

स्याद्यर्थं तावत्। करिष्यावः करिष्यामः। नुमर्थम्। कुण्डानि। वनानि। मित्कुटो रूपसंख्यानम्। मित्वतः सुड्वत
श्चोपसंख्यानं कर्तव्यम्। मित्वतः। भिनत्ति छिनत्ति। अभिनत्। अच्छिनत्। सुड्वतः। संचस्करतुः संचस्करुः
। किं पुनः कारणं न सिध्यति। । सुटो बहिरङ्गत्वात्। बहिरङ्गः सुट् अन्तरङ्गो गुणः। असिद्धं बहिरङ्गम
न्तरङ्गे। वक्ष्यत्येतत्। संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थम्। यदि संयोगोपधग्रहणं क्रियते ना
र्थः संयोगादिग्रहणेन। इहापि सस्वरतुः सस्वरुरिति संयोगोपधस्येत्येव सिद्धम्। भवेदेवमर्थेन नार्थः।
इदं तु न सिध्यति संचस्करतुः संचस्करुरिति। किं पुनः कारणं न सिध्यति। इह तस्य वा ग्रहणं तदादेर्वा।
न चेदं तत् नापि तदादि। सिद्धं तु तदाद्यादिवचनात्। सिद्धमेतत्। कथम्। तदाद्याद्यङ्गसंज्ञं भवतीति
वक्तव्यम्। किमिदं तदाद्यादीति। तस्यादिस्तदादिस्तदादिरादिर्यस्य तदिदं तदाद्यादीति। स तर्हि तथा नि
र्देशः कर्तव्यः। न कर्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः।

ज्ञापितं स्यादेव। स्कृशब्दस्य द्विर्वचने कृते शर्पूर्वाः खय इति खयःशेषे संचस्करतुरिति सिद्ध्यति। किंतु संस्कृषीष्ट संस्क्रियत इति
ङ्गुणनिवृत्तये कात्पूर्वग्रहणेनाभक्तत्वं सुटो ज्ञापितमिति पूर्वमपि प्रत्ययोत्पत्तेः सुटि कृते नास्ति सुट्सहितस्याङ्गसंज्ञेति गु
णो न स्यादित्युपसंख्यानम्। तस्यैवेति। व्यपदेशिवद्भावादिति भावः। तस्यादिरिति। भिद आदिर्भकारः स आदिर्भिनदित्य
स्येति भवत्यङ्गसंज्ञा। एवं करोतेर्द्विर्वचने कृते चस्कृशब्दे स्थिते यस्मात्कृशब्दात्प्रत्ययविधिस्तस्यादिश्चकारः स एवा
दिश्चस्कृशब्दस्य।

CC-0. In Public Domain. Digitization by eGangotri

उष्ट्रमुख इति। यथा गतार्थत्वान्मुखशब्दनिवृत्तिस्तथा पूर्वं प्रतिपादितम्। इहापि प्रतिलक्ष्यं लक्षणभेदात्तदवयवे तच्छब्दो वर्तत इति तदवयवादित्वान्नित्सुटोः कृतयोरङ्गसंज्ञा सिद्ध्यति। एकेनाप्यपायेइति। अपाये तस्यरूपस्यापगमे। एकेन करणेनैकाभावेनेत्यर्थः। यावर्षकृतं दुर्भिक्षमिति वर्षमभवत् करणं संपद्यते। अङ्गसंज्ञा चापीति। यस्मात्प्रत्ययविधिस्तदादीति विशिष्टरूपपरिग्रहात्। तदेकदेशभूतमिति। तन्मध्यपतितत्वात्तदेकदेशत्वावसायः। स्वार्थमिति। असति हि द्वितीये प्रत्ययग्रहणे प्रत्ययविधानमात्रप्रतिबद्धाङ्गसंज्ञा

तद्यथा। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुखः। एवं तदाद्यादितदादीति। तदेकदेशविज्ञानाद्वा सिद्धम्। तदेकदेशविज्ञानाद्वा सिद्धमेतत्। तदेकदेशभूतं तद्ग्रहणेन गृह्यते। तद्यथा। गङ्गा यमुना देवदत्तेति। अनेका नदी गङ्गां यमुनां प्रविष्टा गङ्गा यमुनाग्रहणेन गृह्यते। तथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते। विषम उपन्यासः। इह केचिच्छब्दा अकृतपरिमाणानामर्थानां वाचका भवन्ति। य एते संख्याशब्दाः परिमाणशब्दाश्च पञ्च सप्तेति। तस्यैकेनाप्यपायेन भवन्ति। द्रोणः खारी आढकमिति नैवाधिके भवन्ति न चन्यूने। केचिद्यावदेव तद्भवति तावदेवाहुः। यथैते जातिशब्दा गुणशब्दाश्च। तैलं घृतमिति खार्यामपि भवति द्रोणेपि। शुक्लो नीलः कृष्ण इति हिमवत्यपि भवति वटकणिकामात्रेपि द्रव्ये। अङ्गसंज्ञा चाप्यकृतपरिमाणानां क्रियते सा केनाधिकस्य स्यात्। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति। यदयं नेदमदसोरकोरिति सककारयोः प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्। इदमदसोः कार्यमुच्यमानं कः प्रसङ्गो यत्सककारयोः स्यात्। पश्यति त्वाचार्यस्तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति ततः सककारयोः प्रतिषेधं शास्ति। अथ द्वितीयं प्रत्ययग्रहणं किमर्थम्। प्रत्ययग्रहणं पदादावप्रसङ्गार्थम्। प्रत्ययग्रहणं क्रियते। परादावङ्गसंज्ञा मा भूदिति। किं च स्यात्। स्त्र्यर्थं स्त्र्यर्थम्व्यर्थम्। अङ्गस्य यङुवङौ स्याताम्।

स्त्रीशब्दस्य प्राप्नोति। ततश्चतुर्थीविधानात्। ततश्चाङ्गाश्रयदूयङ् स्यात्। पुनः प्रत्ययग्रहणे तु यस्माद्यः प्रत्ययो विहितः स एव यदि परो भवति तदाङ्गसंज्ञा भवति। यस्मान्न प्रत्ययो विहितो नासौ परो लुप्तत्वात्। न च प्रत्ययलक्षणं भवति। न लुमताङ्गस्येति निषेधादियङादेशकार्यस्याङ्गत्वात्तस्मिन्कर्तव्ये निषेधप्रवर्तनात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिमाणार्थं चेति। अन्यथा देवदत्त ओदनमपाक्षीदिति देवदत्तशब्दात्सुप्रत्ययविधिरिति तदादेः संघातस्याङ्गसंज्ञायां सत्यां देवदत्तशब्दात्पूर्वोऽडागमः स्यात्। प्रत्ययग्रहणे तु सति यस्माद्यः प्रत्ययो विहितस्तस्मिन्नेव परतस्तदाद्यङ्गमिति विज्ञायमाने न भवत्यतिप्रसङ्गदोषः। दाक्षतयस्येति। दशावयवा येषां ते दशतयः। तेषु भवो दाशतयः। एतच्चानियमप्रतिपादनार्थं न त्वत्र दशत्वसंख्याविवक्षिता। अवयवान्विचार्य सूत्रमाक्षेप्तुं प्रश्नं करोति। तत्तर्हीति। सूत्रमित्यर्थः। प्रत्यय इति प्रकृत्येति। तेन नञ्ग्रहणमिस्त्राकिमिसां पश्येत्यादावेधुदीर्घाद्यभावः। प्राकरोदिति। लङि परतः पूर्वस्यानियतावधेरडागमो विधीयमान उपसर्गादेः स्यात्। सिद्धं त्विति। यत्र पूर्वः कार्यि-

परिमाणार्थं च। परिमाणार्थं च हि तीयं प्रत्ययग्रहणं क्रियते। यस्मात्प्रत्ययविधिस्तदाद्यङ्गमितीयत्युच्यमाने दाक्षतयस्याप्यङ्गसंज्ञा प्रसज्येत। तत्तर्हि कर्तव्यम्। न कर्तव्यम्। केनेदानीमङ्गकार्यं भविष्यति। प्रत्यय इति प्रकृत्याङ्गकार्यमध्येष्यते। यदि प्रत्यय इति प्रकृत्याङ्गकार्यमधीषे। प्राकरोत् उपैहिष्ट। उपसर्गात्पूर्वोऽडारो प्राप्नुतः। सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात्। सिद्धमेतत्। कथम्। प्रत्ययग्रहणे यस्मात्स प्रत्ययो विहितस्तदादेस्तदन्तस्य च ग्रहणं भवतीत्येषा परिभाषा कर्तव्या। कः पुनरत्र विशेषः एषा परिभाषा क्रियेत प्रत्ययग्रहणं वा। अवश्यमेषा परिभाषा कर्तव्या। बहून्येतस्याः परिभाषायाः प्रयोजनानि। प्रयोजनं धातुप्रातिपदिकप्रत्ययसमासतद्धितविधिस्वराः। धातु। देवदत्तश्चिकीर्षति। संघातस्य धातुसंज्ञा प्राप्नोति। प्रातिपदिक। देवदत्तो गार्ग्यः। संघातस्य प्रातिपदिकसंज्ञा प्राप्नोति। प्रत्यय। महान्तं पुत्रमिच्छति। संघातात्प्रत्ययोत्पत्तिः प्राप्नोति।

त्वेनाश्रीयते तत्र तदादेः कार्यं भवति। यत्र तु प्रत्ययान्तः संघात आश्रीयते तत्र तदादेः प्रत्ययान्तस्य ग्रहणं भवतीत्यर्थः। प्रत्ययग्रहणं वेति। प्रत्ययो गृह्यते यस्मिन्सूत्रे तत्। अङ्गसंज्ञासूत्रमित्यर्थः। अवश्यमिति। क्रियमाणेऽपि सूत्रे परिभाषावश्यं कर्तव्येति व्यापित्वात्परिभाषैवाश्रयणीया न तु सूत्रमित्यर्थः। संघातस्येति। ततश्च सुब्लुक्प्राप्नोति। महान्तं पुत्रमिति। समुदायस्यान्ते सुपः श्रवणात्सुबन्तत्वात्। सत्यां तु परिभाषायां समुदायस्यासुबन्तत्वादवयवस्य सापेक्षत्वादसामर्थ्यान्न भवति प्रत्ययः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋद्धस्येति। सुप्सुपेति विवक्षितायामपि संख्यायां समुदायस्य सुबन्तत्वात्समासप्रसङ्गः। परिभाषायां तु सत्यां समुदायस्यासुबन्तत्वात्सुबन्तसमुदायस्य च संख्याविवक्षायां समासाप्रसङ्गात्। अवयवस्य च सापेक्षत्वात्समासाभावः। संघातात्तद्धितोत्पत्तिरिति। ततश्च वृद्धिस्वरौ संघातस्य स्यातां पूर्वस्य च सुपो लुक्। एवं वक्ष्यामीति। योगविभागोऽत्र क्रियते। यस्मात्प्रत्ययविधिस्तदादि प्रत्यय इत्येकं सूत्रम्। अत्र सोपस्कारत्वात्सूत्राणां गृह्यमाणे गृह्यते इति वाक्यशेषः समर्थ्यते। प्रत्यये गृह्यमाणे यस्मात्प्रत्ययविधिस्तदादि गृह्यत इत्यर्थः। सांकूटिनमिति। अणिनुण् इति यदि कूटिन्नित्येतस्मात्क्रियेत तदा तस्यैवादिवृद्धिः स्या

समास। ऋद्धस्य राज्ञः पुरुषः। संघातस्य समाससंज्ञा प्राप्नोति। तद्धितविधि। देवदत्तो गार्ग्यायणः। संघातात्तद्धितोत्पत्तिः प्राप्नोति। स्वर। देवदत्तो गार्ग्यः। संघातस्य ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं प्राप्नोति। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं भवतीति न दोषो भवति। स्यात्तर्ह्येषा परिभाषा कर्तव्या। न कर्तव्या। एवं वक्ष्यामि। यस्मात्प्रत्ययविधिस्तदादि प्रत्यये गृह्यमाणे गृह्यते। ततः अङ्गम्। अङ्गसंज्ञं च भवति यस्मात्प्रत्ययविधिस्तदादि प्रत्यये। यदि प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीत्युच्यते। अवतप्तेनकुलस्थितं त एतत्। उदके विशीर्णं त एतत्। सगतिकेन सनकुले न च समासो न प्राप्नोति। एवं तर्हि प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीत्युक्त्वा ततो वक्ष्यामि। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीत्येषा परिभाषा कर्तव्या। कान्येतस्याः परिभाषायाः प्रयोजनानि। प्रयोजनं समासतद्धितविधिस्वराः। समास। अवतप्तेनकुलस्थितं त एतत्। उदके विशीर्णं त एतत्। सगतिकेन सनकुलेन च समासः सिद्धो भवति। समास। तद्धित। सांकूटिनम्। व्यावक्रोशी। संघातात्तद्धितोत्पत्तिः सिद्धा भवति। तद्धितविधि। स्वर। दूराद् आगतः। दूरादागत इति। अन्तः थाथघञ्क्ताजबित्रकाणामित्येष स्वरः सिद्धो भवति। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति। स्यात्तर्ह्येषा परिभाषा कर्तव्या। न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति।

ता। दूरादागत इति। आगम्यते स्मेति कर्मणि क्तः। तत्र गतिस्वरेणाद्युदात्त आगतशब्दः। ततो दूरशब्दस्य स्तोकान्तिके इति समासः। पञ्चम्याः स्तोकादिभ्य इत्यलुक्। अत्र समासान्तोदात्तत्वे प्राप्ते तदपवादकृत्स्वरेणाद्युदात्ते आगतशब्दे प्राप्ते सगतेरपि क्तान्तत्वात् स्थानान्तरप्राप्तत्वाद्गतिस्वरस्य बाधकस्यापि बाधकत्वात् थाथघञ्क्तेति सिद्धमन्तोदात्तत्वम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदयमिति। अनन्तरग्रहणस्य प्रयोजनमभ्युद्धृतमित्यत्राभिशब्दस्याव्ययवदिति तस्य प्रकृतिस्वरो मा भूदिति। यदि चैषा परिभाषा न-
स्यात्ततउद्धृतशब्दस्य अन्तोदात्तत्वात् अन्तोदात्तउत्तरपदेऽनन्तरे परतो गतिस्वरो विधीयमानो नैव प्राप्नोति किमनन्तरग्रहणेनातत्क्रियमा
णमस्याः परिभाषायाः सद्भावं ज्ञापयतीत्यर्थः॥ सुप्तिङन्तं पदम्॥ ॥अन्तग्रहणमिति। असत्यन्तग्रहणे सुप्तिङामेव पदसंज्ञा स्यात्। तत
श्चाग्निचित्यादौ सात्पदाद्योरिति षत्वनिषेधप्रसङ्ग इत्येतदर्थं यद्यन्तग्रहणं क्रियते तन्न कर्तव्यम्। प्रत्ययग्रहणे यस्मात्स विहि
तदित्यनन्तरोक्तया परिभाषया तदन्तविधेर्लब्धत्वादिति प्रश्नः। कुमारीगौरितरेति। तरबन्तस्य घसंज्ञायां सत्यां तत्रोत्तरपदे परतो
ह्रस्वत्वं कुमारीशब्दस्य परत्वात्पुंवद्भावं बाधित्वा स्यात्। तरपि तु परतो गौरीशब्दस्य न स्यात्। ततः कुमारिगौरतरेति प्राप्नोति। कुमार
गौरितरेति चेष्यते। भाष्ये तु समासप्रदर्शनपरं वाक्यमुपात्तम्। सनाद्यन्ता धातव इति। अन्यथा सनादीनामेव केवलानां धातुसंज्ञा स्या

यदयं गतिरनन्तर इत्यनन्तरग्रहणं करोति॥ सुप्तिङन्तं पदम्॥ अन्तग्रहणं किमर्थम्। ननु सुप्तिङ् पदमित्येवो
च्येत। केनेदानीं तदन्तानां भविष्यति। तदन्तविधिना। अत उत्तरं पठति। पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञावि
धौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थम्। पदसंज्ञायामन्तग्रहणं क्रियते। ज्ञापकार्थम्। किं ज्ञाप्यम्। एतज्ज्ञा
पयत्याचार्यः अन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। तरप्तम
पौ घः। तरप्तमबन्तस्य घसंज्ञा न भवति। किं च स्यात्। कुमारीगौरितरा। घादिषु नद्या ह्रस्वो भवतीति ह्रस्वत्वं प्र
सज्येत। यद्येतज्ज्ञाप्यते। सनाद्यन्ता धातव इत्यन्तग्रहणं कर्तव्यम्। कृत्तद्धितसमासाश्च। अन्तग्रहणं कर्त
व्यम्। इदं तृतीयं ज्ञापकार्थम्। हेतावक्रियेतेन्यास एव। यदप्युच्यते। कृत्तद्धितसमासाश्चेत्यन्तग्रहणं कर्त
व्यमिति। न कर्तव्यम्। अर्थवदिति वर्तते। कृत्तद्धितान्तं चैवार्थवत्।

त्। ततश्चाचिकीर्षीदित्यादौ सन एव धातुत्वात्प्रत्ययोत्पत्तौ तदादेरेवाङ्गत्वान्न ततः पूर्वोऽट् स्यात्। कृत्तद्धिते इत्यत्रासत्यन्तग्रहणे
केवलयोः कृत्तद्धितयोः प्रातिपदिकसंज्ञा स्यात्। ततश्च भिदिच्छिदिति क्विबन्तस्य न स्यात्। अर्थवत्सूत्रेण तु न भवति। अ
धातुरिति निषेधात्। नापि प्रत्ययलक्षणेन प्राप्नोति। प्रत्ययनिमित्तमन्यस्य यत्कार्यं विधीयते तत्प्रत्ययलोपे भवति न तु
प्रत्ययस्यैव यत्कार्यं तदपि। नह्यसत्कार्यित्वेन वचनशते नापि शक्यमाश्रयितुम्। केवलस्य च तद्धितस्य प्रातिपदिक-
संज्ञायां सत्यामौपगव इत्यत्रापि षष्ठ्याः प्रातिपदिकेऽनन्तर्गतत्वाल्लुङ् स्यात्। तदन्तविधौ तु दोषानवतारः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकेवलादिति। ननु यद्यर्थवत्तालौकिक्याश्रीयते सा पदस्यैव न तु कृत्तद्धितान्तस्यापि। पदस्यैव लोके प्रयोगार्हत्वात्। अन्वयव्यतिरेकग म्यात्वर्थवत्ता केवलानामपि कृत्तद्धितानामस्तीति किमुच्यते नकेवलादिति। एवं तर्हि अर्थवद्ग्रहणानुवृत्तिसामर्थ्याल्लौकिकार्थवत्त्वासत्त्वेऽभिव्यक्ततरोयोऽर्थः प्रत्ययान्तेषु लक्ष्यते स आश्रीयत इत्यदोषः॥ नः क्ये॥ ॥किमर्थमिति। लुप्तेपि सुपि प्रत्ययलक्षणेन सिद्धा पदसंज्ञेति प्रश्नः। नान्तमेवेति। क्य एव नान्तमिति विपरीतनियमो न भवति। नङिसंबुद्ध्योरिति नलोपनिषेधाज्ज्ञापकात्। वाच्यतीति। नन्वत्र क्यचा न भाव्यम्। गोसमानाक्षरनान्तादिति वचनात्। एकीयमतं तदित्यदोषः। तन्मते तु क्यङ्क्यषोर्नान्तं व्यावर्त्यं तपस्यती त्यादौ॥ स्वादिष्वसर्वनामस्थाने॥ राजेति। प्रत्ययलक्षणेन सर्वनामस्थानपरत्वात्। नाप्रतिषेधादिति। प्रसज्यप्रतिषेधः प्रतिषेधप्राधान्ये नोक्तः। अप्राप्तेर्वेति। प्रसज्यप्रतिषेधाश्रयणेपि न दोष इत्यर्थः। ननु चेयमिति। परत्वादिति भावः। स्वादिष्विति प्राप्तिं प्रतिषेधो

नकेवलाः कृतस्तद्धिता वा॥ नः क्ये॥ किमर्थमिदमुच्यते। न सुबन्तं पदमित्येव सिद्धम्। नियमार्थोयमारम्भः। नान्तमेव क्ये पदसंज्ञं भवति नान्यत्। क्व मा भूत्। वाच्यतिस्रुच्यति॥ स्वादिष्वसर्वनामस्थाने॥ असर्वनामस्थाने इत्युच्यते तत्र तेराजातक्षा। असर्वनामस्थान इति प्रतिषेधः प्रसज्येत। नाप्रतिषेधात्। नायं प्रसज्यप्रतिषेधः सर्वनामस्थाने नेति। किं तर्हि पर्युदासोयं यदन्यत्सर्वनामस्थानादिति सर्वनामस्थानेऽव्यापारः। यदि केनचित्प्राप्नोति तेन भविष्यति पूर्वेण च प्राप्नोति। अप्राप्तेर्वा। अथवा अनन्तरा या प्राप्तिः सा प्रतिषिध्यते। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते। नोत्सहते प्रतिषिद्धा सती बाधितुम्। अथवा योगविभागः करिष्यते। स्वादिषु। पूर्वं पदसंज्ञं भवति। ततः सर्वनामस्थानेऽयचि पूर्वं पदसंज्ञं भवति। ततः भम्। भसंज्ञं च यजादावसर्वनामस्थान इति॥

बाधते। तत्र यथा देवदत्तस्य हन्तरि हतेपि न पुनः प्रादुर्भाव एवं पदसंज्ञा न स्यादित्यर्थः। नोत्सहत इति। स्वादिष्विति प्राप्तिः किं पूर्वस्याः प्राप्तेर्बाधिका उत्तरथ निषेधस्य बाध्येति। तत्र प्राप्तबाधो न युज्यत इत्य प्राप्त्यनुमानं बाध इत्यपवादविषयपरिहारेणोत्सर्गस्य प्रवर्तनात्स्वादिष्विति प्राप्तिस्तत्रासती कथं बाधकत्वमासादयेत्। यथा दृक्षावित्यत्र नादिचीति प्रतिषेधारम्भात्तद्विषये पूर्वसवर्णदीर्घस्याभावाद्वृद्धिं प्रति बाधकत्वाभावाद्वृद्धिः प्रवर्तते तथेह सुबन्तं पदमिति पदसंज्ञेत्यर्थः। सर्वनामस्थानेऽयचीति। सर्वनामस्थान इत्यत्र नञ्श्रुतो यचीत्यनेन न संबन्ध्यं नीयते। यकारादि सर्वनामस्थानं नास्तीति यग्रहणमुत्तरार्थम्। तेनाजादौ सर्वनामस्थाने पदसंज्ञा निषिध्यते न तु हलादाविति राजेत्यत्रापि भवति। भसंज्ञं चेति। भसंज्ञाविधौ सर्वनामस्थाने नैव नञ् संबध्यते ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. कै. गोरिति। अत्र स्वादिष्विति पदसंज्ञायां सत्यां पूर्वस्याई स्यादुत्तरस्येदुताविति प्रसज्येत। वाक्यपदयोरिति। वाक्यस्य चात्र विसर्जनी
२७५ योन्त्यो न त्वौकारः। भुवद्वद्भ्य इति। तसौ मत्वर्थ इति भसंज्ञा प्राप्नोतीति पदसंज्ञाविधिः॥ ॥यचि भम्॥ षडिक इति। षडङ्गुलिशब्दादनुक
म्पायां बह्वचो मनुष्यनाम्न इति ठच्। विकृते ठाजादावूर्ध्वमिति ङ्गुलिशब्दस्य लोपे यस्येति चेत्यकारलोपे च कृते तुल्यावधिकया भसं
ज्ञया प्रत्ययलक्षणेन सुबन्तं पदमिति प्राप्तायाः पदसंज्ञाया बाधनाज्जश्त्वं न स्यादिति वचनम्। सिद्धमच इति। अचो लोप
स्येत्यर्थः। तत्र भसंज्ञायां विधीयमानायामकारलोपस्य स्थानिवत्त्वादकारान्तमेतदङ्गसंज्ञां प्रतीति भिन्नावधिविषयत्वाद्

यदि तर्हि सावपि पदं भवति एचः प्लुतविकारे पदान्तग्रहणं चोदितम्। इह मा भूत्। भद्रं करोषि गौरिति। तस्मि
न्क्रियमाणेपि प्राप्नोति। वाक्यपदयोरन्त्यस्येत्येवं तत्। भुवद्वद्भ्यो धारयद्भ्यः पदसंज्ञा। एतयोः पदसंज्ञा व
क्तव्या। भुवद्भ्यः धारयद्भ्यः॥ यचि भम्॥ भसंज्ञायामुत्तरपदलोपे षषः प्रतिषेधः॥ भसंज्ञायामुत्तरपद
लोपे षषः प्रतिषेधो वक्तव्यः। अनुकम्पितः षडङ्गुलिः षडिकः। सिद्धमचः स्थानिवत्त्वात्। सिद्धमेतत्। क
थम्। अचः स्थानिवद्भावाद्भसंज्ञा न भविष्यति। इहापि तर्हि प्राप्नोति। वागाशीर्दत्तः वाचिक इति। वक्ष्यत्येत
त्। सिद्धं स्वेकाक्षरपूर्वपदानामुत्तरपदलोपवचनादिति। इहापि तर्हि प्राप्नोति षडङ्गुलिः षडिक इति। वक्ष्य
त्येतत्। षषष्ठाजादिवचनात्सिद्धमिति। नभोङ्गिरोमनुषां वत्युपसंख्यानम्॥ नभोङ्गिरोमनुषां वत्युपसंख्यानं क
र्तव्यम्। नभस्वत्। अङ्गिरस्वत्। मनुष्वत्॥ वृषण्वस्वश्वयोश्च॥ वृषण् इत्येतस्य वस्वश्वयोर्भसंज्ञा वक्तव्या। वृषण्वसुः
वृषणश्वस्य यच्छिरः। वृषणाश्वस्य मेने॥

पदसंज्ञयोर्बाध्यबाधकभावाभावः। न पदान्तेति स्थानिवत्त्वनिषेधोत्र न भवति। यत्र पदान्तो विधीयते तत्रासौ निषेधः यथा कौस्तः
कानि सन्तीति। अत्र हि वकारो यकारश्च पदान्तो विधेयः इह तु पूर्वमेव जश्त्वं प्रवृत्तं न त्विदानीं विधेयम्। सिद्धमिति। उत्तरपदलो-
पस्य हलजादेशत्वान्नास्ति स्थानिवत्त्वमिति तुल्यावधिकया भसंज्ञया पदसंज्ञा बाध्यते। मनुष्वदिति। सत्यां पदसंज्ञायां रुत्वं स्या राम:
द्न तु षत्वम् अपदान्तस्येति वचनात्॥ वृषण्वसुरिति। पदत्वे सति पदान्तस्येति निषेधात् णत्वं न स्यात् नलोपश्च प्रसज्येत। भत्वे तु सत्यल्लो २७५
पो न इत्यकारलोपोत्र न भवति। अङ्गसंज्ञाया अभावात्। अङ्गस्येति च तत्राधिकारात्। उपसंख्यानान्येतानि छन्दोविषयाणीत्याहुः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तसौ मत्वर्थे॥ ॥अर्थग्रहणमिति। स्वादिष्विति वर्तते तत्रैवं संबन्धः क्रियते। मतौ यः स्वादिर्वर्तत इति। शब्दे च तस्यासंभवात्तदर्थ इति
विज्ञास्यत इति प्रश्नः। इहैव स्यादिति। मतौ स्वादाविति सामानाधिकरण्येन मुख्यकल्पनया संबन्धे संभवत्यर्थग्रहणं न लभ्यत
इति भावः। पयस्वानिति। मत्वर्थीयप्रकरणेऽन्यतरस्यांग्रहणानुवर्तनाद् विनिना मतुब् न बाध्यते। न हि मतुबिति। उपलक्षण-
स्यान्योपलक्षणे चरितार्थत्वात्स्वतः कार्यप्रतिनिमित्तत्वावगमाभावात्। मतुबपीति। अस्मिन्निति मतुपोऽर्थः। स च विन्यादी
नामिव मतुपोपीति भावः। तद्यथेति। अयमत्रार्थः। यत्र रूपान्तरेणोपलक्षणत्वं रूपान्तरेण च कार्ययोगः प्रतिपाद्यते तत्रोपलक्ष-
णस्याप्युपलक्ष्यरूपसद्भावे सति कार्ययोगो भवति। तद्यथा। देवदत्तशालायां ब्राह्मणा आनीयन्तामित्युक्ते सति ब्राह्मण्ये देवद
त्तस्याप्यानयनं भवति। कार्यनिमित्तरूपान्तराभावे तु न भवत्युपलक्षणस्य कार्ययोगः। यथा देवदत्तशाला भिद्यतामिति॥ अय

तसौ मत्वर्थे॥ ॥अर्थग्रहणं किमर्थम्। न तसौ मतावित्येवोच्येत। तसौ मतावितीयत्युच्यमाने इहैव स्यात्। पयस्वा
न्। यशस्वान्। इह न स्यात्। पयस्वी। यशस्वी। अर्थग्रहणे पुनः क्रियमाणे मतुपि च सिद्धं भवति यश्चान्यस्तेन समाना
र्थस्तस्मिंश्च। यद्यर्थग्रहणं क्रियते। पयस्वान्। अत्र न प्राप्नोति। किं कारणम्। न हि मतुब् मत्वर्थे वर्तते। मतुबपि मतु
बर्थे वर्तते। तद्यथा। देवदत्तशालायां ब्राह्मणा आनीयन्तामित्युक्ते यदि देवदत्तोपि ब्राह्मणो भवति सोप्यानीयते॥
अयस्मयादीनि छन्दसि॥ ॥उभयसंज्ञान्यपीति वक्तव्यम्॥ स सुष्टुभा स ऋक्वता गणेन॥ ॥बहुषु बहुवचनम्
॥ ॥बहुषु बहुवचनमित्युच्यते। केषु बहुषु। अर्थेषु।

स्मयादीनि॥ आनन्तर्याद् संज्ञाविधानद्वारेणैव निपातनं प्राप्तमित्याह। उभयसंज्ञान्यपीति। ऋक्वतेति। पदत्वात्कुत्वं भत्वाज्जश्त्वं न
भवति। जश्त्वविधानार्थपदसंज्ञाबाधनाय भसंज्ञाप्रवर्तना तु तन्निबन्धनकार्याभावः॥ ॥बहुषु बहुवचनम्॥ केषु बहुष्विति।
जातिवादी प्रत्यवतिष्ठते। जातेः प्रातिपदिकार्थत्वे तस्या एकत्वाद्बहुत्वासंभवात्तत्सहचरितद्रव्यगतं बहुत्वमाश्रयणीयम्। तत
श्च वृक्ष इत्यत्रावयवगतबहुत्वसद्भावात्स्याद्बहुवचनमिति भावः। अत्रोत्तरम्। अर्थेष्विति। अस्यायं भावः। द्रव्यं पदार्थस्तत्राभिधे
यगतमेव बहुत्वमाश्रीयते वृक्षशब्दस्य चावयवी वाच्यो न त्ववयवाः। आकृतिपक्षेपि प्रत्यासत्त्या तदाधारद्रव्यगतं बहुत्वमाश्रीय
ते न त्ववयवगतम्। दारा इत्यादौ त्ववयवावयव्यभेदविवक्षायां बहुत्वमाकृत्याधारगतमेव बहुवचनवाच्यमित्यदोषः। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरोऽगृहीताभिप्राय आह। यद्येवमिति। अर्थशब्दो भवतावस्तुपर्यायः प्रयुक्तः। मूलादीनि च बहूनि वस्तूनि मन्यते। एवं तर्हीति। अयमर्थः। नेदं स्वातन्त्र्येण विधायकं किं तर्हि विहितानामनेन नियमः क्रियते। बहुवचनादिभिर्निष्पन्नशब्दसंज्ञाभिः सुप्तिङोत्र प्रत्याय्यन्ते तेषां च शास्त्रान्तरेण स्थिते विधाने इदमारभ्यमाणं नियमाय भवति। न त्विदमेव विशिष्टार्थानुवादेन सुप्तिङां विधायकमित्येतच्छब्दसंज्ञा एता इत्यनेन प्रदर्श्यते। येष्वर्थेष्विति। क्वचित्तु पाठः एवं तर्हि येष्वर्थेष्विति। एकवचनमित्यादि तु भाष्यं नास्त्येव। अयमर्थः। पञ्चकः प्रातिपदिकार्थः। तथाहि। दधि पश्येत्यादौ विभक्तिश्रवणमन्तरेणापि पश्चाप्यर्थाः प्रतीयन्ते स्वार्थादयः। विभक्तयस्तु क्वचिद्द्योतकत्वेनापेक्ष्यन्ते। तत्रानिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति संख्यायां कर्मादिषु च सिद्धा एव स्वादयः। अनेन तु नियम्यन्ते। तत्र कर्मादिशक्तेः कार्थसमवेत एव बहुत्वे बहुवचनं भवति न त्ववयवगते। नवैकर्मादय इति। अनभिहित इति सूत्रारम्भसामर्थ्यात्कर्मादीनां नैव विभ

यद्येवं वृक्षः प्लक्षः। अत्रापि प्राप्नोति। बहवस्तेषां मूलं स्कन्धः फलं पलाशमिति। एवं तर्हि एकवचनं द्विवचनं बहुवचनमिति शब्दसंज्ञा एताः। येष्वर्थेषु स्वादयो विधीयन्ते तेषु बहुषु। केषु च स्वादयो विधीयन्ते। कर्मादिषु। नवैकर्मादयो विभक्त्यर्थाः। के तर्हि। एकत्वादयः। एकत्वादिष्वपि वै विभक्त्यर्थेषु बहुत्वं कर्मादयो निमित्तत्वेनोपादेयाः। कर्मण एकत्वे कर्मणो द्वित्वे कर्मणो बहुत्व इति। स तर्हि तथा निर्देशः कर्तव्यः। न ह्यन्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः। इह च इत्येके मन्यन्ते तदेके मन्यन्ते इति परत्वादेकवचनं प्राप्नोति। बहुषु बहुवचनमित्येष योगः परः करिष्यते। सूत्रविपर्यासः कृतो भवति।

क्तिवाच्यत्वमिति मन्यते। तेषां हि विभक्त्यर्थत्वे तिङ्कृत्तद्धितसमासैस्तेषूक्तेषु गतार्थत्वाद्द्वितीयादीनां प्रसङ्ग एव नास्ति किमनभिहिताधिकारेण। एकत्वादिष्वपीति। वाक्यैकवाक्यत्वे सति महावाक्यं संपद्यते। कर्मण्यनभिहिते यदेकत्वं तत्रैकवचनमित्यादि। स तर्हीति। बहुत्वे इत्येवमित्यर्थः। एके मन्यन्त इति। प्रातिपदिकार्थ एकत्वमप्यस्ति बहुत्वं चाद्येकयोरित्यत्र च विशेषानुपादानाद्यावत्कश्चिदेकशब्दार्थः तस्य ग्रहणेन भाव्यम्। तत्र परत्वादेकवचनप्रसङ्गः। इह चेति। इह यदि द्व्येकयोरिति योगात्परोऽयं योगः क्रियते तदा विशेषाभावाद्वैपुल्यरूपस्यापि बहुत्वस्य ग्रहणे सति परत्वाद्बहुवचनप्रसङ्गः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गुणिविशेषक इति। अत एव वचनादनित्यस्तृजकाभ्यां कर्तरीति षष्ठीसमासप्रतिषेधः। शेषषष्ठ्या वा समासः। सामानाधिकरण्यमि-
ति। मतुब्लोपादभेदोपचाराद्वा। तदानान्तरेणेति। गुणिवाचिनः शुक्लशब्दाद्भावप्रत्यये कृते गुणः प्रतीयते नान्यथेत्यर्थः। द्र-
व्ये षष्ठीति। षष्ठीग्रहणं व्यतिरेकविभक्तेरुपलक्षणार्थम्। गुणिनो ह्याधारत्वविवक्षायां सप्तम्यपि भवति। यथैवेह कर्मणि या
संख्येति। कथमिति। बहुत्वस्यैकत्वाद्द्विबहाविति भाव्यमिति प्रश्नः। एतदेवेति। आश्रयगतं बहुत्वं बहुत्वे गुणे आरोप्य निर्देशः

इह च बहुरोदनो बहुः सूप इति परत्वाद्बहुवचनं प्राप्नोति। नैष दोषः। यत्तावदुच्यते न ह्यन्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देश इति। तन्न। अन्तरेणापि भावप्रत्ययं गुणप्रधानो भवति निर्देशः। कथम्। इह कदाचिद्गुणो गुणिविशेषको भवति। तद्यथा। शुक्लः पट इति। कदाचिच्च गुणिना गुणो व्यपदिश्यते पटस्य शुक्ल इति। तद्यदा तावद्गुणो गुणिविशेषको भवति पटः शुक्ल इति तदा सामानाधिकरण्यं गुणगुणिनोः। तदानान्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः। यदा तु गुणिना गुणो व्यपदिश्यते पटस्य शुक्ल इति स प्रधानस्तदा गुणो भवति। तदा द्रव्ये षष्ठी। तदान्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः। न चेह वयमेकत्वादिभिः कर्मादीन्विशेषयिष्यामः। किं तर्हि कर्मादिभिरेकत्वादीन्विशेषयिष्यामः। कथम्। एकस्मिन्नेकवचनम्। कस्यैकस्मिन्। कर्मणः। द्वयोर्द्विवचनम्। कयोर्द्वयोः। कर्मणोः। बहुषु बहुवचनम्। केषां बहुषु। कर्मणामिति। कथं बहुषु बहुवचनमिति। एतदेव ज्ञापयत्याचार्यः नानाधिकरणवाची यो बहुशब्दस्तस्येदं ग्रहणम्। न वैपुल्यवाचिन इति। किमेतस्य ज्ञापने प्रयोजनम्। यदुक्तं बहुरोदनो बहुः सूप इति परत्वाद्बहुवचनं प्राप्नोतीति न स दोषो भवति। यदप्युच्यते। इत्येके मन्यन्ते तदेके मन्यन्त इति परत्वादेकवचनं प्राप्नोतीति। नैष दोषः। एकशब्दोऽयं बह्वर्थः। अस्त्येव संख्यावाची। तद्यथा। एको द्वौ बहव इति। अस्त्यसहायवाची। तद्यथा। एकाग्नयः। एकहलानि।

इतः। तस्यैतत्प्रयोजनं भिन्नवस्त्वाधारस्य बहुत्वस्य संख्यारूपस्य ग्रहणं यथा स्यात्। एकाश्रयवर्तिनो वैपुल्यरूपस्य मा भूदिति। ए-
कशब्दोऽयमिति। द्व्येकयोरित्यत्र संख्यापदेन द्विशब्देन साहचर्यादेकशब्दस्यास्ति संख्यावाचिनो ग्रहणम्। द्वित्वैकत्वयोश्च द्व्येक-
शब्दौ वर्तेते इति द्व्येकयोरिति द्विवचनेन निर्देशः। अन्यथा बहुवचनं स्यात्। प्रसिद्धा च संख्येयार्थत्वमेकादीनामष्टादशान्तानामुच्यते।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·वै· किमर्थमिति। लौकिकादेव प्रयोगाद्बहुत्वादिषु बहुवचनादीनां व्यवस्था भविष्यतीति प्रश्नः। सुप्तिङामिति। सुप्तिङ्विधानवाक्ये संख्याविशे ४२
२०७ षानिर्देशाद्विशेषानुपादानेन तेषां विधानमित्यर्थः। यद्यपीति। शास्त्रेऽनुपात्तोप्यर्थः प्रयोगादेव व्यवस्थाप्यत इत्यर्थः। सुप्
त्वावत्स्वार्थे विधीयमानाः स्वार्थद्रव्यलिङ्गसंख्याकर्मादिलक्षणः पञ्चकः प्रातिपदिकार्थ इति दर्शने संख्यायां सिद्धाः। सं
ख्याविशेषावगतिस्तु लोकात्सिद्धा। तिङोपि कर्तृकर्मणोर्विधीयमानाः संख्यायुक्तयोरेव तयोर्वाचका भविष्यन्ति स्वभाव

एकाकिभिः क्षुद्रकैर्जितमिति। अस्त्यन्यार्थे वर्तते। तद्यथा। स धमाद्युम्न एकास्ताः। अन्या इत्यर्थः। त
द्यो ऽन्यार्थे वर्तते तस्यैष प्रयोगः। किमर्थं पुनरिदमुच्यते। सुप्तिङामविशेषेण विधानाद्दृष्टविप्रयोगाच्च
नियमार्थं वचनम्। सुपश्च अविशेषेण प्रातिपदिकमात्राद्विधीयन्ते। तिङश्च अविशेषेण धातुमात्राद्विधीय
न्ते। तत्रैतस्याद्यद्यप्यविशेषेण विधीयन्ते नैव विप्रयोगो लक्ष्यत इति। दृष्टविप्रयोगाश्च दृश्यते खल्व
पि विप्रयोगः। तद्यथा। अक्षीणि मे दर्शनीयानि पादा मे सुकुमारा इति। सुप्तिङोरविशेषविधानाद्दृष्टवि
प्रयोगत्वाच्च व्यतिकरः प्राप्नोति। इष्यते चाव्यतिकरः स्यादिति तच्चान्तरेण यत्नं न सिद्ध्यतीति नियमा
र्थं वचनम्। एवमर्थमिदमुच्यते। अथैतस्मिन्नियमार्थे सति किं पुनरयं प्रत्ययनियम एकस्मिन्नेवैक
वचनं द्वयोरेव द्विवचनं बहुष्वेव बहुवचनमिति। आहोस्विदर्थनियमः। एकस्मिन्नेकवचनमेव द्वयोर्द्विवचन
मेव बहुषु बहुवचनमेवेति। कश्चात्र विशेषः। तत्र प्रत्ययनियमेऽव्ययानां पदसंज्ञाभावोऽसुबन्तत्वात्। तत्र प्र
त्ययनियमेऽव्ययानां पदसंज्ञा न प्राप्नोति। उच्चैः नीचैरिति। किं कारणम्। असुबन्तत्वात्। अर्थनियमे सिद्धम्। अर्थ
नियमे सिद्धं भवति। अस्त्वर्थनियमः। अथवा पुनरस्तु प्रत्ययनियमः। ननु चोक्तं तत्र प्रत्ययनियमेऽव्ययानां पदसं
ज्ञाभावोऽसुबन्तत्वादिति।

तः। संख्याविशेषः प्रयोगदर्शनादवगम्यत इति भावः। अक्षीणीति। द्वित्वेपि लोके बहुवचनं दृश्यत इत्यर्थः। विरुद्धः प्रयोगो विप्रयो- राम:
गः। तत्र प्रत्ययनियम इति। प्रत्यया विशिष्टायां संख्यायां नियता इति निःसंख्येभ्योऽव्ययेभ्यस्तेषामनुत्पादात्पदत्वाभावात्तन्निबन्ध २०७
नरुत्वाद्यभावप्रसङ्गः। अर्थनियम इति। अर्था नियता इति तेषु वचनान्तराभावः। प्रत्ययास्त्वनियतत्वादव्ययेभ्योपि सिद्ध्यन्तीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुपामिति। कर्मणि द्वितीयेत्यादेः प्रकरणस्य बहुषु बहुवचनमित्यादेश्च स्वादिसूत्रेण सहैकवाक्यता। तिङर्थे त्विह तस्मादुद्देशस्त्वत्रेदं च
सुपां त्वमू। तत्रैकस्मिन्कर्मणीत्येवं गुणगुणिनोः सामानाधिकरण्येन संबन्धे सति संख्याकर्मादयश्च सुपामर्था भवन्ति। प्रसिद्धो नियम इ
ति। अर्थनियम इत्यर्थः। नियमः प्रकृतेषु वेति। तुल्यजातीयस्य नियमेन व्यावृत्तिः क्रियत इत्यव्ययेभ्यः स्वादीनाम् व्यावृत्तिः। अथ वेति
भवतु प्रत्ययानां सामान्येन नियमस्तथापि ज्ञापकादव्ययेभ्यः स्वादिसिद्धिरित्यर्थः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्य
प्रदीपे प्रथमस्याध्यायस्य चतुर्थपादे द्वितीयमाह्निकम्॥ कारके॥ किमिदमिति। सप्तमीनिर्देशान्न तावत्संज्ञात्वेनाधिकारः। संज्ञा

नैष दोषः। सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्। सुपां संख्या चैवार्थः कर्मादयश्च। तथा तिङाम्। प्रसिद्धो नि
यमस्तत्र प्रसिद्धस्तत्र नियमः। नियमः प्रकृतेषु वा। अथवा प्रकृतानर्थानपेक्ष्य नियमः। के च प्रकृताः। एकत्वादयः
। एकस्मिन्नेवैकवचनं न द्वयोर्न बहुषु। द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु। बहुष्वेव बहुवचनं न द्वयोर्नैकस्मिन्नि
ति। अथवा आचार्यप्रवृत्तिर्ज्ञापयति उत्पद्यन्तेऽव्ययेभ्यः स्वादय इति। यदयमव्ययादाप्सुप इत्यव्ययाल्लुकं शा
स्ति॥ ॥इति श्री द्वितीयमाह्निकम्॥ कारके॥ ॥किमिदं कारक इति। संज्ञानिर्देशः। किं वक्तव्यमेतत्। न हि।
कथमनुच्यमानं गंस्यते। इह हि व्याकरणे ये च एते लोके प्रतीतपदार्थकाः शब्दास्तैर्निर्देशाः क्रियन्ते। या वा ए
ताः कृत्रिमाष्टिघुभसंज्ञाः। न चायं लोके ध्रुवादीनां प्रतीतपदार्थकः शब्दः न खल्वपि कृत्रिमा संज्ञा अन्यत्रा वि
धानात्। संज्ञाधिकारश्चायं तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः संज्ञायाः॥

याभाव्यमानत्वात्प्रथमानिर्देशस्य न्याय्यत्वात्। अथ विशेषणत्वेनाधिकारस्तदा कारकात् दत्तश्रुतयोरित्यादावपादानादिसंज्ञा-
विकलस्यापि कारकस्य ग्रहणं प्राप्नोति। षड्विधस्यैवेष्यते। तद्व्यतिरिक्तं च कारकमस्ति यथा नटस्य शृणोतीति प्रश्नः। संज्ञानिर्दे-
श इति। सुपां सुपो भवन्तीति प्रथमायाः स्थाने सप्तमी कृतेति भावः। किं वक्तव्यमिति। सप्तमीनिर्देशादयुक्तः संज्ञापक्ष इति भावः।
नहीति। सुब्व्यत्यय उक्तः। न चायमिति। शास्त्रे लोके च प्रसिद्ध्यभावादुक्तविभक्त्यनुपपत्त्या भाव्यमानविभक्तेः प्रथमायाः स्थाने
सप्तमी कृतेति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संज्ञिनो निर्देश इति। यद्यपि वक्ष्यमाणा ध्रुवादयः संज्ञिनो लभ्यन्ते तथापि विशिष्टसंज्ञी निर्देष्टव्यः। यत् क्रियायाः साधकं ध्रुवादि तत्कारकसंज्ञमपादानसंज्ञं च भवतीति। ननु संज्ञापक्षे कारकसंज्ञाया अपादानादिसंज्ञाभिः समावेशो न प्राप्नोति। एकसंज्ञाधिकारात्। नैष दोषः। ध्रुवमपाय इति योगविभागेन कारकसंज्ञा क्रियते। ततोऽपादानमिति। अत्र कारकग्रहणमनुवर्तते ध्रुवमपाय इति च। तेन कारकं सदपादानसंज्ञमित्येवं समावेशः सिध्यतीति। अन्तरेणाप्यनुवृत्तिं वचनसामर्थ्यात् पर्यायेऽसिद्धे समावेशार्थानुवृत्तिर्विज्ञायते। एवं संप्रदानादिसंज्ञास्वपि समावेशो व्याख्येयः। समावेशस्य च प्रयोजनं लम्बेरमइत्यादावधिकरणत्वात्सप्तमी। कारकत्वात्कृदन्तस्योत्तरपदस्य प्रकृतिस्वरः। ।ग्रामस्य समीपादिति। यथा योवृक्षशाखायाः पतति वृक्षादप्यसौ पतति। एवं

कारक इति संज्ञानिर्देशश्चेत्संज्ञिनो निर्देशः॥ कारक इति संज्ञानिर्देशश्चेत्संज्ञिनोऽपि निर्देशः कर्तव्यः। साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यम्॥ इतरथा ह्यनिष्टप्रसङ्गो ग्रामस्य समीपादागच्छतीति अकारकस्य। इतरथा ह्यनिष्टं प्रसज्येत। अकारकस्याप्यपादानसंज्ञा प्रसज्येत। क्व। ग्रामस्य समीपादागच्छतीति। नैष दोषः। नात्र ग्रामोऽपाययुक्तः। किं तर्हि समीपम्। यदा च ग्रामोऽपाययुक्तो भवति भवति तदाऽपादानसंज्ञा। तद्यथा। ग्रामादागच्छतीति। कर्मसंज्ञाप्रसङ्गोऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। कर्मसंज्ञा च प्राप्नोत्यकथितस्य। क्व। ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। नैष दोषः। अयमकथितशब्दोऽस्त्येवासंकीर्तिते वर्तते। तद्यथा। कश्चित्कंचित्संचक्ष्याह। असावत्राऽकथितः। असंकीर्तित इति गम्यते। अस्त्यप्राधान्ये वर्तते। तद्यथा। अकथितोऽसौ ग्रामे अकथितोऽसौ नगर इत्युच्यते-योयत्राप्रधानो भवति।

यो ग्रामसमीपादागच्छति ग्रामादप्यसावागच्छति। ततश्चापाये ग्रामस्य ध्रुवता भवति। आगमने तु निवर्तकत्वाभावः। समीपविशेषणत्वेनोपात्तत्वात्। नात्र ग्राम इति। समीपविशेषणत्वेनोपादानादेव ग्रामस्यापाययोगो नास्ति। स हि संश्लेषपूर्वकः। संश्लेषश्च सन्निकर्षादबुद्ध्या कल्प्यते स च समीपस्यैव विवक्षितो न ग्रामस्येत्यर्थः। ग्रामात्समीपादिति चोक्ते वस्त्वन्तरापेक्षं ग्रामस्यैव सामीप्यं प्रतीयते न तु ग्रामापेक्षमन्यस्य सामीप्यम्। संचक्ष्येति। वर्जयित्वेत्यर्थः। वर्जने प्रतिषेध इति ख्याञादेशाभावः। वर्जनं च प्रसक्तस्य सजातीयस्यैव भवतीति कारकस्यैव कर्मसंज्ञा भवति न तु ब्राह्मणस्य पुत्रं प्रति विशेषणत्वेनोपात्तस्य। ॥ याम: २७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्यदेति। अप्राधान्यस्य प्रसङ्गनिरपेक्षत्वाद्ब्राह्मणोऽपि पुत्रवद्भावात्। पन्था हीप्सिततमत्वात्प्रधानं न पुत्रो नापि ब्राह्मणः। वृक्षस्य पर्णमिति। ग्रामस्य समीपादित्यत्रापाययुक्तार्थान्तरसद्भावान्नास्ति ग्रामस्या —— पाययोगः। इह त्वर्थान्तरस्यानिर्देशाद्वृक्षस्यैवापाययुक्तत्वमिति भावः। न वाऽपायस्येति। पर्णविशेषणत्वेनैव वृक्षस्य विवक्षितत्वात्। तथा हि वृक्षमजहत्यपि पर्णे प्रत्वास्थे भूमिं स्पृशति वृक्षस्य पर्णं पततीति प्रयोगो भवति। सति ह्यवधौ गतिरपायो भवति नान्यथा गतिविशेषत्वादपायस्य। नज्ञायत इति। शब्देनासमर्पणात्संबन्धिविशेषस्येति भावः। प्रत्यासत्त्यात्तु वृक्ष एव संबन्धित्वेन प्रतीयते। कर्मसंज्ञाप्रसङ्ग इति

तद्यदाऽप्राधान्येऽकथितशब्दो वर्तते तदैष दोषः कर्मसंज्ञाप्रसङ्गोऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। अपादानं च वृक्षस्य पर्णं पततीति। अपादानसंज्ञा च प्राप्नोति। क्व। वृक्षस्य पर्णं पतति कुड्यस्य पिण्डः पततीति। न वाऽपायस्याविवक्षितत्वात्। न वा एष दोषः। किं कारणम्। अपायस्याऽविवक्षितत्वात्। नात्रापायो विवक्षितः। किं तर्हि संबन्धः। यदा चापायो विवक्षितो भवति भवति तदाऽपादानसंज्ञा। तद्यथा। वृक्षात्पर्णं पततीति। संबन्धस्तु तदा न विवक्षितो भवति। न ज्ञायते कंकस्य वा कुररस्य वेति। अयं तर्हि दोषः कर्मसंज्ञाप्रसङ्गोऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। नैष दोषः। कारक इति महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणं तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत करोतीति कारकमिति। अन्वर्थमिति चेदकर्तरि कर्तृशब्दानुपपत्तिः। अन्वर्थमिति चेदकर्तरि कर्तृशब्दो नोपपद्यते करणं कारकमधिकरणं कारकमिति। सिद्धं तु प्रतिकारकं क्रियाभेदात्पचादीनां करणाधिकरणयोः कर्तृभावः। सिद्धः करणाधिकरणयोः कर्तृभावः। कुतः। प्रतिकारकं क्रियाभेदात्। पचादीनां हि प्रतिकारकं क्रिया भिद्यते। किमिदं प्रतिकारकमिति। कारकं कारकं प्रति प्रतिकारकम्॥

।अप्रधानवाच्यकथितशब्दाश्रयणादिति भावः। अन्वर्थसंज्ञेति। महत्याः संज्ञायाः करणादनुमीयते नूनं विशिष्टा ध्रुवादयः संज्ञित्वेन निर्दिष्टाः। यद्विशेषदर्शनात्तदनुरूपा तेषां संज्ञा क्रियते। करोतीति कारकमिति। साध्यत्वेन क्रियैव शब्दात्प्रतीयत इति क्रियाया निर्वर्तकस्य कारकसंज्ञाऽपादानादिसंज्ञा च प्रवर्तते। अन्वर्थमिति चेदिति। करोतीति कारकमिति यद्याश्रीयते तदा स्वतन्त्रस्यैव कर्तृसंज्ञावत्कारकसंज्ञापि प्राप्नोति न तु करणादीनां कर्तृपरतन्त्राणाम्। कर्तृशब्द इति। कर्तृवाची कारकशब्द इत्यर्थः। सिद्धं त्विति। स्वव्यापारे सर्वेषां स्वातन्त्र्यात्तदनुष्ठानद्वारेण प्रधानक्रियायामुपयोगात्कर्तृसंनिधावपि स्वव्यापारस्यानिवर्तनात्पारतन्त्र्यावस्थायामप्यनिवृत्तं कारकत्वमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संभवनक्रियामिति। ग्रहणक्रियामित्यर्थः। धारणक्रियामिति। स्थिरत्वादक्रियासमासेस्तण्डुलानांधारणमित्यर्थः। एधाः पक्ष्यन्तीति
। भविष्यन्निर्देशः कर्तृगतसंभावनापेक्षः। कर्त्रीहिसंभावितक्रियाः नियुज्यन्ते। नियुक्ताश्चव्याप्रियन्ते नतुप्रागेवानत्वत्रभवि

कोसौप्रतिकारकंक्रियाभेदः पचादीनाम्। अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणक्रियाः प्रधानस्यकर्तुः
पाकः। अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादिक्रियाः कुर्वन्नेवदेवदत्तः पचतीत्युच्यते। तत्रतदापचिर्वर्त्त
ते। एषप्रधानकर्तुः पाकः। एतत्प्रधानकर्तुः कर्तृत्वम्। द्रोणंपचस्याढकंपचतीतिसंभवनक्रियाधारणक्रियाचाधि
करणस्यपाकः। द्रोणंपचत्याढकंपचतीतिसंभवनक्रियांधारणक्रियांचकुर्वतीस्थालीपचतीत्युच्यते। तत्रतदा
पचिर्वर्तते। एषोऽधिकरणस्यपाकः। एतदधिकरणस्य कर्तृत्वम्। एधाः पक्ष्यन्त्याविक्लित्तेर्ज्वलिष्यन्ती
तिज्वलनक्रियाकरणस्यपाकः। एधाः पक्ष्यन्त्याविक्लित्तेर्ज्वलिष्यन्तीतिज्वलनक्रियांकुर्वन्तिकाष्ठानिपचन्ती
त्युच्यन्ते। तत्रतदापचिर्वर्तते। एषकरणस्यपाकः। एतत्करणस्यकर्तृत्वम्। उद्यमननिपातनानिकर्तुश्छिदिक्रि
या। उद्यमननिपातनानिकुर्वन्देवदत्तश्छिनत्तीत्युच्यते। तत्रतदाछिदिर्वर्तते। एषप्रधानकर्तुश्छेदः। एतत्प्रधा
नकर्तुः कर्तृत्वम्। यत्तन्नतृणेन तत्परशोश्छेदनम्। यत्तत्समानेउद्यमनेनिपतनेचपरशुनाछि
द्यतेनतृणेनतत्परशोश्छेदनम्। अवश्यंचैतदेवंविज्ञेयम्। इतरथाह्यसितृणयोश्छेदनेऽविशेषः स्यात्। योहि
मन्यतेउद्यमननिपतनादेवैतद्भवतिच्छिनत्तीतिअसितृणयोश्छेदनेनतस्यविशेषः स्याद्। यदसिनाछिद्य
तेतृणेनापितच्छिद्येत। अपादानादीनांत्वप्रसिद्धिः। अपादानादीनांतुकर्तृत्वस्याऽप्रसिद्धिः। यथाहिभवता
करणादीनांकर्तृत्वंनिदर्शितंनतथाऽपादानादीनांनिदर्श्यते। नवास्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेणवचनं
वचनाश्रयाचसंज्ञा। नवाएषदोषः। किंकारणम्। स्वतन्त्रपरतन्त्रत्वात्। सर्वत्रैवात्रस्वातन्त्र्यंपारतन्त्र्यंचविव
क्षितम्। तयोः पर्यायेणवचनम्। तयोः स्वातन्त्र्यपारतन्त्र्ययोः पर्यायेणवचनंभविष्यति। वचनाश्रयाचसंज्ञाभविष्यति।

ष्यन्निर्देशस्तन्त्रम्। अनेकार्थत्वाद्धातूनांतादर्थ्याद्वातद्रूपासङ्गात्करणादिव्यापारेपचेर्द्दृत्तिर्द्रष्टव्या। यत्तन्नतृणेनेति। अन्वयव्यतिरेका राम:
भ्यांकरणस्यविशिष्टव्यापारएवेष्टनिदर्शनायदर्श्यति। नतथेति। नह्यपादानेग्रामेग्रामआगच्छतीतिप्रयोगोस्ति। ॥ २७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलाहकादिति। निःसरणाङ्गे विद्योतने द्युतिर्वर्तते पृथग्भावश्च विवक्षित इत्यपादानत्वम्। बलाहक इति। स्थित्यङ्गे द्योतनेऽत्र द्युतिर्वर्तते। बलाहके स्थित्वा ज्योतीरूपा विद्युद्विद्योतत इत्यर्थः। बलाहक इति। विद्युतो बलाहकस्य चाभेदविवक्षायामयं प्रयोगः। पर्याप्तमिति। स्वव्यापारानुष्ठानमन्तरेण प्रधानक्रियायामुपयोगाभावात्। ग्राम आगच्छतीत्यर्थान्तर एव गमादपादानव्यापारानवसायात्प्रयोगाभावः। एवं ब्राह्मणाय ददातीत्यर्थे ब्राह्मणो ददातीति प्रयोगाभावः। शब्दशक्तिस्वाभाव्याच्चापादानसंप्रदानव्यापारे धातुर्न वर्तते। वस्तुतस्त्वपादानस्यावधिभावेनावस्थानं व्यापारोऽस्ति संप्रदानस्याप्यनुमननादिलक्षणः प्रतीयमानोऽपि व्यापारः

तद्यथा। बलाहकाद्विद्योतते विद्युत्। बलाहके विद्योतते। बलाहको विद्योतत इति। किं तर्ह्युच्यतेऽपादानादीनां त्वप्रसिद्धिरिति। एवं तर्हि न ब्रूमोऽपादानादीनां कर्तृत्वस्याप्रसिद्धिरिति। पर्याप्तं करणाधिकरणयोः कर्तृत्वं निदर्शितमपादानादीनां कर्तृत्वनिदर्शनाय। पर्याप्तो ह्येकः पुलाकः स्थाल्या निदर्शनाय। किं तर्हि संज्ञाया अप्रसिद्धिः। यावता सर्वत्रैवात्र स्वातन्त्र्यं विद्यते पारतन्त्र्यं च। तत्र परत्वात्कर्तृसंज्ञैव प्राप्नोति। अत्रापि न वा स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं वचनाश्रया च संज्ञा इत्येव। यथा पुनरिदं भवता स्थाल्याः कर्तृत्वं निदर्शितं संभवनक्रियां च धारणक्रियां च कुर्वती स्थाली स्वतन्त्रेति। क्वेदानीं परतन्त्रा स्यात्। यत्तत्प्रक्षालनं परिवर्तनं वा। न वा एवमर्थं स्थाल्युपादीयते प्रक्षालनं परिवर्तनं च करिष्यामीति। किं तर्हि संभवनक्रियां धारणक्रियां च करिष्यतीति तत्र चासौ स्वतन्त्रा। एवं तर्हि स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रा। कर्तृस्थे यत्ने कथ्यमाने परतन्त्रा।

कारकव्यपदेशनिबन्धनम्। यथा प्रविशपिण्डीमिति। परत्वादिति। अपादानादीनामवकाशो यदा स्वातन्त्र्यं नास्ति। कर्तृसंज्ञाया अवकाशो देवदत्तः पचतीति। ननु सर्वत्र स्वातन्त्र्यस्य सद्भावान्नास्ति कर्तृसंज्ञावियुक्तोऽपादानादिसंज्ञानामन्यत्रावकाशः सत्यमेतत्। पूर्वपक्षस्त्वयं तत्र च न्यायाभासेनैव भाव्यम्। अन्यथा पूर्वपक्ष एव न स्यात्। अत्रापीति। उद्भूतस्वातन्त्र्यविवक्षायां कर्तृसंज्ञा। यथा स्थाली पचतीति। उद्भूतपारतन्त्र्यविवक्षायां तु न्यग्भावात्सदपि स्वातन्त्र्यं स्वकार्यं न प्रयुङ्क्ते। यथा राजसंनिधौ तदनुपयोगिस्वकार्यममात्या नारभन्ते। न वा एवमर्थमिति। प्रक्षालनाद्यभावेऽपि पाकनिष्पादात्तेषां तन्त्रानङ्गत्वात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंपुनः प्रधानमिति। सामग्रीतः क्रियोत्पादात्सर्वेषां तत्र सामान्यान्न कस्यचित्प्राधान्यमिति भावः। कर्ताप्रवर्तयितेति। तदधीनप्रवृत्ति-
निवृत्तित्वात्करणादीनां तस्य च प्रागन्यतः प्राप्तिलाभात्प्रतिनिध्यदर्शनात्करणाद्यभावेप्यास्ते शेते इत्यादौ केवलस्य कर्तुर्दर्शनात्कर्तृ-
रहितानां करणादीनामदर्शनात्प्राधान्यं कर्तुरित्यर्थः। उभौ चान्योन्यविशेषकाविति। ततश्च स्वातन्त्र्यपारतन्त्र्ययोर्युगपद्विरोधा-
द्विशेषणविशेष्यत्वेन प्रकल्प्येते इत्यर्थः। एवं तर्हीति। सर्वेषां कारकाणां साध्यत्वेन साधारणी क्रिया। ततश्च सर्वेषां तस्यां कर्तृत्वम्। अ-
वान्तरव्यापारविवक्षायां तु करणादिरूपत्वम्। यथा मातापित्रोरपत्योत्पादने कर्तृत्वभेदविवक्षायां त्वयमस्यामियमस्माज्जनयती-
त्यधिकरणत्वमपादानत्वं च व्यवतिष्ठते। कर्तृसंज्ञा तु करणत्वाद्यवस्थायां न भवति। स्वतन्त्रः कर्तेत्यत्र कारकत्वादेव स्वातन्त्र्ये लब्धे

ननु च भोः कर्तृस्थेपि यत्ने कथ्यमाने स्थाली संभवनक्रियां धारणक्रियां च करोतीति तत्रासौ स्वतन्त्रा के दानीं परतन्त्रा
स्यात्। एवं तर्हि प्रधानेन समवाये स्थाली परतन्त्रा व्यवाये स्वतन्त्रा। तद्यथा। अमात्यानां राज्ञा सह समवाये पा-
रतन्त्र्यं व्यवाये स्वातन्त्र्यम्। किंपुनः प्रधानम्। कर्ता। कथं पुनर्ज्ञायते कर्ता प्रधानमिति। यत्सर्वेषु साधनेषु संनि-
हितेषु कर्ता प्रवर्तयिता भवति। ननु च भोः प्रधानेनापि वै समवाये स्थाल्या अनेनार्थः अधिकरणं कारकमिति।
नहि कारकमित्यनेनाधिकरणत्वमुक्तमधिकरणमिति वा कारकत्वम्। उभौ चान्योन्यविशेषकौ भवतः। कथ-
म्। एकद्रव्यसमवायित्वात्। तद्यथा गार्ग्यो देवदत्त इति। नहि गार्ग्य इत्यनेन देवदत्तत्वमुक्तं देवदत्त इत्यनेन
वा गार्ग्यत्वम्। उभौ चान्योन्यविशेषकौ भवत एकद्रव्यसमवायित्वात्। एवं तर्हि सामान्यभूता क्रिया वर्तते
तस्या निर्वर्तकं कारकम्।

पुनः स्वतन्त्रश्रुतिर्नियमार्था तेन स्वतः स्वातन्त्र्यमेव यस्य कर्तृसंज्ञा तस्य न तु पारतन्त्र्यसहितस्वातन्त्र्ययुक्तस्य। कारकसंज्ञा
तु वस्तुस्थित्या विद्यमानमुद्भूतत्वेनाविवक्षितमपि स्वातन्त्र्यमाश्रित्य करणादीनां विधानसामर्थ्यात्प्रवर्तते। यत्र च परेषां नानिमि-
त्तनिमित्तिभावेन युगपद्विवक्षा तत्र संज्ञानां विप्रतिषेध उच्यते। यथा धनुषा विध्यतीति विनापायविवक्षया धनुषः साधकत-
मत्वाभावात्संज्ञाद्वयप्रसङ्गे परत्वात्करणसंज्ञा। असिश्छिनत्तीति सत्येव साधकतमत्वे स्वातन्त्र्यस्य विवक्षितत्वात्परत्वात्कर्तृसं-
ज्ञा। तदा तु तैक्ष्ण्यादीनां करणत्वम्। तैक्ष्ण्यादीनां तु कर्तृत्वविवक्षायामात्मनः करणत्वम्। तैक्ष्ण्यमेव हि विवक्षावशाद्द्वेधावतिष्ठ-
ते। कर्तृत्वेन करणत्वेन च। वस्तुस्थित्या त्वेक एवार्थो मेतिकर्तृत्वं करणत्वस्य बाधकमुच्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। क्रियात्र सूत्रे कारकशब्देनोच्यते। सा हि कर्त्रादीनि विशिष्टव्यपदेशयुक्तानि करोतीति। विषयत्वेन चायमधिकारः क्रियायां विषये यद्ध्रुवमित्यादि वस्तु संपद्यते। एवं च कृत्वेति। निर्द्धारणसप्तम्यां हि कारकेष्विति वाच्यम्। निर्द्धारणस्यानेकाश्रयत्वात्। कारकाद्दत्तश्रुतयोरित्यादौ तु कारकशब्दस्य स्वरितत्वात्तदधिकारो ऽपादानादीनां ग्रहणम्॥ ध्रुवमपाये॥ ॥ध्रुवग्रहणमिति। अध्रुवस्य परत्वात्संज्ञान्तरं प्रवर्तिष्यत इति प्रश्नः। शकटेनेति। अपाये शकटस्यापि साधनत्वादपादानसंज्ञा प्राप्नोति। करणसंज्ञेति। यथा धनुषा विध्यतीति क्रियमाणे ऽपि ध्रुवग्रहणे परत्वात्करणसंज्ञा भवति एवमक्रियमाणे ऽपि शकटस्य भविष्यतीत्यर्थः। इदं तर्हीति। ननु कंसपात्री साधनमेवागमनेन भवति भुजिक्रियायां तु साधनं ध्रुवा च तत्र परत्वादधिकरणसंज्ञेति कडारसूत्र उक्तम्। एवं तर्हि वस्तुस्थित्यात्रागमनं प्रधानं तदङ्गं तु भोजनम्। शब्दात्तु विपरीतो गुणप्रधानभावः प्रतीयते। तदुक्तं हरिणा। चङ्क्रम्यमाणो ऽधीष्वात्र जपं श्वङ्क्रमणं कुरु। तादर्थ्यस्याविशेषे ऽपि शब्दाद्भेदः प्रतीयत इति। तत्र कंसपात्री भुजेः साधनत्वात्तद्द्वारेणागमनस्यापि भवत्ये

अथवा यावद्ब्रूयात्क्रियायामिति तावत्कारक इति। एवं च कृत्वा निर्देश उपपन्नो भवति कारक इति। इतरथा हि कारकेष्विति ब्रूयात्। कारके॥ ॥ध्रुवमपाये ऽपादानम्॥ ध्रुवग्रहणं किमर्थम्। ग्रामादागच्छति शकटेन। नैतदस्ति। करणसंज्ञात्र बाधिका भविष्यति। इदं तर्हि ग्रामादागच्छन्कंसपात्र्यां पाणिनौदनं भुङ्क्ते इति। अत्राप्यधिकरणसंज्ञा बाधिका भविष्यति। इदं तर्हि वृक्षस्य पर्णं पतति कुड्यस्य पिण्डः पततीति॥ जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्॥ जुगुप्साविरामप्रमादार्थानामुपसंख्यानं कर्तव्यम्। जुगुप्सा। अधर्माज्जुगुप्सते। अधर्माद्बीभत्सते। विरामः। धर्माद्विरमति। धर्मान्निवर्तते। प्रमादः। धर्मात्प्रमाद्यति। धर्मान्मुह्यति। इदं चोपसंख्यानं कर्तव्यम्। सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति। तत्तर्हीदं बहु वक्तव्यम्॥

वसाधनम्। अत्रापीति। शब्देन भोजनस्यैव प्राधान्यं प्रतीयत इति तत्प्रयुक्तयैव संज्ञया भाव्यम्। यथा भोक्तुं ग्राममभिनिविशत इति प्रधानक्रियापेक्षया ग्रामस्य कर्मसंज्ञा भवति न तु भुज्यपेक्षया ऽधिकरणसंज्ञा। वृक्षस्येति। अस्त्यत्रापाय इति भावः। नन्वत्र कारकत्वाभावात्संज्ञा न भविष्यति अपायाश्रयत्वाद्धा। सत्येव ह्यवधावपायो भवतीति पूर्वसूत्र उक्तत्वात्। तत्र केचिदाहुः। सुज्ञानत्वात्पूर्वसूत्र उक्तत्वाच्च भाष्यकारेणायमर्थो नोक्तः। अन्ये त्वाहुः। सतीह ध्रुवग्रहणे विशिष्टो ऽपायो लभ्यते असति तु तस्मिन्पातमात्रस्य लोके ऽपायत्वेन प्रसिद्धत्वात्कारकाधिकारानपेक्षया च प्रत्युदाहरणमुपन्यस्तम्। जुगुप्सेति। संश्लेषपूर्वको विश्लेषो ऽपायः स चात्र नास्ति। बुद्धिकल्पितस्तु गौण इति भावः। कारकशेषत्वाच्चात्र षष्ठी प्राप्नोति। यथा नटस्य शृणोतीति। सांकाश्यकेभ्य इति। पञ्चमी विभक्ते इत्यनपेक्ष्य वचनम्। अत्र यतश्च निर्द्धारणमिति षष्ठी सप्तम्यौ प्राप्नुतः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवक्तव्यमिति। साधकतमं करणमिति तमग्रहणेन स्वरितेनाधिकार इत्यधिकः कारोऽधिकार इत्यस्यार्थस्याश्रयणेन च बुद्धिव्यव-
स्थितापायाश्रयाऽपादानसंज्ञा प्रवर्तते। अधर्माज्जुगुप्सत इति। जुगुप्सादयो निवृत्त्यङ्गे जुगुप्सादौ वर्तन्ते। संभिन्नबुद्धिरिति। धर्मा
धर्मयोरेकाकारबुद्धिर्नास्तिक इत्यर्थः। यस्तैरिति। तैः सांकाश्यकैः पाटलिपुत्रकाणां समगुणत्वाद्यः साम्यमवगतवान्स प्रकर्षाश्र
येण पुनः पृथक्कृत्य वाक्यं प्रयुङ्क्ते इत्यर्थः। त्रिविधं चेदमपादानम्। निर्दिष्टविषयमुपात्तविषयमपेक्षितक्रियं चेति। तत्र निर्दि
ष्टविषयम्। यत्र धातुनापायलक्षणो विषयो निर्दिष्टः यथा ग्रामादागच्छतीति। उपात्तविषयम्। यत्र धातुर्धात्वन्तरार्थाङ्गं स्वार्थ-
माह। यथा बलाहकाद्विद्योतत इति। निःसरणाङ्गे द्योतने द्युतिर्वर्तते। यथा कुसूलात्पचतीत्यादौ आदानाङ्गे पाके पचिर्वर्तते।
अपेक्षितक्रियम्। यत्र क्रियावाचिपदं न श्रूयते केवलं क्रिया प्रतीयते। यथा सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति।

नवक्तव्यम्। इह तावदधर्माज्जुगुप्सते अधर्माद्बीभत्सत इति। य एष मनुष्यः प्रेक्षापूर्वकारी भवति स
पश्यति दुःखोऽधर्मो नानेन कृत्यमस्तीति स बुद्ध्या संप्राप्य निवर्तते। तत्र ध्रुवमपायेऽपादानमित्येव सि
द्धम्। इह धर्मात्प्रमाद्यति धर्मान्मुह्यतीति। इह य एष मनुष्यः संभिन्नबु
द्धिर्भवति स पश्यति नेदं किंचिद्धर्मो नाम नैनं करिष्यामीति स बुद्ध्या संप्राप्य निवर्तते। तत्र ध्रुवमपायेऽ
पादानमित्येव सिद्धम्। इह च सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति यस्तैः साम्यं गतवान्भवति स एतत्प्रयुङ्क्ते
। गतियुक्तेष्वपादानसंज्ञा नोपपद्यतेऽध्रुवत्वात्। गतियुक्तेष्वपादानसंज्ञा नोपपद्यते। रथात्प्रवीतात्पतितः। अश्वात्त्रस्ता
त्पतितः। सार्थाद्गच्छतो हीन इति। किं कारणम्। अध्रुवत्वात्। नवा ध्रौव्यस्याविवक्षितत्वात्।

गतियुक्तेष्विति। अचलं ध्रुवमेकरूपं चेति परिस्पन्दे ध्रुवता नास्तीति मन्यते। अश्वात्त्रस्तादिति। त्रासपूर्वके परिस्पन्देऽनेकार्थत्वाद्धातूनां त्र
सिर्वर्तते त्रस्तश्चाश्वः पातस्य निमित्तमिति पूर्वमश्वस्य त्रस्तत्वेन संबन्धः पश्चात्पतित इत्यनेनेति ध्रुवताश्वस्य नास्ति। नवेति। अयमर्
थः। ध्रुवमेकरूपमुच्यते। तच्च ध्रौव्यमपायविषयमाश्रीयते न त्वनवच्छिन्नम्। ततोऽपाये यदनाविष्टं तदपाये ध्रुवमुच्यते। देवदत्तकर्तृ
के च पाते त्रस्तस्याप्यश्वस्यापायानावेशाद्ध्रुवत्वम्। देवदत्तस्यैवापायावेशादध्रुवत्वम्। अथवाश्वस्य त्रस्तत्वाद्यदध्रौव्यं तत्प्रथममविव
क्षितमित्यर्थः। तथाहि। कारकस्य पूर्वं क्रियया समन्वयः स च श्रुतिप्रापित उच्यते। पश्चाद्विशेषणेन वाक्यीयः संबन्धस्तत्पश्चात्पतित इति संब
न्धे नास्त्यश्वस्याध्रुवत्वम्। पश्चात्त्रस्तत्वेन संबन्धे सत्यप्यध्रौव्ये अन्तरङ्गा संज्ञा न निवर्तते। विशेषणस्यासत्यप्यपादानत्वे सामयिकी विभक्तिः
सा च विशेष्यानुरोधेन प्रवर्तते न त्वनियमेन। अथवा त्रस्तस्याप्यपादानत्वं सत्यपि त्रासापेक्षेऽध्रुवत्वे पातं प्रति ध्रुवत्वात्। यथोक्तं प्राक्। ॥ राम॰ २९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आशुगामित्वमिति। अयमर्थः। व्युत्पत्तिमात्रमाशुगामित्वमिति तदपेक्षयाऽध्रौव्यं नाशङ्कनीयम्। जातिरेव शब्दप्रवृत्तिनिमित्तमिति नात्य
त्राध्रौव्यम्। आशुगामित्वशब्देनैकार्थसमवायात्साहचर्यादश्वत्वमेवोच्यते। यद्यपीति। यत्र क्रिया न प्रवृत्तिनिमित्तं किंतु व्युत्पत्तिमात्र
निमित्तं तत्रैतद्वक्तुं युज्यते। यत्र तु शब्दप्रवृत्तिनिमित्तं क्रिया तत्र कथं नाध्रौव्यमिति प्रश्नः। अत्रापीति। सरणक्रियोपलक्षितं द्रव्यमा
त्रमपादानत्वेन विवक्षितम्। तच्च देवदत्तकर्तृके पाते पूर्वोक्तन्यायाद्ध्रुवमेवेत्यर्थः। कथं पुनरिति। शब्दोपात्तमपि सरणं द्रव्योपलक्ष-
णार्थत्वादध्रौव्यनिमित्तं न भवतीति कुत एतदिति प्रश्नः। अलोमिकेति। अल्पत्वाल्लोम्नां तत्कार्याकरणादेवमुच्यते। असतश्चे
ति। निदर्शनार्थमिदमुच्यते। यथाऽसतो विवक्षा भवति एवं सतोऽप्यविवक्षेत्यर्थः। समुद्रः कुण्डिकेति। कुण्डिकायां पानीयबाहुल्या

नवा एष दोषः। किं कारणम्। अध्रौव्यस्याविवक्षितत्वात्। नात्राध्रौव्यं विवक्षितम्। किं तर्हि। ध्रौव्यम्। इह तावदश्वा
त्त्रस्तात्पतित इति यत्तदश्वेऽश्वत्वमाशुगामित्वं तद्ध्रुवं तच्च विवक्षितम्। रथात्प्रवीतात्पतित इति यद्रथे रथत्वं र
मन्तेऽस्मिन् रथ इति तद्ध्रुवं तच्च विवक्षितम्। सार्थाद्गच्छतो हीन इति यत्तत्सार्थे सार्थत्वं सहार्थीभावः तद्ध्रुवं तच्च विवक्षि
तम्। यद्यपि तावदत्रैतच्छक्यते वक्तुम्। ये त्वेते त्यन्तं गतियुक्तास्तत्र कथम्। धावतः पतितस्त्वरमाणात्पतित इति
। अत्रापि न वाऽध्रौव्यस्याविवक्षितत्वादित्येव। कथं पुनः सतो नामाविवक्षा स्यात्। सतोऽप्यविवक्षा भवति। तद्य-
था। अलोमिका एडका। अनुदरा कन्येति। असतश्च विवक्षा भवति। समुद्रः कुण्डिका विन्ध्यो वर्धितकमिति॥
भीत्रार्थानां भयहेतुः॥ ॥अयं योगः शक्योऽवक्तुम्। कथं वृकेभ्यो बिभेति दस्युभ्यो बिभेति चोरेभ्यस्त्रायते दस्यु
भ्यस्त्रायत इति। इह तावद्वृकेभ्यो बिभेति दस्युभ्यो बिभेतीति य एष मनुष्यः प्रेक्षापूर्वकारी भवति।

त्समुद्रत्वं विवक्षितं समुद्रस्य वा सुतरत्वात्कुण्डिकात्वम्। विन्ध्यो वर्द्धितकमिति। पूर्ववदन्यतररूपारोपेण व्याख्येयम्। मेषो मेषादप
सर्पतीत्यत्रैकस्य मेषस्य कर्तृत्वविवक्षा परस्यापादानत्वविवक्षा। यदा तु मेषावपसरत इति प्रयोगस्तदाऽवध्यन्तरमपेक्षणीयम्। भी
त्रार्थानाम्॥ ॥कथमिति। भयमाकुलीभावस्त्राणमनर्थप्रतिघात इति तत्र च नास्ति मुख्योऽपाय इति प्रश्नः। प्रेक्षापूर्वकारीति। बु
द्धिव्यवस्थातोऽत्रापायोऽस्तीति भावः। तत्र निवृत्त्यङ्गे भये बिभेत्यादयो वर्तन्त इत्युपात्तविषयमेतदपादानम्। चोरेभ्यस्त्रायत इ
त्यनर्थपरिहाराय निवर्तयतीत्यर्थः। चोरमध्यगतस्यापि त्राणे चोरसंपर्कफलस्य वधबन्धनापहरणादेर्निवर्तनात्तेभ्यो निवर्तय
तीत्युच्यते। वारणार्थानामीप्सित इत्यनेनात्रापादानसंज्ञा न प्राप्नोति चोराणामनीप्सितत्वात्। सूत्रारम्भपक्षे तु कारकशेष-
त्वात् षष्ठ्यां प्राप्तायामिदं वचनम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पराजेः ॥ पराजिः क्वचिदभिभवे वर्तते। यथा शत्रून्पराजयत इति। इह त्वसोढग्रहणान्न्यूनीभावः प्रतिगृह्यते। अध्ययनात्पराजयत इह सति। अध्येतुं ग्लायतीत्यर्थः। अत्र चार्थेऽकर्मकत्वात्सम्बन्धं प्राप्तायां वचनम्। पूर्ववदस्यापि प्रत्याख्यानमित्यत्र पराजयेपराजेर्वर्तेनात्॥ वारणार्थानाम्॥ ॥किमुदाहरणमिति। अव्याप्तिं मन्यमानस्य प्रश्नः। भवेद्यस्येति। यस्यात्मीया माषास्तस्य नईप्सिता इत्यर्थः। अभिप्रेतपर्यायमीप्सितशब्दं मन्यते। यस्य त्विति। यस्यात्मीया गावः परकीयास्तु माषास्तस्य न तईप्सिताः। तस्यापीति। ईप्सितशब्दः क्रियाशब्द आश्रीयते न तु रूढिशब्दः। तत्र वारणक्रियया परकीया अपि माषा वारयितुराप्तुमिष्टा भवन्तीमान शान्ते ते इत्येतेभ्योऽसौ

सपश्यति यदिमां वृकाः पश्यन्ति ध्रुवो मे मृत्युरिति स बुद्ध्या संप्राप्य निवर्तते तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्। इह चोरेभ्यस्त्रायते दस्युभ्यस्त्रायत इति य एष मनुष्यः प्रेक्षापूर्वकारी सुहृद्भवति स पश्यति यदीमं चोराः पश्यन्ति ध्रुवमस्य वधबन्धनादि परिक्लेशः इति स बुद्ध्या संप्राप्य निवर्तयति तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्। भीत्रार्थानाम्॥ ॥पराजेरसोढः॥ अयमपि योगः शक्योऽवक्तुम्। कथमध्ययनात्पराजयत इति। य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखमध्ययनं दुर्धरं च गुरवश्च दुरुपचारा इति स बुद्ध्या संप्राप्य निवर्तते तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्॥ ॥वारणार्थानामीप्सितः॥ किमुदाहरणम्। माषेभ्यो गा वारयति। भवेद्यस्य माषा न गावस्तस्य माषा ईप्सिताः स्युः। यस्य तु खलु गावो न माषाः कथं तस्य माषा ईप्सिताः स्युः। तस्यापि माषा एवेप्सिताः। आतश्चेप्सिताः यदेभ्यो गा वारयति। इह कूपादन्धं वारयतीति कूपेऽपादानसंज्ञा न प्राप्नोति। न हि तस्य कूप ईप्सितः। कस्तर्हि। अन्धः। तस्यापि कूप एवेप्सितः पश्यत्ययमन्धः कूपं मा प्रापदिति। अथवा यथैवास्यान्यत्रापश्यत ईप्सा एवं कूपेऽपि। इहाग्नेर्माणवकं वारयतीति माणवकेऽपादानसंज्ञा प्राप्नोति।

गा वारयति। माषा एवेति। एवकारो भिन्नक्रमः। ईप्सिता एवेत्यर्थः। कूपादिति। अन्धसंबन्धे कूपस्य न विनाशो नापि राजभयमिति प्रश्नः। कस्तर्ह्यन्ध इति। तं प्रत्यनुकम्पायाः सद्भावात्तस्येप्सितत्वं मन्यते। तस्यापीति। वारणक्रियया प्राप्तुमिष्ट इत्यर्थः। अथवेति। ईप्सितइत्यनेन कर्मणा कर्तृमात्रस्याक्षेपान्निवार्यमाणस्यान्धस्य गमनादिक्रियया कूप आप्तुमिष्टो भवतीति प्रवर्ततेऽपादानसंज्ञा। अन्धस्य च प्रवृत्त्यनुमेयेप्सा। तदाह। अन्यत्रापश्यत इति। अन्धस्येत्यर्थः। स ह्यपश्यन्नपि गन्तव्यं जिगमिषति। अन्यथा न क्वचित्तस्य प्रवृत्तिः स्यात्। इदानीमतिप्रसङ्गमुद्भावयति। इहाग्नेरिति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मसंज्ञात्रेति। परत्वादिति भावः। कर्मसंज्ञाया अवकाशो वारणार्थेभ्योऽन्ये धातवः। अपादानसंज्ञायास्तु प्रकर्षरहितमीप्सितम्। ईप्सि
ततमस्य तूभयप्रसङ्गे परत्वात्कर्मसंज्ञा। अग्नावपीति। कारकाधिकारे प्रकर्षो न विवक्ष्यते इत्यतन्त्रं तमनिर्देशं मन्यते। कर्मणो यदी-
प्सितमिति। तत्र कर्मसंज्ञानिमित्तमेवाऽपादानसंज्ञाया इति माणवके प्रवर्तते। ततस्तस्येप्सितस्याग्नेरपादानसंज्ञेत्यर्थः। ईप्सितेप्सितमि
ति। वारयितुर्यदीप्सितं कर्म तस्य यदीप्सितमित्यर्थः। शेषषष्ठ्या चात्र समासः। अन्यथा क्तेन च पूजायामिति निषेधः स्यात्। कर्तुरिति। प्रकर्षे
प्रत्ययोपादानसामर्थ्यात्कर्मसंज्ञायां प्रकर्षो विवक्ष्यत एव। तत्र द्वयोः संज्ञयोः सावकाशयोः परत्वादीप्सिततमस्य कर्मसंज्ञा॥ अन्तर्द्धौ

कर्मसंज्ञात्र बाधिका भविष्यति। अग्नावपि तर्हि बाधिका स्यात्। तस्माद्वक्तव्यं कर्मणो यदीप्सितमिति। ईप्सितमिति। ई-
प्सितेप्सितमिति वा। वारणार्थेषु कर्मग्रहणानर्थक्यं कर्तुरीप्सिततमं कर्मेति वचनात्। वारणार्थेषु कर्मग्रहणमनर्थक
म्। किं कारणम्। कर्तुरीप्सिततमं कर्मेति वचनात्। कर्तुरीप्सिततमं कर्मेत्येव सिद्धम्। अयमपि योगः शक्योऽवक्तुम्।
कथं माषेभ्यो गा वारयतीति। पश्यत्वयं यदीमा गावस्तत्र गच्छन्ति ध्रुवः सस्यविनाशः सस्यविनाशेऽधर्मश्चैव राजभ
यं चास्य बुद्ध्या संप्राप्य निवर्तयति तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्॥ अन्तर्द्धौ येनादर्शनमिच्छति॥ अयमपि यो
गः शक्योऽवक्तुम्। कथमुपाध्यायादन्तर्धत्त इति। पश्यत्वयं यदि मामुपाध्यायः पश्यति ध्रुवं मे प्रेषणमुपालम्भो वे-
ति स बुद्ध्या संप्राप्य निवर्तते तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्॥ आख्यातोपयोगे॥ ॥उपयोग इति किमर्थम्। न
टस्य शृणोति ग्रन्थिकस्य शृणोति। उपयोग इत्युच्यमानेऽत्र प्राप्नोति। एषोऽपि ह्युपयोगः। आतश्चोपयोगः। यदा
रम्भका रङ्गं गच्छन्ति नटस्य श्रोष्यामः ग्रन्थिकस्य श्रोष्याम इति। एवं तर्ह्युपयोग इत्युच्यते सर्वश्चोपयोगः। तत्र प्रकर्ष
गतिर्विज्ञास्यते साधीयो य उपयोग इति। कश्च साधीयः। यो ग्रन्थार्थयोः। अथवा उपयोगः को भवितुमर्हति यो नियम
पूर्वकः। तद्यथा। उपयुक्ता माणवका इत्युच्यन्ते य एते नियमपूर्वकमधीतवन्तो भवन्ति।

येनादर्शनमिच्छति॥ ॥अन्तर्धत्त इति। तिरोभवतीत्यर्थः॥ आख्यातोपयोगे॥ उपयोगो व्यापारः स चाविशिष्टो नटोपाध्याययोरि-
ति मत्वा पृच्छति। उपयोग इति किमर्थमिति। आरम्भका रङ्गं गच्छन्तीति। रङ्गं सामाजिकस्थानम्। आरम्भका यत्नेन प्रवृत्तिमन्तो गच्छ
न्तीत्यर्थः। प्रकर्षगतिरिति। व्यापारमात्रे लब्धे उपयोगग्रहणं विशिष्टव्यापारपरिग्रहार्थम्। तेन ग्रन्थार्थधारणार्थं यद्ग्रहणं स उप
योगः। अथवेति। उपयोगशब्दस्यैवायमर्थो नियमपूर्वकं विद्याग्रहणम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

किंपुनरिति। उभयथासंभवाद्दोषदर्शनाच्च प्रश्नः। यद्यपक्रामतीति। यथा फलं वृक्षादपक्रान्तं न पुनर्वृक्षे तद्भवति एवं शब्देऽपि प्रस-
ङ्ग इत्यर्थः। संततत्वादिति। शब्दस्य व्यञ्जका ध्वनय उपाध्यायेनोत्पाद्यमाना भिन्ना अपि सादृश्यात्तत्त्वेनाध्यवसीयमानाः श्रोतुः पुनः पु
नः श्रोत्रप्रदेशं गच्छन्तो व्यक्तिस्फोटरूपं जातिस्फोटरूपं वा शब्दमभिव्यञ्जयन्तीत्यर्थः। अथवेति। यथा ज्वालारूपं ज्योतिरविच्छे
देनोत्पद्यमानं सादृश्यात्तत्त्वेनाध्यवसीयमानं संततं तथैवोपाध्यायज्ञानानि भिन्नानि भिन्नशब्दरूपतामापद्यमानानि संतता
न्युच्यन्ते। ज्ञानस्य शब्दरूपापत्तिरिति दर्शनमत्र भाष्यकारस्य। तथा चोक्तम्। वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते। केश्चिद्दर्श

किं पुनराख्यातानुपयोगे कारकमाहोस्विदकारकम्। कश्चात्र विशेषः। आख्यातानुपयोगे कारकमिति चेदकथित
त्वात्कर्मसंज्ञाप्रसङ्गः। आख्यातानुपयोगे कारकमिति चेदकथितत्वात्कर्मसंज्ञा प्राप्नोति। अस्तु तर्ह्यकारकम्। अका
रकमिति चेदुपयोगवचनानर्थक्यम्। यद्यकारकमुपयोगवचनमनर्थकम्। अस्तु तर्हि कारकम्। ननु चोक्तमाख्या
तानुपयोगे कारकमिति चेदकथितत्वात्कर्मसंज्ञाप्रसङ्ग इति। नैष दोषः। परिगणनं तत्र क्रियते। दुहियाचिरुधि
प्रच्छिभिक्षिचिञामिति। अयमपि योगः शक्योऽवक्तुम्। कथमुपाध्यायादधीत इति। अपक्रामति तस्मात्तदध्ययनम्।
यद्यपक्रामति किं नात्यन्तायापक्रामति। संततत्वात्। अथवा ज्योतिर्वज्ज्ञानानि भवन्ति॥ जनिकर्तुः प्रकृतिः॥ अय
मपि योगः शक्योऽवक्तुम्। कथं गोमयाद्वृश्चिको जायते। गोलोमाविलोमभ्यो दूर्वा जायन्त इति। अपक्रामन्ति तास्ते
भ्यः। यद्यपक्रामन्ति किं नात्यन्तायापक्रामन्ति। संततत्वात्। अथवान्याश्चान्याश्च प्रादुर्भवन्ति॥

नभेदो हि प्रवादेष्वनवस्थित इति॥ जनिकर्तुः॥ अपक्रामन्ति ता इति। लोकप्रसिद्ध्याश्रयेणैतदुच्यते। लोके हि यद्यस्माज्जायते
तत्तस्मान्निर्गच्छतीत्युच्यते। तर्काश्रयास्तु प्रक्रिया भिद्यन्ते। वैशेषिकदर्शने परमाण्वादिसमवेतं कारणेभ्योऽपृथग्देशं कार्यमु
त्पद्यत इति नास्ति कार्यस्यापक्रमः। सांख्यदर्शनेप्याविर्भावतिरोभावलक्षणजन्मनाशरूपपरिणामाभ्युपगमान्नास्त्यपक्रमः। यदीति।
यद्यतोऽपक्रामति तत्पुनस्तत्र न दृश्यत इति प्रसिद्धम्। इह तु तत्रास्ति दर्शनमिति प्रश्नः। संततत्वादिति। अविच्छेदादित्यर्थः। यथा बि
लाद्दीर्घभोगो भोगी निष्क्रामन्नप्यविच्छेदात्तत्रोपलभ्यते तथा दूर्वा अपीत्यर्थः। अथवेति। क्षणिकपक्षं द्रव्यान्तरारम्भपक्षं वा परिणा- रामः
मपक्षं वाश्रित्यैतदुक्तमित्याहुः। ननु सतो जन्मायोगादसतश्चाकर्तृत्वासंभवात्पक्षान्तराभावाच्च कथमङ्कुरो जायत इति प्रयोगः। नैष दो २९३
षः। बुद्धिव्यवस्थापितस्यार्थस्य क्रियायां कारकरूपोपगमात्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुवः प्र॥ संततत्वादिति। सादृश्यनिबन्धनतत्त्वाध्यवसायादविच्छेदेन तासामुपलम्भादित्यर्थः। अथवेति। वस्तुतोऽत्र भेद एवापामिति भावः। कर्मणा यम्॥ कर्मग्रहणमिति। उपाध्यायाय गां ददातीत्यत्र गोरुपाध्यायस्याप्यभिप्रेयमाणत्वम्। यतो गोर्दानक्रियया करणभूतयाऽभिप्रेयते गवा तूपाध्यायः। तत्र परत्वाद्गोः कर्मसंज्ञेति पारिशेष्यादुपाध्यायस्यैव संप्रदानसंज्ञा भविष्यतीति प्रश्नः। कर्मण एवेति। सत्यप्युभयसंभवेऽन्तरङ्गत्वात्कर्मण एव गवादेः स्यादित्यर्थः। नन्वेवं कर्मसंज्ञानवकाशा स्यात्। वचनसामर्थ्यात्तर्हि पर्यायः स्यात्। कारकप्रकरणे च प्रकर्षयोगो नाश्रीयते न त्वन्तरङ्गबहिरङ्गव्यवहारः। ननु पर्याये सति गत्यर्थकर्मणीत्यारम्भो नर्थकः स्यात्। तस्य प्रत्याख्यातत्वादित्यदोषः। अथेति। अध्याहारेणापि सर्वनामद्वयार्थो लभ्यत इति प्रश्नः। अभिप्रयत एवेति। श्रुतपदार्थसं-

भुवः प्रभवः॥ अयमपि योगः शक्योऽवक्तुम्। कथं हिमवतो गङ्गा प्रभवतीति। अपक्रामन्ति तास्तस्मादापः। यद्यपक्रामन्ति किं नात्यन्तायापक्रामन्ति। संततत्वात्। अथवान्याश्चान्याश्च प्रादुर्भवन्ति॥ कर्मणा यमभिप्रैति स संप्रदानम्॥ कर्मग्रहणं किमर्थम्। यमभिप्रैति स संप्रदानमितीयत्युच्यमाने कर्मण एव संप्रदानसंज्ञा प्रसज्येत। कर्मग्रहणे पुनः क्रियमाणे न दोषो भवति। कर्मनिमित्तत्वेनाश्रीयते। अथ यंसग्रहणं किमर्थम्। कर्मणाभिप्रैति संप्रदानमितीयत्युच्यमाने अभिप्रयत एव संप्रदानसंज्ञा प्रसज्येत। यंसग्रहणे पुनः क्रियमाणे न दोषो भवति। यंसग्रहणादभिप्रयतः संप्रदानसंज्ञा निर्भज्यते। अथाभिप्रग्रहणं किमर्थम्। कर्मणा यमेति स संप्रदानमितीयत्युच्यमाने यमेव संप्रत्येति तत्रैव स्यात्। उपाध्यायाय गां ददातीति। इह न स्यादुपाध्यायाय गामदादुपाध्यायाय गां दास्यतीति। अभिप्रग्रहणे पुनः क्रियमाणे न दोषो भवति। अभिराभिमुख्ये वर्तते प्रशब्द आदिकर्मणि।

बन्धे नैव निराकाङ्क्षत्वेऽध्याहारानुपपत्तिरिति भावः। कर्तृसंज्ञायास्त्वकर्मको धातुरवकाशः स्यात्। ततश्चोपाध्यायाय शिष्येण गौर्दीयत इत्यत्रार्थे शिष्यायोपाध्यायस्य गौर्दीयत इति स्यात्। ननु शिष्यस्य कर्तृत्वाभावे कथं गोः कर्मसंज्ञा नैष दोषः। कर्मसंज्ञायां स्वातन्त्र्यस्य कर्तृग्रहणेनोपलक्षणात्। तथा च सार्थाद्धीयत इत्यत्र कर्मणि लकारोत्पत्तिः। निर्भज्यत इति। आकृष्यत इत्यर्थः। अथेति। कर्मणा यमेति गच्छति प्राप्नोति संबध्नातीत्यर्थः। अभिप्रैतीत्युक्ते स एवार्थ इति प्रश्नः। आभिमुख्य इति। उपसर्गद्वयोपादानसामर्थ्यात्कालानवच्छिन्ना क्रियाश्रीयत इत्यर्थः। ननु यथा तेन दीव्यतीत्यादौ संख्याकालयोर्न विवक्षा तथेहापि संख्यावत्कालस्याविवक्षा भविष्यतीति किमुपसर्गद्वयोपादानेन। एवं तर्हि न्यायसिद्ध एवार्थ उपसर्गद्वयोपादानेन प्रदर्श्यत इति भाष्यकारस्याभिप्रायः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ आह्वायेति। आह्वं निन्दति नास्तिकत्वादित्यर्थः। युद्धायेति। युद्धविषयं संनहनपूर्वकं निश्चयं करोतीत्यर्थः। पत्येशेत इति। पतिमुपसृत्य शे १४३
२९४ त इत्यर्थः। न सिध्यतीति। क्रियान्तरानुपादानादिति भावः। कथं च नामेति। क्रियान्तरानुपादाने एकस्या एव क्रियायाः कर्मकरणभाव
एकदा एकात्मन्येव नोपपद्यत इति भावः। क्रियापीति। प्रतीयमानक्रियापेक्षः कारकभावः प्रविश पिण्डीमित्यादाविवात्रेत्यर्थः।
यदा तु संदर्शनादयो धात्वर्थाद्भेदेन विवक्ष्यन्ते तदा संप्रदानसंज्ञा अन्यदा तु कर्मसंज्ञैव यथा कटं करोतीति। सा च भेदाभेदविव
क्षा प्रयोगदर्शनवशेन नियतविषयैवाश्रीयत इति प्रयोगस्यासंकरः। कर्मणः करणसंज्ञेति। एतच्छन्दोविषयम्। सर्वे विधयः
श्छन्दसि विकल्प्यन्त इति यथाप्राप्तमपि प्रयोगो भवति। पशुना रुद्रं यजत इति। रुद्रं देवतामुद्दिश्य पशुं त्यजतीत्यर्थः। केचित्त्व

तेन यं चाभिप्रैति यं चाभिप्रैष्यति यं चाभिप्रागाद् अभिमुख्यमात्रे सर्वत्र सिद्धं भवति। क्रियाग्रहणमपि कर्त
व्यम्। इहापि यथा स्यात्। श्लाघते निगर्हते। युद्धाय संनह्यते। पत्ये शेते इति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्।
कथम्। क्रियां हि नाम लोके कर्मेत्युपचरन्ति। कां क्रियां करिष्यसि किं कर्म करिष्यसीति। एवमपि कर्तव्यम्।
कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति। क्रियापि कृत्रिमं कर्म। न सिध्यति। कर्तुरीप्सिततमं कर्मेत्युच्य
ते। कथं च नाम क्रियया क्रियेप्सिततमा स्यात्। क्रियापि क्रियया ईप्सिततमा भवति। कया क्रियया। संदर्श
नक्रियया प्रार्थयति क्रियया ऽध्यवस्यति क्रियया च। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति। स बु
द्ध्या तावत्कंचिदर्थं पश्यति संदृष्टे प्रार्थना प्रार्थनायामध्यवसायः अध्यवसाये आरम्भः आरम्भे निर्वृत्तिः निर्वृत्तौ फ
लावाप्तिः। एवं क्रियापि कृत्रिमं कर्म। एवमपि कर्मणः करणसंज्ञा वक्तव्या संप्रदानस्य च कर्मसंज्ञा। पशुना रुद्रं य
जते। पशुं रुद्राय ददातीत्यर्थः। अग्नौ किल पशुः प्रक्षिप्यते रुद्राय उपह्रियत इति॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रतिको
पः॥ ॥किमेत एकार्था आहोस्विन्नानार्थाः।

र्थसंज्ञा विज्ञानाद्ददातिविषय एव संप्रदानसंज्ञेत्यभ्युपगतम्। दानं च स्वत्वनिवृत्तिः परस्वत्वापत्तिपर्यन्तेति प्रसज्ञायि। तदुभयम
प्ययुक्तम्। अन्यत्रापि भाष्यकारेण संज्ञाया अभ्युपगमात्। तथा च क्रियाग्रहणस्य गत्यर्थकर्मणीति सूत्रस्य च प्रत्याख्यानं कृतम्।
तथा स्वत्वनिवृत्त्यभावेपि ददातेः प्रयोगो दृश्यते न शूद्राय मतिं दद्यादिति। खण्डिकोपाध्यायस्तस्मै चपेटां ददातीति च॥ क्रुधद्रुह॥ ॥ रामः
किमेतदिति। ननु लोकव्यवहारादेवार्थावगमात्संदेहस्यानुपपत्तिः। एवं तर्हि चित्तदोषरूपता सर्वेषामस्तीति सामान्यापेक्षायामेकार्थत्व २९४
मवान्तरभेदविवक्षायां तु भिन्नार्थत्वमित्यदोषः। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमर्थमिति। एकेनैव धातुनार्थस्योपलक्षितत्वादन्येषां वैयर्थ्यप्रसङ्गः। नानार्था इति। क्रोधो रोषः। द्रोहोऽभिचारः। ईर्ष्या परगुणासह
नम्। असूया परगुणविध्वंसनम्। कुपाविति। कुपेर्धातोर्वाच्यत्वेन यदवस्थितं तदेतेषां साधारणमित्यर्थः। कोपपूर्वाणां सर्वेषां-
ग्रहणार्थं यं प्रति कोप इति विशेषणमित्यर्थः। तेनेह न भवति भार्यामीर्ष्यतीति। परैर्दृश्यमानां न सहत इत्ययमत्रार्थ इति नास्ति कोपप्र
भवत्वमत्रेर्ष्यायाः। नह्यकुपितः क्रुध्यतीति। ननु कोपः क्रोध एवेति भेदाभावात्कथं पौर्वापर्यम्। एवं तर्हि प्रथममनुद्भूतां कोपाव-
स्थां द्वितीयां चोद्भूतां विकृतवाक्कायव्यापारानुमीयमानामाश्रित्यैतदुक्तमित्यदोषः। न वाकुपितो द्रुह्यतीति। यत्र विषये संप्रदान
संज्ञेष्यते तदुद्देशेनैतदुच्यते न तु सर्वविषयापेक्षया। अन्यथा व्यभिचाराभावाद्यं प्रति कोप इति विशेषणमनुपादेयं स्यात्। भा
र्यामीर्ष्यतीति विनापि कोपात्प्रयोगदर्शनाच्च। अस्मान्द्वेष्टीत्यत्र संप्रदानसंज्ञा न भवति द्विषेः क्रोधार्थत्वात्। अनभिनन्दने द्विषिर्व

किं चातः। यद्येकार्थाः किमर्थं पृथङ्निर्दिश्यन्ते। अथ नानार्थाः कथं कुपिना शक्यन्ते विशेषयितुम्। एवं तर्हि नानार्थाः।
कुपेस्त्वेषां सामान्यमस्ति। नह्यकुपितः क्रुध्यति। न वाऽकुपितो द्रुह्यति। न वाकुपित ईर्ष्यति। न वाकुपितोऽसूयति॥ सा
धकतमं करणम्॥ ॥ तमब्ग्रहणं किमर्थम्। न साधकं करणमित्येवोच्येत। साधकं करणमितीयत्युच्यमाने सर्वेषा
मेव कारकाणां करणसंज्ञा प्रसज्येत। सर्वाणि हि कारकाणि साधकानि। तमब्ग्रहणे पुनः क्रियमाणे न दोषो भवति।
नैतदस्ति प्रयोजनम्। पूर्वास्तावत्संज्ञा अपवादत्वाद्बाधिका भविष्यन्ति। पराः परत्वादनवकाशत्वाच्च। इह तर्हि धनु
षा विध्यति अपाययुक्तत्वाच्चापादानसंज्ञा साधकत्वाच्च करणसंज्ञा प्राप्नोति। तमब्ग्रहणे पुनः क्रियमाणे न दोषो-
भवति। एवं तर्हि लोकत एतत्सिद्धम्।

र्तते यथौषधं द्वेष्टीति॥ साधक॥ ॥ तमब्ग्रहणमिति। कारकाधिकारात्साधकत्वे लब्धे पुनः साधकश्रुतिः प्रकर्षमवगमयतीति प्रश्नः
सर्वेषामेवेति। प्रकर्षगतिरुत्तरत्र प्रतिपादयिष्यते। तत्र वचनसामर्थ्यादेकसंज्ञाधिकाराच्च करणसंज्ञायाः संज्ञान्तराणां
च विकल्पः स्यात्। नन्वसति विशेषाश्रयणे करणकारकसंज्ञाद्वयोपादानमनर्थकं स्यात्। तर्हि संज्ञाद्वयविधानसामर्थ्या
त्करणसंज्ञा कंचिदेव विषयं परिहरतीति लभ्यते। न त्वनिष्टविषयपरिहारेणेष्टविषये तस्याः प्रवृत्तिर्लभ्या। परत्वादन
वकाशत्वाच्चेति। विषयभेदापेक्षो हेतुद्वयोपन्यासः। सावकाशत्वे सति परत्वं हेतुरन्यत्र निरवकाशत्वम्। इह तर्हीति। अत्र संज्ञाद्वयप्र
सङ्गे निरवकाशत्वादपादानसंज्ञैव स्यात्। करणसंज्ञा ह्यपादानादन्यत्र सावकाशा। तमब्ग्रहणे तु सति विविक्तविषयलाभादुभयोर्धनुषा विध्य
तीत्यत्र परत्वात्करणसंज्ञा सिध्यतीति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदकमानेयमिति। कन्यादानार्थम्। न चानभिरूप इति। दृष्टादृष्टप्रयोजनत्वात्कन्यादानस्येति भावः। तरतमयोगो नास्तीति। कथं पुनः केवलयोः प्रत्यययोः प्रयोगः। नैष दोषः। प्रत्ययानुकरणत्वात्। तन्नानुकरणाभ्यामनुकार्यौ प्रत्ययौ प्रतीयेते ताभ्यामपि साहचर्यात्तदर्थो लक्ष्यते। तत्र तमब्श्रुतिरेतज्ज्ञापयति प्रकर्षप्रत्ययग्रहणमन्तरेणेह प्रकरणसामर्थ्याद्गम्यः प्रकर्षो नाश्रीयते। सांकाश्यकेभ्य इति। बुद्धिकल्पितोऽत्रापायो न तु मुख्यः। यत्र कृत्स्न इति। सर्वैरवयवैः सह यत्रावयवी व्याप्त इत्यर्थः। गङ्गायामिति। गोभिर्गङ्गाया व्याप्यमानत्वान्नस्यादधिकरणसंज्ञा। अस्माज्ज्ञापकात्सामीप्यमात्राश्रयेण प्रकल्पिताधारनिबन्धनाऽसा भवति। अथ सामग्रीसाध्यायां क्रियायां

तद्यथा लोके अभिरूपायोदकमानेयमभिरूपाय कन्या देयेति। न चानभिरूपे प्रवृत्तिरस्ति। तत्राभिरूपतमायेति गम्यते। एवमिहापि साधकं करणमित्युच्यते। सर्वाणि च कारकाणि साधकानि न चासाधके प्रवृत्तिरिति तत्र साधकतममिति विज्ञास्यते। एवं तर्हि सिद्धे सति यत्तमग्रहणं करोति तज्ज्ञापयत्याचार्यः कारकसंज्ञायां तरतमयोगो न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। अपायमाचार्यः किं न्याय्यं मन्यते यत्र संप्राप्य निवृत्तिः। तेनेहैव स्यात्। ग्रामादागच्छति। सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र न स्यात्। कारकसंज्ञायां तरतमयोगो न भवतीत्यत्रापि सिद्धं भवति। तथाऽऽधारमाचार्यः किं न्याय्यं मन्यते यत्र कृत्स्न आधारात्मा व्याप्तो भवति। तेनेहैव स्यात्। तिलेषु तैलं दध्नि सर्पिरिति। गङ्गायां गावः कूपे गर्गकुलमित्यत्र न स्यात्। कारकसंज्ञायां तरतमयोगो न भवतीत्यत्रापि सिद्धं भवति॥ उपान्वध्याङ्वसः॥ ॥ वसेरश्यर्थस्य प्रतिषेधः॥ वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः। ग्रामे उपवसतीति। स तर्हि वक्तव्यः। न वक्तव्यः।

कोतिशयः करणस्येति चेत्। यद्व्यापारानन्तरं क्रियाप्रसिद्धिः। यस्य च यदातिशयविवक्षा तदा तस्य करणत्वं यथा स्थाल्या पच्यत इति। कारकान्तरापेक्षश्च करणस्यातिशयो न तु स्वकक्षायामित्यश्वेन दीपिकया पथा व्रजतीति सर्वेषां क्रियानिष्पत्तौ संनिपत्योपकारकत्वात्करणत्वं सिद्धम्॥ उपान्व॥ ॥ वसेरश्यर्थस्येति। अर्थशब्दो निवृत्तिवाची। व्यधिकरणे षष्ठ्यौ। अश्यर्थस्य वाचको यो वसिस्तस्येत्यर्थः। अथवाऽशीडोऽर्थः अश्यर्थः न अश्यर्थोऽनश्यर्थः। तस्य अस्थानार्थस्येत्यर्थः। स्थाने हि शीङ् वर्तते यथा जलाशय इति। तेन ग्रामे तिष्ठतीत्यत्रार्थे ग्राममुपवसतीति प्रयोगः। अस्थानार्थत्वे तु ग्रामे उपवसतीति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नात्रेति। विशिष्टाधारावस्थितत्वेन निश्चिते देवदत्ते भोजननिवृत्तिं विशिष्टकालां प्रत्याययितुमिदं प्रयुज्यते ग्राममुपवसतीति। तत्रान्तरङ्ग-
त्वात्प्रतीयमानवसिक्रियापेक्षो ग्रामस्याधिकरणभावः। उपवसनं तु स्वरूपेणैव कालमपेक्षत इति कालेनैवास्यान्तरङ्गः संबन्धः। ग्रामादि-
ना तु बहिरङ्ग इत्यर्थः॥ कर्तुरीप्सित॥ तमग्रहणमिति॥ असत्यपि तमग्रहणे ग्रामं गच्छतीत्यादौ कर्मसंज्ञा सिध्यतीप्सिततमस्यापीप्सि-
तत्वसद्भावादिति प्रश्नः। माणवक इति। विशेषविहितत्वादपादानसंज्ञायाः कर्मसंज्ञेति परत्वात्। अग्नावपीति। अग्निमाणवकयोरीप्सि-
तत्वसद्भावात्। कर्मापादानसंज्ञाविषयविभागज्ञानपरमेतत्। न तु निरवकाशापादानसंज्ञा सावकाशया कर्मसंज्ञया बाधितुं शक्यते।
तमग्रहणे तु सति संज्ञयोर्विषयविभागलाभः॥ इहेति॥ लोकः शास्त्रं च सामान्येन निर्दिश्यते। लोके प्रयुज्यमानत्वाच्छास्त्रे चोदाह्रियमा-
णत्वात्। द्रव्यान्तरमिति। ओदनशब्दस्य तण्डुलविकारे प्रयुज्यमानत्वात्पचेश्च विक्लित्त्युपसर्जनविक्लेदनवचनत्वान्निर्वृत्तस्यौदन-

नात्रोपपूर्वस्य वसेर्ग्रामोऽधिकरणम्। कस्य तर्ह्यनुपसर्गस्य। ग्रामे सौ वसंस्त्रिरात्रमुपवसतीति॥ कर्तुरीप्सिततमं क-
र्म॥ ॥ तमग्रहणं किमर्थम्। कर्तुरीप्सितं कर्मेतीयत्युच्यमान इहाग्नेर्माणवकं वारयतीति माणवकेऽपादानसं-
ज्ञा प्रसज्येत। नैष दोषः। कर्मसंज्ञात्र बाधिका भविष्यति। अग्नावपि तर्हि बाधिका स्यात्। इह पुनस्तमग्रहणे क्रि-
यमाणे तदुपपन्नं भवति यदुक्तं वारणार्थेषु कर्मग्रहणानर्थक्यं कर्तुरीप्सिततमं कर्मेति वचनादिति। इहोच्य-
ते। ओदनं पचतीति यद्योदनः पच्येत द्रव्यान्तरमभिनिर्वर्तेत। नैष दोषः। तादर्थ्यात्ताच्छब्द्यं भविष्यति। ओद-
नार्थास्तण्डुला ओदन इति। अथेह कथं भवितव्यं तण्डुलानोदनं पचतीत्याहोस्वित्तण्डुलानामोदनं पचती-
ति। उभयथापि भवितव्यम्। कथम्। इह हि तण्डुलानोदनं पचतीति द्व्यर्थः पचिस्तण्डुलान्पचन्नोदनं निर्वर्तयतीति।

स्य विक्लेदनान्तरकरणात्। ओदनार्थ इति। गौणार्थाश्रयणेनैव सर्वलोकस्य प्रयोगदर्शनादिदमत्र न चोदनीयं मुख्यस्यैव त्वोदनस्य
पुनर्विक्लित्तिकरणे कस्मादयं प्रयोगो न भवतीति। विकारविशेषप्रतिपादनाय गौणार्थपरिग्रहः। तण्डुलान्पचतीत्युक्ते विकारान्तर-
मपि प्रतीयते। अथेहेति। उभयथा प्रयोगदर्शनात्प्रकृतिविकृत्योः साक्षादुपादानात्तादर्थ्यात्ताच्छब्द्यानुपपत्त्या विक्लेदनवच-
ने तु पचौ तण्डुलानामोदनं पचतीति प्रयोगायोगाद्द्रव्यान्तरनिर्वृत्तिप्रत्ययप्रसङ्गाच्च। निर्वर्तनवचने तु पचौ तण्डुलानां कर्मभा-
वाघटनात्तण्डुलानोदनं पचतीति प्रयोगाभावप्रसङ्गाच्च प्रश्नः। द्व्यर्थः पचिरिति। विक्लेदनोपसर्जने निर्वर्तने पचिर्वर्तते। तण्डु-
लान्विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थः। तत्रोपसर्जनविक्लेदनक्रियापेक्षं तण्डुलानां कर्मत्वम्। प्रधानभूतक्रियापेक्षं त्वोदनस्य।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कै
२९६

ह्यर्थश्चेदेवेति।तण्डुलानांसंबन्धिनंविकारविशेषमोदनंविक्लित्त्यानिर्वर्तयतीत्यर्थः।साचविक्लित्तिःसामर्थ्यात्तण्डुलानामेवेतिविज्ञायते। १८३
इहकश्चिदिति।अन्वयव्यतिरेकाभ्यांदधिपयसोरीप्सिततमत्वंनत्वोदनस्येतिदर्शयति।तस्याप्योदनइति।दधिपयसोःखलुसंस्कारकत्वात्क
रणाभावः।नतुगुणेष्विति।गुणेषूपकारकेषुकेवलेषुनास्यादरः।किंतर्हितत्संस्कृतओदनइत्यर्थः। मृदुविशदइति।मृदुश्चासौविशद
श्चेतिकर्मधारयः।यदिमार्दवमात्रेआदरःस्यात्पङ्कमपिभक्षयेत्।विशदमात्रादरेसिकताअपि।ईप्सितस्येति।ईप्सिततममेवेप्सितप
देनसामान्यशब्देननिर्दिष्टम्।विशेषेषुसामान्यस्यभावात्।तत्रयन्निर्वर्त्तंक्रियया।ऽनाधेयविकारंक्रियायानिष्पत्त्यर्थंकेवलमुपादी

इहेदानींतण्डुलानामोदनंपचतीतिह्यर्थश्चैवपचिर्विकारयोगेषष्ठीतण्डुलविकारमोदनंनिर्वर्तयतीति।इह
कश्चित्कंचिदामन्त्रयतेसिद्धंभुज्यतामिति।सआमन्त्र्यमाणआहप्रभूतंभुक्तमस्माभिरिति।आमन्त्रयमाणआ
हदधिखलुभविष्यतिपयःखल्लुभविष्यति।आमन्त्र्यमाणआह।दध्नाखलुभुञ्जीयपयसाखलुभुञ्जीयेति
।अत्रकर्मसंज्ञाप्राप्नोति तद्धितस्येप्सिततमंभवति।तस्याप्योदनएवेप्सिततमो नतुगुणेषस्यानुरोधः
तद्यथा।भुञ्जीयाहमोदनंयदिमृदुविशदःस्यादिति।एवमिहापिदधिगुणमोदनंभुञ्जीयपयोगुणमोदनंभु
ञ्जीयेति।ईप्सितस्यकर्मसंज्ञायांनिर्वर्त्तस्यकारकत्वेकर्मसंज्ञाप्रसङ्गः।क्रियेप्सितत्वात्।ईप्सितस्यकर्मसंज्ञा
यांनिर्वर्त्तस्यकारकत्वेकर्मसंज्ञानप्राप्नोति।गुडंभक्षयतीति।किंकारणम्।क्रियेप्सितत्वात्।क्रियातस्येप्सिता।
नवोभयेप्सितत्वात्।नवाएषदोषः।किंकारणम्।उभयेप्सितत्वात्।उभयंहितस्येप्सितम्।आतश्चोभयम्।
यस्यहिगुडभक्षणेबुद्धिःप्रसक्ताभवतिनासौलोष्टंभक्षयित्वाकृतीभवति।यद्यपितावदत्रैतच्छक्यतेवक्तुम्।

यत्रैतत्क्रियासंबन्धात्प्राप्यमपिनेप्सितमितितस्यकर्मसंज्ञानप्राप्नोति।यत्रहिकर्मार्थोक्रियानिष्पत्तिसंस्कारप्रतिपत्तिभिस्त
त्रकर्मेप्सितम्।अन्यत्रतुक्रियैवप्रतीयमानसंदर्शनादिक्रियापेक्षयेप्सितेतिभावः।गुडंभक्षयतीति।भक्षणायगुडस्योपा
दानंनतुगुडायभक्षणानुष्ठानम्।नवेति।गुडभक्षणंयस्येप्सितंतस्यगुडोभक्षणक्रिययेप्सितः।यस्मान्नासौगुडस्यदर्शन रामः
स्पर्शनादिनाकृतीभवतिनापिलोष्टादिभक्षणेनेतिनभक्षणमात्रमीप्सितंनापिगुडमात्रमित्यर्थः। ॥ २९६

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

येत्वेत इति। नेहि यां कांचित् क्रियामनुष्ठाय कालमतिवाहयन्ति न तेषां द्रव्यविशेषे तात्पर्यम्। ततश्च नाहं कटं करिष्यामीत्यत्र कटस्य कर्मत्वानुपपत्त्या द्वितीया न प्राप्नोतीति कटकर्मिका क्रिया न निषिद्धा भवेत्। तथा घटो मयाऽऽहृत इत्यत्र घटस्य कर्मत्वाभावादाहृत इत्यत्र कर्मणि निष्ठा न प्राप्नोति। यस्त्वसौ प्रेषयतीति। प्रयोजकचित्तानुवर्तनं तस्य स्वार्थसिद्धये कर्तव्यम्। यदा च विशिष्टकर्मिका क्रिया तेन संपाद्यते तदाज्ञानुष्ठिता भवतीति प्रयोजकवत्प्रयोज्यस्याप्युभयमीप्सितमिति भाष्यकारस्याभिप्रायः। अन्ये तु प्रयोजककर्त्रपेक्षया प्रयोज्यस्य कर्तुरनीप्सितमपि कर्मेत्याचक्षते। तन्न प्रयोजकव्यापारस्याशाब्दार्थत्वात्पूर्वोक्तोदाहर-

येत्वेते राजकर्मिणो मनुष्यास्तेषां कश्चित्कंचिदाह कटं कुर्विति स आह नाहं कटं करिष्यामि घटो मया आहृत इति। तस्य क्रियामात्रमीप्सितम्। यद्यपि तस्य क्रियामात्रमीप्सितं यस्त्वसौ प्रेषयति तस्योभयमीप्सितमिति॥ तथायुक्तं चानीप्सितम्॥ ॥किमुदाहरणम्। विषं भक्षयतीति। नैतदस्ति। पूर्वेणाप्येतत्सिध्यति। न सिध्यति। कर्तुरीप्सिततमं कर्मेत्युच्यते। कस्य च नाम विषभक्षणमीप्सितं स्यात्। विषभक्षणमपि कस्यचिदीप्सितं भवति। इह य एष मनुष्यः दुःखार्तो भवति सोऽन्यानि दुःखान्यनुनिशम्य विषभक्षणमेव ज्यायो मन्यते। आतश्चेप्सितं यत्तद्भक्षयति। यत्तर्ह्यन्यत्करिष्यामीत्यन्यत्करोति तदुदाहरणम्। किं पुनस्तत्। ग्रामान्तरमयं गच्छन्चोरान्पश्यति अहिं लङ्घयति कण्टकान्मृद्नातीति। इहेप्सितस्यापि कर्मसंज्ञा आरभ्यतेऽनीप्सितस्यापि। यदिदानीं नैवेप्सितं नाप्यनीप्सितं तत्र कथम्। ग्रामान्तरमयं गच्छन्वृक्षमूलान्युपसर्पति कुड्यमूलान्युपसर्पतीति। अत्रापि सिद्धम्। कथम्। अनीप्सितमिति नायं प्रसज्यप्रतिषेधः ईप्सितं नेति। किं तर्हि पर्युदासोऽयम्। यदन्यदीप्सितात्तदनीप्सितमिति। अन्यच्चेदमीप्सिताद्यन्नैवेप्सितं नाप्यनीप्सितमिति॥

णोऽयुक्तमिति न्यायविदो मन्यन्ते॥ तथायुक्तम्॥ ॥कस्य च नामेति। विषमिति वक्तव्ये विषभक्षणमिति किमर्थमुच्यते यदि भक्षणमीप्सितं तदा विषमपीप्सितं विषभक्षणस्य त्वनीप्सितत्वे विषमपि प्राणहरत्वादनीप्सितं भवति। भक्षणक्रियया च विषं नेप्सितं परिहारादिक्रियापेक्षया तदीप्सितं भवत्येवेति भक्षणग्रहणेन प्रदर्श्यते। विषभक्षणमपीति। यथा लोकस्य सुखप्राप्त्यर्था क्रियायां प्रवृत्तिस्तथा भयादिभ्यो दुःखनिवृत्त्यर्थापि विषादिष्वित्यर्थः। चोरान्पश्यतीति। विषयेन्द्रियसंबन्धसामर्थ्याद्दर्शनेनाप्तुमनिष्टतमा अपि चोरास्तथायुक्ताः पूर्वेणासिद्धकर्मभावा अनेन कर्मसंज्ञया संबध्यन्ते। ईप्सितस्यापीति। ईप्सिततमस्यापीत्यर्थः। नायं प्रसज्यप्रतिषेध इति। यथाऽधर्मानृतादिभिरुत्तरपदार्थप्रतिपक्षभूतं वस्तु तत्प्रतिषेधद्वारेण प्रतिपाद्यते तथानीप्सितशब्देनापि द्वेष्यं वस्तु यदभिधीयते तदेव न गृह्यते किं तु सर्वमीप्सितादन्यदित्यर्थः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकथितं च॥ ॥केनेति। किं साधारण्या कारकसंज्ञया अथ विशेषसंज्ञाभिरपादानादिभिरिति प्रश्नः। अपादानादिभिरिति। कर्तरि करणे वाऽत्र तृतीया। भूतकालश्चात्र न विवक्ष्यते। यथा पराजेरसोढ इत्यत्रासहिष्यमाणस्याप्यपादानसंज्ञा भवति अध्ययनात्पराजेष्यत इति। तेन हेतुकर्तृसंज्ञाभ्यां कथयिष्यमाणस्यापि कर्मसंज्ञा न भवति। इह कारक इत्यनुवर्तनात्तस्यैव कारकत्वेऽकथितस्य कर्मसंज्ञया भाव्यमिति सामर्थ्याद्विशेषकथाभिरकथितत्वमाश्रीयते। प्रश्नप्रतिवचनाभ्यां चासंकीर्तितवचनोऽकथितशब्दो न त्वप्रधानवाची रूढिशब्दोऽत्राश्रित इति दर्शितम्। रूढिस्तु हि व्युत्पत्त्यर्थमेव क्रियोपादीयते न तु प्रवृत्तिनिमित्तत्वेन। तथा च गच्छतीति गौरिति व्युत्पत्तावपि यथा गच्छतीत्युक्ते केनेति प्रश्ने रथेनेति प्रतिवचनं भवति तथा गौरित्युक्ते प्रश्नप्रतिवचनेन भवतः। किमुदाहरणमिति। नटस्य शृणोतीत्यादावपि कर्मसंज्ञाप्रसङ्ग इति प्रश्नः। अथवाऽपादानादिभिः सर्वस्य विषयस्य व्यापनादुदाहरणासंभवं मत्वा पृच्छति। उपयोगनिमित्तमिति। उपयुज्यत इत्युपयोगः पयःफलादि तस्य निमित्तं गवादि। अनेन गां दो

अकथितं च॥ ॥केनाकथितम्। अपादानादिभिर्विशेषकथाभिः। किमुदाहरणम्। दुहियाचिरुधिप्रच्छिभिक्षिचित्रामुपयोगनिमित्तमपूर्वविधौ। ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना॥१॥ दुहि। गां दोग्धि पयः। नैतदस्ति। कथितात्र पूर्वोऽपादानसंज्ञा। दुहि।

ग्धि पय इत्यत्र पयस उपयुज्यमानत्वादीप्सिततमत्वं गोस्तूपयोगार्थत्वादुपादानस्यानीप्सिततमत्वं दर्शयति। तथायुक्तत्वाभावाच्च गोस्तथायुक्तमित्यनेनापि कर्मसंज्ञा न सिद्ध्यति। अपूर्वविधाविति। पूर्वत्वमन्यत्वोपलक्षणमिति परविधावपीयं संज्ञा भवति। ब्रुविशासिगुणेनेति। ब्रुविशास्योर्गुणः साधनं प्रधानकर्म धर्मादिकं तेन च यत्सचते संबध्यत इत्यर्थः। क्रियायाः साध्यत्वात्प्राधान्यं तदर्थत्वात्प्रवृत्तेः कारकाणां गुणत्वम्। कविनेति। कविशब्दो मेधाविवचनः। क्वात्वदर्शनात्। दुह्यादीनां चार्थोपलक्षणायोपादानात्पर्यायप्रयोगेऽपि कर्मसंज्ञा भवति। ननु गां दोग्धि पय इत्यस्यायमर्थः। गोः पयस्त्यजति देवदत्तो गवा पयस्त्याजयति। तत्र प्रयोजकव्यापारेणाप्यमानत्वाद्गोः कर्मत्वं सिद्धम्। नैतदस्ति। यथा ण्यन्तेषु धातुषु क्रियाविशिष्टः प्रयुज्यत इति प्रतीतिः। नैवमिह। निष्क्रियस्यापि गवादेर्दोहनादिषु विनियोगात्। गां दोग्धीति। दोहे नाप्यमानत्वेऽपि गोरीप्साप्रकर्षाभावात्तमप उपादानात्प्रकर्षस्य विवक्षितत्वाद्प्राप्ता कर्मसंज्ञानेन विधीयते। दुह्यादिपरिगणनान्नटस्य शृणोतीत्यादौ न भवति। कथितात्रेति। गोः पय आददत इत्यर्थावगमात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पौरवंगामिति। पौरवेणगांदद्दापयिषतद्दूत्यर्थःप्रतीयतेगोश्चेप्सिततमत्वंनपौरवस्य।कथितात्रेति।पौरवाद्गांजिघृक्षतद्दूत्यर्थे
संप्रत्ययात्।नयाचनादेवेति।याचितापियःचनकालेनाध्यवस्यतिनूनमस्मादिदंवस्तुनिर्गत्यमांप्राप्नोतीतिभावः।अन्ववरुण-
द्धीति।गोर्व्रजंप्रविपूतिगवाव्रजंप्रवेशयतीत्यर्थः।कथितेति।गांव्रजेस्थापयतीतिसंप्रत्ययाद्व्रजस्यस्थानक्रियापेक्षमाधा
रत्वम्।माणवकमिति।आचिख्यापयिषतिपन्थानंमाणवकेनेत्यर्थः।कथितेति।माणवकान्मार्गोपदेशंजिघृक्षतद्दूतिसंप्रत्य
यात्।नप्रश्नादेवेति।प्रश्नमात्रमनङ्गीकृतापायंधात्वर्थइत्यर्थः।भिक्षिर्याचिवद्ध्याख्येयः।अथयाचिभिक्ष्योरेकार्थत्वात्कि
मर्थमुभयोरुपादानम्।उच्यते।अनुनयार्थस्यापियाचेर्ग्रहणार्थम्।तेनाविनीतंविनयंयाचतद्दूत्यत्रापिकर्मसंज्ञाभवति।वृक्षमिति।

याचि।इदंतर्हिपौरवंगांयाचतइति।नैतदस्ति।कथितात्रपूर्वोऽपादानसंज्ञा।नयाचनादेवापायोभवतियाचितोसौ
यदिददातिततोऽपायेनयुज्यते।याचि।रुधि।अन्ववरुणद्धिगांव्रजम्।नैतदस्ति।कथितात्रपूर्वाधिकरणसंज्ञा
।रुधि।प्रच्छि।माणवकंपन्थानंपृच्छति।नैतदस्ति।कथितात्रपूर्वापादानसंज्ञानप्रश्नादेवापायोभवतिपृष्टो
ह्यौयद्याचष्टेततोऽपायेनयुज्यते।प्रच्छि।भिक्षि।पौरवंगांभिक्षते।नैतदस्ति।कथितात्रपूर्वोऽपादानसंज्ञा।नभि
क्षणादेवापायोभवतिभिक्षितोसौयदिददातिततोऽपायेनयुज्यते।भिक्षि।चिञ्।वृक्षमवचिनोतिफलानि।नै
तदस्ति।कथितात्रपूर्वोऽपादानसंज्ञा।ब्रुविशासिगुणेनचयत्सचतेतदकीर्तितमाचरितंकविना।ब्रुविशासि
गुणेनयत्सचतेतच्चोदाहरणम्।किंपुनस्तत्।पुत्रंब्रूतेधर्मं पुत्रमनुशास्तिधर्ममिति।नैतदस्ति।कथितात्रपूर्वा
संप्रदानसंज्ञा।तस्मात्त्रीण्येवोदाहरणानि।पौरवंगांयाचतेमाणवकंपन्थानंपृच्छतिपौरवंगांभिक्षतइति।
अथयेधातूनांद्विकर्मकास्तेषांकिंकथितेलादयोभवन्त्याहोस्विदकथिते।

वृक्षेणत्याजयतिफलानीत्यर्थः।कथितेति।वृक्षात्फलान्यादत्तद्दूत्यर्थावसायात्।पुत्रमिति।पुत्रोधर्मंप्रतिपद्यतेपुत्रंधर्मंप्रतिपा
दयतीत्यर्थः।कथितेति।धर्मेणवचनानुशासनकर्मणापुत्रस्याभिप्रेयमाणत्वात्।अथेति।सर्वोदाहरणवाद्याचार्यउदाहरण-
त्रयवादिनंस्वमतात्प्रच्यावयितुमाह।इहासंकीर्तितपर्यायस्याकथितशब्दस्यग्रहणेविवक्षाभेदाद्गांदोग्धिपयइत्याद्यपिभव
तिगोर्दोग्धिपयइत्याद्यपि।पूर्वोक्तेतूदाहरणत्रयेकर्मसंज्ञैवेत्येषाव्यवस्था।अप्रधानवचनाकथितशब्दोपादानेत्वपादानसं
प्रदानसंज्ञेबाधित्वादुह्यादिषुकर्मसंज्ञैवस्यादित्यसंकीर्तितमकथितमिहाश्रितम्।तत्रकर्मणिलादयउत्पद्यमानाःप्राधान्या
प्राधान्याभ्यांभिन्नकस्यमनेकंकर्मयुगपदभिधातुमसमर्थाःकिंप्रधानकर्मण्युत्पद्यन्तेअथगुणकर्मणीतिप्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथितइति। प्रधानेईप्सिततमेइत्यर्थः। प्रधानाप्रधानसंनिधौ प्रधानस्यैवाभिधानस्यन्याय्यत्वात्। अथवाऽपरः कथितस्यैवाभिधानं
मन्यते अकथितस्यतु कारकत्वाभावादभिधानासंभवमेवेति यद्वक्ष्यतिषष्ठीकुर्यात्तदागुणेइति। अकारकमिति। अपादानादिषे
वविशेषेषु कारकत्वंसामान्यंस्थितंनतु विशेषरहितस्य सामान्यस्यस्थितिरस्तीतिभावः। अथकारकइति। यदा विशेषाश्रयण
इत्तिसामान्यमित्यर्थः। यांयामिति। उद्देशएवं वीप्साप्रतिपन्नेतिसाभवेदितिप्रतिनिर्देशेनविवक्षिता। दुह्यतेगोरिति। अपादानंगोः
। याच्यतेपौरवादिति। ननूदाहरणत्रयवादीपौरवस्यकर्मत्वमिच्छत्येवेतिकथंपौरवादित्युक्तम्। अत्रोच्यते। न्यायस्यसमान—

कथितेत्वादयः। कथितेत्वादिभिरभिहितेगुणकर्मणिकाकर्तव्या। कथितेत्वादयश्चेत्स्युः षष्ठीकुर्यात्तदागुणे।
कथितेत्वादयश्चेत्स्युःषष्ठीगुणकर्मणितदाकर्तव्या। दुह्यतेगोःपयः याच्यतेपौरवस्यकम्बलइति। कथम्। अका
रकंह्यकथितात्। अकारकंह्येतद्भवति। किंकारणम्। अकथितत्वात्। कारकंचेत्तुनाकथा। अथकारकंना
कथितम्। अथकारकेसतिकाकर्तव्या। कारकंचेद्विजानीयाद्यांयांमन्येतसाभवेत्। कारकंचेद्विजानीयाद्यांया
प्राप्नोतिसासाकर्तव्या। दुह्यतेगोःपयःयाच्यतेपौरवात्कम्बलइति। कथितेभिहितेत्वविधिस्त्वमतिर्गुणकर्म
णित्वादिविधिःसपरे। कथितेत्वादिभिरभिहितेत्वविधिरेषभवति। किमिदंत्वविधिरिति। तवविधिस्त्वविधिः
। त्वमतिः। किमिदंत्वमतिरिति। तवमतिस्त्वमतिरिति। नैवमन्येमन्यन्ते। कथंतर्ह्यन्येमन्यन्ते।

त्वादत्राप्यपादानत्वंमन्यते। तथाहि। याच्यतेपौरवात्कम्बलइत्यस्यपौरवात्कम्बलआदित्सतइत्यर्थः। ततोबुद्धिकृतस्यापाय
स्यात्रसंभवः। कथितइति। प्रधानकर्मणित्वादिभिरभिहितेतवैयंमतिर्यद्दुक्तंगुणेषष्ठीभवतिचतुर्थीपञ्चम्यौचेति॥ तवविधिस्त्वम
तिरिति। अलपदेनविग्रहः। त्वशब्दस्त्वन्यवाची। यथोतत्वःपथ्यविनितिपक्षश्चायामुक्तम्। युष्मदर्थस्यापित्वपेक्षावपादन्यत्वमस्तीत्येवमुक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीन्याय्यंपक्षंदर्शयति।गुणकर्मणीति।लादयोलकृत्यक्तखलर्थाः।गोर्दुह्यतेपयः।गोर्दोग्धव्यापयः।गोर्दुग्धापयः।गोःसुदोहं
पयः।अनेन दुह्यादयःसर्वएवोदाहरणानीतिदर्शितम्।तत्रसत्यप्यपायेयदानविवक्ष्यतेनिमित्तभावमात्रविवक्षैवतुगोस्तदा-
नेनकर्मता।अपादानादिविशेषविनिर्मुक्तंचविवक्ष्यतेकारकंयथानटस्यशृणोतीति।यतश्चपयोर्थीप्रथमंगविप्रवर्ततेततोन्तरङ्गत्वाद्दु
हक्रियायांगोरेवेप्सिततमत्वम्।यथोक्तमपादानमुत्तराणिगांदोग्धीति।पयोविवक्षायांचप्राधान्येप्यन्तरङ्गत्वाद्गुणेलादयः।उक्तंच।
गुणकर्मणिलादिविधिःपूर्वंगुणकर्मणाभवतियोगात्।मुख्यंकर्मप्रेप्सुर्यस्माद्गव्येवयततेप्राक्।तस्माच्चदुहस्यदुहेर्भवतिगवा
पूर्वमेवसंबन्धः।गोर्दुहिनापयसस्तुप्राक्तस्माल्लादयस्तस्मिन्निति।अपादानविवक्षायांतुपञ्चमीभवति।गोर्दुह्यतेपयइति।यदातुप
योविशेषणत्वेनगोर्विवक्षातदाषष्ठी।गोःपयोदोग्धीति।माणवकायधर्मंब्रूतइत्यपिभवतियदाधर्मेणकर्मणामाणवकस्याभिप्रेयमा-

गुणकर्मणिलादिविधिःसपरे।गुणकर्मणिलादयोभवन्तिसहपरेणयोगेन।गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्म-
काणामणिकर्तासणाविति।ध्रुवचेष्टितयुक्तिषुचाप्यगुणेतदनल्पमतेर्वचनंस्मरत।ध्रुवयुक्तिषुचेष्टितयुक्तिषुचाप्य
गुणेकर्मणिलादयोभवन्तीत्येतदनल्पमतेराचार्यस्यवचनंस्मर्यताम्।अपरआह।प्रधानकर्मण्याख्येयेलादीना
हुर्द्विकर्मणाम्।प्रधानकर्मण्यभिधेयेद्विकर्मणांधातूनांकर्मणिलादयोभवन्तीतिवक्तव्यम्।अजांनयतिग्रामम्।

णत्वेनलक्ष्यते।तदविवक्षायांत्वनेनकर्मत्वम्।सपरइति।उत्तरसूत्रेप्ययमेवविधिरित्यर्थः।बोध्यतेमाणवकंधर्मः।श्राव्यतेमाणव
कंश्लोकः।भोज्यतेमाणवकमोदनइति।प्रयोजकव्यापारेणाप्यमानत्वान्माणकस्यप्राधान्यंधर्मादेस्तुगुणभावः।ध्रुवेति।अगु-
णेप्रधानकर्मणि।ध्रुवयुक्तिषुकर्मकेषुचेष्टितयुक्तिषुचगत्यर्थेषुलादयोभवन्ति।पूर्वाचार्यप्रसिद्ध्याध्रुवयुक्तयोऽकर्मकाउच्य
न्ते।तेषांहिक्रियास्वात्मन्येवावस्थितानतुकर्मार्था।तत्रध्रुवद्ध्रुवध्रुवइतिस्वात्मनिष्ठोऽकर्मकोधात्वर्थउच्यते।तेनमासमास्यतेदे
वदत्तः।शाय्यतेक्रोशंदेवदत्तइतिप्रयोज्येदेवदत्तेप्रयोजकव्यापारस्यतत्रैवपूर्वसंनिपाताल्लादयोभवन्तितथागम्यतेग्रामंदेवद
त्तइत्यत्रापि।अनल्पमतेरिति।मेधाविनआचार्यस्येत्यर्थः।स्मरतेति।आगमस्याविच्छेदमनेनदर्शयति।आगमएवायंनस्वमति
परिकल्पनेतिदर्शयितुमाह।अपरइति।

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अजानीयत इति। अजायाः प्राधान्यान्नेतुश्च तस्यामेव पूर्वं क्रियाप्रवर्तनादन्तरङ्गत्वाच्च तस्यामेव लादयः। ण्यन्ते कर्तुश्च कर्मण इति। कर्तुः
सतो ण्यन्ते धातौ कर्मणो वाच्यकाल्लादयो भवन्ति। गतिबुद्धीत्यनेन यस्य प्रयोज्यस्य कर्मसंज्ञा विधीयते तस्मिन्वाच्ये सर्वेषु गत्यर्थादिषु धा
तुषु लादयो भवन्तीत्यर्थः। पूर्वश्लोके तु भेदेनोक्तं गत्यर्थाकर्मकेषु प्रधाने कर्मणि। बुद्धिप्रत्यवसानार्थशब्दकर्मकेषु तु स्वपरइत्यनेन
वचनेन लादयो गुणकर्मणि। प्रयोज्यकर्मण्येव लादयो दृश्यन्त इत्येकेषां मतम्। माणवकं धर्मं बोधयतीत्यादौ वनियतो गुणप्रधा
नभावइत्याहुः। धर्मप्रतिपादनपरत्वे वाक्यस्य धर्मस्य प्राधान्यं माणवकस्य गुणभावः। माणवकसंस्कारपरायां तु प्रवृत्तौ माणव-
कस्य प्राधान्यं धर्मस्य गुणभावः। तथाऽभिधानव्यापारेण प्रयोजकव्यापारस्य प्राधान्यात्प्रयोज्यस्यैव कर्मणः प्राधान्यम्। गुणभूतप्रयोज्य
व्यापारकर्मणस्तु गुणभावः। आर्थेन तु न्यायेन प्रयोज्यव्यापारस्य प्राधान्यम्। तदर्थत्वात्प्रयोजकव्यापारस्य तत्प्राधान्यात्तत्कर्मणो

अजानीयते ग्रामम्। अजानीता ग्राममिति। अप्रधाने दुहादीनाम्। अप्रधाने दुहादीनां कर्मणि लादयो भवन्तीति व
क्तव्यम्। दुह्यते गोः पयः। ण्यन्ते कर्तुश्च कर्मणः। लादयो भवन्तीति। गम्यते यज्ञदत्तो ग्रामं देवदत्तेन। के पुनर्धातूनां-
द्विकर्मकाः। नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च। द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः॥ अजां नयति ग्रामं भा
रं वहति ग्रामं भारं हरति ग्रामम्। गत्यर्थानाम्। गमयति देवदत्तं ग्रामं यापयति देवदत्तं ग्रामम्। सिद्धं वाप्यन्यकर्म
णः। सिद्धं वा पुनरेतद्भवति। कुतः। अन्यकर्मणः। अन्यस्या ह्यजा कर्म अन्यस्य ग्रामः। अजामसौ गृहीत्वा ग्रामं नयति
॥ अन्यकर्मेति चेद्ब्रूयाल्लादीनामविधिर्भवेत्। अन्यकर्मेति चेद्ब्रूयाल्लादीनामविधिरयं भवेत्। अजानीयते ग्राम
मिति। परसाधन उत्पद्यमानेन लेनाजाया अभिधानं न प्राप्नोति।

पि प्राधान्यमिति वदन्त आचार्याः दुहादिपरिगणनादन्यत्र द्विकर्मकत्वं न प्राप्नोति दृश्यते चेति मत्वा पृच्छति। के पुनरिति। गत्यर्था-
नामिति। उत्तरसूत्रोपात्तधातूपलक्षणं गत्यर्थग्रहणम्। तथैव चेति। चकारेण जयत्यादयः समुच्चीयन्त इत्याहुः। शतं जयति देवद
त्तम्। शतं मुष्णाति देवदत्तम्। शतं दण्डयति देवदत्तम्। सिद्धं वेति। अन्यस्याश्रूयमाणस्य क्रियाविशेषस्य कर्मणः संभवादित्यर्थः।
अथवा कर्मशब्देन कर्मत्वमुच्यते। अन्यकर्मत्वादित्यर्थः। विभाषा गुणइतिपञ्चमी। यथा प्रविशपिण्डीमिति भक्षणापेक्षं पिण्ड्याः
कर्मत्वं तथाऽजां ग्रामं नयतीत्यत्र ग्रहणापेक्षमजायाः कर्मत्वम्। नयतिस्तु प्राप्तिमात्रवाचीतेनाजां गृहीत्वा ग्रामं प्राप्नोतीति वाक्यार्थः
संपद्यते। परसाधनइति। नीयते इति नयतेः परेण लकारेण नयतिकर्मैवाभिधानीयम्। ग्रहणस्य त्वजा कर्म न नयतेरिति कथं सा लेना
भिधीयते। तस्मादन्यकर्मत्वमजाया नेष्टव्यम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालेति। मासादय एव कालवाचित्वेन लोके प्रसिद्धाः न तु गोदोहनपाकादय इति सत्यपि भावस्य कालत्वे पृथगुपादानं कृतम्। निर्ज्ञातपरिमा-
णाद्धि क्रिया अनिर्ज्ञातपरिमाणायाः क्रियायाः परिच्छेदायोपादीयमाना मासगोदोहादिशब्दवाच्या काल इति दर्शनम्। अध्वा चासौ ग-
न्तव्यो ऽध्वगन्तव्यः। अत एव निपातनाद्विशेषणस्यापि परनिपातः। गन्तव्यतया लोके यः प्रसिद्धः क्रोशयोजनादिनियतपरिमाणः तस्यै-
व कर्मत्वं नान्यस्येत्यध्वानं स्वपितीति न भवति। केचिदध्वगन्तव्यत्वादिति पठन्ति। तत्रायमर्थः। गतेरन्तो निष्ठा निश्चयो वा येषु ते गत्यन्ताः
क्रोशयोजनादयः। अध्वनो गत्यन्तत्वादिति षष्ठीसमासः। कर्मसंज्ञा हीति। ननु कालाध्वनोरिति द्वितीयासिद्धेति किं कर्मसंज्ञया। गोदो-
हादीनां कालत्वेनाप्रसिद्धत्वाद् द्वितीया न प्राप्नोतीति भावस्य तावत्कर्मसंज्ञा विधेया। कालाध्वनोरपि लादिविधानार्थं कर्मत्वमेषि-
तव्यम्। आस्यते मासः। आसितव्यो मासः। आसितो मासः। स्वासो मासः। एवं शय्यते क्रोश इत्यादि द्रष्टव्यम्। यदा त्वङ्गीकृतसकर्मकधा-
त्वन्तरार्थे आसनादावास्यादयो वर्तन्ते तदा पूर्वेणैव कर्मत्वं सिद्धम्। तथा हि। मासमास्त इत्यस्यायमर्थः। मासमासनेन व्याप्नोतीति। तथा च-

> कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्। कालभावाध्वगन्तव्या अकर्मकाणां धातूनां कर्मसंज्ञा भवन्तीति वक्तव्यम्। काल। मासमा-
> स्ते। मासं स्वपिति। भाव। गोदोहमास्ते गोदोहं स्वपिति। अध्वगन्तव्य। क्रोशमास्ते। क्रोशं स्वपिति। देशश्चाकर्मकाणाम्। कर्मसं-
> ज्ञो भवतीति वक्तव्यम्। कुरून् स्वपिति। पञ्चालान् स्वपिति। विपरीतं तु यत्कर्म तत्कल्मं कवयो विदुः। किमिदं कल्मेति।
> अपरिसमाप्तं कर्म कल्म। न वा अस्मिन् सर्वाणि कर्मकार्याणि क्रियन्ते किं तर्हि द्वितीयैव। यस्मिंस्तु कर्मण्युपजायते
> ऽन्यद्धात्वर्थयोगापि च यत्र षष्ठी।

वक्ष्यति। प्राकृतमेवेदं कर्म यथा कटं करोतीति। अत्र दर्शनेन केवलमकर्मकाणां कालादयः कर्मत्वं प्रतिपद्यन्ते अपि तु सकर्मकाणाम-
पि। न्यायस्य तुल्यत्वात्। देशश्चेति। संस्थायविशेषः कुरुपञ्चालादिर्देश इह गृह्यत इति भाष्य उदाहरणाद्विज्ञायते। इदानीम-
कथितस्य पूर्वाचार्यकृतं संज्ञान्तरं दूषयितुमुपन्यस्यति। विपरीतमिति। कर्मधर्माणां विपर्यस्तत्वाद्विपरीतमुच्यते। ईप्सिततमं
द्वेष्यमितरच्चेति पूर्वं त्रिविधं कर्म निर्दिष्टमिदं तद्विपरीतम्। कपिलकादित्वाच्च लत्वे कल्मेति भवति। अपरिसमाप्तमिति। ईप्साप्रक-
र्षाभावादित्यर्थः। न वेति। लकृत्यक्तखलर्थानामविधानात्प्रधानकर्मण्यभिधेय इति पूर्वमुक्तत्वात्। दुहादीनां त्वप्रधानकर्म-
णि लादिविधानात्तुच्छ एवायं पक्षः। तथा च परस्ताद् दूषयिष्यते। तस्यैव विपरीतकर्मणो लक्षणं दर्शयति। यस्मिंस्त्विति। यस्मि-
न् गवादौ कर्मणि सत्यन्यत्पयः प्रभृत्युपजायते तत्कल्म। धात्वर्थयोगेति। धातुशब्देन धात्वर्थ उच्यते। तस्यार्थः प्रयोजनं पयःप्रभृ-
ति तेन योगो यस्याः सा षष्ठी यत्र भवति गोर्दुह्यते पयः पौरवस्य कम्बलो याच्यत इति। प्रधाने तु न भवति षष्ठी दुह्यते पयसो गोरिति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा॰ दै॰ २९० इदानीं संज्ञान्तरमनारभमाण आह। कल्मनोक्तमिति। यस्मात्तत्कर्मैव तस्मात्पृथक्कल्मेति नोक्तमस्मिन् शास्त्रे। दुहादीनामप्रधाने कर्मणि १५३
लादिदर्शनात् सर्वे कर्मकार्योपपत्त्याऽपरिसमाप्तत्वाभावाद्भेदेन च कल्मसंज्ञाविधाने कर्मकार्याप्रसङ्गादिति भावः। धातोर्हि वृत्तिरि
ति। रेफस्य लत्वमात्रेण धातोरर्थान्तरे वृत्तिर्नास्तीत्यर्थः। क्वचित्तु पाठः धातोर्निवृत्तिरिति। तत्रायमर्थः। धातोः करोते रेफस्य लत्वमात्रे
णास्यार्थो निवृत्तिर्नास्तीति। एतदुक्तं भवति। वर्णविकारेऽपि कृते कर्मकल्मशब्दयोः पर्यायतैव। यथा पांसुरपांसुलशब्दयोः तत्र किं सं
ज्ञाभेदेनेत्यर्थः। एतेनेति। अकथितं कर्मेत्येवास्तु मा भूत्पूर्वसूत्रद्वयं तद्विषयेऽनेनैव कर्मसंज्ञायाः सिद्धत्वात् परिगणनं च न करि
ष्यतद् इति प्रश्नार्थः। यत्विति। यवेभ्यो गा वारयतीति गवां कथितत्वात् कर्मसंज्ञा न स्याद्वारणार्थानामित्यपादानसंज्ञैव तु स्यादिति कर्तुरी
प्सिततममित्यारब्धम्। तस्मिन्नारब्धेऽनीप्सितस्य कर्मसंज्ञा न प्राप्नोतीति तथायुक्तमित्यारब्धव्यम्। ननु तथायुक्तस्यानेन भविष्यतीति नेत
दस्ति। दुह्यादिपरिगणनं न नटस्य शृणोतीत्यादावतिप्रसङ्गनिवृत्त्यर्थमवश्यं वक्तव्यम्। ईप्सितयुक्तं चेति। ईप्सितेन यवादिना युक्तं

तत्कर्म कल्मेति च कल्मनोक्तं धातोर्हि वृत्तिर्न रलत्वतोऽस्ति। एतेन कर्मसंज्ञासिद्धा भवत्यकथितेनातत्रेप्सित
स्य किं स्यात्प्रयोजनं कर्मसंज्ञायाः। यत्त्वकथितं पुरस्तादीप्सितयुक्तं च तस्य सिद्ध्यर्थम्। ईप्सितमेव तु यत्स्या
त्तस्य भविष्यत्यकथितेन। अथेह कथं भवितव्यं नेताश्वस्य स्रुघ्नमित्याहोस्विन्नेताश्वस्य स्रुघ्नस्येति। उभय
थागोणिकापुत्रः॥ ॥

यवादिर्वार्यमाणस्तस्य कर्मसंज्ञासिद्ध्यर्थं पूर्वसूत्रं कर्तव्यमित्यर्थः। चशब्दात्कर्मापादानसंज्ञयोर्विषयविभागसिद्ध्यर्थं चेत्युक्तं भव
ति। ईप्सितमेवेति। अवधारणेनेप्साप्रकर्षाभावं दर्शयति। अकथितेनेति। सूत्रैकदेशानुकरणमेतत्। अनेन सूत्रेणेत्यर्थः। अथे
हेति। प्रधाने कर्मण्यभिधेये लादीनाहुरित्युक्तम्। तत्र लादिग्रहणेन किं षष्ठ्यपि गृह्यते उत न। यद्यादिशब्दो व्यवस्थायां तदा लः
कर्मणि च भावे चाकर्मकेभ्य इत्यनयोरेव कृत्यक्तखलर्थाः इत्येतेषां ग्रहणं न्याय्यम्। अथ प्रकारे तदा षष्ठ्यपि लादिग्रहणेन गृह्यते इ
ति प्रधानकर्मण्येव सा भवतीति मत्वा प्रश्नः। उभयथेति। गुणकर्मणि षष्ठी द्वितीयादर्शनादुभयमपि स्मर्यते। वाचनिकं चेदं न तु न्या रामः
य्यम्। यत्र ह्येकेनैव शब्देन भिन्नकक्ष्ययोर्गुणप्रधानयोः कर्मणोरभिधानं न संभवति तत्र प्रधानं कर्मण एवाभिधानं न्याय्यम्। षष्ठी तु २९०
पृथग्गुणप्रधानाभ्यां द्वितीयावद्विधीयते विरोधाभावादुभाभ्यां प्राप्ताविष्टस्मरणाद्गुणकर्मणि विकल्प्यते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतिबुद्धि॥ ॥कथमिति।कर्मशब्देन कचित्क्रिया गृह्यते। यथा कर्तरि कर्मव्यतिहार इति। कचित्तु साधनं कर्म यथा वेः शब्दकर्मण इति
। ततश्चोभयथा व्यवहारदर्शनात्संशयानः पृच्छति। ह्वयत्यादीनामिति। ह्वयत्यादयो धातवः साध्यमानावस्थं क्रियारूपं शब्दमभि
दधतीति शब्दकर्मत्वादतिप्रसङ्गे सति प्रतिषेधो विधेयः। ह्वयति देवदत्त इति। पुत्रादेः कर्मणोभावादकर्मकत्वं ह्वयतेर्नाशङ्कनीयम्। शू-
द्रायत इति। शब्दं करोतीति शब्दवैरेति क्यङ्। शब्दलक्षणस्यात्र कर्मणोन्तर्भावात् कर्मान्तरयोगाच्चाकर्मकत्वादपि कर्मसंज्ञाप्रसङ्गः।
शृणोत्यादीनामिति। शब्दोपलब्धिरूपेर्थे वर्तमानाः शृणोत्यादयः शब्दक्रिया न भवन्ति। शब्दसाधनकर्माणस्तु तद्विषयत्वेन प्रयोगात्।
न चैषां बुद्ध्यर्थत्वम्। शृणोत्यादयो हि न ज्ञानमात्रावचनाः। बुद्ध्यर्थौ तु जानात्युपलभत इत्येतौ यद्यप्युपलब्धिमात्रवचनौ तथापि प्रयोज

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माऽकर्मकाणामणिकर्ता स णौ॥ ॥शब्दकर्मेति कथमिदं विज्ञायते शब्दो येषां क्रिये
त्याहोस्विच्छब्दो येषां कर्मेति। कश्चात्र विशेषः। शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेद् ह्वयत्यादीनां प्रतिषेधः।
शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेद् ह्वयत्यादीनां प्रतिषेधो वक्तव्यः। के पुनर्ह्वयत्यादयः। ह्वयति क्रन्दति श-
ब्दायते। ह्वयति देवदत्तः। ह्वाययति देवदत्तेन। क्रन्दति देवदत्तः। क्रन्दयति देवदत्तेन। शब्दायते देवदत्तः। शब्दा
ययति देवदत्तेन। शृणोत्यादीनामुपसंख्यानमशब्दक्रियत्वात्। शृणोत्यादीनां चोपसंख्यानं कर्तव्यम्। के पुनः
शृणोत्यादयः। शृणोति विजानात्युपलभते। शृणोति देवदत्तः। श्रावयति देवदत्तम्। विजानाति देवदत्तः।
विज्ञापयति देवदत्तम्। उपलभते देवदत्तः। उपलम्भयति देवदत्तम्। किं पुनः कारणं न सिध्यति। अशब्द
क्रियत्वात्। अस्तु तर्हि शब्दो येषां कर्मेति। शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानम्। शब्दकर्मण
इति चेज्जल्पतिप्रभृतीनामुपसंख्यानं कर्तव्यम्। के पुनर्जल्पतिप्रभृतयः। जल्पति विलपति आभाषते। जल्पति
देवदत्तः। जल्पयति देवदत्तम्। विलपति देवदत्तः। विलापयति देवदत्तम्। आभाषते देवदत्तः। आभाषयति देवदत्तम्।

कव्यापारविवक्षायां प्रकरणादिवशाद्यदा शब्दविषयामेवोपलब्धिं प्रत्याययतस्तदा साधनकर्मग्रहणे सिध्यति न तु क्रियाग्रहणादि
त्युपसंख्यानं कर्तव्यम्। एवं तु बुद्ध्यर्थत्वादनयोः सिद्धातीति चिन्त्यमेतत्। जल्पतिप्रभृतीनामिति। जल्पत्यादयः शब्दं न क्रियायां
वर्तन्त इति क्रियाग्रहणे सिध्यति न तु साधनकर्मग्रहणे। पुत्रं जल्पतीत्यादौ शब्दकर्मत्वाभावात्। दृशेः सर्वत्रेति। यदि क्रियाग्रहणम
थ साधनग्रहणमथोभयगत्याश्रयणं सर्वत्र दृशेर्न प्राप्नोतीति भावः।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पश्यति रूपतर्क इति। चक्षुःप्रणिधानद्वारक उपलम्भे यदा दृशिर्वर्तते तदेदं द्रष्टव्यम्। अन्यत्र तु बुद्ध्यर्थत्वात्सिध्यति। तत्र साधनकर्मग्रहणमित्येष पक्ष आश्रीयते। क्रियाग्रहणे कर्मग्रहणानर्थक्यप्रसङ्गात्। गतिबुद्धिशब्दप्रत्यवसानार्थाकर्मकाणामित्येव सिद्धत्वात्। पुत्रादिकर्मत्वे जल्पतिप्रभृतीनामुपसंख्यानं कर्तव्यमेव। श्लोकादिशब्दविशेषकर्मकत्वे तु शब्दकर्मत्वात्सिद्धिः। दृशेर्बुद्ध्यर्थत्वादेव ग्रहणं सिध्यति। आदिखाद्योरिति। आदिखाद्योः प्रत्यवसानार्थत्वात्प्राप्तिः। नीवह्योर्गत्यर्थत्वात्। यद्यपि न गतिर्हिंसार्थेभ्य इत्यत्र नवहिर्गत्यर्थ इत्युक्तं भाष्ये तथापि वहेरनियन्तृकर्तृकस्येत्यभिधानाय वहेरुपक्षेपः परस्मैपदमिति। निगरणचलनार्थेभ्यश्चेति प्राप्तम्।

दृशेः सर्वत्र। दृशेः सर्वत्रोपसंख्यानं कर्तव्यम्। पश्यति रूपतर्कः कार्षापणं दर्शयति रूपतर्कं कार्षापणम्। आदिखादिनीवहीनां प्रतिषेधः। आदिखादिनीवहीनां प्रतिषेधो वक्तव्यः। अत्ति देवदत्तः। आदयति देवदत्तेन। अपर आह। सर्वमेव प्रत्यवसानकार्यमदेर्न भवतीति वक्तव्यं परस्मैपदमपि। इदमेकमिष्यते। क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः। इदमेषां जग्धम्। खादि। खादति देवदत्तः खादयति देवदत्तेन। नी। नयति देवदत्तः नाययति देवदत्तेन। वहेरनियन्तृकर्तृकस्य॥ वहेरनियन्तृकर्तृकस्येति वक्तव्यम्। वहति भारं देवदत्तः। वाहयति भारं देवदत्तेन। अनियन्तृकर्तृकस्येति किमर्थम्। वहन्ति बलीवर्दा यवान्। वाहयति बलीवर्दान्यवान्॥ भक्षेरहिंसार्थस्य॥ भक्षेरहिंसार्थस्येति वक्तव्यम्। भक्षयति पिण्डीं देवदत्तः भक्षयति पिण्डीं देवदत्तेन। अहिंसार्थस्येति किमर्थम्। भक्षयन्ति यवान्बलीवर्दाः भक्षयति बलीवर्दान्यवान्॥ अकर्मकग्रहणे कालकर्मणामुपसंख्यानम्॥ अकर्मकग्रहणे कालकर्मणामुपसंख्यानं कर्तव्यम्। मासमास्ते देवदत्तः मासमासयति देवदत्तम्। मासं शेते देवदत्तः मासं शाययति देवदत्तम्। सिद्धं तु कालकर्मणामकर्मकवद्वचनात्। सिद्धमेतत्। कथम्। कालकर्मका अकर्मकवद्भवन्तीति वक्तव्यम्॥

वहेरिति। नियन्ता सारथिः॥ भक्षेरिति। अणिकर्तेति हेतुमति चेति णिचोऽनिषेधाच्चुरादिण्यन्तोऽप्यण्यन्त एवेति प्राप्तिः। भक्षयन्ति यवानिति। क्षेत्रस्थानां प्ररोहाद्यवस्थायां यवानां भक्षणाद्धिंसा भवति। तदवस्थायां केषांचिच्चैतन्यस्याभ्युपगमात्। परकीययवभक्षणे वा परो हिंसितो भवति। हिंसाङ्गं भक्षणेऽत्र भक्षिर्वर्तते। कालकर्मणामिति। कालग्रहणेन साहचर्यात्पूर्वं सह निर्दिष्टत्वाद्वाध्वदेशानामपि ग्रहणम्। वक्ष्यमाणन्यायस्य तुल्यत्वाद्वा॥ सिद्धं त्विति। तेन मासमास्यते देवदत्तेनेत्यादावकर्मकेभ्यो भावे विधीयमाना लादयः सिद्धा भवन्ति। स्वाश्रयं चाव्याहृतं कर्मत्वम्। तेन मासमास्यते देवदत्तेनेत्यादौ कर्मण्यपि भवन्ति॥

CC-0. In Public Domain. Digitization by eGangotri

नचकेचिदिति।ननुक्रियामात्रविवक्षायांकालादीनामविवक्षितत्वात्तेरप्यकर्मकत्वंभवत्येव।यथापूर्तेदेवदत्तोनभुङ्क्ते इति।अ-
त्राहुः।अत्यन्ताविद्यमानकर्मणोधातवोऽकर्मकग्रहणेनगृह्यन्तेनत्वविवक्षितकर्मणः।अन्यथापचादीनामपिकर्माविवक्षायाम
कर्मकत्वनिबन्धनानिकार्याणिभवेयुः।अकर्मकपूर्वस्यचधातवोऽन्यपदार्थत्वेनाश्रीयन्तेनत्वर्थाः।अर्थाश्रयणेहिकर्माविवक्षाया
मर्थस्याकर्मकव्यपदेशः स्यात्।धातुष्वाश्रीयमाणेषुक्वचिदपिकर्मसंबन्धदर्शनेनसारूप्य। तएवैतदितितत्त्वप्रत्ययविषयाना
कर्मत्वेनव्यपदिश्यन्ते।अर्थास्तुकारकादि भेदाद्भिन्नाएवेत्यन्येसकर्मकाअन्यएवाकर्मकाइतिस्याद्व्यपदेशः।यदात्वर्थस्यापित्व
तोनास्तिभेदइतिदर्शनंतदार्थस्याप्यन्यपदार्थत्वदोषः।क्वचिदिति।द्रव्यएवकर्मणिसत्यकर्मकाइत्यर्थः।अथवायेनेति।संभवव्य

तर्हिवक्तव्यम्।नवक्तव्यम्।अकर्मकाणामित्युच्यते।नचकेचित्कालभावाध्वभिरकर्मकाः।तएवंविज्ञास्यामः
क्वचिद्येअकर्मकाइति।अथवायेनकर्मणासकर्मकाश्चाकर्मकाश्चभवन्तितेनाकर्मकाणाम्।नचैतेनकर्मणाक
श्चिदप्यकर्मकः।अथवायत्कर्मभवतिनचभवतितेनाकर्मकाणाम्।नचैतत्कर्मक्वचिदपिनभवति॥ हृक्रोरन्य
तरस्याम्॥ हृक्रोर्वावचनेऽभिवादिदृशोरात्मनेपदउपसंख्यानम्॥ हृक्रोर्वावचनेअभिवादिदृशोरात्मनेपद
उपसंख्यानंकर्तव्यम्।अभिवदतिगुरुंदेवदत्तः।अभिवादयतेगुरुंदेवदत्तेन।अभिवादयतेगुरुंदेवदत्तम्।
पश्यन्तिभृत्याराजानं।दर्शयतेभृत्यैराजा।दर्शयतेभृत्यान्राजा।कथंचात्रात्मनेपदम्।एकस्यणेरणाविति
अपरस्यणिचश्चेति॥ स्वतन्त्रःकर्ता॥ ॥किंयस्यस्वंतन्त्रंसःस्वतन्त्रः।

भिचाराभ्यांविशेषणविशेष्यभावेसर्वत्रवस्तुस्थित्याऽविवक्षिताअपिकालादयःसन्तीतिनतैःकेचिदकर्मकाइत्यर्थः।अथवेति।अ
कर्मकस्तुस्यान्तरङ्गद्रव्यकर्मनिषिद्धातेनबहिरङ्गंकालादिकर्म।तथाहि।पूर्वंक्रियायाद्रव्याख्यकर्मणासहसंबन्धोभवतिपश्चात्का
लादिभिःपरिमाणनिर्धारणाय।तथाचोक्तम्। ।शक्तिप्रमाणसंख्यादेर्द्रव्यधर्मोत्रवर्तते।क्रियासुकालयोगोतःप्राग्योगोद्रव्यक
र्मणाइति।सूत्रंचेदंनियमार्थमितिअ कडारसूत्रउक्तंततएवावधार्यम्॥ हृक्रोर॥ ॥उभयत्रविभाषेयमितिनवेतिविभाषेत्यत्रोक्तम्।
अभिवादिदृशोरिति।अभिवादयतावप्राप्ताकर्मसंज्ञापक्षेविधीयतेदृशेर्बुद्ध्यर्थत्वान्नित्यंप्राप्तौपक्षेनिवर्त्यते॥ स्वतन्त्रःकर्ता॥ ॥
किंयस्येति।तन्त्रुवायस्यस्वतन्त्रशब्दवाच्यत्वाद्विशेषानुपादानाच्चप्रश्नः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ तन्तुवायइति। यद्यपितन्तुवायोवयतिभुङ्क्तइत्यादौतन्तुवायस्यकर्तृसंज्ञेष्यतेतथापिविशेषविहितत्वात्परत्वाच्चापादानादिसंज्ञा
२६२ विषयेपिसाप्राप्नोति। ब्राह्मणोधीतइत्यादौचब्राह्मणादेर्नप्राप्नोतीतिदोषः। वितानइति। वितन्यतइतिवितानम्। स्वतन्त्रोब्राह्मण
इति। स्वशब्दआत्मवाची। स्वआत्मातन्त्रंप्रधानंयस्यसस्वतन्त्रउच्यते। तत्रकारकाधिकाराक्रियासिद्धौप्राधान्यस्योपयोगात्तन्तुवा
यस्यापितन्तुवायरूपतयातन्त्रानुपयोगात्प्रधानवाचिनःस्वतन्त्रशब्दस्येहग्रहणम्। अनेककारकसाध्यायामपिक्रियायांयथाक
स्यचित्स्वातन्त्र्यंतथाकारकसत्त्वेप्रतिपादितम्। यस्यधातुनाव्यापारोऽगुणभावेनोच्यतेसर्वोसौस्वतन्त्रइत्येतदपितत्रैवभाष्य
कृताप्रतिपादितम्। हेतुमतीति। प्रयोज्यइत्यर्थः। यथाकर्तृसन्निधौकरणादीनांनास्तिस्वातन्त्र्यंतथाप्रयोजकसन्निधौप्रयोज्यस्य
पारतन्त्र्यात्स्वातन्त्र्याभावात्कर्तृसंज्ञायाअप्रसङ्गात्पाचयत्योदनंदेवदत्तेनेतिकर्तृतृतीयानप्राप्नोति। तत्प्रयोजकइत्यत्रचत-

किंचातः। तन्तुवायेप्राप्नोति। नैषदोषः। अयंतन्त्रशब्दोऽस्त्येववितानेवर्तते। तद्यथा। आस्तीर्णंतन्त्रंप्रोतंतन्त्र
मिति। विताननमितिगम्यते॥ अस्तिप्राधान्येवर्तते। तद्यथा। स्वतन्त्रोऽसौब्राह्मणइत्युच्यतेस्वप्रधानइतिगम्य
ते। तद्यःप्राधान्येवर्ततेतन्त्रशब्दस्तस्येदंग्रहणम्॥ स्वतन्त्रस्यकर्तृसंज्ञायांहेतुमत्युपसंख्यानमस्वतन्त्रत्वा
त्॥ स्वतन्त्रस्यकर्तृसंज्ञायांहेतुमत्युपसंख्यानंकर्तव्यम्। पाचयत्योदनंदेवदत्तोयज्ञदत्तेनेति। किंपुनःका
रणंनसिद्ध्यति। अस्वतन्त्रत्वात्। नवास्वातन्त्र्याद्इतरथाह्यकुर्वत्यपिकारयतीतिस्यात्। नवाकर्तव्यम्। किं
कारणम्। स्वातन्त्र्यात्स्वतन्त्रोसौभवति। इतरथाह्यकुर्वत्यपिकारयतीतिस्यात्। योहिमन्यतेनासौस्वतन्त्रः
अकुर्वत्यपितस्यकारयतीत्येतत्स्यात्। नाकुर्वतीतिचेत्स्वतन्त्रः। नचेदमकुर्वतितस्मिन्कारयतीत्येतद्भवतिस्व
तन्त्रोसौभवति। शक्यंतावदनेनोपसंख्यानंकुर्वतावक्तुंकुर्वन्स्वतन्त्रोऽकुर्वन्नेति। साधीयोज्ञापकम्। ॥

च्छब्देनपरामर्शोनोपपद्यते। नवेति। प्रयोजकसन्निधानेपिप्रयोज्यस्यकरणादिसाधनविनियोगादिनास्वातन्त्र्यस्यक्रियासिद्धौस-
द्भावादित्यर्थः। अकुर्वत्यपीति। यदिप्रयोज्यस्यस्वातन्त्र्यंनस्यात्तर्हिवासौसाधनान्तरविनियोगादिनाक्रियांकुर्यात्। तथाचाकुर्वत्यपि।
प्रयोज्येप्रयोजकःकारयतीतिव्यपदिश्येत। शक्यंतावदिति। उपसंख्यानवाद्यपिप्रयोज्यस्यस्वातन्त्र्यमस्तीत्यभ्युपगच्छतीति
प्रतिपाद्यते। प्रयोज्यस्यस्वातन्त्र्येणस्वव्यापारंप्रत्यंप्रवर्तनात्किलोपसंख्यानमारभ्यते। तेनचेदमवश्यमभ्युपगन्तव्यंयःक
रोतिसस्वतन्त्रःनत्वकुर्वन्नित्येवंचेत्प्रयोजकसन्निधानेपिस्वार्थदर्शनात्प्रयोज्यःकरोतिनान्यथेतितस्यस्वातन्त्र्यमस्त्येव। राम॰
तथाचोक्तंभाष्यकृता। नहिकश्चित्परोनुग्रहीतव्यइतिप्रवर्ततेसर्वइमेस्वभूत्यर्थंयतन्तइति॥ ॥ २६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रेषिते चेति। कर्तुरधिकरणत्वेन विवक्षितत्वात्सप्तमी। क्रियामिति। स्वार्थदर्शनादिच्छायां सत्यां क्रियां तद्दर्शनेन त्वं क्रियाम्। य
दि चेति। स्वार्थादर्शनादिच्छायामसत्यामित्यर्थः॥ तत्प्रयोजकः॥ ॥प्रैषइति। ननु पूर्वसूत्र एव प्रयोज्यस्य स्वातन्त्र्यमुपपादितं तत्कि
मर्थं चोद्यते। एवं मन्यते। प्रैषादूर्ध्वं प्रयोज्यस्य स्वव्यापारे प्रवर्तनात्स्वातन्त्र्यं प्रेषकात्वेतु स्वव्यापार एव प्रवर्तनात् प्रवृत्तौ प्रैषवैयर्थ्या
त्स्वातन्त्र्यं नास्ति तस्य च प्रयोजको न हेतुः स्यात् तत एवात्र न णिज्भवेत्। प्रैषग्रहणमध्येषणनिवृत्त्यर्थमिति केचित्। अध्येषणे कि
ल व्यापार्यमाणस्य गुर्वादेः स्वव्यापारे स्वातन्त्र्यमस्तीति। तत्त्वयुक्तम्। न्यायस्य तुल्यत्वात्। तस्मादत्र प्रैषग्रहणेन नियोगमात्रमु

प्रेषिते च किलायं क्रियां चाक्रियां च दृष्ट्वाऽध्यवस्यति। कुर्वन्स्वतन्त्रोऽकुर्वन्नेति। यदि च प्रेषितोऽसौ न करोति स्वतन्त्रोऽसौ भ
वतीति॥ तत्प्रयोजको हेतुश्च॥ ॥प्रैषेऽस्वतन्त्रप्रयोजकत्वाद्धेतुसंज्ञाप्रसिद्धिः। प्रैषेऽस्वतन्त्रप्रयोजकत्वाद्धेतुसंज्ञा
याअप्रसिद्धिः प्राप्नोति। स्वतन्त्रप्रयोजको हेतुसंज्ञो भवतीत्युच्यते न चासौ स्वतन्त्रं प्रयोजयति। स्वतन्त्रत्वात्सिद्धम्। स्वत
न्त्रत्वात्सिद्धमेतत्। स्वतन्त्रमसौ प्रयोजयति। स्वतन्त्रत्वात्सिद्धमिति चेत्स्वतन्त्रपरतन्त्रत्वं विप्रतिषिद्धम्। यदि च स्व
तन्त्रो न प्रयोज्यः। अथ प्रयोज्यो न स्वतन्त्रः। प्रयोज्यः स्वतन्त्रश्चेति विप्रतिषिद्धम्। उक्तं वा। किमुक्तम्। एकं तावदुक्त
म्। न वा स्वातन्त्र्यादितरथा ह्यकुर्वत्यपि कारयतीत्येतत्स्यादिति। अपरमुक्तम्। न वा सामान्यकृतत्वाद्धेतुतो ह्यविशिष्ट
म्। स्वतन्त्रप्रयोजकत्वादप्रयोजक इति चेन्मुक्तसंशयेन तुल्यमिति॥ ॥इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्र
थमाध्याये चतुर्थपादे तृतीयमाह्निकम्॥

च्यते न तु निकृष्टविषय एव नियोगः। स्वतन्त्रत्वादिति। दृष्टसामर्थ्यो वा संभावितसामर्थ्यो वा क्रियायां स्वातन्त्र्येण समाश्रित एव नियु
ज्यत इत्यर्थः। स्वतन्त्रपरतन्त्रत्वमिति। प्रयोजकसन्निधौ पारतन्त्र्येण स्वातन्त्र्यस्य तिरस्कृतत्वाद्यौगपद्यानुपपत्तिरिति भावः। उक्तं
वेति। वक्ष्यमाणस्यापि बुद्ध्या विषयीकृतत्वाद्भूतत्वसमारोपादुक्तं वक्ष्यमाणं चाभेदेनोक्तं वेति निर्दिष्टम्। न वा सामान्यकृतत्वा
दिति। हेतुमति चेत्यत्र वार्तिककारेणैतदुक्तम्। मुक्तसंशयेनेति। अप्रयुक्तो यः स्वयं करोति तेन तुल्यः प्रयोज्योऽपीत्यर्थः॥ ॥इ
त्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्र· प्र· च· तृती· ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राग्रीश्वरात्॥ ॥किमर्थमिति। प्रागीश्वरादित्येव क्रियतां प्रत्यासत्त्याधिरीश्वर इतीश्वरशब्दो ग्रहीष्यत इति प्रश्नः। वीश्वरादिति। व्याप्तिन्यायाद्दीश्वरात्प्राक्स्यात्। यदा संहितया सूत्रपाठस्तदा वकारसहित ईश्वरशब्दोऽस्तीत्येतदभिप्रेत्यैवमुक्तम्। यदयमिति। से कसेन्प्रभृतीनां णमुल्कमुलोश्च निपातत्वादेवाव्ययसंज्ञायां सिद्धायां कृन्मेजन्त इत्यव्ययसंज्ञाविधानाज्ज्ञापकाद्व्याप्तिर्बाध्यत इत्यर्थः। परोपीति। कृत्वार्थे तवैकेनित्यादिरेजन्तः खमुनादिश्च मान्तोऽस्ति तदर्थमेतत्स्यादित्यज्ञापकं व्याप्तेर्बाधस्य। यत्तर्हीति। व्याप्तावाश्रीयमाणायां निपातत्वादव्ययीभावस्याव्ययसंज्ञासिद्धैव किं तद्विधानेनेति ज्ञापकं संपद्यते। समासेष्विति। तुल्यजातीयव्यावृत्तये नियमार्थमेतत्स्यादिन तु व्याप्त्यग्रहणज्ञापनार्थमेतदित्यर्थः। एवं तर्हीति। लोके प्रत्यासत्तिराश्रीयते यथा कपिञ्जलानालभे-

प्राग्रीश्वरान्निपाताः॥ ॥किमर्थं रेफाधिक ईश्वरशब्दो गृह्यते। रीश्वराद्दीश्वरान्मा भूत्। रीश्वरादित्युच्यते वीश्वरान्मा भूदिति। प्राक्किरणमुल्कमुलावीश्वरे तोसुन्कसुनाविति। नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति अनन्तरो य ईश्वरशब्दस्तस्य ग्रहणमिति। यदयं कृन्मेजन्त इति कृतो मान्तस्यैजन्तस्याव्ययसंज्ञां शास्ति। कृन्मेजन्तः परोपि सः। परोप्येतस्मात्कृन्मेजन्तश्चास्ति तदर्थमेतत्स्यात्। यत्तर्ह्यव्ययीभावस्याव्ययसंज्ञां शास्ति तज्ज्ञापयत्याचार्यः अनन्तरो य ईश्वरशब्दस्तस्य ग्रहणमिति। समासेष्वव्ययीभावः। समासस्यैतज्ज्ञापकं स्यादव्ययीभाव एव समासोऽव्ययसंज्ञो भवति नान्य इति। एवं तर्हि लोकत एतत्सिद्धम्। तद्यथा लोके आ वनान्तादा उदकान्तात् प्रियं पान्थमनुव्रजेदिति। य एव प्रथमो वनान्त उदकान्तश्च ततोनुव्रजन्ति। लौकिकं चातिवर्तते। द्वितीयं तृतीयं च वनान्तमुदकान्तं चानुव्रजन्ति तस्माद्रेफाधिक ईश्वरशब्दो ग्रहीतव्यः॥

तेति त्रय एवालभ्यन्ते न चतुरादयः। शास्त्रे च लोकव्यवहारोऽङ्गीक्रियत इति भावः। लौकिकमिति। लौकिकं प्रत्यासत्तिलक्षणं न्यायं लोक एव परित्यजति। स्नेहादिवशाद्द्वितीयमप्युदकान्तं प्राप्य निवर्तते। कपिञ्जलानित्यत्र तु प्रथमातिक्रमे कारणाभावान्न हिंस्यात्सर्वा भूतानीति चतुर्थादिषु निषेधावतारात्त्रय एवालभ्यन्ते। इह तु विरोधकाभावाद्व्याप्तिन्यायाश्रयः स्यात्। न लोकाव्ययेत्यव्ययत्वाल्लो- कादीनां सिद्धे षष्ठीनिषेधे पुनस्तेषामुपादानमव्ययसंज्ञाया एवाभावं ज्ञापयेत्। निपातसंज्ञा तु स्यादेव। ततश्चिकीर्षितुमित्यादौ निपात एकाजिति प्रगृह्यसंज्ञा स्यात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति। प्राग्ग्रहणद्वारेणावधिनिर्देशश्चोद्यते। निपातादूत्येवास्तु यथाप्रत्ययइत्यादिरधिकारो विनाप्यवधिनिर्देशेनाभिमतविषयेप्र
वर्ततेतथायमपि प्रवर्तिष्यतेइतिभावः। निपातसंज्ञामिति। चादिषु प्यक्रियायोगे विकल्पितगतिसंज्ञाविषयेषु साक्षात्प्रभृतिषुचगति-
संज्ञाभावपक्षेसावकाशा निपातसंज्ञागत्यादिसंज्ञाभिर्बाध्येतेत्यर्थः। क्रियमाणइति। ईश्वरादितिपञ्चम्याप्राक्शब्दाध्याहारेलब्धेपु
नःश्रुतिप्राग्ग्रहणंसंपद्यते। परशब्दाध्याहारेणतु पञ्चमीनभविष्यति। चादयोऽसत्त्वेइत्यादीनामसंबद्धत्वप्रसङ्गात्। तन्त्रेणैववाद्वेप्रा
क्शब्दावुच्चार्येते। तेनायमर्थः। प्राग्रीश्वरादेव्यवस्थितास्तेप्राङ्निपातसंज्ञाभवन्तिनिपाताःसन्तोगत्यादिसंज्ञाइतिसमावेशःसिद्धः। के
वलेतु निपातादूत्यधिकारे क्रियमाणेसत्यामपि प्रतियोगमनुवृत्तावेकसंज्ञाधिकारात्पर्यायःस्यान्नतुसमावेशः। अवयवसंज्ञाइति। विशि
ष्टावधिपरिच्छिन्नस्यसमुदायस्यान्तरालपतितागत्यादिसंज्ञाभाजोऽवयवाभवन्तितेषांसंज्ञाइत्यर्थः॥ चादयोऽसत्त्वे॥ ॥अयमिति। अ

अथप्राग्वचनंकिमर्थम्। प्राग्वचनंसंज्ञाऽनिवृत्त्यर्थम्। प्राग्वचनंक्रियतेनिपातसंज्ञायाअनिवृत्तिर्यथास्यात्। अक्रियमाणे
हिप्राग्वचनेऽनवकाशाःगत्युपसर्गकर्मप्रवचनीयसंज्ञाःनिपातसंज्ञांबाधेरन्। ताःमाबाधिषतेतिप्राग्वचनंक्रियते। अ
थक्रियमाणेपिप्राग्वचनेयावताअनवकाशाएताःसंज्ञाःकस्मादेवनबाधन्तइति। क्रियमाणेहिप्राग्वचनेसत्यांनिपात
संज्ञायामेताअवयवसंज्ञाआरभ्यन्तेतत्रवचनात्समावेशोभविष्यति॥ चादयोऽसत्त्वे॥ ॥अयंसत्त्वशब्दःअस्त्येवद्र
व्यपदार्थकः। तद्यथा। सत्त्वमयंब्राह्मणःसत्त्वमियंब्राह्मणीति। अस्तिक्रियापदार्थकःसद्भावःसत्त्वमिति। कस्येदंग्रह
णम्। द्रव्यपदार्थकस्य। कुतएतत्। एवंचकृत्वाविधिश्चसिद्धोभवतिप्रतिषेधश्च। किंपुनरयंपर्युदासःयदन्यत्स
त्त्ववचनादितिआहोस्वित्प्रसज्यायंप्रतिषेधःसत्त्ववचनेनेति। किंचातः। यदिपर्युदासःविप्रइत्यत्रापिप्राप्नोति।
क्रियाद्रव्यवचनोयंसंघातःद्रव्यादन्यश्चविधिनाश्रीयते।

र्थद्वयेपिसत्त्वशब्दस्यप्रयोगदर्शनाद्विशेषावगतौप्रमाणानुपलम्भात्प्रश्नः। तत्रसीदत्यस्मिञ्जातिगुणक्रियाइतिसत्त्वंद्रव्यमुच्यते
यदातुसतोभावःसत्त्वमितितदासाध्यमानतयाक्रियारूपापन्नासत्तासत्त्वशब्देनोच्यते। एवंचकृत्वेति। यदिसत्त्वशब्देनसत्तो-
च्येततदाप्रतिषेधोऽनर्थकःस्यात्। नहिचादिषुसत्तावाची कश्चिच्छब्दोस्तियदर्थोनिषेधःस्यात्। पशुर्वैपुरुषइत्यत्रचनिपातसंज्ञास्या
त्। चाद्यनुकरणानांचःपठितोहियस्मादर्थइत्यादावपिविधिनिषेधौयथाभिमतविषयंनव्यवतिष्ठेयातांद्रव्यग्रहणेतुव्यवतिष्ठे-
ते। द्रव्यशब्देनचात्रसिद्धावस्थारूपंवस्त्वभिधीयते। तदुक्तम्। वस्तूपलक्षणंयत्रसर्वनामप्रयुज्यते। द्रव्यमित्युच्यतेसोर्थोभेद्य
त्वेनविवक्षितइति॥ किंपुनरिति। उभयथाशास्त्रेदर्शनात्प्रश्नः। विप्रइति। विप्रातीतिविप्रः। आतश्चोपसर्गेइतिकप्रत्ययान्तःक्रि
योपसर्जनद्रव्यवाचित्वात्केवलाद्द्रव्यात्क्रियाद्रव्यसमुदायस्यान्यत्वाद्द्रव्यादन्यस्मिन्नर्थेवर्तते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ २९४

प्रादिभिरिति। निपातत्वेनाभिमतैः। सामान्यमिति। सारूप्यम्। तदन्तविधिनेति। ननु विशेष्यासन्निधानात्कथं तदन्तविधिः। एवं तर्ह्ययमर्थः। निपातस्य संज्ञा निपातसंज्ञा सा चाव्ययसंज्ञा तस्यां चास्ति तदन्तविधिः प्रयोजनं सर्वनामाव्ययसंज्ञायामिति। तत्र विप्रशब्दे प्रशब्दस्य निपातसंज्ञायां सत्यां यथा परमोच्चैरिति स्वरायन्तस्याव्ययसंज्ञा भवत्येवं निपातान्तस्यापि स्यात्। ततो लुक्प्रसज्येत। विप्रकम्बलइत्यत्र च निपातान्तस्य पूर्वपदस्य प्रकृतिस्वरः स्यात्॥ प्रादयः॥ यद्यप्यग्रे एव प्रादय इति योगो विभज्यते तदाप्रयोजनकथनाय वार्त्तिकम्। यदा तु प्रादय उपसर्गाः क्रियायोग इत्येको योगः पठ्यते तदा योगविभागः कर्त्तव्यत्वेन चोद्यते। एकयोगे हीति। अक्रियायोगे निपातसंज्ञा न स्यात्। क्रियायोग एव तु गत्युपसर्गसंज्ञा वस्यात्। ततश्च प्रगत आचार्यः प्राचार्य इत्यत्र पूर्वपदप्रकृतिस्वरो न स्यात्। यस्मिन्नेवेति। कर्मप्र-

अस्ति च प्रादिभिः सामान्यमिति कृत्वा तदन्तविधिना निपातसंज्ञा प्राप्नोति। अथ प्रसज्यप्रतिषेधः। न दोषो भवति। यथा न दोषस्तथास्तु॥ ॥प्रादयः उपसर्गाः क्रियायोगे॥ प्रादय इति योगविभागः। प्रादय इति योगविभागः कर्त्तव्यः। प्रादयोऽसत्त्ववचना निपातसंज्ञा भवन्ति। तत उपसर्गाः क्रियायोग इति। किमर्थो योगविभागः। निपातसंज्ञार्थः। निपातसंज्ञा यथा स्यात्। एकयोगे हि निपातसंज्ञाभावः। एकयोगे हि निपातसंज्ञाया अभावः स्यात्। यस्मिन्नेव विशेषे गत्युपसर्गकर्मप्रवचनीयसंज्ञास्तस्मिन्नेव विशेषे निपातसंज्ञा स्यात्। मरुच्छब्दस्योपसंख्यानम्॥ मरुच्छब्दस्योपसंख्यानं कर्त्तव्यम्। मरुद्दत्तो मरुत्तः। अच उपसर्गादिति तत्वं यथा स्यात्। श्रच्छब्दस्योपसंख्यानम्॥ श्रच्छब्दस्योपसंख्यानं कर्त्तव्यम्। श्रद्धा॥ गतिश्च॥ ॥कारिकाशब्दस्य॥ कारिकाशब्दस्योपसंख्यानं कर्त्तव्यम्। कारिकाकृत्य॥ पुनश्चनसौ छन्दसि॥

वचनीयसंज्ञासु पूजायामित्यादिभिर्योगैः प्रादीनां विहिता। मरुद्दत्त इति। प्रक्रियायां रूपमिदमलौकिकमिदमुपात्तम्। तत्त्वे न हि नित्यं भाव्यम्। उपसर्गसंज्ञैव चास्येष्यते न निपातसंज्ञा। तस्यां हि सत्यां निपाता आद्युदात्ता इत्याद्युदात्तत्वं तत्तीयाकर्मणीति पूर्वपदप्रकृतिस्वरेण स्यात्। अन्तोदात्तश्च मरुच्छब्द इष्यते। अव्ययसंज्ञा च स्यात्। तत्त्व एवोपसर्गसंज्ञेष्यते। अनभिधानाद्धि किरङ्न भवति। संज्ञावचनसामर्थ्याच्चानजन्तत्वेपि तत्वं प्रवर्तते। अनेन तु न्यायेन मरुन्नयतीति तवर्गव्यवायेपि णत्वं प्राप्नोति। तस्मात्तत्व एवोपसर्गसंज्ञा वक्तव्या। प्रकारान्तरेणापि मरुत्तशब्दो व्युत्पादयिष्यते तत्पूर्वं मरुद्धामिति। श्रच्छब्दस्येति। तेन भिदादिषु श्रद्धाशब्दो न पठितव्यो भवति॥ गतिश्च॥ ॥कारिकाशब्दस्येति। कारिका क्रिया मर्यादा स्थितिरित्यर्थः। यत्न इत्यपरे। यस्तु श्लोकवाची कारिकाशब्दस्तस्य ग्रहणं न भवति। क्रियायोगग्रहणेन कारिकाशब्दस्य विशेषणात् क्रियावृत्तेर्ग्रहणात्। ॥

१४५

रामः
२९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनश्चनसाविति। ततश्च पुनराधेयमित्यत्र कृदन्तोत्तरपदप्रकृतिस्वरेण यतोनाव इति धेशब्द उदात्तः। पुनरुत्स्यूतमिति। गतित्वात्समा
सः। स्वरस्तु प्रवृद्धादेराकृतिगणत्वादन्तोदात्तत्वम्। चनोहित इति। निपातत्वादाद्युदात्तस्य चनःशब्दस्य गतिरनन्तर इति प्रकृतिस्वरः।
गत्युपसर्गसंज्ञा इति। क्रियायोग इति सामान्येनोपादानाद्विशेषावधारणार्थं वचनम्। अथवा प्रत्यासन्नैव क्रिया गृह्यत इति न्यायव्युत्पा
दनार्थम्। वृद्धिविधौ चेति। उपसर्गेणैव धातोराक्षेपात्। प्रर्च्छक इति। प्रगता ऋच्छका अस्मादिति बहुव्रीहिः। तत्र धातुग्रहणस्य-

पुनश्चनसौ छन्दसि गतिसंज्ञौ भवत इति वक्तव्यम्। पुनरुत्स्यूतं वासो देयम्। पुनर्निष्कृतो रथः। उशिग्दूतश्चनोहित इ
ति॥ गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्रतीति वचनम्॥ गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्र
प्रति गत्युपसर्गसंज्ञा भवन्तीति वक्तव्यम्। किं प्रयोजनम्। प्रयोजनं षत्वणत्वे। षत्वम्। विगताः सेचका अस्माद्ग्रामा
द्विसेचको ग्रामः। उपसर्गादिति षत्वं माभूत्। णत्वम्। प्रगता नायका अस्माद्ग्रामात्प्रनायको ग्रामः। उपसर्गादिति णत्वं
माभूत्। वृद्धिविधौ च धातुग्रहणमनर्थकम्। वृद्धिविधौ च धातुग्रहणमनर्थकम्। उपसर्गादृति धाताविति। तत्र
धातुग्रहणस्यैतत्प्रयोजनमिह माभूत्। प्रर्षभं वनमिति। क्रियमाणे चापि धातुग्रहणे प्रर्च्छक इत्यत्र प्राप्नोति।
यत्क्रियायुक्तास्तं प्रतीति वचनान्न भवति। वद्विधिनस्भावावीत्वस्वाङ्गादिस्वरणत्वेषु दोषो भवति। वद्विधि। यदु
दितो निवतो यासि वप्सन्। वद्विधिः। नस्भाव। प्रणसं मुखम्। उन्नसं मुखम्। नस्भाव। अवीत्व। प्रेपं परेपम्। अवी
त्व। स्वाङ्गादिस्वर। प्रस्फिकृशोदरः। स्वाङ्गादिस्वर। णत्व। प्रणः शूद्रः। प्रण आचार्यः। प्रणो राजा। प्रणो वृत्रहा। उप
सर्गादित्येते विधयो न प्राप्नुवन्ति। वद्विधिनस्भावावीत्वस्वाङ्गादिस्वरणत्वेषु वचनप्रामाण्यात्सिद्धम्। अन
वकाशा एते विधयस्ते वचनप्रामाण्याद्भविष्यन्ति॥ सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु॥ सुदुरोः प्रति
षेधो नुम्विधितत्वषत्वणत्वेषु वक्तव्यः। नुम्विधि। सुलभं दुर्लभम्। उपसर्गादिति नुम्माभूदिति। न सुदुर्भ्यां केव
लाभ्यामित्येतन्न वक्तव्यं भवति। नैतदस्ति प्रयोजनम्। क्रियत एतन्न्यास एव। तत्व। सुदत्तम्। अच उपसर्गात्त इति त
त्वं माभूदिति। षत्व। सुषिक्तं घटशतेन। सुस्तुतं श्लोकशतेन। उपसर्गादिति षत्वं माभूदिति। सुः पूजायामित्येतन्न वक्तव्यं भवति।

णकत्वनिवृत्तिः प्रयोजनं वक्ष्यते। उद्धृत इति। क्रियाशब्दस्याप्रयोगादुपसर्गत्वाभावः। अनवकाशादिति। येषां हि क्रियाशब्दप्रयोगे
तं प्रत्युपसर्गसंज्ञा ते संप्रत्यनुपसर्गसंज्ञा अपि गृह्यन्त इत्यर्थः। क्रियत इति। केवलाभ्यामिति विशेषणाभिधानार्थमवश्यं कर्तव्य
म्। तेनातिसुलभमित्यतेरुपसर्गत्वे नुम्भवत्येव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रियतइति। पूजायामितिविशेषणंपादानार्थम्। तेनसुषिक्तंकिंतवात्रेत्यादौषत्वंभवत्येव। कुर्यादि॥ ॥कुरीपत्कृत्येति। प्रयोगापर्यालोचने
नसंभवमात्राश्रयेणेतदुदाहृतम्। नचान्ययेति। च्विडाचौतावत्कृभ्वस्तियोगएवविहितौकुर्यादयोपिकृभ्वस्तिविषयाएवप्रयुज्यन्ते-
नान्यत्र॥ अनुक॥ ॥कथमिति। द्वयोरपिसमासयोःसंभवाद्दोषदर्शनाच्चप्रश्नः। खाडितिकृत्वेति। गतिसंज्ञायांसमासःस्यात्। धातोश्चान
न्तरंप्रयोगइतिरूपमेतन्नसिद्ध्येत्। इतिखाट्कृत्येत्यत्रचनिषेधप्रसङ्गः। श्रौषडिति। श्रौषट्शब्दइतिपरोनभवतिवौषटाव्यवधाना
दितिगतिसंज्ञाप्रसङ्गः। ननुव्यवहितेपिपरशब्दस्यदर्शनादुक्तस्येवेतिपरत्वम्। नैषदोषः। अव्यवधानएवास्यमुख्यावृत्तिः। अन्यत्र
त्वन्तरालस्थमसमीक्ष्याव्यवधानमेवाश्रित्यप्रयुज्यते। इहतुवौषटोव्यवधायकस्योच्चारणाद्युक्तमनपेक्षणम्। खाट्कृत्येति। नि

नैतदस्तिप्रयोजनम्। क्रियतएतन्न्यासएव। णत्वादुर्नयंदुर्नीतमिति। उपसर्गादितिणत्वंमाभूदिति। कुर्यादिच्वि
डाचश्च॥ ॥कृभ्वस्तियोगइतिवक्तव्यम्। इहैवयथास्यात्। ऊरीकृत्यऊरीभूय। इहमाभूत्। ऊरीपक्त्वा। तन्नहिवक्त
व्यम्। नवक्तव्यम्। क्रियायोगइत्यनुवर्तते। नचान्ययाक्रिययोर्यौदिच्विडाचांयोगोस्ति॥ ॥अनुकरणंचानितिपरम्॥ ॥कथ
मिदंविज्ञायतेइतेःपरमितिपरंनइतिपरमनितिपरमिति आहोस्विदितिःपरोयस्मात्तदिदमितिपरंनइ-
तिपरमनितिपरमिति। किंचातः। यदिविज्ञायतेइतेःपरमितिपरंनइतिपरमनितिपरमितिखाडितिकृत्वानिर
ष्ठीवदित्यत्रप्राप्नोति। अथविज्ञायतेइतिःपरोयस्मात्तदितिपरंनइतिपरमनितिपरमिति। श्रौषड्वौषडितिकृत्वा
निरष्ठीवदित्यत्रप्राप्नोति। अस्तुतावदितिःपरोयस्मात्तदितिपरंनइतिपरमनिति परमिति। ननुचोक्तंश्रौषड्वौष
डितिकृत्वानिरष्ठीवदित्यत्रप्राप्नोतीति। नैषदोषः। इदंतावदयंप्रष्टव्यः। अथेहतेप्राग्धातोरिति कथंगतिमात्र
स्यपूर्वप्रयोगोभवतिउपोद्धरतीति। गत्याकृतिःप्रतिनिर्दिश्यते। इहापितर्ह्यनुकरणाकृतिःप्रतिनिर्दिश्यते।
किमर्थमिदमुच्यते। अनुकरणस्येतिकरणपरत्वप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः।

रष्ठीवदित्यत्रधातुव्यवधानेपिप्रतिषेधप्रसङ्गात्। इदंतावदिति। योव्यक्त्याश्रयेणव्यवधानंमन्यते। गत्याकृतिरिति। तस्याश्चभि-
न्नास्वपिव्यक्तिषुअभिन्नायानास्त्यत्रव्यवधानम्। किमर्थमिति। अनितिपरमित्येतदित्यर्थः। संज्ञानियमपक्षेसिद्धिंमत्वाप्रश्नः। अनिष्टश-
ब्दनिवृत्त्यर्थ इति। खाडितिकृत्वेतिप्रयोक्तव्येइतिखाट्कृत्येतिप्रयोगःस्यात्। प्रयोगनियमेचायंदोषः। तन्नह्ययमर्थः। गत्युपसर्ग रामः
संज्ञाधातोःप्रागेवप्रयोक्तव्यादितिततोव्यवहितस्यप्रयोगाप्रसङ्गः। संज्ञानियमेतुनदोषः। तेनैवनियमेनखाडितिकृत्वेत्यत्रव्यवहित २९५
स्यसंज्ञानिवारणादस्यप्रयोगस्यसिद्धत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदर॥ ॥कथमसत्कृत्येति। यदि नसत्कृत्यासत्कृत्येति नञ्समासः क्रियते तदा सतिशिष्टत्वात्कृदुत्तरपदप्रकृतिस्वरं बाधित्वाऽव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं स्यात्। अथ न सदसदिति समासः क्रियते तदा सच्छब्दस्य विधीयमाना गतिसंज्ञाऽसच्छब्दस्य न स्यादिति भावः। तदन्तविधिनेति। यद्यपीह प्रकृतं विशेष्यं नास्ति तथापि कार्यार्थत्वात्संज्ञायाः कार्यप्रदेशेषु प्रकृतस्य गतिना विशेषणात्तदन्तविधिर्भवति। तत्र समासविधौ सुबिति प्रकृतं गतिरनन्तर इत्यत्र पूर्वपदं गतिर्गतावित्यत्र पदस्येति। अव्ययसंज्ञायामस्त्येव तदन्तविधिः। नआदर इति। अनेनासच्छब्दस्यानादरार्थवृत्तितां दर्शयति। ततश्चानादरग्रहणेन यत्साध्यं तदन्यथापि सिध्यतीत्येवं परमेतत्। आदरप्रसङ्ग इति। गुरुमसत्कृत्येत्यादौ स्यात् पाखण्डिनमसत्कृत्येत्यादौ तु न स्यात्। तथाहि। अब्राह्मण इति क्षत्रियादिरेवो

अनुकरणस्येतिकरणपरत्वप्रतिषेध उच्यते। किं प्रयोजनम्। अनिष्टशब्दनिवृत्त्यर्थः। अनिष्टशब्दता मा भूदिति। इदं विचारयिष्यते। प्राग्धातुवचनं प्रयोगनियमार्थं वा स्यात्संज्ञानियमार्थं वेति। तद्यदा प्रयोगनियमार्थं तदानिष्टशब्दनिवृत्त्यर्थमिदं वक्तव्यम्। यदा हि संज्ञानियमार्थं तदा न दोषो भवति॥ आदरानादरयोः सदसती॥ ॥इदमतिबहुक्रियते आदरे अनादरे सद् असदिति। आदरे सदित्येव सिद्धम्। कथमसत्कृत्येति। तदन्तविधिना भविष्यति। केनेदानीमनादरे भविष्यति। नञाऽऽदरप्रतिषेधं विज्ञास्यामः। न आदरेऽनादर इति। नैवं शक्यम्। आदरप्रसङ्गे एव स्यादनादरप्रसङ्गे न स्यात्। अनादरग्रहणे पुनः क्रियमाणे बहुव्रीहिरयं विज्ञायते। अविद्यमानादरे अनादर इति। तस्मादनादरग्रहणं कर्तव्यम्। असतस्तु तदन्तविधिना सिद्धम्॥ अन्तरपरिग्रहे॥ ॥अन्तःशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानम्॥ अन्तःशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानं कर्तव्यम्। अङ्। अन्तर्द्धा। किविधिः। अन्तर्द्धिः। समासः। अन्तर्हत्य। णत्वम्। अन्तर्हण्याद्गोभ्यो गाः॥

च्यते न तु गोलोष्ठादिः। बहुव्रीहिरिति। स चात्यन्ताभावेऽपि प्रसक्त्यभावे भवतीति सर्वत्र संज्ञा सिध्यति। असतस्त्विति। आदरानादरयोः सदित्येव वक्तव्यं तत्रानादरे सच्छब्दस्य वृत्त्यसंभवात्तदन्तविधिनाऽसच्छब्दस्य गतिसंज्ञा भविष्यति। यथा गोष्पदं सेवितेत्यत्रासेविते गोष्पदशब्दस्य वृत्त्यसंभवादगोष्पदार्थमसेवितग्रहणम्॥ अन्तरप॥ ॥अन्तःशब्दस्येति। अङ्किविधिणत्वानि उपसर्गसंज्ञाश्रयाणि। समासस्तु गतिसंज्ञाश्रय इत्यपूर्ववचनं सूत्रोपादानं च सामान्येनोपसंख्यानमुच्यते। गतिसंज्ञाया अनेनैव सिद्धत्वादपूर्ववचनाभावात्। अन्तर्हण्यादिति। हन्तेरत्पूर्वस्येति णत्वस्य सिद्धत्वाद् अन्तरदेशेइति न वक्तव्यं भवति। देशे तु क्षुभ्नादित्वाण्णत्वाभावः। तथैवायनं चेति न वक्तव्यम्। कृत्यचइति सिद्धत्वात्। अन्तरयतीत्यत्राप्युपसर्गादिति णत्वं सिध्यति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साक्षात्॥ ॥साक्षात्प्रभृतिष्विति। अभूततद्भावविषयाणामेव यथा स्यात्। यदा तु साक्षाद्भूतं रूपान्तरेण क्रियते तदा माभूदित्यर्थः। लवणीकृत्येति। अत्र हि परत्वादनेन विभाषा प्राप्नोति। नित्या च गतिसंज्ञेष्यते। पूर्वेणेति। पुनः प्रसङ्गविज्ञानादिति भावः। च्व्यन्तस्य माभूदिति। एकदेशविकृतस्यानन्यत्वात्प्राप्नोति। त्रैशब्द्यमिति। त्रय एव शब्दास्त्रैशब्द्यम्। लवणं कृत्वा लवणं कृत्य लवणीकृत्येति॥ ते प्राग्धातोः॥ ॥किमिदमिति। नियमद्वयसंभवात्प्रश्नः। तत्र यदा प्रयोगनियमस्तदा तद्द्वारेनेन लब्ध गत्युपसर्ग

साक्षात्प्रभृतीनि च॥ साक्षात्प्रभृतिषु च्व्यर्थवचनम्॥ साक्षात्प्रभृतिषु च्व्यर्थे वचनं कर्तव्यम्। असाक्षात्साक्षात्कृत्वा साक्षात्कृत्य। यदा हि साक्षादेव सत्किंचित्क्रियते तदा माभूदिति। मकारान्तत्वं च गतिसंज्ञासन्नियुक्तम्। मकारान्तत्वं च गतिसंज्ञासंनियोगेन वक्तव्यम्। लवणं कृत्वा। तत्र च च्विप्रतिषेधः। तत्र च च्व्यन्तस्य प्रतिषेधो वक्तव्यः। लवणीकृत्य। न वा पूर्वेण कृतत्वात्। न वा वक्तव्यम्। किं कारणम्। पूर्वेण कृतत्वात्। अस्त्वनेन विभाषा पूर्वेण नित्यो भविष्यति। इदं तर्हि प्रयोजनम्। मकारान्तत्वं च गतिसंज्ञासन्नियुक्तमित्युक्तं तच्च्व्यन्तस्य माभूदिति। एतदपि नास्ति प्रयोजनम्। लवणशब्दस्यायं विभाषा लवणंशब्द आदेशः क्रियते। यदि च लवणीशब्दस्यापि विभाषा लवणंशब्द आदेशो भवति न किंचिद्दुष्यति। त्रैशब्द्यं चेह साध्यं तच्चैवं सति सिद्धं भवतीति॥ ते प्राग्धातोः॥ ॥किमिदं प्राग्धातुवचनं प्रयोगनियमार्थमेते प्रागेव धातोः प्रयोक्तव्या आहोस्वित्संज्ञानियमार्थमेते प्राक्चाप्राक् प्रयोक्तव्याः प्राक्प्रयुज्यमानानां गतिसंज्ञा भवतीति। कश्चात्र विशेषः। प्राग्धातुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येतिकरणपरप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः। प्राग्धातुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येतिकरणपरप्रतिषेधो वक्तव्यः। किं प्रयोजनम्। अनिष्टशब्दनिवृत्त्यर्थः। अनिष्टशब्दता माभूदिति। छन्दसि परव्यवहितवचनं च। छन्दसि परेऽपि व्यवहिताश्चेति वक्तव्यम्। संज्ञानियमे सिद्धम्। संज्ञानियमे सति सिद्धमेतद्भवति।

संज्ञाः परामृश्यन्ते। यदा तु संज्ञानियमस्तदा प्रादय उपनिषत्पर्यन्ताः स्वरूपेणैव प्रत्यवमृश्यन्ते संज्ञायाः अनिर्धारितत्वात्। अनेनैकवाक्यतामापन्नैः पूर्वसूत्रैस्तस्या विधानात्। अनुकरणस्येति। अनुकरणं चानितिपरमित्यत्रैतद्व्याख्यातम्। संज्ञानियमे सिद्धमिति। अ- रामः
नितिपरमिति न वक्तव्यम्। अनेनैव नियमेन खाडिति कृत्वेत्यत्र संज्ञानिरासस्य सिद्धत्वात्। उत्तरं च सूत्रद्वयं न कर्तव्यं भवति। परव्य २९६
वहितानां गत्युपसर्गसंज्ञयोर्निवारणान्न तु प्रयोगस्येत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्त्विति।लाघवादस्यैवपक्षस्ययुक्तत्वात्।उभयोरिति।भाषायांपरव्यवहितप्रयोगोनदृश्यतेतत्रकिंप्रयोगनियमेनवासंज्ञानियमेनवा।यत्र
हिलोकेसंकीर्णःप्रयोगोयथागोगोवीतितत्रासाधुपरिहाराययसाध्वनुज्ञानंकर्तव्यम्।नत्वसंकीर्णएवप्रयोगेस्थितेशास्त्रस्यकिंचिदस्ति-
प्रयोजनम्।छन्दसितुपरव्यवहितप्रयोगोदृश्यतएव।उपसर्जनसन्निपातइति।यद्यपिलोकेविपरीतःप्रयोगोनदृश्यतेतथापिकू
लमुद्रुजमित्यादौद्वयोरप्युपपदत्वात्समासेकृतेउपसर्जनंपूर्वमितिशास्त्रदर्शनात्पर्यायेणपूर्वनिपातेनभाव्यंकूलमुद्रुजउत्कूलं
रुजइत्येवंयोभ्राम्येत्तंप्रतीदंसूत्रंकर्तव्यमित्यर्थः।सुकटंकराणीति।सुखेनकटाःक्रियन्तइतिकर्तृकर्मणोश्चभूकृञोरितिखल्।त

अस्तुतर्हिसंज्ञानियमः।उभयोरनर्थकंवचनमनिष्टादर्शनात्।उभयोरपिपक्षयोर्वचनमनर्थकम्।किंकारणम्।
अनिष्टादर्शनात्।नहिकश्चित्पचतीतिप्रयोक्तव्येपचतिप्रेतिप्रयुङ्क्ते।यदिचानिष्टंदृश्येततततोयत्नार्हंस्यात्।उपस
र्जनसन्निपातेतुपूर्वपरव्यवस्थार्थम्।उपसर्जनसन्निपातेतुपूर्वपरव्यवस्थार्थमेतद्वक्तव्यम्।ऋषभंकूलमु
द्रुजमृषभंकूलमुद्वहम्।अत्रगतेःप्राग्धातोःप्रयोगोयथास्यात्।यद्युपसर्जनसन्निपातेपूर्वपरव्यवस्थार्थमि
दमुच्यतेसुकटंकराणिवीरणानीत्यत्रगतेःप्राग्धातोःप्रयोगःप्राप्नोति।आचार्यप्रवृत्तिर्ज्ञापयतिनात्रगतेः
प्राक्प्रयोगोभवतीति।यदयमीषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषुखलितिखकारमनुबन्धंकरोति।कथंकृत्वाज्ञाप
कम्।खित्करणेएतत्प्रयोजनंखितीतिमुम्यथास्यात्।यदिचात्रगतेःप्राक्प्रयोगःस्यात्खित्करणमनर्थकंस्या
त्।अस्त्वत्रमुम्।अनव्ययस्येतिप्रतिषेधोभविष्यति।पश्यतित्वाचार्यःनात्रगतेःप्राग्धातोःप्रयोगोभवती
तिततःखकारमनुबन्धंकरोति।नैतदस्तिज्ञापकम्।यद्यत्रगतेःप्राक्प्रयोगःस्यात्स्यादेवात्रमुमागमः।कथम्।कृ
द्ग्रहणेगतिकारकपूर्वस्यापिग्रहणंभवतीति।तस्मान्नार्थएवमर्थेनप्राग्धातुवचनेन।कथमृषभंकूलमुद्रुजमृष
भंकूलमुद्वहम्।नैषदोषः।नैषउदिरुपपदं।किंतर्हिविशेषणम्।उदिकूलेरुजिवहोः।उत्पूर्वाभ्यांरुजिवहि
भ्यांकूलेउपपदइति॥ ॥

त्रास्मान्नियमात्कटंसुकराणीतिप्राप्नोति।अस्त्वत्रेति।शास्त्रेणप्राप्नोतुप्रतिषेधात्तुनैवप्रयुज्यतइत्यर्थः।खित्करणादव्ययस्यापिम
वत्विितिचेत्।नैतदस्ति।अनव्ययस्येतिनिषेधस्यप्रत्यक्षत्वाद्बाधितुमशक्यत्वात्प्रयोगनियमस्यान्यत्रसावकाशत्वाद्बाधेपिनका
चित्क्षतिः।स्यादेवेति।कटंसुकराणीत्येवमपिप्रयोगेस्यादेवमुमित्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ कै॰ २९७

कर्मप्रवचनीयाः॥ ॥किमर्थमिति। लाघवार्थत्वात्संज्ञाकरणस्य लाघवप्रकर्षाय एकाक्षरा द्व्यक्षरा वा संज्ञा कार्येति भावः। अन्वर्थसंज्ञेति
।अर्थमनुगता अर्थेन वा अनुगता अङ्गीकृतप्रवृत्तिनिमित्ता या संज्ञा साऽन्वर्थसंज्ञा। कर्म प्रोक्तवन्त इति। प्रयुज्यमाने क्रियापदे क्रियाविशेषं
द्योतितवन्त इत्यर्थः। क्रियां नाहुरिति। क्रियाविशेषं न द्योतयन्तीत्यर्थः। ये अप्रयुज्यमानस्य क्रियामाहुरिति। शाकल्यस्य संहितामनुप्रा
वर्षदिति वाक्येऽप्रयुज्यमानस्य निशमेर्या क्रिया तत्कृतो वर्षसंहितयोर्हेतुहेतुमद्भावलक्षणः संबन्ध इत्ययमर्थोऽनुशब्दसन्नि
धौ प्रतीयते। तदयमनुः संहितामिति द्वितीययाभिहितं संबन्धमवच्छिनत्ति। विशिष्टक्रियाभिजनितत्वेन हेतुहेतुमद्भावल
क्षणविशेषरूपतया वा तत्सन्निधौ संबन्धस्य संप्रत्ययात्। तथा हि। क्रियायास्तावदयं न वाचकः। कारकविभक्तिप्रसङ्गात्। शे

कर्मप्रवचनीयाः॥ ॥किमर्थं महती संज्ञा क्रियते। अन्वर्थसंज्ञा यथा विज्ञायेत। कर्म प्रोक्तवन्तः कर्मप्रवचनीया इ
ति। के पुनः कर्म प्रोक्तवन्तः। ये संप्रति क्रियां नाहुः। के च संप्रति क्रियां नाहुः। ये अप्रयुज्यमानस्य क्रियामाहुः ते क
र्मप्रवचनीयाः॥ अनुर्लक्षणे॥ ॥किमर्थमिदमुच्यते। कर्मप्रवचनीयसंज्ञा यथा स्यात्। गत्युपसर्गसंज्ञे मा भू
तामिति। किं च स्यात्। शाकल्यस्य संहितामनुप्रावर्षत्। गतिर्गताविति निघातः प्रसज्येत। यद्येवं वेरपि कर्म
प्रवचनीयसंज्ञा वक्तव्या। वेरपि निघातो नेष्यते। प्रादेशं विपरिलिखतीति। अस्त्यत्र विशेषः।

षविभक्तिसंबन्धस्याप्रतीतिप्रसङ्गाच्च। अत एव न क्रियापदाक्षेपकः। यथा प्रादेशं विपरिलिखतीति विशब्दो विमानक्रियाया आ
क्षेपक इति प्रादेशमिति कर्मणि द्वितीया। क्रियाविशेषद्योतकत्वमपि क्रियापदसन्निधाने दृष्टमिति अत्र न संभवतीति पारिशेष्यात्संबन्धा
वच्छेदहेतुरनुः संपद्यते। तथा चोक्तं हरिणा। क्रियाया द्योतको नायं संबन्धस्य न वाचकः। नापि क्रियापदाक्षेपी संबन्धस्य तु भेदक
इति॥ तत्र क्रियामाहुरिति क्रियाशब्देन तदुपजनितसंबन्धविशेष उपचारादुच्यते। आहुरित्यस्यापि द्योतयन्तीत्ययमर्थः। क्वचित्तु प्र
वृत्तिनिमित्ताभावेऽपि वचनसामर्थ्यादियं संज्ञा प्रवर्तते। यथा सुः पूजायामिति। सोः षत्वादिनिवृत्तये गत्युपसर्गसंज्ञाबाधनार्था॥ अनु
र्लक्षणे॥ ॥किमर्थमिति। लक्षणेत्थंभूताख्यानेत्यनेनैव सिद्धत्वादिति प्रश्नः। इतरः शिष्यबुद्धिपरीक्षार्थं जानन्नुत्तरं ददाति। कर्मप्रवचनीय
संज्ञेति। निघात इति। निपातत्वादाद्युदात्तोऽत्रानुरिष्यते। ॥

रामः २९७

CC-0. In Public Domain. Digitization by eGangotri

नात्रवेरिति। नहिप्रादेशो लिख्यते। किं तर्हीति। धातुं प्रतीति वाक्यशेषः। प्रादेशे च योग्या क्रिया वेरा क्षेप्येति सामर्थ्याद्विमानक्रियाया आक्षेपः। शाकल्येन सुकृतामिति। अत्र वाक्ये यानिशमनक्रिया तत्कृतो वर्षसंहितयोः संबन्धावच्छेदोऽनुना प्रतिपाद्यत इति नास्ति वर्षक्रियायोगो नोरित्यर्थः। अनुर्लक्षणादिति। सूत्रानुकरणमेतत्। सामान्यकृतत्वादिति। सामान्यं साधारणं यत्सूत्रमर्थान्तरसंज्ञान्तरनिर्देशात्तेनैव कृतत्वात्सिद्धत्वादित्यर्थः। हेत्वर्थमिति। हेतुरर्थः प्रयोजनम्। प्रयोजक एतस्य वचनस्येत्यर्थः। हेतुरिति। अन्वयव्यतिरेकाभ्यां वर्षप्रतिसंहितायाः कारणत्वावगमादित्यर्थः। किं वक्तव्यमिति। हेतोर्लक्षणत्वं नास्तीति किं परिभाषितव्यमिति मत्वा पृच्छति। येन पुनः पुनरिति।

नात्रवेर्लिखिं प्रतिक्रियायोगः किं तर्ह्यप्रयुज्यमानम्। प्रादेशं विमाय परिलिखतीति। यद्येवमनोरपि कर्मप्रवचनीयसंज्ञया नार्थः। अनोरपि न वृषिं प्रतिक्रियायोगः किं तर्ह्यप्रयुज्यमानम्। शाकल्येन सुकृतां संहितामनुनिशम्य देवः प्राववर्षत्। इदं तर्हि प्रयोजनं द्वितीया यथा स्यात्। कर्मप्रवचनीययुक्ते द्वितीयेति। अत उत्तरं पठति। अनुर्लक्षणे वचनानर्थक्यं सामान्यकृतत्वात्। अनुर्लक्षणे वचनानर्थक्यम्। किं कारणम्। सामान्यकृतत्वात्। सामान्येनैवात्र कर्मप्रवचनीयसंज्ञा भविष्यति। लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनव इति। हेत्वर्थं तु वचनम्। हेत्वर्थमिदं वक्तव्यम्। हेतुः शाकल्यस्य संहिता वर्षस्य न लक्षणम्। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। लक्षणं हि नाम स भवति येन पुनः पुनर्लक्ष्यते। न यः सकृदपि निमित्तत्वाय कल्पते। सकृच्चासौ शाकल्येन सुकृतां संहितामनु निशम्य देवः प्राववर्षदिति। स तर्हि तथा निर्देशः कर्तव्यः अनुर्हेताविति। अथेदानीं लक्षणे न हेतुरपि व्याप्तो नार्थोऽनेन। लक्षणे न हेतुरपि व्याप्तो नह्यवश्यं तदेव लक्षणं भवति येन पुनः पुनर्लक्ष्यते किं तर्हि यत्सकृदपि निमित्तत्वाय कल्पते तदपि लक्षणं भवति। तद्यथा। अपि भवान्कमण्डलुपाणिं छात्रमद्राक्षीदिति। सकृदपि असौ कमण्डलुपाणिश्छात्रो दृष्टस्तस्य तदेव लक्षणम्। एतदेव तर्हि प्रयोजनम्। द्वितीया यथा स्यात्। कर्मप्रवचनीययुक्ते द्वितीयेति। एतदपि नास्ति प्रयोजनम्। सिद्धात्र द्वितीया कर्मप्रवचनीययुक्त इत्येवा न सिध्यति। परत्वाद्धेत्वाश्रयात्तृतीया प्राप्नोति॥

पौनःपुन्येन साहचर्यावगमे लक्ष्यलक्षणभावो भवतीति भावः। अथेदानीमिति। येनोक्तं स तर्हि तथेति स एव सन्दिहानः पृच्छति। व्याप्त इति। हेतुविषयत्वाल्लक्षणस्य तेन हेतुर्व्याप्तो भवति। लक्षणेनेति। सिद्धान्तवादी। तदपि लक्षणमिति। कार्योत्पत्तिनिमित्तमपि तद्विशेषावगमहेतुत्वाल्लक्षणं भवतीत्यर्थः। परत्वादिति। येन नाप्राप्तिन्यायेन कर्मप्रवचनीययुक्ते द्वितीया षष्ठ्या एव बाधिका तां तु परत्वात्तृतीया बाधेत पुनः संज्ञाविधाने तु स्यानान्तरप्राप्त्या द्वितीया हेतुतृतीयां बाधते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आङ्मर्या॥ ॥अन्यत्रमर्यादाभिविध्योर्भेदेननिर्देशाद्दर्शनाद्विनातेनेतिमर्यादा सहतेनेत्यभिविधिरित्यर्थभेदंमत्वावार्तिकंपठति।आ-
कुमारमिति।कुमारानपियशः प्राप्तमित्यर्थः।मर्यादावचनइत्येवेति।वचनग्रहणस्येदंप्रयोजनमवान्तरभेदपरिहारेणपरिच्छेदहेतुमात्रं
मर्यादायथागृह्येत॥लक्षणेत्थम्॥ ॥कस्येति।किंयथाविभक्तिसमीपाद्योऽव्ययार्थास्तथालक्षणादयःप्रत्यादीनामथपदान्तरवाच्याःस
न्तोविषयभावेनसंज्ञायाःप्रत्यादीनांवानिर्दिष्टादितिप्रश्नः।वृक्षादीनामिति।वृक्षंप्रतिविद्योततेविद्युदितिवृक्षोविद्योतनस्यलक्षणम्।प्र
त्यादयस्तुप्राप्तिक्रियाजनितसंबन्धविशेषावच्छेदहेतवः।किमर्थमिति।वृक्षंवृक्षंप्रतिसिञ्चतीत्यत्रकर्मत्वाद्द्वितीयासिद्धेतितद्विधा

आङ्मर्यादावचने॥ ॥आङ्मर्यादाभिविध्योरितिवक्तव्यम्।इहापियथास्यात्।आकुमारंयशःपाणिनेरिति।तत्त-
र्हिवक्तव्यम्।नवक्तव्यम्।मर्यादावचनइत्येवसिद्धम्।एषास्ययशसोमर्यादा॥लक्षणेत्थंभूताख्यानभागवी-
प्सासुप्रतिपर्यनवः॥ ॥कस्यलक्षणादयोर्थानिर्दिश्यन्ते।वृक्षादीनाम्।किमर्थंपुनरिदमुच्यते।कर्मप्रवचनीय
संज्ञायथास्यात्।गत्युपसर्गसंज्ञेमाभूतामिति।नैतदस्तिप्रयोजनम्।यत्क्रियायुक्तास्तंप्रतिगत्युपसर्गसंज्ञेभव
तः।नचवृक्षादीन्प्रतिक्रियायोगः।इदंतर्हिप्रयोजनंद्वितीयायथास्यात्।कर्मप्रवचनीययुक्तेद्वितीयेति।वृक्षं
प्रतिविद्योततेवृक्षमनुविद्योततइति॥अधिपरीअनर्थकौ॥ ॥किमर्थमधिपर्योरनर्थकयोःकर्मप्रवचनीयसं
ज्ञोच्यते।कर्मप्रवचनीयसंज्ञायथास्यात्।गत्युपसर्गसंज्ञेमाभूतामिति।नैतदस्तिप्रयोजनम्।यत्क्रियायुक्तौतं
प्रतिगत्युपसर्गसंज्ञेभवतः।अनर्थकौचेमौ।इदंतर्हिप्रयोजनंपञ्चमीयथास्यात्।पञ्चम्यपाङ्परिभिरि(ति)
।कुतःपर्यागम्यतइति।सिद्धंतुपञ्चम्यपादानइत्येव।आतश्चापादानपञ्चम्येव।यत्राधिशब्देनयोगेपञ्च
मीनविधीयतेतत्रापिचश्रूयतेकुतोऽध्यागम्यतइति।एवंतर्हिसिद्धेसतियदनर्थकयोरुपसर्गसंज्ञाबाधिकां
कर्मप्रवचनीयसंज्ञांशास्तितज्ज्ञापयत्याचार्यःअनर्थकानामप्येषांभवत्यर्थवत्कृतमिति।किमेतस्यज्ञापने
प्रयोजनम्।निपातस्यानर्थकस्यप्रातिपदिकत्वंचोदितंतन्नवक्तव्यंभवति।

नार्थतावदिदंनभवति।प्रत्यादीनांचक्रियाविशेषानवद्योतनात्क्रियायोगाभावाद्गत्युपसर्गसंज्ञाबाधनार्थमपिनोपयुज्यतइ
तिप्रश्नः।वृक्षंप्रतीति।अकर्मकत्वाद्द्युतेःकर्मणिद्वितीयानास्ति॥अधिपरी॥ ॥किमर्थमिति।अनर्थकयोःक्रियायोगाभावात्संज्ञा- राम॰
न्तरबाधनार्थंसंज्ञाविधानंनोपयुज्यते।नापिपरियोगेपञ्चमीविधानार्थम्।अपेनसाहचर्याद्वर्जनविषयपरियोगेतस्याविधानात्। २९८
अपादानसद्भावेचाधिशब्दस्यप्रयोगइवपरियोगेतन्निमित्तायाःपञ्चम्याःसिद्धत्वादितिप्रश्नः। ॥

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। पूर्वोपरितोषेणोदमुच्यते। यस्य शब्दस्य वाच्यं द्योत्यं वा वस्तु न संभवति तस्य वाक्यार्थेऽनुपयोगात् प्रयोगानुपपत्तिः। तस्मादर्थशब्द इह प्रयोजनवाची तेन योर्थोऽनयोर्यौ त्यक्तस्य प्रकरणादिवशात्संप्रत्ययान्निष्प्रयोजनावेतावुच्येते। धातुनोक्तामिति। प्रकरणादिसामर्थ्यावगतविशेषां धातुनोक्तां क्रियामित्यर्थः। आहतुरिति। द्योतयत इत्यर्थः। तद्विशिष्टमिति। तत्क्रियालक्षणं वस्त्वविशिष्टम्। अधिपरिसन्निधानेप्यनाहितविशेषमित्यर्थः। यथेति। शार्ङ्गेन्यस्तं क्षीरं शौन्ले नामिन्नं शब्दादित्यर्थः। यद्येवमिति। धातोर्वाचकत्वात्तस्य प्रयोगं नाक्षिपतितेन विनातयोः प्रयोगासंभवादुपसर्गग्रहणं चाधिपर्योरुपलक्षणार्थम्। उक्तार्थानामपीति। प्रकरणादिवशादवगतार्थानामपि स्फुटतरावगत्यर्थः प्रयोगो लोके भवति। न चानियमप्रसङ्गः। येषामेव हि गतार्थानां प्रयोगो दृश्यते त एव प्रयुज्यन्ते न तु वृक्षस्तरुः पादपइति तथाप्रयोगादर्शनात्। अपूपौ द्वाविति। अपूपावित्यत एवावगते द्वित्वे द्विशब्दस्यापि प्रयोगो लोके दृश्यते। एतदुक्तं भवति। यथा यावच्छब्दो वाक्यान्तरविषयोऽन्य एव। अन्यश्चयावकश-

अथवानेमावनर्थकौ। किं तर्ह्यनर्थकावित्युच्यते। अनर्थान्तरवाचिनावनर्थकौ धातुनोक्तां क्रियामाहतुः। तदविशिष्टं भवति। यथा शाङ्गे पयः। यद्येवं धातुनोक्तत्वात्तस्यार्थस्योपसर्गप्रयोगो न प्राप्नोति उक्तार्थानामप्रयोग इति। उक्तार्थानामपि प्रयोगो दृश्यते। तद्यथा। अपूपौ द्वावानय ब्राह्मणौ द्वावानयेति॥ अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु॥ ॥ इह कस्मान्न भवति। सर्पिषोपि स्यात्। गोमूत्रस्यापि स्यात्। किं च स्यात्। द्वितीया प्रसज्येत कर्मप्रवचनीययुक्ते द्वितीयेति। नैष दोषः। नेमे अप्यर्था निर्दिश्यन्ते। किं तर्हि। परपदार्था इमे निर्दिश्यन्ते। एतेष्वर्थेषु यत्पदं वर्तते तत्रत्यपिः कर्मप्रवचनीयसंज्ञो भवतीति।

ब्दः। यथा च त्रऋषभशब्दो वृषभशब्द इति च। तथैवागच्छत्यध्यागच्छति पर्यागच्छतीति च। तदत्र विषये धातोरधिपर्योश्च सहाभिधायित्वमङ्गीकर्तव्यम्। अपिः पदार्थे॥ ॥ इहेति। यथाऽपिशब्दस्य कर्मप्रवचनीयसंज्ञायां सत्यां स्यादित्यत्रोपसर्गाश्रयं षत्वं न भवत्येवं सर्पिःशब्दाद्द्वितीया कस्मान्न भवतीति प्रश्नः। इतरो भवत्येवात्रापेः संज्ञेत्याह। किं च स्यादिति। नेमे इति। यद्यपि शब्दार्था इमे निर्दिश्येरन्नपदार्थग्रहणमनर्थकं स्यात्। स्वपदार्थाव्यभिचारात्। संभावनादीनां चोपादानमनर्थकं स्यात् तेषामपि पदार्थत्वात्। परपदार्था इति। स्यादित्यादेः परस्य पदस्यामी अर्था इत्यर्थः। तदयमर्थः। स्यादित्यादि पदं कर्तृसामान्यवाच्यपि यदा सामर्थ्यात्कर्तृविशेषे बिन्दौ वर्तते तदा तस्मात्त्यपिः कर्मप्रवचनीयः। सर्पिःशब्दस्तु समुदाय एव वर्तते नावयवमात्रे। अत एवावयवोपजनितव्यतिरेके षष्ठी भवति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। बिन्दुकर्तृकत्वं क्रियायाः द्योतयितुमपिः प्रयुज्यते इति बिन्दुं प्रतिकर्मप्रवचनीयोऽपिः न तु सर्पिषः प्रतीति भावः। बिन्दोस्तर्ही-
ति। ननु यदा बिन्दुशब्दो न प्रयुज्यते तदापिः कर्मप्रवचनीयः। तदुच्यते वृत्तिकारैः। पदान्तरस्याप्रयुज्यमानस्यार्थः पदार्थ इति
। न चाप्रयुक्ते द्वितीया विधातुं शक्या। अत्राहुः। पदार्थग्रहणमिहोपलक्षणार्थमुपात्तं तेन यस्मिन्पदार्थे पदान्तरस्याभिधानशक्ति-
र्नास्ति तत्रापिः कर्मप्रवचनीयः। ततश्च गतार्थो बिन्दुशब्दो यदा विस्पष्टप्रतिपत्तये प्रयुज्यते तदाप्यपिः कर्मप्रवचनीयसंज्ञो भव-
ति। उपपदविभक्तेरिति। कारकविभक्तिरत्र प्रथमा। सर्वत्रैव वाक्येऽवश्यभाव्यं क्रियया ततः सत्तया। तत्र बिन्दोः प्रथमं स्यादित्य-
नेन संबन्धोन्तरङ्गः पश्चात्तु तद्द्वारकोऽपिशब्देन॥ अधि॥ ॥उक्तमिति वक्ष्यमाणमपि बुद्ध्या निरूपितत्वादुक्तमित्युक्तम्। कर्तृ-
निर्देशश्चेदिति। यदीश्वरवचनमित्यनेन पदेनेश्वरः स्वामी भृत्यनियोगादेयः कर्ता स निर्दिश्यते तदानेन स्वामिनः सप्तमी विधीय-

अथवा यदत्र कर्मप्रवचनीययुक्तं नादः प्रयुज्यते। किं पुनस्तत्। बिन्दुः। बिन्दोस्तर्हि कस्मान्न भवति। उपप-
दविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भविष्यति॥ अधिरीश्वरे॥ ॥अधिरीश्वरवचने उक्तम्। कि-
मुक्तम्। यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेदवचनात्सिद्धम्। प्रथमानुपपत्तिस्तु। स्ववचनात्तु सिद्धमिति।
अधिः स्वं प्रति कर्मप्रवचनीयसंज्ञो भवतीति वक्तव्यम्॥ लः परस्मैपदम्॥ लादेशे परस्मैपदग्रहणं
पुरुषबाधितत्वात्। लादेशे परस्मैपदग्रहणं कर्तव्यम्। किं कारणम्। पुरुषबाधितत्वात्। इह वचनेहि
संज्ञाबाधनम्। ।इह हि क्रियमाणेऽनवकाशा पुरुषसंज्ञा परस्मैपदसंज्ञां बा-
धेत। परस्मैपदसंज्ञाप्यनवकाशा सा वचनाद्भविष्यति। सावकाशा परस्मैपदसंज्ञा।

ते। अधिब्रह्मदत्ते पञ्चालाद् इति। तत्राधिकरणत्वादेव सप्तमी सिद्धा। ब्रह्मदत्ते स्थिताः पञ्चाला इत्यर्थावगमात्। पञ्चाला इति च प्रथ-
मा न प्राप्नोति। कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीयया बाधितत्वात्। स्ववचनादिति। अधिब्रह्मदत्ते पञ्चाला इत्यस्याऽयथा सिद्धला-
दधिस्त्वे इति वक्तव्यम्। मधिपञ्चालेषु ब्रह्मदत्त इत्यर्थम्। ईश्वरवचनमिति च कर्तृषष्ठ्या समासः। ईश्वरेण यदुच्यते स्वतन्त्रं कर्मप्रव-
चनीययुक्ते सप्तमीति। यदि वा यस्य संबन्धिन ईश्वरस्य वचनं सप्तमी तत्र। पञ्चालेषु शासनादिक्रियोपजनिते संबन्धे षष्ठ्यां प्राप्तायां स- राम॰
प्तमी विधीयते। स्वं च प्रत्यधेः कर्मप्रवचनीयसंज्ञा न स्वामिनमिति स्वामिनः प्रथमैव भवति॥ लः परस्मैपदम्॥ लदित्यादेशापेक्षा षष्ठी। ला- २९९
देशाः परस्मैपदसंज्ञा इत्यर्थः। लादेश इति। लस्येत्यत्र परस्मैपदमिति वक्तव्यम्। इह तु वचने एकसंज्ञाधिकारात्परस्मैपदसंज्ञा प्रा-
प्तकसोः सावकाशां पुरुषसंज्ञां तिङ्क्षु बाधेरन्नित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिचि वृद्धौ लिति। अस्मादेव तिङ्गादेकसंज्ञाधिकारोऽत्र बाध्यत इति भावः। आत्मनेपदसंज्ञया परस्मैपदसंज्ञाया बाधनं यथा स्यादित्येवम
र्थं लिह प्रकरणेऽनयोः संज्ञयोर्विधानम्। सामान्यापेक्षं च ज्ञापकमित्यात्मनेपदसंज्ञयापि पुरुषसंज्ञानां समावेशो भवति। अन्यथा पुरु
षसंज्ञाः सावकाशास्तङ्क्षु अनवकाशया आत्मनेपदसंज्ञया बाध्येरन्॥ तिङस्त्रीणि॥ ॥तिङां षट् त्रिकाः संज्ञास्तिस्र इति वैषम्या
द्यथासंख्यं न प्राप्नोतीति मत्वाह। प्रथमेति। आत्मनेपदग्रहणे च पृथक्क्रियमाणे सूत्रं परस्मैपदविषयमेव भवतीति वाक्यभेदादे-
केन वाक्येन परस्मैपदानां त्रयाणां तिस्रः संज्ञा द्वितीयेनात्मनेपदानामिति सिद्धमिष्टम्। वैषम्यादिति। यद्यप्येकैकस्य त्रिकस्य स्थाने

कोऽवकाशः। शतृक्वस्वोरवकाशः। सिचि वृद्धौ तु परस्मैपदग्रहणं ज्ञापकं पुरुषाबाधकत्वस्य। यदयं सिचि वृद्धिः
परस्मैपदेष्विति परस्मैपदग्रहणं करोति तज्ज्ञापयत्याचार्यः न पुरुषसंज्ञां परस्मैपदसंज्ञा बाधत इति॥ तिङ-
स्त्रीणि त्रीणि प्रथममध्यमोत्तमाः॥ ॥प्रथममध्यमोत्तमसंज्ञायामात्मनेपदग्रहणं समसंख्यार्थम्। प्रथममध्यमो
त्तमसंज्ञायामात्मनेपदग्रहणं कर्तव्यम्। आत्मनेपदानां च प्रथममध्यमोत्तमसंज्ञा भवन्तीति वक्तव्यम्। किं
प्रयोजनम्। समसंख्यार्थं संख्यातानुदेशो यथा स्यात्। अक्रियमाणे ह्यात्मनेपदग्रहणे तिस्रः संज्ञाः षट् संज्ञि
नः वैषम्यात्संख्यातानुदेशो न स्यात्। क्रियमाणेऽपि चात्मनेपदग्रहणे आनुपूर्व्यवचनं च। आनुपूर्व्यवचनं च क
र्तव्यम्। अक्रियमाणे हि कस्यचिदेव त्रिकस्य प्रथमसंज्ञा स्यात् कस्यचिदेव मध्यमसंज्ञा कस्यचिदेवोत्तम
संज्ञा स्यात्। न वैकशेषनिर्देशात्। यत्तावदुच्यते आत्मनेपदग्रहणं कर्तव्यं समसंख्यार्थमिति तन्न कर्तव्यम्
। संज्ञा अपि षडेव निर्दिश्यन्ते। कथम्। एकशेषनिर्देशात्। एकशेषनिर्देशोऽयम्। अथैकस्मिन्नेकशेषनिर्देशे
सति किमयं कृतैकशेषाणां द्वन्द्वः प्रथमश्च प्रथमश्च प्रथमौ। मध्यमश्च मध्यमश्च मध्यमौ। उत्तमश्चोत्तमश्चो
त्तमौ। प्रथमौ च मध्यमौ च उत्तमौ च प्रथममध्यमोत्तमा इति। आहोस्वित्कृतद्वन्द्वानामेकशेषः। प्रथमश्च मध्यम
श्चोत्तमश्च प्रथममध्यमोत्तमाः प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमा इति। किं चातः।

कसंज्ञाकरणे प्रयोजनाभावः तथापि कस्यचित्त्रिकस्य काचित्संज्ञेत्येतावल्लभ्येत न तु यथाभिमतविषयविभागलाभः। आनुपूर्व्यव
चनं चेति। अत्र सूत्रे त्रिकाणामुच्चारणं नास्ति केवलं त्रीणि त्रीणीति वीप्सया प्रतिपत्तिस्तेषां तत्रानियमप्रसङ्गे नियमार्थमानुपूर्व्य
ग्रहणं च कर्तव्यमित्यर्थः। एकशेषनिर्देशादिति। आकृत्यभिधानाश्रयेण प्रत्याख्यातं सूत्रं शास्त्रप्रक्रियासंपत्त्यर्थमेव संपद्य
ते। अथैतस्मिन्निति। उभयथा संभवात्प्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथममध्यमयोरिति। प्रसिद्धिमाश्रित्यैतदुच्यते। व्याख्यानान्निर्णय इति मत्वाह। कृतद्वन्द्वानामिति। बहुशुक्तिकिटकमिति। एकशे-षे कृते द्वन्द्वः। जातिरप्राणिनामित्येकवद्भावः। बहुशब्दश्चात्र वैपुल्यवचन इत्येकवचनम्। समुदायस्य वैपुल्यमवयवानां प्रचयाद्भवति। यदा तु समाहारद्वन्द्वे कृते एकशेषः क्रियते तदा बहूनि शुक्तिकिटकानीति भवति। लोकवदिति यथा पङ्क्तिस्थेषु ब्राह्मणेषु द्वौ द्वौ ब्राह्मणावानयेत्युक्ते आनुपूर्व्येणानयनं भवति न तु व्युत्क्रमेण तथेहापि भवतीति भावः। विहव्यस्येति। विहव्याख्यस्य सूक्तस्य द्वाभ्यां द्वाभ्यामग्निरुपस्थेय इत्युक्ते आनुपूर्व्येण ऋग्द्वयं गृह्यते न तु व्युत्क्रमेण॥ विभक्तिश्च॥ ॥सति प्रयोजने स्वरितत्वप्रतिबद्धे शब्दानामनुवृत्त्यननुवृत्ती भवतः। लिङ्गदर्शनं च पक्षद्वयेऽप्यस्तीति संदेहात्प्रश्नः। त्रीणि त्रीणीति। आत्वं न प्राप्नोतीति। न ह्यष्ट-

यदि कृतैकशेषाणां द्वन्द्वः। प्रथममध्यमयोः प्रथमसंज्ञा प्राप्नोति। उत्तमप्रथमयोर्मध्यमसंज्ञा प्राप्नोति। मध्यमोत्तमयोरुत्तमसंज्ञा प्राप्नोति। अथ कृतद्वन्द्वानामेकशेषः न दोषो भवति। यथा न दोषस्तथास्तु। किं पुनरत्र न्याय्यम्। उभयमित्याह। उभयं हि दृश्यते। तद्यथा। बहुशुक्तिकिटकं बहूनि शुक्तिकिटकानि। बहुस्थालीपिठरं बहूनि स्थालीपिठराणि। यदप्युच्यते क्रियमाणेऽप्यात्मनेपदग्रहणे आनुपूर्व्यवचनं कर्तव्यमिति। न कर्तव्यम्। लोकत एतत्सिद्धम्। तद्यथा। लोके विहव्यस्य द्वाभ्यां द्वाभ्यामग्निरुपस्थेय इति न चोच्यते आनुपूर्व्येणेति आनुपूर्व्येण चोपस्थीयत इति॥ विभक्तिश्च॥ ॥ त्रीणि त्रीणीत्यनुवर्तते उताहो न। किं चातः। यद्यनुवर्तते। अष्टन आ विभक्ताविति आत्वं न प्राप्नोति। अथ निवृत्तम्। प्रथमयोः पूर्वसवर्ण इत्यत्र प्रथमयोरेव ग्रहणं प्राप्नोति। यथेच्छसि तथास्तु। अस्तु तावदनुवर्तत इति। ननु चोक्तमष्टन आ विभक्ताविति आत्वं न प्राप्नोतीति। वचनाद्भविष्यति। अथवा पुनरस्तु निवृत्तम्। ननु चोक्तं प्रथमयोः पूर्वसवर्ण इति प्रथमयोरेव ग्रहणं प्राप्नोतीति। नैष दोषः। अचीत्यनुवर्तते। न चाजादी प्रथमौ प्रत्ययौ स्तः। ननु चैवं विज्ञायते ऽजादी यौ प्रथमौ अजादीनां वा यौ प्रथमाविति।

न्शब्दात्परं युगपत्त्रिकमस्ति। प्रथमयोरिति। प्रत्येकं संज्ञित्वे विभक्तिसमुदायस्य विभक्तिग्रहणेनाग्रहणात्प्रथमयोरिति समुदायद्वयापेक्षानुपपत्तेः प्रत्यययोरेव द्वयोर्ग्रहणं प्राप्नोतीत्यर्थः। वचनादिति। त्रिकस्य युगपत्प्रयोगाभावात्सामर्थ्यात्समुदायवृत्तिर्विभक्तिशब्दोऽवयवे वर्तिष्यत इति भावः। न चाजादी इति। सुप्शब्दौ शब्दौ प्रथमौ सुप्स्वजादिर्न भवतीति प्रत्यययोरजादित्वासंभवादवयवशब्दस्त्रिके समुदाये उपचाराद्वर्तत इति भावः। अजादी याविति। अजादी विशेष्यौ प्रथमयोरिति विशेषणं तेनौजसोरेव ग्रहणमस्त्वित्यर्थः। अजादीनां चेति। अचीत्यनुवर्तते। तत्र व्याख्यानात्तदादिविधिः निर्धारणं चाश्रयिष्यते अजादिषु यौ प्रथमाविति। एवमप्यौजसोरेव ग्रहणं स्यादिति चोद्यम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्तर्हीति। एतान्गाः पश्येत्यत्र नत्वनिवृत्त्यर्थं तस्मादित्युच्यते। औजसोरेवग्रहणोऽनन्तरपूर्वसवर्णदीर्घादुत्तरः पूर्वसः सकारेन भवतीति
किं तस्मादित्यनेन। तक्रियमाणं त्रिकद्वयग्रहणस्य ज्ञापकं संपद्यते॥ युष्म॥ ॥ किमर्थमिति। किं त्वादेशविधानवाक्ये नैकवाक्यत्वा-
द्धि ध्यर्थमिदम्। अथ विहितेषु त्वादेशेषु नियमार्थमिदमिति प्रश्नः। तत्रैकवाक्यतापक्षे इतरेतराश्रयपरिहाराय भाविनीं संज्ञामाश्रयित
व्येति प्रतिपत्तिलाघवार्थं वाक्यभेदेन नियमपक्षं दर्शयितुमाह युष्मदस्मदिति। किमयमिति। ननु प्रत्ययस्य प्राधान्यात्तन्नियम एव
युक्तः। नैष दोषः। समुदायस्य संचिकीर्षितत्वात्प्राधान्यं तदङ्गत्वात्तु प्रत्ययोपपदयोर्द्वयोरप्यप्राधान्यमित्युभयोरपि नियम आ
शङ्क्यते। युष्मदि मध्यम एवेति। तुल्यजातीयव्यावृत्तेर्नियमफलत्वादुत्तमप्रथमौ निवार्येते न तु जादयः। त्वजादिविधिसामर्थ्या-

यत्तर्हि तस्माच्छसो नः पुंसीत्यनुक्रान्तं पूर्वसवर्णं प्रति निर्दिशति। तज्ज्ञापयत्याचार्यः विभक्त्योर्ग्रहणमिति। अथ-
वा वचनग्रहणमेव कुर्यादौजसोः पूर्वसवर्णादिति॥ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः॥ अस्मद्युत्त
मः॥ शेषे प्रथमः॥ किमर्थमिदमुच्यते। युष्मदस्मच्छेषवचनं नियमार्थम्। नियमार्थोयमारम्भः। अथैतस्मिन्नियमार्थे
विज्ञायमाने किमयमुपपदनियमः युष्मदि मध्यम एव अस्मद्युत्तम एव। आहोस्वित्पुरुषनियमः युष्मद्येव मध्यमः
अस्मद्येवोत्तम इति। किं चातः। यदि पुरुषनियमः शेषग्रहणं कर्तव्यं शेषे प्रथम इति। किं कारणम्। मध्यमोत्तमौ नि
यतौ युष्मदस्मदी अनियते तत्र प्रथमोऽपि प्राप्नोति। तत्र शेषग्रहणं कर्तव्यम् प्रथमनियमार्थम्। शेष एव प्रथ
मो भवति नान्यत्रेति। अथाप्युपपदनियम एवमपि शेषग्रहणं कर्तव्यं शेषे प्रथम इति। युष्मदस्मदी नियते म
ध्यमोत्तमौ अनियतौ तौ शेषेपि प्राप्नुतः। तत्र शेषग्रहणं कर्तव्यम्। शेषनियमार्थम्। शेषे प्रथम एव भवति नान्य इति
। उपपदनियमे शेषग्रहणं शक्यमकर्तुम्। कथम्। युष्मदस्मदी नियते मध्यमोत्तमावनियतौ तौ शेषेपि प्राप्नुतः। त
तो वक्ष्यामि प्रथमो भवतीति तन्नियमार्थं भविष्यति। यत्र प्रथमश्चान्यश्च प्राप्नोति तत्र प्रथम एव भवतीति।

द्वानास्ति तेषां निवारणम्। यत्र प्रथमश्चेति। युष्मदि मध्यम एव अस्मद्युत्तम एवेति युष्मदस्मदोर्नियतत्वात्तयोः पुरुषान्तरं न भ
वति मध्यमोत्तमयोस्त्वनियतत्वात्शेषेपि तत्प्रसङ्गे प्रथम इति सूत्रमारभ्यमाणं सिद्धे प्रथमे मध्यमोत्तमयोर्निवारणाय नियमा
र्थं संपद्यते प्रथम एव भवति न मध्यमोत्तमाविति। यथा समे देशे यजेतेति पाक्षिकी प्राप्तो नियमः। तत्रेति। उभयथा नियमे इत्यर्थः
। शेषत्वादिति। यत्र केवले युष्मदस्मदी उपपदे स एवाशेषस्तत्र मा भूत्प्रथमः। यत्र त्वन्यसहिते ते तत्र समुदायस्य युष्मदस्मद्ग्र
हणेनाग्रहणाच्छेषत्वमेवेति प्रथमप्रतिषेधो वक्तव्यः।

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स एवाह। सिद्धं त्विति। यत्र शेषे युष्मदस्मदी स्तस्तत्र शेषे प्रथमो नेति वक्तव्यमित्यर्थः। चोदक आह। स तर्हीति। आचार्यदेशीय आह। न वक्तव्य इति। अस्मदः शेष इति। आवां पचाव इति। तत्रास्मद्युत्तम इति। ननु शिष्यमाणस्यास्मदो द्व्यर्थत्वादप्रयुज्यमानेपि युष्मदि तदर्थगतो मध्यमविधानात् तस्याप्यत्र प्रसङ्ग इति विप्रतिषेध एवाश्रयितव्यः। अत्राहुः। युष्मदर्थे साहचर्याद्यदास्मद्रूपत्वमारोप्यते तदाभेदाभावात् पृथग्युष्मदर्थाभावाद् अस्मदुपपदनिमित्तः सिद्ध उत्तम एवेत्यदोषः। चोदकस्त्वाह अनेकशेषभावार्थं त्विति। त्वं चाहं च पचाव इत्यत्र प्रयोगे। आचार्यदेशीय आह। न वेति। सह विवक्षाया अभावे यथा युष्मदस्मदोरेकशेषाभावः एवं तदधिकर

तत्र युष्मदस्मदन्येषु प्रतिषेधः शेषत्वात्। तत्र युष्मदस्मदन्येषु प्रथमस्य प्रतिषेधो वक्तव्यः। त्वं च देवदत्तश्च पचथः। अहं च देवदत्तश्च पचावः। किं कारणम्। शेषत्वात्। शेषे प्रथम इति प्रथमः प्राप्नोति। सिद्धं तु युष्मदस्मदोः प्रतिषेधात्। सिद्धमेतत्। कथम्। युष्मदस्मदोः प्रतिषेधात्। शेषे प्रथमः युष्मदस्मदोर्नेति वक्तव्यम्॥ युष्मदि मध्यमादस्मद्युत्तमो विप्रतिषेधेन॥ युष्मदि मध्यमादस्मद्युत्तम इत्येतद्भवति विप्रतिषेधेन। युष्मदि मध्यम इत्यस्यावकाशः। त्वं पचसि। अस्मद्युत्तम इत्यस्यावकाशः। अहं पचामि। इहोभयं प्राप्नोति। त्वं चाहं च पचावः। अस्मद्युत्तम इत्येतद्भवति विप्रतिषेधेन। स तर्हि विप्रतिषेधो वक्तव्यः। न वक्तव्यः। त्यदादीनां यद्यत्परं तच्छिष्यत इत्येवमस्मदः शेषो भविष्यति। तत्रास्मद्युत्तम इत्येव सिद्धम्। अनेकशेषभावार्थं तु। अनेकशेषभावार्थं तु स विप्रतिषेधो वक्तव्यः। यदा चैकशेषो न। कदा चैकशेषो न। सह विवक्षायामेकशेषः। यदा न सह विवक्षा तदैकशेषो नास्ति। न वा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेधः। न वार्थो विप्रतिषेधेन। किं कारणम्। युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामपि युष्मदस्मदधिकरणानामपि एकशेषेण न भवितव्यम्। त्वं चाहं च पचसि पचामि चेति। क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभावस्य।

णयोरपि क्रिययोर्भेदस्य विवक्षितत्वादाख्यातयोरप्येकशेषाभावे पचसि पचामि चेति पृथगेव प्रयोगान्नार्थो विप्रतिषेधेनेत्यर्थः ॥ राम॰
। एतदेव समर्थयितुमाह। क्रियापृथक्त्व इति। यथा क्रियापृथक्त्वे सति द्रव्यपृथक्त्वं न तु सह विवक्षा एवं द्रव्यपृथक्त्वेपि क्रियापृथक्त्वेन भाव्यं परस्परसाहचर्याव्यभिचारात्। एवं च कृत्वेति। द्रव्यपृथक्त्वे सति क्रियापृथक्त्वादित्यर्थः। ॥ ३०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमाचार्यआह।यत्तावदिति।एकशेषद्रूति।एकशेषफलत्वादेकशेषद्रूत्युच्यते।नतुप्रथममध्यमोत्तमानामेकशेषोसरूपत्वादितिवाचनिकएकशेषः।एवंह्येकशेषेआश्रीयमाणेनार्थोविप्रतिषेधेन।तस्मात्कारकभेदेपिक्रियायाअभेदादेकएवधातुःप्रयुज्यतेतस्माच्चपरोलकारएवानेकार्थाभिधायीविरोधाभावात्।तत्रपुरुषद्वयप्रसङ्गेयुक्तोविप्रतिषेधः।अक्षाद्रूति।शकटाक्षविभीतकाक्षदेवनाक्षाणांसहविवक्षायामेकशेषस्तत्रावयवक्रियायाःसमुदायेआरोपाद्भज्यन्तामित्यादि

क्रियापृथक्त्वेचद्रव्यपृथक्त्वंदृश्यते।तद्यथा।पचसिचपचामिचत्वंचाहंचेति।तदनुमानमुत्तरयोरपिक्रिययोरेकशेषोनभवतीति।एवंचकृत्वासोप्यदोषोभवतियदुक्तंतत्रयुष्मदस्मदन्येषुप्रतिषेधःशेषत्वादिति।तत्रापिह्येवंभवितव्यम्।त्वंचदेवदत्तश्चपचसिचपचतिचेति।अहंचदेवदत्तश्चपचामिचपचतिचेति।यत्तावदुच्यतेनवायुष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावाद्विप्रतिषेधद्रूति।दृश्यतेहियुष्मदस्मदोश्चानेकशेषस्तदधिकरणानांचैकशेषः।तद्यथा।त्वंचाहंचवृत्रहन्नुभौसंप्रयुज्यावहैद्रूति।यदप्युच्यतेक्रियापृथक्त्वेचद्रव्यपृथक्त्वंदृश्यतएतदनुमानमुत्तरत्रानेकशेषभावस्येति।क्रियापृथक्त्वेखल्वपिद्रव्यैकशेषोभवतीतिदृश्यते।तद्यथा।अक्षाःभज्यन्तांभक्ष्यन्तांदीव्यन्तामिति।एवंचकृत्वासोपिदोषोभवति।यदुक्तंतत्रयुष्मदस्मदन्येषुप्रतिषेधःशेषत्वादिति।नैषदोषः।परिहृतमेतत्।सिद्धंतुयुष्मदस्मदोःप्रतिषेधादिति।सतर्हिप्रतिषेधोवक्तव्यः।नवक्तव्यः।शेषेप्रथमोविधीयते।नहिशेषश्चान्यश्चशेषग्रहणेनगृह्यते।भवेत्प्रथमोनस्यात्।मध्यमोत्तमावपिनप्राप्नुतः।किंकारणम्।युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावुच्येते।नचयुष्मदस्मदीअन्यश्चयुष्मदस्मद्ग्रहणेनगृह्यते।यदत्रयुष्मद्यच्चास्मत्तदाश्रयौमध्यमोत्तमौभविष्यतः।यथैवतर्हियदत्रयुष्मद्यच्चास्मत्तदाश्रयौमध्यमोत्तमौभवतःएवंयोत्रशेषस्तदाश्रयःप्रथमोभविष्यति।एवंतर्हिशेषउपपदेप्रथमोविधीयते।उपोच्चारिपदमुपपदम्।

बहुवचनंसामानाधिकरण्यंचोपपद्यते।यथाद्रव्यैकशेषेपिक्रियापृथक्त्वमेवद्रव्यपृथक्त्वमेवद्रव्यपृथक्त्वेपिक्रियैकशेषद्रूत्यर्थः।नहिशेषश्चान्यश्चेति।उपयुक्तादन्यःशेषः।युष्मदस्मदोश्चोपयुक्तयोःसद्भावान्नास्तिशेषत्वम्।इतरएतत्सामर्थ्यमविदित्वाह।भवेदिति।इतरआह।यदत्रेति।तत्सन्निधौशेषत्वाभावात्तन्निबन्धनमेवकार्यंभवतीत्यर्थः।इतरःशेषपदार्थमविद्वानाह।यथैवेति।एतद्विचारणीयमप्युपेक्ष्योपपदार्थंवर्णयितुमाह।एवंतर्हीति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यच्चात्रेति। युष्मदस्मदोः श्रवणे तदभावे च शेषसद्भावात्। यश्च शेष इति। देवदत्तश्चेति। न तदिति। न हि तस्यैव साधनत्वं किं तर्हि युष्मद-
स्मदर्थयोरपि न चात्र शेषेणैवेति। किं तर्हि युष्मदस्मदर्थेनापि तद्भावाच्च शेषत्वाभाव इत्यर्थः। एवं तर्हीति। यद्यप्यनेकशेषदो-
ष उपक्रान्तस्तथाप्येकशेषदिदूषणार्थोयमुपक्रमः। स्थानिन्यपीति। अप्रयुज्यमाने प्रयुज्यमाने च शेषे प्रथमविधानात्। दोषान्तरमप्या-
ह। त्यदादीनामिति। एतदपरिहार्यं मन्यमानो लक्ष्ये चोद्योन्यदप्याह। युष्मदीति। परमत्वमिति। युष्मद्यस्मदी ति विशिष्टरूपपरिग्रह-
दस्य च शब्दान्तरत्वात्। आचार्यदेशीय आह। तदन्तविधिनेति। युष्मदस्मदोरुपपदस्य विशेषणत्वात्तदन्तविधिः। चोदकोदे

यच्चात्रोपोच्चारि न स शेषः यश्च शेषः न तदुपोच्चारि। भवेत्प्रथमो न स्यान्मध्यमोत्तमावपि न प्राप्नुतः। किंका-
रणम्। युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावुच्येते उपोच्चारिपदमुपपदं यच्चात्रोपोच्चारि न ते युष्मदस्मदी। ये
च युष्मदस्मदी न तदुपोच्चारि। एवं तर्हि शेषेण सामानाधिकरण्ये प्रथमो विधीयते। न चात्र शेषेणैव सामानाधिकर-
ण्यम्। भवेत्प्रथमो न स्यान्मध्यमोत्तमावपि तु न प्राप्नुतः। किं कारणम्। युष्मदस्मद्भ्यां सामानाधिकरण्ये मध्यमोत्तमावु-
च्येते। न चात्र युष्मदस्मद्भ्यामेव सामानाधिकरण्यम्। एवं तर्हि त्यदादीनि सर्वैर्नित्यमित्येवमत्र युष्मदस्मदोः शेषो
भविष्यति। तत्र युष्मदि मध्यम अस्मद्युत्तम इत्येव सिद्धम्। न सिध्यति। स्थानिन्यपीति प्रथमः प्राप्नोति। त्यदादीनां
खल्वपि यद्यत्परं तच्छिष्यत इति यदा भवतः शेषस्तदाश्रयः प्रथमः प्राप्नोति। युष्मदि मध्यमः अस्मद्युत्त-
म इत्येवोच्येते ताविह न प्राप्नुतः। परमत्वं पचसि परमाहं पचामीति। तदन्तविधिना भविष्यति। इहापि तर्हि
तदन्तविधिना प्राप्नुतः। अतित्वं पचति अत्यहं पचतीति। ये चाप्येते समानाधिकरणवृत्तयस्तद्धितास्तत्र मध्य-
मोत्तमौ न प्राप्नुतः त्वत्तरः पचसि मत्तरः पचामीति। त्वद्रूपः पचसि मद्रूपः पचामि त्वत्कल्पः पचसि मत्कल्पः पचा-
मीति। एवं तर्हि युष्मदस्मदि इतीत्येवं भविष्यति। इहापि तर्हि प्राप्नुतः अतित्वं पचति अत्यहं पचतीति।

षमाह। इहापीति। अतित्वमिति। त्वामतिक्रान्त इति समासः। एवं तदन्तविधावतिव्याप्तिमुक्त्वाऽव्याप्तिमाह। ये चाप्येत इति। त्वत्क-
ल्प इति। ईषदसमाप्तत्वं त्वत्कल्प इति कालान्तरप्रसिद्धगुणरहितो युष्मदर्थ एव त्वत्कल्पशब्देनोच्यते न तु तत्सदृशं पदार्था-
न्तरम्। तदभिधाने युष्मदर्थस्य साधनत्वाभावान्मध्यमाभावात्। एवं मत्कल्प इति बोद्धव्यम्। आचार्यदेशीय आह। एवं तर्हीति। से-
त्वा निर्देशस्य मतुब्लोपोभिधास्यत इति भावः। चोदक आह। इहापीति। ॥

CC-0. In Public Domain. Digitization by eGangotri

आचार्य आह। एवं तर्हीति। समानाधिकरणे इति वचनाद्युष्मदस्मदर्थेन यत्र लान्तस्य सामानाधिकरण्यं तत्र मध्यमोत्तमाभ्यां भवित
व्यमिति नास्ति कश्चिद्दोषः। एवं च कृत्वेति। युष्मदस्मदर्थस्य साधनत्वाच्छेषत्वाभावः। अथवेति। प्रथम इत्येतावत्सूत्रं क्रियते अना
श्रितविषयविशेषः प्रथमो विधीयमान उत्सर्गो भवति। तस्य विषयविशेषे विधीयमानौ मध्यमोत्तमावपवादौ भवतः। तत्राप
वादनिमित्तसद्भावाद्व्यामिश्रेपि विषये मध्यमोत्तमावेव भविष्यतः न तु प्रथम इत्यर्थः। अत्वं त्वमिति। प्रकृतिविकृत्योर
भेदविवक्षायां च्विप्रत्ययः। तत्र किं प्रकृत्याश्रयेण प्रथमेन भाव्यमथ विकृत्याश्रयेण मध्यमेनेति प्रश्नः। अत्रोत्तरम्। त्वद्भ
वतीति। प्रकृतेरेव विकारस्वरूपेण संपन्नो कर्तृत्वमिति भावः। मध्यमोत्तमौ कस्मादिति। यथा प्रकृतिस्तद्धर्मसमाचाराद्युष्मदस्म

एवं तर्हि युष्मदि साधने अस्मदि साधन इत्येवं भविष्यति। एवं च कृत्वा सोप्यदोषो भवति यदुक्तं तत्र युष्मद
स्मदन्येषु प्रतिषेधः शेषत्वादिति। अथवा प्रथम उत्सर्गः करिष्यते तस्य युष्मदस्मदोरुपपदयोर्मध्यमोत्तमा
वपवादौ भविष्यतः। तत्र युष्मद्ग्रन्थश्चास्मद्ग्रन्थश्चास्तीति कृत्वा मध्यमोत्तमौ भविष्यतः। अथेह कथं भवि
तव्यम्। अत्वं त्वं संपद्यते इति त्वद्भवति मद्भवतीति। आहोस्वित्त्वद्भवसि मद्भवामीति। त्वद्भवति मद्भवतीत्येवं
भवितव्यम्। मध्यमोत्तमौ कस्मान्न भवतः। गौणमुख्ययोर्मुख्ये संप्रत्ययो भवति। तद्यथा। गौरनुबन्ध्योऽ
जोऽग्नीषोमीय इति। न वाहीको नूबध्यते। कथं तर्हि वाहीके वृद्ध्यात्वे भवतः। गौर्वाहीकस्तिष्ठति गामानये
ति। अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति। शब्दाश्रये च वृद्ध्यात्वे॥ परः सन्निकर्षः सं
हिता॥ ॥परः सन्निकर्षः संहिता चेद्द्रुतायामसंहितम्। परः सन्निकर्षः संहिता चेद्द्रुतायां वृत्तौ संहितासं
ज्ञा न प्राप्नोति। द्रुतायामेव हि परः सन्निकर्षो वर्णानां नाद्रुतायाम्। तुल्यः सन्निकर्षः॥

व्यपदेशं लभते तथा मध्यमोत्तमावपि प्राप्नुतः। गौणमुख्ययोरिति। तद्धर्मसमाचाराद्दारोपितमत्र युष्मदर्थरूपत्वमिति भावः।
शिष्टं भाष्यमोदित्यत्र व्याख्यातं तत एवावधार्यताम्। यदुक्तं भवतः शेष इति तत्रोत्तरमाह। युष्मदस्मद्भवतु इत्येवं न संनिवेश
आश्रयणीयः। किं तु भवतु युष्मदस्मदिति। ततश्चास्मद एव शेषो न तु भवतः। पूर्वं शेषदर्शनाच्चेति वचनाद्वा॥ परःसं॥
॥पूर्ववर्णोच्चारणानन्तरमेव यद्वर्णान्तरमुच्चार्यते तेन तु तच्छून्यान्तरालसद्भावः स परउत्कृष्टः सन्निकर्षः प्रत्यासत्तिलक्षणः सं
हितासंज्ञ इति सूत्रार्थः। एवं स्थिते चोद्यते। पर इति। द्रुतायामेव वृत्तावनन्तरोक्तः परः सन्निकर्षः संभवति न तु मध्यमायां वि
लम्बितायां चेत्यर्थः। असंहितमिति। संहितासंज्ञाया अभाव इत्यर्थाभावेऽव्ययीभावः। अविद्यमाना वा संहिता अस्मिन्निति बहुव्रीहिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्रुतमध्यमविलम्बितास्विति।द्रुताचमध्यमाचविलम्बिताचेतिद्वन्द्वेकृतेभाष्यकारवचनप्रामाण्याद्ध्रस्वः।सर्वासुवृत्तिषुतुल्यःस
न्निकर्षःनैरन्तर्योच्चारणात्।विशेषइति।वृत्तीनामितिशेषः।क्वचिद्वृत्तिविशेषइत्येवपाठः।वर्णानांत्विति।वर्णोपलब्धिकालभे
दाद्वर्णकालभूयस्त्वमुच्यते।द्रुतायांस्वल्पउपलब्धिकालःमध्यमायामधिकःविलम्बितायामधिकतरः।प्राकृतवैकृतभेदा
द्भिन्नाध्वनयः।तत्रवैकृतध्वनिवशात्तस्यैववर्णस्यपुनःपुनरुपलब्धिर्भवतीतिध्वनिभेदाद्वृत्तिभेदः।किंकृतइतिकार
णेपृष्टेवर्णकालभूयस्त्वंत्वितिसामर्थ्यात्कारणमेवोक्तंभवतीति।हस्तिमशकयोरिति।हस्तिनोहस्तिनायःसन्निकर्षःम
शकस्य मशकेनसतुल्यःपरस्परापेक्षयेत्यर्थः।प्राणिभूयस्त्वमिति।हस्तिनोमहान्तंदेशंव्याप्नुतोमशकोतुस्वल्पम्।नैर

तुल्यःसन्निकर्षोवर्णानांद्रुतमध्यमविलम्बितासुवृत्तिषु।किंकृतस्तर्हिविशेषः।वर्णकालभूयस्त्वंतु।वर्णानां
तुकालभूयस्त्वम्।तद्यथा।हस्तिमशकयोस्तुल्यःसन्निकर्षःप्राणिभूयस्त्वंतु। यद्येवंद्रुतायांतपरकरणेमध्य
मविलम्बितयोरुपसंख्यानंकालभेदात्।द्रुतायांतपरकरणेमध्यमविलम्बितयोरुपसंख्यानंकर्तव्यम्।
किंकारणम्।कालभेदात्।येहिद्रुतायांवृत्तौवर्णास्त्रिभागाधिकास्तेमध्यमायाम्।येमध्यमायांवृत्तौवर्णास्त्रि
भागाधिकास्तेविलम्बितायाम्।उक्तंवा।किमुक्तम्।सिद्धंत्ववस्थितावर्णावक्तुश्चिराचिरवचनाद्वृत्तयोवि
शिष्यन्तइति।अथवाशब्दाविरामःसंहितेत्येतल्लक्षणंकरिष्यते।शब्दाविरामेप्रतिवर्णमवसानम्।शब्दा
विरामेप्रतिवर्णमवसानसंज्ञाप्राप्नोति।किमिदंप्रतिवर्णमिति।वर्णंवर्णंप्रतिप्रतिवर्णम्।येनैवप्रयत्नेनैकोवर्ण
उच्चार्यतेविच्छिन्नेवर्णेउपसंहृत्यतमन्यमुपादायद्वितीयःप्रयुज्यतेतथातृतीयस्तथाचतुर्थः।एवंतर्ह्यनवका-
शासंहितासंज्ञाऽवसानसंज्ञांबाधिष्यते।अथवाअवसानसंज्ञायांप्रकर्षगतिर्विज्ञास्यतेसाधीयोयोविरामइति।

न्तर्यस्त्वविशिष्टमित्यर्थः।वर्णानांव्यञ्जकध्वनिकृतंयथोक्तंभेदमप्रतिपद्यमानःस्वगतमेवभेदंमत्वाचोदयति।यद्येवमि
ति।शिष्टंभाष्यंतपरस्तत्कालस्येत्यत्रव्याख्यातंततएवावधार्यताम्।शब्दाविरामइति।यदाप्रयोक्ताशब्दोच्चारणान्नविर
मतितदाशब्दाविरामः।सचमध्यमविलम्बितयोरपिपरःसन्निकर्षाभावेऽप्यस्तीतिसिद्धासंहितासंज्ञा।शब्दाविरामेप्रतिवर्णमिति।भिन्नप्र
यत्नजनितध्वनिव्यङ्ग्यत्वाद्वर्णानांप्रतिवर्णंप्रयत्नभेदादेकप्रयत्नाविच्छेदाभावात्प्रथमप्रयत्नोच्चारितवर्णानन्तरंप्रयत्नान्तरेणवर्णान्त
रोच्चारणादेकैकस्यवर्णस्यविरामसद्भावादवसानसंज्ञाप्राप्नोति।अवसानसंज्ञामिति।वर्णान्तरानुच्चारणेह्रस्वइत्यादेःसावकाशामितिभा
वः।तेनसर्वथावर्णानांयोविरामःसोऽवसानसंज्ञोनतुनान्तरीयकइत्यर्थः।अथवेति।सर्वत्रविरामसद्भावात्पुनःश्रुत्याविशेषआश्रीयते। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दार्थयोरिति। अन्यत्र तु सत्यपि शब्दविरामे पदार्थस्य वाक्यार्थस्य वाऽविरामान्न भवत्यवसानसंज्ञा। ह्रादाविराम इति। प्रयत्नविशेषजनितो वर्णविरामेऽप्यनुरणनरूपो वर्णान्तरोच्चारणेऽप्यनुवर्तमानो घोषो ह्राद उच्यते। स्पर्शघोषसंयोग इति। वर्ग्याणां प्रथमद्वितीयानां शषसानां च संयोगे घोषविच्छेदादसन्निधानात्संहितासंज्ञाया अप्राप्तिरित्यर्थः। अघोषसंयोग इत्येव सिद्धत्वात्स्पर्शग्रहणमनर्थकम्। अस्पर्शानामप्यघोषाणां शषसानां संयोगे तुल्यन्यायत्वात्संज्ञाया अप्रसङ्गात्। न च स्पर्शानामघोषाणां चेति समुच्चयः। घोषवतां स्पर्शानां संयोगे दोषाप्रसङ्गात्। कुक्कुट इति। कुकुट इवायमिति कनालुम्मनुष्ये इति लुपि कृते सञ्ज्ञायामुपमानमित्याद्युदात्तत्वं शिष्टमनुदात्तं ततः संहितायां विधीयमानमुदात्तादनुदात्तस्य स्वरितत्वं न स्यात्। पचतीति। अत्रापि चकारस्याघोषत्वाद

कष्मात्रसाधीयः यः शब्दार्थयोर्विरामः। अथवा ह्रादाविरामः संहितेत्येतल्लक्षणं करिष्यते। ह्रादाविरामे स्पर्शघोषसंयोगेऽसन्निधानादसंहितम्। ह्रादाविरामे स्पर्शानामघोषाणां च संयोगेऽसंनिधानात्संहितासंज्ञा न प्राप्नोति। कुक्कुटः पिप्पकः पित्तमिति। किमुच्यते संयोग इति। अथ यत्रैकः पचतीति एकः पूर्वपरयोर्ह्रादेन प्रच्छाद्यते। तद्यथा। द्वयोरक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते। बदरपिटके रिक्तको लोहकंसस्तद्गुण उपलभ्यते। एकेन तुल्यः सन्निधिः। यथैवैको वर्णो ह्रादेन प्रच्छाद्यते एवमनेकोऽपि। अथवा पौर्वापर्यमकालव्यवेतं संहितेत्येतल्लक्षणं क्रियते। पौर्वापर्यमकालव्यवेतं संहिता चेत्पूर्वपराभावादसंहितम्। पौर्वापर्यमकालव्यवेतं संहिता चेत्पूर्वपराभावात्संहितासंज्ञा न प्राप्नोति। न हि वर्णानां पौर्वापर्यमस्ति।

कारोच्चारणे घोषविच्छेदात्स्वरितत्वाप्रसङ्गः। ह्रादेनेति। द्वयोरकारयोर्घोषवतोर्मध्ये चकारो घोषवानिव लक्ष्यत इत्यर्थः। आश्रयान्तरगतोऽपि गुण आश्रयान्तर उपलभ्यत इति दृष्टान्तेन दर्शयति। द्वयोरिति। एकेनेति। अनेकस्य यः सन्निकर्षः स एकेन तुल्यः। यथैकोऽतद्गुणोऽपि तद्गुणाद्वस्त्वन्तरसन्निधौ तद्गुण उपलभ्यते तथाऽनेकोऽपि स्फटिकादिरर्थ इत्यर्थः। अथवेति। वर्णान्तरोच्चारणकालादन्येन वर्णशून्येन कालेनाव्यवहितं पौर्वापर्यं संहितेति लक्षणं क्रियते। तेन मध्यमविलम्बितयोः परमसन्निकर्षाभावेऽपि संहितासंज्ञा सिद्ध्यति। पूर्वपराभावादिति। युगपत्स्थितानां देशकृतं पौर्वापर्यं दृष्टम्। वर्णास्त्वेकैकशः उपलभ्यमाना यौगपद्येनासन्निधानात्कथं पौर्वापर्यमनुवीरन्।

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एकवर्णवर्तित्वादिति। सामान्येनोपक्रमात्त्वा प्रत्ययाभावः। उच्चरितेति। क्रमोत्पन्ना अपि वर्णा यद्यवतिष्ठेरंस्तदा स्यात्पूर्वापरव्यपदेशो ज्येष्ठ
मध्यमकनिष्ठव्यपदेशवत्। अनवस्थानात्तु नास्ति तात्त्विकः पूर्वापरभाव इत्यर्थः। व्यञ्जकध्वन्यपेक्षया चैतदुक्तम्। ध्वनिस्फोटभेदस्त्व-
न्यत्र निर्णीतत्वान्नेहोपन्यस्यते। न द्वौ युगपदिति। युगपद्द्वयोरुच्चारणे स्यादेवाव्यवधानम्। कालेन पौर्वापर्यं तु मा भूदित्यर्थः। वागिति
। वागिन्द्रियमित्यर्थः। एतेन युगपदनवस्थानात्सन्निकर्षो व्याक्षिप्त इति विज्ञेयम्। एवं तर्हीति। बुद्धिप्रकल्पितः सर्वः पौर्वापर्यसन्नि
कर्षादिव्यवहार इत्यर्थः। धीरः पण्डितः। तत्त्वन्नीतिरिति। तननं तत्साऽस्ति यस्याः सा तत्त्वती सकलविषयव्यापिनी नीतिर्बुद्धिर्यस्य स तत्त्वन्नीति

किं कारणम्। एकवर्णवर्तित्वाद्वाचः। उच्चरितप्रध्वंसित्वाच्च वर्णानाम्। एकैकवर्णवर्तिनी वाक्। न द्वौ युगपदु
च्चारयति। गौरिति गकारे यावद्वाग्वर्तते नौकारे न विसर्जनीये। यावदौकारे न गकारे न विसर्जनीये। यावद्विसर्ज
नीये न गकारे नौकारे। उच्चरितप्रध्वंसित्वात्। उच्चरितप्रध्वंसिनः खल्वपि वर्णाः उच्चरितः प्रध्वस्तः। अथापरः
प्रयुज्यते न वर्णो वर्णस्य सहायः। एवं तर्हि बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्त्वन्नीतिः। शब्देनार्थान्वाच्यान्दृ-
ष्ट्वा बुद्धौ कुर्यात्पौर्वापर्यम्। बुद्धिविषयमेव पौर्वापर्यम्। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति अ
स्मिन्नर्थेऽयं शब्दः प्रयोक्तव्यः अस्मिंस्तावच्छब्देऽयं तावद्वर्णः ततोऽयं ततोऽयमिति॥ विरामोऽवसानम्॥ इदं विचा
र्यते। अभावो वावसानलक्षणं स्याद्विरामो वेति। कश्चात्र विशेषः। अभावेऽवसानलक्षण उपर्यभाववचनम्। अभावेऽव
सानलक्षणे उपर्यभावग्रहणं कर्तव्यम्। उपरि यः अभाव इति वक्तव्यम्। पुरस्तादपि हि शब्दस्याभावस्तत्र मा भूदिति।
किं च स्यात्। रसः। रथः। खरवसानयोर्विसर्जनीय इति विसर्जनीयः प्रसज्येत। अस्तु तर्हि विरामः। विरामे विरामवचनम्।
यस्य विरामः विरामग्रहणं तेन कर्तव्यम्। ननु च यस्याप्यभावस्तस्याप्यभावग्रहणं कर्तव्यम्। परार्थं मम भविष्यति।

रिति। अन्ये तु तत्त्वन्नीतिरिति पठन्ति। तत्त्वती विषयान्व्याप्नुवती बुद्धिरस्येति स एवार्थः। विरामः॥ इदं विचार्यत इति। विचरति नानागच्छ
ति यद्वस्तु तद्विचार्यते परीक्ष्यत इत्यर्थः। अभावो वेति। केचिदभावोऽवसानमिति पठन्ति। अन्ये तु विरामोऽवसानमिति तत्र युक्तायुक्त-
विचारः क्रियते। उपरीति। वर्णोच्चारणादूर्ध्वं योऽभावः तदुपलक्षितो वर्णोऽवसानमिति वक्तव्यं प्रागभावस्योपलक्षणत्वनिवृत्त्यर्थम्।
रस इति। परवत्पूर्वस्यापि रेफस्याभावविषयत्वाद्विसर्जनीयप्रसङ्गः। विरामे विरामवचनमिति। अधिकं कर्तव्यमित्यर्थः। ॥

CC-0. In Public Domain. Digitization by eGangotri

ततोऽवसानं चेति। अदर्शनमभाव इत्येक एवार्थः। तेन पुनरभावग्रहणं न कर्तव्यमित्यर्थः। तत्र लोपसंज्ञायामभावः संज्ञित्वेनाश्रीयते अवसानसंज्ञायां तूपलक्षणत्वेन। तेन वर्णान्तराभावोपलक्षितो वर्णोऽवसानसंज्ञ इत्यर्थः। उत्तरत्र त्वभावस्यैव लोपावसानसंज्ञे व्याख्यास्येते। अस्मिन्पक्षे खरवसानयोरिति षष्ठी। खरः समीपस्य रेफस्यावसानस्य च रेफस्येत्यर्थः। अथवैकापि सप्तमी विषयभेदाद्भिद्यते। खरि परतो रेफस्य विसर्जनीयोऽवसाने च रेफे स्थानिनि विसर्जनीय इत्यादेशस्य विषयत्वेन स्थानी विवक्ष्यते। ममापीति। अभावो विराम इति पर्यायत्वं मन्यते। आरम्भपूर्वक इति। निवृत्तिर्विरामः स च प्रवृत्तस्य भवतीति भावः। अवसानलक्षणमिति। अभावोपलक्षितो वर्णोऽवसानं विरामो

अभावो लोपस्ततोऽवसानं चेति। ममापि तर्हि विरामग्रहणं परार्थं भविष्यति। विरामो लोपोऽवसानं चेति। उपरियो विराम इति वक्तव्यम्। पुरस्तादपि हि प्राब्धस्य विरामः। तत्र मा भूदिति। किं च स्यात्। रसः रथः। खरवसानयोर्विसर्जनीय इति विसर्जनीयः प्रसज्येत। नैष दोषः। आरम्भपूर्वको मम विरामः। अथवा नेदमवसानलक्षणं विचार्यते किं तर्हि संज्ञी। अभावोऽवसानसंज्ञी स्याद्विरामो वेति। कश्चात्र विशेषः। अभावेऽवसानसंज्ञिन्युपर्यभाववचनम्। अभावेऽवसानसंज्ञिन्युपर्यभावग्रहणं कर्तव्यम्। उपरि योऽभाव इति वक्तव्यम्। पुरस्तादपि हि प्राब्धस्याभावस्तत्र मा भूदिति। किं च स्यात्। रसः रथः। खरवसानयोर्विसर्जनीय इति विसर्जनीयः प्रसज्येत। अस्तु तर्हि विरामोऽवसानम्। विरामे विरामवचनम्। यस्य विरामस्तेन विरामग्रहणं कर्तव्यम्। ननु च यस्याप्यभावस्तेनाप्यभावग्रहणं कर्तव्यम्। परार्थं मम भविष्यत्यभावो लोपस्ततोऽवसानं चेति। ममापि तर्हि विरामग्रहणं परार्थं भविष्यति विरामो लोपोऽवसानं चेति। उपरि यो विराम इति वक्तव्यम्। ननु चोक्तमारम्भपूर्वक इति। नावश्यमयं रमिः प्रवृत्तावेव वर्तते। किं तर्हि। अप्रवृत्तावपि।

पलक्षितो वेति पूर्वं विचारितम्। इदानीं तु तावेव संज्ञित्वेन विचार्येते। अभावो लोप इत्येकस्य संज्ञाद्वयविधानसामर्थ्याद्विषयविभाग आश्रीयते। प्रसक्ताभावो लोपसंज्ञोऽभावमात्रमवसानसंज्ञमिति। नावश्यमिति। प्रवृत्तौ सत्यां या निवृत्तिस्तस्यामित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 उपरतान्यस्मिन्निति। नप्रवृत्त्यनिवृत्तानि किं तर्हि पूर्वमेवाप्रवृत्तानीत्यर्थः। नियतविषयत्वाच्च शब्दप्रयोगस्य शब्दविधानानुपरतमिति प्रयो
 गाभावः। कचिद्व्रतानीति पाठः। भावाविरामभावित्वादिति। इह शब्दस्य स्वसंबन्धी ह्यभावोऽवसानलक्षणं स्यात् शब्दान्तरस्य संबन्धी वा। न
तावत् स्वसंबन्धी विरोधात्। नहि यस्य सत्ता तस्य तदानीमेवासत्ता युज्यते। नापि शब्दान्तरसंबन्धी। नहि घटाभावः पटस्याभावो भव
ति। भावस्य सत्ताया अविच्छेदेन भवस्यवश्यमिति भावाविरामभावी शब्दः। नहि शब्दस्य भवनकाले सत्ता विच्छिद्यत इत्यर्थः। अपर आहेति।
भावाविरामशब्दयोर्द्वन्द्व इत्यर्थः। इदानीं लक्षणद्वयस्याप्यनुपपत्तिः प्रतिपाद्यते। भावेन सत्तयाऽविरामेणाविच्छेदेन भवतीत्यर्थः। उ

तद्यथा। उपरतान्यस्मिन्कुले व्रतानि। उपरतः स्वाध्याय इति। नच तत्र स्वाध्यायो भूतपूर्वो भवति नापि व्रतानि। भावा
विरामभावित्वाच्छब्दस्यावसानलक्षणं न। भावाविरामभावित्वाच्छब्दस्यावसानलक्षणं नोपपद्यते। किमिदं भा
वाविरामभावित्वादिति। भावस्याविरामः भावाविरामः। भावाविरामेण भवतीति भावाविरामभावी भावाविरामभाविनो
भावो भावाविरामभावित्वम्। अपर आह। भावभावित्वादविरामभावित्वाच्च शब्दस्यावसानलक्षणं नोपपद्यत इति।
तत्परइति वा वर्णस्यावसानम्। विरामपरो वर्णः अवसानसंज्ञो भवतीति वक्तव्यम्। वर्णोन्त्यो वावसानम्। अथवा
व्यक्तमेव पठितव्यम्। अन्त्यो वर्णोऽवसानसंज्ञो भवतीति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। संहितावसानयोर्लोक
विदितत्वात् सिद्धम्। संहिता अवसानमिति लोकविदितावेतावर्थौ। एवं हि कश्चित्कंचिदधीयानमाह शन्नोदेवी
यं संहितयाधीष्वेति स तत्र परमसन्निकर्षमधीते। अपर आह। केनावस्यसीति। स आह। अकारेणेकारेणोकारे
णेति। एवमेतौ लोकविदितावर्थौ तयोर्लोकविदितत्वात्सिद्धम्। इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहा
भाष्ये प्रथमाध्यायस्य चतुर्थे पादे चतुर्थमाह्निकं पादोध्यायश्च समाप्तः॥ १॥

पाधिरहितस्याभावस्य प्रतीतिर्नास्ति। तत्पर इति वेति। इदानीं शब्दान्तराभावपरो वर्णोऽवसानसंज्ञो भवतीति प्रतिपाद्यते। अभावेना
पि बुद्धिपरिकल्पितं पौर्वापर्यमाश्रीयते। अथवेति। यद्यपि विरामशब्दे करणसाधने आश्रीयमाणेऽयमर्थो लभ्यते तथापि भावसाध
नस्यापि संभवात्करणसाधनत्वं संदिग्धमिति व्यक्तमेव पठितव्यमित्युक्तम्। संहितयाधीष्वेति। यथा पदनैरन्तर्ये संहिताव्यवहार
स्तथैकपद्येपि वर्णनैरन्तर्ये। अवसानशब्दोपि विधिप्रदेशेषु भावसाधनः करणसाधनो वा आश्रयिष्यत इति नार्थः संज्ञाद्वयविधा
नेन। तेन विनापीष्टस्य सिद्धत्वात्॥ ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथम॰ चतुर्थमाह्निकम्। अध्यायः समाप्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः॥समर्थःपदविधिः॥ ॥विधिरितिकोयंशब्दइति।अर्थोनिश्चयात्संदेहेसतिप्रश्नः।किंभावसाधनउतकर्मसा
धनः।तत्रभावसाधनेपदानांविधीयमानत्वात्कर्मणिषष्ठी।इतरत्रशेषषष्ठी।तत्रयेषामर्थभेदाच्छब्दभेदइतिदर्शनंस्यादप्रयनिब
न्धनाचप्रत्यभिज्ञातइदर्शनेकइतिप्रश्नोविशिष्टशब्दनिर्धारणाय।येत्वर्थभेदेपिशब्दस्यैक्यमिच्छन्तितत्पक्षेऽर्थभेदाच्छब्दभे-
दमारोप्यकइतिप्रश्नः।विपूर्वाद्धिति।विधविधानइत्यस्यौणादिकेप्रत्ययान्त—स्यनिवृत्त्यर्थंविपूर्वाद्धाञइत्युक्तम्।स्वरेचानयो
र्भेदः।इन्प्रत्ययान्तस्याद्युदात्तत्वात्किप्रत्ययान्तस्यान्तोदात्तत्वात्तस्यैवप्रयोगदर्शनमुत्तरेहेतुः।कर्मसाधनइति।एतद्भावसाधन
निवृत्त्यर्थमुक्तम्।विधीयतइति।वाक्यदर्शनंसुखप्रतिपत्त्यर्थम्।किंपुनरिति।कार्यविशेषस्येहानिर्देशात्प्रश्नः।इतरोवक्ष्यमाणकार्य
विशेषान्पर्यालोच्याह।समासइति।अनन्तरस्यापिपराङ्गवद्भावस्याल्पविषयत्वादनादरात्तन्निमित्तग्रहणाच्चातिप्रसङ्गनिरासस्यासि
द्धत्वान्मुख्यप्रयोजनत्वाभावात्पश्चान्निर्देशःकृतः।तत्रसमासशब्देनसंज्ञावोच्यतेपदसमुदायोवासंज्ञी।विभक्तिविधानशब्देनसा

॥श्रीगणेशायनमः॥समर्थःपदविधिः॥ ॥विधिरितिकोयंशब्दः।विपूर्वाद्धाञःकर्मसाधनइकारः।विधीयतेवि
धिरिति।किंपुनर्विधीयते।समासोविभक्तिविधानंपराङ्गवद्भावश्च।किंपुनरयमधिकारआहोस्वित्परिभाषा।
कःपुनरधिकारपरिभाषयोर्विशेषः।

मान्यविहितानांविभक्तीनांकर्मणिद्वितीयेत्यादिनायोनियमःसउच्यते।एवंहिपदविधिर्भवति।अथाप्येकवाक्यताश्रय
णेनविभक्तीनांविधानंतथापिपदान्तरसंबन्धेनयासांविभक्तीनांविधानमन्तरान्तरेणयुक्तइति तद्विभक्तीनांनेविर्शाइतित
दाश्रयेणपदविधित्वमस्त्येव।तथाचोक्तम्।निरपिपदंविशिरपिपदमिति।तत्रविभक्त्यवच्छिन्नत्वाद्विशिष्टंविधानंकर्मवि-
धानक्रियायाभवति।यथोक्तम्।सामान्यपुषेरवयवपुषिःकर्मेति।कार्यविशेषानिर्देशादस्यपारार्थ्यमवगत्यपरार्थेषुरूपद्व
यंदृष्ट्वापृच्छति।किंपुनरिति।नचधिकारेस्मिन्पदविधिरित्यस्यग्रहणमनर्थकम्।उत्तरेषांपदविधित्वाव्यभिचारात्।तस्मा
त्पदविधिग्रहणात्परिभाषात्वनिश्चयात्संशयानुपपत्तिः।एवंतर्हियुक्तायुक्तत्वापेक्षयाप्रश्नः।तत्रयद्यधिकारपक्षस्ययुक्त
त्वंतदानकर्तव्यंपदविधिग्रहणम्।परिभाषायायुक्तत्वेकर्तव्यम्।अधिकारपक्षेपिवाविस्पष्टार्थमविष्यति।कःपुनरिति।अ
न्योत्रप्रष्टाविज्ञेयः।आद्येनतुतद्विशेषज्ञेनभवितव्यम्।अन्यथाकिंपुनरयमधिकारइतिप्रश्नोनोपपद्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिकारःप्रतियोगमिति।स्वरूपेदृष्टेफलाख्यानंतद्द्वारेणस्वरूपावबोधार्थम्।अधिक्रियमाणस्यहिप्रतियोगमुपस्थानेसतितदनिर्दे
शःफलंसंपद्यते।परिभाषापुनरिति।लिङ्गोपादानेनपरिभाषाक्रियमाणायत्रयत्रतल्लिङ्गोपलम्भस्तत्तद्व्याप्नोतीत्यर्थः।प्रदेशान्तरेषु
परार्थता।सामान्यादधिकारपरिभाषयोरभेदेनव्यवहारोभाष्यकारस्यअधिकारोनामत्रिःप्रकारइति।तयाद्वयोःपरिभाषयोःसाव
काशयोःसमुपस्थितयोरिति।कःपुनरत्रेति।कस्मिन्पक्षेयत्नस्यलाघवंभवतिकस्मिन्वागौरवमितिप्रश्नः।स्वरयितव्यमिति।स्वरि
तगुणेनयुक्तंसमर्थग्रहणंपठितव्यमित्यर्थः।तत्रस्वरितोगुणःक्रियारूपेणस्वरयितव्यमितिनिर्दिष्टःयथाश्वेतोगुणःश्वेतते

अधिकारःप्रतियोगंतस्यानिर्देशार्थइतियोगेयोगेउपतिष्ठते।परिभाषापुनरेकदेशस्थासतीकृत्स्नंशास्त्रमभि
ज्वलयतिप्रदीपवत्।तद्यथा।प्रदीपःसुप्रज्वलितएकदेशस्थःसर्वंवेश्माभिज्वलयति।कःपुनरत्रप्रयत्नविशेषः
।अधिकारेसतिस्वरयितव्यम्।परिभाषायांतुसर्वमपेक्ष्यम्।तथेदमपरंद्वैतंभवति।एकार्थीभावोवासामर्थ्यंव्य
पेक्षावेति।तत्रैकार्थीभावेसामर्थ्येऽधिकारेचसतिसमासएकःसंगृहीतोभवति।विभक्तिविधानंपराङ्गव-
द्भावश्चासंगृहीतः।व्यपेक्षायांपुनःसामर्थ्येऽधिकारेचसतिविभक्तिविधानंपराङ्गवद्भावश्चसंगृहीतोभवति।
समासस्त्वेकोऽसंगृहीतः।अन्यत्रखल्वपिसमर्थग्रहणानियुक्तग्रहणानिचकर्तव्यानिभवन्ति।क्वान्यत्र।इसु-
सोःसामर्थ्येनचवाहाहैवयुक्तइति।व्यपेक्षायांपुनःसामर्थ्येपरिभाषायांचसत्यांयावान्व्याकरणेपदगन्धो
नामससर्वःसंगृहीतोभवति।समासस्त्वेकोऽसंगृहीतः।

इति।पदविधिग्रहणंचात्रपक्षेनकर्तव्यमित्यर्थादुक्तंभवति।सर्वमपेक्ष्यमिति।यावन्तिपदकार्याणितानिसर्वाण्यपेक्ष्यप
दविधिशब्दोपादानेनचपरिभाषाकर्तव्येत्यर्थः।अन्यास्वपिपरिभाषासुयल्लिङ्गमुपादीयतेतल्लिङ्गयुक्तापेक्षाक्रियते।द्वैत
मिति।द्वयोर्भावोद्विता।तत्रभवंद्वैतंसंशयरूपंज्ञानमुच्यते।अथवाद्वाभ्यामितंप्रकारद्वयेनविरुद्धत्वाद्भिन्नाधारवर्तिनायुक्तं राम:
वस्तुद्वीतंतत्रभवंद्वैतंतदेवसंशयज्ञानम्।एकार्थीभावइति।यत्रपदान्युपसर्जनीभूतस्वार्थानिनिवृत्तस्वार्थानिवाप्रधाना ३०६
र्थोपादानाद्व्यर्थान्यर्थान्तराभिधायीनिवासएकार्थीभावः।परस्पराकाङ्क्षारूपाव्यपेक्षा।समासएकइति।तत्रैवैकार्थीभावसद्भावात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति।एकार्थीभावःसामर्थ्यमधिकारइत्येकःपक्षः।व्यपेक्षासामर्थ्यमधिकारइतिद्वितीयःपक्षः।द्विविधंसामर्थ्यमधिकारइतितृतीयः।एवंपरिभाषायामपित्रयःपक्षाइतिषट्पक्षीसंभवेएकार्थीभावःपरिभाषाचेतिनिर्णयः।अभिन्नतरकमिति।उभयविधेसामर्थ्येआश्रीयमाणेऽर्थस्यभेदात्सूत्रस्यभेदःस्यात्।भिन्नेनसामर्थ्येनभिन्नेषुवाक्येषुउपस्थानात्।व्यपेक्षायामपिसामर्थ्येयद्यपिसूत्रमभिन्नंभवतितथाप्येकार्थीभावेसामर्थ्येदोषाभावात्प्रकर्षयोगादभिन्नतरकमित्युच्यते।तत्रपराङ्गवद्भावेतन्निमित्तग्रहणाद्दोषाभावः।विभक्तिविधानेपिकारकविभक्तिषुक्रियाकारकयोर्व्यपेक्षाविनाभावित्वादुपपदविभक्तिषुयुक्तयोगग्रहणासद्भावात्क्वचित्तृतीययायोगस्याक्षेपादेतदनुपस्थानेऽपिनदोषः।परिभाषायांचसुब्धातुप्रभृतयःसर्वावृत्तयःसंगृहीताभवन्ति।एकार्थीभावेचेहाश्रितेन्यत्रयुक्तग्रहणंसमर्थग्रहणंचकृतमेवेतितत्रापिनदोषः।समर्थानामिति।घकालतनेषुकालनाम्नइत्यलुग्विधानाल्लिङ्गाद्विभक्त्यन्तात्तद्धितउत्पद्यतइतिपदविधित्वादेतत्परिभाषोपस्थितौअसामर्थ्येप्रत्ययाप्रसङ्गात्।कर्म

तत्रैकार्थीभावःसामर्थ्यंपरिभाषाचेत्येवंसूत्रमभिन्नतरकंभवति।एवमपिक्वचिदकर्तव्यंसमर्थग्रहणंक्रियते।क्वचिच्चकर्तव्यंनक्रियते।अकर्तव्यंतावत्क्रियतेसमर्थानांप्रथमाद्वेति।कर्तव्यंनक्रियते।कर्मण्यण्समर्थादिति।ननुचगम्यतेतत्रसामर्थ्यंकुम्भकारोनगरकारइति।सत्यंगम्यते।उत्पन्नेतुप्रत्यये।सएवतावत्समर्थादुत्पाद्यः।अथसमर्थग्रहणंकिमर्थम्।वक्ष्यतिद्वितीयाश्रितादिभिःसमस्यते।कष्टंश्रितोनरकंश्रितइति।

एयणीति।पञ्चकप्रातिपदिकार्थपक्षेप्रातिपदिकेनैवकर्मणउपादानान्नास्तिपदविधित्वम्।त्रिकादिपक्षेतुविभक्तिवाच्यत्वात्कर्मणःपदविधित्वादेतत्परिभाषोपस्थानान्नास्तिदोषः।ननुचेति।यदिकुम्भकारपूर्वःसमर्थाभिधायीचासमर्थाभिधायीचस्यात्ततोऽसमर्थाभिधायिप्रयोगनिवृत्त्यर्थोयत्नःकर्तव्यःस्यान्नत्वन्यथेत्यर्थः।सएवतावदिति।यथासमासादयोऽसमर्थानांमाभूवन्नित्येवमर्थमिदंवचनंक्रियतेतद्वदत्रापिसमर्थग्रहणमसामर्थ्येप्रत्ययनिवृत्त्यर्थंकर्तव्यमित्यर्थः।प्रतिविधानंतुसुज्ञानत्वाद्भाष्यकृतानोक्तम्।यतउपपदमितिमहत्याःसंज्ञायाःकरणंप्रत्ययस्यपदाश्रयत्वेसतिसमर्थपरिभाषाव्यापारार्थमेव।अथेति।प्रधानपर्यनुयोगद्वारेणसूत्रस्यैवाक्षेपः।यद्यप्यनेनसामर्थ्यंनविधीयतेनह्यसतोऽसमर्थस्यसामर्थ्यंवचनेनकर्तुंपार्यते।तथापिपदविधौसामर्थ्योपस्थानार्थत्वादस्यसमर्थपदस्यप्राधान्यमुच्यते।समस्यतइति।यद्यपिसमाससंज्ञामात्रंविधीयते।तथाप्यनुपबोधनात्वभिन्नयोःशब्दयोःसंश्लेषःप्रक्रियायांक्रियतइतिसमस्यतइत्युक्तम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा· के· पपूर्येति।असतिसूत्रेद्वितीयान्तमात्रंश्रितादिभिःसमस्येताविरोधात्।एकार्थीभावाभावेपिवचनात्समाससंज्ञास्यात्।अनर्थकस्या
३०७ पिचसमासस्यवचनात्प्रातिपदिकसंज्ञास्यात्।विध्यर्थत्वसंभवेचसमासग्रहणस्यनियमार्थत्वानुपपादनाद्वाक्यस्यप्रातिपदिक-
संज्ञानिषेधःकर्तव्यएवस्यात्।एकार्थीभावाभावेपिचोत्तरपदार्थस्यबाह्यसंबन्धिनंप्रतियोग्यताहानाद्विभक्तयःस्युरेव।खण्डोधा-
वतीति।तृतीयान्तार्थकृतत्वमत्रास्तीतिसमासःस्यात्।महत्कष्टमिति।अस्त्येवात्रश्रयणक्रिययासामर्थ्यमितिप्रश्नः।य
यत्रकष्टश्रितशब्दयोःसमासःस्यात्तदामहत्कष्टश्रितइतिस्यात्।अथापित्रयाणांपदानांसमासःस्यात्तथाप्युत्तरपदेवि-
धीयमानमात्वंमध्यमपदेनस्यात्।अथापित्रयाणांसमासेकृतेसन्महदितिद्वयोःसमासस्त्वचमहाकष्टंश्रितोमहाकष्ट

समर्थग्रहणंकिमर्थम्।पश्यदेवदत्तकष्टंश्रितोविष्णुमित्रोगुरुकुलम्।तृतीयातत्कृतार्थेनगुणवचनेन।उपादा
नविकलः।शङ्कुलाखण्डः।किरिकाणः।समर्थग्रहणंकिमर्थम्।त्वंतिष्ठशङ्कुलयाखण्डोधावतिमुसलेन।किं
त्वंकरिष्यसिशङ्कुलयाखण्डोविष्णुमित्रउपलेन।चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः।गोहितंवृषभहित
म्।गोहितमश्वहितम्।समर्थग्रहणंकिमर्थम्।सुखंगोभ्योहितंदेवदत्ताय।पञ्चमीभयेन।वृकभयंदस्युभयंचौरभयम्।समर्थग्र
हणंकिमर्थम्।गच्छत्वंमावृकेभ्योभयंदेवदत्ताद्यज्ञदत्तस्य।षष्ठी।सुबन्तेनसमस्यते।राजपुरुषः।ब्राह्मण
कम्बलः।समर्थग्रहणंकिमर्थम्।भार्याराज्ञःपुरुषोदेवदत्तस्येति।सप्तमीशौण्डैः।अक्षशौण्डः।समर्थग्रहणंकि
मर्थम्।कुशलोदेवदत्तःअक्षेषुशौण्डःपिबतिपानागारे।अथक्रियमाणेपिसमर्थग्रहणेइहकस्मान्नभवति।
महत्कष्टंश्रितइति।

श्रितइतिअत्राहीनेद्वितीयेतियःस्वरोभवतितत्रसएवसमासस्येत्यनेन तथापिमहारण्यातीतइत्यत्रस्वरोभिद्यते।महारण्यम
तीतइतिद्विपदेसमासेकृतेथाथादिस्वरः।त्रिपदेतुसमासेकृतेसन्महदितिद्वयोस्तत्पुरुषेकृतेसतिमहारण्यशब्दःसमासस्वरेणा
न्तोदात्तःस्यात्।यथापूर्वशालाप्रियइत्यत्रशालाशब्दउदात्तः।अन्येत्वाहुः।त्रयाणांसमासेकृतेप्रधानार्थाभिधायित्वा राम:
न्महत्कष्टशब्दयोःपरस्परसंबन्धाभावात्पूज्यमानत्वंविशेषणविशेष्यत्वंचनास्तीतिसमासोनस्यात्।ततश्चात्वंनस्यात्।अ- ३०७
हीनेद्वितीयेतिमहच्छब्दस्यप्रकृतिस्वरश्चप्रसज्येत। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवा भवतीति। यथा भार्या राज्ञः पुरुषो देवदत्तस्येत्यत्रात्यन्तमसमासो नैवमिहेति भावः। भवति यदेति। श्रितशब्दमनपेक्षमाणयोः
परस्परापेक्षायां महत्कष्टयोः समासे कृते श्रितशब्देन समासः। कस्य कस्मादिति। सामान्यनिर्देशः पदद्वयात्मकस्य पदत्रयात्म
कस्य च समुदायस्य प्रदर्शनार्थः। बहूनां कस्मान्न भवतीति। द्वयोरपि श्रितापेक्षया कर्मत्वे श्रितेन सामर्थ्यं द्वयोरप्यस्ति। कष्टस्यै
व वा कर्मत्वे तद्द्वारेण महतोपि श्रितेन सामर्थ्यमस्तीति भावः। सुप्सुपेति वर्तते तद्इति। संख्याया विवक्षितत्वादेकस्यैव सुबन्तस्यै
केनैव सुबन्तेन समासस्ततो बहूनां न भवतीत्यर्थः। यथा पशुना यजेतेत्यनेकस्य पशोरुपादानाभावस्तथेहापि। ननु च भो इति। यथा-
ब्राह्मणो न हन्तव्य इति सर्वस्य ब्राह्मणस्य हननप्रतिषेधस्तथेहापि बहूनां समासेन भाव्यमिति भावः। आकृतिस्त्विति। एकैकस्यां

नवा भवति महाकष्टश्रितइति। भवति यदैतद्वाक्यं भवति महत्कष्टं महाकष्टं महाकष्टं श्रितो महाकष्टश्रितइति। यदात्वेत
द्वाक्यं भवति महत्कष्टं श्रितइति तदा न भवितव्यम्। तदा च प्राप्नोति। तदा कस्मान्न भवति। कस्य कस्मान्न भवति। किंद्व
योराहोस्विद्बहूनाम्। बहूनां कस्मान्न भवति। सुप्सुपेति वर्त्तते। ननु च भोः आकृतौ शास्त्राणि प्रवर्तन्ते। तद्यथा। प्रा
तिपदिकादिति वर्तमानेऽन्यस्माच्चान्यस्माच्च प्रातिपदिकादुत्पत्तिर्भवति। सत्यमेवमेतत्। आकृतिस्तु प्रत्येकं
परिसमाप्यते न समुदाये। यावति परिसमाप्यते प्रातिपदिकाश्रिति तावत उत्पत्त्या भवितव्यं प्रत्येकं चैतत्परिस
माप्यते न समुदाये। एवमिहापि यावत्स्वेतत्परिसमाप्यते सुप्सुपेति तावतः समासेन भवितव्यम्। द्वयोश्चैत
त्परिसमाप्यते न बहुषु। द्वयोस्तर्हि कस्मान्न भवति। असामर्थ्यात्। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति।

यत्नो जातिनिमित्तप्रत्ययाभिधानसद्भावात्तत्र यथा प्रातिपदिकसमुदायस्याप्रातिपदिकत्वात्ततो विभक्तीनामनुत्पत्तिस्तथा सुबन्तस
मुदायस्यासुबन्तत्वात् श्रितेन समासाभावः। प्रत्ययस्य —— सुबन्तसमुदायस्य च संचिकीर्षितस्याप्रधानत्वाद्गुणत्वाच्च प्रातिपदि
कस्यावयवयोश्च सुबन्तयोराधारगताया एकत्वसंख्याया विवक्षणात्। ब्राह्मणसमुदायस्य हननेतु प्रत्येकार्थी भाति क्रान्त एव भवती
ति ब्राह्मणो न हन्तव्य इत्यादौ निषेधे संख्या न विवक्ष्यते। सापेक्षमसमर्थं भवतीति। न्यायोयम्। वृत्तौ ह्युपसर्जनपदेन प्रधाना
र्थोभिधायिना भाव्यम्। स्वविशेषणापेक्षायां च तस्य प्राधान्यमिति कथमेकस्यैकदा प्राधान्यमेकार्थीभावश्च स्यात्। इतरस्तु वच
नमेतदिति मत्वा चोदयति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ कै॰ यदि सापेक्षमिति। भवति चेति। प्राधान्यादेवानेकेनोपकारकेणोपकार्यत्वाविरोधात्। सामान्याप्रयोगदर्शनाच्च समुदाया-
३०८ पेक्षेति। गुरुकुलादिना समुदायेन समुपजनितेव्यतिरेके देवदत्तस्येति षष्ठी। अवयवद्वारकश्च देवदत्तस्य समुदायेन संबन्ध इ-
ति सामर्थ्यादवयवमपि विशेषणं स्पृशति। तदुक्तम्। समुदायेन संबन्धो येषां गुरुकुलादिना। संस्पृश्यावयवांस्ते तु युज्यन्ते तद्व-
ता सहेति॥ किमोदन इति। केषां शालीनां किं कलमानामथ रक्तानां शालीनामन्येषां वौदन इति प्रश्नः। सक्त्वाढकमिति। आपणी-
यानां सक्तूनामाढकमित्यर्थः। कुतो भवानिति। कस्मात्पाटलिपुत्रादुवानागत इत्यर्थः। अनेकत्वात्पाटलिपुत्रस्य तदवयवानां वा प्रश्नः। अत्र

यदि सापेक्षमसमर्थं भवतीत्युच्यते। राजपुरुषो दर्शनीयः। अत्र वृत्तिर्न प्राप्नोति। नैष दोषः। प्रधानमत्र सापेक्षम्। भवति च प्रधानस्य सापेक्षस्यापि समासः। यत्र तर्ह्यप्रधानं सापेक्षं भवति तत्र वृत्तिर्न प्राप्नोति। देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रः देवदत्तस्य दासभार्येति। अत्र वृत्तिर्न प्राप्नोति। नैष दोषः। समुदायापेक्षात्र षष्ठी सर्वं गुरुकुलमपेक्षते। यत्र तर्हि न समुदायापेक्षा षष्ठी तत्र वृत्तिर्न प्राप्नोति। किमोदनः शालीनाम्। सक्त्वाढकमापणीयानाम्। कुतो भवान्पाटलिपुत्रक इति। इह चापि देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रो देवदत्तस्य दासभार्येति। यद्येषा समुदायापेक्षा षष्ठी स्यान्नैतन्नियोगतो गम्येत। देवदत्तस्य यो गुरुस्तस्य पुत्र इति। किं तर्ह्यन्यस्यापि गुरुपुत्रो देवदत्तस्य किंचिदित्येषोर्थो गम्येत। यतस्तु खलु नियोगतो देवदत्तस्य यो गुरुस्तस्य यः पुत्र इत्येषोर्थो गम्यते। अतो मन्यामहे नैषा समुदायापेक्षा षष्ठीति। अन्यत्र खल्वपि समर्थग्रहणे सापेक्षस्यापि कार्यं भवति। क्वान्यत्र। इसुसोः सामर्थ्ये। ब्राह्मणस्य सर्पिष्करोतीति। तस्मान्नैतच्छक्यं वक्तुं सापेक्षमसमर्थं भवतीति। वृत्तिस्तर्हि कस्मान्न भवति महत्कष्टं श्रित इति। सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यम्।

रोपधेतोः प्राचामिति तद्धितवृत्तिर्न प्राप्नोति। इह चापीति। समुदायसंबन्धे सति सामीप्यादेरपि प्रतिपत्तिप्रसङ्ग इत्यर्थः। नैषेति। गु-
र्वपेक्षयात्र षष्ठी संबन्धिशब्दत्वाच्चात्र स्वार्थपदपेक्षायां वृत्तावप्यहानाद्भवत्येव वृत्तिः। उक्तं च। संबन्धिशब्दः सापेक्षो नित्यं सर्वः प्र-
युज्यते। वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयत इति। अन्यत्रेति। ततो न वक्तव्यं सापेक्षमसमर्थं भवतीति। वाचनिके ह्यसामर्थ्ये यथा रा॰
सर्पिः कालकमिति षत्वं न भवति समानाधिकरणमसमर्थवदिति वचनात्। एवं ब्राह्मणस्य सर्पिष्करोतीत्यत्रापि न स्यात्। स एवाह। वृत्तिस्त- ३०८
र्हि कस्मादिति। सविशेषणानामिति। वृत्तिर्नेति वचनात्खलादि भवत्येव। पूर्वोक्तानुसारेणायमपि न्याय एवोक्तः॥

CC-0. In Public Domain. Digitization by eGangotri

नवक्तव्यमिति। न्यायसिद्धत्वात्। इह समानार्थेनेति। वाक्येनाभिधाने प्राप्ते समास आरभ्यमाणस्तत्समानार्थ एव न्याय्यः। महत्कष्टश्रित इति। यः कष्टश्रितः स महत्कर्म करोतीत्यादि प्रतीयते क्रियाविशेषणं वा महत्त्वं प्रतीयेत न तु कष्टविशेषणम्। न ब्रूम इति। लोके प्रयुज्यमानस्य साधुत्वमसाधुत्वं च विचार्यते गोगाव्यादिशब्दवत्। महत्कष्टश्रित इत्ययं तु महत्कष्टंश्रित इत्येतद्वाक्यार्थे नैव प्रयुज्यते प्रयुक्तानां चेदमन्वाख्यानम्। अतो नात्र समासो भविष्यतीत्यर्थः। नञ्समासो गमक इति। गाव्यादिवदसाधुरपि गमकत्वाभिमतो लोके प्रयुज्यते त

यदि सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इत्युच्यते। देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रो देवदत्तस्य दासभार्येत्यत्र वृत्तिर्न प्राप्नोति। अगुरुपुत्रादीनामिति वक्तव्यम्॥ तत्तर्हि वक्तव्यं सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यते अगुरुपुत्रादीनामिति। न वक्तव्यम्। वृत्तिस्तर्हि कस्मान्न भवति। अगमकत्वात्। इह समानार्थेन वाक्येन भवितव्यं समासेन च। यश्चेहार्थो वाक्येन गम्यते महत्कष्टंश्रित इति। नासौ जातुचित्समासे न गम्यते महत्कष्टश्रित इति। एतस्माद्धेतोर्ब्रूमोऽगमकत्वादिति न ब्रूमोऽपशब्दः स्यादिति। यत्र च गमको भवति भवति तत्र वृत्तिः। तद्यथा। देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रो देवदत्तस्य दासभार्येति। तत्र यद्यगमकत्वं हेतुर्नार्थः समर्थग्रहणेन। इहापि भार्या राज्ञः पुरुषो देवदत्तस्येति योऽर्थो वाक्येन गम्यते नासौ जातुचित्समासे न गम्यते भार्या राजपुरुषो देवदत्तस्येति। तस्मान्नार्थः समर्थग्रहणेन। इदं तर्हि प्रयोजनम्। अस्त्यसमर्थसमासो नञ्समासो गमकः तस्य साधुत्वं मा भूत्। अकिंचित्कुर्वाणम्। अमाषं हरमाणम्। अगाधादुत्सृष्टमिति। एतदपि नास्ति प्रयोजनम्। अवश्यं कस्यचिन्नञ्समासस्यासमर्थस्य गमकस्य साधुत्वं वक्तव्यम्। असूर्यंपश्यानि मुखानि अपुनर्गेयाः श्लोकाः अश्राद्धभोजी ब्राह्मण इति॥

स्यासति समर्थग्रहणे साधुत्वं प्राप्तं ततस्तन्निवृत्त्यर्थमेतदित्यर्थः। किंचिदकुर्वाणं माषमहरमाणं गाधादनुत्सृष्टम्। इत्येतेष्वर्थेष्वेते नञ्समासाः। असूर्यंपश्यानीति। सूर्यकर्मिकया दृशिक्रियया नञः संबन्धो न तु सूर्यस्थया सत्तयेत्यसामर्थ्यम्। अपुनर्गेया इति। पुनर्नगेया इति गानेन नञः संबन्धो न तु पुनःशब्दार्थेन। अश्राद्धभोजीति। भुजिना नञः संबन्धो न तु श्राद्धेन। श्राद्धभोजननिषेधावगमात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनपुंसकस्येति। प्रसज्यप्रतिषेधपक्षेऽयमसमर्थसमासः। असमर्थनञ्समासानां केषांचित्साधुत्वज्ञापनायानपुंसकस्येति प्रसज्यप्र-
तिषेध आश्रीयते। पर्युदासेपि त्वत्र न क्षतिः। तदेवं समर्थग्रहणे क्रियमाणे विध्यर्थमेतेषां ग्रहणं कर्तव्यं तदेवाक्रियमाणे नियमार्थं
भविष्यतीत्यर्थः। एतस्यैवेति। अभेदमाश्रित्यैकवचनं कृतम्। एतेषां बहुत्वाद्बहुवचनप्रसङ्गः। असमर्थसमासेपि क्रियायामुभ-
योः संनिपातादेकार्थीभावस्तद्द्वारकोऽस्त्येव। अथ क्रियमाणेपीति। अबुधबोधनार्थं करणेऽभ्युपगम्यमाने इत्यर्थः। किंस-
मर्थं नामेति। यद्यपि पूर्वमेकार्थीभावो वा सामर्थ्यं व्यपेक्षा वेत्याद्युक्तं तथाप्येतद्विचारस्थानं तत्स्या। एतत्सिद्धेन तु पूर्वं व्यवहारः
कृतः। पृथगर्थानामिति। एकार्थीभावं तावत्सामर्थ्यं दर्शयति। परस्ताद्व्यपेक्षालक्षणं दर्शयिष्यति। पृथगर्थाः येषां पदानां तानि पृथग-
र्थानि पदानि। वाक्ये हि राज्ञः पुरुष इत्यत्र राजशब्दो राजार्थमेवाचष्टे पुरुषशब्दोपि पुरुषार्थमेव। वृत्तौ तु राजपुरुष इत्यत्र राजशब्दो

सुइनपुंसकस्येत्येतन्नियमार्थं भविष्यति। एतस्यैवासमर्थसमासस्य नञ्समासस्य गमकस्य साधुत्वं भव-
ति नान्यस्येति। तस्मान्नार्थः समर्थग्रहणेन। अथ क्रियमाणेपि समर्थग्रहणे समर्थमित्युच्यते। किं समर्थं नाम।
पृथगर्थानामेकार्थीभावः समर्थवचनम्। पृथगर्थानां पदानामेकार्थीभावः समर्थमित्युच्यते। क्व पुनः पृथ-
गर्थानि क्वैकार्थानि। वाक्ये पृथगर्थानि राज्ञः पुरुष इति। समासे पुनरेकार्थानि राजपुरुष इति॥

पि पुरुषार्थमेवाचष्ट इति द्वयोरेकार्थीभावो भवति। अथवान्य एवावयवार्थानन्वितः समुदायार्थः प्रादुर्भवतीति तदपेक्षयैकार्थीभाव
उच्यते पांसूदकवदेकभावापन्नत्वात्। यद्यपि शब्दान्तरमेव वृत्तिरवयववर्णवदनर्थकास्तथापि सादृश्यात्तत्त्वाध्यवसायं पदानामा-
श्रित्य पृथगर्थानामेकार्थीभाव इत्युक्तम्। समर्थवचनमिति। समर्थशब्दस्य वाच्य इत्यर्थः। कर्मणि ल्युट्। क्व पुनरिति। पृथगर्थत्वमेका-
र्थत्वं च विरुद्धत्वादेकस्मिन्विषये न संभवतीति प्रश्नः। राज्ञः पुरुष इति। राज्ञ इत्यनेन पदेन राजार्थोऽनियतसंबन्ध्यपेक्षयोद्भूतसंब-
न्धो विशेषणभावमापन्नोऽभिधीयते। पुरुष इत्यनेन तु पुरुषार्थः स्वनिष्ठो विधीयमानत्वात्प्राधान्यमापन्नोऽभिधीयते। वृत्तौ भेदस्यानि-
वर्तनात्तदधिष्ठानस्यापि संबन्धस्यान्तर्भावात्षष्ठी निवर्तते। सैव चसाभाविकी निवृत्तिः सुपो धातुप्रातिपदिकयोरिति शास्त्रेण
न्वाख्यायते प्रत्ययलक्षणसिद्धये। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमुच्यत इति। एवं हि वाक्ये पदानां पृथगर्थत्वं स्याद्यद्येक एव विशिष्टार्थो न प्रतीयेत। वृत्तौ च पुरुषमात्रप्रतीतौ स्यादेकार्थीभावः। यतस्तु वृत्तिवाक्ययोरेक एवार्थः प्रतीयते तदा सामर्थ्यभेदोपि नास्ति। नापि भूम इति। वाक्ये पृथगर्थत्वेपि पदानामाकाङ्क्षायोग्यतावशाद्विशेषणविशेष्यभावाद्विशिष्टार्थप्रतीतिः। वृत्तावपि विशिष्ट एवार्थो राजपुरुषशब्दाभ्यामभिधीयत इति कुतोऽन्यस्यानयनम्। न चैतावता वृत्तिवाक्ययोरेकार्थता। यथा ब्राह्मणानां शतं भोज्यतां शतं ब्राह्मणा भोज्यन्तामिति सत्यपि कार्यस्याभेदे शब्दार्थो भिद्यते तथेहापीत्यर्थः। सुबलोप इति। एकार्थीभावाभावकृतोपि विशेष एकार्थीभावकृत एवोच्यते। संनिधानासंनिधानाभ्यां क्रियाभिनिर्वृत्तौ पदार्थानां कारणत्वात्। यथा वर्षकृतं सुभिक्षं वर्षकृतं दुर्भिक्षमिति चोच्यते। तत्र राज्ञः पुरुष इति वाक्ये भेदाधिष्ठा-

किमुच्यते पृथगर्थानीति। यावता राज्ञः पुरुष आनीयतामित्युक्ते राजपुरुष आनीयते। राजपुरुष इति च स एव। नापि भूमोऽन्यस्यानयनं भवतीति। कस्तर्ह्येकार्थीभावकृतो विशेषः। सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसंबन्धः स्वर इति। सुबलोपो भवति वाक्ये। राज्ञः पुरुष इति। समासे तु न भवति राजपुरुष इति। व्यवधानं भवति वाक्ये। राज्ञः ऋद्धस्य पुरुष इति। समासे तु न भवति राजपुरुष इति। यथेष्टमन्यतरेणाभिसंबन्धो भवति वाक्ये। राज्ञः पुरुषः पुरुषो राज्ञ इति। समासे न भवति। राजपुरुष इति। द्वौ स्वरौ भवतो वाक्ये राज्ञः पुरुष इति। समासे पुनरेक एव राजपुरुष इति। नैत एकार्थीभावकृता विशेषाः॥

नस्य संबन्धस्य प्रत्यायि ययिषितत्वाद्विना विभक्त्या तस्य प्रत्याययितुमशक्यत्वान्नास्ति सुब्लोपः समासे कृते भेदनिवृत्तौ तदाश्रयस्य संबन्धस्योपरमात्स्वाभाविकी सुपो निवृत्तिः सैव शास्त्रेणानुज्ञायते। तदेवं सुपो भावाभावाभ्यामर्थस्य भावाभावानुमानं वाक्यसमासयोः। व्यवधानमपि सत्यर्थभेदे दृष्टं वाक्ये यथा भार्या राज्ञः पुरुषो देवदत्तस्येति। असति न दृष्टम्। देवदत्त इत्यत्र पदमध्ये पदान्तरस्य प्रक्षेप्तुमशक्यत्वात्। यथेष्टमिति। वाक्येऽनियतपौर्वापर्येण पदानां प्रयोगः। समासे तु नियतपौर्वापर्यः स चार्थभेदनिबन्धनः। यथा कर्क इति प्रयोक्तव्ये र्कक इति न प्रयुज्यते। द्वौ स्वराविति। अर्थभेदे स्वरभेदो दृश्यते यथा देवदत्त गामभ्याजेति। तदभेदे न दृश्यते यथा घट इति। अत्र राज्ञः पुरुष इति द्वे अपि पदे नित्स्वरेणाद्युदात्ते। राजपुरुष इति समासान्तोदात्तः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचनिकानीति।वचनेनैवंभूतानामन्वाख्यानाद्व्यभिचारान्नानुमानंसुबलोपादिकमर्थभेदस्येत्यर्थः।यथापयः पयोजरयतीत्यत्रविना-
पिविभक्त्या कर्तृकर्मप्रतीतिर्भवतिपञ्चकप्रातिपदिकार्थदर्शने।तथाराजपुरुषइत्यत्रसत्येवार्थभेदेराजपदमेवसंबन्धमभिदधा
तु।अर्थाभेदेचसुबलोपोदृष्टः यथावर्षासुजःगोषुचरइति।तथावृत्तावपिप्रयोगानियमोदृश्यते।अन्तादीआद्यन्तोजातपुत्रः
पुत्रजातइति।वाक्येचप्रयोगनियमोधवश्चखदिरश्चेति।नहिभवतिचखदिरश्चधवइति।ऐकस्वर्यंचदृश्यतेवाक्ये।तीक्ष्णे
नपरशुनावृश्चन्निति।अर्थाभेदेचस्वरभेदः।कर्तवैअन्वेतवैइति।अन्तश्चतवैयुगपत्तवैचान्तश्चयुगपदित्यत्रस्वरः।सं
ख्याविशेषइति।वाक्येउपसर्जनपदानिविभक्त्यार्थाभिधायित्वात्संख्याविशेषयुक्तंस्वार्थंप्रतिपादयन्ति।समासेत्वन्तर्भूतस्वार्थं
प्रधानार्थमभिदधतीत्यभेदैकत्वसंख्यांगमयन्ति।संख्याविशेषाणामविभागेनावस्थानमभेदैकत्वसंख्या।यथोक्तम्।यथौषधिरसाः-
सर्वेमधुन्याहितशक्तयः।अविभागेनवर्तन्तेतांसंख्यांतादृशींविदुरिति।अथवापरित्यक्तविशेषंसंख्यासामान्यमभेदैकत्वसं-

किंतर्हि वाचनिकान्येतानि।आहहिभगवान्सुपोधातुप्रातिपदिकयोःउपसर्जनंपूर्वंसमासस्यान्तउदा
त्तोभवतीति।इमेतर्ह्येकार्थीभावकृताविशेषाः।संख्याविशेषोव्यक्ताभिधानमुपसर्जनविशेषणंचयोगइति।
संख्याविशेषोभवतिवाक्ये।राज्ञःपुरुषःराज्ञोःपुरुषःराज्ञांपुरुषइति।समासेनभवतिराजपुरुषइति।अ-
स्तिकारणंयेनैतदेवंभवति।किंकारणम्।योसौविशेषवाचीशब्दस्तदसांनिध्यात्।अङ्गहिभवांस्तमुच्चार
यतुगंस्यतेसविशेषः। ननुचनैतेनैवंभवितव्यम्।नहिशब्दकृतेननामार्थेनभवितव्यम्।अर्थकृतेनना
मशब्देनभवितव्यम्।तदेतदेवंदृश्यताम्।

ख्या।तदुक्तम्।भेदानांवापरित्यागात्संख्यात्मासतथाविधः।व्यापाराज्जातिभागस्यभेदापोहेनवर्तते॥अगृहीतविशेषेणयथारूपेण-
रूपवान्।प्रख्यायतेनशुक्लादिभेदरूपस्तुगम्यतेइति।क्वचित्तुसंख्याविशेषाभिव्यक्तिर्भवति।यथाद्विपुत्रःपञ्चपुत्रइत्यादौप्रा
तिपदिकार्थएवसंख्याविशेषः।तावकीनोमामकीनइत्यत्रादेशाभिव्यङ्ग्यमेकत्वम्।शौर्पिकमितिप्रातिपदिकेनविशिष्टस्यैवप
रिमाणस्योपादानादेकत्वावगमः।तथामासजातइतिविशिष्टकालावगमायप्रयोगादेकत्वावगतिरेवमन्यत्रापिप्रकारान्तरे-
णसंख्याभेदावसायोद्रष्टव्यः।तदसांनिध्यादिति।लुकाविभक्तेर्निवर्तितत्वादित्यर्थः। ननुचेति।नहिविद्यमानेर्थेलुकमाचा-
र्योन्वाचष्टेअपित्वर्थस्याभावात्स्वतएवयाशब्दस्यनिवृत्तिःसैवानुगम्यतइत्यर्थः।अर्थकृतेनेति।प्रत्याययिषितार्थप्रतिपा
दनायशब्दप्रयोगात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थरूपमिति। अर्थस्वभावः। एतदुक्तं भवति। संख्याविशेषादियुक्तवस्तुप्रतिपादनेच्छायां वाक्यं प्रयुज्यते अन्यदा तु वृत्तिः। गोषुचरइ
ति। गोषुचरः कुक्कुट उच्यते। एकस्यां गवि द्वयोर्बह्वीषु वा यश्चरति स सर्वोऽसावविशेषेणोच्यते। जातौ चेदं बहुवचनमिति व्यक्तिगतसं-
ख्याभेदानवगमः। यदि तु व्यक्तिगतं बहुत्वं प्रतीयेत ततस्तदाश्रयमेव बहुवचनं क्रियेत। यदा तु सत्यपि बहुवचने व्यक्तिबहुत्वं
न प्रतीयते तदा जात्याश्रयं बहुवचनमभ्युपगम्यते। वर्षासुज इति। इन्द्रगोपः। अत्राप्येकस्मिन्नप्यृतौ अवयवबहुत्वापेक्षो बहुव
चनान्तो वर्षाशब्दो वर्तते न त्वत्र ऋतुबहुत्वं प्रतीयत इत्यत्राप्यभेदैकत्वमुपजायते। तत्पुरुषे कृतिबहुलमित्यलुक्। लि-
ङ्गविशेषस्यापि क्वचिद्वृत्तावुपादानं कुमारीपुत्र इति। क्वचित्यागः। कुक्कुटाण्डं मृगमांसमिति। वाक्येपि जात्यन्तरनिवृत्तिपरे लिङ्ग

अर्थरूपमेवंजातीयं येनात्र विशेषो न गम्यत इति। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते योऽसौ विशेषवाचीश
ब्दस्तदसंनिध्यादत्र विशेषो न गम्यत इति। इह तस्य विशेषो गम्येत। अप्सुचरो गोषुचरो वर्षासुज इति। व्य
क्ताभिधानं भवति वाक्ये। ब्राह्मणस्य कम्बलस्तिष्ठतीति। समासे पुनरव्यक्ताभिधानं ब्राह्मणकम्बलस्तिष्ठती
ति संदेहो भवति सम्बुद्धिर्वा स्यात् षष्ठीसमासो वेति। एषोप्यविशेषः। भवति हि किंचिद्वाक्येऽव्यक्तं तत्र समासे
व्यक्तम्। वाक्ये तावदव्यक्तम्। अर्द्धं पशोर्देवदत्तस्येति संदेहो भवति पशुगुणस्य वा देवदत्तस्यार्द्धम्। अथवा
योऽसौ संज्ञीभूतः पशुर्नाम तस्य यदर्द्धमिति। तच्च समासे व्यक्तं भवति। अर्द्धपशुर्देवदत्तस्येति। उपसर्ज
नविशेषणं भवति वाक्ये ऋद्धस्य राज्ञः पुरुष इति। समासे न भवति। राजपुरुष इति। एषोप्यविशेषः। समासेषु
पसर्जनविशेषणं भवति। तद्यथा। देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रो देवदत्तस्य दासभार्येति।

विशेषाविवक्षात् दृश्यते छागस्य मांसमिति। ब्राह्मणकम्बल इति। यद्यप्यत्र स्वरान्निर्णयस्तथापि शब्दस्वरूपमात्रान्निश्चयाभाव इत्येवं
परमेतत्। यत्रापि नास्ति स्वरभेदः सम्बुद्धिषष्ठीसमासयोस्तिष्ठति ब्राह्मणकम्बल इत्यादौ तत्रापि प्रकरणादिवशादवश्यं निश्चये
न भाव्यम्। कम्बलशब्दो घृतादित्वान्निपातनाद्वान्तोदात्तः। एकार्थीभावे सति भेदनिबन्धनसंबन्धाभिधायिविभक्तिनिवर्तनात
त्कृतो विशेषोऽव्यक्ताभिधानमुच्यते। एषोपीति। व्यभिचारादपिशब्दः सुबलोपाद्यपेक्षया समुच्चयार्थः। ऋद्धस्येति। राजा स्वार्था
दप्रच्युतः पदान्तरार्थमप्रतिपन्नो वाक्ये योग्यत्वाद्विशेषणसंबन्धमनुभवति। वृत्तौ तूपसर्जनीभूतस्वार्थमर्थान्तरं प्रत्याययतीति
अयोग्यत्वाद्विशेषणेन न संबध्यते। एषोपीति। अव्यापित्वात्। ||

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चयोग इति। वाक्ये पदार्थानां भिन्नत्वाद्भेदनिबन्धनसमुच्चयद्योतनाय चशब्दः प्रयुज्यते। द्वन्द्वे तु समूहलक्षणैकार्थप्रादुर्भावाद्भेदस्य निवर्तनाद्द्योत्यार्थाभावाद्द्योतकस्यापि चशब्दस्य निवृत्तिः। अथैतस्मिन्निति। अयं भावः। यदि वाचनिकमर्थाभिधानं तदाऽसत्यप्येकार्थीभावे चार्थे द्वन्द्वविधानाद्द्वन्द्वे नैव चार्थस्योक्तत्वाच्चस्याप्रयोगोऽन्यथासिद्धत्वान्नानुमानमेकार्थीभावस्य। स्वाभाविके तु चार्थे इत्यादिनिर्देशोऽनर्थकः। अर्थानादेशनादिति। अचतुरविचतुरेत्यादावितिभावः। आदिश्यन्निति। प्रवृत्ताविरामलक्षणं वर्तमानत्वं शास्त्रप्रबन्धानुपरमाद्दर्शयति। वाक्यभेदेन चार्थादेशनं मन्यते। सुबन्तमनेकमन्यपदार्थे वर्तते तच्च बहुव्रीहिसंज्ञमित्येवमन्यत्रापि वाक्यभेदो द्रष्टव्यः। यदा तु लोकप्रसिद्धार्थानुवादेन बहुव्रीहिसंज्ञा विधीयते यदन्यपदार्थेऽनेकं वर्तते तद्बहुव्रीहिसंज्ञमिति तदा नार्थादेशनं

चयोगो भवति वाक्ये। स्वचयोगः स्वामिचयोगश्चेति। क्व स्वचयोगः। राज्ञो गौश्चाश्वश्च पुरुषश्चेति। समासे न भवति। राज्ञो गवाश्वपुरुषा इति। स्वामिचयोगः देवदत्तस्य च यज्ञदत्तस्य च विष्णुमित्रस्य च गौरिति। समासे न भवति। देवदत्तयज्ञदत्तविष्णुमित्राणां गौरिति। अथैतस्मिन्नेकार्थीभावकृते विशेषे किं स्वाभाविकं शब्दैरर्थानामभिधानमाहोस्विद्वाचनिकम्। स्वाभाविकमित्याह। कुत एतत्। अर्थानादेशनात्। नह्यर्था आदिश्यन्ते। कथं पुनरर्थानादिशन्नेवं ब्रूयान्नार्था आदिश्यन्त इति। यदाह भगवान्। अनेकमन्यपदार्थे। चार्थे द्वन्द्वः। अपत्ये। रक्ते। निर्वृत्ते इति। नैतान्यर्थादेशनानि। स्वभावत एतेषां शब्दानामेतेष्वर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियते। तद्यथा। कूपे हस्तदक्षिणः पन्थाः। अभ्रे चन्द्रमसं पश्येति। स्वभावतस्तस्य तत्रस्थस्य पथश्चन्द्रमसश्च निमित्तत्वेनान्वाख्यानं क्रियते। एवमिहापि चार्थे यः स द्वन्द्वः। अन्यपदार्थे यः स बहुव्रीहिरिति। किं पुनः कारणमर्थानादिश्यन्ते। तच्च लघ्वर्थम्।

नापि वाक्यभेदः। अर्थेष्वभिनिविष्टानामिति। अभिनिविष्टेत्यत्र परिक्रयणादित्यतोऽन्यतरस्यांग्रहणानुवर्तनाद्विकल्पेन कर्मसंज्ञाविधानात्सप्तमीकृता। एतदेव च भाष्यकारवचनं लिङ्गं तद्विकल्पस्य। कूप इति। कूपो लक्षणत्वेनोपादीयते हस्तदक्षिणमार्गग्रहणस्य। अभ्र इत्यत्राप्यभ्रं चन्द्रमसो लक्षणत्वेन निर्दिश्यते। किं पुनरिति। प्रकृतिप्रत्ययोपदेशवद्बहुवतु वाक्यभेदे नार्थादेशनमिति भावः। लघ्वर्थमिति। लघुशब्दो लाघवे वर्तते। लाघवार्थमर्था नादिश्यन्ते। अन्यथा गौरवमनवस्था च प्राप्नोति। तथाहि। यदि चार्थे वर्तते नेकं तच्च द्वन्द्वसंज्ञमिति वाक्यभेदेनार्थादेशनं क्रियते तदैवं प्रष्टव्यं स्यात् कः पुनश्चार्थ इति। तत्राचार्येणैव वक्तव्यं स्यात्समाहार इतरेतरयोगश्च। ततः कः समाहारः क इतरेतरयोग इति प्रश्नप्रतिवचनयोरनवस्था गौरवं चानुषज्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असंभव इति। असामर्थ्यात्। दोषबाहुल्यप्रतिपादनाय चार्थादेशनस्य गौरवानवस्थासंभवाः परस्परान्तर्भावेऽपि पृथगुपन्यस्ताः। कोऽहीति। अनेकार्थत्वादिति भावः। तत्र धातूनामनेकार्थत्वं कुर्द खुर्द गुर्द गुद क्रीडायामेवेति नियमार्थादेवकाराद्विज्ञायते। प्रातिपदिकानामपि यथेच्छं विनियोगदर्शनादिना। शक्तिनियमे तु पुरुषस्य व्यापारः। प्रत्ययानां तु कृत्यल्युटो बहुलं शेष इति च लक्षणारम्भात्। निपातानामनेकार्थत्वं नानाविधस्यार्थस्य प्रयोगे द्योतनात्। न चैतन्मन्तव्यमिति। कस्यचिदेवार्थो निर्दिश्यते अन्यस्य तु संबन्धात्प्रतीतिर्भवतीति भावः। भवतीति। एकत्वादिषु गुणेषु शुक्लादयो विधीयन्ते गुणेऽश्व गुणिन आक्षेपो भवति निराधारस्य गुणस्यासंभवात्। तद्यथा शुक्ल इति। गुणमात्राभिधाने गुणिन आक्षेप इत्यर्थः। तथाऽपत्ये प्रत्यये विधीयमाने सामर्थ्यादपत्यवतः प्रकृत्यर्थस्याक्षेपान्निर्देशः सि-

लघ्वर्थं ह्यर्थानादिश्यन्ते। अवश्यं ह्यनेनार्थानादिशता केनचिच्छब्देनार्थो निर्देशः कर्तव्यः स्यात्। तस्य च तावत्केन कृतः येनासौ क्रियते। अथ तस्य केनचित्कृतस्तस्य केन कृतस्तस्य केन कृत इत्यनवस्था। असंभवः खल्वप्यर्थादेशनस्य। को हि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानामर्थानादेष्टुम्। न चैतन्मन्तव्यं प्रत्ययार्थे निर्दिष्टे प्रकृत्यर्थो निर्दिष्ट इति। भवति हि गुणाभिधाने गुणिनः संप्रत्ययः। तद्यथा। शुक्लः कृष्ण इति। विषम उपन्यासः। सामान्यशब्दा एते एवं स्युः। सामान्यशब्दाश्च नान्तरेण प्रकरणं विशेषं वा विशेषेष्ववतिष्ठन्ते। यतस्तु खलु नियोगतो वृक्ष इत्युक्ते स्वभावतः कस्मिंश्चिदेव विशेषे वृक्षशब्दो वर्तते अतो मन्यामहे नेमे सामान्यशब्दा इति। न चेत्सामान्यशब्दाः प्रकृतिः प्रकृत्यर्थे वर्तते। प्रत्ययः प्रत्ययार्थे वर्तते। अप्रवृत्तिः खल्वप्यर्थादेशनस्य। बहवो हि शब्दा येषामर्था न विज्ञायन्ते। जर्भरी तुर्फरीतू। अन्तरेण खल्वपि शब्दप्रयोगं बहवोऽर्था गम्यन्ते।

द्ध्यति। विषम इति। यथा शुक्लः कृष्ण इति गुणेन गुणिमात्रस्याक्षेपो न गुणिविशेषस्यैवं वृक्षः प्लक्ष इत्यत्रापि एकत्वाधारे द्रव्यमात्रे प्रतीयेत। यदि लोकादर्थावधारणं नाश्रीयते नापि शास्त्रेण प्रतिप्रकृति निर्दिश्येतार्थः। तदा वृक्षादयो द्रव्यमात्राभिधायिनः स्युरिति प्रकरणाद्यभावे विशेषसंप्रत्ययो न स्यात्। भवति च। तस्माद्वृद्धव्यवहारादेव शब्दार्थसंबन्धव्युत्पत्तिरनिच्छतापि युक्तिवशादेष्टव्येत्यर्थः। येषामर्था न ज्ञायन्त इति। स्वर्गापूर्वदेवतादिशब्दानामर्थाः प्रत्यक्षापरिच्छेद्यत्वादिदं तया न ज्ञायन्ते तत्र तेषां कथमर्थो निर्दिश्येरन्नित्यर्थः। द्विविधव्यवहारात्तेषामर्थो विज्ञायत एव। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अक्षिनिकोचैरिति। यथैते व्यवहारवशादर्थगम्यन्ते तथा शब्दैरपीति भावः। नखल्वपीति। साध्वसाधुसंकरनिरासाय शास्त्रारम्भान्नात्तिलोकव्यवहारावगतार्थान्वाख्याने प्रयोजनमिति भावः। वावचनानर्थक्यं चेति। इहव्यपेक्षायां समासो न भवति एकार्थीभावे वाक्यं नेति विविक्तविषयत्वात् तयोर्बाध्यबाधकभावो न भविष्यतीति नार्थो विकल्पेन। एकार्थानां विकल्पनात्। न च संज्ञाया इति। एकार्थीभावे चित्रगुरित्येवेष्यते न तु चित्रा गाव इत्येवम्। तथा राजपुरुष इतीष्यते न तु राज्ञः पुरुष इति। ऐकपद्यमैकस्वर्यमेकविभक्तित्वं च सर्व एकार्थीभाव इष्यत इत्यर्थः। अथेति। कार्यशब्दिका वाक्यादेव विकल्पेन वृत्तिं निष्पाद्यां मन्यमानाः किं वृत्तेर्लक्षणं कुर्वन्तीति प्रश्नः। नैत्यशब्दिकास्तु वृत्ति वाक्ये नित्ये विविक्तविषये मन्यन्ते। परार्थाभिधानमिति। परस्य शब्दस्य योऽर्थस्त

अक्षिनिकोचैः पाणिविहारैश्च। न खल्वपि निर्ज्ञातस्यार्थस्यान्वाख्याने किंचिदपि प्रयोजनमस्ति। यो ब्रूयात्गुरस्तादारित्य उदेति पश्चादस्तं गच्छति मधुरो गुडः कटुकं शृङ्गवेरमिति किं तेन कृतं स्यात्। वावचनानर्थक्यं च स्वभावसिद्धत्वात्। वावचनमनर्थकम्। किं कारणम्। स्वभावसिद्धत्वात्। इह द्वौ पक्षौ वृत्तिपक्षश्चावृत्तिपक्षश्चेति। स्वभावतश्चैतद्भवति। वाक्यं च समासश्च। तत्र स्वाभाविके वृत्तिविषये नित्ये समासे प्राप्ते वावचनेन किमन्यच्छक्यमभिसंबद्धुमन्यदतः संज्ञायाः। न च संज्ञाया भावाभावाविष्येते। तस्मान्नार्थो वावचनेन। अथ ये वृत्तिं वर्तयन्ति किं त आहुः। परार्थाभिधानं वृत्तिरित्याहुः। अथ तेषामेवं ब्रुवतां किं जहत्स्वार्था वृत्तिर्भवत्याहोस्विदजहत्स्वार्था भवति। किं चातः। यदि जहत्स्वार्था वृत्तिः राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति औपगवमानयेत्युक्ते अपत्यमात्रस्य चेति।

स्याभिधानं शब्दान्तरेण यत्र सा वृत्तिरित्यर्थः। यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायामनुक्तः पुरुषार्थोऽभिधीयते। अथ तेषामिति। नित्यशब्दवादिपक्षे तु राजपुरुषादीनि वाक्यविषयपदसरूपावयवानि वर्णवदनर्थकोपलभ्यमानावयवानि तत्त्वतो निरवयवान्येवकेवलमसत्यप्रक्रियाश्रयेणान्वाख्यायन्ते। जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था। पुरुषमात्रस्येति। राजपदोपादानमनर्थकमिति चेत् तदा पर्यायत्वं पुरुषराजपुरुषशब्दयोर्यावयावकशब्दयोरिवस्यादित्यदोषः। राम: ३९२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विवचनं प्राप्नोतीति। प्लक्षन्यग्रोधाविति यथा। जहत्स्वार्थेति। नहि स्वार्थमजहतः स्वेनार्थेन वशीकृतस्यार्थान्तरोपादानं घटते। युक्तं पुनरिति। उपात्तस्यार्थस्य त्यागाभावात्। अग्निनेवौष्ण्यस्य। बाढं युक्तमिति। परार्थवृत्तित्वादेव। अत्रैव दृष्टान्तमाह। तक्षा राजकर्मणीति। यदा राज्ञा तक्षा दूत्यादौ नियुज्यते तदा स्वकं कर्म जहाति। नात्यन्तायेति। त्यागमात्रमभिसंधाय जहत्स्वार्थेत्युच्यते न तु सर्वात्मना त्यागः। परोपकाराय तस्योपादानात्। सर्वथा च स्वार्थत्यागे परोपकारासंपादनादनुपादानमेव प्रयोजनाभावात्तस्य स्यादित्यर्थः। हिक्कितेति। तेषां प्राणिधर्मत्वात्तत्त्यागे राजकर्मैव तस्य विच्छिद्येतेत्यर्थः। न चायमर्थ इति। वाक्येऽपि राजार्थस्य विशेषणत्वात्। कस्तस्यदृ-

अथ जहत्स्वार्थायां वृत्तौ। उभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। का पुनर्वृत्तिर्न्याय्या। जहत्स्वार्था। युक्तं पुनर्जहत्स्वार्था नाम वृत्तिः स्यात्। बाढं युक्तम्। एवं हि दृश्यते लोके पुरुषोऽयं परकर्मणि प्रवर्तमानः स्वं कर्म जहाति। तद्यथा। तक्षा राजकर्मणि प्रवर्तमानः स्वं तक्षकर्म जहाति। एवं युक्तं यद्राजा पुरुषार्थे वर्तमानः स्वमर्थं जह्यादुपगुश्च पत्यार्थे वर्तमानः स्वमर्थं जह्यात्। ननु चोक्तं राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति। औपगवमानयेत्युक्तेऽपत्यमात्रस्येति। नैष दोषः। जहदप्यसौ स्वार्थं नात्यन्ताय जहाति। यः परार्थविरोधी स्वार्थस्तं जहाति। तद्यथा। तक्षा राजकर्मणि प्रवर्तमानः स्वं तक्षकर्म जहाति न तु हिक्कितहसितकण्डूयितानि। न चायमर्थः परार्थविरोधी विशेषणं नाम। तस्मात्तन्न हास्यति। अथवाऽन्वयाद्विशेषणं भविष्यति। तद्यथा। घृतघटस्तैलघट इति। निषिक्ते घृते तैले चान्वयाद्विशेषणं भवति। अयं घृतघटोऽयं तैलघट इति। विषम उपन्यासः। भवति हि तत्र या च यावती चार्थमात्रा। अङ्ग हि भवानग्नौ निष्टप्य घृतघटं तृणकूर्चेन प्रक्षालयतु न गंस्यते स विशेषः। यथा तर्हि मल्लिकापुटश्चम्पकपुट इति। निष्कीर्णास्वपि सुमनःसु अन्वयाद्विशेषणं भवति। अयं मल्लिकापुटः अयं चम्पकपुट इति।

तौ विशेष इति चेत्। वाक्ये स्वविशेषणसंबन्धप्रतिपत्तौ सामर्थ्याविघातः। वृत्तावुपसर्जनीभूतेन स्वार्थेन प्रधानार्थस्योपकारात्स्वविशेषणप्रतिपत्तौ सामर्थ्यहानिः। अन्वयादिति। राजशब्दः स्वार्थनिमित्तं पुरुषार्थे विशेषमाधाय स्वार्थं जहाति न च तन्निमित्तं विशेषदर्शनं निवर्तते पुरुषे। यथाग्निसंबन्धजनितपाकजरूपादिनिवृत्तिर्घटेऽग्निसंयोगे निवृत्तेऽपि न भवतीत्यर्थः। विशेषणमिति। विशेषः पुरुषगतो भविष्यतीत्यर्थः। मल्लिकापुट इति। आमोदान्वयाद्विशेषावगतिरिति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्तौ क्रियत इति। यदि च वृत्तौ भेदसंसर्गौ न स्यातां तदा सामर्थ्यमेव न स्यात्तदात्मकत्वात्सामर्थ्यस्येत्यर्थः। तत्र भेदः संसर्गाविनाभावित्वादनु-
मीयमानसंसर्गः सामर्थ्यं संसर्गो वा भेदाविनाभाव्यनुमेयभेदः। उभौ वा यौगपद्येनाश्रीयमाणौ सामर्थ्यमित्यर्थः। सर्वस्वमिति। राज्ञ इति ष-
ष्ठ्या संबन्धिमात्रस्याक्षेपात् सर्वः स्वामीति। यदा पुरुषस्य पारतन्त्र्यं प्रमाणान्तरेण प्रतिपन्नं तदपेक्षयैतदुच्यते। अन्यथा पुरुष इ-
त्युक्तेऽस्तीति प्रतीतिः स्यान्न तु स्वामिमात्राक्षेपः। तत्र भेदपक्षे राजा पुरुषं स्वाम्यन्तरेभ्यो निवर्त्तयन् स्वार्थं जहाति। पुरुषस्त्वजहद-
पि स्वार्थं स्वाम्यन्तरेभ्यो राजानं निवर्त्तयतीति। ततश्च कृतकार्यस्य भवतु राजार्थस्य निवृत्तिः। अकृतकार्यस्य निवृत्तौ वृत्तिरेव न स्यात्। ए-

अथवा समर्थाधिकारोयं वृत्तौ क्रियते। सामर्थ्यं नाम भेदः संसर्गो वा। अपर आह। भेदसंसर्गौ वा सामर्थ्यमिति। कः पुनर्भे-
दः संसर्गो वा। इह राज्ञ इत्युक्ते सर्वं स्वं प्रसक्तं पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। इहेदानीं राजपुरुषमानयेत्युक्ते राजा
पुरुषं निवर्त्तयत्यन्येभ्यः स्वामिभ्यः। पुरुषोपि राजानमन्येभ्यः स्वेभ्यः। एवमेतस्मिन्नुभयतो व्यवच्छिन्ने यदि स्वार्थं ज-
हाति कामं जहातु न जातु चित्पुरुषमात्रस्यानयनं भविष्यति। अथवा पुनरस्त्वजहत्स्वार्था वृत्तिः। युक्तं पुनरिदं यद-
जहत्स्वार्था नाम वृत्तिः स्यात्। बाढं युक्तम्। एवं हि दृश्यते लोके भिक्षुकोयं द्वितीयां भिक्षां समासाद्य पूर्वां न जहा-
ति। संचयायैव प्रवर्त्तते। ननु चोक्तमुभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। कस्याः पुनर्द्वि-
वचनं प्राप्नोति। प्रथमायाः। न प्रथमासमर्थो राजा। षष्ठ्यास्तर्हि प्राप्नोति। न षष्ठी समर्थः पुरुषः। प्रथमाया एव
तर्हि प्राप्नोति। ननु चोक्तं न प्रथमासमर्थो राजेति।

वं संसर्गेपि योज्यम्। उभयत इति। उभयस्मिन्परस्परेणावच्छिन्ने इत्यर्थः। युक्तं पुनरिति। स्वमर्थमजहतस्तेन वशीकृतस्यार्थान्तरोपा-
दानमयुक्तमिति भावः। संचयायेति। एवं प्रत्ययोपि क्वचिद्विषये एकार्थः क्वचिदनेकार्थ इत्यर्थः। कस्या इति। एकया विभक्त्या गुणप्रधानभू-
तस्यार्थद्वयस्य प्रतिपादयितुमशक्यत्वादिति प्रश्नः। प्रथमाया इति। प्रधानानुविधायित्वाद्गुणानां प्रधानविभक्तिः प्रथमा गुणेनापि प्र-
तिपत्तव्येति भावः। न प्रथमासमर्थ इति। प्रथमाद्विवचन उत्पद्यमाने संबन्धासंप्रत्ययाद्गुणप्रधानभाव एव न प्रतीयेत। षष्ठ्यास्तर्ही- रामः
ति। संबन्धस्य प्रत्याय्यत्वात्तस्य चोभयाधिष्ठानत्वात्। न षष्ठीति। यदि षष्ठी द्विवचनं स्यात्तदा द्वयोरपि समकक्षत्वेन संबन्ध्यन्तरा- ३१३
पेक्षया संबन्धः प्रतीयेत।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभिहितइति। कश्चिदर्थोऽभिहितोऽपि नान्तर्भूतः। यथा राज्ञ इति षष्ठ्या संबन्धोऽभिहितो न कुत्रचिदन्तर्भावं यातः। कश्चिदन्तर्भूतोऽपि नाभिहितः। यथा राजसख इति तत्पुरुषे राजा सखास्येत्यर्थोऽन्तर्भवति न त्वभिधीयते। तथा कश्चिदर्थोऽभिहितोऽन्तर्भूतः। यथा पचतीति कर्ताभिधीयमानो गुणाभावादन्तर्भूतः। न त्वसौ प्रातिपदिकार्थ इति त्रयमुपात्तम्। तत्र संबन्धोऽभिहितोऽन्तर्भूतः प्रातिपदिकार्थः संपन्न इति व्यतिरेकाभावात्प्रथमाद्विवचनं प्राप्नोति। संघातस्येति। इह राजपुरुषशब्दात्संघाताद्विभक्त्योत्पत्तव्यम्। तेन च संघातेनावयवार्थोपरक्त एकत्वसंख्यायुक्तो विशिष्टोऽर्थः प्रतिपाद्य इति तदाश्रयमेकवचनं प्रवर्तते न तु गुणभूतावयवसंख्याश्रयं द्विवचनमित्यर्थः। परस्परेति। व्यपेक्षैवात्र सामर्थ्यं न त्वेकार्थीभाव इत्याहुः। का पुनरिति। स्वं स्वमर्थं प्रति गुणभावाच्छब्द-

अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्नस्तत्र प्रातिपदिकार्थे प्रथमेति प्रथमाया एव द्विवचनं प्राप्नोति। संघातस्यैकार्थ्यान्नावयवसंख्यातः सुबुत्पत्तिः। संघातस्यैकत्वमर्थस्तेनावयवसंख्यातः सुबुत्पत्तिर्न भविष्यति। परस्परव्यपेक्षां सामर्थ्यमेके। परस्परव्यपेक्षां सामर्थ्यमेक इच्छन्ति। का पुनः शब्दयोर्व्यपेक्षा। न ब्रूमः शब्दयोरिति किं तर्हि। अर्थयोः। इह राज्ञः पुरुष इत्युक्ते राजा पुरुषमपेक्षते ममायमिति। पुरुषोऽपि राजानमपेक्षतेऽहमस्येति। तयोरभिसंबन्धस्य षष्ठी वाचिका भवति। तथा कष्टं श्रित इति क्रियाकारकयोरभिसंबन्धस्य द्वितीया वाचिका भवति। अथ यद्येवैकार्थीभावः सामर्थ्यमथापि व्यपेक्षा सामर्थ्यं किं गतमेतदियता सूत्रेणाहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम्। गतमित्याह। कथम्। समोऽयमर्थशब्देन सह समासः संश्चोपसर्गः। उपसर्गाश्च पुनरेवमात्मकाः यत्र कश्चित्क्रियावाची शब्दः प्रयुज्यते तत्र क्रियाविशेषमाहुः। न चेह कश्चित्क्रियावाची शब्दः प्रयुज्यते येन समः सामर्थ्यं स्यात्। तत्र प्रयोगादेतद्गन्तव्यं नूनमत्र कश्चित्प्रयोगार्हः शब्दः न प्रयुज्यते येन समः सामर्थ्यमिति। तद्यथा धूमं दृष्ट्वाग्निरत्रेति गम्यते त्रिविष्टब्धकं दृष्ट्वा परिव्राजक इति।

योः परस्परव्यपेक्षा न संभवतीति प्रश्नः। अर्थयोरिति। प्रमातृगतां व्यपेक्षामर्थे समारोप्य शब्दाः संक्रियन्ते। ममायमिति। दानादिक्रियानिमित्तं राज्ञः स्वाम्यमुपजायते। अहमस्येति। पुरुषस्य प्रतिग्रहादिनिमित्तं स्वत्वोत्पादः। क्रियाकारकयोरिति। कारकशब्देनात्र शक्त्याधारो द्रव्यमुच्यते। क्रियाद्रव्ययोरभिसंबन्धनिमित्तत्वाच्छक्तिरेवाभिसंबन्धः। तेन कर्मशक्तेर्वाचिका द्वितीयेत्यर्थः। अथवा कारकशब्देन शक्तिरेवोच्यते। शक्तेश्च वाचिका द्वितीया सामर्थ्यात्क्रियाकारकसंबन्धस्याप्यवगमात्तस्य वाचिकेत्युक्तम्। अथ यद्येवेति। यद्यस्मात्तत्राद्विविधस्यापि सामर्थ्यस्य संप्रत्ययः तदा युक्तायुक्तविचारणा युक्ता नान्यथेति प्रश्नः। संश्चोपसर्ग इति। तेन तस्य द्रव्यवाचिनाऽर्थशब्देन सामर्थ्येनोपपद्यत इति संशब्दोपादानाद्योग्या क्रियाक्षिप्यत इत्यर्थः। संगतार्थं संसृष्टार्थमिति तुल्यार्थधातुनिर्देशः। संप्रेक्षितार्थं संबद्धार्थमिति पर्यायनिर्देशः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यतिषङ्ग इति। रज्ज्वादिनिमित्तः संश्लेषो व्यतिषङ्गः। एवंजातीयकेष्विति। व्यपेक्षायुक्तेष्वित्यर्थः। अस्ति नद्य इति। सत्यामपि हि नौविद्यादिकृतापेक्षायां संबन्धशब्दस्यादर्शनादित्यर्थः। अथैतस्मिन्निति। यदि वृत्तावेकार्थीभावोऽनाभ्युपगम्यते तदा वाक्यवत्संख्याविशेषोपसर्जनविशेषणादीनां प्रसङ्गात्तदभावो वचनेन प्रतिपाद्यो वा वचनं च कर्तव्यम्। समानार्थस्य वाक्यस्य निवृत्त्यर्थं तदेवं शब्दस्य स्वाभाविकं रूपं कदाचिन्नित्यदर्शनाश्रयणेनानुगम्यते कदाचिदबुधबोधनार्थं कार्यदर्शनाश्रयणेनाका र्यपक्षे तु बहवो वार्त्तीधर्मा वचनेन प्रतिपाद्या इति गौरवप्रसङ्गः। तथा हि। निष्कौशाम्बिर्गोरथो घृतघटो गुडधानाः केशचूडः सुवर्णालङ्कारो द्विदशाः सप्तपर्णो गौरखर इत्यादिषु क्रान्तयुक्तपूर्णमिश्रसंहारविकारसुचप्रत्ययलोपो वीप्साजा

कः पुनरसौ प्रयोगार्हः शब्दो न प्रयुज्यते। उच्यते सङ्गतार्थं समर्थं संसृष्टार्थं समर्थं संप्रेक्षितार्थं समर्थं संबद्धार्थं समर्थमिति। तद्यदा तावदेकार्थीभावः सामर्थ्यं तदैवं विग्रहः करिष्यते। सङ्गतार्थः समर्थः संसृष्टार्थः समर्थ इति। तद्यथा। सङ्गतं घृतं सङ्गतं तैलमित्युच्यते। एकीभूतमिति गम्यते। संसृष्टार्थः समर्थ इति। तद्यथा। संसृष्टोऽग्निरित्युच्यते। एकीभूत इति गम्यते। यदा व्यपेक्षा सामर्थ्यं तदैवं विग्रहः करिष्यते। संप्रेक्षितार्थः समर्थः संबद्धार्थः समर्थ इति। कः पुनरिह संबद्धार्थः। व्यतिषङ्गः। संबद्ध इत्युच्यते यो रज्ज्वा अयसा वा कीलेन वा व्यतिषक्तो भवति। नावश्यं बध्नातिर्व्यतिषङ्ग एव वर्तते। किं तर्हि हानावपि वर्तते। तद्यथा। संबद्धाविमौ दम्पती इत्युच्यते यावन्योन्यं न जहीतः। अथवा भवति चैवंजातीयकेषु बध्नातिर्वर्तते। तद्यथा। अस्ति नो गर्गैः संबन्धः अस्ति नो वत्सैः संबन्ध इति। अथैतस्मिन्व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्यः॥ तत्र नानाकारकान्निघातयुष्मदस्म दादेशप्रतिषेधः॥

तिविशेषाभिधायित्वं वचनप्रतिपाद्यं नित्यदर्शने त्वेकार्थीभावकृत एवायं विशेष इति न किंचित्प्रतिपादनीयम्। एवं व्यपेक्षासामर्थ्ये दोषमभिधायेदानीं ये सर्वथा दोषास्ताननुदाहरति। तत्र नानाकारकादिति। नानाशब्दः पृथग्भाववचनस्तेन भिन्नाया क्रियायाः यत्कारकं तन्नानाकारकं यथा यं दण्डो हरानेनेति दण्डोऽस्ति क्रियायाः कर्ता न तु हरतिक्रियायास्तथा नानाभिन्नमन्यत्कारकं यस्य तदपि नानाकारकं यथौदनं पच तव भविष्यतीत्यत्र पचेस्तवेत्येतत्कारकत्वेन नोपात्तं ततः पचेस्येतस्मादुत्तरस्य युष्मदादेशो न भवति। क्वचित्तु पचौदनं तव भविष्यतीति पाठः। ओदनस्य पचतिक्रियां प्रति कारकत्वं न तु भवतिक्रियां प्रतीति नानाकारकत्वं भिन्नक्रियापेक्षत्वात्कारकस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्ति दण्डस्येति। अनेनेति पदेन दण्डस्य हरणे करणत्वेन निर्देशात्।
अस्त्योदनस्येति। स्वस्वामिभावस्य भाविनः प्रतिपादनादित्यर्थः। तेनैवासज्येति। ततश्च दण्डस्य हरणं प्रति कारकत्वान्नास्ति नानाकारकत्वमिति प्रश्नः। अयं दण्डोऽस्तीति। यत्रान्यक्रियापदं न श्रूयते तत्रान्तरङ्गत्वादस्तिक्रियैव प्रतीयते। ततोऽस्तिक्रियायां दण्डस्य कर्तृत्वाद्भवत्येव नानाकारकत्वमित्यर्थः। क्व देवदत्त इति। यदा बहवः पुरुषा दूरस्था भवन्ति तदैते प्रश्नोत्तरे। यत्तिष्ठतीति। यदान्येन निपातिता वृक्षास्तदा विशिष्टवृक्षाधिकरणत्वेन देवदत्तः प्रतिपाद्यते। प्रचय इति। अनेकस्मिन्नसंबन्धिनि विवक्षित इत्यर्थः। तत्र गो राज्ञापि सामर्थ्यमश्वपुरुषाभ्यामपि। तत्र युगपद्द्वन्द्वतत्पुरुषौ प्राप्नुतः। पूर्वं वा तत्पु-

तत्रैतद्व्यपेक्षायां सामर्थ्ये सति नानाकारकान्निघातयुष्मदस्मदादेशाः प्राप्नुवन्ति तेषां प्रतिषेधो वक्तव्यः। निघात। अयं दण्डो हरानेन। अस्ति दण्डस्य हर तेश्च व्यपेक्षेति कृत्वा निघातः प्राप्नोति। युष्मदस्मदादेशाः। ओदनं पच तव भविष्यति ओदनं पच मम भविष्यति। अस्त्योदनस्य युष्मदस्मदोश्च व्यपेक्षेति कृत्वा वान्नावादयः प्राप्नुवन्ति। तेषां प्रतिषेधो वक्तव्यः। किमुच्यते नानाकारकादिति यदा तेनैवासज्य क्रियते नापि ब्रूमोऽन्येनासज्य क्रियत इति। किं तर्हि। शब्दप्रमाणका वयं यच्छब्द आह। तदस्माकं प्रमाणम्। शब्दश्चेदसत्तामाह। अयं दण्डः अस्तीति गम्यते। स दण्डः कर्ता भूत्वान्येन शब्देनाभिसंबध्यमानः करणं संपद्यते। तद्यथा। कश्चित्कंचित्पृच्छति। क्व देवदत्त इति। स तस्मा आचष्टे असौ वृक्ष इति। कतरस्मिन्यस्तिष्ठतीति। स वृक्षोऽधिकरणं भूत्वान्येन शब्देनाभिसंबध्यमानः कर्ता संपद्यते॥ प्रचये समासप्रतिषेधः॥ प्रचये समासप्रतिषेधो वक्तव्यः। राज्ञो गौश्चाश्वश्च पुरुषश्च राजगवाश्वपुरुषा इति। समर्थतराणां वा। समर्थतराणां वा पदानां समासो भविष्यति। कानि पुनः समर्थतराणि। यानि द्वन्द्वभावीनि। कुत एतत्। एषां ह्याशुतरा वृत्तिः प्राप्नोति। तद्यथा।

रुषः पश्चाद्द्वन्द्वः विप्रतिषेधाभावाच्च न परत्वेन व्यवस्थाभिन्नसमुदायविषयत्वात् संज्ञाद्वयस्यात एव षष्ठीतत्पुरुषे सति गोरतद्धितलुकीति टच्प्राप्नोति। अर्थश्च भिद्यते राजगवाश्वपुरुषा इत्युच्यमानेऽश्वपुरुषयो राज्ञा संबन्धो न प्रतीयेत। समर्थतराणां वेति। शक्ततराणामित्यर्थः। एषां ह्याशुतरेति। प्रथमा प्रातिपदि- कार्थमात्रे विधीयमाना न किंचिद्वाह्यं वस्तु अपेक्षते षष्ठी तु बाह्यसंबन्ध्यपेक्षत्वाद्बहिरङ्गा। तत्रान्तरङ्गप्रथमानिमित्तः पूर्वं द्वन्द्वो भवति। असिद्धं बहिरङ्गमिति द्वन्द्वे कर्तव्ये षष्ठीसमासस्यासिद्धत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आशुतरग्रन्थ इति। आशुप्रतिपत्तव्यो ग्रन्थः आशुतर उच्यते। एतानीति। तुल्यजातीयत्वं व्यपेक्षायामेकार्थीभावे च प्रत्यासन्न
तरं कारणमित्यर्थः। समुदायसामर्थ्यादिति। समुदायद्वन्द्वार्थं प्रति राजविशेषणत्वेनोपात्त इति तेनैव राज्ञः सामर्थ्यं नावयवेने
त्यर्थः। अपर आहेति। अत्र पक्षे समुदायसामर्थ्ये समर्थतरत्वे हेतुः। समुदायसंबन्धो चावयवस्याप्यनुमीयमानः संबन्धो
स्तीति तदपेक्षः प्रकर्षप्रत्ययः। अस्मिन्पक्ष इति। एकस्मिन्साध्ये हेतुद्वयोपादाने विकल्पो भवति इह त्वन्यत्रान्यो हेतुः। स
तच्चेति। सापेक्षत्वेनासामर्थ्याद् राज्ञो गवा समासो न भवतीत्यस्यार्थस्य वाशब्दः प्रतिपादकः। आख्यातमिति। नाना-

समर्थतरोऽयं माणवकोऽध्ययनायेत्युच्यते। आशुतरग्रन्थ इति गम्यते। अपर आह। समर्थतराणां वा पदानां
समासो भविष्यति। कानि पुनः समर्थतराणि। यानि द्वन्द्वभावीनि। कुत एतत्। समानविभक्तीन्येतानि। अन्य
विभक्ती राजा। भवति विशेषः स्वस्मिन्भ्रातरि पितर्यपुत्रे च। समुदायसामर्थ्याद्वा सिद्धम्। समुदायसाम
र्थ्याद्वा पुनः सिद्धमेतत्। समुदायेन राज्ञः सामर्थ्यं भवति नावयवेन। अपर आह। समर्थतराणां वा समुदाय
सामर्थ्यात्। समर्थतराणां वा पदानां समासो भविष्यति। कुत एतत्। समुदायसामर्थ्यादेव। अस्मिन्पक्षे वेत्ये
तदसमर्थितं भवति। एतच्च समर्थितम्। कथम्। नैव वा पुनरत्र राज्ञोऽश्वपुरुषावपेक्षमाणस्य गवा सह समा
सो भवति। कथं तर्हि गोः राजानमपेक्षमाणस्याश्वपुरुषाभ्यां सह समासो भवति। प्रधानमत्र तदा गौर्भवति।
भवति च प्रधानस्य सापेक्षस्यापि समासः। आख्यातं साव्ययकारकविशेषणं वाक्यम्। आख्यातं साव्ययं सका
रकं सकारकविशेषणं वाक्यसंज्ञं भवतीति वक्तव्यम्। साव्ययम्। उच्चैः पठति नीचैः पठतीति। सकारकम्। ओद
नं पचति। सकारकविशेषणम्। ओदनं मृदु विशदं पचति। सक्रियाविशेषणं चेति वक्तव्यम्। सुष्ठु पचति दुष्ठु पचतीति।

कारकान्निघातादिनिवृत्तये क्वचित्स्वरवृत्तये च समानवाक्ये निघातयुष्मदस्मदादेशा वक्ष्यन्ते। तत्र लौकिकवाक्यग्रहणनिषे-
धार्थं वाक्यं परिभाष्यते। अव्ययकारकविशेषणानि प्रत्येकं समुदितानि चाश्रीयन्ते यथा द्विवचनेन प्रवेष्टव्यम्। अट्कुप्वाङ्
नुम्व्यवायेऽपीति। आख्यातमिति चैकत्वं विवक्ष्यते। लक्षणविधानसामर्थ्यात्। तथा च तिङ्ङतिङ इत्यत्र वक्ष्यते तिङ्प्रतिषे
धानर्थक्यं च समानवाक्याधिकारादिति। भवति पचतीत्यादौ सत्यपि साध्यसाधनभावे आख्यातयोर्द्वित्वात्समानवाक्यत्वाभा
वान्निघाताप्रसङ्गात्। उच्चैरिति। यद्यप्यव्ययं कारकं विशेषणं च तथापि प्रपञ्चार्थमस्योपादानम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तथाचवक्ष्यते। आख्यातं सविशेषणमित्येवेति। सक्रियाविशेषणं चेति। अव्ययसत्त्वाकारकस्यैव यद्विशेषणं तद्ग्रहणेनतु-
क्रियाया इति भावः। आख्यातेनचक्रियाप्रधानत्वंलक्ष्यते तद्व्यतिङन्तेष्वपि देवदत्तेन पक्तव्यमित्यादिषु वाक्यत्वं सिद्ध्य
ति। एकतिङिति। एकशब्दः समानवचनो नतु संख्यावाची। बहुव्रीहिश्चायम्। ब्रूहि ब्रूहीति। ब्रूहि ब्रूहि देवदत्तेत्यत्र वाक्य
त्वादामन्त्रितनिघातः सिद्ध्यति। समर्थनिघाते हीति। निघातउपलक्षणं तेन युष्मदस्मदादेशा अपि गृह्यन्ते। पचवेतेइति
। अत्र समानाधिकरणम समर्थवद्भवतीति वाचनिकमसामर्थ्यमिति। असति समानवाक्याधिकारे युष्मदस्मदादेशो नस्या

अपर आह। आख्यातं सविशेषणमित्येव। सर्वाणि ह्येतानि क्रियाविशेषणानि। एकतिङ्। एकतिङ् वाक्यसंज्ञं
भवतीति वक्तव्यम्। ब्रूहि ब्रूहि देवदत्त॥ समानवाक्ये निघातयुष्मदस्मदादेशाः॥ समानवाक्य इति प्रकृत्य निघा
तयुष्मदस्मदादेशा वक्तव्याः। किं प्रयोजनम्। नानावाक्येषु माभूवन्निघातादय इति। अयं दण्डो हरानेन। ओद
नं पच तव भविष्यति। ओदनं पच मम भविष्यति॥ योगे प्रतिषेधश्चादिभिः॥ चादिभिर्योगे प्रतिषेधो वक्तव्यः। ग्रा
मस्तव च स्वं मम च स्वम्। किमर्थमिदमुच्यते। यथान्यास एव चादिभिर्योगे प्रतिषेध उच्यते। इदमद्यापूर्वं क्रिय
ते वाक्यसंज्ञा समानवाक्याधिकारश्च। तद्द्वयं विजानीयात् सर्वमेतद्विकल्प्यत इति। तदाचार्यः सुहृद्भूत्वान्वा
चष्टे चादिभिर्योगे यथान्यासमेव भवतीति। सा चावश्यं वाक्यसंज्ञा वक्तव्या समानवाक्याधिकारश्च वक्त
व्यः। समर्थनिघाते हि समानाधिकरणयुक्तयुक्तेषूपसंख्यानं समर्थत्वात्। समर्थनिघाते हि सति समानाधिक
रणयुक्तयुक्तेषूपसंख्यानं कर्तव्यं स्यात्। समानाधिकरणे। पचवेते दास्यामि। मृदवेते दास्यामि। समानाधिक
रणयुक्तयुक्ते। नद्यास्तिष्ठति कूले वृक्षस्य लम्बते शाखायां शालीनां ते ओदनं ददामि। शालीनां मे ओदनं द
दासि। किं पुनः कारणं न सिद्ध्यति। असमर्थत्वात्॥ राजगवीक्षीरे द्विसमासप्रसङ्गो द्विषष्ठीभावात्। राजग
वीक्षीरे द्विसमासप्रसङ्गः। किं कारणम्। द्विषष्ठीभावात्। द्वे ह्यत्र षष्ठ्यौ राज्ञः गोः क्षीरमिति। किमुच्यते द्वि
समासप्रसङ्ग इति। यदा सुप्सुपेति वर्ततेनेन तदा द्विसमासप्रसङ्ग इति।

तद्युक्तयुक्तेपि साक्षात्सामर्थ्याभावात् कार्यं न स्यात्। नद्या इत्यादि कारकविशेषणं विज्ञेयम्। राजगवीक्षीर इति। राज्ञो या गौस्तस्याः क्षीर
मित्येतस्मिन्नर्थे राजगोक्षीरमित्यपि प्राप्नोति। किमुच्यत इति। द्वयोः षष्ठ्यन्तयोः समासप्रसङ्ग इत्यर्थं मत्वा पर्यनुयुङ्क्ते। सुप्सुपेति। संख्या
या अविवक्षितत्वात् समुदायस्य चासुबन्तत्वान्नास्ति समासप्रसङ्ग इत्यर्थः। इतरोऽभिप्रायं प्रकाशयति।

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ ३९६ नैवमिति द्वयोः समासयोः समाहारो द्विसमासंपात्रादिभ्यः प्रतिषेध इति स्त्रीत्वाभावः। अमुमेवार्थं शब्दान्तरेण व्यक्तीकरोति। द्वि २११
प्रकारस्येति। एकस्मिन्नेवार्थे कदाचिद्राजगवीक्षीरं कदाचिद्राजगोक्षीरमिति प्राप्नोतीत्यर्थः। भवितव्यं चेति। अर्थान्तरमित्य-
र्थः। तथाहि गवादवच्छिन्नं क्षीरं राजस्वामिकमिति प्रतीयते। गोस्तु राजविशिष्टा न प्रतीयते। राजविशिष्टाया इति। ततश्च गोः पूर्वं रा
ज्ञा सम्बन्धः पश्चात्तु क्षीरेणेत्यर्थः। नैव वेति। सत्यपि गोरुभाभ्यां सम्बन्धे सापेक्षमसमर्थं भवतीति असामर्थ्याद्गोः क्षीरेण समा
सो न भवति राज्ञा तु भवति राजापेक्षया गोः प्राधान्यादेतदुक्तं भवति। महत्कष्टं श्रित इत्यत्रैवास्यार्थस्य विचारितत्वान्न पुनश्चोद

नैवं विज्ञायते द्वयोः सुबन्तयोः समासप्रसङ्गो द्विसमासप्रसङ्ग इति। कथं तर्हि। द्विप्रकारस्य समासस्य
प्रसङ्गो द्विसमासप्रसङ्ग इति। राजगोक्षीरमित्यपि प्राप्नोति। नचैवं भवितव्यम्। भवितव्यं च यदा एतद्वा
क्यं भवति गोः क्षीरं गोक्षीरं राज्ञो गोक्षीरं राजगोक्षीरमिति। यदा त्वेतद्वाक्यं भवति राज्ञो गोः क्षीरमिति तदा
न भवितव्यम्। तदा च प्राप्नोति तदा कस्मान्न भवति। सिद्धं तु राजविशिष्टाया गोः क्षीरेणासामर्थ्यात्। सि
द्धमेतत्। कथम्। राजविशिष्टाया गोः क्षीरेण सह समासो भवति न केवलायाः। किं वक्तव्यमेतत्। नहि।
कथमनुच्यमानं गंस्यते। यथैवायं गवि यतते तेन च क्षीरमात्रेण संतोषं करोति। एवं राजन्यपि यतते राज्ञो
या गौस्तस्या यत्क्षीरमिति। नैव वा पुनरत्र गो राजानमपेक्षमाणायाः क्षीरेण सह समासः प्राप्नोति। किं का
रणम्। असामर्थ्यात्। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। कथं तर्हि गोः क्षीरमपेक्षमाणा
याः राज्ञा सह समासो भवति। प्रधानमत्र तदा गौर्भवति। भवति च प्रधानस्य सापेक्षस्यापि समासः। अ
थ किमर्थं पदविधौ समर्थाधिकारः क्रियते। पदविधौ समर्थवचनं वर्णाश्रये प्रत्ययआनन्तर्यविज्ञानात्।
पदविधौ समर्थाधिकारः क्रियते। वर्णाश्रये प्रत्ययआनन्तर्यमात्रे कार्यं यथा विज्ञायेतेति तिष्ठतु दध्यशान त्वं शाकेन तिष्ठ
तु कुमारीच्छत्रं हर देवदत्तेति।

नीयं राजगवीक्षीरे द्विसमासप्रसङ्ग इति। समर्थाधिकार इति। पारार्थ्यसामान्यात्परिभाषाधिकारशब्देनोक्ता। विनियोगो ह्यधिकारः। स च परि
भाषायामप्यस्ति तथा च कुप्वोः ≍क≍पौ चेत्यत्र वक्ष्यते अधिकारो नाम त्रिप्रकार इति। अत्र पदग्रहणस्याक्षेपः। समर्थो विधिरित्येव वक्त
व्यम्। आनन्तर्यं गृ त्र इति। विनापि सामर्थ्येनेत्यर्थः। तिष्ठतु कुमारीच्छत्रमिति। दीर्घादिति नित्यस्तुग्भवति। यस्तु पदान्ताद्वेति विकल्पितः रामः
स पदविधित्वादसामर्थ्ये न भवतीत्याहुः। अन्ये तु पदान्ताद्वेत्येव दीर्घेण पदे विशेष्यमाणे लब्धे तदन्तत्वे न तग्रहणात्पदात्तु कोवि प्र १६
कर्षो विज्ञायते। पदान्तस्य दीर्घस्य तुग्भवति न तु दीर्घान्तस्य पदस्येति पदविधित्वाभावादसत्यपि सामर्थ्ये वा तुग्भवतीत्याहुः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्थाधिकारस्येति। विधिशब्दइह कर्मसाधन एव उपात्तः तस्य पदसंबन्धी समासादिरर्थो वाच्यः। तत्समानाधिकरणं च समर्थ इत्यु-
पात्तं तत्र असमर्थानां पदानां समासस्यानिवर्तितत्वात्समर्थवचनेन न किंचित्कृत्यमित्यर्थः। तथाहि। समर्थानां यः समासः सस समर्थ
एवायोप्यसमर्थानां भार्या राज्ञः पुरुषो देवदत्तस्येत्यादौ सोपि नियमाभावान्निर्वर्तत एव। तस्यासमर्थस्यापि अनेन समर्थवचनेनन
किंचिक्रियते। निष्पन्नत्वात्तु सूत्रान्तरेण साधुत्वव्यवस्थापनाच्च अकिंचित्कुर्वाणमित्याद योप्यसमर्थानत्समासाः परिग
णानेन निरस्तादिति तदर्थमपि तन्न भवति। सिद्धं त्विति। वचनाद्याख्यानादित्यर्थः। समर्थपदसंबन्धित्वात्पद विधिरुपचारात्समर्थ
समर्थाधिकारस्य विधेयसमानाधिकरण्यान्निर्देशानर्थक्यम्। समर्थाधिकारोयं विधेयेन समानाधिकरणः। किंच वि
धेयम्। समासः। यावद्ब्रूयात्समर्थः समास इति तावद्ब्रूयात्समर्थः पदविधिरिति। न च राजपुरुष इत्येतस्यामवस्था
यां समर्थाधिकारेण किंचिदपि शक्यं प्रवर्तयितुं निवर्तयितुं वा। समर्थाधिकारस्य विधेयसामानाधिकरण्यादनि
र्देशोनर्थकः। सिद्धं तु समर्थानामिति वचनात्। सिद्धमेतत्। कथम्। समर्थानां पदानां विधिर्भवतीति वक्तव्यम्। ए
वमपि द्व्येकयोर्न प्राप्नोति। एकशेषनिर्देशाद्वा। अथवा एकशेषनिर्देशोयम्। समर्थस्य च समर्थयोश्च समर्थानां
च समर्थानामिति। एवमपि षट्प्रभृतीनामेव प्राप्नोति। षट्प्रभृतिषु ह्येकशेषः परिसमाप्यते। नैष दोषः। प्रत्येकं
वाक्यपरिसमाप्तिर्दृष्टेति द्व्येकयोरपि भविष्यति। एवमपि विभक्तीनां न प्राप्नोति। समर्थात्समर्थे पदात्पद इति। ए
वं तर्हि समर्थपदयोरयं विधिशब्देन सर्वविभक्त्यन्तः समर्थस्य विधिः समर्थविधिः समर्थयोर्विधिः समर्थविधिः सस मासः
मर्थानां विधिः समर्थविधिः समर्थाद्विधिः समर्थविधिः समर्थे विधिः समर्थविधिः। पदस्य विधिः प
दविधिः पदयोर्विधिः पदविधिः पदानां विधिः पदविधिः पदाद्विधिः पदविधिः पदे विधिः पदविधिः।
पूर्वेणेनोच्यते। इतरस्तु पाठोयमिति मत्वाह। एवमपीति। यथा पशुनायजेतेति गुणेषु संख्या विवक्ष्यते तथेहापि बहुत्वस्य विवक्षित
त्वात्। प्रत्येकमिति। आश्रितसंख्याविशेषाणां कृतैकशेषाणां पुनरेकशेषकरणासामर्थ्यात्। एवमपीति। सर्वमेतद्वाचनिकमि-
ति मत्वा पुनः पर्यनुयुङ्क्ते। समर्थादिति। तिङः तिङ इत्यादौ समर्थ इति। यथा कुत्सने च सुप्यगोत्रादाविति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वः समास उत्तरपदलोपीति। गतार्थत्वाद्विधिशब्दस्याप्रयोग इत्यर्थः। समर्थपदाश्रयत्वाद्विधिरेव समर्थशब्देनोच्यत इत्यर्थः। संबन्धसामान्यवचनषष्ठ्यन्तस्य तु पदशब्दस्य विधिशब्देन समासे विभक्त्यन्तरार्थोऽप्यन्तर्भवतीति सर्वं सूत्रेणैव सिद्ध्यति। याद्विच्छिकी च विभक्तिरिति। भेदाभेदविवक्षासंभवेऽपि यदृच्छया अभेदविवक्षामाश्रित्य प्रथमया निर्देशः कृत इत्यर्थः। समानाधिकरणेष्विति। केचिदाचार्या द्रव्यं पदार्थं प्रतिपन्नाः केचिदाकृतिम्। गुणशब्देनाप्याकृतिरुच्यते। यथा दस्य गुणस्याभावादिति। संसर्गभेदकं यद्यत्तत्त्वव्यापारं प्रतीयते। गुणत्वं परतन्त्रत्वात्तस्य शब्दस्य उदाहृतमिति। गुणलक्षणायोगात्तत्र द्रव्ये पदार्थे वीरः पुरुष इत्येताभ्यां द्रव्यमेकमभिधीयते ननु वी

समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधयः। पदविधिश्च पदविधिश्च पदविधिश्च पदविधिश्च पदविधिश्च पदविधयः। समर्थविधयश्च पदविधयश्च समर्थः पदविधिः पूर्वः समास उत्तरपदलोपी याद्विच्छिकी च विभक्तिः। समानाधिकरणेषूपसंख्यानमसमर्थत्वात्। समानाधिकरणेषूपसंख्यानं कर्तव्यम्। वीरः पुरुषो वीरपुरुषः। किं पुनः कारणं न सिध्यति। असमर्थत्वात्। कथमसामर्थ्यम्। द्रव्यं पदार्थ इति चेत्। यदि द्रव्यं पदार्थो न भवति तदा सामर्थ्यम्। भेदाभावात्। अथ हि गुणः पदार्थो भवति तदा सामर्थ्यम्। अन्यो हि वीरत्वं गुणः अन्यो हि पुरुषत्वम्। नान्यत्वमस्तीति इयता सामर्थ्यं भवति। अन्यो हि देवदत्तो गोभ्यश्चाश्वेभ्यश्च न च तस्यैतावता सामर्थ्यं भवति। को वा विशेषः। यद्गुणे पदार्थे सामर्थ्यं स्यात्। द्रव्ये च न स्यात्। अयमेव विशेषः। एकं तयोरधिकरणम्। अन्यश्च वीरत्वं गुणः अन्यः पुरुषत्वम्। द्रव्यपदार्थिकस्यापि तर्हि गुणभेदात्सामर्थ्यं भविष्यति। अशक्यो द्रव्यपदार्थिकेन द्रव्यस्य गुणकृत उपकारः प्रतिज्ञातुम्। ननु चाभ्यन्तरोऽसौ भवति।

रत्वं पुरुषत्वं च। तत्र भेदाभावे भेदाधिष्ठानस्य संसर्गस्येहासंभवात्। असति सामर्थ्ये समासो न प्राप्नोतीति वचनम्। अथ हि गुण इति। वीरत्वं पुरुषत्वं चैकव्यक्तिगतमेताभ्यामभिधीयत इति भेदपूर्वकः संसर्गोऽस्तीति भावः। नान्यत्वमिति। उपकारविवक्षायां सामर्थ्यं नान्यत्वमात्रेणेत्यर्थः। एकं तयोरिति। ततस्तद्द्वारेणास्ति विशेषणविशेष्यभावः। द्रव्यपदार्थिकस्यापीति। एकमपि द्रव्यं भिन्नगुणसंसर्गाद्भेदकार्यं लभते। अशक्य इति। भेदहेतोर्विद्यमानस्यापि गुणस्य शब्देनावाच्यत्वादित्यर्थः। ननु चेति। द्रव्यस्य गुणेन नित्यसंबन्धादित्यर्थः। रामः ३९७

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यपीति। अनभिधीयमानोऽपि संनिधिनैव परिच्छेदहेतुत्वादभ्यन्तरः। न तु गम्यत इति। शब्देन नोच्यत इत्यर्थः। गुणपदार्थिकेनापीति। यद्यवाच्यस्योपकारकत्वं नाश्रीयत इत्यर्थः। अथावाच्यस्याप्युपकारकत्वमाश्रीयते तदा पक्षद्वयेऽपि साम्यम्। क्व च तावदिति। यद्यवाच्यस्योपकारकत्वं नाश्रीयेत इत्यर्थः। यत्र सर्वमिति। समानमेकमधिकरणमभिधेयं यस्य ते न पर्यायेणेत्यर्थ इति मन्यते। ततश्च यत्र प्रवृत्तिनिमित्तमप्येकं वाच्यं च तत्रैव स्यादित्यर्थः। कथं पुनरत्र विशेषणविशेष्यभावः। उच्यते। कंचित्प्रति कयाचित्संज्ञया सोऽर्थः प्रसिद्धोऽन्यया त्वप्रसिद्ध इति प्रसिद्धस्य विशेषणत्वमितरस्य तु विशेष्यत्वम्। नैवंजातीयकानामिति। युगपत्प्रयोगाभावा

यद्यप्यभ्यन्तरः न तु गम्यते। न हि गुड इत्युक्ते मधुरत्वं गम्यते शृङ्गवेरमिति वा कटुकत्वम्। गुणपदार्थिकेनापि तर्हि अशक्यो गुणस्य द्रव्यकृत उपकारः प्रतिज्ञातुम्। अथ गुणपदार्थिकः प्रतिजानीते। द्रव्यपदार्थिकोऽपि कस्मान्न प्रतिजानीते। एवमनयोः सामर्थ्यं स्याद्वा न वा। क्व च तावदिदं स्यात्। समानाधिकरणेनेति। यत्र सर्वं समानम् इन्द्रः शक्रः पुरुहूतः पुरंदरः कन्दुः कोष्ठः कुसूल इति। नैवंजातीयकानां समासेन भवितव्यं प्रत्ययेन वोत्पत्तव्यम्। किं कारणम्। अर्थगत्यर्थः शब्दप्रयोगः। अर्थं संप्रत्याययिष्यामीति शब्दः प्रयुज्यते। तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य शब्दस्य प्रयोगेण न भवितव्यम्। किं कारणम्। उक्तार्थानामप्रयोग इति। न तर्हीदानीमिदं भवति भृत्य भरणीय इति। नैतौ समानार्थौ। एकोऽत्र शक्यार्थे कृत्यः अपरोऽर्हे। शक्यो भर्तुं भृत्यः। अर्हति भृतिं भरणीयः। भृत्यो भरणीयो भृत्यभरणीय इति। यदि तर्हि यत्र किंचित्समानं कश्चिच्च विशेषः तत्र भवितव्यम्। इहापि तर्हि प्राप्नोति। दर्शनीयाया माता दर्शनीयामातेति। अत्रापि किंचित्समानं कश्चिच्च विशेषः। किं पुनस्तत्। सद्भावान्यभावो। न क्वचित्सद्भावान्यभावौ न स्तः। उच्यते चेदं समानाधिकरणेनेति। तत्र प्रकर्षगतिर्विज्ञास्यते। यत्र साधीयः सामानाधिकरण्यम्। क्व च साधीयः सामानाधिकरण्यम्। यत्र सर्वं समानं सद्भावान्यभावौ द्रव्यं च। अथवा समानाधिकरणेनेति तत्समानमाश्रीयते यत्समानं भवति न भवति च।

त्सामर्थ्याभावाच्चेत्यर्थः। भृत्यभरणीय इति। अस्ति चायं शिष्टप्रयोग इति भावः। नैताविति। उपाधिभेदाद्भिन्नार्थावित्यर्थः। दर्शनीयामातेति। यदि सति भेदे किंचित्समानमाश्रित्य समासः क्रियते तदा यथा वीरपुरुष इत्यत्रानभिधीयमानमपि द्रव्यं समानमाश्रित्य समासः क्रियते तथात्रापि सत्ता समानेति समासः प्राप्नोतीत्यर्थः। ननु परत्वादपवादत्वाच्चात्र षष्ठीसमासो भविष्यतीति नैतदस्ति। समानाधिकरणेनेति प्रतिषेधः प्राप्नोति। विधेः कोऽवकाश इति चेद्दृष्टादिह व्यवस्था न स्यात्। समानाधिकरणोत्तरपदलक्षणश्च पुंवद्भावः प्रसज्येत। सद्भावान्यभावाविति। सत्तान्यत्वे इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचैतदिति। सत्तायाः सर्वत्र भावाद्व्यभिचाराभावान्नासौ समानत्वेनाश्रीयते। पूर्वः परिहारः समानत्वमभ्युपगम्य पुनः श्रुत्याप्रकर्षोश्र येणोक्तः। उत्तरस्तु सर्वसाधारण्यात्सत्तायाः समानव्यपदेशं प्रतिनिमित्तत्वानाश्रयणेनाभिहितः। अथवेति। अधिकरणशब्दोभिधेय वाचीति पर्यनुयोगो द्रव्यवाचीति समाधानम्। दर्शनीयायामातेत्यत्र तु द्रव्यभेदः। अभिधेयस्य तु सत्तया समानत्वात्समानत्वंस्या त्। व्युदितमिति। विवादः कृत इत्यर्थः। सर्पिः कालकमिति। इत्युभोः सामर्थ्यमिति पत्वनिवारणार्थं वाचनिकमसामर्थ्यमिति वीरपु रुषइति समानाधिकरणसमासोपि न स्यादित्यर्थः। अधात्वमिद्वि वमिति। धातुसहचरितः प्रत्ययो धातुशब्देनोक्तः। तेनाभिहितं

नचैतत्समानं कचिदपि न भवति। अथवा यावद्ब्रूयात्समानद्रव्येणेति तावत्समानाधिकरणेनेति। द्रव्यं हि लोकेऽधि करणमित्युपचर्यते। तद्यथा। एकस्मिन्द्रव्ये व्युदितम्। एकस्मिन्नधिकरणे व्युदितम्। तथा व्याकरणे विप्रतिषिद्धं चा नधिकरणवाचि अद्रव्यवाचीति गम्यते। एवमपीदमवश्यं वक्तव्यं समानाधिकरणमसमर्थवद्भवतीति। किं प्रयोजन म्। सर्पिः कालकं यजुः पीतकमिति एवमर्थम्। यदि समानाधिकरणमसमर्थवद्भवतीत्युच्यते। सर्पिर्धीयते यजु ष्क्रियत इत्यत्र षत्वं न प्राप्नोति। अधात्वभिहितमित्येवं तत्। एवं च कृत्वा समानाधिकरणेषूपसंख्यानं कर्तव्यम्। वीरः पुरुषो वीरपुरुष इति। किं कारणम्। असमर्थत्वात्। न वा वचनप्रामाण्यात्। न वा कर्तव्यम्। किं कारणम्। व चनप्रामाण्यात्। वचनप्रामाण्यादत्र समासो भविष्यति। किं वचनप्रामाण्यम्। समानमध्यममध्यमवीराश्चेति। लुप्ता ख्यातेषु च। लुप्ताख्यातेषु चोपसंख्यानं कर्तव्यम्। निष्कौशाम्बिः निर्वाराणसिः। लुप्ताख्यातेषु च किम्। वचनप्रामाण्या दित्येव। किं वचनप्रामाण्यम्। कुगतिप्रादय इति। अस्त्यन्यदेतस्य वचने प्रयोजनम्। किम्। सुराजा अतिराजेति। नञ्ब्रू मो वृत्तिः सूत्रवचनप्रामाण्यादिति।

कर्मादि यदि भवति तदा सामर्थ्यमेवेत्यर्थः। न वेति। वचनसामर्थ्याद्वाचनिकमसामर्थ्यं बाध्यत इत्यर्थः। वीरः पचन्नित्यादौ तु धा त्वमिहिते अनभिधानाद्बहुलग्रहणाद्वा समासाभावं मन्यते। लुप्ताख्यातेषु चेति। वचनप्रामाण्यादित्यस्योपजीवनार्थमिदं वा र्तिकम्। भाष्यकारस्तु प्रपञ्चार्थमुपसंख्यानं प्रतिविधानं च वाक्यभेदेनाचष्टे। आख्यातशब्देन क्रियापदं कान्तापि कथ्यते।
निकौशाम्बिरिति। पूर्वपदोत्तरपदयोः सामर्थ्यं मन्यते। क्रियाविषयत्वादुपसर्गाणां द्रव्येण संबन्धाभावात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंतर्हीति। वार्तिककारवचनस्यापिस्मृतिशास्त्रत्वात्प्रामाण्यमाश्रितमित्यर्थः। तस्यार्थ इति। क्रान्तशब्दस्य योर्थः संप्रतीयते निःशब्दे नक्रि
याविषयेण तस्यार्थस्य सामर्थ्यादाक्षिप्तत्वात्तद्द्वारेण पूर्वपदोत्तरपदयोः सामर्थ्यादित्यर्थः। सोर्थ इति। निसएवायं द्वन्द्वविषये क्रान्तल
क्षणोर्थ इति दर्शयति। अथयत्र इति। यत्र विशिष्टे पूर्वपदोत्तरपदे उपात्ते यथा द्वितीयाश्रितेति तत्र नास्ति बहूनां प्रसङ्गः। यत्र तु वि
शेषो नोपात्तः। अनेकमन्यपदार्थे चार्थे द्वन्द्व इति तत्र संदेहः। यदि सुप्सुपेति वर्तेते ततो विवक्षितत्वात्संख्याया द्वयोर्द्वयोः समा
सेन भवितव्यम्। अथ निवृत्तं यावतामन्यपदार्थे चार्थे च वृत्तिस्तावतां भवितव्यम्। नन्वनेकग्रहणाद्बहूनामपि भाव्यम्। अन्यथा त

किं तर्हि। वार्तिकवचनप्रामाण्यादिति। सिद्धं तु क्वाङ्स्वतिदुर्गतिवचनात्। प्रादयः क्तार्थ इति। तदर्थगतेर्वा। तदर्थगतेर्वा
पुनः सिद्धमेतत्। किमिदं तदर्थगतेरिति। तस्यार्थस्तदर्थः तदर्थस्य गतिस्तदर्थगतिस्तदर्थगतेरिति। यस्यार्थस्य कौशाम्ब्या
सामर्थ्यं स निसोच्यते। अथवा सोर्थस्तदर्थः तदर्थस्य गतिस्तदर्थगतिस्तदर्थगतेरिति। योर्थः कौशाम्ब्या समर्थः स निसोच्य
ते। अथ यत्र बहूनां समासप्रसङ्गः किं तत्र द्वयोर्द्वयोः समासो भवति आहोस्विदविशेषेण। कश्चात्र विशेषः॥ समासो द्वयो
र्द्वयोश्चेद्द्वन्द्वेनेकग्रहणम्। समासो द्वयोश्चेद्द्वन्द्वेनेकग्रहणं कर्तव्यम्। चार्थे द्वन्द्वोनेकमिति वक्तव्यम्। इहापि यथा-
स्यात्। प्लक्षन्यग्रोधखदिरपलाशा इति। नैष दोषः। अत्रापि द्वयोर्द्वयोः समासो भविष्यति। द्वयोर्द्वयोः समास इति चेन्न।
बहुषुद्वित्वाभावात्। द्वयोर्द्वयोः समास इति चेत्। तन्न। किं कारणम्। बहुषु द्वित्वाभावात्। न बहुषु द्वित्वमस्ति। नावश्यमेवं
विग्रहः कर्तव्यः प्लक्षश्च न्य—ग्रोधश्च खदिरश्च पलाशश्चेति।

दनर्थकं स्यात्। नैतदस्ति। अनेकग्रहणमुपसर्जनसंज्ञार्थं स्याचित्रगुरित्यादौ ह्रस्वार्थम्। यदा त्वेकविभक्तित्वेनोपसर्जनसंज्ञा सिद्ध्यती
त्युच्यते तदानेकग्रहणं सुप्सुपेत्यस्य निवृत्त्यर्थं विज्ञायते तेन बहूनां समासः सिद्ध्यति। बहुषु द्वित्वाभावादिति। ननु बहुषु द्वौ विद्येते
। तद्यथा एषां ब्राह्मणानां द्वावानयेति। तत्र बहुषूपक्रान्तेषु प्लक्षन्यग्रोधयोरेका द्वन्द्वसंज्ञा। खदिरपलाशयोर्द्वितीया। पुनर्द्वन्द्वस
मुदायस्य तृतीया भविष्यति। नैष दोषः। यद्यपि बहुषु द्वौ स्तस्तथापि चतुर्षु सह विवक्षितेषु एकैकस्य शब्दस्य चत्वारोर्था इति द्वयो-
श्चार्थवृत्त्यसंभवात्। समासभाक्त्वं नास्तीति एतदनेन प्रतिपाद्यते।

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविग्रह इति। द्वयोर्द्वयोः सहविवक्षा भविष्यति न तु युगपच्चतुर्णामित्यर्थः। होतृपोतृनेष्टोद्गातार इति। यदा बहूनां समासस्तदा सर्वोन्त्य
उत्तरपदे परतस्तस्यैवानङ् भविष्यति द्वयोर्द्वयोस्तु समासे क्रियमाणे एकं वर्जयित्वा सर्वेषामानङ् भाव्यम्। अत्र च भाष्यकारवचनप्रा
माण्यादुद्गातृशब्दस्य दीर्घः। अन्यथा न ग्राहिग्रहणस्य नियमार्थत्वान्न स्यात्। समासान्तप्रतिषेधश्चेति। द्वयोर्द्वयोर्द्वन्द्वसंज्ञायां प्रतिद्व
न्द्वं समासान्तः प्राप्नोतीत्यर्थः। यद्यपि प्रक्रियान्तरे प्रतिद्वन्द्वमानङादेशवत्समासान्तेन भाव्यं तथापि बहूनां समासाभावादेकसमासान्त-
ता न कदाचित्प्राप्नोतीति चोद्यते। सुस्रक्त्वजटकेशेनेति। सुष्ठु स्रक्त्वजराः केशा अस्येति विग्रहः। यद्यनेकग्रहणं न क्रियते क्रियमा

किं तर्हि। एवं विग्रहः करिष्यते प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ खदिरश्च पलाशश्च खदिरपलाशौ प्लक्षन्यग्रोधौ च खदि
रपलाशौ च प्लक्षन्यग्रोधखदिरपलाशा इति। होतृपोतृनेष्टोद्गातारस्तर्हि न सिध्यन्ति। होतापोतानेष्टोद्गातार इति प्राप्नो
ति। न चैतदेवं भवितव्यम्। भवितव्यं च। यदैवं विग्रहः क्रियते। होता च पोता च होतापोतारौ नेष्टा चोद्गाता च नेष्टोद्गातारौ होता
पोतारौ च नेष्टोद्गातारौ च होतापोतानेष्टोद्गातार इति। होतृपोतृनेष्टोद्गातारस्तु न सिध्यन्ति॥ समासान्तप्रतिषेधश्च॥
समासान्तस्य प्रतिषेधो वक्तव्यः। वाक्त्वक्स्रुग्दृषदमिति वाक्त्वचस्रुग्दृषदमिति प्राप्नोति। नैष दोषः। अत्रापि परेण
सह समासो भविष्यति। स्रुक्च दृषच्च स्रुग्दृषदं त्वक्च स्रुग्दृषदं च त्वक्स्रुग्दृषदम्। वाक्च त्वक्स्रुग्दृषदं च वाक्त्वक्स्रु
ग्दृषदमिति। होतृपोतृनेष्टोद्गातार एव तर्हि न सिध्यन्ति। इह च सुस्रक्त्वजटकेशेन सुनताजिनवाससा। समन्तशि
तिरन्ध्रेण द्वयोर्वृत्तौ न सिध्यति॥ अस्तु तर्ह्यविशेषेण। अविशेषेण बहुव्रीहावनेकपदप्रसङ्गः। यद्यविशेषेण बहुव्री
हावनेकपदप्रसङ्गः। तत्र को दोषः। तत्र स्वरसमासान्तपुंवद्भावेषु दोषः। तत्र स्वरसमासान्तपुंवद्भावेषु दोषो भवति।
स्वरः। पूर्वशालाप्रियः अपरशालाप्रियः। स्वर।

णं वोपसर्जनसंज्ञार्थं विज्ञायते सुप्सुपेति चानुवर्तते तदात्र बहूनां बहुव्रीहिर्न प्राप्नोति। पूर्वशालाप्रिय इति। यदा बहूनां बहुव्रीहि
संज्ञा तदा पूर्वपदप्रकृतिस्वरेण पूर्वशब्दः स्वाङ्गशिटामदन्तानामित्याद्युदात्तः स्यात्। यदा तु द्वयोरेव बहुव्रीहिसंज्ञा भवतीति पक्षः त
दा पूर्वा शाला पूर्वशालेति पूर्वापरप्रथमेति समासे कृते समासान्तोदात्तत्वे च पूर्वशाला प्रिया अस्येति द्विपदे बहुव्रीहौ कृते पूर्वपद सम:
प्रकृतिस्वरेण शालाशब्दाकार उदात्तः सिध्यति। ननु त्रिपदे बहुव्रीहौ कृते तद्धितार्थोत्तरपदेति तत्पुरुषेणात्र भाव्यमिति कथं दोषो- ३१९
पन्यासः। एवं तर्हि परस्तादयं परिहारो वक्ष्यत इति न तावदत्राश्रितः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चगवप्रिय इति। त्रिपदे बहुव्रीहौ समासान्तो न प्राप्नोति। यदा द्वयोर्बहुव्रीहिरिति पक्षस्तदा पञ्चानां गवां समाहारः पञ्चगवं तत्प्रि-
यमस्येति रूपं सिध्यति। खादिरेतरग्राम्यमिति। खादिरी इतरा ग्राम्या यस्येति त्रिपदे बहुव्रीहौ क्रियमाणे उत्तरपदे पुंवद्भावो विधीय
मानः खादिरी शब्दस्य न प्राप्नोति। यदा तु द्वयोर्बहुव्रीहिरिति पक्षस्तदेतरा ग्राम्या इतरग्राम्येति समासे कृते खादिरी इतरग्राम्यास्ये
ति बहुव्रीहौ सिध्यति पुंवद्भावः न वेति। कश्चित्त्रयाणां पदानां बहुव्रीहौ कृते द्वयोः पदयोस्तद्धितार्थोत्तरपदे इति तत्पुरुषो भिन्नवि
षयत्वाच्च बहुव्रीहितत्पुरुषसंज्ञयोरेकसंज्ञाधिकारेपि नास्ति विरोधः। खादिरेतरग्राम्यमित्यत्र पुंवद्भावसिद्धये कृते तत्पुरुषे-
खादिरी इतरग्राम्यास्येति द्विपदो बहुव्रीहिः क्रियते न तु त्रिपदः। विकारे च प्रत्ययविधानाद्वृद्धिनिमित्तस्येति प्रतिषेधो नास्ति। स्व
रः कथमिति। पूर्वं शालाप्रिय इत्यादावपवादत्वाद्बहुव्रीहिस्वरः प्राप्नोति। विप्रतिषेधादिति। विरोधमात्रं विप्रतिषेधशब्देना-

समासान्तः पञ्चगवप्रियः। समासान्तः। पुंवद्भावः। खादिरेतरग्राम्यम्। नवावयवतत्पुरुषत्वात्। नवा एष दोषः। किं कारणम्। अवयवतत्पुरुषत्वात्।
अवयवोत्र तत्पुरुषसंज्ञः तदाश्रयौ समासान्तपुंवद्भावौ भविष्यतः। स्वरः कथम्। तस्यान्तोदात्तत्वं विप्रतिषेधात्। अन्तोदात्तत्वं क्रि
यतां पूर्वपदप्रकृतिस्वर इति। अन्तोदात्तत्वं भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। विप्रतिषेधे परमित्युच्यते पू
र्वं चान्तोदात्तत्वं परं पूर्वपदप्रकृतिस्वरत्वम्। न परविप्रतिषेधं ब्रूमः। किं तर्ह्यन्तरङ्गविप्रतिषेधम्। निमित्तिस्वरब
लीयस्त्वाद्वा॥ अथवा निमित्तस्वरान्निमित्तिस्वरो बलीयानिति वक्तव्यम्। किं पुनर्निमित्तं को वा निमित्ती। बहुव्रीहिर्नि
मित्तं तत्पुरुषो निमित्ती। तत्तर्हि वक्तव्यं निमित्तस्वरान्निमित्तिस्वरो बलीयानिति। न वक्तव्यम्। एकशितिपात्स्वरव
चनं तु ज्ञापकं निमित्तिस्वरबलीयस्त्वस्य।

त्रोच्यते। हेतुस्त्वन्तरङ्गत्वं निमित्तिस्वरबलीयस्त्वं च। इतरस्तु विप्रतिषेधमूलं परत्वमनेन हेतुत्वेनोक्तमिति मत्वाह नैष युक्त इति। अ-
न्तरङ्गेति। अनुदात्तं पदमेकवर्जमिति वचनाद्द्वयोः स्वरयोरसंभवात् कक्ष्यान्तरप्राप्तत्वाच्च बाध्यबाधकभावाभावादवयवाश्रय
त्वादन्तरङ्गत्वं व्यवस्थाहेतुराश्रीयत इत्यर्थः। अन्तरङ्गोपि सति शिष्टेन बहिरङ्गेणापि स्वरेण बाध्यत इत्यनैकान्तिकमन्तरङ्ग
त्वं मत्वाहेत्वन्तरमाह। निमित्तिस्वरबलीयस्त्वादिति। सति बहुव्रीहौ तदवयवोत्तरपदाश्रयो द्वयोस्तत्पुरुष इति बहुव्रीहेर्निमित्त-
त्वम्। एकशितिपादिति। युक्तारोह्यादिषु पूर्वपदाद्युदात्तार्थः पाठः। एकशब्दस्य कन्नन्तत्वात्स्वाङ्गशिटामिति वाद्युदात्तः तत्त्रि
पदे बहुव्रीहौ कृते द्वयोश्च तत्पुरुषे बहुव्रीहौ प्रकृत्येति सिद्ध आद्युदात्तत्वे ज्ञापनार्थः पाठः संपद्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कः पुनरिति। सर्वथा स्वरस्य सिद्धत्वादकर्तव्य एव पाठो न ज्ञापक इत्यर्थः। निमित्तस्वरस्य तु बलीयस्त्वं वाचनिकं न तु ज्ञापकसिद्धम्। नेदमिति। यद्यपूर्ववचनं क्रियेत बहुव्रीह्यवयवस्तत्पुरुषो भवतीति ततोऽत्र स्याद्दोषः। दिक्संख्ययोस्तूत्तरपदे तत्पुरुषो विधीयत इति दोषाभावः। बहुलवचनादिति। समुदायस्य वृत्तावयवस्यान्या संज्ञा विशेषलक्षणेन विना बहुलवचनान्न प्रवर्तते। अधिकषष्टिवर्ष इति। त्रिपदे बहुव्रीहौ कृते अधिकग्रहणं चानुकीत्यधिकशब्दस्य संख्यासंज्ञात्वात्तद्धितार्थोत्त

यदयं युक्तारोह्यादिष्वेकशितिपाच्छब्दं पठति तज्ज्ञापयत्याचार्यो निमित्तस्वरान्निमित्तिस्वरो बलीयानिति। कः पुनरर्हति युक्तारोह्यादिष्वेकशितिपाच्छब्दं पठितुम्। एवं किल नाम पठ्यते एकः शितिः एकशितिः एकशितिः पादो यस्येति। तच्च न। एवं विग्रहः करिष्यते एकः शितिरेषु त इमे एकशितयः एकशितयः पादा यस्येति एकशितिपादिति। अथाप्येवं विग्रहः क्रियते एकः शितिरेकशितिः एकशितिः पादो यस्येति। एवमपि नार्थः पाठेन। इगन्ते द्विगावित्येष स्वरोऽत्र बाधको भविष्यति। अस्य तर्हि बहुव्रीह्यवयवस्य तत्पुरुषसंज्ञा प्राप्नोति। सुसूक्ष्मजटकेशेन सुनता जिनवाससा। समन्तशितिरन्ध्रेणेति। तत्र को दोषः। तस्यान्तोदात्तत्वं विप्रतिषेधादित्यन्तोदात्तत्वं स्याद्विप्रतिषेधेन। नैष दोषः। नेदं बहुव्रीह्यवयवस्य तत्पुरुषस्य लक्षणमारभ्यते। किं तर्हि। यस्य बहुव्रीह्यवयवस्य तत्पुरुषस्य तस्य तल्लक्षणमस्ति तस्यान्तोदात्तत्वं भविष्यति विप्रतिषेधेन। ननु चास्याप्यस्ति। किम्। विशेषणं विशेष्येण बहुलमिति। बहुलवचनान्न भविष्यति। अस्य तर्हि बहुव्रीह्यवयवस्य तत्पुरुषसंज्ञा प्राप्नोति। अधिकषष्टिवर्ष इति। तत्र को दोषः। तस्यान्तोदात्तत्वं विप्रतिषेधादित्यन्तोदात्तत्वं स्याद्विप्रतिषेधेन। नैष दोषः। इगन्ते द्विगावित्येष स्वरो बाधको भविष्यति। यस्तर्हि नेगन्तः अधिकशतवर्ष इति। इह चाप्यधिकषष्टिवर्ष इति समासान्तः प्राप्नोति। डचः प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थमिति। नैष दोषः। अव्ययादेरित्येवं तत्। किं पुनः कारणमव्ययादेरित्येवं तत्। इह मा भूत्। गोत्रिंशच्चत्वारिंशदिति। बहुव्रीहिसंज्ञा तर्हि प्राप्नोति संख्ययाव्ययासन्नादूराधिसंख्याः संख्येय इति।

रपदेति पदद्वयस्य तत्पुरुषे कृते समासान्तोदात्तत्वं प्राप्नोतीत्यर्थः। अधिकशब्दः कन्नन्तत्वादाद्युदात्तः। बहुव्रीहिसंज्ञा तर्हीति। अधिकषष्टिवर्षेऽपि दोष इति भावः। त्रिपदे बहुव्रीहौ कृते पदद्वयस्य तद्धितार्थोत्तरपदे इति तत्पुरुषं परत्वाद्बाधित्वा संख्ययाव्ययेति बहुव्रीहिः प्राप्नोति। ततश्च बहुव्रीहौ संख्येय इति डच्प्रसङ्गः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नसंख्यामिति। अधिकषष्टिवर्षइत्येवयथास्यादित्येवमर्थमव्यविकन्यायआश्रीयते। तेनाधिकाषष्टिर्वर्षाण्यस्येतिवाक्यमेवभवति। पूर्वे
णेति। अधिकाषष्टिर्येषांवर्षाणामितिवर्षेषुसंख्येयेषुअनेकमन्यपदार्थइतिबहुव्रीहिः प्राप्नोति। संख्येयवृत्तित्वाच्चबहुव्रीहेस्तन्निब
न्धनोऽजपीतिदोषः। बहुव्रीहिगर्भश्चपुनर्वयस्तन्यमिधेयेबहुव्रीहिः प्राप्नोति। प्रत्याख्यातइति। अव्यविकन्यायेनचाधिकाषष्टिर्वर्षा
णामस्येतिवाक्यमेवभविष्यति। अव्यविकन्यायममत्वाह। सर्वथेति। अव्यविकन्यायाश्रयेणाह। यत्तुतदुक्तमिति। वृत्तिविषयेद्व्या-
दीनामपिद्व्येकयोरितिनिर्देशात्तुसंख्यानमात्रवृत्तित्वात्संख्येयस्यान्यपदार्थत्वात्सयोगः प्रत्याख्यायते। अधिकषष्टवर्षस्तिति। अ
धिकंषष्टंवर्षाण्यस्येतित्रिपदेबहुव्रीहौकृतेतद्धितार्थोत्तरपदेतितत्पुरुषेसमासान्तोदात्तत्वंप्राप्नोतिआद्युदात्तत्वंचेष्यते। कर्त-

नसंख्यांसंख्येयेवर्तयिष्यामः। कथमेवंविग्रहःकरिष्यतेअधिकाषष्टिर्वर्षाणामस्येति। यथातर्हिसयोगः प्रत्याख्यायते
तथापूर्वेणप्राप्नोति। कथंचसयोगः प्रत्याख्यायते। अशिष्यः संख्योत्तरपदः संख्येयार्थाभिधायित्वादिति। प्रत्याख्यातेत
स्मिन्योगेसंख्यांसंख्येयेवर्तयिष्यामः। तत्रैवंविग्रहः करिष्यते। अधिकाषष्टिर्वर्षाण्यस्येति। सर्वथावयमधिकषष्टवर्षा-
न्नमुच्यामहे। कथम्। यावतासयोगः प्रत्याख्यायते। अयंचविग्रहोस्तिअधिकाषष्टिर्वर्षाणामस्येति। यत्तुतदुक्तमधि
कषष्टिवर्षोनसिद्ध्यतीतिससिद्धोभवति। कथम्। यावतासचयोगः प्रत्याख्यायते। अयंचविग्रहोस्तिअधिकाषष्टिर्वर्षा
ण्यस्येति। अधिकषष्टवर्षस्तुनसिद्ध्यति। कर्तव्योत्रयत्नः॥ ॥इतिश्रीमहाभाष्येद्वितीयाध्यायस्यप्रथमेपादेप्रथम
माह्निकम्॥ ॥सुबामन्त्रितेपराङ्गवत्स्वरे॥ सुबितिकिमर्थम्। करोष्यटनीनेतदस्ति। असामर्थ्यादत्रनभविष्यति। क
थमसामर्थ्यम्। समानाधिकरणमसमर्थवद्भवतीति। इदंतर्हिपीड्येपीड्यमानेति।

व्योत्रयत्नइति। युक्तारोह्यादिष्वधिकषष्टवर्षशब्दआद्युदात्तार्थोद्रष्टव्यः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृतेमहाभाष्यप्रदी
पेद्वितीयस्याध्यायस्यप्रथमेपादेप्रथममाह्निकम्॥ सुबामन्त्रितेपराङ्गवत्स्वरे॥ सुबितिकिमर्थमिति। आमन्त्रितस्यपदत्वात्तस्मिन्पर
तोविधीयमानस्यपराङ्गवद्भावस्यपदविधित्वात्समर्थपरिभाषोपस्थानात्तिङन्तस्यनभविष्यति। तथाहि। व्यधिकरणस्यतिङन्तस्य
वास्तवमसामर्थ्यंसमानाधिकरणस्यवाचनिकमतिव्याप्तिनिवारणार्थमवश्यंकर्तव्यंषष्ठ्यामन्त्रितकारकवचनमितितेनैवतिङ
न्तस्यसिद्धोनिरासः। क्रियमाणेचसुब्ग्रहणेतीक्ष्णयासूच्यासीव्यन्नित्यादौसुबन्तसमुदायस्याप्राप्तिरित्यव्याप्तिः प्राप्नोतीतिभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करिष्यटन्निति। अधात्वभिहितमितिसापवादत्वान्नात्रिवाचनिकमसामर्थ्यम्। पीड्ये पीड्यमानेति। हे पीड्यमान त्वदीयया पीडयाऽहं पीड्य इत्यस्तिसामर्थ्यम्। अथवा संबोधनपदं क्रियाया एव विशेष्यकमित्यस्तिसामर्थ्यम्। तथा च प्रजा निदेवदत्तेति निघातो भवति। पीड्य इति तास्यनुदात्तेदिति लसार्वधातुकस्यानुदात्तत्वं यक उदात्तत्वादेकारे शउदात्ते नोदात्तइत्येकार उदात्तः। पीड्यमानेत्यस्य पदादुत्तरस्य निघातः। अधात्वभिहितमिति। सर्वनामधातुजमिति दर्शनेन सर्पिःकालकमिति यद्यपि धात्वभिहितं तथापि यत्र क्रियाप्रवृत्तिनिमित्तं स्फुटा च धातुप्रत्ययेन कर्त्रादिप्रतिपत्तिस्तद्धात्वभिहितं गृह्यते। यदप्युक्तं वचनान्तरेणातिव्याप्तिर्वार्यत इति। तदपि न युक्तम्। न हि सूत्रकारो वार्तिककारस्य वचनेनातिव्याप्तिनिवारणं मन्यते। आमन्त्रितस्येति। आमन्त्रिते यो विधीयते स आमन्त्रितसंबन्धी भव

इदं चाप्युदाहरणं करिष्यटन्। ननु चोक्तमसामर्थ्यादत्र न भविष्यतीति। कथमसामर्थ्ये समानाधिकरणमसमर्थवद्भवतीति। नैष दोषः। अधात्वभिहितमित्येवं तत्। आमन्त्रितस्य पराङ्गवद्भावे षष्ठ्यामन्त्रितकारकवचनम्। आमन्त्रितस्य पराङ्गवद्भावे षष्ठ्यन्तमामन्त्रितकारकं च पराङ्गवद्भवतीति वक्तव्यम्। षष्ठ्यन्तं तावत्। मद्राणां राजन्। मगधानां राजन्। आमन्त्रितकारकम्। कुण्डेनाटन्। नास्त्यत्र विशेषः। सति च पराङ्गवद्भावेऽसति वा। इदं तर्हि परशुना वृश्चन्। तन्निमित्तग्रहणं वा। अथवा तन्निमित्तग्रहणं कर्तव्यम्। आमन्त्रितनिमित्तं परस्याङ्गवद्भवतीति वक्तव्यम्। मद्राणां राजन्। तत्तर्ह्यवश्यमन्यतरत्कर्तव्यम्। अवचने हि सुबन्तमात्रप्रसङ्गः। अनुच्यमाने त्वेतस्मिन्सुबन्तमात्रस्य पराङ्गवद्भावः प्रसज्येत। अस्यापि प्रसज्येत।

तीति षष्ठीनिर्देशः। आमन्त्रितकारकमिति। आमन्त्रितेया धातुवाच्या क्रिया तस्याः कारकमित्यर्थः। नास्त्यत्रेति। कुण्डशब्दो न विषयस्यानिसन्तस्येत्याद्युदात्तः। आमन्त्रितस्य पदात्परस्य निघातः। सत्यपि पराङ्गवद्भावे सुबन्तसमुदायस्याद्युदात्तत्वं शेषनिघातश्चेति भेदाभावः। परशुनेति। परशुशब्द आङ्परयोः खनिशृभ्यां डिच्चेति कुप्रत्ययान्तोऽन्तोदात्तः। तन्निमित्तग्रहणं वेति। वाशब्दो विकल्पे। तस्यामन्त्रितस्य यन्निमित्तं तद्वाचि पराङ्गवद्भवतीत्यर्थः। मद्राणां राजन्निति। मद्रनिमित्तं हि राजत्वमित्यस्ति तन्निमित्तत्वम्। भृत्यदेशनिमिता हि राजता। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षत्रेणाग्न इति। क्षत्रमित्रयोराख्यातवाच्यक्रियापेक्षयाकरणत्वादामन्त्रितं प्रतिनिमित्तत्वाभावः। क्रियाद्वारकं तु व्यपेक्षालक्षणं सामर्थ्यमस्तीति स्यात्पराङ्गवद्भावः। इह वचनेनातिप्रसङ्गे निरस्ते पूर्वसूत्र एकार्थीभाव एव सामर्थ्यमाश्रितम्। अन्यथा तु द्विविधमपि सामर्थ्यमाश्रीयेत। किंपुनरत्रेति। गुरुलाघवमनादृत्य प्रयोजनापेक्षः प्रश्नः। गोषु स्वामिन्निति। स्वामीश्वरेति षष्ठी विषये सप्तमी विधानात्ताप्लिकारकत्वम्। निमित्तत्वं तु पूर्वोक्तन्यायेनास्ति। सुबन्तस्येति। क्रियमाणेऽपि सुबन्तग्रहणे सुबन्तसमुदायस्यासुबन्तत्वात्पूर्वस्य च परेण व्यवधानान्न प्राप्नोति। किंपुनरिति। व्यवहितस्यापि परत्वसंभवात्परस्य पराङ्गवद्भावादामन्त्रितानुप्रवेशाद्व्यवधानाद्भविष्यतीति प्रश्नः। अनन्तरत्वादिति। तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानान्निर्दिष्टग्रहणस्यानन्तर्यार्थत्वादप्राप्तिरित्यर्थः। स्वरेऽवधारणाच्चेति। प्रसिद्धं हि लौकिक आनन्तर्ये स्वरे विधीयमाने पराङ्गवद्भावो विधीयते न तु पराङ्गवद्भाव एव कर्तव्ये पराङ्गवद्भावेन

क्षत्रेणाग्ने स्वायुः संरभस्व मित्रेणाग्ने मित्रधेये यतस्व। किंपुनरत्र ज्यायः। तन्निमित्तग्रहणमेव ज्यायः। इदमपि सिद्धं भवति गोषु स्वामिन् पशुषु स्वामिन्। एतद्धि नैव षष्ठ्यन्तं नाप्यामन्त्रितकारकम्॥ सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमनन्तरत्वात्॥ सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानं कर्तव्यम्। तीक्ष्णया सूच्या सीव्यन्। तीक्ष्णेन परशुना वृश्चन्। किंपुनः कारणं न सिध्यति। अनन्तरत्वात्। ननु च परस्य पराङ्गवद्भावे कृते पूर्वस्यापि भविष्यति। स्वरेऽवधारणाच्च। स्वरेऽवधारणाच्च न सिध्यति। स्वरेऽवधारणं क्रियते नानन्तर्ये। परमपि च्छन्दसि॥ परमपिच्छन्दसि पूर्वस्याङ्गवद्भवतीति वक्तव्यम्। आ ते पितर्मरुतां सुम्नमेतु। प्रति त्वा दुहितर्दिवः। ऋणीषद्दुहितर्दिवः॥ अव्ययप्रतिषेधश्च॥ अव्ययानां च प्रतिषेधो वक्तव्यः। उच्चैरधीयान नीचैरधीयान॥

वानन्तर्यं संपाद्यते। स्वात्मनि क्रियाविरोधादतिदेशान्तराभावाच्च। यथोक्तं ग्रहणाग्रहणे ग्रहणाभावदृत्यादि। असति तु स्वरग्रहणे विषयभेदाल्लक्षणं भिद्यत इति परस्य आनन्तर्यव्यपदेशे कर्तव्ये पराङ्गवद्भावे कृते पूर्वस्यापि पराङ्गवद्भावो लभ्यते। न च स्वरार्थमानन्तर्यस्वरशब्देनेहोच्यते। मुख्यार्थसंभवे गौणार्थग्रहणायोगात्। न च तस्मिन्निति निर्दिष्टे पूर्वस्य तस्मादित्युत्तरस्येति परिभाषाद्वयमादेशविधावेवोपतिष्ठते। गोतो णिदूरुदादिभ्यः सार्वधातुक इत्यादावप्युपस्थानदर्शनात्। पितर्मरुतामिति। पितरित्यामन्त्रितनिघाते नानुदात्तं तस्मात्परं मरुतामित्येतदप्यनुदात्तमेव भवति। उच्चैरिति। उच्चैर्नीचैः स्वरादिष्वन्तोदात्तौ पठितौ। अधिकरणप्रक्तिप्राधान्याच्च तन्निमित्तसद्भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनव्ययीभावस्येति। प्रतिषेधप्रतिषेधाद्विधिर्भवति। एतच्चलुङ्लुखस्वरोपचारः ... नमित्येतदनपेक्ष्योक्तं भाष्यकारेण। अन्यथा-
कार्यान्तरेऽव्ययत्वाभावादवक्तव्यमेतत्स्यात्। परमुनावृश्च्नेति। वृश्च्नेति प्रातिप ... मून चाप्रत्ययइति प्रत्ययलक्षणेन प्रातिप
दिकसंज्ञानिषेधो नङिसंबुद्ध्योरिति नलोपप्रतिषेधाज्ज्ञापकात्। तत्रासति स्वरग्रह ... ङ्गवद्भावेन प्रातिपदिकानुप्रवेशात्सुपो-
धातुप्रातिपदिकयोरिति सुपो लुक्प्रसज्येत। स्वरग्रहणे सति सुब्लुकि कर्तव्ये पराङ्गवद्भा ... वः सुबन्तैकान्तइति। पराङ्गवद्भाववि
षयत्वात्पराङ्गवद्भाव उच्यते। पराङ्गवदित्यत्र आमन्त्रितसंनिधानात्परशब्देन गृह्यते। तत ... वन्तमेवेति सुबन्तकार्य एव पराङ्गवद्भा
वोऽन्तरङ्गत्वान्न तु प्रातिपदिककार्य इत्यर्थः। प्रातिपदिकैकान्त इति। अस्याभिप्रायः। आम ... रतो यत्सुबन्तं तत्पराङ्गवद्भवति प
रं चात्र सुब्लोपे कृते प्रातिपदिकमेवेति तदङ्गत्वात्सुब्लोपः प्राप्नोत्येव। प्रत्ययलक्षणेनेति। प्रत्ययो निमित्तं लक्षणं यस्यामन्त्रितस्य पदे

अनव्ययीभावस्य॥ अव्ययीभावस्येति वक्तव्यम्। इह माभूत्। उपाग्न्यधीयान प्रत्यग्न्यधीयान। अथ किमर्थं स्वरेव
धारणं क्रियते। स्वरेवधारणं सुब्लोपार्थम्। स्वरेवधारणं क्रियते सुपो लोपो माभूदिति। परमुनावृश्चन्। न वा सुब
न्तैकान्तत्वात्। न वा कर्तव्यम्। किं कारणम्। सुबन्तैकान्तत्वात्। सुबन्तैकान्तः पराङ्गवद्भावो भवति। प्रातिपदिकैका
न्तस्तु सुब्लोपे। प्रातिपदिकैकान्तस्तु भवति सुब्लोपे च कृते। प्रत्ययलक्षणेन सुबन्तैकान्ततास्यात्। तस्मात्स्वरेवधार
णं न कर्तव्यं सुब्लोपार्थं प्रातिपदिकस्याद्याः सुपो लुगुच्यते। तस्मात्स्वरग्रहणेन नार्थः। इदं तर्हि प्रयोजनं षत्व
णत्वे माभूतामिति। कूपेसिञ्चन्। चर्मनमन्निति। एतदपि नास्ति प्रयोजनम्। इह तावत्कूपेसिञ्चन्निति स्वाश्रयं प
दादित्वं भविष्यति। चर्मनमन्निति पूर्वपदात्संज्ञायामग इत्येतस्मान्नियमान्न भविष्यति।

प्रस्यतेन च सुबैकान्तत्वमित्यर्थः। विशेषणत्वेनाप्युपात्तमामन्त्रितं प्रत्यासत्त्या परशब्देन संबध्यत इति सुबन्ताङ्गवद्भावो विधीयते न तु प्राति
पदिकाङ्गवद्भाव इत्यर्थः। प्रातिपदिकस्याद्या इति। भाष्यकारवचनप्रामाण्यात् सुप्शब्दस्य स्त्रीलिङ्गत्वम्। कूपेसिञ्चन्निति। पराङ्गवद्भावे
सत्येकपद्यात्सकारस्य पदादित्वाभावात्षत्वप्रसङ्गः। चर्मनमन्निति। सति पराङ्गवद्भावे समानपदत्वाण्णत्वं स्यात्। स्वाश्रयमिति। विरोधा
भावादतिदेशेन स्वाश्रयं पदादित्वं न बाध्यते। यच्चेहामन्त्रितस्य कार्यं परशब्देन चोच्यते तत्पूर्वस्य पराङ्गवद्भावात्तत्सहितं भवतु सकार
स्य यत् स्वाश्रयं पदादित्वं तत्केन व्याहन्यते। न चात्रातिदेशिकं कार्यमस्तीति स्वाश्रयं भवत्येव। यथा नमतेदण्डः स्वयमेवेत्यत्र प्राप्।
पूर्वपदात्संज्ञायामिति। पराङ्गवद्भावात् सत्यपि निमित्तनिमित्तिनोः समानपदस्थत्वे पूर्वपदात्संज्ञायामिति नियमादत्रासंज्ञायां
णत्वं न भविष्यतीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु चेति। पूर्वपदशब्दस्य समासाद्यवयवरूढत्वादिति भावः। अविशेषेणेति। व्याप्तिन्यायाश्रयादत्र यौगिकः पूर्वपदशब्दो गृह्यत इत्यर्थः। एवं स्वरग्रहणे प्रत्याख्याते समानाधिकरणस्योपसंख्यानं कर्तव्यम्। परस्य पराङ्गवद्भावे कृतेऽपि विषयभेदात्तल्लक्षणस्या—वर्तनात्पूर्वस्य पराङ्गवद्भावस्यासिद्धत्वात्॥ प्राक्कडारात्॥ ॥प्राग्वचनमिति। अत्रावधित्वद्योतकाक्षेपद्वारेणावधेरप्याक्षेपः। समासइत्येवस्वरितत्वादधिकारोऽस्तु यथा प्रत्यय इति। अनवकाशत्वाच्च समाससंज्ञायाः संज्ञान्तरैः समावेशो भविष्यतीति प्रश्नः। संज्ञानिवृत्त्यर्थमिति। समाससंज्ञायाः संज्ञान्तरविषये अनिवृत्तिर्यथा स्यादित्यर्थः। अन्यथा एकसंज्ञाधिकारात्पर्यायः स्यात्। सत्यां समाससंज्ञायामिति। स्वरितत्वादेवाधिकारे लब्धे प्राक्कडारादित्युपादानसामर्थ्यात्प्राग्ग्रहणमावर्तते। तेन प्राक्समाससंज्ञका भवन्ति समा

ननु च समास एवैतद्भवति पूर्वपदमुत्तरपदमिति। नेत्याह। अविशेषेणैवतद्भवति पूर्वंपदं पूर्वपदम्। उत्तरंपदमुत्तरपदम्॥ प्राक्कडारात्समासः॥ प्राग्वचनं किमर्थम्। प्राग्वचनं समाससंज्ञाऽनिवृत्त्यर्थम्। प्राग्वचनं क्रियते समाससंज्ञाया अनिवृत्तिर्यथा स्यात्। अक्रियमाणे प्राग्वचने अनवकाशा अव्ययीभावादयः संज्ञाः समाससंज्ञां बाधेरन्। तामा बाधिषतेति प्राग्वचनं क्रियते। अथ क्रियमाणेऽपि प्राग्वचने यावता अनवकाशा अव्ययीभावादिसंज्ञाः कस्मादेव न बाधन्ते। क्रियमाणे हि प्राग्वचने सत्यां समाससंज्ञायामेता अवयवसंज्ञा आरभ्यन्ते तत्र वचनात्समावेशो भविष्यति। समाससंज्ञाप्यनवकाशा सा वचनाद्भविष्यति। सानवकाशा समाससंज्ञा। कोऽवकाशः। विस्पष्टादीन्यवकाशः। विस्पष्टं पटु विस्पष्टपटु। व्यक्तं पटु व्यक्तपटु। नैषोऽवकाशः। एषा ह्याचार्यस्य शैली लक्ष्यते यत्तुल्यजातीयं तुल्यलक्षणं च तत्स्य निर्दिशति। *लौकिककाम्यं* ... यनैवावयवकार्यं भवति तेनैव समुदायकार्यमपि भवतीति। येनैव चात्रावयवकार्यं स्वरः क्रियते तेनैव समुदायकार्यं समासोऽपि भविष्यति। विस्पष्टादीनि गुणवचनेष्विति। इदं तर्हि।

सः सन्तोऽव्ययीभावादिसंज्ञका इति समावेशः सिद्ध्यति। अवयवसंज्ञा इति। समाससमूहापेक्षया कस्यचित्समासस्य काचित्संज्ञेत्येवमुक्तम्। समाससंज्ञापीति। ततश्चान्तरेणापि यत्नं समावेशः सिद्ध्यति। विस्पष्टपटुरिति। विस्पष्टं पटुरिति विग्रहः। विस्पष्टादयः प्रवृत्तिनिमित्तस्य पाटवादेर्विशेषणानि न तु द्रव्यस्येति विस्पष्टमिति नपुंसकत्वम्। अत एव मुख्यं सामानाधिकरण्यं नास्तीति तत्पुरुषाभावः। यथा शेष इत्येतल्लक्षणमधिकारश्च तथा सह सुपेत्यपीति समाससंज्ञा प्रवर्तते। अवकाशं निराकर्तुमाह। एषा हीति। शीलेस्वभावे भवा वृत्तिः शैली। अवयवकार्यमिह पूर्वपदप्रकृतिस्वरः। समुदायकार्यं समाससंज्ञा। वृद्धकुमारीवरन्यायेनान्तरेणापि सह सुपेत्येतस्य लक्षणत्वं सिद्ध्यति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काकतालीयमिति। समासाच्च तद्विषयादिति भूतसमासानुवादेन छविधानाद्विशेषलक्षणाभावाच्चेवार्थस्यान्यपदार्थत्वेपि मत्वर्थे बहुव्री हिविधानादुपमानशब्दस्योपमेयवृत्तित्वादन्यपदार्थाभावाद्बहुव्रीहेरभावात्सहसुपेत्यनेनैवात्र समासः कार्यः। तत्र काकतालशब्दौ द्रव्यसहचरितायां क्रियायां वर्तेते। काकस्यागमनमिव चैत्रस्यागमनं तालस्य पतनमिव दस्योरुपनिपात इत्येक इवार्थः। तत्र समासः। तत स्तेन तालेन पतता यथा काकस्य वधस्तथा दस्युना चैत्रस्येति द्वितीय इवार्थः। तत्र च छप्रत्ययः। अत्रापीति। पूर्ववज्ज्ञापनेन समास सिद्धिः। पुनाराज इति। अजिति योगविभागेन तत्पुरुषसंज्ञां विना रूपसिद्धिं मन्यते। तत्पुरुषाश्रय इति। पुनर्गवीति ङीबर्थः टजेवेष्टव्यः। तत्राव्ययं प्रवृद्धादिभिरिति वा मयूरव्यंसकादित्वाद्वा तत्पुरुषः। पुनराधेयमिति। विशेषकार्यादर्शनात्समाससंज्ञामेव मन्यते। अत्रा पीति। ततश्च कुगतिप्रादय इति तत्पुरुषः। तत्र यतोनाव इति धेयशब्दस्याद्युदात्तत्वात्पुनराधेयशब्दे कार उदात्तः। गतिसंज्ञाया स्त्वभावे समासान्तोदात्तत्वं स्यात्। पुनरुत्स्यूतमिति। पुनःशब्दस्य गतिसंज्ञायां सत्यां याथेत्यन्तोदात्तत्वेन भाव्यम्। असत्यां तु समा

काकतालीयमजाकृपाणीयम्। एतदपि नास्ति प्रयोजनम्। अत्रापि येनैवावयवकार्यं प्रत्ययोत्पत्तिः क्रियते ते नैव समुदायकार्यं समाससंज्ञा भविष्यति। समासाच्च तद्विषयादिति। इदं तर्हि पुनाराजः पुनर्गवः। अत्राप्यवश्यं तत्पुरुषसंज्ञा वक्तव्या। तत्पुरुषाश्रयः समासान्तो यथा स्यात्। इदं तर्हि पुनराधेयम्। अत्राप्यवश्यं गतिसंज्ञा वक्त व्या गतिकारकोपपदादित्येष स्वरो यथा स्यात्। इदं तर्हि पुनरुत्स्यूतं वासो देयम्। अत्राप्यवश्यं गतिसंज्ञा वक्तव्या गतिर्गतावितिनिघातो यथा स्यात्। यदि तन्नास्ति पुनश्चनसौ छन्दसि इति सति तस्मिन् तेनैव सिद्धम्।

सान्तोदात्तत्वे नेति विशेषाभावाद्गतिसंज्ञाया अभावात्समाससंज्ञाया एवाभावं मन्यते। अत्रापीति। असत्यां गतिसंज्ञायां समासान्तोदा त्तत्वं स्यात् सत्यां तु गतिरनन्तर इत्यत्रानन्तरग्रहणसामर्थ्यात् याथादिस्वरं बाधित्वोच्छब्दस्य प्रकृतिस्वर उदात्तो भवति। पुनःश ब्दस्य तु शेषनिघातं परत्वाद्बाधित्वा गतिर्गतावितिनिघातो भवति। यदि तन्नास्तीति। छन्दसि स्वरव्यत्ययविधानान्नावश्यं कर्तव्यमिति भा वः। भाषायां तु पुनराधेयादौ स्वरसिद्धये पुनःशब्दस्य गतिसंज्ञा वक्तव्या। काठके तु पुनरुत्स्यूतशब्दोन्तोदात्तः पठ्यते। तत्र स्वरव्यत्य यो बोद्धव्यः प्रवृद्धादेराकृतिगणत्वाद्वा। ननु सह सुपेत्यत्र भाष्यकारो वक्ष्यति। यस्य समासस्यान्यल्लक्षणं नास्ति इदं तस्य लक्ष णं भविष्यतीत्यत्र किमिति समाससंज्ञाया अवकाशो निराक्रियते। एवं मन्यते। असंयुक्ते विधानात्सर्वार्थत्वे समाससंज्ञाया न तु कतिप यविषयमान्यायव्युत्पादनायत्ववकाश निराक्रिया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सह।सह वचनमिति।सुपेतिततीयासहार्थमाक्षिपतिद्वन्द्वे। पूर्वेनेति यथेतिप्रश्नः।एकैकस्येति।यथापुत्रेणस
हागतइतिद्वयोरपिपितापुत्रयोरागमनेनसंबन्धः।एवंसमाससंज्ञापिप्रत्येकंस्यात्।सहग्रहणेत्वेकासमाससंज्ञासहभूतयोर्भवति।किं
चस्यादिति।भवतुप्रत्येकंसमाससंज्ञाकार्येदोषाभावात्।कृत्तद्धितसमासाश्चेत्यत्रसूत्रेसमासश्चसमासश्चेत्येकशेषआश्रयिष्यतेवा
क्यस्यप्रातिपदिकसंज्ञानिवृत्त्यर्थम्।अन्यथाप्रत्ययान्तत्वादेकैकस्यसमासस्यविध्यर्थंसमासग्रहणंस्यात्। एकशेषेतुसमाससमू
हस्यसंज्ञाविधिर्नियमार्थोभविष्यतीतिनकश्चिद्दोषोभवति।समासाच्चतद्विषयादित्यत्रप्रातिपदिकाधिकारात्समाससमूहस्यचप्रा

एवमप्येकासंज्ञेतिवचनान्नास्तियौगपद्येनसंभवः।पर्यायःप्रसज्येत।तस्मात्साग्वचनंकर्तव्यम्॥सहसुपा॥ ॥सह
वचनंकिमर्थम्।सहवचनंपृथक्समासार्थंसहग्रहणंक्रियते।सहभूतयोरेवसमाससंज्ञायथास्याद् एकैकस्यसमा
ससंज्ञामाभूदिति।किंचस्यात्।यद्येकैकस्यसमाससंज्ञास्यात्। इहऋक्पादइतिसमासान्तःप्रसज्येत।
इहराजाश्वइतिद्वौस्वरौस्याताम्।कथंचकृत्वैकैकस्यसमाससंज्ञाप्राप्नोति।प्रत्येकंवाक्यपरिसमाप्तिर्दृष्टेति।तद्यथा
।वृद्धिगुणसंज्ञेप्रत्येकंभवतः।ननुचायमप्यस्तिदृष्टान्तःसमुदायेवाक्यपरिसमाप्तिरिति।तद्यथा।गर्गाःशतंदण्ड्य
न्तामितिअर्थिनश्चराजानोहिरण्येनभवन्तिनचप्रत्येकंदण्डयन्ति।

तिपदिकत्वात्समासादित्येकवचनंनविवक्ष्यतेअनभिधानाद्वाएकस्माच्छप्रत्ययोनभविष्यतीतिभावः। ऋक्पादइति।ऋचपाद
इतिस्यात्।राजाश्वइति।यद्यप्यत्रसमासान्तःप्राप्नोतितथापिरूपभेदाभावात्स्वरद्वयप्रसङ्गोदोषउक्तः।ऋक्पादेपिस्वरद्वय
प्रसङ्गोबोद्धव्यः।कथंचकृत्वेति।एकार्थीभावेसमासविधानात्समुदायस्यचविशिष्टार्थाभिधायित्वात्तस्यैवसंस्कार्यत्वा
त्प्राधान्यात्तत्परतन्त्रत्वादवयवानामप्राधान्यात्समुदायस्यैवहिद्विर्वचनवत्समाससंज्ञाभविष्यतिअन्वर्थसंज्ञाविज्ञानादि
तिभावः।इतरोगृहीताभिप्रायआह।प्रत्येकमिति।एतच्चवृद्धिवार्तिकेव्याख्यातंततएवानुगन्तव्यम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्येतस्मिन्निति। पक्षद्वयेऽस्थितेसामर्थ्यात्कश्चित् कश्चित्पक्षआश्रीयते। तत्रसंयोगसंज्ञावत्समाससंज्ञापूर्वोक्तेनैवन्यायेनसमुदायस्यसंभविष्यति। अथन्यायद्योतनायेहसहग्रहणंक्रियतेवृद्धिगुणसंज्ञयोरपिप्रत्येकमितिवक्तव्यम्। अथतत्रलक्ष्यदर्शनादिवप्रात्यत्येकंगुणवृद्धिसंज्ञेभवतः तदेहापिपूर्वोक्तात्सामर्थ्यात्समुदायस्यसमाससंज्ञाभविष्यतीतिनार्थःसहग्रहणेन। योगाङ्गमिति। योगावयवद्दत्यर्थः। केनेति। सुपाचेन्नार्थोयोगविभागेनेतिप्रश्नः। समर्थेनेति। योगविभागात्तिङन्तेनसहसुपःसमासोभवति। योगविभागश्चेष्टप्रसिद्ध्यर्थइतिसर्वत्रसमासोनभवति। अनुव्यचलदिति। सुबितिसंख्यायाविवक्षितत्वात्पूर्वैवैःसमासःकस्मान्नोः। तत्रसमाससंज्ञायांसत्यांप्राकलप्रतिषेधात्यणादेशोभवति। समासान्तोदात्तत्वंनभवतितिङ्ः। तिङ्इतिनिघातेनबाधितत्वादितिकेचिदाहुः। तत्रानोगितिर्गताविति निघातः विशब्दउदात्तःस्वरितयोर्यणःस्वरितोनुदात्तस्येत्यकारःस्वरितः। एवंत्वनुप्राविशदितिप्रयोजनाभावा

सत्येतस्मिन्नृदृष्टान्तेयदितत्रप्रत्येकमित्युच्यतेइहापिसहग्रहणंकर्तव्यम्। अथतन्त्रान्तरेणप्रत्येकमितिवचनंप्रत्येकंगुणवृद्धिसंज्ञेभवतः इहापिनार्थःसहग्रहणेन। एवंतर्हिसिद्धेसतियत्सहग्रहणंकरोतितस्यैतत्प्रयोजनं योगाङ्गंयथाविज्ञायेत। सतिचयोगाङ्गेयोगविभागःकरिष्यते। सह। सुप्समस्यते। केनसहासमर्थेन। अनुव्यचलद्अनुप्राविशत्। ततःसुपा। सुपाचसहसुप्समस्यते। अधिकारश्चलक्षणंचायस्यसमासस्यान्यल्लक्षणंनास्तिइदंतस्यलक्षणंभविष्यति।

इभाष्यकारेणउदाहरणमवक्तव्यंस्यात्। तस्मात्सतिशिष्टत्वात्समासान्तोदात्तत्वेनात्रभाव्यमित्यपरे। तिङःकत्वस्योक्तत्वात्। प्रातिपदिकत्वेपिसुबनुत्पत्तिः। अन्येत्वाहुः। वचनग्रहणादुक्तेष्वप्येकत्वादिषुप्रथमास्यात्। केवलायाश्चप्रकृतेःप्रयोगाभावादुत्पत्तव्यमत्रप्रथमैकवचनेनतस्यतुहल्ड्यादिलोपःक्रियते। अतएवैकपद्यादामनुप्राविशद्देवदत्तेत्यामरकान्तरमामन्त्रितमितिनिघातप्रतिषेधःसमाससंज्ञायाःप्रयोजनमस्त्येवेतितिङन्तनिघातवादिनआहुः। अधिकारश्चेति। देवदत्तःपचतीतिविशेषणसमासनिवृत्त्यर्थोऽतिङित्यादावुत्तरपदानुपादानादुत्तरपदोपस्थापनार्थश्चेतिभावः। लक्षणंचेति। ननुसहेतियोगविभागेनैवसमासस्यसिद्धत्वात्सुपेत्यस्यलक्षणत्वेनास्तिप्रयोजनम्। नैषदोषः। योगविभागःकतिपयतिङन्तविषयएवेतद्यास्माद्देवभाष्याद्विज्ञायते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनरुत्स्यूतमिति। पुनःशब्दस्यासत्यामपि गतिसंज्ञायां परादिश्छन्दसि बहुलमिति उदात्ताद्युदात्तत्वं समासान्तोदात्तत्वापवादो भ
विष्यतीति मन्यते। अथवा काठकेन्तोदात्तः पठ्यते तदभिप्रायेण पुनःशब्दस्य गतित्वाभावादिदमुदाहरणम्। इवेति। सुपेत्यस्य
लक्षणत्वात् समासे सिद्धे कार्यान्तरविधानार्थं वचनम्। वाससी इवेति। वासःशब्दो वस्तेर्णिदित्यसुन्प्रत्ययान्तत्वादाद्युदात्तः
। समासादुत्पन्नस्य सोरव्ययादिति लुक्। कन्येइति। कन्याराजन्यमनुष्याणामिति फिट्सूत्रपाठात् कन्याशब्दोन्तस्वरितः। अव्य
यी॥ किमर्थमिति। लाघवार्थत्वात् संज्ञाकरणस्याल्पाक्षरा संज्ञा कर्तव्येति प्रश्नः। अन्वर्थसंज्ञेति। इह संज्ञाकरणे न किंचिद् अ
व्ययकार्यं प्राप्यते अनव्ययमव्ययमिति। अव्ययकार्यलाभादित्यर्थः। न वक्तव्यमिति। तदकरणे लुङ्मुखस्वरोपचाराः प्रयोजनमिति क
र्थं परिगणनं क्रियत इति चेत्। इह तु क्रियतामन्वर्थत्वेन वा विशिष्टकार्यविषयमव्ययत्वमनुमास्यत इत्यदोषः। पूर्वपदार्थप्राधा

पुनरुत्स्यूतं वासो देयं पुनर्निष्कृतो रथः॥ इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च॥ इवेन सह समासो विभक्त्यलोपः
पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्। वाससी इव कन्ये इव॥ अव्ययीभावः॥ किमर्थं महती संज्ञा क्रियते। अन्वर्थसंज्ञा
यथा विज्ञायेत। अनव्ययमव्ययं भवतीत्यव्ययीभावः। अव्ययीभावोव्ययसंज्ञो भवतीत्येतन्न वक्तव्यं भवति॥ अ
व्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्ति
साकल्यान्तवचनेषु॥ इह कस्मान्न भवति सुमद्राः सुमगधाः सपुत्रः सच्छात्र इति। समृद्धौ साकल्य इति च प्राप्नोति। नै
ष दोषः। इह कश्चित्समासः पूर्वपदार्थप्रधानः। कश्चिदुत्तरपदार्थप्रधानः। कश्चिदन्यपदार्थप्रधानः। कश्चिदुभय
पदार्थप्रधानः। पूर्वपदार्थप्रधानोव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः अन्यपदार्थप्रधानो बहुव्रीहिः। उभय
पदार्थप्रधानो द्वन्द्वः। न चात्र पूर्वपदार्थप्राधान्यं गम्यते।

न्यं त्वव्ययीभावस्य प्रायिकं न तदन्वर्थसंज्ञया सूच्यते। सूपप्रतीत्यादावुत्तरपदार्थस्य प्राधान्यम्। उन्मत्तगङ्गमित्यादावन्यपदा
र्थप्रधानता॥ अव्ययम्॥ इह कस्मादिति। समुदायस्य संस्कार्यत्वात् प्राधान्यात्तस्यैव विभक्त्याद्यो विशेषणानि अस्ति चात्र
समुदायात् समृद्धिसाकल्यप्रतिपत्तिरिति प्रश्नः। सपुत्र इत्यत्र च साकल्यं प्रतीयते। सपुत्रो भोक्तुमागत इति प्रयोगे पुत्रा अप्य
नेनानीताः न कश्चित्परिशेषित इति संप्रत्ययात्। इह कश्चिदिति। बाहुल्याभिप्रायेणैतदुच्यते क्वचिदन्यथापि दर्शनात् द्वन्द्वे पिप्पली
त्यादौ। अन्यतमप्राधान्यसंभवे अन्वर्थसंज्ञाविज्ञानात् पूर्वपदार्थप्राधान्य एवाव्ययीभावसंज्ञा भवति। वचनसामर्थ्यात्तु पूर्व
पदार्थप्राधान्यासंभवेपि सूपप्रति उन्मत्तगङ्गमित्यादौ प्रवर्तत एव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। अव्ययस्याश्रुतत्वादन्तरङ्गत्वाच्चस्यैवविभक्त्यादयो विशेषणानि। तत्र परोत्तरपदार्थावच्छिन्नाः समृद्ध्यादयः प्रतिपिपादयि-
षितास्तदाव्ययं समृद्ध्यादीनां वाचकमिति तेषां तदर्थता भवति। सुमद्रा इत्यत्र तु मद्रशब्द एव समृद्धिविशिष्टमर्थमाह सुशब्दस्तु स-
मृद्धेर्द्योतको न तु वाचकः। सपुत्र इत्यत्रापि सहशब्दस्तुल्ययोगस्य वाचकः न तु साकल्यस्य। तत्तु प्रकरणादिसहितात्समुदायात्प्र-
तीयते॥ यथा॥ असादृश्य इति किमर्थमिति। सापेक्षत्वादसामर्थ्यं इति। सादृश्य एव च पूर्वप्राप्तनिषेधश्च प्रश्नेऽस्मिन्कारणं न यस्य॥
। यथा देवदत्त इति। समुदायस्य चात्र सापेक्षत्वात्तस्य च प्राधान्यादुपमानस्य चोपमेयं प्रति नित्यसापेक्षत्वात्समासः प्राप्नोति। स-
च सादृश्य इति। प्रकारशब्दस्य सादृश्यार्थत्वात्प्रकारे व्युत्पादितस्य यथाशब्दस्य सादृश्ये वृत्तिरित्यर्थः। अस्त्येवेति। अर्थचत्स्

अथवा नेमे समासार्था निर्दिश्यन्ते। किं तर्हि। अव्ययार्था इमे निर्दिश्यन्ते। एतेष्वर्थेषु यदव्ययं वर्तते तत्सुबन्तेन स-
ह समस्यत इति॥ यथाऽसादृश्ये॥ असादृश्य इति किमर्थम्। यथा देवदत्तस्तथा यज्ञदत्तः। असादृश्य इत्युच्यते तत्रे-
दं न सिध्यति यथाशक्ति यथाबलमिति। किं कारणम्। यथेत्ययं प्रकारवचने थाल् स च सादृश्ये वर्तते। नैष दोषः। अ-
यं यथाशब्दोऽस्त्येवाव्युत्पन्नः प्रातिपदिकं वीप्सावाचि। अस्ति प्रकारवचने थाल् तत्र यद्व्युत्पन्नं प्रातिपदिकं वीप्सा-
वाचि तस्येदं ग्रहणम्। अथ यः प्रकारवचने थाल् तस्य ग्रहणं कस्मान्न भवति। पूर्वेण प्राप्नोति सादृश्य संपत्तीति।
प्रतिषेधवचनसामर्थ्यान्न भविष्यति॥ सुप्प्रतिना मात्रार्थे॥ सुबिति वर्तमाने पुनः सुब्ग्रहणं किमर्थम्। अ-
व्ययमित्येवं तद्भूत सुब्मात्रे यथा स्यात्। माषप्रति। सूपप्रति। ओदनप्रति॥

त्वारम्भाद्व्युत्पन्नानामपि सम्भवो वगम्यते। वीप्सावाचीति। वीप्साग्रहणमुपलक्षणं तेन योग्यतापदार्थानतिवृत्ती अपि यथार्थौ त-
स्येदमिति। सूत्रेऽस्मिन्नित्यर्थः। प्रतिषेधवचनसामर्थ्यादिति। यथार्थे यदव्ययमिति पूर्वेणैव सिद्धे समासे सादृश्यप्रतिषेधार्थत्वाद-
स्यारम्भस्य॥ सुप्प्रतिना॥ सुबिति वर्तमान इति। सुबामन्त्रितद्रूत्यतः। अव्ययमित्येवमिति। अव्ययग्रहणं संबद्धमभूदित्यर्थः। या-
वदवधारण इत्यत्र यावच्छब्दोऽव्ययमेव संगृहीतः तथा च यावन्त्यमत्राणीत्यनव्ययेन वाक्यं प्रदर्शितं। अन्यथा नित्यसमासत्वा-
द्वाक्यं न स्यात्। स्वरादीनां च दोषामन्यमहर्दिवामन्याराणीरिति वृत्तिविषये सत्त्वप्रधानता दर्शनान्मात्रावतिवृत्तिरविरुद्धेति अव्यय-
स्यैवायं समासः स्यात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अक्ष॥ तृतीयान्तादिति॥ विभक्त्यन्तरनिरासार्थमेतदुक्तं न्यायाच्चैतत्सिद्ध्यति। अक्षादीनां वर्तनक्रियायां कर्तृत्वादित्याहुः। पूर्वोक्तस्येति। पूर्ववृत्तस्येत्यर्थः। अनेकार्थत्वाद्धातूनां नियतविषयत्वाच्च वचिरिह वर्तने वर्तते। तदेव यथा न तदिति तच्छब्देन परामृश्यते। अभिधानार्थे तु वचौ तच्छब्देन परामर्शो न संबद्धः स्यात्। अयथाद्योतन इति। जयकाले अक्षादीनामेकरूपं यद्वर्तनं तद्विपरीतं पराजये यद्वर्तनं तद्यदा परिणा द्योत्यते तदा समासः। एकवचनान्तयोरिति। समासे द्वित्वाद्यनवगमादेकत्वस्यान्यनिरपेक्षत्वादन्तरङ्गत्वादवगतिसंभवान्न्यायप्राप्तमेतदित्याहुः। यदुक्तमभेदैकत्वसंख्या वृत्तौ गम्यत इति तद्बाहुल्याभिप्रायेण। कितवव्यवहार इति। पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा भवति। तत्र यदा सर्वे एकरूपाः पतन्ति तदा पा

अक्षशलाकासंख्याः परिणा॥ अक्षादयस्तृतीयान्ताः परिणा पूर्वोक्तस्य यथा न तद् अयथाद्योतने। अक्षादयस्तृतीयान्ताः परिणा सह समस्यन्त इति वक्तव्यम्। पूर्वोक्तस्य यथा न तत्। अयथाजातीयके द्योत्ये। अक्षेणेदं न तथा वृत्तं यथा पूर्वमिति। अक्षपरि शलाकापरि॥ अक्षशलाकयोश्चैकवचनान्तयोः॥ अक्षशलाकयोश्चैकवचनान्तयोरिति वक्तव्यम्। इह माभूद् अक्षाभ्यां वृत्तम् अक्षैर्वृत्तम्। कितवव्यवहारे च॥ कितवव्यवहार इति वक्तव्यम्। इह माभूद्। अक्षेणेदं न तथा वृत्तं शकटेन यथा पूर्वमिति॥ विभाषापपरिबहिरञ्चवः पञ्चम्या॥ योगविभागः कर्तव्यः। विभाषेत्ययमधिकारः। ततः अपपरिबहिरञ्चवः पञ्चम्येति। अपपरिबहिरञ्चवः पञ्चम्या। पञ्चमीग्रहणं शक्यमकर्तुम्। कथम्। सुबन्तेनेति वर्तते। एतैश्च कर्मप्रवचनीययोगे पञ्चमी विधीयते तत्रान्तरेणापि पञ्चमीग्रहणं पञ्चम्यन्तेन समासो भविष्यति। इदं तर्हि प्रयोजनम्। बहिःशब्देन योगे पञ्चमी न विधीयते तत्रापि यथा स्याद् बहिर्ग्रामं बहिर्ग्रामात्॥

तथिता जयति। अन्यथा तु पाते पराजीयते॥ विभा॥ योगविभाग इति। अन्यथेहैवास्योपयोग आशङ्क्येत योगविभागे त्वधिकारो गम्यते। अपपरिशब्दौ परस्परसाहचर्यादिह वर्जनार्थौ गृह्येते तौ च कर्मप्रवचनीयौ तद्योगे पञ्चम्येव विहिता। बहिर्योगे पि बहिर्योगे चोपसंख्यानमिति विहिता अञ्चूत्तरपदलक्षणा च विहिता। प्राग्ग्रामदित्यादौ तु समासो न भविष्यति। पूर्वपदार्थप्राधान्य एव सति संभवे अव्ययीभावस्य विधानादित्यभिप्रायेणाह। पञ्चमीग्रहणमिति। एतैश्चेति। वक्ष्यमाणापेक्षया बहुवचननिर्देशः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा॰ कै॰ अथेति। बहिर्गतोऽस्मादादित्यपादाने पञ्चमी सद्भावात्कथं तद्विधानं ज्ञाप्यत इति प्रश्नः। पञ्चमीग्रहणसामर्थ्यादिति। बहिर्गतो- २१२
३२६ ग्रामादित्यत्रासामर्थ्यात्समासेन न भवितव्यं. तस्मात्षष्ठीविषये पञ्चमी बहिर्योगेनुमीयते ततस्तदुपसंख्यानं न कर्तव्यम्। यस्य
॥ किमुदाहरणमिति। लक्ष्यलक्षणयोर्द्वयोरप्यायामवत्त्वात्सन्दिहानः पृच्छति। गङ्गा चैव लक्षणमिति। अनेकदेशव्याप्त्या ग-
ङ्गाया आयामवत्त्वेनानेकजनापेक्षया प्रसिद्धत्वात् तस्या एव लक्षणत्वम्। ततो यद्यपि कस्यचित्पुरुषस्य हास्तिनपुरमा-
यामत्वेन प्रसिद्धं न गङ्गा तथापि न तदपेक्षया प्रयोगव्यवस्था। किं तर्हि प्रचुरलोकापेक्षया। अथ वेति। लक्षणेनेत्यस्यानुवृत्त्या

अथ क्रियमाणेऽपि पञ्चमीग्रहणे यावता बहिः पूर्वेण योगे पञ्चमी न विधीयते कथमिवेतत्सिद्ध्यति। पञ्चमीग्रहणसाम
र्थ्यात्॥ आङ्मर्यादाभिविध्योः॥ मर्यादाभिविधिग्रहणं शक्यमकर्तुम्। कथम्। पञ्चम्येति वर्तते। आङा च कर्मप्रवचनीये
न युक्ते पञ्चमी विधीयते तयोश्चैवार्थयोराङ् कर्मप्रवचनीयसंज्ञो भवति नान्यत्र॥ यस्य चायामः॥ किमुदाहरणम्। अ
नुगङ्गं हास्तिनपुरम्। अनुगङ्गं वाराणसी। अनुशोणं पाटलिपुत्रम्। यस्य चायाम इत्युच्यते गङ्गा च। आयतता वारा
णस्यायतता तत्र कुत एतद् गङ्गया सह समासो भविष्यति न पुनर्वाराणस्येति। एवं तर्हि लक्षणेनेति वर्तते। गङ्गा
चैव लक्षणं न वाराणसी। अथवा यस्य चायाम इत्युच्यते। गङ्गा चाप्यायता वाराणस्याप्यायता तत्र प्रकर्षगतिर्विज्ञा
स्यते साधीयो यस्यायाम इति। साधीयश्च गङ्गायाः न वाराणस्याः॥ तिष्ठद्गुप्रभृतीनि च॥ किमर्थश्चकारः। एवकारार्थः।
तिष्ठद्गुप्रभृतीन्येव। क मा भूत्। परमं तिष्ठद्गु॥ तिष्ठद्गु कालविशेषे॥ तिष्ठद्गु कालविशेष इति वक्तव्यम्। तिष्ठन्ति गावो-
ऽस्मिन्काले स तिष्ठद्गु। वहद्गु॥ खलेयवादीनि प्रथमान्तान्यन्यपदार्थे॥ खलेयवादीनि प्रथमान्तान्यन्यपदार्थे समस्यन्त
इति वक्तव्यम्। खलेयवम्। खलेबुसं लूनयवम्। पूनयवम्। पूयमानयवम्॥

विनापीष्टसिद्धिं दर्शयति। उपमानोपमेयभावे चायं समासद्रष्यते न्यूनगुणं चोपमेयं परिपूर्णगुणमुपमानं तत्र संपूर्णगुणसन्निधौ-
न्यूनगुणमसद्गुणमिव प्रतिभातीति सामर्थ्यात्प्रकर्षगतिर्विज्ञायते। प्रकृष्टाप्रकृष्टसंनिधौ च प्रकृष्टस्य कार्येण संबन्धो नेतरस्य॥ ति
ष्ठद्गु। किमर्थ इति। समुच्चेतव्यस्याभावात्प्रश्नः। एवकारार्थ इति। अनेकार्थत्वान्निपातानामिति भावः। तेन तिष्ठद्गुप्रभृतीन्येवैकार्थीभा रामः
वविषयाणि भवन्ति। न तु शब्दान्तरेणैकार्थीभावं प्रतिपद्यन्त इत्यर्थः। वहद्गु इति। अस्य कालविशेषवृत्तित्वप्रदर्शनार्थमुपक्षेपः ३२६
खलेयवादीनीति। अव्यतिरिक्त एव प्रातिपदिकार्थ एषां प्रयोगः कर्तव्यो नान्यत्रेति भावः। अन्यपदार्थ इति। न काल एवापि त्वन्यत्रापीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पारे॥ वावचनमिति॥ महाविभाषयैव च वाक्यस्य षष्ठीसमासस्य च सिद्धत्वादिति भावः। इतरोऽन्यायप्रपञ्चार्थस्य वाचावाजल्पयितुं स्वाभिप्रा
यमप्रकाशयन्नाह। विभाषेति। अयमपीति। षष्ठीसमासे प्राप्ते अव्ययीभाव आरभ्यते स नित्यं बाधकः प्राप्त इति महाविभाषाधिकारा
द्विकल्पेन बाधको भवतीति पक्षे षष्ठीसमासः सिद्ध्यति सोऽपि विकल्पेन विधीयत इति वाक्यमपि भविष्यतीत्यर्थः। अत उत्तरमिति
। एतस्मात्पक्षादुपरीत्यर्थः। वक्तव्यमिति। कृत्याश्चेत्यावश्यके कृत्यः। एकदेशिप्रधान इति। ननु पूर्वकाय इत्यादौ पूर्वपदार्थ ए
कदेशः प्रधानं न त्वेकदेशी। एवं तर्हि एकदेशिनोऽनूद्यमानत्वादप्राधान्यं समासस्य तु विधेयत्वात् प्राधान्यम्। तत्रैकदेशि
नः प्रधानमिति षष्ठीसमासेन समास उच्यते। अथवा प्राधान्येन निमित्तत्वं लक्ष्यत इति बहुव्रीहावपि न दोषः। समासतद्धितानां

पारेमध्येषष्ठ्यावा॥ वावचनं किमर्थम्। विभाषा समासो यथा स्यात्। समासेन मुक्ते वाक्यमपि यथा स्यात् पारं गङ्गाया इति।
नैतदस्ति प्रयोजनम्। प्रकृता महाविभाषा तया वाक्यमपि भविष्यति। इदं तर्हि प्रयोजनम्। अव्ययीभावेन मुक्ते षष्ठी
समासो यथा स्याद् गङ्गापारमिति। एतदपि नास्ति प्रयोजनम्। अयमपि विभाषा षष्ठीसमासोऽपि तावुभौ वचनाद्भविष्य
तः अत उत्तरं पठति॥ पारे मध्ये षष्ठ्या वा वचनम्। पारे मध्ये षष्ठ्या वेति वक्तव्यम्। अवचने हि षष्ठीसमासाभावो यथै
कदेशिप्रधाने। अक्रियमाणे हि वावचने षष्ठीसमासस्याभावः स्याद् यथैकदेशिप्रधाने। तद्यथा। एकदेशिसमासे
न मुक्ते षष्ठीसमासो न भवति। किं पुनः कारणम्। एकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति। समासतद्धितानां वृ-
त्तिर्विभाषा वृत्तिविषये नित्योपवादः। इह पुनर्वावचने क्रियमाणे। एकया वृत्तिर्विभाषा अपरया वृत्तिविषये नित्यो
पवादः। एकारान्तनिपातनं च। एकारान्तनिपातनं च कर्तव्यम्। पारेगङ्गमिति। न कर्तव्यम्। सप्तम्या अलुका सिद्धम्
। भवेत् सिद्धं यदा सप्तमी यदा त्वन्या विभक्तिर्यस्तदा न सिद्ध्यति॥

मिति। तुल्यन्यायत्वाद्विचारयतद्धिता अपि निर्दिष्टाः। इह वाक्येनाभिधाने प्राप्ते वृत्तिरारभ्यमाणा वाक्यस्य बाधिका प्राप्नोतीति
विकल्पेन वाक्यस्य पक्षेऽनुज्ञानं क्रियते। तत्रापवादेऽपि विकल्पेन विधीयमाने विकल्पो वाक्यस्यैवानुज्ञानं करोतीति उत्स
र्गस्य नित्येन बाधेन भाव्यम्। तत्र वाग्रहणेनोत्सर्गोऽपि पक्षेऽभ्यनुज्ञायत इति त्रैरूप्यं सिद्ध्यति। एकयेति। विभाषयेत्यर्थः।
अपरयेति। इदमेव वावचनमुदश्वितोऽन्यतरस्यामित्यन्यतरस्यांग्रहणं च ज्ञापकं यत्रोत्सर्गापवादौ वृत्तिषु विभाषा तत्रा
पवादेन मुक्त उत्सर्गो न भवतीति। सप्तम्या अलुकेति। तत्पुरुषे कृतीति बहुलग्रहणादिति भावः। यदा त्वन्या इति। पारेग
ङ्गादागत इत्यादौ सप्तम्यर्थाभावात्सप्तम्यभावः॥

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदीभिः॥ अर्थविशेषमनुपादायपूर्वपदोत्तरपदमात्रनिर्देशेन समासोयंविधीयमानोद्विगोरिवबहुव्रीहेरपिबाधकःस्यादितिनदीभिरितिवार्तिकारम्भः। नवक्तव्यइति। भाष्यकारोवार्त्तिकंप्रत्याचष्टे। पूर्वाचार्यविहितगुरुसंज्ञाश्रयणाद्गुपाधीनांपूर्वाचार्याःसंज्ञाव्यधिषततदुपाधीनामेवैताभवन्ति। नचात्रेति। द्वीरावतीकइत्यादौ। ननुपञ्चनदंद्वियमुनमित्यादौमूलोदाहरणेऽपिपूर्वपदार्थप्राधान्यंनास्ति। समाहारोह्यत्रसमासार्थः। सच यदिसमाहरणंसमाहारइतिभावरूपस्तदान्यपदार्थप्राधान्यम्। अथसमाह्रियतइतिसमाहारस्तथापिद्वेयमुनेसमाहृतेद्वियमुनमितिपूर्वपदार्थविशिष्टउत्तरपदार्थःप्रधानम्। नैषदोषः। समाह्रियमाणार्थःसमाहारः तत्रपूर्वंद्विशब्दार्थप्रक्रमेकेद्वेइत्याकाङ्क्षायांयदायमुनेइत्युच्यतेतदोत्तरपदार्थस्यविशेषणत्वंविशेष्यत्वंपूर्वपदार्थस्य। अथवावृत्तिविषयेद्व्यादयःसंख्यानमात्रेवर्तन्तइतियमुनयोर्द्वित्वमित्यत्रार्थेद्वियमुनशब्दोवर्ततइतिभवत्येवपूर्वपदार्थप्राधान्यम्। इदानींचोदकोन्यपदार्थमाक्षिपति। ननुचेति। अयंभावः। द्वीरावतीकइतिदेशविशेषोभिधीयते। सचपूर्वोत्तरपदयोःसहितयोरर्थइतिद्वाभ्यामप्यसौव्यपदिश्यते। ततःपूर्वपदार्थत्वाद्देशस्यतस्यप्राधान्यात्प्राप्नोत्यव्ययीभावः। एतदेवेति। सिद्धान्तवादी। अस्याभिप्रायः। समासेनान्यपदार्थःप्रतीयतेनतुपूर्वोत्तरपदाभ्यांतयोरन्वयव्यतिरेकाभ्यामर्थान्तराभिधायित्वावधारणात्। तथाहि। द्विशब्दोद्वित्वावच्छिन्नंसंख्येयमात्रमाहनदेशम्। इरावतीशब्दोपिनदीविशेषमाह नदेशमितिद्विशब्दोदेशस्यावाचकइतिकथंपूर्वपदार्थप्राधान्यमभिधीयते। अपिचेति। त्वत्पक्षाभ्युपगमोदोषवानित्यर्थः। ॥

नदीभिश्च॥ नदीभिःसंख्यासमासेऽन्यपदार्थेप्रतिषेधः॥ नदीभिःसंख्यासमासेऽन्यपदार्थेप्रतिषेधोवक्तव्यः। द्वीरावतीकोदेशः। त्रीरावतीकोदेशः। नदीभिःसंख्येतिप्राप्नोति। नवक्तव्यः। इहकश्चित्समासः पूर्वपदार्थप्रधानः। कश्चिदुत्तरपदार्थप्रधानः। कश्चिदन्यपदार्थप्रधानः। कश्चिदुभयपदार्थप्रधानः। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। अन्यपदार्थप्रधानोबहुव्रीहिः। उभयपदार्थप्रधानोद्वन्द्वः। नचात्रपूर्वपदार्थप्राधान्यंगम्यते। ननुचयद्येनोच्यतेसतस्यार्थोभवति। अत्रचवयमेताभ्यांपदाभ्यामेतमर्थमुच्यमानंपश्यामः। एतदेवनजानीमः यद्येनोच्यतेसतस्यार्थइति। अपिचान्यपदार्थप्रधानतानकल्प्येतचित्रगुः शबलगुरिति। किंकारणम्। अत्रापिह्विवयमेताभ्यांशब्दाभ्यामेतमर्थमुच्यमानंपश्यामः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चोदकश्चोद्यमुद्भावितं परिहरति। यद्यपीति। स स्वपरस्य चोद्यमापादयति। इहापीति। प्राप्नोतीत्यन्तम्। अयमभिप्रायः। पूर्वपदोत्तरपदव्यतिरेकेण समासाभावात्तयोरेव समुदितयोर्देशोऽर्थ इति पूर्वोक्तन्यायेन पूर्वपदस्याप्यसावर्थ इति प्राप्नोत्येवाव्ययीभावः। एवं तर्हीति। पुरस्तादपवादन्यायेनायं द्विगुमेव बाधते बहुव्रीहिणा तु परत्वाद्बाध्यते शेषग्रहणं च तत्र प्रत्याख्यातं त्रिकापेक्षो वा शेषः। एकनदीतर इति। यदि समाहारग्रहणं न क्रियते तदा पुरस्तादपवादा इत्यनेन न्यायेनायं समासः पूर्वकाले केति समासं बाधेत समाहारे तु परत्वाद्द्विगुः स्यात्। ततश्चैकनदीत्यत्राव्ययीभावे कृते तन्निबन्धनो नदीपौर्णमास्याग्रहायणीभ्य इति वा टच् प्राप्नोति नपुंसकत्वं चायस्तु गोदावर्याश्च नद्याश्चेत्यच् समासान्तः सोऽप्यत्यन्तवेत्यत्र योगविभागे न क्रियते सचेष्टप्रसिद्ध्यर्थ इति तत्पुरुष

यद्यप्येताभ्यां पदाभ्यामेषोऽर्थ उच्यते न्यपदार्थोऽपि गम्यते तत्रान्यपदार्थाश्रयो बहुव्रीहिर्भविष्यति। इहापि तर्हि यद्यप्यन्यपदार्थोऽपि गम्यते तत्र स्वपदाश्रयो व्ययीभावः प्राप्नोति। एवं तर्हीदमिह संप्रधार्यमव्ययीभावः क्रियतां बहुव्रीहिरिति। बहुव्रीहिर्भविष्यति विप्रतिषेधेन। भवेदेकसंज्ञाधिकारे सिद्धं परंकार्यत्वे तु न सिद्ध्यति। आरम्भसामर्थ्याद्व्ययीभावः प्राप्नोति। परंकार्यत्वाच्च बहुव्रीहिः। परंकार्यत्वे च न दोषः। नदीभिः संख्यायाः समाहारे व्ययीभावो वक्तव्यः। स चावश्यं वक्तव्यः। सर्वमेकनदीतरे॥ द्विगुश्च॥ द्विगोस्तत्पुरुषत्वे कानि प्रयोजनानि। द्विगोस्तत्पुरुषत्वे समासान्ताः प्रयोजनम्। द्विगोस्तत्पुरुषत्वे समासान्ताः प्रयोजयन्ति। पञ्चगवं दशगवं पञ्चराजं दशराजम्। द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः॥ श्रितादिषु गमिगाम्यादीनामुपसंख्यानम्॥ श्रितादिषु गमिगाम्यादीनामुपसंख्यानं कर्तव्यम्।

न्योगादपूर्णादेकनदीत्यत्र न प्रवर्तते। अव्ययीभावे तु पञ्चनदमित्यत्र भवत्येव। एकापूपीवत्समाहारविवक्षायामेकनदमेकनदीति भवतीत्यादुः॥ द्विगुः॥ ॥समासान्ता इति। यद्यपि टजचावेव तत्पुरुषनिबन्धनौ पञ्चगवं द्व्यङ्गुलमिति तथापि प्रकृतिभेदादिह बहुवचननिर्देशः। पञ्चराजमिति। अकारान्तोत्तरपदत्वाभावात्स्त्रीत्वाभावः। यदा तु समासार्थोत्तरपदान्तः समासान्त इति पक्षस्तदा तु पात्रादित्वात्स्त्रीत्वाभावः। द्वितीया॥ गमिगाम्यादीनामिति। औणादिकानामन्येषां च संग्रहार्थमुभयोरुपादानम्।॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ग्रामगमीतिगत्यर्थकर्मणीत्यत्रद्वितीयाग्रहणमपवादविषयेपिविधानार्थमितिक्तप्रयोगेद्वितीयैवभवतिइतिवक्ष्याः प्राप्तिरेव
वनास्तीतियेतस्याअकेनोरितिनिषेधंवर्णयन्तितेपूर्वापरविस्मरणशीलत्वादुपेक्ष्याः।भाष्यकारेणतुगत्यर्थसूत्रस्यप्रत्याख्याना
तू क्तप्रयोगेषष्ठ्येवेष्यतइतितद्दर्शनेसौत्रःषष्ठीनिषेधः।श्रितादिभिरिति।यःकष्टंश्रितःकष्टमनेनश्रितमितिबहुव्रीहिणोववि-
दक्षितार्थागमादर्थरूपस्वरभेदाभावात्तत्पुरुषोनविधेयइत्यर्थः।अहीनवाचिन्याइति।यःकष्टंश्रितः कष्टंतेननहीनमित्यर्थइ
तिभावः।अयतिर्हित्रगतौवर्ततइतिगत्यर्थत्वात्कर्तरिक्तः।ततःश्रितपतितगतैःसमासोयंनविधेयः।अतीतादिभिस्तुस्वरसि-
द्ध्यर्थोविधेयः।तैर्हितत्पुरुषेसतिथाथादिस्वरेणभाव्यम्।अतीतात्यस्तयोरहीनइतिनिषेधात् प्राप्तापन्नयोरहीनेद्वितीयानुप

ग्रामंगमीग्रामगमी।ग्रामंगामीग्रामगामी।श्रितादिभिरहीनेद्वितीयासमासवचनानर्थक्यंबहुव्रीहिकृतत्वात्।श्रि
तादिभिरहीनवाचिन्याद्वितीयायाःसमासवचनमनर्थकम्।किंकारणम्।बहुव्रीहिकृतत्वात्।इहयः कष्टंश्रितःक
ष्टमनेनश्रितंभवतीतितत्रबहुव्रीहिणासिद्धम्।अहीनेद्वितीयास्वरवचनानर्थक्यंच।अहीनेद्वितीयापूर्वपदंप्रकृति
स्वरंभवतीत्येतच्चस्वरवचनमनर्थकम्।किंकारणम्।बहुव्रीहिकृतत्वादेव। जातिस्वरप्रसङ्गस्तु।जातिस्वरप्रसङ्ग
स्तुप्राप्नोतिग्रामगतः अरण्यगतइति।जातिकालसुखादिभ्योनाच्छादनात्क्तोऽकृतमितप्रतिपन्नाइति।तत्रजाता
दिषुवाचनात्सिद्धम्।पदेतद्वाजातइतिएतद्वाजातादिष्विति वक्ष्यामि।इमेजातादयोभविष्यन्ति।ननुचभेदोभवति।
बहुव्रीहौसतिसमासान्तोदात्तत्वेनापिभवितव्यंपूर्वपदप्रकृतिस्वरत्वेनापि।तत्पुरुषत्वेसतिपूर्वपदप्रकृतिस्वरत्वेनैव।

सर्गइतिनिषेधात्पूर्वपदप्रकृतिस्वरोनास्ति।बहुव्रीहौतुपूर्वपदप्रकृतिस्वरेणभाव्यम्।यदातुजातिकालसुखादीनिपूर्वपदानितदातत्रा
पिबहुव्रीहितत्पुरुषयोःस्वरभेदाभावः।बहुव्रीहिकृतत्वादिति ।बहुव्रीहिणारूपस्यसाधितत्वादित्यर्थः।जातिस्वरप्रसङ्ग इति।य
दिबहुव्रीहिरेवक्रियतेतदाजातिकालेत्यन्तोदात्तत्वंप्राप्नोतीत्यर्थः।बहुव्रीहिवादीस्वरदोषंपरिहरति। तत्रेति।वाजातइतिन्या
समपास्यवाजातादिष्वितिवक्ष्यतेतेनपक्षेअन्तोदात्तत्वंपक्षेपूर्वपदप्रकृतिस्वरत्वमितिस्वरद्वयसिद्धिः।इमेइति।श्रितगतपति-
तप्राप्ताः। ततश्चाहीनेद्वितीयेतिनवक्तव्यमितिलाघवंभवति।तत्पुरुषवाद्याहननुचेति।बहुव्रीहिवाद्याहनास्तिभेदइति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वौ स्वरावितिः। तत्पुरुषे अह्नीने द्वितीये इति पूर्वपदप्रकृतिस्वरः बहुव्रीहौ जातिकालेत्यन्तोदात्तत्वम्। द्विस्वरत्वमिति। वाजातादिष्विति-
सूत्रन्यासेन। एवं तर्हीति। ततश्च बहुव्रीह्यभावात् कष्टश्रितइत्यादावह्नीने द्वितीयेति पूर्वपदाद्युदात्तत्वं भवति। निष्ठा च द्व्यजनादि
त्याद्युदात्तत्वात् कष्टशब्दस्य न तु जातिलक्षणबहुव्रीहिनिबन्धनमन्तोदात्तत्वम्। अव्यविकन्यायश्चानेन ज्ञापकेन स्मारितः। राज्ञः
सखेति। सख्यस्योभयाधिष्ठानत्वाद्राजा सखास्येत्ययमर्थोऽन्तर्भूत इति बहुव्रीहिः स्यात् अस्मात्तु ज्ञापकान्न भवति। अत्र कश्चिदुत्स-
र्गापवादन्यायेन बहुव्रीह्यभावं मन्यमान आह नैतदिति। अर्थभेदे बहुव्रीहौ प्राप्ते तत्पुरुषस्यारम्भात्। ज्ञापकता अपवादवादिनो-
ऽत्राहो पुरुषिके वा तत्पुरुषारम्भे बहुव्रीहिबाधलक्षणं तु फलं न भिद्यते। विशेषविहितेनेति। श्रितादुपादानेन विधानादस्य-
नास्ति भेदः योऽपि हि तत्पुरुषमारभते न तस्य दण्डवारितो बहुव्रीहिः। तत्र तत्पुरुषे सति द्वौ समासौ द्वौ स्वरौ बहुव्रीहे
सति एकः समासो द्विस्वरत्वम्। एवं तर्हि सिद्धे सति यत्तत्पुरुषं शास्ति तज्ज्ञापयत्याचार्यः समानार्थे केवलं विग्रहभे
दाद्यत्र तत्पुरुषः प्राप्नोति बहुव्रीहिश्च तत्र तत्पुरुष एव भवति। किमेतस्य ज्ञापने प्रयोजनम्। राज्ञः सखा राजसखः
राजा सखा अस्येति बहुव्रीहिर्न भवति। नैतज्ज्ञापकसाध्यमपवादैरुत्सर्गा बाध्यन्त इति बाधकेनानेन भवितव्यं सा
मान्यविहितस्य विशेषविहितेन। अथ न सामान्यविहितः यदुच्यते बहुव्रीहिकृतत्वादिति। एतदयुक्तम्। अस्ति
खल्वपि विशेषो बहुव्रीहेस्तत्पुरुषस्य च। किं शब्दकृतः अथार्थकृतः। शब्दकृतश्चार्थकृतश्च। शब्दकृतस्तावद्ब
हुव्रीहौ सति कपा भवितव्यम्। तत्पुरुषे सति न भवितव्यम्। अर्थकृतः। तत्पुरुषे सति रुहादीनां क्तः कर्तरि भवति।

विशेषविहितत्वम्। अथ नेति। कष्टं श्रित इति स्वपदार्थे तत्पुरुषविधानात्तत्र च बहुव्रीहेरप्राप्तत्वान्नास्ति सामान्यविहितत्वम्।
अन्तर्भूतश्चार्थो न शब्दसंस्कारनिमित्तं ———————— किं तु शब्दवाच्य एव यदुच्यत इति। अर्थभेदात् श्रितादिग्रहणं
कृतमिति भावः। ननु कष्टश्रित इति समासप्रयोगे लोके विग्रहवाक्याप्रयोगात् तात्पर्यभेदादस्ति बहुव्रीहिकृतत्वमित्याशङ्क्याह
। अस्ति खल्वपीति। पूर्वोक्तेन न्यायेनार्थरूपस्वरेषु विशेषमपश्यन्पृच्छति। किमिति। बहुव्रीहाविति। शेषाद्विभाषेत्यनेन कष्टश्रि
तक इति। तत्पुरुष इति। कष्टश्रित इत्यादौ रुहादीनामिति। आदिशब्दः प्रकारे तेन गत्यर्थादयोऽपि गृह्यन्ते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ ३२९ धात्वर्थस्येति। सर्वस्य धात्वर्थस्यानिष्ठितत्वेऽपि तदेकदेशभूतत्वाश्रयेणारोहणक्रियाविशिष्ट एवद्र समारूढ इति शब्दशक्तिस्वाभाव्या-
दिदमभिधीयते। यथा बद्धो बन्धनमनुभवन्नेवोच्यते तथा कष्टश्रित इति कष्टमनुभवन्नेवोच्यते। व्यपवृक्त इति। सर्वात्मना धात्वर्थेनि
ष्ठित इत्यर्थः। यथा भुक्त ओदन इति भुजिक्रियायाः समाप्तौ प्रयुज्यते। भेदान्तरमप्याह। अन्यथेति। प्रत्यक्षेणेति। शब्दाद्व्यवधानेनेत्यर्थः
। अव्यवधानोपलक्षणत्वात् प्रत्यक्षस्याज्ञापकफलमपि निराकर्तुमाह। उभयमिति। सोमसखेति। बहुव्रीहित्वात्समासान्ताभावः। गवां
सख इति। तत्पुरुषत्वात्समासान्तस्तत्पुरुषे कृति बहुलमिति षष्ठ्या आक्रोश इति वा षष्ठ्या अलुक्॥ खट्वा॥ खट्वारूढ इत्यत्र क्षेपं हे
तोर्धर्मस्यानिर्देशात् क्रियाकारकसंबन्धमात्रावगमात्पृच्छति किमुदाहरणमिति। समासस्य क्षेपोऽर्थः स चात्रास्तीत्याह। खट्वारूढ इ

धात्वर्थस्यानपवर्गे आरूढो वृक्षं देवदत्तः। बहुव्रीहौ व्यपवृक्ते कर्मणि भवति आरूढो वृक्षो देवदत्तेनेति। अन्यथाजा
तीयकः खल्वपि प्रत्यक्षेणार्थसंप्रत्ययः अन्यथाजातीयकः संबन्धात्। राज्ञः सखा राजसखः संबन्धादेतद्गन्तव्यं नूनं
राजाऽप्यस्य सखेति। उभयं खल्वपीष्यते। स्वस्ति सोमसखा पुनरेहि गवां सख इति॥ खट्वाक्षेपे॥ किमुदाहरणम्। खट्वा
रूढः क्षेप इत्युच्यते। कः क्षेपो नाम। अधीत्य स्नात्वा गुरुभिरनुज्ञातेन खट्वा रोढव्या य इदानीमतोऽन्यथा करोति स
उच्यते खट्वारूढोऽयं जाल्मो नातिव्रतवान्॥ अत्यन्तसंयोगे च॥ अत्यन्तसंयोगे समासस्याविशेषवचनात् क्तेन समा
सवचनानर्थक्यम्। अत्यन्तसंयोगे समासस्याविशेषवचनात् क्तान्तेन चाक्तान्तेन च। कालाः क्तेनेत्येतत्समासवचनम
नर्थकम्। अत्यन्तसंयोग इत्येव सिद्धम्। ।अनत्यन्तसंयोगार्थं तु। अनत्यन्तसंयोगार्थं तर्हीदं वक्त
व्यम्। षण्मुहूर्ताश्चराचराः। ते कदाचिदहर्गच्छन्ति कदाचिद्रात्रिम्। अहर्गताः। रात्रिगताः। नैतदस्ति।

ति। अधीत्येति। ब्रह्मचारिणा वेदाध्ययने निष्पादिते गृहस्थाश्रमः कर्तव्यः। अन्यथेति। असमाप्तेऽध्ययने भूमिशयनार्होऽपि यः खट्वा
रोहणं करोतीत्यर्थः। खट्वारोहणं चाविनयोपलक्षणार्थमित्याह। नातिव्रतवानिति॥ अत्यन्त॥ ॥ कालाइति पृथग्योगे न क्तान्ते
न समासविधानं न कर्तव्यम्। कालाअत्यन्तसंयोग इत्येक एव योगः कर्तव्यः। तत्र च क्तेनेत्यस्य निवृत्तत्वात्सर्वत्र समासः सिध्यती
ति मत्वाह। अत्यन्तसंयोग इति। चराचरा इति। चरन्तीत्यर्थः। चरिचलिपतिवदीनामच्याक्काभ्यासस्येति द्विर्वचनमागागमश्च। रा॰म॰
कदाचिदहरिति। उत्तरायणे। कदाचिद्रात्रिमिति। दक्षिणायने। ततश्च षड्भिर्मुहूर्तैरह्नो रात्रेश्च नास्त्यत्यन्तसंयोगः। क्रमेण च ग- ३२९
च्छन्तः संकलय्य व्यपदिश्यन्ते। अथ वैकदेशगमनाद्गच्छन्तीत्युच्यन्ते।

गतग्रहणादिति। द्वितीया श्रितेत्यत्र निर्दिष्टात्। मासप्रमितइति। आदिकर्मणि कर्तरि क्तः। मासं परिच्छेत्तुमारब्धवानित्यर्थः। प्रतिपच्चन्द्रेण च मासस्यात्यन्तसंयोगाभावः। तृतीया त। तत्कृतार्थेनेति किमर्थमिति। अयं भावः। दध्ना पटुरित्यत्र यदि दधिकृतं पाटवं विवक्षितं तदा भवितव्यं समासेन विशिष्टद्रव्यसंस्कृतं दध्यपि पाटवं करोतीति तत्कृतत्वसंभवात्। अथ भोजनाद्यपेक्षो दध्नः करणभावो दध्ना भुङ्क्ते पटुरिति तदा सामर्थ्याभावात्समासो न भविष्यति। दध्ना पटुरिति। अस्याप्ययं भावः। सर्वत्र क्रियाद्वारकेण संबन्धेन भवितव्यम्। ततश्चेहापि क्रियाद्वारकसंबन्धसंभवात्समासः स्यात्। असामर्थ्यादिति। यत्र साक्षात्सामर्थ्यं नास्ति दध्योदनइत्यादौ तत्र वचनसामर्थ्यात्प्रतीयमानक्रियाद्वारकसंबन्धाश्रयेण समासः। इह तु शङ्कुलया खण्डइत्यादौ साक्षात्सामर्थ्यसंभवे वचनस्य सावकाशत्वात् दध्ना पटुरित्यत्र न भविष्यति। इहापीति। खण्डशब्दस्य गुणोपसर्जनद्र-

गतग्रहणादप्येतत्सिद्धम्। इदं तर्हि। अहरतिसृता। रात्र्यतिसृता। मासप्रमितश्चन्द्रमाः॥ तृतीया तत्कृतार्थेन गुणवचनेन॥ तत्कृतार्थेनेति किमर्थम्। दध्ना पटुः। घृतेन पटुः। नैतदस्ति। असामर्थ्यादत्र न भविष्यति। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। नहि दध्नः पटुना सामर्थ्यम्। केन तर्हि। भुजिना। दध्ना भुङ्क्ते पटुरिति। इहापि तर्हि न प्राप्नोति। शङ्कुलाखण्डः किरिकाणइति। अत्रापि न शङ्कुलायाः खण्डेन सामर्थ्यम्। केन तर्हि। करोतिना। शङ्कुलया कृतः खण्डइति। वचनाद्भविष्यति। इहापि तर्हि वचनात्प्राप्नोति। दध्ना पटुः घृतेन पटुरिति। तस्मात्तत्कृतार्थग्रहणं कर्तव्यम्। गुणवचनेनेति किमर्थम्। गोभिर्वपावान्। धान्येन धनवान्।

व्यवाचित्वात् साक्षात्संबन्धाभावाच्छङ्कुलयाऽवयवक्रियापेक्षितत्वात्तामन्तरेण कारकत्वायोगात्। वचनादिति। करोतिक्रियाकृतसंबन्धाश्रयेणेत्यर्थः। इहापीति। परस्परसंबन्धाय चेत्सर्वत्र क्रियाव्यतिरिक्तापेक्ष्यते तदात्रापि तदपेक्षसामर्थ्यसद्भावात् समासप्रसङ्ग इत्यर्थः। परस्तात्तु तत्कृतार्थग्रहणं निराकरिष्यते। गुणवचनेनेति किमर्थमिति। अयं भावः। जातेर्नित्यत्वात्तत्कृतत्वाभावाज्जातिवचनेन समासो न भविष्यति. क्रियावचनेन तु कर्तृकरणे कृता बहुलमिति भाव्यं समासेन। स्वभावसिद्धं च द्रव्यमिति तत्कृतत्वाभावाद्द्रव्यवाचिनापि न भविष्यति। गोभिर्वपावानिति। गोसंबन्धिदध्याद्युपयोगाद्वपावत्त्वमिति तत्कृतत्वमस्ति। वपावच्छब्दस्तु गुणवचनो न भविष्यति। यो हि गुणमुखाद्द्रव्यमभिधत्ते यथा शुक्लः पटइति शुक्लशब्दः स गुणवचनः। वपावच्छब्दस्तु सर्वदा वपासंबन्धविशिष्टं द्रव्यमाहेति नासौ गुणवचनः।

किंपुनरिति। दध्नाजाड्यं घृतेनपाटवमित्यादौ केवलगुणवाचिना समासोनेष्यते। गुणोपसर्जनद्रव्यवचनस्तु द्रव्यवचनत्वाद्गुणवचनोनभविष्यतीतिप्रश्नः। गुणेनेति। अर्थेनचसमासासंभवाद्गुणवचनेनभविष्यति। तत्रवचनग्रहणाद्भूतकालपरिग्रहाद्गुणमुक्तवतासंप्रतिगुणोपसर्जनद्रव्यवाचिनासमासोभवतीत्यर्थः। कथंपुनरिति। नित्यत्वाच्छब्दार्थसंबन्धस्योपात्तार्थपरित्यागेनार्थान्तराभिधानंनसंभवतीतिप्रश्नः। आरभ्यतइति। अर्थभेदेनशब्दभेदात्सादृश्यनिबन्धनत्वाच्चप्रत्यभिज्ञायाः। एकत्वेवानेकशक्तियोगात्प्रयोगभेदेनानेकार्थसंबन्धइतिभावः। भवतिहीति। अव्यतिरिक्तकल्पान्तरङ्गप्रतीयमानसमासार्थान्तर्भूतकरोति

किंपुनरिहोदाहरणम्। शुक्लाखण्डोदेवदत्तइति। कथंपुनर्गुणवचनेनसमासउच्यमानोद्रव्यवचनेनस्यात्। इह तृतीयातत्कृतार्थेनगुणेनेतीयतासिद्धंसोयमेवंसिद्धेसतियद्वचनग्रहणंकरोतितस्यैतत्प्रयोजनम्। एवंयथाविज्ञायेतगुणमुक्तवतागुणवचनेनेति। कथंपुनरयंगुणवचनःसन्द्रव्यवचनःसंपद्यते। आरभ्यतेतत्रमतुब्लोपः। गुणवचनेभ्योमतुपोलुगिति। तद्यथा। शुक्लगुणःशुक्लः कृष्णगुणःकृष्णः। एवंखण्डगुणःखण्डः। यद्येवंनार्थस्तत्कृतार्थग्रहणेन। भवतिहिशङ्कुलायाःखण्डेनसामर्थ्यम्। असामर्थ्याच्चात्रनभविष्यतिदध्नापटुर्घृतेनपटुरिति। तस्मान्नार्थस्तत्कृतार्थग्रहणेन। तृतीयासमासेर्थग्रहणमनर्थकमर्थगतिर्ह्यवचनात्। तृतीयासमासेर्थग्रहणमनर्थकम्। किंकारणम्। अर्थगतिर्ह्यवचनात्। अन्तरेणापिवचनमर्थगतिर्भविष्यति। निर्देशमितिचेत्तृतीयार्थनिर्देशोपि। अथैवमपिनिर्देशःकर्तव्यइतिचेत्तृतीयार्थनिर्देशोपिकर्तव्यःस्यात्। तृतीयातदर्थकृतार्थेनेतिवक्तव्यम्। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। नायमर्थनिर्देशः। किंतर्हि। योगाङ्गमिदंनिर्दिश्यते। सतिचयोगाङ्गेयोगविभागःकरिष्यते। तृतीयातत्कृतेनगुणवचनेनसमस्यते। ततोर्थेन। अर्थशब्देनचतृतीयासमस्यते। धान्यार्थःवसनार्थःहिरण्यार्थः। पूर्वसदृशसमोनार्थइत्यर्थग्रहणंनकर्तव्यंभवतीति॥

क्रियाहारकमितिभावः। दध्नापटुरित्यत्रतुविपर्ययादसामर्थ्यात्समासाभावः। अर्थगतिरिति। तत्कृतस्यार्थत्वाव्यभिचारादित्यर्थः। निर्देशमितिचेदिति। सामर्थ्यलभ्यस्यापियदिविस्पष्टार्थमुपादानमित्यर्थः। योगविभागइति। तत्कृतेतितृतीयायाश्छान्दसोलुक्। अर्थेनेतिपृथक्वादमितिवाक्यभेदःसंपद्यते। नकर्तव्यमिति। अर्थशब्देनसमासार्थमितिभावः। सत्त्वेनिविशतेपैतीतिलक्षितस्यगुणस्येहग्रहणेकुङ्कुमलोहितादीन्यप्यत्रोदाहरणानीतिकरोतिक्रियातत्रावश्यापेक्ष्येतिखण्डादीनांसंभवदपिधातुवाच्यक्रियारूपत्वंभाष्यकारेणनोक्तम्॥

CC-0. In Public Domain. Digitization by eGangotri

पूर्वे॥ पूर्वसूत्रे अर्थ प्राब्देन समासस्य साधितत्वादिहार्थग्रहणमूनेनाभिसंबध्यमानं तदर्थानां विकलादीनां समासं साधयति। पूर्वसूत्रे-
ऽपिह समर्थग्रहणं प्रत्याख्यातम्। अर्थप्रधानत्वान्निर्देशस्योनार्थाना मन्तरेणाप्यर्थग्रहणं समासस्य सिद्धत्वात्। सदृशग्रहण उक्तमि
ति। वक्ष्यमाणस्यापि बुद्ध्या निरूपितत्वाद्धेतुकालसंप्रेक्षितत्वाद्वा भूतनिर्देशः। सदृशप्रतिरूपयोः सादृश्य इत्यत्र वक्ष्यते। पूर्वपद
प्रकृतिस्वरविधानार्थं सदृशग्रहणमनर्थकं मात्रासदृशो मातृसदृश इति। पूर्वसदृश इति समासे कृते तत्पुरुषे तुल्यार्थेति प्रकृतिस्वरो
भविष्यति। अथोच्यते तुल्यार्थयोगे षष्ठ्यपि पक्षे विधीयते ततश्च मातुः सदृशो मातृसदृश इति। यदा षष्ठीसमासः क्रियते तदा पूर्वप
दप्रकृतिस्वरार्थं सदृशग्रहणम्। तथा च दास्याः सदृश इत्याक्रोशे षष्ठ्या अलुकि स्वरः सिद्ध्यति तदा तृतीयासमासे सदृशग्रहणं न कर्तव्य
म्। षष्ठीसमासेनैव स्वररूपयोः सिद्धत्वात्। अथोच्यते हेतुस्तृतीयार्थमिह सदृशग्रहणं विद्यया सदृशो विद्यासदृश इति। तदपि न॥

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः॥ ॥पूर्वादिष्ववरस्योपसंख्यानम्॥ पूर्वादिष्ववरस्योपसंख्यानं कर्त
व्यम्। मासावरो ऽयं संवत्सरावरो ऽयम्। सदृशग्रहण उक्तम्। किमुक्तम्। सदृशग्रहणमनर्थकं तृतीयासमासवचनात्। षष्ठ्य
र्थमिति चेत्तृतीयासमासवचनानर्थक्यमिति॥ कर्तृकरणे कृता बहुलम्॥ कर्तृकरणे कृताक्तेन॥ कर्तृकरणे कृताक्तेनेति वक्त
व्यम्। अहिहतः। नखनिर्भिन्नः। दात्रलूनम्। परशुछिन्नम्। कृताक्तेनेति किमर्थम्। इह माभूत्। दात्रेण लूनवान्। परशुना छिन्नवान्। त
र्हि वक्तव्यम्। न वक्तव्यम्। बहुलवचनात्सिद्धम्॥ कृत्यैरधिकार्थवचने॥ कृत्यैरधिकार्थवचनेऽन्यत्रापि दृश्यते। कृत्यैर
धिकार्थवचनेऽन्यत्रापि दृश्यत इति वक्तव्यम्। बुसोपेन्ध्यं तृणोपेन्ध्यं घनघात्यम्। साधनं कृतेति वा पादहारकाद्यर्थ
म्। अथवा साधनं कृता समस्यत इति वक्तव्यम्।

बन्धमात्रविवक्षायां षष्ठीसमासेनैव स्वररूपयोः पूर्वसूत्रेणैवात्र कृतत्वात् सिद्धत्वात्॥ कर्तृ॥ बहुलवचनादिति। अयं भावः। क्तेने
त्युच्यमाने घस्त्रादिभिर्नखनिर्भेद इत्यादौ समासो न प्राप्नोति। तस्माद्बहुलग्रहणमेवाव्याप्त्यतिव्याप्तिपरिहारार्थमाश्रयणीयम्। कृ
त्यैः॥ स्तुतिनिन्दापरत्वात् क्रियोपादानस्य कर्तृकरणयोर्गौणत्वात् पूर्वेण प्राप्तः समासो नेन विधीयत इति केचिदाहुः। अन्ये तु प्रपञ्चार्थ-
मेतदित्याहुः। तथा च काकपीता नदीत्यत्र कृत्यैरप्यधिकार्थवचने समासो दृश्यते। कृत्यैरिति। तैश्चानेनेदं नियमार्थमपि तु प्रपञ्चार्थ-
म्। बुसोपेन्ध्यमिति। अग्नेरल्पत्वात् काष्ठमेतद्बुसेन प्रज्वलनीयमित्यर्थः। घनघात्यमिति। घनेनायःप्रभृतिना घात्यस्य काठिन्यं प्र-
तिपाद्यते। साधनं कृतेति। बहुलग्रहणसहितसूत्रसंदर्भापेक्षो विकल्पः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादाभ्यामिति। अपादाने पञ्चमी। हारक इति। कृत्यल्युटो बहुलमिति बहुलग्रहणात् कर्मणि एवुल्। चोपक इति। चुपेर्ण्यन्तस्य कर्मणि एवुल्॥ अन्नेन॥ तुल्यन्यायत्वाद् युगपत्सूत्रद्वयस्य विचारः। दध्योदन इत्यादौ क्रियावाची शब्दो न प्रयुज्यते यथा कष्टश्रित इति। क्रियामन्तरेण च द्रव्याणां परस्परसंबन्धो नास्तीत्याह। अन्नेनेति। किंकारणमिति। समासाद् उपसेकादिक्रियावगमात्तत्कृतमस्त्येव सामर्थ्यमिति प्रश्नः। क्रिययेति। तस्याश्च वाचको नास्तीति तदभावात्सामर्थ्याभावः। निश्रयण्या इति। निश्रयणीशब्देन समुदायवृत्तिना उपचारात् सोपानफलकान्यभिधीयन्ते। द्वाभ्यामिति। ऊर्ध्वाभ्यामित्यर्थः। एवमसामर्थ्ये प्रतिपादिते आचार्यदेशीय आह। एवं तर्हीति। नानाका

किंप्रयोजनम्। पादहारकाद्यर्थम्। पादाभ्यां ह्रियते पादहारकः। गले चोप्यते गलेचोपकः॥ अन्नेन व्यञ्जनम्॥ भक्ष्येण मिश्रीकरणम्॥ अन्नेन व्यञ्जनं भक्ष्येण मिश्रीकरणमित्यसमर्थसमासः। अन्नेन व्यञ्जनं भक्ष्येण मिश्रीकरणमित्यसमर्थसमासोऽयं द्रष्टव्यः। किंकारणम्। कारकाणां क्रियासमर्थत्वात्। कारकाणां क्रियया सामर्थ्यमस्ति न तेषामन्योन्यम्। तद्यथा। निश्रयण्या द्वाभ्यां काष्ठाभ्यां सामर्थ्यं न तेषामन्योन्यम्। एवं तर्हि हायम्। अन्नेन व्यञ्जनं भक्ष्येण मिश्रीकरणमिति। न चास्ति सामर्थ्यं तत्र वचनात्समासो भविष्यति। वचनप्रामाण्यादिति चेद्। नानाकारकाणां प्रतिषेधः॥ वचनप्रामाण्यादिति चेन्नानाकारकाणां प्रतिषेधो वक्तव्यः। तिष्ठतु दध्ना ओदनो देवदत्तेन भुज्यत इति। सिद्धं तु समानाधिकरणाधिकारे क्तस्तृतीयापूर्वपदोत्तरपदलोपश्च॥ सिद्धमेतत्। कथम्। समानाधिकरणाधिकारे वक्तव्यम्। क्तान्तस्तृतीयापूर्वपदः समस्यते सुपा उत्तरपदस्य च लोपो भवतीति। दध्ना उपसिक्तः दध्युपसिक्तः दध्युपसिक्तः ओदनो दध्योदनः। गुडेन संसृष्टाः गुडसंसृष्टाः गुडसंसृष्टाः धानाः गुडधानाः। षष्ठीसमासश्च युक्तपूर्णान्तः॥ षष्ठीसमासश्च युक्तपूर्णान्तः समस्यते उत्तरपदस्य च लोपो वक्तव्यः। अश्वानां युक्तोऽश्वयुक्तः अश्वयुक्तो रथोऽश्वरथः। दध्नः पूर्णो ——— दधिपूर्णः दधिपूर्णो घटो दधिघटः। तत्तर्हि बहु वक्तव्यम्। नवाऽसमासेऽदर्शनात्॥

रकाणामिति। भिन्नक्रियापेक्षया कारकाणामित्यर्थः। तिष्ठतु दध्नेति। दध्ना ध्रियतां जीवत्वित्यर्थः। तत्र दध्नः करणत्वम्। एवं सूत्रन्यासं दूषयित्वा वार्तिककार आत्मीयं न्यासं दर्शयति। सिद्धं त्विति। उत्तरपदलोपप्रसङ्गेनान्यदप्याह। षष्ठीसमासश्चेति। अश्वानामिति। संबन्धविवक्षायां षष्ठी। तथा दध्न इति। असमासेऽदर्शनादिति। असमासो वाक्यं तत्रैव युक्तादयो न दृश्यन्ते। अश्वानां रथोऽश्वरथः दध्नो घटो दधिघट इति युक्तादिशब्दप्रयोगमन्तरेणापि संबन्धप्रतीत्यैव युक्ताद्यर्थानामाक्षेपात्। दधिपूर्णो घट इत्येतत्तु शब्दान्तरमेव तत्समानार्थं न तु दधिघट इत्येतस्यैतद्वाक्यम्। अन्यत्र तु प्रत्ययलक्षणार्थो लोपारम्भो यथाऽग्निचित् दधि पश्येति। इह तु लोपान्वाख्याने प्रयोजनाभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युक्तार्थसंप्रत्ययादिति। युक्तग्रहणं योग्यक्रियोपलक्षणमित्युपसेकादयोपिगृह्यन्ते। एतदुक्तं भवति। दध्योदन इत्युक्ते दध्नः संस्कारकत्वमोदनस्य च संस्कार्यत्वं प्रतीयते। न चोपसेकमन्तरेण संस्कार्यसंस्कारकभावोस्तीति सामर्थ्यादुपसेकप्रतीतिः। संप्रत्ययाच्चेति। सर्वलोकव्यवहारप्रसिद्धत्वादिति भावः। अत एव न प्रतिज्ञातार्थैकदेशो हेतुः। तदर्थाध्यवसानमिति। संदेहरहितस्तदर्थनिश्चय इत्यर्थः। मन्दकमिति। मन्दजातम्। उत्तरकमिति। परिपक्वावस्थोपरि घनभावः। निलीनकमिति। पक्वावस्थायां भ्रष्टम्। एषां विशेषाणां संभवाद्दधीत्युक्ते संप्रत्ययः। अक्षिनिकोचैरिति। प्रकारान्तरेण विधिनिषेधलक्षणार्थावसायाच्चरितार्थत्वाद्‌ यथा च शब्दानां प्रयोगो नास्ति तथा युक्तानवावक्तव्यम्। किं कारणमसमासेऽदर्शनात्। यच्चासमासे दृश्यते समासे च न दृश्यते ——— तद्धि लोपारम्भं प्रयोजयति। न चासमासे उपसिक्तशब्दः संसृष्टशब्दो युक्तशब्दः पूर्णशब्दो वा दृश्यते। कथं तर्हि सामर्थ्यगम्यते। युक्तार्थसंप्रत्ययाच्च सामर्थ्यम्। दध्ना युक्तार्थता संप्रतीयते। कथं पुनर्ज्ञायते दध्ना युक्तार्थता प्रतीयत इति। संप्रत्ययाच्च तदर्थाध्यवसानम्। संप्रत्ययाच्च तदर्थोध्यवसीयते। अवश्यं चैतदेवं विज्ञेयम्। संप्रतीयमानार्थलोपे ह्यनवस्था। यो हि मन्यते संप्रतीयमानार्थानां शब्दानां लोपो भवतीति। अनवस्था तस्य लोपस्य स्यात्। दधीत्युक्ते बहवोर्था गम्यन्ते मन्दकमुत्तरकं निलीनकमिति। तद्वाचिनां शब्दानां लोपो वक्तव्यः स्यात्। तथा गुड इत्युक्ते मधुरशब्दस्य परङ्गवेरमिति च कटुकशब्दस्य। अन्तरेणापि खलु शब्दप्रयोगं बहवोर्था गम्यन्तेऽक्षिनिकोचैः पाणिविहारैश्च तद्वाचिनां शब्दानां लोपो वक्तव्यः स्यात्॥ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः॥ ॥ किं चतुर्थ्यन्तस्य तदर्थमात्रेण समासो भवति। एवं भवितुमर्हति। चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसङ्गोऽविशेषात्। चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसङ्गः सर्वस्य चतुर्थ्यन्तस्य तदर्थमात्रेण सह समासः प्राप्नोति। अनेनापि प्राप्नोति रन्धनाय स्थाली अवहननायोलूखलमिति। किं कारणम्। अविशेषात्। न हि कश्चिद्विशेष उपादीयते एवं जातीयकस्य चतुर्थ्यन्तस्य तदर्थेन सह समासो भवतीति। अनुपादीयमानविशेषे सर्वप्रसङ्गः। बलिरक्षिताभ्यां चानर्थकं वच——नम्। बलिरक्षिताभ्यां च समासवचनमनर्थकम्। यो हि महाराजाय बलिः स महाराजार्थो भवति। तत्र तदर्थ इत्येव सिद्धम्।

दीनामपीत्यर्थः॥ चतुर्थी॥ चतुर्थी चाशिषीति हितयोगे या चतुर्थी तदन्तस्य समासो न भवति। समासादाशिषोऽनवगमादिति केचिदाहुः। पाणिनीयलक्षणेऽतिव्याप्तिपुनरुक्ति च दृष्ट्वा पूर्वाचार्यन्यासे लव्याप्तिमत्त्वाविचारः क्रियते। किं चतुर्थ्यन्तस्येति। विशेषानुपादानाद्दोषदर्शनाच्च प्रश्नः। इतरः स्ववचनेनैव दोषमभिधापयितुमाह। एवं भवितुमर्हतीति। सर्वप्रसङ्ग इति। असत्यपि प्रकृतिविकारभाव इत्यर्थः। यो हीति। देयस्य बलेः संप्रदानार्थिना स्तीति तादर्थ्यात्‌ अयः समासः सिद्धः।

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 इदानींपूर्वाचार्यसूत्रंविचार्यते।यदिपुनरिति।अश्वघासइति।तादर्थ्यमत्रास्तिनतुप्रकृतिविकारभावः।श्वश्रूसुरमिति।विभाषा
 सेनासुरेतिनपुंसकत्वम्।हस्तिविधेति।विधाहस्त्यन्नंमाषादि।अर्थेनेति।महाविभाषाधिकाराद् विकल्पनिवृत्त्यर्थंवचनम्। किंविकृतिरिति।तदनन्तरमभिधानात्तस्यैवलक्षणस्यदोषान्तरंमन्यते।नेत्याहेति।आनन्तर्यंसामर्थ्याभावेसत्यकारणमित्यर्थः।सर्व

यदिपुनर्विकृतिश्चतुर्थ्यन्ताप्रकृत्यासहसमस्यतइत्येतल्लक्षणंक्रियेत॥विकृतिःप्रकृत्येतिचेदश्वघासादीनामुपसंख्यानम्।विकृतिःप्रकृत्येतिचेदश्वघासादीनामुपसंख्यानंकर्तव्यम्।अश्वघासःश्वश्रूसुरंहस्तिविधेति॥अर्थेननित्यसमासवचनम्॥अर्थशब्देननित्यंसमासोवक्तव्यः।ब्राह्मणार्थंक्षत्रियार्थम्।किंविकृतिश्चतुर्थ्यन्ताप्रकृत्यासहसमस्यतइत्यतोऽर्थेननित्यसमासोवक्तव्यः।नेत्याह।सर्वथाऽर्थेननित्यसमासोवक्तव्यः।विग्रहोमाभूदिति।सर्वलिङ्गताच।सर्वलिङ्गताचवक्तव्या।ब्राह्मणार्थंपयः।ब्राह्मणार्थःसूपः।ब्राह्मणार्थायवागूरिति।किमर्थेननित्यसमासउच्यतइत्यतःसर्वलिङ्गतावक्तव्या।नेत्याह।सर्वथासर्वलिङ्गतावक्तव्या।किंकारणम्।अर्थशब्दोऽयंपुल्लिङ्गउत्तरपदार्थप्रधानश्चतत्पुरुषः।तेनपुल्लिङ्गस्यैवसमासाभिधानंस्यात् स्त्रीनपुंसकलिङ्गस्यनस्यात्।तत्तर्हीदंबहुवक्तव्यम्।विकृतिःप्रकृत्येतिवक्तव्यम्।अश्वघासादीनामुपसंख्यानंकर्तव्यम्।अर्थेननित्यसमासोवक्तव्यःसर्वलिङ्गताचवक्तव्या।नवक्तव्यम्।यत्तावदुच्यतेविकृतिःप्रकृत्येतिवक्तव्यमिति।नवक्तव्यम्।आचार्यप्रवृत्तिर्ज्ञापयतिविकृतिश्चतुर्थ्यन्ताप्रकृत्यासहसमस्यतइति।यदयंबलिरक्षितग्रहणंकरोति।कथंकृत्वाज्ञापकम्।यथाजातीयकानांसमासेबलिरक्षितग्रहणेनार्थः।तथाजातीयकानांसमासः।यदिचविकृतिश्चतुर्थ्यन्ताप्रकृत्यासहसमस्यतेनतदर्थमात्रेण।ततोबलिरक्षितग्रहणमर्थवद्भवति।यदप्युच्यतेऽश्वघासादीनामुपसंख्यानंकर्तव्यमिति।नकर्तव्यम्।अश्वघासादयःषष्ठीसमासाभविष्यन्ति।यद्धियदर्थंभवति।

लिङ्गताचेति।परवल्लिङ्गमितिपुंस्त्वमेवप्राप्नोति।अभिधेयवशेनचसर्वलिङ्गताविज्ञेयेतिदर्शयति।ब्राह्मणार्थमिति।किमर्थेनेति।पूर्ववत्प्रश्नप्रतिवचने।इदानींभाष्यकारःपाणिनीयसूत्रंसमर्थयितुंचोदकमुखेनाह।तत्तर्हीति।यदयमिति।यदितदर्थमात्रेणचतुर्थीसमासःस्यात्तदाबलिरक्षितग्रहणंनकुर्यात्तादर्थ्यस्यसंभवात्तदर्थग्रहणेनैवसमासस्यसिद्धत्वात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अयमपीति। तादर्थ्यसंबन्धविशेषो विशेषे च सामान्यं संभवतीति तन्मात्रविवक्षायां षष्ठी प्रवर्तत एवेति भावः। अथवाश्वानां घास इति योग्य-
तामात्रं विवक्ष्यते न तु तादर्थ्यम्। रन्धनस्थाल्यादयस्त्वनभिधानात्षष्ठीसमासा न भवन्ति। यूपदार्वादिषु चतुर्थी तदर्थ इति स्वरसि-
द्ध्यर्थं तादर्थ्यमेव संबन्धविशेषो विवक्ष्यते न संबन्धसामान्यमिति षष्ठीसमासाभावः। सर्थविति। तदर्थं विकृतेरित्यत्र तदर्थे सर्थविति
क्रियते। तादर्थ्येन चतुर्थी विभक्तिराक्षिप्यते। तस्मै हितमित्यतो वानुवर्तते तेन चतुर्थ्यन्तात्तादर्थ्यमिधेये सर्थप्रत्ययो भवति। सकारः
पदत्वाय तेन राजार्थं भवदर्थमित्यादौ नलोपादीनि भवन्ति। पकारोऽनुदात्तार्थः। तेन प्रकृतेर्यथाप्राप्तः स्वरो भवतीति। अर्थ इति।

अयमपि तत्राभिसंबन्धो भवत्यस्येदमिति तद्यथा। गुरोरिदं गुर्वर्थमिति। ननु च स्वरे भेदो भवति चतुर्थीसमासे स-
ति पूर्वपदप्रकृतिस्वरत्वेन भवितव्यम्। षष्ठीसमासे सति पुनरन्तोदात्तत्वेन नास्ति भेदः। चतुर्थीसमासेऽपि सत्यन्तोदा-
त्तत्वेनैव भवितव्यम्। कथम्। आचार्यप्रवृत्तिर्ज्ञापयति विकृतिश्चतुर्थ्यन्ता प्रकृतिस्वरा भवति न चतुर्थीमात्रमिति।
यदयं चतुर्थी तदर्थेर्थेति चेत्यर्थग्रहणं क्तग्रहणं च करोति। कथं कृत्वा ज्ञापकम्। ______ । यथाजाती-
यकानां प्रकृतिस्वरत्वेऽर्थग्रहणे न क्तग्रहणे न चार्थः। तथाजातीयकानां प्रकृतिस्वरत्वम्। यदि च विकृतिश्चतु-
र्थ्यन्ता प्रकृत्या भवति न चतुर्थीमात्रं ततोऽर्थग्रहणं क्तग्रहणं — चार्थवद्भवति। यदप्युच्यतेऽर्थेन नित्यसमासो
वक्तव्य इति। न वक्तव्यः। सर्थप्प्रत्ययः करिष्यते। किं कृतं भवति। न चैव हि कदाचित्प्रत्ययेन विग्रहो भवति। अ-
पि च सर्वलिङ्गता सिद्धा भवति। यदि सर्थप्प्रत्ययः क्रियत इत्संज्ञा न प्राप्नोति। अथापि कथंचिदित्संज्ञा स्यादू एव-
मपि श्र्यर्थं भ्र्वर्थम्। अङ्गस्येतीयङुवङौ स्याताम्। एवं तर्हि बहुव्रीहिर्भविष्यति। किं कृतं भवति। भवति चैव क-
श्चिदस्वपदविग्रहो बहुव्रीहिः। तद्यथा। शोभनं मुखमस्याः सुमुखीति। नैवं शक्यम्। इह हि महदर्थमित्यात्वकपौ
प्रसज्येयाताम्।

स्वरार्थं सत्त्वं न कर्तव्यं भवति। न चैवेति। प्रत्ययेन कृते तद्धितान्तत्वात् प्रातिपदिकत्वात्सुब्लुका भवितव्यमिति विग्रहाभावः। अथापीति।
आदिर्ञिटुडव इति प्रत्ययस्येति संहितया सूत्रपाठे सकारस्यापि कृतश्चुत्वस्य निर्देशादिति भावः। शोभनमिति। सुशब्दपर्यायेण शोभनश-
ब्देन विग्रहः सुशब्दस्य सत्त्ववाचित्वात्तेन नास्ति विग्रहः। अत्र च ब्राह्मणायार्थोऽस्येति विग्रहो न भवतीति विवक्षितम्। ब्राह्मणोऽर्थो-
ऽस्येत्येवं समानाधिकरणस्तु विग्रहो भवत्येव। अत्र चार्थशब्दः प्रयोजनवाची॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवंतर्हीति। ब्राह्मणायपयइतिसमासेकृतेपयःशब्दस्थानेअर्थशब्दआदेशः क्रियते। तेनब्राह्मणपयइतिताादर्थ्येप्रयोगोनभव
तिचतुर्थ्याश्चसमासेनित्यत्वादादेशेनार्थशब्देनविग्रहाभावः। अर्थविशेषाभिव्यक्तयेचपयःशब्दस्यप्रयोगः। इहापीति। यदिच
तुर्थ्यैतावल्लक्षणंक्रियेतइत्यर्थः। वाचेति। महाविभाषयार्थादेशोविकल्प्यतेतेनयूपार्थदारुयूपदार्वितिद्वैरूप्यंभवति। यद्यमिति
। कुबेरार्थोबलिः कुबेरबलिरितिरूपद्वयेसिद्धेबलिरक्षितग्रहणंज्ञापकंप्रकृतिविकारभावादन्यत्रनित्योर्थादेशः तदर्थस्यभव

एवंतर्हितदर्थस्योत्तरपदस्यार्थशब्दआदेशःकरिष्यते। किंकृतंभवति। नचैवहिकदाचिदादेशेनविग्रहोभवति।
अपिचसर्वलिङ्गतासिद्धाभवति। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। योगविभागःकरिष्यते। चतुर्थी। सुबन्तेनसहसमस्य
ते। ततस्तदर्थार्थ—। तदर्थस्यचोत्तरपदस्यार्थशब्दआदेशोभवति। इहापितर्हिसमासःप्राप्नोतिछात्रायहृचितं
छात्रायस्वदितमिति। आचार्यप्रवृत्तिर्ज्ञापयतिताादर्थ्येयाचतुर्थीसासमस्यतेनचतुर्थीमात्रमिति। यदयंहितसु
खग्रहणंकरोति। कथंकृत्वाज्ञापकम्। यथाजातीयकानांसमासेहितसुखग्रहणेनार्थस्तथाजातीयकानांसमा
सः। यदिचताादर्थ्येयाचतुर्थीसासमस्यतेनचतुर्थीमात्रंततोहितसुखग्रहणमर्थवद्भवति। इहापितदर्थस्योत्त
रपदस्यार्थशब्दआदेशःप्राप्नोतियूपायदारुयूपदारु। वावचनंच॥ वाचविधास्यते। इहापितर्हिविभाषाप्राप्नो
तिब्राह्मणार्थंक्षत्रियार्थमिति। एवंतर्ह्याचार्यप्रवृत्तिर्ज्ञापयतिप्रकृतिविकृत्योर्यःसमासःतत्रतदर्थस्योत्तरप
दस्यवाऽर्थशब्दआदेशोभवतिअन्यत्रनित्यइति। यदयंबलिरक्षितग्रहणंकरोति। एवंतर्हिउदकार्थोविव
धःस्यानिवद्भावादुदभावःप्राप्नोति। तस्मान्नैवंशक्यम्। नचेदेवमर्थेननित्यसमासोवक्तव्यःसर्वलिङ्गताचाने
षदोषः। इदंतावदयंप्रष्टव्यः। अथेहब्राह्मणेभ्यइतिकेयंचतुर्थी। ताादर्थ्यइत्याह। यदिताादर्थ्येचतुर्थीअर्थश
ब्दस्यप्रयोगेणनभवितव्यम्। उक्तार्थानामप्रयोगइति। समासोपितर्हिनप्राप्नोति। वचनात्समासोभविष्यति। य
दप्युच्यतेसर्वलिङ्गतावक्तव्येति। नवक्तव्या। लिङ्गमशिष्यंलोकाश्रयत्वाल्लिङ्गस्य॥ चतुर्थी॥

तीति। उदकार्थइति। यदिविवधशब्दस्यार्थादेशःक्रियतेतदातस्यस्थानिवद्भावान्मन्थौदनेतिपक्षेउदकशब्दस्योदादेशःप्राप्नोति
। समासोपीति। चतुर्थ्यन्तस्यार्थशब्देनसमासोविधीयतेनचैतयोर्यौगपद्येनभावइतिभावः। वचनादिति। असत्यपिलौकिकेयुगप
त्प्रयोगेप्रक्रियायांयौगपद्यमस्त्येवेत्यर्थः। लिङ्गमिति। ततश्चपरवल्लिङ्गमित्यस्यलक्षणस्याभावाल्लौकिकप्रयोगाश्रयात्सर्वलि
ङ्गताभविष्यतीत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमी॥ भयेनेति स्वरूपग्रहणाद्व्याप्तिं मत्वा वार्त्तिकारम्भः। व्याख्यानादर्थग्रहणे वृकेभ्यस्त्रास इत्यादावपि प्रसङ्गः॥ सप्तमी॥ शौ-
ण्डादिभिरिति वक्तव्यमिति बहुवचनमर्थग्रहणे सति पर्यायार्थं वा स्याद् बहुवचनान्तसमासविधानार्थं वा। गणपाठस्तु सन्नपि संगृ-
हीतत्वादकिंचित्करः स्यादिति भावः। बहुवचननिर्देशादिति। धूर्तादीनां साहचर्यादारोपितशौण्डशब्दरूपाणां शौण्डत्वाद्रूपस्य च
शौण्डशब्देनाभिधानाद् यथा च्छत्रिणो गच्छन्तीति भावः। वृत्त्यन्तर्भूतप्रसक्तयादिक्रियापेक्षोऽक्षादीनामाधारभावः। अन्तः शब्दोऽत्र

पञ्चमी भयेन॥ ॥अल्पमिदमुच्यते भयेनेति। भयभीतभीतिभीभिरिति वक्तव्यम्॥ वृकाद्भयं वृकभयं वृकाद्भीतः
वृकभीतः वृकाद्भीतिः वृकभीतिः वृकाद्भीः वृकभीरिति। अपर आह। भयनिर्गतजुगुप्सुभिरिति वक्तव्यम्॥ वृक-
भयं ग्रामनिर्गतः अधर्मजुगुप्सुः॥ पञ्चमी भयेन॥ ॥सप्तमी शौण्डैः॥ शौण्डादिभिरिति वक्तव्यम्॥ इहापि यथा स्या-
द् अक्षधूर्तः स्त्रीधूर्तः अक्षकितवः स्त्रीकितव इति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। बहुवचननिर्देशाच्छौण्डादि-
भिरिति विज्ञास्यते॥ सप्तमी शौण्डैः॥ ध्वाङ्क्षेण क्षेपे॥ ध्वाङ्क्षेणेत्यर्थग्रहणं ध्वाङ्क्षेण क्षेपेऽर्थग्रहणं कर्तव्यम्।
इहापि यथा स्यात् तीर्थकाक इति। क्षेप इत्युच्यते क इह क्षेपो नाम। यथा तीर्थकाका न चिरस्थातारो भवन्ति। एवं
यो गुरुकुलानि गत्वा न चिरं तिष्ठति स उच्यते तीर्थकाक इति। ध्वाङ्क्षेण॥ कृत्यैर्ऋणे॥ ॥कृत्यैर्नियोगे यद्ग्रहणम्॥
कृत्यैर्नियोगे यत्प्रत्ययेनेति वक्तव्यम्। इहापि यथा स्यात् पूर्वाह्णेगेयं साम प्रातरध्येयोऽनुवाक इति। तत्तर्हि
वक्तव्यम्। न वक्तव्यम्। ऋण इत्येव सिद्धम्। इह यद्यस्य नियोगतः कार्यमृणं तस्य तद्भवति तत्र ऋण इत्येव सि-
द्धम्। यद्ग्रहणं च कर्तव्यम्। इह मा भूत्पूर्वाह्णे दातव्या भिक्षेति॥ कृत्यैः॥ क्षेपे॥ ॥किमुदाहरणम्। अवतप्तेनकु-
लस्थितं त एतत्। क्षेप इत्युच्यते क इह क्षेपो नाम। यथा अवतप्ते नकुलाः न चिरं स्थातारो भवन्ति एवं कार्या-
ण्यारभ्य यो न चिरं तिष्ठति स उच्यते अवतप्तेनकुलस्थितं त एतदिति। क्षेपे सप्तम्यन्तं क्तान्तेन सह समस्य-
त इत्युच्यते तत्र तेन सगतिकेन सनकुलेन च समासो न प्राप्नोति। क्षेपे सगतिकसकारकसमासे उक्तम्। किमु-
क्तम्। क्तग्रहणे गतिकारकपूर्वस्यापीति॥ क्षेपे॥

पद्यते तद्योगे अवयविन आधारत्वविवक्षायां सप्तमी॥ ध्वाङ्क्षेण॥ आधाराधेयमात्रावगमात् क्षेपासंभवं मत्वा पृच्छति। क इति। उपमानो-
पमेयभावेन कार्येष्वस्थिरत्वात् क्षेपः समासात्प्रतीयत इत्यर्थः॥ कृत्यैर्ऋणे॥ पूर्वाह्णे गेयमिति। तत्पुरुषे कृति बहुलमिति अलुक्। यद्यस्येति।
अवश्यकर्तव्यतासामान्यादुपचारादन्यत्राप्यृणशब्दस्य प्रयोगदर्शनाद् गौणस्याप्यर्थस्य शास्त्रे लक्ष्यवशेन क्वचिद्ग्रहणादित्यर्थः॥ क्षेपे
॥अवतप्तेनकुलेति। चापल्यादिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पात्रेस- २१२
भा॰ कै॰ पात्रे॥ परमं पात्रेसमिताइति। वैयधिकरण्येपिविस्पष्टपटुवस्तुपेतिसमासः प्राप्नोति। परममिति। क्रियाविशेषणम्। परमाः पात्रेस-
३३४ मिताइतितुपाठोन्यायान्॥ पूर्व॥ एकशब्दप्रसङ्गेननदीभिश्चेत्यनेनोक्तंवस्तुस्मारयितुमाह। इहकस्मादिति। नचात्रेति। एकत्वविशे-
षणान्नयत्रप्राधान्येनप्रतीयते। अवशिष्टंभाष्यंतत्रैवव्याख्यातम्॥ इत्युपाध्यायजैयटपुत्रकैयटकृतेमहाभाष्यप्रदीपेद्वितीय-
स्याध्यायस्यप्रथमेपादेद्वितीयमाह्निकम्॥ तद्धितार्थ॥ समाहारइतिकोयमिति। किंभावसाधनोथकर्मसाधनः। तत्रभावसाधनेद्र-

पात्रेसमितादयश्च॥ किमर्थश्चकारः। एवकारार्थः। पात्रेसमितादयएव। क्वमाभूत्परमंपात्रेसमिताइति। पात्रे
समि॥ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन॥ ॥इहकस्मादव्ययीभावोनभवतिएका
नदीएकनदी। नदीभिःसंख्येतिप्राप्नोतिनैषदोषः। इहकश्चित्समासःपूर्वपदार्थप्रधानःकश्चिदुत्तरपदार्थप्र
धानःकश्चिदन्यपदार्थप्रधानः। कश्चिदुभयपदार्थप्रधानः। पूर्वपदार्थप्रधानोव्ययीभावः। उत्तरपदार्थप्र
धानस्तत्पुरुषः। अन्यपदार्थप्रधानोबहुव्रीहिः। उभयपदार्थप्रधानोद्वन्द्वः। नचात्रपूर्वपदार्थप्राधान्यं
गम्यते। ——— अथवाव्ययीभावःक्रियतांतत्पुरुषइतितत्पुरुषोभविष्यतिविप्रतिषेधेन। भवेदे
कसंज्ञाधिकारेसिद्धम्। परंकार्यत्वेतुनसिद्ध्यति। आरम्भसामर्थ्याच्चाव्ययीभावःप्राप्नोति। परंकार्यत्वाच्च
तत्पुरुषःप्राप्नोति। परंकार्यत्वेचनदोषः। कथम्। नदीभिःसमाहारेऽव्ययीभावोवक्तव्यः। सचावश्यंवक्तव्यः। स
र्वमेकनदीतरे॥ ॥इतिभगवत्पतञ्जलिविरचितेव्याकरणभाष्येद्वितीयस्याध्यायस्यप्रथमेपादेद्विती
यमाह्निकम्॥ तद्धितार्थोत्तरपदसमाहारेच॥ ॥समाहारइतिकोयंशब्दः। समाङ्पूर्वाद्धरतेःकर्मसाधनो
घञ्। समाह्रियतेसमाहारइति।

व्यस्यानयनादिकंनप्राप्नोति। समूहरूपत्वाच्चसमाहारस्यतद्धितार्थग्रहणेनसमासस्यसिद्धत्वाद्भेदेनोपादानमनर्थकंप्राप्नोति
। कर्मसाधनेतुउपसर्जनह्रस्वत्वंनप्राप्नोतिद्विगुरेकवचनमित्येतच्चवक्तव्यंभवतीतिप्रश्नः। कर्मसाधनइति। द्रव्यस्येवकार्य- रामः
संबन्धदर्शनादितिभावः। संज्ञाग्रहणंचघञ्विधौप्रत्याख्यातमित्यसंज्ञायामपिघञ्भवति॥ ॥ ३३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदीति। कुमार्यर्थस्य प्राधान्यात् समासप्रयुक्ते च प्रथमानिर्देशाभावाद् ह्रस्वाप्रसङ्गः। यद्यप्यत्र नपुंसकह्रस्वत्वं सिद्ध्यति पञ्चखट्वीति
तु न सिद्ध्यति। पक्षे हि क्लीबत्वं तत्र क्लीबत्वे ह्रस्वत्वे सति पञ्चखट्वमिति सिद्ध्यति। स्त्रीत्वे तु अनुपसर्जनत्वाद् अह्रस्वत्वेऽनदन्त-
त्वाद् ङीबभावात् पञ्चखट्वा इति स्यात्। अत्र हि वाबन्त इति पक्षे स्त्रीत्वम्। द्विगुरिति। अनेकार्थत्वात्समासस्येति भावः। अथेति
। लोके समाहार एकप्रदेशसंघट्टनमुच्यते। तस्य पञ्चग्राम्यादावसंभव इति भावः। यत्तदिति। पञ्चमूल्यादौ तस्यसंभ
वादिति भावः। कः पुनरिति। औत्तराधर्यस्यासंभवात्प्रश्नः। यत्तदर्जनमिति। एकस्यां क्रियायां गुणे वा बुद्ध्या समीपीकरणं समाहार
इत्यर्थो विवक्षितः। तत्रार्जननिमित्तत्वादर्जनं समाहार इत्युक्तम्। तच्च क्रयादिना भवतीति तन्निर्देशः कृतः। यथोक्तमप्रतिपद्यम

यदि कर्मसाधनः पञ्चकुमार्यः समाहृताः पञ्चकुमारि दशकुमारि। गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं न प्राप्नोति। द्वि
गुरेकवचनमित्येतच्च वक्तव्यम्। एवं तर्हि भावसाधनो भविष्यति। समाहरणं समाहारः। अथ भावसाधने सति किम
भिधीयते। यत्तदौत्तराधर्यम्। कः पुनर्गवां समाहारः। यत्तदर्जनं क्रयणं भिक्षणमपहरणं वा। यद्येवं विसिन्नेषु पूले
षु गोषु चरन्तीषु न सिद्ध्यति। एवं तर्हि समभ्याशीकरणं समाहारः। एवमपि पञ्चग्रामी षण्णगरी त्रिपुरीति न सिद्ध्यति।
किं कारणम्। समेकत्ववाची आङ् आभिमुख्ये वर्तते। हरतिर्देशान्तरप्रापणे। नावश्यं हरतिर्देशान्तरप्रापण एव
वर्तते। किं तर्हि सादृश्येऽपि वर्तते। तद्यथा। मातुरनुहरति पितुरनुहरतीति। अथवा पञ्चग्रामी षण्णगरी त्रिपुरीति नै
वेदमियत्त्येवावतिष्ठते अवयवमसौ ततः किंचिदाकाङ्क्षति क्रियां गुणं वा यदाकाङ्क्षति तदेकं स च समाहारः। अयं त
र्हि भावसाधने सति दोषः। पञ्चफली आनीयतामिति भावानायने चोदिते द्रव्यानयनं न प्राप्नोति। नैष दोषः। इदं ता
वदयं प्रष्टव्यः। अथेह गौरनुबन्ध्योऽजोऽग्नीषोमीय इति कथमाकृतौ चोदितायां द्रव्ये आरम्भणालम्भनप्रोक्षण
विशसनानि क्रियन्त इति।

नः पर आह। यद्येवमिति। गोष्विति। नानास्वामिकानामर्जनाभावमाह। समभ्याशीकरणमिति। समीपीकरणमित्यर्थः। एवमपी-
ति। ग्रामादीनां नियतदेशावस्थानत्वात्समीपीकरणाभाव इति भावः। पदार्थं ग्रामशब्दो देशविशेषवाची तदायं दोषः। पुरुषवा-
चिनि तु न दोषः। तेषां समीपीकरणसंभवात्। समेकत्ववाचीति। भिन्नदेशानामेकवर्गीकरणे न देशान्तरप्रापणं समाहारः। स च ग्रा
मादीनां नास्तीति भावः। नावश्यमिति। ततश्च ग्रामादीनामपि लाभादिसदृशधर्मानुगमात्समाहारसद्भावः। अथवेति। केवलेन पदा-
र्थेन व्यवहाराभावादवश्यं क्रियागुणौ वा पेक्ष्यते तत्र च बुद्ध्या भिन्नदेशानामप्यस्ति समीपीकरणमित्यर्थः। स च समाहार इति। तन्निमित्तत्वादित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असंभवादिति। द्रव्यानयनमन्तरेणेत्यर्थः। अथवेति। पूर्वमुपायभावेनाम्यानयने पात्रस्येव द्रव्यस्य क्रियायामनुप्रवेशः कथि-
तः। इदानीं तु वास्तवभेदाभावाद् बुद्धिपरिकल्पितभेदसद्भावादिति विशेषः। किं पुनरिति। काशकृत्स्नस्य प्रत्ययोत्तरपदयो-
रिति सूत्रं तद्विचारयति। पाणिनीयं तु पश्चाद्विचारयिष्यति। दोषस्य सुप्रतिविधानत्वादाह। एवमिति। द्विगुसंज्ञानिमि-
त्ते इति। पञ्चसु कपालेषु संस्कृत इति समासे सति प्रातिपदिकत्वात् प्रत्ययेन भाव्यं प्रत्यये च परतो द्विगुरितीतरेतराश्रयः।
पञ्च गावो धनमस्येत्यत्रापि पदद्वयस्य तत्पुरुषे कृते बहुव्रीहिः क्रियत इति पक्षाश्रयेणेतरेतराश्रयो ज्ञावनम्। धनशब्द-
स्य सत्युत्तरपदत्वे पूर्वयोः पदयोः समासेन भवितव्यम् सति च पदद्वयसमासे बहुव्रीहिणा तस्मिंश्च सति धनशब्दस्योत्तर-
पदत्वेन। सुप्सुपेति संख्याया विवक्षितत्वात्त्रयाणां पदानां बहुव्रीहिणा न भवितव्यमिति मन्यते। यदा त्वनेकग्रहणात्पदत्रयस्यापि

असंभवात्। आकृतौ आरम्भणादीनां संभवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आरम्भणादीनि क्रियन्ते।
इदमप्येवंजातीयकमेव। असंभवाद्वा वानयने द्रव्यानयनं भविष्यति। अथवा अव्यतिरेकाद् द्रव्याकृत्योः।
किं पुनर्द्विगुसंज्ञा प्रत्ययोत्तरपदयोर्भवति। एवं भवितुमर्हति। द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्र-
यत्वादप्रसिद्धिः। द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः। का इतरेतराश्रयता। द्विगुसंज्ञा
निमित्ते प्रत्ययोत्तरपदे। प्रत्ययोत्तरपदनिमित्ता च द्विगुसंज्ञा। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च
कार्याणि न प्रकल्पन्ते। एवं तर्ह्यर्थ इति वक्ष्यामि। अर्थे चेत्तद्धितानुत्पत्तिर्बहुव्रीहिवत्। अर्थे चेत्तद्धितोत्पत्तिर्न
प्राप्नोति। द्वैमातुरः। त्रैमातुरः। पाञ्चनापितिः। किं कारणम्। द्विगुनोक्तत्वाद्बहुव्रीहिवत्। तद्यथा। चित्रगुः श-
बलगुरिति। बहुव्रीहिणोक्तत्वान्मत्वर्थस्य मत्वर्थीयो न भवति। एवं तर्हि समासतद्धितविधाविति वक्ष्यामि।

बहुव्रीहिर्भवति तदा नास्तीतरेतराश्रयदोषः। अथवायं भावः। समास इत्यन्वर्थसंज्ञेयं समसनं समासः संक्षेपः स चासंक्षिप्तानां क्रिय-
ते। यदि च पूर्वं बहुव्रीहिः प्रवर्तेत तदा संक्षिप्तत्वादेकार्थीभावात् किमपरः संक्षेपः क्रियते। तस्मात्त्रिपदगर्भो बहुव्रीहिः कर्तव्यस्त-
त्र चेतरेतराश्रयत्वम्। पाणिनीयलक्षणं निरूपयितुमाह। एवं तर्हीति। तद्धितार्थे तद्धिताभिधेये अनुत्पन्न एव तद्धिते द्विगुरिति
नास्त्यन्योन्याश्रयत्वमिति भावः। अर्थे चेदिति। यदि तद्धितार्थेऽभिधेये समासः क्रियते तदा समासेन तद्धितार्थस्याभिहितत्वात्प्रकृ-
त्यर्थव्यतिरिक्तप्रत्ययार्थाभावात्पाञ्चनापितिरित्यादौ तद्धितो न प्राप्नोति। समासतद्धितविधाविति। न्यासद्वये दोषदर्शनान्न्यासान्तरमा- राम:
श्रीयते। समासे विधीयमाने तद्धिते चादिकं स्वार्थसुपा सह समस्यते इति लक्षणाश्रयान्नास्तीतरेतराश्रयदोषः। परनिमित्तानपेक्षणात्तद्विषये- ३३५
प्रागेव समासविधानादिति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यत्रेति। यथा स्वरे पराङ्गवद्भावो विधीयमानः षत्वणत्वयोर्न भवति एवं स्वरे द्विगुसंज्ञा न स्यात्। इगन्तेति च लक्षणं समाहारद्वि-
गोरनवकाशम्। याभिस्तु द्विगोर्लुगनपत्य इत्यादाविति तेषु वचनसामर्थ्यादिह द्विगुसंज्ञा प्रवर्तत इत्यभिप्रायेणान्यत्र सावकाशे स्व
रे दोष उक्तः। पञ्चारत्निरिति। पञ्चारत्नयः प्रमाणमस्येति प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लुक्। सिद्धं त्विति। पाञ्चनापितिः पञ्च
गव धनद्विति च स्थितानामेव षष्ठ्यन्तानामनुशासनं क्रियते तत्र प्रत्ययोत्तरपदे स्थित एवेति नास्ति दोषः। न हि संज्ञेति। प्रत्ययसंज्ञासं

समासतद्धितविधाविति चेदन्यत्र समाससंज्ञाभावः। समासतद्धितविधाविति चेदन्यत्र समाससंज्ञा न प्राप्नोति। का
न्यत्र। स्वरे। पञ्चारत्निः दशारत्निः। इगन्ते द्विगाविति एष स्वरो न प्राप्नोति। सिद्धं तु प्रत्ययोत्तरपदयोश्चेति वचना
त्। सिद्धमेतत्। कथम्। प्रत्ययोत्तरपदयोश्चेति वचनात्। प्रत्ययोत्तरपदयोर्द्विगुसंज्ञा भवतीति वक्तव्यम्। ननु
चोक्तं द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिरिति। नैष दोषः। इतरेतराश्रयमात्रमेतच्चोदि
तम्। सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि। सिद्धं तु नित्यशब्दत्वादिति। नेदं तुल्यमन्यैरितरेतराश्रयैः। न
हि संज्ञा नित्या। एवं तर्हि भाविनी संज्ञा विज्ञास्यते। तद्यथा। कश्चित्कंचित्तन्तुवायमाह। अस्य सूत्रस्य शाटकं व
येति। स पश्यति। यदि शाटको न वातव्यः। अथ वातव्यो न शाटको वातव्यः शाटकश्चेति विप्रतिषिद्धं भवति।
भाविनी खल्वस्य संज्ञाभिप्रेता स मन्ये वातव्यः यस्मिन्नुते शाटक इत्येतद्भवतीति। एवमिहापि तस्मिन्द्विगु
र्भवति यस्याभिनिर्वृत्तस्य प्रत्यय उत्तरपदमिति चैते संज्ञे भविष्यतः। अथवा पुनरस्त्वर्थ इति। ननु चोक्तमर्थे
चेत्तद्धितानुत्पत्तिर्बहुव्रीहिवदिति। नैष दोषः। नावश्यमर्थशब्दोऽभिधेय एव वर्तते। किं तर्हि। स्यादर्थेऽपि व
र्तते। तद्यथा। दारार्थं घटामहे। धनार्थं भिक्षामहे। दारा नः स्युर्धनानि नः स्युरिति। एवमिहापि तद्धितार्थे
द्विगुर्भवतीति तद्धितः स्यादिति। द्विगोर्वा लुग्वचनं ज्ञापकं तद्धितोत्पत्तेः। अथवा यदयं द्विगोर्लुगनपत्य इति द्विगोरुत्तरस्य तद्धितस्य लु
कं शास्ति तज्ज्ञापयत्याचार्य उत्पद्यते द्विगोस्तद्धित इति। समाहारसमूहयोरविशेषात्समाहारग्रहणानर्थक्यं तद्धितार्थेन कृतत्वात्।

बन्धं समाससंज्ञाप्रतिबद्धं चोत्तरपदत्वमाश्रित्यायं समासः क्रियते न च प्रत्ययसमाससंज्ञे लोके स्तः। एवं तर्हीति। प्रत्ययोत्तरपदयोरिति वि
षयसप्तमी न तु परसप्तमी तत्र तात्पर्यम्। याशिनीयं समर्थयितुमाह। अथवेति। तद्धितस्यासावर्थः प्रयोजनं तस्मिन्कर्तव्ये द्विगुर्भवतीत्यर्थः
। स्यादिति। प्रार्थने लिङ्। अत्रापि पक्षे स्वरे द्विगुसंज्ञा न प्राप्नोतीत्याह। द्विगोरिति। अभिधेयवचने त्वर्थशब्दे तद्धितानुत्पत्तिदोषो नास्ती
त्यर्थः। समाहारसमूहयोरिति। स्वरूपपदार्थकत्वाद्भिन्नार्थत्वादेकत्वाभावः। अविशेषादिति। एकार्थत्वादित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिषेधः प्राप्नोतीति। यथा पञ्चभिरश्वैः क्रीता पञ्चाश्वेति। अपरिमाणेति। न तद्धितलुकि तद्धितलुकीत्यपास्य सूत्रद्वयेपि समाहार २१३
ग्रहणं क्रियते समाहार एव तद्धितलुकि ङीप् समासान्तो भवति नान्यत्रेति नियमविधानान्नास्ति दोषः। अविशेषेणेति। गोरित्येकं
सूत्रं क्रियते। गोशब्दान्तस्य तत्पुरुषस्य टज् भवति ब्राह्मणगवइति। ततो द्विगोः समाहार इति द्वितीयं सूत्रं नियमार्थमित्य
र्थः। अभिधानार्थं त्विति। समासेन समाहारस्याभिधानं यथा स्यात्तद्धितेन मा भूदित्यर्थः। समाहारेणेति। समाहारेभिधेये द्विगु
रित्यभिधानं यथा स्यात्। एवं चाभिधाने समासेनोक्तत्वात्तद्धितो नोत्पद्यते। तद्धितार्थे नेति। तद्धितार्थे द्विगुरित्यभिधानं मा भूत्।

समाहारः समूह इत्यविशिष्टावेतावर्थौ। समाहारसमूहयोरविशेषात्समाहारग्रहणमनर्थकम्। किं कारणम्। तद्धिता
र्थे न कृतत्वात्। तद्धितार्थे द्विगुरित्येवमत्र द्विगुर्भविष्यति। यदि तद्धितार्थे द्विगुरित्येवमत्र द्विगुर्भविष्यति तद्धितोत्प
त्तिः प्राप्नोति। उत्पद्यतां लुग्भविष्यति। लुक्कृतानि प्राप्नुवन्ति। कानि पञ्चपूली दशपूली। अपरिमाणबिस्ताचित
कम्बल्येभ्यो न तद्धितलुकीति प्रतिषेधः प्राप्नोति। पञ्चगवं दशगवम्। गोरतद्धितलुकीति टच् न प्राप्नोति। नैष दोषः
। अविशेषेण द्विगोर्ङीब्भवतीत्युक्त्वा अपरिमाणबिस्ताचितकम्बल्येभ्यः समाहार इति वक्ष्यामि तन्नियमा
र्थं भविष्यति। समाहार एव नान्यत्रेति। गोरकारो द्विगोः समाहारे। अविशेषेण गोष्टज् भवतीत्युक्त्वा द्विगोः समा
हार इति वक्ष्यामि तन्नियमार्थं भविष्यति समाहार एव नान्यत्रेति। अभिधानार्थं तु। अभिधानार्थं तु समाहार
ग्रहणं कर्तव्यम्। समाहारेणाभिधानं यथा स्यात् तद्धितार्थे न मा भूदिति। किं च स्यात्। तद्धितोत्पत्तिः सम्प्रसज्येत।
उत्पद्यतां लुग्भविष्यति। लुक्कृतानि प्राप्नुवन्ति। सर्वाणि परिहृतानि। न सर्वाणि परिहृतानि। पञ्चकुमारि दश
कुमारि। लुक्कृत तद्धितलुकीति ङीपो लुक् प्रसज्येत॥ द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्॥ द्वन्द्वत
त्पुरुषयोरुत्तरपदे नित्यसमासो वक्तव्यः। वाग्दृषदप्रियः। छत्रोपानहप्रियः। पञ्चगवप्रियः। दशगवप्रियः।

दित्यर्थः। एवमभिधाने हि तद्धितः स्यात्। अर्थशब्दस्य स्यादर्थत्वाज्ज्ञापकाद्वा। उत्तरपदप्रसङ्गेन विचारान्तरमाह। द्वन्द्वेति। वाग्दृष
दप्रियइति। वाक्च दृषच्च प्रिये अस्य पञ्च गावः प्रिया अस्येति त्रिपदे बहुव्रीहौ कृते उत्तरपदे परतो महाविभाषाधिकाराद्विकल्पेन द्वन्द्व
तत्पुरुषौ प्राप्तौ नित्यौ तु वक्तव्यौ। अन्यथा समासाभावपक्षे समासान्तो न स्यात्। जातिरप्राणिनामिति चात्र समाहारद्वन्द्वः। यदि त्वितरेतर रामः
योगेप्यत्र द्वन्द्वः स्यात्तदा कार्ये नैव भेदः स्यात्। ३३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समुदायवृत्ताविति। बहुव्रीहावित्यर्थः। वृत्तिपक्ष इति। एकार्थीभाव इत्यर्थः। न च समुदायस्यैकार्थीभावे तदभावोऽवयवयोर्युक्तः। विरोधादित्यर्थः। यदाऽवृत्तिरिति। द्वन्द्वतत्पुरुषभाविनां पदानां व्यपेक्षालक्षणं सामर्थ्यं तदा बहुव्रीहिर्न भवतीत्यर्थः। द्विगोरिति। द्विगोर्निष्पन्न इत्यर्थः। द्वौ मासौ जातस्येति। कालाः परिमाणिनेति त्रिपदः समास इष्यते स च सुप्सुपेति संख्याया अविवक्षितत्वान्न प्राप्नोति। तस्मिंश्चाकृते उत्तरपदे परतो द्विमासपूर्वयोः समासः क्रियते कालान्ते द्विगौ पूर्वपदप्रकृतिस्वरो यथा स्यात्। द्व्यह्नजात इत्यत्र च समासान्तः। द्वौ मासौ द्विमासमिति। समाहारे द्विगुः। पात्रादिभ्यः प्रतिषेध इति स्त्रीत्वाभावः। स्वरे हि दोष इति। समासान्तोदात्तत्वेन जाताकार उदात्तः स्यादित्यर्थः। अन्यत्रेति। पञ्चगवधन इत्यादौ बहुव्रीहौ कृते पूर्वयोः समासान्तादिकार्यसिद्धये द

किं प्रयोजनम्। समुदायवृत्तावयवानां मा कदाचिद्वृत्तिर्भूदिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। इह द्वौ पक्षौ वृत्तिपक्षश्चावृत्तिपक्षश्च। यदा वृत्तिपक्षः तदा सर्वेषामेव वृत्तिः। यदाऽवृत्तिपक्षः तदा सर्वेषामवृत्तिः॥ उत्तरपदेन परिमाणिना द्विगोः समासवचनम्॥ उत्तरपदेन परिमाणिना द्विगोः समासो वक्तव्यः। द्वौ मासौ जातस्य यस्य सः द्विमासजातः त्रिमासजातः। किं पुनः कारणं न सिध्यति। सुप्सुपेति वर्तते। एवं तर्हि इदं स्यात्। द्वौ मासौ द्विमासं द्विमासं जातस्येति। नैवं शक्यम्। स्वरे हि दोषः स्यात्। द्विमासजात इति प्राप्नोति द्विमासजात इति चेष्यते। द्व्यह्नजातश्च न सिध्यति द्व्यहजात इति प्राप्नोति। न चैवं भवितव्यम्। भवितव्यं च यदा समाहारे द्विगुः। द्व्यह्नजातस्तु न सिध्यति। किमुच्यते परिमाणिनेति। न पुनरन्यत्रापि पञ्चगवप्रियः दशगवप्रियः। अन्यत्र समुदायबहुव्रीहित्वादुत्तरपदप्रसिद्धिः। अन्यत्र समुदायो बहुव्रीहिसंज्ञः। अन्यत्र समुदायबहुव्रीहित्वादुत्तरपदं प्रसिद्धम्। उत्तरपदप्रसिद्धेरुत्तरपद इति द्विगुर्भविष्यति। सर्वत्र मत्वर्थे प्रतिषेधः। सर्वेषु पक्षेषु द्विगुसंज्ञाया मत्वर्थे प्रतिषेधो वक्तव्यः। किं प्रयोजनम्। पञ्चखट्वो दशखट्वः। द्विगोरितीकारो मा भूत्।

कार्थीभावे प्रागपि सत्येव पुनः समासः क्रियते। एतेन पूर्वोक्त इतरेतराश्रयदोषोऽपि परिहृतः। सर्वत्रेति। यत्र यत्र शब्दः स्यादर्थे यदि वाभिधेयवचनो ज्ञापकाच्च तद्धितोत्पत्तिः तदा मतुप् तद्धितत्वात् तदर्थेऽयमेव समासः स्यान्न तु बहुव्रीहिः। अशेषत्वात्। तस्य तु चित्रग्वादिष्वकाशः। तस्मान्मत्वर्थे प्रतिषेधो वक्तव्यः। पञ्चखट्वेति। पञ्च खट्वा यस्य विद्यन्त इति यदि द्विगुः स्यात्तदा वाटाबन्तः स्त्रियां भाष्यत इति पक्षे द्विगोरिति ङीप् प्राप्नोति पक्षे च नपुंसकत्वम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चगुरिति। तत्पुरुषत्वे सति टच् प्राप्नोति। नन्वस्मिन् समासे सति मतुपः श्रवणं प्रसज्येत। न च द्विगोर्लुगिति लुगस्ति प्राग्दीव्यत
इत्यधिकारात्। एवं तर्हि दोषोपलक्षणं भाष्यम्। मतुपो लुग्वक्तव्य इति दोषः। तल्लुकि च ङीप् समासान्तो प्रतिषेधादेव न भवि
ष्यतः। पञ्च आढका यस्याः सा पञ्चाढके त्यत्र तु ङीप् प्राप्नोति। संख्या। इह कश्चिदवयवोपेक्ष्यते यत्रैतदुच्यते अनन्तरस्य
विधिर्वा भवति प्रतिषेधो वेति। क्वचित्तु समुदायो यथा नान्तः पादमिति पाठे संहिताधिकारविहितस्य सर्वस्य कार्यस्य निषेधः क्रियते
ततः संदेहात्पृच्छति। किमनन्तर इति। पूर्वमात्र इति। अत्र पक्षे समानाधिकरणसमासत्वे सत्यविहितस्तत्पुरुष एव गृह्यते। अ
न्यथा द्विमुनि व्याकरणस्येत्यव्ययीभावस्यापि द्विगुसंज्ञा स्यात्। ततश्चेगन्ते द्विगाविति स्वरः प्रसज्येत। एकशाटीति। एकः शाट इति
पूर्वकालेति समासः। शाटशब्दश्चाकारान्तोस्ति तस्यैव कनि कृते शाटक इत्येवं रूपं संभवति। एकभिक्षेति। भिक्षशब्दो घञन्तोस्ति

पञ्चगुर्दशगुः। गोरतद्धितलुकीति टज् मा भूदिति। तद्धितार्थोत्तरपद। संख्यापूर्वो द्विगुः॥ ॥किमनन्तरे योगे यः सं
ख्यापूर्वः स द्विगुसंज्ञः आहोस्वित्पूर्वमात्रे। किं चातः। यद्यनन्तरयोगे। एकशाटीति द्विगोरितीकारो न प्राप्नोति। अथ
पूर्वमात्रे। एकभिक्षा। अत्रापि प्राप्नोति। अस्त्वनन्तरे। कथमेकशाटी। ईकारान्तेन समासो भविष्यति। एका शाटी ए
कशाटी। इह तर्हि एकापूपी द्विगोरितीकारो न प्राप्नोति। अस्तु तर्हि पूर्वमात्रे। कथमेकभिक्षा। टाबन्तेन सह समासो भवि
ष्यति। एका भिक्षा एकभिक्षा। इदं तर्हि। सप्तर्षयः। इगन्ते द्विगाविति पूर्वपदप्रकृतिस्वरः प्राप्नोति। अस्तु तर्ह्यनन्तरे। कथमेका
पूपी। समाहार इत्येव सिद्धम्।

तथा च भिक्षदं न प्रकाशयेदिति प्रयोगः। तत्रैको भिक्ष इति पूर्ववत् ——— समासे कृते समासार्थस्य स्त्रीत्वोपजननाद् ङीप् प्रसज्येत।
यथा जनानां पदं जनपद इति समासे कृते समासार्थस्य पुंस्त्वमेवमिहापि स्त्रीत्वमिति मन्यते। ईकारान्तेनेति। शाटशब्दाज्जातिलक्ष
णो ङीष् कृत इति भावः। एकापूपीति। एकश्चासावपूपश्चेति पूर्ववत्समासः। अत्र द्विगुत्वे सत्यकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत
इति द्विगोरितीकारः सिध्यति नान्यथा। केवलश्चापूपशब्दः पुंसि वर्तत इति जातिलक्षणो ङीष् नास्ति। टाबन्तेनेति। भिक्षाशब्देन स
मासे कृते अत इत्यधिकाराद् ङीबभाव इत्यर्थः। भिक्षाशब्दश्च गुरोश्च हल इति स्त्रियां व्युत्पाद्यते। वा टाबन्त इत्यनेन पक्षे नपुंसकत्वं न
भवति। व्यवस्थितविभाषाविज्ञानात्। यत्रापोह्रस्वत्वं क्रियते पञ्चखट्वं पञ्चखट्वीत्यादौ तत्रैव वा स्त्रीत्वं विधीयते। भिक्षशब्देन त्वनभि- रामः
धानात्समासो न भवतीति मन्यते। अन्यथा तत्रैकभिक्षीति स्यात्। सप्तर्षय इति। दिक्संख्ये संज्ञायामिति समासः। ॥ ३३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कः पुनरिति। अनेकविषयत्वात्समाहारस्यैकस्य तदसंभवात्प्रश्नः। ______ । यत्तदिति। एकमप्यपूर्णं कश्चित्करणे ददन्नेकमिति मन्यते। दानेश्रद्धातिशयाद्वा महत्त्वाद्वा अनेकस्मिन्यः संभ्रमः स एकस्मिन्नपि कर्तव्यो भवति। अथ वेति। पूर्वत्रापरितोषे णैतदुच्यते। भाषायामपि सप्तर्षिशब्दोन्तोदात्त दृश्यते। प्रकृतिस्वरपूर्वपदश्च स्यात्। अत एवैकशाटीत्यादावपि द्विगुस्वराभावः॥ कुत्सितानि॥ किं व्याकरणमिति। अयं भावः। शब्दप्रवृत्तिनिमित्तकुत्सायामयं समासदृश्यते वैयाकरणश्चौरद्त्यादौ माभूदिति। तत्र व्याकरणस्य वेदाङ्गत्वान्नास्ति कुत्सा नापि तदधीयानस्य वैयाकरणइति। यः छष्टो निष्प्रतिभत्वात्त्वं सूचयति अहो गगनं निर्मलमिति। प्रश्नं विस्मारयितुं स निष्फलव्याकरणाध्ययनत्वात्कुत्स्यते। तत्स्थमपीति। आश्रयदोषादाश्रितस्या

कः पुनरत्र समाहारः। यत्तद्दानं संभ्रमो वा। इह तर्हि पञ्चहोतारो दशहोतारः। इगन्ते द्विगावित्येषः स्वरो न प्राप्नोति। अस्तु तर्हि पूर्वमात्रे। कथं सप्तर्षयः। अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दसीत्येवमेतत्सिद्धम्। अथ वा पुनरस्तु अनन्तरे। कथं पञ्चहोतारः दशहोतारः। आद्युदात्तप्रकरणे दिवोदासादीनां छन्दसीत्येव सिद्धम्॥ संख्या॥ कुत्सितानि कुत्सनैः॥ ॥ किमुदाहरणम्। वैयाकरणखसूचिः। किं व्याकरणं कुत्सितमाहोस्विद्वैयाकरणः। वैयाकरणः कुत्सितः। तस्मिन्कुत्सिते तत्स्थमपि कुत्सितं भवति॥ कुत्सितानि॥ ॥ उपमानानि सामान्यवचनैः॥ ॥ उपमानानीत्युच्यते कानि पुनरुपमानानि। किं यदेवोपमानं तदेवोपमेयमाहोस्विदन्यदुपमानमन्यदुपमेयम्। किं चातः। यदि यदेवोपमानं तदेवोपमेयं क इहोपमार्थः। गौरिव गौरिति।

पि निष्फलत्वात् कुत्सा॥ उपमानानि॥ कानीति। सूत्रानुरोधेन बहुवचनं कृतम्। किं यदेवोपमानमिति। अत्र तूपमानमात्रस्य जिज्ञासितत्वाद्बहुत्वविवक्षायाः प्रयोजनाभावादेकवचननिर्देशः। ननु कर्मकरणयोर्भेदादेकत्वविषयसंदेहाभावात् प्रश्नानुपपत्तिः। अयं भावः। शस्त्री श्यामा देवदत्तेति श्यामत्वं सर्वाश्रयव्यापि यद्यभिन्नं विवक्षितं तदा तद्द्वारेण शस्त्रीदेवदत्तयोरुपमानोपमेयत्वात्तस्य च तयोरविशिष्टत्वात् तद्द्वारकस्तयोरभेद इति यदेवोपमानं तदेवोपमेयमित्यभ्युपगतं भवति। न चैतद्युक्तम्। शस्त्रीशब्दप्रयोगवैयर्थ्यप्रसङ्गात्। अथाधारभेदात् श्यामत्वस्य भेदस्तदा शस्त्रीदेवदत्तास्थयोः श्यामगुणयोर्भेदान्नास्ति तद्द्वारक उपमानोपमेयभावः। किं चातइति। स्ववाचाभिप्रायमभिधापयितुं प्रश्नः। गौरिवेति। व्यक्तिगतानां भेदानां शब्देनासंस्पर्शात् सामान्यमुखेन व्यावहार्यादितिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गौरिवाश्व इति। अत्यन्तभेदविवक्षायामिदमुच्यते। यदा त्वश्वस्य जाड्यादिधर्मप्रतिपादनाय इदमुच्यते तदा भवत्येवोपमानोपमे-
यभावः किंचित्सामान्यमिति। श्यामत्वस्याधारभेदाद्भेदोप्याश्रीयते गुणजातेरेकत्वादभेदोपीत्यर्थः। किंवक्तव्यमिति। यथोपवर्णि-
तं वचनेन विना कथं प्रतिपत्तुं शक्यमिति भावः। इतरो निर्वचनेन यथोक्तं प्रतिपादयितुमाह। नहीति। मानं हीति। यथा प्रस्था-
दिति नहि साकल्येन मेयं परिच्छिद्यते। तत्समीप इति। मानस्य समीप इत्यर्थः। परिच्छेदवशाच्च सामीप्यं परिकल्प्यते न त्वत्र मुख्यं सा-
मीप्यमस्ति। उपमानानीति। निपातनात्तत्पुरुषः। अव्ययीभावे ह्येतद्रूपं न स्यात्। कामं तर्हीति। ततश्च व्यवस्था न प्राप्नोतीति भावः। बाढ-
मिति। अपेक्षानिमित्तकः पितापुत्रादिव्यवहारवदुपमानोपमेयभाव इति न कश्चिद्दोष इत्यर्थः। किं पुनरिति। अयं भावः। यदा श-
स्त्रीशब्दः शस्त्र्यामेव वर्तते श्यामाशब्दोपि तस्यामेव तदा समासेनोपमेयाया देवदत्ताया अभिधानं न प्राप्नोति। अथ श्यामाश-

अथान्यदेवोपमानमन्यदुपमेयं क इदानीमुपमार्थो गौरिवाश्व इति। एवं तर्हि यत्र किंचित्सामान्यं कश्चिच्च विशेषः
तत्रोपमानोपमेये भवतः। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। मानं हि नाम अनिर्ज्ञातज्ञानार्थमुपादीय
ते अनिर्ज्ञातमर्थं ज्ञास्यामीति। तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानं गौरिव गवय इति। गौर्निर्ज्ञातः गवयो
निर्ज्ञातः। कामं तर्ह्यनेनैव हेतुना यस्य गवयो निर्ज्ञातः स्याद्गौरनिर्ज्ञातः तेन कर्तव्यं स्याद्गवय इव गौरिति।
बाढं कर्तव्यम्। किं पुनरिहोदाहरणम्। शस्त्रीश्यामा। क्व पुनरयं श्यामाशब्दो वर्तते। शस्त्र्यामित्याह। केन तर्हीदा
नीं देवदत्ताभिधीयते। समासेन। यद्येवं शस्त्रीश्यामो देवदत्त इति न सिध्यति।

ब्दो देवदत्तायां वर्तते तदा वैयधिकरण्यात्समासाप्रसङ्गः। वचनसामर्थ्यात्समासे मृगीव चपला मृगचपलेति पुंवद्भावो न प्रा-
प्नोति। शस्त्रीश्यामेति। साधारणधर्मविशिष्टोपमेयार्थवृत्तिः शब्दः सामान्यवचनशब्देन वचनग्रहणाद्गृह्यते यथा गुणवचनश-
ब्दो गुणोपसर्जनद्रव्यवाची। क्व पुनरिति। उभयथा दोषदर्शनात्प्रश्नः। केनेति। पूर्वपदोत्तरपदयोरुपमानवृत्तित्वे तद्व्यतिरिक्तश-
ब्दान्तराभावात्प्रश्नः। समासेनेति। स्वाभाविकत्वादर्थाभिधानस्यान्यपदार्थग्रहणमन्तरेणाप्यश्वकर्णादिवज्जातिविशेषस्य शस्त्री-
श्यामादिकः समास उपमेयस्य वाचक इत्यर्थः। यद्येवमिति। गुणवचनस्याश्रयलिङ्गानुविधायित्वात्स्त्रीलिङ्गेन श्यामाशब्देन समा-
से कृते रूपस्याप्रसिद्धिः। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उपसर्जनस्येति। अप्राधान्यादुपसर्जनत्वं मन्यते। समासवाच्यत्वादुपमेयं हि प्रधानमित्याशयः। यदि तर्हीति। ह्रस्वविधौ कृत्रिममेवोपसर्जनं गृह्यते न तु लौकिकमपि। कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्यय इति न्यायाल्लौकिकग्रहणे दोषप्रसङ्गाच्च तित्तिरिकल्माषीकुम्भकपाललोहिनीत्यत्रोपमानस्य पुन्नपुंसकलिङ्गत्वात्समासात्प्राक् स्त्रीप्रत्ययो नास्ति। समासे कृतेऽनुपसर्जनाधिकाराद् ङीप्ङीषोः प्रतिषेधः प्राप्नोति। सत्यपि वा ङीषि सति शिष्टत्वादुपमानस्वरं बाधित्वा ङीष्स्वरः प्राप्नोति। एवं तर्हीति। ततः पूर्वोक्तदोषाभावः। शस्त्रीश्यामा देवदत्त इति श्यामशब्दस्य देवदत्तवृत्तित्वात्तित्तिरिकल्माषीति स्त्रीप्रत्ययान्तेनोपमेयवृत्तिना समासविधानात्। एवमपीति। श्यामाशब्दस्य देवदत्ताभिधाने चरितार्थत्वाच्छस्त्रीगतो गुणो न निर्दिष्टः स्यादित्यनियतगुणनिमित्तसादृश्यप्रतीतिप्रसङ्ग इत्यर्थः। चन्द्रमुखीति। अयं भावः। यत्रानिर्दिष्टोऽपि गुणो वृद्धव्यवहारवशादुपमानिमित्तत्वेन प्रतीयते तत्रोपमेयेऽश्रुतः संनिधानादुपमानं कथं न ल

उपसर्जनस्येति ह्रस्वत्वं भविष्यति। यदि तर्ह्युपसर्जनान्यप्येवंजातीयकानि भवन्ति। तित्तिरिकल्माषीकुम्भकपाललोहिनी। अनुपसर्जनलक्षण ईकारो न प्राप्नोति। एवं तर्हि शस्त्रीश्यामेव शस्त्रीशब्दो वर्तते देवदत्तायां श्यामाशब्दः। एवमपि गुणोऽनिर्दिष्टो भवति। बहवः शस्त्र्यां गुणाः तीक्ष्णा सूक्ष्मा एषुरिति। अनिर्दिश्यमानस्यापि गुणस्य भवति लोके संप्रत्ययः। तद्यथा। चन्द्रमुखी देवदत्तेति। बहवश्चन्द्रे गुणाः। या चासौ प्रियदर्शनता सा गम्यते। एवमपि समानाधिकरणेनेति वर्तते। व्यधिकरणत्वात्समासो न प्राप्नोति। किं हि वचनान्न भवति। यद्यपि तावद्वचनात्समासः स्यात्। इह खलु मृगीव चपला मृगचपला समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोति। एवं तर्हि तस्यामेवोभयं वर्तते। एतच्चात्र युक्तं यत्तस्यामेवोभयं वर्तेत। इतरथा हि बहुपेक्ष्यं स्यात्।

क्ष्यति। किं हि वचनादिति। दुर्बलं प्रकरणं श्रुत्या बाध्यत इत्यर्थः। पुंवद्भाव इति। पुंवत्कर्मधारयजातीयदेशीयेष्वित्यनेनानचस्त्रीपूर्वपदस्याविवक्षितत्वान्मृगक्षीरादिवन्मृगचपलेति भविष्यति। यद्यप्यन्यत्स्त्रियाश्चापल्यमन्यत्पुंसस्तथापि पुंवद्भावेन स्त्रीप्रत्यये निवृत्ते नास्ति स्त्रीत्वलक्षणविशेषावगतिः। प्रकरणादिवशात्तु स्त्रीत्वप्रतिपत्तौ जातिमात्रोपादानेऽपि तत्प्रतीतिर्भविष्यति। सा च बहिरङ्गत्वात्स्त्रीप्रत्ययोत्पत्तिनिमित्तं न भवति। एवं तर्हि प्रतिपत्तिगौरवप्रसङ्गादेतदत्र भाष्यकारेणाश्रितं गत्यन्तरसंभवाच्च. तद्दर्शयति। एवं तर्हीति। शस्त्रीसादृश्याद्देवदत्ता शस्त्रीशब्देनोच्यते सादृश्यनिमित्तस्त्वभेदोपचाराद्यथा गौर्वाहीक इति। पूर्वावस्थाश्रयेण च शस्त्र्या उपमानवाचित्वमवसेयम्। ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यदितावदिति। यदा श्यामाशब्दो देवदत्तायां वर्तते शस्त्रीशब्दः शस्त्र्यामेव तदा शस्त्रीगतं श्यामत्वमनेकगुणसंभवे गुणान्तरव्यवच्छेदायोपमानिमित्तं प्रतिपादयितुं श्यामेत्यपेक्षणीयम्। अथापीति। यदा शस्त्र्यामेव शस्त्रीशब्दो वर्तते श्यामाशब्दोऽपि तस्यामेव तदा देवदत्तागतश्यामत्वप्रतिपादनाय श्यामेत्यपेक्षणीयम्। न च शब्दस्यावृत्तिरस्ति येनोभयगतं श्यामत्वं प्रतिपादयेत्। अत्रापि दोषमाह। एवमपीति। यदा शस्त्रीसादृश्याद्देवदत्तायां शस्त्रीत्वमारोप्यते तदा कं गुणमाश्रित्य तयोः सादृश्यमाश्रीयतामित्यर्थः। उत्तरं तु पूर्वमेव व्याख्यातम्। यद्यपि पूर्वयोरपि पक्षयोरेष परिहारोऽस्ति तथापि ह्रस्वत्वस्त्रीप्रत्ययस्वरपुंवद्भावासिद्ध्या पूर्वे

यदि तावदेवं विग्रहः करिष्यते शस्त्रीव श्यामा देवदत्तेति। शस्त्र्यां श्यामेत्येतदपेक्ष्यं स्यात्। अथाप्येवं विग्रहः करिष्यते। यथा शस्त्री श्यामा तद्वदियं देवदत्तेति। एवमपि देवदत्तायां श्यामेत्येतदपेक्ष्यं स्यात्। एवमपि गुणेन निर्दिष्टो भवति। बहवश्च शस्त्र्यां गुणाः तीक्ष्णा सूक्ष्मा पृथुरिति। अनिर्दिश्यमानस्यापि गुणस्य भवति लोके संप्रत्ययः। तद्यथा। चन्द्रमुखी देवदत्तेति बहवश्चन्द्रे गुणाः। या चासौ प्रियदर्शनता सा गम्यते। उपमानसमासे गुणवचनस्य विशेषभाक्त्वात्सामान्यवचनाप्रसिद्धिः। उपमानसमासे गुणवचनस्य विशेषभाक्त्वात्सामान्यवचनस्याप्रसिद्धिः स्यात्। शस्त्री श्यामेति। श्यामाशब्दोऽयं शस्त्रीशब्देनाभिसंबध्यमानो विशेषवचनः संपद्यते। तत्र सामान्यवचनैरिति समासो न प्राप्नोति। न वा श्यामत्वस्योभयत्र भावात्तद्वाचकत्वाच्च शब्दस्य सामान्यवचनत्वस्य प्रसिद्धिः। न वा एष दोषः। किं कारणम्। श्यामत्वस्योभयत्र भावात्। उभयत्रैवात्र श्यामत्वमस्ति। शस्त्र्यां देवदत्तायां च। तद्वाचकत्वाच्च शब्दस्य। तद्वाचकश्चात्र श्यामाशब्दः प्रयुज्यते। किंवाचकः। उभयवाचकः। श्यामत्वस्योभयत्र भावात्तद्वाचकत्वाच्च शब्दस्य सामान्यवचनत्वं प्रसिद्धम्। सामान्यवचने प्रसिद्धे सामान्यवचनैरिति समासो भविष्यति। नावश्यं स एव सामान्यवचनः। यो बहूनां सामान्यमाह द्वयोरपि यः सामान्यमाह सोऽपि सामान्यवचन एव। अथवा सामान्यवचनैरित्युच्यते।

पक्षद्वयं परिहृत्यायं पक्ष आश्रितः। उपमानसमास इति। शस्त्री श्यामा देवदत्तेत्यत्र शस्त्रीशब्दसंनिधौ श्यामाशब्दः प्रयुज्यमानः शस्त्रीगतं श्यामत्वगुणं प्रतिपादयति न च शस्त्र्यो गुण आश्रयान्तरे वर्तत इति सामान्यवचनत्वाभाव इत्यर्थः। न वेति। शस्त्रीशब्दोपादानसामर्थ्यात् श्यामगुणसंनिधानाच्च यादृशं शस्त्रीश्यामत्वमन्यविलक्षणं तादृशं देवदत्तायामिति संप्रत्ययादुभयसाधारणं श्यामत्वं भवति सामान्यमिति न कश्चिद्दोषः। तत्र सादृश्यं सामान्यमुच्यते गुणो वा द्विवृत्तिर्भिन्नोऽप्यभिन्नत्वेन विवक्षितः सामान्यम्। ॥

CC-0. In Public Domain. Digitization by eGangotri

सर्वश्चेति॥ शब्दान्तरसंबन्धे सर्वः शब्दो विशेषवाचित्वात् सामान्यवचनो न भवतीति सामान्यवचनग्रहणोपादानसामर्थ्याच्छब्दान्तरा-
भिसंबन्धात् समासरूपात् प्राग्यः शब्दः सामान्यवचनः स गृह्यते केवलश्च श्यामाशब्दः श्यामगुणविशिष्टं स्त्रीत्वयुक्तं द्रव्यमात्रमाहे-
ति सा प्रतिकाभावे भूतपूर्वगत्याश्रयणात् सिद्धमिष्टम्॥ उपमितम्॥ पुरुषोयं व्याघ्र इव शूर इति। उपमानप्रतिपादनपरमेतत्। वैय-
धिकरण्यादेवात्र समासस्याप्रसङ्गः। यदा तु व्याघ्रशब्दः शौर्यादेः पुरुषार्थ एव वर्तते तदा सामानाधिकरण्ये सति समासेन भाव्य-
म्। तत्र यदा प्रकरणादिवशान्नियतसाधारणगुणप्रतिपत्तिस्तदा सामान्याप्रयोगे सति समासः। यदा तु गुणान्तरव्यवच्छेदाय वि-
शिष्टसाधारणगुणवचनशब्दप्रयोगः पुरुषो व्याघ्र इव शूर इति तदा समासाभावाय सामान्याप्रयोगग्रहणम्। भवति वै प्रधानस्ये-

सर्वश्च शब्दोन्येन शब्देनाभिसंबध्यमानो विशेषवचनः संपद्यते त एवं विज्ञास्यामः प्रागभिसंबन्धाद्यः सामान्य
वचन इति॥ उपमानानि॥ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे॥ सामान्याप्रयोग इति किमर्थम्। इह मा भूत्। पुरु
षोयं व्याघ्र इव शूरः पुरुषोयं व्याघ्र इव बलवान्। सामान्याप्रयोग इति शक्यमवक्तुम्। इह कस्मान्न भवति। पुरु
षोयं व्याघ्र इव शूरः पुरुषोयं व्याघ्र इव बलवान्। असामर्थ्यात्। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। एवं तर्हि सि
द्धे सति यत् सामान्याप्रयोग इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवति वै प्रधानस्य सापेक्षस्यापि समास इति।
किमेतस्य ज्ञापने प्रयोजनम्। ——— राजपुरुषोभिरूपः राजपुरुषो दर्शनीयः। अत्र वृत्तिः सिद्धा भव
ति॥ उपमितम्॥ विशेषणं विशेष्येण बहुलम्॥ ॥विशेषणविशेष्ययोरुभयविशेषणत्वादुभयविशेष्यत्वादुप
सर्जनाप्रसिद्धिः। विशेषणविशेष्ययोरुभयविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनत्वस्याप्रसिद्धिः। कृष्ण
तिला इति। कृष्णशब्दोयं तिलशब्देनाभिसंबध्यमानो विशेषणवचनः संपद्यते। तथा तिलशब्दः कृष्णशब्देना
भिसंबध्यमानो विशेषणवचनः संपद्यते तदुभयं विशेषणं भवत्युभयं च विशेष्यम्। विशेषणविशेष्ययोरुभय
विशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनत्वस्याप्रसिद्धिः।

ति। न्यायसिद्धस्यैवार्थे लिङ्गदर्शनमिदम्। प्राधान्यादेवानेकोपकारकोपकार्यत्वाविरोधात् समासस्य सिद्धत्वात्॥ विशेषणम्॥ विशेष-
णं विशेष्ययोरिति। उभयापेक्षेयं षष्ठी नित्यसापेक्षत्वाच्चोभयशब्दस्य शब्दान्तरेण समासो भवति। विशेषणविशेष्याभिमतयोर्द्वयोर्द्वै-
रूप्यसद्भावात् समाससिद्धावप्यनियततः पूर्वनिपातः प्राप्नोतीति दोषः। कृष्णशब्द इति। कृष्णशब्द उच्चरितो भ्रमरकोकिलादिद्रव्यमा-
त्रं प्रतिपादयति तिलशब्देन त्वभिसंबध्यमानस्तिलेष्वेव नियम्यत इति कृष्णशब्दो विशेष्यस्तिलशब्दो विशेषणम्। एवं तिलश-
ब्दस्यापि विशेष्यत्वं कृष्णशब्दस्य च विशेषणत्वमवसेयम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नवेति। अन्यतरस्य द्रव्यस्यैवेत्यर्थः। अपरस्येति। गुणस्यैवेत्यर्थः। यदास्य तिला इति। ते हि द्रव्यरूपत्वात् क्रियासिद्धये माषा इवोपयुज्यमानाः प्राधान्येन विवक्ष्यन्ते। कृष्णस्तु गुणत्वात् द्रव्यव्यवधानेन क्रियायामुपयोगाद्विशेषणं तिलानां संपद्यते। इतरोऽपि योक्तं न्यायमबुध्वा विवक्षीमात्रनिबन्धनत्वमनेन विशेषणविशेष्यभावस्य प्रतिपादितं विवक्षायाश्च स्वातन्त्र्यादनियमात् प्रयोगानियम इति मन्यमानः पृच्छति। कामं तर्हीति। नह्ययमिति॥ नहि गुणद्रव्यवाचिनोर्द्वन्द्व उपपद्यते। गुणवचनस्य द्रव्यापेक्षत्वादसामर्थ्याद् द्रव्येण सह विवक्षाया असंभवात्। यदि तु द्वन्द्वः स्यात्स्यादेव तिलकृष्णा इति प्रयोगः। न खल्वपीति। गुणेन सह षष्ठीसमास

नवान्यतरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्योपसर्जनप्रसिद्धिः। नवा एष दोषः। किं कारणम्। अन्यतरस्य प्रधानभावात्। अन्यतरदत्र प्रधानम्। तद्विशेषकत्वाच्चापरस्य। तद्विशेषकं चापरम्। अन्यतरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्योपसर्जनसंज्ञा भविष्यति। यदास्य तिलाः प्राधान्येन विवक्षिता भवन्ति तदा कृष्णो विशेषकत्वेन तदा तिलाः प्रधानं कृष्णो विशेषणम्। कामं तर्ह्यनेनैव हेतुना यस्य कृष्णाः प्राधान्येन विवक्षिता भवन्ति तिला विशेषणत्वेन तेन कर्तव्यं तिलकृष्णा इति। न कर्तव्यम्। न ह्ययं द्वन्द्वः। तिलाश्च कृष्णाश्चेति। न खल्वपि षष्ठीसमासः तिलानां कृष्णा इति। किं तर्हि। द्वाविमौ प्रधानशब्दौ एकस्मिन्नर्थे युगपदवरुध्येते। न च द्वयोः प्रधानशब्दयोरेकस्मिन्नर्थे युगपदवरुध्यमानयोः किंचिदपि प्रयोजनमस्ति तत्र प्रयोगादेतद्गन्तव्यं नूनमत्रान्यतरत्प्रधानं तद्विशेषकं चापरमिति। तत्र त्वेतावान् संदेहः किं प्रधानं किं विशेषणमिति। स चापि कः संदेहः यत्रोभौ गुणशब्दौ। तद्यथा। खञ्जकुब्जः कुब्जखञ्ज इति।

निषेधादिति भावः। प्रधानशब्दाविति। प्रथमान्तावित्यर्थः। अनेन षष्ठीसमासविपरीतत्वं कथितम्। एकस्मिन्नर्थ इत्यनेन तु द्वन्द्वविपरीतत्वं कथितम्। द्वन्द्वे हि सर्वपदार्थानां प्राधान्यान्नास्ति सर्वपदानामेकस्मिन्नर्थेऽवस्थानम्। एतच्चावयवार्थापेक्षयोक्तम्। समुदायार्थापेक्षायां तु समुदायलक्षण एकस्मिन्नर्थे सर्वेषां पदार्थानां वृत्तिरस्त्येव। प्रधानशब्दयोरिति। परस्परविशेषणत्वेनानुपकारकयोः स्वतन्त्रयोरित्यर्थः। यत्रोभाविति। द्वयोरपि गुणत्वाद् द्रव्यव्यवधानेन क्रियासाधनत्वाविशेषादिति भावः।

CC-0. In Public Domain. Digitization by eGangotri

यत्रह्यन्यतरद्द्रव्यमिति। तत्र नास्ति संदेह इति वाक्यशेषः। यद्द्रव्यमिति। साक्षात्क्रियासाधनत्वादिति भावः। ननु तिलशब्दो जातिवाचीन द्रव्यवाची। जातिविशिष्टद्रव्यवाचित्वाद्यदि द्रव्यवाचीत्युच्यते तदा कृष्णशब्दोऽपि गुणविशिष्टद्रव्यवाचित्वाद्द्रव्यवचन आपद्यत इति नानयोः कश्चिद्विशेषः। नैष दोषः। उत्पत्तिप्रभृत्याविनाशाज्जातिर्द्रव्यं न जहाति। न च शब्देन द्रव्यव्यतिरेको जातेः प्रत्याय्यते। नहि भवति शाबलेयस्य गौरिति। किं तर्हि गौः शाबलेय इति। तस्माज्जात्यात्मकमेव द्रव्यं प्रतीयत इति जातिशब्दो द्रव्यवचनत्वेनावस्थाप्यते। गुणाः पुनरुत्पायिनश्चापायिनश्च पटस्य शुक्ल इति व्यतिरिक्ता अपि द्रव्यात्तच्छब्देन प्रत्याय्यन्त इति गुणात्मकत्वं द्रव्यस्य नास्तीति न गुणशब्दो द्रव्यवचनत्वेनावस्थापनमर्हति। एतन्न्यायाश्रयेण वैदिकव्यवहारं निदर्शनायोपन्यस्यति। तद्यथेति। श्वेतं छागमालभेतेति चोदनायां श्वेताभावे कृष्णश्छाग आलभ्यते छागाभावे तु शुक्लस्य द्रव्यान्तरस्यालम्भो नास्ति। कथं तर्हीति। द्वयोरपि जातिशब्दत्वाद्द्रव्यवाचित्वात्प्रधानत्वान्नान्यतरस्य विशेषणत्वमिति प्रश्नः। नैतयोरिति। आवश्यकमस्मिन्नस्तीत्यर्शआदित्वादच्प्रत्ययः। अयं भावः। यदा प्रथमत एव विशेष उपक्रम्यते शिंशपेति तदा वृक्षविशे-

यत्र ह्यन्यतरद्द्रव्यमन्यतरो गुणः ——:तत्र यद्द्रव्यं तत्प्रधानम्। तद्यथा। शुक्लमालभेत। कृष्णमालभेत। न पिष्टपिण्डीमालभ्य कृती भवति। अवश्यं तद्गुणं द्रव्यमाकाङ्क्षति। कथं तर्हीमौ द्वौ प्रधानशब्दावेकस्मिन्नर्थे युगपदवरुध्येते वृक्षः शिंशपेति। नैतयोरावश्यकः समावेशः। नह्यवृक्षः शिंशपास्ति॥ विशेषणम्॥

षस्यैव प्रक्रान्तत्वाद्विशेषस्य सामान्याव्यभिचाराद्वृक्षशब्दस्य नैव प्रयोगेण भाव्यम्। यदा तु प्रथमं सामान्यमुपक्रम्यते वृक्ष इति तदा तद्विशेषणाय शिंशपाशब्द उपादीयमानो विशेषणमेव भवतीति शिंशपावृक्ष इत्येव भाव्यम्। अत्र केचिदाहुः। शिंशपाया अपि फलव्यवच्छेदायोपादीयमानो वृक्षः किमिति विशेषणं न भवति ततश्च भवितव्यं वृक्षः शिंशपेत्यपीति। तदयुक्तम्। वृक्षत्वस्य व्यापकत्वान्महाविषयत्वाद्दूरतः प्रथमतस्तस्यैवोपलम्भाद्विशेष्यत्वमेव। शिंशपात्वं तु स्वल्पविषयत्वात्पश्चाद्ग्रहणाच्च शुक्लादिगुणकल्पत्वाद्विशेषणमेवेति नास्ति प्रयोगस्यानियमः। तथा च वृक्षविशेषस्य खदिरादेः प्रतिनिधिर्भवति न तु वृक्षत्वाभावे फलपुष्पादेरुपादानं क्रियत इति न्यायविद आहुः। नह्यवृक्ष इति। ननु फलमस्त्येव। नैतदस्ति। वृक्षप्रतीतिव्यवधानेन फलप्रतीतेरुत्पादाद्बहिरङ्गत्वाद्वृक्षावस्थायस्य प्रागुत्पादादन्तरङ्गत्वात्। विशेषणं विशेष्येणेति द्वयोरुपादानं विस्पष्टार्थम्। संबन्धिशब्दत्वादेवान्यतरेणेतरस्याक्षेपात्। बहुलग्रहणाच्च तक्षकः सर्पो लोहितस्तक्षक इत्यादौ समासाभावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पूर्वा॥ अथ किमर्थमिति। एतत्सूत्राद्युत्तरसूत्रानुक्रमणमित्यर्थः। पूर्वकालेत्ययं तु योगः पूर्वकालादीनां पूर्वनिपातनियमार्थः। दिक्संख्ये इति संज्ञायां नियमार्थः। कुत्सितानीति विशेष्यस्य पूर्वनिपातार्थः। एवमन्यत्रापि प्रयोजनमूह्यम्। यत्र तु प्रयोजनाभावः पूर्वापरप्रथमेत्यादौ तस्यायमाक्षेपः पूर्वेणैवास्य समासस्य सिद्धत्वात्। बहुलवचनस्याकृत्स्नत्वादिति। अकृत्स्नप्रतिपत्तिविषयत्वादित्यर्थः। न हि मन्दबुद्धयो बहुलग्रहणमात्रेण समासासमासविषयविवेकमवगन्तुं क्षमा इत्यर्थः। इतरो यथोक्तमकृत्स्नशब्दार्थमप्रतिपद्य बहुलवचनस्याव्यापकत्वमकृत्स्नत्वं मत्वा चोदयति। यद्यकृत्स्नमिति। ततश्च निष्प्रयोजनं बहुलवचनमिति भावः। कृत्स्नं चेति। पर्यायोपादानं लौकिक्या वाचोयुक्त्या सामर्थ्याविघातप्रतिपादनार्थं यथा स्वामी प्रभुरीश्वरो भगवानिति। चतुर्भिः शब्दैश्चत्वारो बहुलशब्दार्था इति क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिरित्यादयः संगृहीता इत्ये

-पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च॥ ॥अथ किमर्थमुत्तरत्रैव माद्यनुक्रमणं क्रियते न विशेषणं विशेष्येणा बहुलमित्येव सिद्धम्। बहुलवचनस्याकृत्स्नत्वादुत्तरत्रानुक्रमणसामर्थ्यम्। अकृत्स्नं बहुलवचनमित्युत्तरत्रानुक्रमणं क्रियते। यद्यकृत्स्नं यदनेनकृतमकृतं तत्। एवं तर्हि न ब्रूमोऽकृत्स्नमिति कृत्स्नं च कारकं च लाघकं च निर्वर्तकं च यच्चानेन कृतं सुकृतं तत्। किमर्थं तर्हि एवमाद्यनुक्रमणं क्रियते। उदाहरणभूयस्त्वात्। एते खल्वपि विषयाः सुपरिगृहीता भवन्ति येषु लक्षणं प्रपञ्चश्च। केवलं लक्षणं केवलः प्रपञ्चो वा न तथा कारकं भवति।

कआहुः। तेन कृष्णसर्प इत्यादौ नित्यः समासः। रामो जामदग्न्य इत्यादावसमासः। नीलमुत्पलं नीलोत्पलमित्यादौ विकल्पः। सुसूक्ष्मजटकेशादाववयवसमासाभावः। अन्ये त्वाहुः। कृत्स्नमिति सर्वेष्टस्य संग्राहकत्वाद्व्यापकमित्यर्थः। केनरूपेणाव्यापकत्वमित्याह। कारकमिति। कुर्वदपि न विपर्ययेण करोतीत्याह। साधकमिति। न त्वकस्यचिद्वर्जनेन प्रवर्तकमित्याह। निर्वर्तकमिति। अथवा साधकं पारंपर्येण स्यात्। वर्णो पदे शब्द इव प्रत्याहारद्वारेण लघुसंस्कारस्येत्याह। निर्वर्तकमिति। साक्षात्कार्यं निष्पादयतीत्यर्थः। उदाहरणभूयस्त्वादिति। विभाषा गुणेऽस्त्रियामिति पञ्चमी। अस्यैव लक्षणस्य भूयांस्युदाहरणानि प्रदर्शयितुमित्यर्थः। केवलमिति। केवलेन लक्षणेन मन्दबुद्धिर्विषयविभागं नावधारयति केवलेन प्रपञ्चेन च सामान्यलक्षणरहितेन प्रतिपदपाठवच्छास्त्रस्य गौरवप्रसङ्गः।

CC-0. In Public Domain. Digitization by eGangotri

व्यवस्थितविभाषैव कस्मान्नाश्रीयते किं बहुलग्रहणेनेत्याह। अवश्यमिति। वैदिकव्यवहारानुसरणाय सर्वैः प्रबुद्धैरिह व्यवहार
इत्यर्थः। सर्ववेदपारिषदमिति। परिषद इदं पारिषदं साधारणमित्यर्थः। यत्राध्वर्युपरिषदश्चेत्यत्र। अन्ये त्वाहुः। पारिषदः परिषत्परिचा
रक उच्यते स च परिषत्साधारणादिति पारिषदत्वेन साधारणत्वं लक्ष्यते। सर्ववेदाङ्गत्वादस्य सर्ववेदसाधारणं लक्षणं बहुलादि
ग्रहणोपेतं क्रियते। आनुषङ्गिको लौकिकशब्दसंस्कार इति वेदग्रहणं कृतम्॥ श्रेण्यादयः॥ श्रेण्यादय इति। अत एवात्रादिश
ब्दो व्यवस्थावाची कृतादिरित्यत्रादिशब्दः प्रकारवाची प्रयोगादर्शनाच्चोदाहरणस्थानीयाः कतिपये वृत्तिकारैः प्रदर्शिताः। ए-
कशिल्पपण्याश्रयेणोपजीविनां संघः श्रेणिः। तत्र यदा पृथक्स्थितानां श्रेणीकरणं तदा समासो यथा स्यात्। यदा तु श्रेणीस्थाना
मेव दण्डनादिरूपकरणं तदा मा भूदित्येवमर्थमाह। श्रेण्यादिष्वित्यादि। अन्यत्रेति। साक्षात्प्रभृतीनि चेत्यत्र च्व्यर्थवचनमित्यु

अवश्यं खल्वप्यस्माभिरिदं वक्तव्यम्। बहुलमन्यतरस्यामुभयथा वा एकेषामिति। सर्ववेदपारिषदं हीदं शास्त्रम्।
तत्र नैकः पन्थाः शक्य आस्थातुम्॥ श्रेण्यादयः कृतादिभिः॥ श्रेण्यादयः पठ्यन्ते कृतादिराकृतिगणः। श्रेण्यादि
षु च्व्यर्थवचनम्। श्रेण्यादिषु च्व्यर्थग्रहणं कर्तव्यम्। अश्रेणयः श्रेणयः कृताः श्रेणिकृताः। यदा हि श्रेणय एव किंचित्
क्रियन्ते तदा मा भूदिति। अन्यत्रायं च्व्यर्थग्रहणेषु च्व्यन्तस्य प्रतिषेधं शास्ति। तदिह न तथा। किं कारणम्। अन्यत्र पू
र्वं च्व्यन्तकार्यं परं च्व्यर्थकार्यम्। इह पुनः पूर्वं च्व्यर्थकार्यं परं च्व्यन्तकार्यम्॥ क्तेन नञ्विशिष्टेनानञ्॥ ॥ नञ्विशि
ष्टे समानप्रकृतिग्रहणम्। नञ्विशिष्टे समानप्रकृतिग्रहणं कर्तव्यम्। इह मा भूत् सिद्धं चाभुक्तं चेति। अनञि
ति च प्रतिषेधो वक्तव्यः। इह मा भूत् कर्तव्यमकृतमिति।

क्तौ च्व्यन्ते प्रतिषेध उक्त इह तु कस्मान्न कृत इति प्रश्नः। अन्यत्र पूर्वमिति। साक्षात्कृत्येत्यत्र च्व्यन्तत्वे सति नित्यविकल्पितगति
संज्ञाप्रसङ्गे न परत्वाद्विकल्पः स्यादिति तत्र च्व्यन्तप्रतिषेधः क्रियते। तेन पूर्वो नित्या गतिसंज्ञा भवति। इह तु श्रेणीकृता इति
परत्वान्नित्यो गतिसमासः सिध्यतीति नार्थ इह च्व्यन्तप्रतिषेधेनेत्यर्थः॥ क्तेन॥ विशिष्टशब्दोऽयमवधारणरहिताधिक्यवाच्युपा
त्तस्तदातिव्याप्तिपरिहारायाह। नञ्विशिष्ट इति। समानत्वमर्थरूपाभ्यां बोद्धव्यम्। गौरवमप्यस्मिन्पक्ष इत्याह। अनञिति चेति
। न विद्यते नञ् यस्मिन्पूर्वपदे तदनञ् तच्च प्रत्यासत्त्या क्तान्तमेवेह गृह्यते। तदयमर्थः। आधिक्यमात्रवचने विशिष्टशब्द
उपादीयमाने कर्तव्यमकृतमित्यत्रापि समासप्रसङ्गः समानप्रकृतित्वं चास्तीति वार्तिकेनापि समासो न निवारितः। ततश्चा-
नञ्ग्रहणं क्तान्तपूर्वपदनिर्देशार्थं कर्तव्यमिति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अवधारणरहिताधिक्यवचनेप्यव्याप्तिरितितत्परिहारायाह।तुडिडधिकेनचेति।यद्यपितुडिटौ तद्धक्तौ तथापिश्रुतिभेदहेतु
त्वादवधारणेनचश्रुतिभिन्नस्यनिराकरणात्तदधिकस्याप्राप्तिरितिभावः।तुङ्ग्रहणमागममात्रोपलक्षणार्थमितिच्छिताच्छि
तमित्यत्रतुगधिकस्यापिसमासोभवतीति केचिदाहुः।अर्थभेदमकुर्वतोविकारस्याप्युपलक्षणमितिछाताच्छितमित्यत्र
प्राच्छोरन्यतरस्यामितीत्वेकृतेतदधिकेनापिसमासोभवति।त्राताञ्त्राणमित्यादौतुनत्वस्यासिद्धत्वाद्विदकत्वाभावः।तद्य

तुडिडधिकेनच।तुडिडधिकेनचसमासोवक्तव्यः।इहापियथास्यात्।अशितानशितेनजीवतिक्लिष्टाक्लि
ष्टितेनेति।किमुच्यतेसमानप्रकृतिग्रहणंकर्तव्यमिति।यदानञ्विशिष्टेनेत्युच्यते।नचात्रनञ्कृतएववि
शेषः।किंतर्हि।प्रकृतिकृतोपि।अयंविशिष्टशब्दोस्त्येवावधारणेवर्तते।तद्यथा।देवदत्तयज्ञदत्तावाढ्या
वभिरूपौदर्शनीयौपक्षवन्तौदेवदत्तस्तुयज्ञदत्तात्स्वाध्यायेनविशिष्टः।स्वाध्यायेनैवेतिगम्यते।अन्येगु
णाःसमाभवन्ति।अस्त्याधिक्येवर्तते।तद्यथा।देवदत्तयज्ञदत्तावाढ्यावभिरूपौदर्शनीयौपक्षवन्तौदेवदत्त
स्तुयज्ञदत्तात्स्वाध्यायेनविशिष्टःस्वाध्यायेनाधिकः।अन्येगुणाअविवक्षिताभवन्ति।तद्यदातावदवधारणे
विशिष्टशब्दस्तदानैवार्थःसमानप्रकृतिग्रहणेननेहभविष्यति।सिद्धंचाभुक्तंचेति।नाप्यनञिति।प्रतिषे
धेननेहभविष्यतिकर्तव्यमकृतमिति।तुडिडधिकेनापितुतदासमासोनप्राप्नोति।यदाधिक्येविशिष्टश
ब्दस्तदासमानप्रकृतिग्रहणंकर्तव्यमिहमाभूत्।सिद्धंचाभुक्तंचेति।अनञिति।चप्रतिषेधोवक्तव्यः।इह
माभूत्कर्तव्यमकृतमिति।तुडिडधिकेनापितदासमासःसिद्धोभवति।तत्राधिक्येविशिष्टशब्दंमत्वासमानप्र
कृतिग्रहणंचोद्यते।अवधारणंनत्वाचेद्तुडिड्विशिष्टेननप्रकल्पेत।अथचेदधिकविवक्षाकार्यंतुल्यप्रकृतिके
नेति।कृतापकृतादीनांचोपसंख्यानम्।।कृतापकृतादीनांचोपसंख्यानंकर्तव्यम्।कृतापकृतम्।भुक्तविभुक्तम्।पीतविपीतम्।

थति।यदासमस्तंप्रधारणाप्रतिपाद्यतेतदावधारणेविशिष्टशब्दः।स्वरूपवर्णनमात्रेत्वाढ्यादिगुणद्वारेणक्रियमा-
णेआधिक्यमात्रेविशिष्टशब्दः।तद्यदेति।इहक्तेनसनञितिसिद्धेविशिष्टग्रहणात्सावधारणाधिक्यगतिःस्याद्गुरुला
घवानादरेत्वाधिक्यमात्रवृत्तिर्विशिष्टशब्दो ग्रहोतदूतिद्वैतोपपत्तिः।अवधारणंनत्वाचेदिति।पूर्वोक्तएवार्थआर्ययासंगृहीतः
अनञित्येतत्सूत्रेकृतमेवेतिआर्यायांकर्तव्यत्वेननोक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमप्यव्याप्स्यति व्याप्तिपरिहाराय न्यासान्तरमप्याह। सिद्धं त्विति। विसमाप्तिरसमाप्तिः। कृताकृतमित्यत्रैकदेशोकरणाकरणाभ्यां करणस्यासमाप्तिर्गम्यत इति समासः। कृतापकृतमित्यत्राप्यसमाप्तिर्गम्यते यत्कृतं तदेवापकृतं विरूपं कृतमित्यर्थोऽवगमात्। एवं भुक्तविभुक्तमिति यदुक्तं तद्धि भुक्तं विरूपं भुक्तमभुक्तमिति वार्थो विशब्दस्य प्रतिषेधार्थत्वात्। भुक्ते विभुक्ते चैकदेशद्वारकं भोजनकार्याकरणाद्वा बोद्धव्यम्। सिद्धमभुक्तं कर्तव्यमकृतमित्यत्र प्रतिषेधमात्रावगमाद्धि समास्यभावात् समासाभावः। यत्सर्वथा वक्तव्यं तदाह। गतप्रत्यागतादीनां चेति। क्रयिकेत्यादावल्प इति कप्रत्ययस्तदन्तस्य स्वभावात् क्वचित्स्त्रियां वर्तते। क्रयाक्रयिकेत्यन्येषामपीति दीर्घः॥ युवा॥ अयुक्त इति। पुल्लिङ्गस्य स्त्रीलिङ्गेन सामानाधिकरण्यं नोपपद्यत इत्यर्थोपस्यापरिभाषा-ज्ञाप्यते तेन युवतिर्जरतीति स्त्रीलिङ्गयोः समासः। नन्वेतयोरपि विरुद्धवयोवाचित्वान्नास्ति सामानाधिकरण्यम्। नैष दोषः। जर-

सिद्धं तु क्तेन विसमाप्तावनञ्। सिद्धमेतत्। कथम्। क्तान्तेन क्रियाविसमाप्तावनञ्क्तान्तं समस्यत इति वक्तव्यम्॥ गतप्रत्यागतादीनां चोपसंख्यानम्। गतप्रत्यागतम्। यातानुयातम्। पुटापुटिका। क्रयाक्रयिका। फलाफलिका। मानोन्मानिका॥ युवा खलतिपलितवलिनजरतीभिः॥ ॥ अयुक्तोऽयं निर्देशः। समानाधिकरणेनेति वर्तते। कः प्रसङ्गो व्यधिकरणानां समासः स्यादेवं तर्हि ज्ञापयत्याचार्यः यथाजातीयकमुत्तरपदं तथाजातीयकेन पूर्वपदेन समासो भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्येषा परिभाषा न कर्तव्या भवति॥ युवा॥ वर्णो वर्णेन॥ इदं विचार्यते। वर्णेन तृतीयासमासो वा स्यात्। कृष्णेन सारङ्गः कृष्णसारङ्ग इति। समानाधिकरणो वा कृष्णः सारङ्गः कृष्णसारङ्ग इति।

त्यां युवतिधर्मोपलम्भात्। युवतेर्वा जरतीधर्मसद्भावात्तद्रूपारोपात्। युवतिशब्दस्यैव पूर्वनिपातार्थमिदमनियमो हि गुणशब्दत्वात्स्यात्। जरद्भिरित्यपि पाठं शिष्या आचार्येण बोधिता इति युवजरन्नित्यपि भवति॥ वर्णो॥ इदमिति। बुद्ध्या परामृष्टं वस्तु प्रत्यक्षवाचिना सर्वनाम्ना परामृश्यते। न तावदस्मिन्प्रदेशे सूत्रस्य प्रत्याख्यानं पश्चात्तु भविष्यति। इह कृष्णसारङ्ग इति। सारङ्गशब्दः शबलपर्यायः स च गुणोपसर्जनद्रव्यवाचित्वाद्गुणवचनो भवति सारङ्गत्वस्य च कृष्णकृतत्वमस्ति तस्मिन्सति तस्याभावादिति शङ्कुलाखण्डवत्समासः सिद्धः। अथ कृष्णावयवत्वात्सारङ्ग इति कृष्णशब्दस्तदा समानाधिकरणपदः समासः। स च गौणोपि सामानाधिकरण्ये बहुलवचनाद्विशेषणं विशेष्येणेति सिद्ध इति। कृष्णेनेति हेतुतृतीया। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कथमत्रेति। कृल्लाघवमितिप्रश्नः। एतत्प्रतिषेधइति। स्वरे विधीयमानइत्यर्थः। अनेते वर्णइति। कृष्णसारङ्ग इत्यादौ तत्पुरुषे तुल्यार्थतृतीयेति पूर्वपदप्रकृतिस्वरे सिद्धे अनेते वर्णइति सूत्रं कर्तव्यम्। वर्णवाचि पूर्वपदमेतदुत्तरपदे प्रकृतिस्वरं न भवतीत्यर्थः। तेन कृष्णैतइति समासान्तोदात्तत्वमेव भवति। कृष्णेनेति सहयोगे इत्थंभूतलक्षणे वा तृतीया। अनेन समासः। वर्णग्रहणाच्च हिमेनएतो हिमेतइत्यादौ पूर्वपदप्रकृतिस्वर एव भवति। हिमेनेति हेतौ तृतीया। तृतीया तत्कृतार्थेति समासः। कृत्स्वरस्तु नास्ति उणादीनामव्युत्पन्नत्वादकारकत्वाद्वा हिमस्यायच्च वर्णइति। वर्णग्रहणस्य व्यवच्छेद्यत्वे न प्रयोजको नास्तीति भावः। इतरः पराभिप्रायमबुध्वा सत्त्वं प्रतिपादयितुमाह। ननु चेति। कृष्णैतइति। ओमाङोश्चेति पररूपम्। तृतीया कर्मणी

कथमत्र विशेषः। वर्णेन तृतीयासमासः एतत्प्रतिषेधे वर्णग्रहणं कर्तव्यम्। तृतीयापूर्वपदं प्रकृतिस्वरं भवति। अनेते वर्णइति वक्तव्यम्। इह माभूत्। हिमेन एतः हिमेतः। अथ द्वितीयेन वर्णग्रहणेन तविशेषणेनार्थः। बाढमर्थः। यच्च वर्ण एतच्छब्दोऽस्ति। ननु चायमस्ति। आ इतः एतः कृष्णेतो लोहितेतइति। नार्थ एवमर्थेन वर्णग्रहणेन। यदि तावदयं कर्मणि क्तः। तृतीया कर्मणीत्यनेन स्वरेण भवितव्यम्। अथापि कर्तरि परत्वात्कृत्स्वरेण भवितव्यम्। अथ समानाधिकरणः। समानाधिकरणे द्विर्वर्णग्रहणम्। समानाधिकरणे द्विर्वर्णग्रहणं कर्तव्यम्। वर्णो वर्णेष्वनेतइति वक्तव्यम्। एकं वर्णग्रहणं कर्तव्यम्। इह माभूत्। परमशुक्लः परमकृष्णः। द्वितीयं वर्णग्रहणं कर्तव्यम्। इह माभूत्। कृष्णतिलाइति। एकं वर्णग्रहणमनर्थकम्। अवर्णस्य वर्णे वर्णस्य चावर्णे अन्यतरत्र कस्मान्न भवति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। एवं सति तान्येतानि त्रीणि वर्णग्रहणानि भवन्ति। समासविधौ द्वे स्वरविधौ चैकम्।

ति। अनेतइति प्रतिषेध आनन्तर्यान्मध्येऽपवादा इति वा तत्पुरुषे तुल्यार्थेत्यस्यैव बाधक इत्यभिप्रायः। परत्वादिति। कृष्णेन अश्वादिना करणेन आगतः कृष्णेत इत्यत्र अनेतइति प्रतिषेधः पूर्वपदप्रकृतिस्वरस्य किं बाधकोऽस्तु अथवा कृत्स्वरइति विचारे परत्वात्कृत्स्वर एव बाधक इति नार्थ एतद्विशेषणार्थेन वर्णग्रहणेनेत्यर्थः। कृत्स्वरमपि बाधित्वा थाथादिस्वरेणात्र भाव्यं विशेषाभावात्तु भाष्यकारेणैतन्नोक्तम्। अथवा परत्वादुत्कृष्टत्वात्कक्ष्यान्तरप्राप्तत्वात्कृत्स्वरः थाथादिस्वर इत्यर्थः। लक्षणप्रतिपदोक्तयोरिति। वर्णो वर्णेनेति यः समासः स एव स्वरविधौ द्वितीयवर्णग्रहणमन्तरेणापि ग्रहीष्यते तेनातिप्रसङ्गो न भविष्यतीत्यर्थः।

CC-0. In Public Domain. Digitization by eGangotri

शुकबभ्रुरिति। शुकोहरितः शुक्लो वा। बभ्रुः कपिलः। ततः तत्कृतत्वाभावात् शुकेन बभ्रुरिति तृतीयासहयोगइत्थंभूतलक्षणे
वा कर्तव्या। तस्मादिति। एतस्सूत्रानारम्भाल्लाघवादित्यर्थः। प्रधानोपसर्जनानामिति। प्रधानग्रहणेन समासशास्त्रे तृतीया-
न्तानि लक्ष्यन्ते उपसर्जनपदेन समासशास्त्रे प्रथमानिर्दिष्टमुच्यते। समानाधिकरणसमासादिति। समानाधिकरणसमासा
द्बहुव्रीहिः कदाचित्कर्मधारयः। सर्वधनाद्यर्थं इति। वार्त्तिककारेणेष्टिरूपेण पठितम्। भाष्यकारस्तु न्यायव्युत्पादनाय विप्र

यस्यापि तृतीयासमासस्तस्यापि तान्येव त्रीणि वर्णग्रहणानि भवन्ति। समासविधौ द्वे स्वरविधौ चैकम्। सामान्येन म
मत्तृतीयासमासो भविष्यति। तृतीया तत्कृतार्थेन गुणवचनेनेति। अव एवं वर्णेन प्रति पदं समासो वक्तव्यः। यत्र
तेन न सिध्यति तदर्थम्। क्व च तेन न सिध्यति। शुकबभ्रुर्हरितबभ्रुरिति। तथा सति तान्येतानि त्रीणि वर्णग्रहणानि
भवन्ति। समासविधौ द्वे स्वरविधौ चैकम्। अथेदानीं समानाधिकरणः सामान्येन सिद्धः स्यात्। बाढं सिद्धः। कथ
म्। विशेषणं विशेष्येण बहुलमिति। एवमपि द्वे वर्णग्रहणे कर्तव्ये स्वरविधावेव। प्रतिपदोक्तस्याभावात्। तस्मा
त्समानाधिकरणाद् इत्येष पक्षो ज्यायान्। समानाधिकरणाधिकारे प्रधानोपसर्जनानां परं परं विप्रतिषेधेन। स
मानाधिकरणाधिकारे प्रधानोपसर्जनानां परं परं भवति विप्रतिषेधेन। प्रधानानां प्रधानमुपसर्जनानामुपस
र्जनम्। प्रधानानां तावत्प्रधानम्। वृन्दारकनागकुञ्जरैः पूज्यमानमित्यस्यावकाशः। गोवृन्दारकः अश्ववृन्दा
रकः। पोटायुवतीनामवकाशः। इभ्ययुवतिः आढ्ययुवतिः। इहोभयं प्राप्नोति। नागयुवतिः वृन्दारकयुवतिः।
प्रधानानां परं प्रधानं भवति विप्रतिषेधेन। उपसर्जनानां परमुपसर्जनम्। सन्महत्परमोत्तमोत्कृष्टाद् इत्यस्या
वकाशः। सद्वैद्यः सदश्वः। कृत्यतुल्याख्या अजात्येत्यस्यावकाशः। तुल्यश्वेतः तुल्य महान्। इहोभयं प्राप्नो
ति। तुल्यसन् तुल्यमहान्। उपसर्जनानां परमुपसर्जनं भवति विप्रतिषेधेन। समानाधिकरणसमासाद्बहुव्रीहिः
। समानाधिकरणसमासाद्बहुव्रीहिर्भवति विप्रतिषेधेन। समानाधिकरणसमासस्यावकाशः। वीरः पुरुषो वीरपुरु
षः। बहुव्रीहेरवकाशः। कण्ठेकालः। इहोभयं प्राप्नोति वीरपुरुषको ग्रामः। बहुव्रीहिर्भवति विप्रतिषेधेन।

तिषेधमुपन्यस्य दूषयिष्यत्विष्टिरूपतां स्थापयिष्यति। प्रत्यासत्तेः सामर्थ्यस्य बलवत्त्वाश्रयेण। कण्ठेकाल इति। व्यधिकर-
णानां बहुव्रीहिः सप्तम्यन्तस्य पूर्वनिपातविधानेन ज्ञाप्यते। वीरपुरुषक इति। बहुव्रीहिसंज्ञायां सत्यां पूर्वपदप्रकृतिस्वरः पा
क्षिकश्च कप्समासान्तो भवति। बहुव्रीहिसंज्ञायां शेषग्रहणे प्रत्याख्याते विप्रतिषेधश्चिन्त्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 कदाचिदिति। विषयविशेषनिर्देशार्थं क्वचिदिति वक्तव्ये कदाचिदित्यनेन विषयविशेषावच्छिन्नः कालविशेषो निर्दिश्यते इति नास्ति वस्तुभेदः। सर्वधनीति। सर्वाणि धनान्यस्येत्यर्थविवक्षायां कर्मधारये कृते मत्वर्थीय इति। तदर्थं पूर्वविप्रतिषेध आश्रयणीय इत्युक्तं भवति। किंप्रयोजनमिति। सर्वधनाद्यर्थमिति मत्वर्थीयरहितस्य सर्वधनशब्दस्योपादानात्तस्य च केवलस्यान्यपदार्थविवक्षायां प्रयोगादर्शनाच्च स्वपदार्थे बहुव्रीहेरप्रसङ्गात्कर्मधारयस्यानुक्तसिद्धत्वात्प्रश्नः। कर्मधारयप्रकृतिभिरिति। मत्वर्थीयप्रकृतिः सर्वधनशब्दो वार्त्तिकेऽनुक्तः न तु स्वतन्त्र इत्यर्थः। बहुव्रीहिणेति। सर्वाणि धनान्यस्येति विवक्षायां यदि बहुव्रीहिः क्रियते तदा तेनैव मत्वर्थस्योक्तत्वान्मत्वर्थीयो न स्यात् कर्मधारये तु सति तेन मत्वर्थस्यानुक्तत्वात्प्रत्ययः सिध्यतीत्यर्थः। यद्युक्तत्वमिति। सर्वाणि धनान्यस्येत्यर्थविवक्षायां पूर्वविप्रतिषेधेन यदि कर्मधारयः क्रियते तदा तेनापि मत्वर्थ उच्यत एव न हि बहुव्रीहिक

कदाचित्कर्मधारयः सर्वधनाद्यर्थः। कदाचित्कर्मधारयो भवति बहुव्रीहेः। किं प्रयोजनम्। सर्वधनाद्यर्थः। सर्वधनी। सर्वबीजी। सर्वकेशी नटः। गौरखरवदरण्यम्। कृष्णसर्पवान्वल्मीकः। लोहितशालिमान्ग्रामः। किंप्रयोजनम्। कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानं यथा स्यात्। किं च कारणं न स्यात्। बहुव्रीहिणोक्तत्वान्मत्वर्थस्य। यद्युक्तत्वं हेतुः कर्मधारयेणाप्युक्तत्वान्न प्राप्नोति। न खल्वपि संज्ञाश्रयो मत्वर्थीयः। किं तर्ह्यर्थाश्रयः। स यथैव बहुव्रीहिणोक्तत्वान्न भवति। एवं कर्मधारयेणोक्तत्वान्न भविष्यति। एवं तर्हीदं स्यात् सर्वाणि धनानि सर्वधनानि सर्वधनान्यस्य सन्ति सर्वधनी। नैवं शक्यम्। नित्यमेवं सति कर्मधारयः स्यात् तत्र यदुक्तं कदाचित्कर्मधारय इति। एतदयुक्तम्। एवं तर्हि भवति वै किंचित्

र्मधारयसंज्ञाभेदमात्रेण स्वरव्यवस्थावत्पदार्थस्याभिधानानभिधान व्यवस्था युज्यते तस्याः स्वाभाविकत्वात्। एवं तर्हीति। अनपेक्षितान्यपदार्थं कर्मधारयं कृत्वा मत्वर्थीयो र्थान्तरे विधास्यत इत्यर्थः। नित्यमेवं सतीति। यथा पूर्वं विषयभेदविवक्षया कदाचिदित्युक्तं तथात्र सकलविषयव्याप्त्यपेक्षया सर्वत्रेति वक्तव्ये नित्यमित्युक्तम्। एतदुक्तं भवति। अनेन न्यायेन सर्वत्र मत्वर्थीयप्रकृतिभिः कर्मधारयः स्यादिति। कदाचिद्ग्रहणं विषयविशेषनिर्देशार्थं न वक्तव्यं भवति। इदानीमन्यथा मत्वर्थीयोत्पत्तिमाह।
एवं तर्हीति। भवतीति। एवंजातीयकं वस्त्वित्यर्थः। ॥

CC-0. In Public Domain. Digitization by eGangotri

किंतदित्याह।आचार्यादृति।अथवापठिक्रियाभवतिक्रियायाःकर्त्रीभवति।
कार्याःशब्दाइति दर्शनेलक्षणादेवशब्दानामर्थव्यवस्थाततोन्यपदार्थेबहुव्रीहिशासनात्तस्यैवतत्लक्षस्यायनंनतुकर्मधारयस्य।
।तत्रसर्वाणिधनान्यस्येत्यर्थेविवक्षायांपूर्वविप्रतिषेधेनकर्मधारयःक्रियमाणोऽन्यपदार्थनाभिधत्तइतितदभिधानायायंमत्वर्थीय
उत्पाद्यतइत्यर्थः।विप्रतिषेधापनयनायाह।नैषयुक्तइति।स्वपदार्थइति।मध्यमध्यमवीराश्चेतिस्वपदार्थमात्राश्रयेणविधानाद
न्यपदार्थानाश्रयणादितिभावः।इतरेविषयविशेषेबहुव्रीहिंसाधयति।अस्त्वितियथोक्तेनप्रकारेणान्तरङ्गत्वंकर्मधारयस्यभव
त्वित्यर्थः।विभाषेति।नात्रमहाविभाषाविवक्षितातयाहिपक्षेव्यपेक्षैवप्रतिपाद्यतेनत्वेकार्थीभावेसंज्ञायाभावाभावोक्रियेते।तस्माद्वि
भाषाकर्मधारयइत्यस्यायमर्थोविकल्पितःकर्मधारयोविषयविभागेनावस्थानात्स्वपदार्थेह्यसौवर्ततेनान्यपदार्थे।एतदुक्तंभव
ति।अनपेक्षितान्यपदार्थेस्वपदार्थमात्रविवक्षायांभवतुकर्मधारयःपूर्वमेवत्वन्यपदार्थविवक्षायांवीरपुरुषइत्यादौबहुव्रीहिःसि-

आचार्याःकार्यवद्बुद्धिंकृत्वापठन्तिकार्याःशब्दाइति।तद्वदिदंपठितंसमानाधिकरणसमासाद्बहुव्रीहिःकर्तव्यःकदाचित्क
र्मधारयःसर्वधनाद्यर्थइति।यदुच्यतेसमानाधिकरणसमासाद्बहुव्रीहिर्भवतिविप्रतिषेधेनेति।नैषयुक्तोविप्रतिषेधः।अन्तरङ्गःकर्म
धारयःकाऽन्तरङ्गता।स्वपदार्थेकर्मधारयः।अन्यपदार्थेबहुव्रीहिः।अस्तु।विभाषाकर्मधारयः।यदानकर्मधारयस्त
दाबहुव्रीहिर्भविष्यति।एवमपियद्यत्रकदाचित्कर्मधारयोभवति।कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानंप्रा
प्नोति।सर्वश्चायमेवमर्थोयत्नःकर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानंमाभूदिति।एवंतर्हिनेदंतस्ययोगस्योदा
हरणंविप्रतिषेधेपरमिति।किंतर्हि।इष्टिरियंपठिता।समानाधिकरणसमासाद्बहुव्रीहिरिष्टः।कदाचित्कर्मधार
यःसर्वधनाद्यर्थइति।यदीष्टिःपठितानार्थोनेन।

ध्यति।एवमपीति।पूर्वमनपेक्षितेऽन्यपदार्थेयदिकर्मधारयःक्रियतेतदापश्चादन्यपदार्थविवक्षायांवीरपुरुषवान्ग्राम
इत्याद्यपिस्यादित्यर्थः।इष्टिरियमिति।वीरपुरुषादौप्रथममेवान्यपदार्थविवक्षाकार्या सर्वधनीत्यादौतुपश्चादितिवि
वक्षानियमइष्टसिद्धयेप्रतिपाद्यतइत्यर्थः।नार्थोनेनेति।न्यायसिद्धत्वादितिभावः।यदिकर्मधारयान्मत्वर्थीयःक्रियतेत
दास्वपदार्थप्राधान्यमाश्रित्यकर्मधारयःकर्तव्यःतेषामेवपदार्थानामन्यत्रगुणीभावमाश्रित्यमत्वर्थीयउत्पाद्यतइति
प्रतिपत्तिगौरवप्रसङ्गः।यदापूर्वमेवान्यपदार्थविवक्षातदावर्तिपदार्थानांतत्रगुणभावएवाश्रीयतइतिप्रतिपत्तिला
घवंभवति।अन्येतुशब्दलाघवंमन्यन्तेबहुव्रीहिरन्यानपेक्षोन्यपदार्थप्रतिपादयति।कर्मधारयस्तुमत्वर्थीयसहि
तइतिशब्दगौरवप्रसङ्गः।एतच्चशब्दगौरवंतथाप्रयोगादर्शनादत्रैवविषयआश्रीयतइतिवृक्षवनस्पत्यादिषुनप्रसज्जनीयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ सर्वादेरिति। ततश्चात्र वचनाल्लाघवं नाश्रीयत इति कर्मधारये कृते इनिः कर्तव्य इत्यर्थः। ठनो बाधनार्थमिति। योपीष्टिमारभते तेनापि-
३५५ कर्मधारयाट्ठन्बाधनाय इनिरेवेति वक्तव्यमित्यर्थः। जात्यात्रेति। जातिश्चात्कृते कर्मधारयेन प्रतीयते। यदा हीति। विशिष्टगुणेन द्रव्ये-
णातद्वत्तायां विवक्षितायामित्यर्थः। पूर्वपदातिशय इति। अतिशयेन सूक्ष्माणि वस्त्राण्यस्येत्यर्थे विवक्षायामुभयप्रसङ्गे पूर्वं बहुव्री-
हिरिष्यते ततो बहुव्रीहेः प्रत्ययः। भाष्यकारस्तु विप्रतिषेधं प्रत्याख्यास्यन् पूर्ववदुपन्यस्य सामर्थ्याश्रयेण दूषयित्वेष्टिं त्वं स्थापयिष्य-

इह हि सर्वे मनुष्या अल्पेनाल्पेन महतो महतोऽर्थानाकाङ्क्षन्ति। एकेन माषेण शतसहस्रम्। एकेन कुद्दालकेन खारीसहस्रम्। तत्र कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानमस्तु बहुव्रीहिणेति बहुव्रीहिणा भविष्यति। लघुत्वात्। कथं सर्वधनी सर्वबीजी सर्वकेशी नट इति। इनिप्रकरणे सर्वादेरिति वक्ष्यामि। तच्चावश्यं वक्तव्यं ठनो बाधनार्थम्। कथम्। गौरखरवदरण्यम्। गौरमृगवदरण्यम्। कृष्णसर्पवान् वल्मीकः। लोहितशालिमान् ग्रामः। अस्त्यत्र विशेषः। जात्या त्राभिसंबन्धः क्रियते। कृष्णसर्पो नाम सर्पजातिः सास्मिन् वल्मीकेऽस्ति। यदा ह्यन्तरेण जातिं तद्वत्ताभिसंबन्धः क्रियते। कृष्णसर्पो वल्मीक इत्येव तदा भवति। पूर्वपदातिशये आतिशायिकाद्बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थः। पूर्वपदार्थातिशयविवक्षायामातिशायिकाद्बहुव्रीहिर्भवति विप्रतिषेधेन। किं प्रयोजनम्। सूक्ष्मवस्त्रतराद्यर्थः। आतिशायिकस्यावकाशः पटुतरः पटुतमः। बहुव्रीहेरवकाशः चित्रगुः शबलगुः। इहोभयं प्राप्नोति। सूक्ष्मवस्त्रतरः तीक्ष्णशृङ्गतरः। बहुव्रीहिर्भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। विप्रतिषेधे परमित्युच्यते पूर्वश्च बहुव्रीहिः पर आतिशायिकः। इष्टवाची परशब्दः। विप्रतिषेधे परं यदिष्टं तद्भवतीति। एवमप्ययुक्तः। अन्तरङ्ग आतिशायिकः। कान्तरङ्गता। ङ्याप्प्रातिपदिकादातिशायिकः। सुबन्तानां बहुव्रीहिः। आतिशायिकोऽपि नान्तरङ्गः। कथम्। समर्थात्तद्धित उत्पद्यते। सामर्थ्यं च सुबन्तेन। एवमप्यन्तरङ्गः। कथम्। स्वपदार्थे आतिशायिकः। अन्यपदार्थे बहुव्रीहिः। एवमपि नान्तरङ्गः। कथम्। स्पर्धायामातिशायिको भवति। न चान्तरेण प्रतियोगिनं स्पर्धा भवति।

ति। ङ्याप्प्रातिपदिकादिति। ननु प्रकर्षे आतिशायिकः। प्रकर्षश्च समानार्थस्य भवति। ततश्च पदात्तेनोत्पत्तव्यम्। एवं तर्ह्यधि- रामः
कारमात्रमाश्रित्यैवमुक्तम्। अत एवोच्यते समर्थादिति। सुबन्तेनेति। हेतौ तृतीया। सुबन्तेन पदेन प्रकर्षानुभवविषयं ३५५
सामर्थ्यमर्थस्य नान्यथेत्यर्थः।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आतिशायिकस्य प्रतियोगिवस्त्वन्तरापेक्षया बहुव्रीहिणा सामर्थ्यं प्रतिपाद्य सर्वथानुत्पत्तिं प्रतिपादयितुमाह। नैवेति। तद्वन्तमिति। वस्त्रवा मिनमित्यर्थः। अस्यातिशयेन सूक्ष्माणि वस्त्राणीति तद्वतोपेक्षणात्। सत्यामिति। ननु च यथा प्रतियोग्यपेक्षायां प्रत्ययो भवत्येवं तद्वद-पेक्षायामपि कस्मान्न भवतीति भावः। वस्त्राणीति। अतिशय नानि वस्त्राण्यतिशय्यमानानि वस्त्राण्यपेक्षन्त इत्यर्थः। एवं सापेक्षत्वा द्वयोरपि निराकृतयोरर्थान्तरत्वमाह। एवं तर्हीति। नार्थो नेनेति। इष्टया विनाप्यस्यार्थस्य सिद्धत्वादिति भावः। येषा युक्तिरुक्तेति सा नाश्रीयत इत्यर्थः। कथं तर्ह्याश्रीयत इत्याह। यदाहीति। अन्यपदार्थमात्रविवक्षायां बहुव्रीहौ कृते पश्चादातिशायिकः क्रियते

नैवंचात्रातिशायिकः प्राप्नोति। किं कारणम्। असामर्थ्यात्। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। यावता वस्त्राणि तद्वन्तमपेक्षन्ते। तद्वन्तं चापेक्ष्य वस्त्राणां वस्त्रैर्युगपत्स्पर्द्धा भवति। ननु चायमातिशायिक एवमात्मकः सत्यां व्यपेक्षायां विधीयते। सत्यमेवमात्मकः। यां च नान्तरेण व्यपेक्षामातिशायिकस्य प्रवृत्तिस्तस्यां सत्यां भवितव्यम्। कां च नान्तरेण व्यपेक्षामातिशायिकस्य प्रवृत्तिः। या हि प्रतियोगिनं प्रति व्यपेक्षा या हि तद्वन्तं प्रति न तस्यां भवितव्यम्। बहुव्रीहिरपि तर्हि न प्राप्नोति। किं कारणम्। असामर्थ्यादेव। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। यावता वस्त्राणि व-स्त्रान्तराण्यपेक्षन्ते तद्वता चाभिसंबन्धः। एवं तर्हि नेदं तस्य योगस्योदाहरणं विप्रतिषेधे परमिति किं तर्हि इष्टिरियं पठिता। पूर्वपदातिशये आतिशायिकाद्बहुव्रीहिरिष्टः सूक्ष्मवस्त्रतराद्यर्थ इति। यदीष्टिरियं पठिता नार्थोने-न। कथं येषा युक्तिरुक्ता वस्त्रान्तराणां च वस्त्रान्तरैर्युगपत्स्पर्द्धा तद्वता चाभिसंबन्ध इति। यदा ह्यन्तरेण वस्त्राणां वस्त्रान्तरैर्युगपत्स्पर्द्धां तद्वता चाभिसंबन्धः क्रियते। निष्प्रतिद्वन्द्वस्तदा बहुव्रीहिः। बहुव्रीहेरातिशायिकः। न तर्हीदानीमिदं भवति सूक्ष्मतरवस्त्र इति। भवति यदान्तरेण तद्वन्तं वस्त्राणां वस्त्रान्तरैर्युगपत्स्पर्द्धा भवति निष्प्रतिद्वन्द्वस्तदातिशायिकः। कथं पुनरन्यस्य प्रकर्षेणान्यस्य प्रकर्षः स्यात्।

।अतिशयमात्रविवक्षायां तु प्रत्यये कृते पश्चाद्बहुव्रीहिस्तत्र सूक्ष्मतरवस्त्र इत्यपि सिद्ध्यति। इष्टौ तु सत्यामेतन्न सिद्ध्येत्। यदुक्तं बहुव्रीहौ कृते पश्चादातिशायिकः क्रियत इति तत्राह। कथं पुनरिति। अतिशयेन सूक्ष्मवस्त्र इति बहुव्रीहेः प्रत्यये क्रियमाणे वस्त्रगतस्तैक्ष्ण्यप्रकर्षः कथमन्यपदार्थप्रकर्षः स्यादित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै अत्रोत्तरम्। नैवान्यस्येति। सर्वत्रैव यतः प्रत्ययो विधीयते तदर्थस्य स्वतः प्रकर्षाभावादन्यगत एव प्रकर्ष आश्रीयते। यथोक्तम्। द्र २१३
३५६ व्यस्याव्यपदेश्यस्य य उपादीयते गुणः। भेदको व्यपदेशाय तत्प्रकर्षोभिधीयत इति। एक एवासौ प्रकर्ष इत्यर्थः। यद्यप्यत्राश्रयान्तर
वर्तिगुणप्रकर्षस्तथापि यत्र यथाभूतः संभवति तत्र तथाभूत आश्रीयते। गुणवचनादिति। नात्राजादी गुणवचनादेवेति बोद्धव्यंत
रूपोत्र प्रकृतत्वात्। तस्माद्गुणस्यैव प्रकर्षः संभवति न द्रव्यस्येत्याश्रित्यैतदुक्तम्। अजहत्स्वार्थेति। तत्र सूक्ष्मार्थस्य विद्यमान
त्वात्प्रकर्षसंभवः। बह्वाढ्यतर इति। यद्यत्र बहुव्रीहिं कृत्वा आतिशायिकः क्रियते तदा बहोर्नञ्वदुत्तरपदभूम्नीत्यन्तोदात्तत्वमा-

नैवान्यस्य प्रकर्षेणान्यः प्रकर्षेण भवितव्यम्। यथैवायं द्रव्येषु यतते वस्त्राणीमे स्युरिति। एवं गुणेष्वपि यतते सूक्ष्म
तराणीमे स्युरिति। नात्रातिशायिकः प्राप्नोति। किं कारणम्। गुणवचनादित्युच्यते। न च समासो गुणवचनः। समा-
सोपि गुणवचनः। कथम्। अजहत्स्वार्था वृत्तिरिति। अथ जहत्स्वार्थायां तु दोष एव। जहत्स्वार्थायां च न दोषः। भव
ति बहुव्रीहौ तद्गुणसंविज्ञानमपि। तद्यथा। शुक्लवाससमानय लोहितोष्णीषाः प्रचरन्तीति तद्गुण आनीयते त
द्गुणाश्च प्रचरन्ति। उत्तरपदातिशये आतिशायिको बहुव्रीहेः बह्वाढ्यतराद्यर्थः। उत्तरपदार्थातिशये आति
शायिको बहुव्रीहेर्भवति विप्रतिषेधेन। किं प्रयोजनम्। बह्वाढ्यतराद्यर्थः। बह्वाढ्यतरः। बहुसुकुमारतरः
। कः पुनरत्र विशेषः। बहुव्रीहेर्वातिशायिकः स्यात्। आतिशायिकान्तेन वा बहुव्रीहिः। स्वरकपोर्विशेषः। यद्य
त्रातिशायिकाद्बहुव्रीहिः स्यात्। बह्वाढ्यतर एवं स्वरः प्रसज्येत। बह्वाढ्यतर इति चेष्यते। बह्वाढ्यकतर
इति च प्राप्नोति। बह्वाढ्यतरक इति चेष्यते॥ समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तर
पदलोपश्च॥ समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानं कर्तव्यम्। उत्तरपदलोपश्च वक्तव्यः।
शाकभोजी पार्थिवः शाकपार्थिवः। कुतपवासाः सौश्रुतः कुतपसौश्रुतः। अजापण्यस्तौल्वलिः अजातौल्वलिः
। यष्टिप्रधानो मौद्गल्यः यष्टिमौद्गल्यः॥ ॥

ढ्यपूर्वाकारस्य स्याद् रेफाकारस्य चेष्यते। अयमर्थो न्यायसिद्धो यदि समासात्प्रकर्षप्रत्यय उत्पद्यते तदा किं बहुत्वगुणा- रामः
श्रयः प्रकर्ष उत आढ्यत्वाश्रयः प्रत्ययोत्पत्तिनिमित्तमिति संदेहः स्यात्। तस्मात्पूर्वं प्रकर्षस्य विवक्षा पश्चादन्यपदार्थस्य। ३५६
शाकभोजीति। शाकभोजित्वात्तत्साहचर्यात्तद्व्यपदेशान्नार्थ उत्तरपदलोपेनेत्याहुः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

चतुष्पा ॥ चतुष्पाज्जातिरिति। केचिज्जातिग्रहणमनुवर्त्यमित्याहुः। अन्ये त्वाहुः। शब्दान्तरसंनिधिनिरपेक्षा ये मयूर चतुष्पाज्जातिवच
नास्त एवान्तरङ्गत्वाद्गृह्यन्ते न तु कालाक्ष्यादयो यौगिकाः शब्दान्तरसंनिधानाच्चतुष्पाज्जातिविषयाः॥ मयूर इव व्यंसको धू
र्तः छात्र इव व्यंसकः काम्बोज इव मुण्ड इत्युपमानसमासापवादोऽयं समासः प्रतिपदविहितोपमानसमासविषयपूर्वपदप्र
कृतिस्वरबाधनार्थ इत्याहुः॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयाध्यायस्य प्रथमपादे तृतीयमाह्निकम्॥
अर्द्धम्॥ नपुंसकस्याव्यवस्थितत्वात्कृते च समासे पूर्वपदार्थस्यालिङ्गविशेषानवधारणात्कृतमपि नपुंसकग्रहणमकृतसम-
मिति मत्वा पृच्छति इहेति। क्व पुनरिति। नपुंसकत्वावधारणहेतावयं प्रश्नः। अवयववाची पुल्लिङ्ग इति। नियमेन नपुंसकलि-

चतुष्पाद्गो गर्भिण्या॥ ॥चतुष्पाज्जातिरिति वक्तव्यम्॥ इह माभूत्। कालाक्षी गर्भिणी। स्वस्तिमती गर्भिणी॥ ॥
मयूरव्यंसकादयश्च॥ ॥किमर्थश्चकारः। एवकारार्थः। मयूरव्यंसकादय एव। क्व माभूत्। परमो मयूरव्यंसक इति
॥ ॥इति श्रीमहाभाष्ये द्वितीयस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम्। पादश्च समाप्तः॥ १॥ अर्द्धं नपुंसकम्॥ ॥
इह कस्मान्न भवति ग्रामार्द्धो नगरार्द्ध इति। अर्द्धशब्दस्येदं नपुंसकलिङ्गस्य ग्रहणं पुल्लिङ्गश्चात्रार्द्धशब्दः। क्व पु
नरयं नपुंसकलिङ्गः क्व पुल्लिङ्गः। समप्रविभागे नपुंसकलिङ्गः। अवयववाची पुल्लिङ्गः। इह कस्मान्न भवति अर्द्धं
पिप्पलीनामिति। न वा भवत्यर्द्धपिप्पल्य इति। भवति यदा खण्डसमुच्चयः। अर्द्धं पिप्पली चार्द्धं पिप्पली चार्द्धं पिप्प
ली चार्द्धं पिप्पल्य इति। यदा त्वेतद्वाक्यं भवति अर्द्धं पिप्पलीनामिति तदा न भवितव्यम्। तदा कस्मान्न भवति। एका
धिकरणादिति वर्तते। न तर्हीदानीमिदं भवति। अर्द्धं राशेरिति। भवत्येकमेवेदमधिकरणं योऽसौ राशिर्नाम॥ ॥

ङ्गो न भवतीत्येवंपरमेतत्। अवयववाची त्वभिधेयवशात्सर्वलिङ्गः। तथा च प्रयोगो दृश्यते। अपूपार्द्धो मया भक्षितं दत्तार्द्धो मास्या-
त्पतितमिति। तदत्र नपुंसकग्रहणाद्यस्मिन्नर्थविशेषे नियमेन नपुंसकत्वं तदर्थवृत्तिरेवार्द्धशब्द आश्रीयते तत्रैवार्थे नपुंस
कत्वस्याव्यभिचारात्। अर्द्धमिति निर्देशादेव नपुंसकत्वे लब्धे नपुंसकग्रहणं ज्ञापकं निर्देशेषु लिङ्गाविवक्षायाः। यदा त्वेतदिति
।अर्थश्चात्र भिद्यत एव। समासे च कृते अर्द्धपिप्पलीत्येव स्यात्पूर्वपदार्थस्य प्राधान्यात्तस्य चैकत्वात्। अर्द्धं राशेरिति। राशे
रवयवव्यतिरेकेणासत्त्वादवयवानां च बहुत्वादेकत्वाभावं मन्यते। एकमेवेति। शब्दादेकस्यैवार्थस्य तिरोहितभेदस्याव-
गमादिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीय॥ अन्यतरस्यांग्रहणस्य पक्षे षष्ठीसमासप्राप्तये कृतस्य ज्ञापकत्वं नान्तरीयकतया प्रतिपादयितुं पूर्वपक्षोपन्यासः। यद्यपि
पारे इत्यत्रायमर्थो ज्ञापितस्तथापीह स्मरणाय पुनर्ज्ञाप्यते। अवयवविधानइति। सामान्याश्रयसमूहापेक्षया प्रतिनियतो विशे-
षएकदेशोभवतीति विशेषविषयं विधानमवयवविधानशब्देनोक्तम्। किमेतस्येति। न्यायादेव विशेषविधिः सामान्यविधेर्बा
धकइतिमत्वा पृच्छति। भिनत्तीति। विरोधादेकफलत्वाच्च बाध्यबाधकभावः। इहतु भिन्नदेशत्वाद्विरोधाभावो विकरणानां-

द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्॥ ॥अन्यतरस्यांग्रहणं किमर्थम्। अन्यतरस्यां समासो यथास्यात्। समा
सेन मुक्ते वाक्यमपि यथास्यात् द्वितीयं भिक्षायाइति। नैतदस्ति प्रयोजनम्। प्रकृतामहाविभाषा तया वाक्यमपि
भविष्यति। इदंतर्हि प्रयोजनम्। एकदेशिसमासेन मुक्ते षष्ठीसमासो यथास्याद् भिक्षाद्वितीयमिति। एतदपि ना
स्ति प्रयोजनम्। अयमपि विभाषा षष्ठीसमासोपि। तावुभौ वचनाद्भविष्यतः। अतउत्तरं पठति। द्वितीयादीनां वि
भाषाप्रकरणे विभाषावचनं ज्ञापकमवयवविधाने सामान्यविधानाभावस्य। द्वितीयादीनां विभाषाप्रकरणे वि
भाषावचनं क्रियते। ज्ञापनार्थम्। किं ज्ञाप्यते। एतज्ज्ञापयत्याचार्यः अवयवविधौ सामान्यविधिर्न भवतीति। कि
मेतस्य ज्ञापने प्रयोजनम्। भिनत्ति। छिनत्तीति श्नमि कृते शप् न भवतीति। नैतदस्ति प्रयोजनम्। शबादेशाः श्यन्ना
दयः करिष्यन्ते। तत्तर्हि शपोग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। कर्तरि शबिति। तद्वै
प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। रुधादिभ्यइत्येषा पञ्चमी शबिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मा
दित्युत्तरस्येति। प्रत्ययविधिरयम्। न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति। नायं प्रत्ययविधिः। विहितः प्रत्य
यः प्रकृतश्चानुवर्तते। एवंतर्हि ज्ञापयत्याचार्यः यत्रोत्सर्गापवादं विभाषा तत्रापवादेन मुक्ते उत्सर्गो न भवतीति
। किमेतस्य ज्ञापने प्रयोजनम्। दिक्पूर्वपदान् ङीप् प्राङ्मुखी। प्राङ्मुखा। प्रत्यङ्मुखी। प्रत्यङ्मुखा। ङीपा मुक्ते ङीष् न भवति॥

चानर्थक्यादेकफलत्वाभावः। वार्तिककारस्य मतेनेदमुक्तम्। सहि विरोधाभावे बाध्यबाधकभावं नेच्छति। तथा चाह श्नम्बु
हुजकसुनानादेशत्वादुत्सर्गाप्रतिषेधइति। भाष्यकारस्तु विनापि विरोधेन सामान्यविशेषविध्योर्बाध्यबाधकभावमभ्युप
गच्छति। अर्थाभिधाने साहायकप्रतिपत्तेरेकफलताप्यनयोरस्ति। प्राङ्मुखीति। अस्वाङ्गपूर्वपदाद्वेत्यतो ङीष् ङीब्विधौ वेत्यनुवृत्तेः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैतदस्तीति। वार्तिककारस्य मतमाश्रित्य प्रयोजनप्रत्याख्यानम्। यद्यपूर्वो ङीब्विधीयेत तदा प्राग्गुल्फा प्रत्यग्जघनेत्यादावपि स्यादेव ङी-
षश्च वलनुदात्तत्वविधाने ङीषोऽत्र प्रतिषिद्धत्वाद्दोषाभावस्तदेवं नित्यस्वरमात्रविधानेनास्ति सामान्यविशेषविहितत्वम्। वृत्तिविषय इ-
ति। एकार्थीभावविषय इत्यर्थः। नैतदिति। पूरणगुणेत्यत्र पूरणाधिकारविहितप्रत्ययान्तग्रहणादिति भावः। अनेनैतदिति। पूरणाद्भा-
गे तीयादन्निति स्वार्थिकेनानाव्यवहितमित्यर्थः। एतदपीति। पूरणगुणसुहितार्थेत्यत्रार्थशब्दस्य प्रत्येकं संबन्धात् पूरणार्थग्रहणं-

नैतदस्ति प्रयोजनम्। वक्ष्यत्येतद् दिक्पूर्वपदान्ङीषोऽनुदात्तत्वं ङीब्विधानेऽन्यत्रापि ङीषविषयाद् ङीप्प्रसङ्ग इति।
इदं तर्हि प्रयोजनम्। अर्द्धपिप्पली। अर्द्धकोशातकी एकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति। उन्मत्तगङ्गं
लोहितगङ्गं अव्ययीभावेन मुक्ते बहुव्रीहिर्न भवति। दाक्षिः प्लाक्षिः इञा मुक्तेऽण् न भवति। यद्येतज्ज्ञाप्यते उप
गोरपत्यमौपगवः। तद्धितेन मुक्ते उपग्वपत्यमिति न सिद्ध्यति। अस्त्यत्र विशेषः। द्वे ह्यत्र विभाषे। दैवयज्ञिशौचि
वृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम्। समर्थानां प्रथमाद्वेति च। तत्रैकया वृत्तिर्विभाषा। अपरया वृत्ति
विषये विभाषापवादः। क्रियमाणेऽपि वै अन्यतरस्यांग्रहणे षष्ठीसमासो न प्राप्नोति। किं कारणम्। पूरणेनेति प्र
तिषेधात्। नैतत्पूरणान्तम्। अना एतत्पर्यवपन्नम्। एतदपि पूरणान्तमेव। कथम्। पूरणं नामार्थस्तमाह ती
यशब्दः। अतः पूरणम्। योऽसौ पूरणान्तात्स्वार्थे भागे अन् सोऽपि पूरणमेव। एवं तर्ह्यन्यतरस्यांग्रहणसामर्थ्यात्ष
ष्ठीसमासो भविष्यति॥ प्राप्तापन्ने च द्वितीयया॥ ॥किमर्थश्चकारः। अनुकर्षणार्थः। किमनुकृष्यते। अन्यतरस्या
मित्येतदनुकृष्यते। किं प्रयोजनम्। अन्यतरस्यां समासो यथा स्यात्। समासेन मुक्ते वाक्यमपि यथा स्यात्। जीवि
कां प्राप्त इति। नैतदस्ति प्रयोजनम्। प्रकृता महाविभाषा तया वाक्यमपि भविष्यति। इदं तर्हि प्रयोजनम्। द्विती
यासमासोऽपि यथा स्यात्। जीविकाप्राप्त इति। एतदपि नास्ति प्रयोजनम्। अयमप्युच्यते द्वितीयासमासोऽपि तदुभयं व
चनाद्भविष्यति। एवं तर्हि नायमनुकर्षणार्थश्चकारः। किं तर्ह्यत्वमनेन विधीयते। प्राप्तापन्ने द्वितीयान्तेन सह समस्येते अ
त्वं च भवति प्राप्तापन्नयोरिति। प्राप्ता जीविकां प्राप्तजीविका। आपन्ना जीविकामापन्नजीविका॥

न तु तदधिकारविहितप्रत्ययग्रहणमित्यर्थः॥ प्राप्ता॥ अत्वं च भवतीति। चकारेण समुच्चयार्थेनाकारप्रश्लेषोऽनुमीयते सौत्रत्वाच्च नि-
र्देशस्य प्रकृतिभावः प्रगृह्याश्रयो न भवति। यद्वा समाहारद्वन्द्वे कृते विषयसप्तम्यकारादेशापेक्षा क्रियते सुबिति चानुवर्तनात्प्राप्ता-
पन्नयोरेव संनिधानात् उपसर्जनसंज्ञा भवति। सूत्रारम्भसामर्थ्याद्वा। प्राप्ता जीविकामिति। लिङ्गविशिष्टपरिभाषया प्राप्ताशब्दस्य समासः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्र.कै. ३५८

कालाः॥ इहद्वृत्तिवाक्ययोः समानार्थत्वंन्याय्यं मासोजातस्येतिचवाक्येजातस्यविशेषणत्वादप्राधान्यं समासेतुमासजातोद्रष्टव्यतामि- ३२५
त्यादौजातस्यैवकार्यसंबन्धावगमात्प्राधान्यमन्योत्तरपदार्थप्रधानवैधर्म्यंचलक्ष्यतइतिमत्वापृच्छति। किंप्रधानइति। योसा-
विति। षष्ठीनिवृत्तौन्यायकथनंसंबन्धस्यचान्तर्भावादनुद्भवएवनिवृत्तिः। अभिहितइति। प्रथमोत्पत्तिनिमित्तकथनमनुद्भूतोपिसं
बन्धोगुणभावेनसमासाभिधेयत्वादभिहितइत्युच्यते। तत्राभिहितोपिकश्चिन्नान्तर्भवतियथाराज्ञःपुरुषइत्यत्रवाक्येष-
ष्ठ्यासंबन्धोभिधीयतेनतुकचिदन्तर्भावमुपयाति। राजसखादौबहुव्रीह्यर्थस्यान्तर्भावोऽस्तिनत्वभिधानमित्युभयोपादानम्।
इहपरिमाणंजातस्यप्रतिपादयितुंवाक्येपरिमाणिनएवषष्ठीकर्तव्यामासोजातस्येति। मासस्यजातइतिह्यभिधीयमानेविवक्षि-

कालाः परिमाणिना॥ ॥किंप्रधानोयंसमासः। उत्तरपदार्थप्रधानः। यद्युत्तरपदार्थप्रधानः सधर्मएानेनान्यैरुत्तरपदा
र्थप्रधानैर्भवितव्यम्। अन्येषुचोत्तरपदार्थप्रधानेषुयैवासावन्तर्वर्तिनीविभक्तिस्तस्याः समासेपिश्रवणंभवति। त
द्यथा। राज्ञःपुरुषोराजपुरुषइति। इहपुनर्वाक्येषष्ठी। समासेप्रथमा। केनैतदेवंभवति। योसौमासजातयोरभिसंब
न्धःसमासेसनिवर्तते। अभिहितःसोर्थोन्तर्भूतःप्रातिपदिकार्थःसंपन्नः तत्रप्रातिपदिकार्थेप्रथमेतिप्रथमाभवि
ष्यति। नतर्हीदानीमिदंभवतिमासजातस्येति। भवतिबाह्यमर्थमभिसमीक्ष्यषष्ठी ॥कालस्ययेनसमासस्तस्यापरिमा
णित्वादनिर्देशः। कालस्ययेनसमासःसोपरिमाणी। तस्यापरिमाणित्वादनिर्देशः। अगमकोनिर्देशः अनिर्देशः।
नहिजातस्यमासःपरिमाणम्। कस्यतर्हित्रिंशद्रात्रस्य।

तोर्थेनप्रतीयते। तत्रयथाचित्रागावोस्येतिवाक्येयद्यपिगवांप्राधान्यंतथापिचित्रगुरितिवृत्तावप्राधान्यमेवतथेहापिवृत्तिवा-
क्ययोःपरिमाणिनःप्राधान्याप्राधान्येपृथक्शक्तिस्वाभाव्याद्भवतः। भवतिबाह्यमिति। परिमाणपरिमाणिसंबन्धएवसमासेन्त
र्भूतोनतुबाह्यसंबन्ध्यपेक्षोमासजातस्यवस्त्रमित्यादिरपिसंबन्धइत्यर्थः। नहिजातस्येति। तस्यहिदिष्ट्यादिःपरिमाणंनतुमा-
सः नापितत्सत्तायामासः परिमाणंसत्तायानित्यत्वान्नापिजन्मक्रियायास्तस्याएकक्षणभावित्वान्मासेनसंबन्धासंभवात्। त्रिंश राम: ३५८
द्रात्रस्येति। ननुत्रिंशद्रात्रएवमासोनापरइतिभेदाभावादयुक्तमेतन्नैषदोषः। कालोजातस्यमासेनपरिच्छिद्यते। तथाहि। किय
न्कालोस्यजातस्येतिप्रश्नेमासइत्यादिप्रतिवचनंसचपरिच्छिद्यमानस्त्रिंशद्रात्रात्मकएवसंपद्यतइत्यभिप्रायेणैतदुक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेव दृष्टान्तेन दर्शयति। तद्यथेति। सिद्धं त्विति। कालशब्देन कालसामान्यमुच्यते यस्य जातादेः संबन्धिनः कालसामान्यस्य परि-
माणं मासादिस्तेन स कालो मासादिः समस्यते। अथवा कालशब्देन मासादिः कालविशेष उच्यते स कालः परिमाणं यस्य कालसाम-
न्यस्य तद्यस्य संबन्धि तेन स कालो मासादिः समस्यत इत्यर्थः। कं पुनरिति। यदि नित्य एको विभुः कालस्तदा तस्य भेदाभावात् परि-
च्छेदकत्वासंभवः। अथोपाधिभेदात्तस्य भेदस्तदा तद्भेदभिन्नस्य जातं प्रत्यपि — परिच्छेदकत्वमस्त्येव। येन मूर्तीनामिति। तरु-
तृणलताप्रभृतीनां कदाचिदुपचयोऽन्यदा त्वपचयः सप्रत्ययान्तराविशेषेऽपि यत्कृतः स काल इत्यर्थः। यद्येवं तस्यैकत्वात् कथ-
महरादिविभाग इत्याह। तस्यैवेति। परोपाधिक एव सर्वस्य भेदः। तथा चोक्तं हरिणा कालसमुद्देशे। तस्यात्मा बहुधा भिन्नो भेदैर्ध-
र्मान्तराश्रयैः। न हि भिन्नमभिन्नं वा वस्तु किंचन विद्यते॥१॥ नैको न चाप्यनेकोऽस्ति न युक्तो नापि चाश्रितः। द्रव्यात्मा स तु संसर्गादेवं रू-

तद्यथा। द्रोणो बदराणां देवदत्तस्येति। न देवदत्तस्य द्रोणः परिमाणम्। कस्य तर्हि बदराणाम्। सिद्धं तु कालपरिमाणं य-
स्य स कालस्तेन। सिद्धमेतत्। कथम्। कालपरिमाणं यस्य स कालस्तेन समस्यत इति वक्तव्यम्। सिध्यति। सूत्रं तर्हि भि-
द्यते। यथान्यासमेवास्तु। ननु चोक्तं कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देश इति। कं पुनर्भवान्कालं मत्वाह
कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देश इति। येन मूर्तीनामुपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमित्याहुः।
तस्यैव कयाचित्क्रियया युक्तस्याहरिति च भवति रात्रिरिति च। कया क्रियया। आदित्यगत्या। तयैवासकृदावृत्त-
या मास इति भवति संवत्सर इति च भवति। यद्येवं भवति जातस्य मासः परिमाणम्। एकवचनद्विगोश्चोपसंख्या-
नम्॥ एकवचनान्तानामिति वक्तव्यम्। इह मा भूत्। मासो जातस्य मासजातस्येति। द्विगोश्चेति वक्तव्यम्। इहापि यथा
स्यात्। द्विमासजातस्त्रिमासजातः। उक्तं वा। किमुक्तम्।

पः प्रकाशते॥२॥ संसर्गिणां तु ये भेदा विशेषास्तस्य ते मताः। संभिन्नस्तैर्व्यवस्थानां कालो भेदाय कल्पत इति॥३॥ कया क्रिययेति। क्रि-
याया एकत्वात्तस्या अपि भेदकत्वं नास्तीति प्रश्नः। आदित्यगत्येति। आदित्यादिसाधनभेदाद्भिन्नैव क्रिया। आख्यातेन तु सा निवृत्त-
भेदोच्यते शब्दशक्तिस्वाभाव्यान्न तु तस्या भेदो नास्ति। यद्येवमिति। जातस्य जननक्रियावधिर्मासस्तेन परिच्छिद्यते। न च मास-
व्यतिरिक्तः कश्चित्त्रिंशद्रात्रोऽस्ति यस्य मासः परिमाणं स्यात्। न च कालसामान्यं परिच्छेद्यं काल एव हि संसर्गिभेदाद्वा समासा- ॥
दिभेदव्यवहारः क्रियायाः परिमाणं न वस्त्वन्तरस्य।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनभिधानादिति। समासे द्वित्वादेरनवगमात्। एकत्वं तत्र प्रातिपदिकार्थस्य तथाभूतत्वात्प्रतीयते। वस्त्वन्तरानपेक्षत्वाच्च। द्वित्वादिकास्तु संख्या वस्त्वन्तरापेक्षत्वाद्बहिरङ्गा। तदुक्तं हरिणा। ग्रोऽपि केमासजाते च परिमाणं स्वभावतः। उपाधिभूतमाश्रित्य संख्याभेदेन वर्तत इति। उत्तरपदेनेति। तद्धितार्थेत्यत्रेदमुक्तं तदेव प्रियाथानुग्रहाय स्मारितम्॥ नञ्॥ इहाब्राह्मणादिनाक्षत्रियादेरभिधानं लोके दृश्यते तत्र प्रक्रियागतगुणदोषनिरूपणाय प्रश्नः। किंप्रधान इति। त्रयश्चात्र पक्षाः। अन्यपदपूर्वपदोत्तरपदार्थप्राधान्यलक्षणाः संभवन्ति। यदाजातौ ब्राह्मणशब्दो वर्तते अविद्यमानं ब्राह्मण्यं यस्य सोऽब्राह्मणः क्षत्रियादिस्तदान्यपदार्थः प्रधानः। यदात्वसत्त्वमान्यवृत्तिर्नञ् ब्राह्मणादिभिर्विशेष्यते ब्राह्मणत्वेनासन् अन्यथा तु सनर्थः क्षत्रियादिरब्राह्मणशब्देनोच्यते तदा पूर्वपदार्थः प्रधानः। यदा तु दुरुपदेशाद्भ्रान्तिमिथ्याज्ञानाद्वा ब्राह्मणशब्दः क्षत्रिये प्रयुज्यते ब्राह्मणपदार्थनिवृत्तिश्च स्वाभाविकी नञा द्योत्यते तदोत्तरपदार्थप्रधानः। यद्यपि इहार्थो न निर्दिष्टस्तथाप्यभिधानशक्तिस्वाभाव्याल्लभ्यते। द्वन्द्ववत्तु स्वतन्त्रपदार्थद्वयानवगमादुभयपदार्थप्राधान्यं नाशङ्कितम्। एवं पक्षत्रयसंभवेऽप्यप्रतिविधेयपक्षमाश्रयितुमाह। उत्तरपदार्थप्रधान इति। ब्राह्मणमात्रस्येति। इहानियतगुणस्य गुणविशेषप्रतिपादनाय विशेषणं प्रवर्तते न तदुपघाताय। यदि च नञा ब्राह्मणपदार्थः प्रतिषिध्यते तदा सर्वात्मना तदर्थस्याभावात्कथं प्राधान्यं स्यात्। तस्मात्तद्गतविशेषावचनान्नञनर्थक एवेति ब्राह्मणाब्राह्मणशब्दयोः पर्यायता प्रसज्येत। अन्वाख्यानाद्धि साधुत्वमेवंभूतस्यार्थवदनर्थकावयवस्य समासस्य स्यात्। अवर्षा इति। न चात्र परवल्लिङ्गतास्ति। यस्मान्न्यासभेदेन द्वन्द्वैकदेशिसमासयोरेव सोक्ता। वचनदोषस्तु यथान्यासेऽप्यपरिहार्य एव। किं च नञ्समासस्यान्यपदार्थप्रधानत्वआश्रीयमाणेऽपवादत्वादनेन बहुव्रीहेर्बाधनादब्राह्मणको देश इत्यादि न सिध्यति। असः अ सर्वस्मा इति चोत्तरपदार्थस्योपसर्जनत्वात्सदादिसर्वनामकार्यप्रसङ्गः। सर्वादीनि सर्वनामानीत्यत्र संज्ञोपसर्जनस्यप्रतिषेधाभिधानात्।

एकवचनेतावदुक्तम्। अनभिधानादिति। द्विगोः किमुक्तम्। उत्तरपदेन परिमाणिना द्विगोः समासवचनमिति॥ कालाः परि॥ नञ्॥ ॥ किंप्रधानोऽयं समासः। उत्तरपदार्थप्रधानः। यद्युत्तरपदार्थप्रधानः अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति। अन्यपदार्थप्रधानस्तर्हि भविष्यति। यदि अन्यपदार्थप्रधानः अवर्षाः हेमन्त इति हेमन्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि प्राप्नोति। पूर्वपदार्थप्रधानस्तर्हि भविष्यति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्ययसंज्ञेति।अलिङ्गमसंख्यमव्ययमित्यर्थाश्रयेणाव्ययसंज्ञाविधानादितिभावः।पक्षान्तराश्रयेणापिपरिहाराभवन्तीतिपाठमाश्रित्याह।नैषदोषइति।पाठेनापीति।पाठाभावात्समासस्यमाभूदव्ययसंज्ञालिङ्गसंख्यायोगस्तुनञर्थप्रधानत्वान्नप्राप्नोतीत्यर्थः।नेदंवाचनिकमिति।वचनंप्रयोजनमस्येतिवाचनिकम्।एतदुक्तंभवति।शब्दशक्तिस्वाभाव्यादसत्त्वरूपमर्थंवाक्येनञाह।समासेतुसत्त्वरूपम्।केचिदर्थैरिति।धर्माधर्मवशात्।अथवेति।ब्राह्मणभावस्यगुणत्वात्तद्युक्तद्रव्याभिधायित्वाच्चसमासस्यक्षत्रियाद्याश्रयगतेलिङ्गसंख्येभविष्यतइत्यर्थः।पूर्वत्रस्वाभाविकदर्शनेसाक्षादेवलिङ्गसंख्यायोगः।

यदिपूर्वपदार्थप्रधानःअव्ययसंज्ञाप्राप्नोति।अव्ययंह्यस्यपूर्वपदमिति।नैषदोषः।पाठेनाव्ययसंज्ञाक्रियते।नचनञ्समासस्तत्रपठ्यते।यद्यपिनञ्समासोनतत्रपठ्यतेनञ्तुपठ्यते।पाठेनाप्यव्ययसंज्ञायांसत्यामभिधेयवल्लिङ्गवचनानिभवन्ति।यश्चेहार्थोभिधीयतेनतस्यलिङ्गसंख्याभ्यांयोगोस्ति।नेदंवाचनिकमलिङ्गताअसंख्यतावा।किंतर्हि।स्वाभाविकमेतत्।तद्यथा।समानमीहमानानांचाधीयानानांचकेचिदर्थैर्युज्यन्तेअपरेन।नचेदानींकश्चिदर्थवानितिकृत्वासर्वैरर्थवद्भिःशक्यंभवितुम्।कश्चिद्वानर्थकइतिसर्वैरनर्थकैः।तत्रकिमस्माभिःशक्यंकर्तुम्।यन्नञःप्राक्समासाल्लिङ्गसंख्याभ्यांयोगोनास्तिसमासेचभवति।स्वाभाविकमेतत्।अथवाआश्रयतोलिङ्गवचनानिभविष्यन्ति।गुणवचनानांहिशब्दानामाश्रयतोलिङ्गवचनानिभवन्ति।तद्यथा।शुक्लंवस्त्रम्।शुक्लाशाटी।शुक्लःकम्बलः।शुक्लौकम्बलौ।शुक्लाःकम्बलाइति।यदसौद्रव्यंश्रितोभवतिगुणस्तस्ययल्लिङ्गंवचनंचतद्गुणस्यापिभवति।एवमिहापियदसौद्रव्यंश्रितोभवतिसमासस्तस्ययल्लिङ्गंवचनंचतत्समासस्यापिभविष्यति।अथवापुनरस्तुउत्तरपदार्थप्रधानः।ननुचोक्तमब्राह्मणमानयेत्युक्तेब्राह्मणमात्रस्यानयनंप्राप्नोतीति।नैषदोषः।

इहत्वाश्रयद्वारकइतिविशेषः।समासइति।समासार्थइत्यर्थः।अत्रापिपक्षेदोषः।यदितावत्स्वाभाविकदर्शनमाश्रीयतेतदानेनापवादत्वादव्ययीभावस्यबाधनप्रसङ्गादमक्षिकमित्यादिनसिध्यति।तस्यतुनिर्मक्षिकमित्यादिरवकाशः।असर्वस्मायसइत्यादौचपूर्ववत्स्मायाद्यसिद्धिःस्यात्।आश्रयद्वारकलिङ्गसंख्याभ्युपगमेप्यवर्षाहेमन्तोनर्थःस्त्रीत्यादौहेमन्ताद्याश्रयगतलिङ्गसंख्याप्रसङ्गइत्यालोच्याह।अथवेति।एतत्तदोःसुलोपइत्यत्रानञ्समासग्रहणंलिङ्गमुत्तरपदार्थप्रधानत्वस्य।अन्यथैतत्तदोरर्थद्वारेणसंबन्धिनःसुशब्दस्यलोपोविधीयमानोनैषोददात्यसोददातीत्यत्रकथंप्राप्नुयात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ कै॰ नञ्विशिष्टस्येति। आरोपितब्राह्मण्यस्य क्षत्रियादेरित्यर्थः। कः पुनरसाविति। भावाभावयोर्विरोधाद्नञ्विशिष्टो ब्राह्मणार्थो नोप
३५० पद्यत इति भावः। निवृत्तपदार्थक इति। निवृत्तः पदार्थो मुख्यं ब्राह्मण्यं यस्मिन् स क्षत्रियादिरर्थः। सादृश्यादिना ध्यारोपितब्रा
ह्मण्यो नञ्द्योतिततदवस्थ इत्यर्थः। इदानीं नञो वाचकत्वद्योतकत्वपरीक्षणायाह। यदा पुनरिति। किं स्वयं निवृत्तस्य ब्रा
ह्मणपदार्थस्य नञा निवृत्तिर्द्योत्यते। अथ स्थितस्यैव नञा निवृत्तिः क्रियते मन्त्रेणेव विषादिसामर्थ्यस्येति प्रश्नः। किं नञि
ति। ब्राह्मणशब्द एवाराच्छब्द इव दूरमदूरं च विद्यमानब्राह्मण्यमविद्यमानब्राह्मण्यं च क्षत्रियादिकं वक्ष्यतीति नास्ति
नञो व्यापार इत्यर्थः। अथेति। नञः पदार्थनिवृत्तौ सामर्थ्यस्याप्रसिद्धत्वादपूर्वमेतद्वक्तव्यमिति सोत्प्रासमुपहसति। नञ्प्र
युज्यमान इति। ननु स्वाभाविकनिवृत्तिदर्शने कथं पदार्थं नञ् निवर्तयेदूवाचनिकनिवृत्तिदर्शने ह्येतद्युज्यते वक्तुम्। एवं-

इदं तावदयं प्रष्टव्यः। यथेह राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं कस्मान्न भवति। अस्त्यत्र विशेषः। राजा वि
शेषकः प्रयुज्यते तेन एवं विशिष्टस्यानयनं भवति। इहापि तर्हि नञ् विशेषकः प्रयुज्यते तेन नञ्विशिष्टस्यानयनं भ
विष्यति। कः पुनरसौ निवृत्तपदार्थकः। यदा पुनरस्यार्थो निवर्तते। किं स्वाभाविकी निवृत्तिराहोस्विद्वाचनिकी। किं चा
तः। यदि स्वाभाविकी। किं नञ् प्रयुज्यमानः करोति। अथ वाचनिकी। तद्वक्तव्यम्। नञ् प्रयुज्यमानः पदार्थं निवर्तय
तीति। एवं तर्हि स्वाभाविकी निवृत्तिः। ननु चोक्तं किं नञ् प्रयुज्यमानः करोतीति। नञ्प्रयुज्यमानः पदार्थं निवर्तयति।
कथम्। कीलप्रतिकीलवत्। तद्यथा। कील आहन्यमानः प्रतिकीलं निर्हन्ति। यद्येतन्नञो माहात्म्यं स्यान्न जातु
चिद्राजानो हस्त्यश्वं बिभृयुः। नेत्येव राजानो ब्रूयुः।

तर्हि पदार्थप्रत्यय एवोपचारात्पदार्थशब्देनोच्यते यथा सिंहमध्यापयेदिति सिंहशब्देन माणवक इत्यदोषः। अयमत्रार्थः
। केवलो ब्राह्मणशब्दः प्रयुज्यमानः प्रसिद्धिवशान्मुख्य एव ब्राह्मणार्थे प्रत्ययमादधाति नञ्प्रयोगे तु निवृत्तपदार्थकता ब्राह्म
णशब्दस्य प्रतीयते। यथा प्रतिष्ठत इत्यत्र यद्यपि तिष्ठतिरेव गतिवचनस्तथापि तस्मिन् केवले प्रयुज्यमाने प्रस्थानं न गम्यत-
इति द्योतकत्वेन प्रशब्दोपेक्ष्यते तथेह नञ्। पदार्थशब्देन पदार्थप्रत्यय उपचारादुच्यते। कथं पुनः स्वहेतोरुत्पद्यमानः प-
दार्थप्रत्ययो नञा निवर्त्यत इत्याह। कीलप्रतिकीलवदिति। यथा महता कीलेन प्रतिकीलमुत्खन्यते। तथा क्षत्रिये सादृश्या- रामः
दिनिमित्तोत्पन्नस्य ब्राह्मणप्रत्ययस्य नञ्प्रयोगे निवृत्तिरित्यर्थः। इतरो यथोक्तमभिप्रायमप्रतिपद्य पदार्थस्यैव नञा निवर्त्यत इ ३५०
ति ज्ञात्वा पर्यनुयुङ्क्ते। यद्येतदिति। प्रतिपक्षनिवारणाय नञमेव प्रयुञ्जीरन् न तु तदर्थं हस्त्यश्वादि बिभृयुरित्यर्थः। ॥

इदानीमभिप्रायं स्पष्टयितुमाह। एवं तर्हीति। नञ्निमित्तेति। क्षत्रियादौ सादृश्यनिमित्ताध्यारोपितं ब्राह्मण्यं न तु वास्तविकमिति नञ्प्रयोगेण द्योत्यत इत्यर्थः। यदि पुनरिति। अर्थप्रत्यायनाय शब्दः प्रयुज्यते। स चेन्निवृत्तः किमर्थमसौ प्रयुज्यते। एवं यथेति। प्रतिषेधविषयप्रदर्शनाय बुद्ध्या ब्राह्मणार्थं निरूप्य तस्य क्षत्रियादौ मुख्यसत्ताविरहप्रतिपादनाय नञ्सहितो ब्राह्मणशब्दः प्रयुज्यत इत्यर्थः। सर्वे इति। तत्र यस्यैव गुणस्य स्वाभाविकी निवृत्तिस्तस्यैवासौ नञा द्योत्यते। अवशिष्टानां तु गुणानामर्थात्सद्भावो गम्यते। गुणशब्देन चात्र धर्ममात्रं पराश्रयमुच्यते स्मृतिशास्त्राश्रयेण निदर्शनाय ब्राह्मण-

एवं तर्हि स्वाभाविकी निवृत्तिः। ननु चोक्तं किं नञ् प्रयुज्यमानः करोतीति। नञ्निमित्तात्तूपलब्धिः। तद्यथा। समन्धकारे द्रव्याणां समवस्थितानां प्रदीपनिमित्तं दर्शनं न च तेषां प्रदीपो निवर्तको भवति। यदि पुनरयं निवृत्तपदार्थको ब्राह्मणशब्दः किमर्थं प्रयुज्यते। एवं यथा विज्ञायेत अस्य पदार्थो निवर्तत इति। नेत्युक्ते संदेहः स्यात् कस्य पदार्थो निवर्तत इति। तत्रासंदेहार्थो ब्राह्मणशब्दः प्रयुज्यते। एवं चैतत्। अथवा सर्व एते शब्दा गुणसमुदायेषु वर्तन्ते। ब्राह्मणः क्षत्रियो वैश्यः शूद्र इति। तपः श्रुतं च योनिश्चेत्येतद्ब्राह्मणकारकम्। तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः॥ तथा गौरः शुच्याचारः पिङ्गलः कपिलकेश इत्येतानप्यभ्यन्तरान्ब्राह्मण्ये गुणान्कुर्वन्ति। समुदायेषु च वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते। तद्यथा। पूर्वे पञ्चालाः। तैलं भुक्तम्। घृतं भुक्तम्। शुक्लो नीलः कपिलः कृष्ण इति। एवमयं समुदाये ब्राह्मणशब्दः प्रवृत्तोऽवयवेष्वपि वर्तते। जातिहीने गुणहीने च। गुणहीने तावत्। अब्राह्मणोयम्॥

स्यगुणानाह। तप इति। तपश्चान्द्रायणादि कर्म। श्रुतं वेदवेदाङ्गादीनामध्ययनम्। योनिर्ब्राह्मणाद्ब्राह्मण्यां जन्म। ब्राह्मणकारकमिति। शेषषष्ठीसमासः ब्राह्मणव्यपदेशस्यैतत्कारकं निमित्तमित्यर्थः। गुणसमुदायाभावेऽपि तदेकदेशे प्रयोगदर्शनादाह। तपःश्रुताभ्यामिति। अधुना लोकप्रसिद्धाननुबाहुल्येन तथा दृष्टान्गुणानाह। गौर इति। पूर्वे पञ्चाला इति। अवयवे समुदायरूपारोपाच्छब्दप्रवृत्तिर्विज्ञेया न तु शब्दः स्वार्थं परित्यज्यार्थान्तरं वक्तुं समर्थः शब्दार्थसंबन्धस्यानित्यताप्रसङ्गात्। तैलमिति। यदा संस्कारादियुक्तं विशिष्टमात्रापरिमितं समुदायमाह तैलशब्दस्तदा समुदायवचनोऽन्यदा तु जातिशब्द एवायम्। शुक्ल इति। स्वयमशुक्लोऽप्यवयवः शुक्लावयवान्तरासादितशौक्ल्यसमुदायरूपारोपेण शुक्लशब्दाभिधेयस्तदेतदुदाहरणम्। स्वयं त्ववयवस्य शौक्ल्ये मुख्य एव शुक्लशब्दः।

CC-0. In Public Domain. Digitization by eGangotri

यत्तिष्ठन्निति। तपःश्रुतयोरभावान्निन्द्यात्राऽब्राह्मणशब्दप्रयोगस्तत्र जातिमात्रे अवयवे समुदायरूपारोपाद्ब्राह्मणश-
ब्दप्रयोगेन जातुल्याभाविनी तपःश्रुतनिवृत्तिर्द्योत्यते। नच भिन्नविषयत्वं पूर्वपदोत्तरपदयोराशङ्कनीयम्। द्वयोरपि
समुदायविषयत्वात्तदेकदेशनिवृत्तिसद्भावप्रतिपादनद्वारेण। जातिहीनेइति। तत्र स्तुत्या ब्राह्मणशब्दस्य प्रवृत्तिर-
ध्ययनादिगुणसद्भावप्रतिपादनाय। संदेहादिति। संदेहनिमित्तं गुणः संदेहशब्देनोक्तः। गुणैकदेशदर्शनाच्च गुणस-
मुदायस्य संनिधिमवसाय यदा प्रमाणान्तरेण जात्यभावं प्रतिपद्यते तदा तद्द्योतनाय नञ्प्रयुक्तेऽब्राह्मणोयमि-
ति। जातिकृतेति। जात्यभावकृतेत्यर्थः। यथा वर्षकृतं दुर्भिक्षमिति। अर्थस्येति। समुदायस्येत्यर्थः। अयमत्रार्थः। एक

यत्तिष्ठन्मूत्रयति अब्राह्मणोयं यत्तिष्ठन्भक्षयति। जातिहीने संदेहाद्दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते। सं
देहात्तावत् गौरं शुच्याचारं पिङ्गलं कपिलकेशं दृष्ट्वा ध्यवस्यति ब्राह्मणोयमिति। ततः पश्चादुपलभते नायं ब्राह्म
ण इत्यब्राह्मणोयमिति। अमुष्मिन्नवकाशे ब्राह्मणोयमिति। तत्र संदेहाद्ब्राह्मणशब्दो वर्तते। जातिकृता चा
र्थस्य निवृत्तिः। दुरुपदेशाच्च दुरुपदिष्टमस्य भवति। अमुष्मिन्नवकाशे ब्राह्मणस्तमानयेति। स तत्र गत्वायं प-
श्यति तमध्यवस्यति ब्राह्मणोयमिति। ततश्च पश्चादुपलभते नायं ब्राह्मणः। अब्राह्मणोयमिति निर्ज्ञातं तस्य
भवति। तत्र दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते। जातिकृता चार्थस्य निवृत्तिः। आतश्च संदेहाद्दुरुपदेशाद्वा।
नह्ययं कालं माषराशिवर्णमापणे आसीनं दृष्ट्वा ध्यवस्यति ब्राह्मणोयमिति। निर्ज्ञातं तस्य भवति। इदं खल्वपि
भूय उत्तरपदार्थप्राधान्ये सति संगृहीतं भवति। किम्। अनेकमिति। किमत्र संगृहीतम्। एकवचनम्। कथं पुन
रेकस्य प्रतिषेधे द्विबहूनां संप्रत्ययः स्यात्।

देशविगमात्समुदायो निवृत्त उच्यते एकदेशान्तरसद्भावाच्च तस्य सद्भावो भिधीयते। यथैकदेशकरणाकरणाभ्यां कृताकृतः संघा
त उच्यते। माषराशिवर्णमिति। कालत्वविशेषप्रतिपादनपरमेतत्। आपण आसीनमिति। आचाराभावकथनम्। निर्ज्ञातमिति। भ्रा
न्तिबीजाभावाद्यथास्थितं वस्तुतत्त्वं तस्य ज्ञातमिति ब्राह्मण्यारोपाभावाद्ब्राह्मणशब्दस्य तत्राप्रयोगादब्राह्मणशब्दस्यापि प्र- राम:
योगाभाव इत्यर्थः। तदेवं दोषपरिहारादुत्तरपदार्थप्रधानत्वं स्थापितम्। इदानीं तत्रैवोपचयमाह। इदं खल्वपीति। अनेकमित्यु ३५१
त्तरपदार्थप्रधानत्वे सति प्रधानगतसंख्याश्रयमेकवचनं सिध्यति नान्यथेत्यर्थः। कथं पुनरिति। अनेकशब्दो यदि बहूनां वाचकस्त
दा बहुवचनं प्राप्नोत्यथैकत्वप्रतिषेधमात्रमस्यार्थस्तदाऽनेको जन आगत इति बहूनां संप्रत्ययो न प्राप्नोति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसज्यायमिति। विधायेत्यर्थः। निराश्रययोश्चतयोरसंभवादनियतसंख्यद्रव्याक्षेपे सत्येकप्रतिषेधाद्बहूनां प्रतीतिरित्यर्थः। एतच्च प्रस
ज्यप्रतिषेध उच्यते। पर्युदासे तु द्व्यादिसंख्यायुक्त एवानेकशब्दस्यार्थः। यस्मात्तत्रादिद्वेकत्वमारोप्य प्रतिषिध्यते यथा क्षत्रियादेः
ब्राह्मणत्वम्। ततो यथा अब्राह्मणः क्षत्रियादिरुच्यते तथा अनेकशब्देन संख्यान्तरयुक्तः। यत्र तु खल्विति। यत्र तु पूर्वमेव प्रतिषेधः पश्चात्क्रियागु
णविधानं तत्र कथं बहूनां संप्रत्यय इति प्रश्नः भवतीति। अयमर्थः आख्यातस्य पश्चात्प्रयोगोऽस्तु पूर्वं वा। धात्वर्थेन तावत्कारकस्याक्षेपो वश्यंभा
वीति तत्रैकप्रतिषेधसामर्थ्यादेव हित्वादियोगिसाधनाक्षेपः। न न इति। आबाधे चेति द्विर्वचनम्। शत्रोः प्रियेण सुखेन च प्रयोक्तुराबाधः। न इति बाध
स्थ। अत्रैकप्रतिषेधसामर्थ्यादेव संख्यान्तरयुक्तवस्तुप्रतीतिः। अन्यथा न प्रियमित्येव वाच्यं स्यात्। तस्माद्यत्र वाक्येऽपि सामर्थ्या
त्संख्यान्तरगतिर्भवति तत्र समासे वाक्यविलक्षणधर्मप्रादुर्भावहेतौ किं न भविष्यतीत्युक्तं भवति। अब्राह्मणत्वमिति। नब्राह्म

प्रसज्यायं क्रियागुणौ ततः पश्चान्निवृत्तिं करोति। तद्यथा। आनय। आसय। शायय। भोजय। अनेकमिति। यद्यपि ता
वदत्रैतच्छक्यते वक्तुं यत्र क्रियागुणौ प्रसज्येते। यत्र तु खलु पुनर्न प्रसज्येते तत्र कथमनेकं तिष्ठतीति। भवति
चैवंजातीयकानामप्येकस्य प्रतिषेधेन बहूनां संप्रत्ययः। तद्यथा। न न एकं प्रियं न न एकं सुखमिति। इहाब्राह्म
णत्वमब्राह्मणता परत्वात्त्वतलौ प्राप्नुतः। तत्र को दोषः। स्वरे हि दोषः स्यात्। अब्राह्मणत्वमित्येवं स्वरः प्रसज्ये
त। अब्राह्मणत्वमिति चेष्यते। नञ्समासे भाववचने उक्तम्। किमुक्तम्। त्वतलोर्भ्यां नञ्समासः पूर्वविप्रतिषिद्धं त्व
तलोः स्वरसिद्ध्यर्थमिति॥ नञ्॥ ईषदकृता॥ ईषद्गुणवचनेन॥ ईषद्गुणवचनेनेति वक्तव्यम्। अकृतेति ह्युच्य
माने इह च प्रसज्येत। ईषद्गार्ग्यः। इह च न स्यात्। ईषत्कडार इति। ईषद॥

णस्य भाव इति युगपद्भावप्रतिषेधसंबन्धविवक्षायां प्रत्ययसमासप्रसङ्गे यदि परत्वात्प्रत्ययः स्यात् पुनः प्रसङ्गविज्ञानाच्च
पश्चान्नञ्समासः क्रियते तदा तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरेणाद्युदात्तं पदं स्यात्। प्रत्ययस्वरश्चेष्यत इति नञ्स
मासे तु कृते त्वतलौ कार्यौ। तत्र भावप्रत्ययस्तावत्स्वकृत्यर्थस्य सापेक्षत्वादसामर्थ्यान्न भवति नञ्समासस्तु प्रधानस्य सापेक्ष
त्वाद्भवतीत्याहुः॥ ईषत्॥ ईषद्गार्ग्य इति। यथैकार्थसमवेतक्रियागुणापेक्षया जातेः प्रकर्षादियोगः गार्ग्यतरो गार्ग्यकल्पो गा
र्ग्यपाश इति तथेषदर्थेनापि योगः। ईषत्कडार इति। गडेः कड चेत्यारन्प्रत्ययान्तत्वात्कृदन्तः कडारशब्दः। क्रियाकार
कसंबन्धस्यासंप्रत्ययादकृदन्त इति केचिदाहुः। तदयुक्तम्। कृच्छब्देन हि कृत्संज्ञकः प्रत्यय उच्यते। अथाप्युणादीनाम
व्युत्पत्तिपक्षाश्रयणादत्र समासः स्यात् तथापीषदुक्त ईषदुन्नत इत्यत्र न स्यात्। ॥

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ षष्ठी॥ किमर्थमिति। सूत्रेणैवात्र समासः सिद्ध इति प्रश्नः। अपकर्ष इति। अपवाद इत्यर्थः। का पुनरिति। प्रतिपदविधानायामपि स- २२२
३५२ मासप्रतिषेधविषये कृद्योगोऽस्ति कृद्योगायामपि प्रतिपदविधानमिति विषयविभागाज्ञानात्पृच्छति। सर्वा षष्ठीति। साक्षाद्धातु-
कारकविशेषोपादानेन विधानात्प्रतिपदविधानेत्यर्थः। कृच्छब्दोपादानेन तु या विहिता सैव कृद्योगोच्यते। तत्र शेषविव-
क्षायां षष्ठी शेष इत्यनेनैव सिद्धा यां षष्ठ्यां ज्ञोऽविदर्थस्य करण इत्यादिप्रकरणे समासनिवृत्त्यर्थमेवारब्धं षष्ठी भवत्येव श्रूय-
तेऽव न तु तस्याः समासो भवतीत्यर्थः। समासे हि सति तस्या अभावः स्यात्। तस्मात्प्रतिपदविधानेति न वक्तव्यं तस्मिन्ननुच्य-
माने कृद्योगेति न वक्तव्यम्। अशेषविषये विधानार्थत्वात्कर्तृकर्मणोः कृतीत्यस्य समासनिवृत्तौ सामर्थ्याभावात्सूत्रेणैव
समासस्यासिद्धत्वात्। प्रतिप्रसवप्रसङ्गेनान्यदपि कथ्यते। तत्स्थैरिति। तच्छब्देन सन्निधानाद्गुणशब्दः परामृश्यते। तेना-
यमर्थः। स्वात्मनि ये गुणाः अवस्थितास्तैः सह समासेन च स्वात्मन्यवस्थानं गुणानां संभवति भेदनिबन्धनत्वान्मुख्याधाराधेय-
भावस्य। सर्वस्य च गुणस्य द्रव्याश्रयत्वात्। तस्मादभिधानव्यापारापेक्षया तत्स्थत्वमुच्यते। इह केचिद्गुणाः शब्देन द्रव्यान्नि-

षष्ठी॥ कृद्योगा च॥ कृद्योगा च षष्ठी समस्यत इति वक्तव्यम्। इध्मप्रव्रश्चनः। पलाशशातनः। किमर्थमिदमुच्यते।
प्रतिपदविधाना च षष्ठी न समस्यत इति वक्ष्यति तस्यायं पुरस्तादपकर्षः। का पुनः षष्ठी प्रतिपदविधाना का च कृ-
द्योगा। सर्वा षष्ठी प्रतिपदविधाना शेषलक्षणां वर्जयित्वा। कर्तृकर्मणोः कृतीति तु या षष्ठी सा कृद्योगा। तत्स्थैश्च गु-
णैः॥ तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्यम्। ब्राह्मणवर्णः।

कृष्टा एव प्रत्याय्यन्ते न तु द्रव्यस्योपरञ्जकत्वेन। यथा चन्दनस्य गन्ध इति। सर्वदा वैयधिकरण्यमेव गुणगुणिनोः न कदाचिच्च-
न्दनं गन्ध इति सामानाधिकरण्यं भवति। शुक्लादयस्तु गुणाः कदाचिन्निकृष्टरूपाः शब्दैरुच्यन्ते पटस्य शुक्ल इति। कदा-
चिद्द्रव्येणैकत्वमापन्नाः शुक्लः पट इति तस्माद्द्विविधगुणसद्भावात्तत्स्थैरिति विशेषणं रूपादिगुणपरिग्रहार्थमुपात्तमि-
ति ब्राह्मणवर्णादयउदाहरणम्। अथ बलाकायाः शौक्ल्यमिति समासः कस्मान्न भवति। तत्स्थं हि शौक्ल्यम्। सर्वदा वैयधिकर-
ण्येन संबन्धात्। नैष दोषः। शौक्ल्यशब्देन शुक्लो गुणोऽभिधीयते शुक्लशब्दस्य द्रव्ये वर्तमानस्य तस्मिन्नेव प्रवृत्तिनिमित्ते भाव-
प्रत्ययविधानात्। न चासौ तत्स्थः। अभेदाध्यवसायेन द्रव्यं प्रत्युपरञ्जकत्वदर्शनाच्छुक्लः पट इति। अर्थस्य च तत्स्थत्वम- राम॰
भीयत इति शब्दभेदेऽप्यर्थस्याभेदान्नास्ति शुक्लस्य गुणस्य तत्स्थत्वम्। रूपवान्पट इत्यादौ तु नास्ति गुणगुणिनोरभेदा- ३५२
ध्यवसायः। भेदाश्रयेणैव मत्वर्थीयप्रयोगादिति रूपस्य तत्स्थत्वमव्यावृत्तमिति पटरूपमिति समासो भवत्येव। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न तु तद्विशेषणैरिति। तच्छब्देन गुणाः परामृश्यन्ते। तेषां गुणानां यानि विशेषणानि तद्वचनैः सह समासो न भवतीत्यर्थः।
घृतस्य तीव्र इति। तीव्रो गन्धस्य विशेषणम्। चन्दनस्य मृदुरिति। स्पर्शस्य मृदुत्वं विशेषणम्। ननु घृतस्य गन्धेन संब-
न्धो न तु तद्गतेन तीव्रेण विशेषणेनेति सामर्थ्याभावात्समासस्य प्राप्तिरेव नास्ति तत्किं प्रतिषेधेन। एवं तर्हि यदा प्रकर
णादिवशात्तीव्रशब्द एव विशिष्टगन्धवृत्तिस्तदा तदर्थोपजनित एव व्यतिरेके घृतस्येति षष्ठी तदा षष्ठीति समासप्रसङ्गः। यश्च
गन्धविशेषवचनस्तीव्रशब्दस्तस्य द्रव्यवाचिना सामानाधिकरण्याभावाद्गन्धशब्दस्यैव तत्स्यगुणाभिधायित्वात्समासप्र-

चन्दनगन्धः। पटहशब्दः। नदीघोषः। न तु तद्विशेषणैः। ग

न तु तद्विशेषणैरिति वक्तव्यम्। इह मा भूत्। घृतस्य तीव्रो गन्धः। चन्दनस्य मृदुरिति। किमर्थमिदमुच्यते। गुणेन नने
तिप्रतिषेधं वक्ष्यति तस्यायं पुरस्तादपकर्षः। किमर्थं पुनर्गुणेन नेत्युच्यते न पुनर्गुणवचनेन नेत्युच्येत। नैवं शक्य
मिह हि न स्यात्। काकस्य कार्ष्ण्यम्। बलाकायाः शौक्ल्यमिति। एतदेव खल्वपि तस्मिन्योगे उदाहरणम्। यद्वीदं ब्रा
ह्मणस्य शुक्लाः वृषलस्य कृष्णा इति। असामर्थ्यादत्र न भविष्यति। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। द्र
व्यमत्रापेक्ष्यते दन्ताः। तस्माद्गुणेन नेति वक्तव्यम्। गुणेन नेत्युच्यमाने तत्स्थैश्च गुणैरिति वक्तव्यम्। तत्स्थैश्च
गुणैरित्युच्यमाने न तु तद्विशेषणैरिति वक्तव्यम्। षष्ठी॥ न निर्धारणे॥ प्रतिपदविधाना च॥ प्रतिपदविधाना च षष्ठी
न समस्यत इति वक्तव्यम्। इह मा भूत्। सर्पिषो ज्ञानम्। मधुनो ज्ञानम्॥ न नि॥

सङ्गे प्रतिषेध उच्यते। ननु च तीव्रं घृतं मृदु चन्दनमिति सामानाधिकरण्यदर्शनात्तत्स्थत्वाभावात्समासाप्रसङ्गात्तत्प्रतिषेधोऽ
नर्थकः। एवं तर्हि सोऽत्रस्य प्रतिषेधस्य विषयकथनमिदं न तु तद्विशेषणैरिति। तत्स्थत्वाभावात्तैः समासः प्रतिषिध्यत एवेत्यर्थः। न
पुनरिति। तत्र गुणोपसर्जनद्रव्यवाचिना समासो निषिध्यते। केवलगुणवाचिना रूपादिशब्देन समासो भविष्यतीत्यर्थः। एतदेवेति
। केवलगुणवाच्येवेत्यर्थः। द्रव्यमत्रेति। ततश्च दन्तापेक्षया ब्राह्मणस्येति षष्ठीति शुक्लार्थेन संबन्धाभावात्समासस्य प्रसङ्गाभा
वादनार्थः प्रतिषेधेन॥

CC-0. In Public Domain. Digitization by eGangotri

पूरण॥ अर्थशब्दस्य प्रत्येकं संबन्धाद् गुणेति स्वरूपग्रहणं न भवति नाप्यदेङ्गं किं तर्हि सत्त्वे निविशतेऽपैतीत्येतल्लक्षणल
क्षितो गुणो गृह्यते। संसर्गिभेदकमित्यादिलक्षणयुक्तस्तु न गृह्यते। सामान्यादेरपि ग्रहणप्रसङ्गात्। नापि शुक्लादेरेव ग्रह
णं काण्टकस्य तैक्ष्ण्यमित्यस्योदाहृतत्वात्। गोविंशतिरित्यादौ संख्यया समासो न निषिध्यते शतसहस्रान्ताच्च निष्कात्। क्रो
शशतयोजनशतयोरुपसंख्यानं स्मारीभूतमपि ददातीति मुनित्रयवचनाज्ज्ञापकादुत्तरपदार्थप्राधान्यमित्यादेश्च मुनि
प्रयोगादस्य प्रतिषेधस्यानित्यत्वाद् यत्नगौरवादिशब्दसिद्धिः। गुणेन किमिति। वक्ष्यमाणोऽभिप्रायः। भवतीति यदा प्रकरणादि
वशाद्गत्वाद्यर्थ एवावसितवृत्तिः शुक्लादिशब्दस्तदा तद्योगजनित एव ब्राह्मणादौ व्यतिरेकवृत्तिसामर्थ्यसद्भावात्समासप्र

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन॥ ॥गुणेन किमुदाहरणम्। ब्राह्मणस्य शुक्लाः वृषल
स्य कृष्णा इति। नैतदस्ति प्रयोजनम्। असामर्थ्यादत्र न भविष्यति। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति।
द्रव्यमत्रापेक्ष्यते दन्ताः। इदं तर्हि। काकस्य कार्ष्ण्यं कण्टकस्य तैक्ष्ण्यं बलाकायाः शौक्ल्यमिति। इदं चाप्युदा
हरणं ब्राह्मणस्य शुक्लाः वृषलस्य कृष्णा इति। ननु चोक्तमसामर्थ्यादत्र न भविष्यति कथमसामर्थ्यं सापेक्षमस
मर्थं भवतीति द्रव्यमत्रापेक्ष्यते दन्ता इति। नैष दोषः। भवति वै कस्यचिदर्थात्प्रकरणाद्वाऽपेक्ष्यं निर्ज्ञातं तदा
वृत्तिः प्राप्नोति। सति किमुदाहरणम्। ब्राह्मणस्य पक्ष्यन् ब्राह्मणस्य पक्ष्यमाणः। नैतदस्ति। प्रतिषिध्यतेऽत्र ष
ष्ठीलप्रयोगे नेति। या च श्रूयते। एषा बाह्यमर्थमपेक्ष्य भवति तत्रासामर्थ्यान्न भविष्यति। कथमसामर्थ्यम्। सा
पेक्षमसमर्थं भवतीति। द्रव्यमत्रापेक्ष्यते ओदनः। इदं तर्हि। चोरस्य द्विषन् वृषलस्य द्विषन्। ननु चात्रापि प्र
तिषिध्यते वक्ष्यत्येतद् द्विषः शतुर्वा वचनमिति। अव्यये किमुदाहरणम्। ब्राह्मणस्योच्चैर्वृषलस्य नीचैरिति।
नैतदस्ति। असामर्थ्यादत्र न भविष्यति।

सङ्ग इत्यर्थः। ननु गुणस्य गुण्यपेक्षत्वाद् गुणिन एव समासनिषेधेन भाव्यं न च ब्राह्मणः शुक्लगुणाधारः। नैष दोषः। गुणशब्देन
केवलगुणवाचिनो गुणोपसर्जनद्रव्यवाचिनश्च व्याप्तिन्यायाश्रयेण गृह्यन्त इति गुणिनो गुणाधारसंबन्धिनश्चोपपन्नः समासप्रति
षेधः। प्रतिषिध्यतेऽत्रेति। आवर्जनवाचिपच्याश्रयेण ब्राह्मणं पचेः कर्ममन्यते। यथा स्थलोकपङ्क्तिर्लोकावर्जनमित्यर्थः। तत
श्च ब्राह्मणस्येति षष्ठी पाकापेक्षया कर्मणि न भवतीत्यर्थः। चोरस्य द्विषन्निति। तौ सदित्यत्रतो ग्रहणस्योपाध्यसंसर्गार्थत्वाद्
द्विषोऽमित्र इत्येतत्सूत्रविहितोऽपि शतासत्संज्ञः। ननु चात्रापीति। तृन्निति प्रत्याहारेण शतुरपि ग्रहणात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्यस्योदेतोरिति। हर्योदयात्पूर्वमित्यर्थः। वृक्षस्योपरीत्यादीन्यप्युदाहरणानि। राज्ञः पाटलिपुत्रकस्येति। विशेषणसमासोऽत्रभवत्येव ततोविशेषणस्यैवपूर्वनिपातः सिद्धोभवतिषष्ठीसमासेतुपूर्वनिपातस्यानियमः स्यादितिसप्रतिषिध्यते विशेषणसमासेचववचन सामर्थ्यात्समानाधिकरणमसमर्थवदितिनाश्रीयते। अथात्वभिहितमिति। एवंचकटस्यक्रियमाणस्येत्याद्यप्युदाहरणम् ॥कर्मणि॥ क्तषष्ठ्योः प्रकृतत्वादन्यतरविशेषणेदोषदर्शनात्पृच्छति। कथमिति। अकर्तरिक्तेति। यः कर्तरिविधीयतेय

कथमसामर्थ्यम्। सापेक्षमसमर्थंभवतीति। द्रव्यमत्रापेक्ष्यतेआसनम्। इदंतर्हि। ब्राह्मणस्यकृत्वावृषलस्यकृत्वेति। एतदपिनास्ति। प्रतिषिध्यतेतत्रषष्ठीअव्ययप्रयोगेनेति। याचश्रूयते। एषाबाह्यार्थमपेक्ष्यभवतितत्रासामर्थ्यान्नभविष्यति। कथमसामर्थ्यम्। सापेक्षमसमर्थंभवतीति। द्रव्यमत्रापेक्ष्यतेकटः। इदंतर्हि। पुरासूर्यस्योदेतोराधेयः पुरावत्सानामपाकर्तोः। ननुचात्रापिप्रतिषिध्यतेव्ययमितिकृत्वावक्ष्यत्येतत्। अव्ययप्रतिषेधेतोसुन्कसुनोरप्रतिषेधइति। समानाधिकरणेकिमुदाहरणम्। राज्ञः पाटलिपुत्रकस्य। शुकस्यमाराविकस्यापाणिनेः सूत्रकारस्यानेतदस्ति। असामर्थ्यादत्रनभविष्यति। कथमसामर्थ्यम्। समानाधिकरणमसमर्थवद्भवतीति। इदंतर्हि। सर्पिषः पीयमानस्ययजुषः क्रियमाणस्य। ननुचात्राप्यसामर्थ्यादेवनभविष्यति। कथमसामर्थ्यम्। समानाधिकरणमसमर्थवद्भवतीति। अथात्वभिहितमित्येवंतत्॥ कर्मणिच॥ ॥कथमिदंविज्ञायते। कर्मणियाषष्ठीसानसमस्यतइति। आहोस्वित्कर्मणियः क्तइति। कुतः संदेहः। उभयंप्रकृतम्। तत्रान्यतरच्छक्यंविशेषयितुम्। कश्चात्रविशेषः। कर्मणिषष्ठीतिनिर्देशश्चेदकर्तरिक्तासमासवचनम्। कर्मणिषष्ठीतिनिर्देशश्चेदकर्तरिक्तासमासोवक्तव्यः। इध्मप्रव्रश्चनः पलाशशातनः। तृजकाभ्यांचानर्थकः प्रतिषेधः। तृजकाभ्यांचानर्थकः कर्तरिप्रतिषेधोभवति। पुरांभेत्ता। यवानांलावकः। अपांस्रष्टा। कर्मणीत्येवसिद्धम्। अस्तुतर्हिकर्मणियः क्तइति। किमुदाहरणम्। ब्राह्मणस्यभुक्तंवृषलस्यपीतमिति।

या कुम्भकारइतितत्रपरत्वादुपपदसमासेनभाव्यम्। केचित्तुतृजकाभ्यांकर्तरिचेतिप्रतिषेधेनेत्यभिप्रायेणाकर्तरीत्युक्तम्। इध्मप्रव्रश्चनइति। करणेल्युट्कर्मणिषष्ठीतृजकाभ्यांचेतिकर्तरियौतृजकौतत्रसामर्थ्यात्कर्मण्येवषष्ठीत्यनेनैवप्रतिषेधः सिद्धः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ द्रव्यमत्रेति। ब्राह्मणस्येति षष्ठी भुक्तापेक्षया न भवति न लोकाव्ययनिष्ठेति प्रतिषेधात्। ततश्च ब्राह्मणस्य यओदनादिस्तेनान्येन
३५८ भुक्त इत्यर्थः प्रतीयत इति ब्राह्मणस्य भुक्तेन संबन्धाभावः। प्रतिषेध्यमिति चेदिति। यदा पारंपर्येण संबन्धसंभवाद्भवति वै
कस्यचिदिति न्यायाद्यः समासप्रसङ्गस्तन्निवारणायाबुधानां यत्नः क्रियते तदातिप्रसङ्गो यत्नस्येत्यर्थः। इत्यर्थ इति। अनेकार्थ-
त्वान्निपातानाम्। तेन कर्मणीत्युच्चार्यैव या षष्ठी विधीयते सा न समस्यत इत्यर्थः। ततश्चाश्चर्यो गवां दोहो गोपालकेनेत्याद्युदा
हरणम्। नित्यम्। प्रतिषेधे सिद्धेऽस्यारम्भाद्विधिरप्यत्र संभाव्यते अनन्तरत्वाच्च प्रतिषेधोऽपीति प्रश्नः। किमिहेति। विधिर्हीति।

क्तनिर्देशोऽसमर्थत्वादप्रतिषेधः। अनर्थकः प्रतिषेधः अप्रतिषेधः। समासः कस्मान्न भवति। असामर्थ्या
त्। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। द्रव्यमत्रापेक्ष्यते ओदनः। प्रतिषेध्यमिति चेत्कर्तर्यपि
प्रतिषेधः। अथैवं सति प्रतिषेधः कर्तव्य इति मन्यसे। कर्तर्यपि प्रतिषेधो वक्तव्यः स्यात्। ब्राह्मणस्यागतः।
ब्राह्मणस्य ज्ञात इति। पूजायां च प्रतिषेधानर्थक्यम्। पूजायां च प्रतिषेधोऽनर्थकः राज्ञां पूजितः राज्ञामर्चि
त इति। कर्मणीत्येव सिद्धम्। तस्मादुभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधः। तस्मादुभयप्राप्तौ कर्मणीत्येवं-
या षष्ठी तस्याः प्रतिषेधो वक्तव्यः। स तर्हि वक्तव्यः। न वक्तव्यः। इत्यर्थोऽयं चः पठितः। कर्मणि च। कर्मणीत्ये
वं या षष्ठी॥ कर्मणि॥ नित्यं क्रीडाजीविकयोः॥ ॥किमिह नित्यग्रहणेनाभिसंबध्यते विधिराहोस्वित्प्रति
षेधः। विधिरित्याह। कुत एतत्। विधिर्हि विभाषा नित्यः प्रतिषेधः॥ नित्यम्॥ कुगतिप्रादयः॥ ॥प्रादिप्र
सङ्गे कर्मप्रवचनीयप्रतिषेधः॥ प्रादिप्रसङ्गे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः। वृक्षं प्रति विद्योत
ते विद्युत्। साधुर्देवदत्तो मातरं प्रति॥

महाविभाषाधिकारात्। नित्य इति। विधिविकल्पेनैव पाक्षिकस्य प्रतिषेधस्य सिद्धत्वात्तत्प्रतिषेधारम्भसामर्थ्यादेव नित्यः प्रति
षेधः सिद्ध इति किं नित्यग्रहणेनेत्यर्थः। कुगति॥ प्रादिप्रसङ्ग इति। प्रादिग्रहणस्येहागत्यर्थत्वात्कर्मप्रवचनीयानां प्रतिषेध उच्य राम॰
ते प्रत्यादिविषय एवायं निषेधः। तथा च सत्योः समासो भवत्येव। वृक्षं प्रतीति। वृक्षविद्युद्द्योतनयोः क्रियाजनितस्य लक्षणसं ३५४
बन्धस्यावच्छेदकः प्रतिरिति सामर्थ्यसद्भावात्समासप्रसङ्गः। संबन्धाभावे तु द्वितीयापि न स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवेतानामिति। व्यवहितानां पदान्तरेण पदानां समासो न भवतीत्यर्थः। आमन्द्रैरिति। याहीत्यस्यां क्रियायां द्वयोरुपनिपातात्तद्द्वारको द्वयोर्दानादाविव परस्परसंबन्धोऽस्तीति समासप्रसङ्गः तथा चैकस्वर्यं स्यादिति तत्प्रतिषेध उच्यते। एवं पाणिनीये लक्षणेऽतिव्याप्तिमुद्भाव्य कात्यायन आत्मीयं लक्षणं करोति। सिद्धं त्विति। तेन प्रत्यादीनां न भवति। आमन्द्रैरित्यत्र त्वाङ्ग्रहणेन प्राप्नोतीति सामर्थ्यमेव नास्तीति वक्तव्यं प्रादयः क्तार्थ इति। अगत्यर्थमिदम्। वृत्तिविषये क्तार्थे वृत्तयः प्रादयः। एतदेवेति। कात्यायनाभिप्रायमेव प्रदर्शयितुं सौनागैरतिविस्तरेण पठितमित्यर्थः। सुराजेति। न पूजनादिति समासान्तप्रतिषेधः। उपाधीनां प्रयोगविषयोपलक्षणार्थत्वादन्यत्रापि समासो भवति। तेनातिक्रमणेऽप्यतिः समस्यते अतिसिक्तमेव भवतेति।

व्यवेतप्रतिषेधश्च। व्यवेतानां प्रतिषेधो वक्तव्यः। आमन्द्रैरिन्द्र हरिभिर्याहि। सिद्धं तु क्वाङ्स्वतिदुर्गतिवचनात्। सिद्धमेतत्। कथम्। क्वाङ्स्वतिदुर्गतयः समस्यन्त इति वक्तव्यम्। कु। कुब्राह्मणः कुवृषलः। कु। आङ्। आकडारः। आपिङ्गलः। आङ्। सु। सुब्राह्मणः सुवृषलः। सु। अति। अतिब्राह्मणः अतिवृषलः। अति। दुर्। दुर्ब्राह्मणः दुर्वृषलः। दुर्। गति। प्रकारकः प्रणायकः प्रसेवकः ऊरीकृत्य उररीकृत्य॥ प्रादयः क्तार्थे॥ प्रादयः क्तार्थे समस्यन्त इति वक्तव्यम्। प्रगत आचार्यः प्राचार्यः प्रान्तेवासी प्रपितामहः। एतदेव च सौनागैर्विस्तरतरकेण पठितम्॥ स्वती पूजायाम्॥ स्वती पूजायामिति वक्तव्यम्। सुराजा अतिराजा॥ दुर्निन्दायाम्॥ दुर्निन्दायामिति वक्तव्यम्। दुष्कुलं दुर्गवः॥ आङीषदर्थे॥ आङीषदर्थ इति वक्तव्यम्। आकडारः आपिङ्गलः॥ कुः पापार्थे॥ कुः पापार्थ इति वक्तव्यम्। कुब्राह्मणः कुवृषलः॥ प्रादयो गताद्यर्थे प्रथमया॥ प्रादयो गताद्यर्थे प्रथमया समस्यन्त इति वक्तव्यम्। प्रगत आचार्यः प्राचार्यः प्रान्तेवासी प्रपितामहः॥ अत्यादयः क्रान्ताद्यर्थे द्वितीयया॥ अत्यादयः क्रान्ताद्यर्थे द्वितीयया समस्यन्त इति वक्तव्यम्।

सुकर इत्यादौ तूपपदसमासोऽस्त्येव। दुर्निन्दायामिति। प्रादिग्रहणेन यः समासस्तस्यायं विषयनिर्देश इत्यर्थान्तरेऽपि गतित्वात्समासो भवति दुष्कृतमिति। आङीषदर्थ इति। क्रियायोगे तु गतित्वात्समासः आबद्धमिति। आमन्द्रैरित्यत्र तु सत्यपि सामर्थ्ये मन्द्रं प्रत्यगतित्वात्तद्गतेषदर्थाभावाच्च समासाभावः। कुः पापार्थ इति। प्रपाणेऽपि द्वेषान्निन्दा भवति पापं तु वस्तुस्थित्या गर्हितमिति निन्दापापयोर्भेदः। पूर्ववदुपलक्षणार्थत्वादीषदर्थेऽपि समासो भवति कालवणमिति। अन्ये त्वाहुः। पृथिवीवाचि कुशब्दनिवृत्तये कुः पापार्थ इत्युच्यते। ईषदर्थे तूत्तरपदे कादेशविधानात्समासो भवत्येव॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा·कै· अव्ययंप्रवृद्धादिभिरिति।आदिशब्दःप्रकारेतेनयस्याव्ययस्यसमासोनदृश्यतेतस्यानेनसमासःकार्यः।उदात्तवतेति।सहसुपे
३५५ त्यत्रोक्तमपिपुनरिहस्मरणायोक्तम्।अथवावार्त्तिकगृहीतोर्थोयोगविभागेनतत्रसाधितइतिपौनरुक्त्यभावः।अनुव्यचलदिति
।अत्रपूर्वपरत्वात्तिङ्:तिङ्इतिनिघातस्ततउदात्तवत्त्वाभावाद्गतिमतेतिपृथगुक्तम्।तत्रत्रयाणांपदानांसमासेकृतेसमासान्तोदा–
त्तत्वंभवति।तत्पुरुषेतुल्यार्थेत्यनेनतुपूर्वपदप्रकृतिस्वरत्वंनभवति।गतिर्गता।वित्यनेनानोरनुदात्तत्वात्तत्रचोदात्तस्वरितग्र
हणानुवर्तना द्विशब्दस्यतुपूर्वपदत्वाभावात्।यत्परियन्तीति।उदात्तवतउदाहरणम्।निपातैर्यद्यदीतिनिघातप्रतिषे–
धाद्यन्तीत्यस्यप्रत्ययस्वरेणाद्युदात्तत्वात्परिशब्दस्ययन्तीत्यनेनसमासः॥उपपदम्॥अतिङितिकिमर्थमिति।यदितिङन्तस्य

अतिक्रान्तःखट्वामतिखट्वः।अतिमालः॥अवादयःक्रुष्टाद्यर्थेतृतीयया॥अवादयःक्रुष्टाद्यर्थेतृतीययासम
स्यन्तइतिवक्तव्यम्।अवक्रुष्टःकोकिलयाअवकोकिलः॥पर्यादयोग्लानाद्यर्थेचतुर्थ्या॥पर्यादयोग्लाना
द्यर्थेचतुर्थ्यासमस्यन्तइतिवक्तव्यम्।परिग्लानोऽध्ययनायपर्यध्ययनः॥निरादयःक्रान्ताद्यर्थेपञ्चम्या॥
निरादयःक्रान्ताद्यर्थेपञ्चम्यासमस्यन्तइतिवक्तव्यम्।निष्क्रान्तःकौशाम्ब्याः निष्कौशाम्बिः।निर्वाराणसिः॥
अव्ययंप्रवृद्धादिभिः॥अव्ययंप्रवृद्धादिभिःसमस्यतइतिवक्तव्यम्।पुनःप्रवृद्धंबर्हिर्भवतिपुनर्गवःपुनःसु
खम्॥इवेनविभक्त्यलोपःपूर्वपदप्रकृतिस्वरत्वंच॥वाससीइवकन्येइव॥अव्ययमव्ययेन॥अव्ययमव्यये
नसमस्यतइतिवक्तव्यम्।प्रप्रयत्नपतिम्।उदात्तवतातिङागतिमताचतिङाव्ययंसमस्यतइतिवक्तव्यम्।
अनुव्यचलत्।अनुव्याकरोत्।यत्परियन्ति॥कुगति॥उपपदमतिङ्॥ ॥अतिङितिकिमर्थम्।कारकोव्रजति
हारकोव्रजति।अतिङितिशक्यमवक्तुम्।कस्मान्नभवतिकारकोव्रजतिहारकोव्रजति।सुप्सुपेतिवर्तते।अत
उत्तरंपठति।उपपदमतिङितितदर्थंप्रतिषेधः।उपपदमतिङितितदर्थस्यायंप्रतिषेधः।कस्य।तिङर्थस्य।

समासोनिषिध्यतेतदासुप्सुपेत्यधिकारात्तिङन्तस्यप्राप्त्यभावादनर्थकःप्रतिषेधः।अथतिङ्शब्देनतिङर्थोलक्ष्यतेति
ङन्तार्थवाचिनःशब्दस्यसमासनिषेधार्थंतथापितदर्थशब्दस्तिङन्तएवभवतीत्य—नर्थकएवप्रतिषेधइतिप्रश्नः।अ राम:
तइति।यस्मात्तिङन्तस्यानर्थकःप्रतिषेधइत्यर्थः।तच्छब्देनार्थशब्दसंनिधानेतिङर्थउच्यते।सतिङन्तस्यार्थोऽर्थोयस्यस ३५५
तदर्थः।कस्येति।सामान्याभिधानाद्विशेषावधारणायप्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कः पुनरिति। कालसाधनसंख्यापुरुषक्रियोपग्रहरूपस्तिङर्थस्तदर्थश्च तिङन्त एव संभवति नान्यत्रेति प्रश्नः। क्रियेति।
अनेकार्थसंभवेपि साध्यत्वात् क्रिया प्रधानम्। प्रधानं चार्थस्तिङ्ग्रहणेन वचनसामर्थ्याल्लक्ष्यते। क्रियाप्रतिषेधो वेति। यदि
तिङ्ग्रहणेन वचनसामर्थ्यात् क्रिया लक्षणीया तदा प्रतिपत्तिलाघवाय साक्षात् क्रियाप्रतिषेधः कर्तव्य इत्यर्थः। अत्रापि पक्षे
सुबन्तस्य क्रियावाचित्वाभावान्निर्विषय एव प्रतिषेध इत्याह। अथेति। कारको गत इति। गतशब्दः क्रियावाच्युपपदं
तत्र तुमुन्ण्वुलाविति ण्वुल्। कर्तुं गत इत्यर्थः। अत्रातिङ्ग्रहणात् समासाभावोन्यथा गतकारक इति स्यात्। अत्र च
प्रकृतिवाच्यक्रियाश्रयो ण्वुल् तदाश्रयं गतशब्दस्य क्रियावाचित्वमिति समासनिषेधः। नैतदिति। सुबन्तविशेषणमति-
ङ्ग्रहणम्। न चात्र सुबन्तं क्रियावाचि। प्रकृत्यर्थस्य ह्यत्र गुणीभावः प्रत्ययार्थस्य कर्तुः प्राधान्यम्। तस्य च द्रव्यरूपेण-

कः पुनस्तिङर्थः। क्रिया। क्रियाप्रतिषेधो वा। अथवाव्यक्तमेवेदं पठितव्यमुपपदमक्रियेति। अथ क्रि-
येति किं प्रत्युदाह्रियते। कारको गतः कारको यातः। नैतत् क्रियावाचि। किं तर्हि। द्रव्यवाचि। इदं तर्हि। कार-
कस्य गतिः कारकस्य व्रज्येति। एतदपि द्रव्यवाचि। कथम्। कृदभिहितो भावो द्रव्यवद्भवतीति। एवं त-
र्हि सिद्धे सति यदतिङिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः।

कृताभिधानं प्रधानेन च व्यपदेशो भवतीति द्रव्यवाचीत्युक्तम्। अतएव गतशब्दस्य समासो न प्राप्नोति। तस्यानुपपद-
त्वाद्धातोश्च क्रियावाचित्वात् तदाश्रया प्रत्ययोत्पत्तिरविरुद्धा। धात्वर्थस्य प्रत्ययार्थेन संसृष्टत्वात् यदान्तरेणैकार्थीभा-
वासंभवात् समासस्य तत्प्रसङ्गः। धातोः सुबन्तत्वाभावाच्च कारकस्य गतिरिति। गमनं गतिरिति भावे प्रत्ययविधानात्। क्रियावाचि-
त्वमस्तीति भावः। एतदपीति। धातुरत्र साध्यभूतां क्रियां प्रत्याययति। प्रत्ययस्तु तस्या एव क्रियाया उपसंहृतक्रमरूपं
सत्त्वरूपतामाह प्रत्ययार्थश्च प्रधानमिति यत्सुबन्तं न तत्क्रियावाचि यत्क्रियावाचि न तत्सुबन्तमित्यर्थः। द्रव्यवदिति।
यथा घटादेर्द्रव्यस्य लिङ्गसंख्यासाधनसंबन्धः तथा कृदभिहितस्यापि भावस्येत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनयोरिति। नन्वत्रैव सूत्रे अतिङ्ग्रहणात्सुपो निवृत्तिर्ज्ञाप्यतां पूर्वत्र कथं ज्ञाप्यते। एवं तर्हि योगविभागः क्रियते। तेनातिङि
ति सूत्रद्वयशेषो विज्ञायत इत्यदोषः। अतिङ्ग्रहणेन च समासो योगद्वयविहितो विशेष्यते अतिङन्तः समासो भवतीति। ते
न सुपेत्यस्यैव निवृत्तिर्ज्ञाप्यते सुब्ग्रहणं तु पूर्वस्य पदकार्यार्थमनुवर्तत एव। भाष्येपि समुदायस्य निवृत्तिर्विवक्षिता न तु
केवलस्य सुबित्यस्य। गतिकारकोपपदानामिति। एतत्सूत्रद्वये सुपेत्यस्य निवृत्त्या गतीनामुपपदानां च उत्तरपदात्सुबु
त्पत्तेः प्राक् समाससिद्धिः। कारकाणां तु कर्तृकरणे कृता बहुलमिति समासः क्रियते। तत्र कृद्ग्रहणात्प्राक् सुबुत्पत्तेः समा-
सः तिङन्तेन तृतीयान्तस्य सुपेत्यस्यानुवर्तनात् समासाप्रसङ्गात्। कृदन्तेनैव समाससिद्धेः कृद्ग्रहणं कृदन्तावस्थायामेवानु
त्पन्ने सुपि समासार्थम्। अस्याश्च परिभाषायाः पुंयोगादाख्यायामित्यत्र प्रयोजनानि वक्ष्यन्ते। यदि तर्ह्युत्तरपदात्सुब् नोत्प
द्यते तदा दधिसेचादित्यादौ पदादित्वाभावात् षत्वप्रतिषेधो न प्राप्नोति। पदत्वाभावादुत्तरपदव्यपदेशाच्च न। ततश्च त

अनयोर्योगयोर्निवृत्तं सुप्सुपेति। किमेतस्य ज्ञापने प्रयोजनम्। गतिकारकोपपदानां कृद्भिः सह समासो भ
वतीत्येषा परिभाषा न कर्तव्या भवति। यद्येतज्ज्ञाप्यते केनेदानीं समासो भविष्यति। समर्थेन। यद्येवं धा
तूपसर्गयोरपि समासः प्राप्नोति पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति। नैतदस्ति। पूर्वं धातुः साध
नेन युज्यते पश्चादुपसर्गेण।

न्निबन्धनस्वरो न सिध्यति। नैष दोषः। निरुपपदात्सेचयतेः क्विपि कृते षष्ठीसमासः क्रियत इति षत्वनिषेधो भविष्यति। य
द्वा सुपेत्यस्य निवृत्तौ सत्यां यथेष्टं कार्यसिद्धये क्वचिदुत्पन्ने सुपि समासः क्वचित्प्राक् सुबुत्पत्तेः। एवं कारकसमासोपि ब
हुलग्रहणात् क्वचित्सुबन्तेन भवतीति साहितस्य धनक्रीतेति प्रयोग उपपन्नः। उत्तरपदप्राप्तेः समासावयवविशेषस्य
रूढिरिति तत्राप्यदोषः। यद्येतदिति। प्राप्तेनोत्तरपदस्यानुपादानात्प्रश्नः। समर्थेनेति। सुबित्यस्यानुवृत्तौ सत्यां समासस्य
पदविधित्वात्समर्थपरिभाषोपस्थानात्। यद्येवमिति। ततश्चैकस्वर्यादिप्रसङ्गः शाकलप्रतिषेधप्रसङ्गश्च। पूर्वं धातुरु
पसर्गेणेति। ततस्तयोः सामर्थ्यमस्ति। उपसर्गार्थविशिष्टायाः क्रियायाः साधनयोगात्। पूर्वं धातुः साधनेनेति। ततश्च पू
र्वं साधनाभिधायिप्रत्ययोत्पत्तिः पश्चात्साधनसंसृष्ट एव धातुरुपसर्गेण युज्यते न केवल इति धातूपसर्गयोः समा
सभावः तत्र कृदन्तेन समासो भवत्येव तिङन्तेन त्वतिङिति निषेधान्न भवति। यत्र तु तिङन्तेन समास इष्यते स विषयो दर्शितः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदात्तवतेति। अभिनिर्वृत्तस्येति। अनिष्पन्नस्य विशेषाकाङ्क्षाया अभावाद् अनुभूयते सुखमुपास्यते गुरुरित्यादौ धातुरेव सकर्मिकां क्रियां वक्त्युपसर्गस्तु द्योतक इति नास्ति कश्चिदस्मिन्पक्षे दोषः। षष्ठीसमासादिति। नित्यत्वानित्यत्वाभ्यामनयोर्विरोधसद्भावः। कुम्भकार इति। पञ्चके प्रातिपदिकार्थे प्रातिपदिकेनैव कर्मण उक्तत्वात् तत्रैवोपपदे ऽणा भाव्यम्। अपवादविषयत्वादिति यानुसारात् कृते चाणि कर्तृकर्मणोरिति षष्ठी भवतीत्यस्त्युभयप्रसङ्गः। गतिकारकेति। ततश्चोत्तरपदे विभक्त्युत्पत्त्यनपेक्षणादन्तरङ्गत्वादुपपदसमासो भवतीत्यर्थः। अथवेति। षष्ठीसमासेऽपि दोषाभाव इत्यर्थः। क्वचित्कार्ये दोषदर्शनादाह। अने-

साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि। अभिनिर्वृत्तस्य चार्थस्योपसर्गेण विशेषः शक्यो वक्तुम्। षष्ठीसमासादुपपदसमासो विप्रतिषेधेन। षष्ठीसमासादुपपदसमासो भवति विप्रतिषेधेन। षष्ठीसमासस्यावकाशः राज्ञः पुरुषो राजपुरुषः। उपपदसमासस्यावकाशः स्तम्बेरमः कर्णेजपः। इहोभयं प्राप्नोति। कुम्भकारो नगरकारः। उपपदसमासो भवति विप्रतिषेधेन। न वा षष्ठीसमासाभावादुपपदसमासः। न वार्थो विप्रतिषेधेन। किं कारणम्। षष्ठीसमासस्याभावादुपपदसमासो भविष्यति। गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति समासवचनात्। अथवा विभाषा षष्ठीसमासः। यदा न षष्ठीसमासस्तदोपपदसमासो भविष्यति। अनेनैव यथा स्यात्। तेन माभूदिति। कश्चात्र विशेषः। तेन वा स्यादनेन वा। अयमस्ति विशेषः। उपपदसमासो नित्यसमासः षष्ठीसमासः पुनर्विभाषा। ननु च नित्यं यः समासः स नित्यसमासः यस्य विग्रहो नास्ति। नेत्याह नित्याधिकारे यः समासः स नित्यसमासः। नैवं शक्यम्। अव्ययीभावस्य ह्यनित्यसमासता प्रसज्येत। तस्मान्नित्यः समासो नित्यसमासः यस्य विग्रहो नास्ति॥ उपपद॥

नेति। स्विन्नित्यसमासयोरित्यत्र नित्यसमासग्रहणेनास्य ग्रहणं यथा स्यात् अन्तोदात्तादुत्तरपदादित्यत्रानित्यसमासग्रहणेनास्य ग्रहणं माभूदिति भावः। यस्य विग्रहो नास्तीति। अस्यापि विग्रहाभावः। षष्ठीसमासेन मुक्ते पक्षे उपपदसमाससद्भावात्। नित्याधिकार इति। नित्यशब्दस्य स्वरितत्वप्रतिज्ञानात्तदधिकारसंप्रत्ययः। नैवं शक्यमिति। नित्यशब्दस्य स्वरितत्वं दोषवत्त्वान्न प्रतिज्ञायत इत्यर्थः। तदेवं प्रयोजनाभावाद्विप्रतिषेधो न पठितव्यः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमैवा॥ यदर्थ इति। यन्निवृत्त्यर्थो नियमः स्यादित्यर्थः। स्वप्नायमिति। अधिकरणे शेतेरित्यच्। अतोमिति सोरम्भावः। अनेनानव्ययेनामा समासो मा भूदित्येवमर्थो यं नियमः स्यात्। अन्तरङ्गत्वादिति। अनुत्पन्न एव सौ उपपदसमासेन भाव्यं पश्चात्सुपेति समासविधानकाले अनव्ययस्यामोऽसंभवान्नियमान्तरणवचनस्य चरितार्थत्वाद्विपरीतनियमो न भविष्यतीत्यर्थः। अमैवेति। एवकारस्सामर्थ्यादमेत्यस्यावृत्तिराश्रीयते। ततो येन वा केनामेव केवलो विधीयते न प्रत्ययान्तरसहितस्तेन वा केन यद्विधीयते उपपदं तत्र सप्तमीनिर्देशात्तदमा समस्यते नान्यदित्यर्थः। अग्रेभोजमिति। विभाषाग्रेप्रथमपूर्वेष्विति द्वयोः क्त्वाणमुलोर्विधानादत्र समासो न भवति। अग्रादिष्विति। यतोऽप्राप्तविभाषा ततः प्रत्यययोरुत्पत्तावग्रादीनां निमित्तत्वाद्निमित्तस्योपपदत्वात्समासप्रसङ्गः। प्राप्तविभा-

अमैवाव्ययेन॥ ॥एवकारः किमर्थः॥ नियमार्थः। नैतदस्ति प्रयोजनम्। सिद्धे विधिरारभ्यमाणोऽन्तरेणैवकारं नियमार्थो भविष्यति। इष्टतोऽवधारणार्थस्तर्हि भविष्यति। यथैवं विज्ञायेत। अमैवाव्ययेनेति। मैवं विज्ञायि अमाव्ययेनैवेति। अस्ति चेदानीं कश्चिदनव्ययमम्शब्दो यदर्थो विधिः स्यात्। अस्तीत्याह। स्वप्नायं ब्राह्मणकुलमिति। नैतदस्ति प्रयोजनम्। अन्तरङ्गत्वादत्र समासो भविष्यति। इदं तर्हि प्रयोजनम्। अमैव यत्तुल्यविधानमुपपदं तत्र यथा स्यात्। अमा चान्येन यत्तुल्यविधानं तत्र मा भूदिति। अग्रेभोजम्। अग्रेभुक्त्वा। अग्रादिष्वप्राप्तविधेः समासप्रतिषेधं चोदयिष्यति स न वक्तव्यो भवति। अमै॥ शेषो बहुव्रीहिः॥ ॥शेष इत्युच्यते कः शेषो नाम। येषां पदानामनुक्तः समासः स शेषः। शेषवचनं पदतश्चेन्नाभावात्। शेषवचनं पदतश्चेत्तन्न। किं कारणम्। अभावात्। न हि सन्ति तानि पदानि येषां पदानामनुक्तः समासः। अर्थतस्तर्हि शेषग्रहणम्। येष्वर्थेष्वनुक्तः समासः स शेषः। अर्थतश्चेदविशिष्टम्। अर्थतश्चेदविशिष्टमेतद्भवति। कुतः। पदतः। न हि सन्त्यर्थाः येष्वर्थेष्वनुक्तः समासः। त्रिकतस्तर्हि शेषग्रहणम्। यस्य त्रिकस्यानुक्तः समासः स शेषः। कस्य चानुक्तः। प्रथमायाः॥ ॥इति श्रीभगवत्पतञ्जलिविरचिते महाभाष्ये द्वितीयस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम्॥

षायां त्वग्रादीनां प्रत्ययोत्पत्तावनिमित्तत्वात्तन्निवृत्तावेव हेतुत्वात्तस्यानुपपदत्वमित्यर्थः॥ शेषो॥ पदस्यार्थस्य च सर्वस्योपयुक्तत्वाच्छेषमसंभावयन्नाह। शेष इति। पदतश्चेदिति। पदेन पदत इत्याद्यादित्वात्तसिः। न हीति। सर्वेषां सामान्यविशेषरूपेणोपयुक्तत्वादित्यर्थः। न हि सन्त्यर्था इति। पूर्वोत्तरान्यपदार्थेषु तत्पुरुषाव्ययीभावविधानात्। प्रथमाया इति। द्वितीयादीनां प्रतिपदं समासविधानात्प्रथमायाः शेषत्वं ततश्च प्रथमान्तानां पदानां बहुव्रीहिरित्यर्थात्समानाधिकरणानां भवति कण्ठेकाल इत्यादौ तु सप्तमीविशेषणे इति पूर्वनिपातविधानाज्ज्ञापकाद्भवति॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनेक॥ अनेकग्रहणस्य वार्त्तिककारः प्रयोजनं वक्ष्यतीति भाष्यकारः पदग्रहणस्यान्यग्रहणस्य च प्रयोजनमाचष्टे बहुव-
क्तव्यत्वाच्च पश्चादन्यग्रहणस्य विचारः। पदग्रहणमिति। अन्यार्थ इत्युच्यमाने स्वपदार्थव्यतिरिक्ते अर्थान्तर आश्रीयमा-
णे अन्यपदार्थो लभ्यते वर्त्तिपदानां च क्रियालक्षणे वाक्यार्थे वृत्त्यसंभवात्तन्निवृत्त्यर्थमपि पदग्रहणं नोपयुज्यत इति
प्रश्नः। यथा मे मातेति। कश्चित्केनचित्पृष्टः कीदृशः कुलशीलादिना तव पितेति स आह यथा मे मातेति। एतानि पदानि त
था मे पितेत्यन्यस्य वाक्यस्यार्थं गमयन्तीति समासप्रसङ्गः। अथ वा स्नाहीति कश्चित्केनचिदुक्तः तं प्रत्याह यथा मे माते-
त्यादि यथा शुद्धकुला मे माता तथा पितापीत्यभिजनशुद्धिरपि स्नानं किं बाह्येन स्नानेनेत्यर्थः। ततः सुस्नातं भो इत्येतद्वा
क्यार्थे वर्त्तमानानां यथाप्रभृतीनां पदानां समासाभावार्थं पदग्रहणम्। अश्रुतवाक्यार्थे च पदानां वृत्तिर्दृश्यते यथा न-

अनेकमन्यपदार्थे॥ ॥पदग्रहणं किमर्थम्। इहानेकमन्यार्थ इतीयत्युच्यमाने वाक्यार्थेऽपि बहुव्रीहिः स्या-
द्। यथा मे माता तथा मे पिता सुस्नातं भो इति। पदग्रहणे पुनः क्रियमाणे न दोषो भवति। अथान्यग्रहणं किम-
र्थम्। अनेकं पदार्थ इतीयत्युच्यमाने स्वपदार्थेऽपि बहुव्रीहिः स्याद्राजपुरुषः तक्षपुरुष इति। नैतदस्ति
प्रयोजनम्। तत्पुरुषः स्वपदार्थे बाधको भविष्यति। भवेदेकसंज्ञाधिकारे सिद्धम्। परं कार्यत्वे तु न सिध्य-
ति। आरम्भसामर्थ्यात्तत्पुरुषः परं कार्यत्वाच्च बहुव्रीहिः प्राप्नोति। परं कार्यत्वे च न दोषः। शेष इति वर्त्तते।
अशेषत्वान्न भविष्यति। शेषवचन उक्तम्। किमुक्तम्। तत्र शेषवचनाद्दोषः संख्यासमानाधिकरणनञ्स-
मासेषु बहुव्रीहिप्रतिषेध इति। अथैकसंज्ञाधिकारे नार्थोऽन्यग्रहणेन। एकसंज्ञाधिकारे च कर्त्तव्यम्।

द्यां सिस्नासुः कश्चिदुच्यते नद्यां ग्राहाः सन्तीति तस्माच्च मा स्नासीरिति वाक्यार्थः प्रतीयते। अथान्यग्रहणमिति। अन्तरङ्गत्वात्स्व-
पदार्थे समासे सिद्धे पदार्थग्रहणसामर्थ्यादन्यपदार्थो लप्स्यत इति प्रश्नः। स्वपदार्थेऽपीति। अपिशब्दादन्यपदार्थेऽपीत्यर्थः। पदा-
र्थग्रहणं व्याप्तिसमाश्रयणार्थं स्यादिति स्वपदार्थान्यपदार्थयोः समासः स्यात्। तत्पुरुष इति। बहुव्रीहेस्त्वन्यपदार्थोऽवका-
शः। परं कार्यत्वाच्चेति। ततश्च संज्ञयोः समावेशात्तत्स्वरसमासान्तप्रसङ्गः। शेषवचन इति। शेषग्रहणप्रत्याख्यानं स्मारयति।
संख्येति। द्वीरवतीको वीरपुरुषकोऽब्राह्मणको देश इति समासविधावुपयोगादशेषत्वाद्बहुव्रीहिर्न प्राप्नोतीति तस्माच्छेषग्र-
हणं न कर्त्तव्यं ततः स्वपदार्थे बहुव्रीहिनिवृत्त्यर्थमन्यग्रहणं कर्त्तव्यमिति स्थितम्। ॥

भा·कै॰ अक्रियमाण इति। नीलोत्पलं सर इत्यत्रापि विशेषानुपादानादन्यपदार्थेपि स्वपदार्थ इव तत्पुरुषो बहु- ३२१
३५८ व्रीहिं बाधेत कण्ठेकाल इत्यादिव्यधिकरणपदो बहुव्रीहेरवकाशः स्यात्। अन्यग्रहणे तु सति स्वपदार्थे सावकाशम्। तत्पु
रुषं परत्वाद्बहुव्रीहिर्बाधत इति न कश्चिद्दोषः। अथेति। एकनिवृत्त्यर्थं तावदनेकग्रहणं नोपपद्यते। पदविधित्वात्साम
र्थ्ये सति बहुव्रीहिसंज्ञाविधानादनेकाधिष्ठानत्वाच्च सामर्थ्यस्य। नापि बहूनां समासार्थमनेकग्रहणं तद्धितार्थेत्यनेनोत्त
रपदे परतः समाससंज्ञाविधानाज्ज्ञापकाद्बहूनां बहुव्रीहेः सिद्धत्वादिति प्रश्नः। सर्पिषोपि स्यादिति। अपिशब्दो बिन्द्वर्थे
वर्तत इति तस्यापि बहुव्रीहिसंज्ञाप्रसङ्गस्ततश्च कप्समासान्तप्रसङ्गः पदान्तरेणास्यादित्यनेन चास्य सामर्थ्यमस्तीति

अक्रियमाणे ह्यन्यग्रहणे यथैव तत्पुरुषः स्वपदार्थे बहुव्रीहिं बाधत एवमन्यपदार्थेपि बाधेत। अथा
नेकग्रहणं किमर्थम्। अन्यपदार्थ इतीयत्युच्यमान एकस्यापि पदस्य बहुव्रीहिः स्यात्। सर्पिषोपि स्या
त्। गोमूत्रस्यापि स्यात्। नैतदस्ति प्रयोजनम्। सुप्सुपेति वर्तते। इदं तर्हि प्रयोजनम्। बहूनामपि यथा स्या
त्। सुसूक्ष्मजटकेशेन सुनताजिनवाससा॥ उत्तरार्थं च॥ उत्तरार्थं चानेकग्रहणं कर्तव्यम्। चार्थे द्वन्द्वः
अनेकमिति। इहापि यथा स्यात्। प्लक्षन्यग्रोधधवखदिरपलाशा इति। एतदपि नास्ति प्रयोजन
म्। आचार्यप्रवृत्तिर्ज्ञापयति बहूनामपि समासो भवतीति। यदयमुत्तरपदे द्विगुं शास्ति।

समर्थपरिभाषापि न व्यावृत्तिं करोतीत्येवं केचिद्व्याचक्षते। अन्ये त्वाहुः। अपिः पदार्थेत्यत्राप्यर्थता बिन्द्वादेर्निराकृता तस्मा-
त्स्यादिति पदं बिन्द्वर्थे वर्तत इति तस्य बहुव्रीहिसंज्ञाप्रसङ्गः। अतिङ्ग्रहणेन च पूर्वमेव सुप्सुपेत्यस्याविच्छिन्नत्वादेक
स्यापि तिङन्तस्य प्राप्तिः स्यात्। नैतदिति। योगद्वय एवातिङ्ग्रहणेन सुप्सुपेत्यस्यासंबन्धो ज्ञापितोऽन्यत्र सुप्सुपेत्यनुवर्तत
एवेत्यर्थः। बहूनामपीति। अन्यथा सुप्सुपेति गुणे संख्याया अविवक्षितत्वाद्द्वयोरेव स्यात्। उत्तरपद इति। द्विगुग्रहणं तद्धिता- सम:
र्थेत्यनेन विहितस्य समासस्योपलक्षणं तेन दिक्समानाधिकरणेनोत्तरपदे समासावयवविशेषे परतः समासविधानं बहूनां ३५८
समासस्य ज्ञापकमित्यर्थः। द्विगुस्तु द्व्यह्नजातादेः सावकाशत्वान्न ज्ञापकः।

CC-0. In Public Domain. Digitization by eGangotri

तत्पुरुषोपीति। ज्ञापकफलस्य विषयविभागाभावादनिष्टप्रसङ्गो महत्कष्टं श्रितद्वत्यत्रापि तत्पुरुषप्रसङ्गात्। ग्रहणेनेति। विशिष्टपूर्वोत्तरपदनिर्देशेनेत्यर्थः। तत्र द्वितीयान्तस्य श्रितादिभिः समासविधानात्तस्य यग्रहणपरिभाषोपस्थानात् समुदायस्याद्वितीयान्तत्वादत्र तत्पुरुषाभावः। यद्येवमिहापि सुप्सुपेत्यनुवर्तनात्कथं बहूनां बहुव्रीहिरथ ज्ञापकेन संख्याविवक्षा बाध्यते-त दा द्वितीयादिष्वपि संख्याया अविवक्षा स्यात्। नैष दोषः। तत्पुरुषविधौ सुप्सुपेति संख्या प्रतीयते द्वितीयेत्यपि। द्वन्द्वबहुव्रीह्योस्तु सुप्सुपेत्यत्रैव संख्याप्रतीतिस्तत्र ज्ञापकेनैकैव संख्याप्रतीतिर्बाध्यते तावता च रितार्थत्वाद् द्वितीयादिषु संख्याया अबाधः। चित्रगुरिति। सत्यनेकग्रहणे सुबित्येव चानुवर्तेत न तु सुपेति। तन्निवृत्त्यर्थत्वात्तस्य। ततश्चोत्तरपदमपि तेन प्र

तत्पुरुषोपि तर्हि बहूनां प्राप्नोति। नैष दोषः। ग्रहणेन तत्पुरुष उच्यते तेन बहूनां न भविष्यति। अत उत्तरं पठति। अनेकवचनमुपसर्जनार्थम्। अनेकग्रहणं क्रियते। उपसर्जनार्थम्। प्रथमानिर्दिष्टं समास उपसर्जनमित्युपसर्जनसंज्ञा यथा स्यात्। चित्रगुः शबलगुरिति। नवैकविभक्तित्वात्। नवा एतदपि प्रयोजनमस्ति। किं कारणम्। एकविभक्तित्वात्। एकविभक्ति चापूर्वनिपातद्वत्युपसर्जनसंज्ञा भविष्यति चित्रगुः शबलगुरिति। चित्रा यस्य गावश्चित्रगुस्तिष्ठति। चित्रा यस्य गावश्चित्रगुं पश्य। चित्रा यस्य गावश्चित्रगुणा कृतम्। चित्रा यस्य गावश्चित्रगवे देहि। चित्रा यस्य गावश्चित्रगोरानय। चित्रा यस्य गावश्चित्रगोः स्वम्। चित्रा यस्य गावश्चित्रगौ निधेहि। चित्रा यस्य गावो हे चित्रगो इति। यदि तर्हि कुतश्चिदेव किंचित्पदमध्याहृत्य एकविभक्तियोगः क्रियते। एतदप्येकविभक्तियुक्तम्। इहापि प्राप्नोति। राजकुमारी। तत्रकुमारी। राज्ञो या कुमारी राजकुमारी तिष्ठति। राज्ञो या कुमारी राजकुमारीं पश्य। राज्ञो या कुमारी राजकुमार्या कृतम्। राज्ञो या कुमारी राजकुमार्यै देहि।

त्याद्यतद्वृत्तिसमासप्राग्भेगोशब्दस्य प्रथमानिर्दिष्टत्वादुपसर्जनत्वाद्ध्रस्वसिद्धिः। नवेति। अन्यपदार्थस्य प्राधान्याद्दर्शनाद्यनेकक्रियायोगादनेकविभक्तित्वेपि वर्तिपदानामेकविभक्तित्वादित्यर्थः। यदि तर्हीति। अयं भावः। चित्रा गावोऽस्येत्यस्मिन्विग्रहवाक्येन कस्यचिदनेकविभक्तित्वं यदपेक्षया वर्तिपदानामेकविभक्तित्वं स्यात्। अथ यथा कथंचिद् अन्यस्यानेकविभक्तित्वमाश्रित्य वर्तिपदस्यैकविभक्तित्वं व्यवस्थाप्यते तदातिप्रसङ्गो राज्ञो या कुमारी तां पश्य तया कृतं तस्यै वदेहीत्याश्रयेण कुमारीशब्दस्यैकविभक्तित्वादुपसर्जनह्रस्वत्वं स्यात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकविभक्तियुक्तमेवेति। अयंभावः। नायंनियमः प्रथमान्तस्यैव कुमारीशब्दस्य षष्ठीसमासेन भाव्यं किंतर्हि द्वितीयाद्यन्तस्यापि ततश्च समासे विधीयमाने एकविभक्तित्वाभावात् कुमारीशब्दस्योपसर्जनत्वाभावः। एकग्रहणसामर्थ्यादिति। एकैकस्मिन्प्रयोगे सर्वस्यैव एकविभक्तित्वादेकविभक्तिग्रहणंपर्यायेणानेकविभक्तेर्निरासार्थमित्यर्थः। विभक्तियुक्तमिति। एतदपि-किमर्थमुच्यत इति चेत्संज्ञिनिर्देशार्थम्। अन्यथा अपूर्वनिपात इत्येतावदुच्यमाने संज्ञ्यनिर्दिष्टः स्यात्। पदार्थाभिधान इति। देवदत्तपदस्य यावानर्थस्तावान् बहुव्रीहिणावक्तव्योऽन्यपदार्थे तस्य विधानात् ततो गतार्थत्वादनुप्रयोगो न प्राप्नोतीत्यर्थः।

राज्ञो या कुमारी राजकुमार्या आनय। राज्ञो या कुमारी राजकुमार्याः स्वम्। राज्ञो या कुमारी राजकुमार्यां निधेहि। राज्ञो या कुमारी हे राजकुमारि इति। एकविभक्तियुक्तमेव यन्नित्यम्। न चैतन्नित्यमेकविभक्तियुक्तमेव राज्ञः कुमारीं पश्य राजकुमारीं पश्येत्यपि भवति। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। एकग्रहणसामर्थ्यात्। यदि हि यदेकविभक्तियुक्तं चानेकविभक्तियुक्तं च तत्र स्यादेकग्रहणमनर्थकं स्यात्। विभक्तियुक्तमपूर्वनिपात इत्येव ब्रूयात्। पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरभिहितत्वात्। पदार्थाभिधाने प्रयोगस्यानुपपत्तिः। चित्रगुर्देवदत्त इति। किं कारणम्। अभिहितत्वात्। चित्रगुशब्देनाभिहितः सोऽर्थ इति कृत्वानुप्रयोगो न प्राप्नोति। न वानभिहितत्वात्। न वा एष दोषः। किं कारणम्। अनभिहितत्वात्। चित्रगुशब्देनानभिहितः सोऽर्थ इति कृत्वानुप्रयोगो भविष्यति। कथमनभिहितः। यदिदानीमेवोक्तं पदार्थाभिधाने तु प्रयोगानुपपत्तिरभिहितत्वादिति। सामान्याभिधाने हि विशेषानभिधानम्। सामान्ये ह्यभिधीयमाने विशेषोऽनभिहितो भवति। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः। चित्रगुः कः। देवदत्त इति। भवेत्सिद्धं यदा सामान्ये वृत्तिः। यदा तु खलु विशेषे वृत्तिः तदा न सिध्यति। चित्रा गावो देवदत्तस्येति चित्रगुर्देवदत्त इति। तदापि सिद्धम्। कथम्।

यथा चार्थे द्वन्द्वविधानाद्द्वन्द्वे चशब्दस्य प्रयोगो न भवति। एवमिहापि देवदत्तादिपदानां न स्यात्। सामान्याभिधाने हीति। चित्रगुशब्देन तद्रूमात्रमुच्यते न तु विशेषः। यदा सामान्य इति। चित्रा गावोऽस्येत्येवं विग्रहे कृतेऽन्यपदार्थसामान्यस्य बहुव्रीहिणाभिधानाद्विशेषस्यानुप्रयोगो भवतु यदा विशिष्टेऽन्यपदार्थे बहुव्रीहिः क्रियते तदानुप्रयोगासिद्धिः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेदमुभयमिति। लौकिके प्रयोगे वृत्तिवाक्ययोर्युगपत्प्रयोगाभावः। एकेनैवार्थस्य प्रत्यायितत्वादितरप्रयोगायोगात्। यदास्मा
स्त्विति। पूर्वत्र शक्तिस्वाभाव्यादन्यपदार्थसामान्यमेवाभिधातुं समर्थः समासो न विशेषमिति प्रक्रियायामपि सामान्येन विग्रहः
कार्य इत्यर्थः। सामान्यस्यैव तर्हीति। सामान्यस्य समासेनैवाभिधानात्। सामान्यमपीति। यथा विशेषो विशेषान्तरस्य निवर्तक-
स्तद्वत्सामान्यमपि विशेषाणां निवर्तकं सद्विशेष एवेत्यर्थः। चित्रग्विति। लिङ्गसर्वनाम्ना नपुंसकेन निर्देशः सामान्यवृत्तिता-
मेव प्रकाशयितुं कृतः। सर्वं वा विम्बं वेत्यत्राकारप्रश्लेषः कृतोऽन्यथा पर्यायप्रसङ्गः स्यात्। तत्रावश्यमिति। चित्रगुसर्वमि
त्युक्तेन ह्येकमेवेति विशेषावगतिर्भवतीत्यर्थः। अथवेति। कृत्स्नपदार्थाभिधानेऽनुप्रयोगासिद्धिस्त्वोदितापरिहृता च। य

नेदमुभयं युगपत्संभवति वाक्यं समासश्च। यदा वाक्यं न तदा समासः। यदा समासो न तदा वाक्यम्। यदा
समासः सामान्येन तदा वृत्तिः तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः। चित्रगुः कः देवदत्त इति। सामान्य
स्यैव तर्ह्यनुप्रयोगो न प्राप्नोति। चित्रगुः कः। चित्रगुतच्चित्रगु किंचिच्चित्रगुसर्वमिति। सामान्यमपि यथा विशे
षस्तद्वत्। तत्र चित्रग्वित्युक्ते संदेहः स्यात् सर्वं वाऽविम्बं वेति। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्त-
व्यः चित्रगु तदिति। अथवा विभक्त्यर्थोऽभिधीयते। एतच्चात्र युक्तं यद्विभक्त्यर्थोऽभिधीयते तत्र हि सर्वे पश्चा
त्पदं वर्तते अस्येति। विभक्त्यर्थाभिधानेऽद्रव्यस्य लिङ्गसंख्योपचारानुपपत्तिः। विभक्त्यर्थाभिधानेऽद्रव्य
स्य लिङ्गसंख्याभ्यामुपचारोऽनुपपन्नः। बहुयवं बहुयवा। बहुयवः। बहुयवौ बहुयवा इति। अपर आह
। विभक्त्यर्थाभिधाने द्रव्यस्य लिङ्गसंख्योपचारानुपपत्तिः। विभक्त्यर्थाभिधाने द्रव्यस्य ये लिङ्गसंख्ये ता
भ्यां विभक्त्यर्थस्योपचारोऽनुपपन्नः। बहुयवं बहुयवा। बहुयवः बहुयवौ। बहुयवा इति। कथं ह्यन्यस्य लि
ङ्गसंख्याभ्यामन्यस्योपचारः स्यात्

दा तु विभक्त्यर्थः संबन्धादिरभिधीयते समासेन तदा तद्वाचिनी विभक्तिर्मानुप्रयोजि द्रव्यं त्वनभिहितमिति तद्वाची शब्दो
ऽवश्यानुप्रयोक्तव्यः। कथं पुनरन्यपदार्थ इत्युच्यमाने विभक्त्यर्थ एव गृह्यत इत्याह। तत्र हीति पदेन प्रकृत्यर्थोपस-
र्जनः प्रत्ययार्थोऽभिधीयत इति विभक्त्यर्थस्यैव प्राधान्यादन्यपदार्थग्रहणेन ग्रहणमित्यर्थः। सर्वपश्चादिति। भाष्यका
रवचनप्रामाण्यादव्यये नापि षष्ठीसमासः। अद्रव्यस्येति। असत्त्वभूतस्य विभक्त्यर्थस्य लिङ्गसंख्याभ्यां व्यवहारो नोप
पद्यत इत्यर्थः। अपर इति। अकारप्रश्लेषोऽत्र व्याख्यानेनास्ति।

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ आश्रयत इति। यदा यदावधिकमन्वाख्यानं तदा शुक्लो गुणोस्येति मतुब्लुका सामान्यमात्रे पदं संक्रियत इत्येकत्वनपुंसक
३६० त्वाश्रयेण पदप्रयोगे प्राप्ते विशेषणानां चाजातेरिति सूत्रेण गुणवचनानामाश्रयतो लिङ्गवचनानि प्रतिपादितानि। वाक्य
संस्कारे तु न्यायसिद्धानि आश्रयविशेषाश्रयेणैव पदसंस्कारात्तत्र यद्यपि चित्रगुशब्देन संबन्धोभिधीयते तथाप्यभेदोपचा
रात् संबन्ध्यभिधीयते। तत्र द्विष्ठत्वेपि संबन्धस्य प्रधानत्वात्स्वामिन एवाश्रयत्वं व्यवस्थाप्यत इति तद्गते लिङ्गसंख्ये भ
वतः न तु गवाश्रये। यदि तर्हीति। यथा शुक्लशब्देन कदाचिद्गुण उच्यते कदाचिद्गुणी तथा चित्रगुशब्देन केवलस्यापि सं

सिद्धं तु यथा गुणवचनेषु। सिद्धमेतत्। कथम्। यथा गुणवचनेषु। कथं गुणवचनेषु। गुणवचनेषूक्तम्। गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीति। तद्यथा। शुक्लं वस्त्रं शुक्ला शाटी शुक्लः कम्बलः। शुक्लौ कम्बलौ। शुक्लाः कम्बला इति। यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद्गुणस्यापि भवति। एवमिहापि यदसौ द्रव्यं श्रितो भवति विभक्त्यर्थः तस्य यल्लिङ्गं वचनं च तत्समासस्यापि भविष्यति। यदि तर्हि विभक्त्यर्थोभिधीयते कृत्स्नः पदार्थः कथमभिहितो भवति सद्रव्यः। सलिङ्गः ससंख्यश्च। अर्थग्रहणसामर्थ्यात्। इहानेकमन्यपदे इतीयता सिद्धम्। कथं पुनः पदे नाम वृत्तिः स्यात्। पदं नाम शब्दः शब्दो ह्येषः। शब्दे ह्यसंभवादर्थे कार्यं विज्ञास्यते। सोयमेवं सिद्धे सति यदर्थग्रहणं करोति तस्यैतत्प्रयोजनं कृत्स्नः पदार्थो यथाभिधीयेत सद्रव्यः सलिङ्गः ससंख्यश्चेति। यदि तर्हि कृत्स्नः पदार्थोभिधीयते। लैङ्गाः सांख्याश्च विधयो न सिध्यन्ति। उक्तं वा। किमुक्तम्। लैङ्गेषु तावदुक्तम्। सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात्स्वार्थे टाबादय इति।

बन्धस्याभिधानं प्राप्नोति संबन्धिन एव तु सर्वैर्दृश्यते तन्न सिध्यतीत्यर्थः। कृत्स्न इत्युक्तं तदेव कार्त्स्न्यं प्रतिपाद्यते। सद्रव्य
इति द्रव्यशब्देन सत्त्वरूपोर्थ उच्यते। अर्थग्रहणसामर्थ्यादिति। यदि विभक्त्यर्थस्यैव प्रधानस्य ग्रहणमभिमतं स्या
त् तदार्थग्रहणं न कुर्यात् अन्तरेणाप्यर्थग्रहणमर्थस्यैव लाभादित्यर्थः। यदि तर्हीति। यथा बहुव्रीहिणा विभक्त्यर्थ- उ॰
स्याभिधानात् षष्ठ्यादयो न भवन्ति एवं लिङ्गसंख्ययोरप्यभिधानात्तयोर्वाचकाः प्रत्यया न प्राप्नुवन्ति। सिद्धं त्विति। स्त्रियं ३६०
यत्प्रातिपदिकं वर्तते तस्मात् टाबादयो भवन्तीत्यर्थः। ततश्च समासेनाभिहितेपि स्त्रीत्वे द्योतकाष्टाबादयो भवन्तीति दोषाभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मादीनामिति।चित्रगुरितिसमासेनप्रातिपदिकार्थमात्रस्यकर्मादिशक्तिरहितस्यैकत्वादयउक्ताः ततः कर्मादिगतैकत्वप्रतिपादनायवचनानिभवन्तिचित्रगुंपश्यचित्रगुणाकृतमिति।प्रथमेति।समासेनसंख्यायाअभिधानात्।समयादिति।परश्चेतिनियमार्थमारब्धंनकेवलाप्रकृतिःप्रयोक्तव्यानकेवलःप्रत्ययइति।ननियोगतइति।नियमेनप्रतिनियतैवयदिनभवतिविभक्तिःततःसमयपरिपालनायद्वितीयादयोपिप्राप्नुवन्तिनियमकारणाभावादित्यर्थः।कर्मादीनामभावादिति।कर्मण्येवद्वितीयेत्येवंकर्मादिषुद्वितीयादीनांनियतत्वात्तदभावेतासामभावः।षष्ठीतर्हीति।कर्मादीनामभावःशेषःसचात्रास्तीतिभावः।अशेषत्वादिति।प्रातिपदिकार्थमात्रस्यप्रथमाविधावुपयोगान्नास्तिशे

संख्येयमप्युक्तम्।किमुक्तम्।कर्मादीनामनुक्ताएकत्वादयइतिकृत्वासंख्याभविष्यन्ति।प्रथमातर्हिनप्राप्नोति।समयाद्भविष्यति।यदिसामयिकीननियोगतः।अन्याःकस्मान्नभवन्ति।कर्मादीनामभावात्।षष्ठीतर्हिप्राप्नोति।शेषलक्षणाषष्ठीअशेषत्वान्नभविष्यति।एवमपिव्यतिकरःप्राप्नोति।एकस्मिन्नपिद्विवचनबहुवचनेप्राप्नुतः।द्वयोरप्येकवचनबहुवचनेबहुष्वप्येकवचनद्विवचने।अर्थतोव्यवस्थाभविष्यति।अथवासंख्यानामेयंपरप्रधानासंख्येयमनयाविशेष्यम्।यदिचात्रप्रथमानस्यात्संख्येयमविशेषितंस्यात्।अथवावक्ष्यत्येतद्वचनग्रहणस्यप्रयोजनम्।उक्तेष्वप्येकत्वादिषुप्रथमायथास्यात्।एवमपिषष्ठीप्राप्नोति।किंकारणम्।व्यभिचरत्येवह्ययंसमासोलिङ्गसंख्येषष्ठ्यर्थंपुनर्नव्यभिचरति।अभिहितःसोर्थोन्तर्भूतःप्रातिपदिकार्थःसंपन्नस्तत्रप्रातिपदिकार्थेप्रथमेतिप्रथमाभविष्यति।

षत्वमित्यर्थः॥एवमपीति।समयात्प्रथमायामिष्यमाणायांवचनस्यव्यतिकरप्रसङ्गः।अर्थतइति।यथान्यत्रैकत्वादिष्वेकवचनादीनिदृष्टानितथैवात्रापिभवन्त्येवंहिसमयश्चपरिपालितो भवत्यर्थश्चानुसृतः।अथवेति।असंकरंप्रथमाविधानंप्रकारान्तरेणप्रतिपादयति।यदाचित्रगुरित्येकत्वविशिष्टःप्रातिपदिकार्थःप्रतिपिपादयिषितःतदाविभक्त्याविनासोनशक्यतेप्रत्याययितुमितिप्रथमैकवचनंविधेयम्।एवंद्वित्वबहुत्वयोर्द्विवचनबहुवचनविधिः।परप्रधानेति।संख्येयप्रधानेत्यर्थः।एवमपीति।षष्ठ्यर्थस्यान्नभावात्।व्यभिचरतीति।लिङ्गान्तरसंख्यान्तरयोगेन्यलिङ्गसंख्यापरित्यागात्।अभिहितइति।संबन्धस्यप्रातिपदिकार्थरूपत्वात्षष्ठ्यर्थतानास्तीत्यर्थः।॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्व एवात्र संबन्धोऽन्तर्भूतत्वात्प्रातिपदिकार्थतां गत इति मत्वाऽऽह गच्छतीति। न तर्हीति। भवति बाह्यमिति। गोभिरन्यपदार्थस्य यः संबन्धः स एव समासेऽन्तर्भूतो न तु सर्वः। बहुव्रीहिरिति। भाष्यकारेणात्रिकतःशेषो गृह्यत इत्ययमर्थः साधितो वार्तिककारेण तु वचनेन प्रतिपाद्यते। उच्चैर्मुख इति। उच्चैःशब्दस्याधिकरणप्रधानत्वाद्वैयधिकरण्यमिति व

न तर्हीदानीमिदं भवति चित्रगोर्देवदत्तस्येति। भवति बाह्यमर्थमपेक्ष्य षष्ठी। परिगणनं कर्तव्यम्। बहुव्रीहिः समानाधिकरणानाम्। समानाधिकरणानां बहुव्रीहिर्वक्तव्यः। किं प्रयोजनम्। व्यधिकरणानां मा भूदिति। पञ्चभिर्भुक्तमस्येति॥ अव्ययानां च॥ अव्ययानां च बहुव्रीहिर्वक्तव्यः। उच्चैर्मुखमस्येति उच्चैर्मुखः। नीचैर्मुखः। सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च। सप्तमीपूर्वस्योपमानपूर्वस्य च बहुव्रीहिर्वक्तव्यः। उत्तरपदस्य च लोपो वक्तव्यः। कण्ठेस्थः कालोऽस्य कण्ठेकालः। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। खरमुखः॥ समुदायविकारषष्ठ्याश्च॥ समुदायविकारषष्ठ्याश्च बहुव्रीहिर्वक्तव्यः। उत्तरपदस्य च लोपो वक्तव्यः। केशसमाहारश्चूडाऽस्य केशचूडः। सुवर्णविकारोऽलंकारोऽस्य सुवर्णालंकारः। प्रादिभ्यो धातुजस्य वा। प्रादिभ्यो धातुजस्य बहुव्रीहिर्वक्तव्यः उत्तरपदस्य च वा लोपो वक्तव्यः। प्रपतितपर्णः प्रपर्णः। प्रपतितपलाशः। प्रपलाशः। नञोऽस्त्यर्थानां च। नञोऽस्त्यर्थानां बहुव्रीहिर्वक्तव्यः उत्तरपदस्य च वा लोपो वक्तव्यः। अविद्यमानः पुत्रोऽस्य-अविद्यमानपुत्रः अपुत्रः। अविद्यमानभार्यः अभार्यः। तत्तर्हीदं बहु वक्तव्यम्। न वाऽनभिधानादसमानाधिकरणेषु समाससंज्ञाभावः। न वा वक्तव्यम्। असमानाधिकरणानां बहुव्रीहिः कस्मान्न भवति। पञ्चभिर्भुक्तमस्येति। अनभिधानात्। तच्चावश्यमनभिधानमाश्रयितव्यम्। क्रियमाणेऽपि परिगणने यत्राभिधानं न भवति तत्र न बहुव्रीहिः। यथा पञ्च भुक्तवन्तोऽस्येति।

चनम्। कण्ठेस्थ इति। सुपि स्थ इति कः। अमूर्द्धमस्तकादित्यलुक्। समासेऽत्र सिद्धे वचनमुत्तरपदलोपार्थम्। उष्ट्रमुखमिवेति। अवयवधर्मेण समुदायस्य व्यपदेशाद् उष्ट्रस्योपमानतेति। उपमानपूर्व उष्ट्रमुखशब्दः उपमानोपमेययोर्हि त्वात्पदयोर्वैयधिकरण्यमत्रेति वचनमुत्तरपदलोपार्थं च। समुदायविकारषष्ठ्या इति। समुदायावयवसंबन्धे प्रकृतिविकारसंबन्धे च या षष्ठी तदन्ताद्यत्परं तदन्तस्य शब्दान्तरेण सह बहुव्रीहिरित्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथैतस्मिन्निति। अनभिधानमभ्युपगम्यापि यदि मन्दबुद्धिव्युत्पादनाय परिगणनं क्रियते तदार्थपरिगणनमपि कर्तव्यम्। वर्तनं
वर्तः समासः स विद्यते यस्मिन्नर्थे स वर्ती। मत्वर्थग्रहणमिति। षष्ठ्यर्थः सप्तम्यर्थश्च मत्वर्थः। संख्ययेति। संख्येयस्य वार्थस्य चान्य-
पदार्थत्वात् सिद्धे समासे उत्तरसूत्रमनर्थकं स्यात्। यदा त्वनेन मत्वर्थे समासस्तदा सार्थकमित्यर्थः। व्याख्यानान्तरमाह।
अपर इति। कर्मवचनेनाप्रथमाया इति। प्रथमार्थं वर्जयित्वा सर्वत्रान्यपदार्थे कर्मवाचिना समासो भवतीत्यर्थः। इदं च वा

अथैतस्मिन्सत्यनभिधाने यदि वृत्तिपरिगणनं क्रियेत तर्हि वर्तिपरिगणनमपि कर्तव्यम्। तत्कथं कर्तव्यम्।
अर्थनियमे मत्वर्थग्रहणम्॥ अर्थनियमे मत्वर्थग्रहणं कर्तव्यम्। मत्वर्थे यः स बहुव्रीहिरिति वक्तव्यम्। इह
मा भूत्। कष्टं श्रितमनेनेति। तथा चोत्तरस्य वचनार्थः। एवं च कृत्वोत्तरस्य योगस्य वचनार्थ उपपन्नो भवति। के
चित्तावदाहुः य— इति सूत्रइति संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येय इति। अपर आहुः। यद्वा
र्तिक इति। कर्मवचनेनाप्रथमायाः। कर्मवचनेनाप्रथमाया बहुव्रीहिर्वक्तव्यः। ऊढो रथो येन ऊढरथोऽन
ड्वान्। उपहृतः पशू रुद्राय उपहृतपशू रुद्रः। उद्धृत ओदनः स्थाल्या उद्धृतौदना स्थाली। यदि कर्मवचनेने
त्युच्यते। अथ कर्तृवचनेन कथम्। प्राप्तमुदकं ग्रामं प्राप्तोदको ग्रामः। आगता अतिथयो ग्रामम्। आगताति
थिर्ग्रामः। कर्तृवचनेनापि। कर्तृवचनेनापीति वक्तव्यम्। अप्रथमाया इति किमर्थम्। वृष्टे देवे गतः। अथाप्र
थमाया इत्युच्यमाने इह कस्मान्न भवति। वृष्टे देवे गतं पश्येति। बहिरङ्गा अत्राप्रथमा। सुबधिकारेऽस्ति-
क्षीरादिवचनम्॥ सुबधिकारेऽस्तिक्षीरेत्युपसंख्यानं कर्तव्यम्। अस्तिक्षीरा ब्राह्मणी। तत्तर्हि वक्तव्यम्। न वा
व्ययत्वात्। न वा कर्तव्यम्। किं कारणम्। अव्ययत्वात्। अव्ययमेषोस्तिशब्दः। नैषोस्तेर्लट्। कथमव्ययत्व
म्। उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाता भवन्तीति निपातसंज्ञा निपातोऽव्ययमित्यव्ययसंज्ञा। अथ
किं सब्रह्मचारीति। कोऽयं समासः। बहुव्रीहिरित्याह। कोऽस्य विग्रहः। केऽस्य ब्रह्मचारिणोऽस्येति।

र्त्तिकमेवमुपपद्यते। यदि मत्वर्थे बहुव्रीहिर्भवति। अन्यथैतदवक्तव्यं स्यात्। आद्यमेव तु युक्तं व्याख्यानं न हि वार्तिककारः स्व
वचनमेव ज्ञापकत्वेनोपन्यस्यति। ऊढरथ इति। रथशब्दः कर्मवचनऊढशब्देन सामानाधिकरण्यात्। बहिरङ्गेति। वर्तिपदा
र्थनिमित्तान्तरङ्गा बाह्यपदार्थापेक्षा तु बहिरङ्गेति न गृह्यते असिद्धत्वादित्यर्थः। उपसर्गविभक्तीति। स्वरादिष्वस्तिशब्दपाठमनपे
क्ष्यैतदुक्तम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ प्रतिवचनमिति। वर्तिपदार्थो बहुत्वसंख्यायुक्ताः पृष्टास्तत्रश्चैकत्वसंख्यायुक्ते नान्यपदार्थे विशेषणे न प्रतिवचनं नो २२२
३६२ पपद्यत इत्यर्थः। इष्टसमासस्थापनाय दिगन्तराणि निराकर्तुमुपन्यस्यति। एवं तर्हीति। प्रतिवचनमिति। कठानामिति प्र
तिवचनेन भाव्यं न तु कठ इत्यनेनेत्यर्थः। स्वरेति। अन्तोदात्तः स्यादाद्युदात्तश्चेष्यत इत्यर्थः। कः सब्रह्मचारीति। सुप्सु
पेति समासं मन्यते। विशेषणविशेष्यभावाभावात्तु विशेषणसमासो नास्ति। कः सब्रह्मचारी तवेति। एकस्मिन्पृष्टे एकव
चनेन प्रतिवचनमुपपद्यते। अत्रापि पक्षे कठ इति प्रतिवचनं व्यधिकरणं प्राप्नोति। अहं कठ इति सामानाधिकरण्यं ह्य

यद्येवं कठ इति प्रतिवचनं नोपपद्यते। न ह्यन्यत्पृष्टेनान्यदाख्येयम्। एवं तर्हि एवं विग्रहः करिष्यते के
षां सब्रह्मचारी किं सब्रह्मचारीति। प्रतिवचनं चैवं नोपपद्यते। स्वरे च दोषो भवति। किं सब्रह्मचारीत्येवं स्वरः प्र
सज्येत। किं सब्रह्मचारीति चेष्यते। एवं तर्ह्येवं विग्रहः करिष्यते कः सब्रह्मचारी किं सब्रह्मचारीति। भवेत्प्रति
वचनमुपपन्नं स्वरे तु दोषो भवति। एवं तर्ह्येवं विग्रहः करिष्यते कः सब्रह्मचारी तव किं सब्रह्मचारी त्वमिति। अ
थवा पुनरस्त्वयमेव विग्रहः के सब्रह्मचारिणोऽस्येति। ननु चोक्तं कठ इति प्रतिवचनं नोपपद्यत इति। नैष दोषः।
अङ्गीकरवाणिन्यायेन भविष्यति। तद्यथा। कश्चित्कंचिदाह। अङ्गीकरवाणीति। स आह कुर्विति। कर्तर्यनु
ज्ञाते कर्माप्यनुज्ञातं भवति। अपर आह। अङ्गीकरिष्य इति। क्रियतामिति कर्मण्यनुज्ञाते कर्ताप्यनुज्ञातो भ
वति। यथैव खल्वपि के सब्रह्मचारिणोऽस्येति कठा इत्युक्ते संबन्धादेतद्गम्यते नूनमयमपि कठ इति। एवं
कठ इत्युक्ते संबन्धादेतद्गन्तव्यं नूनं तेऽपि कठा इति। न खल्वपि ते समासेन शक्याः प्रतिनिर्देष्टुम्। उपस
र्जनं हि ते भवन्ति।

ष्यत इति विशेषाभावं मत्वाह। अथ देति। अङ्गीकरवाणिन्यायेनेति। अङ्गीकरवाणीति यद्वाक्यं तदनुकरणमेतत्। कर्मापी
ति। सकर्मकत्वात्करोतिक्रियायाः। एवं कठ इति। न हि तेषां कठत्वेन विना तस्य कठत्वोपपत्तिः। तथा हि। समाने ब्रह्मणि व्र
तचारी सब्रह्मचारी कथ्यते। तत्र च तस्यैकचरणाध्ययनापेक्षं सब्रह्मचारित्वम्। न खल्वपीति। वर्तिपदार्थानामुपसर्जन रामः
त्वात्तदुपलक्षितस्यान्यपदार्थस्य प्राधान्यात्। किं सब्रह्मचारिशब्देन समासेन तेषामभिधानाभावात्कठा इति बहुवचना ३६२
न्तं प्रतिवचनं न कदाचिद्भवतीत्यर्थः। यदा तु के सब्रह्मचारिणोऽस्येति वाक्येन प्रश्नः क्रियते न तु समासेन तदा कठा इत्येव-
प्रतिवचनम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कः समासार्थ इति। वर्तिपदार्थव्यतिरिक्तेनान्यपदार्थेन भाव्यम्। इह च बहुत्वान्यथानुपपत्त्याक्रियायां च वर्तिपदार्थस्याप्य-
न्तर्भावादन्यपदार्थो नोपपद्यते। किं हितयोरितित्वतीयस्य हि तदर्धमिति द्वाभ्यां तस्यावयवावयविभावलक्षणः संबन्धो ना-
स्ति स्वस्वामिसंबन्धे चात्रानभिधानाद्बहुव्रीहिर्न भवति। समासस्यानुपपत्तिचोदनाद्मूलाभावाद् द्विवचनप्रसङ्गेन चोदि
तः। अवयवेनेति। अर्धस्य द्वयोरन्वयः समुदायः स समासार्थः। समुदायावयवानां च कदाचिद्भेदविवक्षा कदाचिदभेदविवक्षाय
था ब्राह्मणानां संघः संघीभवन्ति ब्राह्मणा इति। असिद्वितीय इति। द्वयोः पूरणः द्वितीयः स च ह्यात्मकस्य समुदायस्यावयवो भव

अर्धार्धतृतीया इति कोयं समासः। बहुव्रीहिरित्याह। कोस्य विग्रहः। अर्धं तृतीयमेषामिति। कः समासार्थः। स
मासार्थो नोपपद्यते। अन्यपदार्थो हि नाम संभवति येषां पदानां समासस्ततोन्यस्य पदस्यार्थोन्यपदार्थः। एवं त
र्ह्येवं विग्रहः करिष्यते। अर्धं तृतीयमनयोरिति। एवमपि कः षष्ठ्यर्थः। षष्ठ्यर्थो नोपपद्यते। किं हि तयोरर्धं
भवति। अस्तु तर्ह्ययमेव विग्रहः। अर्धं तृतीयमेषामिति। ननु चोक्तं समासार्थो नोपपद्यत इति। नैष दोषः। अ
वयवेन विग्रहः समुदायः समासार्थः। यद्यवयवेन विग्रहः समुदायः समासार्थः। असिद्वितीयोनुससार पा
ण्डवं संकर्षण द्वितीयस्य बलं कृष्णस्य वर्धतामिति द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। अस्तु तर्ह्ययमेव विग्र
हः अर्धं तृतीयमनयोरिति। ननु चोक्तं षष्ठ्यर्थो नोपपद्यत इति। नैष दोषः। इदं तावदयं प्रष्टव्यः। अथेह देव
दत्तस्य भ्रातेति कः षष्ठ्यर्थ इति। तत्रैतत्स्याद् एकस्मात्प्रादुर्भाव इति। एतच्च वार्तम्। तद्यथा। सार्थिकानामेकप्र
तिश्रये उषितानां प्रातरुत्थाय प्रतिष्ठमानानां न कश्चित्परस्परमभिसंबन्धो भवति। एवं जातीयकं भ्रातृत्वं नाम। अ
त्र चेद्युक्तः षष्ठ्यर्थो दृश्यते इहापि युक्तो दृश्यताम्।

तीति तदवयवस्य समुदायस्य समासेनाभिधानाद् द्विवचनप्रसङ्गः। अथेति। नह्यत्र स्वस्वामिभावादिः संबन्धोस्तीति भावः
। एतच्च वार्तमिति। असारवाची वार्तशब्दः माता पितृभ्यामेव पुत्रयोर्जन्यजनकभावः संबन्धो न तु परस्परेण कश्चिदित्य-
र्थः। अत्र चेदिति। परस्परोपकाराभावेपि यदि समानोदरशायित्वमात्रेण काल्पनिकः संबन्धस्तदार्धस्य द्वाभ्यामेकमदे
शावस्थानादिनिमित्तः संबन्धो युक्त इत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· ३६३ इहतर्हीति। अर्धतृतीयमनयोरिति द्वयोरेव समासार्थत्वादानयनं स्यान्नार्धस्येत्यर्थः। अस्ति सहायवाचीति। अव्युत्पन्न एवे
त्यर्थः। भवति बहुव्रीहाविति। उपलक्षणार्थसहितयोर्द्वयोरानयनं भविष्यतीत्यर्थः। संयोगसमवायलक्षणे संबन्धे यदा बहुव्रीहि
स्तदा तद्गुणसंविज्ञानं भवति शुक्लवासा लम्बकर्ण इति। स्वस्वामिभावादिके तु संबन्धे बहुव्रीहौ तद्गुणसंविज्ञानाभावो यथा चि
त्रगुरिति संक्षेपेण विषयविभागः। द्विवचनप्रसङ्गाद्दुष्टोयं पक्ष इति मत्वाह। अथवेति। संख्यानामेयमिति। अयमर्थः।

इह तर्हि अर्धतृतीया आनीयन्तामित्युक्ते अर्धस्यानयनं न प्राप्नोति। अस्तु तर्ह्ययमेव विग्रहः अर्धतृतीयमे
षामिति। ननु चोक्तमसिद्वितीयोनुससार पाण्डवं संकर्षणद्वितीयस्य बलं कृष्णस्य वर्द्धतामिति द्वयोर्द्विवचन
मिति द्विवचनं प्राप्नोतीति। नैष दोषः। अयं तीयान्तः शब्दोस्त्येव पूरणो वर्तते। अस्ति सहायवाची। तद्यः सहाय
वाची तस्येदं ग्रहणम्। असिद्वितीयः। असिसहाय इति गम्यते। एवमप्यर्धतृतीया इत्येकस्मिन्नेकवचनं प्रा-
प्नोति। एकार्था हि समुदाया भवन्ति। यथा। शतं यूथं वनमिति। अस्तु तर्ह्ययमेव विग्रहः अर्धतृतीयमनयोरि
ति। ननु चोक्तमर्धतृतीया आनीयन्तामित्युक्ते अर्धस्यानयनं न प्राप्नोतीति। नैष दोषः। भवति बहुव्रीहौ तद्गुण
संविज्ञानमपि। तद्यथा। शुक्लवाससमानय लोहितोष्णीषाः ऋत्विजः प्रचरन्ति तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति
। अथवा पुनरस्त्वयमेव विग्रहः। अर्धतृतीयमेषामिति। ननु चोक्तमेकवचनं प्राप्नोतीति। नैष दोषः। संख्यानामेयं प
रप्रधाना संख्येयमनया विशेष्यं यदि चात्रैकवचनं स्यात् संख्येयमविशेषितं स्यात्। इह तर्ह्यर्धतृतीया द्रो
णा इत्ययं द्रोणशब्दः समुदाये प्रवृत्तः अवयवे नोपपद्यते। नैष दोषः। समुदायेषु हि प्रवृत्ताः शब्दाः अवयवेष्व
पि वर्तन्ते। तद्यथा। पूर्वे पञ्चालाः उत्तरे पञ्चालाः तैलं भुक्तं घृतं भुक्तं शुक्लो नीलः कपिल इति। एवमयं समुदाये द्रो
णशब्दः प्रवृत्तोऽवयवेष्वपि वर्तते। कामं तर्ह्यनेनैव हेतुना यदा द्वौ द्रोणौ अर्धाढकं च तदा कर्तव्यमर्धतृतीया द्रोणा इति।

अर्धतृतीयमेषामिति बहुत्वसंख्याविशिष्टोन्यपदार्थो वाक्य उपात्त इति तथाभूतस्यैव समासो वाचक इति अवश्यं प्रत्या
य्यं बहुत्वं यथा च वृक्षा इति बहुत्वसंख्यायुक्तः समुदायः प्रतीयते धवखदिरपलाशा इति च तथार्धतृतीया इत्यपीत्य राम:
र्थः। इह तर्हीति। अर्धस्य द्वयोश्च द्रोणयोर्यः समुदायः स समासार्थस्तत्रार्धस्य द्रोणत्वाभावाद् द्रोणा इति नोपपद्यत इत्य- ३६३
र्थः। नैष दोष इति। अर्धेपि द्रोणत्वोपचाराद् द्रोणशब्दस्य प्रवृत्तिरित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकर्तव्यमिति। स्वावयवएवसमुदायरूपोपचारोनान्यदीयेअवयवइत्यर्थः। अर्धद्रोणोद्रोणमिति। द्रोणेनविनास्याभावा
दित्यर्थः। अर्धाढकमिति। चतुराढकोद्रोणः ततश्चविनापिद्रोणेनैकाढकसद्भावेप्यर्धस्यभावः॥ संख्यया॥ द्वित्राइति। बहु
व्रीहिनिमित्तस्यडचोदर्शनादन्याभावाच्चनिश्चितेबहुव्रीहित्वेविग्रहनिश्चयायप्रश्नः। कोयंसमासइति। स्वाभिप्रायंप्रका
शयितुमाह। कोस्येति। यदितावद्द्वौत्रयएषामनुष्याणामितितदान्यपदार्थत्वात्पूर्वेणबहुव्रीहिः सिद्धः समासान्तस्तु
डज्नसिध्यतिअसंख्येयवृत्तित्वाद्बहुव्रीहेः। अथद्वौवात्रयोवेतितदापक्षेद्विवचनप्रसङ्गः। भवेद्यदि। विकल्पोवा
र्थइतिद्वित्रशब्दः कदाचिद्द्वयोर्वाचकः कदाचित्त्रयाणाम्। अनिर्ज्ञातेर्थइतिकेचिद्वचनमेतदित्याहुः। अन्येतुन्याय

नकर्तव्यम्। समुदायेषुवृत्ताः शब्दाः केष्ववयवेषुवर्तन्तेयोवयवस्तंसमुदायंनव्यभिचरति। कंचसमुदायंन
व्यभिचरति। अर्धद्रोणोद्रोणम्। अर्धाढकंपुनर्व्यभिचरति॥ अनेक॥ संख्ययाव्ययासन्नादूराधिकसंख्याः
संख्येये॥ ॥द्वित्राः त्रिचतुराइतिकोयंसमासः। बहुव्रीहिरित्याह। कोस्यविग्रहः। द्वौवात्रयोवेति। भवेद्यदा
बहूनामानयनंतदाबहुवचनमुपपन्नम्। यदातुखलुद्वावानीयेतेतदानसिध्यति। तदापिसिद्धम्। कथ
म्। केचित्तावदाहुः। अनिर्ज्ञातेर्थेबहुवचनंप्रयोक्तव्यमिति। तद्यथा। कतिभवतः पुत्राः कतिभवतोभार्या
इति। अपरआह। द्वौवेत्युक्तेत्रयोवेतिगम्यते। त्रयोवेत्युक्तेद्वौवेतिगम्यते। सैषापञ्चाधिष्ठानावाक्। तत्रयु
क्तंबहुवचनम्। अथद्विदशाः त्रिदशाइतिकोयंसमासः। बहुव्रीहिरित्याह। कोस्यविग्रहः द्विर्दशद्विदशाइति। सं
ख्यासमासेसुजन्तत्वात्संख्याप्रसिद्धिः। संख्यासमासेसुजन्तत्वात्संख्येत्यप्रसिद्धिः। नहिसुजन्तासंख्यास्ति।

सिद्धंमन्यन्ते। अयमर्थः। संप्रयोत्रवार्थोनविकल्पः सचानियतसंख्याविमर्श इतिविमर्शविषयबहुत्वसद्भावाद्बहुवचनम्। अर्थप्र
देनात्रसंख्येवोच्यतेसंख्यायामविज्ञातायामित्यर्थः। कतिभवतइति। अन्तर्भावितपूर्वसंख्याबहुत्वसंख्याएवैकसतइतिबहुवच
नम्। द्वौवेति। विरुद्धानेकविषयत्वाद्विमर्शस्यपर्यायस्थितद्वित्वत्रित्वाधारवस्तुसंकलनयापञ्चाधिष्ठानत्वमुच्यते। द्विर्दशेति
। अयंभावः। द्वौदशेतिविग्रहोविरोधान्नक्रियते। तथाहि। द्वित्वंदशसंख्यायाएकत्वान्नोपपद्यतेनापिसंख्येयानांदशानाम्। त
स्माद्विशब्देनदशत्वावृत्तिगताद्वित्वसंख्याप्रतिपाद्यतइतिसुजन्तेनवाक्यंक्रियते। अत्रदूषणमाह। संख्यासमासइति।
सुजन्तस्यशब्दान्तरत्वात्संख्यावाचित्वंनास्तीत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा॰ कै॰ द्वौ दशताविति द्वौ दशतौ वर्गावित्यर्थः। नवेति। नहि वाक्योपमर्देन समासः क्रियते लौकिके प्रयोगे द्वयोरपि नित्यत्वात्।
३६४ अन्वाख्यानमात्रं तु शास्त्रेण क्रियते। तत्र वृत्तिविषये सुचमन्तरेणाभ्यावृत्तिसंख्याभिधायी द्विशब्द इति संख्यावाचित्वात्स
मासो भवत्येव। नचात्रेति। वृत्तावित्यर्थः। अभिहित इति। शब्दशक्तिस्वाभाव्यात्समासः सुजर्थं प्रत्याययतीत्यर्थः। इत
रः कार्यशब्ददर्शनमाश्रित्याह। किंच भो इति। यथा चार्थे द्वन्द्वस्य विधानाद्द्वन्द्वे चशब्दो न प्रयुज्यते तथा यद्ययं सम
सः सुजर्थे विधीयते तदा सुचोऽप्रयोगः स्यान्नान्यथेति प्रश्नः। नखल्विति। नहि शब्दैरर्थाभिधानं वाचनिकं किंतु स्वा

एवं तर्ह्येवं विग्रहः करिष्यते। द्वौ दशतौ द्विदशा इति। एवमपि अत्कारान्तत्वात्संख्ययेत्यप्रसिद्धिः। नह्यत्कारान्ता संख्यास्ति। अस्तु तर्ह्ययमेव विग्रहः द्विर्दश द्विदशा इति। ननु चोक्तं संख्या समासे सुजन्तत्वात्संख्येत्यप्रसिद्धिरिति। नवा सुजन्तत्वात्। नवा एष दोषः। किं कारणम्। असुजन्तत्वात्। सुजन्तत्वादित्युच्यते न चात्र सुजन्तं पश्यामः। किं पुनः कारणं वाक्ये सुज्दृश्यते समासे न दृश्यते। सुजभावोऽभिहितार्थत्वात्समासे। समासे सुजभावः। किं कारणम्। अभिहितार्थत्वात्। अभिहितः सुजर्थः समासेनेति कृत्वा समासे सुज्न भविष्यति। किंच भोः सुजर्थ इति समास उच्यते न खलु सुजर्थे इत्युच्यते गम्यते तु सुजर्थः। कथम्। यावता संख्येयो यः संख्यया संख्यायते स च क्रियाभ्यावृत्त्यर्थः स चोक्तः समासेनेति कृत्वा समासे सुज्न भविष्यति। अशिष्यः संख्योत्तरपदः संख्येयवार्थाभिधायित्वात्। अशिष्यः संख्योत्तरपदो बहुव्रीहिः किं कारणम्। संख्येयवार्थाभिधायित्वात्। संख्येयं वार्थश्चाभिधीयते तत्रान्यपदार्थ इत्येव सिद्धम्। भवेत्सिद्धमधिकविंशाः अधिकत्रिंशा इति।

भाविकम्। सचेति। क्रियाभ्यावृत्तिलक्षणोऽर्थः संख्येयो न तु दशसंख्या नापि तत्संख्यायुक्ताः। एतच्च पूर्वमुक्तम्। वाक्ये तु सुचम
न्तरेण क्रियाभ्यावृत्तेरनवगमात्सुचूप्रयोगः। ततश्चास्वपदविग्रहः क्रियते द्विर्दश द्विदशा इति। अनेनैव न्यायेन द्वौ दशतावि राम॰
त्यपि विग्रहः कार्यो न्यायसाम्यात्तु प्रतीयमानत्वाद्भाष्यकारेण पुनर्न दर्शितः। तदुक्तम्। शब्दान्तरत्वाद्वाक्येषु विशेषा यद्य- ३६४
पि श्रुताः। वृत्तिशब्दोऽन्य एवायमर्थान्तरनिबन्धन इति। संख्येयमिति। अधिका विंशतिर्यासां ता अधिकविंशा गाव इति संख्यान
वृत्तित्वाद्विंशतिशब्दस्य संख्येयमन्यपदार्थ उपपद्यत इति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशादयर्थइति। संख्यानेसंख्येयेवेत्यर्थः। अधिकदशाइति। दशशब्देनसंख्येयस्याभिधानादन्यपदार्थाभावः। तस्माद्दशाद्यर्थसूत्रं
कर्तव्यमेवाइदानीमव्ययंनिरूप्यतेबहुव्रीह्यव्ययीभावयोर्विषयविभागप्रदर्शनार्थम्। उपदशाइति। दशानांसमीपइतिस
प्तम्यासमीपप्राधान्येबहुव्रीहिः समीपप्राधान्येत्वव्ययीभावइतिप्रदर्शितंभवति। सामीप्यमिति। धर्मेणधर्मीलक्ष्यतेकस्य-
सामीप्यवानर्थइत्यर्थः। उपशब्दोहिसमीपमात्रवाच्युपकुम्भादिषुदृष्टइतितस्यसमीपिवाचित्वंनास्तिनापिदशशब्दस्य
समासस्येतिचेत्तदा ऽस्यैवान्यपदार्थवृत्तित्वमितिप्रश्नः। उपस्येति। आराच्छब्दवदनेकार्थत्वादुपशब्दस्यसमीपवानर्थः।
सहवाहायद्येवमिति। यदोपशब्दस्यैवासावर्थइत्यर्थः। एवमव्ययासन्नादूराधिकग्रहणंस्थापितम्। संख्याग्रहणंतुतक

यत्रैतद्विचार्यतेविंशत्यादयोदशदर्थेवासुः परिमाणिनिवेति। इदंतुनसिध्यति। अधिकदशाइति। यत्रनि
योगतः संख्यासंख्येयेएववर्तते। अथोपदशाइतिकोयंसमासः। बहुव्रीहिरित्याह। कोस्यविग्रहः। दशा
नांसमीपेउपदशाइति। कस्यपुनःसामीप्यमर्थः। उपस्य। यद्येवंनान्यपदार्थोभवति। तत्रचप्रथमानिर्दिष्टंसं
ख्याग्रहणंशक्यमकर्तुम्। मत्वर्थेवापूर्वस्यविधानात्। अथवामत्वर्थेपूर्वोयोगः। असत्वर्थोयमारम्भः। क
बभावार्थंवा। अथवाकप्माभूदिति। संख्यया॥ दिङ्नामान्यन्तराले॥ तेनसहेतितुल्ययोगे॥ ॥दिक्समास
सहयोगयोश्चान्तरालप्रधानाभिधानात्। दिक्समाससहयोगयोश्चाशिष्योबहुव्रीहिः। किंकारणम्। अ
न्तरालप्रधानाभिधानात्। दिक्समासेसहयोगेचान्तरालंप्रधानंचाभिधीयतेतत्रान्यपदार्थइत्येवसि
द्धम्। यद्येवंदक्षिणपूर्वादिक्समानाधिकरणलक्षणःपुंवद्भावोनप्राप्नोति।

र्तव्यम्। द्वित्राइत्यादौवार्थस्यान्यपदार्थत्वादित्याह। तत्रेति। इदानीमेतदपिस्थापयन्नाह। अथवेति। ननुमत्वर्थग्रहणंतत्र
नकरिष्यतेद्वित्राइतिसिद्धयइत्याह। कबभावार्थंवेति। शेषाद्विभाषेत्यत्रशेषाधिकारविहितोबहुव्रीहिर्गृह्यतेअने
कमन्यपदार्थइत्यत्रैवचशेषग्रहणमनुवर्ततेनोत्तरेषुयोगेषु॥ दिङ्नामानि॥ तुल्यन्यायत्वाद्योगद्वयस्यसहविचा
रः। दिक्समाससहयोगयोरिति। अशिष्यइतिपूर्ववार्तिकोक्तमपेक्ष्यते। दक्षिणस्याश्चपूर्वस्याश्चदिशोयदन्त
रालंदिक्सादक्षिणपूर्वेत्युच्यतेतत्रान्तरालस्यान्यपदार्थत्वात्पूर्वेणैवसिद्धःसमासः। सपुत्रइत्यस्यापिसमास ॥
स्यापिताप्रधानमन्यपदार्थाभिधेयइतिनार्थःसूत्रद्वयेनेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अद्यपुनरिति। सूत्रारम्भविशिष्टे काले इत्यर्थः। तत्रारब्धेयमर्थोव्याख्यायते अन्तराले यानि दिङ्नामानि वर्तन्ते तानि सम स्यन्ते दक्षिणादीनां च सामीप्यादन्तरालवृत्तित्वं ततश्च दक्षिणा चासौ पूर्वा चेति सामानाधिकरण्यात् पुंवद्भावः सिध्यति। सूत्रेण नारब्धेन्यपदार्थसंपादनाय दक्षिणपूर्वाशब्दयोः स्वार्थ एव वृत्तिरुपगन्तव्या ततो वैयधिकरण्यम्। ननु सामानाधि- करण्येपि विशेषणसमासः सिध्यतीति नारब्धव्यमिदम्। नैतदस्ति। पूर्वपदप्रकृतिस्वरार्थं विभाषा दिक्समास इति वि कल्पितसर्वनामसंज्ञार्थं च बहुव्रीहिसंज्ञैवेष्टव्या। न सिध्यतीइति। न हि सामानाधिकरण्यमात्रप्रतिबद्धः पुंवद्भावः किं तु भा षितपुंस्कत्वनिबन्धनोपि। समानायां चाकृतौ यद्भाषितपुंस्कं तस्य पुंवद्भावः। भाषितपुंस्कशब्दस्य ह्यर्थः प्रवृत्तिनिमित्तत्व

अद्यपुनरियं सैव दक्षिणा सैव पूर्वेति कृत्वा समानाधिकरणलक्षणः पुंवद्भावः सिद्धो भवति। न सिध्यति। भाषितपुंस्कस्य पुंवद्भावः न चैतौ भाषितपुंस्कौ। ननु च भोः दक्षिणशब्दः पूर्वशब्दश्च पुंसि भाष्येते। स मानायामाकृतौ यद्भाषितपुंस्कम्। आकृत्यन्तरे चैतौ भाषितपुंस्कौ। दक्षिणपूर्वेति दिक्शब्दौ। दक्षि णः पूर्व इति व्यवस्थाशब्दौ। यदि पुनर्दिक्शब्दा अपि व्यवस्थाशब्दाः स्युः। कथं यानि दिग्गुपदिष्टानि कार्याणि। यदा दिशो व्यवस्थां वक्ष्यन्ति। यदि हि यो यो दिशि वर्तते स दिक्शब्दो रमणीयादिषु अतिप्रस- ङ्गो भवति रमणीया दिक् शोभना दिगिति। अथ मतमेतत्। दिशि दृष्टो दिग्दृष्टः दिग्दृष्टः शब्दो दिक्शब्दः यो दिशं न व्यभिचरतीति। न रमणीयादिषु अतिप्रसङ्गो भवति। पुंवद्भावस्तु न प्राप्नोति। एवं तर्हि सर्वेना- म्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यः। दक्षिणोत्तरपूर्वाणामित्येवमर्थम्। एवं च कृत्वा तु दिक्समाससह योगयोरन्तरालप्रधानाभिधानादित्येव।

क्षणोन्यपदार्थोभिधेयो न शब्दः। दिक्शब्दाविति। विना प्रवृत्तिनिमित्ते न दिग्विशेषे रूढ्या प्रवृत्तावित्यर्थः। य दि पुनरिति। ततश्च व्यवस्थाकृतौ समानायां भाषितपुंस्कत्वस्योपपत्तिः। कथं यानीति। यदि प्रवृत्तिनिमित्ताश्रये ण दिशि वर्तन्ते न तु रूढ्या तदा दिक्शब्दत्वानुपपत्तिः। यदा दिश इति। विषयवशात् प्रवृत्तिनिमित्ताश्रयायाम प्रवृत्तौ दिक्शब्दत्वं पूर्वादीनां संभवतीत्यर्थः। दिशि दृष्ट इति। रूढिरूपेण तत्र प्रवृत्त इत्यर्थः। अत एवैन्द्र्या द यो यौगिकत्वान्न दिक्शब्दाः। दक्षिणोत्तरपूर्वाणामिति। अत्र हि वैयधिकरण्यात् पुंवद्भावो न प्राप्नोतीत्यवश्यं वाच्यं सर्वनाम्न इति। तेनैव दक्षिणपूर्वेत्यादावपि भविष्यतीति नार्थोनेन सूत्रेणेत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र तेनेदम्। क्रियाभिधानादिति। इतिकरणाद्विवक्षार्थोऽत्र। केशाकेशि दण्डादण्डीति समासो युद्धक्रियायामेव भवति स चान्यपदार्थ इति पूर्वेण सिद्धः समास इत्यर्थः न वेति। केशेषु च केशेषु च गृहीत्वेदं युद्धं दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धमिति ग्रहणे प्रहरणे च सह विवक्षितत्वात् सरूपत्वादेकविभक्तित्वाच्चैकशेषः प्राप्तो वचनसामर्थ्यात्समूहान्यथानुपपत्त्या समूहविषयया ऽनया बहुव्रीहिसंज्ञया न वकाशया बाध्यते। पूर्वयोगेनापि परत्वादेकशेषो न शक्यते बाधितुम्। अन्यपदार्थत्वापेक्षत्वात्तस्य बहिरङ्गत्वात्। पूर्वदीर्घार्थं चेति। तत्र तेन आ इदमित्याकारप्र

नतु चोक्तं दक्षिणोत्तरपूर्वादिक्समर्थाधिकरणलक्षणः पुंवद्भावो न प्राप्नोतीति नैष दोषः। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावेन परिहृतः। मत्वर्थे वा पूर्वस्य विधानात्। अथवा मत्वर्थे पूर्वो योगः। अमत्वर्थोऽयमारम्भः। कब्भावार्थो वा अथवा कब् माभूदिति। तत्र तेनेदमिति सरूपे॥ ॥ तृतीयासप्तम्यन्तेषु च क्रियाभिधानादशिष्यो बहुव्रीहिः॥ तृतीयासप्तम्यन्तेषु चाशिष्यो बहुव्रीहिः। किं कारणम्। क्रियाभिधानात्। क्रियाभिधीयते। तत्रान्यपदार्थ इत्येव सिद्धम्। न वैकशेषप्रतिषेधार्थम्। न वा ऽशिष्यः। किं कारणम्। एकशेषप्रतिषेधार्थमिदं वक्तव्यम्। पूर्वदीर्घार्थं चापूर्वदीर्घार्थं चेदं वक्तव्यम्। केशाकेशि। स्यादेतत्प्रयोजनं यदि नियोगतोऽनेनैव दीर्घत्वं स्यात्। अथेदानीमन्येषामपि दृश्यत इति दीर्घत्वं न प्रयोजनं भवति। मत्वर्थे वा पूर्वस्य विधानात्। अथवा मत्वर्थे पूर्वो योगः। अमत्वर्थोऽयमारम्भः। कब्भावार्थं वा। अथवा कब् माभूदिति। तत्र तेनेदम्॥ चार्थे द्वन्द्वः॥ ॥ चार्थ इत्युच्यते चश्चाव्ययं

तेन समासस्याप्यव्ययसंज्ञा प्राप्नोति। नैष दोषः। पाठेनाव्ययसंज्ञा क्रियते न च द्वन्द्वः समासस्तत्र पठ्यते। पाठेनाप्यव्ययसंज्ञायां सत्यामभिधेयवल्लिङ्गवचनानि भविष्यन्ति। यश्चेहार्थोऽभिधीयते न तस्य लिङ्गसंख्याभ्यां योगोऽस्ति। नेदं वाचनिकम्। अलिङ्गता असंख्यता वा। किं तर्हि स्वाभाविकमेतत्। तद्यथा। समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते अपरे न। न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुं कश्चिद्वानर्थक इति सर्वैरनर्थकैः।

श्लेषेण पूर्वपदस्य दीर्घो विधीयते। उत्तरपदस्य तु यस्येति लोपेन भाव्यमिति प्रयोजनाभावादात्वाभावः अथेदानीमिति। एवं च मुष्टीमुष्टीत्यादि भवति आकारप्रश्लेषे तु मुष्टामुष्टीति स्यात्। कब्भावार्थं वेति। इच्कर्मव्यतिहार इति कब्भावपक्षे सावकाशः पक्षान्तरे तु परत्वाद्बाधित्वा कप् प्राप्नोति। शेषग्रहणेन च शेषाधिकारो गृह्यते तेन तूपयुक्तादन्यः॥ चार्थे॥ चार्थ इत्युच्यतद्इति। यदि तु समाहारेतरेतरयोगयोरित्युच्यते तदा न दोषः स्यात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राक् समासादिति। वाक्ये चशब्देन द्योत्यस्यार्थस्य लिङ्गसंख्ये न स्तः समासस्य तु वाचकत्वात्तदर्थस्य लिङ्ग-
संख्याभ्यां योग इत्यर्थः। श्रितो भवति समास इति। समासशब्देन समासार्थोऽर्थ उच्यते तस्य समुच्चितद्रव्याश्रये-
लिङ्गसंख्ये भविष्यत इत्यर्थः। याज्ञिकश्चायमिति। एकस्मिन् धर्मिण्यनेकधर्मसमुच्चयाच्चार्थसद्भावाद् द्वन्द्वसं-
ज्ञाप्रसङ्गः। तत्राभ्यर्हितत्वाद्वैयाकरणशब्दस्यैव पूर्वनिपातः स्यात्तत्पुरुषे तु काणखञ्जवदनियमः। प-
रंकार्यत्वे चायं दोषः एकसंज्ञाधिकारे तु विशेषविहितत्वात्तत्पुरुषसंज्ञैव भवतीति दोषाभावः। अशेषत्वादि-

तत्र किमस्माभिः शक्यं कर्तुम्। यत्प्राक् समासात्स्वार्थस्य लिङ्गसंख्याभ्यां योगो नास्ति समासे च भवति। स्वाभाविकमे-
तत्। अथवा आश्रयतो लिङ्गवचनानि भविष्यन्ति। यथा गुणवचनेषु। गुणवचनानां हि शब्दानामाश्रयतो लिङ्ग-
वचनानि भवन्ति। तद्यथा। शुक्लं वस्त्रं शुक्ला शाटी शुक्लः कम्बलः शुक्लौ कम्बलौ शुक्लाः कम्बला इति। यदसौ द्रव्यं
श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद्गुणस्यापि भवति। एवमिहापि यदसौ द्रव्यं श्रितो भवति समासस्त-
स्य यल्लिङ्गं वचनं च तत्समासस्यापि भविष्यति। अथेह कस्मान्न भवति याज्ञिकश्चायं वैयाकरणश्च कठश्चायं
बह्वृचश्च औक्थिकश्चायं मीमांसकश्चेति। शेष इति वर्तते। अशेषत्वान्न भविष्यति। यदि शेष इति वर्तते। उ-
पास्तातं स्थूलसिकतं तूल्लीगङ्गं महाह्रदम्। द्रोणं चेच्छक्नो गन्तुं मा त्वा तापाः कृताकृते इत्येतन्न सिध्यति। नैव
दोषः। अन्यद्धि कृताकृतमन्यत्कृतम्। चार्थे द्वन्द्ववचनेऽसमासेऽपि चार्थसंप्रत्ययादनिष्टप्रसङ्गः। चार्थे द्वन्द्वव-
चनेऽसमासेऽपि चार्थसंप्रत्ययादनिष्टं प्राप्नोति।

ति। विशेषणमित्यत्रोपयुक्तत्वादित्यर्थः। उपास्तानादयः पञ्चतीर्थविशेषास्तांश्चेत्त्वं गन्तुं शक्तो वांसस्ततः कृताकृते सुकृतदु-
ष्कृते त्वां मा तापयतामित्यर्थः। तीर्थस्नानप्रशंसेयम्। कृतं नीष्फलं सन्तापयत्यकृतं त्वनिष्टफलहेतुत्वेन। कृताकृते इ-
त्येतस्त्रोदाहरणम्। अत्र क्तेन नञ्विशिष्टेनानञिति समासविधानादशेषत्वाद्द्वन्द्वाप्रसङ्गः। कर्मसामान्यं च कृताकृतयोरे-
कमधिकरणं मत्वा प्रश्नः। अन्यद्धि कृतमिति। ततश्च वैयधिकरण्यात्तत्पुरुषाभावाच्छेषत्वमेव। नह्यत्रैकं कर्माभिधेयत्वे-
न विवक्षितं किं तर्हि भिन्ने कर्मणी समुच्चिते। चार्थे द्वन्द्ववचन इति। चार्थानुवादेन द्वन्द्वस्य विधानात्तस्य चानिष्टेऽपि विषये प्रस-
ङ्गादतिप्रसङ्ग इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्मदीति। दुःखेन यो माद्यति स यथा सुरया न तृप्यति एवं यमो गवादीन्नयमान इत्यर्थः। तत्र नयनक्रियायां गवादीनां समुच्चयाच्चार्थसद्भावादस्ति द्वन्द्वप्राप्तिः। इन्द्र इति। इन्द्रादीनां लोकपालत्वाद्गम्यमानपालनक्रियायां समुच्चयोऽस्ति। सिद्धं त्विति। न्यासान्तरेणातिप्रसङ्गपरिहारः। युगपदेकैकेन शब्देनाधिकरणमभिधेयं द्वन्द्ववाच्यं समुदायरूपं यदोच्यते तदा द्वन्द्वः। गामश्वमित्यादौ तु परस्परनिरपेक्षाः स्वतन्त्रा गवादयो भिन्नैरेव शब्दैः पृथक् प्रत्याय्यन्त इति युगपद्वाचित्वाभावाद्द्वन्द्वाभावः। पट्वीमृद्व्याविति। एकैकेन शब्देनार्थद्वयस्याभिधानात् सामानाधिकरण्यमस्ति। विप्रतिषिद्धेषु चेति। ये अर्था अविरुद्धास्तेषां भवत्वेकैकेन शब्देनाभिधानम्। विरुद्धानां तु सहानवस्थानाद्युगपदनुभवाभावात् सह विवक्षाभावाद्युगपद्वाचिता नोपपद्यत इत्यर्थः। आ-

अहरहर्नयमानो गामश्वं पुरुषं पशुम्। वैवस्वतो न तृप्यति सुराया इव दुर्मदीति। इन्द्रस्त्वष्टा वरुणो वायुरादित्य इति। सिद्धं तु युगपदधिकरणवचने द्वन्द्ववचनात्। सिद्धमेतत्। कथम्। युगपदधिकरणवचने द्वन्द्वो भवतीति वक्तव्यम्। तत्र पुंवद्भावप्रतिषेधः। तत्रैतस्मिन् लक्षणे पुंवद्भावस्य प्रतिषेधो वक्तव्यः। पट्वीमृद्व्यौ। समानाधिकरणलक्षणः पुंवद्भावः प्राप्नोति। विप्रतिषिद्धेषु चानुपपत्तिः। विप्रतिषिद्धेषु युगपदधिकरणवचनताया अनुपपत्तिः। शीतोष्णे सुखदुःखे जननमरणे। किं कारणम्। सुखप्रतिघातेन दुःखं दुःखप्रतिघातेन च सुखम्। यत्तावदुच्यते तत्र पुंवद्भावप्रतिषेध इति। इदं तावदयं प्रष्टव्यः। अथेह पुंवद्भावः कस्मान्न भवति दर्शनीयाया माता दर्शनीयामातेति। अथ मतमेतत्। प्राक् समासाद्यत्र सामानाधिकरण्यं तत्र पुंवद्भावो भवतीति। इहापि न दोषो भवति। यदप्युच्यते विप्रतिषिद्धेषु चानुपपत्तिरिति। सर्वे एव शब्दाः विप्रतिषिद्धाः। इहापि प्लक्षन्यग्रोधाविति प्लक्षशब्दः प्रयुज्यमानः प्लक्षार्थं संप्रत्याययति॥

रात्पुरादीनां विरुद्धार्थाभिधानं द्रष्टुं पृच्छति। किं कारणमिति। सुखप्रतिघातेनेति। आरादादयस्तु युगपद्विरुद्धार्थाभिधायिनो नैवाभ्युपगम्यन्ते। दर्शनीयामातेति। वृत्तावेकार्थीभावेन मात्रर्थवृत्तित्वाद्दर्शनीयाशब्दस्य सामानाधिकरण्यमत्रास्ति। अथ मतमिति। वृत्तौ सामानाधिकरण्यव्यभिचाराभावाद्यदि वाक्यविषयं सामानाधिकरण्यमाश्रीयते तदा पट्वीमृद्व्यावित्यत्रापि न दोषः। लौकिकं च यद्वाक्यं प्रयोगार्हं तत्र सामानाधिकरण्यमाश्रीयते न त्वलौकिके प्रक्रियावाक्ये पट्वी च मृद्वी चेति। विप्रतिषिद्धा इति। विप्रतिषिद्धार्था इत्यर्थः। परस्परपरिहारेण सर्वेषामर्थानां शब्दैरभिधानात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा.कै. न्यग्रोधार्थमिति।एकस्मिन्नर्थेअवगतेअर्थादर्थान्तरस्यनिवृत्तिः।इहापीति।विरुद्धानामप्यर्थानामेकशब्दाभिधेयताया-
३६७ अविरोधात्।तथाहि।जन्ममरणयोर्विरुद्धयोरप्येकसंज्ञासहसंप्रत्ययायक्रियतेतदातच्छब्दवाच्यत्वंतयोर्भवत्येव।इ
दानींयुगपद्वाचितायाअसंभवंप्रतिपादयति।एवमपीति।अभिधानक्रमात् अभिधेयक्रमोऽवतिष्ठतेयथागुणवृद्धीवृ-
द्धिगुणाविति।ततश्चशब्दक्रमात्क्रमवदर्थावगमान्नसंभवत्येकेनानेकस्याभिधानमित्यर्थः।न्यग्रोधशब्दइति।न्य
ग्रोधार्थप्रतिपत्तिकालेयदिप्लक्षार्थस्यानवगतिःस्यात्तदान्यग्रोधशब्दादेकार्थत्वादेकवचनंस्यात्।तस्माद्द्विवचनान्य
थानुपपत्त्याप्लक्षन्यग्रोधावित्यादावेकैकोऽनेकार्थाभिधायीत्यभ्युपगन्तव्यम्।एवंयुक्त्यायुगपद्वाचितांप्रसाध्यागमेनप्रसाध

न्यग्रोधार्थंनिवर्तयति।न्यग्रोधशब्दःप्रयुज्यमानोन्यग्रोधार्थंसंप्रत्याययतिप्लक्षार्थंनिवर्तयति।अत्रचे
द्युक्तायुगपदधिकरणवचनतादृश्यतेइहापियुक्तादृश्यताम्।एवमपिशब्दपौर्वापर्यप्रयोगादर्थपौर्वा
पर्याभिधानम्।शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानंप्राप्नोति।अतःकिम्।युगपदधिकरणवच
नतायाअनुपपत्तिः।प्लक्षन्यग्रोधौप्लक्षग्रोधाइति।यथैवहिशब्दानांपौर्वापर्यंतद्वदर्थानामपिभवित
व्यम्।शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानमितिचेद्द्विवचनबहुवचनानुपपत्तिः।शब्दपौर्वापर्यप्र
योगादर्थपौर्वापर्याभिधानमितिचेद्द्विवचनबहुवचनयोरनुपपत्तिः।प्लक्षन्यग्रोधौप्लक्षन्यग्रोधाइति
।प्लक्षशब्दःसार्थकोनिवृत्तोन्यग्रोधशब्दउपस्थितः।एकएकार्थः।तस्यैकार्थत्वादेकवचनंप्राप्नोति।।वि
ग्रहेचयुगपद्वचनंज्ञापकंयुगपद्वचनस्य।विग्रहेखल्वपियुगपद्वचनतादृश्यते।द्यावाहक्षामाद्यावाचि
दस्मैपृथिवीसंनमेतेइति।किमेतत्।युगपदधिकरणवचनतायाः।उपोद्वलकम्।

यति।विग्रहेचेति।द्यावेति।द्योशब्दोद्यावापृथिव्योर्वर्ततइतिततःपरस्यप्रथमाद्विवचनस्यसुपांसुलुगित्याकारेगोतो-
णिदितिगोशब्दस्यौकारान्तत्वोपलक्षणार्थत्वाद्णित्वाद्वृद्धिरावादेशश्च।एवंपृथिवीशब्दोदिवःपृथिव्योवर्त्ततीतिप्रथ-
माद्विवचने।वाछन्दसीतिपूर्वसवर्णदीर्घः।संनमेतइति।द्विवचनान्तेनसामानाधिकरण्यात्पृथिवीइतीतिपदकारैर्द्विवचना राम:
श्रयप्रगृह्यसंज्ञानिबन्धनस्यप्रकृतिभावस्यविधानाच्चद्व्यर्थत्वंपृथिवीशब्दस्यावसीयते।किमेतदिति।यथोक्तमप्रतिप ३६७
द्यपृच्छति।उपोद्वलकमिति।उत्कृष्टबलकमुद्बलकंप्रत्यक्षंतत्समीपमनुमानमुपोद्बलकम्।आगमस्येहानुमानत्वेनोपन्यासात्।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विग्रहे किलेति। साहचर्यादिनिमित्ताश्रयेण वाक्येपि शब्दानामनेकार्थाभिधायित्वं यदा दृश्यते तदा समासे शक्त्यन्तराणां वाक्येऽदृष्टानामपि दर्शनादसंभावनानकार्येत्यर्थः। युगपद्वाचित्वाभावे द्विवचनबहुवचनासिद्धिदोषं परिहर्तुमाह। समुदायादिति। द्वन्द्वे न समुदायरूपोर्थोभिधीयत इति द्विवचनबहुवचनसिद्धिः। नैकार्थ्यमिति। उद्भूतावयवभेदः समुदायोभिधेयो न तु तिरोहितावयवभेद इत्यर्थः। बहुवचनप्रसङ्ग इति। एकैकेन युगपदनेकस्यार्थस्याभिधानात्। याभ्यामेवेति। नात्र चत्वारोर्थाः किं तर्हि द्वावेवार्थावित्यर्थः। अन्यवाचकेनेति। लौकिकात्प्रयोगात् शब्दानामर्थावधारणं तत्र यथा पटशब्दः घटार्थं न प्र

विग्रहे किल नाम युगपदधिकरणवचनता स्यात् किं पुनः समासे। समुदायात्सिद्धम्। समुदायात्सिद्धमेतत्। किमेतत्समुदायात्सिद्धमिति। द्विवचनबहुवचना—प्रसिद्धिरिति चोदितं तस्यायं परिहारः। समुदायात्सिद्धमिति चेन्नैकार्थ्यात्समुदायस्य। समुदायात्सिद्धमिति चेत्तन्न। किं कारणम्। एकार्थत्वात्समुदायस्य। एकार्था हि समुदाया भवन्ति। तद्यथा। शतं यूथं वनमिति। नैकार्थ्यम्। नायमेकार्थः। किं तर्हि। द्व्यर्थो बह्वर्थश्च। प्लक्षोपि द्व्यर्थः न्यग्रोधोपि द्व्यर्थः। यदि तर्हि प्लक्षोपि द्व्यर्थो न्यग्रोधोपि द्व्यर्थत्वाद्बहुवचनप्रसङ्गः। तयोरनेकार्थत्वाद्बहुषु बहुवचनमिति बहुवचनं प्राप्नोति। तयोरनेकार्थत्वाद्बहुवचनप्रसङ्ग इति चेन्न बहुत्वाभावात्। तयोरनेकार्थत्वाद्बहुवचनप्रसङ्ग इति चेत्तन्न। किं कारणम्। बहुत्वाभावात्। नात्र बहुत्वमस्ति। किमुच्यते बहुत्वाभावादिति। यदा इदानीमेवोक्तं प्लक्षोपि द्व्यर्थो न्यग्रोधोपि द्व्यर्थ इति। याभ्यामेवात्रैको द्व्यर्थस्ताभ्यामेवापरोपि। यद्येवमन्यवाचकेनान्यस्य वचनानुपपत्तिः। अन्यवाचकेन शब्देनान्यस्य वचनं नोपपद्यते। अन्यवाचकेनान्यस्य वचनानुपपत्तिरिति चेत्। प्लक्षस्य न्यग्रोधत्वान्न्यग्रोधस्य प्लक्षत्वात्स्वशब्देनाभिधानम्। अन्यवाचकेनान्यस्य वचनानुपपत्तिरिति चेदेवमुच्यते। तन्न। किं कारणम्। प्लक्षस्य न्यग्रोधत्वान्न्यग्रोधस्य च प्लक्षत्वात्स्वशब्देनाभिधानं भविष्यति।

त्याययति तथा प्लक्षन्यग्रोधशब्दौ परस्परार्थस्य प्रत्यायकौ न युक्तावित्यर्थः। प्लक्षस्येति। प्लक्षशब्दस्य न्यग्रोधार्थत्वान्न्यग्रोधशब्दस्य प्लक्षार्थाभिधायित्वात्स्वार्थस्यैवाभिधानेन नास्त्यर्थान्तराभिधायित्वं लोकप्रसिद्ध्यात्वर्थान्तराभिधायित्वमुच्यते। द्वन्द्वविषये चैकैकस्य द्वावर्थाविति स्वार्थावेव तौ भवतः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्लक्षोऽपि न्यग्रोध इति। न्यग्रोधशब्दवाच्य इत्यर्थः। एवं न्यग्रोधोऽपि प्लक्षशब्दवाच्य इत्यर्थः। कारणादिति। शब्दार्थावसायहेतुर्लोकव्यवहारोऽत्र कारणशब्देन विवक्षितः। न च लोकव्यवहारे प्लक्षशब्दस्य न्यग्रोधाभिधायित्वं प्रतीतम्। इतरः शब्दप्रवृत्तिनिमित्तं शब्दप्रयोगस्य कारणमिति मत्वाह। कारणादिति। प्रक्षरणं विस्तारेणावस्थानम्। न्यग्रोहणमधःशाखावस्थानम्। इतरः स्वाभिप्रायं प्रकाशयति। दर्शनमिति। लोकव्यवहार इत्यर्थः। प्लक्षेऽपीति। लोकव्यवहारे प्लक्षन्यग्रोधौ दृश्येते। ताभिस्तुभयोः क्रियान्वयाद् द्विवचनदर्शनाच्च। तुल्यं हीति। तुल्यो लोकव्यवहार इत्यर्थः। तद्विषयं चेति। द्वन्द्वावयवानामेवानेका-

प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्षः। कथं पुनः प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्षः स्यात्। यावता कारणाद्द्रव्ये शब्दनिवेशः। कारणाद्द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात्सिद्धम्। कारणाद्द्रव्ये शब्दनिवेश इति चेद् एवमुच्यते। तन्नातुल्यकारणत्वात्सिद्धम्। तुल्यं हि कारणम्। यदि तावत्प्रक्षरतीति व्युत्पत्त्या प्लक्षः स्या-द्न्यग्रोधेऽप्येतद्भवति। तथा यदि न्यग्रोहतीति न्यग्रोधः प्लक्षेऽप्येतद्भवति। दर्शनं वै हेतुः। न च न्यग्रोधे प्लक्षशब्दो वर्तते। दर्शनं हेतुरिति चेत्तुल्यम्। दर्शनं हेतुरिति चेत्तुल्यमेतद्भवति प्लक्षेऽपि न्यग्रोधशब्दो दृश्यते न्यग्रोधेऽपि प्लक्षशब्दः। तुल्यं हि कारणम्। न वै लोके एष संप्रत्ययो भवति। न हि प्लक्ष आनीयतामित्युक्ते न्यग्रोध आनीयते। तद्विषयं च। तद्विषयं चैतद्द्रष्टव्यं प्लक्षस्य न्यग्रोधत्वम्। किं विषयम्। द्वन्द्वविषयम्। युक्तं पुनर्यन्नियतविषया नाम शब्दाः स्युः। बाढं युक्तम्। अन्यत्रापि तद्विषयदर्शनात्। अन्यत्रापि हि नियतविषयाः शब्दा दृश्यन्ते। तद्यथा। समाने रक्ते वर्णे गौर्लोहित इति भवति। अश्वः शोण इति। समाने च काले वर्णे गौः कृष्ण इति भवति। अश्वो हेम इति। समाने च शुक्ले वर्णे गौः श्वेत इति भवति। अश्वः कर्क इति। यदि तर्हि प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्षः। एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः। एकेनोक्तत्वात्तस्यार्थस्यापरस्य प्रयोगो नोपपद्यते।

र्थाभिधायित्वं न केवलानामित्यर्थः। युक्तं पुनरिति। किं युक्तमेतदित्यर्थः। बाढमिति। भिन्नरूपत्वाद्भिन्नशक्तित्वाच्च। अश्वः शोण इति। यथाश्वादन्यत्र शोणादयो न वर्तन्ते तथा विना द्वन्द्वात्प्लक्षादयो न्यग्रोधाद्यर्थे न भवन्तीत्यर्थः। यदि तर्हीति। ननु तद्विषयं चेत्युक्ते कोऽस्य दोषस्यावसरः। एवं मन्यते। परस्परसन्निधानेन यदा द्वयोरपि सामर्थ्यमाहितं तदान्यतरविगमेऽपि सामर्थ्यहानाभावो यथा वह्निसंपादितपाकजरूपादिसद्भावो निवृत्तेऽपि वह्नौ। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुक्त इति। न्यग्रोधशब्दप्रयोगमन्तरेणेत्यर्थः। उक्तं ह्येतत्। द्वन्द्वावयवानामेवानेकार्थाभिधायित्वं न केवलानां यथा वह्नि-
संनिधावेव ताम्रद्रवत्वसंभवति न तु तद्विनिवृत्तौ। सहभूताविति। भारोद्वहनवत्परस्परापेक्षयाविमर्शात्। प्राथमकल्पिकावि-
ति। लोकव्यवहारे पदोच्चारणमात्रात्तदर्थावसायान्मुख्यावित्यर्थः। कौचिदिति। तत्सहचरितगुणक्रियादर्शनात्तद्रूपा-
रोपणाद्गौणावित्यर्थः। यथोक्तं यदिमक्षरतीत्यादि। संदेहः स्यादिति। उपक्रमे संदेहो गौणस्याप्यर्थस्य संभवमात्रेण। न
तु मुख्यार्थसंभवे गौणस्य परामर्श एवास्ति तत्कुतः संदेहः। भाष्यकारः सूत्रन्यासं स्थापयितुमाह। सेयमिति। दुःखेति। प्रतीता

प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः। एकेनोक्तत्वादपरस्य प्रयोगोनुपपन्न इति चेदनुक्तत्वात्प्लक्षेण न्यग्रोध
स्य न्यग्रोधप्रयोगः। एकेनोक्तत्वादपरस्य प्रयोगोनुपपन्न इति चेत्। तन्न। किं कारणम्। अनुक्तत्वात्प्लक्षेण
न्यग्रोधस्य न्यग्रोधप्रयोगः। अनुक्तः प्लक्षेण न्यग्रोधार्थ इति कृत्वा न्यग्रोधशब्दः प्रयुज्यते। कथमनुक्तः। यावता
इदानीमेवोक्तं प्लक्षोपि न्यग्रोधः न्यग्रोधोपि प्लक्ष इति। सहभूतावेतावन्योन्यस्यार्थमाहतुः न पृथग्भूतौ। किं
पुनः कारणं सहभूतावेतावन्योन्यस्यार्थमाहतुर्न पृथग्भूतौ। अभिधानं पुनः स्वाभाविकम्। स्वाभाविकमभिधा
नम्। अथ वेह कौचित्प्राथमकल्पिकौ प्लक्षन्यग्रोधौ कौचित्क्रियया वा गुणेन वा प्लक्ष इवायं प्लक्षः न्यग्रोध
इवायं न्यग्रोध इति। तत्र प्लक्षावित्युक्ते संदेहः स्यात्। किमिमौ प्लक्षावेव आहोस्वित्प्लक्षन्यग्रोधाविति। तत्रा
संदेहार्थं न्यग्रोधशब्दः प्रयुज्यते। सेयं युगपदधिकरणवचनता नाम दुःखा च दुरुपपादा च। यच्चाप्यस्या
निबन्धनमुक्तं यावाहस्यामेति। तदपि च्छान्दसम्। तत्र सुपां सुपो भवन्तीत्येव सिद्धम्। सूत्रं च भिद्यते। य
थान्यासमेवास्तु। ननु चोक्तं चार्थे द्वन्द्ववचनेऽसमासेपि चार्थसंप्रत्ययादनिष्टप्रसङ्ग इति। नैष दोषः। इह चे
द्वन्द्व इतीयता सिद्धम्। कथं पुनश्चेनामवृत्तिः स्यात्। शब्दोह्येषः। शब्देऽकार्यासंभवादर्थे कार्यं विज्ञास्यते।

वनुपायेहात्। दुरुपपादेति। प्रमाणाभावात्। वृद्धव्यवहाराद्धि शब्दार्थावसायो न च तत्र प्लक्षशब्दस्य प्लक्षन्यग्रोधाभिधायित्वं
दृश्यते। न च गौणार्थत्वं प्लक्षशब्दस्य। न्यग्रोधशब्देनैव न्यग्रोधस्य प्रतिपादितत्वात्। न च प्लक्षन्यग्रोधावित्युक्तेर्थद्वयप्रतीते
रावृत्तिः यथा प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधाविति। समासस्य चानेकार्थाभिधायित्वात्ततः परयोर्द्विवचनबहुवचनयोरुपपत्तिरि
ति द्विवचनबहुवचनान्यथानुपपत्त्यापि नास्ति युगपद्वाचिताप्रतिपत्तिः। लिङ्गदर्शनमपि निराकुर्वन्नाह। यच्चापीति। एकवच
नस्य स्थाने द्विवचनमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· चेनकृतोर्थइति।अर्थशब्दस्यसन्निधानादुत्तरपदलोपीसमासआश्रीयतइत्यर्थः।ननुचेनार्थस्यकृतत्वमुत्पादनंवास्या
३६९ त्प्रकाशनंवा।तत्रोत्पादनंतावन्नोपपद्यते।नहिशब्दैरर्थाउत्पाद्यन्ते।यथोक्तंनहिशब्दकृतेननामार्थेनभवितव्यमि-
ति।अथप्रकाशनंतदासएवातिप्रसङ्गइतिमत्वापृच्छति।कःपुनरिति।समुच्चयइति।यदापरस्परनिरपेक्षाःपदार्थाः
क्रियायांसमुच्चीयन्तेतदासमुच्चयःयथार्थोयथागामश्वंपुरुषमित्यादौ।वाक्येपरस्परानपेक्षागवादयोनयनक्रिययासंब
ध्यन्ते।तत्रचेनकृतोर्थइत्यवधारणमर्थग्रहणसामर्थ्यादाश्रीयतेचेनैवयःप्रकाशितोर्थस्तत्रद्वन्द्वोगामश्वमित्यत्रतुवि
नापिचेनसमुच्चयावगमान्नासौचेनैवप्रकाशितइत्युच्यते।सामर्थ्येत्वेकक्रियाद्वारकंदध्योदनादिवत्स्यादितिनात्रा

सोयमेवंसिद्धेसतियदर्थग्रहणंकरोतितस्यैतत्प्रयोजनम्।एवंयथाविज्ञायेत।चेनकृतोर्थश्चार्थइति।कः
पुनश्चेनकृतोर्थः।समुच्चयःअन्वाचयइतरेतरयोगःसमाहारइति।समुच्चयेप्लक्षश्चेत्युक्तेगम्यतेएतद्
न्यग्रोधश्चेति।तथान्यग्रोधश्चेत्युक्तेगम्यतेएतत्प्लक्षश्चेति।अन्वाचयेप्लक्षश्चेत्युक्तेगम्यतेएतत्सापे
क्षोयंप्रयुज्यतेइति।इतरेतरयोगेप्लक्षश्चन्यग्रोधश्चेत्युक्तेगम्यतेएतत्प्लक्षोपिन्यग्रोधसहायोन्यग्रोधो
पिप्लक्षसहायइति।प्लक्षश्चन्यग्रोधश्चेत्युक्तेसमाहारेपिक्रियतेप्लक्षन्यग्रोधमिति।तत्रायमप्यर्थः।द्व
न्द्वैकवद्भावोनपठितव्योभवति।समाहारैकत्वादेवसिद्धम्।एकादशद्वादशेतिकोयंसमासः।

सामर्थ्यात्समासपरिहारोवाच्यः।प्लक्षश्चेत्युक्तइति।न्यग्रोधोदृश्यतामित्युपक्रम्ययदाप्लक्षश्चेत्युच्यते।तदान्यग्रोधश्चे
तिगम्यते।यदात्वेकस्यप्राधान्यंतदाइतरस्यतदनुरोधेनक्रियासंबन्धाद्भिन्नकक्ष्यतयानास्तिपरस्परेणसामर्थ्यमिति
अन्वाचयेसमासाभावः।प्रधानाभिधायिपदंचार्थेनवर्ततेऽपित्वप्रधानमेवेतिअनेकस्यपदस्यचार्थेवृत्तित्वाभावाद्द्वन्द्वा-
भावः।इतरेतरयोगःपरस्परापेक्षाणामनेकस्मिन्नर्थेसमन्वयेसतिभवतीतिपरस्परसहितताचशब्देनैवद्योत्यतेइतित राम·
त्रसमासोभवति।समाहारेपीति।तत्रापिपरस्परसहिततावगमात्।द्वन्द्वैकवद्भावइति।युगपदधिकरणवचनतायांद्वन्द्वे ३६९
तुवक्तव्यःस्याद्एकैकस्यानेकार्थत्वात्।नचविषयविभागार्थोसौवक्तव्यःप्रयोगदर्शनाद्विषयविभागस्यसिद्धत्वात्।।

CC-0. In Public Domain. Digitization by eGangotri

दशादिभिरिति।आदिशब्देनविंशत्यादयोगृह्यन्तेविंशत्याद्यर्थएवचायंविचारोदशशब्देनतुद्वन्द्वेनकश्चिद्दोषः।वचनमिति।
द्विवचनंबहुवचनंचेत्यर्थः।सिद्धंत्विति।शाकपार्थिवादित्वात्।शतसहस्रमिति।षष्ठीसमासः।सर्वोहीति।तिष्यपुनर्वस्वोरित्य
त्रबहुवचनग्रहणेनैतज्ज्ञापितम्।लिङ्गमशिष्यमिति।सनपुंसकमितिनकर्तव्यमित्यर्थः॥उपसर्जनम्।परप्रयोगनिवृत्त्य

एकादीनांदशादिभिर्द्वन्द्वः।एकादीनांसहदशादिभिर्द्वन्द्वःसमासः।एकादीनांदशादिभिर्द्वन्द्वइतिचेद्विंशत्या
दिषुवचनप्रसङ्गः।एकादीनांदशादिभिर्द्वन्द्वइतिचेद्विंशत्यादिषुवचनंप्राप्नोति।एकविंशतिः।द्वाविंश
तिः।सिद्धंत्वधिकान्तासंख्यासंख्ययासमानाधिकरणाधिकारेऽधिकलोपश्च।सिद्धमेतत्।कथम्।समाना
धिकरणाधिकारेवक्तव्यम्।अधिकान्तासंख्यासंख्ययासहसमस्यतेऽधिकशब्दस्यचलोपोभवतीति।ए
काधिकाविंशतिःएकविंशतिःद्व्यधिकाविंशतिःद्वाविंशतिः।यदिसमानाधिकरणः।स्वरोनसिध्यति।
यद्धितत्संख्यापूर्वपदंप्रकृतिस्वरंभवतीतिद्वन्द्वइत्येवंतत्। ।किंपुनः
कारणंद्वन्द्वइत्येवंतत्।इहमाभूत्।शतसहस्रमिति।अस्तुतर्हिद्वन्द्वः।ननुचोक्तम्।एकादीनांदशा
दिभिर्द्वन्द्वइतिचेद्विंशत्यादिषुवचनप्रसङ्गइति।नैषदोषः।सर्वोहिद्वन्द्वोविभाषैकवद्भवति।यदातर्ह्ये
कवचनंतदानपुंसकलिङ्गंप्राप्नोति।लिङ्गमशिष्यंलोकाश्रयत्वाल्लिङ्गस्य॥चार्थे॥उपसर्जनंपूर्वम्
॥ ॥किमर्थमिदमुच्यते।उपसर्जनस्यपूर्ववचनंपरप्रयोगनिवृत्त्यर्थम्।उपसर्जनस्यपूर्ववचनं
क्रियतेपरप्रयोगोमाभूदिति।नवानिष्टादर्शनात्।नवाएतत्प्रयोजनमस्ति।किंकारणम्।अनिष्टादर्शनात्।
नहिकिंचिदनिष्टंदृश्यते।नहिकश्चिद्राजपुरुषइतिप्रयोक्तव्येपुरुषराजइतिप्रयुङ्क्ते।यदिचानिष्टंप्रसज्ये
ततोयत्नार्हंस्यात्।अथयत्रद्वेषष्ठ्यन्तेभवतःकस्मात्तत्रप्रधानस्यपूर्वनिपातोनभवति।राज्ञःपुरुषस्यराजपुरुषस्येति।

र्थमिति।वाक्यवत्समासेपदानामनियतेप्रयोगेप्राप्तेनियमार्थमेतदित्यर्थः।नवेति।नित्येषुशब्देषुप्रयोगसंकरेस्थितेगा-
व्यादिप्रयोगनिवारणायेदंशास्त्रम्।इहतुविपर्ययप्रयोगोनैवदृश्यतइतिकिंतन्निवृत्त्यर्थेनयत्नेनेत्यर्थः।इदानीमारब्धे
सूत्रेदोषमुद्भावयति।अथयत्रेति।राज्ञःपुरुषस्येति।द्वयोरपिषष्ठीतिसमासशास्त्रेप्रथमानिर्दिष्टत्वादुपसर्जनत्वात्पूर्वनिपा
तानियमप्रसङ्गः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थाभेदादिति। उपसर्जनसंज्ञान्वर्थत्वादप्रधानस्यैव भवति पुरुषस्यात्र राजापेक्षया प्रधानमेवेति पुरुषार्थो न भिद्यते राजा
पेक्षया न व्यतिरिच्यत इत्यर्थः। न चेदमिति। अबुधभ्रान्तिनिराकरणायाश्रितमेवेत्यर्थः॥ अल्पाच्तरम्॥ किमयमिति। किं तर
बर्थः प्रकर्ष आश्रीयते। अथ स्वार्थे अत एव निपातनात्तरः कृत इति प्रश्नः। द्वयोरिति। प्लक्षन्यग्रोधावित्यादावेव स्यान्न्यग्रो
धशब्दस्याल्पाच्त्वात् तदपेक्षया प्लक्षशब्दस्याल्पाच्तरत्वात्। बहुषु तु सन्निहितेषु द्विवचनोपपदत्वाभावात्तरपोऽनु-
त्पत्तिरिति तत्रानियमप्रसङ्गः। ततश्च शङ्खदुन्दुभिवीणानामित्यत्र दुन्दुभिशब्दस्यापि कदाचित्पूर्वनिपातः स्यात्। अतन्त्रे त

षष्ठ्यन्तयोः समासेऽर्थाभेदात्प्रधानस्यापूर्वनिपातः। षष्ठ्यन्तयोः समासे अर्थाभेदात्प्रधानस्य पूर्वनिपातो न भविष्य
ति। एवं न चेदमकृतं भवति उपसर्जनं पूर्वमिति। अर्थश्चाभिन्न इति कृत्वा प्रधानस्य पूर्वनिपातो न भविष्यति॥ उ
पसर्जनम्॥ अल्पाच्तरम्॥ ॥ किमयं तन्त्रं तरनिर्देशः आहोस्विदतन्त्रम्। किं चातः। यदि तन्त्रं द्वयोर्नियमः। ब
हुषु नियमः। तत्र को दोषः। शङ्खदुन्दुभिवीणानामिति न सिध्यति। दुन्दुभिशब्दस्यापि पूर्वनिपातः प्राप्नोति।
अथातन्त्रं मृदङ्गशङ्खतूणवाः पृथङ्नदन्ति संसदि प्रासादे धनपतिरामकेशवानामित्येतन्न सिध्यति।
यथेच्छसि तथास्तु। अस्तु तावत्तन्त्रम्। ननु चोक्तं द्वयोर्नियमो बहुषु नियम इति। तत्र शङ्खदुन्दुभिवीणाना
मिति न सिध्यति। दुन्दुभिशब्दस्यापि पूर्वनिपातः प्राप्नोतीति नैष दोषः। पदे तदल्पाच्तरमिति तदल्पाजि
ति वक्ष्यामीति। अथवा पुनरस्त्वतन्त्रम्। ननु चोक्तम्। मृदङ्गशङ्खतूणवाः पृथङ्नदन्ति संसदि प्रासादे
धनपतिरामकेशवानामित्येतन्न सिध्यतीति। अतन्त्रे तरनिर्देशे शङ्खतूणवयोर्मृदङ्गेन समासः। अतन्त्रे
तरनिर्देशे शङ्खतूणवयोर्मृदङ्गेन सह समासः करिष्यते।

रपि दुन्दुभिशब्दापेक्षयाल्पाच्त्वसद्भावाच्छङ्खवीणाशब्दयोरन्यतरस्य पूर्वनिपातो भवति न दुन्दुभिशब्दस्येति दोषा
भावः। मृदङ्गशङ्खतूणवा इति। शङ्खशब्दस्याल्पाच्त्वात्पूर्वनिपातः प्राप्नोति। तन्त्रे तु तरपि पूर्वोक्तेन न्यायेन बहुषु नियमा पाम:
देतद्रूपं सिध्यति। पदे तदिति। तन्त्रे दोषप्रसङ्गात्। प्रयोजनाभावाच्च तरनिर्देशो न कर्तव्य इत्यर्थः। अतन्त्रे तु तस्मिंस्तस्य स्वा ३७०
र्थिकत्वज्ञापनमेव तरनिर्देशस्य प्रयोजनम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शङ्खतूणवाविति। नियतद्व्यविवक्षायां जातिपरत्वाभावादेकवद्भावाभावः। तूर्याङ्गाणामित्यपि न भवति। शङ्खस्यातूर्याङ्गत्वादित्येके। तूर्यशिल्पोपजीविन एव तूर्याङ्गत्वेन गृह्यन्ते। तेषां हि मुख्यं तूर्याङ्गत्वमित्यपरे। अथ यत्रेति। यदि जातिपदार्थपक्ष आश्रीयते तदा लक्षणाऽऽवृत्त्यभावादेकस्यैव नियमे सति शेषाणामनियमेन भाव्यम्। अथ व्यक्तिपक्षस्तदा पुनःपुनर्लक्षणप्रवर्तनात्सर्वेषां नियमेन भाव्यमिति मत्वा पृच्छति। उत्तरं तु लक्ष्यदर्शनेन व्याजानाति पक्षाश्रयेण। उदगयनस्थाविति। उत्तरायणस्थौ। लौकिकप्रयोगदर्शनपरमिदम्। मातापितराविति। गर्भधारणादिना पित्रपेक्षया माताऽभ्यर्हिता। श्र-

शङ्खश्च तूणवश्च शङ्खतूणवौ। शङ्खतूणवौ च मृदङ्गश्च मृदङ्गशङ्खतूणवाः। रामश्च केशवश्च रामकेशवौ। रामकेशवौ च धनपतिश्च धनपतिरामकेशवाः। धनपतिरामकेशवानामिति। अथ यत्र बहूनां पूर्वनिपातप्रसङ्गः किं तत्रैकस्य नियमो भवति आहोस्विदविशेषेण। अनेकस्यप्राप्तावेकस्य नियमोऽनियमः शेषेषु। अनेकप्राप्तावेकस्य नियमो भवति शेषेष्वनियमः। पटुमृदुशुक्लाः। पटुशुक्लमृदव इति॥ ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणाम्॥ ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणां पूर्वनिपातो वक्तव्यः। शिशिरवसन्तावुदगयनस्थौ। कृत्तिकारोहिण्यः॥ अभ्यर्हितं च॥ अभ्यर्हितं पूर्वं निपततीति वक्तव्यम्। मातापितरौ। श्रद्धामेधे॥ लघ्वक्षरम्॥ लघ्वक्षरं पूर्वं निपततीति वक्तव्यम्। कुशकाशम्। शरचापम्। अपर आह। सर्वत एवाभ्यर्हितं पूर्वं निपततीति वक्तव्यम्। लघ्वक्षरादपीति। दीक्षातपसी श्रद्धातपसी॥ वर्णानामानुपूर्व्येण॥ वर्णानामानुपूर्व्येण पूर्वनिपातो भवतीति वक्तव्यम्॥ ब्राह्मणक्षत्रियविट्शूद्राः॥ भ्रातुश्च ज्यायसः॥ भ्रातुश्च ज्यायसः पूर्वनिपातो भवतीति वक्तव्यम्। युधिष्ठिरार्जुनौ॥ संख्याया अल्पीयसः॥ संख्याया अल्पीयसः पूर्वनिपातो भवतीति वक्तव्यम्। एकादश द्वादश॥ धर्मादिषूभयम्॥ धर्मादिषूभयं पूर्वं निपततीति वक्तव्यम्। धर्मार्थौ अर्थधर्मौ। कामार्थौ अर्थकामौ। गुणवृद्धी वृद्धिगुणौ। आद्यन्तौ अन्तादी॥ अल्पाच्तरम्॥

द्धामेधे इति। सत्यां श्रद्धायामर्थक्रियाकारिणी मेधेति श्रद्धाया अभ्यर्हितत्वम्। लघ्वक्षरादपीति। पूर्वविप्रतिषेधेन। दीक्षातपसी इति। दीक्षार्थं तपश्चरणमिति दीक्षाया अभ्यर्हितत्वं स्वरूपेण वा। वर्णानामिति। वेददर्शनाश्रयणोत्पत्तिक्रमेण वर्णानामानुपूर्व्यम्। अल्पीयस इति। अर्थस्य वाचिका या इति शेषः। एतच्च द्वन्द्वाद्द्वन्द्वविषयमित्याहुः। द्व्येकयोरिति तु सौत्रो निर्देशः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

सप्तमी॥विश्वदेव इति। यद्यपि विश्वस्य विशेष्यत्वं तदेदमुदाहरणम्। विशेषणत्वे तु सूत्रेणैव सिद्धः पूर्वनिपातः। द्विपुत्र इति। दिक्प्रदर्शनमेतत्। अत्र हि विशेषणत्वादेव सिद्धः संख्यायाः पूर्वनिपातस्तस्माद्द्विशुक्ल इत्याद्युदाहरणम्। परत्वात्संख्याया इति। शब्दपरविप्रतिषेधात्। एवमर्थमेव च संख्यासर्वनाम्नोरिति न कृतम्॥ निष्ठा॥ प्रतिषेधे त्विति। अकृतमितप्रतिप

सप्तमीविशेषणे बहुव्रीहौ॥ ॥बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानम्॥ बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानं कर्तव्यम्। विश्वदेवः विश्वयशाः द्विपुत्रः द्विभार्यः। अथ यत्र संख्यासर्वनाम्नोरेव बहुव्रीहिः कस्य तत्र पूर्वनिपातेन भवितव्यम्। परत्वात्संख्यायाः। द्व्यन्याय त्र्यन्याय॥ वा प्रियस्य॥ वा प्रियस्य पूर्वनिपातो भवतीति वक्तव्यम्। प्रियगुडः गुडप्रियः॥ सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनम्॥ सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परा सप्तमी भवतीति वक्तव्यम्। गडुकण्ठः गडुशिराः॥ सप्तमीवि॥ निष्ठा॥ ॥निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनम्॥ निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परा निष्ठा भवतीति वक्तव्यम्। शार्ङ्गजग्धी। पलाण्डुभक्षिती। मासजाता। संवत्सरजाता। सुखजाता दुःखजाता। न वोत्तरपदस्यान्तोदात्तवचनं ज्ञापकं परभावस्य। न वा वक्तव्यम्। किं कारणम्। उत्तरपदस्यान्तोदात्तवचनं ज्ञापकं परभावस्य। यदयं जातिकालसुखादिभ्यः परस्या निष्ठाया उत्तरपदस्यान्तोदात्तत्वं शास्ति तज्ज्ञापयत्याचार्यः परा त्र निष्ठा भवतीति। प्रतिषेधे तु पूर्वनिपातप्रसङ्गस्तस्माद्राजदन्तादिषु पाठः। प्रतिषेधे तु पूर्वनिपातः प्राप्नोति अकृतमितप्रतिपन्ना इति। तस्माद्राजदन्तादिषु पाठः कर्तव्यः। न वा कर्तव्यः। अत्रापि प्रतिषेधवचनं ज्ञापकं परा निष्ठा भवतीति॥ प्रहरणार्थेभ्यश्च॥ प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भवत इति वक्तव्यम्। अस्युद्यतः मुसलोद्यतः असिपाणिः दण्डपाणिः॥ द्वन्द्वे घ्यजाद्यदन्तं विप्रतिषेधेन॥ द्वन्द्वे घीत्यस्मादजाद्यदन्तमित्येतद्भवति विप्रतिषेधेन। द्वन्द्वे घीत्यस्यावकाशः। पटुगुप्तौ। अजाद्यदन्तमित्यस्यावकाशः उष्ट्रखरौ। इहोभयं प्राप्नोति। इन्द्राग्नी। अजाद्यदन्तमित्येतद्भवति विप्रतिषेधेन। उभाभ्यामल्पाच्तरम्। उभाभ्यामल्पाच्तरमित्येतद्भवति विप्रतिषेधेन।

न्ना इति क्तादीनामन्तोदात्तत्वप्रतिषेधादन्तोदात्तविधानाज्ज्ञापितः परनिपातोपि न स्यादित्यर्थः। न वेति। उत्तरपदान्तोदात्तत्वे प्रसक्ते प्रतिषेधः क्रियते। यदि च परनिपातस्ततस्तत्प्रसङ्गो नान्यथा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कडाराः॥ बहुवचननिर्देशादिति। कडारशब्दस्यैकत्वादेकवचने कर्तव्ये साहचर्यादारोपितकडारत्वरूपगडुलादिशब्दगतबहुत्वापेक्षो बहुवचननिर्देशो यथा छत्रिणो यान्तीति॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे द्वितीयस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्॥ द्वितीयपादः समाप्तः॥ अनभिहिते॥ प्रत्याख्यानवादी स्ववाचानभिहितशब्दार्थमारम्भवादिनं संजल्पयितुमिच्छति। किमिदमिति। अभिपूर्वस्य वहधातेर्बन्धनोच्चारणप्रतिपादनेषु वर्तते। अश्वाभिधानीमादत्त इत्यत्र बन्धनवृत्तिः। अभिहितः श्लोक इत्युच्चारणवृत्तिः। अभिहितोर्थ इति प्रतिपादनवृत्तिः। हिनोतेरपि गतिवृद्ध्यर्थस्याभिहितमिति भवति तत्र वक्ष्यमाणानां कर्मादीनां बन्धनाद्यर्थचतुष्टयासंभवात्प्रतिपादनवचन एवाभिहितशब्द आश्रयणीयस्ततः प्रयोजनाभावादनर्थकं सूत्रमिति भावः। पूर्वोक्तेनाभिप्रायेणाह। उक्तमिति। प्रतिपादितमित्यर्थः। यथोक्तार्थानामप्रयोग इति।

इन्द्रे घीत्यस्यावकाशः। पटुगुप्तौ। अल्पाच्तरमित्यस्यावकाशः। वाग्दृषदौ। इहोभयं प्राप्नोति वाग्नी। अल्पाच्तरमित्येतद्भवति विप्रतिषेधेन। अजाद्यदन्तमित्यस्यावकाशः। उष्ट्रखरौ। अल्पाच्तरमित्यस्यावकाशः। वाग्दृषदौ। इहोभयं प्राप्नोति वागिन्द्रौ। अल्पाच्तरमित्येतद्भवति विप्रतिषेधेन॥ कडाराः कर्मधारये॥ ॥कडारादय इति वक्तव्यम्। इहापि यथा स्यात्। गडुलशाण्डिल्यः शाण्डिल्यगडुलः। खण्डवात्स्यः वात्स्यखण्डः। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। बहुवचननिर्देशात्। कडारादय इति विज्ञास्यते॥ ॥इति श्रीमहाभाष्ये भगवत्पतञ्जलिविरचिते द्वितीयस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्॥ पादश्च समाप्तः॥ अनभिहिते॥ ॥अनभिहित इत्युच्यते। किमिदमनभिहितं नाम। उक्तं निर्दिष्टमभिहितमित्यनर्थान्तरम्। यावद्ब्रूयादनुक्ते अनिर्दिष्ट इति तावदनभिहित इति॥ अनभिहितवचनमनर्थकमन्यत्रापि विहितस्याभावादभिहिते॥ अनभिहितवचनमनर्थकम्। किं कारणम्। अन्यत्रापि विहितस्याभावादभिहिते॥

यावद्ब्रूयादिति॥ यावत्तावच्छब्दौ निपातावभिन्नार्थत्वं प्रतिपादयतः अनभिहितवचनमिति। अर्थप्रत्यायनाय लोके शब्दः प्रयुज्यते स चार्थो यदा शब्दान्तरेण प्रतिपादितो भवति तदा प्रयोजनाभावाच्छब्दान्तरस्य प्रयोगेण न भाव्यम्। अक्षिनिकोचादिभिरप्यवगतेर्थे शब्दो न प्रयुज्यते किं पुनः शब्दान्तरप्रतिपादितेर्थे। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·वै यञञ्भ्यामिति। यञन्तेभ्यो ञन्तेभ्यश्चेत्यर्थः। यञञोस्तु लुप्तत्वादर्थाभिधानं न संभवति। न्याय्योत्पत्तिरिति। उत्सर्गः पूर्वाचार्यैः २३१
३७२ सिद्धान्त्याप्युच्यते। बहुवचनोदाहरणम्। गार्ग्यौ गार्ग्याः। वित्सञ्जय इत्येव परत्वे प्रत्यासत्तेर्बाधकत्वादेकवचनाभावात्। बहुवचने
तु यञञोर्लुप्तत्वाद्विरोधकाभावादुक्तार्थाश्रयेणैवात्रोत्पत्तिः प्रतिपाद्यते सप्तपर्णादिति। वीप्सायां विषये द्विर्वचनमुच्यते। अ
लिचेत्पर्वणि सप्त सप्त पर्णान्यस्येति समासेन तु पूर्वस्य प्रयुक्तिस्वाभाव्याद्वीप्सायागमितत्वाद्द्विर्वचनाभावः। आरम्भवादीह
शान्ते शब्दस्य साध्यत्वेऽपि प्रतिपादयितुमाह। यत्तावदिति। न चात्रास्तीनेति। वर्तिपदयोरन्यपदार्थ उपसंक्रान्तत्वादस्त्यर्थे

अन्यत्राप्यभिहितेऽपि विहितं न भवति। क्वान्यत्र। चित्रगुः शबलगुः बहुव्रीहिणोक्तत्वान्मत्वर्थस्य मत्वर्थीयो न
भवति। गर्गाः वत्साः बिदाः उर्वाः यञञ्भ्यामुक्तत्वादपत्यार्थस्य न्याय्योत्पत्तिर्न भवति। सप्तपर्णोऽष्टापद इति।
समासेनोक्तत्वाद्वीप्सायां द्विर्वचनं न भवतीति। यत्तावदुच्यते चित्रगुः शबलगुरिति। बहुव्रीहिणोक्तत्वान्म
त्वर्थस्य मत्वर्थीयो न भवतीति। अस्तिसामानाधिकरण्ये मतुब्विधीयते। न चात्रास्तिना सामानाधिकरण्यम्। यद
प्युच्यते गर्गाः वत्साः बिदाः उर्वा इति। यञञ्भ्यामुक्तत्वादपत्यार्थस्य न्याय्योत्पत्तिर्न भवतीति। समर्थानां प्रथ
माद्वेति वर्तते। न चैतत्समर्थानां प्रथमम्। किं तर्हि। द्वितीयमर्थमुपसंक्रान्तम्। यदप्युच्यते सप्तपर्णोऽष्टा
पद इति। समासेनोक्तत्वाद्वीप्सायां द्विर्वचनं न भवतीति। यदत्र वीप्सायुक्तं नादः प्रयुज्यते। किं पुनस्तत्। पर्वणि
पर्वणि सप्त पर्णान्यस्य। पदे पदे अष्टौ पदानीति। अथ बहुजकस्तु तर्हि। अथ मा भिनत्ति छिनत्ति। अभि
क्तत्वात्कर्तृत्वस्य कर्तरि प्रत्ययो न भवति।

स्यत्रैवान्तर्भूतत्वात्स्वार्थस्य संसृष्टत्वादस्तिसामानाधिकरण्याभावः। यदा त्वन्यपदार्थेन तद्वत्ता प्रतिपिपादयिषिता
तदा चित्रगुमानिति भवत्येव। न चैतदिति। समर्थानां प्रथमादित्यधिकारादपत्यवद्वाचिनः षष्ठ्यन्तात्प्रत्ययेन भाव्यं न त्व
पत्यवाचिनः। यञञोस्तु लुकि कृते प्रकृतिरेवापत्यार्थाभिधायिनीति अणं न भवतीत्यर्थः। पदत्रेति। वीप्स्यमानार्थाभिधा राम:
यिनः पदस्य द्विर्वचनं विधीयते पर्वार्थस्य वीप्सायोगो न चात्र पर्वशब्दस्य प्रयोगः। अभिमोक्तत्वादिति। भावकर्मकर्तारो ३७२
विकरणार्था इति। पूर्वाचार्यदर्शनमाश्रित्यैवमुक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्राप्यन्यथासिद्धिमाह। नन्विति। ततश्चोक्तत्वस्य दृष्टान्ताभावादहेतुत्वम्। नानादेशत्वादिति। विरोधो बाधकारणं न विशे
षविधानमेव। वार्त्तिककारस्य चेदं दर्शनम्। भाष्यकारस्तु विरोधाभावेपि विशेषविधानमात्रेणैव बाधकत्वमन्यत्रावोचत्।

तक्रदानं च दधिदानस्य विरोधाभावेपि लोके बाधकं दृश्यते। तदेवं श्रमादिदृष्टान्तावष्टम्भेन हेतुत्वमुक्तत्वस्यास्था
पितम्। इदानीमारम्भवादीपक्षान्तरमाश्रयिष्यामीति पृच्छति। किंपुनरिति। आहोस्विदन्यत्रेति। अपूर्वो ह्यावित्यभिहितेपि प्रत्य
येन हि त्वेद्विशब्दस्य प्रयोगदर्शनात् श्रमादिभिरहितेप्यवादिनिवृत्त्यर्थः कर्तव्यः सन्नक्रियत इत्यर्थः। प्रत्याख्यानवाद्याह। इ
हाकर्तव्य इति। अपूर्वो ह्यावित्यादौ तु गतार्थस्यापि द्विशब्दस्य लोके प्रयोगो दृश्यते। अन्यस्य तु गतार्थस्य प्रयोगाभावः प्रयो

बह्वच्। बहुकृतं बहु भिन्नमिति। बहुचोक्तत्वादीषदसमाप्तेः कल्पबादयो न भवन्ति। अकच्। उच्चकैः नीचकैरिति।
अकचोक्तत्वात्कुत्सादीनां कादयो न भवन्ति। ननु चाश्रमम्। बहुजकचोपवादास्ते अपवादत्वाद्बाधका भविष्यन्ति। श्र
मः बहुजकस्तु नानादेशत्वादुत्सर्गाप्रतिषेधः। समानदेशैरपवादैरुत्सर्गाणां बाधनं भवति। नानादेशत्वान्न प्रा-
प्नोति। किंपुनरिहाकर्तव्यो नभिहिताधिकारः क्रियते। आहोस्विदन्यत्र कर्तव्यो न क्रियते। इहाकर्तव्यः क्रिय
ते। एष एव हि न्याय्यः पक्षः यदभिहिते विहितं न स्यात्। अनभिहितस्तु विभक्त्यर्थस्तस्मादनभिहितवचनम्।

जनाभावादेव सिद्धः। इदानीमेकत्वादीनां विभक्त्यर्थत्वमाश्रित्य सूत्रं समर्थयितुमाह। अनभिहित इति। कर्मणि द्वितीयेत्यादे
र्बहुषु बहुवचनमित्यादिनैकवाक्यता। तत्र पदैकत्वादीनि विशेषणानि कर्मादीनि विशेष्याणि एकस्य यत्कर्म तत्र द्वितीयैक
वचनमिति तदा कर्म द्वितीयार्थः संपद्यते। तच्च यदा कृदादिभिरभिहितं भवति तदा गतार्थत्वाद् द्वितीयायाः प्राप्तिरेव नास्तीति
नार्थो नभिहिताधिकारेण। यदा तु कर्मादीनां विशेषणत्वमेकत्वादीनां विशेष्यत्वं कर्मण्येकत्वादित्यत्र द्वितीयेति तदेकत्वाद
यो विभक्त्यर्थाः संपद्यन्ते। ते चाभिहितेष्वपि कृदादिभिः कर्मादिष्वनभिहिता इति तदभिधानाय द्वितीयादीनां प्रसङ्गे तन्निवारणा
यकर्तव्यो नभिहिताधिकारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कौ॰ कर्मणि द्वितीयेत्यादौ कर्मादीनां श्रुतत्वात्तेषामेव विभक्त्यर्थत्वेन भाव्यमिति मत्वा पृच्छति। कः पुनरिति। एकत्वादय इति। क २३१
३७३ र्मणि द्वितीयेत्यादि सप्तमीनिर्देशः। एकत्वाद्यपेक्षः कर्मणि यदेकत्वादि तत्र द्वितीयेति न त्वभिधेयप्रतिपादनाय। निमित्तत्वाये
ति। कर्माद्याश्रितानामेकत्वादीनामपि विभक्त्यर्थत्वे पारंपर्येण कर्मादीनां निमित्तभावो स्त्येवेत्यभिप्रायेणैतदुक्तम्। अभिहि
त इति। यदा वक्ष्यमाणानां कर्मादीनां विभक्त्यर्थत्वं तदा प्रातिपदिकार्थेनापि प्रथमार्थेन भाव्यं तस्य च प्रातिपदिकेनैवोक्तत्वा
द्वृक्षद्वत्यादौ प्रथमा न प्राप्नोति। एकत्वादीनां विभक्त्यर्थत्वे तदभिधानाय प्रथमा प्रवर्तत एवेति दोषाभावः। प्रत्याख्यानवा-
द्याह। नक्वचिदिति। वचनसामर्थ्यात्प्रातिपदिकेनोक्तेपि तदर्थे प्रथमा भविष्यति। द्वितीयादयस्त्वनभिहिते कर्मादौ स्यावका

कः पुनर्विभक्त्यर्थः। एकत्वादयो विभक्त्यर्थाः तेष्वनभिहितेषु कर्मादयो भिहिता विभक्तीनामुत्पत्तौ निमित्तत्वाय
मा भूवन्निति तस्मादनभिहितवचनम्। तस्मादनभिहिताधिकारः क्रियते। अवश्यं चैतदेवं विज्ञेयम्। एक
त्वादयो विभक्त्यर्था इति। अभिहिते हि प्रथमाभावः। यो हि मन्यते कर्मादयो विभक्त्यर्थाः तेष्वनभिहितेषु साम
र्थ्यान्मे विभक्तीनामुत्पत्तिर्न भविष्यतीति प्रथमा तस्य न प्राप्नोति। क्व। वृक्षः। प्लक्षः। किं कारणम्। प्रातिपदिकेनोक्तः
प्रातिपदिकार्थ इति। न क्वचित्प्रातिपदिकेनानुक्तः प्रातिपदिकार्थः। उच्यते च प्रथमा सा वचनाद्भविष्यति। त
वैव तु खल्वेष दोषः। यस्य त एकत्वादयो विभक्त्यर्थाः। अभिहिते प्रथमाभाव इति प्रथमा तेन प्राप्नोति। क्व। पचत्यो
दनं देवदत्त इति। किं कारणम्। तिङोक्ता एकत्वादय इति। अनभिहिताधिकारं च त्वं करोषि परिगणनं च न क्व
चित्तिङा एकत्वादीनामनभिधानम्। उच्यते च प्रथमा सा वचनाद्भविष्यति। ननु चेहानभिधानं वृक्षः प्लक्ष इति
। अत्राप्यभिधानमस्ति। कथम्।

णत्वादभिहिते न भविष्यन्ति। तिङोक्ता इति। अनभिहिते कत्वाद्यभिधानाय तत्र विभक्तिविधानम्। पचतीति च कर्तुरेकत्वं तिङाभि
हितमिति प्रथमा न स्यादित्यर्थः। परिगणनं चेति। तिङ्कृत्तद्धितसमासैरित्येतत्। अत्र च तिङास्त्येकत्वस्याभिधानमिति प्रथमा राम:
या अप्रसङ्गः। आरम्भवाद्याह। न क्वचिदिति। सर्वत्र च पदमपेक्षितक्रियापदमेव प्रयुज्यते। उच्यते चेति। प्रातिपदिकार्थसूत्रेणेत्यर्थः। ३७३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवन्तीपरइति।लट्परइत्यर्थः।ततश्चवृक्षइत्यत्रापितिङैकत्वस्याभिधानादनवकाशत्वात्तिङाभिहितेप्येकत्वादौप्रथमा
भवति।एवमारम्भवादीस्वपक्षेदोषंपरिहृत्यपक्षेतमुद्भावयतितत्रैवेति।भीष्ममिति।भीष्मादिविशेषविशिष्टस्यकटस्यक
रोतिक्रियेप्सिततमत्वात्कर्मत्वंतच्चकटशब्दादुत्पन्नयाद्वितीययाभिहितमितिभीष्मादिभ्योद्वितीयायाअप्रसङ्गात्प्रथमाप्रा
प्नोति।आरम्भवादिनस्तुपरिगणनान्नकटशब्दादुत्पन्नयाद्वितीययाभिहितेऽपिकर्मणिभीष्मादिभ्योद्वितीयासिध्यतीतिनदोषः।——
कर्मविशेषइति।भीष्मादियुक्तकटसंबन्धिकर्मत्वंप्रतिपाद्यम्।तत्रचयथाकटशब्देनभीष्मत्वादीनामनभिधानात्तद-
भिधानायभीष्मादिशब्दप्रयोगःतथाद्वितीयापितेभ्योभविष्यति।नह्यन्यथातद्विशिष्टत्वंकटस्यप्रत्याययितुंशक्यते।
अथवेति।यद्यत्करोतिक्रिययाप्तुमिष्टतमंतत्सर्वंकर्मद्रव्यंगुणश्च।नह्यसौकटमात्रेणसंतुष्यतितत्रकरोतिक्रियायांए

वमस्यत्येतद्‌अस्तिर्भवन्तीपरःप्रथमपुरुषोप्रयुज्यमानोप्यस्तीति।वृक्षः।प्लक्षः।अस्तीतिगम्यते।तत्रैवतुखल्वे
षदोषः।यस्यतेकर्मादयोविभक्त्यर्थाः।अभिहितेप्रथमाभावइति।प्रथमात्वेप्राप्नोति।।कटंकरोति।भीष्ममु
दारंशोभनंदर्शनीयमिति।कटशब्दादुत्पद्यमानयाद्वितीययाभिहितंकर्मेतिकृत्वाभीष्मादिभ्योद्वितीयानप्रा
प्नोति।कातर्हिप्राप्नोति।प्रथमा।तद्यथा।कृतःकटोभीष्मउदारःशोभनोदर्शनीयइति।करोतेरुत्पद्यमानेनक्ते
नाभिहितंकर्मेतिकृत्वाभीष्मादिभ्योद्वितीयानभवति।कातर्हि।प्रथमाभवति।नैषदोषः।नहिसमानाभिहिता
धिकारोस्ति।नापिपरिगणनम्।सामर्थ्यान्मेविभक्तीनामुत्पत्तिर्भविष्यति।अस्तिचसामर्थ्यम्।किम्।कर्मविशे
षोवक्तव्यः।अथवाकटेपिकर्मभीष्मादयोपि।तत्रकर्मणीत्येवसिद्धम्।अथवाकटएवकर्मतत्सामानाधिकर
ण्याद्भीष्मादिभ्योद्वितीयाभविष्यति।

थकृत्सर्वेषांकर्मत्वेप्रत्येकंद्वितीयोत्पत्तिःपश्चात्त्वेकवाक्यतयाविशेषणविशेष्यभावः।यद्यपिगुणद्रव्ययोःकरोतिनासंब
न्धस्तथापितमपूरुत्याप्रकर्षस्याश्रितत्वाद्द्रव्यस्येवक्रियान्तरउपयोक्ष्यमाणत्वादीप्सितमत्त्वात्तस्यैवकर्मसंज्ञानगु
णस्येतिमत्वाह।अथवेति।तत्सामानाधिकरण्यादिति।भीष्मादीनांस्वयमकर्मत्वेपिविशेष्यसंबन्धिन्येवविभक्त्याभाव्य
म्।तदेकयोगक्षेमत्वात्।केवलानांचप्रातिपदिकानांपरश्चेतिनियमादप्रयोगार्हत्वात्।ततोयथेश्वरसुहृदःस्वयंनिर्द्ध-
नाअपितदीयेनधनेनतत्फलभाजःएवंगुणाअपि। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ क्तप्रत्ययेनद्वितीयायाएवधर्म्मंदर्शयतिअस्तिखल्वपीति।अनवयवेनेति।साकल्येनासर्वमिति।भीष्मादिगुणगतमपीत्यर्थः २३१
३७५ कटस्यमिति।प्रातिपदिकार्थगतायाएवसंख्याःप्रकृतेर्वाचिकाद्वितीयेत्यर्थः।नकर्मविशेषइति।भीष्मादिगुणगतंकर्मत्वमभिधातुंनशक्य
मित्यर्थः।एवंयुक्त्याप्रत्याख्यानवादीस्वपक्षेदोषंपरिहृत्यपरपक्षेदूषणमाह।तवैवेति।एषदोषइति।वक्ष्यमाणः।प्राति
पदिकेनोक्तादृत्य नभिहितेकत्वाद्यभिधानायतवविभक्तिविधानंतान्निचैकादिभिरेवोक्तानीति प्रथमायाप्राप्तिः।आ
रम्भवादीपरस्यतुल्यदोषतामाह।कर्मादिष्वपीति।यस्यापिकर्मादयोविभक्त्यर्थास्तेनाप्येकवाक्यतावहुषुबहुवचनमित्या
देःकर्मणिद्वितीयेत्यादीनांचाभ्युपगन्तव्या।गुणप्रधानभावएवतुतस्यविपरीतस्तत्रप्रातिपदिकार्थगतैकत्वादिविशिष्टेक

अस्तिखल्वपिविशेषः।कटंकरोतिभीष्ममुदारंदर्शनीयंशोभनमितिच।कृतःकटःभीष्मउदारःशोभनोदर्श
नीयइतिच।करोतेरुत्पद्यमानःक्तःअनवयवेनसर्वंकर्माभिधत्ते।कटशब्दात्तुनरुत्पद्यमानयाद्वितीयया
यत् कटस्थंकर्मतत्शक्यमभिधातुंनकर्मविशेषः।तवैवतुखल्वेषदोषः।यस्यतेएकत्वादयोविभक्त्यर्थाः
अभिहितेप्रथमाऽभावइति।प्रथमातेनप्राप्नोति।एकोद्वौबहवइति।किंकारणम्।प्रातिपदिकेनोक्ताए
कत्वादयइति।कर्मादिष्वपिवैविभक्त्यर्थेषुअवश्यमेकत्वादयोनिमित्तत्वेनोपादेयाः।कर्मणएकत्वेकर्मणो
द्वित्वेकर्मणोबहुत्वइति।नचैकत्वादीनामेकत्वादयःसन्ति।अथसन्तिममापिसन्ति।तेष्वनभिहितेषुप्र–
माभविष्यति।

र्मणिद्वितीयेत्येवमादिर्वाक्यार्थस्तस्यसंपद्यते।कर्मणएकत्वेइति।नन्वेकत्वादीनांविशेषणत्वमभिधानीयंक
र्मादीनांचविशेष्यत्वंतत्रकस्मात्कर्मणोविशेषणत्वंप्रतिपाद्यते।नैषदोषः।प्रातिपदिकार्थस्यैकत्वेसतितद्विशि
ष्टस्यकर्मणोवाचिकाद्वितीयेत्ययमत्रार्थोविवक्षितः ततश्चप्रातिपदिकार्थव्यतिरेकेणान्येषामेकत्वादीनांविशेष
णीभूतानामभावादेकइत्यादौभवतोपिप्रथमानस्यादित्यर्थः।अथसन्तीति। व्यतिरिक्तानीत्यर्थः।तदुक्तंहरिणा। राम:
निमित्तमेकइत्यत्रविभक्त्यानाभिधीयते।तद्गतस्तुपदेकत्वंविभक्तिस्तत्रवर्ततइति।यथाशतमित्यत्रप्रवृत्तिनिमि ३७५
त्तंशतसंख्यान्या।अन्याचविभक्तिवाच्याप्रातिपदिकार्थगतैकत्वसंख्या।तथैकइत्यत्रापिप्रवृत्तिनिमित्तविभक्तिवाच्येद्वेएकत्वे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवं प्रागुक्तयाश्रयेणैकत्वादिभेदेनैव समाधायाभेदपक्षेपि समाधातुमाह। अथवेति। गुणोपसर्जनं द्रव्यं प्रातिपदिकेनाभिधीयते। द्रव्योपसर्जनस्तु गुणो विभक्त्यर्थः। यथा शुक्लमिति गुणोपसर्जनद्रव्याभिधायिनः शुक्लशब्दात् द्रव्योपसर्जने तस्मिन्नेव गुणे भावप्रत्ययः। यत्तस्योत्सा विति।। यस्मिन्नेव द्रव्ये स्थित एकत्वादिगुणस्तस्य द्रव्यस्यानुक्ता एकत्वादयः प्राधान्येनेति भावः। संख्येयमविशेषितमिति। केवलस्य प्रातिपदिकस्य प्रयोगाभावात्प्रथमायाश्चाभावे एकादिशब्दानुच्चारणात्। एवं युक्त्या प्रथमोत्पत्तिं प्रतिपाद्य वचनेन प्रतिपादयितुमाह। अथवेति। समयादिति। परश्चेत्यस्मात्प्रत्ययपरैव प्रकृतिः प्र

अथवा उभयवचना ह्येते द्रव्यं चाहुर्गुणं च यत्तस्योत्सा गुणः तस्यानुक्ता एकत्वादय इति कृत्वा प्रथमा भविष्यति। अथवा संख्या नामेयं परप्रधाना संख्येयमनया विशेष्यम्। यदि चात्र प्रथमा न स्यात्। संख्येयमविशेषितं स्यात्। अथवा वक्ष्यति तत्र वचनग्रहणस्य प्रयोजनमुक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यादिति। अथवा समयाद्भविष्यति। यदि सामर्थिकी ननियोगतः। अन्याः कस्मान्न भवन्ति कर्मादीनामभावात्। षष्ठी न हि प्राप्नोति शेषलक्षणा षष्ठी। अशेषत्वान्न भविष्यति। एवमप्यतिकरः प्राप्नोति। एकस्मिन्नपि द्विवचनबहुवचने प्राप्नुतः द्वयोरप्येकवचनबहुवचने प्राप्नुतः बहुष्वप्येकवचनद्विवचने प्राप्नुतः। अर्थतो व्यवस्था भविष्यति। परिगणनं कर्तव्यम्। तिङ्कृत्तद्धितसमासैः परिसंख्यानम्। तिङ्कृत्तद्धितसमासैः परिसंख्यानं कर्तव्यम्। तिङ्। क्रियते कटः। तिङ्। कृत्। कृतः कटः। कृत्।

योक्तव्या न केवलेत्येवंरूपादित्यर्थः। कर्मादीनामिति। कर्मण्येव द्वितीयेत्येवं द्वितीयादीनां नियतत्वात्। षष्ठी न हीति। कर्माद्यभावः शेष इति भावः। अशेषत्वादिति। प्रातिपदिकार्थस्य प्रथमाविधावुपयोगात्तस्य चाव्यतिरिक्तस्येह सद्भावात्। अर्थतो व्यवस्थेति सामर्थ्यादित्यर्थः। एक इत्यत्रैकमेवैकत्वं तच्च प्रातिपदिकेनाभिहितमित्यप्राप्ता प्रथमा समयवशेन प्राप्यते न त्रययाः समयपश्चपालिनो भवत्येकत्वानुगुणं चान्यत्र तदभिधाने दृष्टसामर्थ्यं वचनं भवति। तथा कर्तव्यमित्य र्थः। तदेवं संख्या विभक्त्यर्थ इति दर्शनाश्रयेण सूत्रं स्थापितम्।

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ औपगवइति। अपत्यापत्यवत्संबन्धस्य तद्धितेनोक्तत्वात् षष्ठी न भवति। चित्रगुरिति। समासेन स्वस्वामिसंबन्धस्याभिधा २३१
३०५ नात् षष्ठ्यभावः। उत्सर्गे इति। अनभिहितइति सामान्येनोच्यमानइत्यर्थः। यत्र बहूनि प्रातिपदिकानि समानाधिकरणानि-
विवक्षितानि तत्रैकयोगक्षेमत्वादेकत उत्पन्नया द्वितीयया सर्वप्रातिपदिकार्थगतं कर्मत्वमभिहितमित्यन्येभ्यो द्वितीया न
स्यात्। परिगणनमन्तरेणाप्येतं दोषं परिहर्तुं इच्छति। कानहीति। अनभिहितइति पर्युदासे प्रसज्यप्रतिषेधे च दोषं दर्शना
त निराकरणाय दोषोद्भावनं कर्तुमाह द्वयोरिति। प्रासादआस्तइत्यत्र सदिक्रियाया आसिक्रियायाश्चैकमधिकरणं प्रासादः

तद्धितः औपगवः कापटवः। तद्धितः। समासः। चित्रगुः शबलगुः। समासः। उत्सर्गे हि प्रातिपदिकसामानाधि
करण्ये विभक्तिवचनम्। उत्सर्गे हि प्रातिपदिकसमानाधिकरण्ये विभक्तिर्वक्तव्या। क्व। कटं करोति। भीष्म
मुदारं शोभनं दर्शनीयमिति। कटशब्दादुत्पद्यमानया द्वितीययाभिहितं कर्मेति कृत्वा भीष्मादिभ्यो द्विती
या न प्राप्नोति। का नर्हि स्यात्। षष्ठी शेषलक्षणा षष्ठी अशेषत्वान्न भविष्यति। अन्या अपि न प्राप्नुवन्ति। किं कार
णम्। कर्मादीनामभावात्। समयश्च कृतः। न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्ययइति। न चान्या उ
त्पद्यमाना एतमभिसंबन्धमुत्सहन्ते वक्तुमिति कृत्वा द्वितीया भविष्यति। अथवा कटोपि कर्म भीष्मादयोपि
तत्र कर्मणीत्येव सिद्धम्। अथवा कटएव कर्म न तत्सामानाधिकरण्याद्भीष्मादि——भ्यो द्वितीया भविष्यति। त
स्मान्नार्थः परिगणेन। द्वयोः क्रिययोः कारके न्यतरेणाभिहिते विभक्त्यभावप्रसङ्गः। द्वयोः क्रिययोः कारके
न्यतरेणाभिहिते ति विभक्तिर्न प्राप्नोति। क्व। प्रासादे आस्ते शयने आस्त इति। किं कारणम्। सदिप्रत्ययेनाभि
हितमधिकरणमिति कृत्वा सप्तमी न प्राप्नोति।

रव्यम्। तच्चान्यतरेण सदिप्रत्ययेन घञाभिहितमित्यहितेनेति सप्तमी न प्राप्नोति। अभिहितादन्यत्रेत्यत्रापि पक्षेभिहित
त्वादधिकरणस्याभिहितादन्यत्वं नास्तीति न प्राप्नोति। द्रव्यं च कारकं मन्यते। तद्व्यतिरेकेण शक्तिसद्भावे प्रमाणाभावात्। नन्त राम॰
वस्तत्वसंद्रव्यव्यतिरिक्तस्वरूपपरिच्छेदि समुपजायते। द्रव्यस्वरूपातिरेकेण शक्तिरूपानुपलम्भात्। प्रत्यक्षाप्रवृत्तौ च त ३०५
त्पूर्वकस्यानुमानस्यापि शक्तिसद्भावावेदने नास्ति प्रवृत्तिः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यवद्व्यस्वरूपायत्तमेवेतिकार्यव्यतिरेकादपिनास्तिप्राप्तिसद्भावावगमः।पर्युदासंप्राप्तिसाधनपक्षंचाश्रित्याह।नवेति।
प्रसज्यप्रतिषेधवाद्याहकुतोनुखल्विति।पर्युदासमाश्रित्याह।अनभिहितेहीति।पर्युदासेपिदूषणमाह।यद्यपितावदिति।
आसनआस्तइत्यत्रैकैवासनक्रियातस्याश्चाधिकरणंल्युटाभिहितमितिसप्तम्याअप्राप्तिरित्यर्थः।अत्राप्यन्यत्वमिति।भि-
न्नपदप्रत्याय्येभिन्नेआसनक्रियेइत्यर्थः।एकपदोपात्तेक्रियासाधनसंबन्धेअनेनविभक्तयोनिवार्यन्तेनतुवाक्योपात्ते।
आस्तिःसाधनमिति।आसनमित्यत्रयासिक्रियातस्याआसिक्रियासाधनंकथमितिचेत्।उच्यते।आस्यतेस्मिन्नित्यासनमु-

नवान्यतरेणानभिधानात्।नवाएषदोषः।किंकारणम्।अन्यतरेणानभिधानात्।अन्यतरेणात्रानभिधानंल्युडादि
प्रत्ययेनाभिधानम्।आस्तिप्रत्ययेनानभिधानम्।यतोऽनभिधानंतदाश्रयासप्तमीभविष्यति।कुतोनुखल्वे
तत्सत्यभिधानेचानभिधानेचानभिहिताश्रयासप्तमीभविष्यति।नपुनरभिहिताश्रयःप्रतिषेधइति।अ
नभिहितेहिविधानम्।अनभिहितेसप्तमीविधीयते।नाभिहितेप्रतिषेधः।यद्यपितावदत्रैतच्छक्यनेव
कुंयत्रान्याचान्याचक्रिया।यत्रतुखलुसैवक्रियातत्रकथम्।आसनेआस्तेशयनेशेतइति।अत्राप्यन्य
त्वमस्ति।कुतःसाधनभेदात्कालभेदाच्च।एकस्यात्रासेरासिःसाधनम्।सर्वकालश्चप्रत्ययः।अपरस्यबा
ह्यंसाधनम्।वर्तमानकालश्चप्रत्ययः।

च्यते।यदिचासनक्रियास्तेसंनिधीयतेननस्तदपेक्षंतदासनमुच्यते।एवंसामर्थ्यादासेरास्तिःकर्तीभवति।नन्वेवंस-
त्यासनमित्यत्रयाआसिक्रियासाअन्यस्याआसिक्रियायाःसाधनंभवति।नत्वस्याअन्या।एवंतर्ह्यर्थान्तरेस्यग्रन्थस्य
तात्पर्यम्।नदयमत्रपरमार्थः।आसनशयनकरणापादानसंप्रदानादिशब्दैरासनादिक्रियायोग्यवस्तुमात्रमनुद्भूत
प्राक्रिकमभिधीयतेतत्रप्रवृत्तयुद्भवप्रतिपादनायविभक्तिरवश्योत्पाद्यातत्तश्चास्तिःसाधनमितिसाधनान्तरनिरासः
क्रियते।प्राङ्व्युत्पन्नयेकेवलमात्रासिक्रियोपादीयतइत्यर्थः।सर्वकालश्चप्रत्ययइति।कालविशेषानुपादानेन
ल्युटोविधानात्।बाह्यमिति।देवदत्तादिकमित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ ३०६ किंपुनरिति। यदि द्रव्यं साधनं तदा तदेकमेव तत्राभिहितमिति पूर्वोक्तपरिहारो न संगच्छते। अथ शक्तिः साधनं तदा तस्या भेदादभिहितत्वानभिहितत्वसंभवाद्भवति समाधानमिति मन्वानस्य प्रश्नः। आश्रितत्वाच्छक्तिरेवात्र गुणशब्देन विवक्षिता। स एवं पृच्छति किंपुनरिति। गुण इत्याहेति। अयं भावः। यदि द्रव्यं साधनं स्यात् तदा तस्यैकरूपत्वात्तं निबन्धना बाधितप्रत्यभिज्ञाविषयत्वान्नानार्थक्रियाकरणनिबन्धनो व्यपदेशभेदो न स्यात् दृश्यते चासावितिनानाशक्तिसद्भावावगमः सिद्धः। सूत्रं प्रत्याख्यातुमाह। अनभिहितवचनमिति। क्रियते कटः कृतः कट इत्यादिषु द्वितीयादिनिवारणायानभिहिता

किंपुनर्द्रव्यं साधनम्। आहोस्विद्गुणः। किं चातः। यदि द्रव्यं साधनं नैतदन्यद्भवत्यभिहितात्। अथ हि गुणः साधनं भवत्येतदन्यदभिहितात्। अन्यो हि स दि गुणः। अन्यश्चासि गुणः। किंपुनः साधनं न्याय्यम्। गुण इत्याह। कथं ज्ञायते। एवं हि कश्चित्कंचित्पृच्छति क्व देवदत्त इति। स तस्मा आचष्टे असौ वृक्ष इति। कतरस्मिन्। यस्तिष्ठतीति। स वृक्षोऽधिकरणं भूत्वान्येन शब्देनाभिसंबध्यमानः कर्ता संपद्यते। द्रव्ये पुनः साधने सति यत्कर्म कर्मैव स्यात्। यत्करणं करणमेव। यदधिकरणमधिकरणमेव। अनभिहितवचनमनर्थकं प्रथमाविधानस्यानवकाशत्वात्। अनभिहितवचनमनर्थकम्। किं कारणम्। प्रथमाविधानस्यानवकाशत्वात्। अनवकाशा प्रथमा सा वचनाद्भविष्यति। सावकाशा प्रथमा। कोऽवकाशः। अकारकम्। वृक्षः प्लक्ष इति। अवकाशोऽकारकमिति चेन्नास्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति। अवकाशोऽकारकमिति चेत्तन्न। किं कारणम्। अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यते। वृक्षः प्लक्षः अस्तीति गम्यते।

धिकारः क्रियते। यदि चात्र द्वितीयादयः स्युस्ततः प्रथमा निरवकाशैव स्यात्। तस्मादनवकाशत्वात्प्रथमैव द्वितीयादीनां बाधिका भविष्यतीति नार्थोऽनभिहिताधिकारेणेत्यर्थः। वृक्ष इति। क्रियापदं न श्रूयत इति विभक्त्यन्तराप्राप्तिं मन्यते। अस्तिर्भवन्तीपर इति। ज्ञानं वस्तुपरं प्रतिपादयितुं शब्दः प्रयुज्यते ज्ञानं च सत्तत इति यदत्र क्रियापदान्तरस्याप्रयोगस्तत्रोत्सर्गतः सत्ताप्रतीतिरित्यस्तीति क्रियापदानुषङ्गान्न कर्तरि तृतीयाप्रसङ्गादनवकाशा प्रथमेत्यर्थः। राम॰ ३०६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विप्रतिषेधादिति। सावकाशत्वमभ्युपगम्येदमुच्यते। षष्ठीति। क्रियाकारकसंबन्धसद्भावात्। अशेषत्वादिति। प्रातिपदि-
कार्थस्य व्यतिरेकाभावात्। कर्तव्यः कट इति। प्रथमां परत्वाद्बाधित्वा कर्तृकर्मणोः कृतीति षष्ठी प्राप्नोतीति तद्बाधना-
र्थोऽनभिहिताधिकारः। कर्मणि॥ समयाग्राममिति। सामीप्यसंबन्धे षष्ठ्यां प्राप्तायां द्वितीयाविधिः। एवं निकषायोगे हाश-
ब्दः शोकादिवृत्तिरिति तद्योगे षष्ठ्येव प्राप्नोति। अभितो ग्राममिति। पर्यभिभ्यां चेति तसिलन्तावभितः परितः शब्दा-

विप्रतिषेधाद्वा प्रथमाभावः। अथवा द्वितीयादयः क्रियन्तां प्रथमा वेति। प्रथमा भविष्यति विप्रतिषेधेन। द्वि-
तीयादीनामवकाशः कटं करोति भीष्ममुदारं शोभनं दर्शनीयमिति। प्रथमाया अवकाशः अकारकं वृक्षः
प्लक्ष इति। इहोभयं प्राप्नोति कृतः कटो भीष्मः उदारः शोभनो दर्शनीय इति प्रथमा भविष्यति विप्रतिषेधे-
न। न सिध्यति। परत्वात्षष्ठी प्राप्नोति। शेषलक्षणा षष्ठी अशेषत्वान्न भविष्यति। कृत्प्रयोगे तु परं विधा-
नं षष्ठ्यास्तत्प्रतिषेधार्थम्। कृत्प्रयोगे तु परत्वात्षष्ठी प्राप्नोति। तत्प्रतिषेधार्थमनभिहिताधिकारः क-
र्तव्यः। कर्तव्यः कट इति। स कथं कर्तव्यः यद्येकत्वादयो विभक्त्यर्थाः अथ हि कर्मादयो विभक्त्यर्थाः
नार्थोऽनभिहिताधिकारेण॥ अनभिहि॥ कर्मणि द्वितीया॥ ॥समयानिकषाहायोगेषूपसंख्यानम्॥ स-
मयानिकषाहायोगेषूपसंख्यानं कर्तव्यम्। समया। समयाग्रामम्। समया। निकषा। निकषाग्रामम्। नि-
कषा। हायोगे। हा देवदत्तं हा यज्ञदत्तम्। अपर आह। द्वितीयाविधानेऽभितः परितः समयानिकषाध्य-
धिधिग्योगेषूपसंख्यानम्॥ द्वितीयाविधाने भितः परितः समयानिकषाऽध्यधिधिग्योगेषूपसंख्या-
नं कर्तव्यम्। अभितो ग्रामम्। अभितः। परितो ग्रामम्। परितः। समयाग्रामम्। समया। निकषाग्रामम्।
निकषा। अध्यधिग्रामम्। अध्यधि। धिग्जाल्मं धिक् वृषलम्। धिक्।

वुभयतः सर्वत इत्यनयोरर्थयोर्वर्तेते तद्योगेऽपि षष्ठ्येव प्राप्नोति। आभिमुख्यवृत्तिरपि विभक्तिप्रतिरूपको निपातोऽभितःश-
ब्दोऽस्ति सोऽपीह गृह्यते तद्योगेऽपि षष्ठी प्राप्नोति। अध्यधिग्राममिति। उपर्यध्यधसः सामीप्य इति द्विर्वचनम् अधिशब्दोऽत्रोप-
र्यर्थे वर्तते इति षष्ठी प्राप्नोति। धिग्जाल्ममिति। धिक्शब्दस्य निन्दार्थत्वात्तद्योगे षष्ठ्याः प्राप्तिः। हा तातेत्यादौ त्वन्तरङ्गत्वा-
त्संबोधनविभक्तिरेव भवति।

CC-0. In Public Domain. Digitization by eGangotri

उभसर्वतसोरिति। उभसर्वयोस्तसाविति षष्ठीसमासः। उभशब्दावयवस्योभयशब्दस्यानुकरणमुभशब्द इत्युभयशब्दो-
गृह्यते द्विवचनटाविषयत्वादुभशब्दस्य तसन्तस्याभावात्। दृश्यत इति। दृशिग्रहणं प्रयोगानुसरणार्थम्। न देवदत्तं प्रती
ति। षष्ठ्यत्र प्राप्नोति। प्रतिशब्दश्चात्र क्रियाविशेषक उपसर्गो न तु कर्मप्रवचनीय इत्युदाहृतं केनचित्। किंचित्सत
मिति दर्शनायानेकस्यत्युपन्यासः॥ तृतीया च॥ किमर्थमिति। अन्तरेणापि येन तत्सूत्रं द्वितीयान्तृतीयासिद्धेरिति प्रश्नः। तृ
तीयेति। देवतोद्देशेनाग्नौ हविःप्रक्षेपो जुहोत्यर्थस्तत्र यवाग्वा द्वितीया प्राप्तेति तृतीया विधीयते। अथ द्वितीयेति।

अपर आह। उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥ उभसर्वद्रत्येताभ्यां तसन्ताभ्यां —— योगे द्वितीया वक्तव्या। उभयतो ग्रामम्। सर्वतो ग्रामम्। धिग्योगे। धिग्जाल्मं धिग्वृषलम्। उपर्यादिषु त्रिष्वाम्रेडितान्तेषु द्वितीया वक्तव्या। उपर्युपरि ग्रामम्। अध्यधि ग्रामम्। अधोधो ग्रामम्। ततोऽन्यत्रापि दृश्यते। न देवदत्तं प्रतिभाति किंचित्। बुभुक्षितं न प्रतिभाति किंचित्॥ कर्मणि द्वि॥ तृतीया च होश्छन्दसि। किमर्थमिदमुच्यते। तृतीया यथा स्यात्। अथ द्वितीया सिद्धा। सिद्धा। कथम्। कर्मणीत्येव। तृतीयापि सिद्धा। कथम्। सुपां सुपो भवन्तीत्येव। असत्यस्मिन्सुपां सुपो भवन्तीति तृतीयार्थोऽयमारम्भः। यद्वयवाग्वाग्निहोत्रं जुहोति। एवं तर्हि तृतीयापि सिद्धा। कथम्। कर्तृकरणयोरित्येव। अयमग्निहोत्रशब्दोऽस्त्येव ज्योतिषि वर्तते। तद्यथा। अग्निहोत्रं प्रज्वलितमिति। अस्ति हविषि वर्तते। तद्यथा। अग्निहोत्रं जुहोतीति। जुहोतिश्चास्त्येव प्रक्षेपणे वर्तते। अस्ति प्रीणात्यर्थे वर्तते। तद्यदा तावद्यवागूशब्दात्तृतीया तदाग्निहोत्रशब्दो ज्योतिषि वर्तते। जुहोतिश्च प्रीणात्यर्थे। तद्यथा। यवाग्वाग्निहोत्रं जुहोति। अग्निं प्रीणाति। यदा यवागूशब्दाद्द्वितीया तदाग्निहोत्रशब्दो हविषि वर्तते जुहोतिश्च प्रक्षेपणे। तद्यथा। यद्वयवागूमग्निहोत्रं जुहोति। यद्वयवागूं हविरग्नौ प्रक्षिपति॥ तृतीया च॥

किमप्राप्ता द्वितीया चकारेण विधीयते। अथ तृतीयया मा बाधीति पक्षे चकारेणाभ्यनुज्ञायत इति प्रश्नः। असत्येतस्मिन्निति। नहि पाणिनेः सूत्रकरणकाले कात्यायनवचनस्य भावः। अग्निहोत्रमिति। अग्निर्ज्वलित इत्यर्थः। अग्निं प्रीणातीति। अग्निषु हूयमानेष्विति। प्रीणात्यर्थे जुहोतेः प्रयोगदर्शनात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तरा॥अन्तरेणगतेनेति।अन्तरशब्दोऽत्रविशेषवाची।विशेषेणज्ञातेनकिंतेप्रयोजनमितिवाक्यार्थः।लक्षणप्रतिपदोक्तयो
रिति।तृतीयान्तोलाक्षणिकोविभक्तिप्रतिरूपकस्तुनिपातःप्रतिपदोक्तः।दृष्टापचारइति।दृष्टव्यभिचारः।अनिपातस्या-
पिभावात्।अन्तराशब्दइति।नन्वन्तराशब्दोऽप्यनिपातआबन्तोऽस्तिअन्तरायांपुरिवसतीतितत्कथमसावदृष्टापचा
रः।एवंतर्हिटाबन्तस्यलाक्षणिकत्वात्स्त्रीत्वापेक्षयावाश्रयत्वाश्रयत्वाद्बहिरङ्गत्वाच्चाग्रहणंमन्यते।अथवाप
रस्परसाहचर्यान्निपातयोर्ग्रहणमितिवाच्यम्।अप्रधानइति।युष्मदस्मदर्थस्यविशेषणत्वादप्राधान्यंकमण्डलोस्तुवि
शेष्यत्वात्प्रधानता।कःपुनरिति।अन्तरान्तरेणशब्दाभ्यामाधेयप्रधानमध्यवचनाभ्यांयुष्मदस्मदर्थस्यैवावधेर्योगो

अन्तरान्तरेणयुक्ते॥ ॥इहकस्मान्नभवतिकिंतेबाभ्रवशालंकायनानामन्तरेणगतेनेति।लक्षणप्रतिप
दोक्तयोःप्रतिपदोक्तस्यैवग्रहणमिति।अथवायद्यपितावदयमन्तरेणशब्दोदृष्टापचारोनिपातश्चानि
पातश्च।अयंतुखल्वन्तराशब्दोऽदृष्टापचारःनिपातएव।तस्यास्यकोन्यःसहायोद्वितीयोभवितुमर्हति
।अन्यदतोनिपातात्।तद्यथा।अस्यगोर्द्वितीयेनार्थइतिगौरेवानीयतेनाश्वोनगर्दभः॥अन्तरान्तरेणयु
क्तानामप्रधानवचनम्॥अन्तरान्तरेणयुक्तानामप्रधानग्रहणंकर्तव्यम्।अप्रधानेद्वितीयाभवतीति
वक्तव्यम्।अन्तरात्वांमांचकमण्डलुरिति।कमण्डलोर्द्वितीयामाभूदिति।कःपुनरेताभ्यांकमण्डलोर्यो
गः।यत्तत्वांचमांचान्तरातत्कमण्डलोःस्थानम्।तत्तर्हिवक्तव्यम्।नवक्तव्यम्।कमण्डलोर्द्वितीयाकस्मा
न्नभवति।उपपदविभक्तेःकारकविभक्तिर्बलीयसीतिप्रथमाभविष्यति॥अन्तरान्तरे॥

नतुकमण्डलोरितिमत्वाप्रश्नः।यत्तदिति।मध्यइत्यर्थेतस्मिन्नर्थेतयोर्वर्तनादवधेरपिताभ्यांयोगोऽस्तिआधारार्थत्वादाधे
यस्यकमण्डलोः।अन्तरातदिति।अत्रभाष्यकारेणमध्यमात्रवचनोन्तराशब्दःप्रयुक्तोनत्वाधाररूपमध्यवाची।अ
न्यथातत्स्थानमितिसामानाधिकरण्यंनस्यात्।कमण्डलुयोगप्रतिपादनायचैवंप्रयोगः।लौकिकेतुप्रयोगेमध्य
इत्युक्तेताधारशक्तिकेमध्येन्तराशब्दोवर्तते।उपपदविभक्तेरिति।अस्तीतिक्रियानुषङ्गात्कमण्डलोःकर्तृत्वंन
च्चतिङऽभिहितमितिप्रथमाकारकविभक्तिःसाचान्तरङ्गाक्रियाकारकयोःसंबन्धस्यान्तरङ्गत्वाद्उपपदार्थेन॥
तुक्रियाद्वारकःसंबन्धइतितन्निमित्ताबहिरङ्गाविभक्तिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· ३७८ कालाध्वनोः॥ पाणिनीयसूत्रन्यासे सतिमासमास्यतेदेवदत्तेनेतिभावएवलादयः स्युर्नतुकर्मणि ततश्चास्यतेमासःआ-
सितोमासः। आसितव्योमासः। स्वासोमासइतिप्रयोगानुपपत्तिरितिवार्त्तिकारम्भः। अत्यन्तसंयोगइति। अनत्यन्तसंयोगेतु
अधिकरणसप्तम्येवभवति। अमावास्यायांयजतइति। लाद्यर्थमिति। आदिशब्देननिष्ठादीनांग्रहणम्। तथाचोदाहृत
मुक्तमितिदेशेनैवचमासमास्तेदेवदत्तइतिद्वितीयायाःसिद्धत्वान्नार्थःसूत्रेणेतिभावः। स्वाश्रयमपीति। यथाब्राह्मण
वदस्मिन् क्षत्रियेवर्तितव्यमितिब्राह्मणकार्याणिक्षत्रियेक्रियन्ते। नतुस्वाश्रयाणिनिवर्त्यन्ते। तद्वदत्रापिकर्मकार्या
ण्यतिदिष्टत्वेनस्वाश्रयाणिनिवर्त्यन्ते। यद्येवमन्तरेणापिवतिंस्वाश्रयाणिकार्याणिभविष्यन्ति। नैतदस्ति। स्वाश्रय

कालाध्वनोरत्यन्तसंयोगे॥ ॥अत्यन्तसंयोगेकर्मवल्लाद्यर्थम्॥ अत्यन्तसंयोगेकालाध्वानौकर्मवद्भव
तइतिवक्तव्यम्। किंप्रयोजनम्। लाद्यर्थम्। लादिभिरभिधानंयथास्यादिति। लादिभिरभिहितेद्वितीयामा
भूत्। आस्यतेमासः शय्यतेक्रोशः। अथवत्करणंकिमर्थम्। स्वाश्रयमपियथास्यात्। आस्यतेमासंश
य्यतेक्रोशम्। अकर्मकाणांभावेलोभवतीतिभावेलोयथास्यात्। नतर्हिवक्तव्यम्। नवक्तव्यम्। प्राकृत
तमेवैतत्कर्म। यथाकटंकरोतिशकटंकरोतीति। एवंमन्यते। यत्रकश्चित्क्रियाकृतोविशेषउपजाय
ते। तन्न्याय्यंकर्मेति। नचेहकश्चित्क्रियाकृतोविशेषउपजायते। नैवंशक्यम्। इहहिदोषःस्यात्। आ
दित्यंपश्यतिहिमवन्तंशृणोतिग्रामंगच्छतीति। तस्मात्प्राकृतमेवैतत्कर्म। यथाकटंकरोतिशकटं-
करोतीति।

कार्येनिवृत्तयेतद्रूपासङ्ग आशङ्क्यते। प्राकृतमेवेति। सकर्मकव्यापनादिधात्वर्थाङ्गे आसनादावास्यादीनांवर्त
नात्स्वाभाविकमेतत्कर्मेत्यर्थः। ततश्चमासमास्तइत्यस्यमासमासनेनव्याप्नोतीत्यर्थः। नियतत्वाच्चप्रयोगस्य
कटआस्तइत्यादौआसनमात्रेनङ्गीकृतक्रियान्तरेआसिर्वर्ततइतिअतिप्रसङ्गोनोद्भावनीयः। किमर्थंतर्हिवार्त्ति राम:
ककारेणातिदेशआरब्धइत्याह। एवंमन्यतइति। यत्रकश्चिदिति। यथाकाण्डानिलुनातीत्यादौ। आदित्यमि ३७८
ति। नहिदर्शनक्रिययादित्येप्रत्यक्षानुमानसमधिगम्यःकश्चिद्विशेषउत्पाद्यते। केवलंदर्शनक्रिययाप्तुमिष्ट
तमत्वादादित्यःकर्मतद्वन्मासमास्तइतिमासोपीत्यर्थः।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचकेचिदिति। यद्यपिक्रियामात्रप्रतिपादने कालादीनामभावात्तदभावनिबन्धनमपिसंभवत्यकर्मकत्वंतथापिधा-
तूनामन्यपदार्थत्वेनाश्रयणात्तेषांप्रयोगान्तरेतदर्थानामेवकालादिसंबन्धदर्शनान्नैरकर्मकत्वासंभवात्सामर्थ्या
द्विशेषाङ्गीकरणमितिद्रव्यकर्मणाकर्मकत्वंविज्ञायतइत्यर्थः। क्वचिदिति। द्रव्यइत्यर्थः। अथवेति। अन्तरङ्गत्वाद्
द्रव्यकर्मणोबहिरङ्गस्यकालादेस्तिरोभावात्तदपेक्षःसकर्मकाकर्मकव्यपदेशोनप्रवर्ततइत्यर्थः। यत्रत्वन्तरङ्ग
स्यासंनिधिस्तत्रकालादिनिमित्तःसकर्मकव्यपदेशोभवत्येवेत्यास्यतेमासइतिकर्मणिलकारोभवति। अथवा
यत्कर्मेति। संभवव्यभिचाराभ्यांविशेषणविशेष्यभावाद् वार्त्तिकंदूषयित्वासूत्रंस्थापयितुमिच्छति। ननुर्हीति। क्रो

यदितर्हिप्राकृतमेवैतत्कर्म। अकर्मकाणांभावेलोभवतीतिभावेलोनप्राप्नोति। आस्यतेमासंदेवदत्तेने
ति। नतर्हिवक्तव्यम्। नवक्तव्यम्। अकर्मकाणामित्युच्यते। नचकेचित्कालभावादिभिरकर्मकास्तएवं
विज्ञास्यामः। क्वचिद्येऽकर्मकाइति। अथवायेनकर्मणासकर्मकाश्चाकर्मकाश्चभवन्तितेनाकर्मका
णाम्। नचैतेनकर्मणा । कश्चिदप्यकर्मकः। अथवायत्कर्मभवतिनचभवतितेनाकर्मकाणाम्। नचैतत्क
र्मक्वचिदपिनभवति। ननुर्हीदानीमिदंसूत्रंवक्तव्यम्। वक्तव्यंच। किंप्रयोजनम्। यत्राक्रिययात्यन्तसंयो
गः तदर्थम्। क्रोशंकुटिलानदी। क्रोशंरमणीयावनराजिः॥ कालाध्वनोः॥ अपवर्गेतृतीया॥ ॥क्रियाप
वर्गइतिवक्तव्यम्॥ साधनापवर्गेमाभूद् मासमधीतोनुवाकोनचानेनगृहीतइति॥ अपवर्गे॥ सप्तमीप
ञ्चम्यौकारकमध्ये॥ ॥क्रियामध्यइतिवक्तव्यम्॥ इहापियथास्यात्। अद्यदेवदत्तोभुक्त्वाद्व्यहाद्भो-
क्ता द्व्यहेभोक्ता। कारकमध्यइतीयत्युच्यमानेइहैवस्यात्।

शंकुटिलेति। गुणेनात्रात्यन्तसंयोगोनतुक्रिययेतिकर्मत्वाभावः॥ अपवर्गे॥ अपवर्गोनिष्ठा। सकदाचित्फलावा
प्तौसत्यांप्रयोजनाभावात्क्रियायाभवतिकदाचिदशक्त्यादिनासाधनानामुपरमाद्भवतीतिवार्त्तिकारम्भः। क्रिया
पवर्गइति। यद्यपिसाधनापवर्गेक्रियापवर्गोस्तितथापिविशेषणोपादानसामर्थ्याद्विशेषआश्रीयतेक्रियायाएवयोप
वर्गोनतुसाधनानामशक्त्यादिनिमित्तस्तत्रेत्यर्थः॥ सप्तमी॥ अद्यदेवदत्तइति। द्रव्यकारकंतत्रात्रैकमेवेतिभेदनि-
बन्धनोमध्यव्यपदेशोनास्तीतिभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कौ· पञ्चेति।लक्ष्यम्।यतश्चेति।प्रदेशात्।ततश्चलक्ष्यप्रदेशयोः कर्मापादानयोर्भेदान्मध्यव्यपदेशसद्भावः।शक्तिः कारक २३९
३७९॥ मितिपक्षाश्रयेणवार्तिकंप्रत्याचष्टे। नान्तरेणसाधनमिति। शक्तिमित्यर्थः।कालभेदभिन्नभुजिक्रियानुमितशक्ति
भेदाश्रयोमध्यव्यपदेशोऽस्त्येवेत्यर्थः॥कर्मप्रवचनीय।यदिसामान्येनकर्मप्रवचनीययुक्तेद्वितीयेति लक्षणंक्रियते

इहस्थोऽयमिष्वासः क्रोशाल्लक्ष्यंविध्यतिक्रोशेनलक्ष्यंविध्यति।पंचविध्यतियतश्चविध्यतितयोरन्त
र्मध्येभवति।तत्तर्हिवक्तव्यम्।नवक्तव्यम्। नान्तरेणसाधनंक्रियायाः प्रवृत्तिर्भवति।क्रियामध्यंचेत्कार
कमध्यमपिभवति।तत्रकारकमध्यइत्येवसिद्धम्॥सप्तमीपञ्चम्यौ॥कर्मप्रवचनीययुक्तेद्वितीया॥
॥कर्मप्रवचनीययुक्तेप्रत्यादिभिश्चलक्षणादिषूपसंख्यानंसप्तमीपञ्चम्योःप्रतिषेधार्थम्॥कर्म
प्रवचनीययुक्तेप्रत्यादिभिश्चलक्षणादिषूपसंख्यानंकर्तव्यम्।वृक्षंपरिविद्योततेविद्युत्। साधुर्दे
वदत्तोमातरंप्रति।साधुर्देवदत्तोमातरंपरि।साधुर्देवदत्तोमातरमनु।किंप्रयोजनम्। सप्तमीपञ्च
म्योःप्रतिषेधार्थम्।सप्तमीपञ्चम्यौमाभूतामिति।साधुनिपुणाभ्यामर्चायांसप्तमीतिसप्तमी।पञ्चम्य
पाङ्परिभिरितिपञ्चमी।तत्रायमप्यर्थः।अप्रतेरितिनवक्तव्यंभवति।तत्तर्हिवक्तव्यम्।नवक्तव्यम्।
उक्तंवा।किमुक्तम्।एकत्रतावदुक्तम्।अप्रतेरिति। इतरत्रापि।यद्यपितावदयंपरिर्दृष्टापचारोवर्ज
नेचावर्जनेच।अयंखल्वपशब्दोऽदृष्टापचारोवर्जनार्थ एव।तस्यकोऽन्योद्वितीयःसहायोभवितु
मर्हतिअन्यदतोवर्जनार्थात्।तद्यथा।अस्यगोर्द्वितीयेनार्थइतिगौरेवानीयतेनाश्वोनगर्दभः॥
कर्मप्रवचनीय॥

तदावृक्षंपरिविद्योततइत्यत्रविशेषविहितत्वात्पञ्चम्यपाङ्परिभिरितिपञ्चमीप्राप्नोति।साधुर्देवदत्तोमातरंप्र राम:
तीत्यत्रचसाधुनिपुणाभ्यामितिपरत्वात्सप्तमीप्राप्नोतितत्राप्रतेरितिवक्तव्यंभवतीतिमत्वाह।प्रत्यादिभिश्चल ३७९
क्षणादिष्विति।ततश्चपुनर्द्वितीयाविधानात्पूर्वोक्तदोषानवतारः।शिष्टंस्पष्टम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्माद॥इह।धिब्रह्मदत्ते पञ्चालाः अधि पञ्चालेषु ब्रह्मदत्त इति स्वस्वामिवाचिनोः पर्यायेण सप्तमी प्राप्यते अन्यतरस्यैव तु प्राप्नोतीति विचारः क्रियते। कथमिति। तत्र पक्षान्तरेणापि भावप्रत्ययमीश्वरशब्दे नैश्वर्यमुच्यते। अथवेश्वर उच्यते अनेनेतीश्वरवचनमैश्वर्यमुच्यते तदा स्वामिनः सप्तमीत्ययमर्थो भवति। यदा यस्येत्यनेन स्वं निर्दिश्यते यस्य संबन्धीश्वर उच्यते तत्र सप्तमीत्युक्तं भवति। कर्तृनिर्देशश्चेदिति। ईशितात्र कर्तृत्वेनाभिमतस्तेन स्वामिनः सप्तमीत्युक्तं भवति। अवचनादिति। एतत्सूत्रारम्भेण विनापीत्यर्थः। आधृतादिति। स्वामिन्याधारे लाः स्थिता इत्यर्थः। ततश्चाधिकरणलक्षणसप्तमीसिद्धेत्यर्थः सप्तमीशौण्डैरिति विकल्पेन समासविधा

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी॥ ॥कथमिदं विज्ञायते। यस्य चैश्वर्यमीश्वरताईश्वरभावस्तस्मात्कर्मप्रवचनीययुक्तादिति। आहोस्विद्यस्य स्वस्येश्वरस्तस्मात्कर्मप्रवचनीययुक्तादिति। कश्चात्र विशेषः। यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेदवचनात्सिद्धम्। यस्य चेश्वरवचनमिति। कर्तृनिर्देशश्चेदन्तरेणावचनं सिद्धम्। अधिब्रह्मदत्ते पञ्चालाः। आधृतास्तेतस्मिन्भवन्ति। सत्यमेवमेतत्। नित्यं परिग्रहीतव्यं परिग्रहीत्रधीनं भवति। प्रथमानुपपत्तिस्तु। प्रथमानोपपद्यते। कुतः पञ्चालेभ्यः। का तर्हि स्यात्। षष्ठीसप्तम्यौ। स्वामीश्वराधिपतिदायादेति। न तत्राधिशब्दः पठ्यते। यद्यपि न पठ्यते। अधिरीश्वरवाची। न तत्र पर्यायवचनानां ग्रहणं भवति। कथं ज्ञायते। पदं यं कस्य चित्पर्यायवचनस्य ग्रहणं करोति। अधिपतिदायादेति। षष्ठी तर्हि प्राप्नोति। शेषलक्षणा षष्ठी अशेषत्वान्न भविष्यति। द्वितीया तर्हि प्राप्नोति। कर्मप्रवचनीययुक्ते द्वितीयेति। सप्तम्योक्तत्वात्तस्यार्थस्य द्वितीया न भविष्यति।

नाद्ब्रह्मदत्ताधीनाइति च भवति। विभक्त्यर्थवृत्तित्वेत्वधेरधिब्रह्मदत्तमिति च भवति। सत्यमिति। अधिकरणं संमन्यते। प्रथमानुपपत्तिस्त्विति। सप्तमीविधानमनर्थकं प्रथमा च स्यान्न प्राप्नोतीति दोषद्वयोपन्यासः। अधिरीश्वरवाचीति स्वामीश्वरेत्यर्थग्रहणात्पर्यायाणामपि ग्रहणं मन्यते। षष्ठी तर्हीति। स्वस्वामिसंबन्धसद्भावात्। अशेषत्वादिति। प्रातिपदिकार्थमात्रनिष्ठत्वाद्व्यतिरेकाभावात्। द्वितीया तर्हीति। अधिरीश्वर इत्यधेः कर्मप्रवचनीयत्वात्। सप्तम्येति। ब्रह्मदत्तशब्दादनेन द्वितीयापवादेन विधीयमानया सप्तम्योभयगतस्य संबन्धस्याभिधानात्पञ्चालशब्दादपि द्वितीया न भवतीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेदिति अधिरीश्वरइत्यत्रेश्वरेणेप्सितव्यस्याप्याक्षेपादीप्सितव्यस्याप्यधिनायोगोस्तीतिभावः। इदानीं
द्वितीयवाक्यं दर्शयितुमाह। स्ववचनादिति। यस्येश्वरवचनमित्यनेनस्वस्यसप्तमीप्रकृतित्वेनवचनात्प्र
तिपादनात्। स्ववचनात्तुसिद्धमित्येतदन्यथाव्याख्यातुमाह। एवंतर्हीति। अधिश्वरइत्यत्रेश्वरग्रहणमप
नीयाधिःस्वइतिवक्तव्यम्। तत्रस्वमेवप्रत्यधिः कर्मप्रवचनीयसंज्ञः। तस्मादेवानेनसप्तमीविधीयते। तेन
स्वामिनंप्रत्यधेः कर्मप्रवचनीयत्वाभावान्नतोद्वितीयायाअभावः। तेनाधिपञ्चालेषुब्रह्मदत्तइतिसिद्धम्। अ

भवेद्यःअधेर्ब्रह्मदत्तस्यचाभिसंबन्धःससप्तम्योक्तःस्यात्। यस्तुखल्वधेःपञ्चालानांचाभिसंब
न्धस्तत्रद्वितीयाप्राप्नोति। स्ववचनात्तुसिद्धम्। अस्तुयस्यस्वस्येश्वरस्तस्मात्कर्मप्रवचनीययुक्तादिति। ए
वमप्यन्तरेणवचनंसिद्धम्। अधिब्रह्मदत्तःपञ्चालेषु। आधृतःसत्तेषुभवति। सत्यमेवंर्तेतत्। नित्यंपरिग्र
हीतापरिग्रहीतव्याधीनोभवति। प्रथमानुपपत्तिस्तु। प्रथमानुनोपपद्यते। कुतः। ब्रह्मदत्तात्। कातर्हि
स्यात्। षष्ठीसप्तम्यौ। स्वामीश्वराधिपतिरित्यादेति। नतत्राधिशब्दःपठ्यते। यद्यपिनपठ्यते। अधिरीश्वरवा
ची। नतत्रपर्यायवचनानांग्रहणंभवति। कथंज्ञायते। पदपंकस्यचित्पर्यायवचनस्यग्रहणंकरोति। अधिप
तिपदायादेति। षष्ठीतर्हिप्राप्नोति। शेषलक्षणाषष्ठी। अशेषत्वान्नभविष्यति। द्वितीयातर्हिप्राप्नोतिक
र्मप्रवचनीययुक्तेद्वितीयेति। सप्तम्योक्तत्वान्नस्याभिसंबन्धस्यद्वितीयानभविष्यति। भवेद्योधेःपञ्चाला
नांचाभिसंबन्धः। ससप्तम्योक्तःस्यात्। यस्तुखल्वधेर्ब्रह्मदत्तस्यचाभिसंबन्धः तत्रद्वितीयाप्राप्नोतिकर्म
प्रवचनीययुक्तेद्वितीयेति। एवंतर्हिस्ववचनात्तुसिद्धमिति। अधिस्स्वंप्रतिकर्मप्रवचनीयसंज्ञोभवतीतिव
क्तव्यम्। एवमपियदाब्रह्मदत्तेधिकरणेसप्तमीतदापञ्चालेभ्योद्वितीयाप्राप्नोति। कथम्। कर्मप्रवचनीय
युक्तेद्वितीयेति। उपपदविभक्तेःकारकविभक्तिर्बलीयसीतिप्रथमाभविष्यति॥ यस्मादधिकम॥

धिब्रह्मदत्तेपञ्चालादित्येनदधिकरणसप्तम्यासिद्धम्। अत्रदोषमुद्भाव्यपरिहरति। एवमपीत्यादिनाभविष्यती ˜ त्यन्ते
नातिष्ठन्तिसन्तिवेतिस्थानादिक्रियापेक्षयापञ्चालानांकर्तृत्वात्कारकविभक्तिःप्रथमेतिभावः। कर्मप्रवचनीयसंज्ञा- सम॰
त्वधिपञ्चालेषुब्रह्मदत्तइत्यत्रचरितार्था। यथाधिकरणत्वंद्वयोरपिस्वस्वामिनोर्दर्शितंतथाधिरीश्वरइतियस्यचेश्वर ३७०
वचनमितिचनकर्तव्यम्। ऐश्वर्यविषयस्य चाधेःक्रियायोगाभावाद्गत्युपसर्गसंज्ञाबाधनार्थापिसंज्ञाविधिर्नोपयुज्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्यर्थ ॥ स्वं रूपमिति वचनात् स्वरूपस्यैव ग्रहणं प्राप्तमित्याह। अध्वन्यर्थग्रहणमिति। तेनाध्वपर्यायेभ्योऽपि चतुर्थीप्रतिषेधो
भविष्यति। द्वितीयातु कर्मणि द्वितीयेति भवति। आ— स्थितप्रतिषेध इति। आस्थित आक्रान्तः सन् यदा पन्था गम्यते तदाऽनध्व-
नीति प्रतिषेधः। यदा तूत्पथेन पन्था आक्रमितुमिष्यते तदा भवत्येव चतुर्थी। किमर्थमिति। अन्तरेणाप्येतत्सूत्रं द्वितीयाच
तुर्थ्यौः सिद्धत्वादिति प्रश्नः। क्रियाग्रहणमपीति। यद्यपि तत्र क्रियाग्रहणं प्रत्याख्यातं तथापि तत्रैव न्यायस्योक्तत्वादुच
नमाश्रित्यास्य सूत्रस्य प्रत्याख्यानं कृतम्। अथवा तत्र न्यायस्मरणार्थमिदमुक्तम्। तत्र यदा गमनस्य संदर्शनादीनां
भेदो विवक्ष्यते तदा संदर्शनादिभिः क्रियाभिराप्यमानत्वात् कर्मणो गमनेनाभिप्रेयमाणस्य संप्रदानत्वाच्चतुर्थी भवति। यदा

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥ ॥ अध्वन्यर्थग्रहणम्। अध्वन्यर्थग्रहणं कर्तव्यम्।
इह मा भूत् पन्थानं गच्छति। वीवधं गच्छतीति। आस्थितप्रतिषेधश्च। आस्थितप्रतिषेधश्चायं वक्तव्यः। यो ह्युत्प
थेन पन्थानं गच्छति पथे गच्छतीत्येव तत्र भवितव्यम्। किमर्थं पुनरिदमुच्यते। चतुर्थी यथा स्यात्। अथ द्विती
या सिद्धा। सिद्धा। कर्मणीत्येव। चतुर्थ्यपि सिद्धा। कथम्। संप्रदान इत्येव। न सिध्यति। कर्मणा यमभिप्रैति स सं
प्रदानमित्युच्यते क्रियया चासौ ग्राममभिप्रैति। कया क्रियया। गमिक्रियया। क्रियाग्रहणमपि तत्र चोद्यते। चे
ष्टायामनध्वनीति। स्त्रियं गच्छत्यजां नयतीत्यतिप्रसङ्गः। चेष्टायामनध्वनीति स्त्रियं गच्छत्यजां नयतीत्यति
प्रसङ्गो भवति। सिद्धं त्वसंप्राप्तवचनात्। सिद्धमेतत्। कथम्। असंप्राप्ते कर्मणि द्वितीयाचतुर्थ्यौ भवत इति
वक्तव्यम्। अध्वनश्चायमनपवादः। एवं चकृत्वा अध्वनीत्येतदपि न वक्तव्यं भवति। संप्राप्तत्वेनत्कर्मा ध्वानं गच्छतीति। गत्यर्थ॥

त्वभेदविवक्षा तदा गमनस्य कर्मत्वाभावाद् ग्रामः कर्मैव भवतीति द्वितीया भवति। भेदाभेदविवक्षा च लौकिकप्रयोगानुसारेण-
नियतविषयेत्यारम्भप्रत्याख्यानयोर्नास्ति फलभेदः। अत एवापवादविषयेऽपि द्वितीयाविधानार्थं चतुर्थीवेति वक्तव्ये द्वि
तीयाग्रहणम्। प्रत्याख्यानेन भिन्नफलत्वाद् व्याख्यानीयम्। इदानीं सूत्रस्यातिव्याप्त्युद्भावनायाह चेष्टायामिति। सिद्धं त्विति।
असंप्राप्तं यद्वस्तु गमनेन संप्रेप्स्यते तस्मिन् कर्मणीत्यर्थः। स्त्रीतु संप्राप्तेति चतुर्थ्यभावः। अजां नयतीत्यत्राप्यजायाः सं
प्रापणाच्चतुर्थ्यभावः। अथवा नयतिर्गत्यर्थ एव न भवति। प्रतीयते ह्यत्र गतिः न ह्यसौ नयतेरर्थः। तस्य प्रापणवाचित्वादित्या
हुः। अध्वनश्चेति। यदा त्वसंप्राप्तोऽध्वा भवति तदा भाव्यमेव चतुर्थ्या अध्वने गच्छतीति प्रागेवोक्तम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ चतुर्थी॥ तादर्थ्य इति। तच्छब्देन कार्यं निर्दिश्यते तस्मा इदं तदर्थमिति समासेन विशिष्टकार्यप्रयोजनं कारणमभिधीय २३१
३०१ ते। तदर्थस्य भावस्तादर्थ्यमिति कार्यकारणसंबन्ध उच्यते। समासकृत्तद्धितेषु भावप्रत्ययेन संबन्धाभिधानमिति व-
चनात्। तत्र द्विष्ठत्वेपि संबन्धस्य यथा षष्ठी विशेषणादेव भवति न विशेष्याद्राज्ञः पुरुष इति तथा चतुर्थी यूपाय दा
र्विति। हेतावितितृतीयापि दारुशब्दान्न भवति। हेतुहेतुमद्भावस्य चतुर्थ्यैव गमितत्वात्प्रातिपदिकार्थव्यतिरेके च हेतुत्व

चतुर्थी संप्रदाने॥ ॥चतुर्थीविधाने तादर्थ्ये उपसंख्यानम्॥ चतुर्थीविधाने तादर्थ्य उपसंख्यानं कर्तव्य
म्। यूपाय दारु कुण्डलाय हिरण्यमिति। किमिदं तादर्थ्यमिति। तदर्थस्य भावः तादर्थ्यम्। तदर्थं पुनः कि
म्। सर्वनाम्नोयं चतुर्थ्यन्तस्यार्थशब्देन सह समासः। कथं चात्र चतुर्थी। अनेनैव। यद्येवमितरेतराश्र
यं भवति। केतरेतराश्रयता। निर्दिष्टोत्तरकालं चतुर्थ्या भवितव्यम्। चतुर्थ्या च निर्देशः। तदेतदितरेत
राश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापय
ति भवति ह्यर्थशब्देन योगे चतुर्थीति। यदयं चतुर्थी तदर्थार्थेति चतुर्थ्यन्तस्यार्थशब्देन सह समासं शास्ति
। न खल्वप्यवश्यं चतुर्थ्यन्तस्यैवार्थशब्देन समासो भवति। किं तर्हि।

तीयायाविधानादिह च प्रातिपदिकार्थव्यतिरेकाभावात्। तस्मादुपकार्ये हि कार्यप्रत्ययम् ध्यते। तदर्थशब्दात्संब
न्धे भावप्रत्ययवद्दृश्यते॥ गम्यमानविभक्तित्वाच्चतुर्थी कार्यवाचिनि॥ गुणोक्ततास्य दातस्मात्कारणं नावगाहते॥ राम:
किमिदमिति। तस्मा इदमिति सत्यां चतुर्थ्यां समासः। सति समासे तदनुवादेन चतुर्थीविधानमितीतरेतराश्र ३०१
यत्वं मत्वा प्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठ्यन्तस्यापीति। संबन्धसामान्यविवक्षायां षष्ठ्यस्त्येव। क्लृपीति। संपत्तिरभूतप्रादुर्भावः उत्पत्तिरिह गृह्यत इति विकाराच्चतुर्थी। विकारस्य प्रकृतिरूपारोपात्सामानाधिकरण्यं यच्च रूपमुपजायते तेन तच्चतुर्थीति प्रकृतेर्न भवति। यदा तु प्रकृतेरपादानविवक्षा तदा विकाराच्चतुर्थी न भवतीति केचिदाहुः। अन्ये तु विरोधाभावात्तत्रापि चतुर्थीमिच्छन्ति॥ नमःस्वस्ति॥ स्वस्तियोग इति। पूर्वविप्रतिषेधार्थं वचनम्। स्वस्ति जाल्मायेति। तत्त्वकथनमिदं जाल्मत्वादाशीर्

षष्ठ्यन्तस्यापि भवति। तद्यथा। गुरोरिदं गुर्वर्थमिति। यदि तादर्थ्ये उपसंख्यानं क्रियते तेनार्थः संप्रदानग्रहणेन। यो ह्युपाध्यायाय गौर्दीयते उपाध्यायार्थः स भवति। तत्र तादर्थ्य इत्येव सिद्धम्। अवश्यं संप्रदानग्रहणं कर्तव्यम्। यान्येन लक्षणेन संप्रदानसंज्ञा तदर्थम्। छात्राय रुचितं छात्राय स्वदितमिति। तत्तर्ह्युपसंख्यानं कर्तव्यम्। न कर्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति भवति तादर्थ्ये चतुर्थीति। यदयं चतुर्थी तदर्थार्थेति चतुर्थ्यन्तस्य तदर्थेन सह समासं शास्ति॥ क्लृपि संपद्यमाने॥ क्लृपि संपद्यमाने चतुर्थी वक्तव्या। मूत्राय कल्पते यवागूः। उच्चाराय यवान्नमिति॥ उत्पातेन ज्ञाप्यमाने॥ उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या। वाताय कपिला विद्युदातपायातिलोहिनी। कृष्णा सर्वविनाशाय दुर्भिक्षाय सिता भवेत्॥ मांसौदनाय व्याहरति मृगः॥ हितयोगे च॥ हितयोगे चतुर्थी वक्तव्या॥ हितमरोचकिने हितमामयाविने॥ चतु॥ नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च॥ स्वस्तियोगे चतुर्थी कुशलार्थैराशिषि वा विधानात्। स्वस्तियोगे चतुर्थी कुशलार्थैराशिषि वा विधानाद्भवति विप्रतिषेधेन। स्वस्तियोगे चतुर्थ्या अवकाशः। स्वस्ति जाल्माय स्वस्ति वृषलाय। कुशलार्थैराशिषि वा विधानस्यावकाशः। अन्ये कुशलार्थाः कुशलं देवदत्तस्य कुशलं देवदत्ताय। इहोभयं प्राप्नोति। स्वस्ति गोभ्यः स्वस्ति ब्राह्मणेभ्य इति। चतुर्थी भवति विप्रतिषेधेन। अलमिति पर्याप्त्यर्थग्रहणम्॥ अलमिति पर्याप्त्यर्थग्रहणं कर्तव्यम्। इह मा भूत्। अलंकुरुते कन्यामिति। अपर आह। अलमिति पर्याप्त्यर्थग्रहणं कर्तव्यम्। इहापि यथा स्यात्। अलं मल्लो मल्लाय प्रभुर्मल्लो मल्लाय प्रभवति मल्लो मल्लायेति॥ नमः॥

भावः। अलमिति। भूषणप्रतिषेधवाचिनोऽलंशब्दस्य निरासार्थं वचनम्। तेनालंकुरुते कन्यामलंरोदनेनेति चतुर्थी न भवति। नन्वत्रोपपदविभक्तेः कारकविभक्तिर्बलीयसीति चतुर्थी न भविष्यतीत्याह। अपर आहेति। सूत्रेऽलंशब्दमपनीय पर्याप्त्यर्थग्रहणं कर्तव्यम्। तेन तत्पर्यायाणामपि ग्रहणं सिध्यति। अन्यथा स्वरूपस्यैव ग्रहणं स्यात्। अथवाऽलमित्यर्थग्रहणं व्याख्येयमित्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ मन्या॥एवंतर्हीति।योगविभागेनप्राणिविषयाविभाषाक्रियते।नत्वाशुनेमन्येनत्वाश्वानंमन्यइति।अप्राणिष्वि- २३१
३८२ त्यनेनत्वप्राणिविषया।नत्वातृणायमन्येनत्वातृणंमन्यइति।इहापीति।आद्येनयोगेनेतिभावः।तदेवंयोगवि
भागेपिदोषदर्शनाद्न्यासान्तराश्रयणेनेष्टंसाधयितुमाह।यदेतदिति।प्रकृष्यकुत्सितग्रहणमिति।यद्वाचि
नश्चतुर्थीविधीयतेततःप्रकर्षेणयदिकुत्साप्रतिपाद्यतेतदाचतुर्थीभवतिनतुसाम्यविवक्षायाम्।तेनप्रतिषेध
युक्तायांकुत्सायांचतुर्थीविधानंसंपद्यते।क्वचित्प्रतिकृष्येतिपाठस्तत्राप्ययमर्थः।तृणादेरपिनिकृष्टत्वंय

मन्यकर्मण्यनादरेविभाषाप्राणिषु॥ ॥अप्राणिष्वित्युच्यते।तत्रेदंनसिध्यति।नत्वाश्वानंमन्येनत्वाशु
नेमन्यइति।एवंतर्हियोगविभागःकरिष्यते।मन्यकर्मण्यनादरेविभाषा।ततःअप्राणिषु।अप्रा-
णिषुच।विभाषेति।इहापितर्हिप्राप्नोति।नत्वाकाकंमन्येनत्वाशुकंमन्यइति।यदेतदप्राणि
ष्वितिएतदनावादिष्वितिवक्ष्यामि।इमेचनावाद्योभविष्यन्ति।नत्वानावंमन्येयावत्तीर्णेननाव्यम्।नत्वान्नं
मन्येयावद्भुक्तंनश्राद्धमिति।अत्रयेषुप्राणिषुनेष्यतेतेनावाद्योभविष्यन्ति।मन्यकर्मणिप्रकृष्यकु
त्सितग्रहणम्।मन्यकर्मणिप्रकृष्यकुत्सितग्रहणंकर्तव्यम्।इहमाभूत्।त्वांतृणंमन्यइति॥मन्यकर्म
॥ ॥इतिश्रीभगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येद्वितीयस्याध्यायस्यतृतीयेपादेप्र
थममाह्निकम्॥कर्तृकरणयोस्तृतीया॥तृतीयाविधानेप्रकृत्यादिभ्यउपसंख्यानम्।तृतीयाविधा
नेप्रकृत्यादिभ्यउपसंख्यानंकर्तव्यम्।प्रकृत्याभिरूपः।प्रकृत्यादर्शनीयः।प्रायेणयाज्ञिकः।प्राये
णवैयाकरणः।

दाप्रतिपिपादयिषितंभवतितदाचतुर्थी।नतुसाम्यविवक्षायाम्।प्रतिकृष्येतिनि कृष्येत्यर्थः।मन्यकर्मण्यनादरउ
पमानेविभाषाप्राणिष्वित्यापिशलिरधीतेस्म॥ ॥इतिश्रीउपाध्यायजैयटपुत्रकैयटकृतेभाष्यप्रदीपेद्वितीयस्या राम:
ध्यायस्यतृतीयेपादेप्रथममाह्निकम्॥कर्तृकरणयोः॥प्रकृत्याभिरूपइति।क्रियापदाश्रवणात्कर्तृकरणयोर ३८२
भावात्षष्ठ्यप्राप्नोति।प्रायेणेति।प्रायशब्दोबह्वर्थवाची।बहवोयाज्ञिकाइत्यर्थः।तत्रप्रथमाप्राप्नोति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोत्रेणेति। प्रथमा षष्ठी वात्र प्राप्नोति। समेनेति। द्वितीया प्राप्नोति। द्विद्रोणेनेति। द्वयोर्द्रोणयोः समाहारो द्विद्रोणम्। पात्रादित्वात्स्त्रीत्वाभावः। अत्रापि द्वितीया प्राप्नोति। पञ्चकेनेति। पञ्च परिमाणमस्य पञ्चकः संघः। तत्र द्वितीया प्राप्ता। पशूनित्यनेनेतत्समानाधिकरणसंघसंबन्धिनोरभेदस्य विवक्षणात्। साहस्रेणेति। सहस्रपरिमाणः संघः साहस्रः। शतमानविंशतिकेत्यण्। पूर्ववदत्र द्वितीया प्राप्तिः। प्रकृतिकृतमिति। गम्यमानापि क्रियाकरणादिव्यपदेशनिमित्तं भवति। यथा प्रविश पिण्डीमित्यत्र इह च करणान्तरव्युदासाय प्रकृतेरेव करणत्वं विवक्षितम्। स्वभावेनायं कृतोभिरूपो न तु वस्त्रालंकरणादिनेत्यर्थः। एषतन्त्रप्राय इति। बाहुल्यमित्यर्थः। तत्राध्ययनस्य करणत्वेन विवक्षितम्। इदमत्रेति। प्रतीयमानत्वादिह द्विद्रोणपञ्चकसाह-

माठरोऽस्मि गोत्रेण। गार्ग्योऽस्मि गोत्रेण। समेन धावति। विषमेण धावति। द्विद्रोणेन धान्यं क्रीणाति। पञ्चकेन पशून् क्रीणाति। साहस्रेणाश्वान् क्रीणाति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। कर्तृकरणयोस्तृतीयेत्येव सिद्धम्। इह तावत्प्रकृत्याभिरूपः प्रकृत्या दर्शनीय इति। प्रकृतिकृतं तस्याभिरूप्यम्। प्रायेण याज्ञिकः प्रायेण वैयाकरण इति। एष तत्र प्रायः। येन तेऽधीयते। माठरोऽस्मि गोत्रेण गार्ग्योऽस्मि गोत्रेणेति। एतेनाहं संज्ञाये। समेन धावति विषमेण धावतीति। इदमत्र प्रयोक्तव्यं सत्प्रयुज्यते समेन पथेति। द्विद्रोणेन धान्यं क्रीणातीति। तादर्थ्यात्ताच्छब्द्यम्। द्विद्रोणार्थम्। द्विद्रोणम्। द्विद्रोणेन हिरण्येन धान्यं क्रीणातीति। पञ्चकेन पशून् क्रीणातीति। अत्रापि तादर्थ्यात्ताच्छब्द्यं पञ्च पश्वर्थः पञ्चकः। पञ्चकेन पशून् क्रीणातीति। साहस्रेणाश्वान् क्रीणातीति। सहस्रपरिमाणं साहस्रम्। साहस्रेण हिरण्येनाश्वान् क्रीणातीति॥ कर्तृकरण॥ सहयुक्तेऽप्रधाने॥ किमुदाहरणम्। तिलैः सह माषान्वपतीति। नैतदस्ति। तिलैर्मिश्रीकृत्य माषा उप्यन्ते। तत्र करण इत्येव सिद्धम्।

स्रशब्दास्तत्क्रयार्थे मूल्ये उपचाराद्वर्तन्त इति करणत्वात्तृतीयासिद्धिः॥ सह॥ किमुदाहरणमिति। सूत्रान्तरेण तृतीयासिद्धिं मत्वा पृच्छति। तिलैः सहेति। अत्र माषा उप्यमानत्वात् प्रधानं कर्म। तिलास्तु तथायुक्तनया वृक्षमूलानीवोपसर्पणेऽप्रधानकर्माणीति द्वितीयायां प्राप्तायां तृतीयाविधिः। तिलैर्मिश्रीकृत्येति। अन्तरङ्गत्वात्पूर्वं मिश्रणक्रियायां तिलाः करणत्वं प्रतिपद्यन्ते पश्चाद्वपनक्रियायां कर्मत्वमिति सिद्धान्तीयेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रेणसहागतइति।पितुरेवात्रगमनक्रियायांशाब्दंकर्तृत्वंनतुपुत्रस्येत्यप्राधान्यात्तृतीयाविधीयते।लादयइति।आदि
शब्देनक्तादीनांग्रहणम्।तत्रैकेनशब्देनभिन्नकक्षत्वाद्गुणप्रधानयोःकर्त्रोरभिधानासंभवात्प्रधानेकार्यसंप्रत्ययात्प्र
धानस्यैवाभिधानंन्याय्यमित्यप्रधानस्यप्रतीयमानगमिक्रियापेक्षकर्तृत्वाश्रयेणतृतीयासिद्धेत्यर्थः।पुत्रेणसहागमन
मिति।ल्युटाकर्तुरनभिहितत्वाद्उभयत्रतृतीयाप्रसङ्गेनियमार्थमिदमप्रधानएवतृतीयाभवतिनतुप्रधानइति।
षष्ठ्यत्रेति।कर्तृकर्मणोःकृतीत्यनेन।साचप्रधानयोरेवकर्तृकर्मणोःप्राधान्यादेवस्मर्यतइत्यप्रधानेकर्तरिनभविष्य
ति।यद्यनुक्तग्रहणमप्रधानकर्तृप्रतिपत्त्यर्थंभेदिकादेवदत्तस्ययज्ञदत्तस्यकाष्ठानामितितदाषष्ठीबाधनायतृतीया

इदंतर्हिपुत्रेणसहागतोदेवदत्तइति।अप्रधानेकर्तरितृतीयायथास्यात्।एतदपिनास्तिप्रयोजनम्।
प्रधानेकर्तरिलादयोभवन्तीतिप्रधानकर्त्तोक्तेनाभिधीयते।यस्मात्प्रधानंसिद्धातत्रकर्तरीत्येवतृतीया।
इदंतर्हिपुत्रेणसहागमनंदेवदत्तस्येति।षष्ठ्यत्रबाधिकाभविष्यति।इदंतर्हि।पुत्रेणसहस्थूलः।पुत्रे
णसहपिङ्गलइति।इदंचाप्युदाहरणंतिलैःसहमाषान्वपतीति।ननुचोक्तंतिलैर्मिश्रीकृत्यमाषाउप्य
न्तेतत्रकरणइत्येवसिद्धमिति।भवेत्सिद्धंयदातिलैर्मिश्रीकृत्योप्येरन्।यदातुखलुकस्यचिन्माषबीजावा
पउपस्थितःतदर्थंचक्षेत्रमुपार्जितंतत्रान्यदपिकिंचिदुप्यते।यदिभविष्यतिभविष्यतीतितदानसिध्य
ति।सहयुक्तेऽप्रधानवचनमनर्थकमुपपदविभक्तेःकारकविभक्तिःबलीयस्त्वादन्यत्रापि।।सहयुक्तेप्र
धानवचनमनर्थकम्।किंकारणम्।उपपदविभक्तेःकारकविभक्तिर्बलीयस्त्वात्।अन्यत्रापिउपपदवि
भक्तेःकारकविभक्तिर्बलीयसीतिप्रथमाभवति।

विधानमत्रापिभवत्येव।पुत्रेणसहस्थूलइति।गुणसंबन्धप्रतिपादनपरत्वादत्रक्रियायाअभावात्पुत्रस्यकर्तृत्वाभावः
।यदिभविष्यतीति।अनेनमिश्रीकरणाभावात्तिलानांकरणत्वाभावमाह।एकक्षेत्रेचवायात्सहयोगःकालभेदेऽपिवि रामः
रुद्धः।सहयुक्तइति।अप्रधानवचनंप्रधाननिवृत्त्यर्थंक्रियतेप्रधानस्यचान्तरङ्गत्वात्कारकविभक्तिर्भविष्यतीतिना- २९३
र्थस्तन्निवृत्त्यर्थेनाप्रधानवचनेनेत्यर्थः।शिष्येणसहोपाध्यायस्यगौरित्यत्रापिगवासंबन्धोऽन्तरङ्गइतिउपाध्यायात्षष्ठ्येव
भविष्यतिनतृतीया। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गाः स्वामी व्रजतीति। अत्रापि व्रजिक्रियायां गवां कर्मत्वात्तन्निबन्धना द्वितीया स्वामीश्वरेति —— प्राप्ते उपपदविभक्ती षष्ठी सप्तम्यौ बाधित्वा प्रवर्तते॥ येनाङ्गविकारः॥ अङ्गशब्दोऽवयववाचित्वेन प्रसिद्धस्ततो येन गुणेनाङ्गस्य विकारो लक्ष्यते ततस्तृतीयेति सूत्रार्थमवगत्याह। इह कस्मादिति। इहैव कस्मान्नेत्यर्थः। अक्षिकाणमिति। कण निमीलने इत्यस्य चौरादिकस्याचि घञि वा रूपम्। काणगुणयोगादभेदोपचाराद्गुणवचनेभ्यो मतुपो लुगिति मतुपो लुग्विधानाद्वाक्षिकाणशब्देनोच्यते। तत्र काणशब्दात्तृतीया प्राप्नोति। काणेन हि गुणेनाक्ष्णो विकारो लक्ष्यते। अक्ष्णा काण इत्यत्र त्वक्षिशब्दान्न प्राप्नोति। अङ्गाद्विकृतादिति। अङ्गवाचिनोऽक्षिपदादेस्तृतीया भवति न काणादेर्गुणवचनादित्यर्थः। एतावत्युच्यमानेऽक्षिकाणमस्येत्यत्राप्यक्षिशब्दान्न प्राप्नोतीत्याह। तद्विकारवत इति। यदि देवदत्तादिरवयवी विकृतेनाङ्गेन विकारवान्प्रका

एवमत्रापि उपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भविष्यति। क्वान्यत्र गाः स्वामी व्रजतीति॥ सहयुक्ते॥ येनाङ्गविकारः॥ इह कस्मान्न भवति। अक्षिकाणमस्येति। अङ्गाद्विकृतात्तद्विकारवतश्चेदङ्गिनो वचनम्। अङ्गाद्विकृतात्तृतीया वक्तव्या तेनैव चेद्विकारेणाङ्गी द्योत्यत इति वक्तव्यम्। तन्न हि वक्तव्यम्। न वक्तव्यम्। अङ्गशब्दोऽयं समुदायशब्दः। येनेति च करणे षा तृतीया। येनावयवेन समुदायोऽङ्गी द्योत्यते तस्मिन्भवितव्यम्। न चैतेनावयवेन समुदायो द्योत्यते॥ येनाङ्ग॥ इत्थंभूतलक्षणे॥ इत्थंभूतलक्षणे तस्य प्रतिषेधः॥ इत्थंभूतलक्षणे तस्य प्रतिषेधो वक्तव्यः। अपि भवान्कमण्डलुपाणिं छात्रमद्राक्षीदिति।

श्यत इत्यर्थः। अङ्गशब्द इति ।आङ्गान्यस्य सन्तीत्यर्शआदित्वादच्प्रत्ययान्तोऽत्राङ्गशब्दो निर्दिष्टः। येनेत्यनेन विकृतमङ्गं निर्दिश्यते। न ह्यविकृतेनाङ्गेनाङ्गिनो विकारो द्योतयितुं शक्यते। न चैतेनेति। अक्षिकाणमस्येत्यत्र काणशब्देनाक्षिसमानाधिकरणेनावयवी नोच्यते किं तर्ह्यवयव एवेत्यर्थः। अवयवश्चात्रावयविना विशेष्यत इति तस्यैव प्राधान्याद्विकारप्रतिपत्तिः॥ इत्थंभूत॥ यदा लक्षणवाची शब्दो लक्ष्यवाचिसमासावयवस्तदा तृतीया मा भूदिति वचनम्। इत्थंभूतलक्षणे तस्येति। लक्ष्यवाचिशब्दस्येत्यर्थः। कमण्डलुपाणिमिति। बहुव्रीहौ कृते कमण्डलुशब्दात्तृतीया प्राप्नोति। न च प्रत्ययलक्षणेनाप्रत्यय इति प्रातिपदिकसंज्ञानिषेधो न ङिसंबुद्ध्योरिति नलोपप्रतिषेधाज्ज्ञापकात्। न च तृतीयायालुक्प्राप्नोति। समासप्रातिपदिकानवयवत्वात्तस्याः कृते समास उत्पादनात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षणेनेति। पृथग्दिनेतितृतीया। तथाह्ययमिति। षष्ठीतत्पुरुषस्योत्तरपदार्थप्रधानत्वात्। इत्थंभूतस्य यल्लक्षणं प्र
धानमप्राप्तोपसर्जनभावं तत्र तृतीया यथा कमण्डलुना छात्रमद्राक्षीदिति। बहुव्रीहौ तु स्वार्थोपसर्जनान्यपदा
र्थाभिधायित्वादुर्निपादानां नास्ति लक्षणस्य प्राधान्यम्॥ संज्ञोऽन्यतरस्याम्॥ मात्रा संजानीत इति। संप्रतिभ्यामन-
ाध्यान इत्यात्मनेपदम्। अन्योगवां स्वामीति। एकस्मिन्वाक्ये सहप्रयोगादस्य न्ययोगो गवामिति मन्यते। नह्य

न वेत्थंभूतस्य लक्षणेनापृथग्भावात्। न वा वक्तव्यम्। किं कारणम्। इत्थंभूतस्य लक्षणेनापृथग्भावात्।
यत्रेत्थंभूतस्य पृथग्भूतं लक्षणं तत्र भवितव्यम्। न चात्रेत्थंभूतस्य पृथग्भूतं लक्षणम्। किं वक्तव्यमेत
त्। न हि। कथमनुच्यमानं गंस्यते। तथा ह्ययं प्राधान्येन लक्षणं प्रतिनिर्दिशति। इत्थंभूतस्य लक्षणमित्थंभूत
लक्षणं तस्मिन्नित्थंभूतलक्षण इति। ———— इत्थंभूत॥ संज्ञोऽन्यतरस्यां कर्मणि॥ संज्ञः
कृत्प्रयोगे षष्ठी विप्रतिषेधेन॥ संज्ञोऽन्यतरस्यां कर्मणीत्येतस्मात्कृद्योगे षष्ठी भवति विप्रतिषेधेन। संज्ञो
ऽन्यतरस्यामित्यस्यावकाशः। मातरं संजानीते मात्रा संजानीते। कृत्प्रयोगे षष्ठ्या अवकाशः। इध्मप्रव्र
श्चनः। पलाशशातनः। इहोभयं प्राप्नोति। मातुः संज्ञाता पितुः संज्ञाता इति। षष्ठी भवति विप्रतिषेधेन
॥ उपपदविभक्तेश्चोपपदविभक्तिः॥ उपपदविभक्तेश्चोपपदविभक्तिर्भवति विप्रतिषेधेन। अन्या
रादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इत्यस्यावकाशः। अन्यो देवदत्तात्। स्वामीश्वराधिपतिदा
यादसाक्षिप्रतिभूप्रसूतैश्चेत्यस्यावकाशः। गोषु स्वामी गवां स्वामी। इहोभयं प्राप्नोति। अन्यो गोषु स्वा
मी अन्यो गवां स्वामी। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्चेत्येतद्भवति विप्रतिषेधेन। नै
ष युक्तो विप्रतिषेधः। न ह्यत्र गावोऽन्ययुक्ताः। कस्तर्हि। स्वामी। एवं तर्हि तुल्यार्थैरतुलोपमाभ्यां तृतीया
न्यतरस्यामित्यस्यावकाशः। तुल्यो देवदत्तस्य। तुल्यो देवदत्तेन। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्चे
त्यस्यावकाशः। स एव। इहोभयं प्राप्नोति। तुल्यो गोभिः स्वामी तुल्यो गवां स्वामी। तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यामित्येतद्भवति विप्र
तिषेधेन। संज्ञोन्य॥

त्र गाव इति। युक्तग्रहणाद्यदपेक्षमन्यत्वं तद्वाचिनः पञ्चमी। न चात्र गवापेक्षमन्यत्वं स्वामिनः प्रतिपाद्यं व्यभिचाराभावात्। किं तर्हि पूर्वस्वाम्यपे- रामः
क्षम्। कस्तर्हि स्वामीति। भूतपूर्वो यः स्वामी सोऽन्ययुक्त इत्यर्थः। तुल्यो गोभिः स्वामीति। गवां यः स्वामी स गोभिर्जाड्यादिना धर्मेण सदृश इत्यर्थे विवक्षायामस्ति गवाप ३८४
दद्वयार्थयोगः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतौ॥ योग्यतामात्रयुक्तोऽनाश्रितव्यापारो योऽर्थो द्रव्यगुणक्रियाविषयो हेतुः। निमित्तेति। असर्वनाम्नोऽपि विधानार्थमत्र सूत्रद्-
वंयपठितं न तु सर्वनाम्नस्तृतीया चेत्यत्र। तत्र प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न भवतोऽन्यास्तु यथादर्शनं भवन्ति। पर्यायो-
पादानं केचित्पर्यायान्तरनिवृत्त्यर्थमिच्छन्ति। अन्ये तूपलक्षणार्थमिच्छन्तः प्रयोजनादिप्रयोगेऽप्येतद्विभक्तिविधा-
नं मन्यन्ते॥ अपादाने॥ ल्यब्लोप इति। यत्र ल्यबन्तस्याप्रयोगेऽप्यर्थो गम्यते तत्र द्वितीयायां प्राप्तायां पञ्चमी विधीयते।
अधिकरणे चेति। ल्यब्लोप इत्यपेक्षते। सप्तम्यपवादोऽत्र पञ्चमी। प्रश्नाख्यानयोश्चेति। विशिष्टे प्रश्नाख्याने गृह्येते। यत्र-

हेतौ॥ निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्॥ निमित्तकारणहेतुषु सर्वाः प्रायेण दृश्यन्त इति वक्तव्यम्
। किं निमित्तं वसति। केन निमित्तेन वसति। कस्मै निमित्ताय वसति। कस्मान्निमित्ताद्वसति। कस्य निमित्तस्य वसति
। कस्मिन्निमित्ते वसति। किं कारणं वसति। केन कारणेन वसति। कस्मै कारणाय वसति। कस्मात्कारणाद्वसति।
कस्य कारणस्य वसति। कस्मिन्कारणे वसति। को हेतुर्वसति। कं हेतुं वसति। केन हेतुना वसति। कस्मै हेतवे वस
ति। कस्माद्धेतोर्वसति। कस्य हेतोर्वसति। कस्मिन्हेतौ वसति। हेतौ॥ अपादाने पञ्चमी॥ पञ्चमीविधाने ल्यब्-
लोपे कर्मण्युपसंख्यानम्। पञ्चमीविधाने ल्यब्लोपे कर्मणि पञ्चम्या उपसंख्यानं कर्तव्यम्। प्रासादमारु-
ह्य प्रेक्षते प्रासादात्प्रेक्षते॥ अधिकरणे च॥ अधिकरणे चोपसंख्यानं कर्तव्यम्। आसने प्रेक्षते शयनात्प्रे-
क्षते। प्रश्नाख्यानयोश्च॥ प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या। कुतो भवान्पाटलिपुत्रात्॥ यतश्चाध्व-
कालनिर्माणम्॥ यतश्चाध्वकालनिर्माणं ततः पञ्चमी वक्तव्या। गवीधुमतः सांकाश्यं चत्वारि यो-
जनानि। कार्तिक्या आग्रहायणी मासे॥ तद्युक्तात्काले सप्तमी॥ तद्युक्तात्काले सप्तमी वक्तव्या। कार्तिक्या
आग्रहायणी मासे॥ अध्वनः प्रथमा च॥ अध्वनः प्रथमा च सप्तमी च वक्तव्या।

लोके पञ्चमी प्रयुज्यते। तेन कस्मायमश्वो देवदत्तस्यायमश्व इत्यादौ पञ्चमी न भवति। कुतो भवानिति। क्रियाया अभावादन-
पादानत्वं मन्यते। यतश्चेति। यदाश्रित्याध्वकालौ परिच्छिद्येते तत्र पञ्चमीत्यर्थः। गवीधुमत इति। गवीधुमन्नाम न-
गरम्। तद्युक्तात्काल इति। कालविषये तेन पञ्चम्यन्तार्थेन योयुक्तो मासादिस्तद्वाचिनः सप्तमीत्यर्थः। अथवा पञ्चमीयुक्तार्था-
त्परे काल इत्यर्थः। अध्वन इति। युक्तादित्यपेक्षते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपक्रामतीति तस्मादिति। दर्शनं चक्षुरिन्द्रियं तेजोरूपं प्राप्य विषयग्राहित्वात्। सादर्देशादपक्रम्य विषयं गच्छतीत्यर्थः। क्षणिकपक्षावष्टम्भेन भेदमाश्रित्याह। अथवान्यान्यप्रादुर्भावादिति। अन्यस्याः अस्य तेजोरूपस्येन्द्रियस्योत्पादादित्यर्थः। भाष्यकारवचनप्रामाण्यादन्यान्यशब्दस्य साधुत्वं द्रष्टव्यम्। इदमत्रेति। प्रतीयमानत्वादर्थस्य शब्दाप्रयोगः। कार्तिक्याः प्रभृतीति। आरभ्येत्यर्थः। भाष्यकारवचनात्प्रभृतीयोगे पञ्चमी। गते मास इति। तन्त्रयस्य च भावेनेति सिद्धा सप्तमी

गवीधुमतः सांकाश्यं चत्वारि योजनानि। गवीधुमतः सांकाश्यं चतुर्षु योजनेषु। तत्रहीदं बहु वक्तव्यम्। न वक्तव्यम्। अपादानमित्येव सिद्धम्। इह तावत्सांकाशकेभ्यः पाटलिपुत्रका अभिनिर्यान्ति ते प्रत्यक्षतेऽपक्रामन्ति तस्माद्दर्शनम्। यद्यपक्रामति किं नात्यन्तायापक्रामति। संततत्वात्। अथवान्यान्यप्रादुर्भावात्। अन्यानि चान्यानि प्रादुर्भवन्ति। प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या। इदमत्र प्रयोक्तव्यम्। सन्न प्रयुज्यते। कुतो भवानागच्छतीति। पाटलीपुत्रादागच्छामीति। यतश्चाध्वकालनिर्माणं तत्र पञ्चमी वक्तव्येति। इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते। गवीधुमतो निःसृत्य सांकाश्यं चत्वारि योजनानि। कार्तिक्या आग्रहायणी मास इति। इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते। कार्तिक्याः प्रभृत्याग्रहायणी मास इति। तद्युक्तात्काले सप्तमी वक्तव्येति। इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते कार्तिक्याः प्रभृति आग्रहायणी गते मास इति। अध्वनः प्रथमा च सप्तमी चेति। इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते। गवीधुमतो निःसृत्य यदा चत्वारि योजनानि गतानि भवन्ति ततः सांकाश्यम्। चतुर्षु योजनेषु गतेषु ततः सांकाश्यमिति। अपादाने॥ अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते॥ अञ्चूत्तरपदग्रहणं किमर्थम्। न दिक्शब्दैर्योगादित्येव सिद्धम्। षष्ठ्यतसर्थप्रत्ययेनेति वक्ष्यति। तस्यायं पुरस्तादपकर्षः॥ अन्यारा॥ षष्ठ्यतसर्थप्रत्ययेन॥ अर्थग्रहणं किमर्थम्।

चत्वारीति। तत्र प्रातिपदिकार्थस्याव्यतिरेकात्सिद्धा प्रथमा॥ अन्यारात्॥ तस्यायमिति। अथ सध्र्यङ् देवदत्तेनेत्यदिक्शब्दार्थमञ्चूत्तरपदग्रहणं कस्मान्न विज्ञायते। उच्यते। दिक्शब्दसाहचर्यादञ्चूत्तरपदस्यापि दिक्शब्दस्यैव ग्रहणं नान्यस्य॥ षष्ठ्यत॥ अर्थग्रहणमिति। अतसशब्दः प्रत्ययत्वं न व्यभिचरतीति प्रत्ययग्रहणादतसशब्दस्तदर्थोपलक्षणं विज्ञास्यत इति प्रश्नः। ॥ रा॰ मः ३९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठ्यतसर्थप्रत्ययेनेति। अतसर्थशब्दस्यार्थस्याश्रयितुमशक्यत्वात्तस्यैतेनात्र पूर्वसूत्रे क्षिप्यत इति रूपसंभवाच्च। प्राग्ग्रामादिति। प्रत्ययग्रहणमधिकं क्रियमाणं श्रूयमाणप्रत्ययग्रहणार्थं विज्ञायत इति लुप्ते स्तात्तौ षष्ठ्यभावः। तत्रान्यतरदिति। एकप्रयोजनत्वात्॥ पृथग्विना॥ अन्यतरस्यांग्रहणेन पक्षे यथाप्राप्ताभ्यनुज्ञानं क्रियते। न चात्र पञ्चमी प्राप्तेति मत्वाह। पृथगादिष्विति। पक्ष इति वाक्यशेषः। न प्रकृतमिति। नशब्दः काकाक्षवद्युक्तः। प्रकृतमेवेत्यर्थः। अनधिकार इति। अन्याराद् इतियो

षष्ठ्यतसर्थप्रत्ययेनेत्युच्यमाने इहैव स्यात्। दक्षिणतो ग्रामस्य उत्तरतो ग्रामस्येति। इह न स्यात्। उपरि ग्रामस्य उपरिष्टाद्ग्रामस्येति। अर्थग्रहणे पुनः क्रियमाणे अतसर्थप्रत्ययेन च सिद्धं भवति। यश्चान्यस्तेन समानार्थः। अथ प्रत्ययग्रहणं किमर्थम्। इह मा भूत्। प्राग्ग्रामात्। प्रत्यग्ग्रामात्। अञ्चूत्तरपदस्याप्येतत्प्रयोजनं युक्तम्। तत्रान्यतरच्छक्यमवक्तुम्॥ षष्ठ्यतसः॥ पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्॥ पृथगादिषु पञ्चमीविधानम्॥ पृथगादिषु पञ्चमी विधेया। पृथग् देवदत्तात्। किमर्थं न प्रकृतं पञ्चमीग्रहणमनुवर्तते। क्व प्रकृतम्॥ अपादाने पञ्चमीति। अनधिकारात्। अनधिकारः सः। ।अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधः। अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधो वक्तव्यः स्यात्। दक्षिणेन ग्रामम्। दक्षिणतो ग्रामस्येति। एवं तर्हि। अन्यतरस्यांग्रहणसामर्थ्यात्पञ्चमी भविष्यति। अस्त्यन्यदन्यतरस्यांग्रहणस्य प्रयोजनम्। किम्। यस्यां नाप्राप्तायां तृतीयारभ्यते सा यथा स्यात्। कस्यां च नाप्राप्तायाम्। अन्ततः षष्ठ्याम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। अपादाने पञ्चमीति। ननु चोक्तमनधिकारात्। अनधिकारः सः। अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेध इति। एवं तर्हि संबन्धमनुवर्तिष्यते।

गात्परेषु नाधिक्रियत इत्यर्थः। एवं तर्हीति। अन्यतरस्यांग्रहणं पक्षे विभक्त्यन्तरप्रापणार्थम्। सव्यवहितामपि पञ्चमीं प्रापयिष्यतीत्यर्थः। अस्त्यन्यदिति। यथाप्राप्तानुज्ञानं हि विकल्पेन कार्यं न तु यस्य कस्यचिदिति भावः। अन्तत इति। अवसानत इत्यर्थः। यत्र ह्यन्या विभक्तिर्न विहिता स शेषत्वात्षष्ठ्या विषयः। यथाप्राप्ताभ्यनुज्ञानं विकल्पेन विधीयते। प्राप्तसंभवे भवेत्षष्ठी सा हि शेषनिबन्धना। संबन्धमिति। अन्यादिग्रहणसंबद्धमित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथोत्सर्गेणेति। पञ्चमी किमुत्तरार्थेनेहार्थापीतिसंदिग्धाषष्ठीद्वितीयाभ्यामसंदिग्धाभ्यां बाध्यतइत्यर्थः॥ दूरान्ति॥ नद्युक्ता
दिति। दूरान्तिकार्थैर्यद्युक्तं यदपेक्षयादूरान्तिकत्वं तद्वाचिनइत्यर्थः। दूराद्ग्रामस्येति। पूर्वसूत्रेणषष्ठ्येवग्रामाद्भवति। दूरादा
वसथादिति। आवसथस्यदूरइत्यर्थः पूर्वसूत्रेणावसथादेः पञ्चम्यपिभवति॥ सप्तम्यधि॥ क्तस्येन्विषयस्येति। इन्नन्तस्ये

अपादानेपञ्चमी। अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते। पञ्चमी। षष्ठ्यतसर्थप्रत्ययेन। अ
न्यारादिभिर्योगेपञ्चमी। एनपाद्वितीया। अन्यारादिभिर्योगेपञ्चमी। पृथग्विनानानाभिस्तृतीयान्यतरस्याम्।
पञ्चमीग्रहणमनुवर्तते। अन्यारादिभिर्योगइतिनिवृत्तम्। अथवामण्डूकप्लुतयोधिकाराः। तद्यथा। मण्डू
काउत्प्लुत्योत्प्लुत्यगच्छन्तितद्वदधिकाराः। अथवाअन्यवचनाच्चकाराकरणात्प्रकृतस्यापवादोविज्ञायते
यथोत्सर्गेणप्रसक्तस्य। अन्यस्याविभक्तेर्वचनाच्चकारस्यानुकर्षणार्थस्याकरणात्प्रकृतायाः पञ्चम्याद्वि
तीयाषष्ठ्योर्बाधिकेभविष्यतः यथोत्सर्गेणप्रसक्तस्यापवादोबाधकोभवति। अथवावक्ष्यत्येतत्। अ
नुवर्तन्तेचनामविधयः नचानुवर्तनादेवभवन्तिकिंतर्हियत्नाद्भवन्तीति। पृथग्विना। दूरान्तिका
र्थेभ्योद्वितीयाच॥ दूरान्तिकार्थेभ्यः पञ्चमीविधानेतद्युक्तात्पञ्चमीप्रतिषेधः॥ दूरान्तिकार्थेभ्यः पञ्च
मीविधानेतद्युक्तात्पञ्चम्याः प्रतिषेधोवक्तव्यः। दूराद्ग्रामस्य॥ नवातत्रापिदर्शनादप्रतिषेधः। अनर्थ
कः प्रतिषेधोप्रतिषेधः। नवातत्रापिदर्शनात्पञ्चम्याः प्रतिषेधोनर्थकः। तत्रापिहिपञ्चमीदृश्यते
। दूरादावसथान्मूत्रं दूरात्पादावसेचनम्। दूराच्चभाव्यं दस्युभ्योदूराच्चकुपितादुरोः॥ दूरान्ति॥ सप्त
म्यधिकरणेच॥ सप्तमीविधानेक्तस्येन्विषयस्यकर्मण्युपसंख्यानम्। सप्तमीविधानेक्तस्येन्विषयस्य
कर्मण्युपसंख्यानंकर्तव्यम्। अधीतीव्याकरणे। परिगणितीयाज्ञिक्येआम्नातीछन्दसि॥

त्यर्थः। अधीति। अधीतमनेनेतीष्टादिभ्यइतीनिः। अत्रव्याकरणस्यकर्मत्वाद्द्वितीयाप्राप्नोति। यथा कृतपूर्वीकटमिति।
ततस्तदपवादः सप्तमीविधीयते। अधिकरणविवक्षयासिद्धेतिचेत्। कर्मविवक्षयाद्वितीयापिस्यादितितन्निवृत्त्यर्थंक
र्तव्यमेववचनम्। समधीतीव्याकरणइतिकालकर्मणोबहिरङ्गत्वादिहाग्रहणात्तसप्तम्यभावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

साध्वसाधुप्रयोगे चेति। साधुनिपुणाभ्यां सप्तम्यां सिद्धायामनर्चार्थमत्र साधुग्रहणम्। तेन तत्त्वकथनेऽपि साधुयोगे सप्तमी भवति। अर्चाग्रहणं तु तत्र निपुणविशेषणार्थमेव। साधुर्भृत्यो राज्ञ इति तु भृत्यापेक्षा षष्ठी न तु साध्वपेक्षेति वाक्यार्थज्ञा आहुः। कारकार्हाणां चेति। कारकशब्दो भावप्रधानः। तेन कारकत्वमर्हन्तीत्यर्थः। ऋद्धेष्विति। ऋद्धा भोजनक्रियामर्हन्तीति कारकार्हाः। लक्ष्यलक्षणभावाविवक्षायामपि यथा स्यादिति वचनम्। तद्विवक्षायामुत्तरसूत्रेण सिद्धत्वात्। मूर्खेष्विति। मूर्खा भोजनानर्हत्वादकारकार्हाः। तद्विपर्यास इति। यदा कारकार्हाणां नास्ति कारकत्वमकारका-

साध्वसाधुप्रयोगे च॥ साध्वसाधुप्रयोगे च सप्तमी वक्तव्या। साधुर्देवदत्तो मातरि। असाधुर्मातुले कृष्णः। असाधुः पितरि। कारकार्हाणां च कारकत्वे॥ कारकार्हाणां च कारकत्वे सप्तमी वक्तव्या। ऋद्धेषु भुञ्जानेषु दरिद्रा आसते। ब्राह्मणेषु तरत्सु वृषला आसते। अकारकार्हाणां चाकारकत्वे॥ अकारकार्हाणां चाकारकत्वे सप्तमी वक्तव्या। मूर्खेष्वासीनेषु ऋद्धा भुञ्जते। वृषलेष्वासीनेषु ब्राह्मणास्तरन्ति॥ तद्विपर्यासे च॥ तद्विपर्यासे च सप्तमी वक्तव्या। ऋद्धेष्वासीनेषु मूर्खा भुञ्जते। ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति॥ निमित्तात्कर्मसंयोगे॥ निमित्तात्कर्मसंयोगे सप्तमी वक्तव्या। चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥ सप्तम्यधि॥ यस्य च भावेन भावलक्षणम्॥ भावलक्षणे सप्तमीविधाने अभावलक्षण उपसंख्यानम्॥ भावलक्षणे सप्तमीविधाने अभावलक्षण उपसंख्यानं कर्तव्यम्। अग्निषु हूयमानेषु गतः। हुतेष्वागतः। गोषु दुह्यमानासु गतः। दुग्धास्वागतः। किं पुनः कारणं न सिध्यति। लक्षणं नाम तद्भवति येन पुनर्लक्ष्यते। सकृच्चासौ कथंचिदग्निषु हूयमानेषु प्रस्थितः हुतेष्वागतः। गोषु दुह्यमानासु प्रस्थितः दुग्धास्वागतः। सिद्धन्तु भावप्रवृत्तौ यस्य भावारम्भवचनात्॥ सिद्धमेतत्। कथम्। यस्य भावप्रवृत्तौ हि तीयो भाव आरभ्यते तत्र सप्तमी वक्तव्या। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु।

र्हाणां चास्ति कारकत्वं तदेत्यर्थः। निमित्तादिति। क्रियाफलमिह निमित्तत्वेन विवक्षितम्। यत्क्रियायाः प्रयोजकं पदार्थः क्रियारम्भस्तत्तो हेतौ विनिवृत्तीयायां प्राप्तायां सप्तमी विधीयते। तस्य निमित्तस्य यदि कर्मणा संयोगः संबन्धः ततो वेतनेन धान्यं लुनातीति सप्तमी न भवति। वेतनस्य धान्येन संयोगाभावात्। यस्य च॥ अभावलक्षण इति भूयोदर्शनाश्रयो हि लक्ष्यलक्षणभावो यथाग्निधूमयोः। इह त्वग्निषु हूयमानेषु प्रस्थित इत्यग्निवहनं प्रस्थानेन सह यदा पुनः पुनर्न दृष्टं तदा न तत्र लक्षणमिति वचनारम्भः। ॥

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ ३८७ सकृदपीति। लक्षणशब्दः क्रियानिमित्तकः। लक्ष्यते अनेनेति लक्षणम्। यच्च निर्ज्ञातकालं हवनादिकमनिर्ज्ञातका-
लस्य सकृदपि कालपरिच्छेदनिमित्तं भवति तत्तस्य लक्षणमित्यर्थः॥ पञ्चमी॥ कृष्णा गवामिति। गोमण्डलात्कृष्णा गोः
पृथक्क्रियत इत्यस्ति विभक्तत्वम्। न चैतदिति। कृष्णाया गोगोत्वेन गोधर्मान्तर्भावात्। विभक्तग्रहणमिति। सर्वत्रैव नि-
र्द्धारणे विभागसद्भावात्पूर्वत्रैव पञ्चमीग्रहणं कुर्यात्। तस्माद्विभक्तग्रहणसामर्थ्यादवधारणमाश्रीयत इत्य-
र्थः॥ साधुनि॥ अप्रत्यादिभिरिति। प्रति पर्यनवः प्रत्यादयः॥ प्रसितो॥ कः प्रसित इति। किं प्रकृष्टः शुक्लः प्रसितः उ

ननु चोक्तं भावलक्षणे सप्तमीविधानेऽभावलक्षण उपसंख्यानमिति। नैष दोषः। न खल्वव्ययं तदेव
लक्षणं भवति ये पुनः पुनर्लक्ष्यते। सकृदपि यन्निमित्तत्वाय कल्प्यते तदपि लक्षणं भवति। तद्यथा।
अपि भवान्कमण्डलुपाणिं छात्रमद्राक्षीदिति। सकृदसौ कमण्डलुपाणिर्दृष्टश्छात्रस्तस्य तदेव लक्षणं
भवति। यस्य च॥ पञ्चमीविभक्ते॥ इह कस्मान्न भवति कृष्णा गवां संपन्नक्षीरतमेति। विभक्त इत्युच्यते। न
चैतद्विभक्तम्। विभक्तमेतत्। गोभ्यः कृष्णा विभज्यते विभक्तमेव यन्नित्यं तत्र भवितव्यम्। न चैतन्नित्यं
विभक्तम्। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। विभक्तग्रहणसामर्थ्यात्। यद्धि यद्विभक्तं
चाविभक्तं च तत्र स्याद्विभक्तग्रहणमनर्थकं स्यात्॥ पञ्चमी॥ साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः॥ अप्र-
त्यादिभिरिति वक्तव्यम्। इहापि यथा स्यात्। साधुर्देवदत्तो मातरं प्रति। मातरं परि। मातरमनु॥ साधु॥ प्रसि-
तोत्सुकाभ्यां तृतीया च॥ प्रसित इत्युच्यते। कः प्रसितो नाम। यस्तत्र नित्यं प्रतिबद्धः। कुत एतत्। सिनोतिर-
यं बध्नात्यर्थे वर्तते बद्ध इवासौ तत्र भवति॥ प्रसितो॥ नक्षत्रे च लुपि॥ इह कस्मान्न भवति। अद्य पुष्यः अद्य मघा
अधिकरण इति वर्तते॥ नक्षत्रे॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्याय-
स्य तृतीयपादे द्वितीयमाह्निकम्॥ ॥

तस्यं ते क्षिनोतेर्वीकारकमिति प्रश्नः। यस्तत्रेति। उत्सुकशब्दसाहचर्यात्तदर्थसदृशोऽर्थो गृह्यते। बद्ध इवेति। मुख्यस्य व्यति-
षङ्गरूपस्य बन्धनस्याभावात्। सादृश्याद्गौणार्थपरिग्रहः॥ नक्षत्रे च॥ अद्य पुष्य इति। पुष्येण युक्तः कालः इत्यणो लुब- राम॰
विशेष इति लुप्। ननु परत्वादत्र प्रथमा भविष्यति। नैतदस्ति। सर्वविभक्त्यपवादोऽयं विज्ञायते। अन्तरङ्गत्वाद्वा प्रातिपदिका- ३८७
र्थमात्र एवेदं विधानं स्यात्॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रातिपदिकार्थ ॥ प्रातिपदिकग्रहणमिति। ङ्याप्प्रातिपदिकाद्विहितानां स्वादीनां प्रकरणमिदं नियमार्थमित्यन्तरेणापि प्रा
तिपदिकग्रहणं प्रातिपदिकार्थ एव प्रथमा भविष्यतीति प्रश्नः। उच्चैरिति। असति प्रातिपदिकग्रहणे ऽव्ययात्प्रथमा न स्यात्।
बहुषु बहुवचनमित्यादिनास्यैकवाक्यतायां संख्यायुक्त एव प्रातिपदिकार्थे स्यात्। । प्रातिपदिकग्रह
णात्तुपन्नात्संख्यारहितेष्वव्ययार्थे प्रथमा सिध्यति। अथवा लिङ्गग्रहणात्तु सर्वत्र प्रथमा सिध्यतीति प्रश्नः। अत एव प्राति
पदिकार्थग्रहणं किमर्थमिति क्वचित्पाठः। अलिङ्गेष्वव्ययार्थे यथा स्यादित्युत्तरम्। प्रातिपदि कार्थश्चेह भाष्यकारेण न वि
चारितः। अन्वयव्यतिरेकाभ्यां यस्य योजात्यादिरर्थः प्रतीतस्तस्य सर्वस्येहाभिमतत्वाद्विचारे प्रयोजनाभावात्। किं पुनरिति।
अव्ययादाप्सुप इति लुग्विधानात्प्रथमायाः श्रवणाभावादिति भावः। पदत्वमिति। प्रत्ययलोपे प्रत्ययलक्षणमिति प्र

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा॥ ॥ प्रातिपदिकग्रहणं किमर्थम्। उच्चैः नीचैरित्यत्रापि
यथा स्यात्। किं पुनरत्र प्रथमया प्रार्थ्यते। पदत्वम्। नैतदस्ति। षष्ठ्यात्र पदत्वं भविष्यति। इदं तर्हि प्रयो
जनम्। ग्रामउच्चैस्तव स्वं ग्रामउच्चैस्ते स्वम्। सपूर्वायाः प्रथमाया विभाषेत्येष विधिर्यथा स्यात्। अथ लिङ्ग
ग्रहणं किमर्थम्। स्त्री पुमान् नपुंसकमित्यत्रापि यथा स्यात्। नैतदस्ति प्रयोजनम्। एष एव चात्रास्ति प्राति
पदिकार्थः।

यमोत्पत्तिनिबन्धनं पदत्वं प्रार्थ्यते तन्निबन्धनं नत्वादिकमित्यर्थः। षष्ठ्यात्रेति। यस्मिन्नर्थे द्वितीयादयो न विहिताः
स शेष इति मन्यते। नन्वसंख्यत्वादव्ययार्थस्य कथं षष्ठी स्यात्। नैष दोषः। एकत्वाद्यर्थनियमे षष्ठ्याः संख्यायामनियमा
त्। प्रत्ययनियमे ऽपि वा तुल्यजातीयापेक्षत्वान्नियमस्यैकत्वादिभिः परस्परस्य व्यावर्तनात्। अथ लिङ्गग्रहणमिति।
सत्वभूतार्थाभिधायीनि यानि प्रातिपदिकानि तेषां लिङ्गमर्थ इति प्रश्नः। मात्रग्रहणात्संबोधने चेति सूत्रारम्भाच्चाधिक
विशेषसद्भावे प्रथमा न स्यादिति मत्वाह। स्त्री पुमानिति। द्रव्यमत्र स्त्रीत्वाद्यधिकमभिधीयते। एष एवेति। यमर्थं प्रातिप
दिकं न व्यभिचरति स प्रातिपदिकार्थः। स्त्रीत्वादिना च विना स्त्र्यादिशब्दानां प्रयोगाभावः। ॥

भा· कै· कुमारीति।विनापिस्त्रीत्वेनकुमारीदेवदत्तेतिकुमारशब्दस्यप्रयोगदर्शनात्स्त्रीत्वंनप्रातिपदिकार्थः।वृक्षः कुण्डमिति।पुं
३९८ नपुंसकोपलक्षणमेतत्।तटस्तटमित्येतदुदाहरणम्।वृक्षकुण्डशब्दयोस्तुपुंनपुंसकत्वेनविनाप्रयोगाभावाल्लिङ्ग-
स्यप्रातिपदिकार्थता।कुण्डशब्दस्तुजीवतिभर्तरिपरेणजातःवर्तमानःपुल्लिङ्ग इतिनपुंसकत्वेनविनापितस्यप्रयोगा
त्।कुण्डीतिचस्त्रियामपिवर्तनात्कुण्डमित्येतदुदाहरणमित्यपरे।जातिरेवात्रप्रातिपदिकार्थोनतुलिङ्गमित्यन्ये
ब्रुवते।अथेति।द्रोणादयःपरिमाणएववर्तन्तइतिप्रातिपदिकार्थग्रहणेनैवप्रथमासिद्धेतिप्रश्नः।द्रोणइति।यदामान
मेयसंबन्धाद्व्रीह्यादौद्रोणादयोवर्तन्तेतदाव्यभिचारान्नास्तिमेयस्यप्रातिपदिकार्थत्वम्।अथवचनग्रहणमिति।अ
र्थकार्यसंभवात्प्रातिपदिकार्थादिवचनात्प्रथमाभविष्यतीतिप्रश्नः।इहेति।प्रथमाविधीयमानत्वात्प्रधानम्।नचगु

इदंतर्हि।कुमारी।वृक्षः।कुण्डमिति।अथपरिमाणग्रहणंकिमर्थम्।द्रोणः खारी आढकमित्यत्रापियथा
स्यात्।अथवचनग्रहणंकिमर्थम्।इहसमुदायेवाक्यपरिसमाप्तिर्दृश्यते।गर्गाःशतंदण्ड्यन्तामिति।
अर्थिनश्चराजानोहिरण्येनभवन्तिनचप्रत्येकंदण्डयन्ति।सत्येतस्मिन्दृष्टान्तेयत्रैतानिसर्वाणिसमु
दितानिभवन्तितत्रैवस्यात्।द्रोणः खारी आढकमिति।इहनस्यात्कुमारी वृक्षः कुण्डमिति।नैतदस्ति
प्रयोजनम्।प्रत्येकमपिवाक्यपरिसमाप्तिर्दृश्यते।तद्यथा।गुणवृद्धिसंज्ञेप्रत्येकंभवतः।इदंतर्हिप्रयो
जनम्।उक्तेष्वप्येकत्वादिषुप्रथमायथास्यात्।एकोद्वौबहवः।अथमात्रग्रहणंकिमर्थम्।एतन्मात्र
एवप्रथमायथास्यात्।कर्मादिविशिष्टेमाभूत्।कटंकरोति।

णभेदेप्रधानस्यभेदोभवतीतियत्रैतत्त्रयंसमुदितंतत्रैवप्रथमास्यात्।वचनग्रहणेतुप्रत्येकंसंबध्यमानेवाक्यत्रयं
संपद्यतइतिनदोषोभवति।प्रत्येकमिति।प्रथमासिद्धैवकेवलंनियमायतदनुवादेनप्रातिपदिकार्थादिभिस्तस्याःसं
बन्धोविधीयतेसचसंबन्धिभेदाद्भिन्नः।अथवान्यायद्वयसंभवेलक्ष्यदर्शनवशात्प्रत्येकंवाक्यपरिसमाप्तिरितिपक्षइ
हाश्रयिष्यतइतिभावः।उक्तेष्वपीति।अनभिहिताधिकाराद्बहुषुबहुवचनमित्यादिनास्यप्रकरणस्यैकवाक्यत्वात्प राम·
रिगणनस्यचप्रत्याख्यानात्वा देकादिभिःशब्दैरेकत्वादीनामभिहितत्वादनभिहिताधिकारस्यप्रत्याख्यानउक्तार्थत्वा ३९८
द्वाप्रथमानस्यात्।वचनग्रहणात्तुभवति।वचनग्रहणस्यपूर्वाचार्यप्रसिध्याश्रयेणसंख्यावाचित्वात्तेनाभिहितेवच
नेप्रथमाभवतीत्यर्थःसंपद्यते। ॥

CC-0. In Public Domain. Digitization by eGangotri

कर्मादिविशिष्ट इति। कर्मण्येव द्वितीयेति प्रत्ययनियमे कर्मादीनामनियमात्तेषु प्रथमा स्यात्। मात्रग्रहणं त्ववधारणार्थं न
भवति। तेन प्रातिपदिकार्थमात्र एव प्रथमा भवति न त्वधिककर्मादिसद्भावे। द्वितीयादय इति। कर्मणि द्वितीयेवेत्यर्थनियम-
आश्रयिष्यत इति भावः। अथवेति। प्रत्ययनियमपक्षेपि दोषाभाव इत्यर्थः। यद्यमिति। यदि प्रातिपदिकार्थसद्भावमात्रा
श्रयेणाधिकार्थसद्भावेपि प्रथमा स्यात्तदा संबोधनाधिक्ये प्रथमायाः सिद्धत्वात्पुनर्विधानमनर्थकं स्यात्। उक्तेष्वपीति। मात्र
शब्दः सामान्यवचन आश्रीयते। यथा ब्राह्मणमात्रं पूजयतीति। एवं प्रातिपदिकार्थमात्रेऽभिहितेपि एकत्वादौ प्रथमा भव

नैतदस्ति प्रयोजनम्। कर्मादिषु द्वितीयाद्या विभक्तयः ताः कर्मादिविशिष्टे बाधिका भविष्यन्ति। अथवाचार्य
प्रवृत्तिर्ज्ञापयति न कर्मादिविशिष्टे प्रथमा भवतीति। यदयं संबोधने प्रथमां शास्ति। नैतदस्ति ज्ञापकम्। अस्त्य
न्यदेतस्य वचने प्रयोजनम्। किम्। सामन्त्रितमिति वक्ष्यामीति। यत्तर्हि योगविभागं करोति। इतरथा हि संबोध
ने आमन्त्रितमित्येव ब्रूयात्। इदं तर्हि। उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यात्। एको द्वौ बहव इति। वचनग्रह
णस्याप्येतत्प्रयोजनमुक्तम्। अन्यतरच्छक्यमवक्तुम्॥ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा
लक्षणे पदसामानाधिकरण्ये उपसंख्यानमधिकत्वात्॥ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा
लक्षणे पदसामानाधिकरण्ये उपसंख्यानं कर्तव्यम्। वीरः पुरुषो वीरः पुरुष इति। किं पुनः कारणं न सिध्यति। अधिक
त्वात्। व्यतिरिक्तः प्रातिपदिकार्थ इति कृत्वा प्रथमा न प्राप्नोति। कथं व्यतिरिक्तः। पुरुषे वीरत्वम्। न वा वाक्यार्थत्वात्।

ति। अन्ये त्वाहुः। मीयते अनयेति मात्रा संख्योच्यते। समाहारद्वन्द्वे नपुंसकत्वाच्च ह्रस्वत्वं कृतं तेनाभिहितायामपि संख्यायां
प्रथमा भवति। प्रातिपदिकार्थेति। अवधारणार्थो मात्रग्रहणात् संबोधने चेति ज्ञापकाद्वाधिकार्थप्रतीतो प्रथमया न
भाव्यम्। अस्ति च वीरः पुरुष इत्यादौ सामानाधिकरण्याद्विशेषणविशेष्यभावस्याधिकस्य प्रतीतिः। न च समासविधा
नं प्रथमोत्पत्तिलिङ्गं द्वितीयाद्यन्तानामपि वीरपुरुषमानयेत्यादौ समाससद्भावात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नवेति। वीरप्रातिपदिकादनपेक्षितशब्दान्तरार्थसंसर्गोपहितविशेषणभावानुत्वार्थमात्रनिष्ठात् प्रथमा विधीयते। एवं पुरुष-शब्दादपि। पश्चात्तु त्वाकाङ्क्षादिवशाद्विशेषणविशेष्यभावावगतिरूपजायमाना बहिरङ्गत्वादन्तरङ्गं संस्कारं पूर्वप्रवृत्तं बाधितुं नोत्सहते। अभिहित इति। तिङ्कृत्तद्धितसमासैरभिहिते कर्त्रादौ प्रथमेत्यर्थः। ततश्च वीरः पुरुष इत्यत्रार्थाधिक्येप्यभिहितत्वमात्राश्रया प्रथमा भविष्यति। अतिव्याप्तिमुद्भावयितुमाह। अभिहितानभिहित इति। प्रासाद आस्त इति। सदिक्रियासिक्रियाद्वयसाधनाधिकरणशक्तिद्वयसद्भावादेकस्याः शक्तेरभिहितत्वात्तदाश्रया प्रथमा प्राप्नोतीत्यर्थः। एवं तर्हीति। य

न वा वक्तव्यम्। किं कारणम्। वाक्यार्थत्वात्। यदत्राधिकं वाक्यार्थः सः। अथवाभिहिते प्रथमेत्येतल्लक्षणं करिष्यते। अभिहितलक्षणायामनभिहिते प्रथमाविधिः। अभिहितलक्षणायामनभिहिते प्रथमा विधेया। वृक्षः प्लक्ष इति। उक्तं वा। किमुक्तम्। अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यते। वृक्षः प्लक्षोऽस्तीति गम्यत इति। अभिहितानभिहिते प्रथमाभावः। अभिहितानभिहिते प्रथमा प्राप्नोति। क्व। प्रासादे आस्ते शयने आस्त इति। सदिप्रत्ययेनाभिहितमधिकरणमिति कृत्वा प्रथमा प्राप्नोति। एवं तर्हि तिङ्समानाधिकरणे प्रथमेत्येतल्लक्षणं करिष्यते। तिङ्समानाधिकरण इति चेत्तिङोऽप्रयोगे प्रथमाविधिः। तिङ्समानाधिकरण इति चेत्तिङोऽप्रयोगे प्रथमा विधेया। वृक्षः। प्लक्षः। उक्तं पूर्वेण। किमुक्तम्। अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ती गम्यते। वृक्षः प्लक्षः अस्तीति गम्यत इति। शतृशानचोश्च निमित्तभावात्तिङोभावस्तयोरपवादत्वात्। शतृशानचोश्च निमित्तभावात्तिङोभावः।

थ्या देवदत्तः पचतीति। प्रासादे आस्त इत्यादौ तु वैयधिकरण्यात् प्रथमाया अभावः। तिङो प्रयोग इति। न हि तिङन्तपदप्रयोगमन्तरेण तत्सामानाधिकरण्यसद्भावः। उक्तं पूर्वेणेति। आक्षिप्तक्रियापदापेक्षं सामानाधिकरण्यमस्तीति। शतृशानचोश्चेति। देवदत्त पचू लट् इति स्थिते यावत्तिङुत्पत्तिर्नास्ति तावत्तिङ्सामानाधिकरण्याभावात् प्रथमैवेति-नियमाभावाद् देवदत्तशब्दादविशेषविहिताः सर्वे स्वादयः स्थिता इति लटः स्थाने द्वितीयाद्यन्तपदसामानाधिकरण्ये विधीयमानौ शतृशानचौ प्राप्नुतो न तु तिङः। तेषां तु लडादिरवकाशस्तद्विषय एव च प्रथमाया अपि। कर्मणि द्वितीयेत्यर्थनियमे द्वितीयादीनामत्र सद्भाव इति मन्यते। निमित्तमत्र शतृशानचोः प्रथमासामानाधिकरण्यम्। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वंह्यपवादाइति।इहदर्शनद्वयम्।सर्वविशेषस्वीकारेणचोत्सर्गस्यप्रवृत्तिः।कतिपयविशेषावगाहनेनवातत्रपूर्वे
स्मिन्दर्शनेउत्सर्गस्यविषयविभागायपूर्वमपवादः प्रवर्ततेपश्चात्तद्विमुक्तेविषयउत्सर्गः।द्वितीयेतुदर्शनेअपवादवि
षयंप्रकल्प्योत्सर्गः प्रवर्तते।एवंपर्युदासार्थनियमपक्षाश्रयेणचोदितम्।प्रसज्यप्रतिषेधाश्रयेणत्वर्थनियमेपक्ष
द्वयेपिप्रत्ययनियमपक्षाश्रयेणपरिहर्तुमाह।पाक्षिकइति।अप्रथमावाविधिनेति।अप्रथमेतिपर्युदासेनद्वितीया-
दीनांयदाग्रहणमित्यर्थः।प्रथमावेति।प्रसज्यप्रतिषेधश्चाश्रीयतेत्यर्थः।तद्यदेति।कर्मणिद्वितीयेवेत्यस्मिन्नियमेद्वि-
तीयादीनामनियमात्प्रातिपदिकार्थमात्रेपिभावात्तदाश्रयौशतृशानचौप्राप्नुतइतिदोषः।प्रसज्यप्रतिषेधेतुप्रथमायाअपित

त्पचत्योरहनंदेवदत्तइति।किंकारणम्।तयोरपवादत्वात्।शतृशानचौतिङपवादौतावत्रबाधकौ।नचापवाद
विषयेउत्सर्गोभिनिविशते।पूर्वंह्यपवादाअभिनिविशन्तेपश्चादुत्सर्गाः।प्रकल्प्यचापवादविषयमुत्सर्गोभिनिवि
शते।ननावदत्रकदाचित्तिङादेशोभवति।अपवादौतावच्छतृशानचौप्रतीक्षते।पाक्षिकएषदोषः।कत
रस्मिन्पक्षेशतृशानचोर्द्वैतंभवति।अप्रथमावाविधिनाश्रीयतेप्रथमावाप्रतिषेधेनेति।विभक्तिनियमेवा
पिद्वैतंभवति।विभक्तिनियमोवास्यादर्थनियमोवेति।तद्यदातावदर्थनियमःअप्रथमाचविधिनाश्रीयतेत
दाएषदोषोभवति।यदाहिविभक्तिनियमःतदायद्येवमप्रथमाविधिनाश्रीयतेअथापिप्रथमाप्रतिषेधे
नतदानदोषोभवति॥प्रातिपदिका॥षष्ठीशेषे॥ ॥शेषइत्युच्यते।कःशेषः।

त्रभावात्तदाश्रयप्रतिषेधःप्रवर्ततइत्यर्थनियमपक्षेपिनदोषः।शतृशानचोरभावात्तिङस्तुसत्त्वात्तत्सामानाधिकरण्या
त्प्रथमैवेतिनियमेनद्वितीयादीनांव्यावर्तनात्।यदाहीति।कर्मण्येवद्वितीयेत्येवंद्वितीयादीनांकर्मादिषुनियतत्वात्तद
भावेतासामत्राभावादनियतायाश्चप्रथमायाःसंनिधानात्पर्युदासेप्रसज्यप्रतिषेधेवानास्तिशतृशानचोरत्रप्रसङ्गइत्य
र्थः॥ ॥षष्ठीशेषे॥कःशेषइति।किमप्रधानंशेषउतोपयुक्तादन्यः।पूर्वस्मिन्पक्षेसर्वेषांकारकाणांक्रियार्थत्वाच्छेषत्व
मितितत्रापिषष्ठीप्रसङ्गः।सर्वत्रकर्मादीनांसद्भावादुत्तरोपिशेषार्थोनप्रकल्पतइतिप्रश्नः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ कै॰ कर्मादिभ्य इति। कर्माद्यनन्तरं शेषशब्द उच्चार्यमाणस्तेभ्योऽन्यमर्थं प्रतिपादयति। येऽन्येऽर्था इति। स्वस्वामिभावादयः संबन्धा इ २३३
३९० त्यर्थः। तदुक्तम्। संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः। श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयत इति। तत्राश्रुता-
यां क्रियायां राज्ञः पुरुष इत्यादौ क्रियाकारकसंबन्धपूर्वकोऽन्य एव स्वस्वामिभावादिकः संबन्धः प्रतीयते। मातुः स्मरतीत्या
दौ तु श्रूयमाणे क्रियाशब्दे सदपि कर्मत्वमविवक्षित्वा विशेषणभावएव स्मरणं प्रति मातुः प्रतिपाद्यते। मातृसंबन्धि स्मरण
मिति। अविदिताभिप्रायः परश्चाह। यद्येवमिति। क्रियामन्तरेण संबन्धाभावात् सर्वत्र तस्या अवश्यंभावान्निमित्तस्य च क
र्मादेरिति भावः। राजा कर्तेति। राजा पुरुषाय ददातीत्यर्थसंप्रत्ययात्। वृक्षइति। लोकप्रसिद्ध्या तदुक्तम्। वैशेषिकप्रक्रियया
त्ववयवोऽवयविनोऽधिकरणम्। विनिमयादिति। परिवर्तनादित्यर्थः। एवं तर्हीति। क्रियाकारकसंबन्धोऽपि सर्वत्र वस्तुस्थि

कर्मादिभ्यो येऽन्येऽर्थाः स शेषः। यद्येवं शेषो न प्रकल्पते। न हि कर्मादिभ्यो ऽन्येऽर्थाः सन्ति। इह तावद्राज्ञः पु
रुष इति। राजा कर्ता पुरुषः संप्रदानम्। वृक्षस्य शाखेति वृक्षः शाखाया अधिकरणम्। तथा यदेतत्स्वं नाम
चतुर्भिरेतत्प्रकारैर्भवति क्रयणादपहरणाद्याच्ञाया विनिमयादिति। अत्र च सर्वत्र कर्मादयः सन्ति। एवं त
र्हि कर्मादीनामविवक्षा शेषः। कथं पुनः सतो नामाविवक्षा स्यात्। सतोऽप्यविवक्षा भवति। तद्यथा। अलो
मिका। एडका। अनुदरा कन्येति। असतश्च विवक्षा भवति। तद्यथा। समुद्रः कुण्डिका। विन्ध्यो वर्धितक
मिति। किमर्थं पुनः शेषग्रहणम्। प्रत्ययावधारणाच्छेषवचनम्।

त्यास्ति तन्निमित्तश्च स्वस्वामिभावादिरपि। तत्र स्वस्वामिभावादिविवक्षायां सत्यपि क्रियाकारकसंबन्धो न विवक्ष्य
ते। अलोमिकेति। लोमकार्याकरणात्सतामपि लोम्नामविवक्षा। अनुदरेति। सदप्युदरं महत्त्वाभावप्रतिपादनाय
न विवक्ष्यते। असतश्चेति। दृष्टान्तरूपेणेदमुपात्तम्। असतो यथा विवक्षा तथा सतोऽप्यविवक्षेत्यर्थः। समुद्रः कुण्डिके-
ति। कुण्डिकायां बहुपानीयसंभवप्रतिपादनाय समुद्रत्वमारोप्यते। विन्ध्यो वर्धितकमिति। वर्धितकशब्देन मूले स्थू राम:
लमग्रे सूक्ष्मं विशिष्टसंस्थानयुक्तं भक्तमुच्यते। तस्य महत्त्वप्रतिपादनाय विन्ध्यत्वमसदारोप्यते। अर्थनियमपक्षे शे ३९०
षग्रहणस्य प्रत्याख्यानाय विचारः क्रियते किमर्थमिति। ॥

तन्नियमार्थमिति। यथा समे देशे यजेतेति समविषमयोः पर्यायेण प्रसङ्गे विषमस्थाने समविधिर्विषमनिवारणफल-
त्वान्नियमः संपद्यते। तथा षष्ठीविधिर्द्वितीयादिनिवारणफलः। षष्ठी शेष इति चेदिति। अस्मिन् सूत्रन्यासे दोषः संबन्धस्य
द्विष्ठत्वात्प्रधानादपि षष्ठीप्रसङ्गो व्याकरणान्तरे तु गुणे षष्ठीनिर्वचनान्नास्ति दोषः। प्रतिषिद्धायामपि षष्ठ्यां प्रातिपदिका-
र्थमात्रे विधीयमानायाः प्रथमायाः संबन्धस्याधिकस्य भावादप्रसङ्ग इति मत्वाह। तत्र प्रथमेति। यदत्रेति। राज्ञ इत्येत

प्रत्ययावधारणात्स्वशेषग्रहणं कर्तव्यम्। प्रत्यया नियता अर्था अनियताः। तत्र षष्ठी प्राप्नोति। तत्र शेषग्रहणं क
र्तव्यम्। षष्ठी नियमार्थे शेष एव षष्ठी भवति नान्यत्रेति। अर्थावधारणाद्वा। अथवा अर्था नियताः प्रत्यया
ते अनियताः। शेषेपि प्राप्नुवन्ति। तत्र शेषग्रहणं कर्तव्यं शेषनियमार्थं शेषे षष्ठ्येव भवति नान्येति। अर्थनिय
मे शेषग्रहणं शक्यमकर्तुम्। कथम्। अर्था नियताः प्रत्यया अनियताः ततो वक्ष्यामि षष्ठी भवतीति। तन्नि
यमार्थं भविष्यति। यत्र षष्ठी चान्या च प्राप्नोति तत्र षष्ठ्येव भवतीति। षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषे
धः। षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधो वक्तव्यः। राज्ञः पुरुष इत्यत्र राजा विशेषणं पुरुषो विशेष्यः।
तत्र प्रातिपदिकार्थो व्यतिरिक्त इति कृत्वा प्रथमा न प्राप्नोति। तत्र षष्ठी स्यात्तस्याः प्रतिषेधो वक्तव्यः। त
त्र प्रथमाविधिः। तत्र षष्ठी प्रतिषिध्य प्रथमा विधेया। राज्ञः पुरुषः। उक्तं पूर्वेण। किमुक्तम्। न वा वाक्यार्थ-
त्वादिति। यदत्राधिक्यं वाक्यार्थः सः। कुतो नु खल्वेतत्पुरुषे यदाधिक्यं स वाक्यार्थ इति। न पुना राजनि य
दाधिक्यं स वाक्यार्थः स्यात्। अन्तरेणापि पुरुषशब्दस्य प्रयोगं राजनि सोर्थो गम्यते न पुनरन्तरेण रा
जशब्दस्य प्रयोगं पुरुषे सोर्थो गम्यते। अस्ति कारणं येनैतदेवं भवति। किं कारणम्। राजशब्दाद्धि भवान्
षष्ठीमुच्चारयति। अङ्ग हि भवान् पुरुषशब्दादप्युच्चारयतु गंस्यते सोर्थः।

त्पदसंनिधाने पुरुषस्य संबन्धित्वं प्रतीयते नान्यथा। पुरुषप्रातिपदिकं तु स्वार्थमात्रे वर्तत इति प्रथमा सिध्यतीत्य
र्थः। कुतो न्विति। पुरुषपदसंनिधान एव राज्ञः संबन्धित्वावगमो नान्यथेति ततोपि प्रथमाप्रसङ्गः। अन्तरेणेति। राज्ञ इ
ति केवलेपि पद उच्चार्यमाणे संबन्धित्वमनियतप्रतियोगि राज्ञो गम्यते। यस्माद्राजा परोपकारित्वेन विवक्षितो न
स्वनिष्ठत्वेन। ॥

CC-0. In Public Domain. Digitization by eGangotri

भा. कै. ननु च नैतेनेति। नहि शब्दस्य भावाभ्यामर्थस्य भावाभावौ क्रियेते किं तर्ह्यर्थस्य प्रतिपिपादयिषया विषयीकरणाकरणा
२९२ भ्यां शब्दस्योच्चारणानुच्चारणलक्षणौ भावाभावावित्यर्थः। तत्र परोपकारित्वेन राज्ञो विवक्षितत्वात् षष्ठी भवति पुरुषस्य तूपकार्यतया स्वनिष्ठत्वेन विवक्षितत्वात् प्रथमा। तदुक्तं हरिणा। दृष्टोप्यसौ परार्थत्वाद्गुणेष्वव्यतिरिच्यते। तत्राभिधीयमानश्च प्रधानेप्युपयुज्यते इति। स्वामित्वमिति। स्वस्वामिसंबन्ध इत्यर्थः। समासकृत्तद्धितेषु संबन्धाभिधानमिति वचनात्। स्वकृतमिति। तत्रस्थानियतं समपेक्ष्य प्रथममेव संबन्धाश्रया षष्ठी उत्पाद्यते। पुरुषशब्दसंनिधौ तु स्वविशेषप्रतिपत्तिरित्यर्थः। तद्यथेति। प्रातिपदिकार्थानामित्यर्थः। क्वचित्तु प्रातिपदिकार्थानामित्येव पाठः। क्रियाकृता इति। क्रियाफलापेक्षया शक्तय आश्रीयन्त इत्यर्थः। तत्कृताश्चेति। शक्तिनिमित्ताः संज्ञा इत्यर्थः। कदाचिदिति। यदा क्रियां प्रति व्यापारवे

ननु च नैतेनैवं भवितव्यम्। नहि शब्दकृतेन नाम अर्थेन भवितव्यम्। अर्थकृतेन नाम शब्देन भवितव्यम्। तदेतदेवं दृश्यताम् अर्थरूपमेवैतदेवंजातीयकं येनान्तरेणापि पुरुषशब्दस्य प्रयोगं राजनि सोऽर्थो गम्यते। किं पुनस्तत्। स्वामित्वम्। किंकृतं पुनस्तत्। स्वकृतम्। तद्यथा। प्रातिपदिकार्थानां क्रियाकृता विशेषा उपजायन्ते तत्कृताश्चाख्याः प्रादुर्भवन्ति कर्म करणम् अपादानं संप्रदानम् अधिकरणमिति। ताश्च पुनर्विभक्तीनामुत्पत्तौ कदाचिन्निमित्तत्वेनोपादीयन्ते कदाचिन्न। कदा विभक्तीनामुत्पत्तौ निमित्तत्वेन नोपादीयन्ते। यदा व्यभिचरन्ति प्रातिपदिकार्थम्। यदा हि न व्यभिचरन्ति। आख्याभूता एव तदा भवन्ति कर्म करणम् अपादानं संप्रदानम् अधिकरणमिति। यथैव तर्हि राजनि स्वकृतं स्वामित्वं तत्र षष्ठी भवति।

शविवक्षा भवति दात्रेण लुनातीति। कदाचिन्नेति। यदा योग्यतामात्रविवक्षा भवति दात्रं लवनेकरणमिति। व्यभिचरन्तीति। यदा प्रातिपदिकार्थस्य क्रियावेशविवक्षायां शक्तिलक्षणार्थातिरेको भवति तदा प्रातिपदिकार्थतां शक्तयो न प्रतिपद्यन्त इत्यर्थः। यदा हीति। अपरोपकारित्वेन स्वनिष्ठतया यदा प्रातिपदिकार्थो विवक्षित इत्यर्थः। तदेवं दात्रेणेति यथा क्रियापेक्षया भवति तथा राज्ञ इति स्वापेक्षया। यथा च स्वनिष्ठत्वाश्रयेण दात्रं करणमिति भवति राम:
तथा राजा स्वामीत्युक्तं भवति। आख्याभूता इति। ताः शक्तयः संज्ञामेव प्राप्ताः न तु विभक्त्युत्पत्तिं प्रयोजयन्तीत्यर्थः। तदुक्तम्। स्वशब्दैरभिधाने तु स धर्मो नाभिधीयते। विभक्त्यादिभिरेवासावुपकारः प्रतीयते इति। ३९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरुषेपीति। संबन्धस्य द्विष्ठत्वाद् द्वाभ्यां षष्ठी प्राप्नोतीत्यर्थः। शक्तिस्तु प्रातिपदिकार्थस्यैव न क्रियास्येति विशेषः। राजश
ब्दादिति। गुणप्रधानभावेनार्थद्वयमवस्थितमित्युक्तमेतत्। तत्र संबन्धो गुणोपदं न्यस्य द्विष्ठत्वात् प्रधानमपि संस्पृश
ति। गुणश्च प्रधानोपकारप्रवृत्तो रूपान्तरमाश्रयति प्रधानं तु स्वनिष्ठमेव न तु रूपान्तरं भजते। पुरुषस्येति षष्ठ्या ने
व भाव्यमिति भ्रान्त्या चोदयति। न तर्हीति भवतीति। यदा पुरुषस्य गुणभावो राज्ञस्तु विशेष्यत्वं तदा पुरुषस्य राजेति भ
वत्येवेत्यर्थः। भवति बाह्यमिति। एकस्यापि वस्तुनो भिन्नविषयो गुणप्रधानभावो न विरुध्यते॥ अधीगर्थ॥ मातुः स्मरती-
ति मातृस्मरणयोरवस्थानादि क्रियानिमित्तः संबन्ध इति केचिदाहुः। अन्ये तु स्मरणस्य क्रियारूपत्वात् क्रियान्तरमन्त
रेणैव द्रव्येण संबन्धोपपत्तिमाहुः। यथा द्वयोः काष्ठयोर्जतुकृतः श्लेषो जतुनस्तु काष्ठेन स्वत एव न जत्वन्तरकृतः। क

एवं पुरुषेपि स्वामिकृतं स्वत्वं तत्र षष्ठी प्राप्नोति। राजशब्दादुत्पद्यमानया षष्ठ्याभिहितः सोर्थ इति कृत्वा पु
रुषशब्दात् षष्ठी न भविष्यति। न तर्हीदानीमिदं भवति पुरुषस्य राजेति। भवति राजशब्दात्तु तदा प्रथमा। न
तर्हीदानीमिदं भवति राज्ञः पुरुषस्येति। भवति बाह्यमर्थमभिसमीक्ष्य षष्ठी शेषे॥ अधीगर्थदयेशां कर्मणि
॥ कर्मादिषु कर्मकवद्वचनम्। कर्मादिषु कर्मकवद्भावो वक्तव्यः। किं प्रयोजनम्। अकर्मकाणां भावे लो भवती
ति भावे लो यथा स्यात्। मातुः स्मर्यते पितुः स्मर्यत इति अथ वत्करणं किमर्थम्। स्वाश्रयमपि यथा स्यात्। माता स्म
र्यते। पिता स्मर्यत इति। कर्माभिधाने हि लिङ्गवचनानुपपत्तिः।

र्मादिष्विति। आदिशब्दोऽत्राश्रयवाची। यथा विष्णुरादिः पृथासूनोर्भीष्मादिश्च सुयोधनः। ते जयन्ति रणे शत्रून् येषां वि
ष्णुः समाश्रयः इति। तेन कर्माश्रयाः द्वितीयाविधिनिमित्तभावेनोपात्ताः। सकर्मका अधीगर्थादयः प्रेष्यब्रूपर्यन्ताः कर्मा
दिशब्देनोच्यन्ते। अकर्मकाणामिति। तेन मातुः स्मर्यत इति भावे लकृत्यक्तखलर्था भवन्ति कर्मणि तु लादिषु विधीय
मानेषु तैरभिहितत्वात् कर्मणः षष्ठ्या न भाव्यमिति प्रथमैव भवति माता स्मर्यत इति। वत्करणं किमर्थमिति। विनापि व
तिना तिदेशः सिध्यति परार्थे शब्दप्रयोगात्। स्वाश्रयमपीति। नाप्राप्ते स्वाश्रये आरभ्यमाणो तिदेशस्तद्बाधेत। कर्माभि
धाने हीति। यद्यकर्मकवद्भावो न विधीयते तेन दा लादिभिः कर्मैवाभिधातव्यं न भावः। ततस्तत्सामानाधिकरण्यात् क्ता
न्तादीनां तदीयलिङ्गसंख्याप्रसङ्गो यथा माता स्मृतेति। भावे तु त्वनौ क्तादीनां नपुंसकत्वमेकवचनं भवति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा॰ कौ॰ षष्ठीप्रसङ्गश्चेति। यदास्मृतशब्देकर्मणिक्तोविधीयतेतदामातृशब्दसामानाधिकरण्याद्बाह्यवस्थापेक्षया यथामातृ
पू॰ ६२ शब्दात् षष्ठीभवतितथास्मृतशब्दादपिस्यादित्येकेव्याचक्षते। अन्येत्वाहुः। अनभिहिताधिकारानपेक्षणेनयथामातृ
शब्दात्कर्मणिषष्ठीभवत्येवंस्मृतशब्दादपिस्यादिति। ननुविद्यमानेऽप्यनभिहिताधिकारः कथंनापेक्ष्यतइत्याशङ्क्याह
।अपर आहेति। प्रसङ्गश्चेति। प्राप्णीयेत्यर्थः। शेषइतीति। प्रकरणंचेदंसमासप्रतिषेधार्थमितिसमासप्रकरणेव्याख्या
तम्। तेनमातुःस्मृतमितिषष्ठीसमासोनभवति। उक्तंचहरिणा। साधनैर्व्यपदिष्टेचश्रूयमाणक्रियेपुनः। प्रोक्ताप्रति
पदंषष्ठीसमासस्यनिवृत्तयइति॥ रुजार्थानाम्। पावनेति। धातूनांभाववाचित्वाव्यभिचारात्। भावकर्तृकादिति। ल्युडो-

कर्माभिधानेहिलिङ्गवचनयोरनुपपत्तिःस्यात्। मातुःस्मृतम्। मात्रोःस्मृतम्। मातॄणांस्मृतमिति। मातुर्येहि
ङ्गंवचनंतत्स्मृतशब्दस्यापिप्राप्नोति। षष्ठीप्रसङ्गश्चाषष्ठीचप्राप्नोति। कुतः। स्मृतशब्दान्मातुःसमानाधि
करणत्वषष्ठीप्राप्नोति। अपर आह। षष्ठीप्रसङ्गश्च। षष्ठीचप्रसज्येत। कुतः। मातृशब्दात्स्मृतशब्देनाभि
हितंकर्मेतिकृत्वाषष्ठीनप्राप्नोति। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। अविवक्षितेकर्मणिषष्ठीभवतीति। किंव
क्तव्यमेतत्। नहि। कथमनुच्यमानंगंस्यते। शेषइतिवर्तते। शेषश्चकः। कर्मादीनामविवक्षाशेषः। यदाचक
र्मविवक्षितंभवतितदाषष्ठीनभवति। तद्यथा। स्मराम्यहंमातरंस्मराम्यहंपितरमिति। अधीगर्थे॥ ॥रु
जार्थानांभाववचनानामज्वरेः॥ अज्वरिसंताप्योरितिवक्तव्यम्। इहापियथास्यात्। चोरंसंतापयति। वृ
षलंसंतापयति। अथकिमर्थंभाववचनानामित्युच्यते। यावतारुजार्थाभाववचनाएवभवन्ति। भावकर्तृकायथास्यात्।

पेकर्मणिपञ्चमीभावकर्तृकमाश्रित्येत्यर्थः। अथवा भावकर्तृकधात्वर्थकर्मचोरादिकंभावकर्तृकशब्देनोक्तम्। कथं
पुनर्भाववचनानामित्यस्यभावकर्तृकाणामित्यर्थोभवति। उच्यते। भावशब्देनघञादिवाच्यसिद्धरूपोर्थोभिधीय
तेनतुसाध्यरूपस्तस्यकर्तृत्वासंभवात्। वचनशब्देपिप्रत्ययार्थः। कर्ताविवक्षितःकर्तरिल्युटोविधानात्। प्रकृ रामः
त्यर्थस्तुवचनंक्रियानविवक्षतेतेनभावोवचनःकर्तायेषांतेभाववचनाःभावकर्तृकाइत्यर्थःसंपद्यते। अन्येत्वा पू॰ ६२
हुः। भावेवचनंयेषांतेभाववचनाःसतिभावेकर्तरियेषांवचनमुच्चारणम्। भावकर्तृकधात्वर्थप्रतिपादनायस्येषाम-
भिधानमित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदीकूलानीति। रुजाशब्दो भावार्थो रुजइत्यत्र प्रसङ्ग एव नास्ति। तस्माद्रुजार्थानामिति धातुमात्रनिर्देशाश्रयमि
दं प्रत्युदाहरणम्। रुजाशब्दनिर्देशे तु श्लेष्मा पुरुषं रुजतीप्रत्युदाहार्यमित्याहुः। द्वितीया॥ किमुदाहरणमिति।
पूर्वसूत्रे व्यवस्थितविभाषाविज्ञानात्सोपसर्गस्य दीव्यतेः कर्मणि छन्दसि द्वितीयैव भविष्यति गां प्रदीव्यन्तीत्यादा-
वि तिप्रश्नः गामस्येति। अत्र दिवस्तदर्थस्येति नित्यं षष्ठी प्राप्नोति। अत्र च शेषइति नानुवर्तत इत्येतत्सूत्रारम्भा
त्पूर्वसूत्रारम्भात्तु च ज्ञायते॥ प्रेष्यब्रुवोः॥ हविषोऽप्रस्थितस्येति। यदा प्रस्थितत्वेन हविर्विशेष्यते तदा षष्ठी न भ

इह मा भूदिति नदीकूलानि रुजतीति। द्वितीया ब्राह्मणे॥ किमुदाहरणम्। गां निघ्नन्ति। गां प्रदीव्यन्ति। गांस
भासद्भ्य उपहरन्ति॥ नैतदस्ति। पूर्वेणाप्येतत्सिद्धम्। इदं तर्हि गामस्य तदहः सभायां दीव्येयुः॥ प्रेष्यब्रुवोर्हवि
षो देवतासंप्रदाने॥ ॥हविषोऽप्रस्थितस्य॥ हविषः अप्रस्थितस्येति वक्तव्यम्। इन्द्राग्निभ्यां छागं हविर्वपां
मेदः प्रस्थितं प्रेष्य॥ प्रेष्य ॥ चतुर्थ्यर्थे बहुलं छन्दसि॥ षष्ठ्यर्थे चतुर्थी। षष्ठ्यर्थे चतुर्थी वक्तव्या। या खर्वेण
पिबति तस्यै खर्वो जायते। तिस्रो रात्रीरिति। तस्या इति प्राप्ते। यां मलवद्वाससं संभवन्ति यस्ततो जायते सोभि
शस्तो यामरण्ये तस्यै स्तेनो यां पराचीं तस्यै ह्रीतमुख्यप्रगल्भो या स्नाति तस्या अप्सु मारुको याभ्यङ्क्ते तस्यै दुश्च
र्मा या प्रलिखते तस्यै खलतिरपमारी याङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन् या नखानि निकृन्तते तस्यै कुनखी
या कृणत्ति तस्यै क्लीबो या रज्जुं सृजति तस्या उद्बन्धुको या पर्णेन पिबति तस्या उन्मादुको जायते अहल्यायै जारमनाय्यै तन्तुः
। तत्तर्हि वक्तव्यम्। न वक्तव्यम्॥ योगविभागात्सिद्धम्। चतुर्थी ततः अर्थे बहुलं छन्दसि॥ कर्तृकर्मणोः कृति॥ ॥कृद्ग्रह णं
किमर्थम्। इह मा भूत्। पचत्योदनं देवदत्त इति। कर्तृकर्मणोः षष्ठीविधाने कृद्ग्रहणानर्थक्यं लप्रतिषेधात्। कर्तृकर्मणोः षष्ठी
विधाने कृद्ग्रहणमनर्थकम्। किं कारणम्। लप्रतिषेधात्। प्रतिषेध्यते ऽत्र षष्ठी लप्रयोगे नेति। तस्य कर्मकर्त्रर्थं तर्हि कृद्ग्रह
णं कर्तव्यम्। कृतो ये कर्तृकर्मणी तत्र यथा स्यात्। अन्यस्य ये कर्मणी तत्र मा भूदिति। नैतदस्ति प्रयोजनम्। धातोर्हि द्वये प्रत्य
या विधीयन्ते तिङश्च कृतश्च। तत्र कृत्प्रयोग इष्यते तिङ्प्रयोगे प्रतिषिध्यते।

तीत्यर्थः॥ चतुर्थ्यर्थे॥ या खर्वेणेति। रजस्वलायाः खर्वपानादिनिषेधार्थोयमर्थवादः। चतुर्थीति। षष्ठीप्रकरणात्षष्ठ्यर्थे चतुर्थी भवती
त्येको वाक्यार्थः। चतुर्थ्यर्थे षष्ठीति द्वितीयः॥ कर्तृकर्मणोः॥ तस्य कर्मकर्त्रर्थमिति। कर्तृकर्मविशेषणार्थं कृद्ग्रहणमित्यर्थः। नैत
दिति। यथोक्तप्रयोजनं कृद्ग्रहणमिह तावन्नोपयुज्यत इति दर्शयति पश्चादुत्तरत्रानुपयोगं दर्शयिष्यति। इह कर्तृकर्मसंनिधानात्क्रि
यासंनिधीयते क्रियायां हि कारकं भवति। सा च वाचकं धातुं प्रत्ययसहितमाक्षिपतीति मत्वाह। धातोर्हीति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदेवंव्यावर्त्यासंभवादिहार्थेक्तग्रहणंकर्तृकर्मविशेषणार्थेनोपयुज्यतइतिदर्शितम्। इदानीमुत्तरार्थत्वमाशङ्क्य
निराकरोति। नब्रूमइति॥ नलोकाव्ययेत्यत्राव्ययंक्तग्रहणेनविशेष्यतेक्तदव्ययस्ययेकर्तृकर्मणीतत्रषष्ठीप्रतिषेधो
यथास्यात्कटंकृतवेत्यादौ। अक्तान्तस्त्वव्ययस्यकर्तृकर्मणोःषष्ठीनिषेधोमाभूदुच्चैःकटानांस्रष्टेति। प्रतिषेधइति। नलो
काव्ययेतिसूत्रेव्ययग्रहणेनकर्तृकर्मणीविशेष्येते अव्ययस्ययेकर्तृकर्मणीतयोःषष्ठीनभवतीति। नचक्तदन्ताव्य-
यादन्यस्याव्ययस्यकर्तृकर्मणीसंभवतइतिसामर्थ्यलभ्यंतत्रापिक्तग्रहणमित्यर्थः। क्तनइति। स्रष्टेत्यस्या। नाव्ययस्येति
। नोच्चैःशब्दस्येत्यर्थः। तस्याऽक्रियावाचकत्वात्। तदेवाह। अधिकरणमिति। उच्चैःस्थानेस्थितानांकटानांस्रष्टेत्यर्थः

नब्रूमः। इहार्थेनस्यकर्मकर्त्रर्थंक्तग्रहणंकर्तव्यमिति। किंतर्हि उत्तरार्थम्। अव्ययेयोगेनेतिषष्ठ्याःप्रतिषेधंवक्ष्य
तिसक्तोव्ययस्ययेकर्तृकर्मणीतत्रयथास्यात्। अक्तोव्ययस्ययेकर्तृकर्मणी तत्रमाभूदिति॥ उच्चैःकटानांस्रष्टे
ति। नस्यकर्मकर्त्रर्थमितिचेत्प्रतिषेधेपितदन्तकर्मकर्तृत्वात्सिद्धम्। क्तेनएतेकर्तृकर्मणीनाव्ययस्य। अधिकर
णमत्राव्ययम्। इदंतर्हिप्रयोजनम्। उभयप्राप्तौकर्मणिषष्ठ्याःप्रतिषेधंवक्ष्यति। सक्तोयेकर्तृकर्मणीतत्रयथा
स्यात्। क्तोयेऽकर्तृकर्मणीतत्रमाभूदिति। आश्चर्यमिदंवृत्तमोदनस्यचनामपाकोब्राह्मणानांचप्रादुर्भावइति।
अथक्रियमाणेपिक्तग्रहणेकस्मादेवात्रनभवतिउभयप्राप्ताविति। नैवंविज्ञायतेउभयोःप्राप्तिरुभयप्राप्तिःउ
भयप्राप्ताविति। कथंतर्हि। उभयोःप्राप्तिर्यस्मिन्क्तिसोयमुभयप्राप्तिःक्तइ उभयप्राप्ताविति। अथवाक्तोयेकर्तृ
कर्मणीतत्रयथास्यात्तद्धितस्ययेकर्तृकर्मणीतत्रमाभूदिति। क्तपूर्वीकटंभुक्तपूर्वीओदनमिति। ननुचवाक्ये
नैवानेनभवितव्यम्।

क्तोयइति। एकस्यैवक्तान्ततुभिन्नयोःक्तोरित्यर्थः। क्तग्रहणे क्रियमाणेशब्दप्रतिपादितत्वादन्यपदार्थस्योभयप्राप्ता-
विति बहुव्रीहिर्लभ्यते। अन्यथातदङ्गत्वात्तत्पुरुषःस्यात्। अथेति। क्तीत्येकत्वस्याविवक्षांजातिविवक्षांवातत्पुरुषंचमत्वा
चोदयति। क्तान्यपदार्थेबहुव्रीहिराश्रीयतइतिपरिहारः। तेनाश्चर्योगवांदोहोगोपालकेनेत्यादावेवनियमःप्रवर्तते।
यद्येवमुत्तरत्रैवक्तग्रहणंकर्तव्यम्। अथवाव्याख्यानाद्बहुव्रीहिराश्रयिष्यतइत्याशङ्क्याह। अथवेति। क्तपूर्वीति। क्तं राम:
पूर्वमनेनेतिसुप्सुपेतिसमासः। पूर्वादिनिःसपूर्वाच्चेतीनिप्रत्ययः। कर्तोत्रतद्धितेनोक्तइतिततःषष्ठीप्रसङ्गाभावः। कटा ३९३
नुकर्मणःषष्ठीमाभूदित्येवमर्थंक्तग्रहणम्। ननुचेति। क्तपूर्वीकटमित्यनेनेत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीययेति। तस्याश्चाप्राप्तौ तदपवादः षष्ठ्यपि न प्राप्नोतीदं हाप्यनभिहिताधिकारात्। सापेक्षमिति। कृतः पूर्वं कटोऽनेनेति विवक्षायां कटापेक्षत्वात् तद्धितेन न भाव्यमित्यर्थः। योऽसाविति। कृतः कटोऽनेनेति वाक्ये कृतकटयोः सामानाधिकरण्यम्। अस्मिंश्चार्थविशेषेण भाव्यवृत्त्या। तस्याः सामान्यविषयत्वात्। तस्मात्कर्मसामान्ये भावे वा क्त उत्पद्यते। तत्र कृतं पूर्वमनेनेत्यस्मिन्नर्थे कृतपूर्वीत्यादावर्तनेनेन पूर्वं कृतवानित्यर्थः संपद्यते। तत्र करोतिवाच्यक्रियापेक्षमस्ति कटस्य कर्मत्वम्। तथाह हरिः। विशेषकर्मसंबन्धे निर्मुक्तेऽपि कृतादिभिः। विशेषनिरपेक्षोऽन्यः कृतशब्दः प्रवर्तते॥ अकर्मकत्वेऽसत्येवं क्तान्तेभावाभिधायिनि॥ ततः क्रियावता कर्त्रा योगो भवति कर्मणा। अविग्रहागतादिस्थो यथा ग्रामादिकर्मभिः॥ क्रियासंबध्यते तद्वत्कृत

द्वितीयया तावन्न भवितव्यम्। किं कारणम्। केनाभिहितं कर्मेति कृत्वा। इनिप्रत्ययेन चापि नोत्पत्तव्यम्। कारणम्। असामर्थ्यात्। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवति। यत्तावदुच्यते द्वितीयया तावन्न भवितव्यम्। किं कारणम्। केनाभिहितं कर्मेति कृत्वेति। योऽसौ कृतकटयोरभिसंबन्धः स उत्पन्ने प्रत्यये निवर्तते। अस्ति च करोतेः कटेन सामर्थ्यमिति कृत्वा द्वितीया भविष्यति। यदप्युच्यते इति प्रत्ययेन चापि नोत्पत्तव्यम्। किं कारणम्। असामर्थ्यात्। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। नेदमुभयं युगपद्भवति वाक्यं च प्रत्ययश्च। यदा वाक्यं न तदा प्रत्ययः। यदा प्रत्ययः सामान्येन तदा वृत्तिः। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः। कृतपूर्वी। किम्। कटम्। भुक्तपूर्वी। किम्। ओदनमिति। अथवा इदं प्रयोजनम्। कर्तृभूतपूर्वमात्रादपि षष्ठी यथा स्यात्। भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामिति। कर्तृक॥

तपूर्व्यादिषु स्थितेनेति॥ कर्तृभूतपूर्वमात्रादिति। करोतीति कृदिति कर्ताऽभिधीयते तत्र कर्तरि पुनः षष्ठीविधानाद्गुणभूतेऽपि भवति। एवं तु तद्धितनिवृत्तिर्न कृता स्यात्। भेदिकेति। भिदेर्ण्यन्तात्पर्यायादिषु ण्वुच्। अत्र प्रयोजकः कर्तृण्यर्थस्य प्राधान्यात्प्रधानम्। प्रयोज्यकर्ता तु प्रकृत्यर्थस्याप्राधान्यादप्रधानम्। तत्र प्रधानाप्रधानसंनिधौ प्रधानादेव षष्ठी स्यान्नाप्रधानात्। कृद्ग्रहणात्तु भवति। अथ कर्तृभूतपूर्वादिति कथमुच्यते। न हि प्रयोजकसंनिधौ प्रयोज्यकर्तृत्वमपैति। गत्यादिसूत्रनियमात्कर्मत्वाभावात्। कर्तृत्वस्यैवावस्थानात्। एवं तर्हि प्राधान्यस्यात्र भूतपूर्वत्वं विवक्षितम्। प्रधानचरात्कर्तुरित्यर्थः। एतच्च विशेषापेक्षायां प्रयोजनमुक्तम्। यदा तु तीयावत् कर्तृमात्रे षष्ठ्याश्रीयते तदाभिन्नशब्दवाच्ययोः प्रधानाप्रधानयोः कर्त्रोरेकशब्दवाच्यताया अभावाद्विशेषाभावात्षष्ठी सिध्यतीति नेदं कृद्ग्रहणस्य प्रयोजनम्। तद्धितनिवृत्तिस्तु प्रयोजनमेव॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभय॥ षष्ठ्याः प्रतिषेध इति। नियमेनानेन कर्तुः षष्ठी प्रतिषिध्यत इत्यभिप्रेत्यैतदुक्तम्। भेदिकेति। पर्यायार्होर्णेष्वेवुच्। शेषे वि-
भाषेति। अकाकारव्यतिरिक्तस्त्रीप्रत्यय एव नान्यस्मिन्निति केचिदाहुः। अपरे तु प्रत्ययमात्रेऽकाकारवर्जिते विकल्पमिच्छ-
न्ति। शब्दानामनुशासनमाचार्यस्याचार्येणेति वा॥ क्तस्य च॥ छात्रस्य हसितमिति। हासो हसितमिति नपुंसके भावे क्तः। तत्र छात्रक
र्तृत्वात्तृतीयाप्रसङ्गे षष्ठीविधानार्थं वचनम्। शेषश्चक इति। कर्तृत्वसद्भावान्नास्ति शेषत्वमिति प्रश्नः। कर्मादीनामिति। स
दपि छात्रस्य कर्तृत्वमविवक्षयाऽपाक्रियते। संबन्धित्वमात्रं ह्यत्र विवक्षितम्। छात्रस्य संबन्धि हसितमित्यर्थः। उत्तरत्रेति

उभयप्राप्तौ कर्मणि॥ उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधेऽकादिप्रयोगेऽप्रतिषेधः। उभयप्राप्तौ कर्मणि षष्ठ्याः प्र
तिषेधेऽकादिप्रयोगे प्रतिषेधो न भवतीति वक्तव्यम्। भेदिका देवदत्तस्य काष्ठानां चिकीर्षा विष्णुमित्रस्य कटस्य
। अपर आह। अकाकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यम्। शेषे विभाषा। शोभना खलु पाणिनेः सूत्रस्य कृतिः।
शोभना खलु पाणिनिना सूत्रस्य कृतिः। शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः। शोभना खलु दाक्षायणेन
संग्रहस्य कृतिः॥ उभ॥ क्तस्य च वर्तमाने॥ क्तस्य च वर्तमाने नपुंसके भाव उपसंख्यानम्। क्तस्य च वर्तमाने नपुंसके भा
व उपसंख्यानं कर्तव्यम्। छात्रस्य हसितं नटस्य भुक्तं मयूरस्य नृत्तं कोकिलस्य व्याहृतमिति। शेषविज्ञानात्सिद्धम्। शे
षलक्षणात्र षष्ठी भविष्यति। शेष इत्युच्यते। कः शेषः। कर्मादीनामविवक्षा शेषः। कथं पुनः सतो नामाविवक्षा
स्यात्। यदा छात्रो हसति नटो भुङ्क्ते मयूरो नृत्यति कोकिलो व्याहरति। सतोऽप्यविवक्षा भवति। तद्यथा। अलोमि
का एडका अनुदरा कन्येति। असतश्च विवक्षा। समुद्रः कुण्डिका विन्ध्यो वर्धितकमिति। यद्येवं उत्तरत्र चातुःश
ब्द्यं प्राप्नोति। इदमहेः सृप्तम्। इहाहिना सृप्तम्। इहाहिः सृप्तः। इहाहेः सृप्तम्। ग्रामस्य पार्श्वे ग्रामस्य मध्ये इति।
इष्यत एव चातुःशब्द्यम्। क्तस्य च॥ न लोकाव्ययनिष्ठाखलर्थतृनाम्॥ ॥ लादेशे सल्लिड्ग्रहणं किकिनोः प्रति
षेधार्थम्। लादेशे सल्लिड्ग्रहणं कर्तव्यम्। सल्लिटोः प्रयोगो नेति वक्तव्यम्।

अधिकरणवाचिनश्चेत्यत्र। इदमिति। अत्राधिकरणे क्तः। तेनाभिहितमधिकरणमिति इदंशब्दात्प्रथमा कृता। अहिशब्दात्त्वधि
करणवाचिनश्चेति षष्ठी। इहाहिना सृप्तमिति। अत्र भावे क्तः। इहाहिः सृप्त इति। अत्र कर्तरि क्तः। इहाहेः सृप्तमिति। भाव एव क्तः
। तत्र शेषविवक्षायां षष्ठी स्यादिति चोद्यम्। इष्यत एवेति। परिहारः। ग्रामस्य पार्श्व इति। सप्तमीप्रयोगेण नायमधिकरणे क्तः रामः
कृतः किं तर्हि भाव इति दर्शयति। न लोक॥ लादेश इति। लग्रहणमपनीय सल्लिड्ग्रहणं कर्तव्यम्। तत्र सद्ग्रहणेन शानच्शतारौ ३९४
गृह्येते। लिड्ग्रहणेन च कानच्क्वसू लिट्संज्ञाविधानात्। किकिनोश्च। लग्रहणे तु किकिनोर्लादेशत्वाद्ग्रहणप्रसङ्गः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतावितिं। लिट्कार्यातिदेशात्त्वादेशतुल्याविसर्थौ विवक्षितः। परस्तु यथोक्तमभिप्रायमप्रतिपद्य त्वादेशत्वमेवानयोर्विप्रतिपन्नमितिमत्वाह। बाढंस्यादिति। वक्ष्यामीति। व्याख्यास्यामीत्यर्थः। परस्त्वपूर्वौ वतिनिर्देशः कर्तव्यत्वेनानेचोदितद्गतिमत्वाह। स नहीति। विशेषातिदेशेच सामान्यातिदेशः प्रवर्ततएव। विशेषस्य सामान्याव्यभिचारात्। तेनत्वमात्रनिबन्धनः षष्ठीप्रतिषे-

किंप्रयोजनम्। किकिनोः प्रतिषेधार्थम्। किकिनोरपि प्रयोगे प्रतिषेधो यथा स्यात्। पपिः सोमं ददिर्गाः। किंपुनःकारणं नसिध्यति। नयोस्त्वादेशत्वात्। नहितौ त्वादेशौ। अथतौ त्वादेशौ स्याताम्। स्यात्प्रतिषेधः। बाढंस्यात्। त्वादेशौ नर्हि भविष्यतः। कथम्। आदृगमहनजनः किकिनौ लिङ्वेति। लिड्वदिति वक्ष्यामि। सतर्हि वतिनिर्देशः कर्तव्यः। नह्यन्तरेण वतिमतिदेशो गम्यते। अन्तरेणापि वतिमतिदेशो गम्यते। तद्यथा। एषब्रह्मदत्तः। अब्रह्मदत्तं ब्रह्मदत्त इत्याह तेमन्यामहे ब्रह्मदत्तवदयं भवतीति। एवमिहाप्यलिटं लिडित्याह। लिड्वदितिज्ञास्यते। उकारप्रयोगे नेतिवक्तव्यम्। कटंचिकीर्षुः। ओदनंबुभुक्षुः। तत्तर्हि वक्तव्यम्। नवक्तव्यम्। ———— । उकारोप्यत्रनिर्दिश्यते। कथम्। प्रश्लिष्टनिर्देशोयम्। उउकउकलउकलोकेति। उकप्रतिषेधेकमेर्भाषायामप्रतिषेधः। उकप्रतिषेधेकमेर्भाषायांप्रतिषेधो नभवतीति वक्तव्यम्। दास्याः कामुकः। वृषल्याः कामुकः। अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः। अव्ययप्रतिषेधे तोसुन्कसुनोः प्रतिषेधो नभवतीति वक्तव्यम्। पुरासूर्यस्योदेतोराधेयः। पुरावत्सानामपाकर्तोः। पुराक्रूरस्यविसृपो विरप्शिन्। शानंश्चानश्शतृणामुपसंख्यानम्। शानज्चानश्शतृणामुपसंख्यानंकर्तव्यम्। सोमंपवमानः। नडमाघ्नानः। अधीयन्पारायणम्। तप्रयोगे नेतिनिषेधो नप्राप्नोति। माभूदेवम्। तृन्नित्येवंभविष्यति। कथंतृन्निति। नेदंप्रत्ययग्रहणम्। किंतर्हि। प्रत्याहारग्रहणम्। क्वसंनिविष्टानांप्रत्याहारः। लटश्शात्रित्यतः प्रभृत्यातृनोनकारात्। यदि प्रत्याहारग्रहणंचोरस्यद्विषन्। अत्रापि प्राप्नोति। द्विषः शतुर्वावचनम्॥ ———— । द्विषः शतुर्वेति वक्तव्यम्। नचावश्यं वक्तव्यम्। प्रत्ययग्रहणे सति प्रतिषेधार्थम्। तदेवप्रत्याहारे सति विध्यर्थं भविष्यति॥ नलोकाव्य॥

धः। किकिनोः प्रवर्ततेनद त्रलिट्संज्ञाकिकिनोर्विधीयतद्गतिमत्वा वार्तिकारम्भः। कार्यातिदेशाश्रयेण तत्प्रत्याख्यानम्। उकारप्रयोगइति। उकारान्तप्रत्ययप्रयोग ———— इत्यर्थः। उप्रत्ययोपिचात्रवद्भ्ना वाङ्गृह्यते। उकारोपीति। उश्चोकश्चेतिद्वयोर्द्वन्द्वः पूर्वंक्रियते ततोन्येषाम्। अन्यथा लवुकेति स्यात्। लप्रयोगेनेति। एतेषांच अत्वादेशत्वात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकेनो॥ यथासंख्यापवादार्थं वचनम्। अकस्येति स्वरितत्वप्रतिज्ञानाद्यथासंख्याभावव्याख्यानं चेदमित्याहुः। अकस्य त्वा-
धमर्ण्ये नास्ति विधानमिति भविष्यदधिकारविहितस्यैव तस्य ग्रहणम्। पुरं दायीति। आवश्यकाधमर्ण्ययोर्णिनिरिति णि-
निः। ग्रामं गमीति। भविष्यति गम्यादय इति वचनाद्भविष्यति गमेरिनिः। गत्यर्थकर्मणीत्यत्र चतुर्थी चेत्येव पक्षे द्वितीयायां
सिद्धायां द्वितीयाग्रहणमपवादविषयेऽपि विधानार्थं ग्रामं गन्तेति यः क्वचिदुक्तं तद्भाष्यकारस्य नाभिमतमिति ग्रामं गमीत्यु-
दाहरणोपपत्तिः। कृत्यानाम्। नेहापीति। काकानन्त्रप्रयोगादिहाप्यनभिधानमित्यर्थः। आकृष्टव्येति। कृषेर्द्विकर्मकत्वात्प्रधान

अकेनोर्भविष्यदाधमर्ण्ययोः॥ अकस्य भविष्यति। अकस्य भविष्यतीति वक्तव्यम्। यवान् लावको व्रजति।
ओदनं भोजको व्रजति। इन आधमर्ण्ये च। इन आधमर्ण्ये भविष्यति चेति वक्तव्यम्। पुरं दायी सहस्रं दायी
ग्रामं गमी॥ अके॥ कृत्यानां कर्तरि वा। कर्तृग्रहणं किमर्थम्। कर्मणि मा भूदिति। नैतदस्ति प्रयोजनम्। भा-
वकर्मणोः कृत्या विधीयन्ते। तत्र कृत्यैरभिहितत्वात्कर्मणि षष्ठी न भविष्यति। अत उत्तरं पठति। भव्यादी-
नां कर्मणोऽनभिधानात्कृत्यानां कर्तृग्रहणं भव्यादीनां कर्म कृत्यैरनभिहितं गेयो माणवकः साम्नाम्। भ-
व्यादीनां कर्मणोऽनभिधानात्कृत्यानां कर्तृग्रहणं क्रियते। किमुच्यते भव्यादीनां कर्म कृत्यैरनभिहित-
मिति नेहाप्यनभिहितं भवति। आकृष्टव्या ग्रामं शाखेति। एवं तर्हि योगविभागः करिष्यते। कृत्यानां प्र-
योगे षष्ठी न भवतीति। किमुदाहरणम्। ग्राममाकृष्टव्या शाखा। ततः कर्तरि वेति। इहापि तर्हि निषेधः प्रा-
प्नोति। गेयो माणवकः साम्नामिति। उभयप्राप्ताविति वर्तते। ननु चोभयप्राप्तिरेवैषा। गेयो माणवकः साम्नामि-
ति च गेयानि माणवकेन सामानीति च भवति। उभयप्राप्तिर्नाम सा भवति यत्रोभयस्य युगपत्प्रसङ्गः। अत्र च
यदा कर्मणि न तदा कर्तरि। यदा कर्तरि न तदा कर्मणीति॥ ॥इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणम-
हाभाष्ये द्वितीयस्याध्यायस्य तृतीये पादे तृतीयमाह्निकम्॥

कर्मणः कृत्येनाभिधानं न त्वप्रधानकर्मण इति तन्निवृत्त्यर्थमपि कर्तृग्रहणं कस्मान्न भवतीति भावः। एवं तर्हीति। कृत्यानामित्ये-
तावत्सूत्रं क्रियते। तत्र चोभयप्राप्ताविति नेति च वर्तते। तेन कर्तृकर्मणोर्द्वयोरप्युभयप्राप्तौ कृत्ययोगे षष्ठी प्रतिषिध्यते। उभयप्रा-
प्तिरेव षष्ठीविषयपर्यायेणेति मन्यते। उभयप्राप्तिर्नामेति। बहुव्रीहिसमासाश्रयणाद्यत्र कृत्ये युगपदुभयोः प्राप्तिस्तत्रैव षष्ठी निषि-
ध्यत इत्यर्थः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयाध्यायस्य तृतीये पादे तृतीयमाह्निकम्॥ समाप्तश्चायं
तृतीयः पादः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विगुरेकवचनम्॥ ॥किमर्थमिति। इह समाहारद्विगोरेव ग्रहणमिष्यते। समाहरणं समाहारः स चैक एवेति सिद्धमेकवचनमिति प्रश्नः। प्रत्यधिकरणमिति। समाह्रियत इति समाहार इति यदा कर्मणि घञ् तदानेकस्यार्थस्य समाह्रियमाणस्य वाचको द्विगुरिति एकत्वाभावादप्राप्तमेकवचनं विधीयत इत्यर्थः। अधिकरणशब्देन द्रव्यमुच्यते। यत्संख्येयद्रव्याभिधानं तत्संख्याश्रयं वचनमुत्पद्यत इत्यर्थः ―――― पञ्चपूलीशब्दे नात्र पञ्चपूलाः समाह्रियमाणा उच्यन्ते। ततो बहुवचनप्रसङ्ग एकवचनविधानम्। संख्यासामानाधिकरण्याच्चेति। एतेन कर्मसाधनत्वं समाहारशब्दस्य दर्शयति। भावसाधने हि वैयधिकरण्यं पञ्चानां ―――― पूलानां समाहार इति। संख्याशब्देन संख्यावाची शब्द उच्यते। संख्येयया बह्वर्थयेति। एकत्वनिरासपरमेतत्। तेन-

द्विगुरेकवचनम्। किमर्थमिदमुच्यते। प्रत्यधिकरणं वचनोत्पत्तेः संख्यासामानाधिकरण्याच्च द्विगोरेकवचनविधानम्। प्रत्यधिकरणं वचनोत्पत्तिर्भवति। किमिदं प्रत्यधिकरणमिति। अधिकरणमधिकरणं प्रति प्रत्यधिकरणम्। संख्यासामानाधिकरण्याच्च। संख्यया बह्वर्थया चास्य सामानाधिकरण्यम्। प्रत्यधिकरणं वचनोत्पत्तेः संख्यासामानाधिकरण्याच्च बहुषु बहुवचनमिति बहुवचनं प्राप्नोति। इष्यते चैकवचनं स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति द्विगोरेकवचनविधानम्। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्रानुप्रयोगस्यैकवचनाभावो द्विगुत्वात्। तत्रानुप्रयोगस्यैकवचनं न प्राप्नोति। पञ्चपूलीयमिति। किं कारणम्। अद्विगुत्वात्। द्विगोरेकवचनमित्युच्यते। न चात्रानुप्रयोगो द्विगुसंज्ञः। सिद्धं तु द्विगवर्थस्यैकवद्वचनात्। सिद्धमेतत्। कथम्। द्विगवर्थ एकवद्भवतीति वक्तव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नेदं पारिभाषिकस्य वचनस्य ग्रहणम्। किं तर्हि अन्वर्थग्रहणम्। उच्यते वचनम्। एकस्यार्थस्य वचनमेकवचनमिति। एकशेषप्रतिषेधश्च। एकशेषे च प्रतिषेधो वक्तव्यः॥

पञ्चपूली च पञ्चपूली च पञ्चपूली च पञ्चपूल्यः।

द्व्यर्थोऽपि गृह्यते संख्या। द्विग्रामीति। तत्रानुप्रयोगस्येति। द्विगुः समास एकवचनं प्रत्ययं प्रतिपद्यत इति पारिभाषिकैकवचनाश्रयेणायं दोषोपन्यासः। उच्यते वचनमिति। कृत्यल्युटो बहुलमिति कर्मणि ल्युट्। एकस्यार्थस्येति। वाच्यवाचकसंबन्धे षष्ठी। एकस्यार्थस्य वाचको द्विगुः समास उच्चार्यत इत्यर्थः। तत्र सामर्थ्यादयमतिदेश उपपद्यते। यो ह्यनेकस्यार्थस्य वाचकः स कथमेकस्य वाचकस्तस्मादेकत्वाश्रयकार्यप्राप्तये द्विगवर्थस्यैकवद्भावो विधीयते। ततश्च तस्मिन्नर्थे प्रयुज्यमानस्य द्विगोरप्येकवचनं सिध्यति। एकशेषप्रतिषेधश्चेति। एकशेषविषय एकवद्भाव उपचारादेकशेषशब्देनोक्तः। पञ्चपूल्य इति। अत्रैकशेषकृतेऽपि द्विगुत्वात्तदर्थस्यैकवद्भावः प्राप्तः प्रतिषिध्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवेति। प्रथमस्य द्विगर्वर्थस्यानेकसंख्यायुक्तस्यानेनैकवद्भावः कृतः। ततएकशेषे कृते द्विगर्वर्थसमुदायस्य द्विगर्वर्थत्वाद्बहिरङ्गत्वाच्च प्राथमकल्पिके न्तरङ्गे द्विगर्वर्थे चरितार्थत्वाच्चैकवद्भावो न प्रवर्ततइत्यर्थः। पञ्चकपालाविति। संस्कृतार्थे विहितस्याणो द्विगोर्लुगनपत्यइति लुक्। किंपुनरिति। यदि तावदेकस्मिन्संस्कृते प्रत्ययमुत्पाद्य लुकि कृते एकशेषः क्रियते तदा पञ्चपूल्यइत्यनेन पञ्चकपालादिति समानम्। अथ प्रथममेव पञ्चसु कपालेषु संस्कृतादिति बहुत्वसंख्यायुक्ता अर्था विवक्ष्यन्ते तदा तेषां समाह्रियमाणत्वात्समाहाररूपतास्तीति क्रियमाणेपि समाहारग्रहणे निवृत्तिर्न सिध्यतीत्यर्थः। एवं तर्हीति। नहि द्वयोर्बहूनां वा पुरोडाशानां पञ्चसु कपालेषु संस्कारः क्रियते। अपितु प्रत्येकमिति भावः। अपरआहेति। नवा समाहारैकत्वादित्येतद्वार्तिकं सूत्रप्रत्याख्यानार्थमित्येतद्व्याचष्टे। अयंभावः। तिरोहितावयवभेदः समूहरूपः समाहारो द्विगर्वर्थस्तस्यैकत्वाद्यूनयूथादि

नवान्यस्यानेकत्वात्। नवा वक्तव्यः। किंकारणम्। अन्यस्यानेकत्वात्। नैतद्द्विगोरनेकत्वम्। कस्य तर्हि द्विगर्वर्थसमुदायस्य। समाहारग्रहणं च तद्धितार्थप्रतिषेधार्थम्। समाहारग्रहणं च कर्तव्यम्। किंप्रयोजनम्। तद्धितार्थप्रतिषेधार्थम्। तद्धितार्थे यो द्विगुस्तस्य मा भूदिति। पञ्चकपालौ पञ्चकपालादिति। किंपुनरयं पञ्चकपालशब्दः प्रत्येकं परिसमाप्यते आहोस्वित्समुदाये वर्तते। किं चातः। यदि तावत्प्रत्येकं परिसमाप्यते पुरस्तादेव चोदितं परिहृतं च। अथ समुदाये पि वर्तते। नवा समाहारैकत्वात्। नवैतत्। समाहारैकत्वादपि सिध्यति। एवं तर्हि प्रत्येकं परिसमाप्यते। पुरस्तादेव चोदितं परिहृतं च। अपरआह। नवा समाहारैकत्वात्। नवा योगारम्भेणैवार्थः। किंकारणम्। समाहारैकत्वादेकवचनं भविष्यति। द्विगुरेक॥

वत्सिद्धमेकवचनमिति नार्थः सूत्रेण तस्मिंश्चासति समाहारग्रहणं न कर्तव्यम्। क्रियमाणे तु सूत्रे समाहारग्रहणं तद्धितार्थद्विगुव्यावृत्त्यर्थं कर्तव्यमेव। तेन समाहारेण व्यपदिष्टस्य द्विगोर्ग्रहणं भवति। यस्तु तद्धितार्थे न तस्य भवति। तेन पञ्चभिर्गोभिः क्रीताः पञ्चगवः पटा इत्यादौ द्विगर्वर्थस्यैकवद्भावाभावः। यदा बहूनां पटानां पञ्चगुत्वं न तु प्रत्येकं तदैकशेषस्याय मविषयः। एतदेव मन्यमानेन भाष्यकारेण पूर्वव्याख्यानेऽसमाश्वसता प्रत्याख्यानत्वेन वार्त्तिकं व्याख्यातम्॥ उत्तरपदे तु यो द्विगुस्तदर्थस्यार्थान्तरे गुणभावात्स्वातन्त्र्यासत्त्यपि प्रातिपदिकत्वे ततः प्रत्ययानुत्पादादेकवद्भावातिदेशः प्रयोजनाभावान्न प्रवर्तते॥ एम: ३९६

CC-0. In Public Domain. Digitization by eGangotri

द्वन्द्वश्च॥ ॥तत्पूर्वपदोत्तरपदग्रहणमिति।यदङ्गवाचिपूर्वपदंतदङ्गवाच्येवयद्युत्तरपदंभवतितथासत्येकवद्भावोनान्यथे
त्यर्थः।व्यतिकरोमाभूदिति।पाणिमार्दङ्गिकाश्वारोहादित्यादावेकवद्भावोमाभूदित्यर्थः।प्रत्येकमिति।बहुवचनान्तोङ्गशब्द
ःप्रत्येकमभिसंबध्यतइतिभावः।पूर्वपक्षेपिप्रत्येकमेवाङ्गशब्दस्यसंबन्धः।सत्यन्यथा।प्राण्यङ्गतूर्याङ्गसेनाङ्गवाचिनांद्व
न्द्वएकवदिति।नहिप्राणितूर्यसेनानामेकमङ्गंसंभवतीतिसामर्थ्यादेवप्रत्येकपरिसमाप्तिरङ्गशब्दस्यसिद्धा।तस्माद
न्यथाप्रत्येकंपरिसमाप्तिर्बहुवचनान्तस्यसतःप्रतिपाद्यते।तेनास्माद्ग्रहणकवाक्याद्द्वन्द्वस्यसंस्कारकंवाक्यत्रयमुप

द्वन्द्वश्चप्राणितूर्यसेनाङ्गानाम्॥ ॥प्राणितूर्यसेनाङ्गानांतत्पूर्वपदोत्तरपदग्रहणम्।प्राणितूर्यसेनाङ्गानां
तत्पूर्वपदोत्तरपदग्रहणंकर्तव्यम्।प्राण्यङ्गानांप्राण्यङ्गैरितिवक्तव्यम्।तूर्याङ्गानांतूर्याङ्गैरितिवक्तव्यम्।से
नाङ्गानांसेनाङ्गैरितिवक्तव्यम्।किंप्रयोजनम्।व्यतिकरोमाभूदिति।तत्तर्हिवक्तव्यम्।नवक्तव्यम्।योगविभागा
त्सिद्धम्।योगविभागःकरिष्यते।प्राण्यङ्गानाम्।ततस्तूर्याङ्गानाम्।ततःसेनाङ्गानामिति।सतर्हियोगविभागः
कर्तव्यः।नकर्तव्यः।प्रत्येकमङ्गशब्दःपरिसमाप्यते॥अनुवादेचरणानाम्॥ ॥इहकस्मान्नभवति।नन्दन्तुकठ
कालापाः।वर्धन्तांकठकौथुमाः।स्थेणोः॥स्थेणोरितिवक्तव्यम्।एवमपितिष्ठन्तुकठकालापाइत्यत्रापिप्राप्नोति।
अद्यतन्यांचेतिवक्तव्यम्।उदगात्कठकालापम्।प्रत्यष्ठात्कठकौथुमम्।उदगात्कौमोदपैप्पलादम्॥ ॥विशिष्ट
लिङ्गोनदीदेशोऽग्रामाः॥ ॥ग्रामप्रतिषेधेनगरप्रतिषेधः।अग्रामादित्यत्रनगराणामितिवक्तव्यम्।इहमाभू
त्।मथुरापाटलिपुत्रमिति।उभयतश्चग्रामाणांप्रतिषेधोवक्तव्यः।शौर्यंचकेतवताचशौर्यकेतवते।जाम्बवंच
शालूकिनीचजाम्बवशालूकिन्यौ॥ ॥क्षुद्रजन्तवः॥ ॥क्षुद्रजन्तवदित्युच्यते।केक्षुद्रजन्तवः।क्षोतव्याजन्तवःक्षुद्रजन्तवः
॥यद्येवंयूकालिक्षम्।कीटपिपीलिकंदंशमशकमितिनसिध्यति।एवंतर्ह्यनस्थिकाःक्षुद्रजन्तवः।अथवायेषांस्वंशोणितंना
स्तितेक्षुद्रजन्तवः।अथवायेषामासहस्रादञ्जलिर्नपूर्यतेतेक्षुद्रजन्तवः।अथवायेषांगोचर्ममात्रंराशिंहत्वानपततितेक्षुद्रजन्तवः।

स्वतइतिसंकरोनभवति॥अनुवादो।यदाप्रतिपन्नाप्रमाणान्तरावगतमप्यर्थंकार्यान्तरार्थंप्रयोक्ताप्रतिपाद्यतेनदानुवादोभवति॥ ॥वि
शिष्ट॥ ॥जनपदविशेषोग्रामः।ग्रामेनाध्येयमभक्ष्योग्राम्यकुक्कुटइत्यादौग्रामग्रहणेनगरस्यापिग्रहणदर्शनाद्वचनम्।अग्रा
मादित्यत्रेति।उभयतइति।ग्रामनगरोभयावयवेद्वन्द्वेग्रामसंबन्ध्येवप्रतिषेधोवक्तव्यः।शौर्यंनगरम्।केतवताग्रामः।जाम्बवं
नगरंशालूकिनीग्रामः।क्षुद्रजन्तवः॥ ॥स्मृतीनांविरुद्धानांदर्शनात्प्रश्नःकेक्षुद्रजन्तवइति।क्षोत्तव्याइति।अर्हार्थेकृत्यः।ये
क्षुद्यमानाअपिनम्रियन्तेजलौकःप्रभृतयः।येतुम्रियन्तेतेपापनिमित्तत्वात्क्षोदनार्हाः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· नकुलपर्यन्तादिति। एतदेवदर्शनमत्रव्यापित्वादाश्रीयते। अत एवैतत्पश्चादुपन्यस्तम्॥ ॥येषां च॥ ॥यदन्यदिति। चकारेण यत्ने
३९७ नपरो विकल्पो बाध्यते। तेनाश्वमहिषं काकोलूकमिति नित्य एकवद्भावो भवति॥ ॥शूद्राणाम्॥ ॥निरवसिता बहिष्कृता उच्यन्ते। तत्रावधिप्रश्नः कुत इति। प्रागादर्शादिति। आदर्शादयः पर्वतविशेषाः। दक्षिणेनेति। एनबन्तः। एनपा द्वितीया। प्रागादिभ्यः प्रथमान्तेभ्यो दिक्शब्देभ्यः प्रत्ययो विहितः। एतत्पर्वतचतुष्टयमध्य आर्यावर्तो देश इत्यर्थः। यद्येवमिति। एतेषामार्यावर्ताद्बाह्यत्वादिति भावः। ग्राम इति। एतेष्वार्या निवसन्तीति भावः। तत्र ग्रामः प्रसिद्धः। घोषो गोमहिष्यादिनिवासः। संवाहो वणिक्प्रधानः।

अथवा नकुलपर्यन्ताः क्षुद्रजन्तवः। येषां च विरोधः शाश्वतिकः॥ ॥किमर्थश्चकारः। एवकारार्थश्चकारः। येषां विरोधः शाश्वतिकस्तेषां द्वन्द्व एकवचनमेव यथा स्यात्। यदन्यत्प्राप्नोति तन्मा भूदिति। किं चान्यत्प्राप्नोति। पशुशकुनिद्वन्द्वे विरोधिनां पूर्वविप्रतिषिद्धमित्युक्तं तन्न वक्तव्यं भवति॥ शूद्राणामनिरवसितानाम्॥ ॥अनिरवसितानामित्युच्यते। कुतोऽनिरवसितानाम्। आर्यावर्तादनिरवसितानाम्। कः पुनरार्यावर्तः। प्रागादर्शात्प्रत्यक्कालकवनाद्दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम्। यद्येवं किष्किन्धगन्धिकं शकयवनं शौर्यक्रौञ्चमिति न सिध्यति॥ एवं तर्ह्यार्यनिवासादनिरवसितानाम्। कः पुनरार्यनिवासः। ग्रामो घोषो नगरं संवाह इति। एवमपि य एते महान्तः संस्त्यायास्तेष्वभ्यन्तराश्चण्डाला मृतपाश्च वसन्ति। तत्र चण्डालमृतपा इति न सिध्यति। एवं तर्हि याज्ञात्कर्मणोऽनिरवसितानाम्। एवमपि तक्षायस्कारं रजकतन्तुवायमिति न सिध्यति। एवं तर्हि पात्रादनिरवसितानाम्। यैर्भुक्ते पात्रं संस्कारेण शुध्यति तेऽनिरवसिताः। यैर्भुक्ते पात्रं संस्कारेणापि न शुध्यति ते निरवसिता इति॥ ॥गवाश्वप्रभृतीनि च॥ ॥गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तम्। गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तं द्रष्टव्यम्। गवाश्वम्। गवाविकम्। गवैडकम्॥

संस्त्याया इति। निवासविशेषा इत्यर्थः। मृतपा डोम्बा इत्याहुः। याज्ञादिति। शूद्राणां पञ्चयज्ञानुष्ठानेऽधिकारोऽस्तीति भावः। तक्षायस्कारमिति। तक्षादीनां यज्ञेऽधिकाराभावादिति भावः। संस्कारेणेति। यः संस्कारः स्मृतिकारैर्द्रव्यशुद्धौ पठितस्तेनैव न तदधिकेनेत्यर्थः॥ गवाश्वप्र॥ यथोच्चारितमिति। गणे यादृशाः कृतावङः पठिता द्वन्द्वास्तादृशानामेवेदं कार्यमेकवद्भावलक्षणं भवतीत्यर्थः। यदा त्ववङ्नास्ति विकल्पितत्वात्तदा पशुद्वन्द्वविभाषा भवति गोश्वं गोश्वा इति। एतेन गणपाठरूपं विवक्षितमित्युक्तं भवति। रामः ३९७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभाषावृक्ष॥ बहुप्रकृतिरिति। बहवो बहुत्वसंख्यायुक्ता वर्तिपदार्थाः प्रकृतयः कारणं नियमस्य स बहुप्रकृतिः। बदरामलक
मिति। जातिरप्राणिनामित्येकवद्भावः। क्वचित्तु बदरामलकानीत्यपि पठ्यते। तत्रैवं व्याचक्षते। नित्य एकवद्भावे प्राप्ते विकल्पो
ऽनेन वचनेन क्रियते। अन्ये तु बदरामलकानीत्येवं प्राप्ते जातिलक्षणो नित्य एकवद्भावो बहुप्रकृतेर्भवतीति प्रदर्श्यत इत्याहुः

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्॥ ॥ बहुप्रकृतिः फलसेनावन
स्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानाम्। फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां द्वन्द्वः वि
भाषा एकवद्भवति बहुप्रकृतिरिति वक्तव्यम्। फल। बदरामलकम्। बदरामलकानि। सेना। हस्त्यश्वम्। हस्त्य
श्वाः। वनस्पति। प्लक्षन्यग्रोधम्। प्लक्षन्यग्रोधाः। मृग। रुरुपृषतं रुरुपृषताः। शकुनि। हंसचक्रवाकम्। हंसच
क्रवाकाः। क्षुद्रजन्तु। यूकालिक्षम्। यूकालिक्षाः। धान्य। व्रीहियवम्। व्रीहियवाः। माषतिलं माषतिलाः। तृण। कु
शकाशं कुशकाशाः। शरशीर्षं शरशीर्षाः। किं प्रयोजनम्। बहुप्रकृतिरेव यस्तत्र यथा स्यात्। क्व मा भूत्। बदराम
लके तिष्ठतः। किं पुनरनेन या प्राप्तिः सा नियम्यत आहोस्विदविशेषेण। किं चातः। यद्यनेन या प्राप्तिः सा नियम्य
ते प्लक्षन्यग्रोधौ जातिरप्राणिनामिति नित्यो द्वन्द्वैकवद्भावः प्राप्नोति। अथाविशेषेण ——— न दोषो भवति। य
था न दोषस्तथास्तु॥ पशुशकुनिद्वन्द्वे विरोधिनां पूर्वविप्रतिषिद्धम्। पशुशकुनिद्वन्द्वे विरोधिनां येषां च विरोधः शा
श्वतिक इत्येतद्भवति पूर्वविप्रतिषेधेन। पशुशकुनिद्वन्द्वस्यावकाशः। महाजोरभ्रम्। महाजोरभ्राः। हंसचक्र
वाकं हंसचक्रवाकाः। येषां च विरोधः शाश्वतिक इत्यस्यावकाशः। श्रमणब्राह्मणम्। इहोभयं प्राप्नोति काको-
लूकम् श्वशृगालमिति। येषां च विरोधः शाश्वतिक इत्येतद्भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो व
क्तव्यः। न वक्तव्यः। उक्तं चकारकरणस्य प्रयोजनं येषां च विरोधः शाश्वतिकस्तेषां द्वन्द्व एकवचनमेव यथा स्याद्
यदन्यत्प्राप्नोति तन्मा भूदिति॥ ॥

।हस्त्यश्वमिति। सेनाङ्गत्वेऽपि परत्वात्पशुलक्षणो विकल्पो भवति। किं पुनरिति। अस्मिन्प्रदेशे पठितत्वात्किमनेन सूत्रविहित एव ए
कवद्भावो नियतविषयो व्यवस्थाप्यते अथ प्रकरणविहित इति प्रश्नः। येषां सूत्रान्तरेणानेन च प्राप्तिर्वनस्पत्यादीनां तद्विषय एव
संप्रयोगस्त्वन्यतरप्राप्तिविषयः। यथा न दोष इति। व्यापित्वात्प्रकरणापेक्षोऽयं विषयनियम इत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ ३९८ अश्ववडवयोरिति। पशुत्वाद्विभाषैकवद्भावः। तत्रैकवद्भावपक्षे नपुंसकत्वमपि प्राप्नोति पूर्ववदश्ववडवावित्यतिदेशात् पुंस्त्व २७१
मपि। तत्र परत्वात्पुंस्त्वे प्राप्ते पूर्वविप्रतिषेध उच्यते। प्रतिपदविधानादिति। नात्र पशुग्रहणेनैकवद्भावो विधीयते किं तर्ह्य-
श्ववडवग्रहणेन न तत्र प्रतिपदविधानात्स नपुंसकमित्येतद् भवति। तच्छब्देन ह्येकवद्भावभाजं परामृश्य नपुंसकत्वं विधी
यते। तेन यथैकवद्भावो न प्रतिपदं विधीयते न तथा नपुंसकत्वमिति भावः। समाहारैकत्वादिति। तिरोहितावयवभेदो

अश्ववडवयोः पूर्वलिङ्गत्वात्पशुद्वन्द्वनपुंसकम्। अश्ववडवयोः पूर्वलिङ्गत्वात्पशुद्वन्द्वनपुंसकं भवति
पूर्वविप्रतिषेधेन। अश्ववडवयोः पूर्वलिङ्गत्वस्यावकाशः। विभाषा पशुद्वन्द्वनपुंसकं पदान पशुद्वन्द्वनपुंस
कंसोवकाशः। अश्ववडवौ। पशुद्वन्द्वनपुंसकस्यावकाशः। अन्ये पशुद्वन्द्वाः। महाजोरभ्रं महाजोरभ्राः। पशुद्व
न्द्वनपुंसकप्रसङ्ग उभयं प्राप्नोति। अश्ववडवम्। पशुद्वन्द्वनपुंसकं भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्ववि
प्रतिषेधो वक्तव्यः। न वक्तव्यः। प्रतिपदविधानात्सिद्धम्। प्रतिपदमत्र नपुंसकं विधीयते। अश्ववडवपूर्वापरे
ति। एकवचनमनर्थकं समाहारैकत्वात्। एकवद्भावोऽनर्थकः। किं कारणम्। समाहारैकत्वात्। एको यमर्थः
समाहारो नाम तस्यैकत्वादेकवचनं भविष्यति। इदं तर्हि प्रयोजनम्। एवं विज्ञास्यामि। इह नित्यो विधिरिह
विभाषेति। नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति सर्वो द्वन्द्वो विभाषैकवद्भवतीति। यदयं तिष्यपुनर्वस्वो
र्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यमित्याह। इदं तर्हि प्रयोजनम्। स नपुंसकमिति वक्ष्यामीति। एतदपि
नास्ति प्रयोजनम्। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य। न तर्हीदानीमिदं वक्तव्यम्। वक्तव्यं च। किं प्रयोजन
म्। पूर्वत्र नित्यार्थम्। उत्तरत्र व्यभिचारार्थं विभाषा वृक्षमृगादिति॥ विभाषा समीपे॥ ॥किमुदाहरणम्। उपदशं
पाणिपादा उपदशाः पाणिपादाः। नैतदस्ति प्रयोजनम्।

हि समाहारः स च वनयूथादिवदेक इत्यर्थः। इह नित्य इति। द्वन्द्वश्चेत्यारभ्यास्माद्योगात्प्राग् नित्यो विधिरनेन तु योगद्वयेन विभाषेत्यर्थः
यद्द्ययमिति। यद्येतत्प्रकरणे पाठानामेवैकवद्भावः स्यात्तदा तिष्यपुनर्वस्वोरत्रापठितत्वादेकवद्भावस्याभावात्तन्निवृत्त राम:
ये बहुवचनग्रहणमनर्थकं स्यादित्यर्थः। पूर्वत्रेति। प्राण्यङ्गादीनां समाहार एवेत्येवमर्थमित्यर्थः। उत्तरत्रेति। क्वचिज्जातिरप्राणि ३९८
नामिति प्राप्ते विभाषा। मृगादीनां तु व्यतिकरनिरासार्थम्॥ विभाषास॥ ॥अनुप्रयोगे दोषदर्शनात्प्रश्नः। किमुदाहरणमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कः प्रसङ्ग इति। नन्वर्थैस्येकवद्भावादनुप्रयोगस्यापि सेत्स्यति। नैनदस्ति। यदि तावदव्ययीभाव एवानुप्रयुज्यते तदा तस्याव्ययत्वाद
संख्यत्वाद्बहुवचनं न स्यात्। सत्यपि वा तस्मिन्नभावे कृते उपदशा इति न स्यात्। अथ बहुव्रीहिरेवानुप्रयुज्यते तदोपदशस्य-
पाणिपादस्येति षष्ठी स्यात्। उपदशमिति चेष्यते। एतदेव मनसि कृत्याह। एवं तर्हीति। अव्ययीभावोऽव्ययं विभक्तीति विहितः।
बहुव्रीहिस्तु संख्ययाव्ययेति। तद्यदेति। अव्ययीभावस्याव्ययत्वादसंख्यत्वादेकवचनस्य उत्सर्गत्वादिति भावः। एकार्थ इति
ति। अभेदैकत्वाश्रयादित्याहुः। यदेति। बहुव्रीहेः समीपप्रधानत्वाद्बह्वर्थत्वमिति भावः॥ ॥तत्पुरुषो॥ ॥उत्तरेषु केषुचिद्यो

अयं द्वन्द्वैकवद्भाव आरभ्यते तत्र कः प्रसङ्गो यदनुप्रयोगस्य स्यात्। एवं तर्ह्यव्ययस्य संख्ययाऽव्ययीभावोप्या
रभ्यते बहुव्रीहिरपि। तद्यदा तावदेकवचनं तदाव्ययीभावोनुप्रयुज्यते। एकार्थस्येकार्थ
इति। यदा बहुवचनं तदा बहुव्रीहिरनुप्रयुज्यते बह्वर्थस्य बह्वर्थ इति॥ ॥तत्पुरुषोऽनञ्कर्मधारयः॥ ॥
किमर्थमिदमुच्यते। संज्ञायां कन्थोशीनरेष्विति वक्ष्यति। तदनत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति। नैत
दस्ति प्रयोजनम्। नहि संज्ञायां कन्थान्त उशीरनरेषु तत्पुरुषो नञ्समासः कर्मधारयो वास्ति। उत्तरार्थं तर्हि। उ
पज्ञोपक्रमं तदाद्याचिख्यासायामिति वक्ष्यति तदनत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति। नै
तदस्ति प्रयोजनम्। नहि तदाद्याचिख्यासायामुपज्ञोपक्रमान्तोऽतत्पुरुषो नञ्समासः कर्मधारयो वास्ति। उत्तरा
र्थमेव तर्हि। छाया बाहुल्य इति वक्ष्यति ——— तदनत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति। नै
तदस्ति प्रयोजनम्। नहि छायान्तो बाहुल्येऽतत्पुरुषो नञ्समासः कर्मधारयो वास्ति। उत्तरार्थमेव तर्हि सभा रा
जाऽमनुष्यपूर्वा अशाला चेति वक्ष्यति। तदनत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति। एतदपि ना
स्ति प्रयोजनम्। नहि सभान्तोऽशालायामतत्पुरुषो नञ्समासः कर्मधारयो वास्ति। इदं तर्हि विभाषा सेनासुरे
ति वक्ष्यति तदनत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति।

गेष्वन्यथासिद्धिं दृष्ट्वा पृच्छति॥ किमर्थमिति। शिष्यबुद्धिपरीक्षार्थमन्यथासिद्धमपि तावत्प्रयोजनमाह। पश्चात्तु नन्यथासि
द्धं दर्शयिष्यति। नहीति। अनादिस्तत्र संज्ञा गृह्यते न त्विदानीं तनीति भावः। नहीति। षष्ठीतत्पुरुषाद्विना तदादित्वासंप्रत्ययः। नहि-
च्छायान्त इति। पूर्वपदार्थधर्मो बाहुल्यं न च षष्ठीतत्पुरुषाद्विना बाहुल्यं गम्यते। नहि सभान्त इति। अशालेति वचनात्संघातवचनः
सभाशब्दो ग्राह्यो न च समूहिभिर्विना समूहोपपत्तिरिति षष्ठीतत्पुरुषस्यैव ग्रहणमिति भावः। इदं तर्हीति। अत्र तु प्रदेशे मन्दबु-
द्ध्यनुग्रहायाधिकारः कृतः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परवत्॥ ॥द्वन्द्वापेक्षयाकिमिदंविध्यर्थमाहोस्विन्नियमार्थम्।तयाकिंषष्ठीनिर्देशेनसमासार्थस्यलिङ्गातिदेशः।अथसप्त
म्याश्रयेणपूर्वपदस्येतिसंशयानःपृच्छति।किमर्थमिति।द्वन्द्वोयमिति।षष्ठीनिर्देशोनियमश्चेतिभावः।तत्रावयवार्थव्यतिरिक्त
:समुदायार्थोनास्तीत्युभयपदार्थप्रधानद्वन्द्वइत्यनेनदर्शितंभवति।तत्रपदाऽपेक्षितपरस्परोविरुद्धलिङ्गावयवार्थावेवसमुदा
यार्थस्तदापर्यायेणलिङ्गद्वयप्रसङ्गेनियमार्थमिदंसंपद्यते।यद्येवंपरस्यैवसंबन्धिलिङ्गंक्रियतइतिसादृश्याभावाद्वदितिनि
र्देशोनोपपद्यते।नैषदोषः।केवलाकेवलावस्थाभेदाश्रयेणभेदमाश्रित्यवतिनिर्देशःकृतः।तत्पुरुषापेक्षयाविध्यर्थत्वंद
र्शयति।तत्पुरुषश्चापीति॥देवकृतमिति।अयत्नसिद्धमित्यर्थः।पूर्वपदस्यचेति।सप्तमीनिर्देशाश्रयेणदोषोद्भावनम्।तत्र

तत्पुरुषइतिकिमर्थम्।दृढसेनोराजा।अनञिनिकिमर्थम्।असेना।अकर्मधारयइतिकिमर्थम्।परमसे
ना।उत्तमसेना॥परवल्लिङ्गंद्वन्द्वतत्पुरुषयोः॥ ॥किमर्थमिदमुच्यते॥द्वन्द्वोयमुभयपदार्थप्रधानः।तत्र
कदाचित्पूर्वपदस्ययल्लिङ्गंतत्समासस्यापिस्यात्कदाचिदुत्तरपदस्य।इष्यतेचपरस्ययल्लिङ्गंतत्समास
स्ययथास्यादिति।तच्चान्तरेणयत्नंनसिध्यतीति।परवल्लिङ्गंद्वन्द्वतत्पुरुषयोरित्येवमर्थमिदमुच्यते।तत्पुरुष
श्चापिकःप्रयोजयति।यःपूर्वपदार्थप्रधानएकदेशिसमासोर्धपिप्पलीति।योह्युत्तरपदार्थप्रधानः।देवकृतंत
स्यपरवल्लिङ्गम्।परवल्लिङ्गंद्वन्द्वतत्पुरुषयोरितिचेत्प्राप्तापन्नालंपूर्वगतिसमासेषुप्रतिषेधोवक्तव्यः।प्रा
प्तोजीविकांप्राप्तजीविकः।आपन्नोजीविकामापन्नजीविकः।अलंपूर्व।अलंजीविकायैअलंजीविकः।गति
समासः।निष्कौशाम्बिः।निर्वाराणसिः।पूर्वपदस्यच।पूर्वपदस्यचप्रतिषेधोवक्तव्यः।मयूरीकुक्कुटौ।यदिपु
नर्यथाजातीयकंपरस्यलिङ्गंतथाजातीयकंसमासादन्यदतिदिश्यते।समासादन्यल्लिङ्गमितिचेदश्ववडव
योष्टाब्लुग्वचनम्।

ह्ययमर्थोभवति।द्वन्द्वेतत्पुरुषेचयत्परंतद्वल्लिङ्गंभवतितत्रकार्यिणोनुपादानात्परशब्दस्यसंबन्धिशब्दत्वात्तदाक्षिप्तंपू
र्वपदमेवकार्यभाक्प्राप्नोति।तत्रमयूरीकुक्कुटावितिपूर्वपदस्यपुंस्त्वातिदेशेस्त्रीप्रत्ययनिवृत्तिप्रसङ्गः।कुक्कुटमयूर्याविति
त्स्त्रीप्रत्ययप्रसङ्गस्तथार्धपिप्पलीत्यादावपीतिप्रतिषेधउच्यते।पूर्वपदप्रतिषेधेचकृतेसामर्थ्याद्द्वन्द्वतत्पुरुषयोरेव
कार्यित्वंसंपद्यते।यदिपुनरिति।षष्ठीनिर्देशोव्यतिरिक्तसमुदायदर्शनंचाश्रीयते।व्यतिरिक्तसमुदायपक्षेहिमुख्यसादृ रामः
श्योपपत्तिरितिभावः।समासादन्यदिति।समासार्थलिङ्गमुपचारात्समासशब्देनोच्यते।तेनोत्तरपदार्थलिङ्गसदृशंसमा ३९९
सार्थस्यस्वलिङ्गंबाधनायलिङ्गान्तरमतिदिश्यतइत्युक्तंभवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्ववडवाविति। परवल्लिङ्गं प्राप्ते पूर्ववदश्ववडवाविति पूर्वपदार्थलिङ्गसदृशं पुल्लिङ्गं समासार्थस्य विधीयते नन्तूत्तरपदार्थस्ये
ति स्त्रीत्वस्यानिवर्तनाट्टापः श्रवणे प्राप्ते लुग्वक्तव्यः। निपातनादिति। टाबित्यस्याहृपमेतदित्यर्थः। पूर्ववदश्ववडवाविति निपा
तनमाश्रयितुं न युज्यते वचनान्तरे पूर्वपदलिङ्गातिदेशाप्रसङ्गादश्ववडवानश्ववडवैरिति मत्वा पृच्छति। किं निपातनमि-
ति। अश्ववडवपूर्वापरेति। अश्ववडवापूर्वापरेति वक्तव्ये टापोनुच्चारणं निपातनमित्यश्ववडवयोर्द्वन्द्वे टाप्निवर्त्यते। उपसर्जन
ह्रस्वत्वमिति। अनेकमिति प्रथमानिर्दिष्टत्वात्समुदायार्थेऽवयवार्थस्य गुणभावादुपसर्जनत्वमिति भावः। इहापीति। ततश्च कुकु
टमयूरीइति प्राप्नोति। शब्दशब्दार्थाविति॥ लिङ्गशब्देन लिङ्गाभिधायी प्रत्ययोर्थश्चात्र न्नौ लोकश्लेषेणाचोच्यत इत्यर्थः। आतिदेशि

समासात्दन्यलिङ्गमिति चेदश्ववडवयोष्टापो लुग्वक्तव्यः। अश्ववडवौ। निपातनात्सिद्धम्। निपातनात्सिद्धमेत
त्। किं निपातनम्। अश्ववडवपूर्वापरेति। उपसर्जनह्रस्वत्वं वा। अथवा उपसर्जनस्येति ह्रस्वत्वं भविष्यति। इ
हापि तर्हि प्राप्नोति। कुक्कुटमयूर्याविति। अस्तु परवल्लिङ्गमिति शब्दशब्दार्थौ। परवल्लिङ्गमिति शब्दशब्दा
र्थावतिदिश्येते। तत्रौपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य श्रवणं भविष्यति। इदं तर्हि दत्ता च कारीषगन्ध्या
च दत्ताकारीषगन्ध्ये। दत्ता च गार्ग्यायणी च दत्तागार्ग्यायण्यौ। ङ्यौ ष्यङो ङ्यौ ष्यङौ च प्राप्नुतः। स्त्राभूः पुंवद्भावेन कस्य
निवृत्तिर्भविष्यति। इदं तर्हि दत्ता च युवतिश्च दत्तायुवती ङ्यौतिशब्दौ प्राप्नुतः। तस्मान्नैतच्छक्यं वक्तुं शब्दश
ब्दार्थावतिदिश्येते इति। ननु चोक्तं समासात्दन्यलिङ्गमिति चेदश्ववडवयोष्टाब्लुग्वचनमिति। परिहृतमेत
त्। निपातनात्सिद्धमिति। अथवा नैवं विज्ञायते॥

कस्य श्रवणमिति। तस्यानुपसर्जनत्वात्तदन्तस्य चाप्रातिपदिकत्वाद्ध्रस्वाभावात्। ङ्यौ ष्यङाविति। तत्र यस्येति चेत्याकारलो
पे कृते ङ्यौ यकारो श्रूयेयाताम्। हलो यमामिति विकल्पितो लोपः। यद्यपि यणो मय इति द्विर्वचने नात्र भाव्यं तथापि पक्षे यका
रत्रयश्रवणप्रसङ्गः। पुंवद्भावेनेति। भस्याढे तद्धित इत्यनेनेति भावः। ङ्यौतिशब्दाविति। अत्र ह्यभावान्नास्ति पुंवद्भावः। तस्मा
न्नैतदिति। उपसर्जनह्रस्वत्वं तु न भवत्यन्वर्थसंज्ञाविज्ञानादप्रधानस्योपसर्जनसंज्ञाविधानात्सकलपदार्थप्रधानत्वाच्च
द्वन्द्वस्य। व्यतिरिक्तसमुदायरूपद्वन्द्वार्थाभ्युपगमेपि अवयवानां कार्यसंबन्धात्फलतः प्राधान्यमेव। अथवेति। नायं नियमः
किं तु विधिरित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा॰ कै॰ परस्यैवेति। एवशब्दप्रयोगेण नियमं निषेधाय दर्शयति। नत्वेवार्थवतिर्विहितः। यथा च नियमपक्षे वतिस्तथा पद्यते तेन यथापूर्वमेव प्र- २५१
५०० तिपादितम्। इह त्रीणि दर्शनानि। अवयवा अपेक्षितपरस्परा द्वन्द्वार्थः न तु व्यतिरिक्तः समुदायोऽस्ति। अत्र दर्शने नियमार्थमिदम्।
अवयवार्थव्यतिरिक्तो वा समुदायो द्वन्द्वार्थः स चावयवलिङ्गैर्नैव लिङ्गवानित्यत्रापि दर्शने पर्यायेण लिङ्गप्राप्तौ वचनं नियमा-
र्थम्। यदा तु समुदायो द्वन्द्वार्थः स चालिङ्ग इति दर्शनं तदा विध्यर्थमिदम्। अथ पूर्वपदस्येति। अतः पूर्वपदस्येत्यर्थः। एतेन
मयूरीकुक्कुटाविति परिहृतं षष्ठ्याश्रयेण दर्शनत्रयेऽपि। मध्यमे तु दर्शने आश्रयभेदाल्लिङ्गभेदाश्रयेण परवदिति साहच-
र्याश्रयो वतिः। एकदेशिसमासो नारभ्यत इति। पूर्वापराधरेति योगत्रयं नारभ्यते। परवल्लिङ्गं द्वन्द्वस्येत्येतावच्च क्रियते सूत्रमि-

परस्येव परवदिति कथं तर्हि परस्येव परवदिति। यथाजातीयकं परस्य लिङ्गं तथाजातीयकं समासस्याति-
दिश्यत इति। अथ पूर्वपदस्य न प्रतिषिध्यते। प्राप्तादिषु कथम्। प्राप्तादिषु चैकदेशिग्रहणं क्रियताम्। द्वन्द्वै-
कदेशिनोरिति वक्ष्यामि। तदेकदेशिग्रहणं कर्तव्यम्। न कर्तव्यम्। एकदेशिसमासो नारभ्यते। कथमर्धपिप्पलीति। समा-
नाधिकरणो भविष्यति। अर्धं चासौ पिप्पली च अर्धपिप्पलीति। न सिध्यति। परत्वात्षष्ठीसमासः प्राप्नोति।
अथ पुनरयमेकदेशिसमास आरभ्यमाणः षष्ठीसमासं बाधते। दृश्यते च षष्ठीसमासोऽपि। तद्यथा। अपूपा-
र्धं मया भक्षितं ग्रामार्धं मया लब्धमिति। एवं पिप्पल्यर्धमित्यपि भवितव्यम्। कथमर्धपिप्पलीति। समाना-
धिकरणो भविष्यति॥ रात्राह्नाहाः पुंसि॥ ॥अनुवाकादयः पुंसि। अनुवाकादयः पुंसि भाष्यन्त इति वक्तव्य-
म्। अनुवाकः। शंयुवाकः। रात्रा॥ अपथं नपुंसकम्॥ ॥पुण्यसुदिनाभ्यामह्नो नपुंसकत्वं वक्तव्यम्। पुण्याहम्।

त्यर्थः। अर्धं चासौ पिप्पली चेति। अवयवे समुदायोपचारात्सामानाधिकरण्यम्। तत्रोत्तरपदार्थस्य प्राधान्यात्तदीयमेव लि-
ङ्गं न त्सुहषस्यापि भवतीति नार्थस्तत्पुरुषग्रहणेनेत्यर्थः। परत्वादिति। अयमर्थः। नतेः प्रयोजनादिष्टं मुख्यशब्दार्थलुम्पन-
मिति भेदाश्रयणमेव परं मुख्यं प्रधानं न तत्र षष्ठीसमास एव प्राप्नोति भिन्नविषयत्वात्तु शास्त्रापेक्षं परत्वमत्र न विवक्षित-
म्। समानाधिकरणो भविष्यतीति। एवमादिप्रयोगसिद्धिरेवोपचाराश्रयणस्य प्रयोजनम्। मुनित्रयाच्च भाष्यकारः प्रमाणतर- राम॰
मधिकलक्ष्यदर्शित्वात्॥ रात्रा॥ ॥अनुवाकइति। अनूच्यत इत्यनुवाकस्तत्र विशिष्टं वाक्यमभिधेयमिति नपुंसकत्वे प्रा- ५००
प्ते वचनम्॥ अपथम्॥ ॥पुण्याहमिति॥ रात्राह्नाहाः पुंसीति प्राप्ते वचनम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुदिनाहमिति। सुदिनशब्दोऽत्र प्रशंसामात्रवाची तेन सुदिनाहशब्दयोर्युगपद्विरुद्धः प्रयोगः। दृश्यते च प्रशंसार्थस्य प्रयोगः। सुदिना सुसमा सुकार्यमेतत्सविचिन्वीत विशेषतः स्वयं चेति। चतुष्पथमिति। षष्ठीतत्पुरुषः समाहारद्विगौ तु द्विगुश्चेति सिद्धमेव नपुंसकत्वम्। उत्पथमिति। कुगतिप्रादय इति तत्पुरुषः। अव्ययादित्वादपथशब्दस्य नपुंसकत्वे सिद्धे किं सूत्रेणेति चेत्पूर्वकालत्वात्सूत्रस्य नायं दोषः। द्विगुश्च समास इति। स नपुंसकमित्यस्यानन्तरं प्रक्रान्तो द्वन्द्व एव सद् इत्यनेन परामृश्यत इति द्विगोरप्राप्तं नपुंसकत्वमिति वचनम्। यथा सामन्त्रितमित्यत्र संबोधनप्रथमैव परामृश्यते। समाहारद्विगोश्चेह ग्रहणं न तु तद्धितार्थद्विगोः। पञ्चगवमिति। यदा पञ्च गावः समाहृता इत्यत्रार्थे द्विगुस्तदोत्तरपदार्थस्य प्राधान्यात्तदीयं लिङ्गं प्राप्नोति। यदा तु समूहोऽभिधेयस्तदा तस्यावनंसेनासंघ इत्यादिवदनियतलिङ्गत्वं प्राप्तमिति वचनम्। पञ्चखट्वीति। टा

सुदिनाहम्। पथः संख्याव्ययादेरिति वक्तव्यम्। द्विपथं त्रिपथं चतुष्पथम्। उत्पथं विपथम्। द्विगुश्च ॥ द्विगुश्च समासो नपुंसकं भवतीति वक्तव्यम्। पञ्चगवं दशगवम्। अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत इति वक्तव्यम्। पञ्चपूली दशपूली। वाऽबन्तः। वा आबन्तः स्त्रियां भाष्यत इति वक्तव्यम्। पञ्चखट्वी पञ्चखट्वम्। दशखट्वी दशखट्वम्। अनो नलोपश्च॥ वा च स्त्रियां भाष्यत इति वक्तव्यम्। पञ्चतक्षी पञ्चतक्षम्। पात्रादिभ्यः प्रतिषेधो वक्तव्यः। पञ्चपात्रं द्विपात्रम्॥ ॥अर्धर्चाः पुंसि च॥ ॥अर्धर्चादय इति वक्तव्यम्। अर्धर्चम्। अर्धर्चः। कार्षापणं कार्षापणः। गोमयं गोमयः। सरकं सरकः। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। बहुवचननिर्देशात्सिद्धम्। बहुवचननिर्देशादाद्यर्थो गम्यते॥

प उपसर्जनह्रस्वत्वे कृते द्विगोरिति ङीप्। यदा तु समूहोऽभिधेयस्तदोपसर्जनह्रस्वत्वं सिध्यति न तु समाह्रियमाणोऽभिधेय इति तत्रैव सूत्रे उक्तम्। पञ्चखट्वमित्यत्र त्वसत्युपसर्जनत्वे नपुंसकह्रस्वत्वं सिध्यति। उपसर्जनत्वे तु परत्वात्तदाश्रयं ह्रस्वत्वम्। अनो नलोपश्चेति। चशब्देन वा स्त्रियां भाष्यत इति समुच्चीयते नलोपस्तु नित्यमेव क्रियते। उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणनिषेधात्परत्वाभावाल्लोपो न प्राप्नोतीति वचनम्। पात्रादिभ्य इति। तादर्थ्ये चतुर्थीयम्। आकृतिगणश्च पात्रादिः॥ ॥अर्धर्चाः॥ ॥कार्षापणादिसंग्रहायाह। अर्धर्चादय इति वक्तव्यमिति। बहुवचननिर्देशात्सिद्धमिति। साहचर्यादर्धर्चशब्देनान्येषामभिधानात्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

 इदमो॥ ॥पश्चात्कथनमात्रमन्वादेशः प्रसिद्ध इत्यधिकरणप्रसङ्गनिवारणायाह। अन्वादेश इति। इमं चेति। एनादेशः
प्राप्तो निवार्यते। अन्वादेशश्चेति। प्रत्यासत्त्येदमैव कथितं यदानुकथ्यते तेनैव तदान्वादेशो भवतीति भ्रान्तिनिवारणाय
वार्तिकम्। तत्र समानाधिकरणग्रहणाच्छब्दान्तरेणेदमा वा कथितं यदानुकथ्यते तदान्वादेशो भवति। द्रक्ष्यामीति। वि

इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ॥ ॥अन्वादेशे समानाधिकरणग्रहणम्। अन्वादेशे समानाधिकरणग्रहणं कर्तव्यम्। किंप्रयोजनम्। देवदत्तं भोजयेमं चेत्यप्रसङ्गार्थम्। इह माभूत्। देवदत्तं भोजयेमं च यज्ञदत्तं भोजयेति। अन्वादेशश्च कथितानुकथितमात्रम्। अन्वादेशश्च कथितानुकथितमात्रं द्रष्टव्यम्। तद् द्वैष्यं विजानीयादिदमा कथितमिदमैवानुकथ्यत इति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे अन्वादेशश्च कथितानुकथितमात्रमिति। अथ किमर्थमशादेशः क्रियते। न तृतीयादिष्वित्येवोच्येत। तत्र हि तृतीयायां टायामोसि च एनेन भवितव्यमन्याः सर्वा हलादयो विभक्तयः। तत्र इद्रूपलोपे कृते केवलमिदमोऽनुदात्तत्वं वक्तव्यम्। अत उत्तरं पठति। अशादेशवचनं साकच्कार्थम्। अशादेशवचनं साकच्कार्थं क्रियते साकच्कस्यायमादेशो यथा स्यात्। इमकाभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतमि ति। अथ किमर्थं शित्करणं सर्वादेशार्थम्॥ शित्करणं क्रियते सर्वादेशार्थं शित्सर्वस्येति सर्वादेशो यथा स्यात्। इमकाभ्यां छात्राभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतमिति। अक्रियमाणे हि शित्करणेऽलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत। न वान्त्यविकारवचनानर्थक्यात्। न वा वक्तव्यम्। किं कारणम्। अन्त्यस्य विकारवचनानर्थक्यात्। अकारस्याकारवचने प्रयोजनं नास्तीति कृत्वान्तरेणापि शकारं सर्वादेशो भविष्यति। अर्थवत्त्वादेशाप्रतिषेधार्थम्। अर्थवत्त्वकारस्याकारवचनम्। कोऽर्थः। आदेशप्रतिषेधार्थम्। येऽन्ये अकारस्यादेशाः प्राप्नुवन्ति तद्बाधनार्थम्। तद्यथा। मो राजि समः क्वाविति मकारस्य मकारवचने प्रयोजनं नास्तीति कृत्वा अनुस्वारादयो बाध्यन्ते। तस्माच्छित्करणम्। तस्माच्छकारः कर्तव्यः। न कर्तव्यः।

परीतत्वादनभिमतमेवेत्यर्थः। साकच्कार्थमिति। साकच्कस्येद्रूपलोपो नास्त्यक इत्यधिकारात्। नापि चेद्रूपलोपेनाभ्यामित्या
दि सिध्यति। अन्त्यस्येति। त्यदादित्वादकारस्येत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अअइति। समुदायाद्धि भक्तिरर्थवत्त्वाद्भवति। ततोऽकारस्यापदान्तत्वादतो गुणादिति पररूपं क्रियते। तत्रादेशप्रवृत्तिकाले स समुदायः अअ इति प्रवर्तते। तत्रानेकाल्त्वात्सर्वादेशे प्रवृत्ते पररूपं प्रवर्तते। अथ येति। आदेशस्यैव प्रत्याख्यानं क्रियते- अनुदात्तत्वमात्रमेव विधेयमित्यर्थः। नान्वादेशे इति। महाविभाषाधिकाराद्व्यवस्थितविभाषाविज्ञानात्। किं चाकचि कृते ने नचाश्नादेशेऽज्ञाताद्यर्थगतिः प्रकरणाद्यधीना तद्वरमनुत्पन्ने रेवाकचोऽस्तु। एवं ह्यादेशो न विधातव्यो भवति॥ एतदः॥

॥ अत्रातद्इत्यत्र तलू तसिलोः कृतयोः प्रकृते र्लित्स्वरेकृते शेषनिघातेन प्रत्ययानुदात्तत्वे सत्यशनुदात्तः करिष्यते तत्रे तदस्त्रतसोरित्येतावत्सूत्रं कर्तव्यमिति प्रश्नः। किमर्थमिति। उदात्तावित्ति॥ प्रत्ययस्वरेण। नित्यमिति। लित्स्वरस्त्वनुदात्तत्वे कृते

प्रश्लिष्टनिर्देशोयम्। अअइति। अनेकाल्शित्सर्वस्येति सर्वादेशो भविष्यति। अथवा विचित्रास्तद्धितवृत्तयः । नान्वादेशे कज्जुत्पद्यते॥ एतदस्त्रतसोस्त्रतसो चानुदात्तौ॥ ॥किमर्थं त्रतसोरनुदात्तत्वमुच्यते। उदात्तौ मा भूतामिति। नैतदस्ति प्रयोजनम्। लित्स्वरे निघाते एतदनुदात्तत्वेन सिद्धम्। इदमिह संप्रधार्यमनुदात्तत्वं क्रियतां लित्स्वर इति। किमत्र कर्तव्यम्। परत्वाल्लित्स्वरः। नित्यमनुदात्तत्वम्। कृतेपि लित्स्वरे प्राप्नोत्यकृतेपि। न त्वनित्यत्वादनुदात्तत्वे कृते लितिपूर्वमुदात्तभावी नास्तीति कृत्वा यथाप्राप्तः प्रत्ययस्वरः प्रसज्येत। तद्यथा। गोष्पदप्रं वृष्टो देवः। कुलोपे कृते पूर्वमुदात्तभावी नास्तीति कृत्वा यथाप्राप्तः प्रत्ययस्वरो भवति। तस्मात्त्रतसोरनुदात्तत्वं वक्तव्यम्॥ द्वितीयाटौस्स्वेनः॥ ॥कस्यायमेनो विधीयते। एतदः प्राप्नोति॥ इदमोपीष्यते। नदिदमो ग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क प्रकृतम्। इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादाविति॥

न प्रवर्तते। अनुदात्तविधानसामर्थ्यात्। एतच्चोत्सर्गापवादभावमनपेक्ष्योक्तम्। लितिपूर्वमिति॥ औपश्लेषिकाधिकरणविवक्षायां सप्तमी। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति दिग्योगलक्षणा पञ्चम्यभावः। प्रत्ययस्वरः प्रसज्येतेति। अपवादाप्रवृत्तावुत्सर्गस्याऽवश्यं प्रवर्तनात्। गोष्पदप्रमिति। वर्षप्रमाणऊलोपश्चास्यान्यतरस्यामित्यूलोपणमुलो सह विधीयेते ततो लित्स्वराभावात्प्रत्ययाद्युदात्तत्वे सति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तं पदं भवति॥ द्वितीया॥ ॥उभयोरादेशस्येष्टत्वादेतदएवानन्तर्यात्स्वप्रसङ्गात्त इत्यन्वाह। कस्येति। न कर्तव्यमित्युत्तरम्। इदमोपीति। इदंशब्दाच्चत्रलोह प्रत्ययेन बाधितस्यादेश- विधानमेव सत्तानुमानं स्यात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मण्डूकगतय इति। इह केवलस्यादेशस्योपादानादवयवाक्षेप्यः स्थानीन तु पूर्ववत्। साक्षात्स्थानिनो निर्देशादिति भावः। अथवैकयोग इति। एकं ग्रहणं एकवाक्यमित्यर्थः। तदपेक्षिष्यामह इति। लौकिकोऽधिकारोऽपेक्षालक्षण आश्रीयते न तु शास्त्रीयः। अपेक्षा च लक्ष्यवशात्समुदायविषयैवेति भावः। एनदिति। यद्येनादेशः क्रियते तदानोमित्यमूभावे सत्येनमिति प्राप्नोति एनदिति चेष्यत इति वार्त्तिकारम्भः। एनच्छ्रितक इति प्राप्नोतीति। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति त्यदाद्यत्वमकृत्वा लुक् क्रियते। लुकि च कृते प्रत्ययलक्षणनिषेधात्त्यदाद्यत्वाभाव इति भावः। यथालक्षणमिति। यस्य प्रयोगो नोपल-

यदि तदनुवर्तते॥ एतदस्त्रतसोस्त्रतसौ चानुदात्ताविदमश्चेतीदमोऽपि प्राप्नोति। नैष दोषः। संबन्धमनुवर्तिष्यते। इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ। इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादावश्भवति। ततः द्वितीयाटौस्स्वेनः। इदमः एतदश्च। तृतीयादाविति निवृत्तम्। अथवा मण्डूकगतयोऽधिकाराः। तद्यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः। अथवा एकयोगः करिष्यते। इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादावेतदस्त्रतसोस्त्रतसौ चानुदात्तौ। ततः द्वितीयाटौस्स्वेनः। इदम एतदश्च। तृतीयादाविति निवृत्तम्। अथवोभयं निवृत्तं तदपेक्षिष्यामहे। एनदिति नपुंसकैकवचने। एनदिति नपुंसकैकवचने वक्तव्यः। इदं कुण्डमानय प्रक्षालयैनत्परिवर्तयैनत्। यद्येनत्क्रियते एनो न वक्तव्यः। का रूपसिद्धिः। अथो एनं अथो एने अथो एनानीति। त्यदाद्यत्वेन सिद्धम्। यद्येवमेनच्छ्रितको न सिध्यति। एनच्छ्रितक इति प्राप्नोति। यथालक्षणमप्रयुक्ते॥ आर्धधातुके॥ ॥जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सति तस्मिन्विधानम्। जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सति तस्मिन्नार्धधातुके जग्ध्यादिभिर्भवितव्यम्। किमतो यत्सति भवितव्यम्। तत्रोत्सर्गलक्षणप्रतिषेधः।

भ्यते तल्लक्षणानुसारेण संस्कर्तव्यम्। तत्र यदा नलुमताङ्गस्येत्यत्राङ्गाधिकारो निर्दिश्यते तदा प्रत्ययलक्षणेनैनच्छ्रितक इति भाव्यम्। अथानङ्गाधिकारविहितमपि अङ्गकार्यं निषिध्यते तदादेशाभावादेतच्छ्रितक इति भाव्यमित्याहुः॥ आर्ध॥ ॥जग्ध्यादिष्विति। व्यक्तौ पदार्थे परसप्तम्यां सत्यां परस्मिन्व्यवस्थित आर्धधातुक आदेशेन भाव्यम्। तत्र विशिष्टार्धधातुकाश्रयेषु जग्ध्यादिषु यद्यपि दोषाभावस्तथापि भूवीस्त्यास्तु दोषः। तत्रेति। उत्सर्गशब्देन स्थानी विवक्षित आदेशेनापवादेन बाध्यमानत्वात्।

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामान्याश्रयत्वादिति। आकृतिपदार्थाश्रयेणोत्तरम्। जातिपक्षस्यदोषवत्तां प्रतिपादयितुमाह। उवर्णाकारान्तेभ्य इति। इदानी माकृतिपक्षाश्रयस्यासंभवमाह। पौर्वापर्याभावाच्चेति। सामान्यस्यव्यापकत्वान्नित्यत्वाच्च देशकालकृतं पौर्वापर्यं नास्ति। स सम्याचेह परत्वं प्रतिपादितम्। तस्माद्व्यक्तिपक्षः परत्वोपपत्तय आश्रयणीयः। तत्र च भव्याद्यसिद्धिः। वक्ष्यतितत्रेति। हलन्ताद्

नन्त्रोत्सर्गलक्षणं कार्यं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः। भव्यं प्रवेयं आख्येयम्। एयत्यवस्थिते ऽनिष्टप्रत्यय आदेशः स्यादित्यतः अवर्णं प्रसज्येत। नैष दोषः। सामान्याश्रयत्वाद्विशेषस्यानाश्रयः। सामान्ये ह्याश्रीयमाणे विशेषो नाश्रितो भवति तत्रार्धधातुकसामान्ये जग्ध्यादिषु योयतः प्रत्ययः प्राप्नोति स ततो भविष्यति। सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो एयद्विधिप्रसङ्गः। सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदु वर्णाकारान्तेभ्यो एयत्प्राप्नोति। लव्यं पव्यमिति। आर्धधातुकसामान्ये गुणे कृतेपि

प्रत्ययसामान्ये च वान्तादेशे कृते हलन्तादिति एयत्प्राप्नोति। इह च दित्स्यं धि-त्स्यमार्धधातुकसामान्ये अकारलोपे कृते हलन्तादिति एयत्प्राप्नोति। पौर्वापर्याभावाच्च सामान्ये नानुपपत्तिः। पौर्वापर्याभावाच्च सामान्ये न जग्ध्यादीनामनुपपत्तिः। नहि सामान्येन पौर्वापर्यमस्ति॥ सिद्धं तु सार्वधातुके प्रतिप्रतिषेधात्। सिद्धमेतत्। कथम्। अविशेषेण जग्ध्यादीनुक्त्वा सार्वधातुके नेति प्रतिषेधं वक्ष्यामि। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सतितस्मिन्विधानमिति। परिहृतमेतत्। सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति। ननु चोक्तं सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो एयद्विधिप्रसङ्ग इति। नैष दोषः। वक्ष्यति तत्राजग्रहणस्य प्रयोजनमजन्तभूतपूर्वमात्रादपि यथा स्यादिति। यदप्युच्यते। पौर्वापर्याभावाच्च सामान्ये नानुपपत्तिरिति। अर्थसिद्धिरेवैषा यत्सामान्ये न पौर्वापर्यं नास्तीति। असति पौर्वापर्ये विषयसप्तमी विज्ञास्यते आर्धधातुके विषय इति। तत्रार्धधातुके विषये जग्ध्यादिषु यो यतः प्राप्नोति स ततो भविष्यति।

यतो विधानादजग्रहणमन्तरेणाप्यजन्तादेव यतिसिद्धेरजग्रहणं भूतपूर्वस्याप्यजन्तस्य परिग्रहार्थमित्यर्थः। अर्थसिद्धिरिति। एषैव प्रयोजनसंपत्तिरित्यर्थः। विषय इति। बुद्धिस्थ इत्यर्थः। अभिव्यङ्ग्यते तत्रार्धधातुकत्वमित्येवं बुद्ध्या निरूपित इति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ वेति। व्यक्तिपक्षाश्रयणेऽपि न दोष इत्युक्तं भवति। नित्यानां भव्यादीनां शब्दानामनेन साधुत्वमात्रं प्रतिपाद्यते। तत्रार्धधातु
कं विद्यते यासु ता भव्यादय आर्धधातुकावयवाः शब्दसंहतय आर्धधातुकशब्देनाऽऽत्री आदित्वादच्प्रत्ययान्ते नोच्यन्ते। उक्ति-
ष्विति। उच्यन्ते उच्चार्यन्त इत्युक्तयस्ता एव शब्दसंहतयः। अन्ये तु उच समवाय इत्यस्य क्तिन्युक्तिशब्दः संहतिपर्याय इत्याहुः।
समवायो हि संहतिः। युक्तिष्विति। अर्थेन संबद्धास्वित्यर्थः॥ रूढिष्विति। परमार्थतो नित्यास्वित्यर्थः। प्रतीतिष्विति। अनेन नित्य
त्वेऽपि व्यवहाराऽनित्यत्वं प्रतिपाद्यते। तदेव दर्शयति। श्रुतिष्विति। एवंभूतानामेव व्यवहारे श्रूयमाणत्वादित्यर्थः। संज्ञास्विति।
बालव्युत्पत्तये प्रकृत्यादिविभागेन संज्ञायमानास्वित्यर्थः। तत्तश्च यस्य च भावेनेति सप्तमी। आर्धधातुकासु संहतिषु व्युत्पा-

अथवा आर्धधातुकास्विति वक्ष्यामि। कासु। उक्तिषु युक्तिषु रूढिषु प्रतीतिषु श्रुतिषु संज्ञासु॥ अदो जग्धि
र्ल्यप्ति किति॥ ॥ल्यब्ग्रहणं किमर्थम्। ननु किति इत्येव सिद्धम्। ल्यपि कृते न प्राप्नोति। इदमिह संप्रधार्यं ल्य
प्क्रियतामादेश इति। किमत्र कर्तव्यम्। परत्वाल्ल्यप्। अन्तरङ्ग आदेशः। एवं तर्हि सिद्धे सति यल्ल्यब्ग्रहणं
करोति तज्ज्ञापयत्याचार्यः अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधत इति। किमेतस्य ज्ञापने प्रयोजनम्।
ल्यबादेश उपदेशिवद्वचनमनादिष्टार्थं बहिरङ्गलक्षणत्वादिति वक्ष्यति तन्न वक्तव्यं भवति। जग्धिविधि
र्ल्यपि यत्तदकस्मात्सिद्धमदस्ति किति इति विधानात्। हि प्रभृतीन्तु सदा बहिरङ्गो ल्यब्भरतीति कृतं तदु वि
द्धि। एष एवार्थः। जग्धौ सिद्धेऽन्तरङ्गत्वात्ति किति इति ल्यबुच्यते ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनमि
ति॥ ॥लुङ्सनोर्घस्लृ॥ ॥घस्लृभावेऽच्युपसंख्यानम्। घस्लृभावेऽच्युपसंख्यानं कर्तव्यम्। प्रात्तीति प्रघसः
॥ ॥हनो वध लिङि॥ लुङि च॥ ॥किमयमदन्त आहोस्विद्व्यञ्जनान्तः। किं चातः। यदि व्यञ्जनान्तः। वधो व्य
ञ्जनान्त उक्तम्। किमुक्तम्॥

यमानासु अस्त्यादीनां भव्यादय आदेशा इत्युक्तं भवति। अदो जग्धि॥ ॥अन्तरङ्ग आदेश इति। तकारादिप्रत्ययमात्रापे-
क्षत्वात्। ल्यबादेशस्तु पूर्वपदापेक्षसमासाश्रयत्वाद्बहिरङ्गः। अनादिष्टार्थमिति। प्रधाय प्रस्थायेत्यादौ हित्वादिष्व
कृतेष्वेव ल्यब्यथा स्यादित्यर्थः। कथं न प्राप्नोतीत्याह। बहिरङ्गलक्षणत्वादिति। अयमेवार्थो व्याघ्रभूतिनाप्युक्त इत्याह।
जग्धिविधिरिति। अकस्मादिति। निष्प्रयोजनमित्यर्थः। सिद्धमद इति। जग्धिविधानं सिद्धमित्यर्थः। ज्ञापनार्थं ल्यपि जग्धि
विधानमित्याह। हिप्रभृतीनिति। ल्यब्भरतीति। ल्यबादेशो हरत्यपनयति बाधत इत्यर्थः। तदु इति। उशब्दो निपातोऽव राम॰ ४०३
धारणार्थः। तद्विध्येवेत्यर्थः॥ हनो वध॥ ॥किमयमिति। किंकार्यार्थोऽकारोऽथोच्चारणार्थ इति प्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृद्धितत्वप्रतिषेधइति। अवधीदित्यत्रातोहलादेर्लघोरिति हलन्तलक्षणा वृद्धिः प्राप्नोति वधकइति ण्वुलि वधादेशे ओपसं-ख्यानिके कृते अत उपधाया इति वृद्धिः प्राप्नोति साजनिवध्योश्चेति प्रतिषिध्यते। स्थानिवद्भावादनुदात्तत्वं प्राप्तम्। इड्विधिश्चेति। अवधीदित्यादावेकाच्त्वादिट्प्रतिषेधः प्राप्नोतीतीड्विधेयः। अदन्तत्वे तल्लोपस्य स्थानिवत्त्वाद्वृद्धितत्वादेरभावः। न तत्वं त्वलो-न्त्यस्य क्रियते। तत्राकारो लुप्तत्वात्स्थानी न भवति धकारोपि अल्लोपस्य स्थानिवत्त्वात्स्तो न भवतीति तत्त्वाभावः। उपदेशे नेकाच्त्वाच्च प्रतिषे-धाभावादिट्सिद्धिः। ॥गाङ् लिटि॥ ॥स्थानिवद्भावात्सिद्धमात्मनेपदं मत्वाह। ङित्करणमिति। इणादेशस्यापीति। नन-श्चागासातां ग्रामो देवदत्तेनेत्यादौ ङित्त्वादीत्वप्रसङ्गः। गाङ्कुटादिभ्य इत्युच्यमाने सैव ग्रहणं भवति न तु गाङ् गतावित्यस्य

वध्यादेशे वृद्धितत्वप्रतिषेधइड्विधिश्चेति। अथादन्तः। न दोषो भवति। यथा न दोषस्तथास्तु इणो गा लुङि॥ इ-ण्वदिकः॥ इण्वदिक इति वक्तव्यम्। इहापि यथा स्यात्। अध्यगात्। अध्यगाताम्। अध्यगुः॥ ॥णौ गमिरबोधने॥ ॥इण्वदिक इत्येव। अधिगमयति। अधिगमयतः। अधिगमयन्ति॥ ॥सनि च॥ ॥इण्वदिक इत्येव। अधि-जिगमिषति। अधिजिगमिषतः। अधिजिगमिषन्ति॥ ॥गाङ् लिटि॥ ॥ङित्करणं किमर्थम्। गाङोऽनुबन्धकर-णं विशेषणार्थम्। गाङोऽनुबन्धकरणं क्रियते। विशेषणार्थम्। क्व विशेषणार्थेनार्थः। गाङ्कुटादिभ्योऽञ्णिन्ङि-दिति। गाकुटादिभ्य इत्युच्यमाने इणादेशस्यापि प्रसज्येत। ज्ञापकं वा सानुबन्धकस्यादेशवचन इत्कार्या-भावस्य। अथ वैतज्ज्ञापयत्याचार्यः सानुबन्धकस्यादेश इत्कार्यं न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। प्र-योजनं चक्षिङः ख्याञ् ङित इत्यात्मनेपदं न भवति। लटः शतृशानचौ प्रयोजनम्। पचमानो यजमान इति टि-त इत्येत्वं न भवति। युवोरनाकौ॥ युवोरनाकौ च प्रयोजनम्। नन्दनः कारकः नन्दना कारिकेति। उगित्लक्ष-णो ङीन्नुमौ न भवतः।

एतद्ङकारस्यात्मनेपदविधौ चरितार्थत्वादादेशेनानन्यार्थेङकारेण तुल्यताभावात्। ज्ञापकं वेति। सानुबन्धा यत्र ष-ष्ठ्युच्चार्यते तत्राकृतायामेवेत्संज्ञायामादेशाः प्रवर्तन्ते। कृतायां वेत्संज्ञायां तन्निबन्धनानि कार्याणि न प्रवर्तन्त इति ज्ञाप-नार्थं ङकारोच्चारणमित्यर्थः। शतृशानचाविति। सूत्रे सह निर्दिष्टत्वादत्रापि सहोपादानम्। शानजेव त्वात्मनेपदत्वात्प्र-योजनम्। युवोरनाकाविति॥ भुज्युशंयूर्णायुप्रभृति घादेशनिवारणाय अनुनासिकौकारानुबन्धौ युवू सूत्रे निर्दिष्टौ। तत्रादेश-प्रवृत्तावेतस्माज्ज्ञापकादुगित्कार्यप्रवृत्तिरिति ङीन्नुमोरभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ ज्ञापकस्यानित्यत्वं सिद्धं द्रष्टुमाह। मेद्येति। नश्चस्यमिषामित्यत्र मिवृग्रहणमपनीयमिग्रहणं कर्तव्यमित्यर्थः। तेन सानुबन्धस्यानी २५९
५०४ नभवतीतिपित्कार्यं प्रवर्तते। अचिनवमिति। पित्वान्ङित्वाभावाद्गुणो भवति। माहिस्मचिनवमितिचानुदात्तत्वम्। वार्तिककारस्याव्याप्तिमुद्भावयन्नाह। अत्यल्पमिति। णलादिविधौ नुतिपृषिपोः सानुबन्धकयोरनुपादानात्तन्नास्ति दोषइतिचिन्त्यमेतत्। भूयांसो वेति। दोषबहुत्वारोपेण निन्दामाह। तस्मादिति। विषेषणार्थं तुङित्करणं स्थितम्। विभाषात्मनेपदमिति। कर्त्रभिप्रायेक्रियाफले आत्मनेपदं नान्यत्रेत्यर्थः। प्रकृतानामिति। तिङ्स्त्तज्ञे यत्र यान्यात्मनेपदान्युपात्तानि तेषामित्यर्थः। सिद्धं त्विति। अनुनासिकयोरेवादेशो नान्ययोरित्यर्थः। ननश्चस्यानिनोरेवोगित्त्वं नास्तीति कुतस्तदादेशयोरुगि-

मेद्यानतुबन्धकस्यान्वचनम्। मेद्यानतुबन्धकस्यान्वक्तव्यः। अचिनवम्। असुनवम्। अकरवम्। अत्यल्पमिदमुच्यते मेरिति। तिपृसिम्पिपामितिवक्तव्यम्। इहापि यथा स्यात्। वेदवेत्त्या। अस्यज्ञापकस्य सन्ति दोषाः सन्तिप्रयोजनानि। दोषाः समाः भूयांसो वा। तस्मान्नार्थो ज्ञापकेन। कथं यानि प्रयोजनानि नैतानि सन्ति। इह तावच्चक्षिङः ख्याञिति ञित्करणसामर्थ्याद्विभाषात्मनेपदं भविष्यति। लटः शतृशानचाविति। वक्ष्यत्येतत्। प्रकृतानामात्मनेपदानां टेरेत्वं भवतीति। युवोरनाकाविति। वक्ष्यत्येतत्। सिद्धं तु युवोरनुनासिकत्वादिति॥
॥चक्षिङः ख्याञ्॥ ॥किमयं कशादिराहोस्वित्खयादिः। चक्षिङः क्शाञ्ख्याञौ। चक्षिङः क्शाञ्ख्याञ्क्शादिः खयादिश्च। खशादिर्वा। अथवा खशादिर्भविष्यति। केनेदानीं कशादिर्भवति। चर्त्वेन। अथ खयादिः कथम्। असिद्धे शस्य यवचनं विभाषा। असिद्धे शस्य विभाषा यत्वं वक्तव्यम्। किं प्रयोजनम्। प्रयोजनं सौप्रख्ये वुञ्विधिः। सौप्रख्य इति योपधलक्षणो वुञ्विधिर्न भवति।

त्कार्यप्रसङ्गः॥चक्षिङः॥ ॥लक्ष्ये रूपद्वये दर्शनादेकतराश्रयणे इतरासिद्धिप्रसङ्गात्पृच्छति। किमयमिति। असिद्ध इति। पूर्वत्रासिद्धमित्यधिकारे णत्वविधानानन्तरं शस्य यत्वं विभाषा वक्तव्यम्। तत्र यत्वस्य पूर्वत्रासिद्धत्वात्तन्निमित्तं कार्यं न प्रवर्तते शकारनिमित्तं च प्रवर्तते। चर्त्वे तु कर्तव्ये यत्वं सिद्धमिति खस्य चर्त्वाभावादाख्यातेत्यादि सिध्यति। सौप्र
ख्ये वुञ्विधिरिति। अकारप्रश्लेषात् सौप्रख्यशब्दे वुञ्विधिर्न भवतीत्यर्थः। सुप्रचष्ट इति सुप्रख्यः। आतश्चोपसर्गइति रामः
कः। यत्वस्यासिद्धत्वात्तु प्रख्यस्य भावइति योपधलक्षणवुञभावात्ष्यञ् भवतीति। तथा सुप्रख्येन निर्वृत्तो देशः सौप्र ५०५
ख्यस्तत्र भवः सौप्रख्यीय इति धन्वयोपधाद्वुञिति वुञभावे वृद्धाच्छो भवति। ॥

CC-0. In Public Domain. Digitization by eGangotri

निष्ठानत्वमिति। नध्याख्येति तु प्रतिषेधः ख्याप्रकथन इत्यस्यैव प्रतिपदोक्तत्वात्। अस्य तु भाष्य यत्नेन लाक्षणिकत्वा
दिति मन्यते। पुंख्यानमिति। पुमः खय्यम्पर इति रुत्वं न भवति यत्वस्यासिद्धत्वादम्परत्वाभावात्। णत्वमिति। ख्याप्रकथन इ
त्यस्मादपि परस्य लुब्योगाप्रख्यानादिति निपातनात्सत्वाभावः। सस्थानत्वमिति। जिह्वामूलीयस्यैयं पूर्वाचार्यसंज्ञा। श
र्परे विसर्जनीय इत्येवात्र भवति। नृचक्षा रक्ष इति प्रयोगश्छान्दसः। भाषायां तु नृचक्षो रक्ष इति। विचक्षण इति। अनुदा
इत्सैप्रख्यी य इति रहाच्छूँति ञ्लो भवति। निष्ठानत्वमाख्याते। आख्यात इति निष्ठानत्वं न भवति। हविधिः पुं
ख्याने। पुंख्यानमिति हविधिर्न भवति। णत्वं पर्याख्याने। पर्याख्यानमिति णत्वं न भवति। सस्थानत्वं नमःख्या
त्रे। नमःख्यात्र इति सस्थानत्वं न भवति। वर्जने प्रतिषेधः। वर्जने प्रतिषेधो वक्तव्यः। अवसंचक्ष्याः। परिसंचक्ष्याः। असनयोश्च। असन
योश्च प्रतिषेधो वक्तव्यः। नृचक्षा रक्षः। विचक्षण इति॥ बहुलं तणि॥ बहुलं तणीति वक्तव्यम्। किमिदं तणीति। संज्ञाछ
न्दसोर्ग्रहणम्। किं प्रयोजनम्। अन्नवधकगात्रविचक्षणाजिराद्यर्थम्। अन्ना। अन्नम्। वधक। वधकम्। गात्रा। गा
त्रं पश्य। विचक्षण। विचक्षणः। अजिरा। अजिरे तिष्ठति॥ ॥अजेर्व्यघञपोः॥ ॥घञपोः प्रतिषेधे क्यप उपसं
ख्यानम्। घञपोः प्रतिषेधे क्यप उपसंख्यानं कर्तव्यम्। इहापि यथा स्यात्। समजनं समज्येति। तत्तर्हि वक्तव्यम्।
न वक्तव्यम्। अपीत्येव भविष्यति। कथम्। अपीति नेदं प्रत्ययग्रहणम्। किं तर्हि प्रत्याहारग्रहणम्। क सन्नि-
विष्टानां प्रत्याहारः। अपोऽकारात्प्रभृत्याक्यपः पकारात्। यदि प्रत्याहारग्रहणम्। संवीतिर्न सिध्यति। एवं तर्हि
नार्थ उपसंख्यानेन नापि घञपोः प्रतिषेधेन। इदमस्ति चक्षिङः ख्याञ् वा लिटीति। ततो वक्ष्यामि अजेर्वी
भावो भवति वा। व्यवस्थितविभाषेति। तेनेह च भविष्यति। प्रवेता प्रवेतुं प्रवीतो रथः। संवीतिः। इह च न भविष्यति।
समाजः। उदाजः। समजः। उदजः। समजनं समज्येति। तत्रायमप्यर्थः। इदमपि सिद्धं भवति प्राजितेति। किं च भोः।
इष्यत एतद्रूपम्। बाढमिष्यते। एवं हि कश्चिद्वैयाकरण आह। कोऽस्य रथस्य प्रवेतेति। सूत आह। अहमायुष्म
न्नस्य रथस्य प्राजितेति। वैयाकरण आह। अपशब्द इति। सूत आह।

तेनश्च हलादेरिति युच्। बहुलमिति। सर्वप्रकरणापेक्षमेतदुच्यते। अन्नशब्दे जग्ध्यभावः। वधकमिति। ण्वुलि वधादेशः।
गात्रमिति। इण ओणादिके ष्ट्रनि गादेशः। विचक्षणे ख्याञभावः। अजिरे वीभावाभावः। अजिरशिशिरेति निपातनमनपेक्ष्यैत
दुक्तम्॥ ॥अजेर्वी॥ ॥इदमपीति॥ वलादावार्धधातुके विकल्पः सिध्यतीति भावः। सूत आहेति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ कै॰ ४०५ प्रयोगदर्शनेनविकल्पंद्रढयति।प्राप्तिज्ञइति।सौत्रीमेवप्राप्तिंभवाञ्जानाति।नत्वाचार्याणामिष्टिमित्यर्थः।देवानांप्रिय २४१
इति।देवशब्दोमूर्खवाची।मूर्खाणांचप्रियामूर्खाएवभवन्ति।अथवासुखासक्ततयाशास्त्रेऽनभियोगोऽनेनप्रतिपा
द्यते।पराजितत्वादमर्षेणाह।अहोनुखल्विति। वेञउतइति यद्रूपंसास्यसंज्ञा।पूजायांचस्तुशब्दइतिमत्वाकुत्साप्र
तिपादनायाह।दुरुतेनेति।सूतआहेति।षूप्रेरणइत्यस्माद्बहुलवचनात्कर्तरिगत्यादिसूत्रेचकारस्यानुक्तसमुच्चया
र्थत्वाद्वर्तमानेक्तः।रथवाहस्यरथप्रेरणात्सूतइतिसंज्ञा। वायुरिति।यजिमनीतिबाहुलकाद्युचिरूपम्। एयक्षत्रि

प्राप्तिज्ञोदेवानांप्रियःनत्विष्टिज्ञः।इष्यतएतद्रूपमिति । वैयाकरणआह।अहोखल्वनेनदुरुतेनबाध्यामहइति।
सूतआह।नखलुवेञःसुतःसुवतेरेवसूतः।यदिसुवतेःकुत्साप्रयोक्तव्यादुःसूतेनेतिवक्तव्यम्।नतर्हीदानीमि
दंवक्तव्यंवायाविति।वक्तव्यंच।किंप्रयोजनम्।नेयंविभाषा।किंतर्ह्यादेशोविधीयते।वाइत्ययमादेशोभवत्यजे
र्यौपरतः।वायुरिति॥ ॥एयक्षत्रियार्षञितोयूनिलुगणिञोः॥ ॥अणिञोर्लुकितद्राजाद्युवप्रत्ययस्योपसंख्या
नम्।अणिञोर्लुकितद्राजाद्युवप्रत्ययस्योपसंख्यानंकर्तव्यम्।बौधिःपिता बौधिःपुत्रः।औदुम्बरिःपिताऔदु
म्बरिःपुत्रः।अपरआह।अणिञोर्लुकिक्षत्रियगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानंकर्तव्यमिति।जाबालिःपिता
जाबालिःपुत्रः।अपरआह।अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानंकर्तव्यमिति।किंप्रयोजनम्।इद
मपिसिद्धंभवति।भाण्डिजङ्घिःपिताभाण्डिजङ्घिःपुत्रः।कार्णखरकिःपिताकार्णखरकिःपुत्रः॥ ॥इतिद्वितीया
ध्यायस्यचतुर्थेपादेप्रथममाह्निकम्॥

य॥तद्राजादिति।तेनतद्राजादितितद्राजसंज्ञकप्रत्ययान्तात्परस्येत्यर्थः।बौधिरिति।बुधोदुम्बरशब्दाभ्यांसाल्वावयवल-
क्षणइञ्तदन्ताद्यूनियञिञोश्चेतिफक्तस्यलुक्।जाबालिरिति।जाबालस्यापत्यमतइञ्।सचतद्राजोनभवतीतिद्वि
तीयंवचनमारब्धम्।तेनेञन्तात्फकोलुक्।अब्राह्मणगोत्रमात्रादिति।तेनवैश्यगोत्रादपिसिध्यति।व्यापकत्वाच्चेदमे रामः
ववचनंप्रमाणम्।भाण्डिजङ्घकार्णखरकौवैश्यौ॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृतेद्वितीयाध्यायस्यचतुर्थपादे ४०५
प्रथममाह्निकम्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

तद्राज॥ इह तेनैव ग्रहणाद् बहुशब्देन बहुवचनमुच्यत इति लक्ष्यते। संज्ञानां चैकदेशपदप्रयोगो दृश्यते यथा भीमसेनो भीम इति। अर्थग्रहणे तु तेनैवेति न च वक्तव्यं प्रियवाङ्गा इत्यत्र बहुत्वे तद्राजस्य वृत्त्यभावाल्लुकः प्रसङ्गाभावाद् बहुवचनं तु परमिति लुक्प्रसङ्गः तन्निवृत्तये तेनैव ग्रहणं कर्तव्यम्। अस्त्रियामिति तु प्रतिषेधो बहुवचनग्रहणे तूपपन्नः। आङ्ग्यः स्त्रिय इत्यादौ स्त्रीप्रत्ययेन बहुवचनस्य व्यवधानाल्लुकः प्रसङ्गाभावात्। अर्थग्रहणे तु लुक्प्रसक्तोऽस्त्रियामिति निषिध्यते। नेनदेवं पक्षद्वयस्यापि लिङ्गदर्शनात् गुणदोषनिरूपणाय विचारः क्रियते तत्र पूर्वं प्रत्ययपक्षो विचार्यते। तद्राजादीनामिति। आदिशब्देन वक्ष्यमाणा लुग्भाजो गृह्यन्ते। समासबहुत्व इति। समासार्थबहुत्व इत्यर्थः। न चात्रेति। अन्यपदार्थकृत

तद्राजस्य बहुषु तेनैवास्त्रियाम्॥ तद्राजादीनां लुकि समासबहुत्वे प्रतिषेधः॥ तद्राजादीनां लुकि समासबहुत्वे प्रतिषेधो वक्तव्यः। प्रिय आङ्गा एषां त इमे प्रियाङ्गाः। प्रियः वाङ्गा एषां त इमे प्रियवाङ्गा इति। किमुच्यते समासबहुत्वे प्रतिषेध इति। यदा तेनैव चेत्कृतं बहुत्वमित्युच्यते न चात्र तेनैव कृतं बहुत्वम्। भवति वै किंचिदाचार्याः क्रियमाणमपि चोदयन्ति तद्वा कर्तव्यं तेनैव चेद्बहुत्वमिति समासबहुत्वे वा प्रतिषेध इति। अबहुत्वे लुग्वचनम्। अबहुत्वे च लुग्वक्तव्यः। अतिक्रान्तः अङ्गान् अत्यङ्ग इति। बहुवचने परतो यस्तद्राज इत्येवं चेत्कृत्वा चोद्यते। अथ किमर्थं पुनरिदं न बहुवचन इत्येव सिद्धम्। न सिध्यति। बहुवचन इत्युच्यते। न चात्र बहुवचनं पश्यामः। प्रत्ययलक्षणेन। न लुमताऽस्मिन्निति प्रत्ययलक्षणस्य प्रतिषेधः

त्वादत्र बहुत्वस्य। भवति वै किंचिदिति। एतावदेकं वाक्यम्। एवंविधं किंचिद्भवतीत्यर्थः। किं तदित्याह। आचार्या इति। सूत्रे क्रियमाणमपि कुर्वन्तीत्यर्थः। बहुवचनपक्षे सर्वथा वचनेनैव दोषो निराकार्य इति प्रतिपादनमस्योपन्यासस्य फलम्। प्रत्ययपक्षे दोषोद्भावनेनार्थग्रहणं स्थापयति। अबहुत्व इति। समासार्थस्याबहुत्वाद् बहुवचनपरत्वाभावेऽपि लुग्वक्तव्यः प्रत्ययश्चेद्बहुत्व उत्पन्न इत्यर्थः। न बहुवचन इत्येवेति। असमेवाश्रित्यान्तरङ्गत्वात्पूर्वं तद्राजस्य लुक् करिष्यत इति भावः। न चात्रेति। अन्तरङ्गानपि विधीन्लुपो धातुप्रातिपदिकयोरित्ययं लुक् प्रत्ययोत्तरपदयोश्चेति ज्ञापकादस्येवात्र संभवाद्बाधत इति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नलुमताङ्गस्येति वक्ष्यामीति। यथास्थितमेव न्यासमेवं व्याख्यास्यामि। लुमता लुप्तो यः प्रत्ययस्तस्मिन्यदङ्गं तस्य यत्कार्यमङ्गाधिकारविहितमन्यद्वा तन्न भवति। लुक्प्रत्ययस्य कार्यं न समस्तस्याङ्गस्येति प्रत्ययलक्षणेन भविष्यति। पञ्चभिरिति। क्रीतार्थस्याहींयस्य ठकोऽध्यर्द्धपूर्वेति लुक्। लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुक्। तत्र प्रत्ययलक्षणेन भिसमाश्रित्यात्र पक्षे यञञोश्चेति लुक् प्राप्नोति। नहि यञ्लुगङ्गस्य कार्यमिति पञ्च गर्गैरिति स्यात्। पञ्च गार्ग्य इति चेष्यत इत्यर्थः। अस्त्रियामिति चात्र प्रतिषेधो न भवत्यर्थान्तरे पुंसि संक्रान्तत्वाद्बहुनि पदार्थस्येत्याहुः। द्वन्द्वे बहुष्वित्यत्राकारप्रश्लेषः। गार्ग्यश्च वात्स्यश्च वाज्यश्चेति द्वन्द्वः। अत्रैकैकस्य बहुवचनपरत्वं नास्ति यत्त्व समासाद्बहुवचनमुत्पद्यते तत्तदन्त्यादेव परं न सर्वेभ्यः। प्रत्ययनिर्दे

नलुमताङ्गस्येति वक्ष्यामि। नैवं शक्यम्। इह हि दोषः स्यात्। पञ्चभिर्गार्गीभिः क्रीतः पटः पञ्चगार्ग्यो दशगार्ग्यः। द्वन्द्वे बहुषु लुग्वचनम्। द्वन्द्वे अबहुषु लुग्वक्तव्यः। गर्गवत्सवाजा इति। इह च लुग्वक्तव्यः। गर्गेभ्य आगतं गर्गेहृप्यं गर्गमयमिति। इह चात्र यद् इति उदात्तनिवृत्तिस्वरः प्राप्नोति। सिद्धं तु प्रत्ययार्थबहुत्वे लुग्वचनात्। सिद्धमेतत्। कथम्। प्रत्ययार्थबहुत्वे लुग्वक्तव्यः। यदि प्रत्ययार्थबहुत्वे लुगुच्यते तेनाप्यस्त्रियामिति वक्तव्यम्। इह माभूत्। आङ्ग्यः स्त्रियः वाङ्ग्यः स्त्रिय इति। यस्य पुनर्बहुवचने परतो लुगुच्यते तस्येकारेण व्यवहितत्वान्न भविष्यति। यस्यापि बहुवचने परतो लुगुच्यते तेनाप्यस्त्रियामिति वक्तव्यम्। आम्बष्ठ्याः स्त्रियः सौवीर्याः स्त्रिय इत्येवमर्थम्। अत्रापि चापा व्यवधानम्। एकादेशे कृते नास्ति व्यवधानम्। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव।

शपक्षे तस्मिन्निति निर्दिष्ट इति परिभाषोपस्थानाद्व्यवहितस्य लुकोऽप्रसङ्गः। गर्गरूप्यमिति। सुबन्तेन केवलं वाक्यं क्रियते प्रत्ययस्तु प्रातिपदिकाधिकारात्प्रातिपदिकादेवोत्पद्यत इति बहुवचनपरत्वाभावाद्लुङ् प्राप्नोति। अत्र यद् इति। अत्रेरपत्यानीत्यत्रश्चानिञ इति ढक्। कितद्दत्यन्तोदात्तत्वम्। तत्र यदि जसि परतो लुक् क्रियते तदा अनुदात्तस्य च यत्रोदात्तलोप इति जस उदात्तत्वप्रसङ्गः। अर्थनिर्देशाश्रयेण परिहारमाह। सिद्धं त्विति। लुग्वचनात्। लुग्व्याख्यानादित्यर्थः॥ आम्बष्ठ्या इति। आम्बष्ठस्यापत्यानि वृद्धाः स्त्रिय इति वृद्धेत्कोसलाजादाञ्ञ्यङिति ञ्यङ्। ञ्यङः ष्वाविति चाप्। एकादेशः। स चान्तवद्भावान्न व्यवधायक इति लुक्प्रसङ्गे प्रत्ययपक्षवादिनाप्यस्त्रियामिति प्रतिषेधो वक्तव्य इत्यर्थः। एकादेश इति। अचः परस्मिन्निति स्थानिवद्भावः। तदेवमर्थनिर्देशपक्ष एवास्त्रियामिति वक्तव्यम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्वन्द्व इति। एकस्मिन्नेवार्थे प्रत्ययोत्पत्तौ सत्यां बहुत्वाभावात्। प्रत्ययपक्षे त्वन्त्यस्य तावत्सिध्यतीति मन्यते। अर्थपक्ष एव दोषमा-
ह। गोत्रस्येति। अपत्यप्रत्ययो लोपभाग्यदा बहुष्वर्थेषूत्पन्नो युवापत्यविवक्षायामर्थान्तरे द्वित्वविशिष्ट एकत्वविशिष्टे वा संक्रा-
मति तदा बहुषूत्पन्नत्वाल्लुक् प्राप्तो वा लुग्वक्तव्यः। प्रत्ययपक्षे तु बहुवचनपरत्वाभावाल्लुङ्न भवति। द्व्येकयोरिति। द्व्येक-
शब्दौ द्वित्वैकत्ववृत्ती उपात्तौ। अन्यथा बहुवचनं स्यात्। वैद इति। विदस्यापत्यानि बहूनि इत्यञ्प्रत्ययः। तदन्ताद्यून्यत इञि-
तीञ्। तस्य ण्यक्षत्रियार्षञित इति लुक्। नाचीत्येवेति। गोत्रे लुगचीत्यनेन। अञन्तमिति। प्रत्ययग्रहणपरिभाषया तदन्तत्वे स्थि-
ते बहुष्विति विशेषणं तदन्तस्यैवेति मन्यते॥ काश्यपा इति। कश्यपस्यापत्यं गोत्रमिति विदादित्वादञ्। ततः काश्यप इव तस्य

द्वन्द्वेऽबहुषु लुग्वचनम्। द्वन्द्वे अबहुषु लुग्वक्तव्यः। गर्गवत्सवाजा इति। गोत्रस्य बहुषु लोपिनो बहुवचनान्त-
स्य प्रवृत्तौ द्व्येकयोरलुक्। गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुग्वक्तव्यः। विदानाम-
पत्यं माणवको वैदः। वैदौ। किमर्थमिदम्। नाचीत्येवालुक् सिद्धः। अचीत्युच्यते। न चात्राजादिं पश्यामः। प्रत्य-
यलक्षणेन। वर्णाश्रये नास्ति प्रत्ययलक्षणम्। एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि। एकवचन-
द्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि वक्तव्यः। वैदस्यापत्यं बहवो माणवका विदाः। वैदयोर्वा विदाः। अञ्यो
बहुषु यञ्यो बहुष्वित्युच्यमानो लुङ्न प्राप्नोति। मा भूदेवम्। अञन्तं यद्बहुषु यञन्तं यद्बहुष्वित्येवं भविष्यति। ने-
वं शक्यम्। इह हि दोषः स्यात् काश्यपप्रतिकृतयः काश्यपा इति। ततो यमाह यस्य प्रत्ययार्थो बहुत्वे लुक्। द्व-
न्द्वेऽबहुषु लुग्वचनमित्यस्य परिहारः। न वा सर्वेषां द्वन्द्वे बह्वर्थत्वात्। न वा एष दोषः। किं कारणम्। सर्वेषां
द्वन्द्वे बह्वर्थत्वात्।

ति कृत्वा यद्यप्यत्रार्थे इवे प्रतिकृताविति कन्प्रत्ययस्तस्य जीविकार्थे चापण्ये इति वा देवपथादित्वाद्वा अर्चासु पूजनार्थासु चित्रकर्मध्वजे-
ष्विति पाठाद्वा लुप्। एतदञन्तं बहुषु वर्तत इति लुक्प्रसङ्गः। अञ्प्रत्ययस्त्वेकस्मिन्नेवापत्य उत्पन्न इत्यञ्यो बहुष्विति विद्य-
मानेनास्ति लुक्प्राप्तिस्तस्मात्तदन्तविधिर्नाभ्युपगन्तव्यः। प्रत्ययादर्शनस्यैव लुगादिसंज्ञाविधानात्प्रत्यया एव कार्यभाक्त्वा-
द्बहुष्वित्यनेन विशेष्यन्ते। इदानीं पक्षद्वयेऽपि क्रमेण परिहार उच्यते। ततो यमिति। न वेति। एकैकं प्रत्ययान्तमनेकार्थाभिधा-
यीति लुक् सिध्यतीत्यर्थः। यश्च तदन्तपक्षे दोषः काश्यपा इति स उत्तरत्र परिहरिष्यते।

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· अचोद्यंचोद्यइति। अचोदनार्हंवस्तुतया अर्हंचोद्यइत्यर्थः। चोदिएच्छत्यर्थत्वाद्दुहियाचीत्यत्रार्थग्रहणाद्द्विकर्मकः
५०७ ।लुकिकृतइति। अन्तरङ्गानपिविधीन्बहिरङ्गोलुग्बाधतइतिभावः। पञ्चगर्गइति। प्रत्ययलक्षणेनबहुवचनपरत्वाश्रयोलु
कूप्रवर्ततइत्यर्थः। समर्थादिति। समर्थानांप्रथमाद्वेत्यधिकारादितिभावः। सामर्थ्यंचसुबन्तेनेति। सुबन्तेनद्वितीयस्यपदस्य
संबन्धवत्वंपदस्यैवप्रयोगार्हत्वात्। प्रातिपदिकाधिकारस्तुवृद्धादिविशेषणार्थः॥ अहमिति। योह्युभयोर्दोषोनतमेकश्चोद्यः। त

त्सर्वाणिद्वन्द्वेबह्वर्थानि। कथम्। युगपदधिकरणविवक्षायांद्वन्द्वोभवति। ततोयमाह यस्यबहुवचनेपरतो
लुक्। यदिसर्वाणिद्वन्द्वेबह्वर्थानि। अहमपीदमचोद्यंचोद्ये। द्वन्द्वेबहुषुलुग्वचनमिति। ममापिह्यत्रसर्व
त्रबहुवचनंपरंभवति। लुकिकृतेनप्राप्नोति। प्रत्ययलक्षणेनभविष्यति। नलुमताऽतस्मिन्निति प्रत्ययलक्ष
णस्यप्रतिषेधः। नलुमताङ्गस्येतिवक्ष्यामि। ननुचोक्तंनैवंशक्यम्। इहहिदोषःस्यात्पञ्चभिर्गार्गीभिःक्रीतः
पटःपञ्चगार्ग्योदशगार्ग्यइति। इष्टमेवैतत्संगृहीतंपञ्चगर्गोदशगर्गइत्येवभवितव्यम्। तथेदमपरमचो
द्यंचोद्येगर्गरूप्यंगर्गमयम्। अत्रापिबहुवचनइत्येवसिद्धम्। कथम्। समर्थात्तद्धितउत्पद्यतेसामर्थ्यंचसुब
न्तेन। ततोयमाह यस्यप्रत्ययार्थबहुत्वेलुक्। यदिसमर्थात्तद्धितउत्पद्यते॥ अहमपीदमचोद्यंचोद्ये गोत्र
स्यबहुषुलोपिनोबहुवचनान्तस्यप्रवृत्तौद्व्येकयोरलुगिति। कथम्। यस्यापिबहुवचनेपरतोलुक् तेना-
प्यलुग्वक्तव्यः। तस्यापिह्यत्रबहुवचनंपरंभवति। नवक्तव्यः। अचीत्येवालुक्सिद्धः। अचीत्युच्यतेनचा
त्राजादिंपश्यामः। प्रत्ययलक्षणेन। ननुचोक्तंवर्णाश्रयेनास्तिप्रत्ययलक्षणमिति। यद्विवाकानिचिद्व
र्णाश्रयाण्यपिप्रत्ययलक्षणेनभवन्ति। तथेदमपिभविष्यति। अथवाविशेषेणालुकमुक्त्वाहलिनेति-
वक्ष्यामि। यद्येवमविशेषेणालुकमुक्त्वाहलिनेत्युच्यतेविदानामपत्यंबहवोमाणवकाविदाः। अत्रापिप्राप्नोति।

स्यापिह्यत्रेति। प्रत्ययलक्षणेन। अचीत्येवेति। अयंचद्वयोरपिसाधारणःपरिहारः। यद्विवेति। यथैवेत्यर्थः। यथातृणे
डितीमागमः। अयंभावः। यत्कार्यंवर्णरूपाश्रयंनप्रत्ययत्वाश्रयंतत्प्रत्ययलक्षणेननभवति। यथागोहितमित्यादा
ववादयः। इमागमस्तुहलादिपित्सार्वधातुकाश्रयत्वात्प्रत्ययाश्रयइतिप्रवर्तते। एवंगोत्रेलुगचीत्यजादिप्रत्ययाश्र
यत्वादलुक्प्रत्ययलक्षणेनप्रवर्तते। हलिनेति। यथागर्गरूप्यमिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनरस्येति। अपत्याधिकारादन्यत्र लौकिकस्यापत्यमात्रस्य गोत्रस्य ग्रहणमिति युवबहुत्वे यञञोश्चेति लुग्भविष्यतीत्यर्थः। पुनरिति। लुकृत्वा स्त्रवदलुकृत्वा स्त्रस्यापि प्रवृत्तेरव्याघातादिति भावः। समर्थानामिति। प्रतियोगं समर्थानां प्रथमादित्यस्यानुवृत्तिस्तत्रायमर्थः। समर्थानां प्रथमस्य गोत्रप्रत्ययस्य लुग्भवतीति प्राथमकल्पिके च प्रत्ययार्थे वर्तमानस्य तस्य प्राथम्यं यथा गार्गीयाइति। अत्र युवप्रत्ययस्य लुकि कृते युवलक्षणं द्वितीयमर्थमुपसंक्रान्तो ञन्तः शब्द इति प्राथम्याभावः। अत्रिभरद्वाजिकेति। अत्रेरपत्यानीतीतश्चानिञ इति ढक्। भरद्वाजस्यापत्यानीति विदाद्यञ्। ततउभाभ्यां युवबहुत्वे तद्व्राजस्य एयक्षत्रियार्षे ति लुक् ढकोत्रिभ्य इति अञोयञञोश्चेति भावः। ततोत्रिभरद्वाजानां मैथुनिकेति द्वन्द्वाद्वुन्निति वुन्।

अस्तु पुनरस्य युवबहुत्वे वर्तमानस्य लुग्भविष्यति। पुनरलुक्कस्मान्न भवति। समर्थानां प्रथमस्य गोत्रप्रत्ययान्तस्यालुगुच्यते न चैतत्समर्थानां प्रथमं गोत्रप्रत्ययान्तम्। किं तर्हि द्वितीयमर्थमुपसंक्रान्तम्। अवश्यं चैतदेवं विज्ञेयम्। अत्रिभरद्वाजिका वसिष्ठकश्यपिका भृग्वङ्गिरसिका कुत्सकुशिकिकाइत्येवमर्थम्। गर्गभार्गविकाग्रहणं वा नियमार्थम्। गर्गभार्गविकाग्रहणं वा क्रियतेतन्नियमार्थं भविष्यति। एतस्यैव द्वितीयमर्थमुपसंक्रान्तस्यालुग्भवति नान्यस्येति। यदप्युच्यते एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि वक्तव्य इति। मा भूदेवम्। अत्र्यो बहुषु यञ्यो बहुष्विति। अजन्तं यद्बहुषु यञन्तं यद्बहुष्वित्येवं भविष्यति। ननु चोक्तं नैवं शक्यम्। इह हि दोषः स्यात्। काश्यपप्रतिकृतयः काश्यपा इति। नैष दोषः। लौकिकस्य तत्र गोत्रस्य ग्रहणम्।

। तस्याकादेशः। यदि द्वितीयमर्थमुपसंक्रान्तस्याप्यलुक् स्यात्तदा गोत्रे लुगचीति यथान्यासेपि अलुगञः प्रसज्येतेत्यर्थः। वसिष्ठकश्यपिकेति। वसिष्ठशब्दादृष्यण्। कश्यपादञ्। पूर्ववद्यून्यतद्व्र। तस्य लुक्। ततो अणञोर्लुक्। वुन्। भृग्वङ्गिरसिकेति। ऋष्यण्। यून्यतद्व्र तस्य लुक् अणो लुक् वुन्। कुत्सकुशिकिकेति। कुत्सादृष्यण्। कुशिकादञ्। अन्यत्पूर्ववत्। गर्गभार्गविकेति। गर्गशब्दाद्यञ्। तस्य लुक्। भृगुशब्दादृष्यण्। तदन्ताद्यून्यतद्व्र। तस्य लुक्। गर्गभृगूणां मैथुनिकेति वुन्। अत्रात्रिभृग्विति लुक्प्राप्तो गोपवनादिपाठेन प्रतिषिध्यते। यदि च द्वितीयमर्थमुपसंक्रान्तस्याप्यलुक् स्याद्गोपवनादिषु न पठ्येत पठितस्तु यथोक्तार्थज्ञापनायेत्यर्थः। अर्थनिर्देशवादी परिहारमाह। यदपीति। लौकिकस्येति। अपत्यस्येत्यर्थः। प्रतिकृतिबहुत्वे यमञन्तो वर्तते न त्वपत्यबहुत्व इत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· नचैतदिति।यद्यपिशास्त्रीयमपिनभवतितथापिस्थितपक्षाश्रयःपरिहारोवक्तव्यइत्येवयुक्तम्।इदानींपक्षद्वयेदोषपरि २४२
५०८ गणनमाह।यस्येति।तस्मादिति।अर्थपक्षेलुकोपरनिमित्तकत्वादत्रयञ्इत्युदात्तनिवृत्तिस्वराप्रसङ्गः।अस्त्रियामित्येतन्नुक्त
तमेवा।गार्गीचेति।एकैकंशब्दरूपंस्त्रीपुंसात्मकसमुदायाभिधायितत्रपर्युदासेसर्वेषांलुकाभाव्यम्।प्रसज्यप्रतिषेधेतुन
भाव्यमितिसंदेहात्प्रश्नः।देवाइति दिव्यदृशःदेवाइतिपण्डिताइत्यर्थः। तत्रपर्युदासस्यैकवाक्यतयालाघवाद्
न्याय्यत्वमिति केचिदाहुः।अन्येतुब्रुवतेगार्गीशब्देनस्त्रीत्वयुक्तानामर्थानामभिधानाद् यत्रोलुकानभाव्यम् न्येषांतुभा

नचैतत्स्त्रौ।किंगोत्रम्।यस्यबहुवचनेपरतोलुक्समासबहुत्वेतेननेतिप्रतिषेधोवक्तव्यः।तेनैवचेत्कृतंबहुत्वमि
ति।वावक्तव्यम्।यस्यप्रत्ययार्थबहुत्वेलुक्तेनास्त्रियामितिवक्तव्यम्।यस्यबहुवचनेपरतोलुक् तस्य
यमधिकोदोषः।अत्र यञ्इतिउदात्तनिवृत्तिस्वरःप्राप्नोति।तस्मात्प्रत्ययार्थबहुत्वेलुगित्येषपक्षोन्याय्यान्।अथेह
कथंभवितव्यंगार्गीचवात्स्यश्चवात्स्यश्चेति।यदितावदस्त्रीविधिनाश्रीयतेअस्त्यत्रास्त्रीतिकृत्वाभवितव्यंलु
क्।अथस्त्रीप्रतिषेधेनाश्रीयतेअस्त्यत्रस्त्रीतिकृत्वाभवितव्यंप्रतिषेधेन।किंपुनरत्रार्थस्यतत्त्वम्।देवाज्ञातुम
र्हन्ति।अथयोलोप्यलोपिनांसमासस्तत्रकथंभवितव्यम्।उभयंहिदृश्यते।शरद्वच्छुनकदर्भाद्भृगुवत्साग्रा
यणेषु।नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानामिति।तद्राजस्यवा।यञञोश्च।यञादीनामेकद्वयोर्वातत्
पुरुषेषष्ठ्याउपसंख्यानम्।यञादीनामेकद्वयोर्वातत्पुरुषेषष्ठ्याउपसंख्यानंकर्तव्यम्।

व्यमिति।अथेति।लोपभाजामन्येषांचयःसमासइत्यर्थः।यदालोपभाग्युगपदर्थानामभिधानाद्बह्वर्थस्तदाश्रयेणकिंत
स्यलुक्क्रियतामथनेत्येवेतिवचनादलोपिसन्निधिकृतंबहुत्वमितिभाकारिलुगितिप्रश्नः।उभयंहीति।ज्ञापकद्वयसद्भावादुभ
यंभवतीतिभावः।भृगुवत्साग्रायणेष्विति।अत्रद्वौलोपिनौतृतीयस्तुनडादिफगन्तोनलोपीद्वयोश्चलुक्कृतः।अगार्ग्यका
श्यपगालवानामिति।द्वौलोपिनौगालवस्तुकृष्यणन्तोनलोपी।नचलोपिनोर्लुक्कृतःस्तदेवंज्ञापकद्वयसद्भावात्प्रयोगद्व राम:
योपपत्तिः॥यञ॥यञादीनामिति।इतःप्रभृतियेप्रत्ययाबहुषुलुग्भाजस्तेयञादयआदिशब्दस्यव्यवस्थावाचित्वात्॥ ॥ ५०८

CC-0. In Public Domain. Digitization by eGangotri

बह्वः॥ द्वन्द्वतत्पुरुषयोर्द्वयोरपि संभवाद्दोषदर्शनाच्च प्रश्नः। किमयमिति। गोबलीवर्दवत्सामान्यविशेषवाचिनोरपि द्वन्द्वसंभवः। औ
द्दालकिरिति। उद्दालको नाम भरतकुलोत्पन्नः। नगोप॥ बिदाद्यन्तर्गणो गोपवनादिः। न च तत्समाप्तये गणे वृत्करणं पठित-
मिति आगणान्ताद्ग्रहणं प्राप्नोतीत्याह। गोपवनादिप्रतिषेध इति॥ ॥उपका॥ द्वन्द्वे पि लुग्विकल्पस्येष्टत्वात्प्रश्नः। किमर्थमि
ति। भ्राष्टकिकापिष्ठलय इति। अस्मादेवोदाहरणान्निककितवादिष्वस्य पाठो नार्ष इति लक्ष्यते। द्वन्द्वाधिकारनिवृत्त्यर्थ

गार्ग्यस्य कुलं गार्ग्यकुलं गर्गकुलं वा। गार्ग्ययोः कुलं गार्ग्यकुलं गर्गकुलं वा। बिदस्य कुलं बैदकुलं बिदकुलं वा। बैदयोः
कुलं बैदकुलं बिदकुलं वा। यञञादीनामिति किमर्थम्। आङ्गस्य कुलमाङ्गकुलम्। आङ्गयोः कुलमाङ्गकुलम्। एकद्वयोरिति
किमर्थम्। गर्गाणां कुलं गर्गकुलम्। तत्पुरुष इति किमर्थमाङ्ग क्रुत्तुम्। गार्ग्यस्य समीपमुपगार्ग्यम्। षष्ठ्या इति किम
र्थम्। क्षौमनगार्ग्यः। यञञो॥ बह्वच इञः प्राच्यभरतेषु॥ किमयं समुच्चयः प्राक्षु भरतेषु चेति आहोस्विद्भरतविशे
षणं प्राग्ग्रहणं प्राञ्चो ये भरता इति। किं चातः। यदि समुच्चयः भरतग्रहणमनर्थकं न ह्यन्यत्र भरताः सन्ति। अ
थ प्राग्ग्रहणं भरतविशेषणम्। प्राग्ग्रहणमनर्थकं न ह्यप्राञ्चो भरताः सन्ति। एवं तर्हि समुच्चयः। ननु चोक्तं भर
तग्रहणमनर्थकं न ह्यन्यत्र भरताः सन्तीति नानर्थकम्। ज्ञापकार्थम्। किं ज्ञाप्यते। एतज्ज्ञापयत्याचार्यः। अन्य
त्र प्राग्ग्रहणे भरतग्रहणं न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। इञः प्राचां भरतग्रहणं न भवति। औद्दालकिः
पिता। औद्दालकायनः पुत्र इति। लुक् च॥ न गोपवनादिभ्यः॥ गोपवनादिप्रतिषेधः प्राग्घरितादिभ्यः। गोपवनादि
प्रतिषेधः प्राग्घरितादिभ्यो द्रष्टव्यः। हारितः हारितौ। बहुषु हरिताः। नगोपव॥ उपकादिभ्योन्यतरस्यामद्वन्द्वे॥ ॥
किमर्थमद्वन्द्व इत्युच्यते। द्वन्द्वे मा भूदिति। नैतदस्ति प्रयोजनम्। इष्यते द्वन्द्वे भ्राष्टककपिष्ठलाः भ्राष्टकिका
पिष्ठलय इति। अत उत्तरं पठति। अद्वन्द्व इति द्वन्द्वाधिकारनिवृत्त्यर्थम्। अद्वन्द्व इत्युच्यते द्वन्द्वाधिकारनिवृत्त्य
र्थम्। द्वन्द्वाधिकारो निवर्त्यते तस्मिन्निवृत्ते अविशेषेण द्वन्द्वे चाद्वन्द्वे च भविष्यति। उपकादिभ्यो॥

मिति। अधिकार एवेह नात्र प्राग्ब्री योधिकारः स्वरितत्वनिमित्तो न गृह्यते न हि पूर्वसूत्रोपात्तो द्वन्द्वशब्द आसन्नः स्वरितः किं तर्हि लौकि-
कोधिकारोपेक्षालक्षणो निविवर्तयिषितः। द्वन्द्वशब्देन तद्विषयोधिकारोभिधीयते तस्य नञा निषेधो द्योत्यते तेनायमर्थो द्वन्द्व इह
॥
नापेक्ष्यते तदनपेक्षायां सामान्येन द्वन्द्वे चाद्वन्द्वे च लुग्विकल्पसिद्धिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आगस्त्य ॥ प्रकृतिप्रत्ययसमुदायस्य षष्ठीनिर्दिष्टत्वादादेशप्रसङ्गस्ततश्चागस्तीनां छात्रा इत्यत्रादेशे कृते वृद्धत्वात् छो न स्यादित्याह। प्रकृतिनिपातनमिति। प्रकृतेरेवादेशो निपात्यतां नीयावित्यर्थः। लुक्प्रतिषेध इति। गोत्रे लुगचीति लुकि प्रतिषिद्धे तत्संनियोगशिष्टस्यादेशस्याप्यभाव इत्यागस्त्यशब्दाच्छः सिध्यति॥ प्रत्ययान्तनिपातने हीति। यदि प्रत्ययान्तस्यादेशः क्रियेतेत्यर्थः। कौण्डिनाइति। कण्वादिभ्यो गोत्र इत्यण्। अस्य विशेषाभावप्रदर्शनायोपन्यासः। अधि

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्॥ ॥आगस्त्यकौण्डिन्ययोः प्रकृतिनिपातनम्। आगस्त्यकौण्डिन्ययोः प्रकृतिनिपातनं कर्तव्यम्। अगस्तिकुण्डिनजित्येतौ प्रकृत्यादेशौ भवत इति वक्तव्यम्। किं प्रयोजनम्। लुक्प्रतिषेधे वृद्ध्यर्थम्। लुक्प्रतिषेधे वृद्धिर्यथा स्यात्॥ प्रत्ययान्तनिपातने हि वृद्ध्यभावः। प्रत्ययान्तनिपातने हि सति वृद्ध्यभावः स्यात्। आगस्तीयाः कौण्डिनाइति। प्रकृतिनिपातनं क्रियते। केनेदानीं प्रत्ययस्य लोपो भविष्यति। अधिकारात्प्रत्ययलोपः। अधिकारात्प्रत्यय लोपो भविष्यति। तत्तर्हि प्रकृतिनिपातनं कर्तव्यम्। न कर्तव्यम्। योगविभागः करिष्यते। आगस्त्यकौण्डिन्ययोर्बहुषु लुग्भवति। ततः अगस्तिकुण्डिनजित्येतौ च प्रकृत्यादेशौ भविष्यतः आगस्त्यकौण्डिन्ययोरिति। एवमपि प्रत्ययान्तयोरेव प्राप्नोति। प्रत्ययान्ताद्धि भवान् षष्ठीमुच्चारयति आगस्त्यकौण्डिन्ययोरिति। नैष दोषः। यथापरिभाषितं प्रत्ययस्य लुक्श्लुलुपो भवन्तीति प्रत्ययस्यैव भविष्यति। अवशिष्टस्यादेशौ भविष्यतः॥ आगस्त्य॥ ॥यङोचि च॥ ॥ऊतोचि॥ ऊतः अचिति वक्तव्यम्। इह मा भूत् सनीस्रसोदनीध्वस इति। अथ ऊत इत्युच्यते। इह कस्मान्न भवति। योयूपः। रेरूपः। विहितविशेषणमूकारग्रहणम्। ऊकारान्ताद्यो विहित इति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। इष्टमेवैतत्संगृहीतं सनीस्रंसोदनीध्वंस इत्येव भवितव्यम्। यङो॥

कारादिति। लुग्ग्रहणमिहानुवर्तते तेन तत्र प्रकृतेरादेशः प्रत्ययस्य लुगित्यर्थः संपद्यते। बहुषु लुग्भवतीति। बहुषु वर्तमानयोर्यः प्रत्ययस्तस्येत्यर्थः। प्रकृत्यादेशावेति। सामर्थ्यलभ्योयमर्थः। प्रत्यये हि लुप्ते प्रकृतिरेवावशिष्यते। एवमपीति। षष्ठीनिर्दिष्टस्यादेशविधानादिति भावः। ततश्च लुक आदेशयोश्च पर्यायप्रसङ्गः। यथापरिभाषितमिति। तत्र स्थानिभेदान्न पर्यायाभावः॥ ॥ रा॰ म॰ ५०६
यङोचि॥ सनीस्रस इति। यद्यत्र लुक् स्यात्तदा न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधान्नलोपो न स्यात्। अतो लोपः। यस्य हलइति लोपे तु प्रत्ययलक्षणं भवत्येव॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गाति॥ पिबतेरिति। पिबतेर्यः स्थानी दृष्टः पाशब्द इत्यर्थः। शिति च पिबादेशो विहित इति पापान इत्यस्यैव भ्वादिकस्य ग्रहणम्। अगासीदिति। गे शब्दे पा रक्षणे अनयोर्यमरमनमातां सक्च इति सगागमः। सिच इट्। निर्देशादिति। गातीत्यादादिकादेशानुकरणत्वात् दादिलुका गातिशब्दश्तिपि निर्दिष्टः। सर्वत्रेति। घुमास्थागापेत्यादावपीत्यर्थः। तेन पायत इति पातेरीत्वाभावः। शोष-णार्थस्यानुपायते लाक्षणिकत्वात्पारूपस्य ग्रहणाभावः॥ आमः॥ लिग्रहणमिति। निपातनादन्यत्र लुक्सिध्यति। न त्वनपेक्ष्या

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु॥ गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम्। गापोर्ग्रहणे इण्पिबत्योर्ग्रहणं कर्तव्यम्। इणो यो गाशब्दः पिबतेर्यः पाशब्द इति वक्तव्यम्। इह मा भूत्। अगासीन्नटः। अपासीद्धनमिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। इण्ग्रहणे तावद्गातेर्निर्देशादेवव्यक्तं लुग्विकरणस्य ग्रहणमिति। पाग्रहणे चापि वार्त्तमुक्तमेतत्सर्वत्रैव पाग्रहणे अलुग्विकरणस्य ग्रहणमिति। गातिस्था॥ तनादिभ्यस्तथासोः। तथासोरात्मनेपदवचनम्। तथासोरात्मनेपदस्य ग्रहणं कर्तव्यम्। आत्मनेपदं यौ तथासाविति वक्तव्यम्। एकवचनग्रहणं वा। अथवा एकवचने यौ तथासाविति वक्तव्यम्। तच्चावश्यमन्यतरत्कर्तव्यम्। अवचने ह्यनिष्टप्रसङ्गः। अनुच्यमाने ह्येतस्मिन्ननिष्टं प्रसज्येत। अतनिष्ट यूयम्। असनिष्ट यूयमिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। यद्यपि तावदयं तशब्दो दृष्टापचारोऽस्त्यात्मनेपदम्। अस्ति च परस्मैपदम्। अस्त्येकवचनम्। अस्ति बहुवचनम्। अयं तु खलु थास्शब्दोऽदृष्टापचार आत्मनेपदमेकवचनं च। तस्यास्य कोऽन्यः सहायो भवितुमर्हति। अन्यदत आत्मनेपदादेकवचनाच्च। तद्यथा। अस्य गोर्द्वितीयेनार्थ इति। गौरेवानीयते। नाश्वो न गर्दभ इति। तनादि॥ आमः॥ आमो लेर्लोपे लुङ्लोटोरुपसंख्यानम्। आमः लेर्लोपे लुङ्लोटोरुपसंख्यानं कर्तव्यम्। तां वैजवापयो विदामक्रन्। अस्य भवन्तो विदांकुर्वन्तु। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। लिग्रहणं निवर्तिष्यते। यदि निवर्तते। प्रत्ययमात्रस्य लुक् प्राप्नोति। इष्यत एव प्रत्ययमात्रस्य। आतश्चेष्यते। एवं ह्याह कृञ्चानुप्रयुज्यते लिटीति।

यं परिहार उक्तः। प्रत्ययमात्रस्येति। न त्वादेरपीत्यर्थः। एवं ह्याहेति। व्यवहितविपर्यस्तप्रयोगनिवृत्त्यर्थमेवं तद्वचनमित्यर्थः। आमन्तस्यानभिव्यक्तपदार्थत्वात् स्वाभाविक्येवानुत्पत्तिस्तरतादेर्लुग्द्वारेणान्वाख्यायत इति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थवदिति। आंप्रत्ययोऽनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीत्यर्थवान्। आमिति। अमगत्वादि विन्यस्यणलिवृद्धो द्विर्वचने एकादेशेच यद्रूपमामिति तस्यार्थवत्त्वाण्णलो लुक्प्रसङ्गः। किंपुनरिति। यदा विशेषविधिः सामान्यविधिबाधक इति न्याय आश्रीयते तदा लकारान्तरेषु साक्काशाल्लिनादयो विशेषविहिते न लुका बाध्यन्त इत्यादेशापवादो लुक् संपद्यते। अथ त्वविरोधादस्ति च संभवो यद् भयस्यादित्याश्रीयते तदा कृते णाद्यादेशेषु लुका भाव्यमिति संदेहात्प्रश्नः। लुगिति। सत्यपि संभवे बाधनं तत्कदा नेनेद दधिदान्स्येति भावः। कस्येति। निघातादेस्तिङ्कार्यस्यानिष्टत्वात्प्रश्नः॥ कथमिति। आमः प्रत्ययत्वादप्रत्यय

यदि च प्रत्ययमात्रस्य लुग्भवति तत एतदुपपन्नं भवति। आमन्तेभ्यो णलः प्रतिषेधः। आमन्तेभ्यो णलः प्रतिषेधो वक्तव्यः। शृङ्गाम ततनाम। वृद्धौ कृतायामामिति लुक् प्राप्नोति। आमन्तेभ्योऽर्थवद्ग्रहणाण्णलोऽप्रतिषेधः। आमन्तेभ्योऽर्थवद्ग्रहणाण्णलः अप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः॥ लुक्कस्मान्न भवति। शृङ्गाम ततामेति। अर्थवद्ग्रहणात्। अर्थवत आमूत्रस्य ग्रहणं न चैषोऽर्थवान्। आमन्तेभ्योऽर्थवद्ग्रहणाण्णलोऽप्रतिषेध इति चेदमः प्रतिषेधो वक्तव्यः। आम उक्तं वा। किमुक्तम्। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति। किंपुनर्लुगादेशापवादः आहोस्वित्कृतेष्वादेशेषु भवति। लुगादेशापवादः। लुक् आदेशानामपवादः। तिङ्क्ताभावस्तु। तिङ्क्तस्य तु अभावः कस्मात्पदत्वस्यासुबन्तत्वात्सिद्धम्। सुबन्तं पदमिति परसंज्ञा भविष्यति॥ कथं स्वाद्युत्पत्तिः। लकारस्य कृत्त्वात्प्रातिपदिकत्वं तदाश्रयं प्रत्ययविधानम्। लकारः कृत् कृत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा तदाश्रयं प्रत्ययविधानं प्रातिपदिकाश्रयत्वात्स्वाद्युत्पत्तिर्भवति। यद्येवं सुपः श्रवणं प्राप्नोति। अव्ययादिति लुग्भविष्यति। कथमव्ययत्वम्। अव्ययत्वं मकारान्तत्वात्। कृदन्तं मान्तमव्ययसंज्ञं भवतीति अव्ययसंज्ञा भविष्यति।

इति प्रातिपदिकसंज्ञानिषेधात्प्रश्नः। लकारस्येति। अतिङिति कृत्संज्ञाप्रतिषेधस्तिङ्भाविनो लकारस्य। अयं तु तिङ्भावी न भवतीति भावः। सुपः श्रवणमिति। यद्यप्येकवचनस्य हल्ङ्यादिलोपोऽस्ति तथापि द्विवचनबहुवचनश्रवणप्रसङ्गः। कृदन्तमिति। कृन्मेजन्त इत्यत्र कृदन्तस्य विशेषणं मेजन्तग्रहणं न तु कृतः। स्वरादिषु यदामिति पठ्यते तेन तद्धितप्रकरण— तद्धितसाहचर्याद्वा तद्धित एव गृह्यते। यत्प्रकारयां चकारेति। अत्र प्रशब्दस्यानुदात्तत्वमिष्यते तच्चातिबादिलुकि सति गतिर्गतौ तिङि चोदात्तवतीति सिध्यति नान्यथेति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृदन्तप्रकृतिस्वरत्वादिति। प्रशब्दस्य कारयामित्यनेन समासे कृते समासस्वराव्ययपूर्वपदप्रकृतिस्वरयोः प्राप्तयोः कृत्स्वरः। ततः शेषनिघातेन गतेरनुदात्तत्वं सिध्यतीत्यर्थः। तस्य चेति। आमन्तस्य। तिङन्तत्वान्निघातो न प्रवर्तते। तस्मात्परं तिङन्तं तु चकारादि निहन्यते। न कारयामिति। नतस्य च न लोपादिप्रसङ्गः। न चकारेति। नञो तिङन्तेन सामर्थ्यं प्रदर्शयति न त्वयं लौकिकः प्रयोगो व्यवहितविपर्यस्तप्रयोगनिवृत्त्यर्थत्वादनुप्रयोगारम्भस्य। अभिव्यक्तपदार्थेन नञः सामर्थ्यं न त्वनभिव्यक्तार्थेनेत्यर्थः॥ अव्यया॥ लिङ्गाभावादिति। न च स्त्रीसमानाधिकरणपक्षः स्त्रियामित्यत्राश्रितः भूतमियंब्राह्मणी

स्वरः कथम्। यत्नकारयांचकार। स्वरः कृदन्तप्रकृतिस्वरत्वात्। कृदन्तमुत्तरपदं प्रकृतिस्वरं भवतीत्येष स्वरो भविष्यति। तथा च निघातसिद्धिः। तथा च निघातसिद्धिर्भवति। चस्तु कामं याजयांचकार। तिङ्। तिङ इति तस्य वा निघातः। तस्माच्च निघातः सिद्धो भवति। नञा तु समासप्रसङ्गः। नञा तु समासः प्राप्नोति। न कारयां न हारयाम्। नञ् सुबन्तेन सह समस्यत इति समासः प्राप्नोति। उक्तं वा। किमुक्तम्। असामर्थ्यादिति। नात्र नञ आमन्तेन सामर्थ्यं केन तर्हि लिङन्तेन। न चकार कारयां न जहार हारयामिति। आमः॥ अव्ययादाप्सुपः॥ अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावात्। अव्ययादापः लुग्वचनमनर्थकम्। किं कारणम्। लिङ्गाभावात्। अलिङ्गमव्ययम्। किमिदं भवान् सुपो लुकं मृष्यति आपो लुकं न मृष्यति। यथैव ह्यलिङ्गमव्ययमेवमसंख्यमपि। सत्यमेवमेतत्। प्रत्ययलक्षणमाचार्यः प्रार्थयमानः सुपो लुकं मृष्यति आपः पुनरस्य लुकि सति न किंचिदपि प्रयोजनमस्ति। उच्यमाने ऽप्येतस्मिन् स्वाद्युत्पत्तिर्न प्राप्नोति। किं कारणम्। एकत्वादीनामभावात्। एकत्वादिष्वर्थेषु स्वादयो विधीयन्ते। न चैषामेकत्वादयः सन्ति। अविशेषेणोत्पद्यन्ते। उत्पन्नानां नियमः क्रियते। अथवा प्रकृतानर्थानपेक्ष्य नियमः। के च प्रकृताः। एकत्वादयः। एकस्मिन्नेवैकवचनं न द्वयोर्न बहुषु। द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु। बहुष्वेव बहुवचनं नैकस्मिन्न द्वयोरिति।

दृत्यादौ भूतादिभ्यः प्रत्ययप्रसङ्गादिति भावः। किमिदमिति। संख्याया अप्यभावात्सुपापि नोत्पत्तव्यमिति भावः। प्रत्ययलक्षणमिति। स्वाभाविकेयदसुपो नुपलब्धिर्लुग्द्वारेण पदत्वनिबन्धनरुत्वादिकार्यसिद्धये सा ख्यायत इत्यर्थः। उच्यमानेऽपीति। प्रसक्तादर्शनस्य लोपादिसंज्ञाविधानात्। अनुत्पन्नस्य सुपो लुगसंभवादिति भावः। एकत्वादिष्विति। वाक्यैकवाक्यतया विशिष्ट एवार्थे स्वादिविधानादिति भावः। अविशेषेणेति। वाक्यान्तरनिरपेक्षत्वात्स्वादिविधिवाक्यस्येति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदयमिति। एकवाक्यतापक्षे पिञ्ज्ञापकात्सुब्लुगुत्पत्तिरित्यर्थः॥ नाव्ययी॥ योगव्यवसानमिति। योगविभाग इत्यर्थः। तुर्नियामक इति। अवधारणे तुर्वर्तते तेनामेवापञ्चम्या अलुक् तु पञ्चम्या अपीत्यर्थः संपद्यते। आपाटलिपुत्रमिति। आङ्योगे त्र पञ्चमी न त्वपादान इत्यम्भावो भवतीत्यर्थः। नवेति। अव्ययीभावाद्विहितायाः पञ्चम्या अमादेशप्रतिषेधो न तूत्तरपदाद्विहिता पञ्चमी तस्याश्च समासप्रातिपदिकत्वाल्लुकि कृते समासात्सुपं इत्युत्पद्यते न तस्याम्भावः। भवति तदेति। श्रूयत एवेत्यर्थः। आउपकुम्भा

अथवा आचार्यप्रवृत्तिर्ज्ञापयति। उत्पद्यन्ते व्ययेभ्यः स्वादय इति। यदयमव्ययादाप्सुप इति लुकं शास्ति। अव्ययाद्॥ नाव्ययीभावादतोम्त्वपञ्चम्याः। नाव्ययीभावादत इति योगव्यवसानम्। नाव्ययीभावादत इति योगो व्यवसेयः। नाव्ययीभावादकारान्तात्सुपो लुग्भवति। ततो मृत्पञ्चम्या इति। किमर्थो योगविभागः। पञ्चम्या अमृप्रतिषेधार्थः। पञ्चम्या अमः प्रतिषेधो यथा स्यात्। एकयोगे ह्युभयोः प्रतिषेधः। एकयोगे ह्युभयोः प्रतिषेधः-स्यात्। अमः अलुक् च। स तर्हि योगविभागः कर्तव्यः। न कर्तव्यः। तुर्नियामकः। तुः क्रियते स नियामको भविष्यति। अमेवापञ्चम्या इति। अमि पञ्चमीप्रतिषेधे पादानग्रहणम्। अमि पञ्चमीप्रतिषेधे अपादानग्रहणं कर्तव्यम्। अपादानपञ्चम्या इति वक्तव्यम्। किं प्रयोजनम्। कर्मप्रवचनीययुक्तेः प्रतिषेधार्थम्। कर्मप्रवचनीययुक्ते मा भूदापाटलिपुत्राद्वृष्टो देवः। न वोत्तरपदस्य कर्मप्रवचनीययोगात् समासात्पञ्चम्यभावः। न वा वक्तव्यम्। किं कारणम्। उत्तरपदमत्र कर्मप्रवचनीययुक्तम्। उत्तरपदस्य कर्मप्रवचनीययोगात् समासात्पञ्चमी न भविष्यति। यदा च समासः कर्मप्रवचनीययुक्तः भवति तदा प्रतिषेधः। तद्यथा। आउपकुम्भात्। आउपमणिकात् इति। नाव्ययीभाव॥ तृतीयासप्तम्योर्बहुलम्॥ सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यम्। सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यमिति वक्तव्यम्। सुमद्रं सुमगधम्। ऋद्धिनदीसमासा उन्मत्तगङ्गं लोहितगङ्गम्। संख्यावयव एकविंशतिभारद्वाजं त्रिपञ्चाशद्गौतमम्। तृतीयासप्त॥

दिति। कुम्भस्य समीपमित्यव्ययीभावः। तत आङ्योगे पञ्चमी॥ तृतीया॥ सुमद्रमिति। मद्राणां समृद्धिरित्यव्ययीभावः। एकविंशतिभारद्वाजमिति। एकविंशतिर्भरद्वाजा वंश्याः त्रिपञ्चाशद्गौतमा वंश्या इति संख्या वंश्येनेति समासः। तत्र वर्तिपदानां स्वार्थोपसर्जनार्थान्तराभिधायित्वाद्गौतमभारद्वाजशब्दयोरेकत्वविशिष्टेऽर्थान्तरे संक्रमाद्बहुगभावः ततः सप्तमी। नित्योऽम्भावः। बहुलग्रहणलभ्यश्चायमर्थो दर्शितः॥ राम: ४९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लुटः॥ श्वः कर्तेति। तिस्रस्संज्ञा नामत्र डारौरसः कृताः। आत्मनेपदानामिति। लुट आत्मनेपदानां च प्रथमसंज्ञकानां डारौरसो भवन्तीति वक्तव्यम्। ततश्च विशेषविहितत्वात् टादेशे टेरेत्वं बाध्यते। पूर्वविप्रतिषेधार्थेनेति। पूर्वविप्रतिषेधस्य यत्प्रयोजनं॰

लुटः प्रथमस्य डारौरसः। टितां टेरे विधेर्लुटो डारौरसः पूर्वविप्रतिषिद्धम्। टितां टेरे विधेर्लुटो डारौरसो भवन्ति पूर्वविप्रतिषेधेन टेरेत्वस्यावकाशः पचते पचेते पचन्ते। डारौरसामवकाशः श्वः कर्ता श्वः कर्तारौ श्वः कर्तारः। इहोभयं प्राप्नोति। श्वः अध्येता श्वः अध्येतारौ श्वः अध्येतार इति। डारौरसो भवन्ति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वक्तव्यः। आत्मनेपदानां चेति वचनात्सिद्धम्। आत्मनेपदानां च डारौरसो भवन्तीति वक्तव्यम्। तच्च समसंख्यार्थम्। तच्चावश्यमात्मनेपदग्रहणं कर्तव्यं समसंख्यार्थं संख्यातानुदेशो यथा स्यात्। अक्रियमाणे ह्यात्मनेपदग्रहणे षट् स्थानिनस्त्रय आदेशाः वैषम्यात्संख्यातानुदेशो न प्राप्नोति। पूर्वविप्रतिषेधार्थेन तावन्नार्थ आत्मनेपदग्रहणेन। इदमिह संप्रधार्यं डारौरसः क्रियन्तामेत्वमिति। किमत्र कर्तव्यम्। परत्वादेत्वं नित्या डारौरसः कृतेऽप्येत्वे प्राप्नुवन्त्यकृतेऽपि प्राप्नुवन्ति। टेरेत्वमपि नित्यं कृतेष्वपि डारौरस्सु प्राप्नोत्यकृतेष्वपि प्राप्नोति। अनित्यमेत्वमन्यस्य कृतेषु डारौरस्सु प्राप्नोतीत्यन्यस्याकृतेषु। शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति। डारौरसोऽप्यनित्याः अन्यस्य कृत एत्वे प्राप्नुवन्त्यन्यस्याकृते। शब्दान्तरस्य च प्राप्नुवन्तोऽनित्या भवन्ति। उभयोरनित्ययोः परत्वादेत्वम्। एत्वे कृते पुनः प्रसङ्गविज्ञानाद् डारौरसो भविष्यन्ति। समसंख्यार्थेन चापि नार्थ आत्मनेपदग्रहणेन। स्थानेऽन्तरतमेन व्यवस्था भविष्यति। कुत आन्तर्यम्। अर्थतः। एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थः। अथवा आदेशा अपि षडेव निर्दिश्यन्ते। कथम्। एकशेषनिर्देशोऽयम्। अथैतस्मिन्नेकशेषे सति किमयं कृतैकशेषाणां द्वन्द्वः डा च डा च डा। रौ च रौ च रौ। रश्च रश्च रः। डा च रौ च रश्च डारौरस इति। आहोस्वित्कृतद्वन्द्वानामेकशेषः। डा च रौ च रश्च डारौरसः। डारौरसश्च डारौरसश्च डारौरस इति॥ किंचातः। यदि कृतैकशेषाणां द्वन्द्वः अनिष्टः समसंख्यः प्राप्नोति। एकवचनद्विवचनयोर्डा प्राप्नोति बहुवचनैकवचनयो रौ प्राप्नोति द्विवचनबहुवचनयो रः प्राप्नोति। अथ कृतद्वन्द्वानामेकशेषः न दोषो भवति। यथा न दोषस्तथास्तु॥

तत्प्रयोजनेनेत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ किंपुनरिति।कस्यपक्षस्यन्याय्यतरत्वात्प्रशस्यतरत्वमितिसामान्येनप्रश्नः।इहतुकृतेनैकपक्षेषाणांहून्होदुष्टत्वान्नैवप्रशस्यतरत्व २४२
५१२ तिनतदपेक्षःप्रश्नः।डारौरसःकृतेटेरइति।परत्वाट्टेरेत्वेकृतेपुनःप्रसङ्गविज्ञानाड्डारौरसोभवन्ति।यथेजतुरीजुरितिकृतेसंप्र-
सारणेद्विर्वचनम्।एषएवार्थआर्ययादर्शितः।आन्तर्यतइति।यएवामीत्रयःश्रूयन्तेतएवसर्वेषांसन्तु।डाविकारइति।डादेश
इत्यर्थः।नानुबन्धकृतमनेकाल्त्वमित्यन्त्यस्यस्यादितिडाश्चकर्तव्यः।श्वःकर्तेति।तिपोडादेशस्तस्यतासस्तुदात्तेनृङ्डिदित्य-

किंपुनरत्रन्यायः।उभयंहिदृश्यतेबहुशक्तिकिटिकंबहूनिशक्तिकिटिकानि।बहुस्थालीपिठरंबहूनिस्थाली
पिठराणि।डारौरसःकृतेटेरेयथाद्वित्वंप्रसारणे।समासंख्येननार्थोस्तिसिद्धंस्थानेर्थतोन्तरतः॥आन्तर्य
तोव्यवस्थानयएवेमेभवन्तुसर्वेषाम्।टेरेत्वंचपरत्वात्कृतेपितस्मिन्निमेसन्तु॥डाविकारस्यशित्करणंस
र्वादेशार्थम्।डाविकारःशित्कर्तव्यः।किंप्रयोजनम्।सर्वादेशार्थः।शित्सर्वस्येतिसर्वादेशोयथास्यात्।अ
क्रियमाणेहिशकारेअलोन्त्यस्यविधयोभवन्तीत्यन्त्यस्यप्रसज्येत।निघातप्रसङ्गस्तु।निघातस्तुप्रा
प्नोति।श्वःकर्ता।तासेःपरंलसार्वधातुकमनुदात्तंभवतीत्येषस्वरःप्राप्नोति।यत्तावदुच्यते।डाविकारस्य
शित्करणंसर्वादेशार्थमिति।सिद्धमलोन्त्यविकारात्।सिद्धमेतत्।कथम्।अलोन्त्यविकारात्।अस्त्वय
मलोन्त्यस्य।कारूपसिद्धिः।कर्ता।डितिटेर्लोपात्लोपः।डितिटेर्लोपेनलोपोभविष्यति।अभत्वान्नप्राप्नोति।डित्क
रणसामर्थ्याद्भविष्यति।अनित्वाद्वा।अथवाअनित्वादेतत्सिद्धम्।किमिदमनित्वादिति।अन्त्यस्यायंस्थानेभव
न्प्रत्ययःस्यात्।असत्यांप्रत्ययसंज्ञायामित्संज्ञा न।आसत्यामित्संज्ञायांलोपोन।असतिलोपेनेकाल्।यदा
नेकाल्तदासर्वादेशः।यदासर्वादेशःतदाप्रत्ययः।यदाप्रत्ययस्तदेत्संज्ञा।यदेत्संज्ञातदालोपः॥प्रश्लिष्टनि
र्देशाद्वा॥अथवाप्रश्लिष्टनिर्देशोयंडाआडा।सोनेकाल्शित्सर्वस्येतिसर्वादेशोभविष्यति।

नुदात्तत्वंप्राप्नोति।यस्तुतिङ्ङतिङ्इतिनिघातःसनलुडितिप्रतिषिद्धः।डितीति।आकारेडितिपरतःसतकारस्यटिसंज्ञकस्यलोपः।डित्कर
णसामर्थ्यादिति।ततएवानङ्गस्यापीतिबोद्धव्यंनह्यन्त्यस्यडादेशेकृतेसतकारमङ्गंप्रत्ययेपरतोङ्गसंज्ञाविधानात्।अनित्वादि- रामः
ति।अनित्संज्ञकत्वादित्यर्थः।अन्त्यस्येति।प्रत्ययस्यह्यवयवःस्यान्नतुप्रत्ययस्तकारादेःसमुदायस्यप्रत्ययत्वात्। ॥ ५१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रश्लिष्टनिर्देशादिति। तत्रानेनकृतेनैकादेशेनसमुदायःप्रत्याय्यतेसोनेकाल्त्वात्सर्वादेशःप्रवर्तते। सर्वादेशेचतस्मिन्कृतेएका
देशःक्रियते। सिद्धमस्तोन्त्यविकारादिति यदुक्तंतत्रदोषमुद्भावयति। यदातर्हीति। अकृतपरिमाणस्यतिङ्संज्ञासंबन्धात्तिश
ब्दस्यान्त्यादेशेकृतेरूपान्तरयोगात्तिङ्ग्रहणेनाग्रहणात्पदत्वंनस्यादित्यर्थः। एकदेशविकृतमिति। पचतुपचन्त्वित्या-

यदातर्ह्ययमन्त्यस्यस्थानेभवतितदातिङ्ग्रहणेनग्रहणंनप्राप्नोति। तिङ्ग्रहणमेकदेशविकृतस्यानन्य-
त्वात्। एकदेशविकृतमनन्यवद्भवतीतितिङ्ग्रहणेनग्रहणंभविष्यति। स्वरःकथम्। स्वरेविप्रतिषेधात्सिद्धम्।
डारौरसःक्रियन्तामनुदात्तत्वमिति। किमत्रकर्तव्यम्। परत्वादनुदात्तत्वंनित्याडारौरसःकृतेप्यनुदात्तत्वेप्रा
प्नुवन्त्यकृतेपिप्राप्नुवन्ति। अनुदात्तत्वमपिनित्यंकृतेष्वपिडारौरस्सुप्राप्नोत्यकृतेष्वपिप्राप्नोति। अनित्यमनु
दात्तत्वम्। अन्यस्यकृतेषुडारौरस्सुप्राप्नोत्यन्यस्याकृतेषु। शब्दान्तरस्यचप्राप्नुवन्विधिरनित्योभवति। डा
रौरसोऽप्यनित्याः। अन्यथास्वरस्यकृतेऽनुदात्तत्वेप्राप्नुवन्ति। अन्यथास्वरस्याकृते। स्वरभिन्नस्यचप्राप्नुव
न्तो नित्याभवन्ति। उभयोरनित्ययोःपरत्वादनुदात्तत्वम्। अनुदात्तत्वेकृतेपुनःप्रसङ्गविज्ञानाड्डारौरसः।
टिलोपेउदात्तनिवृत्तिस्वरेणसिद्धम्। नसिध्यति। किंकारणम्। अन्तरङ्गत्वाड्डारौरसः। तत्रान्तरङ्गत्वाड्डा
रौरस्सुकृतेषुअनुदात्तत्वंक्रियतांटिलोपइति। किमत्रकर्तव्यम्। परत्वाट्टिलोपेनभवितव्यम्। एवंतर्हिस्वरे-
विप्रतिषेधात्सिद्धम्। न्याय्यएवायंस्वरविप्रतिषेधः।

दोयथा। न्याय्यएवायमिति। पूर्वप्रदर्शितोहिडारौरसामन्तरङ्गत्वादन्याय्योयंतुन्याय्यः। अथवापरविप्रतिषेधएवायं
नपूर्वविप्रतिषेधइतिन्याय्यत्वमुच्यते।

भा॰ कै॰ इदमिहेति। डारौरसः सुकृतेषु टिलोपे च कृते संप्रधारणे यमानन्तकृते नुदात्तत्वे उदात्तनिवृत्तिस्वरो नैव प्राप्नोति। तत्कथमनयो २५२
४२३ विप्रतिषेध इत्याह। तदेतदिति। तिपोनुदात्तस्य स्थाने डादेशः स्थानिवद्भावादनुदात्तस्तत्रोदात्तनिवृत्तिस्वरः सिध्यति। यस्तु तस्य
इस्य स्थाने क्रियते तत्र परत्वाट्टिलोपे कृते नुदात्ते उदात्तलोपेन कृत इत्युदात्तनिवृत्तिस्वरो न सिध्यति। पुनःप्रसङ्गविज्ञाना-
त्त्वनुदात्तत्वमेव स्यादित्यर्थः। सोसाविति। शास्त्रीयस्तत्रानुदात्तो न गृह्यते किं तर्हि उदात्तत्वाभावयुक्त इत्यर्थः। वृत्तिसन्नियोग

इदमिह संप्रधार्यम्। अनुदात्तत्वं क्रियताम् उदात्तनिवृत्तिस्वर इति। किमत्र कर्तव्यम्। परत्वादनुदात्तत्वम्। अनुदात्तत्वे कृते पुनःप्रसङ्गविज्ञानादुदात्तनिवृत्तिस्वरो भविष्यति। तदेतद्धि सिद्धं भवति यत्र पिद्वचनम्। यदपि द्वचनं तत्र न सिध्यति। तत्रापि सिद्धम्। कथम्। इदमद्य लसार्वधातुकानुदात्तत्वं प्रत्ययस्वरस्यापवादः। न चापवादविषये उत्सर्गोऽभिनिविशते पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः। प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते। तन्न तावदत्र कदाचित्प्रत्ययस्वरो भवति अपवादं लसार्वधातुकानुदात्तत्वं प्रतीक्षते। तत्रानुदात्तत्वं क्रियतां लोप इति। यद्यपि परत्वाल्लोपः सोसाववियमानोदात्तत्वे अनुदात्ते उदात्तो लुप्यते। प्रत्ययस्वरापवादो लसार्वधातुकानुदात्तत्वम्। तेन तत्र न प्रसक्तः प्रत्ययस्वरः कदाचित्। प्रत्ययस्वरश्च तासेर्वृत्तिसंनियोगशिष्टः। तेन चाप्यसावुदात्तो लोप्स्यते तथा न दोषः॥ ॥इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम्। समाप्तश्चायं पादोऽध्यायश्च॥

शिष्ट इति। वृत्तिः प्रवृत्तिर्यदैव तासिः प्रवर्तते तदैवापवादाभावादुदात्तत्वयुक्त इत्यर्थः। पूर्वोक्त एवार्थः श्लोकेन संगृहीतः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकं समाप्तम्। रामः
समाप्तश्चायं पादोऽध्यायश्च॥ ॥ ४२३

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥विद्योदयोनिराकुर्यादविद्यानिभिरंसदा॥

॥श्रीसंकष्टनाशिन्यैनमः॥

॥इतिद्वितीयाध्यायः समाप्तः ॥

॥श्रीविश्वेश्वरायनमः॥

॥सहस्रांशुरिवाशेषंमुद्राकिरणराजिभिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्योदयो निराकुर्याद विद्यातिमिरं सदा ॥ १॥

अथ तृतीयाध्यायप्रारम्भः

सहस्रांशुरिवारोषं मुद्राकिरणराजिभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः॥प्रत्ययः॥ अधिकारेणेति। यदितुप्रकारान्तरेणसंज्ञिस्वरूपनिर्देशादिनासंज्ञाक्रियते ततोनस्यादतिप्रस
ङ्गः।यदातुगौरवादिप्रसङ्ग·परिहारायाधिकारेणक्रियते ततोतिप्रसङ्ग·इत्यर्थः। तत्रयदिसर्वेसंज्ञिनः स्वरूपेणनिर्दिश्येरन्
ततोगौरवंस्यात्। अथसप्प्रत्ययइतिसनः सकारादारभ्यकपः पकारेणप्रत्याहाराश्रयणेनसंज्ञाविधीयेततदानेकस्यप
कारस्यसंभवात्संदेहःस्यात्। ननुप्रतियोगमुपस्थानेपिवाक्यभेदप्रसङ्गात् प्रकृत्यादीनांप्रत्ययसंज्ञानभविष्यति।तथाहि।
हरतेर्धातोर्दृतिनाथयोःकर्मणोरुपपदयोः पशौकर्तरीन्प्रत्ययोभवतीत्येकंवाक्यम्। तेचहरतिदृतिनाथपशवःप्रत्य
यसंज्ञाइतिद्वितीयंवाक्यम्। नचैकवाक्यतायांसंभवन्त्यांवाक्यभेदोयुक्तः। नैतदस्ति। सनादीनामपिवाक्यभेदेनैवसं
ज्ञाविधेयानह्यसतःसंज्ञिनस्संज्ञाविधानमुपपद्यते। तत्रैकेनवाक्येनसनादीनांविधिः। अपरेणतेषामेवसंज्ञाविधिः। तत

श्रीगणेशायनमः॥प्रत्ययः॥अधिकारेणेयंप्रत्ययसंज्ञाक्रियते। साप्रकृत्युपपदोपाधीनामपिप्राप्नोतितस्याः
प्रतिषेधोवक्तव्यः॥प्रकृति। गुप्तिज्किद्भ्यः उपपद·स्तम्बकर्णयोः। उपाधि। हरतेर्दृतिनाथयोःपशौ। एतेषांप्रति
षेधोवक्तव्यः॥

त्रयथासनादीनांवाक्यभेदेनसंज्ञाविधिः एवंप्रकृत्यादीनामपिप्रतिसंज्ञिप्रत्ययसंज्ञोपस्थापनसामर्थ्यात्संज्ञासंज्ञिसंब
न्धप्रतिपत्तियोग्यविभक्त्यन्तराध्याहारेणप्राप्नोति। सनाद्युत्पत्तिवाक्यएवप्रथममेतेषांपारार्थ्यमवगतम्। द्वितीयेतु
संज्ञासंज्ञिसंबन्धप्रतिपादनवाक्येसंज्ञासंबन्धप्रतिपत्तौस्वार्थतास्यात्। यथाचसप्तमीनिर्दिष्टस्यवाक्यभेदेनोपपद
संज्ञाधिकाराद्भवतितथाप्रत्ययसंज्ञापिप्राप्नोति। उपाधिशब्देनचेहतुल्यन्यायत्वाद्विशेषणमप्युच्यते क्वचित्तुतयो
र्भेदेनव्यवहारोदृश्यते। यथानोपाधेरुपाधिर्भवति विशेषणस्यवाविशेषणमिति। अर्थविशेषउपाधिस्तदन्त
वाच्यःसमानशब्दोयः। अनुपाधिरतोन्यःस्याच्छुपादिविशेषणंयद्वदिति ॥

राम: १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचस्यादिति। नहिसंज्ञाप्रवृत्तिमात्रादेवदोषोभवति। किंतुतन्निमित्तकार्यप्रवर्तनात्। नचप्रकृत्यादीनांकिंचित्तन्निमि
त्तंकार्यंसंभवतिपरत्वंतावदवधिविशेषोपादानेनसनादिभिरेवप्रतिपन्नम्। नचगुपादीनांसनादीनांचपरस्परापेक्षंपर
त्वंयुज्यतेविरोधात्। उपपदस्यापिसमासेसतिपूर्वनिपातेनभवितव्यमितिपरत्वाभावः। उपाधेरपिपौर्वापर्यस्यलौकि
केप्रयोगेनियमाभावात्। स्थितस्यैवचपरत्वस्यशास्त्रेणानुवादाच्छास्त्रस्यविधायकत्वाभावादनुवादकत्वादर्थस्यचोपाधि
त्वात्तस्यचपरत्वासंभवात्परत्वाभावः। आद्युदात्तत्वमपिनभविष्यति। यथास्वंलक्षणेनतेषांस्वरस्यविहितत्वात्। अङ्ग·सं
ज्ञाचविधानप्रतिबद्धा। नचप्रकृत्यादयःकुतश्चिद्विहिताइतितेषुपरत्वसामान्यस्यभविष्यतीतिप्रश्नः । परत्वमिति। प्रकृतिप्रत्यय
योः पर्यायेणपरस्परापेक्षंपरत्वंस्यात्। शब्दान्तरापेक्षंवाप्रकृतेः प्रकृत्यपेक्षंतुप्रत्ययस्य। उपपदस्यापिपरत्वादुपसर्जनंपूर्वमित्ये
तद्राजपुरुषादिषुसावकाशंबाधित्वापरत्वंस्यात्। भोक्तुंव्रजतीत्येवंचनित्यंस्याद्‌। नतुव्रजतिभोक्तुमिति । उपाधिवाचिनोपिप्र

किंचस्यात्। यद्येतेषामपिप्रत्ययसंज्ञास्यात् । परत्वमाद्युदात्तत्वमङ्ग·संज्ञेत्येतेविधयःप्रसज्येरन्। अतउत्तरंपठति
प्रत्ययाधिकारेप्रकृत्युपपदोपाधीनामप्रतिषेधः। अधिकारेणापिप्रत्ययसंज्ञायांसत्यांप्रकृत्युपपदोपाधीनामप्र
तिषेधः। अनर्थकःप्रतिषेधोऽप्रतिषेधः। प्रत्ययसंज्ञाकस्मान्नभवति। निमित्तस्यनिमित्तिकार्यार्थत्वाद
न्यत्रापि। निमित्तानिहिनिमित्तिकार्यार्थानिभवन्ति ॥

योगानियमेप्राप्तेपरश्चेतिनियमःस्यात्। यःप्रत्ययस्सपरइतिपरिभाषणात्। आद्युदात्तत्वमपिस्वरान्तरंबाधित्वास्यात्। अङ्ग·सं
ज्ञेति। ननुविधानप्रतिबद्धाङ्ग·संज्ञा नचेहप्रकृत्यादयोविधीयन्ते। नैषदोषः। सिद्धशब्दान्वाख्यानायतेषामपिशास्त्रेणविधाना
त्। परत्वेनचपूर्वस्यावधेराक्षेपात्। ननुपूर्वापेक्षेपिपरत्वेतस्माद्विधिर्नास्तीत्यङ्ग·संज्ञानभविष्यतीतिविन्यस्यमेतत्। निमित्त
स्येति। प्रकृत्यादीनांभूतविभक्त्यानिर्देशात्सनाद्युत्पत्तौनिमित्तभावेनोपादानात्। पारार्थ्यात्स्वसंस्कारंप्रतिप्रयोजकत्वाभावादि
त्यर्थः। तत्रवाक्यभेदेनापिविधीयमानाप्रत्ययसंज्ञासनादिभिरेवसंबध्यते। तेषामेवनिमित्तत्वात्तांप्रतिप्रयोजकत्वात्। सं
ज्ञासंबन्धप्रतिपत्तियोग्यविभक्तिनिर्देशाद्‌। द्वयोश्चपरस्पराकाङ्क्षायांसंबन्धः। नत्वन्यतराकाङ्क्षायांसीतारावणयोरि
वेतिसत्यामपिसंज्ञायाआकाङ्क्षायांप्रकृत्यादीनांविशेषणत्वादनाकाङ्क्षत्वात्संज्ञासंबन्धाभावदत्युक्तंभवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंपुनरिति।नित्यत्वाच्छब्दानांनिमित्तनिमित्तिभावोनोपपद्यतइतिप्रश्नः।प्रकृतीति।प्रतिपादकानांशब्दानामुपायभावेनशास्त्रे
णव्यवस्थापनात्तदनुगुणविभक्तिनिर्देशादस्तिनिमित्तनिमित्तिभावः।कतरइति।किंयत्तदोनिर्धारणेद्वयोरेकस्यडतरच्
वाबहूनांजातिपरिप्रश्नेडतमजितिसूत्रद्वयउपाधिप्रत्याख्यानाद् बहूनामप्येकस्यनिर्धारणेकतरशब्दःप्रयुक्तः।प्रधानइ
ति।प्रत्ययसंज्ञास्वविषयप्रक्लृप्तयेप्रधानमपेक्षते नतुपारतन्त्र्यादप्रधानमित्यर्थः।किंकृतमिति।भवतुराज्ञःप्राधान्यंतदधी

किंपुनर्निमित्तम्।कोवानिमित्ती।प्रकृत्युपपदोपाधयोनिमित्तंप्रत्ययोनिमित्ती।अन्यत्रापिचैषन्यायोदृष्टः।नावश्य
मिहैव।कान्यत्र।लोके।तद्यथा।बहुष्वासीनेषुकश्चित्कंचित्पृच्छतिकतरोदेवदत्तःकतमोयज्ञदत्तइति।सआ
हयोऽश्वेयःपीठइति।योऽश्वेयःपीठइत्युक्तेनिमित्तस्यनिमित्तिकार्यार्थत्वादध्यवस्यति।अयंदेवदत्तोऽयंयज्ञदत्तइ
ति।नेदानींअश्वस्यपीठस्यवादेवदत्तइतिसंज्ञाभवति। किंपुनर्निमित्तंकोवानिमित्ती।निर्ज्ञातोर्थोनिमित्तम्।अनि
र्ज्ञातोर्थोनिमित्ती।इहचप्रत्ययःअनिर्ज्ञातःप्रकृत्युपपदोपाधयोनिर्ज्ञाताः।क्व।धातूपदेशेप्रातिपदिकोपदेशेच।ते
निर्ज्ञातानिमित्तत्वेनाश्रीयन्ते।प्रधानेकार्यसंप्रत्ययाद्वासिद्धम्।अथवाप्रधानेकार्यसंप्रत्ययोभवति।किंचप्रधानम्।
प्रत्ययः।तद्यथा।बहुषुयात्सुकश्चित्कंचित्पृच्छति।कोयातीति।सआह।राजेति।राजेत्युक्तेप्रधानेकार्यसंप्रत्यया
यःपृच्छतियश्चकथयति उभयोःसंप्रत्ययोभवति।किंकृतंपुनःप्राधान्यम्।अर्थकृतम्।यथापुनर्लोकेऽर्थकृतंप्राधा
न्यम्।शब्दस्येदानींकिंकृतंप्राधान्यम्।शब्दस्यापूर्वोपदेशःप्राधान्यम्।यस्यापूर्वोपदेशःसप्रधानम्।प्रकृत्युपपदोपाध
यश्चनिर्दिष्टाः।क्व।धातूपदेशेप्रातिपदिकोपदेशेच।यद्येवनिमित्तःस्यनिमित्तिकार्यार्थत्वात्।यद्वा।प्रधानेकार्यसंप्रत्ययात्प्रकृत्युपप
दोपाधीनांनभवति।विकारागमानांतुप्राप्नोति।हनस्तच।त्रपुजतुनोःषुक्।एतेषांह्यपूर्वोपदेशात्प्राधान्यंनिमित्तिनश्चैवैते॥

नस्थितित्वादन्येषामिहतुकथमितिप्रश्नः।अर्थकृतमिति।प्रयोजनकृतमित्यर्थः।यस्यापूर्वइति।तदर्थत्वादन्येषांतस्यैवप्राधा
न्यमित्यर्थः।यद्येवेति।ननुयेतावत्प्रकृतेर्विकारागमास्तेप्रकृत्यनुप्रवेशात्प्रकृतिवत्संज्ञयानसंभन्त्स्यन्ते।येतुप्रत्ययस्यतेतद्ग्र
हणेनगृह्यन्तएवेतिनास्त्यनिष्टप्रसङ्गः।नैतदस्ति।प्रकृतिविकारागमानांनत्संबन्धित्वेपिप्रयोजकत्वात्प्राधान्यत्वात्तस्यादे
वप्रत्ययसंज्ञाप्रत्ययसंबन्धिनामपितदवयवत्वेसिद्धेपृथक्प्रत्ययसंज्ञास्यादेवयोग्यतासंभवात् ॥ राम: २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकारागमेष्विति। यः परः स प्रत्ययः नच विकारागमाः परे। तेन न ते प्रत्ययसंज्ञा न भविष्यन्तीत्येवं न व्याख्येयम्। नहि परत्वनि
मित्ता प्रत्ययसंज्ञा अपि तु प्रत्ययसंज्ञानिमित्तं परत्वम्। तथा च परत्वाभावेपि श्नम् बहुजकचां प्रत्ययसंज्ञा भवति। तस्मादेवं
व्याख्यायते। प्रयोजनाभावाद्विकारागमानां प्रत्ययसंज्ञा न भवति। तथाहि। परविज्ञानं प्रत्ययसंज्ञाफलम्। तच्चेषां न संभ
वति। षष्ठ्या स्थानसंबन्धस्यावयवसंबन्धस्य च प्रतिपादनादागमानां चानुदात्तत्वेन भवितव्यमित्याद्युदात्तत्वाभावः। वि
कारा अपि येऽनच्कास्तेन स्वरभाजः ये तु साच्कास्ते प्रवृत्तिकाल एवान्तरङ्गत्वात्तच्छानि स्वरयुक्ताः। अङ्गसंज्ञापि तन्निमित्ता न्य
स्यन प्राप्नोति। सा हि प्रत्ययविधानपरत्वनिबद्धा। प्रयोजनभावे तु श्नम आगमत्वेपि शकारस्येत्संज्ञार्थं प्रत्ययसंज्ञा प्रवर्तत एव। प
रविज्ञानादिति। विभाषा गुण इति हेतौ पञ्चमी फलमपि प्रयोजकत्वाद्धेतुरित्युच्यते। यथाध्ययनेन वसतीति। ततश्चायमर्थः। प्र

विकारागमेषु च परविज्ञानात्। विकारागमेषु च परविज्ञानात् प्रत्ययसंज्ञा न भविष्यति। प्रत्ययः परो भवतीत्युच्यते।
न च विकारागमाः परे संभवन्ति। किं पुनः कारणं समाने अपूर्वोपदेशे प्रत्ययः परो न विकारागमाः परे। षष्ठीनिर्दिष्टस्य त
द्युक्तत्वात्। षष्ठीनिर्दिष्टं विकारागमयुक्तं भवति। पञ्चमीनिर्दिष्टाच्च प्रत्ययो विधीयते। प्रत्ययविधानानुपपत्तिस्तु
प्रत्ययविधिस्तु नोपपद्यते। क्व। यत्र विकारागमाः शिष्यन्ते। हनस्त च। त्रपुजतुनोः षुक् इति। किं पुनः कारणं न
सिध्यति। विकारागमयुक्तत्वात्। अपञ्चमीनिर्दिष्टत्वाच्च। तस्मात्तत्र पञ्चमीनिर्देशात् सिद्धम्। तस्मात्तत्र पञ्च
मीनिर्देशः कर्तव्यः। न कर्तव्यः। इह तावद्धनस्त चेति धातोरिति वर्तते। त्रपुजनोः षुक् इति। प्रातिपदिकादिति वर्तते।

किंपुनरिति। परत्वमेव भवतु प्र
त्ययसंज्ञायां परत्वं फलम्। तच्चात्र न संभवतीति प्रत्ययसंज्ञाप्रयोजनाभावान्न भविष्यति। किंपुनरिति। परत्वमेव भवतु प्र
त्ययसंज्ञाप्रयोजनमिति भावः। षष्ठीनिर्दिष्टस्येति। षष्ठ्या च पूर्वोदितस्य संबन्धस्य प्रतिपादनाद्विरोधात् परत्वाभाव इत्यर्थः।
पञ्चमीनिर्दिष्टाच्चेति। पञ्चमीनिर्देशे पर्यायेण पूर्वपरत्वयोः प्राप्तयोः परश्चेत्यनेन परत्वं नियम्यत इति नास्ति कश्चिद्विरोध
इत्यर्थः। प्रत्ययेति। षष्ठीनिर्देशेष्विति भावः। क्वेति। गापोष्टगित्यादावानन्तर्यसंबन्धे षष्ठीविज्ञानादुपपद्यत एव प्रत्ययविधि
रिति प्रश्नः। हनस्त चेति। श्रुतयोरेव स्थान्यादेशयोरागमागमिनोश्च संबन्धप्रतिपादने वाक्यस्योपयोगाद्वाक्यान्तराभावाच्च प्रत्य
यविधिर्न प्रकल्पत इत्यर्थः। इह तावदिति। प्रकृतिप्रत्ययानुवृत्तिसामर्थ्यात्प्रत्ययोपि विधास्यते। विकारागमा अपीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यद्येवमिति। हन्तेरादेशविधावुपयोगाद्विविभक्तित्वाच्च धातोरविशेषितत्वादितिभावः। अथवेति। पूर्वलिङ्गेन धातुश्रुतिर्ह
न्तावुपसंहृता। इदानीं वाक्यभेदेन सन्निधानाद्धन्तिस्तकारसंबन्धं च प्रतिपद्यते धातुं च विशिनष्टीत्युच्यते। अर्थाश्रयत्वादिति।
अन्वर्थसंज्ञाश्रयेणार्थवतः संज्ञाविधानादिकारागमानां चानर्थकत्वात्तस्य प्रत्ययसंज्ञा न भवतीत्यर्थः। किं वक्तव्यमिति। पूर्वो
पात्तार्थपरित्यागेन स्वरूपेणैव संज्ञात्वं संज्ञाशब्दा अनुभवन्तीति प्रत्यायकः प्रत्यय इत्येवं वक्तव्यमिति मत्वा प्रश्नः। मह
तीति। महत्त्वात्प्रत्ययशब्दस्यावृत्तिरनुमीयते। तेन यः प्रत्यायकस्स प्रत्ययः। महत्त्वसूचितं प्रकारान्तरमपि यद्भवतित

यद्येवं हनस्तच धातोः क्यप् भवतीति धातुमात्रात् क्यप् प्राप्नोति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति। न धा
तुमात्रात् क्यप् भवतीति। यदयमेतिस्तुशास्वृदृजुषः क्यप् इति परिगणनं करोति। अथवा हन्तिरेवात्र धातुग्रह
णेनाभिसंभन्त्स्यते। हन्तेस्तो भवति धातोः क्यप् भवतीति कस्माद्धन्तेरिति। अर्थाश्रयत्वादिति। अथवा अर्थाश्रयः
प्रत्ययविधिः यः स्वमर्थं प्रत्याययति स प्रत्ययः। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। प्रत्यय इति
महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः
करण एतत्प्रयोजनम्। अन्वर्थसंज्ञा यथा विज्ञायेत। प्रत्याययतीति प्रत्ययः। यदि प्रत्याययतीति प्रत्ययः
अविकादीनां प्रत्ययसंज्ञा न प्राप्नोति। नहि ते किंचित्प्रत्याययन्ति, एवं तर्हि प्रत्याय्यत इति प्रत्ययः। एवम
पि सन्नादीनां न प्राप्नोति। एवं तर्ह्युभयसाधनोयम्। कर्तृसाधनः कर्मसाधनश्च ॥

सर्वादिसूत्रे व्याख्यातं ततएवावधारणीयम्। नहि तदिति। अन्वयव्यतिरेकाभ्यां कादीनां वाच्योऽर्थो नावधार्यते। तदभा
वेऽपि केवलायाएव प्रकृतेस्तदर्थावगमात्। नापितरबादिवत्कश्चिद्द्योत्योऽर्थ इति भावः। यदप्युच्यते अनिर्दिष्टार्थाः प्रत्य
याः स्वार्थे भवन्तीति प्रकृत्यर्थ एव तेषामर्थ इति। तदपि कल्पनामात्रम्। सत्यर्थवत्त्वे प्रत्ययसंज्ञया भाव्यमिति अभिहि
ते तदभावे स्वार्थावगमादर्थवत्त्वं कादीनां नोपपद्यत इत्युक्तस्य दुरुत्तरत्वात्। प्रत्याय्यत इति। अभिधेयधर्मस्याभि
धान उपचारादेवमुक्तम्। अयमत्रार्थः। यस्यार्थः प्रकृत्या प्रत्याय्यते स प्रत्याय्यमानार्थत्वात्प्रत्याय्यमानः स्वार्थिकः
प्रत्ययसंज्ञो भवति ॥

CC-0. In Public Domain. Digitization by eGangotri

एवमपीति। नहीच्छादावर्थे विधीयमानाः सनादयः प्रकृत्या प्रत्याय्यमानार्था इतिभावः। योगुपादिसन् स प्रकृत्या प्रत्याय्यमानार्थ इतीच्छासनेवात्राभिप्रेतः। एवं तर्हीति। एक एव शब्दोनेकशक्तियोगादङ्गीकृतप्रवृत्तिनिमित्तद्वयोधिक्रियते। तत्र यथासंभवं निमित्ताश्रयणेन सनादीनां कादीनां च प्रत्ययसंज्ञा प्रवर्तते। णयन्तस्य निपातनादचिणेर्लुक्। एवमपीति। आगमस्यार्थवत्तां निराकर्तुमुपन्यासः। अन्यत्रापीति। प्रत्ययस्यागममन्तरेणापि प्रयोगादर्थवत्तावगतिः। आगमस्य तु प्रत्ययमन्तरेण प्रयोगाभावादन्वयव्यतिरेकाभ्यामर्थवत्त्वं नावधार्यत इत्यर्थः॥ परश्च॥ किमर्थमिति। पञ्चमीनिर्देशे परशब्दाध्याहारेण पञ्चमीविधानात् परत्वं सिद्धम्। षष्ठीनिर्देशेपि गापोष्टगित्यादावानन्तर्यसंबन्धे षष्ठीविज्ञानादितिभावः। परइति। पूर्वशब्दाध्याहारेणापि पञ्चमीविधानात् पूर्वत्वमपि स्यादिति नियमार्थं परवचनम्। तथानन्तर्यस्य पूर्वत्वेऽपिभावात् षष्ठीनि

एवमपि कुत एतत् समानेऽपूर्वो पदेशे। त्रापुषं जातुषमित्यत्राकारस्तमर्थं प्रत्याययति। न पुनः षकार इति। अन्यत्राप्यकारेण तस्यार्थस्य प्रत्यायनान्मन्यामहे। अकारस्तमर्थं प्रत्याययति। न पुनः षकार इति। क्वान्यत्र। बिल्वादिभ्योण्। बैल्वः॥ परश्च॥ किमर्थमिदमुच्यते। परो यथा स्यात् पूर्वो मा भूदिति। नैतदस्ति प्रयोजनम्। यमिच्छति पूर्वं माहतं विभाषासुपो बहुच् पुरस्तादिति। मध्ये तर्हि मा भूदिति। मध्येपि यमिच्छति आहत मव्ययसर्वनाम्नामकच् प्राक्टेरिति। यद्इदानीमतोन्यः प्रत्ययः शेषः सोन्तरेण वचनं पर एव भविष्यतीति नार्थः परवचनेन। एवमपि येषामेव प्रत्ययानां देशो नियम्यते॥

र्देशेपि नियमार्थमित्यर्थः। यमिच्छतीति। बहुजेव पुरस्ताद्भवति नान्यः प्रत्यय इति बहुचि पूर्वदेशस्य नियतत्वादन्यः प्रत्ययः पर एव भविष्यतीत्यर्थः। मध्ये तर्हीति। षष्ठीनिर्देशेषु मध्यशब्दाध्याहारेणापि षष्ठीविधानं स्यादितिभावः। मध्येपीति। अव्ययसर्वनाम्नामिति मध्यशब्दाध्याहारेण षष्ठीविधानादकच्प्राक्टेः सिद्ध एवेति प्राक्टेरिति नियमार्थम्। अकजेव प्रकृतिमध्ये भवति नान्य इति। मध्यमात्रपरिग्रहेण च नियमो विज्ञायते न त्वकजेव प्राक्टेरित्येवं मध्यविशेषाश्रयेण। अन्यथा मध्यान्तरे प्रत्ययान्तरं स्यात्। मध्यविशेषे तु यन्मध्यसामान्यमस्ति तदाश्रयेण नियमे विज्ञायमाने नास्ति दोषः। एवमपीति। बहुजकचोर्विधेयत्वं तया प्राधान्यात्तावेव देशविशेषे नियम्येयाताम्। पुरस्तादेव बहुच्। प्राक्टेरेवाकजित्येवमितिभावः। देशो नियम्यत इति। प्रत्ययनियमेप्यनियतदेशप्रसङ्गे विशिष्टदेशप्रतिपादनमेव देशनियम इत्यभिप्रेत्यैतदुक्तम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातुर्वत्सइति।अनेनप्रकृतेःकार्यशब्ददर्शनेमातस्थानीयत्वमुच्यते। परवचनमिति।तस्मादित्युत्तरस्येत्यनेनैवनियमस्यसि
द्धत्वादितिभावः।सतस्तत्रेति।यत्रविद्यमानमेवकार्यान्तरविधानार्थंकार्यित्वेननिर्दिश्यतेतत्रतस्मादितिपरिभाषानियमा
र्थावतिष्ठते।अत्रतुसनादयोऽपूर्वाएवोत्पद्यन्तइतिनतस्याःपरिभाषायाःप्रवृत्तिरितिभावः।कस्यसतइति।असन्नेवसनादिर्भा
व्यतइतिभावः।इहापीति।नित्याःशब्दाःप्रयोगस्यास्तत्रस्वभावतएवगुपादिभ्यःपरस्यसनादेःसाधुत्वमात्रंप्रतिपाद्यत
इत्यर्थः।एतद्धीति।तस्मादित्युत्तरस्येत्येतस्यप्रदेशेषुअर्थाभिव्यक्तिर्भवति।ततश्चयत्रसदेवकार्यित्वेनोपादीयतेतत्रोत्तर
स्यकार्यंभवतीतिकार्यापेक्षासंबन्धेषष्ठी।यत्रत्वसतएवोत्पत्तिःक्रियतेतत्रोत्तरस्यभावोभवतीतिभावापेक्षयाकर्तृषष्ठीवि

तएवनियतदेशाःस्युः।यदिदानीमनियतदेशःसकदाचित्परःकदाचित्पूर्वःकदाचिन्मध्येस्यात्।तद्यथा।मातु
र्वत्सःकदाचिदग्रतःकदाचित्पृष्ठतःकदाचित्पार्श्वतोभवतिपरएवयथास्यादित्येवमर्थंपरवचनम्।परव
चनमनर्थकंपञ्चमीनिर्दिष्टाद्धिपरस्य।परग्रहणमनर्थकम्।किंकारणम्।पञ्चमीनिर्दिष्टाद्धिपरस्यकार्य
मुच्यते।तद्यथा।द्व्यन्तरुपसर्गेभ्योपईदिति।विषमउपन्यासः।सतस्तत्रपरस्यकार्यमुच्यते।इहेदानींकस्य
सतःपरस्यकार्यंभवितुमर्हति।इहापिसतएव।कथम्।स्वाभाविकंपरत्वम्।अथवावाचनिकेपरत्वेसतिपरग्र
हणेनार्थःस्यात्।वाचनिकेचनार्थः।एतद्धिपरस्यकार्यम्।यदसौपरःस्यात्।अथवापदस्यपरस्यसतःसंज्ञास्यात्।

ज्ञायतइत्यर्थः।परस्यकार्यमिति।उत्पत्तिरेवकार्यमित्यर्थः।नन्वेवंसतिसन्नित्यादिप्रथमानिर्देशःषष्ठीप्रकल्पनेसतिनि
रर्थकोकृतार्थत्वात्स्यात्।नैषदोषः।निर्देशमात्रार्थाप्रथमास्यात्।उत्तरकालंतुषष्ठीप्रकल्प्यते।यत्त्वन्यत्रोच्यते।नचप्रत्यय
विधौपञ्चम्यःप्रकल्पिकाइतितदस्मिन्सूत्रेस्थितइतिद्रष्टव्यम्।अथवेति।अयमर्थः।उत्पत्तिःसनादेरनियतदेशाभवतु।
पश्चात्तुसतएवपरस्ययतकृत् कृत्प्रत्ययादिसंज्ञाशास्त्रकार्यंविधीयतेतन्नान्यदेशस्य।यद्देशस्यचशास्त्रीयंकार्यं
तद्देशस्यैवसाधुत्वात्प्रयोगोभविष्यतीत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकारागमेषिति। तदेवेहाप्यनुगन्तव्यमित्यर्थः। गापोष्टगित्यादौ धातोरित्यधिकाराद्धातोः परष्टग्भवति। गापोस्त्वनन्तरइति ग्ला
स्येयम्। अत्यन्तापरदृष्टानां वेति। वाशब्दस्त्वर्थो परेणप्रधानेनप्रमाणेनप्रत्यक्षेणनकश्चिद्दृशयेक्विबादयः तेषां नित्यशब्ददर्श
नेकार्यदर्शनेवासत्ताया अभावात्तस्मादित्युत्तरस्येत्यस्योपस्थानाभावादनियतदेशो लोपः स्यादिति परभूतलोपार्थमेतद्वचनम्।
जस्मिन्हिंसतिक्विबादयः परभूतालुप्यन्तइतिबुद्धिरुपजायते। तत्राग्निचिदित्यादौ प्रत्ययलक्षणेनपरभूतप्रत्ययाश्रयास्तुगा
दयः सिद्ध्यन्तिनतुपूर्वभूतक्विबादिलोपेइतिभावः। ननुकार्यदर्शनेउत्तरस्याभावइत्येवव्याख्यातत्वात्परभूताः क्विबादयो भ
विष्यन्ति। नैतदस्ति। नहितेषुभावबुद्धिरस्ति। लोपविधानेनाभावबुद्धेरुत्पादात्। स्वरूपलाभोहिभावः नैतेकदाचित्स्वरू
पत्वंलभन्तेशशविषाणतुल्यत्वात्। अतएवात्यन्तापरदृष्टानामित्युक्तम्। केवलं प्रत्ययलोपवचनेनकार्यमात्रंतेषाम

यत्रतर्हिपञ्चमीनास्ति। तदर्थमयंयोगोवक्तव्यः। क्वचपञ्चमीनास्ति। यत्रविकारागमाः शिष्यन्ते। क्वचविकारा
गमाः शिष्यन्ते। हनस्तच्चन्तपुजतुनोः षुक्इति। विकारागमेषुचोक्तम्। किमुक्तम्। प्रत्ययविधानानुपपत्तिस्तुतस्मात्तत्र प
ञ्चमीनिर्देशात्सिद्धमिति। अत्यन्तापरदृष्टानां वापरभूतलोपार्थम्। अत्यन्तापरदृष्टानां तर्हिपरभूतलोपार्थंप
रग्रहणंकर्तव्यम्। यएतेऽत्यन्तापरदृष्टाः क्विबादयोलुप्यन्ते तेषांपरभूतानांलोपोयथास्यात्। अपरभूतानामा
भूदिति। किंपुनरत्यन्तापरदृष्टानां परभूतलोपवचनेप्रयोजनम्। कितिणितीतिकार्याणियथास्युरिति। एतदपिनास्ति
प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति। अत्यन्तापरदृष्टाः परभूताएवलुप्यन्तइति। यदयंतेषुकादीननुबन्धानासजति।

त्यन्तासत्त्वेपिविधीयते। यदयमिति। यदिपूर्वभूतालुप्येरन्तदानुबन्धासङ्गोऽनर्थकः स्यात्। सर्वस्यानुबन्धकार्य
स्यपरभूतप्रत्ययाश्रयत्वात्। नन्वनियतदेशत्वेपियदापरभूतलोपस्तदानुबन्धासङ्गः सचरितार्थत्वात्कथंलिङ्गत्व
मितिकेचिदाहुः। तदयुक्तम्। एवंपक्षेऽनुबन्धासङ्गः स्यानर्थक्यमभ्युपगतंस्यात्। स्पशोनुदकइत्यादौ चसकृत्पञ्च
मीश्रुतासाकिंपूर्वशब्दाध्याहारेणभवत्युतपरशब्दाध्याहारेणेतिसंदेहेपूर्वशब्दाध्याहारेणपञ्चम्यांसत्यामानर्थ
क्यमेवानुबन्धासङ्गः स्येतिकथंपरभूतलोपेऽनुबन्धासङ्गोनलिङ्गं स्यादितिभाष्यविदआहुः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ प्रयोगनियमार्थं वेति। पूर्वप्रयोजनं स्थितमिति वार्त्तिककारेण विकल्पार्थो वाशब्दः पठितः। भाष्यकारेण तु लिङ्गे न पूर्वप्रयोज २११
५ नस्य निराकरणात्तर्ह्यर्थे व्याख्यातः। क्स देवदत्त इति। देवदत्तादयस्तदपत्येषु वर्त्तमाना दृश्यन्ते तेषामनेन नियमेनासा
धुत्वं प्रतिपाद्यते। न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्ययः प्रयोक्तव्य इति। ननु सोयमित्यभिसंबन्धादभेदोप
चारादपत्ये प्रयोगात् कथमसाधुत्वम्। नैतदस्ति। भृत्यादेरपि साहचर्य्यादिनिमित्तभेदाध्यारोपदर्शनादपत्यार्थो निय
मेन न प्रतीयेत। तदुक्तं हरिणा। सोयमित्यभिसंबन्धात्तद्धितेन विना यदि। बभ्र्वादयः प्रयुज्येरन्नापत्ये नियमो भवेदिति।
तस्मादभेदोपचारादिना ऽपत्यविवक्षायां गर्गा इति बहुवचनान्तवदेकवचनान्ता बभ्र्वादयो मा प्रयुक्षतेति नियमार्थंव

कथं कृत्वा ज्ञापकम्। अनुबन्धासञ्जनमेतत्प्रयोजनम्। कितिणितीति कार्याणि यथा स्युरिति। यदि चात्यन्ताप
रदृष्टाः परभूता लुप्यन्ते ततोनुबन्धासञ्जनमर्थवद्भवति। प्रयोगनियमार्थं वा। प्रयोगनियमार्थं तर्हि परग्रह
णं कर्त्तव्यम्। परभूतानां प्रयोगो यथा स्यात्। अपरभूतानां मा भूदिति। अस्ति पुनः किंचिदनिष्टं दृश्यते यदर्थो नि
यमः स्यात्। अस्तीत्याह। प्रकृतेरर्थाभिधाने प्रत्ययदर्शनात्। प्रकृतिरर्थाभिधाने अप्रत्ययिका दृश्यते। क्स देव
दत्तः क्स यज्ञदत्तः बभ्रुः मण्डुः लमक इति। बाभ्रव्यो माण्डव्यो लामकायन इति प्रयोक्तव्ये बभ्रुर्मण्डुर्लमक इ
ति प्रयुज्यते। द्वयसादीनां च केवलदृष्टत्वात्। द्वयसादीनां च केवलानां प्रयोगो दृश्यते। किमस्य द्वयसं किमस्य
मात्रं काद्यतिथीति। द्वयसादयो वृत्तिजसदृशाः अवृत्तिजाः यथा बहुस्तथा॥

चनम्। क्स देवदत्त इत्यत्र केचिदाहुः। क्स इति यथा सुपो लुग्लोपयोः कृतयोः केवला प्रकृतिः प्रयुज्यमाना दृश्यते तथा ब
भ्र्वादयोपीति दृष्टान्तोपन्यासः। किमस्य द्वयसमिति। किमस्य प्रमाणमित्यत्रार्थेऽयं प्रयोगो दृश्यते। तत्र गाव्यादिवदेवमादी
नामनेनासाधुत्वं प्रतिपाद्यते। काद्यतिथीति। काद्यद्यादिसंख्यायाः पूरणीत्यर्थः। बहुतिथीत्यादौ च तिथीशब्दमुपलभ्य भ्रा
न्त्या केवलमपि प्रयुञ्जते यस्तु तिथिशब्दान्ङीपि कृते तिथीशब्दः स साधुरेव। द्वयसजादय इति। अवृत्तिजा अपि भ्रान्त्या के
वला लोके प्रयुज्यमाना दृश्यन्त इत्यर्थः। यथा बहुरिति। ईषदसमाप्तौ यो बहुच् प्रत्ययस्तत्सदृशो बहुशब्दः संख्यावैपुल्य
वाची यथा लोके प्रयुज्यते तथा द्वयसजादयोपीति केचिद्व्याचक्षते। अन्ये त्वाहुः। केवल एवेषदसमाप्तौ यो बहुशब्दो लोके राम॰
प्रयुज्यते स दृष्टान्तो साधुत्वे द्वयसजादीनामुपात्तः॥ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वावचनेचेति। तस्मादित्युत्तरस्येत्येवप्रत्ययस्य सिद्धे परत्वे पुनः परवचनं वावचनेन प्रत्ययस्य पक्षेऽनुत्पत्तिं प्रतिपादयति। वा परः सन् भवति परत्वोपलक्षितस्सन् पक्षे भवति। पक्षे तु नैवोत्पद्यत इत्यर्थः। न त्वत्र परत्वं विकल्प्यते। पक्षे पूर्वो भवतीति। परत्वस्य प्रयोगे नियतत्वात् तस्मादितिवचनाद्वा नियतत्वात्। अक्रियमाण इति। प्रतियोगं प्रत्ययसंज्ञोपस्थानात्त।

वावचने चानुत्पत्त्यर्थम्। वावचने चानुत्पत्त्यर्थं परग्रहणं कर्तव्यम्। वावचने चानुत्पत्तिर्यथा स्यात्। अथ क्रियमाणेऽपि वै परग्रहणे कथमिव वावचनेनानुत्पत्तिर्लभ्या। क्रियमाणे परग्रहणे वावचने वा पर इत्येतदभिसंबध्यते। अक्रियमाणे परग्रहणे वावचनेन किमन्यच्छक्यमभिसंबन्धुमन्यदतः संज्ञायाः। न च संज्ञाया भावाभावाविष्येते। वावचने चोक्तम्। किमुक्तम्। वावचनानर्थक्यं च तत्र नित्यत्वात्सन इति। प्रयोगनियमार्थमेव तर्हि परग्रहणं कर्तव्यम्। अथैतस्मिन् प्रयोगनियमार्थे किमयं प्रत्ययनियमः प्रकृतिपर एव प्रत्ययः प्रयोक्तव्यः अप्रकृतिपरो नेति। आहोस्वित्प्रकृतिनियमः प्रत्ययपरैव प्रकृतिः प्रयोक्तव्या अप्रत्ययपरा नेति। कश्चात्र विशेषः तत्र प्रत्ययनियमे प्रकृतिनियमाभावः तत्र प्रत्ययनियमे सति प्रकृतेर्नियमो न प्राप्नोति। अप्रत्ययिकायाः प्रकृतेः प्रयोगः प्राप्नोति। क्वस देवदत्तः क्वस यज्ञदत्तः बभ्रुः मण्डुर्लमक इति। अस्तु तर्हि प्रकृतिनियमः प्रकृतिनियमे प्रत्ययानियमः। प्रकृतिनियमे सति प्रत्ययनियमो न प्राप्नोति। किमस्य द्वयसं किमस्य मात्रं काद्यतिथीति। अप्रकृतिकस्य प्रत्ययस्य प्रयोगः प्राप्नोति। सिद्धं तूभयनियमात्। सिद्धमेतत्। कथम्। उभयनियमात्। उभयनियमोऽयं प्रकृतिपर एव प्रत्ययः प्रयोक्तव्यः प्रत्ययपरैव च प्रकृतिरिति। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। परग्रहणसामर्थ्यादन्तरेणापि परग्रहणं स्यादेवायं परः। पर एव स्यादित्येवमर्थं परग्रहणम् ॥

स्याएव विकल्पः स्यात्। कृते त्वस्मिन्पराधिकारे प्रतियोगमुपस्थिते परो वा भवति परत्वोपलक्षितः पक्षे भवति पक्षे नैव भवतीत्यर्थः संपद्यते। नित्यत्वात्सन इति। वृत्तिपक्षे नित्य एव सन्निष्यते कर्तुमिच्छतीत्यवृत्तिपक्षे नैव सन उत्पत्तिः प्राप्नोतीति। प्रत्याख्याते वावचने प्रयोगनियमार्थमिदम्। सिद्धे तस्मादितिवचनात्परत्वे नित्यं परः प्रत्ययो यथा स्यात् मा कदाचित्परो न प्रयोजि इत्येवं सामर्थ्यादुभयनियमलाभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आद्युदात्तश्च॥ अस्वरकस्याचउच्चारणाभावात्स्वरान्तरस्यप्रत्ययान्तरेष्वनियतत्वात्पारिशेष्यादाद्युदात्तएवप्रत्ययोभविष्यतीति
मत्वाप्रश्नः। किमर्थमिति। येषामेवेति। चिदादीनामनियतस्वरप्राप्तावन्तोदात्तएवचिदित्येवंनियमात्तेषामेवनियतस्वरत्वं

आद्युदात्तश्च॥ किमर्थमिदमुच्यते। आद्युदात्तोयथास्यात्। अन्तोदात्तोमाभूदिति। नैतदस्तिप्रयोजनम्। यमिच्छ
त्यन्तोदात्तं करोतितत्रचकारमनुबन्धम्। आहचचितोन्तोदात्तइति। मध्योदात्तस्तर्हिमाभूदिति। मध्योदात्तम
पियमिच्छति तत्ररेफमनुबन्धंकरोति। आहचोपोत्तमंरितीति। अनुदात्तस्तर्हिमाभूदिति। अनुदात्तमपियमिच्छ
ति तत्रपकारमनुबन्धंकरोति। आहचअनुदात्तौसुप्पिताविति। स्वरितस्तर्हिमाभूदिति। स्वरितमपियमिच्छति।
करोतितत्रतकारमनुबन्धम्। आहचतित्स्वरितमिति। यइदानीमतोन्यःप्रत्ययःशेषःसोन्तरेणापिवचनमाद्युदात्त
एवभविष्यतीतिनार्थआद्युदात्तवचनेन। एवमपियेषामेवप्रत्ययानांस्वरोनियम्यतेतएवनियतस्वराःस्युःयइ
दानीमनियतस्वरः सक दाचिदाद्युदात्तःकदाचिदन्तोदात्तःक दाचिन्मध्योदात्तःकदाचिदनुदात्तःकदाचित्स्व
रितःस्यात्। आद्युदात्तएवयथास्यादित्येवमर्थमिदमुच्यते। अथकिमर्थंप्रत्ययसंज्ञासंनियोगेनाद्युदात्तत्वमनुदा
त्तत्वंचोच्यते। नयत्रैवान्यःस्वरःतत्रैवायमप्युच्येतञ्नित्यादिर्नित्यम्। प्रत्ययस्यच। अदुपदेशाल्लसार्वधातुकमनु
दात्तम्। सुप्पितौचेति। तत्रायमप्यर्थः। द्विराद्युदात्तग्रहणंद्विश्चानुदात्तग्रहणंनकर्तव्यंभवति। प्रकृतमनुवर्तते।
अतउत्तरंपठति। आद्युदात्तस्यप्रत्ययसंज्ञासन्नियोगेप्रयोजनंयस्यसंज्ञाकरणंतस्याद्युदात्तार्थम्। आद्युदात्तस्य
प्रत्ययसंज्ञासंनियोगकरणएतत् प्रयोजनंयस्यसंज्ञाक्रियते तस्याद्युदात्तत्वंयथास्यात्। असन्नियोगेहियस्मात्स
विहितस्तदादेराद्युदात्तत्वंतदन्तस्यचानुदात्तत्वम्। अक्रियमाणेहिप्रत्ययसंज्ञासन्नियोगेनाद्युदात्तत्वेप्रत्ययग्रह
णेयस्मात्सतदादेस्तदन्तस्यग्रहणंभवतीतितदादेरेवाद्युदात्तत्वंप्रसज्येततदन्तस्यचानुदात्तत्वम्। अथक्रियमाणे
पिप्रत्ययसंज्ञासंनियोगेनाद्युदात्तत्वेअनुदात्तत्वेचकस्मादेवतदादेराद्युदात्तत्वंनभवतितदन्तस्यचानुदात्तत्वम्। उत्पन्नः
प्रत्ययःप्रत्ययाश्रयाणांकार्याणांनिमित्तंभवति। नोत्पद्यमानः। तद्यथा। कृतोघटोघटाश्रयाणांकार्याणांनिमित्तंभवतिनक्रियमाणः

स्यात्। अन्येषांत्वनियतस्वरप्रसङ्ग इत्यर्थः। प्रत्ययाश्रयाणामिति। तदन्तग्रहणादीनामित्यर्थः। आद्युदात्तश्चेत्यस्यतुप्रतियोगमुपस्था
नेसत्युत्पद्यमानएवतस्यादिराद्युदात्तोभवत्येवंतिबादिरनुदात्तइतिदोषाभावः। घटाश्रयाणामिति। उदकाहरणादीनामित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदयमिति। प्रत्ययस्य चेत्यनेनाद्युदात्तत्वे सिद्धे ञ्नित्यादिर्नित्यमित्यनारम्भणीयं स्यात् यदि तदादेर्ग्रहणं स्यादित्यर्थः। यत्रहीति। यानीत्यादौ पिति प्रत्यये धातोरुदात्तत्वं भवति। यातो यान्तीत्यादौ तु प्रत्यये आद्युदात्तत्वे न सति शिष्टत्वाद्बाध्यते। कृत्स्नतरदृत्यादौ च प्रातिपदिकान्तोदात्तत्वं श्रूयते। यदि च प्रत्ययान्तस्यानुदात्तत्वं स्यात् निर्विषयं धातुप्रातिपदिकान्तोदात्तत्वं स्यादित्यर्थः। आस्ते शेते इत्यादौ लसार्वधातुकानुदात्तत्वे सति धातुस्वरस्य सविषयत्वादज्ञापकत्वमिति चेत्। तत्रापि तदन्तविधिप्रसङ्गाद् ज्ञापकत्वमेव। आगमानुदात्तार्थं चेति। वाशब्दस्तर्ह्यर्थे। लवितव्यमित्यादौ तव्यस्योत्पत्तिकाल एवाद्युदात्तत्वे

न वा प्रकृतेराद्युदात्तवचनं ज्ञापकं तदादेरग्रहणस्य। नैवैष दोषः। किं कारणम्। यदयं ञ्नित्यादिर्नित्यमिति प्रकृतेराद्युदात्तत्वं शास्ति तज्ज्ञापयत्याचार्यः न तदादेराद्युदात्तत्वं भवतीति। तदन्तस्य तर्ह्यनुदात्तत्वं प्राप्नोति। प्रकृतिस्वरस्य विधानसामर्थ्यात् प्रत्ययस्वराभावः। यदयं धातोरन्तः प्रातिपदिकस्य चान्त इति प्रकृतेरन्तोदात्तत्वं शास्ति तज्ज्ञापयत्याचार्यः न तदन्तस्यानुदात्तत्वं भवतीति। कथं कृत्वा ज्ञापकम्। यत्र ह्यनुदात्तः प्रत्ययः प्रकृतिस्वरस्तत्र प्रयोजयति। आगमानुदात्तार्थं वा। आगमानुदात्तार्थं तर्हि प्रत्ययसंज्ञासन्नियोगेनाद्युदात्तत्वमुच्यते। प्रत्ययसंज्ञासन्नियोगेनाद्युदात्तत्वे कृते अगमा अनुदात्ता यथा स्युरिति। न वा आगमानुदात्तवचनात्। न वा एतदपि प्रयोजनमस्ति। किं कारणम्। आगमानुदात्तवचनात्। आगमा अनुदात्ता भवन्तीति वक्ष्यामि। के पुनरागमा अनुदात्तत्वं प्रयोजयन्ति। इट्। लविता। इट् तावन्न प्रयोजयति। इदमिह संप्रधार्यम्। इट् क्रियतामाद्युदात्तत्वमिति।

कृते पश्चादिडागमः क्रियमाणः शेषनिघातेनानुदात्तो भवति। अन्यथा परत्वादिडागमे कृते तस्य तद्भक्तत्वात् प्रत्ययग्रहणेन ग्रहणादाद्युदात्तत्वं क्रियमाणमिट एव प्रसज्येतेत्यर्थः। के पुनरिति। अन्योन्यप्रश्नाद्रष्टव्यः। ननु येन न वेत्युक्तं स एवेष्टश्श्रुतिविरोधात्। लवितेति। लुट्। तिप्। डा। तासिः। इट्। अत्र यदीटोऽनुदात्तत्वं न स्यात् तदा तासिभक्तत्वादिडुदात्तः स्यात्। शेषनिघातेन च तास्याकारेऽनुदात्ते इत्युदात्तलोपाभावादुदात्तनिवृत्तिस्वर आकारस्य न स्यात्। इटस्त्वनुदात्तत्वे सति तास्याकार एवोदात्त इत्युदात्तनिवृत्तिस्वरः सिद्ध्यति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरभिन्नस्येति। रूपवत्स्वरोपिश्रुतिभेदहेतुत्वात् शब्दान्तरत्वमेवकरोतीतिभावः। प्रकृतिरप्याश्रितेति। प्रत्ययग्रहणपरिभाषयेतिभावः। अन्तरङ्गमेवेति। तत्तद्गुणन प्रयोजयतीत्यर्थः। लविषीयेति। आशिषिलिङ्। अत्रविशेषविहितत्वाद्वापरत्वाद्वापूर्वंसीयुट्क्रियतेपश्चाल्लादेशः। तत्रप्रत्ययाद्युदात्तत्वंक्रियमाणंसीयुटएवस्यात्। आगमाअनुदात्ताइतिवचनात्सी

किमत्रकर्तव्यम्। परत्वादिट्। नित्यमाद्युदात्तत्वम्। कृतेपीटिप्राप्नोतिअकृतेपिप्राप्नोति। इडपिनित्यः। कृतेप्याद्युदात्तत्वेप्राप्नोतिअकृतेपि। अनित्यइट्। अन्यथास्वरस्यकृतेआद्युदात्तत्वेप्राप्नोति। अन्यथास्वरस्याकृतेप्राप्नोति। स्वरभिन्नस्यप्राप्नुवन्विधिरनित्योभवति। आद्युदात्तत्वमपिअनित्यम्। अन्यस्यकृतेइटिप्राप्नोति। अन्यस्याकृते। शब्दान्तरस्यप्राप्नुवन्विधिरनित्योभवति। उभयोरनित्ययोः परत्वादिडागमः। अन्तरङ्गंतर्हिआद्युदात्तत्वम्। कान्तरङ्गता। उत्पत्तिसन्नियोगेनाद्युदात्तत्वमुच्यते। उत्पन्नेप्रत्ययेप्रकृतिप्रत्ययावाश्रित्याङ्गस्येडागमः। आद्युदात्तत्वमपिनान्तरङ्गम्। यावताप्रत्ययआश्रितेप्रकृतिरप्याश्रिताभवति। अन्तरङ्गमेवाद्युदात्तत्वम्। कथमिदानीमेवद्युक्तंनप्रत्ययस्वरविधौतदादिविधिर्भवतीति। सीयुट्तर्हिप्रयोजयति। अवचनेहिसीयुडादेराद्युदात्तत्वम्। अक्रियमाणेहिआगमानुदात्तत्वेक्रियमाणेपिप्रत्ययसंज्ञासन्नियोगेनाद्युदात्तत्वेसीयुडादेर्लिङ्आद्युदात्तत्वंप्रसज्येत। लविषीय पविषीय तत्तर्हिवक्तव्यम् आगमाअनुदात्ताभवन्तीति। नवक्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति। आगमाअनुदात्ताभवन्तीति। यदयंयासुट्परस्मैपदेषूदात्तोङिच्चेत्याह। नैतदस्तिज्ञापकम्। वक्ष्यत्येतत्। यासुटोङिद्वचनंपिदर्थमुदात्तवचनंचेति। शक्यमनेनैवंवक्तुंयासुट्परस्मैपदेषुभवति। अपिच्चलिङ्भवतीति। सोयमेवंलघीयसान्यासेनसिद्धेसतियद्गरीयांसंयत्नमारभते। तज्ज्ञापयत्याचार्यः। आगमाअनुदात्ताभवन्तीति। शक्यमेवंलब्धुम्। यद्येववचनाद्यथापिज्ञापकादागमाअनुदात्ताभवन्तीति। आगमेस्त्वव्यवहितत्वादाद्युदात्तत्वंनप्राप्नोति। आगमाअविद्यमानवद्भवन्तीतिवक्ष्यामि ॥

युटोनुदात्तत्वेसतिङ्योदित्यकारस्योदात्तत्वंसिद्ध्यतीत्यर्थः। पिदर्थमिति। चिनुयादित्यादौपि द्वकत्वाद्यासुटोनुदात्तत्वप्रसङ्गे उदात्तवचनमित्यज्ञापकमित्यर्थः। आगमेरिति। विक्लिन्नत्वाददित्यस्यलविषीयेत्यादौप्रत्ययस्याद्युदात्तत्वंनप्राप्नोतीत्यर्थः। आरब्धेतुसूत्रेप्रत्ययसंज्ञासन्नियोगेनकृतेआद्युदात्तत्वेभवन्त्यागमाइतिनदोषः ॥ रामः ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमपिलवितेति। तन्नन्तत्वादाद्युदात्तमेतत्। यदयमिति। यदिप्रत्ययाद्युदात्तत्वेकर्तव्येआदित्वमागमाविहन्युः तदाचिनुया
तामित्यादौयासुटःप्रत्ययादित्वात्सिद्धमुदात्तत्वमितितन्नकुर्यात्। कृतंतुप्रत्ययाद्युदात्तत्वेकर्तव्येआगमानामविद्यमानत्वंज्ञाप
यतीत्यर्थः। स्रौघ्नीति। विभज्यान्वाख्यानेस्रौघ्नअईइतिस्थिते प्रत्ययस्यचेत्याद्युदात्तत्वात्परत्वाद्यस्येतिलोपेकृतेउदात्तनिवृत्त्य
भावादुदात्तनिवृत्तिस्वरईकारस्यनस्यात्। प्रत्ययसंज्ञासन्नियोगेनत्वाद्युदात्तविधानेनदोषः। बहिरङ्गलक्षणइति। स्वार्थादीनांक्र

यद्यागमाअविद्यमानवद्भवन्तीत्युच्यते। लविताअत्रादेशोनप्राप्नोति। स्वरविधावितिवक्ष्यामि। एवमपिलविता।
उदात्तात्त्वनुदात्तस्यस्वरितइतिस्वरितत्वंनप्राप्नोति। षाष्ठिकेस्वरइतिवक्ष्यामि। एवमपिचिन्तितः। निष्ठाचद्व्य
जनादितिएषस्वरःप्राप्नोति। प्रत्ययस्वरविधावितिवक्ष्यामि। नतर्हिआगमाअविद्यमानवद्भवन्तीतिवक्तव्यम्।
नवक्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति। आगमाअविद्यमानवद्भवन्तीति। यदयंयासुट्परस्मैपदेषूदात्तोङिच्चे
त्याह। नैतदस्तिज्ञापकम्। वक्ष्यत्येतत्। यासुटोङिद्वचनंपिदर्थमुदात्तवचनंचेति। शक्यमनेनवक्तुंयासुट्
परस्मैपदेषुभवतिअपिच्चलिङ्भवतीति। सोयमेवंलघीयसान्यासेनसिद्धेसतियद्गरीयांसंयत्नमारभतेतत्
ज्ज्ञापयत्याचार्यः आगमाअविद्यमानवद्भवन्तीति। आद्युदात्तस्यवालोपार्थम्। आद्युदात्तस्यतर्हिलोपार्थंप्रत्यय
संज्ञासन्नियोगेनाद्युदात्तत्वमुच्यते। प्रत्ययसंज्ञासन्नियोगेनाद्युदात्तत्वेकृतेलोपेउदात्तनिवृत्तिस्वरःसिद्धोभ
वति। स्रौघ्नी। माथुरी। अत्रहिपरत्वाल्लोपःस्वरंबाधेत। नवाबहिरङ्गलक्षणत्वात्। नैवेतदपिप्रयोजनमस्ति।
किंकारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गलक्षणोलोपः। अन्तरङ्गःस्वरः। असिद्धंबहिरङ्गमन्तरङ्गे। अवश्य
चैषापरिभाषाआश्रयितव्या। अवचनेहित्रिल्किस्त्वतिप्रसङ्गः। अक्रियमाणायांह्यस्यांपरिभाषायांक्रियमाणेपि
प्रत्ययसंज्ञासंनियोगेनाद्युदात्तत्वेत्रिल्किस्तुअतिप्रसङ्गःस्यात्। औत्सीकंसिकी॥

मेणप्रतीतिरितिस्त्रीत्वनिमित्तईकारोबहिरङ्गइतितन्निमित्तोलोपोबहिरङ्गः। अथवाङ्गस्यभस्येत्याद्यपेक्षणाल्लोपोबहिर
ङ्गः। औत्सीति। उत्सेजाता। उत्सादिभ्यो ऽञ्ङीप्। यद्यत्रपरत्वाल्लोपः। आद्युदात्तत्वंतल्लक्षणंबाधेततदाप्रत्ययस्याद्युदात्त
त्वादुदात्तनिवृत्तिस्वरईकारस्यस्यादेव। कंसिकीति। कंसेनक्रीता। कंसाट्टिठन्नितिटिठन्ङीपिचठकारस्याकृतइकादेशेउदा
त्तत्वंमन्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कौ॰ ८ आत्रेयीति। अत्रेरपत्यं स्त्री। इतश्चानिञ इति ढक्। आयन्नादिषु उपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति पूर्वमेयादेशः ङीप्। अत्रोदात्तनिवृत्तिस्वरो न स्यात्। अन्तरङ्गत्वे तु स्वरस्याश्रीयमाणे दोषाभावः। कंसिक्यामिति। ठचश्चित्करणात्पूर्वमिकादेशः ततः प्रत्ययाद्युदात्तत्वमिति नास्त्युदात्तलोप इत्यर्थः। चित्स्वरमिति। तत उदात्तनिवृत्तिस्वरो न स्यादित्यर्थः। इदानीं प्रत्ययसंज्ञासन्नियोगेन स्वरविधौ प्रयोजनमाह। प्रत्ययाद्युदात्तत्वादिति। यदाञ्नित्यादिर्नित्यमित्यस्यानन्तरं प्रत्ययस्य चेत्युच्येत तदा परत्वाद्धा

आत्रेयीति। अत्र हि परत्वाल्लोपो ञ्नित्किति स्वरान्बाधेत। नैष दोषः। ञ्नित्किति स्वराः प्रत्ययस्वरस्यापवादाः। न चापवादविषये उत्सर्गोऽभिनिविशते। पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः। प्रकल्प्य वा अपवादविषयं तत उत्सर्गोऽभिनिविशते। न तावदत्र कदाचित्प्रत्ययस्वरो भवति अपवादान् ञ्नित्कित्स्वरान्प्रतीक्षते। कंसिक्यां भूयान्परिहारः। अन्त्यस्यात्र उदात्तत्वमन्त्यस्य लोपः। आदेरुदात्तत्वमन्त्यस्य लोपः। इदं तर्हि आत्रेयी। परत्वाल्लोपः कित्स्वरं बाधेत। तस्मादेषा परिभाषाश्रयितव्या एतस्यां च सत्यां शक्यं प्रत्ययसंज्ञासन्नियोगेनाद्युदात्तत्वमवक्तुम्। प्रत्ययाद्युदात्तत्वाद्धातोरन्तः। प्रत्ययाद्युदात्तत्वाद्धातोरन्त इत्येतद्भवति विप्रतिषेधेन। प्रत्ययाद्युदात्तत्वस्यावकाशः यत्रानुदात्ता प्रकृतिः। समत्वम्। सिमत्वम्। धातोरन्त इत्येतस्यावकाशः यत्रानुदात्तः प्रत्ययः पचति पठतीति। इहोभयं प्राप्नोति गोपायति। धातोरन्त इत्येतद्भवति विप्रतिषेधेन। पित्स्वरान्नित्स्वरश्शापि। पित्स्वरान्नित्स्वरश्शापि भवति विप्रतिषेधेन। पित्स्वरस्यावकाशः। पचति पठति। नित्स्वरस्यावकाशः। कार्यम्। हार्यम्। इहोभयं प्राप्नोति। कार्या हार्या। नित्स्वरो भवति विप्रतिषेधेन। चित्स्वरश्चापि पित्स्वरात्। पित्स्वराच्चित्स्वरश्शापि भवति विप्रतिषेधेन। चित्स्वरस्यावकाशः। चलनः कम्पनः। पित्स्वरस्य स एव। इहोभयं प्राप्नोति। आम्बष्ठ्या सौवीर्या। चित्स्वरो भवति विप्रतिषेधेन। न वाद्युदात्तत्वस्य प्रत्ययसंज्ञासन्नियोगात्। न वार्थो विप्रतिषेधेन॥

तुस्वरं प्रत्ययस्वरो बाधेत। यथान्यासे तु प्रत्ययस्वरं धातुस्वरो बाधते। पित्स्वरादिति। एतदत्रानुदात्तत्वविधाने सिद्ध्यति नान्यत्रेति भावः। कार्येति। स्वरितत्वास्त्वागेकादेशं मन्यते। तत्रैकादेशस्य पूर्वप्रत्ययान्तवद्भावान्नित्स्वरः प्राप्नोति। परं प्रत्यादिवद्भावात्तु पित्स्वरप्रसङ्गः। न वेति। प्रत्ययसंज्ञासन्नियुक्तस्वरस्यान्तरङ्गत्वान्नास्ति विप्रतिषेध इति भावः॥ राम॰ ८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परत्वात्स्वरितत्वमिति। अन्तरङ्गत्वं स्वरितत्वस्यानपेक्ष्यैवदुक्तम्। स्त्रीत्वापेक्षटाब्निमित्तोह्येकादेशोबहिरङ्गः। आन्तर्यतइति। स्वरितेत्वनुदात्तोपिविद्यतइतिस्वरितानुदात्तयोःस्वरितोन्तरतमः। चापीति। यदिसामान्यग्रहणाविघातार्थत्वमेवचकारस्याभविष्यत्‌टाप्प्रकरणएवयड्‌श्यप्‌च्य धास्यतेतिभावः॥ गुप्तिज्किद्‌॥ गुपेति। अनुक्रमप्रदर्शनायकितिः पठितोनत्वयम्

किंकारणम्। आद्युदात्तत्वस्यप्रत्ययसंज्ञासन्नियोगात्। प्रत्ययसंज्ञासन्नियोगेनाद्युदात्तत्वेकृतेसतिशिष्टत्वाद्वातुस्वरोभविष्यति। अयंचाप्ययुक्तोविप्रतिषेधः। पित्स्वरस्यतित्स्वरस्यच। किंकारणम्। टापिस्वरितेनैकादेशः टाप्यपिस्वरितेनैकादेशोभविष्यति। इदमिहसंप्रधार्यम्। स्वरितत्वंक्रियतामेकादेशइति। किमत्रकर्तव्यम्। परत्वात्स्वरितत्वंनित्यएकादेशः। कृतेस्वरितत्वेप्राप्नोत्यकृतेपि। स्वरितत्वमपिनित्यम्। कृतेप्येकादेशेप्राप्नोत्यकृतेपि। अनित्यंस्वरितत्वम्। अन्यस्यकृतेएकादेशेप्राप्नोत्यन्यस्याकृते। शब्दान्तरस्यप्राप्नुवन्विधिरनित्योभवति। एकादेशोप्यनित्यः। अन्यथास्वरस्यकृतेस्वरितत्वेप्राप्नोतिअन्यथास्वरस्याकृते। स्वरभिन्नस्यचप्राप्नुवन्विधिरनित्योभवति। अन्तरङ्गस्तर्हिएकादेशः। कान्तरङ्गता। वर्णावाश्रित्यैकादेशः। पदस्यस्वरितत्वम्। स्वरितत्वमप्यन्तरङ्गम्। कथम्। वक्ष्यत्येतत्। पदग्रहणंपरिमाणार्थमिति। उभयोरन्तरङ्गयोःपरत्वात्स्वरितत्वम्। स्वरितत्वेकृते। आन्तर्यतःस्वरितानुदात्तयोरेकादेशःस्वरितोभविष्यति। अयंचाप्ययुक्तोविप्रतिषेधः पित्स्वरस्यचित्स्वरस्यच। किंकारणम्। चापिचित्करणात्। चापिचित्करणसामर्थ्यादन्तोदात्तत्वंभविष्यति॥ गुप्तिज्किद्भ्यःसन्॥ गुपतिजकितमानाअनुदात्तेतः। गुपादिष्वनुबन्धकरणं किमर्थम्। गुपादिष्वनुबन्धकरणमात्मनेपदार्थम्। गुपादिष्वनुबन्धाःक्रियन्ते आत्मनेपदंयथास्यात्। अथक्रियमाणेष्वप्यनुबन्धेषुआत्मनेपदंनप्राप्नोति। किंकारणम्। सनाव्यवहितत्वात्। पूर्ववत्सनइत्येवंभविष्यति। पूर्ववत्सनइत्युच्यते नचैतेभ्यःप्राक्‌सनआत्मनेपदंनापिपरस्मैपदंपश्यामः॥

नुदात्तेत्। गुपादिष्विति। नित्यसन्विषयत्वात्केवलेभ्योलडाद्यनुत्पादात्‌ प्रश्नः। आत्मनेपदार्थमिति। सन्नन्तेभ्यइतिभावः। पूर्ववदिति। लिङ्गातिदेशादितिभावः। नचैतेभ्यइति। कार्यातिदेशोसौ। लिङ्गातिदेशेतुअनुचिकीर्षतीत्यादावप्यात्मनेपदप्रसङ्ग इतिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ एवं तर्हीति। सनाद्यव्यवधानेपीतिभावः। अथवेति। यत्रावयवे लिङ्गासङ्ग स्य प्रयोजनं नास्ति तत्र समुदायार्थ एवासावितिभावः। शिष्टं २११
६ भाष्यं पूर्ववत्स नइत्यत्र विस्तरेण व्याख्यातं तत एवावधार्यम्॥ मान्बध॥ सामान्यविधेर्विशेषविधिर्बाधक इत्याह। अभ्यासदीर्घ इ

एवं तर्ह्यनुबन्धकरणसामर्थ्याद्भविष्यति। अथवा अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति। तद्यथा। गोः सक्थ्नि कर्णे वा कृतं लिङ्गं गोर्विशेषकं भवति। यदि अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति। तदा जुगुप्सयति मीमांसयतीत्यत्रापि प्राप्नोति। अवयवे कृतं लिङ्गं तस्य समुदायस्य विशेषकं भवति यं समुदायं योऽवयवो न व्यभिचरति। सनन्तमेव चनव्यभिचरति। णिजन्तं पुनर्व्यभिचरति। तद्यथा। गोः सक्थ्नि कर्णे वा कृतं लिङ्गं गोरेव विशेषकं भवति न गोमण्डलस्य॥ मान्बध॥ अभ्यासदीर्घे वर्णस्य दीर्घप्रसङ्गः। अभ्यासदीर्घत्वे ऽवर्णस्य दीर्घत्वं प्राप्नोति। मीमांसते। ननु च इत्वे कृते दीर्घत्वं भविष्यति। कथं पुनरत्र सति सन्नियोगेन दीर्घत्वमुच्यमानमित्वं प्रतीक्षते। अथ कथमभ्यासं प्रतीक्षते। वचनादभ्यासं प्रतीक्षते। अभ्यासस्य दीर्घत्वविधानात्। इत्वं पुनर्न प्रतीक्षते। न वाभ्यासविकारेषु अपवादस्योत्सर्गाबाधकत्वात्। नवैष दोषः। किं कारणम्। अभ्यासविकारेषु अपवादस्योत्सर्गाबाधकत्वादभ्यासविकारेषु अपवादा उत्सर्गान्न बाधन्त इत्येवं दीर्घत्वमुच्यमानमित्वं न बाधिष्यते। अथवा मान्बधदान्शान्भ्य ईच्चाभ्यासस्येति वक्ष्यामि। एवमपि हलादिशेषापवाद ईकारः प्राप्नोति। ईच्चाच इति वक्ष्यामि। अथवा मान्बधदानशान्भ्यो दीर्घश्चेतोभ्यासस्येति वक्ष्यामि। सिद्ध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तमभ्यासदीर्घत्वे अवर्णस्य दीर्घत्वप्रसङ्ग इति। परिहृतमेतत्। न वाभ्यासविकारेषु अपवादस्योत्सर्गाबाधकत्वादिति। अथवा नैवं विज्ञायते। दीर्घश्चाभ्यासस्येति। कथं तर्हि। दीर्घश्च आभ्यासस्येति

ति। अथ कथमिति। यथाभ्यासस्येति वचनाद्दीर्घत्वमभ्यासमपेक्षते तथा वचनान्तरविहितमित्वमपीतिभावः। अभ्यासविकारेष्विति। एतच्च दीर्घोक्तिनइत्यत्राकिद्ग्रहणेन ज्ञापयिष्यते। ईच्चाच इति। अजन्तस्येत्यर्थः। न चाकृते हलादिशेषे ऽजन्तत्वं भवति॥ राम:
६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासस्यविकारइति। सचेत्वमेव। तथाहि। लोपस्यतावदादेशोविधातुमशक्यः तस्याभावरूपत्वात्। यदिचह्रस्वस्यदीर्घत्वं स्यात् तद्धितनिर्देशोनर्थकः स्यात्। दीर्घश्रुत्याचूपरिभाषोपस्थानादजन्तस्यदीर्घविधानात् दीर्घस्यह्रस्वस्यवा दीर्घविधानेविशेषाभावाचस्मादित्वमेवतद्धितेनप्रत्याय्यते। अथवाह्रस्वसनियोगेविहितोविकारः सन्यतइतितस्यैवग्रहणंविज्ञायते। ह्रस्वश्रमानादीनामिवबधेरपिपर्जन्यवल्लक्षणप्रवृत्त्याभवति। धातोः कर्मणः॥ धातोरर्थद्वारकेकर्मत्वसमानकर्तृकत्वे। तेचेच्छायाः प्रत्ययार्थत्वेपिसन्निधानात्तदपेक्षेएवगृह्येते। एवंचप्रकृत्यर्थोपसर्जनः प्रत्ययार्थोभवति। अन्यथाप्रकृतिप्रत्ययार्थयोरसंबन्धःस्यात्। वार्त्तिकावतारणायप्रश्नंकरोति। धातोरितिकिमर्थमिति। अयंभावः। धातुरेवक्रियावाची। उपसर्गस्तुविशेषकः। ततस्तदर्थद्वारकेकर्मत्वसमानकर्तृकत्वेधातोरेवसंभवतइति। सोपसर्गादिति। संघातेनविशिष्टक्रियाप्रति

किमिदमाभ्यासस्येति। अभ्यासस्यविकारआभ्यासःतस्येति। धातोःकर्मणः॥ धातोरितिकिमर्थम्। प्रकर्त्तुमैच्छत्प्राविकीर्षत्। सोपसर्गादुत्पत्तिर्माभूदिति। कर्मग्रहणात्सन्विधौधातुग्रहणानर्थक्यम्। कर्मग्रहणात्सन्विधौधातुग्रहणमनर्थकम्। कर्मणः समानकर्तृका दिच्छायांवासन्भवतीत्येवधातोरुत्पत्तिर्भविष्यति। सोपसर्गेवैकर्म। सोपसर्गकमिह्वैकर्म। ततउत्पत्तिःप्राप्नोति। सोपसर्गकर्मेतिचेत्कर्मविशेषकत्वात्उपसर्गस्यानुपसर्गंकर्म। सोपसर्गंकर्मेतिचेत्कर्मविशेषकउपसर्गः। अनुपसर्गमेवहिकर्म। अवश्यंचैतदेवंविज्ञेयम् ॥

पाद्यतइतिततएवसनुत्पत्तिप्रसङ्गः। ततश्चसंघातादेरेवद्विर्वचनादिप्रसङ्गइतिभावः। कर्म्मग्रहणादिति। एतदुपलक्षणम्। तेनसमानकर्तृकग्रहणादित्यपिबोद्धव्यम्। सोपसर्गमिति। संघातस्यक्रियाविशेषाभिधायित्वादितिभावः। कर्मविशेषकइति। अतएववचनात् षष्ठीसमासप्रतिषेधोऽनित्यार्थः। अयमर्थः। धातुरेवक्रियावाचीतितदर्थस्यैवकर्म्मत्वम्। नतूपसर्गार्थस्यापियथोक्तम्। कटएवकर्म्मतत्सामानाधिकरण्याच्चभीष्मादिभ्योद्वितीयाभविष्यतीति। अथापिविशेषणस्यपृथक्कर्मत्वम्। यथोक्तम्। करोपिकर्मभीष्मादयोपीतितथापिकर्म्मसमुदायस्याकर्मत्वात्समुदायादुत्पत्तिर्नभविष्यति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा-कै: १० सोपसर्गात्सहीति। यदिदं घातस्यार्थद्वारकं कर्मत्वं स्यात्। तदा अवयवस्याकर्मत्वात्ततः सन्प्रत्ययो न स्यात्। कर्म्मण ३११
इत्येषा हि पञ्चमी। पञ्चम्यां तु सत्यां कर्मणोऽवयवाद्धातोः सन्नित्याश्रीयमाणेऽनुपसर्गान्न स्यात्। तस्मात्। अडादीनामव
स्थायैष्टव्यस्तेन प्रकल्पनात्। धातूपसर्गयोर्धातुः क्रियावाचीति निर्णयः॥ सुबन्तादिति। विकल्पितत्वात्सनः पक्षे साव
काशाः क्यजादय इति भावः। प्रातिपदिकादिति तु नोक्तम्। कर्म्मण इति वचनात्कर्मत्वे च सति सुबन्तताया अवश्यंभावा
त्। क्यजादीनामिति। कर्ममात्रात्सन्विधिः। कर्म्मविशेषात्सुबन्तात्क्यजादय इति भावः। यत्र चोत्सर्गापवादौ विभाषात

सोपसर्गस्य हि कर्मत्वे धात्वधिकारेऽपि सनोऽविधानमकर्मत्वात्। यो हि मन्यते सोपसर्गं कर्मेति क्रियमाणे
ऽपि तस्य धातुग्रहणे सनोऽविधिः स्यात् किं कारणमकर्मकत्वात्। इदं तर्हि प्रयोजनम्। सुबन्तादुत्पत्तिर्माभू
त्। सुबन्ताच्चाप्रसङ्गः क्यजादीनामपवादत्वात्। सुबन्ताच्च सनोऽप्रसङ्गः किं कारणम्। क्यजादीनामपवाद
त्वात्। सुबन्तात्क्यजादयो विधीयन्ते। तेऽपवादत्वात् बाधका भविष्यन्ति। अनभिधानाद्वा। अथवा अनभि
धानात्सुबन्तादुत्पत्तिर्न भविष्यति। नहि सुबन्तादुत्पद्यमानेन सनाऽऽइच्छाभिधानमस्ति। इयं तावदगति
कागतिः। यदुच्यते अनभिधानादिति। यदप्युच्यते। सुबन्ताच्चाप्रसङ्गः क्यजादीनामपवादत्वादिति। भवे
त् कस्माच्चिदप्रसङ्गः स्यादिति आत्मेच्छायाम्। परेच्छायां तु प्राप्नोति राज्ञः पुत्रमिच्छतीति। एवं तर्हि इदमि
ह व्यपदेश्यं सदाचार्यो न व्यपदिशति। किम्। समानकर्तृकादिच्छायां वेत्युच्यते। न च सुबन्तस्य समानः क
र्त्तास्ति। एवमपि भवेत् कस्माच्चिदप्रसङ्गः स्यात् यस्य कर्त्ता नास्ति॥

त्रापवादेन मुक्त उत्सर्गो न भवति। अपि तु वाक्यमेव। इयं तावदिति। लक्षणाश्रयालक्ष्यस्य व्यवस्थान्याय्यालक्ष्याश्रयेण तु ल
क्षणव्यवस्थापनं गत्यन्तराभावादिति भावः। व्यपदेश्यं सदिति। सच्छोभनं यद्व्यपदेशार्हं तन्न व्यपदिशति। न च सुबन्तस्ये
ति। पुत्रादेः सत्वभूतार्थाभिधायित्वात्साध्यस्यैव साधनसंबन्धयोग्यत्वादिति भावः। कटं करोतीत्यादावपि सुबन्तेन सि
द्धरूपो र्थोऽभिधीयते। शब्दान्तरसन्निधानात्तु साध्यता प्रतीयते। यथोक्तं हरिणा। निर्वर्त्यो वा विकार्यो वा प्राप्यो वा सा
धनाश्रयः। क्रियाणामेव साध्यत्वात्सिद्धरूपोऽभिधीयत इति॥ रामः १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसितुमिच्छतीति। तुमुनन्तस्य साध्यरूपाभिधायित्वादस्ति कर्त्रा योग इति भावः। क्यचिमान्ताव्ययप्रतिषेध इति क्यजत्र प्रतिषिद्धः। तुमुनोक्तत्वादिति। तुमुन्निमित्तेनेच्छतीत्यनेनेत्यर्थः। न चेच्छतीत्यस्य प्रयोगं बाधित्वा सन् भवतीति युज्यते वक्तुम्। उपपदनिमित्तत्वात्तुमुनस्तदभावे अभावप्रसङ्गात्। आसनमिच्छतीति। ल्युड् भावमात्रे विधीयते न त्विच्छार्थेषूपपदेष्विति भावः। धातुवाच्यक्रियापेक्षं च समानकर्तृकत्वमस्ति। इहयोविशेष इति। समानशब्दस्तदन्तवाच्योऽर्थ उपाधिरन्यस्तु विशेष इति भावः। क्वचित्त्वभेदेन व्यवहारः। आसितुमिच्छतीति। वृत्तिसमानार्थेन वाक्येन भवितव्यम्। आसिसिषत इत्यस्य चासितुमिच्छतीति समानार्थं भवतीति भवत्यासेः सन्प्रत्ययः। आसनमिच्छतीत्यत्र तु किमात्मन आसनमिच्छति अथ परस्येति संदेहात्समानकर्तृकत्वाप्रतिपत्तिरित्यासनशब्दात्सन्प्रत्ययो न भविष्यति। न ह्यतः सन्नुत्पद्यमानः समानकर्तृकत्वलक्षणं विशेषमन्तर्भा

इह तु प्राप्नोति। आसितुमिच्छति शयितुमिच्छतीति। इच्छायामर्थे सन् विधीयते इच्छार्थेषु च तुमुन्। तत्र तुमुनोक्तत्वात्तस्यार्थस्य सन् न भविष्यति। एवमपीह प्राप्नोति। आसनमिच्छति शयनमिच्छतीति। इहयो विशेष उपादीयते उपाधिर्वाच्यो स्येतस्मिंस्तेन भवितव्यम्। यश्चेहार्थो गम्यते आसितुमिच्छति शयितुमिच्छतीति स्वयं तां क्रियां कर्तुमिच्छतीति नासाविह गम्यते। आसनमिच्छति शयनमिच्छतीति। अन्यस्याप्यासनमिच्छतीत्येषोऽर्थो गम्यते। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते अर्थो स्येतस्मिंस्तेन भवितव्यमिति। क्रियमाणेपि हि तस्य धातुग्रहण इह प्रसज्येत। संगतमिच्छति यज्ञदत्तो देवदत्तेनेति। कर्मसमानकर्तृकग्रहणानर्थक्यं चेच्छाभिधाने प्रत्ययविधानात् ॥

वयितुं शक्नोतीति भावः। संगतमिच्छतीति। केवलस्य धातोः प्रयोगाभावात्क्तप्रत्ययोपादानम्। धातोरेव तु सन्प्रसङ्ग इति उच्यते। अत्र च किमात्मकर्तृकं संगतमिच्छति अथ परकर्तृकमिति संदेहाद्यदा समानकर्तृकत्वं नावधार्यते तेन दानभाव्यम्। यदा तु समानकर्तृकत्वं प्रतिपिपादयिषितं तदा भवितव्यमेव सना संजिगंसते वत्सो मात्रेति। कर्मेति। इच्छायाः कर्मणावश्यं भाव्यमिति प्रत्यासत्त्या प्रकृत्यर्थ एव कर्मत्वेनाश्रयिष्यते न तु तद्व्यतिरिक्तमिति। गमनेनेच्छतीति सन्न भविष्यति। प्रत्यासत्त्यैव च समानकर्तृकत्वमाश्रयिष्यत इति देवदत्तस्य भोजनमिच्छतीत्यत्रापि न भविष्यतीत्येतन्न्यायमूलमनभिधानम्। इह नित्यानां शब्दानां संकीर्णप्रयोगदर्शने सति साध्वसाधुविभागाय शास्त्रारम्भो न च गमनेनेच्छति देवदत्तस्य भोजनमिच्छतीत्यत्रार्थे जिगमिषति बुभुक्षत इत्यादि प्रयोगोऽस्तीति किं तन्निवृत्त्यर्थेन विशेषणोपादानेनेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अङ्ग·परिमाणार्थेत्विति। इच्छायांवेत्येतावत्युच्यमानेयद्यपिप्रत्ययपरत्वेनपूर्वाप्रकृतिराक्षिप्यतेतथापिप्राचिकीर्षदित्या
दौसोपसर्गस्याङ्ग·त्वंस्यात्। यदातुसाक्षात्प्रकृतिर्विशिष्टानिर्दिश्यतेतदाङ्ग·परिमाणंज्ञापते। अन्यतरदिति। त्रितयेप्रत्या
ख्यातेअन्यतममितिवक्तव्येसमानकर्तृग्रहणंनकर्तव्यमेवगौरवप्रसङ्गा दितिमत्वान्यतरदित्युक्तम्। धातुग्रहणमेवे
त्याते अन्यतममितिवक्तव्ये। धातुशब्दोच्चारणेनधातोर्विहितस्यार्द्धधातुकसंज्ञोक्ता। तथाचपूर्वसूत्रद्वयविहित
ति। कार्यान्तरस्यापिसंपादनादित्यर्थः। धातुशब्दोच्चारणेनधातोर्विहितस्यार्द्धधातुकसंज्ञोक्ता। तथाचपूर्वसूत्रद्वयविहित
स्यसनस्तदभावाज्जुगुप्सतइत्यादाविडभावः। एतत्सूत्रविहितस्यतुसनआर्द्धधातुकत्वाच्छिशयिषतइत्यादाविड्गुणौ

कर्मसमानकर्तृकग्रहणंचानर्थकम्। किंकारणम्। इच्छाभिधानेप्रत्ययविधानात्। इच्छायामभिधेयायां
सन्विधीयते। अकर्मणोह्यसमानकर्तृकाद्वानभिधानात्। इच्छायामभिधेयायांसन्विधीयते। नचाकर्मणोः
समानकर्तृकाद्वाउत्पद्यमानेनसनाइच्छायाअभिधानंस्यात्। अनभिधानात्ततउत्पत्तिर्नभविष्यति। अङ्ग·प
रिमाणार्थंतु। अङ्ग·परिमाणार्थंतर्ह्यन्यतरत्कर्तव्यंधातुग्रहणंकर्मग्रहणंवा। अङ्ग·परिमाणंज्ञास्यामीति। किंपु
नरत्रज्यायः। धातुग्रहणमेवज्यायः। अङ्ग·परिमाणंचैवविज्ञातंभवति। अपिचधातोर्विहितःप्रत्ययःशेषआ
र्द्धधातुकसंज्ञोभवतीतिसन आर्द्धधातुकसंज्ञापिसिद्धाभवति। यच्चाप्येतदुक्तंकर्मग्रहणात् सन्विधौ
धातुग्रहणानर्थक्यंसोपसर्गकर्मेति चेत् कर्मविशेषकत्वादुपसर्गस्यानुपसर्गकर्मसोपसर्गस्यहिकर्मत्वे
धात्वधिकारेपिसनोःविधानमकर्मत्वादिति। स्वपक्षोनेनवर्णितःयुक्तमिहदृष्टव्यं किंन्याय्यंकर्मेति। एत
च्चात्रयुक्तम् ॥

भवतः। नन्विकोझलितिकित्त्वमार्द्धधातुकत्वनिमित्तगुणनिषेधार्थम् सनआर्द्धधातुकसंज्ञाज्ञापकंभविष्यति। नै
तदस्ति। सामान्येनज्ञापकेव्याख्यायमानेसर्वत्रसनःप्रसङ्गः। विशेषविषयेत्विगन्तप्रकृतेरेवस्यादितिधातुग्रहणंक
र्तव्यम्। स्वपक्षइति। यद्यपिसर्वएवस्वपक्षंवर्णयति। तथापिपरपक्षदूषणाभिनिवेशादयुक्तोपिस्वपक्षोवर्णित रामः ११
इत्युक्तंभवति। युक्तमिति। यदेवन्याय्यंतदेवग्राह्यम्। नतुदुराभिनिवेशःकार्यइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्सोपसर्गमिति। धातूपसर्गसंघातेन हि क्रियाविशेषस्य प्रक्रमादर्थद्वारकं तस्यैव कर्मत्वमित्यर्थः। विशिष्टैव च क्रिया सा
धनेन निर्वर्त्यते। न तूत्पन्ना सती विशेषणेनान्यत उत्पन्नेनाभिसंबध्यते। तत्र यद्यपि धातुर्वाचक उपसर्गस्तु द्योतकः तथा
प्यसति धातुग्रहणे वाचकद्योतकविभागस्य शब्देनानङ्गीकृतत्वात्संघातादेवोत्पत्तिः स्यादिति भावः। उपपदमति
ङिति अत्र च साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि इत्युत्पत्तिविशिष्टाया एव क्रियाया आश्रितोक्तमित्यविरो
धः। अथवासत्यपि धातोः पूर्वं साधनयोगे द्वित्विकर्मत्वमिह विशिष्टाया एव क्रियायाः प्रतिपाद्यमिति पूर्वमुपसर्गेण संबन्धे धा
तुग्रहणे सति सोपसर्गात्क्यन उत्पत्तिप्रसङ्ग एव। किं तर्हीति। व्याप्तिग्रहणाय षष्ठीपक्ष आश्रीयते पञ्चम्यां हि सत्यामनुपस

यत्सोपसर्गात्कर्मस्यात्। ननु चोक्तम्। सोपसर्गस्य कर्मत्वे धात्वधिकारेऽपि सनोऽविधानमकर्मकत्वादिति। नै
ष दोषः। कर्मण इति नैषा धातुसमानाधिकरणा पञ्चमी कर्मणो धातोरिति। किं तर्ह्यवयवयोग एषा षष्ठी कर्मणो
यो धातुरवयव इति। यद्यवयवयोगा षष्ठी। केवलादुत्पत्तिर्न प्राप्नोति चिकीर्षति जिहीर्षतीति। एषोऽपि व्यपदेशि
वद्भावेन कर्मणो धातुरवयवो भवति। कामं तर्ह्यनेनैव हेतुना क्यजपि कर्तव्यः। महान्तं पुत्रमिच्छतीति कर्मणो
यत्सुनन्तमवयव इति। न कर्तव्यः। असामर्थ्यान्न भविष्यति। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। वावच
नानर्थक्यं च तत्र नित्यत्वात्सनः। वावचनं चानर्थकम्। किं कारणम्। तत्र नित्यत्वात्सनः। इह द्वौ पक्षौ वृत्तिपक्षश्चा
वृत्तिपक्षश्च। स्वभावतश्चैतद्भवति वाक्यं च प्रत्ययश्च। तत्र स्वाभाविके वृत्तिविषये नित्ये प्रत्यये प्राप्ते वाव
चनेन किमन्यच्छक्यमभिसंबन्द्धुमन्यदतः संज्ञायाः॥

र्गादेवोत्पत्तिः स्यान्न तु सोपसर्गात्। षष्ठीपक्षे तु सोपसर्गादपि सिध्यति। एषोऽपीति। प्रयोगभेदान्नानारूपस्य कर्माभिधायिनोऽवयवः
सन्प्रकृतित्वेनाश्रीयमाणो धातुरित्यर्थः। काममिति। इच्छयेत्यर्थः। इच्छाया व्याघाताभावादित्यर्थः। असामर्थ्यादिति। सुबन्ता
त्क्यज्विधानात्पदविधित्वात्समर्थपरिभाषोपस्थानादिति भावः। सन्विधौ तु तदनुपस्थानात्सापेक्षादपि सन उत्पत्तिः। अथवा धा
तुरेव विशिष्टां क्रियामाह उपसर्गस्तु द्योतक इति सापेक्षत्वाभावः। वावचनानर्थक्यं चेति। वृत्तेरेकार्थीभावविषयत्वाद्व्यपेक्षा
विषयत्वाच्च वाक्यस्य भिन्नार्थत्वाद्बाध्यबाधकभावाप्रसङ्गादिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचसंज्ञायादिति। अनर्थः प्रत्युतवाग्रहणाद्धवतिप्रत्ययसंज्ञायाविकल्पेसतितन्निबन्धनकार्यविकल्पप्रसङ्गात्। तुमुन्नन्तादिति लघ्वेवंलक्षणंभवतीतिभावः। वचनसामर्थ्याल्लोपपदस्यवर्णबाधित्वापक्षेतदीयेर्थेसन्प्रत्ययोभवति। इच्छाग्रहणंप्रत्ययार्थनिर्दे शायावश्यंकर्तव्यम्। अत्रचोदयन्ति। तुमुनन्तस्यपदत्वात्तुमुनोलुकिकृतेजिघांसतीत्यादौनलोपादीनिप्राप्नुवन्तीति। नैषदोषः तुमुनोलुकोबहिरङ्गत्वादसिद्धत्वान्नलोपादीतिनभविष्यन्तीति। एतस्मिंस्तुसूत्रन्यासेधातोरितिसनोविधानाभावादार्द्धधातुक संज्ञानप्राप्नोतीतिइकोझलितिकित्वविधानंज्ञापकमाश्रयणीयमिष्टसिद्धये। आशङ्कायामिति। आशङ्कासंभावनातद्विषिष्टार्थो

नचसंज्ञायाभावाभावाविष्येते। तस्मान्नार्थोवावचनेन। तुमुन्नन्ताद्वातस्यचलुग्वचनम्। तुमुनन्ताद्वासन्वक्त व्यः तस्यचतुमुनो लुग्वक्तव्यः॥ कर्तुमिच्छतिचिकीर्षतीति। लिङ्न्तमाद्वा। लिङ्न्तमाद्वासन्वक्तव्यः। तस्यचलि ङोलुक्वक्तव्यः॥ कुर्यामितीच्छतिचिकीर्षति। आशङ्कायामचेतनेषूपसंख्यानम्॥ आशङ्कायामचेतनेषूपसं ख्यानंकर्तव्यम्। अश्मालुलुठिषते। कूलंपिपतिषति। किंपुनःकारणंनसिध्यति। एवंमन्यतेचेतनावतएतद्भव तीच्छेति। कूलंचाचेतनम्। अचेतनग्रहणेननार्थः। आशङ्कायामित्येव। इदमपिसिद्धंभवति। श्वामुमूर्षतीति। नवातुल्यकारणत्वादिच्छायाहिप्रवृत्तितउपलब्धिः नवावक्तव्यम्। किंकारणम्। तुल्यकारणत्वात्। तुल्यंहिका रणंचेतनावतिदेवदत्तेकूलेचाचेतने। किंकारणम्। इच्छायाहिप्रवृत्तितउपलब्धिर्भवति। योप्यसौकटंचिकी र्षुर्भवतिनासावाघोषयतिकटंकरिष्यामीति। किंतर्हिसन्नद्धरज्जुकीलपूलपाणिंदृष्ट्वाततइच्छागम्यते। कूलस्यापिपिपतिषतोलोष्टाःशीर्यन्तेभिदाउपजायतेदेशान्तरमुपसंक्रामति। श्वानःखल्वपिमुमूर्षवःएका न्तशीलाःशूनाक्षाश्चभवन्ति। उपमानाद्वासिद्धम्। उपमानाद्वासिद्धमेतत्। लुलुठिषतइवलुलुठिषते। पिपतिषतिइवपिपतिषति

मिथायिनोधातोः स्वार्थेप्रत्ययः। लुलुठिषतइति। रुठलुठप्रतीघातइतिद्युतादिषुपठ्यते। वर्त्तमानसामीप्यइतिलट्प्रत्ययः। श्वामुमूर्षतीति। शुनश्चैतन्येपिजीवितस्यप्रियत्वाद्व्याध्याद्यभिभवेपितिर्यक्त्वान्मर्तुमिच्छानास्ति। नचेति। कार्येणेच्छानुमी यतइच्छानुमानकारणंकार्यलिङ्गंतुल्यमितिवास्तवसदसत्त्वानपेक्षलोकव्यवहाराश्रयकार्यानुमेयेच्छाश्रयेणसन्प्रयुज्यतेइ त्यर्थः। उपमानादेति। यदिच्छानिमित्तंकार्यंतदचेतनेषुनास्ति। यत्त्वास्तिनतदिच्छायाःकार्यमितिमत्वापरिहारान्तरोपन्यासः ॥ राम॰ १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवैतिङन्तेनेति। तिङन्तार्थेनेत्यर्थः। क्रियायाः साध्यैकस्वभावत्वादनिष्पन्नरूपत्वादिदं तदिति परामर्शविषयवस्तुगोचरत्वादुपमानोपमेयभावस्येदं तदिति परामर्शाभावादिति भावः। इवशब्दप्रयोगे तु अध्यारोपस्तु विद्यते। रोदितीव गायति नृत्यतीव गच्छति देवदत्त इति। परिपूर्णेन च न्यूनस्योपमानं भवति। क्रियाच सर्वा स्वाश्रये समाप्तेति न्यूनत्वासंभवस्तस्याम्। तदुक्तम्। येनैव हेतुना हंसः पततीत्यभिधीयते। आतौ तस्य समाप्तत्वादुपमार्थो न विद्यत इति। भिन्नजातीयानां च क्रियाणां सादृश्यान्नास्ति भुङ्क्ते इव गच्छतीति। एवं तर्हीति। इच्छाशब्दस्य सत्त्वभूतार्थाभिधायित्वादस्ति तदर्थस्योपमानत्वं ततश्चेच्छासदृशेऽपि व्यापारे सन् भवति। गौणमुख्यन्यायश्च क्वचिल्लक्ष्यापेक्षया नाङ्गीक्रियते। सर्वस्येति। आत्माद्वैतदर्शनेनेति भावः। ऋषिरिति। वेदः सर्वभावानां चैतन्यं प्रतिपादयतीत्यर्थः। वैचित्र्येण च पदार्थानामुपलम्भात्सर्वचेतनधर्मप्रसङ्गः सर्वत्र नोद्भावनीयः। इममिति। श

न वै तिङन्तेनोपमानमस्ति। एवं तर्हि इच्छेवेच्छा सर्वस्य वा चेतनावत्त्वात्। अथवा सर्वं चेतनावत्। एवं ह्याह कंसकाः सर्पन्ते शिरीषोऽयं स्वपिति सुवर्चला आदित्यमनुपर्येति। आस्कन्द कपिलके त्युक्ते तृणमास्कन्दति। अयस्कान्तमयः संक्रामति। ऋषिः पठति। शृणोत ग्रावाणः। इमे ऋषयो बहवः पठ्यन्ते। तत्र न ज्ञायते कस्यायमर्थे सन् विधीयत इति। इषेश्छत्वभाविनः। यद्येवं कर्तुमन्विच्छति कर्तुमन्वेषणा। अत्रापि प्राप्नोति। एवं तर्हि यस्य स्त्रियामिच्छेत्येतद्रूपं निपात्यते। कस्य चैतन्निपात्यते। कान्तिकर्मणः। अथेह ग्रामं गन्तुमिच्छतीति कस्य किं कर्म। इषेरुभे कर्मणी। यद्येवं ग्रामं गन्तुमिच्छति ग्रामाय गन्तुमिच्छतीति। गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ न प्राप्नुतः। एवं तर्हि गमेर्ग्रामः कर्म। इषेर्गमिः कर्म ॥

श्नाश्यन्विकरणास्त्रय इत्यर्थः। तत्रेति। इच्छेति निपातनं त्रयाणामपि संभवतीति मन्यते। छत्वभाविन इति। इच्छेति शप्रत्ययो यगभावश्च निपात्यते। छत्वं तु लक्षणेनैव सिद्धं तच्च शविकरणस्यैव विहितमित्यर्थः। यद्येवमिति। अन्विच्छतीति तौदादिकस्यैव रूपमिति भावः। एवं तर्हीति। अर्थविशेषे निपातनमाश्रितमिति भावः। कान्तिकर्मण इति। कान्तिः कामनाभिलाषस्तत्क्रियस्येत्यर्थः। अन्विच्छतीत्यस्य गवेषयतीत्यर्थः न तु कामयत इति सन्न भवति। अथेहेति। क्रियाद्वयसन्निधानाद्भुङ्क्ते मणादिकामस्य गमनमात्रे प्रसंभवादन्यस्य चोभयेप्सासंभवात्प्रश्नः। इषेरुभे इति। यो हि ग्राम गमनमिच्छति तस्येषिक्रिययोभयमीप्सितं न केवलो ग्रामो नापि केवलं गमनमित्यर्थः। यद्येवमिति। इषिकर्मत्वे ग्रामस्य गतिकर्मत्वाभावादिति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परसाधन इति। परस्येषेः साधनं यत्कर्म तत्र लकार उत्पद्यते। तच्च गमनमेव न तु ग्राम इत्यर्थः। एवं तर्हीति। इष्यते ग्रामो गन्तुमित्यत्र
गमनस्य ग्रामार्थत्वादप्राधान्याद्भिन्नकक्ष्ययोः कर्मणोरेकेन शब्देनाभिधानासंभवात्प्रधाने कार्यसंप्रत्ययाद्ग्रामस्यैवाभिधानं लका
रेण भवति। इषिक्रियायाश्चाख्यातवाच्यत्वात्प्राधान्यमिति प्रधानक्रियाशक्त्यभिधाने गुणक्रियाशक्तेरभिहितवच्चकासनाद्गु
मिक्रियापेक्षे द्वितीयाचतुर्थ्यौ न भवतः। अथेति। प्रयोगादर्शनाल्लक्षणसद्भावाच्च पृच्छति। न भवितव्यमिति। एककर्तृत्वादिच्छायाः
तस्याश्च पूर्वोत्पन्नेनाभिहितत्वादपरः सन्न भवतीत्यर्थः। न तर्हीति। इषिणैव धातुनेच्छाया अभिधानात्सन्न प्राप्नोतीति भावः। ए
कस्येति। इच्छतीत्यत्र यदिषिस्तस्यैषितुमित्येतत्पदवाच्यदिषिः कर्मेत्यर्थः। तथाहि। कश्चिदालस्यादुपहतोऽध्ययनादिविषया

एवमपीष्यते ग्रामो गन्तुमिति। परसाधन उत्पद्यमानेन लेन ग्रामस्याभिधानं न प्राप्नोति। एवं तर्हि गमेर्ग्रामः कर्म इषेरु
भे कर्मणी। अथ सन्नन्तात्सन्ना भवितव्यम्। चिकीर्षितुमिच्छति जिहीर्षितुमिच्छतीति न भवितव्यम्। किं कारणम्।
अर्थगत्यर्थः शब्दप्रयोगः। अर्थं प्रत्याययिष्यामीति शब्दः प्रयुज्यते। तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न
भवितव्यम्। उक्तार्थानामप्रयोग इति। न तर्हीदानीमिदं भवति। एषितुमिच्छति एषिषिषतीति। अस्त्यत्र विशेषः। ए
कस्यात्रेषेरिषिः साधनं वर्तमानकालश्च प्रत्ययः। अपरस्य बाह्यं साधनं सर्वकालश्च प्रत्ययः। इहापि तर्ह्येकस्येषेः
करोतिविशिष्ट इषिः साधनं वर्तमानकालश्च प्रत्ययः। अपरस्य बाह्यं साधनं सर्वकालश्च प्रत्ययः। येनैव खल्वपि हेतु
नाऽतद्वाक्यं भवति। चिकीर्षितुमिच्छतीति तेनैव हेतुना वृत्तिरपि प्राप्नोति। तस्मात्सन्नन्तात्सनः प्रतिषेधो वक्तव्यः। तं चा
पि ब्रुवता इषिसन इति वक्तव्यम्। भवति हि जुगुप्सिषते मीमांसिषत इति। शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः।

मिच्छामेवेच्छति। सर्वकाल इति। समानकर्तृकेषु तुमुन्नित्यनेन तुमुनः कालसामान्ये विधानात्। शैषिकादिति। सन्प्रसङ्गेऽनान्योऽप्यनिष्ट
प्रत्ययो निवार्यते। प्रतिव्यक्तिलक्षणप्रवृत्तौ वाचनिको निषेधः। आकृतिपक्षे तु सकृल्लक्षणप्रवृत्तौ तस्य वृत्तेः प्राक्तनस्य प्रत्ययान्तप्रकृ
त्यसंभवात्तदन्तात्प्रत्ययोत्पत्तिर्न भवतीति न्यायानुवादोऽयं संपद्यते। तत्र शैषिकाच्छैषिकः सरूपो न भवति। शालायां भवः शाली
यो घटः तत्र भव इदं कमिति पुनश्छो न भवति। विरूपस्तु भवति। अहिच्छत्रे भव आहिच्छत्रः तत्र भव आहिच्छत्रीयः। तथा द
ण्डोऽस्यास्तीति दण्डिकः सोऽस्यास्तीति पुनष्ठन्न भवति। विरूपस्तु भवति। दण्डिमती सेनेति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्नन्तान्नसनिष्यतइति। सरूपइत्यपेक्ष्यते सारूप्येण चात्र सादृश्यं लक्ष्यते तच्चार्थद्वारकमिति इच्छासन्नन्तादित्यर्थो लभ्यते॥ इति जैयटपुत्रकैयटकृते भाष्यप्रदीपे तृतीयस्याध्यायस्य प्रथमपादे प्रथममाह्निकम्॥ सुप आत्मनः॥ किमर्थइति। वक्ष्यमाणोभिप्रायः। शिष्यबुद्धिपरीक्षार्थं परिहाराभासमाह। चितइति। प्रत्ययस्वरेणैवेति। यद्यप्यत्र धातुस्वरेणभाव्यं तथापि पूर्वं प्रत्ययस्वरो भवति। पश्चात्सति शिष्टे धातुस्वर इति क्रमः। तदनुबन्धकेति। सएव यस्यानुबन्धः तस्य ग्रहणम्। यस्य तु सचान्यश्च तस्य न

सरूपः प्रत्ययो नेष्टः सन्नन्तान्नसनिष्यतेइति॥ इति श्रीमहाभाष्ये तृतीयाध्यायस्य प्रथमे पादे प्रथमाह्निकम्।
सुप आत्मनः क्यच्॥ किमर्थश्चकारः। स्वरार्थः। चितोन्त उदात्तो भवतीत्यन्तोदात्तत्वं यथा स्यात्। नैतदस्ति प्रयोजनम्। एकाजयं तत्र नार्थः स्वरार्थेन चकारेणानुबन्धेन। प्रत्ययस्वरेणैव सिद्धम्। विशेषणार्थस्तर्हि। क्व विशेषणार्थेनार्थः। अस्यच्वौ क्यचि चेति। क्य इति ह्युच्यमाने अपि काकः श्येनायते अत्रापि प्रसज्येत। नैतदस्ति। तदनुबन्धकग्रहणे अतदनुबन्धकस्य ग्रहणं नेत्येवमेतस्य न भविष्यति। सामान्यग्रहणाविघातार्थस्तर्हि। क्व च सामान्यग्रहणाविघातार्थेनार्थः। नः क्य इति। अथात्मग्रहणं किमर्थम्। आत्मेच्छायां यथा स्यात् परेच्छायां माभूत्। राज्ञः पुत्रमिच्छतीति। क्रियमाणेऽपि वै आत्मग्रहणे परेच्छायां प्राप्नोति। किं कारणम्। आत्मन इतीयं कर्तरि षष्ठी। इच्छेत्यकारो भावे। सयद्येवात्मन इच्छति। अथापि परस्य। आत्मन एवेच्छा सो भवति। नैष दोषः। नात्मग्रहणेनेच्छाभिसंबध्यते। किं तर्हि। सुबन्तमभिसंबध्यते। आत्मनो यत्सुबन्तमिति। यद्यात्मग्रहणं क्रियते। छन्दसि परेच्छायां न प्राप्नोति। मात्वा वृका अघायवो विदन्। तस्मान्नार्थ आत्मग्रहणेन। कस्मान्न भवति राज्ञः पुत्रमिच्छतीति। असामर्थ्यात्। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति॥

ग्रहणमित्येवमेतद्वचनसामर्थ्यादाश्रीयते। आत्मेच्छायामिति। आत्मन इच्छेति शेषषष्ठ्या समासः न तु कर्तृषष्ठ्या। सुबन्तद्वारकश्चात्मन इच्छया संबन्धः। न तु साक्षात्तेनायमर्थः। आत्मनः सुबन्तार्थं यदेच्छति तदा यथा स्यादिति। एवं परेच्छायामिति व्याख्येयम्। आत्मन इतीयमिति। क्रियाकारकसंबन्धस्यान्तरङ्गत्वादिति भावः। नात्मग्रहणेनेति। आत्मग्रहणे पादानसामर्थ्यात्। न ह्यपितारमन्तरेणेच्छा भवतीति व्यभिचाराभावादिच्छाया विशेषणस्य निष्फलत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कस्मात्मनइति।अघंव्यसनंदुःखमुच्यते।तच्चात्मनोनकश्चिदिच्छतीत्यर्थः।पद्यमिति।नचतदाचारेक्यजर्थम्।छन्दस्यघश

छन्दस्यपितर्हिनप्राप्नोति।मात्वावृकाअघायवोविदन्।अस्त्यत्रविशेषः।अन्तरेणाप्यत्रतृतीयस्यपदस्यप्रयोगं परेच्छागम्यते।कथंपुनरन्तरेणाप्यत्रतृतीयस्यपदस्यप्रयोगंपरेच्छागम्यते।तेचैवहिवृकाएवमात्मकाहिंस्राःक श्चात्मनअघमेषितुमर्हति।अतोऽन्तरेणापितृतीयस्यपदस्यप्रयोगंपरेच्छागम्यते।यद्येवंतर्हिछन्दस्यघशब्दा त्परेच्छायांक्यज्भवति।एवंभाषायामपिप्राप्नोतिअघमिच्छतीति।तस्मादात्मग्रहणंकर्तव्यम्।छन्दसिकथम्। आचार्यप्रवृत्तिर्ज्ञापयति।भवत्यघशब्दात् छन्दसिपरेच्छायांक्यजिति।यदयमाहअश्वाघस्यादिति।क्यचिप्रकृ तेरुत्वबाधनार्थमाकारंशास्ति।अथसुब्ग्रहणंकिमर्थम्।सुबन्तादुत्पत्तिर्यथास्यात्प्रातिपदिकान्माभूदिति।नै तदस्तिप्रयोजनम्।नास्त्यत्रविशेषः।सुबन्तादुत्पत्तौसत्यांप्रातिपदिकाद्वा।अयमस्तिविशेषः।सुबन्तादुत्पत्तौसत्यां पदसंज्ञासिद्धाभवति।प्रातिपदिकात्पुनरुत्पत्तौसत्यांपदसंज्ञानप्राप्नोति।ननुचप्रातिपदिकादप्युत्पत्तौसत्यांपद संज्ञासिद्धा।कथम्।आरभ्यते नःक्यइति।तच्चावश्यंवक्तव्यम्।सुबन्तादुत्पत्तौसत्यांनियमार्थम्।तदेवप्रातिपदिका दुत्पत्तौसत्यांविध्यर्थंभविष्यति।इदंतर्हिप्रयोजनम्।सुबन्तादुत्पत्तिर्यथास्याद् धातोर्माभूदिति।एतदपिनास्ति प्रयोजनम्।धातोःसन्विधीयतेसबाधकोभविष्यति।अनवकाशाहिविधयोबाधकाभवन्ति।नसावकाशाः।सावका शश्चसन्।कोऽवकाशः।परेच्छा।नपरेच्छायांसनाभवितव्यम्।किंकारणम्।समानकर्तृकादित्युच्यते।यावच्चेदात्मग्रह णंतावच्चतत्रसमानकर्तृकग्रहणम्।इदंतर्हिप्रयोजनम्।सुबन्तादुत्पत्तिर्यथास्याद्वाक्यान्माभूदिति।महान्तंपुत्रमि च्छति।नैवाभवति महापुत्रीयतीति।भवतियदैतद्वाक्यंभवति महान्पुत्रो महापुत्रः।महापुत्रमिच्छतिमहा पुत्रीयतीति।यदात्वेतद्वाक्यंभवति।महान्तंपुत्रमिच्छतीति।तदानभवितव्यम्।तदाचप्राप्नोति।तदामाभूदिति। अथक्रियमाणेऽपिसुब्ग्रहणेकस्मादेवात्रनभवति।सुबन्तंह्येतद्भवतिवाक्यम्।नैतत्सुबन्तम्।कथम्। प्रत्ययग्रहणेयस्मात्सतदादेर्ग्रहणंभवतीति।अथयदत्रसुबन्तंतस्मादुत्पत्तिःकस्मान्नभवति ॥

व्यादावारेक्यचःप्रयोगाभावादितिभावः।महान्तंपुत्रमिच्छतीति।यद्यत्रसुबन्तसमुदायात्परःक्यच्प्रत्ययःस्यात् तदाप्रत्ययार्थासंनि
धानेपदद्वयस्यप्रवर्तनात्स्वरस्यसमासाभावादुत्तरपद‾‾निबन्धनमात्त्वंनस्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानाधिकरणानामिति। समानाधिकरणानांपदानांमध्येएकेनपदेनायोगात्समुदायेनैवयोगाद्वृत्तिर्नभवतीत्यर्थः। सगुणस्यहिपुत्रस्येषिणासंबन्धोनकेवलस्येतिभावः। द्वितीयानुपपत्तिस्त्विति। यदिकेवलस्यप्रातिपदिकार्थस्येषिसंबन्धोनेष्यतेतदाकर्मत्वाभावा

समानाधिकरणानांसर्वत्रावृत्तिरयोगादेकेन। समानाधिकरणानांसर्वत्रवृत्तिर्नभवति। क्वसर्वत्र। समासविधौप्रत्ययविधौच। समासविधौतावत्। ऋद्धस्यराज्ञःपुरुषः। महत्कष्टंश्रितइति। प्रत्ययविधौ। ऋद्धस्योपगोरपत्यंमहान्तंपुत्रमिच्छतीति। किंपुनःकारणं समानाधिकरणानांसर्वत्रवृत्तिर्नभवतीति। अयोगादेकेन। नह्यत्रएकेनपदेनयोगोभवति। इहतावत ऋद्धस्यराज्ञःपुरुषइतिषष्ठ्यन्तस्यसुबन्तेनसामर्थ्येसतिसमासोविधीयते। यच्चात्रषष्ठ्यन्तं नतस्यसुबन्तेनसामर्थ्यम्। यस्यचसामर्थ्यंनतत्षष्ठ्यन्तंसमर्थम्। वाक्यंतत्। ऋद्धस्योपगोरपत्यमितिषष्ठीसमर्थादपत्येनयोगेप्रत्ययोविधीयते यच्चात्रषष्ठ्यन्तंसमर्थंनतस्यापत्येनयोगः। यस्यचापत्येनयोगो नतत्षष्ठीसमर्थम्। वाक्यंतत्। समानाधिकरणानामित्युच्यते। अथकथंव्यधिकरणानांराज्ञःपुत्रमिच्छतीति। एवंतर्हिइदंपठितव्यंसविशेषणानांसर्वत्रावृत्तिरयोगादेकेनेति। द्वितीयानुपपत्तिस्तु। द्वितीयातुनोपपद्यतेमहान्तंपुत्रमिच्छतीति। किंकारणम्। नपुत्रेइषिकर्म। यदिपुत्रोनेषिकर्म। नचावश्यंद्वितीयैव किंतर्हिसर्वाअत्रद्वितीयादयोविभक्तयोनस्युः। महतापुत्रेणकृतंमहतेपुत्रायदेहिमहतःपुत्रात् आनयमहतःपुत्रस्यस्वंमहतिपुत्रेनिधेहीति। तस्मान्नैतच्छक्यंवक्तुंनपुत्रइषिकर्मेति। पुत्रएवेषिकर्म। तत्सामानाधिकरण्यान्महतोपिद्वितीयादयोभविष्यन्ति। वृत्तिस्तर्हिकस्मान्नभवति। सविशेषणानांवृत्तिर्नवृत्तस्यवाविशेषणंनप्रयुज्यतइतिवक्तव्यम्। यदितर्हिसविशेषणानांवृत्तिर्न वृत्तस्यवाविशेषणंनप्रयुज्यतइतिउच्यते। मुण्डयति माणवकमत्रवृत्तिर्नप्राप्नोति। एवंतर्ह्यमुण्डादीनामितिवक्तव्यम्। तत्तर्हिवक्तव्यम्। सविशेषणानांवृत्तिर्नवृत्तस्यवाविशेषणंनप्रयुज्यते अमुण्डादीनामिति। नवक्तव्यम् ॥

त्केवलात्प्रातिपदिकाद्द्वितीयानप्राप्नोति। नापिसमुदायात्तस्याप्रातिपदिकत्वाद्गुणेचसंख्यायाविवक्षितत्वात्। पुत्रएवेति। तस्यैवेप्सिततमत्वाद्गुणानांचेप्साप्रकर्षाभावात्। स्वयमकर्मत्वेपितत्सामानाधिकरण्यनिबन्धनाविभक्तिरित्यर्थः। सविशेषणानामिति। एकस्यैकदाव्यपेक्षैकार्थीभावविरोधादितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अगमकत्वादिति। लौकिके प्रयोगेऽनुमानादपि गाव्यादिभ्यो गवाद्यर्थप्रतिपत्तिवद् महान्तं पुत्रमिच्छतीत्यादिवाक्यार्थस्य महान्तं पुत्रीयतीत्यादेः प्रतीतिर्नास्तीत्यर्थः। सिद्धानां च शब्दानां संकरनिरासाय अन्वाख्यानं क्रियते न त्वप्रयुक्तापूर्वशब्दव्युत्पादनाय। न ब्रूम इति। अपशब्दो हि लोके प्रयुज्यते साधुशब्दसमानार्थश्च अयं त्वप्रयुक्तत्वादपशब्दव्यपदेशस्यापि न भाजनमित्यर्थः। भावः कर्ता चेति। कर्मभावप्रतिपादनपरमेतत्। अधिकरणादौ हि ल्युडादयो यथायोगं भवन्त्येव। भावस्य च लकाराद्युत्पत्तिनिमित्ततया

वृत्तिस्तर्हि कस्मान्न भवति। महान्तं पुत्रमिच्छतीति। अगमकत्वात्। इह समानार्थेन वाक्येन भवितव्यं प्रत्ययान्तेन च। यश्चेहार्थो वाक्येन गम्यते महान्तं पुत्रमिच्छतीति। नासौ जातुचित्प्रत्ययान्तेन गम्यते महान्तं पुत्रीयतीति। एतस्माद्धेतोर्ब्रूमः अगमकत्वादिति। न ब्रूमः अपशब्दः स्यादिति। यत्र च गमकत्वं भवति तत्र वृत्तिस्तद्यथा मुण्डयति माणवकमिति। अथास्य क्यजन्तस्य कानि साधनानि भवन्ति। भावः कर्ता च। अथ कर्म। नास्ति कर्म। ननु चायमिषिः सकर्मकः। यस्यायमर्थे क्यज्विधीयते। अभिहितं तत्कर्मान्तर्भूतं धात्वर्थः संपन्नः। न चेदानीमन्यत्कर्मास्ति येन सकर्मकः स्यात्। कथं तर्ह्ययं सकर्मको भवति। अपुत्रं पुत्रमिवाचरति पुत्रीयति माणवकमिति। अस्त्यत्र विशेषः। द्वे ह्यत्र कर्मणी। उपमानकर्मोपमेयकर्म च। उपमानकर्मान्तर्भूतमुपमेयेन कर्मणा सकर्मको भवति। तद्यथा। अपिकाकः श्येनायत इति। अत्र द्वौ कर्तारौ। उपमानकर्ता उपमेयकर्ता च। उपमानकर्तान्तर्भूतः। उपमेयकर्त्रा सकर्तृको भवति। अयं तर्हि कथं सकर्मको भवति मुण्डयति माणवकमिति। अत्रापि द्वे कर्मणी सामान्यकर्म विशेषकर्म च। सामान्यं कर्मान्तर्भूतं विशेषकर्मणा सकर्मको भवति। ननु च वृत्त्यैवात्र न भवितव्यम् ॥

साधनव्यपदेशः। अभिहितमिति। ततश्च जीवतीत्यादिवदिच्छाक्यजन्तस्याकर्मकत्वात्कर्मणि लाद्यभावः। न चेदानीमिति। नियतविषयायाद्(?)इच्छायाः क्यजन्तेन प्रतिपादनात्तस्याश्च वस्त्वन्तरविषयीकरणाभावादिति भावः। कथं तर्हीति। अत्रापि पुत्रकर्मणोऽस्त्यन्तर्भाव इति प्रश्नः। द्वे इति। वाक्य एव कर्मद्वयमाकाङ्क्षितमित्यर्थः। मुण्डयतीति। मुण्डगुणविशिष्टं द्रव्यकर्मणो धात्वर्थेऽन्तर्भावादिति भावः। अत्रापीति। ण्यन्तो धातुर्द्रव्यमात्रमन्तर्भावयितुं शक्नोति न तु विशेषणं माणवकादिकमिति भावः। ननु चेति। यद्यप्येतच्चोदितं च परिहृतं च तथापि गमकत्वागमकत्वविषयविभागप्रदर्शनाय पुनरुपन्यासः ॥ रामः १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नान्त्रोभाविति। मौण्ड्यमेव करोति। युक्तमिति। मौण्ड्यं करोतीत्यस्मिन्नेवार्थे मुण्डयतीति णिजुत्पद्यत इत्यर्थः। मुण्डं करोति माणवकमित्यत्र तु वाक्ये कर्मत्वमेकस्यैव तत्सामानाधिकरण्यात्तु द्वितीयस्माद् द्वितीयोत्पत्तिः। गुणप्रधानभावश्चाविवक्षावशादनियत इति माणवकादयो मौण्ड्याधारविशेषप्रतिपत्त्यर्थमुपादीयमानाः करोतियुक्ता न भवन्तीत्यर्थः। मुण्डयतेश्च क्रियाविशेषवाचित्वात्तदपेक्षं माणवकादेः कर्मत्वमिति माणवकं मुण्डयतीत्यादिप्रयोगोपपत्तिः। तद्यथेति। बलीवर्दमेवात्मसंबन्धित्वेन करोति तं च मुण्डं करोतीति। युगपदुभयोः करोतिकर्मत्वे विवक्षिते मुण्डयति बलीवर्दमिति प्रयोगो न भवतीत्यर्थः। कामं तर्हीति। अत्रापि मौण्ड्यमेवेष्यते माणवकस्तु तदाधारविशेषप्रतिपादनायोपात्त इति भावः। उभावत्रेति। माणवकस्य मौण्ड्यकरणेन संस्कार्यत्वादुभयोः कर्मत्वे सापेक्षत्वादे

किंकारणमसामर्थ्यात्। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। नैष दोषः। नान्त्रोभौ करोतियुक्तौ मुण्डो माणवकश्च। नहि माणवकत्वं क्रियते। यदा चोभौ करोतियुक्तौ भवतः। न भवति तदा वृत्तिः। तद्यथा। बलीवर्दं करोति मुण्डं चैनं करोतीति। कामं तर्ह्यनेनैव हेतुना क्यजपि कर्तव्यः। माणवकं मुण्डमिच्छतीति। नोभावपि युक्ताविति। न कर्तव्यः। उभावत्रापि युक्तौ मुण्डो माणवकश्च। कथम्। नह्यसौ मौण्ड्यमात्रेण संतोषं करोति माणवकस्यासौ मौण्ड्यमिच्छति। इह हि तर्हि न प्राप्नोति मुण्डयति माणवकमिति। अत्रापि ह्युभौ करोतियुक्तौ मुण्डो माणवकश्च। नह्यसौ मौण्ड्यमात्रेण संतोषं करोति किं तर्हि माणवकस्यासौ मौण्ड्यं निर्वर्तयति। एवं तर्हि मुण्डादयो गुणवचनाः। गुणवचनाश्च सापेक्षाः। न त्ववचनात्सापेक्षाणां वृत्तिर्भविष्यति। अथवा धातव एवं मुण्डादयः। न चैवं ह्यर्था आदिश्यन्ते क्रियावचनता च गम्यते ॥

कतरस्मात्प्रत्ययोत्पत्तिर्न भवतीत्यर्थः। गुणवचनाश्चेति। वचनसामर्थ्यात्सापेक्षेभ्योपि मुण्डादिभ्यः प्रत्ययो भवति क्यच्प्रत्ययस्तु निरपेक्षेभ्यः पुत्रादिभ्यः सावकाश इति माणवकं मुण्डमिच्छतीत्यादौ सापेक्षेभ्यो न भवति। नन्वयमपि णिज् गुणमात्रविवक्षायां सावकाशो मुण्डयत्ययं नापितः प्रवीणो मौण्ड्यकरण इत्यर्थावगमात्। ततश्च द्रव्यविशेषापेक्षायां प्रत्ययो न प्राप्नोति। नैष दोषः। तत्करोतीति सिद्धे णिचि पुनर्विधानमिदं सापेक्षेभ्योपि मुण्डादिभ्यो यथा स्यादित्येवमर्थमेवाधातव इति। सौत्रा धातवो मुण्डादयस्तेभ्यश्चुरादिवत्स्वार्थिको णिजित्यर्थः। न चैवेति। यद्यपि क्रियाविशेषाभिधायित्वं मुण्डादीनां नैवोपात्तं तथापि स्वाभाविकत्वादर्थाभिधानस्य प्रयोगादेव तदवसीयत इत्यर्थः। यथा कण्ड्वादयो द्विविधास्तथा मुण्डादय इति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ·कै· मुण्डविशिष्टेनेति। पूर्वस्मिन्परिहारे कर्मविशेषानपेक्षायां प्रत्ययोत्पत्तिरित्युक्तम्। अस्मिंस्तु यथा गां दोग्धि पय इति शुद्धस्य दुहे ३१२
१६ र्गवा पूर्वसंबन्धः पश्चात्तु गोदुहि ना पयसः। एवं शुद्धः करोतिर्मौण्ड्येन संबध्यते मौण्ड्यविशिष्टस्तु माणवकेनेत्युच्यते। अनेनैव न्यायेन माणवकं मुण्डमिच्छतीति क्यच् प्राप्नोतीत्याशङ्क्याह। अथवेति। व्यापारो नाश्रयणीयः। प्रयत्नमन्तरेणापीष्टस्य सिद्धत्वादित्यर्थः। क्यच्त्वगमकत्वान्न भवति। तदुक्तं हरिणा। सद्पीच्छाक्यचः कर्म तदाचारक्यचाहृतम्। वाक्यवाच्यमतोऽप्यस्ते यथाभ्यासः क्रमादिष्विति। अथेहेति। इच्छाक्यजन्तात्कर्मणि प्रत्ययोत्पत्तिः प्रकारान्तरेणाशङ्क्यते। तथाहि। यद्यत्र क्यज्भवति तदेच्छामात्रस्य क्यचाभिधानाद्वश्यं कर्मणोऽभिधानाय तद्वाचिना प्रत्ययेनोत्पत्तव्यम्। यथा पुत्रीयतीति कर्त्रभिधानाय तिप्। स्वशब्देनेति। इष्टश्च।

अथवा नेदमुभयं युगपद्भवति वाक्यं च प्रत्ययश्च। यदा वाक्यं न तदा प्रत्ययः। यदा प्रत्ययः सामान्येन तदा वृत्तिर्भवति। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः। मुण्डयति कं माणवकमिति। मुण्डविशिष्टेन वा करोतिना नात्र मामिच्छति। अथवोक्तमेतत्। नात्र व्यापारोऽनुगन्तव्यः। गमकत्वादिह वृत्तिर्भविष्यति मुण्डयति माणवकमिति। अथेह क्यचा भवितव्यम्। इष्टः पुत्रः। इष्यते पुत्रः। केचित्तावदाहुः। न भवितव्यमिति। किं कारणम्। स्वशब्देनोक्तत्वात्। अपर आहुः। भवितव्यमिति। किं कारणम्। धात्वर्थे यं क्यज्विधीयते। स च धात्वर्थः केनचिदेव शब्देन निर्देष्टव्य इति। इह भवन्तस्तावदाहुः। न भवितव्यमिति। किं कारणम्। समानार्थेन वाक्येन भवितव्यं प्रत्ययान्तेन च। यश्चेहार्थो वाक्येन गम्यते। इष्टः पुत्रः। इष्यते पुत्र इति। नासौ जातुचित्प्रत्ययान्तेन गम्यते। क्यचि मान्ताव्ययप्रतिषेधः। क्यचि मान्ताव्ययानां प्रतिषेधो वक्तव्यः। इदमा भूत्। इदमिच्छति। किमिच्छति। उच्चैरिच्छति। नीचैरिच्छतीति॥

त्वसामानाधिकरण्यात्पुत्र इत्यनेन निर्मुक्ते षि क्रियापेक्षकर्मभावस्यार्थस्य प्रतिपादनादित्यर्थः। अयमर्थः। यदा क्रियाफलस्य कर्मणः प्राधान्यं प्रतिपिपादयिषितं तदा वाक्यमेव प्रयुज्यते पुत्र इष्ट इत्यादि। न तु क्यजन्तः। तस्याकर्मकत्वात् कर्मणि प्रत्ययानुत्पादात्। स च धात्वर्थ इति। इच्छायाः प्रत्ययार्थत्वं दर्शयितुं वाक्यमुपादेयम्। तत्र वाक्ये कर्तृप्रत्ययः प्रयुज्यतां कर्मप्रत्ययो वा। प्रत्यये तूत्पन्नेऽकर्मकत्वात्कर्मप्रत्ययो न भवति। नासौ जातुचिदिति। प्रत्ययान्तस्याकर्मकत्वात्कर्मणि प्र राम:
त्ययोत्पत्त्यसंभवादित्यर्थः॥ १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोस्समानाक्षरेति।अकाराद्यो दशसमानाः।तत्रलृवर्णान्तस्यप्रातिपदिकस्यासंभवादृकारान्तस्यचसप्तानांग्रहणम्।अस्मिंस्तुन्यासेव्याप्तिः।वाच्यतीत्याद्यसिद्धिप्रसङ्गात्।भाष्यकारेणतुमतभेदप्रदर्शनायोपन्यासि।क्राम्यच्च॥आदितइति।अन्तेपिकृत आदिकृतफलसंपादनादादितः संपद्यते।तथाहियदादोक्रियतेतदाककारस्यानादित्वादित्संज्ञानभवति।एवमन्तेपिकृतश्चितकार्येन्तोदात्तत्वेसिद्धेतियमार्थःसंपद्यते।चिदेवायंव्यपदेश्यः।नन्वनुबन्धान्तरेणकिदिति।यजादिभ्योयोविहितइति।अयं

गोस्समानाक्षरनान्तादित्येकेवक्तव्यमित्याहुः।गामिच्छतिगव्यति।समानाक्षर।घटीयतिदधीयतिमधूयतिकर्त्रीयति।नान्तात्।राजीयतितक्षीयति॥क्राम्यच्च॥किमर्थश्चकारः।स्वरार्थः।चितोन्तउदात्तोभवतीत्यन्तोदात्तत्वंयथास्यात्।नैतदस्तिप्रयोजनम्।धातुस्वरेणाप्येतत्सिद्धम्।ककारस्यतर्हीत्संज्ञापरित्राणार्थः।आदितश्चकारःकर्तव्यः।अतउत्तरंपठति।क्राम्यचश्चित्करणानर्थक्यंककारस्येदर्थाभावात्।क्राम्यचश्चित्करणमनर्थकंककारस्येत्संज्ञाकस्मान्नभवति।इदर्थाभावात्।इत्कार्याभावात्।अत्रेत्संज्ञानभविष्यति।ननुचलोपएवेत्कार्यम्।अकार्यंलोपः।इहहिशब्दस्यकार्यार्थोवास्यादुपदेशः।श्रवणार्थोवा।कार्यंचेहनास्ति।असतिकार्येयदिश्रवणमपिनस्यात्।उपदेशोऽनर्थकःस्यात्।इदमस्तिकार्यम्।अग्निचित्काम्यति।कितीतिगुणप्रतिषेधोयथास्यात्।नैतदस्तिप्रयोजनम्।सार्वधातुकार्धधातुकयोरङ्गस्यगुणउच्यते।धातोश्चविहितःप्रत्ययःशेष आर्द्धधातुकसंज्ञांलभते।नचायंधातोर्विधीयते।इदंतर्हिप्रयोजनम्।उपयट्काम्यति।कितीतिसंप्रसारणंयथास्यात्।एतदपिनास्तिप्रयोजनम्।यजादिभिरत्रकितंविशेषयिष्यामः।यजादीनांयःकिदितिकश्चयजादीनांकित्।यजादिभ्योयोविहितः।अथापिकथंचित्कार्यंस्यात्।एवमपिनदोषः।क्रियतेन्यासएवद्विचकारोनिर्देशः।सुपआत्मनःक्यच्क्राम्यच्चेति।अथवाछान्दसमेतत्।दृष्टानुविधिः छन्दसिभवति।नचात्रसंप्रसारणंदृश्यते॥उपमानादाचारे॥अधिकरणाच्च॥अधिकरणाच्चेतिवक्तव्यम्।इहापियथास्यात्।कुटीयतिप्रासादे।प्रासादीयतिकुट्याम्॥

तुसुबन्तादिहितः।अथापीति।यदायजादिभिःकिन्नविशेष्यतेकार्यितेनैवयजादयोनिर्दिश्यन्तइतिभावः।अथवेति।विजुपे छन्दसीतिविचश्छन्दसिविधानात्।इहवाक्काम्यतीतिसंप्रसारणंकित्कार्यम स्तितस्मात्पूर्वःपरिहारआश्रयणीयः।अथवाधातोःस्वरूपग्रहणेतत्प्रत्ययेकार्यविज्ञानम्॥उपमाना॥कुट्यामिति।उपमेयेसप्तमीश्रवणादुपमानमपिसप्तम्यन्तमितिकर्मविवक्षायामेतत्प्रयोगासंभवात्वार्त्तिकारम्भः॥

Nepal Sanskrit University, Balmeeki Campus, Kaṭhmandu

CC-0. In Public Domain. Digitization by eGangotri

आ·कै· कर्तुः क्यङ्॥सलोपविधौकर्तुरितिस्थानषष्ठीसकारेणकर्तुर्विशेषणात्तदन्तविधिसद्भावाद् हंसायतइत्यादौसलोपाभावः।सलोप ३।१।२
१७ सन्नियोगेनेति।एकवाक्यतांसंनियोगार्थंचशब्दंमत्वाचोदयति।वाक्यभेदमन्वाचयेचशब्दमाश्रित्यपरिहारः।अपरआहेति।मतभे
दप्रदर्शनायोपन्यासः नत्वयंस्थितः पक्षइत्याहुः।क्रियावचनतेति।आचारलक्षणक्रियावचनतेत्यर्थोविवक्षितोधातुपाठेहिपाठ

कर्तुःक्यङ् सलोपश्च॥सलोपसन्नियोगेनायंक्यङ् विधीयतेतेनयत्रैवसलोपस्तत्रैवक्यङ् स्यात्।पयायते इहन स्यात्।अपिकाकः श्येनायते।नैतदस्ति।प्रधानशिष्टः क्यङ् अन्वाचयशिष्टः सलोपः।यत्रचसकारंपश्यसीति। तद्यथा।कश्चिदुक्तोग्रामेभैक्षंचरदेवदत्तंचानय।सग्रामेभैक्षंचरति यदिचदेवदत्तंपश्यतितमप्यानयति।सलोपोवा ।सलोपोवेतिवक्तव्यम्।पयायतेपयस्यते।ओजोप्सरसोर्नित्यम्।ओजसोप्सरसोनित्यंसलोपोवक्तव्यः।ओजायमानंयोऽहिंजघान।अप्सरायते।अपरआह।सलोपोप्सरसएव।ओजस्तइत्येवभवितव्यम्।कथमोजायमानंयोऽहिंजघानेति। छान्दसत्वात्सिद्धम्।आचारेवगल्भक्लीबहोडेभ्यः क्विब्वा।आचारेवगल्भक्लीबहोडेभ्यः क्विब्वावक्तव्यः।अवगल्भते।अवगल्भायते।विक्लीबते।विक्लीबायते।विहोडते।विहोडायते।किंप्रयोजनम्।क्रियावचनतायथागम्येत।नैतदस्तिप्रयोजनम्।धातवएवावगल्भादयः।नचैवह्यर्थाआदिश्यन्तेक्रियावचनताचगम्यते।इदंतर्हिप्रयोजनम्।अवगल्भा विक्लीबा विहोडा।अप्रत्ययादित्यकारप्रत्ययो यथास्यात्।माभूदेवम्।गुरोश्चहलइत्येवंभविष्यति।इदंतर्हिप्रयोजनम्।अवगल्भांचक्रे।विक्लीबांचक्रे।विहोडांचक्रे।कास्प्रत्ययादाममन्त्रेलिटीत्याम् प्रत्ययोयथास्यात्।अपरआह।सर्वप्रातिपदिकेभ्यआचारेक्विब्वावक्तव्यः।अश्वति।गर्दभ—तीत्येवमर्थम्।नतर्हिइदानींगल्भाद्यनुक्रमणंकर्तव्यम्।कर्तव्यंच।किंप्रयोजनम्।आत्मनेपदार्थाननुबन्धानासंस्यामीति।गल्भ क्लीबहोड ॥

तेषांक्रियावचनतासिद्धैव।नचैवहीति।अनेकार्थत्वाद्धातूनामाचारक्रियावृत्तित्वस्यासिद्धत्वादित्यर्थः।अश्वतीति।प्राति
पदिकादेवायंक्विब्विधीयतेसुबन्तात्तेनपदत्वाभावादतोगुणइतिपररूपत्वंभवति।एतच्चसर्वेभ्यइतिवक्तव्येसर्वप्रातिप राम:
दिकेभ्यइतिवचनाल्लभ्यते।आत्मनेपदार्थानिति।वाक्येऽकारस्यानुदात्तत्वानुनासिकत्वेप्रतिज्ञातेइतिभावः ॥ १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भृशादिभ्यो॥ हलइति। हला भृशादयो विशेष्यन्ते तेन हलन्तानामेव क्यङ् लोपाभ्यां भवितव्यमित्यर्थः। प्रधानशिष्ट इति। वाक्यभेदेन सर्वेभ्यो भृशादिभ्यः क्यङं विधाय हलन्तानां लोपो विधीयत इत्यर्थः। अन्यथाऽनर्थकः पाठः स्यादहलन्तानाम्। क्वदिवा भृशा भवन्ती ति। येरात्रौ भृशा आलोकास्ते दिवसे क्व प्रदेशे भवन्तीत्यर्थः। अत्राभूततद्भावाभावः। च्विनोक्तत्वादिति। च्विसहचरितेन भवतिनेत्यर्थः। डाचिवचनप्रामाण्यादिति। अप्रयुक्त एव भवतौ भवत्यर्थविवक्षायां वचनप्रामाण्याड्डाचं विधाय भवत्यर्थे क्यषि विधीयत इत्यर्थः। यथा

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः॥ हलो लोपसन्नियोगेनायं क्यङ् विधीयते। तेन यत्रैव हलो लोपः तत्रैव प्राप्नोति। नैष दोषः। प्रधानशिष्टः क्यङ् अन्वाचयशिष्टो हलो लोपः। यत्र च हलं पश्यसीति। भृशादिष्वभूततद्भावग्रहणम्। भृशादिष्वभूततद्भावग्रहणं कर्तव्यम्। इह माभूत्। क्वदिवा भृशा भवन्तीति। च्विप्रतिषेधानर्थक्यं च भवत्यर्थे क्यङ् वचनात्। च्विप्रतिषेधश्चानर्थकः। किं कारणम्। भवत्यर्थे क्यङ्वचनात्। भवत्यर्थे क्यङ् विधीयते। भवति योगे च्विविधानम्। भवतिना योगे च्विर्विधीयते। तत्र च्विनोक्तत्वात्तस्यार्थस्य क्यङ् न भविष्यति। डाजन्तादपि तर्हि न प्राप्नोति पटपटायते। डाजपि हि भवतिना योगे विधीयते। भत्यर्थे क्यष् विधीयते। डाचि वचनप्रामाण्यात्। डाचि वचनप्रामाण्याद्भविष्यति। किं वचनप्रामाण्यम्। लोहितादिडाज्भ्यः क्यष् इति। इह किंचित्क्रियमाणं चोद्यते। किंचिच्च क्रियमाणं प्रत्याख्यायते। सूत्रभेदः कृतो भवति। यथान्यासमेवास्तु। ननु चोक्तमिह कस्मान्न भवति क्वदिवा भृशा भवन्तीति। नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः। नञ्युक्तमिवयुक्तं वा यत्किंचिदिह दृश्यते ततः अन्यस्मिंस्तत्सदृशे कार्यं विज्ञायते तथा ह्यर्थो गम्यते। अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृश एवानीयते नासौ लोष्टमानीय कृती भवति। एवमिहाप्यच्वेरिति प्रतिषेधादन्यस्मिन्नच्व्यन्ते च्विसदृशे कार्यं विज्ञायते। किं चान्यदतोऽच्व्यन्तं च्विसदृशम्। अभूततद्भावः। इह काश्चित्प्रकृतयः सोपसर्गाः पठ्यन्ते।

न्यासमिति। अच्वेरिति पर्युदासाश्रयेण दोषद्वयस्यापि परिहार इत्यर्थः। इह काश्चिदिति। यदा मनः शब्देनासमस्ता एव सू दुर् भयइ तिपक्षस्तदा प्रत्ययार्थविशेषणं ते भवन्ति। मनः शब्दश्चावृत्तिविषये तद्वृत्तिवर्तते। मनस्वी सुष्ठु भवति। उद्भवति दुष्ठु भवति। आभिमुख्येन भवतीत्यत्रार्थे क्यङ् विधिः। अन्ये त्वाहुः। प्राप्त्यर्थस्यात्र वृत्तिविषये भवतेर्ग्रहणं तेन मनः कर्म शोभनं प्राप्नोतीत्यादिरर्थः क्यङन्तस्य भवति। यदा तु मनः शब्देन स्वादीनां बहुव्रीहिरिति पक्षः तदा प्रकृत्यर्थविशेषणं ते भवन्तीति विचारः क्रियते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राक्प्रकृतेरिति। प्रकृतेरेवावयवाः पूर्वभूताः पठ्यन्त इत्यर्थः॥ निघात इति। मनःशब्दात् क्यङि कृते मनायत इत्यस्य तिङन्तस्य प
दस्यातिङन्तात्त्वादेः पदादुत्तरत्वात्। प्रकृत्यर्थविशेषणत्वे तु सुमनायत इत्यादि तिङन्तं संपद्यत इति तद्व्यतिरिक्तपदान्तराभा
वान्निघाताभावः। उपसर्गस्य तु धात्वन्तर्भावात्ततः पूर्वमडादौ प्राप्नुतः। क्यङन्ते च तस्यानुप्रवेशान्तद्व्यतिरिक्तपदाभावात्समासा
भावाल्ल्यपोऽप्रसङ्गः। क्यङन्ताच्च सनि कृते सोपसर्गस्य द्विर्वचनप्रसङ्गः। अवश्यमिति। ग्रामशब्द एव युद्धे वर्तते सामान्यतो दृष्टा

अभिमनस् सुमनस् उन्मनस् दुर्मनस्। तत्र विचार्यते। भृशादिषूपसर्गः प्रत्ययार्थविशेषणं वा स्यात्। अभिभव
तौ सुभवतौ उद्भवतौ दुर्भवताविति। प्रकृत्यर्थविशेषणं वा। अभिमनस्शब्दात् सुमनस्शब्दात् उन्मनस्शब्दा
त् दुर्मनस्शब्दा इति। युक्तं पुनरिदं विचारयितुम्। नन्वनेनासंदिग्धेन प्रकृत्यर्थविशेषणेन भवितव्यम्। यावता
प्राक्प्रकृतेः पठ्यन्ते। यदि प्रत्ययार्थविशेषणं स्युः प्राग्भवतेः पठ्येरन्। नेमे शक्याः प्राग्भवतेः पठितुम्। एवं हि वि
शिष्टप्रत्ययार्थे भृशादिमात्रादुत्पत्तिः प्रसज्येत। तस्मान्नैवं शक्यं वक्तुम्। न चेदेवम्। जायते विचारणा। कश्चात्र वि
शेषः। भृशादिषूपसर्गः प्रत्ययार्थविशेषणमिति चेत्स्वरे दोषः। भृशादिषूपसर्गः प्रत्ययार्थविशेषणमिति चेत्स्वरे
दोषो भवति। अभिमनायते। तिङ्ङतिङ इति निघातः प्रसज्येत। अस्तु तर्हि प्रकृत्यर्थविशेषणम्। सोपसर्गादिति चेदटि
दोषः। सोपसर्गादिति चेदटि दोषो भवति। स्वमनायतेति। अत्यल्पमिदमुच्यते। अट्ल्यप्द्विर्वचनेषु। अट्ल्य
प्द्विर्वचनेष्विति वक्तव्यम्। अटि उदाहृतम्। ल्यपि। सुमनाय्य। द्विर्वचने। अभिमिमनायिषते। नैष दोषः। अवश्यं
संग्रामयतेः सोपसर्गादुत्पत्तिर्वक्तव्या। अंससंग्रामयत शूर इत्येवमर्थम्। तन्नियमार्थं भविष्यति। संग्रामयतेरे
व सोपसर्गान्नान्यस्मात्सोपसर्गादिति॥

च्चानुमानात् क्रियाविशेषस्य द्योतकः संशब्दः। तथा च वा पदान्तस्येति परसवर्णविकल्पो भवति। उपसर्गसदृशानर्थकशब्दान्तरा
वयवे तु संग्रामशब्दे ऽनुपगम्यमाने परसवर्णविकल्पो न स्यात्। तत्र ग्रामयुद्ध इत्येव वक्तव्यं संशब्दस्तु द्योतकः प्रयोगदर्शनाल्लभ्यते।
यथा इक् स्मरणे इङ् अध्ययने इत्यनयोः अधिः। नियमार्थस्तु संग्रामेति पाठः। नियमार्थत्वे च प्रत्ययोत्पत्तावुपसर्गः पृथक् क्रियते। अतो
धातौ तेषामनन्तर्भावात् यथेष्टमडादिसिद्धिः। प्रत्ययार्थविशेषणपक्षे तु विरोधाद्भूततद्भावविषयत्वं नाश्रीयते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असंग्रामयतेति। संग्रामयतिरनुदात्तेद्बोद्धव्यः। लोहितादि॥ भुरण्युरिति। कण्ड्वादियगन्तादुप्रत्ययः। उरुष्येति। सुपांसुलुगितित्वनी

यदिनियमः क्रियते। स्वरोनसिध्यति। एवंतर्हि भृशादिषुउपसर्गस्यपराङ्गवद्भावंवक्ष्यामि। यदिपराङ्गवद्भावउच्यते। अट्कुप्पद्विर्वचनानिनसिध्यन्ति। स्वरविधाविति वक्ष्यामि। एवंचकृत्वासुप्रत्ययार्थविशेषणमपि। ननुचोक्तं भृशादिषूपसर्गः प्रत्ययार्थविशेषणमितिचेत्स्वरेदोषइति। स्वरेपराङ्गवद्भावेनपरिहृतम्। अयंतर्हिप्रत्ययार्थविशेषणेसतिदोषः। क्यङोक्तत्वात्तस्यार्थस्यउपसर्गस्यप्रयोगोनप्राप्नोति। किंकारणम्। उक्तार्थानामप्रयोगइति। तद्यथा। अपिकाकः श्येनायतेइत्यत्रक्यङोक्तत्वादाचारार्थस्य आङ्प्रयोगोनभवति। अस्त्यत्रविशेषः। एकेनात्र विशिष्टप्रत्ययार्थेप्रत्ययउत्पद्यते। इहपुनरनेकेनतत्रमनायतइत्युक्तेसंदेहः स्यात्। अभिभवतौ सुभवतौ दुर्भवतौउद्भवताविति। तत्रासंदेहार्थमुपसर्गः प्रयुज्यते। यत्रतर्ह्येकेनउत्पुच्छयते। अत्राप्यनेकेन। केन। पुच्छादुदसनेपुच्छाद्व्यसनेपुच्छात्पर्यसनेचेति॥ लोहितादिडाज्भ्यः क्यष्॥ किमर्थः ककारः। गुणवृद्धिप्रतिषेधार्थः। क्ङितिचेतिगुणवृद्धिप्रतिषेधोयथास्यात्। नैतदस्तिप्रयोजनम्। सार्वधातुकार्द्धधातुकयोरङ्गस्यगुणउच्यते। धातोश्चविहितः प्रत्ययः शेषआर्द्धधातुकसंज्ञांलभते। नचायंधातोर्विधीयते। लोहितादीनिप्रातिपदिकानि। सामान्यग्रहणार्थस्तर्हि। क्व सामान्यग्रहणार्थेनार्थः। नः क्ये इति। नायंनान्ताद्विधीयते। इहतर्हियस्यहलः क्यस्यविभाषेति। नायंहलन्ताद्विधीयते। इहतर्हिआपत्यस्यचतद्धितेनातिक्यच्व्योश्चेति। नायमापत्याद्विधीयते। इहतर्हिक्याच्छन्दसीति। याच्छन्दसीत्येवतद्वक्तव्यम्। चुरण्युस्तुरण्युर्भुरण्युरित्येवमर्थम्। इदंतर्हिप्रयोजनम्। यत्तदक्कृद्यकारइति दीर्घत्वम्। तत्रक्ङिद्ग्रहणमनुवर्तते। तदिहापियथास्यात्। लोहितायतीति। किंपुनः कारणंतत्रक्ङिद्ग्रहणमनुवर्तते। इहमाभूत्। उरुयाधृष्णुयेति। यदितत्रक्ङिद्ग्रहणमनुवर्त्तते। पित्र्यमितिरीङ्भावोनप्राप्नोति। रीङ्भावेक्ङिद्ग्रहणंनिवर्तिष्यते। यदिनिवर्त्तते। कथमसूयावसूयाचयजामहइति। असूयतेरसूयावसूयतेर्वसूया। अथवा छान्दसमेतत्। दृष्टानुविधिश्छन्दसिभवति॥

यास्यानेयादेशः। पित्र्यमिति। पितुरागतमितिपितुर्यच्चेतियत्प्रत्ययः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदीति। यदिरीङ्ङ्वद्एवनिवर्तते न तु दीर्घविधावपि तदा असुवसुशब्दाभ्यां पूर्ववद्यादेशे कृते दीर्घाभावादसूयावसूये तिन सिद्ध्यति। असूयतेः कण्ड्वादियगन्तस्यासूया। वसूयतेरिच्छाक्यजन्तस्य वसूयेत्युत्तरम्। अथवेति। वर्णव्यत्ययेन दीर्घः क्रियत इत्यर्थः। यदीति। अनेन ककारः प्रत्याख्यातः। इदानीं षकारप्रत्याख्यानाय विचारः क्रियते। अथ किमर्थ इति। पाश्येति। पाशादिभ्यो यद् इति समूहे यप्रत्ययः। वाय्यादिति सूत्रं विध्यर्थं मन्यते। टापि कृत एकादेशस्यान्तवद्भावाद्यप्रत्ययान्तमेतत्। नैतदस्ति

यदिच्छान्दसत्वं हेतुः। नार्थः क्विद्ग्रहणेनानुवर्तमानेन। कस्मान्न भवति उरुया धृष्णुयेति। छान्दसत्वात्। अथवास्त्वदीर्घत्वं छान्दसं ह्रस्वत्वं भविष्यति। तद्यथा। उपगायन्तु मा पत्नयो गर्भिणयो युवतय इति। अथ किमर्थः षकारः। विशेषणार्थः। क्व विशेषणार्थेनार्थः। वाक्यष इति। वाय्यादिति ह्युच्यमाने पाश्या अत्रापि प्रसज्येत। नैतदस्ति प्रयोजनम्। परस्मैपदमित्युच्यते। न चात्र परस्मैपदं नाप्यात्मनेपदं पश्यामः। सामान्यग्रहणाविघातार्थस्तर्हि भविष्यति। क्व सामान्यग्रहणाविघातार्थेनार्थः। क्याच्छन्दसीति। याच्छन्दसीत्येव च तद्वक्तव्यम्। चुरण्युः तुरण्युर्भुरण्युरित्येवमर्थम्। लोहितडाज्भ्यः क्यष्वचनम्। लोहितडाज्भ्यः क्यष्वक्तव्यः। लोहितायति लोहितायते। पटपटायति पटपटायते। दमदमायति। दमदमायते। मटमटायति मटमटायते। अथान्यानि लोहितादीनि। भृशादिष्वितराणि। भृशादिष्वितराणि पठितव्यानि। किं प्रयोजनम्। ङित इति नित्यमात्मनेपदं यथा स्यात्। लोहितादि॥ कष्टाय क्रमणे। कष्टायेति किं निपात्यते। कष्टशब्दाच्चतुर्थीसमर्थात्क्रमणे ऽनार्जवे क्यङ् निपात्यते। कष्टाय कर्मणे क्रामति कष्टायते। अत्यल्पमिदमुच्यते। कष्टायेति। सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायाम्॥ सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम्। सत्रा। सत्रायते। सत्रा। कक्ष। कक्षायते। कक्ष। कृष्ट। कष्टायते। कष्ट। कृच्छ्र। कृच्छ्रायते। कृच्छ्र। गहन। गहनायते। गहन। अपर आह। सत्रादिभ्यश्चतुर्थ्यन्तेभ्यः क्रमणे ऽनार्जवे क्यङ् वक्तव्यः। तान्येवोदाहरणानि। सत्रादिभ्य इति किमर्थम्। कुटिलाय अनुवाकाय क्रामति।

ति। सामान्यविहितानामात्मनेपदपरस्मैपदानां नियमार्थं प्रकरणमित्यदोषः। लोहितडाज्भ्य इति। आदिशब्दप्रत्याख्यानमेतत्। अपठितसंग्रहार्थो ह्यादिशब्दो न भवति तस्य वार्तिककारेण दूषितत्वात्। कष्टाय॥ कष्टायेति किं निपात्यत इति। विधावनार्जवमेव क्रमणमिति विशेषो न लभ्यत इति क्रमणविशेषलाभाय निपातनाश्रयणम्। सत्रेति। सत्रादयोऽत्र वृत्तिविषये पापपर्यायाः कण्वं पापमुच्यते। कुटिलायेति। दुरध्येयत्वादनुवाकस्यानार्जवमस्तीति भावः। रम॰ १९

CC-0. In Public Domain. Digitization by eGangotri

अजइति। अनार्जवयुक्तंपथ्यानंगच्छतीत्यर्थः। कष्टायपदिति। कष्टलक्षणार्थंप्रतिपादनाययत्प्रातिपदिकंप्रयुज्यतेतस्मात्क्रमणे। र्थेक्यङ्भवतीत्यर्थः। क्रमणविशेषश्चानार्जवमभिधानशक्तिस्वाभाव्याल्लभ्यते। व्यवस्थितविभाषाविज्ञानाच्चपापादिभ्योतिप्रसङ्गाभावः। कर्मणो॥ उद्गीर्णस्येति। मुखप्रदेशआकृष्टस्येत्यर्थः। अवगीर्णस्येति। अपानप्रदेशान्निःसृतस्येत्यर्थः। हनुचलनइति। हनुचलनसहचरितंचर्वितस्यमुखप्रदेशआकृष्यपच्चर्वणंतत्रयथास्यादित्यर्थः। कीटइति। अपानप्रदेशान्निःसृतमश्नातीत्यर्थः।

चतुर्थ्यन्तेभ्यइतिकिमर्थम्। अजःकष्टंक्रामति। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। नेदंप्रत्ययान्तनिपातनम्। किंतर्हि तादर्थ्यएषाचतुर्थी। कष्टाययत् प्रातिपदिकं कष्टार्थंयत्प्रातिपदिकमितिकष्टाय॥ कर्मणोरोमन्थतपोभ्यांवर्तिचरोः॥ रोमन्थइत्युच्यते। कोयंरोमन्थोनाम। उद्गीर्णस्यवावगीर्णस्यवामन्थोरोमन्थः। यद्येवंहनुचलनइतिवक्तव्यम्। इहमाभूत्। कीटोरोमन्थंवर्तयतीति। तत्तर्हिवक्तव्यम्। नवानभिधानात्। नवावक्तव्यम्। कस्मान्नभवतिकीटोरोमन्थंवर्तयतीति। अनभिधानात्। तपसःपरस्मैपदंच॥ तपसःपरस्मैपदंचेतिवक्तव्यम्। तपश्चरति। तपस्यति कथंतपस्यतेलोकजिगीषुरग्रैःक्षान्त्सत्वाद्भविष्यति। कर्मणो॥ वाष्पोष्मभ्यामुद्वमने। फेनाच्च॥ फेनाच्चेतिवक्तव्यम्। फेनायते। बाष्पोंशब्दवैरकलहाभ्रकण्वमेघेभ्यःकरणे॥ अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणम्। अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणंकर्तव्यम्। अटा। अटायते। अट्टा। अट्टायते। शीका। शीकायते। कोटा। कोटायते। पोटा। पोटायते। सोटा। सोटायते। प्रुष्टा। प्रुष्टायते। प्लुष्टा। प्लुष्टायते। सुदिनदुर्दिनाभ्यांच॥ सुदिनदुर्दिनाभ्यांचेतिवक्तव्यम्। सुदिनायते। दुर्दिनायते। नीहाराच्च॥ नीहाराच्चेतिवक्तव्यम्। नीहारायते। शब्दवैरसुखादिभ्यःकर्तृवेदनायाम्॥ कर्तृवेदनायामितिकिमर्थम्। इहमाभूत्। सुखंवेदयतेप्रसाधकोदेवदत्तस्य। कर्तृवेदनायामित्युच्यमानेपिअत्रप्राप्नोति। किंकारणम्। कर्तुरितीयंकर्तरिषष्ठी। वेदनायामितिआत्मनोभावे। सयद्येवात्मनोवेदयते। अथापिपरस्य कर्तृवेदनैवासौभवति। नकर्तृग्रहणेनवेदनाभिसंबध्यते। किंतर्हिसुखादीन्यभिसंबध्यन्ते। कर्तुर्यानि सुखादीनीति॥

अनभिधानादिति। रोमन्थायतइतिक्यङन्तेनलौकिकेप्रयोगेचर्वितचर्वणस्यैवाभिधानं नत्वर्थान्तरस्येत्यर्थः। सुखादिभ्यः॥ किंतर्हीति। वेदनायाःकर्तारमन्तरेणाभावात्कर्तृग्रहणसामर्थ्यात्सुखादीनिविशेष्यन्ते। कर्तृग्रहणंचसुपांसुलुगितिषष्ठीलुकानिर्दिष्टम्। ननुचवेदयितायदात्मसंबन्धीनिसुखादीनिवेदयते तदाप्रत्ययोनान्य दीयसुखादिवेदने ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमोवरिव॥प्रकृत्यन्तरत्वादिति।नमस्येतिधातुंमुत्पादयितुंनिपातनमः शब्दसदृशशब्दान्तरावयवकल्पनाक्रियते।परमार्थतस्तुअविद्यमानावयवार्थोनमस्शब्दः पूजावाचीप्रकृत्यन्तरमित्यर्थः।ननुचेति।सएवायमितिप्रत्यभिज्ञानान्निपातएवायमितिभावः। अर्थवतद्विति।नमस्शब्दस्यसमुदायस्यैवार्थवत्त्वादितिभावः।अथवेति।अर्थवत्त्वास्युपगमेननमस्कारेणपूजयतीत्यर्थाङ्गीकारेण

नमोवरिवश्चित्रङः क्यच्॥नमसः क्यचिद्वितीयानुपपत्तिः।नमसः क्यचिद्वितीयानोपपद्यते।नमस्यतिदेवानिति। किंकारणम्।नमः शब्देनयोगेचतुर्थीविधीयतेसाप्राप्नोति।प्रकृत्यन्तरत्वात्सिद्धम्।नमः शब्देनयोगेचतुर्थीविधीयते।नमस्यतिशब्दस्त्वायम्।ननुचनमस्यतिशब्देनमः शब्दोऽस्तितेनयोगेप्राप्नोति।नैषदोषः।अर्थवतोनमः शब्दस्यग्रहणम्।नचनमस्यतिशब्देनमः शब्दोऽर्थवान्।अथवोपपदविभक्तेः कारकविभक्तिर्बलीयसीतिद्वितीयाविभक्तिर्भविष्यति।क्यजादिषुप्रत्ययार्थनिर्देशः।क्यजादिषुप्रत्ययार्थनिर्देशः कर्तव्यः।नमसः पूजायाम्।वरिवसः परिचर्यायाम्।चित्रङ आश्चर्ये।भाण्डात्समाचयने।चीवरादर्जनेपरिधानेच।पुच्छादुदसनेव्यसनेपर्यसनेचेति।किंप्रयोजनम्।क्रियावचनतायथास्यात्।नैतदस्तिप्रयोजनम्।आचार्यप्रवृत्तिर्ज्ञापयतिक्रियावचनाः क्यजादयइति। यदयंसनाद्यन्ताधातवइतिधातुसंज्ञांशास्ति।कथंकृत्वाज्ञापकम्।धातुसंज्ञावचन ॱएतत्प्रयोजनं धातोरितितव्यदादीनामुत्पत्तिर्यथास्यात्।यदिचात्रक्रियावचनतानस्याद् धातुसंज्ञावचनमनर्थकंस्यात्।सत्स्वामपिधातुसंज्ञायांतव्यदादयोनस्युः।किंकारणम्।साधनेतव्यदादयोविधीयन्ते।साधनंचक्रियायाः।क्रियाभावात्साधनाभावः।साधनाभावात्सत्यामपिधातुसंज्ञायांतव्यदादयोनस्युः।पश्यतित्वाचार्यः क्रियावचनाः क्यजादयइति।ततः सनाद्यन्ताधातवइतिधातुसंज्ञांशास्ति।ननुचेदंप्रयोजनंस्यात्।परसाधनेतव्यदादीनामुत्पत्तिंवक्ष्यामीति ॥

परिहारान्तरम्।चतुर्थ्यास्तुनमोऽस्तुदेवेभ्यइत्यादिरवकाशः।नमस्करोमिनारायणमित्यत्रापिकारकविभक्तिरेवभवति।क्यजादिष्विति।करणग्रहणस्यवेदनाग्रहणेनव्यवधानादनधिकारेस्वार्थेप्रत्ययप्रसङ्ग इतिवचनम्।वरिवसइति।सपर्यासेवा।परिचर्यायामितिपाठान्तरम्।परसाधनइति।शब्दान्तरवाच्यायांक्रियायांयत्कर्मादिकारकंतत्रतव्यादीनांवृक्षंपश्येत्यादौद्वितीयादीनामिवस्वार्थिकताद्रव्यवाचित्वेपिक्यजाद्यन्तानामुत्पत्तिः स्यादेवेतिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपरसाधनइति। द्वितीयादीनां प्रातिपदिकाद्विधानात् तस्य च द्रव्यवचनत्वादिह वचनप्रामाण्यात्परसाधनउत्पत्तिर्भवति। तव्यादयस्तु धात्वन्तरेषु क्रियावाचिषु स्वसाधनेसावकाशाः। परसाधनेनोत्पद्यन्त इत्यर्थः। अथवेति। अभिधानशक्तिस्वाभाव्यादन्तरेणाप्यर्थादेशनं विशिष्टक्रियावचनत्वस्यसिद्धत्वादित्यर्थः। चित्रयतीति। चित्रं वैचित्र्यकरणइतिचौरादिकस्यरूपमनेकं मार्गमाश्रयतीत्यर्थः। क्रिया

नपरसाधनेउत्पत्त्याभवितव्यम्। किंकारणम्। साधनइतिसंबन्धिशब्दोयम्। संबन्धिशब्दाश्चपुनरेवमात्मका यदुतसंबन्धिनमाक्षिपन्ति। तद्यथा। मातरिवर्तितव्यं पितरिशुश्रूषितव्यमिति। नचोच्यतेस्वस्यां मातरिस्वस्मिन्पितरीति। संबन्धाच्चैतद्गम्यते यायस्यमातायश्चयस्यपितेति। एवमिहापिसंबन्धादेतद्गन्तव्यम्। यस्यधातोर्यत्साधनमिति। अथवाधातवएवक्यजादयः नचैवह्यर्थाआदिश्यन्तेक्रियावचनताचगम्यते। कःखल्वपिपचादीनांक्रियावचनत्वेयत्नंकरोति येनैवखल्वपिहेतुनापचादयः। क्रियावचनास्तेनैवक्यजादयोपि। एवमर्थंखल्वप्याचार्यश्चित्रयति क्वचिदर्थानादिशति। क्वचिन्नेति। एवमप्यर्थादेशनंकर्तव्यम्। कथमिमेअबुधाबुध्येरन्निति। अथवाशक्यमेवार्थादेशनमकर्तुम्। कथम्। करणइतिवर्तते। करणंचकरोतेरर्थः। करोतिश्चक्रियासामान्येवर्तते। नमोवरि॥ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्योणिच्। इमौहलिकलीस्तःइकारान्तौ। हलिःकलिः। अस्तिहलशब्दःकलशब्दश्चाकारान्तः। कयोरिदंग्रहणम्। याविकारान्तौतयोरत्वंनिपात्यते। किंप्रयोजनम्। हलिकल्योरत्वनिपातनंसन्वद्भावप्रतिषेधार्थम्। हलिकल्योरत्वनिपातनंक्रियतेसन्वद्भावोमाभूदिति। अजहलत् अचकलत्। नैतदस्तिप्रयोजनम्। इकारलोपेकृतेअग्लोपिनांनेतिप्रतिषेधोभविष्यति। वृद्धौकृतायांलोपः तत्राग्लोप्यङ्गंभवति। इदमिहसंप्रधार्यंवृद्धिःक्रियतां लोपइति। किमत्रकर्तव्यम्। परत्वाद्वृद्धिः। नित्योलोपः कृतायामपिवृद्धौप्राप्नोतिअकृतायामपिप्राप्नोति॥

सामान्यइति। सामान्येनचविशेषाणामाक्षेपात्क्वचिन्प्रत्ययः क्वचिद्विशेषेभवतीत्यर्थः। नचवेदनाग्रहणेनकरणस्यविच्छेदः। तयोर्विरोधाभावात्। मुण्डमिश्र॥ कयोरिदंग्रहणमिति। किमिकारान्तयोः कृतात्वयोर्ग्रहणमुताकारान्तयोरेवेतिप्रश्नः। किंप्रयोजनमिति। हलिकलिइत्येवकस्मान्नक्रियतइत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै शब्दान्तरस्यचेति। यद्यपिवृद्धौकृतायामपिलोपस्यप्रवृत्तिस्तथापिवाचनिकत्वस्यानित्यत्वम्। अथवाअन्यस्यप्रवृत्तावप्यन्यस्यस्यानि ३।१२
२१ नोऽप्रवृत्त्यालोपस्यानित्यत्वम्। अन्यस्यकृतेलोपइति। अतउपधायाइत्यनेनाकारस्येत्यर्थः। ननुलोपस्यस्थानिवद्भावात्कथमकारस्य
प्राप्नोति। नैषदोषः। प्राप्तौसत्यांस्थानिवद्भावेनप्रतिबन्धःक्रियते। पूर्वस्यविधौस्थानिवद्भावविधानात्। अप्राप्तौतुपूर्वविध्यभावात्स्थानि
वद्भावएवनस्यात्। यद्यपिभिन्नलक्षणाभिन्नस्वभावाचवृद्धिस्तथापिवृद्धिशब्दवाच्यत्वादभेदमाश्रित्यशब्दान्तरप्राप्त्यावृद्धेरनित्यत्वं
कथितम्। तत्रतत्तुलोपेकृतेवृद्धेःप्राप्त्याऽनित्यत्वंवक्तव्यम्। न्यायव्युत्पादनायत्वन्यथाभिहितम्। सूत्रंचेदंप्रातिपदिकाद्धात्वर्थइ
तिणिचिसिद्धेप्रपञ्चार्थमित्याहुः। नचतत्करोतीत्यादिनातत्रधात्वर्थनियमःक्रियते। राजानमतिक्रान्तवानस्यराजदित्यादावपिणिचो

वृद्धिरपिनित्या। कृतेपिलोपेप्राप्नोत्यकृतेपि। अनित्योलोपः। अन्यस्यकृतायांवृद्धौप्राप्नोत्यन्यस्याकृतायाम्। शब्दान्त
रस्यचप्राप्नुवन्विधिरनित्योभवति। वृद्धिरप्यनित्या। अन्यस्यकृतेलोपेप्राप्नोत्यन्यस्याकृते। शब्दान्तरस्यचप्राप्नुवन्विधि
रनित्योभवति। उभयोरनित्ययोःपरत्वाद्वृद्धिः। वृद्धौकृतायांलोपः तन्नाग्लोपिइङ्भवति। अत्वेपुनःसतिवृद्धिः
क्रियतांलोपइति। यद्यपिपरत्वाद्वृद्धिःवृद्धावपिकृतायामगेवलुप्यते। तस्मात्तुइष्ठत्वमतेहलिकत्वोरत्व
निपातनंसन्वद्भावप्रतिषेधार्थमितिमुण्डमिश्रः॥ धातोरेकाचोहलादेःक्रियासमभिहारेयङ्॥ समभिहारइतिकोयंशब्दः
समभिपूर्वाद्धरतेर्भावसाधनोघञ्। समभिहरणंसमभिहारइति। तद्यथा। पुष्पाभिहारः उत्पलाभिहारःमा
लाभिहारः फलाभिहारइति। विषमउपन्यासः। बहुत्वाःसुमनसः तत्रयुक्तःसमभिहारइति। इहपुनरेका
क्रिया ॥

दर्शनात्। मुण्डंकरोतिमाणवकमित्यादौसापेक्षेभ्योपिणिजर्थेवा॥ धातोरेकाचो॥ इहसमभिहारोनाममूर्तस्यानेकस्यैककालस्यभ
वति। धातुवाच्यातुक्रियैकैवयुगपदेकेनधातुनानेकस्यागनभिधानात्। साचनिवृत्तभेदासाध्यैकस्वभावत्वाद्धातुनाप्रत्याय्यते। अधि
श्रयणादीनांचक्रमजन्यत्वाद्युगपदवस्थानाभावाच्चक्रियासमभिहारोनसंभवतीतिमन्यमानःपृच्छति। समभिहारइतिकोयमिति। इ
तरस्तद्बुद्धिपरीक्षार्थंशब्दव्युत्पत्तिमाह। समभिपूर्वादिति। यद्यप्येकेति। मुख्यस्यसमभिहारस्येहासंभवाद्गौणआश्रीयते। बुद्धिगो राम:
चरानेकसकलावयवक्रियागतःपौनःपुन्येनानुष्ठीयमानप्रधानक्रियाविषयोवेत्यर्थः ॥ २१

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामान्यक्रियेति। साधारणी समूहरूपा क्रिया धातुवाच्येत्यर्थः। यथोक्तं हरिणा। गुणभूतैरवयवैः समूहः क्रमजन्मना। बुद्ध्या प्रक
ल्पिताभेदः क्रियेति व्यपदिश्यते॥ समूहश्च तथाभूतः प्रतिभेदं समूहिषु। समाप्यते ततो भेदे कालभेदस्य संभव इति। अथवा अधिश्र
यणादीनां तादर्थ्येन प्रवर्तनाद् गुणत्वादवयवत्वं तस्याश्च साधारणत्वमुच्यते। तदुक्तम्। अनन्तरफलं यस्याः कल्पते तां क्रियां वि

यद्यप्येका सामान्यक्रिया। अवयवक्रियास्तु बह्व्यः। अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणक्रियाः। ताः क
श्चित् कार्त्स्न्येन करोति। कश्चिदकार्त्स्न्येन। तत्र यः कार्त्स्न्येन करोति स उच्यते पापच्यत इति। पुनः पुनर्वा पचति पापच्यते इति।
अथ धातुग्रहणं किमर्थम्। इह मा भूत्। प्राटति भृशमिति। अत उत्तरं पठति। यङ्विधौ धातुग्रहण उक्तम्। किमुक्तम्। तत्र
तावदुक्तम्। कर्मग्रहणात् सन्विधौ धातुग्रहणानर्थक्यं सोपसर्गकर्मेति चेत् कर्मविशेषकत्वादुपसर्गस्यानुपसर्गं कर्म।
सोपसर्गस्य हि कर्मत्वे धात्वधिकारेपि सनो विधानमकर्मत्वादिति। एवमिहापि क्रियासमभिहारग्रहणाद्यङ्विधौ धातु
ग्रहणानर्थक्यम्। सोपसर्गः क्रियासमभिहार इति चेत् क्रियासमभिहारविशेषकत्वादुपसर्गस्यानुपसर्गः क्रियास
मभिहारः। सोपसर्गस्य हि क्रियासमभिहारत्वे धात्वधिकारेपि यङोऽविधानमक्रियासमभिहारत्वादिति। अथैकाज्झ
लादिग्रहणं किमर्थम्। इह मा भूत्। जागर्त्ति भृशम्। सीसत्ते भृशमिति। एकाज्झलादिग्रहणे चोक्तम्। किमुक्तम्। तत्र तावदुक्त
म्। कर्मसमानकर्तृग्रहणानर्थक्यं चेच्छाभिधाने प्रत्ययविधानात्। अकर्मणो ह्यसमानकर्तृकाद्वा अनभिधानादिति। इ
हापि एकाज्झलादिग्रहणानर्थक्यं च क्रियासमभिहारे यङ्वचनाद् अनेकाचो हलादेर्ह्यनभिधानमिति। तच्चावश्यमनभिधान
माश्रयितव्यम्। क्रियमाणेपि ह्येकाज्झलादिग्रहणे यत्रैवैकाचो हलादेश्चोत्पद्यमानेन यङार्थस्याभिधानं न भवति। न भवति
तत्रोत्पत्तिः। तद्यथा। भृशं शोभते। भृशं रोचते। यत्र चानेकाचोऽहलादेर्वोत्पद्यमानेन यङाऽर्थस्याभिधानं भवति भवति
तत्रोत्पत्तिः। तद्यथा। अटाट्यते अरार्यते अशाश्यते सोसूच्यते सोसूत्र्यते मोमूत्र्यते ॥

दुः। प्रधानभूतां तादर्थ्यादन्यासां तु तदाख्यता॥ कार्त्स्न्येनेति। विजातीयाव्यवहितानां साकल्येनेत्यर्थः। अथेति। धातुरेव समभिहारविशिष्ट
क्रियावाची द्योतकस्तूपसर्गो न तु वाचक इत्यर्थः। प्राटतीति। धातूपसर्गसमुदायस्य क्रियाविशेषावगतिहेतुत्वात्ततो यदि प्रत्ययः स्यात्
ततः सोपसर्गस्य द्विर्वचनं प्रसज्येत। प्राटाट्यत इति चेष्यते। सन्सूत्रोक्तं वस्त्विहाप्यतिदिशति। यङ्विधाविति। धात्वधिकारेपीति। प्रयाप
च्यत इत्यादौ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊर्णोतेश्चेति। यथान्यासेसिद्ध्यभावादूचनम्। कार्यान्तरसिद्धयेऽवश्यमूर्णोतेर्नुवद्भावोवाच्यस्तेनैवयङोपिसिद्धिमा द्दवाच्यइति। तत्रय ङि·भावातिदेशआमिटोस्त्वभावातिदेशस्तयोर्नोतेरभावात्। इड्डुपग्रहः। इट्प्रतिषेधः। विभाषागुणइतिपञ्चमी। फलस्यचात्रहेतुत्वं यथाध्ययनेनवसतीति। उदाहरणानि। प्रोर्णोनूयते। प्रोर्णुनाव। प्रोर्णुतः। प्रोर्णुतवानिति। यङैवचंक्रियासमभिहारस्यद्योतितत्वान्नित्य वीप्सयोरितिक्रियासमभिहारेद्वेभवतइतिवाद्विर्वचनंनभवति। यदातुभृशार्थेपिपौनःपुन्यंविवक्ष्यते तदापापच्यतेपापच्यतइ

ऊर्णोतेश्चोपसंख्यानम्॥ ऊर्णोतेश्चोपसंख्यानंकर्तव्यम्। प्रोर्णोनूयते। अयस्मिदमुच्यते ऊर्णोतेरिति। सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोती नांग्रहणंयङ्विधावनेकाजहलाद्यर्थम्। सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनांग्रहणंकर्तव्यम्। किंप्रयोजनम्। यङ्विधाव नेकाजहलाद्यर्थम्। सोसूच्यते। सोसूत्र्यते। सोमूत्र्यते। अटाट्यते। अरार्यते। अशाश्यते। प्रोर्णोनूयते। ऊर्णोतेर्नवक्तव्यः। वाच्यऊर्णोर्णुवद्भावोयङ्प्रसिद्धिःप्रयोजनम्। आमश्चप्रतिषेधार्थमेकाचश्चेड्डुपग्रहात्॥ क्रियासमभिहारेयङोविप्रति षेधेनलोड्विधानम्। क्रियासमभिहारेयङोलोड्भवतिविप्रतिषेधेन। क्रियासम भिहारेयङ्भवतीत्यस्यावकाशः। धा तुर्यएकाज्झलादिःक्रियासमभिहारेवर्तते। अधातुसंबन्धश्च। लोलूयते। पोपूयते। लोटोवकाशः। धातुर्योनेकाजह लादिःक्रियासमभिहारेवर्ततेधातुसंबन्धश्च। सभवान्जागृहिजागृहीत्येवायंजागर्ति सभवानीहस्वईहस्वेत्येवाय मीहते। धातुर्यएकाज्झलादिःक्रियासमभिहारेवर्ततेधातुसंबन्धश्चतस्मादुभयंप्राप्नोति। सभवान्लुनीहिलुनीही त्येवायंलुनाति। लोड्भवतिविप्रतिषेधेन। नतर्हीदानीमिदंभवति। सभवान्लोलूयस्वलोलूयस्वेत्येवायंलोलू यतइति। भवतिच। नवानानार्थत्वात्कर्तृकर्मणोर्हिलविधानंक्रियासमभिहारेस्वार्थेयङ्। नवार्थोविप्रतिषेधेन। किं कारणम्। नानार्थत्वात्। कानानार्थता। कर्तृकर्मणोर्हिलोड्विधीयते। क्रियाविशेषेस्वार्थेयङ्। तत्रान्तरङ्गत्वाद्यङ्भवित व्यम्। नतर्हिइदानीमिदंभवति। सभवान्लुनीहिलुनीहीत्येवायंलुनातीति। भवतिच। विभाषायङ्। यदानयङ्तदालोट्धातोरि

तिद्विर्वचनंभवत्येव। सभवानिति। सामान्यविशेषभावेनक्रियाभेदाश्रयोधातुसंबन्धःसइति। भृशार्थपौनःपुन्ययोःप्रतिपिपादयिषि तत्वादेकतरस्मिन्यङ्प्रत्ययः। अपरस्मिंस्तुलोट्। लोटश्चकेवलस्यसमभिहारमभिव्यङ्क्तुमसामर्थ्यात्तदन्तस्यद्विर्वचनं प्रवर्तते तत्रेति। लोड्डिरङ्गः। कर्त्राद्यपेक्षणाद्धातुसंबन्धापेक्षणाच्च। विभाषायङिति। धातोःकर्मणइत्यतोवेत्यनुवर्तनात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यं कौ॥ नह्रीति। चङ्क्रम्यत इत्यस्माद्योर्थः प्रतीयते नासौ कुटिलं क्रामतीति वाक्येन शक्यः प्रत्याययितुमिति तदर्थाभिधाना देव वाक्यं न भविष्यति। अर्थान्तरे च कौटिल्यमात्रप्रतिपादने वाक्यं निवारयितुमशक्यमिति नित्यग्रहणमनर्थकमित्यर्थः। क्रियासमभिहार इति। तत्र कौण्डिन्यन्यायेन कौटिल्यभावगर्हाभ्यां यङः क्रियासमभिहाराद्व्यवच्छिद्य स्वीकृतत्वादिति भावः। सत्यापपाश॥ आचार्यमतभेदप्रदर्शनार्थो नैकपक्षोपन्यासः। टिलोप इति। णाविष्ठवदित्यतिदेशादिति भावः। अक्करिष्यत इति।

नित्यं कौटिल्ये गतौ॥ लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्॥ उत्तरयोर्विग्रहेण विशेषासंप्रत्ययान्नित्यग्रहणानर्थक्यम्। उत्तरयोर्योगयोर्विग्रहेण विशेषस्यासंप्रत्ययान्नित्यग्रहणमनर्थकम्। नहि कुटिलं क्रामतीति चङ्क्रम्यत इति गम्यते। अथैतेभ्यः क्रियासमभिहारे यङा भवितव्यम्। क्रियासमभिहारे च नैतेभ्यः। क्रियासमभिहारे च नैतेभ्यो यङा भवितव्यं भृशं जपति ब्राह्मणः भृशं समिधो दहतीत्येवनित्यं कौ॥ सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्॥ सत्यापेति किं निपात्यते। सत्यस्य कृञ्यापुक्। सत्यस्य कृञि आपुक् निपात्यते णिच्च। सत्यं करोतीति सत्यापयति। अल्पमिदमुच्यते। णिविधावर्थवेदसत्यानामापुक्। णिविधावर्थवेदसत्यानामापुक्वक्तव्यम्। अर्थापयति वेदापयति सत्यापयति। यद्यापुक् क्रियते टिलोपः प्राप्नोति। एवं तर्हि पुक्करिष्यते। एवमपि टिलोपः प्राप्नोति। एवं तर्ह्यक्करिष्यते। एवमपि टिलोपः प्राप्नोति। एवं तर्हि कुक्करिष्यते। एवमप्यनाकारान्तत्वात्पुङ्‍ प्राप्नोति। एवं तर्हि टक्करिष्यते। एवमप्यनाङ्गत्वात्सङ्‍ प्राप्नोति। एवं तर्हि पुट्करिष्यते। अथवा पुनरस्त्वापुगेव। ननु चोक्तं टिलोपः प्राप्नोतीति। आपुक्वचनसामर्थ्यान्न भविष्यति। अथवा पुनरस्तु पुगेव। ननु चोक्तमेवमपि टिलोपः प्राप्नोतीति। पुग्वचनसामर्थ्यान्न भविष्यति। अथवा पुनरस्त्वागेव। ननु चोक्तमेवमपि टिलोपः प्राप्नोतीति। आग्वचनसामर्थ्यान्न भविष्यति। सत्यापपाश॥

तत्र पररूपे कृते अचो ञ्णितीति वृद्धौ कृतायां पुगागम इति भावः। अनाकारान्तत्वादिति। यद्यत्र वृद्धिः स्यादग्विधानमनर्थकं स्यात् अगागममन्तरेणापि तस्याः प्रसङ्गात् ततश्च तद्बाधनार्थमगागमः स्यादिति भावः। आपुडिति। तस्य च णिज्सन्नियोगशिष्टत्वात् अकारस्य पूर्वस्य टिलोपे सति सत्यापयतीत्यादि सिध्यतीति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा-कै- २३ हेतुमति च॥ कृत्रिमस्य पारिभाषिकस्य प्रयोजकस्येह हेतोर्ग्रहणम्। तदीयो व्यापारः प्रेषणाध्येषणा तत्समर्थाचरणलक्षणो हेतुमानिह गृह्यते। ननु सकलकारकसाध्यपाकाद्यपेक्षः प्रयोजकस्य हेतुव्यपदेशो न तु तदर्थावान्तरस्वसाध्यप्रेषणाद्यपेक्षः। यथा काष्ठस्य पाकापेक्षं करणत्वं न तु ज्वलनापेक्षम्। तदपेक्षं तु कर्तृत्वमेव। ततश्च पाकादेरेव हेतुमद्व्यपदेशो युक्तो न तु प्रेषणादेः। नैष दोषः। णिच्प्रकृत्या धातुनैव तस्यार्थस्य प्रकाशितत्वात् प्रयोजनाभावात्तत्रैवार्थे णिचोऽनुत्पादात्। प्रयोज्योपि हेतुमच्छब्देन न गृह्यते। तस्य द्रव्यत्वात्। णिचश्च स्वभावतः करणाधिकाराद्वा क्रियावाचित्वात्तस्मात्पारिशेष्यात्पाकाद्यर्थो यः प्रेषणादिलक्षणो लब्धपाकाद्यपेक्षहेतुव्यपदेशो हेतुत्वोपलक्षितप्रयोजकसाध्यो व्यापारः स एव गृह्यते। कथमिति। यदा पचतीत्युक्ते प्रयोज्यसाध्य एव व्यापारो गम्यते न प्रयोजकसाध्योपि तदा प्रत्ययार्थस्य करणाधिकारोपस्थापितस्य करण २१२

हेतुमति च॥ कथमिदं विज्ञायते हेतुमत्यभिधेये णिज्भवतीति आहोस्विद्धेतुमति यो धातुर्वर्तते इति। युक्तं पुनरिदं विचारयितुम्। नन्वनेनासंदिग्धेन प्रत्ययार्थविशेषणेन भवितव्यम्। यावता हेतुमति चेत्युच्यते। यदि हि प्रकृत्यर्थविशेषणं स्याद्धेतुमत इत्येव ब्रूयात्। नैतदस्ति। भवन्ति हि विषयसप्तम्योपि। तद्यथा। प्रमाणे यस्मात् प्रातिपदिकं वर्तते तस्मिन्यः स प्रातिपदिकं वर्तत इति। एवमिहापि हेतुमत्यभिधेये णिज्भवतीति हेतुमति वा यो धातुर्वर्त्तत इति जायते विचारणा। अत उत्तरं पठति। हेतुमतीति कारकोपादानं प्रत्ययार्थपरिग्रहार्थं यथा तनूकरणे तक्षः। हेतुमतीति कारकमुपादीयते। किं प्रयोजनम्। प्रत्ययार्थपरिग्रहार्थम्। एवं सति प्रत्ययार्थः सुपरिगृहीतो भवति

सविशेषणं हेतुमतीति संपद्यते। यदा त्वनेकार्थत्वाद्धातूनां तादर्थ्याद्वाधिश्रयणादिवत् प्रयोजकव्यापारोपि पचादिवाच्यो भवति यथा पञ्चभिर्हलैः कृषतीति। तदा प्रकृतिविशेषणपक्षो भवति तदा तु णिच्प्रत्ययो द्योतकः संपद्यत इति पक्षद्वयस्य संभवाद् दोषदर्शनाच्च प्रश्नः। हेतुमत इति। हेतुमदर्थाभिधायिन इत्यर्थः। कारकोपादानमिति। कारकशब्देन प्रत्ययार्थ उच्यते स हि प्रत्ययं करोति निष्पादयति। प्रत्ययार्थ इति। प्रत्ययस्यार्थः प्रयोजनं सुष्ठु परिगृहीतः परिपूर्णो भवति। वाचकत्वात्प्रत्ययस्य। प्रकृतिविशेषणे तु प्रत्ययस्यानुवादकत्वाद्द्योतकत्वात्प्रयोजनमपरिपूर्णं स्यादित्यर्थः। अथवार्थोभिधेयमुच्यते स चान्वयव्यतिरेकाश्रयव्यवस्थत्वात्प्रेषणादिः प्रत्ययस्यैव न प्रकृतेरिति सुष्ठु परिगृहीतो व्यवस्थापितो भवति॥ रामः २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथातनूकरणइति। यदाविकरणार्थाः कर्त्रादय इतिपक्षस्तदातनूकरणशब्देनकर्त्ताभिधीयतेतदासाधर्म्येणदृष्टान्तः। यदातु सार्वधातुकार्थाः कर्त्रादयइतिपक्षस्तदावैधर्म्येणदृष्टान्तइतिव्याख्यानम्। यथातनूकरणंप्रकृत्यर्थोनतथाहेतुमद्व्यापारइत्यर्थः। परस्तुसाधर्म्येणदृष्टान्तंसार्वधातुकार्थत्वंचकर्त्रादीनांमन्यमानआह। यदीति। अस्त्विति। विनापिणिचापञ्चभिर्हलैः कृषतीतिप्रयोजकव्यापारावगमात् प्रकृत्यर्थत्वंहेतुमतउपपद्यते। पचतीत्यादौतुद्योतकोणिच्नास्तीतितदप्रतिपत्तिरितिभावः। उक्तः करोतीति। प्रकृतिविशेषणपक्षेयथाप्रकृत्यभिहितेप्रयोजकव्यापारेणिज्भवति एवमुक्तप्रेषितादिशब्दाभिहितेपिप्राप्नोति। हेतुमद्विशेषणत्वात्करोत्यर्थस्य। प्रत्ययार्थविशेषणपक्षेतूक्तार्थत्वाद्णिजभावः। यत्नेति। यस्यार्थस्यद्योतनायणिज्वि

यथातनूकरणेतक्षइति। तनूकरणमुपादीयते। यदितर्हितद्धत्प्रकृत्यर्थविशेषणमिदंभवति। प्रकृत्यर्थविशेषणंहि तत्तत्रविज्ञायते। तनूकरणक्रियायांतक्षइति। अस्तुप्रकृत्यर्थविशेषणम्। कोदोषः। इहहिउक्तः करोतिप्रेषितः करोतीतिणिच्प्राप्नोति। प्रत्ययार्थविशेषणेसतिपुनर्नदोषोभवति। स्वशब्देनोक्तत्वान्नभविष्यति। प्रकृत्यर्थविशेषणेपिसतिनदोषः । यत्रनान्तरेणशब्दमर्थस्यगतिर्भवतितत्रशब्दःप्रयुज्यते । यत्रह्यन्तरेणापिशब्दमर्थस्यगतिर्भवतिनतत्रशब्दःप्रयुज्यते । । इहतर्हिपाचयत्योदनंदेवदत्तोयज्ञदत्तेनेतिउभयोःकर्त्रोर्लेनाभिधानंप्राप्नोति। प्रत्ययार्थविशेषणेसतिपुनर्नदोषः। प्रधानकर्त्तरिलादयोभवन्तीति प्रधानकर्तालेनाभिधीयते। यश्चात्राप्रधानंकर्तासिद्धातत्रकर्तरीत्येवतृतीया। इहचगमितोग्रामंदेवदत्तोयज्ञदत्तेनेतिअव्यतिरिक्तोगत्यर्थइतिकृत्वागत्यर्थानांक्तः कर्तरीतिकर्त्तरिक्तः प्राप्नोति ॥

धीयते। सयदाशब्दान्तरावगतोभवतितदाप्रयोजनाभावाद्णिज्नभवतीत्यर्थः। उभयोरिति। धातुवाच्यस्यव्यापारस्यकर्तरिलकारेणोक्तत्वम्। यदाचपचिनाद्वयोरपिप्रयोज्यप्रयोजकयोर्व्यापारोभिधीयतेणिच्प्रत्ययः केवलंस्वार्थिकत्वात्प्रयोजकव्यापारस्यद्योतकस्तदाधातुवाच्यव्यापारसाम्यात्कर्त्रोरपिसाम्यमिति द्वयोरप्यभिधानंस्यात्। ततः पाचयतोदेवदत्तयज्ञदत्तावितिप्रसज्येतेत्यर्थः। प्रधानकर्तेति। प्रकृत्यर्थोपसर्जनत्वाद्ण्यर्थस्यप्राधान्यात्तस्यकर्त्तापिप्रधानमितिभावः। गमितइति। प्रयोजकव्यापारस्यगमिवाच्यत्वात्तस्यकर्त्तरिप्रयोजकेक्तः प्राप्नोतीत्यर्थः। प्रयोज्यस्यतुकर्मत्वात्तत्रैवक्तइष्यते। तदुक्तम्। अप्रधानेदुहादीनांण्यन्तेकर्तुश्चकर्मणइति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ·कै· व्यतिभेदयन्त इति। प्रयोजकव्यापारस्य व्यतीहारो न तु प्रयोज्यव्यापारस्येति द्रष्टव्यम्। भवति हीति। ण्यर्थस्य प्राधान्यात्तद्व्यापारेणे
२५ प्सिततमत्वात्प्रयोज्यस्येत्यर्थः। प्रकृत्यर्थविशेषणत्वे तु द्वयोरपि प्रयोज्यप्रयोजकव्यापारयोरेकधातुवाच्यत्वाद्धातुवाच्यव्या २१२
पारापेक्षया द्वयोरपि कर्तृत्वात्तेनाभिधानं प्राप्नोतीति दोष उक्तः। ग्रामं गमयतीति। ण्यर्थस्यैव ग्रामः प्रयोज्यश्च कर्मेति भावः।
षष्ठी न प्राप्नोतीति। ण्यर्थस्य कर्मत्वादिति भावः। सुट् तु करोति धात्वाश्रयत्वाद् णिजुत्पत्तावपि तद्रूपसन्निधानात्सिध्यत्येवेति

इह च व्यतिभेदयन्ते व्यतिच्छेदयन्त इति अव्यतिरिक्तो हिंसार्थ इति कृत्वा न गतिहिंसार्थेभ्य इति प्रतिषेधः प्राप्नोति। अस्तु तर्हि प्रत्ययार्थविशेषणम्। यदि प्रत्ययार्थविशेषणं पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति प्रयोज्ये कर्तरि कर्मसंज्ञा प्राप्नोति। भवति हि तस्य तस्मिन्नीप्सा। इह च ग्रामं गमयति ग्रामाय गमयतीति व्यतिरिक्तो गत्यर्थ इति कृत्वा गत्यर्थकर्मणीति द्वितीयाचतुर्थ्यौ न प्राप्नुतः। इह चैधोदकस्योपस्कारयतीति व्यतिरिक्तः करोत्यर्थ इति कृत्वा कृञः प्रतियत्न इति षष्ठी न प्राप्नोति। इह च भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामिति प्रयोज्ये कर्तरि षष्ठी न प्राप्नोति। इह चाभिषावयति परिषावयतीति व्यतिरिक्तः सुनोत्यर्थ इति कृत्वा उपसर्गात्सुनोति सुवतीत्यादिना षत्वं न प्राप्नोति। नैष दोषः। यत्तावदुच्यते पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति प्रयोज्ये कर्तरि कर्मसंज्ञा प्राप्नोतीति। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणीत्येतन्नियमार्थं भविष्यति। एतेषामेव ण्यन्तानां यः कर्ता स णौ कर्मसंज्ञो भवति नान्येषामिति। यदप्युच्यते इह च ग्रामं गमयति ग्रामाय गमयतीति व्यतिरिक्तो गत्यर्थ इति कृत्वा गत्यर्थकर्मणीति द्वितीयाचतुर्थ्यौ न प्राप्नुत इति ॥

न्नाचूनुदत्। प्रयोज्ये कर्तरीति। तस्याप्राधान्यादिति भावः। अभिषावयतीति। ण्यर्थस्योपसर्गो विशेषक इति भावः। एतेषामेवेति। ण्यर्थस्य प्राधान्यात्तेनेप्सिततमस्य प्रयोज्यस्य सिद्धा कर्मसंज्ञा। न च स्वव्यापारापेक्षया स्वातन्त्र्यात् परत्वात्कर्तृसंज्ञा प्राप्नोतीति युक्तं वक्तुम्। प्रयोज्यव्यापारस्याप्राधान्यात् प्रधानाप्रधानव्यापारसंनिधौ च प्रधाननिमित्तस्य कार्यस्य युक्तत्वान्नियमेन तु प्रधानप्रयुक्तकार्यव्यावृत्तौ गुणनिमित्तकार्यसद्भावात्कर्तृत्वं भवत्येव तदुक्तं हरिणा। गुणक्रियायां स्वातन्त्र्यात्प्रे रामः
षणे कर्मतां गतः। नियमात्कर्मसंज्ञायाः स्वातन्त्र्येणाभिधीयत इति ॥ २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नासाविति। ग्रामः प्रकृत्यर्थस्य कर्म न तु ण्यर्थस्येत्यर्थः। साधनविशिष्टामिति। ग्रामकर्मिकां गमनक्रियां प्रयोज्यः प्रेष्यति प्राप्नो
तीत्यर्थः। स च प्रेष्यते प्राप्यते। कर्तृभूतपूर्वमात्रेपीति। प्रधानचरेपि कर्तरीत्यर्थः। सुनु अभीति। न प्रयोजकव्यापारस्याभिमुख्य
मभिशब्देन द्योत्यते। अपितु प्रयोज्यव्यापारस्यैवेत्यर्थः। युक्तं पुनरिति। संदेह एव विचारनिमित्तं नोपपद्यते। अन्वयव्यति
रेकाभ्यां भूयोदर्शनविषयाभ्यां प्रत्ययार्थविशेषणपक्षस्यैवोपपन्नत्वादिति भावः। यासाविति। तदर्थत्वात्कारकग्रामस्य

नासावेवं प्रेष्यते गच्छ ग्राममिति। कथं तर्हि साधनविशिष्टां क्रियामसौ प्रेष्यते ग्रामं गच्छ ग्रामाय गच्छेति।
यदप्युच्यते इह च एधोदकस्योपस्कारयतीति व्यतिरिक्तः करोत्यर्थ इति कृत्वा कृञः प्रतियत्न इति षष्ठी न
प्राप्नोतीति। नासावेवं प्रेष्यते उपस्कुरुष्वैधोदकस्येति। कथं तर्हि साधनविशिष्टां क्रियामसौ प्रेष्यते एधोद
कस्योपस्कुरुष्वेति। यदप्युच्यते इह भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामिति प्रयोज्ये कर्तरि षष्ठी न प्राप्नो
तीति। उक्तं तत्र कृद्ग्रहणस्य प्रयोजनं कर्तृभूतपूर्वमात्रेपि षष्ठी यथा स्यादिति। यदप्युच्यते इह चाभि
षावयति परिषावयतीति व्यतिरिक्तः सुनोत्यर्थ इति कृत्वा उपसर्गात्सुनोतीत्यादिना षत्वं न प्राप्नो
तीति। नासावेवं प्रेष्यते सुनु अभीति। कथं तर्हि उपसर्गविशिष्टां क्रियामसौ प्रेष्यते अभिषुण्विति।
युक्तं पुनरिदं विचारयितुम्। नन्वनेनासंदिग्धेन प्रत्ययार्थविशेषणेन भवितव्यम्। यावता व्यक्तम
र्थान्तरं गम्यते पचति पाचयतीति च। बाढं युक्तम्। इह पचेः कः प्रधानार्थः। यासौ तण्डुलानां विक्लित्तिः

तदनन्तरं च फलोत्पादादिति भावः। तदुक्तं हरिणा। अनन्तरं फलं यस्याः कल्पते तां क्रियां विदुः। प्रधानभूतां तादर्थ्या
दन्यासां तु तदाख्यतेति। तत्र यथाधिश्रयणादयस्तादर्थ्यात्पचिवाच्यास्तथा प्रेषणादिरपि। द्योतकस्तु णिजपेक्ष्यत इ
त्यर्थः। न च कारकाणामपि तादर्थ्यात्पच्यभिधेयत्वप्रसङ्गः तेषामक्रियारूपत्वाद्धातोश्च क्रियावाचित्वाद्विक्लित्तिश्चा
त्र फलानन्तरव्यापारोपलक्षणमिष्टकाः पचन्तीत्यादौ तस्यासंभवादित्याहुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पच्यर्थः स्यादिति। संभावने लिङ्। संभाव्यते पच्यर्थत्वं प्रेषणादेरत एव संशयाद्विचार्यप्रत्ययार्थविशेषणपक्षो भाष्यकारेणाव
स्थापितस्तद्दोषाणां परिहृतत्वात् पक्षान्तरे दोषाणां चापरिहारात्। अथवा प्रकृत्यर्थविशेषणपक्षोपि स्थापितस्तस्य सम्भाविनां
दोषाणां सुपरिहरत्वात्। तथाहि। यदुक्तं द्वयोः कर्त्रोर्लेनाभिधानं प्राप्नोतीति नायं दोषः। प्रकृत्या प्रयोज्यव्यापारो पसर्जनस्य प्रयोजक
व्यापारस्याभिधानात्तस्यैव णिचा द्योतनात्प्रधान एव कर्तरि लो भविष्यति नाप्रधाने। णिचा च द्योतके न प्रधानभूतगत्यर्थत्वं निव
र्तितं गमनारूपस्य प्रधानस्यार्थस्याभिधानादिति ण्यन्तात्प्रयोजककर्तरि क्तस्यानुत्पत्तिः। व्यतिभेदयन्तद्त्यत्रापि हिंसनाल
क्षणः प्रधानं धात्वर्थो न तु हिंसारूपद्दत्यात्मनेपदनिषेधाभावः। अथेति। यद्यपि षष्ठ्यर्थस्य प्रश्नस्यार्थश्च मत्वर्थत्वेन निर्ज्ञातस्तथा

अथेदानीं तदभिसंधिपूर्वकं प्रेषणमध्येषणं वा युक्तं यत्सर्वं पच्यर्थः स्यात्। अथ हेतुमतीति कोमत्वर्थः। हेतुः कर्ता
यस्य स हेतुमान् हेतुमतीति। हेतुनिर्देशश्च निमित्तमात्रे भिक्षादिषु दर्शनात्। हेतुनिर्देशश्च निमित्तमात्रे द्रष्ट
व्यः। यावद्ब्रूयान्निमित्तं कारणं तावद्धेतुरिति। किं प्रयोजनम्। भिक्षादिषु दर्शनात्। भिक्षादिषु हि णिज् दृश्य
ते भिक्षा वासयति कारीषोग्निरध्यापयतीति। किं पुनः कारणं पारिभाषिके हेतौ न सिध्यति। एवं मन्यते चे
तनावत एतद्भवति प्रेषणमध्येषणं चेति भिक्षाश्चाचेतनाः। नैष दोषः। नावश्यं स एव वासं प्रयोजयति य आ
होष्यतामिति ब्रवीति किं तर्हि तूष्णीमप्यासीनो यस्तत्समर्थान्याचरति सोपि वासं प्रयोजयति ॥

पि हेतुशब्दस्यानेकार्थत्वे सति हेत्वर्थापरिज्ञानात्तद्विशिष्टस्यापि मत्वर्थस्यापरिज्ञानात्प्रश्नः। स चार्थो हेतुविषय एवावतिष्ठते
को हेतुरिति किं प्रयोजको हेतुरथ निमित्तमात्रम्। हेतुः कर्तेति। हेतुः प्रयोजक इति भावः। नावश्यमिति। तत्समर्थाचरणम
पि प्रयोजकव्यापारस्तत्सद्भावाधीनत्वात्प्रयोज्यक्रियासिद्धेरित्यर्थः। एव्छतु मा भवानिति। प्रश्नाप्रयोज्यस्तस्य प्रेरकः प्रयोजको
भवतीति तद्व्यापारेणि चूक्तस्यान्न भवतीति प्रश्नः। एकविषयत्वाल्लोडादेर्णिचश्च पर्यायप्रसङ्गः। अकर्तृत्वादिति। स्वतन्त्रस्य क
र्तुः प्रयोजको हेतुरित्युच्यते प्रयोज्यश्चान्न कर्तानेति प्रयोजको न हेतुसंज्ञ इत्यर्थः। तूष्णीमिति। निर्व्यापारत्वात्कारकत्वमात्र
मपि तस्य नास्ति कुतस्तद्विशेषः कर्तृत्वमित्यर्थः। कर्तृत्वमेव तस्याधीयमानं प्रश्नक्रियायाः कर्ता त्वं भवेति। यथा राजा भव युद्ध्य
स्वेति राजत्वमेवाधीयते। यस्तु प्रवृत्तक्रियः संभावितक्रियो वा प्रयोज्यः कर्ता तस्य प्रयोजको हेतुरित्यत्र णिजभावः ॥ राम: २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरोवर्तमानक्रियस्यैवानेनकर्तृत्वमुक्तमितिमत्वाचोदयति। किंचभोइति। अभिसंबन्धइति। भूतायाभाविन्याश्चक्रियायाः
कर्त्राभिसंबन्धोभूतोभावीचप्रतिपाद्यतइत्यर्थः। अथकथमिति। असत्यर्थेशब्दप्रयोगासंभवात्। अभिसंबन्धइति। बुद्धिपरि
वर्तिन्यर्थेबहिरसत्यपिशब्दप्रयोगादितिभावः। नचकर्तेति। तस्यैवाधीयमानत्वात्। तदुक्तंहरिणा। द्रव्यमात्रस्यतुप्रैषे
इच्छ्याद्यैर्लोड्विधीयते। सक्रियस्य प्रयोगस्तुयदासविषयोणिचइति। अथापीति। दुर्बलपक्षाभ्युपगमेनापिपरिहारो

भिक्षाश्चापिप्रचुराव्यञ्जनवत्योलभ्यमानावासंप्रयोजयन्ति। तथाकारीषोग्निर्निर्वातेएकान्तेसुप्रज्वलि
तोध्ययनंप्रयोजयति। इहकश्चित्कंचिदाह इच्छतुमाभवान् अनुयुङ्क्तांमाभवानितिअत्रणिच्कस्मा
न्नभवति। अकर्तृत्वात्। नह्यसौसंप्रतिइच्छति। तूष्णीमास्ते। किंचभोवर्तमानकालायाएवक्रियायाःक
र्त्राभवितव्यंनभूतभविष्यत्कालायाः। भूतभविष्यत्कालायाअपिभवितव्यम्। अभिसंबन्धस्तत्रक्रियते
इमांक्रियामकार्षीद् इमांक्रियांकरिष्यतीति। इहपुनर्नकश्चिदभिसंबन्धः क्रियते। नचासौसंप्रतिइच्छ
तिनचासौप्रक्ष्यति। तूष्णीमास्ते। यदितर्हिकर्तानास्ति कथंतर्हिकर्तृप्रत्ययेनलोटाभिधीयते। अथकथम
स्मिन्नइच्छतिइच्छिर्वर्तते। अभिसंबन्धस्तत्रक्रियतेइमांक्रियांकुर्विति। कर्त्रापितर्ह्यभिसंबन्धःक्रियते।
कथम्। कर्ताअस्याःक्रियायाभवेति। एवंनचकर्ताकर्तृप्रत्ययेनलोटाभिधीयते। अथापिकथंचित्कर्तास्या
त् एवमपिनदोषः। लोटोक्तत्वात् प्रैषस्यणिज्नभविष्यति। विधीयन्तेह्येतेष्वर्थेषुप्रैषादिषुलोडादयः। य
त्रचद्वितीयःप्रयोज्योर्थोभवतिभवतितत्रणिच्। तद्यथा। आसयशाययेति। कृष्यादिषुचानुत्पत्तिः॥ कृष्यादिषु
चानुत्पत्तिर्वक्तव्या॥ एकान्तेतूष्णीमासीनउच्यते पञ्चभिर्हलैःकृषतीति। तत्रभवितव्यंपञ्चभिर्हलैःकर्षयतीति। कृ
ष्यादिषुचानुत्पत्तिर्नानाक्रियाणांकृष्यर्थत्वात्। कृष्यादिषुचानुत्पत्तिःसिद्धा। कुतः। नानाक्रियाणांकृष्यर्थत्वात्॥

भिधीयतइतिभावः। लोटोक्तत्वादिति। एकविषयत्वात्सिचोलोडादीनांचपाक्षिकत्वाद्यदालोडुत्पद्यते तदातेनैवाभिहितत्वात्प्रैष
स्यणिज्नभविष्यति। एकान्तइति। कृषावसामर्थ्यंदर्शयति। तूष्णीमासीनइति। व्यापाराभावकथनम्। कश्चिदिसामर्थ्यातिशयाद्युगप
त्पञ्चभिर्हलैःकृषेत्पर्यायेणवेतितन्निराकरणायएकान्तेतूष्णीमासीनइत्युक्तम्। तत्रपञ्चभिर्हलैर्भूमिमन्यैःकर्षयतीत्यर्थावग
मात्सिचिसतिकृषतीतिनप्राप्नोतीतितदनुत्पत्तिर्वक्तव्येत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिविधानेपीति।अनेकार्थत्वाद्धातूनांकृषिरेवप्रयोजकव्यापारेतत्समर्थाचरणलक्षणेवर्ततइत्यर्थः।धातुनैवचोपपदसहिते
नतस्यार्थस्यप्रकाशितत्वाण्णिजभावः।विभाषोपपदेनप्रतीयमानइतिपक्षआत्मनेपदाभावश्च।यदातुकृषिर्विलेखनेवर्तते
तदाभवत्येवपञ्चभिर्हलैःकर्षयतीतिणिच्।यज्यादिष्विति।यजेःप्रक्षेपविशेषवाचित्वात्प्रक्षेपेचऋत्विजांकर्तृत्वाद्यजमान
स्यप्रयोजककर्तृत्वाण्णिच्प्रसङ्गनिवारणायवचनम्।नानाक्रियाइति।तत्त्यागवचनाश्रयेणयःप्रयोगस्तद्विपरीतःप्रक्षेपव
चनेद्रष्टव्यः।इहव्याकरणस्येति।लक्ष्येलक्षणसमुदायेवाव्याकरणशब्दोवर्ततइतिभेदनिबन्धनाषष्ठी।यदातुलक्षणए

नानाक्रियाःकृषेरर्थाः।नावश्यंकृषतिर्विलेखनएववर्तते।किंतर्हि।प्रतिविधानेपिवर्तते।यदसौभक्तबीज
बलीवर्दैःप्रतिविधानंकरोतिसकृष्यर्थः।आतश्चप्रतिविधानेपिवर्तते यदहरेवासौनप्रतिविधत्ते तदहरेव
त्कर्म नप्रवर्तते॥यज्यादिषुचाविपर्यासः।यज्यादिषुचाविपर्यासोवक्तव्यः।पुष्यमित्रोयजतेयाजकाया
जयन्तीति।तत्रभवितव्यंपुष्यमित्रोयाजयतेयाजकायजन्तीति।यज्यादिषुचाविपर्यासोनानाक्रियाणांयज्य
र्थत्वात्।यज्यादिषुचाविपर्यासःसिद्धः।कुतः।नानाक्रियाणांयज्यर्थत्वात्।नानाक्रियायजेरर्थाः।नावश्यंय
जिर्हविःप्रक्षेपणएववर्तते।किंतर्हि।त्यागेपिवर्तते।तद्यथा।अहोयजतइत्युच्यतेयःसुष्ठुत्यागंकरोतितं
चपुष्यमित्रःकरोतियाजकाःप्रयोजयन्तीति॥ तत्करोतीत्युपसंख्यानंसूत्रयत्याद्यर्थम्॥ तत्करो
तीत्युपसंख्यानंकर्तव्यम्।किंप्रयोजनम्।सूत्रयत्याद्यर्थम्।सूत्रंकरोतिसूत्रयति।सूत्रयतीति।इहव्याक
रणस्यसूत्रंकरोतिव्याकरणंसूत्रयतीतिवाक्येषष्ठीउत्पन्नेप्रत्ययेद्वितीया।केनैतदेवंभवति।योसौ
सूत्रव्याकरणयोरभिसंबन्धःसउत्पन्नेप्रत्ययेनिवर्तते ॥

वसूत्रेव्याकरणशब्दोवर्ततेतदाव्यपदेशिवद्भावनिमित्ताषष्ठी।यदाव्याकरणंसूत्रंकरोतीतिसामानाधिकरण्यंतदाय
थामुण्डयतिमाणवकमितिभवतितथाव्याकरणंसूत्रयतीत्यपिभवति।योसाविति।वाक्येद्रव्यरूपंसूत्रंसूत्रशब्देनोच्य
ते।णिचितूत्पन्नेसत्त्वभावातिवर्तनात्करोत्यर्थाभिधायीसूत्रशब्दःसंपद्यते।तदुक्तंपरार्थाभिधानंवृत्तिरिति।एतच्चप्रक्रि
यागतविभागाश्रयेणोक्तम्।परमार्थतस्तुधात्वन्तरंसूत्रिर्विशिष्टक्रियावचनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आख्यानादिति। आख्यायतइत्याख्यानमितिवृत्तमुच्यते। प्रकृतिवदिति। णिचो याप्रकृतिः कंसवधादिः तयातुल्यंकंसादिकारकं भवति। यथाख्यानक्रियापेक्षंकंसवधादेः कर्मत्वंतथाकंसादेरपिअप्रतिपन्नाख्यानकर्मभावस्येत्यर्थः। प्रकृतिवद्भावातिदेशे नचकंसादेः पृथक्कृतत्वात्कंसमघातयदित्यादौकंसादिशब्दवर्जितस्याङ्गसंज्ञायामडाद्यः कंसादेर्नभवन्ति। वत्करणाच्च स्वाश्रयमपिभवति। पुष्येणयोजयतीतिपुष्यस्यकर्मत्वाभावः। अथवाप्रकृत्यातुल्यंवर्ततइतिप्रकृतिवत्स्वकृतेरिवप्रकृतिव द्रूण्यन्तस्यकारकमित्युभयथातिदेशाश्रयणात्क्वचित्कश्चित्परिगृह्यते। प्रकृतिप्रत्यापत्त्याराजागमनादौनलोपाद्यपिनिवर्त

अस्तिचकरोतेर्व्याकरणेनसामर्थ्यमितिकृत्वाद्वितीयाभविष्यति॥ आख्यानात्कृतस्तदाचष्टेकृल्लुक्प्रकृतिप्र त्यापत्तिः प्रकृतिवच्चकारकम्॥ आख्यानात्कृदन्ताण्णिज्वक्तव्यः। तदाचष्टइत्यस्मिन्नर्थे। कृल्लुक् प्रकृतिप्रत्या पत्तिः प्रकृतिवच्चकारकंभवतीतिवक्तव्यम्। कंसवधमाचष्टेकंसंघातयति। बलिबन्धमाचष्टेबलिंबन्धयति। आ ख्यानाच्चप्रतिषेधः॥ आख्यानशब्दाच्चप्रतिषेधोवक्तव्यः। आख्यानमाचष्टइति। किंपुनर्यान्येतानिसंज्ञाभूतानि आख्याननितेभ्यउत्पत्त्याभवितव्यम् आहोस्वित्क्रियाख्यानमात्रात्। किंचातः। यदिसंज्ञाभूतेभ्यः। इहनप्रा प्नोतिराजागमनमाचष्टेराजानमागमयतीति। अथक्रियाख्यानमात्रम्। नदोषोभवति। यथानदोषस्त थास्तु। दृश्यर्थायांचप्रवृत्तौ॥ दृश्यर्थायांच प्रवृत्तौकृदताण्णिज्वक्तव्यः तदाचष्टइत्येतस्मिन्नर्थे कृल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवच्चकारकंभवतीतिवक्तव्यम्। मृगरमणमाचष्टेमृगान्रमय ति। दृश्यर्थायामितिकिमर्थम् ॥

तइतिराजानमागमयतीत्याद्युपपन्नंभवति। कंसवधमिति। यद्यप्यत्रसंनियोगनिर्दिष्टानामन्यतरापायेउभयोरप्य भावइतिवधादेशनिवृत्तिस्सिद्ध्यति तथापिपुष्येणयोगंजानातिपुष्येणयोजयतीतिकुत्वस्यसंनियोगशिष्टत्वाभावा न्निवृत्तिर्नसिध्यतीतिप्रकृतिप्रत्यापत्तिरुच्यते। किंपुनरिति। कंसंवन्धनलोपाख्यानादीनीत्यर्थः। दृश्यर्थाया मिति। यदारण्यस्थोरममाणान्मृगान्प्रतिपद्यमाचष्टेएतस्मिन्नवकाशएवंविधामृगारमन्तइतितदाप्रतिपाद्यदर्श नार्थाप्रवृत्तिर्भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मा·कै· २७ यदा हि ग्राम इति। ग्रामे मृगाणामसंभवान्न तद्दर्शनार्था प्रवृत्तिः। दृश्यर्थायामित्येतच्च मृगरमणादिविषयमेव द्रष्टव्यम्। रा १२
जागमनादिषु तु दृश्यर्थप्रवृत्त्यभावेपि णिज्भवति। आरात्रि विवासमिति। यावद्रात्रेर्विवासोतिक्रमणं तावत्कथाः कथयती
त्यर्थः। चित्रीकरण इति। आश्चर्यकरणे गम्यमाने तस्मात्प्राप्नोतीत्यन्यार्थे णिज्वक्तव्यः। संभावयत इति। भूप्राप्तावात्मनेपदी

यदा हि ग्रामे मृगरमणमाचष्टे मृगरमणमाचष्ट इत्येव तदा भवति॥ आङ्लोपश्च कालात्यन्तसंयोगे मर्यादायाम्॥
कालात्यन्तसंयोगे मर्यादायां कृदन्ताण्णिज्वक्तव्यः तदाचष्ट इत्येतस्मिन्नर्थे। आङ्लोपश्च कृल्लुक् प्रकृतिप्र
त्यापत्तिः प्रकृतिवच्च कारकं भवतीति वक्तव्यम्। आरात्रि विवासमाचष्टे रात्रिं विवासयति। चित्रीकरणे प्रा
पि॥ चित्रीकरणे प्राप्यर्थे कृदन्ताण्णिज्वक्तव्यः। कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकं भवतीति वक्तव्य
म्। उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमनं संभावयते। सूर्यमुद्गमयति॥ नक्षत्रयोगे ज्ञि॥ नक्षत्रयोगे जाना
त्यर्थे कृदन्ताण्णिज्वक्तव्यः कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकं भवतीति वक्तव्यम्। पुष्ययोगं जानाति
पुष्येण योजयति मघाभिर्योजयतीति। तत्तर्हि वक्तव्यम्। न वा सामान्यकृतत्वाद्धेतुतो ह्यविशिष्टम्। न वा वक्त
व्यम्। किं कारणम्। सामान्यकृतत्वात्सामान्येनैवात्र णिज्भविष्यति हेतुमतीति। किं कारणम्। हेतुतो ह्यविशिष्टम्।
हेतुतो ह्यविशिष्टमेतद्भवति। तुल्या हि हेतुता देवदत्ते चादित्ये च। न सिध्यति। स्वतन्त्रस्य प्रयोजको हेतुसंज्ञो भवती
त्युच्यते न चासावादित्यं प्रयोजयति। स्वतन्त्रप्रयोजकत्वादप्रयोजक इति चेन्मुक्तसंशयेन तुल्यम्। संभवान्स्वतन्त्रप्र
योजकं मुक्तसंशयं न्याय्यं मन्यते पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति तेनैतत्तुल्यम्। कथम्। प्रवृत्तिर्ह्युभयत्रानपेक्षा। प्रवृत्ति
र्ह्युभयत्रानपेक्ष्यैव किंचिद्भवति देवदत्ते चादित्ये च। नेह कश्चित्परेणानुगृहीतव्य इति प्रवर्तते। सर्व इमे स्वभूत्यर्थं प्रवर्तन्ते। ये
तावदेते गुरुशुश्रूषवो नाम तेपि स्वभूत्यर्थं प्रवर्तन्ते पारलौकिकं च नो भविष्यति इह च नः प्रीतो गुरुरध्यापयिष्यतीति॥

तस्य रूपम्। पुष्येणेति। पुष्यो योगक्रियायाः कर्ता स हि चन्द्रमसं संबध्नाति। तत्रोभयप्राप्तौ कर्मणीति नियमात् षष्ठ्यभावे तृतीयास
मासः। तत्र प्रकृतेरिव प्रकृतिवदित्येवं प्रकृतिवदतिदेशात्कर्तरि तृतीया भवति। लकारस्तु प्रधान एव कर्तरि भवति नातिदेशि राम:
के॥ सामान्यकृतत्वादिति। सामान्यलक्षणेनैव सिद्धत्वादित्यर्थः। देवदत्ते चेति। देवदत्तविषयान्यस्य हेतुतेत्यर्थः॥ २७

CC-0. In Public Domain. Digitization by eGangotri

परिभाषादिति। दण्डनादिकाः। यदभिप्रायेष्विति। तदुक्तं हरिणा। निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये। अभिप्रायानुरोधोपि स्वार्थस्यैव प्रसिद्धय इति। सज्जन्त इति। भाष्यकारवचनादात्मनेपदम्। परस्मैपदी तु सज्जिः गल्गुञ्जुषस्तगताविति। चिरहत इति। चिरप्रवृत्तत्वाद्वध्यघातकभावस्य प्रयोजकव्यापारस्य वर्तमानत्वासंभवात्। उपसंख्यानारम्भे तु न दोष आख्यानस्य वर्तमानत्वादित्यर्थः

तथा ये एते दासाः कर्मकरा नाम तेऽपि स्वभूत्यर्थं प्रवर्तन्ते भक्तं चैलं च लप्स्यामहे परिभाषाश्च न नो भविष्यन्तीति। तथा य एते शिल्पिनो नाम एतेऽपि स्वभूत्यर्थं प्रवर्तन्ते वेतनं च लप्स्यामहे मित्राणि च नो भविष्यन्तीति। एवमेतेषु सर्वेषु स्वभूत्यर्थं प्रवर्तमानेषु कुर्वतः प्रयोजक इति चेत्तुल्यम्। यदि किञ्चित्प्रयोजको नाम कुर्वतो भवतीति तेनैतत्तुल्यम्। यदि तर्हि सर्व इमे स्वभूत्यर्थं प्रवर्तन्ते कः प्रयोज्यार्थः। यदभिप्रायेषु सज्जन्ते ईदृशो च ध्रुवौ कुरु ईदृशौ पुटकौ कुरु आदित्यश्चास्याभिप्राये सज्जते। एष तस्याभिप्राय उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमनं संभावयेयमिति तं चास्यादित्योऽभिप्रायं निर्वर्तयति। भवेदिह वर्तमानकालता युक्ता स्याद् उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमनं संभावयते सूर्यमुद्गमयतीति तत्र स्यात्संहितस्यादित्य उदेति। इह तु कथम् ——— वर्तमानकालता कंसं घातयति बलिं बन्धयतीति। चिरहते च कंसे चिरबद्धे च बलौ। अत्रापि युक्ता कथम्। ये तावदेते शोभिका नामैते प्रत्यक्षं कंसं घातयन्ति प्रत्यक्षं च बलिं बन्धयन्तीति। चित्रेषु कथम्। चित्रेष्वपि उद्गूर्णा निपतिताश्च प्रहारा दृश्यन्ते कंसस्य च कृष्णस्य च। ग्रन्थिकेषु कथम्। यत्र शब्दग्रन्थनमात्रं लक्ष्यते। तेऽपि हि तेषामुत्पत्तिप्रभृत्याविनाशा ——— दृद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान्प्रकाशयन्ति। आतश्च सतः। व्यामिश्रा दृश्यन्ते। केचित्कंसभक्ता भवन्ति केचिद्वासुदेवभक्ताः। वर्णान्यत्वं खल्वपि पुष्यन्ति। केचित्कालमुखा भवन्ति केचिद्रक्तमुखाः। त्रैकाल्यं खल्वपि लोके लक्ष्यते गच्छ हन्यते कंसः गच्छ घानिष्यते कंसः किं गतेन हतः कंस इति हेतुमति च॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये तृतीयाध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥

शोभिका इति। कंसाद्यनुकारिणां नटानां व्याख्यानोपाध्यायाः। कंसानुकारी नटः सामाजिकैः कंसबुद्ध्या गृहीतः कंसो भाष्ये विवक्षितः। ग्रन्थिकेष्विति। कथकेष्वित्यर्थः। तेपीति। तदुक्तं हरिणा। शब्दोपहितरूपांस्तु बुद्धेर्विषयतां गतान्। प्रत्यक्षमिव कंसादीन्साधनत्वेन मन्यत इति। शिष्टं भाष्यं स्पष्टम्। इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे तृतीयस्याध्यायस्य प्रथमपादे द्वितीयमाह्निकम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कण्ड्वादिभ्यो यक्॥ किमर्थ इति। द्वैविध्यं कण्ड्वादीनां दर्शयितुमुपन्यासः। ककारप्रयोजनमेव दर्शयितुं वस्त्वन्तरमुपक्षिप्यते। कण्ड्वादिभ्यो वा वचनमिति। यदा कण्ड्वादीनि प्रातिपदिकानि तदा वेति वक्तव्यमित्यर्थः। तत्र को दोष इति। नित्येऽपि प्रत्यये क्विपा कण्डूरित्यादि सिद्ध्यतीति भावः। क्विपा यथेष्टं रूपं न सिध्यतीति दर्शयितुमाह। तत्रेति। कण्डूयशब्दात् क्विपि विहितेऽकारलोपस्य स्थानिवत्त्वमुवङ् कर्तव्ये नास्ति। क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेष्विति निषेधात्। अथापि स्थानिवत्त्वादुवङ् स्यात् तथापि

कण्ड्वादिभ्यो यक्॥ किमर्थः ककारः। गुणवृद्धिप्रतिषेधार्थः। क्ङितीति गुणवृद्धिप्रतिषेधो यथा स्यात्। नैतदस्ति प्रयोजनम्। सार्वधातुकार्धधातुकयोरङ्गस्य गुण उच्यते धातोश्च विहितः प्रत्ययः शेष आर्धधातुकसंज्ञां लभते न चायं धातोर्विधीयते। कण्ड्वादीनि हि प्रातिपदिकानि। कण्ड्वादिभ्यो वा वचनम्। कण्ड्वादिभ्यो वेति वक्तव्यम्। अवचने हि नित्यप्रत्ययत्वम्। अक्रियमाणे हि वावचने नित्यः प्रत्ययविधिः प्रसज्येत। तत्र को दोषः। तत्र धातुविधितुक्प्रतिषेधः॥ तत्र धातुविधेस्तुकश्च प्रतिषेधो वक्तव्यः स्यात्। कण्ड्वौ कण्ड्वः। अचि श्नुधातुभ्रुवां य्वोरियङुवङाविति उवङादेशः प्रसज्येत। इह कण्ड्वा कण्ड्वे इति नोङ्धात्वोरिति विभक्तेरुदात्तत्वप्रतिषेधः प्रसज्येत। तुक् च प्रतिषेध्यः। वल्गुर्मन्तुरिति। ह्रस्वस्य पिति कृति तुगिति तुक् प्राप्नोति॥ ह्रस्वयलोपौ च॥ ह्रस्वयलोपौ च वक्तव्यौ स्याताम्। ह्रस्वः वल्गुर्मन्तुरिति। किमर्थमिदं न ह्रस्व एवायम्। अन्तरङ्गत्वाद् अकृद्यकार इति दीर्घत्वं प्राप्नोति। ह्रस्वः। यलोपः। यलोपश्च वक्तव्यः। कण्डूर्मन्तुर्वल्गुरिति। किमर्थमिदं न वलीत्येव सिद्धम्। वलीत्युच्यते न चात्र वलं पश्यामः। ननु च क्विब्वलादिः। क्विपो लोपे कृते वलाद्यभावान्न प्राप्नोति। इदमिह संप्रधार्यं क्विब्लोपः क्रियतां वलि लोप इति। किमत्र कर्तव्यम्। परत्वात् क्विब्लोपः। नित्यः खल्वपि क्विब्लोपः कृतेऽयलोपे प्राप्नोति अकृतेऽपि। नित्यत्वात् परत्वाच्च क्विब्लोपे कृते वलाद्यभावाद् न प्राप्नोति। एवं तर्हि प्रत्ययलक्षणेन भविष्यति। वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥

वकारस्योठ् करिष्यते। आदिष्टादचः पूर्वो विकार इत्यूठि कर्तव्ये स्थानिवत्त्वाभावः। अत एवोठः पुनरुवङ् न भवति। तत्र कण्डूशब्दादौजसोः कृतयोरुवङ् प्राप्नोति। ओः सुपीति तु यणादेशः संयोगपूर्वस्येत्युक्तः। नित्यत्वाच्चेति। वेरपृक्तलोपात् पूर्वं वलि लोप इत्येतदनाश्रित्येदमुच्यते। वर्णाश्रय इति। वलरूपाश्रयो य्वोर्लोपः न तु प्रत्ययाश्रयः। वावचने तु सति पक्षे यगनुत्पादाद्यथेष्टसिद्धिः॥

CC-0. In Public Domain. Digitization by eGangotri

नैतेभ्य इति। कर्तरि क्विपो विधानात् कण्डूरिति च कर्त्रर्थानवगमादिति भावः। अवश्यमिति। संपदादित्वाद्भावे कर्तर्य्यस्य इति भा-
वः। वेदनामात्रस्येति। वेदना च सत्त्वरूपा प्रतीयते तेन च साध्यरूपेति भावः। तत्र धात्वधिकाराद्धातुभ्य एव स्वार्थे यग् भवति प्रा-
तिपदिकेभ्यस्तु स्वागुत्पत्तौ सत्यां कण्डूरित्यादिरूपसिद्धिः। कस्य चेति। धातुविधानप्रतिबद्धार्धधातुकसंज्ञाश्रयगुणनिषेधा-
र्थात् ककारासञ्जनादपि धातुः कण्ड्वादिर्यकमुत्पादयतीति ज्ञायत इत्यर्थः। आह चेति। दीर्घान्तपाठाद्वा पाक्षिकं धातुत्व-

अथ क्रियमाणेऽपि वावचने यदा यगन्तात् क्विप् तदैते दोषाः कस्मान्न भवन्ति। नैतेभ्यस्तदा क्विबुत्पद्यते। किं
कारणम्। अन्येभ्योऽपि दृश्यत इत्युच्यते न चैतेभ्यः तदा क्विब् दृश्यते। यथैव तर्हि क्रियमाणेऽपि वावचनेऽन्ये-
भ्योऽपि दृश्यत इत्यत्र क्विब् न भवति। एवमक्रियमाणेऽपि वावचने न भविष्यति। अवश्यमेतेभ्यः क्विब् एषितव्यः। किं प्रयो-
जनम्। एतानि रूपाणि यथा स्युरिति। तत्तर्हि वावचनं कर्तव्यम्। न कर्तव्यम्। उभयं कण्ड्वादीनि धातवश्च प्रा-
तिपदिकानि च। आतश्चोभयम्। कण्डूयतीति क्रियां कुर्वाणे प्रयुज्यते। अस्ति मे कण्डूरिति वेदनामात्रस्य सं-
निध्ये। अपर आह। धातुप्रकरणाद्धातुः कस्य चासंजनादपि। आह चायमिमं दीर्घं मन्ये धातुर्विभाषित इति॥
कण्ड्वादिभ्यो यक्॥ कमेर्णिङ्॥ किमर्थो णकारः। वृद्ध्यर्थः। ञ्णितीति वृद्धिर्यथा स्यादिति। क्रियमाणेऽपि वै णकारे
वृद्धिर्न प्राप्नोति। किं कारणम्। क्ङिति चेति प्रतिषेधात्। णित्करणसामर्थ्याद्भविष्यति। अत उत्तरं पठति। णिङि
णित्करणस्य सावकाशत्वाद्वृद्धिप्रतिषेधप्रसङ्गः। णिङि णित्करणं सावकाशम्। कोऽवकाशः। सामान्यग्रह-
णार्थो णकारः। क्व सामान्यग्रहणार्थेन णकारेणार्थः। णेरनिटीति। णिङि णित्करणस्य सावकाशत्वाद्वृद्धेः प्रतिषेधः
प्राप्नोति। ङित्करणमपि सावकाशम्। कोऽवकाशः। सामान्यग्रहणाविघातार्थो ङकारः। क्व सामान्यग्रहणाविघातार्थेनार्थः।

मेषां निश्चीयते। नित्ये हि धातुत्वे नित्ये च यकि सति अकृद्यकार इति दीर्घस्य सिद्धत्वाद्दीर्घपाठोऽनर्थकः स्यादित्यर्थः॥ कमेर्णिङ्॥ प्रति-
षेधबलीयस्त्वादिति। प्रतिषेधस्य विध्यपवादत्वाद्बाधकत्वाद्बलीयस्त्वम्। णिङन्तस्येति। कामयमानं प्रयुङ्क्त इति णि-
च्। णिङ्येवेति। णिज्निमित्ताया वृद्धेरसत्त्वाणिङ्निमित्तं ह्रस्वत्वं माभूदित्येवमर्थो मित्प्रतिषेधः स्यादित्यज्ञापको णिङ्-
वृद्धेरित्यर्थः। णिङि चेति। ह्रस्वत्वमिति शेषः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असिद्धमिति। ह्रस्वे कर्तव्ये बहिरङ्गा वृद्धिरसिद्धेत्यर्थः। स्थानिवद्भावादिति। किन्तु उपधालोपे त्पुपधाविधौ स्थानिवत्त्वनिषेधः

अत्रैव। शक्योऽत्र सामान्यग्रहणाविघातार्थोऽन्योऽनुबन्ध आसङ्क्तुम्। तत्र ङकारानुबन्धाद्वृद्धिप्रतिषेधः प्राप्नोति। अवश्यमत्रात्मनेपदार्थो ङकारोऽनुबन्ध आसङ्क्त्यः। ङितइत्यात्मनेपदं यथा स्यात्। एवमप्युभयोः सावकाशयोः प्रतिषेधवलीयस्त्वात्प्रतिषेधः प्राप्नोति। एवंतर्हि आचार्यप्रवृत्तिर्ज्ञापयति न कमेर्वृद्धिप्रतिषेधो भवतीति। यदयं नकम्यमिचमामिति मित्संज्ञायाः प्रतिषेधं शास्ति। मित्प्रतिषेधस्य चार्थवत्त्वात्। मित्प्रतिषेधस्य चार्थवत्त्वाद्वृद्धिप्रतिषेधः प्राप्नोति। अर्थवान् मित्प्रतिषेधः। कोऽर्थः। णिङन्तस्य णिचि या वृद्धिस्तस्या ह्रस्वत्वं माभूदिति। ननु तस्या अपि क्ङितिचेति प्रतिषेधेन भवितव्यम्। न भवितव्यम्। उक्तमेतत्। ङितिप्रतिषेधे तन्निमित्तग्रहणमुपधारोरित्यर्थमिति। एवंतर्हि णिङन्तस्य णिचि या वृद्धिस्तस्या ह्रस्वत्वं न प्राप्नोति। किं कारणम्। णिङा व्यवहितत्वात्। लोपे कृते नास्ति व्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव। णिङ्येव तर्हि माभूदिति। णिङि च न प्राप्नोति। किं कारणम्। असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षण इति। नैव वा पुनर्णिङन्तस्य णिचि वृद्धिः प्राप्नोति। किं कारणम्। णिङा व्यवहितत्वात्। लोपे कृते नास्ति व्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव। इदं तर्हि प्रयोजनम्। यत्तच्चिण्णमुलोर्दीर्घोऽन्यतरस्यामिति दीर्घत्वं शास्ति तत्कमेर्णिङि माभूदिति। किं पुनः कारणं तत्र दीर्घोऽन्यतरस्यामित्युच्यते न ह्रस्वोऽन्यतरस्यामित्येवोच्येत यथाप्राप्तं कमेर्ह्रस्वत्वमेव। तत्रायमप्यर्थः। ह्रस्वग्रहणं न कर्तव्यं भवति। प्रकृतमनुवर्तते। क्व प्रकृतम्। मितां ह्रस्व इति। का रूपसिद्धिः। अशमि अशामि। शमंशमम्। शामंशामम्। वृद्ध्यासिद्धम्। न सिध्यति। नोदात्तोपदेशस्य मान्तस्यानाचमेरिति वृद्धिप्रतिषेधः प्राप्नोति। नैष दोषः। चिण्कृतोः स वृद्धिप्रतिषेधो न णिचि। इह तर्हि। अजनि अजानि। जनंजनम्। जानंजानम्। जनिवध्योश्चेति वृद्धिप्रतिषेधः प्राप्नोति सोऽपि चिण्कृतोरेव न णिचि।

प्रत्ययविधावेवेति तत्रैवोक्तम्। तथा च पटयतीत्यत्र वृद्धौ कर्तव्यायां निषेधो न भवति। किं पुनरिति। कमेर्णिङि वृद्धिप्रतिषेधान्नित्यं ह्रस्वत्वमेवस्थितमिति मित्प्रतिषेधो न कर्तव्यो भवति क्रियमाणस्तु णिङि वृद्धेर्ज्ञापक एवेति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंख्यानं कर्तव्यं स्यादिति। पाक्षिकवृद्धिप्राप्त्यर्थमित्यर्थः। एतदिदानीमिति। ततश्च पाक्षिकदीर्घनिवृत्त्यर्थमित्यस्य प्रतिषेधोनज्ञापकः। यदेति। अणिङ्न्तात्क्रमेर्यदाणिचूक्रियते तदाकृत्स्वनिवृत्त्यर्थमित्प्रतिषेधः स्यादित्यर्थः। आयादयः। आर्धधातुक इति परसप्तमीमाश्रित्य पक्षद्वय विचारः। द्वयोरपि च पक्षयोर्दोषइतिमत्वा प्रश्नः। कथमिति। आहोस्विदन्यतरस्मिन्निति।

णिजन्यवहितेषु तर्हि यङ्लोपे चोपसंख्यानं कर्तव्यं स्यात्। शमयन्तं प्रयोजितवान् अशशमिअशशामि। शशंशमम्। शशंशाममम्। शंशमयतेः। अशंशमिअशंशामि। शंशमंशंशमम्। शंशामंशंशामम्। किं पुनः कारणं न सिध्यति। चिण्णमुल्परे णौ मितामङ्गानां ह्रस्वो भवतीत्युच्यते। यश्चात्र णिः चिण्णमुल्परः न तस्मिन्निदङ्गम्। यस्मिंश्च मिदङ्गं नासौ णिश्चिण्णमुल्परः। णिलोपे तर्हि कृते चिण्णमुल्परः। स्थानिवद्भावान्न चिण्णमुल्परः। अथ दीर्घोन्यतरस्यामित्युच्यमाने यावता स्थानिवद्भावः कथमेवैतावता सिध्यति। एतदिदानीं दीर्घग्रहणस्य प्रयोजनम्। दीर्घविधिं प्रत्यजादेशो न स्थानिवद्भव[..]तीति स्थानिवत्त्वप्रतिषेधः सिद्धो भवति। यदा खल्वप्यायादय आर्धधातुके वा भवन्ति तदाणिचिणिङ् नास्ति तदर्थं च मित्प्रतिषेधः स्यात्। तस्मात्प्रतिषेधः प्राप्नोति। उक्तं वा। किमुक्तम्। तद्धितकाम्योरिकृप्रकरणादिग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चैषा दिग्लक्षणा वृद्धिरिति। कमेर्णिङ्। ॥ आयादय आर्धधातुके वा॥ कथमिदं विज्ञायते आयादिभ्यो यदार्धधातुकं तस्मिन्नवस्थिते वा आयादीनां निवृत्तिर्भवतीति। आहोस्विदायादिप्रकृतेर्यदार्धधातुकं तस्मिन्नवस्थिते वा आयादीनामुत्पत्तिर्भवतीति। किं गतमेतदियता सूत्रेण आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम्। गतमित्याह। कथम्। यदा तावदायादिभ्यो यदार्धधातुकं तस्मिन्नवस्थिते वा ऽऽयादीनां निवृत्तिर्भवतीति तदाऽविशेषेण सर्वेणायादिप्रकरणमनुक्रम्य आयादय आर्धधातुके वेत्युच्यते ॥

निवृत्तिशब्द उत्पत्तिशब्दो वा निर्देष्टव्य इति मन्यते। यदा तावदिति। एतद्वाक्यनिरपेक्षैरायादिविधानवाक्यैः परनिमित्तानपेक्षा आयादयो यदा विधीयन्ते तदानेनार्धधातुके तेषां पक्षे निवृत्तिः क्रियते। यद्यपि नित्याश्शब्दास्तथापि शास्त्रप्रक्रियायां क्वचिदुत्पन्नस्य लोपादिद्वारेण निवृत्तिः क्रियते। क्वचिदपवादविधाने नोत्सर्गस्यानुत्पत्तिर्ज्ञाप्यते। ततो निवृत्तिपक्षो नानुपपन्नः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ नै॰ २॰ यदेति। यदा सूत्रत्रयस्यायं योगः शेषस्तदैकवाक्यतायां सत्यामार्धधातुके परत आयादयो विकल्पेनोत्पद्यन्त इति पक्षः। यदि त ३१२
र्ह्येकवाक्यता ततः सार्वधातुक आयादयो नोत्पद्येरन्। नैष दोषः। गुपूधूपेत्यत्रैवार्द्धधातुके वेति वक्तव्ये पृथक्पाठात्सार्वधातुकेप्या
यादयो भवन्तीति ज्ञायते। आर्द्धधातुकस्य त्वेकवाक्यतया विकल्पेन विधीयन्ते। गुप्तिरिति। गोपायशब्दस्य प्रत्ययान्तत्वादकारे

यद्याप्यायादिप्रकृतेर्यदार्धधातुकं तस्मिन्नवस्थिते वा आयादीनामुत्पत्तिर्भवतीति तदेकं वाक्यं तच्चेदं च। गु
पूधूपविच्छिपणिपनिभ्य आयः। आर्धधातुके वा। ऋतेरीयङ्। आर्धधातुके वा। कमेर्णिङ्। आर्धधातुके वेति।
कश्चात्र विशेषः। आयादिभ्यो यदार्धधातुकम् आयादिप्रकृतेर्यदार्धधातुकमिति चोभयथानिष्टप्रसङ्गः। आ
यादिभ्यो यदार्धधातुकमायादिप्रकृतेर्यदार्धधातुकमिति चोभयथानिष्टं प्राप्नोति। यदि विज्ञायत आयादि
भ्यो यदार्धधातुकं तस्मिन्नवस्थिते वा आयादीनां निवृत्तिर्भवतीति। गुप्तिः जुगोपेति चेष्टं न सिध्यति। इदं चानि
ष्टं प्राप्नोति गोपांचकार गोपेति। इदं तावदिष्टं सिद्धं भवति। गोपायांचकार गोपायेति। अथ विज्ञायत आयादिप्रकृ
तेर्यदार्धधातुकं तस्मिन्नवस्थिते वा आयादीनामुत्पत्तिर्भवतीति। गुप्तिर्जुगोपेति चेष्टं सिद्धं भवति। इदं चानिष्टं न प्राप्नो
ति। गोपांचकार गोपेति। इदं त्विष्टं न सिद्ध्यति। गोपायांचकार गोपायेति। इदं तावदिष्टं सिद्धं भवति गोपायांचकारेति।
कथम्। अस्त्वत्रायादिप्रकृतेर्यदार्धधातुकं लिट् तस्मिन्नवस्थिते वा आयादयः आम्प्रत्यये प्रतिष्यति यथाविकरणास्तद्व
त्। इदं तर्हीष्टं न सिध्यति गोपायेति। सिद्धं तु सार्वधातुके नित्यवचनादनाश्रित्य वा विधानम्। सिद्धमेतत्। कथम्। अविशे
षेणायादीनां वा विधिमुक्त्वा सार्वधातुके नित्यमिति वक्ष्यामि। स्यादिविषये त्वेतु विप्रतिषेधेन तुल्यनिमित्तत्वात्। स्यादि
भिस्त्वायादीनां बाधनं प्राप्नोति। किं कारणम्। विप्रतिषेधेन तुल्यनिमित्तत्वात्। तुल्यं हि निमित्तमायादीनां स्यादीनां—
च। स्यादीनामवकाशः करिष्यति हरिष्यति। आयादीनामवकाशः गोपायति धूपायतीति। इहोभयं प्राप्नोति। गोपायि
ष्यति धूपायिष्यतीति। परत्वात्स्यादयः प्राप्नुवन्ति। न वायादिविधानस्यानवकाशत्वात्। नैष दोषः। किं कार
णम्। आयादिविधानस्यानवकाशत्वात्। अनवकाशा आयादयः उच्यन्ते च तेवचनाद्भविष्यन्ति ॥

णित्किनो बाधनाद्गुप्तिर्न सिध्यति। आमि परत आयस्य पाक्षिकत्वान्निवृत्तौ जुगोपेति न सिध्यति। दोषोपलक्षणं चैतत्। गुप्त इत्यपि न सिध्यति। क्तप्र
त्यये परत आयस्य निवृत्तौ सत्यां प्रत्ययलक्षणेन गुणप्रसङ्गात्। न च प्रत्ययलोपसूत्रे लोपसंज्ञासूत्रे वा तद्भावितग्रहणमाश्रितम्। गोपायतीति। विशेषा राम॰
भावादनभ्यासोत्पत्तिरित्यायादीनामवकाशं मन्यते ॥ २॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यदिदानीमिति। विशेषाभावेपिलक्षणवशात्सवर्णेशपेतिभावः। कामयतइत्यत्रतुविशेषोस्त्येव। शपमन्तरेणास्वरूपस्याभावात्। यथा पुनरिति। वार्त्तिककारेणतुसिद्धंसार्वधातुकेनित्यवचनादितिब्रुवतासूत्रभेदेनपरिहारउक्तोऽवश्यकर्तव्येचसूत्रभेदेशपिनित्यमितिन्या सःकर्तव्योयेनदोषोनभवतीत्यर्थः। ननुतौदादिकत्वादिच्छेःशेनभाव्यंनतुशपा। एवंतर्हिन्यासभेदोपलक्षणार्थमिदमितिशिति. नित्य मितितुन्यासःकर्तव्यः॥ सनाद्यन्ता॥ भूवादयइत्येवेति। भुवोवादयोभूवादयइत्यर्थोश्रयणादितिभावः। ननश्चक्रियावाचित्वात्सनाद्यन्ता

ननुचेदानीमेवावकाशःप्रक्लृप्तःगोपायतिधूपायतीति। अत्रापिशप्स्यादिर्भवति। यद्यत्रापिशप्स्यादिर्भवति। नत्वत्रा स्तिविशेषः सतिवाशप्यसतिवा। अन्यदिदानीमेतद्। यदुच्यतेनास्तिविशेषइति। यत्तुतदुक्तम्। आयादीनांस्यादिभिरव्या प्तोवकाशइतिसनास्त्यवकाशः। अवश्यंखल्वप्यत्रशप्स्यादिरेषितव्यः। किंप्रयोजनम्। गोपायन्तीधूपायन्तीत्यत्रश प्श्यनोर्नित्यमितिनित्योनुम् यथास्यात्। यदितर्हिअनवकाशाआयादयःआयादिभिःस्यादीनांबाधनंप्राप्नोति। य थापुनरयंसूत्रभेदेनपरिहारःयदिपुनःशपिनित्यमित्युच्यते। सिध्यति। सूत्रंतर्हिभिद्यते। यथान्यासमेवास्तु। ननुचोक्तमा यादिभ्योयदार्धधातुकमायादिप्रकृतेर्यदार्धधातुकमितिचोभयथानिष्टप्रसङ्गःइति। नैषदोषः। आर्धधातुकइतिनैषाप रसप्तमी। कातर्हि। विषयसप्तमी। आर्धधातुकेविषयइति। तत्रार्धधातुकविषयेआयादिप्रकृतेरायादिषुवाकृतेषुयोय तःप्रत्ययःप्राप्नोति सततोभविष्यति। आयादय॥ सनाद्यन्ताधातवः॥ अन्तग्रहणंकिमर्थंनसनादयोधातवइत्येवोच्येत। केनेदा नींतदन्तानांभविष्यति। तदन्तविधिना। अतउत्तरंपठति। सनादिष्वन्तग्रहणउक्तम्। किमुक्तम्। पदसंज्ञायामन्तवचन मन्यत्रसंज्ञाविधौप्रत्ययग्रहणेतदन्तविधिप्रतिषेधार्थमिति। इदंचापिप्रत्ययग्रहणम्। अयंचापिसंज्ञाविधिः। किमर्थंपु नरिदमुच्यते। नभूवादयोधातवइत्येवसिद्धम्। नसिध्यति। पाठेनधातुसंज्ञाक्रियते। नचेमेतत्रपठ्यन्ते। कथंतर्ह्येषाम पठ्यमानानांधातुसंज्ञाभवति। अस्तेर्भूर्ब्रुवोवचिःचक्षिङःख्याञिति। यद्यप्येतेतत्रनपठ्यन्ते। प्रकृतयस्त्वेषांतत्रपठ्यन्तेतत्रस्थानिवद्भावात्सिद्धम्

नांधातुसंज्ञासिध्यतीत्यर्थः। पाठेनेति। आदिशब्दस्यप्रत्येकंसंबन्धादर्थपाठाभ्यांधातुसंज्ञाविहिता तेनाणवयत्यादयःसमानशब्दा श्चसर्वनामादयोनिवर्तिताभवन्तीतिभावः। स्थानिवद्भावेनधातुसंज्ञासिद्धिंवक्ष्यामीतिहृच्छति। कथंतर्हीति। ननुभूवचिख्या दिशब्दाधातुपाठेपठिताएव। नैतदस्ति। नहियेधातुपाठेपठितास्तइहातिदिश्यन्ते. शब्दान्तरत्वादादेशानाम्। जग्ध्यादीनांतु पाठशङ्कापिनास्ति। येषांत्वर्थइति। इण्यादीनामित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचेमइति। रूढिशब्दस्यादेशशब्दस्यतत्रग्रहणाद्येषामेवस्थानिनिरूत्यादेशत्वंप्रसिद्धंतेषामेवतत्रग्रहणमित्यर्थः। इमेपीति। क्रिया
निमित्तकस्यादेशशब्दस्यतत्रग्रहणमित्यर्थः। अत्रचोदयन्ति। यदिस्थानिवद्भावेनसनादीनांधातुसंज्ञाविधीयतेतदातदन्तविध्यभा
वात्प्रत्ययानामेवाङ्गसंज्ञानिबन्धनाय्यडादीनिप्राप्नुवन्तिप्रत्ययान्तानांचेष्यन्ते। यङ्प्रत्ययश्चसमभिहारविशिष्टक्रियावचनाद्धा
तोः स्वार्थेविधीयते आयादयश्चयुइएवस्वार्थेविधीयन्ते इतितेषांस्थानिनः कस्यचिन्निरूत्यभावात्स्थानिवत्त्वाभावाद्धातुसं
ज्ञानप्राप्नोति। अत्रोच्यते। कर्तुमिच्छतीतिकरणाङ्गइष्यर्थेसर्वेसर्वपदादेशाइतिन्यायाद्वर्तमानस्यइषेः प्रसङ्गे चिकीर्षशब्दस्य

इमेपितर्हियद्यपितत्रनपठ्यन्ते येषांत्वर्थआदिश्यन्ते। तेतत्रपठ्यन्ते तत्रस्थानिवद्भावात्सिद्धम्। नसिध्यति।
आदेशः स्थानिवदित्युच्यते नचेमेआदेशाः। इमेअप्यादेशाः। कथम्। आदिश्यतेयः सआदेशः इमेचाप्यादिश्यन्तेएव
मपिषष्ठीनिर्दिष्टस्यादेशाः स्थानिवद्भवन्तीत्युच्यते नचेमेषष्ठीनिर्दिष्टस्यादेशाः। षष्ठीग्रहणंनिवर्तिष्यते। यदिनि
वर्तते। अपवादेउत्सर्गकृतंप्राप्नोति। कर्मण्यण् आतोनुपसर्गेकइतिकेप्यण्कृतंप्राप्नोति। नैषदोषः। आचार्य
प्रवृत्तिर्ज्ञापयति नापवादेउत्सर्गकृतंभवतीति। यदयंश्यन्नादीन्कांश्चित्कितः करोति श्यन्श्नम् श्नाश्नु
रिति॥ सनाद्यन्ताधातवः ॥स्यतासीलृलुटोः॥ इमेविकरणाः पठ्यन्तेतत्रनज्ञायतेकउत्सर्गः कोपवादइति। तत्र
वक्तव्यमयमुत्सर्गः अयमपवादइति। इमेब्रूमः यगुत्सर्गः अपवादाः शबादयः स्यादयश्च। यदियगुत्सर्गः अपवादः
शबादिः स्यादयश्च । अपवादविप्रतिषेधाच्छबादिबाधनम्॥ अपवादविप्रतिषेधाच्छबादिभिः स्यादीनांबा
धनंप्राप्नोति। शबादीनामवकाशः पचति पठति। स्यादीनामवकाशः पक्ष्यते। इहोभयंप्राप्नोति पक्ष्यति। प
रत्वाच्छबादयः प्राप्नुवन्ति। अपवादोनामानेकलक्षणप्रसङ्गः। अपवादोनामसभवति यत्रानेकलक्षणप्रसङ्गः।

न्नन्तआदिश्यतइतिसिद्धंतदन्तस्यधातुत्वम्। एवंसमभिहारविशिष्टलवनक्रियावाचिलूशब्दप्रयोगप्रसङ्गे लोलूयशब्दआदिश्यते। गु
पेः प्रसङ्गे गोपायशब्दइतिभगवतोभाष्यकारस्याभिप्रायः। स्यतासी॥ उत्सर्गापवादधर्मज्ञानायपृच्छति। इमेइति। यगुत्सर्गइति। भाव
कर्मग्रहणानन्तरत्वात्सार्वधातुकमात्रेविधानादितिभावः। अपवादविप्रतिषेधादिति। यगपवादानामुभयेषांशबादीनांस्यादीनांच
विप्रतिषेधेसतिपरत्वाच्छबादयः स्युरित्यर्थः। अपवादइति। यत्रोत्सर्गलक्षणस्यापवादलक्षणस्यचप्रसङ्गः तत्रापवादव्यवहारः
यग्विधौतुभावकर्मग्रहणानुवर्तनात्कर्तरियकोऽप्रसङ्गान्नास्तितदपवादत्वमित्यर्थः॥ राम: ३१

CC-0. In Public Domain. Digitization by eGangotri

लावस्थायामिति। ननु च परत्वाल्लादेशैर्भाव्यम्। न च लादेशानामनित्यत्वम्। कृतेष्वपि स्यादिषु आत्‌तीयपरिसमाप्तेर्धात्वधिकारेऽपि धातोर्विहितस्य लस्येत्येवं विहितविशेषणाश्रयणाल्लादेशानां प्रसङ्गात्। एवं तर्हि कृतेष्वपि लादेशेषु स्यादयो भवन्तोऽन्तरङ्गा एव भवन्ति। न हि तद्विधौ शब्देन सार्वधातुकत्वमर्थविशेषो वा कर्त्रादिराश्रितः। श्यनादयस्तु तदाश्रितत्वाद्बहिरङ्गाः अवश्यं चैतदभ्युपगन्तव्यं कृतेषु लादेशेषु स्यादयः क्रियन्त इति। अन्यथा तासेः परस्य लसार्वधातुकस्यानुदात्तत्वविधानं न विकरणस्य

अत्र च भावकर्मणोर्यग्विधीयते। कर्तरि शप्। कः प्रसङ्गो यद्भावकर्मणोर्यकं कर्तरि शबादयो बाधेरन्। एवं तर्हि यक् शपावुत्सर्गौ अपवादाः श्यनादयः स्यादयश्च। एवमपि अपवादविप्रतिषेधाच्छ्यन्नादिबाधनम्। अपवादविप्रतिषेधात् श्यन्नादिभिः स्यादीनां बाधनं प्राप्नोति। श्यन्नादीनामवकाशः दीव्यति सीव्यति। स्यादीनामवकाशः पक्ष्यति यक्ष्यति। इहोभयं प्राप्नोति देविष्यति सेविष्यतीति। परत्वाच्छ्यन्नादयः प्राप्नुवन्ति। नैष दोषः। शबादेशाः श्यनादयः करिष्यन्ते। शप् स्यादिभिर्बाध्यते। तत्र दिवादिभ्यः स्यादिविषये शबेव नास्ति कुतः श्यन्नादयः। तत्तर्हि शपो ग्रहणं कर्तव्यम्। न कर्तव्यम् प्रकृतमनुवर्तते। क्व प्रकृतम्। कर्तरि शबिति। तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। नैष दोषः। दिवादिभ्य इत्येषा पञ्चमी शबिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति। प्रत्ययविधिरयं न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति। नायं प्रत्ययविधिः विहितः प्रत्ययः प्रकृतश्चानुवर्तते। अथवा अनुवृत्तिः करिष्यते। सार्वधातुके यक् स्यतासी लृलुटोः च्लि लुङि च्लेः सिज्भवति। कर्तरि शप् स्यतासी लृलुटोः च्लि लुङि च्लेः सिज्भवति। दिवादिभ्यः श्यन् स्यतासी लृलुटोः च्लि लुङि च्लेः सिज्भवति। अथवान्तरङ्गाः स्यादयः। कान्तरङ्गता। लावस्थायामेव स्यादयः। सार्वधातुके श्यन्नादयः ॥

स्वरो लसार्वधातुकस्वरं बाधत इत्यस्यार्थस्य कथं ज्ञापकं स्यात्। यदि हि लावस्थायां तासिः क्रियेत पश्चात्सार्वधातुकं तदा सति शिष्टत्वाल्लसार्वधातुकस्योदात्तत्वे प्राप्तेऽप्राप्तानुदात्तार्थं वचनमिति ज्ञापकत्वं नोपपद्येत। येत्वाहुः। संख्याविधानवाक्येनात्मनेपदपरस्मैपदप्रकरणेन च लादेशविधानवाक्यस्यैकवाक्यतायां लादेशानां बहिरङ्गत्वाल्लावस्थायामेवान्तरङ्गत्वात्प्रतिपदविधानाच्च स्यादयो भवन्तीति तैस्तासेः परस्य लसार्वधातुकस्यानुदात्तविधानस्य पूर्वोक्तार्थज्ञापकत्वमसमर्थितं भवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिब्बहुलम्॥ सिबुत्सर्ग इति। परनिमित्तमनुपादाय सनादिवर्गे धातोः सिब्विधेयः। तेन तदन्तस्य धातुसंज्ञायां सत्यां नेषत्वादीनि सिद्ध्यन्ति। नी शब्दात्सिपि गुणे च कृते लोटि च नेषत्विति रूपम्। प्रकृत्यन्तरत्वादिति। जे ष्टने ष्टप्रेष्ठगताविति पाठान्नयत्यर्थ उत्सर्गो न कर्तव्यः। अवयासिसीष्ठा इत्याद्यर्थस्तु कर्तव्य एव॥ सवयमिति। सनादिमध्ये नैव वचेति भावः। यदवयासिसीष्ठा इति। यातेरवपूर्वात्सप् लिङ् थास् सुट् सीसुट्। सबन्तस्याङ्गस्यानेकाच्त्वात्तीयुडादेरिडागमो भवति। यदि पुनः सिप् क्रियते तदावस्य मिकार उच्चारणार्थो माख्येयः। अन्यथा तस्य श्रवणं स्यात्। तत्र सिबन्तस्य धातोरेकाच्त्वादिट्प्रतिषेधः प्रसज्येत। ननु योत्र धातु

सिब्बहुलं लेटि॥ सिबुत्सर्गः छन्दसि सनाद्यन्ते नेषत्वाद्यर्थः॥ सिबुत्सर्गश्छन्दसि कर्तव्यः सनाद्यन्ते नेषत्वाद्यर्थः। सनाद्यन्ताधिकारे च वक्तव्यः। किं प्रयोजनम्। नेषत्वाद्यर्थः। इन्द्रो नस्तेन नेषतु। गावो नेष्टादिति। प्रकृत्यन्तरत्वात्सिद्धम्। प्रकृत्यन्तरत्वात्सिद्धमेतत्। कथम्। प्रकृत्यन्तरं नेषः नेषतु नेष्टादिति दर्शनात्। नेषतु नेष्टादिति हि दृश्यते। अथ किमर्थः पकारः। स्वरार्थः। अनुदात्तौ सुप्पितावित्येष स्वरो यथा स्यादिति। पित्करणानर्थक्यं चानङ्गत्वात्। पित्करणं चानर्थकम्। कुतः। अनङ्गत्वात्। अनङ्गोयम्। तत्र नार्थः स्वरार्थेनानुबन्धेन पकारेण। इटि कृते साङ्गो भविष्यति। इटोनुदात्तार्थमिति चेदागमानुदात्तत्वात्सिद्धम्। आगमानुदात्तत्वेनेटोनुदात्तत्वं भविष्यति। एवं तर्हि सवयं कर्तव्यः। किं प्रयोजनम्। यदवयासिसीष्ठाः एकाज्लक्षण इट्प्रतिषेधो माभूदिति। क्वायमकारः श्रूयते। न क्वचिच्छ्रूयते। लोपोस्य भविष्यति। अतो लोपः आर्धधातुक इति। यदि न क्वचिच्छ्रूयते। नार्थः स्वरार्थेन पकारेणानुबन्धेन। एवमपि कर्तव्यः॥

रुपदेशेऽनुदात्तो या शब्दः न तस्मात्परमार्धधातुकं सिपा व्यवधानात्। यस्माच्च सिबन्तात्परमार्धधातुकं नासावुपदेशेऽनुदात्तः। एवं तर्हि सनाद्यन्ता धातव इत्यस्य यदा सनाद्यवयवा धातवो भवन्तीत्यर्थो व्याख्यायते तदा सिपो यासवयवत्वाद्यातिग्रहणेन ग्रहणादिट्प्रतिषेधप्रसङ्गः। यदापि स्थानिवद्भावाश्रयणेन सूत्रं प्रत्याख्यातं तदा स्थानिवद्भावेनानुदात्तादेकाचः श्रूयमाणात्प्राप्नोत्येवेट्प्रतिषेधः। अनुदात्तस्येति। धातोरित्यनाश्रित्योक्तम्। अथ वैतत्प्रदेशपाठाश्रयमेतद्भाष्यम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदात्तस्येति। छन्दस्युभयथेति सार्वधातुकत्वादड्उपदेशादिति लसार्वधातुकानुदात्तत्वे सति प्रत्ययस्वरेण धातुस्वरेण वा सशब्दाकारस्योदात्तत्वादुदात्तनिवृत्तिस्वर इटः प्रसज्येत। पकारे तु सति अनुदात्त एवेड् भवति पित्करणसामर्थ्यादेव च सशब्दाकारस्य धातुस्वरेण न भवति एतत्त्वदेशपाठाद्याशब्दस्यैव तु भवति। तिङ्ङः तिङ इति योनिघातः स निपातैर्यद्यदीति प्रतिषिद्धोऽवशब्दाऽ स्यतिङि चोदात्तवतीति निघातः। साविषदिति। षूप्रेरणे इत्यस्य लेटि रूपम्। तारिषदिति तरतेः। इजादेः॥ उवोषेति। नन्वत्रोषविदेति वि

किंप्रयोजनम्। अनुदात्तस्य लोपो यथा स्यादुदात्तस्य लोपो मा भूदिति। किं च स्यात्। उदात्तनिवृत्तिस्वरः प्रसज्येत॥ सिब्बहुलं छन्दसि णिद्वक्तव्यः। सविता धर्मं साविषत्। प्रण आयूंषि तारिषत्। सिब्बहुलम्॥ कास्प्रत्ययादाममन्त्रे लिटि॥ कास्ग्रहणे चकास उपसंख्यानम्॥ कास्ग्रहणे चकास उपसंख्यानं कर्तव्यम्। चकासांचकार। न कर्तव्यम्। चकास्प्रत्ययादिति वक्ष्यामि। चकास्ग्रहणे कास उपसंख्यानम्। चकास्ग्रहणे कास उपसंख्यानं कर्तव्यम्। कासांचक्रे। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं कास्ग्रहणे चकास उपसंख्यानमिति। नैष दोषः। चकास्शब्दे कास्शब्दोऽस्ति तत्र कास्प्रत्ययादित्येव सिद्धम्। न सिध्यति। किं कारणम्। अर्थवतः कास्शब्दस्य ग्रहणं न च चकास्शब्दे कास्शब्दोऽर्थवान्। एवं तर्हि कास्यनेकाच इति वक्तव्यम्। किंप्रयोजनम्। चुलुम्पाद्यर्थम्। चुलुम्पांचकार दरिद्रांचकार॥ इजादेश्च गुरुमतोऽनृच्छः॥ गुरुमत आम्विधाने लिण्निमित्ताद्गुरुप्रतिषेधः॥ गुरुमत आम्विधाने लिण्निमित्ताद्गुरुमतः प्रतिषेधो वक्तव्यः। इयेष उवोष। गुणे कृते इजादेश्च गुरुमतोऽनृच्छ इत्याम् प्रसज्येत। गुरुमद्वचनमिदानीं किमर्थं स्यात् ॥

कल्पेनामाभाव्यम्। अत्राहुः। द्विवचनबहुवचनयोर्गुणाभावाद्गुरुमत्त्वाभावाद्विकल्पः सावकाश इति यत्र गुरुमत्त्वं तत्र नित्यमेवाम् प्राप्नोति। एतच्च विप्रतिषेधे परमिति प्रतिपदविधेश्च बलवत्त्वमनाश्रित्य भाष्यकारेणोदाहृतम्। तत्राश्रिते विकल्प एव भविष्यतीति नैतदिहोपन्यसनीयम्। गुरुमद्वचनमिति। ईषतुरीषुरित्यत्रापि सवर्णदीर्घे गुरुमत्त्वादिजादेः सर्वत्र गुरुमत्त्वादामा भवितव्यमिति गुरुमद्वचनसामर्थ्यादुपदेशावस्थायां गुरुमत इत्याश्रयिष्यत इति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· णल्युत्तमइति।एतच्चोपलक्षणंतेनथलपिगृह्यते।इयष्ठइयजियेति।लिड्यभ्याससस्संप्रसारणेकृतेयजादयइजादयोभव ३ १ २
३३ न्तीति।उपदेशवचनादिति।वचनंव्याख्यानमभिप्रेतमन्यथावचनेनवचनान्तरस्यनिरासेकोगुणःस्यात्।तस्मान्नित्ययोगेम
तुपआश्रयणादुपदेशावस्थायांगुरुमतइत्याश्रयिष्यतइत्यर्थः।उपदेशग्रहणशब्देनाप्युपदेशोगृह्यतेनेनेतिसुत्रस्यव्याख्या
नमेवोच्यते।उच्छेरिति।उच्छीविवासइत्युपदेशेगुरोरपाठान्नायंगुरुमानित्ययुक्तः।तुडि·मित्तेति।तुग्ग्रहणमागममात्रोप
लक्षणंतेनेङ्गं चकारेत्यत्रापिभवति।प्राप्त्यर्थोपीति।प्रतिषेधप्राप्त्यर्थइत्यर्थः।ऋच्छेरिति।आमाव्यवधानेपिवचनाद्गुणो
भविष्यतीतिचेदेवंसतितस्मिन्नितिनिर्दिष्टइत्येतद्व्यर्थंततस्मादामएवाभावोगुणविधानेनज्ञाप्यते।सामर्थ्यादिति।ऋगति

गुरुमद्वचनंकिमर्थमितिचेद्णल्युत्तमेयजादिप्रतिषेधार्थम्।गुरुमद्वचनंकिमर्थमितिचेण्णलिउत्तमेयजादीनांमा
भूदिति।इयजअहम्।उवयअहम्।उपदेशवचनात्सिद्धम्।उपदेशेगुरुमतइतिवक्तव्यम्।यद्युपदेशग्रहणंक्रियते
उच्छेरामूवक्तव्यः उच्छांचकारेति।ऋच्छिप्रतिषेधोज्ञापकउच्छेराम्भावस्य।यदयमनृच्छइतिप्रतिषेधंशास्तितद्
ज्ञापयत्याचार्यः।तुडि·मित्तायस्यगुरुमत्ताभवतितस्मादामिति।सतर्हिज्ञापकार्थऋच्छिप्रतिषेधोवक्तव्यः।ननु
चावश्यंप्राप्त्यर्थोपिवक्तव्यः।नार्थःप्राप्त्यर्थेन।ऋच्छत्यृतामिति ऋच्छेर्लिटिगुणवचनंज्ञापकंनच्छेर्लिट्याम्भव
तीति।नैतदस्तिज्ञापकम्।अस्त्यर्थमेतत्स्यात्।कथंपुनर्ऋच्छेर्लिटिगुणउच्यमानोर्त्यर्थःशक्योविज्ञातुम्।सामर्थ्यात्।
ऋच्छेर्लिटिनास्तीतिकृत्वाप्रकृत्यर्थोविज्ञास्यते।तद्यथा।तिष्ठतेरित्।जिघ्रतेर्वेति।चङि·तिष्ठतिजिघ्रतीनस्तइति
कृत्वाप्रकृत्यर्थोविज्ञायते।किंपुनरर्तेर्लिटिगुणवचनेप्रयोजनम्।आरतुः।आरुः।एतद्रूपंयथास्यात्।किंपुनःका
रणंनसिध्यति।द्विर्वचनेकृतेसवर्णदीर्घत्वम्।सवर्णदीर्घत्वेचकृते ॥

घ्रापणयोरित्यस्यतिपिघ्रापिकृच्छादेशःकृतोनत्वनादेशऋच्छिर्निर्दिष्टइत्यर्थः।ऋच्छेरिति।शितिऋच्छादेशविधानाल्लिटित
द्भावः।तिष्ठतेरिति।अत्रापिस्थःशितितिष्ठादेशंकृत्वानिर्देशःकृतःतत्रानेनरूपेणस्थाशब्दएवप्रतीयतइत्यर्थः।द्विर्वचनइति।यणा
देशात्पूर्वंविप्रतिषेधेनद्विर्वचनंक्रियते।तथाहि।सतिस्थानिवद्भावशास्त्रेद्वयोरपियणद्विर्वचनयोर्नित्यत्वमितिविप्रतिषेधउपपद्यतेअथ
वायथानिन्यतुरित्यत्रयणादेशेनभवितव्यमितिद्विर्वचनात्पूर्वमेवइयङ्नप्रवर्तते।तथेहापिद्विर्वचनेकृतेसवर्णदीर्घेणभाव्यमिति राम:
यण्नप्रवर्तते।सतिवायणितस्यस्थानिवद्भावाद्द्विर्वचनम्।सत्रकृतेयणादेशात्परत्वात्सवर्णदीर्घत्वम् ॥ ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदितावदिति। अन्तादिवद्भावादुभयादेशस्यान्यतरतोऽपदेशात्स्थानिवद्भावा इतिभावः। अन्तरङ्गत्वादिति। वर्णाश्रयं बलीय
इत्येतत्तु समानाश्रयाङ्गवार्णविषयम्। यथा कारकश्रयणमितिगुणवृद्धीभवतो यणादेशात्। इहतूदत्त्वं लिडाश्रयं वर्णद्वयाश्रयं
तुसवर्णदीर्घत्वमितिभिन्नाश्रयत्वमनयोः। अथापीति। आसप्तमपरिसमाप्तेरङ्गाधिकारो वव्रश्चेत्यादिसिद्धय आश्रित इतिभावः।
ऋकारोऽपीति। बहुवचननिर्देशादितिभावः। इहापीति। ऋ इति वर्णग्रहणात्तदन्तविधिसद्भावादितिभावः। संयोगादेरिति। अ

यदितावद्धातुग्रहणेनग्रहणम्। ऋकारान्तानांलिटिगुणोभवतीतिगुणेकृतेरपरत्वेचअरतुः अरुरित्येतद्रूपंप्रसज्ये
त। अथाभ्यासग्रहणेनग्रहणम्। उरत्वं रपरत्वं हलादिःशेषः। अतआदेरितिदीर्घत्वंततआतोलोपइटिचेत्याकारलो
पेअतुःउरितिवचनमेवश्रूयेत। गुणेपुनःसतिगुणेकृतेरपरत्वेचद्विर्वचनंहलादिःशेषः अतआदेरितिदीर्घत्वंत
तःसिद्धंभवति आरतुरारुरिति। यथाआटतुःआटुरिति। किंपुनःकारणंसवर्णदीर्घत्वंतावद्भवतिनपुनरुरत्वम्।
परत्वादुरत्वेनभवितव्यम्। अन्तरङ्गत्वात्सवर्णदीर्घत्वंप्राप्नोति। अन्तरङ्गंसवर्णदीर्घत्वंबहिरङ्गमुरत्वम्। कान्त
रङ्गता। वर्णावाश्रित्यसवर्णदीर्घत्वमङ्गस्योरत्वम्। उरत्वमप्यन्तरङ्गम्। कथम्। वृक्षस्येतत्प्रागभ्यासविकारेभ्यो
ऽङ्गाधिकारइति। उभयोरन्तरङ्गयोः परत्वादुरत्वम्। उरत्वेचकृतेरपरत्वंहलादिःशेषः अतआदेरितिदीर्घत्वंपरस्य
रूपस्ययणादेशः सिद्धंभवतिआरतुःआरुरिति। अथापिकथंचिदृते — लिटिगुणेनार्थःस्यात्। एवमपिनदोषः।
ऋच्छत्यृतामितिऋकारोऽप्यत्रनिर्दिश्यते। कथम्। प्रश्लिष्टनिर्देशोऽयम्। ऋच्छतिऋऋृताम्। ऋच्छत्यृतामिति।
इहापितर्हिप्राप्नोतिचक्रतुश्चक्रुरिति। संयोगादिग्रहणंनियमार्थंभविष्यति। संयोगादेरेवाकेवलस्यनान्यस्याके
वलस्येति। तदेतदन्तरेणापिवैलिटिगुणवचनंरूपंसिद्धंभवति। अन्तरेणचऋच्छिग्रहणम्। अर्तेर्लिटिगुणः
सिद्धः। सएषोऽनन्यार्थऋच्छिप्रतिषेधोवक्तव्यः। उच्छेर्वाआमूवक्तव्यः। उभयंनवक्तव्यम् ॥

केवलस्यवर्णान्तरसहितस्येत्यर्थः। ततश्चधातोरेवग्रहणंभवतिष्ठते। सएषइति। आगमनिमित्तगुरुमत्त्वधात्वर्थइत्यर्थः।
अनृच्छइतिपर्युदासाश्रयेणतत्सदृशंधातुग्रहणादुच्छेराम्भवति। अथवायद्यपिगुणविधानेनऋच्छेराम्भवतीतिज्ञा
यते तथाप्यनृच्छइतिप्रतिषेधः प्राप्तिसंभावनयाक्रियमाणोज्ञापकोयथोक्तस्यार्थस्यभवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपदेशग्रहणमिति।शुरूमतइतिगुरुत्वमात्राश्रयोमतुबयथापितम्मानिति नतुनित्ययोगइतिव्याख्यास्तरइत्यर्थः।सन्निपा
तलक्षणइति।लिट्सन्निपातनिमित्तोगुणस्तद्विघातनिमित्तस्यामोनिमित्तंनभवति।आमिसति द्विलेर्लुकाभाव्यमितिलि
ट्सन्निपातस्यविघातःस्यात्।ऊर्णोतेरिति।प्रतिषेधइत्यर्थः।उकारोपीति।तेनोकारान्तस्योर्णोतेराम्नभवतिसंहितयाचसू
त्रपाठइतिदर्शयति।अनृच्छोदयायासश्चेति।उषविद॥विदिर्कारान्तइति।सूत्रेअकारान्तत्वंविदेर्निपात्यतइतिभावः।इ
तरोधातुपाठएवाकारान्तत्वमनेनविदेरुक्तमितिमत्वाह।यदीति।गुणोनसिध्यतीति।इकारस्योपधत्वाभावादकारलोपाभ
वाद्वविदतीतिस्यादित्यर्थः।आमसंनियोगेनेति।आमःप्राधान्येनविधीयमानत्वात्तदनुयायित्वमत्वस्येत्यर्थः॥भीह्री॥द्विर्वचनमे

उपदेशग्रहणंनकरिष्यते।कस्मान्नभवतिइयेषउवोषेति।उक्तंवा।किमुक्तम्।सन्निपातलक्षणोविधिरनिमित्तं
तद्विघातस्येति॥ऊर्णोतेश्चोपसंख्यानम्।ऊर्णोतेश्चोपसंख्यानंकर्तव्यम्।प्रोर्णुनाव।नकर्तव्यम्।वाच्यऊर्णोतेर्णुव
द्भावोयङ्प्रसिद्धिःप्रयोजनम्।आमश्चप्रतिषेधार्थमेकाचश्चेडुपग्रहात्।अथवाउकारोप्यत्रनिर्दिश्यते।कथम्।अ
विभक्तिकोनिर्देशः।अनृच्छउअनृच्छोदयायासश्चेति॥इजादेः॥उषविदजागृभ्योन्यतरस्याम्॥विदेराम्कित्॥वि
देराम्कित्वक्तव्यः।विदांचकार।नवक्तव्यः।विदिरकारान्तः।यद्यकारान्तः।वेत्तीतिगुणोनसिध्यति।लिट्सन्नियो
गेन।एवमपिविवेदेतिनसिध्यति।एवंतर्हि आमसन्नियोगेन।भारद्वाजीयाःपठन्ति।विदेराम्कित्निपातनाद्वाअ
गुणत्वमिति।भीह्रीभृहुवांश्लुवच्च॥श्लुवदतिदेशेकिंप्रयोजनम्।श्लुवदतिदेशेप्रयोजनं द्विर्वत्वे।बिभरांचकार।
कृञ्चानुप्रयुज्यतेलिटि॥किमर्थमिदमुच्यते।अनुप्रयोगोयथास्यात्।नैतदस्तिप्रयोजनम् ॥

वविधेयंकिमतिदेशेनेतिपृच्छति।श्लुवदतिदेशइति।नतुमताङ्गस्येतिगुणप्रतिषेधोनभवति।प्रत्ययलोपइत्यस्याः प्राप्तेरयं।
निषेधोनचात्रासौप्राप्तिरस्ति।कृञ्चानु॥किमर्थमिति।अन्तरेणापिसूत्रारम्भमनुप्रयोगःसिद्धःकालसाधनसंख्याप्रत्यक्तादिप्रतिपा
दनायलिट्परस्यकृञः।आमन्ताद्धिकालविशेषएवावसीयतेनत्वर्थान्तरं तत्रस मानार्थस्यधातोरनुप्रयोगोनभविष्यति।ओषा
मुवोषेति।उत्तरेणैवसर्वार्थाभिव्यञ्जनादामन्तस्यानर्थक्यप्रसङ्गात्।नापिभिन्नार्थस्यईहांपपाचेति।आमन्तसंबद्धसाधनाद्यसंप्रस
पात्।कृञतुसामान्यवचनः।सामान्यविशेषवाचिनोश्चप्रयोगोर्थविशेषप्रतिपादनेनगुणइतिभावः।अनुप्रयोगइति।यद्यप्यामन्तात्तक
लार्थाभिव्यक्तिर्नभवति तथापिप्रकरणादिवशाद्भविष्यतितस्मादनुप्रयोगसिद्ध्यर्थमिदंवक्तव्यमितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आमन्तमिति। पूर्वोक्तानामर्थानांप्रकरणादिवशादशक्याप्रतिपत्तिरितितदर्थाभिधानायानुप्रयोगः सिध्यत्येवेतिभावः। करोतेरेवानुप्रयोगो यथास्याद्भूभ्वस्त्योर्माभूदितिनियमार्थमेतदितिदर्शयितुमाह। कृञ्इति। आत्मनेपदेति। सिद्धेकृञोनुप्रयोगेपुनर्वचनमतिशयेनानुगुणस्यानुप्रयोगार्थंतेनात्मनेपदप्रकृतेरामन्तस्यात्मनेपदान्तएवकरोतिरनुप्रयुज्यतइत्याम्प्रत्ययवदितिसूत्रंनकर्तव्यंभवतीत्यर्थः। अवश्यमिति। परस्मैपदेनापिकर्त्रर्थस्यावगमात्तदन्तस्यानुप्रयोगः स्यादितिभावः। प्रत्याहारग्रहणमिति। एतच्चाम्प्रत्यय

आमन्तमव्यक्तपदार्थकंतेनापरिसमाप्तोर्थइतिकृत्वानुप्रयोगोभविष्यति। अतउत्तरंपठति। कृञोनुप्रयोगवचनमस्तिभुवोः प्रतिषेधार्थम्। कृञोनुप्रयोगवचनंक्रियते। अस्तिभुवोरनुप्रयोगोमाभूदिति। आत्मनेपदविध्यर्थंच। आत्मनेपदविध्यर्थंचकृञोनुप्रयोगवचनंक्रियते। आत्मनेपदंयथास्यात्। उच्यमानेप्येतस्मिन्नवश्यमात्मनेपदार्थोयत्नः कर्तव्यः। अस्तिभूप्रतिषेधार्थेनचापिनार्थः। इष्टः सर्वानुप्रयोगः। सर्वेषामेवकृभ्वस्तीनामनुप्रयोगइष्यते। किमिष्यतएव आहोस्वित्प्राप्नोत्यपि। इष्यतेचप्राप्नोत्यपि। कथम्। कृञितिनेदंधातु ग्रहणं किंतर्हि प्रत्याहारग्रहणम्। कृसंनिविष्टानांप्रत्याहारः। कृभ्वस्तियोगइत्यतः प्रभृत्याकृञोञकारात्। सर्वानुप्रयोगइतिचेदशिष्यमर्थाभावात्। सर्वानुप्रयोगइतिचेदशिष्यंकृञोनुप्रयोगवचनम्। किंकारणम्। अर्थाभावात्। आमन्तमव्यक्तपदार्थकंतेनापरिसमाप्तोर्थइतिकृत्वाअनुप्रयोगोभविष्यति। इदंतर्हिप्रयोजनम्। कृभ्वस्तीनामेवानुप्रयोगोयथास्यात्पचादीनांमाभूदिति। एतदपिनास्तिप्रयोजनम्। अर्थाभावाद्यन्यस्यसिद्धम्। अर्थाभावाद्यन्यस्यसिद्धमेतत्। कुतः। कृभ्वस्तयः क्रियासामान्यवाचिनः क्रियाविशेषवाचिनः पचादयः। नचसामान्यवाचिनोरेववाप्रयोगोभवति तत्रविशेषवाचिनः उत्पत्तिः सामान्यवाचिनोनुप्रयोक्ष्यन्ते। लिट्परार्थंवा। लिट्परार्थंतर्हिकृञोनुप्रयोगवचनंक्रियते। लिट्परस्यैवानुप्रयोगोयथास्यात्। अन्यपरस्यमाभूदिति। किंपरस्यपुनःप्राप्नोति। लट्परस्य।

२ विशेषवाचिनोरेव

नदिस्यन्नकृञ्ग्रहणादुस्तिनिवृत्त्यर्थादिज्ञायतेसंपदस्यार्थविरोधान्नभविष्यत्यनुप्रयोगः। अशिष्यमिति। विद्यतिनिरत्त्यर्थमपिनोपयुज्यते। प्रयुक्तानामन्वाख्यानात्तस्यचानुप्रयोगादर्शनात्। नचेति। द्वयोरेकार्थयोः प्रयोगाभावादितिभावः। न्यायप्रदर्शनार्थंचसामान्यवाचिनोरित्युक्तम्। ननुसामान्यवाचिभ्यः कृभ्वस्तिभ्यआम्विधानमस्ति। सामान्यवाचिनश्चार्थद्योतयितुंविशेषवचनोनशक्तः। प्रत्युतविशेषान्तरव्यावृत्त्यातदर्थविरोधी। लट्परस्येति। भूतार्थविशेषस्यामन्तेनप्रतिपादनाद्भूतस्यापिभूते पूर्वावर्तमानतामाश्रित्यलट्प्रयोगः स्यादितिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नलट्परस्येति। आमन्त्रार्थो मित्र्यक्त्यर्थत्वादनुप्रयोगस्य विरुद्धकालाभिधायिलङनुप्रयोगो न भविष्यति। ननु चेदसां प्रतिक वर्तमानता संभवे भूत
पूर्वोऽप्रयोलट्प्रयोग उपपद्यत इत्यर्थः। एकस्याकृति। वेदलोकप्रसिद्धोऽयं न्यायः। तथा हि। खादिरे बध्नाति पालाशे बध्नातीत्यादौ विकल्पिते
षु साधनेषु येनैव साधनेनोपक्रान्ता क्रिया तेनैव निर्वाह्यते। तत्र यदि कदाचित्खदिरस्याभावो भवति तदा तत्सदृशः कुबुरः सादृश्यात्खदिर
बुद्ध्या प्रतिनिधीयते न तु पलाशः परिगृह्यते। साधनभेदेन क्रियान्यत्वादुपक्रान्तक्रियायानिर्वाहप्रसङ्गात्। लोकेऽपि यदा स्वस्वामिभाव
प्रतिपादनाय गवां स्वामीति षष्ठ्युपक्रम्येत तदा अश्वानां चेत्यत्रापि तत्प्रतिपादनाय सैव निर्वाह्यते। अन्यथा स्वेषु चेत्युक्तेऽधिकरण

नलट्परस्यानुप्रयोगेण भूतकालो विशेषितः स्यात्। निष्ठापरस्य तर्हि मा भूत्। न निष्ठापरस्यानुप्रयोगेण पुरुषोपग्रहौ
विशेषितौ स्याताम्। लुङ्परस्य तर्हि मा भूत्। न लुङ्परस्यानुप्रयोगेणानद्यतनभूतकालो विशेषितः स्यात्। लङ्पर
स्य तर्हि मा भूत्। न लङ्परस्यानुप्रयोगेणानद्यतनः परोक्षः कालो विशेषितः स्यात्। अयं तर्हि भूते परोक्षानद्यतने ल
ङ्विधीयते ह शश्वतोर्लङ् चेति तत्परस्य मा भूदिति। एतदपि नास्ति प्रयोजनम्। एकस्या आकृतेश्चरितः प्रयोगो द्वि
तीयस्यास्तृतीयस्याश्च भविष्यति। तद्यथा। गोषु स्वामी अश्वेषु चेति। न हि भवति गोषु वाश्वानां च स्वामीति। अर्थसमा
प्तेर्वानुप्रयोगो न स्यात्। अर्थसमाप्तेस्तर्ह्यनुप्रयोगो न स्यात्। आमन्तेन च परिसमाप्तोऽर्थ इति कृत्वा अनुप्रयोगो न स्या
त्। एतदपि नास्ति प्रयोजनम्। इदानीमेव ह्युक्तमामन्तमव्यक्तपदार्थकं तेनापरिसमाप्तोऽर्थ इति कृत्वानुप्रयोगो भविष्यती
ति। विपर्यासनिवृत्त्यर्थं वा। विपर्यासनिवृत्त्यर्थं तर्हि कृञोऽनुप्रयोगवचनं क्रियते। ईहां चक्रे चक्रे ईहामिति मा भूत्। व्यवहितनि
वृत्त्यर्थं चैकृञोऽनुप्रयोगवचनं क्रियते। अन्वेव कृञोऽनुप्रयोगो यथा स्यात्। ईहां चक्रे। व्यवहितस्य मा भूदिति। ईहां देवदत्तश्चक्रे
इति॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये तृतीयाध्यायस्य प्रथमे पादे तृतीयमाह्निकम्॥

प्रतिपत्तिरपि स्यादश्वेषु च तिष्ठतीति। तस्माद्योऽर्थो यथा शब्दात्कृत्या प्रतिपादयितुमुपक्रान्तस्तथैवासौ निर्वाह्यो न त्वन्यथा शब्दाकृत्येत्यर्थः।
एवं हि प्रतिपत्तिलाघवं भवति। अर्थसमाप्तेर्वेति। आमन्तं पदं यावन्तमर्थमभिधातुं शक्नोति तावानर्थस्तत्रैव परिसमाप्त इत्यनुप्रयोगो न
स्यादिति भावः। एतद्भाष्यकारो दूषयितुमाह। एतदपीति। अशिष्यमर्थाभावादित्युक्तत्वात्। विपर्यासनिवृत्त्यर्थं वेति। सिद्धे कृञ्प्रयोगे
देशनियमार्थं वचनम्। अनुशब्दस्य पश्चादर्थत्वात्तेनामन्तस्य पश्चादेव कृञ्प्रयुज्यते न पूर्वं नापि व्यवहितमित्यर्थसंपत्तिः॥ ॥
इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे तृतीयस्याध्यायस्य प्रथमपादे तृतीयमाह्निकम्॥

CC-0. In Public Domain. Digitization by eGangotri

च्लिलुङि॥ आदेशैः सर्वत्र बाधितत्वान्नास्य प्रयोगः प्रयोजनं नापि क्विबादीनामिव कार्यार्थता दृश्यते। ततोऽस्यानर्थकं विधानमिति पृच्छति। का
यमिति। च्लिरुत्सर्ग इति। स्थानीत्यर्थः। स ह्यादेशेनापोद्यते। सिजुत्सर्ग इत्यत्र तु सामान्यविधिरुत्सर्गशब्देनोच्यते। च्ल्युत्सर्ग इति। च्लेरुत्सर्गो धातुमा
त्राद्विधानमित्यर्थः। तत्रावरत इति। त्रयाणां तावदवश्यं कर्तव्यं जनेस्तु दीपजनेति तशब्दे विहितस्य चिणो मन्त्रे यदि लुग्दृश्येत तदा चतुर्थस्या
पि ग्रहणं कर्तव्यमित्यवरत इत्युक्तम्। तत्र धयतेराकारान्तत्वात्तदर्थं चङ्। सिज्ग्रहणं कर्तव्यं घसॢ शृगम्यर्थमङ्। ग्रहणं धात्वन्तरार्थं तु सिज्
ग्रहणमित्यर्थः। क्सविधान इति। अनिट इत्येतत् च्लेर्विशेषणं यथा स्यादित्यर्थः। तथाहि। यद्यनिड्ग्रहणेन धातुर्विशेष्यते। यस्मादन्यत्रेडागमो
न दृष्ट इति विषयान्तरगतमनिड्ग्रहणमाश्रयणीयम्। लुङादेशानां सार्वधातुकत्वादिटः प्राप्त्यभावात्ततश्च गुहादिभ्यः क्सो न स्यात्। तेषां विकल्पि

च्लि लुङि॥ क्वायं च्लिः श्रूयते। न क्वचि[illegible]च्छ्रूयते। एतस्य सिजादय आदेशा उच्यन्ते। यदि न क्वचिच्छ्रूयते किमर्थं च्लिरुत्सर्गः क्रिय
ते न सिजुत्सर्ग एव कर्तव्यः। तस्य क्सादयोऽपवादा भविष्यन्ति। अत उत्तरं पठति। च्ल्युत्सर्गः सामान्य
ग्रहणार्थः। च्ल्युत्सर्गः क्रियते सामान्यग्रहणार्थः। क्व सामान्यग्रहणार्थेनार्थः। मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेरि
ति। तत्रावरतस्त्रयाणां ग्रहणं कर्तव्यं स्यात्। चङ्ङोः सिचश्चेति। क्सविधाने चानिड्वचने च्लिसंप्रत्ययार्थः। क्सविधाने चानि
ड्वचने च्लिसंप्रत्ययार्थः च्लिरुत्सर्गः क्रियते। च्लेरनिट इति क्सः सिद्धो भवति। घसॢभावे च। घसॢभावे च कृते लृदित इत्यङ्
सिद्धो भवति। अथ चित्करणं किमर्थम्। च्लेः चित्करणं विशेषणार्थम्। च्लेश्चित्करणं क्रियते। किमर्थम्। विशेषणार्थम्। क्व विशेष
णार्थेनार्थः। च्लेः सिजिति। लेः सिजित्युच्यमाने लिङ्लिटोरपि प्रसज्येत। नैतदस्ति प्रयोजनम्। लुङीत्युच्यते। न च लुङि लिङ्लिटौ स्तः॥

तेनेटा सेट्त्वात्। अथापि पाक्षिके नेडभावेन तेषामनिट्त्वं स्यात्। तथापि नित्यं क्सः स्यात्। च्लौ तु विशेष्यमाणे यदा तस्येण्नास्ति तदा क्सो भ
वति अघुक्षदिति। यदा त्विड्भवति तदा सिच् अगूहीदिति। घसॢभावे चेति। लुङि यदार्धधातुकं तत्राद्देर्घसॢभावो विधीयते। तत्र च्लौ प
रतो घसॢभावे सत्यङ् सिध्यति। अन्यथा सिच्येव घसॢभावः स्यात्। ततश्च सिचः श्रवणं स्यात्। न हि प्रवृत्तस्योत्सर्गस्यापवादेन बाधः क
र्तुं शक्यत इति भावः। तथा मन्त्रे घसेति यदा सिचो लुक् क्रियते तदा आदिः सिचोऽन्यतरस्यामिति स्वरः स्यात्। लुमता लुप्तेऽपि तस्मिन् प्रत्य
यलक्षणेनास्य स्वरस्येष्टत्वात्। लुङीत्युच्यत इति। लुङीत्यनुवर्तत इत्यर्थः। तदनुबन्धकग्रहणे इत्ययमपि परिहारोऽत्र संभवति।
भाष्यकारेण तु प्रकारान्तरेण परिहृतत्वान्नोक्तः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आमइतिचेति। तत्रसामान्यग्रहणेसतियथासंभवंकार्यंविज्ञायतइतिभावः। अत्रैवेति। अन्य थातदनुबन्धपरिभाषयाऽस्यैवग्रहणंस्यादू
नलिटस्ततश्चामइत्यनेनलिटोलुङ्स्यादित्यर्थः। तान्येवेति। च्लिच्लेर्लेरिति। सिज्लुङीत्येतत्तुइतरेणापिकर्तव्यम्। मन्त्रेघसेत्यत्रचङो
ङः सिचइतितान्येवत्रीणीत्यर्थः। च्लुत्सर्गवाद्याह। यदेतदिति। लेरितिवक्ष्यामीतितदेवमन्त्रेघसेत्यत्रानुवर्तिष्यते। ततश्चलाघवंभव
तीत्यर्थः। धेटइति। विभाषाघ्राधेडित्यत्रलिग्रहणानुवृत्तौसत्यांलेरादेशेषुकृतेषुस्थानिवद्भावाल्लिग्रहणेनतेषांग्रहणाल्लुकिकृतेच

अथेदित्करणंकिमर्थम्। इदित्करणंसामान्यग्रहणार्थम्। इदित्करणंक्रियतेसामान्यग्रहणार्थम् क्व सामा
न्यग्रहणार्थेनार्थः। मन्त्रेघसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेरिति आमइतिच। इकारेचेदानींसामान्यग्रहणार्थेक्रिय
माणेअवश्यंसामान्यग्रहणाविघातार्थश्चकारःकर्तव्यः। क्वसामान्यग्रहणाविघातार्थेनार्थश्चकारेण। अत्रैव। यत्तावदुच्य
तेच्लिरुत्सर्गः सामान्यग्रहणार्थइति। क्रियमाणेपिवैच्लुत्सर्गेतान्येवत्रीणिग्रहणानिभवन्ति। च्लिलुङि च्लेःसिच्लेरिति।
यदेतल्लेरिति तत्सर्वार्थंभ विष्यति। कथम्। यदेतद्गातिस्थाघुपाभूभ्यः सिचःपरस्मैपदेष्विति अत्रसिचोग्रहणमेतल्लेरि
तिवक्ष्यामि। यदिलेरित्युच्यतेधेटश्चातुःशब्दंप्राप्नोति। अदधद्अधाद्अधासीद्अदधादित्येतदपिप्राप्नोति। नचङोलु
किद्विर्वचनम्। नचङोलुकिद्विर्वचनेनभाव्यम्। किंकारणम्। चङोलुच्यतेनचात्रचङं पश्यामः। प्रत्ययलक्षणेन। नलुमता
तस्मिन्निति प्रत्ययलक्षणप्रतिषेधः। बहुवचनेतर्हिचातुःशब्दंप्राप्नोति। अदधन्अधुःअधासिषुःअधानित्यपिप्राप्नोति।
नैषदोषः। आतइतिजुस्भावोभविष्यति। नसिध्यति। सिज्ग्रहणंतत्रानुवर्तते। सिज्ग्रहणंतत्रनिवर्तिष्यते। यदिनि
वर्ततेअभूवन्निति प्रत्ययलक्षणेनजुस्भावःप्राप्नोति। एवंतर्हिलुक्सिजपवादोविज्ञास्यते। यदिलुक्सिजपवा
दोविज्ञायते। माहिधातामित्यत्रआदिःसिचोन्यतरस्यामित्येषस्वरोनप्राप्नोति। तस्मान्नैतच्छक्यंवक्तुंलुक्सिजपवादइति॥

ङ्मित्तंद्विर्वचनंप्राप्नोतीत्यदधादित्यपिस्यात्। ननुचङ्लोपस्यस्थानिवद्भावादाकारलोपेसत्यधदितिभाव्यंतत्कथमुच्यतेअदधादिति
प्राप्नोतीति। नैषदोषः। क्विलुगुपधात्वेतिलुकाक्लुप्तस्यस्थानिवत्त्वनिषेधान्नलुमताङ्गस्येतिप्रत्ययलक्षणनिषेधाच्चाकारलोपाभावा
त्। आतइति। विध्यर्थमेतद्भविष्यतिनतुनियमार्थमित्यर्थः। एवंतर्हीति। अकृतेषादेशेषुतदपवादोलेरेवलुग्विधास्यते तेनाभू
वन्नितिजुस्भविष्यति। आतइत्येतच्चविध्यर्थंभविष्यति। अदुरखुरित्यादिसिद्ध्यर्थमितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति। स्वरसिद्ध्यर्थे सिजादेशे कृते लुक् कर्तव्य इत्यर्थः। कथमिति। आर्धधातुकस्येड्विधीयते। तदेव तदभावादनिडिति व्यपदिश्यते। म
त्वर्थे बहुव्रीहिविज्ञानादिति भावः। अनिमित्तमिति। धातोरिट्श्च निमित्तनिमित्तिभावोस्तीति नानुपपन्नः षष्ठ्यर्थे बहुव्रीहिरिति भावः। न
वा तस्मादिति। अनिडिति वचनसामार्थ्यात्सप्तम्यर्थे बहुव्रीहिराश्रयिष्यत इत्यर्थः। क्वयोनिडिति। असति त्विविधाने विकरणेन क्सेना नि
ट्त्वाश्रयेण भाव्यम्। तत्रास्मिन्विषय इटः प्राप्त्यभावाद्विषयान्तरमनिट्त्वस्यापेक्षणीयमिति प्रश्नः। निष्ठायामिति। यद्यार्धधातुकमात्रे परिगृ
ह्यते ततो गुहादिभ्य ऊदिद्भ्यो न स्यादिति निष्ठाश्रयणम्। तदाश्रये च गुहादिभ्यो नित्यं क्सः प्रसज्येत विकल्पितश्चेष्यते इघुक्षत्‌ घुक्षत्‌ प्रघा

न चेदेवमुच्यते अभूवन्निति प्रत्ययलक्षणे नञुस्भावः प्राप्नोति। तस्मादात इत्यत्र सिज्ग्रहणमनुवर्त्यं तस्मिंश्चानुवर्तमाने धेट
श्चातुः शब्द्यं प्राप्नोति। तस्माद्गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेष्वित्यत्र सिज्ग्रहणं कर्तव्यम्। तस्मिंश्च क्रियमाणे तान्येव त्री
णि ग्रहणानि भवन्ति च्लिलुङि च्लेः सिचू लेरिति। यदप्युच्यते क्सविधाने चानिड्वचने च्लिसंप्रत्ययार्थ इति। धातुमेवात्रानिट्त्वेन
विशेषयिष्यामः। धातोरनिट इति। कथं पुनर्धातुर्नामानिट् स्यात्। धातुरेवानिट्। कथम्। अनिमित्तत्वादिटः अनिट्। न वा तस्मा
दिडस्ति सोयमनिडिति। अथ धातौ विशेष्यमाणे क्वयोनिडिति विशेषयिष्यसि। यदि विज्ञायते निष्ठायामनिट इति। भूयिष्टे
भ्यः प्राप्नोति। भूयिष्ठा हि शलन्तादिगुपधा निष्ठायामनिटः। अथ विज्ञायते लिटि यो निडिति। न कुतश्चित्प्राप्नोति सर्वे हि श
लन्तादिगुपधा लिटि सेटः। किं पुनः कारणं धातौ विशेष्यमाण एतयोर्विशेषयोर्विशेषयिष्यसि न पुनर्यत्र सामान्येने
टो विधिप्रतिषेधौ। क्व सामान्येन। वलादावार्धधातुके। यदप्युच्यते घस्लृभावे चेति। आर्धधातुकीयाः सामान्येन भ
वन्ति अनवस्थितेषु प्रत्ययेषु। तत्रार्धधातुकसामान्ये घस्लृभावे कृते लृदित इति अङ् भविष्यति। च्लिलुङि ॥

दीनां च निष्ठायामनिट्त्वात्क्सः प्राप्नोति। न पुनर्यत्रेति। गुहादयो विकल्पितेट इटो भावाभावाभ्यां भिद्यन्ते तत्र ये सेटस्तेभ्यः सिज्भ
विष्यति अनिड्भ्यस्तु क्स इति न कश्चिद्दोषः। आर्धधातुकसामान्य इति। अङ्प्रत्ययगतमार्धधातुकसामान्यं लुङ्विशेषितमाश्रयिष्य
त इत्यर्थः। यदि तर्हि च्लिः प्रत्याख्यायते। तदा मन्त्रे घसेति सिचो लुक्यादिः सिच इति स्वरः प्राप्नोति। नैष दोषः। तत्र हि छन्दसि क्वचिदडाटो
रुदात्तत्वेन भाव्यं क्वचित्तिङ्घातेन। यत्र लडाटोः तिङ्घातस्य च निषेधः प्रत्ययस्वरश्चेष्यते स विषयश्छन्दसि नास्ति। एतच्च भाष्यकारेण च्लेः
प्रत्याख्यानाद्विज्ञायते। माहिलावीरित्यादौ तु सिच एव विस्तेनानन्यार्थेन चागमानुदात्तत्वं बाधिष्यत इति तदर्थोप्यनुबन्धासङ्गार्थश्च्लिर्न कर्तव्यः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्लेः सिच्॥ अग्निरिति। सौ च परस्मैपदेषु चेति समुच्चयो विज्ञायेत तथा चात्रापि स्यात्। सावितिच सिसुशब्दयोः साधारणो निर्देशः स्यात्। आगन्तुना चेकारेण सकारो निर्दिश्येतेति भावः। न चात्रेति। पृथग्विभक्तिनिर्देशादङ्गाङ्गिभावोऽत्र न तु समुच्चय इति भावः। स्वरार्थ इति। सिचोऽनकत्वेपि चितस्तत्प्रकृतेरितिवचनान्माहिकार्ष्टमित्यादौ धातोरुदात्तार्थ इत्यर्थः। अनक्तोयमिति। माहिकार्ष्टमित्यादावादिस्सिचोन्यतरस्यामिति पाक्षिकेणोदात्तत्वेन भाव्यमिति चित्स्वरस्यायमविषय इति भावः। अर्थवत्त्विति। च्लेश्चित्करणस्य सामान्यग्रहणविघातार्थत्वान्माहिलावीदित्यादौ स्थानिवद्भावप्राप्तं स्वरमागमानुदात्तत्वं बाधेत। तस्मादन्तोदात्तार्थं सिचश्चित्त्वमित्यर्थः। नै

च्लेः सिच्॥ किमर्थश्चकारः। विशेषणार्थः। क्व विशेषणार्थेनार्थः। सिचि वृद्धिः परस्मैपदेष्विति। सो वृद्धिरिती यत्युच्यमाने अग्निर्वायुरित्यत्रापि प्रसज्येत। नैतदस्ति प्रयोजनम्। परस्मैपदेष्वित्युच्यते न चात्र परस्मैपदं पश्यामः। स्वरार्थस्तर्हि। चितोन्त उदात्तो भवतीति अन्तोदात्तत्वं यथा स्यात्। एतदपि नास्ति प्रयोजनम्। अनक्तोयं तत्र नार्थः स्वरार्थेन चकारेणानुबन्धेन। इटि कृते साक्तो भविष्यति। तत्र प्रत्ययाद्युदात्तत्वेनेट उदात्तत्वं भविष्यति। न सिध्यति। आगमा अनुदात्ता भवन्तीति अनुदात्तत्वं प्राप्नोति। अत उत्तरं पठति। सिचश्चित्करणानार्थक्यं स्थानिवत्त्वात्। सिचश्चित्करणमनर्थकम्। किं कारणम्। स्थानिवत्त्वात्। चितो यमादेशः स्थानिवत्त्वाच्चिद्भविष्यति। अर्थवत्तु चित्करणसामर्थ्यादीट उदात्तत्वम्। नैष दोषः। अर्थवत्तु सिचश्चित्करणम्। कोऽर्थः। सिचः चित्करणसामर्थ्यादिट उदात्तत्वं भविष्यति। नाप्राप्ते प्रत्ययस्वरे आगमानुदात्तत्वमारभ्यते तद्यथैव प्रत्ययस्वरं बाधत एवं स्थानिवद्भावादपि या प्राप्तिस्तामपि बाधेत। तस्माच्चित्करणम्। तस्माच्चकारः कर्तव्यः ॥

षदोष इति। सिचश्चित्करणानर्थक्यमिति यदुक्तं तन्नास्तीत्यर्थः। अत्र केचिदाहुः। प्रत्ययस्वरस्येवापवादो आगमानुदात्तत्वं यासुडित्यत्र ज्ञापितं तद्दृशं चित्स्वरश्च षाष्ठिकस्तत्रापवादविप्रतिषेधाच्चित्स्वर एव भविष्यति नार्थः सिचश्चित्त्वेनेति। नैतदस्ति। न हि प्रत्ययस्वरस्यैव तावदपवादो प्रकृत्यागमानामानुगादीनां तदप्रसङ्गात्। कुण्डिनजादीनां च चिताम्। स्थानिवदित्ययं च कार्यातिदेश इति परत्वमपि चित्स्वरस्य नास्त्यागमानुदात्तत्वेन चाविशेषात्सर्वः स्वरो बाध्यः। तस्मात्तद्बाधनार्थं सिचश्चित्त्वं कर्तव्यमिति स्थितम् ॥ रामः ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परस्मिन्निति। सिचः परं यत्सार्वधातुकं तस्मिन्नित्यर्थः। असिद्धमिति। बाह्यसार्वधातुकाश्रयस्य सनलोपस्य बहिरङ्गत्वादसिद्धत्वमित्यर्थः। आर्धधातुकोपदेशे यदकारान्तं तस्य लोप इत्येवं वा हन्तेरतो लोपो न भविष्यति। तथा चोच्यते। अवयवलोपिनामतो

अथेदित्करणं किमर्थम्। इदित्करणं नकारलोपाभावार्थम्। इदित्करणं क्रियते। नकारलोपो मा भूदिति। अमंस्त अमंस्याः। अनिदितां हल उपधायाः क्ङितीति। न वा हन्तेः सिचः कित्करणं ज्ञापकं नकारलोपाभावस्य। न चैतत्प्रयोजनमस्ति। किं कारणम्। यदयं हनः सिजिति हन्तेः सिचः कित्वं शास्ति तज्ज्ञापयत्याचार्यः न सिजन्तस्य नकारलोपो भवतीति। नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्। सिच्येव नकारलोपो यथा स्यात् परस्मिन्निमित्ते मा भूदिति। कः पुनरत्र विशेषः। सिचि वा नलोपे सति परस्मिन्निमित्ते वा। अयमस्ति विशेषः। सिचि नलोपे सति नलोपस्यासिद्धत्वादकारलोपो न भवति। परस्मिंस्तु निमित्ते सति नकारलोपे कृते अकारलोपः प्रसज्येत। समानाश्रयमसिद्धम्। व्याश्रयं तु सिद्धमेव। व्याश्रयं चेदम्। ननु च परस्मिन्नपि निमित्ते नकारलोपे सति अकारलोपो न भवति। कथम्। असिद्धं बहिरङ्गमन्तरङ्ग इति तदेतद्धन्तेः सिचः कित्करणं ज्ञापकमेव न सिजन्तस्य नकारलोपो भवतीति। इदिद्धि स्थानिवत्त्वात्। अथाप्यनेनेदितार्थः स्यात्। इदितो यमादेशः स्थानिवद्भावादिदिद्भविष्यति॥ स्पृशमृशकृषतृपदृपां सिज्वा॥ स्पृशमृशकृषतृपदृपां सिज्वेति वक्तव्यम्। स्पृश। अस्पृक्षत् अस्प्राक्षीत्। मृश। अमृक्षत् अम्राक्षीत्। कृष। अकृक्षत् अक्राक्षीत्। तृप अतृपत् अत्राप्सीत्। दृप। अदृपत् अद्राप्सीत्। किं प्रयोजनम्। सिच् यथा स्यात्। अथ क्सः सिद्धः। सिद्धः कथम्। शल इगुपधादनिटः क्स इत्येव। सिजपि सिद्धः। कथम्। च्लेः चित्करणं प्रत्याख्यायते तत्र च्लावेव झलक्षणे ऽमागमे कृते विहतनिमित्तत्वात् क्सो न भविष्यति। यद्येवमन्त्यस्य सिजादयः प्राप्नुवन्ति ॥

लोपो नास्तीति। स्पृशेति। त्रिभ्यः क्से प्राप्ते द्वाभ्यां पुणा द्यडि पक्षे सिज्विधीयते। च्लेश्चित्करणमिति। ततश्च प्रयोजनाभावाच्चकारस्येत्संज्ञा नास्तीति च्लौ झलादौ पक्षे ऽमागमे कृते सिच्। अमभावपक्षे तु क्स इति त्रयाणां ग्रहणं न कार्यमित्यर्थः। अन्त्यस्येति। अन्त्यग्रहणमुपलक्षणं चङादयो ह्यादेः परस्येत्यादेः प्राप्नुवन्ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिणोनित्वादिति। चिण्भावकर्मणोरित्यत्र धातुग्रहणंनापेक्ष्यत इति आदेः परस्येतिनभविष्यति पदेर्दीपादिस्यश्चादेः परस्येतिप्राप्नोति। तस्माद्विहितविशेषणाश्रयेण परिहर्तव्यम्। सप्रयोजनमिति। सामान्यग्रहणाविघातार्थत्वस्योक्तत्वात्। सति च प्रयोजनेचकारस्येत्संज्ञयाभाव्यंलकारश्चह्मलुनूभवतीत्यमोभावात् क्स एव प्रसज्येतेत्यर्थः। यस्य खल्वपीति। पुषादिद्युताद्ल्लृदितः इति कृते प्यमागमे प्रवर्तते॥ शलइगु॥ क्सविधानइति। विशेषणासंभवाल्लक्षणदोषमुद्भावयति। भूतपूर्वगत्याश्रयेविहितवि

सिद्धंतुसिचोयादित्वात्। सिद्धमेतत्। कथम्। सिचोयादित्वात्। यादिःसिच्करिष्यते। सोऽनेकाल्शित्सर्वस्येतिसर्वादेशोभविष्यति। किंपुनर्नश्रूयतेयकारः। लुप्तनिर्दिष्टोयकारः। चङ्ङोः कथम्। चङ्ङोःप्रश्लिष्टनिर्देशात्सिद्धम्। चङ्ङोरपिप्रश्लिष्टनिर्देशोयम्। चअङ् चङ् अअङ् अङ् सोनेकाल्शित्सर्वस्येतिसर्वादेशोभविष्यति। चिणः कथम्। चिणोऽनित्वात्। चिणश्चकारस्यअनित्वात्सिद्धम्। किमिदमनित्वादिति। अन्त्यस्यायंस्थानेभवन्नप्रत्ययः स्यात्। असत्यांप्रत्ययसंज्ञायामित्संज्ञान। असत्यामित्संज्ञायांलोपोन। असतिलोपेअनेकाल्। यदानेकाल्तदासर्वादेशः। यदासर्वादेशस्तदाप्रत्ययः। यदाप्रत्ययः तदेत्संज्ञा। यदेत्संज्ञातदालोपः। एषचतत्रवार्तिककारस्यनिर्णयः सप्रयोजनंचित्करणमिति। अपिचनैश्यंनप्रकल्प्यते। अस्रक्षत् अस्याक्षीत् अस्याक्षीदिति। सिचिपुनः सतिविभाषासिचि। सिच्यपिझलक्षणोमागमोविभाषा। यस्यखल्वपिअमाअङोनिमित्तंनविहन्यतेसस्यादेव। तस्मात्सुष्ठूच्यतेस्पृशमृशकृषतृपदृपांसिज्वेति। शलइगुपधादनिटः क्सः॥ क्सविधानइगुपधाभावः झ्लेर्गुणनिमित्तत्वात्। क्सविधानेइगुपधत्वस्याभावः। किंकारणम्। झ्लेर्गुणनिमित्तत्वात्। झ्लिर्गुणस्यनिमित्तम्। तत्रझ्लावेवगुणेकृतेइगुपधादितिक्सोनप्राप्नोति। नवाक्सस्यानवकाशत्वादपवादोगुणस्य। नवाएषदोषः। किंकारणम्। क्सस्यानवकाशत्वात्। अनवकाशः क्सोगुणंबाधिष्यते ॥

शेषणाश्रयेवालक्ष्यासिद्धिः। कित्करणंतुक्सस्याचीतिविशेषणार्थंवत्साद्यत्यादौलोपनिवृत्तयेस्यात्। नवाक्सस्येति। भूतपूर्वगत्याश्रयेकित्त्वमनर्थकंस्यादितिसानुबन्धकंरूपमनवकाशमित्यपवादत्वाद्गुणस्यबाधकमित्यर्थः। नचक्सस्याचीतिविशेषणार्थंकित्त्वम्। प्रत्ययत्वादर्थवत्वाच्चास्यैवक्सस्यतत्रग्रहणस्यसिद्धत्वाद्गुणादीनामप्रसक्तत्वाद्वत्साद्यत्यादौप्रसङ्गाभावात् ॥ रामः ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनिड्वचनमिति। अनिट इत्येतच्छ्लेर्विशेषणं यथा स्यादिति। च्लिरुत्सर्गः कृत इत्युक्तं तत्रास्य सिचा नित्यं भाव्यमिति इडभावोपलक्षितमस्य रूपं न क्वचिदिति यत इति च्लेरनिट इति विशेषणस्याप्रसिद्धिरित्यर्थः। नवा क्सस्येति। अयं भावः। लिङ्लिटोरिति स्थिते सिचा न भाव्यं क्सस्यापि विषय इति क्सेनापि न तावद्भाव्यं यावदस्यानिट्त्वं न ज्ञातम्। तत्र लकारस्यैवेटः प्राप्तौ तन्निषेधादनिट्त्वमस्तीति क्सः सिद्धः अलिस्

अनिड्वचनमविशेषणं च्लेर्नित्यादिष्टत्वात्। अनिड्वचनमविशेषणम्। किं कारणम्। च्लेर्नित्यादिष्टत्वात्। नित्यादिष्टः च्लिः न क्वचित् श्रूयते। तत्र च्लेरनिट इति क्सो न प्राप्नोति। न वा क्सस्य सिजपवादत्वात् तस्य चानिडाश्रयत्वादनिटि प्रसिद्धे क्सविधिः। न वैष दोषः। किं कारणम्। क्सस्य सिजपवादत्वात्। सिजपवादः क्सः। स चानिडाश्रयः। न चापवादविषयमुत्सर्गोऽभिनिविशते। पूर्वं ह्यपवादाः प्रवर्तन्ते पश्चादुत्सर्गाः। प्रकल्प्य वापवादविषयमुत्सर्गोऽभिनिविशते। तन्न तावदत्र कदाचित् सिज् भवति। क्समपवादं प्रतीक्षते। क्सस्य सिजपवादत्वात्तस्य चानिडाश्रयत्वादनिट्प्रसिद्धः। अनिटि प्रसिद्धे क्सविधिः। अनिटि प्रसिद्धे क्सो भविष्यति। सिजिदानीं कं भविष्यति। शेषे सिज्विधानम्। शेषे सिज्विधानं भविष्यति अक्रोषीत् अमोषीत् इति। श्लिष आलिङ्गने॥ किमर्थमिदमुच्यते। नियमार्थम्। नियमार्थोऽयमारम्भः। श्लिष आलिङ्गन एव क्सो यथा स्यात्। इह मा भूत्। उपाश्लिषत् जतु काष्ठं च समाश्लिषद्ब्राह्मणकुलमिति। अत उत्तरं पठति। श्लिष आलिङ्गने नियमानुपपत्तिर्विधेयभावात्। श्लिष आलिङ्गन इति नियमस्यानुपपत्तिः। किं कारणम्। विधेयभावात्। कैमर्थक्यान्नियमो भवति। विधेयं नास्तीति कृत्वा। इह चास्ति विधेयम्। किम्। पुषादिपाठादङ् प्राप्तः तद्बाधनार्थः क्सो विधेयः। तत्रापूर्वो विधिरस्तु नियमो वेति। अपूर्व एव विधिः स्यान्न नियमः। किं च स्याद्यद्ययं नियमो न स्यात्। आत्मनेपदेष्वालिङ्गने नालिङ्गने च क्सः प्रसज्येत। यथैव क्सोऽङं बाधते एवं चिणमपि बाधेत। उपाश्लेषि कन्या देवदत्तेनेति ॥

दिति। यत्र लिटः प्रतिषेधो नास्ति तत्र सिजेव भवत्यक्रोषीदिति। श्लिष आ॥ किमर्थमिति। किं पुषादिपाठादङि प्राप्ते तद्बाधनाय विध्यर्थमिदमथ पूर्वेण क्से सिद्धे नियमार्थमिति प्रश्नः। इतरो वक्ष्यमाणयोगविभागमनसिकृत्याह। नियमार्थमिति। उपाश्लिषदिति। प्रत्यासत्तावत्र श्लिषिर्वर्तते नालिङ्गने। अङ् प्राप्त इति। श्लिषेर्नोप्राप्ते अङि क्सस्यारम्भाद्बाधकत्वमित्यर्थः। यथैवेति। विध्यर्थत्वे दोषान्तरोद्भावनम्॥

CC-0. In Public Domain. Digitization by eGangotri

 सिद्धंत्विति।पूर्वेणक्सेसिद्धेनियमार्थमेतद्वचनंकर्तव्यम्।अचिण्विषयइति।अनेननियमार्थत्वंसमर्थ्यते।अन्यथाचिण्बाधनायतद्विषयेविध्यर्थमेतत्स्याद् नतुनियमार्थम्।अङ्गिधानइति।ततश्चालिङ्गनेऽङ्प्रतिषेधाच्छ्लिषआलिङ्गनेऽचिण्विषयइतिनियमार्थंभवत्यन्यथाविध्यर्थमेतत्स्यात्।श्लिषःक्सइति।श्लिषइत्यत्रानिटइत्यनुवर्तनाद्दीहार्यस्यसेटोग्रहणाभावः।सानुबन्धकत्वाद्वा।तत्रपुषादित्वादनुमितोऽङ्प्रत्ययःशिष्टेनक्सेनबाध्यते।अथवेति।समुदायापेक्षायांपुरस्ता

सिद्धंतुश्लिषआलिङ्गनेऽचिण्विषये।सिद्धमेतत्।कथम्।श्लिषआलिङ्गनेअचिण्विषयेक्सोभवतीतिवक्तव्यम्।अङ्गिधानेचश्लिषोनालिङ्गने।अङ्गिधानेचश्लिषोनालिङ्गनेइतिवक्तव्यम्।सिध्यति।सूत्रंतर्हिभिद्यते।यथान्यासमेवास्तु।ननुचोक्तंश्लिषआलिङ्गनेनियमानुपपत्तिर्विधेयभावादिति।नैषदोषः।योगविभागात्सिद्धम्।योगविभागःकरिष्यते।श्लिषः।श्लिषःक्सोभवति।किमर्थमिदम्।पुषादिपाठादङ्प्राप्नोति तद्बाधनार्थम्।ततआलिङ्गने।आलिङ्गनेचश्लिषःक्सोभवति।इदमिदानींकिमर्थंस्यात्।नियमार्थम्।श्लिषआलिङ्गनेएव।क्वमाभूत्।उपाश्लिषज्जतुचकाष्ठंचसमाश्लिषद्ब्राह्मणकुलमिति।यदप्युच्यते।यथैवक्सोऽङंबाधतएवंचिणमपिबाधेतेति।पुरस्तादपवादाअनन्तरान्विधीन्बाधन्तेनोत्तरानित्येवंक्सोऽङंबाधिष्यतेनचिणम्।अथवातत्रवक्ष्यतिचिणित्यनुवर्तमानेपुनश्चिण्ग्रहणस्यप्रयोजनं चिणेवयथास्याद्यदन्यत्प्राप्नोतितन्माभूदिति॥श्लिषआलिङ्गने॥णिश्रिद्रुस्रुभ्यःकर्तरिचङ्॥णिश्रिद्रुस्रुषुकमेरुपसंख्यानम्।णिश्रिद्रुस्रुषुकमेरुपसंख्यानंकर्तव्यम् ॥

दपवादादितिपरिभाषानास्तीतिपरिहारान्तरोपन्यासः।णिश्रिद्रु॥कमेरिति।आर्धधातुकेविकल्पेनणिङोविधानाद्णिङ्पक्षेसिद्धिप्राप्तेर्वचनम्।तत्राचकमतेतिभवति।णिङ्पक्षेतुसन्वद्भावादचीकमतेतिसन्वल्लघुनिचङीतिवक्तव्ये परग्रहणसामर्थ्यादन्यपदार्थेणिराश्रीयतेअन्यस्यासंभवात्तेनचङ्परेणौयल्लघुधात्वक्षरंतत्रपरतोऽभ्यासस्यसनीवकार्यंभवतीत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाकमिष्टसुखमिति। नाकं स्वर्गमिष्टं सुखं यान्ति सुयुक्तैर्वडवारथैर्यैः कर्मभिर्लुङि किंरूपं भवतीति ष्टैरञ्चकमते स्तुक्तम।
यैस्त्वचीकमतेत्युक्तं ते पत्काषिणो यान्ति लक्षणास्मरणा न्निन्दार्थवादोयं लक्षणस्मरणादरार्थः। अन्ये त्वाहुः। अकमिष्टे
तियैरुक्तं तएवोपचारादकमिष्टशब्देनानु करणशब्देनोच्यन्ते। अनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वाद्विभक्ति
र्न कृता। ते सुयुक्तैरपि वडवारथैर्गच्छन्तः सुखं न प्राप्नुवन्ति अपशब्दोच्चारणात्। येत्वचीकमत भाषिणस्ते पत्काषिणो पि

नाकमिष्टसुखं यान्ति सुयुक्तैर्वडवारथैः। अथ पत्काषिणो यान्ति येचीकमत भाषिणः॥ कर्मकर्तरि च॥ कर्मक
र्तरि चोपसंख्यानं कर्तव्यम्। कारयति कटं देवदत्तः अचीकरत कटः स्वयमेव। उच्छ्रयति कटं देवदत्तः उदशि
श्रियत कटः स्वयमेवेति। न वा कर्मण्यविधानात्कर्तृत्वाच्च कर्मकर्तुः सिद्धम्। न वा कर्तव्यम्। किं कारणम्। कर्म
ण्यविधानात्। न हि कश्चित्कर्मणि विधीयते यश्चङं बाधेत। कर्तृत्वाच्च कर्मकर्तुः सिद्धम्। अस्ति च कर्मकर्तरि
कर्तृत्वमिति कृत्वा चङ् भविष्यति। ननु चायं कर्मणि विधीयते चिण्भावकर्मणोरिति। प्रतिषिध्यते तत्र यक्चि
णोः। यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानमिति। यस्तर्हि न हेतुमण्णिच् उदपुपुच्छत गौः स्वयमे
वेति। अत्रापि यथा भारद्वाजीयाः पठन्ति तथा भवितव्यं प्रतिषेधेन। यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्म
नेपदाकर्मकाणामुपसंख्यानं कर्तव्यमिति॥ अस्यति वक्तिख्यातिभ्योऽङ्॥ अस्यतिग्रहणं किमर्थम्। अस्यतिग्र
हणमात्मनेपदार्थं पुषादित्वात्। अस्यतिग्रहणमात्मनेपदार्थं द्रष्टव्यम्। किमुच्यते आत्मनेपदार्थमिति न पु
नः परस्मैपदार्थमपि स्यात्। पुषादित्वात्। पुषादिपाठात् परस्मैपदेषु अङ् भविष्यति॥ कर्मकर्तरि च॥ कर्मक
र्तरि चोपसंख्यानं कर्तव्यम्। पर्यास्यतां कुण्डले स्वयमेव ॥

सुखं यान्तीति। कर्मकर्तरि चेति। कर्तर्युच्यमानश्चङ् कर्मकर्तरि प्राप्नोतीति वचन
म्। उदपुपुच्छतेति। पुच्छ मुदस्यति उत्पुच्छयते गौस्तत्र यदान्तर्भावितण्यर्थत्वात् सगवासकर्मकत्वं भवति तदोत्पुच्छय
तिगामिति भवति। पुनर्गौरेव यदासौ करोति शयेन कर्तृत्वं विवक्ष्यते भूतकालश्च तदैतदुदाहरणम्। अस्यति॥ पुषादय आगणान्ताद्
अन्तराले कृत्करणं रधादिसमाप्त्यर्थं न तु पुषादिपरिसमाप्त्यर्थमिति प्रतिपादनाय सुहृद्भूत आचार्य आह। अस्यतिग्रहणमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· ५०

अन्नापोति। आतिदेशिकस्य कर्मकार्यस्य कस्यचिदत्राविधानात्तदाश्रयं कार्यं प्रतिबन्धकाभावात्प्रवर्तत एवेतिभावः॥ जृस्तम्भु॥ अन्यतरदिति। अनेकार्थत्वाद्धातूनामत्र विषये ऽर्थभेदो न प्रयोजक उभयोपादानस्येतिभावः। यत्तूभयोपादानसामर्थ्याद् ग्लुचेरिङि नलोपो न भवति न्यग्लुञ्चदिति। केश्चिद्व्याख्यायि तद्भाष्यविरोधादनादरणीयम्। चिण्भावा। नित्यमेवमिति। प्रतिषेधसंबद्धं तदभूदित्यर्थः। नन्वत्र प्राप्त्यभावान्नेति नापेक्षिष्यत इत्याह। अथवेति। विकल्पोपि पूर्वमेव निषेधेन निवर्तितत्वान्नापेक्षिष्यत इत्याह। अथवेति। तेनोपाश्लेषीति क्सो न भवति। सार्वधा॥ इह पश्याम इति। वक्ष्यमाणस्य वाक्यार्थ

अत्रापि न वा कर्मण्यविधानात् कर्तृत्वाच्च कर्मकर्तुः सिद्धमित्येव॥ जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च॥ इहं ग्लुचिग्रहणं ग्लुञ्चिग्रहणं च क्रियते। अन्यतरच्छक्यमकर्तुम्। यदि तावद् ग्लुचिग्रहणं क्रियते। ग्लुञ्चिग्रहणं न करिष्यते तेनैव सिद्धं न्यग्लुचदन्यग्लोचीत्। इदमिदानीं ग्लुञ्चे रूपं न्यग्लुञ्चीत्। अथ ग्लुञ्चिग्रहणं क्रियते ग्लुचिग्रहणं न करिष्यते तेनैव सिद्धं न्यग्लुचदन्यग्लुञ्चीत्। इदमिदानीं ग्लुचे रूपं न्यग्लोचीदिति॥ चिण्ते पदः॥ अयं तशब्दोऽस्त्येवात्मनेपदमस्ति परस्मैपदमस्त्येवैकवचनमस्ति बहुवचनम्। कस्येदं ग्रहणम्। यः पदेरस्ति। कश्च पदेरस्ति। पदिरयमात्मनेपदी॥ चिण् भावकर्मणोः॥ चिणिति वर्तमाने पुनश्चिण्ग्रहणं किमर्थम्। नेत्येवं तदभूद् विध्यर्थमिदम्। अथवा चेत्येवं तदभूद् नित्यार्थमिदम्। अथवा चिणिति वर्तमाने पुनश्चिण्ग्रहणस्यैतत्प्रयोजनम्। चिणेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूत्॥ सार्वधातुके यक्॥ इह पश्यामः कर्मणि द्विवचनबहुवचनान्युदाह्रियन्ते पच्येते ओदनौ पच्यन्ते ओदना इति। भावे पुनः एकवचनमेव आस्यते भवता आस्यते भवद्भ्याम्। आस्यते भवद्भिरिति। केनैतदेवं भवति ॥

स्य दृशिक्रियायां कर्मत्वं यथा पश्य मृगो धावतीति मृगकर्तृकायाः स्मरणक्रियायाः। केनैतदिति। इह क्रियाप्रधानमाख्यातं सा च क्रिया साध्यरूपत्वान्निवृत्तभेदा। तदुक्तम्। निवृत्तभेदा सर्वैव क्रियाख्यातेऽभिधीयते। श्रुतेरशक्या भेदानां प्रविभागप्रकल्पनेति। तत्र यथा साधनभेदात्कर्तृकर्माभिधायिनि लकारे द्विवचनबहुवचने भवतस्तथा भावाभिधायिन्यपि प्रसजतः। अथैकपदवाच्यसाधनसंख्याश्रये द्विवचनबहुवचने भवत इति पक्षस्तदा पाकौ पाका इत्यत्र न प्राप्नुतः साधनस्य घञाऽनभिधानादिति प्रश्नः।

राम: ५०

CC-0. In Public Domain. Digitization by eGangotri

कर्मानेकमिति। कर्मशक्त्याधारोद्रव्य मनेकं शक्तिशक्तिमतोश्चशब्देनभेदोनप्रतिपाद्यतइतिशक्त्यभिधायिनाप्याख्यातेनौ
दनःपच्यतइतिशक्तिमद्द्रव्यवाचिनओदनशब्दस्यसामानाधिकरण्यंभवति।भावःपुनरिति।भेदाभावलक्षणमभेदैकत्वंभावस्य।
नत्वेकत्वसंख्याख्यातवाच्यस्यभावस्यास्ति।तस्यद्रव्यधर्मत्वादसत्त्वभूतत्वाच्चाख्यातवाच्यस्यभावस्य।आश्रयभेदादिति।गुडति
लौदनादीनामाश्रयाणांभेदादाश्रितोपिपाकोभिद्यते।घञादिभिश्चसत्त्वरूपोर्थोभिधीयतइतिद्रव्यधर्मसंख्याभेदाश्रयोव
चनभेदोनविरुध्यतइतिभावः।इहापीति।आख्यातवाच्यस्यापिभावस्याश्रयभेदाद्भेदोस्तु।ततश्चवचनभेदप्रसङ्गइत्यर्थः।
पाकविशेषानिति।केचित्पाकशब्दंकर्मसाधनंव्याचक्षते।पक्तव्यविशेषान्गुडादीनित्यर्थः।तत्त्वयुक्तम्।असंज्ञायांकर्मणि
घञोदुर्लभत्वात्।तस्मादाश्रयप्रकारादिभेदभिन्नान्पाकविशेषानित्यत्रायमर्थः।अथवासंज्ञाग्रहणस्यप्रत्याख्यातत्वादसंज्ञा

कर्मानेकंतस्यानेकत्वाद्द्विवचनबहुवचनानिभवन्ति।भावःपुनरेकएव।कथंतर्हिइहद्विवचनबहुवचनानिभवन्ति
पाकौपाकाइति।आश्रयभेदात्।यदासौद्रव्यमाश्रितोभवतिभावस्तस्यभेदाद्द्विवचनबहुवचनानिभवन्ति।इ
हापितर्हियावन्तस्तेतांक्रियांकुर्वन्तिसर्वेतेतस्याआश्रयभूताभवन्तितद्भेदाद्द्विवचनबहुवचनानिप्राप्नुव
न्ति।एवंतर्हिइदंतावदयंप्रष्टव्यःकिमभिसमीक्ष्यैतत्प्रयुज्यतेपाकौपाकाइति।यदितावत्पाकविशेषानभि
समीक्ष्ययश्चौदनस्यपाकः।यश्चगुडस्ययश्चतिलानांबहवस्तेशब्दाःसरूपाश्च।तत्रयुक्तंबहुवचनमेकशेषश्च।तिङ
भिहितेचापितथाभावेबहुवचनंश्रूयते।तद्यथा।उष्ट्रासिकाआस्यन्तेहतशायिकाःशय्यन्तइति ॥

यामपिकर्मणिघञ्भवति।उष्ट्रासिकाआस्यन्तइति।अत्राश्रयाणामुष्ट्राणांभेदादनेकप्रकारयुक्तान्यासनानिभिन्नानितत्सा
मानाधिकरण्याच्चाख्यातवाच्यभावभेदा स्यन्तइति बहुवचनमित्यर्थः।इवशब्दप्रयोगमन्तरेणापि चेवार्थगतिर्भवति।
तदयमर्थः।यादृशान्युष्ट्राणामनेकप्रकाराण्यासनानितादृशानिदेवदत्तादिभिःक्रियन्तइति।भवद्भिरास्यतइत्यत्राश्रयभेद
दाश्रितभेदस्यप्रतिपन्नत्वात्प्रयोजनाभावाद्वावोभेदंनोपादत्तइत्येकवचनमेवभवति।यथाताम्रःपलाशेषुबभूवरागइ
ति।नचसर्वत्राश्रयभेदादाश्रितभेदस्यप्रतीतिः घटान्यचतीत्यादौपाकस्याभिन्नस्यैवावगमात्।
केचित्तूष्ट्रासिकाआस्यन्तइतिकर्मणिलकारमिच्छन्ति।उष्ट्रासिकालक्षणस्यभावस्यकर्मत्वात्।यथागोदोहःसुप्यतइति।ए
वंतुविवक्षान्तरेभवत्येवेतिभाष्यकारेणभावेपिलविधानेबहुवचनमुपपादितम्।तेपिबहवइति।भिन्नकालत्वादेवेतिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तत्रयुक्तमिति। शास्त्रेणैकशेषेसत्येकस्यानेकार्थाभिधायित्वाद् अन्तरेणवैकशेषात्स्वंसरूपाणामेकस्यैवस्वभावतोनेका
र्थत्वादितिभावः।तिङभिहितइति।नह्येकंतिङन्तमनेककालभावप्रत्यायनेसमर्थंकिंचिदस्तीतिभिन्नकालास्तनक्रियाप्र
त्यायनायभिन्नाएवशब्दाःप्रयुज्यन्तइतिभावः।द्रव्यवदिति। द्रव्यत्वेनप्रसिद्धोयोघटादिस्तद्वदयंभावोभवति।लिङ्गसं
ख्यासाधनसंबन्धप्रतिपत्त्या।तत्रवस्तूपलक्षणंयत्रेतिद्रव्यलक्षणयोगेपिप्रसिद्धप्रसिद्धपेक्षउपमानोपमेयभावः।क्रि
याक्रिययेति। ननुभवतिपचति पश्यमृगोधावतीतिकर्तृकर्मभावेनक्रियाक्रियया संबध्यतएव।एवंतर्हिकरणादिरू
पेणसमवायंनगच्छतीतिविवक्षितम्।ननुसाध्यत्वात्क्रियायाःकथंक्रियान्तरंप्रतिकर्मकर्तृभावः।विषयभेदादेकस्याप्यर्थ

अथकालविशेषानभिसमीक्ष्ययश्चाद्यतनः पाकः यश्चह्यस्तनः यश्चश्वस्तनस्तेपिबहवः शब्दाः सरू
पाश्च । तत्रयुक्तंबहुवचनमेकशेषश्च । तिङभिहितेचापितथाभावेऽ सारूप्यादेकशेषोन
भवति।आसिआस्यतेआसिष्यतेइति।अस्तिखल्वपिविशेषःतिङभिहितस्यभावस्यकृदभिहितस्यच।
कृदभिहितोभावोद्रव्यवद्भवति।किमिदंद्रव्यवदिति।द्रव्यंक्रिययासमवायंगच्छति।कंसमवायंगच्छति।द्रव्यं
क्रियाभिनिर्वृत्तौसाधनत्वमुपैति।तद्वच्चास्यभावस्यकृदभिहितस्यभवतिपाकोवर्ततइति।क्रियावन्नभवति।कि
मिदंक्रियावदिति।क्रियाक्रिययासमवायंनगच्छतिपचतिपठतीति।तद्वच्चास्यकृदभिहितस्यनभवतिपाकोवर्ततइति।
अस्तिखल्वपिविशेषःकृदभिहितस्यभावस्यतिङभिहितस्यच।तिङभिहितेनभावेनकालपुरुषोपग्रहाव्यज्यन्ते

स्यसाध्यसाधनभावसंबन्धसंभवाददोषः।तदुक्तंहरिणा।तत्रयंप्रतिसाध्यत्वमसिद्धातंप्रतिक्रिया।सिद्धातुयस्मिन्साध्यत्वं
नतमेवपुनःप्रति।मृगोधावतिपश्येतिसाध्यसाधनरूपता।तथाविषयभेदेनस्मरणस्योपपद्यतइति॥तत्रकर्तृकर्मत्वमा
ख्यातवाच्यस्यभावस्यनविरुद्धम्।तथाहि।भवतिक्रियापेक्षमेवतस्यकर्तृत्वंसर्वश्चार्थःस्वेनरूपेणभवतीतिभवनेकर्तृ
त्वमुपपन्नमेवं कर्मापिक्रियाफलत्वात्प्रधानमिति कर्मत्वमपितस्योपपद्यते। करणत्वादीनितुसर्वात्मनागुणभाव म
न्तरेणनोपपद्यन्तइतिप्राधान्येनात्यन्तविरोधात्तस्यनोपपद्यन्ते।कालेति।पुरुषशब्देनतदर्थःप्रत्यक्तापरभावश्चोच्य
ते।उपग्रहोऽनेकप्रकारःस्वार्थपरार्थत्वादिकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृदभिहित इति। ननु कृदभिहितस्यापि भावस्य भवति कर्त्राद्योगः यथा ब्राह्मणानां प्रादुर्भाव इति। तत्राहुः। एकपदवाच्येन कर्त्रा न युज्यते यथा पचतीति कर्ता वाच्यो नैवं पाक इति। शुद्धस्यैव भावस्य प्रत्यायनात्। अथवा घञादिभिः सिद्धरूपता भावस्याभिधीयत इति तेन रूपेण कर्त्रा योगाभावो धातुरूपप्रतिपाद्यसाधुसाध्यतया कर्त्रा योगो भवति। अथवोपलक्षण भावेन भावः कर्त्रा युज्यते कृत्सु पाचक इति। तिङ्षु तु पचतीति साध्यमानतया प्राधान्येन। तत्र कृत्सु प्राधान्येन कर्त्रा योगो नास्तीत्ययमत्रार्थः। इदं विचार्यत इति। विचरति नाना गच्छति यद् वस्तु तद्विचार्यते नानात्वं नीयत इत्यर्थः। इहान्वयव्यतिरेकाभ्यां शास्त्रीयाः पदावयवानामापोद्धारिकार्थवत्ता। तौ चान्वयव्यतिरेकावेकतरस्यापि न सम्भवतिष्ठेते। सार्वधातुकम

कृदभिहिते न पुनर्न व्यज्यन्ते। अस्ति खल्वपि विशेषः। तिङभिहितस्य भावस्य कृदभिहितस्य च। तिङभिहितो भावः कर्त्रा संप्रयुज्यते। कृदभिहितः पुनर्न संप्रयुज्यते। यावता किंचिच्च सामान्यं कश्चिच्च विशेषः। युक्तं यदयमपि विशेषः स्यात्। लिङ्गकृतः संख्याकृतश्च। इदं विचार्यते। भावकर्मकर्तारः सार्वधातुकार्था वा स्युः विकरणार्था वेति। कथं च सार्वधातुकार्थाः स्युः कथं वा विकरणार्थाः। भावकर्मवाचिनि सार्वधातुके यक् भवति कर्तृवाचिनि सार्वधातुके शब् भवतीति सार्वधातुकार्थाः। भावकर्मणोर्यक् भवति सार्वधातुके। कर्तरि शब् भवति सार्वधातुक इति विकरणार्थाः। कश्चात्र विशेषः। भावकर्मकर्तारः सार्वधातुकार्थाश्चेदेकद्विबहुषु नियमानुपपत्तिरतदर्थत्वात्। भावकर्मकर्तारः सार्वधातुकार्थाश्चेद् एकद्विबहुषु नियमस्यानुपपत्तिः। किं कारणम्। अतदर्थत्वात् ॥

न्तरेणापि कर्त्राद्यवगमात्। यथा गच्छ ग्रामम् अशायि भवता अकारि कट इति तथा विकरणाभावेपि अकर्त्राद्यवगतिरस्ति लविषीष्ट स्तेत्र मिति। उभयाभावेप्यस्ति अजागर्भवानिति। क्वचित्तूभयसंनिधौ कर्त्राद्यवगतिः पचति पच्यत इति। तत्र निश्चयाभावाद्विचारः क्रियते कः पक्ष आश्रीयमाणः शास्त्रं न विरुणद्धीति। एकद्विबहुष्विति। एकत्व एवैकवचनं नार्थान्तर इति यो नियमः स नोपपद्यते कर्त्रादीनामपि तदर्थत्वादित्यर्थः। अतदर्थत्वादिति। सामर्थ्यादत्रावधारणमाश्रीयते न तान्येवैकत्वादीन्यर्थः। अपि तु कर्त्रादयोपीत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृताभिहितइति। क्वचिदेवकृतिविकरणोविधीयतेनसर्वत्रेतिकृतस्य कर्तरिकृदितिकर्त्रर्थोनिर्दिश्य
ते तेनैववचकर्तुरुक्तत्वात्तदभिधायीविकरणोनप्राप्नोति। ततश्चधारयइत्यादावसतिशपिगुणोनस्यात्। नलेनापीति।
लः कर्मणिचेतिवचनाल्लादेशैरपिकर्त्रादेरभिधानमितितत्रापिविकरणाप्राप्तिः किंनचोद्यतइत्यर्थः। ततोलः कर्मणीतिव
चनात्कर्त्रादीनांविकरणार्थत्वंनैवसंभवतीत्युक्तंभवति। एवंवक्ष्यामीति। व्याख्यास्यामीत्यर्थः। लः कर्मणिइति। कर्मणि
वर्तमानाद्विकरणादितिव्याख्यास्यतइत्यर्थः। तत्रकर्माभिधायीविकरणः कर्मशब्देनभाष्यउक्तः। ननुसार्वधातुकनिमि

नहीदानीमेकत्वादयएवविभक्त्यर्थाः। किंतर्हि। भावकर्मकर्तारोपि। सन्तुतर्हिविकरणार्थाः। विकरणार्थाइ
तिचेत्कृताभिहितेविकरणाभावः। विकरणार्थाइतिचेत्कृताभिहितेविकरणोनप्राप्नोतिधारयः पारय
इति। किमुच्यतेकृताभिहितइति। नलेनाप्यभिधानंभवति। नशक्यंलेनाभिधानमाश्रयितुम्। पक्षान्तरमि
दमास्थितंभावकर्मकर्तारः सार्वधातुकार्थावास्युर्विकरणार्थावेति। यदिचलेनाप्यभिधानंस्यान्नेदंपक्षा
न्तरंस्यात्। कथमशक्यम्। यदाभवानेवाहलः कर्मणिचभावेचाकर्मकेभ्यइति। एवंवक्ष्यामिलः कर्मणोभा
वाच्चाकर्मकेभ्यइति। यस्मिंस्तर्हिलेविकरणानश्रूयन्ते कस्तत्रभावकर्मकर्तॄनभिधास्यति। क्वचनश्रूयन्ते।
यएतेलुग्विकरणाः श्लुविकरणाश्च। अत्राप्युक्तेकर्तृत्वेलुग्भविष्यति। यस्मिंस्तर्हिलेविकरणानैवोत्पद्यन्तेक
स्तत्रभावकर्मकर्तॄनभिधास्यति। क्वचनैवोत्पद्यन्तेलिङ्लिटोः। तस्मान्नैवंशक्यंवक्तुं नलेनाप्यभिधानंभव
तीति । भवतिचेदभिहितेविकरणाभावइत्येव ॥

त्तोविकरणोननुविकरणनिमित्तोलकारः तत्कथमेवंव्याख्यायते। एवंतर्हि कृतेलकारेसार्वधातुकइतिविषयसप्त
म्याश्रयणात्कृतेविकरणेलः कर्मणिचेत्यनेनभावकर्मकर्त्रभिधायिनोविकरणात्परोलः साधुर्भवतीति व्याख्याना
द्दोषः। अत्राप्युक्तइति। विकरणलोपद्वारेणप्रकृतिरेवात्रकर्त्राद्यभिधायिनीतिप्रतिज्ञातंभवतीत्यर्थः। यस्मिंस्तर्हीति।
ततश्चविकरणानुत्पादाल्लादेशस्यासाधुत्वप्रसङ्गोविधानसामर्थ्याद्वासाधुत्वेभावाद्यर्थावगतिर्नस्यात्। कर्तरिकृदितिव
चनात्कर्तर्येवलकारः स्यादित्यर्थः। भवतिचेदिति। ततश्चविकरणार्थपक्षोनुपपन्नएवेतिभावः ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं तर्हीति। प्रकारान्तरेण विकरणार्थत्वपक्षं समर्थयते। यथा ग्रामं गच्छतीति गमिक्रियायाः कर्तृकर्मणी साधने। तत्र कर्तरि लकारः कर्मणि द्वितीया। तथात्राप्येकस्मिन्नर्थे सार्वधातुकमपरस्मिन्विकरणो भविष्यतीति भावः। इदमस्येति। अयमर्थः। यत्र पदद्वयवाच्ये कर्तृकर्मणी साधने तत्र विरोधाभावात्तन्निबन्धनः कार्यभेदो युक्तः। एकस्मिंस्तु पदे विरुद्धार्थयोर्विकरणसार्वधातुकयोर्विशिष्टार्थप्रतिपादने साहायकाभावात्परस्परानुपकारादप्रयोग एव स्यात्। तथाहि। पचतीति क्रियाविशिष्टः कर्ताभिधीयते। पच्यत इति क्रियाविशिष्टं कर्म। न त्वेकेन साधनद्वयं क्रियाविशिष्टं प्रतिपादयितुं शक्यते। एकपक्षीभूतमिति। एक एव

एवं तर्हीदं स्यात्। यदा भावकर्मणोर्लः तदा कर्तरि विकरणाः यदा कर्तरि लः तदा भावकर्मणोर्विकरणाः। इदमस्य यद्येव स्वाभाविकमथापि वाचनिकं प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति। न चास्ति संभवो यदेकस्याः प्रकृतेर्द्वयोर्नानार्थयोर्युगपदनुसहायीभावः स्यात्। एवं च कृत्वा एकपक्षीभूतमेवेदं भवति सार्वधातुकार्थी एवेति। ननु चोक्तं भावकर्मकर्त्रोः सार्वधातुकार्थाद् इति चेदेकद्विबहुषु नियमानुपपत्तिः अतदर्थत्वाद् इति। नैष दोषः। सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्। सुपां तिङां च संख्या चैवार्थः कर्मादयश्च। प्रसिद्धो नियमस्तत्र। प्रसिद्धस्तत्र नियमः। नियमः प्रकृतेषु वा। अथवा प्रकृतानर्थानपेक्ष्य नियमः। के च प्रकृताः। एकत्वादयः। एकस्मिन्नेवैकवचनं न द्वयोर्न बहुषु। द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु। बहुष्वेव बहुवचनं नैकस्मिन्न द्वयोरिति। भावकर्मणोर्यग्विधाने कर्मकर्तर्युपसंख्यानम्। भावकर्मणोर्यग्विधाने कर्मकर्तर्युपसंख्यानं कर्तव्यम्। पच्यते ओदनः स्वयमेव। पच्यते विद्यास्वयमेव। किं पुनः कारणं न सिध्यति। विप्रतिषेधाद्धि शपो बलीयस्त्वम्। विप्रतिषेधाद्धि शपो बलीयस्त्वं प्राप्नोति।

पक्षः सार्वधातुकार्थः कर्मादय इत्यर्थः। पूर्वभेदापेक्षश्चविप्रत्ययनिर्देशः। प्रसिद्धो नियम इति। अर्थनियम इत्यर्थः। कर्माद्यर्थान्तरनिर्देशात्तु न प्रत्ययनियमः प्रमाणसिद्धः। तत्रैकत्व एकवचनमेवेत्येवमेकत्वादिरर्थो नियम्यते। न तु प्रत्यय इति तस्यार्थान्तरमपि कर्मादि न विरुध्यते। अथवेति। कर्माद्यर्थविधानसामर्थ्यात्तुल्यजातीयसंख्यापेक्ष एव नियम इत्यर्थः। कर्मकर्तरीति। कर्मवदित्यतिदेशेन स्वाश्रयस्य कार्यस्याबाधनात्कर्त्राश्रयविकरणप्राप्तेर्वचनम्। विप्रतिषेधादिति। यदा शास्त्रातिदेशपक्षस्तदा शपो बलीयस्त्वम्। कार्यातिदेशे तु यक एव बलीयस्त्वम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु चैतदिति। सर्वा प्राप्तिर्योगविभागेन बाधिष्यत इति भावः। पराप्राप्तिरिति। परत्वाद्बलीयस्त्वादित्यर्थः। ननु चेयमिति। योगवि
भागप्राप्तिः पूर्वविप्रतिषेधेन बाधिका भविष्यतीत्यर्थः। नोत्सहत इति। न्याय्यविप्रतिषेधाश्रयणस्यायुक्तत्वाद्दुर्बलो योगविभा

शपोऽवकाशः पचति पठति। यकोऽवकाशः पच्यते ओदनो देवदत्तेन पठ्यते विद्या देवदत्तेनेति। इहोभयं प्राप्नोति। पच्यते
ओदनः स्वयमेव पठ्यते विद्या स्वयमेवेति। परत्वाच्छप् प्राप्नोति। योगविभागात्सिद्धम्। योगविभागः करिष्यते। चिण्भाव
कर्मणोः। ततः सार्वधातुके यक्। भावकर्मणोः। ततः कर्तरि। कर्तरि च यक् भवति भावकर्मणोः। यद्येवं तर्हि कर्मणि कर्तरि
यक् भवति। एवं कर्तरि यगभावेऽपि प्राप्नोति। एति जीवन्तमानन्दो नरं वर्षशतादपि। नास्य किंचिद्रुजति रोग इति। द्वि
तीयो योगविभागः करिष्यते। चिण्भावे। ततः कर्मणि। कर्मणि च चिण् भवतीति। ततः सार्वधातुके यक्। सार्वधातुके यक् भ
वति भावे कर्मणि च। ततः कर्तरि। कर्तरि च यग्भवति। कर्मणीत्यनुवर्तते भाव इति निवृत्तम्। ततः शप्। शप् च भवति
कर्तरीत्येव। कर्मणीत्यपि निवृत्तम्। एवमप्युपसंख्यानं कर्तव्यम्। विप्रतिषेधाद्धि श्यनो बलीयस्त्वम्। विप्रतिषेधाद्धि
श्यनो बलीयस्त्वं प्राप्नोति। श्यनोऽवकाशः दीव्यति सीव्यति। यकोऽवकाशः पच्यते ओदनो देवदत्तेन पठ्यते विद्या देवदत्तेने
ति। इहोभयं प्राप्नोति। दीव्यते स्वयमेव सीव्यते स्वयमेवेति। परत्वाच्छ्यन् प्राप्नोति। ननु चैतदपि योगविभागेनैव सिद्धम्। न
सिध्यति। अनन्तरा या प्राप्तिः सा योगविभागेन शक्या निवारयितुम्। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पराप्रा
प्तिरप्रतिषिद्धा तया श्यन् प्राप्नोति। ननु चेयं प्राप्तिः परां प्राप्तिं बाधेत। नोत्सहते प्रतिषिद्धा सती बाधितुम्। एवं तर्हि शबादेशाः श्य
नादयः करिष्यन्ते। शप् च यका बाध्यते तत्र दिवादिभ्यो यग्विषये शबेव नास्ति कुतः श्यन्नादयः। तत्र तर्हि शपो ग्रहणं कर्तव्यम्।
न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। कर्तरि शबिति। तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। दिवादिभ्य इत्येषा पञ्च
मी शबिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति। तस्मादित्युत्तरस्येति। प्रत्ययविधिरयम्। न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति। ना
यं प्रत्ययविधिः। विहितः प्रत्ययः प्रकृतश्चानुवर्तते। अथवा भावकर्मणोरित्यननुवृत्त्यैव सिद्धे सत्यनुवृत्तिर्यको भावाय। इह सार्व
धातुके यगिति अन्तरेण भावकर्मणोरित्यनुवृत्तिं सिद्धम्। सोऽयमेवं सिद्धे सति यद्भावकर्मग्रहणमनुवर्तयति तस्यैतत्प्र
योजनं कर्मकर्तर्यपि यग्यथा स्यादिति ॥

गप्राप्तिकदित्यर्थः। इहेति। सार्वधातुके यग्भवतीति सामान्योक्तावपि कर्तरि शबाद्यपवादविधानाद्भावकर्मणोरेव यग्भविष्यतीति भावकर्मा
नुवृत्तिरधिको यत्न इति कर्मकर्तर्यपि यग्भविष्यतीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रापिव्याख्याने योगविभागः कर्तव्य एवेत्याह। कर्तरीति चेति। अन्यथाभावकर्मानुवृत्तिप्रयत्नाच्छ्रपएवानन्तरं स्यबाधः स्याद् नतु श्यन्नादीनाम्। योगविभागेनतुतेपिबाध्यन्ते। वचनादिति। कर्तरिकर्मव्यतिहारइत्यत्रकर्तरीतियोगविभागात्तत्रचकर्मग्रहणानुवर्तनादन्तरेणाप्यतिदेशमात्मनेपदंभविष्यतीत्यर्थः। चिणपीति। चिण्ग्रहणेऽनुवर्तमानेपुनश्चिण्ग्रहणमधिकविधानार्थमितिक

कर्तरीतिचयोगविभागः श्यनः पूर्वविप्रतिषेधावचनाय। कर्तरीतिचयोगविभागः कर्तव्यः। श्यनः पूर्वविप्रतिषेधंमावोचमिति। अथवाकर्मवद्भाववचनसामर्थ्याद्यक्भविष्यति। अस्त्यन्यत्कर्मवद्भाववचनेप्रयोजनम्। किम्। आत्मनेपदंयथास्यात्। वचनादात्मनेपदंभविष्यति। चिण्तर्हियथास्यात्। चिणपिवचनाद्भविष्यति। चिण्वद्भावस्तर्हियथास्यात्। नैकंप्रयोजनंयोगारम्भंप्रयोजयति। तत्रकर्मवद्भाववचनसामर्थ्याद्यक्भविष्यति। अथवाआचार्यप्रवृत्तिर्ज्ञापयति कर्मकर्तरियग्भवतीति। यदयंनदुहस्नुनमांयक्चिणावितियक्चिणोः प्रतिषेधंशास्ति॥ यसोऽनुपसर्गात्॥ अनुपसर्गादितिकिमर्थम्। आयस्यतिप्रयस्यति। अनुपसर्गादितिशक्यमकर्तुम्। कथमायस्यतिप्रयस्यतीति। संयसश्चेत्येतन्नियमार्थंभविष्यति। संपूर्वादेवयसोनान्यपूर्वादिति॥ रुधादिभ्यः श्नम्॥ किमर्थः शकारः। सार्वधातुकार्थः। शित्सार्वधातुकमितिसार्वधातुकसंज्ञा सार्वधातुकमपिदितिङिन्त्वं ङितीतिगुणप्रतिषेधोयथास्याद्भिनत्तिछिनत्तीति। नैतदस्तिप्रयोजनम्। सार्वधातुकार्धधातुकयोरङ्गस्यगुणउच्यते। यस्माच्चप्रत्ययविधिस्तदादिप्रत्ययेपरतोऽङ्गसंज्ञंभवतीति। यस्माच्चप्रत्ययविधिः नतत् प्रत्ययेपरतः। यच्चप्रत्ययेपरतः नतस्मात्प्रत्ययविधिः। इदंतर्हिप्रयोजनम्। आर्धधातुकसंज्ञामाभूदिति। किंचस्यात्। वलादिलक्षणइट्प्रसज्येत। एतदपिनास्तिप्रयोजनम्। वलादेरार्धधातुकस्याङ्गस्येडुच्यते। यस्माच्चप्रत्ययविधिः तदादिप्रत्ययेपरतोऽङ्गसंज्ञंभवति। यस्माच्चअत्रप्रत्ययविधिः नतत्प्रत्ययेपरतः। यच्चप्रत्ययेपरतोनतस्मात्प्रत्ययविधिः। अतउत्तरंपठति। श्नमिशित्करणंपादिहृस्वार्थम् ॥

र्मकर्तर्यपिचिण्भविष्यतीत्यर्थः। नैकमिति। अन्यथास्यसिच्सीयुडित्स्वत्रैवकर्मणातुल्यक्रियेकर्तरीतिवाच्यंस्यादित्यर्थः। रुधादि॥ भिनत्तीति। भिशब्दस्याङ्गसंज्ञानिबन्धनोगुणोमाभूदितिशित्त्वंकृतमित्यर्थः। यस्माच्चेति। भिदृशब्दादित्यर्थः। तस्यैवरुधादित्वात्। नतुतदवयवाद्भिशब्दात्प्रत्ययविधानम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एणतीति। मृ इति क्र्यादिषु पठितौ ताभ्यां व्यत्ययेन श्नम् प्रत्ययः। धात्वन्तरमिति। तौदादिकावित्यर्थः। वृणस इति। वृ वरणे इति क्र्या दित्वस्माद्व्यत्ययेन श्नम् थासौ। श्न इति। छान्दसमितिभावः। अङ्क्ष इति। श्नान्नलोप इत्यस्यासिद्धवदत्राभादित्यसिद्धत्वादकारस्योप धात्वाभावः। प्रमिणीमीति। मीञो मीनातेर्निगम इति ह्रस्वः। सिपो पित्त्वेन ङित्त्वे सतीत्वम्। परत्वादिति। यत्तु सुपि चेति दीर्घत्वं त

वेतह्रस्व

श्नसि शित्करणं क्रियते। घादिह्रस्वार्थम्। घादीनां शिति ह्रस्वत्वं यथा स्यात्। एणति मृणतीति। न वा धात्वन्यत्वात्। न वा कर्तव्यम्। किं कारणम्। धात्वन्यत्वात्। धात्वन्तरं एणि मृणी। यत्तर्हि न धात्वन्तरं यत्र भूयो वृणसे नैष श्नम्। श्न एवम्। यदि श्नो ह्र स्वत्वम्। स्वरेण न सिध्यति। वृणसे। अदुपदेशाल्लसार्वधातुकमनुदात्तं भवतीति एष स्वरो न प्राप्नोति। तस्माच्छ एषः। यदि श्नम् श्न सोरल्लोप इत्यल्लोपः प्रसज्येत। उपधाया इति वर्तते। अनुपधात्वान्न भविष्यति। न शक्यमुपधाया इति विज्ञातुम्। इह हि दो षः स्यात्। अङ्क्ष्वः अञ्जन्तीति। तस्माच्छ एवैतद् ह्रस्वत्वम्। यद्येवम्। स्वरः कथम्। बहुलं पित्सार्वधातुकं छन्दसि। सार्वधा तुकस्य छन्दसि बहुलं पित्त्वं वक्तव्यम्। पितश्चैवापित्त्वं दृश्यते। अपितश्च पित्त्वम्। पितस्तावदपित्त्वम्। मातरं प्रमिणी मिजनित्रीम्। अपितश्च पित्त्वम्। गृणोत ग्रावाणः। तत्तर्हि श्नो ह्रस्वत्वं वक्तव्यम्। अवश्यं छन्दसि ह्रस्वत्वं वक्तव्यम्। उप गायन्तु मां पत्नयो गर्भिणयो युवतय इत्येवमर्थम्। विशेषणा तर्हि। क्व विशेषणार्थेनार्थः। श्नान्नलोप इति। नान्नलोप इतीय त्युच्यमाने यज्ञानां यत्नानामित्यत्रापि प्रसज्येत। दीर्घत्वे कृते न भविष्यति। इदमिह संप्रधार्यं दीर्घत्वं क्रियतां नान्नलोप इति। किमत्र कर्तव्यम्। परत्वान्नलोपः स्यात्। तस्माच्छकारः कर्तव्यः। अथ क्रियमाणेऽपि शकारे इह कस्मान्न भवति विश्नानां प्रश्नानामिति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति॥ तनादिकृञ्भ्य उः॥ किमर्थं करोतेः पृथग्ग्रहणं क्रि यते न तनादिभ्य इत्येवोच्येत। अन्यानि तनोत्यादिकार्याणि मा भूवन्निति। कानि। अनुनासिकलोपादीनि। नैतर क्ताः किं युक्ताः। अनुनासिकाभावादेवानुनासिकलोपो न भविष्यति। इदं तर्हि तनादिकार्यं मा भूत् तनादिभ्यस्तथासोरिति।

तु सन्निपातलक्षणपरिभाषावशान्न प्रवर्तते। यत्त्वन्यत्रोक्तं नामि दीर्घात्परत्वात्सुपि चेति भवितव्यमिति तत्सन्निपात परिभाषाया अनित्यत्वाश्रयेणेति न विरोधः। लक्षणेति। लाक्षणिकस्यानुमीयमानरूपत्वात् प्रतिपदोक्तस्य तु प्रत्य क्षत्वादिति भावः। तनादि ॥ राम: ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभाषालुगिति। ननु येन नाप्राप्तिन्यायेन लुकाह्रस्वादङ्गादिति लोपो बाध्यत इति कथं लुगभावपक्षे लोपः स्यात्। नैष दोषः। यत्र पक्षे लुक् प्र
वर्तते तत्रासौ लोपस्य बाधकः। न त्वप्रवर्तमानः॥ धिन्वि॥ आर्धधातुकनिमित्त इति। धातुलोप इति बहुव्रीह्याश्रयणादिति भावः। नन्वेष इ

ननु च भवत्येवात्र ह्रस्वादङ्गादिति। तेनैव यथा स्यात् अनेन मा भूदिति। कः पुनरत्र विशेषः तेन वा स्यादनेन वा। तेन स
ति सिज्लोपस्यासिद्धत्वाच्चिण्वद्भावः सिद्धो भवति। अनेन पुनः सति चिण्वद्भावो न स्यात्। अनेनापि सति सिद्धश्चिण्व
द्भावः। कथम्। विभाषा लुक्। यदा न लुक् तदा सिज्लोपः तत्र सिज्लोपस्यासिद्धत्वाच्चिण्वद्भावो भविष्यति। तन्नादित्वात्। लुक्
सिद्धं सिज्लोपे च न दुष्यति। चिण्वद्भावेन दोषः स्यात्सोऽपि प्रोक्तो विभाषया॥ धिन्विकृण्व्योरच॥ क्वायमकारः श्रूयते। न
क्वचिच्छ्रूयते। लोपोऽस्य भविष्यति। अतो लोप आर्धधातुक इति। यदि न क्वचिच्छ्रूयते किमर्थमयमुच्यते। न लोप इ
त्येवोच्येत। नैवं शक्यम्। लोपे सति गुणः प्रसज्येत। अत्वे पुनः सति अकारलोपस्य स्थानिवद्भावाद्गुणो न भविष्यति।
ननु च लोपेऽपि सति न धातुलोप आर्धधातुक इति प्रतिषेधो भविष्यति। आर्धधातुकनिमित्ते लोपे स प्रतिषेधः। न
चैष आर्धधातुकनिमित्तो लोपः। अपि च प्रत्याख्यायते खल्वपि स योगः। तस्मिन्प्रत्याख्याते गुणः स्यादेव। तस्मादत्वं व
क्तव्यम्। अथ किमर्थं नुमनुषक्तयोर्धिन्विकृण्व्योर्ग्रहणं क्रियते न धिविकृव्योरित्येवोच्येत। धिविकृव्योरितीयत्युच्यमा
ने अत्वे कृते अनिष्टे देशे नुम् प्रसज्येत। इदमिह संप्रधार्यं नुम् क्रियतामत्वमिति। किमत्र कर्तव्यम्। परत्वान्नुमागमः। अ
न्तरङ्गमत्वम्। कान्तरङ्गता। प्रत्ययोत्पत्तिसंनियोगेनात्वमुच्यते। उत्पन्ने प्रत्यये प्रकृतिप्रत्ययावाश्रित्याङ्गस्य नुमागमः।
नुमप्यन्तरङ्गः। कथम्। वक्ष्यत्येतन्नुम्विधावुपदेशिवद्वचनं प्रत्ययविध्यर्थमिति। उभयोरन्तरङ्गयोः परत्वान्नुमागमः। त
स्माद्धिविकृव्योरिति वक्तव्यम्। हलः श्नः शानज्झौ॥ किमर्थः शकारः। शित्सार्वधातुकमिति सार्वधातुकसंज्ञा। सार्वधा
तुकमपिदिति ङित्त्वं क्ङितीति गुणप्रतिषेधो यथा स्यात्। कुषाण पुषाणेति। अत उत्तरं पठति। श्नाविकारस्य शित्करणा
नर्थक्यं स्थानिवत्त्वात्। श्नाविकारस्य शित्करणमनर्थकम्। किं कारणम्। स्थानिवत्त्वात्। शितो यमादेशः स्थानिव
द्भावात् शिद्भविष्यति। अर्थवत्तु ज्ञापकं सार्वधातुकादेशे अनुबन्धास्थानिवत्त्वस्य॥

ति। सन्नियोगशिष्टत्वान्निमित्तनिमित्तिभावाप्रसङ्गः। अत्वे कृत इति। अकारान्तरः स्यादित्यर्थः। उत्पन्ने प्रत्यय इति। नुम्विधावङ्गाधिका
रादिति भावः॥ हलः श्नः शा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तबादिष्विति। तप्तनप्तनथनाश्चेति शृणोतेस्त्येवमादेशे येतिङांङि॰तामा देशाविधीयन्ते ते तबादयः। एवमपीति। पित्त्वनि
मित्तमनुदात्तत्वं भवतु ब्रूताद्ब्रवानितीडागमश्च ङि॰त्वनिमित्तश्च गुणवृद्धिप्रतिषेध इत्यर्थः। पिन्नेति। अपिदिति प्रसज्यप्रतिषेधआ

अर्थवत्तुस्त्राविकारस्य शित्करणम्। कोर्थः। ज्ञापकार्थम्। किं ज्ञाप्यते। एतज्ज्ञापयत्याचार्यः सर्वधातुकादेशे अनुबन्धा
नस्थानिवद्भवन्तीति। किमेतस्य ज्ञापने प्रयोजनम्। प्रयोजनं हितात तङोरपित्त्वम्। हेः पित्त्वं न प्रतिषेध्यम्। पितोयमा
देशः स्थानिवद्भावात्पित्स्यात्। सार्वधातुकादेशे अनुबन्धानस्थानिवद्भवन्तीति नायं पिद्भविष्यति। तातङि॰चङ॰का
रेणेच्चार्यो भवति। पितोयम्नादेशः स्थानिवद्भावात्तस्मात्। सार्वधातुकादेशे अनुबन्धान स्थानिवद्भवन्तीति नायं पि
द्भविष्यति। तबादिषु चाङि॰त्वम्। तबादिषु चङि॰त्त्वं न प्रतिषेध्यम्। शृणोतप्ताबाण :। ङि॰तद्मे आदेशास्स्थानिवद्भावान्ङि॰
तः स्युः। सार्वधातुकादेशेऽनुबन्धानस्थानिवद्भवन्तीति नेमेङि॰तो भविष्यन्ति। तस्यदोषो मिप आदेशे पिद्भावः। तस्यैत
स्य लक्षणस्य दोषो मिप आदेशे पितोभावः। अचिनत्वमकरवम्। पितोयमादेशः स्थानिवद्भावात् पिद्भवति सार्वधातु
कादेशे अनुबन्धानस्थानिवद्भवन्तीति नायं पित्स्यात्। अत्यल्पमिदमुच्यते मिप आदेश इति। तिपूसिप्मिपामादेशा
इति वक्तव्यम्। वेदवेत्थ॥ विदेर्वसोः शित्त्वम्। विदेत्त्वस्य वसोः शित्त्वं वक्तव्यम्। शितोयमादेशः स्थानिवद्भावाच्छिद्भव
ति। सार्वधातुकादेशेऽनुबन्धानस्थानिवद्भवन्तीति नायं शित्स्यात्। कित्करणाद्वा सिद्धम्। अथवा अवश्यमत्र सामा
न्यग्रहणाविघातार्थः ककारोऽनुबन्धः कर्तव्यः। क्वसामान्यग्रहणाविघातार्थेनार्थः। वसोः संप्रसारणमिति। तेनैव
यत्नेन गुणो न भविष्यति। अस्य ज्ञापकस्य सन्ति दोषाः सन्ति च प्रयोजनानि। समादोषा भूयांसो वा। तस्मान्नार्थोनेन ज्ञापके
न। कथं यानि प्रयोजनानि। तानि क्रियन्ते न्यासएव। एवमपि भवेत् पित्करणसामर्थ्यात् पित्कृतं स्यात् ङि॰त्करणसाम
र्थ्याद्ङि॰त्कृतम्। यत्तु खलु पितिङि॰त्कृतं प्राप्नोति ङि॰ति च पित्कृतम्। केन तन्न स्यात्। तस्मादुक्तं पिन्नङि॰द्भव
तिङि॰च्च पिन्न भवतीति। न वक्तव्यम्। एवं वक्ष्यामि। सार्वधातुकं ङि॰द्भवति पिन्न। एवं तावत्पितो ङि॰त्त्वं प्रतिषिद्ध
म्। ततः असंयोगाल्लिट् किद्भवति ङि॰च्च पिन्न भवतीति। एवं ङि॰तः पित्त्वं प्रतिषिद्धम् ॥

श्रीयते। पिद्भवन् ङि॰न्न भवतीत्यर्थः। योगविभागाच्च यावती सार्वधातुकस्य ङि॰त्वप्राप्तिस्सर्वा सो निषिध्यते। असं योगादि रामः
ति। अत्र ङि॰दपिदिति वर्तते। तेन ङि॰द्भवन् पिन्न भवतीति तातङः स्थानिवद्भावप्राप्तं पित्त्वं निषिध्यते ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छन्दसि॥ अस्कभायदिति। स्कन्भुः सौत्रो धातुः लङि तिप् अन्त्यः शायच् अडागमः॥ लिङ्याशिषि॥ दृशेरग्वेति। अङि गुणः स्यात्। उपस्थेयामेति। स्यात् लिङ् मस् यासुट् अङ् आकारलोपः सलोपश्च अतो येय इतीय्। मस्याडागमः कार्योऽन्यथा यलोपे सति उपस्थेमेति

छन्दसि शायजपि॥ शायच् छन्दसि सर्वत्र॥ शायच् छन्दसि सर्वत्रेति वक्तव्यम्। क्व सर्वत्र हौ चाहौ च। किं प्रयोजनम्। महीः अस्कभायत्। यो अस्कभायत् उद्गृभायत उन्मथायतेत्येवमर्थम्॥ व्यत्ययो बहुलम्॥ योगविभागः कर्तव्यः व्यत्ययः। व्यत्ययो भवति स्यादीनामिति। आण्डा शुष्णस्य भेदति। भिनत्तीत्येवं प्राप्ते। सचन मरति। म्रियत इति प्राप्ते। ततो बहुलम्। छन्दसि विषये सर्वे विधयो भवन्तीति। सुपां व्यत्ययः तिङां व्यत्ययः वर्णव्यत्ययः लिङ्गव्यत्ययः पुरुषव्यत्ययः कालव्यत्ययः आत्मनेपदव्यत्ययः परस्मैपदव्यत्यय इति। सुपां व्यत्ययः। युक्ता माता सीद्धुरि दक्षिणायाः। दक्षिणायामिति प्राप्ते। तिङां व्यत्ययः। चषालं ये अश्वयूपाय तक्षति। तक्षन्तीति प्राप्ते। वर्णव्यत्ययः। त्रिष्टुभौजः शुभितमुग्रवीरम्। सुधितमिति प्राप्ते। लिङ्गव्यत्ययः। मधोस्तृप्ता इवासते। मधुन इति प्राप्ते। पुरुषव्यत्ययः। अधा स वीरैर्दशभिर्वियूयाः। वियूयादिति प्राप्ते। कालव्यत्ययः। श्वोऽग्नीनाधास्यमानेन। श्वः सोमेन यक्ष्यमाणेन। आधाता यष्टेति प्राप्ते। आत्मनेपदव्यत्ययः। ब्रह्मचारिणमिच्छते। इच्छतीति प्राप्ते। परस्मैपदव्यत्ययः। प्रतीपमन्य ऊर्मिर्युध्यति। युध्यत इति प्राप्ते। सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च। व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन॥ लिङ्याशिष्यङ्॥ अयमाशिषि अङ् विधीयते। तस्य किं प्रयोजनम्। आशिष्यङ्प्रयोजनं स्थागागमिवचिविदः स्था। उपस्थेयं वृषभं तुग्रियाणाम्। स्था। गा। अञ्जसा सत्यमुपगेयम्। गा। गमि। यत्रेन प्रतिष्ठां गमेयम्। गमि। वचि। मन्त्रं वोचेमाग्नये। वचि। विदि। विदेयमेनां मनसि प्रविष्टाम्। विदि। शकिरुहोश्च॥ शकिरुहोश्चेति वक्तव्यम्। शकेम त्वा समिधं साधया धियः। अवन्ती मारुहेमा स्वस्तये। दृशेरक्। पितरं च दृशेयं मातरं च दृशेयम्॥ दृशेरग्वक्तव्यः। पितरं च दृशेयं मातरं च दृशेयमित्येवमर्थम्। इह उपस्थेयामेत्यत्र आडपि वक्तव्यः। नह्याडि वसिध्यति। न वक्तव्यः। सार्वधातुकत्वाल्लिङः सलोपः आर्धधातुकत्वादेत्वम्। तत्रोभयलिङ्गत्वात् सिद्धम्॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये तृतीयाध्यायस्य प्रथमपादे चतुर्थमाह्निकम्॥

स्यात्॥ इति श्रीमन्महोपाध्यायजैयटपुत्रकैयटविरचिते भाष्यप्रदीपे तृतीयस्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्मवत्कर्मणा॥वत्करणमिति।विनापिवतिनापरार्थेशब्दप्रयोगात्तदर्थलाभइतिभावः।स्वाश्रयमपीति।असतिवत्करणेकर्तुःकर्मसंज्ञाविज्ञायेत।ततश्चाकर्मकव्यपदेशाभावाद्भावेलोनस्यात्।वत्करणेतुसतिकर्मकार्याणिकर्तर्यतिदिश्यन्ते।नतुस्वाश्रयंकार्यंनिवार्यतइतिभावेलस्सिद्धोभवतीतिलादेशेनकर्तुरनभिधानात्तृतीयाभवतिभिद्यतेकुसूलेनेति।नचासत्यपिवत्करणेलान्तस्यकर्तेतिवक्ष्यमाणेनभावेलस्सिध्यति।यस्माद्भावेलविधिर्लान्तस्यकार्यमितिस्वाश्रयनिवारणंस्यादेव।कर्मणेतिकिमिति।धातुवाच्याक्रियाकर्तृकर्मणोरेवसमवेता।तत्रकर्तृस्थयाक्रिययातुल्यक्रियःकर्तानसंभवतीतिकर्मस्थैवक्रियाश्रयितव्येतिभावः।साध्वसिश्छिनत्तीति।ननुकरणादिव्यापारोधातुनानाभिधीयतेयदात्वभिधीयतेतदातेषांकर्तृत्वमेवनतुकरणादिरूपता।नचकर्तृकर्मव्यतिरेकेणकारकान्तराश्रयत्वंक्रियायाउपपद्यते।नैषदोषः।यद्यपिकरणादिव्यापारोधातुवाच्योनभवतितथापिस्वव्यापारंकुर्वन्तिकरणादीनिप्रधानक्रियांसाधयन्ति।तत्रावश्यंतुल्यक्रियत्वंकर्तुराश्रयितुमवस्थान्तरमपेक्षणीयम्।अ

कर्मवत्कर्मणातुल्यक्रियः॥वत्करणंकिमर्थम्।स्वाश्रयमपियथास्याद्भिद्यतेकुसूलेनेति।अकर्मकाणांभावेलोभवतीतिभावेलोयथास्यात्।कर्मणेतिकिमर्थम्।करणाधिकरणाभ्यांतुल्यक्रियःकर्तायःसकर्मवन्माभूत्।साध्वसिःछिनत्तिसाधुस्थालीपचतीति।तुल्यक्रियइतिकिमर्थम्॥

वस्थान्तरयुक्तक्रिययातुल्यक्रियःकर्तेति।ततश्चकर्मावस्थावत्करणाद्यवस्थाअप्याश्रीयेरन्प्रधानव्यापारस्यकर्तृकर्मणोरेवस्थितोनत्ववान्तरव्यापारेपितस्यसर्वत्रैवकारकेव्यवस्थानात्।यद्यपिस्वव्यापारेकर्तृत्वंतस्यतथापिप्रधानक्रियापेक्षत्वम्करणादिव्यपदेशवस्तुव्यवस्थितक्रियातुल्यत्वग्रहणनिवारणायकर्मणेतिकर्तव्यमेव।यद्यपिकरणादिव्यापारस्यधातुवाच्यत्वंनास्ति।तथापीहसूत्रेधातुवाच्यत्वस्यशब्देनानाश्रयणाद्वस्तुसद्भावाश्रयेणप्रसङ्गःस्यादेव।साधुस्थालीपचतीति।स्थाल्याअधिकरणत्वेयादृशीधारणसंभवनादिरूपाक्रियातादृश्येवकर्तृत्वेपीतिस्यात्कर्मवत्त्वम्।तुल्यक्रियइतिकिमर्थमिति।कर्मणेतितृतीयातुल्यशब्दाध्याहारेणव्याख्यास्यते।तुल्यक्रियत्वाच्चकर्तुस्तत्तुल्यत्वमितिप्रश्नः।अथवाक्रियमाणेपितुल्यक्रियग्रहणेतिप्रसङ्गइतिप्रश्नः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पचत्योदनमिति। सहार्थेपितृतीयाविज्ञायेत। तेनकर्मणासहयः कर्ताप्रतिपाद्यतइतिभावः। अकर्मकनिवृत्त्यर्थाकर्मश्रुतिः
स्यादास्तेशेतइति। अत्रापीति। तुल्यशब्दस्यसाधारणवचनत्वात्कर्तृकर्मसाध्यत्वाच्चात्रक्रियायादइतिभावः। समानक्रियत्व
मिति। साधारणक्रियत्वमित्यर्थः। एतच्चतुल्यक्रियग्रहणादेवलभ्यते। अन्यथाकर्मवत्कर्मणेत्येवब्रूयात्। यस्मिन्निति। सा
दृश्यवाचीतुल्यशब्दआश्रीयतइत्यर्थः। कर्तृभूतइति। च्वेर्विकल्पेनविधानादत्राभावः कर्तरिसंपन्नइत्यर्थः। अथवाभूप्राप्ता
वित्यस्याधृषादेर्णिचोविकल्पनाद्रूपमेतत्। तेनकर्तृत्वंप्राप्तइत्यर्थः। वृत्तिविषयेकर्तृशब्दःकर्तृत्वेवर्तते। कर्तृकर्मावस्था
भेदाच्चएकस्याअपिक्रियाभेदाश्रयंसादृश्यमुपपद्यते। कर्मणेति। कर्मस्थयाक्रिययेत्यर्थः। साध्यसाधनयोरत्यन्तभेदात्तु
ल्यत्वासंभवात्कर्मस्थाक्रियाकर्मशब्देनोच्यते भवतिहितास्थ्यात्ताच्छब्द्यं यथामञ्चाःक्रोशन्तीति। तन्नपचत्योदन

पचत्योदनंदेवदत्तः। तुल्यक्रियइत्यस्युच्यमानेत्रप्राप्नोति। अत्रापिहिकर्मणातुल्यक्रियःकर्ता। नतुल्यक्रियग्रह
णेनसमानक्रियत्वमभिधीयते। किंतर्हि। यस्मिन्कर्मणिकर्तृभूतेपितद्वक्रियालक्ष्यतेयथाकर्मणि। सकर्मणातु
ल्यक्रियःकर्ताकर्मवद्भवतीति। कर्मवदकर्मकस्यकर्ता। अकर्मकस्यकर्ताकर्मवद्भवतीतिवक्तव्यम्। किंप्रयोज
नम्। सकर्मकस्यकर्ताकर्मवन्माभूत्। भिद्यमानःकुसूलःपात्राणिभिनत्तीति। तथा। कर्मदृष्टश्चेत्समानधातौ॥ कर्म
दृष्टश्चेत्समानधाताविति वक्तव्यम्। इहमाभूत्। पचत्योदनंदेवदत्तः। राध्यत्योदनःस्वयमेवेति ॥

मित्यत्रकर्तृकर्मव्यापारयोरत्यन्तभेदात्सादृश्याभावात्कर्मवद्भावाभावः। लूयतेकेदारःस्वयमेवेत्यत्रतुकेदारस्यद्विधाभवनलक्षणा
कर्मावस्थायांयादृशीक्रियाताद्दृश्येवकर्त्रवस्थायामपीतिभवतिकर्मवद्भावः। भिद्यमानइति। पात्राणामपिद्विधाभवनंकुसूलस्यापीति
प्राप्नोतिकर्मवद्भावः। कर्मदृष्टइति। समानएकस्मिन्धातौकर्ताकर्मत्वेनयदिदृष्टोभवतितदाकर्मवद्भावोयदात्वन्यस्मिन्धातौकर्मान्य
स्मिंश्चकर्तातदामाभूत्कर्मवद्भावइत्यर्थः। पचत्योदनमिति। ओदनस्यकर्मत्वेयादृशीक्रियाविक्लित्तिलक्षणाताद्दृश्येवकर्तृत्वेपिराध्यतेर्वि
क्लित्तिवचनत्वान्नचास्यवाक्यद्वयस्ययुगपत्प्रयोगःकर्मस्थक्रियातुल्यत्वप्रतिपादनायतुवाक्यद्वयोपन्यासः। अन्यथासमानधातावपिव्या
स्यात्भिःकथंतुल्यक्रियत्वंप्रदर्श्यते। यद्येवंलुनातौकेदारस्यकर्मत्वमितिलावयतेकेदारःस्वयमेवेतिकर्मवद्भावोनस्यात्। अत्रकेचिदा
हुः। लुनातिरेवणिचिलाविःसंपन्नइतिअस्तिसमानधातुत्वम्। अन्येत्वाहुः। लावयतावेवकेदारस्यकर्तृत्वंकर्मत्वंचेतिदोषाभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्मस्थभावकानामिति। अपरिस्पन्दनसाधनसाध्यो धात्वर्थो भावः। सपरिस्पन्दनसाधनसाध्यस्तु क्रिया। यत्र च क्रियाकृतविशेष
दर्शनं तत्स्था क्रियोच्यते। ततश्च पश्यति राजा स्वयमेव आरोहति हस्ती स्वयमेवेति कर्मवद्भावाभावः। सकर्मकाणामिति। अन्यो
न्यमाश्लिष्यत इत्युदाहरणमात्रमेतन्न तु व्यतीहारविशिष्टक्रियाविषयकर्मवद्भावप्रतिषेधप्रतिपादनार्थमित्यर्थः। धातोः कर्म
ण इति। कर्मणः सतः कर्तुरित्यर्थः। कर्मणेति चोपादानादयमर्थो लभ्यते। यस्य धातोर्यत्कर्म तत्स्थया क्रियया तुल्यक्रियः कर्ता

तथा॥ कर्मस्थभावकानां कर्मस्थक्रियाणां च॥ तथा कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्ता कर्मवद्भवतीति व
क्तव्यम्। कर्तृस्थभावकानां कर्तृस्थक्रियाणां च कर्ता कर्मवन्माभूदिति। कर्मस्थभावकानाम्। आसयति देवदत्तं
शाययति देवदत्तं स्थापयति देवदत्तम्। कर्मस्थक्रियाणाम्। गामवरुणद्धि करोति कटम्। क
र्तृस्थभावकानाम्। चिन्तयति मन्यते। कर्तृस्थक्रियाणाम्। गच्छति धावति हसति। यत्तावदुच्यते। अकर्मक
स्य कर्ता कर्मवद्भवतीति वक्तव्यम्। न वक्तव्यम्। वक्ष्यत्येतत्। सकर्मकाणां प्रतिषेधः। अन्योन्यमाश्लिष्यत इति। यदप्युच्यते
कर्मदृष्टश्चेत्समानधाताविति वक्तव्यमिति। न वक्तव्यम्। धातोरिति वर्तते। धातोः कर्मणः कर्तुरयं कर्मवद्भा
व उच्यते। तत्र संबन्धादेतद्गतव्यं यस्य धातोर्यत्कर्म तस्य चेत्कर्ता स्यादिति। तद्यथा। धातोः कर्मण्यण् भ
वतीति तत्र संबन्धादेतद्गम्यते यस्य धातोर्यत्कर्मेति। इह माभूत्। आहर कुम्भं करोति कटमिति। यदप्युच्यते
कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्ता कर्मवद्भवतीति वक्तव्यम्। कर्तृस्थभावकानां कर्तृस्थक्रियाणां वा क
र्ता कर्मवन्माभूदिति। न वक्तव्यम्। कर्मस्थया क्रियया यं कर्तारमुपमिमीते। न च कर्तृस्थभावकानां कर्तृस्थक्रिया
णां वा कर्मणि क्रियायाः प्रवृत्तिरस्ति। किं पुनः कर्मकर्तरि कर्माश्रयमेव भवति आहोस्वित्कर्त्राश्रयमपि। किं
चातः। यदि कर्माश्रयमेव। चङ्शपक्तिद्विधयो न सिध्यन्ति। चङ्। अचीकरत कटः स्वयमेव। चङ् ॥

तस्यैव धातोर्यदि भवति ततः कर्मवद्भवति। आहर कुम्भमिति। समर्थपरिभाषोपस्थानमन्तरेणापि भवत्येवेष्टसिद्धिरिति प्रदर्शनायोप
न्यासः। कर्तारमिति। कर्तृस्थां क्रियामित्यर्थः। किं पुनरिति। किमतिदेशेन स्वाश्रयं निवर्त्यते आहोस्विन्नेति प्रश्नः। यद्यपि स्वाश्रयमपि यथा
स्यादित्यत्र निर्णयः कृतः तथापि दोषान्तरोद्भावनाय पुनर्विचार्यते। अचीकरतेति। यक्चिणोः प्रतिषेधे पि स्वाश्रयौ चङ्शपौ न प्राप्नुतः ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिदुरमिति। कर्तरिकुरजुन प्राप्नोति। लान्तस्यकर्ताकर्मवदितिनतावत्स्याभितमितिङ्गद्विधेरसिद्धिरुक्ता। उभयमिति। कर्तैवयः कर्तातत्रपरस्मैपदमितिपरस्मैपदाभावादात्मनेपदंभवति। कर्तरिशबित्यत्रकर्तरीतियोगविभागेन शबादीनांयकबाधनंभवति। कार्यातिदेशोवायमाश्रीयते। यच्चाविरुद्धमतिदेशेनस्वाश्रयंतद्भवतिनतुविरुद्धमितिशबादिपरस्मैपदाभावः। स्वातन्त्र्यस्येति। पच्यतेओदनः स्वयमेवेतिविक्लित्तिमात्रवाचीपचिस्तत्रचौदनस्यकर्तृत्वमेव। लूयतेकेदारइति द्विधाभ

शपा। नमतेदण्डः स्वयमेव। शपा। कृद्विधिः। भिदुरंकाष्ठंस्वयमेव। अथकर्त्रीश्च यमगिसिद्धमेतद्भवति। किंतर्हीति। आत्मनेपदशबादिविधिप्रतिषेधः। आत्मनेपदंविधेयंशबादीनांचप्रतिषेधोवक्तव्यः। उभयंक्रियतेन्यासएव। किमर्थंपुनरिदमुच्यते। कर्मकर्तरिकर्तृत्वंस्वातन्त्र्यस्यविवक्षितत्वात्। कर्मकर्तरिकर्तृत्वमस्ति। कुतः। स्वातन्त्र्यस्यविवक्षितत्वात्। स्वातन्त्र्येणैवात्रकर्ताविवक्षितः। किंपुनः सतः स्वातन्त्र्यस्यविवक्षाआहोस्विद्विवक्षामात्रम्। सतइत्याह। कथंज्ञायते। इहभिद्यतेकुसूलेनेति। नचान्यः कर्तादृश्यतेक्रियाचोपलभ्यते। किंचभोः विग्रहवतैवक्रियायाः कर्त्राभवितव्यं नपुनर्वातातपकालाअपिकर्तारः स्युः। भवेत्सिद्धंयदिवातातपकालानामन्यतमः कर्तास्यात्। यस्तुखलुनिवातेनिरभिवर्षेअचिरकालकृतः कुसूलः स्वयमेवभिद्यतेतस्यनान्यः कर्ताभवतिअन्यदतः कुसूलात्। यद्यपितावदत्रैतच्छक्यतेवक्तुंयत्रान्यः कर्तानास्ति। इहतुकथंस्याल्लूयतेकेदारः स्वयमेवेति। यत्रासौदेवदत्तोदात्रहस्तः समंततोविपरिपतन्दृश्यते। अत्रापियाऽसौसुकरतानामतस्यानान्यः कर्ताभवति अन्यदतः केदारात् ॥

वनवाचीलुनातिस्तथाचकेदारस्यकर्तृत्वम्। क्रियाचेति। विशरणक्रियेत्यर्थः। किंचभोइति। कारणाभावेविशरणस्यकार्याभावादवश्यंकेनचिद्वातादिनाकारणेनभाव्यमितिभावः। अन्यदतइति। कुसूलस्यैवविशरणक्रियायांकारणत्वोपपत्तावदृश्यमानकारणान्तरकल्पनायाअयुक्तत्वादितिभावः। सुकरतेति। द्विधाभवनलक्षणक्रियेत्यर्थः। अन्यथापर्वतमपिदेवदत्तोलुनीयादितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लान्तस्यकर्त्रेति।लान्तवाच्योयःकर्त्तासलान्तकार्यएवकर्मवद्भवतीत्यर्थः।तेनकर्मणिविधीयमानाःकृत्यादयोऽतिदेशात्क
र्मकर्तरिनभवन्तीतिभावएवोत्पद्यन्ते।ततश्चतैःकर्तुरनभिहितत्वात्कर्तृविभक्तौषष्ठीतृतीयेभवतः।भेत्तव्यंकुसूलस्यभे
त्तव्यंकुसूलेनेति।भिद्यतेकुसूलइत्यत्रचद्वितीयानभवति।क्तग्रहणस्यात्रप्रयोजनंनदृश्यते।गवादुग्धंपयइत्यत्रदृश्यत
इत्याहुः।तथाह्यकर्मकत्वाद्गत्यर्थाकर्मकेतिवचनात्कर्त्तरिभवितव्यमेवक्तेनभिन्नःकुसूलःस्वयमेवेति।तथाचसिनो

अस्तिप्रयोजनमेतत्।किंतर्हीति।तत्रलान्तस्यकर्मवदनुदेशः।लान्तस्यकर्मवदनुदेशःकर्तव्यः।लान्तस्यकर्ता कर्मवद्भवतीतिवक्तव्यम्।अन्यथाहिकृत्यक्तखलर्थेषुप्रतिषेधः।अक्रियमाणेहिलग्रहणेकृत्यक्तखलर्थेषुप्रतिषेधोवक्तव्यःस्यात्।कृत्याः।भेत्तव्यःकुसूलइतिकर्म।सयदास्वातन्त्र्येणविवक्षितस्तदास्यकर्मवद्भावःस्यात्तस्यप्रतिषेधोवक्तव्यस्तस्मिन्प्रतिषिद्धेअकर्मकाणांभावेकृत्योभवतीतिभावेकृत्योयथास्याद्भेत्तव्यंकुसूलस्यभेत्तव्यंकुसूलेनेति।क्तः।भिन्नःकुसूलइतिकर्म।सयदास्वातन्त्र्येणविवक्षितोभवतितदास्यकर्मवद्भावःस्यात् तस्यप्रतिषेधोवक्तव्यःतस्मिन्प्रतिषिद्धेअकर्मकाणांभावेक्तोभवतीतिभावेक्तोयथास्याद्भिन्नंकुसूलेनेति।क्तः।खलर्थः।ईषद्भेदःकुसूलइति कर्म।सयदास्वातन्त्र्येणविवक्षितोभवतितदाऽस्यकर्मवद्भावःस्यात्तस्यप्रतिषेधोवक्तव्यःतस्मिन्प्रतिषिद्धेऽकर्मकाणांभावेखल्भवतीतिभावेखल्यथास्यात्।ईषद्भेदंकुसूलेनेति।तत्तर्हिलग्रहणंकर्तव्यम्। नकर्तव्यम्।क्रियतेन्यासएव।लिङ्याशिष्यङितिद्विलकारकोनिर्देशः। सिद्धंतुप्राकृतकर्मत्वात्।सिद्धमेतत्।कथम्।प्राकृतकर्मत्वात्।प्राकृतमेवैतत्कर्म।यथाकटंकरोतिशकटंकरोतीति।कथंपुनर्ज्ञायतेप्राकृतमेवैतत्कर्मेति।आत्मसंयोगेकर्मकर्तुः कर्मदर्शनात् ॥

तेर्ग्रासकर्मकर्तृकस्येतिवक्तव्यमितिसिनोग्रासःस्वयमेवेतिक्तःकर्तर्युदाहरिष्यते।सिद्धंत्विति।प्राकृतंस्वाभाविकमेवै
तत्कर्मनत्वातिदेशिकमित्यर्थः।आत्मसंयोगइति।एकस्यैववस्तुनाभेदेनात्माकर्मत्वेनकर्तृत्वेनचविवक्ष्यतइत्यर्थः।तदु
क्तम्।एकस्यबुद्ध्यवस्थाभिर्भेदेचपरिकल्पितेकर्मत्वंकरणत्वंचकर्तृत्वंचोपजायतइति ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मदृश्यतइति।कर्मत्वंदृश्यतइत्यर्थः।विषमउपन्यासइति।अयंभावः।दृष्टान्तेआत्मभेदस्यशब्देनप्रतिपादितत्वाद्युक्तंकर्मत्वम्।इहतुलूयतेकेदारःपच्यतेओदनइत्यादौयदास्वयमितिशब्दोनप्रयुज्यतेतदात्मभेदाविवक्षायांकर्मत्वाभावात्कर्तृत्वमेवद्विधाभवनादौकेदारादीनामितिकर्मवदतिदेशःकर्तव्यएव।नमतेदण्डइत्यादौचप्राकृतकर्मत्वेयक्चिणोःप्रतिषेधेशस्वङ्गेनस्याताम्।भिद्यतेकुसूलेनेतिचसकर्मकत्वाद्धातोर्भावेलोनस्यात्।कर्मदृश्यतइति।आत्मानमितिद्वितीयान्तवाच्यंकर्म।कर्तानदृश्यतइति।हन्तीतिकर्तरिलकारोत्पत्तावपिकर्तृविशेषानुपादानादितिभावः।कर्तादृश्यतइति।तमन्तरेणक्रियायाअभावादात्मनेत्येतद्वाच्यइतिभावः।कर्मनदृश्यतइति।कर्तृव्यतिरेकेणान्यस्यात्रकर्मणोदुरुपपा

आत्मसंयोगेकर्मकर्तुःकर्मदृश्यते।क्व।हन्त्यात्मानमात्मनाहन्यतइति।विषमउपन्यासः।हन्त्यात्मानमितिकर्मदृश्यतेकर्तानदृश्यते।आत्मनाहन्यतइतिचकर्तादृश्यते नकर्मदृश्यते।पदलोपश्च।पदलोपश्चात्रद्रष्टव्यः।हन्त्यात्मानमात्मा।आत्मनाहन्यतआत्मेति।कःपुनरात्मानंहन्तिकोवात्मनाहन्यते।द्वावात्मानौ

शरीरात्माअन्तरात्माच।शरीरात्मातत्कर्मकरोतियेनान्तरात्मासुखदुःखेअनुभवति।अन्तरात्मातत्कर्मकरोतियेनशरीरात्मासुखदुःखेअनुभवति।सकर्मकाणांप्रतिषेधोऽन्योन्यमाश्लिष्यतइति॥सकर्मकाणांप्रतिषेधोवक्तव्यः।किंप्रयोजनम्।अन्योन्यमाश्लिष्यतः।अन्योन्यंसंस्पृशतः।अन्योन्यंसंगृह्णीतइति।तपेर्यासकर्मकस्यवचनंनियमार्थम्।तपेर्वापुनःसकर्मकस्यवचनंनियमार्थंभविष्यति।तपेरेवसकर्मकस्यनान्यस्यसकर्मकस्येति ॥

दत्वादितिभावः।पदलोपश्चेति।गम्यमानार्थत्वादप्रयोगःपदस्येत्यर्थः।यत्तुलूयतेकेदारःस्वयमेवेतिवृत्तिकारैरुदाह्रियतेतत्रकर्त्रन्तराभावप्रतिपादनेनकेदारस्यैवकर्तृत्वप्रतिपादनायस्वयंशब्दःप्रयुज्यते।नत्वेतत्कर्मवद्भावस्योदाहरणंस्वयंशब्दस्यात्मनेतिवत्तृतीयान्तार्थवर्तनादात्मनःकर्तृत्वेकेदारस्यप्राकृतकर्मत्वसद्भावात्।द्वावात्मानाविति।णेरणावित्यत्रव्याख्यातमितितत्रएवावधार्यम्।आश्लिष्यतइति।क्रियाफलस्यसंयोगस्यकर्मणिदर्शनात्कर्मस्थक्रियत्वमत्रद्रष्टव्यम्।तपेर्वेति।तपइतियोगविभागेननियमःक्रियतइतिभावः।ननुतप्यतेतपस्तापसइत्यत्रकर्मस्थक्रियया तुल्यक्रियत्वंकर्तुर्नास्ति।उपवासादेस्तपसःकर्तृत्वेनतपेर्दुःखार्थत्वात्तापसस्यकर्तृत्वेऽर्जनार्थत्वात्।नैषदोषः।शरीरसंतापलक्षणायाःक्रियायास्तुल्यत्वादवस्थाद्वयेपिशरीरसंतापलक्षणमेवार्जनंतापसस्ययतोव्यापारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कः प्रत्ययार्थ इति। तापसेन तपस्तप्यत इति कर्मणि लकारे त्वसौ प्रकृत्यर्थस्यैव क्रियारूपस्य प्रत्ययार्थत्वं दृश्यते। क्रिया कर्मणोश्च साध्यसाधनभावाद्भेदेन भाव्यम्। इह तु भेदाभावात्प्रकृतिप्रत्ययार्थानुपपत्तिः। अथवा तपःकर्मकस्येति वचनात् प्रकृत्यर्थस्यैव कर्मत्वमाश्रितं तच्च विरुद्धमिति भावः। अवयववतपिरिति। विशेषतपिर्ज्ञानलक्षणं तप इत्यर्थः। दुग्धे गौरिति। गौर्मुञ्चति पय इत्यर्थः। दुहेर्द्विकर्मकत्वात्कर्मस्थक्रियातुल्यक्रियत्वेपि सकर्मकत्वादप्राप्ते वचनम्। फलं पच्यत इत्यत्र वृक्षस्य कर्तृत्वविवक्षायामत्यन्तमप्राप्ते वचनम्। अन्ये त्वाहुः। पचिरत्र विषये द्विकर्मको वृक्षस्य पाकमन्तरेण फलपाकासंभ

तस्य तर्ह्यन्यकर्मकस्यापि प्राप्नोति। उत्तपति सुवर्णं सुवर्णकारः। उत्तप्यमानं सुवर्णं सुवर्णकारस्तपति। तस्य च तपःकर्मकस्यैव। तस्य च तपःकर्मकस्यैव कर्ता कर्मवद्भवति नान्यकर्मकस्य। किमिदं तप इति। तपेर्यमो णादिको ऽकारो भावसाधनः। कः प्रकृत्यर्थः कः प्रत्ययार्थः। स एव संतापः। कथं पुनः स एव नाम प्रकृत्यर्थः स्यात्स एव च प्रत्ययार्थः। सामान्यतपेरवयववतपिः कर्म भवति। तद्यथा। स एतान् पोषान् पुपत्। गोपोषमश्वपोषं रैपोषमिति सामान्यपुषेरवयवपुषिः कर्म भवति। एवमिहापि सामान्यतपेरवयवतपिः कर्म भवति। दुहिपच्योर्बहुलं सकर्मकयोः॥ दुहिपच्योः सकर्मकयोः कर्ता कर्मवद्बहुलं भवतीति वक्तव्यम्। दुग्धे गौः पयः स्वयमेव। तस्माद्दुदुम्बरः स लोहितं फलं पच्यते। बहुलवचनं किमर्थम्। परस्मैपदार्थम्। यद्येवं नार्थो बहुलवचनेन। न हि परस्मैपदमिष्यते। सृजियुज्योः श्यंस्तु॥ सृजियुज्योः सकर्मकयोः कर्ता बहुलं कर्मवद्भवतीति वक्तव्यम्। श्यंस्तु भवति। सृजेः श्रद्धोपपन्ने कर्तरि कर्मवद्भावो वाच्यः चिणात्मनेपदार्थः। सृज्यते मालाम् असर्जि मालामिति। युजेस्तु न्याय्ये कर्मकर्तरि यको ऽभावाय ॥

वादृक्षोः कथितं कर्म तस्यैव च यदा कर्तृत्वविवक्षा तदायं कर्मवद्भावः। एवंविध एव च विषये कर्मवद्भाव इष्यते न पुनरोदनं पचतीत्यादौ। श्रद्धोपपन्न इति। श्रद्धायुक्ते कर्तरीत्यर्थः। चिणात्मनेपदार्थ इति। श्यना यगेव बाध्यते न तु चिणित्यर्थः। श्यनि तु प्रकृतेराद्युदात्तत्वं भवति यकि तु लसार्वधातुकानुदात्तत्वे यक एवोदात्तत्वमिति श्यन्यकोरन्यस्वरे विशेषः। सृज्यते मालामिति। श्रद्धया मालां निष्पादयतीत्यर्थः। असर्जि मालामिति। मालां निष्पादितवानित्यर्थः। यको ऽभावायेति। अकारप्रश्लेषाद्यग्बाधनायेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युज्यतइति। योगोब्रह्मचारिणंयुनक्तिसंबध्नातीत्यर्थः। ततोब्रह्मचारिणःकर्तृत्वविवक्षायांयुज्यतेब्रह्मचारीयोगमितिभवति। कर
णेनेति। बहुलग्रहणात्साध्वसिश्छिनत्तीत्यादौनभवति। स्रवतिकुण्डिकेति। निष्क्रामदुदकंनिष्क्रामयतीत्यस्मिन्नर्थेतुल्यक्रियत्वात्
प्राप्तःकर्मवद्भावोनिषिध्यते। विसृजतीतिगम्यतइति। तथाचलोकेकथ्यतेकृपणोसौनकिं चित्स्रवतीतिविसर्गश्चदानमुच्यतेइ
तितुल्यक्रियत्वाभावः। भूषाकर्मेति। कर्मशब्दःक्रियावाची। भूषाफलंचशोभाख्यंकर्मणिदृश्यतइतिकर्मस्थाभूषा। अण्यन्तार्थंच
भूषाग्रहणंण्यन्तानांचवक्ष्यमाणेनयक्चिणोःप्रतिषेधस्यसिद्धत्वात्तेनालंकुरुतेस्वयमेवकन्याअलमकृतकन्येतिभवति। अव

युज्यतेब्रह्मचारीयोगम्। करणेनतुल्यक्रियःकर्ताबहुलम्। करणेनतुल्यक्रियःकर्ताबहुलंकर्मवद्भवतीतिवक्त
व्यम्। परिवारयतिकण्टकैर्वृक्षं परिवारयन्तेकण्टकावृक्षम्। स्रवत्यादीनांप्रतिषेधः॥ स्रवत्यादीनांप्रतिषेधोव
क्तव्यः। स्रवतिकुण्डिकाउदकंस्रवतिकुण्डिकायाउदकम्। स्रवन्तिवलीकान्युदकंस्रवतिवलीकेभ्यउदकम्।
सतर्हिप्रतिषेधोवक्तव्यः। नवक्तव्यः। तुल्यक्रियइत्युच्यते। क्रियान्तरंचात्रगम्यते। इहतावत्स्रवतिकुण्डिकाउदक
मिति विसृजतीतिगम्यते। स्रवतिकुण्डिकायाउदकमिति निष्क्रामतीतिगम्यते। स्रवन्तिवलीकान्युदकमिति
विसृजन्तीतिगम्यते। स्रवतिवलीकेभ्यउदकमिति पततीतिगम्यते। भूषाकर्मकिरादिसनांचान्यत्रात्मनेपदा
त्॥ भूषाकर्मकिरादिसनांचअन्यत्रात्मनेपदात्प्रतिषेधोवक्तव्यः। भूषयतेकन्यास्वयमेव। अबुभूषतकन्यास्व
यमेव। मण्डयतेकन्यास्वयमेव। अममण्डतकन्यास्वयमेव। किरादि। अवकिरतेहस्तीस्वयमेव। अवाकीर्ष्टहस्ती
स्वयमेव। गिरतेग्रासःस्वयमेव। अगीर्ष्टग्रासःस्वयमेव। सन्। चिकीर्षतेकटःस्वयमेव। अचिकीर्षिष्टकटःस्वयमे
व॥ नदुहस्नुनमांयक्चिणौ॥ यक्चिणोःप्रतिषेधेहेतुमण्णिश्रिब्रूञामुपसंख्यानम्॥

किरतइति। हस्तिनंकश्चित्पांस्वादिनावकिरतितत्रसौकर्यात्कर्तृत्वेनहस्तीविवक्ष्यते। चिकीर्षतइति। करोतिक्रियापेक्षमत्रक
र्मस्यक्रियत्वमिच्छातुकर्तृस्थैवार्थाच्चकरोतेःप्राधान्यंतदर्थत्वादिच्छायाः॥ नदु॥ यक्चिणोरिति। आत्मनेपदविधावकर्मकायेधा
तवोनिर्दिष्टास्तेयदान्तर्भावितण्यर्थाःसकर्मकाभवन्तितदाकर्मवद्भावात्प्राप्तौयक्चिणौप्रतिषिध्येते। यथाविकुर्वतेसैन्धवाव
ल्गन्तीत्यर्थः। तान्यदाअन्योवल्गयतितदातेषांकर्मत्वम्। पुनःसौकर्यातिशयात्कर्तृत्वविवक्षायांविकुर्वतेसैन्धवाःस्वयमेव। व्यकृष
तसैन्धवाःस्वयमेवेति। यक्चिणौनभवतः। उत्पुच्छयतेगौरित्यत्राप्यन्तर्भावितण्यर्थत्वात्कर्मवद्भावाद्यक्चिणोःप्राप्तिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ ५० ब्रूतेकथेति।वचनंशब्दप्रकाशनफलत्वात्कर्मस्थम्॥कुषिरजोः॥यकिप्राप्तेश्यन्विधीयतेतेनश्यनि ञ्नित्यादिरित्याद्युदात्तंप
दंभवति।शपूश्यनोर्नित्यमितिनित्यंनुमागमः कुष्यन्तीजङ्घेति।सार्वधातुकवचनमिति।सार्वधातुकेविषयभूतेश्यन्परस्मैप

यक्चिणोःप्रतिषेधेहेतुमण्णिश्रिब्रूञामुपसंख्यानंकर्तव्यम्।णि।कारयतेकटः स्वयमेव।अचीकरतक
टः स्वयमेव।णि।श्रि।उच्छ्रयतेदण्डःस्वयमेव।उदशिश्रियतदण्डः स्वयमेव।श्रि।ब्रूञ्।ब्रूतेकथा
स्वयमेव।अवोचतकथाःस्वयमेव।भारद्वाजीयाःपठन्ति॥यक्चिणोःप्रतिषेधेणिश्रिग्रन्थिब्रूञात्मनेपदाकर्म
काणामुपसंख्यानमिति॥कुषिरजोःप्राचांश्यन्परस्मैपदंच॥कुषिरजोःश्यन्विधानेसार्वधातुकवचनम्॥कुषिर
जोःश्यन्विधानेसार्वधातुकग्रहणंकर्तव्यम्।अवचनेहिलिङ्लिटोःप्रतिषेधः।अक्रियमाणेहिसार्वधातुकग्रह
णेलिङ्लिटोःप्रतिषेधोवक्तव्यःस्यात्।चुकुषेपादःस्वयमेव।ररञ्जेवस्त्रंस्वयमेव।कोषिषीष्टपादःस्वयमेव।रङ्क्षीष्ट
वस्त्रंस्वयमेव।क्रियमाणेचापिसार्वधातुकग्रहणेकतीहकुष्णानाःपादाइति।अत्रापिप्राप्नोति।श्यनाचस्यादीनां
बाधनंप्राप्नोति।कोषिष्यतेपादःस्वयमेव।अकोषिपादःस्वयमेव।रङ्क्ष्यतेवस्त्रंस्वयमेव।अरञ्जिवस्त्रंस्वयमेव।य
त्तावदुच्यतेसार्वधातुकग्रहणंकर्तव्यमिति।नकर्तव्यम्।प्रकृतमनुवर्तते।क्वप्रकृतम्।सार्वधातुकेयगिति।यदि
तदनुवर्तते।पूर्वस्मिन्योगेकिंसमुच्चयः लेचसार्वधातुकेचेति।आहोस्विल्लग्रहणंसार्वधातुकविशेषणम्।किंचा
तः।यदिसमुच्चयःकतीहभिन्दानाःकुसूलाइत्यत्रापिप्राप्नोति।अथलग्रहणंसार्वधातुकविशेषणंलिङ्लिटोर्न
सिध्यति।बिभिदेकुसूलःस्वयमेव।भित्सीष्टकुसूलःस्वयमेवेति।अस्तुलग्रहणंसार्वधातुकविशेषणम्।ननुचो
क्तंलिङ्लिटोर्नसिध्यतीति।लिङ्लिड्ग्रहणमपिप्रकृतमनुवर्तते।क्वप्रकृतम्।कास्प्रत्ययादाममन्त्रेलिटिलिङ्या
शिष्यङितिच।एवंचकृत्वासोऽप्यदोषोभवति।यदुक्तंकतीहकुष्णानाःपादाइत्यत्रापिप्राप्नोतीति।इहापिलवि
शिष्टंसार्वधातुकग्रहणमनुवर्तते।यदप्युच्यतेश्यनाचस्यादीनांबाधनंप्राप्नोतीति ॥

दंभवतीत्यर्थः।कुष्णानइति।ताच्छील्यवयोवचनेतिचानश्।तत्रश्यन्नप्राप्नोतिपरस्मैपदंचान्वाचयशिष्टंमन्यते।श्यनाचेति। रमः
विशेषविहितत्वादितिभावः ॥ ५०

CC-0. In Public Domain. Digitization by eGangotri

यक्प्रतिषेधसंबन्धेनेति। तेनयत्रयकः प्राप्तस्यप्रतिषेधस्तत्रश्यन्परस्मैपदेभवतोनान्यत्रेतिस्यादिविषयेनभवतः।
लकारावस्थायामेवेति । अकृतेष्वेवलादेशेषुविशेषविहिताः स्यादयोभवन्तिपूर्वंतैश्चश्यनोविरोधाद्बाधि

यक्प्रतिषेधसंबन्धेनश्यनंवक्ष्यामि। नदुहस्नुनमांयक्चिणौ। ततः।कुषिरजोः प्राचाम्। कुषिरजोःप्रा
चांयक्चिणौनभवतः। ततः श्यन्परस्मैपदंचेति। यथैवतर्हियकोविषयेश्यन्भवति। एवंचिणो
पिविषयेप्राप्नोति।अकोपिपादः स्वयमेव।अरञ्जिवत्तंस्वयमेव। एवंतर्हिद्वितीयोयोगविभागः
करिष्यते। नदुहस्नुनमांचिण्भवति।ततोयक्। यक्चनभवतिदुहस्नुनमाम्। ततः कुषि रजोः प्रा
चांयक्नभवति। ततः श्यन्परस्मैपदंचेति। अथवाअनुवृत्तिः करिष्यते। स्यतासीलृलुटोः। च्लि
लुङि। च्लेः सिज्भवतीति। कर्तरिशप्। स्यतासीलृलुटोः। च्लिलुङि। च्लेः सिज्भवतीति। दिवादिभ्यः
श्यन्। स्यतासीलृलुटोः च्लिलुङि च्लेः सिज्भवतीति। कुषिरजोः प्राचांश्यन्परस्मैपदं च। स्यतासी
लृलुटोः च्लिलुङि च्लेः सिज्भवतीति। अथवान्तरङ्गाः स्यादयः। कान्तरङ्गता। लावस्थायामेव
स्यादयः। सार्वधातुकेश्यन्॥ धातोः॥ आकुतोयंधात्वधिकारः। किंप्राग्लादेशात्। आहोस्विद्
आतृतीयाध्यायपरिसमाप्तेः।धात्वधिकारः प्राग्लादेशात्। प्राग्लादेशाद्धात्वधिकारः। लादेशेहि
व्यवहितत्वादप्रसिद्धिः।अनुवर्तमानेहिलादेशेधात्वधिकारेव्यवहितत्वादप्रसिद्धिःस्यात्। किंचस्यात्। आ
द्येयोगेनव्यवायेतिङः स्युः।आद्येयोगेविकरणैर्व्यवहितत्वात्तिङोनस्युः। पचतिपठति। इदमिहसंप्रधा
र्यम्। विकरणाःक्रियन्तामादेशाइति। किमत्रकर्तव्यम्। परत्वादादेशाः। नित्याविकरणाः।

तत्वात्संनियोगशिष्टंपरस्मैपदमपिनभवति। धातोः॥ स्वरितत्वप्रतिज्ञानादधिकारत्वमवसीयते नत्ववधिविशेषः। अथापि
स्वरितेसतिनाधिकारोभवतीतिव्याख्यानम्। तथापिदुर्लक्ष्यत्वान्नज्ञायतेकुस्वरितत्वंधात्वधिकारनिवृत्त्यर्थंप्रतिज्ञातमितिप्रच्छ
ति। आकुतइति। आद्येयोगइति। तिप्तस्झीत्यत्र। विकरणैरिति। स्यादयोत्रविकरणाअभिप्रेतानशबादयस्तेषांसार्वधातुकाश्रयत्वा
दकृतेलादेशेप्राप्त्यभावात्। यदातुसार्वधातुकइतिविषयसप्तमीपक्षस्तदाकृतेपिलादेशेशबादीनांप्राप्तिरस्ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वयोरेकारयोरिति। यद्यप्येकस्यायादेशस्तथाप्यादेशश्रवणद्वारेणतस्यापिश्रवणप्रसङ्ग इतिभावः। अकारइति। यस्ययस्यस्थानेवि धीयते। थकारस्यात्वइति। ननु पचथ इतिस्थितेपरत्वादिट् प्राप्नोति। नैषदोषः। अकारोनित्यः कृतेपीटिप्राप्नोत्यकृतेपि। इटंतुकृते

कृतेष्वप्यादेशेषुप्राप्नुवन्ति अकृतेष्वपिप्राप्नुवन्ति। नित्यत्वाद्विकरणेषुकृतेषुविकरणैर्व्यवहितत्वादादेशानप्रा प्नुवन्ति। अनवकाशास्तर्ह्यादेशाः। सावकाशाआदेशाः। कोवकाशः। यएतेलुग्विकरणाःश्लुविकरणाः लिङ् लि टौच। नस्यादेत्वंटेष्टितांयद्विधत्ते। यत्रटित्त्वंज्ञकानांटेरेत्वंविधत्ते। नत्रविकरणैर्व्यवहितत्वादादेशानांनस्यात्। एशः शित्वम्। एकारश्चशित्कर्तव्यः। किंप्रयोजनम्। शित्सर्वस्येतिसर्वस्यादेशोयथास्यात्। अक्रियमाणेहिशकारेतस्मा दित्युत्तरस्यादेः परस्येतितकारस्यैत्वेकृतेद्वयोरेकारयोः श्रवणंप्रसज्येत। निवृत्तेपुनर्लादेशेधात्वधिकारेअलो न्त्यस्यविधयोभवन्तीत्येकारस्यएकारवचनेप्रयोजनंनास्तीतिकृत्वाअन्तरेणापिशकारंसर्वादेशोभविष्यति। यत्रलोटोविधत्ते। यत्रलोटोविधीयते। तत्रविकरणैर्व्यवहितत्वान्नस्यात्। किंपुनस्तत्। लोटोलङ्वत्। एरुः। से ह्यपिच्च। वाछन्दसीति। यत्राप्युक्तंलङ्लिङोस्तत्रनस्यात्। किंपुनस्तत्। नित्यंङितः। इतश्च। तस्थस्थमिपांतांतं तामः। लिङः सीयुट्। यासुट् परस्मैपदेषूदात्तोङिच्चेति। तस्मात्प्राग्लादेशाद्धात्वधिकारः। यदिप्राग्लादेशा द्धात्वधिकारः। अकारः शित्कर्तव्यः। किंप्रयोजनम्। शित्सर्वस्येतिसर्वादेशोयथास्यात्। अनुवर्तमानेपुनर्लादे शेधात्वधिकारेतस्मादित्युत्तरस्यआदेः परस्येतिथकारस्यात्वेकृतेद्वयोरकारयोः पररूपेणसिद्धंरूपंस्यात्। पेच यूयंचक्रयूयमिति। ननुचनिवृत्तेपिलादेशेधात्वधिकारेअलोन्त्यस्यविधयोभवन्तीकारस्याकारवचनेप्रयोज नंनास्तीतिकृत्वान्तरेणापिशकारंसर्वादेशोभविष्यति। अस्त्यन्यदकारस्याकारवचनेप्रयोजनम्। किम्। वक्ष्य त्येतत्। अकारस्याकारवचनंसमसंख्यार्थमिति। आर्धधातुकसंज्ञायांधातुग्रहणंकर्तव्यम्। धातोःपरस्यार्धधा तुकसंज्ञायथास्यात्। इहमाभूत्। वृक्षत्वंवृक्षतेति। तस्माल्लादेशेधात्वधिकारोनुवर्त्यः ॥

अकारेवलादित्वाभावान्नप्राप्नोतीत्यनित्यः। यद्यपिशब्दान्तरस्यप्राप्त्याअकारस्यानित्यत्वंतथापिकृताकृतप्रसङ्गित्वान्नित्यत्व मस्त्येव। नचशब्दान्तरप्रासिकृतमनित्यत्वमिहसर्वत्रशास्त्रआश्रीयते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावत्येवेति। कृत एवम्भूशब्दे: कृत एव विकरण इत्यर्थः। आयन्नादिषूपदेशिवद्वचनादुपदेशकाल एवम्भूस्यान्तादेशेन भाव्य

ननु चोक्तमाद्ये योगे नव्यवाये तिङः स्युरिति। नैष दोषः। आनुपूर्व्यात्सिद्धमेतत्। नात्राकृतेष्वादेशेषु विकरणाः प्राप्नुवन्ति। किं कारणम्। सार्वधातुके विकरणवचनात्। सार्वधातुके विकरणा उच्यन्ते। न चाकृतेष्वादेशेषु सार्वधातुकत्वं भवति। यदि तर्हि नैतस्मिन्विशेषे विधीयन्ते के पुनस्ते। स्यादयः। अत्रापि धातुग्रहणं विहितविशेषणं धातोर्विहितस्य लस्येति। यद्येवं विन्दतीति णलादयः प्राप्नुवन्ति। धातुनात्र विहितं विशेषयिष्यामः। विदिना आनन्तर्ये धातोर्विहितस्य लस्य विदेरनन्तरस्येति। इह तर्हि अजक्षिष्यन् अजागरिष्यन् इति अभ्यस्तादृभेर्जुस्भवतीति जुस्भावः प्राप्नोति। अत्रापि धातुना विहितं विशेषयिष्यामः। अभ्यस्तेनानन्तर्यम्। धातोर्विहितस्याभ्यस्तादनन्तरस्येति। आत इत्यत्र कथं विशेषयिष्यसि। यदि तावद्धातुग्रहणं विहितविशेषणम्। आकारग्रहणमानन्तर्यविशेषणम्। अलुनन् अपुनन् इत्यत्रापि प्राप्नोति। अथाकारग्रहणं विहितविशेषणं धातुग्रहणमानन्तर्यविशेषणम्। अपिबन् अजिघ्रन् इत्यत्रापि प्राप्नोति। अस्तु तर्हि धातुग्रहणं विहितविशेषणमाकारग्रहणमानन्तर्यविशेषणम्। ननु चोक्तम् अलुनन् अपुनन् इत्यत्रापि प्राप्नोतीति। नैष दोषः। लोपे कृते न भविष्यति। नात्र लोपः प्राप्नोति। किं कारणम्। ईत्वेन बाध्यते। नात्रेत्वं प्राप्नोति। किं कारणम्। अन्तिभावेन बाध्यते। नात्रान्तिभावः प्राप्नोति। किं कारणम्। जुस्भावेन बाध्यते। नात्र जुस्भावः प्राप्नोति। किं कारणम्। लोपेन बाध्यते। लोप ईत्वेन। इत्वमन्तिभावेन। अन्तिभावो जुस्भावेन। जुस्भावो लोपेनेति चक्रकमव्यवस्था प्रसज्येत। नास्ति चक्रकप्रसङ्गः। न चाव्यवस्थाकारिणा शास्त्रेण भाव्यम्। शास्त्रेण नाम व्यवस्थाकारिणा भवितव्यम्। न चात्र हलादिना मुहूर्तमपि शक्यमवस्थातुम्। तावत्येवात्रान्तिभावेन भवितव्यम्। अन्तिभावे कृते लोपः। लोपेन व्यवस्था भविष्यति। यदप्युच्यते एशः शित्त्वमिति। क्रियते न्यास एव। कानि पुनरस्य योगस्य प्रयोजनानि। प्रयोजनं प्रातिपदिकप्रतिषेधः। प्रातिपदिकप्रतिषेधः प्रयोजनम्। धातोस्तव्यदादयो यथा स्युः प्रातिपदिकान्मा भूवन्निति। नैतदस्ति प्रयोजनम् ॥

मिति भावः। प्रातिपदिकान्मा भूवन्निति। द्वितीयादिवदिति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधनइति।प्रकृतिवाच्यान्तरङ्ग क्रियासाधनसंभवेशब्दान्तरवाच्यबहिरङ्ग·क्रियासाधनेतव्यादयोनभविष्यन्ति।इती
यादयस्तुप्राति पदिकादेवविधीयमानाःशब्दान्तरवाच्यक्रियापेक्षएवसाधनेवचनसामर्थ्याद्भवन्तीतिभावः।स्वपादिष्वि
ति।येःपभ्रंशरूपाःक्रियावचनाआणवयत्यादितुल्यास्तेभ्यस्तव्य दादयोमाभूवन्।नहितेधातवः।पाठेनधातुसंज्ञायास्ते
षांनिरस्तत्वात्।ततःस्वपितीतिप्रयोक्तव्येसुपितीतिप्रयोगोऽपभ्रंशःततःप्रत्ययोत्पत्तिर्माभूदित्यर्थः।अङ्गसंज्ञेति।असति

साधनेतव्यदादयोविधीयन्ते।साधनंचक्रियायाः।क्रियाभावात्साधनाभावः।साधनाभावादसत्यपिधात्व
धिकारेप्रातिपदिकात्तव्यदादयोनभविष्यन्ति।स्वपादिषु।स्वपादिषुतर्हिप्रयोजनम्।स्वपिति।सुपितीतिमाभू
त्।अङ्ग·संज्ञाच।अङ्ग·संज्ञाचप्रयोजनम्।यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्ग·मितिधातोरङ्ग·संज्ञासिद्धाभ
वति।कृत्संज्ञाच।कृत्संज्ञाचप्रयोजनम्।धातोर्विहितःप्रत्ययःकृत्संज्ञोभवतीति।कृत्संज्ञासिद्धाभवति।उ
पपदसंज्ञाच।उपपदसंज्ञाचप्रयोजनम्।तत्रैतस्मिन्धात्वधिकारेयत्सप्तमीनिर्दिष्टंतदुपपदसंज्ञंभवती
तिउपपदसंज्ञासिद्धाभवति।कृदुपपदसंज्ञेतावन्नप्रयोजयतः।अधिकारादप्येतेसिद्धे।स्वपादिषुतर्हि
अङ्ग·संज्ञाचप्रयोजनम्।धातुग्रहणमनर्थकंयङ्·धेधात्वधिकारात्।धातुग्रहणमनर्थकम्।किंकारण
म्।यङ्·धेधात्वधिकारात्।यङ्·धेधातुग्रहणंप्रकृतमनुवर्तते।तच्चावश्यमनुवर्त्यम्।अनधिकारेतर्ह्य
ङ्·संज्ञाभावः।अनधिकारेहिस तिअङ्ग·संज्ञायाअभावःस्यात्।करिष्यतिहरिष्यति।यदितदनुवर्तते।चू
र्णचुरादिभ्योणिज्भवतिधातोश्चेतिधातुमात्राणिच्प्राप्नोति।हेतुमद्वचनंतुज्ञापकमन्यत्राभावस्य।यद
यं हेतुमतिचेत्याहतज्ज्ञापयत्याचार्योनिधातुमात्राण्णिज्भवतीति।इहतर्हिकण्ड्वादिभ्योयग्भवती
तिधातोश्चेतिधातुमात्राद्यक्प्राप्नोति।कण्ड्वादिषुचव्यपदेशिवचनात्सिद्धम् ॥

धात्वधिकारेधातूपसर्गसमुदायस्यक्रियाविशेषवाचित्वात्ततःप्रत्ययविधानेतस्यैवाङ्ग·संज्ञायांसत्यामडादिप्रसङ्गःप्रास्थितेत्या
दावित्यर्थः।तत्रैतस्मिन्निति।सत्यस्मिन्धात्वधिकारेतत्रोपपदमित्यत्रतच्छब्देनपरामर्शउपपद्यतेनान्यथा।सप्तम्यमिति।यद्यविशेषेण
धातुमात्राण्णिच्स्यात्तदाकरणेकरोत्यर्थेविधीयमानोहेतुमत्यपिकरणेसिद्धइतिपुनस्तत्रणिचंनविदध्यादित्यर्थः।चुरादिग्रहणंतुप्रा
तिपदिकाद्धात्वर्थइत्याद्यर्थंस्यादित्यज्ञापकम्।व्यपदेशिवद्वचनादिति।धातुव्यपदेशोविद्यतेयेषांतेपचादयो धातुपाठपठिताव्यपदेशि
नस्तैस्तुल्यंकण्ड्वादयोवर्तन्ते।यकःकित्त्वेनतेषांधातुत्वानुमानात्।तदयमर्थः।यदिधातुमात्राद्यक्प्रत्ययःस्यात्ततःकण्ड्वादिग्रहणमनर्थकं
स्यात्तेषामपि क्रियावाचित्वाद्धातुमात्राद्यकःसिद्धत्वात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। सामानाधिकरण्येनसंबन्धेसंभवतिसमुच्चयाश्रयणस्यायुक्तत्वादितिभावः। आर्धधातुकसंज्ञार्थोऽप्ययंधात्वधिकारो
नोपयुज्यते। यङ्विधावेवोपात्तस्यानुवृत्तस्यविहितविशेषणार्थत्वाज्जुगुप्सतेलूयामित्यादावार्धधातुकसंज्ञानिवृत्तेस्सिद्धत्वा
त्। शमिधातोरित्यतोद्वितीयधातुग्रहणानुवर्तनाद्वा॥ तत्रोपपदं॥ स्थग्रहणमिति। सप्तमीशब्देनसाहचर्यात्सूत्रेषुसप्तमीनिर्दि
ष्टग्रहीष्यन्तइतिप्रश्नः। यत्रैवसप्तमीति। मुख्यार्थसंभवेगौणग्रहणस्यान्याय्यत्वात्सप्तम्याएवोपपदसंज्ञास्यात्। संज्ञाविधौप्रत्यय
ग्रहणेतदन्तविधेःप्रतिषेधात्। समासस्तुसमर्थपरिभाषोपस्थानात्तदन्तस्यैवस्यात्। यत्रवेति। सप्तमीतियदारूपग्रहणंतदा
सतिसप्तम्यांजनेर्डइत्यादावेवस्यात्। उपसरजादिसिद्ध्यर्थंकुम्भकारादिषुतुनैवस्यादित्यर्थः। स्थग्रहणइति। स्थग्रहणेतुसतिसो

यदयंकण्ड्वादिभ्योयग्भवतीत्याहतज्ज्ञापयत्याचार्योनधातुमात्राद्यग्भवतीति। अथवाकण्ड्वादीनेवनधातु
ग्रहणेनसंभन्त्स्यामःकण्ड्वादिभ्योधातुभ्योयगिति॥ तत्रोपपदंसप्तमीस्थम्॥ स्थग्रहणंकिमर्थम्। तत्रोपपदंस
प्तमीतीयत्युच्यमानेयत्रैवसप्तमीश्रूयतेतत्रैवस्यात्। स्तम्बेरमः। कर्णेजपः। यत्रवैतेनशब्देननिर्देशःक्रियते
सप्तम्यांजनेर्डइतिइहनस्यात्। कुम्भकारोनगरकारः। स्थग्रहणेपुनःक्रियमाणेयत्रसप्तमीश्रूयतेयत्रचस
प्तमीनश्रूयतेयत्रवैतेनशब्देननिर्देशःक्रियतेयत्रवान्येनशब्देनसप्तमीस्थमात्रेसिद्धंभवति। अथतत्रग्र
हणंकिमर्थम्। तत्रग्रहणंविषयार्थम्। विषयःप्रतिनिर्दिश्यते। तत्रैतस्मिन्धात्वधिकारेयत्सप्तमीनिर्दिष्टमु
पपदसंज्ञंभवतीत्युपपदसंज्ञासिद्धाभवति। उपपदसंज्ञायांसमर्थवचनम्। उपपदसंज्ञायांसमर्थग्रहणंकर्तव्यम्।

त्रसप्तम्युपलक्षितस्यसंज्ञाविधानात्सर्वत्रसिध्यतीत्यर्थः। अथतत्रग्रहणमिति। धातोरित्यनुवर्तनादस्मिन्नेवधात्वधिकारेउपपदसं
ज्ञाभविष्यतीतिप्रश्नः। तत्रैतस्मिन्निति। तत्रग्रहणेनाधिकारपरामर्शेस्पष्टाप्रतिपत्तिर्भवतीतिभावः। अथवोपपदसंज्ञोत्तरत्राधिकाराद
त्रैवधात्वधिकारेभविष्यतीतिप्रश्नः। प्रतिसूत्रमधिकारआश्रीयमाणेगौरवंस्यात्। तत्रग्रहणेतुक्रियमाणेअनेनैववाक्येनपरिपूर्णत्वा
त्संज्ञाविधीयतइतिप्रतिपत्तिलाघवंभविष्यतीत्युत्तरम्। समर्थवचनमिति। इहयदात्रिकःप्रातिपदिकार्थःस्वार्थद्रव्यलिङ्गलक्षणस्त
दाविभक्तिमन्तरेणकर्माऽधिकरणाद्युपपदंनभविष्यतीत्यवश्योत्पत्तव्यंविभक्त्या। ततश्चपदविधित्वात्समर्थपरिभाषायाउपस्थानंभवत्ये
व। चतुष्कपक्षेपञ्चकपक्षेवाप्रातिपदिकस्यैवकर्मादिवाचित्वात्पदविधित्वाभावात्समर्थपरिभाषानुपस्थानात्समर्थवचनंकर्तव्यमितिभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आहरकुम्भमिति। कुम्भशब्दउपपदेकरोतेरणप्रत्ययः स्यात्। उपपदसमासस्तुसामर्थ्याभावान्नस्यात्। महान्तंकुम्भमितिम हत्वयुक्तस्यकुम्भस्यकरोतिनासामर्थ्यमस्तीतिभावः। यदिचात्रप्रत्ययः स्यात्तदाकुम्भशब्दस्यकारशब्देनसमासेकृतेकार्र्यएकार्थीभावान्महच्छब्देनसमासोनस्यात्। सुबन्तसमुदायस्याप्यसुबन्तत्वादुपपदसमासेतृतीयान्तस्यसुब्ग्रहणस्यनिवृत्तावपिप्रथमान्तस्यानुवर्तनात्समासाभावः। नतत्पदमिति। पदसमुदायत्वादितिभावः। यच्चपदमिति। महान्तमित्येतत्। कु

समर्थमुपपदंप्रत्ययस्येतिवक्तव्यम्। इहमाभूदाहरकुम्भंकरोतिकटमिति। अथक्रियमाणेचापिसमर्थग्रहणेमहान्तंकुम्भंकरोतीत्यत्रापिप्राप्नोति। नत्राभवितव्यंमहाकुम्भकार इति। भवितव्यम्। यदैतद्वाक्यंभवति महान्कुम्भोमहाकुम्भः महाकुम्भंकरोतीतिमहाकुम्भकारः। यदात्वेतद्वाक्यंभवति महान्तंकुम्भंकरोतीति। तदानभवितव्यम्। तदाचप्राप्नोति। तदामाभूदिति। यत्तावदुच्यते समर्थग्रहणंकर्तव्यमिति। नकर्तव्यम्। धातोरितिवर्तते। धातोःकर्मण्यण्भवति। तत्रसंबन्धादेतद्गन्तव्यं यस्यधातोर्यत्कर्मेति। यदप्युच्यतेक्रियमाणेचापिसमर्थग्रहणेमहान्तंकुम्भंकरोतीत्यत्रापिप्राप्नोतीति। उपपदमितिमहतीयंसंज्ञाक्रियते। संज्ञाचनामयतोनलघीयः। कुतएतत्। लघ्वर्थंहिसंज्ञाकरणम्। तत्रमहत्याः संज्ञायाःकरणएतत्प्रयोजनमन्वर्थसंज्ञायथाविज्ञायेतउपोच्चारिपदमुपपदमिति। यच्चात्रोपोच्चारिनतत्पदंयच्चपदंनतदुपोच्चारि। यावताचेदानींपदगन्धोस्ति पदविधिरयंभवति। पदविधिश्चसमर्थानांभवति। तत्रासामर्थ्यान्नभविष्यति। अथच्व्यन्त उपपदेकिमणाभवितव्यम् अकुम्भंकुम्भंकरोतिकुम्भीकरोतिमृदमिति। नभवितव्यम्। किंकारणम्। प्रकृतिविवक्षितत्वात् ॥

म्भमित्येतत्तुयद्यपिपदंभवतिउपोच्चारिचतथापिसापेक्षत्वादसामर्थ्यात्प्रत्ययोत्पत्तिनिमित्तंनभवति। अन्वर्थसंज्ञाकरणादेवसप्तमीनिर्दिष्टत्वेपिप्रकृत्यर्थविशेषणानांप्रत्ययार्थानांतद्विशेषणानांचोपोच्चारितत्वाभावादुपपदसंज्ञानभवति। पदविधिरिति। पदनिमित्तत्वात्प्रत्ययविधेरितिभावः। अथच्व्यन्तइति। इहकेचित्सापेक्षत्वेप्रत्ययोनभवतिमहान्तंपुत्रमिच्छतीति। क्वचित्तुभवतिमाणवकंमुण्डयतीतितत्रसंदेहात्प्रश्नः। च्व्यन्तस्यचाश्रयत्वेपिकर्मत्वंमन्यते। सत्त्वभूतत्वस्यानिवर्तनात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतिविवक्षायामिति। प्रकृतिविकारयोरभेदविवक्षायां च्विर्विधीयते। तत्रावश्यं विकारेण प्रकृतिविशेषोपेक्षणीयः। तदनपेक्षायां
च्वेरभावात्। ततश्च यथा महान्तं कुम्भं करोतीत्यत्राण् न भवति एवं मृदं कुम्भीकरोतीत्यादावपीत्यर्थः। काशान्कटीकरोतीत्यत्र त्वि-
ष्याण् प्रत्ययो भवति। तस्मिन्नुत्पन्ने काशशब्दात्कृद्योगे षष्ठी तस्याः षष्ठीति समासः। समासरूपस्यैव चेष्टत्वेनोपात्तत्वात् काशा-
नां कटीकार इति वाक्यं न भवतीत्याहुः। निर्देश इति। कर्मणीति सप्तमीविज्ञानात्सत्येव कर्मणि प्रत्ययो भविष्यतीति भावः। निर्दे-
शः संज्ञाकरणार्थ इति। यथेत्संज्ञार्थमनुनासिकत्वं प्रतिज्ञायते तथार्थनिरपेक्षा कर्मणीत्यादिसप्तम्युपपदसंज्ञालिङ्गं सौत्रीति भा-

प्रकृतिविवक्षायां च्विर्विधीयते। तत्सापेक्षम्। सापेक्षं चासमर्थं भवति। न तर्हि इदानीमिदं भवति इच्छाम्यहं काशकटी-
कारमिति। इष्टमेवैतद्गोनर्दीयस्य। निमित्तोपादानं च। निमित्तोपादानं च कर्तव्यम्। निमित्तमुपपदं प्रत्ययस्येति व-
क्तव्यम्। अनुपादाने ह्यनुपपदे प्रत्ययप्रसङ्गः। अक्रियमाणे हि निमित्तोपादाने अनुपपदेऽपि प्रत्ययः प्रसज्येत।
निर्देश इदानीं किमर्थः स्यात्। निर्देशः संज्ञाकरणार्थः। यदा उपपदे प्रत्ययस्तदोपपदसंज्ञां वक्ष्यामीति। तत्तर्हि
निमित्तोपादानं कर्तव्यम्। तत्र वचनमुपपदसंनियोगार्थम्। तत्र वचनं क्रियते तदुपपदसंज्ञासंनियोगार्थं
भविष्यति। कर्मण्यण् विधीयते। तत्र च प्रत्ययो भवतीति। ननु चान्यस्तत्रग्रहणस्य प्रयोजनमुक्तम्। किम्। तत्र-
ग्रहणं विषयार्थमिति। अधिकारादप्येतत्सिद्धम्॥ कृदतिङ्॥ अतिङिति किमर्थम्। पचति। अतिङिति
शक्यमकर्तुम्। कस्मान्न भवति पचति करोतीति। धातोः परस्य कृत्संज्ञा प्राक् च लादेशाद्धात्वधिकारः।
एवमपि स्थानिवद्भावात्प्राप्नोति। अथातिङित्युच्यमाने यावता स्थानिवद्भावः। कथमेवैतत्सिध्यति॥

वः। अर्थापेक्षायां तु सप्तम्या मण्प्रत्ययस्याभिधेयं कर्म स्यात्। यथा धः कर्मणि ष्ट्रन्निति तथा च उपपदत्वं न प्रतीयेत। अर्थानपेक्ष-
त्वे च सप्तम्या धातोरण् भवति कर्म चोपपदसंज्ञमित्ययमर्थः स्यादिति कर्मणः प्रत्ययोत्पत्तिनिमित्तत्वं न प्रतीयेत। तत्रवचनमि-
ति। तत्रैव सति प्रत्ययो भवति नासतीति तत्रग्रहणाल्लभ्यते। कथमिति चेत्। उच्यते। प्रत्ययइत्यत्रानुवर्तते। तत्रायमर्थः। सप्त-
मीस्थमुपपदसंज्ञं भवति। तत्र चोपपदे प्रत्ययो भवतीति॥ कृदतिङ्॥ स्थानिवद्भाव इति। अतिङिति प्रतिषेधः स्वाश्रयामेव
तिङः कृत्संज्ञां बाधितुमुत्सहते न त्वतिदेशशास्त्रेण प्रसक्ताम्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति वचनादिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिषेधइति। अन्यथानर्थकःप्रतिषेधःस्यादितिभावः। अथवेति। तिङ्भावीलकारएवतिङ्शब्देनोच्यतइतिमूलोच्छेदएवकृत्संज्ञाप्रतिषेधेनक्रियते। टाबादयइति। यथासाधनाश्रयसंख्यानिमित्तकवचनोत्पत्तिस्तथैवतद्गतलिङ्गाश्रयाष्टाबादयःस्युरितिभावः। स्त्रियामिति। शब्दशक्तिस्वाभाव्यात्साधनाश्रयसंख्योपादानमस्तितिङन्तस्यनलिङ्गोपादानमितिभावः। धातोरिति। धात्वादेरित्यतः। एकादेशइति। ननुस्थानिवद्भावंबाधित्वापरत्वादन्तवद्भावेनभाव्यम्। नैषदोषः। परशब्दस्येष्टवाचित्वा

प्रतिषेधवचनसामर्थ्यात्। अथवातिङ्भाविनोलकारस्यकृत्संज्ञाप्रतिषेधः। किंचस्यात्। यद्यत्रकृत्संज्ञास्यात्कृत्प्रातिपदिकमितिप्रातिपदिकसंज्ञास्यात्। ङ्याप्प्रातिपदिकादितिस्वाद्युत्पत्तिःप्रसज्येत। नैषदोषः। एकत्वादिष्वर्थेषुस्वादयोविधीयन्तेतेचात्रतिङोक्ताएकत्वादयइतिकृत्वाउक्तार्थत्वान्नभविष्यन्ति। टाबादयस्तर्हितिङन्तान्माभूवन्निति। स्त्रियांटाबादयोविधीयन्ते। नचतिङन्तस्यस्त्रीत्वेनयोगोस्ति। अणादयस्तर्हितिङन्तान्माभूवन्निति। अपत्यादिष्वणादयोविधीयन्ते। नचतिङन्तस्यापत्यादिभिर्योगोस्ति। अथापिकथंचिद्योगःस्यात्। एवमपिनदोषः। आचार्यप्रवृत्तिर्ज्ञापयतिनतिङन्तादणादयोभवन्तीति। यदयंक्वचित्तद्धितविधौतिङ्ग्रहणंकरोति। अतिशायनेतमबिष्ठनौ। तिङश्च। इहतर्हिपचतिपठतीति। ह्रस्वस्यपितिकृतितुग्भवतीतितुक्प्राप्नोति। धातोरितिवर्तते। एवमपिचिकीर्षतीत्यत्रापिप्राप्नोति। अत्रापिशपाव्यवधानात्। एकादेशेकृतेनास्तिव्यवधानम्। एकादेशःपूर्वविधौस्थानिवद्भवतीतिस्थानिवद्भावाद्व्यवधानमेवेति ॥ इतिश्रीभगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येतृतीयस्याध्यायस्यप्रथमेपादेपञ्चममाह्निकम्॥ समाप्तमिदंवासरूपान्तंभाष्यम् ॥

त्स्थानिवद्भावएवान्तवद्भावस्यबाधकः। नन्वतिङितिप्रत्याख्यायमानेपचेरन्नितिप्रातिपदिकान्तत्वान्नकारलोपःप्राप्नोति। ऋस्सरन्नितिनकारोच्चारणसामर्थ्यान्नभविष्यति। इहतर्हिविचीयादितिकृद्यकारत्वाद्दीर्घोनप्राप्नोति। एषोप्यदोषः। सार्वधातुकप्रतिषेधोज्ञापयत्यकृदितिप्रतिषेधस्तिङोनभवतीति। यदिहिस्यात्सुनुयाच्चिनुयादित्यादावपिसार्वधातुकेकृत्प्रतिषेधेनदीर्घोनभविष्यतीतिपृथक्सार्वधातुकप्रतिषेधोऽनर्थकःस्यात्॥ ॥ इतिश्रीमदुपाध्यायजैयटपुत्रकैयटविरचितेभाष्यप्रदीपेतृतीयस्याध्यायस्यप्रथमेपादेपञ्चममाह्निकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासरूपोस्त्रियाम्॥कथमिति।स्त्रियामित्यभिधेयसप्तमीवास्यात्स्त्रियामित्यस्यैववासरूपस्यनिषेधःस्यात्स्त्रियामित्युच्चा
र्ययेप्रत्ययाविधीयन्तेतेषुवासरूपोनभवतीतिसंदिहानःपृच्छति।लव्येति।अचोयदितियतातव्यादीनांनित्यबाधनंप्राप्नो

वासरूपोस्त्रियाम्॥कथमिदंविज्ञायतेस्त्रियामभिधेयायांवासरूपोनभवतीतिआहोस्वित्स्त्रीप्रत्यये
ष्विति।किंचातः।यदिविज्ञायतेस्त्रियामभिधेयायामिति।लव्यालवितव्याअत्रवासरूपोनप्राप्नोति।अ
थविज्ञायतेस्त्रीप्रत्ययेष्विति।व्यावक्रोशीव्यावक्रुष्टिरितिनसिध्यति।एवंतर्हिनैवंविज्ञायतेस्त्रियाम
भिधेयायांनापिस्त्रीप्रत्ययेष्विति।कथंतर्हि स्त्रीग्रहणंस्वरयिष्यते।तत्रस्वरितेनाधिकारगतिर्भवती
तिस्त्रियामित्यधिकृत्ययेप्रत्ययाविहितास्तेषांप्रतिषेधोविज्ञास्यते।किमर्थंपुनरिदमुच्यते।असरू
पस्यवावचनमुत्सर्गस्यबाधकविषयेऽनिवृत्त्यर्थम्।असरूपस्यवावचनंक्रियतेउत्सर्गस्यबाध
कविषयेऽनिवृत्तिर्यथास्यात्।तव्यत्तव्यानीयरउत्सर्गास्तेषामजन्ताद्यदपवादः।चेयंचेतव्यमि
त्यपियथास्यात्।नैतदस्तिप्रयोजनम्।अजन्ताद्यद्विधीयते।हलन्ताण्ण्यद्विधीयते।एतावन्तश्च
धातवोयदुताजन्ता हलन्ताश्च।उच्यन्तेचतव्यदादयस्तेवचनाद्भविष्यन्ति।एवंतर्हिण्वुल्तृ
चावुत्सर्गौपचादिभ्योऽजपवादः।पचतीतिपचःपक्तापाचकइत्यपियथास्यात्।एतदपिनास्ति
प्रयोजनम्।वक्ष्यत्येतत्।अजपिसर्वधातुभ्योवक्तव्यइति।एवंतर्हिण्वुल्तृजच उत्सर्गाः।ते
षामिगुपधात्कोपवादः।ज्ञियःविलिखःविक्षिपाविक्षेपकइत्यपियथास्यात्।अस्तिप्रयोजनमे
तत्।किंतर्हीति।

तीत्यर्थः।व्यावक्रोशीति।कर्मव्यतिहारेणच्स्त्रियामितिणचाक्तिनोबाधःप्राप्नोतीत्यर्थः।स्त्रियामित्यधिकृत्येति।
स्त्रियांक्तिन्नित्यस्मिन्नधिकारेयेउत्सर्गापवादास्तेष्वपवादउत्सर्गस्यबाधकएवेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रोत्पत्तिर्वाप्रसङ्ग इति। वासरूपइत्येतावच्छ्रूयते। तत्र वाग्रहणेन किं भावो विकल्प्यताम्। असरूपोऽपवादो वा भवति पक्षे न भवतीति। अथ बाधकत्वं विकल्प्यतां वा बाधको भवति पक्षे न बाधक इति। तत्रान्तरङ्गत्वात्सत्ताया एव विकल्पः स्यात्। यथोक्तम्। यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवतिपर इति। ननु बहिरङ्गस्य बाधकत्वस्येत्युत्पत्तेरेव विकल्पः स्यात्पक्षे तु न कश्चित्प्रत्यय उत्पद्येतेत्यर्थः। अस्त्विति। बाधकाभावे उत्सर्गस्यानिवार्यत्वादिति भावः।

तत्रोत्पत्तिर्वाप्रसङ्गो यथा तद्धिते। तत्रोत्पत्तिर्विभाषा प्राप्नोति यथा तद्धिते। अस्तु। यदा विक्षिपो विलिख इत्येतन्न। तदा विक्षेप्ता विक्षेपक इत्येतद्भविष्यति। यद्येन लभ्येत न कृतं स्यात्। तत्तु न लभ्यम्। किं कारणम्। यथा तद्धित इत्युच्यते। तद्धितेषु च सर्व एवोत्सर्गापवादं विभाषा उत्पद्यते वा न वा। सिद्धं त्वसरूपस्य बाधकस्य वा बाधकवचनात्। सिद्धमेतत्। कथम्। असरूपस्य बाधकस्य वा बाधकवचनात्। असरूपो वा बाधको भवतीति वक्तव्यम्। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं तत्रोत्पत्तिर्वाप्रसङ्गो यथा तद्धित इति। नैष दोषः। अस्ति कारणं येन तद्धितेषु विभाषोत्पत्तिर्भवति। किं कारणम्। प्रकृतिस्तत्र प्रकृत्यर्थे वर्तते। अन्येन च शब्देन प्रत्ययार्थोऽभिधीयते। इह पुनर्न केवला प्रकृतिः प्रकृत्यर्थे वर्तते ॥

यद्येतदिति। अपवादशास्त्रेणोत्सर्गशास्त्रस्य बाधितत्वादपवादाभावपक्षेऽप्युत्सर्गस्याप्रवर्तनादिति भावः। तत्र यथा अतइञिति विकल्पिते नेजा मुक्ते पक्षेऽण्न भवति अपि तु वाक्यमेव। तथेहाप्यपवादाभावपक्षे प्रकृतिरेव कर्त्रादीनर्थानभिदध्यात्। यथाग्निचिदित्यादौ क्विबादिलोपे कृते सिद्धं त्विति। बाधकत्वे विकल्पिते यत्र पक्षेऽपवादस्य बाधकत्वं नास्ति तत्र बाधकत्वाभावादुत्सर्गः प्रवर्तते। अन्येनेति। दक्षस्यापत्यमित्यादावपत्यादिशब्देनेत्यर्थः। इह पुनरिति। केवला प्रकृतिः स्वार्थमपि नाभिधत्ते किं पुनः कर्त्रादिकमर्थमभिधास्यति। तथा हि। प्रकृतिप्रत्ययसमुदाये प्रयुज्यमानेऽन्वयव्यतिरेकाभ्यां प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्ययस्तु प्रत्ययार्थ इत्युच्यते। अनुत्पन्नप्रत्यया तु प्रकृतिर्न कंचिदर्थं गमयति। अथापि हि क्षिपेः कर्तेति कर्त्रादिशब्दाः प्रयुज्यन्ते तथापि करोतिक्रियापेक्षमपि कर्तृत्वं प्रतीयेत न तु क्षिपिक्रियापेक्षमेव तस्मात्सामर्थ्याद्बाधकत्वं बहिरङ्गमपि विकल्प्यते ॥ रामः ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यएवेति।समयस्यायंबाधकोस्त्विति भावः।सामर्थ्यमिति।अर्थप्रत्यायनाय शब्दाः प्रयुज्यन्तेनचप्रत्ययस्यानुत्पत्तावर्थः प्रत्याय यितुंशक्यतइत्यर्थः।पूर्वस्मिन्परिहारेप्रकृतेरेवकेवलायाः स्वार्थमात्राभिधानेपिसामर्थ्यनास्तीत्युक्तम्।उत्तरत्रतुसमयात् प्रयोगएवकेवलायानास्तीत्युच्यते।कथंतर्हीति।समयात्केवलस्यप्रातिपदिकस्यतद्धितानुत्पत्तौसाधुत्वंनप्राप्नोतीत्यर्थः।अन्ये नेति।दक्षस्यापत्यमितिषष्ठ्यन्तस्यप्रातिपदिकस्यप्रयोगोनकेवलस्यदक्षहन्तुकृदनुत्पत्तौसत्यांकेवलएवधातुःस्यात्तस्यचसम

नचान्यःशब्दोस्तियस्तमर्थमभिदधीतेतिकृत्वातेनानुत्पत्तिर्नभविष्यति।अथवासमयःकृतः।नकेवलाप्रकृतिः प्रयोक्तव्यानचकेवलःप्रत्ययइति।एतस्मात्समयादनुत्पत्तिर्नभविष्यति।ननुचयएवतस्यसमयस्यकर्तासएवे दमप्याह।यद्यसौतत्रप्रमाणमिहापिप्रमाणंभवितुमर्हति।प्रमाणमसौतत्रचेहच।सामर्थ्यंत्विहदृष्ट्वंशब्दानां प्रयोगे।नचानुत्पत्तौसामर्थ्यमस्ति।ततोनुत्पत्तिर्नभविष्यति।कथंतर्हितद्धितेष्वनुत्पत्तौसामर्थ्यंभवति।अन्येन प्रत्ययेनसामर्थ्यम्।केन।षष्ठ्या।अथवासरूपवत्तामाश्रित्यवाविधिरुच्यते।नचानुत्पत्तौरूपवतीतेनानुत्पत्तिर्न भविष्यति।एवमपिकुतएतत्।अपवादोविभाषाभविष्यतिनपुनरुत्सर्गइति।नैतदस्तिविशेषोयदपवादो विभाषास्यादुत्सर्गोवा।अपिचसापेक्षोयंनिर्देशःक्रियतेवासरूपइति।नचोत्सर्गवेलायांकिंचिदपेक्ष्यमस्ति। अपवादवेलायांपुनरुत्सर्गोपेक्ष्यते।तेनयो रूपवानन्यपूर्वोबाधकःप्राप्नोतिसवाबाधकोभविष्यति।कःपुनर सौ।अपवादः।यदियोरूपवानन्यपूर्वोबाधकःप्राप्नोतिसवाबाधकोभवतीत्युच्यते।क्विबादिषुसमावेशोनप्रा प्नोति।ग्रामणीःग्रामणायइति।नह्येतेरूपवन्तः।एतेपिरूपवन्तः।कस्यामवस्थायाम्।उपदेशावस्थायाम्।यद्येवम नुबन्धविभिन्नेषुविभाषाप्रसङ्गः।अनुबन्धविभिन्नेषुविभाषाप्राप्नोति। कर्मण्यण्आतोनुपसर्गेकइति ।कविषयेऽणपिप्राप्नोति ॥

यात्प्रयोगाभावः।अथवेति।असरूपशब्देनभिन्नरूपउच्यते।तस्यचभिन्नरूपत्वंरूपवदुत्सर्गापेक्षयाभवतीतिसएवपक्षेऽ भ्यनुज्ञायतेनत्वरूपानुत्पत्तिरित्यर्थः। नन्वेवास्तीति।उत्सर्गविकल्पेऽप्राप्तविभाषाअपवादविकल्पेतुप्राप्तविभाषेतिन कश्चिद्विशेषः।अपवाददेलायामिति।बाध्यत्वेनयावदुत्सर्गोनापेक्ष्यतेतावदपवादस्यप्रवृत्तिरेवनास्तीत्यर्थः।उपदेशाव स्थायामिति।प्रत्यासत्तिन्यायादुपदेशावस्थायामसारूप्यमाश्रीयतेइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्योपचदिति। लङ्यनङ्कस्तकारः प्रत्ययः लुङि त्वपाक्षीदिति ईङ्कब्द इति भिन्नरूपत्वात्समावेशप्रसङ्गः। यदयमिति। परो
ऽसेलिडिति लिटा लङः समावेशोऽसारूप्यात्सिद्ध एवेति नार्थो लङ्ग्रहणेन। विहित स्तु लकाराणामसमावेशं ज्ञापयतीत्यर्थः।
अथवेति। क्विबादयो न संगृहीतास्तेषां प्रयोगे रूपाभावादित्यर्थः। क्वचिद्यद्इति। प्रयोग इत्यर्थः। उपदेशे सर्वस्यैवासारू

सिद्धमनुबन्धस्यानेकान्तत्वात्। सिद्धमेतत्। कथम्। अनुबन्धस्यानेकान्तत्वात्। अनेकान्ता अनुबन्धाः। अथ
वा प्रयोगे सरूपाणां वा विधिर्न्याय्यः। प्रयोगे लादेशेषु प्रतिषेधः॥ प्रयोगे चेल्लादेशेषु प्रतिषेधो वक्तव्यः। ह्योपच
दित्यत्र लुङपि प्राप्नोति। श्वः पक्तेत्यत्र लुडपि प्राप्नोति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न लादेशेषु वासरूपो
भवतीति। यदयं हशश्वतोर्लङ् चेत्याह। अथवा प्रयोगे सरूपाणां वा विधाने सर्वमिष्टं संगृहीतमिति कृत्वा दिति
यः प्रयोग उपास्यते। कोऽसौ उपदेशो नाम। उपदेशे चैतेऽसरूपाः। ननु चोक्तमनुबन्धभिन्नेषु विभाषाप्रसङ्ग इति।
परिहृतमेतत्। सिद्धमनुबन्धस्यानेकान्तत्वादिति। अथैकान्तेषु दोष एव। एकान्तेषु च न दोषः। आचार्यप्रवृत्तिर्ज्ञा
पयति। नानुबन्धकृतमसारूप्यं भवतीति। यदयं ददातिदधात्योर्विभाषां शास्ति अथवाऽसरूपो वा बाधको भव
तीत्युच्यते। अपवादश्च नाम अनुबन्धभिन्नो वा भवति रूपान्यत्वेन वा। तेनानेनावश्यं किंचित्स्याज्यं किंचिच्च स
ग्रहीतव्यम्। तद्यदनुबन्धकृतमसारूप्यं तन्नाश्रयिष्यामः। यत्तु रूपान्यत्वेनासारूप्यं तदाश्रयिष्यामः। अथवा अ
सरूपो वा बाधको भवतीत्युच्यते। सर्वश्चासरूपस्तत्र प्रकर्षगतिर्विज्ञास्यते साधीयो योऽसरूप इति। कश्च सा
धीयान्। यः प्रयोगे च प्राक् च प्रयोगात्। असरूपो वा बाधको भवतीत्युच्यते। न चैवं सति कश्चिदपि सरूपः।
तएवं विज्ञास्यामः। क्वचिद्योऽसरूपा इति। अनुबन्धभिन्नाश्च प्रयोगे सरूपाः। अथ कथमिदं विज्ञायते अ
स्त्रियामिति। किं स्त्रियां न भवतीति आहोस्वित्प्राक् स्त्रिया भवतीति। कश्चात्र विशेषः। स्त्रियां प्रतिषेधे क्त
ल्युट्तुमुन्खलर्थेषु विभाषाप्रसङ्गः॥

प्यमित्यसरूपग्रहणमनर्थकं स्यात्। कथमिति। स्त्र्यधिकारविहितेष्वेव किं प्रतिषेधः परस्तात्स्त्र्यधिकारस्य भवत्येव राम॰
वा सरूपविधिः। अथ स्त्र्यधिकारात्प्राग्वासरूपविधिर्भवति स्त्र्यधिकारेण विच्छिद्यत इति प्रश्नः॥ ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिङ्लोटाविति। लिङ् चेति लिङ् भवत्येव। इच्छार्थेषु लिङ्लोटावित्यत्र तु लिङ्लोटोः सहनिर्देशादत्रापि सहनिर्देशः कृतः। लिङ्ङिति नियमाल्लोण्न भविष्यतीति शक्यते वक्तुम्। ननु तुमुन्भावे कर्तृकर्मणोर्लिङ्लोटाविति भिन्नार्थत्वात्कुतो बाध्यबाधकभावः। नैष दोषः। भावेपि लिङ्लोटोरस्ति विधानमिति तदपेक्षया बाध्यबाधकभावोभिमतः। आस्ते भोक्तुमिति भोजनार्थत्वादासनस्य पौर्वकाल्यमात्रं गम्यत इति समानविषयत्वाद्बाध्यबाधकभावप्रसङ्गः। क्त्वाभावे तन्नैव चलकारोत्पत्तिरत्रेति समानार्थत्वमपि विद्यते। त

स्त्रियां प्रतिषेधे क्तल्युट्तुमुन्खलर्थेषु विभाषा प्राप्नोति। क्त। हसितं छात्रस्य शोभनम्। घञपि प्राप्नोति। ल्युट्। हसनं छात्रस्य शोभनम्। घञपि प्राप्नोति। तुमुन्। इच्छति भोक्तुम्। लिङ्लोटावपि प्राप्नुतः। खलर्थः। ईषत्पानः सोमो भवता। खलपि प्राप्नोति। एवं तर्हि स्त्रियाः प्रागिति वक्ष्यामि। स्त्रियाः प्रागिति चेत् क्त्वायां वावचनम्। स्त्रियाः प्रागिति चेत्क्त्वायां वावचनं कर्तव्यम्। आसित्वा भुङ्क्ते। आस्ते भोक्तुमित्यपि यथा स्यात्। कालादिषु तुमुन्विधाने वावचनम्। कालादिषु तुमुन्विधाने वावचनं कर्तव्यम्। कालो भोक्तुं। कालो भोजनस्येत्यपि यथा स्यात्। अर्हे तृज्विधानम्। अर्हे तृज्विधेयः। इमे अर्हे कृत्या विधीयन्ते। ते विशेषविहिताः सामान्यविहितं तृचं बाधेरन्। नैष दोषः। भावकर्मणोः कृत्या विधीयन्ते कर्तरि तृच्। कः प्रसङ्गो यद्भावकर्मणोः कृत्याः कर्तरि तृचं बाधेरन्। एवं तर्हि अर्हे कृत्यतृज्विधानम्। अर्हे कृत्यतृचो विधेयाः। अयमर्हे लिङ् विधीयते। स विशेषविहितः सामान्यविहितान्कृत्यतृचो वा बाधेत। वासरूपो स्त्रियाम्। क्त्वा। कृत्यसंज्ञायां प्राङ्ण्वुल्वचनम्। कृत्यसंज्ञायां प्राङ्ण्वुल इति वक्तव्यम्। किं प्रयोजनम्। ण्वुलः कृत्यसंज्ञा माभूदिति। अर्हे कृत्यतृज्ग्रहणं तु ज्ञापकं प्राङ्ण्वुल्वचनानर्थक्यस्य। यदयमर्हे कृत्यतृचश्चेति तृज्ग्रहणं करोति तज्ज्ञापयत्याचार्यः प्राङ्ण्वुलः कृत्यसंज्ञा भवतीति। एवमपि ण्वुलः कृत्यसंज्ञा प्राप्नोति। योगापेक्षं ज्ञापकम्॥ तव्यत्तव्यानीयरः॥ केलिमर उपसंख्यानम्॥ केलिमर उपसंख्यानं कर्तव्यम्। पचेलिमा माषाः पक्तव्याः। भिदेलिमाः सरला भेतव्याः।

त्रायं निर्णयः। स्त्र्यधिकारस्य परस्तादपि वासरूपविधिर्भवति। अर्हे कृत्यतृचश्चेत्यत्र तु कृत्यतृज्ग्रहणेन तस्यानित्यत्वं ज्ञाप्यते॥ कृत्याः कृत्या इत्येतावत्सूत्रमित्याह। कृत्यसंज्ञायामिति। योगापेक्षमिति। ण्वुल्तृचावित्येतस्माद्योगात्प्राक् कृत्यसंज्ञाधिकार इत्येवं तृज्ग्रहणेनानुमास्यत इत्यर्थः। तव्यत्तव्या॥ केलिमर इति। कर्मकर्तरि चायं कैश्चिदिष्यते। भाष्यकारेण तु कर्मणि प्रदर्शितः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वास्तुनि भव इति। दिगादित्वाद्यत्प्रत्ययः। नित्यानां शब्दानां यथा कथंचिदन्वाख्यानं कर्तव्यमिति मन्यते। यथोक्तम्। उपादायापि ये हेयास्तानुपायान्प्रचक्षते। उपायानां च नियमो नावश्यमवतिष्ठत इति। अवास्तव्य इत्यत्र स्वरभेदोऽपि नास्ति। कृत्योकेष्णुजिति यदन्तोदात्तत्वं विधीयते तदेव ययतोश्चातदर्थ इत्यनेन। अचो यत्। यतिजनेरिति। यतोऽनाव इति स्वरार्थं जनेर्यद्विधानम्। जन्यमिति तु ण्यतापि सिध्यति। जनिवध्योश्चेति वृद्धिप्रतिषेधात्। वधमर्हतीति। दण्डादिभ्य इति यत्प्रत्ययः। य

वसेस्तव्यत्कर्तरि णिच्च॥ वसेस्तव्यत्कर्तरि वक्तव्यः णिच्चासौ भवतीति वक्तव्यम्। वसतीति वास्तव्यः। तद्धितो वा। तद्धितो वा पुनरेष भविष्यति। वास्तुनि भवो वास्तव्यः॥ अचो यत्॥ अज्ग्रहणं किमर्थम्। अजन्ताद्यथा स्याद् हलन्तान्मा भूदिति। नैतदस्ति प्रयोजनम्। हलन्ताण्ण्यद्विधीयते स बाधको भविष्यति। यथैव तर्हि ण्यद्यतं बाधते एवं तव्यदादीनपि बाधेत। अज्ग्रहणे पुनः क्रियमाणे अजन्ताद्यद्विधीयते हलन्ताण्ण्यद्विधीयते। एतावन्तश्च धातवो यदुत अजन्ता हलन्ताश्च। उभयन्ते च तव्यदादयः ते वचनाद्भविष्यन्ति। नैतदस्ति प्रयोजनम्। वासरूपेण तव्यदादयो भविष्यन्ति। इदं तर्हि प्रयोजनम्। अजन्तभूतपूर्वमात्रादपि यथा स्यात्। लव्यम्। पव्यम्। आर्धधातुकसामान्ये गुणे कृतेऽपि प्रत्ययसामान्येऽपि च वान्तादेशे कृते हलन्तादिति ण्यत्प्राप्नोति। तथा दित्स्यम्। धित्स्यम्। आर्धधातुकसामान्ये अकारलोपे कृते हलन्तादिति ण्यत्प्राप्नोति। अज्ग्रहणसामर्थ्याद्यदेव भवति॥ यतिजनेरुपसंख्यानम्॥ यतिजनेरुपसंख्यानं कर्तव्यम्। जन्यं वृत्तेन। अत्यल्पमिदमुच्यते। तकिशसिचतियतिजनीनामुपसंख्यानमिति वक्तव्यम्। तक्यम्। शस्यम्। चत्यम्। यत्यम्। जन्यम्। हनो वा वध च। हन्तेर्वा यद्वक्तव्यः वध इत्ययं चादेशः। वध्यः। घात्यः। तद्धितो वा। तद्धितो वा पुनरेष भविष्यति। वधमर्हतीति वध्यः। यदि तद्धितः समासो न प्राप्नोति। असिवध्यो मुसलवध्य इति। यदि पुनः सति साधनं कृतेति वा पादहारकाद्यर्थमिति समासः सिद्धो भवति। यदि पुनरसिवधशब्दादेवोत्पत्तिः स्यात्। असिवधमर्हतीति। नैवं शक्यं वक्तुम्। स्वरे हि दोषः स्यात्। असिवध्यः। एवं स्वरः प्रसज्येत। असिवध्य इति चेष्यते। अचो ॥

दितद्धित इति। तेन सह समासस्य लक्षणाभावात्। स्वरे हि दोष इति। असिवधशब्दाद्यति सति तित्स्वरितमिति स्वरितः प्रसज्येत। कृदन्तेन तु समासे कृदुत्तरपदप्रकृतिस्वरेण वध्यशब्द आद्युदात्तो भवति। न चासिवधशब्दात्प्राप्नोति। यद्दण्डादिषु केवलवधशब्दस्य पाठात्तदन्तविध्यभावाच्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अजर्यम्॥ तयोरेवेतिवचनाद्भावेऽजर्यशब्दः प्राप्नोति। अजर्यं सङ्गतेनेति। कर्तरि च सङ्गतमिष्यते अजर्यमार्यसङ्गतमित्यतः पृच्छति। किंप्रत्युदाह्रियत इति। अजर इति कर्तर्ययं प्रत्ययो निपात्यते। ततो ह्यङ्गविकलतापरिहाराय कर्तैव प्रत्युदाहरणे प्रदर्शनीय इति भावः। गत्यर्थानामिति। यद्यपि सङ्गमनं सङ्गतमिति भावे इह क्तो विहितस्तथापि गत्यर्थानां क्तः प्रत्ययः कर्तरि दृष्टो गतो ग्रामं देवदत्त इति। ततो गत्यर्थधातुसाहचर्यादजर्यमिति कर्तरि निपातनमिति मन्यते। जीर्यतिरकर्मक इति। सोपसर्गस्य सकर्मकत्वेपीहानुपसर्गस्य निपातनादकर्मकत्वं बोद्धव्यम्। द्रव्यकर्माभावाश्रयेण चाकर्मकत्वमुक्तम्। कालादिना सर्वस्यैव सकर्मक

गदमदचरयमश्चानुपसर्गे॥ अनुपसर्गाच्चरेराङि चागुरौ॥ अनुपसर्गाच्चरेरित्यत्राङि चागुराविति वक्तव्यम्। आचर्यो देशः। अगुराविति किमर्थम्। आचार्य उपनयमानः। गदमद॥ अर्यः स्वामिवैश्ययोः॥ स्वामिन्यन्तोदात्तत्वं च॥ स्वामिन्यन्तोदात्तत्वं च वक्तव्यम्। अर्यः स्वामी॥ अजर्यं सङ्गतम्॥ सङ्गतमिति किंप्रत्युदाह्रियते। अजरः कम्बलः अजरिता कम्बल इति। किंपुनः कारणं कर्तृसाधन एव प्रत्युदाह्रियते न भावसाधनः प्रत्युदाहार्यः। एवं तर्हि अजर्यं कर्तरि॥ अजर्यं कर्तरीति वक्तव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। गत्यर्थानां क्तः कर्तरि विधीयते। तेन योगाद् अजर्यं कर्तरि भविष्यति। गत्यर्थानां क्तः कर्मण्यपि विधीयते तेन योगादजर्यं कर्मण्यपि प्राप्नोति। जीर्यतिरकर्मकः। भावे तर्हि प्राप्नोति। संगतग्रहणमिदानीं किमर्थं स्यात्। कर्तृविशेषणं संगतग्रहणं संगतं कर्तृ चेद्भवतीति। तद्यथा। हृषेर्लोमस्विति लोमानि चेत्कर्तॄणि भवन्ति। अजर्यम्॥ वदः सुपि क्यप्च॥ वदः सुप्यनुपसर्गग्रहणम्॥ वदः सुप्यनुपसर्गग्रहणं कर्तव्यम्। इह मा भूत्। प्रवाद्यं संवाद्यम्। तत्तर्हि कर्तव्यम्। न कर्तव्यम्। अनुपसर्ग इति वर्तते एवं तर्हीन्वाचष्टे अनुपसर्ग इत्येवं वर्तत इति। नैतदन्वाख्येयमधिकारा अनुवर्तन्त इति। एष एव च न्यायो यदुताधिकारा अनुवर्तेरन्निति ॥

कत्वम्। सङ्गतग्रहणमिति। नहि गमेर्भावस्य जीर्यतेर्भावेन सामानाधिकरण्यमुपपद्यत इति प्रश्नः। कर्तृविशेषणमिति। वैयधिकरण्यमनयोः पदयोः स्यादिति भावः। लोमानि चेदिति। तथा च हृषितं लोमभिर्हृष्टं लोमभिरिति वैयधिकरण्येपीड्विकल्पो भवति। तस्मात्कर्तरीति वक्तव्यम्। अथवा सामानाधिकरण्यत्यागेन वैयधिकरण्याश्रयणस्यायुक्तत्वान्निपातनाद्वा कर्तर्येव प्रत्ययो भवतीति स्थितम्॥ वदः सुपि॥ नैतदिति। यत्राधिकारस्य विच्छेदोऽवध्यपरिज्ञानं वा सिंहावलोकनन्यायाश्रयणं वा तत्रावश्यवक्तव्यो विशेषः। एवमादौ तु प्रयोजनाभावादवक्तव्य इत्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

सुवोभावे॥भवतिरकर्मकइति।ननुप्राप्त्यर्थःसकर्मकोस्ति।नैषदोषः।प्राप्त्यर्थस्यचार्थस्यैवेहग्रहणात्।ननुकालादिकर्मणिप्राप्नो
ति।अनभिधानात्कालादिकर्मणिनभविष्यतीतिमन्यते॥हनस्तच॥दस्युहत्यायेति।छन्दस्येवैतत्क्यबन्तंनपुंसकंभाषायांतुस्त्री
लिङ्गमेव॥रितिस्तु॥अथवेति।पूर्वस्मात्क्यपोःस्वैदेलक्षण्यप्रदर्शनायक्यब्ग्रहणंकृतंतेनपूर्वक्यपूछन्दसिस्त्रियांचिद्भवति।क्य
बिधाविति।ईडवन्दवृशंसदुहांण्यतइतिवार्यशब्दस्याद्युदात्तविधानादेतज्ज्ञायते।तत्रहीडिवन्दिभ्यामात्मनेपदिभ्यांसाह

भुवोभावे॥भावग्रहणंकिमर्थम्।कर्मणिमाभूदिति।नैतदस्तिप्रयोजनम्।भवतिरकर्मकः।अकर्मकाअपिधातवः
सोपसर्गाःसकर्मकाभवन्ति।तेनानुभाव्यमानन्दमित्यत्रापिप्राप्नोति।एतदपिनास्तिप्रयोजनम्।अनुपसर्गइति
वर्तते।उत्तरार्थंतर्हिभावग्रहणंकर्तव्यम्।हनस्तचभावेयथास्यात्।ब्रह्महत्यावर्तते।इहमाभूत्।श्वघात्योवृषलइ
ति॥हनस्तच॥ हनस्तश्चित्स्त्रियांछन्दसि॥ हनस्तचेत्यत्रचित्स्त्रियां छन्दसिइतिवक्त
व्यः।तांभ्रूणहत्यांनिगृह्यानुचरणम्।अस्यैस्त्वाभ्रूणहत्यायैचतुर्थंप्रतिगृह्यते।स्त्रियामितिकिमर्थम्।आघ्नतेदस्यु
हत्याय।छन्दसीतिकिमर्थम्।ब्रह्महत्यादस्युहत्यावर्तते॥एतिस्तुशास्वृदृजुषःक्यप्॥क्यबितिवर्तमानेपुनःक्यब्
ग्रहणंकिमर्थम्।क्यबेवयथास्यात्।यदन्यत्प्राप्नोतितन्माभूदिति।किंचान्यत्प्राप्नोति।ण्यत्।ओरावश्यकेण्यतः
स्तौतेःक्यप्पूर्वविप्रतिषिद्धमितिवक्ष्यति।सपूर्वविप्रतिषेधोनपठितव्योभवति।अथवाहनस्तश्चित्स्त्रियांछन्द
सिचोदितःसनवक्तव्योभवति।क्यब्विधौवृञ्ग्रहणम्।क्यब्विधौवृञ्ग्रहणंकर्तव्यम्।इहमाभूत्।वार्योऋत्विजइ
ति।अञ्जेश्चोपसंख्यानंसंज्ञायाम्॥अञ्जेश्चोपसंख्यानंकर्तव्यंसंज्ञायाम्।आज्यम्।यदिक्यप्।वृद्धिर्नप्राप्नोति।त
स्माण्ण्यदेषः।यदिण्यत्।उपधालोपोनप्राप्नोति।तस्मात्क्यबेवेषः।ननुचोक्तंवृद्धिर्नप्राप्नोति।आङ्पूर्वस्यप्रयोगोभ
विष्यति।सर्वथैवमवग्रहः—प्राप्नोति।नलक्षणेनपदकाराअनुवर्त्याःपदकारैर्नामलक्षणमनुवर्त्यम्।यथाल
क्षणंपदंकर्तव्यम्॥

चर्यादृशब्देनवृणातिर्गृह्यतेतस्माण्ण्यदूषणइति।ननुस्वरभेदोभवति।क्यपिसत्याद्युदात्तंपदंण्यतिसत्यन्तस्वरितम्।नैषदोषः।नद्वि
षयस्यानिसन्तस्येत्याद्युदात्तविधानात्।लक्षणेनेति।संहितायाएवनित्यत्वम्।पदविच्छेदस्तुपौरुषेयत्वम्।तथाचयत्रार्थनिश्चयाभाव
स्तत्रावग्रहोनक्रियते।तदुक्तंहरिद्रूरनवगृह्यतेइति।हरिद्रूरित्यत्रकिंहरिशब्दइकारान्तः।अथहरितशब्दस्तकारान्तइतिसंदेहात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईचखनः॥दीर्घोच्चारणेभाष्यकारेणप्रत्याख्यातेकेचित्प्रश्लेषनिर्देशेनद्वितीयइकारोयेविभाषेत्यालस्यपक्षेपरत्वात्प्राप्तस्यबाधना र्थइत्याहुः।तदयुक्तम्।क्यप्संनियोगेनविधीयमानस्येत्वस्यान्तरङ्गत्वादात्वस्यतुयकारादावुत्पन्नेविधीयमानस्याङ्गस्यबहिरङ्गत्वा द्विप्रतिषेधाभावात्प्राप्त्यभावात्।भृञोसं॥असंज्ञायांकिमर्थमिति।क्रियमाणेप्रतिषेधइष्टंनसिध्यतीतिप्रश्नः।भार्येति।गृहिण्यादर्थ संज्ञेतिक्यबभावेण्यत्प्रत्ययः।अनर्थकइति।भृञइति।प्राप्तेरयंप्रतिषेधआनन्तर्यान्नतुलक्षणान्तरप्राप्तेर्व्यवधानादितिभावः।प्रतिषे

ईचखनः॥दीर्घोच्चारणंकिमर्थम्।नचइचखनइत्येवोच्येत।कारूपसिद्धिः।खेयम्।आद्गुणेनसिद्धम्।नसिध्यति। षत्वतुकोरसिद्धइतिएकादेशस्यासिद्धत्वात्तुक्प्रसज्येतानैतदस्ति।पदान्तपदाद्योरेकादेशः सिद्धः।नैषत्वतुक्पदान्तप दाद्योरेकादेशस्तस्मादिचखनइत्येववक्तव्यम्॥ईचखनः ॥ भृञोऽसंज्ञायाम् ॥ असंज्ञायामितिकि मर्थम्।भार्या।भृञः संज्ञाप्रतिषेधेस्त्रियामप्रतिषेधोन्येनविहितत्वात्।भृञः संज्ञाप्रतिषेधेस्त्रियामप्रतिषेधः।अ नर्थकःप्रतिषेधोऽप्रतिषेधः।किंकारणम्।अन्येनविहितत्वात्।अन्येनलक्षणेनस्त्रियांक्यब्विधीयते।संज्ञायांस मजनिषदनिपतमनविदषुञ्शीङ्भृञिणइतिप्रतिषेधइदानींकिमर्थः स्यात्।प्रतिषेधःकिमर्थइतिचेदस्त्रीसंज्ञा प्रतिषेधार्थः।प्रतिषेधःकिमर्थइतिचेदस्त्रीसंज्ञास्तितदर्थःप्रतिषेधः स्यात्।भार्यानामक्षत्रियाः।सिद्धंतुस्त्रियांसंज्ञा प्रतिषेधात्।सिद्धमेतत्।कथम्।स्त्रियांसंज्ञाप्रतिषेधोवक्तव्यः।संज्ञायांसमजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ।ततोनस्त्रियांभृञइति।सिध्यति।सूत्रंतर्हिभिद्यते।यथान्यासमेवास्तु।ननुचोक्तंभृञः संज्ञाप्रतिषेधेस्त्रियामप्रतिषे धोन्येनविहितत्वादिति।नैषदोषः।भावइतितत्रानुवर्तते।कर्मसाधनश्चायम्।अथवायएतेसंज्ञायांविधी यन्तेतेषुनैवंविज्ञायतेसंज्ञायामभिधेयायामिति।किंतर्हि।प्रत्ययान्तेनचेत्संज्ञागम्यतइति ॥

धइदानीमिति।प्रतिषेधविधानसामर्थ्याल्लक्षणान्तरेणप्राप्तस्यापिक्यपःप्रतिषेधोभविष्यतीतिभावः।अस्त्रीसंज्ञेति।संज्ञायतइति संज्ञेतिकर्मसाधनोऽत्रसंज्ञाशब्दः।ततोनस्त्रियामिति।स्त्रीशब्देनात्रस्तनकेशवतीगृह्यते।अन्यथाविधिप्रतिषेधयोर्विषयविभागो नस्यात्।तस्माद्भरणंभृत्येतिविधेर्विषयः।लौकिकीतुस्त्रीप्रतिषेधस्याभावइतितत्रेति।व्रजयजोर्भावेक्यबित्यतःसंज्ञायामिति। सं ज्ञाशब्दःकर्मसाधनोनगृह्यतेकिंतर्हिभावसाधनः।तेनप्रत्ययान्तेनयदिरूढिर्गम्यतेततःप्रत्ययः।नचभृत्याशब्देनहिगृहि ण्यभिधीयतइतिक्यपोऽप्रसङ्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संज्ञायामिति। भार्या नाम क्षत्रियादित्यत्र संज्ञायामिति प्रतिषेधस्य चरितार्थत्वात्सूत्रान्तरेण स्त्रियां संज्ञायां क्यपः प्रसङ्गाद्भार्याशब्दो न सिध्यतीति चोद्यम्। स्त्रीप्रकरणे भावग्रहणानुवर्तनात्कर्मणि क्यबभावाण्ण्यदेव भवतीत्युत्तरम्। यथेति। अजन्ताद्विधीयमानो यद्यथा हलन्तात्कुतश्चिद्भवति बहुलवचनात्। यथा च मित्तिरित्यङ्विषये क्तिन्भवति। एवं भार्येति क्यप्प्र

अपर आह। संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिध्यति। संज्ञायां पुंसि दृष्टत्वात्तव भार्या शब्दो न सिध्यति। स्त्रियां भावाधिकारोस्ति तेन भार्या प्रसिध्यति। भाव इति तत्र वर्तते। कर्मसाधनश्चायम्। अथवा बहुलं कृत्याः संज्ञायामिति तत्स्मृतम्। अथवा कृत्यल्युटो बहुलमिति एवमत्रापि ण्यद्भविष्यति॥ यथा यत्यं यथा जन्यं यथा मित्तिस्तथैव सा। समञ्च बहुलं। समञ्च बहुलमुपसंख्यानं कर्तव्यम्। संभृत्याएव संभाराः। संभार्या एव संभाराः॥ राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः॥ सूर्यरुच्याव्यथ्याः कर्तरि। सूर्य रुच्य अव्यथ्य इत्येते कर्तरि निपात्यन्ते। किं निपात्यते। सूर्ये, सृसर्तिभ्यां चासर्तेरुत्वं सुवतेर्वा रुडागमः। सरत्याद्वा सुवति कर्मणीति वा सूर्यः। रुच्यो रोचते सो रुच्यः। न व्यथत इत्यव्यथ्यः। कुप्यं संज्ञायाम्॥ कुप्यं संज्ञायामिति वक्तव्यम्। गोप्यमन्यत्। कृष्टपच्यस्यान्तोदात्तत्वं च कर्मकर्तरि चा। कृष्टपच्यस्यान्तोदात्तत्वं च वक्तव्यं संज्ञायां कर्मकर्तरि चेति वक्तव्यम्। कृष्टे पच्यन्ते स्वयमेव कृष्टपच्याः श्यामे। यो हि कृष्टे पक्तव्यः स कृष्टपाक्यो भवति॥ राजसूय॥ प्रत्यपिभ्यां ग्रहेः॥ प्रत्यपिभ्यां ग्रहेश्छन्दसि॥ प्रत्यपिभ्यां ग्रहेः छन्दसीति वक्तव्यम्। मत्तस्य न प्रतिगृह्यम्। अनृतं हि मत्तो वदति तस्मान्नापिगृह्यम्। प्रतिग्राह्यमपिग्राह्यमित्येवान्यत्र॥ प्रत्यपिभ्याम्॥ अमावस्यदन्यतरस्याम्॥ कस्यायमनुबन्धः। प्रधानस्य। यदि प्रधानस्य। अमावस्यादित्येवं स्वरः प्रसज्येत। अमावस्यादिति चेष्यते। तथा अमावास्याग्रहणेनामावस्याग्रहणं न प्राप्नोति। एवं तर्हि निपातनस्य॥

सङ्गे ण्यद्भवतीत्यर्थः। अमावस्य। प्रधानस्येति। विधीयमानत्वात्प्रत्ययस्य प्राधान्यमिति यत्प्रत्ययो निपात्यत इत्युक्तं भवति। एवं स्वर इति। यतोनाव इति उत्तरपदमाद्युदात्तं स्यात्। अन्तस्वरितं चेष्यते। अमावास्याग्रहणेनेति। शब्दान्तरत्वादमावास्याशब्दस्य ण्यदन्तत्वादमावस्याशब्दस्य यदन्तत्वादिति भावः। एवं तर्हीति। यत्प्रत्ययान्तत्वं न निपात्यत इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुतितिप्रत्ययग्रहणंचोदयिष्यते।निरस्तविभागेचनिपातनआश्रीयमाणेस्वरितत्वंनसिध्यतीतिमत्वाह।यदितर्हीति।एवंजातीयकानीति।निरस्तावयवविभागानीत्यर्थः।अमावसोरिति।वृद्धिभावाभावकृतभेदाश्रयोद्विवचननिर्देशः।निपातयामीति।एकतरस्येतिशेषः।एकवृत्तितेति।एकातद्धितवृत्तिरुभयोःसिध्यतिएकदेशविकृतस्यानन्यत्वात्।तथा

यदितर्हिनिपातनान्यप्येवंजातीयकानिभवन्तिश्रोत्रियंश्छन्दोधीतइति।अपवर्गाभावात्तुन्नित्यादिरुदात्तत्वं नप्राप्नोति।एवंतर्हिअमावसोरहंण्यतोर्निपातयाम्यवृद्धिताम्।तथैकवृत्तितातयोःस्वरश्चमेप्रसिध्यति॥ अमा॥छन्दसिनिष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि॥निष्टर्क्यइतिकिंनिपात्यते।निष्टर्कैर्कृतेराद्यन्तविपर्ययश्छन्दसि॥ कृताद्यर्थः।यथाकृतेस्तर्कः।कसेःसिकता।हिंसेःसिंहः।अपरआह।निष्टर्क्येव्यत्ययंविद्यान्निसःषत्वंनिपातनात्।ण्यदायादेशइत्येतावुपचाय्येनिपातितौ॥निष्टर्क्यंचिन्वीतपशुकामः।ण्यदेकस्माच्चतुर्भ्यःक्यप्चतुर्भ्यश्चयतोविधिः।ण्यदेकस्माद्यशब्दश्चद्वौक्यपौण्यद्विधिश्चतुः॥ण्यदेकस्मान्निष्टर्क्यः।चतुर्भ्यःक्यप्।देवहूयः प्रणीयः उन्नीयः उच्छिष्यः।चतुर्भ्यश्चयतोविधिः।मर्यः स्तर्याध्वर्यः खन्यः।ण्यदेकस्मात्।खान्यः।यशब्दश्च।देवयज्या।द्वौक्यपौ।आपृच्छ्यः प्रतिषीव्यः।ण्यद्विधिश्चतुः।ब्रह्मवाद्यः भाव्यः स्ताव्यः।उपचाय्यपृडम्।उपपूर्वाच्चिनोतेरायादेशोपिनिपात्यते।नहिण्यतैवसिध्यति।हिरण्यइतिच॥हिरण्यइतिचवक्तव्यम्।उपचेयपृडमित्येवान्यत्र॥ऋहलोर्ण्यत्॥पाणौसृजेर्ण्यद्विधिः।पाणौसृजेर्ण्यद्विधेयः।पाणिसर्ग्यारज्जुः।समवपूर्वाच्च।समवपूर्वाच्चेतिवक्तव्यम्।समवसर्ग्यारज्जुः।लपिदभिभ्यांच॥लपिदभिभ्यांचेतिवक्तव्यम्।अपलाप्यम्।अपदाभ्यम्॥

हिण्यत्वमावास्याशब्दस्यन्याय्यत्वादाकारस्यप्रकृतित्वमकारस्यतुविकारत्वम्।छन्दसि॥कृताद्यर्थइति।कृतशब्दस्यधातोर्यआदिःककारस्तत्प्रयोजनः।आदेरन्तत्वमन्तस्यचादित्वंयथास्यादित्यर्थः।आद्यन्तयोःपरस्पररूपापत्तिर्नतुवर्णान्तररूपापत्तिरितिप्रदर्शनायकृताद्यर्थइत्युक्तंभवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओरावश्यके॥ कथमिति। किमावश्यकार्थवाचिन्युपपदे प्रत्ययः उत प्रत्ययेनावश्यके द्योत्य इति प्रश्नः। अवश्यलाव्यमिति। द्वावपूपावित्यादौ गतार्थस्यापि क्वचित्प्रयोगो लोके दृश्यते लाघवं प्रत्ययनादराादिति मन्यते। विस्पष्टादिवदिति। यथा विस्पष्टक टुकमि―त्यत्र मयूरव्यंसकादित्वात्समासे कृते पूर्वपदप्रकृतिस्वरो भवत्येवमवश्यलाव्यमित्यादावपि मयूरव्यंसकादिषु

ओरावश्यके॥ कथमिदं विज्ञायते आवश्यके उपपदे आहोस्विद्द्योत्य इति। कश्चात्र विशेषः। आवश्यक उपपद इति चेद्द्योत्य उपसंख्यानम्। आवश्यके उपपद इति चेद्द्योत्ये उपसंख्यानं कर्तव्यम्। पाव्यं लाव्यम्। अस्तु तर्हि द्योत्ये। द्योत्य इति चेत् स्वरसमासानुपपत्तिः। द्योत्य इति चेत्स्वरसमासानुपपत्तिः प्राप्नोति। अवश्यलाव्यम्। अवश्यपाव्यम्। नैष दोषः। मयूरव्यंसकादित्वात्समासः। विस्पष्टादिवत्स्वरश्च। ओरावश्यके ण्यतः स्तौतेः क्यप् पूर्वविप्रतिषिद्धम्। ओरावश्यके ण्यतः स्तौतेः क्यप् भवति पूर्वविप्रतिषेधेन। ओरावश्यके ण्यद्भवतीत्यस्यावकाशः। अवश्यलाव्यम्। अवश्यपाव्यम्। क्यपो ऽवकाशः स्तुत्यः। इहोभयं प्राप्नोति अवश्यस्तुत्यः। क्यप् भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वक्तव्यः। उक्तं तत्र क्याविति वर्तमाने पुनः क्यब्ग्रहणस्य प्रयोजनं क्यबेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति॥ आनाय्यो ऽनित्ये॥ दक्षिणाग्नाविति वक्तव्यम्। आनेयो ऽन्यः। आनाय्यो ऽनित्य इति चेद्दक्षिणाग्नौ कृतं भवेत्। एकयोनौ तु तं विद्यादानेयो ह्यन्यथा भवेत्॥ आनाय्य॥ प्राय्य सान्नाय्य निकाय्य धाय्या मानहविर्निवाससामिधेनीषु॥ पाय्यनिकाय्ययोः किं निपात्यते। पाय्यनिकाय्ययोरादिपत्वकत्वनिपातनम्। पाय्यनिकाय्ययोरादिपत्वमादिकत्वं च निपात्यते। मेयं निचेयमित्येवान्यत्र॥ पाय्यसांनाय्य॥ क्रतौ कुण्डपाय्यसंचाय्यौ॥ कुण्डपाय्ये यद्विधिः। कुण्डपाय्ये यद्विधेयः। कुण्डपाय्यः क्रतुः॥ अग्नौ परिचाय्योपचाय्यसमूह्याः॥ समूह्य इत्यनर्थकं वचनं सामान्येन कृतत्वात्। समूह्य इत्यनर्थकं वचनम्। किं कारणम्। सामान्येन कृतत्वात्। सामान्येनैवात्र ण्यद्भविष्यति ऋहलोर्ण्यदिति। वह्यर्थं तर्हि निपातनं कर्तव्यम्। वहेर्ण्यद्यथा स्यात्॥

निपातनादुत्तरपदप्रकृतिस्वरो भविष्यतीत्यर्थः॥ आनाय्यो॥ आनाय्यो ऽनित्य इति चेदिति। घटादिष्वपि प्रसङ्ग इति शेषः। भवेदिति संभावने लिङ्। निपातनाद्रूढिराश्रीयते। एकयोनाविति। यो गार्हपत्यादानीयते आहवनीयेन सहैकयोनिर्दक्षिणाग्निस्तत्रेत्यर्थः। यस्तु वैश्यकुलादानीयते तत्रानाय्यशब्दो न भवति। अग्नौ॥ राम॰ ६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऊहिविग्रहादिति। वहिसमानार्थेनोहिनाब्राह्मणस्य निर्वचनंकृतमित्यर्थः। ण्वुलतृचौ॥ मातराविति। उणादिषुतृप्रत्ययान्तामात्राद

ऊहिरपिवह्यर्थेवर्तते। कथंपु
वह्यर्थमितिचेद्‌ऊहेस्तदर्थत्वात्सिद्धम्।
नरन्योन्यस्यार्थेवर्तते। कथमूहिर्वह्यर्थेवर्तते। बह्वर्था अपिधातवोभवन्ति। अस्तिपुनःक्वचिदन्यत्रापिऊहिर्व
ह्यर्थेवर्तते। अस्तीत्याह। ऊहिविग्रहाच्चब्राह्मणेसिद्धम्। ऊहिविग्रहाच्चब्राह्मणेसिद्धमेतत्। समूह्यंचिन्वीतप
शुकामः। पशवोवैपुरुषःपशूनेवास्मैतत्समूहति॥ चित्याग्निचित्येच॥ अग्निचित्येत्यन्तोदात्तोभावे। अग्निचि
त्येतिभावेन्तोदात्तोभवति। अग्निचयनमेवाग्निचित्या॥ ण्वुलतृचौ॥ किमर्थश्चकारः। स्वरार्थः। चितोन्तउदात्तो
भवतीत्यन्तोदात्तत्वंयथास्यात्। नैतदस्तिप्रयोजनम्। एकाजयम्। तत्रनार्थःस्वरार्थेनचकारेणानुबन्धेन। प्र
त्ययस्वरेणैवसिद्धम्। विशेषणार्थस्तर्हि। क्वविशेषणार्थेनार्थः। अप्तृन्तृजिति। तद्‌उच्यमानेमातरौमातरः
पितरौपितरइत्यत्रापिप्राप्नोति। स्वसृनप्तृग्रहणंनियमार्थंभविष्यति। एतयोरेवयोनिसंबन्धयोर्नान्येषांयो
निसंबन्धानामिति। सामान्यग्रहणाविघातार्थस्तर्हि। क्वसामान्यग्रहणाविघातार्थेनार्थः। तुश्छन्दसितुरिष्ठे
मेयःस्विति चोभयोर्ग्रहणंयथास्यात्। ण्वुलिसकर्मकग्रहणम्॥ ण्वुलिसकर्मकग्रहणंकर्तव्यम्। इहमाभू
द्‌आसिताशयितेति। नवाधातुमात्रादर्शनाद्‌ण्वुलः। नवावक्तव्यः। किंकारणम्। धातुमात्राद्दर्शनाद्‌ण्वुलःधा
तुमात्राण्ण्वुलदृश्यते। इमेअस्यआसकाः। इमेअस्यशायकाः। उत्थिताआसकावैश्रवणस्येति। तृजादिषुवर्तमा
नकालोपादानमध्यापकवेदाध्यायाद्यर्थम्। तृजादिषुवर्तमानकालोपादानंकर्तव्यम्। किंकारणम्। अध्या
पकवेदाध्यायाद्यर्थम्। अध्यापकवेदाध्यायः। अधीतवत्यध्येष्यमाणेवामाभूद्‌इति। नवाकालमात्रेदर्श
नादन्येषाम्। नवावक्तव्यम्। किंकारणम्। कालमात्रेदर्शनादन्येषाम्। कालमात्रेह्यन्येप्रत्ययादृश्यन्ते
। वर्चोपारःशमनीपारः ॥

योनिपातितादितिभावः। स्वसृनप्तृग्रहणमिति। नप्तृग्रहणंनियमार्थंस्वसृशब्दस्तुऋन्प्रत्ययान्तत्वादिष्यर्थएव। सामान्यग्रहणाविघाता
र्थत्वंचकारस्यस्थितम्। तुश्छन्दसितुरिष्ठेमेयःस्वित्यत्राप्येतत्प्रयोजनसद्भावात् ॥

ऐवेवायदेतस्न्तचोर्ग्रहणंएतत्तद्‌इतिवक्ष्यामि। यदितद्‌उच्यते। मातरौ
मातरः पितरौपितरः। अत्रापिप्रसज्येत। स्वसृनप्तृग्रहणंनियमार्थंभविष्यति।
एतयोरेवयोनिसंबन्धयोर्नान्येषांयोनिसंबन्धानामिति।

भा॰कै॰ नन्दि॥ श्वपचेति। कर्मण्यण्बाध्यते। न्यङ्क्वादिषु श्वपाकशब्दस्य पाठात्पक्षे सोपि भवति॥ इत्युपाध्यायजैयटपुत्रकै २१६
६१

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः॥ अजपि सर्वधातुभ्यः॥ अजपि सर्वधातुभ्यो वक्तव्यः। इहापि यथा स्यात्। भवः। सव इति। न तर्हीदानीमिदं पचाद्यनुक्रमणं कर्तव्यम्। कर्तव्यं च। किं प्रयोजनम्। पचाद्यनुक्रमणमनुबन्धासञ्जनार्थम् अपवादबाधनार्थं च। अनुबन्धासंजनार्थं तावत्। नदट्। नदी। चोरट्। चोरी। अपवादबाधनार्थम्। जारभराः श्वपचेति। नन्दिग्रहि॥ इगुपधज्ञाप्रीकिरः कः॥ इगुपधेभ्य उपसर्गे कविधिर्मेषाद्यर्थः॥ इगुपधेभ्य उपसर्गे को विधेयः। किं प्रयोजनम्। मेषाद्यर्थः। मेषः। देवः। सेवः। नवा बुधादीनां दर्शनादनुपसर्गेपि नवा को विधेयः। किं कारणम्। बुधादीनां दर्शनादनुपसर्गेपि। बुधादीनामनुपसर्गेपि को दृश्यते। बुधः। युधः। सिम इति। कथं मेषः देवः सेव इति। पचादिषु पाठः करिष्यते॥ पाघ्राध्माधेट्दृशः शः॥ जिघ्रः संज्ञायां प्रतिषेधः॥ जिघ्रः संज्ञायां प्रतिषेधो वक्तव्यः। व्याजिघ्रतीति व्याघ्रः। इह केचिद्घ्रस्यैव प्रतिषेधमाहुः। केचिज्जिघ्रभावस्य। किं पुनरत्र न्याय्यम्। घ्रस्यैव प्रतिषेधो न्याय्यः। जिघ्रभावे हि प्रतिषिद्धे के नशे आकारलोपः स्यात्॥ अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च॥ अनुपसर्गान्नौ लिम्पेः॥ अनुपसर्गान्नौ लिम्पेरिति वक्तव्यम्। निलिम्पा नाम देवाः॥ गवि च विन्देः संज्ञायामुपसंख्यानम्॥ गवि चोपपदे विन्देः संज्ञायामुपसंख्यानं कर्तव्यम्। गोविन्दः। अल्पमिदमुच्यते गवीति। गवादिष्विति वक्तव्यम्। गोविन्दः। अरविन्दम्। ज्वलितिकसन्तेभ्यो णः॥ तनोतेरुपसंख्यानम्। तनोतेरुपसंख्यानं कर्तव्यम्। अवतनोतीत्यवतानः॥ शिल्पिनि ष्वुन्॥ नृतिखनिरञ्जिभ्य इति वक्तव्यम्॥ इह मा भूत्। वायकः॥ प्रुसृल्वः समभिहारे वुन्॥ प्रुसृल्वः साधुकारिणि वुन्विधानम्। प्रुसृल्वः साधुकारिणि वुन्विधेयः। सकृदपि यः सुष्ठु करोति तत्र यथा स्याद्बहुशोपि यो दुष्ठु करोति तत्र मा भूदिति॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणभाष्ये तृतीयाध्यायस्य प्रथमे पादे षष्ठमाह्निकम्॥

यटकृते भाष्यप्रदीपे तृतीयाध्यायस्य प्रथमे पादे षष्ठमाह्निकम्॥ राम:
६१

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मण्यण्॥ निर्वर्त्यमानेति। हरिणानिर्वर्त्यमानादीनां विशेषो दर्शितः॥ सतीवाऽविद्यमानावाप्रकृतिः परिणामिनी। यस्यना
शो यतेतस्यनिर्वर्त्यत्वंप्रचक्षते॥ यस्योपादानकारणंनास्तितन्निर्वर्त्यंयथासंयोगंकरोतीति। यस्यापिसदुपादानकार
णंनविवक्षितंतन्निर्वर्त्यंयथाघटंकरोतीति। यदातूपादानकारणमेवपरिणामित्वेनविवक्ष्यते मृद्घटंकरोतीतितदा
विकार्यंकर्म। भेदविवक्षायांतु मृदाघटंकरोतीतिनिर्वर्त्यमेवकर्म। विकार्यमपिद्विधम्। प्रकृत्युच्छेदसंभूतंकिंचित्काष्ठादि
भस्मवत्। किंचिद्गुणान्तरोत्पत्त्यासुवर्णादिविकारवदिति॥ प्राप्यमपि। क्रियाकृतविशेषाणांसिद्धिर्यत्रनगम्यते। दर्शनादनु
मानाद्वातत्प्राप्यमितिकथ्यतेइति॥ तत्रप्राप्यत्वंसर्वस्यकर्मणोस्ति क्रियया प्राप्यमाणत्वाद्वान्तरविवक्षायांतुत्रैविध्यमु

कर्मण्यण्॥ कर्मणिनिर्वर्त्यमानविक्रियमाणइतिवक्तव्यम्। इहमाभूत्। आदित्यंपश्यतिहिमवन्तंशृणोति
ग्रामंगच्छतीति। कर्मणिनिर्वर्त्यमानविक्रियमाणेइतिचेद्वेदाध्यायादीनामुपसंख्यानम्॥ कर्मणिनिर्वर्त्यमा
नविक्रियमाणइतिचेद्वेदाध्यायादीनामुपसंख्यानंकर्तव्यम्। वेदाध्यायः चर्चापारःशमनीपारः। यत्र चनि
युक्तस्तत्रचोपसंख्यानंम्। यत्रचनियुक्तस्तत्रचोपसंख्यानंकर्तव्यम्। छत्रधारःद्वारपालः। हृग्रहिनीव
हिस्थश्च॥ हृग्रहिनीवहिस्थश्चेतिवक्तव्यम्। हृ। भारहारः ग्रहि। कमण्डलुग्राहः। नी। उष्ट्रप्रणायः। वहि। भा
रवाहः। अपरिगणनंवा। नवार्थःपरिगणनेन। कस्मान्नभवतिआदित्यंपश्यतिहिमवन्तंशृणोतिग्रामंगच्छ
तीति। अनभिधानात्। अनभिधानादत्रनभविष्यति। अकारादनुपपदात्कर्मोपपदोविप्रतिषेधेन॥ अकारा
दनुपपदात्कर्मोपपदोभवतिविप्रतिषेधेन। अनुपपदस्यावकाशः। पचतीतिपचः ॥

च्यते। वेदाध्यायइति। नित्योवेदःस्थितएवाधीयते इतिनिर्वर्त्यत्वाभावः। छत्रधारइति। वेदाध्यायादिग्रहणेनछत्रधारा
दीनांग्रहणंनास्तिप्रकारार्थेनादिशब्देनसदृशानांशास्त्राध्यायादीनामेवशब्दानांग्रहणात्। तत्प्राप्यमेवनविकार्यम्।
नहिधारणादूर्ध्वंछत्रस्यकश्चित्क्रियाकृतोविशेषःप्रत्यक्षानुमानपरिच्छेद्योस्ति। अनभिधानादिति। नित्यानांशब्दाना
मिदमस्याख्यानमात्रम्। नचादित्यंपश्यतीत्याद्यर्थप्रतिपादनायादित्यदर्शादयःशब्दालोकेप्रयुज्यन्तइतिशास्त्रेणापि
साधुत्वेननानुशास्यन्तइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदातु सर्वधातुविषयोऽप्रत्ययस्तदा येन
कर्मोपपदस्येति। यदागणपठितधातुविषयएवाप्रत्ययस्तदायंविप्रतिषेधोयदातु सर्वधातुविषयोऽप्रत्ययस्तदा येन
नाप्राप्तिन्यायादण्प्रत्ययस्यापवादत्वादुत्सर्गापवादयोर्विप्रतिषेधोनुपपन्नः। तथाचकरोतेरच्प्रत्ययःकृतःशिवशमरिष्टे
स्यकरइति। ततश्चकुम्भकारादिरपिनाणोऽवकाशः तत्राप्यप्रत्ययप्रसङ्गात्। अतएवभाष्यकारउदाहरणान्तराणिकाष्ठभे
दादीनिविप्रतिषेधस्यवक्ष्यति। काष्ठभेदइति। सर्वधातुभ्योविधानादचउत्सर्गस्यकाणावपवादौतयोर्विप्रतिषेधादणेवात्र

कर्मोपपदस्यावकाशः। कुम्भकारः नगरकारः। इहोभयंप्राप्नोति। ओदनपाचः। कर्मोपपदोभवतिविप्रतिषे
धेन। अनुपपदस्यावकाशः। विक्षिपः विलिखः। कर्मोपपदस्यसएव। इहोभयंप्राप्नोति काष्ठभेदः। कर्मोपपदोभ
वतिविप्रतिषेधेन। अनुपपदस्यावकाशः जानातीतिज्ञः। कर्मोपपदस्यसएव। इहोभयंप्राप्नोतिअर्थज्ञः। कर्मोप
पदोभवतिविप्रतिषेधेन। नैषयुक्तोविप्रतिषेधः। अनुपपदस्तृतीयः। ण्वुल्तृजचः। तेषांणः। तस्यकः। सयथैव
वकोणंबाधते एवंकर्मोपपदमपिबाधेत। कर्मोपपदोपितृतीयः। ण्वुल्तृजचः। तेषामण्। अणःकः। उभयो
स्तृतीययोर्युक्तोविप्रतिषेधः। अनुपपदस्यावकाशः लिम्पतीतिलिम्पः। कर्मोपपदस्यसएव। इहोभयंप्राप्नो
तिकुड्यलेपइति। कर्मोपपदोभवतिविप्रतिषेधेन। नैषयुक्तोविप्रतिषेधः। अनुपपदस्तृतीयः। ण्वुल्तृज
चः। तेषांकः। कस्यशः। सयथैवशःकंबाधतेएवंकर्मोपपदमपिबाधेत। कातर्हिगतिः। मध्येऽपवादाःपूर्वान्वि
धीन्बाधन्तेनोत्तरानित्येवंशःकंबाधिष्यते। कर्मोपपदंनबाधिष्यते। अनुपपदस्यावकाशः सुग्लः सुम्लः। कर्मोप
पदस्यसएव। इहोभयंप्राप्नोतिगोसंदायः वाडवसंदायः। कर्मोपपदोभवतिविप्रतिषेधेन। नैषयुक्तोविप्रति
षेधः। अनुपपदस्तृतीयः। ण्वुल्तृजचः। तेषांणः। तस्यकः। सयथैवकोणंबाधतेएवंकर्मोपपदमपिबाधेत॥

अवति। सयथैवकइति। प्राप्तिमात्रस्यबाध्यत्वमपेक्ष्यैतदुच्यते। यदातुप्राप्तिविशेषोऽपेक्ष्यतेतदातुयेननाप्राप्तिन्यायात्सस्यैवको
बाधकोनतुकर्मोपपदस्याणः। कःपुनरनयोःप्रत्यययोर्विशेषः। उच्यते। कर्मोपपदेकेसतिनित्यसमासोभवति। अकर्मोपपदेतुवि
कल्पेनषष्ठीसमासःस्यात्। नन्वर्थज्ञइत्यत्रातोनुपसर्गेकइतिकःप्राप्नोतिनत्वणप्रत्ययःतत्कथमुच्यतेकर्मोपपदेस्यसएवेतिनहि
कुम्भकारःकर्मोपपदस्यकस्यविषयः। एवंतर्हिकाणोर्विप्रतिषेधेपरत्वादण्कंबाधनेअणमपिकर्मोपपदःकोपवादत्वादितिक्रम
माद्दृत्यैतदुक्तमित्यदोषः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मांसकामइति।मांसशब्दःसप्रत्ययान्तोन्तोदात्तःकल्याणशब्दस्त्वलघावन्तेद्वयोश्चबह्वषोगुरुरितिमध्योदात्तस्तत्रकदुत्तरपदप्रकृतिस्वरेप्राप्तेपूर्वपदप्रकृतिस्वरोविधीयते।भक्षयतेरजिति।एरजण्यन्तानामित्येतत्तुमुनित्रयस्यमतेनास्ति,कृल्यादिभ्यःप्रतिषेधएवास्ति॥ननुचबहुव्रीहौसतिबहवोभक्षाअस्यबहुभक्षइत्यत्रबहोर्नञ्वदुत्तरपदभूम्नीत्यन्तोदात्तत्वंप्राप्नोतीतिपूर्वपदप्रकृतिस्वरोनसिध्यति।नैषदोषः।भक्षणंभक्षःबहुषुभक्षणमस्येत्येवंव्यधिकरणपदोबहुव्रीहिःकरिष्यतेतत्रोत्तरपदभूमाभावाद्बहुव्रीहौ

कातर्हिगतिः।पुरस्तादपवादा अनन्तरान्विधीन्बाधन्तेनोत्तरानित्येवमयंकोणंबाधिष्यते।कर्मोपपदंनबाधिष्यते।शीलिकामिभक्ष्याचरिभ्योणःपूर्वपदप्रकृतिस्वरत्वंच॥शीलिकामिभक्ष्याचरिभ्योणोवक्तव्यःपूर्वपदप्रकृतिस्वरत्वंचवक्तव्यम्।शीलि।मांसशीला।मांसशीलः।कामि।मांसकामः।मांसकामा।भक्षि।मांसभक्षः।मांसभक्षा।आचरी।कल्याणाचारः।कल्याणाचारा।ईक्षिक्षमिभ्यांच ॥ईक्षिक्षमिभ्यांचेतिवक्तव्यम्।सुखप्रतीक्षः।सुखप्रतीक्षा।कल्याणक्षमः।कल्याणक्षमा।किमर्थमिदमुच्यते।पूर्वपदप्रकृतिस्वरत्वंवक्ष्यामि।ईकारश्चमाभूदिति।नैतदस्तिप्रयोजनम्।इहयोमांसंभक्षयतिमांसंतस्यभक्षोभवति।तत्रयोसौभक्षयतेरच्तदन्तेनबहुव्रीहिः।एवंतर्हिसिद्धेसतियत्कर्मोपपदेणंशास्तितज्ज्ञापयत्याचार्यः।समानेर्थेकेवलंविग्रहभेदाद्यत्रकर्मोपपदश्चप्राप्नोतिबहुव्रीहिश्चकर्मोपपदस्तत्रभवतीति।किमेतस्यज्ञापनेप्रयोजनम्।काण्डलावःकाण्डानिलावोऽस्येतिबहुव्रीहिर्नभवति।भवतिबहुव्रीहिरपिमांसेकामोस्यमांसकामःमांसकामकइतिवा॥नत्वम्भोभिगमा।नत्विदंभवतिअम्भोऽभिगमोऽस्याअम्भोभिगमाइति।किंतर्हि।अम्भोभिगामीत्येवभवति।काण्डलावेपिचविग्रहाभावान्नज्ञापकस्यप्रयोजनंभवतीति।नैषोस्तिविग्रहःकाण्डानिलावोस्येति ॥

प्रकृत्येतिस्वरोभविष्यति।काण्डानिलावोऽस्येति।लावयतेरच्।भवतिबहुव्रीहिरपीति।तेनज्ञापनप्रयोजनाभावादण्बाधनार्थमेवेदंवक्तव्यमित्यर्थः। नत्वम्भोभिगमेति।तेनात्रानभिधानाद्बहुव्रीहिर्नभवतीतिभावः।नैषोस्तीति।काण्डानिलुनातीतिप्रकृत्यर्थविवक्षायामभावात्क्विचःलूयतइतिलवःकाण्डानिलवोस्येतिविग्रहेणभाव्यमितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्नादायेति। अन्नमत्तीत्यणः प्रसङ्गे व्यत्ययः क्रियते तेनान्नअदायेत्येवमवग्रह उपपद्यते। आतोनुपसर्गे॥ ब्रह्मज्य इति। ब्रह्मजिनातीति डप्रत्ययः। वार्णादाङ्गमित्युक्ते यो ब्रूयात्समानाश्रयाङ्गवार्णविषयमेतदिति तं प्रत्याह। एवं तर्हीति। नित्यमिति। संप्रसारणे कृते पूर्वत्वेन भाव्यमित्याकारलोपस्यानित्यत्वं मन्यते। अन्तरङ्गमिति। वार्णादाङ्गं बलीय इत्येतत्तु समानाश्रयविषयमित्युक्तम्।

अन्नादायेति चकृतां व्यत्ययश्छन्दसि॥ अन्नादायेति चकृतां व्यत्ययश्छन्दसि द्रष्टव्यः। अन्नादायान्नपतये य आहुतिमन्नादां हुत्वा। आतोनुपसर्गे कः॥ कविधौ सर्वत्र प्रसारणिभ्यो डः॥ कविधौ सर्वत्र प्रसारणिभ्यो डो वक्तव्यः। ब्रह्मज्य इति। किमुच्यते सर्वत्रेति। अन्यत्रापि। नावश्यमिहैव। क्वान्यत्र। आहूः प्रहू इति। के हि संप्रसारणप्रसङ्गः। के हि संप्रसारणं प्रसज्येत। संप्रसारणे कृते संप्रसारणस्य पूर्वत्वे च उवङादेशः। आहुव इत्येतद्रूपं प्रसज्येत। स तर्हि वक्तव्यः। न वक्तव्यः। अस्त्वत्र संप्रसारणम्। संप्रसारणे कृते आकारलोपः तस्य स्थानिवद्भावादुवङादेशो न भविष्यति। पूर्वत्वे कृते प्राप्नोति। एवं तर्हि। इदमिह संप्रधार्यम्। आकारलोपः क्रियतां पूर्वत्वमिति। किमत्र कर्तव्यम्। परत्वाद् आकारलोपः। न सिध्यति। अन्तरङ्गत्वात्पूर्वत्वं प्राप्नोति। एवं तर्हि वार्णादाङ्गं बलीय इत्याकारलोपो भविष्यति। एवं तर्हि। इदमिह संप्रधार्यम्। आकारलोपः क्रियतां संप्रसारणमिति। किमत्र कर्तव्यम्। परत्वादाकारलोपः। नित्यं संप्रसारणं कृते प्याकारलोपे प्राप्नोत्यकृतेपि। आकारलोपोपि नित्यः। कृतेपि संप्रसारणे प्राप्नोत्यकृतेपि। अनित्य आकारलोपः। न हि कृते संप्रसारणे प्राप्नोति। अन्तरङ्गं हि पूर्वत्वं बाधते। यस्य लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्। न च संप्रसारणमेवाकारलोपस्य निमित्तं विहन्ति। अवश्यं लक्षणान्तरं पूर्वत्वं प्रतीक्ष्यम्। उभयोर्नित्ययोः परत्वादाकारलोपः। आकारलोपे कृते संप्रसारणं संप्रसारणे कृते यणादेशेन सिद्धं रूपं आहूः प्रहू इति। एवमपि न सिध्यति। योनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः॥

एवमपि न सिध्यतीति। आहुव इत्यादि रूपमिति शेषः। योनादिष्टादिति। उकारस्यानादिष्टादचः पूर्वो न भवति। नन्वनादिष्टादचः पूर्वो वकार इति तदादेशस्यापि स्थानिवद्भावादनादिष्टादचः पूर्वत्वं भविष्यति। नैतदस्ति। शास्त्रीयकार्यसिद्धये स्थानिवद्भावो विधीयते न त्वनादिष्टादचः पूर्वत्वे लौकिके। आकारलोपस्यासिद्धत्वादिति। असिद्धवदत्राभादित्यनेनेति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जुहुवतुरिति। ह्वेञः लिटि ह्वः संप्रसारणमभ्यस्तस्य चेति संप्रसारणे रूपम्। परत्वादात्वमिति। अशितीति पर्युदासाश्रयेणैतदुक्तं प्रसज्यप्रतिषेधे त्वनैमित्तिकत्वादात्वमन्तरङ्गं न चान्तरङ्गबहिरङ्गयोर्युक्तो विप्रतिषेधः। एवं तर्हीति। एङः पदान्तादतीत्ययं योगो विभज्यते एङ इति तेनात्वं बाध्यते पूर्वत्वविधानेन। आकारान्तलक्षण इति। पर्युदासाश्रयेपि ह्वावामश्चेति ज्ञापकादाकारान्तलक्षणे कप्रत्यये कर्तव्ये पूर्वमेवात्वं भवति। ततस्तन्निमित्तः प्रत्यय इति भावः। उक्तार्थसंग्रहार्थश्लोकाः

आदिष्टाच्चैषोऽचः पूर्वो भवति। एवं तर्हि आकारलोपस्यासिद्धत्वादुवङादेशो न भविष्यति। इहापि तर्ह्याकारलोपस्यासिद्धत्वादुवङादेशो न स्यात् जुहुवतुः जुहुवुरिति। अस्त्यत्र विशेषः। अकृते त्वात्वे पूर्वत्वं भवति। इदमिह संप्रधार्यम्। आत्वं क्रियतां पूर्वत्वमिति। किमिह कर्तव्यम्। परत्वात्पूर्वत्वम्। न सिध्यति। अन्तरङ्गत्वादात्वं प्राप्नोति। एवं तर्हीदमिह संप्रधार्यम्। आत्वं क्रियतां संप्रसारणमिति। किमत्र कर्तव्यम्। परत्वादात्वम्। नित्यं संप्रसारणं कृतेप्यात्वे प्राप्नोत्यकृतेपि। आत्वमपि नित्यम्। कृतेपि संप्रसारणे प्राप्नोत्यकृतेपि। अनित्यमात्वम्। न हि कृते संप्रसारणे प्राप्नोति परत्वात्पूर्वत्वेन भवितव्यम्। यस्य लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्। न च संप्रसारणमेवात्वस्य निमित्तं विहन्ति। अवश्यं लक्षणान्तरं पूर्वत्वं प्रतीक्ष्यम्। उभयोर्नित्ययोः परत्वादात्वम्। आत्वे कृते संप्रसारणम्। एवं तर्हि पूर्वत्वे योगविभागः करिष्यते। संप्रसारणात्परः पूर्वो भवति। तत एङः। एङश्च संप्रसारणात्पूर्वो भवति। किमर्थमिदम्। अकृते आत्वे पूर्वत्वं यथा स्यात्। ततः पदान्तादति। एङ इत्येव। इहापि तर्ह्यकृत आत्वे पूर्वत्वं स्यात् आह्वः प्रह्व इति। अस्त्यत्र विशेषः। आकारान्तलक्षणः कप्रत्ययविधिः। तेनानेनावश्यमात्वं प्रतीक्ष्यम्। लिट्पुनरविशेषेण धातुमात्राद्विधीयते। नित्यं प्रसारणं ह्वो यणवार्णादाङ्गं न पूर्वत्वं हि। यो नादिष्टादचः पूर्वस्तत् कार्ये स्थानिवत्त्वं हि। प्रोवाच भगवान्कात्यस्तेनासिद्धिर्यणस्तु ते। आतः कोलिण्नेङः पूर्वः सिद्ध आह्वस्तथा सति ॥

नित्यं प्रसारणमिति। कृताकृतप्रसङ्गित्वादिति भावः। तत्र कृते पूर्वत्वं क्रियतामाकारलोप इति वार्णादाङ्गमिति वचनादाकारलोपो भवति न तु पूर्वत्वं तत्राकारलोपस्य स्थानिवत्त्वादुवङ् नास्तीति ह्वो यण् प्रवर्ततं इत्यर्थः। इत आह। यो नादिष्टादिति। तेनासिद्धिरिति। असिद्धवदत्राभादित्याकारलोपस्येत्यर्थः। तस्यासिद्धत्वाद्यणादेशो भवत्वित्यर्थः। जुहुवतुरित्यत्रापि तथैव यण् स्यादित्याह। एङः पूर्व इति। आह्व इत्यत्रापि तथैव पूर्वत्वं स्यादित्याह। आतः क इति। लिएनेति। लिड्धातुमात्राद्विधीयते न त्वाकारान्तादेवेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुपिस्थः॥ कृच्छ्रेणनपिबतीति। अत्रकेचिदाहुः। कृच्छ्रंपिबतीत्येवमसन्तमप्यवयवार्थमाश्रित्यकर्मोपपदःकोविधास्यते किं यो
गविभागेन। नैतत्साधूच्यते। कृच्छ्रेणनपिबतिद्वाभ्यांपिबतिइत्येतस्मिन्सत्येवार्थेऽसदर्थाश्रयेणरूढिशब्दानामपिव्युत्पत्तेरयुक्त
त्वात्। यत्रतुसर्वात्मनाऽर्थानुगमोनास्तियथातैलपायिकेतितत्रैवासदर्थाश्रयाव्युत्पत्तिःक्रियते॥ भावेयथास्यादिति। अत्राप्याहुः
।घञर्थेकविधानमितिकःसिद्धइति। एवंतर्हिनित्यसमासार्थंस्थइत्यनेनउपपदाश्रयःकोविधीयते। अन्यथापाक्षिकःषष्ठीसमा
सःस्यात्। अनिर्दिष्टार्थाइति। प्रत्यासन्नत्वात्स्वार्थस्येतिभावः। यद्येवंस्थइत्यनेनभावेविधीयमानःकःकर्तारंबाधेत। तथाचस
त्वत्र

सुपिस्थः॥ सुपिस्थोभावेच॥ सुपिस्थइभावेचेतिवक्तव्यम्। इहापियथास्यात्। आखूत्थोवर्तते। प्रस्थेनोत्थः शलभोत्थः
तत्तर्हिवक्तव्यम्। नवक्तव्यम्। योगविभागात्सिद्धम्। योगविभागःकरिष्यते। आतोनुपसर्गेकः। ततःसुपि। सुपिचातः
कोभवति। कृच्छ्रेणनपिबतिकृच्छ्रपः। कटाहेनपिबतिकटाहपः। द्वाभ्यांपिबतिद्विपः। ततस्थः। स्थश्चसुपिकोभवति।
किमर्थमिदम्। भावेयथास्यात्। कुतोनुखल्वेतद्भावेभविष्यतिनपुनःकर्मादिष्वपिकारकेष्विति। योगविभागाद
यंकर्तुरपकृष्यते। नचान्यस्मिन्नर्थेआदिश्यते। अनिर्दिष्टार्थाश्चप्रत्ययाःस्वार्थेभवन्तीति। गुप्तिज्किद्भ्यः सन्। यावा
दिभ्यःकन्इति। सोसौस्वार्थेभवन्भावेभविष्यति॥ तुन्दशोकयोःपरिमृजापनुदोः॥ तुन्दशोकयोःपरिमृजापनुदो
रालस्यसुखाहरणयोः॥ तुन्दशोकयोःपरिमृजापनुदोरित्यत्रालस्यसुखाहरणयोरितिवक्तव्यम्। तुन्दपरिमृजो
लसः। शोकापनुदःपुत्रोजातः। योहितुन्दंपरिमार्ष्टितुन्दपरिमार्जःसभवति। यश्चशोकमपनुदतिशोकापनोदः
सभवति। कप्रकरणेमूलविभुजादिभ्यउपसंख्यानम्॥ कप्रकरणेमूलविभुजादिभ्यउपसंख्यानंकर्तव्यम्। मू
लविभुजोरथः। नखमुचानिधनूंषि। काकगुहास्तिलाः। सरसिरुहंकुमुदम्॥ ॥

मस्यइतिकर्तरिनस्यात्। नैषदोषः। यद्यत्रसाक्षाद्भावशब्दोपादानेनभावेकोविधीयते। तदाभावःकर्तारंतक्रकौण्डिन्यन्यायेनबाधे
त। सामर्थ्यात्त्वयंभावेव्यवतिष्ठतइतिभावेननबाध्यतेकर्तासौ॥ तुन्दशो॥ आलस्यसुखाहरणयोरिति। आलस्येगम्यमानेसुखेस्याद
नेचप्रत्ययोभवतीत्यर्थः। तत्रसामर्थ्यादलसेकर्तरिसुखस्यचाहर्तरिप्रत्ययोभवतीत्युक्तंभवति। शोकापनोदइति। यःसंसार
नित्यतोद्भावनादिनाशोकमेवनिवर्तयतिनतुसुखमुत्पादयतिसशोकापनोदः ॥

CC-0. In Public Domain. Digitization by eGangotri

गापोष्टक्॥ पिबतेरिति। लुग्विकरणपरिभाषालभ्यार्थकथनम्॥ हरतेरनु॥ अच्प्रकरणेइति। घटग्रहणेनैवसिद्धेघटीग्रहणं लिङ्गविशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थम्। शमिधातोः॥ शंगरेति। पृषोदरादित्वात्संज्ञायांगकारस्यककारत्वेनशंकराश

गापोष्टक्॥ सुराशीध्वोः पिबतेः॥ सुराशीध्वोः पिबतेरितिवक्तव्यम्। इहमाभूत्। क्षीरपाब्राह्मणीति। पिबतेरिति च वक्तव्यम्। याहिसुरांपातिसुरापासाभवति। बहुलंतणि॥ बहुलंतणीतिवक्तव्यम्। किमिदंतणीति। संज्ञाछन्दसो ग्रहणम्। याब्राह्मणीसुरापीभवतिनैनांदेवाःपतिलोकंनयन्ति। याब्राह्मणीसुरापाभवतिनैनांदेवाःपतिलोकंन यन्ति। गापोः॥ हरतेरनुद्यमनेऽच्॥ अच्प्रकरणेशक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुष्षुग्रहेरुपसंख्यानम्। सु अच्प्रकरणेशक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुःषुग्रहेरुपसंख्यानंकर्तव्यम्। शक्तिग्रहः लाङ्गलग्रहः अङ्कुशग्रहः यष्टिग्रहः तोमरग्रहः घटग्रहः घटीग्रहः धनुर्ग्रहः॥ सूत्रेचधार्यर्थे॥ सूत्रेचधार्यर्थे ग्रहेरुपसंख्यानंक र्तव्यम्। सूत्रग्रहःधार्यर्थइतिकिम्। योहिसूत्रंगृह्णातिसूत्रग्राहःसभवति॥ स्तम्बकर्णयोरमिजपोः॥ स्तम्बकर्णयो र्हस्तिसूचकयोः॥ स्तम्बकर्णयोरित्यत्रहस्तिसूचकयोरितिवक्तव्यम्। स्तम्बेरमोहस्ती। कर्णेजपःसूचकः। स्तम्बेरन्ता कर्णेजपितेत्येवान्यत्र॥ शमिधातोःसंज्ञायाम्॥ धातुग्रहणंकिमर्थम्। शमिसंज्ञायांधातुग्रहणंकृञोहेत्वादिषुटप्रतिषे धार्थम्। शमिसंज्ञायांधातुग्रहणंक्रियतेकृञोहेत्वादिषुटोमाभूदिति। शमिसंज्ञायांधातोरज्भवतीत्यस्यावका शः शंभवः शंवदः टस्यावकाशः श्राद्धकरः पिण्डकरः। शंकरानामपरिव्राजिकाशंकरानामशकुनिकातच्छीलाच तस्यामुभयंप्राप्नोति। परत्वाट्टःस्यात्। धातुग्रहणसामर्थ्यादजेवभवति। कुणरवाडवस्त्वाह। नैषाशंकरा। शंगरे षा। कुतएतत्। गृणातिःशब्दकर्मातस्यैषप्रयोगः॥ अधिकरणेशेतेः॥ अधिकरणेशेतेःपार्श्वादिषूपसंख्यानम्॥ अधिकरणेशेतेःपार्श्वादिषूपसंख्यानंकर्तव्यम्। पार्श्वशयः पृष्ठशयः उदरशयः॥ दिग्धसहपूर्वाच्च॥ दिग्धसहपूर्वा च्चेतिवक्तव्यम्। दिग्धसहशयः। उत्तानादिषुकर्तृषु॥ उत्तानादिषुकर्तृष्वितिवक्तव्यम्। उत्तानशयः अवमूर्धशयः॥ गिरौडश्छन्दसि॥ गिरावुपपदेछन्दसिडोवक्तव्यः। गिरौशेतेगिरिशः ॥

ब्दस्यसिद्धत्वात्तदर्थंधातुग्रहणंनकर्तव्यमित्यर्थः॥ अधिकर॥ दिग्धसहपूर्वाच्चेति। दिग्धसहशब्दस्यसमुदायस्यपूर्वत्वमाश्रीय ते नतुप्रत्येकम्। तत्रदिग्धेनसहशेतइत्यचिकृतेमयूरव्यंसकादित्वात्समासः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्धितो वेति। यो गिरौ शेते गिरिरस्यास्तीति लोमादिषु दर्शनात् शप्रत्ययः। अन्ये त्वाहुः। गिरौ गिरौ शेत इति संख्यैकत्व च नादिति सप्तम्य न्ताच्छ प्रत्ययः। स्मृतान्तिर्हि यथाकथंचित्कर्तव्या उपायानामनियमात्। तदुक्तं हरिणा। वैरव्याशिष्टगिरिशास्तथैकागारिकादयः। कै श्चित्कथंचिद् व्याख्याता निमित्ताव धिसंकरैरिति। छन्दसीति वचनाद्भाषायां गिरिश शब्दस्यासाधुत्वमाहुः॥ चरेष्टः॥ कुरूंश्चरतीति।

तद्धितो वा। तद्धितो वा पुनरेष भविष्यति। गिरौ शेते गिरिरस्यास्तीति गिरिशः॥ चरेष्टः॥ इह कस्मान्न भवति॥ कुरूंश्चरति पञ्चालांश्चरतीति। अधिकरण इति वर्तते। ननु च कर्मणीत्यपि वर्तते । तत्र कृत एतत् अधिकरणे भविष्यति न पुनः कर्मणीति। चरेर्भिक्षाग्रहणं ज्ञापकं कर्मण्यप्रसङ्गस्य। यदयं भिक्षासेनादायेषु चेति चरेर्भिक्षाग्रहणं करोति तज्ज्ञापयत्याचार्यो न भवति कर्मणीति॥ दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःषु॥ किं यत्तद्बहुषु कृञोज्विधानम्। किंयत्तद्बहुषु कृञोज्विधानं कर्तव्यम्। किंकरा यत्करा तत्करा बहुकरा॥ स्तम्बशकृतोरिन्॥ स्तम्बशकृतोर्व्रीहिवत्सयोः॥ स्तम्बशकृतोरिन्व्रीहिवत्सयोरिति वक्तव्यम्। स्तम्बकरिर्व्रीहिः शकृत्करिर्वत्सः॥ फलेग्रहिरात्मंभरिश्च॥ आत्मंभरिरिति किं निपात्यते। आत्मनो मुमभृञश्चेन्प्रत्ययः। अत उत्तरमिदमुच्यते। भृञः कुक्ष्यात्मनोर्मुम् च॥ भृञः कुक्ष्यात्मनोर्मुम् चेति वक्तव्यम्। कुक्षिंभरिः। आत्मंभरिश्चरति यूथमसेवमानः॥ एजेः खश्॥ खश्प्रकरणे वातशुनीतिलशर्धेषु अजधेट्तुदजहातिभ्यः॥ खश्प्रकरणे वातशुनीतिलशर्धेषु अजधेट्तुदजहातिभ्य इति वक्तव्यम्। वातमजाः मृगाः शुनिंधयः तिलंतुदः शर्धंजहा माषाः॥ नासिकास्तनयोर्ध्माधेटोः॥ स्तने धेटः॥ स्तने धेट इति वक्तव्यम्। स्तनंधयः। ततो मुष्टौ ध्मश्च। मुष्टौ ध्मश्च धेटश्चेति वक्तव्यम्। मुष्टिंधमः मुष्टिंधयः। नासिकायां ध्मश्च धेटश्च॥ नासिकायां ध्मश्च धेटश्चेति वक्तव्यम्। नासिकंधमः। नासिकंधयः॥

यस्य कुरव एव प्राप्याः स कुरूंश्चरतीत्युच्यते। यश्च कुरुषु भ्रमति स कुरुषु चरतीत्युच्यते॥ दिवाविभा॥ किंयदिति॥ वार्तिकेन सूत्रस्य बाधितत्वाद्धस्याभावे किंकरीत्यसाधुरित्याहुः॥ नासिका॥ स्तने धेट इति। यथासंख्याभावार्थ एतावान्योगः कर्तव्य इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्तिकस्याप्यत्राप्रिसुद्धावयन्भाष्यकारआह।अत्यल्पमिति।डेचेति।विहायःशब्दपूर्वाद्गमेरन्येष्वपिदृश्यतइतिडप्रत्ययेसतिविहादेशः।

अत्यल्पमिदमुच्यते।नासिकानाडीमुष्टिघटीखारीष्वितिवक्तव्यम्।नासिकंधयः।नासिकंधमः।नासिकानाडिंधयः।नाडिंधमः।नाडीमुष्टिंधयः।मुष्टिंधमः।घटिंधमः।घटिंधयः।खारिंधयः।खारिंधमः॥प्रियवशेवदःखच्॥खच्प्रकरणेगमेःसुप्युपसंख्यानम्॥खच्प्रकरणेगमेःसुप्युपसंख्यानंकर्तव्यम्।मितंगमोहस्ती।मितंगमाहस्तिनी।विहायसोविहच॥विहायसोविहइत्ययमादेशोवक्तव्यःखच्च।विहंगमः॥खच्चडिद्वा॥खच्चडिद्वावक्तव्यः।विहंगः।डेच॥डेचविहायसोविहइत्ययमादेशोवक्तव्यः।विहगः॥प्रियवशेवदःखच्॥अन्तात्यन्ताध्वदूरपारसर्वानन्तेषुडः॥डप्रकरणेसर्वत्रपन्नयोरुपसंख्यानम्॥डप्रकरणेसर्वत्रपन्नयोरुपसंख्यानंकर्तव्यम्।सर्वत्रगः।पन्नगः।उरसोलोपश्च॥उरसोलोपश्चवक्तव्यः।उरगः।सुदुरोरधिकरणे॥सुदुरोरधिकरणेडोवक्तव्यः।सुगः।दुर्गः।निसोदेशे॥निसोदेशेडोवक्तव्यः।निर्गोदेशः।अपरआह।डप्रकरणेऽन्येष्वपिदृश्यते॥डप्रकरणेऽन्येष्वपिडोभवतीतिवक्तव्यम्।तत्रस्त्र्यगारगः।अस्नुतेयावदन्नायग्रामगः।ध्वंसतेगुरुतल्पगइति।अन्तात्यन्ता॥आशिषिहनः॥दारावाहनोणन्त्यस्यचटःसंज्ञायाम्॥दारावुपपदेआङ्पूर्वाद्धन्तेरण्वक्तव्यः।अन्त्यस्यचटोवक्तव्यः।दार्वाघाटस्तेवनस्पतीनाम्।चारौवा॥चारावुपपदेआङ्पूर्वाद्धन्तेरण्वक्तव्यः।अन्त्यस्यचटोवावक्तव्यः।चार्वाघाटः।चार्वाघातः।कर्मणिसमिच।कर्मण्युपपदेसंपूर्वाद्धन्तेर्धातोरण्वक्तव्यः।अन्त्यस्यचटोवावक्तव्यः।वर्णसंघाटः।वर्णसंघातः।पदसंघाटः।पदसंघातः॥आशिषि॥लक्षणेजायापत्योष्टक्॥कथमिदंविज्ञायतेलक्षणेकर्तरिआहोस्वित्लक्षणवतिकर्तरीति।किंचातः।यदिविज्ञायतेलक्षणेकर्तरीति।सिद्धंजायाघ्नस्तिलकालकः।पतिघ्नीपाणिरेखेति।इदंतुनसिध्यति।जायाघ्नोब्राह्मणः।पतिघ्नीवृषलीति।अथविज्ञायतेलक्षणवतिकर्तरीति।सिद्धंजायाघ्नोब्राह्मणः।पतिघ्नीवृषलीति।जायाघ्नस्तिलकालकः।पतिघ्नीपाणिरेखेतिनसिध्यति।अस्तुतर्हिलक्षणेकर्तरीति।कथंजायाघ्नोब्राह्मणः।पतिघ्नीवृषलीति।अकारोमत्वर्थीयः।जायाघ्नोऽस्मिन्नस्तिसोयंजायाघ्नइति।पतिघ्नीवृषलीतिनसिध्यति।अस्तुतर्हिलक्षणवतिकर्तरीति।कथंजायाघ्नस्तिलकालकः।पतिघ्नीपाणिरेखेति।अमनुष्यकर्तृकेचेत्येवंभविष्यति॥लक्षणे॥अमनुष्यकर्तृकेच॥अप्राणिकर्तृकइतिवक्तव्यम्।इहमाभूत्।नगरघातोहस्ती।यद्यप्राणिकर्तृकइत्युच्यते।शशघ्नीशकुनीतिनसिध्यति।अस्तुतर्ह्यमनुष्यकर्तृकेचइत्येव।कथंनगरघातोहस्ती।कृत्यल्युटोबहुलमित्येवाणभविष्यति॥पाणिघताडघौशिल्पिनि॥राजघउपसंख्यानम्॥राजघउपसंख्यानंकर्तव्यम्।राजघः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आढ्य॥ उत्तरार्थमिति। उत्तरत्र ञ्विप्रतिषेधस्य चरितार्थत्वाद्दाढ्यीकरणमिति ल्युटा भाव्यम्। तत्र यदन्यैरुक्तं प्रतिषेधसामर्थ्यात् ख्युन्यसति ल्युडपि न भवतीति ल्युटोप्ययमर्थतः प्रतिषेध इति। तदयुक्तम्। रूढिशब्दप्रकारादिति। यथा रूढिशब्देषु क्रियाकेवलं व्युत्पत्त्यर्थमाश्रीयते गच्छतीति गौरिति। तेन गमनक्रियारहितोपि गौर्भवति। गोपिण्डाच्चान्यो र्थो गमनविशिष्टोपि गौर्न भवति। तथा ताच्छीलिका अपि क्रियाविषयं ताच्छील्यमुपादाय क्रियावेशाभावेपि प्रयुज्यन्ते। केचिदेव तु गतिना संबध्यन्ते। आगामुकः प्रवर्षुक इति। न तु सर्वे यथा कामुक इति। न

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्॥ ख्युनि च्विप्रतिषेधानर्थक्यं ल्युट्ख्युनोरविशेषात्। ख्युनि च्विप्रतिषेधोनर्थकः। किं कारणम्। ल्युट्ख्युनोरविशेषात्। ख्युना मुक्ते ल्युटा भवितव्यम्। न चैवास्ति विशेषः च्व्यन्त उपपदे ख्युनो वा ल्युटो वा। तदेव रूपं स एव च स्वरः। अयमस्ति विशेषः। ल्युटि सति ईकारेण भवितव्यम्। ख्युनि सति न भवितव्यम्। ख्युन्यपि सति ईकारेण भवितव्यम्। एवं हि सौनागाः पठन्ति। नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानमिति। अयं तर्हि विशेषः। ख्युनि सति नित्यसमासेन भवितव्यम्। उपपदसमासो हि नित्यसमास इति। ल्युटि सति न भवितव्यम्। ल्युट्यपि सति भवितव्यम्। गतिसमासोपि हि नित्यसमासः। च्व्यन्तं च गतिसंज्ञं भवति। सुमर्थं तर्हि प्रतिषेधो वक्तव्यः। ख्युनि सति सुमा भवितव्यं ल्युटि सति न भवितव्यम्। सुमर्थमिति चेन्नाव्ययत्वात्। सुमर्थमिति चेत् तन्न। किं कारणम्। अव्ययत्वात्। अनव्ययस्य मुमुच्यते। च्व्यन्तं चाव्ययसंज्ञं भवति। उत्तरार्थं तु। उत्तरार्थं तर्हि प्रतिषेधो वक्तव्यः। कर्तरि भुवः खिष्णुच्खुकञौ। अच्वावित्येव। आढ्यी भविता। अथेदानीमनेन मुक्ते ताच्छीलिक इष्णुज्विधीयते सोत्र कस्मान्न भवति। रूढिशब्दप्रकारास्ताच्छीलिकाः। न च रूढिशब्दा गतिभिर्विशेष्यन्ते। न हि भवति देवदत्तः प्रदेवदत्त इति॥ आढ्य॥

च भवति प्रकामुक इति। अत एव प्रकारग्रहणं सादृश्यार्थम्। रूढिशब्दानां न केषांचिदिति संबन्धो भवति। ताच्छीलिकानां तु भवति केषांचिन्न सर्वेषामिति प्रतिपादयति। द्रव्योपलक्षणार्थं क्रियायाः प्रवृत्तत्वादात्मातिशयं प्रति आकाङ्क्षाया अभावात्तदतिशयद्योतनार्थं गतिसंबन्धाभाव स्ताच्छीलिकेष्वित्यर्थः। प्रदेवदत्त इति। प्रकर्षेण देवनक्रिया न विशेष्यते। देवशब्दस्य रूढिशब्दत्वात् तदवयवस्य च देवदत्तशब्दस्येत्यर्थः। आघ्रादयस्तु सोपसर्गा एव रूढिशब्दा इति तद्व्यतिरिक्तगत्यन्तरयोगस्तेषां नास्ति॥ रामः ६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तरि॥ नञ इति। पञ्चमी नञ उत्तरस्य स्वरसिद्ध्यर्थमित्यर्थः। अयमपीति। क्सुच्प्रत्ययः क्रियते चकारः सामान्यग्रहणार्थ इति मन्यते। खिष्णुचितु कृते इकारोच्चारणसामर्थ्यात्तदनुबन्धकपरिभाषा नाश्रीयते॥ स्पृशोनु॥ संदेहः स्यादिति। किमेकपकारको निर्देश उत द्विपकारक

कर्तरि भुवः खिष्णुच् खुकञौ॥ किमर्थं खिष्णुजिकारादिः क्रियते न खुष्णुरित्येवोच्येत। तत्रायमप्यर्थः। स्वरार्थश्चकारो न कर्तव्यो भवति। केनेदानीमिकारादित्वं क्रियते। इष्णुच इकारादित्वमुदात्तत्वात् कृतं भुवः। भवति रुदात्तस्तस्योदात्तत्वादिड् भविष्यति। इदं तर्हि प्रयोजनं खिदयं क्रियते तत्र चर्त्वे कृते संदेहः स्यात् किद्वा खिद्वेति। संदेहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। खिदिति व्याख्यास्यामः। नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्णुचः। इदं तर्हि प्रयोजनं कृत्योके ष्णुचार्वादयश्चेत्येष स्वरो यथा स्यात्। एतदपि नास्ति प्रयोजनम्। अयमपि इटि कृते षत्वेण त्वे च ष्णुजेव भविष्यति। न सिध्यति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। अथवा असिद्धं खल्वपि षत्वं तस्यासिद्धत्वादिष्णुजेव भविष्यति। इष्णुच इकारादित्वमुदात्तत्वात् कृतं भुवः। नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्णुचः। कर्तरि भुवः॥ स्पृशोनुदके क्विन्॥ किमर्थो नकारः। स्वरार्थः। ञ्नितीत्याद्युदात्तत्वं यथा स्यात्। नैतदस्ति प्रयोजनम्। एकाचोयं विधीयते तत्र नार्थः स्वरार्थेनानुबन्धेन नकारेण। धातुस्वरेणैव सिद्धम्। यस्तर्ह्यनेकाज् दधृगिति। वक्ष्यत्येतद् धृषेर्द्विर्वचनमन्तोदात्तत्वं च निपात्यत इति। विशेषणार्थस्तर्हि। क्व विशेषणार्थेनार्थः। क्विन्प्रत्ययस्य कुरिति। क्विप्रत्ययस्य कुरित्युच्यमाने संदेहः स्यात्। क्विर्वा एष प्रत्ययः क्विन्वेति संदेहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। क्विनिति व्याख्यास्यामः॥ स्पृशोनुदके क्विन्॥ ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च॥ दधृगिति किं निपात्यते। धृषेर्द्विर्वचनमन्तोदात्तत्वं च। धृषेर्द्विर्वचनमन्तोदात्तत्वं च निपात्यते। सदादिषु दशोनालोचने कञ्च॥ किमर्थो ञकारः। स्वरार्थः। ञ्नित्याद्युदात्तत्वं यथा स्यात्। नैतदस्ति प्रयोजनम्। नकारेणापि स्वरः सिद्धः। विशेषणार्थस्तर्हि भविष्यति। क्व विशेषणार्थेनार्थः। कञ्क्वरपिति। कनक्वरपित्युच्यमाने याविकादिस्तत्रापि प्रसज्येत॥

इत्यर्थः। व्याख्यानत इति। तदनुबन्धकपरिभाषया चक्विपोग्रहणाभावः॥ त्यदादिषु॥ ञकारस्य कार्यद्वयं प्रतियुक्तत्वं प्रश्नद्वारेण प्रदर्श्यते। किमर्थ इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कुदर्थानुपपत्तिस्त्विति। यः कुतोऽर्थः स तादृशादिशब्दवाच्यो न भवति। तादृशाद्यो हि सदृशलक्षणमर्थमाचष्टे तेन तु दर्शनक्रियायाः कर्तारमित्यर्थः। कर्मकर्तेति। कर्मण एवासौ कर्यात्कर्तृत्वविवक्षायां कर्तर्येव प्रत्ययः क्रियत इत्यर्थः॥ सत्सूद्विष॥ सदादीनां केषांचित्सकर्मकत्वात्कर्मैवोपपदं प्राप्नोतीति मत्वाह। सदादिष्विति। वेदिषदिति। वेद्यां सीदतीति क्विप् पूर्वपदादिति षत्वं दुरोणेसीदतीति दुरोणसत् दुरोणं गृहम्। तन्न वक्तव्यमिति। अनुपसर्गग्रहणानुवृत्तिमन्तरेणैवोपसर्गनिवृत्तेः सिद्धत्वादनुवृत्तिप्रदर्शनमपिन

दृशेः समानान्ययोश्च॥ दृशेः समानान्ययोश्चोपसंख्यानं कर्तव्यम्। सदृक्। सदृशः। अन्यादृक्। अन्यादृशः। कुदर्थानुपपत्तिस्तु। कुदर्थस्तु नोपपद्यते। दृशेः कर्तरि प्राप्नोति। इवार्थे तु तद्धितः। इवार्थे त्वयं तद्धितो द्रष्टव्यः। स इवायं तादृक्। तादृशः। अन्य इवायमन्यादृक्। अन्यादृश इति॥ अथवा युक्त एवायं कुदर्थः। कर्मकर्तायम्। तमिवेमं पश्यन्ति जनाः सोऽयं स इव दृश्यमानस्तमिवात्मानं पश्यति तादृक्। अन्यमिवेमं पश्यन्ति जनाः सोऽयमन्य इव दृश्यमानोऽन्यमिवात्मानं पश्यति अन्यादृगिति। सदादिषु॥ सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेपि क्विप्॥ सदादिषु सुब्ग्रहणम्। सदादिषु सुब्ग्रहणं कर्तव्यम्। होता वेदिषत्। अतिथिर्दुरोणसत्। न तर्हीदानीमुपसर्गे पीति वक्तव्यम्। वक्तव्यं च। किं प्रयोजनम्। ज्ञापकार्थम्। किं ज्ञाप्यम्। एतज्ज्ञापयत्याचार्यः। अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। वदः सुप्यनुपसर्गग्रहणं चोदितं तन्न वक्तव्यं भवति॥ अदोनन्ने॥ क्रव्ये च॥ किमर्थमिदमुच्यते न अदोनन्न इत्येव सिद्धम्। न सिध्यति। छन्दसीति वर्तते। भाषार्थोयमारम्भः। पूर्वस्मिन्नेव योगे छन्दोग्रहणं निवृत्तम्। तच्चावश्यं निवर्त्यम्। आमात् सस्यादित्येवमर्थम्। अत उत्तरं पठति। अदोनन्ने क्रव्यग्रहणं वासरूपनिवृत्त्यर्थम्। अदोनन्ने क्रव्यग्रहणं क्रियते वासरूपो मा भूदिति। अदोन॥ मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्॥ श्वेतवहादीनां डस्॥ श्वेतवहादीनां डस्वक्तव्यः। श्वेतवा इन्द्रः। पदस्य च॥ पदस्येति च वक्तव्यम्। इह मा भूत्। श्वेतवाहौ श्वेतवाह इति। किं प्रयोजनम्। वर्थम्। रुर्यथा स्यात्। क्रियते र्वर्थे निपातनम्। अवयाः श्वेतवाः पुरोडाश्च ॥

युज्यते। यत्र चानुपसर्गग्रहणानुवृत्तिर्न संभाव्यते। स्पृशोनुदके क्विन्नित्येतदपि ज्ञापनस्य प्रयोजनम्। तेनोपस्पृशति संस्पृशतीत्यादौ क्विन्न भवतीति॥ क्रव्ये च॥ वासरूपो मा भूदिति। तेन क्रव्यादइत्यण न भवतीत्यर्थः॥ मन्त्रे॥ डस्वक्तव्य इति। ण्विन्प्रत्ययबाधनार्थ इति भावः। पदस्येति। भाविपदाश्रयेणेदमुच्यते। यत्र तु डसन्तस्य पदत्वं भविष्यति तत्र डस्नत्वन्यस्योऽन्यत्र ण्विन्नेवेत्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

तन्नवक्तव्यमिति। डसैवसिद्धत्वान्निपातनंनकर्तव्यमित्यर्थः। वक्तव्यश्चेति। अवयादित्यादीनिप्रथमान्तान्येवनिपात्यन्त इतिश्वेतवोभ्यामित्यादिरूपमन्यथानस्यात्। अथापिपदमात्रविषयेनिपातनमाश्रीयते। तथाप्यतउत्वंविधीयमानमाकारान्नस्यात्। तस्मात्संबुद्ध्यर्थंनिपातनमपिकर्तव्यम्। डसप्युत्वार्थोवक्तव्यः। उक्थशादित्येतदपिसंबुद्ध्यर्थंनिपातनंकर्तव्यम्। उक्थशोभ्यामित्यादिसिद्धयेडसपिकर्तव्यः। णिवनिहितनलोपेनिपात्यमानेवृद्धौसत्यामुत्वंनस्यादृश्यदिमन्त्रेदर्शनमस्ति॥ स्यः कच॥ शंस्यादिति। ईत्वमवकारा

आतश्चवर्थम्। उक्थशः शब्दस्यसामान्येनकृःसिद्धः। नतस्यनिपातनंक्रियते। तन्नवक्तव्यंभवति। अवश्यंतद्वक्तव्यम्। दीर्घार्थम्। नैतदस्तिप्रयोजनम्। सिद्धमत्रदीर्घत्वम्। अत्वसन्तस्यचाधातोरिति। यत्रतेननसिध्यतितदर्थम्। क्वचतेननसिध्यति। संबुद्धौ। हेश्वेतवाः। नतर्हीदानींडसवक्तव्यः। वक्तव्यश्च। किंप्रयोजनम्। उत्वार्थम्। श्वेतवोभ्यांश्वेतवोभिः। मन्त्रेश्वेत॥ स्यः कच॥ किमर्थंस्यःकक्विपावुच्येते। नक्विप्सिद्धोन्येभ्योपिदृश्यतइति। कश्च। आतोनुपसर्गेकइति। नसिध्यति। विशेषविहितःकः सामान्यविहितंक्विपंबाधेत। वासरूपेणक्विबपिभविष्यति। इदंतर्हि। शंस्यःशंस्याः। उक्तमेतत्। शमिसंज्ञायांधातुग्रहणंकृञोहेत्वादिषुटप्रतिषेधार्थमिति। सयथैवाचंटंबाधते। एवंकक्विपावपिबाधेत॥ सुप्यजातौणिनिस्ताच्छील्ये॥ सुपीतिवर्तमानेपुनःसुब्ग्रहणंकिमर्थम्। अनुपसर्गइत्येवंतदभूत्। इदंसुम्मात्रेयथास्यात्। उदासारिण्यः प्रत्यासारिण्यइति। णिन्विधौसाधुकारिण्युपसंख्यानम्। णिन्विधौसाधुकारिण्युसंख्यानंकर्तव्यम्। साधुकारीसाधुदायी॥ ब्रह्मणिवदः॥ ब्रह्मणिवदउपसंख्यानंकर्तव्यम्। ब्रह्मवादिनोवदन्ति॥ व्रते॥ किमुदाहरणम्। अश्राद्धभोजी। किंयोश्राद्धंभुङ्क्ते सोश्राद्धभोजी। किंचातः। यदासावश्राद्धंनभुङ्क्ते तदातस्यव्रतलोपः स्यात्। तद्यथास्थण्डिलस्थायीयदास्थण्डिलेनतिष्ठतितदातस्यव्रतलोपोभवति ॥

दाविति वचनाद्भाष्यकारवचनप्रामाण्याद्वाप्रत्ययलक्षणेनेत्वाभावः॥ सुप्य॥ णिन्विधाविति। अताच्छील्यार्थमिदम्। एवंब्रह्मणिवदइति॥ व्रते॥ उदाहरणेविचार्यमस्तीतिप्रश्नः। किमिति। यदासाविति। ननुबुभुक्षाप्रयुक्तंश्राद्धाश्राद्धभोजनंप्रसक्तम्। तत्राश्राद्धंभुङ्क्त इत्यनेनश्राद्धभोजनंनिषिध्यते। यथापञ्चपञ्चनखाभक्ष्याइतिशशादिव्यतिरिक्तपञ्चनखभक्षणंनिवर्त्यते। तत्रकथंव्रतलोपःस्यात्। स्थंडिलस्थायीत्यत्रतुस्थानविपरीतगमनाचरणेयुक्तोव्रतलोपः। उच्यते। अश्राद्धंमयाभोक्तव्यमितियेनसंकल्पःकृतः सयदाबुभुक्षायांसत्यांयस्मिन्नहन्यश्राद्धंनभुङ्क्ते तदातस्यस्यादेवव्रतलोपः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नश्राद्धभोजीति। समासार्थप्रक्रियावाक्यमिदं नतु लौकिकम्। नहि केवलः श्राद्धभोजीशब्दो व्रतविषय उपपद्यते। अश्राद्धभोजिश ब्दस्यैव व्रतविषयत्वात्। एवं स्वर इति। अव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तं पदं स्यात्। कृदुत्तरपदप्रकृतिस्वरत्वेनान्तोदात्तत्वं चेष्यत इत्यर्थः। ननु च णिनीत्यनेन पूर्वपदाद्युदात्तत्वेनैव भाव्यमिति नास्ति स्वरे भेदः। अत्राहुः। सुप्यजातौ णिनीत्यत्र संज्ञायामित्य नुवर्तते। तदा संज्ञायामस्ति स्वरे भेदः। अथ नानुवर्तते। स्वरभेदाभावः। भोजीति। एतदपि भुजिना संबन्धं नञः प्रदर्शयितुं प्रक्रि

एवं तर्हि णिन्यन्तेन समासो भविष्यति। नश्राद्धभोज्य श्राद्धभोजीति। नैवं शक्यम्। स्वरे हि दोषः स्यात्। अश्राद्धभो जीत्येवं स्वरः प्रसज्येत। अश्राद्धभोजीत्येवं चेष्यते। एवं तर्हि नञ् एवायं भुजिप्रतिषेधवाचिनः श्राद्धशब्देनास मर्थसमासः नभोजी श्राद्धस्येति। स तर्ह्यसमर्थसमासो वक्तव्यः। यद्यपि वक्तव्यः। अथवैतर्हि बहूनि प्रयोज नानि। कानि। असूर्यंपश्यानि मुखानि। अपुनर्गेयाः श्लोकाः। अश्राद्धभोजी ब्राह्मणः। मुण्डनपुंसकस्येति॥ आत्ममाने खश्च॥ आत्मग्रहणं किमर्थम्। परमाने माभूदिति। क्रियमाणेऽपि वै आत्मग्रहणे परमाने प्राप्नोति। किं कारणम्। आत्मन इतीयं कर्तरि षष्ठी। मान इत्यकारो भावे। स यद्येवात्मानं मन्यते यदि परमात्मन एवासौ मानो भवति। नैष दोषः। आत्मन इतीयं कर्मणि षष्ठी कथम्। कर्तृकर्मणोः कृतीति। ननु च कर्तर्यपि वै एतेनैव विधीयते। तत्र कृत एतत्। कर्मणि भविष्यति न पुनः कर्तरीति। एवं तर्हि कर्मकर्तरि च॥ कर्मकर्तरि खश् चेति वक्त व्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। आत्मन इतीयं षष्ठी कर्मणि। कथम्। कर्तृकर्मणोः कृतीति। ननु चोक्तं कर्तर्यपि एतेनैव विधीयते। तत्र कृत एतत्। कर्मणि भविष्यति न पुनः कर्तरीति। एवं तर्हि आत्मग्रहणसा मर्थ्यात् कर्मणि विज्ञास्यते। एवमपि कर्मकर्तृग्रहणं कर्तव्यम् ॥

यावाक्यमुपात्तम्। नहि केवलस्य भोजीशब्दस्य प्रयोगः। सुप्युपपदे प्रत्ययविधानात्। तदेतदुक्तं भवति न श्राद्धं भुङ्क्त इति वाक्यं कृत्वा नञः श्राद्धशब्देनासमर्थसमासं विधाय श्राद्धशब्द उपपदे णिनिः कर्तव्यः। णिनीत्यत्र संज्ञानुवृत्तौ सत्यामत्र कृत्स्वरः॥ आत्ममाने॥ आत्मशब्दः प्रत्यात्मवचनः परव्यावृत्तिं करोति। कर्मकर्तरीति। यदा प्रत्ययार्थः कर्ता आत्मानमेव पाण्डित्यादियु क्तं मन्यते तदासौ कर्मकर्ता भवति तत्र यदि कर्तरि षष्ठी स्यात्तदात्मग्रहणमनर्थकं स्यात्। कर्तृसंबन्धाव्यभिचारान्मननक्रियायाः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तरि॥ नञ इति। पञ्चमी नञ उत्तरस्य स्वरसिद्ध्यर्थमित्युः। अयमपीति। ख्युच् प्रत्ययः क्रियते चकारः सामान्यग्रहणार्थ इति मन्यते। खि
ष्णुचि तु कृते इकारोच्चारणसामर्थ्यात्तदनुबन्धकपरिभाषा नाश्रीयते॥ स्पृशोऽनु॥ संदेहः स्यादिति। किमेकपकारको निर्देश उत द्विपकारक

कर्तरि भुवः खिष्णुच्खुकञौ॥ किमर्थं खिष्णुचि इकारादिः क्रियते न ख्स्नुरित्येवोच्येत। तत्रायमप्यर्थः। स्वरार्थश्चका
रो न कर्तव्यो भवति। केनेदानीमिकारादित्वं क्रियते। इष्णुच इकारादित्वमुदात्तत्वात् कृतं भुवः। भवतिरुदात्तस्तस्यो
दात्तत्वादिड्भविष्यति। इदं तर्हि प्रयोजनं खिदयं क्रियते तत्र चर्त्वे कृते संदेहः स्यात् किंद्वा खि इति। संदेहमा
त्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। खिदिति व्या
ख्यास्यामः। नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्णुचः। इदं तर्हि प्रयोजनं कृत्योकेष्णुच्चार्वादयश्चेत्येष स्वरो यथा
स्यात्। एतदपि नास्ति प्रयोजनम्। अयमपि इटि कृते षत्वे णत्वे च ष्णुजेव भविष्यति। न सिध्यति। लक्षणप्रतिपदोक्त
योः प्रतिपदोक्तस्यैवेति। अथवा असिद्धं खल्वपि षत्वं तस्यासिद्धत्वादिष्णुजेव भविष्यति। इष्णुच इकारादित्वमु
दात्तत्वात् कृतं भुवः। नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्णुचः। कर्तरि भुवः॥ स्पृशोऽनुदके क्विन्॥ कि
मर्थो नकारः। स्वरार्थः। ञ्नितीत्याद्युदात्तत्वं यथा स्यात्। नैतदस्ति प्रयोजनम्। एकाचोऽयं विधी
यते तत्र नार्थः स्वरार्थेनानुबन्धेन नकारेण। धातुस्वरेणैव सिद्धम्। यस्तर्ह्यनेकाज् दधृगिति। वक्ष्यत्येतद् धृषेर्द्विर्वचन
मन्तोदात्तत्वं च निपात्यत इति। विशेषणार्थस्तर्हि। क्व विशेषणार्थेनार्थः। क्विन्प्रत्ययस्य कुरिति। क्विप्रत्ययस्य कुरित्यु
च्यमाने संदेहः स्यात्। क्विर्वा एष प्रत्ययः क्विन्वेति संदेहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशे
षप्रतिपत्तिर्न हि संदेहादलक्षणमिति। क्विनिति व्याख्यास्यामः॥ स्पृशोऽनुदके क्विन्॥ ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजि
क्रुञ्चां च॥ दधृगिति किं निपात्यते। धृषेर्द्विर्वचनमन्तोदात्तत्वं च। धृषेर्द्विर्वचनमन्तोदात्तत्वं च निपात्यते। सदादिषु दर्शो
नालोचने कञ्च॥ किमर्थो ञकारः। स्वरार्थः। ञ्नित्याद्युदात्तत्वं यथा स्यात्। नैतदस्ति प्रयोजनम्। नकारेणाप्येष स्वरः सिद्धः। विशे
षणार्थस्तर्हि भविष्यति। क्व विशेषणार्थेनार्थः। कञ्कराविति। कन्करावित्युच्यमाने याविकादस्यत्रापि प्रसज्येत ॥

इत्यर्थः। व्याख्यानत इति। तदनुबन्धकपरिभाषया चक्षियोग्रहणाभावः॥ त्यदादिषु॥ ञकारस्य कार्यद्वयं प्रतियुक्तत्वं प्रश्नद्वारे
णप्रदर्श्यते। किमर्थ इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुदर्थानुपपत्तिस्त्विति। यः कुतोर्थः स तादृशादिशब्दवाच्यो न भवति। तादृशादयो हि सदृशलक्षणमर्थमाचक्षते न तु दर्शनक्रियायाः कर्तारमित्यर्थः। कर्मकर्तेति। कर्मण एव सौकर्यात्कर्तृत्वविवक्षायां कर्तर्येव प्रत्ययः क्रियत इत्यर्थः॥ सत्सूद्विष॥ सदादीनां केषांचित्सकर्मकत्वात्कर्मण्येवोपपदं प्राप्नोतीति मत्वाह। सदादिष्विति। वेदिषदिति। वेद्यां सीदतीति क्विप् पूर्वपदादिति षत्वं दुरोणेसीदतीति दुरोणसत् दुरोणं गृहम्। तन्न वक्तव्यमिति। अनुपसर्गग्रहणानुवृत्तिमन्तरेणैवोपसर्गनिवृत्तेः सिद्धत्वादनुवृत्तिप्रदर्शनमपि न

दृशेः समानान्ययोश्च॥ दृशेः समानान्ययोश्चोपसंख्यानं कर्तव्यम्। सदृक्। सदृशः। अन्यादृक्। अन्यादृशः। कुदर्थानुपपत्तिस्तु। कुदर्थस्तु नोपपद्यते। दृशेः कर्तरि प्राप्नोति। इवार्थे तु तद्धितः। इवार्थे त्वयं तद्धितो द्रष्टव्यः। स इवायं तादृक् तादृशः। अन्य इवायमन्यादृक् अन्यादृश इति॥ अथवा युक्त एवायं कुदर्थः। कर्मकर्तायम्। तमिवेमं पश्यन्ति जनाः सोयं स इव दृश्यमानस्तमिवात्मानं पश्यतितादृक्। अन्यमिवेमं पश्यन्ति जनाः सोयमन्य इव दृश्यमानोऽन्यमिवात्मानं पश्यति अन्यादृगिति। सदादिषु॥ सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेपि क्विप्॥ सदादिषु सुब्ग्रहणम्। सदादिषु सुब्ग्रहणं कर्तव्यम्। होता वेदिषत्। अतिथिर्दुरोणसत्। न तर्हीदानीमुपसर्गेपीति वक्तव्यम्। वक्तव्यं च। किं प्रयोजनम्। ज्ञापकार्थम्। किं ज्ञाप्यम्। एतज्ज्ञापयत्याचार्यः। अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। वदः सुप्यनुपसर्गग्रहणं चोदितं तन्न वक्तव्यं भवति॥ अदोनन्ने॥ क्रव्ये च॥ किमर्थमिदमुच्यते न अदोनन्न इत्येव सिद्धम्। न सिध्यति। छन्दसीति वर्तते। भाषार्थोयमारम्भः। पूर्वस्मिन्नेव योगे छन्दोग्रहणं निवृत्तम्। तत्त्वावश्यं निवर्त्यम्। आमात्सस्यादित्येवमर्थम्। अत उत्तरं पठति। अदोनन्ने क्रव्यग्रहणं वासरूपनिवृत्त्यर्थम्। अदोनन्ने क्रव्यग्रहणं क्रियते वासरूपो मा भूदिति। अदोन॥ मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्॥ श्वेतवहादीनां डस्॥ श्वेतवहादीनां डस्वक्तव्यः। श्वेतवा इन्द्रः। पदस्य च॥ पदस्येति च वक्तव्यम्। इह मा भूत्। श्वेतवाहौ श्वेतवाह इति। किं प्रयोजनम्। वर्थम्। रुर्यथा स्यात्। क्रियतेर्वर्थे निपातनम्। अवयाः श्वेतवाः पुरोडाश्च ॥

युज्यते। यत्र चानुपसर्गग्रहणानुवृत्तिर्न संभाव्यते। स्पृशोनुदके क्विन्नित्येतदपि ज्ञापनस्य प्रयोजनम्। तेनोपस्पृशति संस्पृशतीत्यादौ क्विन्न भवतीति॥ क्रव्ये च॥ वासरूपो मा भूदिति। तेन क्रव्यादइत्यण्न भवतीत्यर्थः॥ मन्त्रे॥ डस्वक्तव्य इति। ण्विन्प्रत्ययबाधनार्थ इति भावः। पदस्येति। भाविपदाश्रयेणेदमुच्यते। यत्र तु डसन्तस्य पदत्वं भविष्यति तत्र डस्प्रत्ययोऽन्यत्र ण्विन्नेवेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्नवक्तव्यमिति। डसैवसिद्धत्वान्निपातनंनकर्तव्यमित्यर्थः। वक्तव्यश्चेति। अन्वयादित्यादीनि प्रथमान्तान्येवनिपात्यन्त इति श्वेतवो
भ्यामित्यादिरूपमन्यथानस्यात्। अथापिपदमात्रविषयंनिपातनमाश्रीयते। तथाप्यतउत्वंविधीयमानमाकारान्नस्यात्। तस्मात्संबु
द्ध्यर्थंनिपातनमपिकर्तव्यम्। डसप्युत्वार्थोवक्तव्यः। उक्थशा इत्येतदपिसंबुद्ध्यर्थंनिपातनंकर्तव्यम्। उक्थशोभ्यामित्यादिसि
द्ध्येडसपिकर्तव्यः। ण्विनिहि नलोपेनिपात्यमानेवृद्धौसत्यामुत्वंनस्याद्यदिमन्त्रेदर्शनमस्ति॥ स्यः कच॥ शंस्यादिति। ईत्वमवकारा

आतश्चर्वर्थम्। उक्थशः शब्दस्यसामान्येनरुः सिद्धः। नतस्यनिपातनंक्रियते। तन्नवक्तव्यंभवति। अवश्यंतदुक्तव्यम्।
दीर्घार्थम्। नैतदस्तिप्रयोजनम्। सिद्धमत्रदीर्घत्वम्। अत्वसन्तस्यचाधातोरिति। यत्रतेननसिध्यतितदर्थम्। क्वचतेन
नसिध्यति। संबुद्धौ। हेश्वेतवाः। नतर्हीदानींडस्वक्तव्यः। वक्तव्यश्च। किंप्रयोजनम्। उत्वार्थम्। श्वेतवोभ्याम्। श्वेतवोभिः।
मन्त्रेश्वेत॥ स्यः कच॥ किमर्थंस्यः कक्विपावुच्येते। नक्विप्सिद्धोन्येभ्योपिदृश्यत इति। कश्च। आतोनुपसर्गेक इति। नसि
ध्यति। विशेषविहितः कः सामान्यविहितंक्विपंबाधेत। वासरूपेणक्विबपिभविष्यति। इदंतर्हि। शंस्यः शंस्थाः। उक्तमेत
त्। शमिसंज्ञायांधातुग्रहणंकृञोहेत्वादिषुटप्रतिषेधार्थमिति। सयथैवाचंटंबाधते। एवंक्विपावपिबाधेत॥ सुप्य
जातौणिनिस्ताच्छील्ये॥ सुपीतिवर्तमानेपुनः सुब्ग्रहणंकिमर्थम्। अनुपसर्ग इत्येवंतदभूत्। इदंसुम्मात्रेयथास्यात्।
उदासारिण्यः प्रत्यासारिण्य इति। णिन्विधौसाधुकारिण्युपसंख्यानम्। णिन्विधौसाधुकारिण्युसंख्यानंकर्तव्यम्। सा
धुकारीसाधुदायी॥ ब्रह्मणिवदः॥ ब्रह्मणिवद उपसंख्यानंकर्तव्यम्। ब्रह्मवादिनोवदन्ति॥ व्रते॥ किमुदाहरणम्। अश्रा
द्धभोजी। किंयोश्राद्धंभुङ्क्ते सोश्राद्धभोजी। किंचातः। यदासावश्राद्धंनभुङ्क्ते तदातस्यव्रतलोपः स्यात्। तद्यथास्थण्डिल
स्थायीयदास्थण्डिलेनतिष्ठतितदातस्यव्रतलोपोभवति ॥

दाविति वचनाद्भाष्यकारवचनप्रामाण्याद्वाप्रत्ययलक्षणेनेत्वाभावः॥ सुप्य॥ णिन्विधाविति। अताच्छील्यार्थमिदम्। एवंब्रह्मणि
वद इति॥ व्रते॥ उदाहरणेविचार्यमस्तीतिप्रश्नः। किमिति। यदासाविति। ननुबुभुक्षाप्रयुक्तंश्राद्धाश्राद्धभोजनंप्रसक्तम्। तत्राश्राद्धंभु
ङ्क्त इत्यनेनश्राद्धभोजनंनिषिध्यते। यथापञ्चपञ्चनखाभक्ष्या इतिशशादिव्यतिरिक्तपञ्चनखभक्षणंनिवर्त्यते। तत्रकथंव्रतलो
पः स्यात्। स्थंडिलस्थायीत्यत्रतुस्थानविपरीतगमनाचरणेयुक्तोव्रतलोपः। उच्यते। अश्राद्धंमयाभोक्तव्यमितियेनसंकल्पः कृतः
सयदाबुभुक्षायांसत्यांयस्मिन्नहन्यश्राद्धंनभुङ्क्ते तदातस्यस्यादेवव्रतलोपः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नश्राद्धभोजीति। समासार्थप्रक्रियावाक्यमिदं नतु लौकिकम्। नहि केवलः श्राद्धभोजीशब्दो व्रतविषय उपपद्यते। अश्राद्धभोजिश
ब्दस्यैव व्रतविषयत्वात्। एवं स्वर इति। अव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तं पदं स्यात्। कृदुत्तरपदप्रकृतिस्वरत्वेनान्तोदात्तत्वं
चेष्यत इत्यर्थः। ननु च णिनीत्यनेन पूर्वपदाद्युदात्तत्वेनैव भाव्यमितिनास्ति स्वरे भेदः। अत्राहुः। सुप्याणिनीत्यत्र संज्ञायामित्य
नुवर्तते। तदा संज्ञायामस्ति स्वरे भेदः। अथ नानुवर्तते। स्वरभेदाभावः। भोजीति। एतदपि भुजिनासंबन्धं नञः प्रदर्शयितुं प्रक्रि

एवं तर्हि णिन्यन्तेन समासो भविष्यति। नश्राद्धभोज्यश्राद्धभोजीति। नैवं शक्यम्। स्वरे हि दोषः स्यात्। अश्राद्धभो
जीत्येवं स्वरः प्रसज्येत। अश्राद्धभोजीत्येवं चेष्यते। एवं तर्हि नञ एवायं भुजिप्रतिषेधवाचिनः श्राद्धशब्देनास
मर्थसमासः नभोजी श्राद्धस्येति। स तर्ह्यसमर्थसमासो वक्तव्यः। यद्यपि वक्तव्यः। अथवैतर्हि बहूनि प्रयोज
नानि। कानि। असूर्यंपश्यानि मुखानि। अपुनर्गेयाः श्लोकाः। अश्राद्धभोजी ब्राह्मणः। सुडनपुंसकस्येति॥ आत्ममाने
खश्च॥ आत्मग्रहणं किमर्थम्। परमाने माभूदिति। क्रियमाणेपि वै आत्मग्रहणे परमाने प्राप्नोति। किं कारणम्।
आत्मन इतीयं कर्तरि षष्ठी। मान इत्यकारो भावे। स यद्येवात्मानं मन्यते यद्यपि परमात्मन एवासौ मानो भवति।
नैष दोषः। आत्मन इतीयं कर्मणि षष्ठी कथम्। कर्तृकर्मणोः कृतीति। ननु च कर्तर्यपि वै एतेनैव विधीयते।
तत्र कृत एतत्। कर्मणि भविष्यति न पुनः कर्तरीति। एवं तर्हि कर्मकर्तरि च॥ कर्मकर्तरि खश् चेति वक्त
व्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। आत्मन इतीयं षष्ठी कर्मणि। कथम्। कर्तृकर्मणोः कृतीति। ननु चोक्तं
कर्तवैपि पि एतेनैव विधीयते। तत्र कृत एतत्। कर्मणि भविष्यति न पुनः कर्तरीति। एवं तर्हि आत्मग्रहणसा
मर्थ्यात्कर्मणि विज्ञास्यते। एवमपि कर्मकर्तृग्रहणं कर्तव्यम्॥

यावाक्यमुपात्तम्। नहि केवलस्य भोजीशब्दस्य प्रयोगः। सुप्युपपदे प्रत्ययविधानात्। तदेतदुक्तं भवति न श्राद्धं भुङ्क्त इति वाक्यं
कृत्वा नञः श्राद्धशब्देनासमर्थसमासं विधाय श्राद्धशब्द उपपदे णिनिः कर्तव्यः। णिनीत्यत्र संज्ञानुवृत्तौ सत्यामत्र कृत्स्वरः॥
आत्ममाने॥ आत्मशब्दः प्रत्यात्मवचनः परव्यावृत्तिं करोति। कर्मकर्तरीति। यदा प्रत्ययार्थः कर्ता आत्मानमेव पाण्डित्यादियु
क्तं मन्यते तदासौ कर्मकर्ता भवति तत्र यदि कर्तरि षष्ठी स्यात्तदात्मग्रहणमनर्थकं स्यात्। कर्तृसंबन्धाव्यभिचारान्न तु क्रियायाः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मोपदिष्टइति। लान्तस्य कर्तोकर्मवदित्यनपेक्ष्योक्तं ष्यनैवसिद्धेर्वक्ष्यमाणत्वात्। यकः सिद्धान्तत्वाभावादुपेक्षणीयत्वात्। अविशे
षेणेति। सार्वधातुकमात्रइत्यर्थः॥ इतिजैयटपुत्रकैयटकृतेभाष्यप्रदीपेतृतीयाध्यायस्यद्वितीयेपादेप्रथममाह्निकम्॥ भूते॥ यस्यस्व
सत्ताव्यपरक्तातत्सर्वंभूतशब्देनोच्यते। तत्रविशेषज्ञानायपृच्छति। कस्मिन्निति। इतरआह। कालइति। तस्यैवभूतादिशब्दवा
च्यत्वेनसुप्रसिद्धत्वादितिभावः। अत्रकेचिन्नित्यंकालंपदार्थानामनुज्ञाप्रतिबन्धाभ्यांस्थित्युत्पत्तिप्रलयहेतुमाचक्षते। तत्रसंसर्गि
सूर्यादिक्रियाभेदाश्रयोमासादिभेदव्यवहारोभूतादिव्यपदेशश्च। अन्येतुप्रसिद्धपरिमाणाक्रियासूर्यादिकर्तृकाअप्रसिद्धपरिमाण

कर्मोपदिष्टेयग्यथास्यात्श्यन्माभूदिति। कश्चात्रविशेषः यकोवाश्यनोवा। यकिसत्यन्तोदात्तत्वेनभवितव्यम्। श्यनिसत्या
द्युदात्तत्वेन। श्यन्यपिसत्यन्तोदात्तत्वेनैवभवितव्यम्। कथम्। स्वशःस्वरः श्यन्स्वरंबाधिष्यते। सतिशिष्टत्वात् श्यन्स्वरः
प्राप्नोति। आचार्यप्रवृत्तिर्ज्ञापयति सतिशिष्टोपिविकरणस्वरः सार्वधातुकस्वरंनबाधतइति। यदयंतासेःपरस्य
लसार्वधातुकस्यानुदात्तत्वंशास्ति। लसार्वधातुकएवैतत् ज्ञापकंस्यात्। नेत्याह। अविशेषेणज्ञापकम्॥ इतितृ
तीयस्यद्वितीयेपादेप्रथममाह्निकम्॥ भूते॥ भूतइत्युच्यते। कस्मिन्भूते। काले। नवैकालाधिकारोस्ति। एवंतर्हिधातो
रितिवर्तते। धातौभूते। धातुर्वैशब्दः। नचशब्दस्यभूतभविष्यद्वर्तमानतायाःसंभवोस्ति। शब्देऽसंभवादर्थेकार्यंविज्ञा
स्यते। कःपुनर्धात्वर्थः। क्रिया। क्रियायांभूतायाम्। यद्येवंनिष्ठायामितरेतराश्रयत्वादप्रसिद्धिः। निष्ठायामितरेतराश्र
यत्वादप्रसिद्धिःस्यात्। काइतरेतराश्रयता। भूतकालेनायंशब्देननिर्देशःक्रियते। निर्देशोत्तरकालंचभूतकालता।
तदेतदितरेतराश्रयंभवति। इतरेतराश्रयाणिकार्याणिचनप्रकल्पन्ते ॥

याःक्रियायाःपरिच्छेदायोपात्ताअहरादिव्यपदेश्याकालइत्याहुः। नवैकालाधिकारइति। ततश्चसामान्यशब्दस्यविशेषेऽवस्थानं
नलभ्यतइत्यर्थः। नचशब्दस्येति। शब्दस्यार्थेगुणाभावाद्गुणस्यविशेषणसंबन्धायोग्यत्वान्नित्यत्वाद्वाशब्दस्यानित्यत्वेपिभूतात्प्रत्य
यविधानासंभवादुच्चरितत्वलक्षणभूतत्वाश्रयेचविशेषणवैयर्थ्यादितिभावः॥ भूतकालेनेति। भवतेर्निष्ठाप्रत्ययोभूतक्रियावाचि
नोविधातव्यः। नचभूताधिकारमन्तरेणनिष्ठाप्रत्ययस्यभूतक्रियाविषयत्वंलभ्यते। नचभूत¯क्रियाविषयनिष्ठाविधानमन्तरेण
भूताधिकारउपपद्यते। ततश्चाधिकाराश्रयोनिष्ठाप्रत्ययस्तदाश्रयश्चाधिकारइतीतरेतराश्रयत्वमित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एव सपीति। नशाक्लीयसव्ययत्वमभिप्रेतं किं तर्हि नित्यमित्यर्थः। ततो नित्यो भूतशब्दो निकान्तार्थवाची नित्येनार्थेन भविष्य दूर्तमानप्रतिद्वन्द्विना संबद्धोधिक्रियत इत्यर्थः॥ कुमारघातीति। यदीह भूताधिकारो न क्रियते तदा कर्मणि हन इति णिनिः सामान्येन विधीयते। कुमारशीर्षयोर्णिनिरित्ययमपि णिनिस्तथैव कालसामान्ये। पुनर्विधानं तु वासरूपनिवृत्त्यर्थं स्यात्। त तश्च विशेषविहितः कुमारशीर्षयोर्णिनिरित्ययं भूतेपि प्रसज्येत। सति तु भूताधिकारे तक्रकौण्डिन्यन्यायेन कुमारशीर्षयो रित्यनेन भूते णिनिं बाधित्वा भविष्यद्वर्तमानयोरेव णिनिर्विधीयते। आखुहेति। सति भूताधिकारे ब्रह्मादिष्वेव हन्तेर्भूते किव्

अव्ययनिर्देशात्सिद्धम्। अव्ययवता शब्देन निर्देशः करिष्यते। अवर्तम। नेअभविष्यतीति। स तर्हि अव्ययवता श ब्देन निर्देशः कर्तव्यः। न कर्तव्यः। अव्ययमेष भूतेशब्दः। नैषा भवतेर्निष्ठा। कथमव्ययत्वम्। उपसर्गविभक्तिस्वर प्रतिरूपकाश्च निपाता भवन्तीति निपातसंज्ञा। निपातोव्ययमित्यव्ययसंज्ञा। अथापि भवतेर्निष्ठा। एवमप्यव्ययमे व कथम्। नञ्वेतीत्यव्ययमिति। क्व पुनर्नञ्वेति। एतौ कालविशेषौ भविष्यद्वर्तमानौ स्वभावतो भूत एव वर्तते। यदि तर्हि नञ्वेतीत्यव्ययम्। न वा तद्विधानस्यान्यत्राभावात्। न वा भूताधिकारेणार्थः। किं कारणम्। तद्विधानस्यान्यत्राभा वात्। येपि ह्येत इत उत्तरं प्रत्ययाः शिष्यन्ते तेष्येतौ कालविशेषौ न वि॰॰यन्ति भविष्यद्वर्तमानौ। स्वभावतो भूत ए व वर्तन्ते। अत उत्तरं पठति। भूताधिकारस्य प्रयोजनम्। कुमारघाती शीर्षघाती आखुहा बिडालः सुत्वानः सुन्व न्तः सुषुपुषो नेहा अग्निमाद्धानस्य भूतकालनिवृत्त्यर्थं भविष्यद्वर्तमानकालसंप्रत्ययार्थम्। कुमारघाती शीर्ष घातीति भविष्यद्वर्तमानार्थे भूतनिवृत्त्यर्थः। आखुहा बिडाल इति भविष्यद्वर्तमानार्थे भूतनिवृत्त्यर्थः। इतरथा हि ब्रह्मादिनियमस्त्रिषु कालेषु निवर्तकः स्यात्। सुत्वानः सुन्वन्तः ॥

भवतीति नियमेन भूत एवोपपदान्तरे क्विप् निवर्त्यते। न तु कालान्तरे इत्याखुहेति भविष्यद्वर्तमानयोः प्रयोग उपपन्नो भव ति। सुन्वन्त इति। सुञो यज्ञसंयोग इति शतृप्रत्ययः। तत्र यदि भूताधिकारो वर्तमानाधिकारश्च न क्रियेते तदा यज्ञसंयोगविशेषविधी यमानः शता कालत्रयेपि ङ्वनिपं बाधेत। ततश्च भूते यज्ञसंयोगे सुत्वेति न स्यात्। अथवा सरूप इति ङ्वनिप् विधीयते तथापि सुत्वा सुन्वन्निति कालभेदो न स्यात्। सति त्वधिकारे कालभेदेन तयोरवस्थानं भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुषुपुष इति। असति भूतवर्तमानाधिकारे विशेषविहितेन नजिङा लिटो बाधनं स्यात्। ताच्छीलिकेषु वासरूपविधिर्नास्ति। सति त्वधिकारे भूते लिट्, वर्तमाने नजिङ् इति बाध्यबाधकभावाभावः। अनेहा इति। नञ्याहन एह चेति असिप्रत्ययो सत्यधिकारे सर्वस्मिन्काले तं बाधेत। सति त्वधिकारे वर्तमानकाल एवौणादिकस्तं बाधते। चानशिति। असत्यधिकारे कानच्चानशं बाधकः स्यात्। कः पुनरनयोर्भेदः। यावता ऽभ्यस्तानामादिरिति लसार्वधातुके विधीयते न सार्वधातुकमात्रे। एवं तर्ह्युपग्रहकृतो भेदः। कानच आत्मनेपदत्वात्कर्त्रभिप्राय एव भवति। चानश् पुनरविशेषेण। सति त्वधिकारे भूते कानज् वर्तमाने चानशिति बाध्यबाधकभावाभावः॥ ब्रह्मभ्रूण॥ किमविशेषेणेति। किं धातूपपदकालप्रत्ययाश्चत्वारोऽपि नियम्यन्ते अथ किंचिदेव नियम्यत इति प्रश्नः। उपपद

यज्वसंयोगे ङ्वनिपस्त्रिषु कालेषु शतापवादो माभूत्। सुषुपुषः। स्वपितृषोर्नजिङ् सर्वकालापवादो माभूत्। अनेहा इति वर्तमानकाल एव। अन्यत्र अनाहन्ता। आदधानस्येति कानच्चानशौ। ताच्छील्यादिषु सर्वकालापवादो माभूत्। अग्निमादधानस्येत्येवान्यत्र॥ ब्रह्मभ्रूणवृत्रेषु क्विप्॥ किमर्थं ब्रह्मादिषु हन्तेः क्विब् विधीयते न क्विबन्येभ्योऽपि दृश्यत इत्येव सिद्धम्। ब्रह्मादिषु हन्तेः क्विब्वचनं नियमार्थम्। नियमार्थोऽयमारम्भः। ब्रह्मादिष्वेव हन्तेर्भूते क्विब्यथा स्यादिति। किमविशेषेण। नेत्याह। उपपदविशेष एतस्मिन्नविशेषे। अथ ब्रह्मादिषु हन्तेर्णिनिना भवितव्यम्, न भवितव्यम्। किं कारणम्। उभयतो नियमात्। उभयतो नियमोऽयम्। ब्रह्मादिष्वेव हन्तेर्भूते क्विब्भवति। क्विबेव हन्तेर्भूते ब्रह्मादिष्विति। तथा चोत्तरस्य वचनार्थः। एवं च कृत्वोत्तरस्य योगस्य वचनार्थ उपपन्नो भवति। बहुलं छन्दसीति। यो मातृहा पितृहा भ्रातृहा। न भवति च अमित्रघात इति।

विशेष इति। अनेन धातुनियमं दर्शयति। ब्रह्मादिष्वेव हन्तेर्भूते क्विब्भवति नोपपदान्तरे। तेन पुरुषं हतवानित्यत्र क्विब्न भवति। अथेति। कर्मणि हन इत्ययं नेनेति भावः। क्विबेवेति। ब्रह्मादिषु हन्तेः भूते क्विबेव भवति न प्रत्ययान्तरमिति। क्विब् भूतकाले नियम्यत इति कालनियमोऽयं भवति। एतदेव नियमद्वयं भाष्यकारेणाश्रितम्। ब्रह्मादिषु हन्तेरेव भूते क्विब्भवति। ब्रह्मादिषु हन्तेः क्विब्भूत एवेत्येतत्तु नियमद्वयं नाभ्युपगतम्। अन्यैस्त्वाहोपुरुषिकया चतुर्विधो नियमो व्याख्यातः। स भाष्यविरोधान्नादरणीयः। तथा चेति। यस्माद्ब्रह्मादिष्वेवेति नियमोऽनेन क्रियते तस्मादुत्तरस्य योगस्य वचने प्रयोजनमस्ति। उपपदान्तरे हन्तेश्छन्दसि क्विब्यथा स्यादिति। कर्मणि॥ कर्मणि कुत्सित इति। यस्य सोमघृतादेः शास्त्रेण विक्रयः प्रतिषिद्धस्तत्कर्म विक्रये कुत्सितम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्येषपि॥अन्येष्विति सप्तमीनिर्देशादुपपदान्तरमेवाश्रितं नतु धात्वन्तरमित्याह। अन्येभ्योपीति॥ निष्ठा॥ यदि पुनरिति। यौलौकिके प्रयोगे न दृष्टौ नापीह शास्त्रे श्रुतौ तौ क्तक्तवतू निर्दिश्य संज्ञा विधीयते। एतदुक्तं भवति। इहैव प्रकरणे क्तक्तवतू निष्ठेति सूत्रं कर्तव्यम्। यौ भूते क्तक्तवतू तौ निष्ठासंज्ञौ भवतः। तत्र संज्ञाविधानान्यथानुपपत्त्या तयोर्भूते विधानमनुमास्यते। इतरेतराश्रयदोषश्च न भविष्यतीति। दृष्टश्रुतयोरिति। यद्यपि क्तवतुरन्यो नास्ति। तथापि संज्ञाविधाने द्वयोः सहनिर्देशादत्रापि द्विवचनेन निर्देशो न तु द्वित्वं विवक्षितम्। एकत्वेनेति।

कर्मणीनिविक्रियः॥ कर्मणि कुत्सिते॥ कर्मणि कुत्सित इति वक्तव्यम्। इह मा भूत्। धान्यविक्राय इति। अन्येषपि दृश्यते॥ अन्येभ्योपि दृश्यते॥ अन्येभ्योपि दृश्यत इति वक्तव्यम्। इहापि यथा स्यात् आखा। उखा। परिखा॥ निष्ठा॥ निष्ठायामितरेतराश्रयत्वादप्रसिद्धिः॥ निष्ठायामितरेतराश्रयत्वादप्रसिद्धिः स्यात्। केतरेतराश्रयता। सतोः क्तक्तवत्वोः संज्ञया भवितव्यम्। संज्ञया च क्तक्तवतू भाव्येते। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। सिद्धौ क्तक्तवतुग्रहणम्॥ सिद्धौ क्तक्तवतुग्रहणं कर्तव्यं भवति। क्तक्तवतू भूते। क्तक्तवतू निष्ठेति। यदि पुनरिहैव निष्ठासंज्ञा प्रोच्येत। क्तक्तवतू भूते। ततो निष्ठा। क्तक्तवतू निष्ठासंज्ञौ भवत इति। किं कृतं भवति। द्विः क्तक्तवतुग्रहणं न कर्तव्यं भवति। एवमपि तावितिवक्तव्यं स्यात्। वक्ष्यत्येतत्। तौ सदिति वचनमसंसर्गार्थमिति। असंसक्तयोर्भूतकालेन क्तक्तवत्वोर्निष्ठासंज्ञा यथा स्यात्। जिमिदा। मिन्नः। जिष्विदा। स्विन्नः। यदि पुनर्दृष्टश्रुतावेव क्तक्तवतू गृहीत्वा निष्ठासंज्ञोच्येत। नैवं शक्यम्। दृष्टश्रुतयोर्हि न स्यात्। जिमिदा। मिन्नः। जिष्विदा। स्विन्न इति। तस्मान्नैवं शक्यम्। न चेदेवं द्विः क्तक्तवतुग्रहणं कर्तव्यं भवति। इतरेतराश्रयं वा भवति। नैष दोषः। इतरेतराश्रयमात्रमेतद्भवति। सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि। सिद्धं तु नित्यशब्दत्वादिति। नेदं तुल्यमन्यैरितरेतराश्रयैः। न हि संज्ञा नित्या। एवं तर्हि भाविनी संज्ञा विज्ञास्यते। तद्यथा कश्चित्कंचित्तन्तुवायमाह। अस्य सूत्रस्य शाटकं वयेति। स पश्यति शाटको न वातव्यः॥

सामान्येनेत्यर्थः। न हि संज्ञा नित्येति। वृद्ध्यादिका संज्ञा विषयनियतत्वान्नित्या आकारादयो हि प्रयोगे विद्यन्ते तत्र मृजेर्वृद्धिरित्यादिना साधुत्वमात्रमन्वाख्यायते। मृजेर्वृद्धिः साधुर्भवति। क्तक्तवतू तु सानुबन्धकौ प्रयोगे न विद्येते इति नित्यत्वाभावं संज्ञिनोऽभिप्रेत्यैतदुक्तम्। भाविनी संज्ञेति। संज्ञिनो भावित्वात्संज्ञा भाविनीति। तथाहि। निष्ठेत्युक्ते संज्ञावाक्यं क्तक्तवतू निष्ठेति स्मर्यते। तत्र सामर्थ्यात् क्तक्तवतुविधानं संपद्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदिकर्मणीति॥ आदिभूतक्रियाक्षणेषु भूतेषु सर्वस्याः क्रियाया भूतत्वाभावान्निष्ठा न प्राप्नोतीति वचनम्। न चादिकर्मणि क्तः कर्तरि चेत्येतदर्थातिदेशनमादिकर्मणि निष्ठाया ज्ञापकम्। शीतः क्त इत्यादिना वर्तमानकालविषयस्य क्तस्य संभवात्तस्यैवैतदर्थादेशनं स्यात्। यद्वा भवन्त्यर्थ इति। यस्माल्लटोऽर्थे विकल्पेन भाष्यते निष्ठा तस्माद्वक्तव्येत्यर्थः। न्याय्येति। आदिभूत एवावयवे समूहरूपस्य समाप्तत्वादस्ति भूतत्वोपपत्तिरित्यर्थः। तदुक्तं हरिणा। समूहस्स तथाभूतः प्रतिभेदं समूहिषु। समाप्यते ततो भेदे कालभेदस्य संभव इति। वाचाद्यतन्यामिति। यदुक्तं भवन्त्यर्थे भाष्यत इति। तस्य व्यभिचारः। लुङोऽपि विषये निष्ठाया अयं प्रयोगः। तस्मादव

अथवा तव्यो न शाटकः शाटको वातव्यश्चेति विप्रतिषिद्धम्। भाविनी खल्वस्य संज्ञाभिप्रेता। स मन्ये वातव्यः यस्मिन्नुते शाटक इत्येतद्भवतीति। एवमिहापि तौ भूते काले भवतो ययोरभिनिर्वृत्तयोर्निष्ठेत्येषा संज्ञा भविष्यति॥ आदिकर्मणि निष्ठा॥ आदिकर्मणि निष्ठा वक्तव्या। प्रकृतः कटं देवदत्त इति। किं पुनः कारणं न सिध्यति। यद्वा भवन्त्यर्थे। यद्वा भवन्त्या अर्थे भाष्यते। प्रकृतः कटं देवदत्तः प्रकरोति कटं देवदत्त इति। न्याय्या त्वाद्यपवर्गात्। न्याय्या त्वेषा भूतकालता। कुतः। आद्यपवर्गात्। आदिरत्रापवृक्तः। एष एव च न्याय्यो भूतकालः। यत्र किंचिदपवृक्तं दृश्यते। वाचाद्यतन्याम्। वाचाद्यतन्यां भाष्यते। प्रकृतः कटं देवदत्तः प्राकार्षीत्कटं देवदत्त इति। किं शक्यन्त एते शब्दाः प्रयोक्तुमित्यतो न्याय्यैषा भूतकालता। नावश्यं प्रयोगादेव। क्रिया नामेयमत्यन्तापरदृष्टा अनुमानगम्या न शक्या पिण्डीभूता निदर्शयितुम्। यथा गर्भो निर्लुठित इति। सासौ येन येन शब्देनाभिसंबध्यते तावति तावति परिसमाप्यते ॥

श्यमाद्यपवर्गाद्भूततैष्टव्या। अन्यथा लुङ्प्रयोगो न स्यादित्यर्थः। किं शक्यन्त इति। यावदभिमतफलप्रयोजनसकलक्रियापरिसमाप्तिर्न भवति तावद्वर्तमानत्वमेव क्रियाया न तु भूतत्वम्। ततश्च वस्तुशून्या एवामी शब्दाः प्रयुज्यन्त इति भावः। अत्यन्तापरदृष्टेति। परं प्रधानं प्रमाणं प्रत्यक्षम्। अनुमानस्य तत्पूर्वकत्वात्तेन क्रिया न दृश्यते। अवयवसमूहस्य युगपदनुत्पादादनवस्थानाच्च। तदुक्तम्। क्रमात्सदसतां तेषामात्मानो न समूहिनाम्। सद्वस्तुविषयैर्यान्ति संबन्धं चक्षुरादिभिरिति। येन येनेति। शब्देन प्रत्याय्यमाना येन येनावयवेन संबध्यते समूहरूपा क्रिया तस्मिन्नेवावयवे समाप्यते। तत्रावयवानां कालत्रययोगात् क्रियाया अपि कालत्रययोगः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिटःकान॥छन्दसितिङोदर्शनादिति।वासरूपविधिश्चलादेशेषुनास्तीत्युक्तम्।अनेनेति।छन्दसिलिडित्यनेनेत्यर्थः।तस्यैव
लिटइहानुकृतत्वादानन्तर्यादितिभावः।तदेतदिति।उत्तरत्रोपयोगस्यतदितिभावः।बद्धानस्येतिबन्धबन्धनेछान्दसत्वा

तद्यथा।कश्चित्पाटलिपुत्रंजिगमिषुरेकमहर्गत्वाहइदमद्यगतमिति।नचतावतातस्यव्रजिक्रियासमाप्ताभ
वति।यत्तुगतंतदभिसमीक्ष्यैतत्प्रयुज्यतइदमद्यगतमिति।एवमिहापियत्कृतंतदभिसमीक्ष्यैतत्प्रयुज्यतेप्र
कृतःकटंदेवदत्तइति।यदाहिवेणिकान्तःकटोभिसमीक्षितोभवति।प्रकरोतिकटमित्येवतदाभवितव्यम्॥लि
टःकानज्वा॥क्वसुश्च॥किमर्थंकानच्क्वस्वोर्वावचनंक्रियते।कानच्क्वस्वोर्वावचनंछन्दसितिङोदर्शनात्।का
नच्क्वस्वोर्वावचनंक्रियतेछन्दसितिङोदर्शनात्।छन्दसितिङपिदृश्यते।अहंसूर्यमुभयतोददर्श।अहंद्यावापृ
थिवीआततानेति।नवानेनविहितस्यादेशवचनात्।नवाएतत्प्रयोजनमस्ति।किंकारणम्।अनेनविहितस्यादे
शवचनात्।अस्त्वनेनविहितस्यादेशः।केनेदानींछन्दसिविहितस्यलिटः तिङःश्रवणंभविष्यति।छन्दसिलु
ङ्लङ्लिटइत्यनेन।तदेतद्वावचनंतिष्ठतुतावत्सान्यासिकम्।अथकित्करणंकिमर्थम्।नासंयोगाल्लिट्किदि
त्येवसिद्धम्।कित्करणंसंयोगार्थम्।कित्करणंक्रियतेसंयोगान्तार्थम्।संयोगान्ताःप्रयोजयन्ति।चेत्रस्ययद्बद्धानस्य
रोदसी।त्वमर्णवान्बद्बधानाँअरम्णाः।अञ्जिःआजिवानिति।छान्दसोकानच्क्वसू।लिट्चच्छन्दसिसार्वधातुकम
पिभवति।तत्रसार्वधातुकमपिद्ङिद्भवति।ङित्वादुपधालोपोभविष्यति ॥ ।ॠ
कारान्तगुणप्रतिषेधार्थंवा।ॠकारान्तानांगुणप्रतिषेधार्थंतर्हिकित्त्वंवक्तव्यम्।अयंहिलिटिॠकारान्तानांप्रति
षेधविषयेगुणआरभ्यते।सयथैवेहप्रतिषेधंबाधित्वागुणोभवति।तेरतुःतेरुरिति।एवमिहापिस्यात्।तितीर्वा
न्।तितिराणइति।पुनःकित्करणात्प्रतिषिध्यते।तस्मात्कित्त्वंकर्तव्यम्।भाषायांसदवसश्रुवः॥भाषायांसदादि
भ्योवालिट्॥भाषायांसदादिभ्योवालिड्वक्तव्यः।किंप्रयोजनम्।तद्विषयेलुङोनिवृत्त्यर्थम्॥

दभ्यासधकारस्यहलादिशेषेणनिवृत्त्यभावेझलांजशझशीतिजश्त्वंदकारः॥भाषायाम्॥इहक्वस्यादेशविधानादभूतसामा रामः
न्येलिट्सदादिभ्योऽनुमीयतेसविशेषविषयत्वाल्लुङोबाधकःप्राप्नोतीतिमत्वाहभाषायामिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपवादविप्रतिषेधादिति। लुङोपवाद एतत्सूत्रानुमितो लिट्। तथाऽनद्यतने लङ्। परोक्षे लिडिति च। तत्रास्य लिटो लङ् लिटोश्च विप्रतिषेधे परत्वाल्लङ् लिटौ स्यातामित्यर्थः। अस्य तु भूतसामान्यमवकाशः। एतदादेशविधानानुमितस्यैव लिटः सदादिभ्यः क्वसुः न तु परोक्षे लिडित्यनेन विहितस्य तस्याप्रकृतत्वात्। तस्येति। नित्यग्रहणं प्रकृतस्य विकल्पस्य निरत्यर्थमपरोक्षग्रहणं परोक्षे लिडित्यनेन विहितस्य लिटस्तिङां श्रवणार्थम्। अपरोक्षग्रहणेनेति। अनद्यतनपरोक्षयोश्चेति

तस्य लिटो विषये लुङो निवृत्तिर्यथा स्यात्। उपसेदिवान् कौत्सः पाणिनिम्। उपासदत्। अनद्यतनपरोक्षयोश्च॥ अनद्यतनपरोक्षयोश्च वा लिड् वक्तव्यः। उपसेदिवान् कौत्सः पाणिनिम्। उपासीदत्। उपससाद। अपवादविप्रतिषेधाद्द्वितयोर्भावः। अपवादविप्रतिषेधाद्द्वितौ स्याताम्। कौ। लङ् लिटौ। तस्य क्वसुरपरोक्षे नित्यम्॥ तस्य लिटो भाषायां क्वसुरपरोक्षे नित्यमिति वक्तव्यम्। अपरोक्षग्रहणेन नार्थः। तस्य क्वसुर्नित्यमित्येव। केनेदानीं लिटः परोक्षे श्रवणं भविष्यति। परोक्षे लिडित्यनेन। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। अनुवृत्तिः करिष्यते। भाषायां सदादिभ्यो वा लिड् भवति। लिटश्च क्वसुर्भवति ततो लुङ्। लुङ् भूते काले भवति। भाषायां सदादिभ्यो वा लिड् भवति लिटश्च क्वसुर्भवति। ततोऽनद्यतने लङ्। ततोऽनद्यतने भूतकाले लङ् भवति। भाषायां सदादिभ्यो वा लिड् भवति लिटश्च क्वसुर्भवति। परोक्षे लिट्। परोक्षे लिड् भवति। भाषायां सदादिभ्यो वा लिड् भवति लिटश्च क्वसुर्भवति। तत्राप्ययमर्थः। तस्य क्वसुरपरोक्षे नित्यमित्येतन्न वक्तव्यं भवति॥ उपेयिवाननाश्वाननूचानश्च॥ किमर्थमुपेयिवानिति निपातनं क्रियते ॥

वचनेन वा लिडयं विधीयते तत्र यस्मिन्पक्षेऽयं लिण्न भवति तत्र लङ् लिटौ भवतः। तत्र च परोक्षे लिडिति विहितस्य लिटः सूत्रान्तरविहितत्वात् क्वस्वभावात्तिङो भवन्ति। भाषायां सदादिभ्यो वा लिडिति। लिटः कानज्वेत्यतो वेत्यनुवर्तते। न च न क्वसुना संबध्यते किं तर्हि लिटा। तत्र वा वचनात्पक्षे लुङ् भावः सिध्यति। ततोऽनद्यतने लङ् परोक्षे लिडित्यत्रास्य सूत्रस्यानुवर्तनादनद्यतनपरोक्षयोरपि सदादिभ्यो वा लिड् भवतीत्यर्थः ॥ उपेयिवान्॥ उपसर्गस्यातन्त्रत्वादीयिवान् समीयिवान् इत्याद्यपि भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपेयुषीति। इणो लिट्क्वसुः तत्रेडागमात्पूर्वं नित्यत्वाद्द्विर्वचनं दीर्घ इणः किती त्यभ्यासस्य दीर्घत्वं तत्सामर्थ्यादेकादेशो न प्रवर्तते। न च दीर्घस्यावकाश ईयतुरित्यादिस्तत्रापि पूर्वपरविधेः पूर्वविधित्वात् तत्र कर्तव्ये यणादेशस्य स्थानिवत्त्वादेकादेशप्रसङ्गात् तत्रानेकाच्त्वादिड्प्राप्नोति पात्यत इत्यर्थः। अजादावतिप्रसङ्ग इति। यदा पूर्वं इण्निपात्यते तदाविशेषानुपादानादजादावपि प्राप्नोति। यथा स्यसिच्सीयुडित्यत्रोक्तं नित्यश्चायं वलनिमित्तो विघातीति। यदि त्वनेन निपातनेन क्रादिनियमप्राप्तस्य वस्वेकाजाद्घसामित्यनेन नियमेन निवारितस्य प्रतिप्रसवमात्रमिटः क्रियते न त्वपूर्वो विधिस्तदाजादावतिप्रसङ्गाभावः। इदानीमजादावतिप्रसङ्गपरि

उपेयुषिनिपातनमिडर्थम्। उपेयुषिनिपातनं क्रियते इडर्थम्। इड्यथा स्यादिति। नैतदस्ति प्रयोजनम्। सिद्धोऽत्रेड्वस्वेकाजाद्घसामित्येव। द्विर्वचने कृतेऽनेकाच्त्वान्न प्राप्नोति। इदमिह संप्रधार्यं द्विर्वचनं क्रियतामिडिति। किमत्र कर्तव्यम्। परत्वादिडागमः। नित्यं द्विर्वचनं कृते पीटि प्राप्नोत्यकृतेपि इटि प्राप्नोति। इडपि नित्यः कृतेपि द्विर्वचने एकादेशे च प्राप्नोत्यकृतेपि प्राप्नोति। नात्रैकादेशः प्राप्नोति। किं कारणम्। दीर्घ इणः कितीति दीर्घत्वेन बाध्यते। तदेतदुपेयुषिनिपातनमिडर्थं क्रियते। उपेयुषिनिपातनमिडर्थमिति चेदजादावतिप्रसङ्गः। उपेयुषिनिपातमिडर्थमिति चेदजादावतिप्रसङ्गो भवति। उपेयुषा उपेयुषे उपेयुषः उपेयुषीति। एकादिष्टस्येयभावार्थं तु। एकादिष्टस्येयभावार्थं तु निपातनं क्रियते। एकादिष्टस्य ईय इत्येतद्रूपं निपात्यते। ननु चोक्तं नात्रैकादेशः प्राप्नोति। किं कारणम्। दीर्घ इणः कितीति दीर्घत्वेन बाध्यत इति। तद्धि न सुष्ठूच्यते। न हि दीर्घत्वमेकादेशं बाधते। कस्तर्हि बाधते। यणादेशः। स चापि क्व बाधते। यत्रास्य निमित्तमस्ति। अत्र हि निमित्तं नास्ति निष्प्रतिद्वन्द्वस्तत्रैकादेशः ॥

हाराय प्रकारान्तरमाश्रयति। एकादिष्टस्येति। द्विर्वचने कृते अभ्यासस्य दीर्घत्वे चैकादेशस्तस्येयादेशो निपात्यते। अद्यप्युपेयिवानित्येतदियादेशनिपातनेन न सिध्यति तथापि समीयिवानित्यादि न सिध्यतीति तदर्थमीयादेशो निपात्यते। क्वचित्तु भाष्ये इय इति पाठः स उपेयिवानित्येतद्रूपसिद्ध्यपेक्षया द्रष्टव्यः। कस्तर्हीति। इणो यणित्यनेनाजादौ विधीयमान इत्यर्थः। ननूक्तमीयतुरित्यत्राप्यभ्यासदीर्घत्वे कृते एकादेशात्पूर्वं वार्णादाङ्गं बलीय इति यणि कृते स्थानिवत्त्वादेकादेशः प्राप्नोति ततश्चावश्यमभ्यासदीर्घत्वेनैकादेशो बाध्यः। नैष दोषः। न हि स्थानिवद्भावेन रूपमतिदिश्यते रूपाश्रयश्च पूर्वपरयोरेकादेशो न यकारस्य भवितुमर्हति। अथवा यणादेशेन वार्णादाङ्गमिति वचनेन बाधितस्यैकादेशस्य स्थानिवद्भावाद्बाधितत्वादेव प्रवृत्त्यभावात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यञ्जनइति। अभ्यासदीर्घत्वेकृतेऽजादौविधीयमानइणोयणितियणादेशोहलादौनप्राप्नोतीतिनिपात्यतेततश्चैकाच्त्वाद
सेकाजाद्घसामित्यनेनैवेड्भवतीत्यजादौनभवति। नेयेयिवानिति। इणोभाषायांकेवलंभूतमात्रेवालिड्विधेयस्तस्यचनित्यंक

व्यञ्जनेयणादेशार्थंवा। अथवाव्यञ्जनएवयणादेशोनिपात्यते। यणादेशेकृतेएकाचइतीट्सिद्धोभवति। अपर
आह। नेयेयिवान्निपात्योद्विर्वचनादिड्भविष्यतिपरत्वात्। द्विर्वचनंक्रियतामिडिति। परत्वादिड्भविष्यतिविप्रति
षेधेन। इहापितर्हिद्विर्वचनादिट्स्यात् बिभिद्वान् चिच्छिद्वानिति। अन्येषामेकाचांद्विर्वचनंनित्यमित्याहुः। अन्येषा
मेकाचांद्विर्वचनंनित्यम्। कृतेपीटिप्राप्नोतिअकृतेपिअस्यपुनरिट्चनित्योद्विर्वचनंचनविहन्यतेह्यस्य। अस्यपु
नरिट्चैवनित्योस्यहिद्विर्वचनंचनविहन्यते। द्विर्वचनेचैकाच्त्वात्। द्विर्वचने कृतेएकादेशेचैकाज्भवति ॥ ।
तस्मादिड्बाधतेद्वित्वम्। तस्मादिड्द्विर्वचनंबाधते। अनूचानःकर्तरि। अनूचानःकर्तरीतिवक्तव्यम्। अनूक्तवा
नूचानूचानः। अनूक्तमित्येवान्यत्र। नेयेयिवान्निपात्योद्विर्वचनादिड्भविष्यतिपरत्वात्। अन्येषामेकाचांद्विर्वचनं
नित्यमित्याहुः। अस्यपुनरिट्चनित्योद्विर्वचनंचनविहन्यतेह्यस्य। द्विर्वचनेचैकाच्त्वात्तस्मादिड्बाधतेद्वित्वम्। लुङ्। लुङ्
लृटोरपवादप्रसङ्गोभूतभविष्यतोरविशेषवचनात्। लुङ्लृटोरपवादःप्राप्नोति। अगमामघोषान्। अपामपयः। अ
शयिष्महिपूतीकतृणेषु। गमिष्यामोघोषान्। पास्यामःपयः। शयिष्यामहेपूतीकतृणेषु। किंकारणम्। भूतभविष्यतो
रविशेषवचनात्। भूतभविष्यतोरविशेषेणलुङ्लृटौविधीयेतेततोविशेषविहितौलङ्लुटावपवादौप्राप्नुतः।
नचापवादस्यनिमित्ताभावादनद्यतनेहितयोर्विधानम्। नवाएषदोषः। किंकारणम्। अपवादनिमित्ताभावात्। ना
त्रापवादस्यनिमित्तमस्ति। किंकारणम्। अनद्यतनेहितयोर्विधानम्। अनद्यतनेहितौलङ्लुटौविधीयेते। नचा
त्रानद्यतनःकालोविवक्षितः। किंतर्हि। भूतकालसामान्यंभविष्यत्कालसामान्यंच। यद्यपितावदेतच्छक्यतेव
क्तुंगमिष्यामोघोषान्पास्यामःपयः। शयिष्यमहेपूतीकर्तृणेषु ॥

सुडादेशःकार्यान्तरंतुसिध्यत्येवेत्यर्थः। अन्येषामिति। सिदादीनांद्विर्वचनेकृतेःनेकाच्त्वादिटोऽप्रसङ्गादनित्यत्वम्। लुङः ॥
लुङ्लृटोरिति। कालविशेषसद्भावाश्रयेणचोद्यम्। सामान्यविवक्षाश्रयेणप्रतिसमाधानम्। नवेति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रैतदिति। विशेषानिच्छया भावात्सामान्यस्यैव प्रयुक्ताविवक्षेति भावः। असतश्चेति। विवक्षोपारूढ एवार्थः शब्दप्रयोगनिमित्त
मित्येतदनेन द्रढयति। इहतु सदेव विशेषेषु सामान्यमाश्रित्य लुङादिप्रयोग उपपद्यत एव। विशेषविवक्षायां तु लङादिप्रयो
ग इति न कश्चिद्दोषः। वसेर्लुङिति। रात्रेश्चतुर्थयामे यदा प्रबुद्धो वाक्यं प्रयुङ्क्ते अमुत्रावात्समिति तदा तत्रातिक्रान्तरात्रिप्रहरत्रयव
स्तनमनद्यतनमिति लङ्प्रसङ्गे लुङ्वक्तव्यः। एकस्या रात्रेश्चतुर्थो यामो द्विसन्ध्यस्सर्वो द्वितीयया याम्यरात्रेः प्रथमोऽद्यतन इत्याहुः

यत्रैतन्न ज्ञायते। किम्। कदेति। इहकथम् अगमाम घोषान् अपाम पयः अशयिष्महि पूतीकतृणेष्विति। यत्रै
तन्निर्ज्ञातं भवति अमुष्मिन्नहनि गतमिति। अत्रापि न वा पवादस्य निमित्ताभावादनद्यतने हि तयोर्विधानमि
त्येवा। कथं पुनः सतो नाम विवक्षा स्यात्। सतोऽप्यविवक्षा भवति। तद्यथाऽलोमिका एडका अनुदरा कन्येति। अ
सतश्च विवक्षा भवति। तद्यथा समुद्रः कुण्डिका विन्ध्यो वर्धितकमिति। वसेर्लुङ् रात्रिशेषे। वसेर्लुङ् रात्रिशेष इ
ति वक्तव्यम्। न्याय्ये प्रत्युत्थाने प्रत्युत्थितं कश्चित् कंचित्पृच्छति क्व भवानुषित इति स आह अमुत्रावात्समि
ति। अमुत्रावसमिति प्राप्नोति। जागरणसन्ततौ। जागरणसंततावितिच वक्तव्यम्। यो हि मुहूर्तमात्रमपि स्वपि
ति तत्रामुत्रावसमित्येव भवितव्यम्। लुङ्॥ अनद्यतने लङ्॥ अनद्यतन इति बहुव्रीहिनिर्देशोऽद्यह्योभुङ्क्ष्म
हीति। अनद्यतन इति बहुव्रीहिनिर्देशः कर्तव्यः। अविद्यमानाद्यतनो ऽनद्यतन इति। किं प्रयोजनम्। अद्य ह्यो
वाभुङ्क्ष्महीति। अद्य च ह्यश्चाभुङ्क्ष्महीति व्यामिश्रेण लुङेव यथा स्यात्। यद्येवमद्यतनेऽपि लङ् प्राप्नोति। नह्य
द्यतनेऽद्यतनो विद्यते। अद्यतनेऽपि हि अद्यतनो विद्यते। कथम्। व्यपदेशिवद्भावेन॥

जागरणसन्ततावितिः। यदा प्रयोक्ता सकलमतिक्रान्तरात्रिप्रहरत्रयं जागरितवांस्तदा लुङ्प्रयोगः। यदा तु सुप्त्वा प्रबुध्य
प्रयुङ्क्ते तदा लङ्प्रत्यय एवेत्यर्थः। अनद्यतने॥ व्यपदेशिवद्भावेनेति। यथा मुख्ये भेद आधाराधेयभावो भवति तटे तिष्ठतीति।
तथेहापि समुदायावयवभेदाश्रयेण समुदायेऽद्यतने वयवा अद्यतनाः सन्तीत्यनद्यतनो न भवतीत्युच्यते। ननु तत्त्वतोऽव
यवव्यतिरिक्तोत्र समुदाय आधारोस्ति। तदुक्तं हरिणा। कालस्याप्यपरं कालं निर्दिशन्त्येव लौकिकाः। न च निर्देशमात्रेण व्य
तिरेको नुगम्यत इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परोक्षे चेति। अननुभूतत्वात्परोक्षेऽपि प्रत्यक्षयोग्यतामात्राश्रयेण दर्शनविषय इति विरोधाभावः॥ विभाषा सा॥ भवेत्पूर्वमिति। य
इति प्रसिद्धं वासगमनादि तल्लक्षणं तच्च परार्थमुपादीयमानं यत्तत्स्मार्यमाणत्वाल्लक्ष्यं भोजनादि प्रति भवतु साकाङ्क्षं लक्ष्यं तु प्र
धानमपरोपकारिकं कथं साकाङ्क्षमित्यर्थः। अस्त्यस्मिन्निति। सहशब्दो विद्यमानार्थवृत्तिः तेन विद्यमानाकाङ्क्षः साकाङ्क्षोऽर्थ
उच्यते लक्ष्यलक्षणयोश्च परस्परापेक्षत्वाद् द्वयोरपि साकाङ्क्षत्वमित्यर्थः। सर्वत्रेति। यदीति नानुवर्तते तेनोभयत्र विभाषेयमिति
भावः। परोक्षे लिट्॥ किं परोक्षमिति। यद्यपीन्द्रियाविषयोऽर्थः परोक्षशब्दवाच्य इति जानाति तथापि सर्वस्याः क्रियायाः परोक्षत्वादि

परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये। परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ् कर्त्तव्यः। अरुणद्यव
नः साकेतम्। अरुणद्यवनो माध्यमिकान्। परोक्ष इति किमर्थम्। उदगादादित्यः। लोकविज्ञात इति किमर्थम्। चका
र कटं देवदत्तः। प्रयोक्तुर्दर्शनविषय इति किमर्थम्। जघान कंसं किल वासुदेवः॥ विभाषा साकाङ्क्षे॥ किमुदाह
रणम्। अभिजानासि देवदत्त कश्मीरेषु वत्स्यामः। तत्र सक्तून्पास्यामः। अभिजानासि देवदत्त कश्मीरेष्ववसा
म। तत्र सक्तूनपिबाम। भवेत् पूर्वं परमाकाङ्क्षतीति साकाङ्क्षं स्यात् परं तु कथं साकाङ्क्षम्। परमपि साकाङ्क्ष
म्। कथम्। अस्त्यस्मिन्नाकाङ्क्षेत्यतः साकाङ्क्षम्। विभाषा साकाङ्क्षे सर्वत्र॥ विभाषा साकाङ्क्षे सर्वत्रेति व
क्तव्यम्। क्व सर्वत्र। यदि चायदि च। यदि तावत्। अभिजानासि देवदत्त यत्काश्मीरान्गमिष्यामः यत्काश्मीरान
गच्छाम। यत्तत्रौदनं भोक्ष्यामहे यत्तत्रौदनमभुञ्ज्महि। अयदि। अभिजानासि देवदत्त कश्मीरान्गमिष्यामः
कश्मीरानगच्छाम। तत्रौदनं भोक्ष्यामहे। तत्रौदनमभुञ्ज्महि। विभाषा॥ परोक्षे लिट्॥ परोक्ष इत्युच्यते। किं प
रोक्षं नाम। परमक्ष्णः परोक्षम् ॥

शेषणानर्थक्यमिति पृच्छति। परमक्ष्ण इति। मयूरव्यंसकादित्वात्समासः। अच्प्रत्यन्ववपूर्वेत्यत्राजिति योगविभागाद
नयवानिपातनादच् समासान्तः। यद्वा प्रतिपरसमनुभ्योऽक्ष्ण इति टच् समासान्तः। स च यद्यप्यव्ययीभावे विधीयते त
थापि परशब्दस्याक्षिशब्देनाव्ययीभावासंभवात्समासान्तरे विज्ञायते। वृत्तिविषये चाक्षिशब्दः सर्वेन्द्रियवाची न तु चक्षुः प
र्यायः। अन्यथेन्द्रियान्तरविज्ञातं वस्तु परोक्षशब्दवाच्यं स्यात्। अत एवान्ये दर्शनपर्यायोऽयमक्षिशब्दो न भवतीति अक्ष्णो दर्शना
दित्येवं समासान्तं कुर्वन्ति। ततो यदिन्द्रियात्परमिन्द्रियागोचरतामापन्नं वस्तु तत्परोक्षमित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अक्षिपुनरिति। किंचसुरेवाक्षिशब्देनोच्यतेअयमर्थमितिप्रश्नः। अश्नोतेरिति। व्युत्पत्तिद्वारेणविषयव्यापनात्सर्वमिन्द्रियमिति विषयेऽक्षिशब्दोवर्ततइत्यर्थः। सिद्धंवेति। निर्भागःसमुदायएवेन्द्रियागोचरार्थवाची निपात्यतइत्यर्थः। कालइति। यथाकालस्यनित्यपक्षउपाधिभेदाद्भूतादिव्यपदेशस्तथापरोक्षत्वमपि। अनित्यक्रियारूपकालपक्षेतुस्वतएवपरोक्षत्वम्। नचशब्दस्येति। प्रत्ययप्रकृतेःशब्दस्योच्चार्यमाणस्यानुभूतत्वात्परोक्षत्वासंभवः। ततोयथाप्रत्यक्षत्वव्यभिचाराच्छब्दस्यविशेषणं नसंभवतिएवंपरोक्षत्वमप्यसंभवादविशेषणमित्यर्थः। कःपुनरिति। यद्येकैकःक्षणोधात्वर्थस्तदातस्यप्रत्यक्षत्वपरोक्षत्व

अक्षिपुनःकिम्। अश्नोतेरयमौणादिकःकरणसाधनःक्सिप्रत्ययः। अश्नुतेऽनेनाक्षीति। यद्येवंपराक्षमितिप्राप्नोति। नैषदोषः। परोभावःपरस्याक्षेपरोक्षेलिटिदृश्यताम्। परशब्दस्याक्षिशब्देउत्तरपदेपरोभावोवक्तव्यः। उत्वंवादेःपरादक्ष्णः। अथवापरशब्दादुत्तरस्याक्षिशब्दस्योत्वंवक्तव्यम्। सिद्धंवासान्निपातनात्। अथवानिपातनादेवसिद्धंपरोक्षेलिडिति। कस्मिन्पुनःपरोक्षेलिड्भवति। कालेनचकालाधिकारोऽस्ति। एवंतर्हिधातोरितिवर्ततेधातौपरोक्षे। धातुर्वैशब्दः। नचशब्दस्यप्रत्यक्षपरोक्षतायांसंभवोऽस्ति। शब्देसंभवादर्थेकार्यंविज्ञास्यते। परोक्षेधातौपरोक्षेधात्वर्थइति। कःपुनर्धात्वर्थः। क्रिया। क्रियायांपरोक्षायामिति। यद्येवंह्योऽपचदित्यत्रलिट्प्राप्नोति। किंकारणम्। क्रियानामेयमत्यन्तापरिदृष्टाअनुमानगम्याऽशक्यापिण्डीभूतानिदर्शयितुम्। यथागर्भोनिर्लुठितः। एवंतर्हिसाधनेषुपरोक्षेषु। साधनेषुचपरोक्षेषुभवतःकःसंप्रत्ययः। यदितावद्गुणसमुदायःसाधनम्॥

संभवाद्युक्तंविशेषणम्। अथसमूहस्त्वस्ययुगपदसंनिधानादप्रत्यक्षत्वाव्यभिचारात्परोक्षत्वमविशेषणमितिमत्वाप्रश्नः। क्रियेति। समूहरूपेतिभावः। साधनेष्विति। शक्तिशक्तिमतोरभेदविवक्षयासाधनशब्देनशक्तिमन्तिद्रव्याण्युच्यन्ते। इतरोयथोक्तमभिप्रायमप्रतिपद्यपृच्छति। साधनेष्विति। गुणसमुदायइति। शक्तीनांसमुदायइत्यर्थः। समुदायग्रहणंसर्वासांकरणादिशक्तीनांक्रियासिद्धौनिमित्तत्वाविशेषात् साधनत्वप्रतिपादनार्थम्। तेनयावदुक्तंसर्वाःशक्तयःसाधनमितितावद्गुणसमुदायःसाधनमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधनमपीति।शक्तीनांनित्यानुमेयत्वात्।अथान्यदिति।शक्तिव्यतिरिक्तंशक्तिमद्द्रव्यमित्यर्थः।तत्रद्रव्यप्रत्यक्षत्वेलोकस्यक्रियाप्रत्यक्षत्वाभिमानः।तत्परोक्षत्वेक्रियापरोक्षत्वमित्यर्थः।यदितावदिति।दृष्ट्वापितण्डुलोदकंयदाननिश्चितवान्किमेतेतण्डुलाःपच्यन्तेऽथहूयन्तेऽथक्रुध्यन्तइतितदाप्रमाणान्तरेणयदाकालान्तरेप्रयोक्तापाकमवगम्यवाक्यंप्रयुङ्क्तेतदासाधनत्वस्यसंरम्भरूपस्यपरोक्षत्वात्पपाचेतिप्रयुङ्क्ते।अथेति।क्रियाकृतविशेषप्रत्यक्षत्वेपिलोकस्यक्रियाप्रत्यक्षत्वाभि

साधनमप्यनुमानगम्यम्।अथान्यद्गुणेभ्यःसाधनंभवतिप्रत्यक्षपरोक्षतायांसंभवः।अथयदानेनरथ्यायांतण्डुलोदकंदृष्टंकथंतत्रभवितव्यम्।यदितावत्साधनेषुपरोक्षेषु।पपाचेतिभवितव्यम्।भवन्तिहितस्यसाधनानिपरोक्षाणि।अथयएतेक्रियाकृताविशेषाश्चीत्काराःफूत्काराश्चतेषुपरोक्षेषु।एवमपिपपाचेतिभवितव्यम्।कथंजातीयकंपुनःपरोक्षंनाम।केचित्तावदाहुःवर्षशतवृत्तंपरोक्षमिति।अपरआहुःवर्षसहस्रवृत्तंपरोक्षमिति।अपरआहुःकुड्यकटान्तरितंपरोक्षमिति।अपरआहुर्द्व्यहवृत्तंत्र्यहवृत्तंवेति।सर्वथोत्तमोनसिध्यति।सुप्तमत्तयोरुत्तमः॥सुप्तमत्तयोरुत्तमइतिवक्तव्यम्।सुप्तोहंकिलविललाप।मत्तोहंकिलविललाप।सुप्तोन्वहंकिलविललाप।मत्तोन्वहंकिलविललाप।अथभवतिवैकश्चिज्जाग्रदपिवर्तमानकालंनोपलभते।तद्यथावैयाकरणानांशाकटायनोराजमार्गेआसीनःशकटसार्थंयान्तंनोपलेभे।किंपुनःकारणंकश्चिज्जाग्रदपिवर्तमानकालंनोपलभते।मनसाप्रयुक्तानीन्द्रियाण्युपलब्धौकारणानिभवन्तिमनसोऽसांनिध्यात् ॥

मनः।तत्परोक्षत्वेतुपपाचेत्येवभाव्यमित्यर्थः।कथंजातीयकमिति।यस्मिन्भूतानद्यतनपरोक्षेलिड्भाव्यंतत्परिज्ञानायप्रश्नः।केचिदिति।मतभेदप्रदर्शनायानेकदर्शनोपन्यासः।इन्द्रियागोचरसाधनसाधितानद्यतनक्रियावाचिनस्तुधातोर्लिट्प्रत्ययइतिनिर्णयः।तथाह्यः।पपाचेत्याद्यपिभवति।सर्वथेति।आत्मसाध्यायाःक्रियायाःप्रत्यक्षत्वाभिमानः।सुप्तमत्तयोरिति।सुप्तमत्तग्रहणंचित्तविक्षेपनिमित्तोपलक्षणम्।असांनिध्यादिति।विषयान्तरेणाकृष्टत्वान्मदाद्यभिभवाद्वेतिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्यन्तापह्नवे चेति। न केवलं तद्देशस्य भोजनादेरपह्नवः यावत्तद्देशगमनादेरपि भवतीत्यर्थः। खण्डिका नाम जनपदः। त्वया अयाज्यो याजित इत्युक्तः कश्चिदाह नाकारिषं सोममिति। कारी याजकऋत्विगुच्यते। तस्य सोमं नाहं पपौ। ऋत्विग्भूत्वा सोमं न पीतवान्। अपि तु यजमान एव भूत्वेत्यर्थः। ऋत्विक्कर्मैवापह्नुते। तथा प्रतिग्रहस्त्वया योग्याद्गृहीत इत्युक्त आह। नदार्वजस्येति। दार्वी नाम जनपदविशेषः। तत्र जातस्याहं न प्रतिजग्राहेति सर्वथा प्रतिगृहीतत्वमपह्नुते। को मे मनुष्य इति। को मनुष्यो वधाय मम सत्यारोपणेन प्रहरेदित्यर्थः॥ लट् स्मे॥ इतः प्रारभ्य पञ्चसूत्र्यां कालविभागप्रतिपादनाय वार्त्तिकद्वयम्। स्मपुराभूतमात्रे न स्मपुराद्यतन इति। तस्यायमर्थः। प्रथमे वार्त्तिके स्मपुराशब्दाभ्यामाद्यन्ताभ्यां पञ्चसूत्री लक्ष्यते। तत्र भूतमात्रे प्रत्ययो भवति। स्मपुरालक्षणस्तु प्रत्ययो द्यतनेन भवति। एतदुक्तं भवति। लट् स्मे अपरोक्षे च पुरि लुङ् चास्मे इति सूत्रत्रये पानद्यतने भूतविशेषे प्रत्ययो भवति। ननौ पृ

परोक्षे लिडत्यन्तापह्नवे च॥ परोक्षे लिडित्यत्रात्यन्तापह्नवे चेति वक्तव्यम्। नो खण्डिकान् जगाम। नो कलिङ्गाञ्जगाम। नकारिषं सोमं पपौ यावग्रे। नदार्वजस्य प्रतिजग्राह। को मे मनुष्यः प्रहरेद्वधाय। परो भावः परस्य। अक्षे परोक्षे लिटि दृश्यताम्। उत्वं वादेः परादक्ष्णः सिद्धं वास्मान्निपातनात्॥ परोक्षे॥ लट् स्मे॥ स्मपुराभूतमात्रे न स्मपुराद्यतने। स्मपुराभूतमात्रे न स्मपुराद्यतन इति वक्तव्यम्। किमयं स्मादिविधिः पुरान्तो विशेषेण भूतमात्रे भवति। तत्र वक्तव्यं स्मलक्षणः पुरालक्षणश्चाद्यतनेन भवत इति आहोस्वित् स्मलक्षणः पुरालक्षणश्चाविशेषेण भूतमात्रे भवत इति। तत्र स्माद्यर्थं न स्मपुराद्यतन इति वक्तव्यम् ॥

ष्टप्रतिवचने नन्वोर्विभाषेत्येताभ्यां तु भूतमात्रे प्रत्ययः। तत्र स्मपुरेति वार्त्तिकद्वये विधिप्रतिषेधयोरुपादानाद्भूतमात्रस्य विधानात्तस्यैव चाद्यतननिषेधद्वारेणानद्यतनलक्षणविशेषप्रतिपादनेन निषेधादेकस्मिन्विषय एकस्य विधिप्रतिषेधयोरत्यन्तविरोधात् पूर्वोक्तविषयविभाग आश्रीयते। किमयमिति। स्मपुराभूतमात्र इत्यत्र वार्त्तिके स्मपुराशब्दाभ्यां यदि पञ्चसूत्री लक्ष्यते तदा मध्यमौ योगौ भूतमात्रे भवतो न स्मपुराद्यतन इति वचनाच्च स्मपुरालक्षणो विधिरनद्यतन एव। अथ स्मपुराभूतमात्र इत्यनेन स्मपुरालक्षणस्यैव विधेर्भूतमात्रं निर्दिश्यते। न स्मपुराद्यतन इत्यत्र वार्त्तिके स्मपुराशब्दाभ्यां मध्यमौ योगौ लक्ष्येते तदा ननौ पृष्टप्रतिवचने नन्वोर्विभाषेत्येताभ्यां योगाभ्यामनद्यतन एव विधिना भवितव्यमिति प्रश्नः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं चात इति। एकतरस्मिन्वार्तिके स्मपुराशब्दावुपलक्षणत्वेनाश्रयणीयौ। तत्र पूर्वस्मिन्परस्मिन्वाविशेषमपश्यन्नाह कृति। इत
रो वार्तिकप्रत्याख्यानायमयाविकल्पितमेतदित्याह। स्मादिविधिरिति। लट् स्मे। अपरोक्षे च। पुरि लुङ् चास्मे। इत्येतेषु योगेष्वनद्य
तनग्रहणानुवृत्त्येष्टस्यार्थस्य सिद्धत्वान्न स्मपुराद्यतन इति वार्तिकं न कर्तव्यमित्यर्थः। यदि लट् स्म इत्यत्रानद्यतनग्रहणमनुव
र्तते तदा ननौ पृष्टप्रतिवचने। नन्वोर्विभाषेत्यनयोरप्यनुवर्तते अत आह। अपरोक्षानद्यतनाविति। तेन भूतमा
त्रे एताभ्यां योगाभ्यां विधिरित्यर्थः। पुरि लुङ् चास्म इत्यत्राप्यनद्यतनग्रहणनिवृत्तौ भूतमात्रे विधिः प्राप्नोतीत्याह।
न पुरेति। तत्रेति। पुरि लुङ् चास्म इत्यत्रानद्यतनग्रहणमनुवर्तत इत्येतल्लुङ्ग्रहणेन ज्ञाप्यते। यदि तु भूतमा
त्रेऽयं विधिः स्यात्तदा नन्वोर्विभाषेत्यतो विभाषाग्रहणानुवृत्त्या विकल्पेन लटो विधानात्पक्षे लुङ् भविष्यति

किं चातः। स्मादिविधिः पुरान्तो यद्यविशेषेण किं कृतं भवति। न स्मपुराद्यतन इति ब्रुवता कात्यायनेनेह स्मादिवि
धिः पुरान्तो यद्यविशेषेण भवति। किं वार्तिककारः प्रतिषेधेन करोति न स्मपुराद्यतन इति। अनुवृत्तिर
नद्यतनस्य लट् स्म इत्यत्र नास्ति न च कार्यम्। लट् स्म इत्यत्रानद्यतन इत्येतदनुवर्तिष्यते। अपरोक्षा
नद्यतनौ ननौ नन्वोश्च विनिवृत्तौ। न पुराद्यतन इति भवेदेतद्वाच्यम्। तत्रैतावद्वक्तव्यं स्यादन पुराद्यत
न इति। तत्र चापि लुङ्ग्रहणम्। तत्र चापि लुङ्ग्रहणं ज्ञापकं न पुरा लक्षणो द्यतने भवतीति। अथ बुद्धि
रियमविशेषेण स्मपुरा हेतू इति। तत्र चापि शृणु भूयः। अपरोक्षे चेत्येष प्राक् पुरि संशब्दनाद विनिवृत्तः।
सर्वत्रानद्यतनस्तथा सति न च किमत्र कार्यम्॥

किं लुङ्ग्रहणेन। अनद्यतनानुवृत्तौ तु लुङ्ग्रहणमन्तरेण पक्षे लुङ् न लभ्यते लङा बाधितत्वादिति भावः। अथ
बुद्धिरिति। लट् स्मे पुरि लुङ् चास्मे एतावाद्यन्तौ योगौ यदि भूतमात्रे भवत इत्यर्थः। स्मपुरा हेतू इति। स्मपुराशब्दौ प्रत्ययोत्पत्तेर्नि
मित्ते इत्यर्थः। तत्र चापीति। अयमर्थः। न स्मपुराद्यतन इत्ययं निषेधो यद्याद्यन्तोपलक्षितमध्यमयोगविषयस्तदा न कर्तव्य
एव। अपरोक्षग्रहणं ननौ पृष्टप्रतिवचने नन्वोर्विभाषेत्यत्रानुवर्तिष्यते। तदनुवृत्त्याऽनद्यतनग्रहणानुवृत्तिरनुमास्यते। य
स्मात्परोक्षानद्यतनयोः प्रकृतत्वेऽन्यतरनिवृत्तिर्यत्नेन क्रियमाणा द्वितीयस्यानुवृत्तिमनुमापयति। अपरोक्षग्रहणेन हि प
रोक्षाधिकारो निवर्त्यते यथाऽद्वन्द्वग्रहणं द्वन्द्वाधिकारग्रहणमित्युक्तम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमपरोक्षेचेत्येतत्सूत्रंप्रत्याख्यातुमाह।स्मादाविति।तेनस्मादिग्रहणेनस्मादिविधिःपुरान्तइत्येषपक्षोलक्ष्यते।लट्स्मइत्यादि
सूत्रेष्वपरोक्षग्रहणस्यानिवृत्तत्वादपरोक्षेचेत्येतत्सूत्रंनकर्तव्यमित्यर्थः।इदानीमाचार्यःसूत्रंसमर्थयितुमाह।स्मादेषेति।यदिलंम
न्यसेलट्स्मइत्यत्रपरोक्षग्रहणनिवृत्तौसत्यांपरोक्षेचापरोक्षेचलङ्भविष्यतीतिनार्थःपरोक्षेचेत्येतत्सूत्रेणेति।तत्रायस्मादपरोक्ष
ग्रहणमनद्यतनानुवृत्तिज्ञापनार्थंकर्तव्यम्।लट्स्मइत्ययंयोगःपरोक्षानद्यतनेवर्तते।यदिह्यत्रपरोक्षग्रहणंनिवर्तेततदातत्संब
द्धमनद्यतनग्रहणमपिनिवर्तेत।तस्मादपरोक्षेचेतिसूत्रारम्भाल्लट्स्मइत्ययंयोगःपरोक्षानद्यतनविषयोऽपरोक्षेचेत्ययमपरोक्षा
नद्यतनविषयः।पुरिलुङ्चास्मइत्ययंतुलुङ्ग्रहणादनद्यतनविषयः।मध्यमौतुभूतमात्रविषयावितिसूत्रेणैवव्यवस्थायाःसिद्धत्वा

स्मादावपरोक्षेचेत्यकार्यमपिशक्यमेतदितिविद्धि।शक्यंहिनिवर्तयितुंपरोक्षइतिलट्स्मइत्यत्र।स्मादेषात्तव
बुद्धिःस्मलक्षणेप्येवमेवसिद्धमिति।लट्स्मइतिभवेन्नार्थस्तस्मात्कार्यंपुरार्थंतु।एवंतर्हिज्ञापयत्याचार्यःस्मल
क्षणःपुरालक्षणस्यानद्यतनेभवतइति।लट्स्मे॥ननौपृष्टप्रतिवचने॥ननौपृष्टप्रतिवचनइत्यशिष्यंक्रिया
समाप्तेर्विवक्षितत्वात्।ननौपृष्टप्रतिवचनइतिअशिष्योलट्।किंकारणम्।क्रियासमाप्तेर्विवक्षितत्वात्।
क्रियायाअत्रअसमाप्तिर्विवक्षिता।एषएवन्याय्योवर्तमानःकालःयत्रक्रियायाःअसमाप्तिर्भवतितत्रव
र्तमानेलडित्येवसिद्धम्।यदिवर्तमानेलडित्येवलड्भवति।शतृशानचौचप्राप्नुतः।इष्येतेशतृशानचौ।न
नुमांकुर्वन्तंपश्य।ननुमांकुर्वाणंपश्येति॥ननौपृष्ट ॥

न्नार्थोवार्तिकारम्भेणेत्यर्थः।ननौपृष्टप्रतिवचनइत्ययंयोगोयेननाप्राप्तिन्यायेनलुङोबाधकःपरत्वेनलङ्लिटोः॥ननौपृ
ष्ट॥असमाप्तिरिति।निवृत्तायामपिपाकादिक्रियायांतत्कृतस्यश्रमादेरनुवर्तनात्तस्याएवासमाप्तिविवक्षायांलट्सिद्धइत्यर्थः
इष्येतेइत्यनेनप्रत्याख्यानंद्रढयति।यदिहिभूतार्थयोलट्क्रियेत तदावर्तमानाधिकाराद्वर्तमानेविहितस्यलटोविधीय
मानौशतृशानचावस्यलटोनस्याताम्।अथपृष्टग्रहणंकिमर्थम्।यावताप्रश्नपूर्वकमेवप्रतिवचनंभवति।नैतदस्ति।विरुद्ध
मपिवचनंवचनाभिमुख्यमपितथावचनंवचनंप्रतिप्रतिवचनमित्यनेकार्थसंभवात्पृष्टग्रहणंकर्तव्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरिलुङ्॥स्मः सर्वेभ्य इति। परविप्रतिषेधेन पूर्वविप्रतिषेधेन च। ततश्च पुरिलुङ् चास्मे इति अस्म इति न वक्तव्यं भवतीति भा
वः॥ वर्तमा॥ प्रवृत्तस्येति। इहाधीमह इत्यध्ययनं प्रवृत्तं प्रारब्धं न च तद्विरतम्। यदा च भोजनादिकां क्रियां कुर्वन्तो नाधीय
ते तदाऽधीमह इति प्रयोगो न प्राप्नोतीति वचनम्। भवन्तीति। लटः पूर्वाचार्यसंज्ञा। नित्यप्रवृत्ते चेति। पर्वतास्तिष्ठन्तीत्या

पुरिलुङ् चास्मे॥ हशश्वद्युगान्तःप्रच्छ्ये लङ् च॥ हशश्वल्लक्षणात्पुरालक्षणो भवति विप्रतिषेधेन। हशश्वल्लक्षणस्याव
काशः। इति हाकरोत्। इति ह चकार। शश्वदकरोत्। शश्वच्चकार। पुरालक्षणस्यावकाशो रथेनायं पुरा
याति। रथेनायं पुरायासीत्। इहोभयं प्राप्नोति। रथेनायं ह शश्वत्पुरायाति। रथेन ह शश्वत्पुरायासीत्। पु
रालक्षणो भवति विप्रतिषेधेन। स्मः सर्वेभ्यो विप्रतिषेधेन॥ स्मलक्षणः सर्वेभ्यो भवति विप्रतिषेधेन। ह
शश्वल्लक्षणात्पुरालक्षणाच्च। हशश्वल्लक्षणस्यावकाशः। इति हाकरोत्। इति ह चकार। शश्वदकरोत्। श
श्वच्चकार। पुरालक्षणस्यावकाशः। रथेनायं पुरायाति। रथेनायं पुरायासीत्। स्मलक्षणस्यावकाशः। ध
र्मेण स्म कुरवो युध्यन्ते। इह सर्वं प्राप्नोति। नह स्म वै पुरा शश्वदग्निरपरश्रुवृक्णं दहति। स्मलक्षणो ल
ङ्भवति विप्रतिषेधेन। पुरिलुङ्॥ वर्तमाने लट्॥ प्रवृत्तस्याविरामे शिष्या भवन्त्यवर्तमानत्वात्। प्रवृत्त
स्याविरामे शासितव्या भवन्ति। इहाधीमहे। इह वसामः। इह पुष्यमित्रं याजयाम इति। किं पुनः कारणं न
सिध्यति। अवर्तमानत्वात्। नित्यप्रवृत्ते च कालाविभागात्। नित्यप्रवृत्ते च शासितव्या भवन्ति। तिष्ठन्ति
पर्वताः। स्रवन्ति नद्य इति। किं पुनः कारणं न सिध्यति। कालाविभागात्। इह भूतभविष्यत्प्रतिद्वन्द्वो
वर्तमानः कालः। न चात्र भूतभविष्यन्तौ कालौ स्तः ॥

दौ स्थानादेः सर्वदा सद्भावात्साध्यत्वाभावात् क्रियारूपत्वाभावात्तद्धर्मस्य वर्तमानत्वस्याप्यभाव इति भावः। भूतेति। सा
ध्यस्यार्थस्यानित्यत्वादवश्यं भविष्यत्त्वेन भाव्यम्। उत्पन्नस्यापि नाशाद्भूतत्वेन भूतभविष्यत्प्रतिद्वन्द्वो वर्तमानो धा
त्वर्थो नित्यप्रवृत्तस्य भूतभविष्यत्त्वाभावाद्वर्तमानत्वाभावः क्रियारूपत्वाभावश्चेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्याय्यात्विति। अध्ययनं यदा प्रवृत्तं न चोपरतं तदा तस्य भोजनादिक्रियानान्तरीयकत्वादव्यवधायिका। अथवाध्ययनस्यैवा
वयवक्रियेति भावः। तदुक्तं हरिणा। व्यवधानमिवोपैति निवृत्त इव दृश्यते। क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः।
न च विच्छिन्नरूपोपि सोविरामान्निवर्तते। सर्वैव हि क्रियान्येन संकीर्णेवोपलभ्यते॥ तदन्तरालदृष्टा वा सर्वैवाव
यवक्रिया। सादृश्यात्तु तिभेदे तु तदङ्गत्वेन गृह्यत इति॥ नित्यप्रवृत्तस्य चेत्यस्योत्तरं सन्तीति। इहेति। प्रसिद्धपरिमाण

न्याय्यात्वारम्भानपवर्गात्। न्याय्यात्वेषा वर्तमानकालता। कुतः। आरम्भानपवर्गात्। आरम्भोत्रानपवृ
क्तः। एष एव च नाम न्याय्यो वर्तमानकालो यत्रारम्भो नपवृक्तः। अस्ति च मुक्तसंशये विरामः। यं खल्वपि
भवान्मुक्तसंशयं वर्तमानकालं न्याय्यं मन्यते भुङ्क्ते देवदत्त इति। तेनैतत्तुल्यम्। सोपि ह्यवश्यं भुञ्जानो
हसति वा जल्पति वा पानीयं वा पिबति। यद्यत्र युक्ता वर्तमानकालता दृश्यते। इहापि युक्ता दृश्यताम्।
सन्ति च कालविभागाः। सन्ति त्र खल्वपि कालविभागाः तिष्ठन्ति पर्वताः स्थास्यन्ति पर्वतास्तस्थुः पर्वता
इति। किं शक्यन्त एते शब्दाः प्रयोक्तुमित्यतः सन्ति कालविभागाः। नावश्यं प्रयोगादेव। इह हि भूतभवि
ष्यद्वर्तमानानां राज्ञां याः क्रियास्ताः तिष्ठतेरधिकरणम्। इह तावत्तिष्ठन्ति पर्वता इति संप्रति ये राजानस्ते
षां याः क्रियास्तासु वर्तमानासु। स्थास्यन्ति पर्वता इति कुरुत्तरं ये राजानो भविष्यन्ति तेषां याः क्रियास्तासु
भविष्यन्तीषु। तस्थुः पर्वता इति इह हि ये राजानो बभूवुस्तेषां याः क्रियास्तास्वतिक्रान्तासु। अपर आ
हुः। नास्ति वर्तमानः काल इति। अपि चात्र श्लोकानुदाहरन्ति ॥

क्रियैव क्रियान्तरपरिच्छेदात्काल इत्युक्तम्। तत्र राज्ञां स्थितिर्भूतादिभेदेन भिन्ना पर्वतादिस्थित्यादेर्भेदिके ति क्रि
यारूपत्वं कालत्रययोगश्चोपपन्न इत्यर्थः। उक्तं च हरिणा। परतो भिद्यते सर्वमात्मा तु न विकल्प्यते। पर्वतादिस्थितिस्त
स्मात्पररूपेण भिद्यते॥ प्रसिद्धभेदा व्यापारा विरूपावयवक्रियाः। साहचर्येण भिद्यन्ते सरूपावयवक्रिया इति।
ता इति। तासामेव कालरूपत्वात्कालस्य च क्रियाधिकरणत्वादिति भावः। नास्तीति। निष्पन्नस्यार्थस्य भूतत्वादनि
ष्पन्नस्यार्थस्य भावित्वान्निष्पन्नानिष्पन्नव्यतिरेकेण रूपान्तरस्याभावः ॥ रामः ७७

CC-0. In Public Domain. Digitization by eGangotri

नवर्ततइति। परिवर्तनक्रियायावर्तमानाया अभावादितिभावः। कूटस्थइति। स्वरूपस्थोनतुवर्तमानक्रियाविशिष्टइत्य
र्थः। अतएवाह। नविचेष्टितेति। व्यापारस्यनकर्तेत्यर्थः। एवंयोवेत्तिसोप्यनन्धः किंपुनर्योऽनुष्ठातायोगीत्यर्थः। सह्यविद्वत
मात्मतत्त्वंभावयन्प्रत्यक्षीकरोति। तथाचोक्तंभगवता। ज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनः। तेषामादित्यवज्ज्ञानंप्रकाशय
तितत्परमिति। मीमांसकइति। विचारकः। युवेत्यनेनप्रज्ञायांपाटवंदर्शयति। मेधाविसंमतइति। मेधावीचासौसंमतश्चेतिक
र्मधारयः। षष्ठीसमासस्यतुक्तेनचपूजायामितिनिषेधात्। पतितलक्षणमिति। पातः पतिततंतस्यकिंरूपंनास्त्येवपतनक्रि
येत्यर्थः। अनागतइति। अनागतत्वादेवासत्त्वात्पातक्रियायाः पतसीतिव्यपदेशोऽनुपपन्नइत्यर्थः। अतिक्रान्तइति। तथैव
क्रियाया असत्त्वात्। सर्वोलोकइति। क्रियायावर्तमानत्वाभावेपियदिपतसीतिव्यपदेशस्तदाविशेषाभावात्सर्वतादावपिप

नवर्ततेचक्रमिषुर्नपात्यतेनस्यन्दन्तेसरितः सागराय। कूटस्थोयंलोकोनविचेष्टितास्तियोह्येवंपश्यति
सोप्यनन्धः॥ मीमांसकोमन्यमानोयुवामेधाविसंमतः। काकेसेहाऽप्रच्छतिकिंतेपतितलक्षणम्॥ अनाग
तेनपतसिअतिक्रान्तेचकाकता॥ यदिसंप्रतिपतसिसर्वोलोकः पतत्ययम्। हिमवानपिगच्छति। अनागत
मतिक्रान्तंवर्तमानमितित्रयम्। सर्वत्रचगतिर्नास्तिगच्छतीतिकिमुच्यते। क्रियाप्रवृत्तौयोहेतुस्तदर्थंय
द्विचेष्टितम्। तत्समीक्ष्यप्रयुञ्जीतगच्छतीत्यविचारयन्॥ अपरआह। अस्तिवर्तमानः कालइति। आ
दित्यगतिवन्नोपलभ्यतइति ॥

तसीतिव्यदेशप्रसङ्गइत्यर्थः। अनागतमिति। एकएवक्षणउपलभ्यतेनातीतोनाप्यनागतोनचैकक्षणस्यगमनादिक्रियावेश
संभवतीतिभावः। सर्वत्रेति। कालवृत्तित्वाविवक्षायांदाप्रत्ययोनकृतः। क्रियाप्रवृत्ताविति। परिहारः। हेतुः प्रयोजनंगमनस्यदे
शान्तरप्राप्तिस्तदर्थंफलार्थमित्यर्थः। दृढप्रत्यभिज्ञानात्क्षणभङ्गनिरासेदेवदत्तस्यदेशान्तरप्राप्तिर्निर्हेतुकानसंभवतीतिग
मनक्रियैवतस्यानिमित्तम्। तदालम्बनश्चगच्छतीतिप्रत्ययोऽबाधितउत्पद्यतइतिसत्त्वंतावदवगम्यतेक्रियायाः वर्तमानत्वाभा
वेचभूतभविष्यतोरप्यभावप्रसङ्गोवर्तमानोभूतत्वंभविष्यत्त्वंचप्रतिपद्यते। तत्रानेकक्षणसमूहात्मकंक्रियासंबन्धरूपंबुद्ध्या
संकलय्यगच्छतीत्यादिप्रयुज्यतइत्यर्थः। अविचारयन्निति। कुविकल्पकलङ्करहितमित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विसस्येति। विसस्यवाला विसे दह्यमाने दह्यमाना अपि न प्रत्यक्षं दह्यमानत्वेनावसीयन्ते। किं तर्ह्यनुमानेन विसान्तर्ग
तत्वात्तद्दाहे तेषामपि दाहः प्रतीयते। तथा कारकसंनिपात एकैकक्षणग्रहणे क्रियावेशलक्षणा विकृतिः प्रत्यक्षेण लक्ष्य
ते। तां तु त्रिभावा अस्तीति निश्चिन्वन्ति। त्रिषु कालेषु भावो भावना येषां ते त्रिभावा योगिनो ये भावनावशेनातीतानपि कालान्
योगिप्रत्यक्षेण विदन्ति। सूक्ष्म इति। अनेकक्षणसमूहात्मकस्य धातुवाच्यस्य अर्थस्य क्रियारूपस्य युगपदसंनिधाना
दनुमीयत इत्यर्थः॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे तृतीयस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्॥

अपि चात्र श्लोकमुदाहरन्ति। विसस्य वाला इव दह्यमाना नलक्ष्यते विकृतिः सन्निपाते। अस्तीति तां वेदयन्ते
त्रिभावाः सूक्ष्मो हि भावोऽनुमितेन गम्यते। इति। वर्तमाने लट्॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याक
रणमहाभाष्ये तृतीयाध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्॥ लटः शतृशानचावप्रथमासमानाधिकर
णे॥ लस्याप्रथमासमानाधिकरणेनायोगादादेशानुपपत्तिर्यथान्यत्र। लस्य अप्रथमासमानाधिकरणे
नायोगादादेशयोरनुपपत्तिर्यथान्यत्र। तद्यथा। अन्यत्रापि लस्याप्रथमासमानाधिकरणेन योगो न भव
ति। क्वान्यत्र। लङि। अपचदोदनं देवदत्त इति। योग इति चेदन्यत्रापि योगः स्यात्। अथ मतमेतत्। भव
ति योग इति। अन्यत्रापि योगः स्यात्। क्वान्यत्र। लङि। अपचदोदनं देवदत्त इति ॥

लटः शतृ॥ लस्येति। इहायं लकारो लः कर्मणि च भावे चेत्यनेन कर्तृकर्मणोर्विधीयमानो गुणभूते क्रियां प्रति कर्तृ
कर्मणी प्रतिपादयति। तथा च पचत्योदनं देवदत्त ओदनः पच्यते देवदत्तेनेति क्रियाप्रधानत्वात् क्रियान्तरयो
गाभावाच्छक्त्यन्तरावेशाभावः। अन्ये तु कृतः प्राधान्येन कर्त्रादीनि प्रतिपादयन्ति तथा च क्रियान्तरयोगे शक्त्य
न्तरावेशो भवति। पाचकं पश्य पक्वेन तृप्त इति। ततश्च लङादिवल्लटोऽपि क्रियान्तरयोगाभावाद्द्वितीयाद्यनुत्प
त्तावप्रथमान्तेन सामानाधिकरण्यं नोपपद्यत इत्यर्थः। अपचदिति। तथा चापचदोदनं देवदत्तं पश्येत्यादि
प्रसज्येतेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नक्वचिदिति। तिङ्भाविनो लकारस्य गुणभूतकर्त्राद्यभिधानस्य। शत्रादिविषयस्य तु क्रियोपसर्जनकर्त्राद्यभिधानम्। तथा च क्रियान्तरनिमित्तद्वितीयादिसामानाधिकरण्योपपत्तिरित्यर्थः। शक्यं कर्तुमिति। प्रतिपत्तुमित्यर्थः॥ अयं वेति। सिद्धानां शब्दानामिदमन्वाख्यानं प्रवृत्तम्। तत्र पचन्तं देवदत्तं पश्येत्यादिप्रयोगदर्शनात्स्थानिनोपि लटः प्रक्रियार्थं विहितस्याप्रथमासामानाधिकरण्यमनुमीयत इत्यर्थः। विषम इति। अग्निधूमयोर्हि प्रत्यक्षेण संबन्धो गृह्यते। लकारस्य तु प्रयोगाभावादप्रथमासामानाधिकरण्यं न क्वचिदुपलब्धमिति भावः। भवतीति। यद्यपि लटः प्रयोगादप्रथमासामानाधिकरण्य

नक्वचिद्योग इति कृत्वातः सर्वत्रयोगेन भवितव्यम्। क्वचिद्वाऽयोग इति कृत्वा सर्वत्रायोगेन। तद्यथा। समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते अपरे न। न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुं कश्चिद्वानर्थक इति सर्वैरनर्थकैः। तत्र किमस्माभिः शक्यं कर्तुं यल्लटः प्रथमासमानाधिकरणेन योगो भवति लङो न भवति। स्वाभाविकमेतत्। अथवाऽऽदेशेन सामानाधिकरण्यं दृष्ट्वानुमानाद्गन्तव्यं प्रकृतेरपि सामानाधिकरण्यं भवतीति। तद्यथा। धूमं दृष्ट्वाग्निरत्रेति गम्यते। त्रिविष्टब्धकं दृष्ट्वा परिव्राजक इति। विषम उपन्यासः। प्रत्यक्षस्तेनाग्निधूमयोरभिसंबन्धः कृतो भवति। त्रिविष्टब्धकपरिव्राजकयोश्च। स तद्विदेशस्थमपि दृष्ट्वाध्यवस्यति अग्निरत्र परिव्राजकोऽत्रेति। भवति वै प्रत्यक्षादप्यनुमानं बलीयस्त्वम्। तद्यथाऽलातचक्रं प्रत्यक्षं दृश्यते अनुमानाच्च गम्यते नैतदस्तीति ॥

भावः प्रत्यक्षेण निश्चीयते तथापि प्रत्यक्षस्यान्यथासिद्धत्वाल्लकारप्रयोगनिमित्तत्वाद्भावग्राहिणो बाध्यत्वमनन्यथासिद्धेन तु सामान्यतो दृष्टेनानुमानेन लटः प्रथमासामानाधिकरण्यावगमो न ह्यन्यथादेशस्य तदुपपद्यत इति भावः। तद्यथेति। आशुसंचाराच्चक्रभ्रान्तिरुत्पद्यते। रूपसहचारिणस्तु स्पर्शस्यानेकदिक्कस्य युगपद्ग्रहणादनन्यथासिद्धानुमानेन प्रत्यक्षाभासो बाध्यते। तदुक्तं हरिणा। स्पर्शप्रबन्धो हस्तेन यथा चक्रस्य संततः। न तथालातचक्रस्य विच्छिन्नं स्पृश्यते हि तदिति ॥

CC-0. In Public Domain. Digitization by eGangotri

कस्यचिदिति। नभूयोदर्शनेनसंबन्धग्रहणमपितुसकृद्दर्शनेनापीत्यर्थः। वृक्षपर्णयोरिति। भाष्यकारवचनप्रामाण्याज्जाति
रप्राणिनामित्येकवद्भावोनकृतः। किंपुनरिति। यद्यपिप्रसज्यप्रतिषेधेवाक्यभेदाद्दोषप्रसङ्गस्तथापिलक्ष्यसिद्धयेशास्त्रे
क्वचित्स्वाङ्गीकृतइतिविचार्यते। कौर्वतइति। कुर्वतोदेवदत्तस्यापत्यमित्यत्रसापेक्षत्वात्तद्धितोनोत्पद्यते। पदान्तरनिरपेक्षे
त्वपदान्तरेणसामानाधिकरण्याभावादादेशाप्रसङ्ग इतिभावः। कुर्वद्भक्तिरिति। षष्ठीसमासः। समानाधिकरणसमासेतुप्रस

कस्यचित्त्वल्वपिसकृत्कृतोभिसंबन्धोऽत्यन्तायकृतोभवति। तद्यथा। वृक्षपर्णयोरयंवृक्षइदंपर्णमितिसकृद्दि
देशास्थमपिदृष्ट्वाजानातिवृक्षस्येदंपर्णमिति। किंपुनरयंपर्युदासोयदन्यत्प्रथमासमानाधिकरणादितिआहोस्वित्
प्रसज्यप्रतिषेधःप्रथमासमानाधिकरणेनेति। कश्चात्रविशेषः। लटःशतृशानचावप्रथमासमानाधिकरणेइतिचे
त्प्रत्ययोत्तरपदयोरुपसंख्यानम्। लटःशतृशानचावप्रथमासमानाधिकरणइतिचेत्प्रत्ययोत्तरपदयोरुप
संख्यानंकर्तव्यम्। कौर्वतःपाचतःकुर्वद्भक्तिःपचद्भक्तिःकुर्वाणभक्तिःपचमानभक्तिरिति। अस्तुतर्हिप्रसज्यप्र
तिषेधःप्रथमासमानाधिकरणेनेति। प्रथमाप्रतिषेधेउत्तरपदेआदेशानुपपत्तिः। प्रथमाप्रतिषेधेउत्तरपदेआ
देशयोरनुपपत्तिः। कुर्वतीचासौभक्तिश्चकुर्वद्भक्तिःपचद्भक्तिःकुर्वाणभक्तिःपचमानभक्तिरिति। येचाप्येतेसमा
नाधिकरणवृत्तयस्तद्धितास्तेषुशतृशानचौप्राप्नुतः। कुर्वत्तरःकुर्वाणतरःपचमानतरःकुर्वद्रूपःपचद्रूपःकुर्वाण
रूपःपचमानरूपःकुर्वत्कल्पःपचत्कल्पःकुर्वाणकल्पःपचमानकल्पइति। सिद्धंतुप्रत्ययोत्तरपदयोश्चेतिवच
नात्। सिद्धमेतत्। कथम्। प्रत्ययोत्तरपदयोश्चशतृशानचौभवतइतिवक्तव्यम्। तत्रप्रत्ययस्यादेशनिमित्त
त्वात्प्रसिद्धिः। तत्रप्रत्ययस्यादेशनिमित्तत्वादप्रसिद्धिः। आदेशनिमित्तःप्रत्ययःप्रत्ययनिमित्तश्चादेशःत
देतदितरेतराश्रयंभवति। इतरेतराश्रयाणिचनप्रकल्पन्ते ॥

ज्यप्रतिषेधेपिदोषः। सचवक्ष्यतएव। कुर्वत्तरइति। अत्रदेवदत्तादिनापदान्तरेणसामानाधिकरण्यादादेशाप्रसङ्गः।
पूर्वस्मिन्नपिपक्षेएषदोषः। सिद्धंत्विति। लक्षणशेषःकर्तव्यइत्यर्थः। पृथगुत्तरपदग्रहणमन्तरङ्गानपिविधीन्बहिरङ्गो
लुग्बाधतइतिलुकिकृतेप्रत्ययलक्षणप्रतिषेधादप्रत्ययपरत्वार्थम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तरपदनिमित्तइति। सत्युत्तरपदे शतृशानचौ भवतः तयोश्च कृत्त्वात् सुबुत्पत्तिः सुन्निमित्तः समासः समासनिमित्तं चोत्तरपदमित्यर्थः। नवेति। लस्य कृत्त्वात् सुबुत्पत्तौ सत्यामणादिषु तरबादिषु चोत्पन्नेष्वादेशविधानमिति नास्तीतरेतराश्रयदोष इत्यर्थः। उत्तरपदे इतरेतराश्रयं परिहरति। तिङादेशादिति। वीक्ष्यमाणस्येति। अत्राकृते शानच्यकारान्तत्वाभावादि

उत्तरपदस्य च सुबन्तनिमित्तत्वाच्छतृशानचोरप्रसिद्धिः। उत्तरपदस्य च सुबन्तनिमित्तत्वाच्छतृशानचोरप्रसिद्धिः उत्तरपदनिमित्तः सुप् सुबन्तनिमित्तं चोत्तरपदम्। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च न प्रकल्पन्ते। न वा लकारस्य कृत्त्वात् प्रातिपदिकत्वं तदाश्रयं प्रत्ययविधानम्। न वा एष दोषः। किं कारणम्। लकारस्य कृत्त्वात् प्रातिपदिकत्वम्। लकारः कृत्। कृत् प्रातिपदिकमिति प्रातिपदिकसंज्ञा। तदाश्रयं विधानम्। प्रातिपदिकाश्रयात्स्वाद्युत्पत्तिर्भविष्यति। तिङादेशात् सुबुत्पत्तिः। तिङादेशः क्रियतां सुबुत्पत्तिरिति। परत्वात्सुबुत्पत्तिर्भविष्यति। तस्मादुत्तरपदप्रसिद्धिः। तस्मादुत्तरपदस्य प्रसिद्धिर्भविष्यति। उत्तरपदे प्रसिद्धे उत्तरपद इति शतृशानचौ भविष्यतः। इहापि तर्हि तिङादेशात् सुबुत्पत्तिः स्यात् पचति पठतीति। अस्त्यत्र विशेषः। नित्योऽत्र तिङादेशः। उत्पन्नेऽपि सुपि प्राप्नोत्यनुत्पन्नेऽपि प्राप्नोति। नित्यत्वात् तिङादेशे कृते सुबुत्पत्तिर्न भविष्यति। इहापि तर्हि नित्यत्वात्तिङादेशः स्यात्। कुर्वद्भक्तिः पचद्भक्तिः कुर्वाणभक्तिः पचमानभक्तिरिति। अस्त्यत्र विशेषः। शतृशानचौ तिङपवादौ तौ चात्र निमित्तवन्तौ। न चापवादविषय उत्सर्गोऽभिनिविशते। पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः। प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते। न तावदत्र कदाचित्तिङ् भवति। अपवादौ शतृशानचौ प्रतीक्षते। तदेतत् कृसिद्धं भवति। यत्र सामान्यादुत्पत्तिः। यत्र हि विशेषादिति तद्द्विजितिइतरेतराश्रयमेव तत्र भवति। वीक्ष्यमाणस्यापत्यं वैक्ष्यमाणिरिति। इह च शतृशानचौ प्राप्नुतः पचतितरां जल्पतितरां पचतिरूपं जल्पतिरूपं पचतिकल्पं जल्पतिकल्पं पचति पठतीति ॥

ऽप्रसङ्ग इत्यर्थः। पचतितरामिति। तिङश्चेत्येतत्तु लकारान्तरार्थं स्यादपचत्तरामिति। पचतीति। अत्रापि लस्य कृत्त्वात् सुबुत्पन्ने प्रत्यये विधीयमान आदेशः स्यादित्यर्थः। तिङां तु लिङादयो वकाशाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेतदिति। व्यवस्थितविभाषाविज्ञानाच्चयथेष्टंप्रयोगसिद्धिः। ननर्हीति। व्यवस्थितविभाषयैवसिद्धत्वान्नित्ययोरादेशयोर्वि
विभावः। नित्यार्थमिति। लटः शतृशानचावित्येकोयोगः क्रियतेतत्रविभाषेतिवर्तते। ततोप्रथमासमानाधिकरणइतिद्विती
योयोगोनित्यार्थोव्यवस्थितविभाषाश्रयेणतुविस्पष्टाप्रतिपत्तिर्नस्यादितितदर्थोद्वितीयोयोगः॥ लक्षण॥ गुणादिति। गुणशब्दे

तदेतत्कथंकृत्वासिद्धंभवति। शतृशानचौयदिलटोवा। यदिलटः शतृशानचौवाभवतः। व्यवस्थितविभाषा
च। तेनेहचभविष्यतः। कौर्वतः पाचतः कुर्वद्भक्तिः पचद्भक्तिः पचमानभक्तिः कुर्वत्तरः पचत्तरः पचमानतरः कु
र्वद्रूपः पचद्रूपः पचमानरूपः कुर्वत्कल्पः पचत्कल्पः पचमानकल्पः पचन्पठन्निति च लटः शतृशानचौ। इहच
नभविष्यतः। पचतितरांजल्पतितरांपचतिरूपंजल्पतिरूपंपचतिकल्पंजल्पतिकल्पंपचतिपठतीतिचल
टः शतृशानचौ। तत्तर्हिवावचनंकर्तव्यम्। नकर्तव्यम्। प्रकृतमनुवर्तते। क्वप्रकृतम्। नन्वोर्विभाषेति। यदितद
नुवर्ततेवर्तमानेलडितिलडपिविभाषाप्राप्नोति। संबद्धमनुवर्तिष्यते। नन्वोर्विभाषा। पुरिलुङ्चास्मेविभाषा। व
र्तमानेलट्। पुरिलुङ्चास्मेविभाषा। लटः शतृशानचौविभाषा। पुरिलुङ्चास्मइति निवृत्तम्। नतर्हीदानीम
प्रथमासमानाधिकरणइतिवक्तव्यम्। वक्तव्यंच। किंप्रयोजनम्। नित्यार्थम्। अप्रथमासमानाधिकरणेनि
त्यौशतृशानचौयथास्याताम्। क्वतर्हीदानींविभाषा। प्रथमासमानाधिकरणेपचन्पचतीति। पचमानः प
चतेइति। लटः शतृशानचावप्रथमासमानाधिकरणे॥ लक्षणहेत्वोः क्रियायाः॥ लक्षणहेत्वोः क्रियायागुणउ
पसंख्यानम्॥ लक्षणहेत्वोः क्रियायागुणउपसंख्यानंकर्तव्यम्। तिष्ठन्मूत्रयतिगच्छन्भक्षयतीति। कर्तृत्वलक्ष
णयोः पर्यायेणाचयोगे। कर्तृत्वलक्षणयोः पर्यायेणाचयोगउपसंख्यानंकर्तव्यम्। योधीयानआस्तेसदेवदत्तइति।
आसीनोधीतेसदेवदत्तइति। अचयोगइतिकिमर्थम्। यआस्तेचाधीतेचसचैत्रः ॥

नात्रसाधनमुच्यते। तिष्ठन्मूत्रयतीत्यादौयदास्थानादिनामूत्रादिक्रियालक्ष्यतेतदासूत्रेणैवादेशसिद्धिः। यदातुकारकंलक्ष्य
तेतदर्थमिदंवचनम्। बहुषुमूत्रयत्सुकोदेवदत्तइत्युक्तेयस्तिष्ठन्मूत्रयतीतिप्रतिवचनेनदेवदत्तोलक्ष्यते। अथवाअशोचादिगु
णोगृह्यते। कर्तृत्वेति। यदापूर्ववाक्येगुणः साधनंगृह्यतेतदातेनैवसिद्धेपर्यायार्थः। यदात्वशौचादेर्गुणस्यतत्रग्रहणंतदाविध्यर्थः॥ राम: ८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्त्वाख्यानइति। स्वभावाख्यानेविनापिलक्ष्यलक्षणभावेनेत्यर्थः। नह्यासनंवृद्धेर्लक्षणंकिंतर्हिस्वभावमात्रकथनमासीनंविस
मिति। सदादयश्चेति। वाग्रहणस्यायंप्रपञ्चः। सच्छब्दोविद्यमानवाचीतिसत्सदृशाःसदादिशब्देनोपात्तानान्यदित्याह। इङ्जुहो
त्योश्चेति। माङ्याक्रोशइति। लुङिप्राप्तेस्मादेवादेशविधानाल्लुडनुमीयते। तिष्ठतिक्रियेति। स्थितिक्रियालक्षितातुमूत्रणक्रिया।
यस्तिष्ठन्मूत्रयतिसदेवदत्तइतिसर्वनामपरामर्शेदेवदत्तस्यलक्षणंतद्भूतस्यवाशौचादेरितिभावः। नैतदिति। समुच्चीयमानंक्रिया

तत्त्वाख्यानेच॥ तत्त्वाख्यानेचोपसंख्यानंकर्तव्यम्। शयानावर्धते दूर्वाआसीनंवर्धतेबिसमिति। सदादयश्चबहुल
म्। सदादयश्चबहुलमितिवक्तव्यम्। सन्ब्राह्मणः। अस्तिब्राह्मणः। विद्यतेब्राह्मणः। विद्यमानोब्राह्मणः। इङ्जुहोत्योर्वा॥
। इङ्जुहोत्योर्वेतिवक्तव्यम्। अधीतेअधीयानः। जुहोतिजुह्वत्। माङ्याक्रोशे॥ माङ्याक्रोशइतिवक्तव्यम्। मापच
न्। मापचमानः। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। लक्षणहेत्वोःक्रियायाइत्येवसिद्धम्। इहतावत्तिष्ठन्मूत्रयती
ति। तिष्ठतिक्रियामूत्रयतिक्रियायालक्षणम्। गच्छन्भक्षयतीतिगच्छतिक्रियाभक्षयतिक्रियायालक्षणम्। योऽ
धीयानआस्तेसदेवदत्तइति। अध्ययनक्रियाआसनक्रियायालक्षणम्। यआसीनोधीतेसदेवदत्तइति। आ
सिक्रियाऽध्ययनक्रियायालक्षणम्। इदंतर्हिप्रयोजनम्। अचयोगइतिवक्ष्यामीति। यआस्तेचाधीतेचसचैत्र
इति। नैतदस्तिप्रयोजनम्। नैतत्क्रियालक्षणम्। किंतर्हि। कर्तृलक्षणमेतत्। शयानावर्धतेदूर्वेति। शेतिक्रिया
वृद्धिक्रियायालक्षणंभवति। आसीनंवर्धतेबिसमितिआसिक्रियावृद्धिक्रियायालक्षणमिति। सदादयश्चबहुल
म्। इङ्जुहोत्योर्वा। माङ्याक्रोशइत्येतद्वक्तव्यमेवेति। लक्षणहेत्वोः॥ तौसत्॥ तौग्रहणंकिमर्थम्। शतृशान
चौप्रतिनिर्दिश्येते। नैतदस्तिप्रयोजनम्। प्रकृतौशतृशानचावनुवर्तिष्येते। क्वप्रकृतौ। लटःशतृशानचावप्रथ
मासमानाधिकरणइति। अतउत्तरंपठति। तौसदितिवचनमसंसर्गार्थम्। तौग्रहणंक्रियतेअसंसर्गार्थम्। असं
सक्तयोरेतैर्विशेषैःशतृशानचोःसत्संज्ञायथास्यादिति ॥

द्वयंपरस्परस्यालक्षणंकर्तृविशेषस्यलक्षणमित्यर्थः। शेतिक्रियेति। तत्त्वाख्यानमपिलक्षणंभवति। यथाचैतन्यलक्षणःपुरुषइति
भावः॥ तौसत्॥ तौग्रहणमिति। शतृशानचोरनुवर्तनादेवसंज्ञाभविष्यतीतिप्रश्नः। शतृशानचाविति। असतितौग्रहणेप्रत्ययविधिरयं
स्यान्नतुसंज्ञाविधिरितिभावः। तौसदिति। तच्छब्देनशतृशानचोरूपमात्रंपरामृश्यतइतिलट्स्थानिकत्वादिधर्मासंबद्धयोरपिसंज्ञाभव
तीत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु चेति। अस्वरितत्वाद्नेपेक्षणा चेति भावः। भूते इति। वर्तमानसामीप्ये वर्तमानवद्वेति वचनाद्भूतेपि शतृशानचौ भवतः। किंपुनरिति। अतिदेशाद्भूते शतृशानचौ भविष्यतः। लृटः सद्वेति वचनाद्भविष्यत्यपीति प्रश्नः। पूरणेति। वर्तमानवदित्यतिदेशाद्विधानमेव भूते शतृशानचोः स्यान्न तु संज्ञा। प्रत्ययाधिकाराद्धि प्रत्यय एवातिदिश्यते न तु संज्ञा। तथा लृटः सद्वेति सत्संज्ञकप्रतिरूपकविधानं स्यात्। यथा पिष्टपिण्डाः सिंहाः क्रियन्तामिति तदाकाराः क्रियन्ते। विहितयोस्तु तयोः सत्संज्ञानिबन्धनकार्यप्रसङ्गः। अथेति। संनिहितस्यैव वस्तुनः सर्वनाम्ना परामर्शादिति प्रश्नः। यद्यप्यनुवृत्त्या प्रकृतयोः संज्ञासिद्धौ तौग्रहणं क्रियते तथापि न प्रयोजनानुवर्तिप्रमाणमपि तु प्र

ननु चैते विशेषा निवर्तन्ते। यद्यप्येते विशेषा निवर्तन्ते। अयं तु खलु वर्तमानः कालोऽवश्यमुत्तरार्थो ऽनुवर्त्यः। तस्मिन्नु वर्तमाने वर्तमानकालविहितयोरेव शतृशानचोः सत्संज्ञा स्यात्। भूतभविष्यत्कालविहितयोर्न स्यात्। किंपुनर्भूतभविष्यत्कालविहितयोः सत्संज्ञावचने प्रयोजनम्। प्रयोजनं पूरणगुणसुहितार्थसदिति। ब्राह्मणस्य पक्ष्यन्। ब्राह्मणस्य पक्ष्यमाणः। अथ क्रियमाणेपि तौग्रहणे कथमेवासंसक्तयोरेतैर्विशेषैः सत्संज्ञा लभ्या। लभ्येत्याह। कथम्। ताविति शब्दतः। सदिति योगविभागे क्रियमाणे तौग्रहणं योगाङ्गमुपजायते। सति च योगाङ्गे योगविभागः करिष्यते। तौ। तावेतौ शतृशानचौ धातुमात्रात्परस्य प्रत्ययस्य भवतः। ततः सत्। सत्संज्ञौ भवतः शतृशान चाविति। इहापि तर्हि प्राप्नुतः कारको हारक इति। अवधारणं लृटि विधानम्। लृटः सद्वेति नियमार्थं भविष्यति। लृट एव धातुमात्रात्परस्य नान्यस्येति। कैमर्थक्यान्नियमो भवति। विधेयं नास्तीति कृत्वा। इह चास्ति विधेयम्। किम्। नित्यौ शतृशानचौ प्राप्तौ तौ विभाषा विधेयौ। तत्रापूर्वो विधिरस्तु नियमोस्त्विति। अपूर्व एव विधिः स्यान्न नियमः। योगविभागतश्च विहितं सत् ॥

माणानुवर्तिप्रयोजनमिति क्रियमाणमपि तौग्रहणं प्रयोजनसंपादनायनालमिति भावः। ताविति शब्दत इति। शब्देनैवाभिमतोर्थः सति योगविभागे लभ्यत इत्यर्थः। तावेताविति। पूर्वसूत्रे तयोरादेशत्वाद्धातोः प्रादेशयोरेव विधानमिति भावः। कारक इति। तृजादीनां विधानसामर्थ्याच्छतृशानचौ न भविष्यतः क्विबादीनामपि लोपविधानसामर्थ्यादिति यः प्रत्यय आदेशेन निवर्त्यते तस्य तदादेशापवादौ शतृशानचौ प्राप्नुत इत्यभिप्रायेण ण्वुलुदाहृतः। एवं च नन्दनाद्यप्युदाहार्यम्। युवोरनाकाविती त्यस्य तु तद्धितोऽवकाशः ॥ रामः ८१

CC-0. In Public Domain. Digitization by eGangotri

तन्नवक्तव्यमिति। कथमिति चेदुच्यते। तावित्यत्र योगे प्रथमासमानाधिकरणादीन् विशेषाननुवर्त्य शतृशानचौ विधीयेते तावेव
चलटः सदित्यनेन नियम्येते। वेत्यनेन तु प्रथमासमानाधिकरणादौ लटद्व विकल्पेन विधीयेते। शत्रानाविति। इङ्धार्योः शत्र
कृच्छ्रिणि पूङ्यजोः शानन् ताच्छील्यवयोवचनशक्तिषु चानशिति प्रत्ययानां ग्रहणं तत्र लटोऽनुवृत्त्यननुवृत्तिभ्यां पक्षद्वयसंभवः

एवं तर्हि योगविभागः करिष्यते। लृटः सत्। लृटः संसंज्ञकौ भवतः। किमर्थमिदम्। नियमार्थम्। लृट एव धातुमा
त्रात्परस्य नान्यस्येति। ततो वा। वा च लृटः शतृशानचौ सत्संज्ञौ भवतः। तत्रायमप्यर्थः। सद्विधिर्नित्यमप्रथमास
मानाधिकरण इति वक्ष्यति तन्न वक्तव्यं भवति। अथ यावेतावुत्तरौ शत्रानौ किमेतौ लादेशौ आहोस्विदलादेशौ।
कश्चात्र विशेषः। उत्तरयोर्लादेशे वावचनम्॥ उत्तरयोर्लादेशे वावचनं कर्तव्यम्। पचमानः यजमानः पचते यज
त इत्यपि यथा स्यात्। साधनाभिधानं च॥ साधनाभिधानं च प्राप्नोति। लः कर्मणि च भावे चाकर्मकेभ्य इति भावकर्म
णोरपि प्राप्नुतः। स्वरः। स्वरश्च साध्यः। कतीह पचमानाः। अदुपदेशाल्लसार्वधातुकमनुदात्तं भवतीत्येष स्वरः प्राप्नोति।
उपग्रहप्रतिषेधश्च॥ उपग्रहस्य च प्रतिषेधो वक्तव्यः। कतीह निघ्नानाः तङानावात्मनेपदमित्यात्मनेपदसंज्ञा प्राप्नो
ति। स्तां तर्हि अलादेशौ। अलादेशे षष्ठीप्रतिषेधः॥ अलादेशे षष्ठीप्रतिषेधो वक्तव्यः। सोमं पवमानः। नटमाघ्नानः। अधी
यन्पारायणम्। लप्रयोगे नेति प्रतिषेधो न प्राप्नोति। माभूदेवं तृन्नित्येवं भविष्यति। कथम्। तृन्निति नेदं प्रत्य
यग्रहणं किं तर्हि प्रत्याहारग्रहणम्। क्व संनिविष्टानां प्रत्याहारः। लटः शतृ इत्यत आरभ्यात् तृनो नकारात्। य
दि प्रत्याहारग्रहणं चोरस्य द्विषन् वृषलस्य द्विषन् अत्रापि प्राप्नोति। द्विषः शतुर्वावचनम्॥ द्विषः शतुर्वेति
वक्तव्यम्। तच्चावश्यं वक्तव्यम्। प्रत्ययग्रहणे सति प्रतिषेधार्थम्। तदेव प्रत्याहारग्रहणे सति विध्यर्थं
भविष्यतीति। तौसत् ॥

उत्तरयोरिति। लादेशेषु वासरूपविधिर्नास्तीत्युक्तत्वादिति भावः। साधनाभिधानं चेति। तदानिष्टस्यापि साधनस्याभि
धानं प्राप्नोति कर्तुरेव चेष्यते। स्वर इति। चित्करणं तु निघ्नानादित्यादौ सावकाशम्। उपग्रहस्येति। आत्मनेपदसंज्ञाया इ
त्यर्थः। अन्यथा परस्मैपदिभ्यश्चानश् न स्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृन्॥ तृन्विधाविति। अताच्छील्यार्थमिदम्। प्रशास्तेति। तृजेव भवति। तृंस्तृचौ शास्तिक्षदादिभ्यः संज्ञायां चानिटाविस्यनेन। स्वरेच विशेषः। तृनिताद्दौच निति कृत्यता विति गतेः प्रकृतिस्वरो भवति। तृचि कृत्स्वरः। नवेति। नयतेस्तुग्क्ङिति गुणो न स्यात्। नेषतेस्तु

तृन्॥ तृन्विधावृत्विक्षु चानुपसर्गस्य॥ तृन्विधावृत्विक्षु चानुपसर्गस्येति वक्तव्यम्। होता पोता। अनुपसर्गस्येति किमर्थम्। प्रशास्ता प्रतिहर्ता। नयतेः षुक्॥ नयतेः षुग्वक्तव्यः। तृंश्च प्रत्ययो वक्तव्यः। नेष्टा। न वा धात्वन्यत्वात्॥ न वा वक्तव्यः। किं कारणम्। धात्वन्यत्वात्। धात्वन्तरं नेषतिः। कथं ज्ञायते। नेषतु नेष्टादिति दर्शनात्। नेषतु नेष्टादिति हि प्रयोगो दृश्यते। इन्द्रो वस्तेन नेषतु। ग्रावो नेष्टात्। त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वं च॥ त्विषेर्देवतायां तृन्वक्तव्यः। अकारश्चोपधाया अनिट्त्वं च वक्तव्यम्। त्वष्टा। किं पुनरिदं त्विषेरेवानिट्त्वम्। नेत्याह। यच्चानुक्रान्तं यच्चानुक्रंस्यते सर्वस्यैष शेषो निट्त्वं चेति। क्षदेश्च युक्ते॥ क्षदेश्च युक्ते तृन्वक्तव्यः। क्षत्ता। छन्दसि तृच्च॥ छन्दसि तृच्च वक्तव्यः। क्षतृभ्यः संगृहीतृभ्यः। क्षतृभ्यः संगृहीतृभ्यः॥ ग्लाजिस्थश्च ग्स्नुः। क्नोः कित्त्वे स्थ ईकारप्रतिषेधः॥ क्नोः कित्त्वे स्थ ईकारस्य प्रतिषेधो वक्तव्यः। स्थास्नुरिति। घुमास्थेतीत्वं प्राप्नोति। एवं तर्ह्यकित्करिष्यते। अकिति गुणप्रतिषेधः। यद्यकित्क्रियते गुणप्रतिषेधो वक्तव्यः। जिष्णुरिति। भुवश्च इट्प्रतिषेधश्च॥ भुवश्च इट्प्रतिषेधो वक्तव्यः। किं चान्यत्। गुणप्रतिषेधश्च। भूष्णुरिति। अस्तु तर्हि कित्। ननु चोक्तम्। क्नोः कित्त्वे स्थ ईकारप्रतिषेध इति। नैष दोषः। स्थादंशिभ्यां स्नुश्छन्दसि॥ स्थादंशिभ्यां स्नुश्छन्दसि वक्तव्यः। स्थास्नु जङ्गमं दङ्क्ष्णवः पशव इति। स इदानीं स्थः स्नुरविशेषेण विधास्यते। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तम्। क्नोः कित्त्वे स्थ ईकारप्रतिषेध इति। एवं तर्हि गित्करिष्यते। क्नो र्गित्वान्न स्थ ईकारः। क्नोर्गित्वात्स्थ ईकारो न भविष्यति। किं कारणम्। क्ङितोरीत्वशासनात्। क्ङितोर्हीत्वं शिष्यते। इह तर्हि जिष्णुरिति गुणः प्राप्नोति। गुणाभावस्त्रिषु स्मार्यः। गुणाभावस्त्रिषु स्मर्तव्यः। गिति किति ङितिचेति। तदकारग्रहणं कर्तव्यम्। न कर्तव्यम्। क्रियते न्यास एव ॥

ऋत्विजि तन्निवक्ष्यमाणादनिङ्वचनात्सर्वोपसंख्यानेशेषादिङभावः। नेत्याहेति। त्विषेः स्वत एवानिट्त्वादिति भावः॥ ग्ला॰ गमः ८२
जि॥ क्स्नुरिति श्रवणात् कित्त्वं निश्चित्याह। क्नोः कित्त्व इति। एवं तर्हीति। गकारस्य चर्त्वेन निर्देशो व्याख्यास्यत इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ककार इति। परभूत इत्यर्थः। एतच्च लक्ष्यमूलाद्व्याख्यानाल्लभ्यते। सौत्र इति। तेन असिद्धत्वाभावादुत्वाभावे विसर्जनीयो भवतीत्य
र्थः। असंहितयेति। संहितायामुत्वविधानात्। इह तु तदभावादवसानविषयत्वाद्विसर्जनीयो भवति॥ शमित्य॥ घिनुणयमिति।

ककारेण गकारश्चर्त्वभूतो निर्दिश्यते क्ङिति चेति। इह तर्हि भूष्णुरिति श्र्युकः किती तीट्प्रतिषेधो न प्राप्नो
ति। श्र्युको निट्त्वं गकोरितोः। श्र्युको निट्त्वं गकारककारयोरितोरिति वक्तव्यम्। तद्गकारग्रहणं कर्तव्यम्। न
कर्तव्यम्। क्रियते न्यास एव। ककारेण गकारश्चर्त्वभूतो निर्दिश्यते श्र्युकः क्किती ति। यद्येवं चर्त्वस्यासिद्धत्वाद्झशि
चेत्युत्वं प्राप्नोति। सौत्रो निर्देशः। अथवाऽसंहितया निर्देशः करिष्यते। श्र्युकः क्किती ति। स्लोर्गित्वान्नस्य ईकारः
क्ङितोरीत्वशासनात्। गुणाभावस्त्रिषु स्मार्यः श्र्युको निट्त्वं गकोरितोरिति। शमित्यष्टाभ्यो घिनुण्॥ घिनण
यं वक्तव्यः। घिनुणि हि सति शमिनौ शमिनः तमिनौ तमिन इति उगिदचां सर्वनामस्थाने इति नुम्प्रसज्येत॥
नैष दोषः। झल्ग्रहणं चोदयिष्यते। इह तर्हि शमिनितरा शमिन्नीतरा तमिनितरा तमिनीतरा। उगितो घादि
षु नद्या अन्यतरस्यां ह्रस्वो भवतीत्यन्यतरस्यां ह्रस्वत्वं प्रसज्येत। तस्माद्घिनुण्यं वक्तव्यः। इष्यत एव ह्रस्वत्व
म्। घिनुण कर्मकाणाम्। घिनुण कर्मकाणामिति वक्तव्यम्। इह मा भूत्। संपृणक्ति शाकमिति। उक्तं वा॥ कि
मुक्तम्। अनभिधानादिति। शमित्यष्टाभ्यः॥ निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूञो वुञ्॥
किमर्थं निन्दादिभ्यो वुञ्विधीयते। न ण्वुलैव सिद्धम्। न ह्यस्ति विशेषः। निन्दादिभ्यो वुञो वा ण्वुलो वा। तदेव रूपं स एव स्व
रः। वुञ्मनेकाचः। वुञमनेकाचः प्रयोजयन्ति। असूयकः। अथ येऽत्रैकाचः पठ्यन्ते तेषां ग्रहणं किमर्थम्। न तेषां ण्वुलैव
सिद्धम्। न सिध्यति। अयं तच्छीलादिष्वर्थेषु तृन्विधीयते स विशेषविहितः सामान्यविहितं ण्वुलं बाधेत। वासरूपेणन्या
येन ण्वुलपि भविष्यति। अत उत्तरं पठति। निन्दादिभ्यो वुञ्वचनमन्येभ्यो ण्वुल्प्रतिषेधार्थम्। निन्दादिभ्यो ण्वुल्वचनं क्रियते
ज्ञापकार्थम्। किं ज्ञाप्यम्। एतज्ज्ञापयत्याचार्यः तच्छीलादिषु वासरूपन्यायेनान्येभ्यो ण्वुल् न भवतीति। तृजादिप्रतिषेधार्थं
वा एके। अथवा एके मन्यन्ते एतज्ज्ञापयत्याचार्यः ताच्छीलिकेषु सर्व एव तृजादयो वासरूपेण न भवन्तीति। निन्द ॥

उकारे हि सति कार्यार्थत्वसंभवात्तस्योच्चारणार्थत्वं न स्यादिति भावः। इष्यत इति। विकल्पेनैव ह्रस्वत्वमिष्यते न तु नित्यमित्युकार उगित्का
र्यार्थ इति स्थितम्॥ निन्द॥ वुञ्मनेकाच इति। जातौ बहुवचनम्। असूयशब्दस्यैकस्यैव प्रयोजकत्वात्। तृजादिप्रतिषेधार्थं वेति। प्रत्ययसामा
न्यापेक्षं च ज्ञापकमाश्रीयते न तु ण्वुलभावार्थमेव ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जुचङ्क॥पदिग्रहणमिति।नचसकर्मकार्थंपदिग्रहणमनभिधानाद्अनेनसकर्मकाद्विधानात्॥ स्पृदि॥ शपिकृतइति।तुरुस्तु
शम्यमइत्यतस्तत्रसार्वधातुकग्रहणमनुवर्ततेनतुतिङ्ग्रहणमितिभावः ॥ एवंतर्हीति।न
नुलुशिस्तिलकारस्येत्संज्ञाप्राप्नोतिश्रद्दालुश्चनसिध्यतिश्रद्दधुरितिप्राप्नोतीत्याह्ः।नैषदोषः।यादित्वादित्संज्ञानभविष्यति।यकारस्य

जुचङ्क्रम्यदंद्रम्यसृगृधिज्वलशुचलषपतपदः॥पदिग्रहणमनर्थकमनुदात्तेतश्चहलादेरितिसिद्धत्वात्।पदि
ग्रहणमनर्थकम्।किंकारणम्।अनुदात्तेतश्चहलादेरितिसिद्धत्वात्।अनुदात्तेतश्चहलादेरित्येवात्रयुच्सिद्धः।न
सिध्यति।अयंपदेरुकञ्विधीयते।लषपतपदस्थाभूवृषहनकमगमशृभ्यउकञ्इतिसविशेषविहितःसामा
न्यविहितंयुचंबाधेत।वासरूपन्यायेनयुजपिभविष्यति।असरूपनिवृत्त्यर्थंतु।असरूपनिवृत्त्यर्थंतर्हिपदिग्र
णंक्रियते।एतज्ज्ञापयत्याचार्यःताच्छीलिकेताच्छीलिकावासरूपेणनभवन्तीति।यद्येतज्ज्ञाप्यते।सृद्दीप
दीक्षश्चेतिदीपिग्रहणमनर्थकम्।अयंदीपेरोविधीयते।नमिकम्पिस्म्यजसकमहिंसदीपोरइतिसविशेषविहितः
सामान्यविहितंयुचंबाधिष्यते।एवंतर्हिसिद्धेसतियद्दीपिग्रहणंकरोतितज्ज्ञापयत्याचार्यःभवतियुचोरेणस
मावेशइति।किमेतस्यज्ञापनेप्रयोजनम्।कम्राकन्याकमनाकन्येत्येतत्सिद्धंभवति॥स्पृहिगृहिपतिदयिनि
द्रातन्द्राश्रद्धाभ्यआलुच्॥किमर्थमालुच्विधीयतेनलुशेवोच्येत।कारूपसिद्धिः।स्पृहयालुःदयालुःशपिकृते
अतोदीर्घोयञीतिदीर्घोभविष्यति।एवंतर्हिसिद्धेसतिय दालुचंशास्तितज्ज्ञापयत्याचार्योऽन्येभ्योप्ययंभव
तीति।किमेतस्यज्ञापनेप्रयोजनम्।आलुचिशीङोग्रहणंचोदयिष्यतितन्नकर्तव्यंभवति।आलुचिशीङ्ग्र
हणम्।आलुचिशीङ्ग्रहणंकर्तव्यम्।शयालुः॥स्पृहिगृहि ॥

लुप्तनिर्दिष्टः।प्रयोजनाभावाद्वा।नह्यत्रलित्स्वरप्रत्ययस्वरयोर्विशेषोस्ति।उभयत्रैकादेशउदात्तेनोदात्तइत्युदात्तत्व।
स्यभावात्।श्रद्धालुशब्दस्याप्यनेकार्थत्वाद्वातूनामत्रविषयेद्धात्यर्थेवर्तमानस्यधेटोभविष्यति।ननुशिदाश्रयोशितीत्यात्व
प्रतिषेधःप्राप्नोति।एवंतर्हिश्रद्धाआश्रद्धेत्याकारप्रश्लेषादात्वंभविष्यति।अथवादधातेरेवसंज्ञापूर्वकोविधिरनित्यइति
द्विर्वचनंनप्रवर्तिष्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदृगा॥ दकारोमुखसुखार्थः संदेहार्थोवा। तकारेतुसतितादपिपरस्तपरइत्यृकारस्यतपरत्वादृकारग्रहणंनस्यात्। ऋकारगुण निषेधार्थश्च। किकिनोः कित्वादृकारनिर्देशावसायः। सासहीति। पापतीतिनिपातनाद्यङि नीगभावः। विधौतुभाष्यकारवचनप्रामा ण्यात्। तेनाप्युक्तंतान्येवोदाहरणानीति। अथलिङ्वद्भावेकिकिनोः परस्मैपदसंज्ञाकस्मान्नभवति। तथाचात्मनेपदिभ्योदेङ् दङादि भ्योनप्राप्नुतः। नैषदोषः। लादेशानांपरस्मैपदसंज्ञानतुलकारस्य। भावकर्मकर्त्रे षुतर्हिलिङ्वत्किकिनौप्राप्नुतः। एषोप्यदोषः। उ

आदृगमहनजनः किकिनौलिट्च॥ किमर्थंकिकिनोः कित्त्वंक्रियते। नअसंयोगाल्लिट्किदित्येवसिद्धम्। किकिनोः कित्वम् ऋकारगुणप्रतिषेधार्थम्। किकिनोः कित्करणंक्रियते। ऋकारस्यगुणप्रतिषेधार्थम्। अयमृकारान्तानां लिटिगुणः प्रतिषेधविषयेआरभ्यते ऋच्छत्यृतामिति। सयथेहभवतितेरतुस्तेरुरिति। एवंमित्रावरुणौततुरिः दू रेअध्वाजगुरिरिति अत्रापिप्रसज्येत। पुनः कित्करणात्प्रतिषेधएवभवति। उत्सर्गश्छन्दसिसदादिभ्योदर्शनात्। उत्सर्गश्छन्दसिकिकिनौवक्तव्यौ। किंप्रयोजनम्। सदादिभ्योदर्शनात्। सदादिभ्योहिकिकिनौदृश्येते। सदिमनिरमिनमिविवि चीनाम्। सेदिः मेनिः रेमिः नेमिश्चक्रमिवाभवत्। विविचिंरत्नधातमम्। भाषायांधाञ्कृसृजनिनमिभ्यः॥ भाषायांधा ञ्कृसृजनिनमिभ्यः किकिनौवक्तव्यौ। धाञ्। दधिः। कृ। चक्रिः। सृ। ससृिः। जनि। जज्ञिः। नमि। नेमिः। सासहिवावहि चाचलिपापतीनांनिपातनम्॥ सासहिवावहिचाचलिपापतीनांनिपातनंकर्तव्यम्। दृषासहमानंसासहिः। वावहिः चाचलिः पापतिः। अपरआह। सहिवहिचलिपतिभ्योयङन्तेभ्यः किकिनौवक्तव्यौ। तान्येवोदाहरणानि॥ भियः क्रु क्लुकनौ॥ भियः क्रुकन्नपिवक्तव्यः। भीरुकः॥ अन्येभ्योपिदृश्यते॥ किमर्थमिदमुच्यते। नक्विप्चान्येभ्योपिदृश्यतइत्येव सिद्धम्। क्विब्विधिरनुपपदार्थः। अनुपपदार्थोयमारम्भः। पचेः पक्। भिदेः भित्। छिदेः छित्। अथयोत्रसोपपदस्तस्यग्र हणंकिमर्थम्। नतेनैवसिद्धम्। नसिध्यति। इहकेचिदाक्वेरितिसूत्रंपठन्ति। केचित्प्राक्क्वेरिति।

त्सन्नयोः कार्यातिदेशादुत्पत्तिश्चकर्तरिकृदित्यनेनास्यैकवाक्यत्वात्कर्तरितयोर्भवति। वर्तमानाधिकाराच्चवर्तमानइतिभूतकालता पिविरोधान्नातिदिश्यते। स्वरूपाबाधेनचकार्याण्यतिदिश्यन्तइतिक्वसुकानचावपिकिकिनोर्नभवतः॥ अन्येभ्योपि॥ क्विब्विधिरिति। क्विप्चेत्यत्रसुप्युपसर्गेपीतिचवर्ततइतिभावः। अथेति। पूर्वसूत्रेग्रावस्तुशब्दइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आङ्केरिति। अभिविधावाकारः। दीर्घवचनसामर्थ्यादिति। दीर्घश्रुत्याऽच्परिभाषोपस्थानाद्वविप्रच्छ्योरचोदीर्घत्वेनभाव्यंतत्रकृते सं
प्रसारणेपूर्वैकादेशेच दीर्घविधानमनर्थकंस्यादितिभावः। नस्यादिति। संभावनेलिङ्। पूर्वमेवप्रवृत्तत्वात्तुनदीर्घोनप्रवर्ततइत्यर्थः। दि

तत्रयेआङ्केरितिपठन्तितैःक्विब्ग्रहणंकर्तव्यम्। तत्रतच्छीलादिष्वर्थेषुक्विबू यथास्यात्। नैतदस्तिप्रयोजनम्। यएवा
सावविशेषविहितःसतच्छीलादिषुभविष्यति। अन्यत्रच। नसिध्यति। अयंतच्छीलादिष्वर्थेषुतृन्विधीयतेसवि
शेषविहितःसामान्यविहितंक्विपंबाधेत। वासरूपेणक्विबपिभविष्यति। नसिध्यति। इहेदानीमेवह्युक्तंतच्छी
लादिष्वर्थेषुवासरूपेणतृजादयोनभवन्तीति। क्विबपितृजादिः। ववचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणांदीर्घश्च॥ व
चिप्रच्छ्यायतस्तुकटप्रुजुश्रीणांक्विब्दीर्घत्वंचवक्तव्यम्। वचिवाक्। प्रच्छि। शब्दप्राट्। आयतस्तुआयतस्तूः
कटप्रु। कटप्रूः। जु। जूः। श्रि। श्रीः। अपरआह। वचिप्रच्छ्योरसंप्रसारणंचेतिवक्तव्यम्। तत्तर्हिवक्तव्यम्। नवक्तव्यम्।
दीर्घवचनसामर्थ्यात्संप्रसारणंनभविष्यति। इदमिहसंप्रधार्यम्। दीर्घत्वंक्रियतांसंप्रसारणमिति। किमत्रकर्तव्य
म्। परत्वात्संप्रसारणम्। अन्तरङ्गं दीर्घत्वम्। काअन्तरङ्गता। प्रत्ययोत्पत्तिसंनियोगेनदीर्घत्वमुच्यते। उत्पन्नेप्रत्य
येसंप्रसारणम्। तत्रान्तरङ्गत्वाद्दीर्घत्वेकृतेसंप्रसारणम्। संप्रसारणपूर्वत्वेकृतेकार्यकृतत्वात्पुनर्दीर्घत्वंनस्यात्।
तस्मात्सुष्ठूच्यते। दीर्घवचनसामर्थ्यात्संप्रसारणंनभवतीति। द्युतिगमिजुहोतीनांद्वेच॥ द्युतिगमिजुहोतीनांद्वे
चेतिवक्तव्यम्। दिद्युत्। गमि। जगत्। जुहोतेदीर्घश्च। जुहूः। दृणातेर्ह्रस्वश्चद्वेचक्विप्चेतिवक्तव्यम्। दद्दत्। जुहूर्जुहो
तेर्ह्वयतेर्वा। दद्दत्। दृणातेर्दीर्यतेर्वा। जूः। ज्वरतेर्जीयतेर्वा। ध्यायतेःसंप्रसारणंच॥ ध्यायतेःसंप्रसारणंच क्विप्चवक्त
व्यः। धीर्ध्यायतेर्दधातेर्वा॥ अन्येभ्यो॥ विप्रसंभ्योड्वसंज्ञायाम्॥ डुप्रकरणेमितद्र्वादिभ्यउपसंख्यानंधातुविधि
तुक्प्रतिषेधार्थम्॥ डुप्रकरणेमितद्र्वादिभ्यउपसंख्यानंकर्तव्यम्। किंप्रयोजनम्। धातुविधितुक्प्रतिषेधार्थम्।
धातुविधेस्तुकश्चप्रतिषेधोयथास्यात्। मितद्रुः मितद्रू मितद्रवः। अचिश्नुधातुभ्रुवामित्युवङादेशोमाभूत्। इहचमित
द्रू। मितद्रू। नोङ्धात्वोरितिप्रतिषेधोमाभूत्। तुग्विधि। मितद्रुः। ह्रस्वस्यपितिकृतितुगितितुङ्माभूदिति॥

द्युदिति। द्युतिस्वाप्योरित्यभ्यासस्यसंप्रसारणम्। जगदिति। गमःक्वावितिमलोपः। जुहूरिति। दीर्घेसमुच्चीयमानेदीर्घश्रुत्याऽच्प
रिभाषोपस्थानादच्चातदन्तविध्याश्रयणाद्जुहोतेरेवाजन्तत्वसंभवाद्भवतिनिप्रसङ्गः। किंप्रयोजनमिति। क्विपासिद्धिमन्यमानस्यप्रश्नः।

CC-0. In Public Domain. Digitization by eGangotri

किंप्रयोजनमितिक्रियासिद्धिं मन्यमानस्य प्रश्नः॥ मतिबुद्धि॥ क्तस्य मत्याद्यर्थेभ्यः परस्य भूतविषयतापि वर्तमानविषय
तया तत्र कौण्डिन्यन्यायेन बाध्यते। ज्ञातमितितु भूतेपि भवति। तेनेत्यधिकारात्तृतीयान्तादुपज्ञाते ऽर्थे ऽण्प्रत्ययविधाना
त्। वर्तमाने हि क्तस्य च वर्त्तमान इति षष्ठ्याभाव्यम्॥ इति भाष्यप्रदीपे तृतीयस्य द्वितीये तृतीयमाह्निकम्॥ उणादयो बहु
लम्॥ बहुलवचनमिति। उणादय इत्येव सूत्रमुणादीनां शास्त्रान्तरपठितानां साधुत्वाभ्यनुज्ञानार्थमस्त्विति भावः। बाहुलकमि
ति। प्रकृतेरितिजातावेकवचनम्। तनुशब्दो ऽत्र वृत्तिविषये गुणमात्रवचनः प्रकृतीनां तानवं दृष्ट्वा बाहुलकं बहुलशब्दप्रवृ

मतिबुद्धिपूजार्थेभ्यश्च॥ शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि। रुष्टश्च रुषितश्चोभावभिव्याहृत इत्य
पि॥ हृष्टतुष्टौ तथाक्रान्तस्तथोभौ संयतोद्यतौ। कष्टं भविष्यतीत्याहुरमृताः पूर्ववत्स्मृताः॥ नम्रियन्ते अमृ
ताः॥ इति तृतीयस्य द्वितीये पादे तृतीयमाह्निकम्। पादश्च समाप्तः॥ उणादयो बहुलम्॥ बहुलवच
नं किमर्थम्। बाहुलकं प्रकृतेस्तनुदृष्टेः। तन्वीभ्यः प्रकृतिभ्य उणादयो दृश्यन्ते न सर्वाभ्यो दृश्यन्ते प्रायसमुच्च
यनादपि तेषाम्। प्रायेण खल्वपि ते समुच्चिता न सर्वे समुच्चिताः। कार्यसशेषविधेश्च तदुक्तम्। कार्याणि खल्व
पि सशेषाणि कृतानि न सर्वाणि लक्षणेन परिसमाप्तानि। किं पुनः कारणं तन्वीभ्यः प्रकृतिभ्य उणादयो दृ
श्यन्ते न सर्वाभ्यः। किं च कारणं प्रायेण समुच्चिता न सर्वे समुच्चिताः किं च कारणं कार्याणि सशेषाणि
कृतानि न पुनः सर्वाणि लक्षणेन परिसमाप्तानि। नैगमरूढिभवं हि सुसाधु॥

त्तिनिमित्तं वहुर्थादानमुक्तम्। तेनापठिताभ्योपि प्रकृतिभ्य उणादयो भवन्ति। यथाह। षेरूलच् शकेरपि भवति शङ्कुलेति त
थाते षामुणादीनां प्रायेण समुच्चयनं कृतं न तु साकल्येनेति बहुलवचनादविहिता अपि भवन्ति। यथार्त्तेः फिडफिड्डौ भ
वतः ऋफिड ऋफिड्ड इति। सशेषाणि च कार्याणि उणादिषु विहितानि न तु निःशेषाणि। बहुलवचनात्त्वविहितान्यपि
भवन्ति तेन षण्ड इत्यत्र सत्वाभावः सकारस्य वा षत्वं भवति। किं पुनरिति। यावत्यः प्रकृतयः तावन्तश्च प्रत्ययाः यावन्ति
च कार्याणि तावन्त्येव भवन्त्विति प्रश्नः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैगमेति। निगमश्छन्दस्तत्र भव इत्यणृगयनादिभ्य इत्यण्। रूढिः प्रसिद्धिस्तत्र भवाः संज्ञाशब्दा इत्यर्थः। ते सुष्ठु साधवो यथा स्युरित्येवमर्थं सपरिपूर्णत्वं प्रकृत्यादीनामुच्यते। अपरिपूर्णानां हि पूर्णत्वं बहुलग्रहणेन क्रियत इति नैगमरूढिभवानां व्याकरणेऽस्मिन्व्युत्पादनात्संदिग्धं साधुत्वमवगम्यत इत्यर्थः। अन्यैराचार्यैः शब्दानां प्रकृत्यादिविभागेन व्युत्पादनमभ्युपगतमित्याह नामेति। तोकमित्यपत्यमित्यर्थः। यन्नेति। पदमर्थः प्रयोजनं यस्य सत्त्वाख्यत्वेन स पदार्थः प्रकृत्यादिविशेषश्चासौ पदार्थस्तस्माद्य

नैगमाश्च रूढिशब्दाश्च अवैदिकास्ते सुसाधवः कथं स्युः। नाम च धातुजमाह निरुक्ते। नाम खल्वपि धातुजमेवाहुः नैरुक्ताः। व्याकरणे शकटस्य च तोकम्। वैयाकरणानां च शाकटायन आह धातुजं नामेति। अथ यस्य विशेषपदार्थो न समुत्थितः कथं तत्र भवितव्यम्। यन्न विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्। प्रकृतिं दृष्ट्वा प्रत्यय ऊहितव्यः प्रत्ययं दृष्ट्वा प्रकृतिरूहितव्या। संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे। कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु। भविष्यति गम्यादयः॥ भविष्यतीत्यनद्यतन उपसंख्यानम्। भविष्यतीत्यनद्यतन उपसंख्यानं कर्तव्यम्। श्वो ग्रामं गमी। किं पुनः कारणं न सिध्यति। लुटायं निर्देशः क्रियते। लट्चानद्यतने लुटा बाध्यते। तेन लट एव विषये एते प्रत्ययाः स्युः लुटो विषये न स्युः। इतरेतराश्रयं च भवति। का इतरेतराश्रयता। भविष्यत्कालेन अयं निर्देशः क्रियते निर्देशोत्तरकाला च भविष्यत्कालता। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च न प्रकल्पन्ते। उक्तं वा। किमुक्तम्। एकं तावदुक्तं न चाऽपवादस्य निमित्ताभावादनद्यतने हि तयोर्विधानमिति ॥

न समुत्थितं विशिष्टप्रकृतिप्रत्ययोत्पादनेन व्युत्पादितमित्यर्थः। प्रकृतिमिति। प्रसिद्धां मर्त्यादिकामित्यर्थः। प्रत्यय इति। फिडादिकः प्रत्ययं चेति। प्रत्ययत्वेन प्रसिद्धमित्यर्थः। तेन हृषेरुलजिति प्रत्ययं दृष्ट्वा शकि प्रकृतिरूह्यते। तेन सिद्धं शङ्कुलेति। न सर्वत्र ऊहः कर्तव्यः। किं तर्हि साधुत्वेनाभिमतासु संज्ञासु स्थितिं प्रदर्शयति। संज्ञास्विति। भविष्यति। अनद्यतन इति। भविष्यच्छब्दो भविष्यन्मात्रे वर्तते न तु तद्विशेषेऽनद्यतने तस्य लुड्विषयत्वात्। ततश्च गम्यादयो भविष्यच्छब्दार्थे व्याख्यायमाना अनद्यतने न सिध्यन्तीति वार्तिकारम्भः। इतरेतराश्रयं चेति। एतद्भूते इत्यत्र व्याख्यातं तत एवावधारणीयम्। न चेति। विशेषे यत्सामान्यमस्ति तदाश्रयेण गम्यादयः प्रयुज्यन्त इत्यर्थः। विशेषविवक्षायां चापवादविप्रतिषेधाल्लुडेव भवति श्वो गन्ता ग्राममिति। वासरूपवचनाल्लुडपि भवति। तेन गमिष्यति भविष्यतीत्यादयः प्रयोगा उपपद्यन्ते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावत्पचतीति। सतिभविष्यदधिकारेभविष्यत्येवयावत्पुराशब्दयोगेलटःसाधुत्वंभविष्यति। भविष्यत्कालेनवर्तमानकालस्यबा
धनादसतिभविष्यदधिकारेभूतेपिसाधुत्वंलटःस्यात्। शब्दोपात्तकालेविशेषविधानाभावेवर्तमानकालस्यबाधोनस्यात्। लिप्स्य

अपरमप्युक्तमव्ययनिर्देशात्सिद्धमिति। अव्ययवताशब्देननिर्देशःकर्तव्यः। अवर्तमानेभूतइति। सतथानिर्देशःक
र्तव्यः। नकर्तव्यः। अव्ययमेषभविष्यतिशब्दः। नैषभवतेर्लृट्। कथमव्ययसंज्ञा। विभक्तिस्वरप्रतिरूपकाश्चनिपाताभव
न्तीतिनिपातसंज्ञानिपातोव्ययमित्यव्ययसंज्ञा। अथापिभवतेर्लृट्एवमप्यव्ययमेव। कथम्। नव्येतीत्यव्ययमिति। क्वपु
नर्नव्येति। एतौकालविशेषौभूतवर्तमानौस्वभावतोभविष्यत्येववर्तेते। यदितर्हिनव्येतीत्यव्ययमिति। नवातद्विधान
स्यान्यत्राभावात्। नवाभविष्यदधिकारेणार्थः। किंकारणम्। तद्विधानस्यान्यत्राभावात्। येपिह्येतेइतउत्तरंप्रत्ययाःशि
ष्यन्तेएतेप्येतौकालविशेषौनवियन्तिभूतवर्तमानौस्वभावतोभविष्यत्येववर्तन्ते। अतउत्तरंपठति। भविष्यदधिकारस्य
प्रयोजनंयावत्पचतिपुरापचतीत्यनपशब्दत्वाय॥ यावत्पुरानिपातयोर्लट्॥ यावत्पुरादिषुलङ्विधिर्लुटःपूर्वविप्रतिषिद्धम्।
यावत्पुरादिषुलङ्विधिर्भवतिलुटःपूर्वविप्रतिषेधेन। यावत्पुरानिपातयोर्लङ्भवतीत्यस्यावकाशः। यावद्भुङ्क्ते। पुराभुङ्क्ते।
लुटोवकाशःश्वःकर्ताश्वोभोक्ताइहोभयंप्राप्नोति। यावत्श्वोभुङ्क्ते। पुराश्वोभुङ्क्ते। लड्भवतिपूर्वविप्रतिषेधेन। सतर्हिपू
र्वविप्रतिषेधोवक्तव्यः। नवक्तव्यः। अनद्यतनेलुडित्यत्रयावत्पुरानिपातयोर्लडित्येतदनुवर्तिष्यते। लिप्स्यमानसि
द्धौच॥ किमर्थमिदमुच्यते। नलिप्स्यमानसिद्धिरपिलिप्सैव। तत्रकिंवृत्तेलिप्सायामित्येवसिद्धम्। अकिंवृत्तार्थो
यमारम्भः। योभवतामोदनंददातिसस्वर्गंलोकंगच्छति। योभवता[illegible]मोदनंदास्यतिसस्वर्गंलोकंगमिष्यति॥
तुमुन्ण्वुलौक्रियायांक्रियार्थायाम्। किमर्थंक्रियायामुपपदेक्रियार्थायांण्वुल्विधीयतेनअविशेषेणविहितः
ण्वुल्सक्रियायांचोपपदेक्रियार्थायामन्यत्रचभविष्यति। ण्वुलिसकर्मकग्रहणंचोदितम्। अकर्मकार्थोय
मारम्भः। आसकोव्रजति। शायकोव्रजतीति। प्रत्याख्यातंतत्। नवाधातुमात्राद्दर्शनाद्ण्वुलइति। एवंतर्हितृजादि
षुवर्तमानकालोपादानंचोदितम्। अवर्तमानकालार्थोयमारम्भः। तदपिप्रत्याख्यातम्। नवाकालमात्रेदर्शना
दन्येषामिति ॥

मान॥ अकिंवृत्तार्थइति। पूर्वत्रतुकिंवृत्तग्रहणंलिप्स्यमानसिद्धिरहितायांलिप्सायामकिंवृत्तेलड्निरस्यर्थम्॥ तुमुन् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकेनोरिति। सतिभविष्यत्कालेण्वुल्विधौतदनुवादेनषष्ठीनिषेधोविधातुंशक्यतेनान्यथेतिभावः। लप्स्यन्तेस्येति। याजकशब्दो भविष्यतिवर्ततेयस्मात्तेनयाजयिष्यन्तिनतुतेयाजितवन्तः तत्रभविष्यदधिकारविधानाभावाद्स्येतिषष्ठीनप्रतिषिध्यते। अस्य याजकादृति। एतद्याचष्टे। यएनमिति। कस्तर्हिभूतकालदृति। शब्दशक्तिस्वाभाव्याद्याजकशब्दस्यभूतकालविषयत्वमितिभावः। धातुसंबन्धदृति। याजकत्वस्यैवभविष्यत्त्वंप्रतीयतदृत्यर्थः। संबन्धादिति। भावियाजकत्वादिकमारोप्यतथाभिधानादित्यर्थः। त्वजा

इदंतर्हिप्रयोजनम्। अकेनोर्भविष्यदाधमर्ण्ययोरित्यत्रषष्ठ्याः प्रतिषेधउक्तः सयथास्यात्। एतदपिनास्तिप्रयोजनम्। यएवासावविशेषेणविहितःसयदाभविष्यतितदास्यप्रतिषेधोभविष्यति। एवंतर्हिभविष्यदधिकारविहितस्यप्रतिषेधोयथास्यात्। इहमाभूत्। अद्ययजतांलप्स्यन्तेऽस्ययाजकाःयएनंयाजयिष्यन्तीति। नैषभविष्यत्कालः। कस्तर्हि। भूतकालः। कथंतर्हिभविष्यत्कालतागम्यते। धातुसंबन्धेप्रत्ययादृति। यस्तर्हिनधातुसंबन्धः। इमेऽस्ययाजकाइमेस्यलावकादृति। एषोपिभूतकालः। कथंतर्हिभविष्यत्कालतागम्यतेधातुसंबन्धात्। सचतावत्तेरयाजितोभवति। तस्यचतावत्तैर्यवाअलूनाभवन्ति। उच्यतेच। इदंतर्हिप्रयोजनम्। अयंक्रियायामुपपदेक्रियार्थायांतुमुन्विधीयतेसविशेषविहितःसामान्यविहितंण्वुलंबाधेत। एतदपिनास्तिप्रयोजनम्। भावेतुमुन्विधीयतेकर्त्तरिण्वुल्तत्रकःप्रसङ्गोयद्भावेविहितस्तुमुन्कर्तरिण्वुलंबाधेत। लृट्तर्हिबाधेत। वासरूपेणण्वुलपिभविष्यति। अतउत्तरंपठति। ण्वुलःक्रियार्थोपपदस्यपुनर्विधानंतृजादिप्रतिषेधार्थम्। ण्वुलःक्रियार्थोपपदस्यपुनर्विधानंक्रियते। ज्ञापनार्थम्। किंज्ञाप्यम्। एतज्ज्ञापयत्याचार्यः। क्रियायामुपपदेक्रियार्थायांवासरूपेणतृजादयोनभवन्तीति। ण्वुलपितृजादिः। तुमर्थ्ण्वुलौ। भाववचनाश्च॥ किमर्थमिदमुच्यतेनअविशेषेणभावेयेप्रत्ययाविहितास्तेक्रियायामुपपदेक्रियार्थायाम्। अन्यत्रचभविष्यन्ति ॥

दिप्रतिषेधार्थमिति। तेनकर्ताव्रजतिविक्षिपोव्रजतीत्यादिनप्रयुज्यतदृत्यर्थः। भावव॥ प्रतिपदविध्यर्थमिति। ज्ञापकेननिराकृतानांपुनःप्रतिपदंसाक्षाद्विधानार्थोयोगदृत्यर्थः। यथाविहितादृति। येनप्रकारेणविहितायथाविहितादृत्यसमस्तंपदद्वयम्। अथवायथाविहितंविधानंयेषांतेयथाविहिताइतिबहुव्रीहिः। अव्ययीभावेतुयथाविहितमितिस्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचनग्रहणमिति। वचनानांग्रहणेनलोकप्रसिद्धंवाचकत्वमवगम्यतइत्यसामञ्जस्यंनभवति॥ अण्कर्म॥ कथंपुनरिति। अपूर्वविधानात्प्रतिप्रसवस्यलाघवादुत्सर्गविषयएवण्वुलंबाधित्वाण्स्यात्। काण्डलावोव्रजतीति। तथाचापवादविषयेनस्यादि

अतउत्तरंपठति भाववचनानांयथाविहितानांप्रतिपदविध्यर्थम्। भाववचनानांचयथाविहितानांप्रतिपदविध्यर्थोयमारम्भः। इदानीमेवह्युक्तंक्रियायामुपपदेक्रियार्थायांवासरूपेणतृजादयोनभवन्तीति। भाववचनाश्चापितृजादयः। अस्तिप्रयोजनमेतत्। किंतर्हीति। यथाविहिताइतितुवक्तव्यम्। किंप्रयोजनम्। इहयाभ्यःप्रकृतिभ्यःयेनविशेषेणभावेप्रत्ययाविहितास्ताभ्यःप्रकृतिभ्यस्तेनैवविशेषेणक्रियायामुपपदेक्रियार्थायांयथास्युः व्यतिकरोमाभूदिति। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। इहभावेप्रत्ययाभवन्तीतीयतासिद्धम्। सोयमेवंसिद्धेसतियद्वचनग्रहणंकरोतितस्यैतत्प्रयोजनंवाचकायथास्युरिति। यदिचयाभ्यःप्रकृतिभ्यःयेनविशेषेणभावेप्रत्ययाविहितास्ताभ्यःप्रकृतिभ्यस्तेनविशेषेणक्रियायामुपपदेक्रियार्थायामपिभवन्तिततोमीवाचकाःकृताःस्युः। अथहिधातुमात्राद्वास्युःप्रत्ययमात्रंवास्यात्ततोनामीवाचकाःकृताःस्युः॥ अण्कर्मणिच॥ किमर्थमिदमुच्यते नअविशेषेणकर्मण्यणित्यण्कर्मणिविहितःसक्रियायामुपपदेक्रियार्थायामन्यत्रचभविष्यति। अणःपुनर्वचनमपवादविषयेऽनिवृत्त्यर्थम्। अणःपुनर्वचनंक्रियतेअपवादविषयेनिवृत्तिर्यथास्यात्। गोदायोव्रजतिकम्बलदायोव्रजतीति। किमुच्यतेअपवादविषयेअनिवृत्त्यर्थमितिनपुनरुत्सर्गविषयेप्रतिपदविध्यर्थंस्यात्। इदानीमेवह्युक्तंक्रियायामुपपदेक्रियार्थायांवासरूपेणतृजादयोनभवन्तीति। अण्चापितृजादिः। एवंतर्ह्युभयमनेनक्रियते। अपवादविषयेचानिवृत्तिः। उत्सर्गविषयेचप्रतिपदविधिः। कथंपुनरेकेनयत्नेनोभयंलभ्यम्। लभ्यमित्याह। कथम्। कर्मग्रहणसामर्थ्यात्। कथंपुनरन्तरेणकर्मग्रहणंकर्मण्यण्लभ्यः। वचनग्रहणमपिप्रकृतमनुवर्तते। अस्तिप्रयोजनमेतत्। किंतर्हीति। अपर्यायेणेतितुवक्तव्यम् ॥

तिप्रश्नः। वचनग्रहणमपीति। ततश्चवचनग्रहणात्कर्मण्येवोपपदेऽणिसिद्धेपुनःकर्मग्रहणंकर्ममात्रपरिग्रहार्थमित्यपवादविषयेप्यण्सिद्धोभवतीत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदाचिदिति। वचनंतु भविष्यति काले पवादबाधनार्थंस्यादिति भावः। एवमपीति। ततश्च काण्डलावो व्रजतीति केवलस्य कर्मण उपपदसंज्ञाया अभावात्समासो न प्राप्नोतीति भावः। प्रत्येकं चेति। कर्मणि क्रियायामिति पृथक्सप्तमीनिर्देशात्प्रत्येकमुपपदसंज्ञा भवति निमित्तसद्भावादित्यर्थः॥ लृट् शेषे च। शेषग्रहणमिति। क्रियायां क्रियार्थायामिति निवर्तिष्यत इति भावः। लृटीति। अयंभावः। लडित्येतावत्युच्यमाने करिष्यतीत्यादावेव स्यात् करिष्यामीति व्रजतीत्यादौ ण्वुला बाधितत्वान्न स्यात्। शेषग्रह

कदाचिदण्कर्मणि स्यात्कदाचित्क्रियायामुपपदे क्रियार्थायामिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। चेन संनियोगः करिष्यते अण्कर्मणि च। किंच अन्यत् क्रियायामुपपदे क्रियार्थायामिति। एवमपि प्रत्येकमुपपदसंज्ञा न प्राप्नोति। चेनैव संनियोगः करिष्यते। प्रत्येकं च वाक्यपरिसमाप्तिर्दृष्टेति प्रत्येकमुपपदसंज्ञा भविष्यति। लृट् शेषे च॥ शेषग्रहणं किमर्थम्। लृटि शेषवचनं क्रियायां प्रतिपदविध्यर्थम्। लृटि शेषवचनं क्रियते क्रियायां प्रतिपदविधिर्यथा स्यात्। अविशेषणविधाने लृटोऽभावः प्रतिषिद्धत्वात्। अविशेषेण हि विधाने लृटोऽभावः स्यात्। हरिष्यामीति व्रजति। करिष्यामीति व्रजति। किं कारणम्। प्रतिषिद्धत्वात्। इदानीमेव ह्युक्तं क्रियायामुपपदे क्रियार्थायां वासरूपेण तृजादयो न भवन्तीति। लृड्वापि तृजादिः। अस्ति प्रयोजनमेतत्। किं तर्हीति। साधीयस्तु खलु शेषग्रहणेन क्रियार्थोपपदाल्लृण्निर्भज्यते। किं कारणम्। अक्रियार्थोपपदत्वात्। शेष इत्युच्यते। शेषश्चकः। यदन्यत्क्रियायाः क्रियार्थायाः। एवं तर्हि लृटि शेषवचनं क्रियायां प्रतिपदविध्यर्थम्। लृटि शेषवचनं क्रियते क्रियायां प्रतिपदविधिर्यथा स्यात् लृट शेषे च। करिष्यति हरिष्यतीति। क्व चा क्रियायामुपपदे क्रियार्थायामिति। स तर्हि चकारः कर्तव्यः। न कर्तव्यः। कथम्। इह लृड्भवतीतीयता सिद्धम्। सोयमेवं सिद्धे सति यत् शेषग्रहणं करोति तस्यैतत्प्रयोजनम्। योगाङ्गं यथा विज्ञायते। सति च योगाङ्गे योगविभागः करिष्यते। लृट्। लृड्भवति क्रियायामुपपदे क्रियार्थायामिति। ततः शेषे। शेषे च लृड्भवतीति॥ लृट् शेषे च ॥

णात्तु क्रियायां क्रियार्थायामित्यस्य संनिधिरनुमीयत इति तत्रापि लृट् सिध्यति शेषे च विषये साधीयस्त्विति। विपर्ययसाधनं प्रत्युत शेषग्रहणमिति भावः। एवं तर्हीति। चशब्दसहिताच्छेषग्रहणात्क्रियायामप्युपपदे लृट् सिध्यतीति वार्तिककारस्याशय इत्यर्थः। इदानीं योगविभागाश्रयणेन चकारं प्रत्याख्यातुमाह। स तर्हीति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लृटःसद्वा॥सद्विधिरिति।अप्रथमासमानाधिकरणमुपलक्षणंसूत्रोपात्तानामर्थानामितिसंबोधनंलक्षणंहेतुश्चक्रियायागृह्यते।अनद्य॥एवंचेति।भविष्यच्छब्दस्यानद्यतनेपिवर्त्तनात्तन्त्रेणएकशेषेणवाद्वयोर्भविष्यच्छब्दयोर्निर्देशादितिभावः।भविष्यन्त्यर्थइति।भविष्यन्तीशब्देनपूर्वाचार्यसंज्ञयालृङुच्यते।अनद्यतनइति।प्रयोगदर्शनवशाच्चगौणेप्यनद्यतनेप्रत्ययोभवति।

लृटःसद्वा॥सद्विधिर्नित्यमप्रथमासमानाधिकरणे॥सद्विधिरप्रथमासमानाधिकरणेनित्यमितिवक्तव्यम्।पक्ष्यन्तंपश्य।पक्ष्यमाणंपश्य।क्वतर्हीदानींविभाषा।प्रथमासमानाधिकरणे।पक्ष्यन्पक्ष्यति।पक्ष्यमाणःपक्ष्यते॥अनद्यतनेलुट्॥योगविभागःकर्तव्यः।अनद्यतनेलृटःसत्संज्ञौभवतः।श्वोग्नीनाधास्यमानेन।श्वःसोमेनयक्ष्यमाणेन।ततःलुट्।लुड्भवत्यनद्यतने।श्वःकर्ता।श्वोध्येता।केनविहितस्यानद्यतनेलृटःसत्संज्ञाउच्येते।एतदेवज्ञापयतिभवत्यनद्यतनेलृडिति।यदयमनद्यतनेलृटःसत्संज्ञौशास्ति।एवंचकृत्वासोप्यदोषोभवति।यदुक्तंभविष्यतीत्यनद्यतनउपसंख्यानमिति।परिदेवनेश्वस्तनीभविष्यन्त्यर्थे॥परिदेवनेश्वस्तनीभविष्यन्त्यर्थेइतिवक्तव्यम्।इयंतुकदागन्तायैवंपादौनिदधाति।अयंतुकदाध्येतायएवमनभियुक्तइति।कालप्रकर्षात्तूपमानम्।कालप्रकर्षात्तूपमानंभविष्यति।गन्तेवेयंगन्तानेयंगमिष्यति।अध्येतेवायमध्येतानायमध्येष्यते।नैवतिङन्तेनोपमानमस्ति।एवंतर्ह्यनद्यतनइवानद्यतनइति।अनद्यतने॥पदरुजविशस्पृशोघञ्॥स्पृशउपतापे।स्पृशउपतापेइतिवक्तव्यम्।इहमाभूत्।कम्बलस्पर्शइति।पदरु॥सृस्थिरे॥व्याधिमत्स्यबलेष्वितिवक्तव्यम्।अतिसारोव्याधिः।विसारोमत्स्यः।बले।शालसारः।खदिरसारः॥सृस्थिरे॥भावे॥भावेसर्वलिङ्गोनिर्देशः॥भावेसर्वलिङ्गोनिर्देशःकर्तव्यः।भूतौभवनेभावेइति।किंप्रयोजनम्।सर्वलिङ्गेभावेएतेप्रत्यययायथास्युरिति ॥

पदरुज॥स्पृशउपतापइति।उपतापोरोगः।स्पर्शोनामव्याधिविशेषः।अन्यत्रपचाद्यज्भवति।स्वरेविशेषः॥सृस्थिरे॥स्थिरःकालान्तरस्यप्रापकोर्थउच्यते।व्याधीति।अस्थिरार्थंवचनम्॥भावे॥सर्वलिङ्गइति।लिङ्गस्योपलक्षणार्थत्वात्सर्वसंख्यइत्यपिबोद्धव्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुल्लिङ्गेनेति। ततश्च शब्देन योऽर्थः प्रतिपाद्यते यल्लिङ्गसंख्यायुक्तस्तस्यैवाभिधायकेन भाव्यमिति स्त्रियां भाव इति सामानाधिकरण्येन संबन्धस्यासंभवात्स्त्रियामकर्तरि च कारके क्तिन्प्रत्ययः स्यात्। भावे तु पुंसि। एवं नपुंसके भावे क्त इत्यत्रापि कर्तरि च कारके इत्यस्य निवृत्तत्वान्नपुंसके कर्तरि क्तः स्यात्। भावे तु पुंसि। द्वित्वबहुत्वयोश्च पाकौ पाका इत्यादौ प्रत्यया न स्युरित्यर्थः। नान्तरीयकत्वादिति। अन्तरशब्दो गहादिषु पठ्यते स च विनार्थे वर्तते। अन्तरे भवं अन्तरीयं तत्र नञ्समासे कृते पृषोदरादित्वा

किं पुनः कारणं न सिध्यति। पुल्लिङ्गे नायं निर्देशः क्रियते। एकवचनान्तेन च। तेन पुल्लिङ्गे एव भावे एकवचने चैते प्रत्ययाः स्युः स्त्रीनपुंसकयोर्द्विवचनबहुवचनयोश्च न स्युः। नात्र निर्देशस्तन्त्रम्। कथं पुनस्तेनैव नाम निर्देशः क्रियते तच्चातन्त्रं स्यात्। तत्कारी च भवांस्तद्द्वेषी च। नान्तरीयकत्वादत्र पुल्लिङ्गे न निर्देशः क्रियते एकवचनेन च। अवश्यं कयाचिद्विभक्त्या केनचिल्लिङ्गेन निर्देशः कर्तव्यः। तद्यथा। कश्चिदन्नार्थी शालिकलापं सतुषं सपलालं आहरति। नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चिन्मांसार्थी मत्स्यान्सशकलान्सकण्टकानाहरति। नान्तरीयकत्वात्स यावदादेयं तावदादाय शकलकण्टकान्युत्सृजति। एवमिहापि नान्तरीयकत्वात्पुल्लिङ्गे न निर्देशः क्रियते एकवचनान्तेन च। न ह्यत्र निर्देशस्तन्त्रम्। कयाचिद्विभक्त्या केनचिच्च लिङ्गेन निर्देशः कर्तव्यः॥ अथवा कृभ्वस्तयः क्रियासामान्यवाचिनः क्रियाविशेषवाचिनः पचादयः ॥

द्वाष्यकारवचनप्रामाण्याद्वा नलोपाभावः। ततः स्वार्थे कन्प्रत्ययः॥ तुषपलालानीति। तुषसहितानि पलालानीत्युत्तरपदलोपी समासः। द्वन्द्वे तु जातिरप्राणिनामित्येकवद्भावप्रसङ्गः। एवं शकलकण्टकानीति बोद्धव्यम्। कण्टकशब्दश्चोभयलिङ्गः। एवमिहापीति। प्रयोगमूलत्वाद्व्याकरणस्मृतेः प्रयोगे च सर्वलिङ्गसंख्ये भावे प्रत्ययानां दर्शनादिह च लिङ्गसंख्ययोरविवक्षेत्यर्थः। अथवेति। पाकादिषु क्रियाविशेषेषु भिन्नलिङ्गसंख्यानुगतेष्वपि भावशब्दवाच्यं सामान्यं शाबलेयादिष्विव गोत्वं विद्यते तच्चैकं पुंस्त्वानुगतं चेति तदाश्रित्य प्रत्यया विधास्यन्त इत्यर्थः ॥ एम॰ ८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यच्चात्रेति। भावः सामान्यमेव पचाद्यो विशेषा एवेत्यर्थः। भूतिर्भवनमित्यपि पाकादिवत्कर्त्रादिभेदाद्भावविशेष एव भावसामान्यानुगत इति द्रष्टव्यः। तद्यथेति। यथैकस्मिन्वस्तुनि मातुलत्वमुपाध्यायत्वं च भिन्नसंबन्ध्याश्रयं परस्परमबाधेनावस्थितं तथा पाकादिषु विशेषरूपता भावशब्दस्य वाच्यं च सामान्यम्। तदुक्तं हरिणा। आचार्यो मातुलश्चेति यथैको व्यपदिश्यते। संबन्धिभेदाद्धर्मात्मा सविधिः पक्तिभावयोरिति। भवतौ यदिति। भवतौ धातौ वाच्यत्वेनावस्थितं यत्सामान्यं पचादिधातुवाच्यविशेषसमवेतं तत्प्रत्ययार्थत्वेन निर्दिश्यत इत्यर्थः। तत्र पाक इत्यादौ प्रकृतिभागः साध्यरूपमर्थमाह। प्रत्ययभागस्तु सत्त्वरूपताम्। तदुक्तं हरिणा। आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता। प्रकल्पिता यथा शास्त्रे

यच्चात्र पचतेर्भवतिर्भवति न तद् भवतेः पचतिर्भवति। यच्चात्र भवतेः पचतिर्भवति न तत् पचतेर्भवतिर्भवति। किं च पचतेर्भवतिर्भवति। सामान्यम्। किं च भवतेः पचतिर्भवति। विशेषः। तद्यथा। उपाध्यायस्य शिष्यो मातुलस्य भागिनेयं गत्वाह। उपाध्यायं भवानभिवादयतामिति। स गत्वा मातुलमभिवादयते। तथा मातुलस्य भागिनेय उपाध्यायस्य शिष्यं गत्वाह। मातुलं भवानभिवादयतामिति। स गत्वा उपाध्यायमभिवादयते। एवमिहापि पचतेर्भवतौ यत्तन्निर्दिश्यते॥ भावे॥ अकर्तरि च कारके संज्ञायाम्॥ कारकग्रहणं किमर्थम्। कारकग्रहणमनादेशे स्वार्थविज्ञानात्। कारकग्रहणं क्रियते। अनादेशे स्वार्थविज्ञानात्। अनादेशे अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति। तद्यथा। गुप्तिज्किद्भ्यः सन्। यावादिभ्यः कन्। एवमिहापि प्रत्ययाः स्वार्थे स्युः। स्वार्थे मा भूवन्कारके यथा स्युरित्येवमर्थमिदमुच्यते। नैतदस्ति प्रयोजनम् ॥

सघञादिष्वपि क्रमः। साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना। सत्त्वभावस्तु यस्तस्याः स घञादिनिबन्धन इति। अकर्तरि॥ कारकग्रहणं किमर्थमिति। अकर्तरीति पर्युदासपक्षे कर्तृसदृशस्य कारकस्य ग्रहणं विज्ञास्यते। प्रसज्यप्रतिषेधे पि वाक्यभेदेन संज्ञायां घञ्भवति कर्तरि न भवतीति विधिप्रतिषेधयोर्विधानाद्भावे च पूर्वसूत्रेण विहितत्वात्संज्ञायां घञ् धात्वर्थसंबन्धिनि कारक एव सामर्थ्याद्विज्ञास्यत इति प्रश्नः। स्वार्थ इति। साध्यमानरूपः स्वार्थ इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहितइति।भावेभेदमबुध्यमानआह॥आवाहइति।आवाहकन्याया आनयनमुच्यते।विवाहस्तुनयनम्।तत्रापूर्वइति।अ
न्यथाभावेसंज्ञायामितिएकमेवयोगंकुर्यात्।योगविभागात्तुविध्यर्थत्वमस्येत्यर्थः।अन्यइति।सत्त्वभावमापन्नइत्यर्थः।अ

विहितःप्रत्ययःस्वार्थेभावेघञिति।तेनातिप्रसक्तमितिकृत्वानियमोयंविज्ञायते।अकर्तरिसंज्ञायामेवेति।
अस्तिचेदानींकश्चित्संज्ञाभूतोभावोयदर्थोविधिःस्यात्।अस्तीत्याह।आवाहोविवाहइति।केमर्थ्यान्नियमोभ
वति।विधेयंनास्तीतिकृत्वा।इहचास्तिविधेयम्।किम्।अकर्तरिचकारकेसंज्ञायांघञ्विधेयः।तत्रापूर्वोविधि
रस्तुनियमोस्त्विति।अपूर्वएवविधिर्भविष्यतिननियमः।तदेवतर्हिप्रयोजनंस्वार्थेमाभूवन्निति।ननुचोक्तं
विहितःप्रत्ययःस्वार्थेभावेघञितीति।अन्यःसभावोबाह्यःप्रकृत्यर्थात्।अनेनेदानीमभ्यन्तरे भा
वेस्यात्।कःपुनरनयोर्भावयोर्विशेषः।उक्तोभावभेदोभाष्ये।एतदपिनास्तिप्रयोजनम्।नञिवयुक्तमन्यस
दृशाधिकरणेतथाह्यर्थगतिः।नञ्युक्तमिवयुक्तंचान्यस्मिंस्तत्सदृशेकार्यंविज्ञायतेतथाह्यर्थोगम्यते।त
द्यथा।अब्राह्मणमानयेत्युक्तेब्राह्मणसदृशंपुरुषमानयति।नासौलोष्ठमानीयकृतीभवति।एवमिहापिअक
र्तरीतिकर्तृप्रतिषेधादन्यस्मिन्नकर्तरिकर्तृसदृशेकार्यंविज्ञास्यते।किंचान्यदकर्तृकर्तृसदृशम्।कारकम्।
उत्तरार्थंतर्हिकारकग्रहणंकर्तव्यम्।परिमाणाख्यायांसर्वेभ्यः।कारकेयथास्यात्।इहमाभूत्।एकातिलोच्छि
तिःद्वेप्रसृतीइति।घञनुक्रमणमजब्विषयेअवचनेहिस्त्रीप्रत्ययानामप्यपवादविज्ञानमितिवक्ष्यति।तन्न
वक्तव्यंभवति।एतदपिनास्तिप्रयोजनम्।अत्राप्यकर्तरीत्येवानुवर्तिष्यते।संज्ञाग्रहणानर्थक्यंचसर्वत्रघञोदर्श
नात्।संज्ञाग्रहणंचानर्थकम्।किंकारणम्।सर्वत्रघञोदर्शनात्।असंज्ञायामपिघञ्दृश्यते।कोभवतालाभोलब्धः।
कोभवतादायोदत्तइति।यदिसंज्ञाग्रहणंनक्रियते।अतिप्रसङ्गोभवति।कृतःकटइत्यत्रकारःकटइतिप्राप्नोति।अतिप्र
सङ्गइतिचेदभिधानलक्षणत्वातप्रत्ययस्यसिद्धम्।अतिप्रसङ्गइतिचेत्।तन्न।किंकारणम्।अभिधानलक्षणत्वात्प्र
त्ययस्यसिद्धम्।अभिधानलक्षणाःकृत्तद्धितसमासाः।अनभिधानान्नभविष्यन्ति॥अकर्तरिच ॥

नेनेति।साध्यमानरूपोधातुवाच्यआभ्यन्तरः।उक्तइति।सार्वधातुकेयगित्यत्रभावभेदःप्रतिपादितः।उत्तरार्थमिति।तेनपरिमाणाख्यायां
सर्वेभ्यइत्यनेनघञ्कारकेभवतिननुभावइतिएकातिलोच्छितिःद्वेप्रसृतीइत्यत्रभावेघञोप्रसङ्गादेतदर्थंघञनुक्रमणमित्यादिनवक्त
व्यंभवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिमाणा॥ अजपोरपीति। अन्यथा पुरस्तादपवादा इति न्यायेनाचमेव घञ् बाधेत नापमिति भावः। द्वौ शूर्पनिष्पावाविति। यद्यप्यत्र निरभ्योः पूल्वोरिति घञ् सिध्यति तथापि सर्वापवादार्थं सर्वग्रहणोपादानादनेनैव भवितुमर्हतीत्युपन्यासः। सर्वग्रहणमिति। बाध्यमात्रापेक्षायां समुदायापेक्षायां वा पुरस्तादपवादन्यायो नास्तीति भावः। एकः पाक इति। कर्मण्यपि घञ् भवतीति भावः।

परिमाणाख्यायां सर्वेभ्यः॥ सर्वग्रहणं किमर्थम्। सर्वेभ्यो धातुभ्यो घञ् यथा स्यात्। अजपोरपि विषये। एकस्तण्डुलनिश्चायः। द्वौ शूर्पनिष्पावौ। सर्वग्रहणमनर्थकं परिमाणाख्यायामिति सिद्धत्वात्। सर्वग्रहणमनर्थकम्। किं कारणम्। परिमाणाख्यायामिति सिद्धत्वात्। परिमाणाख्यायामित्येव घञ् सिद्धः। अजपोरपि विषयेऽनर्थः सर्वग्रहणेन। अस्त्यन्यदेतस्य वचने प्रयोजनम्॥ किम्। एकः पाको द्वौ पाकौ त्रयः पाका इति। पूर्वेणाप्येतत् सिद्धम्। न सिध्यति। संज्ञायामिति पूर्वो योगः। न चैषा संज्ञा। प्रत्याख्यायते संज्ञाग्रहणम्। अथापि क्रियते। एवमपि न दोषः। अजपावपि संज्ञायामेव। यथाजातीयक उत्सर्गः तथाजातीयकेनापवादेनापि भवितव्यम्। उत्तरार्थं तर्हि। इङश्च। सर्वेभ्योऽपि यथा स्यात्। ननु चायमिङ् एक एव वण्ठरण्डाकल्पः। सर्वेषु साधनेषु यथा स्यात्। उपेत्याधीयते तस्मादित्युपाध्यायः। अस्मिन्नधीयत इत्यध्यायः। अध्यायन्यायोद्यावसंहाराधारावायाश्चेत्येतन्निपातनं न कर्तव्यं भवति। एतदपि नास्ति प्रयोजनम्। क्रियते न्यास एव। उत्तरार्थमेव तर्हि वक्तव्यम्। कर्मव्यतिहारे णच् स्त्रियामिति। सर्वेभ्यो यथा स्यात्। एतदपि नास्ति प्रयोजनम्। वक्ष्यत्येतत्। कर्मव्यतिहारे स्त्रीग्रहणं व्यतिपाकार्थम्। एथक्तु ग्रहणं बाधकबाधनार्थम्। व्यावचोरी व्यावचर्च्यर्थम्। तत्र व्यतीक्षादिषु दोषः। सिद्धं तु प्रकृते स्त्रीग्रहणे णज्ग्रहणं णिज्ग्रहणं चेति। उत्तरार्थमेव तर्हि। अभिविधौ भाव इनुण्। सर्वेभ्यो यथा स्यात्। सांराविणम्। एतदपि नास्ति प्रयोजनम्। वक्ष्यत्येतत्। अभिविधौ भावग्रहणं नपुंसकेक्तादिनिवृत्त्यर्थम्। एथक्तु ग्रहणं बाधकबाधनार्थं न तूत्सर्ग इति। इदं तर्हि प्रयोजनम्। प्रकृत्याश्रयो योऽपवादस्तस्य बाधनं यथा स्यात्। अर्थाश्रयो योऽपवादस्तस्य बाधनं मा भूदिति। एकातिलोच्छितिः। द्वे प्रसृती इति॥

सर्वेष्विति। सर्वेभ्य इति तादर्थ्ये चतुर्थी तेनायमर्थो गृह्यत इति भावः। तेनाधिकरणे घं नाधित्वा घञ् भवति। प्रकृत्याश्रय इति। सर्वेभ्य इति पञ्चमीनिर्देशादयमर्थो लभ्यत इति भावः। अर्थाश्रय इति। स्त्रियामित्यर्थं निर्दिश्य क्तिनो विधानादर्थाश्रयत्वम्। एकेति। ननु कारकानुवृत्त्यात्र भावे घञ् न भविष्यति। नैतदस्ति। उभयाधिकारात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 दारजाराविति। णिलोपे सति तस्य स्थानिवत्त्वाद्वृद्ध्याश्रयायां वृद्धिर्न स्यादिति णिलुग्विधीयते। तस्य हि अपरनिमित्तकत्वात् किं लुगुपधात्वेति प्रतिषेधाद्वा स्थानिवत्त्वाभावाज्जारशब्दः सिध्यति। करणे वेति। अण्यन्तयोरेव दृणातिजीर्यत्योः करणे घे प्राप्ते घञेवोच्यत इत्यर्थः॥ इ॰ ख्या॥ प्रकृत्याश्रयस्यैवा चो घञा बाधके न भाव्यम्। न त्वर्थाश्रयस्यापि क्तिन इति मत्वा

घञनुक्रमणमजब्विषये। अवचने हि स्त्रीप्रत्ययानामप्यपवादविज्ञानमिति चोदयिष्यति। तन्न वक्तव्यं भवति। घञनुक्रमणमजब्विषये। घञनुक्रमणमजब्विषय इति वक्तव्यम्। अवचने हि स्त्रीप्रत्ययानामप्यपवादविज्ञानम्। अनुच्यमाने ह्येतस्मिन् स्त्रीप्रत्ययानामप्यपवादोऽयं विज्ञायेत। एकातिलो च्छ्रितिः इत्युती इति। दारजारौ कर्तरि णिलुक् च॥ दारजारौ कर्तरि वक्तव्यौ। णिलुक् च वक्तव्यः। दारयन्तीति दाराः। जरयन्तीति जाराः। करणे वा॥ करणे वा वक्तव्यौ। दीर्यन्ते तैर्दाराः। जीर्यन्ति तैर्जाराः। परिमाण॥ इ॰ ख्या॥ इ॰ श्वेत्यपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष्॥ इ॰ श्वेत्यत्रापादाने स्त्रियामुपसंख्यानं कर्तव्यं तदन्ताच्च वा ङीष् वक्तव्यः। उपेत्याधीयतेऽस्या उपाध्यायी उपाध्याया॥ शृ वायुवर्णनिवृतेषु॥ शृ इत्येतस्माद्वायुवर्णनिवृतेषु घञ् वक्तव्यः। शारो वायुः। शारो वर्णः। गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः। इ॰ ख्या॥ समि मुष्टौ॥ समि मुष्टावित्यनर्थकं वचनं परिमाणाख्यायामिति सिद्धत्वात्। समि मुष्टाविति वचनमनर्थकम्। किं कारणम्। परिमाणाख्यायामिति सिद्धत्वात्। परिमाणाख्यायामित्येवात्र घञ् सिद्धः। अपरिमाणार्थं तु। अपरिमाणार्थोऽयमारम्भः मल्लस्य संग्राहः। मुष्टिकस्य संग्राह इति। उद्ग्राभनिग्राभौ च च्छन्दसि स्रुगुद्यमननिपातनयोः। उद्ग्राभो निग्राभ इति इमौ शब्दौ छन्दसि वक्तव्यौ स्रुगुद्यमननिपातनयोरर्थयोः उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्॥ कर्मव्यतिहारे णच् स्त्रियाम्॥ स्त्रीग्रहणं किमर्थम्। कर्मव्यतिहारे स्त्रीग्रहणं व्यतिपाकार्थम्। कर्मव्यतिहारे स्त्रीग्रहणं क्रियते व्यतिपाकार्थम्। इह मा भूत्। व्यतिपाको वर्तते ॥

ह। इ॰ श्वेति। शृ वायु इति। ऋदोरबिति प्राप्ते वचनम्। शार इति। कर्मणि घञ्। अकृतनीशार इति। अकृताच्छादन इत्यर्थः॥ समि मुष्टौ॥ परिमाणवाचि मुष्टिशब्दाश्रयेण पूर्वः पक्षः॥ अङ्गुलिसंनिवेशवाच्याश्रयणेन तु परिहारः॥ कर्म ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथग्ग्रहणमिति। प्रकरणोत्कर्षात्क्तिनो बाधकानामप्यनेन बाधनमिति भावः। व्यतीक्षादिष्विति। अप्रत्ययाद् गुरोश्च हलइति अकारस्यापि बाधप्रसङ्गादित्यर्थः। सिद्धन्त्विति। यद्येवं व्यावक्रुष्टिरिति क्तिन्न प्राप्नोति। व्यात्युक्षी च न सिध्यति। नैष दोषः। कृत्यल्युटो बहुलमिति बहुलवचनाद्यथेष्टलाभप्रयोजनात्॥ अभिविधौ ॥ भावे कारक इति द्वयेऽपि प्रकृते शब्दशक्तिस्वाभाव्याद्भावएवेनुण्भविष्यतीति मत्वाह। भावग्रहणमिति। नपुंसक इति। मध्येऽपवादाः पूर्वान्विधीन्बाधन्त इतिइनुण् घञमेव बाधेत न तु क्ता

अथ किमर्थं पृथग्ग्रहणम्। पृथग्ग्रहणं बाधकबाधनार्थम्। पृथग्ग्रहणं क्रियते बाधकबाधनार्थं येतस्य बाधकास्तद्बाधनार्थम्। किं प्रयोजनम्। व्यावचोरी व्यावचर्च्यर्थम्। व्यावचोरी वर्तते। व्यावचर्ची वर्तते। तत्र व्यतीक्षादिषु दोषः। तत्र व्यतीक्षादिषु दोषो भवति। व्यतीक्षा वर्तते। व्यतीहा वर्तते। सिद्धं तु प्रकृते स्त्रीग्रहणेणञ्ग्रहणं णिज्ग्रहणं च। सिद्धमेतत्। कथम्। प्रकृत एव स्त्रीग्रहणेऽयं योगः कर्तव्यः। स्त्रियां क्तिन्। ततः कर्मव्यतिहारे णच्। ततो णिचः। अभिविधौ भाव इनुण्। भावग्रहणं किमर्थम्। अभिविधौ भावग्रहणं नपुंसके क्तादिनिवृत्त्यर्थम्। अभिविधौ भावग्रहणं क्रियते। नपुंसके क्तादिनिवृत्त्यर्थम्। नपुंसके लिङ्गे भावे क्तादयो मा भूवन्निति। अथ किमर्थं पृथग्ग्रहणं क्रियते। पृथग्ग्रहणं बाधनार्थम्। पृथग्ग्रहणं क्रियते बाधकबाधनार्थम्। येतस्य बाधकास्तद्बाधनार्थम्। नल्युटः। ल्युटो बाधनं नेष्यते। संकटनमित्येव भवति॥ एरच्॥ अज्विधौ भयस्योपसंख्यानम्। अज्विधौ भयस्योपसंख्यानं कर्तव्यम्। भयम्। अत्यल्पमिदमुच्यते भयस्येति। भयादीनामिति वक्तव्यम्। इहापि यथा स्यात्। भयं वर्षम्। किं प्रयोजनम्। नपुंसके क्तादिनिवृत्त्यर्थम्। नपुंसकलिङ्गे भावे क्तादयो मा भूवन्निति। कल्प्यादिभ्यः प्रतिषेधः। कल्प्यादिभ्यः प्रतिषेधो वक्तव्यः। कल्पः। अर्थः। मन्त्र इति। जवसवौ छन्दसि॥ जवसवौ छन्दसि वक्तव्यौ। ऊर्वोरस्तु मे जवः। अयं मे पञ्चौदनः सवः॥ एरच् ॥

दीन्। भावग्रहणात्त्वधिकविधानार्थात्तानपि बाधत इति भावः। अथेति। नपुंसके भाव इत्यस्यानन्तरमिदं वक्तव्यमिति भावः। पृथग्ग्रहणमिति। वासरूपोऽस्त्रियामिति वचनात्पक्षे क्तादयः स्युरिति प्रकरणोत्कर्षेण वासरूपविधिर्बाध्यत इत्यर्थः॥ एरच्॥ वर्षमिति। वर्षणमित्यपि भवति। वृषभो वर्षणादिति भाष्यकारवचनात्। कल्प इति। ण्यन्तेभ्योऽपि प्रतिषिद्धे घञेव भवति। एरजण्यन्तानामिति तु वचनमनार्षम्। जवसवाविति। अपि प्राप्तेऽज्विधिः स्वरे विशेषः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ ९१ ग्रहट्ट॥ एषस्वरइति। मध्योदात्तत्वंकृत्स्वरेणभवति। वशिरण्योरिति। घञिप्राप्तेवचनम्। वशनंवशः। रणन्त्यस्मिन्निति रणः। घ २३१

ग्रहट्टइ निश्चिगमश्च॥ किमर्थनिष्पूर्वाच्चिनोतेरब्विधीयते। नाचैवसिद्धम्। नह्यस्तिविशेषः। निष्पूर्वाच्चिनो
तेरपोवाअचोवातदेवरूपंसएवास्वरः। नसिध्यति। हस्तादानेचेरस्तेयइतिघञ्प्राप्नोति। तद्बाधनार्थम्।
अतउत्तरंपठति। अब्विधौनिश्चिग्रहणमनर्थकंस्तेयस्यघञ्विधौप्रतिषेधात्। अब्विधौनिश्चिग्रहणमनर्थक
म्। किंकारणम्। स्तेयस्यघञ्विधौप्रतिषेधात्। स्तेयस्यघञ्विधौप्रतिषेधउच्यते। निष्पूर्वश्चिनोतिस्तेयेवर्त
ते। अस्तेयार्थंतर्हीदंवक्तव्यनिष्पूर्वाच्चिनोतेरस्तेयेअब्यथास्यात्। अस्तेयार्थमितिचेन्नानिष्टत्वात्। अस्तेयार्थ
मितिचेत्तन्न। किंकारणम्। अनिष्टत्वात्। नहिनिष्पूर्वाच्चिनोतेरस्तेयेअबिष्यते। किंतर्हि। घञेवेष्यते। एवंत
र्हिसिद्धेसतियन्निष्पूर्वाच्चिनोतेरपंशास्तितज्ज्ञापयत्याचार्यः। यत्तदन्तःथाथघञ्क्ताजबित्रकाणामितितन्नि
ष्पूर्वाच्चिनोतेर्नभवतीति। किमेतस्यज्ञापनेप्रयोजनम्। निश्चयः। एषस्वरःसिद्धोभवति। वशिरण्योश्चोपसं
ख्यानम्॥ वशिरण्योश्चोपसंख्यानंकर्तव्यम्। सवशंसैन्धवम्। धनंजयंरणेरणे। घञर्थेकविधानंस्थास्नापाव्य
धिहनियुध्यर्थम्। घञर्थेकोविधेयः। किंप्रयोजनम्। स्थास्नापाव्यधिहनियुध्यर्थम्। स्था। प्रतिष्ठन्तेस्मिन्धान्या
नीतिप्रस्थः। प्रस्थेहिमवतःशृङ्गे। स्था। स्ना। प्रस्नान्तिअस्मिन्निति प्रस्नः। स्ना। पा। प्रपिबन्त्यस्यामितिप्रपा। पा। व्यधि।
अविध्यन्तितेनाविधः। व्यधि। हनि। विघ्नन्तितस्मिन्मनांसि विघ्नः। हनि। युधि। आयुध्यन्तेतेनायुधम्। स्तम्बेकच॥
कस्मादयंकोविधीयते। हन्तेरित्याह। तद्धन्तिग्रहणंकर्तव्यम्। नकर्तव्यम्। प्रकृतमनुवर्तते। क्वप्रकृतम्। हन
श्चवधइति। तद्वैअनेकेननिपातनेनव्यवच्छिन्नंनशक्यमनुवर्तयितुम्। नैतानिनिपातनानि। हन्तेरेतेआदे
शाः। यद्यादेशाःघनस्वरोनसिध्यति। घनइति। सन्तुतर्हिनिपातनानि। ननुचोक्तंतद्वैअनेकेननिपातनेनव्यव
च्छिन्नंनशक्यमनुवर्तयितुमिति। संबन्धमनुवर्तिष्यते। अथवापुनःसन्तुआदेशाः। ननुचोक्तंस्वरोनसिध्यती
ति। नैषदोषः। अकारान्ताआदेशाः। अथयदादर्षीकयास्तम्बोहन्यतेकथंतत्रभवितव्यम् ॥

ञर्थइति। भावःकर्तृवर्जितंचकारकंघञर्थः। स्तम्बेकच॥ घनस्वरइति। अन्तोदात्तत्वंनसिध्यतिअप्स्वरेणाद्युदात्तत्वप्रसङ्गादित्यर्थः। रमः
अकारान्तादिति। तत्रातोलोपेकृतेउदात्तनिवृत्तिस्वरेणाप्युदात्तत्वंभवतीतिभावः ॥ ९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तम्बघ्नेति। कप्रत्यये रूपं तस्य सर्वापवादत्वादिति भावः। स्तम्बहेतिरिति। निपातनस्य सर्वापवादत्वादिति भावः। स्त्रियां क्तिन्॥ स्रस्तिरिति। स्रंसाध्वंसेति नैव भवतीति भावः॥ स्थागापा॥ स्थादिभ्य इति। बाध्यमात्रापेक्षायां बाध्यसमुदायापेक्षायां वा पुरस्ताद

केचित्तावदाहुः। स्तम्बघ्नेति भवितव्यम्। अपर आहुः। स्तम्बहेतिरिति भवितव्यम्। ऊतियूतिजूतिसातिहेतिकीर्तयश्चेति निपातनादिति। अपर आहुः। स्तम्बहननीति भवितव्यमिति। वक्ष्यत्येतत्। अजब्भ्यां स्त्रीखलनाः। स्त्रियाः खलनौ विप्रतिषेधेनेति॥ यजयाचयतविच्छप्रच्छरक्षो नङ्॥ यजादिभ्यो नङित्वे संप्रसारणप्रतिषेधः॥ यजादिभ्यो नङित्वे संप्रसारणप्रतिषेधो वक्तव्यः। प्रश्न इति। एवं तर्हि अङित्करिष्यते। अङिति गुणप्रतिषेधः। यद्यङिद् गुणस्य प्रतिषेधो वक्तव्यः। विश्न इति। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं यजादिभ्यो नङित्वे संप्रसारणप्रतिषेध इति। नैष दोषः। निपातनादेतत्सिद्धम्। किं निपातनम्। प्रश्ने चासन्नकाल इति। स्त्रियां क्तिन्॥ स्त्रियां क्तिन्नाबादिभ्यश्च। स्त्रियां क्तिन्नित्यत्राबादिभ्यश्चेति वक्तव्यम्। आप्तिः। राद्धिः। दीप्तिः। निष्ठायां वा सेटोऽकारवचनात्सिद्धम्। अथवा निष्ठायां सेटः अकारो भवतीति वक्तव्यम्। यदि निष्ठायां सेटोऽकारो भवतीत्युच्यते। स्रंसाध्वंसेति न सिध्यति। स्रस्तिः ध्वस्तिरिति प्राप्नोति। किं पुनरिदं परिगणनं त्रय एवाबादयः। आहोस्विदुदाहरणमात्रम्। किं चातः। यदि परिगणनं भेदो भवति। अथोदाहरणमात्रं नास्ति भेदः। स्रस्तिः ध्वस्तिरित्येव भवितव्यम्॥ स्थागापापचो भावे॥ स्थादिभ्यः सर्वापवादप्रसङ्गः। स्थादिभ्यः सर्वापवादः क्तिन्प्राप्नोति स यथैवाङं बाधत एवं ण्वुलिञावपि बाधेत। कां त्वं स्थायिकां का त्वं स्थायिम्। सिद्धं तु अङ्विधाने स्थादिप्रतिषेधात्। सिद्धमेतत्। कथम्। अङ्विधाने एव स्थादीनां प्रतिषेधो वक्तव्यः। प्रतिषिद्धे तस्मिन् क्तिनेव भविष्यति। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं स्थादिभ्यः सर्वापवाद इति। नैष दोषः। पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानित्येवमयं क्तिन्नङं बाधिष्यते। ण्वुलिञौ न बाधिष्यते॥ श्रुयजिषिस्तुभ्यः करणे॥ श्रुयजिषिस्तुभ्यः करणे क्तिन्वक्तव्यः। श्रूयतेऽनयेति श्रुतिः। इज्यतेऽनयेतीष्टिः। इष्यतेऽनयेतीष्टिः। स्तूयतेऽनयेति स्तुतिः। ग्लाम्लाज्याहाभ्यो निः॥

पवादन्यायो नास्तीति भावः। ण्वुलिञाविति। विभाषाख्यानपरिप्रश्नयोरित्यनेन विहितौ। पुरस्तादिति। अनन्तरबाधेन लब्धावकाशो विधिः परत्वादुत्तरेण बाध्यत इत्यर्थः। श्रुयजीति। ल्युड्बाधनार्थं वचनम्॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रजयजो॥ क्यब्विधिरिति। उत्तरसूत्रेइतिभावः॥ कृञः शच॥ चकारेणानन्तरस्य क्यप एव समुच्चयो न तु व्यवहितस्य क्तिन इति मत्वाह।
वा वचनमिति। तेन क्रिया कृत्या कृतिरिति रूपत्रयसिद्धिः। षिद्भिदादि॥ आर्तिरिति। आङो र्तेश्च उपसर्गादृति धाताविति रृद्धिरेकादेशः। ग्

ग्लाम्लाज्याहाभ्यो निर्वक्तव्यः। ग्लानिः। म्लानिः। ज्यानिः। हानिः॥ व्रजयजोर्भावे क्यप्॥ क्यब्विधिरधिकरणे च॥ क्यब्विधि
रधिकरणे चेति वक्तव्यम्। समजन्ति तस्यां समज्या॥ कृञः शच॥ कृञः श चेति वा वचनम्॥ कृञः श चेति वा वचनं कर्तव्यम्।
किं प्रयोजनम्। क्तिन्नपि यथा स्यात्। कृतिः॥ इच्छा॥ किं निपात्यते। इषेः शे यगभावः। अत्यल्पमिदमुच्यते इच्छेति। इच्छा
परिचर्यापरिसर्यामृगयाऽटाट्यानामुपसंख्यानं कर्तव्यम्। जागर्तेरकारो वा। जागर्या। जागरा। षिद्भिदादिभ्योऽङ्॥ भि
दा विदारण इति वक्तव्यम्। भित्तिरन्या। छिदा द्वैधीकरण इति वक्तव्यम्। छित्तिरन्या। आरा शस्त्र्यामिति वक्तव्यम्। आ
र्तिरन्या। धारा प्रपात इति वक्तव्यम्। धृतिरन्या। गुहा गिर्योषध्योरिति वक्तव्यम्। गूढिरन्या॥ षिद्भिदा॥ ण्यासश्रन्थो यु
च्॥ किमर्थश्चकारः। स्वरार्थः। चितः अन्त उदात्तो भवतीत्यन्तोदात्तत्वं यथा स्यात्। नैतदस्ति प्रयोजनम्। उदात्त इति वर्त
ते भूवीरा उदात्त इति । यद्युदात्त इति वर्तते। व्रजयजोर्भावे क्यप्। किमर्थः पकारः। तुगर्थः। इ
त्यस्यापि तिकृतीति। उदात्त इत्येव हि वर्तते। एवमपि कुत एतद् अन्तस्योदात्तत्वं भविष्यति न पुनरादेरिति। उदात्त
इत्यनुवर्तनसामर्थ्यात्। यस्य अप्राप्तः स्वरस्तस्य भवति। कस्य चा प्राप्तः। अन्त्यस्य। सामान्यग्रहणाविघाता
र्थस्तर्हि। क्व सामान्यग्रहणाविघातार्थेनार्थः। युवोरनाकाविति। एतदपि नास्ति प्रयोजनम्। वक्ष्यत्येतत्
सिद्धं तु युवोरनुनासिकवचनादिति। युच्प्रकरणे घट्टिवन्दिविदिभ्य उपसंख्यानम्॥ युच्प्रकरणे घट्टिव
न्दिविदिभ्य उपसंख्यानं कर्तव्यम्। घट्टना। वन्दना। वेदना। इषेरनिच्छार्थस्य॥ इषेरनिच्छार्थस्येति व
क्तव्यम्। अन्विष्यते अन्वेषणा। परेर्वा। परेर्वेति वक्तव्यम्। अन्यां परीष्टिं चर। अन्यां पर्येषणां चर। रोगाख्यायां ण्वुल् बहुलम्॥
धात्वर्थनिर्देशे ण्वुल्॥ धात्वर्थनिर्देशे ण्वुल् वक्तव्यः। का नामासिका अन्येषीह मानेषु। का नाम शायिका अन्येष्वधीयानेषु॥

हा गिर्योषध्योरिति। गिरिशब्देन गिर्यवयवे वर्तते॥ ण्यासश्रन्थो॥ युवोरिति। अन्यथा निरनुबन्धकत्वादस्यैव ग्रहणं स्यान्न तु
ल्युडादीनामिति भावः॥ अनुनासिकवचनादिति। तत्र ल्युडादीनामपि अनुनासिकत्वप्रतिज्ञानसामर्थ्याद् ग्रहणं भविष्य
तीत्यर्थः। रोगाख्या॥ धात्वर्थनिर्देश इति। क्रियानिर्देश इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इकृश्तिपाविति। बहुलवचनाच्च क्वचिन्नभवति श्तिपः शित्करणादकर्तृवाचिन्यपि तस्मिन्शबादयो भवन्ति। यगपि क्वचिद्भवति
यथा विभाषालीयतेरिति। अत्र हि लीलीङोर्यका श्तिपि निर्देशः कृतः। श्यनि तु लीङ एव ग्रहणं स्यान्न तु लिनातेः। वर्णादिति। व
र्णवाचिनो वर्णानुकरणादित्यर्थः। बहुलग्रहणात्क्वचिन्नभवति अस्यच्वाविति यथा। तथा क्वचिद्वर्णसमुदायानुकरणादपि। ए
वकार इति। कारप्रत्ययस्य ककारस्येत्संज्ञा प्रयोजनाभावान्नभवति। ननु करणं कारः अस्य कारः अकार इत्येवं सिध्यति। नैतद
स्ति। एवं हि विज्ञायमानेऽकारकरणमित्यादि न सिध्येत्। कारप्रत्ययस्य कृदतिङ् इत्यधिकाराद्धातुविहितत्वेपि कृत्संज्ञा। ततस्त

इकृश्तिपौ धातुनिर्देशे॥ इकृश्तिपावित्येतौ प्रत्ययौ धातुनिर्देशे वक्तव्यौ। पचेर्ब्रूहि पचतेर्ब्रूहि। वर्णात्कारः॥ वर्णात्कार
प्रत्ययो वक्तव्यः। अकारः॥ रादिफः॥ रादिफो वक्तव्यः। रेफः। मत्वर्थाच्छः॥ मत्वर्थाच्छो वक्तव्यः। मत्वर्थीयः। इणजादिभ्यः। इञ्व
पादिभ्यः॥ इणजादिभ्यो वक्तव्यः। आजिः। आतिः। आदिः॥ इञ्वपादिभ्यो वक्तव्यः। वापिः। वासिः। वादिः। इक्कृष्यादिभ्यः॥ इ
क्कृष्यादिभ्यो वक्तव्यः। कृषिः। किरिः। गिरिः। संपदादिभ्यः क्विप्॥ संपदादिभ्यः क्विब्वक्तव्यः। संपत्। विपत्। प्रतिप
त्। आपत्। परिषत्॥ रोगाख्या॥ कृत्यल्युटो बहुलम्॥ कृत्ल्युटः। कृल्ल्युट इति वक्तव्यम्। कृतो बहुलमिति वा। कृतो
बहुलमिति वा वक्तव्यं पादहारकाद्यर्थम्। पादाभ्यां ह्रियते पादहारकः। गले चोप्यते गलेचोपकः। श्वोग्लीना धास्यमाने
नाश्वः सोमेन यक्ष्यमाणेन॥ कृत्यल्युटो बहुलम्। गोचरसंचरवहव्रजव्यजापणनिगमाश्च॥ गोचरादीनामग्रहणं प्रा
यवचनाद्यथा कषो निकष इति। गोचरादीनां ग्रहणं शक्यमकर्तुम्। घञ् कस्मान्न भवति। प्रायवचनाद् यथा कषः नि
कष इति। प्रायवचनाद्घञ् न भवति॥ हलश्च॥ घञ्विधौ अवहाराधारावायानामुपसंख्यानम्॥ घञ्विधौ अवहाराधार
वायानामुपसंख्यानं कर्तव्यम्। अवह्रियन्ते अस्मिन्नवहारः। आध्रियन्ते अस्मिन्नाधारः। एत्येतस्मिन्नवयन्त्यावायः॥

इन्तस्य प्रातिपदिकत्वाद्विभक्त्युत्पत्तिः। एवं मत्वर्थीय इति। अकारलोपस्त्वन्नभत्वेपि भाष्यकारवचनाद्बहुलग्रहणाद्वा। संपदादिभ्य इ
ति। क्तिन्नपि बहुलवचनाद्भवति संपत्तिरिति॥ कृत्य॥ कृत इति। कृत्यग्रहणमपनीय कृद्ग्रहणं व्यापकत्वात्कर्तव्यं तस्मिंश्च कृते ल्युड्ग्रह
णं न कर्तव्यं तस्यापि कृत्त्वात्। श्वोग्लीनिति। अनद्यतनेपि लृड्भवति। गोचरसंचर॥ प्रायवचनादिति। हलश्चेत्यत्र प्रायग्रहणानुवर्त
नाद्घञः क्वचिदभावाद्घ एव भवतीत्यर्थः॥ हलश्च॥ अध्यायसूत्रे आधारावायशब्दौ वार्तिके दर्शनादभियुक्तैः प्रक्षिप्तौ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदङ्को॥प्रायवचनादिति।घञ्वद्घोऽपिनभवतीतिल्युडेवभवति।कर्तृ॥च्व्यर्थयोरिति।तेनाभूततद्भावादन्यत्रखलन्नभवति।आढ्येन
सुभूयतइति।अत्रातिलात्तुशब्दस्यधातोःप्राक्प्रयोगःस्वाढ्यंभवंभवतेत्यादौखलःखित्करणसामर्थ्याद्धातोरनन्तरंकर्तृकर्मणी
प्रयुज्येते।तदाचार्यइति।एतच्चखित्करणादनव्ययस्यमुमर्थो लभ्यते।चकारस्यसन्नियोगार्थत्वादीषद्दुःसुषूपपदान्याश्री

उदङ्कोऽनुदके॥किमर्थमिदमुच्यते।नहलश्चेत्येवसिद्धम्।अनुदकइतिवक्ष्यामीति।इहमाभूत्।उदकोदञ्चनः।उदङ्कोऽनुदकग्रहणानर्थक्यंचप्रायवचनात्।यथागोदोहनःप्रसाधनइति।उदङ्कोऽनुदकग्रहणंचानर्थकम्।घञ्कस्मान्नभवति।प्रायवचनाद्घञ्नभवति।यथागोदोहनः प्रसाधनइति॥खनोघच॥खनोडडरेकेकवकाः।डोवक्तव्यः।आखः।डरोवक्तव्यः।आखरः।इकोवक्तव्यः।आखनिकः।इकवकोवक्तव्यः।अखनिकवकः।ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषुखल्॥अजब्भ्यांस्त्रीखलनाः॥अजब्भ्यांस्त्रीखलनाभवन्तिविप्रतिषेधेन।अजपोरवकाशः।चयः।लवः।स्त्रीप्रत्ययानामवकाशः।कृतिः।हृतिः।इहोभयंप्राप्नोति।चितिःस्तुतिः।खलोवकाशः।ईषद्भेदः।सुभेदः।अजपोःसएव।इहोभयंप्राप्नोति।ईषच्चयः।सुचयः।ईषल्लवः।अनस्यावकाशः।इध्मप्रव्रश्चनः।अजपोःसएव।इहोभयंप्राप्नोति।पलाशचयनः।अविलवनः।स्त्रीखलनाभवन्तिविप्रतिषेधेन ।

स्त्रियाःखलनौविप्रतिषेधेन।स्त्रियाःखलनौभवतोविप्रतिषेधेन।स्त्रीप्रत्ययानामवकाशः।कृतिः।हृतिः।खलोवकाशः।ईषद्भेदः।सुभेदः।इहोभयंप्राप्नोति।ईषद्भेदा।सुभेदा।अनस्यावकाशः।इध्मप्रव्रश्चनः।स्त्रीप्रत्ययानांसएव।इहोभयंप्राप्नोति।सक्तुधानी।तिलपीडनी।खलनौभवतोविप्रतिषेधेन।कर्तृकर्मणोश्चभूकृञोः॥खलकर्तृकर्मणोश्च्व्यर्थयोः॥खलकर्तृकर्मणोश्च्व्यर्थयोरितिवक्तव्यम्।अनाढ्येनभवताईषदाढ्येनशक्यंभवितुम्।ईषदाढ्यंभवंभवता।दुराढ्यंभवम्।स्वाढ्यंभवम्।कर्तृकर्मग्रहणंचोपपदसंज्ञार्थम्।कर्तृकर्मग्रहणंचोपपदसंज्ञार्थंद्रष्टव्यम्।तद्द्वेष्यंविजानीयात् अभिधेययोरिति।तदाचार्यःसुहृद्भूत्वान्वाचष्टेकर्तृकर्मग्रहणंचोपपदसंज्ञार्थमिति॥अन्येभ्योपिदृश्यते॥भाषायांशासियुधिदृशिधृषिभ्योयुच्॥भाषायांशासियुधिदृशिधृषिभ्योयुज्वक्तव्यः।दुःशासनः।दुर्योधनः।दुर्दर्शनः।दुर्धर्षणः।मृषेश्चेतिवक्तव्यम्।दुर्मर्षणः॥इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येतृतीयस्याध्यायस्यतृतीयेपादेप्रथममाह्निकम्।

यन्ते।अन्येभ्यो॥भाषायामिति।छन्दसीत्यधिकाराद्भाषायांनप्राप्नोतीतिवचनम्॥ इत्युपाध्यायजैयटपुत्रकैयटकृतेमहाभाष्यप्रदीपेतृतीयस्याध्यायस्यतृतीयेपादेप्रथममाह्निकम् ॥ ग्मः
६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्तमान॥समीपमेवसामीप्यमितिस्वार्थेष्यञंवर्णयन्ति।अन्येसमीपस्यभावः सामीप्यंवर्तमानस्यसामीप्यं वर्तमानसामीप्यमितिव्याचक्षते।ननुभूतभविष्यतोरनेनप्रत्ययानामतिदेशात्तयोरेवसामीप्यसंबन्धोनवर्तमानस्येतिसमासाप्रसङ्गः।नैषदोषः।पारंपर्येणसंबन्धसद्भावात्।अथास्मिन्पक्षेगुणेनेनेतिषष्ठीसमासप्रतिषेधः कस्मान्नभवति।अत्रकेचिदाहुः।शौक्ल्यादीनांरूपादिविशेषाणांसमासप्रतिषेधइति।अन्येत्वाहुः।अयमेवनिर्देशोज्ञापयतिअनित्यःसमासप्रतिषेधइति।अपरेब्रुवते।गुणशब्दस्यसंबन्धिशब्दत्वाद्गुणास्मिन्नस्यगुणिनएवसमासप्रतिषेधः नचवर्तमानःसामीप्यस्यगुणी।भूतभविष्यतोस्तद्गुणत्वात्।वत्कर

वर्तमानसामीप्येवर्तमानवद्वा॥वत्करणंकिमर्थम्।वर्तमानसामीप्येवर्तमानेवेतीयत्युच्यमानेवर्तमानेयेप्रत्ययाविहितास्तेवावर्तमानसामीप्येधातुमात्रात्स्युः।वत्करणेपुनः क्रियमाणेनदोषोभवति।यदि चयाभ्यःप्रकृतिभ्योयेनविशेषणेनवर्तमानेप्रत्ययाविहितास्ताभ्यःप्रकृतिभ्यस्तेनैवविशेषणेनवर्तमानसामीप्येभवन्ति।ततोमीवर्तमानवत्कृताःस्युः।अथहिप्रकृतिमात्राद्वास्युःप्रत्ययमात्रंवास्यात्।नामीवर्तमानवत्कृताःस्युः।इहवर्तमानसामीप्येवर्तमानवद्वेतिउक्तालडेवोदाह्रियते।यदिपुनर्वालड्वतीत्येवोच्येत।अतउत्तरंपठति।वर्तमानसामीप्येवर्तमानवद्वचनंशत्राद्यर्थम्।वर्तमानसामीप्येवर्तमानवद्वचनंक्रियतेशत्राद्यर्थम्।शत्राद्यर्थोयमारम्भः। एषोस्मिपचन्।एषोस्मिपचमानइति।नैतदस्तिप्रयोजनम्।लडादेशौशतृशानचौ।तत्रवालड्वतीत्येवसिद्धम्।यौतर्हिलडादेशौ।एषोस्मिपचमानः।एषोस्मियजमानइति।यौचापिलडादेशौतावपिप्रयोजयतः ॥

णमिति।वर्तमानइत्येतावतैववर्तमानसहचरितानांप्रत्ययानांसिद्धत्वादितिप्रश्नः॥धातुमात्रादिति।वर्तमानग्रहणेनसाहचर्यात्प्रत्ययानांरूपमात्रमेवलक्ष्येततनश्चसंकरोपिस्यात्।यस्माद्धातोर्वर्तमानेयः प्रत्ययोविहितःसविशेषानुपादानाद्धात्वन्तरादपिस्यादित्यर्थः। लडेवेति। वृत्तिष्विति भावः।शत्राद्यर्थमिति।लटः शतृशानचावित्यनेनवर्तमानाधिकाराद्वर्तमानकालविहितस्यैवलटः शतृशानचौभवतः नतुकालान्तरविहितस्येतिभावः।लडादेशाविति।लण्मात्रादेशौ। वर्तमानग्रहणस्यतत्रानपेक्षणादितिभावः।यौतर्हीति।पूङ्यजोः शानन्।ताच्छील्यवयोवचनशक्तिषुचानश्।इङ्धार्योःशतृप्रत्ययइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वर्तमानविहितस्येति। लट्स्मदृत्यादिविहितलक्ष्निवृत्त्यर्थमवश्यं तत्र वर्तमानग्रहणमपेक्षणीयमिति भावः। अविशेषवि
हितइति। वर्तमानलक्षणाद्विशेषादन्यस्मिन्विशेषे विहितइत्यर्थः। आशंसायाम्। आशंसेति। आशंसा अभिमतार्थवाञ्छा सा वर्तमानपि
विषयस्य भविष्यत्त्वाद्भविष्यत्काले त्वुच्यते। इह चाशंसातिदेशस्य विषयभावेनोपात्ता। आशंसायां विषय आशंस्यमानक्रिय
वचनाद्धातोर्भूतवद्वर्तमानवच्च प्रत्यया भवन्तीत्यर्थः संपद्यते। नवेति। अत्र सूत्रे भूतशब्देन भूतमात्रमुच्यते न तु तद्विशेषोनद्य
तनस्तत्र सामान्यातिदेशे विशेषानतिदेश इति न्यायाल्लङ्लिटौ न भवत इत्यर्थः। आशंसासंभावनयोरिति। यद्यविशेषः कथंइ

वर्तमानविहितस्य लटः शतृशानचावुच्येते। अविशेषविहितश्चायं योगः शत्राद्यर्थमिति खल्वप्यु च्य
ते। बहवश्च शत्रादयः। एषोस्मि अलंकरिष्णुः। एषोस्मि प्रजनिष्णुः॥ आशंसायां भूतवच्च॥ आशंसा नाम भवि
ष्यत्काला। आशंसायां भूतवदतिदेशे लङ्लिटोः प्रतिषेधः॥ अशंसायां भूतवदतिदेशे लङ्लिटोः प्रतिषेधो व
क्तव्यः। नवापवादस्य निमित्ताभावादनद्यतने हि तयोर्विधानम्। नवा वक्तव्यः। किं कारणम्। अपवादस्य
निमित्ताभावात्। नात्रापवादस्य निमित्तमस्ति। कथम्। अनद्यतने हि तयोर्विधानम्। अनद्यतने हि तौ विधी
येते लङ्लिटौ। न चात्रानद्यतनः कालो विवक्षितः। कस्तर्हि। भूतकालसामान्यम्। आशंसासंभावनयोरविशे
षात्तद्विधानस्याप्राप्तिः। आशंसा संभावनमित्यविशिष्टावेतावर्थौ। आशंसासंभावनयोरविशेषात्तद्विधा
नस्याप्राप्तिः। आशंसायां ये विधीयन्ते ते संभावनेपि प्राप्नुवन्ति ये च संभावने विधीयन्ते ते आशंसायाम
पि प्राप्नुवन्ति। किं तर्ह्युच्यते अप्राप्तिरिति। न साधीयः प्राप्तिर्भवति। इष्टाव्यवस्थानप्रकल्पेत। न सर्वे स
र्वत्रेष्यन्ते। न वा संभावनावयवत्वादाशंसायाः। न वा एष दोषः। किं कारणम्। संभावनावयवत्वादाशंसा
याः। संभावनावयवात्मिका आशंसा। आशंसा नाम प्रधारितोर्थः ॥

न्तनिर्देश इति चेत् शब्दस्वरूपाभिधायित्वाददोषः। आशंसासंभावनयोरर्थभेदाभावादविशेष इत्यर्थः। आशंसा अनागतव
स्तुवाञ्छा संभावनमपि भाविवस्तूत्प्रेक्षणमिति भावः। नवेति। अवयवशब्दः एकदेशवाची संभावनात्मकैवाशंसेत्यर्थः
प्रधारितोर्थ इति। इदं मे भूयादिति मनसा विषयीकृतोर्थः। आशंसाविषयत्वादाशंसाशब्देनात्र उक्तः ॥

CC-0. In Public Domain. Digitization by eGangotri

अभिनीतइति।कारणयोग्यतावशाच्छक्यप्राप्तिरित्यर्थः।ततोन्योनभिनीतइत्यर्थः।अन्येत्वप्रधारितइतिपठन्तिअनिर्धारि
तोवश्यंभावितयाअनिश्चितइत्यर्थः।संभावनंचासतिविधुरप्रत्ययोपनिपातेभवितव्यमनेनार्थेनेतिज्ञानमित्यनयोर्भेदः।
यद्यमिति।यदिसंभावनेनियमेनालमर्थोगम्येततदाव्यभिचाराभावादलमितिविशेषणंनोपाददीतेत्यर्थः॥क्षिप्रवच॥अ
निष्पन्नइति।अनाशंसार्थमिदम्।वृष्टश्चेदित्यादिवस्तुस्वरूपकथनम्।सिद्धंत्विति।अपूशालिबीजसंयोगएवनिष्पत्तिःश

अभिनीतश्चानभिनीतश्च।संभावनंनामप्रधारितोर्थः।अभिनीतएव।अर्थासंदेहोवाअलमर्थत्वात्संभा
वनस्य।अथवाअर्थासंदेहएवपुनरस्य।किंकारणम्।अलमर्थत्वात्संभावनस्य।संभावनेअालमर्थ्यंगम्य
ते।आशंसायांपुनरनालमर्थ्यम्।आचार्यप्रवृत्तिर्ज्ञापयतिसंभावनेपिनालमर्थ्यंगम्यतइति। यदयंसंभाव
नेलमितिचेदित्याह।तस्मात्सुष्ठुच्यते।नवासंभावनावयवत्वादाशंसायाइति॥क्षिप्रवचनेलृट्॥क्षिप्रवच
नेलृटआशंसावचनेलिङ्ग्प्रतिषेधेन।क्षिप्रवचनेलृटआशंसावचनेलिङ्ग्वतिविप्रतिषेधेन।क्षिप्रवच
नेलृड्वतीत्यस्यअवकाशः।उपाध्यायश्चेदागतःक्षिप्रमध्येष्यामहे।आशंसावचनेलिङ्ग्वतीत्यस्यावका
शः।उपाध्यायश्चेदागतःआशंसेयुक्तोधीयीय।इहोभयंप्राप्नोति।उपाध्यायश्चेदागतःआशंसेक्षिप्रमधीयी
य।लिङ्ग्वतिविप्रतिषेधेन।अनिष्पन्नेनिष्पन्नशब्दःशिष्योऽनिष्पन्नत्वात्।अनिष्पन्नेनिष्पन्नशब्दःशिष्यःशासि
तव्यः। किंकारणम्।अनिष्पन्नत्वात्।देवश्चेदृष्टोनिष्पन्नाःशालयः।तत्रभवितव्यंसंपत्स्यन्तेशालयइति।
सिद्धंतुभविष्यत्प्रतिषेधात्।सिद्धमेतत्।कथम्।भविष्यत्प्रतिषेधात्।यल्लोकोभविष्यद्वाचिनःशब्दस्यप्रयोगंनमृ
ष्यति।कश्चिदाहदेवश्चेदृष्टःसंपत्स्यन्तेशालयइति।सउच्यते।मैवंवोचःसंपन्नाःशालयइत्येवंब्रूहि ॥

लीनांतत्रैवनिष्पत्तेर्वर्तनादिति भावः।हेतुभूतकालसंप्रेक्षितत्वादिति।कारणसंबन्धीकालःकार्यस्याव्यवस्थाप्यते।कारणान्त
रापेक्षाभावप्रतिपादनायेत्यर्थः।हेतुभूतस्यवर्षादेर्यःकालःसएवकार्येसंप्रेक्षितःकारणस्यैवकार्यरूपतयाविवक्षितत्वात्।का
र्यकारणयोरभेदाध्यवसायादित्यर्थः।भाष्यकारस्त्वेतदेवचवस्त्वन्यथाव्याचष्टे।हेतुभूतकालवर्षमिति।हेतुभूतस्यहेतुत्वं
प्राप्तस्यमेघादेर्यःकालःसएववर्षस्य।वर्षस्यचयःकालःसएवनिष्पत्तिक्रियाया इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जननादीनीति। जननमभिव्यक्तिः। एतदुक्तं भवति। विद्यमानोप्यर्थोऽनभिव्यक्तोऽर्थक्रियां न करोति। न चैतावता तस्यासत्त्वम्। कारणसामग्र्याः कार्योत्सादानुमानात्। स्थूलेन तु रूपेणाभिव्यक्तोऽर्थक्रियां संपादयति। अस्त्यर्थानामिति। सत्तावाचिनामित्यर्थः। भवन्तीशब्दो लटः पूर्वाचार्यसंज्ञा। कर्तुर्विद्यमानत्वादिति। ततश्च सत्ता यावर्तमानत्वं न तु भूतभविष्यद्रूपत्वमित्यर्थः। अवाल्वादिति। अविकल्पितत्वादित्यर्थः। एतदेवाह। यन्नवा भाष्यन्त इति। एतदुक्तं भवति। यदि वचनेन वर्तमाने लडादयो विधीयेरन्तदा

हेतुभूतकालसंप्रेक्षितत्वाद्वा। हेतुभूतकालसंप्रेक्षितत्वाद्वा पुनः सिद्धमेतत्। हेतुभूतकालं वर्षं वर्षकाला च क्रिया। यदि तर्हि निष्पन्नोऽर्थः। किं निष्पन्नकार्याणि न क्रियन्ते। कानि। भोजनादीनि। अन्यदिदानीमुच्यते। किं निष्पन्नकार्याणि न क्रियन्त इति। यत्तु तन्निष्पन्नोऽर्थो न निष्पन्न इति। स निष्पन्नोऽर्थः। अवश्यं खल्वपि कोष्ठगतेष्वपि शालिषु अवहननादीनि प्रतीक्ष्याणि। एवमिहापि निष्पन्नोऽर्थः। अवश्यं तु जननादीनि प्रतीक्ष्याणि। अस्त्यर्थानां भवन्त्यर्थे सर्वा विभक्तयः कर्तुर्विद्यमानत्वात्। अस्त्यर्थानां भवन्त्यर्थे सर्वा विभक्तयः शासितव्याः। कूपोस्ति कूपो भविष्यति कूपो भविता कूपोभूत् कूप आसीत् कूपो बभूवेति। कथं पुनर्ज्ञायते भवन्त्या एषोऽर्थ इति। कर्तुर्विद्यमानत्वात्। कर्तात्र विद्यते। कथं पुनर्ज्ञायते कर्तात्र विद्यत इति। कूपो नेन कदाचिद्दृष्टो न चास्य किंचिदप्यपायं पश्यति। स तु तत्र बुद्ध्या नित्यां सत्तामध्यवस्यति कूपोत्रास्तीति। सिद्धं तु यथास्वकालं समुच्चारणात्। सिद्धमेतत्। कथम्। यथास्वकालमेता विभक्तयः स्वेषु स्वेषु कालेषु प्रयुज्यन्त इति। कथं पुनर्ज्ञायते यथास्वकालमेता विभक्तयः स्वेषु स्वेषु कालेषु प्रयुज्यन्त इति। अवाल्वात्। यन्नवा भाष्यन्ते। असिद्धविपर्यासश्च। असिद्धश्च विपर्यासः। नहीह कश्चित्कूपोस्तीति प्रयोक्तव्ये कूपोभूदिति प्रयुङ्क्ते। किं पुनः कारणं न वा भाष्यन्ते असिद्धश्च विपर्यासः। इह हि किंचिदिन्द्रियकर्म किंचिद्बुद्धिकर्म ॥

लोके विकल्पेन प्रयुज्येरन्। कूपोभूदिति प्रयोक्तव्ये कूपो भविष्यतीत्यपि प्रयुज्येत। तदेव दर्शयति। असिद्धविपर्यासश्चेति। इह किंचिदिति। इन्द्रियव्यापारकालस्य कूपसत्त्वं प्रति भेदकत्वेनाश्रयणात् तस्यापि तत्कालत्वमित्यर्थः। तदुक्तं हरिणा। सत्तामिन्द्रियसंबन्धात्सैव सत्ता विशिष्यते। भेदेन व्यवहारो हि वस्त्वन्तरनिबन्धनः। अस्तित्वं वस्तुमात्रस्य बुद्ध्या तु परिगृह्यते। यः समासादनाद्भेदः स नत्र न विवक्षित इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानद्यतन॥ तत्रलङ्विधिप्रसङ्ग इति। अपूर्वविधानेऽद्यतनेलटोदृष्टत्वाद्भूतभविष्यदनद्यतनेप्रसङ्गः। लुङ्लृटोश्चेति ननुवत्करणात्सादृश्यार्थात्संकरोनभविष्यति। नैतदस्ति। अप्राप्तप्रापणार्थत्वादतिदेशस्यभूतभविष्यच्छब्दोपादानेन लुङ्लृटोर्विधानेप्यद्यतनेदृष्टत्वमात्रेणायथाकालमपिप्रसङ्ग उच्यते। वत्करणंतुतदाविस्पष्टार्थमेवस्यात्। प्रतिषे

इन्द्रियकर्म समासादनंबुद्धिकर्मव्यवसायः। एवंह्विकश्चित्पाटलिपुत्रंजिगमिषुराह। योयमध्वागन्तव्यः आपाटलिपुत्रात्तस्मिन्कूपोभविष्यति। अनद्यतनेकूपोभवितेति। समासाद्यकूपोस्तीतिसमासाद्यातिक्रम्य कूपोभूदिति। समासाद्यातिक्रम्योषित्वाकूपआसीदिति। समासाद्यातिक्रम्योषित्वाविस्मृत्यकूपोबभूवेति। तद्यदेन्द्रियकर्मतदेताविभक्तयः। यदाह्विबुद्धिकर्मतदावर्तमानाभविष्यति॥ नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः॥ किमर्थमिमौद्वौप्रतिषेधावुच्येते। नअद्यतनवदित्येवोच्येत। नानद्यतनवत्प्रतिषेधेलङ्लुटोःप्रतिषेधः। नानद्यतनवत्प्रतिषेधेलङ्लुटोःप्रतिषेधोद्रष्टव्यः। अद्यतनवद्वचनेहिविधानम्। अद्यतनवद्वचनेहिसतिविधानमिदंविज्ञायतेतत्रकोदोषः। तत्रलङ्विधिप्रसङ्गः। तत्रलङ्विधिःप्रसज्येत। लुङ्लटोश्चायथाकालम्। लुङ्लटोश्चायथाकालंप्रयोगःप्रसज्येत। लुङोपिविषयेलट्स्यात्। लटश्चविषयेलुङ्यथास्यात्। अद्यपुनरयं द्वौप्रतिषेधावुक्तातूष्णीमास्ते। यथाप्राप्तमेवाद्यतनेभविष्यति॥ नानद्यतन॥ भविष्यतिमर्यादावचनेवरस्मिन्॥ किमर्थमिदमुच्यते। ननानद्यतनवदित्येवसिद्धम्। भविष्यतिमर्यादावचनेवरस्मिन्नित्यक्रियाप्रबन्धार्थम्। अक्रियाप्रबन्धार्थोयमारम्भः। किमुच्यते। अक्रियाप्रबन्धार्थइति। नपुनःक्रियाप्रबन्धार्थोपिस्यात्। क्रियाप्रबन्धार्थमितिचेद्वचनानर्थक्यम्। क्रियाप्रबन्धार्थमितिचेद्वचनमनर्थकंभवति। सिद्धंक्रियाप्रबन्धेपूर्वेणैव ॥

धोपादानेतुवत्करणमनद्यतनविशेषविहितानामपिप्रतिषेधार्थम्। अन्यथावत्करणमनर्थकंस्याद्धनानद्यतनइत्येवब्रूयात्तेनपरोक्षेलिट्। हशश्वतोर्लङ्लट्स्मेपुरिलुङ्चास्मेइत्येतत्सूत्रविहिताअपिप्रत्ययाःप्रतिषिध्यन्ते॥ भविष्यतिम॥ अक्रियाप्रबन्धार्थमिति। एतच्चउपलक्षणंतेनअसामीप्यार्थंचेतिद्रष्टव्यम्। वचनसामर्थ्याच्चक्रियाप्रबन्धसामीप्ययोरितिनिवृत्तम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनहोरात्राणामिति। उत्तरसूत्रस्य प्रयोजनमेतत् स्यादिति भावः। अनिष्टत्वादिति। क्रियाप्रबन्धसामीप्ययोरहो रात्रविभागेप्यनद्यतने प्रतिषेध इत्यर्थः। मर्यादावचन इति। नियमार्थमेतत्स्यान्मर्यादावचन एवेति भावः। अत्रापी ति। विधिनियमसंभवे विधेर्ज्यायस्त्वात्॥ कालविभा॥ तद्विभाग इति। अनहोरात्राणामिति संबन्धसामान्ये षष्ठी नक

इदं तर्हि प्रयोजनम्। अनहोरात्राणामिति वक्ष्यामीति। इह माभूद्योयं त्रिंशद्रात्र आगामी तस्य योव रः पञ्चदशरात्र इति। अहोरात्रप्रतिषेधार्थमिति चेन्नानिष्टत्वात्। अहोरात्रप्रतिषेधार्थमिति चेत्तन्न। किं कारणम्। अनिष्टत्वात्। अत्रापि नानद्यतनवदित्येवेष्यते। इदं तर्हि प्रयोजनं भविष्यतीति वक्ष्यामी ति। इह माभूत्। योयमध्वागत आपाटलिपुत्रात्तस्य यदवरं साकेतादिति। नानिष्टत्वात्। अत्रापि नानद्य तनवदित्येवेष्यते। इदं तर्हि प्रयोजनं मर्यादावचन इति वक्ष्यामीति। इह माभूत्। योयमध्वा अपरिमाणो गन्तव्यः तस्य यदवरं साकेतादिति। नानिष्टत्वात्। अत्रापि नानद्यतनवदित्येवेष्यते। इदं तर्हि प्रयोजमम्। अवरस्मिन्निति वक्ष्यामीति। इह माभूत्। योयमध्वा आपाटलिपुत्राद्गन्तव्यस्तस्य यत्परं साकेतादिति। ना निष्टत्वात्। अत्रापि नानद्यतनवदित्येवेष्यते। तस्मात्सुष्ठूच्यते भविष्यति मर्यादावचनेवरस्मिन्नित्यक्रियाप्रबन्धा र्थम्। क्रियाप्रबन्धार्थमिति चेद्वचनानर्थक्यमिति। भविष्यति॥ कालविभागे चानहोरात्राणाम्। अनहोरात्राणामिति तद्विभागे प्रतिषेधः। अनहोरात्राणामिति चेत्तद्विभागे प्रतिषेधो वक्तव्यः। योयं त्रिंशद्रात्र आगामी तस्य योवरोर्धमास इति। तैश्च विभागे॥ तैश्च विभागे प्रतिषेधो वक्तव्यः। योयं मास आगामी तस्य योवरः पञ्चदशरा त्रः। तद्द्वैध्यं विजानीयात्। अहोरात्राणामेवाहोरात्रैर्विभागे प्रतिषेधो भवतीति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे अनहोरात्राणा मिति तेषां विभागे तैश्च विभाग इति॥ परस्मिन्विभाषा॥ कस्मिन्परस्मिन्। कालविभागे। कुत एतत्। योगविभागकरणसामर्थ्यात्॥

र्मणिनापि कर्तरि। तेन यदाहोरात्राणामन्येन कालेन विभागोऽन्यस्य वा अहोरात्रैरहोरात्राणां वाऽहोरात्रैः सर्वथा प्रतिषेध इत्य र्थः॥ परस्मिन्॥ योगविभागकरणसामर्थ्यादिति। इह भविष्यति मर्यादावचनेवरस्मिन्ननहोरात्राणामित्येकयोगे कर्तव्ये पृथग्योगकरणं परस्मिन्विभाषेत्यत्र कालविभागग्रहणसंबन्धार्थमेवेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिङ्‌निमि॥ साधनातिपत्ताविति। साधनं मांसादि तस्यातिपत्तौ क्रियानिष्पत्तावपि लृङ् भवतीति भावः। अभोक्ष्यतेति। मांसस्या
त्रानिष्पत्तिः भोजनक्रियायास्तु निष्पत्तिरेव। साधनातिपत्तिश्चेदिति। करणभेदाद्धि नैव भोजनक्रियातेन मांसातिपत्तौ मां
सभोजनक्रियातिपत्तिरेवेत्यर्थः॥ भूते च॥ भूत इति। वक्ष्यमाणसूत्रार्थपर्यालोचनलभ्यं चैतत्॥ उताप्योरित्यारभ्य लिङ्‌नि
मित्तं तत्र भूते क्रियातिपत्तौ अनेन लृङ् प्रत्ययः प्राकृतत्तो विकल्प इत्यर्थः॥ वोताप्योः॥ विभाषेति। गर्हायां लडपिजात्वोरित्य

लिङ्‌निमित्ते लृङ् क्रियातिपत्तौ॥ साधनातिपत्तौ॥ साधनातिपत्तावित्यपि वक्तव्यम्। इहापि यथा स्यात्। अभोक्ष्य
त भवान्मांसेन यदि मत्समीप आसिष्यतेति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नान्तरेण साधनं क्रियायाः प्रवृत्तिर
स्तीति। साधनातिपत्तिश्चेत् क्रियातिपत्तिरपि भवति। तत्र क्रियातिपत्तावित्येव सिद्धम्॥ लिङ्‌निमित्ते॥ भूते
च॥ भूते लृङ् ताप्यादिषु॥ भूते लृङ् उताप्यादिषु द्रष्टव्यः। उताध्येष्यत। अप्यध्येष्यत॥ वोताप्योः। विभाषा गर्हा
प्रभृतौ प्रागुतापिभ्याम्॥ विभाषा गर्हाप्रभृतौ प्रागुतापिभ्यामिति वक्तव्यम्। वोताप्योरिति ह्युच्यमाने संदेहः
स्यात्। प्राग्वोतापिभ्यां सह वेति। तदाचार्यः सुहृद् भूत्वान्वाचष्टे। विभाषा गर्हाप्रभृतौ प्रागुतापिभ्यामिति॥ गर्हा
यां लडपिजात्वोः॥ गर्हायां लड्विधानानर्थक्यं क्रियासमाप्तेर्विवक्षितत्वात्। गर्हायां लड्विधानमनर्थकम्।
किं कारणम्। क्रियाया असमाप्तेर्विवक्षितत्वात्। क्रियाया अत्रासमाप्तिर्विवक्षिता। एष एव च नाम न्याय्यो व
र्तमानः कालः यत्र क्रिया अपरिसमाप्ता भवति। तत्र वर्तमाने लडित्येव सिद्धम्। यदि वर्तमाने लडि स्ये
वमत्र लड् भवति शतृशानचावपि तर्हि प्राप्नुतः। इष्येते च शतृशानचावपि। मां याजयन्तं पश्य। अपि मां याजयमानं प
श्य॥ अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि॥ किंवृत्तस्यानधिकारादुत्तरत्राकिंवृत्तग्रहणानर्थक्यम्। किंवृत्तस्यानधिकारादुत्त
रत्राकिंवृत्तग्रहणमनर्थकम्। निवृत्तं किंवृत्तमिति तस्मिन्निवृत्ते अविशेषेण किंवृत्ते चाकिंवृत्ते च भविष्यति॥

नेन लड्विधानाल्लिङ्‌निमित्ताभावाद्विभाषा कथमिति लिङ्‌इत्यतः प्रभृति प्रागुताप्योः समर्थयोरित्यतः सूत्राद्यल्लिङ्‌निमित्तं तत्र लृङ्
विकल्पः। मर्यादायां ह्यत्राङ् नाभिविधावित्यर्थः। गर्हाप्रभृताविति। गर्हादिविशिष्टे प्रकृत्यर्थ इत्यर्थः॥ गर्हायाम्॥ इष्येते इति
तौ च सूत्रारम्भे सत्यवर्तमानकालविहितत्वाल्लटो न प्राप्नुत इति दोषवानेव सूत्रारम्भ इत्यर्थः॥ अनव॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंतर्हीति। अकिंवृत्तशब्देनकिंवृत्तादन्यत्पदंपर्युदासाश्रयणेनगृह्यतेतस्योपपदसंज्ञार्थमकिंवृत्तग्रहणंतेनकिंवृत्तात्किंवृत्त
योरुपपदसंज्ञासिध्यतीतिभावः। अतिङितिप्रतिषेधइति। नविद्यतेतिङ्यस्मिन्समासेसोतिङितिबहुव्रीहिसमासाश्रयणादिति
भावः। उपपदसंज्ञेति। उपपदसंज्ञाकार्यंसमासइत्यर्थः। भविष्यदधिकारविहितस्येति। लृटः सद्वेत्यत्रभविष्यतीत्यधिकाराद्भविष्य
तीत्येवंविहितस्यलृट्शेषेचेत्यस्यलृटआनन्तर्याद्वा शतृशानचौ। अविशेषेति। कालमात्रेविधानाद्यंलृट्यद्यपिभविष्यति
भवतितथापिभविष्यदधिकारविहितोनभवतीतिशतृशानचावस्यनभवतः॥ शेषेलृ॥ नहियदावितिः॥ आश्चर्येयदिसम्भुञ्जीतेत्य

इदंतर्हिप्रयोजनम् उपपदसंज्ञांवक्ष्यामीति। उपपदसंज्ञावचनेकिंप्रयोजनम्। उपपदमतिङितिसमासोयथास्यात्।
अतिङितिहिप्रतिषेधःप्राप्नोति। यदातर्हिलृटःसत्संज्ञौतदोपपदसंज्ञाभविष्यति। भविष्यदधिकारविहितस्यलृटः
सत्संज्ञावुच्येतेअविशेषविहितश्चायम्॥ जातुयदोर्लिङ्॥ जातुयदोर्लिङ्विधानेयदायद्योरुपसंख्यानम्। जातु
यदोर्लिङ्विधानेयदायद्योरुपसंख्यानंकर्तव्यम्। यदाभवद्विधःक्षत्रियंयाजयेत्। यदिभवद्विधःक्षत्रियंयाजये
त्॥ जातुयदोर्लि॥ शेषेलृडयदौ॥ चित्रीकरणेयदिप्रतिषेधानर्थक्यमर्थान्यत्वात्। चित्रीकरणेयदिप्रतिषेधोनर्थ
कः। किंकारणम्। अर्थान्यत्वात्। नहियदावुपपदेचित्रीकरणंगम्यतेकिंतर्हिसंभावनम्॥ हेतुहेतुमतोर्लिङ्॥ हेतु
हेतुमतोर्लिङ्वा॥ हेतुहेतुमतोर्लिङ्वेतिवक्तव्यम्। दक्षिणेनचेद्यायात्नशकटंपर्याभवेत्। दक्षिणेनचेद्यास्यति
नशकटंपर्याभविष्यति। भविष्यदधिकारेच। भविष्यदधिकारेइतिवक्तव्यम्। इहमाभूत्। वर्षतीतिधावति। हन्तीति
पलायतइति। अथेदानींशतृशानचावत्रकस्मान्नभवतः। देवत्रातोगलोग्राहइतियोगेचसद्विधिः। मिथस्तेनविभाष्यन्तेगवाक्षः
संशितव्रतः॥ इच्छार्थेषुलिङ्लोटौ॥ कामप्रवेदनंचेत्। कामप्रवेदनंचेदुच्यतइतिवक्तव्यम्। इहमाभूत्। इच्छन्करंकरोतीति॥

त्रसंभावनंतात्पर्येणप्रतीयतइतितन्निमित्तएवलिङ्भविष्यति। संभावनेलमितिचेदित्यनेनेत्यर्थः। संभावनेहियदिशब्दःप्रयुज्यते॥
हेतु॥ देवत्रातइति। व्यवस्थितविभाषाश्रयणादितिभावः। तेनदेवत्रातइतिसंज्ञायांभवतिनतुदेवत्राणइति। गलशब्दःप्राण्यङ्गेभव
तिनतुगरइति। विषेतुगरइतिनतुगलइति। जलचरेग्राहएवज्योतिषिग्रहएवाइतिशब्दप्रयोगेचसत्संज्ञेनप्रवर्तेतेगवाक्षइति। वात
यनेनित्यमेवावङ्भवति। संशितव्रतइति। व्रतविषयेश्यतेर्नित्यमित्त्वंभवति। मिथइति। परस्परेणदेवत्राणादिभिरेकस्मिन्विषयेनविक
ल्प्यन्तइत्यर्थः। एषुचतुर्ष्वविदोन्द्रेतिवानत्वमचिविभाषेतिलत्वंविभाषाग्रहइतिणप्रत्ययः लक्षणहेत्वोःक्रियायाइतिशतृशानचौनन्चोर्वि राम: ८७
भाषेत्यतोविभाषानुवर्तनादिकल्पितौ। अवङ्स्फोटायनस्येतिविभाषाऽवङ्शाच्छोरन्यतरस्यामित्येतेविधयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधिनिमन्त्रण॥ विध्यधीष्टयोरिति। उभयोरपि नियोगरूपत्वादिति प्रश्नः। प्रेषणमिति। भृत्यादेः कस्यांचित्क्रियायां नियोजनमित्यर्थः। अधीष्टं नामेति। गुर्वादेस्तु पूज्यस्य व्यापारणमधीष्टमित्यर्थः। प्रपञ्चार्थं न्यायव्युत्पादनार्थं वार्थभेदमाश्रित्य भेदेनोपादानं विधिनिमन्त्रणादीनां कृतम्। विधिरूपता हि सर्वत्रान्वयिनी विद्यते। संनिहितेनेति। धात्वर्थेनासनादिना। यथेह भवानासीतेति संनिहितमासनं तदनुपरमार्थं च निमन्त्र्यते। असंनिहितेति। यथेह भवान्भुञ्जीतेति भोजनमसंनिहितं तदर्थमामन्त्र्यते। यन्नियोगत इति। अवश्यकर्तव्यं नित्यं नैमित्तिकं च तन्निमन्त्रणमिति निमन्त्रणविषयत्वात्तदेव निमन्त्रणम्। अधर्म

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्॥ विध्यधीष्टयोः को विशेषः। विधिर्नाम प्रेषणम्। अधीष्टं नाम सत्कारपूर्विका व्यापारणा। अथ निमन्त्रणामन्त्रणयोः को विशेषः। संनिहितेन निमन्त्रणं भवति। असंनिहितेनामन्त्रणम्। नैषोऽस्ति विशेषः। असंनिहितेनापि निमन्त्रणं भवति संनिहितेन चामन्त्रणम्। एवं तर्हि यन्नियोगतः कर्तव्यं तन्निमन्त्रणम्। किं पुनस्तत्। हव्यं कव्यं च। ब्राह्मणेन स्विद् भुज्यतामित्युक्ते अधर्मः प्रत्याख्यातुः। आमन्त्रणे कामचारः। कथं पुनरिदं विज्ञायते निमन्त्रणादीनामर्थ इति। आहोस्विन्निमन्त्रणादिषु गम्यमानेष्विति। कश्चात्र विशेषः। निमन्त्रणादीनामर्थे चेदामन्त्रये निमन्त्रये भवन्तमिति प्रत्ययानुपपत्तिः प्रकृत्यभिहितत्वात्। निमन्त्रणादीनामर्थे चेद् आमन्त्रये निमन्त्रये भवन्तमिति प्रत्ययो नोपपद्यते। किं कारणम्। प्रकृत्यभिहितत्वात्। प्रकृत्याभिहितः सोऽर्थ इति कृत्वा प्रत्ययो न प्राप्नोति। द्विवचनबहुवचनाप्रसिद्धिश्चैकार्थत्वात्। द्विवचनबहुवचनयोश्चाप्रसिद्धिः॥

इति। यदान्यो ब्राह्मणो भोक्ता न लभ्यते तदा दौहित्रादिर्भोजयितव्यः तस्य च प्रत्याख्याने अधर्मः। स्मार्तः समाचारः। आमन्त्रण इति। काम्यकर्मणि कामनया प्रवृत्तिर्नान्यथा। कथमिति। किमिह विध्यादयः प्रत्ययस्याभिधेयत्वेन निर्दिष्टाः। उत विषयभावेनेति प्रश्नः। निमन्त्रणादीनामिति। आदिशब्दस्य प्रकारार्थत्वाद्विधिरपि गृह्यते। प्रकृत्यभिहितत्वादिति। प्रकृत्या योऽर्थोऽभिधीयते तत्रैव प्रत्ययेन भाव्यं न तु प्रकृत्यभिहितेऽर्थे। उक्तार्थानामप्रयोग इति न्यायात्। विषयपक्षाश्रये तु प्रकृत्यभिहितेष्वपि विध्यादिषु तत्सत्तामात्राश्रयः प्रत्ययः सिध्यति। द्विवचनेति। नाप्राप्तेषु कर्त्रादिषु विध्यादयोऽर्था निर्दिश्यमानास्तेषां बाधकाः प्रसजन्तीति कर्त्रादिगतायाः संख्यायाः अभिधानं न प्राप्नोतीति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· ९८ सिद्धंत्विति। द्वितीयंविध्यादिकमर्थंयदाधात्वर्थमाकाङ्क्षतितदालिङ्प्रत्ययःयदाचधात्वर्थेसंपाद्येनियोज्योनियुज्यतेतदा
द्वितीयाकाङ्क्षित्वम्। इहतुदेवदत्तोभवन्तमामन्त्रयतइतिनास्तिधात्वर्थस्यद्वितीयाकाङ्क्षित्वमितिलिङ्नभवति।प्राप्नोति
ति।धात्वर्थस्यप्राप्त्यादेर्भिन्नमामन्त्रणंप्रत्याकाङ्क्षाविद्यतइतिभावः। आमन्त्रयेदिति।आमन्त्रणस्यधात्वर्थत्वात्तस्यचैकत्वा
द्भेदपूर्विकायाआकाङ्क्षाया आमन्त्रणंप्रत्यभावइतिभावः।निमन्त्रयेनिमन्त्रणमिति।प्रकृतिवाच्यंनिमन्त्रणंविशिष्टकर्मकम
न्यत्तद्विषयंत्ववश्यकर्तव्यतालक्षणंनिमन्त्रणमन्यदितिभिन्नत्वादस्त्येवद्वितीयाकाङ्क्षित्वम्।तदयमर्थः।त्वत्कर्मकंभो

किंकारणम्।एकार्थत्वात्।एकोयमर्थोनिमन्त्रणंनामतस्यैकत्वादेकवचनमेवप्राप्नोति।अस्तुतर्हिनिमन्त्रणादि
षुगम्यमानेष्वितिइहापितर्हिप्राप्नोति।देवदत्तोभवन्तमामन्त्रयते देवदत्तोभवन्तंनिमन्त्रयतइति।सिद्धंतुद्वि
तीयाकाङ्क्षस्यप्रकृतेप्रत्ययार्थेप्रत्ययविज्ञानात्।सिद्धमेतत्।कथम्।द्वितीयाकाङ्क्षस्यधातोःप्रकृतेप्रत्ययार्थे
प्रत्ययोभवतीतिवक्तव्यम्।केपुनःप्रकृताअर्थाः।भावकर्तारः।एवमपिभवेत्सिद्धम्।प्राप्नोतुभवानामन्त्रणम्।अ
नुभवतुभवानामन्त्रणमितियत्रद्वितीयआकाङ्क्षते। इदंतुनसिध्यति।निमन्त्रयेआमन्त्रयेइति।अत्रापिद्विती
यआकाङ्क्षते।कः।निमन्त्रिरेवा।निमन्त्रयेनिमन्त्रणमामन्त्रयेआमन्त्रणमिति।कथंपुनर्निमन्त्रिर्नामनिमन्त्रण
माकाङ्क्षेत्। दृष्टस्स्वभावेनभावयोगः।तद्यथा।इषिरिषिणायुज्यतेस्त्रीत्वंचस्त्रीत्वेन।यावताचात्रापिद्वितीय
आकाङ्क्षते।अस्तुतर्हिनिमन्त्रणादीनामर्थइति।ननुचोक्तंनिमन्त्रणादीनामर्थेचेदामन्त्रयेनिमन्त्रयेभवन्त
मितिप्रत्ययानुपपत्तिःप्रकृत्यभिहितत्वादिति ॥

जनादिषुनिमन्त्रणंममानुष्ठेयम्।ततोभोजनादिषुत्वांनिमन्त्रयेइति।अत्रचामन्त्रयेआमन्त्रणंनिमन्त्रयेनिमन्त्रणमिति।प्रकृत्यर्थ
व्यतिरिक्तामन्त्रणनिमन्त्रणसद्भावप्रदर्शनायामन्त्रणनिमन्त्रणशब्दौप्रयुक्तौनत्वयंलौकिकःप्रयोगःलोटैवप्रकृत्यर्थव्यतिरिक्त
स्यामन्त्रणादेर्गमितत्वात्।तदयमर्थः।आमन्त्रयेआमन्त्रणमिति आमन्त्रयेइत्यत्रलोटिप्रयुज्यमानेआमन्त्रणंधा
त्वर्थविषयमाकाङ्क्ष्यमाणमस्ति।इषिरिति।एषितुमिच्छतिइतिकालसाधनभेदादिच्छयोर्भेदाश्रयोयोगः।स्त्रीत्वमिति।कुमारी
त्यादौस्त्रीत्वंद्रव्यस्यविशेषणंयदातुतदेवप्राधान्येनाश्रीयतेतदातस्यस्त्रीत्वादिनायोगः। स्त्रीत्वंस्त्रीतेति ॥ रामः ९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सएवसमेति।निमन्त्रयेभवन्तमित्यवश्यकर्तव्यंभवतोभोजनादिषुमयानिमन्त्रणमितिनिमन्त्रणस्यावश्यकर्तव्यतालक्षणंनिमन्त्रणमितिप्रकृतिप्रत्ययार्थयोर्भेदइत्यर्थः।सुपामिति।विध्यादिभिर्विरोधाभावाल्लः कर्मणिचेत्यत्रबहुवचननिर्देशात्सर्वलकारसंग्रहार्थाद्वाउभयानुग्रहाच्च कर्त्रादयोनबाध्यन्तइतिकर्तृकर्मगतद्वित्वबहुत्वनिबन्धनानिद्विवचनबहुवचनानिभव

नैषदोषः।योसौद्वितीयआकाङ्क्ष्यते।सएवसमप्रत्ययार्थोभविष्यति।अयंतर्हिदोषः।द्विवचनबहुवचनाप्रसिद्धिरेकार्थत्वादिति।एषोप्यदोषः।सुपांकर्मादयोप्यर्थाः संख्याचैवतथातिङाम्।सुपांसंख्याचैवार्थः कर्मादयश्च।प्रसिद्धोनियमस्तत्र।प्रसिद्धस्तत्रनियमः।नियमः प्रकृतेषुवा।अथवाप्रकृतानर्थानपेक्ष्यनियमः।केचप्रकृताः।एकत्वादयः।एकस्मिन्नेवैकवचनंनद्वयोर्नबहुषु।द्वयोरेवद्विवचनंनैकस्मिन्नबहुषु।बहुष्वेवबहुवचनंनैकस्मिन्नद्वयोरिति॥प्रैषातिसर्गप्राप्तकालेषुकृत्याश्च॥किमर्थंप्रैषादिष्वर्थेषुकृत्याविधीयन्तेनअविशेषेणविहिताःकृत्यास्तेप्रैषादिषुभविष्यन्ति।अन्यत्रचाप्रैषादिषुकृत्यानांवचनंनियमार्थम्।प्रैषादिषुकृत्यानांवचनंक्रियते।किंप्रयोजनम्।नियमार्थम्।नियमार्थोयमारम्भः।प्रैषादिष्वेवकृत्यायथास्युरिति।प्रैषादिषुकृत्यानांवचनंनियमार्थमितिचेत्तदनिष्टम्।प्रैषादिषुकृत्यानांवचनंनियमार्थमितिचेत्तदनिष्टंप्राप्नोति।नहिप्रैषादिष्वर्थेष्वेवकृत्याइष्यन्ते।किंतर्हि।अविशेषेण।बुसोपेन्ध्यंतृणोपेन्ध्यम्।घनघात्यम्।विध्यर्थंतुस्त्रियाःप्रागितिवचनात्।विध्यर्थंतुप्रैषादिषुकृत्यानांवचनम्।अयंप्रैषादिष्वर्थेषुलोड्विधीयतेसविशेषविहितः सामान्यविहितान्कृत्यान्बाधेत।वासरूपेणकृत्याअपिभविष्यन्ति।नस्युः।किंकारणम्।स्त्रियाःप्रागितिवचनात्।प्राक्स्त्रियावासरूपः॥कालसमयवेलासुतुमुन्॥प्रथमान्तेष्वितिवक्तव्यम्।किंप्रयोजनम्।इहमाभूत्।कालेभुङ्क्ते।तत्तर्हिवक्तव्यम्।नवक्तव्यम्।प्रैषादिष्वितिवर्तते।तच्चावश्यंप्रैषादिग्रहणमनुवर्त्यम्।प्रथमान्तेष्वितिह्युच्यमानेइहापिप्रसज्येतकालः पचतिभूतानिकालः संहरतिप्रजाइति॥ इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणेमहाभाष्येतृतीयस्याध्यायस्यतृतीयेपादेद्वितीयमाह्निकम्।पादश्चतृतीयः समाप्तः ॥

न्तीत्यर्थः॥प्रैषाति॥बुसोपेन्ध्यमिति।अग्निस्तोकंबुसेनज्वलनीयमितिवस्तुस्वरूपकथनंनतुप्रैषादिप्रतिपत्तिः।घनघात्यमिति।घनेनलोहादिनाघात्यमितिकठिनत्वादित्यर्थः॥इतिश्रीमन्महोपाध्यायजैयटपुत्रकैयटकृतेभाष्यप्रदीपेतृतीयस्यअध्यायस्यतृतीयेपादेद्वितीयमाह्निकम्।पादश्चतृतीयः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· ९९ धातुसंबन्धेप्रत्ययाः॥ संबन्धस्यअनेकाधिष्ठानत्वात्सामर्थ्यादृत्ता वपिसंख्याविशेषोद्वित्वमव गम्यते। धात्वोः संबन्धो ३ ४ १
धातुसंबन्धः। धात्वर्थश्चात्रोपचाराद्धातुशब्देनोच्यते। नहिस्वार्थेगुणीभूतयोर्धात्वोः परस्परेणसंबन्धउपपद्यतेधात्व
र्थयोस्तुविशेषणविशेष्यभावलक्षणसंबन्धोपपत्तिः। तत्रधातुसंबन्धेकालान्तरविहितानांप्रत्ययानामन्यस्मि
न्कालेसाधुत्वाभ्यनुज्ञानार्थमिदंसूत्रम्। प्रत्ययइतिवर्तमानइति। यद्यपिस्वरूपपदार्थकः प्रत्ययशब्दः प्रकृतः।
तथापीहसंज्ञिनिर्देशाभावात्संज्ञिपदार्थकोविज्ञास्यतइतिभावः। अधातुप्रत्ययानामपीति। अन्यथाप्रकृतानामेव
धातुप्रत्ययानांग्रहणंस्यात्। प्रत्ययग्रहणात्तुसर्वप्रत्ययपरिग्रहार्थात्तद्धितानामपिकालभेदेसाधुत्वंभवति। गोमा
नासीदिति। तदस्यास्त्यस्मिन्निितिमतुप्प्रत्ययोवर्तमानसत्ताविशिष्टप्रकृत्यर्थयुक्तेर्थेविहितः। धातुसंबन्धेतुप्रकृत्य

धातुसंबन्धेप्रत्ययाः॥ प्रत्ययइतिवर्तमानेपुनःप्रत्ययग्रहणंकिमर्थम्। अधातुप्रत्ययानामपिधातु
संबन्धेसाधुत्वंयथास्यात्। गोमानासीत्। गोमान्भवितेति। इहपश्यामः भूतकालोभविष्यत्कालेनाभि
संबध्यमानोभविष्यत्कालः संपद्यते। कस्मान्नभविष्यत्कालोभूतकालेनाभिसंबध्यमानोभूतकालः
संपद्यते। धातुसंबन्धेप्रत्ययस्ययथाकालविधानात्सिद्धम्। धातुसंबन्धेयथाकालविहिताएवैतेप्र
त्ययाः स्वेषुस्वेषुकालेषुप्रयुज्यन्ते। कथंतर्हिकालान्यत्वंगम्यते ॥

र्थस्यभूतभविष्यत्त्वेपिसाधुर्भवति। इहपश्यामइति। अग्निष्टोमयाज्यस्यपुत्रोजनितेतिकालभेदेसाधुत्वाभ्यनु
ज्ञानायसूत्रम्। तत्रविशेषानुपादानाद्यथाभूतकालपरित्यागेनजनितेत्येतत्संबन्धाद्णिनिर्भविष्यतिकालेभवति
तथाजनितेतिलुट्प्रत्ययोभविष्यत्कालत्यागेनाग्निष्टोमयाजीत्येतत्संबन्धादूतेकस्मान्नभवतीतिप्रश्नः। यथाका
लविधानादिति। सूत्रप्रत्याख्यानेनउत्तरम्। अग्निष्टोमयाजीतिभूतएवणिनिर्विधीयते। जनितेत्येतत्संबन्धात्तुभा
विव्यपदेशप्रतिपत्तिर्यथास्यसूत्रस्यशाटकंवयेतीत्यर्थः। इतरोऽगृहीताभिप्रायआह। कथंतर्हीति। पुत्रोस्यज रामः ९९
नितासचाग्निष्टोमेनयष्टेतितत्रयदिभूतेणिनिर्विधीयतेतदायागस्यभविष्यत्तावगमोनप्राप्नोतीतिप्रश्नः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपपदस्येति। भाविव्यपदेशविज्ञानाद्विशेषणस्यकालान्यत्वंवाक्यार्थवशादसत्यपिसूत्रारम्भेप्रतीयतइत्यर्थः। विशेष्यायाआख्यातादिपदवाच्यायाः क्रियायाः प्राधान्यात्स्वकालएवावस्थानंविशेषणभूतायास्तुक्रियायाउपलक्षणभावेनोपादानाद्भाविभूतव्यपदेशविषयताप्रतिपादनात्कालान्यत्वावगमइत्यर्थः। इतरोयथोक्तमभिप्रायमबुध्वासमीपेश्रूयमाणमुपपदमित्यवगम्यचोदयति। कुतइति। ततश्चाग्निष्टोमयाज्यस्यपुत्रोजातइत्ययमपिवाक्यार्थः कस्मान्नभवतीतिप्रश्नः। आचार्यदेशीयआह। एवंतर्हीति। धात्वधिकाराद्धातुग्रहणेसिद्धेधातुसंबन्धइतिपुनर्धातु

उपपदस्यतुकालान्यत्वम्। उपपदस्यैतत्कालान्यत्वम्। कुतोनुखल्वेतत्। अग्निष्टोमयाजीत्येतदुपपदंभवतिनपुनर्जनितेति। एवंतर्ह्यस्त्यादिभिर्योगे। अस्त्यादिविषयाः प्रत्ययाः साधवइतिवक्ष्यामि। केपुनरस्त्यादयः। अस्तिभूजनयः। एवमपियदास्त्यादीनामेवास्त्यादिभिर्योगस्तदानज्ञायतेकः कस्यकालमनुवर्ततेइति। भाविकृत्यमासीत्। पुत्रोजनिष्यमाणआसीत्। एवंतर्हिवाक्यमेवैतदेवंविषयंप्रयुज्यते। अग्निष्टोमयाजीत्येतत्तस्मिन्भविता। कस्मिन्योस्यपुत्रोजनिता। कदा। यदानेनाग्निष्टोमेनेष्टंभवति॥ क्रियासमभिहारेलोट्लोटोहिस्वौवाचतध्वमोः॥ हिस्वयोः परस्मैपदात्मनेपदग्रहणंलादेशप्रतिषेधार्थम्॥ हिस्वयोःपरस्मैपदात्मनेपदग्रहणंकर्तव्यम्। हिः परस्मैपदानांयथास्यात्स्वआत्मनेपदानामिति। किंप्रयोजनम्। लादेशप्रतिषेधार्थम्। लादेशौहिस्वौमाभूतामिति। किंचस्यात्। यदिलादेशौहिस्वौस्यातांतिङन्तंपदमितिपदसंज्ञानस्यात् ॥

ग्रहणंधातुविशेषपरिग्रहार्थंतेनास्तिभूजनिसंबन्धएवप्रत्ययानांकालान्तरेसाधुत्वमन्वाख्यायतइतिसूत्रारम्भेसतिविपर्ययोनभवतीत्यर्थः। अस्त्यादिविषयाइति। अस्त्यादिविशेषणायप्रयुक्ताइत्यर्थः। आचार्यः पूर्वोक्तेनाभिप्रायेणसूत्रप्रत्याख्यानेनैववाक्यार्थंस्थापयति। एवंतर्हीति। अवश्यंचस्वकालएवप्रत्ययविधिरेष्टव्यः। भाविकृत्यमासीदित्यत्रभाविशब्दस्यभूतकालत्वेभाव्यासीच्छब्दयोः पर्यायत्वाद्युगपत्प्रयोगोनस्यात्॥ क्रियासम॥ हिस्वयोरिति। सामान्यविहितानांतिङांशतृशानज्भ्यामिवहिस्वाभ्यांबाधः प्राप्नोतीतिस्थानिनिर्देशार्थंपरस्मैपदात्मनेपदग्रहणंकर्तव्यमित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लकारः कृदिति। तत्र स्थानिवद्भावाद्धिस्वयोरपि कृत्त्वात्तदन्तस्य प्रातिपदिकत्वात्स्वाद्युत्पत्तिर्भवतीत्यर्थः। विभक्तीति। विभक्तिसंज्ञकहिस्वसदृशत्वादनयोर्हिस्वयोरव्ययत्वमित्यर्थः। व्यतिकरो मा भूदिति। यदि लकारस्यैव स्थाने हिस्वौ विधीयेयातां तदा लः परस्मैपदमिति द्वयोरपि परस्मैपदसंज्ञा स्यात् ततश्च द्वावपि परस्मैपदिभ्य एव स्यातामित्ययं व्यतिकरः स्यादित्यर्थः। नवेति। यदि लस्यैव हिस्वौ स्यातां तदा तध्वमोर्लोटः स्थानिकयोरभावाद्वा च तध्वमोरिति स्थानित्वेनोपा

माभूदेवम् सुबन्तं पदमिति पदसंज्ञा भविष्यति। कथं स्वाद्युत्पत्तिः। लकारस्य कृत्त्वात्प्रातिपदिकत्वं तदाश्रयं प्रत्ययविधानम्। लकारः कृत् तस्य कृत्त्वात् कृत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा तदाश्रया प्रातिपदिकाश्रया स्वाद्युत्पत्तिरपि भविष्यति। यदि स्वाद्युत्पत्तिः सुपां श्रवणं प्राप्नोति। अव्ययादिति सुब्लुक् भविष्यति। कथमव्ययत्वम्। विभक्तिस्वरप्रतिरूपकाश्च निपाता भवन्तीति निपातसंज्ञा निपातोऽव्ययमिति अव्ययसंज्ञा। इह तर्हि स भवान् लुनीहि लुनीहीत्येवायं लुनाति तिङ्ङतिङ इति निघातो न प्राप्नोति। समसंख्यार्थं च। समसंख्यार्थं च हिस्वयोः परस्मैपदात्मनेपदग्रहणं कर्तव्यम्। हिः परस्मैपदानां यथा स्यात्। स्व आत्मनेपदानाम् व्यतिकरो मा भूदिति। न वा तध्वमोरादेशवचनं ज्ञापकं पदादेशस्य। न वा हिस्वयोः परस्मैपदात्मनेपदग्रहणं कर्तव्यम्। किं कारणम्। तध्वमोरादेशवचनं ज्ञापकं पदादेशस्य। यदयं वा च तध्वमोरित्याह तज्ज्ञापयत्याचार्यः पदादेशौ हिस्वाविति। तत्र पदादेशे पित्त्वाटोः प्रतिषेधः। तत्र पदादेशे पित्त्वस्याटश्च प्रतिषेधो वक्तव्यः। पित्त्वस्य तावत्स भवान् लुनीहि लुनीहीत्येवायं लुनाति। आटः खल्वपि सोऽहं लुनीहि लुनीहीत्येवं लुनामि। पित्त्वस्य तावन्न वक्तव्यः। पित्त्वप्रतिषेधे योगविभागः करिष्यते ॥

दा नमनुपपन्नं स्यादिति तध्वमोः स्थानित्वेनोपादाना लोट्शब्देन लोडादेशानां परस्मैपदात्मनेपदानां स्थानित्वमवसीयत इत्यर्थः। पदादेशस्येति। पदशब्देन पदसंज्ञानिमित्तानि तिङ उच्यन्ते। अथवा सर्वे सर्वपदादेशा इति न्यायात्तिङन्तस्य हिस्वान्तादेशप्रवृत्तिः। पित्त्वस्येति। तिप्सिप्मिपां स्थाने विधीयमानो हिः स्थानिवद्भावात्पित्स्यात् ततश्च ङित्त्वाभावाल्लुनीहीत्वं न स्यात्। अनुदात्तत्वं च हेः प्रसज्येत लुनीहि लुनीहि स भवानित्यादौ परस्य लुनीहिशब्दस्य तस्य परमाम्रेडितमनुदात्तं चेत्यनुदात्तत्वं भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावानिति।योगविभागकरणसामर्थ्यादानन्तर्यान्नापेक्ष्यतइत्यर्थः।भुङ्क्ष्वभुङ्क्ष्वेति।परत्वादाटिकृतेउत्तमस्यापित्त्वेस्वादे
शःस्थानिवद्भावात्सित्त्वादितिङित्त्वाभावाल्लोपाप्रसङ्गः।समसंख्यार्थत्वमिति।सर्वेषांतिङांद्वावपिपर्यायेणस्यातामित्यर्थः।एत

इहसेर्हिर्भवति।ततःअपिच्च।अपिच्चभवतियावान्।हिर्नामेति।आटश्चापिप्रतिषेधोनवक्तव्यः।आटिकृतेस्वा
द्धस्यादेशोभविष्यति।इदमिहसंप्रधार्यम्।आट्क्रियतामादेशइति।किमत्रकर्तव्यम्।परत्वादाडागमः।नि
त्यआदेशः।कृतेप्याटिप्राप्नोत्यकृतेपिप्राप्नोति।आडपिनित्यः।कृतेप्यादेशेप्राप्नोत्यकृतेपि।अनित्यआट्।अ
न्यस्यकृतेप्यादेशेप्राप्नोत्यन्यस्याकृतेपिप्राप्नोति।शब्दान्तरस्यचप्राप्नुवन्विधिरनित्योभवति।आदेशोप्यनित्यः।
अन्यस्यकृतेआटिप्राप्नोतिअन्यस्याकृतेप्राप्नोति।शब्दान्तरस्यचप्राप्नुवन्विधिरनित्योभवति।उभयोरनित्ययोः
परत्वादाडागमः।आटिकृतेस्वाद्धस्यादेशोभविष्यति।इदंतर्हिसोहंभुङ्क्ष्वभुङ्क्ष्वइत्येवंभुनजैइति।अत्रसो
रल्लोपइत्यकारलोपोनप्राप्नोति।समसंख्यार्थत्वंचाप्यपरिहृतमेव।सिद्धंतुलोण्मध्यमपुरुषस्यैकवचनस्य
क्रियासमभिहारेद्विर्वचनात्।सिद्धमेतत्।कथम्।लोण्मध्यमपुरुषैकवचनस्यक्रियासमभिहारेद्वेभ
वतइतिवक्तव्यम्।केनविहितस्यक्रियासमभिहारेलोण्मध्यमपुरुषैकवचनस्यद्विर्वचनमुच्यते।ए
तदेवज्ञापयत्याचार्योभवतिक्रियासमभिहारेलोडिति।यदयंक्रियासमभिहारेलोण्मध्यमपुरुषैक
वचनस्यद्विर्वचनंशास्ति।कुतोनुखल्वेतत्।ज्ञापकादत्रलोड्भविष्यति।नपुनर्यएवासावविशेषविहि
तःसयदाक्रियासमभिहारेभवतितदातस्यद्विर्वचनंभवतीति।लोण्मध्यमपुरुषैकवचनएवखल्व
पिसिद्धंस्यात्।इमौचान्यौहिस्वौसर्वेषांपुरुषाणांसर्वेषांवचनानामिष्येते।सूत्रंचभिद्यते।यथान्यासमेवास्तु।न
नुचोक्तंहिस्वयोःपरस्मैपदात्मनेपदग्रहणंलादेशप्रतिषेधार्थंसमसंख्यार्थंचेति।नैषदोषः।योगविभागा
त्सिद्धम्।योगविभागःकरिष्यते।क्रियासमभिहारेलोड्भवति ॥

देवेति।वृद्धकुमारीवरइत्यनेनन्यायेनक्रियासमभिहारविषयोलोडनुमीयतइत्यर्थः।कुतोन्विति।ज्ञापकंविघटयति।विध्यादिवि
षयस्यलोटोविद्यमानत्वात्क्रियासमभिहारविषयस्यतस्यैवादेशयोर्द्विर्वचनार्थग्रहणंस्यादित्यर्थः।सर्वेषामिति।प्रसङ्गइतिशेषः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोटौयाविति। लोडादेशौयौहिस्वौ दृष्टौ तत्तुल्यावनेनहिस्वौभवतइत्यर्थः। तेनतदीयकार्यातिदेशात्परस्मैपदात्मने
पदसंज्ञेहिस्वयोर्भवतः। तेनपरस्मैपदिभ्योहि रात्मनेपदिभ्यस्तुस्वोभवति। हिशब्दस्यकर्तावाच्यःस्वशब्दस्यभावकर्म
कर्तारः। तिङ्त्वंचभवतीतितिङ्ङ्ःतिङ इत्यादिकार्यंभवति। पुरुषैकवचनसंज्ञेतुसामर्थ्यान्नभवतः। यदिहितेअपि
स्यातांहिस्वयोरनेनविधानमनर्थकंस्याद्वचनान्तरेणतयोः सिद्धत्वात्। तध्वंभाविनइति। मुख्यार्थासंभवेगौणीकल्प
नाश्रीयतेततश्चतध्वंभावित्वाल्लोडेवतध्वंशब्दाभ्यामुच्यतइतिभावः॥ यथावि॥ हिस्वान्तमिति। संख्याकालपुरुषाण
मनभिव्यक्तत्वात्। एतदपीति। समुच्चयएवधात्वन्तरस्यानुप्रयोगइतिनियमात्क्रियासमभिहारेयथाविध्यनुप्रयोगोभ

ततोलोटोहिस्वौभवतः लोडित्येवानुवर्ततेलोटौयौहिस्वाविति। कथंवाचतध्वमोरिति। वाचतध्वंभावि
नोलोटइत्येवमेतद्विज्ञायते॥ यथाविध्यनुप्रयोगःपूर्वस्मिन्॥ किमर्थमिदमुच्यते। अनुप्रयोगोयथास्यात्।
नैतदस्तिप्रयोजनम्। हिस्वान्तमव्यक्तपदार्थकंतेनापरिसमाप्तोर्थइतिकृत्वाअनुप्रयोगोभविष्यति। इदंत
र्हिप्रयोजनंयथाविधीतिवक्ष्यामीति। एतदपिनास्तिप्रयोजनं समुच्चयेसामान्यवचनस्येतिवक्ष्यति। तन्त्रा
न्तरेणवचनंयथाविध्यनुप्रयोगोभविष्यति॥ समुच्चयेसामान्यवचनस्य॥ किमर्थमिदमुच्यते। अनुप्रयो
गोयथास्यात्। नैतदस्तिप्रयोजनम्। हिस्वान्तमनभिव्यक्तपदार्थकंतेनापरिसमाप्तोर्थइतिकृत्वानुप्रयो
गोभविष्यति। इदंतर्हिप्रयोजनंसामान्यवचनस्येतिवक्ष्यामीति। एतदपिनास्तिप्रयोजनम्। सामान्यव
चनस्यानुप्रयोगोस्तुविशेषवचनस्येति। सामान्यवचनस्यैवानुप्रयोगोभविष्यति। लघुत्वात्॥ उपसंवा
दाशङ्कयोश्च॥ उपसंवादाशङ्कयोर्वचनानर्थकंलिङर्थत्वात् ॥

विष्यति। ननुसमुच्चयेसामान्यवचनस्यैवेतिनियमःस्यात्ततश्चधात्वन्तरस्यापिलोट्प्रकृतिस मानार्थस्यक्रियासमभि
हारेनुप्रयोगःस्यात्। नैतदस्ति। नह्येकस्याआकृतेश्चरितःप्रयोगोद्वितीयस्याश्चतृतीयस्याश्चभवतीतिन्यायाल्लोट्प्रकृति
रेवानुप्रयोक्ष्यते। पूर्वव्यवहितप्रयोगनिवृत्तिरपिनेष्टायतस्तदर्थोयोगःस्यात्॥ समुच्चये॥ लघुत्वादिति। एतच्चलाघवंक्वचिदेव
विषयेशिष्टप्रयोगदर्शनादाद्रियतेनसर्वत्रअन्यथातरुद्रुमादीनामेवप्रयोगःस्याद्वनवनस्पत्यादिशब्दानाम्॥ उपसंवा॥ उप रामः
संवादेति। नित्यार्थमिदमितिचेच्छन्दसिनित्योत्रलेड्दृश्यतइत्यत्रप्रमाणाभावः। व्यवस्थितविभाषयावानित्यंलेड्भविष्यति॥ १०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुहेतुमतोरिति। उपसंवादः कर्तव्ये पणबन्धः। यदि मे भवानिदं कुर्यात् अहमपि ते इदं दद्यामिति तत्र करणं हेतुर्दानं हेतुमत्। आशङ्कापि कारणात्कार्ये स्वेक्षेति हेतुहेतुमद्भावः। अपर इति। करणमवधिर्दानमवधिमदित्यवध्यवधिमद्भाव उपसंवादे प्रतीयते न तु हेतुहेतुमद्भावः। आशङ्कायामपि निश्चितो हेतुहेतुमद्भावो नास्तीति भावः। लिङ्प्रयोगसिद्धये अवश्यवक्तव्यो लिङ् न तु सूत्रप्रत्याख्यानायैव॥ तुमर्थे सेसे॥ कृतोन्विति। क्रियया कर्मादीनामाक्षेपात्तेष्वेव तुमुन्स्यादिति भावः। न वक्तव्यमिति। तुमर्थग्रहणानुवृ

उपसंवादाशङ्कयोर्वचनमनर्थकम्। किं कारणम्। लिङर्थत्वात्। लिङर्थे लेडित्येव सिद्धम्। कः पुनर्लिङर्थः। केचित्तावदाहुः। हेतुहेतुमतोर्लिङिति। अपर आहुः। वक्तव्य एवैतस्मिन्विशेषे लिङ् प्रयुज्यते हि लोके यदि मे भवानिदं कुर्यात् अहमपि तदिदं दद्यामिति॥ तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः॥ तुमर्थ इत्युच्यते कस्तुमर्थो नाम। कर्ता तुमर्थः। यद्येवं नार्थस्तुमर्थग्रहणेन। येनैव खल्वपि हेतुना कर्तरि तुमुन्भवति तेनैव हेतुनासयादयोपि भविष्यन्ति। एवं तर्हि सिद्धे सति यत्तुमर्थग्रहणं करोति तज्ज्ञापयत्याचार्यः अस्त्यन्यः कर्तुस्तुमुनोर्थ इति। कः पुनरसौ। भावः। कुतो नु खल्वेतद्भावे तुमुन्भविष्यति न पुनः कर्मादिषु कारकेषु स्यादिति। ज्ञापकात्तावदयं कर्तुरपकृष्यते। न चान्यस्मिन्नर्थे आदिश्यते अनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवन्तीति स्वार्थे भविष्यति। तद्यथा। गुप्तिज्किद्भ्यः सन्। यावादिभ्यः कन्निति। सोसौ स्वार्थे भवन्भावे भविष्यति। किमेतस्य ज्ञापने प्रयोजनम्। अव्ययकृतो भावे भवन्तीति एतन्न वक्तव्यं भवति॥ उदीचां माङो व्यतीहारे॥ किमर्थं मेङः सानुबन्धकस्यात्वभूतस्य ग्रहणं क्रियते। न उदीचां मेङ इत्येवोच्येत। तत्रायमप्यर्थः। उदीचां मेङ इति व्यतीहारग्रहणं न कर्तव्यं भवति। किं कारणम्। तद्विषयो हि सः व्यतीहारविषय एव मयतिः। एवं तर्हि सिद्धे सति यन्मेङः सानुबन्धकस्यात्वभूतस्य ग्रहणं करोति तज्ज्ञापयत्याचार्यः नानुबन्धकृतमनेजन्तत्वं भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। तत्रासरूपसर्वादेशदाप्प्रतिषेधेषु पृथक्त्वनिर्देशोऽनाकारान्तत्वादित्युक्तं तन्न वक्तव्यं भवति ॥

स्यात्क्वादीनां भावे सिद्धत्वात्साध्यमानरूपश्च भावः क्त्वादीनामर्थः स एव च धात्वर्थः। घञादीनां तु धात्वर्थव्यतिरिक्तः सिद्धरूपो वाच्यः॥ उदीचाम्॥ नानुबन्धकृतमिति। एतच्च ज्ञापनमनुबन्धानामेकान्तत्वे उपयुज्यते। अनेकान्तत्वे स्वत एव एजन्तत्वाज्ज्ञापनप्रयोजनाभावः। पृथक्त्वनिर्देशो नाकारान्तत्वादित्येतद्दाप्प्रतिषेधग्रहणेनैव संबध्यते। दाधाघ्वदाबित्यत्र देपोपि पृथक्प्रतिषेधो वक्तव्यः अनाकारान्तत्वाद्घुरूपत्वाभावादित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अपमयतइति। वस्त्रादिकं परिवर्तयतीत्यर्थः॥ समान॥ समानशब्द एकवाचीशक्तिशक्तिमतोश्चाभेदविवक्षयाक्रिययोरेककर्तृकत्वम्। स्वशब्देनेति। पौर्वकाल्येद्योत्ये क्त्वादिर्विधीयते नतु विषयइतिभावः। पूर्वशब्दस्यात्र क्रियापौर्वकाल्यवाचित्वादग्रादिसूत्रेणापि न भवति। अग्रादीनां साधनपौर्वकाल्यविषयाणां तत्र ग्रहणात्। नैतदिति। द्विविधात्र भुजेः पूर्वकालता व्रजिक्रियापेक्षा तस्यां क्त्वाप्रत्ययो भोक्त्रन्तरसाध्यभुजिक्रियापेक्षा च तां पूर्वशब्द उपादत्ते। ततश्चाग्रादिसूत्रेणात्र क्त्वाणमुलौ भवतइतिभावः। कर्तृपौर्वकाल्यं च क्रियाद्वारकमेव बोद्धव्यम्। क्रियाविषयत्वात्कालव्यवहारस्य। आस्यतइति। आसेः पूर्वका

किमर्थं पुनरिदमुच्यते न समानकर्तृकयोः पूर्वकालइत्येव सिद्धम्। अपूर्वकालार्थोयमारम्भः। पूर्वं ह्यसौ याचते पश्चादपमयते॥ उदीचां माङो व्यतीहारे॥ समानकर्तृकयोः पूर्वकाले॥ इह कस्मान्न भवति पूर्वं भुङ्क्ते पश्चाद्व्रजतीति। स्वशब्देनोक्तत्वान्न भवति। न तर्हीदानीमिदं भवति। पूर्वं भुक्त्वा ततो व्रजतीति। नैतत्क्रियापौर्वकाल्यम्। किं तर्हि। कर्तृपौर्वकाल्यमेतत्। पूर्वं ह्यसौ भुक्त्वान्येभ्यो भोक्तृभ्यः ततः पश्चाद्व्रजति। अन्येभ्यो व्रजितृभ्यः। इह कस्मान्न भवति। आस्यते भोक्तुमिति। कुतः कस्मान्न भवति। किमासेः आहोस्विद्भुजेः। भुजेः कस्मान्न भवति अपूर्वकालत्वात्। आसेस्तर्हि कस्मान्न भवति। यस्मादत्र लड् भवति। एतदत्र प्रष्टव्यं लडत्र कथं भवतीति। लट् चात्र वासरूपेण भविष्यति। समानकर्तृकयोरिति बहुषु प्राप्तिः। समानकर्तृकयोरिति बहुषु क्त्वा न प्राप्नोति। स्नात्वा भुक्त्वा पीत्वा व्रजतीति। किं पुनः कारणं न सिध्यति। द्विवचननिर्देशात्। द्विवचनेनायं निर्देशः क्रियते। तेन द्वयोरेव पौर्वकाल्ये स्याद्बहूनां न स्यात्। सिद्धं तु क्रियाप्रधानत्वात्। सिद्धमेतत्। कथम्। क्रियाप्रधानत्वात्। क्रियाप्रधानोयं निर्देशः। नात्र निर्देशस्तन्त्रम्॥

लत्वाद्भावस्य च प्रतिपाद्यत्वात्। आसित्वा भोक्तुमिति प्राप्नोतीति भावः। लड्वात्रेति। वासरूपोस्त्रियामित्यत्र स्त्रियाः प्रागितिपक्षो नाश्रितः किं तर्हि स्त्र्यधिकारे वासरूपविधिर्नेति। यदा त्वासेः क्त्वा भवति तदा भुजेः तुमुन्न भवति अनभिधानात्। न ह्यासित्वा भोक्तुमित्याद्यभिधानमस्ति। तस्माल्लडादय एव भुजेर्भवन्ति आसित्वा भुङ्क्तेइति। क्रियाप्रधानत्वादिति। समानकर्तृकक्रियान्तरापेक्षपौर्वकाल्यक्रियाप्रतिपादनपरत्वान्निर्देशस्य नान्तरीयकत्वादुपात्तं द्वित्वमत्राविवक्षितमित्यर्थः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकविज्ञानादिति। अमीषां ब्राह्मणानां पूर्वमानयेत्युक्ते षड्कौयः सर्वेषामादिः स एवानीयते तथेहापि स्नात्वा भुक्त्वा पीत्वा व्रजतीति स्नानस्यैव पूर्वत्वात् स्नातेरेव प्रत्ययेन भाव्यं न तु भुजिपिबतिभ्यामित्यर्थः॥ सर्वेषामिति। आख्यातवाच्यायाः

कथं पुनस्तेनैव निर्देशः क्रियते तच्चातन्त्रं स्यात्। तत्कारी च भवान् तद्द्वेषी च। नान्तरीयकत्वादत्र द्विवचनेन निर्देशः क्रियते। अवश्यं कयाचिद्विभक्त्या केनचिद्वचनेन निर्देशः कर्तव्यः। तद्यथा। कश्चिदन्नार्थी शालिकलापं सतुषं सपलालमाहरति नान्तरीयकत्वात् स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चित्मांसार्थी मत्स्यान् सशकलान् सकण्टकानाहरति नान्तरीयकत्वात् स यावदादेयं तावदादाय शकलकण्टकान्युत्सृजति। एवमिहापि नान्तरीयकत्वाद्द्विवचनेन निर्देशः क्रियते। न ह्यत्र निर्देशस्तन्त्रम्। एवमपि लोकविज्ञानान्न सिध्यति। तद्यथा। लोके ब्राह्मणानां पूर्व आनीयतामित्युक्ते सर्वपूर्व आनीयते एवमिहापि सर्वपूर्वायाः क्रियायाः प्राप्नोति। अनन्त्यवचनात्तु सिद्धम्। समानकर्तृकयोरनन्त्यस्येति वक्तव्यम्। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं समानकर्तृकयोरिति बहुषु प्राप्तिरिति। परिहृतमेतत्। सिद्धं तु क्रियाप्रधानत्वादिति। ननु चोक्तं एवमपि लोकविज्ञानान्न सिध्यतीति। नैष दोषः। सर्वेषामत्र व्रजिक्रियां प्रति पौर्वकाल्यम्। स्नात्वा व्रजति भुक्त्वा व्रजति पीत्वा व्रजतीति। एवं च कृत्वा प्रयोगोऽप्यनियतो भवति। स्नात्वा भुक्त्वा पीत्वा व्रजति। पीत्वा भुक्त्वा स्नात्वा व्रजति। व्यादाय स्वपितीत्युपसंख्यानमपूर्वकालत्वात्। व्यादाय स्वपितीत्युपसंख्यानं कर्तव्यम्। किं पुनः कारणं न सिध्यति। अपूर्वकालत्वात्। पूर्वं ह्यसौ स्वपिति पश्चाद्व्याददाति । न वा स्वप्नस्यापरकालत्वात्। न वा वक्तव्यम्। किं कारणम्। स्वप्नस्यापरकालत्वात्। अपरकालः स्वप्नः अवश्यमसौ व्यादाय मुहूर्तमपि स्वपिति ॥

क्रियाया विशेष्यत्वात्प्रधान्यात्तां प्रति सर्वासां विशेषणत्वात्परस्परेण संबन्धः। यथोक्तम्। गुणानां च परार्थत्वादसंबन्धः समत्वादिति। अपरकाल इति। यद्यपि स्वप्नलक्षणानां व्यादानात्पूर्वकालता तथापि व्यादानानन्तरभाविस्वप्नक्रियापेक्षं व्यादानस्य पूर्वकालत्वमस्तीत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभाषाग्रे॥ इहाग्रादयः साधनपौर्वकाल्यविषयागृह्यन्तेन तु क्रियापौर्वकाल्यविषयास्तेषां हि क्रियापौर्वकाल्यवि
षयत्वेतैरेवपौर्वकाल्यस्योक्तत्वात् क्त्वाणमुलोर्गतार्थत्वादुत्पत्त्यानभाव्यम्। न चैतत्सूत्रारम्भादुक्तेपिपौर्वकाल्येतयो
रुत्पत्तिरितिशक्यतेवक्तुम्। अस्यसाधनपौर्वकाल्यविषयाग्रावुपपदत्वेचरितार्थत्वाद्भाष्यकारेणचसमानादिसूत्रे
पूर्वशब्देनक्रियापौर्वकाल्येउक्तेक्त्वाप्रत्ययस्यानुत्पत्तेः प्रतिपादितत्वात्। यदि चात्रअग्रादयः क्रियापौर्वकाल्यवि
षयागृह्येरन्तदाअप्राप्तविभाषैवनिःसंदेहास्यादितिकिमियंप्राप्तेविभाषेतिसंशयोनैवोपपद्येत। यस्मादाभीक्ष्ण्ये
णमुल्चेतिक्त्वाणमुलौक्रियापौर्वकाल्येएवविधीयेते। तच्चेदग्रादिभिरुच्यतेतदाभीक्ष्ण्यग्रहणानुवृत्तावप्यप्रा

विभाषाग्रेप्रथमपूर्वेषु॥ किमयंप्राप्तेविभाषाआहोस्विदप्राप्ते। कथंचप्राप्तेकथंवाप्राप्ते। आभीक्ष्ण्य
इतिचनित्येप्राप्तेअन्यत्रवाअप्राप्ते। किंचातः। यदिप्राप्ते। आभीक्ष्ण्येऽनिष्टाविभाषाप्राप्नोति। अन्य
त्रचेष्टानसिध्यति। अथाप्राप्तेअग्रादिष्वप्राप्तविधेः समासप्रतिषेधः॥ अग्रादिषुअप्राप्तविधेः समा
सस्यप्रतिषेधोवक्तव्यः। सतर्हिप्रतिषेधोवक्तव्यः ॥

प्तविभाषैवस्यात्। आभीक्ष्ण्यंचद्विर्वचनमन्तरेणक्त्वाणमुल्भ्यांनद्योत्यतइतितद्योतनायापितयोर्विधानंनो
पपद्यते। तस्मात्साधनपौर्वकाल्यविषयाइहाग्रादयइतिस्थितम्। यद्यपिदेशविशेषवचनोग्रशब्दोस्ति। ग्र
मेऽग्रेभुङ्क्तेइतितथापिपूर्वप्रथमसाहचर्यात्कालविशेषवृत्तिरेवगृह्यते। अनिष्टाविभाषेति। अभीक्ष्ण्येनित्यौ
क्त्वाणमुलाविष्येतेअग्रेभुक्त्वाभुक्त्वाव्रजतीति। लडादयस्तुनैवेष्यन्तेअग्रेभुङ्क्तेभुङ्क्तेततोव्रजतीतिभावः। अ
न्यत्रचेति। आभीक्ष्ण्यग्रहणानुवृत्तौसत्यामनाभीक्ष्ण्येक्त्वाणमुलौनस्यातामित्यर्थः। अप्राप्तविधेरिति। विभाषा
यामग्रादीनांप्रत्ययोत्पत्तिंप्रतिनिमित्तत्वान्निमित्तस्यचोपपदसंज्ञाविधानादुपपदसमासः प्रतिषेध्यः। प्राप्तवि
भाषायांत्वग्रादीनांपक्षेप्रत्ययनिवृत्तौनिमित्तत्वंनतुप्रत्यययोत्पत्तौप्रत्यययोराभीक्ष्ण्येणमुल्चेत्यनेनाविशेषे
णविहितत्वादितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नवक्तव्यइति। अप्राप्तविभाषात्वमनेन द्रढयति पूर्वविप्रतिषेधाच्चाग्र्यादिष्वाभीक्ष्ण्ये नित्याभ्यां क्त्वाणमुल्भ्यां भाव्यमित्यु
भयत्र विभाषा चेयं न भवति। ननु च णमुल्यप्राप्ते क्त्वाप्रत्यये तु समानादिसूत्रेण प्राप्ते सत्यारम्भादुभयत्र विभाषेयमुक्ता।
नैतदस्ति। समानादिसूत्रे विहितं क्त्वां प्रति विभाषाग्रहणमनर्थकमेव वासरूपइत्यनेनैव पक्षे लडादीनां सिद्धत्वात्। कः
पुनरस्य क्त्वः समानादिसूत्रविहिताद्विशेष इति चेद्णमुल्सहितत्वमेव विशेषः। णमुल्सहितस्य क्त्वो विधौ विभाषाश्रुति
रिहोपादीयमाना ज्ञापकार्था संपद्यते। क्त्वाणमुलौ यत्र सह विधीयेते तत्र वासरूपविधिर्न भवतीति। तेनाभीक्ष्ण्ये पौर्व
काल्ये लडादयो न भवन्तीति। तत्र यदि केवलो णमुल् विधीयेत विभाषाश्रुतिरभिमतमर्थं ज्ञापयितुं न क्षमेतेति क्त्वोऽप्यनुवा

न वक्तव्यः। उक्तं वा। उक्तमेतत्। अस्मैवाव्ययेनेत्यत्र एवकारकरणस्य प्रयोजनम्। अस्मैवाव्ययेन यत्तुल्यविधानमुपप
दं तत्र समासो यथा स्यात्। अमा चान्येन च यत्तुल्यविधानमुपपदं तत्र मा भूदिति॥ विभाषाग्रे॥ स्वादुमि णमुल्॥
किमर्थं स्वादुमि मकारान्तनिपातनं क्रियते न खमुञ्प्रकृतः सोऽनुवर्तिष्यते। स्वादुमि मान्तनिपातनमीकारा
भावार्थम्। स्वादुमि मान्तनिपातनं क्रियते ईकाराभावार्थम्। ईकारो मा भूदिति। स्वादीं कृत्वा यवागूं भुङ्क्ते। स्वा
दुङ्कारं यवागूं भुङ्क्त इति। च्व्यन्तस्य च मकारान्तार्थम्। च्व्यन्तस्य च मकारान्तत्वं यथा स्यात्। अस्वादुं स्वादुं कृ
त्वा भुङ्क्ते स्वादुंकारं भुङ्क्ते। आ च तुमुनः समानाधिकरणे। आ च तुमुनः प्रत्ययाः समानाधिकरणे भवन्तीति वक्त
व्यम्। केन। अनुप्रयोगेण। किं प्रयोजनम्। स्वादुंकारं यवागूर्भुज्यते देवदत्तेनेति देवदत्तेतृतीया यथा स्यात्॥

दः कर्तव्यः॥ स्वादुमि॥ ईकाराभावार्थमिति। मान्तत्वे भाविप्रत्ययविषये निपात्यमाने विहतनिमित्तत्वाद्वोतो गु
णवचनादिति ङीष् न भवतीत्यर्थः। च्व्यन्तस्य चेति। खमुञ्यपि सर्वत्र मुम् न सिध्यति। अनव्ययस्येत्यधिकारादि
ति भावः। यद्येवं मान्तत्वमेव निपात्यतां प्रत्ययस्तु खमुञेव विधेयः। नैतदस्ति। अव्ययार्थमेव मान्तनिपातनं स्या
दिति ङीष् स्यादेव। णमुलि तु मान्तत्वमपूर्वं विधीयमानमीकाराभावार्थं च्व्यन्तस्य च मकारान्तार्थं विज्ञायते। अवश्यं चो
त्तरार्थो णमुल् विधेय इति लाघवाभावादिहैव विहितः। आ च तुमुन इति। पूर्वोक्तवाक्यार्थापेक्षया समुच्चयप्रतिपादनार्थश्च
शब्दः। न केवलं स्वादुमि मान्तनिपातनमपि तु इदमपि वक्तव्यमित्यर्थः। शकधृषादिसूत्रविहितस्तुमुन्नुपगृह्यते अभिविधौ चाय
माकारः॥

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ णमुलेति।असत्यस्मिन्वचनेकर्तरिकृदितिणमुलाकर्तरिभाव्यमितिभावः। अनभिहिताश्रयइति।अनभिहितइतिपर्युदा
१०४ सआश्रीयतेनतुप्रसज्यप्रतिषेधइतिभावः।यदिपुनरिति।अव्ययकृतःकर्मणीतिवचनंयदिक्रियतइतिभावः।अथाने

किंचकारणंनस्यात्।णमुलाभिहितःकर्तेति।ननुचभुजिप्रत्ययेनअनभिहितःकर्तेतिकृत्वाअनभिहिताश्रयोविधिर्भविष्यतितृतीया।यदिसत्यभिधानेचानभिधानेचकृतश्चिदनभिधानमितिकृत्वाअनभिहिताश्रयोविधिर्भवतितृतीया।यवाग्वांद्वितीयाप्राप्नोति।किंकारणम्।णमुलानभिहितंकर्मेति।यदिपुनरयंकर्मणिविज्ञायेत।नैवंशक्यम्।इहहिस्वादुंकारंयवागूंभुङ्क्तेदेवदत्तइतियवाग्वांद्वितीयानस्यात्।किंकारणम्।णमुलाभिहितंकर्मेति।ननुचभुजिप्रत्ययेनानभिहितंकर्मेतिकृत्वाअनभिहिताश्रयोविधिर्भविष्यतिद्वितीया।यदिसत्यभिधानेचानभिधानेचकृतश्चिदनभिधानमितिकृत्वाअनभिहिताश्रयोविधिर्भविष्यतिद्वितीया।देवदत्तेतृतीयाप्राप्नोति।किंकारणम्।णमुलानभिहितःकर्तेति।अथानेनक्त्वायामर्थः।पक्त्वौदनोभुज्यतेदेवदत्तेनेति।बाढमर्थः।देवदत्तेतृतीयायथास्यात्।किंचकारणंनस्यात्।क्त्वयाभिहितःकर्तेति।ननुचभुजिप्रत्ययेनाऽनभिहितःकर्तेतिकृत्वाअनभिहिताश्रयोविधिर्भविष्यतितृतीया।यदिसत्यभिधानेचानभिधानेचकृतश्चिदनभिधानमितिकृत्वाअनभिहिताश्रयोविधिर्भविष्यतितृतीया।ओदनेद्वितीयाप्राप्नोति।किंकारणम्।क्त्वयानभिहितंकर्मेति।यदिपुनरयंकर्मणिविज्ञायेत।नैवंशक्यम्।इहहिपक्त्वाओदनंभुङ्क्तेदेवदत्तइतिओदनेद्वितीयानस्यात्।किंचकारणंनस्यात्।क्त्वयाऽभिहितंकर्मेति।ननुचभुजिप्रत्ययेनअनभिहितंकर्मेतिकृत्वाअनभिहिताश्रयोविभक्तिर्भविष्यतिद्वितीया।यदिसत्यभिधानेचानभिधानेचकृतश्चिदनभिधानमितिकृत्वाऽनभिहिताश्रयोविधिर्भविष्यतिद्वितीया।देवदत्तेतृतीयाप्राप्नोति।किंकारणम्।क्त्वयानभिहितःकर्तेति।अथानेनतुमुन्यर्थः।भोक्तुमोदनःपच्यतेदेवदत्तेनेति।बाढमर्थः।देवदत्तेतृतीयायथास्यात्।किंचकारणंनस्यात्।तुमुनाभिहितःकर्तेति ॥

नेति।आचतुमुनइत्यनेनवचनेनेत्यर्थः।अनेकप्रयोजनत्वमस्यवचनस्यप्रश्नद्वारेणदर्शयति।पक्त्वौदनमिति।भिन्न रामः
धात्वर्थविषयकर्मभेदेपिवचनस्यास्यदर्शयितुंप्रयोजनमुपन्यासः ॥ १०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्ययकृतइति॥यद्येवंपक्कौदनंभुङ्क्ते देवदत्तः।पक्कौदनोभुज्यते देवदत्तेनेतिक्त्वाप्रत्ययेनकर्तृकर्मणोरनभिधा
नात्याकापेक्षयातृतीयाद्वितीयेकस्मान्नभवतः।उच्यते।आख्यातादिपदवाच्याक्रियाविशेष्यत्वात्प्रधानम्।विशेषण

ननुचपचिप्रत्ययेनानभिहितःकर्तेतिकृत्वाअनभिहिताश्रयोविधिर्भविष्यतितृतीया।यदिसत्यभिधाने
चानभिधानेचकुतश्चिदनभिधानमितिकृत्वाअनभिहिताश्रयोविधिर्भविष्यतितृतीया।ओदनेद्वितीया
प्राप्नोति।किंकारणम्।तुमुनानभिहितंकर्मेतिकृत्वा।यदिपुनरयंकर्मणिविज्ञायेत।नैवंशक्यम्।इहहि
भोक्तुमोदनंपचतिदेवदत्तइतिओदनेद्वितीयानस्यात्।किंचकारणंनस्यात्।तुमुनाभिहितंकर्मेति।न
नुचपचिप्रत्ययेनानभिहितंकर्मेतिकृत्वाअनभिहिताश्रयोविधिर्भवतिद्वितीया।यदिसत्यभिधानेचा
नभिधानेचकुतश्चिदनभिधानमितिकृत्वाअनभिहिताश्रयोविधिर्भविष्यतिद्वितीया।देवदत्तेतृतीया
प्राप्नोति।किंकारणम्।तुमुनानभिहितःकर्तेति।अथअनेनेहार्थः।पक्कौदनंग्रामोगम्यतेदेवदत्तेनेति।
बाढमर्थः।देवदत्तेतृतीयायथास्यात्।किंचकारणंनस्यात्।क्त्वयाभिहितःकर्तेति।ननुचगमिप्रत्य
येनानभिहितःकर्तेतिकृत्वाऽनभिहिताश्रयोविधिर्भविष्यतितृतीया।यदिसत्यभिधानेचानभिधा
नेचकुतश्चिदनभिधानमितिकृत्वाऽनभिहिताश्रयोविधिर्भविष्यतितृतीया।यदुक्तमोदनेद्वितीया
प्राप्नोतीतिसइहदोषोनजायते।तत्तर्हिवक्तव्यम्।आचतुमुनःसमानाधिकरणइति।नवक्तव्यम्।
अव्ययकृतोभावेभवन्तीतिभावेभविष्यन्ति।किंवक्तव्यमेतत्।नहि।कथमनुच्यमानंगंस्यते।तु
मर्थइतिवर्तते।तुमर्थश्चकः।भावः॥वर्षप्रमाणऊलोपश्चास्यान्यतरस्याम्॥ऊलोपश्चास्यान्यतर
स्यांग्रहणंशक्यमकर्तुम्।कथंगोष्पदप्रंवृष्टोदेवइति॥प्रातिःपूरणकर्मा ॥

भूतात्प्रधानम्।तत्क्रियासाधन्योरपिशक्त्योस्तद्द्वारकोगुणप्रधानभावः।तत्रप्रधानशक्त्यभिधानेगुणक्रिया
शक्तिरभिहितवत्प्रकाशते।प्रधानानुरोधाद्गुणानांतन्मुखप्रेक्षित्वात्एवंचकृद्भिरुक्तस्वकार्यारम्भाभावात्त्वर्षे॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादेषकइति। गोष्पदंप्रातीत्यातोनुपसर्गेकइतिकप्रत्ययः। क्रियाविशेषणत्वाच्चकर्मत्वनपुंसकत्वे। गोष्पदप्रकल्पंगोष्पदप्रंतरामित्यादिप्रयोगसिध्यर्थमूलोपोनविधेयः। एषांप्रयोगाणांभाष्यकारेणानभ्युपगमात्। अनभ्युपगमस्तुऊलोपप्रत्याख्यानान्यथानुपपत्त्याविज्ञायते। गोष्पदपूरमित्यादेरपिघञासिद्धत्वाद्‌णमुलकस्मान्नप्रत्याख्यायते। स्वरेदोषप्रसङ्गात्। तथाहि। यदिकरणेघञंविधायषष्ठीतत्पुरुषःक्रियते। तदाथाथादिसूत्रेणान्तोदात्तत्वंभवति। भावेतुघञिबहुव्रीहौपूर्वपदप्रकृतिस्वरः। णमुलितुलित्स्वरेणोकारउदात्तः। गोष्पदपूरंतरामित्यादिच

तस्मादेषकः। यदिकः। विभक्तीनांश्रवणंप्राप्नोति। श्रूयन्तएवात्रविभक्तयः। तद्यथा। एकेनगोष्पदप्रेणेति॥ करणेहनः॥ हनःकरणेऽनर्थकंवचनंहिंसार्थेभ्योणमुल्विधानात्। हनःकरणेवचनमनर्थकम्। किंकारणम्। हिंसार्थेभ्योणमुल्विधानात्। हिंसार्थेभ्योणमुल्विधीयते। तेनैवसिद्धम्। अर्थवत्त्वहिंसार्थस्यविधानात्। अर्थवत्तुहन्तेर्णमुल्वचनम्। कोर्थः। अहिंसार्थस्यविधानम्। अहिंसार्थस्यहन्तेर्णमुलयथास्यात्। अस्तिपुनरयंकचिद्धन्तिरहिंसार्थः यदर्थोविधिःस्यात्। अस्तीत्याह। पाण्युपघातंवेदिंहन्ति। नित्यसमासार्थंच। नित्यसमासार्थश्चहिंसार्थादपिहन्तेरनेनविधिरेषितव्यः। कथंपुनरिच्छतापिहिंसार्थाद्धन्तेरनेनविधिर्लभ्यः। अनेनास्तुतेनचेति। तेनस्याद्विप्रतिषेधेन। हन्तेःपूर्वविप्रतिषेधोवार्त्तिकेनैवज्ञापितःयदयंनित्यसमासार्थंचेत्याह। तज्ज्ञापयत्याचार्यः हिंसार्थादपिहन्तेरनेनविधिर्भवतीति ॥

सिध्यति। गोष्पदप्रमित्यत्रतुनास्तिस्वरभेदः। कप्रत्ययेथाथादिस्वरेणान्तोदात्तत्वाद्‌णमुलिऊलोपेकृतेपूर्वस्योदात्तभाजोऽभावात्कृत्स्वरेणान्तोदात्तत्वात्॥ करणे॥ बाहुल्येनहन्तिर्हिंसार्थोदृश्यतइतिमत्वाह। हनइति॥ हन्तेःपूर्वविप्रतिषेधइति। यद्येवंहिंसार्थानामित्यत्रदण्डोपघातंगाःकालयतीतिउदाहरणंनोपपद्यते। नैषदोषः। यत्रएकएवधात्वर्थःसामान्यविशेषभावेनाभिद्यमानोविशेषणविशेष्यभावमनुभवतिसोस्यविषयः। कषादिषुयथाविध्यनुप्रयोगइतिवचनादन्यत्रभिन्नधात्वर्थसंबन्धेतुहिंसार्थानामित्यनेनैवणमुल्भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिकं। ग्रामे बन्ध इति। णमुलि सति ग्रामबन्धं बद्ध इति प्राप्नोति॥ तिर्य॥ सौत्रो निर्देश इति। अनुक्रियमाणरूपविनाशप्रसङ्गः स्तु न परिहारो न हि प्रयोजनानुवर्ति प्रमाणम्॥ नाधा॥ द्वैधं कृत्वेति। यदादिभ्यो ऽञ्च धमुञित्यादौ प्रत्ययपक्षस्तदेतदर्थग्रहणस्य प्रयोजनम्। आदेशपक्षे तु स्थानिवद्भावात् धाग्रहणेन ग्रहणात् सिध्यति। तथा च धमुञन्तात्स्वार्थे डदर्शनमिति डप्रत्यय उदाहार्यो द्वैधकृत्वेति। नार्थमप्यर्थग्रहणं कर्तव्यमन्यथा निरनुबन्धकपरिभाषया ना

अधिकरणे बन्धः॥ इह कस्मान्न भवति ग्रामे बन्ध इति। एवं वक्ष्यामि अधिकरणे बन्धः संज्ञायां ततः कर्त्रोर्जीवपुरुषयोर्नशिवहोरिति। कथम् ट्टालिकाबन्धं बद्धः। चण्डालिकाबन्धं बद्धः। उपमाने कर्मणि चेत्येवं भविष्यति। तिर्यच्यपवर्गे। अयुक्तोयं निर्देशः। तिरश्चीति भवितव्यम्। सौत्रो निर्देशः॥ नाधा र्थप्रत्यये च्व्यर्थे। अर्थग्रहणं किमर्थं नाधाप्रत्यय इतीयत्युच्यमाने इहैव स्यात्। द्विधा कृत्वा। इह च न स्यात्। द्वैधं कृत्वा। अर्थग्रहणे पुनः क्रियमाणे न दोषो भवति। नाधाप्रत्यये च सिद्धं भवति। यश्चान्यस्तेन समानार्थः। अथ प्रत्ययग्रहणं किमर्थम्। इह हि मा भूत्। हिरुक्कृत्वा पृथक्कृत्वा॥ अन्वच्यानुलोम्ये॥ अयुक्तोयं निर्देशः। अनूचीति भवितव्यम्। सौत्रोयं निर्देशः॥ कर्तरि कृत्॥ किमर्थमिदमुच्यते। कर्तरि कृद्वचनमनादेशे स्वार्थविज्ञानात्। कर्तरि कृतो भवन्तीत्युच्यते अनादेशे स्वार्थविज्ञानात्। अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति। तद्यथा। गुप्तिज्किद्भ्यः सन्। यावादिभ्यः कन्निति। एवमिमे प्रत्ययाः कृतः स्वार्थे स्युः। स्वार्थे मा भूवन् कर्तरि यथा स्युः। एवमर्थमिदमुच्यते। नैतदस्ति प्रयोजनं यमिच्छति स्वार्थे आहतं भावे घञ् भवतीति ॥

ञो ग्रहणं न स्यात्॥ कर्त॥ किमर्थमिति। वक्ष्यमाणोभिप्रायः। अनादेश इति। यत्र वचनेनार्थो नादिश्यते तत्र प्रत्यासत्त्या प्रकृत्यर्थ एव प्रत्ययो भवति। यमिच्छतीति। असत्यस्मिन्सूत्रे घञित्येतावत्सूत्रं कर्तव्यम्। धातोर्घञ्भवतीति तत्रानिर्दिष्टत्वाद्भावे घञ्भविष्यति। ततः पदरुजविशस्पृश इति द्वितीयं सूत्रं कर्तव्यं ततश्च भाव इति न कर्तव्यम्। क्रियमाणं तु नियमार्थं भविष्यति। घञेव भावे नान्य इति। ततो धात्वर्थसिद्धे कर्तरि कृद्भविष्यति नार्थः सूत्रेणेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ १०६

कर्मणीति। तस्यापिधात्वर्थेनाक्षेपादितिभावः। कर्मणिघ्नन्निति। घ्नन्नेवकर्मणिनान्यदितिनियमोविज्ञास्यते। य
द्येवंकर्मणोनियमात्प्रत्ययोननियतइतिकारकान्तरेपिघ्नन्प्राप्नोति। नैषदोषः। एकमिदंवाक्यंधः कर्मणिघ्न
न्निनितितेनचकर्मणिविधीयमानः कथंकारकान्तरेस्यात्। अथवाद्वितीयोनियमः करिष्यतेकर्मणिएवघ्नन्निति।

कर्मणितर्हिमाभूवन्निति। कर्मण्यपियमिच्छत्याहतंधः कर्मणिघ्नन्निति। करणाधिकरणयो
स्तर्हिमाभूवन्निति। करणाधिकरणयोरपियमिच्छत्याहतंल्युट्करणाधिकरणयोर्भवती
ति। संप्रदानापादानयोस्तर्हिमाभूवन्निति। संप्रदानापादानयोरपियमिच्छत्याहतंदाशगो
घ्नौसंप्रदानेभीमादयोपादानइति। यदिदानीमतोन्यः प्रत्ययः शेषः सोन्तरेणवचनंकर्तर्ये
वभविष्यति। तदेवतर्हिप्रयोजनम्। स्वार्थेमाभूवन्निति। ननुचोक्तंस्वार्थेयमिच्छत्याहतं
भावेघञ्भवतीति। अन्यःस्वभावोबाह्यः प्रकृत्यर्थात्। अनेनेदानीमाभ्यन्तरेभावेस्युः। तत्र
माभूवन्निनितिकर्तृग्रहणम्। कः पुनरेतयोर्भावयोर्विशेषः। उक्तोभावभेदोभाष्ये। अस्तिप्रयो
जनमेतत्। किंतर्हीति। तत्रल्युनादिप्रतिषेधोनानावाक्यत्वात्। तत्रल्युनादीनांप्रतिषेधो
वक्तव्यः। ल्युनादयः कर्तरिमाभूवन्निति। ननुचकरणेल्युनादयोविधीयन्ते तेनकर्तरिनभवि
ष्यन्ति। तेनचकरणेस्युर्नेनचकर्तरि। ननुचापवादत्वाल्ल्युनादयोबाधकाः स्युः। नस्युः। किंका
रणम्। नानावाक्यत्वात्। नानावाक्यंतच्चेदंच। समानेवाक्येचापवादैरुत्सर्गाबाध्यन्ते ॥

यदिदानीमिति। ननुकर्तरिभुवः खिष्णुच्खुकञौकर्तरिचर्षिदेवतयोरितिकर्तुरपिनियमः प्राप्नोति। नैषदो
षः। उभयत्रकरणनिवृत्त्याकर्तृश्रुतिर्विध्यर्थैवननियमार्था॥ उक्तइति। सार्वधातुकेयगित्यत्रबाह्याभ्यन्तर
योर्भावयोर्विशेषोदर्शितः। ननुचेति। ल्युनादिषुकरणादिरर्थोविशेषविहितत्वात्कर्तुर्बाधकोभविष्यती रामः
तिभावः ॥ १०६

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानावाक्यत्वादिति। इह ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्य भिन्नकालत्वादेकं वाक्यं विशिष्टस्य दानस्य प्रतिपा
दकमिति तक्रेण दधि बाध्यते। यदा तु कालभेदेन वाक्यद्वयमुच्चार्यते पूर्वाह्णे ब्राह्मणभोजनप्रकरणे दधि ब्राह्मणेभ्यो दीय
तामिति। अपराह्णे तु तक्रं कौण्डिन्याय दीयतामिति। तदा तक्रेण दधि न बाध्यते तथेहापि कालभेदेन वाक्यद्वयोच्चारणाद्बाध्य
बाधकभावो नास्तीत्यर्थः। यत्लिगादिवाक्ये यद्येकं वाक्यं तच्चेदं च तनस्त्वक्षेपः। अथ नानावाक्यं तदा तदपवादइत्युक्तम्। त
दसंभवाश्रयेण। यदाङ्गस्येति इगपेक्षावयवावयविसंबन्धे षष्ठी तदा — नषष्ठ्यभावादलोन्त्यस्येत्यस्यानुपस्थानं तदेव
चापवादत्वम्। ख्युनादयस्तु कृत्स्वात्देनेन कर्तरि स्युः करणादिषु त्वाचकरणादिषु। तत्रानेकस्यार्थस्य युगपदभिधानासंभवात्प
र्यायः स्यात्। कदाचित्कर्तरि कदाचित्करणादिषु। तदुक्तं चेति। योयमर्थ उक्तः तेन तुल्यमेवकारकरणमित्यर्थः। तथा हि। कृत्वा

नानावाक्यत्वाद्बाधनं न प्राप्नोति। तदुक्तं कृत्येष्वेवकारकरणम्। एवं च कृत्वा कृत्येष्वेवकारः क्रियते तयोरेवकृ
त्यक्तखलर्थाइति भावे चाकर्मकेभ्य इति। किं प्रयोजनम्। तत्र भव्याद्यर्थं भव्यादिषु समावेशः सिद्धो भवति।
गेयो माणवकः साम्नां गेयानि माणवकेन सामानीति। ऋषिदेवतयोस्तु कृद्भिः समावेशवचनं ज्ञापकमस
मावेशस्य। यदयं कर्तरि चर्षिदेवतयोरिति सिद्धे सति समावेशे समावेशार्थं चकारं शास्ति तज्ज्ञापयत्याचार्यः
न भवति समावेश इति। किमर्थं तर्हि कृत्येष्वेवकारः क्रियते। एवकारकरणं च चार्थं। एवकारकरणं च चार्थेद्र
ष्टव्यम्। तयोर्भावकर्मणोः कृत्या भवन्ति भव्यादीनां कर्तरि च। किं प्रयोजनम्। तत्र भव्याद्यर्थं भव्यादिषु समा
वेशः सिद्धो भवति। गेयो माणवकः साम्नां गेयानि माणवकेन सामानीति ॥

कर्तरि कृत्यादयः प्राप्ताः एवकारेण कर्तुरपकृष्यन्ते भावकर्मणोरेव यथा स्युरित्येवमर्थः। भावे चाकर्मकेभ्य इत्यनेना
धिकारसहितं वाक्यं दर्शयति। किं प्रयोजनमिति। एवकारेणान्यत्र समावेशज्ञापनेन किं प्रयोजनमिति प्रश्नः। तत्र भव्याद्य
र्थमिति। भव्यगेयादिसूत्रे वाग्रहणं न कर्तव्यम्। तदन्तरेणापि भव्यादयः कर्तरि भवन्तीत्यनेन समावेशज्ञापनादेव
कारकरणाद्भावकर्मणी न बाधिष्यते इत्यर्थः। इदानीं तत्र ख्युनादिप्रतिषेध इत्यस्य परिहारमाह। ऋषिदेवतयोरि
ति। कृद्भिरिति जातौ बहुवचनमत्र च यथासंख्यं वार्तिककारस्यानभिमतम्। यथासंख्ये हि चशब्दस्य ज्ञापकत्वं न स्यात् स
मावेशाभावात्। भव्याद्यर्थमिति। भव्यगेयेति सूत्रं न कर्तव्यं भवतीत्यर्थः। अन्ये तु कृत्यादयो न विधानात्कर्तरि न भविष्यन्तीति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इदानींभाष्यकारोवार्तिकदूषणमाह।यत्तावदिति।नविदेशस्थमिति।नकालभेदान्नानावाक्यत्वंभवति।शास्त्रेविदे
शस्थानामप्यवान्तरवाक्यानामाकाङ्क्षावशादेकवाक्यत्वदर्शनात्।देशग्रहणंचात्रकालस्योपलक्षणम्।शब्दक्र
मस्यकालकृतत्वात्।चतुर्थषष्ठ्योरिति।चतुर्थ्यैगोत्रेऽलुगचीति।षष्ठेतुअलुगुत्तरपदेइति।तदुक्तंहरिणा।अनेका
ख्यातयोगेपिवाक्यंन्यायापवादयोः।एकमेवेष्यतेकैश्चिद्भिन्नरूपमिवस्थितम्।नियमःप्रतिषेधश्चविशेषश्चतथासति।
द्वितीयेयोलुगाख्यातस्तच्छेषमलुकंविदुरिति।कथमिति।एवकारस्यलौकिकेप्रयोगेनक्वचित्स्वार्थवृत्तित्वंदृश्यत

यत्तावदुच्यते।ऋषिदेवतयोःकृद्भिःसमावेशवचनंज्ञापकमसमावेशस्येति।नैतज्ज्ञापकसाध्यमपवा
दैरुत्सर्गाबाध्यन्तइति।एषएवन्यायः।यदुतापवादैरुत्सर्गाबाध्येरन्।ननुचोक्तंनानावाक्यत्वाद्
बाधनंनप्राप्नोतीति।नविदेशस्थमितिकृत्वातोनानावाक्यंभवति।विदेशस्थमपिसदेकंवाक्यंभवति।
तद्यथाद्वितीयेऽध्यायेलुगुच्यतेतस्यचतुर्थषष्ठयोरलुगुच्यतेऽपवादः।यदप्युच्यतेएवकारकरणंचचा
र्थइति।कथंपुनरन्योनामान्यस्यार्थेवर्ततेकथमेवकारश्चार्थेवर्तेत।सएषएवकारःस्वार्थेवर्तते।किंपु
नःप्रयोजनम्।ज्ञापकार्थम्।किंज्ञाप्यम्।एतज्ज्ञापयत्याचार्यः।इतउत्तरंसमावेशोभवतीति।किमेतस्य
ज्ञापनेप्रयोजनम्।तत्रभव्याद्यर्थम्।भव्यादिषुसमावेशःसिद्धोभवति।गेयोमाणवकःसाम्नांगेयानिमा
णवकेनसामानीति।यद्येतज्ज्ञाप्यतेइहापिसमावेशःप्राप्नोति।दाशगोघ्नौसंप्रदानेभीमादयोपादानइति।
अत्रापिसिद्धंभवति।यदयमादिकर्मणिक्तःकर्तरिचेतिसिद्धेसमावेशेसमावेशार्थंचकारंशास्तितज्ज्ञाप
यत्याचार्यः।प्रागमुतःसमावेशोभवतीति। किंपुनरयंप्रत्ययनियमः ॥

इतिभावः।उत्तरमिति।कर्तरिकृदित्यस्मादुत्तरमित्यर्थः।तच्चेति।भव्यगेयादिसूत्रेचेतिनकर्तव्यंभवतीत्यर्थः।यदयमि
ति।आदिकर्मणिक्तःकर्तरीत्येतावदस्तु नार्थश्चशब्देन।समावेशोप्येवकारज्ञापितोभविष्यति।कृतस्तुचशब्दोज्ञापयति
आदिकर्मणीत्यस्मात्सूत्रात्परेषुयोगेषुसमावेशोनभवतीति। किंपुनरिति।सिद्धेशब्दार्थसंबन्धइतियदुक्तंतस्मात्
स्थितंविचार्यते।प्रत्ययनियमइति।धातोःपरःकृत्प्रत्ययःकर्तरिवर्ततामितिकर्तृलक्षणेऽर्थेकृत्प्रत्ययोनियम्यते ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नियोगतइति।कर्तरिकृदित्यस्मादाचार्यनियोगादित्यर्थः।कार्यशब्दाभ्युपगमेचास्यपक्षस्यसंभवः।आहोस्विदिति।
नित्यशब्दार्थसंबन्धाभ्युपगमनिबन्धनोयंपक्षः।यःस्वभावतःकर्तरिवर्ततेसएवकृत्संज्ञोनान्यइतिकृत्संज्ञानियम्य
ते।यद्येवंल्युनादीनांकृत्संज्ञानप्राप्नोति।नैषदोषः।एतत्सूत्रव्यापारेणनियम्यते।करणेल्युन्नित्यादावप्ययमेवविचारः
किमयमर्थः।करणेल्युन्वर्ततामितिउतयत्स्वभावतोवर्ततेतस्यसाधुत्वमिति।कृत्संज्ञातुप्रतिप्रत्ययमधिक्रियमा
णाल्युनादिषुप्रवर्ततएव।काष्ठभिद्ब्राह्मणइति।अनित्यशब्दाभ्युपगमेकाष्ठभेदइत्यत्राप्यणप्रत्ययोवचनादे
वकर्तारमाचष्टे।उत्पाद्यशब्दपक्षेचाकाराणांविशेषाभावाद्ब्राह्मणशब्दाकारस्यापिकर्तरिनियोगत्वंप्राप्नोति।आचा
र्यनियोगाच्चकर्तारंब्रुवतःकृत्प्रत्ययसंज्ञाप्रसङ्गः।तत्रकृत्संज्ञायांसत्यांस्वाद्युत्पत्तिप्रसङ्गः प्रत्ययसंज्ञायांचसत्यांत

धातोःपरःअकारःअकशब्दोवानियोगतःकर्तारंब्रुवन्कृत्संज्ञश्चप्रत्ययसंज्ञश्चेति।आहोस्वित्संज्ञा
नियमोधातोःपरःअकारःअकशब्दोवास्वभावतःकर्तारंब्रुवन्कृत्संज्ञश्चभवतिप्रत्ययसंज्ञश्चेति।क
स्तात्रविशेषः।तत्रप्रत्ययनियमेऽनिष्टप्रसङ्गः।तत्रप्रत्ययनियमेसतिअनिष्टंप्राप्नोति।काष्ठभिद्
ब्राह्मणः।वलभिद्ब्राह्मणः।एषोपिनियोगतःकर्तारंब्रुवन्कृत्संज्ञश्चस्यात्प्रत्ययसंज्ञश्च।संज्ञानि
यमेसिद्धम्।संज्ञानियमेसतिसिद्धंभवति ॥

न्निबन्धनाङ्गसंज्ञाश्रयआर्धधातुकनिमित्तोगुणःप्राप्नोति।ननुनायंधातोर्विहितःततोदोषाभावः।नैतदस्ति।ल
क्षणवशाच्छब्दार्थसंबन्धव्यवस्थानुविधानेकुतोयंनियमः।अयंधातोर्विहितोनायमिति।काष्ठशब्दोहिकर्मो
पपदंभिदिर्धातुः तस्माच्चपरोऽकारइतितस्यकर्तरिस्यादेवनियोगः।यदाहिस्ववाक्यैर्विहितानांप्रत्ययानामने
नार्थविशेषेनियोगःक्रियतेतदाविशेषाभावादस्यापिनियोगःप्राप्नोति।क्विपोलुप्तत्वाद्धातुरेवकर्त्रर्थेनियुक्त
इत्यकारस्यकर्त्रर्थोनभविष्यतिचेत्।यावकादिष्विवसर्वाभिधानमस्तु।लौकिकार्थानपेक्षायांहिधातोःपरस्य
कृत्प्रत्ययसंज्ञाकर्तृनियोगप्रसङ्गः।संज्ञानियमेसिद्धमिति।नह्यत्राकारोलौकिकेप्रयोगेकर्तारंब्रवीति। प्र
तिषेधवाचित्वादिति।कृत्प्रत्ययेसंज्ञयोरप्रवृत्तिरित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययनियमवादयाह। यदीति। अत्रहि क्तः स्वभावतः कर्तारमाहस्मात् मिर्गोसिश्चसामानाधिकरण्यात्। ततश्चकर्तरि साधुत्वंप्राप्नोतीत्यसाधुत्वंमन्यते। क्रियाकारकसंबन्धेनविभक्तादीनांकर्तरिवृत्तिरनभिमतेतिदोषोपन्यासः। प्रकारान्तरेणसाधुत्वंदर्शयिष्यते। प्रत्ययनियमवादिनस्त्वयमदोषः। गत्यर्थाकर्मकेत्यत्रपरिगणिताभ्यः प्रकृतिभ्यः परः क्तः कर्तरिनियुज्यते। नहितत्रभजिपिबतीपरिगणिताविल्यर्थः। संज्ञानियमवादयाह। विभक्तादिषुचेति। ममापिगत्यर्थाकर्मकेतिसूत्रंनदण्डवारितम्। तत्रगत्यर्थादिभ्यएवक्तः स्वभावतः कर्तारंब्रुवन्‌क्तप्रत्ययसंज्ञोभवतीतिभजिपिबतिभ्यांक्तस्यकर्तरिसाधुत्वाप्रसङ्गः। प्रकृतेरिति। गत्यादिकायादित्यर्थः। प्रत्ययपरत्ववचनादिति। क्तप्रत्ययस्यक

यदिसंज्ञानियमः। विभक्तादिषुदोषः। विभक्ताभ्रातरः पीतागावइतिनसिध्यति। प्रत्ययनियमेपुनः सतिपरिगणिताभ्यः प्रकृतिभ्यः परः क्तोनियोगतः कर्तारमाह। नचेमास्तत्रपरिगण्यन्तेप्रकृतयः। विभक्तादिषुचाप्राप्तिः प्रकृतेःप्रत्ययपरत्ववचनात्। विभक्तादिषुचप्रत्ययनियमस्याप्राप्तिः। किंकारणम्। प्रकृतेःप्रत्ययपरत्ववचनात्। परिगणिताभ्यः प्रकृतिभ्यः परः क्तः स्वभावतः कर्तारमाह। नचेमास्तत्रपरिगण्यन्ते। नतर्हीदानीमयंसाधुर्भवति। भवतिसाधुर्नतुकर्तरि। कथंतर्हिकर्तृत्वंगम्यते। अकारोमत्वर्थीयः। विभक्तमेषामस्तीतिविभक्ताः। पीतमेषामस्तीतिपीताइति। अथवाउत्तरपदलोपोत्रद्रष्टव्यः। विभक्तधनाः विभक्ताः। पीतोदकाः पीताइति ॥

र्तरिवर्तमानस्यसाधुत्वेनप्रतिपादनादित्यर्थः। तदेवंस्थितमेतत्। स्वभावतस्तेषुतेष्वर्थेषुवर्तमानानांप्रत्ययसंज्ञाविधानद्वारेणसाधुत्वमन्वाख्यायते। इदानींभाष्यकारः प्रश्नपूर्वकंप्रयोगसमर्थनंकरोति। नतर्हीति। नतुकर्तरीति। तयोरेवेतिवचनात्कर्मण्येवसाधुरित्यर्थः। विभक्तमिति। धनमितिभावः। पीतमिति। उदकमित्यर्थः। आकृतिगणश्चअर्शआदिः। अथवेति। गम्यमानार्थस्यशब्दस्याप्रयोगएवलोपोभिमतः। विभक्ताभ्रातरइत्यत्रचधनस्ययद्विभक्तत्वंतद्भ्रातृषूपचर्यतेपीतागावइत्यत्राप्युदकस्यपीतत्वंगोष्वारोप्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लः कर्मणि॥ केचिल्लइतिप्रथमांव्याचक्षते। अपरेषष्ठीलस्ययआदेशइति। तत्रलकारोद्विविधः तिङ्भाव्यतिङ्भावीति। तत्रति
ङ्भाविनः कृत्संज्ञानिषेधात्कर्त्तरिकृदित्यस्यानुपस्थानात्स्वार्थेभावेविधानंप्राप्नोति। अतिङ्भाविनस्तुकर्त्तरिकृदितिव
चनात्कर्त्तर्येवसाधुत्वंप्राप्नोतीतिवचनम्। किमर्थमिति। वक्ष्यमाणोभिप्रायः। लएतेष्विति। लकारइत्यर्थः। अथवालस्यय
आदेशइतिभावः। भावकर्मणोरिति। असत्यस्मिन्सूत्रेभावकर्मणोरात्मनेपदविधानाच्छेषात्कर्त्तरीतिचपरस्मैपदविधानाल्ल
कारस्यभावकर्मकर्त्तारोर्था अनुमास्यन्ते। लकारस्यप्रयोगासमवायाद्धालादेशानामेवैतेर्थाभविष्यन्तीत्यर्थः। एतावानिति। न
न्वाम्विषयोपिलोविद्यते। नैषदोषः। तस्यलुकापहारात्। अनुप्रयोगलकारेणभावादीनांप्रतिपाद्यत्वात्। लग्रहणमि

लः कर्मणिचभावेचाकर्मकेभ्यः॥ किमर्थमिदमुच्यते। लएतेषुसाधनेषुयथास्यात्। कर्मणिचकर्त्तरिभा
वेचाकर्मकेभ्यइति। नैतदस्तिप्रयोजनम्। भावकर्मणोरात्मनेपदंविधीयतेशेषात्कर्त्तरिपरस्मैप
दम्। एतावांश्चलकारः यदुतपरस्मैपदमात्मनेपदंच। सचायमेवंविहितः। अतउत्तरंपठति। लग्रह
णंसकर्मकनिवृत्त्यर्थम्। लग्रहणंक्रियतेसकर्मकनिवृत्त्यर्थंसकर्मकाणांभावेलोमाभूदिति। यदिपुनस्त
त्रैवाकर्मकग्रहणंक्रियते। तत्तत्राकर्मकग्रहणंकर्त्तव्यम्। ननुचेहापिक्रियतेभावेचाकर्मकेभ्यइति। प
रार्थमेतद्भविष्यतितयोरेवकृत्यक्तखलर्थाः भावेचाकर्मकेभ्यइति। एवमपियावदिहलग्रहणंताव
त्तत्राकर्मकग्रहणम् ॥

ति। यदीदंनारभ्येततदायथाभावेविधीयमानाघञादयः सकर्मकेभ्योभवन्तिओदनस्यपाकः सूत्रस्यकृतिरितितथा
भावकर्मणोरित्यनेनभावेआत्मनेपदंसकर्मकेभ्योपिस्यात्। ततश्चपच्यतेयवागूर्देवदत्तेनेत्यपिस्यात्। यदिपुनरिति।
भावकर्मणोरकर्मकादित्येवंकरिष्यतेसामर्थ्याच्चाकर्मकग्रहणंभावार्थंभविष्यति। अकर्मकाणांकर्मासंभवात्। सूत्रार
म्भवाद्याह। तत्रेति। सूत्रप्रत्याख्यानवाद्याह। ननुचेति। त्वयापीतिशेषः। आरम्भवाद्याह। परार्थमिति। सूत्रप्रत्याख्या
नवाद्याह। यावदिहेति। कर्मणिचभावेचाकर्मकेभ्यइत्येतदत्रप्रदेशद्वाभ्यामपिवक्तव्यम्। त्वयातुलइत्येतत्पदमत्र
कर्त्तव्यम्। मयाभावकर्मणोरित्यत्रअकर्मकग्रहणमितिपदेनपदस्यसाम्यम्। मात्रालाघवंत्वत्रनविवक्षितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरम्भवाद्याह॥अयमस्तीति।आनइति।आत्मनेपदसंज्ञत्वाद्भावकर्मणोरितिवचनाद्भावकर्माभिधायित्वमेवस्यान्नतु कर्तृवाचित्वमितिशयानइत्यादौकर्तर्यानोनस्यात्।सूत्रारम्भेतुकर्तर्यप्यानः सिध्यतीत्यर्थः।प्रत्याख्यानवाद्याह।तत्रा पीति।अनुदात्तङितइत्यादिभिःसूत्रैःकर्तर्यात्मनेपदविधानार्थैरानःकर्तरिशयानइत्यादौभविष्यतीत्यर्थः।विप्रतिषे धादिति।भावकर्मणोरित्यस्यतङ् वकाशः।यत्रकृत्संज्ञायाअभावात्कर्त्तरिकृदितिनप्रवर्ततेआस्यतेपच्यतइति।कर्त्त रिकृदित्यस्यतृजादयोवकाशः।आनस्यतूभयप्रसङ्गे कर्तरिकृदितिपरत्वात्कर्तार्थोभविष्यतीत्यर्थः।आरम्भवाद्याह।

इहवालग्रहणंक्रियते।तत्रवाऽकर्मकग्रहणम्।कोन्वत्रविशेषः।अयमस्तिविशेषः।इहलग्रहणेक्रि यमाणेआनःकर्तरिसिद्धोभवति।तत्रपुनरकर्मकग्रहणेक्रियमाणेआनःकर्तरिनप्राप्नोति।तत्राप्यकर्म कग्रहणेक्रियमाणेआनःकर्तरिसिद्धोभवति।कथम्।भावकर्मणोरित्यतोयदन्यदात्मनेपदानुक्रमणं तत्सर्वंकर्त्रर्थम्।विप्रतिषेधाद्वानःकर्तरि।विप्रतिषेधाद्वाआनःकर्तरिभविष्यति।तत्रभावकर्मणोरित्ये तदस्तुकर्तरिकृदिति।कर्तरिकृदित्येतद्भविष्यतिविप्रतिषेधेन।सर्वप्रसङ्गस्तु।सर्वेभ्यस्तुधातुभ्य आनःकर्तरिप्राप्नोति।परस्मैपदिभ्योपि।नैषदोषः।अनुदात्तङितइत्येषयोगोनियमार्थोभविष्यति।य द्येषयोगोनियमार्थः।विधिर्नप्रकल्पते।आस्तेशेतेइति।अथविध्यर्थः।आनस्यनियमोनप्राप्नोति।आ सीनःशयानइति।तथानेर्विशइत्येवमाद्यनुक्रमणंयदिनियमार्थम्।विधिर्नप्रकल्पते।अथविध्यर्थम् आनस्यनियमोनप्राप्नोति।अस्तुतर्हिनियमार्थम् ॥

सर्वप्रसङ्गइति।परस्मैपदिभ्योधातुभ्यआनःकर्तरिप्राप्नोतीत्यर्थः।प्रत्याख्यानवाद्याह।नैषदोषइति।अनुदात्तङितआ त्मनेपदंनान्यस्मादितिनियमादानःकर्त्तरिपरस्मैपदिभ्योनभविष्यतीत्यर्थः।आरम्भवाद्याह।यदीति।भावकर्मणोरात्मनेपद विधानात्तङोनुदात्तङितोनप्राप्नुवन्ति।अनुदात्तङितइत्यनेनआनएवधातुविशेषेनियम्यतइत्यर्थैकत्वादेकस्यवाक्यस्य विधिनियमाभावेकेनसूत्रेणनप्रकल्प्येतेइत्यर्थः।प्रत्याख्यानवाद्याह।अस्तुतर्हीति ॥ एमः १०९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावकर्मणोरित्यत्रेति। अनुदात्तङित आत्मनेपदमित्यनेनैकेन वाक्येन आनस्य नियमः क्रियते। भावकर्मणोरित्यत्र ल
नुवृत्त्याद्वितीयेन वाक्येन तङां विधिः क्रियत इत्यर्थः। एवमपीति। भावकर्मणोरित्यस्यानुदात्तङित इत्यनेनैकवाक्यता
सत्यामनुवृत्तौ स्यात्। ततश्चास्यते गुरुणा अतिशय्यते गुरुरित्यादौ आत्मनेपदं स्यात्। भूयते गम्यते शेते आस्त इत्यादौ तु
नैव स्यादित्यर्थः। यथैवात्रेति। अनुदात्तङित इत्यनेनानस्य नियमादप्राप्तिः। तङोऽपि भावकर्मणोर्विधीयमानाः निर्विश इत्

ननु चोक्तं विधिर्न प्रकल्पत इति। विधिश्च प्रक्लृप्तः। कथम्। भावकर्मणोरित्यत्र अनुदात्तङित इत्येतदनुवर्ति
ष्यते। यद्यनुवर्तते। एवमप्यनुदात्तङित एव भावकर्मणोरात्मनेपदं प्राप्नोति। एवं तर्हि योगविभागः करिष्य
ते। अनुदात्तङित आत्मनेपदं भवति। ततो भावकर्मणोः। ततः कर्तरि। कर्तरि चात्मनेपदं भवति। अनुदात्तङि
त इत्येव। आस्ते शेते। भावकर्मणोरिति निवृत्तम्। ततः कर्मव्यतिहारे। कर्तरीत्येवानुवर्तते। अनुदात्तङित इ
त्यपि निवृत्तम्। यदप्युच्यते तथा नेर्विश इत्येवमाद्यनुक्रमणं यदि नियमार्थं विधिर्न प्रकल्पत इति। अथ विध्यर्थं
मानस्य नियमो न प्राप्नोति। अस्तु विध्यर्थम्। ननु चोक्तं मानस्य नियमो न प्राप्नोतीति। नैष दोषः। य
थैवात्राप्राप्तास्तङो भवन्त्येवं मानोऽपि भविष्यति। सर्वत्राप्रसङ्गस्तु सर्वेषु च साधनेषु आनो न प्राप्नोति।
विप्रतिषेधाद्धानः कर्तरीति भावकर्मणोर्न स्यात्। कर्तर्येव स्यात्। इह पुनर्लग्रहणे क्रियमाणे कर्तरि
कृदित्येतदस्तु लः कर्मणि च भावे चाकर्मकेभ्य इति। लः कर्मणि च भावे चाकर्मकेभ्य इत्येतद्भविष्य
ति विप्रतिषेधेन। सर्वप्रसङ्गस्तु। लादेशः सर्वेषु साधनेषु प्राप्नोति। शतृक्तसू च भावकर्मणोरपि प्राप्नुतः ॥

त्यादौ कर्तरि न प्राप्नुवन्ति। तत्राविशेषान्नेर्विश इत्यादिभिः सूत्रैस्तङानाः कर्तरि विधास्यन्त इत्यर्थः। सर्वत्राप्रस
ङ्गस्त्विति। असत्यस्मिन्सूत्रे भवदुक्तेन विप्रतिषेधेनानः कर्तरि कृदिति कर्तर्येव स्यान्न तु भावकर्मणोः। तत
श्च भूयमानं गम्यमानमित्यादिप्रयोगो न स्यादित्यर्थः। इह पुनरिति। यदि ल इति षष्ठी तदा स्यतिङोऽवकाशः। कर्त
रि कृदित्यस्य तृजादयः। आनस्य परत्वादनेनार्थनिर्देशः। अथ ल इति प्रथमा तदा स्यतिङ्ग्वी लकारोऽवकाशः। आ
नभाविनस्तु लकारस्य परत्वादनेनार्थव्यवस्था ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषादिति।कर्तर्येव परस्मैपदमित्येवं नियमात् शतृक्वस्वादेः कर्मणोर्न भविष्यत इति भावः।लइत्यादेशापेक्षा षष्ठी निर्देशपक्षे आम इति विधीयमानस्य लुकोप्ययमर्थनिर्देशः।अभावस्याप्यादेशत्वात्।तथा च अचः परस्मिन्नित्यत्र लोपस्याप्यजादेशस्य स्थानिवद्भावः प्रदर्शितः।लुको भावरूपत्वात्कथमर्थाभिधानमिति चेत्।प्रतिज्ञाप्रापितं क्विबादीनामिव प्रयोगे श्रवणेपि लुकोर्थवत्त्वमनुप्रयोगात्तु तदर्थाभिधानव्यक्तिरित्यदोषः।लस्य॥अर्थव द्ग्रहणादिति।लइत्यय एव भावाद्यर्थाभिधायिनः स्थानित्वेन गृह्यन्त इत्यर्थः।न वर्णग्रहणेष्विति।लस्येत्यत्र लकारे ऽकार उच्चारणार्थः।तन्नैष दोषः ।

शेषात्परस्मैपदं कर्तरीत्येवं तौ कर्तारं द्विषेते॥लस्य॥लादेशे सर्वप्रसङ्गोविशेषात्।लादेशे सर्वस्य प्रसङ्गः।सर्वस्य लकारस्यादेशः प्राप्नोति।अस्यापि प्राप्नोति।लुनाति लभते।किं कारणम्।अविशेषात्।न हि कश्चिद्विशेष उपादीयते।एवं जातीयस्य लकारस्यादेशो भवतीति।अनुपादीयमाने विशेषे सर्वप्रसङ्गः।अर्थवद्ग्रहणात्सिद्धम्।अर्थवतो लकारस्य ग्रहणम्।न चैषोर्थवान्।अर्थवद्ग्रहणात्सिद्धमिति चेन्न वर्णग्रहणेषु।अर्थवद्ग्रहणात्सिद्धमिति चेत्तन्न।किं कारणम्।वर्णग्रहणमिदम्।न चैतद्वर्णग्रहणेषु भवत्यर्थवद्ग्रहणे नानर्थकस्येति।तस्माद्विशिष्टग्रहणम्।तस्माद्विशिष्टस्य लकारस्य ग्रहणं कर्तव्यम्।न कर्तव्यम्।धातोरिति वर्तते।एवमपि शाला माला मल्ल इत्यत्रापि प्राप्नोति।उणादयो ऽव्युत्पन्नानि प्रातिपदिकानि।एवमपि नन्दन इत्यत्रापि प्राप्नोति।इत्संज्ञात्र बाधिका भविष्यति।इहापि तर्हि बाधेत।पचति पठतीति।इत्कार्याभावादत्रेत्संज्ञा न भविष्यति।इदमस्ति त्कार्यम्।लितिप्रत्ययात्पूर्वमुदात्तं भवतीत्येष स्वरो यथा स्यात् ॥

तश्च वर्णमात्रस्यायं निर्देशः।वर्णनिर्देशेषु विद्यमानाप्यर्थवत्ता शब्देन नाश्रिता वर्णरूपमात्रस्याश्रयणात्।तथा च यस्येति लोपो नर्थकस्यापि भवति दैवदत्तिरिति।तस्मादिति।भावाद्यर्थाभिधायिनो लस्येति वक्तव्यमित्यर्थः।धातोरिति वर्तत इति।विहितविशेषणं च धातुग्रहणमाश्रीयत इत्यग्निचिल्लभत इत्यत्रापि न भवति।शालेति।शाभामलिभ्य औणादिको लन्प्रत्ययः।इत्संज्ञात्रेति।तस्यां च सत्यां लोपे च कृते स्थान्यभावादल्विधित्वाच्च स्थानिवद्भावाभावादादेशो न भविष्यतीत्यर्थः।इहापीति।ततश्चात्राप्यादेशा न स्युरित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लितीत्युच्यत इति। लइदस्येति बहुव्रीहिराश्रितः। अत्र च लस्य लोपे कृते न कश्चिल्लकारइत्संज्ञकः प्रत्ययोस्तीत्यर्थः।
अथापीति। लएवेल्लिदित्येवं तत्पुरुषोप्याश्रीयेत तथापि लस्येति स्थानित्वेनाश्रयणात्तस्यामपि इत्संज्ञायां लोपो
न क्रियते। अनुवर्तनादिति। भावादीनामनुवृत्त्या भावकर्मकर्तृवाचिनो लस्यादेशः। न च लोपे सति भावाद्यर्थाभिधायि
त्वं संभवतीत्यकृतलोपानामेव लकाराणामादेशाः करिष्यन्ते। ज्ञापकात्तु लित्स्वरो न भविष्यतीत्यर्थः। क्रियत इति। अ
नुनासिको लकारः स्थानित्वेनोपात्त इत्यर्थः। अथवा लअस्य लस्येत्येवं निर्देशः कृतः। अस्येति सर्वनाम्ना भावाद्यर्थाभि

लितीत्युच्यते न चात्र लितं पश्यामः। अथापि कथंचिद्वचनादनुवर्तनाद्वा इत्संज्ञकानामादेशः स्यात्। एव
मपि न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति। न लादेशेषु लित्कृतं भवतीति। यदयं णलं लितं करोति। अथा प्यु
गादयो व्युत्पाद्यन्ते। एवमपि न दोषः। क्रियते विशिष्टग्रहणं लस्येति। लादेशो वर्णविधेः पूर्वविप्रतिषिद्धम्।
लादेशो वर्णविधेर्भवति पूर्वविप्रतिषेधेन। लादेशस्यावकाशः। पचतु पठतु। वर्णविधेरवकाशः। दध्यत्र
मध्वत्र। इहोभयं प्राप्नोति। पचत्वत्र पठत्वत्रेति। लादेशो भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो
वक्तव्यः। न वक्तव्यः। उक्तं वा। किमुक्तम्। लादेशो वर्णविधेरन्तरङ्ग इति॥ टित आत्मनेपदानां टेरे॥ टित एत्वे आ
त्मनेपदेषानप्रतिषेधः॥ टित एत्वे आत्मनेपदेषानस्य प्रतिषेधो वक्तव्यः। पचमानः। यजमानः। टित इत्येत्वं प्रा
प्नोति। उक्तं वा। किमुक्तम्। ज्ञापकं वा सानुबन्धकस्यादेशवचनमित्कार्याभावस्येति। नैतदस्त्युक्तम्। एवं कि
लनदुक्तम्। एवं किल तदुक्तं स्यात्। यद्येवं विज्ञायते टित आत्मनेपदं टिदात्मनेपदं टिदात्मनेपदानामिति।
तच्चन। टितो लकारस्य यान्यात्मनेपदानीत्येवमेतद्विज्ञायते। अवश्यं चैतदेवं विज्ञेयम्। टित आत्मनेपदं टिदात्म
नेपदं टिदात्मनेपदानामिति हि विज्ञायमाने अकुर्वीत्यत्रापि प्रसज्येत। नैष टित्। कस्तर्हि टित्। स चावश्यं टित्कर्तव्यः।
आदिर्मा भूदिति। कथमिटोदिति। इटोदिति वक्ष्यामीति। तच्चावश्यं वक्तव्यम्। पर्यवपाद्यस्य माभूत्। लविषीष्ट॥

धायी परामृश्यते। पचत्वत्रेति। वाक्यस्य विभज्यान्वाख्यानं क्रियत इत्येवमुपन्यासः। लादेशो वर्णविधेरिति। विप्रतिषेधसूत्रे ब
हिरङ्गपरिभाषाया इदं प्रयोजनमित्यर्थः॥ टित आत्म॥ यद्येवमिति। यदि टित इत्येकवचनं बहुवचनप्रसङ्गे व्यत्ययेन क्रियेते
त्यर्थः। अथवा केचिद् टितामित्येव पठन्ति तदाश्रयेणैतदुक्तम्। अकुर्वीति। लङः स्थाने उत्तमैकवचनमिट्। पर्यवपाद्यस्येति। प
र्यवपादोऽरूपान्तरापत्तिः। तत्र साधुरागमः पर्यवपाद्यः। तत्र साधुरिति यत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदीति। दाञो लङ् उत्तमैकवचनम्। शपः श्लुः। द्विर्वचनप्रसङ्गे छन्दसि वेति वक्तव्यमिति द्विर्वचनाभावः। यदि टि दि
स्यात् तदा आतो लोप इटि चेत्याकारलोपो न स्यात्। अत्र च छन्दस्युभयथेर्धं त्वार्धधातुकत्वमिट एष्टव्यम्। आर्धधातुक इत्या
लोपविधानात्। सप्तदशेति। लस्येत्येका षष्ठी। सा यद्यवयवावयविसंबन्धे स्यात् तदा इट एवानुग्रहः स्यात् न तिबादीनाम्।
तस्मादुपसंस्थान्यादेशसंबन्धस्य प्रयोजकत्वाल्लस्येति स्थाने योगा षष्ठीत्यादेशा एवेड् भवति न त्वागमः। असिद्धमिति। व
लाद्यार्धधातुकापेक्षणादङ्गापेक्षत्वाच्च बहिरङ्ग इडागमः। इटोदित्यङ्गावस्तु लिङ्संबन्धोडपेक्षणादन्तरङ्गः। तत्र कर्त
व्ये आगमस्यासिद्धत्वादङ्गावाभावः। प्रकृतानामिति। तिबादय इहानुवर्तन्ते तैरात्मनेपदानि विशेष्यन्ते। अथवा प्रकरण
स्य विशेषस्मृतिहेतुत्वात्प्रकृतान्येवात्मनेपदानीहात्मनेपदशब्देनोच्यन्ते। ज्ञापकमाह। आनेमुगिति। यद्येत्वमानस्य

इह तर्हि इषमूर्जमहमित आदीत्याऽतो लोप इटि चेत्याकारलोपेन प्राप्नोति। तस्मात्त्वि देषः आदिस्तर्हि
कस्मान्न भवति। सप्तदशादेशा स्थाने योगत्वं प्रयोजयन्ति ताने को नोत्सहते विहन्तुमिति कृत्वा आदिर्न
भविष्यति। पर्यवपाद्यस्य तर्हि कस्मान्न भवति। लविधौ ष्टेति। असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणइ
ति। इदं तर्हि युक्तं प्रकृतानामात्मनेपदानामेत्वं भवतीति। के च प्रकृताः। तादयः। आनेमुग् ज्ञापकं त्वेत्वे
टित्तङामि शिसीरिचः। डारौरः सुटि दटितः प्रकृते तद् गुणे कथम् ॥

स्यादानयि मुगिति वक्तव्यं स्यादित्यर्थः। टित्तङामिति। टितः स्थाने ये तङः तेषामेत्वं न त्वानस्यापि। अथाध्येतेत्य
दौ डारौरसामेत्वं कस्मान्न भवतीत्याह। इशिसीरिच इति। लिटस्तझयोरेशिरेच् थासः से इत्ये ताभ्यां सूत्राभ्यां लाघवा
य इशा सिद्ध रिच् इत्येते आदेशा विधेयाः। एत्वस्यानेन सिद्धत्वात्। ज्ञापनाय तु सयादयो विहिता लादेशादेशानामेत्वा
भावस्य। टिदटित इति। अकुर्वीत्यत्र परिहारः। अटितो लङः स्थाने टिदिड्कृत इत्येत्वं न भवति। प्रकृते तदिति। तदेत्वं
प्रकृते तङ्यात्मनेपदे भवति न त्वाने। गुणे कथमिति। श्लोकपूरणायैतदुक्तम्। एत ऐ इत्यत्र पचावेदम्। इत्यादु गुणे कृते
कथमेत्वं न भवतीति चोद्यम्। परिहारस्तु वक्ष्यते। बहिरङ्ग आद्गुण इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परस्मै॥णलइति।कुपुनरस्यशकारः क्रियते।यद्यादौ।णकारस्य अनादित्वादित्संज्ञा न प्राप्नोति।मध्येशस्येत्संज्ञाया अभावः।अन्ते तु लस्येत्संज्ञाया अप्रसङ्गः।एवं तर्हि लश् विधातव्यः।लशाउत्तमो वेति करिष्यते।योगविभागश्चेति म न्यते।अथवाणल् शिदित्यतिदेशः कर्तव्यः।अक्रियमाणे हीति।नानुबन्धकृतमनेकाल्त्वमित्यन्त्यस्य स्यादित्यर्थः।एतच्च प्राग्लादेशाद्धात्वधिकार इति पक्षमाश्रित्योच्यते।धात्वधिकारे तु सत्यादेः परस्येत्यादेः प्राप्नोति।धातुस्वर इति प्र

परस्मैपदानां णलतुसुस्थलथुसणल्वमः॥णलः शित्करणं सर्वादेशार्थम्।णल् शित्कर्तव्यः।किं प्रयोजनम्।सर्वादेशार्थं शित्सर्वस्येति सर्वादेशो यथा स्यात्।अक्रियमाणे हि शकारे अलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत।उक्तं वा।किमुक्तम्।अनित्त्वात् सिद्धमिति।णकारः क्रियते तस्य अनित्त्वात्सिद्धमिति।कथमेष परिहारोन्याय्यः।शकारमसि चोदितः।णकारं करिष्यामि शकारं न करिष्यामीति।णकारो वात्र क्रियेत शकारो वा।कोन्वत्र विशेषः।अवश्यमत्र णकारो वृद्ध्यर्थः कर्तव्यः णितीति वृद्धिर्यथा स्यात्।नार्थो वृद्ध्यर्थेन णकारेण।णित्वे योगविभागः करिष्यते।इदमस्ति गोतो णित्।ततः अल्।अल् च णिद्भवति।ततः उत्तमो वेति।एवं तर्हि लकारः क्रियते।तस्य अनित्त्वात्सिद्धम्।एवमपि क एष परिहारोन्याय्यः।शकारमसि चोदितः।लकारं करिष्यामि।शकारं न करिष्यामीति।लकारो वा क्रियते शकारो वा।कोन्वत्र विशेषः।अयमस्ति विशेषः। अवश्यमत्र स्वरार्थो लकार इत्कर्तव्यः।लितिप्रत्ययात्पूर्वमुदात्तं भवतीत्येष स्वरो यथा स्यात्।नैतदस्ति प्रयोजनम्।धातुस्वरे कृते द्विर्वचनं तत्रान्तर्यतोन्तोदात्तस्यान्तोदात्त आदेशो भविष्यति।कथं पुनरयमन्तोदात्तः।यदेकाच्व्यपदेशिवद्भावेन।यद्येवं तर्हि व्यपदेशिवद्भावे नान्तोदात्तः।एवमाद्युदात्तोपि।तत्रान्तर्यत आद्युदात्तस्य अद्युदात्त आदेशः प्रसज्येत।सत्यमेवमेतत्।न त्विदं लक्षणमस्ति।धातोरादिरुदात्तो भवतीति।इदं पुनरस्ति।धातोरन्त उदात्तो भवतीति।सोयं लक्षणेनान्तोदात्तः तत्रान्तर्यतोन्तोदात्तस्यान्तोदात्त आदेशो भविष्यति ॥

त्ययस्य पित्वादनुदात्तत्वाद्धातुस्वरः प्रवर्त्तते।यदेकाजिति।योनेकाच् जजागारेति तत्र धातुस्वरे कृते शिष्टस्यानुदात्तत्वे प्रथमैकाचो द्विर्वचनं सर्वानुदात्तं सिध्यतीत्येकाजेव धातुनिरूप्यते व्यपदेशिवद्भावेनेति।आद्यन्तवदेकस्मिन्नित्यनेनेत्यर्थः।यद्येवेति।कार्यातिदेशं मन्यते।न त्विदमिति।शास्त्रातिदेश इति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदपीति। स्थानिवदिति कार्यातिदेशः प्राधान्यादिति भावः। प्रकृतितद्‌ इति। स्थानिन इत्यर्थः। द्विःप्रयोग इति। पाष्ठिकं द्विर्वचनं द्विःप्रयोगः न तु स्थाने द्विर्वचनमिति निर्णयः। लकार इति। ततश्च लउत्तमो वेति कर्त्तव्यं योगविभागश्च कार्यः। अकारस्येति। यस्य स्थाने विधीयते तस्येत्यर्थः। एतदपि प्राग्लादेशाद्वा लधिकार इति पक्षाश्रयेणोच्यते धात्वधिकारे ह्यादेः परस्यादेरकारे

एतदप्यादेशो नास्ति। आदेशस्यान्त उदात्तो भवतीति। प्रकृतितो नेन स्वरो लभ्यः। प्रकृतिश्चास्य यथैवान्तोदात्ता एवमाद्युदात्तापि। द्विःप्रयोगे खल्वपि हि द्विर्वचने उभयोरन्तोदात्तत्वं प्रसज्येत। अनुदात्तं पदमेकवर्जमिति नास्ति यौगपद्येन संभवः। पर्यायः प्रसज्येत। तस्मात्स्वरार्थो लकारः कर्तव्यः। लकारः क्रियते। तस्मान्नित्त्वात्सिद्धम्। अकारस्य शित्करणं सर्वादेशार्थम्। अकारः शित्कर्तव्यः। किं प्रयोजनम्। सर्वादेशार्थं शित्सर्वस्येति सर्वादेशो यथा स्यात्। अक्रियमाणे हि शकारे अलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत। ननु च अकारस्य अकारवचने प्रयोजनं नास्तीति कृत्वा अन्तरेण शकारं सर्वादेशो भविष्यति। अस्त्यन्यदकारस्य अकारवचने प्रयोजनम्। किम्। अकारवचनं समसंख्यार्थम्। संख्यातानुदेशो यथा स्यात्। तस्माच्छित्करणम्। तस्माच्छित्कर्तव्यः। न कर्तव्यः। क्रियते न्यास एव। प्रश्लिष्टनिर्देशो यम्। अ अ इति। सो सावनेकाल्। अनेकाल्शित्सर्वस्येति सर्वादेशो भविष्यति॥ लोटो लङ्‌वत्॥ लङ्‌वदतिदेशे जुस्भावस्य प्रतिषेधः॥ लङ्‌वदतिदेशे जुस्भावस्य प्रतिषेधो वक्तव्यः। पान्तु वान्तु। लङः शाकटायनस्यैवेति जुस्भावः प्राप्नोति। उत्ववचनात्सिद्धम्। उत्वमत्र बाधकं भविष्यति। अनवकाशा हि विधयो बाधका भवन्ति। सावकाशं चोत्वम्। कोवकाशः पचतु पठतु ॥

सति रूपं सिद्धम्। अ अ इति। अकारद्वयसमुदायस्य आदेशत्वमित्यर्थः॥ लोटो ल॥ लोट इत्युपमेये षष्ठीनिर्देशादुपमाने षष्ठ्यन्तं विज्ञायते तेन लङो यत्कार्यं तल्लोटोतिदिश्यते न तु लङि यत्कार्यं तदित्यङाटौ लोटि न भवतः। उत्ववचनादिति। नाप्राप्ते लङ्‌वद्भावे उत्वमारब्धं तस्य बाधकमित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रापीति। लङ्वद्भावादित्यनेनेत्यर्थः॥ सेर्ह्यि॥ अलघीयइति। उकारे सति प्रक्रियायां लाघवं भवति। इकारे तु सति लक्षणान्तरेणोत्वे प्रक्रियागौरवं स्यात्। न चेकारोच्चारणे लाघवं भवति। तस्मादिकारोच्चारणमुत्वस्य बाधकमेवेत्यर्थः॥ लिङः सी॥ यथैव कृषीष्ट कृषीष्ठा इत्येवमादौ सुटि कृते विरोधाभावाद्बाध्यबाधकभावाभावात्सीयुड्भवति। एवं यासुड्यपि कृ

अत्रापीकारलोपः प्राप्नोति। तद्यथैवोत्वमीकारलोपं बाधते। एवं जुस्भावमपि बाधेत। न बाधते। किं कारणम्। येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते इकारलोपे उत्वमारभ्यते। जुस्भावे पुनः प्राप्ते चाप्राप्ते च। अथवा पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त इत्येवमिदमुत्वमिकारलोपं बाधते जुस्भावं न बाधते। एवं तर्हि वक्ष्यति तत्र लङ्ग्रहणस्य प्रयोजनम्। लङो वयो लङ् तत्र यथा स्यात्। लङ्वद्भावेन यो लङ् तत्र मा भूदिति॥ लोटो लङ्वत्॥ सेर्ह्यपिच्च॥ मेर्निः॥ ह्विन्योरुत्वप्रतिषेधः॥ ह्विन्योरुत्वस्य प्रतिषेधो वक्तव्यः। लुनीहि। लुनानि। एरुरित्युत्वं प्राप्नोति। न वोच्चारणसामर्थ्यात्। न वा वक्तव्यः। किं कारणम्। उच्चारणसामर्थ्यात् उच्चारणसामर्थ्यादत्रोत्वं न भविष्यति। अलघीयश्चैव हि इकारोच्चारणमुकारोच्चारणात्। इकारं चोच्चारयति। उकारं च नोच्चारयति। तस्यैतत्प्रयोजनमुत्वं मा भूदिति। सेर्ह्यपिच्च॥ एत ऐ॥ एत ऐत्वे आड्गुणप्रतिषेधः। एत ऐत्वे आड्गुणस्य प्रतिषेधो वक्तव्यः। पचावेदम्। पचामेदम्। आड्गुणे कृते एत ऐ इत्यैत्वं प्राप्नोति। न वा बहिरङ्गलक्षणत्वात्। न वा वक्तव्यः किं कारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गलक्षण आड्गुणः। अन्तरङ्गमैत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे॥ एत ऐ। लिङः सीयुट्॥ यासुडादेः सीयुट्प्रतिषेधः। यासुडादेः सीयुटः प्रतिषेधो वक्तव्यः। चिनुयुः। सुनुयुः। लिङः सीयुडिति सीयुट् प्राप्नोति। न वा वाक्यापकर्षात्। न वा वक्तव्यः। किं कारणम्। वाक्यापकर्षात्। वाक्यापकर्षाद्यासुट् सीयुटं बाधिष्यते। सुट्तिथोस्त्वपकर्षविज्ञानम्। सुटोपीदानीं तिथोरपकर्षो विज्ञायेत। कृषीष्ट। कृषीष्ठाः। हृषीष्ट। हृषीष्ठाः॥

तेतस्य लिङ्कृत्वा न दादेः सीयुट्प्रसङ्ग इति मत्वाह। यासुडादेरिति। न वेति। लिङः सीयुडित्यस्य वाक्यस्य यासुड्विधिवाक्येनापकर्षो बाध इत्यर्थः। विनापि विरोधेन सामान्यविधिर्विशेषविधिना बाध्यते तक्रेणेव दधीति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनादेश्चेति। तिथोरितिसप्तमींमन्यते ततस्तदादिविधिसद्भावात्तकारथकारादेरेवलिङादेशस्य सुट्स्यात्कृषीष्ठाइत्यादा
वितिभावः। नवेति। चोद्यद्वयमपि परिहृतम्। सुटस्तकारथकारौ वागमिनौ सीयुटस्तु समुदायइति कार्यिभेदाद्बाध्यबाध
कभावाभावः। तिथोरिति च षष्ठीनिर्देशात्तदादिविध्यभावादनाद्योरपि तिथोः सुड्भवति॥ आतः॥ अकार्षुरिति। अत्रनाका
रान्तात्सिज्विहितः नापि परः रेफेण व्यवधानादिति जुस्त्वस्यात्। ननु यद्यकार्षुरित्यादावपि नियमः स्यात्तदा पूर्वसूत्रेण सि

अनादेशग्रहणं सुड्वचनम्। अनादेशस्य सुड्वक्तव्यः। कृषीयास्तांकृषीयास्ताम्। तकारथकारादेर्लिङ इति सुण्नप्राप्नो
ति। नवातिथोः प्रधानभावात्तद्विशेषणंलिङ्ग्रहणम्। नवावक्तव्यम्। किंकारणम्। तिथोः प्रधानभावात्। ति
थावत्र प्रधानं तयोर्विशेषणं लिङ्ग्रहणम्। नैवंविज्ञायते। तकारथकारादेः लिङ इति। कथंतर्हि तकारथका
रयोः सुड्भवति तौचेल्लिङ इति॥ लिङः सीयुट्॥ यासुट्परस्मैपदेषूदात्तो ङिच्च॥ किमर्थं यासुटो ङित्वमुच्यते।
यासुटो ङिद्वचनं पिदर्थं पितिवचनानि प्रयोजयन्ति। अथ किमर्थमुदात्तवचनंक्रियते। उदात्तवचनंच। किमपि
दर्थमेव। आगमानुदात्तार्थंवा। अथवा एतज्ज्ञापयत्याचार्यः आगमाअनुदात्ताभवन्तीति। असत्यन्यस्मिन्प्र
योजने ज्ञापकंभवति। उक्तंचैतद्यासुटो ङिद्वचनं पिदर्थमुदात्तवचनंचेति। शक्यमनेनवक्तुं यासुट्परस्मै
पदेषुभवति अपिच्चलिङ्वतीति। सोऽयमेवंलघीयसान्यासेन सिद्धेसति यद्गरीयांसं यत्नमारभते तज्ज्ञापय
त्याचार्यः आगमा अनुदात्ताभवन्तीति। यासुट्परस्मैपदेषूदात्तो ङिच्च॥ आतः॥ किमिदंजुस्याकारग्रहणं नियमा
र्थम्। आहोस्वित्प्रापकम्। कथंचनियमार्थंस्यात्। कथंवाप्रापकम्। यदिसिज्ग्रहणमनुवर्तते। ततो नियमार्थम्।
अथनिवृत्तम्। ततः प्रापकम्। कश्चात्रविशेषः। जुस्याकारग्रहणं नियमार्थमिति चेत् सिज्लुक्ग्रहणम्। जुसि आकारग्र
हणं नियमार्थमिति चेत् सिज्लुक्ग्रहणंकर्तव्यम्। आतः सिज्लुगन्तादिति वक्तव्यम्। इहमाभूत्। अकार्षुः।
अहार्षुः। अस्तु तर्हि प्रापकम्। प्रापकमिति चेत्प्रत्ययलक्षणप्रतिषेधः। प्रापकमिति चेत्प्रत्ययलक्षणस्य प्रति
षेधो वक्तव्यः। अभूवन्निति प्रत्ययलक्षणे न जुस्भावः प्राप्नोति॥

जन्ताज्जुस्विधानमनवकाशंस्यान्नैषदोषः। अयुरस्युरित्यादेरवकाशस्य संभवाद्विषयविभागश्च न लभ्यते। यतोऽकार्षुरिति जु
स्भवति। अभूवन्नित्यत्र तु न भवति। यद्येवं पूर्वसूत्रे सिज्ग्रहणमकृत्वा आतः सिचइति वक्तव्यंस्यात्। नैतदस्ति। उत्तरत्रातइत्यस्यानु
वृत्त्यर्थो योगविभागः स्यात्। अथवा योगविभागोऽस्य नियमार्थत्वाय स्यात्। अस्य हि नियमार्थत्वे उत्तरत्रलङ्ग्रहणं न कर्तव्यं भवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवकारकारणंचेति। यदासिज्ग्रहणमिह नानुवर्तते तदानेनैव लङादेशस्य झेर् तउत्तरस्यायुरित्यादौ जुसिसिद्धे लङः शाकटायनस्यैवेति नियमार्थ एवकारः कर्तव्यः। अन्येषांमतेन अयानित्यादि यथा स्यात्। यदातु सिज्ग्रहणानुवृत्त्यानियमार्थमिदं तदा लङः शाकटायनस्येत्येवपक्षे विध्यर्थं कर्तव्यं नार्थ एवकारेणेत्यर्थः। मैवं विज्ञायीति। लङ एव शाकटायनस्येति विज्ञायमाने लुङः शाकटायनस्य न स्यात्। ततश्च लुङि विकल्पः प्रसज्येत। लुङि तु नित्यः स्यादित्यर्थः। तुल्यजाती

एवकारकरणंच। एवकारकरणंच कर्तव्यम्। लङः शाकटायनस्यैवेति। नियमार्थे पुनः सति नार्थ एवकारकरणेन। ननु च प्रापकेपि सति सिद्धे विधिरारभ्यमाणोन्तरेणैवकारं नियमार्थो भविष्यति। इष्टतोवधारणार्थस्तर्ह्येवकारः कर्तव्यः। यथैवं विज्ञायते लङः शाकटायनस्यैवेति। मैवं विज्ञायि लङ एव शाकटायनस्येति। किंच स्यात्। लुङः शाकटायनस्य न स्यात्। अदुः। अगुः। अधुः। अस्थुः। लङ्ग्रहणंच। लङ्ग्रहणंच कर्तव्यम्। लङः शाकटायनस्यैवेति। नियमार्थे पुनः सति नार्थो लङ्ग्रहणेन। आतो ङित इति वर्तते। नचान्य आकारादनन्तरो ङिदस्ति अन्यदतो लङः। अस्तु तर्हि नियमार्थम्। ननु चोक्तं जुस्याकारग्रहणं नियमार्थम्। इति चेत् सिज्लुक्ग्रहणमिति। नैष दोषः। तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः। यो द्वाभ्यामनन्तरः आतश्च सिचश्च। अथ तदेवकारकरणं नैव कर्तव्यम्। कर्तव्यंच। किंप्रयोजनम्। उत्तरार्थम्। लिङ्लिङाशिषि आर्धधातुकमेव यथा स्यात्। इतरथा हि वचनादार्धधातुकसंज्ञा। स्यात्। तिङ्ग्रहणेन च ग्रहणात्सार्वधातुकसंज्ञा। अथ तल्लङ्ग्रहणं नैव कर्तव्यम्। कर्तव्यंच। किंप्रयोजनम्। लङेवयोलङ् तत्र यथा स्यात्। लङ्भावेनयोलङ् तत्र माभूत्॥ आतः ॥

यस्येति। सिज्लुका विना आतः सिचश्चानन्तरो झिर्न भवतीति सिज्लुगन्तस्याकारान्तस्येह ग्रहणमिति नियमेन सिज्लुगन्तमेव निवर्त्यते। उत्तरार्थमिति। अन्यथैकसंज्ञाधिकारादन्यत्र संज्ञासमावेशस्य दृष्टत्वाल्लिङ्लिङादेशानां सार्वधातुकसंज्ञापि स्यात्। ततस्तन्निमित्तविकरणप्रसङ्गः आर्धधातुकसंज्ञा चेडाद्यर्थास्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आर्धधा॥ अनुक्रान्तापेक्षमिति। अनुक्रान्ताये प्रत्ययास्तिङ्शिद्वर्जितास्ते आर्धधातुकसंज्ञा भवन्ति न त्वनुक्तं स्यमा ३४१
नादित्यर्थः। धातोरिति। धातोरित्येवं धातुशब्दमुच्चार्य ये विहिता इत्यर्थः॥ इति श्रीमन्महामहोपाध्यायश्रीमत्कैयटपु

आर्धधातुकं शेषः॥ आर्धधातुकसंज्ञायां धातुग्रहणम्। आर्धधातुकसंज्ञायां धातुग्रहणं कर्तव्यम्। धा
तोः परस्यार्धधातुकसंज्ञा यथा स्यात्। इह मा भूत्। वृक्षत्वं वृक्षतेति। क्रियमाणे चापि धातुग्रहणे स्वा
दिप्रतिषेधः। स्वादीनां प्रतिषेधो वक्तव्यः। इह मा भूत्। लूभ्यां लूभिरिति। अनुक्रान्तापेक्षं शेषग्रहणम्।
एवमपि अग्निकाम्यति। वायुकाम्यतीति प्राप्नोति। तस्माद्धातुग्रहणं कर्तव्यम्। न कर्तव्यम्। आ तृती
यपरिसमाप्तेर्धात्वधिकारः प्रकृतोनुवर्तते। क्व प्रकृतः। धातोरेकाचो हलादेरिति। एवमपि श्रीका
म्यति भूकाम्यतीति प्राप्नोति। तद्विधानात्सिद्धम्। विहितविशेषणं धातुग्रहणं धातोर्यो विहित इ
ति। धातोर्विहितः संकीर्त्य धातोरित्येवं यो विहित इति ॥ इति श्रीभगवत्पतञ्जलिविरचिते व्याकर
णमहाभाष्ये तृतीयाध्यायस्य चतुर्थे पादे प्रथममाह्निकम्। पादश्चाध्यायश्च समाप्तस्तृतीयः ॥

त्रश्रीमत्कैयटकृते महाभाष्यप्रदीपे तृतीयाध्यायस्य चतुर्थे पादे प्रथममाह्निकम्। पादोध्यायश्च समाप्तः तृतीयः। राम: ११४
श्रीशुभं ॥ भार्गवार्पणमस्तु ॥

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः॥ ङ्याप्प्रातिपदिकात्॥ ङ्याप्प्रातिपदिकग्रहणंकिमर्थमिति। परश्चेतिवचनात्परेभवन्तोवक्ष्यमाणाः
प्रत्ययाः प्रत्ययार्थसंबन्धयोग्यार्थाभिधायिनींङ्याप्प्रातिपदिकलक्षणामेवप्रकृतिमाक्षेप्स्यन्तिसतिचपञ्चमीनिर्देशेपर
श्चेतिप्रत्याख्यातमसतित्विहपञ्चमीनिर्देशेवक्ष्यमाणप्रत्ययपरत्वप्रतिपादनपरत्वान्नास्तिप्रत्याख्यानम्। सतिवाप्रत्या
ख्यानेप्रत्ययद्योत्यवाच्यार्थसंबन्ध्यर्थाभिधायिप्रकृत्याक्षेपः सिद्धइतिप्रश्नः। धातोर्माभूवन्निति। असतीहप्रकृतिनिर्देशे
धात्वधिकाराद्धातोरेवस्युः। वासरूपविधिश्च स्यात्। अथवाप्रत्ययपरत्वेनप्रकृतिमात्राक्षेपेधातोरपिस्युः। तत्रयथा
कर्तृकर्मणोर्लकारउत्पद्यतेसाधनाश्रयसंख्यायांचतिङामुत्पत्तिः कर्त्रादिषुतव्यादीनांचतथास्वादयोपिस्युरिति
भावः। धातोरिति। धातुग्रहणंनिदर्शनम्। तत्रप्रकृतिमात्राद्विधीयमानाः स्वादयउत्सर्गास्तव्यदादयस्तुप्रकृतिविशेषाश्र

श्रीगणेशायनमः॥ ङ्याप्प्रातिपदिकात्॥ ङ्याप्प्रातिपदिकग्रहणंकिमर्थम्। ङ्याप्प्रातिपदिकात्स्वा
दयोयथास्युः। धातोर्माभूवन्निति। नैतदस्तिप्रयोजनम्। धातोस्तव्यदादयोविधीयन्ते। तेऽपवादत्वा
द्बाधकाभविष्यन्ति। तिङन्तात्तर्हिमाभूवन्निति। एकत्वादिष्वर्थेषुस्वादयोविधीयन्ते। तेचात्रतिङा
उक्ताएकत्वादयइतिकृत्वाउक्तार्थत्वान्नभविष्यन्ति ॥

येणविधानादपवादादितिभावः। तिङन्तादिति। कर्मादयः स्वादीनामर्थाः। तत्रयथापुत्रीयशब्दादन्तर्भूतकर्मक्रिया
वाचिनः कर्तरिलकारउत्पद्यतेतथापचतिशब्दात्कर्तृविशिष्टक्रियावाचिनः कर्मादिषुद्वितीयादयः स्युः। यद्वैकत्वा
दिष्वपिविभक्त्यर्थेषुयथैकोद्वौबहवइतिप्रकृत्यभिहितेष्वपिभवन्त्येवंतिङाभिहितेष्वपिस्युरितिभावः। एकत्वादि
ष्विति। संख्याविभक्त्यर्थः। साचतिङाभिहितेत्युक्तार्थत्वात्स्वादयोनभवन्त्येकादिभ्यस्तुवचनग्रहणाद्यत्नात्संख्या
वाचिभ्योपिप्रथमाभवति। नचपचतिशब्दात्कर्त्रभिधायिनः कर्मादिषुद्वितीयादीनामुत्पत्तिर्युक्ता। नह्येकक्रियापे
क्षाभिन्नसाधनाभिधायिनोरेकस्मिन्पदेऽनुसहायभावोयुक्तः। पुत्रीयशब्दस्तुजीवत्यादिधातुवद्विशिष्टक्रियावाचीति
ततः कर्तरिलकारोत्पत्तिरविरुद्धा। अनभिहिताधिकाराच्चतिङभिहितेसाधनेस्वाद्यनुत्पत्तिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टाबादय इति। यथा साधनाश्रयसंख्याभिधायित्वं तिङन्तं तथा तद्गतलिङ्गाभिधायित्वमपि स्यादिति भावः। न च तिङन्तस्येति। क्रियाप्रधानत्वादाख्यातस्य क्रियायाश्चासत्त्वभूतत्वात्सत्त्वधर्मेण लिङ्गेनायोगः। न च द्रव्यधर्मलिङ्गग्रहणयोग्यत्वं नियतत्वाच्छब्दशक्तीनामिति भावः। तदुक्तं हरिणा। एकत्वेपि क्रियाख्याते साधनाश्रयसंख्यया। भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रयः। तस्मादुपस्थितेप्यर्थे कस्यचित्प्रतिबध्यते। शब्दस्य शक्तिर्नत्वेष शास्त्रेणाख्यायते विधिरिति। शोभनं पचतीत्यादावुक्तक्रियाविशेषणस्य नपुंसकत्वं न तु क्रियायाः। पचतिरूपमित्यादौ तु रूपबाद्यन्तार्थस्य क्रियायाः शब्दशक्तिस्वाभाव्यादेव नपुंसकत्वम्। नानारूपादिशब्दानां शक्तयो न सामान्यतो दृष्टेनानुमानेन व्यवस्थापयितुं शक्यन्ते। अनेनैव न्यायेन धातोष्टाबाद्यनुत्पत्तिर्व्याख्येया। अणादय इति। यथैव गर्गस्यापत्यमित्यपत्यापत्यवत्संबन्धादिसंभवः। एवं पचति यस्तस्यापत्यमिति सर्वनामप्रत्यवमृष्टतिङन्तार्थेन संबन्धसंभव इति भावः।

> टाबादयस्तर्हि तिङन्तान्माभूवन्निति। स्त्रियां टाबादयो विधीयन्ते। न च तिङन्तस्य स्त्रीत्वेन योगोस्ति। अणादयस्तर्हि तिङन्तान्माभूवन्निति। अपत्यादिष्वर्थेष्वणादयो विधीयन्ते। न च तिङन्तस्यापत्यादिभिर्योगोस्ति। अथापि कथंचिद्योगः स्यात् ॥

ननु षष्ठ्यन्तादपत्ये प्रत्ययो विधीयते सर्वनाम्नश्चात्र षष्ठ्यन्तत्वं न तिङन्तस्य। नैष दोषः। गर्गस्यायमित्यत्रापि वाक्यगोचरैव षष्ठी संबन्धप्रदर्शनायोपादीयते। प्रत्ययस्तु प्रातिपदिकादेवोत्पद्यते। लुग्विधानद्वारेण ह्याचार्यः स्वाभाविकीं प्रत्ययस्यानुत्पत्तिमाचष्टे। तस्येति तु षष्ठीनिर्देशः सति संबन्धे प्रत्ययविधानार्थो न तु षष्ठ्यन्तात्प्रत्ययोत्पत्त्यर्थः। न चेति। क्रियाप्रधानत्वादाख्यातस्य तस्याश्चासत्त्वभूतत्वादपत्यादिभिर्योगाभावः। साधनस्यापि क्रियां प्रति गुणभावादपत्यादिभिर्योगो नास्ति शब्दान्तरपरामृष्टस्य साधनस्यापत्यादियोगसंभवेपि तिङन्तप्रतिपाद्यस्य साधनस्यापत्यादिभिर्योगाभावः। न हि यथा पाचकस्यापत्यमिति संबन्धप्रतिपत्तिरेवं पचत्यपत्यमिति। अथापीति। सर्वनामप्रत्यवमृष्टस्यार्थस्यापत्यादियोगसंभवादिति भावः। धातोरप्यणाद्युत्पत्तिर्धात्वर्थस्यापत्यादियोगाभावादेव प्रतिक्षिप्ता वाक्यार्थस्याप्यसत्त्वभूतत्वाच्छक्तिलिङ्गापत्यादियोगाभावाद्वक्ष्यमाणप्रत्ययानुत्पत्तिरभिधानीया। भाष्यकारेण तु न्यायस्योक्तत्वात्स्वयमुपन्यासो न कृतः ॥ राम १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अङ्गभपदसंज्ञार्थमिति। यस्मात्प्रत्ययविधिरित्यत्रविधिग्रहणाद्यस्यप्रत्ययविधौ शब्देनाश्रयणंतस्याङ्गसंज्ञा। भपदसंज्ञेअ
प्युत्तरत्रयस्मात्प्रत्ययविधिरित्यस्यानुवर्तनात्तस्यैवेतिभावः। भाष्यकारएतत्प्रयोजनंनिराकर्तुमाह। क्वपुनरिति। ग्रहणव
द्युदिति। ग्रहणमुपादानंतच्चक्वचित्साक्षात्तथाजाद्यतष्टाबित्यजादीनांक्वचित्संज्ञाद्वारेणयथात्रैवाकारेणादन्तानाम्। क्वचि
दनुबन्धनिर्देशोपलक्षितसंज्ञानिर्देशेन। यथोगितश्चेति। अत्रस्त्र्यर्थाभिधायिशब्दआक्षिप्तोऽकारेणोगिताचविशेष्यते। अथा

एवमपिनदोषः। आचार्यप्रवृत्तिर्ज्ञापयतिनतिङन्तादणादयोभवन्तीति। यदयंक्वचित्तद्धितविधौतिङ्ग्र
हणंकरोति। अतिशायनेतमबिष्ठनौतिङश्चेति। अतउत्तरंपठति। ङ्याप्प्रातिपदिकग्रहणमङ्गभपदसं
ज्ञार्थम्। ङ्याप्प्रातिपदिकग्रहणंक्रियते। अङ्गभपदसंज्ञार्थम्। अङ्गभपदसंज्ञाङ्याप्प्रातिपदिकस्ययथा
स्युरिति। क्वपुनरिहाङ्गभपदसंज्ञार्थेनङ्याप्प्रातिपदिकग्रहणेनार्थः। टाबादिषु। नैतदस्तिप्रयोजन
म्। ग्रहणवद्ध्याष्टाबादयोविधीयन्तेउगितोङीब्भवति। अतष्टाब्भवतीति। यत्तच्छब्दरूपंगृह्यते। त
स्मादुत्पत्तिस्तस्यैताः संज्ञाभविष्यन्ति। अथापिकश्चिदग्रहणः। एवमपिनदोषः। स्त्रियांटाबादयोवि
धीयन्ते। यत्तच्छब्दरूपंस्त्रियां वर्तते। तस्मादुत्पत्तिस्तस्यैताः संज्ञाभविष्यन्ति। अणादिषुतर्हि। अणा
दयोग्रहणवद्भ्यो। विधीयन्तेगर्गादिभ्योयञ्नडादिभ्यःफगिति। यत्तच्छब्दरूपंगृह्यतेतस्मादुत्पत्ति
स्तस्यैताः संज्ञाभविष्यन्ति। अथापिकश्चिदग्रहणः। एवमपिनदोषः अपत्यादिष्वर्थेष्वणादयोविधी
यन्ते। यत्तच्छब्दरूपमपत्यादिष्वर्थेषुवर्ततेतस्मादुत्पत्तिस्तस्यैताः संज्ञाभविष्यन्ति। स्वार्थिकेषु
तर्हि। स्वार्थिकाअपिग्रहणवद्भ्योविधीयन्ते। यावादिभ्यःकन्प्रज्ञादिभ्योणिति। यत्तच्छब्दरूपंगृह्य
तेतस्मादुत्पत्तिस्तस्यैताः संज्ञाभविष्यन्ति ॥

पीति। सामर्थ्याक्षिप्तस्याप्युपादानमस्त्येव। अभ्युपगम्यवादेनतुदर्शयति। वयस्तिप्रथमइत्यादौसामर्थ्याक्षिप्ताप्र
कृतिर्यत्रत्राप्यतइत्यनुवर्तनाद्वर्णग्रहणेचसर्वत्रतदन्तविधिसंभवादकारान्तस्यग्रहणंतदानास्तिकश्चिदग्रहण
टाबादिः। यत्तच्छब्दरूपमपत्यादिष्विति। परार्थाभिधानंवृत्तिरितिप्रकृतिरप्यपत्यादिषुवर्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुक्लतरइति। नह्यत्रशब्देनप्रकृतिरुपात्तेतिभावः। नयावदिति। यावत्तावच्छब्दौनिपातौपर्यायतांद्योतयतः। स्वा
दिषुतर्हीति। प्रकरणोत्कर्षाद्द्व्युषुबहुवचनमित्यादेः स्वादिविधिवाक्यस्यचभिन्नवाक्यतांमन्यते। एकत्वादिष्विति।
आकाङ्क्षायोग्यतावशाद्भिन्नप्रकरणपठितानामप्येकवाक्यत्वमितिभावः। तत्रत्रिकेप्रातिपदिकार्थेचतुष्केपिपक्षेस्वा
दयएकत्वादीनांवाचकाः पञ्चकेतुपक्षेचतुष्केचद्योतकाः। तत्रैकत्वादिषुद्योतकावाचकावाविधीयन्तइत्यर्थः। य
त्तदिति। द्योतकपक्षेऽयमर्थः। एकत्वादिषुयद्वर्ततेतस्मात्स्वादयएकत्वादीनांद्योतकाउत्पद्यन्ते। वाचकपक्षेत्वय

यस्तर्ह्यग्रहणः। शुक्लतमः शुक्लतरः कृष्णतमः कृष्णतरइति। अत्रापिनयावच्छुक्लः तावच्छुक्लत
रः। प्रकृष्टः शुक्लः शुक्लतरः। यत्तच्छब्दरूपंप्रकृष्टेवर्तते। तस्मादुत्पत्तिस्तस्यैताः संज्ञाभविष्यन्ति।
स्वादिषुतर्हि। एकत्वादिष्वर्थेषुस्वादयोविधीयन्ते। यत्तच्छब्दरूपमेकत्वादिष्वर्थेषुवर्ततेतस्मा २
दुत्पत्तिस्तस्यैताः संज्ञाभविष्यन्ति। कथंपुनरिहोच्यमानाः स्वादयएकत्वादिषुशक्याविज्ञातुम्। एषैवै
कवाक्यतात्। एकंवाक्यंतच्चेदंच। यद्येकंवाक्यंतच्चेदंचकिमर्थंनानादेशस्यंक्रियते। कौशल
मात्रमेतदाचार्योदर्शयति। यदेकंवाक्यंसन्नानादेशस्थंकरोति। अन्यदपिकिंचित्संग्रहीष्या
मीति। यच्छयोश्चलुगर्थम्। यच्छयोस्तर्हिलुगर्थंङ्याप्प्रातिपदिकग्रहणंक्रियते। कंसीयपरश
व्यशब्दयोर्यञञोलुक्चेतिङ्याप्प्रातिपदिकात्परस्यलुग्यथास्यात्। अक्रियमाणेहिङ्याप्प्राति प
दिकग्रहणेप्रकृतेरपिप्रसज्येत ॥

मर्थः। एकत्वादिषुस्वादिवाच्येष्वाधेयेषुयच्छब्दरूपंतदाधारार्थवाचितस्मात्स्वादयएकत्वादीनांवाचकाउत्प
द्यन्ते। अन्यदपीति। तिङ्विधिवाक्येनापिसहैकवाक्यत्वंयथास्यादित्येवमर्थमित्यर्थः। अङ्गानांहिप्रधानसंनि
धावुपदेशार्हाणांप्रकरणोत्कर्षेणोपदेशः सर्वप्रधानसंबन्धार्थः। यच्छयोश्चेति। वार्त्तिककारस्यसमुच्चयार्थश्चश
ब्दोभाष्यकारेणतुपूर्वप्रयोजनस्यदूषितत्वात्तर्ह्यर्थेचशब्दोव्याख्यातः। प्रकृतेरपीति। यच्छयोर्याप्रकृतिः कंसशब्दः
परशुशब्दश्चतदवयवस्यापिप्रत्ययस्येत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरश्च प्रकृतेरिति स्थानषष्ठीमत्वाह। एतदपीति। इतरः पूर्वमेवार्थं स्पष्टीकरोति। एवमपीति। उणादय इति। अतः क
कमिकंसेति कमिग्रहणेनैव कंसेग्रहणे सिद्धे कंसशब्दोपादानं ज्ञापकं क्वचिदेषां व्युत्पत्तिकार्यं न भवतीति। यत्रञो स्तु वि
धानसामर्थ्याल्लुङ् भवतीति यञञोरेव भविष्यतीत्यर्थः। वृद्धावृद्धेति। अत्रापि वार्त्तिककारस्य चशब्दः समुच्चये भाष्यकार
स्य तु तर्ह्यर्थे। वृद्धादयो लक्षणं निमित्तं यस्य प्रत्ययविधेस्तस्मिन् वृद्धादीनि ङ्याप्प्रातिपदिकविशेषणानि यथा स्युरित्यर्थः।
अथेति। प्रत्ययार्थसंबन्धयोग्यार्थाभिधायित्वाद् ङ्याप्प्रातिपदिकस्यैव विशेषणानि भविष्यन्तीति प्रश्नः। समर्थविशेष

एतदपि नास्ति प्रयोजनम्। यथा परिभाषितं प्रत्ययस्य लुक्श्लुलुपो भवन्तीति प्रत्ययस्य भविष्यति। एवम
प्युकारसकारयोः प्रसज्येत। कमेः सः कंसः। परान् शृणातीति परशुरिति। उणादयो व्युत्पन्नानि प्रातिपदिका
नि। वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे च प्रत्ययविधौ तत्स्थं प्रत्ययार्थम्। वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे तर्हि प्रत्यय
विधौ तत्स्थं प्रत्ययार्थे ङ्याप्प्रातिपदिकग्रहणं क्रियते। वृद्धात्। अवृद्धात्। अवर्णान्तात्। अनुदात्तादेः। द्व्यचइ
ति। एतानि ङ्याप्प्रातिपदिकविशेषणानि यथा स्युरिति। अथाक्रियमाणे ङ्याप्प्रातिपदिकग्रहणे कस्यैतानि वि
शेषणानि स्युः। समर्थविशेषणानि। तत्र को दोषः। उदीचां वृद्धादगोत्रात्। इह च प्रसज्येत। ज्ञानां ब्रह्मणानामप
त्यमिति। एतद्धि समर्थं वृद्धम्। इह च न स्यात्। ज्ञयोर्ब्राह्मणयोरपत्यमिति। एतद्धि समर्थमवृद्धम्। वृद्धअवृद्ध।
प्राचामवृद्धात्फिन्बहुलम्। इह च प्रसज्येत। ज्ञयोर्ब्राह्मणयोरपत्यमिति। एतद्धि समर्थमवृद्धम्। इह च न
स्यात्। ज्ञानां ब्राह्मणानामपत्यमिति। एतद्धि समर्थं वृद्धम्। अवृद्ध ॥

णानीति। समर्थानां प्रथमादित्यधिकाराद्विभक्तिमन्तरेण सामर्थ्यानवगमाद्विभक्त्यन्तस्यैव विशेषणानि स्युरित्यर्थः। ङ्याप्प्रा
तिपदिकग्रहणे तु सति तदुपादानसामर्थ्यात्तद्विशेषणानि वृद्धादीनि भवन्ति। ज्ञानामिति। ननु वृत्तावभेदैकत्वसंख्योपजन
नान्नास्ति द्विवचनबहुवचनान्तात्प्रत्ययः। नैष दोषः। क्वचिदादेशादिवशात्संख्याविशेषोपि प्रतीयते। यथा तावको मामक
इति। एवमिहापि फिञ्विधीयमानो बहुवचनमन्तरेण वृद्धत्वाभावाद्बहुत्वं गमयेत्। प्रकरणादिवशाद्वा। तदुक्तम्।
भेदः संख्याविशेषो वाप्याख्यातो वृत्तिवाक्ययोः। सर्वत्रैव विशेषस्तु नावश्यं तादृशो भवेदिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचो विकार इति। सावेकाच इति विभक्तेरुदात्तत्वापदमेतदनुदात्तादि। एतच्चोदाहरणदिक्प्रदर्शनार्थमस्य वृद्ध
त्वान्मध्यटाभाव्यम्। इदंतूदाहरणं पश्चानां विकार इति। षट्त्रिचतुर्भ्यो हलादिरिति विभक्तेरुदात्तत्वादनुदात्तादिसम
र्थमेतत्। प्रातिपदिकंतु न्नःसंख्याया इत्याद्युदात्तम्। सर्वेषामिति। सर्वस्य सुपीत्याद्युदात्तं पदम्। प्रातिपदिकंतु सर्वश

अवर्णा। अतइञ्भवति। इहैव स्यात्। दक्षस्यापत्यं दाक्षिरिति। एतद्धि समर्थमकारान्तम्। इह न स्यात्।
दक्षयोरपत्यं दक्षाणामपत्यमिति। एतद्धि समर्थमनवर्णान्तम्। अवर्णा स्वर। अनुदात्तादेरञ्भवति। इ
हच प्रसज्येत। वाचो विकारस्त्वचो विकार इति। एतद्धि समर्थमनुदात्तादि। इह च न स्यात्। सर्वेषां विकार
इति। एतद्धि समर्थमुदात्तादि। स्वर। द्व्यज्लक्षणद्व्यचष्ठन्निति। इह च प्रसज्येत। वाचा तरति त्वचा तरती
ति। एतद्धि समर्थं द्व्यच्। इह च न स्यात्। घटेन तरतीति। एतद्धि समर्थमद्व्यच्। अस्ति पुनः समर्थविशेष
णे सति किं चिदिष्टं संगृहीतं भवति। आहोस्विद्दोषान्तमेव। अस्तीत्याह। किम्। सामतरति वेम्नातरती
ति। एतद्धि समर्थमपि द्व्यच्। ङ्याप्प्रातिपदिकमपि। अथ ङ्याब्ग्रहणं किमर्थम्। न प्रातिपदिकादि
त्येव सिद्धम्। न सिध्यति। अप्रत्यय इति प्रातिपदिकसंज्ञायाः प्रतिषेधः प्राप्नोति। यद्येष ङ्याब्ग्रहणे
हेतुः। स्त्रूङ्ग्रहणमपि कर्तव्यम्। तावपि हि प्रत्ययौ। तिग्रहणे तावद्वार्तम्। तद्धितः प्रातिपदिकमिति प्रा
तिपदिकसंज्ञा भविष्यति। ऊङ्ग्रहणे चापि वार्तम्। उवर्णान्तादूङ्विधीयते तत्रैकादेशः। एकादेशेकृते
न्तादिवद्भावात्प्रातिपदिकसंज्ञा भविष्यति। यद्येष ऊङोः ग्रहणे हेतुः। आब्ग्रहणमपि न कर्तव्यम्। आबपि
ह्यकारान्ताद्विधीयते। तत्रैकादेशः। एकादेशे कृते न्तादिवद्भावात्प्रातिपदिकसंज्ञा भविष्यति। यस्तर्हि नका
रान्तात् कुञ्चा उष्णिहा देवविशेति। अत्राप्यकारान्ताद्दृत्तिर्लक्ष्यते। कुञ्चानालभेत। उष्णिहककुभौ। देववि
शंच मनुष्यविशंचेति। इह तावदुष्णिहककुभाविति। आप एवोत्तरपदिकं ह्रस्वत्वम् ॥

ङ्वोऽन्तोदात्तो निपात इत्यनुदात्तादि। अथेति। लिङ्गविशिष्टपरिभाषया सिद्धिं मन्यते। इतरोऽगृहीताभिप्राय आह। न सिध्य
तीति। तिग्रहण इति। वानुंस्यु तं प्रातिपदिकत्वमित्यर्थः। कुञ्चानिति। अजादिषु तु पाठो जातिलक्षणङीष्बाधनार्थः। आब्ग्रह
णं वा द्याह। इह तावदिति। आप इति। ङ्यापोरिति ह्रस्वत्वं हलन्ताद्देवविहितस्याप इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहेति। ततश्च देवविट्शब्दाद्देवादिति भावः। आब्ग्रहणप्रत्याख्यानवाद्याह। यत्तावदिति। स्वरे विशेष इति। क्विबन्तस्य कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वाद्विभक्तेः सुप्त्वादनुदात्तत्वं भवति। यदा तु मूलविभुजादित्वाद्देवविशशब्दः कप्रत्ययान्तस्तदा थाथादिस्वरेणान्तोदात्तत्वाद्विभक्त्या च सहैकादेश उदात्तो भवति। तत्र च्छान्दसत्वादिति। अप्रातिपदिकत्वेऽपि

इह खल्वपि देवविशं च मनुष्यविशं चेति। नास्ति विशेषः। अकारान्तादमुत्पत्तौ सत्यां व्यञ्जनान्ताद्वेति। यत्तावदुच्यते। इह तावदुस्रिह ककुभाविलाप एवैतदौत्तरपदिकं ह्रस्वत्वमिति। संज्ञाछन्दसोरित्येवं तत्। नैषा संज्ञा नापीदं छन्दः। यदप्युच्यते। इह खल्वपि देवविशं च मनुष्यविशं चेति। नास्ति विशेषः। अकारान्तादमुत्पत्तौ सत्यां व्यञ्जनान्ताद्वेति। स्वरे विशेषः। यद्यत्र व्यञ्जनान्तादुत्पत्तिः स्याद्देवविशमित्येवं स्वरः प्रसज्येत। देवविशमिति चेष्यते। तस्मात् एष एवं विषयः। इदं तर्हि पादोऽन्यतरस्यां टाबृचीति। ऋचीत्युच्यते। तत्र च्छान्दसत्वाद्भविष्यति। ऋचीति नेदं छन्दो विवक्षितम्। काठकं कालापकं मौदकं पैप्पदकं च। किं तर्हि प्रत्ययार्थविशेषणमेतत्। ऋच्येव प्रत्ययार्थो भवतीति। एतदपि नास्ति प्रयोजनम्। पदशब्दः पादशब्दसमानार्थः। अकारान्तः छन्दसि दृश्यते। तस्याः सप्ताक्षरमेकं पदम्। एकः पाद इत्यर्थः। तस्मादुत्पत्तिर्भविष्यति। इदं तर्हि डाबुभाभ्यामन्यतरस्यामिति। बहुराजा बहुराजे बहुराजा इति। ङ्याब्ग्रहणमनर्थकम् प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात्॥ ङ्याब्ग्रहणमनर्थकम्। किं कारणम्। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात्। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्येषा परिभाषा कर्तव्या। कः पुनरत्र विशेषः एषा वा परिभाषा क्रियेत ङ्याब्ग्रहणं वा। अवश्यमेषा परिभाषा कर्तव्या। बहून्येतस्याः परिभाषायाः प्रयोजनानि। कानि। प्रयोजनं सर्वनामस्वरसमासतद्धितविधिलुग्लुगर्थम् ॥

प्रत्ययोत्पत्तिरिति शेषः। लिङ्गविशिष्टस्येति। यथाकथंचित् प्रातिपदिकग्रहणे एषा परिभाषोपतिष्ठते न तु प्रातिपदिकस्य स्वरूपग्रहण एवेति भावः। कः पुनरिति। ङ्याब्ग्रहणं लघु न तु परिभाषेति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थण्डिलशायिनीति। गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति वचनादनुत्पन्न एव ङीपि समासेस

सर्वनामविधिः प्रयोजनम्। सर्वनाम्नः सुट्। इहैव स्यात्। येषाम्। तेषाम्। यासाम्। तासामित्यत्र न स्यात्।
नैतदस्ति प्रयोजनम्। अवर्णान्ताद्विधीयते। तत्रैकादेशे कृते स्यादिवद्भावात्सुड्भविष्यति। इदं तर्हि प्र
योजनम्। सर्वनाम्नस्तृतीया च। इहैव स्यात्। भवता हेतुना। भवतो हेतोरिति। भवत्या हेतुना। भवत्या हे
तोरित्यत्र न स्यात्। सर्वनामस्वरः। कुसूलकूपकुम्भशालं बिले। इहैव स्यात्। कुसूलबिलम्। कुसूली बि
लमित्यत्र च न स्यात्। स्वरः समासः। द्वितीया श्रितादिभिः सह समस्यते। इहैव स्यात्। कष्टंश्रितः। कष्टश्रितः।
कष्टंश्रिता। कष्टश्रितेत्यत्र न स्यात्। एतदपि नास्ति प्रयोजनम्। श्रितशब्दोऽकारान्तस्तत्रैकादेशे कृते स्या
दिवद्भावाद्भविष्यति। इदं तर्हि। पूर्वसदृशेति ॥ इहैव स्यात्। पित्रा सदृशः। पितृस
दृशः। पित्रा सदृशी। पितृसदृशीत्यत्र न स्यात्। समासः। तद्धितविधिः। अचित्तहस्तिधेनोष्ठक्। इहैव स्यात्।
हस्तिनां समूहो हास्तिकम्। हस्तिनीनां समूहो हास्तिकमित्यत्र न स्यात्। एतदपि नास्ति प्रयोजनम्। पुंव
द्भावेनैतत्सिद्धम्। इदं तर्हि। प्रमाणे द्वयसच्। यथेह भवति। हस्तिद्वयसं हस्तिमात्रम्। एवं हस्तिनीद्वय
समित्यपि यथा स्यात्। तद्धितविधिः। लुक्। नेन्सिद्धबध्नातिषु च। इहैव स्यात्। स्थण्डिलशायी। स्थण्डिल
शायिनीत्यत्र न स्यात्। लुगलुक्। शयवासवासिष्वकालात्। इहैव स्यात्। ग्रामेवासी। ग्रामेवासिनीत्यत्र
न स्यात्। मानिनि च विधिप्रतिषेधार्थम्॥ मानिनि च विधिप्रतिषेधार्थं प्रयोजनम्। विध्यर्थं तावत्। क्यङ्मा
निनोश्च। इहैव स्यात्। दर्शनीयमानी। ।दर्शनीयमानिनीत्यत्र न स्यात्। प्रतिषेधार्थमपि।
वक्ष्यति स्वाङ्गाच्चेतो मानिनि। तस्मिन् क्रियमाणे इहैव स्यात्। दीर्घमुखमानी। दीर्घमुखमानिनीत्यत्र न
स्यात्॥ प्रत्ययग्रहणोपचारेषु च॥ प्रत्ययग्रहणोपचारेषु च प्रयोजनम्। तृजकाभ्यां कर्तरि। इहैव
स्यात्। अपां स्रष्टा। अपां स्रष्ट्रीत्यत्र न स्यात्। प्रत्यय ॥ एमः ४

तिङन्तमेवोत्तरपदमित्यप्रयोजनमेतत्। एवं ग्रामेवासिनी दर्शनीयमानिनी दीर्घमुखमानिनीत्यपि द्रष्टव्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ढगन्तेति। परत्वादिति भावः। समासान्तादीकार इति। मद्रराजस्य भार्या मद्रराजीति पुंयोगादाख्यायामिति ङीष्। तत्र को दोष
इति। टचि कृते यस्य चेतीकारे लुप्ते टित्वाद् ङीपि कृते मद्रराज्ञीति सिध्यतीति प्रश्नः। यत्र पुंवद्भाव इति। तत्रापूरणीप्रिया
दिष्विति वचनात्। यत्र त्विति। महाजङ्घ इत्यादौ। दासीति। इतो मनुष्यजातेरिति ङीष्प्रत्ययस्वरेणान्तोदात्तमिष्यते। ब

उपाचार। अतः कृकमिकंसकुम्भ इहैव स्यात्। अयस्कुम्भः। अयस्कुम्भीत्यत्र न स्यात्। एतान्येतस्याः परि
भाषायाः प्रयोजनानि। यदर्थमेषा परिभाषा कर्त्तव्या। एतस्यां च सत्यां नार्थो ङ्याब्ग्रहणेन। अतिप्रसङ्ग उप
पदविधौ। उपपदविधावतिप्रसङ्गो भवति। द्विषत्परयोस्तापेः। यथेह भवति। द्विषन्तप इति। एवं द्विषतीता
प इत्यत्रापि स्यात्। यञिञोः फगि अतिप्रसङ्गो भवति। यथेह भवति गार्ग्यायणः। दाक्षायणः। एवं गार्गे
यो दाक्षेय इत्यत्रापि स्यात्। नैष दोषः। ढगेवात्र बाधको भविष्यति। समासान्तेषु च। समासान्तेषु चातिप्र
सङ्गो भवति। राजाहःसखिभ्यष्टच्। यथेह भवति। मद्रराजः। कश्मीरराजः। एवं मद्रराज्ञी कश्मीरराज्ञी
त्यत्रापि स्यात्। न वा भवति मद्रराजीति। भवति यदा समासान्तादीकारः। लिङ्गविशिष्टग्रहणे तु इकारान्ता
त्समासान्तः प्रसज्येत। तत्र को दोषः। पुंवद्भावष्टिलोपश्च। तत्र मद्रराजीत्येवं रूपं स्यात्। मद्रराज्ञीति चेष्य
ते। महद्दाले प्रियादिषु अतिप्रसङ्गो भवति। आन्महतः समानाधिकरणजातीययोरिति यथेह भवति महा
न्प्रियोऽस्य महाप्रियः एवं महती प्रियाऽस्य महतीप्रिय इत्यत्रापि स्यात्। किमुच्यते प्रियादिष्विति। यत्र पुंव
द्भावः प्रतिषिध्यते। यत्र तु न प्रतिषिध्यते भवितव्यमेव तत्रात्वेनेति। ञ्नित्स्वरे ञ्नित्स्वरे अतिप्रसङ्गो भव
ति ञ्नित्यादिर्नित्यमित्याद्युदात्तो भवतीति। यथेह भवति। दाक्षिः। अहिचुम्बकायनिः। एवं दाक्षी अहिचुम्बकायनीत्य
त्रापि स्यात्। राज्ञः स्वरे ब्राह्मणकुमारयोः। कर्मधारये समासे राज्ञः स्वरे अतिप्रसङ्गो भवति। राजा च ब्राह्म
णकुमारयोरिति। यथेह भवति। राजब्राह्मणः। राजकुमारः। एवं राजब्राह्मणी राजकुमारीत्यत्रापि स्यात्।
समाससंघातग्रहणेषु च। समाससंघातग्रहणेषु चातिप्रसङ्गो भवति। बहोर्नञ्वदुत्तरपद भूम्नि ॥

होर्नञ्वदिति। बहुशब्दादुत्तरपदबहुत्वे वर्तमानाद्यत्स्वरं पदं तदन्तस्य समासस्य नञ इव स्वरो भवतीत्यतिदेशार्थः। तेन
बहवो गोमन्तोऽस्य बहुगोमानित्यत्र नञ्सुभ्यामिति समासान्तोदात्तत्वं भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुगोमतीति। बहवोगोमन्तोऽस्या इतिबहुव्रीहिः उगितश्चेतिङीप्। समासोऽत्रसंघातरूपः कार्यीतिलिङ्गविशिष्टसमासाग्रहणात्स
मासान्तोदात्तत्वाभावादीकारःपित्वादनुदात्तोभवति। ईकाराच्चपूर्वउदात्तोभवति। कुसूलीबिलमिति। पूर्वपदस्यात्रकार्यित्वंनतुसं
घातस्येतिपूर्वपदान्तोदात्तत्वंभवत्येव। विभक्तौचोक्तमिति। उगिदचामित्यत्रोक्तम्। यथागोमानित्यत्रनुम्भवतिएवंगोमतीत्यत्रापि
प्राप्नोति। तत्रपरिहारउक्तोनवाविभक्तौलिङ्गविशिष्टाग्रहणादिति। विभक्त्याश्रयकार्येक्रियमाणेलिङ्गविशिष्टपरिभाषानेष्यतइ
त्यर्थः। प्रतिविधेयमिति। अच्प्रकरणेशक्तिलाङ्गलाङ्कुशेत्यत्रवार्तिकेघटग्रहणेनैवघटीग्रहणेसिद्धेघटीग्रहणमस्याःपरिभाषायाअ
नित्यत्वज्ञापनार्थंतेनानिष्टेविषयेनोपतिष्ठते। तद्धितविधानार्थंत्विति। सतिङ्याब्ग्रहणेतद्धितविधौप्रकृतित्रयाधिकारसामर्थ्यात्

यथेहभवति बहुगोमान् बहुयवमान्। एवंबहुगोमती। बहुयवमतीत्यत्रापिस्यात्। किमुच्यतेसमाससंघातग्रह
णेष्विति। यदवयवग्रहणंप्रयोजनमेवैतस्याःपरिभाषायाः। कुसूलकूपकुम्भशालंबिले। कुसूलीबिलमितिय
नवा था। विभक्तौचोक्तम्। किमुक्तम्। विभक्तौलिङ्गविशिष्टाग्रहणादिति। एतेऽस्याःपरिभाषायादोषाः। एतानिचप्रयो
जनानि। एतेदोषाःसमाभूयांसोवा। तस्मान्नार्थोऽनयापरिभाषया॥ नहिदोषाःसन्तीतिपरिभाषानकर्तव्या। लक्षणंवा
नपरिणेयम्। नहिभिक्षुकाःसन्तीतिस्थाल्योनाधिश्रीयन्ते। नचमृगाःसन्तीतियवानोप्यन्ते। दोषाःखल्वपिसा
कल्येनपरिगणिताः। प्रयोजनानामुदाहरणमात्रम्। कुतएतत्। नहिदोषाणांलक्षणमस्तीति। तस्माद्यान्येतस्याः
परिभाषायाःप्रयोजनानितदर्थमेषापरिभाषाकर्तव्या। प्रतिविधेयंचदोषेषु। तद्धितविधानार्थंतु। तद्धितविधा
नार्थंतुङ्याब्ग्रहणंकर्तव्यंङ्याबन्तात्तद्धितोत्पत्तिर्यथास्यात्। कालितरा। हरिणितरा। खट्वातरा। मालातरा॥

वैङ्यापोभवतस्त्वदन्तात्तद्धितइत्यर्थः। विप्रतिषेधाद्वीति। स्त्रीप्रत्ययस्यावकाशोयत्रप्रकर्षोनविवक्ष्यते कालीति। प्रकर्षप्रत्य
यस्यावकाशोयत्रस्त्रीत्वाविवक्षाकालतरइति। स्त्रीत्वप्रकर्षयोस्तुयुगपद्विवक्षायांपरत्वात्प्रकर्षप्रत्ययःस्यादित्यर्थः। ननुस्त्रीत्व
स्यान्तरङ्गत्वात्तन्निमित्तःप्रत्ययोन्तरङ्गः प्रकर्षस्तुबाह्यप्रतियोग्यपेक्षत्वाद्बहिरङ्गः। ततस्तन्निमित्तस्यप्रत्ययस्यापिबहिरङ्गत्वम्।
अन्तरङ्गबहिरङ्गयोश्चायुक्तोविप्रतिषेधः। तथाचवक्ष्यते। स्वार्थमभिप्रायशब्दोनिरपेक्षोद्रव्यमाह। समवेतंसमवेतस्यवचनेलि
ङ्गसंख्यांविभक्तिंचाभिधायतान्विशेषानपेक्षमाणश्चकृत्स्नमात्मानंप्रियकुत्सनादिषुततःप्रवर्तते सोविभक्त्यन्तइति। एवंतर्ह्येत
त्क्रमानाश्रयेणलौकिकेप्रयोगेपदादुच्चरितायुगपदर्थाःप्रतीयन्तइतिलौकिकार्थव्यवस्थाङ्गीकरणेनप्रातिपदिकार्थगत राम: ५
स्त्रीत्वप्रकर्षविवक्षाश्रयेणविप्रतिषेधउक्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समासान्ताअपीति।तत्रबहवोगोमन्तोस्यइतिबहुव्रीहौकृतेङीपिचकबुत्पत्तौबहुगोमतीकेतिप्राप्नोति।ब्रह्मबन्धुकेति।अ
ज्ञाताद्यर्थविवक्षायामूङन्तात्कप्रत्ययइष्यते।नास्त्यत्रेति।केणइतिह्रस्वविधानादितिभावः।युवतितरेति।जातेश्चेतिपुंवद्भावप्र
तिषेधंमन्यते।यौवनस्यजातिरूपत्वात्।ब्रह्मबन्धुतरेति।अत्रनद्याःशेषस्यान्यतरस्यामितिविकल्पेनह्रस्वः।नचस्त्रीत्वस्येति।
तस्यसर्वत्रैकरूपत्वात्प्रकर्षाप्रकर्षाभावइत्यर्थः।इहखल्वपीति।सर्वत्रप्रधानस्यप्रकर्षाभावः।तदुक्तंहरिणा।सर्वस्यैवप्र

किंपुनःकारणंनसिध्यति।विप्रतिषेधाद्धितद्धितबलीयस्त्वम्।विप्रतिषेधाद्धितद्धितोत्पत्तिःप्राप्नोति।तत्र
समासान्तेषुदोषः।तत्रसमासान्तेषुदोषोभवति।बहुगोमत्का।बहुयवमत्का।समासान्ताअपिङ्याबन्ता
त्स्युः।त्यूङोश्चापिग्रहणम्।त्युङ्योश्चापिग्रहणंकर्तव्यंभवति।युवतिका।ब्रह्मबन्धुकेति।ऊङ्ग्रहणेनत
वन्नार्थः।नास्त्यत्रविशेषः।उकारान्तादुत्पत्तौसत्यामूङन्ताद्वा।इदंतर्हि।युवतितरा।ब्रह्मबन्धुतरा।ब्रह्मब
न्धूतरेति।तदन्तस्यचप्रत्ययार्थेनायोगात्तद्धितानुत्पत्तिः।तदन्तस्यचङ्याबन्तस्यप्रत्ययार्थेनायोगात्तद्धितो
त्पत्तिर्नप्राप्नोति।कालितरा।हरिणितरा।खट्वातरा।मालातरेति।किंकारणम्।ङ्याबन्तमेतत्स्त्रीप्रधा
नम्।नचस्त्रीत्वस्यप्रकर्षाप्रकर्षौस्तः।नैषदोषः।नहिकिंचिदुच्यते।एवंजातीयकादुत्पत्तव्यमे वंजातीय
कान्नेति।एतावदुच्यते।अतिशायनेतमबिष्ठनौ।तिङश्चेति।यस्यचप्रकर्षोस्तितस्यचप्रकर्षेप्रत्ययोभवि
ष्यति।अस्तिचाप्रधानस्यगुणस्यप्रकर्षः।इहखल्वपिशुक्लतरः।कृष्णतरइति।द्रव्यंप्रधानम्।गुणस्यचप्रकर्षे
प्रत्ययउत्पद्यते।उक्तंवा।किमुक्तम्।सिद्धंतुस्त्रियाःप्रातिपदिकविशेषणत्वात्स्वार्थेटाबादयइति।यदिप्रातिप
दिकविशेषणंस्त्रीग्रहणंस्वार्थिकाष्टाबादयः।नैवंविज्ञायतेस्त्रियामभिधेयायामिति।नापिस्त्रीसमानाधिकरणा
त्प्रातिपदिकादिति।कथंतर्हियत्प्रातिपदिकंस्त्रियांवर्ततेतस्माट्टाबादयोभवन्ति।कस्मिन्नर्थे स्वार्थइति॥

धानस्यनविनाभेदहेतुना।प्रकर्षोविद्यतेनापिशब्दस्योपैतिवाच्यतामिति।ततश्चकालितरेत्यत्रापिकालगुणप्रकर्षाश्रय
स्तरप्प्रत्ययः।उक्तंवेति।नात्रस्त्रीत्वंप्राधान्येनप्रत्ययाभिधेयम्।किंतर्हिस्त्रीत्ववति.द्रव्येवर्तमानात्प्रातिपदिकात्स्वार्थेटाबा
दयः।ततश्चद्रव्यमेवप्राधान्येनाभिधीयतेतस्यचव्यपदेशहेतुगुणप्रकर्षाश्रयातिशयविवक्षायांप्रकर्षप्रत्ययइत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 समासान्ता अपीति । ङ्याब्ग्रहणप्रत्याख्यानेन समासान्तेषु परिहारः । स्त्रियामन्यपदार्थे बहुव्रीहिविधानात् स्त्रीप्रत्ययस्य
च समासान्तस्य च विप्रतिषेधोपपत्तिः । कालितरेत्यादौ तु पूर्वोक्तेन न्यायेनान्तरङ्गत्वात् स्त्रीप्रत्यये कृते प्रकर्षप्रत्यय उत्पद्य
ते । कथं कालिकेति । वर्णे चानित्ये रक् इति वर्तमाने कालाच्चेति स्वार्थे कप्रत्ययस्तदपेक्षं च स्त्रीप्रत्ययस्यान्तरङ्गत्वं नास्तीति
परत्वात्कन् स्यादिति प्रश्नः । कथं हरिणिकेति । स्वार्थे हरितशब्दात्परत्वात्कन् स्यादिति प्रश्नः । अज्ञातादिकनस्तु बहिरङ्गत्वात्
प्रागेव स्त्रीप्रत्ययः सिध्यति । हरिणशब्द इति । हरितशब्दसमानार्थ इति भावः । तन्न हरितशब्दस्य हरितिकेति भवति । ह
रिणशब्दस्य हरिणिकेति भावः । लोहिनिकेति । न हि लोहिनशब्दः प्रातिपदिकमस्तीति प्रश्नः । वक्ष्यत इति । अवश्यवक्तव्य
तां दर्शयति । क्रियमाणेऽपि ङ्याब्ग्रहणे लोहितान्मणौ वर्णे चानित्ये रक् इति प्रतिपदविधानाद्बलीयस्त्वात् स्त्रीप्रत्ययं बाधि

ननु चोक्तं तत्र समासान्तेषु दोष इति । समासान्ता अपि स्वार्थिकाः । उभयोः स्वार्थिकयोः परत्वात्समासान्ता
भविष्यन्ति । कथं कालिकेति । प्रत्ययस्थात्कात्पूर्वस्येतीत्वं भविष्यति । कथं हरिणिकेति । हरिणशब्दः प्रकृ
त्यन्तरमस्ति । कथं लोहिनिकेति । वक्ष्यत्येतल्लोहितालिङ्गबाधनं वेति ॥ स्त्रियाम् ॥ स्त्रियामित्युच्यते । का
स्त्री नाम । लोकत एते शब्दाः प्रसिद्धाः । स्त्री पुमान्नपुंसकमिति । यल्लोके दृष्ट्वा एतदवसीयते इयं स्त्री अयं
पुमानिदं नपुंसकमिति । सा स्त्री स पुमांस्तन्नपुंसकमिति ॥

त्वात्कन्नेव स्यात् ॥ स्त्रियाम् ॥ का स्त्री नामेति । प्रसिद्धस्यार्थस्य कार्यान्तरविधानायानुवादसंभवादिह च शास्त्रे स्त्रिया अपरिभा
षितत्वाल्लोके च खट्वादिषु स्त्रीव्यवहाराभावाल्लौकिकस्त्रीग्रहणेऽव्याप्त्यतिव्याप्तिदर्शनात्प्रश्नः । न च गोत्वादिवत्संस्थानविशे
षव्यङ्ग्यत्वं स्त्रीत्वस्य यतः सामान्यविशेषरूपत्वं तस्य स्यात् । खट्वाशिंशपानगर्यादिषु भिन्नत्वात्संस्थानस्य । न च सकृदाख्यातं
स्त्रीत्वं गोत्वादिवत् सर्वेषु स्त्रीलिङ्गेषु व्यक्त्यन्तरेषु ग्रहीतुं शक्यते । यत्र वस्तुस्वरूपजिज्ञासा तत्र प्रथमान्तेन प्रश्नो युक्त इति
का स्त्री नामेत्युक्तम् । कस्यां स्त्रियामित्युच्यमाने विशेषविषयः प्रश्नः स्यात् । लोकत इति । पञ्चम्यन्तात्सप्तम्यन्ताद्वा तसिः । शब्दाः प्र
सिद्धा इति । विशिष्टार्थाभिधायित्वेनेति भावः । पुंनपुंसकयोरुपादानं प्रसङ्गेन तद्विषयस्याप्यज्ञानस्य निराकरणार्थम् । यल्लोक इति ।
यन्निमित्तमुपलभ्य निमित्तवत्यर्थे प्रत्यय उपजायते तत्स्त्र्यादिशब्दवाच्यमित्यर्थः । तद्योगाच्च निमित्तवानप्यर्थः स्त्र्यादिशब्दवाच्यो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंपुनरिति। द्रव्यैस्तत्त्वादेरनेकार्थस्यसंभवात्प्रश्नः। लिङ्गमिति। स्तनकेशादिकमितिभावः। स्तनकेशवतीति। भूमादौमतुप्। त
थैवलोमशइतिशः। लिङ्गेदृष्टेलिङ्गिकथंनलिङ्गप्रतिपत्तिपरमितिप्रश्नप्रतिवचनयोर्नास्त्यसंगतिः। स्तनकेशं चप्रसिद्धत्वा
दन्यस्यापिस्त्रीप्रतिपत्तिनिमित्तस्यकुमार्यादिगतस्यउपलक्षणम्। तदनेनस्त्रीत्वादीनांस्तनाद्युपव्यञ्जनानांगोत्वादिवत्सा
मान्यविशेषत्वंदर्शितम्। यथोक्तंहरिणा। हस्तिन्यांवडवायांचस्त्रीतिबुद्धेःसमन्वयः। अतस्तांजातिमिच्छन्तिद्रव्यादिस
मवायिनीमिति। उभयोरन्तरमिति। लिङ्गवत्त्वेनसदृशमित्यर्थः। तेनाव्याख्यातार्थस्यनपुंसकत्वाभावः। तदभावइत्य
नेनमयूरीकुक्कुटादीनांस्त्रीपुंससमुदायानांनपुंसकत्वंनिराकृतम्। भवतिहिसमुदायःसमुदायिनोःसदृशइतिस्यान्न
पुंसकत्वम्। अथतुपरवल्लिङ्गमित्यनेनसमुदायस्यपरवल्लिङ्गातिदेशादप्रसङ्गोनपुंसकत्वस्य। ततोवस्तुस्वरूपनिरू

किंपुनर्लोकेदृष्ट्वाएतदवसीयते। इयंस्त्रीअयंपुमानिदंनपुंसकमिति। लिङ्गम्। किंपुनस्तत्। स्तनकेश
वतीस्त्रीस्याल्लोमशःपुरुषःस्मृतः। उभयोरन्तरंयच्चतदभावेनपुंसकम्। लिङ्गात्स्त्रीपुंसयोर्ज्ञानेभ्रूकुंसे
टाप्प्रसज्यते। लिङ्गात्स्त्रीपुंसयोर्ज्ञानेसतिभ्रूकुंसेटाप्प्राप्नोति। यद्धिलोकेदृष्ट्वाएतदवसीयतेइयंस्त्री।
अस्तितद्भ्रूकुंसे। नत्वंखरकुटीःपश्य। इहवत्साःपश्य। वध्रिकाःपश्य। खरकुटीःपश्येति। तस्माच्छसो
नःपुंसीतिनत्वंप्राप्नोति। यद्धिलोकेदृष्ट्वाएतदवसीयते। अयंपुमानिति। अस्तितद्वध्रिकादिषुखट्वावृ
क्षौनसिध्यतः। खट्वावृक्षयोश्चलिङ्गंनसिध्यति ॥

पणपरमेतदित्यवगन्तव्यम्। इदानीमेतद्दूषयितुमाह। लिङ्गादिति। भ्रूकुंसःस्त्रीवेषधारीनटस्तस्यस्तनकेशसंबन्धात्स्त्री
त्वेसतिटाप्स्यात्। ननुनित्ययोगेस्तनकेशवतीतिमतुब्विज्ञानाद्भ्रूकुंसशब्दस्यस्त्रीत्वाभावः। नैतदस्ति। प्रतिपत्तॄणांनित्यं
लिङ्गदर्शनात्तत्रापिस्त्रीत्वप्रसङ्गात्। केशवपनेचस्त्रियाःस्त्रीत्वंनस्यात्तदानींकेशसंबन्धाभावात्। स्तनातिशयसंब
न्धस्यचोत्तरकालभावित्वादतिशयेपिमतुपिविज्ञायमानेप्राक्स्त्रीत्वंनस्यात्। अव्याप्तिसद्भावाद्धेयत्वादस्यदर्शनस्यनसु
तुनिर्बन्धोत्रकर्तव्यः। नत्वमिति। खरकुटीनापितगृहमुच्यतइतिकेचिदाहुः। तत्रइवार्थेसंज्ञायामितिकन्प्रत्ययः। तस्यलु
मनुष्यइतिलुप्। तत्रमनुष्यस्यवाच्यत्वात्तस्यचलोमशत्वात्पुंस्त्वात्खरकुटीःपश्येत्यादौनत्वप्रसङ्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0, In Public Domain. Digitization by eGangotri

नापुंसकमिति। नपुंसके वस्तुनि भवं लिङ्गं नापुंसकं —— त्वं तत्प्राप्तं स्त्रीत्वपुंस्त्वयोरभावात्स्त्रीपुंससदृशत्वाच्च लिङ्गं व त्वेन। सत्त्वरूपत्वाच्च लिङ्गं संख्यारहितस्यासत्त्वभूतस्यार्थस्याभावादिति भावः। असत्त्विति। मृगतृष्णाविषया मरुमरीचिका यथाऽसत्येन जलरूपेण प्रतिभासते। तथा खट्वावृक्षावसतास्त्रीपुंसत्वेनेत्यर्थः। अथोच्येत मरीचिदर्शनात्प्राग्दृश्याज्जलं पूर्वानुभूतं स्मर्यते न तु तत्रासज्जलं चकास्तीति तत्राह। गन्धर्वनगरं यथेति। नहि गन्धर्वनगरमन्तरिक्षे कदाचिदुपलब्धम्। न च तन्नतत्सदृशवस्त्वन्तरग्रहणं येन गन्धर्वनगरं स्मर्येत। तस्मादसतामपि भावानामचिन्त्यान्निमित्तसामर्थ्याद्यथोपलम्भः त

यद्धि लोके दृष्ट्वा एतदवसीयते इयं स्त्री अयं पुमानिति। न तत्खट्वावृक्षयोरस्ति। किं तर्हि तयोर्लिङ्गं न्याय्यम्। नापुंसकं भवेत्तस्मिन्। नापुंसकं खट्वावृक्षयोर्लिङ्गं न्याय्यम्। किमिदं नापुंसकमिति। नपुंसके भवं नापुंसकम्। तदभावेन पुंसकम्। तदभावे स्त्रीपुंसलिङ्गाभावेन पुंसकं लिङ्गं न्याय्यम्। असत्तु मृगतृष्णावत्। असत्तु खट्वावृक्षयोर्लिङ्गं द्रष्टव्यम्। कथं पुनरसन्नाम लिङ्गं शक्यं द्रष्टुम्। मृगतृष्णावत्। तद्यथा। मृगास्तृषिता अपां धाराः पश्यन्ति। न च ताः सन्ति। गन्धर्वनगरं यथा। यथा गन्धर्वनगराणि दूरतो दृश्यन्ते उपसृत्य च नोपलभ्यन्ते तद्वत्खट्वावृक्षयोः सल्लिङ्गं द्रष्टव्यम्। आदित्यगतिवत्तन्न। अथवा यथा आदित्यगतिः सती नोपलभ्यते। तद्वत्खट्वावृक्षयोः सल्लिङ्गं नोपलभ्यते। वस्त्रान्तर्हितवच्च तत्। यथा वस्त्रान्तर्हितानि द्रव्याणि नोपलभ्यन्ते। तद्वत्खट्वावृक्षयोः सद् लिङ्गं नोपलभ्यते। विषम उपन्यासः। वस्त्रान्तर्हितानि द्रव्याणि वस्त्रापाये उपलभ्यन्ते।

थाखट्वादावपिस्त्रीत्वादेरित्यर्थः। तदुक्तं हरिणा। यथा सलिलनिर्भासो मृगतृष्णासु जायते। जलोपलब्ध्यनुगुणाद्वीजाद्बुद्धिर्जलेऽसति। तथैवाव्यपदेश्येभ्यो हेतुभ्यस्तारकादिषु। सुखेभ्य इव लिङ्गेभ्यो भेदो लोके व्यवस्थित इति। इदानीमसत्त्वं निराकरोति। अदित्यगतिवत्तन्नेति। यथा आदित्यगतिः सती प्रत्यक्षेण नोपलभ्यते देशान्तरप्राप्त्यानुमीयते तथा खट्वावृक्षयोः सदपि लिङ्गं सूक्ष्मत्वात्प्रत्यक्षेणाशक्यं ग्रहीतुं तत्कृतकार्यदर्शनादनुमीयते। किंचिद्धि स्थूलमुपलभ्य व्यञ्जनं किंचित्सूक्ष्मत्वाद्दुरवधारणमिति भावः। विषम इति। यस्य कदाचिदुपलब्धिर्भवति तस्यानुपलब्धिकारणं व्यवधानादिकमभिधीयताम्। अत्यन्तानुपलब्धस्य तु शशविषाणादिवत्खट्वादौ लिङ्गस्यासत्त्वमेवेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येप्येतदिति। अनेनदृश्यानुपलब्धिमभावसंव्यवहारहेतुमुपन्यस्यति। रथकारास्तक्षाणः। वृक्षादनंश्लक्ष्णकम्। इतरोवि
द्यमानस्यापिलिङ्गस्यसौक्ष्म्यमनुपलब्धिकारणंदर्शयितुमाह। षड्भिरिति। अतिसंनिकर्षादिति। यथास्वच क्षुर्गतस्याञ्ज
नादेः। अतिविप्रकर्षादिति। यथोड्डीनस्यशकुनेः। मूर्त्यन्तरव्यवधानादिति। कुड्याद्यव्यवहितस्यसुवर्णादेः। तमसावृत
त्वादिति। अन्धकाराक्रान्तस्यस्वभ्रादेः। इन्द्रियदौर्बल्यादिति। तिमिराद्यावृतस्यनयनादेः। अतिप्रमादादिति। विषयान्तरास
क्तचित्तत्वादित्यर्थः। सौक्ष्म्यस्येन्द्रियदौर्बल्येन्तर्भावान्नपृथगनुपन्यासः। दिव्यचक्षुःश्रोत्रादिसूक्ष्ममप्यर्थमुपलभन्तेनतुदुर्ब

खट्वावृक्षयोःपुनः येप्येतेरथकारावाशीवृक्षादनहस्तामूलात्प्रभृतिआअग्राद्वृक्षांस्तक्ष्णुवन्ति तेपितयो
र्लिङ्गं नोपलभन्ते। केनैतदवसीयते। खट्वावृक्षयोःसल्लिङ्गं नोपलभ्यतइति षड्भिःप्रकारैःसतांभावानामनु
पलब्धिर्भवति। अतिसन्निकर्षादतिविप्रकर्षाद्मूर्त्यन्तरव्यवधानात्तमसावृतत्वादिन्द्रियदौर्बल्या
दतिप्रमादादिति। अतोत्रकश्चिद्धेतुर्द्रष्टव्यः। येनखट्वावृक्षयोःसल्लिङ्गं नोपलभ्यते। केनैतदवसीय
तेखट्वावृक्षयोःसल्लिङ्गं नोपलभ्यतइति। तयोस्तुतत्कृतंदृष्ट्वा। स्त्रीकृतंशब्दंदृष्ट्वास्त्रीत्यवसीयते। पुंस्कृतंश
ब्दंदृष्ट्वापुमानिति। यथाकाशेनज्योतिषः। तद्यथा। आकाशंदृष्ट्वाज्योतिरत्रेतिगम्यते। ज्योतिर्निमित्तंह्याका
शम्। अन्योन्यसंश्रयंत्वेतत्। अन्योन्यसंश्रयत्वेतद्भवति। स्त्रीकृतःशब्दः। शब्दकृतंचस्त्रीत्वम्। एतदित
रेतराश्रयंभवति। इतरेतराश्रयाणिचनप्रकल्पन्ते ॥

लेन्द्रियाः। अतोत्रेति। इन्द्रियदौर्बल्यमितिभावः। केनैतदिति। सतामसतांचानुपलम्भात्खट्वादिषुसर्वदालिङ्गानुपल
म्भात्सदसत्त्वविषयःसंदेहइतिप्रश्नः। इतरस्तत्सद्भावेनुमानमाह। तयोस्त्विति। स्त्रीपुंसकार्यंदाम्नत्वादिकंदृष्ट्वाकारण
भूतलिङ्गानुमानंक्रियतइत्यर्थः। आकाशेनेति। आकाशतइत्याकाशःप्रकाशआलोकस्तेनयथामेघान्तरितंज्योतिरनुमी
यतेतथालिङ्गमित्यर्थः। अन्योन्यसंश्रयमिति। ज्योतिःप्रकाशयोःप्रत्यक्षेणकार्यकारणभावावगमात्। भवतुकार्येणकार
णानुमानम्। खट्वादिषुतुलिङ्गस्यकदाचिदप्यग्रहणान्नतेनकस्यचित्कार्यकारणभावग्रहणम्। तत्रहिलिङ्गावगमात्
शब्दप्रयोगः शब्दप्रयोगाल्लिङ्गावगतिरितीतरेतराश्रय-मेतदित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदुक्तमादित्यगतिवत्तन्नेति। तद्दूषयति। प्रत्यक्षेणेति। लिङ्गस्वरूपविविक्तखट्वादिवस्तुविषयेणप्रत्यक्षेणलिङ्गाभावनिश्चय कारिणाविरुध्यतएतदित्यर्थः। इन्द्रियदौर्बल्यमनुपलब्धिकारणंप्रमाणान्तरावसितवस्तुविषयमेवाभिधातुंशक्यते। तटेचे ति। लिङ्गशब्देनतत्कार्याण्यभिधीयन्ते। एकस्मिन्द्रव्येविरोधात्सर्वलिङ्गासंभवः। स्त्रीपुंसयद्वावेचनपुंसकत्वंनस्यात्। तदभा वेनपुंसकमितिवचनात्। स्वकृतान्तइति। स्वसिद्धान्तः। स्त्रीपुमानिति। रूढिपरिहारेणक्रियाशब्दत्वमाश्रयणीयमित्यर्थः। सं स्त्यानइति। भावसाधनत्वंदर्शयति। सूतेरिति। सूङ्इत्येतस्यधातोः सप्प्रत्ययोभवतिसकारस्यपकारोभवतीत्यर्थः। औणादिको मसुन्प्रत्ययः ह्रस्वश्चबाहुलकात्। स्त्यायत्यस्यामिति। संघातरूपंप्राप्नोतीत्यर्थः। कर्तृसाधनइति। सूतेऽपत्यंजनयतिपुमानित्य

प्रत्यक्षेणविरुध्यते। प्रत्यक्षेणखल्वपिसविरुध्यते। यआहखट्वावृक्षयोः सल्लिङ्गंनोपलभ्यतइति। तत्रस्वेन्द्रिय विरोधःकृतोभवति। नचनामस्वेन्द्रियविरोधिनाभवितव्यम्। तटेचसर्वलिङ्गा निर्दृष्टाकोध्यवसास्यति। तटेच खल्वपिसर्वाणिलिङ्गानिदृष्टानतटःतटीतटमितिकस्तदध्यवसातुमर्हति। इयंस्त्री। अयंपुमान्। इदंनपुंसक मिति। तस्मान्नवैयाकरणैः शक्यंलौकिकंलिङ्गमास्थातुम्। अवश्यंचकश्चित्स्वकृतान्तआस्थेयः। कोसौस्वकृ तान्तः॥ संस्त्यानप्रसवौलिङ्गमास्थेयौस्वकृतान्ततः॥ संस्त्यानप्रसवौलिङ्गमास्थेयौ। किमिदंसंस्त्यानप्रसवावि ति। संस्त्यानेस्त्यायतेर्ड्रट्स्त्री सूतेःसप्प्रसवेपुमानिति। ननुलोकेपिस्त्यायतेरेवस्त्री। सूतेश्चपुमानिति। अधि करणसाधनालोकेस्त्री। स्त्यायत्यस्यांगर्भइति। कर्तृसाधनश्चपुमान्। सूतेःपुमानिति। इहपुनरुभयंभावसा धनम्। संस्त्यानंस्त्रीप्रवृत्तिश्चपुमान्। कस्यपुनः संस्त्यानंस्त्रीप्रवृत्तिर्वापुमान्। गुणानाम्। केषाम्। शब्दस्पर्शरू परसगन्धानाम्। सर्वाश्चपुनर्मूर्त्तयएवमात्मिकाः। संस्त्यानप्रसवगुणाः शब्दस्पर्शरूपरसगन्धवत्यः। यत्रा ल्पीयांसोगुणास्तत्रावरतस्त्रयः शब्दःस्पर्शोरूपमिति। रसगन्धौनसर्वत्र ॥

र्थः। संस्त्यानमिति। तिरोभावः। प्रवृत्तिराविर्भावः। साम्यावस्थास्थितिः। एताश्चावस्थाः शब्दगोचराएवेत्यवसेयम्। गुणानामिति। सत्त्व रजस्तमांसित्रिगुणास्तत्परिणामरूपाश्चतदात्मकाएवशब्दादयः पञ्चगुणाः। तत्संघातरूपंचघटादिनतुतद्व्यतिरिक्तमवयविद्रव्यमस्ती तिसांख्यानांसिद्धान्तः। केषामिति। सत्त्वादीनामनारब्धकार्याणांसूक्ष्मावस्थायिनामप्रत्यक्षत्वाच्छब्दव्यवहारागोचरत्वात्प्रश्नः। तथाचोक्तम्। गुणानांपरमंरूपंनदृष्टिपथमृच्छतीति। इतरस्तत्परिणामरूपान्लोकप्रसिद्धानाह। शब्दस्पर्शेति। अवरतइति। अन्ततइत्यर्थः। ननुआकाशं शब्दात्मकमेवास्पर्शात्मकश्चवायुः नैषदोषः संपिण्डितस्वभावाश्चक्षुर्गोचरामूर्तिशब्देनात्रविवक्षिताः। रसगन्धाविति। वाय्वाकाशयोरभावात्॥ राम: ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वपदार्थव्यापित्वं पुंस्त्वादीनामाह। प्रवृत्तिरिति। नहीति। सत्त्वादीनामाविर्भावादिरूपः प्रवृत्तिशब्दवाच्यो नित्यः परिणाम इत्यर्थः।
पुरुषो यद्यप्यपरिणामी तथापि भोक्तृत्वाद्धर्मापन्न इव भवति। तदुक्तं हरिणा। प्रवृत्तिरिति सामान्यं लक्षणं तस्य कथ्यते। आविर्भाव
तिरोभावः स्थितिश्चेत्यथ भिद्यते। प्रवृत्तिमन्तः सर्वेर्थाः तिसृभिः स्वप्रवृत्तिभिः। सततं न वियुज्यन्ते वाचश्चैवात्र संभवः। यश्चाप्रवृत्तिध
र्मार्यस्थितिरूपेण गृह्यते। अनुयातीव सोन्येषां प्रवृत्तीर्विषयाश्रयः। तेनास्य चितिरूपं च चितिकालश्च भिद्यते। तस्य स्वरूपभेद
स्तु न कश्चिदपि विद्यते। अचेतनेषु संक्रान्तं चैतन्यमिव दृश्यते। प्रतिबिम्बकधर्मेण यत्तद्वाचो निबन्धनमिति। सामान्यमपि गोत्वा
दिकं व्यक्तेरव्यतिरिक्तत्वात्प्रवृत्तिधर्मः। शशविषाणादावपि उत्तरपदार्थस्य सद्भावात्तद्द्वारको लिङ्गयोग इति सर्वपदार्थव्यापिनीत्वं प्र

प्रवृत्तिः खल्वपि नित्या। नहीह कश्चिदपि स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते वर्द्धते वा। यावदनेन वर्द्धितव्यम
पायेन वा युज्यते। तच्चोभयं सर्वत्र। यत्तूभयं सर्वत्र कुतो व्यवस्था। विवक्षातः। संस्त्यानविवक्षायां स्त्री। प्रसववि
वक्षायां पुमान्। उभयविवक्षायां नपुंसकम्। तस्योक्तौ लोकतो नाम। तस्योक्तौ वचने लोकतो नामैतद्भव
ति स्त्री पुमान्नपुंसकमिति। गुणो वा लुपियुक्तवत्। वध्रिकादिषु भूयान्परिहारः लुपि युक्तवद्व्यक्तिव
चने इति। एवमत्र गुणो भवति। न चैतन्मन्तव्यं स्वमनीषिकयोच्यत इति। पठिष्यत्याचार्यः लिङ्गम
शिष्यं लोकाश्रयत्वाल्लिङ्गस्येति पुनः पठिष्यति ॥

वृत्तेः। आविर्भावतिरोभावान्तरालावस्था स्थितिरुच्यते। सा च नपुंसकत्वेन व्यवस्थाप्यते। स्त्रीत्वं स्त्रीता पुंस्त्वमित्यादौ सं।
स्त्यानादेरपि प्रवृत्तिलक्षणलिङ्गयोगः। विवक्षात इति। लोकव्यवहारानुवादिनी विवक्षाश्रीयते न तु प्रायोक्त्री। तदुक्तं हरि
णा। संनिधाने निमित्तानां किंचिदेव प्रवर्तकम्। यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा। भावतत्त्वविदः शिष्टाः शब्दा
र्थेषु व्यवस्थिताः। यद्यद्धर्मेङ्गतामेति लिङ्गं तत्तत्प्रचक्षत इति। तस्योक्ताविति। लोकतः शिष्टलोकात्तस्य लिङ्गस्य प्रतिपा
दनव्यवस्थानुगन्तव्येत्यर्थः। भूयानिति। भ्रूकुंसादिषु स्तनकेशादिमत्त्वलक्षणलिङ्गाभ्युपगमत्यागः परिहारः। वध्र्यादि
षु तु तदपरित्यागेपि शास्त्राल्लिङ्गसिद्धिरिति भावः। लिङ्गमशिष्यमिति। लिङ्गव्यवस्थायां लोकः प्रमाणमित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकार्थ इति। अनेन लिङ्गस्वरूपमपि लोकादेव ज्ञायत इत्युक्तं भवति। तत्रैकस्मिन्नेवार्थे संस्त्यानादिसद्भावात्पुष्यस्तारकानक्षत्रमिति शब्दान्यत्वाल्लिङ्गान्यत्वम्। स्तनकेशादिसंबन्धे तु लिङ्गेऽभ्युपगम्यमाने एतन्न युक्तम्। अवयवान्यत्वाच्चेति। कुटीकुटीर इति रेफस्यावयवस्योपजने लिङ्गभेदो दृष्ट इत्यर्थः। यद्यपि अविचारितरमणीयं लिङ्गमाश्रित्य वक्तारः शब्दानुच्चारयन्ति श्रोतारश्च प्रतिपद्यन्ते। तथापि वस्तुतत्त्वनिर्णयो भाष्यकारेण कृत इति यदन्यैरप्यधायि संस्त्यानादिलक्षणमलौकिकं लिङ्गमिति तदपाकृतं भवति। कथमिति। स्त्रीशब्दः शुक्लादिशब्दवद्गुणमात्रे गुणिनि च वर्तते। तत्र यदा गुणमात्रमिह स्त्रीत्वं स्त्रीशब्देनोच्यते तदा द्रव्यवाचिनः प्रातिपदिकात् स्त्रीत्वे वाच्ये टाबादय इति स्त्रीत्वं प्रत्ययार्थ इति पक्षः।

एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वमवयवान्यत्वाच्चेति॥ संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप्प्रसवे पुमान्। तस्योक्तौ लोकतो नाम गुणो वा लुपि युक्तवत्॥ कथं पुनरिदं विज्ञायते स्त्रियामभिधेयायां टाबादयो भवन्तीति। आहोस्वित् स्त्रीसमानाधिकरणात्प्रातिपदिकादिति। कश्चात्र विशेषः। स्त्रियामिति स्त्र्यर्थाभिधाने चेट्टाबादयो द्विवचनबहुवचनानेकप्रत्ययानुपपत्तिः। स्त्रियामिति स्त्र्यर्थाभिधाने चेट्टाबादयो भवन्ति। द्विवचनबहुवचनयोरनुपपत्तिः। कुमार्यौ कुमार्यः। किशोर्यौ। किशोर्यः। किं कारणम्। एकत्वात् स्त्रीत्वस्य। एकोऽयमर्थः स्त्रीत्वं नाम। तस्यैकत्वादेकवचनमेव प्राप्नोति। अनेकप्रत्ययानुपपत्तिश्च। अनेकश्च प्रत्ययो नोपपद्यते ॥

संपद्यते। यदा तु स्त्रीत्वयुक्तं द्रव्यं स्त्रीशब्देनोच्यते। तदापरं पक्षद्वयं संभवति स्त्रीत्वोपलक्षितद्रव्यवाचिनः प्रातिपदिकाट्टाबादय इति स्त्रीसमानाधिकरणपक्षसंभवः। अथ स्त्रीत्वयुक्तद्रव्यवाचिनोऽङ्गीकृतस्त्रीत्वात्प्रातिपदिकादिति प्रकृत्यर्थविशेषणपक्षसंभवः। एकोऽयमर्थ इति। प्रकृत्यर्थोपसर्जनस्य स्त्रीत्वस्य प्रत्ययेनाभिधानादिति भावः। यद्यपि शब्दादीनामवस्थाविशेषो लिङ्गमवस्थाश्चावस्थातुर्भिन्नास्तथापि यथा शब्दादीनां संनिवेशमात्रे घटे शब्दादीनां बहुत्वेऽपि संनिवेशस्याभेदविवक्षायां घट इत्येकवचनं भवति। एवमवस्थाविशेषस्य लिङ्गस्याप्येकत्वमेव संस्त्यानादेरिति मन्यते। अनेकश्चेति। पक्षद्वयेऽपि द्योतकः प्रत्ययोऽनेकस्यापि च प्रदीपादेर्दृष्टं द्योतकत्वमित्यनेकप्रत्ययोत्पत्तिरविरुद्धा। वाचके तु प्रत्ययेऽर्थप्रयुक्तत्वाच्छब्दस्यैकेनैवाभिहितेऽर्थे द्वितीयस्यानुत्पत्तिप्रसङ्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गार्ग्यायणीति। गर्गस्यापत्यं गोत्रं स्त्री। गर्गादिभ्यो यञ्। तदन्तात्प्राचांष्फ तद्धित इति ष्फः। तदन्तान्ङीष्। करीषगन्धेरपत्यं स्त्री त्वण्। तस्याणिञोरिति ष्यङ्। ततो यङश्चाबिति चाप्। कालशब्दाज्जानपदादिसूत्रेण ङीष्। ततस्तरप्। ततष्टाब्न प्राप्नोति। ङीषा स्त्रीत्वस्योक्तत्वात्। स्त्र्यर्थस्येति। संस्त्यानवाचिड्ट्रप्रत्ययान्तेन स्त्रशब्देन स्त्रीत्वस्याभिधानान्ङीन्न प्राप्नोति। भूतमियमिति। स्त्रीत्वोपलक्षितब्राह्मणीवृत्तित्वाद्भूतशब्दस्य तत्सामानाधिकरण्यात् स्त्रीप्रत्ययप्रसङ्गः। स्त्र्यर्थाभिधान इति। प्रत्यया

गार्ग्यायणी। कारीषगन्ध्या। कालितरा। किं कारणम्। एकत्वात् स्त्रीत्वस्य। एको ऽयमर्थः स्त्रीत्वं नाम। तस्यैकेनोक्तत्वाद्द्वितीयस्य प्रयोगेण न भवितव्यम्। किं कारणम्। उक्तार्थानामप्रयोग इति। स्त्र्यर्थस्य च प्रातिपदिकार्थत्वात् स्त्रियामिति लिङ्गानुपपत्तिः। स्त्र्यर्थस्य च प्रातिपदिकार्थत्वात् स्त्रियामिति ईकारो न प्राप्नोति। अस्तु तर्हि स्त्रीसमानाधिकरणात्प्रातिपदिकादिति। स्त्रीसमानाधिकरणादिति चेद्भूतादिषतिप्रसङ्गः। स्त्रीसमानाधिकरणादिति चेद्भूतादिषतिप्रसङ्गो भवति। भूतमियं ब्राह्मणी। कारणमियं ब्राह्मणी। आवपनमियमुष्ट्रिकेति। स्त्र्यर्थाभिधाने पुनष्टाबादिषु सत्स्विह तावद्भूतमियं ब्राह्मणीति नात्र स्त्रीत्वं विवक्षितम्। किं तर्हि। पौतन्यम्। कारणमियं ब्राह्मणीति। नात्र स्त्रीत्वं विवक्षितम्। किं तर्हि। प्राधान्यम्। आवपनमुष्ट्रिकेति। नात्र स्त्रीत्वं विवक्षितम्। किं तर्हि। संभवनम्॥ षट्संज्ञकेभ्यश्च प्रतिषेधः॥ षट्संज्ञकेभ्यश्च प्रतिषेधो वक्तव्यः। पञ्च ब्राह्मण्यः। दश ब्राह्मण्यः। स्त्र्यर्थाभिधाने पुनष्टाबादिषु सत्सु नात्र स्त्रीत्वं विवक्षितम्। किं तर्हि। भेदो विवक्षितः संख्या। इह च स्त्रीति ईकारो न प्राप्नोति। न हि तेनैव तस्य सामानाधिकरण्यमस्ति। सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात् स्वार्थे टाबादयः ॥

र्थपक्षे दोषोऽयं नावतरतीत्यर्थः। भूतादयः पौतन्याद्यर्थवृत्तय इति तदर्थस्य स्त्रीत्वेन संबन्धाभावात् प्रत्ययो ऽसन्तिप्रसङ्गाभावः। न हि तेनैवेति। स्त्रीशब्दसामानाधिकरण्याद्ब्राह्मण्यादिषु स्त्रीप्रत्ययः सिध्यति। स्त्रीशब्दे तु पदान्तरप्रयोगाभावाद्ब्राह्मण्यादिपदापेक्षाभावाच्च प्रत्ययो न प्राप्नोतीत्यर्थः। अथ ब्राह्मण्याद्यपेक्षया स्त्रीशब्दात्प्रत्ययः क्रियते तदेतरेतराश्रयदोषापत्तिः। प्रत्यययोस्तयोः परस्परापेक्षणात्। इदानीं तृतीयं पक्षमाश्रित्याह। सिद्धं त्विति। स्त्रीत्वयुक्ते ऽर्थे ङीकृतस्यानेवर्तमानात्स्वार्थे टाबादय इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवमिहापीति। यद्यपि गुणमात्रे प्रत्ययः क्रियते तथापि गुणगुणिनोरभेदविवक्षायां स्वाभाविकत्वाद्वा गुणप्रधानभाव
व्यवस्थायाः कुमारीशब्देन द्रव्यस्यैवाभिधानात्तद्गतसंख्यानिमित्ता वचनोत्पत्तिर्द्रव्यवाचिना च नित्यं सामानाधिकरण्य
मिति भावः। तदुक्तं हरिणा। सोऽयमित्यभिसंबन्धादाश्रयं प्रतिपद्यते। स्त्रीत्वं स्वभावसिद्धो वा गुणभावविपर्यय इति। भाव
स्येति। स्त्रीत्वस्य स्त्रीत्वेन योग इत्यर्थः। इषिरिति। एषितुमिच्छतीत्यत्रेत्यर्थः। निमन्त्रिश्चेति। निमन्त्रयेत इत्यत्र निमन्त्रणे

सिद्धमेतत्। कथम्। स्त्रियाः प्रातिपदिकविशेषणत्वात्। प्रातिपदिकविशेषणं स्त्रीग्रहणम्। स्वार्थिकाष्टाबा
दयः। नैवं विज्ञायते स्त्रियामभिधेयायामिति। नापि स्त्रीसमानाधिकरणादिति। कथं तर्हि। स्त्रियां यत्प्रातिपदिकं
वर्तते तस्माट्टाबादयो भवन्ति। कस्मिन्नर्थे। स्वार्थ इति। अथवा पुनरस्तु स्त्रियामभिधेयायामिति। ननु चोक्तम्।
स्त्रियामिति स्त्र्यर्थाभिधाने चेट्टाबादयो द्विवचनबहुवचनानेकप्रत्ययानुपपत्तिः स्त्र्यर्थस्य च प्रातिपदिकार्थ
त्वात् स्त्रियामिति लिङ्गानुपपत्तिरिति। नैष दोषः। यत्तावदुच्यते द्विवचनबहुवचनयोरनुपपत्तिरिति। गुण
वचनस्य चाश्रयतो लिङ्गवचनभावात्। गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति। तद्यथा।
शुक्ला शाटी। शुक्लः कम्बलः। शुक्लौ कम्बलौ शुक्लाः कम्बला इति। यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लि
ङ्गं वचनं च तद्गुणस्यापि भवति। एवमिहापि यदसौ द्रव्यं श्रितं भवति स्त्रीत्वं गुणः तस्य यल्लिङ्गं वचनं च तत् स्त्रीत्व
स्यापि भविष्यति। यदप्युच्यते अनेकप्रत्ययानुपपत्तिरिति। भावस्य च भावयुक्तत्वाद्भावो भावेन युज्यते।
तद्यथा। इषिरिषिणा। निमन्त्रिश्च निमन्त्रिणा। विषम उपन्यासः। युक्तं तत्रान्यत्वं साधनभेदात् कालभे
दाच्च। उक्तं तत्रैकस्य बाह्यं साधनं सर्वकालश्च प्रत्ययः। अपरस्याभ्यन्तरं साधनं वर्तमानकालश्च प्रत्य
य इति। इह पुनरेकं स्त्रीत्वम् ॥

लिङ्विधावित्यर्थः। एकस्येति। एषितुमित्यस्येषेरित्यर्थः। बाह्यमिति। भोजनादिकमित्यर्थः। सर्वकाल इति। तुमुन्नि
त्यर्थः। सह हि समानकर्तृकेषु तुमुन्निति कालमात्रे विधीयते। अपरस्येति। इच्छतीत्यस्य। आभ्यन्तरमिति। इषेरेव
कर्मेत्यर्थः। स चैषिषिषतीत्यत्र प्रकृत्यर्थत्वादाभ्यन्तरः। इह पुनरिति। भेदहेत्वभावादेकमेव स्त्रीत्वम्। इच्छायास्तु राम: १०
भिन्नरूपाया अपि कालसाधनभेदाद्वस्तुभेदग्रहणमित्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतर इह पुनरेकमिति ब्रुवता स्त्रीत्वमनेन प्रतिपन्नं भेदस्तु सुसाध इति मत्वाह अथैकमपीति। यद्येकमुपलभ्यत इति। खट्वादिषु सदपि मृगतृष्णावद्यद्युपलभ्यते लिङ्गम्। अविचारितरमणीयेन च तेन प्रसिद्धो व्यवहारस्तदा स्त्रीते त्यादौ द्वितीयस्याप्युपलम्भोऽस्त्विति भावः। अथैकमिति। सुखदुःखमोहान्वयात्सर्वव्यक्तीनां तत्परिणाम एवेदं विश्वं गुणानां च प्रवृत्तिर्लिङ्गम्। तत्र प्रवृत्तेरपि प्रवृत्तिसद्भावाल्लिङ्गयोगोऽस्त्वित्यर्थः। कस्य तावदिति। आश्रयेनिर्ज्ञाते सु वचः समाधिरिति भावः। गुणसमुदाय इति। रूपादिसंनिवेशमात्रमित्यर्थः। गोतेति। भावे तल्। अयमतमिति। इदं तदिति सर्वनामप्रत्यव

अथैकमप्युपलभ्यते। किं चातः। यद्येकमुपलभ्यते द्वितीयमप्युपलभ्यताम्। अथैकमप्यनुमानगम्यं द्वितीयमप्यनुमानाद्गम्यताम्। कस्य तावद्भवानेकं गुणं न्याय्यं मन्यते स्त्रीत्वं नाम। द्रव्यस्य। द्रव्ये च भवतः कः संप्रत्ययः। यदि तावद्गुणसमुदायो द्रव्यम्। का गतिर्य एते भावाः कृदभिहितास्तद्धिताभिहिताश्च चिकीर्षा गोतेति। अयमतमेतत् कृदभिहितो भावो द्रव्यवद्भवतीति। स्त्रीत्वमपि स्त्रीत्वेनाभिहितं द्रव्यवद्भविष्यति। क्व च तावद् दोषः स्यात्। दृष्टस्य हि दोषस्य सुसुखः परिहारः। गार्ग्यायणी। कारीषगन्ध्या। कालितरेति। इह तावद्गार्ग्यायणीति। षित्करणसामर्थ्यान्ङीष् भविष्यति। कारीषगन्ध्येति वचनाच्चाब्भविष्यति। कालितरेति न यावत्कालीतावत्कालितरेति। किं तर्हि। प्रकृष्टा काली कालितरा। यत्तच्छब्दरूपं प्रकर्षे वर्तते तस्यानुक्तं स्त्रीत्वमिति कृत्वा टाब्भविष्यति। यदप्युच्यते। इह स्त्री इति ईकारो न प्राप्नोतीति। निपातनादेतत् सिद्धम्। किं निपातनम्। स्त्रियामवन्तिकुन्तिकुरुभ्यश्चेति ॥

मर्शयोग्यं वस्तु द्रव्यमित्यर्थः। ततश्च स्त्रीत्वस्यापि द्रव्यरूपत्वादपरेण स्त्रीत्वेनाविरुद्धो योगः। षित्करणसामर्थ्यादिति। एकमपि स्त्रीत्वं प्रत्यय इ येनाभिधीयत इत्यर्थः। वचनादिति। यङश्चाबित्यस्मात्। तथाहि। अत्र सामान्यग्रहणाविघाताय चष्यङो नुबन्धद्वयं कृतमिति भावः। यावत्कालीति। अन्योऽत्र प्रकर्षयुक्तोऽर्थोऽन्यश्चाप्रकर्षयुक्तः अवस्थाभेदाद्वाचनिकशब्दभेदस्त्वेक एवार्थोऽभिधीयत इति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीविषयइति। येनित्यमेवस्त्रियांवर्तन्तेखट्वामालादयस्तेषामकारान्तप्रकृतित्वमवधारयितुंनशक्यते। अकारा
न्तस्यप्रयोगाभावात्। अनेकलिङ्गेषुतुकुक्कुटादिशब्देष्वदन्तत्वंनिश्चेतुमितिभावः। सर्वेषामिति। शाकटायनद
र्शनेनसर्वशब्दानांव्युत्पाद्यत्वाद्धात्वादीनाकारान्ततानिश्चीयतेइत्यर्थः। पञ्चभिरिति। तद्धितार्थेद्विगुः। आर्हादिति
ठक्। तस्याध्यर्धेतिलुक्। लुक्तद्धितलुकीतिस्त्रीप्रत्ययस्यलुकिकृतेप्रयोगएवाकारान्ततादृश्यतएवेत्यर्थः॥ अजाद्य
तष्टाप्॥ शूद्राचेति। जातिलक्षणोङीष्अनेनटापाबाध्यते। ननुपुंयोगलक्षणः। गौणमुख्ययोर्मुख्येसंप्रत्ययइतिन्याया
न्मुख्यार्थवृत्तेरिहशूद्रशब्दस्यग्रहणात्तेनशूद्रस्यभार्याशूद्रीत्येवभवति। अमहत्पूर्वेत्यत्रमहच्छब्दस्यानुकरणशब्द

स्त्रीविषयेङ्याबोरप्रसिद्धिरकारान्तादर्शनात्। स्त्रीविषयेङ्याबोरप्रसिद्धिः। खट्वा। माला। किंकारणम्।
अकारान्तादर्शनात्। नह्यकारान्तता दृश्यते। ननुचेयं दृश्यते। अतिखट्वः। अतिमालइति। नैषाअकारान्त
ता। आपएवैतद्ध्रस्वत्वम्। सर्वेषांतुस्वरवर्णानुपूर्वीज्ञानार्थउपदेशः। सर्वेषामेवतुप्रातिपदिकानांस्वरव
र्णानुपूर्वीज्ञानार्थउपदेशःकर्तव्यः। शशःषषइतिमाभूत्। पलाशःपलाषइतिमाभूत्। मञ्चकःमञ्जकइतिमा
भूत्। तस्मात्सिद्धम्। तस्मात्सिद्धमेतद्भवति। अथवा दृश्यमकारान्तता दृश्यते। पञ्चभिःखट्वाभिःक्रीतःपञ्चप
ञ्चखट्वः। दशखट्वः॥ अजाद्यतष्टाप्॥ शूद्राचामहत्पूर्वा। शूद्राचामहत्पूर्वेतिवक्तव्यम्। शूद्रा। अमहत्पूर्वे
तिकिमर्थम्। महाशूद्री॥ जातिः॥ जातिरितिवक्तव्यम्। याहिमहतीशूद्रामहाशूद्राहिसाभवति ॥

त्वाल्लौकिकार्थाभिधायित्वाभावात्तत्वाभावः। अमहत्पूर्वेतिकिमर्थमिति। अन्तरङ्गत्वात्पूर्वंटापिकृतेसुप्सुपेतिसमासेन
भाव्यम्। महतीशूद्रामहाशूद्रेति। ततश्चनिर्वृत्तत्वाट्टापःप्रतिषेधोऽनर्थइतिप्रश्नः। महाशूद्रीति। महाशूद्रशब्दःसमुदायएवा
भीरजातिवचनोनत्वत्रावयवार्थोस्ति यथागौरखरइति। तत्रसमुदायत्वात्स्यादनेऽवयवार्थस्यस्त्रीत्वाभावात्तदविवक्षितत्वे
वसमासःक्रियते। ततष्टापिप्रतिषिद्धेजातिलक्षणोङीषेवभवति। जातिरिति। महाशूद्रशब्दःसमुदायोयदाजातिवाची
तदाटापःप्रतिषेधोयदातुमहत्वविशिष्टाशूद्राप्रतिपिपादयिषितातदामहाशूद्रेत्येवभवति। असतितुजातिग्रहणेअ रामः ११
महत्पूर्वेतिप्रतिषेधसामर्थ्यादन्तरङ्गोपिटाब्बाध्येत। ततश्चात्रापिङीष्प्रसज्येत ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिभवतीति। भवन्तमतिक्रान्तामहान्तमतिक्रान्तेति प्रादिसमासः। ततउगितश्चेत्यनेनोगिदन्तादपि ङीप्सिद्धो भवति। गौरादिषु बृहन्महच्छब्दौ न पठितव्यौ। तथा च शतुरनुमइत्यत्र नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानमित्युक्तम्। अन्यथा ङीष एवोदात्तत्वेन सिद्धत्वात् किं ङीप उदात्तविधानेन। विभक्त्युदात्तार्थं तद्वचनमिति चेत् किं गौरादिषु पाठेन प्रयोजनम्। अनुपसर्जनाधिकाराच्चातिमहतीत्यत्र गौरादिङीषभावादुगिल्लक्षणो ङीप् कर्तव्यस्तस्य चोदात्तत्वमुपसंख्यानेन कर्तव्यम्। जातिरिति च वक्ष्यामीति। अन्यथा महत्पूर्वेत्यस्य तिप्रतिषेधे महाशूद्री महाशूद्रा शब्दयोर्विषयविभागेन कथं साधुत्वं प्रतीयेतेति भावः। पञ्चाजीति। पञ्चानामजानां समाहार इति द्विगुः। ततो द्विगोरिति ङीम्न प्राप्नोति। टापा बाध्यमानत्वात्। अजादीनामिति। अजाद्यत इति षष्ठी। तेनाजादिप्रातिपदिकाभिधेयसमवेतं स्त्रीत्वमिह गृह्यते। पञ्चाजीत्य

शूद्राशब्दोऽजादिषु पठ्यते। तत्र कः प्रसङ्गो यन्महत्पूर्वात्स्यात्। नैव प्राप्नोति। नार्थः प्रतिषेधेन। तदन्तविधिनाप्राप्नोति। ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते। एवं तर्हि विज्ञापयत्याचार्यः। भवतीह तदन्तविधिरिति। किमेतस्य ज्ञापने प्रयोजनम्। अतिभवती। महती। अतिमहती। अत्र तदन्तविधिः सिद्धो भवति। जातिरिति च वक्ष्यामीति। यद्येतज्ज्ञाप्यते। पञ्चाजी। दशाजी। अत्रापि प्राप्नोति। नैष दोषः। अजादिभिस्त्स्त्रियं विशेषयिष्यामः। अजादीनां या स्त्रीति॥ उगितश्च॥ कथमिदं विज्ञायते। उगितः प्रातिपदिकादिति आहोस्विदुगिदन्तात्प्रातिपदिकादिति। किं चातः ॥

न तु समासाभिधेयसमाहारगतं स्त्रीत्वं न त्वजादिशब्दार्थगतमिति टापोऽप्रसङ्गः। प्रत्यासत्त्या च स्त्रीत्वविशेषणोपक्षीणानामप्यजादीनामेव प्रकृतित्वं विज्ञायते। सामर्थ्याद्वा। एवं तु सत्य महत्पूर्वेति न प्रतिषेधो वक्तव्यः। न हि महाशूद्रीत्यत्र शूद्रार्थगतं स्त्रीत्वमिति टापः प्रसङ्गाभावः॥ उगितश्च॥ कथमिति। प्रातिपदिकादिति। वर्तते। तत्र विशेषणविशेष्यभावे कामचाराद्दिप्रातिपदिके नोगिद्विशेष्यते तदोगितः प्राधान्याच्चेन तदन्तविधिर्नास्ति। न च प्रातिपदिकान्तमुगित्संभवतीति प्रातिपदिकादुगित इति पक्षसंभवः। यदा तूगिता प्रातिपदिकं विशेष्यते। तदा तदन्तविधौ सत्युगिदन्तात्प्रातिपदिकादित्येष पक्षो भवति। पक्षद्वयेऽप्यव्याप्तिरिति मत्वा प्रश्नः ॥ एमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 भवतीति। सर्वादिषुभवतुशब्दउगित्पठ्यते। महच्छब्दोपिशतृवद्भावादुगिद्व्यपदेश्यः। तदन्तविधिनेति। उगिताप्रातिपदि-
कस्यविशेषणादितिभावः। ग्रहणवतेति। ग्रहणमुपादानमात्रम्। नतुप्रातिपदिकस्यस्वरूपेणोच्चारणम्। अघेति। असमहत्सू-
वैतिप्रतिषेधेनेहप्रकरणेतदन्तविधेर्ज्ञापितत्वादितिभावः। निर्गोमतीति। आद्येपक्षेगोमतीत्यत्रापिनसिध्यति। उगित्त्वंमतुपो
गोमानित्यादौनुमर्थंस्यात्। द्वितीयेतुगोमतीतिसिध्यति। मतुपउगित्वात्तदन्तत्वाच्चगोमच्छब्दस्य। गोमतीनि ङ्यान्तेतिसमा-
सेतुकृतेनिरादेःसमुदायात्मतुपोविधानाभावान्ङीप्नस्यादित्यर्थः। तदन्तविधिनेति। ननुचप्रातिपदिकेनोगितोविशेषणादि-

यदिविज्ञायतेउगितःप्रातिपदिकादिति। सिद्धम्। भवती। महतीति। अतिभवती अतिमहतीति नसिध्यति।
तदन्तविधिनाभविष्यति। ग्रहणवताप्रातिपदिकेनतदन्तविधिःप्रतिषिध्यते। अथविज्ञायतेउगिदन्तात्प्राति-
पदिकादिति। सिद्धम्। अतिभवतीअतिमहतीति। भवतीमहतीतिनसिध्यति। व्यपदेशिवद्भावेनेहभविष्यति।
व्यपदेशिवद्भावोऽप्रातिपदिकेन। उभयथाचनिर्गोमतीनिर्यवमतीतिनसिध्यति। किंकारणम्। प्रत्ययग्रह-
णेयस्मात्सविहितस्तदादेर्ग्रहणंभवतीति। यथेच्छसितथास्तु। अस्तुतावदुगितःप्रातिपदिकादिति। कथंअतिभ-
वतीअतिमहतीति। तदन्तविधिनाभविष्यति। ननुचोक्तंग्रहणवताप्रातिपदिकेनतदन्तविधिःप्रतिषिध्यतइ-
ति। नैतत्प्रातिपदिकग्रहणम्। प्रातिपदिकाप्रातिपदिकयोरेतद्ग्रहणम्। अथवा पुनरस्तुउगिदन्तात्प्रातिप-
दिकादिति। कथंभवतीमहतीति। व्यपदेशिवद्भावेनभविष्यति। ननुचोक्तंव्यपदेशिवद्भावोऽप्रातिपदिके-
नेति। नैतत्प्रातिपदिकग्रहणम् ॥

शेष्येणकथंतदन्तविधिः। एवंतर्हितन्त्रेणयोगद्वयमुच्चार्यतेतत्रैकस्मिन्योगेप्रातिपदिकेनोगिद्विशेष्यते। द्वितीयेतूगिता
प्रातिपदिकमितिदोषाभावः। नैतदिति। उगिद्यस्यतदुगिदितिशब्दरूपमात्रमन्यपदार्थआश्रीयते नतुप्रातिपदिकमे-
वेत्यर्थः। व्यपदेशिवद्भावेनेति। प्रयोगभेदेनभवान्भवतीतियच्छब्दरूपंनानारूपंप्रयुज्यते तस्यायंभवच्छब्दोऽ-
न्तइतिकल्पनयेत्यर्थः। एतेनयेनविधिस्तदन्तस्येत्यत्रस्वंरूपमितिनिवृत्तमितिदर्शितंभवति। तेनगोक्षीरमित्यादौ
गोस्त्रियोरितिह्रस्वोनभवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णोऽप्युगिदिति। अर्वणस्त्रसावनञ इति अर्वत् शब्दस्य तृ शब्द आदेशः तत्रार्वतीति ङीब् भवति। अश्वपर्यायोऽर्वन् शब्दः नन्वङ्गस्य तृ शब्द आदेशो विधीयते तत्र नञ्नेभ्य इति ङीप्यपि कृते तत्रादेशेन भवितव्यम् एवं तर्हि संभवमात्रेणैतदुक्तमित्यदोषः। उगित्यञ्चतिग्रहणादिति। उगिदचामित्यत्रोगिद्ग्रहणादञ्चतेरपि ग्रहणसिद्धेऽञ्चतिग्रहणं नियमार्थम्। इह शास्त्रे यत्कार्यमुगितो विधीयते तदञ्चतेरेव धातोर्भवति नान्यस्य धातोरिति कार्यमात्रं नियम्यते न तु नुमागम एव। अधातुग्रहणं तु तत्र धातुभूतपूर्वस्यापि नुमागमार्थम्। तेन गोमन्तमिच्छतीति क्यचि क्विपि च कृते गोमानित्यत्रापि नुम्भवति। अन्यथा धातुत्वादञ्चतिग्रहणान्नियमार्थान्न स्यात्। अन्ये त्वाहुः। उगितश्चेति यश्च शब्दः सोऽञ्चतेर्लुप्ताकारन

प्रातिपदिकाप्रातिपदिकयोरेतद्ग्रहणम्। यदप्युच्यते उभयथा निर्गोमती निर्यवमतीति न सिध्यतीति। किंकारणम्। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं भवतीति। नैतत्प्रत्ययग्रहणम्। प्रत्ययाप्रत्यययोरेतद्ग्रहणम्। कथम्। वर्णोऽप्युगित् प्रत्ययोऽप्युगित् प्रातिपदिकमप्युगित्। धातोरुगितः प्रतिषेधः॥ धातोरुगितः प्रतिषेधो वक्तव्यः। उखास्रद् ब्राह्मणी। पर्णध्वद् ब्राह्मणी। अञ्चतेश्चोपसंख्यानम्। अञ्चतेश्चोपसंख्यानं कर्तव्यम्। प्राची। प्रतीची। उगित्यञ्चतिग्रहणात्सिद्धमधातोः। उगिति अञ्चतिग्रहणात्। अधातोः सिद्धम्। अञ्चतिग्रहणं नियमार्थं भविष्यति। अञ्चतेरेवोगितो धातोर्नान्यस्योगितो धातोरिति॥ वनोरच॥ इह कस्मान्न भवति। निःशुनी। अतियूनीति। अर्थवद्ग्रहणे नानर्थकस्येति। एवमपि मघोनी। अत्र प्राप्नोति। मघवन् शब्दोऽव्युत्पन्नं प्रातिपदिकम् ॥

कारस्यानुकरणम्। विभक्तेश्च सुपां सुलुगिति लुक्। भाविनं चाकारलोपमाश्रित्य चेति निर्देशः कृतः। ततश्चाञ्चतिग्रहणमिहैव नियमार्थम्। अकारनकारलोपयोश्चातन्त्रत्वात्। नाञ्चेः पूजायामिति यदा नलोपः प्रतिषिध्यते तदापि ङीब् भवति॥ वनोरच॥ निःशुनीति। शुनो निःक्रान्ता युवानमतिक्रान्तेति प्रादिसमासस्ततो ङीप्। श्वन् शब्दस्य गौरादिपाठेऽप्युपसर्जनत्वादत्र ङीष् न भवति। मघोनीति। मघमस्यास्तीति छन्दसीवनिपौ वक्तव्याविति वनिप्। स चार्थवानिति प्रश्नः। अव्युत्पन्नमिति। श्वन्नुक्षन्नित्यौणादिको मघवन् शब्दः। उणादिषु चनावश्यं व्युत्पत्तिनिमित्तं कार्यं भवतीति प्रागेवोक्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वनोनहशइति।इयोरपिङीब्रेफयोर्निषेधः।सहयुध्वेति।सहेचेतिक्वनिप्।शर्वरीति।शृहिंसायामित्येतस्मादन्येभ्योपि दृश्यन्तइतिवनिप्।तत्रगुणेरपरत्वेचकृतेहशन्तोभवतीतिपूर्वःपक्षः।प्रेर्लरीति।ईरगतावित्यस्मात्प्रपूर्वादन्येभ्योपि दृश्यन्तइतिक्वनिब्वनिपोरन्यतरःसहशन्ताद्विहितइतिङीब्रौनस्यातामितिप्रश्नः।छान्दसत्वादिति।प्रईरिसघोस्तु दृत्युणादिसूत्रमनपेक्ष्यैतदुक्तम्।यज्वरीति।सुयजोर्ङ्वनिप्।वाछन्दसीतिपूर्वसवर्णदीर्घः।बहुधीवरीति।बहवो धीवानोस्यामितिबहुव्रीहिस्तत्रानोबहुव्रीहेरितिङीपःप्रतिषेधःप्राप्नोति।रेफस्यङीप्संनियोगेनविधानात्तद भावादेवाभावप्रसङ्गः।यदिवास्त्रियांयदुक्तंतस्यसर्वस्यानोबहुव्रीहेरितिप्रतिषेधविधानादत्रङीब्रौनप्राप्नुतः

वनोनहशः॥वनोरचेत्यत्रहशन्तान्नभवतीतिवक्तव्यम्।इहमाभूत्।सहयुध्वाब्राह्मणीति।यदिन हशइत्युच्यते।शर्वरीतिनसिध्यति।विहितविशेषणंहशग्रहणम्।हशन्ताद्योविहितइति।एवमपिप्रे र्लरीतिनसिध्यति।कथंचात्रतुगागमः।छान्दसत्वात्।ङीब्रावपितर्हिछान्दसत्वादेवभविष्यतः।बहु लंछन्दसि बहुलंछन्दसिङीब्रौवक्तव्यौ।यज्वरीरिषः।यज्वनीरिषः।रविधानेबहुव्री हेरुपसंख्यानम्।प्रतिषिद्धत्वात्॥रविधानेबहुव्रीहेरुपसंख्यानंकर्तव्यम्।बहुधीवरी।बहुपीवरी।किं पुनःकारणंनसिध्यति।प्रतिषिद्धत्वात्।अनोबहुव्रीहेरितिप्रतिषेधःप्राप्नोति॥अनोबहुव्रीहेःप्रतिषेधे वोपधालोपिनोवावचनम्।अथवाअनोबहुव्रीहिप्रतिषेधेउपधालोपिनोवेतिवक्तव्यम् ॥

तस्माद्वनोरचबहुव्रीहेश्चेतिवक्तव्यमित्यर्थः।तत्रबहुव्रीहेश्चेत्यनेनलक्षणान्तरेणानउपधालोपिनइत्यनेनविहिते ङीपिरेफमात्रंविधेयम्।यदितुद्वावपिङीब्रौविधीयेयातांतदासुपर्वादेरनुपधालोपिनोपिस्याताम्।अनइति।अनो बहुव्रीहेरित्यस्यानन्तरमुपधालोपिनोवेतिवक्तव्यम्।तेनानउपधालोपिनोन्यतरस्यामित्येतन्नवक्तव्यंभवति। तत्रानुपधालोपिनोनित्योङीप्प्रतिषेधोभवति सुपर्वेति।उपधालोपिनस्तुङीब्विकल्पस्तेनबहुराजी।बहुराजा नौ।बहुराजेति।रूपत्रयंसिध्यति।एवंबहुधीवरी।बहुधीवानौ।बहुधीवेति।वन्नन्तस्याप्युपधालोपिनोरूपत्र यंभवति ॥

CC-0. In Public Domain. Digitization by eGangotri

इतरः पूर्वोक्तमभिप्रायमप्रतिपद्याह। अन्यथाकृत्वेति। अन्येन सतीति। प्रकरणान्तरविहितत्वात्तस्य ङीप इति भावः। बहुव्रीहेश्चेति वचनेन प्रकरणान्तरविहिते पाक्षिके ङीपि रेफो विधीयत इति तदेव रूपत्रयं भवतीत्यर्थः। किं पुनरिति। ङीप्संनियोगमनपेक्ष्य रेफमात्रं वन्नन्तस्य स्त्रियां विधीयताम्। ततश्च बहुधीवरीत्यत्रापि रेफो भविष्यति। अनउपधालोपिन इत्यनेन च ङीबिति प्रश्नः। डाबिति। एतत्तत्रैव व्याख्यास्यते। केचिच्चोदयन्ति। वन्निति प्रत्ययग्रहणं कृद्ग्रहणं वा ततश्च प्रत्ययग्रहणे यस्मात्स विहित इति कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति वा बहुधी

अन्यथाकृत्वा चोदितमन्यथाकृत्वा परिहारः। यथोपसंख्यानं चोदितं तथा नित्याभ्यां ङीब्राभ्यां भवितव्यम्। यथा परिहारः तथा विभाषया भवितव्यम्। यथोपसंख्यानं चोदितमेवमपि विभाषया भवितव्यम्। न ह्यत्र ङीब्दुर्लभः। सिद्धोऽत्र ङीप्। अनउपधालोपिनोऽन्यतरस्यामिति। ङीप्संनियोगेन र उच्यमान अन्येन सति न स्यादित्येवमर्थमुपसंख्यानं चोद्यते। किं पुनः कारणं ङीप्संनियोगेन र उच्यते। इह माभूत्। सुपर्वा चारुपर्वेति। तत्तर्ह्युपसंख्यानं कर्तव्यम्। न कर्तव्यम्। वक्ष्यति। डाबुभाभ्यामन्यतरस्यामित्यत्रान्यतरस्यांग्रहणस्य प्रयोजनं डाप्प्रतिषेधाभ्यां मुक्ते ङीब्राविति यथा स्यातामिति ॥ नषट्स्वस्रादिभ्यः ॥ कस्यायं प्रतिषेधः। ङीबनन्तरस्तस्य प्रतिषेधः। अथेदानीं ङीपि प्रतिषिद्धे षट्संज्ञानामन्ते लुप्ते टाबुत्पत्तिः कस्मान्न स्यात्। अत इति प्राप्नोति। असिद्धो नलोपस्तस्यासिद्धत्वान्न भविष्यति ॥

वरी अतिधीवरीति रेफो न प्राप्नोति। नैष दोषः। असमहत्पूर्वेति प्रतिषेधेन तदन्तविधेर्ज्ञापितत्वात् ॥ नषट् ॥ कस्यायमिति। यदि ङीपः प्रतिषेधस्तदा पञ्च ब्राह्मण्य इत्यत्र नलोपे सति अदन्तत्वाट्टाप् प्राप्नोतीति मत्वा प्रश्नः। आचार्यः शिष्यबुद्धिपरीक्षार्थं परिहाराभासमाह। ङीबनन्तर इति। यस्तु टाऋचीति पादन्ताट्टाब्विहितस्तस्यात्र प्रसङ्गाभावा ङीबनन्तर इत्युक्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परिगणितेष्विति। नलोपः सुप्स्वरेति सूत्रं नियमार्थं सुबादिविधिष्वेव नलोपोऽसिद्धो नान्यत्रेत्यर्थः। आचापइति। यङ
श्चाबित्यस्यात्र प्रत्याहारे टापोन्तर्भावाट्टाब्विधिः सुब्विधिः तत्र नलोपस्यासिद्धत्वमस्त्येवेत्यर्थः। दोषस्त्वित्वे इति। त
त्र हि सुब्विधिरिति सर्वविभक्त्यन्तावयवः समास आश्रितः। ततश्च टापि सुपि विधिरित्वं सुब्विधिर्भवतीति इत्वे कर्त
व्ये नलोपस्यासिद्धत्वात्कात्पूर्वोऽकारो न भवतीतीत्वं न स्यादित्यर्थः। स्त्रियां यत्प्राप्नोतीति। अर्थाश्रयप्राप्तिमात्रापेक्षोयं प्र

परिगणितेषु कार्येषु नलोपोऽसिद्धः। न चेदं तत्र परिगण्यते। इदमपि तत्र परिगण्यते। कथं। प्रत्याहाराच्चा
पासिद्धम्। सुबिति नेदं प्रत्ययग्रहणम्। किं तर्हि प्रत्याहारग्रहणम्। क्व संनिविष्टानां प्रत्याहारः। प्रथमैकव
चनात्प्रभृत्याचापः पकारात्। यदि प्रत्याहारग्रहणम्। दोषस्त्वित्वे। इत्वे दोषो भवति। बहुचर्मिका। बहुव
र्मिका। प्रत्ययस्थात्कात्पूर्वस्यात इतीत्वं न प्राप्नोति। तस्मान्नोभौ। तस्मात् षट्संज्ञकेभ्य उभौ न भवत
इति वक्तव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। स्त्रियामिति वर्तते स्त्रियां यत्प्राप्नोति तस्य प्रतिषेधः। ष
ट्संज्ञानामन्ते लुप्ते टाबुत्पत्तिः कस्मान्न स्यात्। प्रत्याहाराच्चापासिद्धम्। दोषस्त्वित्वे। तस्मान्नोभौ॥ डाबु
भाभ्यामन्यतरस्याम्॥ किमर्थमुभाभ्यामित्युच्यते। उभाभ्यां योगाभ्यां डाब्यथा स्यात्। मन्नन्तादन्नन्ता
च्च। नैतदस्ति प्रयोजनम्। प्रकृतमुभयमनुवर्तते। अथान्यतरस्यांग्रहणं किमर्थम्। अन्यतरस्यां डाब्य
था स्यात्। डापासुक्तेपि प्रतिषेधो यथा स्यादिति। नैतदस्ति प्रयोजनम्। इह डाबुच्यते प्रतिषेधोपि। ता
वुभावपि वचनाद्भविष्यतः ॥

तिषेध इत्यर्थः॥ डाबु॥ योगाभ्यामिति। योगस्य प्रकृतिर्योगशब्देनोच्यते। प्रकृतमिति। द्वयोरपि स्वरितत्वप्रतिज्ञा
नादपेक्षणाद्वेति भावः। एवमुभाभ्यामिति प्रत्याख्यातम्। तावुभाविति। यदि यत्रैव ङीप्प्रतिषेधस्तत्रैव डाप्स्यात्तदा
प्रतिषेधमविधायैवमनो डाबित्युच्येत ततोऽनो बहुव्रीहेरित्यनेनापि डाबेव विधीयेत स एव हि ङीपं बाधिष्यते किं प्र
तिषेधेन। तस्मादुभयविधानसामर्थ्यादुभयं भविष्यतीत्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

सिद्धोऽत्रेति। ननु यत्र तेन न सिध्यति सुपर्वेत्यादौ तदर्थमन्यतरस्यांग्रहणं स्यात्। नैतदस्ति। यदानेनान्यतरस्यांग्रहणे न पक्षे ङीबनुज्ञायते तदा नउपधालोपिन इति नियमार्थं भवति। उपधालोपिन एवान्नन्ताद् ङीब्भवति नान्यस्मादिति। ततश्च सुपर्वेत्यादेरनउपधालोपिनो ङीपा न भाव्यमेव। अथ तदिति। अन्तराले विचारः क्रियते। इदमेवान्यतरस्यांग्रहणं भवतु तत्रत्यं न कर्तव्यं भवतीति मन्यते। इतरोऽकरणं संमन्यते। बाढमिति। ङीबपीति। अन्यतरस्यांग्रहणेनात्रत्येन प्रापित इति भावः। इदं त्विति। अस्मिन्नन्यतरस्यांग्रहणे क्रियमाणेऽनउपधालोपिनोऽन्यतरस्यामिति नियमार्थं कर्तव्यम्। तदेवेहाकृतेऽन्यतरस्यांग्रहणे विध्यर्थं भविष्यतीति भावः। इदमपीति। असति ह्यन्यतरस्यांग्रहणे न

इदं तर्हि प्रयोजनम्। डाप्प्रतिषेधाभ्यां मुक्ते ङीबपि यथा स्यात्। सिद्धोऽत्र ङीप्। अनउपधालोपिनोऽन्यतरस्यामिति। अथ तदन्यतरस्यांग्रहणं शक्यमकर्तुम्। बाढं शक्यम्। कथम्। इह डाबप्युच्यते प्रतिषेधोऽपि ङीबपि। तत्सर्ववचनाद्भविष्यति। नैवं शक्यं विज्ञातुम्। अक्रियमाणे हि तत्रान्यतरस्यांग्रहणेऽनवकाशो ङीब् डाप्प्रतिषेधौ बाधेत। डाप्प्रतिषेधावप्यनवकाशौ तौ वचनाद्भविष्यतः। सावकाशौ डाप्प्रतिषेधौ। कोऽवकाशः। सुपर्वा चारुपर्वेति। तस्मादन्यतरस्यांग्रहणं कर्तव्यम्। इदं तु खल्वन्यतरस्यांग्रहणं शक्यमकर्तुम्। इदमप्यवश्यं कर्तव्यम्। किं प्रयोजनम् ॥

उपधालोपिनोऽन्यतरस्यामिति सूत्रं विध्यर्थं स्यात्ततश्च प्रकरणान्तरेण ङीपो विधानाद्वनो र चेत्यनेनन्नन्तेभ्यो ङीबित्येतत्सूत्रविधीयमानङीप्संनियोगेन विधीयमानो रेफो बहुधीवरीत्यत्र न स्याद्बहुधीवेति स्यात्। सति त्विहान्यतरस्यांग्रहणेऽनउपधालोपिन इति सूत्रं नियमार्थं भवति न तु विध्यर्थमिति बहुधीवरीत्यत्रन्नन्तेभ्यो ङीबित्यनेनैव ङीब्भवति। ततश्च वनो र चेति रेफादेशः सिध्यति। यदि तर्ह्यन्यतरस्यांग्रहणे न पक्षे ङीबनुज्ञायते तदा मन्नन्तादपि प्राप्नोति। तदा व्यवस्थितविभाषाविज्ञानान्न भविष्यति। अथवा डाबुभाभ्यामित्येको योगः क्रियते ततोऽन्यतरस्यामिति द्वितीयस्तत्रानो बहुव्रीहेरिति वर्तते न तु मन इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· अश्वेहेति। यदि नद्युतश्चेत्यनेन नद्यन्ताद्बहुव्रीहेः कब्विधीयते तदात्रापि कपा भाव्यम्। अथ नद्यन्तानां वर्तिपदानां यो ४११
१५ बहुव्रीहिस्ततः कबिति तदात्र कपा न भाव्यमिति संशयस्यच्छेति। आचार्यदेशीय आह। बहुभूकेति। संप्रसारणपर
पूर्वत्वमिति। संप्रसारस्य डापश्चेत्यर्थः। ततो हल इति संप्रसारणान्तस्य दीर्घत्वमङ्ग प्रत्यययोरेकादेशस्य पूर्वप्रत्य
न्तवद्भावात्ततो नदीसंज्ञायामुपजातायां नद्युतश्चेति कप्। इदानीमाचार्य आह। कपातान्वदिति। वक्ष्यतीति। डापि
परतः पूर्वमङ्गं डाबन्तं तु प्रत्ययान्तरे इति संप्रसारणस्य डापश्च समानाङ्गत्वं नास्तीत्युकाराकारयोरेकादेशाभावो

डाप्प्रतिषेधाभ्यामुक्ते ङीब्नावपियच्यास्यातामिति। रविधाने बहुव्रीहेरुपसंख्यानं चोदितं तन्नवक्त
व्यं भवति। अथेह कथमन्तव्यं बहवः श्वानोऽस्यां रथ्यायां बहवो युवानोऽस्यां शालायामिति। बहुभूका
बहुयूकादिति भवितव्यम्। का रूपसिद्धिः। डाप् टिलोपः संप्रसारणम्। संप्रसारणपरपूर्वत्वम्। नद्युत
श्चेति कप्। कपातावन्नभवितव्यम्। किं कारणम्। नद्यन्तानां यो बहुव्रीहिरित्येवं तद्विज्ञायते। न चैष
नद्यन्तानां बहुव्रीहिः। संप्रसारणेनापि न भवितव्यम्। वक्ष्यत्येतत्। श्वादीनां प्रसारणे नकारान्तग्रह
णमनकारान्तप्रतिषेधार्थमिति। परपूर्वत्वेन चापि च न भवितव्यम्। वक्ष्यत्येतत् संप्रसारणपूर्व
त्वे समानाङ्गग्रहणमसमानाङ्गप्रतिषेधार्थमिति। तस्माद्बहुश्वा बहुयुवेति भवितव्यमिति॥ अ
नुपसर्जनात्॥ अनुपसर्जनादिति किमर्थम्। बहुकुरुचरा मथुरा। नैतदस्ति प्रयोजनम्॥

यथाशकट्टाविति॥ अनुपसर्जनात्॥ उपसर्जनमिह शास्त्रीयं गृह्यते। समासावयवभूतम्। तत्रावयवाश्रयं
कार्यं समुदायस्य न प्राप्नोति। यदवयवे कार्यमकृतार्थं तत्समुदायस्य भवति। यथाजुगुप्सत इत्यात्मनेपदम्। न
तु यदवयवे कृतार्थम्। यथा पणायतीति न भवति आत्मनेपदम्। तदन्तविधिश्च ग्रहणवतेति प्रतिषिद्धः। तत्रान
र्थकोऽयं प्रतिषेध इति मत्वाह। अनुपसर्जनादिति किमर्थमिति। इतरोऽमहत्पूर्वेति प्रतिषेधेन तदन्तविधिर्ज्ञापित राम:
इति मत्वाह। बहुकुरुचरेति। बहवः कुरुचरा अस्यामिति बहुव्रीहिः। कुरुचरशब्द उपसर्जनमिति ङीब्न भवति॥ २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुरुचरशब्दादिति। टिड्ढाणञित्यत्र टित्प्रातिपदिकं गृह्यते। तत्र किंचित्साक्षाट्टिद्भवति यथा नदट्चोरडिति। किंचित्तवय वटित्वद्वारेण। अवयवे हि यत्र टित्वमकिंचित्करं तत्र समुदायार्थं तद्विज्ञायते स चावयवः क्वचिद्धातुष्टिद्भवति। यथास्तनंधयीति। क्वचित्तद्धितः ट्युट्युलादिः। क्वचित्कृद्ल्युडादिः। तत्र यं समुदायं योवयवो नव्यभिचरति तदर्थमवयवस्य टित्वमित्यनेना — भिप्रायेणोक्तं कुरुचरशब्दादिति। नतु कृद्ग्रहणपरिभाषाश्रयणेन नहि टिदिति कृत एव ग्रहणम्। बहुधीवरीति। वनोरचेत्यत्र वन्नन्तस्य प्रातिपदिकस्य ग्रहणादेव तदन्तविधिर्न स्यादिति भावः। उपसंख्यानादत्र सिद्धिं सत्वा

कुरुचरशब्दात्प्रत्ययो विधीयते। तत्र कः प्रसङ्गो यद्बहुकुरुचरशब्दात्स्यात्। नैव प्राप्नोति। नार्थः प्रतिषेधेन। तदन्तविधिना प्राप्नोति। अतउत्तरं पठति। अनुपसर्जनग्रहणमनर्थकं प्रातिपदिकेन तदन्तविधिप्रतिषेधात्। अनुपसर्जनग्रहणमनर्थकम्। किं कारणम्। प्रातिपदिकेन तदन्तविधिप्रतिषेधात्। ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते। ज्ञापकं तु पूर्वत्र तदन्ताप्रतिषेधस्य। एवं तर्हि ज्ञापयत्याचार्यः। पूर्वत्र तदन्तविधिप्रतिषेधो न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। भवती अतिभवती। महती। अतिमहतीत्यत्र तदन्तविधिः सिद्धो भवति। नैतदस्ति प्रयोजनम्। उक्तमेतत्। वर्णोप्युगित्। प्रत्ययोप्युगित्। प्रातिपदिकमप्युगिदिति। इदं तर्हि। बहुधीवरी। बहुपीवरीति। एतदपि नास्ति प्रयोजनम्। अत्राप्युक्तम्। रविधाने बहुव्रीहेरुपसंख्यानं प्रतिषिद्धत्वादिति। इदं तर्हि। अतिधीवरी। अतिपीवरी। पूर्वसूत्रनिर्देशो वा पिशलमधीत इति। पूर्वसूत्रनिर्देशो वा पुनरयं द्रष्टव्यः ॥

ह। एतदपीति। अतिधीवरीति। धीवानमतिक्रान्तेति तत्पुरुषः। नन्वमहत्पूर्वेत्यनेनैव ज्ञापितस्तदन्तविधिः। तत्राह नार्थोनेन ज्ञापकेनेत्याह। पूर्वसूत्रनिर्देश इति। वाशब्दस्तर्ह्यर्थे। अथवा पूर्वं तदन्तविधेर्ज्ञापितत्वादुपसर्जनेनापि तदन्तविधिः स्यादिति प्रयोजनसमुच्चयार्थो वा शब्दः। पूर्वसूत्रशब्देन पूर्वाचार्यकृतं व्याकरणमुच्यते। आपिशलिना प्रोक्तमिती अञ्चेत्यण्। ततोध्येत्र्यां तदधीत इत्यण्। तस्य प्रोक्ताल्लुगिति लुक्। प्रोक्तप्रत्ययस्याणोऽनुपसर्जनत्वाद्ङीन्न भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अणन्तमिति। प्रत्ययेलुप्ते प्रकृतेरेवतदर्थाभिधानादितिभावः। अणेवेति। अत्रप्रोक्तार्थस्योपसर्जनत्वादर्थद्वारेणाण
प्रत्ययउपसर्जनमितिभावः। यस्त्वध्येत्र्यांप्रत्ययउत्पन्नस्तस्यलुप्तत्वात्तदाश्रयोङीन्नभवति। प्रत्ययलक्षणेनापिनभ
वत्यण्योऽकारइतिविज्ञानात्। अतिप्रसङ्गइति। तेनतेभ्योपिप्रतिषेधःप्राप्नोतीत्यर्थः। अवन्तीति। अवन्तेरपत्यंस्त्री। वृ
द्धेत्कोसलाजादाञ्ञ्यङ्। तस्यस्त्रियामवन्तिकुन्तिकुरुभ्यश्चेतिलुक्। गान्धारीति। गान्धारेरपत्यंस्त्री। साल्वेयगान्धारिभ्यां
चेत्यञ्। तस्यातश्चेतिलुक्। अत्रप्रत्ययार्थंप्रतिप्रकृत्यर्थस्योपसर्जनत्वादितोमनुष्यजातेरितिङीष्नप्राप्नोति। तस्य

पूर्वसूत्रेऽप्रधानस्योपसर्जनमितिसंज्ञाक्रियते   यावद्ब्रूयात्प्रधानाऽदुत्पत्तव्यमप्रधानान्नेति। तावद
नुपसर्जनादिति। किंप्रयोजनम्। आपिशलमधीतेब्राह्मणीआपिशलाब्राह्मणी। अणन्तादीकारोमाभूदि
ति। अथानुपसर्जनादित्युच्यमानेकस्मादेवात्रनभवति। अणन्तंह्येतदनुपसर्जनम्। नानुपसर्जनग्रह
णेनाणन्तंविशेष्यते। अणन्तादनुपसर्जनादिति। किंतर्हि। अणेवविशेष्यते। अण्यअनुपसर्जनमिति।
जातिशब्देभ्यस्त्वतिप्रसङ्गः॥ जातिशब्देभ्यस्त्वतिप्रसङ्गोभवति। अवन्ती। कुन्ती। गान्धारी। सिद्धंतुजा
तेरनुपसर्जनत्वात्। सिद्धमेतत्। कथम्। अनुसर्जनादित्युच्यते। नचजातिरुपसर्जनम्। एतदपिना
स्तिप्रयोजनम्। स्त्रियामितिवर्तते। तेनाणंविशेषयिष्यामः। स्त्रियांयोऽण्विहितइति। एवमपिकाशकृ
त्स्निनाप्रोक्तामीमांसाकाशकृत्स्नीकाशकृत्स्नीमधीतेकाशकृत्स्नब्राह्मणी। अत्रप्राप्नोति। नैषदोषः। अ
ध्येत्र्यामभिधेयायामणईकारेणभवितव्यम्। यश्चात्राध्येत्र्यामभिधेयायामण्। लुप्तःसः। यश्च श्रू
यते। उत्पन्नस्तस्मादीकारइतिकृत्वापुनर्नभविष्यति ॥

तुदासीत्यादिरवकाशः। सिद्धंत्विति। प्रत्ययेलुप्तेप्रकृतिरेवापत्यलक्षणांजातिमाह। साचानुपसर्जनमित्यर्थः।
एतदपीति। यदुक्तंपूर्वसूत्रनिर्देशोवेतितद्भाष्यकारःप्रत्याचष्टे। स्त्रियांयोऽणिति। आपिशलिशब्दात्तुयःप्रोक्तो
णप्रत्ययःसस्त्रियांनविहितः। उत्पन्नइति। सोपिलुक्तद्धितलुकीतिलुप्तः। पुनर्नेति। सकृत्प्रवृत्तौशास्त्रस्यचरिता
र्थत्वात्पुनःप्रवृत्त्यभावः। अकारस्यैवचाध्येत्र्यांस्त्रियांवृत्त्याटाब्भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंतर्हीति।प्रधानेनतदन्तविधेर्ज्ञापनार्थमित्यर्थः।नन्वमहत्पूर्वेतिज्ञापितोसौ।एवंतर्हिज्ञापकाद्यथाप्रधानेनभवति
एवमुपसर्जनेनापिस्यादितिसर्वथायंयोगःकर्तव्यः।भाष्यकारेणतुसूत्रमेवेदंज्ञापनायाश्रितंगणपठितप्रतिषेधान
पेक्षया।तदपेक्षयातुसर्वादिवार्तिकेतुभाष्यमनुसर्जनादित्ययंयोगःप्रत्याख्यायतइत्यादि । एवंतर्हीति।कु
म्भस्यकारीशब्देनोपपदलक्षणःसमासःकरिष्यते।स्त्रीभ्योढगित्यत्रचङ्याप्प्रातिपदिकादितित्रितयाधिकारात्स्त्री
प्रत्ययान्तात्समासप्रातिपदिकाड्ढग्विधास्यते।समासमन्तरेणस्त्रीप्रत्ययान्तस्यप्रातिपदिकस्यासंभवात्समासःस्त्रीप्र
त्ययान्तोगृह्यते।ङ्याबन्तेभ्यस्सुसुपर्ण्यादिभ्योङ्याब्ग्रहणानुवृत्त्याभविष्यतीतिभावः।अवयवादिति।अत्रचोदयन्ति।
कृत्तद्धितसमासाश्चेत्यत्रकृद्ग्रहणपरिभाषयाकुम्भकारशब्दस्यप्रातिपदिकत्वात्ततएवङीब्भविष्यतीति।तदयु

इदंतर्हिप्रयोजनम्।प्रधानेनतदन्तविधिर्यथास्यात्।कुम्भकारी।नगरकारी।अत्रहिप्रत्ययग्रहणे
यस्मात्सतदादेर्ग्रहणंभवतीति।अवयवादुत्पत्तिःप्राप्नोति।कृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणंभव
तीतिसंघातादुत्पत्तिर्भविष्यति।कृद्ग्रहणइत्युच्यते।नचैतत्कृद्ग्रहणम्।कृदकृद्ग्रहणमेतत्।कृद
प्ययमण्।तद्धितोपि।एवंतर्हिईकारान्तेनसमासोभविष्यति।यद्येवंलभ्येतकृतंस्यात्।तत्तुनलभ्य
ते।किंकारणम्।अत्रहिगतिकारकोपपदानांकृद्भिःसहसमासोभवतीतिसमासएवतावद्भवति।समा
सेचकृते।अवयवादुत्पत्तिःप्राप्नोति ॥

क्तम्।अत्रास्याःपरिभाषायाअनुपस्थानस्यपुंयोगसूत्रेप्रतिपादनात्।नन्वेवमपिकारशब्दाद्ङीपिविहितेकुम्भकारीशब्दा
देवटाब्भविष्यति।स्त्रीप्रत्ययग्रहणेतदादिनियमाभावात्।तथाचपरमकारीषगन्धीपुत्रइत्यत्रसंप्रसारणंभवति।एवंतर्हि
तदादिनियमाभावादनियमःप्रसज्येत।तथाचकदाचित्कारीशब्दात्प्रत्ययःस्यात्।कदाचित्कुम्भकारीशब्दात्।यदातुकुम्भ
कारीशब्दाद्ङीब्विधीयतेतदाकुम्भकारीशब्दएवस्त्रीप्रत्ययान्तोभवतिनतुकारीशब्दइतिततःप्रत्ययोनभवति।ननुकदा
चिन्नियमाभावात्कारीशब्दोपिस्त्रीप्रत्ययान्तोभवतीति।ततोपिढक्प्रसङ्गः।नैषदोषः।नियमप्रतिषेधेनाधिकस्यतदन्त
स्यकार्येविधीयतेनतुन्यूनस्य।अथवा।स्त्रीप्रत्ययेतदादिनियमाभावमनाश्रित्यकुम्भकारीतिप्रयोजनमुक्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुपर्णीति। शोभनानि पर्णान्यस्या इति बहुव्रीहिः। तत्र पर्णशब्दस्योपसर्जनत्वाद्ङीष् न प्राप्नोति। न चेति। सुपर्णशब्दो जातिवाचि प्रातिपदिकं तच्चानुपसर्जनम्। बहुकुक्कुटा नगरीत्यत्र तु जातिवाचिनः कुक्कुटशब्दस्योपसर्जनत्वात्समासस्याजातिवाचित्वाद्ङीषोऽभावः। जातेरिति। जातेरित्यनुवर्तमाने पाककर्णपर्णेत्यनेनेत्यर्थः। बहुव्रीहिरिति। नास्त्युपसर्जनमस्मिन्नित्यनुपसर्जनमित्याश्रीयमाणे पर्णशब्दस्योपसर्जनत्वाद्ङीन्न स्यात्। तत्पुरुषे तु दोषा

अवयवादुत्पत्तौ सत्यां को दोषः। कौम्भकारेयो न सिध्यति। अवयवस्य वृद्धिस्वरौ स्याताम्। तस्मादनुपसर्जनाधिकारः। अनुपसर्जनाधिकारे जातेर्ङीष् विधाने सुपर्ण्या उपसंख्यानम्। अनुपसर्जनाधिकारे जातेर्ङीष् विधाने सुपर्ण्या उपसंख्यानं कर्तव्यम्। सुपर्णी। न वा समासस्यानुपसर्जनत्वाज्जातिवाचकत्वाच्च शब्दस्य सामान्येन ङीष् विधानम्। न वा एष दोषः। किं कारणम्। समासस्यानुपसर्जनत्वात्। समासोऽत्रानुपसर्जनम्। स च जातिवाचकः। समासस्यानुपसर्जनत्वात्तस्य जातिवाचकत्वाच्छब्दस्य सामान्येन ङीष् भविष्यति जातेरस्त्रीविषयादयोपधादिति। कथं कृत्वा चोदितम्। कथं कृत्वा परिहारः। बहुव्रीहिरिति कृत्वा चोदितम्। तत्पुरुष इति कृत्वा परिहारः॥ इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थाध्यायस्य प्रथमे पादे प्रथममाह्निकम्॥ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः॥ ढग्रहणे सानुबन्धकस्योपसंख्यानम्। ढग्रहणे सानुबन्धकस्योपसंख्यानं कर्तव्यम्। कारिकेयी हारिकेयी। किं पुनः कारणं न सिध्यति। अननुबन्धकग्रहणे हि न सानुबन्धकस्य। अननुबन्धकग्रहणे हि न सानुबन्धकस्य ग्रहणं भवतीत्येषा परिभाषा कर्तव्या ॥

भावः। समासस्योपसर्जनत्वाभावात्॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे चतुर्थाध्यायप्रथमपादे प्रथममाह्निकम्॥ टिड्ढाणञ्॥ तव्यग्रहणमिति। पूरणगुणेति तव्येन समासप्रतिषेध उच्यमानस्तव्यता न भवतीति ब्राह्मणकर्तव्यमिति समासो भवत्येव तत्र कृत्स्वरेणान्तस्वरितं भवति। तव्येन तु समासे कृत्स्वरेण तशब्दाकार उदात्तः स्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिव्ग्रहणेइति। तेनाक्षद्युरितिदिवऔदितिनभवति। अक्षद्यूभ्यामितिदिवउदितिनभवति। अन्यथाऊठिकृतेए
कदेशविकृतस्यानन्यत्वाद्दौत्वोत्वेस्याताम्। परिभाषायांतुसत्यांप्रातिपदिकस्यस्वर्गान्तरिक्षवाचिनोदिव्शब्दस्यग्र
हणम्। प्रसङ्गेनपरिभाषान्तरप्रतिपादनायाह। ननुचेयमिति। सएवानुबन्धोयस्येत्यर्थः। उपात्तानुबन्धव्यतिरि
क्तानुबन्धयुक्तस्त्वतदनुबन्धकः। यद्ग्रहणइति। यतोनावद्यादावित्यर्थः। अङ्ग्रहणइति। ऋदृशोङिगुणइत्य
त्रचङोग्रहणाभावादङि विधीयमानेश्वयतेरद्यत्वंचङि नभवत्यशिश्वियदिति। ङ्यङ्यावितिः यस्येतिलोपेनवा

कान्येतस्याः परिभाषायाः प्रयोजनानि। तव्यग्रहणेतव्यद्ग्रहणंमाभूत्। दिव्ग्रहणेदिवुग्रहणंमा
भूत्। ननुचेयमपिकर्तव्या तदनुबन्धकग्रहणे अतदनुबन्धकग्रहणंनेति। कान्येतस्याः परिभाषायाः
प्रयोजनानि। यद्ग्रहणेण्यद्ग्रहणंमाभूत्। अङ्ग्रहणेचङ्ग्रहणंमाभूत्। अजग्रहणेणज्ग्रहणंमाभू
त्। तेद्वेएतेपरिभाषेकर्तव्ये। नकर्तव्ये। आचार्यप्रवृत्तिर्ज्ञापयतिभवतएतेपरिभाषेइति। यदयंवा
मदेवाड्ड्यड्यावितिययतोडितौकरोति। तत्तर्ह्युपसंख्यानंकर्तव्यम्। नकर्तव्यम्। अननुबन्धको
ढशब्दःस्त्रियांनास्तीतिकृत्वासानुबन्धकस्यग्रहणंविज्ञास्यते। ननुचायमस्तिशिलायाढइति। नैष
स्त्रियांवर्तते। अयंतर्हिसभायायः ढश्छन्दसीति। एषोपिनस्त्रियांवर्तते। किंकारणम्। तत्रसाधुरिति
वर्तते। कथंचस्त्रीनामसभायांसाध्वीस्यात् ॥

मदेव्यमितिरूपेसिद्धेडित्करणंययतोश्चातदर्थइत्यत्रड्यड्यतोर्ग्रहणनिवारणार्थम्। एवंचैतद्डित्वस्यप्रयोजनंभ
वतियद्येतेपरिभाषेभवतस्तेनावामदेव्यमित्यत्रान्तोदात्तत्वंनभवतिअपितव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्व
म्। नैषस्त्रियामिति। शिलेवशिलेयमितिनपुंसकलिङ्गएवशिलेयशब्दःस्वभावात्। कथंस्त्रीनामेति। यत्र सभायांवि
दुषामेवपुरुषाणांसाधुत्वाधिकारादितिभावः। ननुसभायांसाधुरियंब्राह्मणपङ्क्तिःपरिषद्वेतिसंभवतिस्त्रियाःसभा
यांसाधुत्वमेवंतर्हिच्छन्दसिसभेयशब्दस्यैवंविधायांस्त्रियांप्रयोगाभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अञ्ग्रहणमिति। शार्ङ्गरवाद्यञो ङीनित्यनेनाजन्तान्ङीन्विधानादन्नाजन्तान्ङीन्विधानमनर्थकम्। स्वरे विशेषाभावात्। अजन्तस्याद्युदात्तत्वाद् ङीपि ङीनि वाद्युदात्तस्यैवावस्थानात्। औत्सीति। उत्से भवेति भावादावर्थे उत्सादिभ्योऽञित्यञ्विधाने जातिवाचित्वाभावः। बैदस्य भगिनीति। अनेन जातिवाचित्वं दर्शयति। या हि बैदस्य भगिनी सा बिदस्यापत्यमिति तस्यां जातिनिमित्त एव बैदशब्दः प्रवर्तते न पुंयोगनिमित्तः। परत्वादिति। परत्वग्रहणेन बाधकत्वं लक्ष्यते तदपवादत्वादित्

अञ्ग्रहणमनर्थकं तदन्ताद्धि ङीन्विधानम्। अञ्ग्रहणमनर्थकम्। किं कारणम्। तदन्ताद्धि ङीन्विधानम्। तदन्ताद्ध्यजन्ताद् ङीन्विधीयते। शार्ङ्गरवाद्यञो ङीनिति। न चास्ति विशेषः। अजन्ताद् ङीपो वा ङीनो वा। तदेव रूपं स एव स्वरः। नवा जात्यधिकारात्। नवानर्थकम्। किं कारणम्। जात्यधिकारात्। जातेरिति तत्रानुवर्तते। अजात्यर्थोऽयमारम्भः। औदपानी। औत्सीति। तत्रावश्यं जातिग्रहणमनुवर्त्यम्। अनधिकारे हि पुंयोगादाख्यायां ङीन्प्रसङ्गः। अननुवर्तमाने हि जातिग्रहणे पुंयोगादाख्यायां ङीन्प्रसज्येत। बैदस्य स्त्री बैदीति। यदि तर्ह्यस्य निबन्धनमस्ति इदमेव वक्तव्यम्। तन्न वक्तव्यम्। तदप्यवश्यं वक्तव्यम्। अनुच्यमाने हि तस्मिन् बैदस्य भगिनी बैदीति। परत्वाज्जातिलक्षणो ङीष् ङीपं बाधेत। ङीनि पुनः सति परत्वाद् ङीन् ङीषं बाधते॥ ख्युन उपसंख्यानम्॥ ख्युन उपसंख्यानं कर्तव्यम्। आढ्यंकरणी। सुभगंकरणी। अस्त्यत्यमिदमुच्यते ख्युन इति। नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्। नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानं कर्तव्यम्। नञ्। स्त्रैणी। स्नञ्। पौंस्नी। ईकक्। शाक्तीकी याष्टीकी। ख्युन्। आढ्यंकरणी। सुभगंकरणी। तरुण। तलुन। तरुणी। तलुनी॥ यञश्च॥ आपत्यग्रहणं द्वीपाद्यञः प्रतिषेधार्थम्। आपत्यग्रहणं कर्तव्यम्। द्वीपाद्यञः प्रतिषेधार्थम्। इह माभूत्। द्वैप्येति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नैवं विज्ञायते ॥

मुक्तं भवति। ख्युन इति सूत्रे ख्युनः पाठोऽनार्षः। नञ्स्नञीति। तरुणतलुनशब्दयोरवयोर्थे ग्रहणं तरुणी सुरेति। प्राणिधर्मो हि वयः। गौरादिषु तरुणतलुनशब्दयोः पाठात् ङीषपि भवति। स्वरे विशेषः। अथवा। वयोवाचिभ्यामपि गौरादिपाठात्परत्वान्ङीषेव स्यादिति वयोवचनावपि तरुणतलुनशब्दावुपसंख्यानं प्रयोजतः तत्र सामर्थ्यान्ङीन्ङीषोर्विकल्पः॥ यञश्च॥ आपत्यग्रहणमिति। अपत्ये भव आपत्यः। द्वैप्येति। द्वीपे भवेति भवादावर्थे द्वीपादनुसमुद्रं यञिति यञ्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कञ्कुरपोऽयञश्चेति। अयं संहितापाठ आर्षः। तत्र गर्गादिभ्यो यञित्यत्राकारप्रश्लेषाद् ञ्विधीयते स एव चेहानु
क्रियते। तत्राऽकारेऽनुनासिक इत्युक्तं ञक इह विशेषणार्थ इति यञो ग्रहणाभावाद् दृष्यतेति यञेवेव भवति। यस्कादिभ्यो
गोत्रे यञञोश्चेत्यत्राप्यकारप्रश्लेषः। अथवा गोत्रग्रहणानुवृत्त्या गर्गादिभ्यो यञित्यस्यैव लुप्ताकारस्य निर्देशः॥ प्रा
चां ष्फ॥ षित्करणसामर्थ्यादिति। धातोस्तपाठेः षित्वमङ्गि धौ चरितार्थमिति त्रपास्समेत्यादौ ङीष्न भवति। यथैव तर्ही
ति। यदि षिङ्गौरादिभ्यश्चेत्यत्र षित्प्रातिपदिकशब्दयोर्विशेषणविशेष्यभावो नास्ति। तदा समुच्चयेन भाव्यमिति

कञ्कुरपो यञश्चेति। कथं तर्हि। कञ्कुरपोऽयञश्चेति॥ प्राचां ष्फ तद्धितः॥ तद्धितवचनं किमर्थम्। त
द्धितवचनं षितः प्रातिपदिकादीकारार्थम्। तद्धितवचनं क्रियते। षितः प्रातिपदिकादीकारो यथा स्या
त्। नैतदस्ति प्रयोजनम्। षित्करणसामर्थ्यादेवात्रेकारो भविष्यति। यथैव तर्हि षित्करणसामर्थ्या द
प्रातिपदिकादीकारो भवति। एवं प्रातिपदिकादित्यस्यानुवर्तनसामर्थ्याद् षितोपि प्रातिपदिकादीका
रः स्यात्। अस्त्यन्यत् प्रातिपदिकादित्यनुवृत्तौ प्रयोजनम्। किम्। उत्तरार्थम्। अतइञ्। दाक्षिः। प्लाक्षिः।
सर्वत्र लोहितादिकतन्तेभ्यः॥ सर्वत्रग्रहणं किमर्थम्। प्राचामेव हि स्यात्। नैतदस्ति प्रयोजनम्। सिद्धं प्राचां पू
र्वेण। इदं तर्हि प्रयोजनम्। सर्वेषामेव यथा स्यात्। आवट्यायनी। चापं बाधित्वा ष्फो यथा स्यात्। लोहितादिषु शा
कल्यस्योपसंख्यानम्। लोहितादिषु शाकल्यस्योपसंख्यानं कर्तव्यम्। शाकल्यायनी। यदि पुनरयं शकलशब्दो
लोहितादिषु पठ्यते। नैवं शक्यम्। इह हि शाकल्यस्य छात्राः शाकला इति। कण्वादिभ्यो गोत्र इत्यण्न स्यात्॥

भावः। उत्तरार्थमिति। अत्र त्वनुवर्तनं नान्तरीयकम्। एतच्च गौरादिग्रहणाद्विज्ञायते। समुच्चये गौरादिभ्यो ङीषः
सिद्धत्वात्। अतइञिति। अन्यथाऽतइति समर्थविशेषणं स्यादिति भावः॥ सर्वत्र॥ सिद्धमिति। आरम्भसामर्थ्यात्।
प्राचामिति न संभंत्स्यत इति भावः। सर्वेषामिति। अपवादविषयाणामपीत्यर्थः। इहानुपयोगात् पूर्वसूत्रेण सर्व
त्रग्रहणं संबध्यते। तेनावट्यायनीति प्राचां ष्फः सिद्धो भवति। अन्यथा ह्यावट्याच्चेति चापुदीचां सावकाशः
परत्वात् प्राचां ष्फं बाधेत॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कण्वात्त्विति। गर्गादिषु कपिकतकुरुकतअनडुहकण्वशाकलइत्येवं गणसंनिवेशः। तत्रानडुह्कुरुकतशब्दावतः
स्थानादपकृष्यान्यत्र पठितव्यौ। शाकलशब्दस्तु कतकण्वशब्दयोर्मध्ये पठितव्यः। कतशाकलकण्वेति। तत्र कु
तस्यान्तः कतन्तइति तत्पुरुषेण शाकलशब्दउच्यते। शकन्ध्वादित्वान्निपातनाद्वा पररूपत्वम्। तथा कतोऽन्तो ये
षां तानि कतन्तानि। तत्र बहुव्रीहितत्पुरुषयोर्बहुव्रीहिः शिष्यते। स्वरभिन्नानां यस्योत्तरस्वरविधिः स शिष्यतइति वचनात्।
एवं कण्वादिभ्यो गोत्रे इत्यत्राप्येकशेषः। ष्फाणाविति। शाकल्यायनीति। स्त्रियामनेन ष्फः। शाकल्यस्य छात्राइति छापवादः

एवं तर्हि कण्वात्तु शकलः पूर्वः। कण्वशब्दात् शकलशब्दः पूर्वं पठितव्यः। कतादुत्तरः इष्यते। कतशब्दात्तु श
कलशब्दउत्तरः पठितव्यः। पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम्। पूर्वोत्तरौ गणौ तदन्तादी द्रष्टव्यौ। ये कण्वा
दयस्ते शकलादयः। ये कतपर्यन्तास्ते शकलपर्यन्ताः। किं प्रयोजनम्। ष्फाणौ तत्र प्रयोजनम्। ष्फाणौ
तत्र प्रयोजयतः। कण्वात्तु शकलः पूर्वः। कतादुत्तरं इष्यते। पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम्। कौ
रव्यमाण्डूकाभ्यां च॥ कौरव्यमाण्डूकयोरासुरेरुपसंख्यानम्। कौरव्यमाण्डूकयोरासुरेरुपसंख्या
नं कर्तव्यम्। आसुरायणी। छश्च॥ छश्चेति वक्तव्यम्। आसुरीयः कल्पः। वयसि प्रथमे॥ वयस्यचर
मइति वक्तव्यम्। इहापि यथा स्यात्। वधूटी। चिरण्टीति ॥

कण्वादिभ्यो गोत्रइति शैषिकोऽण्भवति॥ कौरव्या॥ आसुरायणीति। प्रांचां ष्फ तद्धितइत्यत्र सूत्रपाठापेक्षया तद्धित
ग्रहणं प्रत्याख्यातम्। आसुरिशब्दात्तु ष्फस्य तद्धितसंज्ञाप्रयोजनमिकारलोपः अकारान्तात्तु ष्फे सवर्णदीर्घत्वेनै
पि रूपं सिध्यति। आसुरीयइति। आसुरिणा प्रोक्तइति शेषेऽर्थे छापवादे इञश्चेत्यणि प्राप्ते छस्य प्रतिप्रसव इहैव ला
घवार्थं क्रियते। अन्यथा हि आसुरिग्रहणं कर्तव्यं स्यात्। वयसि॥ वयस्यचरमइति। ये त्रीणि वयांसीच्छन्ति कौमारयौ
वनस्थाविराणि। तन्मतेनेदं वक्तव्यम्। वधूटचिरण्टशब्दयोर्द्वितीयवयोवचनत्वात् यदा तु द्वे एव वयसि उपचया रामः
पचयलक्षणेइति दर्शनं तदैतन्न वक्तव्यम्। यौवनस्यापि प्रथमवयोरूपत्वात् ॥ १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तानशयेति। एते हि शब्दाः प्रथमवयोविषयाः प्रयुज्यन्त इति भावः। नैतानीति। नैतेषां वयः प्रवृत्तिनिमित्तमित्यर्थः। संबन्धादिति। विशेषणविशेष्यलक्षणादित्यर्थः। ततश्च बहिरङ्गत्वाद्वयः प्रतीतेर्ङीन्न भवति। कुमारीति। पुंसा सहासंप्रयोगोस्य प्रवृत्तिनिमित्तम्। न तु प्रथमं वयः। तथा च वृद्धकुमारीति प्रयोगः। पाणिगृहीती तु प्रथमवया अपि कुमारीशब्देन नोच्यत इति भावः। संबन्धादेवेति। औत्पत्तिकाद्वाच्यवाचकभावलक्षणात् संबन्धादित्यर्थः। कुमारशब्दस्य हि प्रथमं वयः प्रवृत्तिनिमित्तम्। साहचर्यात्तु पुंसा सहासंप्रयोगमुपादाय वृद्धायां गौणः कुमारीशब्दः प्रयुज्यते। संबन्धसंबन्धा

इह कस्मान्न भवति। उत्तानशया लोहितपादिका। द्विवर्षा। त्रिवर्षेति। नैतानि वयोवाचीनि। कथं तर्हि वयो गम्यते। संबन्धाद्वयो गम्यते। यदि तर्हि यत्र संबन्धाद्वयो गम्यते तत्र न प्राप्नोति। इहापि न प्राप्नोति। कुमारीति। अत्रापि संबन्धाद्वयो गम्यते। कोसौ संबन्धः। योसौ पुंसा सहासंप्रयोगः। संबन्धादेवात्र वयो गम्यते। इह पुनः संबन्धसंबन्धात्। इह तावत्। उत्तानशयेति। यदा कर्तृत्वं विशेषितं भवति ततउत्तरकालं वयो गम्यते। लोहितपादिकेति। यदा बहुव्रीह्यर्थो विशेषितस्ततउत्तरकालं वयो गम्यते। द्विवर्षा त्रिवर्षेति। यदा द्विगवर्थो विशेषितः। ततउत्तरकालं वयो गम्यते। यदि तर्हि यत्र संबन्धादेव वयो गम्यते तत्र भवितव्यम्। इहापि प्राप्नोति। कन्येति। निपातनादेतत्सिद्धम्। किं निपातनम्। कन्यायाः कनीन चेति॥ अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि॥ इमौ द्वौ प्रतिषेधावुच्येते। तत्रैकः शक्योवक्तुम्। कथम्। एवं वक्ष्यामि। परिमाणान्तात्तद्धितलुकि ङीब्भवतीति। तन्नियमार्थं भविष्यति ॥

दिति। कर्तृमात्रादेरभिधेयस्य शब्दसंबन्धस्य प्रमाणान्तरावगतेन विशेषणेन संबन्धादित्यर्थः। कर्तृत्वमिति। उत्तानशयेति। शेतिक्रियायाः कर्त्री शब्दार्थः। यदा तु प्रकरणादिवशात्प्रथमवयोविशिष्टा कर्त्री प्रतीयते। तदा प्रथमवयोविषयत्वं बहिरङ्गमित्यर्थः। लोहितपादिकेति। अत्राप्यन्यपदार्थमात्रं शब्दार्थः। विशेषप्रतिपत्तिः प्रकरणायत्ता। द्विवर्षेति। द्वे वर्षे भूतेति ठञो वर्षाल्लुक् चित्तवति नित्यमिति लुक्। अत्रापि परिमाणमात्रं शब्दार्थः। शालादावपि प्रयोगाद्वयः प्रतिपत्तिस्तु प्रमाणान्तरनिबन्धना। अपरिमाण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· परिमाणान्तादेवेति। तद्धितलुक्येवेति तु विपरीतनियमो न भवति। लक्ष्यानुसारित्वाल्लक्षणस्य। तेन तद्धितलुकि समाहा
२० रेच स्याद् द्वकीति ङीब् भवति। पञ्चभिरश्वैः क्रीता पञ्चाश्वेत्यादौ न भवति। बिस्तादीनां परिमाणवाचित्वात्प्रतिषेधो विधेयः
बहुव्रीहेः॥ ऊधसः इति। ऊधसोनङिति समासान्तप्रकरणे सूत्रं पठित्वा बहुव्रीहेरूधसो ङीष्प्रत्ययश्चेति वक्तव्यम्। तत्रालोन्त्य
स्येत्यन्त्यस्य नकारो ङीष्प्रत्ययश्च स्त्रियां भवतीत्यर्थो भवति। धनुषो नङिति समासान्तेषु पठितव्यमेवं च महोधाः पर्ज

परिमाणान्तादेव तद्धितलुकि नान्यत्र इति। नतोविस्ताचितकम्बल्येभ्यो नेति। तद्धितलुकीत्येव॥ बहु
व्रीहेरूधसो ङीष्॥ ऊधसो नकारो लिङ्गाधिकारे॥ ऊधसो नकारो लिङ्गाधिकारे वक्तव्यः। इह माभूत्।
महोधाः पर्जन्य इति। न वा समासान्ताधिकारे स्त्रीग्रहणात्। नवा लिङ्गाधिकारे नकारः कर्तव्यः। किं का
रणम्। समासान्ताधिकारे स्त्रीग्रहणात्। समासान्ताधिकार एव स्त्रीग्रहणं कर्तव्यम्। इतरथा हि कब्वि
धिः प्रसङ्गः। इतरथा हि कब्विधिः प्रसज्येत। कस्यां पुनरवस्थायां कप्प्राप्नोति। प्राग्ङीबुत्पत्तेः। प्राक्ता
वत्प्राप्नोति। किं कारणम्। न हि ङीब्विभाषा उत्पन्ने तर्हि ङीप्यपि प्राप्नोति। उत्पन्ने चापि न भवितव्यम्।
किं कारणम्। नद्यन्तानां यो बहुव्रीहिरित्येवं सः। नैष नद्यन्तानां बहुव्रीहिः। प्रागेव तर्हि प्राप्नोति। न
नु चोक्तम्। न हि ङीब्विभाषेति। यद्यपि न ङीब्विभाषा। कस्तु विभाषा। कपोऽवकाशः। अन्यो बहुव्रीहिः।
अयवकः अव्रीहिकः। ङीपोऽवकाशः। विभाषा कब् यदा न कप् सोऽवकाशः। कुण्डोध्नी। घटोध्नी। क
प्प्रसङ्गे उभयं प्राप्नोति। परत्वात्कप्स्यात्। तस्मात्सुष्ठूच्यते न वा समासान्ताधिकारे स्त्रीग्रहणा
दितरथा कब्विधिप्रसङ्ग इति ॥

न्यः। कुण्डोध्नी धेनुकमित्यनङ् भवति। न वेति समासान्तप्रकरण एवोधसोऽनङ् स्त्रियामिति वक्तव्यम्। तत्रैवावश्यं क
र्तव्यम्। कप्समासान्तनिवृत्त्यर्थमित्यर्थः। कस्यां पुनरिति। द्वावप्यत्र कपौ। नद्यीलक्षणो नित्यः। शेषलक्षणो विकल्पितः। तत
श्च तत्र कस्य प्रसङ्ग इति प्रश्नः। प्रागिति। शेषलक्षण इत्यर्थः। न हि ङीपीति। यद्यत्र कप्स्यान्ङीब्विधानमनर्थकं स्यादिति पमः
भावः। द्वयोस्तु विकल्पे सति परस्परपरिहारेण प्रवर्तनान्नास्ति ङीपोऽवकाश इत्यलम्। उत्पन्न इति। नदीलक्षण इत्यर्थः ॥ २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दामहाय॥ संख्यादेरिति। संख्याव्यययोर्द्वन्द्वनिर्देशादनुवृत्तिरलभ्येति भावः। चेतनावत इति। लोकव्यवहारे उत्क्रमणादौ चे
तनस्यैव कर्तृत्वेन प्रसिद्धत्वान्न हि घट उत्क्रामतीति प्रसिद्धिरिति भावः। अचेतनेष्वपीति। देशान्तरप्राप्तिरचेतनानामपि दृश्य
त इत्यर्थः। एकयोगेति। शब्दानुमानपक्षे यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञायते स एवानुवर्तते अर्थानुमानपक्षे द्वन्द्वार्थस्ये

दामहायनान्ताच्च॥ दामहायनान्तात्संख्यादेः। दामहायनान्तात्संख्यादेरिति वक्तव्यम्। इह माभूत्। उद्दामा
वडवेति। तत्पुरुषविज्ञानाद्धि सिद्धम्। बहुव्रीहेरिति वर्तते। तत्पुरुषश्चायमुत्क्रान्ता दाम्न उद्दामेति भवेत्सिद्धं य
दा तत्पुरुषः। यदा तु खलु बहुव्रीहिस्तदा न सिध्यति। उत्क्रान्तं दाम अस्या इति। ननु चेतनावत एतद्भवति उ
त्क्रमणं वाऽपक्रमणं वा। दाम चाचेतनम्। अचेतनेष्वपि चेतनवदुपचारो दृश्यते। तद्यथा। स्रस्तान्यस्या बन्ध
नानि। स्रंसन्ते चास्या बन्धनानीति। तत्र हि संख्यादेरिति वक्तव्यम्। न वक्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृ
तम्। संख्याव्ययादेर्ङीबिति। यदि तदनुवर्तते। अव्ययादेरपि प्राप्नोति। नैष दोषः। संख्यादेरित्यनुवर्तते। अ
व्ययादेरिति निवृत्तम्। कथं पुनरेकयोगनिर्दिष्टयोरेकदेशोऽनुवर्तते एकदेशो न। एकयोगनिर्दिष्टानामप्येक
देशानुवृत्तिर्भवति। तद्यथा। तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ पक्षात्तिरित्यत्र मूल इत्यनुव
र्तते। पाक इति निवृत्तम्। अथेह कथं भवितव्यम्। द्वौ हायनावस्याः शालाया द्विहायना त्रिहायनेति। हाय
नो वयसि स्मृतः। वयोवाचिनो हायनशब्दस्य ग्रहणम्। न चैष वयोवाची। अथ णत्वं कस्मान्न भवति। णत्वम
पि वयोवाचिन एव। केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च॥ मामकग्रहणं
किमर्थम्। नाणन्तादित्येवं सिद्धम्। नियमार्थोऽयमारम्भः। मामकशब्दात्संज्ञाछन्दसोरेव। क्व माभूत्।
मामिका बुद्धिरिति। रात्रेश्चाजसौ ॥ अजसादिष्विति वक्तव्यम्। इहापि यथा स्यात्। रात्रिं रात्रिं स्मरिष्य
न्तो रात्रिं रात्रिमजानन्तः। सर्वां रात्रिं सहोषित्वा पत्या एकान्तरात्रिकाम् ॥

कत्वादनुरविः स्यात्। हायन इति। वक्तव्यमेतदिति भावः। णत्वमपीति। त्रिचतुर्भ्यां हायनस्येति विहितम्। केवल॥ मा
मिकेति। युष्मदस्मदोरन्यतरस्यां खञ्चेत्यण्। तवकममकावेकवचने इति। ममकादेशः। टाप्। मामकनरकयोरुप
संख्यानमितीत्वम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तर्वत्॥ अन्तर्वदिति। अन्तर्वत्नी। गर्भिणी। पतिवत्नी। जीवद्भर्तृकेत्यर्थः। किंपुनरिति। अन्तर्वतीति। नुगभावएवो दाहार्यइतिमन्यते। नचात्रेति। अन्तःशब्दस्याधिकरणप्रधानत्वादितिभावः। वाचेति। मतुब्वत्वेतुनित्यंभवतः॥ पत्युर्नौ॥ इयमस्यपत्नीति। यज्ञसंयोगे इतिपतिशब्दस्यविशेषणंमन्यते। तेनयत्रयज्ञवाचिसमवधानेपतिशब्दःप्रयुज्यते

अन्तर्वत्पतिवतोर्नुक्॥ अन्तर्वत्पतिवदितिगर्भभर्तृसंयोगे॥ अन्तर्वत्पतिवदितिगर्भभर्तृयोगइतिवक्तव्यम्। इहमाभूत्। प्रथ—तेत्वयापतिमतीपृथिवीति। अथान्तःशब्दस्यागर्भसंयोगेकिंप्रत्युदाह्रियते। अन्तरस्यांशालायामस्तीति। किंपुनःकारणंवाक्यमेवोदाह्रियतेनपुनर्मतुप्। अस्तिसामानाधिकरण्ये मतुब्विधीयते। नचास्मिन्विषयेस्तिनासामानाधिकरण्यम्। इहापितर्हिनप्राप्नोति। अन्तर्वत्नीति। एवंतर्ह्यन्तर्वत्पतिवतोर्नुम्मतुब्वत्वेनिपातनात्। अन्तर्वदितिमतुब्निपात्यते। वत्वंसिद्धम्। पतिवदितिवत्वंनिपात्यतेमतुप्सिद्धः। किमविशेषेण। नेत्याह। गर्भिण्यांजीवत्पत्यांचएतस्मिन्विषये। वाच्छन्दसिनुग्भवेत्। वाछन्दसिनुग्वक्तव्यः। सान्तर्वतीदेवानुपैत्। सान्तर्वत्नीदेवानुपैत्। पतीवतीतरुणवत्सा। पतिवत्नीतरुणवत्सा। अन्तर्वत्पतिवतोर्नुम्मतुब्वत्वेनिपातनात्। गर्भिण्यांजीवपत्यांचवाच्छन्दसिनुग्भवेत्॥ पत्युर्नोयज्ञसंयोगे॥ यज्ञसंयोगइत्युच्यते। तत्रनेदंसिध्यति। इयमस्यपत्नी। किंतर्हिस्यात्। पत्नीसंयाजाइतियत्रयज्ञसंयोगः। नैषदोषः। पतिशब्दोयमैश्वर्यवाची। सर्वेणगृहस्थेनपञ्चमहायज्ञानिर्वर्त्याः। यच्चादःसायंप्रातर्होमंचरुपुरोडाशान्निर्वपतितस्यासावीष्टे। एवमपितुषजकस्यपत्नीनसिध्यति। उपमानात्सिद्धंपत्नीवपत्नी ॥

पत्नीसंयाजाइत्यादौतत्रैवनत्वेनभाव्यमितिभावः। पतिशब्दोयमिति। पतिशब्दार्थस्ययज्ञसंयोगइतिविशेषणम्। पत्याश्चदम्पत्योःसहाधिकाराद्यज्ञेकर्तृत्वात्तत्फलसंबन्धाद्यज्ञसंयोगः। तुषजकस्येति। त्रैवर्णिकानामेवसभार्याणांयज्ञेधिकारोनतुशूद्रस्य। उपमानादिति। अग्निसाक्षिपूर्वकपाणिग्रहणाश्रयादितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभाषा॥ सहशब्दोत्रविद्यमानवचनोविद्यमानपूर्वंसपूर्वंनतुसपुत्रआगतइत्यादिवत्तुल्ययोगेसहशब्दोनहिपूर्वस्यनकारादेशइष्यते। तत्रपतिशब्दविशेषणंसपूर्वग्रहणमितिमत्वाह। पत्युरिति। उपसर्जनसमासइति। सर्वोपसर्जनेबहुव्रीहावित्यर्थः। आशापतिरिति। आशायाः पतिरितिषष्ठीसमासः। प्रातिपदिकविशेषणत्वादिति। प्रातिपदिकंपतिशब्देनविशेष्यते। तदेवानुपसर्जनग्रहणेनसपूर्वग्रहणेनच। पूर्वशब्दश्चावयववाचीगृह्यतेनतुव्यवस्थावाची। शब्देऽवयवस्यप्रत्यासन्नत्वात्। सामर्थ्याच्चपतिशब्देनतदन्तविधिर्भवति। ग्रहणवतेतितदन्तविधिप्रतिषे

विभाषासपूर्वस्य॥ पत्युःसपूर्वादुपसर्जनसमासउपसंख्यानम्। पत्युःसपूर्वादुपसर्जनसमासउपसंख्यानंकर्तव्यम्। वृद्धपतिः। वृद्धपत्नी। स्थूलपतिः। स्थूलपत्नी। वचनाद्भविष्यति। अस्तिवचनेप्रयोजनम्। किम्। आशापतिः। आशापत्नी। सिद्धंतुपत्युःप्रातिपदिकविशेषणत्वात्। सिद्धमेतत्। कथम्। पत्युःप्रातिपदिकविशेषणत्वात्। नैवंविज्ञायते। अस्तियस्मात्पतिशब्दात्पूर्वः सोयंसपूर्वः। सपूर्वात्पतिशब्दादनुपसर्जनादिति। कथंतर्हि। अस्तिअस्मिन्प्रातिपदिकेपूर्वंतदिदंसपूर्वम्। सपूर्वात्प्रातिपदिकात्पत्यन्तादनुपसर्जनादिति॥ पूतक्रतोरैच॥ पूतक्रत्वादीनांपुंयोगप्रकरणेवचनम्। पूतक्रत्वादयः पुंयोगप्रकरणेवक्तव्याः। पूतक्रतोः स्त्रीपूतक्रतायी। ययाहिपूताः क्रतवःपूतक्रतुःसाभवति। लिङ्गसंनियोगेनसर्वत्रागमादेशानांवचनेलिङ्गलुकितल्लुतप्रसङ्गः। लिङ्गसंनियोगेनसर्वत्रागमादेशानांवचनेलिङ्गलुकितल्लुतंप्राप्नोति ॥

धबाधनात्॥ पूतक्र॥ पूतक्रत्वादीनामिति। त्रयएतेयोगाःङीप्सहिताःपुंयोगादाख्यायामित्यत्रानुवर्तयितव्याइत्युक्तंभवति। तेनयदापुंयोगात्स्त्रियांपूतक्रत्वादयोवर्तन्तेतदायंविधिर्नान्यदा। लिङ्गसंनियोगेनेति। लिङ्गार्थविहितःप्रत्ययोलिङ्गशब्देनोच्यते। यद्यपिस्त्रिप्रत्ययेनसहागमादेशानांविधानंतथापिविधानोत्तरकालंस्त्रीप्रत्ययेलुप्तेपितेषांश्रवणंप्रसज्येत। तन्निवृत्तौप्रमाणाभावात्। यथायमलकयोरेकविनाशेपिनापरस्यविनाशइतिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चेन्द्राण्य इति। तद्धितार्थे द्विगुः। सास्यदेवतेत्यण्। तस्य द्विगोर्लुगनपत्य इति लुक्। लुक्तद्धितलुकीति ङीपो लुक्। अत्रानुको निवृत्तिर्न प्राप्नोति। पञ्चाग्निरिति। पञ्चाग्नाय्यो देवता अस्येति। पूर्ववत्सर्वम्। अत्रैकारस्य निवृत्तिर्न प्राप्नोति। पञ्चभिरिति। आर्हीयष्ठक्। तस्याध्यर्द्धपूर्वेति लुक्। ततो ङीपो लुक्। अत्र रेफस्य निवृत्तेरप्रसङ्गः। पञ्चमेनेति। तावतिथं ग्रहणमिति लुग्वेत्यत्र तावतिथेन गृह्णातीति लुक्केत्युपसंख्यानात्कन्प्रत्ययो डट्च लुक्। सडट इति। एतेन मट्सहितस्य लुगित्यर्थः। षट्क इति। डटि परतः पूर्वभक्तः सुगागमो डटि निवृत्तेपि न निवर्तेत प्रत्यय

पञ्चाग्निः

पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः। दशाग्निः। किमुच्यते सर्वत्रेति। अन्यत्रापि नावश्यसिद्धैव। क्वान्यत्र। पञ्चाभिर्धीवरीभिः क्रीता पञ्चधीवा। दशधीवेति। लिङ्ग ग्रहणेन नार्थः सर्वत्रागमादेशानां लुकि तत्कृतप्रसङ्ग इत्येव। इदमपि सिद्धं भवति। पञ्चमेन गृह्णाति पञ्चकः। नैतदस्ति। मयड्यं परादिः सडटो ग्रहणेन ग्रहीष्यते। इदं तर्हि प्रयोजनं षष्ठेन गृह्णाति षट्क इति। सिद्धं त्वागमादेशानामङ्गतः स्त्रीप्रकरणवचनात्। सिद्धमेतत्। कथम्। आगमादेशा य इह स्त्रीप्रकरण उच्यन्ते ते ङ्गाधिकारे कर्त्तव्याः। स्त्रीप्रत्यय ग्रहणेन नार्थः। सिद्धं त्वागमादेशानामङ्गतो वचनादित्येव। इदमपि सिद्धं भवति षष्ठेन गृह्णाति षट्क इति। लिङ्ग लुकि वा प्रकृतिप्रत्यापत्तिवचनम्। अथवा लिङ्ग लुक्येव प्रकृतिप्रत्यापत्तिर्वक्तव्या। लिङ्ग ग्रहणेन नार्थः। लुकि वा प्रकृतिप्रत्यापत्तिवचनमित्येव। इदमपि सिद्धं भवति षट्केन गृह्णाति षट्क इति। किं पुनरत्र ज्यायः। लुकि प्रकृतिप्रत्यापत्तिवचनमित्येव ज्यायः ॥

लक्षणेनापि प्रसज्येत। ननु कनिपूर्वस्य पदत्वात्संयोगान्तस्य लोप इति शुको लोपो भवति। एवं तर्हि चतुर्थेन गृह्णाति चतुष्क इत्युदाहरणम्। अत्र हि रात्सस्येति नियमात्सुकः संयोगान्तलोप इति नास्ति। सिद्धं त्विति। स्त्रीप्रकरणे य आगमादेशास्ते ऽङ्गतो ऽङ्गाधिकारे वक्तव्या इत्यर्थः। तत्र स्त्रीप्रत्यये परतो ऽङ्गस्य विधीयमाना आगमादेशास्तत्र लुप्तेन लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधान्न भविष्यन्तीति भावः ॥ रामः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चपटुरिति। यणादेशस्यानङ्गत्वात्प्रत्ययलक्षणप्रतिषेधाभावः। यद्यपि यणादेशः प्रत्ययलक्षणो न भवति। तथापि स्त्रीप्रत्ययलुको बहिरङ्गत्वादसिद्धत्वाद्यणादेशोन्तरङ्गो न निवर्तेतेति। प्रत्यापत्तौ लिङ्गं सिध्यतीत्यर्थः। संनियोगशिष्टानामिति। लौकिकोयं न्यायः। एकैकस्मिन्प्रयोजने येषां सहाधिकारस्तत्रान्यतरनिवृत्तावितरनिवृत्तिः। लिङ्गमपि शास्त्रेऽस्ति बिल्वकादिभ्यश्छस्य लुगित्यत्र छस्य स्थानिनिर्देशस्तस्य हि प्रयोजनं छमात्रस्य लुग्यथा स्यात् कुको निवृत्तिर्मा भूदिति। यदि चैषा परिभाषा नाभविष्यत्तदा कुङ्न्यवर्त्स्यदिति किं तन्निर्देशेन। कथं पञ्चपटुरिति। न हि यणादेशः संनियोगशि

इदमपि सिद्धं भवति पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुः। दशपटुरिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। संनियोगशिष्टानामन्यतरापाय उभयोरप्यपायः। तद्यथा। देवदत्तयज्ञदत्ताभ्यामिदं कार्यं कर्तव्यम्। देवदत्तापाये यज्ञदत्तोपि न करोति। वर्णादनुदात्तात्तोपधात्तो नः॥ असितपलितयोः प्रतिषेधः। असितपलितयोः प्रतिषेधो वक्तव्यः। असिता। पलिता। छन्दसि क्नमेके॥ छन्दसि क्नमेके इच्छन्ति। असिक्न्यस्योषधे पलिक्नीरिद्धवतयो भवन्ति। वर्णान्ङीब्विधाने पिशङ्गादुपसंख्यानम् ॥

वर्णान्ङीब्विधाने पिशङ्गादुपसंख्यानं कर्तव्यम्। पिशङ्गी॥ जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु॥ नीलादोषधौ॥ नीलादोषधाविति वक्तव्यम्। नीली ओषधिः॥ प्राणिनि च॥ प्राणिनि चेति वक्तव्यम्। नीली गौः। नीली वडवा॥ वा संज्ञायाम्॥ वा संज्ञायामिति वक्तव्यम्। नीली नीला ॥

ष्टः। एवं तर्ह्यन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इत्यकृत एव यणादेशे लुकि सति निमित्ताभावाद्यण्न भवति। न च लुको बहिरङ्गत्वादसिद्धत्वम्। नाजानन्तर्य इत्यसिद्धत्वप्रतिषेधात्। इको यणचीत्यत्र हि अचोश्चानन्तर्यमाश्रितम्॥ वर्णा॥ छन्दसि क्नमिति। तस्य स्थान इति बोद्धव्यम्। अत्र केचित्। छन्दोग्रहणं प्रयोगदर्शनार्थमिच्छन्ति। तेन भाषायामपि क्नादेशो भवति। गतो गणस्तूर्णमसिक्नकानामिति। भाष्यकारेण चैतन्नोपन्यस्तमित्ययुक्तमित्याहुः। पिशङ्गादिति। उत्तरसूत्रेण ङीषि प्राप्ते ङीब्विधिः। स्वरे विशेषः। पिशङ्गशब्दो लघावन्ते द्वयोश्च बह्वषो गुरुरिति मध्योदात्तत्वादनुदात्तान्तः॥ जानपद॥ नीलादिति। सर्वस्मिन्नाच्छादने प्राप्ते इतीतिवचनम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वोतो॥ उतइतिवचनादुत्वनग्रहणाच्चादेङोर्नग्रहणम्। विशेषणस्यापितुगुणस्यग्रहणंप्राप्नोति। यथायस्यगुणस्या
हिभावादित्यत्र। ततश्चजात्यादिवचनादपिङीष्प्राप्नोति आखुरित्यादावितिप्रच्छति। कोगुणइति। सत्वइति। द्रव्यमाश्र
यतेततएवचद्रव्यान्निवर्ततेभिन्नजातीयेषुद्रव्येषुदृश्यतेयःसगुणः। एतेनजातेर्गुणत्वंनिवारितम्। साहिद्रव्येनिवि
शमानाद्रव्यंनकदाचिज्जहाति। नचभिन्नजातीयानिद्रव्याण्यभिनिविशते। यद्यपिगवाश्वादिषुप्राणित्वमस्तितथापिप्रा
णित्वेनतेषामेकजातीयत्वमेव। क्रियायास्तुपूर्वोक्तलक्षणयोगाद्गुणत्वंप्राप्नोति। सापिहिद्रव्येनिविशतेकदाचि
द्द्रव्यान्निवर्तते। निष्क्रियंहिद्रव्यंकदाचिद्भवतिकदाचित्सक्रियम्। भिन्नजातीयानिचद्रव्याण्याश्रयतीत्याह। आ
धेयइति। उत्पाद्योयथाघटादेःपाकजोरूपादिः। अक्रियाजोऽनुत्पाद्योयथाकाशादेर्महत्वादिः। क्रियातूत्पाद्यैवननि
त्येतितस्याद्वैविध्यत्वाभावाद्गुणत्वाभावः। एवंतुद्रव्यस्यापिगुणत्वंप्राप्नोति। अवयविद्रव्यमवयव द्र

वोतोगुणवचनात्॥ गुणवचनादित्युच्यते कोगुणोनाम। सत्वेनिविशतेपैति पृथग्जातिषुदृश्यते।
आधेयश्चाक्रियाजश्चसोऽसत्त्वप्रकृतिर्गुणः॥ अपरआह। उपैत्यन्यज्जहात्यन्यद्दृष्टोद्रव्यान्तरेष्वपि।
वाचकःसर्वलिङ्गानांद्रव्यादन्योगुणःस्मृतः ॥ नित्यत्वादवयविद्रव्यस्या

व्येषुनिविशतेऽसमवायिकारणसंयोगनिवृत्तौचविनाशात्ततोपैति भिन्नजातीयेषुचहस्तपादादिषुदृश्यते। द्वि
विधंतन्नित्यानित्यभेदेन। निरवयवस्यद्रव्यस्यात्मपरमाण्वादेर्नित्यत्वादित्याह। असत्त्वप्रकृतिरिति। अद्रव्यस्व
भावइत्यर्थः। अत्रपृथग्जातिष्वित्यसमासः। समासेहिजात्यन्ताच्छबंधुनीतिछः प्रसज्येत। तत्रव्यक्तिषुजात्याधा
रेषुदृश्यमानोजातिषुदृश्यतइत्युच्यते। अयमेवार्थःश्लोकान्तरेणोच्यते। उपैत्यन्यदिति। अन्यद्द्रव्यंशुक्लादिको
गुणआगच्छत्यन्यत्तुपरित्यजति भिन्नजातीयेषुद्रव्येषुदृष्टः। सर्वलिङ्गाश्रयगतलिङ्गग्राहित्वाद्वाचकःसर्वलिङ्गा
नाम्। शब्दधर्मस्यवाचकत्वस्यार्थे आरोपाद्वाचकइत्युच्यते। द्रव्यादन्यइति। यथोक्तलक्षणयुक्तत्वेपियस्य रामः
द्रव्यत्वंनास्तिसगुणइत्यर्थः ॥ २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्वीति। धान्येनिदित्यतोनिदितिवर्तमानेशृस्वृस्निहीतिवसुशब्दआद्युदात्तोव्युत्पादितः। तस्मान्ङीपिसतिईकारो
नुदात्तोभवति। ङीषितूदात्तःस्यात्। अन्तोदात्तात्तुङीम्ङीपोर्विशेषाभावःउदात्तयणोहल्पूर्वादितिङीपउदात्तत्व
विधानात्। पुंयोगा॥ पुंसायोगः पुंयोग...स्तस्माद्धेतोर्यत्प्रातिपदिकंस्त्रियांवर्तेततेतोङीष्भवति। आख्याग्रहणंगु
णभूतेनापिपुंसासंबध्यते। अन्येनसंबन्धासंभवात्। गणकादयोहिशब्दाःपुंयोगात्स्त्रियांवर्तमानानपुंयोगस्या
ख्याभवन्तिस्त्रियांचपुंयोगमन्तरेणनप्रवर्तन्तइतिस्त्रियाअपिनाख्याः। पुंयोगात्स्त्रियांवर्तमानानांस्त्रीप्रत्यास्त्व
त्वमव्यभिचारान्नविशेषणम्। पुंविशेषणस्यतुप्रयोजनंप्राजाताप्रसूतेत्यादौङीष्प्रवृत्तिः। प्रसूतादयोहिपुंयो

गुणवचनान्ङीबाद्युदात्तार्थः। गुणवचनाद्ङीब्वक्तव्यः। किंप्रयोजनम्। आद्युदात्तार्थः। आद्युदात्ताः
प्रयोजयन्ति। वस्वी। तन्वी॥ खरुसंयोगोपधप्रतिषेधश्च । खरुसंयो
गोपधानांप्रतिषेधोवक्तव्यः। खरुरियंब्राह्मणी। पाण्डुरियंब्राह्मणी। पुंयोगादाख्यायाम्॥ गोपालि
कादीनांप्रतिषेधः॥ गोपालिकादीनांप्रतिषेधोवक्तव्यः। गोपालिका। पशुपालिका। किंपुनरत्रोदा
हरणम्। प्रष्ठीप्रवरीति। कथंपुनरयंप्रष्ठशब्दोकारान्तःस्त्रियांवर्तते। तस्येदमित्यनेनाभिसंबन्धेन।
यथाह्यसौतत्कृतान्स्नानोद्वर्तनपरिषेका...ल्लभतेएवंप्रष्ठशब्दमपिलभते ॥

गात्स्त्रियांप्रवर्तन्तेपुमांसंतुनाचक्षते। गोपालिकादीनामिति। सिद्ध्येदितिवाक्यशेषः। किंपुनरिति। यदिप्र
ष्ठादिशब्दःपुंसिव्युत्पाद्यतेततःस्त्रीवृत्तिर्नस्यात्। अथतत्समर्थाचरणात्प्रस्थानादिक्रियांप्रतिकर्तृत्वमाश्रित्य
स्त्रियांव्युत्पाद्यतेतदान्तरङ्गत्वाट्टापिकृतेसुबुत्पत्तौसत्यांसमासेकृतेअकारान्तत्वाभावान्ङीष्नस्यादितिप्रश्नः।
तस्येदमित्यनेनेति। यथाराजामात्यौराजकार्याणिराजव्यपदेशंचलभतेतथाप्रष्ठभार्यापीत्यर्थः। स्नानशब्दः
करणसाधनइत्यपुनरुक्तःपरिषेकशब्दः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्धितलुग्वचनमिति। तस्येदमितिसंबन्धस्य भेदनिबन्धनत्वाद्भेदाश्रयतद्धितोत्पत्तौ सत्यां तस्य लुग्वक्तव्यः। लुकि च सति प्रकृतिरेव प्रष्ठशब्दस्तद्धितार्थं स्त्रियमभिधत्त इति प्रष्ठीति ङीष् सिद्ध्यति। नह्यन्तरेणेति। तद्धितस्य विकल्पेनोत्पत्तावपि पक्षे वाक्यमेव भवति प्रष्ठस्येयमिति। तत्र च प्रष्ठशब्दः पुंस्येव वर्त्तते न तु स्त्रियाम्। तस्मात् स्त्रीत्वविवक्षायां च्छेतात तद्धितलुग्विधेय इत्यर्थः। यदि पुनरिति। यथा पञ्चभिर्हलैः क्रीता पञ्चहली इति प्रतिविधानात्

यद्येवं पुंयोगादाख्यायां तद्धितलुग्वचनम्। पुंयोगादाख्यायां तद्धितस्य लुग्वक्तव्यः। तस्येदमिति प्राप्नोति। न तर्हीदानीमिदं भवति। प्राच्य इमाः प्राचर्य इमा इति भवति च। विभाषा लुग्वक्तव्यः। यदा लुक् तदा प्रष्ठी यदा न लुक् तदा प्राष्ठी। यद्येवं नार्थो लुका विभाषा तद्धितोत्पत्तिः। यदा तद्धितोत्पत्तिः तदा प्राष्ठी। यदा न तद्धितोत्पत्तिः तदा प्रष्ठी एवमपि लुग्वक्तव्यः। न ह्यन्तरेण तद्धितलुकं परार्थे शब्दो वर्त्तते। यदि पुनस्तस्यामेव प्रष्ठशब्दो वर्त्तते। कथं पुनस्तस्यामेवाप्रतिष्ठमानायां प्रष्ठशब्दो वर्त्तते। यथैव ह्यसावकुर्वती किंचित्पत्या भर्तृकृतान्बधबन्धनादिक्लेशान् लभते। एवं प्रष्ठशब्दमपि लभते। सुबन्तसमासवचनाद्वाकारान्तानुपपत्तिः। सुबन्तसमासवचनाद्वाकारान्तता नोपपद्यते। सुबन्तानां समासस्तत्रान्तरङ्गत्वाट्टाप्। टापुत्पन्ने समासः। स्त्रीशब्दः समस्येत। तत्र पुंयोगादाख्यायामकारान्तादिति ङीकारेण प्राप्नोति। सिद्धं तु स्त्रियाः पुंशब्देनाभिधानात्। सिद्धमेतत्। कथम्। स्त्रियाः पुंशब्देनाभिधानात्। स्त्री पुंशब्देनाकारान्तेनाभिधीयते। ननु चोक्तं पुंयोगादाख्यायां तद्धितलुग्वचनमिति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति। नातस्तद्धितोत्पत्तिर्भवतीति ॥

कर्तृत्वमेवं स्त्रिया अपि प्रस्थानादौ कर्तृत्वं स्यादेवेति भावः। कथमिति। साक्षात्तस्याः क्रियाया अकरणादकर्तृत्वं मन्यते। यथैवेति। साक्षात्तापमकुर्वत्यपि संविधात्रीत्वात्कर्तृत्वमापद्यते यथा स्वामिदासौ पचत इति स्वामिनः संविधातृत्वात्पक्तृत्वं दासस्य तु साक्षात् तथा स्त्रीपुंसोः प्रस्थातृत्वमित्यर्थः। तत्रान्तरङ्गत्वादिति। प्रातिपदिकं पूर्वं लिङ्गमभिदधाति पश्चात्संख्यामिति तन्निमित्तस्य सुपो बहिरङ्गत्वमिति भावः। सिद्धं त्विति। तस्येदमिति संबन्धात् तच्छब्दलाभं मन्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0, In Public Domain. Digitization by eGangotri

यद्यमिति। अणिहि ङीप्प्रसिद्धो न चाणन्ताङ्ङीपिङीषिवा विशेषः। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वात्। येनीकारादृ
ति। यथा भानोरियं रुद्वाच्छः। भानवीया। अत्र टाबाधनार्थमिदं वचनं स्यात्। न हि तद्धितान्तमिति। तद्धितान्तस्य शब्दस्य
प्रकृत्यर्थे पुंस्यवर्तनादिति भावः। तदेवमाख्याग्रहणं तस्येदमिति भेदविवक्षायामपि तद्धितोत्पत्तिमन्तरेण प्रष्ठशब्दस्य
स्त्रियां वृत्तित्वं साधुत्वं वक्तापयति। तेन न केवला प्रकृतिः प्रयोक्त — व्येति नियमो निवर्त्यत इत्युक्तम्। अस्मिंस्तु व्याख्याने त
द्धितस्य नित्यो बाधः प्राप्नोतीति। सिद्धं तु स्त्रियादित्येतत्पक्षान्तराश्रयेण व्याचष्टे। अथवेति। अनेनाभिसंबध्येनेति। एतत्पू
र्वकेण सोयमिति संबन्धेनेति भावः। इतरो भेदसंबन्ध एवानेनोक्त इति मत्वाह। ननु चेति। अयमपीति। अभेदाच्च भेदस्य

यद्ययं पुंयोगादाख्यायामिति ङीकारं शास्ति। नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्।
येनीकारास्तद्धितास्तदर्थमेतत्स्यात्। यत्तर्ह्याख्याग्रहणं करोति। न हि तद्धितान्तमाख्या भवति। अथवा पुन
रस्तु तस्येदमित्यनेनैवाभिसंबन्धे — न। ननु चोक्तं पुंयोगादाख्यायां तद्धितलुग्वचनमिति। नैष दोषः। नावश्य
मयमेवाभिसंबन्धो भवति तस्येदमिति। अयमप्यभिसंबन्धो भवति सोयमिति। कथं पुनरेतस्मिन्स इत्येत
द्भवति। चतुर्भिः प्रकारैः। अतस्मिन्स इत्येतद्भवति। तात्स्थ्यात् ताद्धर्म्यात् तत्सामीप्यात् तत्साहचर्यादिति। ता
त्स्थ्यात्तावत् मञ्चा हसन्ति गिरिर्दह्यते। ताद्धर्म्यात्। जटिनं यान्तं ब्रह्मदत्त इत्याह। ब्रह्मदत्ते यानि कार्याणि जटि
न्यपि तानि क्रियन्त इति। अतो जटी ब्रह्मदत्त इत्युच्यते। तत्सामीप्याद् गङ्गायां घोषः। कूपे गर्गकुलम् ॥

निवृत्तत्वात्तद्धितानुत्पत्तिः। भेदस्य तु विवक्षायां तद्धितो न निवार्यते। कथं पुनरिति। भिन्नानामभेदाभावादिति प्रश्नः। च
तुर्भिरिति। आरोप्यते ताद्रूप्यं न तु मुख्यमित्यर्थः। मञ्चा हसन्तीति। अत्र बालेषु मञ्चत्वारोपान्मञ्चशब्दप्रवृत्तिर्हसन्तीति प
दान्तरप्रयोगाद्विज्ञायते। जटिनमिति। ब्रह्मदत्तवद्धर्मलाभात्तद्रूपारोपः। सिंहो माणवको गौर्वाहीक इत्यादावपि ताद्ध
र्म्यात्ताद्रूप्यारोपात्तच्छब्दप्रवृत्तिः। तदुक्तं हरिणा। गोत्वानुषङ्गो वाहीके निमित्तात्कैश्चिदिष्यते। अर्थमात्रं विपर्यस्तं श
ब्दः स्वार्थे व्यवस्थित इति। इह तु साहचर्यात्स्त्रियां प्रष्ठत्वारोपः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मा॰कौ अथवेति। संविधात्रीत्वात् प्रस्थानेकर्तृत्वं स्त्रियाः पुरुषगताया वा प्रस्थानक्रियायास्तस्यामारोपादिति भावः। अभ्रविलि ४१२
२५ प्तीति। अभ्रशब्दस्य तृतीयान्तस्य विलिप्ताशब्देन कर्तृकरणे कृतेति समासः। ततः करणपूर्वादिति वर्तमाने क्तादल्पाख्या
यामिति ङीष् न प्राप्नोति। वचनसामर्थ्याट्टाबन्तादपि भविष्यतीति चेदतद्दत्यधिकारो बाध्येत। परिभाषा चान्यार्था वर्ण्यं क
र्तव्या। अथता वचनात् प्रातिपदिकाधिकारो बाध्येत तत्र तस्य वाक्ये ङीष् प्रसज्येत। अभ्रैर्विलिप्ताद्यौरिति। व्याघ्रीति। व्याङ् पू

तस्मादुच्चार्येत। कुन्तान्प्रवेशय पष्टीः प्रवेशयेति। अथवा पुनरस्तु तस्यामेव प्रष्ठशब्दः। ननु चोक्तं सुब
न्तसमासवचनाद्ब्रकारान्तानुपपत्तिरिति। नैष दोषः। गतिकारकोपपदानां कृद्भिः सह समासवचन
म्। गतिकारकोपपदानां कृद्भिः सह समासो भवतीत्येषा परिभाषा कर्तव्या। कानि पुनरस्याः परिभाष
याः प्रयोजनानि। प्रयोजनं क्तादल्पाख्यायाम्। अभ्रलिप्ती। सूर्पविलिप्ती। सुबन्तानां समासः। तत्रान्तर
ङ्गत्वात् टाप्। टापि कृते समासः। विलिप्ताशब्दः समस्येत तत्र क्तादल्पाख्यायाम कारान्तादिति ङीष् न प्रा
प्नोति॥ जातेर्ङीष्विधाने॥ जातेर्ङीष्विधाने प्रयोजनम्। व्याघ्री। कच्छपी। सुबन्तानां समासः। तत्रान्त
रङ्गत्वाट्टापि कृते समासः। घ्राशब्दः समस्येत। तत्र जातेरस्त्रीविषयादयोपधादकारान्तादिति ङीष् न प्रा
प्नोति। समासान्तस्य णत्वे समासान्तणत्वे प्रयोजनं नस्यति। प्रातिपदिकान्तस्य णत्वे। समासान्तग्रह
णमसमासान्तप्रतिषेधार्थमिति। तस्मिन्क्रियमाणे माषवापिणी। व्रीहिवापिणी सु
बन्तानां समासः। तत्रान्तरङ्गत्वान्नकारान्तत्वान्ङीप्। ङीपि कृते समासः। वापिनीशब्दः समस्येत। तत्र स
मासान्तस्येति णत्वं न प्राप्नोति। कृदन्तात्तद्धिते वृद्धिस्वरौ च। कृदन्तात्तद्धिते वृद्धिस्वरौ च प्रयोजनम्॥

वाज्जिघ्रते र्घ्रः संज्ञायां प्रतिषेध इति शस्य प्रतिषेधादातश्चोपसर्गे इति कप्रत्ययः। तत्र घ्रशब्दमात्रं जातौ न वर्तत इति टा
बेव स्यात्। ङीषस्तु सूकर्यादिरवकाशः। समासान्तग्रहणमिति। समासस्य प्रातिपदिकस्य योऽन्त्यो नकारस्तस्य णत्वमि
त्यर्थः। तत्र माषान्वपत्य भीक्ष्णमिति बहुलमाभीक्ष्ण्ये इति णिनौ कृते ऋन्नेभ्यो ङीप् इति ङीपि कृते सुबन्तेन यदि समास राम:
स्यात्तदा समासस्यान्त ईकारो न तु नकार इति णत्वं न स्यात्। माषवापिण इत्यादेरेव तु स्यात् ॥ २५

CC-0. In Public Domain. Digitization by eGangotri

सांकूटिनमिति। अभिविधौभावइनुणिती नुणप्रत्ययः। तत्र कूटिन्निस्येतस्माच्छब्दात्समासार्थाद्विभक्तिश्च प्राप्नोति। अणिनुण इत्यणप्रत्ययश्च तत्र स्वार्थिकत्वादन्तरङ्गत्वादणप्रत्ययः स्यात्। ततश्च कूटिन्निस्यैवाङ्गत्वादादिवृद्धिः स्यात्। प्राक् सुबुत्पत्तेः समासेन्तरङ्गत्वात् पूर्वं समासः। अणप्रत्ययो हि प्रातिपदिकविशेषापेक्षत्वाद्बहिरङ्गः। तत्र संकूटिन्नित्यस्मात्समासप्रातिपदिकादणप्रत्यये सतीष्टं सिध्यति। व्यावक्रोशीति। कर्मव्यतिहारे णच् स्त्रियामिति णच्। णचः स्त्रियामित्यञ्। सत्यामपीति। णच इनुण इति प्रत्ययग्रहणात् प्रत्ययग्रहणपरिभाषोपस्थानात् कूटिन्नित्यादौ चावयवात्तद्धितोत्पत्तिप्रसङ्ग इत्यर्थः। कृद्ग्रहण इति। अनया परिभाषया प्रत्ययग्रहणपरिभाषा बाध्यत इत्यर्थः

सांकूटिनम्। व्यावक्रोशी। अत्रावयवादुत्पत्तिः प्रसज्येत। गतिकारकोपपदानां कृद्भिः सह समासो भवतीति न दोषो भवति। सत्यामप्येतस्यां परिभाषायामवयवादुत्पत्तिः प्राप्नोति। किं कारणम्। प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति संघातादुत्पत्तिर्भविष्यति। यदि तर्ह्येषा परिभाषास्ति। नैतदस्याः परिभाषायाः प्रयोजनं भवति। एतयैव सिद्धम्। न सिध्यति। किं कारणम्। अप्रातिपदिकत्वात्। कृत्त्वात् प्रातिपदिकसंज्ञा भविष्यति। ननु चेदानीं प्रातिपदिकसंज्ञायामप्येतया परिभाषया शक्यमिहोपस्थातुम्। नेत्याह ॥

नैतदस्यादिति। गतिकारकोपपदानामित्यस्याः सांकूटिनमित्यादि न प्रयोजनम्। अकृत एव समासे कृद्ग्रहणपरिभाषया संघातात्तद्धितोत्पत्तिर्भविष्यतीति भावः। अप्रातिपदिकत्वादिति। णचः स्त्रियामञ् अणिनुण इत्यत्र प्रातिपदिकाधिकाराद् णजन्तादिनुणन्ताच्च प्रातिपदिकात्तद्धितो विधीयते। तत्र कृद्ग्रहणपरिभाषया णजिनुणन्तत्वं सिध्यति न तु प्रातिपदिकत्वम्। तत्र समासग्रहणेन नियमार्थेन संघातस्य प्रातिपदिकसंज्ञानिषेधात्संघातात्तद्धितो न स्यादित्यर्थः। ननु चेति। कृत्तद्धितसमासाश्चेत्यत्रापि कृद्ग्रहणे कृद्ग्रहणपरिभाषया संकूटिन्नित्यस्य विनापि प्राक्सुबुत्पत्तेः समासेन प्रातिपदिकसंज्ञा भविष्यति तन्निबन्धनश्च तद्धित इति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूलकेनोपदंशमिति। उपदंशस्तृतीयायामिति णमुल्। अत्र यदि सगतिकारकस्य कृदन्तस्य प्रातिपदिकसंज्ञा स्यात् तदा प्रातिपदिकान्तर्वर्तित्वात्सुब्लुक् प्रसज्येत। यद्येवं तृतीयाप्रभृतीन्यन्यतरस्यामिति विकल्पेन समासविधानस्य किं प्रयोजनमिति चेत्। दधि उपदंशं भुङ्क्ते इत्यत्र पक्षे प्रकृतिभावः। अन्यथाऽसत्यस्मिन्विकल्पविधाने अमैवाव्ययेनेति नित्यसमासः स्यात्। ततश्चास्मिन्नित्यसमासयोः शाकलप्रतिषेधो वक्तव्य इति प्रकृतिभावः प्रतिषिध्येत। प्रकारक इति। अत्र समुदायस्य प्रातिपदिकसंज्ञायां सत्यां सुबुत्पत्तौ पदव्यपदेशोऽस्ति न तूत्तरपदव्यपदेशस्तत्र समुदायस्य कृदन्तव्यपदेशेन तदन्तर्भावादुत्तेस्तस्मात्कृदन्तमुत्तरपदं न भवतीति कारकशब्दस्य प्रकृतिस्वरो न स्यात्। वचनं किमर्थमिति चेत्। उपपदार्थे अमावास्येत्यादौ। गतिकारकग्रहणं तूत्तरार्थं स्यात्। अथवा वचनस्याप्रातिपदिकत्वलक्षणमप्रामाण्यं स्यात्। दे

इह हि मूलकेनोपदंशं भुङ्क्ते इति वाक्येऽपि लुक् प्रसज्येत। स्वरे च दोषः स्यात्। प्रकारकः प्रकरणम्। गतिकारकोपपदात् कृदन्तमुत्तरपदं प्रकृतिस्वरं भवतीत्येष स्वरो न स्यात्। नैष दोषः। द्वे अत्र प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि। तत्रावयवस्य या प्रातिपदिकसंज्ञा तदाश्रयः स्वरो भविष्यति। इहापि तर्हि सांकूटिनं व्यावक्रोशीति द्वे अत्रापि प्रातिकसंज्ञे अवयवस्यापि समुदायस्यापि। तत्रावयवस्य या प्रातिपदिकसंज्ञा तदाश्रया अवयवादुत्पत्तिः प्राप्नोति। अवयवादुत्पत्तौ सत्यां को दोषः। कौम्भकारेयो न सिध्यति। अवयवस्य वृद्धिस्वरौ स्याताम् ॥

इति। गतिकारकपूर्वस्यापीत्यत्रापि शब्दात्कारकशब्दस्यापि प्रत्ययान्तस्य प्रातिपदिकसंज्ञा प्रकारकशब्दस्यापि समुदायस्येत्यर्थः। तदाश्रय इति। कारकशब्दस्य प्रातिपदिकसंज्ञायां सत्यां गतिकारकोपपदानामित्येतदनाश्रयणे सुप्सुपेति समासे कृतेऽपि ग्रहणात्कारकशब्दस्यापि कृदन्तत्वादुत्तरत्वात्स्वरो भविष्यतीत्यर्थः। कौम्भकारेय इति। एतच्चोपलक्षणम्। सांकूटिनं व्यावक्रोशीत्यपि न सिध्यति। समुदायावयवसंनिधाने द्विर्वचनवत्समुदाय एव प्रकृतित्वेनाश्रयिष्यत इति चेत्प्रकारके — दोषः स्यात्। समुदायस्य कृदन्तत्वे तदन्तर्भावादुत्तेस्तदाश्रयः स्वरो न स्यात्। किं च समुदाये द्विरुक्ते अवयवा अपि द्विरुक्ता भवन्तीति पृथग्द्विर्वचनं न प्रयुज्यते। इह तु समुदायादुत्पत्तौ तस्यैवाङ्गसंज्ञायां तन्निबन्धनानि कार्याणि प्रवर्तन्ते नावयवानामित्यवयवादपि प्रत्ययोत्पत्तिप्रसङ्गः ॥ रामः २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रकुम्भकारकशब्देयदिकारशब्दस्यापिप्रातिपदिकसंज्ञासमुदायस्यापिगतिकारकोपपदानामित्येतन्नाश्रीयतेतदा
कारशब्दात्प्रातिपदिकान्ङीपिकृतेकारीशब्दस्यस्त्रीप्रत्ययान्तत्वात्ततएवढकिसतितस्यैवादिवृद्धिःस्यात्।ननु
चानुपसर्जनादितिसूत्रंप्रधानेनतदन्तविध्यर्थमित्युक्तम्।तत्रकारशब्दान्तान्ङीब्भविष्यतितत्कथमुक्तंकौम्भकारेयो
नसिध्यतीति।नैषदोषः।गतिकारकोपपदानामित्येतद्वचनमत्रप्रदेशेआक्षिप्तम्।अस्मिंश्चासतिउपपदस्यसुबन्तेनस
हसमासेनभाव्यम्।तत्रान्तरङ्गत्वात्कारशब्दादेवङीपिसतिसुबुत्पत्तौसत्यांसमासःप्रसज्येत।ततश्चकारीशब्दादेवढक्
स्यात्।यद्यपिस्त्रीप्रत्ययेतदानियमोनास्तितथापिस्त्रीभ्योढगितिसमुदायाड्ढकंबाधित्वाह्यचइतिपरत्वादन्तरङ्ग
द्व्यचवाढक्प्रसज्येत।तस्मात्स्थितमेतत्कृत्तद्धितसमासाश्चेत्यत्रकृद्ग्रहणपरिभाषानोपतिष्ठते।यस्मादप्रत्य
यइत्यस्यप्रतिषेधस्यबाधनार्थंतत्रकृद्ग्रहणम्।परिभाषोपस्थानेतुसतिमूलकेनोपदंशंभुङ्क्तइतिवाक्यस्यापिस्या
त्।तथाचसमासग्रहणाद्योनियमःसबाध्येत।मध्येऽपवादादिन्यायाच्च।अप्रत्ययइत्ययंनिषेधःकृद्ग्रहणेनबाध्य

॥ तस्मात्प्रयोजनमेवैतदस्याःपरिभाषायाः।उभाभ्यांतुखलुसिध्यति॥

ते।ननुसमासग्रहणकृतोनियमः।तत्रपरत्वात्समासग्रहणेनगतिकारकपूर्वस्यापिकृदन्तस्यवाक्यस्यप्रातिपदिकसं
ज्ञायानिवर्तनात्।यस्मात्कृद्विहितस्तदादेरेवकृदन्तस्यप्रातिपदिकसंज्ञाऽवतिष्ठते।तस्मादिति।गतिकारकोपपदानामित्य
स्याःसांकूटिनमित्यादिप्रयोजनमित्यर्थः।उभाभ्यामिति ।सांकूटिनादिपरिभाषाद्वयेनसिध्यतिनकेवलयाकृद्ग्रहणपरि
भाषयेत्यर्थः।ननुचगतिकारकपूर्वस्यापीत्यपिग्रहणात्कूटिन्नित्यस्यापिइनुणन्तत्वादणप्राप्नोति।नैषदोषः।उभयोरपी
नुणन्तत्वेप्रातिपदिकत्वेचार्थविच्छेदाभावादवयवविच्छेदेप्रमाणाभावात्समुदायादेवोत्पत्तिर्भवति।असत्यांत्वेकतरस्यां
परिभाषायामवयवस्यैवेनुणन्तत्वात्प्रातिपदिकत्वाच्चततएवतद्धितोत्पत्तिःप्रसज्येत।गतिकारकोपपदात्कृदित्यत्रतुगति
कारकयोर्भेदेनोपादानान्निमित्तभावाद्यथासंभवंक्वचित्केवलस्यक्वचिद्गतिकारकपूर्वस्यगत्यादिस्यउत्तरस्यस्वरोभवति।
तदेवंगतिकारकोपपदानामितिवचनात्प्राक्सुबुत्पत्तेःसमासेप्रष्ठशब्दोऽकारान्तः।पुंयोगात्प्रस्थानसंज्ञासंस्कर्तृकप्र
स्थानक्रियायांसंविधात्रीत्वाद्वाकर्तृत्वात्स्त्रियांवर्ततेपुंसोवाचकश्चेतिप्रष्ठीत्युदाहरणंभवतीति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवदात्तायामिति। प्राक्सुबुत्पत्तेः समासइत्येतत्प्रसङ्गे नानेदमुक्तं वर्णादनुदात्तादित्यत्रतुवक्तव्यम्। अवदातशब्दो गौरवाचीतिमन्यते। विशुद्धवाचीति। वर्णान्तरव्यतिकीर्णेपिविशुद्धिमुपादायप्रयुज्यते। सूरीति। सूर्यतिष्येतियलोपः॥ इन्द्रवरुण॥ महद्धिममिति। महत्वयोगेहिमारण्ययोः स्त्रीत्वम्। यवानीति। जात्यन्तरमेवाभिधीयते। दोषस्तुयवत्वजातेरभावेतदाकारानुकृतिमात्रमित्याहुः। यवनानीति। तस्येदमित्यणोबाधकोङीष्। उपाध्यायेति। उपाध्यायस्याप्राप्तेमातुलस्यतुनित्यंप्राप्तेआनुग्विकल्प्य

अवदात्तायांतुङीप्प्रसङ्गः। अवदात्तायांङीप्प्राप्नोति। अवदात्ताब्राह्मणी। वर्णादनुदात्तात्तोपधात्तोनइतिनैषवर्णवाची। किंतर्हिविशुद्धवाची। आतश्चविशुद्धवाची। एवंह्याह। त्रीणियस्यावदातानिविद्यायोनिश्चकर्मच। एतच्छिवेविजानीहिब्राह्मणाग्र्यस्यलक्षणमिति॥ सूर्याद्देवतायांचाब्वक्तव्यः॥ सूर्यस्यस्त्रीसूर्या। देवतायामितिकिमर्थम्। सूरी। इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्॥ हिमारण्ययोर्महत्त्वे। हिमारण्ययोर्महत्त्वइतिवक्तव्यम्। महद्धिमंहिमानी। महदरण्यमरण्यानी॥ यवाद्दोषे॥ यवाद्दोषइतिवक्तव्यम्। दुष्टोयवोयवानी॥ यवनाल्लिप्याम्। यवनाल्लिप्यामितिवक्तव्यम्। यवनानीलिपिः। उपाध्यायमातुलाभ्यांवा॥ उपाध्यायमातुलाभ्यांवेतिवक्तव्यम्। उपाध्यायी। उपाध्यायानी। मातुली। मातुलानी॥ मुद्गलाच्छन्दसिलिच्च॥ मुद्गलाच्छन्दसिलिच्चेतिवक्तव्यम्। रथीरभून्मुद्गलानीगविष्टौ॥ आचार्यादणत्वंच॥ आचार्यादणत्वंचेतिवक्तव्यम्। आचार्यानी॥ अर्यक्षत्रियाभ्यांवा॥ अर्यक्षत्रियाभ्यांवेतिवक्तव्यम्। अर्या। अर्याणी। क्षत्रिया। क्षत्रियाणी॥ क्रीतात्करणपूर्वात्॥ करणपूर्वादितिकिमर्थम्। गवाक्रीता। अश्वेनक्रीता। करणपूर्वादित्युच्यमानेप्यत्रप्राप्नोति। एषोपिकरणपूर्वः क्रीतशब्दः। विभक्त्याव्यवहितत्वान्नभविष्यति। यदितर्हिविभक्तिरपिव्यवधायिकाभवष्यति ॥

ते। मुद्गलानीति। ङीषोलित्वादनुगाकारस्यलित्स्वरः। अर्येति। केचित्तुपुंयोगएवेच्छन्ति। अन्येतुस्वार्थएवेच्छन्ति। पुंयोगेतुअर्यीक्षत्रियीत्येवभवितव्यम्। क्रीतात्॥ करणपूर्वादितिकिमर्थमिति। क्रियमाणेपिकरणपूर्वग्रहणेपूर्वशब्दस्यव्यवस्थावाचित्वादनिष्टप्रसङ्ग इतिपृच्छति। विभक्त्येति। कर्मादीनांद्योतिकाविभक्तयइतिदर्शनेइदमुच्यते। अन्यथाविभक्तेः करणाभिधानेव्यवधानाभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनसाक्रीतेति। मनसः संज्ञायामिति तृतीयाया अलुक्। करणमस्मिन्निति पूर्वशब्दोऽवयववचनः समासप्रातिपदिकं चान्यपदार्थस्तेन वाक्येऽङीष् भविष्यतीत्यर्थः॥ बहुव्रीहेः॥ दन्तजातेति। वा जातइत्यन्तोदात्तत्वं वा भवति। पाणिगृहीतीति। यस्या अग्निसाक्षिपूर्वकं पाणिग्रहणं कृतं सा अभिधीयते। प्रबद्धविलूनीति। प्रबद्धं विलूनं यस्या इति बहुव्रीहिः। अपरे तु कर्मधारयं कुर्वन्ति। बहुकृतेति। बहूनि कृतान्यनयेति बहुव्रीहिः। बहोर्नञ्वदुत्तरपदभूम्नीत्यन्तोदात्तत्वम्। अकृता सुकृतेत्यत्र नञ्सुभ्यामिति। मासजातेत्यादौ जातिकालसुखादिभ्य इति। सुखादयः सुखादिभ्यः कर्तृवेदनायामिति क्यङर्थे ग

मनसाक्रीतीति न सिध्यति। एवं तर्हि नैवं विज्ञायते करणमस्मात् क्रीतशब्दात् पूर्वं सोऽयं करणपूर्वस्तस्मात् करणपूर्वात् क्रीतशब्दादनुपसर्जनादिति। कथं तर्हि। करणमस्मिन् प्रातिपदिके पूर्वं तदिदं करणपूर्वं तस्मात् करणपूर्वात् प्रातिपदिकात् क्रीतान्तादनुपसर्जनादिति॥ बहुव्रीहेश्चान्तोदात्तात्॥ अन्तोदात्ते जातप्रतिषेधः॥ अन्तोदात्ताज्जातस्य प्रतिषेधो वक्तव्यः। दन्तजाता। स्तनजाता॥ पाणिगृहीत्यादीनां विशेषे॥ पाणिगृहीत्यादीनां विशेष इति वक्तव्यम्। पाणिगृहीती भार्या चेत्। यस्या हि यथाकथंचित् पाणिर्गृह्यते पाणिगृहीता सा भवति॥ बहुलं तणि॥ बहुलं तणीति वक्तव्यम्। किमिदं तणीति। संज्ञाछन्दसोर्ग्रहणम्। किं प्रयोजनम्। प्रबद्धविलून्याद्यर्थम्। प्रबद्धविलूनी। प्रबद्धविलूना॥ अन्तोदात्तादबहुनञ्सुकालसुखादिपूर्वात्॥ अन्तोदात्तादबहुनञ्सुकालसुखादिपूर्वादिति वक्तव्यम्। बहु। बहुकृता। बहु। नञ्। अकृता। नञ्। सु। सुकृता। सु। काल। मासजाता। वत्सरजाता। काल। सुखादि। सुखयाता। दुःखयाता। क्षिप्रयाता। सुखादि॥ जातिपूर्वाद्वा॥ अथवा जातिपूर्वादिति वक्तव्यम्। स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्॥ स्वाङ्गाच्चोपसर्जनादित्युच्यते। किं स्वाङ्गं नाम। अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् ॥

णे पठिता गृह्यन्ते। अथवेति। बहुव्रीहावन्तोदात्तनिमित्तेष्वन्येषु निषिद्धेषु जातिरेवान्तोदात्तनिमित्तं कान्तस्यावशिष्यत इति जातिग्रहणमेवात्र कर्तव्यमित्यर्थः। स्वाङ्गाच्च॥ किं स्वाङ्गमिति। किं स्वमङ्गं स्वाङ्गमाहोस्विल्लक्षणान्तरप्रयुक्तमिति प्रश्नः। अद्रवमिति। द्रवतीति द्रवम्। ततोऽन्यदद्रवम्। मूर्तिः काठिन्यम्। अथवा सर्वगतद्रव्यपरिमाणं सा यस्यास्ति तन्मूर्तिमत्। अविकारजमिति। विकारो वातादिवैषम्यम्। तस्माद्यन्नजातमित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाप्राणिस्थमपिसंप्रतियत्पूर्वंप्राणिनिदृष्टंतदपिस्वाङ्गम्।यथारथ्यापतिताःकेशाः।तस्यचेदिति।अप्राणिनोपि मुखंस्वाङ्गंभवति।यदियथाप्राणिनातत्स्थंबद्धंतथैवाप्राणिनापि।अप्राणिनोपीति।तस्यचेत्तत्तथायुतमित्यस्यसामर्थ्या लभ्योऽयमध्याहारः।बहुलोहितेति।लोहितंरुधिरमुच्यते।नैतदस्तीति।ङीषभावार्थंलोहितस्यास्वाङ्गत्वप्रतिपादनंनो

अतत्स्थंतत्रदृष्टंचतस्यचेत्तत्तथायुतम्।अप्राणिनोपिस्वाङ्गम्।अद्रवमितिकिमर्थम्।बहुलोहिता।नैतदस्ति।बहुचो नेतिप्रतिषेधोभविष्यति।इदंतर्हि।बहुकफा।मूर्त्तिमदितिकिमर्थम्।बहुबुद्धिःबहुमनाः।नैतदस्ति।अतदितिवर्त्त ते।इदंतर्हि।बहुज्ञाना।प्राणिस्थमितिकिमर्थम्।श्लक्ष्णमुखाशाला।अविकारजमितिकिमर्थम्।बहुगण्डुःबहुपिट का।नैतदस्ति।इहतावद्बहुगण्डुरिति।अतदित्यनुवर्त्तते।बहुपिटकेतिबहुचोनेतिप्रतिषेधोभविष्यति।इदंतर्हि। बहुशोफा।अतत्स्थंतत्रदृष्टंच।अप्राणिस्थंप्राणिनिदृष्टंचस्वाङ्गसंज्ञंभवति।दीर्घकेशीरथ्या।तस्यचेत्तत्तथायुतम्। अप्राणिनोपिस्वाङ्गसंज्ञंभवतीति।दीर्घनासिकीअर्चा।तुङ्गनासिकीअर्चेति·अथोपसर्जनग्रहणंकिमर्थम्।इहमाभूत्। अशिखा।उपसर्जनग्रहणमनर्थकम्।बहुव्रीह्यधिकारात्।उपसर्जनग्रहणमनर्थकम्।किंकारणम्।बहुव्रीह्यधि कारात्।बहुव्रीहेरितिप्रकृतमनुवर्त्तते।क्वप्रकृतम्।बहुव्रीहेश्चान्तोदात्तादिति।बह्वजर्थंतर्हिउपसर्जनग्रह णंकर्तव्यम्।बह्वचोनेतिप्रतिषेधंवक्ष्यतितद्बह्वज्ग्रहणमुपसर्जनविशेषणंयथाविज्ञायेत।बह्वचउपसर्जना न्नेति।अथाक्रियमाणेउपसर्जनग्रहणेकस्यबह्वज्ग्रहणंविशेषणंस्यात्।बहुव्रीहेरितिवर्तते।बहुव्रीहिविशे षणंविज्ञायेत।अस्तिचेदानींकश्चिदबह्वज्बहुव्रीहिः।यदर्थोविधिःस्यात्।अस्तीत्याह।स्वडास्वडीति।बह्वजर्थ मितिचेत्स्वाङ्गग्रहणात्सिद्धम्।स्वाङ्गग्रहणंक्रियते।तद्बह्वज्ग्रहणेनविशेषयिष्यामःस्वाङ्गाद्बह्वचोनेति।

प्रयुज्यते।स्वाङ्गे·ध्रुवे।उपसर्गात्स्वाङ्गंध्रुवमपर्श्वित्यादिकार्ये भावार्थंतूपप्रयुज्यतेएव।अस्तिचेदानीमिति।अने कपदावयवत्वादबह्वत्त्वंबहुव्रीहेर्नसंभवति।तत्रविधिसामर्थ्याद्बह्वज्ग्रहणमुत्तरपदविशेषणंभविष्यतीतिमत्वा प्रश्नः।स्वडेति।अडोरश्मिकावयवविशेषः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनन्तोदात्तार्थइति। बहुव्रीह्यधिकारात्स्वाङ्ग·स्योपसर्जनत्वेलब्धेपुनरुपसर्जनग्रहणंसुपसर्जनमात्रपरिग्रहार्थमित्यनन्तोदात्तादपिङीष्भविष्यतीतिभावः। सहादिकृतत्वादिति। सहादीनांकृतः सहादिकृतः प्रतिषेधस्तद्भावः सहादिकृतत्वंतस्मादित्यर्थः। सहादिपूर्वस्यहिबहुव्रीहेः पूर्वपदप्रकृतिस्वरेशेषनिघातेचनास्त्यन्तोदात्तत्वमितिप्रतिषेधंनविदध्यादितिभावः। कल्याणपाणिपादेति। पाणीचपादौचपाणिपादंतत्कल्याणंयस्याइतिबहुव्रीहिः। अत्रपाणिपादशब्दउपसर्जनम्।सच स्वाङ्ग·

एवंतर्हिअन्तोदात्तादितिवर्तते। अनन्तोदात्तार्थोयमारम्भः। अनन्तोदात्तार्थमितिचेत् सहादिकृतत्वात्सिद्धम्। यदयंसहनञ्विद्यमानपूर्वाच्चेतिप्रतिषेधंशास्तितज्ज्ञापयत्याचार्यः अनन्तोदात्तादपिभवतीति। स्वाङ्ग·समुदायप्रतिषेधार्थंतु। स्वाङ्ग·समुदायप्रतिषेधार्थतर्ह्युपसर्जनग्रहणंकर्त्तव्यम्। स्वाङ्गाद्यथास्यात्स्वाङ्ग·समुदायान्माभूत्। कल्याणपाणिपादा। अथक्रियमाणेप्युपसर्जनग्रहणेकस्मादेवात्रनभवतिस्वाङ्गंह्येतदुपसर्जनम्। नस्वाङ्ग·समुदायः स्वाङ्ग·ग्रहणेनगृह्यते। तद्यथानजनपदसमुदायोजनपदग्रहणेनगृह्यते। काशिकोशलीयाइति। जनपदतदवध्योश्चेतिवुञ्नभवति। एतदपिनास्तिप्रयोजनम्। अस्वाङ्ग·पूर्वादितिवर्तते। तेनस्वाङ्गं·विशेषयिष्यामः। अस्वाङ्ग·पूर्वपदात्परंयत्स्वाङ्गं·तदन्ताद्बहुव्रीहेरिति। यच्चात्रास्वाङ्ग·पूर्वपदात्परंस्वाङ्गं·नतदन्तोबहुव्रीहिः। यदन्तश्चबहुव्रीहिर्नेदःअस्वाङ्ग·पूर्वपदात्परंस्वाङ्ग·म्। ननुचतत्पूर्व—स्मिन्योगेबहुव्रीहिविशेषणम्। नेत्याह। पूर्वपदविशेषणंतत्। नस्वाङ्ग·मस्वाङ्ग·म्। पूर्वपदंपूर्वपदम्। अस्वाङ्गं·पूर्वपदमस्वाङ्ग·पूर्वपदंअस्वाङ्ग·पूर्वपदादिति। यद्येवंपूर्वस्मिन्योगेबहुव्रीहिरविशेषितोभवति। बहुव्रीहिश्चविशेषितः। कथम्। क्तादितिवर्तते। तेनबहुव्रीहिंविशेषयिष्यामः। अस्वाङ्गात्पूर्वपदात्परंयत्क्तान्तंतदन्ताद्बहुव्रीहेरिति ॥

समुदायवाचीनतुस्वाङ्ग·वाची। यस्तुस्वाङ्ग·वाचीपादशब्दः सउपसर्जनंनभवतीतिङीषन्नभवति। असतितूपसर्जनग्रहणेपादशब्देनस्वाङ्गवाचिनास्वाङ्गान्तोबहुव्रीहिर्भवतीतिङीष्स्यात्। काशिकोशलीयाइति। काशयश्चकोशलाश्चेतिद्वन्द्वस्तत्रभवाइत्यवृद्धादपीवुञ्नभवतिवृद्धलक्षणःछएवभवति। नस्वाङ्ग·मिति। पर्युदासाश्रयेणतत्सदृशंशब्दान्तरमर्थान्तरंवाविगृह्यतइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्केशीति। केशेभ्यो निष्क्रान्तेति प्रादिसमासस्तत्पुरुषः॥ नासिकोदर॥ कबरपुच्छीति। कबरशब्देन वर्णविशेषोभिधीयते। विधिप्रतिषेधयोरिति। विधिरुत्सर्गः प्रतिषेधस्त्वपवाद इति तुल्यबलत्वाभावादस्या अपि प्राप्तेः सहादिलक्षणेनैव प्रतिषेधेन भा

इदं तर्हि प्रयोजनम्। बहुव्रीहेरिति वर्त्तमाने उपसर्जनग्रहणमुपसर्जनमात्राद्यथा स्यात्। निष्केशी यूका। अतिकेशी मालेति॥ नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च॥ नासिकादीनां विभाषायां पुच्छाच्च॥ नासिकादीनां विभाषायां पुच्छाच्चेति वक्तव्यम्। कल्याणपुच्छी। कल्याणपुच्छा। कबरमणिविशेषशरेभ्यो नित्यम्। कबरमणिविषशरेभ्यो नित्यमिति वक्तव्यम्। कबरपुच्छी। कबर। मणि। मणिपुच्छी। मणि। विषपुच्छी। विष। शरपुच्छी। शर॥ उपमानात्पक्षाच्च पुच्छाच्च॥ उपमानात्पक्षात्पुच्छाच्चेति वक्तव्यम्। उलूकपक्षी शाला उलूकपुच्छी सेनेति॥ नासिकादिभ्यो विभाषायाः सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो विप्रतिषेधेन॥ नासिकादिभ्यो विभाषायाः सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो भवति विप्रतिषेधेनेति वक्तव्यम्। नासिकादिभ्यो विभाषाया अवकाशः। कल्याणनासिकी कल्याणनासिका। सहनञ्विद्यमानपूर्वलक्षणस्य प्रतिषेधस्यावकाशः। समुखा अमुखा विद्यमानमुखेति। इहोभयं प्राप्नोति। सनासिका अनासिका विद्यमाननासिकेति। सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः अयं विधिः स प्रतिषेधः। विधिप्रतिषेधयोश्चायुक्तो विप्रतिषेधः। अयमपि विधिः नमृदूनामिव कार्पासानां कृतः। प्रतिषेधविषये आरभ्यते। स यथैव बह्वज्लक्षणं संयोगोपधलक्षणं च प्रतिषेधं बाधते। एवं सहनञ्विद्यमानपूर्वलक्षणमपि बाधेत। का तर्हि गतिः। इह तावन्नासिकोदर इति बह्वज्लक्षणस्य प्रतिषेधः प्राप्नोति। सहनञ्विद्यमानपूर्वलक्षणश्च। पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते न परानित्येवमियं विभाषा बह्वज्लक्षणं प्रतिषेधं बाधिष्यते। सहनञ्विद्यमानलक्षणं न बाधिष्यते। ओष्ठजङ्घादन्तकर्णशृङ्गाच्चेति संयोगोपधलक्षणश्च प्रतिषेधः प्राप्नोति॥

व्यमित्यर्थः। नमृदूनामिति। मृदुभिः कार्पासैः कृतः पटो मृदुरेव भवति। अयं तु विधिः प्रतिषेधापवादत्वाद्बलवान् ... का तर्हीति। विधेरपि बलवत्त्वे विप्रतिषेधाभाव इति मन्यते। इदानीं यथा विप्रतिषेधोपपत्तिस्तथा दर्शयति। इह तावदिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिक्पूर्व॥ अन्यत्रापीति। यत्रापिप्रतिषिद्धोङीषित्यर्थः। असंयोगोपधादित्यादिकस्तुप्रतिषेधोनन्तरस्यविधिर्वाभवतिप्रतिषे
धोवेतिङीषएवभवतिनानेनविधीयमानस्यङीपोलभ्यतइतिभावः। एवमपीति। वेत्यनुवर्तनादिक्त्वेनङीब्विधीयते
पक्षेप्राङ्मुखेत्यपियथास्यात्। तत्रङीपामुक्तेपक्षेङीष्प्राप्नोतीत्यर्थः। उक्तमिति। पारेमध्येषष्ठ्यावेत्यादौ। ततङीपामुक्ते
टाबेवभविष्यतीतिनार्थःसूत्रभङ्गेनेत्यर्थः॥ जातेरस्त्री॥ काजातिरिति। लक्षणविप्रतिपत्त्याप्रश्नः। आकृतिग्रहणेति। गृह्यते

सहनञ्विद्यमानपूर्वलक्षणश्च। मध्येपवादाःपूर्वान्विधीन्बाधन्तेइत्येवमियंविभाषासंयोगोपधलक्षणंप्रति
षेधंबाधिष्यते।सहनञ्विद्यमानपूर्वलक्षणंनबाधिष्यते। दिक्पूर्वपदान्ङीप्॥ दिक्पूर्वपदान्ङीषोनुदात्तत्वम्।
दिक्पूर्वपदान्ङीषअनुदात्तत्वंवक्तव्यम्। प्राङ्मुखीप्रत्यङ्मुखीङीब्विधानेह्यन्यत्रापिङीषविषयान्ङीपप्रसङ्गः।
ङीब्विधानेहिसतिअन्यत्रापिङीषविषयान्ङीप्प्राप्नोति। प्राग्गुल्फा। प्रत्यग्ललाटा। ननुचैतेविशेषाअनुव
र्तेरन्। असंयोगोपधादङ्कूचोनेति। यद्यप्येतेविशेषाअनुवर्तेरन्संयोगोपधादङ्कूचोनेति। एवमपिदिक्पूर्वप
दान्ङीपामुक्तेङीष्प्रसज्येत। नैषदोषः। उक्तमेतत्। यत्रोत्सर्गापवादौविभाषातत्रापवादेनमुक्तेउत्सर्गो
नभवतीति। अथवाङीषआदेशोङीप्करिष्यते। तत्तर्हिङीषोत्रग्रहणंकर्तव्यम्। नकर्तव्यम्। प्रकृतमनुवर्तते।
क्वप्रकृतम्। अन्यतोङीषिति। तद्वैप्रथमानिर्दिष्टंषष्ठीनिर्दिष्टेनचेहार्थः। दिक्पूर्वपदादितित्येषापञ्चमीङीषितिप्रथमा
याःषष्ठीमिहकल्पयिष्यति। तस्मादित्युत्तरस्येति। प्रत्ययविधिरयम्। नचप्रत्ययविधौपञ्चम्यःप्रकल्पिकाभव
न्ति। नायंप्रत्ययविधिः। विहितश्चप्रत्ययःप्रकृतश्चानुवर्तते। जातेरस्त्रीविषयादयोपधात्॥ जातेरित्यु
च्यते। काजातिर्नाम। आकृतिग्रहणाजातिर्लिङ्गानांचनसर्वभाक् ॥

नेनेतिग्रहणमितिकरणसामान्येपदंसंक्लिश्यते। तत्राकृतिशब्दसंनिधानेस्त्रीत्वप्रतिपत्तिर्बहिरङ्गत्वात्स्त्रीप्रत्ययनिमि
त्तंनभवति। आकृतिर्ग्रहणंयस्याःसाकृतिग्रहणाऽवयवसंनिवेशविशेषव्यङ्ग्येत्यर्थः। एतेनगोत्वादिर्लक्षिता। ब्राह्म
णत्वादिस्तुनसंगृहीता। ब्राह्मणक्षत्रियादीनांसंस्थानस्यसदृशत्वादितितत्संग्रहायाह। लिङ्गानामिति। लिङ्गानिसर्वाणिभ
जतीतिसर्वशब्दस्यलिङ्गापेक्षत्वेपिगमकत्वाद्भजोण्विरितिण्विप्रत्ययः। लिङ्गानामितिकर्मणिषष्ठी। अप्राप्तपूर्णार्थेचेदंवचनमितितय
देःसर्वलिङ्गत्वेऽप्याकृतिग्रहणत्वाज्जातिरूपोपपत्तिः। उपदेशापेक्षंचलिङ्गानामिति। जातिलक्षणमितिब्राह्मणत्वादिरेव
लक्ष्यते। तेनदेवदत्तेत्यसर्वलिङ्गत्वेपिजातिलक्षङीषभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सकृदिति। अयंगौरिति सकृदुपदिष्टा जातिर्निगृहीता तु निश्चेतुं पिण्डान्तरे शक्येत्यर्थः। गोत्रमिति। अपत्यमित्यर्थः। चरण
शब्देन शाखाध्यायिनो गृह्यन्ते। गोत्रस्य सर्वलिङ्गत्वात् यञ्गुपादानं नाडायनं नपुंसकमिति दर्शनात्। प्रादुर्भावेति। सत्त्व
स्य द्रव्यस्य प्रादुर्भावविनाशाभ्यां या आविर्भावतिरोभावौ प्राप्नोति यावद्द्रव्यभाविनीत्यर्थः। गुणैर्युगपद्द्रव्येण संबध्यते
यथा निर्गुणस्य द्रव्यस्योपलम्भो न भवत्येवं जातिरहितस्यापीत्यर्थः। बह्वर्थामिति सर्वव्यक्तिव्यापिनीमित्यर्थः। अर्थशब्दोऽत्र
विषयवाची। चरणानीति। चरणशब्दोऽध्ययनवचनः इह तूपचाराद्ध्येतृषु वर्तते। कुमारीभार्य इति। कौमारमयावद्द्र
व्यभाव्यप्याकृतिग्रहणत्वाज्जातिरिति जातेश्चेति पुंवद्भावप्रतिषेधः। उत्तरे तु लक्षणे कौमारं जातिर्न भवति अयावद्द्रव्य

सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह। अपर आहुः। प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः। असर्वलिङ्गां ब
ह्वर्थां तां जातिं कवयो विदुः॥ गोत्रं च चरणानि च कः पुनरेतयोर्जातिलक्षणयोर्विशेषः। यथा पूर्वं जातिलक्षणं
तथा। कुमारीभार्य इति भवितव्यम्। यथोत्तरं तथा कुमारभार्य इति भवितव्यम्। अस्त्रीविषयादिति कथ
मिदं विज्ञायते समानायामाकृतौ यदस्त्रीविषयमिति। आहोस्वित् क्वचिदस्त्रीविषयमिति। किं चातः। यदि वि
ज्ञायते समानायामाकृतौ यदस्त्रीविषयमिति। द्रोणीकुटीपात्रीति न सिध्यति। अथ विज्ञायते क्वचिदस्त्री
विषयमिति। मालाबलाका अत्रापि प्राप्नोति। अस्तु क्वचिद्यदस्त्रीविषयमिति। कथं मालाबलाकेति। अजा
दिषु पाठः करिष्यते। अयोपधादिति किमर्थम्। इभ्या क्षत्रिया। अत्यल्पमिदमुच्यते। अयोपधादिति। अको
पधादित्यपि च वक्तव्यम्। इहापि यथा स्यात्। चटका मूषिकेति। यद्यकोपधादित्युच्यते काकी कोकीपि
कीशुकी उलूकीति न सिध्यति ॥

भावित्वात्। पूर्वोक्तमेव लक्षणं भाष्यकारस्याभिमतमपर आहेत्यभिधानादित्याहुः। तथा च सुवतितरे तिङ्न्या सूत्रे उदाहरणं द
दौ तसिलादिष्विति प्राप्तस्य पुंवद्भावस्य जातेश्चेति निषेधात्। अथेति। यदा अस्त्रीविषयोऽस्मिन्नर्थे प्रवृत्तिनिमित्त[...]त्यन्यपदार्थः
प्रवृत्तिनिमित्तमाश्रीयते तदा समानायामाकृतावस्त्रीविषयादित्येष पक्षो भवति। यदा तु प्रातिपदिकमन्यपदार्थत्[...]नाश्रीयते त
दा यत्र क्वचिदस्त्रीविषयादित्येष पक्षः संपद्यते। द्रोणीति। द्रोणशब्दः परिमाणविशेषे पुल्लिङ्गो गवाद्न्यां तु स्त्रीलिङ्गः। मालेति। नल
नं माल इति पुल्लिङ्गः क्षेत्रविशेषेण पुंसकम्। स्रजि स्त्रीलिङ्गः। बलमाकायतीति बलाकशब्दो यौगिकः पुंसि दृश्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्त्विति। अन्य एव क्रियावाची जातिशब्दस्त्वन्य एवेति। परिहारान्तरमप्यत्र संभवति। गवयीति। गौरादिषिदानींतनैर्गवयादयः प्रक्षिप्ता इति वार्त्तिकारम्भाद्विज्ञायते। पाककर्ण॥ सदच्‌काण्डेति। अत्रास्त्वतिः क्विन्नन्तो गृह्यते। अयमप्यजादिष्व... इदानींतनः। त्रिफलेति। त्रयाणां फलानां समाहार इति द्विगुः। ततो द्विगुलक्षणान्ङीपः परत्वान्ङीष्प्राप्तो निषिध्यते। तन्नि

अस्तु तर्ह्ययोपधादित्येव। कथं चटका मूषिकेति। अजादिषु पाठः कर्तव्यः॥ योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधः। योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधो भवतीति वक्तव्यम्। हया। हयी। गवया। गवयी। मुकया। मुकयी। मत्स्या। मत्सी। मनुष्या। मनुषी। पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च॥ सदच्‌काण्डप्रान्तशतैकेभ्यः पुष्पात्प्रतिषेधः॥ सदच्‌काण्डप्रान्तशतैकेभ्यः पुष्पात्प्रतिषेधो वक्तव्यः। सत्पुष्पा। प्राक्पुष्पा। प्रत्यक्पुष्पा। काण्डपुष्पा। प्रान्तपुष्पा। शतपुष्पा। एकपुष्पा॥ संभस्त्राजिनशणपिण्डेभ्यः फलात् प्रतिषेधः। संभस्त्राजिनशणपिण्डेभ्यः फलात्प्रतिषेधो वक्तव्यः। सम्। संफला। सम्। भस्त्रफला। अजिन। अजिनफला। शण। शणफला। पिण्डफला॥ श्वेताच्च॥ श्वेताच्चेति वक्तव्यम्। श्वेतफला॥ त्रेश्च॥ त्रेश्च प्रतिषेधो वक्तव्यः। त्रिफला॥ मूलान्नञः॥ मूलान्नञः प्रतिषेधो वक्तव्यः। अमूला॥ इतो मनुष्यजातेः॥ जातेरिति वर्तमाने पुनर्जातिग्रहणं किमर्थम्। अयोपधादिति वर्तते। योपधादपि यथा स्यात्। औदमेयी॥ इतो मनुष्यजातेरितीञ उपसंख्यानम्॥ इतो मनुष्यजातेरितीञ उपसंख्यानं कर्तव्यम्। सौतंगमी। मौनिचित्ती॥ ऊङुतः॥ किमर्थोऽङ्कारः। विशेषणार्थः। क्व विशेषणार्थेनार्थः। नोङ्धात्वोरिति। नौधात्वोरितीयत्युच्यमाने यवाग्वो यवाग्वे इत्यत्रापि प्रसज्येत। अथ दीर्घोच्चारणं किमर्थम्। न उङ् तद् इत्येवोच्येत। का रूपसिद्धिः। ब्रह्मबन्धूः। वीरबन्धूः। सवर्णदीर्घत्वेन सिद्धम्। न सिध्यति। गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं प्रसज्येत।

विधसामर्थ्यान्ङीबपि न भवति। तयोरत्र विशेषाभावात्॥ इतो म॥ औदमेयीति। उदमे यस्यापत्यमतइञ्। सौतंगमीति सुतंगमेन निर्वृत्तेति वुञ्छणादिसूत्रेणइञ्॥ ऊङुतः॥ यवाग्वेति। वर्णग्रहणेऽर्थवद्ग्रहणपरिभाषा नोपतिष्ठत इति भावः। गोस्त्रियोरिति। एकादेशस्यान्तवद्भावादुपसर्जनान्तं प्रातिपदिकं स्त्रीप्रत्ययान्तं भवतीति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नद्युतइति। नद्यन्तो बहुव्रीहिर्भवतीति भावः। दीर्घोच्चारणे तु तत्सामर्थ्यात्कब्ह्रस्वौ न प्रवर्तेते। उभयतइति। एकादेशस्यान्तवत्त्वेन प्रातिपदिकसंज्ञा संपाद्या॥ अन्यथा॥ प्रत्ययइति प्रतिषेधप्रसङ्गः। आदिवत्त्वेन स्त्रीप्रत्ययत्वं साध्यमित्येकोवयवोयुगपद्द्वयोरित्येषा बुद्धिर्विरोधान्न प्रवर्तते। स्त्रीप्रत्ययविशेषणं चोपसर्जनम्। न चात्र स्त्रीप्रत्ययस्योपसर्जनत्वमिति ह्रस्वाऽप्रसङ्गः। पदान्तेति। अधीत्येत्यादावित्यर्थः। तस्मादिति। उकारद्वयं दीर्घेण निर्दिष्टं तत्र द्वितीय उकारः परत्वाद्बाधकस्य शे

इह च ब्रह्मबन्धूकृतम्। ब्रह्मबन्धूकृतम्। षत्वतुकोरसिद्धइत्येकादेशस्यासिद्धत्वान्नित्यस्तुक्प्रसज्येत। इह च ब्रह्मबन्धूः वीरबन्धूरिति। नद्युतश्चेति कप्प्रसज्येत। नैष दोषः। यत्तावदुच्यते ब्रह्मबन्धूः वीरबन्धूरिति। गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं प्रसज्येतेति। उभयतआश्रयणे नान्तादिवत्। यदप्युच्यते इह च ब्रह्मबन्धूकृतं ब्रह्मबन्धूकृतं षत्वतुकोरसिद्धइत्येकादेशस्यासिद्धत्वान्नित्यस्तुक्प्रसज्येतेति। पदान्तपदाद्योरेकादेशोसिद्धः। न चैष पदान्तपदाद्योरेकादेशः। यदप्युच्यते ब्रह्मबन्धूः वीरबन्धूरिति नद्युतश्चेति कप्प्रसज्येतेति। नद्यन्तानां यो बहुव्रीहिरित्येवं तत्। न चैष नद्यन्तानां बहुव्रीहिः। शेषलक्षणस्तर्हि कप्प्राप्नोति। तस्माद्दीर्घोच्चारणं कर्तव्यम्। ऊङ्प्रकरणेऽप्राणिजातेश्चारज्ज्वादीनाम्। ऊङ्प्रकरणेऽप्राणिजातेश्चारज्ज्वादीनामिति वक्तव्यम्। अलाबूः। कर्कन्धूः। अप्राणिजातेरिति किमर्थम्। कृकवाकुः। अरज्ज्वादीनामिति किमर्थम्। रज्जुर्हनुः। संहितशफलक्षणवामादेश्च॥ सहितसहाभ्यां चेति वक्तव्यम्॥ सहितोरूः। सहोरूः। कद्रुकमण्डल्वोश्छन्दसि॥ अत्यल्पमिदमुच्यते कद्रुकमण्डल्वोरिति। कद्रुकमण्डलुगुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम्। कद्रूः। कमण्डलूः। गुग्गुलूः। मधूः। जतूः। पतयालूः। यङश्चाप्॥ षाच्च यञः श्चाप्॥ षाच्च यञश्चाब्वक्तव्यः। शार्कराक्ष्या। पौतिमाष्या। तत्रायमप्यर्थः। गौकक्ष्यशब्दः क्रौड्यादिषु पठ्यते स न पठितव्यो भवति ॥

षलक्षणस्य कपो बाधनार्थ इति भावः। अलाबूरिति। ऊङि सति नोङ्धात्वोरिति विभक्तेरुदात्तत्वनिषेधो भवत्यलाब्वेति। संहित॥ सहितोरूरिति। नन्वेकदेशविकृतस्यानन्यत्वात्संहितशब्दग्रहणेन सहितशब्दस्य सिद्धं ग्रहणम्। एवं तर्हि विद्यमानं हितमस्य सहित इति यदा व्युत्पत्तिस्तदर्थं वार्तिकम्। सहोरूरिति। सहेत इति सहौ ऊरू यस्याइति व्युत्पत्तिः। अथवा विद्यमानावूरू यस्याः सा सहोरूरित्यूर्वतिशयप्रतिपादनार्थः प्रयोगः॥ कद्रु ॥ गुग्गुलुमधुजतूनां छन्दसि लिङ्गव्यत्ययेन स्त्रीत्वम्। पतयालुशब्दः स्पृहिगृहीत्यालुजन्तः॥ यङश्चाप्॥ शार्कराक्ष्येति। गर्गादियञन्ता एते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आव॥ अनइति। यद्यपीदमन्यत्रवक्तव्यंतथाप्यन्यार्थपूर्वविप्रतिषेधप्रतिपादनप्रसङ्गेनात्रोक्तम्। गौकक्ष्यायणीति। गोकक्ष्यस्यापत्यंगोत्रंस्त्रीगर्गादित्वाद्यञ्। ततःष्यङ्। प्रातिपदिकग्रहणेलिङ्गविशिष्टस्यापिग्रहणाद्यञन्तात्ष्फोविधीयमानःष्यङन्तादपिभवतीतिप्रक्रियाश्रयेणेदमुक्तम्। अणिञोः॥ दाक्षीति। दक्षस्यापत्यंगोत्रंस्त्रीत्यतइञ्। उत्तमश[illegible]स्मुत्तमन्त्यमात्रवचनमाश्रित्यप्रश्नः। सचेति। यत्रैकोऽनुद्रुतःप्रथमोच्चारितत्वात्। त्रयस्तूद्रुताऊर्ध्वोच्चारिताः [illegible]त्रोत्तमशब्दः

यदिनपठ्यते। गौकक्षीपुत्रइतिसंप्रसारणंनप्राप्नोति। इष्टमेवैतत्संगृहीतंगौकक्ष्या पुत्रइत्येवभवितव्यम्। एवंहिसौनागाःपठन्ति। ष्यङःसंप्रसारणेगौकक्ष्याःप्रतिषेधइति। आवट्याच्च॥ अनउपधालोपिनऊधसोङीष्पूर्वविप्रतिषिद्धम्॥ अनउपधालोपिनोऽन्यतरस्यामित्येतस्मादूधसोङीष्भवतिपूर्वविप्रतिषेधेन। अनउपधालोपिनइत्यस्यावकाशः। बहुराज्ञीबहुतक्ष्णी। ऊधसोङीष्भवतीत्यस्यावकाशः। विभाषाङीपोयदानङीप्सोवकाशः। ङीप्प्रसङ्गेउभयंप्राप्नोति। ऊधसोङीष्भवतिपूर्वविप्रतिषेधेन। सतर्हिपूर्वविप्रतिषेधोवक्तव्यः। नवक्तव्यः। अनउपधालोपिनोन्यतरस्यामित्यत्रऊधसोङीष्भवतीत्येतदनुवर्तिष्यते। आवट्याद्यञःष्फश्चापः। आवट्याद्यञःष्फश्चापोभवतिपूर्वविप्रतिषेधेन। आवट्याद्यञश्चापोवकाशः। उदीचामावट्या। ष्फस्यावकाशः। अन्यानियञन्तानि। गार्ग्यायणी। वात्स्यायनी। आवट्यशब्दात्प्राचामुभयंप्राप्नोति। आवट्यायनीतिष्फोभवतिपूर्वविप्रतिषेधेन। आवट्याग्रहणेननार्थः। यञःष्फश्चापइत्येव। इदमपिसिद्धंभवति। शार्कराक्ष्यायणीपौतिमाष्यायणी। यञ्ग्रहणेनापिनार्थः। ष्फश्चापइत्येव। गौकक्ष्यशब्दःक्रौड्यादिषुपठ्यते। इदमपिसिद्धंभवतिगौकक्ष्यायणी। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। एवंवक्ष्यामि। प्राचांष्फतद्धितःसर्वत्र। क्वसर्वत्र। यत्रष्फश्चान्यश्च प्राप्नोति। ष्फएवतत्रभवतीति। ततोलोहितादिकतन्तेभ्यःसर्वत्र। क्वसर्वत्र। प्राचांचोदीचांच॥ अणिञोरनार्षयोर्गुरूपोत्तमयोःष्यङ्गोत्रे॥ इहकस्मान्नभवति। दाक्षीप्लाक्षीति। आतिशायिकेनायंतमपानिर्देशः क्रियते। सचत्रिप्रभृतिषुवर्तते। त्रिप्रभृतिनामभावात् ॥

प्रयुज्यते। एवंचतुष्प्रभृतिषुप्रयुज्यते। उद्गतापेक्षयातुत्रिप्रभृतिष्वित्युक्तम्। प्रकर्षेचेति। चणवेदर्थेवर्तते। क्वचित्तुप्रकर्षेचेदितिपाठः। यदिप्रकर्षप्रत्ययंकृत्वादाक्ष्यागुरूपोत्तमंनभवतीत्युच्यते। ततउत्कृष्टादुत्तमपिसतिकिमेत्तिङव्ययघादित्वाम्प्रत्ययप्रसङ्गादुत्तमामितिप्राप्नोति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्गतस्येति।उच्छब्दोऽत्रससाधनक्रियावचनःतत्रक्रियाप्रकर्षद्वारकोद्रव्यप्रकर्षइत्यद्रव्यप्रकर्षवचनादामुन्नभवतीत्य
र्थः।गतशब्दोऽत्रेति।उच्छब्देनगतार्थस्याभिधानादप्रयोगएवगतशब्दस्यलोपः। धात्वर्थोऽत्रेति।धातुशब्देनधात्वर्थोऽत्रक्रिया
भिधीयतेसोऽर्थोविषयःप्रयोजनंवायस्यसधात्वर्थः।साधनाधारःपदार्थःसप्रकृष्यतेक्रियाप्रकर्षद्वारेणेत्यर्थः।त्रयाणामि
ति।यत्रत्रयोवर्णास्तत्रैकोऽनुद्गतोद्वावुद्गतौद्वयोश्चैकस्यप्रकर्षेतरपातमपोबाधनादुत्तमशब्दोनास्तीतिवाराह्येतिष्यङ्
प्राप्नोति।यत्रचतुष्प्रभृतयोवर्णास्तत्रैवष्यङ्स्यादित्यर्थः।भिद्यतइति।तमपःपित्त्वादनुदात्तत्वादुत्तमशब्दआद्युदात्तःप्रा

यद्येवम्।प्रकर्षेचेत्तमंकृत्वादास्यानोपोत्तमंगुरु।आम्विधिःकेनतेनस्यात्प्रकर्षेयद्यपियंतमः॥प्रकर्षेचेत्तमं
कृत्वादास्यानोपोत्तमंगुर्वित्युच्यते।आम्विधिःकेनतन्नस्यात्।अव्ययघादितिप्राप्नोति। प्रकर्षेयद्यपियंत
मः।यद्यपियंतमःप्रकर्षेवर्ततेउद्गतस्यप्रकर्षोयंगतशब्दोऽत्रलुप्यते।उद्गतस्यायंप्रकर्षः।गतशब्दस्यात्रलोपो
भवति।नाव्ययार्थप्रकर्षोऽस्ति।धात्वर्थोऽत्रप्रकृष्यते।नायमव्ययार्थस्यप्रकर्षः।कस्यतर्हि।धात्वर्थस्य।उद्गतोऽपे
क्षतेकिंचित्त्रयाणांद्वौकिलोद्गतौ।अनुद्गतमपेक्ष्यात्रउद्गतमित्येतद्भवति।त्रयाणांद्वौकिलोद्गतौ।त्रयाणां
किलद्वावुद्गतौभवतः।चतुष्प्रभृतिकर्तव्योवाराह्यायांनसिध्यति।चतुष्प्रभृतिषुष्यङ्वक्तव्यः।वाराह्यायां
नसिध्यति।वाराह्यानप्राप्नोति।किंकारणम्।चतुष्प्रभृतीनामभावात्।भिद्यतेस्यस्वरस्तेनविधिश्चामोन
लक्ष्यते॥भिद्यतेखल्वस्यस्वरस्तेनातिशायिनिकेनतमशब्देनउत्तमस्य।विधिश्चामोनलक्ष्यते।विधिश्चा
मःनक्वचिदपिलक्ष्यते।शब्दान्तरमिदंविद्याद्दृष्टमभ्यन्तरंत्रिषु।एवंतर्हिअन्योयमातिशायनिकेनस
मानार्थःतमस्त्रिप्रभृतिषुवर्तते।किंपुनरयमणिञोरादेशः।आहोस्विदणिञ्भ्यांपरइति ॥

प्नोत्यन्तोदात्तश्चेष्यते।एतच्चोच्चादिषूत्तमशब्दस्तमौसर्वत्रेतिपाठानपेक्षयोक्तम्।नचक्रियाप्रकर्षेऽपिआमन्तस्यक्वचि
त्प्रयोगोदृश्यतेइत्यनभिधानादुच्छब्दात्तमबेवनास्ति।अव्युत्पन्नएवोत्तमशब्दःस्वभावात्त्रिप्रभृतीनामन्त्यमाहेत्याह।
शब्दान्तरमिति।दृष्टमिति।त्रिग्रहणंबहुत्वोपलक्षणार्थम्।तेनत्रिप्रभृतिषुयदभ्यन्तरमन्तर्भूतंतत्रदृष्टमित्यर्थः।आतिशा
यनिकेनेति।आतिशायिनिकश्चतुःष्प्रभृतीनामन्त्यमाह।अव्युत्पन्नस्तुत्रिप्रभृतीनामित्यन्त्यत्वमात्रेणसदृशार्थत्वेऽभि[illegible] प्रामः
वः।तमइति।तमान्तोऽव्युत्पन्नशब्दइत्यर्थः।किंपुनरिति।प्रत्ययविधावपिगापोष्टग्व्रीहिशाल्योर्ढगित्यादौषष्ठीदृश्यतइतिसंदेहा ३२
त्प्रश्नः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

औदमेघ्या इति। उदमेघस्यापत्यं गोत्रं स्त्री अवद्ञ्। यद्यत्र इञन्तात्परः स्त्रियां ष्यङ् विधीयते तदा ऽपत्यप्रत्ययकारेण भवतीति यलोपो न प्राप्नोति। आदेशपक्षे तु स्थानिवद्भावाद् ष्यङ् आपत्यत्वमिति यलोपः सिध्यति। द्विरिति। इञश्चेत्यस्यानन्तरं ष्यङ्ग इ तिवक्तव्यम्। तेनेञः परो यः ष्यङ् तदन्तादण् भवतीत्ययमर्थो भवति। संघाङ्कं लक्षणेष्विति त्रापि तथैव वक्तव्यम्। आदेशपक्षे तु स्था निवद्भावात्सिध्यति। औडुलोम्येति। उडुलोम्नो ऽपत्यं गोत्रं स्त्री बाह्वादिषु लोमन्शब्दस्य पाठात् केवलस्यापत्ये। न योगाभावा त्सामर्थ्यात्तदन्तग्रहणादिञ्प्रत्ययः। तत्र यदि तदादेशः ष्यङ् क्रियेत तदा ये चाभावकर्मणोरिति प्रकृतिभावा दिलोपेन

कस्यात्र विशेषः। ष्यङ्ग्यनादेशे यलोपवचनम्। ष्यङि अनादेशे यलोपो वक्तव्यः। औदमेघ्या याम्छात्रा औदमे घाः। द्विरण्विधिः। द्विस्त्वाण्विधेयः। औदमेघ्यायाम्छात्रा औदमेघाः। औदमेघ्यानां संघ औदमेघः। इञ इत्यण् न प्राप्नोति। अस्तु तर्हि आदेशः। आदेशे ऽल्लोपवचनम्। यद्यादेशः अनो लोपो वक्तव्यः। औडलोम्या शारलोम्ये ति। ये चाभावकर्मणोरिति प्रकृतिभावः प्रसज्येत। न वा ष्यङो लोपनिमित्तत्वात्। न वा एष दोषः। किं कारणम्। ष्यङो लोपनिमित्तत्वात्। लोपनिमित्तः ष्यङ्। न चाकृते लोपे ष्यङ् प्राप्नोति। किं कारणम्। गुरूपोत्तमयोरित्युच्य ते। न चाकृते लोपे गुरूपोत्तमता भवति। अथवा पुनरस्तु परः। ननु चोक्तं ष्यङ्ग्यनादेशे यलोपवचनं द्विरण्विधि रिति। नैष दोषः। यत्तावदुच्यते यलोपवचनमिति। अदोष एषः। किं कारणम्। पुंवद्भावात्। यजादौ तद्धिते पुंव द्भावो भविष्यति। भस्याढे तद्धिते पुंवद्भवतीति। अयं तर्हि दोषो द्विरण्विधिरिति। नैष दोषः। सिद्धस्तु प्रत्ययवि धौ। स च सिद्धः प्रत्ययविधौ । उभयमिदमुक्तमादेशः पर इति च। किमत्र न्याय्यम्। आ देश इत्येतन्न्याय्यम्। कुत एतत्। एवं चैव हि कृत्वा आचार्येण सूत्रं पठितं षष्ठ्या च निर्देशः कृतः। अत एवैष पक्षो निर्दोषः। ननु च परस्मिन्नपि सति ये दोषास्ते परिहृताः। पुंवद्भावेन यलोपः परिहृतः। स च पुंवद्भाव अढे भवति। त त्रते औदमेघे यो न सिध्यति ॥

प्राप्नोति। प्रत्ययपक्षे त्विञाव्यवधानात्प्रकृतिभावाभावः। न वेति। अनुपूर्व्याश्रयेण दोषं परिहरति। सिद्धश्चेति। यद्यपि लिङ्ग विशिष्टप रिभाषाश्रयेण इञन्तात्प्रातिपदिकादण् विधीयमानः ष्यङन्तादपि सिध्यति। तथापि पुंवद्भावस्यान्याय्यत्वात्स एवोक्तः। ष ष्ठ्या चेति। चशब्दो हेतौ। अणिञोरनार्षयोरिति षष्ठीनिर्देश आदेशार्थ एव प्रत्ययपक्षस्याभिमतत्वे ह्यसंदेहाय पञ्चम्येवो चार्येत। औदमेघे य इति। ष्यङन्तात् स्त्रीभ्यो ढक् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीं प्रत्ययवाद्यादेशवादिनो दोषमुद्भावयति। अनुबन्धाविति। टापामस्मेति। प्रत्ययवादी प्रत्यये कृते टापं करोतीत्यर्थः। आदेशवाद्याह। ममापीति। अण्यइति। अकारः प्रधानं तद्विशेषणमण्। तत्रानल्विधाविति प्रतिषेधात् स्थानिवद्भावाभावः। अणन्तादकारान्तादिति तु विज्ञायमाने स्वाश्रयमकारान्तत्वं स्थानिवद्भावादणन्तत्वं चेति स्यादेव ङीप्प्रत्ययः। इञादेशस्य तु ष्यङोन स्वाश्रयमिकारान्तत्वं नापि स्थानिवद्भावप्रापितमनल्विधाविति प्रतिषेधादिति ततः सिद्ध एव टाप्। यदा चेञ उपसंख्यानमित्यनेन इत्यपेक्ष्यं तेन तदा ष्यङि कृते ऽनिकारान्तत्वान्ङीषोऽप्रसङ्गः। प्रत्ययवा

अनुबन्धौ त्वया कार्यौ। यस्यादेशः अनुबन्धौ तेन कर्तव्यौ। एकः सामान्यग्रहणार्थः। अपरः सामान्यग्रहणाविघातार्थः। क्व सामान्यग्रहणार्थेनार्थः। यङश्चाबिति। अथ क्व सामान्यग्रहणाविघातार्थेनार्थः। अत्रैव। किं प्रयोजनम्। चाबर्थम्। चाब्यथा स्यात्। तव कथं चाप्। टाब्विधिर्मम। मम टापा सिद्धम्। ननु च ममापि टापा सिद्धं स्यात्। न सिध्यति। अण इति चेञ इति चेतीकारः प्राप्नोति। नैष दोषः। नैवं विज्ञायते अणन्तादकारान्तादिञन्तादिकारान्तादिति। कथं तर्हि। अण्योऽकार इञ्यइकार इति। स्वरार्थस्तर्हि। स्वरार्थस्तर्हि त्वया चाब्वक्तव्यः। ञ्नितीत्याद्युदात्तत्वं माभूत्। चितोन्त उदात्तो भवतीत्य¯न्तोदात्तत्वं यथा स्यादिति। तवापि तर्हि ष्यङ उक्तत्वात् स्त्रीत्वस्य टाब्न प्राप्नोति। नैष दोषः। उक्तेपि हि भवन्त्येते। उक्तेपि स्त्रीत्वे भवन्त्येते टाबादय इति। उक्तमेतत्। स्वार्थिका एते टादय इति। सानुबन्धकस्यादेशो मम। ममापि तर्हि सानुबन्धकस्यादेशे ञित्कार्यं नेति तेन ञिन्न भविष्यति। अस्थानिवत्त्वे दोषस्ते¯वृद्धिस्त्वन्न सिध्यति ॥

द्याह। स्वरार्थ इति। इञादेशो यदि ष्यङ् क्रियते तदन्ताच्च टाप् तदा वाराह्येत्याद्युदात्तं पदं स्यात्तस्मादन्तोदात्तार्थस्त्वयं चाब्विधेयः। आदेशवाद्याह। तवापीति। मम तु यङश्चाबिति वचनाच्चाब्भवतीति मन्यते। प्रत्ययवाद्याह। नैष दोष इति। उक्त इति। द्योतित इत्यर्थः। एकस्य स्त्रीत्वद्योतने सामर्थ्याभावाद्द्वयोर्द्योतकत्वम्। एतच्च प्रयोगदर्शनादवसीयते। आदेशवाद्याह। सानुबन्धकस्येति। इञ एवाकृतञकारे त्वं ञकस्य यादेशः करिष्यते तेन ञित्स्वराभावात् प्रत्ययस्वरे टापि कृते एकादेश उदात्तेनोदात्त इति वाराह्या शब्दोन्तोदात्तो भविष्यतीत्यर्थः ॥ राम: ३३

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययवाद्याह। अस्यानिवत्त्वइति। अर्धजरतीयमिति। समासाच्चतद्विषयादिति छप्रत्ययः। सुखंनकामयन्तेअङ्गान्तरं तुकामयन्तेजरत्याः। आदेशवाद्याह। त्वयाप्यत्रेति। प्रत्ययवाद्याह। अङ्क्रियैवेति। यस्यसंप्रसारणमितिवक्ष्यते। निरनुबन्धकत्वाच्चायमेवग्रहीष्यते। आम्बष्ठ्यापुत्रइत्यादौतुष्यङः सानुबन्धकत्वात्संप्रसारणंनभविष्यतीत्यर्थः। आदेश[illegible]वाद्याह। पाश्यायामिति। यदीहयप्रत्ययंविधायस्यसंप्रसारणमित्युच्यतेतदापाशानांसमूहः पाशादिभ्योयइतिचप्रत्ययस्यपाश्यापतिरित्यादौसंप्रसारणप्रसङ्गः। प्रत्ययवाद्याह। एकइति। आदेशवाद्याह। अथेति। चेक्रियितइति धातोरेकाचइत्यनेनवि

अस्यानिवत्त्वेदोषः। वृद्धिस्तेनप्राप्नोति। औडुलोम्या। शारलोम्येति। नचेदानीमर्द्धजरतीयंलभ्यम्। वृद्धिर्ममभविष्यति। स्वरोनेति। तद्यथा। अर्धंजरत्याः कामयन्तेअर्धंनेति। त्वयाप्यत्रविशेषार्थंकर्तव्यंस्याद्विशेषणम्। त्वयाप्यत्रविशेषणार्थोऽनुबन्धःकर्तव्यः। क्वविशेषणार्थेनार्थः। ष्यङः संप्रसारणमिति। अङ्क्रियैवविशेषोत्रसानुबन्धोविशेषवान्। अङ्क्रियैवममविशेषः। सानुबन्धस्तुविशेषवान्। पाश्यायांतेकथंनस्यात्। पाश्यापतिरित्यत्रतवकस्मान्नभवति। एकोमेस्याद्विशेषणम्। एकोममविशेषणार्थः। त्वयापुनर्द्वौकर्तव्यौ। अथैकस्मिन्मतिकः करिष्यते। किंचातः। अन्यस्मिन्सूत्रभेदः स्यात्। यद्येताभ्यामन्यःक्रियते। सूत्रभेदः कृतोभवति। षितिलिङ्गं प्रसज्यते। अथषित्क्रियतेषितइतिईकारःप्राप्नोति। ङितिचेक्रियितेदोषः। अथङित्क्रियतेचेक्रियितेदोषोभविष्यति। लोलूयापुत्रः। लोलूयापतिरिति। व्यवधानान्नदुष्यति ॥

हितेयङीत्यर्थः। यङः पूर्वाचार्यसंज्ञाचेक्रियितमिति। प्रत्ययवाद्याह। व्यवधानादिति। लोलूयतेत्यत्रयङन्तादप्रत्ययादित्यकारप्रत्ययेसतिअकारेणव्यवधानादित्यर्थः। पुत्रपत्योरिति। सप्तमीनिर्देशादनन्तरस्ययङः संप्रसारणेनभाव्यम्। तत्रवाराह्याशब्देटापासहैकादेशस्यपूर्वप्रत्यन्तवद्भावात्पुत्रपत्योरनन्तरोयङ्भवति। लोलूयेत्यत्रतुयङन्तादप्रत्ययादित्यकारप्रत्ययेकृतेऽतोलोपइतियङोऽकारोलुप्यतेतत्रटापिकृतेएकादेशेचपुत्रपत्योरनन्तरोयङ्नभवत्यकारेणव्यवधानादितिसंप्रसारणंनभविष्यतीत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदेशवाद्याह। योनन्तर इति। यङः संप्रसारणमिति भवता सूत्रं क्रियते तदा लिटि धातोरित्यतो धातुग्रहणानुवृत्तौ सत्यां
धातुना यङ् विशेष्यते। तत्र पुत्रपत्योरनन्तरो यङन्तो धातुर्न संभवतीति सामर्थ्याद्यथाऽधातोरनन्तरस्य वाराही पुत्र इति
संप्रसारणं भवति। एवं लोलूयापुत्र इत्यत्र व्यवहितस्यापि धातोः स्यादित्यर्थः। धातुत्वमानन्तर्यं च विशेषणमाश्रितं
तत्रैकस्योभयासंभवात्सामर्थ्यादेकतरविशेषणाश्रयणादुभयोरपि संप्रसारणप्रसङ्ग इत्यर्थः। नचेदिति। एकस्य य
दा धर्मद्वयं न संभवति तदान्यतररूपाश्रयणादुभयोः साम्यात्कार्यप्राप्तिः। प्रत्ययवाद्याह। यदीति। तदा किं दोषः स्या
न्नवेति पृच्छति। आदेशवाद्याह। यङेति। जुस्ति चेत्यादावङ्गे नैको विशेषणेऽङ्गस्यैकावाविशेषोऽस्येव। यङा तु धातो

अकारेण व्यवधानाद्दोषो भविष्यति। योनन्तरो धातुः सः। यो धातुः सोनन्तरः। धातोरिति वर्तते। यस्मा
त्रानन्तरो नासौ धातुः। यश्च धातुर्नासावनन्तरः। नचेदुभयतः साम्यमुभयत्र प्रसज्यते। नचेदुभय
तः साम्यं भवति। उभयत्र प्राप्नोति। यदि पुनर्यङा धातुर्विशेष्येत। यङा विशेष्येत यदीह धातुर्यङ् धा
तुना वा यदि तुल्यमेतत्। यद्येवं यङा धातुर्विशेष्येत। अथापि धातुना यङ्। तुल्यमेतद्भवति। उभौ
प्रधानं यदि नात्र दोषः। अथोभौ प्रधानं भवतः नात्र दोषो भवति। तथा प्रसार्येत तु वाक्यतिस्ते। तथा
सतिं कियतिः वाक्पुत्र इत्यत्र संप्रसारणं प्राप्नोति। धातुप्रकरणस्येह न स्थानमिति निश्चयः। धातुप्रक
रणस्येह स्थानं नास्तीति कृत्वा एष निश्चयः क्रियते ॥

विशेष्यमाणे धातुना वात्र विशेष्यमाणे यङि विशेषो नास्तीत्यर्थः। प्रत्ययवाद्याह। उभाविति। यङ्धात्वोः परस्परेण विशेषणवि
शेष्यभावो नास्ति समुच्चयेन तु कार्यं विधीयते पुत्रपत्योरनन्तरस्य यङो धातोश्चेति। तत्र वाराही पुत्र इत्यादौ भवि
ष्यति न तु लोलूयापतिरित्यादौ धातोर्व्यवधानात्। ततश्च सामर्थ्याद्धातुग्रहणस्योत्तरार्थैवानुवृत्तिः। आदेशवाद्या
ह। तथेति। यदि यङ्धात्वोः समुच्चयो न तु विशेषणविशेष्यभावस्तदा वाक्पतिशब्दे पत्युरनन्तरस्य यङो धातोश्चे
ति वचे धातोः संप्रसारणप्रसङ्गः। प्रत्ययवाद्याह। धातुप्रकरणस्येति। धातुग्रहणं नानुवर्तत इति नास्त्यतिप्रसङ्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदेशवाद्याह। अवश्यमिति। आदेचउपदेशेऽशितीत्येतदर्थमवश्यमनुवर्त्त्यं धातुग्रहणमित्यर्थः। प्रत्ययवाद्याह। आ
त्वार्थमिति। स्तदिति। एतत्प्रयोजनार्थं व्याख्यानमित्यर्थः। उपदेशशब्देन शास्त्रमुच्यते। तेन शास्त्रे ये पठिता[illegible]
स्तेषामात्वं विधीयते। प्रातिपदिकानि तु न प्रतिपदं शास्त्रे पठितानि किं तर्हि प्रकृत्यादिविभागकल्पनाद्वारेण साधुत्वे
न प्रतिपादितानि। ननु नौद्यचष्ठन् गोद्यचइत्यादावुपदेशे यानि प्रातिपदिकानि पठितानि तेषामात्वप्रसङ्गः। एवं च गो
तो णिदिति णित्वातिदेशाज्ज्ञापकात्तेषामात्वाभावः। न ह्यात्वे गोशब्दस्य कृते णित्वस्यास्ति प्रयोजनम्। एवं प्रत्ययम

अवश्यमात्वार्थं धातुग्रहणं कर्त्तव्यम्। इह माभूत्। गोभ्यां गोभिः नौभ्यां नौभिरिति। आत्वार्थं यदि क
र्त्तव्यं तत्रैवैतत्करिष्यते। उपदेशे यदेजन्तं तस्यैवेदात्वमिष्यते। उद्देशो रूढिशब्दानां तेन गोर्न भ
विष्यति। एवं तर्हि उपदेशे आत्वमित्युच्यते। उद्देशश्च प्रातिपदिकानां नोपदेशः॥ गोत्रावयवात्॥ कि
मर्थमिदमुच्यते। गोत्रावयवादगोत्रार्थम्। गोत्रावयवादित्युच्यते। अगोत्रार्थोऽयमारम्भः। गोत्रावयवा
दगोत्रार्थमिति चेत्तदनिष्टम्। गोत्रावयवादगोत्रार्थमिति चेत्तदनिष्टं प्राप्नोति। इहापि प्राप्नोति। आहिच्छ
त्रीकान्यकुब्जीति। एवं तर्हि गोत्राद्देव गोत्रावयवात्। गोत्रादिति चेद्वचनानर्थक्यम्। गोत्रादिति चेद्वचनम
नर्थकं भवति। सिद्धं गोत्रे पूर्वेणैव। इदं तर्हि प्रयोजनम्। गुरूपोत्तमयोरित्युच्यते। अगुरूपोत्तमार्थोऽय
मारम्भः। अगुरूपोत्तमार्थमिति चेत् सर्वेषामवयवत्वात्सर्वत्र प्रसङ्गः॥

स्योऽपि निर्दोषः। अत एव क्रोड्यादिभ्यश्चेति पञ्चमीनिर्देशः। औडमेघयइत्यादौ तु सिद्धः प्रत्ययपक्षेऽपि यलोपः। ष्य
ङ् आपत्यादि हितत्वात्स्वार्थिकत्वादापत्यत्वादित्याहुः। गोत्रा॥ अवयवशब्दस्यानेकार्थत्वात् संदेहात्प्रश्नः। किमर्थमि
ति। पृथग्भाववाचिनमवयवशब्दमाश्रित्याह। गोत्रावयवादिति। गोत्रावयवो गोत्रात्पृथग्भूतो गोत्रं न भवतीत्यर्थः। सप्तम्यर्थे
चेयं पञ्चमी तेन गोत्रे अणिञोः ष्यङ् भवतीत्यर्थः। इहापीति। पूर्वसूत्रे गोत्रग्रहणानर्थक्यप्रसङ्गादेषोऽर्थ इह नाश्रीयत इति भा
वः। इदानीमेकदेशवाच्याश्रयेणाह। एवं तर्हीति। यथा घृतावयवो घृतमेवं गोत्रावयवोऽपि गोत्रमित्यर्थः। गोत्रादिति चेदिति।
पौत्रप्रभृत्यपत्यसमुदायस्य गोत्रत्वे तदवयवस्यापि गोत्रत्वात् पूर्वेणैव ष्यङ् सिद्ध इत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वत्रप्रसङ्ग इति। यथाभार्गवगोत्रस्यसाधारणस्यावान्तरगोत्राणिच्यवनादीनितेषुऋषिशब्देभ्यः पूर्वसूत्रेऽनार्ष
योरितिष्यङ्प्रतिषेधादनृषिशब्देभ्योगुरूपोत्तमेभ्यएवष्यङि ष्यतेनलगुरूपोत्तमेभ्यइतिभावः। तत्रभवतामि
ति। अगस्त्याष्टमानामित्यर्थः। कथंयेभ्यइति। पुणिकमुखरादिभ्यः। यैञ्जौड्यादयइति। पूर्वाचार्यसंज्ञयैवमभिहि
तमित्यर्थः। कुलाख्याभ्यइति। अप्रधानवचनोऽवयवशब्दइहगृह्यते। तत्रप्रवराध्याय पठितानांमुख्यंगोत्रत्व
म्। येत्वादिपुरुषाःश्रुतशीलसंपन्नाअपत्यसन्तानप्रसिद्धिहेतवस्तेषामप्रधानगोत्रत्वंतेभ्योऽनेनष्यङ्विधान

अगुरूपोत्तमार्थमितिचेत्सर्वेषामवयवत्वात्सर्वत्रप्राप्नोति। अष्टाशीतिसहस्राणिमुनीनामूर्ध्वरेतसा
म्। बभूवुस्तत्रागस्त्याष्टमैर्ऋषिभिः प्रयोजनमस्त्युपगतः। तत्रभवतांयदपत्यं तानिगोत्राणिअतो
न्येगोत्रावयवाःततउत्पत्तिःप्राप्नोति। तच्चानिष्टम्। तस्मान्नार्थोऽनेनयोगेन। कथंयेभ्योऽगुरूपोत्तमेभ्य
इष्यते। सिद्धंतुरौड्यादिषूपसंख्यानात्। सिद्धमेतत्। कथम्। रौड्यादिषूपसंख्यानात्। रौड्यादिषू
पसंख्यानंकर्तव्यम्। केपुनारौड्यादयः। यैञ्जौड्यादयःभारद्वाजीयाःपठन्ति। सिद्धंतुकुलाख्याभ्यो
लोकेगोत्राभिमताभ्यइति। सिद्धमेतत्। कथम्। कुलाख्यालोकेगोत्राभिमताःगोत्रावयवाइत्युच्यन्ते।
अथवागोत्रावयवःकोभवितुमर्हतियोगोत्रादवयुतः। कश्चगोत्रादवयुतः। योनन्तरः। देवदत्तस्याप
त्यस्येति ॥ इतिश्रीभगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येचतुर्थस्याध्यायस्यप्रथमेपा
देद्वितीयमाह्निकम् ॥

म्। पुणिकस्यापत्यंगोत्रंस्त्रीपौणिक्याभौणिक्या मौखर्येति। योनन्तरइति। पृथग्वाच्यवयवशब्दोऽपत्यत्वेनगो
त्रसादृश्येसतिपृथग्भावोन्तरङ्गत्वादाश्रीयतइतिजातादौष्यङ्नभवति। आहिच्छत्रीति। तदेवमर्थरूपमस्यसूत्र
स्यभाष्यकारेणव्याख्यातम्। अभिधानलक्षणाश्चकृत्तद्धितसमासाइतिसर्वत्रानन्तरापत्येष्यङ्नभवति ॥ इत्युपा
ध्यायजैयपुत्रकैयटकृतेमहाभाष्यप्रदीपेचतुर्थस्याध्यायस्यप्रथमेपादेद्वितीयमाह्निकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्थानाम्॥ समर्थवचनमिति। तस्यापत्यमित्यादौ श्रूयमाणविभक्तिसंबन्ध्यपेक्षायां विभक्तौ विज्ञायमानायामसाम
र्थ्ये प्रत्ययप्रसङ्ग एव नास्तीति मत्वा प्रश्नः समर्थादिति। समर्थादेवेत्यवधारणं द्रष्टव्यम्। न तस्यापत्यमित्यादौ लक्षणवाक्ये
संबन्धप्रतिपादनाय विभक्त्युच्चारणम्। इह तस्य प्रयोजनाभावात्। किं तर्हि षष्ठ्यन्तात्प्रत्ययविध्यर्थं तस्येति निर्दिष्ट
म्। अपत्यमिति। प्रत्ययार्थत्वेन निर्दिष्टमिति परस्परसंबन्धस्याप्रतिपादनादसमर्थादपि प्रत्ययः स्यादिति भावः। ऋद्ध
स्योपगोरित्यादावपि प्रत्ययो न भवति सापेक्षत्वादसामर्थ्यात्। समर्थवचनमिति। प्रयुक्तानामिदमन्वाख्यानं प्रवृत्तम्।
तत्र कम्बल उपगोरपत्यं देवदत्तस्येति योऽर्थः प्रतीयते नासौ कम्बल औपगवो देवदत्तस्येति प्रत्यये कृते इति प्रत्ययो न भ

समर्थानां प्रथमाद्वा॥ समर्थवचनं किमर्थम्। समर्थादुत्पत्तिर्यथा स्यात्। उपगोरपत्यमिति। असमर्थान्मा भूदि
ति। कम्बल उपगोरपत्यं देवदत्तस्येति। समर्थवचनमनर्थकम्। न ह्यसमर्थेनार्थाभिधानम्। समर्थवचनमन
र्थकम्। किं कारणम्। न ह्यसमर्थेनार्थाभिधानम्। न ह्यसमर्थादुत्पद्यमानेन प्रत्ययेनार्थाभिधानं स्यात्। अनभि
धानात्तत उत्पत्तिर्न भविष्यति। अथ प्रथमवचनं किमर्थम्। प्रथमवचनं प्रकृतिविशेषणार्थम्। प्रथमात्प्रत्ययो
त्पत्तिर्यथा स्यात्। अप्रथमान्मा भूत्। उपगोरपत्यमिति। अपत्यशब्दात्। प्रथमवचनमनर्थकं न ह्यप्रथमेनार्था
भिधानम्। प्रथमवचनमनर्थकम्। किं कारणम्। न ह्यत्राप्रथमेनार्थाभिधानम्। न ह्यप्रथमादुत्पद्यमानेन प्रत्य
येनार्थाभिधानं स्यात्। अनभिधानात्तत उत्पत्तिर्न भविष्यति। अथ वावचनं किमर्थम्। वाक्यमपि यथा स्यात्। उप
गोरपत्यमिति। वावचने चोक्तम्। किमुक्तम्। तत्र तावदुक्तं वावचनानर्थक्यं च तत्र नित्यत्वात्सन्न इति ॥

विष्यतीत्यर्थः। प्रकृतिप्रत्ययौ च प्रत्ययार्थं सह ब्रूतः। न चानन्वितयोः सहाभिधानसंभवः। असमर्थशब्देनासमर्थादुत्पन्नः
प्रत्यय उपचारादभिहितः। अपत्यशब्दादिति। अपत्यविशेषवाचिनो देवदत्तादिशब्दादित्यर्थः। तथाहि। यथेन्द्रो देवताऽ
स्येति ऐन्द्रं हविरिति प्रथमान्तात्प्रत्ययो भवति। एवं देवदत्तोऽपत्यमस्योपगोरिति प्रत्ययप्रसङ्गः। लक्षणवाक्यापेक्षं च प्राथ
म्यं नियतत्वादाश्रीयते। न तु विग्रहवाक्यापेक्षं [illegible] नियतमन्यथा पर्यायेण सर्वस्य प्राथम्यात् प्रथमादित्यनर्थकं स्यात्। प्रथ
मवचनमिति। देवदत्तिरित्युक्तेऽपत्यं प्रतीयते। न त्वपत्यवानित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्हेति। व्यपेक्षैकार्थीभावयोरत्यन्तभेदाद्भिन्नार्थस्य वाक्यस्य वृत्त्या बाधनं न भविष्यतीत्यर्थः। कृतवर्णानुपूर्वीकमि
ति। तस्यैव लोकेऽर्थप्रतिपादनाय प्रयोगात्समर्थत्वमिति भावः। सौत्थितिरिति। विभज्यान्वाख्याने सु उत्थित इत्यस्मा
दपि प्रत्ययः स्यात्। ततश्च सावुत्थितिरित्यनिष्टप्रसङ्गो वार्णादाङ्गं बलीय इति वृद्धिप्रसङ्गात्। नन्वन्तरङ्गत्वाद्वार्णेषु कृ
र्येषु कृतेषु प्रत्ययो भविष्यति। एवं तर्ह्येतदनेन समर्थवचनेन ज्ञाप्यते। अस्तीयं परिभाषा अकृतव्यूहाः पाणिनीया इ
ति। तेन पपुषः तस्थुष इत्यादि सिद्धं भवति। अन्तरङ्गत्वात्पूर्वं कृतो पीडागमस्तत्परिभाषावशान्निवर्तते। तत्र पपाव
स् अस् इति स्थिते इट् च प्राप्नोति संप्रसारणं च। तत्र संप्रसारणं बलीयः प्रतिपदविधानादिति। तत्र कृते वलादित्वाभावा

इहापि वावचनमनर्थकम्। किं कारणम्। तत्र नित्यत्वात्प्रत्ययस्यात्। इह द्वौ पक्षौ। वृत्तिपक्षश्चावृत्तिपक्ष
श्च। स्वभावतश्चैतद्भवति। वाक्यं च वृत्तिश्च। तत्र स्वाभाविके वृत्तिविषये नित्ये प्रत्यये प्राप्ते वावचनेन कि
मन्यच्छक्यमभिसंबन्धुमन्यदतः संज्ञायाः। न च संज्ञाया भावाभावाविष्येते। तस्मान्नार्थो वावचनेन। अ
थैतत्समर्थग्रहणं नैव कर्तव्यम्। कर्तव्यं च। किं प्रयोजनम्। समर्थादुत्पत्तिर्यथा स्यादसमर्थान्माभूदिति।
किं पुनः समर्थं समर्थाभिधानेयच्छक्तम्। किं पुनस्तत्। कृतवर्णानुपूर्वीकं पदम्। सौत्थितिः वैक्षमाणिरिति।
अथ तद्वावचनं नैव कर्तव्यम्। कर्तव्यं च। किं प्रयोजनम्। नित्याः शब्दाः नित्येषु शब्देषु वाक्यस्य साधुत्वमने
नान्वाख्यायते। प्राग्दीव्यतोऽण्॥ अयुक्तोयं निर्देशः ॥

दिपना स्तीति सिद्धं पपुष इति। वाक्यस्येति। वृत्तिवाक्ययोरवान्तरार्थभेदेऽपि प्रधानार्थभेदादेकार्थाद्वाक्यस्य वृत्त्या बाधः
स्यात्। तथाह्यौपगवमानयेत्युक्ते योऽर्थ आनीयते स एवोपगोरपत्यमानयेत्युक्तो तत्र यथा गोशब्देन गावीशब्दो निवर्त्यते
सत्यामपि गावीशब्दादधिकस्य स्त्रीत्वस्य प्रतिपत्तौ जातिलक्षणार्थाभेदात्। एवं वाक्यस्यापि वृत्त्या निवृत्तिः स्यादिति तद
भ्यनुज्ञानाय वावचनम्। प्राग्दीव्यतोऽण्॥ अयुक्त इति। प्रसिद्धन्यायकरणोऽयुजिः। प्रसिद्धस्य च कदाचि[illegible]स्पष्टप्रतिपत्त्य
र्थः प्रयोगो दृश्यते न्यायेनायुक्तमिति। नहीति। दीव्यतिशब्दवाच्यस्यार्थस्यैवावधिभावो विवक्षितः। अर्थानामेवा[illegible]धिमत्वस्ये
ष्टत्वात्। समानजातीयानामवध्यवधिमद्भावस्य प्रसिद्धत्वात्। समुदाये चैकदेशस्य गुणभावादवधित्वानुपपत्तिरिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीव्यच्छब्द इति। एकदेशेन समुदायो निर्दिश्यते। सुचार्थप्रधान इत्यर्थस्यावधित्वं संपद्यते। तन्नेति। तेन पञ्चत्वं स्यादौ
पदसंज्ञा सिद्धा भवति। अथ वेति। नैवेदमनुकरणं किं तर्ह्यर्थ एवावधित्वेन निर्दिश्यते। तत्र दिवेर्लटि कृते ऽर्थादिति नेगा।
न्य मान। ... र्थत्वादप्रयुक्तेनाप्रथमान्तेन सामानाधिकरण्यात् प्रथमासमानाधिकरणे निषेधाद्बलटः शत्रा ... शः कृतद्यत्य
र्थः। अथेति।। एकदेशाक्षेपद्वारेण प्राग्दीव्यत इति समुदाय आक्षिप्तः। अणित्येवं वक्तव्यमधिकारार्थमिति मत्वा प्रश्नः। स

नहि तत्र कश्चिद् दीव्यच्छब्दः पठ्यते। कस्तर्हि। दीव्यतिशब्दः। कथं तर्हि निर्देशः कर्तव्यः। प्राग्दीव्यतेरिति।
स तथा तर्हि निर्देशः कर्तव्यः प्राग्दीव्यतेरिति। न कर्तव्यः। दीव्यतिशब्दे च दीव्यच्छब्दोऽस्ति तस्मादेषा पञ्च
मी। किं पुनः कारणं विकृतनिर्देशः क्रियते। एतज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा एकदेशविकृतमन
न्यवद्भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। एकदेशे विकृते रूपसंख्यानं चोदितं तन्न वक्तव्यं भवति। अ
थवा प्राक्शब्दोऽयं दिक्शब्दः। दिक्शब्दैश्च योगे पञ्चमी भवति। तत्राप्रथमासमानाधिकरणे इति कृत्वा
शता भविष्यति। अथ प्राग्वचनं किमर्थम्। प्राग्वचनं सकृद्विधानार्थम्। प्राग्वचनं क्रियते सकृद्विधानार्थम्।
सकृद्विहितः प्रत्ययो विहितो यथा स्यात्। योगे योगे तस्य ग्रहणमा कर्षमिति। नैतदस्ति प्रयोजनम्। अधिका
रादप्येतत् सिद्धम्। अधिकारः प्रतियोगं तस्यानिर्देशार्थः इति योगे योगे उपतिष्ठते। अधिकारात्सिद्धमिति
चेदपवादविषयेण प्रसङ्गः। अधिकारात् सिद्धमिति चेदपवादविषयेण प्राप्नोति। अत इञ्। अण् चेत्यणपि
प्राप्नोति। तस्मात् प्राग्वचनम्। तस्मात्प्राग्वचनं कर्तव्यम्। अथ प्राग्वचने क्रियमाणे कथमिदं विज्ञायते प्राग्दी
व्यतो याः प्रकृतयः आहोस्वित् प्राग्दीव्यतो येऽर्था इति। किं चातः। यदि विज्ञायते प्राग्दीव्यतो याः प्रकृतय इति। स ए
व दोषः। अपवादविषयेण प्रसङ्ग इति। अथ विज्ञायते प्राग्दीव्यतो येऽर्था इति। न दोषो भवति ॥

कृद्विधानार्थमिति। प्राग्दीव्यतो येऽर्थास्तान्सर्वानपेक्ष्यानेनाण्प्रत्ययः सकृद्विधीयत इत्यर्थः। विहितो यथा स्यादिति। सर्वेष्वर्थेषु
विहितो यथा स्यादित्यर्थः। अण् चेति। प्रतियोगमुपस्थाने द्वयोरेकविषयत्वाद्विकल्पः स्यान्न तु बाध्यबाधकभावः। स एष दोष
इति। सर्वाश्चैव प्रकृतय इहापेक्ष्यन्ते। तदेकविषयत्वादणिञादीनां बाध्यबाधकभावो न स्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· समानेर्थइति। अर्थापेक्षणेसत्यर्थेचिदमणिविधानमितिप्रकृत्यन्तरेसावकाशोऽण्प्रत्ययःएकस्मिन्नर्थेप्रकृतिविशेषादुत्पद्यमा ४१३
३७ नेनेञादिनातक्कौण्डिन्य न्यायेनबाध्यतइत्यर्थः। तथाहीति। यज्जातीयोऽवधिस्तज्जातीयोऽवधिमानितिभावः। प्राधान्ये
नेति। तात्पर्येणेत्यर्थः। यांकांचिदिति। प्राकुलस्यादणइतिवक्तव्यंस्यादित्यर्थः। पीलायावेति। सूत्रमप्येतदनारम्भणीयंस्या
दाद्यचइत्यनेनैवठकःसिद्धत्वादनेनाप्यणः। उदश्वितइति। उदश्वितइत्येवठग्विधानायकर्तव्यंस्यादनेनाणःसिद्धत्वादित्य

समानेर्थेप्रकृतिविशेषादुत्पद्यमानइञणंबाधिष्यते। यथानदोषस्तथास्तु। प्राग्दीव्यतोऽर्थोइतिविज्ञायते।
कृतएतत्। तथाह्ययंप्राधान्येनार्थंनिर्दिशति। इतरथाहिबह्व्यस्तत्रप्रकृतयःपठ्यन्ते ततोयांकांचिदेवावधि
त्वेनोपाददीत। अथवापुनरस्तुप्राग्दीव्यतोयाःप्रकृतयइति। ननुचोक्तमपवादविषयेणप्रसङ्गइति। नवाक्व
चिद्वावचनात्। नवाएषदोषः। किंकारणम्। क्वचिद्वावचनात्। यदयंक्वचिद्वावचनंकरोति। पीलायावा। उ
दश्वितोन्यतरस्यामिति। तज्ज्ञापयत्याचार्यः। नापवादविषयेणभवतीति। यद्येतज्ज्ञाप्यतेनार्थःप्राग्वचनेन।
अधिकारात्सिद्धम्। ननुचोक्तमधिकारात्सिद्धमितिचेदपवादविषयेणप्रसङ्गइति। नैषदोषः। परिहृतमेतत्।
नवाक्वचिद्वावचनादिति। किंपुनःकारणमियानवधिर्गृह्यते। नप्राक्ठकइत्येवोच्यते। एतज्ज्ञापयत्यर्थेषे
तद्भवतीति। किमेतस्यज्ञापनेप्रयोजनम्। प्रकृतिविशेषादुत्पद्यमानइञणंबाधिष्यते। दित्यदित्यादित्यपत्यु
त्तरपदाण्ण्यः॥ ण्यप्रकरणेवाङ्मतिपितृमतांछन्दस्युपसंख्यानम्॥ ण्यप्रकरणेवाङ्मतिपितृमतांछ
न्दस्युपसंख्यानंकर्तव्यम्। वाक्। वाच्यम्। मति। मात्यः। पितृमत्। पैतृमत्यः। पृथिव्याञाञौ॥ पृथिव्याञाञौव
क्तव्यौ। पार्थिवा पार्थिवी॥ देवस्यजञौ॥ देवस्ययञञौवक्तव्यौ दैव्यं दैवम्॥ बहिषष्टिलोपोयञ्च॥ बहि
षष्टिलोपोयञ्चवक्तव्यः। बहिर्भवोबाह्यः ॥

र्थः। नप्राक्ठकइति। यद्यपीहानेकठग्ग्रहणमस्तितथाव्याख्यानात्प्राग्वहतेष्ठगित्ययमेवावधित्वेनग्रहीष्यते। स्तदिति। एवंहि
सत्येवबाध्यबाधकभावोभवतिज्ञापकाश्रयणमन्तरेणैवेत्यर्थः। दित्यदित्यादि। अणपवादोण्यः। वाङ्मतीति। कुर्वादिञ्यमतिपितृम
च्छन्दयोरपत्यार्थेभाषायामपिण्यविधानार्थःपाठः। अनेनतुच्छन्दसिसर्वेषुप्राग्दीव्यतीयेषुण्यविधिः। बहिषइति। टिलोप
वचनमव्ययानांभमात्रेटिलोपइत्यस्यानित्यत्वज्ञापनार्थंतेनारातीयइत्येवमादिसिद्धंभवति। स्यामन्इति। भाष्यकारवचन एमः
प्रामाण्यात्तदन्तस्यग्रहणंनकेवलस्य ॥ ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्वत्थामइति। अश्व स्येवस्थामबलं यस्येतिबहुव्रीहिः। पृषोदरादित्वात्सकारस्यतकारः। अपत्यादावर्थेऽकारप्रत्ययः। नस्तद्धि तइतिटिलोपः। उडुलोमाइतिबाह्वादिषुलोमन्‌शब्दस्यपाठादिञिप्राप्तेऽकारोविधीयते। केचिदाहुरिञ्यपिकृतेतस्यबह्वच इञः प्राच्यभरतेष्विति लुकिप्रत्ययलक्षणेनस्वादिष्विति पदसंज्ञायांनलोपेनसिद्धंरूपम्। भसंज्ञातुवर्णाश्रयत्वात्प्रत्ययल क्षणेननभविष्यति नङिसंबुद्ध्योरिति ङौनलोपनिषेधाद्वा। तदेतदयुक्तम्। प्राच्यभरतगोत्रादन्यत्रलुगभावात्। किंचोडुलो मेरुडुलोमेभ्य इत्यादौसुब्विधौनलोपस्यासिद्धत्वादैसादिनस्यात्। नलुमताङ्गस्येतिप्रत्ययलक्षणनिषेधाद्वापदसंज्ञा याअभावः। यथाकाश्यपेनप्रोक्तमधीयतेकाश्यपिनइत्यत्राणोलुकिकृतेनलोपोनभवति। एवमिहापिनस्यात्। सर्वत्रेति।

ईकक्‌। बहिष ईकक्‌वक्तव्यः। बाहीकः। ईकञ्छन्दसिचवक्तव्यः॥ बाहीकमस्तुभद्रंवः॥ स्थाम्नोकारः॥ स्थाम्नोऽ कारोवक्तव्यः। अश्वत्थामः। लोम्नोपत्येषुबहुषु॥ लोम्नोऽपत्येषुबहुषुअकारोवक्तव्यः। उडुलोमाः। शारलोमाः। बहुष्वितिकिमर्थम्। औडुलोमिः। शारलोमिः। सर्वत्रगोरजादिप्रसङ्गेयत्॥ सर्वत्रगोरजादिप्रसङ्गेयद्वक्तव्यः॥ गविभवंगव्यम्। गोस्स्वंगव्यम्। गौर्देवतायस्यस्थालीपाकस्यगव्यःस्थालीपाकः। ण्याद्योऽर्थविशेषलक्षणाद पवादात्पूर्वविप्रतिषिद्धम्॥ ण्याद्योऽर्थविशेषलक्षणादणपवादाद्भवन्तिपूर्वविप्रतिषेधेन। ण्यादीनामव काशः। दितिर्देवतास्यदैत्यः। अदितिर्देवतास्यआदित्यः। अर्थविशेषलक्षणस्याणपवादस्यावकाशः। दुलेरपत्यं दौलेयः। बालेयः। इहोभयंप्राप्नोति। दितेरपत्यंदैत्यः। अदितेरादित्यः। अपरस्यार्थविशेषलक्षणस्याणपवादस्या वकाशः। अचित्तहस्तिधेनोष्ठक्‌। आपूपिकम्। शाष्कुलिकम्। ण्यादीनामवकाशः। बार्हस्पत्यम्। प्राजापत्यम्। इहोभयंप्रा प्नोति। वनस्पतीनांसमूहोवानस्पत्यम्। ण्याद्योभवन्तिपूर्वविप्रतिषेधेन। सतर्हिपूर्वविप्रतिषेधोवक्तव्यः। नवक्तव्यः॥

नापत्यएव। यद्वा। प्राग्दीव्यतीयेअन्यत्रचतेनगवाचरतिगव्यइत्यपिभवतीतिकेचिदाहुः। अजादिप्रसङ्गइतिकिम्। गोभ्यो हेतुभ्यआगतंगोरूप्यम्। गोमयम्। ण्याद्यइति। ण्याद्योयेननाप्राप्तिन्यायेनाणएवापवादाः। ठगादिभिरणपवादैस्तुस हसंप्रधारणायांपरत्वात्तएवस्युरितिवार्तिकारम्भः। अर्थविशेषोलक्षणंनिमित्तंयस्यसोऽर्थविशेषलक्षणः। यस्त्वर्थसाम न्यलक्षणोऽणपवादस्तपरत्वाद्भवतिउष्ट्रपतिर्नामपत्त्रंतस्येदमौष्ट्रपतम्। पत्त्राध्वर्युपरिषदश्चेत्यञ्भवतिनतुण्यः। बा र्हस्पत्यमिति। बृहस्पतिर्देवताअस्येतिण्यः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 दितिवनस्पतिभ्यामिति। इतश्चानिञ इति दितेर्ढञ् भवति। वनस्पतेरविशेषेण दित्यादिभ्य इति ण्य भवति। उत्सादीति। ग्रीष्मा
दिति। छन्दःशब्देनेह वृत्तमुच्यते। तस्मिन्नभिधेयेऽञः प्रतिषेधादण् एव भवति। त्रिष्टुबिति। ग्रीष्मो देवता अस्या इत्यण्। यदा तु
ग्रीष्मे भवेति शेषार्थविवक्षा तदा तु शैषिकस्त्वण् सिद्ध एव। न चाञो शैषिकस्य बाधप्रसङ्गोऽर्थविशेषलक्षणानां तुल्य
कक्ष्याणामेव प्रत्ययानां ण्यादिभिर्बाधनात्। अत्वणं तु कस्मान्न प्राप्तत्वादञो बाधकः। तथाहि। कालाट्ठञणोपवादस्तथोऽपि अ
त्वण्। ग्रैष्मावेताविति। शेषलक्षणादर्थादन्यत्र बोद्धव्यम्। शेषे अत्वणा भाव्यमित्युक्तम्। स्त्रीपुंसाभ्याम्॥ लोपः प्राप्नोतीति। व

द्वच्चाचीपरशब्दः। विप्रतिषेधे परं यदिष्टं तद्भवति। दितिवनस्पतिभ्यामपत्यसमूहयोरिति॥ उत्सादिभ्योऽञ्
अञ्प्रकरणे ग्रीष्मादच्छन्दसि॥ अञ्प्रकरणे ग्रीष्मादच्छन्दसीति वक्तव्यम्। ग्रैष्मम्। अच्छन्दसीति किमर्थम्। त्रि
ष्टुब् ग्रैष्मी। यद्यच्छन्दसीत्युच्यते ग्रैष्मावेतौ मासौ। अत्र न प्राप्नोति। अच्छन्दसीत्युच्यते। नेदं छन्दः समीक्षितम्।
काठकं कालापकं मोदकं पैप्पलादकमिति। किं तर्हि। प्रत्ययार्थविशेषणमेतद्। न चेच्छन्दः प्रत्ययार्थो भव
तीति। स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्॥ किमर्थं नञ्स्नञावुच्येते। न नञेवोच्येत। का रूपसिद्धिः। पौंस्नम्। पुं
स इति सकारान्तः। नञ् शब्दश्च प्रत्ययः। न सिध्यति। संयोगान्तस्य लोप इति लोपः प्राप्नोति। एवं तर्हि नैवा
र्थो नञा नापि स्नञा। अञ् प्रकृतः सोऽनुवर्तिष्यते। नकारस्यागमो वक्तव्यः। अथ नकारे आगमे सति किं पूर्वा
न्तः करिष्यते आहोस्वित्परादिः। किं चातः। यदि पूर्वान्तः। स्त्रैणाः। बहुषु लोपः प्राप्नोति। स्त्रैणानां संघः। संघा
ङ्कलक्षणेष्वञ्यञिञामणित्यण् प्राप्नोति। अथ परादिः। पौंस्नम्। स एव दोषः। संयोगान्तस्य लोपः प्राप्नोती
ति। अस्तु पूर्वान्तः। कथं स्त्रैणाः स्त्रैणानां संघ इति ॥

त्र कर्तव्ये पूर्वत्रासिद्धमित्यनुस्वारस्यासिद्धत्वादनुस्वारस्यापि वा अयोगवाहस्य प्रत्याहारे दृष्टत्वात्संयोगान्तत्वादिति भा
वः। अञ्प्रकृत इति। तत्र भत्वात्पदत्वाभावात्संयोगान्तलोपाप्रसङ्गः। बहुषु लोप इति। यञञोश्चेत्यनेन। अथ परादिरि
ति। परादौ न शब्दः संपद्यत इत्यञ्कार्याभावः। ननु च तद्धितस्य तद्ग्रहणेन ग्रहणात्परादावपि नकारेऽञ्कृतं प्राप्नोति। ए
वं तर्हि अश्वासावजित्याश्रयणाददोष इति मन्यते। पररूपं च शकन्ध्वादित्वात्सौत्रत्वाद्वा निर्देशस्य भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभयत्रेति। यञञोश्चेत्यत्र यस्कादिभ्यो गोत्र इत्यनुवर्तते। संघांकेत्यत्रापि गोत्रचरणाद्वुञित्यतः। ऋषिप्रजनश्च लोके गोत्रमित्युच्यते। स्त्री च नर्षिर्नापि पुंशब्दवाच्यं सामान्यमिति भावः। टिलोपस्तर्हीति। प्रकृत्यैकाजित्यत्रेष्ठेमेयःस्वित्यनुवर्तनात् प्रकृतिभावो नास्ति। इह तु खल्विति। यं विधिं प्रतीति यस्य तु विधेरिति च न्यायाभ्यामित्यर्थः। ननु च स्त्रीशब्दस्यापि नुगेव लोपनिमित्तम्। अन्यथा श्रीर्देवता अस्येति श्रायमित्यादावियस्येतिलोपासत्त्वाद् ढ्ङिः स्यादिचिन्त्यमेतत्। पौंस्ने दोष

उभयत्र लौकिकस्य गोत्रस्य ग्रहणम्। न चैतल्लौकिकं गोत्रम्। ईकारस्तर्हि प्राप्नोति। इष्टमेवैतत्संगृहीतं स्त्रैणीपौंस्नीत्येव भवितव्यम्। एवं हि सौनागाः पठन्ति। नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानमिति। टिलोपस्तर्हि प्राप्नोति। नुग्वचनान्न भविष्यति। भवेदिह नुग्वचनान्नस्यात्स्त्रैणमिति। इह तु खलु पौंस्नमिति नुग्वचनादेव प्राप्नोति। तस्मान्नञ्स्नञौ वक्तव्यौ॥ अथेहेमौ नञ्स्नञौ प्राग्भवनाद्वा आहोस्वित्प्राग्वतेरिति। कश्चात्र विशेषः। नञ्स्नञौ भवनादिति चेद्वत्यर्थे प्रतिषेधो वक्तव्यः। स्त्रीवत् पुंवदिति। किं पुनः कारणं न सिद्ध्यति। इमौ नञ्स्नञौ प्राग्भवनादित्युच्येते। तौ विशेषविहितौ सामान्यविहितं वतिं बाधेयाताम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। वतेः प्रागिति वक्ष्यामि। वतेः प्रागिति चेद्भाव उपसंख्यानम्। वतेः प्रागिति चेद्भाव उपसंख्यानं कर्तव्यम्। स्त्रीभावः स्त्रैणं पुंभावः पौंस्नमिति। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं नञ्स्नञौ भवनादिति चेद्वत्यर्थे प्रतिषेध इति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति। न वत्यर्थे नञ्स्नञौ भवत इति। यदयं स्त्रियाः पुंवदिति निर्देशं करोति। एवमपि स्त्रीवदिति न सिध्यति। योगापेक्षं ज्ञापकम्। द्विगोर्लुगनपत्ये॥ इह कस्मान्न भवति। त्रैविद्यः पाञ्चनदः षाड्कुल इति। इह तावत्त्रैविद्य इति। नैवं विज्ञायते तिस्रो विद्या अधीते त्रैविद्य इति॥

प्रसङ्गाद्वा। स्त्रैणेनाकारि सूक्ष्मेक्षा। वत्यर्थ इति। प्राग्भवनात्सर्वेष्वर्थेषु नञ्स्नञौ प्रकृतिविशेषाद्विधीयमानौ प्रकृत्यन्तरेषु सावकाशस्य वतेर्बाधकौ प्राप्नुत इति भावः। योगापेक्षमिति। अयं योगो वत्यर्थे न प्रवर्तत इति पुंवदिति निर्देशेन ज्ञाप्यत इत्यर्थः। द्वित्वतलोस्तु नञ्स्नञोः समावेशाय चत्वादित्यत्र यत्नः करिष्यते। तेन स्त्रीत्वं स्त्रीता। पुंस्त्वं पुंस्तेत्यपि भवति। द्विगोर्लुग। त्रैविद्य इति। द्विगोरत्राण्प्रत्यय इति मन्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवयवेति। विद्यात्रयरूपस्यसमुदायस्यविद्यात्वंविवक्षितमित्यर्थभेदोनास्ति। अव्ययिकन्यायाच्च द्विग्वभावः। पञ्चनदमि
ति। नदीभिश्चेतिसमाहारेव्ययीभावः। कुलोदकु पाण्डुसंख्यापूर्वायाइत्यच्समासान्तः। षण्मामिति। आदिपुरुषाणांकुलमिति
कुलसामान्यस्यविवक्षितत्वाद्यएवार्थः षट्सुकुलेषुभवइतिसएवषण्णांकुलेभवइतीतिभावः। पञ्चगर्गरूप्यमिति। पञ्चभ्यो
गर्गेभ्योहेतुभ्यआगतमितिद्विगुः। ततोरूप्यमयटौ। द्विगुनिमित्तमिति। द्विगोर्निमित्तमितिषष्ठीसमासः। क्वचिद्द्विगुनिमित्तइति

कथंतर्हिन्यवयवाविद्यात्रिविद्यात्रिविद्यामधीतेत्रैविद्यइति। इहापिपांञ्चनदइतिनैवंविज्ञायते। पञ्चसुन
दीषुभवः पाञ्चनदइति। कथंतर्हिपञ्चानांनदीनांसमाहारः पञ्चनदंपञ्चनदेभवः पाञ्चनदइति। षाङ्कुलइति।
नैवंविज्ञायतेषट्सुकुलेषुभवः षाङ्कुलइति। किंतर्हि। षण्णांकुलंषट्कुलंषट्कुलेभवः षाङ्कुलइति। अजादिग्र
हणंचकर्त्तव्यम्। इहमाभूत्। पञ्चगर्गरूप्यंपञ्चगर्गमयम्। द्विगोर्लुकितन्निमित्तग्रहणम्। द्विगोर्लुकि
तन्निमित्तग्रहणंकर्तव्यम्। द्विगुनिमित्तंयस्तद्धितः तस्यलुग्भवतीतिवक्तव्यम्। इहमाभूत्। पञ्चकपाल
स्येदंखण्डंपाञ्चकपालमिति। अर्थविशेषाऽसंप्रत्ययेऽतन्निमित्तादपि। अर्थविशेषासंप्रत्ययेऽतन्निमित्ताद
पीतिवक्तव्यम्। किंप्रयोजनम्। पञ्चसुकपालेषुसंस्कृतः पञ्चकपालः पञ्चकपाल्यांसंस्कृतइत्यपिविग्र
ह्यपञ्चकपालइत्येवयथास्यात्। अथक्रियमाणेपितन्निमित्तग्रहणेकथमिदंविज्ञायते। तस्यनिमित्तं
तन्निमित्तंतन्निमित्तादितिआहोस्वित्सनिमित्तमस्यसोयंतन्निमित्तस्तन्निमित्तादिति। किंचातः। य
दिविज्ञायते। तस्यनिमित्तंतन्निमित्तंतन्निमित्तादिति। क्रियमाणेपितन्निमित्तग्रहणेऽत्रप्राप्नोति। पञ्चकपाल
स्येदंखण्डंपाञ्चकपालमिति। अथविज्ञायते। सनिमित्तमस्यसोयंतन्निमित्तस्तन्निमित्तादिति। नदोषोभ
वति। यथानदोषस्तथास्तु। सनिमित्तमस्यसोयंतन्निमितः तन्निमित्तादितिविज्ञायते। कुतएतत् ॥

पाठः। तत्रद्विगोर्निमित्तंयस्मिंस्तद्धितेतदीयोयोर्थः सद्विगुनिमित्तइतिव्याख्येयम्। पञ्चकपालस्येति। पञ्चसुकपालेषुसंस्कृ
तइतितद्धितार्थेद्विगुः। ततोण्। तस्यानेनलुक्पुनस्तस्येदमित्यण्। तस्यद्विगुंप्रत्यनिमित्तत्वाल्लुगभावः। अर्थविशेषाऽसंप्र
त्ययइति। तद्धितहेतुकाद्द्विगोर्लुकियोर्थःप्रतीयते सएवातद्धितहेतुकादपियदीत्यर्थः। समाहारद्विगुश्चतद्धितार्थइति
द्विगुनासमानार्थइतितदिदंलुग्विधानंतस्येतितद्धितस्य। सनिमित्तमिति। सतद्धितोर्थद्वारेणनिमित्तंयस्येत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यमिति। पञ्चकपाल्यां संस्कृत इत्यत्रापि तद्धितस्य निमित्तं द्विगुरिति किं द्वितीयवार्त्तिकारम्भेण। किंच तन्निमित्तग्रहणमपि व्यावर्त्याभावादनर्थकं स्यात्। निमित्तमिति। निमित्तनिमित्तिभावलक्षणस्य संबन्धस्यान्तरङ्गत्वात्स एवाश्रीयते न तु पौर्वापर्यलक्षणः। पौर्वापर्यस्य च पञ्चम्या लाभात् षष्ठ्याश्रयणमनर्थकं स्यात्। अव्यविकन्यायेनेति। अव्यविक शब्दयोर्योन्यायस्तेनेत्यर्थः। क्वचिदविरविकन्यायेनेति पाठस्तत्र च दृष्टान्तत्वेनोपन्यासः। अविरविकन्यायेन तद्द्वारेण यथा प्रत्ययमुत्पादयति न स्वयं तथायमपीत्यर्थः। अथवाऽविरित्यस्य विभक्त्यन्तस्यानुकरणमविरिति। ततोऽनुकीर्येणार्थेनार्थव

यद्यमाह अर्थविशेषाऽसंप्रत्यये तन्निमित्तादपीति। तत्तर्हि निमित्तग्रहणं कर्तव्यम्। न कर्तव्यम्। द्विगोरिति नैषा पञ्चमी। का तर्हि संबन्धे षष्ठी। द्विगोस्तद्धितस्य लुग्भवतीति। कश्च द्विगोस्तद्धितः। निमित्तम्। यस्मिन् द्विगुरित्येतद्भवति। कस्मिंश्चैतद्भवति । ।प्रत्यये। इदं तर्हि वक्तव्यम्। अर्थविशेषासंप्रत्यये तन्निमित्ताद पीति। एतच्च न वक्तव्यम्। इहास्माभिस्त्रैशब्द्यं साध्यं पञ्चसु कपालेषु संस्कृतः पञ्चकपाल्यां संस्कृतः पञ्चकपालो दशकपाल इति। तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः। अपरस्मादुत्पत्तिर्भविष्यत्य व्यविकन्यायेन। तद्यथा। अवेर्मांसमिति विगृह्य अविकशब्दादुत्पत्तिर्भवति आविकमिति। एवं पञ्चसु कपालेषु संस्कृत इति विगृह्य पञ्चकपाल इति भविष्यति। पञ्चकपाल्यां संस्कृत इति विगृह्य वाक्यमेव भविष्यति। तत्त्रैशब्द्यं चेह साध्यं तच्चैवं सति सिद्धं भवति। गोत्रेऽलुगचि॥ गोत्रेऽलुगचीति चेदितरेतराश्रयत्वादप्रसिद्धिः। केतरेतराश्रयता। अलुग्निमित्तो जादिः। अजादिनिमित्तश्चालुक्।

त्वाद्याविभक्तिरुत्पद्यते तस्याद्द्वन्द्वान्तर्भावाल्लोपः न तु पूर्वस्या अनुकरणत्वात्सुप्त्वाभावात्। यथाऽस्य वामीयमिति षष्ठ्या लुगभावः। अथवा भाष्यकारवचनप्रामाण्यादस्य साधुत्वम्। एवमिति। पञ्चकपालीशब्दात्त्वनभिधानात्तद्धितानुत्पत्तिरिति भावः। गोत्रेऽलुगचि॥ यस्कादिभ्यो गोत्र इति प्रकरणेन प्राप्तस्य लुको विषयविशेषेऽयमपवादः। गोत्रेऽलुगचीति चेदिति। अस्मिन्सूत्रन्यासे दोषः। यदि तु गोत्रेऽलुगित्युक्त्वा हलि नेत्युच्येत तदा न स्याद्दोष इत्यर्थः। अलुङ्निमित्त इति। गर्गाणां छात्रा इति प्राग्दीव्यतीयार्थविवक्षायां सत्यलुकि वृद्धत्वाच्छेन भाव्यं नान्यथा के च कृते ईयादेशे परतोऽलुगितीतरेतराश्रयत्वम्। व्यक्तिपक्षेऽचीति परसप्तम्याश्रयणेऽयं दोषः। आकृतिपक्षे तु विषयसप्तम्याश्रयणेऽस्य दोषस्यानवतारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गार्गीयइति। गर्गस्यायंछात्रइतियदाएकवचनान्ताप्रकृतिस्तदेदंछस्यावकाशप्रदर्शनम्। भूम्नी तिचेति। प्रत्ययार्थबहुत्वमात्रापेक्षोलुगन्तरङ्गोबाह्यप्राग्दीव्यतीयार्थापेक्षत्वात्तुबहिरङ्गोजादिप्रत्ययः। अन्तरङ्ग·बहिरङ्ग·योश्चातुल्यकालत्वादयुक्तोविप्रतिषेधः। तुल्यकालत्वप्रतिपादनायाह। भूम्नीति। समानकालाविति। यदिपूर्वंलुक्प्रवर्त्तेततदाभिनिर्वृत्तस्यनिवर्तयितुमशक्यत्वादनर्थकमलुग्विधानंस्यात्। तस्मादलुग्विधानात्तावत्पूर्वंलुक्प्रवर्त्ततइतिलुकोपिसापेक्षत्वादन्तरङ्ग·त्वाभावादुपपन्नएवविप्रतिषेधइत्यर्थः। यदिवेति। अन्तरेणापिवि प्रतिषेधंलुगपवादत्वादलुकस्तन्निमित्तम

तदेतदितरेतराश्रयंभवति। इतरेतराश्रयाणिचनप्रकल्पन्ते। विप्रतिषेधाल्लुकश्छविधानम्। विप्रतिषेधाल्लुकःछोभविष्यति। लुकोवकाशः। गर्गाः। वत्साः। बिदाः। उर्वाः। छस्यावकाशः। शालीयोमालीयः। गार्गीयोवात्सीयः। इहोभयंप्राप्नोति। गर्गाणांछात्राःगार्गीयाः। वात्सीयाः। छोभवतिविप्रतिषेधेन। नैषयुक्तोविप्रतिषेधः। भूम्नीतिचलुक्प्राप्नोबाह्येचार्थेविधीयतेऽजादिः। बहिरङ्ग·मन्तरङ्गाद्विप्रतिषेधादयुक्तंस्यात्। भूम्निप्राप्तस्यलुकोयदजादौतद्धितेऽलुकंशास्ति। एतद्ब्रवीतिकुर्वन्समानकालावलुग्लुक्च यदयंभूम्निप्राप्तस्यलुकोऽजादौतद्धितेऽलुकंशास्ति। तज्ज्ञापयत्याचार्यःसमानकालावेतावलुग्लुकाविति। यदिवालुकःप्रसङ्गेभवत्यलुक्छस्तथाप्रसिद्धोस्य। यदिवालुकःप्रसङ्गेऽलुग्भवतितथास्यछःप्रसिद्धोभवति। पूर्वंह्यपवादाअभिनिविशन्तेपश्चादुत्सर्गाः। लुग्वालुकःप्रसङ्गंप्रतीक्षते। छेऽलुगस्यतथा। लुग्वापुनःअलुकःप्रसङ्गं·यदिप्रतीक्षते। तथातस्यछेऽलुक्सिद्धोभवति। प्रकल्प्यचापवादविषयंततउत्सर्गोभिनिविशतइति॥ गोत्रस्यबहुषुलोपिनोबहुवचनान्तस्यप्रवृत्तौद्व्येकयोरलुक्॥ गोत्रस्यबहुषुलोपिनोबहुवचनान्तस्यप्रवृत्तौद्व्येकयोरलुग्वक्तव्यः ॥

जादिप्रत्ययोबलवत्त्वात्प्रवर्त्ततइत्यर्थः। पूर्वमिति। निरपवादेविषयेउत्सर्गेणप्रवर्त्तितव्यमितिपश्चादसौप्रवर्तइतिभावः। प्रकल्प्येति। अन्यथानिर्विषयोऽपवादःस्याद्यदिसर्वत्रोत्सर्गःप्रवर्तेतेतिभावः। गोत्रस्येति। गोत्रप्रत्ययस्येत्यर्थः। बहुषुलोपिनइति। बहुष्वर्थेषुविधीयमानलोपस्येत्यर्थः। बहुवचनान्तस्येति। यदातदर्थान्तरेयूनिसंक्रामतितदन्ताद्यूनियदाप्रत्ययः क्रियतेइत्यर्थः। द्व्येकयोरिति। द्वित्वैकत्वयोरित्यर्थः। द्वयोर्यूनोरेकस्मिन्वायूनियदाप्रत्ययउत्पद्यतइत्युक्तंभवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बिदानामितिबिदस्यापत्यानिबहूनि।अनृष्यानन्तर्यइ्तिगोत्रेञ्।तदन्ताद्बहुष्वतद्ञ्।तस्यण्यस्त्रियार्षञितइतिलुक्।तत्रा
ञोबहुषूउत्पन्नत्वाल्लुक्प्राप्तःप्रतिषिध्यते।अञन्तमिति।इञिलुप्तेऽपिबहुष्वञन्तस्यवर्तनाल्लुम्भविष्यतीत्यर्थः।काश्यपा
इति।काश्यपस्यापत्यंबिदादित्वादञ्।ततएकस्यैवकाश्यपस्यबह्व्यःप्रतिकृतयोयदाविवक्षिताभवन्तितदैवंप्रतिकृता
विति।कन्प्रत्ययस्तस्यदेवपथादित्वाल्लुप्।हरीतक्यादिषुव्यक्तिरितिवचनाल्लिङ्गमेवयुक्तवद्भावेनभवति।वचनंत्वमि
धेयगतमेव।यद्वैकशेषःक्रियतेतदाऽञन्तस्यप्रकृतिबहुत्वेवर्तमानाल्लुक्प्रसङ्गः।यद्वेति।यथैवेत्यर्थः।अतएवइ

बिदानामपत्यंमाणवकःबैदः बैदौ।किमर्थमिदम्।नाचीत्येवालुक्सिद्धः।अचीत्युच्यते।नचात्राजादिंपश्यामः
प्रत्ययलक्षणेन।वर्णाश्रयेनास्तिप्रत्ययलक्षणम्।एकवचनद्विवचनान्तस्यप्रवृत्तौबहुषुलोपोयूनि॥एकव
नचंद्विवचनान्तस्यप्रवृत्तौबहुषुलोपोयूनिवक्तव्यः।बैदस्यापत्यंबहवोमाणवकाबिदाः।बैदयोर्वाबिदाः।अञ्यो
बहुषुयञ्योबहुष्वित्युच्यमानोलुग्नप्राप्नोति।माभूदेवम्।अञ्योबहुषुयञ्योबहुष्विति।अञन्तंयद्बहुषुयञन्तं
यद्बहुष्वित्येवंभविष्यति।नैवंशक्यम्।इहहिदोषःस्यात्।काश्यपप्रतिकृतयःकाश्यपाइति।नैषदोषः।यत्ता
वदुच्यते।गोत्रस्यबहुषुलोपिनोबहुवचनान्तस्यप्रवृत्तौद्व्येकयोरलुग्वक्तव्यःनवक्तव्यःअचीत्येवालुक्सि
द्धइति।अचीत्युच्यतेनचात्राजादिंपश्यामः।प्रत्ययलक्षणेन।ननुचोक्तंवर्णाश्रयेनास्तिप्रत्ययलक्षणमिति।
यदिवाकानिचिद्वर्णाश्रयाण्यपिप्रत्ययलक्षणेनभवन्ति।तथाचेदमपिभविष्यति।अथवा।विशेषणलुकमु
क्त्वाहलिनेतिवक्ष्यामि।यद्यविशेषेणलुकमुक्त्वाहलिनेत्युच्यते।बिदानामपत्येबहवोमाणवकाबिदाः।
अत्राप्यलुक्प्राप्नोति ॥
त्यत्रहलादौपितिसार्वधातुकेविधीयमानस्तृणहइमितीमागमोलुप्तेऽपिसर्वधातुकेभवति।तत्रहिहलीत्यनेनसार्वधातुकंवि
शेष्यते।ततश्चहलादिसार्वधातुकाश्रयत्वादिमागमःप्रत्ययलक्षणइतिलुप्तेऽपिप्रत्ययेप्रवर्तते।गवेहितंगोहितमित्यादौत्व
वादयोऽज्मात्रेविधीयमानावर्णरूपतानिमित्ताएवनतुप्रत्ययत्वनिमित्ताइतिप्रत्ययलक्षणाभावाल्लोपेनप्रवर्तन्ते।इहा
प्यजादौप्रत्ययेलुगुच्यमानःप्रत्ययलक्षणोभवतीतिलुप्तेऽपिप्रत्ययेप्रवर्ततइतिभावः।अविशेषेणेति।प्राग्दीव्यतीयोऽर्थएवापे
क्ष्यतेनत्वजादिःप्रत्ययविशेषइत्यर्थः।हलिनेति।गर्गेभ्यआगतंगर्गरूप्यंगर्गमयमितिहलादावलुङ्भवति।बिदानामपत्य
मिति।अत्रापिप्राग्दीव्यतीयार्थस्यविवक्षितत्वादलुक्प्राप्नोतीत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युवबहुत्वइति।लुग्विधौगोत्रप्रत्ययमात्रंगृह्यतइतियुवबहुत्वेपिलुक्प्रवर्ततइतिभावः।प्रथमस्येति।प्रथमादित्यनुवृत्त मिहार्थवशात्षष्ठ्यन्तंसंपद्यते।प्रथमार्थवृत्तित्वाच्चप्राथम्यंगोत्रप्रत्ययस्यद्वितीयार्थवृत्तित्वेत्वलुगभावः।अत्रिभरद्वाजि केति।अत्रेरपत्यानिबहूनिइतश्चानिञइतिढक्।तदन्ताद्युवबहुत्वेअतइञ्।तस्यण्यक्षत्रियार्षेतिलुक्।अत्रिभृग्वितिढ कोलुक्।भरद्वाजशब्दाद्विदाद्यञ्।ततोयूनीञ्।पूर्ववल्लुक्।अञोपियुवबहुत्वेलुग्विष्यते।अनेनप्रथमस्योच्यमानोऽत्रिभर द्वाजानांमैथुनिकेतिप्राग्दीव्यतीयार्थविवक्षायामलुग्नभवति।वसिष्ठकश्यपिकेति।वसिष्ठादृष्यण्।यूनीञोलुक्।अणोप्य त्र्यादिसूत्रेणलुक्।कश्यपाद्विदाद्यञ्।यूनीञोलुक्।अञोयञञोश्चेतिलुक्।पूर्ववद्वुन्।भृगोःऋष्यण्।यूनीञोलुक्।अणोत्रि

अस्तुपुनरस्ययुवबहुत्वेवर्तमानस्यलुग्भविष्यति।पुनरलुक्कस्मान्नभवति।समर्थानांप्रथमस्यगोत्र प्रत्ययान्तस्यालुगुच्यते।नचैतत्समर्थानांप्रथमंगोत्रप्रत्ययान्तम्।किंतर्हि।द्वितीयमर्थमुपसंक्रान्त म्।अवश्यंचैतदेवंविज्ञेयम्।अत्रिभरद्वाजिका।वसिष्ठकश्यपिका।भृग्वङ्गिरसिका।कुत्सकुशिकिकाइत्ये वमर्थम्।गर्गभार्गविकाग्रहणंवानियमार्थम्।अथवागर्गभार्गविकाग्रहणंकर्तव्यम्।तन्नियमार्थंभवि ष्यति।एतस्यैवगोत्रप्रत्ययान्तस्यद्वितीयमर्थमुपसंक्रान्तस्यालुग्भवतिनान्यस्येति।यदप्युच्यते।ए कवचनद्विवचनान्तस्यचप्रवृत्तौबहुषुलोपोयूनिवक्तव्यः।नवक्तव्यः।ननुचोक्तम्।अञ्यो बहुषुय ञ्यो बहुष्वित्युच्यमानेलुङ्नप्राप्नोतीति।माभूदेवमञ्यो बहुषुयञ्यो बहुष्विति।अञन्तंयद्बहुषुयञ न्तंयद्बहुष्वित्येवंभविष्यति।ननुचोक्तंनैवंशक्यमिहहिदोषःस्यात्काश्यपप्रतिकृतयःकाश्यपाइति। नैषदोषःलौकिकस्यतत्रगोत्रस्यग्रहणम्।नचैतल्लौकिकंगोत्रम् ॥

भृग्वितिलुक्।एवमङ्गिरसः।कुत्साद्दृष्यण्तस्माद्यून्यणोद्व्यचइतिफिञाभाव्यंनत्विञेतियुवविवक्षानक्रियते।कुशिका द्विदाद्यञ्।यूनीञोलुक्।अञोपिलुक्।वुन्।गर्गाद्यञोलुक्।भृगोर्ऋष्यण्।यूनीञोलुक्।अणोत्रिभृग्वितिलुक्प्राप्तेनगोप वनादिभ्यइतिप्रतिषिध्यते।सएषप्रतिषेधोनियमार्थइतिबिदादूत्यत्रयुवलक्षणेर्थेऽलुङ्भवतीत्यर्थः।लोपोयूनीति। लोपग्रहणेनलुग्लक्ष्यते।लोपेहिप्रत्ययलक्षणेनवृद्धिस्वरप्रसङ्गः।लौकिकस्येति।अपत्यस्येत्यर्थः।काश्यपइत्यञन्तंतुप्रति कृतिबहुत्वेवर्ततेनापत्यस्यबहुत्वे।निमित्तंनास्तीति।बहुत्वंनास्तिद्वित्वेकत्वविषयत्वादित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आपत्यंवेति। अपत्यस्येदमापत्यंपौत्रप्रभृत्यपत्यमित्यर्थस्तद्गोत्रसंज्ञंभवति। परमप्रकृतेरिति। गर्गादेरेवापत्यप्रत्ययः
कार्योनत्वनन्तरगोत्रयुवभ्यइत्यर्थः। आपत्यादिति। गर्गादेर्यदापौत्रप्रभृतेरपत्येचतुर्थादौजीवद्वंश्येप्रत्ययःक्रियतेत
दास्वार्थेद्वितीयोयञिञोश्चेत्यादिनाफगादिःक्रियतेगार्ग्यायणइति। सचेति। स्त्रियांद्वितीयप्रत्ययाभावाद्गार्गीत्येवभ
वति। एकइति। परमप्रकृतेश्चापत्यइत्यनेनतदर्थस्यलाभात्। बहुवचनलोपिष्विति। युवबहुत्वेबिदाइत्यादिसिद्धमद्वि
त्वैकत्वयोस्तुबैदोबैदावित्यादीत्यर्थः। तत्रबिदानामितिगोत्रबहुषुलोपिनइतिवार्त्तिकप्रयोजनमन्यथासाधयति। पर

यद्यञन्तंयद्बहुषुयञन्तंयद्बहुष्वित्येवमुच्यते। बिदानामयमपत्यंमाणवकोबैदःबैदौअत्रापिप्राप्नो
ति। अलुगत्रलुकंबाधिष्यते। अलुकिचकृतेपुनर्लुकोनिमित्तंनास्तीतिकृत्वापुनर्लुग्नप्राप्नोति। उक्तंवा।
किमुक्तम्। आपत्यंवागोत्रम्। परमप्रकृतेश्चापत्यः। आपत्याज्जीवद्वंश्यात्स्वार्थेद्वितीयोयुवसंज्ञःसचास्त्रि
यामेको गोत्रग्रहणानर्थक्यंच। बहुवचनलोपिषुचसिद्धमिति। तत्रबिदानामपत्यंमाणवकइति
विग्रहेबिदशब्दाद्द्व्येकयोरुत्पत्तिर्भविष्यति। बैदःबैदौ। बैदस्यापत्यंबहवोमाणवकाइतिविग्रहेबि
दशब्दाद्बहुषूत्पत्तिर्भविष्यतिबिदाइतिअविरविकन्यायेन॥ यूनिलुक्॥ यूनिलुगचीतिचेत्प्रत्ययस्या
यथेष्टप्रसङ्गः। यूनिलुगचीतिचेत् प्रत्ययस्यायथेष्टंप्राप्नोति। अनिष्टप्रत्ययेऽवस्थितेलुक्। अनिष्टस्यप्र
त्ययस्यश्रवणंप्रसज्येत। सिद्धंत्वविशेषेणलुग्वचनंहलिचेतिप्रतिषेधः ॥

मप्रकृतेरेवयूनिप्रत्ययः। आपत्याज्जीवद्वंश्यादित्यनेनस्वार्थिकोद्वितीयोण्यक्षत्रियार्षञितइतिलुप्यते। अविरवि
कन्यायेनेति। केचिदाहुरग्रन्थोयमिति। परमप्रकृतेश्चापत्यइतिवाचनिकत्वादस्यार्थस्य। अन्येतुवचनस्यैवान्यवि
कन्यायमूलत्वप्रतिपादनायेतदुक्तमित्याहुः॥ यूनिलुक्॥ यूनिलुगचीतिचेदिति। अस्मिन्सूत्रन्यासेदोषोनतुन्या
सान्तरइत्यर्थः। फाण्टाहृतस्यापत्यमित्यतइञ्। तस्यापत्यंयुवाफाण्टाहृतिमिमताभ्यामितिणः। तस्यछात्राइति
प्राग्दीव्यतीयार्थविवक्षायामिञश्चेत्यणिष्यते। सचनप्राप्नोति। णान्तत्वात्। ततश्चवृद्धलक्षणएवच्छेपरतोणस्य
लुक्स्यादितिच्छश्रवणप्रसङ्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भागवित्तेरिति। भगवित्तस्यापत्यमित्यतइञ्। ततोयूनिवृद्धाट्ठक् सौवीरेषुबहुलमितिठक्। तस्यछात्राइत्यर्थेठको लुकीञश्चेत्यण्। तैकायनेरिति। तिकस्यापत्यमितितिकादिभ्यः फिञ्। ततोयूनिफेश्छचेतिछः। यमुन्दसुयामाचवार्ष्यायणिफिञः स्मृताइतिपरिगणनंभाष्यकारेणफेश्छचेत्यत्रनाश्रितमितितैकायनेश्छोभवति। परिगणनाश्रयेतुनप्राप्नोति। तस्यछात्राइतिच्छेलुप्तेवृद्धलक्षणःश्छः। औपगवेरिति। उपगोरपत्येण्। ततोयूनीञ्। तस्मिन्लुप्तेछः। किंपुनरिञोलुकःप्रयोजनंयदातस्मिन्लुप्तेपिसिद्धश्छोवृद्धलक्षणइत्याह। वृद्धवदिति। वृद्धशब्दःपूर्वाचार्यसंज्ञागोत्रस्य। तत्र

सिद्धमेतत्। कथम्। अविशेषेणलुकमुक्त्वा हलिनेतिवक्ष्यामि। सिध्यति। सूत्रंतर्हिभिद्यते। यथान्यासमेवास्तु। ननुचोक्तंयूनिलुगचीतिचेत्प्रत्ययस्यायथेष्टप्रसङ्ग इति। नैषदोषः। अचीतिनैषापरसप्तमी। कातर्हि। विषयसप्तमी। अजादौविषयइति। तत्राविविषयेलुकिकृतेयोयतःप्रत्ययःप्राप्नोतिसततोभविष्यति। कानि पुनरस्ययोगस्यप्रयोजनानि। प्रयोजनंसौवीरगोत्रेभ्योणठक्छाः। फाण्टाहृतेरपत्यंमाणवकःफाण्टाहृतः। फाण्टाहृतस्ययूनःछात्राःफाण्टाहृताः। ण। ठक्। भागवित्तेरपत्यंमाणवकोभागवित्तिकः। भागवित्तिकस्ययूनश्छात्राभागवित्ताः। ठक्। छ। तैकायनेरपत्यंमाणवकस्तैकायनीयः। तैकायनीयस्ययूनश्छात्राःतैकायनीयाः। छ इञ्ण्यौसर्वत्र। इञ्ण्यौसर्वत्रप्रयोजनम्। औपगवेर्यूनश्छात्राःऔपगवीयाः। वृद्धवदतिदेशेसतिइञोगोत्रइत्यण्प्राप्नोति। नैषदोषः। प्रत्याख्यायतेसावतिदेशः। कथंपुनर्यानिप्रयोजनानितानिज्ञापकेनसिद्धानि। यत्वछान्तात्तर्हिइञ्प्रयोजनम्। यत्। श्वशुरस्यापत्यंश्वशुर्यः। श्वशुर्यस्यापत्यंश्वाशुरिः। श्वाशुरेर्यूनश्छात्राःश्वाशुराः। यत्। ख। कुलस्यापत्यंकुलीनः। कुलीनस्यापत्यंकौलीनिः। कौलीनेर्यूनश्छात्राःकौलीनाः। ख ॥

यूनोवृद्धवदतिदेशादिञोलुक्यसत्यण्स्यात्। कथंपुनर्यानीति। गार्ग्यायणानांसमूहइत्यादौगोत्रलक्षणोञ्भविष्यतेसनप्राप्नोति। ज्ञापकेनेति। राजन्यादुञ्मनुष्याच्चेतिवक्ष्यमाणेन। तदेवमिञोलुकाविनाप्यौपगवीयाइतिछस्यसिद्धत्वादनुदाहरणमेतत्। इदानीमिञउदाहरणान्तरंदर्शयितुमाह। यत्वछान्तादिति। श्वाशुरिरिति। आपत्यस्यचतद्धितेनातीतियलोपः। उणादीनामव्युत्पन्नत्वादनश्वाभ्यामितिवृद्धिनिषेधस्यैजागमस्यनप्रवर्त्तते। कुलीनइति। कुलात्खः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्त्रीय इति। स्वसुश्छः। एतान्यपीति। लक्षणान्तरेण युवप्रत्ययस्य लुकः सिद्धत्वादित्यर्थः। नचैतदिति। अब्राह्मणशब्दे नब्राह्मणसदृशक्षत्रियादिग्रहणाच्छुभ्रादिशब्दैः क्षत्रियादेरनभिधानादित्यर्थः। प्रसज्यप्रतिषेध इति। युवप्रत्ययमात्रस्य लुकं विधाय ब्राह्मणगोत्रात्परस्य स निषिध्यत इत्यर्थः। मायूरिरिति। मयूरस्य पक्षिविशेषस्य गोत्र इञ्। तदन्ताद्यूनि यञिञोश्चेति फक्। तस्य लुक्। ग्लुचुकायनेरिति। ग्लुचुकस्यापत्यं गोत्रमिति प्राचामवृद्धात्फिन्बहुलमिति फिन्। ततो यून्यण्। तस्य लुक्यणेव भवति। अन्यथा वृद्धत्वाच्छः स्यात्। कापिञ्जलादेरिति। कपिञ्जलादस्यापत्यमत इञ्। ततो यूनि

छः। स्वसुरपत्यं स्वस्त्रीयः स्वस्त्रीयस्यापत्यं स्वास्त्रीयिः। स्वास्त्रीयेर्यूनः छात्राः स्वास्त्रीयाः। एतान्यपि हि न सन्ति प्रयोजनानि। अत्रापि यूनि श्वशुर्यः कुलीनः स्वस्त्रीय इत्येव भवितव्यम्। उक्तमेतत्। अणिञोर्लुकि अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानमिति। अब्राह्मणगोत्रमात्रादित्युच्यते। नचैतद्ब्राह्मणगोत्रमात्रम्। अब्राह्मणगोत्रमात्रादिति नायं पर्युदासः। यदन्यद्ब्राह्मणगोत्रमात्रादिति। किं तर्हि। प्रसज्यायं प्रतिषेधः ब्राह्मणगोत्रमात्रान्नेति। अवश्यं चैतदेवं विज्ञेयम्। मायूरिः। कापोतिः। कापिञ्जलिरित्येवमर्थम्। एवं तर्हि अणण्योः सर्वत्र प्रयोजनम्। अण्। ग्लुचुकायनेरपत्यं माणवकः ग्लौचुकायनः। ग्लौचुकायनस्य यूनश्छात्रा ग्लौचुकायनाः। ण्यश्च कापिञ्जलाद्यर्थम्। कापिञ्जलादेरपत्यं माणवकः कापिञ्जलाद्यः कापिञ्जलाद्यस्य यूनश्छात्राः कापिञ्जलादाः। प्राग्दीव्यतोऽधिकारे यूनो वृद्धवदतिदेशः। प्राग्दीव्यतोऽधिकारे यूनो वृद्धवदतिदेशः कर्तव्यः। युवा वृद्धवद्भवतीति वक्तव्यम्। किं प्रयोजनम्। गार्ग्यायणानां समूहो गार्ग्यायणकं गार्ग्यायणानां किंचिद्गार्ग्यायणकम्। गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः। गोत्राश्रयो वुञ् यथा स्यात्। यदि वृद्धवदतिदेशः क्रियते। औपगवेर्यूनश्छात्रा औपगवीया इतीञो गोत्र इत्यण् प्राप्नोति ॥

कुर्वादिभ्यो ण्य इति ण्यः। तस्य लुकि ञश्चेत्यण्भवति। अन्यथा छः स्यात्। प्राग्दीव्यत इति। प्राग्दीव्यतो ये ऽर्थास्तेषु विवक्षितेष्वित्यर्थः। वृद्धवदिति। गोत्रवदित्यर्थः। अन्यथा गोत्रसंज्ञाया युवसंज्ञया बाधितत्वाद्गोत्राश्रयकार्याप्रसङ्गः। गार्ग्यायणानामिति। गर्गस्यापत्यं गोत्रं गर्गादिभ्यो यञ्। तदन्ताद्यूनि यञिञोश्चेति फक्। तदन्तात्समूहे गोत्रोक्षोष्ट्रेत्यादिना वुञ्। इदमर्थे गोत्रचरणाद्वुञिति वुञ्। सास्य भक्तिरित्यत्रार्थे गोत्रक्षत्रियाख्येभ्यो बहुलं वुञिति वुञ्। औपगवेरिति। सत्यतिदेशे यूनि लुगिष्यप्रत्याख्यानादिञो लुगभावाद्वृद्धवदतिदेशादिञश्चेत्यण्प्रसङ्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतद्दोषपरिहारायाह। यदिपुनरिति। यथागोत्रेयुवप्रत्ययोनोत्पद्यते यथायूनिपिप्राग्दीव्यतीयार्थविवक्षायांयुवप्रत्ययस्यानुत्पातादिञभावादिञश्चेत्यण्नभविष्यतीत्यर्थः। अतिदिश्येतेति। अतोयंदोषोनस्यादितिवाक्यशेषः। एवंवाक्यशेषमिति। उभयसंभवेनभवतीत्यध्याहरिष्यतइत्यर्थः। एवमित्यनेनानन्तरप्रक्रान्तोनभवतीतिवाक्यशेषः परामृश्यते। तद्वक्तव्यमिति। ततश्चगौरवंस्यादितिभावः। अथवैतर्हीति। एवंसतीत्यर्थः। एतेनगौरवंपरिहृतम्। कथमिति। यूनिलुगित्यस्मिन्नकृते फक्फिञोरन्यतरस्यामित्येतदपिनकर्तव्यम्। विधेयकार्यानिर्देशात्। ततश्चगार्ग्यायणस्यच्छात्राः गर्गीया गार्ग्या

यदिपुनर्युवावृद्धवदित्यनेनानुत्पत्तिरतिदिश्यते कथंपुनर्युवावृद्धवदित्यनेनानुत्पत्तिः शक्यानिर्देष्टुम्। [?]वतिनिर्देशोयम्। कामचारश्चभवतिनिर्देशोवाक्यशेषंसमर्थयितुम्। तद्यथा। उशीनरवन्मद्रेषुयवाः सन्तिनसन्तीति मातृवदस्याः कलाः सन्तिनसन्तीति। एवमिहापियुवावृद्धवद्भवतिनभवतीति। एवंवाक्यशेषंसमर्थयिष्यामहे यथागोत्रेयुवप्रत्ययोनभवति। एवंप्राग्दीव्यतोधिकारेयून्यपिनभवतीति। तद्वक्तव्यम्। यद्यप्येतदुच्यते। अथवैतर्हियूनिलुगित्येतन्नक्रियते। कथंतर्हिफक्फिञोरन्यतरस्यामिति। फक्फिञ्वर्तीयुवावावृद्धवद्भवतीतिवक्ष्यामि। यदातर्हिनवृद्धवत्तदागार्ग्यायणानांसमूहोगार्ग्यायणकम्। गार्ग्यायणानांकिंचिद्गार्ग्यायणकम्। गार्ग्यायणोभक्तिरस्यगार्ग्यायणकः। गोत्राश्रयोवुञ्नप्राप्नोति। यदिपुनर्युवावृद्धवदित्यनेनार्थोतिदिश्यते। प्राग्दीव्यतोधिकारेयूनोवृद्धवदर्थोभवतीति। तद्वक्तव्यम्। यद्यप्येतदुच्यते। अथवैतर्हियूनिलुगित्येतन्नक्रियते। तत्कथंफक्फिञोरन्यतरस्यामिति। फक्फिञ्वर्तीयुवार्थोवावृद्धवद्भवतीतिवक्ष्यामि। यदातर्हिनवृद्धवत्। तदागार्ग्यायणानांसमूहोगार्ग्यायणकम्। गार्ग्यायणानांकिंचिद्गार्ग्यायणकम्। गार्ग्यायणोभक्तिरस्यगार्ग्यायणकः। गोत्राश्रयोवुञ्नप्राप्नोति ॥

यणीयाइतिरूपद्वयंनसिध्यतीतिभावः। फक्फिञ्वर्तीति। वर्तनंवर्तः फक्फिञोर्वर्तः फक्फिञ्वर्तः सविद्यतेयस्मिन्यूनि सवावृद्धवत्। ततः पक्षेफक्फिञोरुत्पत्तिः पक्षेनुत्पत्तिरितिद्वैरूप्यसिद्धिः। यदातर्हीति। गार्ग्यायणानांसमूहइतिविवक्षायांयदावृद्धवदतिदेशात्फकोनुत्पत्तिस्तदागार्ग्यकमितिसिध्यति। यस्मिंस्तुपक्षेवृद्धवदतिदेशाभावात्फक्श्रवणंतत्रगोत्रलक्षणोवुञ्नप्राप्नोतीदानीमर्थातिदेशदर्शनायाह। यदिपुनरिति। यूनिलुगित्येतदिति। यूनोगोत्रत्वातिदेशाद्यूवप्रत्ययस्याभावाल्लुग्विधेयर्थ्यमित्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यमिति। प्रागूगोत्रसंज्ञाया गोत्रे कुञ्जादिभ्य इत्यतो गोत्रग्रहणानुवर्त्तनाच्छास्त्रीयगोत्राभिधायिनौ राजन्यमनुष्यशब्दौ ततश्च गोत्रग्रहणेनैव ताभ्यां वुञः सिद्धत्वात् किं तयोर्ग्रहणेन। गृहीतौ तु ज्ञापयतो गोत्रग्रहणं लौकिकगोत्रपरमिति। राजन्यमनुष्यशब्दौ च लौकिके प्रयोगे जातिविशेषवाचित्वाल्लौकिकगोत्राभिधायिनौ न भवत इति कर्त्तव्यं तयोर्ग्रहणम्। लौकिकं च गोत्रमपत्यमात्रम्। परमिति। अपत्याधिकारादुत्तरमित्यर्थः। उपचर्यत इति। व्यवह्रियत इत्यर्थः। शालङ्केरिति। शलङ्कोरपत्यमिति बाह्वादेराकृतिगणत्वादिञ्। पैलादिषु शालङ्कि शब्दपाठान्निपातनाच्छलङ्कादेशः। अत एव च निपातनाद्गोत्रे पिञ्जादिकैकेऽ बाध्यते। ततो यूनि फक्। तस्य पैलादित्वाल्लुकि कृते इञन्तं यूनि वर्त्तत इति गोत्राश्रय इञश्चेत्यण् न प्राप्नोति। गोत्रेणेञमिति। कण्वादिभ्यो गोत्र इत्य

एवं तर्हि राजन्याद्वुञ् मनुष्याच्च लौकिकं ज्ञापकपरम्। यदयं वुञ्विधौ राजन्यमनुष्ययोर्ग्रहणं करोति। तज्ज्ञापयत्याचार्यः लौकिकं परं गोत्रग्रहणमिति। युवा च लोके गोत्रमित्युपचर्यते। किं गोत्रोऽसि माणवक। गार्ग्यायणः। किं गोत्रोऽसि माणवक। वात्स्यायनः। यद्येतज्ज्ञाप्यते। औपगवेर्यूनश्छात्राः औपगवीयाः। गोत्राश्रय इञो गोत्र इत्यण् प्राप्नोति। सामूहिकेषु ज्ञापकम्। यदि सामूहिकेषु ज्ञापकम्। गार्ग्यायणानां किंचिद् गार्ग्यायणकम्। गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः। गोत्राश्रयो वुञ् प्राप्नोति। एवं तर्हि वुञ्विधौ ज्ञापकम्। यदि वुञ्विधौ ज्ञापकम्। शालङ्केर्यूनश्छात्राः शालङ्काः। इञो गोत्र इत्यण् न प्राप्नोति। अस्तु तर्ह्यविशेषेण। कथमौपगवेर्यूनश्छात्रा औपगवीयाः। गोत्रेणेञं विशेषयिष्यामः। गोत्रे य इञ् विहित इति॥ तस्यापत्यम्॥ तस्येदमित्यपत्येऽपि। तस्येदमित्यपत्येऽपि अण् सिद्धः ॥

त्र गोत्रग्रहणेन पौत्रप्रभृति गोत्रं गृह्यते। गोत्रप्रत्ययानुवादेन ह्यन्यो विधीयते। कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितस्तदन्तेभ्योऽण् भवतीति। कण्वादयश्च गर्गादिषु पठितास्तत्र च गोत्र इति वर्त्तते। अपत्याधिकारे च गोत्रग्रहणादेव शास्त्रीयं गोत्रं गृह्यते। तदेव कण्वादिभ्यो गोत्र इत्यत्रानूद्यते। तदेवेञश्चेत्यत्रानुवर्त्तते। तेन गोत्रे य इञ्विहितस्तदन्तादणि विधीयमाने शालङ्केर्भविष्यति नत्वौपगवेरित्यर्थः। नन्वौपगवि शब्देऽनेन सूत्रेणेञो लुक्याभाव्यम्। नैष दोषः। पूर्वमेवासोदाहरणस्य प्रत्याख्यानादन्यथासिद्धत्वाभिप्रायेणेदमुक्तम् ॥ तस्यापत्यम्॥ तस्येदमिति। इदमिति संबन्धिसामान्ये सर्वविशेषान्तर्भावादपत्यस्याप्यन्तर्भूतत्वादित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाधकादिति। जातौ बहुवचनम्। तस्येदमित्यनेन विधीयमानस्याणो बाधका ये छादयस्तद्बाधनार्थमिदं सूत्रमित्यर्थः। कथं पुनरिति। एकस्मिन्नर्थे प्राप्तौ सत्यां बाध्यबाधकभावो भवति। तत्र शेषेऽर्थे विधीयमानश्छः अणस्त्वनेनापत्यादिति भिन्नार्थत्वादनयोः कथं बाध्यबाधभाव इति प्रश्नः। उत्सर्ग इति। यदि योगविभागमकृत्वा तस्यापत्यमतद्रूपमित्युच्येत तदा प्रकृतिविशेषसंबद्धस्यैवापत्यार्थस्योपयोगात् प्रकृतिसामान्यसंबद्धोऽपत्यार्थः शेष एव स्यादिति स्यादेव वृद्धादपत्ये छः। पृथग्योगे त्वपत्यार्थस्याणादिविधावुपयोगाच्छेषत्वाभावाच्छस्याप्राप्तिरिति सैव बाधा कथ्यते। उत्सर्ग इति। प्रकृतिसामान्यसंबद्धः सामान्यभूतोऽपत्यार्थ उक्तः। अथवेदमिति सामान्यभूतोऽर्थ उत्सर्गस्तदन्तर्भावादसत्यस्मिन् पृथग्योगेऽपत्यार्थ उत्सर्गः शेष

तस्येदं विशेषा ह्येते अपत्यं समूहो विकारो निवास इति। किमर्थं तर्हीदमुच्यते। बाधनार्थं कृतं भवेत्। ये तस्य बाधकास्तद्बाधनार्थम्। कथं पुनः शैषिकः शैषिकं बाधेत। उत्सर्गः शेष एवासौ। यो ह्युत्सर्गः सोऽपि शेष एव। अथैतस्मिन् बाधकबाधनार्थे सति किं प्रयोजनम्। वृद्धान्यस्य प्रयोजनम्। वृद्धानि प्रयोजयन्ति। भानोरपत्यं भानवः। श्यामगोरपत्यं श्यामगव इति। कथं पुनरिच्छतापि अपवादः प्राप्नुवन् शक्यो बाधितुम्। तस्यग्रहणसामर्थ्यात्। किमिदं भवानध्याहृत्य तस्यग्रहणस्य प्रयोजनमाह न पुनः सर्वस्यैव योगस्य। अवश्यमुत्तरार्थमर्थनिर्देशः कर्तव्यः। समर्थविभक्तिरपि तर्हि अवश्यमुत्तरार्था निर्देष्टव्या। एवं तर्हि योगप्रतिविभागकरणसामर्थ्यात्। इतरथा हि तस्यापत्यमतद्रूपं भवतीत्येव ब्रूयात्। पुल्लिङ्गे नायं निर्देशः क्रियते एकवचनान्तेन च। तेन पुल्लिङ्गादेवोत्पत्तिः स्यात्। एकवचनान्ताच्च। स्त्रीनपुंसकलिङ्गाद् द्विवचनबहुवचनान्ताच्चेदं न स्यात् ॥

एव भवति। अनुपयुक्तत्वादित्यर्थः। कथं पुनरिति। प्रकृतिसामान्याद्विधानादणेवोत्सर्गः। प्रकृतिविशेषात्तु विधानाच्छोऽपवाद इति मत्वा प्रश्नः। तस्यग्रहणसामर्थ्यादिति। एकदेशेन सूत्रं लक्ष्यते। तेन पृथक् सूत्रारम्भादित्यर्थः। पृथक् सूत्रे ह्यपत्यार्थस्य शेषत्वाभावाच्छस्याभावः। इतरोऽज्ञाताभिप्राय आह। किमिदमिति। अध्याहृत्येति। तत्रैव तात्पर्यं कृत्वेत्यर्थः। सिद्धान्तवादी स्वाभिप्रायं दर्शयितुमाह। एवं तर्हीति। पुल्लिङ्गे नेति। यद्यपि नपुंसकेऽपि तस्येति रूपं तथापि पुंनपुंसकयोर्युगपन्निर्देशस्य कर्तुमशक्यत्वात् कामचारादेवमुक्तम्। स्त्रीनपुंसकलिङ्गादिति। सुमातुरपत्यं सौमात्रः। सत्रस्यापत्यं सात्रिरित्यादावित्यर्थः॥ १ग॰ ४४

CC-0. In Public Domain. Digitization by eGangotri

तद्धितार्थे निर्देश इति। तद्धितप्रकरणादेवमुक्तम्। सर्वत्रैव हि शास्त्रेऽस्मिन्नान्तरीयकत्वादुपात्तं लिङ्गसंख्यं न विवक्ष्यते। क्वचित्संख्यातु विवक्ष्यते। यथा सुप्सुपेति। अप्रमाणमिति। तद्दृशात्कार्यस्य विधिनिषेधौ न भवत इत्यर्थः। भावसूत्रे विस्तरेण भाष्यमेतद्व्याख्यातमिति तत एवावधार्यम्। सामान्यनिर्देशादिति। तस्येति निर्देशात्तच्छब्दादेव सामान्यवाचिनः प्रत्य

तद्धितार्थनिर्देशे लिङ्गवचनमप्रमाणं तस्याविवक्षितत्वात्। तद्धितार्थनिर्देशे लिङ्गवचनम प्रमाणम्। किं कारणम्। तस्याविवक्षितत्वात्। नात्र निर्देशस्तन्त्रम्। कथं पुनस्तेनैव चनामनिर्देशः क्रियते। तच्चावश्यं स्यात्। तत्कारी च भवांस्तद्द्वेषी च। नान्तरीयकत्वादत्र पुल्लिङ्गेन निर्देशः क्रियत एकवचनान्तेन च। अवश्यं कया चिद्विभक्त्या केन चिद्वचनेन निर्देशः कर्तव्यः। तद्यथा। कश्चिद्धान्यार्थी शालिकलापं सतुषं सपलालमाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालानुत्सृजति। तथा कश्चिन्मांसार्थी मत्स्यान् सशकलान् सकण्टकानाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय शकलकण्टकानुत्सृजति। एवमिहापि नान्तरीयकत्वात् पुल्लिङ्गेन निर्देशः क्रियते। एकवचनान्तेन च। न ह्यत्र निर्देशस्तन्त्रम्। सर्वनामनिर्देशे विशेषाऽसंप्रत्ययः सामान्यनिर्देशात्। सर्वनामनिर्देशे विशेषासंप्रत्ययः। किं कारणम्। सामान्यनिर्देशात्। सर्वनाम्नायं निर्देशः क्रियते। सर्वनाम च सामान्यवाचि। तेन सामान्यवाचिन एवोत्पत्तिः स्याद्विशेषवाचिनो न स्यात्। सामान्यचोदनास्तु विशेषेषु। सामान्यचोदनास्तु विशेषेष्ववतिष्ठन्ते। तद्यथा। गौरनुबन्ध्योऽजोऽग्नीषोमीय इति। आकृतौ चोदितायां द्रव्ये आरम्भणालम्भनप्रोक्षणविशसनादीनि क्रियन्ते। विषम उपन्यासः। अस्ति कारणं येनैतदेवं भवति। किं कारणम्। असंभवात्। आकृतावारम्भणादीनां संभवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आरम्भणालम्भनविशसनादीनि क्रियन्ते। इदमप्येवंजातीयकमेव। असंभवात् सामान्यवाचिन उत्पत्तौ विशेषवाचिन उत्पत्तिर्भविष्यति। अपत्याभिधाने स्त्रीपुल्लिङ्गस्याप्रसिद्धिर्नपुंसकलिङ्गत्वात्। अपत्याभिधाने स्त्रीपुल्लिङ्गस्याप्रसिद्धिः

यः स्यान्नोपगवादिभ्य इत्यर्थः। सामान्यचोदना इति। विशेषाणामेव कार्यसिद्ध्यर्थं सामान्यमुपादीयते न तु स्वार्थमित्यर्थः। इदमपीति। अपत्यमित्यनेनैव संबन्धिशब्दत्वादपत्यवत्यात्र स्याक्षेपात्सामान्येनापत्यस्य विशेषणविशेष्यभावायोगादिहापि सामान्येन विशेषा एव गृह्यन्ते। यदा तु प्रकरणवशाद्विशेषे सर्वनाम वर्तते तदा तस्मादपि प्रत्ययो भवति तादृयनिरिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपुंसकलिङ्गस्येति। औपगवमित्यनेनैवापत्यस्याभिधानं स्यात्। औपगव औपगवी त्येवं न स्यादित्यर्थः। प्रजन इति। प्रसवमात्रं विवक्षितं न तु लिङ्गसंख्ये अपीत्यर्थः। स चेति। सन्ततिरपत्यं प्रसव इति सर्वलिङ्गस्य शब्दैरभिधीयमानस्य दर्शनादित्यर्थः। समानायामिति। एकस्मिन्नर्थ इत्यर्थः। अपत्यमिति। अपत्यशब्दप्रत्याय्यमानमित्यर्थः। प्रजन इति। सर्वलिङ्गैः शब्दैः प्रत्याय्यमानत्वात्सर्वलिङ्ग इत्युच्यते। एकार्थ इति। एकैकोर्थः सर्वलिङ्गः स च केनचिच्छब्देन प्रत्याय्यमानः केनचिदेव लिङ्गेन युक्तः प्रतीयते। अवयवान्यत्वादिति। स्वार्थिकस्यापि प्रत्ययस्योत्पत्तौ भिन्नावयवत्वाद्भिन्नशब्दप्रत्याय्यमानत्वादेकस्यैवार्थस्य लिङ्गभेदोवगम्यते किं पुनरत्यन्तभिन्नशब्दप्रत्याय्यमानस्य लिङ्गभेदावगतिर्न स्यादित्यर्थः॥ एको गोत्रे॥ एकशब्दोयमन्य

किं कारणम्। नपुंसकलिङ्गत्वात्। अपत्यं नपुंसकलिङ्गं तेन नपुंसकलिङ्गस्यैवापत्याभिधानं स्यात्। स्त्रीपुंल्लिङ्गस्य न स्यात्। ननु चेदं पुरस्तादेव चोदितं परिहृतं च। उत्पत्तिस्तत्र चोद्यते। इह पुनरुत्पन्नेनाभिधानं चोद्यते। सिद्धं तु प्रजनस्य विवक्षितत्वात्। सिद्धमेतत्। कथम्। प्रजनस्य विवक्षितत्वात्। प्रजनोत्र विवक्षितः स च सर्वलिङ्गः। किं पुनः कारणं समानायामाकृतौ अपत्यं नपुंसकलिङ्गं प्रजनः सर्वलिङ्गः। एकार्थत्वे शब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वम्। एकार्थत्वेपि शब्दान्यत्वाल्लिङ्गान्यत्वं दृश्यते। तद्यथा। पुष्यः तारका नक्षत्रं गेहं कुटी मठ इति। अवयवान्यत्वाच्च। अवयवान्यत्वाच्च लिङ्गान्यत्वं दृश्यते। तद्यथा। कुटी कुटीरः। शमी शमीरः। शुण्डा शुण्डारः। अवयवान्यत्वात्किल लिङ्गान्यत्वं स्यात्। किं पुनर्यत्र शब्दान्यत्वमपि॥ एको गोत्रे॥ किमर्थमिदमुच्यते॥

प्रधानासहायसंख्याप्रथमसमानवाची इह तु संख्यावाची प्रथमवाची वा गृह्यत इत्येव निर्णयोऽर्थान्तरासंभवात्। किमर्थमिति। क्रियमाणेपि सूत्रद्वये सर्वमिष्टं न सिध्यतीति प्रश्नः। इह पौत्रप्रभृतावपत्ये विवक्षिते मूलप्रकृतेरेव गर्गादेः प्रत्यय इष्यते। न त्वनन्तरापत्यवाचिनो गार्गिप्रभृतेर्नापि गोत्रप्रत्ययान्ताद्गार्ग्यप्रभृतेः। यूनि तु गोत्रप्रत्ययान्तादेवेष्यते न तु मूलप्रकृत्यनन्तरयुवभ्यः। स्त्रियां तु युवकार्यं नेष्यते। अपि तु गोत्रकार्यमेव। एतत्सर्वमेतस्मात्सूत्रद्वयाद्यथा न सिध्यति तथा क्रमेण वक्ष्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्तिककारः। प्रयोजनं तावदाद्यस्य सूत्रस्य कथयितुमाह। उत्पादयितारमिति। प्रतिशब्दो लक्षणे वाक्यकारेण प्रयुक्तः। उत्पादयितृसामान्यविवक्षया च द्विर्वचनं नाकारि। भाष्यकारेण तु भेदविवक्षया वीप्सामाश्रित्य द्विर्वचनं कृतम्। अपत्ययोगादिति। अपत्यस्य योग इति कर्तृषष्ठीसमासः। उत्पादयिता चात्र कर्मत्वेन न विवक्षितः किं तर्हि प्रतिशब्दयोगविवक्षायां कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीयया निर्दिष्टः। अन्यथोपपदविभक्तेः कारकविभक्तिर्बलीयसीति कर्मणि कृद्योगलक्षणा षष्ठी स्यात्। तस्य चेति। स च प्रत्यर्थो यदा लोके न विवक्ष्यते तदा नासौ शब्दसंस्कारे निमित्तं भवति। अपत्येन योगस्तु लोके उत्पादयितुरेव विवक्षित इति तन्निमित्तानेकप्रत्ययप्रसङ्ग इत्यर्थः। एकवचनमिति।

उत्पादयितारं प्रत्यपत्ययोगात्तस्य चाभिसंबन्धस्याविवक्षितत्वादेकवचनं गोत्रे। उत्पादयिता ऽत्पादयिता ऽपत्येन युज्यते तस्य च विवक्षितत्वात्। उत्पादयितुः स चाभिसंबन्धो विवक्षितः। उत्पादयितारं प्रत्यपत्ययोगात् तस्य चाभिसंबन्धस्याविवक्षितत्वात्। उत्पादयितुरुत्पादयितुरपत्याभिधाने ऽनेकः प्रत्ययः प्राप्नोति। दृश्यते चैक एव स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्येकवचनं गोत्रे। एवमर्थमिदमुच्यते। कथं पुनर्ज्ञायते उत्पादयितौ ऽपत्येन युज्यत इति। एवं हि दृश्यते लोके पितामहस्योत्सङ्गे दारकं पितामहस्य आसीनं कश्चित् कंचित्पृच्छति कस्यायं दारक इति। स आह। देवदत्तस्य यज्ञदत्तस्य चेति। उत्पादयितारं व्यपदिशति नात्मानम्। अस्ति प्रयोजनमेतत्। किं तर्हीति ॥

एकस्य प्रत्ययस्य प्रतिपादनमित्यर्थः। यावन्त्यपत्यानि तावतां प्रत्ययानां प्रसङ्गे सति एक एव प्रत्ययो यथा स्यादित्येवमर्थमित्यर्थः। गोत्र इति च जात्यपेक्षये कवचनं तेन गोत्रसमुदाये प्रत्ययसमुदायो निवार्यते। कथमिति। एकमप्यपत्यं पितृपितामहादीनां सर्वेषां संबन्धि भवति। तथा चापत्यं पौत्रप्रभृति गोत्रमिति सूत्रकारेण सामानाधिकरण्येन निर्देशः कृत इति प्रश्नः। एवं हि दृश्यत इति। शब्दार्थसंबन्धे लोकव्यवहार एव प्रमाणं नान्यत्। तत्र च प्रष्टृप्रतिवक्त्रोरुत्पादयितृविषय एव प्रश्नप्रतिवचने इति तत एतदवधार्यत इत्यर्थः। अपत्यं पौत्रप्रभृतीति सामानाधिकरण्यं तु गौणमाश्रयिष्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्त्रेति।अनन्तरोक्ते प्रयोजने अभिमते सूत्रस्यासामर्थ्यान्नापत्यादितिवक्तव्यम्।अपत्यप्रत्ययान्तादपत्ये प्रत्ययाभावार्थ
मागोत्रइति।यदेकोगोत्रइतिगोत्रशब्दोपादानेननियमःकृतःतदायंप्रतिषेधोवक्तव्यः।यदित्वेकोपत्यइतिउच्यतेतदा
पत्यप्रत्ययान्तादपत्येनैवापरःप्रत्ययःस्यादपत्यजातावेकस्यैवविधानात्।एकोगोत्रइतितूच्यमानेतदानन्तरापत्य
प्रत्ययान्ताद्गोत्रेप्रत्ययःस्यादेव।तुल्यजातीयापेक्षोहिनियमः।तेनगोत्रप्रत्ययएवापरोनिवार्यते।ततश्चगोत्रप्रत्ययान्ता
दपरोगोत्रप्रत्ययोमाभूत्।अनन्तरापत्यप्रत्ययान्तात्तुगोत्रेप्रत्ययःस्यादेवेतिभावः।अथवा यदोत्पादयितैवापत्येनयु
ज्यतेनतुपितामहादि रेकोगोत्रइत्येतच्चनियमार्थंतदायतोनेकप्रत्ययप्रसङ्गोगोत्राकृतौविवक्षितायांतस्मादेकएवे
तिनियम्यते।अपत्यप्रत्ययान्तादेवचक्रमेणापत्यपरंपराविवक्षायामनेकप्रत्ययप्रसङ्गात्ततएवैकाभ्यनुज्ञाद्वारेणा

तन्त्रप्रत्ययान्ताद्गोत्रेप्रतिषेधोगोत्रेनियतत्वात्।तन्त्रप्रत्ययान्ताद्गोत्रेप्रतिषेधोवक्तव्यः।औपगवस्या
पत्यमिति।किंकारणम्।गोत्रेनियतत्वात्।गोत्रेह्ययंनियमःक्रियते।तेनयश्चासौयथाजातीयकश्च
गोत्रेप्रत्ययःप्राप्नोतिसएकःस्यात्।कश्चप्राप्नोति।यःप्रत्ययान्तात्।परमप्रकृतेश्चोत्पत्तिः।परमप्रकृ
तेश्चोत्पत्तिर्वक्तव्या।अयोगाद्धिनप्राप्नोति ॥

नेकनिवारणंस्यादितिभावः।यश्चासौयथाजातीयकश्चेति।यत्प्रकृतिरित्यर्थः।उभयोपादानंसर्वविशेषयोगप्रति
पत्त्यर्थम्।परमप्रकृतेरिति।गर्गादेरित्यर्थः।अयोगादिति।उत्पादयितुर्यपत्ययुक्तेगर्गस्यपौत्रादिनाअपत्यापत्यवत्सं
बन्धाभावात्प्रत्ययोनप्राप्नोति।यद्यपिगर्गादिभ्योयञितिविधानसामर्थ्याद्गर्गादिभ्योगोत्रेप्रत्ययाःसिध्यन्तितथापियेऽणा
दयोऽनन्तरापत्येसावकाशास्तेपरमप्रकृतेरुपग्वादेर्गोत्रेनप्राप्नुवन्तीतिविवक्षितम्।अथोच्यते।एकोगोत्रइत्येतत्परमप्र
कृतेर्विध्यर्थंभविष्यतीति।नियमस्तर्हिनप्रकल्प्येत।ततश्चापत्यमालायांप्रत्ययमालाप्रसङ्गः।ननुपरमप्रकृतेःप्रत्ययोत्प
त्तावुच्यमानायामपिप्रकृतिप्रत्ययार्थयोःपरस्परायोगस्तदवस्थएवेतिप्रयोगोनैवस्यात्।नैषदोषः।पारंपर्येणसंब
न्धसद्भावात्प्रयोगोभविष्यति।साक्षात्संबन्धेतुप्रत्ययस्यचरितार्थत्वाद्द्वारेणसंबन्धाश्रयेणोत्पत्तिर्नस्यादितिवक्तव्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यमीमेतद्दोषद्वयं वक्ष्यमाणेन दोषेण सह परिहर्तुमाह। एतयोश्चेति। चशब्दो वक्ष्यमाणापेक्षया समुच्चयार्थः। त
त्प्रत्ययान्तमिति। ञितश्च तत्प्रत्ययादित्येतत्सूत्रं प्रत्याख्यायते। यो हि कपोतस्य तदवयवस्य तद्विकारस्य वावयवो वि
कारो वा सोऽभेदोपचारात् कपोतस्यावयवो विकारश्च भवतीति कापोत एव भविष्यतीति नार्थो मयड्बाधनार्थेन
ञितश्च तत्प्रत्ययादित्यनेन सूत्रेण। तत्र यथा कपोतस्य विकारावयवाभ्याम् अभेदोपचारात् कापोतस्य वेत्युभयथेष्टं सि
ध्यति। तथेहाप्युपगवौपगवयोरौपगवतदपत्ययोर्वाभेदोपचारात् पौत्रप्रभृतिरौपगवशब्देनाभिधास्यते। गार्ग्यायणा
पत्यं च गार्ग्यायणशब्देनेति दोषत्रयमपि परिहृतम्। अस्य परिहारस्याव्याप्तिं दर्शयितुमाह। भवेदिति। अत्र ह्यन्य इति।
यदि गार्गी गर्गत्वमारोप्यते तदा गार्गिरेवाभेदसंबन्धस्य निवृत्तत्वाद् गर्गशब्दवाच्य इति गार्गेरपत्यं गार्गिरेव स्यात्। गार्ग्य
श्चेष्यते। अथ गार्गितदपत्ययोरभेदाध्यवसायस्तथापि गार्गेरपत्यं गार्गिः प्राप्नोति। यद्यपि गर्गादिभ्यो यञिति वचनसामर्थ्या

एतयोश्चैव परिहारः। पठिष्यति ह्याचार्यः। यूनि चान्तर्हिते प्राप्तिरिति। तस्य च। यथा तत्प्रत्ययान्तं यथा तदेव वि
कारावयवप्रत्ययान्तं द्वितीयं तृतीयं च विकारं संक्रामति। एवमिहापि तदेवापत्यप्रत्ययान्तं द्वितीयं तृतीयं
चापत्यं संक्रमिष्यति। भवेत्सिद्धम्। औपगवस्यापत्यमौपगवः। यत्र स एवानन्तरं दृश्यते स एव गोत्रे। इदं तु
खलु न सिध्यति। गर्गस्यापत्यं गार्ग्य इति। अत्र ह्यन्योऽनन्तरं दृश्यते। अन्यो गोत्रे। स्त्रियां चानियमः ॥

द्गार्ग्यः स्यात्तथापि गार्गिरपि स्यात्। तस्मादपत्यविषये दोषवानभेदोपचार इति भेद एवाश्रयणीयः। तथा च प्रत्ययान्तात्प्रति
षेधः परमप्रकृतेश्चोत्पत्तिर्न वक्तव्येति स्थितमेतत्। स्त्रियां चेति। चशब्दो दोषसमुच्चयार्थः। तत्रानन्तरापत्ये स्त्रियां गोत्रे स्त्रि
यां चानियमप्रसङ्गाभावात्सामर्थ्यात्पौत्रप्रभृतेरपत्यं स्त्री गृह्यते। युवसंज्ञया गोत्रसंज्ञाया एकसंज्ञाधिकारे वृद्धं युवेति वच
नात्तु शब्दाद्वा नियमार्थाद्वा धितत्वात् स्त्रियाः पौत्रप्रभृतेरपत्यस्य गोत्रसंज्ञा नास्तीत्येको गोत्र इत्येव नियमो नास्ति। अस्त्रि
यामिति निषेधाद्यूनत्वानुनीत्यपि नास्ति। नियमस्त्वस्याश्च स्त्रियां विवक्षितायामनेकप्रत्ययप्रसङ्गः। औपगवस्यापत्यं स्त्री
त्यत इञितीञ् प्राप्नोति। इतो मनुष्यजातेरिति ङीष् इञन्तान्न प्राप्नोति। गोत्रं च चरणैः सहेत्यत्र शास्त्रीयस्य गोत्रस्य ग्र
हणात् स्त्रियाश्चास्या गोत्रसंज्ञाया अभावात्। एतच्चेञ उपसंख्यानमजात्यर्थमित्येतदनपेक्ष्यैवोदाहृतम्। गोत्रलक्ष
णश्च यञादिः पौत्र्यामेव स्यात्। अजीवद्वंश्यायां च स्त्रियां पौत्रप्रभृतेरपत्ये। जीवद्वंश्यायां तु न स्यात्। अपत्यसामान्यलक्षण एव तु स्यात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नियमादिति। सामान्यापेक्षमेकवचनं नियमद्वयादित्यर्थः। कतरस्मिन्निति। येनोद्भावितो दोषस्तदीयोयं प्रश्नः। विरोधा
त्। किं तर्हि पक्षप्रविभागदर्शनेन भाष्यकारोनन्तरोक्तमेवार्थं प्रश्नपूर्वकं विवृणोति। उत्पादयितरि तावदिति
। अनियमइति यदुक्तं तत्र वाकूकुलमुद्भावयति। यदोत्पादयितुरेवापत्येन योगो नान्यस्य। तस्मिंश्च विवक्षिते एकस्माए
व प्रकृतेरेक एव प्रत्ययः प्राप्नोति नानेकस्तदा सूत्रद्वयं नैव नियमार्थं किं तर्हि विध्यर्थमिति किमुच्यते स्त्रियां चानियमइ
ति। प्रत्ययमाला प्रसङ्ग दोषस्तु गोत्रलक्षणप्रत्ययाप्रसङ्ग दोषश्च स्थित एव। सर्वेष्विति। वक्ष्यमाणेन न्यायेन सर्वे अपत्ये

स्त्रियां युवत्यां नियमो न प्राप्नोति। औपगवीयं माणविका। नियमाद्धि स्त्री पर्युदस्यते। एको गोत्रे गोत्राद्यून्य
स्त्रियामिति। कतरस्मिन्पक्षेयं दोषः। उत्पादयितर्यपत्ययुक्ते। उत्पादयितर्यपत्ययुक्ते तावन्न दोषः। उ
त्पादयितर्यपत्ययुक्ते न सर्वे तउत्पत्त्या भवितव्यम्। तत्र नियमो नोपपद्यते। असति नियमे नैष दोषः। सर्वेषु
तर्ह्यपत्ययुक्तेष्वयं दोषः। सर्वेषु तर्ह्यपत्ययुक्तेषु सर्वे तउत्पत्त्या भवितव्यम्। तत्र नियम उपपन्नो भवति।
सति च नियम एष दोषः। उत्पादयितरि चापत्ययुक्ते स्त्रियां युवत्यामभिधानं न प्राप्नोति। किं कारणम्। गोत्र
संज्ञां युवसंज्ञा बाधते। गोत्राद्यूनि चास्त्रियां प्रत्ययो विधीयते। यूनि चान्तर्हिते प्राप्तिः। यूनि चान्तर्हिते निय
मस्याप्राप्तिः। गार्ग्यायणस्यापत्यमिति। कतरस्मिन्पक्षेयं दोषः। सर्वेष्वपत्ययुक्तेषु। सर्वेषु अपत्ययुक्तेषु
तावन्न दोषः। सर्वेष्वपत्ययुक्तेषु सर्वे तउत्पत्त्या भवितव्यम्। तत्र नियम उपपन्नो भवति। सति च नियमे ने
तरिषदोषः। उत्पादयितर्यपत्ययुक्ते यं दोषः। उत्पादयितर्ह्यपत्ययुक्ते परमप्रकृतेरनन्तराद्गोत्राच्चायोगान्न प्राप्नोति ॥ नृ रि

न युज्यन्त इति पक्षोपपत्तिः। इदानीं वाकूकुलं परिहरति। उत्पादयितरि चेति। चशब्देन केवलं पक्षान्तरं यावदस्मिन्न
पीत्यस्यार्थस्य द्योतनार्थः। अभिधानं न प्राप्नोतीति। गोत्रविषयेण यञादिप्रत्ययेनेत्यर्थः। अयमेवात्र नियमो विवक्षितः।
एको गोत्र इत्येतन्नियमपूर्वकं स्त्रिया गोत्रप्रत्ययेनाभिधानं न प्राप्नोतीत्येषोर्थोत्र विवक्षित इत्यर्थः। यूनि चेति। चतुर्था
दिनाव्यवहिते पञ्चमादावित्यर्थः। अत्रापि पूर्ववत्प्रश्नपूर्वकं पक्षप्रविभागेन विवरणं कर्तुमाह। कतरस्मिन्निति। तत्र नि
यम इति। गोत्रादेव यूनीति भावः। परमप्रकृतेरिति। पञ्चमस्य त्रिभिरपत्यापत्यवत्संबन्धाभावादित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यूनश्चेति। चतुर्थ्यादित्यर्थः। गोत्रादिति। चतुर्थस्य युवत्वाद्गोत्रसंज्ञाया अभावः। ननूत्पादयितर्यपत्ययुक्ते नियन्तत्वस्या
भावाद्गोत्राद्यूनीति विध्यर्थं भविष्यति। तत्रानन्तरे यूनि गोत्रात्सिद्ध एव प्रत्यय इति व्यवहिते यूनि गोत्रेण तस्यायोगादप्रा
प्तः प्रत्ययो विधास्यते। तत्किमुच्यते यूनि चान्तर्हिते ऽप्राप्तिः प्रत्ययस्येति। उच्यते। उत्पादयितर्यपत्ययुक्ते गोत्रसमुदा
ये प्रत्ययमालाप्रसङ्ग- निवृत्त्यर्थमेको गोत्र इति सूत्रं यथानियमार्थम्। एवं युवसमुदाये युवसामान्ये वा युवशब्देनोच्यमा
ने गोत्राद् गोत्राच्च प्रत्ययप्रसङ्गे- गोत्रादेव यूनीति नियमे क्रियमाणे विध्यर्थत्वाभावाद्युक्तमुक्तं यूनि चान्तर्हित इति। सन्तु
तर्हीति। तेन व्यवहितेपि यूनि गोत्रादेवेति वचनाद्गोत्र प्रत्ययो भविष्यतीति नास्त्ययं दोषो यूनि चान्तर्हित इति। दशपुरु
षानूकमिति। अनुपूर्वात्कायते रनूकानमनूक इति घञर्थे कविधानमिति कः। अन्येषामपीति दीर्घत्वम्। दशपुरुषाअ

यूनश्च न प्राप्नोति। किं कारणम्। गोत्रादिति नियमात्। सन्तु तर्हि सर्वे पत्ययुक्ता इति। कथं पुनर्ज्ञायते
सर्वे पत्ययुक्ता इति। एवं हि याज्ञिकाः पठन्ति। दशपुरुषानूकं यस्य गृहे शूद्रा न विद्येरन् स सोमं पिबे
दिति। यदि च सर्वे पत्ययुक्ता भवन्ति। तत एत दुपपन्नं भवति। कथं यदुक्तं पितामहस्योत्सङ्गे- दारक
मासीनं कश्चित्कंचित्पृच्छति कस्यायमपत्यमिति। स आह। देवदत्तस्य यज्ञदत्तस्य वेति। उत्पादयिता
रं व्यपदिशति नात्मानमिति। उत्पत्तिस्तस्य विवक्षिता ॥

स्मिन्ननूक इति बहुव्रीहिः। दशपुरुषोऽनूकोऽस्मिन्निति पुनर्बहुव्रीहिः। दशपुरुषानुसंशब्दनं दशसु पुरुषेष्विति यावत्। शू
द्रा इति। विवाहिताः। शूद्रा वेदी पतत्यध इति वचनात्पातहेतुः शूद्रा। एकस्मिंश्च पतिते सर्वेषां च पात इत्येतद्दशपु
रुषानूकशब्देनोक्तं भवति। ततश्चार्थादेकस्यैव सर्वान्प्रत्य पातहेतुत्वादपत्यत्वमित्युक्तं भवति। नन्वेकस्यैव पत्योत्पत्तौ
व्यापारात्कथं तेनान्येषां संबन्धः। क्रियागर्भो हि सर्वत्र संबन्धो नान्यथेति उद्घुष्यते। नैष दोषः। पुत्रोत्पादनमेव पौत्राद्यु
त्पत्तौ व्यापारः तदन्तरेण तस्यासंभवात्। अपत्यं पौत्रप्रभृतीति मुख्यं सामानाधिकरण्यमस्मिन्पक्ष उपपद्यते। पूर्वत्र
तु पक्षे गौणं सामानाधिकरण्यं स्यादपत्यापत्यस्यापत्यत्वोपचारात्। उत्पत्तिस्तस्येति। सामान्यशब्दस्यापि क्वचिद्विशे
षवृत्तिदर्शनात्। यथा गोमण्डले स्थितं गोपालकं कश्चित्पृच्छति गां पश्यसीति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेषामिति। यदा गार्ग्यस्य पौत्रप्रभृति सर्वेषां गर्गगार्गिगार्ग्यायणानामपत्यं भवति तदा गार्गिगार्ग्याभ्यां प्रत्ययो मा भूद्गर्गशब्दादेव यथा स्यादिति। एवमर्थमेको गोत्र इत्येतदित्यर्थः। ननु ज्ञायत इति। एक इति सामान्येनोपादानाद्विशेषस्यानवगम इत्यप्रतिपादकत्वात्संदेहलक्षणमप्रामाण्यं प्रसक्तमित्यर्थः। उत्पादयितरि त्वपत्ययुक्ते क्रमेण संबन्धविव

सर्वेषां नेदमपत्यं देवदत्तस्त्वस्योत्पादयितेति। अथ सर्वेष्वपत्ययुक्तेषु किमनेन क्रियते एको गोत्र इति। सर्वेषामपत्ययोगात् प्रत्ययान्ताद् गोत्रे प्रतिषेधार्थमेको गोत्रे। सर्वेषामपत्ययोगात् प्रत्ययान्ताद्गोत्रे प्रतिषेधार्थमेको गोत्र इत्युच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्र न ज्ञायते क एको भवति। यो वा परमप्रकृतेर्यो वानन्तरादिति। नियमानुपपत्तिश्च। नियमश्च नोपपद्यते। किं कारणम्। न ह्येकस्मिन्नपत्ये ऽनेकप्रत्ययप्राप्तिः। न ह्येकस्मिन्नपत्ये ऽनेकः प्रत्ययः प्राप्नोति। किं तर्हि। अपत्यान्तरे शब्दान्तरात्प्रत्ययान्तरप्राप्तिः। अपत्यान्तरे ऽपत्यान्तरे शब्दान्तराच्च शब्दान्तरात् प्रत्ययान्तरं प्रत्ययान्तरं प्राप्नोति। फगन्तादिञ् इञन्तात्फगिति। फगिञोर्दीर्घतमो प्रत्ययमाला प्राप्नोति। कतरस्मिन्पक्ष एष दोषः सर्वेष्वपत्ययुक्तेषु। सर्वेष्वपत्ययुक्तेषु तावन्न दोषः। सर्वेष्वपत्ययुक्तेषु सर्वत उत्पत्त्या भवितव्यम्। तत्र नियम उपपन्नो भवति। सति नियमे नैष दोषः। उत्पादयितर्ह्यपत्ययुक्ते ऽयं दोषः। उत्पादयितर्ह्यपत्ययुक्ते न सर्वत उत्पत्त्या भवितव्यम्। तत्र नियमो नोपपद्यते। असति नियम एष दोषः। उत्पादयितरि चापत्ययुक्ते नायं दोषः। कथम्। अपत्यं समुदायश्चेन्नियमोऽस्य समीक्षितः ॥

स्वार्यां गोत्रसमुदाये प्रत्ययमालाप्रसङ्गे एक एव भवती त्युच्यमाने य एव परमप्रकृतेः प्राप्नोति स एव भवतीति नास्ति तत्रैकविशेषज्ञानलक्षणो दोषः। न ह्येकस्मिन्निति। एकेनैव तस्यार्थस्योक्तत्वाद्यस्मिन्नपत्ये एकः प्रत्ययः क्रियते तस्मिन्नेव नास्त्यपरस्य प्रत्ययस्य प्रसङ्ग इति तन्निवारणमनर्थकमेवेत्यर्थः। अपत्यान्तर इति। सामान्यापेक्षं वार्त्तिक एकवचनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाष्यकारस्तु भेदं वीप्सां च सा कल्यप्रतिपादनायाश्रित्य विवृणोति। दाशतयीति। दशावयवा यस्य संघातस्य स दशतयः संघः। तत्र भवा दाशतयी। अनेकप्रत्ययप्रसङ्गप्रतिपादनपरं चैतत्। न त्वत्र दशार्थो विवक्षितः। अतोनन्तरमेव क्वचित्पुस्तके अपत्यं समुदायश्चेदिति पठ्यते। अन्यत्र तु प्रत्ययमालाप्रसङ्गग्रन्थानन्तरं कतरस्मिन्नित्यादि सर्वं पूर्वोक्तं पठ्यते। तत्पुनरुक्तत्वादग्रन्थत्वादन्यैरुपेक्षितम्। अन्ये त्वेवं पठन्ति। कतरस्मिन्पक्ष एष दोषः। सर्वेष्वपत्ययुक्तेषु। सर्वेष्वपत्ययुक्तेषु तावन्न दोषः। सर्वेषु ह्यपत्ययुक्तेषु सर्वत उत्पत्त्या भवितव्यं तत्र नियमउपपन्नो भवति। सति च नियमे नैष दोषः। उत्पादयितरि तर्ह्यपत्ययुक्तेऽयं दोषः। उत्पादयितर्ह्यपत्ययुक्ते न सर्वत उत्पत्त्या भवितव्यम्। तत्र नियमो नोपपद्यते। असति नियमे एष दोषः। उत्पादयितरि चापत्ययुक्ते न दोषः। कथम्। अपत्यं समुदायश्चेदिति। अयं ग्रन्थ एव। पक्षप्रविभागेन दोषपरिहारात्। अस्यायमर्थः। यदा सर्वेऽपत्येन युज्यन्ते तदैकस्मिन्नेव गोत्रापत्ये गर्गगार्गिगार्ग्येभ्यः पर्यायेणापत्यापत्यवत्संबन्धविवक्षायां प्रत्ययप्रसङ्गः। तत्र यदा गर्गशब्दात् प्रत्यय उत्पद्यते तदैक एव गोत्रापत्ये प्रत्ययो भवति। यदि तु गार्गिगार्ग्यशब्दाभ्यामुत्पद्यते तदा पूर्वस्मिन्स्थिते परस्योत्पत्तिरनुज्ञाता भवति। यदा तूत्पादयितैवापत्येन युज्यत इति पक्षो गोत्रशब्देन चैकमेवापत्यमुच्यते। तदोत्पादयितुरेवैक एव प्रत्ययः प्राप्नोतीति नियन्तव्याभावान्नियमो नोपपद्यत इत्यपत्यपरंपराविवक्षायां प्रत्ययमालाप्रसङ्गदोष आपतत्येव। अत्रापि पक्षे परिहारोभिधीयते। अपत्यं समुदायश्चेदिति। अपत्यशब्देनापत्यसामान्यवाचिनापि प्रकरणवशाद्गोत्रापत्यमेवोच्यते। तेनायमर्थो गोत्रशब्देन गोत्रसमुदायोभिधीयते। अवयवधर्मेण समुदायस्य गोत्रव्यपदेशात्। अन्ये त्वाहुः। अपत्यं पौत्रप्रभृति गोत्रमित्यत्रापत्यशब्देन समुदायोभिधीयत इति तस्यैव गोत्रसंज्ञा क्रियते। क्वचित्तु अवयवमात्रेपि गोत्रशब्दो वर्त्तते। समुदायेषु प्रवृत्ताः शब्दा अवयवेष्वपि वर्त्तन्त इति न्यायात्। ततश्चैको गोत्र इत्यस्यायमर्थः। पौत्रप्रभृत्यपत्यपरंपराविवक्षायां प्रत्ययमालाप्रसङ्गे एक एव कर्त्तव्यो नानेक इति तेन परमप्रकृतेरेव संबन्धिसंबन्धाश्रयेणापत्यापत्यवत्संबन्धविवक्षायां प्रत्ययः कर्तव्य इत्युक्तं भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ तस्मिन्निति। समुदाय इत्यर्थः। एवमपीति। अस्त्रियामिति योगविभागेपि कृते यदिनामगोत्राद्देव यूनीत्यस्य नियम ४१३
४९ स्य निषेधो न भवति तथापि प्राधान्याद्युवप्रत्ययस्यैव निषेधः प्राप्नोति न तु युवसंज्ञायाः ततश्च गोत्रलक्षणः प्रत्ययो न
प्राप्नोति। अपत्यसामान्यलक्षण एव तु प्रत्ययः स्यादित्यर्थः। ततश्च गर्गस्यापत्यं स्त्रीति गार्ग्यशब्दाद्यञ्न स्यात्। तदभावा
द्यञश्च प्राचां ष्फ तद्धित इति ङीष्फौ न स्यातां गार्गी गार्ग्यायणीति। स्त्रियां लुगिति। गार्ग्यशब्दात्फको लुकि कृते यञा
श्रयं रूपद्वयं सिध्यति। एवमपीति। औपगवस्यापत्यं स्त्रीत्यत इञः तस्य लुकि कृतेऽनुपसर्जनाधिकाराद् अणश्चार्थद्वा
रेणोपसर्जनत्वात्तदर्थस्य प्रत्ययार्थं प्रति विशेषणत्वादणलक्षण ईकारो न प्राप्नोतीत्यर्थः। अणन्तादिति। प्रत्यये लुप्ते

तस्मिंस्तु बहवः प्राप्ता नियमोऽस्य भविष्यति॥ अपत्यमित्यनेन सर्वमुपग्वादि पितृकमपत्यं समीक्षितम्।
तस्मिंस्तु बहवः प्रत्ययाः प्राप्ताः। नियमोऽस्य भविष्यति एको गोत्र इति। यदप्युच्यते स्त्रियां चानियम इति। ए
वं वक्ष्यामि। गोत्राद्यूनि प्रत्ययो भवति स्त्रियां नेति। एवमपि स्त्रिया युवत्या अभिधानं न प्राप्नोति। एवं तर्हि व
क्ष्यामि। गोत्राद्यूनि प्रत्ययो भवति ततः स्त्रियां लुक्। एवमप्यौपगवीमाणविका। अनुपसर्जनलक्षण ईका
रो न प्राप्नोति। मा भूदेवम्। अण्योऽनुपसर्जन इति। अणन्तादनुपसर्जनादित्येवं भविष्यति। नैवं शक्यम्। इ
हहि दोषः स्यात्। काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी काशकृत्स्नीमधीते काशकृत्स्ना ब्राह्मणीति।
अणन्तादितीकारः प्रसज्येत। नैष दोषः। अध्येत्र्यामभिधेयायामण ईकारेण भवितव्यम्। यश्चात्राध्येत्र्याम
भिधेयायामण् लुप्तः सः। यश्च श्रूयते उत्पन्नस्तस्मादीकार इति कृत्वा पुनर्न भविष्यति। इह तर्हि। औप
गवीमाणविका भार्यास्य औपगवीभार्यः॥

प्रकृतिरेव प्रत्ययार्थमाहेत्यणन्तस्यानुपसर्जनत्वमिति भावः। काशकृत्स्निनेति। इञश्चेत्यण्। तदन्तादध्येत्र्यामण्। त
स्य प्रोक्ताल्लुगिति लुक्। लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुक्। अत्राणन्तस्याध्येत्र्यां संक्रान्तत्वादनुपसर्जनत्वादीकारस्य प्र
सङ्गः। पुनर्न भविष्यतीति। शास्त्रस्य सकृत्प्रवृत्त्या चरितार्थत्वादिति भावः। टाब्घुपूर्वीमनुत्पन्न इति उत्पद्यते। अपवाद
स्याप्रवृत्तावुत्सर्गस्यानिवारणात्। नन्वेवमापिशलिना प्रोक्तमापिशलं तदधीते आपिशला ब्राह्मणीति ङीप् प्राप्नोति। तस्मा
दण एवानुपसर्जनं विशेषणमित्यौपगवीमाणविकेति न सिध्यति। एवं तर्हि वक्ष्यमाणाद्दोषादिष्टसिद्ध्यभावादेतद्भाष्यकारे राम:
ण सुष्ठु न निरूपितम्॥ ग्रहणं ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातिलक्षणइति। गोत्रसंज्ञाया अभावे जातिरूपाभावात्। यदा तु गोत्रं च चरणैः सहेत्यत्र गोत्रशब्देनापत्यमात्रं गृह्यते त
दौपगवीभार्य इत्यत्र जातिलक्षणङीषः पुंवद्भावप्रतिषेधो सिध्यत एव। ग्लुचुकायनीति। ग्लुचुकस्यापत्यमिति प्राचामवृद्धा
दिति फिन्प्रत्ययः तदन्ताद् अणो लुकि क्रियमाणे जातित्वाभावादितो मनुष्यजातेरिति ङीष् न प्राप्नोति। अथापि सर्वतोक्ति
न्नर्थादिति ङीष् क्रियते। तथापि पुंवद्भावप्रतिषेधो न प्राप्नोति। लुक्ताधिको विधेयः। तस्मादिति। अस्त्रियामिति योगविभा
गे सति यूनीति वर्त्तते। परिभाषा चेयम्। तेन युवसंज्ञायामस्त्रियामित्युपतिष्ठते। तदुपस्थानेन स्त्रियां युवसंज्ञा निवार्य।

जातिलक्षणः पुंवद्भावप्रतिषेधो न प्राप्नोति। माभूदेवं वृद्धि- निमित्तस्येत्येवं भविष्यति। यस्तर्हि वृद्धि
निमित्तम्। ग्लुचुकायनी माणविका भार्यास्य ग्लुचुकायनीभार्यः। तस्मात् स्त्रियां युवत्वं युवसंज्ञैव पर्युदासत
व्या। युवसंज्ञायां पर्युदस्तायां गोत्रप्रत्ययान्तमेतद्यूनि वर्त्तते। इहोत्स्माद् यितर्यपत्ययुक्ते प्रत्ययान्तात् प्रतिषे
धो वक्तव्यः। परमप्रकृतेश्चोत्पत्तिर्वक्तव्या। सर्वेषापत्ययुक्तेषु प्रत्ययान्तात्प्रतिषेधो वक्तव्यः। तस्मात्प्रति
षेधः। तस्मात्प्रतिषेधो वक्तव्यः। संज्ञाकारिभ्यो वा प्रत्ययोत्पत्तिः। अथवा संज्ञाकारिभ्यः प्रत्ययोत्पत्तिर्वक्त
व्या। यदि संज्ञाकारिभ्यः प्रत्ययोत्पत्तिरुच्यते। कथं गार्ग्यायणो वात्स्यायन इति। गोत्राद्यूनीति च। गोत्राद्यू
नीत्येतद्वक्तव्यम्। तच्च जात्यादिनिवृत्त्यर्थम्। तच्चावश्यं संज्ञाकारिग्रहणं कर्त्तव्यम्। किं प्रयोजनम्। जात्या
दिनिवृत्त्यर्थम्। जात्यादिभ्य उत्पत्तिर्माभूदिति। जातिर्न वर्त्तते। संख्या न वर्त्तते। सर्वनाम न वर्त्तते। जातिर्न व
र्त्तते। काकस्यापत्यं कुररस्यापत्यमिति। संख्या न वर्त्तते। नवानामपत्यं दशानामपत्यमिति। सर्वनाम न वर्त्त
ते। सर्वेषामपत्यं विश्वेषामपत्यमिति। यत्तावदुच्यते जातिर्न वर्त्तते काकस्यापत्यं कुररस्यापत्यमिति ॥

ते इति गोत्रसंज्ञा प्रवर्त्तते। यूनि वर्त्तत इति। युवसंज्ञाया अभावे पि युवत्वेन पौत्रप्रभृतेरपत्यमुपलक्ष्यत इति यूनीत्युक्तम्। इदा
नीं पक्षद्वयोक्तदोषपरिहाराय तत्संकीर्त्तनं करोति। इहेति। सर्वेष्विति। ननु नायं दोषः पूर्वमुक्तः। नैतदस्ति। न ज्ञायते क एको
भवतीत्यभिधानादर्थत उक्त एवायं दोषः। तस्मादिति। नापत्यादित्येव वक्तव्यम्। तेनापत्यप्रत्ययान्तादपत्ये प्रत्ययो न भवती
त्ययमर्थः संपद्यते। संज्ञाकारिभ्य इति। कुलव्यपदेशहेतव आदिपुरुषाः संज्ञाकारिण उच्यन्ते, जातिर्नेति। प्रत्ययं नोत्साद्यतीत्य
र्थः। परार्थाभिधानं हि वृत्तिः। सति च प्रत्यये प्रकृतिः प्रत्ययार्थे वर्त्तते तत्र जात्यादिवृत्तिः संज्ञाकारिग्रहणेन निवार्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनैवेति। अपत्यविशेषप्रतिपत्तये प्रकृत्यर्थो विशेषणमुपादीयते। सविशेषो जातिसंबन्धावगमेनैवावगम्यत इत्यप
त्यापत्यवत्संबन्धविवक्षाया एवात्राभाव इत्यर्थः। संख्येयमिति। ब्राह्मणादिकमवश्यमपेक्षणीयं निराधारस्य गुणस्या
भावादित्यर्थः। निर्देश्यमिति। पूर्वप्रकृतमित्यर्थः। वृत्तिरपीति। यदा जात्युपव्यञ्जनानि नाभिव्यक्तानि तदापि तत्संबन्धए

येनैव हेतुनाएकः काकस्तेनैव हेतुना द्वितीयस्तृतीयश्च काको भवति। यदप्युच्यते संख्या न वर्त्तते नवा
नामपत्यं दशानामपत्यमिति। संख्येयमपेक्ष्य संख्या प्रवर्त्तते। तत् सापेक्षम्। सापेक्षमसमर्थं भवतीति असा
मर्थ्यान्न भविष्यति। यदप्युच्यते सर्वनाम न वर्त्तते सर्वेषामपत्यं विश्वेषामपत्यमिति। निर्देश्यमपेक्ष्य निर्दे
शः प्रवर्त्तते। तत्सापेक्षम्। सापेक्षमसमर्थं भवति असमर्थत्वान्न भविष्यति। यत्तावदुच्यते येनैव हेतुनाए
कः काकस्तेनैव हेतुना द्वितीयस्तृतीयश्च काको भवतीति। नैतद्विवदामहे। काको न काक इति। किं तर्हि।
येनैव हेतुनाएतद्वाक्यं भवति काकस्यापत्यं कुररस्याप त्यमिति। तेनैव हेतुना वृत्तिरपि प्राप्नोति। यद
प्युच्यते संख्येयमपेक्ष्य संख्या प्रवर्त्तते तत्सापेक्षं सापेक्षं चासमर्थं भवतीति। भवति वै कस्यचिदर्थात्प्र
करणाद्वा अपेक्ष्यं निर्ज्ञातम्। यदा निर्ज्ञातं तदा वृत्तिः प्राप्नोति। यदप्युच्यते सर्वेषामपत्यं विश्वेषामपत्य
मिति निर्देश्यमपेक्ष्य निर्देशः प्रवर्त्तते तत्सापेक्षं सापेक्षं चासमर्थं भवतीति। भवति वै कस्यचिदर्थात्प्र
करणाद्वा अपेक्ष्यं निर्ज्ञातम्। यदा निर्ज्ञातं तदा वृत्तिः प्राप्नोति। एवं तर्हि अनभिधानाज्जात्यादिभ्य उत्प
त्तिर्न भविष्यति। तच्चावश्यमनभिधानमाश्रयितव्यम्। क्रियमाणेपि च संज्ञाकारिग्रहणे यन्न जात्यादि
भ्य उत्पद्यमानेन प्रत्ययेनार्थाभिधानं भवति भवति तत्रोत्पत्तिः। तद्यथा। कुतश्चरति मायूरिः केनकापि
ञ्जलिः कृशः। आहेयेन च दष्टस्य पाञ्चिः सुतसमो मतः ॥

वविशेषावगमायोपादीयते तत्र वाक्यवद्वृत्तिप्रसङ्ग इत्यर्थः। भवतीति। ततश्च संख्याशब्द एव विशिष्टसंख्ये
यवाचीति सापेक्षत्वाभावाद्वृत्तेन एवेत्यर्थः। आहेयेनेति। अहेरपत्यमित्यस्मान्निज इति ढक्। पाञ्चिरिति। बाह्वा
दित्वादिञ् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादायनिरिति। उदीचांवृद्धादितिफिञ्। एकाप्रकृतिरिति। एकशब्दः संख्यावाचीतिकेचिदाहुः। प्रथमातिक्रमे चकारणाभावात् परमप्रकृतिरेवैकशब्देनगृह्यते। शब्दापेक्षयाचैकइतिपुल्लिङ्गनिर्देशः। अन्येतुसाधारणएक इत्याहुः। परमप्रकृतिश्चसर्वप्रत्ययसाधारणीतिततएवोत्पत्तिर्भवति। सर्वेऽपत्येनयुज्यन्तइत्ययंचपक्षः प्रमाणोपपन्नत्वात्स्थितः। नहीदमिति। लोकेयोर्थएकशब्दस्यदृश्यतेसएवेहाश्रीयते। लोकेचप्रथमशब्दसमान

तादायनिर्योदायनिः कैमायनिरिति। तदेतदनन्यार्थंसंज्ञाकारिग्रहणं कर्तव्यम्। प्रत्ययान्ताद्वाप्रतिषेधोवक्तव्यः। उभयंनकर्तव्यम्। गोत्रग्रहणंकरिष्यते। एकोऽपत्येप्रत्ययोभवतीति। यदिचेदानींप्रत्ययान्तादपिप्रत्ययःस्यान्नैकोपत्येप्रत्ययःकृतःस्यात्। यदिगोत्रग्रहणंनक्रियते। कथंगार्ग्यायणोवात्स्यायनइति। वक्तव्यमेवैतत्। गोत्राद्यून्यस्त्रियामिति। अथापिगोत्रग्रहणं क्रियते। एवमपिनदोषः। नैकग्रहणेनप्रत्ययोभिसंबध्यते। एकोगोत्रेप्रत्ययोभवतीति। किंतर्हिप्रकृतिरभिसंबध्यते। एकाप्रकृतिर्गोत्रप्रत्ययमुत्पादयतीति। यदिचेदानींप्रत्ययान्तादपिप्रत्ययःस्यान्नैकाप्रकृतिर्गोत्रेप्रत्ययमुत्पादयेत्। अथवाअस्थानेयंयत्नःक्रियते। नहीदंलोकाद्भिद्यते। लोकेहिसंख्याप्रवर्तमानामुपाचरन्तिएकइतिवाप्रथमइतिवा। यावद्ब्रूयात्प्रथमोगोत्रेप्रत्ययमुत्पादयतीतितावदेकोगोत्रइति। ॥ इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्ये चतुर्थस्याध्यायस्यप्रथमेपादेतृतीयमाह्निकम् ॥

र्थएकशब्दोदृश्यतेइतीहापिप्रथमार्थएवाश्रीयते। शास्त्रेपिप्रथमार्थएकशब्दोदृश्यतेएकेऽल्पप्राणाइत्यत्रप्रथमेऽल्पप्राणाइतिगम्यते। उपाचरन्तीति। व्यवहरन्तीत्यर्थः। अस्यांपङ्क्तावेकमानयेत्यादावनियतस्यैकस्यावगमात्संख्यावाच्येकशब्दोनप्रथमवाची ॥ इत्युपाध्यायजैयटपुत्रकैयटविरचितेभाष्यप्रदीपे चतुर्थस्याध्यायस्यप्रथमेपादेतृतीयमाह्निकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतइञ्॥ दाक्षिरिति। वानामध्नेयस्येतियदावृद्धसंज्ञानास्तितदायमिञोवकाशः। इञः सएवेति। प्राचामवृद्धात्फि
न्बहुलमितिप्राचांमतेनफिनोविधानात्।उदीचांमतेनतदभावादिञोवकाशइतिभावः। इहकस्मादिति। प्राचांमतेना
वृद्धत्वात्फिन्प्राप्नोतीतिभावः। ऐक्ष्वाकइति। इक्ष्वाकोरपत्यमितिजनपदशब्दात्क्षत्रियादञित्यञ्। दाण्डिनायनादि
सूत्रेणोकारलोपोनिपात्यते। पाञ्चालइति। पञ्चालविदेहविदर्भेभ्योञ्॥ बाह्वा॥ बाह्वादिप्रभृतिष्विति। प्रभृतिग्रहणेनवक्ष्य
माणानांऋष्यादिनडादीनांग्रहणम्। लौकिकइति। लोकेविदितइत्यर्थः। गोत्रभावइति। संज्ञाकारित्वेआदिपुरुषत्वइत्य

अतइञ्॥ इञोवृद्धावृद्धाभ्यांफिञ्फिनौविप्रतिषेधेन॥ इञोवृद्धावृद्धाभ्यांफिञ्फिनौविप्रतिषेधेनभव
तः। इञोवकाशः। दाक्षिः। प्लाक्षिः। फिञोवकाशः। तादायनिः। यादायनिः। इहोभयंप्राप्नोति। लापसायनिः। सांमि
तिकायनिः। फिनोऽवकाशः। ग्लुचायनिः। लवायनिः। इञः सएव। इहोभयंप्राप्नोति। ग्लुचुकायनिः। फिञ्फिनौ
भवतोविप्रतिषेधेन। इहकस्मान्नभवतिदाक्षिः प्लाक्षिः। बहुलवचनात्॥ तद्राजश्च॥ तद्राजश्चेञोभवतिवि
प्रतिषेधेन। तद्राजस्यावकाशः। ऐक्ष्वाकः। इञः सएव। इहोभयंप्राप्नोति। पाञ्चालः। वैदेहः। वैदर्भः। तद्राजो
भवतिविप्रतिषेधेन॥ बाह्वादिभ्यश्च॥ बाह्वादिप्रभृतिषुयेषांदर्शनं गोत्रभावेलौकिकेततोन्यत्रतेषांप्रति
षेधः॥ बाह्वादिप्रभृतिषुयेषांदर्शनंगोत्रभावेलौकिकेततोन्यत्रतेषांप्रतिषेधोवक्तव्यः। बाहोरपत्यंबाहविः।
योहिबाहुर्नामबाहवस्तस्यभवति। नडस्यापत्यंनाडायनः। योहिनडोनामनाडिस्तस्यभवति। संबन्धिशब्द
प्रत्ययानांचतत्सदृशात्प्रतिषेधः॥ संबन्धिशब्दप्रत्ययानांचतत्सदृशात्प्रतिषेधोवक्तव्यः। श्वशुरस्यापत्यं
श्वशुर्यः। योहिश्वशुरोनामश्वाशुरिस्तस्यभवति। प्रत्ययग्रहणेननार्थः। संबन्धिशब्दानांतत्सदृशात्प्रतिषेधइत्येव।

र्थः। एतच्चस्मृतिशास्त्रस्यार्थतोऽनादित्वादनाद्यर्थाभिधायिबाह्वादिग्रहणस्यन्याय्यत्वाल्लभ्यते। सचकार्यविशिष्टशब्दस्व
रूपोपादानेननविधीयते। किंतुप्रकारान्तरेणयथाअतइञितितदिदानींतनार्थाभिधायिनोपिभवतिदेवदत्तिरिति। सं
बन्धिशब्देति। अयमपिन्यायानुवादः। आदिमत्वात्संज्ञाश्वशुरस्यसंबन्धोपाधिकस्यत्वनादित्वात्तद्ग्रहणस्येवन्याय्य
त्वात्। उक्तंचहरिणा। अभिव्यक्तपदार्थायेस्वतन्त्रालोकविश्रुताः। शास्त्रार्थस्तेषुकर्तव्यः शब्देषुनतदुक्तिषिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातृस्वसेति।मातृशब्दोऽत्रक्रियावाचीनजननीवाचीतिमातृपितृभ्यांस्वसेतिषत्वंनभवति।यद्यपिक्रियाशब्दा
र्थोपिनित्यस्तथापिप्रसिद्धतरःसंबन्धिलक्षणोर्थइतितस्यैवग्रहणंयुक्तम्॥सुधातुरकङ्च॥प्रकृत्यन्तराणीति।स्वा
र्थिककन्प्रत्ययान्तत्वादितिभावः।अव्यविकन्यायेनचकन्रहितेवीक्यमेवभवति।व्यासकशब्दाच्चकनन्तादपि

इदमपिसिद्धंभवति।मातृपितृभ्यांस्वसा।मातृष्वसापितृष्वसा।अन्यातुमातृस्वसेति॥सुधातुरकङ्च॥सु
धातृव्यासयोरितिवक्तव्यम्।सौधातकिः।वैयासकिःशुकः।अत्यल्पमिदमुच्यते।सुधातृव्यासवरुडनिषा
दचण्डालबिम्बानामितिवक्तव्यम्।सौधातकिः।वैयासकिःशुकः।वारुडकिः।नैषादकिः।चाण्डालोबै
म्बकिः।तत्तर्हिवक्तव्यम्।नवक्तव्यम्।प्रकृत्यन्तराण्येवैतानि॥गोत्रेकुञ्जादिभ्यश्च्फञ्॥किमर्थश्चका
रः।स्वरार्थः।चितोन्तोदात्तोभवतीत्यन्तोदात्तत्वंयथास्यात्।अथञकारःकिमर्थः।ञकारोवृद्ध्यर्थः।ञ्णिती
तिवृद्धिर्यथास्यात्।एकेनककारेणोभयंसिद्धम्।अवश्यमत्रविशेषणार्थोन्योनुबन्धःकर्तव्यः।क्वविशे
षणार्थेनार्थः।व्रातच्फञोरस्त्रियामिति।फगित्यु च्यमानेनाडायनःअत्रापिप्रसज्येत।अथापिफञित्यु
च्यते।एवमप्याश्वायनःअत्रापिप्रसज्येत।तस्माच्चकारएवकर्तव्यः।अन्तोदात्तत्वमपियथास्यात्।चकारे
चेदानींविशेषणार्थेक्रियमाणेऽवश्यंवृद्ध्यर्थोन्योनुबन्धःकर्तव्यः।सचञकारएवकर्तव्यः।सूत्रभेदोमा
भूदिति।अथक्रियमाणेपिवैचकारेअन्तोदात्तत्वंनप्राप्नोति।किंकारणम्।परत्वाञ्ञ्नितीत्याद्युदात्तत्वंप्रा
प्नोति।चित्करणसामर्थ्यादन्तोदात्तत्वंभविष्यति।ञित्करणसामर्थ्यादाद्युदात्तत्वंप्राप्नोति।अस्त्यन्यदञित्कर
णेप्रयोजनम्।किम्।वृद्ध्यर्थोञकारः।चित्करणेप्यन्यत्तर्हिप्रयोजनम्।किम्।विशेषणार्थश्चकारः।शक्योत्र
विशेषणार्थोन्योनुबन्धआसङ्क्तुम्।तत्रचकारानुरोधादन्तोदात्तत्वंभवति।वृद्ध्यर्थोप्यन्यःशक्योनुब
न्धआसङ्क्तुम्।तत्रञकारानुरोधादाद्युदात्तत्वंप्राप्नोति ॥

वाचिनोपिबा ह्वादेराकृतिगणत्वादिञ्भवति।नतुऋष्यणितिभावः॥गोत्रे॥अथापिफञिति।सर्वथासामान्यग्रहणंप्रा
प्नोतीत्येवंपरमेतत्फञितिक्रियमाणेकौञ्जायनादितिञित्स्वरप्रसङ्गः।सूत्रभेदइति।च्फञपिसिध्यति।सूत्रभेदस्तुस्या
दितिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवंतर्हीति। चकारस्यविशेषणेचरितार्थत्वाद्वृद्धौचञकारस्यपरत्वाञ्ञित्स्वरप्राप्तावित्यर्थः। तत्रञ्नितीति। सतिशिष्टस्व
रस्यबलीयस्त्वादितिभावः। इहेति। पूर्वेवैयाकरणाः। केनयशब्दइति। यशब्दस्यबहुत्वेप्रयोगाभावात्। यदातुञ्यःक्रिय
तेतदागोत्रेऽलुगचीतिलुकिप्रतिषिद्धेयशब्दःश्रूयते। कौञ्जायन्यस्यापत्यानिबहूनीत्यतइञोण्यस्त्रियार्षेतिलुकित
द्राजान्तस्यबहुषुवर्तमानाञ्ञ्यस्यलुक्सिध्यति। आपत्यंचेति। गोत्रेलुगचीत्यत्रैतद्व्याख्यातम्। कुञ्जशब्दादेवयूनि

एवंतर्हिस्वरेयोगविभागःकरिष्यते। इदमस्ति। चितः। चितोन्तउदात्तोभवतीति। ततस्तद्धितस्य। तद्धितस्यचि
तोन्तउदात्तोभवतीति। किमर्थमिदम्। परत्वाञ्ञ्नितीत्याद्युदात्तत्वंप्राप्नोति। तद्बाधनार्थम्। ततःकितः। कितस्तद्धित
स्यान्तउदात्तोभवतीति। किंपुनरत्रस्वरार्थेनचकारेणानुबन्धेन। यावताच्फञन्ताञ्ञ्योविधीयते। तत्रञ्निती
त्याद्युदात्तत्वेनभवितव्यम्। नैतदस्ति। बहुषुलोपेकृतेअन्तोदात्तत्वंयथास्यात्। कौञ्जायनाइति। इहकेचि
द्व्येकयोःफञंविदधतिबहुषुफकम्। केचिच्फञन्ताञ्ञ्यम्। किमत्रन्याय्यम्। ञ्यवचनमेवन्याय्यम्। द्व्ये
कयोर्हिफञिसतिबहुषुचफकि कौञ्जायनानामपत्यंमाणवकःकौञ्जायन्यः कौञ्जायन्यौ। केनयशब्दः
श्रूयेत। द्व्येकयोरित्युच्यमानोनप्राप्नोति। इहकौञ्जायन्यस्यापत्यंबहवोमाणवकाःकौञ्जायनाः। केनयश
ब्दोनश्रूयेत। द्व्येकयोरित्युच्यमानःप्राप्नोति। तदेतत्कथंकृत्वाञ्यवचनंज्यायोभवति। यदितन्नास्ति। आपत्यं
वागोत्रम्। परमप्रकृतेरपत्यः। आपत्याज्जीवद्वृद्ध्यात्स्वार्थेद्वितीयोयुवसंज्ञः। सचास्त्रियाम्। एकोगोत्रग्र
हणानर्थकंच। बहुवचनलोपिषुचसिद्धमिति। सतिहितस्मिन्द्व्येकयोरपिफञिसतिबहुषुचफकिसति
नदोषोभवति। तत्रकौञ्जायनानामपत्यंमाणवकइतिविगृह्यकुञ्जशब्दाद्द्व्येकयोरुत्पत्तिर्भविष्यति। कौ
ञ्जायन्यः। कौञ्जायन्यौ। कौञ्जायन्यस्यापत्यंमाणवकाइतिविगृह्यकुञ्जशब्दाद्बहुषूत्पत्तिर्भविष्यति। कौ
ञ्जायनाइति॥ अनृष्यानन्तर्येबिदादिभ्योञ्॥ अनृष्यानन्तर्यइत्युच्यतेतत्रेदंनसिद्ध्यति। कौशिकोविश्वामित्र
इति। किंकारणम्। विश्वामित्रस्तपस्तेपेनानृषिःस्यामिति ॥

फञिफकिचकृतेस्वार्थिकस्यचेञोलुकिकृतेसर्वेष्टसिद्धिः॥ अनृष्या॥ अनृष्यानन्तर्यइत्यस्यार्थद्वयंसंभवति। ऋषीणामान
न्तर्येअव्यवधानेनभवति। यद्वाऽनन्तरमेवानन्तर्यंतेनऋषिभ्योनन्तरापत्येप्रत्ययोनभवतीति। उभयात्राप्यसमर्थसमासो
भवतिनानञःसंबन्धात्। तत्राद्यपक्षाश्रयेणपूर्वःपक्षोद्वितीयपक्षाश्रयेणोत्तरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संज्ञागोत्राधिकारादिति। संज्ञयाय द्वोत्रं पौत्रप्रभृतितदेवाधिकृतं नत्वपत्यमात्रमित्यर्थः। तेषामनन्तर इति। अन्यथा प्रति
षेधोनर्थकः स्यात्। तत्रर्षिभ्यो गोत्र एव प्रत्ययः। अनृषिभ्यस्त्वनन्तरापत्य एवेत्येषविषयविभागः। नन्वस्माज्ज्ञापकादनृ
षिभ्योपत्यमात्रे प्रत्ययः प्राप्नोति। नैष दोषः। विशेषविषयस्यानुमानस्याश्रयणात्॥ वतण्डा॥ लुक् स्त्रियामिति वक्ष्यामीति।
तत्र च वतण्डशब्दानुवृत्त्यर्थमेतदित्यर्थः। यदीति। गर्गादिगण एव वतण्डशब्दानन्तरं लुक् स्त्रियामिति पठितव्यमिति भा

तत्रभवानृषिः संपन्नः। स पुनस्तपस्तेपेनानृषेः पुत्रः स्यामिति। तत्रभवान् गाधिरप्यृषिः संपन्नः। स पुन
स्तपस्तेपेनानृषेः पौत्रः स्यामिति। तत्रभवान् कुशिकोप्यृषिः संपन्नः। तदेतदृष्यानन्तर्यं भवति। तत्रानृष्या
नन्तर्य इति प्रतिषेधः संप्राप्नोति। नैष दोषः। नैवं विज्ञायते। ऋष्यानन्तर्येण न भवतीति। कथं तर्हि। ऋषावनन्त
रे नेति। यद्येवम्। अनृष्यानन्तर्यवचनमनर्थकं संज्ञागोत्राधिकारात्। अनृष्यानन्तर्यवचनमनर्थकम्। किं
कारणम्। संज्ञागोत्राधिकारात्। संज्ञागोत्र इति वर्तते कः प्रसङ्गो यदनन्तरे स्यात्। नैव प्राप्नोति। नार्थः प्रति
षेधेन। एवं तर्हि सिद्धे सति यदनृष्यानन्तर्य इति प्रतिषेधं शास्ति। तज्ज्ञापयत्याचार्यो बिदादिषु येऽनृषयः
पठ्यन्ते तेषामनन्तरेपि वृत्तिर्भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। नानान्द्रः। पौत्रः। दौहित्र इत्यादि सि
द्धं भवति। वतण्डाच्च॥ किमर्थमिदमुच्यते। न गर्गादिभ्यो यञित्येव सिद्धम्। लुक् स्त्रियामिति वक्ष्यामीति।
यदि पुनस्तत्रैवोच्येत। नैवं शक्यम्। आङ्गिरसग्रहणं हि विच्छिद्येत॥ शिवादिभ्योण्॥ किमर्थं शिवादिभ्यो
ण् विधीयते। न यथाविहितमित्येवोच्येत। शिवादिभ्यो यथाविहितमितीयत्युच्यमाने इञ् प्रसज्येत। इञ
तो यथाविहितः। पुनर्वचनमिदानीं किमर्थं स्यात्। येतस्य बाधकास्तद्बाधनार्थम्। स वै नास्ति यस्तं बाधेत।
तत्रारम्भसामर्थ्याद्यो विहितो न च प्राप्नोति स भविष्यति। कथ्वा सावणेव ॥

वः। आङ्गिरसग्रहणमिति। तथा च सर्वत्र लुक् स्यात्। योगविभागस्तर्हि किमर्थो न वतण्डाल्लुक् स्त्रियामित्येकयोग ए
वोच्येत। आङ्गिरसे शिवाद्यण्बाधनार्थो योगविभागः। वतण्डो नाम ऋषिः। ततऋषित्वादेवाणि सिद्धे शिवादिषु तस्य पा
ठो गोत्रे गर्गादियञा समावेशार्थः। अनेन तु योगेनाङ्गिरसेऽण्प्रसङ्गे यञ्विधानादण्बाध्यते। अन्यत्र तु गोत्रे यञणौ
द्वावपि भवतः। ऋषित्वादेव च वातण्डीत्यत्र ष्यङ् भवति॥ शिवा॥ गोत्र इति निवृत्तमपत्यमित्येवानुवर्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ढगतइति। नमानुमात् शब्दस्यास्त्रीप्रत्ययान्तत्वात्कथं ढग्विहितः। एवं तर्हि परिहारान्तराभिधानादविचारितमेतद्भाष्यका ४१४
रेण। तपरत्वादिति। परत्वग्रहणेनबाधकत्वं लक्ष्यते। तेनापवादत्वादित्यर्थः॥ ऋष्यं॥ ऋषिव्ल्यणइति। अवृद्धाभ्योन

उत्तरार्थं तर्हि। अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्य इत्य त्रयथाविहितमितीयत्युच्यमाने ढक्प्रसज्ये
त। ढगतो यथाविहितः। पुनर्वचनमिदानीं किमर्थं स्यात्। ये तस्य बाधकास्तद्बाधनार्थम्। स चैव नास्ति यस्तं बाधे
त। तत्रारम्भसामर्थ्याद्यो विहितो न च प्राप्नोति स भविष्यति। कः पुनरसावण् वा। उत्तरार्थमेव हि तर्हि। ऋष्य
न्धकवृष्णिकुरुभ्यश्चेत्यत्र यथाविहितमितीयत्युच्यमाने इञ् प्रसज्येत। इञतो यथाविहितः। पुनर्वचन
मिदानीं किमर्थं स्यात्। ये तस्य बाधकास्तद्बाधनार्थम्। स चैव नास्ति यस्तं बाधेत। तत्रारम्भसामर्थ्याद्यो विहितो
न प्राप्नोति स भविष्यति। कश्चासावण् वा। उत्तरार्थमेव तर्हि। मातुरुत्संख्यासंभद्रपूर्वायाः। कन्यायाः कनीन
चेति। अत्र यथाविहितमितीयत्युच्यमाने ढक् प्रसज्येत। ढगतो यथाविहितः। पुनर्वचनमिदानीं किमर्थं
स्यात्। मातुरुकारं वक्ष्यामि। कन्यायाः कनीनभावमिति। यद्येतावत्प्रयोजनं स्यात्। तत्रैव ब्रूयात् स्त्रीभ्यो ढ
क् मातुरुकारः कन्यायाश्च कनीन इति। इदं तर्हि प्रयोजनम्। अयमृष्टिषेणशब्दः शिवादिषु पठ्यते। अत्र
यथाविहितमितीयत्युच्यमाने इञ् प्रसज्येत। तं परत्वात्सेनान्ताण्यो बाधेत। तत्रारम्भसामर्थ्यादिञ् प्रसज्येत।
पुनरण्ग्रहणादणेव भवति॥ ऋष्यन्धकवृष्णिकुरुभ्यश्च॥ ऋषिव्ल्यणो ढक्ढ्कौ विप्रतिषेधेन॥ ऋष्यण
ल्व्यणश्च ढक्ढ्कौ भवतो विप्रतिषेधेन। ऋष्यणोऽवकाशः। वासिष्ठः। वैश्वामित्रः। ढकोऽवकाशः। दुलि। दौले
यः। वलि। वालेयः। इहोभयं प्राप्नोति। अत्रि। आत्रेयः। ल्व्यणोऽवकाशः। मकन्दिका। माकन्दिकः। ढ्रकोऽवकाशः।
काणिकेरः। इहोभयं प्राप्नोति। पौणिकेरः। मौद्गलिकेरः। ढक्ढ्कौ भवतो विप्रतिषेधेन॥ द्व्यचो ढक् ढ्रक्ढञ्॥
द्व्यचो ढग् भवति स एतस्माद्ढक्ढञो भवतो विप्रतिषेधेन। द्व्यचो ढग् भवतीत्यस्यावकाशः। दात्तेयः। गौप्तेयः। ढ्रकः
स एव। इहोभयं प्राप्नोति। नटी। नाटेरः। दासी। दासेरः। ढञोऽवकाशः। कामण्डलेयः। हैरण्यवाहेयः। माद्रवाहेयः। ढकः स एव।

दीमानुषीभ्य इति मानुषीलक्षणो णः ल्व्यण्शब्देनोक्तः। अत्र च यथासंख्यं संबन्धः। दौलेय इति। दुलेरनृषित्वाड्ढकोऽयम राम:
वकाशः। काणिकेर इति। काणेवकाणिका। पौणिकेर इति। पुणिका तन्नामिका क्षुद्रा च ॥ ५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाम्बेय इति। चतुष्पाल्लक्षणो ढञ् ढे लोपोकद्रू इत्यूकारलोपः। जम्बूशब्दस्य स्त्रीप्रत्ययान्तत्वाढ्ढक् प्राप्तिश्चिन्त्या। नवे ति। प्राप्तिमात्रं बाध्यं मन्यते। मध्येपवादा इति। पूर्वस्य निर्ज्ञातस्वरूपत्वाद्बाध्यत्वं न तूत्तरस्यानिर्ज्ञातस्वरूपस्येति भावः।

इहोभयं प्राप्नोति। जम्बूः। जाम्बेयः। ढक् ढञो भवति विप्रतिषेधेन। न चर्ष्यणः पुनर्वचनमन्यनिवृत्त्यर्थम्। न वाऽएष युक्तो विप्रतिषेधः। योऽयमृष्यणो ढकश्च। किं कारणम्। ऋष्यणः पुनर्वचनमन्यनिवृत्त्यर्थम्। सिद्धो त्राणुत्सर्गेणैव। तस्य पुनर्वचन एतत्प्रयोजनं येऽन्ये तदपवादाः प्राप्नुवन्ति तद्बाधनार्थम्। स यथैव तदप वादमिञं बाधते। एवं ढकमपि बाधेत। तस्मादृषिभ्योऽणिवधानेऽन्यादिप्रतिषेधः। तस्मादृषिभ्योऽणिवधा नेऽन्यादिभ्यः प्रतिषेधो वक्तव्यः। न वक्तव्यः। मध्येपवादाः पूर्वान्विधीन्बाधन्त इत्येवमृष्यण् इञं तदप वादं बाधिष्यते ढकं न बाधिष्यते। अयं चाप्ययुक्तो विप्रतिषेधो योऽयं ढकः द्व्यक् ढञोश्च। किं पुनः कारणम्। ढकः पुनर्वचनमन्यनिवृत्त्यर्थम्। सिद्धोऽत्र ढक्। स्त्रीभ्यो ढगित्येव। तस्य पुनर्वचन एतत्प्रयोजनं येऽन्ये त दपवादाः प्राप्नुवन्ति तद्बाधनार्थम्। स यथैव तन्नामिकाणं तदपवादं बाधत एवं द्व्यक् ढञावपि बाधेत। त स्मात्तन्नामिकाण्यद्व्यचः। तस्मात्तन्नामिकाणि अद्व्यच इति वक्तव्यम्। न वक्तव्यम्। मध्येपवादाः पूर्वान्वि धीन्बाधन्त इत्येवमयं ढक् तन्नामिकाणं तदपवादं बाधिष्यते। द्व्यक् ढञौ न बाधिष्यते॥ ऋष्यन्धकवृष्णिकु र्वणः सेनान्ताण्ण्यः॥ ऋष्यन्धकवृष्णिकुर्वणः सेनान्ताण्ण्यः भवति विप्रतिषेधेन। ऋष्यणोवकाशः। वासिष्ठः। वैश्वामित्रः। ण्यस्यावकाशः। पारिषेण्यः। वारिषेण्यः। जातसेनो नाम ऋषिस्तस्मादुभयं प्राप्नोति। ण्यो भ वति विप्रतिषेधेन। जातसेन्यः। अन्धकाणोवकाशः। श्वाफल्कः। चैत्रकः। राध्यसः। ण्यस्य स एव। उग्रसेनो ना मान्धकस्तस्मादुभयं प्राप्नोति ण्यो भवति विप्रतिषेधेन। औग्रसेन्यः। वृष्ण्यणोवकाशः। वासुदेवः। बालदेवः। ण्य स्य स एव। विष्वक्सेनो नाम वृष्णिस्तस्मादुभयं प्राप्नोति ण्यो भवति विप्रतिषेधेन। वैष्वक्सेन्यः। कुर्वणोवकाशः। ना कुलः। साहदेवः। ण्यस्य स एव। भीमसेनो नाम कुरुस्तस्मादुभयं प्राप्नोति। ण्यो भवति विप्रतिषेधेन। भैमसेन्यः। से नान्ताण्ण्यो भवति विप्रतिषेधेन॥ जातोग्रविष्वक्भीमेभ्य इति वक्तव्यम् ॥

अथात्राहुः। कथं पुनर्नित्यानां शब्दानामनित्यान्धकादिवंशाश्रयेणान्वाख्यानं युज्यते। अत्र समाधिः। त्रिपुरुषानूकं नाम कुर्यादिति न्यायेनान्धकादिवंशा अपि नित्या एव। अथवाऽनित्योपाध्याश्रयेणापि नित्यान्वाख्यानं दृश्यते। यथा शकाश्रयणेन कालस्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.कै. मातुरुत्॥अणिसिद्धेतत्संनियोगेनोत्वार्थवचनम्।स्त्रीलिङ्ग इति।अर्थधर्मस्त्रीत्वंशब्देसमारोप्यक्रियाशब्दनिवृत्त्यर्थःस्त्री
५४ लिङ्ग निर्देशःकृतः।न्यायानुवादश्चायंस्त्रीलिङ्गनिर्देशः।संबन्धिशब्दस्यप्रसिद्धतरत्वात्तस्यैवग्रहणस्यसिद्धत्वात्।एत
च्चबाह्वादिभ्यश्चेत्यत्रोक्तम्॥कन्यायाः।यदीति।अक्षतयोनिःकन्यासाकथमपत्येनसंबध्येतेतिभावः।अभिसंबन्धपूर्वक
इति।शास्त्रोक्तोविवाहोभिसंबन्धस्तत्पूर्वकेपुरुषसंयोगेकन्याशब्दोनिवर्तते।यातुशास्त्रोक्तेनविवाहसंस्कारेणविनापुरु
षंयुनक्तिसाकन्यात्वंनजहाति।कन्योक्तायाइति।कन्यैवासावुक्ता।तदेवव्याचष्टे।कन्याभिमतायाइति।कन्यैवसाभिमता
स्मृतिकाराणामित्यर्थः।सुदर्शनायाइति।प्रकटदर्शनायाअगुप्तत्वादित्यर्थः।अन्येत्वाहुः।मुनिदेवतामाहात्म्याद्यापुंयोगेप्य

मातुरुत्संख्यासंभद्रपूर्वायाः॥किमर्थंस्त्रीलिङ्गेननिर्देशःक्रियतेनसंख्यासंभद्रपूर्वस्येत्येवमुच्यते।स्त्री
लिङ्गेयोमातृशब्दस्तस्माद्यथास्यात्।इहमाभूत्।संमिमीते।संमाता।संमातुरपत्यंसांमात्र इति॥कन्यायाःक
नीनच॥इदंविप्रतिषिद्धम्।कोविप्रतिषेधः।अपत्यमितिवर्तते।यदिचकन्यानामपत्यम्।अथापत्यंनक
न्या।कन्याचापत्यंचेतिविप्रतिषिद्धम्।नैतद्विप्रतिषिद्धम्।कथम्।कन्याशब्दोयंपुंसाभिसंबन्धपूर्वकेसंप्रयोगे
वर्तते।याचेदानींप्रागभिसंबन्धात्पुंसासहसंप्रयोगंगच्छतितस्यांकन्याशब्दोवर्ततएव।कन्यायाःकन्यो
क्तायाःकन्याभिमतायाःसुदर्शनायाःयदपत्यंसकानीनइति॥स्त्रीभ्योढक्॥इदंसर्वेष्वेवस्त्रीग्रहणेषुविचार्यते।
स्त्रीग्रहणेस्त्रीशब्दग्रहणंस्यात्स्त्रीप्रत्ययग्रहणंवा।स्त्र्यर्थग्रहणंवा।किंचातः।यदिस्त्रीशब्दग्रहणमर्थग्रह
णंवा।इडबिड्।ऐडबिडः।पृथा।पार्थः।उशिक्।औशिजः।दरद्।दारदः।अत्रापिप्राप्नोति।अथप्रत्ययग्रहणम्।
लैखाभ्रेयः।वैमात्रेयः।इतिनसिध्यति ॥

क्षतयोनिर्भवति।यथाकुन्तीमन्त्राहूतदिनकरोत्पादितकर्णाख्यपुत्रापिपुनःकन्यैवाभूत्।तदपत्यंकानीनशब्दाभिधेयम्।स्त्री
भ्यो॥बहुवचननिर्देशात्स्वरूपग्रहणेनिरस्तेपक्षत्रयसंभावनापूर्वकंप्रत्ययग्रहणमिहव्यवस्थाप्यते।इदंसर्वेष्विति।तत्रक्व
चित्कश्चित्पक्षआश्रीयते।इहतुस्वरितत्वप्रतिज्ञानात्स्वरितेनाधिकारावगतिर्भवतीत्यस्याप्यर्थस्याश्रयणाङ्यादिप्रत्ययग्र
हणम्।स्त्रियांक्तिन्नित्येतत्प्रकरणविहितास्तुप्रत्ययाव्यवधानान्नगृह्यन्ते।स्त्रीशब्दग्रहणमिति।स्त्रीलिङ्गानांशब्दानांग्र
हणमित्यर्थः।अर्थग्रहणमिति।अर्थेकार्यासंभवेतदभिधायिशब्दग्रहणमेवसंबध्यते।इडविडादयःशब्दाःस्त्रीवृत्तयोनतु राम.
स्त्रीप्रत्ययान्ताइति।तेभ्योणेवभवति ॥ ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वडवायाद्‌ इति। वृषो बीजाश्वः। तेन चार्थेन विशेषविहितेनापत्यलक्षणोऽर्थो ढको बाध्यते। तेनापत्ये वाडव इति भवति। क्रौ
ञ्च इति। अपत्य एवायं ढगपवादः॥ चटकायाः॥ पुल्लिङ्गे नेति। अन्यथा पुल्लिङ्गादिञ् प्रसज्येत॥ क्षुद्राभ्यो॥ अङ्गहीना वे
ति। वाशब्दश्चार्थे॥ मातृष्वसुः॥ तत्रेदमिति। अनन्तरस्य विधिं मन्यते। एवं वक्ष्यामीति। व्याख्यास्यामीत्यर्थः। चकारेण पि
तृष्वसुरित्यनुकृष्यते द्विकार्यद्वयलाभः॥ राज॥ राजशब्दः क्षत्रियशब्दपर्यायः। जातिग्रहणमिति। यदा प्रकृतिप्रत्ययसमु

अस्तु प्रत्ययग्रहणम्। कथं लैखाभ्रेयः वैमात्रेय इति। शुभ्रादिषु पाठः करिष्यते। वडवाया वृषे वाच्ये॥ वडवाया
वृषे वाच्ये ढग्वक्तव्यः॥ वडवाया वृषः वाडवेयः। अण् क्रुञ्चाकोकिलात्स्मृतः। क्रौञ्चः। कौकिल इति। आरक्पुं
सि ततोऽन्यत्र। ततोऽन्यत्र आरक्पुंसि वक्तव्यः। मुषिकाया अपत्यं पुमान् मौषिकारः। मृग्याः पुमान् मार्गारः॥ ... धाया
ढ्रक् विधौ स्मृतः। गोधायाः पुमान् गौधेरः॥ चटकाया ऐरक्॥ चटकायाः पुल्लिङ्गनिर्देशः। चटकायाः पुल्लिङ्गे नि
र्देशः कर्तव्यः। इहापि यथा स्यात्। चटकस्यापत्यं चाटकैरः। यदि पुल्लिङ्गे न निर्देशः क्रियते। चटकाया अपत्यं चाटकै
र इति न सिध्यति। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्येवं भविष्यति। स्त्रियामपत्ये लुक्। स्त्रियाम
पत्ये लुग्वक्तव्यः॥ चटकस्यापत्यं चटका॥ आरगुदीचाम्। आरग्वचनमनर्थकं रकासिद्धत्वात्। आरग्वचनमनर्थकम्। किं
कारणम्। रकासिद्धत्वात्। गोधा आकारान्ता रक्प्रत्ययः। एवं तर्हि सिद्धे सति यदारकं शास्ति तज्ज्ञापयत्याचार्यो
ऽन्येभ्योऽप्ययं भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। जाडारः पाण्डार इत्येतत्सिद्धं भवति॥ क्षुद्राभ्यो वा॥ क्षुद्रा
भ्य इत्युच्यते। का क्षुद्रा नाम। अनियतपुंस्का। अङ्गहीना वा॥ पितृष्वसुश्छण्॥ ढकि लोपः॥ केन विहिते पितृष्व
सुः ढकि लोप इत्युच्यते। एतदेव ज्ञापयति पितृष्वसुर्ढगिति। यदयं ढकि लोपं शास्ति। मातृष्वसुश्च॥ ढकि लोप
इत्युच्यते। तत्रेदं न सिध्यति। मातृष्वस्रीयः। नैष दोषः। एवं वक्ष्यामि। पितृष्वसुश्छण् ढकि लोपः ततो मातृष्वसुश्च पितृष्व
सुर्यदुक्तं तन्मातृष्वसुर्भवतीति। किं पुनस्तच्छण् ढकि लोपाविति॥ राजश्वशुराद्यत्॥ राज्ञोऽपत्ये जातिग्रहणम्। रा
ज्ञोऽपत्ये जातिग्रहणं कर्तव्यम्। राजन्यो नाम जातिः। क्व मा भूत्। राजन इति॥ व्यन्सपत्ने॥ व्यन्व चनमनर्थकं प्रत्य
यार्थाभावात्। व्यन्वचनमनर्थकम्। किं कारणम्। प्रत्ययार्थाभावात्। किमिदं प्रत्ययार्थाभावादिति ॥

दायेन जातिर्गम्यते तदा प्रत्ययो नान्यदा। तेन क्षत्रियजातौ प्रतिपिपादयिषितायां राजन्यशब्दप्रयोगो वैश्ये शूद्रे वा राजापत्ये रा
जनशब्दप्रयोगः॥ व्यन्सपत्ने॥ प्रत्ययार्थाभावादिति। भ्रातृव्यशब्दः सर्वस्मिन्सपत्ने दृष्यते। न हि सर्वः सपत्नो भ्रातुरपत्यमित्य
पत्यलक्षणस्य प्रत्ययार्थस्याभाव इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तु तावदिति। विरोधाभावात्सपत्नेनापत्यार्थो न बाध्यते। न च समुदायार्थः सपत्नः। प्रकृतिप्रत्ययार्थयोस्त्यागप्रसङ्गात्। न च गत्यन्तरसंभवे तत्त्यागो युक्त इति भावः॥ गोत्र॥ बहूनां गोत्रप्रत्ययानां वृद्धिमत्त्वदर्शनाद्विचारः। गोत्रस्त्रियाइति। वातण्ड इति। वतण्डस्यापत्यं गोत्रं स्त्री। वतण्डाच्चेति यञ्। तस्य लुक् स्त्रियामिति लुक्। शार्ङ्गरवादिलान्ङीन्। वतण्ड्या अपत्यमिति णः। व्यवहितत्वादिति। अचीति परसप्तमी मन्यते। विषयसप्तम्यां तु न दोषः। अथवा यतो गोत्रप्रत्ययाद्व्यवहि

अपत्यार्थाभावात्। अपत्यमिति वर्तते। अनपत्ये चापि सपत्ने भ्रातृव्यशब्दो वर्तते। पाप्मना भ्रातृव्येण। अस्तु तावदपत्यं सपत्नश्च। तत्र भ्रातृव्य इति। कथं पाप्मना भ्रातृव्येणेति। उपमानात्सिद्धं भ्रातृव्य इव भ्रातृव्य इति॥ गोत्रस्त्रियाः कुत्सने ण च॥ किमर्थो णकारः। वृद्ध्यर्थः। ञ्णितीति वृद्धिर्यथा स्यात्। गार्गो जाल्मः। गोत्रस्त्रियाः प्रत्ययस्य णित्करणमनर्थकं वृद्धत्वात्प्रातिपदिकस्य। गोत्रस्त्रियाः प्रत्ययस्य णित्करणमनर्थकम्। किं कारणम्। वृद्धत्वात्प्रातिपदिकस्य। वृद्धमेवेदं प्रातिपदिकम्। लुगर्थं तर्हि णकारः कर्तव्यः। यल्लुगन्तमवृद्धं तत्र वृद्धिर्यथा स्यात्। वातण्डो जाल्मः। लुगर्थमिति चेन्न लुक्प्रतिषेधात्। ।

लुगर्थमिति चेन्न॥ किं कारणम्। लुक्प्रतिषेधात्। प्रतिषिध्यते तत्र लुक्। गोत्रे लुगचीति। व्यवहितत्वादप्रतिषेधः। ईकारेण व्यवहितत्वात्प्रतिषेधो न प्राप्नोति। व्यवहितत्वादप्रतिषेध इति चेन्न पुंवद्भावात्। व्यवहितत्वादप्रतिषेध इति चेत्तन्न। किं कारणम्। पुंवद्भावात्। पुंवद्भावोऽत्र भवति। भस्याढे तद्धिते पुंवद्भवतीति। फिनर्थं तु णकारः कर्तव्यः। यत्फिनन्तमवृद्धं तत्र वृद्धिर्यथा स्यात्। ग्लौचुकायनो जाल्म इति। पुंवद्भावप्रतिषेधार्थं च णकारः कर्तव्यः। गार्गीभार्यो अस्य गार्गीभार्यः। वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो यथा स्यात्। गोत्राद्यून्यस्त्रियामिति वचनादप्रयोजनम्। गोत्राद्यून्यस्त्रियामिति वचनादप्रयोजनमेतदिति भवति। नास्ति गार्गीइति ॥

तो जादिकृत्यदृते तस्या लुगिति विज्ञानाद्विषयसप्तम्यामपि दोषाव्यवधानम्। पुंवद्भावादिति। पुंवद्भावेन रूपातिदेशाद्भूतण्ड्यशब्दात्स्त्रीवृत्तेर्णप्रत्यय इति भावः। ग्लौचुकायन इति। ग्लुचुकस्यापत्यं स्त्री प्राचामिति फिञ्प्रत्ययः। इतो मनुष्यजातेरिति ङीष्। पुंवद्भावे कृते णः। नास्ति गार्गेति। गार्ग्या अपत्यं स्त्रीत्यत्रार्थे नास्ति प्रत्ययः। अस्त्रियामिति युवसंज्ञानिषेधाद्गोत्र संज्ञावस्थानादेको गोत्र इति नियमाद्गोत्रप्रत्ययान्तादपरगोत्रप्रत्ययानुत्पादात् ॥ रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवंश्यत्वादिति। गार्ग्याअपत्यंयास्त्रीतस्यानयुवसंज्ञानापिगोत्रसंज्ञानहिसागर्गस्यापत्यम्। पौत्रप्रभृतेर्ह्यपत्यस्यगोत्रसंज्ञा विधीयतेतदभावादेकोगोत्रइतिनियमाभावात्तस्याभावादस्तिगार्गेत्यर्थः। नचस्त्रीवंश्येति। पितृपितामहादिर्वंशोनमा तृमातामहादिरित्यर्थः। तस्मात्पुंवद्भावप्रतिषेधार्थोणकारः। नचजातेश्चेतिप्रतिषेधःसिध्यति। गोत्रत्वाभावेजातित्वाभा वात्। यदाचगोत्रंचचरणैःसहेत्यत्रापत्यमात्रंगोत्रंगृह्यतेतदाजातित्वमस्त्येव। फिनर्थस्तुकर्तव्यएवणकारोवृद्धये। मातृ वंशइति। गार्ग्याअपत्यंयास्त्रीसामातृवंशेनगर्गकुलाभवत्येवेतिगर्गापेक्षयागोत्रत्वादेकोगोत्रइतिनियमात्प्रत्ययान्तरा भावान्नास्तिगार्गी। पौत्रप्रभृतिग्रहणंतुव्यवहितापत्योपलक्षणम्। तस्मात्फिनर्थोणकारः॥ वृद्धाट्ठक्सौ॰गोत्रस्त्रियाइति।

अवंश्यत्वाद्वास्त्रियाः प्रयोजनम्। अवंश्यत्वाद्वास्त्रियाःप्रयोजनमेतद्भवति। नचस्त्रीवंश्या। अस्ति[illegible]स्त्री। अपरआह। द्वावेववंशौ। मातृवंशः पितृवंशश्च। यावतामातृवंशोस्तिनास्तिगार्गी॥ वृद्धाट्ठक्सौवीरेषुबहुलम्। गोत्रस्त्रियाः। वृद्धाट्ठक्। फेश्छच। फाण्टाहृति। इमेचत्वारोयोगाः। एषांत्रयःकुत्सने। त्रयःसौवीरगोत्रे। आद्योयो गःकुत्सनएव। अन्त्यःसौवीरगोत्रएव॥ फाण्टाहृतिमिमताभ्यांणफिञौ॥ किमर्थोणकारः। वृद्ध्यर्थः। ञ्णितीतिवृ द्धिर्यथास्यात्। फाण्टाहृतः। फाण्टाहृतेः प्रत्ययस्यणित्करणानर्थक्यंवृद्धत्वात्प्रातिपदिकस्य। फाण्टाहृतेःप्रत्य यस्यणित्करणमनर्थकम्। किंकारणम्। वृद्धत्वात्प्रातिपदिकस्य। वृद्धमेवैतत्प्रातिपदिकम्। पुंवद्भावप्रतिषेधार्थंतु। पुंवद्भा क वस्यप्रतिषेधार्थोणकारःकर्तव्यः। फाण्टाहृताभार्याअस्यफाण्टाहृताभार्यः। वृद्धिनिमित्तस्येतिपुंवद्भावप्रतिषेधोय थास्यात्। उक्तंवा। किमुक्तम्। गोत्राद्यून्यस्त्रियामितिवचनादप्रयोजनम्। अवंश्यत्वाद्वास्त्रियाःप्रयोजनमि ति॥ कुर्वादिभ्योण्यः॥ वामरथस्यकण्वादिवत्स्वरवर्जम्। वामरथस्यकण्वादिवद्भावोवक्तव्यः। किमविशेषेण। ने त्याह। स्वरवर्जम्। स्वरंवर्जयित्वा। किंप्रयोजनम्। वामरथ्यस्यच्छात्राः वामरथाः। कण्वादिभ्योगोत्रइत्यण्यथास्यात्॥

विषयविभागकथनार्थोत्रोपक्षेपः। कुत्सनग्रहणस्यसौवीरग्रहणस्यचसूत्रद्वयएवानुवर्तनाद्यथोक्तविषयविभागलाभः। फाण्टा॥ फाण्टाहृतेरिति। यथासंख्यसंबन्धस्येष्टत्वान्निमिमतशब्दार्थंणित्वम्। पूर्वनिपातव्यवस्थातुशास्त्रेनावश्यंस र्वत्राश्रीयतेइतितदनाश्रयणमपिनयथासंख्याभावंसूचयितुमलम्। शिष्टंभाष्यंपूर्ववद्व्याख्येयम्॥ कुर्वा॥ वामरथस्ये ति। प्रकरणाण्ण्यप्रत्ययान्तस्येतिविज्ञेयम्। कण्वादीनांयञन्तानांयत्कार्यंतदतिदेशः केवलानांतेषांकार्यस्यक्वचि दनभिधानात्। वामरथाइति। कप्राप्तेःण्विधिः। आपत्यस्येतियलोपः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदीति। कण्वादिवदिति वचनात्कण्वादीनामाहृत्य यत्कार्यं विहितं कण्वादिभ्यो गोत्र इति तस्यैवातिदेशः प्राप्नोति न तु
यञन्तमात्रनिबन्धनस्येति भावः। एवमपीति। सामान्यातिदेशे विशेषानतिदेशात्। यदयमिति। लिङ्गादाहृत्यानाहृत्य
च कण्वादीनां यञन्तानां यत्कार्यं विधीयते तदतिदिश्यते॥ उदीचाम्॥ उदीचामिति। इञाधनायाण्विध्यर्थं वचनम्। ता
क्ष्ण इति। षपूर्वहन्धृतराज्ञामणीत्यल्लोपः। यदीति। विशेषविहितेनाणा बाधितत्वादिञ्न भविष्यतीति भावः। ण्यविधिरि
ति। यद्यणा कार्यमात्रं बाध्यते तदा द्वयोरपि ण्यञोर्बाधः स्यात्। अथ विशेषचिन्ता तदा पुरस्तादपवादा इति न्यायाद्ण्य

यदि कण्वादिवदित्युच्यते। प्रत्ययाश्रयमनतिदिष्टं भवति। तत्र को दोषः। वामरथाः बहुषु लोपो न प्राप्नो
ति। वामरथानां संघः। वामरथाः। संघाङ्कलक्षणेष्वञ्यञिञामणित्यण्न प्राप्नोति। यदि पुनर्यञ्वदित्युच्यते।
एवमपि प्रकृत्याश्रितमनतिदिष्टं भवति। तत्र को दोषः। वामरथ्यस्य छात्रा वामरथाः। कण्वादिभ्यो गो
त्र इत्यण्न प्राप्नोति। अस्तु तर्हि कण्वादिवदित्येव। कथं वामरथाः। वामरथानां संघ इति च। यदयं स्वर
वर्जमित्याह तज्ज्ञापयत्याचार्यः प्रत्ययाश्रयमप्यतिदिष्टं भवतीति॥ उदीचामिञ्॥ उदीचामिञ्विधौ त
क्ष्णो ण्वचनम्॥ उदीचामिञ्विधौ तक्ष्णो ण्वक्तव्यः। ताक्ष्णः। यदि पुनरयं तक्षशब्दः शिवादिषु पठ्ये
त। शिवादिरिति चेण्ण्यविधिः। शिवादिरिति चेद्ण्यो विधेयः। ताक्षण्यः। सिद्धं तूदीचां वाण्यवचनात्।
सिद्धमेतत्। कथम्। उदीचां वाण्यवचनात्। उदीचां वाण्यो भवतीति वक्तव्यम्। ण्येन मुक्ते योयतः
प्राप्नोति स ततो भविष्यति॥ कौसल्यकार्मार्याभ्यां च॥ किमिदं कौसल्यकार्मार्ययोर्विकृतयोर्ग्रहणं क्रिय
ते। एवं विकृताभ्यां यथा स्यात्। अत्यल्पमिदमुच्यते। कौसल्यकार्मार्याभ्यां चेति। फिञ्प्रकरणे दङ्गुणो को
लकर्मारच्छागवृषाणां युट् च ॥

स्यैव बाधः प्राप्नोति नेञः। सिद्धं त्विति। विकल्पितण्यमुक्ते पक्षे तक्षन्शब्दात्प्राग्दीव्यतोऽणित्यण्भवति। ननु जातसेनोग्रसेन
विष्वक्सेनभीमसेनेभ्यो ण्येन मुक्ते पक्षे अणृष्यादिलक्षणः प्राप्नोति। यथान्यासे तु तेभ्यो ण्यञो भवतः। एवं तर्हि बाह्वादेरा
कृतिगणत्वादेतेभ्यो ण्येन मुक्ते इञ् भविष्यतीत्यदोषः॥ कौसल्य॥ किमिदमिति। कोसलस्यापत्यं वृद्धे कोसलाजादञ्
ङितिञ्यङ्। कर्मारस्यापत्यं कारिलक्षणो ण्य इत्येवं यौ कौसल्यकार्मार्यशब्दौ तयोर्ग्रहणं नेष्यत इति प्रश्नः। उत्तरं तु। प्रत्य
यसंनियोगेनैवंभूतप्रकृत्यादेशविधानार्थ एव निर्देशः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अङ्गस्यादेश इति। अङ्गनिमित्तप्रत्ययावयवस्येत्यर्थः। चेनेति। तेन युगपदागमादेशौ भवतः॥ वाकि॥ क्रियत इति। गणसू
त्रमेवैवं पठ्यत इत्यर्थः। यद्यपि वाकिनादीनां कुक्चेति सूत्रपाठे लाघवं भवति। नलोपश्चेति गणसूत्रैकदेशस्याकरणात् तथा

फिञ्प्रकरणे दगुकोसलकर्मारच्छागवृषाणां युड्वेति वक्तव्यम्। दगु। दागव्यायनिः। कोसल। कौसल्यायनिः।
कर्मार। कार्मार्यायणिः। छाग। छाग्यायनिः। वृष। वार्ष्यायणिः। यदि युट् क्रियते। युटि कृते अनादित्वादादे
शो न प्राप्नोति। इदमिह संप्रधार्यम् आदेशः क्रियतां युडिति। किमत्र कर्तव्यम्। परत्वादादेशः। नित्यो युट्। कृतेऽप्यादे
शे प्राप्नोति अकृतेऽपि। युडप्यनित्यः। अन्यस्य कृते आदेशे प्राप्नोति अन्यस्याकृते। शब्दान्तरस्य प्राप्नुवन् विधिरनि
त्यो भवति। अन्तरङ्गस्तर्हि युट्। कान्तरङ्गता। उत्पत्तिसंनियोगेन युडुच्यते। उत्पन्ने प्रत्यये प्रकृतिप्रत्य[illegible]
त्याङ्गस्यादेशः। आदेशोऽप्यन्तरङ्गः। कथम्। वक्ष्यत्येतत्। आयन्नादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति। अनकाश व
स्तर्हि युट्। एवं तर्हि पूर्वान्तः करिष्यते। यदि पूर्वान्तः करिष्यते। दागव्यायनिः। ओर्गुणो न प्राप्नोति। अस्तु तर्हि परा
दिरेव। ननु चोक्तम्। युटि कृते अनादित्वादादेशो न प्राप्नोति। नैष दोषः। सिद्धंत्वादेशस्य युड्वचनात्। सिद्धमेतत्।
कथम्। आदेशस्य युड्वचनात्। युडादिष्टस्येति वक्तव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। चेन संनियोगः करिष्यते।
युड्च। किं च। यच्चान्यत्प्राप्नोति। किं चान्यत्प्राप्नोति। आदेशः॥ वाकिनादीनां कुक्च॥ यदि पुनरयं कुट् परादिः क्रियते।
कुटि प्रत्ययादेरादेशानुपपत्तिरनादित्वात्। कुटि सति प्रत्ययादेरादेशो नोपपद्यते। किं कारणम्। अनादित्वात्। कुटि कृ
तेऽनादित्वादादेशो न प्राप्नोति। एवं तर्हि पूर्वान्तः करिष्यते। पूर्वान्ते नलोपवचनम्। यदि पूर्वान्तः क्रियते। नलोपो व
क्तव्यः। चार्मिकायणिः। वार्मिकायणिः। नलोपः प्रातिपदिकान्तस्येति नलोपो न प्राप्नोति। परादौ तु पुनः सति नलो
पः प्रातिपदिकान्तस्येति नलोपः सिध्यति। अस्तु तर्हि परादिरेव। ननु चोक्तम्। कुटि कृते अनादित्वादादेशो न प्राप्नो
ति। सिद्धंत्वादिष्टस्य कुड्वचनात्। सिद्धमेतत्। कथम्। कुङादिष्टस्येति वक्तव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्।
चेन संनियोगः करिष्यते। कुक्च। किं च। यच्चान्यत्प्राप्नोति। किं चान्यत्प्राप्नोति। आदेशः। सिध्यति। सूत्रं तर्हि भिद्यते। य
थान्यासमेवास्तु। ननु चोक्तं पूर्वान्ते नलोपवचनमिति। नैष दोषः। क्रियते न्यास एव एतत् चर्मिवर्मिणोर्नलोपश्चेति॥

पि गणपाठस्य पश्चात्सूत्रप्रणयनाद्गणपाठदर्शनात्कुक्चेत्युक्तमिति भावः। लिङ्गविशिष्टपरिभाषया चर्मिणीवर्मिणीभ्यां प्रत्य
यविधानाद्भस्याढ इति पुंवद्भावः सिद्ध्यति। कुटि तु भत्वाभावात्पुंवद्भावो न स्यात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोः॥अपत्यइति।णत्वविधानार्थमिदम्।अणःसिद्धत्वात्।नचनदण्डमाणवान्तेवासिष्विति निपातनात्सत्वस्यसिद्धत्वाद्वचनमनारम्भणीयम्।निपातनादर्थविशेषस्यानिश्चयात्।अनधीतविद्यत्वान्मूढत्वंविहिताकरणान्निषिद्धाचरणाच्चकुत्सितत्वम्।मानुषाइति।अपत्याधिकारादपत्येप्रत्ययोविधीयते।जातिग्रहणंतुप्रकृतिप्रत्ययविशेषणंनतुजातिःप्रत्ययार्थइति यञञोश्चेतिलुक्प्रसङ्गः।परादौतुषञ्भवति नत्वञितिलुगभावः।ननुतद्राजसञ्ज्ञग्रहणेनगृह्यतेइतिपरादावप्यञ्कृतप्रसङ्गः।एवंतर्हिअकारप्रश्लेषादकारमात्रस्याञोत्रग्रहणात्परादावञ्कार्याभावः।ईकारइति।शार्ङ्गरवाद्यञोङीनि

कारिभ्यइञोगोत्रात्फिञ्विप्रतिषेधेन।कारिभ्यइञ्भवतीत्येतस्माद्गोत्रात्फिञ्भवतिविप्रतिषेधेन।कारिभ्यइञ्भवतीत्यस्यावकाशः।आयस्कारिः।लौहकारिः।फिञोवकाशः।तापसायनिः।साम्मिन्तिकायनिः।इहोभयंप्राप्नोति।नापितायनिः।फिञ्भवतिविप्रतिषेधेन॥मनोर्जातावञ्यतौषुक्च॥अपत्येकुत्सितेमूढेमनोरौत्सर्गिकःस्मृतः।नकारस्यचमूर्द्धन्यस्तेनसिध्यतिमाणवः॥यदिषुक्पूर्वान्तःक्रियते।मानुषाः।बहुषुलोपःप्राप्नोति।मानुषाणांसंघः।संघाङ्कलक्षणेषञ्यञिञामणित्यणप्राप्नोति।अथपरादिःक्रियतेमानुषी।अजन्तादितीकारोनप्राप्नोति।अस्तुतर्हिपूर्वान्तएव।कथंमानुषामानुषाणांसंघइतिच।उभयत्रलौकिकस्यगोत्रस्यग्रहणम्।नचैतल्लौकिकंगोत्रम्।किंतर्हि।जातिः।इहतर्हिमानुष्यकमितिहलस्तद्धितस्येतियलोपःप्राप्नोति।परादावप्येषदोषः।यद्धितद्धलस्तद्धितस्येतिहलग्रहणंनतदङ्गविशेषणंशक्यंविज्ञातुम्।इहहिदोषःस्यात्।वृकाट्टेण्यण्।वार्केणीति।तस्मादुभाभ्यामेतद्वक्तव्यम्...त्याकेराजन्यमनुष्ययुवानइति ॥

त्सनेनेतिभावः।नचैतदिति।अपत्येत्युत्पादितस्यापिमानुषशब्दस्यब्राह्मणशब्दस्येवजातिवाचित्वादपत्यवाचित्वाभावादित्यर्थः।इहतर्हीति।हलन्तादङ्गात्परस्यतद्धितयकारस्यलोपइतिमन्यते।हलस्तद्धितस्येतिवर्त्तमानेआपत्यस्यचतद्धितेनातीति लोपोत्रप्राप्नोति।हस्तस्तद्धितस्येत्यत्रत्वीती तिवर्त्तते।वार्केणीति।वृक्शब्दादायुधजीविसंघविशेषवचनात्स्वार्थेटेण्यण् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपत्यम्॥ पौत्रप्रभृतेरिति। नन्वपत्यमात्रस्य लोके गोत्रत्वादपत्यविशेषे गोत्रशब्दस्य नियमात्परिभाषेयं न्याय्या न तु संज्ञा॥ नैष दोषः। लिङ्गवती परिभाषा भवति विध्यन्तरशेषभूता वा। न चेयं तथा। यथा च वृद्ध्यादयः सर्वार्थप्रत्यायनयोग्या अपि संज्ञिविशेषशक्त्यवच्छेदकरणात्संज्ञा उच्यन्ते तथेयमपि। उक्तं च हरिणा। व्यवहाराय नियमः संज्ञानां संज्ञिनि क्वचित्। नित्य एव तु संबन्धो डित्थादिषु गवादिवत्॥ वृद्ध्यादीनां च शास्त्रेस्मिन् शक्त्यवच्छेदलक्षणः। अकृत्रिमो हि संबन्धो विशेषणविशेष्यवदिति। गर्गोपीति। वस्तुस्थित्या तस्यापि पौत्रत्वमवश्यंभावि। सत्यां च गोत्रसंज्ञायां गोत्राद्यूनीति व

अपत्यं पौत्रप्रभृति गोत्रम्॥ पौत्रप्रभृतेर्गोत्रसंज्ञायां यस्यापत्यं तस्य पौत्रप्रभृति संज्ञाकरणम्। पौत्रप्रभृतेर्गोत्रसंज्ञायां यस्यापत्यविवक्षा तस्य पौत्रप्रभृति गोत्रसंज्ञं भवतीति वक्तव्यम्। गर्गोपि किंचित्प्रति पौत्रः। कुशिकोपि। तत्र मा भूदिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। समर्थानां प्रथमादिति वर्त्तते। समर्थानां प्रथमस्य यदपत्यं पौत्रप्रभृति विज्ञायते। जीवद्वंश्यं च कुत्सितम्। जीवद्वंश्यं च कुत्सितं गोत्रसंज्ञं भवतीति वक्तव्यम्। गार्ग्यस्त्वमसि जाल्म वात्स्यस्त्वमसि जाल्म इति। का पुनरिह कुत्सा। पितृतो लोके व्यपदेशवता अस्वतन्त्रेण भवितव्यम्। यदिदानीं पितृमान्स्वतन्त्रो भवति स उच्यते गार्ग्यस्त्वमसि जाल्म वात्स्यस्त्वमसि जाल्म। न त्वं पितृतो व्यपदेशमर्हसीति॥ जीवति तु वंश्ये युवा॥ जीवति वंश्ये युवेति पौत्रप्रभृत्यपेक्षं च ॥ जीवति तु वंश्ये युवेति पौत्रप्रभृत्यपेक्षं चेति वक्तव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। पौत्रप्रभृतीति वर्तते। एवं तर्हि अन्वाचष्टे पौत्रप्रभृतीति वर्ततइति। किमेतस्यान्वाख्याने प्रयोजनम्। तत्त्वदेवदत्त्यर्थम्। देवदत्तस्यापत्यं देवदत्तिरिति ॥

चनाद्यूनि प्रत्ययप्रसङ्गो गार्ग्यादेव च यूनीष्यते। समर्थानामिति। यद्यप्यपत्यशब्दस्य संबन्धिशब्दत्वेन चोद्यमेतत्परिह्रियते। न हि गर्गशब्दस्यापत्यत्वं सदपि वस्तुस्थित्यार्थ इति। तथापि परिहारान्तरसद्भावाद्भाष्यकारेणैतन्नोक्तम्। जीवद्वंश्यमिति। यूनश्च कुत्सायामिति सूत्रमनार्षमिति वचनम्। न त्वं पितृत इति। पितृतो व्यपदेशे हि गार्ग्यायण इति भाष्यम्। जीवति॥ अभिजनप्रबन्धो वंशः। तत्र भवो वंश्यः। पित्रादिः। तस्मिन् जीवति यस्य संज्ञेष्यते तेन स निर्दिष्ट इत्यपत्यमात्रस्य युवसंज्ञा प्राप्नोतीति मत्वाह। पौत्रप्रभृत्यपेक्षं चेति। इदं संज्ञाविधानमिति शेषः। पौत्रप्रभृतीत्यधिकरणं विशेषणमपत्यस्य। पेक्ष्य युवसंज्ञा विधीयते। पौत्रप्रभृतेर्यदपत्यं तद्युवसंज्ञमित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनन्तरमिति। अनन्तरस्य च युवसंज्ञायां ण्यक्षत्रियार्षञितो लुक् प्रसङ्गः। इतरः पौत्रप्रभृति यदपत्यमिति सामानाधिकरण्ये न संबन्धं मत्वाह। देवदत्तस्येति। आचार्यदेशीय आह। न पौत्रप्रभृतीति। चोदक आह। एवमपीति। भ्रातरीत्यनेन वंश्यस्य निवर्तितत्वात्तद्विशेषणस्यापि पौत्रप्रभृतिग्रहणस्य निवृत्तौ ज्यायसि भ्रातरि जीवत्यनन्तरापत्यस्यापि कनीयसो युवसंज्ञाप्रसङ्ग इत्यर्थः। कथं तर्हीति। एतच्चेहार्थादपत्यग्रहणाल्लभ्यते। अन्यथा पौत्रप्रभृतेरपत्यत्वाव्यभिचारादनर्थकमेवापत्यग्रह

अनन्तरं यदपत्यं तत्र युवसंज्ञा मा भूदिति। उच्यमानेऽप्येतस्मिन्देवदत्तस्य पौत्रस्य युवसंज्ञा प्राप्नोति। एतदपि पौत्रप्रभृति भवति। न पौत्रप्रभृतीत्यनेनापत्यमभिसंबध्यते पौत्रप्रभृति यदपत्यमिति। किं तर्हि। वंश्योऽभिसंबध्यते। पौत्रप्रभृति वंश्ये जीवति यदपत्यमिति। एवमपि देवदत्तस्य द्वौ पुत्रौ तयोः कनीयसि युवसंज्ञा प्राप्नोति भ्रातरि च ज्यायसीति। एवं तर्ह्यपत्यमेवाभिसंबध्यते न तु पौत्रप्रभृतिसमानाधिकरणमपत्यम्। नैवं विज्ञायते। पौत्रप्रभृति यदपत्यमिति। कथं तर्हि। पौत्रप्रभृतेर्यदपत्यमिति॥ वृद्धस्य च पूजायाम्॥ वृद्धस्य च पूजायां युवसंज्ञा वक्तव्या। तत्रभवन्तो गार्ग्यायणाः। ।तत्रभवन्तो वात्स्यायनाः। का पुनरिह पूजा। युवत्वं लोके ईप्सितं पूजेत्युपचर्यते। तत्रभवन्तश्च युवत्वेनोपचर्यमाणाः पूजिता भवन्ति। आपत्यो वा गोत्रम्। अथवा आपत्यो गोत्रसंज्ञं भवतीति वक्तव्यम्। परमप्रकृतेश्चापत्यः। परमप्रकृतेश्चापत्यो भवतीति वक्तव्यम्। आपत्याज्जीवद्वंश्यात्स्वार्थे द्वितीयो युवसंज्ञः। आपत्याज्जीवद्वंश्यात्स्वार्थे द्वितीयः प्रत्ययः स च युवसंज्ञो भवतीति वक्तव्यम्। स चास्त्रियाम्। स चास्त्रियां भवतीति वक्तव्यम्। एको गोत्रग्रहणानर्थक्यं च। एवं च कृत्वा एको गोत्रग्रहणमनर्थकं भवति। बहुवचनलोपि युवसिद्धम्। बहुवचनलोपि युवसिद्धं भवति। तत्र बिदस्यापत्यमपत्यं माणवक इति विगृह्य बिदशब्दाद्द्व्येकयोरुत्पत्तिर्भविष्यति। बैदः बैदौ। बैदस्यापत्यानि बहवो माणवका इति विगृह्य बिदशब्दाद्बहुषूत्पत्तिर्भविष्यति। बिदा इति ॥

र्गस्यात्। वृद्धस्येति सूत्रेषु तु केश्चिद्वृद्धस्य च पूजायामिति वार्त्तिकदर्शनात्प्रक्षिप्तम्। गार्ग्यायणा इति। युवसंज्ञाविधानसामर्थ्यात्स्वार्थे युवप्रत्ययः। युवत्वमिति। ननु युवशब्दोऽनपेक्षितप्रवृत्तिनिमित्त एव संज्ञेति कथमेतदुच्यते। प्रायेणाल्पवयसो जीवद्वंश्यत्वं भवतीति तदध्यारोपः पूजेत्यदोषः। आपत्यो वेति। गोत्रे लुगचीत्यत्र व्याख्यातम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वान्यस्मिन्॥सपिण्डमात्रइति।अन्यथापूर्वेणनित्यायांयुवसंज्ञायांप्राप्तायामियंविभाषास्यात्।उभयतइति।ज्यायसीत्य
नुवृत्त्यावयःप्रकर्षेलब्धेस्थविरतरइतिवचनसामर्थ्यादुभयनिमित्तःप्रकर्षआश्रीयते।जीवतइति।जीवतीत्यस्मात
पदंसंज्ञिविशेषणार्थमिहोपात्तमित्यर्थः।मृतेहीति।संज्ञिनिसपिण्डेचेतिभावः।अथेति।एकसंज्ञाधिकारादन्यत्रसमावे
शस्यदर्शनादर्शनाभ्यांप्रश्नः।यास्कायनयइति।यस्कस्यापत्यंगोत्रमितिशिवाद्यण्।तदन्ताद्यूनिअणोद्व्यचइतिफिञ्॥

वान्यस्मिन्सपिण्डेस्थविरतरेजीवति॥अन्यग्रहणंकिमर्थम्।भ्रातरीतिवर्त्तते।सपिण्डमात्रेयथास्यात्।अ
यस्थविरतरग्रहणंकिमर्थम्।उभयतोविशिष्टेयथास्यात्।स्थानतोवयस्तश्च।अथजीवतीतिवर्तमानेपुनर्जी
वतिग्रहणंकिमर्थम्।जीवतोजीवतियथास्यात्।मृतेहिमाभूत्।मृतेहिगार्ग्योमृतइत्येवभवितव्यम्।अथगो
त्रयूनोःसमावेशोभवति।उताहोन।किंचप्राप्नोति।बाढंप्राप्नोति । ।नह्ययमेकसंज्ञाधिकारः।किं
चातः।गोत्रयूनोःसमावेशेकोदोषस्तत्कृतंभवेत्।गोत्रयूनोःसमावेशेकोदोषोभवति।तत्कृतंभवेत्।तत्कृ
तंप्राप्नोति।गोत्राश्रयाविधयोयून्यपिप्राप्नुवन्ति।यास्कायनयः।लाह्यायनयः।यस्कादिभ्योगोत्रइतिलुक्प्रा
प्नोति।यस्कादिषुनदोषोस्तिनयूनीत्यनुवर्त्तनात्।यस्कादिषुनदोषः।किंकारणम्।नयूनीत्यनुवर्त्तना
त्।नयूनीतितत्रानुवर्त्तते।क्वप्रकृतम्।नतौल्वलिभ्यइति।दोषोत्रिबिदपञ्चालानयूनीत्यनुवर्त्तना
त्।यदिनयूनीत्यनुवर्त्तते।अत्रयःबिदाःपञ्चालामाणवकाइतिनसिध्यति।नैषदोषः।संबन्धमनुवर्तिष्य
ते।नतौल्वलिभ्यःतद्राजस्यबहुषुतेनैवास्त्रियांलुग्भवति।नतौल्वलिभ्योयूनि।यस्कादिभ्योगोत्रेलुग्भव
ति।नयूनि।तौल्वलिभ्यइतिनिवृत्तम्।यञञोश्च॥अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्चलुग्भवति।
यूनिनेत्यपिनिवृत्तम् ॥

एकदेशविकृतस्यानन्यत्वाद्यञ्ञोश्चेतिलोपेचयास्कितिशब्दोयस्कशब्दएवेतिलुक्प्राप्नोति।नयूनीति।तत्रवाक्यभेदेन
संबन्धोयस्कादिभ्यःपरस्यगोत्रप्रत्ययस्यबहुषुलुग्भवतियूनितुनभवतीति।अत्रयइति।अत्रेर्गोत्रेइतश्चानिञइतिढक्।बि
दाद्यञ्।पञ्चालाज्जनपदशब्दादित्यञ्।ततोबहुषुयुवस्वतइञ्।तस्यण्यक्षत्रियार्षेतिलुकिकृतेढगञोर्लुगिष्यतेसन
यूनीत्यनुवर्त्तनान्नप्राप्नोति।संबन्धमिति।तेनयस्कादिभ्योगोत्रइत्यत्रैवनयूनीतिसंबध्यतेनान्यत्रेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहतर्हीति। व्यवहितेपिपरशब्दस्य वृत्तिदर्शनात्कण्वशब्दात्परः फग्भवतीति गोत्रसंज्ञायामणप्रसङ्गः। विहितविशेषणाश्र
येणपरिहारमाह। कण्वादिष्विति। कण्वादिभ्यो गोत्रेयः प्रत्ययो विहितस्तदन्तात्प्रातिपदिकाच्छैषिके ऽर्थे अण्प्रत्ययइति सूत्रा
श्रयणात्तद्दोषाभावः। प्रतिपदमिति। एकोगोत्रइतिनियमादप्राप्तोयून्यपरः प्रत्ययो विधीयतइत्यर्थः। तदन्तात्तर्हीति। यदिए
कोगोत्रइतिनियमो बाध्यते तर्ह्यौपगवेर्यूनोऽपत्यमित्यत्रापियूनो गोत्रत्वे सति यञिञोश्चेतिफक्प्रसङ्गः। गोत्राद्यूति। गोत्राद्यू
नीत्यत्रैकग्रहणमनुवर्त्तते तेनैकस्यैवयुवप्रत्ययस्यानुज्ञानादनेकः प्रत्ययो न भविष्यतीत्यर्थः। यद्यप्यादस्ययुवप्रत्ययस्य
यूनिलुगितिलुकिकृते इष्टं सिध्यति। तथापि परिहारान्तरसंभवादेतन्नाश्रितम्। अस्त्रियूनि पीति। अत्रीणां यूनां छात्रा इत्यादावि

इहतर्हि काण्वायनस्य च्छात्राः काण्वायनीयाः। कण्वादिभ्यो गोत्रइत्यण्प्राप्नोति। कण्वादिषु न दोषोऽस्ति नयू
न्यस्ति ततः परम्। कण्वादिषु दोषो नास्ति। किं कारणम्। नयून्यस्तिततः परम्।

कण्वादिभ्यो योविहितस्तदन्तात्प्रातिपदिकादित्युच्यते। यश्चात्रकण्वा
दिभ्यो विहितः न तदन्तं प्रातिपदिकम्। यदन्तं च प्रातिपदिकं नासौ कण्वादिभ्यो विहितः। इहतर्हि औपगव
स्यापत्यमौपगविरिति एको गोत्रइत्येतस्मान्नियमात्प्रत्ययो न प्राप्नोति। एकोगोत्रेप्रतिपदम्। प्रतिपदमत्रप्र
त्यया विधीयन्ते। गोत्राद्यून्यस्त्रियामिति। तदन्तात्तर्ह्यनेकः प्रत्ययः प्राप्नोति। गोत्राद्यूनि च तत्स्मरेत्। गोत्राद्यून्य
स्त्रियामिति तत्स्मरेत्। किम्। एकइत्येव। गोत्रेतर्ह्यलुगुक्तः स यून्यपि प्राप्नोति। अस्तु पुनर्यूनि लुगित्येवं लुग्भवि
ष्यति। नैवं शक्यम्। फक्फिञोस्तर्हि दोषः स्यात्। शालङ्केर्यूनः छात्राः शालङ्काः ॥

त्यर्थः। पुनरिति। परत्वादलुकं बाधित्वा लुग्भविष्यतीत्यर्थः॥ शालङ्केरिति। शलङ्कोरपत्यं गोत्रमिति बाह्वादेराकृतिगणत्वादिञ्। पै
लादिषु शालङ्किशब्दपाठान्निपातनादेत्प्रत्ययः शलङ्कादेशश्च। ततः शालङ्केरपत्यं युवेति यञिञोश्चेति फक्। तस्य पैलादिभ्यश्चे
तिलुक्। ततः शालङ्केर्यूनः छात्रा इति प्राग्दिव्यतीयार्थविवक्षायां यूनो गोत्रसंज्ञायां सत्यां पैलादिषु लुको गोत्रे लुगचीत्यलुग्बाधकः स्या
त्। तस्यापि यूनिलुगिति परत्वाल्लुग्बाधकः तस्यापि फक्फिञोरन्यतरस्यामिति विकल्पइति पक्षे तु फकः श्रवणप्रसङ्गः। यदा
तु यूनो गोत्रसंज्ञा नास्ति तदा गोत्रे लुगचीत्यस्याप्रवृत्तौ पैलादिभ्यश्चेति लुग्भवत्येव ततः कण्वादिभ्यो गोत्रे इञश्चेत्यणि सति शालङ्का इ
ति भवति। फक्फिञोरन्यतरस्यामित्ययं च विकल्पोऽनन्तरस्य यूनिलुगित्यस्यैव बाधको न तु पैलादिलुकोऽव्यवहितस्यानन्तरङ्गस्य च । राम: ५९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पैलीयाइति।पीलायाअपत्यंगोत्रंपीलायावेत्यण्।ततोयून्यणोद्व्यचइतिफिञ्।तस्यपैलादिभ्यश्चेतिलुक्।ततोवृद्धाच्छः।तुर्नि
यामकइति।अनेकार्थत्वान्निपातानामवधारणार्थत्वात्तुशब्दस्य॥जनपद॥एकराजादिति।एकश्चासौराजाचेतिक्षत्रियएकरा

पैलस्यपैलीयाः।फक्फिञोरन्यतरस्यामित्यन्यतरस्यांश्रवणंप्रसज्येत।तस्माद्युवसंज्ञायांगोत्रसंज्ञायाःप्रति
षेधोवक्तव्यः।नवक्तव्यः।तुर्नियामकः।तुःक्रियते।सनियामकोभविष्यति।जीवतितुवंश्येऽपत्यंयुवसंज्ञमेव
भवतीति।यदितर्हियुवसंज्ञायांगोत्रसंज्ञानभवति।यद्यन्तेयूनिगोत्राश्रयाविधयस्तेनसिध्यन्ति।गार्ग्याय
णानांसमूहोगार्ग्यायणकम्।गार्ग्यायणानांकिंचिद्गार्ग्यायणकम्।गार्ग्यायणोभक्तिरस्यगार्ग्यायणकः।गो
त्राश्रयोवुञ्नप्राप्नोति।एवंतर्हि।राजन्याद्वुञ्मनुष्याच्चज्ञापकंलौकिकंपरम्।यदयंवुञ्विधौराजन्यमनु
ष्ययोर्ग्रहणंकरोति।तज्ज्ञापयत्याचार्यः।लौकिकंपरंगोत्रग्रहणमिति।युवाचलोकेगोत्रमित्युपचर्यते।
किंगोत्रोऽसिमाणवक।गार्ग्यायणः।किंगोत्रोऽसिमाणवक।वात्स्यायनइति।यद्येतज्ज्ञाप्यतेऔपगवेर्यूनः
छात्राऔपगवीयाः।इञोगोत्रइत्यण्प्राप्नोति।सामूहिकेषुज्ञापकम्।यदिसामूहिकेषुज्ञापकंगार्ग्याय
णानांकिंचिद्गार्ग्यायणकम्।गार्ग्यायणोभक्तिरस्यगार्ग्यायणकः।गोत्राश्रयोवुञ्नप्राप्नोति।वुञ्विधौज्ञाप
कम्।वुञ्विधावेवतज्ज्ञापकम्।यदिवुञ्विधौज्ञापकंशालङ्केर्यूनःछात्राःशालङ्काः।इञोगोत्रइत्यण्नप्राप्नो
ति।अस्तुतर्ह्यविशेषेण।कथमौपगवेर्यूनःछात्राऔपगवीयाः।इञोगोत्रइत्यण्प्राप्नोति।नैषदोषः।गोत्रे
णात्रेञंविशेषयिष्यामः।गोत्रेयइञ्विहितइति॥जनपदशब्दात्क्षत्रियादञ्॥क्षत्रियादेकराजात्सङ्घप्रति
षेधार्थम्।क्षत्रियादेकराजादितिवक्तव्यम्।किंप्रयोजनम्।सङ्घप्रतिषेधार्थम्।सङ्घान्माभूत्।पञ्चाला
नामपत्यंविदेहानामपत्यमिति।तत्तर्हिवक्तव्यम्।नवक्तव्यम्।नह्यन्तरेणबहुषुलुकंपञ्चालानामि
त्येतद्भवति।यस्तस्मादुत्पद्यतेसयुवप्रत्ययःस्यात्॥

जः।तेनैकक्षत्रियवाचिनएवप्रत्ययोभवतिनतुबहुत्वसंख्यायुक्तक्षत्रियवाचिनइत्यर्थः।यथैवैकःक्षत्रियःपञ्चा
लस्तथैवबहवःक्षत्रियाःपञ्चालाइतिप्रत्ययप्रसङ्गेवचनमिदम्।नह्यन्तरेणेति।पञ्चालापत्येषुयौगिकःपञ्चाल
शब्दस्तद्राजस्याञोबहुषुलुप्तत्वात्॥

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· तस्य लुगिति। ण्य क्षत्रियार्षञितद्ध्यनेन। तस्मिंश्चेति। गोत्रे लुगचीत्यनेन। यद्येवं पाञ्चाल इति सर्वथा भवितव्यमिति किं
६० वार्त्तिकारम्भेण। तत्र वार्त्तिककारस्याभिप्रायमाहुः। असति वार्त्तिकारम्भे बहुवचनान्तादेव प्रत्ययः स्यान्नैकवचना
न्तात्। जनपदे हि बहुवचनान्तः पञ्चालशब्दो वर्त्तत इति तस्यैव जनपदसमानशब्दत्वं क्षत्रियवृत्तित्वं च। भाष्यकारस्तु
मन्यते प्रातिपदिकस्य जनपदसमानशब्दत्वं ग्राह्यं न सुबन्तस्येत्येकवचनान्तात् प्रत्ययः केन निवार्यते। इदं तर्हीति। क्षौ
द्रकस्य राज्ञो भृत्या अपि क्षत्रियाः क्षौद्रका उच्यन्ते। ततश्चापत्यापत्यवत्संबन्धाभावाद्गोत्रयुवाश्रयकार्याभावादनिष्यमाणोपि

युवप्रत्ययश्चेत्तस्य लुक्। तस्मिंश्चालुग्भविष्यति। इदं तर्हि क्षौद्रकाणामपत्यं मालवानामपत्यमित्यत्रापि प्रा
प्नोति क्षौद्रक्यो मालव्य इति। नैतत्तेषां दासे वा भवति कर्मकरे वा। किं तर्हि तेषामेव कस्मिंश्चित्। यावता तेषा
मेव कस्मिंश्चित्। यस्तस्मादुत्पद्यते स युवप्रत्ययः स्यात्। युवप्रत्ययश्चेत्तस्य लुक्। तस्मिंश्चालुग्भविष्यति।
अथ क्षत्रियग्रहणं किमर्थम्। इह मा भूत्। विदेहो नाम ब्राह्मणस्तस्यापत्यं वैदेहिः। क्षत्रियग्रहणानर्थक्यं चो
क्तम्। किमुक्तम्। एकं तावदुक्तं बाह्वादिप्रभृतिषु येषां दर्शनं लौकिके गोत्रभावे ततोन्यत्र तेषां प्रतिषेध इ
ति। अपरमुक्तमनभिधानादिति॥ क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्॥ क्षत्रियसमानश
ब्दाज्जनपदात्तस्य राजन्यपत्यवत्प्रत्ययो भवतीति वक्तव्यम्। पञ्चालानां राजा पाञ्चालः॥ पूरोरण्वक्तव्यः।
पौरवः॥ पाण्डोर्ड्यण्वक्तव्यः॥ पाण्ड्यः॥ द्व्यञ्मगधकलिङ्गसू रमसादण्॥ अणो ञ्यङ्ण्यौ ञोविप्रतिषे
धेन॥ अणो ञ्यङ्ण्य इञ् इत्येते भवन्ति विप्रतिषेधेन। अणोवकाशः। आङ्गः वाङ्गः। ञ्यङोवकाशः। आम्ब
ष्ठ्यः सौवीर्यः। इहोभयं प्राप्नोति। दार्व्यः। ण्यस्यावकाशः। निचको नैचक्यः। अणः स एव। इहोभयं प्राप्नोति
नीया नैप्यः। इञोवकाशः आजमीढिः। आजक्रन्दिः। अणः स एव। इहोभयं प्राप्नोति। बुध ॥

तद्राजो ञ्यङ् प्राप्नोतीत्यर्थः। नैतदिति। मुख्यया वृत्त्या दासेषु वृत्त्यभावादुपचरितार्थात्प्रत्ययादर्शनात्तदेवोत्तरमित्य
र्थः। पूरोरिति। सिद्धे प्राग्दीव्यतीयेऽणि तद्राजसंज्ञार्थमिदं वचनम्। पुरुषशब्दो न जनपदवाची। अन्यथा द्व्यञ्मगधेत्यणः
सिद्धत्वाद्वचनमनर्थकं स्यात्। पाण्डोरिति। बाह्वादिप्रभृतिषु येषां दर्शनं लौकिके गोत्रभाव इति वचनाद्युधिष्ठिरादिपि रामः
तुः पाण्डोरग्रहणात्तद्वाचिनः पाण्डवइत्येव भवति॥ द्व्यञ्मग॥ दार्व्य इति। दार्वस्यापत्यमिति ञ्यङ् ॥ ६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बौधिरिति। साल्वावयवलक्षण इञ्॥ अतश्च॥ पर्शूरिति। पर्शोरपत्यं स्त्री द्व्यञ्मगधेत्यण्। तस्मात तश्चेति लुक्। पर्श्वादियौधे यादिभ्यामणञाविति स्वार्थे ऽण्। तस्याभिन्नप्रकरणत्वाल्लुगप्राप्तो वचनेन विधीयते। ततऊङ्। तद्धस्वूङ्। रक्षा इति। रक्ष सः क्षत्रियविशेषस्यापत्यं स्त्रीति पूर्ववदस्य लुकि कृते स्त्रिया अभिधायकात्तु लोपे दीर्घत्वे च रक्षा इति भवति। रक्ष इत्य युक्तः पाठः। असुरीति। असुरशब्दात स्त्रियामपत्ये ऽञो लुक्। ततो ऽण्। तस्यापि लुक्। जातिलक्षणो ङीष्। यौधेयादि

बौधिः। ञ्यङ्‌ण्ये ञो भवन्ति विप्रतिषेधेन॥ ञ्यङः कुरुनादिभ्यो ण्यः॥ ञ्यङः कुरुनादिभ्यो ण्यो भवति वि प्रतिषेधेन। ञ्यङो ऽवकाशः। आवन्त्यः। कौन्त्यः। ण्यस्य स एव। नैषो नाम जनपदस्तस्मादुभयं प्राप्नोति। ण्यो भवति विप्रतिषेधेन। नैष्यः। इञ्मगध॥ कम्बोजाल्लुक्॥ कम्बोजादिभ्यो लुग्वचनं चोलाद्यर्थम्। कम्बो जादिभ्यो लुग्वक्तव्यः। किं प्रयोजनम्। चोलाद्यर्थम्। चोलः। शकः। केरलः। यवनः॥ अतश्च॥ इह कस्मा न्न भवति आम्बष्ठ्यासौवीर्येति। अत इत्युच्यते। नैषो ऽकारः। तदन्तविधिना प्राप्नोति। अत उत्तरं पठति। अत इति तदन्ताग्रहणमवन्त्यादिभ्यो लुग्वचनात्। अत इति तदन्तस्याग्रहणम्। किं कारणम्। अव न्त्यादिभ्यो लुग्वचनात्। यदयमवन्त्यादिभ्यो लुकं शास्ति। तज्ज्ञापयत्याचार्यः। नात्र तदन्तविधिर्भ वतीति॥ पर्श्वादिभ्यो लुग्वक्तव्यः॥ पर्शूः। रक्षाः। असुरी। यौधेयादिप्रतिषेधो ज्ञापकः पर्श्वादि लु कः। यदयं न प्राच्यभर्गादियौधेयादिभ्य इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः भवति पर्श्वा दिभ्यो लुगिति॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थाध्यायस्य प्रथ मे पादे चतुर्थमाह्निकं पादश्च समाप्तः ॥

प्रतिषेध इति। यदि पार्श्वमिकस्यापि तद्राजस्यातश्चेति लुङ् स्यात्तदा यौधेयादिभ्यो विहितस्याञो लुक् प्रतिषेध विधानमनर्थकमेव स्यादित्यर्थः। युधाया अपत्यं स्त्री द्व्यच इति ढक्। ततः स्वार्थे ऽञ्। तस्य लुकि प्रतिषिद्धे ऽन्तलक्ष णे ङीनि कृते यौधेयीति भवति। यदि त्वञो लुक् स्यात्तदा ढलक्षणे ङीपि सति उदात्तनिवृत्तिस्वरः स्यात् ॥ इत्युपाध्या यजैयटपुत्रकैयटकृते भाष्यप्रदीपे चतुर्थस्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकं पादश्चायं समाप्तः ॥

तेनरक्तम्।रक्तादीनामिति।रक्तादीनांशब्दानांयोर्थः सएवयद्विलौकिकेप्रयोगेप्रत्ययेनाभिधीयतेतदाप्रत्ययोभवति।नान्य
था।प्रयुक्तानांशब्दानांसाध्वसाधुविवेकायशास्त्रारम्भा देवदत्तेनरक्तंवस्त्रमितिवाक्याद्योर्थोवगम्यतेनासौदेवदत्तंवस्त्र
मित्यतोवगम्यते।स्वस्वामिसंबन्धस्यैवातःसंप्रत्ययादतएवानभिधानात् कोपेनरक्तंमुखंरूपेणकान्तायांरक्त इत्यादौ
वर्णाभिषङ्गयोर्नभविष्यतिप्रत्ययः॥लाक्षा॥ठक्प्रकरणइति।शकलकर्दमयोःसूत्रेपाठोनार्षः।नील्याइति।ओषधिविशेषो
नीली।अण्बाधनार्थंवचनम्।नीलशब्दस्तुगुणगुणिनोरभेदोपचारान्मतु ब्लुपाद्वानील्यारक्तेवस्त्रेसिध्यति।पीतादिति।राग

तेनरक्तंरागात्॥रागादितिकिमर्थम्।देवदत्तेनरक्तंवस्त्रम्।रक्तादीनामर्थाभिधानेप्रत्ययविधानादुपाध्यानर्थ
क्यम्।रक्तादीनामर्थाभिधानेप्रत्ययविधानादुपाधिग्रहणमनर्थकम्। नह्यरागादुत्पद्यमानेनप्रत्ययेनार्थाभिधा
नंस्यात्।अनभिधानात्ततउत्पत्तिर्नभविष्यति॥लाक्षारोचनाट्ठक्॥ठक्प्रकरणेशकलकर्दमाभ्यामुपसंख्यान
म्।ठक्प्रकरणेशकलकर्दमाभ्यामुपसंख्यानंकर्तव्यम्।शाकलिकंकार्दमिकम्।नील्याअन्।नील्याअन्वक्तव्यः।
नील्यारक्तंनीलम्।पीतात्कन्॥पीतात्कन्वक्तव्यः।पीतेनरक्तंवस्त्रंपीतकम्।पीतकशब्दोवाप्रकृत्यन्तरम्।तस्माल्लु
ग्वक्तव्यः।हरिद्रामहारजनाभ्यामञ्।हरिद्रामहारजनाभ्याम ञ्वक्तव्यः।हारिद्रम्।माहारजनम्।रागादित्युच्यते।
तत्रेदंनसिध्यति।हारिद्रौकुक्कुटस्यपादौ।काषायौगर्दभस्यकर्णाविति।उपमानात्सिद्धम्।हरिद्राविवहारिद्रौ।काषा
याविवकाषायौ॥नक्षत्रेणयुक्तःकालः॥अयुक्तोयंनिर्देशः।योगोहिनामसम्भवतिययोःसंनिकर्षविप्रकर्षौस्तः।नच
कालनक्षत्रयोःसंनिकर्षविप्रकर्षौस्तः।नित्येहिकालनक्षत्रे।कथंतर्हिनिर्देशःकर्तव्यः।नक्षत्रेणचन्द्रमसोयोगा
त्तद्युक्तात्कालेप्रत्ययविधानम्।नक्षत्रेणचन्द्रमसोयोगात्तद्युक्तात्कालेप्रत्ययविधानंभवतीतिवक्तव्यम्। पु
ष्येणयुक्तःपुष्ययुक्तःपुष्ययुक्तश्चन्द्रमाअस्मिन्कालेपौषीरात्रिः।पौषमहः ॥

विशेषवाचीपीतशब्दः।प्रकृत्यन्तरमिति।स्वार्थिककप्रत्ययान्तमित्यर्थः।उपमानादिति।रूपसादृश्यनिमित्तादित्यर्थः॥नक्षत्रे
ण॥योगोहीति।अप्राप्तिपूर्विकाप्राप्तिर्योगःसकालनक्षत्रयोर्नास्ति द्वयोरपिनित्यत्वात्।नचचन्द्रमसैवयोगः पुष्यादीनांनक्षत्र
ता।सर्वदातेषांलोकेनक्षत्रव्यवहारादर्शनात्।अथापिसंबन्धमात्रंयोगःसचनित्यानामपिप्रधानपुरुषवदविरुद्धः।तथापि
कालविशेषावगमार्थःपौषादिशब्दप्रयोगः।एवंसत्यसत्यांकालविशेषावगतौनस्यात्।तद्युक्तादिति।नक्षत्रयुक्तचन्द्रवाचि
नःकालेऽभिधेयेप्रत्ययोविधेयइत्यर्थः।चन्द्रनक्षत्रयोश्चाविभुत्वादस्तिकादाचित्कोयोगः।कालस्तुनित्योव्यापीचेतियोगाभावः।

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गे·ति। मघायुक्त शब्दात्प्रत्यये क्रियमाणे तस्य चलुपि सति मघा इति स्त्रीत्वबहुत्वे न सिध्यत इत्यर्थः। कालयोगादिति। का
लस्यैव पुष्यादिसमीपस्थेन चन्द्रमसा योग आश्रीयत इत्यर्थः। पुष्यसमीपगत इति। मुख्यार्थासंभवे गौणस्याश्रयणादिति भा
वः। मघादयः शब्दा अपरित्यक्तस्वलिङ्ग·संख्या एव चन्द्रमसि वर्तन्ते। यथा मञ्चादयो मञ्चा न्क्रियः पश्येति। तेन युक्तव

त्त्रोत्तरपदलोपः। तन्नैवं सति उत्तरपदलोपो वक्तव्यः। पुष्ययुक्त शब्दाद्धि प्रत्ययो विधीयते। लिङ्ग·वचनानुपपत्तिश्च।
लिङ्ग·वचनयोश्चानुपपत्तिः। चन्द्रमसो यल्लिङ्गं·वचनं च तद्युक्तवद्भावेन प्राप्नोति। कालयोगात्सिद्धम्। अस्तु नक्षत्रेण युक्तः
काल इत्येवानुचोक्तम्। अयुक्तोयं निर्देशः। योगो हि नाम सम्भवति ययोः संनिकर्षविप्रकर्षौ स्तः। न च कालनक्षत्रयोः सं
निकर्षविप्रकर्षौ स्तः। नित्ये हि कालनक्षत्रे इति। नैष दोषः। पुष्यसमीपगते चन्द्रमसि पुष्यशब्दो वर्तते। तेन तत्सं
युक्तेन कालो विशेष्यते। तथा च संप्रत्ययः। एवं च कृत्वा लोके न संप्रत्ययो भवति। पुष्यसमीपगते चन्द्रमसिव
क्तारो भवन्ति पुष्येणाद्य मघाभिरद्येति॥ लुबविशेषे॥ इह कस्मान्न भवति। पौषी रात्रिः पौषमहरिति। अविशेष
इत्युच्यते। विशेषश्चात्र गम्यते। रात्रिरित्युक्ते हर्नेति गम्यते। अहरित्युक्ते रात्रिर्नेति गम्यते। इहापि तर्हि न प्रा
प्नोति। अद्य पुष्य इति। अत्रापि हि विशेषो गम्यते। अद्येत्युक्ते न ह्यो न श्व इति गम्यते। यद्यप्यत्र विशेषो गम्यते।
अविशेषोपि तु गम्यते। अद्येत्युक्ते न ज्ञायते रात्रौ दिवा चेति। यतो विशेषस्तदाश्रयो लुब्भविष्यति। इहापि तर्हि
यद्यपि विशेषो गम्यते अविशेषोपि तु गम्यते। रात्रिरित्युक्ते न ज्ञायते कदेति। दिवेत्युक्ते न ज्ञायते कदेति। यतो विशेषस्तदाश्र
यो लुप्प्राप्नोति। एवं तर्हि। नक्षत्रेण युक्तः काल इति वर्तते। नक्षत्रेणयुक्तस्य कालस्याविशेषे। कियान्पुनः कालो नक्षत्रेण यु
ज्यते। अहोरात्रः॥ संज्ञायां श्रवणाश्वत्थाभ्याम्॥ इह कस्मान्न भवति युक्तवद्भावः। श्रवणा रात्रिः। निपातनादे
तत्सिद्धम्। किं निपातनम्। विभाषा फाल्गुनी श्रवणा कार्तिकी चैत्रीभ्य इति॥ दृष्टं साम॥ दृष्टं साम कलेर्ढक्॥ दृ
ष्टं सामेत्यत्र कलेर्ढग्वक्तव्यः। कलिना दृष्टं साम कालेयम्. सामगीयते ॥

द्वावेपि दोषाभावः॥ लुब॥ अविशेषस्वरूपदर्शनाय प्रश्नप्रतिवचने। इहेति। पौषमहरित्यह र्विशेषानवगमादस्त्य विशेष इति
लुप्प्रसङ्गः। अहोरात्र इति। तेनाहोरात्रस्य यदावान्तर रात्र्याद्यवयवविशेषाविवक्षा तदा लुप्। विशेषविवक्षायां तु श्रवणम्। पौ
षोहोरात्र इत्यत्रापि विशेषस्य शब्देनाश्रितत्वाल्लुबभावः॥ दृष्टम्॥ कलिना दृष्टमिति। यस्य साम्नो विशिष्टकार्यविषयो विनियो
गो ज्ञानातिशयः संपन्यः कलिना ज्ञापितस्तेन दृष्टमित्युच्यते ॥

CC-0. In Public Domain. Digitization by eGangotri

 सर्वत्रेति। सर्वेषु प्राग्दीव्यतीयेष्वर्थेष्वित्यर्थः। जाते चेति। जातार्थे योद्धिरण् विधीयते। पूर्वविहितो बाधकेन निवर्तितः पुनर्वि
धीयत इत्यर्थः। स वा डिद्भवति। शतभिषजीति। शतभिषजा युक्तः काल इत्यण्। तस्य लुक्। ततो जातेर्थे प्राग्दीव्यतोणित्यण्
विहितः कालाट्ठञितिठञा बाधितः पुनः संधिवेलेत्यादिसूत्रेण विधीयते। तीयादीकगिति। अर्थानिर्देशात्स्वार्थ एवेति ज्ञेय
म्। न विद्याया इति। विद्यावाचिनो न भवतीत्यर्थः। गोत्रादिति। यथाङ्के गोत्रप्रत्ययान्तात्प्रत्ययः। एवं दृष्टे सामनीत्यर्थः। औपगव

अपर आह। सर्वत्राग्निकलिभ्यां ढक्॥ सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः। अग्निना दृष्टमाग्नेयम्। अग्नौ भवमाग्नेयम्। अग्नेरा
गतमाग्नेयम्। अग्नेः स्वमाग्नेयम्। अग्निर्देवता अस्याग्नेयम्। कलिना दृष्टं कालेयम्। कलौ भवं कालेयम्। कलेरागतं का
लेयम्। कलेः स्वं कालेयम्। कलिर्देवताऽस्य कालेयम्। दृष्टे सामनि जाते च द्विरण् डिद्वा विधीयते। दृष्टे सामनि जाते च
द्विरण् डिद्वा वक्तव्यः। उशनसा दृष्टं साम औशनसम्। औशनम्। शतभिषजि जातः शातभिषजः। शातभिषः॥
तीयादीकक्॥ तीयादीकग् वक्तव्यः। द्वैतीयीकः। तार्तीयीकः॥ न विद्यायाः॥ विद्याया न भवतीति वक्तव्यम्। द्विती
याविद्येत्येव। गोत्रादङ्कवदिष्यते। औपगवकम्। कापटवकम्। दृष्टे सामनि जाते च द्विरण् डिद्वा विधीयते। ती
यादीकग्न विद्याया गोत्रादङ्कवदिष्यते॥ वामदेवाड्ड्यड्ड्यौ॥ किमर्थो डकारः। डितिटेरिति टिलोपो यथा स्या
त्। नैतदस्ति प्रयोजनम्। यस्येति लोपेनाप्येतत्सिद्धम्। एवं तर्हि सिद्धे सति यद्ड्यतो डितौ करोति तज्ज्ञाप
यत्याचार्यः। भवत एते परिभाषे। अननुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणं तदनुबन्धकग्रहणे नातदनुबन्ध
कस्य ग्रहणमिति। किमेतस्य ज्ञापने प्रयोजनम्। अवामदेव्यमित्येष स्वरो भवति। सिद्धे यस्येति लोपेन किम
र्थं यड्यतौ डितौ। ग्रहणं मा तदर्थे भूद्वामदेव्यस्य नञ्स्वरे॥ परिवृतो रथः॥ परिवृतो रथ इति तदेकान्तग्र
हणम्। परिवृतो रथ इत्यत्र तदेकान्तग्रहणं कर्तव्यम्। येन परिवृतो रथो रथैकान्तश्चेत् स भवतीति वक्तव्यम्। इह मा भू
त्पुत्रैः परिवृतो रथः। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। कस्मान्न भवति पुत्रैः परिवृतो रथः। छात्रैः परिवृतो रथ इति। अनभिधानात्॥

कमिति। गोत्रचरणाद्वुञिति वुञ्। वामदेवात्॥ अवामदेव्यमिति। अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमित्यर्थः। अन्यथा यय
तोश्चातदर्थ इत्यनेनोदात्तत्वं स्यात्। ग्रहणमिति। अतदर्थग्रहणेन सूत्रं लक्ष्यते। नञ्स्वर इति नञाश्रयेन्तोदात्तत्वे विधीयमान इ
त्यर्थः॥ परि॥ तदेकान्तग्रहणमिति। रथस्य चर्मवस्त्रादयो वयवा इति तद्वाचिभ्य एव प्रत्ययो भवतीत्यर्थः। अनभिधानादिति।
पौत्रो रथ इत्यादावभिधानस्याभावादित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाण्डुकम्बला॥ इनिनैतदिति। अण्वानभिधानान्नभवतीति तद्बाधनार्थमपीदं नवाच्यमिति भावः॥ कौमारापू॥ उभयत इति उभयस्मिन्नुभयतः। यदि कौमारीति स्त्रियां प्रयोगोऽथ कौमारः पतिरिति पुंस्युभयत्रापि स्त्रियाः पाणिग्रहणस्यापूर्वत्वे प्रयोगः कार्य इत्यर्थः। एतच्च निपातनसामर्थ्याल्लभ्यमेव वार्त्तिककृता प्रकाशितम्। अपूर्वपतिमिति। अविद्यमानः पूर्वः पतिर्यस्यास्तां प्राप्त इत्यर्थः। द्वितीयासमर्थात्कुमारीशब्दादुपयन्तर्यण्प्रत्ययः। स्त्रियां तु स्वार्थे प्रत्ययः। कुमार्यांभव इति। रोगादि

पाण्डुकम्बलादिनिः॥ अयं योगः शक्यो वक्तुम्। कथं पाण्डुकम्बली पाण्डुकम्बलिनौ पाण्डुकम्बलिन इति। इतिनैतन्मत्वर्थीयेन सिद्धम्। पाण्डुकम्बलोऽस्यास्ति पाण्डुकम्बलीति॥ कौमारापूर्ववचने॥ कौमारापूर्ववचन इत्युभयतः स्त्रिया अपूर्वत्वे। कौमारापूर्ववचन इत्यत्रोभयतः स्त्रिया अपूर्वत्व इति वक्तव्यम्। अपूर्वपतिं कुमारीमुपपन्नः कौमारो भर्त्ता। कुमारी अपूर्वपतिः पतिमुपपन्ना कौमारी भार्य्या। कौमारापूर्ववचने कुमार्या अण्विधीयते। अपूर्वत्वं यदा तस्याः कुमार्यां भवतीति वा॥ अथवा कुमार्यां भवः कौमारः। यद्येवं कौमारी भार्येति न सिध्यति॥ पुंयोगात् स्त्रियामभिधानम्। पुंयोगात्स्त्रियामभिधानं भविष्यति। कौमारस्य भार्या कौमारीति॥ सास्मिन्पौर्णमासीति॥ सास्मिन्पौर्णमासीति संज्ञाग्रहणम्। सास्मिन्पौर्णमासीत्यत्र संज्ञाग्रहणं कर्त्तव्यम्। अ[illegible]ज्ञायां हि गरीयानुपसंयोगः। अक्रियमाणे हि संज्ञाग्रहणे गरीयानुपसंयोगः कर्त्तव्यः स्यात्। मासार्द्धमासयोरिति वक्तव्यं स्यात्। इह मा भूत्पौषी पौर्णमास्यस्मिन्पञ्च दशरात्रे दशरात्रे वेति। संवत्सरपर्वणीति च वक्तव्यं स्यात्। भृतकमासे मा भूदिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। इतिकरणः क्रियते। ततश्चेद्विवक्षा॥ ॥

नुतु यद्यभिधानं नास्ति तदानभिधानात्प्रत्ययाभावः। कौमारस्य भार्येति। प्रत्यासत्त्यायेव तस्य कौमारव्यपदेशनिबन्धनं सैवाभिधीयते नान्या॥ सास्मिन्॥ संज्ञाग्रहणं सूत्रेनार्थमिति वार्त्तिकमारब्धम्। उपसंयोग इति। उपसंयुज्यत इत्युपसंयोग इत्युपाधिरुच्यते। अनेक उपाधिर्निर्देश्यः स्यादित्यर्थः। संवत्सरपर्वणीति। संवत्सरस्य द्वादश पर्वाणि मासान्तास्तत्र पर्वविशिष्टे मासे यथा स्यात्। भृतकमासे पौष्या पौर्णमास्या तद् इति मासादिव्यपदेशभाजि पौषशब्दो मा भूदित्येवमर्थमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्येत्॥ इत्कारोच्चारणसामर्थ्यादिति। यदाकशब्दस्येकारादेशस्तदायं परिहारः। यदा तु किमोऽकारस्येकारस्तदा लोपेपि कायमिति सिध्यति। यद्यपि कशब्दस्येत्वे कृते परत्वाट्ट्याऽलोपो बाध्यते यथा श्रीदेवताऽस्याः श्रायमिति। तथापि परिहारान्तरसद्भावादेतद्व्याख्यकृता नोक्तम्। अथेति। कल्पकारविप्रतिपत्त्या संशयः। अध्वर्युणा होतुः संप्रैषः क्रियते। यदि तावदिति। किमो विभक्तौ कादेशं कृत्वा कस्येति यदि निर्देशः कृत इत्यर्थः। किंशब्दश्च प्रश्नाक्षेपयोरिव प्रजापतौ वर्तते। अथ नेति। यदा कशब्दस्यैव कस्येति निर्देश इत्यर्थः। सर्वस्येति। सर्वार्थवाचिन इत्यर्थः। सर्वश्चेति। कार्यकारणयोरभेदादिति भावः। प्रजापतिश्च

कस्येत्॥ यस्येति लोपः कस्मान्न भवति। इकारोच्चारणसामर्थ्यात्। अथ यत्कायं हविः कथं तस्य संप्रैषः कर्त्तव्यः। यदि तावत्किमः कादेशः कस्मै अनुब्रूहीति भवितव्यम्। अथ न किमः। काया अनुब्रूहीति भवितव्यम्। यद्यपि किमः अथापि न किमः। उभयथा कस्मा अनुब्रूहीति भवितव्यम्। सर्वस्य हि सर्वनामसंज्ञा क्रियते। सर्वश्च प्रजापतिः। प्रजापतिश्च कः। अपर आह। यद्येव किमः। अथापि न किमः। उभयथा काया अनुब्रूहीति वक्तव्यम्। संज्ञोपसर्जनयोर्हि सर्वनामसंज्ञा प्रतिषिध्यते। संज्ञा चैषा तत्र भवतः। अपोनप्त्रपांनप्तृभ्यां घः। अथ यदपोनप्त्रियमपांनप्त्रियं वा हविः कथं तस्य संप्रैषः कर्त्तव्यः। अपोनपातेऽनुब्रूहि। अपांनपातेऽनुब्रूहीति। अपोनप्त्रपांनप्तृ भावः कस्मान्न भवति। प्रत्ययसंनियोगेन ऋकारान्तत्वमुच्यते। तेनासति प्रत्यये न भवितव्यम्॥ छश्च॥ छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानम्। छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानं कर्तव्यम्। पैङ्गाक्षीपुत्रीयम्। तार्णबिन्दवीयम्॥ शतरुद्राद्घश्च। शतरुद्राद्घप्रत्ययो वक्तव्यः। छश्च वक्तव्यः। शतरुद्रियम्। शतरुद्रीयम्॥ कालेभ्यो भववत्॥

क इति। सर्वादिषु कशब्दस्यापाठेऽपि अन्वर्थसंज्ञाविज्ञानात्सर्वनामसंज्ञा भवति। गणपाठस्तु प्रपञ्चार्थः। येषां तु सकलं कृत्स्नमित्यादीनां सर्वनामसंज्ञा नेष्यते तेषां न बहुव्रीहावित्यत्र नेति योगविभागात्तदभावः। योगसंप्रदानं देवता। मन्त्रस्तुत्यश्चार्थः। संज्ञा चैषेति। यद्येवं कादेशाभावात्कायेति किमो न सिध्यति। एवं तर्हि कस्येत्यत एव निपातनात्कादेशो भविष्यतीत्यदोषः॥ अपो॥ अथेति। वेदे क्वचिदपोनप्त्रे स्वाहेति ऋकारान्तः प्रयोगो दृश्यते। क्वचिदपोनपादपांनपादिति तकारान्तप्रयोग इति प्रश्नः। प्रत्ययसंनियोगेनेति। वेदे तु छान्दसत्वात्क्वचित्तकारान्तप्रयोगः॥ काले॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कथमिति।कालेभ्यइतिसकृच्छ्रवणाद्भवेनवाभिसंबन्धःस्यात्सास्यदेवतेत्यनेनवेतिप्रश्नः।प्रत्ययमात्रमिति।दिगादिभ्योयदितियत्प्रत्ययोभवेविहितःसकालवाचिभ्यःप्राप्नोतीत्यर्थः।प्रातिपदिकमात्रादिति।कालाट्ठञितिठञिन्द्रादेरपिप्राप्नोति।सिद्धंत्विति।वतिरतिदेशमात्रेचरितार्थइतिनसर्वसादृश्यंलभ्यतइतिवार्त्तिककारोमन्यते।वतिनिर्देशोयमिति।

कथमिदंविज्ञायतेभवेयेप्रत्ययाविहितास्तेभवन्तिकालेभ्यःसास्यदेवतेत्यस्मिन्नर्थइति।आहोस्वित्कालेभ्योभवेयेप्रत्ययाविहितास्तेभवन्तिसास्यदेवतेत्यस्मिन्नर्थइति।कश्चात्रविशेषः।कालेभ्योभवेचेत्प्रत्ययमात्रप्रसङ्गः।यदिविज्ञायतेभवेयेप्रत्ययाविहितास्तेभवन्तिकालेभ्यःसास्यदेवतेत्यस्मिन्नर्थइति।प्रत्ययमात्रंप्राप्नोति।यःकालेभ्योभवेतस्यविधानेप्रातिपदिकमात्रात्प्रसङ्गः।अथविज्ञायतेकालेभ्योभवेयेप्रत्ययाविहितास्तेभवन्तिसास्यदेवतेत्यस्मिन्नर्थइति।प्रातिपदिकमात्रात्प्राप्नुवन्ति।सिद्धंतूभयनिर्देशात्।सिद्धमेतत्।कथम्।उभयनिर्देशात्।उभयथानिर्देशःकर्त्तव्यः।कालेभ्योभववत्कालेभ्यइति।सतर्ह्युभयनिर्देशःकर्त्तव्यः।नकर्त्तव्यः।भववदितिवतिनिर्देशोयम्।यदिचयाभ्यःप्रकृतिभ्योयेनविशेषणेनभवेप्रत्ययाविहितास्ताभ्यःप्रकृतिभ्यस्तेनैवविशेषणेनसास्यदेवतेत्यस्मिन्नर्थेभवन्ति।ततोऽमीभववत्कृताःस्युः।अथहिप्रकृतिमात्राद्वास्युःप्रत्ययमात्रंवास्यान्नातोमीभववत्कृताःस्युः॥महाराजप्रोष्ठपदाट्ठञ्॥ठञ्प्रकरणेतदस्मिन्वर्त्ततइतिनवयज्ञादिभ्यउपसंख्यानम्॥ठञ्प्रकरणेतदस्मिन्वर्त्ततेइतिनवयज्ञादिभ्यउपसंख्यानंकर्त्तव्यम्।नवयज्ञोऽस्मिन्कालेवर्त्ततेनावयज्ञिकः।पाकयज्ञिकः॥पूर्णमासादण्॥पूर्णमासादण्वक्तव्यः।पूर्णमासोऽस्मिन्कालेवर्त्ततेपौर्णमासीतिथिः॥पितृव्यमातुलमातामहपितामहाः॥पितृव्यमातुलेतिकिंनिपात्यते।पितृमातृभ्यांभ्रातरिव्यड्डुलचौ।पितृमातृभ्यांभ्रातरिव्यड्डुलचौप्रत्ययौनिपात्येते।पितृभ्रातापितृव्यः।मातृभ्रातामातुलः।अथमातामहपितामहेतिकिंनिपात्यते।मातृपितृभ्यांपितरिडामहच्।मातृपितृभ्यांपितरिडामहच्प्रत्ययोनिपात्यते।मातुःपितामातामहः।पितुःपितापितामहः॥मातरिषिच्च॥मातृपितृभ्यांमातरिडामहच्षिच्चभवति।पितुर्मातापितामही।मातुर्मातामातामही।महोवाछन्दस्यानङोऽवग्रहदर्शनात्।महोवापुनरेषभवति ॥

कालेभ्योभवइत्येवभवार्थेविहिताःप्रत्ययाःसिध्यन्तीतिवतिनिर्देशःसर्वसादृश्यपरिग्रहार्थःकृतः॥पितृव्यमातुल॥महोवेति।पितृशब्दस्यानङादेशोनिपात्यतेमहच्चप्रत्ययः।तेनपदसंज्ञायांसत्यांपितेत्यवग्रहोभवति।डामहच्चितुनस्यात्।

CC-0. In Public Domain. Digitization by eGangotri

 ।।विसोढमिति।षत्वं सकारोच्चारणसामर्थ्यान्न भवति। अन्यथा षोढप्रत्ययं प्रक्रियालाघवार्थं कुर्यात्।एवं दूसमरीसयोरपि
षत्वाभावः सकारस्य।तिलपिञ्ज इति।तिलो धान्यविशेषः।फलरहित इत्यर्थः।।भिक्षा।।पुंवद्भावो नेति।पुंवद्भावे सत्याद्युदा

छन्दस्यानङोऽवग्रहदर्शनात्। छन्दस्यानङोऽवग्रहो दृश्यते।मातामहः पितामह इति।।अवेर्दुग्धे सोढदू
समरीसचः।।अवेर्दुग्धे सोढदूसमरीसचश्चैते प्रत्यया भवन्तीति वक्तव्यम्।अविसोढम्।अविदूसम्।अ
विमरीसम्।तिलान्निष्फलात्पिञ्जपेजौ।।तिलान्निष्फलात्पिञ्जपेजौ प्रत्ययौ वक्तव्यौ।तिलपिञ्जः।तिलपे
जः।।पिञ्जः छन्दसि डिच्च।।पिञ्जः छन्दसि डिच्च वक्तव्यः।तिलिञ्जं दण्डानतम्।।भिक्षादिभ्योऽण्।।किमर्थं भिक्षा
दिषु युवतिशब्दः पठ्यते।न तस्य समूह इत्येव सिद्धम्।न सिध्यति।अनुदात्तादिलक्षणोऽञ् प्राप्नोति।तद्बाध
नार्थम्।अत उत्तरं पठन्ति।भिक्षादिषु युवतिग्रहणानर्थकं पुंवद्भावस्य सिद्धत्वात् प्रत्ययविधौ।भिक्षादिषु
युवतिग्रहणानर्थकम्।किं कारणम्।पुंवद्भावस्य सिद्धत्वात्।प्रत्ययविधौ पुंवद्भावोऽत्र भविष्यति।भस्याढे तद्धि
ते पुंवद्भवतीति।सिद्धश्च प्रत्ययविधौ।स च सिद्धः प्रत्ययविधौ।।गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्या
जाद्वुञ्।।वृद्धाच्च।।वृद्धाच्चेति वक्तव्यम्।वृद्धानां समूहो वार्द्धकम्।।अञो वुञ्पूर्वविप्रतिषिद्धम्।।अञो वुञ्भवति
पूर्वविप्रतिषेधेन।अञोऽवकाशः।कापोतम्।वुञोऽवकाशः।ग्लुचुकायनिः।ग्लौचुकायनकम्।इहोभयं प्राप्नोति।
औपगवकम्।कापटवकम्।वुञ्भवति पूर्वविप्रतिषेधेन।स तर्हि पूर्वविप्रतिषेधो वक्तव्यः।न वक्तव्यः।वक्ष्यते
तत्।पूर्वोऽपि वुञ् परमञं बाधत इति।अथवा इष्टवाची परशब्दः।विप्रतिषेधे परं यदिष्टं तद्भवतीति।ठक्तु विप्रति
षेधात्।ठक्तु भवत्यञो विप्रतिषेधात्।ठकोऽवकाशः।साक्तुकम्।अञः स एव।इहोभयं प्राप्नोति।आपूपिकम्।शा
ष्कुलिकम्।ठग्भवति पूर्वविप्रतिषेधेन।केदाराद्यञ्च।।गणिकायाश्च।।गणिकायाश्चेति वक्तव्यम्।गणिका
नां समूहो गाणिक्यम्।।ब्राह्मणमाणववाडवाद्यन्।।किमर्थं ब्राह्मणादिभ्यो यन्विधीयते।न यञ्प्रकृतः सोऽनु
वर्तिष्यते।न ह्यस्ति विशेषो ब्राह्मणादिभ्यो यञो वा यनो वा।तदेव रूपं स एव स्वरः ॥

त्तत्वादण् सिद्ध इत्यर्थः।सिद्धश्चेति।पूर्वं पुंवद्भावः पश्चात्प्रत्यय इत्यर्थः।।गोत्रे ।।कापोतमिति।लघावन्ते द्वयोश्च बह्वषो गुरु
रिति मध्योदात्तादिः कपोतशब्दः।सक्तुशब्दस्तुन्प्रत्ययान्तत्वादाद्युदात्तः।शष्कुलीशब्दो ङीषन्तोऽन्तोदात्तत्वादनुदात्तादिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्राम। आह्नायेति। खण्डिकादिषु दर्शनादहःशब्दादञ् तदन्ताच्चतुर्थी॥ खण्डि॥ तन्नैवाविति। चाषशब्दः चषेर्ण्यन्तादच्यन्तोदात्तः। उलूकशब्दो लघावन्ते द्वयोश्चेति मध्योदात्तः। औलूक्यशब्दो गर्गादियञन्तः। बहुवचनान्तानामिति। द्वयोस्तु समूहव्यवहारो लोके प्रायेण नास्तीति भावः। बह्वषु चेति यञञोश्चेत्यनेन। लुकि कृत इति। ननु लुक्यपि कृते प्रत्ययलक्षणेन गोत्रलक्षणो वुञ् पूर्वविप्रतिषेधेन प्राप्नोत्येव। एवं तर्हि परिहारान्तराभिधानात्तन्नोक्तम्। सामर्थ्याच्चौलूक्यशब्दार्थ उलूकशब्दस्य

एवं तर्हि सिद्धे सति यद्ब्राह्मणादिभ्यो यनं शास्ति तज्ज्ञापयत्याचार्यः अन्येभ्योऽप्ययं भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। अन्यप्रकरणे पृष्ठादुपसंख्यानं वक्ष्यति तन्न वक्तव्यं भवति। यन्प्रकरणे पृष्ठादुपसंख्यानम्। यन्प्रकरणे पृष्ठादुपसंख्यानं कर्तव्यम्। पृष्ठानां समूहः पृष्ठ्यः। षडहः॥ ग्रामजनबन्धुभ्यस्तल्॥ गजसहायाभ्यां च॥ गजसहायाभ्यां चेति वक्तव्यम्। गजता। सहायता॥ अह्नः खः॥ अह्नः खो वक्तव्यः। अह्नां समूहोऽहीनः॥ क्रतौ॥ क्रतावितिवक्तव्यम्। इह मा भूत्। अह्नाय धूतपाप्मानो भास्करा जितमृत्यवः॥ पर्श्वाः सण्॥ पर्श्वाः सण् वक्तव्यः। पर्शूनां समूहः पार्श्वम्। यदि सण् क्रियते इत्संज्ञा न प्राप्नोति। एवं तर्हि णस् वक्तव्यः॥ खण्डिकादिभ्यश्च॥ खण्डिका शुकोलूका। किमर्थं खण्डिकादिषूलूकशब्दः पठ्यते। न अनुदात्तादेरञित्येव सिद्धम्। न सिध्यति। चाषोलूकयोश्छन्दस्याद्युदात्तः प्रयोगो दृश्यते। चाषेण किकिदीविना। यदुलूको वदति। नैतयोश्छन्दसि सामूहिको दृश्यते। यत्र त्वस्य दृश्यते। तत्रैवानुदात्तादी। इदं तर्हि प्रयोजनम्। अयमौलूक्यो गोत्रम्। तत्र गोत्राश्रयो वुञ् प्राप्नोति तद्बाधनार्थम्। एतदपि नास्ति प्रयोजनम्। बहुवचनान्तानां हि सामूहिकः। बह्वषु च लुक्। तत्र लुकि कृते अनुदात्तादेरित्येव सिद्धम्। न सिध्यति। गोत्रेऽलुगचीत्यलुक् प्राप्नोति। अञ्सिद्धिरनुदात्तादेः कोऽर्थः क्षुद्रकमालवात्। अनुदात्तादेरञित्येवास्ति सिद्धः। किमर्थं क्षुद्रकमालवशब्दः खण्डिकादिषु पठ्यते। गोत्राश्रयो वुञ् प्राप्नोति तद्बाधनार्थम्। गोत्राद्वुञ्। न च तद्गोत्रम्। गोत्राद्वुञ् भवतीत्युच्यते। न च क्षुद्रकमालव शब्दो गोत्रम्। न च गोत्रसमुदायो गोत्रग्रहणेन गृह्यते ॥

यञन्तस्य पाठः। कृतयञ्लुक् उलूकशब्दस्यानुकरणो गणे निर्दिष्टः। अञ्सिद्धिरिति। क्षुद्रकस्यापत्यानीति जनपदशब्दाद् द्वितस्य तद्राजस्य लुक्। मालवात्तु वृद्धलक्षणस्य ञ्यङः। ततो द्वन्द्वः। ततः समासान्तोदात्तत्वेनानुदात्तादित्वमिति भावः। अत्र च गोत्रेऽलुगचीति यञो लुक्प्रतिषेधादापत्येति यलोपः। न चेति। चशब्दो ह्यर्थे। न हीत्यर्थः। वुञ् न भवतीति। अवृद्धादपीत्यनेन ॥

CC-0. In Public Domain. Digitization by eGangotri

तदन्तादिति। तदन्ताद्वुञ्प्राप्नोतीति यदुच्यते तन्न यस्मात्तत्तदन्तविधिः सर्वत्र न भवति। उगिद्वर्णग्रहणवर्जप्रत्ययविधौ तदन्तविधेरिष्टत्वात्। भवतीहेति। समूहप्रकरण इत्यर्थः। एवं चेति। तदन्तविध्यभावे ह्यनञिति प्रतिषेधो नर्थकः स्यादित्यर्थः। आधेनवमिति। तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वादण्। अन्ये त्वाहुः। उत्सादित्वादञ्। तत्र हि वक्ष्यासदिति समासनिषेधात्तदन्तविधिरस्ति जङ्गलधेनुवलजोत्तरपदस्य वा वृद्धिः। नियमार्थं वेति। वाशब्दः समुच्चये। एवमथवेत्य

तद्यथा। न जनपदसमुदायो जनपदशब्देन गृह्यते। काशिकोसलीया इति वुञ्न प्राप्नोति। तदन्तविधिना प्राप्नोति। तदन्तान्न स सर्वतः। परिगणितेषु कार्येषु तदन्तविधिः। न चेदं तत्र परिगण्यते। ज्ञापकं स्यात्तदन्तत्वे। एवं तर्हि ज्ञापयत्याचार्यो भवतीह तदन्तविधिरिति। तथा चापिशलेर्विधिः। एवं चापिशलेराचार्यस्य विधिरुपपन्नो भवति। धेनुरनञि ठकमुत्पादयति। धेनूनां समूहो धैनुकम्। अनञीति किमर्थम्। अधेनूनां समूहः। आधेनवम्। सेनायां नियमार्थं वा अथवा नियमार्थोऽयमारम्भः। क्षुद्रकमालवशब्दात्सेनायामेव। मा भूत्। क्षौद्रकमालवकमन्यदिति। यथा बाध्येत वाऽञ्वुञा। अथैतज्ज्ञापयत्याचार्यः पूर्वोऽपि वुञ् परमञं बाधत इति। ननु चोक्तं गोत्राद्वुञ्न च तद्गोत्रमिति। तदन्तविधिना प्राप्नोति। ननु चोक्तं तदन्तान्न स सर्वत इति। ज्ञापकं स्यात्तदन्तत्वे। एवं तर्हि ज्ञापयत्याचार्यो भवतीह तदन्तविधिरिति। कथं पुनरेतदुभयं शक्यं ज्ञापयितुम्। भवति च तदन्तविधिः। पूर्वोऽपि वुञ् परमञं बाधत इत्युभयं ज्ञाप्यते॥ अञ्प्रकरणे क्षुद्रकमालवात्सेनासंज्ञायाम्। अञ्प्रकरणे क्षुद्रकमालवात्सेनासंज्ञायामिति वक्तव्यम्। क्षौद्रकमालवी सेना चेत्। मा भूत्। क्षौद्रकमालवकमन्यदिति॥ पाशादिभ्यो यः॥ पाशतृणधूमवातेष्वथ वातादर्शनान्न समूहः॥

यमपि। यदा सेनारूपः समूहः तदाऽञ्प्रसङ्गयोऽन्यदा तु वुञेवेत्यर्थः। ननु चेति। ज्ञापकं स्यादित्युक्तमपि चोद्यपरिहाराय नूदितम्। उभयमिति। अन्यथानुपपत्त्या ज्ञापकत्वं भवत्युभयेन च विना क्षुद्रकमालवादञ्विधानं नोपपद्यत इत्युभयस्यापि ज्ञापकत्वमित्यर्थः। अञ्प्रकरण इति। यद्यपि गण एवैतत्पठ्यते तथापि क्षुद्रकमालवादिति योगविभागेनार्थद्वयं ज्ञाप्यं ततः सेनासंज्ञायामिति नियमः कर्तव्य इति दर्शयितुं वार्त्तिकारम्भः॥ पाशा॥ इष्यगिति। वातपरमाणूनामनेकत्वेऽपि वातसंज्ञकस्यावयविन एकत्वादनेकाश्रयरूपसमूहानुपपत्तिरित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीघ्रत्वेत्विति। ततश्च वाताच्छैघ्र्य इति पृथग्वक्तव्यमित्यर्थः। अथवेति। एकस्यापि वातस्य दिग्भेदनिमित्तभेदप्रतिभासादने
काश्रयसमूहोपपत्तिः। यथैकापि दिक् सूर्योदयास्तमयाद्युपाधिभेदादनेका व्यपदिश्यते। तथा च दश दिश इति लोके व्यव
हारः। यद्वा भिन्ना एव वाता अवयविनः पृथगुपलम्भात्॥ विषयो॥ विषयाभिधान इति। अङ्गानां निवासो जनपद इत्यतः स्व
स्वामिभावो न प्रतीयते। अङ्गानां विषय इत्यत्र तु स्वस्वामिभावः प्रतीयते न तु निवासार्थ इति। जनपदे लुबिति चातुरर्थिक
स्य लुब्विधीयमानो विषयेन प्राप्नोतीति वचनम्। बहुवचनविषयादिति। बहुवचनान्ताच्छब्दात्स्वरस्य प्रत्ययस्येत्यर्थः। गा
न्धार इति। गान्धारस्यापत्यं गान्धारिः। तस्यापत्यानि साल्वेयगान्धारिभ्यां चेत्यञ्। ततो गान्धारीणां विषय इत्यण्। ततस्तस्य

पृथग्वातादर्शनादयुक्तोयं वातशब्दस्य सामूहिके पाठः। नहि पृथग्वाता दृश्यन्ते। न तर्हीदानीमिदं भवति
वात्येति। शीघ्रत्वे तु। शीघ्रो वातो वात्या। अथवा पृथग्वाता अपि दृश्यन्ते। तद्यथा पूर्वो वातः। उत्तरो वातः। सर्वतो
वातः। वाता वान्तु दिशो दश॥ खलगोरथात्॥ इनित्रकट्यचश्च॥ खलादिभ्य इनिः॥ खलादिभ्य इनिर्वक्तव्यः। ख
लिनी। डाकिनी। कुटुम्बिनीति॥ विषयो देशे॥ विषयाभिधाने जनपदे लुब्बहुवचनविषयात्॥ विषयाभिधाने
जनपदे लुब्बहुवचनविषयाद्वक्तव्यः। अङ्गानां विषयो देशः अङ्गाः। वङ्गाः। सुह्माः। पुण्ड्राः॥ गान्धार्यादिभ्यो वा॥ गा
न्धार्यादिभ्यो वेति वक्तव्यम्। गान्धारः। गान्धारयः। वासातः। वासातयः। शैवः। शिवयः॥ राजन्यादिभ्यो वा वुञ्॥ राज
न्यादिभ्यो वा वुञ्वक्तव्यः। राजन्यकः। राजन्याः। दैवयातवाः। दैवयातवकः। बैल्ववनादिभ्यो नित्यम्॥ बैल्ववनादि
भ्यो वुञ् नित्यमिति वक्तव्यम्। बैल्ववनकः। आम्बरीषपुत्रकः। आत्मकामेयकः। तत्तर्हीदं बहु वक्तव्यम्। न वा
भिधेयस्य निवासविषयत्वात्। निवासविवक्षायां लुब्विषयविवक्षायां प्रत्ययः। न वा वक्तव्यम्॥

वा लुप्लुपि युक्तवदिति लिङ्गसंख्यातिदेशः। राजन्यादिति। औत्सर्गिकस्याणो विषयाभिधान इति लुप्। वुञ्पक्षे तु तद्विधान
सामर्थ्याल्लुबभावः। न वेति। जनपदलक्षणस्याभिधेयस्याङ्गादिसंबन्धिनो निवासरूपत्वं विषयरूपत्वं चास्ति। यद्यपि विषयनि
वासयोः परस्परव्यभिचारस्तथाप्यङ्गादीनां य एव स्वो विषयः स एव तेषां निवास इति स्मर्यते। तत्रैकस्योभयरूपत्वात्प्रयोगद
र्शनवशादङ्गादौ निवासविवक्षैव गान्धार्यादिषु राजन्यादिषु च पर्यायेणोभयविवक्षा बैल्ववनादिषु विषयविवक्षैवाश्रीयत इ
ति नार्थो लुब्विधिना तद्विकल्पेन वुञ्विकल्पेन वा। नापि विकल्पबाधनार्थेन नित्यवचनेनेत्यर्थः॥

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· सोऽस्यादि॥ छन्दस इति। छन्दःशब्देनाक्षरेयत्ताविशेषवाचिनो गायत्र्यादिशब्दग्रहणम्। नपुंसकादिति। नपुंसकार्थाभि
६६ धायिन इत्यर्थः। नपुंसकार्थाभिधायित्वं च त्रिष्टुबादीनां स्वार्थिकाण्प्रत्ययान्तानामेवेति नपुंसके स्वार्थ इत्युक्तं भवति॥ तदधी
ते॥ न य इति। यो हीयं ग्रन्थमधीते स तं स्वरूपतो वस्तुतो वेति। यश्च स्वरूपतो वेत्ति सोऽवश्यमधीत इति भावः। नैतयोरिति। अर्थाव
बोधो वेदनमभिप्रेतं न तु स्वरूपमात्रवेदनम्। तत्र परस्परव्यभिचारदर्शनादुभयोपादानमित्यर्थः। संपाठमिति। अर्थनिरपेक्षं

किं कारणम्। अभिधेयस्य निवासविषयत्वात्। अत्र चाभिधेयं स निवासश्च विषयश्च। अभिधेयस्य निवासविषय
त्वात्। निवासविवक्षायां लुप्। विषयविवक्षायां प्रत्ययो भविष्यति। इदं तर्हि प्रयोजनम्। एतज्ज्ञास्यामि। इह नि
त्यो विधिरिह विभाषेति। एतदपि नास्ति प्रयोजनम्। यावता यदभिधेयं स निवासश्च विषयश्च। अभिधेयस्य
निवासविषयत्वान्निवासविवक्षायां लुप्। विषयविवक्षायां प्रत्यय इत्येव॥ सोऽस्यादिरिति च्छन्दसः प्रगाथेषु॥ छ
न्दसः प्रत्ययविधाने नपुंसकात्स्वार्थे उपसंख्यानम्॥ छन्दसः प्रत्ययविधाने नपुंसकात्स्वार्थे उपसंख्यानं कर्तव्य
म्। त्रिष्टुबेव त्रैष्टुभम्। अनुष्टुबेवानुष्टुभम्। जगत्येव जागतम्॥ तदधीते तद्वेद॥ किमर्थमुभावप्यर्थौ निर्दिश्येते।
न योऽधीते वेत्त्यप्यसौ। यश्च वेदाधीतेऽप्यसौ। नैतयोरावश्यकः समावेशः। भवति हि कश्चित्संपाठं पठति न वेत्ति
तथा कश्चिद्वेत्ति न संपाठं पठति॥ क्रतूक्थादिसूत्रान्ताट्ठक्॥ उक्थादीत्युच्यते। कानि पुनरुक्थानि। सामानि। य
द्येवं सामगमात्रे औक्थिक इति प्राप्नोति। नैष दोषः। तादर्थ्यात्ताच्छब्द्यं भविष्यति। उक्थार्थमुक्थम्। इह उक्थान्य
धीते औक्थिकः। यज्ञमधीते याज्ञिकः। य इदानीमौक्थिकं याज्ञिकं वाधीते कथं तत्र भवितव्यम्। औक्थिको या
ज्ञिक इत्येव भवितव्यम्। कथम्। तस्येदं प्रत्ययाल्लुक्। तस्येदं प्रत्ययाल्लुग्वक्तव्यः। तस्येदंप्रत्ययस्य च। स तर्हि
वक्तव्यः। न वक्तव्यः॥

स्वाध्यायं पठतीत्यर्थः॥ क्रतू॥ का——नीति। उक्थशब्दो येषु सामसु रूढस्तान्यधीयाने प्रत्ययो नेष्यते। यदधीयाने प्रत्यय
इष्यते तत्रोक्थशब्दो न रूढ इति प्रश्नः। उक्थार्थमिति। सामलक्षणं प्रातिशाख्यं शास्त्रमित्यर्थः। मुख्यार्थाभिधायिनस्तूक्थश
ब्दात्प्रत्ययो नेष्यते। तत्र वाक्यमेव भवत्युक्थान्यधीते वेद वेति। इहेति। उक्थशब्देन गौण्या वृत्त्या सामलक्षणमौक्थिकमुच्य
ते। य इदानीमिति। औक्थिकानामाम्नाय इतीदमर्थे छन्दोगौक्थिकेति ञ्यः। तस्येदंप्रत्ययादिति। अध्येतृवेदित्रोरुत्पन्नस्या राम:
णो लुगाम्नाये विहितस्य ञ्यस्य चेत्यर्थः॥ ६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्येति। इकगिति। ठगित्यर्थः। अकल्पादेरित्येतदानन्तर्यात्सूत्रान्तस्यैव कल्पादेर्निषेधं करोति। तथा च भाष्ये काल्पसूत्र इति प्रत्युदाहृतम्। अन्ये तु सर्वेषामेव निषेधमिच्छन्तः काल्यविद्य इत्यादि भाष्यमित्याहुः। तत्तु प्रथमातिक्रमे कारणाति क्रमाद्भाष्यविरुद्धमिति लक्ष्यते। त्रैविद्य इति। त्र्यवयवा विद्यास्त्रिविद्या तामधीत इति प्रत्ययः कार्यः। तिस्रो विद्या अधीत इति क्रियमाणे द्विगोर्लुगिति लुक्प्रसङ्गः॥ आख्यानेति। द्वयोरर्थग्रहणं द्वयोः स्वरूपग्रहणम्। यावक्रीतिक इति। यावक्रीताधिकारेकृतमाख्यानमुपचाराद्यावक्रीतशब्देनोच्यते। तदधीते वेद वा यावक्रीतिकः। एवं प्रैयङ्गवाधिकारकृताख्यानाध्यायी प्रैयङ्गविकः। वासवदत्तिक इति। वासवदत्तामधिकृत्य कृताख्यायिकाऽधिकृत्य कृते ग्रन्थ इत्यत्रार्थे वृद्धाच्छः। तस्य लु

इहास्माभिर्लैः शब्दं साध्यम्। उक्थान्यधीते औक्थिकयमधीते औक्थिक इति। तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः अपरस्मादुत्पत्तिर्भविष्यति। अविरविकन्यायेन। तद्यथा। अवेर्मांसमिति विगृह्याविकशब्दादुत्पत्तिर्भवत्याविक इति। एवमिहापि औक्थिक्यान्यधीत इति विगृह्य उक्थशब्दादुत्पत्तिर्भविष्यति। औक्थिक इति। औक्थिक्यमिति विगृह्य वाक्यमेव भवति। विद्यालक्षणकल्पसूत्रान्तादकल्पादेरिकक्स्मृतः। विद्या। वायसविद्यिकः। सार्पविद्यिकः। लक्षण। गौलक्षणिकः। आश्वलक्षणिकः। कल्प। पाराशरकल्पिकः। मातृकल्पिकः। सूत्र। वार्त्तिकसूत्रिकः। सांग्रहसूत्रिकः। अकल्पादेरिति किमर्थम्। काल्पसूत्रः॥ विद्या चानङ्गक्षत्रधर्मत्रिपूर्वा। विद्या चानङ्गक्षत्रधर्मत्रिपूर्वेति वक्तव्यम्। आङ्गविद्यः। क्षात्रविद्यः। धार्मविद्यः। त्रैविद्यः॥ आख्यानाख्यायिकेतिहासपुराणेभ्यश्च॥ आख्यानाख्यायिकेतिहासपुराणेभ्यश्चेकग्वक्तव्यः। यावक्रीतिकः। प्रैयङ्गविकः। यायातिकः। आख्यान। आख्यायिका। वासवदत्तिकः। सौमनोत्तरिकः। ऐतिहासिकः। पौराणिकः॥ सर्वसादेर्द्विगोश्च लः॥ सर्वसादेर्द्विगोश्च लो वक्तव्यः। सर्ववेदः। सर्वतन्त्रः। सवार्तिकः। ससंग्रहः ॥

ऽाख्यायिकाभ्यो बहुलमिति लुप्। ततोऽनेन ठक्। एवं सौमनोत्तरिक इति। ऐतिहासिक इति। इतिह शब्द उपदेशपारंपर्ये वर्तते। इतिहास्यतेऽस्मिन्निति इतिहासः। हलश्चेति घञ्। मयूरव्यंसकादित्वात्समासस्ततष्ठक्। सर्वसादेरिति। स शब्दोऽर्थवान् गृह्यत इति सर्वशब्दः पृथङ्निर्दिष्टः। द्विगोश्चेत्यनेन द्विगोर्लुगिति स्मारितम्। सर्ववेद इति। सर्ववेदानधीत इत्यणो लुक्। सवार्तिक इति। वृत्तौ साधु वार्तिकम्। कथादिभ्यष्ठगिति ठक्। वार्तिकान्तमधीत इत्यन्तवचने सहस्याव्ययीभावः। अव्ययीभावे चाकाले इति सभावः। ततोऽणो लुक् ॥

CC-0. In Public Domain. Digitization by eGangotri

पञ्चकल्पइति। पञ्चकल्पानधीतइति द्विगुः ततो विद्यालक्षणेति ठक्। तस्य लुक्। अनुसूरिति। अनुसूशब्दो ग्रन्थविशेषवाची स ठकमुत्पादयति। लक्ष्यलक्षणशब्दौ चेत्यर्थः। अनुसूमधीतइति ठक्। इसुसुक्तान्तादिति काऽऽदेशः। केणइति ह्रस्वो वृद्धिश्च। तत आनुसुकइति भवति। लक्ष्यमधीते लाक्षिकः। लक्षणमधीते लाक्षणिकः। इकन्निति। पूर्वपदमधीते पूर्वपदिकः। शतपथमधीते शातपथिकः। शतपथिकी। षष्टिपथिकः। षष्टिपथिकी॥ अनुब्रा॥ अयमिति। अध्येतृवेदितोरनभिधानाद्‌णन भविष्यतीति तद्बाधनार्थमपि सूत्रं न कर्तव्यम्॥ वसन्ता॥ वसन्तसहचरितमिति। यत्र वसन्तो वर्ण्यते यद्वा वसन्ते

पञ्चकल्पः। द्वितन्त्रः॥ द्विवेदः। अनुसूर्लक्ष्यलक्षणे सर्वसादेर्द्विगोश्च लः॥ इकन्पदोत्तरपदात् शतषष्टेः षिकन्पथः॥ अनुब्राह्मणादिनिः॥ अयं योगः शक्योऽवक्तुम्। कथमनुब्राह्मणी अनुब्राह्मणिनौ अनुब्राह्मणिन इति। इनिनैतन्मत्वर्थीयेन सिद्धम्। अनुब्राह्मणमस्यास्तीत्यनुब्राह्मणी॥ वसन्तादिभ्यष्ठक्॥ अयुक्तोऽयं निर्देशः। अधीते वेदेति वर्तते। न च वसन्तो नामाध्ययनमस्ति। नैष दोषः। साहचर्यात्ताच्छब्द्यं भविष्यति। वसन्तसहचरितमध्ययनमेव वसन्तः॥ प्रोक्ताल्लुक्॥ अयुक्तोऽयं निर्देशः। प्रोक्तादिति भवितव्यम्। सौत्रो निर्देशः॥ सूत्राच्च कोपधात्॥ संख्याप्रकृतेरिति वक्तव्यम्। इह मा भूत्। माहावार्त्तिकः। चान्दनगन्धिकः। कालापकः॥ छन्दोब्राह्मणानि च तद्विषयाणि॥ किमर्थमिदमुच्यते। अन्यत्राभिधेयस्यानित्यत्वात्‌ छन्दोब्राह्मणानां तद्विषयवचनम्। अन्यत्राभिधेयमनित्यं भवति। पाणिनीयमिति वा भवति ॥

धीयते तत्साहचर्यात्ताच्छब्द्यं लभते। प्रोक्ता॥ अयुक्तइति। अर्थस्य प्रोक्तत्वाद्‌र्थस्य च प्रत्ययेन पौर्वापर्यासंभवादिति भावः। सौत्रइति। प्रोक्तशब्दस्येह स्वरितत्वं प्रतिज्ञातं तेन तदधिकारविहितप्रत्ययग्रहणमित्यर्थः॥ सूत्रा॥ संख्याप्रकृतेरिति। अष्टअध्यायाः परिमाणमस्य संख्याया अतिशदन्तायाः कन्निति कन्प्रत्ययस्ततोऽष्टकमधीयतेइति अणो लुकि कृतेऽष्टकाः पाणिनीयाइत्युदाहरणम्॥ छन्दो॥ इह प्रोक्तप्रत्ययान्तस्यानेकः प्रकारो दृश्यते। स्वातन्त्र्यमुपाध्यन्तरयोगो वाक्यमध्येतृवेदित्रोः प्रत्ययश्च। स्वातन्त्र्यं तावद्यथा। पाणिनिना प्रोक्तं व्याकरणं पाणिनीयमिति। उपाध्यन्तरयोगो महत्पाणिनीयमिति वाक्यम्। पाणिनीयमधीयतइति। अध्येतृवेदित्रोः प्रत्ययः ॥

राम: ६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

= नेदं प्रतीकम् =
पाणिनीयादिति। छन्दोब्राह्मणवाचिनांतु प्रोक्तप्रत्ययान्तानामध्येतृवेदितृप्रत्ययविषयतैवेष्यते न तु स्वातन्त्र्यादीतितद्विषयार्थमिदं सूत्रम्। क्रियमाणेपि चैतस्मिन्नधीतेवेदेत्यधिकारादध्येतृवेदितृविषयस्य वाक्यस्यैव निवृत्तिः सिध्यति न तु स्वातन्त्र्यादेरितिमत्वा पृच्छति। किमर्थमिति। अन्यत्रेति। पाणिनीयादौ। अभिधेयस्येति। प्रोक्तलक्षणस्यार्थस्येति। अनित्यत्वादिति। नानाविषयत्वादध्येतृवेदित्रोर्नित्यं विशेषणत्वेनाप्रयोगादनियतत्वादित्यर्थः। तत्र यथाधिकारमिति। अधिकारमनतिक्रम्येत्यर्थः। अधीतेवेदेत्यधिकारादध्येतृवेदित्रोरेव विवक्षितयोस्तद्विषयता विधीयमाना तं द्विषयमेव वाक्यं

पाणिनीयादितिवा। अन्यत्राभिधेयस्यानित्यत्वाच्छन्दोब्राह्मणानामप्यनित्यता प्राप्नोति। इष्यते च तद्विषयतैव स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति छन्दोब्राह्मणानां तद्विषयवचनम्। एवमर्थमिदमुच्यते। अस्तिप्रयोजनमेतत्। किंतर्हीति। तत्र यथाधिकारं तद्विषयप्रसङ्गः। तत्र यथाधिकारं तद्विषयता प्राप्नोति। अधीतेवेदेति वर्त्तते। तेनाध्येतृवेदित्रोरेव तद्विषयता स्यात्। येन्ये उपचारास्तत्र तद्विषयता न स्यात्। यथेह भवति। पाणिनीयं महत्सुविहितमिति। एवमिहापि स्यात्। कठं महत्सुविहितमिति। सिद्धंतु प्रोक्ताधिकारे तद्विषयवचनात्। सिद्धमेतत्। कथम्। प्रोक्ताधिकारे एव तद्विषयता वक्तव्या। तेन प्रोक्तं छन्दोब्राह्मणान्यध्येतृवेदित्रोरिति। तत्तर्ह्यध्येतृवेदितृग्रहणं कर्त्तव्यम्। ननु चेहापि क्रियते। तदधीते तद्वेदेति परार्थमेतद्भविष्यति। एवं तर्हि यावदिह छन्दोब्राह्मणग्रहणं तावत्तत्राध्येतृवेदितृग्रहणम्। ननु च तत्रापि क्रियते। परार्थं तद्भविष्यति। पुराणप्रोक्तेषु ब्राह्मणकल्पेषु। शौनकादिभ्यश्छन्दसीति। इह वा छन्दोब्राह्मणग्रहणं क्रियते। तत्र वाध्येतृवेदितृग्रहणम्। कोन्वत्र विशेषः। याज्ञवल्क्यादिभ्यः प्रतिषेधः॥ याज्ञवल्क्यादिभ्यप्रतिषेधो वक्तव्यः। याज्ञवल्कानि ब्राह्मणानि। सौलभानि ॥

निवर्त्तयेद्न तु क्रियान्तरमित्यर्थः। येन्ये उपचारा इति। व्यवहारा इत्यर्थः। सिद्धं त्विति। अध्येतृवेदित्रोरेव विवक्षितयोः छन्दोब्राह्मणेषु प्रोक्तप्रत्यय उत्पद्यते नान्यत्रेत्येवं वक्तव्यमित्यर्थः। परार्थं तदिति। छन्दोब्राह्मणान्यध्येतृवेदित्रोरिति परिभाषां कृत्वा पुराणप्रोक्ते कल्पे चेति करिष्यते। चकारेण ब्राह्मणग्रहणमनुकृष्यते। ततः शौनकादिभ्य इति। ततश्छन्दोग्रहणमनुवर्त्तिष्यत इति भावः। याज्ञवल्कानीति। यज्ञवल्कस्यापत्यमिति गर्गादित्वाद्यञ्। तदन्तात्प्रोक्तार्थे कण्वादिभ्यो गोत्र इत्यण्। अत्र तद्विषयता न भवति। सौलभानीति। सुलभेन प्रोक्तानीति तेन प्रोक्तमित्यण् ॥

CC-0. In Public Domain. Digitization by eGangotri

सिद्धमित्यस्यानन्तरं प्रतिषेधवचनात्। तन्निमित्तत्वं प्रतिषेधवचनस्याशङ्क्य पृच्छति॥ किंप्रोक्ताधिकार इति। इनिर्वेति। इनिशब्देन णिनिरपि गृह्यते। कर्मन्दकृशाश्वादिनिरित्ययमिनिरपि। तेनेनेरेव प्रोक्तार्थे विहितस्य तद्विषयता भविष्यति न त्वण इत्यर्थः। पैङ्गीति। पिङ्गेन प्रोक्तः कल्प इति णिनिः। अत्रापि छन्दोब्राह्मणग्रहणे क्रियमाणे तद्विषयताप्रसङ्गः। काश्यपकौशिकग्रहणं चेति। इनेरध्येतृवेदित्रोरिति परिभाषां कृत्वा काश्यपकौशिकाभ्यां कल्प इति सूत्रं नियमार्थं कर्त्तव्यमित्यर्थः॥ एवमपीति। इनेरेकस्योपादानात्तित्तिर्यादिसूत्रे विहितानां छणादीनां तद्विषयता न स्यात्। कौडा इति। कोडेन प्रोक्तं छन्दोधीय

किंप्रोक्ताधिकारे तद्विषयता क्रियत इत्यतो याज्ञवल्क्यादिभ्यः प्रतिषेधो वक्तव्यः। नेत्याह। सर्वथा याज्ञवल्क्यादिभ्यः प्रतिषेधो वक्तव्यः। इनिर्वा प्रोक्ते तद्विषयः॥ अथवा इनिः प्रोक्ते तद्विषयो भवतीति वक्तव्यम्। यदीनिः प्रोक्ते तद्विषयो भवतीत्युच्यते। एवमपि पैङ्गी कल्पः अत्रापि प्राप्नोति। काश्यपकौशिकग्रहणं च कल्पे नियमार्थम्। काश्यपकौशिकग्रहणं च कल्पे नियमार्थं द्रष्टव्यम्। काश्यपकौशिकाभ्यामेवेनिः कल्पे तद्विषयो भवति नान्येभ्य इति। एवमपि छणादीनां तद्विषयता न प्राप्नोति। तैत्तिरीयाः। वारतन्तवीयाः। यदि पुनश्छणादयः प्रोक्ते तद्विषया भवन्तीत्युच्यते। एवमपि पैङ्गी कल्पः अत्रापि प्राप्नोति। काश्यपकौशिकग्रहणं च कल्पे नियमार्थमित्येव। एवमप्यौत्सर्गिकाणस्तद्विषयता न प्राप्नोति। कौडाः। काङ्कताः। मौदाः। पैप्पलादाः। छणादयश्चाप्यौत्सर्गिकाणमध्येतृवेदित्रोरेव बाधेरन्। येऽन्ये उपचारास्तत्र न बाधेरन्। तित्तिरिणा प्रोक्ताः श्लोका इति ॥

ते। कङ्कतेन मुदेन पिप्पलादेन चेति तेन प्रोक्तमित्यण्। तस्य छणादिष्वनन्तर्भावात्तद्विषयता न प्राप्नोति। दोषान्तरमुद्भावयति। छणादय इति। अध्येतृवेदितृविवक्षायामेव प्रोक्तार्थे उत्पद्यमानाश्छणादयस्तत्रैव स्वयं भवन्त औत्सर्गिकाणं बाधेरन्। अन्यत्र तु स्वयं भवन्तो न बाधेरन्नित्यर्थः। तित्तिरिणा प्रोक्ता इति। तित्तिरिवरतन्त्वित्यत्र छन्दोग्रहणं कर्त्तव्यमिति वक्ष्यते तेनात्र छण् न भवति। तदभावेऽप्यण्नेष्यते। यद्येवमपवादाभाव उत्सर्गस्य प्रवृत्तिः केन वार्यते अथानभिधानादिकमुत्सर्गानुत्पत्तौ हेतुरभिधीयते तर्हि छणादयश्चापीति दोषो नोपन्यसनीय इति चिन्त्यमेतत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तुतर्हीति।इहवाछन्दोब्राह्मणानिचतद्विषयाणीतिक्रियेत।प्रोक्ताधिकारेवाछन्दोब्राह्मणान्यध्येतृवेदितॄरित्युच्येत।
नास्तिविशेषः।इहापिचप्रकरणेप्रोक्तग्रहणानुवृत्त्याप्रोक्तप्रत्ययान्तानांछन्दोब्राह्मणवाचिनांतद्विषयताविधीयमा
नासर्वेस्वातन्त्र्यादिनिवर्तयितुंक्षमेतियथाधिकारमित्ययंदोषोनावतरति।सिद्धंतुप्रोक्ताधिकारइत्येतदपिवार्त्तिकमत्रै
वसूत्रेप्रोक्ताल्लुगित्यतःप्रोक्तशब्दस्याधिकारइत्येवंकेचिद्व्याचक्षते।वक्ष्यत्येतदिति।पुराणप्रोक्तेष्वित्यत्र।कथमिति।कृत्स्ने
तद्विषयतानप्राप्नोतीतिप्रश्नः।अत्रापितद्विषयताचेति।अर्थमात्रमत्रनिर्दिष्टम्।तथाहि।यद्यत्रप्रकरणेसूत्रमिदंक्रियते।
तदाव्यवहितत्वात्कथंतत्रतद्विषयग्रहणस्यानुवृत्तिःस्यात्।अथप्रोक्तप्रकरणेछन्दोब्राह्मणान्यध्येतृवेदितॄरित्युच्यते
तदातद्विषयग्रहणंनास्ति।तस्मात्प्रोक्तप्रकरणेऽध्येतृवेदितृग्रहणंपाराशर्यशिलालिभ्यामित्यादावनुवर्त्यमितिभाष्यका

अस्तुतर्ह्यविशेषेण।ननुचोक्तंयाज्ञवल्क्यादिभ्यःप्रतिषेधइति।वक्ष्यत्येतत्।याज्ञवल्क्यादिभ्यःप्रतिषेध
स्तुल्यकालत्वादिति।तत्रैववक्तव्यंतद्विषयताचनभवतीति।कथंकाश्यपिनःकौशिकिन इति।इनिःप्रोक्ते
तद्विषयोभवतीत्युच्यमानेअवश्यमत्रकाश्यपकौशिकग्रहणंकर्त्तव्यंनियमार्थंद्रष्टव्यम्।तदेवेदानींवि
ध्यर्थंभविष्यति।कथंपाराशरिणोभिक्षवःशैलालिनोनटाः।अत्रापितद्विषयताचेत्यनुवर्त्तिष्यते॥तदस्मि
न्नस्तीतिदेशेतन्नाम्नि॥तेननिर्वृत्तम्॥तस्यनिवासः॥अदूरभवश्च॥किंपुनरेकयोगआहोस्विन्नानायोगाः।किंचा
तः।यद्येकोयोगउत्तरेष्वर्थादेशनेषुदेशेतन्नाम्नीतिपृथक्श्रुतिःकर्त्तव्यानह्येकयोगेअनुवृत्तिर्भवति ॥

रोमन्यते।यद्वा।याज्ञवल्क्याद्यर्थेतद्विषयताचनेतियदुक्तंतदेवतद्विषयताग्रहणमुत्तरत्रानुवर्त्स्यमित्यर्थः॥अदूर॥
चतुर्णांयोगानांकिमेकवाक्यताअथ नानावाक्यतेतिविचारः।किंपुनरिति।ननुसमर्थविभक्तयःप्रत्ययार्थाश्चभिन्नाइ
तिकथमेकयोगत्वसंभावना।उच्यते।अणादयःपञ्चएतैर्योगैर्विधीयन्तइतितद्विधानापेक्षमेकयोगत्वंसंभवति।यदा
युगपदेतेष्वर्थेष्वणादयोविधीयन्तेग्रहणकवाक्येनैकेनतदैकयोगत्वंतदा चैतन्निबन्धनानिप्रक्रियावाक्यान्युपपद्य
न्ते।यदातुक्रमेणभिन्नेष्वर्थेषुप्रत्ययविधानंतदानानावाक्यता।देशेतन्नाम्नीति।चतुर्ष्वपियोगेषुप्रत्ययान्तोपाधित्वेने
तदुपयुज्यते एकयोगेचप्रथमेनैवार्थेनानन्तर्यात्संबध्येतनान्यैः।नानायोगत्वेतुस्वरितत्वादधिकारेसतिसर्वैरर्थैरस्योपा
धेःसंबन्धउपपद्यते ॥

प्रमादकृतमिति। शिष्याणां सुखावबोधाय लाघवं प्रत्यनवधानलक्षणेन प्रमादेन कृतमित्यर्थः। लौकिको ह्यधिकारोऽपेक्षाल
क्षण एकस्मिन्नपि योगे न विरुध्यते। अर्थसमुदायं चापेक्ष्य समर्थविभक्तिरुपाधिर्वा निर्दिश्यमानः प्रत्येकमभिसंबध्यते। य
त्त्वन्यत्रोक्तं नचैकयोगेऽनुवृत्तिर्भवतीति। तच्छास्त्रीयमधिकारमन्तरेणैव संबन्धस्यान्याय्यत्वमनाश्रित्येत्यविरोधः। गोयूथ
वदिति। स्वरितलिङ्गासंङ्गदण्डप्रेर्य्यमाणा अधिकारगवा आनन्तर्यमवधाननिरपेक्षाः सममेव कार्यदेशमनुसरन्तीत्यर्थः।

कथं ज्ञायते। यदयं तदधीते तद्वेदेति द्विस्तद्ग्रहणं करोति। अथ नाना योगाः। ओरञित्येवमाद्यनुक्रमणं यदेव सर्वान्त्यमर्थादेशनं तस्यैव विषये स्यात्। यथेच्छसि तथास्तु। अस्तु तावदेको योगः। ननु चोक्तमुत्तरेष्वर्थादेशनेषु देशे तन्नाम्नीति पृथक् स्तुतिः कर्तव्या न ह्येकयोगेऽनुवृत्तिर्भवतीति। एकयोगेऽप्यनुवृत्तिर्भवति। कथं ज्ञायते। यदयं तदस्यास्त्यस्मिन्निति मतुबिति द्विस्तद्ग्रहणं न करोति। कथं तदधीते तद्वेदेति। प्रमादकृतमाचार्यस्य शक्यमकर्तुम्। अथवा सन्तु पुनर्नाना योगाः। ननु चोक्तम्। ओरञित्येवमाद्यनुक्रमणं यदेव सर्वान्त्यमर्थादेशनं तस्यैव विषये स्यात्। नैष दोषः। गोयूथवदधिकाराः। तद्यथा। गोयूथमेकदण्डप्रघट्टितं सर्वं समं घोषं गच्छति तद्वदधिकाराः॥ ओरञ्॥ ओरञ्विधेर्नद्यां मतुब्विप्रतिषिद्धम्। ओरञ्विधेर्नद्यां मतुब्भवति विप्रतिषेधेन। ओरञ्विधेरवकाशः। कक्षतुकाक्षतवम्। काकपेलवम्। नद्यां मतुपोऽवकाशः। उदुम्बरावती। मशकावती। इहोभयं प्राप्नोति। इक्षुमती। द्रुमती। मतुब्भवति विप्रतिषेधेन॥ मतौ च बह्वजङ्गात्॥ अङ्गग्रहणं किमर्थम्। यथा बह्वज्ग्रहणमङ्गविशेषणं विज्ञायेत। बह्वजङ्गादिति। अथाक्रियमाणेऽङ्गग्रहणे कस्य बह्वज्ग्रहणं विशेषणं स्यात्। मत्वन्तविशेषणम्। तत्र को दोषः। इहापि प्रसज्येत। मालावतां निवासः मालावतम्। अस्ति चेदानीं कश्चिदबह्वज्मत्वन्तो यदर्थो विधिः स्यात्। अस्तीत्याह। खवान् स्ववान्॥ नद्यां मतुप्॥ किमर्थं नद्यां मतुब्विधीयते न तदस्यास्त्यस्मिन्निति मतुबित्येव सिद्धम्। नद्यां मतुब्वचनं मत्वर्थेऽण्विधानात्। नद्यां मतुब्वचनं क्रियते मत्वर्थेऽण्विधानात्॥

ओर॥ उदुम्बरावतीति। मतौ बह्वचोऽनजिरादीनामिति दीर्घः॥ मतौ॥ अङ्गग्रहणमिति। मतौ च बह्वच इत्येवास्तु व्यधिकरणे पञ्चम्यौ व्याख्यास्येते। बह्वचो यो विहितो मतुप् तदन्तादण् भवतीति स एवार्थः संपद्यत इति प्रश्नः। यथेति। सामानाधिकरण्ये संभवति वैय्यधिकरण्याश्रयस्यान्याय्यत्वादित्यर्थः॥ नद्याम्॥

CC-0. In Public Domain. Digitization by eGangotri

अयमिति। तदस्मिन्नस्तीति देशे तन्नाम्नीत्येतत्सूत्रविहितो नद्या अपदेशत्वाद्विशिष्टलिङ्गो नदी देशोग्रामादित्यत्र तु पृथ
ङ्नदीग्रहणं सर्वनदीवाच्यवयवद्वन्द्वपरिग्रहार्थम्। सविशेषविहित इति। देशे तन्नाम्नि विधानात्। निर्वृत्ताद्यर्थं चेति। निर्वृ
त्तादिषु त्रिष्वर्थेषु अप्राप्त एव मतुब्विधीयते। तदस्मिन्नस्तीत्यत्र त्वर्थे प्रतिप्रसूयत इत्यर्थः॥ नडा॥ सूत्रकारेण कुक्पूर्वा
न्तः कृतः। तत्र कुञ्चा अस्मिन्सन्तीति कुञ्चकीयमिति ह्रस्वो न सिध्यति। तस्कीयमित्यत्र च नलोपो न प्राप्नोति। परादौ तु केण

अयं मत्वर्थे ण्विधीयते। सविशेषविहितः सामान्यविहितं मतुपं बाधेतेति। निर्वृत्ताद्यर्थे च। निर्वृत्ताद्यर्थं च नद्यो
मतुब्वचनं क्रियते। निर्वृत्ताद्यर्थेषु मतुब्यथा स्यात्॥ कुमुदनडवेतसेभ्यो ड्मतुप्॥ महिषाच्च॥ महिषाच्चेति व
क्तव्यम्। महिष्मान्। नडादीनां कुक्॥ यदि पुनरयं कुट् परादिः क्रियते। कुटि प्रत्ययादेरादेशानुपपत्तिरनादि
त्वात्। कुटि सति प्रत्ययादेरित्यादेशस्यानुपपत्तिः। कुटि कृते अनादित्वादादेशो न प्राप्नोति। एवं तर्हि पूर्वान्तः क
रिष्यते। पूर्वान्ते ह्रस्वत्वम्। यदि पूर्वान्तः ह्रस्वत्वं वक्तव्यम्। कुञ्चकीयः। परादौ पुनः सति केण इति ह्रस्वत्वं सि
द्धं भवति। अस्तु तर्हि परादिः। ननु चोक्तं कुटि कृते नादित्वादादेशो न प्राप्नोतीति। सिद्धं त्वादिष्टस्य कुड्वचनात्। सि
द्धमेतत्। कथम्। आदिष्टस्य कुड्वचनात्। कुट् चादिष्टस्येति वक्तव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। संनियोगा
त्सिद्धम्। संनियोगः करिष्यते। क एष यत्नश्चोद्यते संनियोगो नाम। चकारः कर्तव्यः। कुट् च। किं च। यच्चान्यत्प्राप्नो
ति। किं चान्यत्प्राप्नोति। आदेशः। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं पूर्वान्ते ह्रस्वत्वमिति।
निपातनात्सिद्धम्। किं निपातनम्। कुञ्चाह्रस्वत्वं चेति। तत्तर्हि पूर्वान्ते सति निपातनं कर्तव्यम्। परादावप्येष दो
षः। यद्धितत्केण इति ह्रस्वत्वम्। न तत्कादिमात्रे शक्यं विज्ञातुम्। इहापि प्रसज्येत। नदीकल्पः परीवाहः। कुमा
रीकाम्यतीति। तस्मादुभयमेतद्वक्तव्यम्। कुञ्चाह्रस्वत्वं चेति॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकर
णमहाभाष्ये चतुर्थाध्यायस्य द्वितीये पादे प्रथममाह्निकम्॥

इति ह्रस्वो नान्तस्य च पदत्वान्नलोपः सिध्यतीति मन्वान आह। यदि पुनरयमिति। क एष इति। आगमादेशौ सह भवत इत्युच्य
माने गौरवप्रसङ्ग इति मन्यते। निपातनादिति। गण एव कुञ्चाह्रस्वत्वं च तस्मिन्नलोपश्चेत्युच्चारणादित्यर्थः। यद्धितदिति। के
ण इत्यत्र कप्रत्ययस्य ग्रहणं न तु वर्णमात्रस्य यतस्तदादिविधिः स्यादित्यर्थः॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्र
दीपे चतुर्थस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम्॥

CC-0. In Public Domain. Digitization by eGangotri

भा·कै शेषे॥ शेषग्रहणमन्तरेणापत्यादीनांचातुरर्थपर्यन्तानांनिवृत्तत्वाद्वक्ष्यमाणेषुजातादिषुघादयःसिध्यन्तीतिमत्वापृच्छति। ४२२
७० कःशेषइति।इतरः शिष्यबुद्धिपरीक्षार्थंशेषंदर्शयति।अपत्यादिभ्यइति।येनाभिप्रायेणपृष्टवांस्तेनैवपुनःपृच्छति।किमर्थमिति।स्वार्थेमाभूवन्निति।अर्थानिर्देशेहिस्वार्थेघादिप्रसङ्गोविप्रकर्षात्तुजातादिभिर्घादीनांसंबन्धोनस्यादितिभावः।अपत्यादिष्विति।प्राग्दीव्यतइतिविशिष्टावधिपरिच्छिन्नार्थाश्रयेणाणादीनांविधानादितिभावः।इमेपीति।घादिविधानवाक्येष्वर्थनिर्देशाभावात्।तत्रजातइत्यादिष्वर्थनिर्देशवाक्येषुप्रत्ययानुपादानात्परस्पराकाङ्क्षावशादेकवाक्यतायांसत्यांजातादि

शेषे॥ शेषइत्युच्यते।कःशेषोनाम।अपत्यादिभ्यश्चातुरर्थपर्यन्तेभ्योन्येर्थाःसशेषः।किमर्थंपुनःशेषग्रहणंक्रियते।शेषेघादयोयथास्युःस्वार्थेमाभूवन्निति।नैतदस्तिप्रयोजनम्।इदंतावदयंप्रष्टव्यः।अणादयःस्वार्थेकस्मान्नभवन्तीति।अपत्याद्यर्थेष्वणादयोविधीयन्तेतेनस्वार्थेनभविष्यन्ति।इमेपितर्हिजातादिष्वर्थेषुविधीयन्तेतेनस्वार्थेनभविष्यन्ति।कथंपुनरिहोच्यमानाघादयोजातादिष्वर्थेषुशक्याविज्ञातुम्।अनुवर्तिष्यन्तेतत्रघादयः।यद्यनुवर्तिष्यन्तेघादयः।यायापरापराप्रकृतिस्तस्यास्तस्याःपूर्वेपूर्वेप्रत्ययाःप्राप्नुवन्ति।एवंतर्हिजातादिष्वर्थेषुघादीनपेक्षिष्यामहे।अयुक्ताएवंबहूनोपेक्षा।अपेक्षमाणोयमनन्तरंयोगमपेक्षेत।बहूनाप्यपेक्षाभवति।तद्यथा।कषादिषुयथाविध्यनुप्रयोगइति।ससामान्यकंसविशेषकंसर्वमपेक्षते।अथवापुनरस्त्वनुवृत्तिः।ननुचोक्तंयायापरापराप्रकृतिस्तस्यास्तस्याःपूर्वेपूर्वेप्रत्ययाःप्राप्नुवन्ति।नैषदोषः।संबन्धमनुवर्तिष्यते॥ राष्ट्रावारपाराद्घखौ॥ ग्रामाद्यखञौ॥ राष्ट्रावारपाराद्घखौ।कत्र्यादिभ्योढकञ्।राष्ट्रावारपाराद्घखौ।ग्रामाद्यखञाविति ॥

ष्वेवघादयोभविष्यन्तिनतुस्वार्थइत्यर्थः।एवंतर्हीति।तत्रजातइत्यादिषुप्रत्ययानिर्देशादवश्याकाङ्क्षितत्वाद्घादयइतिभावः।अयुक्तेति।बहूनांवस्तुनोपेक्षानयुक्ता।अनन्तरेणैवप्रत्ययेनाकाङ्क्षाविच्छेदसंभवादितिभावः।अनन्तरमिति।विभाषापूर्वाह्णापराह्णाभ्यामित्येतदित्यर्थः।कषादिष्विति।यथात्रकषादिष्वितिवचनेनापेक्षाप्रतिपाद्यतेतथेहापियोगविभागसामर्थ्यात्प्रत्ययसमुदायापेक्षाभविष्यतीतिमन्यते।ससामान्यकमिति।उपमानेकर्मणिचेत्यत्रधातुसामान्यंप्रकृतित्वेनोप रामः
दीयतेऽन्यत्रतुविशेषः।ततश्चसर्वस्यैवापेक्षाभविष्यतीत्यर्थः।अथवेति।स्वरितत्वादितिभावः ॥ ७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रतिषेधादिति। पूर्वविप्रतिषेधादितिभावः। नवेति। अनिष्टप्रसङ्गादिप्रतिषेधआश्रयितुंनयुक्तः। परशब्दस्यव्यवस्थाविषयस्यतत्रग्रहणादिष्टवाचीसंगृह्यतइतिचेदिष्टानिष्टत्वस्यवचनादिनादुर्ज्ञानत्वात्तद्ग्रहणस्यायुक्तत्वात्। अणपवादत्वादिति। नाप्राप्तेऽणिविधीयमानाघादयोऽपत्यादिषुप्यणंबाधेरन्निति शेषाधिकारःकर्तव्यइत्यर्थः। इदानींभाष्यकारोऽसत्यपिशेषाधिकारेज्ञापकेनापत्यादिषुशेषाधिकारप्रत्याख्यानायघादीन्व्यावर्तयति। नैषदोषइति। फेश्छेचे

अतउत्तरंपठति। शेषवचनंघादीनामपत्यादिषुप्रसङ्गार्थम्। शेषवचनंक्रियते। शेषेघादयोयथास्युः। अपत्यादिषुमाभूवन्निति। कथंचप्राप्नुवन्ति। तस्येदंवचनात्प्रसङ्गः। तस्येदंविशेषाह्येतेअपत्यंसमूहोनिवासेविकारइति। विप्रतिषेधात्सिद्धम्। अणादयःक्रियन्तांघादयइति। किमत्रकर्तव्यम्। अणादयोभवन्तिविप्रतिषेधेन। नवापरत्वाद्घादीनाम्। नवाएषयुक्तोविप्रतिषेधः। किंकारणम्। परत्वाद्घादीनाम्। विप्रतिषेधेपरमित्युच्यते। पूर्वेचाणादयःपरेघादयः। परेणादयःकरिष्यन्ते। सूत्रविपर्यासःकृतोभवति। अणपवादत्वाच्चाणविषयेघादिप्रसङ्गः। अणपवादत्वाद्घादीनामणविषयेघादयःप्राप्नुवन्ति। नैषदोषः। आचार्यप्रवृत्तिर्ज्ञापयति अणविषयेघादयोनभवन्तीति। यदयंफेश्छचेतिफिञन्ताच्छंशास्ति। नैतदस्तिज्ञापकम्। फिनर्थमेतत्स्यात्। सौवीरगोत्रेष्वितिवर्तते। नचफिन्नन्तंसौवीरगोत्रमस्ति। गोत्रग्रहणंसामूहिकेषुज्ञापकम्। दैवयातवग्रहणंवैषयिकेषु ॥

ति। फेर्वेत्येवंठग्विधानार्थंकर्तव्यम्। तत्रठकामुक्तेपक्षेवृद्धाच्छइतिच्छोभविष्यतिनार्थश्छविधानेन। तत्तुज्ञापकार्थंसंपद्यतेघादयोऽपत्यादिषुनभवन्तीत्यस्यार्थस्य। अपत्यएवज्ञापकंस्यादित्याशङ्क्यज्ञापकान्तराण्याह। गोत्रग्रहणमिति। गोत्रोक्षोष्ट्रोरभ्रेत्येतदितिभावः। गोत्रचरणाद्वुञितिसमूहइदमर्थान्तर्भूतेवुञिसिद्धेपुनर्वुञविधानंयथोक्तार्थज्ञापनम्। दैवयातवग्रहणमिति। राजन्यादिगणपठितमितिभावः। दैवयातूनामपत्यानिदैवयातवाइतिगोत्रप्रत्ययान्तमेतत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वाल्लायणग्रहणमिति। अरीहणादिगणपठितवुञ्विधानार्थमिति भावः। यद्यपि न्यायेनापत्यादिषु घाद्यभावः सिध्यति। तथापि विस्पष्टप्रतिपत्तये भाष्यकारेण ज्ञापकान्युपन्यास्यत्। तथाहि। विशेषशब्दसंनिधाने सामान्यशब्द उपादीयमानस्तन्नैव विशेषेऽवतिष्ठते। यथा वृक्षः शिंशपेति। विशेषान्तरेषु वा। यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति। तस्येदमिति सामान्यमपत्यादिशब्दसंनिधावुपादीयमानं यद्यपत्यादिष्वेव वर्तेत तदा सामान्योपादानमनर्थकमेव स्यात्। तस्मादपत्यादिविशेषपरिहारेण विशेषान्तराणि तस्येदमित्यनेन ग्राहीष्यन्ते। यदि तर्हि शेषग्रहणं प्रत्ययार्थव्याख्यापकं तदा तस्य लक्षणतया यानि शब्दरूपाणि साध्यानि तानि कथं सिध्यन्ति। चक्षुषा गृह्यते चाक्षुषं रूपम्। श्रावणः शब्दः चतुर्भिरुह्यते चातुरं शकटम्। आ

श्वाल्लायणग्रहणं नैवासिकेषु॥ राष्ट्रावारपाराद्घखौ॥ अवारपारादिगृहीतादपि॥ अवारपारादिगृहीतादपीति वक्तव्यम्। अवारपारीणः। पारीणः। अवारीणः॥ विपरीताच्च॥ विपरीतादपीति वक्तव्यम्। पारावारीणः॥ कन्यादिभ्यो ढकञ्॥ ग्रामाच्च॥ ग्रामाच्चेति वक्तव्यम्। ग्रामेयकः। न तर्हि वक्तव्यम्। न वक्तव्यम्। कन्यादिभ्यो ढकञित्यत्र ग्रामादित्येतदनुवर्तिष्यते॥ कुलकुक्षिग्रीवाभ्यः॥ अयं योगः शक्योऽवक्तुम्। कथं कौलेयकः कौक्षेयकः ग्रैवेयकः। कुलस्यापत्यं कुक्षिग्रीवात्तु कन्ढञः। कुलस्यापत्यं कौलेयक इति भविष्यति। कुक्षिग्रीवाद्पिठञन्तात्कन्भविष्यति। कापिश्याः ष्फक्। बाह्वुर्दिपर्दिभ्यश्चेति वक्तव्यम्। बाह्लायनी। और्दायनी। पार्दायनी। रङ्कोरमनुष्येऽण्च। अमनुष्य इति किमर्थम्। राङ्कवो मनुष्यः। रङ्कोरमनुष्यग्रहणानर्थक्यं मनुष्यतत्स्थयोर्वुञ्विधानात्। रङ्कोरमनुष्यग्रहणमनर्थकम्। किं कारणम्। मनुष्यतत्स्थयोर्वुञ्विधानात्। अयं मनुष्यतत्स्थयोर्वुञ्विधीयते॥

श्चार्थः। दृषदि पिष्टा दार्षदाः सक्तवः। उलूखले क्षुण्ण औलूखलो यावकः। चतुर्दश्यां दृश्यते चातुर्दशं रक्ष इति। तस्येदमिति संस्कृतं भक्षा इति च सिद्धत्वान्नार्थस्तदर्थेन शेषवचनेन। तत्र जात इत्यत्र तु सूत्रे स्वलक्षणत्वमाश्रित्यैतेषां सिद्धिमभिधास्यति नागनाथः। कुल॥ कुलस्यापत्यमिति। पुनः प्रत्ययार्थत्वे स्वकुलं प्रकृत्यर्थः संपद्यते। कन्निति। स्वार्थिक इति भावः॥ कापि॥ बाह्वुर्दीति। अरडुादपीति वुञि प्राप्ते ष्फगारभ्यते इत्याहुः। रङ्कोः। रङ्कुर्जनपदस्ततः प्राग्दीव्यतोऽणित्यण्प्राप्तस्ततो वृद्धादपीति वुञ्प्राप्तः ततओर्देशे ठञ्प्राप्तः ततः कोपधादण् ततः कच्छादिभ्यश्चेत्यण्प्राप्तस्ततः ष्फगणौ विधीयेते। कच्छादिषु कोपधत्वादेवाणि सिद्धे रङ्कुशब्दस्य पाठो मनुष्यतत्स्थयोर्वुञ्विधानार्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सबाधक इति। विशेषविहितत्वादिति भावः। अमनुष्ये मनुष्यस्य इति। चूडादावित्यर्थः। यदि हि मनुष्यस्यैव वुञं ष्फगणो न बाधेत तर्हि अमनुष्यप्रतिषेधोऽनर्थकः स्यात्। कच्छादिभ्यो ण्वचनादिति। तत श्चैकविषयत्वात्पर्यायेण ष्फगणो भविष्यत इति ना। र्थोण्वचनेनेत्यर्थः। तदेवं द्वयोरप्येतयोरेव वक्तव्यम्। यत्तु कैश्चिदभ्यधायि। अमनुष्यग्रहणेन पर्युदासाश्रयेण मनुष्यसदृशे प्राणिनि ष्फग्विधीयते नाप्राणिनि। अत एव विशेषविहितत्वाद्णो बाधकः स्यादित्यण्ग्रहणमपि कृतमिति। तदयुक्तम्। न हि भाष्यकारवार्त्तिककाराभ्यामभियुक्ततरः शब्दविषये कश्चिदस्ति। अव्ययात्॥ अमेहेति। योऽव्ययात्त्यब्विधिः सोऽमादिभ्य एव स्मृ

सबाधको भविष्यति। एवं तर्हि ज्ञापयत्याचार्य्यः अमनुष्ये मनुष्यस्य ष्फगणो भवत इति। अमनुष्ये मनुष्यस्य ष्फगणोऽज्ञापकमिति चेन्नानिष्टत्वात्। अमनुष्ये मनुष्यस्य ष्फगणोऽज्ञापकमिति चेत्तन्न। किं कारणम्। अनिष्टत्वात्। न ह्यमनुष्ये मनुष्यस्य ष्फगणाविष्येते। किं तर्हि। वुञेवेष्यते। अण्ग्रहणं च कच्छादिभ्यो ण्वचनात्। अण्ग्रहणं चानर्थकम्। किं कारणम्। कच्छादिभ्यो ण्वचनात्। कच्छादिपाठादण्भविष्यति॥ अव्ययात्त्यप्॥ परिगणनं कर्त्तव्यम्॥ अमेहक्वतसित्रेभ्यस्त्यब्विधिर्योऽव्ययात्स्मृतः॥ अमा। अमात्यः। इह। इहत्यः। क्व। क्वत्यः। तसि। ततस्त्यः। त्र। तत्रत्यः। इतरथा ह्यौत्तराहौपरिष्टपारतानां प्रतिषेधो वक्तव्यः स्यात्। औत्तराहः। औपरिष्टः। पारतः॥ त्यब्नेर्ध्रुवे॥ त्यब्नेर्ध्रुवे वक्तव्यः। नियतं भवः नित्यः॥ निसो गते त्यब्वक्तव्यः। निष्ट्यः॥ अरण्याण्णः॥ अरण्याण्णो वक्तव्यः। आरण्याः सुमनसः॥ दूरादेत्यः॥ दूरादेत्यो वक्तव्यः। दूरेत्यः॥ उत्तरादाहञ्॥ उत्तरादाहञ्वक्तव्यः। औत्तराहः॥ अव्ययात्त्यप्याविष्ट्यस्योपसंख्यानं सछन्दसि॥ अव्ययात्त्यविधावाविष्ट्यस्य छन्दस्युपसंख्यानं कर्त्तव्यम्। आविष्ट्यो वर्द्धते चारुरासु॥ अव्ययतीररूप्योत्तरपदोदीच्यग्रामकोपधविधेर्वृद्धाच्छो विप्रतिषेधेन॥ अव्ययतीररूप्योत्तरपदोदीच्यग्रामकोपधविधेर्वृद्धाच्छो भवति विप्रतिषेधेन। अव्ययात्त्यब्भवतीत्यस्यावकाशः। अमात्यः। वृद्धाच्छस्यावकाशः। शालीयो मालीयः। आरादुभयं प्राप्नोति।

तदित्यर्थः। अमाशब्दः सहार्थे सामीप्ये च वर्त्तते। तेन समीपे भवतीत्यमात्यः। औत्तराह इति। आहि च दूरे उत्तराच्चेत्याहिप्रत्ययः। उत्तराहि भवः। औपरिष्टाद्भवः। परतो भव इत्यण्। अव्ययानां भमात्र इति टिलोपः। परतः शब्दो विभाषा परावराभ्यामित्यतसुजन्तः। त्यब्नेर्ध्रुवे इति। ध्रुवं नित्यमुच्यते। निसो गत इति। निर्गतो वर्णाश्रमेभ्य इति निष्ट्यः चाण्डालादिः। ह्रस्वात्तादौ तद्धित इति सकारस्य मूर्द्धन्य सकारस्य ष्टुत्वम्। अरण्याण्ण इति। अणि सति ङीप्स्यादिति णो विधीयते। आविष्ट्य इति। आविःशब्दादृद्धाच्छे प्राप्ते त्यब्विधिः आविर्भूत आविष्ट्यः ॥

भा·कै आरातीय इति। असति परिगणने ऽत्र प्राप्नोति। योपधलक्षण इति। धन्वयोपधाद्वुञिति वुञ्। परत्वग्रहणेन बाधकत्वं ल ४२२
७२ क्ष्यते। अपवादत्वादिह छस्य वुञ् बाधकः। वार्त्तिककारेण तु प्राप्तिमात्राश्रयेण छस्य रूप्योत्तरपदलक्षणस्य च ञस्य वि
प्रतिषेध उक्तः। शिवपुरमिति। शिवस्य पुरमिति षष्ठीसमासः। समासस्वरेणान्तोदात्तत्वम्। प्रस्थपुरवहान्ताच्चेत्यत्र वृद्धा
त्प्राचामित्यतो वृद्धाधिकारादत्र वुञ् न भवति। कोपधादिति। प्रस्थोत्तरपदपलद्यादिकोपधादणित्ययमण् विवक्षितः। एत

आरातीयः। तीरोत्तरपदादञ् भवतीत्यस्यावकाशः। कारवतीरः। कारवतीरम्। छस्य स एव। वायसतीरादुभ
यं प्राप्नोति। वायसतीरीयः। रूप्योत्तरपदाद्ञ् भवतीत्यस्यावकाशः। चणाररूप्यं। चाणाररूप्यम्। छस्य स
एव। माणिरूप्यादुभयं प्राप्नोति। तं चापि छं परत्वाद्योपधलक्षणो वुञ् बाधते। माणिरूप्यकः। उदीच्यग्रामाच्च ब
हूचोन्तोदात्तादञ् भवतीत्यस्यावकाशः। शिवपुरं। शैवपुरम्। छस्य स एव। वाडवकर्षादुभयं प्राप्नोति। वाडव
कर्षीयः। कोपधादण् भवतीत्यस्यावकाशः। निलीनकं। नैलीनकः। छस्य स एव। औलूकादुभयं प्राप्नोति। औलूकी
यः। तेभ्यष्ठञ्ञिठौ। तेभ्यस्त्वबादिभ्यष्ठञ्ञिठौ भवतो विप्रतिषेधेन। अन्यथा त्वञ् भवतीत्यस्यावकाशः। अमात्यः।
ठञ्ञिठोरवकाशः। कारतन्तविकी। कारतन्तविका। आरान्नाम वाहीकग्रामस्तस्मादुभयं प्राप्नोति। आरात्की। आरा
त्का। तीरोत्तरपदादञ् भवतीत्यस्यावकाशः। कारवतीरः। कारवतीरी। ठञ्ञिठयोः स एव। कास्तीरं नाम वाहीकग्राम
स्तस्मादुभयं प्राप्नोति। कास्तीरिकी। कास्तीरिका। रूप्योत्तरपदाद्ञो भवतीत्यस्यावकाशः। चणाररूप्यं। चाणार
रूप्यम्। ठञ्ञिठयोः स एव। दासरूप्यं नाम वाहीकग्रामस्तस्मादुभयं प्राप्नोति। तौ चापि ठञ्ञिठौ परत्वाद्योपधलक्षणो
वुञ् बाधते। दाशरूप्यकः॥ उदीच्यग्रामाच्च बहूचोन्तोदात्तादञ् भवतीत्यस्यावकाशः। शिवपुरं। शैवपुरम्। ठञ्ञिठ
योः स एव। शाकलं नाम वाहीकग्रामस्तस्मादुभयं प्राप्नोति। शाकलिकी। शाकलिका ॥

स्मादिपरश्छः। यस्तु कोपधादणित्यण् स जनपदवुञोऽपवादः। तस्यापि वृद्धादकेकान्तखोपधादित्यत्र कोपधग्रहणात् छो बा
धकः परत्वात्। औलूकादिति। उलूका अस्मिन् सन्तीति तदस्मिन्नस्तीत्यण्। औलूको नाम ग्रामः। तेभ्य इति। ये छस्य बाध्या अञा
दिलक्षणाः प्रत्ययास्तेभ्य इत्यर्थः। आरात्कीति। परिगणनानपेक्षयाऽयं विप्रतिषेध उक्तः। शाकलमिति। शकलानि सन्त्यस्मिन्नि रामः
तिपूर्ववदण् ॥ ७२

CC-0. In Public Domain. Digitization by eGangotri

कोपधलक्षणादिति। वृद्धाच्छ केकान्तेत्यत्राकेकान्तग्रहणे कोपधग्रहणं कर्तव्यमिति विहितः। नवेति। यदुक्तं तेभ्यष्ठञ्ञिठाविति तन्निराकरोति। अव्ययादिलक्षणानां प्रत्ययानां परत्वाच्छेन बाधितानां छापवादैः ठञादिभिरुत्सृष्टबलैः सह संप्रधारणा नास्तीत्यर्थः। अञं बाधत इति। उदीच्यग्रामलक्षणमित्यर्थः। तस्मादिति। उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्कोपधादिति वक्तव्यमित्यर्थः। भाष्यकारो विप्रतिषेधं समर्थयितुमाह। नवक्तव्य इति। दाक्षिकर्षुक इति। दाक्षिकर्षूर्नाम वाहीकग्रामः तत्र भव इ

कोपधादण्भवतीत्यस्यावकाशः। निलीनक। नैलीनकः। ठञ्ञिठयोः स एव। सौसुकं नाम वाहीकग्रामस्तस्मादुभयं प्राप्नोति। तौ चापि ठञ्ञिठौ परत्वात्कोपधलक्षणश्छो बाधते। सौसुकीयः। नवा ठञादीनां छापवादत्वात्तद्विषये चाभावादितरेषाम्। नवार्थो विप्रतिषेधेन। किं कारणम्। ठञादीनां छापवादत्वात्।

ठञादयश्छापवादास्तद्विषये चाभावादितरेषाम्। तद्विषये छविषये त्यबादीनामभावः। कोपधादणः पुनर्वचनमन्यनिवृत्त्यर्थम्। अयं चाप्ययुक्तो विप्रतिषेधः। योऽयं कोपधादणः छस्य च। किं कारणम्। कोपधादणः पुनर्वचनमन्यनिवृत्त्यर्थम्। सिद्धोऽत्राण् उत्सर्गेणैव। तस्य पुनर्वचन एतत्प्रयोजनं य एतस्य बाधकास्तद्बाधनार्थम्। स यथैव तदपवादमञं बाधते। एवं छमपि बाधेत। तस्मादन्तोदात्ते कोपध प्रतिषेधः। तस्मादन्तोदात्ते कोपधादञः प्रतिषेधो वक्तव्यः। न वक्तव्यः। मध्येऽपवादाः पूर्वान्विधीन्बाधन्त इत्येवं कोपधादण् अञं बाधिष्यते छं न बाधिष्यते॥ छादेर्देशे कालाट्ठञ्। छादेर्देशे कालाट्ठञित्येतद्भवति विप्रतिषेधेन। छस्यावकाशः। शालीयो मालीयः। ओर्देशे ठञ्भवतीत्यस्यावकाशः। निषादकर्षूर्नाम देशः। नैषादकर्षुकः। इहोभयं प्राप्नोति। दाक्षिकर्षुकः। कालाट्ठञ्भवतीत्यस्यावकाशः। आर्द्धमासिकम्। सांवत्सरिकम्। छस्य स एव। मासादुभयं प्राप्नोति। मासिकम्॥ नक्षत्रादण्॥ नक्षत्रादण्भवति छाद्विप्रतिषेधेन। अणोऽवकाशः। तैषः। पौषः। छस्य स एव। स्वातेरुभयं प्राप्नोति। सौवातः। अव्ययाट्ट्युट्युलौ छाद्भवतो विप्रतिषेधेन। ट्युट्युलोरवकाशः। दोषातनम्। दिवातनम्। छस्य स एव। प्रातःशब्दादुभयं प्राप्नोति। प्रातस्तनम्॥ शरीरावयवाद्यत् छाद्भवति विप्रतिषेधेन। यतोऽवकाशः। दन्त्यम्। ओष्ठ्यम्। छस्य स एव। पादादुभयं प्राप्नोति ॥

तिरञाद्दसुसुक्तान्तात्कः केण इति ह्रस्वः। सौवात इति। अतेः सुपूर्वाद् ज्यतिस्यामितीण्प्रत्ययः। स्वातिना युक्तः काल इत्यण्। लुबविशेष इति लुप्। स्वातौ भव इति सन्धिवेलादिसूत्रेणाण्। जातेऽर्थे तु लुकाभाव्यम्। श्रविष्ठाफल्गुनीत्यादिना ॥

CC-0. In Public Domain. Digitization by eGangotri

पद्यमिति। पद्यत्यतदर्थइतिपद्गावः। अक्रूरवर्ग्यइति। अक्रूरोनामक्षत्रियःभगवान्वासुदेवोवा। नातानतिकइति। नतोऽनुदात्तः। अनतउदात्तः। ततोद्वन्द्वः। समासस्वरेणान्तोदात्तः। सामस्तंनामशास्त्रम्। आपणिकमिति। आपणादागतमितिठक्। स्वासृकमिति। उणादीनांकचिद्व्युत्पत्तिनिमित्तकार्याभावान् नस्वाभ्यामितिनप्रवर्त्तते। शास्तृकमिति। शासेस्तृन्तृचौ। शंसिसदादिभ्यः संज्ञायांचानिटा। विवितितृन्प्रत्ययः। पायसिकइति। पयसिसंस्कृतइत्यणत् तष्ठक्। गार्गकइति। गार्ग्योभक्तिरस्येतिवुञ्। आपत्यस्येतियलोपः। मालवकइति। मालवस्यापत्यम्। वृद्धेत्कोसलेतिञ्यङ्। पूर्ववद्वुञ्यलोपौ। भाल्लविनइति। भल्लुनाप्रोक्तमधीयतइतिपुराणप्रोक्तेष्वितिणिनिः। तदन्तादध्येतर्यण्। तस्यप्रोक्तालुगितिलुक्। आरुणिनइति। अरुणिर्वैशंपायनान्तेवासी। तेनप्रोक्तंछन्दोधीयतइतिणिनिः। शाट्यायनिनइति। शटस्यापत्यंशाट्यः। तस्यापत्यंयुवायञिञोश्चेतिफक्। शाट्यायनेनप्रोक्तंब्राह्मणमधीयतइत्यर्थविवक्षायांयूनिलुक्। फक्फिञोरन्यतरस्यामितिपक्षेलुगभावः। पुराणप्रोक्तेष्वितिणिनिः॥

पद्यम्। वर्गान्ताच्चाशब्देयत्खौछाद्भवतोविप्रतिषेधेन। यत्खयोरवकाशः। अक्रूरवर्ग्यः। अक्रूरवर्गीणः। छस्यसएव। वासुदेववर्गादुभयंप्राप्नोति। वासुदेववर्ग्यः। वासुदेववर्गीणः। बह्वचोन्तोदात्ताट्ठञ्छाद्भवतिविप्रतिषेधेन। ठञोवकाशः। नतानत। नातानतिकः। छस्यसएव। सामस्तशब्दादुभयंप्राप्नोति। सामस्तिकः। आयस्थानेभ्यष्ठक्छाद्भवतिविप्रतिषेधेन। ठकोऽवकाशः। शौल्किकम्। गौल्मिकम्। छस्यसएव। आपणादुभयंप्राप्नोति। आपणिकम्। विद्यायोनिसंबन्धेभ्योवुञ् छाद्भवतिविप्रतिषेधेन। वुञोऽवकाशः। औपाध्यायकम्। पैतामहकम्। छस्यसएव। द्वाभ्यामुभयंप्राप्नोति। आचार्यकम्। मातुलकम्। ऋतष्ठञ् छाद्भवतिविप्रतिषेधेन। ठञोऽवकाशः। हौतृकम्। स्वासृकम्। छस्यसएव। द्वाभ्यामुभयंप्राप्नोति। शास्तृकम्। भ्रातृकम्। रूप्यमयटौछाद्भवतोविप्रतिषेधेन। रूप्यमयटोरवकाशः। देवदत्तरूप्यम्। देवदत्तमयम्। छस्यसएव। वायुदत्तादुभयंप्राप्नोति। वायुदत्तरूप्यम्। वायुदत्तमयम्। अचित्ताट्ठक्छाद्भवतिविप्रतिषेधेन। ठकोवकाशः। आपूपिकः। शाष्कुलिकः। छस्यसएव। पायसादुभयंप्राप्नोति। पायसिकः। गोत्रक्षत्रियाख्येभ्योबहुलंवुञ् छाद्भवतिविप्रतिषेधेन। वुञोवकाशः। ग्लौचुकायनकः। त्रैगर्त्तकः। छस्यसएव। द्वाभ्यामुभयंप्राप्नोति। गार्गकः। वात्सकः। मालवकः। णिनिरन्तेवासिब्राह्मणेभ्यश्छाद्भवति विप्रतिषेधेन। णिनेरवकाशः। हारिद्रविणः। तौम्बुरविणः। भाल्लविनः। छस्यसएव। द्वाभ्यामुभयंप्राप्नोति। आरुणिनः। शाट्यायनिनः। पत्रपूर्वादञ्छाद्भवतिविप्रतिषेधेन। अञोवकाशः। उष्ट्र। औष्ट्रम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

औष्ट्रस्थमिति। रथाद्यत् पत्रपूर्वादित्यञ्। वामीति। वामीवडवा तस्या बाह्यमिति पत्राध्वर्य्वित्यञ्। श्वावराहिकेति। श्वा च वराहश्चेति द्वन्द्वः। येषां च विरोधः शाश्वतिक इत्येकवद्भावः। शुनो दन्तदंष्ट्रेति दीर्घः। ततो वैरे वुन्। काण्वा इति। कण्वो गर्गादिः यञन्तः। तस्य दण्डमाणवादिलक्षणो वुञ्। तत्र न दण्डमाणवान्तेवासिष्विति निषिद्धः। पुरस्तादपवादा इति न्यायेनाणमेव बाधते न वुञमिति विप्रतिषेधउ

औष्ट्ररथम्। छस्य स एव देशे उभयं प्राप्नोति। वामी। वामम्। वामीरथम्। द्वन्द्वाद् वुन्वैरमैथुनिकयोः छाद्भवति विप्रतिषेधेन। वुनोऽवकाशः। अहिनकुलिका। छस्य स एव देशे उभयं प्राप्नोति। काकोलूकिका। श्वावराहिका। गोत्रचरणाद् वुञ् छाद्भवति विप्रतिषेधेन। वुञोऽवकाशः। ग्लौचुकायनकम्। काठकम्। कालापकम्। छस्य स एव देशे उभयं प्राप्नोति। गार्गकम्। वात्सकम्। मौदकम्। पैप्पलादकम्। कण्वादिञोऽणिविधेः। कण्वादिभ्योऽण् भवति इञोऽण् भवतीत्येतस्माद् वुञ् भवति विप्रतिषेधेन। कण्वादिभ्योऽण् भवति इञोऽण् भवतीत्यस्यावकाशः। काण्वाः। दण्डमाणवाः। दाक्षाः। दण्डमाणवाः। वुञः स एव देशे उभयं प्राप्नोति। काण्वकम्। दाक्षकम्। ठञ्ञिठाभ्यामोर्देशे ठञ्। ठञ्ञिठाभ्यामोर्देशे ठञ् भवति विप्रतिषेधेन ठञ्ञिठयोरवकाशः। कारतन्तविकी। कारतन्तविका। ओर्देशे ठञ् भवतीत्यस्यावकाशः। निषादकर्षूः। नैषादकर्षुकः। इहोभयं प्राप्नोति। नापितवास्तुकः। ठञ् भवति विप्रतिषेधेन। नवा ठञो नवकाशत्वात्। नवार्थो विप्रतिषेधेन। किं कारणम्। ठञोऽनवकाशत्वात्। अनवकाशष्ठञ् ठञ्ञिठौ बाधिष्यते। ननु चेदानीमेवावकाशः प्रक्लृप्तः। यद्वृद्धमनुवर्णान्तं वाहीकग्रामश्च स ठञ्ञिठयोरवकाशः। यदवृद्धमवर्णान्तं न च वाहीकग्रामः उस ठञोऽवकाशः। यद्वृद्धमुवर्णान्तं वाहीकग्रामश्च तस्मादुभयं प्राप्नोति। एवं तर्हि नायमस्य विप्रतिषेधस्योपालम्भः। कस्य तर्हि। वृद्धादोर्देशे कालाट्ठञित्येतस्य। ननु च तत्राप्यवकाशः प्रक्लृप्तः। यद्वृद्धमनुवर्णान्तं स छस्यावकाशः। यदवृद्धमुवर्णान्तं स ठञोऽवकाशः। यद्वृद्धमुवर्णान्तं देशश्च तस्मादुभयं प्राप्नोति। एवं तर्हि वृद्धात् प्राचामित्यनेन वृद्धग्रहणेन किं क्रियते। यावद्ब्रूयात् पूर्वस्मिन्योगे वृद्धाच्चावृद्धाच्चेति। यदेतस्मिन्योगे वृद्धग्रहणं तदनवकाशं तस्यानवकाशत्वाद्युक्तो विप्रतिषेधः ॥

क्तः। एवं तर्हीति। छठञोरपि विप्रतिषेधो नास्तीति दर्शयति। वृद्धात्प्राचामिति। ठञो विशेषविहितत्वादित्यर्थः। यावद्ब्रूयादिति। यदि वृद्धाच्चेत्यतो वृद्धग्रहणं ओर्देश इत्यत्रानुवर्तेत तदा वृद्धात्प्राचामिति सूत्रं न कुर्यात्। एतद्धि नियमार्थं कृतं प्राग्देशवाचिनो वृद्धादेव यथा स्यादवृद्धान्मा भूदिमाल्लवास्तव इति। न च वृद्धग्रहणानुवृत्ताववृद्धात्प्राप्तिष्ठञोऽस्तीति किं नियमार्थेन सूत्रेणेत्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

वुञ्वेति। परत्वादितिभावः। कोपधा दण इति। जनपदवाचिनः कोपधाद्योण् विधीयते तस्मादित्यर्थः। आरीहणकमिति।
अरीहणेननिर्वृत्तमितिवुञ्छणकठेतिवुञ्। अयंचनजनपदवाचीतिकोपधादणोनविषयः। ब्राह्मणकइति। ब्राह्मणको
सिकेसंज्ञायामित्यत्रब्राह्मणा आयुधजीविनोयस्मिन्देशेतस्मिन्नर्थेब्राह्मणकशब्दोनिपातितः। धन्ववुञ इति। धन्वश

योपधप्रस्थादीनांवुञ्ठञ्ञिठाभ्यांभवतिविप्रतिषेधेन। योपधाद्वुञ्भवतीत्यस्यावकाशः। साङ्काश्यः। साङ्का
श्यकः। काम्पिल्यकः। ठञ्ञिठयोः सएव। दाशरूप्यंनामवाहीकग्रामः तस्मादुभयंप्राप्नोति। दाशरूप्यकः। प्र
स्थान्ताद्वुञ्भवतीत्यस्यावकाशः। मालाप्रस्थ। मालाप्रस्थकः। ठञ्ञिठयोः सएव। पातालप्रस्थंनामवाहीकग्रा
मस्तस्मादुभयंप्राप्नोति। पातालप्रस्थिकः। पुरान्ताद्वुञ्भवतीत्यस्यावकाशः। काञ्चीपुर। काञ्चीपुरकः। ठञ्ञिठ
योः सएव। नान्दीपुरंनामवाहीकग्रामस्तस्मादुभयंप्राप्नोति। नान्दीपुरकः। वहान्ताद्वुञ्भवतीत्यस्यावकाशः।
वातवह। वातवहकः। ठञ्ञिठयोः सएव। कौक्कुटीवहंनामवाहीकग्रामस्तस्मादुभयंप्राप्नोति। कौक्कुटीवहकः।
ओष्ठञोवुञ्भवतिविप्रतिषेधेन। ओष्ठञोवकाशः। नैषादकर्षुकः। वुञः सएव। आप्रीतिमायोरुभयंप्राप्नोति।
आप्रीतिमायवकः। जनपदानामकाणोओष्ठञोभवतोविप्रतिषेधेन। अकस्यावकाशः। अङ्गाः। आङ्गकः। ओष्ठ
ञः सएव। जिह्ववोनामजनपदस्तस्मादुभयंप्राप्नोति। जैह्ववकः। अणोवकाशः। ऋषिक। आर्षिकः। ओष्ठञः सएव। इ
क्ष्वाकवोनामजनपदस्तस्मादुभयंप्राप्नोति। ऐक्ष्वाकः। नवावुञपवादत्वादणः। नवार्थोविप्रतिषेधेन। किंकारणम्। वु
ञपवादत्वादणः। वुञपवादोण्। वुञ्चओष्ठञंबाधिष्यते। कोपधादणोकान्ताच्छः। कोपधादण्भवतीत्येतस्मादका
न्ताच्छोभवतिविप्रतिषेधेन। कोपधादण्भवतीत्यस्यावकाशः। निलीनक। नैलीनकः। अकान्ताच्छोभवतीत्य
स्यावकाशः। आरीहणक। आरीहणकीयः। ब्राह्मणकोनामजनपदस्तस्मादुभयंप्राप्नोति। ब्राह्मणकीयः। धन्व
वुञश्चछोभवतिविप्रति षेधेन। धन्वनोवुञ्भवतीत्यस्यावकाशः। पारेधन्व। पारेधन्वकः। छस्यसएव। आष्ट
कंनामधन्वतस्मादुभयंप्राप्नोति। आष्टकीयः। नवाछस्यपुनर्वचनं छापवादनिवृत्त्यर्थम् ॥

ब्दोमरुदेशवाची। पारेधन्वेति। धन्वनः पारमिति पारेमध्येषष्ठ्यावेत्यव्ययीभावः। अनश्चनपुंसकादन्यतरस्यामिति
पक्षेऽच्समासान्तः। आष्टकीय इति। वृद्धादकेकान्तेतिच्छः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येन्यद्रति।वुञादयः।स्वयथैवेति।ततश्चापवादत्वादेवठञो बाधकोनतुपरत्वादित्यर्थः॥जनपद॥तस्यावधिस्तदवधिरि
तिषष्ठीसमासाश्रयेणचोदयति।जनपदेति।अवयवमात्रादिति।योजनपदस्यावधिःसीमाअजनपदोपितस्मादपिप्राप्नो
तिविशेषानुपादानादित्यर्थः।मौञ्जोनामवाहीकेष्विति।सामीपिकमिदमधिकरणम्।तेनवाहीकग्रामेभ्यइतिठञ्ञि

नवार्थेविप्रतिषेधेन।किंकारणम्।ठञ्स्यपुनर्वचनंछापवादनिवृत्त्यर्थम्।सिद्धोत्रठञः।वृद्धाच्छइत्येव।तस्यपुनर्व
चनएतत्प्रयोजनम्।येन्येतदपवादाःप्राप्नुवन्तितद्बाधनार्थम्।स्वयथैवान्यांस्तदपवादान्बाधतेएवमिम
मपिबाधिष्यते। जनपदतदवध्योश्च॥जनपदतदवध्योर्वुञ्विधानेवयवमात्रात्प्रसङ्गः।जनपदतदवध्यो
र्वुञोविधानेअवयवमात्रात्प्राप्नोति।मौञ्जोनामवाहीकेषुग्रामस्तस्मिन्भवोमौञ्जीयः।एवंतर्हिजनपदादेव
जनपदावधेः।जनपदादितिचेद्वचनानर्थक्यम्।जनपदादितिचेदवधिग्रहणमनर्थकम्।जनपदादित्येवसिद्ध
म्।इदंतर्हिप्रयोजनम्।जनपदावधेर्वुञेवयथास्यात्।यदन्यत्प्राप्नोतितन्माभूत्।किंचान्यत्प्राप्नोति।ठञ्ः।गर्त्तो
त्तरपदात्छविधेर्जनपदाद्वुञ्पूर्वविप्रतिषिद्धमितिवक्ष्यतिसपूर्वविप्रतिषेधोनपठितव्योभवति॥अरण्या
न्मनुष्ये॥अत्यल्पमिदमुच्यते।मनुष्यइति॥पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विितिवक्तव्यम्।आरण्यकः
पन्थाः।आरण्यकोध्यायः।आरण्यकोन्यायः।आरण्यकोविहारः।आरण्यकोमनुष्यः।आरण्यकोहस्ती॥वागोम
येषु॥वागोमयेष्वितिवक्तव्यम्।आरण्यकाःगोमयाः।आरण्याःगोमयाः।विभाषाकुरुयुगंधराभ्याम्॥कुरुयु
गन्धरेभ्योवावचनान्मनुष्यतत्स्थयोर्वुञ्विधानम्॥कुरुयुगन्धरेभ्योवावचनान्मनुष्यतत्स्थयोर्वुञ्भवतद्भ
वतिविप्रतिषेधेन।कुरुयुगन्धरेभ्योवावचनस्यावकाशः।कौरवः।कौरवकः।यौगन्धरः।यौगन्धरकः।मनुष्य
तत्स्थयोर्वुञ्भवतीत्यस्यावकाशः।अन्येकच्छादयः।काच्छकोमनुष्यः।काच्छकमस्येक्षितम्।जल्पितम्।हसितम्।स्मि
तम्।इहोभयंप्राप्नोति।कौरवकोमनुष्यः।कौरवकमस्येक्षितम्।हसितम्।जल्पितम्।स्मितम्।वुञ्भवतिविप्र
तिषेधेन।नैषयुक्तोविप्रतिषेधः।नहिकुरुशब्दस्यान्येकच्छादयोऽवकाशः॥

ठौनभवतः।एवंतर्हीति।सचासाववधिस्तदवधिरितिकर्मधारयआश्रीयतेइत्यर्थः।कस्यासाववधिरितिचेत्प्रत्यासत्त्या
जनपदस्येतिविज्ञायते।वुञेवेति।त्रिगर्त्तेषुभवःत्रैगर्त्तकइत्यत्रैवेत्यर्थः॥विभाषा॥अन्येकच्छादयइति।समुदायेकार्ये
विधीयमानंकेषुचिदप्यवयवेषुप्रवर्त्तमानंसावकाशमेवेतिमन्यते।नहीति।सर्वएवावयवास्तत्रकार्यित्वेननिर्दिष्टाइतिभावः।

CC-0. In Public Domain. Digitization by eGangotri

सैषेति। ननुयुगन्धरशब्दादप्यवृद्धादपीतिनित्येवुञिसिद्धेन्तरेणापिविभाषाग्रहणंविकल्पोविज्ञास्यते। नैतदस्ति। युग न्धरान्नित्योवुञ्। अवृद्धादित्यनेनतुविभाषेत्येवमपिविज्ञायते। तस्माद्विभाषाग्रहणंकर्त्तव्यमेव॥ कच्छ्॥ साल्वशब्दोगणेप ठ्यतेतस्यप्रत्याख्यानायाह। नवेति। जनपदतदवध्योरितिवुञिसिद्धेअपदातौसाल्वाद् गोयवाग्वोश्चेतिवुञोनियमादन्यत्राण् भविष्यतीत्यर्थः। ननुवुञभावेच्छः प्राप्नोति नत्वणितिचिन्त्यमेतत्। गर्त्तो॥ श्वाविद्गर्त्तीयइति। श्वानंविध्यतीतिक्विप्। नहिवृतीतिदीर्घः।

कुरुशब्दस्ययःकच्छादिषुपाठःसोऽनवकाशः। नखल्वपिकुरुशब्दोपिविभाषांप्रयोजयति। अनेनवुञ्कच्छादिषुपा ठादण्भविष्यति। सैषायुगन्धरार्थाविभाषा॥ कच्छादिभ्यश्च॥ किमर्थंसाल्वानांकच्छादिषुपाठःक्रियते। साल्वानांकच्छा दिषुपाठोण्विधानार्थः। साल्वानांकच्छादिषुपाठः क्रियतेऽण्विधानार्थः। अण्यथास्याद्वुञ्माभूदिति। नवापदातिगोय वागूग्रहणमवधारणार्थम्। नचैतत्प्रयोजनमस्ति। किंकारणम्। अपदातिगोयवागूग्रहणमवधारणार्थंभविष्यति। अप दातावेवसाल्वात्। गोयवाग्वोरेवसाल्वादिति॥ गर्त्तोत्तरपदाच्छः॥ गर्त्तोत्तरपदाच्छविधेर्जनपदाद्वुञ्विप्रतिषिद्धम्। ग र्त्तोत्तरपदाच्छविधेर्जनपदाद्वुञ्भवतिपूर्वविप्रतिषेधेन। गर्त्तोत्तरपदाच्छोभवतीत्यस्यावकाशः। श्वाविद्गर्त्तः। श्वाविद्गर्त्ती यः। वुञोवकाशः। अङ्गाः। आङ्ग कः। इहोभयंप्राप्नोति। त्रैगर्तकः। वुञ्भवतिपूर्वविप्रतिषेधेन। सतर्हिपूर्वविप्रतिषेधोवक्त व्यः। नवक्तव्यः। उक्तमेवावधिग्रहणस्यप्रयोजनम्। जनपदावधेर्वुञेवयथास्यात्। यदन्यत्प्राप्नोतितन्मा भूदिति॥ गहादिभ्यश्च॥ गहादिषुपृथिवीमध्यस्यमध्यमभावः। गहादिषुपृथिवीमध्यस्यमध्यमभावोवक्तव्यः। पृथिमध्ये भवोमध्यमीयः। चरणसंबन्धेननिवासलक्षणोण्। चरणसंबन्धेननिवासलक्षणोण्वक्तव्यः। त्रयःप्राच्याः। त्रयऔदीच्याः। त्रयोमाध्यमाः। सर्वेनिवासलक्षणाः॥ वृद्धादकेकान्तखोपधात्॥ ईकान्तादपीतिवक्तव्यम्। इहापियथास्यात्। ऐणीकीयः। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। अकेकान्तग्रहणेकोपधग्रहणंसौसुकाद्यर्थम्। अकेकान्तग्रहणेकोपधग्रहणंकर्त्तव्य म्। किंप्रयोजनम्। सौसुकाद्यर्थम्। सौसुकीयः॥ इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येचतु र्थाध्यायस्यद्वितीयेपादेद्वितीयमाह्निकम् ॥

श्वाविधांगर्त्तइतिसमासः॥ गह॥ मध्यमोमध्यमंचाण्चरणइतिगणपाठ स्तंविशेषेऽवस्थापयितुमाह। गहादिष्विति। पृथिवीमध्यवा च्येवमध्यशब्दोग्राह्योनतुमध्यान्तरवाचीत्यर्थः। चरणसंबन्धेनेति। पृथिवीमध्यंनिवासएषांचरणानामित्यत्रार्थेमाध्यमाश्चरणाइति भवतीत्यर्थः। चरणाःकठादयः। निवासलक्षणइति। सोस्यनिवासइत्यत्रार्थइत्यर्थः॥ वृद्धा॥ अकेकान्तग्रहणइति। अकेकान्तग्रहणम पनीयकोपधग्रहणंव्यापकंकर्त्तव्यमित्यर्थः॥ इतिश्रीमहाभाष्यप्रदीपेचतुर्थस्याध्यायस्यद्वितीयेपादेद्वितीयमाह्निकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युष्मदस्मदोरन्यतरस्यां खञ् च॥ त्यदादित्वाद्वृद्धत्वाद् छे प्राप्ते खञ् विधीयते। ततश्छस्य बाधे प्राप्ते चकारेण छोऽनुकृष्यते।
एवं च खञ्छावन्यतरस्यां युष्मदस्मदोर्विधीयेते। तेन पक्षे यथाप्राप्तमण् भवति। तत्र खञ्छयोर्युष्मदस्मदोश्च संख्या
साम्याद्यथासंख्यं प्राप्नोति तन्निराकरणायाह। युष्मदस्मद्भ्यामिति। केचित्त्वत्राहुः एक एवानेन खञ् विधीयते। चकारेण तु
तस्य सहायता द्योत्यते। तत्र प्रकरणाच्छेनेति विज्ञायते। अन्यतरस्यांग्रहणेन चाणः प्रतिप्रसवः क्रियते। तत्र यद्येक एवापू
र्वः खञ् विधीयते। यदि वा त्रयः खञ्छाणः सर्वथा नास्ति संख्यासाम्यमिति यथासंख्यनिरासाय न कर्तव्यो योगविभागः
इति। अत्राहुः। चकारेण छस्यानुकर्षणं क्रियते। तेन यावदुक्तं खञ्छाविति तावत् खञ् चेति। ततश्च सिद्धोऽपि छप्रत्ययो

युष्मदस्मदोरन्यतरस्यां खञ्च॥ युष्मदस्मद्भ्यां प्रत्ययविधाने योगविभागः। युष्मदस्मद्भ्यां प्रत्ययविधने योग
विभागः कर्तव्यः। युष्मदस्मदोरन्यतरस्यां छो भवति। युष्मदीयः। अस्मदीयः। ततः खञ् भवति। युष्मदस्मदोरन्यत
रस्याम्। यौष्माकीणः। आस्माकीनः। किमर्थो योगविभागः। संख्यातानुदेशप्रतिषेधार्थः। संख्यातानुदेशो मा भूत्।
तस्मिन्नणि च युष्माकास्माकौ॥ आदेशविधाने च॥ किम्। योगविभागः कर्तव्यः। तस्मिन्नणि युष्माकास्माकौ भव
तः। यौष्माकः। आस्माकः। ततः खञि। खञि च युष्माकास्माकौ भवतः। यौष्माकीणः। आस्माकीनः। किमर्थो योगवि
भागः क्रियते। संख्यातानुदेशप्रतिषेधार्थ इत्येव। तत्र पुनः खञ्ग्रहणम्। तत्र पुनः खञ्ग्रहणं कर्तव्यम्। न ह्य
न्तरेण खञ्ग्रहणं योगाङ्गमुपजायते। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। एवं वक्ष्यामि तस्मिन् खञि युष्माकास्मा
कौ भवतः। ततोऽणि च। अणि च युष्माकास्माकौ भवत इति॥

नेनैवाबाधाय चकारेण समुच्चयार्थेनानुकृष्य विधीयत इति स्यादेव यथासंख्यम — न्यतरस्यांग्रहणेन तु खञ्छयोः
पक्षेऽनुत्पत्तिः प्रतिपाद्यते। तदनुत्पत्तौ चापवादाभावात्तत्त्वशास्त्रेणाण् भवतीति कुतः प्रत्ययत्रयस्यानेन विधानम्॥ तस्मिन्॥
तत्र पुनरिति। खञ्यणि चेति वक्तव्यमित्यर्थः। अन्यथा पूर्वसूत्रे खञ् चेति चकारेण छोऽनुकृष्ट इति स एवानन्तर्यात्तस्मिन्नि
त्यनेन परामृश्येत। एवं वक्ष्यामीति। एवं व्याख्यास्यामीत्यर्थः। तस्मिन्नित्यनेन पूर्वेण साक्षाद्विहितः खञ् परामृश्यते न तु च
कारानुकृष्टश्छः। चशब्दो हि समुच्चयस्य द्योतकः प्रकृतमनुकर्षति। तत्र किं प्रकृतं स्यादिति विचारप्रसङ्गे विलम्बिता छस्य
प्रतीतिरव्यवहितात् खञ् इति तस्यैव सर्वनाम्ना परामर्शो युक्त इति भावः। अथवा। पूर्वसूत्रे योगविभागस्य व्याख्यातत्वा
न्नैव चकारेण छस्यानुकर्षणमिति कुतस्तस्यानन्तर्यं यतस्तस्य परामर्शः स्यात्॥

CC-0. In Public Domain. Digitization by eGangotri

तवक॥ कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययादिति न्यायात्प्रत्ययस्यैकवचनस्य ग्रहणं स्यात् तस्य च नित्यत्वाल्लुक्प्र
वर्त्तनात् प्रत्ययलक्षणप्रतिषेधाच्च एकवचनपरता युष्मदस्मदोर्न संभवतीति मत्वाह। एकार्थग्रहणं चेति। यदि पुनरि
ति। तवायं तावक इत्यादि सिध्यतीति मन्यते। नैवं शक्यमिति। अन्यास्वतिव्याप्तिदोषदूषयदुष्टत्वादिति भावः। अन्वर्थग्रहण
मिति। उभयगतिरिह शास्त्रे संभवति। तत्र विषयभेदेन क्वचित् कृत्रिमस्य ग्रहणं। क्वचिदकृत्रिमस्य क्वचिदुभयोः। अथ वच
नात् प्रत्ययलक्षणं भवतीति कस्मान्नाश्रितम्। उच्यते। अन्वर्थग्रहणे सत्यव्यवहिता प्रतिपत्तिर्भवतीति तदेवाश्रितम्। एकव

तवकममकावेकवचने॥ एकार्थग्रहणं च॥ एकार्थग्रहणं च कर्तव्यम्। एकार्थयोर्युष्मदस्मदोरिति वक्तव्यम्।
किमर्थम्। न एकवचन इत्येव सिद्धम्। न सिध्यति। किं कारणम्। एकवचनाभावात्। एकवचन इत्युच्यते। न चा
त्रैकवचनं पश्यामः। यदि पुनरेकवचनपरत्वेनाण्खञौ विशेष्येयाताम्। नैवं शक्यम्। इहापि प्रसज्येयाताम्। यु
ष्माकं छात्रा यौष्माकीणः। अस्माकं छात्र आस्माकीनः। इह च न स्याताम्। तव छात्राः तावकीनाः। मामकीनाः। तस्मा
न्नैवं शक्यम्। न चेदेवमेकार्थग्रहणं कर्तव्यम्। न कर्तव्यम्। नेदं पारिभाषिकस्यैकवचनस्य ग्रहणम्। किं तर्ह्यन्व
र्थग्रहणम्। उच्यते वचनम्। एकस्यार्थस्य वचनमेकवचनमिति॥ अर्द्धाद्यत्॥ अर्द्धाद्यद्विधाने सपूर्वाट्ठञ्। अर्द्धाद्य
द्विधाने सपूर्वाट्ठञ् वक्तव्यः। बालेयार्द्धिकः। गौतमार्द्धिकः। दिक्पूर्वपदाद्यच्च। दिक्पूर्वपदाद्यच्च ठञ्च वक्तव्यः। पूर्वा
र्द्ध्यः। पौर्वार्द्धिकः। दक्षिणार्ध्यः। दाक्षिणार्द्धिकः। उत्तरार्द्ध्यः। औत्तरार्द्धिकः। किमर्थमिदमुच्यते। यथान्यास एव दिक्पू
र्वपदादर्द्धशब्दादुभयमुच्यते। इदं मया पूर्वं क्रियते। अर्द्धाद्यद्विधाने सपूर्वपदाट्ठञिति। तद्वैष्यं विजानीयात् सर्व
मेव विकल्प्यत इति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे दिक्पूर्वपदादर्द्धाद्यथान्यासमेव भवतीति। श्वसस्तुट्॥ श्वसस्तुडा
देशानुपपत्तिरनादित्वात्। श्वसस्तुटि कृते आदेशानुपपत्तिः। किं कारणम्। अनादित्वात्। तुटि कृते अनादित्वादादे
शो न प्राप्नोति ॥

चन इति च प्रथमाद्विवचनान्तम्। युष्मदस्मदोः समानाधिकरणं विशेषणम्। एकस्येति। वाच्यवाचकसंबन्धे षष्ठी। एकार्था
भिधानाय ये उच्येते युष्मदस्मदी तयोरादेशावित्यर्थः। श्वसस्तुट्॥ अनादित्वादिति। यद्यपि ठस्येक इत्यत्रादिग्रहणं नास्ति। त
थाप्यङ्गस्य निमित्तं यष्ठस्तस्येक इति सूत्रार्थाश्रयणात् यथा कर्मणि घटोऽठजित्यठ जङ्गस्य निमित्तं न ठ इति कर्मठ इत्यत्रेका राम:
देशो न भवति। एवं तु टि कृते समुदायो ङ्गसंज्ञानिमित्तं न ठमात्रमिति कादेशो न प्राप्नोतीति भावः ॥ ७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शौवस्तिकमिति। द्वारादीनां चेति वृद्धिप्रतिषेध ऐजागमश्च संनियोग इति। तेनागमादेशौ सह भवतः॥ सर्वत्र॥ हेम्न इति। हेम
न्तपर्यायो हेमन्शब्दोऽप्यस्ति तस्मादत्वणि कृते हैमनमिति भविष्यतीनार्थस्तलोपविधानेन सर्वत्राणि चेवक्तव्यम्। भाषायां
चैतद्वृत्तिविषय एव हेमन्शब्दस्तु वाचीत्यस्वपदविग्रहः कर्तव्यः। हेमन्ते साधु हैमनमिति। अन्निति प्रकृतिभावादि
लोपाभावः। हेमन् हेमनिति। सप्तम्येकवचनस्य छन्दसि सुपां सुलुगिति लुक्। नङि संबुध्योरिति नलोपप्रतिषेधः। अपर आहेति। सूत्र

एवं तर्हि पूर्वान्तः करिष्यते। पूर्वान्ते कप्रतिषेधः॥ यदि पूर्वान्तः। कादेशस्य प्रतिषेधो वक्तव्यः। शौवस्तिकम्। तान्ता
दिति कादेशः प्राप्नोति। अस्तु तर्हि परादिः। ननु चोक्तं श्वसस्तुट्यादेशानुपपत्तिरनादित्वादिति। सिद्धं त्वादिष्टस्य तुड्वच
नात्। सिद्धमेतत्। कथम्। तुड्वा तिदिष्टस्येति वक्तव्यम्। संनियोगाद्वा। अथवा चेन संनियोगः क्रियते तुट्। किं च। य
श्चान्यस्याप्नोति। किं चान्यस्याप्नोति। आदेशः॥ सर्वत्राण्चतलोपश्च॥ हेमन्तस्याणि तलोपवचनानर्थक्यं हेम्नः प्रकृ
त्यन्तरत्वात्। हेमन्तस्याणि तलोपवचनमनर्थकम्। किं कारणम्। हेम्नः प्रकृत्यन्तरत्वात्। प्रकृत्यन्तरं हेमन्शब्दः। आ
तश्च प्रकृत्यन्तरम्। एवं ह्याह। हेमन् हेमन्तागनीगन्तिकर्णौ तस्मादेतौ हेमन्नशुष्यत इति। अलोपदर्शनाच्च। अलो
पः खल्वपि दृश्यते। पङ्क्तिर्हैमन्तीति। अपर आह। हेमन्तस्याण्वचनमणि च तलोपवचनमनर्थकं हेम्नः प्रकृत्यन्तरत्वा
त्। हेमन्तस्याण्वचनमणि च तलोपवचनमनर्थकम्। किं कारणम्। हेम्नः प्रकृत्यन्तरत्वात्। प्रकृत्यन्तरं हेमन्श
ब्दः। अलोपदर्शनाच्चेत्येव। तत्रर्त्वणभ्य इत्येव सिद्धम्॥ सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च॥ चिरपरुत्परा
रिभ्यस्त्नः। चिरपरुत्परारिभ्यस्त्नो वक्तव्यः। चिरत्नम्। परुत्नम्। परारित्नम्। अग्रादिपश्चाड्डिमच्॥ अग्रादिपश्चाड्डिमज्व
क्तव्यः। अग्रिमम्। आदिमम्। पश्चिमम्। प्रगस्य छन्दसि गलोपश्च त्नश्च वक्तव्यः। प्रत्नमात्मानम्। अन्ताच्च॥ अन्ता
च्चेति वक्तव्यम्। अन्तिमः। अथ सायंचिरयोः किं निपात्यते। सायंचिरयोर्मकारान्तत्वं प्रत्ययसंनियुक्तम्। सायंचिर
योर्मकारान्तत्वं प्रत्ययसंनियोगेन निपात्यते। सायंतनम्। चिरंतनम्। नैतदस्ति प्रयोजनम् ॥

स्यैव प्रत्याख्यानम्। तथा हि छन्दस्येव सूत्रेमिष्टम्। हेमनं हैमन्तिकं हैमन्तमिति। तत्र हेमन्शब्दस्यर्त्वणि हैमनमिति भवति। हे
मन्ताच्चेत्यनेन ठञि हैमन्तिकमिति। सर्वे विधयः छन्दसि विकल्प्यन्त इति हेमन्तशब्दादत्वणि हैमन्तमिति भवति। भाषायां तु हेमन् हेम
न्तशब्दयोर्ऋत्वणि हैमनं हैमन्तमिति रूपद्वयमिष्टं सिध्यतीति नार्थः सूत्रेणेत्यर्थः। सायंचिरंप्राह्णेप्रगे॥ चिरपरुदिति। ट्युट्युलभ्यां त्नस्य
समावेश इष्यते न तु ट्युट्युलोर्बाध इत्याहुः। सायंचिरयोरिति। स्वतेर्य त्रि सायशब्दस्य चिरशब्दस्य च मान्तत्वं निपात्यत इत्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

मकारान्तइति।अनेनसायंशब्दःप्रत्याख्यायते।अव्ययत्वादेवट्युट्युलोःसिद्धत्वाच्चिरशब्दस्यैवतुमान्तत्वंनिपात्यते।सायशब्दस्तु
घञन्तोवसानमात्रवाचीनतुकालविशेषवाचीतितस्येहग्रहणमयुक्तमितिभावः।सायेमोद्वइति।अह्नोह्न एतेभ्यइत्यह्नादेश
ष्टजन्तोनिर्दिष्टः।संख्याविसायपूर्वस्याह्नस्येतिज्ञापकादेकदेशिसमासः।सायतरइति।तरपिरूपमेतत्।वासप्तम्यामिति।म
लोपेचकृतेसायइतिभाष्यकारवचनप्रामाण्यादव्ययसंज्ञाभावः।अलुकेति।घकालतनेषुकालनाम्नइत्यनेन।यदात्वन्या

मकारान्तःसायंशब्दः।यदिमकारान्तःकथंसायाह्नः।सायमोह्नेमलोपः॥सायमोह्नेमलोपोवक्तव्यः।क
थंसायतरे।तरेचेतिवक्तव्यं।कथंसायंसाये।वासप्तम्यांचेतिवक्तव्यम्।अथ प्राह्ण प्रगयोःकिंनिपात्यते।प्राह्ण प्र
गयोरेदन्तत्वम्।प्राह्ण प्रगयोरेदन्तत्वंनिपात्यते।प्राह्णेतनम्।प्रगेतनम्।नैतदस्तिप्रयोजनम्।सप्तम्याअलुकापि
सिद्धम्।भवेत्सिद्धंयदासप्तमी।यदात्वन्याविभक्तयःतदानसिध्यति।तुट्युक्तम्।किमुक्तम्।तुडादेशानुपपत्तिर
नादित्वादिति।तुटिकृतेनादित्वादादेशोनप्राप्नोति।एवंतर्हिपूर्वान्तःकरिष्यते।पूर्वान्तेविसर्जनीयः।यदिपूर्वान्तः।वि
सर्जनीयोवक्तव्यः।प्रातस्तनम्।परादौपुनःसतिखरवसानयोर्विसर्जनीयइतिविसर्जनीयःसिद्धोभवति।अस्तुत
र्हिपरादिः।ननुचोक्तंतुटिकृतेऽनादित्वादादेशोनप्राप्नोतीति।सिद्धंत्वादिष्टस्यतुड्वचनात्।सिद्धमेतत्।कथम्।आदि
ष्टस्यतुड्वचनात्।तुडादिष्टस्येतिवक्तव्यम्।तत्तर्हिवक्तव्यम्। न वक्तव्यम्।चसंनियोगाद्वा।अथवाचेनसंनियोगःक
रिष्यते।तुट्च।किंचायस्त्वान्यत्प्राप्नोति।किंचान्यत्प्राप्नोति।आदेशः।विभाषापूर्वाह्णापराह्णाभ्याम्॥पूर्वाह्णापराह्णा
भ्यांसुबन्तवचनंसप्तमीश्रवणार्थम्।पूर्वाह्णापराह्णाभ्यांसुबन्ताभ्यांतद्धितोभवतीतिवक्तव्यम्।किंप्रयोजनम्।
सप्तमीश्रवणार्थम्।सप्तम्याःश्रवणंयथास्यात्।पूर्वाह्णेतनम्।अपराह्णेतनम्।तत्तर्हिवक्तव्यम्।नवक्तव्यम्।
आचार्यप्रवृत्तिर्ज्ञापयतिभवत्यत्रसप्तमीति।यदयंघकालतनेषुकालनाम्नोयत्सप्तम्याअलुकंशास्ति।अलुग्व
चनंज्ञापकमितिचेदव्ययात्सप्तमीप्रसङ्गः।अलुग्वचनंज्ञापकमितिचेदव्ययात्सप्तमीप्राप्नोति ॥

इति।प्राह्णःसोढोस्यप्राह्णेतनइत्यादौ।अनादित्वादिति।अङ्गसंज्ञानिमित्तस्ययोरनादेशउच्यमानोमृत्युशब्दइवतुटिकृते
त्युशब्दोङ्गनिमित्तंनतुयुशब्दइतिनस्यादित्यर्थः।यदीति।पदान्तस्यरेफस्यविधीयमानस्तुकिकृतेअपदान्तत्वान्नप्राप्नोती
त्यर्थः॥विभाषा॥सुबन्तवचनमिति।ङ्याप्प्रातिपदिकाधिकारात्प्रातिपदिकस्यैवतद्धितोत्पत्तौप्रकृतित्वेनभाव्यंनतुसुबन्त
स्येतिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषातनमिति। दोषाशब्दस्यापिकालवाचित्वादलुगनुमितायाःसप्तम्याःश्रवणप्रसङ्गः। समानाश्रयइति। सुपोधातुप्रातिपदि
कयोरित्यर्थंलुक् तद्धितोत्पत्तिनिमित्तप्रातिपदिकसंज्ञकसमुदायान्तर्वर्तिसुप्स्थानिकोऽलुकस्तद्धितविशेषनिमित्तस्य
समानाश्रयः। अन्यचेति। अव्ययादाप्सुपइत्ययंलुग् अव्ययमात्रापेक्षत्वादन्तरङ्गत्वाद्भवतीत्यर्थः। नसिध्यतीति। प्रातिप
दिकात्प्रत्ययोत्पत्तिरलुग्विधानाज्ज्ञापकाद्विभक्तिरितिपक्षः प्रक्रान्तस्तत्रप्रत्ययउत्पन्नेविभक्त्याभाव्यंनतुपूर्वंततश्चा
व्ययादाप्सुपइत्ययमपिलुक्तद्धितोत्पत्त्युत्तरकालभाविसुप्स्थानिकत्वादलुकःसमानाश्रयत्वाद्बाध्यतइत्यर्थः। एतच्चहलद

दोषातनम्। दिवातनम्। अस्त्वव्ययादितिलुग्भविष्यति। इहापितर्हिलुक्प्राप्नोति। पूर्वाह्णेतनम्। अपराह्णेतनम्। अ
लुगत्रलुकंबाधिष्यते। इहापितर्हिबाधेत। दोषातनम्। दिवातनम्। समानाश्रयोलुगलुकाबाध्यते। कःपुनःसमाना
श्रयः। यःप्रत्ययाश्रयः। अत्रचप्रागेवप्रत्ययोत्पत्तेर्लुग्भवति। नसिध्यति। इहहिसतिप्रत्ययेलुकाभवितव्यम्। त
त्रचप्रत्ययएवनास्तिकुतोलुग्भविष्यति। सैषाज्ञापकेनासतीविभक्तिराकृष्यते। सायथैवेहबाधिकाभवति। पूर्वा
ह्णेतनम्। अपराह्णेतनमिति। एवमिहापिस्यात्। दोषातनम्। दिवातनमिति। एवंतर्हिनब्रूमोऽलुग्वचनंज्ञापकं
भवत्यत्रसप्तमीति। किंतर्हि। भवतिसुबन्तादुत्पत्तिरिति। किंपुनर्ज्ञाप्यमेतद्यावतासमर्थानांप्रथमादिति
वर्तते। सामर्थ्यंचसुबन्तेन। ज्ञाप्यमित्याह। कथम्। ङ्याप्प्रातिपदिकादित्यपिवर्तते। तत्रकुतएतत् सुबन्तात्समर्था
दितिदुत्पत्तिर्भविष्यति। नपुनर्ङ्याप्प्रातिपदिकादिति। कथंयत्तदुक्तम्। वृद्धाद्वृद्धावर्णस्वरद्व्यज्लक्षणप्रत्यय
विधौतत्संप्रत्ययार्थमिति। समर्थस्यहद्वृद्धंङ्याप्प्रातिपदिकादिकमित्येवमेतद्विज्ञायते। यद्येतज्ज्ञाप्यते।
कथंद्विपदआगतंद्विपाद्रूप्यम्। प्रष्ठौहआगतंप्रष्ठवाड्रूप्यम् ॥

न्तादित्यस्यानुवृत्तिमनपेक्ष्योच्यते। तत्रचप्रत्ययइति। प्राक्तद्धितोत्पत्तेःसुप्संज्ञकःप्रत्ययोनास्तीत्यर्थः। कथंयदिति। यद्ययं
लुग्विधानेनसमर्थस्यप्रकृतित्वमनुमीयतेतदाङ्याप्प्रातिपदिकाधिकारस्यवृद्धादिविशेषणत्वेनङ्याप्प्रातिपदिकस्य
प्रकृतित्वापादनप्रयोजनंयदुक्तंतत्कथंनविरुध्येतेतिप्रश्नः। परिहारमाह। समर्थस्येति। समर्थस्यविभक्त्यन्तस्यप्रत्ययप्र
कृतित्वेनाश्रितस्यावयवभूतंङ्याप्प्रातिपदिकंवृद्धादितिचेद्भवतिततःसमर्थादेवप्रत्ययोभवतीतिनास्तिविरोधइत्यर्थः।
कथंद्विपदइति। विभक्त्यन्तात्प्रत्ययोत्पत्तावाश्रीयमाणायांविभक्तिनिमित्तानिकार्याण्यन्तरङ्गत्वात्प्राप्नुवन्तीतिप्रश्नः।
सर्वत्रहेतुमनुष्येभ्योन्यतरस्यांरूप्यइतिरूप्यप्रत्ययः ॥

CC-0. In Public Domain. Digitization by eGangotri

 लुकि कृत इति। कृताकृतप्रसङ्गित्वान्नित्यत्वादिति भावः। वर्णाश्रयत्वाद्भसंज्ञायाः प्रत्ययलक्षणत्वाभावात्पद्भावादिकम

नित्यम्। इह तर्हीति। नलोपस्य प्रत्ययलक्षणेन प्राप्त्या नित्यत्वं मन्यते। परत्वादिति। द्वावपि लुङ्लोपौ नित्यौ यस्य लक्षणा

न्तरेण निमित्तं विहन्यते नेन तदनित्यमिति नलोपोपि नित्य इति भावः। एतं चान्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इत्य

नाश्रित्योक्तम्। एतदेव त्वाश्रयणीयम् अन्यथान्तरङ्गत्वात्पद्भावादयो नित्यमपि लुकं बाधेरन्। तदुक्तम्। परनित्यान्तरङ्गप्रति

पदविधयो विरोधिसंनिपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वमिति। सुबन्ताद्विधिरिति। ततश्च तद्धितोपि सुब्विधिरिति त

कीलालप आगतं कीलालपारूप्यम्। पपुष आगतं पपिवद्रूप्यम्। पद्भाव ऊठ् आकारलोपः प्रसारणमित्येते वि

धयः प्राप्नुवन्ति। लुकि कृते न भविष्यन्ति। इह तर्हि सामसु साधुः सामन्यः वेमन्यः। नलोपः प्रातिपदिकान्तस्ये

ति नलोपः प्राप्नोति। लुकि कृते भत्वान्न भविष्यति। इदमिह संप्रधार्यं लुक्क्रियतां लोप इति। किमत्र कर्त्तव्यम्।

परत्वान्नलोपः। एवं तर्हीदमिह संप्रधार्यं नलोपः क्रियतां तद्धितोत्पत्तिरिति। किमत्र कर्त्तव्यम्। परत्वान्नलोपः।

असिद्धो नलोपः। तस्यासिद्धत्वात्तद्धितोत्पत्तिर्भविष्यति। परिगणितेषु कार्येषु नलोपो सिद्धः। न चेदं तत्र परिग

ण्यते। इदमपि तत्र परिगण्यते। कथम्। सुब्विधिरिति सर्वविभक्त्यन्तः समासः। सुपो विधिः सुब्विधिः। सुबन्ताद्वि

धिः सुब्विधिरिति॥ तत्र जातः॥ किमर्थं जातादयोर्था निर्दिश्यन्ते। जातादिष्वर्थेषु घादयो यथा स्युः स्वार्थे माभूवन्निति।

नैतदस्ति प्रयोजनम्। शेष इत्यनुवर्त्तते। तेन स्वार्थे न भविष्यन्ति। अत उत्तरं पठति। तत्र जातादिषु वचनं नियमार्थ

म्। नियमार्थोयमारम्भः। जातादिष्वेव घादयो यथा स्युरिह माभूवन्। तत्रास्ते तत्र शेत इति। यदि नियमः क्रियते।

दार्षदाः सक्तवः। औलूखलो यावक इति न सिध्यति। संस्कृतमित्येवं भविष्यति। भवेत् सिद्धं दार्षदाः सक्तव इति।

इदं तु न सिध्यति औलूखलो यावक इति। संस्कृतं नाम तद्भवति यत्तत एवापकृष्याभ्यवह्रियते ॥

न्न कर्त्तव्येन लोपस्यासिद्धत्वादप्रवृत्तिः। तद्धिते तु कृते लुकोपि सुब्विधित्वात्तत्र नलोपस्यासिद्धत्वाल्लुक्प्रवर्त्तते। ततो भत्वान्न

लोपाभावः॥ तत्र॥ जातादिषु घादीनामपेक्षामाश्रित्य शेषग्रहणं प्रत्याख्यातम्। इह तु शेष इत्यस्य लक्षणत्वमधिकारत्वं चाश्रि

त्य जाताद्यर्थाक्षेपः। किमर्थमिति। प्रत्ययार्थवशेनाभिधानसामर्थ्येन च समर्थविभक्तिर्लप्स्यत इति तन्निर्देशोपि न कर्त्तव्य इ

ति भावः। तेन स्वार्थ इति। ननु स्वार्थोपि प्रत्ययविधावनुपयोगाच्छेष इति कुतस्तत्र न स्युः। उच्यते। अन्तरेणापि शेषाधिकारं चा

तुरर्थपर्यन्तापत्याद्यर्थनिरस्यास्वार्थे घादिषु प्राप्तेषु शेषाधिकारः स्वार्थव्यतिरिक्तार्थपरिग्रहार्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रआस्तेइति।स्रुघ्नआस्तइत्यादावपिशेषइत्यस्यलक्षणत्वात्प्रत्ययप्रसङ्गः।संस्कृतमिति।उपयोगफलादिक्रियासंस्कार
इतिमन्यते।तच्चावश्यमिति।अर्थनिर्देशकरणवादिनाप्यनिष्टनिवृत्तयेऽवश्याश्रयितव्यमनभिधानमित्यर्थः।अपवादविधि
नार्थमिति।असंकरेणविशिष्टएवार्थेपवादायथास्युरित्येवमर्थोअर्थनिर्देशादित्यर्थः॥श्रविष्ठा॥रेवतीरोहिणीति।नक्षत्राणो
लुकिकृतेलुक्तद्धितलुकीतिस्त्रीप्रत्ययस्यलुक्।ततोगौरादिषुपिप्पल्यादयश्चेतिपाठादादिशब्दस्यप्रकारार्थत्वाद्ङीष्प्र

नचयावकउलूखलादेवापकृष्याभ्यवह्रियते।अवश्यंरन्धनादीनिप्रतीक्ष्याणि।तस्मान्नार्थोनेननियमेन।कस्मा
न्नभवति।तत्रास्तेशेतइति।अनभिधानात्।तच्चावश्यमनभिधानमाश्रयितव्यम्।क्रियमाणेष्वपिह्यर्थनिर्देशे
षुयत्रजातादिषूत्पद्यमानेनप्रत्ययेनार्थस्याभिधानंनभवतितत्रप्रत्ययोत्पत्तिर्नभविष्यति।तद्यथा।अङ्गुल्याख
नतिवृक्षमूलादागतइति।नतर्हीदानींजातादयोनिर्देष्टव्याः।निर्देष्टव्याश्च।किंप्रयोजनम्।अपवादविधानार्थम्।प्रा
वृषष्ठप्।प्रावृषिजातःप्रावृषिकः।क्वमाभूत्।प्रावृषिभवाःप्रावृषेण्याबलाहकाइति।यानिह्येतानिनिरपवादानि
अर्थादेशनानितानिशक्यान्यकर्तुम्।कृतलब्धक्रीतकुशलाः।स्रौघ्नोदेवदत्तइति॥श्रविष्ठाफल्गुन्यनुराधास्वाति
तिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्॥लुक्प्रकरणेचित्रारेवतीरोहिणीभ्यःस्त्रियामुपसंख्यानम्।लुक्
प्रकरणेचित्रारेवतीरोहिणीभ्यःस्त्रियामुपसंख्यानंकर्तव्यम्।चित्रायांजाताचित्रास्त्रीरेवत्यांजातारेवतीस्त्री।
रोहिणीस्त्री॥फल्गुन्यषाढाभ्यांटानौ॥फल्गुन्यषाढाभ्यांटानौवक्तव्यौ। फल्गुनीअषाढाउपदधाति।श्रविष्ठा
षाढाभ्यांछण्॥श्रविष्ठाषाढाभ्यांछण्वक्तव्यः।श्राविष्ठीयाः।आषाढीयाः।तत्तर्हिवक्तव्यम्।नवानक्षत्रेभ्योबहुलंलु
ग्वचनात्।नवावक्तव्यम्।किंकारणम्।नक्षत्रेभ्योबहुलंलुग्वचनात्।नक्षत्रेभ्योबहुलंलुगित्येवमत्रलुग्भविष्य
ति॥प्रायभवः॥प्रायभवग्रहणमनर्थकंतत्रभवेनकृतत्वात्॥प्रायभवग्रहणमनर्थकम्।किंकारणम्।तत्रभवेनकृतत्वात्।
योहिराष्ट्रेप्रायेणभवतितत्रभवोऽसौभवति।तत्रतत्रभवइत्येवसिद्धम्।नसिध्यति।अनित्यभवःप्रायभवः।नित्यभवस्तत्रभवः।

त्ययः।नवेति।लुकएवप्रत्याख्यानंप्रत्ययास्तूपसंख्येयाः॥प्राय॥तत्रभवेनेति।भवेसामान्येप्रायभवस्यापिविशेषस्यान्तर्भा
वादितिभावः।अनित्यभवइति।अर्थभेदमनेनाचष्टे।यस्तत्रकदाचिद्भवतिकदाचिन्नभवतिसप्रायभवः।यस्यतुनियतआ
धाराधेयभावःसतत्रभवइतिभावः ॥

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतन्निराकरोति। मुक्तसंशयेनेति। अथेति। जानुसमीपस्य शरीरावयववाच्युपजानुशब्द इति भावः। एवं ठगपीति। तत्र भावाधिकारे ठग्विधीयमानः प्रायभवएव भविष्यतीत्यर्थः॥ कोशा॥ विकारइति। तस्य विकार इत्यत्र प्रकरणे सूत्रमिदं कर्त्तव्यम्। एण्यादढञिति कृत्वा कोशादिति कर्त्तव्यम्। अर्थानुपपत्तिरिति। कौशेयशब्दस्य लौकिको योर्थः सूत्रवस्त्रलक्षणः स एवं नोपपद्यते लौकि कोर्थोन संगृहीतः स्यादित्यर्थः। नह्यद इति। कौशेयशब्दाभिधेयं वस्त्रसूत्रलक्षणं कोशेन संभवतीत्य

अनित्यभवः प्रायभव इति चेन्मुक्तसंशयेन तुल्यम्। यद्वानमुक्तसंशयं तत्र भवउदाहरणं न्याय्यं मन्यते। स्रौघ्नो देवदत्त इति। तेनैतत्तुल्यम्। सोप्यवश्यमुदग देशादीन्यभिनिष्क्रामति। अथेतद्वानप्रायभवेउदाहरणं न्याय्यं मन्यते। तत्र भवे किमुदाहरणम्। यत्तत्र नित्यं भवति स्रौघ्नाः प्राकारा इति। एवं तर्हि तत्र भव इति प्रकृत्य जिह्वामूलाङ्गुलेश्छो विधीयते। स यथैव तस्मिन्दृष्टापचारे अङ्गुलीयमिति भवति। एवं प्रायभवेपि भविष्यति। इदं तर्हि प्रयोजनम्। प्रायभव इति प्रकृत्य उपजानूपकर्णोपनीवेष्ठक् वक्ष्यति स प्रायभवे यथा स्यात्तत्र भवे मा भूत्। उपजानुभवं गड्वि ति। अथेदानीं तत्र भव इति प्रकृत्य शरीरावयवाद्यद्विधीयते सोत्र कस्मादत्र न भवति। अनभिधानात्। यथैव तर्ह्यनभिधानाद्यन्न भवति। एवं ठगपि न भविष्यति॥ कोशाड्ढञ्॥ विकारे कोशाड्ढञ्॥ विकारे कोशाड्ढञ्वक्तव्यः। कोशस्य विकारः कौशेयम्। संभूते ह्यर्थानुपपत्तिः। संभूत इत्युच्यमाने र्थस्यानुपपत्तिः स्यात्। नह्यदः कोशे संभवति। किं तर्हि। कोशस्यादो विकारः। यदि विकार इत्युच्यते भस्मन्यपि प्राप्नोति। भस्मापि कोशविकारः। अथ संभूत इत्युच्यमाने क्रिमौ कस्मान्न भवति। क्रिमिरपि कोशे संभवति। अनभिधानात्। यथैव तर्हि क्रिमावनभिधानान्न भवत्येवं भस्मन्यपि न भवति। अर्थश्चोपपन्नो भवति॥ कलाप्यश्वत्थयवबुसाद्वुन्॥ अयुक्तो निर्देशः कालादिति वर्त्तते। नच कलापी नाम कालोस्ति। नैष दोषः। साहचर्यात्ताच्छब्द्यं भविष्यति। कलापिसहचरितः कालः कलापीकाल इति ॥

र्थः। ननु कोशस्य वस्त्रकारणत्वात् कार्यस्य च कारणे संभवात् कथमर्थानुपपत्तिः। नैष दोषः। लोकप्रसिद्धार्थबाध एवं कृतः स्यात्। नहि कार्यावस्थायां लोकः कार्यकारणयोः संभवक्रियापेक्षमेवाधाराधेयभावमधिगच्छति किं तर्हि प्रकृतिविकारभावम्। अर्थश्चेति। लौकिकोर्थो विकारे प्रत्ययविधानेन शास्त्रेणानुसृतत्वाद्युक्तियुक्तो भवतीत्यर्थः॥ कलाप्य॥ कलापिसहचरितइति। यस्मिन्काले मयूराः कलापिनो भवन्ति स कलापीत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रभवः॥नहिकाकइति।यथाकाकवाशितस्यकालाधिकारनिवृत्तिर्नाभिधेयातथातत्रशब्दस्यापीत्यर्थः।तत्रग्रहणंचेति।सप्तम्यर्थमात्रप्रतिपत्तिप्रयोजनंतत्रग्रहणंकालसंबद्धस्यविशेषफलस्यतत्रग्रहणस्यनिवृत्तिविरोधातकरोतीत्यर्थः।गम्भीराञ्ज्यः॥ञ्यप्रकरणइति।अव्ययीभावाच्चेत्येतदतिव्यापकत्वादकृत्वापरिमुखादिभ्यएवञ्योविधेयः।गणेचाव्ययीभावकार्ययुक्तानिपरिमुखादीनिपठितव्यानिनतुप्रातिपदिकान्येव।तेनतेषांबहुव्रीहितत्पुरुषाणांग्रहणंनभविष्य

तत्रभवः॥तत्रेतिवर्त्तमानेपुनस्तत्रग्रहणंकिमर्थम्।तत्रप्रकरणेपुनस्तत्रवचनंकालनिवृत्त्यर्थम्।तत्रप्रकरणेपुनस्तत्रवचनंकालाधिकारनिवृत्त्यर्थम्।कालाधिकारोनिवर्त्यते।नहिकाकोवाश्यतइत्येवाधिकारानिवर्त्तन्ते।कोवाभिसंबन्धः।यत्तत्रग्रहणंकालाधिकारंनिवर्त्तयेत्।एषोभिसंबन्धःकालाभिसंबन्धंहितत्रग्रहणमनुवर्त्तते।तत्रग्रहणंचतत्रग्रहणस्यनिवर्त्तकंभवति।तस्मिंश्चनिवर्त्तकंभवति।तस्मिंश्चनिवर्त्तमानेकालाधिकारोपिनिवर्त्तते।गम्भीराञ्ज्यः॥अव्ययीभावाच्च॥ञ्यप्रकरणेपरिमुखादिभ्यउपसंख्यानम्॥ञ्यप्रकरणेपरिमुखादिभ्यउपसंख्यानंकर्तव्यम्।पारिमुख्यम्।पार्योष्ठ्यम्।पारिहनव्यम्।अव्ययीभावाद्विधानेउपकूलादिभ्यःप्रतिषेधः॥अव्ययीभावाद्विधानेउपकूलादिभ्यःप्रतिषेधोवक्तव्यः।औपकूलः।औपशालः॥अन्तःपूर्वपदाट्ठञ्॥अत्यल्पमिदमुच्यते।समानस्यतदादेश्च।समानस्यसामानिकः।तदादेः।सामानग्रामिकः।सामानदेशिकः॥अध्यात्मादिषुचेष्यते॥आध्यात्मिकम्।आधिदैविकम्।आधिभौतिकम् ॥ ऊर्ध्वंदमाच्चदेहाच्च॥ऊर्ध्वंदमाच्चदेहाच्चठञ्वक्तव्यः।और्ध्वदमिकम्।और्ध्वदेहिकम्।लोकोत्तरपदस्य च॥लोकोत्तरपदस्यचठञ्वक्तव्यः।ऐहलौकिकम्।पारलौकिकम्।मुखपार्श्वतसोरीयः॥मुखपार्श्वतइत्येताभ्यांतसन्ताभ्यामीयप्रत्ययोवक्तव्यः।मुखतीयम्।पार्श्वतीयः॥कुग्जनस्यपरस्यच॥ईयोवक्तव्यःकुक्चागमः।जनकीयः।परकीयः।ईयःकार्योथमध्यस्य।मध्यीयः॥मण्मीयौप्रत्ययौ॥तथामण्मीयौचापिप्रत्ययौवक्तव्यौ॥माध्यमः ॥

तीतिभावः।अथसूत्रंक्रियतेतदातिव्याप्तिपरिहारायेदंवक्तव्यमित्याह।अव्ययीभावादिति॥अन्तः॥ऊर्ध्वंदमाच्चेति।दमउत्तरपदेठञ्संनियोगेनोर्ध्वशब्दस्यमकारान्तत्वंनिपात्यते।ऐहलौकिकमिति।अनुशतिकादित्वादुभयपदवृद्धिः।मुखतीयमिति।अव्ययानांभमात्रेटिलोपः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्यमीयइति। गहादिषु मध्यो मध्यमं चाण्चरणइति यत्पठितं तत्र पृथिवीमध्यमध्यं प्राचीमध्यशब्दो गृह्यतइत्युक्तम्। ततोन्यत्रापि भवार्थं मध्यमीयइति यथास्यादिति मीयप्रत्ययविधिः। जातादिषु पृथिवीमध्यवाचिन एवं मध्यमीयइति यथास्यान्मध्यान्तरवाचिनो माभूदित्येवमर्थं गहादिषु पृथिवीमध्यस्य मध्यमभावइत्युक्तम्। स्थाम्नो लुगजिनात्तथेति। उभाभ्यामपि तदन्तविधिरिष्यते। बाह्यइति। गम्भीराञ्ञ्य इत्यत्रेदं वक्तव्यमित्यर्थः॥ तस्येदं॥ अधिकारोयमिति वृत्तिकारैर्व्याख्यातं तत्र प्रयोजनं पृच्छति। किमर्थमिति। यथाविहितविधानार्थमेव भवव्याख्यानयोरुपादानं कस्मान्न भवतीति भावः। अपवादविधानार्थइति वक्ष्यमाणा

मध्यमीयः। मध्यो मध्यं दिनण् चास्मात्॥ मध्यशब्दोयं मध्यंभावमापद्यते दिनण् चास्मात्प्रत्ययो भवतीति वक्तव्यम्। माध्यंदिनउपगायति। स्थाम्नो लुगजिनात्तथा॥ लुक्स्थाम्नो वक्तव्यः। अश्वत्थामा। अजिनात्तथा॥ अजिनान्ताच्च लुग्वक्तव्यः। कृष्णाजिनः। उष्ट्राजिनः। सिंहाजिनः। व्याघ्राजिनः। बाह्यो दैव्यः। पाञ्चजन्योथ गम्भीराञ्ञ्यइष्यते॥ तस्य व्याख्यानइति च व्याख्यातव्यनाम्नः॥ किमर्थं भवव्याख्यानयोर्युगपदधिकारः क्रियते। भवव्याख्यानयोर्युगपदधिकारोऽपवादविधानार्थः। भवव्याख्यानयोर्युगपदधिकारः क्रियते अपवादविधानार्थः। युगपदपवादान्वक्ष्यामीति। किमुच्यतेऽपवादविधानार्थ इति। न पुनर्निर्देशार्थोपि स्यात्। कृतनिर्देशौ हि तौ। कृतनिर्देशौ हि तावर्थौ। एकस्तत्रभवइति अपरस्तस्येदमिति। अथ व्याख्यातव्यनाम्नो ग्रहणं किमर्थम्। तत्र व्याख्यातव्यनाम्नो ग्रहणं भवार्थम्। तत्र व्याख्यातव्यनाम्नो ग्रहणं क्रियते भवार्थम्। किमुच्यते भवार्थमिति न पुनर्व्याख्यानार्थमपि स्यात्। व्याख्याने ह्यवचनात्सिद्धम्। व्याख्याने हि क्रियमाणे अन्तरेण वचनं सिद्धम्। अस्त्रति व्याख्यानमित्येतद्भवति। तस्मादुत्पत्तिर्भविष्यति। किं च प्रत्येतद्भवति। व्याख्यातव्यस्य नाम। यदुच्यते भवार्थमिति। तन्न व्याख्यानार्थमपि व्याख्यातव्यनाम्नो ग्रहणं क्रियते। इह माभूत्। पाटलिपुत्रस्य व्याख्यानी सुकोसलेति ॥

घञादयोऽपवादा भवव्याख्यानयोर्यथास्युरित्येवमर्थस्तयोरधिकारइत्यर्थः। निर्देशार्थोपीति। अणादीनां घादीनां चार्थे निर्देशार्थोपीत्यर्थः। भवार्थमिति। उत्तरैर्योगैर्भवे व्याख्यातव्यनाम्नएव प्रत्यया यथास्युरित्येवमर्थमित्यर्थः। व्याख्याने हीति। व्याख्यानशब्दस्य संबन्धिशब्दत्वाद्व्याख्यातव्याक्षेपस्य सिद्धत्वादिति भावः। पाटलिपुत्रस्येति। यादृशाः सुकोसलायां प्राकारादिसंनिवेशाः तादृशाः पाटलिपुत्रइति पाटलिपुत्रं व्याख्यातव्यं भवतीति स्यादेव प्रत्ययः। व्याख्यातव्यनामग्रहणात्तु व्याख्यातव्यत्वेन प्रसिद्धतमस्य ग्रन्थस्य यन्नाम तस्य ग्रहणादत्तिप्रसङ्गाभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निष्टोमे भवइति। अग्निष्टोमशब्दोत्र क्रतुवाच्येव न तु व्याख्यानव्यवाचीति ठञभावादणो लुक्। कल्पे चेति। अत्र ठञ एव लु क्॥ क्रतु॥ क्रतुयज्ञशब्दयोः पर्यायत्वात् प्रश्नः। क्रतुग्रहणमिति। संज्ञीभूतका इति। मुख्या इत्यर्थः। यज्ञे चेति। बहुवचननि र्देशात् स्वरूपग्रहणे निरस्ते तदन्तविधिः स्यादिति भावः। पाञ्चौदनिक इति। सोमपानाभावादमुख्यत्वमेषामिति भावः। तस्मा

अथ क्रियमाणेपि व्याख्यातव्यनाम्नो ग्रहणे कस्मादेवात्र न भवति। अवयवश आख्यानं व्याख्यानम्। पाटलिपुत्रं चास्मै अवयवश आचष्टे। ईदृशा अस्य प्राकाराः ईदृशा अस्य प्रासादा इति। सत्यमेवमेतत्। क्व चित्तु का चिदस्य ततरा गतिर्भवति। शब्दग्रन्थेषु चैषा प्रसूततरा गतिर्भवति निरुक्तं व्याख्यायते व्याकरणं व्याख्यायत इत्युच्यते न कश्चिदाह पाटलिपुत्रं व्याख्यायत इति। भवे मन्त्रेषु लुग्वचनम्। भवे मन्त्रेषु लुग्वक्तव्यः। अग्निष्टोमे भवो मन्त्रः। अग्निष्टोमः। राजसूयः। राजपेयः। कल्पे च व्याख्याने। कल्पे च व्याख्याने लुग्वक्तव्यः। अग्निष्टोमस्य व्याख्यानं कल्पोऽग्निष्टोमः। राजसूयः। वाजपेयः। स तर्हि वक्तव्यः। न वा तादर्थ्यात्ताच्छब्द्यम्। न वा वक्तव्यः। किं कारणम्। ता दर्थ्यात्ताच्छब्द्यं भविष्यति। अग्निष्टोमार्थोऽग्निष्टोमः। राजसूयः। वाजपेयः॥ क्रतुयज्ञेभ्यश्च॥ क्रतुग्रहणं किम र्थम्। यज्ञेभ्य इतीयत्युच्यमाने य एव संज्ञीभूतका यज्ञास्तत एवोत्पत्तिः स्यात्। आग्निष्टोमिको राजसूयिको वा जपेयिकः। यत्र वा यज्ञशब्दोऽस्ति। नावयज्ञिकः। पाकयज्ञिकः। इह न स्यात्। पाञ्चौदनिकः। शातौदनिकः। दाशौद निक इति। क्रतुग्रहणे पुनः क्रियमाणे न दोषो भवति। अथ यज्ञग्रहणं किमर्थम्। क्रतुभ्य इतीयत्युच्यमाने य ए व संज्ञीभूतकाः क्रतवस्तत उत्पत्तिः स्यात्। आग्निष्टोमिको राजसूयिको वाजपेयिक इति। इह न स्यात्। पाञ्चौ दनिकः। शातौदनिकः। दाशौदनिकः। यज्ञग्रहणे पुनः क्रियमाणे न दोषो भवति॥ द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपु रश्चरणनामाख्याताट्ठक्॥ नामाख्यातग्रहणं संघातविगृहीतार्थम्। नामाख्यातग्रहणं संघाविगृहीतार्थं द्रष्ट व्यम्। नामिकः। आख्यातिकः। नामाख्यातिकः॥ विदूराञ्ञ्यः॥ अयुक्तोयं निर्देशः। न ह्यसौ विदूरात्प्रभवति। किं तर्हि। वालवायात्प्रभवति। विदूरे संस्क्रियते ॥

द्रौणमुख्यपरिहारार्थमुभयोरुपादानम्। विदूरा॥ वालवाय इति। आदेश एव सूत्रे निर्दिष्टः। तेन त्वनुरूपः स्थानी वालवायश ब्द आक्षिप्यते। यथा शिवादिगणे विश्रवणरवणत्यादेशौ पठ्येते ताभ्यां तु विश्रवः शब्दः स्थानित्वेनाक्षिप्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृत्यन्तरमिति। विदूरशब्दो नगरविशेषस्येव पर्वतविशेषस्यापि वाचकः स एव च प्रकृतित्वेनाश्रीयत इत्यर्थः। पर्वते विदूरशब्दो न प्रसिद्ध इति चेद्दूजित्वरीवद्व्यवहरेत् प्रतिनियतपुरुषापेक्षापि प्रसिद्धिर्भवति वणिजश्च मङ्गलार्थं वाराणसीं जित्वरीति व्यवहरन्ति॥ अभि॥ चेतनावत इति। निष्क्रमणस्य पादविक्षेपरूपत्वादिति भावः। यद्यपि शकटादीनां निष्क्रमणादि भवति तथापि चेतनाधिष्ठानां न तु स्वतन्त्राणामिति भावः। अचेतनेष्वपीति॥ देशान्तरप्राप्तिलक्षणकार्यदर्शनादचेतनेष्वपि क्रियाव्यवहारः। न च पादविक्षेप एव निष्क्रमणम्। वायुर्निष्क्रामतीति दर्शनात्। ननु द्वारस्य देशान्तरप्राप्तिफलं निष्क्रमणं नैवास्ति। ए

एवं तर्हि वालवायो विदूरं च॥ वालवायशब्दो विदूरशब्दमापद्यते तस्मात् प्रत्ययो वक्तव्यः। प्रकृत्यन्तरमेव वा। अथ वा प्रकृत्यन्तरं विदूरशब्दोऽस्ति वालवायस्य। नवैतत्तत्र वालवायं विदूर इत्युपाचरन्ति। नवैतत्तत्रेति चेद्बूयाज्जित्वरीवदुपाचरेत्। यथा वणिजो वाराणसीं जित्वरीत्युपाचरन्ति। एवं वैयाकरणा वालवायं विदूर इत्युपाचरन्ति। वालवायो विदूरं वा प्रकृत्यन्तरमेव वा। नवैतत्तत्रेति चेद्बूयाज्जित्वरीवदुपाचरेत्॥ अभिनिष्क्रामति द्वारम्। अयुक्तोऽयं निर्देशः चेतनावत एतद्भवति। निष्क्रमणमपक्रमणं वा द्वारं चाचेतनम्। कथं तर्हि निर्देशः कर्त्तव्यः। अभिनिष्क्रमणं द्वारमिति। स तर्हि तथा निर्देशः कर्त्तव्यः। न कर्त्तव्यः। अचेतनेष्वपि चेतनवदुपचारो दृश्यते। तद्यथा। अयमस्य कोणोऽभिनिसृतः। अयमभिप्रविष्ट इति॥ अधिकृत्य कृते ग्रन्थे॥ लुबाख्यायिकाभ्यो बहुलम्॥ अधिकृत्य कृते ग्रन्थे इत्यत्र लुबाख्यायिकाभ्यो बहुलं वक्तव्यः। वासवदत्ता। सुमनोत्तरा। न च भवति भैमरथी॥ शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः॥ द्वन्द्वे देवासुरादिभ्यः प्रतिषेधो॥ द्वन्द्वे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः। दैवासुरम्। राक्षोसुरम्। दैवासुरी। राक्षोसुरी॥ सोऽस्य निवासः॥ अभिजनश्च॥ अथ निवासाभिजनयोः को विशेषः। निवासो नाम यत्र संप्रत्युष्यते। अभिजनो नाम यत्र पूर्वैरुषितम्॥

वं तर्हि करणस्यापि कर्तृसाध्यक्रियारोपादभिनिष्क्रामति द्वारमिति निर्देशः॥ अधि॥ आख्यायिकाभ्य इति। तादर्थ्ये चतुर्थी। आख्यायिकाभिधानाय यः प्रत्ययस्तस्य बहुलं लुब् भवतीत्यर्थः॥ सोऽस्य॥ निवासाभिजनयोरिति। अभिजनशब्देन पूर्वे बान्धवा उच्यन्ते। तत्संबन्धाद्देशोऽभिजनो गृह्यते। निवासशब्देनाप्यधिकरणसाधनेन देश एवेत्यविशेषात् प्रश्नः। निवासो नामेति। यत्र स्वयं वसति स तस्य निवासः। यत्र पूर्वे बान्धवा न्युषितं सोऽभिजन इत्यर्थः। निवाससाहचर्याच्चाभिजनो देशो गृह्यते न तु पूर्वे बान्धवाः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासुदेव॥वसुदेवस्यापत्यंवासुदेवः ऋष्यन्धकेत्यणन्तः।तत्रगोत्रत्वात्क्षत्रियत्वाच्चवुञिरूपस्वरयोःसिद्धत्वात्प्रश्नः।किम
र्थमिति।पूर्वनिपातमिति।अभ्यर्हितंपूर्वंनिपततीत्यस्यार्थस्यज्ञापनार्थमित्यर्थः।संज्ञैषेति।नित्यःपरमात्मदेवताविशेषइह
वासुदेवोगृह्यतइत्यर्थः।प्रसङ्गे नचनिर्देशेनपूर्वोक्तोप्यर्थोज्ञाप्यते॥जन॥जनपदिनोजनपदस्वामिनःक्षत्रियाः।तद्वाचिनांब
हुवचनेजनपदवाचिनाशब्देनसमानश्रुतीनांजनपदवत्सर्वंभवतिसोस्यभक्तिरित्येतस्मिन्विषये।यथाअङ्गाजनपदोभक्ति
रस्यआङ्गकइत्यवृद्धादपिवुञ्भवति।एवमङ्गाःक्षत्रियाभक्तिरस्येत्यत्रापिभवति।एवंस्थितेप्रश्नः।सर्ववचनमिति।अन्तरेणा
पिसर्ववचनंजनपदवदितिसामान्येनातिदेशःक्रियमाणःसर्वस्यभविष्यतीतिभावः।प्रकृतिनिर्ह्रासार्थमिति।असतिसर्वग्र

वासुदेवार्जुनाभ्यांवुन्॥किमर्थंवासुदेवशब्दाद्वुन्विधीयते।नगोत्रक्षत्रियाख्येभ्योबहुलंवुञित्येवसिद्ध
म्।नह्यस्तिविशेषः।वासुदेवशब्दाद्वुञोवावुनोवा।तदेवरूपंसएवस्वरः।इदंतर्हिप्रयोजनम्।वासुदेवश
ब्दस्यपूर्वनिपातंवक्ष्यामीति।अथवानैषाक्षत्रियाख्या।संज्ञैषातत्रभगवतः।जनपदिनांजनपदवत्सर्वंज
नपदेनसमानशब्दानांबहुवचने॥सर्ववचनंकिमर्थम्।सर्ववचनंप्रकृतिनिर्ह्रासार्थम्।सर्ववचनंक्रिय
तेप्रकृतिनिर्ह्रासार्थम्।प्रकृतिनिर्ह्रासोयथास्यात्।तच्चमद्रवृज्यर्थंद्रष्टव्यम्।माद्रोभक्तिरस्यमाद्रोवाभक्ति
रस्य मद्रकइत्येवयथास्यात्।वार्ज्योवाभक्तिरस्यवार्जोवाभक्तिरस्यवृजिकइत्येवयथा
स्यात्॥तेनप्रोक्तम्॥प्रोक्तग्रहणमनर्थकंतत्रादर्शनात्।प्रोक्तग्रहणमनर्थकम्।किंकारणम्।तत्रादर्श
नात्।ग्रामेग्रामेकालापकंकाठकंचप्रोच्यतेतत्रादर्शनात्।नचतत्रप्रत्ययोदृश्यते।ग्रन्थेचदर्शनात् ॥

हणेप्रत्ययस्यैवप्राधान्यादतिदेशःस्यान्नतुप्रकृतेरपि।सर्वग्रहणात्तुभवति।निर्ह्रासोऽपचयोल्पत्वमित्यर्थः।वृद्धिनिमित्ते
षुवुञादिषुविशेषाभावंमत्वाह।तच्चेति।द्वित्वैकत्वयोश्चशब्दभेदादतिदेशःप्रकृतिनिर्ह्रासार्थःनतुबहुत्वेतत्रमद्राइति
शब्दभेदाभावात्।मद्रकइति।मद्रस्यापत्यमितिद्व्यञ्मगधेत्यण्।माद्रशब्दस्यमद्रशब्दातिदेशः।तत्प्रत्ययादेशश्च।वार्ज्यइ
ति।वृजेरपत्यमितिवृद्धेत्कोसलेतिञ्यङ्॥तेन॥प्रपूर्वोवचिःप्रकाशनेअध्यापनरूपेवावर्त्ततेकरणेवा।तत्राद्येर्थेप्रत्ययो
नदृश्यतेद्वितीयेतुसूत्रान्तरेणसिद्धमितिमत्वाह।प्रोक्तग्रहणमिति।ग्रामेग्रामइति।सुशर्मादीनांप्रतिग्रामंप्रवक्तृत्वेपि
सुशर्मणाप्रोक्तंकाठकंसौशर्मणमितिप्रयोगोनदृश्यतइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यानीति। कर्त्तुरस्मरणात्तेषामिति भावः। याल्वसाविति। महाप्रलयादिषु वर्णानुपूर्वीविनाशे पुनरुत्पद्य ऋषयः संस्कारा
तिशयाद्वेदार्थं स्मृत्वा शब्दरचनां विदधतीत्यर्थः। तद्भेदादिति। आनुपूर्वीभेदादित्यर्थः। ततश्च कठादयः वेदानुपूर्व्याः कर्त्ता
र एव नत्वस्थितायाः एव सुधर्मादिवत्प्रवक्तारः। ततश्च छन्दस्यपि कृते ग्रन्थ इत्येव सिद्धः प्रत्यय इति भावः। माथुरीति। माथु

यत्र च दृश्यते ग्रन्थः सम्भवति। तत्र कृते ग्रन्थ इत्येव सिद्धम्। छन्दोर्थं तर्हीदं वक्तव्यम्। नहि छन्दांसि क्रियन्ते। नि
त्यानि छन्दांसि। छन्दोर्थमिति चेत्तुल्यम्। छन्दोर्थमिति चेत्तुल्यमेतद्भवति। ग्रामे ग्रामे काठकं कालापकं च प्रोच्य
ते। तत्रादर्शनात्। न च तत्र प्रत्ययो दृश्यते। ग्रन्थे दर्शनात्। यत्र दृश्यते ग्रन्थः सम्भवति। तत्र कृते ग्रन्थ इत्येव सिद्ध
म्। ननु चोक्तम्। नहि छन्दांसि क्रियन्ते। नित्यानि छन्दांसीति। यद्यप्यर्थो नित्यः। या त्वसौ वर्णानुपूर्वी सा ऽनित्या।
तद्भेदाच्चैतद्भवति। काठकम्। कालापकम्। मौदकम्। पैप्पलादकमिति। न तर्हीदानीमिदं वक्तव्यम्। वक्तव्यं च। किं प्र
योजनम्। यत्तेन प्रोक्तं। न च तेन कृतम्। माथुरी वृत्तिः। यदि तर्हि अस्य निबन्धनमस्ति। इदमेव वक्तव्यम्। तन्न वक्त
व्यम्। तदप्यवश्यं वक्तव्यम्। यत्तेन कृतं न च तेन प्रोक्तम्। वाररुचं काव्यम्। जालूकाः श्लोकाः॥ कलापिवैशंपा
यनान्तेवासिभ्यश्च॥ प्रत्यक्षकारिग्रहणम्॥ प्रत्यक्षकारिग्रहणं कर्त्तव्यम्। अन्तेवास्यन्तेवासिभ्यो मा भूदिति। तत्त
र्हि वक्तव्यम्। न वक्तव्यम्। कलापिखाडायनग्रहणं ज्ञापकं वैशंपायनान्तेवासिषु प्रत्यक्षकारिग्रहणस्य। यद
यं कलापिखाडायनग्रहणं करोति तज्ज्ञापयत्याचार्यो नान्तेवास्यन्तेवासिभ्यो भवतीति। कथं कृत्वा ज्ञापकम्।
वैशंपायनान्तेवासी कठः। कठान्तेवासी खाडायनः। वैशंपायनान्तेवासी कलापी। यद्यन्तेवास्यन्तेवासिभ्यो
पि स्यात्कलापिखाडायनग्रहणमनर्थकं स्यात्। पश्यति त्वाचार्यो नान्तेवास्यन्तेवासिभ्यो भवतीति ॥

रेण प्रथमतः प्रकाशित इत्यर्थः। कलापिनोणित्यण्ग्रहणस्याधिकविधानार्थत्वाद् द्वादप्यत्राण्भवति। द्विविधं चेह प्रोक्तं गृ
ह्यते। परकृतं स्वकृतं वा। यत्प्रकाशितं तेन प्रोक्ताधिकार एव कठादिभ्यो वक्ष्यमाणप्रत्ययविधानम्। कलापि॥ प्रत्यक्षकारि
ग्रहणमिति। करोतेः क्रियासामान्यवाचित्वात् सामान्यस्य सर्वविशेषेषु समवायादध्ययनमिह करणं गृह्यते। शिष्यशिष्या
णामपि शिष्यव्यवहारदर्शनाद्वार्त्तिकारम्भः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलापिखाडायनग्रहणमिति।वैशंपायनान्तेवासीकलापी।कलाप्यन्तेवासिनांवैशंपायनान्तेवासित्वाण्णिनौसिद्धेपृथक्क
लापिग्रहणंप्रत्यक्षकारिग्रहणेलिङ्गम्।तथावैशंपायनान्तेवासीकठः।कठान्ते वासीखाडायनो।वैशंपायनान्तेवासीभव
त्येवेतिणिनौसिद्धेशौनकादिषुणिन्यर्थंखाडायनग्रहणंसाक्षाच्छिष्यग्रहणेलिङ्गमित्यर्थः।तित्तिरिणेति।छणोऽभावेयथाण्नभ
वतितथाछन्दोब्राह्मणानीत्यत्रोक्तम्॥पुराण॥तुल्यकालत्वादिति।शाट्यायनादिप्रोक्तैर्ब्राह्मणैरेककालत्वादित्यर्थः॥कृते॥

ततःकलापिखाडायनग्रहणंकरोति।छन्दोग्रहणंचेतरथाह्यतिप्रसङ्गः।छन्दोग्रहणंचकर्तव्यम्।इतरथाह्य
तिप्रसङ्गःस्यात्।तित्तिरिणाप्रोक्ताःश्लोकाइति॥पुराणप्रोक्तेषुब्राह्मणकल्पेषु॥पुराणप्रोक्तेषुब्राह्मणकल्पेषु
याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वात्॥पुराणप्रोक्तेष्वित्यत्रयाज्ञवल्क्यादिभ्यःप्रतिषेधोवक्तव्यः।या
ज्ञवल्क्यानिब्राह्मणानि।सौलभानिइति।किंकारणम्।तुल्यकालत्वात्।एतान्यपितुल्यकालानीति॥कृतेग्र
न्थे॥कृतेग्रन्थेमक्षिकादिभ्योण्॥कृतेग्रन्थइत्यत्रमक्षिकादिभ्योण्वक्तव्यः।मक्षिकाभिः कृतंमाक्षिकम्।तद्वि
शेषेभ्यश्च॥तद्विशेषेभ्यश्चाण्वक्तव्यः।सरघाभिःकृतंसारघम्।गार्मुतम्।पौत्तिकम्।सतर्हिवक्तव्यः।नवक्तव्यः।
योगविभागात्सिद्धम्।योगविभागःकरिष्यते।कृतेग्रन्थे।ततःसंज्ञायाम्।संज्ञायांचतेनकृतइत्येतस्मिन्नर्थेयथा
विहितंप्रत्ययोभवति।सरघाभिःकृतंसारघम्।गार्मुतम्।पौत्तिकम्।ततःकुलालादिभ्योवुञ्संज्ञायामित्येव॥
इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येचतुर्थाध्यायस्यतृतीयेपादेप्रथममाह्निकम्॥तस्येद
म्॥तस्येदमित्यसंनिहितेऽप्राप्तिः।तस्येदमित्यसंनिहितेऽप्राप्तिः।किंकारणम्।इदमःप्रत्यक्षवाचित्वात्।इदमित्ये
तत्प्रत्यक्षेवर्तते।तेनेहैवस्यात्तस्येदमिति।तस्यादस्तस्यतदित्यत्रनस्यात्।सिद्धंतुयद्योगाषष्ठीतत्र।सिद्धमेतत्।
कथम्।यद्योगाषष्ठीवर्ततेतत्रेतिवक्तव्यम्।अनन्तरादिषुचप्रतिषेधः॥अनन्तरादिषुचप्रतिषेधोवक्तव्यः॥
तस्यानन्तरस्तत्समीपइति।किंयद्योगाषष्ठीवर्ततइत्यतोऽनन्तरादिषुप्रतिषेधोवक्तव्यः ॥

योविभागइति।संज्ञायांकुलालादिभ्योवुञितिसूत्रंविभक्तमित्यर्थः॥भाष्यप्रदीपेचतुर्थस्याध्यायस्यतृतीयेपादेप्रथमाह्निक
म्।तस्येदम्।इदमइति।इदंशब्दाद्योऽर्थःप्रतीयतेतस्मिन्नेवप्रत्ययप्रसङ्ग इत्यर्थः।सिद्धंत्विति।येनसंबन्धिनायोगेषष्ठीविधी
यतेतस्मिन्प्रत्ययइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सर्वथेति। पाणिनीये कात्यायनीये च न्यास इत्यर्थः। पाणिनीयन्यासेपि देवदत्तस्येदमनन्तरमिति प्रत्ययप्रसङ्गः। सिद्धं त्वि
ति। असंनिहिते प्रत्ययविधानमनन्तरादिषु चाप्राप्तिरित्यर्थः॥ स्व इति। तेनात्मीयज्ञातिधनेष्वेव प्रत्यया भवन्ति न त्वनन्त
रादिषु। पत्राद्वाह्य इति। पत्राध्वर्युपरिषदश्चेत्यत्रासमर्थनिर्देशः। रथादिति। रथाद्यत्सत्र पूर्वादजित्येतयोर्योगयोरर्थनिर्दे
शः। सांवहित्रमिति। तत्र पूर्वत्रासिद्धमिति ढत्वादीनामिटि कर्त्तव्ये सिद्धत्वात्तु चिदिटि रूपम्। आग्नीध्रमिति। अग्निमिन्ध
नेत्याह। सर्वथानन्तरादिषु प्रतिषेधो वक्तव्यः। सिद्धं तु परिगणनात्। सिद्धमेतत्। कथम्। परिगणनं क्रियते। स्वे
ग्रामजनपदमनुष्येभ्यः। स्वे ग्रामजनपदमनुष्येभ्य इति वक्तव्यम्। ग्रामः स्रौघ्नः माथुरः। जनपदः आङ्गकः। वा
ङ्गकः। मनुष्याः दैवदत्तः। याज्ञदत्तः॥ पत्राद्वाह्ये॥ पत्राद्वाह्य इति वक्तव्यम्। आश्वमौष्ट्रं गार्दभम्। रथाद्रथाङ्गे॥
रथाद्रथाङ्ग इति वक्तव्यम्। आश्वरथम्। गार्दभरथम्। औष्ट्ररथम्। वहेस्तुरणिट्च॥ वहेस्तृन्तादण् चेट् च वक्तव्यः।
संवोढुः स्वं सांवहित्रम्। अग्नीधः शरणे रञ्भं च॥ अग्नीधः शरणे रञ् प्रत्ययो भसंज्ञा च वक्तव्या। अग्नीधः शरण
माग्नीध्रम्॥ समिधामाधाने षेण्यण्॥ समिधामाधाने षेण्यण् वक्तव्यः। समिधामाधानो मन्त्रः सामिधेन्यो मन्त्रः। सामि
धेनीका। चरणाद्धर्माम्नाययोः॥ चरणाद्धर्माम्नाययोरिति वक्तव्यम्। कठानां धर्म आम्नायो वा काठकम्। मौद्क
म्। पैप्पलादकम्। तत्तर्हीदं बहु वक्तव्यम्। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं तस्येदमित्यसंनिहिते
प्राप्तिरिति। किमिदमपि भवान्प्रत्ययार्थमेवोपालभते न पुनः प्रकृत्यर्थमपि। यद्येवं तर्हि इदमित्येतत्प्रत्यक्षे
वर्त्तते एवं तदित्येतत्परोक्षे वर्त्तते। तेनेहैव स्यात्तस्येदमिति। अस्यामुष्य इत्यत्र न स्यात्। अस्त्यत्र विशेषः। ए
कशेषनिर्देशोत्र भविष्यति। तस्य च अमुष्य च तस्येति। इहापि तर्ह्येकशेषनिर्देशो भविष्यति। तच्च अदश्च इदं च इ
दमित्येव। यदप्युच्यते। अनन्तरादिषु प्रतिषेधो वक्तव्य इति। न वक्तव्यः। अनभिधानादनन्तरादिषूत्पत्तिर्न भवि
ष्यति॥ द्वन्द्वाद्वुन्वैरमैथुनिकयोः॥ वैरे देवासुरादिभ्यः प्रतिषेधः॥ वैरे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः। दैवासुरम्। राक्षोसुरम्।
इति क्विप्। अन्तर्भावितण्यर्थत्वादिन्धिः सकर्मकः। होताग्नीदुच्यते। तस्य शरणं गृहमाग्नीध्रम्। भसंज्ञया पदसंज्ञाया बाधनाज्जश्त्वाभावः।
चरणादिति। गोत्रचरणादित्यत्रासमर्थनिर्देशः। एकशेषनिर्देश इति। त्यदादीनि सर्वैर्नित्यमित्येकशेषः। त्यदादीनां यद्यत्परं तत्तच्छि
ष्यत इत्युक्तेः पूर्वशेषदर्शनाच्चेत्युक्तमिति पूर्वस्यापि तदः शेषः। सौत्रत्वाच्च निर्देशस्यैकवचनं विभक्त्यन्तानां चैकशेषः। एकशे
षद्वारेण चैतत्प्रतिपादयति षष्ठ्यन्तमात्रं प्रकृतित्वेन विवक्षितं तत्प्रतियोगिमात्रं च प्रत्ययार्थत्वेन यत्त्वपरं लिङ्गसंख्याप्रत्यक्षपरो
क्षादिकं तदविवक्षितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्घाङ्क॥ घोषग्रहणमिति। घोषेपिप्रत्ययः सिध्यति। वैषम्याच्चयथासंख्यंनभवति। लिङ्गेति। लिङ्ग विहितप्रत्ययोलिङ्गशब्दे नोच्यते॥ रैवति॥ अपाणिनीयः सूत्रेषुपाठइत्याहु। कौपिञ्जलेति। गोत्रेवुञिप्राप्तेऽण्विधिः। अस्मादेवनिपातनादपत्यार्थेकुपिञ्ज

सङ्घाङ्कलक्षणेष्वञ्यञिञामण्॥ सङ्घादिषुघोषग्रहणंकर्त्तव्यम्। गार्गोघोषः। वात्सोघोषः। किमर्थोणकारः। रुद्ध्यर्थः। ञ्णितीतिवृद्धिर्यथास्यात्। सङ्घादिषुप्रत्ययस्यणित्करणानर्थकंवृद्धत्वात्प्रातिपदिकस्य। सङ्घादिषुप्रत्ययस्यणित्करणमनर्थकम्। किंकारणम्। वृद्धत्वात्प्रातिपदिकस्य। वृद्धमेतत्प्रातिपदिकम्। लिङ्गपुंवद्भावप्रतिषेधार्थंतुलिङ्गपुंवद्भावप्रतिषेधार्थस्तुणकारःकर्त्तव्यः। लिङ्गार्थम्। वैदी। पुंवद्भावप्रतिषेधार्थम्। वैदीस्थूणाऽस्य वैदीस्थूणः। वृद्धिनिमित्तस्येतिपुंवद्भावप्रतिषेधोयथास्यात्। रैवतिकादिभ्यश्छः॥ कौपिञ्जलहास्तिपदादण्॥ कौपिञ्जलहास्तिपदादण्वक्तव्यः। कौपिञ्जलः। हास्तिपदः। आथर्वणिकस्येकलोपश्च॥ आथर्वणिकस्येकलोपश्चाण्वक्तव्यः। आथर्वणोधर्मः। आथर्वणआम्नायः। इदमाथर्वणार्थमा थर्वणिकार्थंचचतुर्ग्रहणंक्रियते। वसन्तादिषुअथर्वन्शब्दआथर्वणशब्दश्चपठ्यते। षष्ठेअध्यायेप्रकृतिभावार्थंग्रहणंक्रियते। इदंचतुर्थमिकलोपार्थम्। द्विर्ग्रहणंशक्यमकर्त्तुम्। कथम्। तेनप्रोक्तमितिप्रकृत्य ऋषिभ्योलुग्वक्तव्यः। वसिष्ठोनुवाकोविश्वामित्रोनुवाकइत्येवमर्थम्। ततोवक्तव्यम्। अथर्वणोवेति। तेनसिद्धमथर्वाइति। आथर्वणइतिच। अथवसन्तादिष्वाथर्वणशब्दःपठितव्यस्तत्रचनार्थःप्रकृतिभावार्थेननापिइकलोपार्थेन। यदिवसन्तादिष्वाथर्वणशब्दःपठ्यते। अथर्वाणमधीतेआथर्वणिकइतिनसिध्यति। नैषदोषः। इहास्माभिस्त्रैशब्द्यंसाध्यम्। अथर्वाणमधीते। आथर्वणमधीते। आथर्वणिकइति। तत्रद्वयोःशब्दयोःसमानार्थयोरेकेनविग्रहः। अपरस्मादुत्पत्तिर्भविष्यति। अव्यविकन्यायेन। तद्यथा। अवेर्मांसमितिविगृह्याऽविकशब्दादुत्पत्तिर्भवति। आविकमिति। एवमाथर्वणमधीतइतिविगृह्यआथर्वणिकइतिभविष्यति। अथर्वाणमधीतइतिवाक्यमेवभविष्यति ॥

लहस्तिपादशब्दाभ्यामण्। पादस्यपद्भावश्च। गोत्राधिकाराद्गोत्रप्रत्ययान्तादिदंविधानम्। आथर्वणिक॥ अण्वक्तव्यइति। कौपिञ्जलहास्तिपदादणित्यस्यापाणिनीयत्वात्। ऋषिभ्योलुगिति। वसिष्ठादिशब्दसिद्धयेअवश्यवक्तव्योलुक् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नत्वः सत्यस्मिन्सूत्रे आथर्वणिकानां धर्मआ म्नायोवेत्यत्रार्थे आथर्वण शब्दो न सिध्यतीत्याह। तत्रेति। यदेवाथर्वणा प्रोक्त
माथर्वणं शास्त्रं तदेवाथर्वणिकानामाम्नायो न तु तेषामाम्नायान्तरमाथर्वण शब्दवाच्यं धर्मस्तु आथर्वणस्याद स्यादाथर्व
णशब्देनाभिधास्यते। न चेदानीमिति। चरणाद्धर्माम्नाययोरितिवचनादर्थान्तरे प्रत्ययाभावादित्यर्थः। तस्यविकारः ॥
शैषिकनिवृत्त्यर्थमिति। विकारावयवयोर्घादयो माभूवन्नित्येवमर्थं तस्यग्रहणमित्यर्थः। कथं चेति। किमधिकारात्प्राप्नुव
न्ति। अथ तस्येदमितिवचनात्। यद्यधिकारात्प्राप्तानां तस्यग्रहणेन निवृत्तिः क्रियते तदा पुनरपि तस्येदमित्यनेन प्राप्नुव
न्ति। अथ तस्येदमित्यनेन प्राप्तानां तस्यग्रहणेन निवृत्तिः क्रियते। तदासौ नोपपद्यते उत्तरार्थत्वादस्य योगस्य तत्रैव चरिता
र्थत्वादिति प्रश्नः। तस्येदं वचनादिति। तस्य ग्रहणं घादिसंबद्धस्य तस्यग्रहणस्य निवर्तकं घादीनपि निवर्त्तयति। तन्नि
वर्त्तनसामर्थ्यात्तस्येदमित्यनेनापि विकारावयवयोर्घादयो न भवन्ति। अन्यथा तन्निवर्त्तनमनर्थकं स्यादित्यर्थः। प्राग्दी

तत्राभिसंबन्धमात्रं कर्त्तव्यम्। आथर्वणिकानामिदमिति। न चेदानीमन्यदाथर्वणिकानां स्वंभवितुमर्हति
अन्यदतो धर्मादाम्नायाद्वा॥ तस्य विकारः॥ तस्येति वर्त्तमाने पुनस्तस्यग्रहणं किमर्थम्। तस्यप्रकरणे तस्यपु
नर्वचनं शैषिकनिवृत्त्यर्थम्। तस्यप्रकरणे तस्यपुनर्वचनं क्रियते। शैषिकनिवृत्त्यर्थम्। शैषिका निवर्त्तन्ते।
कथं च प्राप्नुवन्ति। तस्येदं वचनात्प्रसङ्गः। तस्येदं विशेषा ह्येते। अपत्यं समूहो निवासो विकार इति। किमर्थ
मिदमुच्यते। बाधनार्थं कृतं भवेत्। ये तस्य बाधकास्तद्बाधनार्थम्। कथं पुनरशैषिकः शैषिकं बाधेत। उ
त्सर्गः शेष एवासौ। यो ह्युत्सर्गः सोपि शेष एव ॥

व्यतद्रत्यवधिविशेषाश्रयेण त्वणादीनामधिकाराद्णादय इह संबध्यन्त इति विपर्ययोऽत्र न चोदनीयः। घादयोऽनुवर्त्तन्ता
म् अणादयो मानुवर्त्तन्तामिति। किमर्थमिति। सर्वस्यैव सूत्रस्याक्षेपः। बाधनार्थमिति। तस्येदमित्यत्राणादयो घादयश्चाणाद्य
पवादा विहिताः। तत्र विकारावयवयोरणादय एव यथा स्युस्तदपवादा घादयो माभूवन्निति एवमर्थमिदमुच्यते। ये तस्येति।
अण इत्यर्थः। कथं पुनरिति। तस्येदमित्यस्मात्तस्य विकार इत्यस्य पृथग्निर्देशादनेन विधीयमानोऽण्प्रत्ययो शैषिकः कथं वि
कारे प्राप्तान्घादीन्बाधत इति प्रश्नः। उत्सर्ग इति। असत्यस्मिन्पृथक्सूत्रे विकारोपि तस्येदमित्यत्रान्तर्भावाच्छेषो भवतीति
घादयः प्राप्नुवन्ति। उत्सर्गत्वं विकारस्य प्रकृतिविशेषासंबन्धादसति हि योगविभागे बिल्वादिभ्योऽण् विकार इति वक्तव्यम्। त
त्र प्रकृतिविशेषसंबद्ध एव विकार उपयुक्तत्वादशेषः स्यात्। प्रकृतिमात्रसंबद्धस्त्वनुपयोगाच्छेष एव स्यात्। सति तु योगवि रामः
भागे विकारस्यापि अण्विधावुपयोगादशेषत्वाद्घादीनामप्राप्तिः। अप्राप्तिरनुमानमेव बाध इति भावः ॥ ८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केपुनरिति। शैषिकाणामिति निर्द्धारणे षष्ठी। अपवादैरिति। वक्ष्यमाणैरणादिभिरित्यर्थः। हलसीरादिति। हलशब्दो नवि
नयस्यानिसन्तस्येत्याद्युदात्तः सीरशब्दोपिक्रन्नन्तो निलात्। ततश्चैताभ्यां विकारेन कश्चिदणपवादोस्तीति ठकं बाधित्वा
णेव भवति हालः सैर इति। कथं पुनरिति। हलसीराट्ठगित्ययमण एवापवादः कथमणेव शक्यो बाधितुं योगस्तूत्तरार्थ ए
वस्यादिति प्रश्नः। तस्य ग्रहणसामर्थ्यादिति। बाधकबाधनार्थादणः पुनर्विधानादित्यर्थः। तस्य ग्रहणमेवानन्यार्थमिति
तत्सामर्थ्यादित्युक्तम्। इदमर्थादिकारस्योत्कर्षो बाधकबाधनार्थ एवेत्यर्थः। नवेति। घादीनां प्राधान्यात्तस्य ग्रहणे गुणे

इह न किंचिदुच्यते। हल
केपुनः शैषिकाणां विकारावयवयोः प्राप्नुवन्ति। यावता सर्वमप्यपवादैर्व्याप्तम्। किमिदं भावानध्या
सीराट्ठगिति। कथं पुनरिच्छताप्यपवादः प्राप्नुवन् शक्यो बाधितुम्। तस्य ग्रहणसामर्थ्यात्। समर्थविभ
रुद्ध्य तस्य ग्रहणस्यैव प्रयोजनमाह। न पुनः सर्वस्यैव योगस्य। अवश्यमुत्तरार्थोर्थनिर्देशः कर्तव्यः। नवा संप्रत्ययः। नवासं
क्तिरपि तर्ह्यवश्यमुत्तरार्थानिर्देश्या। प्रकृता समर्था विभक्तिरनुवर्तते। तस्येदमिति। यदि खल्वपि विका
प्रत्यय इयता सूत्रेण शैषिकाणां निवृत्तौ। नवा काकोवाश्यतद्वत्स्वेवमधिकारा निवर्तन्ते। अवय
रावयवयोः शैषिका नेष्यन्ते। महता सूत्रेण निवृत्तिः कर्तव्या। अवयवे चाप्राण्योषधिवृक्षेभ्योऽनिवृत्तिः।
वे चाप्राण्योषधिवृक्षेभ्योऽनिवृत्तिरिष्टा तत्र निवृत्तिः प्राप्नोति। पाटलिपुत्रकाः प्राकाराः। पाटलिपुत्रकाः प्रासादा इति।
अण्मयटोश्च विप्रतिषेधानुपपत्तिः मयडुत्सर्गात्। अण्मयटोश्च विप्रतिषेधो नोपपद्यते। पठिष्यति हि विप्रतिषे
धम्। अणो वृद्धान्मयडिति स विप्रतिषेधो नोपपद्यते। किं कारणम्। मयडुत्सर्गात्। निवर्तमानेषु शैषिकेषु
वृद्धान्मयडुत्सर्गः तस्याणपवादः। उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः ॥

घादी
प्राक्तने निवर्तमानेपि निवृत्तिर्न शक्यते प्रतिपादयितुं न हि गुणानुयायि प्रधानं भवति। अवयवे चेति। अवयवे अर्थो घादी
नां निवृत्तत्वादप्राण्योषधिवृक्षेभ्योऽप्रसङ्ग इत्यर्थः। पाटलिपुत्रका इति। पाटलिपुत्रस्यावयवा इति तस्येदमित्यर्थे रोपधेतोः
प्राचामिति वुञ्। मयडुत्सर्गादिति। मयडुत्सर्गः शैषिकेषु निवृत्तेषु सामान्येन विधानमित्यर्थः। अप्राप्त एव वृद्धाच्छे नित्यं वृद्धे
तिमयडारम्भात्। अनुदात्तादेरित्ययमवृद्धेषु कृतार्थस्तत्राविशेषादञ्मयटोः कोपधाच्चेत्ययमपवादोणिति शाकमय
मित्यत्र मयडेन लभ्यत इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कै. अपवादविप्रतिषेधादिति। शाकशब्दाच्छापवादयोरणमयटोः परत्वान्मयट् सिध्यतीत्यर्थः। इदानीं भाष्यकारः सूत्रेणैवेष्ट ४ ३ २
५ सिद्धिं प्रतिपादयितुमाह। यत्तावदिति। इदमिति। घादीनामिह निवृत्तत्वादयमण् निरपवादः घाद्यनुवृत्तौ हि योगविभागो
नर्थकः स्यात्तस्येदमित्यनेनैव विकारेऽप्यणादीनां घादीनां च सिद्धत्वात्। तत्रेति। यथा हलसीराट्ठगित्यणि प्राप्ते ठग्विधीयमा
नो द्वितीयो भवति तमपवादत्वादयमण् बाधते तृतीयकस्याप्राप्तः ये तृतीया इति। तृतीयस्यानेप्राप्तत्वादस्याणस्तुल्यक
क्ष्यत्वात्परत्वाद्बाध्या यथा रजीनां विकार इति तस्येदमित्यण् प्रथमः। अवृद्धादपीति वुञ् द्वितीयः। मद्रवृज्योः कन्निति तृती
योऽनेन बाध्यते। वाजेइति। वृजिशब्दस्य फिट्सूत्रेषु विकल्पेनोदात्तत्वविधानात्पक्षे आद्युदात्तत्वादण्। पक्षे अनुदात्तादेश्चे
त्यञ्। ये चतुर्था इति। यथा त्रिगर्त्तानां विकारः त्रैगर्त्त इति त्रिगर्त्तशब्दो बहुव्रीहिः पूर्वपदप्रकृतिस्वरेणाद्युदात्तः। तत्रा

अनुवृत्तौ हि वस्योत्सर्गापवादविप्रतिषेधान्मयट्। अनुवर्त्तमाने तु शैषिके वृद्धाच्छ उत्सर्गः। तस्याणमयटा
वपवादौ। अपवादविप्रतिषेधान्मयड् भविष्यति। यत्तावदुच्यते नवा संप्रत्यय इत्यतासूत्रेण शैषिकाणां निवृत्
तेरिति संप्रत्यय एव। नह्यत्राण् दुर्लभः। सिद्धोऽत्राण्। तस्येदमित्येव। सोऽयं पुनस्तस्य ग्रहणेन सापवादस्याणः
प्रसङ्गे इमं निरपवादकमणं प्रतिपादयति तत्र ये तावत् द्वितीयास्ताननपवादत्वाद्बाधिष्यते। ये तृतीयास्तान्प
रत्वात्। ये चतुर्थास्तत्र केचित्परत्वादपवादा अनन्तरान्विधीन्बाधन्ते इत्येवमिमं न बाधिष्यन्ते। केचिन्मध्येऽपवा
दाः पूर्वान्विधीन्बाधन्त इति। एतावन्तश्चैते स्युः यदुत द्वितीयास्तृतीयाश्चतुर्था वा न पञ्चमाः सन्ति न षष्ठाः ॥

ण् प्रथमः। जनपदलक्षणो वुञ् द्वितीयः। गर्त्तोत्तरपदलक्षणश्छस्तृतीयः। तदवधिग्रहणविहितो वुञ् चतुर्थः। केचिन्म
ध्य इति। यथा रङ्कूणां विकारो राङ्कव इत्यत्राण् प्रथमः। तदपवादयोरवृद्धादपीति ओर्देशे ठञिति वुञ्ठञोस्तुल्यकक्षयो
रन्यतरो द्वितीयः। ततः कोपधादणिति वा कच्छादिपाठाद्वाण् तृतीयः। मनुष्यतत्स्थयोर्वुञिति चतुर्थः पूर्वमेवाणं बाध
ते न तु विकाराणं बाधते। तेनैव तु परत्वाद्वुञ् बाध्यते। ततः ओरञित्यञि प्राप्ते कोपधाच्चेत्यण् प्रतिप्रसूयते। न पञ्चमा इ
ति। शैषिका इति शेषः। अन्यथा प्रावृषो विकारः प्रावृण्मय इति मयडस्येवात्राण् प्रथमः। तदपवादः कालाट्ठञिति द्वि रामः
तीयः। ऋत्वण् तृतीयः। प्रावृष एण्य इति चतुर्थः। विकाराण् पञ्चमः। नित्यं वृद्धेति मयट् षष्ठो भवति ॥ ८५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्पीति। अवयवे च प्राण्योषधिवृक्षेभ्य इति प्रकृतिविशेषाद्विधीयमानोऽण् तस्मादेव शैषिकाणां बाधको न तु प्रकृत्यन्तरात् स्वयमेवाभावादित्यर्थः। अञमिति। ओरञ् अनुदात्तादेश्चेति सूत्रद्वयविहितं कोपधाच्चेत्यण् बाधिष्यते न तु मयट्। मयडेवं तु परत्वादण् बाधिष्यत इत्यर्थः॥ अवयवे॥ कृतनिर्देशौ ह्येताविति। यद्यपि शैषिकनिवृत्त्यर्थत्वमुक्तं तथापि तदनपेक्ष्यैकं चित्तावदणाद्यसिद्धाः भास्मनं मार्त्तिकमित्यादावित्यभिसंबध्यायेतदुक्तम्॥ अनु॥ कुवलीति। कुवल

यद्प्युच्यते। अवयवे चाप्राण्योषधिवृक्षेभ्यो निवृत्तिरिति। प्राण्योषधिवृक्षेभ्यो निवृत्तिरुच्यते। तत्र कः प्रसङ्गो यद् प्राण्योषधिवृक्षेभ्यो निवृत्तिः स्यात्। यद्प्युच्यते। अण्मयटोश्च विप्रतिषेधानुपपत्तिर्मयड्वक्ष्यमाणादिति। मा भूद्विप्रतिषेधः। पुरस्तादपवादा अनन्तरान् विधीन् बाधन्त इत्येवमणं बाधिष्यते मयटं न बाधिष्यते॥ अवयवे च प्राण्योषधिवृक्षेभ्यः॥ किमर्थं विकारावयवयोर्युगपदधिकारः क्रियते। विकारावयवयोरुक्तम्। किमुक्तम्। तत्र तावदुक्तम्। भवत्याख्यानयोर्युगपदधिकारोऽपवादविधानार्थः। कृतनिर्देशौ हिताविति। इहापि विकारावयवयोर्युगपदधिकारोऽपवादविधानार्थः कृतनिर्देशौ ह्येतावर्थौ तस्येदमिति॥ बिल्वादिभ्योऽण्॥ किमर्थं बिल्वादिषु गवीधुकाशब्दः पठ्यते। न कोपधादित्येव सिद्धम्। बिल्वादिषु गवीधुकाग्रहणं मयट्प्रतिषेधार्थम्। बिल्वादिषु गवीधुकाग्रहणं क्रियते मयट्प्रतिषेधार्थम्। मयडतो मा भूदिति॥ अनुदात्तादेश्च॥ अनुदात्तादेरञ्विधाने आद्युदात्तान्ङीषउपसंख्यानम्। अनुदात्तादेरञ्विधाने आद्युदात्तान्ङीषउपसंख्यानं कर्त्तव्यम्। कुवली। कौवलम्। बदरी। बादरम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। निघाते कृतेऽनुदात्तादेरित्येव सिद्धम्। न सिध्यति। किं कारणम्। पदस्यानुदात्तादित्वम्। पदस्य हि निघातः। सुबन्तं च पदम्। ङ्याप्प्रातिपदिकाच्च प्रत्ययो विधीयते। न वासमर्थस्यानुदात्तादित्वात्। न वा वक्तव्यम्। किं कारणम्। समर्थस्यानुदात्तादित्वात्। समर्थमनुदात्तादित्वेन विशेषयिष्यामः। नैवं शक्यम्। इह च प्रसज्येत। वाचो विकारः त्वचो विकार इति॥

बदरशब्दो ग्रामादीनां चेत्याद्युदात्तस्ताभ्यां गौरादित्वान्ङीषि पदस्येति। अनुदात्तं पदमेकवर्जमिति वचनादिह चानुदात्तादिग्रहणस्य ङ्याप्प्रातिपदिकविशेषणत्वात्। यथोक्तम्। वृद्धाद्वृद्धौ वर्णौ स्वरद्वज्लक्षणे च प्रत्ययविधौ तत्संप्रत्ययार्थमिति। न वेति। विभक्त्युत्पत्तौ सत्यां ङ्यन्तस्यानुदात्तादित्वं मन्यते। न च वृद्धाद्वृद्धेत्वेनेन विरोधः। समर्थावयवस्य ङ्याप्प्रातिपदिकस्य वृद्धादिविशेषणत्वेनाश्रयणात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतद्वीति। सावेकाचइति विभक्तेरुदात्तत्वात् प्रातिपदिकयोस्तु धातुस्वरेणान्तोदात्तत्वम्। सर्वशब्दश्च सर्वस्य सुपीति सुप्याद्युदात्तः। केवलस्त्वयमुणादिष्वन्तोदात्तो निपातित इत्यनुदात्तादिः। तस्माद्विभक्त्युत्पत्तेः प्रागनुदात्तादित्वमाश्रणीयम्। पूर्वस्य निघात इति। प्राग्व्यवस्थितस्य निघात इत्यर्थः। गर्भशब्द इति। अर्तिगृभ्यां भन्निति प्रत्ययस्य नित्वात्। पदग्रहणमिति। अस्य पदत्वं भविष्यति तस्यैवैकवर्जमनुदात्तं यथा स्यात् पदसमूहस्य माभूदित्येवमर्थं पदग्रहणमित्यर्थः॥ मयट्॥ किमर्थमिति। विकारावयवौ प्रकृतावेवेति भावः। मयडिति। एतयोरित्येतस्मिन्सति पुनर्विधानं मयटो भवति तच्चापवादवि

एतद्धि समर्थमनुदात्तादि। इहचन स्यात्। सर्वेषां विकारः सर्व इति। तस्मान्नैवं शक्यम्। नचेदेवमुपसंख्यानं कर्त्तव्यम्। न कर्त्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति। यावत्येव द्वितीयस्य स्वरस्य प्रादुर्भावस्तावत्येव पूर्वस्य निघात इति। यदयं भिक्षादिगणे गर्भिणीशब्दं पठति। कथं कृत्वा ज्ञापकम्। भिक्षादिषु गर्भिणीशब्दस्य पाठे एतत्प्रयोजनम्। अनुदात्तादिलक्षणोऽञ्मा भूदिति। यदि पदस्य निघातः। गर्भशब्दोयमाद्युदात्तस्तस्मादिनिरिन्नन्ताद्यः प्रत्ययः प्राप्नोति स तावत्स्यात्। तस्मिन्नवस्थिते निघातस्तत्र कोनुदात्तादिलक्षणस्याञः प्रसङ्गः। पश्यति त्वाचार्यः। यावत्येव द्वितीयस्य स्वरस्य प्रादुर्भावस्तावत्येव पूर्वनिघात इति। अतो भिक्षादिषु गर्भिणीशब्दं पठति। पदग्रहणं किमर्थम्। पदग्रहणं परिमाणार्थम्। पदग्रहणं क्रियते परिमाणार्थम्। पदावधेर्यथा स्यात्। वाक्यस्य मा भूत्। अनुदात्तं पदमेकवर्ज्यमिति॥ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः॥ किमर्थं मयड्वैतयोरित्युच्यते। मयड्वैतयोरिति वचनमपवादविषयेऽनिवृत्त्यर्थम्। मयड्वैतयोरित्युच्यते। अपवादविषयेऽनिवृत्तिर्यथा स्यादिति। बिल्वमयं बैल्वम्। एतयोरित्यर्थनिर्देशः। एतयोरित्यर्थनिर्देशो द्रष्टव्यः। तदेष्यं विजानीयात्। योगयोर्वा प्रत्यययोर्वेति। तदाचार्यः सुहृद्भूत्वाऽन्वाचष्टे। एतयोरित्यर्थनिर्देश इति॥ ञितश्च तत्प्रत्ययात्॥ किमर्थमिदमुच्यते। विकारावयवयो

विकारावयवयुक्तत्वान्मयट्प्रतिषेधार्थं ञितश्च तत्प्रत्ययादञो विधानम्॥

षयेऽपि प्राप्त्यर्थं संपद्यते। योगयोर्वेति। योगयोः प्रत्यययोर्वा विषये मयडित्यर्थः स्यादित्यर्थः॥ ञितश्च तत्प्रत्ययात्॥ तयोर्विकारावयवयोर्यो ञितप्रत्ययः तदन्ताद्विकारावयवयोरेवाञ्भवतीति सूत्रार्थः। किमर्थमिति। अन्तरेणापि सूत्रं सिद्धिं मत्वा प्रश्नः। विकारावयवयोरिति। कपोतस्य विकारो यन्मांसं कापोतं तस्यापि विकारो रसो भवति कपोतावयवस्य सक्थ्यादेः कापोतस्यावयवोन्यो भवतीति वृद्धत्वान्मयट्प्रसङ्गे तन्निवृत्त्यर्थमञ्विधानमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न वेति। यदा कपोतावयवस्य सक्थ्यादेरवयवो विवक्ष्यते तदा कपोतशब्दादेव सक्थ्याद्यवयववृत्तेरञ् भविष्यति। कपोतविकारमांसवृत्तेश्च कपोतशब्दान्मांसविकारे रस इत्यर्थः। तेनेति। मयटः कापोतमयमिति विकारावयवयोः प्रयोगाभावादित्यर्थः। तस्मादिति। यद्यनभिधानं नाश्रीयते तदा जितश्च तत्प्रत्ययादिति सूत्रमपनीय बैल्वमयादिनिवृत्त्यर्थं तत्प्रत्ययाल्लु

विकारो विकारेण युज्यते अवयवश्चावयवेन। विकारावयवयोर्विकारावयवयुक्तत्वान्मयट् प्राप्नोति। इष्यते चाञेव स्यादिति। तत्रान्तरेण यत्नं न सिद्ध्यतीति मयट्प्रतिषेधार्थं जितश्च तत्प्रत्ययादञ्विधानम्। एवमर्थमिदमुच्यते। न वा दृष्टो ह्यवयवे समुदायशब्दो विकारे च प्रकृतिशब्दः। तस्मान्मयड्भावः। न चैतत्प्रयोजनमस्ति। किं कारणम्। दृष्टो ह्यवयवे समुदायशब्दस्तद्यथा पूर्वे पञ्चालाः उत्तरे पञ्चालाः। तैलं भुक्तम्। घृतं भुक्तम्। शुक्लो नीलः कृष्ण इति। विकारे च प्रकृतिशब्दो दृश्यते। तद्यथा शालीन्भुङ्क्ते मुद्गैः शालिविकारान्मुद्गविकारैरिति। तस्मान्मयड्भावः। तस्मान्मयड्भावो भविष्यति। नैतद्विवदामहे। अवयवे समुदायशब्दोऽस्ति नास्तीति। विकारे वा प्रकृतिशब्द इति। किं तर्हि विकारावयवशब्दोऽप्यस्ति। ततउत्पत्तिः प्राप्नोति। विकारावयवशब्दात्प्रसङ्ग इति चेन्न तेनानभिधानात्। विकारावयवशब्दात्प्रसङ्ग इति चेत्तन्न। किं कारणम्। तेनानभिधानात्। न हि विकारावयवशब्दादुत्पद्यमानेन प्रत्ययेनार्थस्याभिधानं स्यात्। अनभिधानान्न तत उत्पत्तिर्न भविष्यति। तत्रावश्यमनभिधानमाश्रयितव्यम्। अभिधाने ह्यन्यतो मयट्प्रसङ्गः। अभिधाने सत्यन्यतोऽपि मयट् प्रसज्येत। बैल्वस्य विकार इति। तस्मात्तत्प्रत्ययान्ताल्लुग्वचनम्। तस्मात्तत्प्रत्ययान्ताल्लुग्वक्तव्यः। यदि लुगुच्यते। कथं गोमयं भस्म द्रौवं मानम्। कापित्थो रस इति। अन्यत्र गोमयाद्द्रुवयात्फलाच्च लुग्वक्तव्यः। इह तर्हि औष्ट्रकी। अञन्तादितीकारेण प्राप्नोति। इष्टमेवैतत्संगृहीतम्। औष्ट्रिकेत्येव भवितव्यम्। इह हि सौनागाः पठन्ति ॥

गोरिति वक्तव्यम्। अन्यत्रेति। गोश्च पुरीष इति विकारे प्रत्ययं मन्यते। यदा तु पुरीषं नावयवो नापि विकारस्तदा गोर्मयट् तत्प्रत्ययएव न भवतीति लुकः प्रसङ्ग एव नास्ति। द्रुवयशब्दो द्रोर्विकार इति मानेवयद् इति वयप्रत्ययान्तः। एताभ्यामनुदात्तादिलक्षणोऽञ्। औष्ट्रकीति। वृद्धलक्षणस्य मयटो लुकि कृते अञन्तत्वाभावादीकाराप्रसङ्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वुञश्चेति।पाणिनीयलक्षणेदोषोद्भावनमेतत्।पालाशीति।पलाशस्यविकारः।पलाशादिभ्योवेतिपक्षेऽञ्।तदन्तादीका
रेमयटोलुकिईकाराप्रसङ्गः।पाणिनीयलक्षणेत्वजन्तादितिसतीकारःसिध्यति।काशकृत्स्नेति।अणन्तस्यस्त्रियाम
ध्येत्र्यामनुपसर्जनत्वादीकारप्रसङ्गः।तस्मादिति।यस्माल्लुकिपालाशीतिनसिध्यतितस्मादनभिधानान्मयटोनुत्पत्ति
राश्रयितव्याकेषांचित्तुग्रन्थः।नैषदोषः।अध्येत्र्यामभिधेयायामणईकारेणभवितव्यम्।यस्याध्येत्र्यांवर्त्ततेलुप्तः।सः
यश्चश्रूयतेउत्पन्नस्तस्मादीकारः।अथवापुनरस्तुनतेनानभिधानादिति।अनेनयद्यपिकाशकृत्स्नापरिहृतातथाप्या
पिशलानपरिहृताभवति।पालाश्यापिशलेनसंवद्देतेतस्मादस्तुनतेनाभिधानादित्येषपाठोयुक्तः।इहतर्हीति।उद्

वुञश्चाञ्कृतप्रसङ्ग·इति।इहतर्हिपालाशीसमिदित्य नुपसर्जनलक्षणईकारोनप्राप्नोति।माभूदेवम्।अञ्
योनुपसर्जनमितिअञन्तादनुपसर्जनादित्येवंभविष्यति।नैवंशक्यम्।इहहिदोषःस्यात्।काशकृत्स्निना
प्रोक्तामीमांसाकाशकृत्स्नीतामधीतेकाशकृत्स्नाब्राह्मणीति।अणन्तादितीकारःप्रसज्येत।तस्मादस्तुनतेनान
भिधानादित्येव।इहतर्हिकापोतोरसइतिप्राणिशब्दोनोपपद्यते।नैषदोषः।इदंतावदयंप्रष्टव्यः।योसावाद्यः
कपोतःसलोमकःसपक्षः।नससंप्रतिप्राणीति।कथंतत्रप्राणिशब्दोवर्त्ततइति।अथमतमेतत्।प्रकृत्यन्व
याविकाराभवन्तीति।इहापिनदोषोभवति॥क्रीतवत्परिमाणात्॥कथमिदंविज्ञायते।क्रीतेयेप्रत्ययाविहि
तास्तेभवन्तिपरिमाणाद्विकारावयवयोरिति।आहोस्वित्परिमाणात् क्रीतेयेप्रत्ययाविहितास्तेभवन्तिवि
कारावयवयोरिति।किंचातः।यदिविज्ञायतेक्रीतेयेप्रत्ययाविहितास्तेभवन्तिपरिमाणाद्विकारावयवयोरि
तिप्रत्ययमात्रंप्राप्नोतीति ॥

तप्राणेमांसेप्राणिवाचिनःकपोतशब्दस्यवृत्तिः।सत्यांचावृत्तौप्राणिवाचित्वाभावादस्मेमांसविकारेकापोतशब्दोनसिध्य
तीतिचोद्यम्।कथंतत्रेति।तत्रापिलोकेकपोतशब्दोदृश्यतइतिप्रश्नः।प्रकृत्यन्वयाइति।प्रकृतेरन्वयोयेषुतेप्रकृत्यन्व
याः।प्रकृतिरेवविकाररूपतामापद्यमानाविकारावस्थायामपिकश्चित्प्रकृतिशब्देनाभिधीयतइत्यर्थः।क्रीतव॥प्र
त्ययमात्रमिति।मुद्गैःक्रीतंमौद्गिकमितिक्रीतेठग्विहितइतिमूर्पस्यविकारइत्यत्रापिप्राप्नोति ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतिमात्रादिति।शूर्पादञन्यतरस्यामित्यञ्ठञौ।हलस्यविकारइत्यत्रापिप्राप्नुतः।अङ्गंचेति।कालेभ्योभववदित्य
त्रयदुक्तंसिद्धंतूभयनिर्देशादिति।तदेवानेनप्रतिपाद्यते।अङ्गग्रहणेनप्रत्यासत्त्यापरिमाणमेवगृह्यते।तेनायमर्थोभ
वतिक्रीतार्थेयथापरिमाणमङ्गंयथाचपरिमाणात्प्रत्ययस्तथाविकारेपिपरिमाणमङ्गंप्रत्ययश्च।तेनयस्मात्परिमाणात्
क्रीतेयःप्रत्ययस्तस्मादेवसएवविकारेपिभवति।नवक्तव्यमिति।क्रीतेपरिमाणादित्येवान्यतरविशेषणत्वेपरि

अथविज्ञायतेपरिमाणात्क्रीतेयेप्रत्ययाविहितास्तेभवन्तिविकारावयवयोरितिप्रकृतिमात्रात्प्राप्नुवन्ति।
तस्मात्क्रीतवत्परिमाणादङ्गंच।अङ्गंचक्रीतवद्भवतीतिवक्तव्यम्।तत्तर्हिवक्तव्यम्।नवक्तव्यम्।क्रीतवदिति
वतिनिर्देशोयम्।यदिचयाभ्यःप्रकृतिभ्योयेनविशेषणेनक्रीतेप्रत्ययाविहितास्ताभ्यःप्रकृतिभ्यस्तेनैवविशे
षणेनपरिमाणाद्विकारावयवयोरपिभवन्ति।ततोऽमीक्रीतवत्कृताःस्युः।अथहिप्रकृतिमात्राद्वास्युःप्रत्यय
मात्रंवास्यात्नामीक्रीतवत्कृताःस्युः।अणोवृद्धान्मयट्॥अणोवृद्धान्मयडित्येतद्भवतिविप्रतिषेधेन।अणोवका
शः।तित्तिडीका।तैत्तिडीकम्।मयटोऽवकाशः।काष्ठमयम्।इहोभयंप्राप्नोति।शाकमयम्।ओरञो नुदात्तादेर
ञ्श्च।ओरञोनुदात्तादेरञ्श्चमयड्भवतिविप्रतिषेधेन।ओरञोवकाशः।अरडु।आरडवम्।मयटःसएवाइहो
भयंप्राप्नोति।दारु।दारुमयम्।अनुदात्तादेरञ्भवतीत्यस्यावकाशः।कुवल।कौवलम्।जरद्रुस ।जारद्रुसम्।
मयटःसएवाइहोभयंप्राप्नोति।आम्रमयम्।मयटःप्राण्यञ्विप्रतिषेधेन।मयटःप्राण्यञ्भवतिविप्रतिषेधेन।
प्राण्यञोऽवकाशः।गृध्र।गार्ध्रम्।मयटःसएवाइहोभयंप्राप्नोति।चाषम्।भासम्।प्राण्यञ्भवतिविप्रतिषेधेन।
नवानवकाशत्वादपवादोमयट्।नैषयुक्तोविप्रतिषेधः।योयमञोमयटश्च।किंकारणम्।अनवकाशत्वाद
पवादोमयट्।सावकाशमयंवाधिष्यते।सकथमनवकाशः ॥

माणस्यसिद्धे वतिनिर्देशात्सर्वसादृश्यपरिग्रहार्थादुभयविशेषणंपरिमाणग्रहणमर्थाद्भवतीत्यर्थः।अणइतिको
पधाश्चेतिविहितात्।कौवलमिति।कुवल्याविकारइत्यर्थेऽञ्मयटःसएवेति।काष्ठमयमिति।काष्ठशब्दस्याद्युदात्त
त्वात्।आम्रमयमिति।आम्रशब्दो मितम्योर्दीर्घश्चेतिरगन्तोनुदात्तादिः।गार्ध्रमिति।गृध्रस्यविकारइत्यर्थः।नवेति।ओ
रञोनुदात्तादेरञ्श्चेतियउक्तोविप्रतिषेधस्तन्निराकरोति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यद्यनुवर्त्तन्त इति। तस्य विकार इत्यत्र शैषिकाणामनुवृत्तौ केऽप्राप्ते मयडारभ्यमाणोऽन्यपूर्वको भवतीति कुत्स्यैवाञोऽपि बाधक इत्यर्थः। एतच्च बाध्यसामान्यचिन्तायां येन नाप्राप्त इति न्यायस्यानवतारादेतस्यानपेक्ष्योच्यते। अथेति। तन्निवृत्तौ विध्यन्तरपूर्वको मयट् न भवतीति काष्ठमयादौ सावकाशः परत्वादेवाञं बाधते न त्वपवादत्वादित्यर्थः। प्राण्यञश्चेति। पूर्वत्र विप्रतिषेधाभावेऽपीष्टसिद्धिर्भवत्येव। दारुमयमाम्रमयमिति। प्राण्यञि तु तदभावे चार्षभास्रमितीष्टं न सिध्यति मयट्प्रसङ्गात्। तस्मादिति। नित्यं वृद्धशरादिभ्यः प्राणिन इति वक्तव्यमित्यर्थः। यद्येतदस्तीति। यद्येतदाश्रीयत इत्यर्थः। मानुवृत्तन्नि

यद्यनुवर्त्तन्ते शैषिकाः। अथ निवृत्ताः शैषिकाः। वृद्धमाद्युदात्तं मयटोऽवकाशः प्राण्यञश्च। अयं चाप्ययुक्तो विप्रतिषेधः। योऽयं मयटः प्राण्यञश्च। किं कारणम्। अनवकाशत्वादपवादो मयडित्येव। अनवकाशो मयट्। स यथैव ओरञमनुदात्तादेरञं च बाधत एवं प्राण्यञमपि बाधेत। तस्मान्मयड्विधाने प्राणिप्रतिषेधः। तस्मान्मयड्विधाने प्राणिभ्यः प्रतिषेधो वक्तव्यः। स तर्हि वक्तव्यः। न वक्तव्यः। मध्येऽपवादाः पूर्वान्विधीन्बाधन्त इत्येव मयट् ओरञमनुदात्तादेरञं च बाधिष्यते प्राण्यञं न बाधिष्यते। यद्येतदस्ति। मध्येऽपवादाः पुरस्तादपवादा इति। मानुवृत्तन् शैषिकाः। पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त इत्येवमयमणञं बाधिष्यते नयटं न बाधिष्यते। अनुदात्तादेरञः प्राण्यञ्विप्रतिषेधेन। अनुदात्तादेरञः प्राण्यञ्भवति विप्रतिषेधेन। अनुदात्तादेरञ्भवतीत्यस्यावकाशः। जारद्वृक्ष। जारद्वृक्षम्। प्राण्यञः स एव। इहोभयं प्राप्नोति। कपोत। कापोतम्। प्राण्यञ्भवति विप्रतिषेधेन। कः पुनरत्र विशेषः। तेन वा सत्यनेन वा। सापवादकः स विधिः। अयं पुनर्निरपवादः। यदि तेन स्यादिह न स्यात्। श्वाविधो विकारः शौवाविधं मांसम्। मयट् प्रसज्येत ॥

ति। वृत्तेर्द्युद्भ्यो लुङीति वा परस्मैपदम्। पुषादिद्युतादीति च्लेरङादेशः। शैषिकाणां निवृत्त्यनुवृत्त्योरपि विप्रतिषेधोपपत्त्या मयटा परत्वात्कोपधलक्षणोऽण् बाध्यत इत्यर्थः। जरद्वृक्ष इति। जरद्वृक्षशब्दः समासस्वरेणान्तोदात्तत्वादनुदात्तादिः। स एवेति। गार्द्दमिति। कपोतशब्दो लघावन्त इति मध्योदात्तत्वादनुदात्तादिः। सापवाद इति। मयटा परत्वाद्बाध्यमानत्वात्। अयमिति। अनेन परत्वान्मयटो बाधनात्। श्वाविध इति। श्वानं विध्यतीति क्विप्। नहिवृतीति दीर्घः। कृत्स्वरेणोत्तरपदस्यान्तोदात्तत्वादनुदात्तादित्वम्। अत्र मयडभावात्प्राण्यञ्भवति। द्वारादीनां चेति वृद्धिप्रतिषेधे ऐजागमश्च भवति ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फले॥ प्रकृत्यन्तरत्वादिति। आमलकादिशब्दः फलेन यौगिकः आमलक्याः फलमिति किं तर्हि जातिशब्द एवेत्यर्थः। एकान्त
दर्शनादिति। आमलक्या अवयवे आमलकं दृश्यते। ततश्च यौगिक एव फले आमलकशब्दः इत्यर्थः। फलैकान्त इति। फ
लमेकान्तो यस्येति बहुव्रीहिः। यदि संबन्धदर्शनाद्यौगिकत्वमामलकशब्दस्य फले व्यवस्थाप्यते तदा संबन्धाविशेषादाम
लकस्येयमामलकी वृक्ष इति वृक्षावयविनि छ प्रत्ययमुत्पाद्य लुग्विधेयः। तस्मादुभयत्राप्यामलकादयो जातिशब्दा एव
स्वभावतो वर्त्तन्ते इत्यभ्युपगन्तव्यमित्यर्थः। लुप् च॥ फलपाकशुषाम्। फलपाके नये शुष्यन्ति व्रीह्यादयस्तद्वाचिनामित्यर्थः।
व्रीहय इति। बिल्वाद्यण्। यवा माषा इति। तृणधान्यानां च द्व्यषामित्याद्युदात्तत्वादौत्सर्गिकोऽण्। मुद्गशब्दाद् बिल्वाद्यण्। पाट

फले लुक्॥ फले लुग्वचनानर्थक्यं प्रकृत्यन्तरत्वात्॥ फले लुग्वचनमनर्थकम्। किं कारणम्। प्रकृत्यन्तर
त्वात्। प्रकृत्यन्तरमामलकशब्दः फले वर्त्तते। एकान्तदर्शनात्प्राप्नोति। एकान्तदर्शनात्प्र
सङ्ग इति चेद्वृक्षे लुग्वचनम्। एकान्तदर्शनात्प्रसङ्ग इति चेद् वृक्षे लुग्वक्तव्यः। वृक्षोऽपि हि फलैकान्तः। लु
प् च॥ लुप्प्रकरणे फलपाकशुषामुपसंख्यानम्। लुप्प्रकरणे फलपाकशुषामुपसंख्यानं कर्त्तव्यम्। व्रीहयः
यवाः। माषा मुद्गास्तिलाः॥ पुष्पमूलेषु बहुलम्। पुष्पमूलेषु बहुलं लुग्वक्तव्यः। मल्लिका। करवीरम्। बिसम्।
मृणालम्। न च भवति पाटलानि मूलानि ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्था
ध्यायस्य तृतीये पादे द्वितीयमाह्निकं पादश्च समाप्तः॥ प्राग्वहतेष्ठक्॥ ठक्प्रकरणे तदाहेति माशब्दादिभ्य उ
पसंख्यानम्। ठक्प्रकरणे तदाहेति माशब्दादिभ्य उपसंख्यानं कर्त्तव्यम्। माशब्दिकः। नैत्यशब्दिकः। कार्य
शब्दिकः॥ आहौ प्रभूतादिभ्यः॥ आहौ प्रभूतादिभ्यष्ठग्वक्तव्यः। प्रभूतमाह प्राभूतिकः ॥

लानीति। पाटलिशब्दो बिल्वादिः॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे चतुर्थस्याध्यायस्य तृतीये पादे द्वि
तीयमाह्निकं पादश्च समाप्तः॥ प्राग्वहतेष्ठक्॥ तदाहेति। तदिति कर्ममात्रं निर्दिश्यते। न तु द्वितीया समर्थविभक्तिः। आहौ
प्रभूतादिभ्य इत्यतो भेदेन वचनात्तेन पदसमुदायाद्यं प्रत्ययः। माशब्द इत्याह माशब्दिकः। नित्यः शब्द इत्याह नैत्यशब्दि
कः। तत्र पदसमुदायार्थ इति नाप्रत्यवमृश्यमानो वचनक्रियासंबन्धात्कर्म संपद्यते। अप्रातिपदिकत्वात्तु द्वितीयानुत्प
त्तिः। प्रभूतमाहेति। क्रियाविशेषणत्वात्कर्मत्वम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋच्छताविति। तिङन्तानुकरणमेतत्। तत्र शब्दे कार्यासंभवात्तिङन्तार्थे ठग्विधिः॥ आक॥ इहेति। एकस्य वाऽनेकस्य वा षकारस्य व्यञ्जनपरस्य स्कृत्या विशेषानवधारणात्सांहितिकेऽपि वा षकारेऽनचि चेति द्विर्वचनविधानादनेकषकारत्वसंभवात्संशयः। आकर्षेति। श्लोकवार्तिककारः संदिग्धानसंदिग्धांश्च भ्रान्तिनिरासाय पर्यैजीगणत्। षडेतदिति। विधिवाक्यापेक्षं षड्वं प्रत्ययास्तु सप्तैते॥ विभाषा॥ वीवधाच्चेति वक्तव्यमिति। अत्र विवधवीवधशब्दौ पर्यायौ। तत्राविरविकन्यायेन संभवति उभाभ्यां प्रत्ययस्येष्टत्वात्। ततो वीवधाच्चेति वक्तव्यमित्युक्तम्॥ त्रेर्मप् ॥ विभाषा मा भूदिति। द्वैअत्रविभा

पार्यात्रिकः॥ ऋच्छतौ सुस्नातादिभ्यः॥ ऋच्छतौ सुस्नातादिभ्यष्ठग्वक्तव्यः। सौस्नातिकः। सौखरात्रिकः। सौखशायनिकः॥ गच्छतौ परदारादिभ्यः॥ गच्छतौ परदारादिभ्यष्ठग्वक्तव्यः। पारदारिकः गौरुतल्पिकः॥ आकर्षात्ष्ठल्॥ इह केषांचित्सांहितिकं षत्वम्। केषांचित्स्विदर्थम्। तत्र न ज्ञायते केषां सांहितिकं षत्वं केषां स्विदर्थमिति। किमत्र न्याय्यम्। परिगणनं कर्तव्यम्। आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च। आवसथात्किशरादेः षितः षडेते ठगधिकारे॥ विभाषा विवधात्॥ वीवधाच्चेति वक्तव्यम्। वैवधिकः॥ त्रेर्मन्नित्यम्। नित्यग्रहणं किमर्थम्। विभाषा मा भूत्। नैतदस्ति प्रयोजनम्। पूर्वस्मिन्नेव योगे विभाषाग्रहणं निवृत्तम्। इदं तर्हि प्रयोजनम्। त्रेर्मब्वचनं नित्यविषयार्थम्। नित्यं म्नन्तं मब्विषयमेव यथा स्यात्। केवलस्य प्रयोगो मा भूदिति। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्र यथाधिकारं तद्विषयताप्रसङ्गः। तत्र यथाधिकारं तद्विषयता प्राप्नोति। निर्वृत्त इति वर्तते। तेन निर्वृत्त एव म्नन्तं मब्विषयं स्यात्। येऽन्ये उपचारास्तत्र न स्यात्। कृत्रिमं महत्सु विहितमिति। एवं तर्हि भावप्रत्ययान्तादिमब्वक्तव्यः। कुट्टिमा भूमिः। सेकिमो सिरित्येवमर्थम्। ततो वक्तव्यम् ॥

षे संभवतः। एका महाविभाषा अपरा विभाषा विवधादिति। तत्रान्तरेणापि नित्यग्रहणं पूर्वसूत्र एवानन्तरस्य विभाषाग्रहणस्यास्वरितत्वादननुवृत्तत्वान्महाविभाषा नित्यग्रहणेन निवर्त्यते। इतरेऽनन्तराविभाषा निवर्त्यत इत्युक्तमिति मत्वाह। नैतदस्तीति। इतरः स्वाभिप्रायं प्रकाशयति। इदं तर्हीति। निर्वृत्त एवेति। पङ्क्तिणा निर्वृत्तमित्यस्यैव वाक्यस्य निवृत्तिः न तु पक्तिः क्रियत इत्यादेरपीत्यर्थः। कृत्रिमं महदिति। प्रत्ययप्रयोगमन्तरेणापि महत्त्वादीन कृत्रिमशब्दार्थविशेषणानि स्युरित्यर्थः। भाव इति प्रकृत्येति। भाववाचिनः शब्दान्निर्वृत्तेऽर्थे इमब्विधेय इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रेरिति। पूर्वेणसिद्धेनित्यार्थंवचनम्। तेननिर्वृत्तेतावद्वाक्यंनिवर्त्यते। ततोनित्यमित्यनेनोपचारान्तरविषयस्यापिवाक्यस्यनिवृत्तिःक्रियतइतितद्विषयतात्रिप्रत्ययस्यसिध्यति॥ चूर्णा॥ इनि नेति। ठक्तुसंसृष्टइत्यनेनानभिधानान्नभविष्यतीतिभावः॥ लव॥ रसवाचित्वादिति। रसस्यगुणत्वाद्गुणवाचिनांशुक्लादीनांगुणगुणिनोरभेदोपचाराद्गुणवृत्तिदर्शनान्नार्थोलुकेत्यर्थः। असंसृष्टेचेति। लवणेनद्रव्येणयदसंसृष्टंलवणरसयुक्तंचेत्तत्रापिलवणशब्दस्यदर्शनाद्गुणशब्दत्वमेवास्येत्यर्थः। संसृष्टेचेति। लवणद्रव्यसंसृष्टमपियल्लवणरसंनसंभवतितत्रनदृश्यतेलवणशब्दइत्यर्थः॥ प्रयच्छ॥ अयुक्तोयमि

त्रैः। त्रेश्चेमप्प्रत्ययोभवति। ततोनित्यम् । नित्यंचत्रेरिमप्प्रत्ययोभवति। किमर्थमिदम्। नित्यंत्र्यन्तमिमविषयमेवयथास्यात्केवलस्यप्रयोगोमाभूदिति। चूर्णादिनिः॥ अयंयोगःशक्योवक्तुम्। कथंचूर्णीचूर्णिनइति। इनिनैवमत्वर्थीयेनसिद्धम्॥ लवणाल्लुक्॥ लवणा ल्लुग्वचनानर्थक्यंरसवाचित्वात्॥ लवणाल्लुग्वचनमनर्थकम्। किंकारणम्। रसवाचित्वात्। रसवाच्येषलवणशब्दः। नैषसंसृष्टिनिमित्तः। आतश्चरसवाची। असंसृष्टेचदर्शनात्। असंसृष्टेपिहिलवणशब्दोवर्त्तते। तद्यथा। लवणंक्षीरम्। लवणंपानीयमिति। संसृष्टेचादर्शनात्। संसृष्टेचापियदानोपलभ्यते। तदाह। लवणःसूपः। अलवणायवागूः। अलवणंशाकमिति॥ प्रयच्छतिगर्ह्यम्। अयुक्तोयंनिर्देशः। यदसावल्पंदत्वाबहुगृह्णातितद्गर्ह्यम्। कथंतर्हिनिर्देशःकर्त्तव्यः। प्रयच्छतिगर्ह्यायेति। सतर्हितथानिर्देशःकर्त्तव्यः। नकर्त्तव्यः। तादर्थ्यात्ताच्छब्द्यंभविष्यतिगर्ह्यार्थंगर्ह्यम्। मेस्याल्लोपोवा॥ मेस्याच्छब्दलोपोवावक्तव्यः। द्विगुणंमेस्यादितिप्रयच्छतिद्वैगुणिकः। त्रैगुणिकः। वृद्धेर्वृधुषिभावः॥ वृद्धेर्वृधुषिभावोवक्तव्यः। वार्द्धुषिकः॥ धर्मंचरति॥ अधर्माच्च॥ अधर्माच्चेतिवक्तव्यम्। आधर्मिकः ॥

ति। उत्तमर्णोयदल्पंददातिनतद्गर्ह्यम्। यत्त्वल्पंदत्वाबहुगृह्णाति तदेवगर्ह्यमित्यर्थः। गर्ह्यायेति। द्विगुणायप्रयच्छतिद्वैगुणिकइतिचतुर्थ्यन्तात्प्रत्ययोविधेयइत्यर्थः। मेस्याल्लोपोवेति। उपचारापेक्षयाविकल्पार्थोवाशब्दः। द्विगुणंमेस्यादितिवाक्यात्प्रत्ययोमेस्याच्छब्दलोपश्च। वार्द्धुषिकइति। वृद्ध्यर्थंधनंप्रयच्छतीत्यर्थः॥ धर्मम्॥ अधर्माच्चेति। तदन्तविधेर्ग्रहणवताप्रातिपदिकेननिषेधाद्वचनम्। येनविधिरित्यत्रधर्मान्नञइति वार्त्तिकमनपेक्ष्यैतदुक्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋतोऽञ्॥ नृनराभ्यामिति। नृशब्दस्य सूत्रेणैव सिद्धे प्रत्यये दृष्टान्तत्वेनोपादानम्। यथा नृशब्दादञ् भवत्येवं नरशब्दादपीत्यर्थः॥ शिल्पम्॥ अभ्यासपूर्वकं क्रियासु कौशलं शिल्पम्। मृदङ्गादिषु द्विविधाः क्रियाः। अभ्याहननलक्षणा निष्पादनलक्षणा च। तत्राविशेषानुपादानात् संदेहः। किमस्येति। एवं तर्हीति। उपचरितवृत्तिः शिल्पशब्द आश्रीयत इत्यर्थः। नैवशब्दलोपः। कुम्भकारस्य हि मृदङ्गं मुख्यं शिल्पं वादकस्य तूपचरितम्। मृदङ्गवादनमिति। लोके तु मार्दङ्गिकशब्दस्य मृदङ्गवादनशिल्पोऽभिधेयः। तत्र साहचर्यान्मृदङ्गवादने मृदङ्गशब्दस्य वृत्तिविषये वृत्त्या गतार्थत्वादप्रयोगो वादनशब्दस्य॥ शक्ति॥

ऋतोऽञ्॥ नृनराभ्यामञ्वचनम्॥ नृनराभ्यामञिति वक्तव्यम्॥ नुर्द्धर्म्यां नारी। नरस्यापि नारी॥ विशसितुरिड्लोपश्च॥ विशसितुरिड्लोपश्च वक्तव्यः। अञ्च वक्तव्यः। विशसितुर्द्धर्म्यं वैशस्त्रम्। विभाजयितुर्णिलोपश्च॥ विभाजयितुर्णिलोपोऽञ्च वक्तव्यः। विभाजयितुर्द्धर्म्यं वैभाजित्रम्॥ शिल्पम्॥ किमस्य मृदङ्गः शिल्पं स मार्दङ्गिकः। किं चातः। कुम्भकारे प्राप्नोति। एवं तर्ह्युत्तरपदलोपो द्रष्टव्यः। शिल्पमिव शिल्पम्। मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः। मौरजिकः। पाणविकः। पैठरिकः॥ शक्तियष्ट्योरीकक्॥ किमर्थमीकगुच्यते। न कगेवोच्येत। का रूपसिद्धिः। शाक्तीको याष्टीक इति। शक्तियष्ट्योरीकारोऽन्ते कक्शब्दश्च प्रत्ययः। न सिध्यति। विभाषा चैव हि शक्तियष्ट्योरीकारः। अपि च केऽणः इति ह्रस्वत्वं प्रसज्येत। एवं तर्हीकगुच्यते। का रूपसिद्धिः। शाक्तीको याष्टीक इति। सवर्णदीर्घत्वेन सिद्धम्। न सिध्यति। यस्येति लोपः प्राप्नोति। ईकारोच्चारणसामर्थ्यान्न भविष्यति। यदि तर्हि प्राप्नुवन् विधिरीकारोच्चारणसामर्थ्याद्बाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति। यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते। यस्य तु विधेर्निमित्तमेव नासौ बाध्यते ॥

क्ति॥ ईकारान्त इति। बह्वादिपाठात्। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति वचनात् शक्तीयष्टीशब्दाभ्यां कगृभविष्यतीत्यर्थः। ईकारोच्चारणसामर्थ्यादिति। अन्यथा ककमेव विदध्यात्। न चावग्रहनिवृत्तिरीकारस्य प्रयोजनम्। यतो न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यम्। यं विधिमिति। एवं च दीर्घोच्चारणं प्रत्याख्यातम्। इककाः सिद्धत्वात्। अन्ये त्वाहुः शक्तियष्टिभ्यां ठगिति ठग्विधानादेव यस्येति लोपाभावः सिद्धः प्रहरणमित्यनेन हि ठक् सिद्धे पुनष्ठग्विधानं यस्येति लोपाभावार्थमेव वाक्यनिवृत्तये नित्यार्थं तस्मादिति चेत्। न। शक्तियष्टिभ्यामित्येवाधिकस्य ठकः पूर्वेण सिद्धस्य पुनर्विधानेन वाक्यनिवृत्तेरपि सिद्धत्वात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्ति॥ चोरेपीति। तस्यापि मतिसद्भावात्। अचेतनश्चपदार्थो नास्तिकः स्यादिति वक्तव्यम्। न्यायस्सतु प्रदर्शनाद्भाष्यकारेण प्रतिपदं नोक्तम्। अस्तीत्यस्येति। परलोककर्तृकाचसत्ताविज्ञेया। तत्रैव विषये लोके प्रयोगदर्शनात् तेन परो लोकोस्तीति मतिर्यस्य स आस्तिकस्तद्विपरीतो नास्तिकः। दिष्टशब्दो दैवपर्यायः। तेन दैवपरायणो दैष्टिकः॥ छत्त्रा॥ राजपुरुषइति। यः पुरुषो राजच्छत्त्रं धारयति स छत्त्रशब्दाभिधेयः स्यादित्यर्थः। उत्तरपदलोपइति। उत्तरपदस्यैव शब्दस्य लोपो द्रष्टव्य इत्यर्थः। गोणीवृत्तिश्छत्त्रशब्दस्याश्रयणीया। तत्रैव प्रत्ययस्य दर्शनादित्युक्तं भवति। गुरुश्छत्त्रमिति। अज्ञानं शिष्यस्य छादयतीति व

यस्येति लोपं प्रतीकारोच्चारणमनर्थकं सवर्णदीर्घस्य तु निमित्तमेव॥ अस्तिनास्तिदिष्टं मतिः॥ किं यस्यास्तिमतिः स आस्तिकः। किं चातः। चौरेपि प्राप्नोति। एवं तर्हि इति लोपोत्र द्रष्टव्यः। अस्तीत्यस्य मतिः आस्तिकः। नास्तीत्यस्य मतिः नास्तिकः। दिष्टमित्यस्य मतिः दैष्टिकः॥ छत्त्रादिभ्यो णः॥ किं यस्य छत्त्रधारणं शीलं स छात्त्रः किं चातः। राजपुरुषे प्राप्नोति। एवं तर्ह्युत्तरपदलोपोत्र द्रष्टव्यः। छत्त्रमिव छत्त्रम्। गुरुः छत्त्रम्। गुरुणा शिष्यश्छत्त्रवत् छाद्यः। शिष्येण गुरुश्छत्त्रवत्परिपाल्यः॥ हितं भक्षाः॥ हितं भक्षादिति चतुर्थीनिर्देशः॥ हितं भक्षा इति चतुर्थीनिर्देशः कर्त्तव्यः। इतरथा ह्यनिर्देशः। इतरथा ह्यनिर्देशो भवति। हितशब्देन च योगे चतुर्थी विधीयते सा प्राप्नोति। सतर्हि चतुर्थीनिर्देशः कर्त्तव्यः। न कर्त्तव्यः। एवं वक्ष्यामि। हितं भक्षास्तदस्मै। ततो दीयते नियुक्तम्। तदस्मैइति॥ तद्वहति रथयुगप्रासङ्गम्॥ वहत्यभिधाने रथशकटहलसीरेभ्यः प्रत्ययविधानानर्थक्यं विहितत्वात्। वहत्यभिधाने रथशकटहलसीरेभ्यः प्रत्ययविधिरनर्थकः। किं कारणम्। विहितत्वात्। विहितोत्र प्रत्ययस्तस्येदमिति। शब्दभेदाद् विधानम्। शब्दभेदादविधिरर्थं भवति। अन्यो हि शब्दो रथं वहति अन्यो हि रथस्य वोढेति। शब्दभेदादविधानमिति चेदर्थाश्रयत्वात् प्रत्ययविधानस्यार्थसामान्यात्सिद्धम्॥

र्त्तयति यत्तस्त्वच्छत्त्रं शीलमस्य गुरुविषयं पालनं शीलमस्येत्यर्थः॥ हितम्॥ इतरथाहीति। यदि चतुर्थी न निर्दिश्यते तदाप्रकृतायाअस्येति षष्ठ्याः संबन्धायोग्यत्वादिहानुपस्थानात्प्रत्ययार्थो न निर्दिष्टः स्यादित्यर्थः॥ तद्वह॥ शब्दभेदादिति। षष्ठ्यन्तात्प्रत्ययो विधीयमानो द्वितीयान्तान्न प्राप्नोतीत्यर्थः। अर्थसामान्यादिति। अर्थस्यैक्यात् षष्ठ्यन्तादेव प्रत्ययोत्पत्त्याविष्टसिद्धिर्भवत्येवेत्यर्थः। ननु रथाद्रथाङ्ग इति तत्रोक्तम्। वोढर्यपि प्रयोगदर्शनादिष्यतामित्यदोषः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विरथ्य इति। रथसीताहलेभ्यो यद्विधाविति तदन्तविधिः॥ संज्ञायाम्॥ निपातनानर्थक्यमिति। वृत्तिकारैर्यन्निपातनमाश्रितं तदनर्थकं विधिनैवेष्टसिद्धिर्भवत्येवेत्यर्थः। जनीशब्दादिति। जायतेऽस्यां गर्भ इति जनी वधूरुच्यते। जनिसहिभ्यामितीण् प्रत्यये जनिवध्योश्चेति वृद्धिप्रतिषेधः। सर्वकाल इति। यद्यपि विध्यर्थत्वेपि संख्याकालयोरविवक्षयैतत्सिध्यति तथापि न्यायानुसरणे प्रतिपत्तिगौरवं स्यादिति निपातनाश्रयणम्॥ विध्य॥ शर्कराभिरिति। प्रधानस्यात्र सापेक्षत्वाद्वृत्तिप्रसङ्गः।

शब्दभेदादविधानमिति चेदर्थाश्रयः प्रत्ययविधिः। य एवार्थो रथं वहति स एवार्थो रथस्य वोढेति। तत्रार्थसामान्यात्सिद्धम्। इदं तर्हि प्रयोजनम्। यो द्वौ रथौ वहति स द्विरथ्यः। यो द्वयो रथयोर्वोढा स द्विरथः। तेन सति लुग्भवति। अनेन सति कस्मान्न भवति। प्राग्दीव्यत इत्युच्यते। संज्ञायां जन्याः॥ किं निपात्यते। जनन्या जनी भावो निपात्यते यश्च प्रत्ययः। जन्या इति निपातनानर्थक्यं पञ्चमीनिर्देशात्। जन्या इति निपातनमनर्थकम्। किं कारणम्। पञ्चमीनिर्देशात्। जनीशब्दादेषा पञ्चमी। इदं तर्हि प्रयोजनम्। सर्वकालः प्रत्ययविधिर्यथा विज्ञायेत। जनीं वहन्ति जन्याः। जनीं वोढारो जन्याः। जनीमवाक्षुर्जन्या इति॥ विध्यत्यधनुषा॥ विध्यत्यकरणेन॥ विध्यत्यकरणेनेति वक्तव्यम्। इतरथा ह्यनिष्टप्रसङ्गः। अधनुषेत्युच्यमानेऽनिष्टप्रसङ्गः स्यात्। इहापि प्रसज्येत। शर्कराभिर्विध्यति। कण्टकैर्विध्यतीति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। कस्मान्न भवति कण्टकैर्विध्यति शर्कराभिर्विध्यतीति। अनभिधानात्॥ गृहपतिना संयुक्ते ञ्यः॥ गृहपतिना संयुक्त इत्युच्यते। तत्र दक्षिणाग्नावपि प्राप्नोति। दक्षिणाग्निरपि गृहपतिना संयुज्यते। एवं तर्हि गृहपतिना संयुक्त इत्युच्यते। सर्वश्च गृहपतिना संयोयुक्तः। तत्र प्रकर्षगतिर्विज्ञास्यते। साधीयो यो गृहपतिना संयुक्तः। कश्च साधीयः। यस्मिन्पत्नीसंयाजाः क्रियन्ते अथवा गृहपतिर्नाम मन्त्रः स यस्मिन्नुच्यते। अथवा संज्ञायामिति वर्त्तते॥

अनभिधानादिति। शर्कराभिः पद्य इति प्रयोगाभावादित्यर्थः। एवं चाधनुषेत्यपि न वक्तव्यम्। अन्ये त्वाहुः। धनुषा करणविशेषेण करणमात्रं लक्ष्यत इति सर्वत्र करणे प्रतिषेधः प्रवर्त्तते॥ गृह॥ गृहपतिर्यजमानः। यस्मिन्निति। यजमानेन पत्न्या च ये योगविशेषाः क्रियन्ते ते पत्नीसंयाजास्ते च गार्हपत्य एव क्रियन्ते न दक्षिणाग्नौ। अथ वेति। स च मन्त्रो गार्हपत्यविषय एव॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्वर्थे॥ अनन्तरार्थे वेति। वाशब्दः समुच्चये। मत्वर्थे मासतन्वर्थविशेषणेऽपि प्रत्ययोऽनन्तरार्थेऽपीत्यर्थः। मधुरिति। मधु विद्यतेऽस्मिन् नभांसि विद्यन्तेऽस्मिन् तपो विद्यतेऽस्मिन्निति मतो लुक्। नभःशब्दोऽत्राभ्रवाची। अत्र नभस्तप इति नपुंसकत्वं छान्दसत्वात्। इषइति। एषणमिट् साऽस्मिन्नस्ति ऊर्गस्मिन्नस्ति शोचनं शुक् साऽस्मिन्नस्तीति प्रत्ययाः। शुक्र इत्यत्राऽयस्मयादित्वा

मत्वर्थे मासतन्वोः॥ मासतन्वोरनन्तरार्थे वा॥ मासतन्वोरनन्तरार्थे वेति वक्तव्यम्। मध्वस्मिन्नस्ति मध्वस्मिन्ननन्तरमिति वा मधव्यः॥ माधवः॥ लुगकारेकाररेफाश्च प्रत्ययाः॥ लुगकारेकाररेफाश्च प्रत्यया वक्तव्याः। लुक्। मधुः। नभः तपः। अकारः। ईषः। ऊर्जः। ईकारः। शुचिः। रेफश्च। शुक्रः। वसोः समूहे च॥ अक्षरसमूहे छन्दस उपसंख्यानम्॥ अक्षरसमूहे छन्दस उपसंख्यानं कर्तव्यम्। ओश्रावयेति चतुरक्षरम्। अस्तु श्रौषडिति चतुरक्षरम्। ये यजामह इति पञ्चाक्षरम्। यजेति द्व्यक्षरम्। द्व्यक्षरो वषट्कारः। एष वै सप्तदशाक्षरः छन्दस्यः प्रजापतिर्यज्ञमनुविहितः॥ छन्दसि बहुभिर्वसव्यैरुपसंख्यानम्॥ छन्दसि बहुभिर्वसव्यैरुपसंख्यानं कर्तव्यम्। हस्तौ पृणस्व बहुभिर्वसव्यैः॥ अग्निरीशे वसव्यस्य उपसंख्यानम्॥ अग्निरीशे वसव्यस्येत्युपसंख्यानं कर्तव्यम्। तत्तर्हि उपसंख्यानं कर्तव्यम्। न कर्तव्यम्। स्वार्थविज्ञानात्सिद्धम्। स्वार्थविज्ञानात् सिद्धमेतत्। वसव एव वसव्याः पान्तु ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकं पादोऽध्यायश्च समाप्तः ॥

ज्ञश्चाभावः॥ वसोः॥ अक्षरसमूह इति। अक्षरसमूहवाचिनश्छन्दःशब्दाद्यत् प्रत्ययः। ओश्रावयेति। अक्षराणि गण्यन्ते। स्वार्थविज्ञानादिति। वसोरिति योगविभागः कर्तव्यः। तेन स्वार्थे भविष्यतीत्यर्थः॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे चतुर्थस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम्। पादोऽध्यायश्च चतुर्थः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ विद्योदयोनिराकुर्यादविद्यातिमिरंसदा॥

॥ इतिचतुर्थोध्यायः समाप्तः ॥

॥ सहस्रांशुरिवाशेषंमुद्राकिरणराजिभिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ विद्योदयोनिराकुर्याद्विद्यातिमिरंसदा ॥

॥ अथपञ्चमाध्यायःप्रारभ्यते ॥

॥ सहस्रांशुरिवाशेषंसुद्राकिरणराजिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ श्रीगणेशाय नमः॥ प्राक्क्रीताच्छः॥ प्राग्वचनमिति। छ इत्येवाधिकारोस्त्विति प्रश्नः। प्राग्वचनउक्तमिति। अस्मिन्प्राग्वचने ५११
१ यद्वक्तव्यं तदन्यत्रोक्तं न्यायस्य तुल्यत्वात्। प्राग्दीव्यतोणित्यत्र यदुक्तं तदेवेहापि द्रष्टव्यमित्यर्थः। सकृद्विधानार्थमिति। प्राक्क्री
ताद्येऽर्थास्तानपेक्ष्य सकृदेवानेन तेष्वर्थेषु छस्य विधानं यथा स्यादित्यर्थः। विहितो यथा स्यादिति। पुनः श्रुत्या प्रकर्षप्रतिपत्तिः।
सुष्ठु लाघवेन विहितो यथा स्यादित्यर्थः। योगे योग इति। असति सकृद्विधाने तस्मै हितं छ इत्येवं प्रत्यर्थनिर्देशात्सूत्रं क्लोवक्तव्यस्तथा च शा
स्त्रगौरवप्रसङ्गः। अधिकारादिति। छ इत्येतावदेव सूत्रमस्तु नार्थः प्राक्क्रीतादित्यनेन। यथैव प्रत्ययाद्योधिकारा अवधिविशे
षोपादानमन्तरेणेष्टं साधयन्ति एवमयमपि साधयिष्यतीत्यर्थः। प्रतियोगमित्यनेन लाघवार्थत्वमधिकारस्य दर्शयति। यो

प्राक्क्रीताच्छः॥ प्राग्वचनं किमर्थम्। प्राग्वचन उक्तम्। किमुक्तम्। तत्र तावदुक्तम्। प्राग्वचनं सकृद्विधानार्थम्।
अधिकारात्सिद्धमिति चेदपवादविषयेण प्रसङ्ग इति। इहापि प्राग्वचनं क्रियते सकृद्विधानार्थम्। सकृद्विहितः प्र
त्ययो विहितो यथा स्यात्। योगे योगे तस्य ग्रहणं मा कार्षमिति। नैतदस्ति प्रयोजनम्। अधिकारादप्येतत्सिद्धम्। अधि
कारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योग उपतिष्ठते। अधिकारात्सिद्धमिति चेदपवादविषये छप्रसङ्गः। अधि
कारात्सिद्धमिति चेदपवादविषये छः प्राप्नोति। उगवादिभ्यो यत् छ श्चेति छोपि प्राप्नोति। तस्मात्प्राग्वचनं क
र्तव्यम्। अथ क्रियमाणेपि प्राग्वचने किमिदं विज्ञायते प्राक्क्रीताद्याः प्रकृतय आहोस्वित्प्राक्क्रीताद्येऽर्था इति। किं चा
तः। यदि विज्ञायते प्राक्क्रीताद्याः प्रकृतय इति स एव दोषः। अपवादविषये छप्रसङ्ग इति। अथ विज्ञायते प्राक्
क्रीताद्येऽर्था इति न दोषो भवति ॥

गे योग उपतिष्ठत इत्यनेन नत्वधिकारस्य व्यापारः प्रदर्श्यते। उगवादिभ्यो यच्छ श्चेतीति। नदीस्रोतोन्यायेन प्रतिसूत्रमधिका
रस्योपस्थानात्। उत्सर्गापवादयोः संनिधानाविशेषात्तव्यत्तव्यानीयरामिव विकल्पः स्यादित्यर्थः। केचिदाहुः। उगवादिभ्यो य
दित्ययमप्यधिकारस्ततो द्वयोरपि पारार्थ्यात्परस्परासंबन्धादुपलक्षणमेतत्। इदं तु प्रदर्शनीयं शरीरावयवाद्यच्छश्चेति। स
एव दोष इति। तस्मै हितमित्यादिष्वर्थनिर्देशेषु ङ्याप्प्रातिपदिकादिति सामान्यप्रकृतिरधिकारात्संनिहिता शरीरावयवा रमः
द्यदित्यादौ तु विशेषप्रकृतिस्तत्र प्राक्क्रीतात्प्रकृतिभ्यो विधीयमानश्छो विशेषप्रकृतेरपि प्राप्नोतीत्यर्थः ॥ १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानेऽर्थ इति। तस्मै हितमित्यस्मिन्नर्थे शरीरावयवाद्यद्विधीयमानः प्रकृत्यन्तरे सावकाशं छं बाधते। तक्रमिव कौण्डिन्ये दधीत्यर्थः। तथा हीति। यथाजातीयोऽवधिस्तथाजातीयेनावधिमता भाव्यम्। यथा मासात्पर इत्युक्ते कालः प्रतीयते ग्रामात्पूर्व इत्युक्ते देशः। अलोऽन्त्यात्पूर्व इत्यत्रेव। यांकांचिदिति। आ परिखायाश्छ इत्येवं वाच्यं स्यादित्यर्थः। अथवेति। अभ्युपगम्यवादोऽयम्। न त्वयं पक्षो युक्तः। अवधिविजातीयत्वात्। नन्वस्मिन्पक्षे कस्यार्थो न निर्दिष्टः स्यात् ततश्च स्वार्थे प्राप्नोतीति नैष दोषः। तस्मै हितमित्यादीनामर्थनिर्देशानां प्रत्ययं प्रति साकाङ्क्षत्वात् सन्निहितेन च्छेन निराकाङ्क्षीकरणादर्थस्य लाभात् स्वार्थे प्रत्ययाप्रसङ्गात्। वा वचनादिति। विकल्पवचनादित्यर्थः। अथेति। ठञः परोऽर्थः प्रकृतिर्वा प्राक्क्रीतान्नास्तीति लाघवार्थे प्राक् ठञ इ

समानेऽर्थे प्रकृतिविशेषादुत्पद्यमानो यच् छं बाधिष्यते। यथा न दोषस्तथास्तु। प्राक्क्रीताद्योऽर्थ इति विज्ञायते। कुत एतत्। तथा ह्ययं प्राधान्येनार्थं प्रतिनिर्दिशति इतरथा हि बह्व्यस्तत्र प्रकृतयः पठ्यन्ते ततो यांकांचिदेव प्रकृतिमवधित्वेनोपाददीत। अथवा पुनरस्तु प्राक्क्रीताद्याः प्रकृतय इति। ननु चोक्तमपवादविषयेऽपि च्छप्रसङ्ग इति। नवा क्वचिद्वावचनात्। न वा एष दोषः। किं कारणम्। क्वचिद्वावचनात्। यदयं क्वचिद्वावचनं करोति। विभाषा हविरपूपादिभ्य इति। तज्ज्ञापयति नापवादविषये छो भवतीति। यद्येवं नार्थः प्राग्वचनेन। अधिकारात्सिद्धम्। ननु चोक्तमधिकारात्सिद्धमिति चेदपवादविषये च्छप्रसङ्ग इति। परिहृतमेतत्। नवा क्वचिद्वावचनादिति। अथ किमर्थमियानवधिर्गृह्यते न प्राक् ठञ इत्येवोच्येत। एतज्ज्ञापयत्याचार्यः अर्थेष्वेव भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। समानेऽर्थे प्रकृतिविशेषादुत्पद्यमानो यच् छं बाधते॥ उगवादिभ्यो यत्॥ यच्छ्यावञः पूर्वविप्रतिषिद्धं सनङ्गूपानहोः प्रयोजनम्॥ यच्छौ भवतः अञः पूर्वविप्रतिषेधेन। किं प्रयोजनम्। सनङ्गूपानहोः प्रयोजनम् ॥

तिवक्तव्यम्। प्राग्वतेष्ठञिति प्रत्यासन्नष्ठञ् ग्रहीष्यत इत्यर्थः। अर्थेष्विति। तेन ज्ञापकाश्रयणमन्तरेण न्यायेनापवादविषये छस्याप्रवृत्तिः सिध्यति। प्राक् ठञ इति तूच्यमाने तुल्यजातीयस्यावधिमतोऽभावादर्थाः प्रकृतयो वावधिमत्त्वेन संगृह्येरन्॥ उगवा॥ यच्छ्याविति॥ छापवादानां परविप्रतिषेधबाधनायेदम्। छदिर्नामेति। छादनं छदिः स्तम्बचर्मविकारोऽपि संभवति। अत्राहुः छदिरुपानहोः प्रतिपदं प्रत्ययविधानादयुक्तो विप्रतिषेधः। तथा चोक्तम्। परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वमिति नार्थः पूर्वविप्रतिषेधेनेति चिन्त्यमेतत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हविरपूपादिभ्यइति सूत्रपाठानुपूर्वीप्रदर्शनार्थमपूपादिग्रहणम्।नह्यपूपादिषुप्रतिपदंकश्चिदुकारान्तःपठ्यते।पाठेऽपि
वापवादोऽसौभवत्युत्सर्गापवादयोश्चायुक्तोविप्रतिषेधस्तस्माद्धविर्विशेषवाचिविषयएवविप्रतिषेधोऽभिमतः।गवादिगणेह
विःशब्दस्यपाठात्स्वरूपग्रहणाच्च विभाषाहविरित्यत्रहविर्विशेषवाचिग्रहणम्।चरव्यादृति।चर्वधिकरणंहविरुपचारा
च्चरुशब्देनोच्यते।अन्नविकारेभ्यश्चेति।अपूपादिष्वन्नविकारेभ्यश्चेतिपठ्यते तद्विषयोयंविप्रतिषेधउच्यते।प्रपञ्चार्थश्चा
यंपाठोहविरपूपादिभ्योविभाषायायदित्युक्तत्वात्।तत्रसामर्थ्यादपूपादिग्रहणेनानिर्द्धारितविशेषाअन्नविकाराएवगृह्य
न्ते।प्रकृत्यभावादिति।यद्यपिहितार्थे नभ्यंतैलंनभ्यंलोहबन्धनमितिसिध्यति।तथापिनभ्यंचक्रमितिनसिध्यति।नहिचक्रस्य

यतोऽवकाशः।शङ्कव्यंदारु।पिचव्यःकार्पासः।अजोऽवकाशः।वार्ध्रंवारत्रम्।सनङ्गुर्नामचर्मविकारःतस्मादुभयंप्राप्नो
ति।सानङ्गव्यंचर्म।ज्यस्यावकाशः।औपानह्यंदारु।अजःसएव।उपानन्नामचर्म विकारस्तस्मादुभयंप्राप्नोति।औपान
ह्यंचर्म।ढञ्।ढञ्भवत्यजःपूर्वविप्रतिषेधेन।ढञोऽवकाशः।छादिषेयंतृणम्।अजःसएव।छदिर्नामचर्मविका
रस्तस्मादुभयंप्राप्नोतिछादिषेयंचर्म।ढञ्भवतिपूर्वविप्रतिषेधेन॥हविरपूपादिभ्योविभाषायायत्॥हविरपूपा
दिभ्योविभाषयायद्भवतिपूर्वविप्रतिषेधेन।हविरपूपादिभ्योविभाषायाअवकाशः।आमिक्ष्यमामिक्षीयम्।पुरोडा
श्यंपुरोडाशीयम्।यतःसएव।इहोभयंप्राप्नोति।चरव्यास्तण्डुलाः।यद्भवतिपूर्वविप्रतिषेधेन॥अन्नविकारेभ्यश्च॥
अन्नविकारेभ्यश्च विभाषा यायद्भवति पूर्वविप्रतिषेधेन।अन्नविकारेभ्योविभाषायाअवकाशः।सुर्याःसुरीयाः।
यतःसएव।इहोभयंप्राप्नोतिसक्तव्याधानाइति।यद्भवतिपूर्वविप्रतिषेधेन।सतर्हिपूर्वविप्रतिषेधोवक्तव्यः।नवक्त
व्यः।इष्टवाचीपरशब्दः।विप्रतिषेधेपरंयदिष्टंतद्भवतीति।अयंनाभिशब्दोगवादिषुपठ्यते।तत्रैवचोच्यतेनाभि
नभ्यंचेति।तत्रचोच्यते।नाभेर्नभभावेप्रत्ययानुपपत्तिःप्रकृत्यभावात्।नाभेर्नभभावेप्रत्ययस्यानुपपत्तिः।किंका
रणम्।प्रकृत्यभावात्।विकृतेःप्रकृतावभिधेयायांप्रत्ययेनभवितव्यम् ॥

नाभिर्विकृतिरप्यवयवः।नापितादर्थ्यमस्ति अवयविनोऽवयवार्थत्वाभावादितिपर्यनुयोगः।यस्तुशरीरावयवोनाभिस्ततः
परत्वाद्धितार्थेशरीरावयवाद्यदितियताभाव्यं नाभ्यंतैलमिति।गवादियतासन्नियुक्तोनभभावोऽन्यत्रयतिनभवति।नचेति।य राम॰
द्यपिदारुलक्षणाप्रकृतिर्नाभेरस्ति।तथापिनभ्यशब्दवाच्यंचक्रंनाभेःप्रकृतिर्नास्तीत्यर्थः ॥ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

:

नेयंनिर्द्धारणेषष्ठी सामान्यविशेषाभावात्। नहि भवति गवां गोः संपन्नक्षीरतमेति। तस्मादवयवावयवि
मण्डलचक्राणामिति। मण्डलचक्राणिशकटानि। तेषांमण्डलाकारंयच्चक्रंतन्नभ्यमुच्यते। तच्चनाभेः प्रकृ
भावेषष्ठी। मण्डलाकारंचक्रंयेषांतानिमण्डलचक्राणिशकटानि। तेषांमण्डलाकारंयच्चक्रंतन्नभ्यमुच्यते। तच्चनाभेः प्रकृ
तिर्नभवतीति तत्र प्रत्ययो न प्राप्नोतीत्यर्थः। कः पुनरिति। अवयवावयविनोः सादृश्याभावादिति प्रश्नः। इतरः क्रियाद्वारकं
सादृश्यंप्रतिपादयति। यत्तदिति। छिद्रवान्रथाङ्गविशेषोनाभिशब्दवाच्यः सयथाऽक्षारव्यंकाष्ठविशेषंधारयति परिवर्त्तते
चैवंचक्रमपीति तस्मादृश्यान्नभ्यशब्देनाभिधास्यत इत्यर्थः। अञ्जनोपाञ्जनमिति। अञ्जनंतैलाभ्यङ्गः। उपाञ्जनंसमीपाभ्य
ङ्गः। यान्येतानीति। एतच्चोपलक्षणम्। नभ्योलोहबन्धोनभ्योक्ष इत्याद्यर्थमपिपठितव्यमेव। अरव
नच नाभिसंज्ञायाविकृतेः प्रकृतिरस्ति। यदेवहितन्मण्डलचक्राणांतदेवमण्डलचक्रंतन्नभ्यमित्युच्यते। सि
इदंतुशाखादिषुवचनाद्ह्रस्वत्वंच। सिद्धमेतत्। कथम्। शाखादिषुनाभिशब्दः पठितव्यः। ह्रस्वत्वंचवक्तव्यम्।
नाभिरिवनभ्यमिति। कः पुनरिहोपमार्थः। यत्तदक्षधारणंपरिवर्त्तनंवा। अपर आह। यत्तदञ्जनोपाञ्जनमि
ति। नतर्हीदानीमिदंवक्तव्यंनाभिनभंचेति। वक्तव्यंच। किंप्रयोजनम्। यान्येतान्यरवन्तिचक्राणि तदर्थम्। तत्र
नाभिसंज्ञायाविकृतेः प्रकृतिरस्ति। यानिचाप्यनरवन्तिचक्राणितदर्थमपीदंवक्तव्यम्। दृश्यन्तेहिसमुदाया
दवयवस्यपृथक्त्वम्। तद्यथा। वार्क्षीशाखेति ॥
त्तुचक्रेषुपृथग्व्यवस्थितेभ्यः काष्ठेभ्यः पृथग्भूताएवनाभ्यादयोऽवयवाउत्पद्यन्ते। तत्रनाभिप्रकृतिः काष्ठंनभ्यंभवत्येव।
अररहितंतुचक्रमेकस्मादेवकाष्ठादुत्पद्यत इति पृथङ्नाभेः प्रकृतिभूतकाष्ठाभावात्प्रत्ययाप्रसङ्गः स्यादित्यर्थः। यानिचा
पीति। अनराणीतिवक्तव्येचक्रजातिविशेषप्रतिपत्त्यर्थोमतुब्निर्देशः। अनराणीत्युक्तेभग्नाराण्यपिचक्राणिप्रतीयेरन्
तस्मादरवत्पर्युदासेनानुपजातारचक्रप्रतीतिरनरवन्तीत्यनेनभवति। ननुयथारक्षाएवबहवोवनंनतुतद्व्यतिरिक्त
म्। एवंनाभ्यादयएवचक्रंतत्रभेदनिबन्धनोनाभिचक्रयोः प्रकृतिविकारभावोनस्यादित्याशङ्क्यभेदंतावदवयवावय
विनोः साधयति। दृश्यत इति। भेदेनापिव्यवहारोऽवयवावयविनोर्दृश्यतेनकेवलमभेदेनैवेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुप्रकृत्युच्छेदे विकारस्यदर्शनंयथा काष्ठोच्छेदे भस्मनः। नचेह चक्रोच्छेदे नाभिदर्शनमित्याशङ्क्याह। गुणान्तरयोगा
दिति। तत्रावयवोयश्चक्रस्य नाभिसंज्ञकः सोऽञ्जनादिगुणयुक्तनाभिसंज्ञावयवप्रकृतिस्तद्वारेणचक्रमपिप्रकृतिर्दृश्यते
ह्यवयवनिबन्धनोव्यपदेशः समुदायेयथापटोदग्धइत्यादौ। तत्रबुद्धिपरिगृहीतभाविविकारापेक्षालब्धप्रकृतिव्यपदे
शनाभिलक्षणावयवद्वारकश्चक्रस्यनभ्यव्यपदेशः। तादर्थ्यादिति। अनेनैवन्यायेनचरव्यतण्डुलार्थाव्रीहयोपिचरव्याअङ्गा
रीयकाष्ठार्थोवृक्षोप्यङ्गारीयएवेति प्र कृतौक्तोनभवतीतिवेदितव्यम्॥ कम्बला॥ निपातनादिति। अन्तस्वरितपाठाच्चय
दन्तत्वंविज्ञास्यते। परिमाणपर्युदासेनेति। अपरिमाणान्ताद्द्विगोस्तद्धितलुकि पञ्चाश्वेत्यादौङीपिप्रतिषिद्धेकम्बल्यग्रहणं

गुणान्तरयोगाच्चविकारशब्दोदृश्यते। तद्यथा। बैभीतकोयूपः। खादिरंचषालमिति। तत्रावयवात्समुदायेवृत्ति
र्भविष्यति। अथयोनभ्यार्थोवृक्षः कथंतत्रभवितव्यम्। नभ्योवृक्षोनभ्याशिंशपेति। नभ्यात्तुलुग्वचनम्॥ नभ्यात्तु
लुग्वक्तव्यः। सतर्हिलुग्वक्तव्यः। नवक्तव्यः। तदर्थ्यात्ताच्छब्द्यंभविष्यति। नभ्यार्थोनभ्यइति। कम्बलाच्चसंज्ञाया
म्॥ अयंयोगः शक्योऽवक्तुम्। कथमशीतिशतंकम्बल्यमिति। निपातनादेतत्सिद्धम्। किंनिपातनम्। अपरिमाण
बिस्ताचितकम्बल्येभ्योनतद्धितलुकीति। इदंतर्हिप्रयोजनंसंज्ञायामितिवक्ष्यामीति। इहमाभूत् कम्बलीयाऊर्णाः।
एतदपिनास्तिप्रयोजनम्। परिमाणपर्युदासेनपर्युदासेप्राप्तेकम्बल्यग्रहणंतत्रक्रियतेपरिमाणार्थम्। परिमाणं
चसंज्ञैव॥ विभाषाहविरपूपादिभ्यः॥ किमियंप्राप्तेविभाषाआहोस्विदप्राप्ते। कथंचप्राप्तेकथंवाऽप्राप्ते। ऊर्णान्तादि
तिवानित्येप्राप्तेअन्यत्रवाऽप्राप्ते। हविरपूपादिभ्योऽप्राप्ते। हविरपूपादिभ्योऽप्राप्तेविभाषाप्राप्तेनित्योविधिः। चरव्या
स्तण्डुलाः। शरीरावयवाद्यत्॥ यत्प्रकरणेरथाच्च॥ यत्प्रकरणेरथाच्चोपसंख्यानंकर्तव्यम्। रथायहितारथ्या॥

तत्रपरिमाणार्थमेवेत्यर्थः। परिमाणंचसंज्ञैवेति। संज्ञायतइतिसंज्ञा॥ विभाषा॥ किमियमिति। यद्यपिहविरपूपादिभ्योविभाषाय
यदितिपूर्वविप्रतिषेधप्रदर्शनादप्राप्तविभाषात्वमिहावगतम्। तथापिशिष्याणांसुखावबोधनायोपन्यासः॥ शरीरा॥ रथाच्चे
ति। हितार्थएवरथाद्यथास्यादर्थान्तरेमाभूदित्येवमर्थंमुगवादिभ्योयदित्यत्रोपसंख्यानंकृतम्। केचिद्रथसीताहलेभ्योय
द्विधावितितदन्तविधिमिच्छन्ति। अन्येतुहलसीताशब्दयोः साहचर्यात् चतुर्थाध्यायविहितएवयतितदन्तविधिर्नत
स्मिन्नित्याहुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खल॥ वृषशब्दोयमिति। नतुकृतनलोपोऽकारान्तोऽन्यथाऽसंदेहाय कृतनलोपो निर्दिश्येतेतिभावः। वृषन्शब्द इति। उच्चारणादेवनान्तत्वेज्ञाते नकारान्त इतिवचनं स्वरूपनिरूपणार्थम्। तस्येति। अन्यथाततष्ठकः प्रसज्येत। वृषशब्दस्यादेश इति। अन्यथायेचाभावकर्मणोरिति प्रकृतिभावाद्वृषण्यमिति स्यात्। कुतोनुचरसीति। ब्रह्मशब्दस्यानेकार्थत्वाद् ब्राह्मणशब्दपर्यायत्वं नातिप्रसिद्धमिति व्युत्पादयति। एकेनविग्रह इति। एकेनविग्रहएवेत्यर्थः। विग्रहस्तु द्वाभ्यामपिभवतीति नासौ नियम्यते।

खलयवमाषतिलवृषब्रह्मणश्च॥ वृषशब्दोयमकारान्तो गृह्यते। वृषन्शब्दोपि नकारान्तोस्ति। तस्योपसंख्यानंकर्त्तव्यंवृषशब्दस्यादेशो वक्तव्यः। वृषेभ्योहितमिति विगृह्य वृष्यमित्येवयथास्यात्। तथाब्रह्मशब्दो नकारान्तो गृह्यते ब्राह्मणशब्दश्चाकारान्तोप्यस्ति तस्योपसंख्यानंकर्त्तव्यं ब्रह्मन्शब्दस्यादेशोवक्तव्यः। ब्राह्मणेभ्योहितमिति विगृह्य ब्रह्मण्यमित्येवयथास्यात्। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। समानार्थावेतौ। वृषशब्दः वृषन्शब्दश्च ब्रह्मन्शब्दो ब्राह्मणशब्दश्च। आतश्चसमानार्थौ एवंह्याह। कुतोनुचरसि ब्रह्मन्। कुतोनुचरसि ब्राह्मणेति। तत्रद्वयोः शब्दयोः समानार्थयोरेकेनविग्रहः। अपरस्मादुत्पत्तिर्भविष्यति अविरविकन्यायेन। तद्यथा अवेर्मांसमिति विगृह्य आविकशब्दादुत्पत्तिर्भवति आविकमिति। एवमिहापि वृषायहितमिति विगृह्य वृष्यमिति भविष्यति। वृषेभ्योहितमिति विगृह्य वाक्यमेव। तथा ब्रह्मणेहितमिति विगृह्य ब्रह्मण्यमिति भविष्यति ब्राह्मणेभ्योहितमिति विगृह्य वाक्यमेवभविष्यति। त्रैशब्द्यं चेहसाध्यं तच्चैवं सतिसिद्धं भवति। आत्मन्विश्वजनभोगोत्तरपदात्खः॥ भोगोत्तरपदात्खविधानेऽनिर्देशः पूर्वपदार्थहितत्वात्॥ भोगोत्तरपदात्खविधानेऽनिर्देशः॥ अगमको निर्देशोऽनिर्देशः। किंकारणम्। पूर्वपदार्थहितत्वात् ॥

विगृह्येति। भिन्नकर्तृकत्वात्क्त्वानुपपत्तिः। नैषदोषः। उत्पत्तिशब्देनोत्पादनमुच्यते अन्तर्भावितण्यर्थत्वात्। पदैः परावरयोगे चेतिवाक्त्वाप्रत्ययः। वृषन्ब्राह्मणशब्दाभ्यामनभिधानाच्छप्रत्ययो नभवतीत्यर्थः। आत्मन्॥ अनिर्देश इति। योयंहितमितिप्रत्ययार्थनिर्देशः सभोगोत्तरपदात्खविधाने विवक्षितार्थप्रत्यायनासामर्थ्यादनिर्देशः। तत्कार्याकरणात्। तथाहि। लोकेपितृभोगीणादिशब्दैः पित्रादिहितस्यार्थस्यप्रतिपत्तिः पित्रादिभोगहितस्यप्रतिपत्तिप्रसङ्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वावचनमिति। अन्यथाभोगीनरा च्छोबाध्येत। भोगोत्तरपदात्त्वविधानेकेवलेभ्यः पित्रादिभ्योबाधकाभावाच्छः सिध्यति। किंभो गीनरिति प्रत्यासत्त्याश्रयेणप्रश्नः। सर्वथेति। सामर्थ्यंबलवदित्युत्तरम्। ननुभोगोत्तरपदात्त्वविधानेक्रियमाणेपिनित्यग्रहणे केवलाभ्यांराजाचार्याभ्यांकुस्यनिवृत्तिर्नसिध्यति। एवंतर्हितथापाठः कर्त्तव्यः। यथेष्टंसिध्यतिराजाचार्याभ्यांनित्यंभोगोत्तरप दाभ्यामेवहितेप्रत्ययइति। ग्रामणिभोगीनइति। ग्रामण्योभोगइतिषष्ठीसमासः। इकोह्रस्वोऽङ्योगालवस्येतिह्रस्वः। तत्वंप्राप्नो

उत्तरपदार्थप्रधानस्तत्पुरुषः पूर्वपदार्थप्रधानेचप्रत्ययइष्यते। पितृभोगायहितेप्राप्नोति। पित्रेचैवहितइष्यते। एवंतर्हिभोगीनरप्रत्ययोविधास्यते। भोगीनरितिचेद्वावचनम्। भोगीनरितियदिप्रत्ययोविधीयतेवावचनंकर्त्त व्यम्। मात्रीयः पित्रीयइत्यपियथास्यादिति॥ राजाचार्याभ्यांनित्यम्। राजाचार्याभ्यांनित्यमितिवक्तव्यम्। राज भोगीनः। आचार्यादणत्वंच। आचार्यभोगीनः। किंभोगीनरप्रत्ययोविधीयतइत्यतः राजाचार्याभ्यांनित्यमितिव क्तव्यम्। नेत्याह। सर्वथाराजाचार्याभ्यांनित्यमितिवक्तव्यम्। इहचग्रामणिभोगीनः सेनानिभोगीनइतिउत्तरपद इतिह्रस्वत्वंनप्राप्नोति। इहचाब्भोगीनइतिअपोभीतितत्वंप्राप्नोति। सूत्रंचभिद्यते। यथान्यासमेवास्तु। ननुचोक्तं भोगोत्तरपदात्त्वविधानेऽनिर्देशः पूर्वपदार्थहितत्वादिति। नैषदोषः। अयंभोगशब्दोऽस्त्येवद्रव्यपदार्थकः। त द्यथा। भोगवानयंदेशइत्युच्यतेयस्मिन्गावः सस्यानिचवर्त्तन्ते। अस्तिक्रियापदार्थकः। तद्यथा। भोगवानयंब्राह्म णइत्युच्यते। यः सस्यकूलानादीः क्रियाः अनुभवति। तद्यः क्रियापदार्थकस्तस्येदंग्रहणम्। यश्चापितस्याभ्यःक्रि याभ्योहितः संबन्धात्सोपिपित्रेहितोभवति। यदिसंबन्धादस्तुद्रव्यपदार्थकस्यापिग्रहणम्। योहिपितृद्रव्यायहि तः संबन्धात्सोपिपित्रेहितोभवति। अथवाभोगशब्दः शरीरवाच्यपिदृश्यते। तद्यथा ॥

तीति। भकारादौप्रत्ययेङ्स्यविधीयमानमितिभावः। द्रव्यपदार्थकइति। भोगोधनमुच्यते। भोगवानयंब्राह्मणइति। धनवा नपिकृपणोनिर्भोगउच्यते। तस्मादत्रक्रियाभोगशब्दवाच्या। संबन्धादिति। यस्तुपितृधनायहितोनासाववश्यंपितृहितोभ वति। ममैतद्धनंभविष्यतीत्येवंबुद्ध्यापितृधनरक्षणादितिभावः। योहीति। यस्तुममैतद्भविष्यतीतिमन्यतेनासौपितुरेतद्धन मिति। रक्षति किंतर्हिममैतदित्यभिमानेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहिरिवेति। समुदायेवृत्तो भोगशब्दएकदेशेषु फणेषु प्रयुज्यते। केचिदाहुः। भुजङ्गाङ्गमेव भोगशब्देनोच्यते न तु सर्वश
रीरमिति। तदयुक्तम्। अनन्तत्वात् प्रयोगविषयस्यावधारणस्य कर्तुमशक्यत्वात्। पञ्चजनादिति। मनुष्याः पञ्चजना उ
च्यन्ते। चत्वारो वर्णाः रथकारपञ्चमाः। पञ्चजनायेति। दिक्संख्ये संज्ञायामिति समासः। समुदायेवृत्तस्यावयवेपि वृत्त्या एकव
चनं यथा सप्तर्षिरिति। यो हि पञ्चानामिति। ननु सापेक्षत्वादत्र समासेन न भाव्यम्। संख्या हि संख्येयविशेषमपेक्षते। संख्ये
यस्यैव जनापेक्षया व्यतिरेकस्तद्द्वारेण तु संख्याया गुणस्येति साक्षात्संबन्धाभावात्समासाप्रसङ्गः। नैष दोषः। प्रकरणादि

अहिरिव भोगैः पर्येति। अहिरिव शरीरैरिति गम्यते। एवं पितृशरीराय हितः पितृभोगीण इति॥ खविधाने प
ञ्चजनादुपसंख्यानम्॥ खविधाने पञ्चजनादुपसंख्यानं कर्त्तव्यम्। पञ्चजनाय हितः पञ्चजनीनः। समाना
धिकरण इति वक्तव्यम्। यो हि पञ्चानां जनाय हितः पञ्चजनीयः स भवति। सर्वजनाट्ठञ्च॥ सर्वजनाट्ठञ्च वक्त
व्यः खश्च। सर्वजनाय हितः सार्वजनिकः। सर्वजनीनः। समानाधिकरण इति च वक्तव्यम्। यो हि सर्वेषां जना
य हितः सर्वजनीयः स भवति॥ महाजनान्नित्यम्॥ महाजनान्नित्यं ठञ्वक्तव्यः। महाजनाय हितो माहाजनिकः।
तत्पुरुष इति वक्तव्यम्। बहुव्रीहौ मा भूत्। महान् जनोऽस्य महाजनः। महाजनाय हितो महाजनीयः। यदि तर्ह्य
तिप्रसङ्गाः सन्तीत्युपाधिः क्रियते आद्यन्यासेप्युपाधिः कर्त्तव्यः। आत्मन्विश्वजनसमानाधिकरण इति वक्तव्य
म्। यो हि विश्वेषां जनाय हितः विश्वजनीयः स भवति। अथ मतमेतदनभिधानादाद्यन्यासे न भवतीति। इहापि
नार्थ उपाधिग्रहणेन। इहाप्यनभिधानान्न भविष्यति। सर्वपुरुषाभ्यां णढञौ॥ सर्वाण्णस्य वा वचनम्॥ सर्वाण्ण
स्य वेति वक्तव्यम्। सार्वः। सार्वीयः ॥

वशाद्यदा विशिष्टसंख्येयवृत्तित्वावसायः संख्याशब्दानां तदा जनादिना साक्षात्संबन्धाद्भवति वृत्तिः। सर्वजनायेति। सर्वो जन
इति पूर्वकाले कसर्वेति समासः। सर्वेषां जनायेति। सर्वसाधारणाय वैश्यादिजनायेत्यर्थः। महाजनादिति। नित्यग्रहणं सर्व
जनादुक्तः खो मा भूदित्येवमर्थम्। महाजनशब्दश्च समानाधिकरणपदआत्वनिर्देशादेवावसीयते॥ सर्व॥ सर्वादिति। अनुकर
णत्वात्सर्वनामकार्याभावः। सर्वनामानीत्यन्वर्थसंज्ञाविज्ञानात्। अनाश्रितार्थस्य च शब्दरूपस्यानुकरणमिति प्रकृतिवद्भा
वादपि सर्वनामत्वं न भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· पुरुषाद्वधेति। प्रत्ययार्थसामर्थ्येन षष्ठी समर्थविभक्तिर्लभ्यते। कृते तु तेनेति तृतीयोपात्तैव। पुरुषश्च लोकप्रसिद्धः पाण्यादि ५ ११
५ युक्त इह गृह्यते। ननु सांख्यादिशास्त्रप्रसिद्धस्तत्र प्रत्ययः स्यादर्शनादित्याहुः॥ तदर्थम्॥ कृत्यनामभ्य इति। अवश्यकर्त्तव्यत्वात्का
रणार्हत्वाद्वा कृत्या उक्तवास्तन्नामभ्य इत्यर्थः। नवेति। प्रयुज्यतेऽनेनेति प्रयोजनं फलमप्यभिधीयते कारणमपीति भावः॥ कृदि॥
उपध्यभावादिति उपाधिशब्दो विकृतिवाची नास्ति। एकस्यैव रथाङ्गविशेषस्योपध्योपधेयशब्दाभ्यामभिधानात् प्रकृतिप्रत्ययार्थ

पुरुषाद्वध इति वक्तव्यम्। पौरुषेयो वधः। अल्पल्पमिदमुच्यते पुरुषाद्वध इति। पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यम्॥ पौरुषेयो वधः। पौरुषेयो विकारः। पौरुषेयस्समूहः। तेन कृतं पौरुषेयं चन दैवतम्। तदर्थं विकृतेः प्रकृतौ॥ तदर्थमिति कृत्यनामभ्यष्ठञ्। तदर्थमिति कृत्यनामभ्यष्ठञ्वक्तव्यः। इन्द्रमहार्थम्। ऐन्द्रमहिकम्। गाङ्गमहिकम्। काशेरुपज्ञिकम्। नवा प्रयोजनेन कृतत्वात्॥ नवा वक्तव्यम्। किं कारणम्। प्रयोजनेन कृतत्वात्। यद्धि ऐन्द्रमहार्थम् इन्द्रमहस्तस्य प्रयोजनं भवति। तत्र प्रयोजनमित्येव सिद्धम्॥ कृदिरुपधिबलेर्ढञ्॥ उपध्यर्थमिति प्रत्ययानुपपत्ति रुपध्यभावात्। उपध्यर्थमिह प्रत्ययस्यानुपपत्तिः। किं कारणम्। उपध्यभावाद्विकृतेः प्रकृतावभिधेयायां प्रत्ययेन भवितव्यम्। नचोपधिसंज्ञिका या विकृतेः प्रकृतिरस्ति। यद्धि तद्रथाङ्गं तदौपधेयमित्युच्यते। सिद्धं तु कृदन्तस्य स्वार्थे ञ्वचनात्। सिद्धमेतत्। कथम्। कृदन्तस्य स्वार्थे अञ्वक्तव्यः। उपधीयते उपधेयम्। उपधेयमेवौपधेयम्। सिद्ध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तम्। उपध्यर्थमिति प्रत्ययानुपपत्तिरुपध्यभावादिति। नैतदस्ति। अयमुपधिशब्दोऽस्त्येव कर्मसाधनः। उपधीयते उपधिरिति। अस्ति भावसाधन उपधानमुपधिरिति। तद्यो भावसाधनस्तस्येदं ग्रहणम्। एवमपि न सिध्यति। किं कारणम्। विकृतेः प्रकृताविति वर्तते। प्रकृतिविकृतिग्रहणं निवर्तिष्यते॥

स्य प्रकृतिविकारभावाभावादित्यर्थः। सिद्धं त्विति। उपधेयशब्दात्कर्मसाधनयदन्तात्स्वार्थे ञ्वक्तव्य इत्यर्थः। तद्यो भावसाधन इति।
तत्र हि तादर्थ्यं संभवति। उपधानक्रियार्थत्वाद्रथाङ्गविशेषस्य। एवमपीति। यद्यपि लोके क्रियाविकारत्वेन क्वचिन्निर्दिश्यते। ब
हुविकारोऽयं मनुष्यो हसति गायति नृत्यतीति। तथापि प्रत्ययविधौ विशिष्ट एव प्रकृतिविकारभावो गृह्यते यत्र प्रकृत्युच्छेदो यत्र रामः
वा प्रकृतेरूपान्तरापत्तिः॥ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बालेयाइति।अत्रतण्डुलानांतादर्थ्यमस्ति।ननुप्रकृतिविकारभावोबल्यवस्थायामपितण्डुलानांतदवस्थत्वादितिभावः।आर्षभ्य
इति।यथापक्कमाम्रफलमाम्रफलविकारत्वेननप्रसिद्धमपितुप्रत्यभिज्ञावशात्तत्त्वेनैवमृषभोपिनवत्सविकारः।अथेति।तद
र्थग्रहणमनुवर्त्ततेस्वार्थेप्रत्ययउपधिशब्दात्सिध्यतीतिभावः।ऋषभोपानहोरित्रादयश्चशब्दास्तादर्थ्याद्वृत्तादिषुवर्त्तमानाःस्वा
र्थएवप्रत्ययमुत्पादयिष्यन्ति।प्रासादइति।अत्रसंभावनामात्रंगम्यतेनतुतादर्थ्यमितिप्रत्ययोनेष्यतइतिकरणापरामर्शेनेद
मुच्यते।यदितर्हितदस्येत्यनेनतादर्थ्येप्रत्ययःक्रियतेतदायोग्यतामात्रविवक्षायांप्रत्ययाप्रसङ्गः।अरणीयंस्थूणाकाष्टमिति।अ

तच्चावश्यंनिवर्त्त्यम्।इष्टार्थमुत्तरार्थंच।इष्टार्थंतावत्।बालेयास्तण्डुलाः।उत्तरार्थम्।ऋषभोपानहोर्ञ्यः।
आर्षभ्योवत्सइति।अथतदर्थमित्यनुवर्त्ततेउताहोन।किंचार्थोनुवृत्त्या।बाढमर्थः।तदस्यतदस्मिन्
स्यादितितदर्थेयथास्यादिहमाभूत्।प्रासादोदेवदत्तस्यस्यादिति।प्राकारोनगरस्यस्यादिति।यदित
दर्थमित्यनुवर्त्तते।ऋषभोपानहोर्ञ्यः।ऋषभार्थोघासः।उपानदर्थस्तिलकल्कइत्यत्रापिप्राप्नोति।एवं
तर्ह्यनुवर्त्ततेप्रकृतिविकृतिग्रहणम्।ननुचोक्तंबल्यृषभयोर्नसिध्यतीति।कथंपुनर्भवान्विकारंमत्वा
योऽहबल्यृषभेनसिध्यतीति।यदितावद्यःप्रकृत्युपमर्देनभवतिसविकारः।बैभीतकोयूपःखादिरंचषाल
मितिनसिध्यति।अथमतमेतत्तदेवगुणान्तरयुक्तंविकारइतिबल्यृषभयोरपिसिद्धंभवति।गुणान्तरयु
क्ताहितण्डुलाबालेयाः।गुणान्तरयुक्तश्चवत्सआर्षभ्यः ॥

त्रापिबुद्धिपरिकल्पितारोपिततादर्थ्याश्रयणेप्रत्ययोभविष्यतीत्याहुः।गुणान्तरयुक्ताहीति।बल्यवस्थायांयोगुणःस
न्निवेशलक्षणोलास्यादिकृतलौहित्यादिलक्षणोवातदपेक्षयाप्राक्तनगुणयुक्तादित्यर्थः।गुणान्तरयुक्तश्चवत्सइति।युवा
नावयवःसंहननवान्महाप्राणऋषभावस्थाप्राप्तयेयदापरिपोष्यतेनतुदानविक्रयार्थं तदातादर्थ्यस्यसं
भवः।आम्रंतुपक्कंयद्यप्याम्रविकारोगुणभेदात्।तथापितत्त्वबुद्ध्युत्पादाल्लोकेप्रकृतिविकारभावस्याप्रसिद्धत्वात्तत्र
प्रत्ययाभावः।आम्रपक्कावस्थयोराम्रशब्दएववाचकत्वेनप्रवर्त्ततेनतुशब्दान्तरंवत्सर्षभशब्दवत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

औपधेयंत्विति। सत्यपि क्रियापेक्षद्रव्यस्य तादर्थ्ये प्रकृतिविकाराऽभावात्। वचनादिति। कर्मसाधनक्तिप्रत्ययान्ता
दुपधिशब्दात्स्वार्थे ढञ्प्रत्यय उपध्यौपधेयशब्दयोर्लोके पर्यायत्वादेकस्यार्थस्यात्मापेक्षया तादर्थ्ये प्रकृतिविकारभा
वाभावात्॥ तदस्य॥ स्याद्ग्रहणमिति। क्रियमाणेपि स्याद्ग्रहणे नैवातिप्रसङ्ग निवृत्तिरितिकरणादेव सर्वातिप्रसङ्ग निवृत्तिः
सेत्स्यतीति प्रश्नः। प्रासादो देवदत्तस्येति। अक्रियमाणे स्याद्ग्रहणे स्वस्वामिसंबन्धादावतिप्रसङ्ग उक्तः। अस्येति षष्ठ्या संब
न्धमात्रस्य प्रतिपादनात्सामान्ये च सर्वविशेषान्तर्भावात्। ननु तदर्थग्रहणानुवृत्त्या न भविष्यति। तथा च क्रुदिरुपधिबलेर्ढ
ञित्यत्र भाष्यं बाढमर्थ इत्यादि। एवं तर्हि सति स्याद्ग्रहणे प्रासादार्थोयं देवदत्त उत्पन्नो योग्यो यं प्रासादलाभ इति तादर्थ्ये सं
भवात्प्रत्ययप्रसङ्गः। अथेति। यदा देवदत्तनामा केनचिदीश्वरो दृष्टस्ततः प्रासादं विस्तीर्णं दृष्ट्वा सौ संभावयति नायं प्रासादो

औपधेयंतु न सिध्यति। वचनात्स्वार्थिको भविष्यति॥ तदस्य तदस्मिन्स्यादिति॥ स्याद्ग्रहणं किमर्थम्। इह
मा भूत्। प्रासादो देवदत्तस्य प्राकारो नगरस्येति। अथ क्रियमाणेपि स्याद्ग्रहण इह कस्मान्न भवति। प्रासादो
देवदत्तस्य स्यात् प्राकारो नगरस्य स्यादिति। शक्यार्थे लिङ् इति वक्तव्यम्। नैवं शक्यम् ॥

न्यस्य संभवति देवदत्तस्यायं प्रासादः स्यादिति तदा प्रत्ययः प्राप्नोतीत्यर्थः। नन्वत्र तादर्थ्यं न प्रतीयत इति प्रत्ययो न भविष्य
ति। एवं तर्हि प्रासादलाभयोग्यो सौ देवदत्तः प्रासादार्थ इत्येवं विवक्षायामिदमुदाहरणम्। अथवा तदर्थग्रहणमत्र नानुव
र्तते इतिकरणेनानिष्टनिवृत्तेः साधयिष्यमाणत्वात् पूर्वसूत्रे तु भाष्यकारेणेतिकरणापरामर्शेन प्रसङ्गान्तरेण तदर्थग्रह
णस्यैवानुवृत्तिर्दर्शिता न त्वसौ सिद्धान्तस्तथा चान्यार्थमपि दारुयोग्यतामात्रेण प्रासादीयमुच्यते न च तत्र तादर्थ्यलेशो
प्यस्ति। न च प्रतीयते येनासदपि तादर्थ्यं बुद्ध्या परिकल्प्य प्रयोगः क्रियेत। शक्यार्थ इति। स्यात् शक्यार्थ इति पठितव्यमि
त्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेवेति। चिरवृत्तमपि वस्तु बुद्ध्या भावितत्वात्प्रत्यासन्नमिव प्रतीयते। उपदेशेऽजनुनासिक इदित्यत्रेदमुक्तम्। प्रायग्रह
णात् संज्ञायामपि घञ्भवति। प्रायवचनात्संज्ञायामेव घञ् स्यादिदानवानन्तु पाधेरुपाधिर्भवति विशेषणस्य वा विशेषणमिति
तत्र हि घञ् विधेयत्वात्प्रधानं तस्यैव प्रायग्रहणं संज्ञाग्रहणं च विशेषणं न्याय्यम्। ननु संज्ञायां प्रायग्रहणं विशेषणं परार्थस्य
संस्कारप्रतिपत्तावयोग्यत्वाच्छब्देन पारार्थ्यापन्नस्यैव प्रत्यायनादेकवाक्यत्वाच्चोपाधिविशेषणशब्दयोश्च क्वचित्पर्यायत्वं
क्रियाभावशब्दयोरिव। क्वचित्तु भेदेन व्यवहारः। तदुक्तम्। अर्थविशेष उपाधिस्तदन्तवाच्यः समानशब्दोपात्तः। अनुपाधिरतोऽन्य
च्छ्लाघादिविशेषणं यद्वदिति। तत्र स्यादित्येतत्प्रकृत्यर्थविशेषणायोपात्तं परतन्त्रमयोग्यं शक्यार्थ इत्यनेन विशेषणेन संबन्धानुभवे।
ननु विशेषण संबन्धमनुभूय प्रकृत्यर्थं विशेषयिष्यति। नैतदस्ति। विशेषणसंबन्धानुभवे प्रधानत्वं तस्य स्यात्। ननूपाधित्वं प्र
तीतिकाल एव तस्य पारार्थ्यमवगतमिति कुतो विशेषणसबन्धः। अथोपाधिद्वयेन प्रकृत्यर्थः संबध्येत। तदिहापि प्रसज्येत। श

इदानीमेव ह्युक्तं न ह्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणमिति। एवं तर्हि इतिकरणः क्रियते। ततश्चेद्वि व
क्षा भवति। विवक्षा च द्वयी। अस्त्येव प्रायोक्त्री विवक्षा। अस्ति लौकिकी। प्रायोक्त्री विवक्षा। प्रयोक्ता हि। मृद्व्या स्निग्धया श्ल
क्ष्णया जिह्वया मृदून् स्निग्धान् श्लक्ष्णान् शब्दान् प्रयुङ्क्ते। लौकिकी विवक्षा यत्र प्रायस्य संप्रत्ययः प्राय इति लोकोऽव्यप
दिश्यते। न च प्रासादो देवदत्तस्य स्यात्। प्राकारो नगरस्य स्यादित्यत्रोऽस्यद्यमानेन प्रत्ययेन प्रायस्य संप्रत्ययः स्यात्॥

क्यः प्रासादो देवदत्तस्य स्यादिति। तत्र ज्ञातुमुपभोक्तुं वा शक्य इति प्रकृत्यर्थस्य शक्यार्थत्वविशेषणसंबन्धसंभवः। मृदूनिति।
अपभ्रंशानित्यर्थः। तस्मात् प्रयोक्तृविवक्षा नाश्रीयते। प्रयोक्तुः स्वातन्त्र्यान्नियमाभावात्। प्रायस्येति। समग्रकल्पस्येत्यर्थः। तस्मा
द्यत्रार्थे लोकाः शब्दान् प्रयुञ्जते तदर्थाभिधायिनः त एव शास्त्रेणानुविधीयन्ते। प्रयोगमूलत्वाद् व्याकरणस्मृतेः। अयमेवान्या
यः क्वचिदितिकरणेनोपसंगृह्यते। तत्रेति शब्दो हेत्वर्थः सन् विवक्षामनुसारयति। योऽयमर्थस्तदस्य तदस्मिन् स्यादिति तदर्थप्र
त्यायनाय यदा विवक्षा भवति अतो हेतोरयमर्थः प्रत्ययोत्पत्तिनिमित्तत्वेनाश्रीयत इति। अथवा एवमर्थ इतिरिति शब्दो वि
वक्षामनुसारयति। एवं यदि लोकस्य विवक्षा भवति तत्र प्रत्यय इत्यर्थः। न च लोकस्य प्रासादो देवदत्तस्य स्यादित्यर्थस्य प्रतिपा
दनाय प्रासादीयो देवदत्त इति शब्दप्रयोगेच्छा भवति भवद्यर्थप्रतिपादनायैवैतच्छब्दप्रयोगात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ आह॥ किमर्थमिति। परिमीयतेऽनेनेति परिमाणमिति क्रियाशब्दत्वात्परिमाणशब्दस्य संख्याया अपि परिच्छेदहेतुत्वात्पृथग्ग्रह ५११
७ णं न कर्त्तव्यमिति मत्वा प्रश्नः। एवं तर्हीति। आचार्यदेशीयः परिहरति। यथा प्राच्यत्वाद्भरतानां ग्रहणे सिद्धे बह्वच इत्यत्र भेदेनोपादा
नमन्यत्र प्राच्यग्रहणे भरतग्रहणनिवारणार्थम्। तेनेञः प्राचामिति भरतेभ्यो युवप्रत्ययस्य लुङ्न भवति औद्दालकिः पिता औद्दाल
कायनः पुत्र इति। एवमिहापि संख्याग्रहणमन्यत्र परिमाणग्रहणे संख्याया अग्रहणार्थम्। तेन द्वाभ्यां शताभ्यां क्रीता द्विशतेत्यत्र
द्विगुलक्षणस्य ङीपो परिमाणान्तत्वात् प्रतिषेधः सिध्यति। यथा पञ्चाश्वेति। पणपादेति नित्ये यति प्राप्ते शाणाद्वेत्यत्र शतशाणाभ्यां
वेति वचनाद्यस्तस्याभावात् पक्षे शताच्च ठन्यताव शत इत्यत्रासमासग्रहणानुवृत्त्या संख्यालक्षणस्य कनोऽध्यर्द्धपूर्वेति लुकि

यद्येवं नार्थः स्याद्ग्रहणेन। न हि प्रासादो देवदत्तस्य प्राकारो नगरस्येत्यत्रोत्पद्यमानेन प्रत्ययेन प्रायस्य संप्रत्ययः स्या
त्। आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्॥ किमर्थं संख्यायाः पृथग्ग्रहणं क्रियते। न संख्यापि परिमाणमेव तत्र परिमा
णपर्युदासो भविष्यति। एवं तर्हि सिद्धे सति यत्संख्यायाः पृथग्ग्रहणं करोति तज्ज्ञापयत्याचार्यः। अन्या संख्या अ
न्यत्परिमाणमिति। किमेतस्य ज्ञापने प्रयोजनम्। अपरिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकीति॥ द्वाभ्यां शता
भ्यां क्रीता द्विशता। त्रिशता। परिमाणपर्युदासो न भवतीति। यद्येतज्ज्ञाप्यते। तदस्य परिमाणं संख्यायाः संज्ञासंघसू
त्राध्ययनेष्विति विशेषणं न प्रकल्पते परिमाणं या संख्येति। इह च क्रीतवत्परिमाणादिति संख्याविहितस्य प्रत्यय
स्यातिदेशो न प्रकल्पते। घृतस्य विकारः शत्यः। शतिकः। साह—— स्र इति यतावदुच्यते एतज्ज्ञापयत्याचार्योऽन्या
संख्याऽन्यत्परिमाणमिति। नैतज्ज्ञापकसाध्यमन्या संख्यान्यत्परिमाणमिति। न्यायसिद्धमेवैतत् ॥

लुते द्विशतेति भवति। यद्येतदिति। शिष्य आचार्यदेशीयेनोक्ते दूषणमुद्भावयति। इदानीमाचार्य आह। यत्तावदिति। परिमाणश
ब्दः क्रियाशब्दत्वेपि विशिष्टपरिच्छेदहेतौ द्रोणादौ रूढो न संख्याममभिधेयत्वेन गृह्णाति यथा पङ्कजशब्दः पद्ममेवाभिधा
ति न तु कुमुदादिकमपीत्यर्थः। भेदमात्रमिति। भेदः पदार्थानां वैलक्षण्यं तन्मात्रं संख्याशब्दः प्रतिपादयति। मूर्त्तामूर्त्तगणनात्मकत्वा
त्संख्यायाः एको घट इत्यत्रापि द्व्यादिनिरासाद्भेदावगतिरस्त्येव। यत्त्वैषीकान्तमिति। अपचितपरिमाणोपलक्षणमिषीकान्तग्रहणम्। एमः
तेनायमर्थः। हिमवदादिमहापरिमाणमपि संख्यया गण्यते सप्तकुलाचला इति। अपचितपरिमाणमपि त्रयः परमाणव इति ॥ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यच्चा परिमाणमिति। अमूर्त्तमप्यात्मादि गण्यत इत्यर्थः। उन्मानप्रमाणपरिमाणानि तु मूर्त्तद्रव्यविषयाण्येव। क्वचित्पाठः। यच्च परि
माणमिति। तत्रायमर्थः। द्रोणादिपरिमाणमपि संख्यया परिच्छिद्यते द्वौ द्रोणाविति। परिमाणग्रहणं चोपलक्षणं सर्वस्य संख्याप
रिच्छेद्यत्वात्। तदुक्तम्। द्विष्टिप्रस्थसुवर्णादिमूर्त्तिभेदाय कल्पते। क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिकेति। सर्वत इति। आ
रोहपरिणाहाभ्यां स्वगताभ्यां धान्यादि येन मीयते काष्ठादिमयेन तत्परिमाणं प्रस्थादिकमुच्यते। प्रस्थस्य चेति। संख्ययैव विशेषो
गण्यते द्वौ प्रस्थौ त्रयः प्रस्था इति न त्वन्यत इत्यर्थः। भिन्नसन्निवेशस्य हस्त्यादिनापि परिच्छेदो भवतीति समानाकृतिग्रहणं समा
नसन्निवेशप्रतिपादनार्थम्। प्रसङ्गेन उन्मानप्रमाणयोरपि स्वरूपप्रतिपादनं प्रश्नपूर्वकं करोति। किं पुनरिति। ऊर्ध्वमिति।
ऊर्ध्वदिगवस्थितं परिच्छेदकमुन्मानमुच्यते। यथाहास्तिनमुदकं हस्तीति केचिदाहुः। अन्ये तु हस्त्यादेः प्रमाणे चान्तर्भावात्तुला

भेदमात्रं संख्याह। यच्चेषीकान्तं यच्चापरिमाणं तस्य सर्वस्य संख्या भेदमात्रं ब्रवीति। परिमाणं तु सर्वतः। सर्वतो
मानमिति चातः परिमाणमिति। प्रस्थस्य च समानाकृतेर्न कुतश्चिद्विशेषो गम्यते। न चोन्मानतो न परिमाणतो न प्र
माणतः। किं पुनरुन्मानं किं परिमाणं किं प्रमाणम्। ऊर्ध्वमानं किलोन्मानम्। ऊर्ध्वं यन्मीयते तदुन्मानम्। परिमाणं
तु सर्वतः। सर्वतोमानमिति चातः परिमाणम्। कुत एतत्। परिः सर्वतोभावे वर्त्तते। आयामस्तु प्रमाणं स्यात्। आयाम
विवक्षायां प्रमाणमित्येतद्भवति। संख्या बाह्या तु सर्वतः। आतश्च सर्वतः संख्या बाह्या। भेदमात्रं ब्रवीत्येषा नै
षामानं कुतश्चन ॥

दण्डादावारोप्य येन द्रव्यान्तरपरिच्छिन्नगुरुत्वेन पलादिशब्दवाच्येन पाषाणादिना सुवर्णादेर्गुरुत्वं मीयते तदुन्मानं तच्चोर्ध्वा
रोपणादूर्ध्वमुच्यत इत्याहुः। आयाम इति। विस्तारो येन मीयते दारुवस्त्रादीनां तत्प्रमाणं हस्तादि तच्चायामपरिच्छेदित्वादुपचा
रादायामशब्देनोच्यते। नैषेति। न कुतश्चित्सन्निवेशादेः संख्यामानं संनिवेशादिनिरपेक्षं मानमित्यर्थः। तथाहि। द्वौ मेरुसर्षपावित्य
पि भवति। इयती विवक्षेति। रूढिपरित्यागेन परिच्छेदकत्वमात्रमाश्रयिष्यत इत्यर्थः। नन्वेवमप्यव्यभिचारात्संख्याया विशे
षणमनर्थकम्। नैष दोषः। प्रत्ययार्थस्य यदा परिच्छेदिका संख्या तदा प्रत्ययो यथा स्यात् पञ्चको गोसंघ इति यदा तु प्रकृ
त्यर्थस्यैव परिच्छेदिका संख्या पञ्च गावोऽस्य संघस्येति तदा मा भूदित्येवमर्थं संख्यापरिमाणग्रहणेन विशेष्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संख्यायाइतिचतन्त्रेति।लक्ष्यसिद्ध्येसंख्याग्रहणंतन्त्राधिकंकर्त्तव्यमित्यर्थः।किंपुनरिति।किंमर्यादायामाङ् अथाभिविधावितिप्रश्नः।अ
र्हेतिशब्दैकदेशानुकरणंचार्हशब्दः।वस्नेवचनादिति।पटादेरर्थस्यशत्यादिशब्दैरभिधानादितिभावः।मांसौदनिकइति।नहि
मांसौदनोऽनिथेर्मूल्यमितिभावः।अस्मिन्दीयतइति।अधिकरणत्वंसंप्रदानत्वंवाविवक्षित्वाप्रत्ययोविधास्यतइतिविकल्पप्र
दर्शनार्थमुभयोरुपादानम्।तत्रतदस्मिन्वृद्ध्यायलाभशुल्कोपदादीयतइतियोगविभागः क्रियते।तदस्मिन्नित्येकोयोगः।वृद्ध्या

एवंचकृत्वासंख्यायाः पृथग्ग्रहणंक्रियते।यदप्युच्यते।तदस्यपरिमाणंसंख्यायाः संज्ञासंघसूत्राध्ययनेष्विति विशेष
णंनप्रकल्पतइति।आहायंपरिमाणंयासंख्येतिनचास्तिसंख्यापरिमाणंतत्रवचनादियतीविवक्षाभविष्यति।यदप्यु
च्यते।क्रीतवत्परिमाणादितिचसंख्याविहितस्यप्रत्ययस्यातिदेशोनप्रकल्पतेइति।संख्यायाइतिचतत्रवक्तव्यम्।किंपु
नरिमेठगादयः प्रागर्हाद्भवन्ति।आहोस्वित्सहार्हेण।कश्चात्रविशेषः।ठगादयः प्रागर्हाच्चेदर्हेतद्विधिः।ठगादयः प्रागर्हा
च्चेदर्हेतद्विधिः।अर्हेठगादयोविधेयाः।शतमर्हतिशत्यः।शतिकः।साहस्रइति।वस्नेवचनात्सिद्धम्।इहयःशतमर्ह
तिशतंतस्यवस्नोभवति।तत्रसोस्यांशवस्नभृतयइत्येवसिद्धम्।वस्नेवचनात्सिद्धमितिचेन्मांसौदनिकादिष्वप्राप्तिः।दि
वस्नेवचनात्सिद्धमितिचेन्मांसौदनिकादिष्वप्राप्तिः।मांसौदनिकोतिथिः।श्वैतच्छत्रिकः।कालायसशूपिकः।तथागुणा
नांपरिप्रश्नेभवति।किमयंब्राह्मणोर्हतिशतमर्हतिशत्यः।शतिकः।साहस्रः।नैष्किकइतिनसिध्यति।सन्तुतर्हिसहा
र्हेण।अर्हाच्चेद्भोजनादिष्वतिप्रसङ्गः।अर्हाच्चेद्भोजनादिष्वतिप्रसङ्गोभवति।भोजनमर्हतीति।किमुच्यतेभोजनादिष्व
तिप्रसङ्गइति।यदाच्छेदादिभ्यइत्युच्यते।अवश्यंमांसौदनिकाद्यर्थेयोगविभागःकर्त्तव्यः।तदर्हति।ततःच्छेदादिभ्यो
नित्यमिति।तस्मिन्क्रियमाणेभोजनादिष्वतिप्रसङ्गोभवति।उक्तंवा।किमुक्तम्।अनभिधानादिति।अनभिधानाद्भोज
नादिष्वतिप्रसङ्गोनभविष्यति।अथवायोगविभागःकरिष्यते।कथंमांसौदनिकोतिथिः।श्वैतच्छत्रिकः।कालायसशूपिकः।
अस्मिन्दीयतेअस्मादितिच ॥

यलाभशुल्कोपदादितिद्वितीयः पूर्वयोगस्यासर्वविषयत्वज्ञापनार्थः।दीयतइति तृतीयोयोगउभयोर्योगयोः शेषः।ततोदीयते।
तदस्मिन्नितिसप्तम्यर्थेठगादयःप्रत्ययाभवन्ति।तदस्मिन्दीयतेतदस्मादितिचोपसंख्यानमितिवचनाद्धचतुर्थ्यर्थेपिभवतीतिस
र्वेष्टसिद्धिः।यद्यप्यर्हतेपिनदीयते।तथापियोग्यतयासंभावितदानाश्रयप्रत्ययोत्पादनेनविशिष्टस्वरूपनित्यशब्दव्युत्पत्ति
रविरुद्धेतिमन्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्त॥ असमासइति। वक्ष्यमाणः प्रष्ठुरभिप्रायः। परमनैष्किकमिति। ठञेवात्रभवति। निष्कशब्दस्यपरिमाणवाचित्वात् पूर्वेण प्राप्तोनेनठग्विधीयते। निष्कादिष्विति। पूर्वत्रग्रहणंवार्तिककारः पठन् कुरुस्ततिल्यादिसिद्धिंप्रयोजनंमेने। भाष्यकारस्तुन्यायसुत्वाद्नायपूर्वत्रग्रहणमविवक्षितार्थमत्वाप्रयोजनानिप्रदर्श्यदूषयित्वाचकुस्ततिल्याद्यर्थत्वमेवज्ञापकस्यस्थापयिष्यति।

एवमेतत्सिद्धम्। अथवापुनः सन्तुप्रागर्हीयात्। ननुचोक्तम्। ठगादयः प्रागर्हीयाश्चेद् द्वैतद्विधिरिति। परिहृतमेतद्बहुवचनात्सिद्धमिति। ननुचोक्तंबहुवचनात्सिद्धमितिचेन्मांसौदनिकादिषुप्राप्तिरिति। तथागुणानांपरिप्रश्ने भवति। किमयंब्राह्मणोर्हतिशत्यः। शतिकः। साहस्रः। नैष्किकइतिनसिध्यतीति। नैष शतमर्हति दोषः। अस्मिन्दीयतेअस्मादितिचएवमेतत्सिद्धंभवति॥ असमासेनिष्कादिभ्यः॥ असमासइतिकिमर्थम्। परमनिष्केणक्रीतंपरमनैष्किकम्। नैतदस्तिप्रयोजनम्। निष्कशब्दात्प्रत्ययोविधीयते। तत्रकः प्रसङ्गोयत्परमनिष्कशब्दात्स्यात्। नैवप्राप्नोतिनार्थः प्रतिषेधेन। तदन्तविधिनाप्राप्नोति। ग्रहणवताप्रातिपदिकेनतदन्तविधिः प्रतिषिध्यते। अतउत्तरंपठति। निष्कादिषुसमासग्रहणंज्ञापकंपूर्वत्रतदन्ताप्रतिषेधस्य। निष्कादिषुसमासग्रहणंक्रियते। ज्ञापकार्थम्। किंज्ञाप्यम्। एतज्ज्ञापयत्याचार्यः पूर्वत्रतदन्तविधेः प्रतिषेधोनभवतीति। किमेतस्यज्ञापनेप्रयोजनम्। प्राग्वतेष्ठञित्यत्रतदन्तविधिः सिद्धोभवति। नैतदस्तिप्रयोजनम्। ग्रहणवताप्रातिपदिकेनतदन्तविधिः प्रतिषिध्यते। नचठञ्विधौकाचित्प्रकृतिर्गृह्यते। इदंतर्हिप्रयोजनम् ॥

प्राग्वतेष्ठञित्यत्रेति। तेनपरमनिष्कशब्दाट्ठञ्सिद्धोभवति। केवलात्प्रातिपदिकाट्ठञ्विधीयमानः समासान्नस्यादित्याभासमात्रेदमुक्तम्। नचठञ्विधावितियत्रविशिष्टाप्रकृतिरुपादीयतेतत्रतदन्तविधेः प्रतिषेधः। ठञ्विधौतुङ्याप्प्रातिपदिकाधिकारात्प्रातिपदिकमात्रंप्रकृतित्वेनाश्रीयते। तत्रहिसमासस्यापिप्रातिपदिकत्वात्तदन्तविधेर्नप्रतिषेध इतिठञ्सिध्यतीतिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पारमगोपुच्छिकमिति।ठक्प्रतिषेधाट्ठञ्भवति।यद्येवंकेवलस्यप्रतिषेधोनप्राप्नोतिगोपुच्छिकइति।नैषदोषः।यस्यांपरिभाषा
यांप्रातिपदिकश्रुतिरस्तिसेहनोपतिष्ठतइतिसामान्यापेक्षंज्ञापकमिहाश्रीयते।तेनग्रहणवताप्रातिपदिकेनतदन्तविधिर्नास्ति
व्यपदेशिवद्भावोप्रातिपदिकेनेति।द्वयोरप्यत्रानुपस्थानात्तदन्तविधिनातदन्तस्यकार्यंकेवलस्यापिव्यपदेशिवद्भावेन।विधौप्रति
षेधइति।पूर्वादिनिःसपूर्वाच्चेतिप्रत्ययविधौग्रहणवतेत्यस्याःपरिभाषायाज्ञापितत्वाद्यत्रैवप्रत्ययोविधीयतेतत्रैवानया
तदन्तविधिःप्रतिषिध्यते।अगोपुच्छसंख्यापरिमाणादित्यनेनतुठक्प्रतिषिध्यतइतिनतदन्तविधिप्रतिषेधोनापिव्यपदे
शिवद्भावप्रतिषेधः।अन्येत्वाहुः।गोपुच्छात्परष्ठक्साधुर्नभवतीत्येवंप्रतिषेधेविज्ञायमानेगोपुच्छश्रुतेःसर्वत्राविशेषात्के

आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्परमगोपुच्छेनक्रीतंपारमगोपुच्छिकम्।एतदपिनास्तिप्रयोजनम्।
विधौप्रतिषेधः।प्रतिषेधश्चायम्।एवंतर्हिज्ञापयत्याचार्यःइतउत्तरंतदन्तविधेःप्रतिषेधोनभवतीति।किमे
तस्यज्ञापनेप्रयोजनम्।पारायणतुरायणचान्द्रायणंवर्त्तयतिद्वैपारायणिकःत्रैपारायणिकः।अत्रतदन्तवि
धिःसिद्धोभवति।एतदपिनास्तिप्रयोजनम्।वक्ष्यत्येतत्।प्राग्वतेःसंख्यापूर्वपदानांतदन्तग्रहणमलुकीति।
पूर्वत्रैवतर्हिप्रयोजनम्।खलयवमाषतिलवृषब्रह्मणश्च।राजमाषेभ्योहितंराजमाष्यम्।कृष्णतिलेभ्योहि
तःकृष्णतिल्यः।प्राग्वतेःसंख्यापूर्वपदानांतदन्तग्रहणमलुकि॥प्राग्वतेःसंख्यापूर्वपदानांतदन्तग्रहणम
लुकिकर्त्तव्यम् ॥

वलात्तदन्ताच्चठक्नोसाधुत्वंसिध्यतीतिनात्रतदन्तविधिनाप्रयोजनमितितदभावेतत्प्रतिषेधस्याप्रसङ्ग इतिज्ञापनस्यापि
नप्रयोजनम्।वक्ष्यत्येतदिति।तच्चावश्यंवक्तव्यमसत्यस्मिन्ज्ञापकेविध्यर्थंसतितुनियमार्थंसंख्यापूर्वपदानामेवयथास्या
दिहमाभूत्परमपारायणंवर्त्तयतीति।तथालुगन्तायाःप्रकृतेर्माभूद्द्विशूर्पेणक्रीतंद्विशौर्पिकमिति।राजमाष्यमिति।ननुराजमाष
शब्दस्यजात्यन्तरवाचित्वान्माषशब्दस्यानर्थक्यादत्रप्रत्ययोनप्राप्नोति।नैषदोषः।यथैकविंशतिर्नरसिंहोगौरखरोलोहित
शालिरित्यादीनांसमुदायानामर्थान्तराभिधायित्वेऽपिनावयवानामानर्थक्यंतस्यापिशब्दसंस्कारायहिशास्त्रेसर्वत्रपरिकल्पि
तार्थवत्ताश्रीयते।तात्त्विकीतुवाक्यस्यैवार्थस्यप्रत्यायनायप्रयोगात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वाभ्यामिति। तद्धितार्थेति समासे कृते शूर्पादञन्यतरस्यामित्यञ्ठञौ रन्यतरस्यामध्यर्द्धेतिलुक्। ततो द्विशूर्पेण क्रीतमित्यञभावे सामान्यविहितष्ठञ्भवति। तस्य द्विगुनिमित्तत्वाभावाल्लुगभावः। परिमाणान्तस्येत्युत्तरपदवृद्धिः। शताच्च॥ संख्याया इति। कनिप्राप्ते ठन्यतौ विधीयेते। तत्र शत इति प्रत्ययार्थविशेषणं न प्रकृतेरसंभवात्। न हि शतशब्दस्य शते वृत्तिः संभवति। तत्र प्रत्ययार्थस्य द्विविधं शतत्वम्। प्रकृत्यर्थव्यतिरिक्तसंख्येयान्तरविषयं प्रकृत्यर्थविषयं च। तत्र पूर्वं यथा। शतेन क्रीतं शत्यं शाटकशतमिति। अपरं तु शतमध्यायाः परिमाणमस्य ग्रन्थस्य शतक इति। अत्र हि केवलं प्रत्ययोत्पादनाय प्रकृतिप्रत्ययार्थयोर्भेदविवक्षा तात्त्विकस्त्वभेद इति प्रत्ययार्थस्यैकत्वेपि शतत्वमस्त्येव। यथा शतमित्येकत्वे विभक्तिवाच्ये सत्यपि शतत्वं न निवर्तते। तत्राद्यस्य निषेधो माभूदित्याह। शतप्रतिषेध इति। तत्र केचिदाहुः। न्यायसिद्ध एवार्थो वार्त्तिककारेण प्रतिपादितः। प्रकृत्यर्थस्य श

> पारायणतुरायणचान्द्रायणं वर्तयति॥ द्वैपारायणिकः। त्रैपारायणिकः। अलुकीति किमर्थम्। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्। त्रिशूर्पम्। द्विशूर्पेण क्रीतं द्विशौर्पिकम्। त्रिशौर्पिकम्। शताच्च ठन्यतावशते॥ शतप्रतिषेधेऽन्यशतत्वेऽप्रतिषेधः॥ शतप्रतिषेधेऽन्यशतत्वे प्रतिषेधो न भवतीति वक्तव्यम्। इह माभूत्। शतेन क्रीतं शत्यं शाटकशतमिति। अन्यशतत्व इति किम्। शतकं निदानमिति ॥

तस्य यत्र प्रत्ययार्थत्वं तत्रान्तरङ्गमहे यं संख्यान्तरासाधारणं च शतत्वमन्यत्र तु शत्यं शाटकशतमित्यादौ शब्दान्तरप्रयोगसमधिगम्यत्वाद्बहिरङ्गमिति तत्र प्रतिषेधाप्रसङ्गः। अन्ये त्वाहुः। शतको ग्रन्थ इत्यत्र ग्रन्थस्यैकसंख्यत्वाच्छतत्वमनुमीयते। तत्र यथा वृक्ष इत्यत्र मूलाद्यवयवसमवेतबहुत्वसंख्याश्रयं बहुवचनं न भवति। एवमशत इति प्रतिषेधो ग्रन्थे न प्राप्नोत्यन्यशतत्वे च प्राप्नोतीति वार्त्तिकारम्भः। ततोऽन्यशतत्वे प्रतिषेधाभावात्सामर्थ्यादनुमीयमानशतत्वविषयः प्रतिषेधः संपद्यते। एवं च सति शतं गावः परिमाणमस्य शतको गोसंघ इत्यत्रापि प्रतिषेधो भवति। आपिशलकाशकृत्स्नयोस्त्वग्रन्थ इति वचनादन्यत्र प्रतिषेधाभावो नियतकालाश्च स्मृतयो व्यवस्था हेतव इति मुनित्रयमतेनायत्ते साध्वसाधुप्रविभागः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संख्यायाः॥ डतेश्चेति। विंशतिशब्दात्तु विंशतिकात्खइति ज्ञापकात्कन्भवति। नचडतेरितिसमुदायस्यार्थवत्त्वात्तद्वयवस्ति
शब्दोनर्थकोऽतएवविंशतिशब्देशतिचप्रत्ययत्वात्तिशब्दस्यानर्थक्याज्ज्ञापकमन्तरेणापिकन्सिद्धः। नेवेति। लौकिकार्थ
वत्ताप्रकृतीनांप्रत्ययानांचनास्तिकेवलानांप्रयोगाभावादितिभावः। यान्येतानीति। यद्यपिप्रत्ययाअपिशब्दसंघातास्तथापि
तेषामानर्थक्यादर्थवन्तःशब्दसंघाताइहविवक्षिताः। यथोक्तंसंग्रहणेपायसंकरोतीतिसुण्नभवति। उद्ग्रहणेगर्मुद्ग्रहणंन
भवति गर्मुत्स्यास्यतीति। हन्ग्रहणेप्लीहन्ग्रहणंनभवतिप्लीहानाविति। केवलेनापीति। शास्त्रव्यवस्थाहेतुरन्वयव्यतिरेकग
म्यार्थवत्ताश्रीयतइत्यर्थः। अतएवशेर्थवद्ग्रहणात्काशेकुशेइत्यादौशेशब्दस्यग्रहणाभावः। उपसर्गाणामपिकेवलानांप्रयो

संख्यायाअतिशदन्तायाः कन्॥ डतेश्च॥ डतेश्चेतिवक्तव्यम्। इहापियथास्यात्। कतिभिः क्रीतंकतिकम्। किं
पुनःकारणंनसिध्यति। त्यन्तायानेतिप्रतिषेधःप्राप्नोति। तिप्रतिषेधाड्डतिग्रहणमितिचेदर्थवद्ग्रहणात्सिद्ध
म्। अर्थवतस्तिशब्दस्यग्रहणम्। नडतेस्तिशब्दोर्थवान्। नैषापरिभाषाइहशक्याविज्ञातुम्। नहिकेवलेनप्रत्य
येनार्थोगम्यते। किंतर्हि। सप्रकृतिकेन। क्वतर्ह्येषापरिभाषाभवति। यान्येतानिशब्दसंघातग्रहणानि। तत्तर्हि
वक्तव्यम्। नवक्तव्यम्। अर्थवद्ग्रहणात्सिद्धम्। ननुचोक्तंनैषापरिभाषेहशक्याविज्ञातुंनहिकेवलेनप्रत्ययेना
र्थोगम्यतेकेनतर्हिसप्रकृतिकेनेति। केवलेनापिप्रत्ययेनार्थोगम्यते। कथम्। उक्तमन्वयव्यतिरेकाभ्याम्॥ व
तोरिड्वा॥ कस्यायमिड्विधीयते। कनइत्याह। तत्कनोग्रहणंकर्तव्यम्। अक्रियमाणेहिप्रत्ययाधिकारात्प्रत्यये
ऽयंविज्ञायेत। टित्करणसामर्थ्यादादिर्भविष्यति। अस्त्यन्यट्टित्करणस्यप्रयोजनम्। टितइतिईकारोयथास्यात्।
अकारान्तप्रकरणेईकारः। नचैषोऽकारान्तः ॥

गाभावा ल्लौकिक्याअर्थवत्तायाअभावादन्वयव्यतिरेकव्यवस्थाप्येवासावाश्रीयते॥ वतोरि॥ कस्यायमिति। टित्त्वादस्या
गमत्वंनिश्चितम्। आगमीननिर्दिष्टइतितद्विषयःप्रश्नः। वतोरितिपञ्चमीनिर्देशादुत्वन्तस्यागमित्वमयुक्तम्। कनइति।
वत्वन्तस्यसंख्यात्वात्पूर्वेणविहितस्येतिभावः। आनन्तर्याच्चकनमागमिनंमन्यते। तदिति। संख्यायास्तावदनेक रामः
स्यप्रत्ययस्यविधानादागमिविशेषोदुर्लभः। प्रत्ययाधिकाराच्चपरेष्टइत्यादिवदिटः प्रत्ययत्वप्रसङ्गः ॥ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनकारान्तादिति। यथाडित्यमस्यापि टिलोपः। अथप्रयोजनाभावा इकारस्येत्संज्ञा न भवतीति कस्मान्न कल्प्यते। नैतदस्ति
हलन्त्यमिति श्रुतेर्बलीयस्त्वादित्यतदिति प्रकरणस्य दुर्बलस्य बाधोपपत्तौ प्रयोजनलाभात्। नवेति। पञ्चमी हि प्रत्ययस्वरूपमु
त्पादयति। यथा गुप्तिज्किद्भ्यः सन्निति न तु षष्ठीं प्रकल्पयति। असतः षष्ठीप्रकल्पनाभावादिति भावः। प्रकृते श्चेति। स्वरितत्व
प्रतिज्ञानादिति भावः। ननु विधानार्थापि कनोनुवृत्तिः संभवति। इटामावाधीति तन्नेट्कनोर्बाभवतः पक्षे ठञिप्रत्ययत्रयंस्या
त्। नैष दोषः। पूर्वसूत्रेण तावत् कन्विहितस्तस्येहानुवृत्तिर्विधानार्था न भवतीति प्रतीतिरुपजायते। तस्मादित्युत्तरस्येषापरि
भाषावतिष्ठते तत्र किमनिष्टप्रकल्पनयानेकबाधोस्तु अथेष्टप्रकल्पनया सर्वानुग्रह इति। तत्र सर्वानुग्रहो न्याय्यः लक्ष्यस्य

एवमपि कुत एतदित्करणसामर्थ्यादादिर्भविष्यति न पुनरकारान्तप्रकरणे अनकारान्तादपि ईकारः स्यात्।
तस्मात् कनो ग्रहणं कर्त्तव्यम्। न कर्त्तव्यम्। प्रकृतमनुवर्त्तते। क्व प्रकृतम्। संख्याया अतिशदन्तायाः कन्निति।
तद्वै प्रथमानिर्दिष्टम्। षष्ठीनिर्दिष्टेन चेहार्थः। वतोरित्येषा पञ्चमी कन्निति प्रथमायाः षष्ठीं कल्पयिष्यति तस्मा
दित्युत्तरस्येति। प्रत्ययविधिरयम्। न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति। नायं प्रत्ययविधिः। विहितः
प्रत्ययः प्रकृतश्चानुवर्त्तते॥ विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्॥ असंज्ञायामिति किमर्थम्। त्रिंशत्को विंशतिकः।
कथं चात्र कन्भवति। संख्यायाः कन्भवतीति। अतिशदन्ताया इति प्रतिषेधः प्राप्नोति। एवं तर्ह्याचार्यप्रवृत्ति
र्ज्ञापयति भवत्यत्र कन्निति। यदयं विंशतिकात्खइति प्रत्ययान्तनिपातनं करोति। विंशतेरेतज्ज्ञापकं स्या
दनेत्याह ॥

तथास्यानाद्य॥ विंशति॥ प्रत्ययान्तनिपातनमिति। कन्प्रत्ययान्तोच्चारणमित्यर्थः। ननु विंशतिशब्दे शतिचः प्रत्ययत्वात्तिशब्द
स्यानर्थकत्वात्प्रतिषेधप्रसङ्गाभावात्किं ज्ञापकाश्रयणेन। उच्यते। द्विदशशब्दस्य विंशादेशस्तिप्रत्यय इत्येषा प्रक्रियाश्रीय
ते। एवं हि ज्ञापकाश्रयेण त्रिंशत्कशब्दोपि सिध्यति। अन्यथा त्रिंशच्छब्दे शतोर्थवत्त्वाद् शदन्ताया इति प्रतिषेधः स्यात्। ननु विं
शतिशब्दादज्ञाताद्यर्थविवक्षायां कन्प्रत्यये विंशतिकशब्दः स्यादिति कथं ज्ञापकम्। नैतदस्ति। स्वार्थिके कन्प्रत्यये विंशति
काइति निर्देशः स्यात् असंज्ञायां ड्वुनो विधानात् संज्ञाविषयमेव ज्ञापकमाश्रयणीयम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगापेक्षमिति। यथा पुंवदिति योगापेक्षत्वाज्ज्ञापकस्य वत्यर्थेनञ्स्नञोरप्रवृत्तौ स्त्रीवदित्यपि भवति। एवमेतद्योगापेक्षं विंश
तिकादिति ज्ञापकमिति त्रिंशत्कशब्दोपि संज्ञायां भवतीत्यर्थः॥ कंसात्॥ अर्द्धिकइति। अर्द्धशब्दः कार्षापणस्यार्द्धे रूढ इति भा
गवदपेक्षायामसामर्थ्यं नाशङ्कनीयमिति केचिदाहुः। अन्ये तु प्रकरणादिवशाद्यदा निर्ज्ञातो भागवद्विशेषो भवति तदा नास्त्य
सामर्थ्यमिति सर्वस्यैवार्द्धस्य ग्रहणे न भाव्यमित्याहुः॥ अध्यर्द्ध॥ द्विगोर्लुक्युक्तमिति। द्विगोर्लुगनपत्य इत्यत्र भाष्ये व्याख्यातमिति।

योगापेक्षं ज्ञापकम्। अथवा योगविभागः करिष्यते। विंशतित्रिंशद्भ्यां कन्भवतीति ततो ड्वुन्संज्ञायामिति॥ कंसाट्टि
ठन्॥ टिठन्नर्द्धाच्च॥ टिठन्नर्द्धाच्चेति वक्तव्यम्। अर्द्धिकः। अर्द्धिकी॥ कार्षापणाद्वा प्रतिश्च॥ कार्षापणाद्वा टिठन्व
क्तव्यः। वा च प्रतिरादेशो वक्तव्यः। कार्षापणिकः। कार्षापणिकी। प्रतिकः। प्रतिकी॥ अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञाया
म्॥ द्विगोर्लुक्युक्तम्। किमुक्तम्। तत्र तावदुक्तं द्विगोर्लुकि तन्निमित्तग्रहणम्। अर्थविशेषासंप्रत्यये तन्निमित्तादपी
ति। इहापि द्विगोर्लुकि तन्निमित्तग्रहणं कर्त्तव्यम्। द्विगोर्निमित्तं यस्तद्धितस्तस्य लुग्भवतीति वक्तव्यम्। इह मा भूत्।
द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्। द्विशूर्पेण क्रीतं द्विशौर्पिकम्। त्रिशौर्पिकम्। अर्थविशेषस्यासंप्रत्यये तन्निमित्ताद
पि। अर्थविशेषस्यासंप्रत्यये तन्निमित्तादपीति वक्तव्यम्। किं प्रयोजनम्। द्वयोः शूर्पयोः समाहारः द्विशूर्पी। द्विशू
र्प्या क्रीतमिति विगृह्य द्विशूर्पमित्येव यथा स्यात्। अथ क्रियमाणेपि तन्निमित्तग्रहणे कथमिदं विज्ञायते। तस्य
निमित्तं तन्निमित्तं तन्निमित्तादिति। आहोस्वित्स निमित्तं यस्य सोयं तन्निमित्तः। तन्निमित्तादिति। किं चातः। यदि
विज्ञायते तस्य निमित्तं तन्निमित्तं तन्निमित्तादिति। क्रियमाणेपि हि तन्निमित्तग्रहणेऽत्र प्राप्नोति। द्वाभ्यां शूर्पा
भ्यां क्रीतं द्विशूर्पम्। द्विशूर्पेण क्रीतं द्विशौर्पिकम्। त्रिशौर्पिकम्। अथ विज्ञायते स निमित्तमस्य सोयं तन्निमित्तस्तन्निमित्ताद
ति। न दोषो भवति। यथा न दोषस्तथास्तु। स निमित्तमस्य सोयं तन्निमित्तस्तन्निमित्तादिति विज्ञायते। कुत एतत्।

तत एव बोद्धव्यम्। संज्ञाप्रतिषेधानर्थक्यमिति। इह वृत्तिकारा असंज्ञाग्रहणं प्रत्ययान्तविशेषणं व्याचक्षते। न चेत्प्रत्य
यान्तं संज्ञेति पाञ्चलोहितिकपाञ्चकलापिकशब्दौ च परिमाणविशेषस्य संज्ञे इति लुङ् भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्तिककारस्तु द्विगुविशेषणमसंज्ञाग्रहणं संनिधानादवगम्य प्रत्याचष्टे। तन्निमित्तत्वादिति॥ पाञ्चलोहितीति। तस्याः संज्ञाया लोप एव निमित्तमित्यर्थः। पञ्चलोहितपञ्चकलापशब्दौ द्विगुकृततद्धितलुकावेव संज्ञे ततो नार्थः प्रतिषेधेनेत्यर्थः। पञ्चलोहितीति। समाहारद्विगुसंज्ञां मन्यते। ततश्च न लोपनिमित्तैव संज्ञा॥ अत्रापीति॥ आव्यविकन्यायेन वाक्यवि

यदयमाह। अर्थविशेषासंप्रत्ययेऽतन्निमित्ताद— पीति। तत्तर्हि तन्निमित्तग्रहणं कर्त्तव्यम्। न कर्त्तव्यम्। द्विगोरिति नैषा पञ्चमी। का तर्हि। संबन्धषष्ठी द्विगोस्तद्धितस्य लुग्भवति। द्विगोर्यस्तद्धितः। किं च द्विगोस्तद्धितः। निमित्तम्। यस्मिन् द्विगुरित्येतद्भवति। कस्मिंश्चैतद्भवति। प्रत्यये। इदं तर्हि वक्तव्यम्। अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपीति। एतच्च न वक्तव्यम्। इहास्माभिस्त्रैशब्द्यं साध्यम्। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पमिति। द्विशूर्प्या क्रीतमिति। तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः करिष्यते। अपरस्मादुत्पत्तिर्भविष्यति अव्यविकन्यायेन। तद्यथा। अवेर्मांसमिति विगृह्य अविकशब्दादुत्पत्तिर्भवति आविकमिति। एवमिहापि द्वाभ्यां शूर्पाभ्यां क्रीतमिति विगृह्य द्विशूर्पमिति भविष्यति। द्विशूर्प्या क्रीतमिति विगृह्य वाक्यमेव भविष्यति। असंज्ञायामिति किमर्थम्। पाञ्चलोहितिकम्। पाञ्चकलापिकम्। संज्ञाप्रतिषेधानर्थक्यं च तन्निमित्तत्वाल्लोपस्य। संज्ञाप्रतिषेधश्चानर्थकः। किं कारणम्। तन्निमित्तत्वाल्लोपस्य। नान्तरेण तद्धितं तद्धितस्य च लुकं द्विगुसंज्ञास्ति। यस्तस्मादुत्पद्यते नासौ तन्निमित्तः स्यात्। एवं तर्हि इदं स्यात्पञ्चानां लोहितानां समाहारः पञ्चलोहिती। पञ्चलोहित्या क्रीतमिति। अत्रापि पञ्चलोहितमित्येव भवितव्यम्। कथम्। उक्तं ह्येतत्। अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपीति। उक्तं संख्यात्वे प्रयोजनं तस्मादिहाध्यर्द्धग्रहणानर्थक्यम्। उक्तं संख्यात्वेऽध्यर्द्धग्रहणस्य प्रयोजनम्। किमुक्तम्। अध्यर्द्धग्रहणं च समासकन्विध्यर्थं लुकि चाग्रहणमिति। ।तस्मादिहाध्यर्द्धग्रहणमनर्थकम्। द्विगोरित्येव लुक् सिद्धः॥

पय एव समाहारद्विगुरित्यर्थः। अद्ध्यर्द्धग्रहणं चेति। बहुगणादिसूत्रे इदमुक्तम्। न च संख्याकार्यभावज्ञापनमध्यर्द्धग्रहणस्येह प्रयोजनम्। कन्समासाभावप्रसङ्गात्। तस्मात्तत्रत्यं वार्त्तिकमेव कर्त्तव्यम्। तस्मिंश्च सति इहाध्यर्द्धग्रहणमनर्थकं द्विगुत्वाल्लुकः सिद्धत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभाषाकार्षापण॥ अध्यर्द्धसुवर्णमिति। अध्यर्द्धेन सुवर्णेन क्रीतमिति द्विगौ कृते ठञो लुक्। अलुक्पक्षे परिमाणान्तस्येत्युत्तरपदवृद्धिः। उन्मानस्यापि वृद्धौ शाणप्रतिषेधाद् ग्रहणात्। द्विशतमानमिति। शतमानादिसूत्रेणाण्॥ द्वित्रि॥ द्वयोर्योगयोरिति। तद्धितार्थे द्विगौ कृते बह्वचोन्तादात्ताट्ठञ्। द्विगोर्लुगनपत्ये इति लुक्। अथ द्विगुर्न स्यात्तस्य नास्ति तदा अण एव लुक्। द्वैयोग्यशब्देन च

विभाषाकार्षापणसहस्राभ्याम्॥ कार्षापणसहस्राभ्यां सुवर्णशतमानयोरुपसंख्यानम्। कार्षापणसहस्राभ्यां सुवर्णशतमानयोरुपसंख्यानं कर्त्तव्यम्। अध्यर्द्धसुवर्णम्। अध्यर्द्धसौवर्णिकम्। अध्यर्द्धशतमानम्। अध्यर्द्धशातमानम्। द्विशतमानम्। द्विशातमानम्॥ द्वित्रिपूर्वान्निष्कात्॥ बिस्ताच्च॥ द्वित्रिभ्यां द्वैयोग्यम्॥ द्वित्रिभ्यामिति यदुच्यते तद्द्वैयोग्यमिति द्रष्टव्यम्। किमिदं द्वैयोग्यमिति। द्वयोर्योगयोर्भवं द्वियोगं द्वियोगयोर्भावो द्वैयोग्यमिति। तद्द्वैध्यं विजानीयात्। अविशेषेणेत उत्तरं द्वित्रिभ्यामिति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे द्वित्रिभ्यां द्वैयोग्यमिति। तत्र च बहुग्रहणम्। तत्र च बहुग्रहणं कर्त्तव्यम्। बहुनिष्कम्। बहुनैष्किकम्। बहुबिस्तम्। बहुबैस्तिकम्॥ खार्यादिकन्॥ खार्यादिकन् केवलायाश्च॥ खार्यादिकन् केवलायाश्चेति वक्तव्यम्। खारीकम्। काकिण्याश्चोपसंख्यानम्। काकिण्याश्चोपसंख्यानं कर्त्तव्यम्। अध्यर्द्धकाकिणीकं द्विकाकिणीकम्। केवलायाश्च॥ केवलायाश्चेति वक्तव्यम्। काकिणीकम्॥ शाणाद्वा॥ शतशाणाभ्यां वा॥ शतशाणाभ्यां वेति वक्तव्यम्। अध्यर्द्धशतम्। अध्यर्द्धशत्यम्। पञ्चशतम्। पञ्चशत्यम्। अध्यर्द्धशाणम्। अध्यर्द्धशाण्यम्। पञ्चशाणम्। पञ्चशाण्यम्। द्वित्रिपूर्वादण् च। द्वित्रिपूर्वादण्चेति वक्तव्यम्। द्विशाणम्। त्रिशाणम्। द्वैशाणम्। त्रैशाणम्। द्विशाण्यम्। त्रिशाण्यम्॥ तेन क्रीतम्॥ तेन क्रीतमिति करणात्॥ तेन क्रीतमित्यत्र करणादिति वक्तव्यम्। इह माभूत्। देवदत्तेन क्रीतं यज्ञदत्तेन क्रीतमिति। अकर्वैकान्तात्॥ अकर्वैकान्तादिति वक्तव्यम्। इह माभूत्। देवदत्तेन पाणिना क्रीतमिति। संख्यैकवचनान्ताद् द्विगोश्चोपसंख्यानम्। संख्याया इति वक्तव्यम् ॥

धाराधेयभाव उच्यते। समासकृत्तद्धितेषु संबन्धाभिधानमिति वचनात्॥ खार्या॥ केवलायाश्चेति। अध्यर्द्धपूर्वद्विगोरित्यधिकारात् केवलाया न प्राप्नोतीति वचनम्॥ शाणा॥ शतशाणाभ्यामिति। शतान्तात्पूर्वेण नित्ये यति प्राप्ते विकल्पार्थं वचनम्। यदभावपक्षे कनो लुक्। द्वित्रिपूर्वादण्चेति सूत्रेष नार्षः पाठ इति वार्तिकारम्भः॥ तेन क्रीतम्॥ संख्यैकवचनादिति। समाहारद्वन्द्वः ॥ रामः
१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिमाणस्येति। परिमाणस्य या संख्या तस्या यद्वाचकं द्योतकं वैकवचनं तदन्तादिति वक्तव्यमिति वचनाद् मुद्रादीनां द्व्यादीनां चाप्रतिषेधः। अनभिधानादिति। वृत्तौ संख्याविशेषानवगमात् परिमाणशब्देभ्यो द्विवचनबहुवचनान्तेभ्यः प्रत्ययाभावः। एकत्वसंख्यायुक्ते चार्थे तेषां स्वभावतो वृत्त्येकवचनान्तेभ्य एव प्रत्ययः। द्व्यादयस्तु शब्दा लुप्तायामपि विभक्तौ स्वप्रवृत्तिनिमित्तभूतां संख्यामवगमयन्तीति तेभ्यः प्रत्ययो भवत्येव। एकया च मुद्रादिव्यक्त्या क्रयासंभवाद् बहुवचनान्तादेव प्रत्ययः। यदा तु जातिशब्दत्वं मुद्रादीनामभ्युपेयते तदैकवचनान्तेभ्योऽपि प्रत्ययः। ननु यन्निष्केण क्रीतं तत्स्य निष्को वस्नो भवतीति सोऽस्यांशवस्न

इहापि यथा स्यात्। पञ्चभिः क्रीतं पञ्चकम्। किं पुनः कारणं न सिध्यति। एकवचनान्तादिति वक्ष्यति। तस्यायं पुरस्तादपकर्षः। एकवचनात्॥ एकवचनान्तादिति वक्तव्यम्। इह माभूत्। शूर्पाभ्यां क्रीतं शूर्पैः क्रीतमिति। द्विगोश्चेति वक्तव्यम्। इहापि यथा स्यात्। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं त्रिशूर्पमिति। यद्येकवचनान्तादित्युच्यते। मुद्गैः क्रीतं मौद्गिकं माषैः क्रीतं माषिकमिति न सिध्यति। परिमाणस्य संख्याया यदेकवचनं तदन्तादिति वक्तव्यम्। तत्तर्ह्येकवचनान्तादिति वक्तव्यम्। तस्मिंश्च क्रियमाणे बहु वक्तव्यं भवति। न वक्तव्यम्। कस्मान्न भवति शूर्पाभ्यां क्रीतं शूर्पैः क्रीतमिति। उक्तं वा। किमुक्तम्। अनभिधानादिति। यद्येवं करणादकर्त्रकान्तादित्यपि न वक्तव्यम्। कर्तुः कर्त्रकान्ताद्वा कस्मान्न भवति। अनभिधानात्॥ तस्य निमित्तं संयोगोत्पातौ॥ संयोगोत्पातयोः को विशेषः। संयोगो नाम स भवति इदं कृत्वेदमवाप्यत इति। उत्पातो नाम स भवति यादृच्छिको भेदो वा छेदो वा पद्मं वा पर्णं वा। तस्य निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम्॥ तस्य निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानं कर्तव्यम् ॥

भृतय इत्यनेन प्रत्ययाः सिद्धा इति नार्थोऽनेन योगेन। अत्राहुः। यस्य शतं मूल्यं न भवति अथ च तेन क्रीतं कार्यवशात्तदर्थमिदम्। तस्य॥ संयोगोत्पातयोरिति। कोऽनयोः शब्दयोरर्थ इति प्रश्नः। नन्वेकार्थत्वं मन्यमानस्य प्रश्नः। कोऽसौ विशेषः येन संयोगोत्पातौ प्रतिपद्यामहे। इदं कृत्वेति। यथा काम्यैर्यागैः पुत्रादयोऽवाप्यन्ते तत्र संयुज्यन्ते फलविशेषेण येन यागादिना करणेन स यागादिरर्थः संयोगः। यादृच्छिक इति। अतर्कितोपनतः। भेद इति। वस्त्रादेः। छेद इति। उपानदादेः। भाविनः शुभस्याशुभस्य वा सूचकोऽर्थ उत्पात इत्यर्थः। तस्य च निमित्तत्वं फलविशेषविषयबुद्ध्युत्पत्तिहेतुत्वात्। न तु फलं प्रति कारणत्वात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वातिकमिति। शमनकोपनेएवात्रप्रत्ययार्थः। नतुनिमित्तम्। ठगत्रप्रत्ययः। प्रकरणादिवशाच्चक्वचिच्छमनंप्रतीयते। क्वचित्कोपनम्॥ गोद्व्यचो॥ ब्रह्मवर्चस्यइति। ब्रह्मणोवर्चोब्रह्मवर्चसंवृत्तस्वाध्यायसंपदुच्यते। ब्रह्महस्तिभ्यांवर्चसइत्यच्समासान्तः॥ तदस्मिन्॥ यत्रनदीद्वारादौशुल्कादिदीयतेतत्रप्रत्ययोविधीयमानः संप्रदानेनप्राप्नोतीत्याह। तदस्मिन्निति। तस्मिन्नपीति। संप्रदानमेवदानक्रियापेक्षयाधिकरणत्वेनविवक्ष्यते। यथासममब्राह्मणेदानमिति॥ पूरणा॥ अन्नन्तादिति। यथागोस्त्रियोरित्यत्रस्त्रीशब्देनस्त्र्यधिकारविहितानांटाबादीनांग्रहणमेवमिहापिपूरणाधिकारविहिताएवडडाद्योगृह्येर

वातस्यशमनंकोपनंवावातिकम्। पैत्तिकम्। श्लैष्मिकम्। संनिपाताच्च। सन्निपाताच्चेतिवक्तव्यम्। सान्निपातिकम्। गोद्व्यचोसंख्यापरिमाणाश्वादेर्यत्॥ यत्प्रकरणेब्रह्मवर्चसाच्च। यत्प्रकरणेब्रह्मवर्चसाच्चोपसंख्यानंकर्तव्यम्। ब्रह्मवर्चसस्यनिमित्तंसंयोगः ब्रह्मवर्चस्यः। उत्पातोवा॥ तदस्मिन्वृद्ध्यायलाभशुल्कोपदादीयते। तदस्मिन्दीयतेस्मादितिच॥ तदस्मिन्दीयतेस्मादितिचवक्तव्यम्। पञ्चवृद्धिर्वाआयोवालाभोवाशुल्कोवाउपदावादीयतेअस्मैपञ्चकः। सप्तकः। अष्टकः। नवकः। दशकः। तत्तर्हिउपसंख्यानंकर्तव्यम्। नकर्तव्यम्। यद्धियस्मैदीयतेतस्मिन्नपितद्दीयतेतत्रतदस्मिन्दीयतइत्येवसिद्धम्॥ पूरणार्द्धाट्ठन्॥ ठन्प्रकरणेऽन्नन्तादुपसंख्यानम्॥ ठन्प्रकरणेऽन्नन्तादुपसंख्यानंकर्तव्यम्। द्वितीयिकः। तृतीयिकः। किंपुनःकारणंनसिध्यति। पूरणादित्युच्यते। नचैतत्पूरणान्तम्। अनेतत्पर्यवपन्नम्। पूरणंनामार्थः। तमर्थमाहतीयशब्दः। पूरणंसोसौभवति। पूरणान्तात्स्वार्थेभागेअन्सोपिपूरणंभवत्येव॥ संभवत्यवहरतिपचति॥ तत्पचतीतिद्रोणादण्चेतिवक्तव्यम्। द्रोणंपचतिद्रौणीद्रौणिकी ॥

न्नितिवचनम्। द्वितीयिकइति। द्वयोःपूरणोभागइतिद्वितीयस्तदन्तात्पूरणाद्भागेतीयादन्नितिस्वार्थेअन्प्रत्ययः। ततोद्वितीयोवृद्ध्यादिरस्मिन्दीयतइतिठन्प्रत्ययः। पर्यवपन्नमिति। व्यवहितमित्यर्थः। पूरणंनामेति। अर्थग्रहणमिहनतुपूरणाधिकारविहितप्रत्ययग्रहणमितिभावः। स्वार्थइति। स्वस्याःप्रकृतेरर्थः स्वार्थः सा हिप्रत्ययस्यात्मीयातदर्थेचान्विधीयमानःपूरणाभिधायितात्पूरणव्यपदेशमासादयतीत्यर्थः॥ संभ॥ द्रोणादिति। द्रोणपरिमितेव्रीह्यादौवर्त्तमानाद्द्रोणशब्दात्प्रत्ययस्तस्यैवपाकसंभवात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुलि॥कुलिजाच्चेति सिद्ध इति। कुलिजाच्चेत्येव सूत्रमस्तु तत्र द्विगोष्ठँश्चेत्यनुवर्त्तते खोन्यतरस्यामिति च तत्र ष्ठंन्खाभ्यां मुक्ते पक्षे ठञ् तस्याध्यर्द्धपूर्वेति लुक्। एवं रूपत्रयं सिद्धम्। न च ठञः पक्षे लुगभावेन चतुर्थं रूपमिष्यत इति लुक्खग्रहणं वार्त्तिककृता प्रत्याख्यातम्॥ तदस्य॥ संज्ञायां स्वार्थ इति। इहाद्‌शम्यः संख्याः संख्येये वर्त्तन्ते। न तु संख्यानमात्रे। ततः परा तु संख्या संख्याने संख्येये च। तत्र य एव शकुनयः पञ्चत्वसंख्यायुक्ताः पञ्चशब्दस्य वाच्यास्त एव पञ्चकशब्दस्यापि। ततश्च परिमाणपरिमाणिभावाभावात् स्वार्थ एव प्रत्ययो वक्तव्यः। यदा तु वृत्तिविषये संख्यामात्रवृत्तित्वं पञ्चादीनामाश्रीयते। तथा च द्व्येकयोरिति

कुलिजाल्लुक्खौ च॥कुलिजाच्चेति सिद्धे लुक्खग्रहणानर्थक्यं पूर्वस्मिन्त्रिकभावात्। कुलिजाच्चेत्येव सिद्धं नार्थो लुक्खग्रहणेन। किं कारणम्। पूर्वस्मिन्त्रिकभावात्। पूर्वस्मिन्योगे सर्व एष त्रिको निर्दिश्यते। द्व्याढकी। द्व्याढकिकी। द्व्याढकीना॥ तदस्य परिमाणम्॥ संख्यायाः संज्ञासंघसूत्राध्ययनेषु॥ संज्ञायां स्वार्थे॥ संज्ञायां स्वार्थे कन् प्रत्यय उत्पाद्यः। पञ्चैव पञ्चकाः शकुनयः। त्रिकाः शालङ्कायनाः। सप्तका ब्रह्मवृक्षाः। ततः परिमाणिनि॥ ततः परः प्रत्ययः परिमाणिनीति वक्तव्यम्। पञ्चकः संघः। दशकः संघः। जीवितपरिमाणे चोपसंख्यानम्। जीवितपरिमाणे चोपसंख्यानं कर्त्तव्यम्। षष्टिर्जीवितपरिमाणमस्य षाष्टिकः। साप्ततिकः। जीवितपरिमाणे चेत्यनर्थकं वचनं कालादिति सिद्धत्वात्। जीवितपरिमाणे चेत्यनर्थकं वचनम्। किं कारणम्। कालादिति सिद्धत्वात्। कालादित्येव सिद्धम्। इह यस्य षष्टिर्जीवितपरिमाणं षष्टिर्जीवितमसौ भूतो भवति। तत्र तमधीष्टो भृतो भूतो भावीत्येव सिद्धम्। अवश्यं चैतदेवं विज्ञेयम्। इह वचने हि लुक्प्रसङ्गः। इह हि क्रियमाणे लुक् प्रसज्येत। द्विषाष्टिकः। त्रिषाष्टिकः। अनेन सति लुग्भवति। तेन सति कस्मान्न भवति। आर्हादित्युच्यते। न सिध्यति। किं कारणम्। न हीमे कालशब्दाः। किं तर्हि। संख्याशब्दः ॥

सूत्रकारेण हि द्वैकत्वे द्व्येकशब्दवाच्ये आश्रित्य निर्देशः कृतः संख्येयार्थत्वे हि द्व्येकेष्विति स्यात् तदा परिमाणपरिमाणिभावाश्रयेणापि शक्यः प्रत्यय उत्पादयितुम्। जीवितपरिमाणे चेति। पूर्वोपेक्षः समुच्चयः। संघादिषु प्रत्ययो विधीयमानोऽन्यत्र न प्राप्नोतीति वचनम्। द्विषाष्टिक इति। संख्यायाः संवत्सरसंख्यस्येत्युत्तरपदवृद्धिः। अर्हादिति। अध्यर्द्धपूर्वेत्यत्रार्हादित्यनुवर्त्तनादार्हीयस्य लुकाभाव्यम्। तमधीष्ट इत्यनेन प्रत्ययोऽर्हात्पर इति तस्य लुगभावः। न हीम इति। मासादय एव कालशब्दा न तु निमित्तान्तरेण काले प्रयोगमात्रेणेति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संख्यासंख्येयइति। काले संख्येये वर्तमानस्य संख्यावाचिनः कालाभिधायित्वमुपपन्नमिति भावः। वार्षशतिक इति। संख्यायाः प्रत्ययो विधीयमानस्तदन्तान्न प्राप्नोति। संख्यापूर्वपदानामेव प्राग्वतेस्तदन्तविधिरिष्यते। खारशताद्यर्थमिति। खारशब्दोऽकारान्तो वार्त्तिककारवचनात्साधुः। तदस्य परिमाणमिति योगविभागः कर्त्तव्य इत्युक्तं भवति। अनभिधानादिति। नहि रमणीयादयो वृत्तिविषये काले वर्त्तन्ते षष्ट्यादयस्तु वृत्तौ संख्येयेषु संवत्सरेषु स्वभावतो वर्त्तन्त इ

इमेऽपि कालशब्दाः। कथम्॥ संख्या संख्येये वर्त्तते। यदि तर्हि यो यः काले वर्त्तते स स कालशब्दः रमणीयादिषतिप्रसङ्गो भवति। रमणीयं कालं भूतः शोभनं कालं भूतः। अथ मतमेतत्काले दृष्टः शब्दः कालशब्दः कालं यो न व्यभिचरतीति। न रमणीयादिषतिप्रसङ्गो भवति। जीवितपरिमाणे तूपसंख्यानं कर्त्तव्यम्। इहचोपसंख्यानं कर्त्तव्यम्। वार्षशतिको वार्षसहस्रिक इति। किं पुनः कारणं न सिध्यति। नहि वर्षशब्दः संख्या। किं तर्हि। संख्येये वर्त्तते वर्षशब्दः। ॥ एवं तर्ह्यन्येभ्योऽपि दृश्यते खारशताद्यर्थम्। अन्येभ्योऽपि दृश्यत इति वक्तव्यम्। किं प्रयोजनम्। खारशताद्यर्थम्। खारशतिको राशिः। खारसहस्रिको राशिः। अयं तर्हि दोषः। इहवचने हि लुक्प्रसङ्ग इति। नन्वेषो यत्नः क्रियमाणे दोषस्तत्र कर्त्तव्यमिति। किं तर्हि। यत्नः क्रियमाणे न दोषो भवति तत्र कर्त्तव्यम्। क्व च क्रियमाणे न दोषः। परस्माद्धेतुः। न तर्हि उपसंख्यानं कर्त्तव्यम्। न कर्त्तव्यम्। कालादित्येव सिद्धम्। ननु चोक्तं नेमे कालशब्दाः किं तर्हि संख्याशब्दा इति। ननु चोक्तमिमेऽपि कालशब्दाः। कथं संख्या संख्येये वर्त्तते। ननु चोक्तं यदि तर्हि यो यः शब्दः काले वर्त्तते स स कालशब्दः रमणीयादिषतिप्रसङ्गो भवतीति। उक्तं वा। किमुक्तम्। अनभिधानादिति। अनभिधानाद्रमणीयादिषूत्पत्तिर्न भविष्यति॥ स्तोमे डविधिः। पञ्चदशाद्यर्थः॥ स्तोमे डो विधेयः। किं प्रयोजनम्। पञ्चदशाद्यर्थम्। पञ्चदशः स्तोमः। सप्तदशः स्तोम इति॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये पञ्चमाध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

तियुक्तं तेषां कालवाचित्वम्। लोके च संवत्सरसंख्यया जीवितं प्रायेण परिच्छिद्यत इति संवत्सरवृत्तित्वं षष्ट्यादीनामुच्यते। स्तोमे डविधिरिति। डित्करणं विंशः स्तोमस्त्रिंशः स्तोम इत्यादौ टिलोपार्थम्। पञ्चदश इत्यत्र तु नस्तद्धित इति टिलोपः सिध्यति। स्तोमो मन्त्रसमूहः। इति श्रीमदुपाध्यायजैयटपुत्रकैयटविरचिते भाष्यप्रदीपे पञ्चमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥ समः १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पङ्क्ति॥इमेविंशत्यादयइति।सूत्रेपठितानांप्रत्यक्षत्वादिदमापरामर्शः।पङ्क्तिशब्दश्छन्दोविशेषेसंनिवेशविशेषेचरूढः।नै
वावयवार्थानुसारेणप्रवर्त्ततइतितत्परित्यागेनविंशत्यादयएवविचार्यन्ते।वक्ष्यमाणवार्त्तिकावतारणार्थंचायंभाष्यउपक्षेपः।
सप्रकृतिकाइति।प्रकृतिप्रत्ययप्रकरणेउच्चारणादितिभावः।सहशब्दोऽत्रविद्यमानार्थः।नतुल्ययोगार्थः।तेनविद्यमानप्र
कृतिप्रत्ययाइत्यर्थः।निपात्यन्तइति।प्रकृतित्वमेषांकस्मान्नविज्ञायते।पञ्चम्याःप्रत्ययस्यचानुपादानादनिष्पन्नस्यचप्र
कृतित्वाभावात्।प्रत्ययत्वंतर्हिकस्मादेषांनभवति।लोकेकेवलानांप्रयोगदर्शनात्।शताच्चठन्यतावशतेविंशत्यादिष्वद
तिशास्त्रेचकेवलानामुच्चारणात्।विधिनिपातनयोश्चायंभेदोयत्रावयवानिर्दिश्यन्तेसमुदायोऽनुमीयते सविधिः।यत्रतु
समुदायःश्रूयतेअवयवाश्चानुमीयन्तेतन्निपातनम्।काप्रकृतिरिति।प्रकृतिप्रत्ययविशेषविषयःप्रश्नः।प्रकृत्यर्थंतुन
पृच्छति।प्रकृतौविज्ञातायांतदर्थस्यापिविज्ञानात्।कःप्रत्ययार्थइति।लोकेविंशत्यादीनांसंख्यायांसंख्येयेचप्रयोगो

पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्॥इमेविंशत्यादयःसप्रकृतिकाःसप्रत्यय
काश्चनिपात्यन्ते।तत्रनज्ञायतेकाप्रकृतिःकःप्रत्ययःकःप्रत्ययार्थइति।तत्रवक्तव्यमियंप्रकृतिरयंप्रत्ययःअयं
प्रत्ययार्थइति।इमेब्रूमःद्विशब्दादयंदशदर्थाभिधायिनःस्वार्थेशतिच्प्रत्ययोनिपात्यतेविन्भावश्चद्वौदशतौविं
शतिः।विंशत्यादयोदशदर्थेचेत्समासवचनानुपपत्तिः ॥

दृश्यतेतत्रलौकिकार्थानुगुणकंप्रत्ययार्थमाश्रित्यसाधुत्वार्थमन्वाख्यानंक्रियतइत्यर्थः।इमेब्रूमइति।वचनक्रि
यायामाभिमुख्यंप्रतिपादयितुंप्रत्यक्षार्थंसर्वनामोपादानम्।वचनमात्रंचेहविवक्षितंनतुकर्त्रभिप्रायंक्रियाफलमि
त्यात्मनेपदंनकृतम्।द्विशब्दादिति।दशद्वर्गलक्षणसंख्येयवाचिनइत्यर्थः।समुदायेचनिपात्यमानेनान्तरीयकम
वयवानांनिपातनमित्यभिप्रायेणशतिच्प्रत्ययोनिपात्यतइत्युच्यते।स्वार्थइति।प्रत्ययस्यस्वात्मीयाप्रकृतिस्तस्या
र्थइत्यर्थः।अथवायःप्रकृतेरर्थःसएवप्रत्ययानांस्वार्थःपितृधनमिवपुत्रस्य तत्रैवार्थेप्रत्यासत्त्याऽनिर्दिष्टार्थप्रत्यय
स्योत्पत्तेर्न्याय्यत्वात्।समासवचनानुपपत्तिरिति।द्वयोःसमासवचनयोरनुपपत्तिरित्यर्थोऽभिमतः।नहिसमासमात्रं व
चनमात्रंवानसिध्यति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा विंशतिगवमिति। विंशतिशब्देन द्वयोर्दशतोरभिधानं न तु दशत्संबन्धिनां द्रव्याणाम्। ततश्च दशदपेक्षया गवां व्यतिरेको ५१२
५ पजननात् षष्ठ्या भाव्यम्। गवां विंशतिरिति। ततः समानाधिकरणपदनिबन्धनद्विगुसमासाप्रसङ्गः। षष्ठ्यन्तं चेति। उप
सर्जनं पूर्वमिति लक्षणेन। गुणे न षष्ठी न समस्यत इति प्रतिषेधः संख्यायां न भवति शतसहस्रान्ताच्च निष्कादिति प्रत्यय
विधानाज्ज्ञापकात्। कोऽशः शतयोजनशतयोरिति वार्त्तिकवचनाच्च। द्विवचनं प्राप्नोतीति। स्वार्थिकाः प्रकृतलिङ्गमेव के
चिदतिवर्त्तन्ते न तु संख्यामपि संख्यान्तरयुक्तस्य संख्यान्तरविरोधात्। लिङ्गानां तु विरोधाभावः स्त्रीसूत्रे प्रतिपादितः। एवं त
र्हीति। तदस्य परिमाणमित्यधिकारात्परिमाणोपाधेः संख्याया अस्येति परिमाणिनि प्रत्ययः। परिमाणी च द्विविधः। द्रव्यसं
घातो भिन्नानि वा द्रव्याणि। तत्र संघस्यैकत्वाद् विंशतिरित्येकवचनं सिध्यति। द्रव्याणां तु परिमाणित्वे विंशतिगवं त्रिंशत्पू

विंशत्यादयो दशदर्थे चेत्समासो नोपपद्यते॥ विंशतिगवमिति। किं कारणम्। द्रव्यमनभिहितं तस्यानभिहि
तत्वात् षष्ठी प्राप्नोति। षष्ठ्यन्तं च समासे पूर्वं निपतति। तत्र गोविंशतिरिति प्राप्नोति। न चैवं भवितव्यम्। गोविं
शतिरिति। भवितव्यं च। विंशतिगवं तु न सिध्यति। इह च त्रिंशत्पूली। पञ्चाशत्पूली। चत्वारिंशत्पूली। समा
नाधिकरणलक्षणः समासो न प्राप्नोति। वचनं च विधेयम्। विंशतिः। द्वित्वाद्दशतोर्द्वयोर्द्विवचनमिति द्वि
वचनं प्राप्नोति। एवं तर्हि परिमाणिनि विंशत्यादयो भविष्यन्ति। परिमाणिनि चेत् पुनः स्वार्थे प्रत्ययविधा
नम्। परिमाणिनि चेत् पुनः स्वार्थे प्रत्ययो विधेयः। विंशकः संघः ॥

लीति समानाधिकरणसमाससिद्धिरिति भावः। परिमाणिनि चेदिति। द्वौ दशतौ परिमाणं यस्य स संघो विंशतिरित्यभिधी
यते। तत्र विंशतिः परिमाणं यस्य संघस्येति संघान्तरस्य परिमाणिनोऽसंभवाद्विंशकः संघ इति सिद्ध्यै विंशतित्रिंश
द्भ्यां ड्वुन्संज्ञायामिति ड्वुन् प्रत्ययः स्वार्थे वक्तव्यः। ननु यदा द्रव्याणि परिमाणीनि विंशतिशब्दाभिधेयानि तदा संघे परि
माणिनि प्रत्ययः सिध्यत्येव। विंशतिर्गावः परिमाणमस्य विंशकः संघ इति। एवं तर्हि विंशतिशब्देन संघस्याभिधानं प्रा
प्नोति न चेष्यते। विंशतिर्गावः संघ इति। तस्माद्यदा संघे परिमाणिनि विंशत्यादयो निपात्यन्ते तदा तत्र तेषां केवलानां प्रयो रामः
गो मा भूदिति पुनः स्वार्थे नित्यं प्रत्ययो विधेयः ॥ १५

CC-0. In Public Domain. Digitization by eGangotri

षष्ठीवचनविधिश्चेति। संख्येयपरिमाणिनि विंशत्यादीनां केवलानां नित्यं प्रयोगो नेष्यते भिन्नेषु तु द्रव्येषु परिमाणिषु प्रवृत्ययोरस्त्वाश्रीयमाणायां विंशतिशब्देन द्रव्याणामभिधानाद्व्यतिरेकाभावाद्गवां विंशतिरिति षष्ठी न प्राप्नोति द्रव्यसामानाधिकरण्याद्बहुवचनप्रसङ्गश्च। तदेवं व्युत्पत्तिपक्षे दूषणान्यभिधायाव्युत्पत्तिपक्षे निर्दोषमाश्रित्यारम्भं प्रत्याख्यातुमाह। अनारम्भो वेति। वाशब्दस्तदर्थे सहस्रादिवदव्युत्पन्ना एव विंशत्यादयोऽर्थवदधातुरिति लब्धप्रातिपदिकसंज्ञा अर्थवत्त्वेनानुज्ञातसाधिमानः संख्यासंख्येये च प्रयोगभेदेनाक्षादिपदवदनेकार्थतया स्वभावतो वर्तमाना रूढिशब्दत्वाच्च

षष्ठिवचनविधिश्च। षष्ठी च विधेया। गवां विंशतिः। द्रव्यमभिहितं तस्याभिहितत्वात् षष्ठी न प्राप्नोति। एकवचनं च विधेयम्। विंशतिर्गावः। गोभिः सामानाधिकरण्याद्बहुषु बहुवचनमिति बहुवचनं प्राप्नोति। अनारम्भो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिषु। अनारम्भो वा पुनः विंशत्यादीनां न्याय्यः कथं सिध्यति। प्रातिपदिकविज्ञानात्। कथं प्रातिपदिकविज्ञानम्। विंशत्यादयोऽव्युत्पन्नानि प्रातिपदिकानि। यथा सहस्रादिषु। तद्यथा। सहस्रमयुतमर्बुदमिति। न चानुगमः क्रियते। भवति चाभिधानम्। यथा सहस्रादिषु उच्यते। अथ सहस्रादिष्वपि कथं भवितव्यम्। सहस्रं गवाम्। सहस्रं गावः। सहस्रगवम्। गोसहस्रमिति। यावता त्वापि संदेहः। नासूया कर्तव्या यन्नानुगमः क्रियते। ननु चोक्तं विंशत्यादयो दशदर्थे चेत्समासवचनानुपपत्तिः परिमाणिनि चेत्पुनः स्वार्थे प्रत्ययविधानं षष्ठीवचनविधिश्चेति। नैष दोषः ॥

नियतलिङ्गसंख्याः यथा आपो दारा इति भावः। इदानीं भाष्यकार आरम्भं समर्थयमान आह। यथेति। अयमत्रार्थः। अक्षादयः परस्परानन्वितानेकार्थाभिधायिनो भिन्नासु जातिषु रूढशब्दा एव न तु यौगिकाः। विंशत्यादयः सहस्रादयश्च शुक्लादिवद्गुणिनि यौगिका एव। नहि संख्यानिरपेक्षाः संख्येयविशेषमेते प्रत्याययन्ति येनैषां रूढिशब्दत्वमुच्येत। अत्रापि संदेह इति। कः एषां मुख्यार्थः को वा सोऽयमिति संबन्धादौपचारिक इति संदेहः। नासूयेति। अननुगमो हि दोषाया शक्योपादानत्वात्सर्वशब्दानुगमो न त्वननुगम एव स्वप्रज्ञापराधादशक्यार्थविशेषनिश्चयत्वादोषत्वेनोद्भावनीय इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समुदायइति।अस्येतिप्रत्ययार्थस्यानुवर्त्तनात्समुदायः परिमाणीप्रत्ययार्थत्वेनाश्रीयतेनतुभिन्नानिद्रव्याणीत्यर्थः।किं
वक्तव्यमिति।अस्येत्यनुवर्त्तनात्परिमाणिमात्रेप्रत्ययोलभ्यतेनतुतद्विशेषइतिमत्वाप्रश्नः।संघइतिवर्त्ततइति।पूर्वसूत्रे
द्वन्द्वनिर्दिष्टस्यापिसंघशब्दस्यैवस्वरितत्वादिहानुवृत्तिः।ननुप्राणिसमूहः संघः।ततश्चवृक्षाणांविंशतिरितिनप्राप्नोतीत्या
हासंघःसमूहइति।सामान्येनप्राणिनामप्राणिनांचसमुदायः संघइत्यर्थः।ननुचोक्तंपरिमाणिनिचेत्पुनःस्वार्थेप्रत्ययवि
धानमिति।नैषदोषः।द्रव्यसंघयोर्दशतोः संघेप्रत्ययोनिपात्यतेनतुद्रव्यसंघे।इहद्रव्याणांद्रव्यसंघस्यदशतांदशसंघस्य
चपारमार्थिकोभेदोनास्तिकेवलंबुद्ध्यापरिकल्प्यते।बुद्धिव्यवस्थापितार्थनिबन्धनाश्चशब्दाबुद्धिमेवार्थाकारामुपजन
यन्तोऽसत्यपिवास्तवेभेदेभेदमवगमयन्ति।तएवइति।निपातनसामर्थ्याद्विशिष्टेदशतेसंघेवर्त्तमानाभाववचनाभव

समुदायेविंशत्यादयोभविष्यन्ति। किंवक्तव्यमेतत्।नहि।कथमनुच्यमानंगंस्यते।संघइतिवर्त्तते।संघः
समूहः समुदायइत्यनर्थान्तरम्।एतेविंशत्यादयः समुदायेसन्तोभाववचनाभवन्ति।भाववचनाः सन्तोगु
णवचनाभवन्ति।गुणवचनाः सन्तो अविशिष्टाभवन्त्यन्यैर्गुणवचनैः।अन्येषुचगुणवचनेषुकदाचिद्गुणः गु
णिविशेषकोभवति।तद्यथा। शुक्लः पटइति।कदाचिद्गुणिनागुणोव्यपदिश्यते।तद्यथा।पटस्यशुक्लइति।
तद्यदातावदुच्यतेविंशत्यादयोदशदर्थेचेत्समासवचनानुपपत्तिरिति ॥

न्ति।भावशब्देनात्रधर्ममात्रमुच्यते।भावइवभावः।यथापाकादिभावः।पराश्रयएवमन्योपिधर्मः पराश्रयत्वाद्भावः।गु
णवचनाइति।गुणमुक्तवन्तोगुणवचनागुणमुक्त्वाद्रव्यमभिदधतीत्यर्थः।अन्यैरिति।शुक्लादिभिरुभयवचनैस्तुल्याइ
त्यर्थः।गुणिविशेषकइति।भाष्यकारवचनात्कर्त्तरिचेतिअनित्यः षष्ठीसमासनिषेधः।शेषषष्ठ्यावासमासः।अथवागु
णिनंविशिनष्टीतिकर्मण्यण्।ततः स्वार्थेकन्प्रत्ययः।पटः शुक्लइति।गुणगुणिनोरव्यतिरेकविवक्षायामतद्भावोपाद्सा
मानाधिकरण्यमेवंविंशत्यादीनामपिद्रव्येणसामानाधिकरण्यम्।कदाचिदिति।आधारान्तरव्यवच्छेदायोपजातव्यति
रेकेणगुणिनागुणोविशिष्यते।पटस्यशुक्लः नशङ्खादेरित्यर्थः।दशदर्थेचेदिति।अस्मिन्पक्षेयोदोषः सपक्षान्तराश्रयेण
परिह्रियतइत्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

वचनपरिहार इति। समुदायाभिधानेन वचनदोषो नावतरति। सामानाधिकरण्ये त्ववतरति। स च परतः परिहरिष्यते। तिष्ठत्विति। परस्माद्वक्ष्यमाणत्वात्। संहननइति। संघः संहननं तत्र दशतोः संघे वृत्तौ विंशतिशब्दो गवादिद्रव्यसंघे परिमाणिनि प्रत्ययमुत्पादयिष्यतीत्यर्थः। विंशतिः परिमाणमस्य गोसंघस्य विंशको गोसंघ इति। वर्त्तिष्यत इति। परार्थाभिधानं वृत्तिर्विवक्षिता ननु विंशतिशब्दः कदाचिदपि गोसंघे वर्त्तते। गुणिनेति। गवादिनेत्यर्थः। ननु दशत संख्यस्य गवादिर्गुणी न भवति दशतो हि तस्य गुणिनो। नैष दोषः। गवां दशतोश्चतात्विकभेदाभावाद्गवामपि गुणित्वात् तन्नाव्यभिचाराद्दशता विंशतिर्न विशेष्यते दशतो विंशतिरिति गोभिस्त्वश्वादिव्यावृत्तये विशेष्यते। गवां विंशतिरिति। यथा पटस्य शौक्ल्यमिति पटेन शुक्ल

सामानाधिकरण्यं यदा गुणगुणिनोः। वचनपरिहारस्तिष्ठतु तावत्। परिमाणिनि चेत्पुनः स्वार्थे प्रत्ययविधानमिति। संहनने वृत्तः संहनने वर्त्तिष्यते। संख्या संहनने वृत्तो द्रव्यसंहनने वर्त्तिष्यते। अथ षष्ठी तदा गुणिना गुणो विशेष्यते। वचनपरिहारः उभयोरेवम्। उभयोरपि पक्षयोरेवं कृत्वा वचनपरिहारः। यदि तर्हि इमे विंशत्यादयो गुणवचनाः स्युः सर्वैर्भिरन्यैर्गुणवचनैर्भवितव्यम्। अन्ये च गुणवचनाः द्रव्यस्य लिङ्ग-सङ्ख्ये अनुवर्त्तन्ते। तद्यथा। शुक्लं वस्त्रम्। शुक्ला शाटी। शुक्लः कम्बलः। शुक्लौ कम्बलौ शुक्लाः कम्बला इति। यदसौ द्रव्यं श्रितो गुणस्तस्य यल्लिङ्गं-वचनं च तद्गुणस्यापि भवति। विंशत्यादयः पुनर्नानुवर्त्तन्ते। अन्येपि वै गुणवचना नावश्यं द्रव्यस्य लिङ्ग-संख्ये अनुवर्त्तन्ते ॥

दिव्यावृत्तये शौक्ल्यं विशेष्यते न तु शुक्लेन गुणेन स्वसमवेतं गुणसामान्यं शुक्लस्य शौक्ल्यमिति व्यभिचाराभावाद्वचनपरिहारः। उभयोरिति। समुदायाभिधाने गुण्यभिधाने चेत्यर्थः। तत्र समुदायाभिधाने तस्यैकत्वात्सिद्धमेकवचनमिति सामर्थ्यात्परिहृत एव वचनदोषः। सामानाधिकरण्ये तु परिहार उच्यत इति भावः। तं वचनदोषं यदि तर्हीत्यनुभाष्य परिहरति। विंशत्यादयः पुनरिति। प्राक् शतात्तेषां स्त्रीलिङ्ग-त्वादेकवचनान्तत्वाच्च शतस्य नपुंसकत्वादेकवचनान्तत्वाच्चेति भावः। विंशतिर्विंशतयः शते शतानीति तु प्रचयविवक्षायामेकशेषो भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गावो धनमिति। धनादीनां साकाङ्क्षत्वाद्भेदकत्वात् क्रियायां पारतन्त्र्याच्च गुणत्वम्। यथा शुक्लमित्युक्ते किं तदिति नित्यं द्रव्यमाकाङ्क्षति शुक्लं वस्त्रमिति द्रव्यस्य भेदकम्। शुक्लमानयेति क्रियायां द्रव्यपरतन्त्रं द्रव्यानयनमन्तरेण गुणानयनासंभवादिति शौक्ल्यं गुणः। एवं धनमित्युक्ते किं तदिति गवाद्याकाङ्क्षति गावो धनमिति गवां प्रीतिहेतुत्वावगमाद्भेदकं धनमानयेत्युक्ते गवादिद्रव्यानयनात् क्रियायां पारतन्त्र्यमिति धनं गुणः। उडुपशतानीति। अत्र संख्यालक्षणस्य गुणस्य तरणे प्राधान्यं विवक्षितम्। तीर्णानीति कर्तरि निष्ठाभिधानात्। तत्त्वतस्तु संख्येयानामुडुपानां प्लवने कर्तृत्वम्। अथवोडुपानां करणानामेव कर्तृत्वविवक्षायामिदमुदाहरणम्। अश्वैरिति। अश्वा असयश्चाधिकरणत्वात्करणत्वाच्चोपकारित्वाद्गुणा अपि सन्तः प्रहारे प्राधान्येन विवक्षिताः कर्तरि तृतीयाविधानात्। धिनोतेर्धनमिति। समुदायस्य प्रीति

गावो धनं पुत्रा अपत्यम्। इन्द्राग्नी देवता विश्वे देवा देवता यावन्तस्तेतां वाशितामनुयन्ति सर्वे ते दक्षिणा समृद्ध्या इति। अथात्रानुवृत्तौ हेतुः शक्यो वक्तुम्। बाढं शक्यो वक्तुम्। कामं तर्ह्युच्यताम्। इह कदाचिद्गुणः प्राधान्येन विवक्षितो भवति। तद्यथा पञ्चोडुपशतानि तीर्णानि पञ्च वध्रीशतानि तीर्णानि अश्वैर्युद्धमसिभिर्युद्धमिति। न चास्य यो युध्यन्ते। असिगुणाः पुरुषा युध्यन्ते। गुणस्तु खलु प्राधान्येन विवक्षितो भवति। इह तावद्गावो धनमिति। धिनोतेर्धनम्। एको गुणः स च प्राधान्येन विवक्षितः। पुत्रा अपत्यमिति। अपतनादपत्यमेको गुणस्स प्राधान्येन विवक्षितः। इन्द्राग्नी देवता विश्वे देवा देवता इति। दिवेरैश्वर्यकर्मणो देवस्तस्मात्स्वार्थे तल्। एको गुणः स प्राधान्येन विवक्षितः। यावन्तस्तेतां वाशितामनुयन्ति सर्वे ते दक्षिणा समृद्ध्या इति। दक्षतेर्वृद्धिकर्मणो दक्षिणा एको गुणः स प्राधान्येन विवक्षितः ॥

हेतुत्वादनत्वं नत्वेकैकस्य गोपिण्डस्येति धनमेकं गोभिर्विशेष्यते। आश्रितसंख्याविशेषाश्च गोपिण्डा धनं विशिषन्तः समुदायस्य प्रीतिहेतुत्वं प्रत्याययन्तीति गावोपि धनसंख्यां नानुवर्तन्ते गोर्धनमित्युक्ते विवक्षितार्थानवगमात्। अपतनादिति। बहूनां चापतनहेतुत्वं न त्वेकैकस्य तथा चोच्यते वरमपुत्रत्वं न त्वेकपुत्रतेति लोकाश्रयत्वाल्लिङ्गस्यापत्यशब्दो नपुंसकलिङ्ग एव प्रयुज्यते। प्रत्येकं त्वपतनहेतुत्वे विवक्षिते पुत्रा अपत्यानीति बहुवचनं भवत्येव। इन्द्राग्नी देवतेति। संघस्य देवतात्वमेकं हविष्प्रतीति द्विवचनाभावः। देवते इत्युच्यमाने प्रत्येकं देवतात्वं प्रतीयेत ततश्च विकल्पेन देवताकार्यं स्यात्। यथा खादिरे बध्नाति पालाशे बध्नातीति बध्नातावेकार्थत्वादधिकरणविकल्पः। सर्वे ते दक्षिणेति। अत्रापि समुदायस्य दक्षिणात्वमित्येकवचनम्। दक्षिणा इति तु बहुवचने दाने विकल्पः स्यात् ॥ रामः १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंशत्यादिष्विति। विंशतिसंख्यासमुदितद्रव्यसमवायिनी न तु प्रत्येकं शुक्लादिवत्परिसमाप्तेति द्रव्यगते लिङ्गसंख्ये नानुवर्तेते। पश्चादयस्तु नित्यं संख्येयवचनादिति संख्येयलिङ्गसंख्यानुविधायिनः। भावानयन इति। न ह्यन्यस्मिंश्चोदितेऽन्यस्यानुष्ठानं युक्तम्। न हि दण्डं छिन्धीत्युक्ते कश्चिद्दण्डिनं छिनत्तीति भावः। इदं तावदिति। अन्यस्मिंश्चोदितेऽन्यत्रापि तदव्यभिचारिणि कार्यं दृश्यत इति मत्वा प्रश्नः। असंभवादिति। आकृतौ कार्याणां साक्षादसंभवाद्द्रव्येषु कार्याणि क्रियन्त इत्यर्थः। येषां तावद्व्यतिरिक्ता जातिस्तेषामेतदेव जातौ कार्यं चोद्यमानं द्रव्यविषयमेवोपतिष्ठते। यथा चाग्निमानयेति चोदिते नान्तरीयकत्वादचोदितमपि पात्रमानीयते। तथा जातिचोदनायां द्रव्ये क्रियाप्रवृत्तिः। अव्यतिरेकादिति। जातितद्वतोर्गुणगुणिनोश्च तात्त्विकभेदाभावाद्द्रव्यमेव तेन द्वारेण तासु तासु क्रियासु चोद्यत इत्यर्थः। सहस्रादयस्तु पृषोदरादित्वादनुज्ञातसाधिमानः। छेदादि॥ पन्थोण॥ छेदादिपथिभ्य इति। नित्य

विंशत्यादिषु चाप्येको गुणः स प्राधान्येन विवक्षितः। तस्यैकत्वादेकवचनं भविष्यति। अयं तर्हि विंशत्यादिषु भाववचनेषु दोषः गोविंशतिरानीयतामिति। भावानयने चोदिते द्रव्यानयनं न प्राप्नोति। नैष दोषः। इदं तावदयं प्रष्टव्यः। अथेह गौरनुबन्ध्योऽजोऽग्नीषोमीय इति। कथमाकृतौ चोदितायां द्रव्ये आरम्भणालम्भनविशसनादीनि क्रियन्त इति। असंभवादाकृतावारम्भणादीनां संभवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आरम्भणादयः क्रियन्ते। इदमप्येवंजातीयकमेव। असंभवाद्भावानयनस्य द्रव्यानयनं भविष्यति। अथवा अव्यतिरेकात्। छेदादिभ्यो नित्यम्। पन्थोण नित्यम्॥ छेदादिपथिभ्यो विग्रहदर्शनान्नित्यग्रहणानर्थक्यम् ॥

ग्रहणं प्रत्ययान्तरनिवृत्त्यर्थं तावदिह न भवति तस्याप्राप्तत्वात्। यथैकगोपूर्वाट्ठञ्नित्यमिति नित्यग्रहणं मतुब्निवृत्त्यर्थम्। तथा हि। छेदादिभ्य इति ठग्विधीयते न चैतेभ्यः प्रत्ययान्तरप्रसङ्गः। पथिशब्दात्स्कन्प्रत्ययो विधानसामर्थ्याद्भवत्येव प्रत्ययान्तरस्य तु प्रसङ्गाभावः। नापि तद्विषयार्थं नित्यग्रहणम्। यथाक्रोर्मम्नित्यमिति मप्प्रत्ययादन्यत्रात्यन्तप्रयोगनिवारणफलं नित्यग्रहणम्। छेदादीनामन्यत्र प्रयोगस्येष्टत्वात्। नापि प्रत्ययार्थविशेषणम्। नित्यं छेदमर्हतीत्यस्यार्थस्यासंभवात्। न हि कश्चित्सदार्थो नित्यं छेदमर्हति योऽपि बेतसादिरर्थश्छिन्नः प्ररोहति सोऽपि न नित्यं छेदमर्हति कालान्तरे तस्य च्छेदप्रवर्तनात्। नित्यं पन्थानं गच्छतीति यद्यप्यर्थः संभवति तथापि नात्रैवार्थे पान्थशब्दस्य प्रयोगो दृश्यते कदाचिद्गच्छत्यपि प्रयोगात्। वाक्यनिवृत्त्यर्थं नित्यग्रहणं स्यात्। यथा नित्यं क्रीडाजीविकयोरिति। एतदप्यप्रयोजनं शिष्टप्रयोगे वाक्यस्य दर्शनात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकारेणेति। नित्यग्रहणं विकारेण संबध्यते। विरङ्गादेशः पन्थादेशश्च नित्यं प्रत्ययविषयो भवतो न तु ताभ्यां वाक्यं कर्त्तव्यमित्य
र्थः। अन्यथा तयोः साधुत्वं सर्वविषयमित्याशङ्क्येत प्रत्ययविधानं लब्धावीयमानं विज्ञायेतेति भावः। अकङादिभिरिति। सुधा
तुरकङ्। कल्याण्यादीनामिनङ्। परस्त्रीपरशुं चेति प्रत्ययसंनियोगेन विधीयमानाना मादेशानां तदभावे प्रसङ्ग एव नास्ती
ति नार्थो विकारेण वाक्यनिषेधार्थेन नित्यग्रहणेन। संनियोगशिष्टानामिति। विशिष्टप्रयोगसिद्धये ययोरेकस्मिन्विषये विधिस्त
योस्तद्विषयादन्यत्रैकस्याप्रयोगे परोपि न प्रयुज्यते। यथा श्रुवः शृ चेति श्नुसंनियोगे विधीयमानस्य शृभावस्य विषयान्तरे प्रयो
गाभावोऽस्यैव न्यायस्य सिद्धस्यार्थस्य बिल्वकादिभ्यश्छस्य लुगित्यत्र लिङ्गं वक्ष्यते। इदं कर्त्तव्यमिति। धर्मनिर्णयादिकं तत्र ह्येक

च्छेदादिपथिभ्यो नित्यग्रहणमनर्थकम्। किं कारणम्। विग्रहदर्शनात्। विग्रहो दृश्यते। छेदमर्हति पन्थानं ग
च्छतीति। विकारार्थं तर्हीदं नित्यग्रहणं कर्त्तव्यम्। नित्यग्रहणं क्रियते। विकारेण विग्रहो मा भूदिति। विरागवि
रङ्गं च पन्थो णनित्यमिति। विकारार्थमिति चेदकङादिभिस्तुल्यम्। विकारार्थमिति चेदकङादिभिस्तुल्यमेतत्।
यथाकङादिभिर्विकारैर्विग्रहो न भवति। एवमाभ्यामपि न भविष्यति। किं पुनरिहाकर्त्तव्यं नित्यग्रहणं क्रिय
ते आहोस्विदन्यत्र कर्त्तव्यं न क्रियते। इहाकर्त्तव्यं क्रियते। एष एव न्यायो यदुत संनियोगशिष्टानामन्यतरापा
ये उभयोरप्यपायः। तद्यथा। देवदत्तयज्ञदत्ताभ्यामिदं कर्त्तव्यमिति देवदत्तापाये यज्ञदत्तोपि न करोति॥ यज्ञ
र्त्विग्भ्यां घखञौ॥ यज्ञर्त्विग्भ्यां तत्कर्माहतीत्युपसंख्यानम्। यज्ञर्त्विग्भ्यां तत्कर्माहतीत्युपसंख्यानं कर्त्तव्यम्।
यज्ञकर्माहतीति यज्ञियो देशः। ऋत्विक्कर्माहतीत्यार्त्विजीनं ब्राह्मणकुलमिति ॥

स्य संदेहसंभवादनधिकारः। यज्ञर्त्विक्॥ तत्कर्माहतीति। ननु वृत्तिविषये यज्ञार्थव्यापारे यज्ञशब्दस्य वृत्त्या सिद्धः सूत्रेणैव
प्रत्ययो यथा मृदङ्गवादनवृत्तेर्मृदङ्गशब्दात् ठग्भवति मार्दङ्गिक इति। नैतदस्ति। तत्र हि गौणार्थवृत्तिभ्य एव प्रत्यय इष्य
ते न तु मुख्यार्थवृत्तिभ्यस्तत्र च गौणमुख्यपरिभाषा तत्र नाश्रीयते। इह तु यश्च यज्ञमर्हति यश्च तत्कर्माहति तयोरपि प्रत्य
य इष्यते तत्र मुख्यार्थसंभवे गौणपरिग्रहणस्यान्याय्यत्वात्सूत्रेण न सिध्यतीति वार्त्तिकारम्भः। ननु यो देशो यज्ञकर्माहति
स यज्ञमर्हतीति नार्थो वार्त्तिकारम्भेण। नैतदस्ति। यस्य यज्ञेऽधिकारः स यज्ञमर्हति अधिकारश्च कर्तुरर्थिनो विदुषः शास्त्रेण राम॰
पर्युदस्तस्तस्य न तु देशादेस्तस्य तु योग्यत्वाद्यज्ञार्थव्यापारार्हत्वमुच्यते ॥ १८

CC-0. In Public Domain. Digitization by eGangotri

पारा॥ अनिर्देश इति। इष्टार्थसाधनत्वाभावान्निर्देशकार्याकरणादनिर्देशः। परस्येति। शिष्यस्याकरोतीति। उच्चारयति अध्यापक इत्यर्थः। शिष्यस्तु केवलं प्रतिपद्यते न तु निष्पादयति अध्यापकाधीनत्वान्निष्पत्तेरिति भावः। तुरायणमिति। यज्ञविशेष मृत्विगेव सव्यापारत्वान्निष्पादयति। यजमानस्तूष्णीमास्त इति भावः। उभौताविति। अन्यतरांसंनियोक्रियायाअनुस्वादादु भयोः कर्तृत्वम्। यश्चेति। यजमानो देवतोद्देशेन स्वंद्रव्यं त्यजतीति तस्यापि तुरायणनिर्वर्त्तने कर्तृत्वम्। तदेव भाष्यकारेण

पारायणं तुरायणं चान्द्रायणं वर्त्तयति॥ तद्वर्त्तयतीत्यनिर्देशस्तत्रादर्शनात्। तद्वर्त्तयतीत्यनिर्देशः। अगमको निर्देशोऽनिर्देशः। पारायणं को वर्त्तयति यः परस्य करोति। तुरायणं को वर्त्तयति यश्च पुरोडाशान्निर्वर्त्तयति। तत्राद र्शनात्। न च तत्र प्रत्ययो दृश्यते। इडुत्यज्योश्च दर्शनात्। इडुत्यज्योश्च प्रत्ययो दृश्यते। यः पारायणमधीते स पारा यणिक इत्युच्यते। यस्तुरायणेन यजते स तौरायणिक इत्युच्यते। यश्चैवाधीते यश्च परस्य करोति। उभौ तौ वर्त्तय तः। यश्च यजते यश्च पुरोडाशान्निर्वर्त्तय ति उभौ तौ वर्त्तयतः। उभयत्र कस्मान्न भवति। अनभिधानात्॥ योजनं ग च्छति॥ योजनं गच्छतीत्यत्र क्रोशशतयोजनशतयोरुपसंख्यानम्। योजनं गच्छतीत्यत्र क्रोशशतयोजनश तयोरुपसंख्यानं कर्त्तव्यम्। क्रोशशतं गच्छति क्रौशशतिकः। योजनशतं गच्छति यौजनशतिक इति। ततो ऽभिगमनमर्हतीति च॥ क्रोशशतयोजनशत योरुपसंख्यानं कर्त्तव्यम्। क्रोशशतादभिगमनमर्हति क्रौशश तिको भिक्षुः। योजनशतादभिगमनमर्हति यौजनशतिको गुरुः। उत्तरपथेनाहृतं च॥ आहृतप्रकरणे वारि जङ्गलस्थलकान्तारपूर्वपदादुपसंख्यानम्॥ आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वपदादुपसं ख्या नं कर्त्तव्यम्। वारिपथेन गच्छति वारिपथिकः। वारिपथेनाहृतः वारिपथिकः। वारि। जङ्गल। जङ्गलप थेन गच्छति जाङ्गलपथिकः। जङ्गलपथेनाहृतं जाङ्गलपथिकम्। जङ्गल ॥

यथान्यासं सूत्रं समर्थितम्। अनभिधानादिति। अध्यापके याजके च प्रयोगाभावात्। उत्तरप॥ चकारः प्रत्ययार्थसमीपेश्रू यमाणः प्रत्ययार्थमेव गच्छतीत्येतं समुच्चिनोति। समर्थविभक्तिस्तु तत्रापि सूत्रोपात्ता तृतीयैव। तेन वारिपथेन गच्छती त्यादि पाठो युक्तो न द्वितीयान्तपाठः। द्वितीयापक्षे आक्रान्ते ना क्रान्ते च प्रकृत्यर्थे प्रत्ययः स्यादाक्रान्ते चेष्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुकमरिचयोरिति। अत्र मुख्यगमनासंभवादाहृतमेव च प्रत्ययमिच्छन्ति। अन्ये तु गौणगमनाश्रयेण गच्छतीत्यत्राप्यर्थे प्रत्ययमाहुः। प्रत्ययार्थोपाधित्वाच्च द्वयोरसंदेहार्थोऽन्यतरप्रयोगः॥ तमधी॥ अधीष्टभृतयोरिति। यावन्तं कालमध्येषणं भरणं च क्रियते ततः प्रत्ययो नेष्यते। अध्येषणभरणफलव्यापारव्याप्यात्तु कालादिष्यते। ततो न प्राप्नोति। तस्याध्येषणभरणाभ्यामव्याप्तादितीयानुपपत्तिरिति निष्प्रयोजनो द्वितीयानिर्देशः। सिद्धं त्विति। तेन मासायाधीष्टो भृतो वेति तादर्थ्ये चतुर्थ्यन्तात्प्रत्ययः। मासस्यापि व्यापारार्थमधीष्ट इत्यर्थः। तादर्थ्यादिति। मासादिशब्दा अध्येषणभरणव्याप्तमुहूर्त्तादिकालवाचिन एवाश्रीय

स्थल। स्थलपथेन गच्छति स्थालपथिकः। स्थलपथेनाहृतं स्थालपथिकम्। स्थल। कान्तार। कान्तारपथेन गच्छति कान्तारपथिकः। कान्तारपथेनाहृतं कान्तारपथिकम्॥ अजपथशङ्कुपथाभ्यां च॥ अजपथशङ्कुपथाभ्यां चेति वक्तव्यम्। अजपथेन गच्छति आजपथिकः। अजपथेनाहृतम् आजपथिकम्। शङ्कुपथेन गच्छति शाङ्कुपथिकः। शङ्कुपथेनाहृतं शाङ्कुपथिकम्॥ मधुकमरिचयोरण् स्थलात्॥ मधुकमरिचयोरण् स्थलाद्वक्तव्यः। स्थालपथं मधुकम्। स्थालपथं मरिचम्॥ तमधीष्टो भृतो भूतो भावी॥ अधीष्टभृतयोर्द्वितीयानिर्देशोऽनर्थकस्तत्रादर्शनात्। अधीष्टभृतयोर्द्वितीयानिर्देशोऽनर्थकः। किं कारणम्। तत्रादर्शनात्। न ह्यसौ मासमधीष्यते। किं तर्हि। मुहूर्त्तमसावधीष्टो मासं तत्कर्म करोति। सिद्धं तु चतुर्थीनिर्देशात्। सिद्धमेतत्। कथम्। चतुर्थीनिर्देशः कर्त्तव्यः। तस्माय अधीष्ट इति। स तर्हि चतुर्थीनिर्देशः कर्त्तव्यः। न कर्त्तव्यः। तादर्थ्यात्ताच्छब्द्यं भविष्यति। मासार्थो मुहूर्त्तो मासः॥ अवयसि ठंश्च॥ अवयसि ठंश्चेत्यनन्तरस्यानुकर्षः। अवयसि ठंश्चेत्यनन्तरस्यानुकर्षो द्रष्टव्यः। ढेष्यं विजानीयाद्द्वयमप्यनुवर्त्तत इति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे अवयसि ठंश्चेत्यनन्तरस्यानुकर्ष इति॥ षष्टिकाः षष्टिरात्रेण पच्यन्ते॥ षष्टिके संज्ञाग्रहणम्। षष्टिके संज्ञाग्रहणं कर्त्तव्यम्। मुद्गा अपि हि षष्टिरात्रेण पच्यन्ते तत्र मा भूदिति॥

न्ते भूतभाविनोस्तु प्रत्ययविधौ मुख्यार्थवृत्तय इति विभागो लक्ष्यपरतन्त्रत्वाल्लक्षणस्य॥ अवय॥ अनन्तरस्येति। ण्यतः। ढेष्यमिति। विपरीतमित्यर्थः। व्यवहितस्यापि क्वचिदनुवृत्तिर्दृष्टा। यथा द्वितीयाटौस्स्वेनदित्यत्रैतदः इदम इति दर्शनादिहापि कस्यचिद्भ्रमः स्यादित्यर्थः॥ षष्टिका॥ बहुवचनमतन्त्रम् एकवचनान्तस्यापि षष्टिकशब्दस्य लोके प्रयोगात्। संज्ञाग्रहणमिति। षष्टिरात्रेण पच्यन्ते इत्यत्रार्थे निपात्यमानस्य धान्यविशेष एव प्रयोगार्थम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनभिधानादिति। लोके तु स्वार्थे प्रयुज्यमानानां शब्दानां साधुत्वमात्रमनेन प्रतिपाद्यते न त्वर्थनियोगः क्रियते॥ तदस्य॥ द्विधेदं सूत्रं व्याख्यायते। तदिति द्वितीयासमर्थात् कालवाचिनोऽस्येति षष्ठ्यर्थे ठञ् भवति ब्रह्मचर्यं चेद् गम्यते। मासं ब्रह्मचर्यमस्य मासिको ब्रह्मचारी। तथा तदिति प्रथमासमर्थात् कालवाचिनोऽस्येति षष्ठ्यर्थे ठञ् भवति यत्तदस्येति षष्ठीनिर्दिष्टं ब्रह्मचर्यं चेत्तद्भवति मासोऽस्य ब्रह्मचर्यमस्य मासिकं ब्रह्मचर्यमिति वाक्ये मासस्य प्राधान्यात् प्रथमैव भवति न तु द्वितीया तस्याः षष्ठीविषये विधानात्। महानाम्न्यादिभ्य इति। ब्रह्मचर्यस्य प्रत्ययार्थत्वात् सामर्थ्यलभ्या षष्ठी समर्थविभक्तिः। न च तादिति। चरणमनुष्ठानं तच्च

उक्तं वा। किमुक्तम्। अनभिधानादिति॥ तदस्य ब्रह्मचर्यम्॥ तदस्य ब्रह्मचर्यमिति महानाम्न्यादिभ्य उपसंख्यानम्। तदस्य ब्रह्मचर्यमिति महानाम्न्यादिभ्य उपसंख्यानं कर्तव्यम्॥ महानाम्नीनां ब्रह्मचर्यं माहानाम्निकम्। आदित्यव्रतिकम्। तच्चरतीति च महानाम्न्यादिभ्य उपसंख्यानम्॥ तच्चरतीति च महानाम्न्यादिभ्य उपसंख्यानं कर्तव्यम्। महानाम्नीश्चरति माहानाम्निकः। आदित्यव्रतिकः। नैष युक्तो निर्देशस्तच्चरतीति। महानाम्न्यो नामर्चः न च ता श्चर्यन्ते व्रतं तासां चर्यते। नैष दोषः। साहचर्यात्ताच्छब्द्यं भविष्यति। महानाम्नीसहचरितं व्रतं माहानाम्न्यो व्रतमिति। अवान्तरदीक्षादिभ्यो डिनिः। अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः। अवान्तरदीक्षी। तिलव्रती। अष्टाचत्वारिंशतो ड्वुंश्च। अष्टाचत्वारिंशतो ड्वुंश्च डिनिश्च वक्तव्यः। अष्टाचत्वारिंशकः। अष्टाचत्वारिंशी॥ चातुर्मास्यानां यलोपश्च॥ चातुर्मास्यानां यलोपश्च ड्वुंश्च डिनिश्च वक्तव्यः। चातुर्मासकः। चातुर्मासी। अथ किमिदं चातुर्मास्यानामिति। चातुर्मासाद् ण्यो यज्ञे तत्र भवे। चतुर्मासाद् ण्यो वक्तव्यः यज्ञे तत्र भवदित्येतस्मिन्नर्थे। चतुर्षु मासेषु भवन्ति चातुर्मास्यानि यज्ञाः॥ संज्ञायामण्॥ संज्ञायामण् वक्तव्यः। चतुर्षु मासेषु भवति चातुर्मासी पौर्णमासी ॥

क्रियाविषयमिति भावः। महानाम्न्यो व्रतमिति। लिङ्गसंख्ये अजहदेव महानाम्नीशब्दो व्रते वर्तते। डिनेर्डित्करणमष्टाचत्वारिंशदर्थम्। अन्येषां यस्येति लोपेन रूपस्य सिद्धत्वात्। अष्टाचत्वारिंशक इति। वृत्तिविषये वर्षेष्वेव संख्येयेष्वष्टचत्वारिंशच्छब्दो वर्तते। चतुर्षु वेदेष्वष्टाचत्वारिंशतं वर्षाणि व्रतं चरति प्रतिवेदं द्वादश वर्षाणि व्रतचरणात्। चातुर्मासीति। तत्र भवदित्येवाणसिद्धः। तस्य तु द्विगोर्लुगनपत्य इति लुक् प्राप्नोतीति पुनरण्विधिः। कालाट्ठञिस्तस्याप्राप्तिः समुदायस्याकालवाचित्वात् तदन्तविध्यभावाच्च। केचित्तु यथाकथंचित् कालवृत्तेरष्टञ् दृष्टत्वात् ठञेव प्राप्तस्तस्य च लुकि इदमण्विधानमित्याहुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य॥ आख्याग्रहणमिति। यज्ञेभ्य इति बहुवचननिर्देशात्स्वरूपग्रहणाभावात्तदर्थाभिधायिभ्यः प्रत्ययो लभ्यत
इति प्रश्नः। संज्ञीभूतकाः। सर्वलोकप्रसिद्धाः। प्रसिद्धत्वादेव ते यज्ञा मुख्या इति भावः। यत्रेति। बहुवचननिर्देश
द्यज्ञशब्दान्ता एव गृह्येरन्नान्ये। एवं यज्ञशब्दश्रुतिबहुवचनं स्मानुगृहीतं भवतीति भावः। आख्याग्रहण इति। ये
यज्ञं प्रसिद्धमप्रसिद्धं वा वक्ष्यते सर्वेभ्यष्ठञ् भवति॥ तत्र च॥ दीयते कार्यमित्येतयोरर्थयोः कालवाचिभ्यो भववत्प्र

तस्य दक्षिणा यज्ञाख्येभ्यः॥ आख्याग्रहणं किमर्थम्। तस्य दक्षिणा यज्ञेभ्य इतीयत्युच्यमाने य एव सं
ज्ञीभूतका यज्ञास्ततउत्पत्तिः स्यात्। आग्निष्टोमिक्यः राजसूयिक्यः। यत्र वा यज्ञशब्दोस्ति। नावयज्ञि
क्यः। पाकयज्ञिक्यः। इह न स्यात्। पाञ्चौदनिक्यः। दाशौदनिक्यः। आख्याग्रहणे पुनः क्रियमाणे न दोषो
भवति। ये च संज्ञीभूतका यज्ञा ये च न संज्ञीभूतका यत्र च यज्ञशब्दोस्ति यत्र च नास्ति तदाख्यामात्रात्सि
द्धं भवति॥ तत्र च दीयते कार्यं भववत्॥ कार्यग्रहणमनर्थकं तत्रभवेन कृतत्वात्। कार्यग्रहणमनर्थ
कम्। किं कारणम्। तत्रभवेन कृतत्वात्। यद्धि मासे कार्यं मासे भवन् तद्भवति तत्र तत्रभव इत्येव सिद्धम्।
किमिदं भवान् कार्यग्रहणमेव प्रत्याचष्टे न पुनर्दीयते ग्रहणमपि। यथैव हि यन्मासे कार्यं तन्मासे भ
वं भवति। एवं यदपि मासे दीयते तदपि मासे भवं भवति। तत्र तत्रभव इत्येव सिद्धम्। न सिध्यति। न
तन्मासे दीयते। किं तर्हि मासे गते॥

त्यया भवन्तीति सूत्रार्थः। तत्र कार्यस्य भवेन्तर्भावादेवात्र प्रत्ययानां सिद्धिमित्याह। कार्यग्रहणमिति। मासे गत इति। मासे दीयत
इति नैषाधिकरणसप्तमी किं तर्हि यस्य च भावेनेति। तत्रभव इत्यत्र चाधिकरणसप्तम्याश्रितोपपदविभक्तेः कारकविभक्ति
र्बलीयसीति न्यायादिह त्वतिदेशसामर्थ्याद्भावलक्षणसप्तमीपरिग्रहः। औपश्लेषिकमिति। मासेऽतिक्रान्ते यद्दीयते तस्य मास
औपश्लेषिकमधिकरणमिति तत्रभव इत्यनेनैव सिद्धमित्यर्थः। कारकप्रकरणे च गौणस्यापि संज्ञा भवतीत्युक्तम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं तर्हीति। प्रत्ययविध्यर्थे दीयतइत्युपात्तं नत्वतिदेशार्थं तेनाग्निष्टोमे दीयते आग्निष्टोमिकं भक्तमित्येवमादि सिद्धम्। केचिदाहुः। दीयमानस्य भवत्वात् क्रतुयज्ञेभ्यश्चेति ठञ् सिद्धइति। तदयुक्तम्। व्याख्यातव्यनाम्नइति तत्रानुवर्त्तनात्। तदेवं कार्यग्रहणमेव वार्त्तिककृता प्रत्याख्यातम्। प्राग्वतेः संख्यापूर्वपदानामिति वचनाद्द्वयोर्बीजपेययोर्दीयते द्वैवाजपेयिकमित्यत्रापि योगविभागाट्ठञ् भवति॥ व्युष्टा॥ अण्प्रकरणइति। प्रकरणं प्रस्तावः। अग्निपदादिभ्यइति। आदिशब्दः प्रका

एवं तर्हि औपश्लेषिकमधिकरणं विज्ञास्यते। एवं तर्हि योगविभागोत्तरकालमिदं पठितव्यम्। तस्य दक्षिणा यज्ञाख्येभ्यः। तत्र च दीयते। ततः कार्यं भववत्। कालादिति॥ व्युष्टादिभ्योऽण्॥ अण्प्रकरणेऽग्निपदादिभ्य उपसंख्यानम्। अण्प्रकरणेऽग्निपदादिभ्य उपसंख्यानं कर्त्तव्यम्। त्रीणि मान्यण्ग्रहणानि। व्युष्टादिभ्योऽण्। समयस्तदस्य प्राप्तम्। ऋतोरण्। प्रयोजनम्। विशाखाषाढादण्मन्थदण्डयोरिति त्रीण्यपि। तत्र न ज्ञायते कतरस्मिन्नण्प्रकरणे अग्निपदादिभ्य उपसंख्यानम्। अविशेषात्सर्वत्र। व्युष्टादिभ्योऽण्भवतीत्युक्तोऽग्निपदादिभ्यश्चेति वक्तव्यम्। अग्निपदे दीयते कार्यं वा आग्निपदम्। पैलुमूलम्। समयस्तदस्य प्राप्तम्। ऋतोरण्। अग्निपदादिभ्यश्चेति वक्तव्यम्। उपवस्ता प्राप्तोऽस्यौपवस्त्रम्। प्राशिता प्राप्तोऽस्य प्राशित्रम्। प्रयोजनं विशाखाषाढादण्मन्थदण्डयोः। अग्निपदादिभ्यश्चेति वक्तव्यम्। चूडा प्रयोजनमस्य चौडम्। श्रद्धा प्रयोजनमस्य श्राद्धम्॥ अनुप्रवचनादिभ्यश्छः॥ छप्रकरणे विशिपूरिपदिरुहिप्रकृतेरनात्पूर्वपदादुपसंख्यानम्। छप्रकरणे विशिपूरिपदिरुहिप्रकृतेरनात्पूर्वपदादुपसंख्यानं कर्त्तव्यम्। विशि। गेहानुप्रवेशनीयम्। पूरि। प्रपापूरणीयम्। पदि। गोप्रपदनीयम्। अश्वप्रपदनीयम्। रुहि। प्रासादारोहणीयम्। स्वर्गादिभ्यो यत्॥ स्वर्गादिभ्यो यत्प्रत्ययो भवति। स्वर्ग्यम्। धन्यम्। यशस्यम्। आयुष्यम्॥ पुण्याहवाचनादिभ्यो लुक्। पुण्याहवाचनादिभ्यो लुग्वक्तव्यः। पुण्याहवाचनम्। शान्तिवाचनम्। स्वस्तिवाचनम् ॥

रे। तत्र क्वचिदर्थे कुतश्चिदण्प्रत्ययो भवति तत्राण्दर्शनमात्रकृतं सादृश्यमाश्रीयते॥ अनुप्र॥ अनादिति। अनस्य केवलस्य पूर्वपदेन संबन्धाभावात्तामर्थ्यात्तदन्तग्रहणम्। स्वर्ग्यमिति। स्वर्गः प्रयोजनमस्येति ठञि प्राप्ते यद्विधिः। पुण्याहवचनादिभ्यइति। साहचर्यादभिधाने सिद्धे भेदविवक्षायां प्रत्ययश्रवणनिरस्त्यर्थं लुग्विधानम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऐका ॥ एकागारादिति । प्रयोजनमित्यनेनैव ठञः सिद्धत्वात्सूत्रं निपातनार्थं न कर्तव्यमित्यर्थः । ठञ्प्रकरणादिति । प्रयोजनमित्यत्र ठञ्प्रकृतस्तेनैवैकागारिकशब्दः सिद्ध इत्यर्थः। एकशब्दोऽसहायवाची। असहायं गृहमस्य मुमुषिषोः प्रयोजनं स ऐकागारिकः। स सहायं तु गृहमनेकपुरुषाधिष्ठानं मोषितुमशक्यम्। ठञ्प्रकृत इति। प्राग्वतेष्ठञित्यत्र ठञ्प्रत्ययः प्रयोजनमित्यत्रानुवर्तिष्यते। इदं तर्हीति। नियमार्थमेतदित्यर्थः। भिक्षोरिति। एकामेव यो भिक्षां गृह्णीते न द्वितीयां तस्याभिधानं माभूदित्यर्थः। यद्येतावदिति। अनभिधानाद्भिक्षोर्न भविष्यतीति नियमार्थमप्येतन्नोपयुज्यत इति भावः। न च ञित्स्वरनिवृत्त्यर्थं निपातनम्। ञित्स्वरस्येष्टत्वात्। एतच्च भाष्यवार्त्तिककाराभ्यां निराकरणाद्‌ ज्ञायते॥ आकालि॥ आकालादिति। आकालशब्दात् प्रत्ययनिपातनमनर्थकं प्रकृतिमुच्चार्य प्रकृतष्ठञ् विधेय इत्यर्थः। तत्रावृत्तः कालो यस्यासावकालो न च कालस्यावृत्तिः संभवतीत्ययमर्थो भवति। उत्पत्तिकालेन समानो यस्य विनाशकालः। एवं हितस्योत्पत्तिकालो विनाश आवृत्तो भवति। य

ऐकागारिकट् चौरे॥ एकागारान्निपातनानर्थक्यं ठञ्प्रकरणात्। एकागारान्निपातनमनर्थकम्। किं कारणम्। ठञ्प्रकरणात्। ठञ्प्रकृतः सोऽनुवर्तिष्यते। इदं तर्हि प्रयोजनं चौर इति वक्ष्यामीति। इह माभूत्। एकागारं प्रयोजनमस्य भिक्षोरिति। यद्येतावत्प्रयोजनं स्याद् एकागाराच्चौर इत्येव ब्रूयात्॥ आकालिकडाद्यन्तवचने॥ आकालान्निपातनानर्थक्यं ठञ्प्रकरणात् । आकालान्निपातनानर्थक्यम्। किं कारणम्। ठञ्प्रकरणात्। ठञ्प्रकृतः सोऽनुवर्तिष्यते। इदं तर्हि प्रयोजनम्। एतस्मिन्विशेषे निपातनं करिष्यामि। समानकालस्याद्यन्तविवक्षायामिति॥ आकालाट्ठंश्च। आकालाट्ठंश्च वक्तव्यः। आकालिकी। आकालिका ॥

द्य एवोत्पत्तिकालः स एव विनाशकालः। न चोत्पादविनाशयोरेककालत्वं संभवतीति निरन्तरविनाशकालप्रतीतिर्भवति। निरन्तरो हि कालोऽभेदाग्रहणात् स एव काल इति लोके व्यवह्रियते। ततः स्वार्थे ठञ् विधेयः। आद्यन्तवचने विषय इति भावः। भाष्यकारो निपातनं समर्थयितुमाह। इदं तर्हीति। निपातने हि समानकालशब्दः प्रकृतित्वेनाश्रीयते तस्य वा काल आदेशो निपात्यते। समानशब्द एकवाची एककालावाद्यन्तौ यस्यासावाकालिकः। आदिर्जन्मान्तो विनाशः। जन्मविनाशयोश्चाव्यवहितकालत्वादेककालत्वम्। विधेयत्वयमर्थः क्लेशेन प्रतीयत इति निपातनाश्रयणम्। उक्तं च। धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च। अनुबन्धविकाराणां रूढ्यर्थं च निपातनमिति। अन्ये वर्षादिष्वप्याकालिकशब्दमिच्छन्ति। यस्मिन्नेव काले मध्याह्नादावुत्पत्तिर्येषां तस्मिन्नेव द्वितीयादिदिवससंबन्धिनि विनाशस्तान्याकालिकानि। आकालाट्ठंश्चेति। आकालशब्दव्युत्पत्तिः प्रदर्शिता ततः स्वार्थे ठन्प्रत्ययश्चकारात् ठञ् । अर्थस्तु पूर्वं प्रदर्शितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेन॥ इदमयुक्तमिति। सूत्रोपात्तंवस्त्विदमापरामृश्यते। यत्तत्तृतीयासमर्थमिति। तेनतुल्यमित्यनेनक्रमेणप्रकृतिप्रत्ययार्थौ
निर्दिष्टौतत्रक्रियाग्रहणंप्रकृत्यर्थस्यैवप्राधान्याद्व्यतिक्रमहेत्वभावाद्विशेषणंन्याय्यम्। एतच्चासंभवादयुक्तमित्यर्थः। न
नुतेनेत्यस्यविविभक्तिकत्वेनक्रियाग्रहणेनकथंसंबन्धः। सोपस्कारत्वात् सूत्राणांयत्तत्तृतीयासमर्थंक्रियाचेत्साभवती
त्येवंसंबन्धसंभवाददोषः। कथंचेति। तृतीयासत्त्ववाचिनः प्रातिपदिकाद्विधीयते। क्रियातुसाध्यरूपत्वादसत्त्वभूतात
तोविशेषणविशेष्य भावोऽसंभवादयुक्तः। पाकादयोघञाद्यन्तवाच्याः सत्त्वधर्मसमन्वयात्क्रियाधर्मातीतास्तथाचत
त्रक्त्वोऽर्थप्रत्ययाभावः। भोक्तुंपाकइत्यादौधातुवाच्यक्रियापेक्षस्तुमुन्प्रत्ययोविभक्तिस्तुतृतीयादिः पाकादेः सत्त्वरूपाश्रया
नक्रियारूपताश्रया। पचत्यादीनांतुक्रियावाचिनामप्रातिपदिकत्वादसत्त्वभूतार्थाभिधानाच्चतृतीयाद्यभावः। कृत्वाहृ
त्वाकर्तुंहर्तुमित्यादीनामव्ययकृतांयद्यपिक्रियावाचित्वंतथाचपञ्चकृत्वःकृत्वेतिकृत्वोऽर्थेऽस्यनिर्भवतितथाप्यसत्त्ववाचि
त्वात्तेभ्यस्तृतीयाद्यभावः। प्रातिपदिकार्थमात्रेतुप्रथमाया एवोत्पत्तिः। शयितव्यादयोयद्यपिक्रियावचनाः पञ्चकृत्वः शयितव्यमिति
कृत्वोऽर्थप्रत्ययदर्शनात् तथापितत्रोपमानोपमेयभावासंभवोनहिभवतिशयितव्येनतुल्योदेवदत्तः शयितव्येनतुल्यः शुक्लइ

तेनतुल्यंक्रियाचेद्वतिः॥ इदमयुक्तंवर्त्तते। किमत्रायुक्तम्। यत्तत्तृतीयास
मर्थंक्रियाचेत्साभवतीत्युच्यते। कथंतृतीयासमर्थंनामक्रियास्यात् ॥

ति। उपमानंहिप्रसिद्धगुणक्रियाहेतुकंभवति। यथास्याश्चन्द्रइवमुखमिति। नापिशयितव्येनतुल्यः श्यामकइतिक्रियावतः क्रियोपमा
नंसंभवति। क्रियातद्वतोरत्यन्तभेदात्। क्रियाणामपिभिन्नजातीयानांनास्त्युपमानोपमेयभावः। शयितव्येनतुल्यमासितव्यमित्यत्यन्त
भेदात्। नास्त्येकजातीयानांशयितव्येनतुल्यंशयितव्यमिति। यथागौरिवगौरिति। येनैवहेतुनैकोगौस्तेनैवापरोऽपीतिकउपमानोपमेय
भावः। नन्वाधारभेदादेकजातीयानामपिभेदाश्रयउपमानोपमेयभावोभवति। यथाराज्ञः शयितव्येनतुल्यंदेवदत्तस्यशयितव्यमि
ति। सापेक्षत्वादत्रप्रत्ययेननभाव्यमित्यदोषः। ननुयदाप्रकरणादिवशादपेक्ष्यंनिर्ज्ञातंभवतितदाप्रत्ययप्रसङ्गः। तथाराजशयित
व्येनतुल्यंदेवदत्तस्यशयितव्यमित्यत्रसापेक्षत्वाभावात्तथास्यातव्येनतुल्यंगमनंमन्दत्वान्नत्येनतुल्यंगमनंबहुविकारत्वादिति
भोक्तुंपाकइत्यादौचक्रियानिबन्धनकार्यदर्शनात्तैलपाकेनतुल्योघृतपाकइत्यादावस्तितृतीयासमर्थस्यापिक्रियावाचित्वंतत्किमु
च्यतेकथंचतृतीयासमर्थंनामक्रियास्यादिति। अत्रोच्यते। उपमानोपमेयभावस्थितयसंनिधानायत्तोयेनोपमीयतेयच्चोपमीयतेय
श्चतयोः साधारणोऽर्थः। एतत्त्रयमवश्यापेक्ष्यंतत्रयदाक्रियोपमानत्वेनविवक्ष्यतेतदासाववश्यापेक्षसाधारणधर्माधारत्वा
त्क्रियारूपतांहित्वासत्त्वरूपतांप्रतिपद्यतइतिमत्वाभाष्यकृतेदमुक्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सर्वएतइति। उपमानोपमेयभावविषयाः शब्दाएतच्छब्देनपरामृश्यन्ते। तपइति। चान्द्रायणादिः। श्रुतमिति। वेदवेदाङ्गादीनाम्। योनिरिति। ब्राह्मणाद्ब्राह्मण्यांजन्म। ब्राह्मणकारकमिति। शेषषष्ठीसमासः तृजकाभ्यांकर्त्तरि कर्त्तरि चेत्येताभ्यांतुकर्त्तरियाषष्ठीयाचतृजक निमित्ताकर्मणितस्याएवसमासनिषेधोनतुशेषषष्ठ्याः। नहिसातृजकसंबन्धनिमित्ता। ब्राह्मणव्यपदेशस्यनिमित्तमेतदित्यर्थः। तपःश्रुताभ्यामिति। नासौपरिपूर्णोब्राह्मणः। जातिलक्षणेकदेशाश्रयस्तुतत्रब्राह्मणशब्दप्रयोगः। अतएवचतस्यसर्वासुब्राह्मणक्रियासुनास्त्यधिकारः। शुच्याचारोनुपहताचारः। एतानिति। गौरत्वादयोब्राह्मण्यस्यप्राकल्यदर्शनेनाद्यत्वेपिक्वचित्तदन्वयदर्शनेनव्यञ्जकाइतितानपिशब्दार्थान्त

नैतदयुक्तम्। सर्वएतेशब्दाःगुणसमुदायेषुवर्त्तन्ते। ब्राह्मणःक्षत्रियोवैश्यःशूद्रइति। आतश्चगुणसमुदाये। एवंह्याह। तपःश्रुतंचयोनिश्चएतद्ब्राह्मणकारकम्। तपःश्रुताभ्यांयोहीनोजातिब्राह्मणएवसः। तथागौरःशुच्याचारःपिङ्गलःकपिलकेशइति। एतानप्यभ्यन्तरान्ब्राह्मण्येगुणान्कुर्वन्तीति। समुदायेषुचशब्दाःप्रवृत्ताअवयवेष्वपिप्रवर्त्तन्ते। तद्यथा। पूर्वेपञ्चालाःउत्तरेपञ्चालाः। तैलंभुक्तम्। घृतंभुक्तम्। शुक्लोनीलःकृष्णइति ॥

र्भूतत्वेनाश्रयन्तीत्यर्थः। पूर्वेपञ्चालाइति। समुदायरूपारोपादवयवेसमुदायवृत्तिशब्दवृत्तिर्नतूपात्तार्थत्यागेनार्थान्तराभिधानंशब्दानामुपपद्यते। शब्दार्थसंबन्धस्यानित्यत्वप्रसङ्गात्। पूर्वादिशब्दसामानाधिकरण्याच्चावयववृत्तित्वावसायः समुदायवृत्तित्वेहिपञ्चालानांपूर्वइतिषष्ठ्याभाव्यम्। तैलंभुक्तमिति। यदाद्रव्यंसंस्कृतेविशिष्टमात्रायुक्तेर्थेतैलादयोवर्त्तन्तेतदैषांसमुदायशब्दत्वमेकदेशोपयोगेचयदातैलंभुक्तमितिप्रयोगस्तदावयववृत्तित्वमवसेयम्। यदातुजातिशब्दास्तैलादयस्तदासंस्थानप्रमाणनिरपेक्षाजातिसमाश्रयेणवर्त्तन्तइत्यनुदाहरणमेतत्।
शुक्लइति। स्वयमशुक्लोप्यवयवःशुक्लसमुदायसंबन्धात्तद्रूपारोपात्शुक्लइत्युच्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमयमिति। यैव क्रियोपमेये भूयते तस्यामेव ब्राह्मणादिशब्दो वर्त्तत इत्यर्थः। ब्राह्मणेन तुल्यमधी ते ब्राह्मणवदधी ते क्षत्रिय इति। अध्ययनक्रियाविशेषणत्वात् तुल्यमिति द्वितीया नपुंसकत्वं च। ब्राह्मणाध्ययनेन क्षत्रियाध्ययनस्य तुल्यत्वसंभवात्सामर्थ्याद्ब्राह्मणाध्ययने ब्राह्मणशब्दस्य वृत्तिरित्युपपद्यते तृतीयासमर्थस्य क्रियावाचित्वम्। ननु भिन्नकर्तृकयोरध्ययनयोस्तुल्यत्वे आश्रीयमाणेऽन्यः साधारणो धर्मोऽपेक्षणीयः कर्त्रोरेव तूपमानोपमेयत्वेऽध्ययनमेव साधारणो धर्म इति नास्ति धर्मान्तरापेक्षा। उच्यते। शब्दानुपात्ता अपि यथा चन्द्र इव मुखमस्या इत्यादौ कान्त्यादयः प्रतीयन्ते तथात्रापि सौष्ठवादयः प्रतीष्यन्ते। ननु चोक्तं साधारणधर्माधारत्वात्सत्त्वरूपापत्त्या क्रियारूपहानिरिति। एवं तर्हि सामर्थ्याद्भूतपूर्वगत्याश्रयणम्। यस्यार्थस्य क्रियारूपता भूत् स सप्रतिक्रियारूपातीतोऽपि सत्त्वभावापन्नस्तृती

एवमयं ब्राह्मणशब्दः समुदाये प्रवृत्तोऽवयवेष्वपि वर्त्तते। यदि तर्हि तृतीयासमर्थं विशेष्यते। प्रत्ययार्थोऽविशेषितो भवति। तत्र को दोषः। तृतीयासमर्थात्क्रियावाचिनः गुणतुल्येऽपि प्रत्ययः स्यात्। पुत्रेण तुल्यः स्थूलः। पुत्रेण तुल्यः पिङ्गल इति। अस्तु तर्हि प्रत्ययार्थविशेषणम्। यत्तत्तुल्यं क्रिया चेत्सा भवतीति। एवमपि तृतीयासमर्थमविशेषितं भवति। तत्र को दोषः। तृतीयासमर्थादक्रियावाचिनः क्रियातुल्येऽपि प्रत्ययः प्राप्नोति। स्थूलेन तुल्यः पुत्रः स्थूलेन तुल्यो यातिं ॥

यान्तशब्दवाच्यः परिग्रहीष्यते। अत एव ब्राह्मणादयः शयितव्यादयश्च भूतपूर्वक्रियारूपार्थवाचित्वेन तुल्यादिति संप्रतिक्रियारूपार्थवाच्यसंभवाद्भूतपूर्वगतिरभ्युपेयते। अविशेषित इति। एकेन विशेषणेन द्वयोः संबन्धाभावादिति भावः। गुणतुल्य इति। गुणेन तुल्य इति तृतीयासमासः। पुत्रेण तुल्यः स्थूल इति। पुत्रशब्दोऽत्र श्रुताध्ययननिर्देशस्नानादिप्रसिद्धक्रियान्तर्भावेण स्वार्थमभिदधातीति संभवति क्रियावाची। अस्तु तर्हीति। समानविभक्तित्वात्प्रधानत्वाच्च प्रत्ययार्थः क्रमबाधेन विशेष्यत इति भावः। क्रियातुल्येऽपीति। अत्रोदाहरणमूह्यम्। क्वचित्तु पुस्तके भाष्य एव पठ्यते स्थूलेन तुल्यः पुत्रः स्थूलेन तुल्यो यातीति तत्र पुत्रादयो निर्देशस्नानादिभिः क्रियावत्तस्थौल्यगुणयुक्ते न पित्रादिना स्थौल्येनैव गुणेन तुल्यादिति विवक्षायामपि वति प्रसङ्गः क्रियाग्रहणं च क्रियावत उपलक्षणं निष्क्रियनिवृत्तिफलत्वात्तस्येत्यभिप्रायेण पक्षद्वयेऽप्यतिप्रसङ्गचोदना ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैष दोष इति। एकस्मिन्नप्यर्थे विशेषिते सामर्थ्यादुभयोर्विशेषितत्वात्। तुलया च संमितमिति। सदृशमित्यर्थः। यथा तुलापरिच्छिनत्ति द्रव्यविशेषमेवं यस्मादस्येन वस्त्वन्तरं परिच्छिनत्ति तत्तुल्यमुच्यते। ततः प्रत्ययार्थे विशेषिते सामर्थ्यात्प्रकृत्यर्थोपि विशेषितो भवति। न ह्यक्रियया क्रियातुल्या भवतीति सामर्थ्यात्क्रियावाचिन एव प्रत्ययो विज्ञायते। न च क्रियाशब्देन क्रियावान्गृह्यते। मुख्यार्थसंभवे गौणग्रहणस्यायुक्तत्वात्। न च स्थूलेन तुल्यः पुत्र इत्यादौ क्रिययोस्तुल्यत्वप्रतीतिः। क्रियापदानुपादानात्। अत एव न पुत्रादेः क्रियात्वप्रतीतिः। स्थूलेन तुल्यो यातीत्यत्रापि न क्रियातुल्या। स्थूलेन यस्तुल्यः स्थौल्ये

नैष दोषः। यत्तत्तुल्यं क्रिया चेत्सा भवतीत्युच्यते। तुलया च संमितं तुल्यम्। यदि च तृतीयासमर्थोपि क्रिया प्रत्ययार्थोपि क्रिया ततस्तुल्यं भवति। अथवा पुनरस्तु यत्तत्तृतीयासमर्थं क्रिया चेत्सा भवतीत्येव। ननु चोक्तं प्रत्ययार्थो विशेषित इति। तत्र को दोषः। तृतीयासमर्थात्क्रियावाचिनो गुणतुल्योपि प्रत्ययः प्राप्नोति। पुत्रेण तुल्यः स्थूलः पुत्रेण तुल्यः पिङ्गल इति। नैष दोषः। यत्तत्तृतीयासमर्थं क्रिया चेत्सा भवतीत्युच्यते। तुलया च संमितं तुल्यम्। यदि च तृतीयासमर्थमपि क्रिया प्रत्ययार्थोपि क्रिया ततस्तुल्यं भवति। किं पुनरत्र ज्यायः। प्रत्ययार्थविशेषणमेव ज्यायः। कुत एतत्। एवं चैव हि कृत्वाऽऽचार्येण सूत्रं पठितं वतिना सामानाधिकरण्यं कृतम् ॥

न गुणेन स यातीत्यर्थावगमात्। यदा तु स्थूलेन तुल्यं यातीति क्रियातुल्यत्वविवक्षा तदा वतिर्भवत्येव स्थूलवद्यातीति। अथवेति। पूर्वोक्ते नैव न्यायेन प्रकृत्यर्थे विशेषिते प्रत्ययार्थोपि विशेषित इत्यर्थः। किं पुनरिति। उक्तदोषपरिहाराद् द्वयोरपि प्रशस्यत्वादन्यतरप्रकर्षविषयः प्रश्नः। वतिनेति। वतिशब्देन वत्यर्थ उच्यते। तेनायमर्थः प्रकृत्यर्थविशेषणपक्षे वाक्याध्याहारेण समर्थनीयम्। तेन क्रियेत्यनयोः पदयोर्भिन्नविभक्तित्वात्। तुल्यं क्रियेत्यनयोस्तु पदयोरेकविभक्तिकत्वात् श्रुत्यैव सामानाधिकरण्योपपत्तिः। अन्ये तु वतिप्रत्ययेनैव सामानाधिकरण्यं व्याचक्षते। वतिर्भवति स च क्रियावाची। एवं च क्रियायां तुल्यायां वतिर्भवतीत्यर्थः संपद्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपिचेति। प्रत्ययार्थविशेषणपक्षेमुख्याक्रियासाध्यमानस्वभावाऽसत्त्वभूतासंभवति। तस्यांवतिर्विधीयमानोविनापिगण
पाठेनाव्ययसंज्ञांप्रतिपद्यते। यन्नव्येति लिङ्गसंख्यानुपादानात्तदव्ययमितिअव्ययलक्षणंगणपाठस्तुप्रपञ्चार्थइतिभा
ष्यकाराभिप्रायः। क्रियामात्रंचेहवतिनाभिधीयतइतितद्विशेषप्रतिपत्तयेक्रियाशब्दप्रयोगः। प्रकृत्यर्थविशेषणपक्षेतुभू
तपूर्वगतिर्वाश्रयणीयाक्रियाग्रहणेनवाक्रियावतउपलक्षणेक्रियाद्वारकंक्रियावतःसादृश्यमाश्रयणीयम्। तत्रगत्यन्त
रसं भवेभूतपूर्वाश्रयणमयुक्तम्। द्वितीयेतुपक्षेक्रियावान्प्रत्ययार्थःस्याद्ब्राह्मणेनतुल्योऽध्येतेति। तथाचलिङ्गसंख्याव
दर्थाभिधायित्वादव्ययसंज्ञार्थोवतेःपाठःकर्त्तव्यःस्यात्। पाठ सामर्थ्याच्चसत्त्ववाचित्वेव्ययसंज्ञाप्रवृत्तिः। तदेवंस्थितमेतत्प्र
त्ययार्थविशेषणंक्रियाब्राह्मणेनतुल्योऽध्येतेत्येवमादौक्रियावतोःसादृश्यंविवक्षितंनतुक्रिययोरितिप्रत्ययाभावः। उत्तरसू
त्रेणापिवतेर्विहितस्यासत्त्वभूतार्थाभिधायित्वमिवशब्दस्येव। तदर्हमित्यनेनापिक्रियायांवतिर्विधीयतइतितदर्थोऽप्यव्ययेषुव
तेःपाठोनकर्त्तव्यः॥ तत्र॥ किमर्थमिति। तुल्यार्थैरितियात्तृतीयातयैवेवयोगेसर्वाविभक्त्यर्थः। व्याप्ताः। यथाब्राह्मणइवाधीते

अपिचवतेरव्ययेषुपाठोनकर्त्तव्योभवति। क्रियायामयंभवन् लिङ्गसंख्याभ्यांनयोक्ष्यते॥ तत्रतस्येव॥ किम
र्थमिदमुच्यते। नतेनतुल्यंक्रियाचेद्वतिरित्येवसिद्धम्। नसिध्यति। तृतीयासमर्थात्तत्रप्रत्ययः। यदाऽन्येन
कर्त्तव्यांक्रियामन्यःकरोतितदाप्रत्ययउत्पाद्यते ॥

ब्राह्मणेनतुल्यमधीतेब्राह्मणमिवपश्यति। ब्राह्मणेनतुल्यंपश्यति। ब्राह्मणेनेवाधीतम्। ब्राह्मणेनतुल्यमधीतम्। ब्राह्मणायेववै
श्यायददातिब्राह्मणेनतुल्यंवैश्यायददाति। ब्राह्मणादिववैश्यादधीतेब्राह्मणेनतुल्यंवैश्यादधीते। ब्राह्मणस्येवक्षत्रियस्यस्वंब्राह्मणे
नतुल्यंक्षत्रियस्यस्वम्। ब्राह्मणइवक्षत्रियेवर्त्ततेब्राह्मणेनतुल्यंक्षत्रियेवर्त्ततेइति। तत्रतृतीयया षष्ठीसप्तम्यर्थस्याप्तत्वात् तृती
यान्तादेवपूर्वेणप्रत्ययोविधास्यते। क्रियाग्रहणंचनकरिष्यते। एवचार्थोमधुरायामिवपाटलिपुत्रेप्राकारादृतिसएवमधुरयात्तु
ल्याःपाटलिपुत्रेप्राकाराइति। तथादेवदत्तस्येवयज्ञदत्तस्यशुक्लादन्तादेवदत्तेनतुल्यायज्ञदत्तस्यशुक्लादन्ताइति। मधुराशब्देनत
दवयवाःप्राकाराउच्यन्ते देवदत्तशब्देनापिदन्ताइतिप्रश्नः। नसिध्यतीति। पूर्वसूत्रेअवश्यंकर्त्तव्यंक्रियाग्रहणंगवातुल्योगवयइ
त्यादौप्रत्ययनिवृत्त्यर्थंतस्मिन्क्रियमाणेगुणद्रव्ययोस्तुल्यत्वेप्रत्ययोनप्राप्नोतीतिषष्ठीसप्तम्यन्तादिवार्थेवतिर्विधीयतइत्यर्थः। इ
वशब्दश्चद्योतकत्वान्नव्यतिरेकहेतुः। गौरिवगवयइति। यथाचशब्दोधवश्चखदिरश्चेतितुल्यशब्दस्तुवाचकत्वादुपमानेव्यतिरे
कहेतुः। देवदत्तेनतुल्योदेवदत्तस्यतुल्यः इतिवातत्रदन्तप्राकारादिसंबन्धोपजनितषष्ठीसप्तम्यन्तादिवार्थेनेनप्रत्ययः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्विवेत्येव सूत्रमस्तु। पूर्वसूत्राच्च तेनेत्यनुवर्त्तिष्यते तदनुवृत्त्या च शेषविषये सर्वा विभक्तय इवशब्दप्रयोगे उपमानाद्भवन्तीत्य
नुमास्यत इत्याशङ्क्याह। न च काचिदिति। अयमर्थः। इवशब्दस्तावदसत्त्ववाचित्वान्न व्यतिरेकहेतुरिति तद्योगे लक्षणेन तृतीयाना
स्तिनापि तद्योगे शेषविषये ज्ञापयितुमिष्टेति हित्वा तृती यां विभक्त्यन्तरमाश्रितम्। ननु चेति। तत्रयथा शेषविषये ज्ञापकात्सप्तमी
भवत्येवं तृतीयापि भविष्यतीति भावः। एवं तर्हीति। तृतीयान्तस्येव इवयोगे स्मादेव ज्ञापकादनुमितत्तृतीयान्ताद्वतेः सिद्धे तत्रे
ति सप्तमीनिर्देशो ज्ञापयति शेषविषये भवतीवयोगे सप्तमीति। तृतीया तु नेष्यत इति नासौ ज्ञाप्यते। देवेष्विति। देवानामिवेत्यर्थः।
नन्वसति प्रयोजने ज्ञापकं भवति। अस्ति च सप्तम्युपादानस्य प्रयोजनं मथुरायामिव मधुरावत्पाटलिपुत्रे प्राकारा इत्यादौ प्राका
राद्याधेयापेक्षाधिकरणविहितसप्तम्यन्तात्प्रत्ययविधानम्। किं च ज्ञापकात्सप्तम्यनुमाने ऽधिकरणसप्तम्यन्ताद्वतेरनुत्पत्तिः स्यात्। एवं
तर्हि तन्त्रेण सूत्रद्वयमुच्चारितमिति भाष्यकाराभिप्रायः। तत्रैकेन सूत्रेण स्वलक्षणविहितषष्ठीसप्तम्यन्ताद्वतिर्विधीयते। द्विती ये

न च कदाचिदिवशब्देन योगे तृतीया विधीयते। ननु सप्तम्यपि न विधीयते। एवं तर्हि सिद्धे सति यदिवशब्देन यो
गे सप्तमीसमर्थाद्वतिं शास्ति तज्ज्ञापयत्याचार्यो भवतीवशब्देन योगे सप्तमीति। किमेतस्य ज्ञापने प्रयोजनम्।
देवेष्विव नाम ब्राह्मणेष्विव नाम एष प्रयोग उपपन्नो भवति॥ तदर्हम्॥ किमर्थमिदमुच्यते न तेन तुल्यं क्रिया
चेद्वतिरित्येव सिद्धम्। न सिध्यति ॥

न त्विवशब्दयोगे तस्येत्यस्यार्थे तत्रेति सप्तमी विधीयते। सप्तम्या षष्ठी मा बाधीति तस्येत्यनेन न प्रतिप्रसूयते। महाविभाषाधि
कारादा षष्ठी न बाध्यते। तदर्हम्॥ किमर्थमिति। इह क्रियाग्रहणमनुवर्त्तते तेन द्वितीयान्तादर्हणस्य कर्त्र्यां क्रियायां वतिर्विधी
यते। राजानमर्हति वृत्तम्। ब्राह्मणमर्हति वृत्तं राजवद्वर्त्तते। ब्राह्मणवद्वर्त्तत इति। तत्र राज्ञा तुल्यं वर्त्तत इति विग्रहाश्रयेण पू
र्वेण वतिः सिद्धः। राजानमर्हति छत्रमित्यादौ क्रियानुवर्त्तनात्प्रत्ययेन न भाव्यम्। राजवद्रूपमस्ये त्यादावपि तत्र त
स्येवेति सिद्धो वतिः। तेन तुल्यमित्येतत्तु चोदकेनोपलक्षणायोपात्तम्। इहं तर्हि राजवद्वर्त्तते राजेति भेदाभावाद्भेदनिब
न्धनसादृश्याभावादप्राप्तो वतिरनेन विधीयते। अत्रापि राजत्वेन प्रसिद्धा ये पृथुभरतभगीरथादयस्तद्वृत्तानीतनानां रा
ज्ञामुपमानानीति सिद्धो वतिरिति प्रश्नः। न सिध्यतीति। यदा राजशब्दः सामान्यवचनः प्रसिद्धविशेषविषयो वा राज
वद्यं वर्त्तते पृथुरिति तदा सादृश्याभावाद्वतेरप्राप्तिः। तथापि छेदकृतहस्तवदिति कृत्तहस्तमर्हति छेदनमित्यर्हणं गम्यते
न तु सादृश्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मार्हांयामिति। द्वितीयान्तवाच्यस्यार्थस्यात्मनोऽर्हायाङ्क्रियायास्तस्यामित्यर्थः। अर्हतिकर्तरीति। अर्हतेः कर्तरि क्रियारूपे वृत्तादिकइत्यर्थः। निश्चितबलाधानइति। निश्चितस्यार्थस्यान्ययोगनिवृत्त्यर्थं बलाधानं पुनरुपादानेन निश्चयनमित्यर्थः। यदा राज्ञः किंचन वृत्तं प्रसिद्धमेवान्यनिवृत्त्यर्थं पुनरुपादीयते राजानमेतदर्हतिवृत्तं न त्वराजानमिति तदार्थवदेतत्सूत्रम्। यदा त्वेकमेव वस्त्ववस्थाभेदपरिकल्पितभेदमुपमानोपमेयत्वेन विवक्ष्यते तदानार्थोऽनेन योगेन। तथा चद्रवशब्दस्यापि प्रयोगो दृश्यते। राजेवायं राजा युध्यते वैयाकरणइवायं वैयाकरणो ब्रूते त्वमिव बुध्यस्वेति। तथा सदृशस्त्वं तवेवेति॥ उपसर्गात्॥ अर्थग्रहणमिति। धाताविस्येव धात्वर्थो लभ्यइतिभावः। धातुर्वै शब्दइति। तत्रार्थग्रहणमन्तरेणार्थस्य ग्रहणं न स्यादितिभावः। येनाभिप्रायेण प्रश्नस्तमेवाविष्कर्तुमाह। शब्दे कार्यस्येति। नहि वतिप्रत्ययस्य धातुर्वाच्यउपपद्यतइति सामर्थ्या

तृतीयासमर्थात्तत्र यदान्येन कर्तव्यांक्रियामन्यः करोति तदा प्रत्ययउत्पाद्यतेइह पुनर्द्वितीयासमर्थादात्मार्हांक्रियायामर्हतिकर्तरि निश्चितबलाधाने प्रत्ययउत्पाद्यते। ब्राह्मणवद्वानवर्तते एतद्वृत्तं ब्राह्मणमर्हतीति॥ उपसर्गाच्छन्दसि धात्वर्थे॥ अर्थग्रहणंकिमर्थम्। नतूपसर्गाच्छन्दसि धाताविस्येवोच्येत। धातुर्वै शब्दः। शब्दे कार्यस्यासंभवादर्थे कार्यं विज्ञास्यते। कः पुनर्धात्वर्थः। क्रिया। इदं तर्हि प्रयोजनम्। उत्तरपदलोपो यथा विज्ञायेत। धातुकृतोऽर्थो धात्वर्थइति। कः पुनर्धातुकृतोऽर्थः। साधनम्। किं प्रयोजनम्। साधनेऽयं भवन् लिङ्गसंख्याभ्यां योक्ष्यते। उद्वतानि उद्वतः निगतानि निवत्इति। स्त्रीपुंसाभ्यां वत्युपसंख्यानम्॥ स्त्रीपुंसाभ्यां वत्युपसंख्यानं कर्तव्यम्। स्त्रीवत् पुंवदिति ॥

द्धातुसहचरितोऽर्थआश्रयिष्यतइत्यर्थः। अथवा धातुर्वै शब्दः शब्दे कार्यस्येत्येकग्रन्थएवायम्। उत्तरपदलोपइति। गम्यमानार्थत्वादप्रयोगएव शब्दस्य लोपः। धातुकृतइति। धातुशब्देनात्र धात्वर्थ उच्यते। क्रियाकृतोऽर्थआश्रयिष्यतइत्यर्थः। क्रियया कारकं कर्मादिव्यपदेशयुक्तं क्रियते। क्रियापेक्षत्वात्कर्मादिव्यपदेशस्य। बहुव्रीह्याश्रयाच्चायमर्थो गृह्यते। धातुर्धात्वर्थः क्रिया सा अर्थः प्रयोजनं यस्य साधनस्य तस्मिन्वर्तमानादुपसर्गात्स्वार्थे वतिप्रत्ययोऽवृत्तिविषये चोपसर्गः क्रियाविशेषविशिष्टशक्त्याधारे च द्रव्ये वर्ततइति तस्यार्थे विधीयमानस्य वतेः सत्त्ववाचित्वादन्वर्थसंज्ञाविज्ञानादलिङ्गासंख्यस्य विधीयमानाव्ययसंज्ञा न प्रवर्तते। साधनशब्देनात्र शक्त्याधारो द्रव्यं विवक्षितम्। उद्वतान्युद्वतइति। पुंस्त्वमत्र नपुंसकप्रसङ्गे छान्दसम्। वत्युपसंख्यानमिति। वतिप्रत्यये विधीयमानइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमौ नञ्स्नञाविति। प्राग्भवनाद्ये येऽर्थास्तान् सर्वाननपेक्ष्य प्रकृतिविशेषाद्विधीयमानौ प्रकृतिसामान्याद्विधीयमानस्य सर्वस्य प्रत्ययस्य सर्वेष्वर्थेषु नञ्स्नञौ बाधकौ ततो वत्यर्थे वतिरुपसंख्यायते। तेन चोपसंख्यानेन विशिष्टार्थविषयेणार्थान्तरे सावकाशौ नञ्स्नञौ बाध्येते। योगापेक्षमिति। स्त्रीपुंसाभ्यामिति योगो वत्यर्थे न प्रवर्तते इत्यस्यार्थस्य पुंवदिति ज्ञापकमित्यर्थः॥ तस्य॥ वा वचनं चेति। अन्यथार्थान्तरे सावकाशयोर्नञ्स्नञोरुपसंख्यानविहिताभ्यां विशिष्टार्थविषयाभ्यां त्वतलाभ्यां बाधः स्यात्। अपवादसमावेशाद्वेति। वाशब्दः पूर्वोक्तवचनव्यावृत्त्यर्थो वा वचनं न कर्तव्यम्। अपवादसमावेशात्सिद्धत्वादित्यर्थः। यथा प्रकृ

किं पुनः कारणं न सिध्यति। इमौ नञ्स्नञौ प्राग्भवनादित्युच्येते तौ विशेषविहितौ सामान्यविहितं वतिं बाधेयाताम्। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न वत्यर्थे नञ्स्नञौ भवत इति। यदयं स्त्रियाः पुंवदिति निर्देशं करोति। एवमपि स्त्रीवदिति न सिध्यति। योगापेक्षं ज्ञापकम्॥ तस्य भावस्त्वतलौ॥ स्त्रीपुंसाभ्यां त्वतलोरुपसंख्यानम्। स्त्रीपुंसाभ्यां त्वतलोरुपसंख्यानं कर्तव्यम्। स्त्रीभावः स्त्रीत्वं स्त्रीता। पुंभावः पुंस्त्वं पुंस्तेति। किं पुनः कारणं न सिध्यति। इमौ नञ्स्नञौ प्राग्भवनादित्युच्येते तौ विशेषविहितौ सामान्यविहितौ त्वतलौ बाधेयाताम्। वा वचनं च। वा वचनं च कर्तव्यम्। किं प्रयोजनम्। नञ्स्नञावपि यथा स्याताम्। स्त्रीभावः स्त्रैणं पुंभावः पौंस्नमिति। अपवादसमावेशाद्वा सिद्धम्। अपवादसमावेशाद्वा सिद्धमेतत्। तद्यथा। इमनिच्प्रभृतिभिरपवादैः समावेशो भवति। एवमाभ्यामपि भविष्यति। नैवेश्वर आज्ञापयति नापि धर्मसूत्रकाराः पठन्ति। इमनिच्प्रभृतिरपवादैः समावेशो भवतीति। किं तर्हि आ च त्वादित्यस्माद्यत्नादिमनिच्प्रभृतिभिरपवादैः समावेशो भवति। न चैतावत्राभ्यन्तरौ। एतावप्यत्राभ्यन्तरौ। कथम्। अपवादसदेशा अपवादा भवन्तीति ॥

तिविशेषाद्विधीयमानैरिमनिजादिभिस्त्वतलौ समाविशत एवं नञ्स्नञ्भ्यामित्यर्थः। नैवेश्वर इति। ईश्वरभयाद्धि रुद्धमप्यनुष्ठीयते। नापीति। तेषां हि वचनमदृष्टेऽर्थे प्रमाणम्। एतेन दृष्टादृष्टार्थाभाव उक्तः। यत्नादिति। नञ्स्नञोश्चासौ यत्नो नव्याप्रियते आ च त्वादित्यस्मात्सूत्रादूर्ध्वमा त्वसंशब्दनात् नञ्स्नञोरसंनिधानात्। एतावप्यत्रेति। प्राग्भवनात् प्रतिसूत्रमुपस्थानात् त्वतलापवादैरिमनिजादिभिः समानदेशौ नञ्स्नञावित्यर्थः ॥

राम: २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतच्चैवनजानीमइति।विध्यधिकारपरिभाषारूपसंभवादन्यतमरूपनिश्चयाभावात्।तत्राधिकारपक्षेकार्यकालपरिभाषापक्षेचप्रतिसूत्रंप्रत्यर्थंचोपस्थानात्स्यादनयोरभ्यन्तरत्वम्।यदातुप्राग्भवनाद्येर्थास्तानपेक्ष्यनञ्स्नञौविधीयेतेयथोद्देशंवापरिभाषाश्रीयतेतदानास्त्यनयोरभ्यन्तरत्वम्।तथाचषष्ठ्याद्योऽर्थविशेषलक्षणादणपवादात्पूर्वंविप्रतिषिद्धमितिपूर्वविप्रतिषेधोविधीयते।यथोद्देशपरिभाषापक्षयोरेवसंभवति।नतुप्रतिसूत्रमुपस्थाने।नपुनरिति।कार्यकालपरिभाषापक्षेपिप्राग्भवनाद्येर्थास्तत्रनञ्स्नञ्यामुपस्थातव्यम्।तत्रयदितावद्भावदित्यर्थनिर्देशनमात्रएवनञ्स्नञावुपतिष्ठेतेतस्यभावस्त्वतलौस्त्रीपुंसाभ्यांभावेनञ्स्नञाविति।तदास्मिन्प्रदेशेसंनिधानादाचत्वादित्येतस्मात्सूत्रात्पूर्वौनञ्स्नञौभवतोना।

एतच्चैवनजानीमः।अपवादसंदेशाअपवादाभवन्तीति।अपिचकुतएतदुएतावप्यत्राभ्यन्तराविति।नपुनः पूर्वौवास्यातांपरौवा।एवंतर्हिवक्ष्यतेआचत्वादित्यत्रचकारकरणस्यप्रयोजनंनञ्स्नञ्यामपिसमावेशोभवतीति।तस्यभावइत्यभिप्रायादिष्वतिप्रसङ्गः।तस्यभावइत्यभिप्रायादिष्वतिप्रसङ्गोभवति।इहापिप्राप्नोति।अभिप्रायोदेवदत्तस्यमोदकेषुभोजने।येनोभावास्तेनोभावाः।पुत्राःपौत्राश्चवृश्चन्तइति।सिद्धंतुयस्यगुणस्यभावाद्द्रव्येशब्दनिवेशस्तदभिधानेत्वतलौ।सिद्धमेतत्।कथम् ॥

भ्यन्तरौ॥अथतुतत्सर्वापवादविधानोपयोगविज्ञानानन्तरंनञ्स्नञोरुपस्थानंतदाब्राह्मणस्यइत्येतस्मात्परौनञ्स्नञौभवतः।तथापिनाभ्यन्तरौगुणवचनब्राह्मणादिभ्यःकर्मणिचेत्यत्रतुप्रकृतिविशेषसंबद्धस्यकर्मार्थस्योपादानात्प्रकृत्यन्तरेणतस्यासंबन्धात्कर्मणिनञ्स्नञोरनुपस्थानादभ्यन्तरत्वंनाशङ्कनीयम्।एवंतर्हीति।चशब्देनयत्नेनसमावेशःसिध्यति।एतच्चतत्रैवव्याख्यास्यते।अभिप्रायादिष्विति।अनाश्रितप्रवृत्तिनिमित्तविशेषोभावशब्दवाच्योयावत्कश्चिदर्थस्तस्यसर्वस्यविशेषानुपादानाद्ग्रहणस्यन्याय्यत्वादतिप्रसङ्गः।येनोभावाइति।अस्माकंयेभिप्रायास्तेनित्यमेवास्माकंभवन्तीत्यर्थः।भवन्तीतिभावाः।भवतेश्चेतिवक्तव्यमितिकर्तरिणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्यगुणस्येति।गुणशब्देनयावान्कश्चित्पराश्रयोभेदकोजात्यादिरर्थः ससर्वइहगृह्यते।यस्यभावादित्येतावत्युच्यमानेपुत्र
स्यभावात्पितरिपितृशब्दस्यप्रवर्तनात्पितृत्वमितिपुत्रेभावप्रत्ययःस्यात्पुत्रत्वमितिचपितरीतिगुणग्रहणम्।भावादित्यमानत्वादि
त्यर्थः।द्रव्यशब्देनविशेष्यभूतस्तत्वभावापन्नोऽर्थउच्यते।तस्मिन्द्रव्येशब्दनिवेशःशब्दस्यप्रवृत्तिर्यस्यगुणस्यशब्देनवाच्यस्यावाच्यस्यवा
भावात्तस्यत्वतलावभिधेयइत्यर्थः।तत्रयेरूपादयःशब्दागुणमात्रवृत्तयः तेभ्योगुणसमवायिनिसामान्येभावप्रत्ययः।रूपत्वमिति।
येतुशुक्लादयोगुणगुणिवृत्तयोगुणगुणिनोरभेदोपचारान्मतुब्लोपाद्वातेभ्योगुणवृत्तिभ्योगुणसमवायिनिसामान्येभावप्रत्ययः।गुण
वृत्तिभ्यस्तुगुणे।अणुमहद्दीर्घादयोनित्यंपरिमाणिनिवर्तन्तेनतुपरिमाणमात्रे।तेनतेभ्यः परिमाणेगुणेभावप्रत्ययः।णत्वंणत्वमिति
भिन्नवर्णव्यक्तिसमवेतेसामान्यविशेषेप्रत्ययः।गवादयोयदाजातिमात्रवाचिनःतदातेभ्यःशब्दस्वरूपेप्रत्ययः।तथाहि।अर्थेजातौ
शब्दस्वरूपमध्यस्यतेयोगोशब्दःसएवार्थइतिततःशब्दस्वरूपमेवतत्रप्रवृत्तिनिमित्तंनान्यत्।द्रव्यवाचिभ्यस्तुगवादिभ्योजा
तौप्रत्ययः।समासकृत्तद्धितास्तुयद्यपिकेवलंसंबन्धंनाभिदधतितथापिसंबन्धिनिवर्तमानाःसंबन्धंप्रवृत्तिनिमित्तमपेक्षन्तइतिहे
तोःसंबन्धेभावप्रत्ययः।तथाचराजपुरुषत्वमितिस्वस्वामिभावःप्रतीयते।पाचकत्वमिति क्रियाकारकसंबन्धः।उपगुत्वमिति अप

यस्यगुणस्यभावाद्द्रव्येशब्दनिवेशस्तदभिधानेतस्मिन्गुणेवक्तव्येप्रत्ययेनभवितव्यम्।नचाभिप्रायादीनांभावाद्द्रव्ये
देवदत्तशब्दोवर्तते ॥

त्यापत्यवत्संबन्धः।केचिदौपगवत्वमित्यपत्यप्रत्ययान्ताद्भावप्रत्ययस्यजातिमभिधेयामिच्छन्तितन्मतेर्थान्तरवृत्तिस्तद्धितउदाहार्यः।उ
क्तंच।समासकृत्तद्धितेषुसंबन्धाभिधानमन्यत्ररूढ्यभिन्नरूपाव्यभिचरितसंबन्धेभ्यइति।रूढिशब्दागौरखरसप्तपर्णलोहितशाल्याद
योजातिविशेषावच्छिन्नद्रव्यवाचिनइति। तेभ्योजातावेवभावप्रत्ययः।एवंकुम्भकारत्वंहस्तित्वमिति।अभिन्नरूपाःशुक्ला
दयोमतुब्लुकिविज्ञायमानेयद्यपितद्धितान्तास्तथापितेभ्योभावप्रत्ययोगुणएवभवतिनतुसंबन्धे ।गुणगुणिनोर्जातितद्वतोरिवसोयमित्य
भिसंबन्धेनलोकनिरूढेनभेदसंबन्धस्यान्यस्याभावाद्गुणवचनेभ्योलुगितिलुग्विधानद्वारेणाभेदेनैवगुणिनोभिधानंनतुभेदंकृत्वामत्वर्थोत्प
त्तिरित्याख्यायते।अव्यभिचरितसंबन्धात्सत्तोभावःसत्तेतिजातावेवभावप्रत्ययः।नहिसदृस्तुसत्तासंबन्धंव्यभिचरतीतिसत्तासंबन्धानपे
क्षणान्नसंबन्धेप्रत्ययः।राजपुरुषयोस्तुसंबन्धस्यकादाचित्कत्वात्तदपेक्षोराजपुरुषशब्दःस्वार्थमभिधत्तइतिततःसंबन्धेप्रत्ययोयुक्तः।
तस्मात्सर्वेषुपदार्थेषुनित्यसमवायिनीशब्दप्रवृत्तिहेतुःसत्तैवभावप्रत्ययवाच्यानतुसत्तत्तयोःसंबन्धः समवायाख्यः।धवखदिरत्वमि
ति जातिद्वन्द्वाज्जातिसमुदाये।कुत्वमित्यादौसंज्ञास्वरूपेसंज्ञिषु ध्यस्तेप्रत्ययः।अन्येतुसंज्ञासंज्ञिसंबन्धइत्याहुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंपुनरिति। प्रकृतिप्रत्ययार्थयोर्भेदप्रतिपत्त्यर्थः प्रश्नः । शब्दस्पर्शेति। एतच्चोपलक्षणंपरामृश्यस्यसर्वस्यभेदकस्यजात्यादेरिहगुणत्वेनाभिमतत्वाद्विशेष्यस्यसर्वनाम्नाप्रत्यवमृश्यस्यद्रव्यत्वेन ततएतदुक्तंभवति। यथाशब्दादयआश्रिताः संसर्गिणोगुणाएवमन्योपिजात्यादिधर्मोगुणइति। किंपुनरन्यदिति। भेदावगमहेतुप्रमाणप्रश्नः। अयमिति। तात्त्विकभेदाभेदचिन्तापरिहारेणलोकप्रसिद्धंभेदमाश्रित्यप्रत्ययार्थआचार्येणव्यवस्थापितइत्यर्थः। नह्यन्यदिति। असत्यपिभेदेलोकेभेदव्यवहारदर्शनान्नास्तिततोभेदनिश्चयः। नचरूपादिव्यतिरेकेणद्रव्यंप्रत्यक्षेणोपलभ्यतेरूपादिसंनिवेशमात्रेघटादिव्यवहारात्। पशोःखल्वपीति। उपलब्धिलक्षणेनप्राप्तस्यद्रव्यानुपलम्भादसत्त्वनिश्चयोयुक्तइतिभावः। पर्णशतेन्यस्तस्येति। बहुधाविभक्तस्येत्यर्थः। एतेनभागानांपरस्परात्र्यवधानेनव्यवधानस्यानुपलब्धिकारणस्याभावः प्रतिपादितः। नन्ववयवविभागात्संयो

किंपुनर्द्रव्यंकेपुनर्गुणाः। शब्दस्पर्शरूपरसगन्धागुणास्ततोन्यद्द्रव्यम्। किंपुनरन्यच्छब्दादिभ्योद्रव्यमाहोस्विदनन्यद्गुणस्यायंभावाद्द्रव्येशब्दनिवेशंकुर्वन्नूख्यापयत्यन्यच्छब्दादिभ्योद्रव्यमिति। अनन्यच्छब्दादिभ्योद्रव्यम्। नह्यन्यदुपलभ्यते। पशोःखल्वपिविशसितस्यपर्णशतेन्यस्तस्यनान्यच्छब्दादिभ्यउपलभ्यते। अन्यच्छब्दादिभ्योद्रव्यम्। तत्त्वनुमानगम्यम्। तद्यथा। औषधिवनस्पतीनांवृद्धिह्रासौ। ज्योतिषांगतिरिति। कोसावनुमानइह ॥

गनिमित्तावयविद्रव्यस्यविनाशादनुपलम्भः स्यात्। एवंतर्ह्युपलब्धिलक्षणप्राप्तस्यसर्वदानुपलम्भादसत्त्वनिश्चयोस्तु। अनुमानगम्यमिति। यद्यपिगुणव्यतिरिक्तद्रव्यवादिभिःप्रत्यक्षप्रमाणग्राह्यंद्रव्यमभ्युपगतंरूपाद्यालम्बनप्रत्ययविलक्षणपदार्थालम्बनप्रत्ययोत्पादात् तथापिप्रत्यक्षेविप्रतिपन्नंप्रतिसाक्षिस्थानीयानुमानोपन्यासः। प्रत्यक्षापलापिनंप्रत्यक्षपूर्वकानुमानासंभवात्सामान्यतोदृष्टमनुमानमुपन्यस्यते। औषधिवनस्पतीनामिति। भाष्यकारवचनाज्ज्ञातिरप्राणिनामित्येकवद्भावोनभवति। ओषध्यादीनामुपचयापचयपूर्वकोदेशविशेषसंबन्धोदृष्टइतिवनस्पत्यादीनामङ्कुराद्यवस्थासुदृष्टानांकालान्तरेदेशविशेषसंबन्धदर्शनादुपचयापचयानुमानम्। ज्योतिषांगतिरिति। गतिपूर्विकांदेशान्तरप्राप्तिमस्मादीनामुपलभ्यादित्यादीनांदेशान्तरप्राप्त्यागत्यनुमानम्। कोसावनुमानइति। अनुमीयतेऽनेनेत्यनुमानशब्देनहेतुरुच्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानइति। वर्ष्मोच्छ्रायः। परिमाणं पारिमाण्डल्यम्। क्वचित्परिणाहइति पाठः। परिणाहः पारिमाण्डल्यमेव। अन्यत्तुलाग्र मिति। तुलाग्रस्यान्यथात्वं नामोन्नामलक्षणं गुरुत्वभेदाद्गुरुत्वस्य च समवायिकारणं द्रव्यमिति रूपादिव्यतिरिक्तद्रव्यसिद्धिः। विशेषइति। तुलाग्रस्य नामोन्नामलक्षणोभेदइत्यर्थः। स्पर्शनेनेति। खड्गादिः। लम्बमानोपीति। कार्पासादिः। व्यपवर्गमिति। विभागम्। तत्त्वमिति। एकाकारबुद्धिनिमित्तत्वमित्यर्थः। यदि रूपाद्यालम्बनैवामलकादिबुद्धिः स्यात्तदा पूर्वरूपादिविनाशादपूर्वरूपादिप्रादुर्भावाच्च तदेवेदमामलकमिति प्रत्यभिज्ञाप्रत्ययो नोत्पद्येत। अस्ति चाभिन्नाकारबुद्ध्युत्पत्तिस्तस्मादस्ति रूपाश्रयो द्रव्यम्। एतच्च पाकजरूपाद्युत्पत्तौ ये द्रव्यविनाशं नेच्छन्ति। तन्मतेन द्रव्यं प्रत्यभिज्ञाश्रयेणोक्त

समानेवर्ष्मणि परिणाहे च। अन्यत्तुलाग्रं भवति लोहस्य। अन्यत्कार्पासानां यत्कृतो विशेषस्तद्द्रव्यम्। तथा कश्चित्स्पर्शनेनैव च्छिनत्ति। कश्चित्लम्बमानोपि न च्छिनत्ति। यत्कृतो विशेषस्तद्द्रव्यम्। तथा कश्चिदेकेनैव प्रहारेण व्यपवर्गं करोति कश्चिद्द्वाभ्यामपि न करोति। यत्कृतो विशेषस्तद्द्रव्यम्। अथवा यस्य यस्य गुणान्तरेष्वपि प्रादुर्भवत्सु तत्त्वं न विहन्यते तद्द्रव्यम्। किं पुनस्तत्त्वम्। तद्भावस्तत्त्वम्। । तद्यथा। आमलकादीनां फलानां रक्तादयः पीतादयश्च गुणाः प्रादुर्भवन्ति। आमलकं बदरमित्येव भवति। अन्वर्थं खल्वपि निर्वचनं गुणसंद्रावो द्रव्यमिति। यदि तर्हि षष्ठीसमर्थाद्गुणे प्रत्यया उत्पाद्यन्ते। किमियता सूत्रेण। एतावद्वक्तव्यं षष्ठीसमर्थाद्गुणइति। षष्ठीसमर्थाद्गुणइतीयत्युच्यमाने द्विगुणा रज्जुस्त्रिगुणा रज्जुः। अत्रापि प्राप्नोति ॥

म्। ये तु पाकजरूपाद्युत्पत्तौ पूर्वद्रव्यविनाशमपूर्वद्रव्यारम्भं चाभ्युपगच्छन्ति तन्मतेन द्रव्यभेदेपि जातेरेकत्वाज्जातिप्रत्यभिज्ञाश्रयेणोक्तम्। जातेश्चाधारो द्रव्यं ततो जातिमन्तरेण प्रत्यभिज्ञाया अभावाद्द्रव्यमन्तरेण जात्युपलम्भाभावाद्द्रव्यस्य सद्भावनिश्चयः। अन्वर्थमिति। अर्थान्विताद्द्रव्यव्यपदेशादेव रूपादिव्यतिरिक्तं द्रव्यं सिद्धमित्यर्थः। गुणसंद्रावइति। संद्रूयते संगम्यते आश्रीयतेइति संद्रावः। समिगुद्रुदुवइति घञ्। गुणानामाश्रयो द्रव्यमित्यर्थः। किमियतेति। यस्य गुणस्य भावादित्यादिना गुरुणा सूत्रेणेत्यर्थः। द्विगुणा रज्जुरिति। विषयप्रदर्शनमात्रमेतत्। रज्जुशब्दात्तु षष्ठ्यन्तादवयवलक्षणे गुणे त्वतलप्रसङ्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंप्रसङ्ग इत्याह।गुणशब्दोयमिति।क्वचित्तुपाठः नैषदोषोगुणशब्दोयमिति।तत्रायमर्थः।यतोयंगुणशब्दोबह्वर्थः ततोयस्यगुणस्यभावादित्यस्मिन्न्यासेऽतिप्रसङ्गोनभवतिशब्देनविशिष्टस्यगुणस्यशब्दप्रवृत्तिनिमित्तरूपस्योपादानात्।अथवेति।पूर्वोक्तविषयेसर्वस्मिन्नित्यर्थः।त्रिगुणमध्ययनमिति।पदक्रमसंहितालक्षणावयवत्रययोगात्। चर्चागुणाः।पदविच्छेदगुणाः।पदक्रमाध्यायीद्विगुणमधीतइत्युच्यते।नहिसंहितागुणांश्चर्चागुणांश्चेति।वेदान्तरसंहितांवेदान्तरपदानिवाधीयानोद्विगुणमधीतइतिनोच्यते।अध्ययनक्रमभेदादेकस्याध्ययनस्यद्विगुणत्वाभावात्।

नैषदोषः।गुणशब्दोयंबह्वर्थः।अस्त्येवसमेष्ववयवेषुवर्त्तते।तद्यथा।द्विगुणारज्जुःत्रिगुणारज्जुरिति।अस्तिद्रव्यपदार्थकः।तद्यथा।गुणवानयंदेशइत्युच्यते।यस्मिन्गावःसस्यानिचवर्त्तन्ते।अस्त्यप्रधानेवर्त्तते। तद्यथा।योयत्राप्रधानोभवतिसआह।गुणभूतावयमत्रेति।अस्त्याचारेवर्त्तते।तद्यथा।गुणवानयंब्राह्मणइत्युच्यते।यःसम्यगाचारंकरोति।अस्तिसंस्कारेवर्त्तते।तद्यथा।संस्कृतमन्नंगुणवदित्युच्यते।अथवासर्वत्रैवायंगुणशब्दःसमेष्ववयवेषुवर्त्तते।तद्यथा।द्विगुणमध्ययनंत्रिगुणमध्ययनमित्युच्यते।चर्चागुणान्क्रमगुणांश्चापेक्ष्यभवति।नसंहितागुणांश्चर्चागुणांश्च।यद्येवंगुणवदन्नमितिगुणशब्दोनोपपद्यते। नह्यन्नस्यसूपादयोगुणाःसमाभवन्ति।नावश्यंवर्ष्मतःपरिमाणतएववासाम्यंभवति।किंतर्हि।युक्तितोपि।आतश्चयुक्तितः।योहिमुद्गप्रस्थेलवणप्रस्थंप्रक्षिपेत्।नादोयुक्तंस्यात् ॥

यद्यपिक्रमपाठेपदावृत्त्याधिक्यंभवति।तथापियुक्तितःसाम्योपपत्तिः।गुणवानयंदेशइत्यत्रापिगोसस्यादयोयुक्तितःसमाः।देशावयवत्वाद्गुणाउच्यन्तेगवादीनांदेशावयवत्वमुपचरितंगुणभूतावयवमित्यत्रापिगृहाद्यवयवसदृशात्मनिर्देशः।गुणवानयंब्राह्मणइत्यादावपिब्राह्मणादिशब्दार्थगुणसमुदायैकदेशाचारवाचीगुणशब्दः।युक्तितश्चाचारस्यसाम्यम्।यद्येवमिति।यथाद्विगुणारज्जुरित्यादौप्रमाणतोऽवयवस्यसाम्यंनतथात्रेतिप्रश्नः।युक्तितइति। अर्थक्रियायांयद्योग्यंतत्सममित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ यदितावदिति।युक्तितःसाम्याभावेअन्नमेवतन्नस्यात्।कुतःपुनस्तस्यगुणवत्त्वमित्यर्थः।तदेवंषष्ठीसमर्थाद्गुणइत्युच्यमा ५१२
२८ नेःतिप्रसङ्गाद्यस्यगुणस्यभावादित्याश्रयितव्यम्।अत्राप्यव्याप्तिंचोदयति।शुक्लादिष्विति।पटस्यशुक्लइतिव्यतिरेकदर्श
नाद्गुणमात्रवचनाःशुक्लादयः।पटस्यशुक्लत्वमित्यादौगुणएवत्वतलादिप्रत्ययोदृश्यते।नचगुणेवर्त्तमानानांतेषांगुण
एवप्रवृत्तिनिमित्तमितिसत्वाप्रश्नः।गुणसमवायिनितुसामान्येस्यात्प्रत्ययःकिंतुपटस्यशुक्लत्वमितिपटेनसंबन्धाभा
वप्रसङ्गः।वर्त्यभावादिति।वर्त्तनंवर्त्तौवृत्तिरित्यर्थः।वर्त्तौस्मिन्नस्तीति।वर्त्तीप्रत्ययार्थःप्रकृत्यर्थव्यतिरिक्तप्रत्ययार्थाभावा
दित्यर्थः।नपुनर्वृक्षादयइति।तेपिजातिमात्रवचनास्ततोजातौप्रत्ययाप्रसङ्गः।द्रव्यं चाहुरिति।विशिष्टजातियुक्तमित्य

यदितावद्देरन्नंनादेःऽत्तव्यंस्यात्।अथानितेरन्नंनादेजग्ध्वाप्राण्यात्।शुक्लादिषुतर्हिवर्त्यभावाद्वृत्ति
र्नप्राप्नोति।शुक्लत्वंशुक्लतेति।किंपुनःकारणंशुक्लादयएवोदाह्रियन्तेनपुनर्वृक्षादयोपि।वृक्षत्वंवृक्षतेति।
अस्त्यत्रविशेषः।उभयवचनाह्येतेद्रव्यंचाहुर्गुणंच।यतोद्रव्यवचनास्ततोवृत्तिर्भविष्यति।इमेपितर्हिउभ
यवचनाः।कथम्।आरभ्यतेमतुब्लोपःगुणवचनेभ्योमतुपोलुग्भवतीति।यतोद्रव्यवचनास्ततोवृत्तिर्भवि
ष्यति।डित्थादिषुतर्हिवर्त्यभावाद्वृत्तिर्नप्राप्नोति।डित्थत्वंडित्थता।डाम्भिट्टता।डाम्भिट्टत्वमिति।तत्रापिकश्चि
त्प्राथमकल्पिकःडित्थोडाम्भिट्टश्चेति।तेनकृतांक्रियांगुणंवायःकश्चित्करोतिसउच्यतेडित्थत्वंतएतद्डा
म्भिट्टत्वंतएतदेवंडित्थाःकुर्वन्ति।एवंडाम्भिट्टाःकुर्वन्ति।यस्तर्हिप्राथमकल्पिकोडित्थोडाम्भिट्टश्चतस्यवर्त्य
भावाद्वृत्तिर्नप्राप्नोति।नैषदोषः

र्थः।गुणंचेति।जातिलक्षणम्।यतोद्रव्यवचनाइति।यस्माद्द्रव्यवचनास्तस्माज्जातौप्रवृत्तिनिमित्तेप्रत्ययः।आरभ्यतेमतु
ब्लोपइति।वृक्षादयोजातितद्वतोरभेदविवक्षायांद्रव्यमाहुः।नहियथापटस्यशुक्लइतिव्यतिरेकोदृश्यतेतथाधवस्यवृक्ष
इति।तत्रगुणद्रव्ययोर्व्यतिरेकदर्शनान्मतुप्श्रवणनिवृत्त्यर्थोलुगारम्भः।डित्थादिष्विति।डित्थादयोयदृच्छाशब्दाअ
र्थगतंनकिंचित्प्रवृत्तिनिमित्तमपेक्षन्तेपुरुषेच्छावशेनप्रवर्त्तनात्।तेनकृतार्थमिति।डित्थसहचरितगुणक्रियादर्शना रामः
दन्यत्राप्युपचारात्प्रवर्त्तमानस्यडित्थशब्दस्यगुणक्रियेएवप्रवृत्तिनिमित्तमित्यर्थः ॥ २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काथंचित्कइति। विनयादिषु कथंचिच्छब्दस्य पाठात्स्वार्थे ठक्प्रत्ययः। शब्दस्वरूपमर्थेध्यस्यायंडित्थइति संज्ञासंज्ञिसंबन्धः क्रियते। ततः शब्दस्वरूपासङ्गाद्यथाडित्थशब्दस्यार्थे प्रयोगस्तथैव शब्दस्वरूपेर्थेध्यस्तेप्रत्ययः। अन्येतूत्पत्तिप्रभृत्याविनाशात्कौमाराद्यवस्थाभेदभिन्नद्रव्यसमवायिनीं जातिमिच्छन्ति। यद्दर्शनादवस्थान्तरेपि स एवायंडित्थ इति प्रत्यभिज्ञाप्रत्यय उत्पद्यते तस्यां प्रत्ययः। यद्वेति। पूर्वत्र लक्षणे जातिगुणद्रव्यलक्षणार्थाभिधायिभ्यो गवादिभ्यः शब्दस्वरूपगुणसामान्यादिषु प्रत्ययः। इह तु शब्दाभिधायिभ्यः पूर्वोक्तेष्वेवार्थेष्विति प्रकृत्यर्थभेदेपि प्रधानप्रत्ययार्थाभेदापेक्षो विकल्पः। किमेभिरिति। भावशब्दत्रयस्यार्थभेदं पृच्छति। एकेनेति। भवन्तीति भावाः शब्दाः। भवतेश्चेति वक्तव्यमिति कर्त्तरि णः। द्वाभ्यामिति। स च द्विविधो वाच्यप्रवृत्तिनिमित्तरूपोऽनुकरणसाधनो घञ्। तत्र शुक्लस्य भावः शुक्लत्वमिति शुक्लशब्दस्य गुणे वर्त्तमानस्य भावो गुणसमवायिसामान्यं तस्माद्धि निमित्ताच्छुक्लशब्दः स्वस्मिन्नर्थे गुणलक्षणे भवति प्रवर्त्तत इत्यर्थः। द्रव्ये तु वर्त्तमानस्य शुक्लशब्दस्य गुणो भावस्तथा गोशब्दस्य द्रव्ये वर्त्तमानस्य जातिर्भावो राजपुरुषशब्दस्य संबन्ध इत्यादि बोद्धव्यम्। स्वेनार्थेनेति। शब्दानां स्वार्थो वाच्यस्तेन

यथैव तस्य काथंचित्कः प्रयोगः एवं वृत्तिरपि भविष्यति। यद्वा सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भावस्तदभिधाने। किमेभिस्त्रिभिर्भावग्रहणैः क्रियते। एकेन शब्दः प्रतिनिर्दिश्यते द्वाभ्यामर्थः। यद्वा सर्वे शब्दाः स्वेनार्थेन भवन्ति स तेषामर्थ इति। तदभिधाने त्वतलौ भवत इति वक्तव्यम्। नैवमन्यत्र भवन्ति। न हि तेन रक्तं रागादित्यत्र शब्दे न रक्ते प्रत्यया उत्पद्यन्ते शब्दे असंभवादर्थे न रक्ते प्रत्यया भविष्यन्ति ॥

भवन्ति। तत्र वाचकत्वेन प्रवर्त्तन्त इत्यर्थः। वाच्योर्थः शब्दभवने करणत्वेन विवक्षितोर्थप्रत्यायनाय शब्दप्रयोगाद्भवत्यर्थस्य करणत्वम्। स तेषामर्थ इति। यत्तदोर्नित्यमभिसंबन्धादित्यपेक्षते। यस्मात्प्रवृत्तिनिमित्तात्स्वेनार्थेन प्रयुज्यन्ते सोर्थस्तेषां प्रवृत्तिनिमित्ततया संबन्धीत्यर्थः। एतेन प्रकृतिप्रत्ययार्थयोः संबन्धो दर्शितः। नैवमन्यत्रेति। अन्यत्र शब्दार्थसंबन्धी प्रत्ययार्थो निर्दिश्यते। न तु शब्दसंबन्धीत्यर्थः। अत्रोत्तरं शब्देऽसंभवादिति। शब्दसंबन्धित्वं प्रत्ययार्थस्य नोपपद्यते। कृषायादिशब्देन रागाद्यसंभवात्ततः शब्दार्थसंबन्धित्वं प्रत्ययार्थस्याश्रीयते। इह तु शब्दस्य तदर्थस्येव भावसंबन्धसंभवात्तद्वाचिनी कामचारात्प्रकृतिराश्रीयते। तथाहि। शुक्लस्य द्रव्यस्य गुणो भावस्तद्वशाद्धि शुक्लं द्रव्यं भवति। गोत्वसंबन्धाच्च गौर्द्रव्यम्। एवं शुक्लशब्दस्यापि द्रव्ये वर्त्तमानस्य गुणो भावः। तद्वशात्तस्य द्रव्ये प्रवर्त्तनात्। गोत्ववशाच्च गोशब्दस्येत्येवं सर्वत्रावसेयम्। नानात्वं योगपद्यमित्यादौ पूर्वत्र लक्षणे नानाभूतार्थाभिधायिनो युगपद्भूतार्थाभिधायिनश्च द्रव्यधर्मे असहभावे युगपद्भावे च प्रत्यय उत्तरत्र तु शब्दाभिधायिभ्यां पूर्वोक्तार्थवृत्तौ पूर्वोक्त एव भावे प्रत्ययः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तर्ह्यन्यतरदिति। यस्यगुणस्यभावादितिवा। यद्वासर्वेभावाइतिवेत्यर्थः। अनभिधानादिति। नहिगोत्वसम्बत्वमित्याद्युक्ते
भिप्रायाद्यवगम्यते किंतुजात्यादीत्यर्थः। तत्रभवस्यनेनेतिकरणसाधनेनघञन्तेनभावशब्देनजात्यादिकेउच्यमानेवाच्यसं
बन्धिनिशब्दसंबन्धिनिचपूर्वोक्तन्यायाद्द्रव्यादिवाचिनःशब्दाभिधायिनोवाशुक्लादेस्त्वतलादयइतिस्थितम्। त्वतलभ्या
मिति। नब्राह्मणस्यभावइतियुगपद्भावमनञर्थसंबन्धविवक्षायांयदिपरत्वात्त्वतलोःकृतयोर्नञ्समासःस्यात्तदाव्ययपूर्व
पदप्रकृतिस्वरेणाद्युदात्तत्वंप्रसज्येत। नञ्समासात्तुत्वप्रत्ययेप्रत्ययस्वरेणाद्युदात्तंपदंभवति। तलितुलित्स्वरेणमध्यो

तत्तर्ह्यन्यतरत्कर्तव्यम्। सूत्रंचभिद्यते। यथान्यासमेवास्तु। ननुचोक्तंतस्यभावइत्यभिप्रायादिष्वतिप्रसङ्ग
इति। उक्तंवा। किमुक्तम्। अनभिधानादिति। अनभिधानादभिप्रायादिषूत्पत्तिर्नभविष्यति। त्वतलभ्यांनञ्समा
सः पूर्वविप्रतिषिद्धंत्वतलोःस्वरसिद्ध्यर्थम्। त्वतलभ्यांनञ्समासोभवतिपूर्वविप्रतिषेधेन। किंप्रयोजनम्।
त्वतलोःस्वरसिद्ध्यर्थम्। त्वतलोःस्वरसिद्धिर्यथास्यात्। त्वतलोरवकाशः भावस्यवचनंप्रतिषेधस्यावचनम्।
ब्राह्मणत्वम्। ब्राह्मणता। नञ्समासस्यावकाशः प्रतिषेधस्यवचनंभावस्यावचनम्। अब्राह्मणः। अवृषलः। उ
भयवचनेउभयंप्राप्नोति। अब्राह्मणत्वम्। अब्राह्मणता। नञ्समासोभवतिपूर्वविप्रतिषेधेन। सतर्हिपूर्व
विप्रतिषेधोवक्तव्यः। नवक्तव्यः। नात्रत्वतलौप्राप्नुतः। किंकारणम्। असामर्थ्यात्। कथमसामर्थ्यम्। सापे
क्षमसमर्थंभवतीति। यावताब्राह्मणशब्दः प्रतिषेधमपेक्षते। नञ्समासोपितर्हिनप्राप्नोति। किंकारणम्।
असामर्थ्यादेव। कथमसामर्थ्यम्। सापेक्षमसमर्थंभवतीति। यावताब्राह्मणशब्दोभावमपेक्षते। प्रधान
मत्रब्राह्मणशब्दःभवतिचप्रधानस्यसापेक्षस्यापिसमासः ॥

दात्तमितितदर्थंपूर्वविप्रतिषेधआश्रीयते। यावताब्राह्मणशब्दइति। प्रत्ययार्थस्यप्राधान्याद्ब्राह्मणार्थस्यनञर्था
पेक्षत्वादसामर्थ्यादप्रधानस्यसापेक्षत्वेसतिऋद्धस्यराजपुरुषइत्यादाविवरत्स्यभावात्त्वतलोरप्रसङ्गः। प्रधानमत्रे
ति। उत्तरपदार्थप्रधानत्वात्तत्पुरुषस्य। यथाराजःपुरुषोभिरूपइतिप्रधानस्यसापेक्षत्वेपिवृत्तिर्भवत्येवंभावमपेक्ष
माणस्यापिब्राह्मणस्यनञ्समासोभवतीत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंतर्हीति।न्यायेनैवपूर्वंनञ्समासेसिद्धेत्वतलभ्यामितिवचनंनियमार्थम्।त्वतलोरेवकर्त्तव्ययोः पूर्वंनञ्समासोनान्यत्रभावप्रत्ययइत्यन्योभावप्रत्ययः प्राग्भवतिपश्चान्नञ्समासः।न्यायस्यनियमार्थेनवचनेनबाधात्।ततश्चसतिशिष्टत्वादप्रथिमेत्यादौनञ्स्वरोभवत्यतः शौक्ल्यमित्यादौचनञः प्रकृत्यनेकदेशत्वादुत्तरपदवृद्धिःसिध्यति।यदितुपूर्वंनञ्समासःस्यात्ततोननञ्पूर्वादितिप्रतिषेधात्ष्यञोप्रसङ्गादशौक्ल्यमित्यादिनसिध्येत्।वाछन्दसीति।छन्दोविषयेक्वचित्पूर्वंत्वतलौततोनञ्समासःक्वचित्तुविपर्ययः।अयोनित्वायेति।प्रत्ययस्यपश्चान्नञ्समासेसतिनञ्स्वरोभवति।भवेदिदमिति।अत्रहिनञ्समासभावप्रत्यययोर्युगपत्प्राप्तिः।नह्यसौसमासभावमिति।समासशब्देनसमासार्थोजात्यन्तरयुक्तंवस्तुउच्यते।तद्भावमसौनाशास्ते।अपशुःपशुसदृशोभूयासमिति।किंतर्हि उत्तरपदार्थस्याभावमिति।उत्तरपदार्थस्यपशुत्वस्याभा

इदंतर्हिप्रयोजनम्।नञ्समासादन्योभाववचनः स्वरोत्तरपदवृद्ध्यर्थमितिवक्ष्यति।तत्रव्यवस्थार्थमिदंवक्तव्यम्॥वाछन्दसि॥वाछन्दसिनञ्समासोवक्तव्यः।निर्वीर्यतांवैयजमानआशास्ते।अपशुतांगोः।अयोनित्वाय।अशिथिलत्वाय।अगोतामनपत्यताम्।भवेदिदंयुक्तमुदाहरणम्।अयोनित्वायअशिथिलत्वायेति।इदंत्वयुक्तम्।अपशुतामिति।नह्यसौसमासभावमाशास्ते।किंतर्हि।उत्तरपदाभावमाशास्तेनपशोर्भावइति।नञ्समासादन्योभाववचनःस्वरोत्तरपदवृद्ध्यर्थम्।नञ्समासादन्योभाववचनोभवतिविप्रतिषेधेन।किंप्रयोजनम्।स्वरोत्तरपदवृद्ध्यर्थम्।स्वरार्थमुत्तरपदवृद्ध्यर्थंच।स्वरार्थंतावत्।अप्रथिमा।अम्रदिमा।उत्तरपदवृद्ध्यर्थम्।अशौक्ल्यम्।अकार्श्यम्॥आचत्वात्॥किमर्थश्चकारः ॥

वमाशास्तेपशुर्मीभूवमिति।ततश्चपूर्वंभावप्रत्ययः पश्चान्नञ्समासोविनापिवाछन्दसीतिवचनेनसिध्यति।नपशोर्भावइति।भावस्यनञ्संबन्धात्पशोरसंबन्धात्॥आचत्वात्॥वक्ष्यमाणैर्विशेषविहितैस्त्वतलौमाबाधिषातांगुणवचनादिभ्यःकर्मणिचयथास्यातामितिसूत्रम्।किमर्थश्चकारइति।वक्ष्यमाणोभिप्रायः।अथत्वतलोरुत्तरत्राधिकारादेवसिद्धत्वात्सूत्रमेवकस्मान्नाक्षिप्तम्।नैतदस्ति।गुणवचनादिभ्यःकर्मणिविधानार्थत्वादनुवृत्तेरपवादैरसंदिग्धैः संदिग्धतदर्थेपिस्थानेत्वतलौबाधेयातामितिसूत्रमवश्यंकर्त्तव्यम्।किंचास्त्यस्मिन्सूत्रेत्वतलोरुत्तरस्मिन्ननुवृत्तिर्दुर्ज्ञानाउत्तरेणप्रत्ययनिर्देशान्निराकाङ्क्षत्वात्त्वतलोरपिपूर्वसूत्रेणप्रातिपदिकसामान्याद्भावेविधानादाकाङ्क्षायाअभावात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुकर्षणार्थइति। अन्यथाभिधेयानुपादानादवधिमात्रनिर्देशोनर्थकः स्यात्। प्रकृताविति। विधेयमन्तरेणावध्युपादानस्यानर्थक्यादेवसाकाङ्क्षत्वात् प्रकृतौत्वतलावपेक्ष्येतेइत्यर्थः। अपवादसमावेशार्थमिति। नञ्स्नञ्समावेशार्थमित्यर्थः भाष्यकारस्तुन्यायव्युत्पादनायवक्ष्यमाणापवादसमावेशार्थत्वमुपन्यस्यदूषयित्वाचनञ्स्नञ्समावेशार्थत्वंविवरिष्यते। इमनिच्प्रभृतिभिरिति। असतिचकारेप्राक्त्वादर्थेत्वतलौभवतइत्ययमेवार्थः स्यादितिकर्मण्येवगुणवचनादिभ्यस्त्वतलोर्विधिः स्यात्त्वपवादेनसमावेशः। चशब्दात्तौपिभवतीतिभावः। नेदस्तीति। आत्वाद्याः प्रकृतयस्ताभ्यस्त्वतलौभवतइतिविज्ञायमानेसूत्रार्थेसिद्धोऽपवादैः समावेशः। आत्वाद्याः प्रकृतयइति। गुणवचनब्राह्मणादिप्रकृतयः। ताभ्यश्चेति।

अनुकर्षणार्थः। त्वतलावनुकृष्येते। नैतदस्तिप्रयोजनम्। प्रकृतौत्वतलावनुकृष्येते। अतउत्तरंपठति। आचत्वादिति। चकारकरणमपवादसमावेशार्थम्। आचत्वादितिचकारकरणंक्रियते। अपवादसमावेशार्थम्। इमनिच्प्रभृतिभिरपवादैः समावेशोयथास्यात्। नैतदस्तिप्रयोजनम्। आत्वादित्येवेमनिच्प्रभृतिभिरपवादैः समावेशोभविष्यति। इदंतर्हिप्रयोजनम्। आत्वाद्याः प्रकृतयः ताभ्यश्चत्वतलौयथास्यातां यतश्चोच्येते। एतदपिनास्तिप्रयोजनम्। आत्वादित्येवआत्वाद्याः प्रकृतयः ताभ्यस्त्वतलौभविष्यतः यतश्चोच्येते। इदंतर्हिप्रयोजनम्। आत्वाद्येर्थास्तत्रत्वतलौयथास्यातां यत्रचोच्येते। एतदपिनास्तिप्रयोजनम्। आत्वादित्येवआत्वाद्येर्थास्तत्रत्वतलौभविष्यतः॥

कर्मणीतिभावः। अनेनसूत्रार्थोव्याख्यातः। यतश्चोच्येतइति। अनेनचशब्दस्यप्रयोजनमाख्यायते। यतोविशेषप्रकृतेर्भावेपूर्वसूत्रेणप्रसक्ताविमनिजादिभिश्चबाधितौततोपियथास्यातामित्येवमर्थश्चशब्दोऽन्यथाकर्मणित्वतल्विधावस्यसूत्रस्योपयोगात्त्वतलोरपवादैर्बाधः स्यात्। एतदपिनास्तीति। आत्वात्प्रकृतीः सर्वाअपेक्ष्यत्वतलौविधीयमानावपवादविषयेकर्मणिचभविष्यतइतिनार्थश्चशब्देनेत्यर्थः। आत्वाद्येर्थाइति। जातौबहुवचनम्। कर्मणएकस्यैवार्थस्यवक्ष्यमाणत्वात्। अयमर्थोयद्यवधिमत्यः प्रकृतयआश्रीयन्तेतदापवादैः समावेशः सिध्यतिप्रतिप्रसवार्थत्वादस्यसूत्रस्य। गुणवचनादिभ्यस्तुकर्मणित्वतलोर्विधानंनसिध्यति। तस्मादवधिमदर्थपरिग्रहेणकर्मणित्वतलौसूत्रेणविधीयेतेचकारेणतुभावेअपवादैः समावेश्येते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्र चोच्यते इति। भावे विशेषप्रकृतिभ्योऽपवादैः प्रसक्तत्वाधादित्यर्थः। एतदपीति। अर्थात् प्रकृतीश्चाविशेषेणावधिमत्त्वे नापेक्ष्य त्वतल्विधानान्नार्थश्चकारेणेत्यर्थः। केचित्तु प्रातिपदिकसामान्यात्कर्मणि त्वतलाविच्छन्तो भाष्यमन्यथा व्याचक्षते। तत्त्वयुक्तम्। प्रकृतिविशेषसंबन्धस्य कर्मार्थस्योपादानात् प्रकृत्यन्तरेण तस्य संबन्धायोग्यत्वात्। तस्माद्गुणवचनेत्यतः प्रभृति प्राक् त्वाद्याविशेषप्रकृतयस्ताभ्य एव च प्रकृतिभ्यः कर्मणि त्वतलौ भवतः आपादपरिसमाप्तेर्भावकर्माधिकाराद्भावे तु प्राक् त्वादेतस्मात्सूत्रादूर्ध्वं याः प्रकृतयस्ताभ्यः। पूर्वेसूत्रेण तु ङ्याप्प्रातिपदिकादिति सिद्धान्तः। यस्याश्चेति। प्रकृतिविशेषान्नञ्जो प्राग्भवनात्सर्वेष्वर्थेषु विधीयमानौ त्वतलौ बाधकौ प्राप्नुत इति तद्विषय

यत्र चोच्यते। इदं तर्हि प्रयोजनम्। आत्वाद्याः प्रकृतयस्ताभ्यश्च त्वतलौ यथा स्यातां यस्याश्च प्रकृतेरेतस्मिन्विशेषेऽन्यः प्रत्यय उत्पद्यते। किं कृतं भवति। स्त्रीपुंसाभ्यां त्वतलोरुपसंख्यानं चोदितं तन्न वक्तव्यं भवति॥ ननञ्पूर्वात्तत्पुरुषाद्चतुरसंगतलवणवटबुधकतरसलसेभ्यः॥ कस्यायं प्रतिषेधः। त्वतलोरित्याह। नैतदस्ति प्रयोजनम्। इष्येते नञ्पूर्वात्तत्पुरुषात्त्वतलौ। अब्राह्मणत्वं अब्राह्मणतेति। अत उत्तरं पठति। ननञ्पूर्वादित्युत्तरस्य प्रतिषेधः। ननञ्पूर्वादिति। उत्तरस्य भावप्रत्ययस्य प्रतिषेधः क्रियते। नैतदस्ति प्रयोजनम्। परिगणिताभ्यः प्रकृतिभ्य उत्तरो भावप्रत्ययो विधीयते। न च तत्र काचिन्नञ्पूर्वा प्रकृतिर्गृह्यते। तदन्तविधिना प्राप्नोति। ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते। यत्र तर्हि तदन्तविधिरस्ति पत्यन्तपुरोहितादिभ्यो यगिति। यद्येतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयात्। पत्यन्ताद्यग्भवति। नञ्पूर्वात्तत्पुरुषान्नेति।

त्वे त्वतलौ प्राप्येते। प्राग्भवनादित्यवध्युपादानाच्च नञ्जाव पिभावे भवतोऽन्यथा प्राग्वतेरित्येव वक्तव्यं स्यादर्थे हि नत्वतलोर्थ्यां पुंवदिति लिङ्गात्तभाव्यम्॥ ननञ्पूर्वा॥ कस्यायमिति। प्रतिषेध्यस्यानुपादानादनन्तरयोश्च त्वतलोः प्रतिषेधस्यानिष्टत्वात्प्रश्नः। आचार्यदेशीय आह। त्वतलोरिति। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति मन्यते। उत्तरस्य प्रतिषेध इति। अधिकारादस्य सूत्रस्येति भावः। परिगणिताभ्य इति। पृथ्वादिप्रभृतिभ्यो गणे सूत्रे च पठिताभ्यः। यत्र तर्हीति। एतच्चोपलक्षणम्। हायनान्तयुवादिभ्योऽण् इगन्ताच्च लघुपूर्वात् योपधाद्गुरूपोत्तमाद्वुञित्येतैः सूत्रैर्नञ्पूर्वात्तत्पुरुषादस्त्येव प्रसङ्गः। यद्येतावदिति। अत्र प्रदेशे प्रयोजनाभावात् पत्यन्तसूत्रस्य परतः प्रतिषेधो विधेयः स एवोत्तरत्रानुवर्तिष्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंतर्हीति। अत्र प्रदेशे प्रतिषेधाधिकारस्योपादानादमनिजादीनामपि प्रतिषेधो विज्ञायते तत्र तदन्तविध्यभावात् प्रसङ्गाभावा
त् किं प्रतिषेधेन कृतस्मात्स नञ्पूर्वाद् हुब्रीहेरन्यपूर्वाच्च तत्पुरुषात्प्रत्ययविधानं ज्ञापयतीति पूर्वः पक्षः। अनिष्टत्वेन तूत्तरम्। एवं तर्ही
ति। प्रसङ्गाभावात्प्रतिषेधो न कर्त्तव्यः कृतस्तु ज्ञापयति यत्रापि विषये उत्तरो भावप्रत्ययो न प्राप्नोति तत्रापि भवति न पृथो भाव इति। अत्र हि
प्रकृत्यर्थस्य नञर्थापेक्षत्वात्सापेक्षत्वात्सामर्थ्यादिमनिज्न प्राप्नोतीति ज्ञापकाद् भवत्यपृथिमेति। नञ्पूर्वस्य तत्पुरुषस्य प्रत्यासन्नत्वा
द् विग्रहवाक्यावस्थेति तद्विषयमेव ज्ञापनमाश्रीयते। त्वतलौ तु कृते नञ्समासे भवतो न तु सापेक्षादुत्तरप्रत्ययविषयत्वाज्ज्ञाप
नस्यायदयमिति। वत्सेभ्यो न हितं इत्यादौ प्रतिषेधापेक्षणात्तद्धितानुत्पत्तौ नञः परस्य संपाद्याद्यर्थतद्धितान्तस्यान्तोदात्तविधानमनु
पपन्नम्। तत्क्रियमाणं सामान्येन सर्वे तद्धिता नञर्थापेक्षाद् भवतीति ज्ञापयतीति तदेवं सूत्रमेतत् प्रत्याख्यातम्। त्वतलर्थं नञ्समास इत्ये
तदिदानीं विध्यर्थं न नियमार्थम्। चतुरादिभ्यस्तु नञपेक्षेभ्यो नभिधानात्ष्यञ् न भवति। कृते तु नञ्समासे ब्राह्मणादेराकृतिगणत्वा

एवं तर्हि ज्ञापयत्याचार्यः उत्तरो भावप्रत्ययो नञ्पूर्वाद् बहुव्रीहेर्भवतीति नेष्यते। त्वतलादेवेष्यते। अविद्यमा
नाः पृथवोऽस्याऽपृथुः अपृथोर्भावः अपृथुत्वम्। अपृथुतेति। एवं तर्हि ज्ञापयत्याचार्यः उत्तरो भावप्रत्ययोऽन्यपू
र्वात्तत्पुरुषाद् भवतीति। नैवेष्यते। त्वतलावेवेष्येते। परमः पृथुः परमपृथुः परमपृथोर्भावः परमपृथुत्वम्। परम
मपृथुता। एवं तर्हि ज्ञापयत्याचार्यः। उत्तरो भावप्रत्ययः सापेक्षाद् भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। नञ्स
मासादन्यो भाववचनः स्वरोत्तरपदवृद्ध्यर्थमित्युक्तं तदुपपन्नं भवति। एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्ति
र्ज्ञापयति। सर्व एते तद्धिताः सापेक्षाद् भवन्तीति। यदयं नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताद् इत्याह ॥
त्यजिसत्या चतुर्थमित्यादि भवति। यथातथयथापुरयोः पर्यायेणेत्येतत्सूत्रं विवक्षाभेदेन रूपद्वयसिद्धिं मत्वा भाष्यकारेण प्रत्याख्या
स्यते। यदा पूर्वं भावविवक्षा पश्चात्प्रतिषेधविवक्षा तदा अयायातथ्यमयाथापुर्यमिति भवति। पूर्वं तु प्रतिषेधविवक्षायामायथातथ्य
मायथापुर्यमिति भवति। न पटुर्भाव इत्यत्र पतिशब्दः केवलं प्रातिपदिकं न पटत्वन्तमिति यगभावे त्वतलर्थो नञ्समास इति वचनान्नञ्स
मासे कृते त्वतलौ भवतः। न पटोर्भावो न मनुष्यस्य भावो न द्विहायनस्य भाव इत्यादौ पूर्वोक्तज्ञापकान्नञर्थापेक्षत्वेपि पूर्वं प्रत्ययः पश्चा
न्नञ्समासः। अपाटवममानुष्यकमद्वैहायनमिति। अशुचिशब्दात्तु तत्पुरुषादिगन्तादितीष्यत एवाण् अशौचमाशौचमिति। नञः शु
चीश्वरेति पूर्वपदस्य वा वृद्धिरुत्तरपदस्य नित्यम्। न शुक्लस्य भाव इत्यादौ सापेक्षात् ष्यञ्ञुत्पत्तौ चाशौक्ल्यमित्यादि भवति। तदेवं
सूत्रेस्मिन् प्रत्याख्याते लक्ष्यदर्शनवशात्क्वचिद्भावनिषेधयोर्युगपद्विवक्षायां ज्ञापकान्नञर्थापेक्षत्वेपि पूर्वं यथाप्राप्तं भाव
प्रत्ययः पश्चान्नञ्समासः। त्वतलौ तु कृते नञ्समासे क्वचित्पूर्वं भावविवक्षा क्वचित्पूर्वं निषेधविवक्षा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एष्वादि॥ वावचनमिति। वक्ष्यमाणोभिप्रायः। आचार्यदेशीयः परिहरति। वाक्यमपीति। अणसमावेशार्थमिति। यत्रोत्सर्गापवादौ विभाषातत्रापवादेनमुक्तेउत्सर्गोनप्रवर्त्तते। वाक्यानुज्ञानार्थत्वाद्विभाषायाः। लिङ्गं चपारेमध्येषष्ठ्यावा। पीलायावेत्यादिषुविकल्पवचनमस्यार्थस्येत्यणसमावेशार्थमिहवावचनम्॥ गुण॥ चातुर्वर्ण्यादीनामिति। प्रत्ययान्तोच्चारणंभावकर्मसंबन्धनिवृत्त्यर्थमिति स्वार्थएवष्यञ्भवति। चत्वारोवर्णाश्चातुर्वर्ण्यम्। चतुर्वेदमेवचातुर्वैद्यम्। अथवाचतस्रोविद्याअधीतेदिद्यालक्षणकल्पसूत्रान्तादकल्यादेरितिठक्। सर्वसादेर्द्विगोश्चलइतिलुक्। चतुर्विद्यएवचातुर्वैद्यमनुशतिकादेराकृतिगणत्वादुभयपदवृद्धिः। अर्हतोनुम्चेति। अर्हः प्रशंसायामितिशत्रन्तोर्हच्छब्दः पूजाद्यर्थाभिधायी। आर्हन्तीति। षित्वकरणात्स्त्रियामपि

एष्वादिभ्य इमनिज्वा॥ वावचनंकिमर्थम्। वाक्यमपियथास्यात्। नैतदस्तिप्रयोजनम्। प्रकृतामहाविभाषातया वाक्यमपिभविष्यति। इदंतर्हिप्रयोजनम्। त्वतलावपियथास्याताम्। एतदपिनास्तिप्रयोजनम्। आचत्वादित्येतस्माद्यत्नात्त्वतलावपिभविष्यतः। अतउत्तरंपठति। एष्वादिभ्योवावचनमणसमावेशार्थम्। एष्वादिभ्योवावचनंक्रियते। अण्समावेशोयथास्यात्। पार्थवंप्रथिमा॥ गुणवचनब्राह्मणादिभ्यः कर्मणिच॥ ब्राह्मणादिषुचातुर्वर्ण्यादीनामुपसंख्यानम्॥ ब्राह्मणादिषुचातुर्वर्ण्यादीनामुपसंख्यानंकर्त्तव्यम्। चातुर्वर्ण्यम्। चातुर्वैद्यम्। चातुराश्रम्यम्। अर्हतोनुम्च॥ अर्हतोनुम्चष्यञ्चवक्तव्यः। अर्हतोभावः। आर्हन्त्यम्। आर्हन्ती। स्तेनाद्यन्नलोपश्च॥ किमिदंनलोपेवर्णग्रहणमाहोस्वित्संघातग्रहणम्। किंचातः। यदिवर्णग्रहणंस्तेयंनलोपेकृतेअयादेशः प्राप्नोति। अथसंघातग्रहणम्। अन्त्यस्यलोपःकस्मान्नभवति। सिद्धोन्त्यलोपोयस्येत्येव। तत्रारम्भसामर्थ्यात्सर्वस्यभविष्यति॥ हायनान्तयुवादिभ्योण्॥ अण्प्रकरणेश्रोत्रियस्ययलोपश्च॥ अण्प्रकरणेश्रोत्रियस्योपसंख्यानंकर्त्तव्यम्। यलोपश्चवक्तव्यः। श्रोत्रियस्यभावः श्रौत्रम् ॥ इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येपञ्चमस्याध्यायस्यप्रथमेपादेद्वितीयमाह्निकम् ॥

ष्यञन्तः प्रयोगः। तथाचौचितीमैत्रीत्यादिप्रयुज्यते। स्तेना। अयादेशः प्राप्नोतीति। यस्येत्यकारलोपस्यपूर्वविधौस्थानिवद्भावात्। अथेति। नानर्थकेलोन्त्यविधिरित्येषापरिभाषाप्रयोजनाभावान्नाद्दता। आरम्भसामर्थ्यादिति। अलोन्त्यस्ये त्यनुसंहारोबाध्यतइत्यर्थः॥ हायनान्त॥ यलोपश्चेति। यदाछन्दसः श्रोत्रभावोघंश्चप्रत्ययइतिपक्षस्तदायस्यलोपोयदातुवाक्यार्थेपदवचनमितिदर्शनंतदाघशब्देनइयेतिरूपंलस्यते। क्वचित्तुयलोपश्चेतिपाठः ॥ इत्युपाध्यायजैयटपुत्रकैयटकृतेभाष्यप्रदीपेपञ्चमाध्यायस्यप्रथमेपादेद्वितीयमाह्निकंपादश्चसमाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धान्यानाम्॥विभाषा॥नयतामुक्त इति। सहाविभाषयावाक्ये सिद्धे विभाषाग्रहणमुत्सर्गप्राप्त्यर्थमेवेति भावः। उमाभङ्ग्योरि
ति। निमित्ताभावाचास्यां खञो प्राप्तिः। विभाषाग्रहणं तु तिलमाषाणुभ्य एव खञः प्राप्त्यर्थं स्यात्। चमेष्विति। यवाश्चमेमाषाश्चम
इति चमेशब्दस्य पुनः पुनरुच्चारणा चमेशब्देन तदन्तो नुवाका उच्यन्ते। अथवा चमेशब्दस्य चमिति यन्मकारान्तं तदनुकर
णं च मिति। आगन्तुना वाकारेण चमशब्दो भवति। चमेशब्दो विद्यते येष्वनुवाकेषु ते चमाः। अध्यायानुवाकयोर्लुगिति छस्य
लुक्। संबन्धमनुवर्त्तिष्यत इति। धान्यग्रहणे न संबन्धमनुरोत्स्यत इत्यर्थः। अथवा संबध्यद इति संबन्धः धान्यग्रहणसंबन्धम

विभाषा तिलमाषोमाभङ्गाणुभ्यः॥ तिलादिभ्यः खञ्॥ तिलादिभ्यः खञ्वेति वक्तव्यम्। तिल्यम्। तैलीनम्। किम
र्थमिदमुच्यते। नयतामुक्ते धान्यानां भवने क्षेत्रे खञ्वेत्येव सिद्धम्। न सिध्यति। किं कारणम्। उमाभङ्ग्योरधान्यत्वा
त्। धान्यानां भवने क्षेत्रे खञित्युच्यते। न चोमाभङ्गे धान्ये। चमेषु यस्य ठ्यते तद्धान्यम्। न चैते तत्र पठ्येते। तत्तर्हि ख
ञ्ग्रहणं कर्त्तव्यम्। न कर्त्तव्यम्। प्रकृतमनुवर्त्तते। क्व प्रकृतम्। धान्यानां भवने क्षेत्रे खञिति। यदेतदनुवर्त्तते॥ व्रीहि
शाल्योर्ढक्। यवयवकषष्टिकाद्यदिति खञ्वेति खञपि प्राप्नोति। संबन्धमनुवर्त्तिष्यते धान्यानां भवने क्षेत्रे खञ्। व्री
हिशाल्योर्ढग्भवति। धान्यानां भवने क्षेत्रे खञ्। यवयवकषष्टिकाद्यद्भवति। धान्यानां भवने क्षेत्रे खञ्भवति। विभाषा
तिलमाषोमाभङ्गाणुभ्यः। भवने क्षेत्रे खञ्ग्रहणमनुवर्त्तते। धान्यानामिति निवृत्तम्। अथवा मण्डूकप्लुतयोधिका
राः। यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः। अथवा अन्यवचनाच्चकाराकरणात् प्रकृतस्यापवादो विज्ञा
स्यते। यथोत्सर्गेण प्राप्तस्यापवादः। अन्यस्य प्रत्ययस्य वचनाच्चकारस्य चानुकर्षणार्थस्याकरणात् प्रकृतस्य खञः
ढग्यतौ बाधकौ भविष्यतः। यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति ॥

नुवर्त्तिष्यत इत्यर्थः। ततो धान्यसामान्यसंबन्धं खञ्ग्रहणं व्रीह्यादिभिर्वाक्यविशेषैर्न संबध्यते। भवने क्षेत्र इत्येतत्तु प्रत्यये
नाभिधायकेन संबध्यते। अथवेति। यत्रैवार्थित्वं तत्रैवाधिकाराः संबध्यन्ते नान्यत्रेत्यर्थः। यथोत्सर्गेणेति। उत्सर्गस्यान्यत्र च
रितार्थत्वादपवादविषये प्रवृत्तिः संदिग्धेत्यसंदिग्धेनापवादेनासौ बाध्यते। एवं खञ उत्तरार्थायामनुवृत्तौ नान्तरीयको प
स्यानसंभवात्संदिग्धप्रवृत्तित्वादसंदिग्धप्रवृत्तिभ्यां ढग्यद्भ्यां बाधः। धान्यानामित्यनेन प्राप्तस्य खञो ढग्यतावपवादौ न तु त
त्रानुवृत्त्यासंनिहितस्येति साधर्म्यवैधर्म्यसंभवाद्यथोत्सर्गेण प्रसक्तस्येत्युक्तम् ॥ ऽसः ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। विभाषाग्रहणमेवज्ञापयति अनुवर्तमाना अप्यत्राधिकारा यत्र यत्नो विभाषाग्रहणादिकस्तत्रैव भवन्ति नान्यत्रेति। अन्यथा विभाषाग्रहणमनर्थकं स्यात्। अनुवर्तनादेव खञः सिद्धत्वात्। धिनोतेरिति। योगरूढिरियम्। उमाभङ्गयोरपीति भावः। चमकेषु त्वधान्यान्यपिकानि चित्पठ्यन्ते धान्यान्यपिकानि चिन्नपठ्यन्ते। नहि तद्धान्यपरिगणनार्थमिति तत्रापाठादुमाभङ्गयोरधान्यत्वं न भवति। शणसप्तदशानीति। धान्यपरिगणनार्था स्मृतिरियम्॥ यथामुख॥ समस्यान्तलोप इति। समं सर्वं यत्रादर्शादौ प्रतिबिम्बाश्रये दृश्यते स संमुखीन इति प्रयोगदर्शनान्निपातनमाश्रितम्। संशब्दस्य निपातस्यार्थसंगत्यभावादनाश्रयणम्। प्रत्ययसंनियोगेनाकारलोपोऽपि निपात्यमानस्तदभावे न भवति। संमुखीनादर्शादि सादृश्याद्यान्योऽप्यभिमुखावस्थानः संमुखीन उच्यत इत्याहुः॥ अनुपद॥ तत्र न ज्ञायत इति। अयनमय इति गमनमात्रम

अथवा एतज्ज्ञापयति अनुवर्तन्ते नाम विधयो न चानुवर्तनादेव भवन्ति। किं तर्हि। यत्नाद्भवन्ति। अथवा यतासुक्ते धान्यानां भवने क्षेत्रे खञित्येव सिद्धम्। ननु चोक्तं न सिध्यति। किं कारणम्। उमाभङ्गयोरधान्यत्वादिति। नैष दोषः। धिनोतेर्धान्यम्। एते चापि धिनुतः। अथवा शणसप्तदशानि धान्यानि॥ यथामुखसंमुखस्य दर्शनः खः॥ संमुखेति किं निपात्यते। संमुखेति समस्यान्तलोपः। संमुखेति समस्यान्तलोपो निपात्यते। संमुखस्य दर्शनः संमुखीनः॥ अनुपदसर्वान्नायानयं बद्धाभक्षयति नेयेषु॥ अयानयं नेय इत्युच्यते। तत्र न ज्ञायते कः अयः कः अनय इति। अयः प्रदक्षिणम्। अनयः प्रसव्यम् ॥

यशब्देनोच्यते। तत्र प्रतिषेधस्त्वनयशब्देनेति विरुद्धार्थाभिधायिना द्यानयं नेय इत्यसमन्वयशङ्कया प्रश्नः। अयः प्रदक्षिणमिति। एकद्यूतकारापेक्षया शारस्य प्रदक्षिणगमनमयो द्वितीयापेक्षया प्रसव्यं वामापरपर्यायं गमनमनयो रूढिवशादुच्यते। परैरिति। द्वितीयद्यूतकारसंबन्धिभिः शारैः पदानां स्थानानां गृहापरपर्यायाणामनाक्रमणमनध्यासनमित्यर्थः। ससहायस्य शारस्य परैर्नाक्रम्यते पदम्। असहायस्तु शा रेण परकीयेण बाध्यत इति द्यूतव्यवहारः। अयसहितो नय इत्युत्तरपदलोपी समासस्तत्पुरुषः। अथवा अयश्चासावनयोऽयानय इत्येकदेशद्वारेण समुदायस्य कृताकृतादिवद्व्यपदेशात्समानाधिकरणसमासः। समाहारद्वन्द्वो वा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयानयमिति। नयतेर्द्विकर्मकत्वादयानयमित्यप्रधानेपिकर्मणिद्वितीया। प्रधानेतुकृत्यप्रत्ययः। तत्रकेचित्फलकशिरस्यसैवस्वशारवर्गमानस्यायानयीनमित्यभिधानमिच्छन्ति। यस्तुशारएकपार्श्वएवसंचरतितत्रनभवतिप्रत्ययोयोहिशारःपार्श्वात्पार्श्वान्तरमानीयतेसएवायानयंनीयतेऽन्यस्त्वयमेवनीयतेऽनयमेववा। परो॥ परस्योत्ववचनमिति। परशब्दस्यान्तस्यौकारोनिपात्यतइत्यर्थः। ततएङःपदान्तादतीतिपूर्वैकादेशः। शकन्ध्वादिन्यायेनेति। शकन्ध्वादिषुपररूपंवक्तव्यमितिपररूपेणनिर्देशः। परस्येति। अवरशब्दस्यादेरकारस्येत्यर्थः। तत्रादुणः। तत्रकेचित्सामान्येननिपातनमिच्छन्ति। ते

प्रदक्षिणप्रसव्यगामिनांशाराणांयस्मिन्परैःपदानामसमावेशःसोयानयः। अयानयंनेयअयानयीनःशारः॥ परोवरपरंपरपुत्रपौत्रमनुभवति॥ परोवरेतिकिंनिपात्यते। परोवरेपरस्योत्ववचनम्। परोवरेतिपरस्योत्वंनिपात्यते। यद्येवंपरस्योत्ववचनमितिप्राप्नोति। शकन्ध्वादिन्यायेननिर्देशः। अथवानैवंविज्ञायतेपरस्योत्वंनिपात्यतइति। कथंतर्हिपरस्यशब्दरूपस्यादेरुत्वंनिपात्यतइति। परांश्चावरांश्चानुभवतिपरोवरीणः। अथपरंपरेतिकिंनिपात्यते। परपरतराणांपरंपरभावः। परपरतराणांपरंभावोनिपात्यते। परांश्चपरतरांश्चानुभवतिपरंपरीणः॥ समांसमांविजायते॥ इहसमांसमीनागौः। सुपोधातुप्रातिपदिकयोरितिलुक्प्राप्नोति। समांसमांविजायतइतियलोपवचनादलुग्विज्ञानम्। समांसमांविजायतइतियलोपवचनादलुग्विज्ञानंभविष्यति। यदयंयलोपंशास्तितज्ज्ञापयत्याचार्योनात्रलुग्भवतीति। समांसमांविजायतइतियलोपवचनादलुग्विज्ञानमितिचेद् ॥

नखप्रत्ययाभावेपिप्रयोगउपपन्नोभवतिपारोवर्यविदितिपारंपर्यमविच्छिन्नमितिच। अन्येतुपरंपराशब्दमव्युत्पन्नमाचक्षते। तस्मात्स्वार्थेष्यञिपारंपर्यमितिभवति। परोवर्यवदित्यस्यासाधुत्वमाहुः प्रत्ययसंनियोगेनैवनिपातनस्ययुक्तत्वंमन्यमानाः॥ समाम्॥ विजायतेप्रसूयतइत्यर्थः। तत्रसमायांसमायामित्यस्मात्पदसमुदायात्प्रत्ययोवचनाद्भवति। तद्धितान्तत्वात्प्रातिपदिकत्वेसतितस्त्ववयवस्योत्तरपदवत्पूर्वपदेपिसुपोलुक्प्राप्तोयलोपवचनान्नभवति। याटःसुब्भक्तत्वाल्लुक्यैवयलोपेसिद्धेसूत्रेयलोपवचनंनियमार्थंयकारस्यैवलोपोभवतिनतुसर्वस्यप्रत्ययस्येत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तरपदस्यलुग्वचनमिति।यलोपनिपातनात्पूर्वपदवदुत्तरपदेपिलुङ्प्राप्नोतीतिभावः।सिद्धंत्विति।तेनपूर्वपदएवय
लोपनिपातनादामःश्रवणंभवति।उत्तरपदेतुसुब्लुग्भवत्येवेत्यर्थः।अनुत्पत्ताविति।वाक्येपूर्वोत्तरपदयोर्वालोपोवक्तव्यः।ते
नद्वैरूप्यंभवति॥आगवीनः॥किंनिपात्यतइति।काप्रकृतिःकःप्रत्ययःकःप्रत्ययार्थइतिप्रश्नः।गोराङ्पूर्वादिति।योगवा
भृतःआगोःप्रत्यर्पणात्कर्मकरोतिसआगवीनउच्यते।तत्रवृत्तिविषयेगोशब्दोगोप्रत्यर्पणेवर्तते।तत्रआङ्गोशब्दयो
राङ्मर्यादाभिविध्योरित्यव्ययीभावेह्रस्वत्वेचकृतेखोनिपात्यते॥शालीनकौपीने॥किंयःशालायामिति।अस्यांकल्पना
यांशालाकूपशब्दयोर्मुख्यार्थत्वमाश्रितंभवतीतिभावः।शालायामधृष्टइति।अन्यत्रधृष्टःकूपइति।लङ्घनादिकमित्यर्थः।
उत्तरपदलोपइति।लोकप्रसिद्ध्यानुवादेनसाधुत्वान्वाख्यानादधृष्टाकार्यमात्रेशालीनकौपीनशब्दयोःप्रयोगादितिभावः।

उत्तरपदस्यलुग्वचनम्।समांसमांविजायतइतियलोपवचनादलुग्विज्ञानमितिचेदुत्तरपदस्यलुग्वक्त
व्यः।सिद्धंतुपूर्वपदस्ययलोपवचनात्।सिद्धमेतत्।कथम्।पूर्वपदस्ययलोपोवक्तव्यः।अनुत्पत्तावुत्तरपद
स्यवावचनम्।अनुत्पत्तौपूर्वपदस्यउत्तरपदस्ययलोपोवावक्तव्यः।समांसमांविजायते।समायांसमायांविजा
यतइति॥आगवीनः॥आगवीनइतिकिंनिपात्यते।गोराङ्पूर्वादातस्यगोःप्रतिदानात्कारिणिखः।गोराङ्पूर्वा
दातस्यगोःप्रतिदानात्कारिणिखोनिपात्यते।आतस्यगोःप्रतिदानात्कर्मकारीतिआगवीनःकर्मकरः॥शालीन
कौपीनेअधृष्टाकार्ययोः॥किंयःशालायामधृष्टःसशालीनः।कूपेवायदकार्यंतत्कौपीनम्।नेत्याह।उत्तरपदलो
पोत्रद्रष्टव्यः।शालाप्रवेशनमर्हत्यधृष्टःसशालीनः।कूपावतरणमर्हत्यकार्यंतत्कौपीनम्॥व्रातेनजीव
ति॥व्रातेनजीवतीत्युच्यते।किंव्रातंनाम ॥

तत्रवृत्तिविषयेशालाकूपशब्दौतत्कर्मिकायांक्रियायांवर्तेतेइतिगम्यमानार्थत्वादप्रयोगएवोत्तरपदस्यलोपः।शालाप्रवेशन
मिति।अन्यत्रप्रागल्भ्याभावादासितुमशक्यत्वाच्छालामेवप्रवेष्टुमर्हतीत्यर्थः।कूपावतरणमिति।यदकार्यंतत्प्रच्छादनीय
त्वात्कूपावतरणमर्हतीत्यर्थः।अकार्ययोग्यत्वात्पुरुषलिङ्गमपिकौपीनमुच्यते।तत्साहचर्यात्तदाच्छादनमपिकौपीनम्।
अथवाःकार्यशब्दे करोतिःक्रियासामान्यवचनः।तेनादृश्यत्वाल्लज्जाहेतुदर्शनत्वात्पुरुषलिङ्गंकौपीनमस्पृश्यत्वा
त्तदाच्छादनम्॥व्रातेन॥किंव्रातंनामेति।व्रातशब्दस्तावत्संघवचनः।तत्रयःसंघेनजीवतितत्रव्रातीनशब्दोनप्रयु
ज्यते।व्रातकर्मणाजीवतितुप्रयुज्यते।व्रातकर्मणिचव्रातीयशब्देनभाव्यमितिप्रश्नः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानाजातीया इति। एककजातीयक्षत्रियादिनिराकरणम्। अनियतवृत्तय इति। नियतवृत्त्याऽऽयुधजीविसंघनिषेधः। उत्से
धजीविन इति। उत्सेधः शरीरं तदायासेन भारवहनादिना जीवन्तीनतु बुद्धिवैभवेनेत्यर्थः। व्रातानां कर्मेत्यत एव निपात
नाच्छं बाधित्वाऽण् भवति। तेषामेवान्यतमो व्रातीन उच्यते। यस्त्वन्यस्तत्कर्मणा जीवति स नोच्यते। हैयंगवीनम्॥ किं निपात्य
त इति। प्रकृतिसंदेहात्प्रश्नः। ह्योगोदोहस्येति। ह्यःशब्दस्य गोदोहशब्देन सुप्सुपेति समासः। दुह्यत इति दोहः क्षीरमुच्यते।
ह्यःशब्देन कालप्रत्यासत्तिः प्रतिपाद्यते। तेनाविकृतरूपं गन्धमेव घृतं हैयंगवीनमुच्यत इत्याहुः॥ पक्षा॥ मूल इति वक्त

नानाजातीया अनियतवृत्तयः उत्सेधजीविनः संघाः व्राताः। तेषां कर्म व्रातम्। व्रातकर्मणा जीवतीति व्राती
नः॥ हैयंगवीनं संज्ञायाम्॥ हैयंगवीनमिति किं निपात्यते। ह्योगोदोहस्य हियंग्वादेशः संज्ञायां तस्य विकारे॥
ह्योगोदोहस्य हियंग्वादेशो निपात्यते संज्ञायां विषये तस्य विकार इत्येतस्मिन्नर्थे। ह्योगोदोहस्य विकारो है
यंगवीनं घृतम्। संज्ञायामिति किमर्थम्। ह्योगोदोहस्य विकार उदश्वित्त्वमा भूदिति॥ पक्षात्तिः॥ मूल इति व
क्तव्यम्। पक्षस्य मूलं पक्षतिः। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। मूल इति वर्तते। क्व प्रकृतम्। तस्य पाकमूले पी
ल्वादिकर्णादिभ्यः कुणब्जाहचाविति। यदि तदनुवर्तते। पाकेऽपि प्राप्नोति। मूल इत्यनुवर्तते। पाक इति नि
वृत्तम्। कथं पुनरेकयोगनिर्दिष्टयोरेकदेशोऽनुवर्तते एकदेशो वा निवर्तते। एकयोगनिर्दिष्टानामप्येकदे
शानुवृत्तिर्भवति। तद्यथा। संख्याव्ययादेर्ङीप्। दामहायनान्ताच्च। संख्यादेरित्यनुवर्तते अव्ययादेरिति नि
वृत्तम्॥ विनञ्भ्यां नानाञौ नसह॥ इह नानेति सहार्थो गम्येत। द्वौ हि प्रतिषेधौ प्रकृतमर्थं गमयतः। न न
सह सहैवेति। नैष दोषः ॥

व्यमिति। अन्यथाऽनिर्दिष्टार्थत्वात्स्वार्थे प्रत्ययप्रसङ्गः। कथं पुनरिति। एकस्मिन्नर्थे योगः संबन्धस्तेन निर्दिष्टयोः समुदायाभि
धायि द्वन्द्वनिर्दिष्टयोरित्यर्थः। द्वन्द्वस्य तदर्थस्य चैकत्वादेकदेशानुवृत्तिर्न संभवतीति भावः। एकसूत्रनिर्दिष्टानां त्वेकदेशानु
वृत्तिर्दृश्यते। एकयोगनिर्दिष्टानामपीति। अर्थाधिकारपक्षेऽर्थस्यैकत्वाद्विच्छेदाभावान्नस्यादेकदेशानुवृत्तिः। शब्दाधिकारप
क्षे तु यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञातं तस्य ग्रहणं शब्दान्तरसंनिधानं योगान्तरे प्रतीयत इति दोषाभावः॥ विनञ्॥ सहार्थो गम्येते
ति। नसहेति प्रत्ययार्थनिर्देशं मन्यते। प्रकृत्यर्थेन प्रत्ययार्थो विशेषणीयः। ततः प्रतिषेधस्य प्रतिषेधाद्विधिना भाव्यमिति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नायमिति। लोकप्रसिद्धार्थानां शब्दानामिह साधुत्वान्वाख्यानात्। लोके च नानाशब्दस्य पृथग्भावाभिधायित्वान्न सहेति प्रकृत्य र्थनिर्देशः। यद्येवं सहेत्येव प्रत्ययार्थो निर्देश्यः। विनञोः प्रतिषेधार्थत्वात्। द्विगार्द्धभरथिकइत्यादौ विशब्दस्य गुणप्रतिषेध वृत्तित्वदर्शनात्। नैतदस्ति। क्रियावाचिनोऽपि विशब्दात् सहार्थे प्रत्ययो विज्ञायेत। विगतौ सह निकृतौ सहेति। इह तु विना देवदत्तेन नाना देवदत्तेनेत्यस्य सत्वभूतस्याप्यर्थस्य व्यतिरेकहेतुत्वं भवति यथा मातुः स्मरतीति। वेः शा॥ कस्मिन्नर्थे शालजादय इति। वक्ष्यमाणप्रत्ययापेक्षं बहुवचनम् असहार्थस्य सर्वत्रासंभवादर्थानुपादानाच्च प्रश्नः। विशाले इति। नानादेशगमनादस्यत्रासहार्थत्वमिति भावः। किं वक्तव्यमिति। शब्दान्तरवाच्यक्रियाविशेषस्य द्योतका उपसर्गा वाचकाभावे द्योत्यर्था

नायं प्रत्ययार्थः। किं तर्हि। प्रकृतिविशेषणमेतत्। विनञ्भ्यामसहवाचिभ्यां नानाञौ भवतः। कस्मिन्नर्थे। स्वार्थ इति॥ वेः शालच्छङ्कटचौ॥ कस्मिन्नर्थे शालजादयो भवन्ति। न सह इत्यनुवर्तते। भवेत्सिद्धम्। विशाले शृङ्गे। विशङ्कटे शृङ्गे इति। इह खलु संगतोऽर्थो गम्यते संकटमिति। प्रकटमिति प्रगतोऽर्थो गम्यते। उत्कटमिति उद्गतोऽर्थो गम्यते। एवं तर्हि साधने शालजादयो भवन्ति। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। उपसर्गेभ्य इमे विधीयन्ते। उपसर्गाश्च पुनरेवमात्मका यत्र कश्चित्क्रियावाची शब्दः प्रयुज्यते तत्र क्रियाविशेषमाहुः। यत्र हि न प्रयुज्यते ससाधनां तत्र क्रियामाहुः। एते उपसर्गेभ्यो विधीयमानाः ससाधनायां क्रियायां भविष्यन्ति। एवमपि भवेत्सिद्धं विशाले शृङ्गे इति। इदं तु न सिध्यति। विशालो विशङ्कटः। एतदपि सिद्धम्। कथम्। अकारो मत्वर्थीयः। विशाले अस्य स्तः विशालः। विशङ्कटे अस्य स्तः विशङ्कटः॥

भावादनर्थका एवेति भावः। ससाधनामिति। क्रियोपसर्जनं साधनमाहुरित्यर्थः। नियतविषयाः शब्दानां शक्तयो दृश्यन्ते यथा द्विदशा इत्यादौ कृत्वोऽर्थाद्यभिधानमिति भावः। उपसर्गेभ्य इति। अन्यत्रोपसर्गसंज्ञादर्शनाद्विषयान्तरेऽपि योग्यतामात्राश्रयं प्रादीनामिदमभिधानम्। विशाले इति। शृंगयोरेव विगमनक्रियाकर्तृत्वं न तु गोरिति भावः। विशाले अस्येति। मतुप्प्रत्ययस्तु गव्यनभिधानान्न भवति। विशालवानित्युक्तेऽपि विशालगवयुक्तस्य गोष्ठादेरवगमो न तु गोरित्यर्थः। व्युत्पत्त्यनुसारेण चेदमुच्यते। गुणशब्दास्तु विशालादयः साधुत्वान्वाख्यानाय तु कंचिदुपायमाश्रित्य व्युत्पत्तिः क्रियते। यथा प्रतिलोमोऽनुलोम इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ संप्रोद्०॥अलाबूतिलोमाभङ्गाभ्य ओषधित्वादवयवे।लाबूशब्दादोरञित्यञिप्राप्तेतिलोमाशब्दाभ्यांघृतादित्वादन्तोदा ५१३
३५ त्तत्वादनुदात्तादेश्चेत्यञिप्राप्तेभङ्गायास्तृणधान्यानांचद्व्यषामित्याद्युदात्तत्वादणिप्राप्तेरजसिकटच्विधिः।गोष्ठादयइ
ति।प्रयोगसमवायिप्रत्ययरूपंनिर्दिष्टम्।चकारस्तुस्वरार्थोनुबन्धआसङ्ज्यः।तथाहि।समासाश्रयेणप्रत्ययाःप्रत्याख्या
यन्ते।तत्रचित्स्वरसमासस्वरयोरभेदादेकफलत्वमारम्भप्रत्याख्यानयोरुपपद्यते।सर्वत्रादिशब्दःप्रकारे।गवांस्थानमि
ति।तस्येदमित्यत्रार्थेसर्वत्रगोरजादिप्रत्ययप्रसङ्गेयदितियतिप्राप्तेगोष्ठच्प्रत्ययः।अविकटइति।अवीनांसमूहइत्यणि
प्राप्तेकटच्।अवीनांविस्तारइत्यर्थेपटच्।अप्रसृतेसमूहेअविकटःप्रसृतेत्वविपटः।उष्ट्रगोयुगमिति।द्वावुष्ट्रावित्यत्रार्थेगो

संप्रोदश्चकटच्॥कठच्प्रकरणेअलाबूतिलोमाभ्योरजस्युपसंख्यानम्।कटच्प्रकरणेअलाबूतिलोमा
भ्योरजस्युपसंख्यानंकर्तव्यम्।अलाबूकटः।तिलकटः।उमाकटः॥भङ्गायाश्च॥भङ्गायाश्चेतिवक्तव्यम्।भ
ङ्गाकटः॥गोष्ठादयःस्थानादिषुपशुनामादिभ्यः॥गोष्ठजादयःप्रत्ययाःस्थानादिष्वर्थेषुपशुनामादिभ्योवक्त
व्याः।गोगोष्ठम्।अविगोष्ठम्।संघेकटज्वक्तव्यः।अविकटः।उष्ट्रकटः॥विस्तारेपटच्चवक्तव्यः।अविपटः।उ
ष्ट्रपटः॥द्वित्वेगोयुगच्॥गोयुगच्शब्दश्चप्रत्ययोवक्तव्यः।उष्ट्रगोयुगम्।खरगोयुगम्।स्नेहनेतैलच्शब्द
श्चप्रत्ययोवक्तव्यः।इङ्गुदतैलम्।सर्षपतैलम्।संभवनेक्षेत्रेशाकटशब्दश्चप्रत्ययोवक्तव्यः।इक्षुशाकट
म्।मूलशाकटम्।शाकिनशब्दश्चप्रत्ययोवक्तव्यः।इक्षुशाकिनम्।मूलशाकिनम्।उपमानाद्वासिद्धम्।उप
मानाद्वासिद्धमेतत्।गवांस्थानंगोष्ठम्।यथागवांतद्वदुष्ट्राणांकटज्नवक्तव्यइति ॥

युगच्प्रत्ययः।अन्येत्वाहुः।उष्ट्रस्यग्रीवाबन्धनेयानाङ्गेगोयुगेच्प्रत्ययः।इङ्गुदतैलमिति।लघावन्तइत्याद्युदात्तत्वात्त
स्यविकारइत्यण्प्राप्तः।सर्षपशब्दस्यसप्तादीनांशाकानामित्याद्युदात्तत्वेप्राप्तेपरत्वाद्यद्द्वितीयंप्राग्गीषादित्यनुव
र्तमानेयान्तानांचगुर्वादीनामितिमध्योदात्तत्वंभवति।ततोनुदात्तत्वादिञ्प्राप्तः।इक्षुशाकटमिति।इक्षूणांभवनंक्षेत्र
मित्यर्थेशाकटशाकिनौ।गवांस्थानमिति।गावस्तिष्ठन्तियस्मिन्नितिघञर्थेकविधानमितिकः।तत्रगोष्ठसाधर्म्यादु
ष्ट्रादिस्थानमपिगोष्ठशब्देनोच्यते।तत्रविशेषप्रतिपत्त्यर्थमुष्ट्रादीनामन्यतमेनविशेष्यते।मुख्यगोष्ठप्रतिपत्तयेचगो रामः
भिरपिगोष्ठस्यविशेषणाद्गोगोष्ठमित्यपिभवति ॥ ३५

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानाद्रव्याणामिति। रज्जुवीरणादीनामित्यर्थः। तस्माधर्म्यादन्योपि संघातः कटशब्दाभिधेयोऽविभिर्विशेषितोऽविकट इत्युच्यते। यथा पट इति। विस्तारसामान्यादन्योपि संघातः पटशब्दाभिधेयोऽविभिर्विशेष्यते अविपट इति। गोयुगमिति। युगशब्देन द्वित्वमुच्यते ग्रीवाबन्धनं काष्ठम्। तन्नयानाङ्गे युगः पुंस्युक्त इति पुंस्त्वं प्रायिकं बोध्यम्। प्रकृत्यन्तरमिति। अव्युत्पन्नं विशिष्टस्नेहद्रव्यवाचीत्यर्थः। तैलमित्यपीति। अपिशब्दात्तैलमपीत्यर्थः। यदितु तैलच्प्रत्ययो विधीयते तदा विशेषविहितेन तैलचा तिलशब्दादञ्बाध्येत। ततश्च तैलमिति न सिध्येत्। यदात्वव्युत्पन्न एव तैलशब्दो विकारविशेषवाची तदा तिलानां तैलमिति समासे कृते तिलतैलमिति भवति। तिलानां विकार इत्यत्राञि तैलमिति। उपमानाश्रयेणा

३ क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी॥

यथा नानाद्रव्याणां संघातः कटः। एवमवयः संहता अविकटः। पटच्च न वक्तव्य इति। यथा पटः प्रस्तीर्णः। एवमवयः प्रस्तीर्णाः अविपटः। गोयुगच् शब्दश्च प्रत्ययार्थो न वक्तव्य इति। गोर्युगं गोयुगम्। यथा गोस्तद्द्वदुष्ट्रस्य उष्ट्रगोयुगम्। तैलशब्दश्च प्रत्ययो न वक्तव्य इति। प्रकृत्यन्तरं तैलशब्दो विकारे वर्तते। एवं च कृत्वा तिलतैलमित्यपि सिद्धं भवति। शाकटशब्दश्च प्रत्ययो वक्तव्य एव। शाकिनशब्दश्च प्रत्ययो वक्तव्य एव॥ इनच्पिटच्चिकचि च॥ इनच्पिटच्काः चिकचिचिकादेशाश्च॥ इनच्पिटच्काः प्रत्यया वक्तव्याः। चिक चिचिकू इत्येते च प्रकृत्यादेशा वक्तव्याः। चिकिनः। चिपिटः। चिक्कः॥ क्लिन्नस्य चिल्पिल् इत्येतौ प्रकृत्यादेशौ वक्तव्यौ लश्च प्रत्ययः अस्य चक्षुषी इत्यस्मिन्नर्थे। क्लिन्ने अस्य चक्षुषी चिल्लः। पिल्लः। चुल्च वक्तव्यः। चुल्लः। यद्यस्येत्युच्यते। चिल्ले चक्षुषी इति न सिध्यति। तस्मान्नार्थोऽस्य ग्रहणेन। कथं चिल्लः पिल्ल इति॥

पिङ्ङ्गुद इतैलमित्यादि सिध्यति॥ तिलविकारो मुख्यं तैलं तस्मात्दृश्यादन्यदपि तैलमिङ्गुदादिभिर्विशेष्यते। गौणसंभवे च मुख्यं तैलं प्रतिपादनाय तिलैर्विशेषणात्तिलतैलमित्यपि भवतीति केचिदाहुः। व्युत्पत्त्युपाय एव तिलानां विकारस्तैलमिति रूढिशब्दश्चायं स्नेहद्रव्यवृत्तिः। तथा च सादृश्यानुकरणमन्तरेणेङ्गुदतैलादयः शब्दाः प्रयुज्यन्ते। यथा प्रकृष्टे वीणायां प्रवीण इति व्युत्पत्तिमात्रं क्रियते कौशलं तस्य प्रवृत्तिनिमित्तम्। तेन वीणायां प्रवीण इत्यपि भवति। इनच्॥ सूत्रेति शब्दस्य द्वावादेशौ प्रत्ययौ विहितावित्यादेशत्रयप्रत्ययजप्रविधानाय वार्त्तिकम्। तस्मान्नार्थ इति। क्लिन्नशब्दाच्चक्षुर्विशेषार्थाभिधायिनः स्वार्थे लो विधेयः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकारोमत्वर्थीयइति। अर्शआदिषु स्वाङ्गाद्धीनादिति पाठात्। मतुप्त्वनभिधानान्नभवति॥ प्रमाणे॥ किमयमिति। सप्तमीनिर्दिष्टस्येह शास्त्रे प्रकृत्यर्थप्रत्ययार्थत्वदर्शनादुभयसंभवाच्च प्रश्नः। अस्येत्यनुवर्तनादिति। नन्वेवमपि प्रमेयवाचिनः प्रमाणे प्रत्ययप्रसङ्गः। उदकं प्रमेयमस्योरोरिति। नैष दोषः। अनियतप्रमेयविषयत्वात्। प्रमाणानामेकेन प्रमेयेणाविशेषेण दुःसंबन्धत्वात् प्रमेयस्य तु नियतप्रमाणप्रतिपादनाय ऊरुमात्रादयः शब्दा लोके प्रयुज्यमानाः साधुत्वेनान्वाख्यायन्ते। प्रथमश्चेति। यद्यायामवाच्येव प्रमाणशब्दः सूत्र उपात्तः। तदोर्ध्वमाने प्राप्तौ द्वयसज्दघ्नचौ प्रमाणादपकृष्य विधीयेते। अथ तु परिच्छेदमात्रं प्रमाणमिह गृह्यते। तदोर्ध्वमान एव यथा स्यातामिति नियमार्थं वचनम्। प्रमाणे लद्इति।

अकारो मत्वर्थीयः। चिल्ले अस्य स्तः चिल्लः। पिल्ले अस्य स्तः पिल्ल इति॥ प्रमाणे द्वयसज्दघ्नञ्मात्रचः॥ प्रमाण इति किमयं प्रत्ययार्थः प्रमाणे प्रत्ययार्थ इति। प्रमाण इति नायं प्रत्ययार्थः। क्व तर्हि प्रत्यया भवन्ति। तद्धिति। कुत एतत्। अस्येत्यनुवर्तनात्। क्व प्रकृतम्। तदस्य संजातं तारकादिभ्य इतजिति। प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम। ऊरुद्वयसम्। ऊरुदघ्नम्॥ प्रमाणे लः॥ प्रमाणे लो वक्तव्यः। शमो दिष्टिर्वितस्तिः। द्विगोर्नित्यं लो वक्तव्यः। द्विशमम्। त्रिशमम्। द्विदिष्टिः। त्रिदिष्टिः। द्विवितस्तिः। त्रिवितस्तिः। किमर्थमिदमुच्यते। संशये श्राविणं वक्ष्यति। तस्यायं पुरस्तादपकर्षः। डट् स्तोमे वक्तव्यः। पञ्चदशः स्तोमः। शतृशानोर्डिनिः। शतशानोर्डिनिर्वक्तव्यः। त्रिंशिनो मासाः। पञ्चदशिनोर्द्धमासाः॥

प्रमाणशब्दा लोके ये प्रसिद्धा दिष्टिहस्तादयस्तेभ्यः परस्य प्रत्ययस्य लुग्भवति। स च संभवान्मात्रच एव। इतरयोरूर्ध्वमान एव हि विधानम्। मात्रचस्त्वविशेषेण परिच्छेदकमात्रवाचिनः स्मरणात्। द्विगोर्नित्यमिति। तदन्तविध्यभावाल्लुगप्राप्तिः। किमर्थमिति। नित्यग्रहणमिति प्रश्नः। न हि विकल्पः प्रकृत इति भावः। श्राविणमिति। श्रवणं श्रावः। स यस्यास्तीति श्रावी। मात्रचः प्रत्ययः। तस्य परत्वाच्छ्रवणे प्राप्ते नित्यग्रहणाद्बाधकबाधनार्थाल्लुगेव भवति। द्वौ शमौ प्रमाणमस्य स्यात्। न वा द्विशममिति। प्रकरणादिवशाच्च निश्चयसंशयविषयप्रयोगावधारणम्। डट् स्तोम इति। अत्रायामस्य प्रमाणस्यासंभवात्परिच्छेदोपाधिकायाः संख्यायाः स्तोमे डट् प्रत्ययः। पञ्चदश मन्त्राः परिमाणमस्य स्तोमस्य पञ्चदशः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंशिनइति। विंशतिशब्दात्संख्यामात्रवाचिनः संख्येयेप्रमेयेडिनिः। तिविंशतेर्डितीतितिलोपस्तस्ययस्येतिचेत्यकारलो पेकृतेल्येःसिद्धवदत्राभादित्यसिद्धत्वंनभवति। भाष्यकारवचनात्तस्यसिद्धत्वात्। तदस्यपरिमाणंसंख्यायाः संज्ञे स्त्रस्तो मेडविधिः। पञ्चदशाद्यर्थमित्युक्तेपिस्त्रियांडीबर्थमिहडड्विधीयतेस्तोमसाहचर्याच्चस्त्रियांप्रयोगः सप्तदशीरात्रिरिति। तत्रतुडविधानंटाबर्थंयदिप्रयोगोदृश्यते। तदृर्शनेतुप्रपञ्चार्थम्। डिनेः सामान्यविधानात्तत्रशन्शतोर्डिनिः छन्दसि वक्तव्यइतिवचनंप्रपञ्चार्थमेव। प्रमाणपरिमाणाभ्यामिति। रूढिशब्दौभेदेनोपात्तौ। शममात्रमिति। शमः प्रमाणमस्य स्यान्नवादिष्टिः प्रमाणमस्यस्यान्नवाकुडवंप्रमाणमस्यस्यान्नवेत्यत्रार्थेमात्रच्। पञ्चमात्राइति। पञ्चस्युर्नवेतिसंशय्य मानार्थवाचिनः स्वार्थेप्रत्ययः। अथवावृत्तिविषयेद्व्येकयोरित्यादिवत्संख्यामात्रवाचिनः षष्ठ्यर्थेप्रत्ययः। पञ्च[illegible]लसं

विंशतेश्च। विंशतेश्चेतिवक्तव्यम्। विंशिनोङ्गिरसः। प्रमाणपरिणाभ्यांसंख्यायाश्चापिसंशयेमात्रज्वक्तव्यः। शममात्रम्। दिष्टिमात्रम्। कुडवमात्रम्। पञ्चमात्राः। दशमात्राः। वत्वन्तात्स्वार्थेद्वयसज्मात्रचौबहुलम्। वत्व न्तात्स्वार्थेद्वयसज्मात्रचौबहुलंवक्तव्यौ। तावदेवतावद्द्वयसम्। तावन्मात्रम्। यावदेवयावद्द्वयसम्। याव न्मात्रम्॥ यत्तदेतेभ्यः परिमाणेवतुप्॥ किमर्थंपरिमाणइत्युच्यते। नप्रमाणइतिवर्तते। एवंतर्हिसिद्धेसति यत्परिमाणग्रहणंकरोतितज्ज्ञापयत्याचार्यः। अन्यत्प्रमाणमन्यत्परिमाणमिति। डावतावर्थवैशेष्यान्नि र्देशः पृथगुच्यते। नैतज्ज्ञापकसाध्यमन्यत्प्रमाणमन्यत्परिमाणमिति ॥

ख्याप्रमाणमेषांस्यान्नवेतिसंशय्यपञ्चमात्राः। तावदेवेति। तत्परिमाणंयस्यधान्यादेः तत्तावद्धान्यादिकंततः स्वार्थेप्रत्य यः। उत्तरसूत्रेतुभावः सिद्धश्चडावतोरित्यर्थान्तरेवत्वन्तान्मात्रादिप्रतिपादनम्॥ यत्तदे॥ किमर्थमिति। प्रमाणपरिमा णशब्दयोरेकार्थत्वंमत्वाप्रश्नः। नप्रमाणइतिवर्ततइति। काक्वानञः प्रयोगाद्वर्ततएवेत्यर्थः। अथवाऽनेकार्थत्वान्निपा तानांननुशब्दस्यार्थेनशब्दोवर्तते। आचार्यदेशीयआह। एवंतर्हीति। आचार्यआह। डावतावििति। पूर्वाचार्यप्रक्रियापे क्षोनिर्देशः। इदंतुवतुपंविधायासर्वनाम्नइत्यात्वंविहितम्। पूर्वाचार्यास्तुडावतुंविदधिरे। अर्थवैशेष्यादिति। विशिष्य तइतिविशेषः विशेषस्यभावोवैशेष्यमर्थस्यवैशेष्यमर्थवैशेष्यमर्थभेदस्तस्मात्परिमाणशब्दस्यपृथङ्निर्देशः क्रियते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तोत्रेति। आयामस्तु प्रमाणं स्यात्परिमाणं तु सर्वतइति। मात्राद्यप्रतिघातायेति। यदि प्रमाणइत्यनुवृत्त्या प्रमाणोपाधिकेभ्यो यदादिभ्यो वतुब्विधीयते तदासौ विशेषविहितत्वात्सामान्यविहितान्मात्रादीन्बाधेत परिमाणग्रहणे तु सति भिन्नोपाधिविषयत्वाद्बाध्यबाधकभावाभावः। तेन तन्मात्रं यन्मात्रमित्यादि प्रमाणोपाधौ प्रकृत्यर्थे सिद्धं भवतीति। भावः सिद्धश्चेति। तत्परिमाणमस्य धान्यस्य तत्तावद्धान्यं राशीकृतं तावत्प्रमाणमस्य कुड्यादेस्तावन्मात्रम्। यादृग्राशीकृतस्य धान्यस्य दैर्घ्यं तादृगस्यापीत्यर्थः। एकविषयत्वे तु वतुपै वोक्तत्वाद्विशिष्टस्य प्रमेयस्य तदन्तान्मात्राद्योनस्युः। यस्य हि तावत्प्रमाणं तस्य तत्प्रमाणमिति तावच्छब्दस्यैव तत्रापि प्रयोगः स्यात्। सादृश्य इति। विषयनिर्देशोयं सदृश

उक्तोत्र विशेषः मात्राद्यप्रतिघाताय। एवं च कृत्वा मात्रादीनां प्रतिघातो न भवति॥ भावः सिद्धश्च डावतोः॥ डावत्वन्ताच्च मात्रजादीनां भावः सिद्धो भवति। वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम्। वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानं कर्तव्यम्। नत्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते। त्वावतः पुरूवसो। यज्ञं विप्रस्य मावतः। त्वत्सदृशस्य मत्सदृशस्येति। किमिदंभ्यां वो घः॥ केन विहितस्य किमिदंभ्यां वतुपो वो घत्वमुच्यते। एतदेव ज्ञापयति भवति किमिदंभ्यां वतुबिति। यद्ययं किमिदंभ्यामुत्तरस्य वतुपो वो घत्वं शास्ति। अथवा योगविभागः करिष्यते। किमिदंभ्यां वतुब्भवति। ततो वो घइति॥ किमः संख्यापरिमाणे डति च॥ बहुष्विति वक्तव्यम्। इह माभूत्। कियान्। कियन्तौ। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। किमित्येतत्परिप्रश्ने वर्तते। परिप्रश्नश्चानिर्ज्ञाते ॥

वस्तुप्रत्ययार्थः। किमिदम्। एतदेवेति। आदेशविधानान्यथानुपपत्त्या प्रत्ययोनुमीयते॥ किमः॥ बहुष्विति वक्तव्यमिति। का संख्या परिमाणमस्य वर्गस्येति यदा वर्गावयवगतसंख्याविशेषविषयः प्रश्नस्तदा प्रत्ययः प्राप्नोति कति वर्ग इति। तदा पञ्चक इत्याद्युत्तरेण भाव्यम्। तस्मादत्र प्रत्ययनिवृत्तये बहुष्विति वक्तव्यमिति भावः। किमित्येतदिति। इहास्येत्यधिकाराद्यदीयासंख्या पृच्छ्यते तत्रैव प्रत्ययेनोत्पत्तव्यम्। तत्र यदि वर्गावयवगतसंख्याविशेषप्रश्नस्तदावयवेष्वेव प्रत्ययेन भाव्यं न तु व्यवहितसंख्यासंबन्धे वर्गे ततः कति गावोऽस्मिन्वर्ग इति भवति कति गावो यं वर्ग इति च संघसंघिनोरभेदविवक्षायाम्। कियानिति तु परिमाणोपाधौ प्रकृत्यर्थे प्रयुज्यते। संख्याप्रश्ने तु कियन्त इति बहुवचनान्तस्यैव प्रयोगः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संख्यायाः॥ बहवोऽवयवा इति। उत्कृष्टभेदस्य संख्यालक्षणस्यार्थस्यैकत्वादीन्विशेषानवयवान्मत्वा प्रश्नः। अवयवे या संख्येति। अवयवे यः संख्यावाची शब्दो वर्त्तते तस्मादस्येत्यधिकाराद्वयविनिप्रत्ययो भवति। न च सामान्यविशेषयोरवयवावयविभावः संभवतीति भावः। बहुशब्द इति। बहुशब्दवाच्योऽर्थ इत्यर्थः। अथैवं कल्प्यते बहव एकत्वगुणा अवयवा अस्या विंशतिसंख्यायास्तत्समुदायस्वरूपायाः सा बहुतयी विंशतिरिति। तथापि प्रत्ययार्थस्य प्रकृत्यर्थो विशेषणमव्यभिचारादनुपपन्नम्। संख्येत्येवेति। संख्याशब्दवाच्या संख्यावयविनीत्यर्थः। नैषा संख्येति। संख्याशब्देन संख्याविशेषो नाभिधीयत इत्यर्थः। संज्ञैषेति। एकत्वादीनां संख्यात्वजातियुक्तानां संख्येत्येषा संज्ञा। तत्र संख्याशब्दप्रतिपाद्यस्य सामान्यविशेषस्याऽवयवित्वासंभव इत्युक्तमेतत्। बहुतयं यूथमित्येतदवयवावयविभेदविवक्षायां भवति। बहुतयं रूपमित्येत

अनिर्ज्ञातं च बहुषु। द्व्येकयोः पुनर्निर्ज्ञातं निर्ज्ञातत्वाद् द्व्येकयोः परिप्रश्नो न। परिप्रश्नाभावात् किमेवतावन्नास्ति कुतः प्रत्ययः॥ संख्याया अवयवे तयप्॥ इह कस्मान्न भवति बहवोऽवयवा अस्याः संख्याया इति। अवयवे या संख्येत्युच्यते। न च काचित्संख्यास्ति यस्या बहुशब्दोऽवयवः स्यात्। ननु चेयमस्ति। संख्येत्येव। नैषा संख्या। संज्ञैषा। अवयवविधानेऽवयविनि प्रत्ययः। अवयवविधानेऽवयविनि प्रत्ययो भवतीति वक्तव्यम्। इह माभूत्। पञ्चावयवा दशावयवा इति। अथवाऽवयविनीत्युच्यमानेऽवयवस्वामिनि कस्मान्न भवति। पञ्च पश्वऽवयवा देवदत्तस्येति। अवयवशब्दोऽयं गुणशब्दः। अस्येति च वर्त्तते। तेन यं प्रत्यवयवो गुणस्तस्मिन्नवयविनि प्रत्ययेन भवितव्यम् ॥

श्चित्रस्य रूपस्यावयवित्वविवक्षायां भवति। यदा तु रूपसामान्यं विवक्ष्यते शुक्लादिविशेषविषयं तदा सामान्यविशेषयोरवयवावयविभावाभावान्न भवति। अवयविनीति। स्वार्थे प्रत्ययो माभूदित्येवमर्थम् अवयविनीति वक्तव्यम्। अवयवस्वामिनीति। अवयवाः सन्त्यस्येति व्युत्पत्त्या स्वामिनोऽप्यवयविशब्देनाभिधानात्तत्रापि प्रत्ययेन भाव्यमिति मत्वा प्रश्नः। अवयवशब्दोऽयमिति। संबन्धिशब्दा नियत एव संबन्धिनि मत्वर्थीयो भवति। यथा पितृमानिति पुत्र एवाभिधीयते। पुत्रवानिति पितैव तथेहाप्यवयविशब्देनावयवारब्ध एवोच्यते न तु स्वामीत्यर्थः। अस्येति च वर्त्तत इति। अत इनिठनावित्यत्र तदस्यास्त्यस्मिन्निति मतुबित्यतोऽस्येति वर्त्तते। सप्तम्यर्थे त्विनिठनोरभावः। सप्तम्यां च नतौ स्मृताविति वचनात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्येतिवर्ततइति।तदस्यसंजातमित्यतः॥उभा॥उभयोमणिरित्यवयविनोऽवयवद्वित्वनिमित्तोव्यपदेशः।उभौपीतलो
हितावयवौयस्यसउभयः।उभयेदेवमनुष्याइति।वर्गद्वयापेक्षमतिरोहितभेदानांवर्गिणामभिधानम्।किमर्थमिति।कि
मप्राप्तमादेरुदात्तत्वंविधातुमुदात्तवचनमुतामन्त्रितत्वस्वरबाधनार्थमन्तस्यैवोदात्तत्वंविधातुमितिप्रश्नः।उदात्तइति।
आदेरितिभावः।स्थानिवद्भावात्पित्वादनुदात्तत्वंप्राप्तंबाधित्वाचित्स्वरेप्राप्तेआदेरुदात्तत्वंविधीयते।प्रत्ययस्वरेणापीति।
स्थानिवद्भावात्प्रत्ययत्वाच्चित्स्वरंपूर्वपक्षवादित्वान्नपश्यति।सर्वदर्शित्वेपूर्वपक्षमेवनविदधीत।कृतएतदिति।स्वरान्त
रबाधनार्थमन्तस्यैवोदात्तमस्त्वितिमन्यते।हेउभयेत्यामन्त्रितायुदात्तत्वप्रसङ्गः।उदात्तेति।पुरस्तादपवादाअनन्तरान्विधी

कंचप्रत्यवयवोगुणः।समुदायम्।यद्येवमवयविनीत्यपि नवक्तव्यम्।अवयवेकस्मान्नभवति।अस्ये
तिवर्तते॥उभादुदात्तोनित्यम्॥किमर्थमुदात्तइत्युच्यते।उदात्तोयथास्यात्।नैतदस्तिप्रयोजनम्।प्रत्ययस्वरे
णाप्येषस्वरःसिद्धः।नसिध्यति।चितोन्तउदात्तोभवतीतिअन्तोदात्तत्वंप्रसज्येत।अथउदात्तइत्युच्यमानेकुत
एतदादेरुदात्तत्वंभविष्यतिनपुनरन्तस्येति।उदात्तवचनसामर्थ्याद्यस्याप्राप्तःस्वरस्तस्यभविष्यति।कस्य
चाप्राप्तः।आदेः।अन्तस्यपुनश्चित्स्वरेणैवसिद्धम्।तदस्मिन्नधिकमितिदशान्ताड्डः॥इहकस्मान्नभवति।एकाद
शमाषाअधिकाअस्मिन्कार्षापणशतइति।अधिकेसमानजातौ।समानजातावधिकइष्यते।अथेहकस्मान्न
भवति।एकादशकार्षापणाअधिकाअस्यांकार्षापणत्रिंशतीति।इष्टंशतसहस्रयोः।शतसहस्रयोरधिकाइ
ष्यते।अथेहैकादशंशतसहस्रमितिकस्माधिकोनभवितव्यम् ॥

न्बाधन्तेइतिचित्स्वरएवानेनबाध्यतेनामन्त्रितस्वरः॥तदस्मिन्न॥अधिकेसमानजाताविति।अधिकेयासमानाजातिस्तस्यांस
त्यामधिकेर्थेवर्तमानात्प्रत्ययः।प्रकृतिप्रत्ययार्थयोस्तुल्यजातीयत्वेप्रत्ययइत्यर्थः।न्यायप्राप्तएवायमर्थउक्तः।तथाह्ये
कादशाधिकाअस्मिन्गोशतइतिवाक्येशतविशेषणत्वेनाप्युपात्तागावःसंनिधानात्प्रकृत्यर्थमपिविशिंषन्ति।एवंवृत्ताव
पिएकादशंगोशतमित्युक्तेगावःप्रकृत्यर्थतयाप्रतीयन्ते।शब्दान्तरप्रयोगमन्तरेणाधिकाधिकिभावस्तुल्यजातिविषयएवप्र
सिद्धः।नचवृत्तौभिन्नजातीयसंख्येयवाचिनाशब्देनप्रकृत्यर्थोविशेष्टुंशक्यते।सविशेषणानांवृत्तिर्नवृत्तस्यवाविशेषणंनेतिन्यायात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्यसंख्येति। शतानांसहस्रं शतसहस्रमितिव्युत्पत्तिः क्रियतेसहस्राणांशतंशतसहस्रमिति च।संख्यायाअल्पीयस्याइति द्वन्द्वेचाद्वन्द्वेचस्मरणाच्छतस्यपूर्वनिपातः।तत्रशतानांसहस्रमितिशतानिसंख्यायन्तइतितान्येवप्रकृत्यर्थतयाविज्ञायन्ते। एकादशशतान्यधिकान्यस्मि छतसहस्रेतदेकादशशतसहस्रमिति।शतसहस्राणांशतंशतसहस्रमितितुसहस्राणांसं ख्येयत्वात्तेषामेवप्रकृत्यर्थत्वम्।एकादशसहस्राण्यधिकान्यस्मिन्नेकादशमिति।प्रकरणादिवशाच्छता नांसहस्राणां वासंख्येयत्वावसायः।यस्यसंख्यातदाधिक्यइत्येतत्प्रत्ययार्थेनतुल्यजातीयस्यप्रकृत्यर्थस्याश्रयणाल्लभ्यतइतिनायमपू

यस्यसंख्यातदाधिक्ये।डः कर्तव्योमतोमम।यदितावच्छतानिसंख्यायन्ते शताधिक्येभवितव्यम्।अथसह स्राणिसंख्यायन्तेसहस्राधिक्येभवितव्यम्।डविधानेपरिमाणशब्दानामाधिक्यस्याधिकरणाभावादनिर्दे शः।डविधानेपरिमाणशब्दानामाधिक्यस्याधिकरणाभावादनिर्देशः।अगमकोनिर्देशोऽनिर्देशः।नह्येकाद शानांशतमधिकरणम्।सिद्धंतुपञ्चमीनिर्देशात्।सिद्धमेतत्।कथम्।पञ्चमीनिर्देशःकर्तव्यः।तदस्मादधि कमिति।सतर्हिपञ्चमीनिर्देशःकर्तव्यः।नकर्तव्यः।यद्यपितावद्वैषयिकेव्यापकेवाधिकरणेसंभवो ना स्ति।औपश्लेषिकमधिकरणंविज्ञास्यते।एकादशकार्षापणाउपश्लिष्टाअस्मिन्छतेएकादशंशतम्॥शदन्त विंशतेश्च॥किमर्थंशद्ग्रहणेन्तग्रहणम्।शद्ग्रहणेन्तग्रहणंप्रत्ययग्रहणेयस्मात्सतदादेरधिकार्थम्।श द्ग्रहणेन्तग्रहणंक्रियते प्रत्ययग्रहणेयस्मात्सविहितस्तदादेस्तदन्तस्यग्रहणंभवतीति।इहनप्राप्नोति।ए कत्रिंशंशतम्।इष्यतेचात्रापिस्यादिति।तच्चान्तरेणयत्नंनसिध्यतीति।अन्तग्रहणमेवमर्थमिदमुच्यते।अ स्तिप्रयोजनमेतत्।किंतर्हीति।संख्याग्रहणंच।संख्याग्रहणंचकर्तव्यम्।इहमाभूत्। गोत्रिंशदधिकाअ स्मिञ्छतइति ॥ यापा

र्वार्थः।नह्येकादशानामिति।तेषांशतेन्तर्भावादितिभावः।पञ्चमीनिर्देशइति।यस्मादधिकमितिनिपातनाद्बुद्धिप्रकल्पितोश्र यणाद्वापञ्चमी।औपश्लेषिकमिति।एवंचाधिकसंबन्धेपञ्चमीसप्तम्यौभवतः।अधिकाखारीद्रोणेनेतिकर्तरितृतीयाभव ति।शदन्त।अन्तग्रहणमिति।केवलस्यशतःप्रतिपादकस्यासंभवात् प्रत्ययग्रहणपरिभाषयावातदन्तविधिर्भविष्यती तिप्रश्नः।संख्याग्रहणंचेति।संख्यायाअवयवेतयबित्यतःसंख्याया इत्यनुवर्ततइतिव्याख्यानंकर्तव्यमित्यर्थः।एकत्रिं शदादयश्चशब्दाःसंख्यान्तरस्यनरसिंहादयइवजात्यन्तरस्यवाचकानतुसंख्यासमूहस्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 विंशतेश्चेति। ग्रहणवतेति तदन्तविधिनिषेधात्तदन्तादपि यथा स्यादिति वचनम्॥ संख्यायाः॥ तदस्य संजातमित्यतस्तदस्ये
त्यनुवर्तते। मेङ् प्रणिदान इत्यस्माद्धातोः करणे ल्युटि निमानशब्दः स च मूल्यवाची प्रकृत्यर्थविशेषणं चैतत्। निमाने वर्तमा
नात्संख्यावाचिनोऽस्येति षष्ठ्यर्थे मयट् प्रत्ययो गुणस्य चेन्निमानं भवति। गुणशब्दः समानावयववचनः निमानस्य निमेया
पेक्षत्वान्निमेयं प्रत्ययार्थः संपद्यते। निमानस्य च गुणत्वमन्तरेण निमेयस्य गुणत्वं नोपपद्य तेइति सामर्थ्यान्निमानस्यापि गु
णत्वं विज्ञायते। यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानामित्युदाहरणम्। भागविशेषप्रतिपत्त्यर्थं
यवादेः प्रकृत्यर्थविशेषस्योपादानं नित्यसापेक्षत्वाच्च वृत्तिर्भवति। संख्याया इति किम्। यवभागो निमानमस्योदश्विद्भागस्य।
गुणस्येति किम्। द्वौ कार्षापणौ निमानमस्य व्रीहेर्द्विमयो व्रीहिः कार्षापणयोरिति मा भूत्। निमानमिति किम्। यवानां द्वौ भागौ
समीपे ऽस्योदश्विद्भागस्येत्यत्र मा भूत्। गुणिनीति। द्विमयमुदश्विदिति गुणिनि निमेये प्रत्ययो यथा स्यादित्येवमर्थम्। गुणेषु मा भू

विंशतेश्च। विंशतेश्चान्तग्रहणं कर्तव्य मिहापि यथा स्यात्। एकविंशं शतम्। चकारात्संख्याग्रहणं च कर्तव्य
म्। इह मा भूत्। गोविंशतिरधिकास्मिन्कृत इति॥ संख्याया गुणस्य निमाने मयट्॥ निमाने गुणिनि॥ निमाने गुणिनी
ति वक्तव्यम्। किं प्रयोजनम्। गुणेषु मा भूत्॥ भूयसः॥ भूयस इति च वक्तव्यम्। किं प्रयोजनम्। भूयसो वाचिकायाः
संख्याया उत्पत्तिर्यथा स्यात्। अल्पीयसो वाचिकायाः संख्याया उत्पत्तिर्मा भूदिति। एको ऽन्यतरः। एकश्चेदन्यतरो
भवतीति वक्तव्यम्। इह मा भूत्। द्वौ यवानां त्रय उदश्वित इति॥ समानानाम्॥ समानानां चेति वक्तव्यम्। इ
ह मा भूत्। एको यवानामध्यर्धमुदश्वित इति ॥

दिति। स्वार्थे मा भूदित्येवमर्थमित्यर्थः। अन्यथा द्वौ यवानां गुणौ निमानमस्योदश्विद्भागस्य द्विमयो यवानामुदश्वित इति स्वार्थे मयट्
प्रसज्येत। भूयस इति। निमेयभागसंख्याया निमानभागसंख्या यदाधिका भवति तदा प्रत्ययो यथा स्यादेको ऽवयवभागो निमानम
स्योदश्विद्भागस्येत्यत्र मा भूदिति। एको ऽन्यतर इति। अन्यतरशब्देन निमेयमेव विवक्षितम्। एक एव यदि निमेयगुणो भवति तदा
प्रत्ययः। द्वयोर्बहुषु च निमेयगुणेषु न भवति। द्वौ यवानां त्रय उदश्वित इति। नन्वत्र भूयस्त्वाभावान्न भविष्यति। एवं तर्ह्युदाहर
णदिगियम्। तत्रोदाहरणं त्रयो यवानां द्वावुदश्वित इति। अथवा द्वौ यवानां निमेयौ त्रय उदश्वितो भागा निमानमिति विवक्षाया
मुदाहरणम्। एको यवानामध्यर्द्धमुदश्वित इति भूयस इत्येतदनपेक्ष्येदमुदाहरणम्। तदपेक्षायां तु द्वौ यवानामध्यर्द्धमुद
श्वित इत्युदाहार्यम्। अन्ये त्वध्यर्द्धशब्दात्प्रत्ययनिवृत्त्यर्थमिदमुदाहरणमित्याहुः। तदयुक्तम्। अध्यर्द्धशब्दस्य समासकन्नोरेव सं
ख्यासंज्ञात्वादन्यत्र संख्यात्वाभावात् प्रत्ययाप्रसङ्गात्। अध्यर्द्धपञ्चमादयोपि समासकन्नोरेव संख्यासंज्ञा नान्यत्रेति तेभ्योपि प्रत्ययाप्रसङ्गः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्येतिवर्ततइति। तेनस्वार्थेमयपन्नभवति। किंतर्हिनिमेयेक्षीरादौस्वभागापेक्षयालब्धगुणिव्यपदेशो निमेयगुणमात्रेतुप्रत्ययोनभवति। अनभिधानात्। तन्त्रमिति। पशुनायजेतेत्यादिवद्गुणस्येत्येकत्वसंख्या विवक्षिता। एतदर्थमेवगुणनिमानइतिलघुरपिसमासनिर्देशोनकृतः। अनभिधानादिति। अन्यूनाधिकैकगुणमुदश्विदादिनिमेयंवक्तुंप्रत्ययान्तस्यसामर्थ्यादित्यर्थः। द्विमयायवाइति। उदश्वितोद्वौगुणौनिमेयौयेषामेकगुणानांयवानांतेद्विमयाः। यावतेति। तथाचनिमेयस्यापिनिमानत्वान्निमेयेचापिदृश्यतइतिनवक्तव्यमितिमन्यते। प्रसततरागतिरिति। आमुद्रा गितिप्रतिपत्तिरित्यर्थः। अथवे

तत्तर्हीदंबहुवक्तव्यम्। नवक्तव्यम्। यत्तावदुच्यतेगुणिनीतिवक्तव्यमिति। नवक्तव्यम्। गुणेषुकस्मान्नभवति। अस्येतिवर्तते। यदुक्तंभूयसइतिवक्तव्यमिति। नवक्तव्यम्। अल्पीयसोवाचिकायाः संख्यायाउत्पत्तिः कस्मान्नभवति। अनभिधानात्। यदुक्तमेकश्चेदन्यतरोभवतीतिवक्तव्यमिति। नवक्तव्यम्। कस्मान्नभवति। द्वौयवानांत्रयउदश्वितइति। तन्त्रंविभक्तिनिर्देशः। यदप्युच्यते। समानानामितिवक्तव्यमिति। नवक्तव्यम्। कस्मान्नभवति एकोयवानामध्यर्द्धमुदश्वितइति। अनभिधानात्। निमेयेचापिदृश्यते। निमेयेचापिप्रत्ययोदृश्यते। द्विमयायवाः। त्रिमयाः। किंपुनरिहनिमानंकिंनिमेयम्। यावताउभयंत्यज्यते। सत्यमेवैतत्। क्वचित्तुकाचित्प्रसततरागतिर्भवति। तद्यथा। समानेत्यागेधान्यंविक्रीणीते। यवान्विक्रीणीतइति। अथवायेनाधिगम्यतेतन्निमानंयदधिगम्यतेतन्निमेयम्। तस्यपूरणेडट्॥ तस्यपूरणइत्यतिप्रसङ्गः॥ तस्यपूरणइत्यतिप्रसङ्गोभवति। इहापिप्राप्नोति। पञ्चानामुष्ट्रिकाणांपूरणोघटइति। सिद्धंतुसंख्यापूरणइतिवचनात्। सिद्धमेतत्। कथम्। संख्यापूरणइतिवक्तव्यम्। एवमपिघटेप्राप्नोति। संख्येयंह्यसावद्भिःपूरयति। संख्यापूरणइतिब्रूमः। नब्रूमःसंख्येयपूरणइति। यस्याभावादन्यसंख्यात्वंतत्र। यस्याभावादन्यासंख्याप्रवर्ततेतत्रेति वक्तव्यम्। अथव

ति। येनमूल्येनकरणेनक्रय्यंप्राप्तुमिष्यतेतन्निमानंयत्प्रेप्स्यतेतन्निमेयमित्यर्थः। देशकालापेक्षव्यवहारापेक्षत्वान्निमाननिमेयभावस्य॥ तस्यपूरणेडट्॥ तस्येतिसंबन्धमात्रंविवक्षितंनैकत्वम्। नह्येकस्यपूरणंसंभवतीतिद्व्यादिभ्यएवद्विवचनबहुवचनान्तेभ्यःप्रत्ययविधिः। तस्यपूरणइति। संख्यावाचिनःशब्दात्पूरणेडट्प्रत्ययः इत्येतावानेवसूत्रार्थः। तथाचलब्धपञ्चत्वसंख्यानांसंख्येयानामुष्ट्रिकादीनांपूरणेघटेप्रत्ययोनिष्टःप्राप्नोति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवमपीति। आधारधर्मेण पूरणेनाधेयायाः संख्यायास्तद्द्वारेण संस्पर्शादिति भावः। संख्यापूरण इति ब्रूम इति। द्वे संख्याग्रहणे अनुवर्तेते। तत्रैकं प्रकृतिविशेषणमपरं पूरणविशेषणम्। ततश्च येन पञ्चत्वसंख्या संपद्यते स प्रत्ययार्थः। अथवैकस्मिन्नेव संख्याग्रहणेऽनुवर्तमाने प्रत्यासत्त्या संख्यापूरण एव प्रत्ययो भवति न तु विप्रकृष्टे पञ्चत्वादिसंख्यासंख्येये नतर्भूते। यस्य चेति। न्यासान्तरं वा कर्तव्यमित्यर्थः। तेन पञ्चत्वसंख्या भवत्यनेनेत्यत्रार्थे पञ्चम इति भवति। एवमपीति। प्रसिद्धसंनिवेशविशेषस्य ग्रन्थस्य यो द्वितीयोऽध्यायः। यथेह समर्थः पदविधिरित्यादिस्तस्याप्यष्टमशब्देनाभिधानं प्राप्नोति। तद्भावेऽष्टत्वसंख्याया भावात्। तदभावेऽभावात्। द्वितीयग्रहणं चोपलक्षणं न्यायस्य तुल्यत्वात्प्रथमाध्यायोऽपि अष्टमाद्यभिधानप्रसङ्गात्। यदा तु व्युत्क्रमेण गणना क्रियते तदा द्वितीयोऽध्यायः पश्चाद्गण्यमानोऽष्टमादिव्यपदेशत्वेनेष्यत एव। त

एवमपि द्वितीयेऽध्यायेऽष्टम इति प्राप्नोति। सर्वेषां हि तेषां भावात्संख्या प्रवर्तते। चरम उपजाते पूर्वस्मिंश्चानपगत इति वक्तव्यम्। एवमपि। एकादशीद्वादश्योः सौ विष्टकृतो इदं द्वितीयमिदं तृतीयं दशदशमानीति न सिध्यति। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं तस्य पूरण इत्यतिप्रसङ्ग इति। परिहृतमेतत्। सिद्धं संख्यापूरण इति वचनादिति। तत्तर्हि संख्याग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते क्व प्रकृतम्। संख्याया गुणस्य निमाने मयडिति। एवं तर्हि नैषं दत्तिरुपालभ्यते ॥

या च भाष्यकारो वक्ष्यति। भवत्येवेति। पूरणग्रहणे तु क्रियमाणे चरमोपजातस्य गणनापेक्षायां पूरणत्वात्। संनिवेशमात्रापेक्षया द्वितीयेऽष्टमव्यपदेशाभावः। द्वितीयं न्यासान्तरमाह। चरमोपजात इति। गणनायां क्रियमाणायां पूर्वस्मिन्संख्येये नपगते बुद्ध्या परिगृहीतत्वादपेक्षिते यद्बुद्धौ पश्चादुपजायते तत्र प्रत्यय इत्यर्थः। एकादशीद्वादश्याविति। द्वादशीनां संनिधावेकादश्याश्चरमोपजातत्वाभावः। एवं तृतीयसंनिधौ द्वितीयस्य चरमत्वाभावः। दशदशमानीति। शततमस्यैव चरमोपजनात्नवानां दशमानां चरमत्वाभावः। सूत्रं चेति। न च केवलमव्याप्तिदोषो यावत्सूत्रभेदोऽपीति चशब्दस्यार्थः। एवं तर्हीति। वृत्तिः परार्थाभिधानमुच्यते। उपसर्जनपदानां प्रधानार्थाभिधानात्। तदसमर्थः। दृष्टविषयवदनिष्टेऽपि विषये प्रवृत्तिः प्राप्नोत्येवमुपालम्भो न क्रियते। किं तर्हि दृष्टे विषये प्रत्ययो न सिध्यति। अनिष्ट एव प्राप्नोतीत्युच्यते ॥ च्य

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिस्थानमिति। प्रत्ययार्थइत्यर्थः। प्रत्ययार्थेहि स्वार्थोपसर्जने प्रकृतिर्वर्ततइति प्रत्ययार्थोवृत्तिस्थानम्। अयमत्रार्थः। प्रकृत्यर्थव्यतिरिक्तेन प्रत्ययार्थेन भवितव्यम्। यथौपगवमिति। इह तु पञ्चमः पञ्चशब्दार्थेन्तर्भूतः। तथाहि। पञ्चानीयतामित्युक्ते पञ्चमस्याप्यानयनं भवति। ततश्चात्र प्रकृत्यर्थव्यतिरिक्तप्रत्ययार्थाभावात्पञ्चानां मुष्टिकाणां पूरणो घट इत्यत्रैवानिष्टे विषये प्रत्ययप्रसङ्गः। वचनादिति। प्रकृत्यर्थान्तर्भावमात्रेण स्वार्थिकत्वं न तु सर्वांश नातत्र संख्याग्रहणद्वयानुवर्त्तनादन्तरङ्गत्वाद्वा संख्यासंप्रतिपत्तिहेतौ प्रकृत्यर्थान्तर्भूतेपि प्रत्ययो भविष्यतीत्यर्थः। पूर्वस्यादिति। चतुःशब्दादिभ्यः प्रत्ययो विधेयः पञ्चादयश्चादेशाः कर्तव्या इत्यर्थः। तेन चतुर्णां पञ्चत्वसंख्योपजननद्वारेण पूरणः पञ्चमः। न्यूनइति। यथार्द्धतृतीया द्रोणाइत्यत्रार्द्धद्रोणोपि द्रोणशब्देनाभिधीयते। तथा च द्रोणाइति बहुवचनमवयवेन विग्रहः समुदायः समासार्थः। तथेहापि

किं तर्हि वृत्तिस्थानमुपालभ्यते। वृत्तिरेवात्र न प्राप्नोति। किं कारणम्। प्रत्ययार्थाभावात्। नैष दोषः। वचनात्स्वार्थिको भविष्यति। अथवा पूर्वस्याः संख्यायाः परापेक्षयोत्पत्तिर्वक्तव्या। उत्तरा च संख्या आदेशो वक्तव्यः। अथवा न्यूनेऽयं कृत्स्नशब्दो द्रष्टव्यः। चतुर्षु पञ्चशब्दः। अथवा सर्व एव द्व्यादयोऽन्योन्यमपेक्षन्ते। यद्येवं द्वितीयेऽध्यायेऽष्टम इति प्राप्नोति। भवत्येव। प्रकृत्यर्थाद्बहिः सर्वा वृत्तिः प्रायेण लक्ष्यते। पूरणेऽस्याः कथं वृत्तिर्वचनादिति लक्ष्यताम्। तस्याः पूर्वा तु या संख्या तस्यां भवतु तद्धितः। आदेशश्चोत्तरा संख्या तथान्याय्या भविष्यति। न्यूने वा कृत्स्नशब्दोऽयं पूर्वस्यामुत्तरा यदि। सामर्थ्यं च तथा तस्यास्तथान्याय्यं भविष्यति। अन्योन्यं वा व्यपाश्रित्य सर्वस्मिन् द्व्यादयो यदि। प्रवर्तन्ते तथान्याय्या वृत्तिर्भवति पूरणे ॥

वृत्तिविषये चतुर्षु पञ्चशब्दो वर्तते। तेन न्यूनानां पञ्चानां पूरणः पञ्चमः। न्यूनाश्च पञ्च चत्वारो भवन्ति। तथाहि। पञ्चसु लब्धव्येषु चतुरो लब्ध्वा ब्रवीति न्यूनानि पञ्च लब्धानीति। अथवेति। सर्वेष्वेव पञ्चशब्दो वर्ततइत्येकैकमन्तरेण पञ्चत्वनभवन्तीति पञ्चभ्यो बुद्ध्यैकतमं निष्कृष्य प्रत्ययो विधीयते। पञ्चानां पूरणः पञ्चसंख्यानिमित्तत्वात्पञ्चमः। भवत्येवेति। गणनापेक्षायां यथा पूर्वं व्याख्यातम्। प्रकृत्यर्थादिति। पूर्वोक्तार्थसंग्रहश्लोकाः। बहिरिति। बाह्यार्थे सर्वा वृत्तिर्न तु स्वार्थइत्यर्थः। वचनादिति। स्वार्थइत्यर्थः। पूर्वस्यामुत्तरेति। यदोत्तरसंख्यावाचो पञ्चादिशब्दः पूर्वसंख्यायां वर्ततइत्यर्थः। सामर्थ्यं चेति। तस्या न्यूनार्थाभिधायिन्याः संख्यायाः प्रत्ययार्थेन संबन्धत्वं न्याय्यमित्यर्थः। अन्योन्यं वेति। अपेक्षितपरस्पराः संख्येयाः पञ्चादिशब्दवाच्यास्तेषामन्यतमे पञ्चादिसंख्याहेतौ प्रत्ययः ॥ त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहूनामिति। पूर्वस्मात्पक्षादयंभेदः पूर्वस्मिन्पक्षे सर्वस्यातिरोहितभेदः पञ्चशब्दार्थः। उत्तरत्रतु समुदायः शब्दार्थः। अवयव
स्तुनोपात्तोनचत्यक्तः। प्रत्ययेनत्वभिधीयते। अन्यत्वादुभयोरिति। ससमुदायावयवयोर्भेदात्समुदायः प्रकृत्यर्थोवयवः प्र
त्ययार्थः। यथावार्क्षीशाखेति। प्रत्यस्तमितमूलावयवभेदः समुदायः प्रकृत्यर्थः। अवयवस्तुशाखाप्रत्ययार्थोऽनुदात्तादे
श्चेत्यञ्प्रत्ययः॥ नान्ता॥ मडादिष्विति। षष्ठीस्थानेयोगेत्यत्र षष्ठीतियोगविभागात्। तत्रचाद्यन्तौटकिताविव्यस्यानुवर्तनात्
षष्ठीनिर्दिष्टस्यागमिनोभावाच्चरेष्टइत्यादिवन्मडादयोडडपवादाः प्रत्ययाः प्राप्नुवन्ति। तत्रमट्थट्थुकामागमत्वप्रत्यय

बहूनांवाचिकासंख्यापूरणश्चैकदृष्यते। अन्यत्वादुभयोर्न्याय्यावार्क्षीशाखानिदर्शनम्। नान्तादसंख्यादेर्मट्॥
मडादिषुयस्यादिस्तन्निर्देशः॥ मडादिषुयस्यादिः क्रियतेतन्निर्देशःकर्तव्यः। अस्यादिर्भवतीतिवक्तव्यम्।
अक्रियमाणेप्रत्ययाधिकारात्प्रत्ययोयंविज्ञायेत। तत्रकोदोषः। प्रत्ययान्तरेहिसतिस्वरेदोषः। प्रत्ययान्तरेहि
सतिस्वरेदोषःस्यात्। विंशतितमः। एषस्वरः प्रसज्येत। विंशतितमइतिचेष्यते। सतर्हितथानिर्देशःकर्तव्यः।
नकर्तव्यः। प्रकृतंडड्ग्रहणमनुवर्तते। क्वप्रकृतम्। तस्यपूरणेडडिति। तद्वैप्रथमानिर्दिष्टम्। षष्ठीनिर्दिष्टेन
चेहार्थः। नान्तादित्येषापञ्चमीडडितिप्रथमायाः षष्ठींप्रकल्पयिष्यति तस्मादित्युत्तरस्येति। प्रत्ययविधि
रयम्। नचप्रत्ययविधौपञ्चम्यः प्रकल्पिकाभवन्ति। नायंप्रत्ययविधिर्विहितः प्रत्ययः प्रकृतश्चानुवर्तते॥
षट्कतिकतिपयचतुरांथुक्॥ चतुरश्छयतावाद्यक्षरलोपश्च॥ चतुरश्छयतौवक्तव्यौ। आद्यक्षरलोपश्चव
क्तव्यः। तुरीयम्। तुर्यम्। अथकिमर्थंषट्थुकौपृथक्क्रियेते। नसर्वेथडेववास्यात् थुगेववा। षट्थुकोः पृ
थक्करणंपदान्तविधिप्रतिषेधार्थम्। षट्थुकोः पृथक्करणंक्रियते। पदान्तविधिप्रतिषेधार्थम्। पदान्त
विध्यर्थम्। पदान्तप्रतिषेधार्थंच। पदान्तविध्यर्थंतावत् ॥

त्ययोर्विशेषाभावः। तमट्तुप्रत्ययत्वेसत्याद्युदात्तः स्यादागमत्वेत्वनुदात्तोभवतीतिडट्स्वरेणविंशतितमइत्यन्तोदात्तत्वंभवति। प्र
कृतमिति। स्वरितत्वादितिभावः। विहितइति। नातोविधानार्थाडड्ग्रहानुवृत्तिरपित्वागमसंबन्धप्रतिपत्त्यर्थेत्यर्थः। षट्। आद्यक्षरलो
पइति। अक्षरशब्देनाच्सहितंव्यञ्जनमुच्यते। छयद्भ्यांचडण्नबाध्यते। डटिचतुरस्थुग्विधानात्। नसर्वमिति। सर्वेथकारस्
पंथडेवक्रियतांथुगेववेत्यर्थः। पदान्तविप्रतिषेधार्थमिति। विधिप्रतिषेधौनलोपादीनांपदान्तकार्याणांविषयविभागेन
व्यवतिष्ठेयातामित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चथानीति। थदिसतिस्वादिष्विति पदत्वात्तन्निबन्धनोनलोपोभवति। शुकितुसतिथकारान्तस्यभत्वंस्यात्। षष्ठइति यद्यत्रथट्क्रियतेततस्यकारान्तस्यपदत्वात्तन्निबन्धनंजस्त्वंस्यात्। शुकितुवदन्तस्यभत्वात्पदत्वाभावः॥ बहु॥ लिङ्ग विशिष्टादिति। लिङ्ग सहचरितःप्रत्ययोलिङ्गं तदधिकादित्यर्थः। तिशुकेति। तिशुकिकृतेतदन्तस्यभत्वंनतुस्त्रीप्रत्यया

पर्णमयानिपञ्चथानिभवन्ति। रथःसप्तथः। पदान्तस्येतिनलोपोयथास्यात्। पदान्तप्रतिषेधार्थम्। षष्ठः। पदान्तस्येतिजश्त्वंमाभूत्। इहचतुर्थइति। पदान्तस्येतिविसर्जनीयोमाभूदिति॥ बहुपूगगणसंघस्य तिशुक्॥ बहुकतिपयवतूनांलिङ्गविशिष्टादुत्पत्तिः॥ बहुकतिपयवतूनांलिङ्गविशिष्टादुत्पत्तिर्वक्तव्या। इहापियथास्यात्। बह्वीनांपूरणीबहुतिथी। कतिपयानांपूरणीकतिपयथी। तावतीनांपूरणीतावतिथी। बहुकतिपयवतूनांलिङ्गविशिष्टादुत्पत्तिःसिद्धा। कथम्। प्रातिपदिकग्रहणेलिङ्गविशिष्टस्यापिग्रहणंभवतीति। पुंवद्वचनंच। पुंवद्भावश्चवक्तव्यः। बह्वीनांपूरणीबहुतिथी। किमर्थम्। न भस्याढेतद्धितेपुंवद्भवतीतिसिद्धम्। भस्येत्युच्यते। यजादौचभंभवति। नचात्रयजादिंपश्यामः। किंकारणम्। तिशुकाव्यवहितत्वान्नप्राप्नोति। इदमिहसंप्रधार्यम्। तिशुक्क्रियतांपुंवद्भावइति। किमत्रकर्तव्यम्। परत्वात्पुंवद्भावः। नित्यस्तिशुक्। कृतेपिपुंवद्भावेप्राप्नोति। अकृतेपिप्राप्नोति। तिशुगप्यनित्यः। अन्यस्यकृतेपुंवद्भावेप्राप्नोत्यन्यस्याकृते। शब्दान्तरस्यप्राप्नुवन्विधिरनित्योभवति। अन्तरङ्गस्तर्हितिशुक्। कान्तरङ्गता। उत्पत्तिसंनियोगेनतिशुगुच्यते। उत्पन्नेप्रत्ययेप्रकृतिप्रत्ययावाश्रित्यपुंवद्भावः। पुंवद्भावोपिअन्तरङ्गः। कथम्। उक्तमेतत्सिद्धश्चप्रत्ययविधाविति। उभयोरन्तरङ्गयोःपरत्वात्पुंवद्भावः। पुंवद्भावेकृतेपुनःप्रसङ्गविज्ञानात्तिशुक्सिद्धः। बहुतिथी ॥

न्तस्येत्यर्थः॥ उत्पत्तिसंनियोगेनेति। यदैवप्रकृतयःपूरणविषयाःप्रत्ययोत्पत्तिनिमित्तंतदेवागमइत्यर्थः। प्रकृतिप्रत्ययाविति। भस्येतिवचनादुभयमाश्रीयते। सिद्धश्चेति। तेनप्राक्प्रत्ययोत्पत्तेःपुंवद्भावइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ट्यादेः।असंख्यादेः किमर्थमिति।इहप्रत्यासत्त्यापङ्क्त्यादिसूत्रनिपातिताः षष्ट्यादयोगृह्यन्ते।नलोकप्रसिध्याविप्रकृष्टत्वाच्चानर्थकः प्रतिषेध इतिमत्वाप्रश्नः।इतरोव्याप्तिन्यायाश्रयाल्लौकिकग्रहणादतिप्रसङ्ग इतिमत्वाह।एकषष्ट इति।प्रत्यासत्तिन्यायाश्रयेणाह।षष्टिशब्दादिति।षष्टिशब्दस्योपलक्षणत्वात्पृत्यादयोपिगृह्यन्ते।प्रत्यय इति।प्रत्ययभक्तत्वात्तदवयवत्वादागमएवप्रत्ययशब्देनोक्तः।तदन्तविधिनेति।शास्त्रीयाणामपिषष्ट्यादीनांग्रहणेतैः संख्याया विशेषणात्तदन्तविधौसतिषष्ट्याद्यन्तस्यसंख्यावाचिनोग्रहणप्रसङ्गः।भवतीहेति।इहप्रकरणइत्यर्थः।तत्रयदिलौकिकसंख्याग्रहणंज्ञाप्यते तदैकान्नविंशतिशब्दान्मयण्नप्राप्नोतीतिभाष्यकारेणशास्त्रीयग्रहणाभ्युपगमेनतदन्तविधिज्ञापनमुक्तम्।एवंचैकान्नविंशतितमइतिभाव्यमितिलभ्यते।अत्रचज्ञापकात्तदन्तविधिस्तत्रव्यपदेशिवद्भावात्केवलानामपिग्रहणंभवति।ज्ञापकेनसामान्येनग्रहणवताप्रातिपदिकेनतदन्तविधिर्नास्तिव्यपदेशिवद्भावोऽप्रातिपदिकेनेतिपरिभाषाद्व

षष्ट्यादेश्चासंख्यादेः॥असंख्यादेरितिकिमर्थम्।इहमाभूत्।एकषष्टः।द्विषष्टः।असंख्यादेरितिशक्यमवक्तुम्।कस्मान्नभवति।एकषष्टो द्विषष्ट इति।षष्टिशब्दात्प्रत्ययो विधीयते।कः प्रसङ्गो यदेकषष्टिशब्दात्स्यात्।नैवप्राप्नोति।नार्थः प्रतिषेधेन।तदन्तविधिनाप्राप्नोति।ग्रहणवताप्रातिपदिकेनतदन्तविधिः प्रतिषिध्यते।एवंतर्हिज्ञापयत्याचार्यो भवतीहतदन्तविधिरिति।किमेतस्यज्ञापनेप्रयोजनम्।एकविंशतितमः एतत्सिद्धंभवति॥मतौछः सूक्तसाम्नोः॥

यस्यानुपस्थानज्ञापनादथवासूत्रोपात्तानांकेवलानांप्रथमंग्रहणंभवति।ततोज्ञापकेनलक्षणविशेषो वाक्यान्तरमनुमीयतइतितदन्तस्यापिग्रहणंभवति।तेनविंशतितमइतिभवति।एकषष्ट्यादिभ्योविंशत्यादिभ्यइतिविकल्पेनतमडुभवति।केचित्त्वसंख्यादेरितिप्राप्तिमात्रापेक्षयानिषेधाश्रयणादसंख्यादेरितियोगविभागाद्वाविकल्पितस्यापितमटोनिषेधमिच्छन्ति।एकषष्टितमइतिनभवितव्यमित्याहुः।एतत्तुभाष्यकारेणानुक्तत्वादसंबद्धम्।अनन्तरस्यविधिर्वाभवतिप्रतिषेधोवेत्येतत्त्वत्यागहेतुत्वाभावात्कथंत्यज्येत।मतौछः।मतुशब्देनसाहचर्यान्मत्वर्थउच्यते।तद्विशेषणंसूक्तसाम्नी।प्रधानानुयायित्वाच्चगुणानांप्रथमासमर्थविभक्तिरस्त्युपाधिकत्वंचप्रकृतेर्गम्यते।अच्छावाकशब्दोऽस्मिन्नस्तिअच्छावाकीयंसूक्तमित्युदाहरणम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेकपदादपीति। कर्मधारयो बहुव्रीहिर्वा पदसमुदायादित्यर्थः। अस्यवाम इत्यस्मिन्नस्तीति षष्ठी प्रथमयोरुपलम्भात्पदसमुदायात्मकत्वात्प्रातिपदिकत्वाभावात्प्रत्ययो न प्राप्नोतीति वचनम्। सिद्धं त्विति। अस्यवामस्येति वेदे यस्य द्वयंप ठ्यते तदेकदेशस्यास्यवामशब्दस्य यदनुकरणमस्यवामशब्दोऽनुकार्येणार्थेनार्थवत्त्वाल्लब्धप्रातिपदिकसंज्ञस्तस्मादेतत्प्रत्ययविधानमित्यर्थः। स्वंरूपमिति। दृष्टान्तत्वेनास्योपन्यासः। यथा स्वंरूपमिति वचनादग्नेर्ढगित्यत्राग्निशब्दस्वरूप मग्निशब्दस्य प्रत्यायकमेवमाम्नाय पठितस्यास्यवामशब्दस्य च्छप्रत्ययप्रकृतिरस्यवामशब्दः प्रत्यायक इत्यर्थवत्त्वात्पदसमुदायरूपत्वाभावाच्च प्रातिपदिकत्वमित्यर्थः। नत्वनुकार्यानुकरणविषये स्वंरूपमित्युपतिष्ठते। स्वशास्त्रविषयत्वादस्य लौकिकत्वाच्चानुकार्यानुकरणभावस्य। एवं योसाविति । एवं श

छप्रकरणे अनेकपदादपि। छप्रकरणेऽनेकपदादपीति वक्तव्यम्। इहापि यथा स्यात्। अस्यवामीयम्। कयाशुभीयम्। किंपुनः कारणं न सिध्यति। अप्रातिपदिकत्वात्। सिद्धं तु प्रातिपदिकविज्ञानात्। सिद्धमेतत्। कथम्। प्रातिपदिकविज्ञानात्। कथं प्रातिपदिकविज्ञानम्। स्वंरूपं शब्दस्याशब्दसंज्ञेति वचनात्। स्वंरूपं शब्दस्याशब्दसंज्ञा भवतीति। एवं योसावाम्नाये अस्यवामशब्दः पठ्यते सोऽस्य पदार्थः। किंपुनरन्ये आम्नायशब्दाः अन्यदिमे ओमित्याह। कुत एतत्। आम्नायशब्दानामान्यभाव्यं स्वरवर्णानुपूर्वीदेशकालनियतत्वात्। आम्नायशब्दानामान्यभाव्यमन्यभावः सिद्धः। स्वरवर्णानुपूर्वीदेशकालनियतत्वात्। स्वरस्तावन्नियत आम्नाये अस्यवामशब्दस्य। वर्णानुपूर्वी। वर्णानुपूर्वी खल्वप्याम्नाये नियता अस्यवामशब्दस्य ॥

ब्दस्तथा शब्दस्यार्थो यथात्र शास्त्रे वचनात्स्वंरूपं शब्दस्य प्रत्यायकं तथानुकार्यस्यानुकरणमित्यर्थः। किंपुनरिति। अभिन्नरूपत्वादनुकार्यानुकरणयोरभेदं मन्यमानः पृच्छति। आम्नायशब्दानामिति। अन्यस्य वस्तुत्वस्य भावोऽन्यभावः। अन्यभाव एवान्यभाव्यम्। ब्राह्मणादिषु प्रतिपद पाठात्स्वार्थे ष्यञ्। अथवा अन्यो भावोऽन्य इव स्तुतस्य भाव आन्यभाव्यम्। अन्यवस्तुत्वमित्यर्थः। यद्यप्यनुकार्यानुकरणयोरर्थभेदादन्यत्वनिश्चयस्तथाप्यन्यत्वस्य दार्ढ्याय स्वरादिभेदोपन्यासः। स्वर इति। अस्येत्यू डिदमित्यन्तोदात्तत्वम्। वामशब्दः कर्षात्वत इत्यन्तोदात्तः। अथवा ज्वलितिकसन्तेभ्यो ण इति णान्तः प्रत्ययस्वरेणान्तोदात्तः। अनुकरणं त्वस्यवामशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। प्रकृतिवदनुकरणमित्येतत्तु विरोधादत्र स्वरे नाश्रीयते। अनुकरण एकस्मिन्पदे उदात्तद्वयविरोधात्। वर्णानुपूर्वीति। अनुकरणं तु व्युत्क्रमेणाप्युच्चार्यमाणं सादृश्यादनुकार्यस्य प्रत्यायकं भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देशइति।अनुकरणस्यतुदेशकालनियमाभावः।पदैकदेशे ति।आम्नायेअस्यवामस्येतिप्रयुज्यतेतदेकदेशस्यास्यवा
मशब्दस्यानुकरणमेकदेशएवास्यवामशब्दोदृश्यते।अस्यवामीयशब्देप्रकृतिरित्यर्थः।सुबलोपदर्शनाच्चेति।यदिष
ष्ठ्यालुकिकृतेरूपमेतद्भवतीत्युच्यते।तदापूर्वपदेपिलुक्प्रसङ्गः।अनुकरणस्य तु विभक्त्यर्थाप्रतिपादनात्सुप्प्राभा
वाल्लुगभावः।मत्वर्थोनोपपद्यतइति।अनुकार्येणसूक्तनाम्नोस्तद्वत्तानत्वनुकरणेनेतिभावः।नसंज्ञेति।अनुकरणंप्रत्या
यकत्वात्संज्ञा।अनुकार्यंतुप्रत्याय्यत्वात्संज्ञि।अव्यभिचारश्चावश्यप्रत्याय्यत्वात्संज्ञिनस्तत्रयथागवादयःशब्दाः
सास्नावदर्थंप्रत्याययन्तस्तेनार्थेनतद्वतिमतुपमुत्पादयन्तिगोमानिति।तथाअनुकरणशब्दाःप्रथमासमर्थाःस्वे

देशः।देशःखल्वप्याम्नायेनियतः।श्मशानेनाध्येयम्।चतुष्पथेनाध्येयमिति।काल।कालःखल्वप्याम्नायेनियतः।
नामावास्यायामधीयीत।नचतुर्दश्यामिति।पदैकदेशसुबलोपदर्शनाच्च।पदैकदेशःखल्वप्याम्नायेदृश्य
ते।अस्यवामीयम्।ननुचैषसुब्लोपःस्यात्।सुबलोपदर्शनाच्च।सुबलोपःखल्वपिदृश्यते।अस्यवामीय
मिति।तस्मादन्येआम्नायशब्दाअन्यइमे।यदितर्हिअन्यआम्नायशब्दाअन्यइमेमत्वर्थीयोनोपपद्यते।
अस्यवामशब्दोत्रास्तीति।नसंज्ञासंज्ञिनंव्यभिचरति॥अध्यायानुवाकयोर्लुक्॥अध्यायानुवाकाभ्यांवा
लुक्।।अध्यायानुवाकाभ्यांवालुग्वक्तव्यः।स्तम्भः।स्तम्भीयः।गर्दभाण्डः।गर्दभाण्डीयः।अनुवाकः।अनु
वाकीयः॥धनहिरण्यात्कामे॥धनहिरण्यात्कामाभिधाने॥धनहिरण्यात्कामाभिधानइतिवक्तव्यम्।
षष्ठ्यर्थेह्यनिष्टप्रसङ्गः।षष्ठ्यर्थेहिसतिअनिष्टंप्राप्नोति।धनेकामोस्येति। तत्तर्हिवक्तव्यम्।नवक्तव्यम्।
कस्मान्नभवति।धनेकामोऽस्येति ॥

नार्थेनानुकार्येणतद्वतिच्छप्रत्ययमितिनकश्चिद्दोषः।अनुकरणशब्दस्यानुकार्यस्वजातिसमवेतं वक्तीतिजातिशब्दइ
तिलृकारवार्तिकेभिहितम्॥अध्याय॥अध्यायानुवाकाभ्यामिति।तादर्थ्येएषाचतुर्थीअध्यायानुवाकार्थोयश्छस्तस्यवालुग्वक्त
व्यः।तेनपक्षेश्रवणंभवति।लुग्विधानमेवज्ञापकमध्यायानुवाकयोश्छोभवतीति।तत्रमतुप्प्रकरणएवास्मिन्सूत्रेकर्तव्येयद
त्रच्छस्यलुग्विधानंतस्मात्साक्षिकोलुगनुमीयतेइत्याहुः॥धन॥कामाभिधानइति।इच्छामात्राभिधानइत्यर्थः।षष्ठ्यर्थेहीति।य
द्यप्यत्रषष्ठ्यर्थोनप्रकृतस्तथापिकामयतइतिकामःकर्तृसाधनकामशब्दोपादानेधनस्यकामयितादेवदत्तादिर्धनकश
ब्देनाभिधीयतइतिसामर्थ्यात्षष्ठ्यर्थएवप्रत्ययःस्यादित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनभिधानादिति। कामशब्देनेच्छामात्रमभिधीयते न तु कामयिता। ततश्च तत्रेत्यधिकाराद्धनहिरण्याभ्यां सप्तम्यन्ताभ्यामिच्छामात्रे प्रत्ययो भवति। धनको देवदत्तस्येति न तु तद्वतीति भावः॥ शीतो॥ किं यः शीतमिति। शीतोष्णशब्दयोः स्पर्शविशेषो मुख्यार्थ इति तत्संप्रत्यये नैव भाव्यमिति मत्वा प्रश्नः। उत्तरपदलोप इति। नात्र समासावयव उत्तरपदमभिप्रेतं समासस्यासंभवात्। किं तर्हि उत्तरं यत्पदं द्योतक इवशब्दस्तस्यापि गतार्थत्वाद्वृत्तिविषयेऽप्रयोग इत्यर्थः। यथा मन्दतायुक्तं शीतं सति शीते कार्यकरणे पाटवाभावात्तद्वन्मन्दकरणं शीतमित्युच्यते। एवमाशुकरणमुष्णम्। तत्र क्रियाविशेषणाभ्यां कर्मभ्यां प्रत्ययः शीतंकारी शीतको ऽलस इत्यर्थः। उष्णंकारी उष्णको दक्षः। प्रयोगदर्शनाच्च गौणस्याप्यर्थस्येह क्वचिद्भवति॥ अधिकम्। किं निपात्यत इति। यद्यधिशब्दात्तत्साधनक्रियावचनात्कन्निपात्यते तदा कर्तृकर्मणोरन्यतरस्य साधनस्याभिधा

अनभिधानात्॥ शीतोष्णाभ्यां कारिणि॥ किं यः शीतं करोति स शीतकः। यो वा उष्णं करोति स उष्णकः। किं चातः। तुषारे आदित्ये च प्राप्नोति। एवं तर्ह्युत्तरपदलोपोऽत्र द्रष्टव्यः। शीतमिव शीतम्। उष्णमिवोष्णम्। य आशु कर्तव्यानर्थांश्चिरेण करोति स उच्यते शीतक इति। यः पुनराशु कर्तव्यानर्थानाश्वेव करोति स उच्यते उष्णक इति॥ अधिकम्॥ अधिकमिति किं निपात्यते। अध्यारूढस्योत्तरपदलोपः कं च प्रत्ययः। अध्यारूढमधिकम्। भवेत्सिद्धमध्यारूढो द्रोणः खार्यामधिको द्रोणः खार्यामिति। इदं तु न सिध्यति। अध्यारूढा द्रोणेन खारी अधिका द्रोणेन खारीति। गत्यर्थानां हि क्तः कर्तरि विधीयते। गत्यर्थानां वै क्तः कर्मण्यपि विधीयते॥ पार्श्वेनान्विच्छति॥ किं यः पार्श्वेनान्विच्छति स पार्श्वकः। किं चातः। राजपुरुषेऽपि प्राप्नोति। एवं तर्हि उत्तरपदलोपोऽत्र द्रष्टव्यः। पार्श्वमिव पार्श्वम्। यऋजुनोपायेनान्वेष्टव्यानर्थाननृजुनोपायेनान्विच्छति स उच्यते पार्श्वक इति॥

नेन भाव्यम्। तत्र कर्तुरङ्गीकरणे कर्मणोऽभिधानं न प्राप्नोति कर्माश्रयणे कर्तुरभिधानस्याप्रसङ्ग इति मत्वा प्रश्नः। अध्यारूढस्येति। लौकिके प्रयोगे अधिकशब्देन विषयभेदेन कर्तृकर्मणोरनभिधानदर्शनादनङ्गीकृतसाधनभेदमध्यारूढस्येदं निपातनं स चोभयार्थ इति न कश्चिद्दोषावसरः। खार्यामिति। यदा कर्तरि क्तस्तदा कर्मणोऽनभिधानाद्द्वितीयायां प्राप्तायां यस्मादधिकमिति ज्ञापकात्पञ्चमी भवति। औपश्लेषिकाधिकरणविवक्षायां तु सप्तमी तथापि तदस्मिन्नधिकमिति निर्देशः कृतः॥ पार्श्वेन॥ राजपुरुष इति। स हि राजपार्श्वाश्रयेणार्थमिच्छतीति भावः॥ ऋजुनेति। यथा पार्श्वं तिर्यगवस्थानादनृजु तथान्योऽप्यनृजुरुपायः पार्श्वमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयः। शिवभागवतइति। भगवान्भक्तिरस्यभागवतः। शिवस्यभागवतइतिषष्ठीसमासः। अवयवसंस्पर्शद्वारेणसमुदायार्थविशेषणाच्छिवोभगवान्भक्तिर्यस्यसप्रतीयते। एवंतर्हीति। यथाऽयःशूलंतीक्ष्णमेवान्योपितीक्ष्णउपायोऽयःशूलमुपचारादुच्यते॥ तावतिथम्। तावतिथमितिपूरणप्रत्ययान्तनिर्देशः। गृह्यतेनेनेतिग्रहणम्। तत्रायमर्थः। पूरणप्रत्ययान्ताद्ग्रहणोपाधिकात्स्वार्थेकन्भवति। तस्यचकनोवालुग्भवति। पञ्चमंग्रहणंपञ्चकमिति। एतत्सूत्राश्रयेणवार्तिकारम्भः। तावतिथमिति। महाविभाषाधिकाराद्विकल्पेनप्रत्ययोत्पादनाद्रूपद्वयस्यसिद्धत्वादि

अयःशूलदण्डाजिनाभ्यांठक्ठञौ॥ किंयोऽयःशूलेनान्विच्छतिसआयःशूलिकः। किंचातः। शिवभागवतेप्राप्नोति। एवंतर्हिउत्तरपदलोपोत्रद्रष्टव्यः। अयःशूलमिवायःशूलंयोमृदुनोपायेनान्वेष्टव्यानर्थान्रभसेनान्विच्छतिसउच्यते। आयःशूलिकः॥ तावतिथंग्रहणमितिलुग्वा॥ तावतिथंग्रहणमितिलुग्वावचनानर्थक्यंविभाषाप्रकरणात्। तावतिथंग्रहणमितिलुग्वावचनमनर्थकम्। किंकारणम्। विभाषाप्रकरणात्। प्रकृतामहाविभाषातयैतत्सिद्धम्। तावतिथेनगृह्णातीतिलुक्च॥ तावतिथेनगृह्णातीत्युपसंख्यानंकर्तव्यम्। लुक्चवक्तव्यः। षष्ठेनगृह्णातीतिषट्कः॥ शृङ्खलमस्यबन्धनंकरभे॥ शृङ्खलमस्यबन्धनंकरभइत्यनिर्देशः। शृङ्खलमस्यबन्धनंकरभइत्यनिर्देशः। अगमकोनिर्देशोऽनिर्देशः। नहितस्यशृङ्खलंबन्धनंशृङ्खलवत्सौरज्वाबध्यते। सिद्धंतुतद्धन्निर्देशोलुक्च। सिद्धमेतत्। कथम्। तद्धन्निर्देशःकर्तव्यः। लुक्चवक्तव्यः। शृङ्खलवद्बन्धनमिति। सतर्हितद्धन्निर्देशःकर्तव्यः। नकर्तव्यः। इहयत्नान्तरेणयस्यप्रवृत्तिर्भवतितत्तस्यनिमित्तत्वायकल्पते। नचान्तरेणशृङ्खलंबन्धनंप्रवर्तते ॥

त्यर्थः। यदातुपूरणप्रत्ययस्यवालुग्विधीयतेपञ्चकंग्रहणंपञ्चमकंग्रहणमिति। तदालुग्वाग्रहणंचकर्तव्यमेव। अन्यथारूपद्वयंकथंसिद्ध्येत। तावतिथेनेति। स्वार्थेप्रत्यययोविधीयमानोग्रहीतरिनप्राप्नोतीतिवचनम्। लुक्चपूरणप्रत्ययस्यैवनतुकनः। शृङ्खलम्। शृङ्खलमिति। बध्यतेऽस्वतन्त्रीक्रियतेऽनेनेतिबन्धनमुच्यते। रज्जोश्चास्वतन्त्रीकरणेकरणत्वंनतुशृङ्खलस्येतिभावः। काष्ठमयंपाशकंपादेयद्बध्यतिषज्यतेतच्छृङ्खलमुच्यते। बालउष्ट्रः। करभः। इहेति। यद्यपिरज्जोःकरणत्वंतथापिशृङ्खलस्यकरणत्वमस्त्येवतदन्तरेणबन्धनस्याभावात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। रज्जुः शृङ्खलशब्देन तत्साहचर्यादुच्यत इत्यर्थः। तदस्मिन्नन्नम्। वटकेभ्य इनिरिति। क्तनिप्राप्ते वचनम्। मत्वर्थीयस्त्विनिः सप्तम्यां चनतौ स्मृताविति नास्ति॥ श्रोत्रियन्। वाक्यार्थस्य संबन्धरूपस्य क्रियारूपस्य वा सत्त्वभूतत्वात् श्रोत्रियशब्दस्य च सत्त्वभूतार्थाभिधायित्वाद्वाक्यार्थग्रहणेन तदाश्रयश्छन्दोध्याय्युपचारादभिहितः। तत्राविद्यमानप्रकृतिप्रत्ययविभागः श्रोत्रियशब्दो निपात्यते। नकारः स्वरार्थः। तेनाद्युदात्तत्वं नित्करणसामर्थ्याद्घपवर्गाभावेपि भवति। छन्दसो वेति। तस्मिन्पक्षे घनः णो बाधप्रसङ्गात् छान्दसशब्दो न सिध्यतीति तावतिथं ग्रहणमित्यतो वाग्रहणमनुवर्त्यम्। अथवा विशेषतः छन्दोध्यायिनि तदर्थानुष्ठायिनि श्रोत्रियशब्दस्य निपातनादध्येतृमात्रे छान्दसशब्दस्य नास्ति बा

अथवा साहचर्यात्ताच्छब्द्यं भविष्यति। शृङ्खलसहचरितं बन्धनं शृङ्खलबन्धनमिति॥ तदस्मिन्नन्नं प्राये संज्ञायाम्॥ प्राये संज्ञायां वटकेभ्य इनिः॥ प्राये संज्ञायां वटकेभ्य इनिर्वक्तव्यः। वटकिनी पौर्णमासी॥ श्रोत्रियंश्छन्दोधीते॥ किं निपात्यते। श्रोत्रियंश्छन्दोधीत इति वाक्यार्थे पदवचनम्। छन्दोधीत इत्यस्य वाक्यस्यार्थे श्रोत्रियन्नित्येतत्पदं निपात्यते। छन्दसो वा श्रोत्रभावः तदधीत इति घंश्च। छन्दसो वा श्रोत्रभावो निपात्यते। तदधीत इत्यस्मिन्नर्थे घंश्च प्रत्ययः। छन्दोधीते श्रोत्रियः॥ श्राद्धमनेन भुक्तमिनिठनौ॥ इनिठनोः समानकालग्रहणम्॥ इनिठनोः समानकालग्रहणं कर्तव्यम्। अद्य भुक्ते श्वः श्राद्धिक इति मा भूत्। उक्तं वा। किमुक्तम्। अनभिधानादिति॥ साक्षाद्द्रष्टरि संज्ञायाम्॥ संज्ञायामिति किमर्थम्। त्रिभिः साक्षाद्द्रष्टव्यं भवति यश्च ददाति यस्मै च दीयते यश्चोपद्रष्टा तत्र सर्वत्र प्रत्ययः प्राप्नोति। संज्ञाग्रहणसामर्थ्यादुनिकान्तेवासिनोर्न भवति ॥

थः। श्राद्धम्। समानकालग्रहणमिति। भुजिना समाने काले प्रत्ययप्रयोगो यथा स्यात्। यस्मिन्काले भुजिक्रिया हि तत्प्रिलक्षणविशेषानुवृत्तिस्तस्मिन्नेव श्राद्धी श्राद्धिकशब्दयोरुच्चारणम् न तु कालान्तरे। स च समानः कालो लोकप्रतीत्यनुसारेणाद्यतन एव द्रष्टव्यः तेन यदाह्नितीयेह निकस्यचिदन्नमपरिणतं तदा प्रत्ययाभावः॥ साक्षात्। संज्ञायत इति संज्ञेत्यर्थ एव व्यपदिश्यमानोभिधीयते। अथवा संज्ञायतेः न येति संज्ञा निपातनात्दूल्युडभावः। ततः शब्द एव संज्ञाशब्देनोच्यते। संज्ञायां विषये कार्यं भवतीत्यर्थः। लक्ष्यानुसारिप्रतिपत्त्रपेक्षया प्रश्नः। संज्ञाग्रहणं किमर्थमिति। लक्षणानुसारिप्रतिपत्त्रपेक्षयात्तूत्तरम्। त्रिभिरिति। अन्तेवासिशब्देन शिष्यसाधर्म्यात्पारतन्त्र्यादधमर्ण उच्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षेत्रि
परक्षेत्रे जन्मान्तरशरीरे चिकित्स्यो व्याधिरसाध्यत्वात् क्षेत्रियः। तथा परक्षेत्रे धान्यार्थे क्षेत्रे यानि तृणानि जातानि विनाश्यानि ता
नि क्षेत्रियाणि। तथा परदारे निग्राह्यः क्षेत्रियः। तथा परशरीरेषु संक्रमय्य यद्विषं चिकित्स्यते तत् क्षेत्रियम्॥ इति श्री प्रथममाह्नि
कम्॥ तदस्यास्त्यस्मिन्निति मतुप्॥ तदस्यास्मिन्नस्तीति वा। तदस्य शाखावान् वृक्ष इत्यादौ वृक्षादेराधारभावोऽप्यस्ति। तत्पूर्वकं संबन्धित्वं चेत्यन्यतरोपादानेनेष्टविषये सिद्धिं मत्वा पृच्छ
ति। किमर्थमिति। कस्मादिदं किमर्थम्। को ऽर्थोऽस्येति वा किमर्थमेतच्च निर्देशक्रिया विशेषणं न तु निर्दिश्यमानविशेषणमिति। नपुंसकै
कवचननिर्देशः। नयस्येति। नशब्दः काकाप्रयुक्तो भवत्येवेति विधिं गमयति। नैतयोरावश्यक इति। अवश्यंभाव आवश्यकं मनोज्ञा
देराकृतिगणत्वादेरावश्यक इति निपातनाद्वा वुञ्प्रत्ययः। अव्ययानां भमात्रे इति टिलोप आवश्यकमस्मिन्नस्तीत्यावश्यकः। अ
र्श आदेराकृतिगणत्वादच्प्रत्ययः। इह यदा संबन्धः सर्वकारकपूर्वः। नाधारपूर्वक एव यथा। देवदत्तस्य गाव इति क्रयप्रतिग्रहादि
क्रियाविषयकर्तृत्वपूर्वकः स्वस्वामिसंबन्धस्तदा सप्तम्युपादाने कारकान्तरपूर्वसंबन्धाग्रहणादस्येति षष्ठ्यर्थोऽप्युपादानीयः।

क्षेत्रियच्परक्षेत्रे चिकित्स्यः। किं निपात्यते॥ श्रोत्रियवत्। क्षेत्रियः क्षेत्रियः श्रोत्रियवन्निपात्यते। परक्षेत्राद्वा
तत्र चिकित्स्य इत्येतस्य वाक्यस्यार्थे क्षेत्रियजित्येतत्पदं निपात्यते। परक्षेत्राद्वा तत्र चिकित्स्य इति
परलोपो घंश्च। परक्षेत्राद्वा तत्र चिकित्स्य इत्येतस्मिन्नर्थे परलोपो घंश्च प्रत्ययः। परक्षेत्रे
चिकित्स्यः। क्षेत्रियः॥ इति पञ्चमाध्यायस्य द्वितीये पादे प्रथममाह्निकम्॥ तदस्यास्त्यस्मिन्निति मतुप्॥ किमर्थ
मिमावर्थावुभौ निर्दिश्येते। अस्यास्मिन्निति। न यद्यस्य भवति तस्मिन्नपि तद्भवति। यच्च यस्मिन्भवति तत्तस्यापि भवति। ने
तयोरावश्यकः समावेशः। भवन्ति हि देवदत्तस्य गावो न च तास्तस्मिन्नाधृता भवन्ति। भवन्ति च पर्वते वृक्षा न च ते तस्य भवन्ति।
तथा षष्ठ्यर्थमात्रनिर्देशे यत्राधिकरणं शेषसंबन्धनिमित्तसंबन्धित्वेनाविवक्षितम्। वृक्षा अस्मिन्पर्वते सन्तीति तत्र प्रयोगो न स्या
त्। न ह्यत्र क्रियाकारकपूर्वः शेषसंबन्धो दृश्यते। वृक्षैः पर्वतस्यानारम्भात्। नावयवावयविभावः। आनन्तर्यादिसंबन्धसंभवेऽपि तत्र म
त्वर्थीयैर्न भाव्यम्। तस्मादुभयोपादानम्। ननु किमुच्यते न तास्तस्मिन्नाधृता भवन्तीति। यावता यस्य चेश्वरवचनमित्येतत्सूत्रव्याख्या
नायाधि ब्रह्मदत्ते पञ्चालाद् इति सप्तमी सिद्ध्यर्थं भाष्यकारेणाभिहितं परिगृहीतव्यम्। परिगृहीत्रधीनमित्यादि तथा च देवदत्ते गाव
इत्यपि भवितव्यम्। कारकप्रकरणे हि गौणमुख्यन्यायस्यानाश्रयणाद्गौणस्याधारस्याप्यधिकरणसंज्ञया भाव्यम्। यथा गङ्गायां
घोषः कूपे गर्गकुलमिति। ततश्च सप्तम्युपादानेऽपि गोमान्देवदत्त इति सिध्यत्येव। नैतदस्ति। सप्तमीमात्रनिर्देशे मुख्य एवाधिकरणे म
त्वर्थीयाः स्युः। वृक्षवान्पर्वत इत्यादौ तु गौणे गोमान्देवदत्त इत्यादौ कारकप्रकरणे हि गौणमुख्यन्यायानाश्रयणम्। अयं तु प्रत्य
यविधिरिति स्यात्। न्यायाश्रयणमिति षष्ठीनिर्देशोऽपि कृतः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथास्तिग्रहणमिति। संभवे व्यभिचारे च विशेषणविशेष्यभावो भवति। यथा नीलोत्पलमिति। सत्तां तु पदार्थो न व्यभिचरति। तामन्तरेण पदोच्चारणासंभवात्तस्या एव सर्वशब्दप्रवृत्तौ कारणत्वादिति प्रश्नः। सत्तायां प्रत्ययो यथा स्यादिति। सत्तायां वर्तमानात्सत्तोपाधिकार्थाभिधायिनः प्रत्ययो यथा स्यादित्यर्थः। न सत्तां पदार्थो व्यभिचरतीति। यावद्बुध्या पदार्थो न विषयीकृतस्तावत्पदस्य प्रयोगाभावः। तस्माद्बुद्धिसत्तासमाविष्टोऽर्थो विधिनिषेधजननादिभिः संबध्यते। वृक्षोऽस्ति वृक्षो नास्ति वृक्षो जायत इति। अत्यन्तासतोऽपि बहिः शशविषाणादीनर्थान्बुध्या विषयीकृत्य शशविषाणादिप्रयोगस्तस्माद्बुध्यारूढोपचरितसत्ताशब्दप्रयोगाश्रयत्वादव्यभिचारेत्यर्थः। सैव तु बुद्धिसत्ता प्रयोक्तृप्रतिपत्तॄणां बहीरूपतयावभासते। यदि तु वृक्षादीनां बाह्यसत्तासमाविष्टं वस्तु वाच्यं स्यात्तदा वृक्ष इत्यतः सत्तावगमादस्तीत्यस्य गतार्थत्वात्प्रयोगो न स्यात्। नास्तीत्यस्य च सत्ताविरोधात्प्रयोगाप्रसङ्गः। अङ्कुरो जायत इति च प्रयोगो न स्यात्। सतो जन्मविरोधात्। उपचारसत्तायां त्वेते दोषा नावतरन्ति। बुद्धिसत्तासमाविष्टस्य बहिः सत्त्वासत्त्वजननप्रतिपादनायास्ति नास्ति जायत इति प्रयोगयोगात्। अन्ये तु वर्णयन्ति यत्र क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमा

अथास्तिग्रहणं किमर्थम्। सत्तायामर्थे प्रत्ययो यथा स्यात्। नैतदस्ति प्रयोजनम्। न सत्तां पदार्थो व्यभिचरति। इदं तर्हि प्रयोजनम्। संप्रतिसत्तायां यथा स्यात्। भूतभविष्यत्सत्तायां माभूत्। गावोऽस्यासन् गावोऽस्य भवितार इति। न तर्हीदानीमिदं भवति। गोमानासीत्। गोमान्भवितेति ॥

नोऽप्यस्तीति गम्यत इत्येतदाश्रयणेन न सत्तां पदार्थो व्यभिचरतीत्युक्तम्। तेषां संप्रतिसत्तायां यथा स्यादिति परिहारग्रन्थो नोपपन्नः। राजपुरुष इत्यादौ च संबन्धप्रतिपादनेऽस्तेराक्षेपाभावादनैकान्तिकमेतत्। संप्रतिसत्तायामिति। वर्तमानसत्तायां बाह्यायां सत्तायामित्यर्थः। भूतभविष्यत्सत्तायामिति। भूतभविष्यतोर्या सत्ता अतीतानागतवस्तुपरामर्शिबुद्धितत्त्वोत्प्रेक्षितोपचरितरूपा तस्यां माभूदित्यर्थः। या तु मुख्या सत्ता सा भूतभविष्यत्सत्तेति व्यपदेष्टुं न शक्यते। सदित्यस्य लडन्तस्य वर्तमानकालविषयत्वाद्भूतभविष्यतोः सत्तेति संबन्धायोगात्। नापि भूता सत्ता भविष्यन्ती सत्तेति सामानाधिकरण्येन संबन्धोपपत्तिः। अथाश्रयस्य भूतभविष्यत्वाद्भूता सत्ता भविष्यती सत्तेत्युच्यते तथाप्यसौ वर्तमाना न भवतीति तत्र प्रत्ययाभावः। तेन गावोऽस्यासन् गावोऽस्य भवितार इत्यत्रार्थे गोमानिति प्रयोगो न भवति। न तर्हीति। विद्यमान एव देवदत्ते तद्वी नामतीतानागतत्वप्रतिपादनाय गोमानासीत् गोमान्भवितेति प्रयुज्यते। तत्र प्रकृत्यर्थस्य संप्रतिसत्ताया अभावात्प्रत्ययाप्रसङ्गः। गुणधर्मस्य च प्रधान आरोपादासीद्भवितेति प्रत्ययार्थस्यातीतानागतव्यपदेश इति चोदको मन्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवतीति। अवस्थातुर्विद्यमानत्वेप्यवस्थाविशेषस्य भूतभविष्यत्वादासीद्भवितेति व्यपदेशः यथेश्वरोयमासीदिति सिद्धान्तवादिनोभिप्रायः। नत्वेतस्मिन्वाक्य इति। गावोस्यासन् गावोऽस्य भवितार इत्यत्रार्थे गोमानिति न प्रयुज्यत इत्यर्थः। यथेति। प्रत्ययान्ते नैव प्रकृत्यर्थोपाधेः प्रतीतत्वात्तदुपाधिवाचिनः प्रयोगाभावः यथा दाण्डा क्रीडेति प्रहरणशब्दस्येति भावः। सतिचेति। सामान्याभिधाने विशेषावगमाय दृश्यते प्रयोगः। यथोत्सृच्छ्यत इत्यादावसन विशेषप्रतिपादनाय स्तुत्सरीणा स भिसनाय इत्यादौ च प्रत्ययार्थभवनविशेषावगमाय सुदुरुद्भीनामिति भावः। एवमिहापीति। प्रकृत्यर्थसत्ताकालविशेषावधारणाय वाक्यवद्बहुवचनान्तस्यास्तेः प्रयोगप्रसङ्गः। कातर्हीति। गोमतो वर्तमानत्वादासीद्भवितेति प्रयोगानुपपत्तिरिति मत्वा प्रश्नः। एषैषेति। याएषा शिष्टैः प्रयुक्ता सैषैव वाचोयुक्तिः। यथास्माभिर्व्याख्यायते न त्वन्यथेत्यर्थः। नैषेति। साक्षादित्यर्थः। गोमत्सत्तेति। अतीतानागता चेति शेषः। अवस्थाविशेषस्यातीतानागतत्वादवस्था तुरतीता

भवति। नत्वेतस्मिन्वाक्ये। यदित्वेतस्मिन्वाक्ये स्यात्। यथेहास्तेः प्रयोगो न भवति। गोमान्यवमानिति। एवमिहापि न स्यात्। गोमानासीत्। गोमान्भवितेति। सति चास्तेः प्रयोगे यथेह बहुवचनं श्रूयते। गावोऽस्यासन् गावोस्य भवितार इति। एवमिहापि स्यात्। गोमानासीत्। गोमान्भवितेति। कातर्हीयं वाचोयुक्तिः गोमानासीत्। गोमान्भवितेति। एषैषा वाचोयुक्तिः नैषा गवां सत्ता कथ्यते। किं तर्हि। गोमत्सत्तैषा कथ्यते। अस्त्यत्र वर्तमानसत्ता कालोस्तिः। कथं तर्हि भूतभविष्यत्सत्ता गम्यते। धातुसंबन्धे प्रत्यया इति ॥

नागतत्वमिति प्रागेवोक्तम्। अस्त्यत्रेति। चोदकः। गोमानित्यादौ वर्तमानसत्तायुक्तः प्रकृत्यर्थः प्रतीयत एवास्तिर्भवन्तीपरत्वस्यान्तरङ्गत्वात्सत्तायास्तथा च प्रत्ययान्तादेव शब्दशक्तिस्वाभाव्यात् प्रकृत्यर्थसत्तावगमात् सत्तावाचिपदाप्रयोगः। तस्मादङ्गीकृतसत्तः प्रकृत्यर्थः प्रत्ययार्थमवच्छिनत्तीति न कर्तव्यमस्तिग्रहणम्। चोदक एव कथं तर्हीत्याशङ्क्य धातुसंबन्ध इति परिहरति। तन्त्रास्त्रपक्षे प्रत्ययाधिकारे प्रत्ययग्रहणस्येदं प्रयोजनमधात्वधिकारविहितानामपि तद्धितानां कालान्तरे धातुसंबन्धे साधुत्वं यथा स्यादिति। यदा तु तत्सूत्रं प्रत्याख्यायते तदा हि स्वकाल एव प्रत्यया विधीयन्ते। तत्राग्निष्टोमयाज्यस्य पुत्रो जनितेति विरुद्धकालक्रियासंबन्धादग्निष्टोमयाजित्वस्यैव वाक्यार्थवशाद्भावित्वं गम्यते। तथेहापि गोमानासीद्गोमान्भवितेति विरुद्धकालक्रियासंबन्धाद्गोसत्तालक्षणावस्थाविशेषविषयातीतानागतत्वप्रतीतिरवस्थातुः सत्वे असत्वे चात त्र प्रकृत्यर्थस्य वर्तमानसत्ताभावप्रतीतावपि शब्दसंस्कारस्यान्तरङ्गस्यानिवृत्तिर्यथा ग्रामान्नागच्छतीति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तियुक्तादिति। अस्तिनैवयुक्तादित्यर्थः। पूर्वोक्तेनन्यायेनास्त्युपाधिकत्वेलब्धेपुनरस्तिग्रहणंविशेषणान्तरयुक्तप्रकृत्यर्थनिराकरणार्थम्। गावोस्येति। अनन्तरमव्यवहितंसमीपंतुव्यवहितमपीतिभावः। गावोस्यसन्त्यनन्तराइति। केवलानामनन्तरादीनांभवत्वस्तिग्रहणान्निरासः। इहतुसत्तासद्भावात्प्राप्नोत्येवप्रत्ययइतिभावः। असामर्थ्यादिति। इहयःप्रकृत्यर्थोपाधिःप्रत्ययान्तेनान्तर्भावयितुंशक्यस्तदुपाधेरेवप्रत्ययेनभाव्यम्। नचगोमानित्येतत्प्रकृत्यर्थस्यानन्तर्यंगमयितुंशक्नोतीतितदभिधानायवाक्यमेवप्रयुज्यते। स्वस्वामिभावस्तुसत्तयैवान्तर्भावितइतितत्प्रतीतिर्भवत्येव। क्रियमाणइति। प्रकृत्यर्थविषयंयदापेक्षंतत्तीयत्वंगावःसन्त्यनन्तराअस्येति। तत्रास्तिग्रहणेक्रियमाणेकेवलएवास्त्यर्थउपाधिभावेनप्रत्ययान्तेऽन्तर्भव

इदंतर्हिप्रयोजनमस्तियुक्ताद्यथास्यात्। अनन्तरादियुक्तान्माभूदिति। गावोस्यानन्तरागावोस्यसमीपइति। अथक्रियमाणेप्यस्तिग्रहणइहकस्मान्नभवति। गावोस्यसन्त्यनन्तरागावोस्यसन्तिसमीपइति। असामर्थ्यात्। कथमसामर्थ्यम्। सापेक्षमसमर्थंभवतीति। यथैवतर्हिक्रियमाणेऽस्तिग्रहणेऽसामर्थ्यादनन्तरादिषुनभवति। एवमक्रियमाणेपिनभविष्यति। अस्त्यन्नविशेषः। क्रियमाणेऽस्तिग्रहणेनान्तरेणतृतीयस्यपदस्यप्रयोगमनन्तरादयोर्थागम्यन्ते। अक्रियमाणेपुनरस्तिग्रहणेअन्तरेणापितृतीयस्यपदस्यप्रयोगमनन्तरादयोर्थागम्येरन्। अथेहकस्मान्नभवति। चित्रगुःशबलगुरिति। बहुव्रीहिणोक्तत्वान्मतुप्प्रत्ययार्थस्य। अथेहकस्मान्नभवति। चित्रागावोयस्यसन्तीति। कुतःकस्मान्नभवति। किमवयवादाहोस्वित्समुदायात्। अवयवात्कस्मान्नभवत्यसामर्थ्यात्। कथमसामर्थ्यम् ॥

तिनत्वानन्तर्यादिविशिष्टइतिप्रतीतिर्भवति। असतित्वस्तिग्रहणेधर्मान्तरावच्छिन्नस्याप्यस्त्यर्थस्यान्तर्भावआशङ्क्येतेत्यर्थः। तत्रक्रियमाणेऽस्तिग्रहणेऽस्त्यर्थस्यैवान्तर्भावावगमाद्वाक्येयत्तृतीयंपदमनन्तरादितितद्धितौऽस्यार्थप्रतिपादनायावश्यंप्रयोक्तव्यम्। तत्प्रयोगेचासामर्थ्यम्। अक्रियमाणेत्वस्तिग्रहणेनेकस्याप्युपाधेरन्तर्भावसंभावनयावृत्तावनन्तरपदप्रयोगमन्तरेणाप्यानन्तर्यावगमादसामर्थ्यंनस्यादित्यर्थः। चित्रगुरिति। सत्ताविशिष्टचित्रगवार्थः षष्ठ्यर्थश्चास्तीतिप्रश्नः। बहुव्रीहिणेति। षष्ठ्यर्थएवबहुव्रीहिविधानादित्यर्थः। कुतःकस्मादिति। समुदायावयवसंनिधानात्प्रश्नः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सापेक्षमिति। चित्रादितिगुणपदं विशेषापेक्षं द्रव्यद्वारेणैव चित्रार्थस्य देवदत्तादिना संबन्धाद्गवादित्येतदपि गुणापेक्षमित्ये
कार्थीभावं प्रतिपत्तुं न शक्नोति। तस्माद्गतौ चित्रादिगुणानपेक्ष्य प्रकृत्यर्थोपसर्जनप्रत्ययार्थावगमात्तत्समानार्थमेव वाक्यं
प्रदर्शयितव्यम् गावोस्य सन्तीति। अप्रातिपदिकत्वादिति। यदा सुबन्तात्प्रत्ययोत्पत्तिः समर्थात्प्रत्ययः प्रातिपदिकात्तुप
रः श्रूयतद्वत्वे वमाश्रयणं तदा सुबन्तसमुदायस्य समासग्रहणान्नियमार्थादप्रातिपदिकत्वम्। सुबन्तत्वमपि नास्ति सम्
दायात्सुपोः विधानात्। प्रातिपदिकसमुदायस्यार्थान्तरोपजननाभावादेकाप्रातिपदिकसंज्ञा नास्तीत्यप्रातिपदिकत्वम्। वि
शेषणविशेष्यभावस्य हि पदावस्थायां प्रादुर्भावः न प्रातिपदिकावस्थायाम्। आकृताविति। जातौ कार्यमुच्यमानमनपेक्षि
तव्यक्तिगतसंख्याविशेषं सर्वत्र प्रवर्तते। यथा ब्राह्मणो न हन्तव्य इति। ततश्च प्रातिपदिकसमुदायादपि प्रत्ययोत्पत्ति

सापेक्षमसमर्थं भवतीति। समुदायात्तर्हि कस्मान्न भवति। अप्रातिपदिकत्वात्। ननु च भोः आकृतौ शास्त्राणि प्र
वर्तन्ते। तद्यथा। सुपेति वर्तमाने अन्यस्यान्यस्य च समासो भवति। सत्यमेवैतत्। आकृतिस्तु प्रत्येकं परिसमाप्य
ते। यावत्स्वेतत्परिसमाप्यते ङ्याप्प्रातिपदिकादिति तावदुत्पत्त्या भवितव्यम्। अवयवे चैतत्परिसमाप्यते न सम्
दाये। अथेह कस्मान्न भवति। पञ्चगावः सन्त्यस्य पञ्चगुर्दशगुरिति। प्रत्येकमसामर्थ्यात्समुदायादप्रातिपदि
कत्वात् समासात्समासेनोक्तत्वात्। नैतत्कारम्। उक्तेपि हि प्रत्ययार्थे उत्पद्यते द्विगोस्तद्धितः। तद्यथा। द्वैमा
तुरः। पाञ्चनापितिरिति। नैष द्विगुः। कस्तर्हि। बहुव्रीहिः। अपवादत्वाद्द्विगुः प्राप्नोति ॥

प्रसङ्गः। अन्यस्यान्यस्य चेति। अनेन जात्याश्रयत्वं कार्याणां समर्थयते। यदि हि व्यक्तिः पदार्थस्तदा कस्यचिदेवैकस्य सुबन्त
स्य समासः प्रसज्येत न तु सर्वस्येत्यर्थः। प्रत्येकमिति। आश्रयगतैकत्वसंख्याविशिष्टा जातिः कार्य आश्रीयते। यथा पशुना य
जेतेति भावः। ङ्याप्प्रातिपदिकादित्यत्रैकवचनान्तानां समाहारनिर्देशाद्गुणे संख्याया विवक्षितत्वादेकैकस्मात्प्रातिपदिका
त्प्रत्ययोत्पत्तिः न तु समुदायादित्यर्थः। उक्तेपीति। द्विगोर्लुग्विधानात्तद्धितार्थेत्यत्र स्यादर्थस्यार्थे शब्दस्य ग्रहणाद्वा तद्धि
तार्थे द्विगोस्तद्धितो भवति पञ्चगवशब्दं च द्विगुं मन्यते न बहुव्रीहिम्। अपवादत्वादिति। अन्यपदार्थमात्रे सुबन्तमात्रस्य
विधीयमानस्य बहुव्रीहेः संख्यायास्तद्धितार्थे पञ्चगुरित्यादौ विधीयमानो द्विगुर्विशेषविषयत्वाद्बाधकः प्राप्नोतीत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तरङ्गत्वादिति। ननु चानवकाशेनान्तरङ्गमपि बाध्यते। नैष दोषः। यत्रैकनिमित्ताद्द्विगुबहुव्रीहिप्राप्तिस्तत्र द्विगुना बहुव्रीहिर्बाध्यताम् इह तु द्विगुरस्त्यर्थमधिकमपेक्षते। तदाह। तस्मिंश्चास्येति। तेन विशिष्टस्य षष्ठ्यर्थस्य तद्धितार्थत्वादस्त्यर्थापेक्ष्यो द्विगुना षष्ठ्यर्थमात्रापेक्षस्तु बहुव्रीहिः। यदि तर्हीति। यदि वचनमन्तरेणानन्तरादीनां निवृत्तिर्नास्तीत्यर्थः। अथ न सन्तीति। अनभिधानादेवानिष्टप्रसङ्गादिति भावः। प्रत्ययविध्यर्थमिति। अस्तीति लुप्तपञ्चमीकः प्रकृतिनिर्देश इति भावः। अव्ययमिति। कर्तृविशिष्टसत्तावाचीति भावः। तथा चास्तित्वमिति भावप्रत्ययप्रयोगोपपत्तिः। न चास्तेरिति। गवादीनां

अन्तरङ्गत्वाद्बहुव्रीहिर्भविष्यति। कान्तरङ्गता। अन्यपदार्थे बहुव्रीहिरिति वर्तते। विशिष्टेऽन्यपदार्थे तद्धितार्थे द्विगुस्तस्मिंश्चास्य तद्धितेऽस्तिग्रहणं क्रियते। यदि तर्हि अतिप्रसङ्गाः सन्तीति तद्धितविधावस्तिग्रहणं क्रियते। बहुव्रीहावप्यस्तिग्रहणं कर्तव्यमस्तियुक्तं यथा स्यादनन्तरादियुक्तान्माभूदिति। अथ बहुव्रीहौ दोषा न सन्ति तद्धितविधावपि नार्थोऽस्तिग्रहणेन। सत्यमेवमेतत्। क्रियते त्विदानीं तद्धितविधावस्तिग्रहणम्। तद्धै क्रियमाणमपि प्रत्ययविध्यर्थं नोपाध्यर्थम्। अस्तिमानिति मतुब्यथा स्यात्। किं च कारणं न स्यात्। अप्रातिपदिकत्वात्। नैष दोषः। अव्ययमेषोऽस्तिशब्दः। नैषोऽस्तेर्लट्। कथमव्ययत्वम्। विभक्तिस्वरप्रतिरूपकाश्च निपाता भवन्तीति निपातसंज्ञा। निपातोऽव्ययमित्यव्ययसंज्ञा। एवमपि न सिध्यति। किं कारणम्। अस्तिना सामानाधिकरण्ये मतुब्विधीयते। न चास्तेरस्तिना सामानाधिकरण्यं तदेतत्क्रियमाणमपि प्रत्ययविध्यर्थं नोपाध्यर्थम्। तस्माद्द्विगोस्तद्धितस्य प्रतिषेधो वक्तव्यः। यदेतद्भूनास्ति सर्वत्र नमत्वर्थे प्रतिषेध इति। सति हि तस्मिंस्तेनैव तत्सिद्धम् ॥

संभवव्यभिचाराभ्यामस्तीति सामानाधिकरण्यं संभवत्यस्तेस्त्वव्यभिचारादस्तिसामानाधिकरण्याभावः। तत्रास्तिमानिति वृत्तिविषयेऽस्तिक्रियायाः कर्तृविशेषेधनेऽस्तिशब्दो वर्तते। कर्तृसामान्येन प्रत्ययार्थस्य विशेषणायोगात्। तस्माद्द्विगोरिति उपाध्यनुपादानेऽपि शब्दशक्तिस्वाभाव्यान्मतुपो बहुव्रीहेश्चास्त्युपाधिकार्थविषयत्वाद्द्विगुबहुव्रीह्योस्तुल्याश्रयत्वादन्तरङ्गबहिरङ्गभावाद्विशेषविहितेन द्विगुना बहुव्रीहिबाधनाद्द्विगोर्मतुबादेस्तद्धितस्य प्रतिषेधो वक्तव्यः। तेनैव तु सिद्धमिति। द्विगौ प्रतिषिद्धे बहुव्रीहेर्भावाद्द्विगुप्रतिषेध एव युक्तः पञ्चखट्व इत्यादौ बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरो भवति। द्विगौ तु समासान्तोदात्तत्वप्रसङ्गः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति। यवमानस्यास्तीत्यादौ। अर्थगत्यर्थ इति। यस्य यवमानस्ति तस्य यवैरपि तत्संबन्धद्वारेण संबन्धोस्तीति यवमानित्यनेनै वयवमत्संबन्धावगमादिति भावः। दण्डिमतीति। यस्यां शालायां दण्डिनः पुरुषाः सन्ति दण्डा अपि तस्यां सन्तीति दण्डवतीत्य नेनैव पूर्वोक्तेन न्यायेन दण्डिसंबन्धावगमान्मतुप्न प्राप्नोतीति भावः। अर्थान्तरे वृत्तादिति यदुक्तं तदेव विभजति। षष्ठ्यर्थे वे ति। एकजातीये हि संबन्धे मतुप्न भवति। यस्य हि यवमान्विद्यते तस्य यवा अपि सन्ति। इह तु यस्यां शालायां हस्तिनो गोमन्तश्च। तस्यां नावश्यं हस्ता गावश्च सन्ति किं तु न हस्ता यामपि हस्तित्वजातिसंबन्धात्तद्देशासंनिहितगोभिरपि गोमत्वाच्च। अथमत्वन्तादि

अथमत्वर्थीयान्मत्वर्थीयेन भवितव्यम्। किं कारणम्। अर्थगत्यर्थः शब्दप्रयोग इति अर्थं संप्रत्याययिष्या मीति शब्दः प्रयुज्यते। तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यम्। किं कारणम्। उक्तार्थाना मप्रयोग इति। न तर्हीदानीमिदं भवति। दण्डिमती शाला हस्तिमत्युपत्यकेति। भवत्यर्थान्तरे वृत्तित्वादर्था न्तरे वृत्तिः। षष्ठ्यर्थे वा वृत्तं सप्तम्यर्थे वर्तते। सप्तम्यर्थे वा वृत्तं षष्ठ्यर्थे वर्तते। अथमत्वन्तान्मतुपा भवितव्यम्। गोमन्तोस्य सन्ति यवमन्तोस्य सन्तीति। न भवितव्यम्। किं कारणम्। यस्य गोमन्तः सन्ति गावोपि तस्य सन्ती ति। तत्रोक्तो गोभिरभिसंबन्धे प्रत्यय इति कृत्वा तद्धितो न भविष्यति। न तर्हीदानीमिदं भवति। दण्डिमती शा ला हस्तिमत्युपत्यकेति। भवत्यर्थान्तरे वृत्ताद् अर्थान्तरे वृत्तिर्भविष्यति। षष्ठ्यर्थे वा वृत्तं सप्तम्यर्थे वा वर्तते। सप्तम्यर्थे वा वृत्तं षष्ठ्यर्थे वर्तते। इहापि सप्तम्यर्थे वा वृत्तं षष्ठ्यर्थे वर्तते। षष्ठ्यर्थे वा वृत्तं सप्तम्यर्थे न वर्तते। अन्य थाजातीयकः खल्वपि गोभिरभिसंबन्धे प्रत्ययः ॥

ति। पूर्वोक्तन्यायस्य मतुप्यपि सद्भावात् प्रश्नः। यस्य गोमन्त इति। गावो विद्यन्ते येषु ते गोमन्तो ग्रामास्ते यस्य सन्तीत्यर्थः। गावो पीति। द्विविधो हि गोभिः संबन्धः साक्षात्पारंपर्येण वेति भावः। ततो गोमानित्ययं शब्दो द्विविधमपि संबन्धं शब्दप्रवृत्तिनिमित्तत्वे नान्तर्भावयितुं शक्तस्तत्र पारंपर्येण गोसंबन्धे मिथित्सिते गोमत्संबन्धोप्याक्षिप्त एव तद्द्वारकत्वाद्गोसंबन्धस्य। न तर्हीति। न्या यस्य तुल्यत्वादिति भावः। इहापीति। मत्वन्तादपि मतुप्प्रसङ्गो न्यायस्य तुल्यत्वादित्यर्थः। अन्यथाजातीयक इति। संबन्धे प्रत्य यावगम इत्यर्थः। गोमानित्युक्ते साक्षाद्गोभिः संबन्धः प्रतीयते। गोमत्संबन्धे गोसंबन्धो नावश्यंभावी न हि गोमत्स्वामिना गो स्वामिना भाव्यमिति नियम इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनैवेति। वृत्तिवाक्ययोस्तुल्यार्थत्वाद्वृत्तेरिव वाक्यस्याभावः स्याद्वाक्यवद्वा वृत्तिप्रसङ्गः। मत्वर्थीयान्मतुबादिप्रतिषेध इति। न केवलं मत्वन्तान्मतुब्नेष्यते। यावता ठन्नन्तादिनिठनावपि नेष्येते इति सामान्येनोक्तम्। सामान्येन प्रतिषेधं विधाय विशेषप्रतिपादनायाह। तं चापीति। ———— । समानवृत्ताविति। समाने प्रत्ययार्थे षष्ठ्यर्थे वृत्तं षष्ठ्यर्थेन वर्तते सप्तम्यर्थे वृत्तं सप्तम्यर्थेन वर्तते इत्यर्थः। तेन सप्तम्यां च न तौ स्मृताविति वचनात् षष्ठ्यर्थे इनिठनोर्विधानात्समानवृत्तित्वाद्विरूपोपि इनिष्ठन्नन्तान्न भवति। दण्डिका अस्य सन्तीति। तथा भिन्नवृत्तावपि सरूपो न भवति। यवमन्तो ग्रामा अस्य सन्तीति। अथ हस्तिमान् राजेति समानवृत्तित्वात्कथं प्रत्ययः। हस्तिशब्दस्य जातिशब्दत्वान्न संबन्धः प्रवृत्तिनिमित्तमित्यदोषो तएवाह हस्तीति कृते मत्वर्थीयेन ञ्समासः क्रियते न बहुव्रीहिः। न ह्य हस्त इत्युक्ते जातिपर्युदासप्रतीतिर्यत्र तु समानार्थत्वं तत्र बहुव्रीहिरेव भवति यथाऽगुरनश्व इति। न तु अगोमाननश्ववानिति। यत्रापि मत्वर्थीयेनार्थविशेषप्रतीतिस्तत्रापि तदन्तेन नञ्समा

अन्यथाजातीयकस्तद्वता। येनैव खल्वपि हेतुना एतद्वाक्यं भवति गोमन्तोऽस्य सन्तियवमन्तोऽस्य सन्तीति। तेनैव हेतुना वृत्तिरपि प्राप्नोति॥ तस्मान्मत्वर्थीयान्मतुबादेः॥ तस्मान्मत्वर्थीयान्मतुबादेः प्रतिषेधो वक्तव्यः। तं चापि ब्रुवता समानवृत्तौ सरूप इति वक्तव्यम्। भवति हि दण्डिमती शाला हस्तिमत्युपत्यकेति। शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः। सरूपप्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते। किं पुनरिमे मतुप्प्रभृतयः सन्मात्रे भवन्ति। एवं भवितुमर्हति। मतुप्प्रभृतयः सन्मात्रे इति चेदतिप्रसङ्गः। मतुप्प्रभृतयः सन्मात्र इति चेदतिप्रसङ्गो भवति। इहापि प्राप्नोति। व्रीहिरस्य यवोऽस्येति ॥

सोयथाऽदण्डी अपुच्छी अवाग्मीति। दण्डपुच्छसंयोगनिषेधस्य सम्यग्भावित्वनिषेधस्य च बहुव्रीहेरनवगमात्। शैषिकादिति। शैषिकाच्छैषिकः सरूपो नेष्टः। यथा शालायां भवः शालीयो घटस्तत्र भवस्तस्येदमिति वा क्रान्ता। च्छो न भवति। विरूपस्तु भवत्येव। यथा अहिच्छत्रे भव आहिच्छत्रस्तत्र भव आहिच्छत्रीय इति। तथा मत्वर्थीयान्मतुबर्थीयः सरूपो नेष्टो यथा यवमानस्यास्तीति। मत्वन्तान्मतुम्न भवति। समानवृत्ताविति तु श्लोकानुरोधान्नोक्तम्। पूर्वमेव च विषयः प्रविभक्तः। सन्नन्तादिति। सरूप इत्यपेक्ष्यते। सारूप्यं चाव्यभिचारात्। तेन समानत्वं लक्ष्यते। तच्चार्थकृतम्। तेनेच्छा सन्नन्तादिच्छा सन्न भवति। अर्थान्तराभिधायिनस्तु भवत्येव। जुगुप्सिषते। मीमांसिषत इति। किं पुनरिति। विशेषानुपादानात्सन्मात्रस्य सर्वत्र चानिष्टप्रसङ्गात् प्रश्नः। अभिधानतो व्यवस्थां वक्ष्यामीत्याह। एवं भवितुमर्हतीति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूमेति। यद्यपि त्रिप्रभृतिषु बहुत्वं व्यवस्थितं तथाप्यभिधानमाश्रयणीयम्। नहि यस्य त्रयः यवाः सन्ति स यवमानित्युच्यते। इतिकरण इति। इतिशब्दस्य बह्वर्थत्वादिह विवक्षार्थत्वमिति भावः। नहि कस्यचिदिति। मत्वर्थीयान्तानभिधानस्यापि संबन्धोस्तीत्येवं परमेतत्। नहि कश्चिन्नसंखादकीति। संखादकोदशनः स च सर्वस्याप्यस्तीति विशेषणोपादानान्निन्दाप्रतीतिः। नहीति। रूपमात्रसंबन्धे वगते। रूपवानयमिति विशेषणोपादानात्प्रशंसाप्रतीतिः। यावतीभिरिति। क्रियमाणेपि

तस्माद्भूमादिग्रहणं कर्तव्यम्। के पुनर्भूमादयः। भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने। संबन्धेस्ति विवक्षायां भवन्ति मतुबादयः॥ भूम्नि। गोमान्यवमान्। निन्दायाम्। ककुदावर्ती। संखादकी। प्रशंसायाम्। रूपवान्। वर्णवान्। नित्ययोगे क्षीरिणो वृक्षाः। कण्टकिनो वृक्षाः। अतिशायने। उदरिणी कन्या। संसर्गे। दण्डी। छत्री। तत्तर्हि भूमादिग्रहणं कर्तव्यम्। न कर्तव्यम्। कस्मान्न भवति। व्रीहिरस्य यवोस्येति। उक्तं वा। किमुक्तम्। अनभिधानादिति। इतिकरणः खल्वपि क्रियते। ततश्चेद्विवक्षा भूमादियुक्तस्यैव विवक्षा। गोमान्। यवमान्। भूमादियुक्तस्यैव सत्ता कथ्यते। तेन हि कस्यचिद्यवो नास्ति संखादकी। ककुदावर्ती। निन्दायुक्तस्यैव सत्ता कथ्यते। नहि कश्चिन्न संखादकी। रूपवान्वर्णवान्। प्रशंसायुक्तस्यैव सत्ता कथ्यते। नहि कस्यचिद्रूपं नास्ति। क्षीरिणो वृक्षाः। कण्टकिनो वृक्षा इति। नित्ययुक्तस्यैव सत्ता कथ्यते। नहि कस्यचित्क्षीरं नास्ति। उदरिणी कन्येति। अतिशायनयुक्तस्यैव सत्ता कथ्यते। नहि कस्यचिदुदरं नास्तीति। दण्डी। छत्री। संसर्गयुक्तस्यैव सत्ता कथ्यते। नहि कस्यचिद्दण्डो नास्ति छत्रं वा। गोमान्। यावतीभिः खल्वपि गोभिर्वाहदोहप्रसवाः कल्प्यन्ते। तावतीषु सत्ता कथ्यन्ते। कस्यचिच्चतसृभिः कल्प्यन्ते। कस्यचिच्छतेनापि न प्रकल्प्यन्ते। सन्मात्रे चर्षिदर्शनात्। सन्मात्रे च पुनः ऋषिर्दर्शयति मतुपम्। यवमतीभिरद्भिर्यूपं प्रोक्षतीति॥ गुणवचनेभ्यो मतुपो लुक्॥ गुणवचनेभ्यो मतुपो लुग्वक्तव्यः। शुक्लः। कृष्ण इति। अव्यतिरेकात्सिद्धम्। न गुणो गुणिनं व्यभिचरतीति ॥

भूमादिग्रहणे विशिष्टमेव बहुत्वमभिधानवशादाश्रयणीयं ततश्चाकरणमेव भूमादीनां न्याय्यमिति भावः। यवमतीभिरिति। संस्कारस्यादृष्टार्थत्वाज्जातिमात्रसंबन्धोत्र विवक्षितः। गुणवचनेभ्य इति। शुक्लादय एवाभिन्नरूपा गुणे तद्वति च द्रव्ये वर्तमाना गृह्यन्ते न तु रूपादयः सर्वदा गुणमात्रवाचिनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्यतिरेकादिति। गुणगुणिनोः सोयमित्यभिसंबन्धादभेदाध्यवसायादुत्पत्तिरेव मतुपो नास्तीत्यर्थः। नगुणइति। गुणगुणिनोर्जातितद्वतोरिवयुतसिद्धभावात्सोयमित्यभेदात्संबन्धइत्यर्थः। दृश्यतेव्यतिरेकइति। जातिरुत्पत्तिप्रभृत्याविनाशाद्द्रव्यंनजहातितदात्मैवप्रतीयतेशब्देनचाभिधीयतेगोः शाबलेयइति। नतुशाबलेयस्यगौरिति। गुणाःपुनरुपायिनश्चापायिनश्चेति द्रव्याद्भेदेनप्रतीयन्ते शब्देनचाभिधीयन्तइत्यर्थः। पटस्यशुक्लइति। ततश्चभेदविवक्षायाःसद्भावान्मतुपःश्रवणंस्यादितिलुग्वक्तव्यएव। तथा चेति। यस्माद्द्रव्येवर्तमानाःशुक्लादयोयौगिकानतुवरणपञ्चालादिवद्रूढिशब्दास्ततोद्रव्य

अव्यतिरेकात्सिद्धमितिचेद् दृष्टोव्यतिरेकः। दृश्यतेव्यतिरेकः। तद्यथा। पटस्यशुक्लइति। तथाचलिङ्गवचनसिद्धिः। एवंचकृत्वालिङ्गवचनानिसिद्धानिभवन्ति। शुक्लंवस्त्रम्। शुक्लाशाटी। शुक्लःकम्बलः। शुक्लौकम्बलौ। शुक्लाःकम्बलाइति। यदसौद्रव्यंश्रितोभवति गुणस्तस्ययल्लिङ्गंवचनंचतद्गुणस्यापिभवति॥ रसादिभ्यश्च॥ किमर्थमिदमुच्यते। नातद्स्यास्त्यस्मिन्नित्येवमतुप्सिद्धः। रसादिभ्यःपुनर्वचनमन्यनिवृत्त्यर्थम्। रसादिभ्यःपुनर्वचनंक्रियते। अन्येषांमत्वर्थीयानांप्रतिषेधार्थम्। मतुबेवयथास्यादन्येमत्वर्थीयाःप्राप्नुवन्तितेमाभूवन्निति। नैतदस्तिप्रयोजनम्। दृश्यन्तेह्यन्येरसादिभ्योमत्वर्थीयाः। रसिकोनटः। उर्वशीवैरूपिण्यप्सरसाम्। स्पर्शिकोवायुरिति॥ प्राणिस्थादातोलजन्यतरस्याम्॥ इहकस्मान्नभवति। चिकीर्षास्यास्तिजिहीर्षास्यास्तीति। प्राण्यङ्गादितिवक्तव्यम्। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। कस्मान्नभवति। जिहीर्षास्यास्तिचिकीर्षास्यास्तीति। अनभिधानात्॥ सिध्मादिभ्यश्च॥ सिध्मादिषुयान्यकारान्तानितेभ्योलचामुक्तेइनिठनौप्राप्नुतः। इनिठनौचनेष्येते। कथंतौनभविष्यतः। लजन्यतरस्यामितिसमुच्चयः। लजन्यतरस्यामितिसमुच्चयोयंनविभाषालच्चमतुप्च। कथंपुनरेतज्ज्ञायते लजन्यतरस्यामितिसमुच्चयोनविभाषेति ॥

गतलिङ्गसंख्योपादायिनोरूढत्वेनियतलिङ्गसंख्यत्वंसर्वत्रवासर्वलिङ्गसंख्यत्वंप्रसज्येत॥ रसा॥ दृश्यन्तेहीति। प्रयोगमूलत्वाल्लक्षणस्यनियमार्थत्वायोगात्सूत्रंप्रत्याख्यातम्॥ प्राणि॥ लोकप्रसिद्धशरीरादिसंघातःप्राणीतत्रचैतन्यापगमेपिप्राणिव्यवहारस्यरूढत्वान्मृतावस्थायामपिचूडालादिव्यपदेशसिद्धिः॥ सिध्म॥ प्राणिस्थादातइत्यतोन्यतरस्यांग्रहणंविकल्पार्थमनुवर्ततइतिमत्वाह। सिध्मादिष्विति। समुच्चयइति। अनेकार्थत्वान्निपातानांसमुच्चयेन्यतरस्यांशब्दोथवाविकल्पार्थएवतत्रलचामुक्तेप्रकृतएवमतुब्भवतिनत्विनिठनौ। वक्ष्यमाणज्ञापकादिसामर्थ्यात्समुच्चयःसंपद्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिच्छादिभ्य इति। तुन्दादिभ्य इलच्चेत्यत्र चत्वारः प्रत्यया इष्यन्ते इलजिनिठनौ मतुबिति। तत्र यद्यन्यतरस्यांग्रहणानुवृत्त्या पिच्छादिभ्यः प्रत्ययचतुष्टयं स्यात्तदा तुन्दादिष्वेव पिच्छादयः पठितव्याः। पिच्छादिष्वेव वा तुन्दादयः। पृथक्पाठात्तु ज्ञायतेऽन्यतरस्यांग्रहणेन मतुप् समुच्चीयते। ननु यथा प्राप्तमभ्यनुज्ञायते। तेन सिध्मादिपिच्छादिभ्य इनिठनौ न भवतः। नैतदस्तीति। तुन्दादिभ्योऽनकारान्तेभ्योपीनिठनौ विधीयेते। तत्र यदि तुन्दादिषु पिच्छादयः पठ्येरंस्तदा पिच्छादिभ्योऽनकारान्तेभ्य इनिठनौ स्याताम्। अथ पिच्छादिषु तुन्दादयः पठ्येरंस्तदा तुन्दादिभ्यो नकारान्तेभ्य इनिठनौ न स्यातामि

पिच्छादिभ्यस्तुन्दादीनां नानायोगकरणं ज्ञापकं समावेशस्य। यदयं पिच्छादिभ्यस्तुन्दादीनां नानायोगं करोति तज्ज्ञापयत्याचार्यः समुच्चयोयं न विभाषेति। यदि विभाषा स्यात्। नानायोगकरणमनर्थकं स्यात्। तुन्दादीन्यपि पिच्छादिष्वेव पठेत्। नैतदस्ति ज्ञापकमस्ति ह्यन्यन्नानायोगकरणे प्रयोजनम्। किम्। तुन्दादिषु यानि नकारान्तानि तेभ्य इनिठनौ यथा स्याताम्। यानि तर्ह्यकारान्तानि तेषां पाठः किमर्थः। ज्ञापकार्थ एव। अपर आह। तुन्दादिभ्यः पिच्छादीनां नानायोगकरणं ज्ञापकमसमावेशस्य। यदयं तुन्दादिभ्यः पिच्छादीनां नानायोगं करोति तज्ज्ञापयत्याचार्यः समुच्चयोयं न विभाषेति। यदि विभाषा स्यान्नानायोगकरणमनर्थकं स्यात्। पिच्छादीनपि तुन्दादिष्वेव पठेत्। नैतदस्ति ज्ञापकमस्ति ह्यन्यन्नानायोगकरणे प्रयोजनम्। किम्। पिच्छादिषु यान्यनकारान्तानि तेभ्य इनिठनौ मा भूतामिति। यानि तर्ह्यकारान्तानि तेषां पाठः किमर्थः। ज्ञापकार्थ एव। वस्य च पुनर्वचनं सर्वविभाषार्थम्। वस्य खल्वपि पुनर्वचनं क्रियते सर्वविभाषार्थम्। केशाद्वोऽन्यतरस्यामिति। एतदेव ज्ञापयत्याचार्यः। समुच्चयो न विभाषेति। द्युद्रुभ्यां नित्यार्थमेकेऽन्यतरस्यांग्रहणमिच्छन्ति। कथम्। विभाषामध्येऽयं योगः क्रियते। विभाषामध्ये ये विधयो नित्यास्ते भवन्तीति ॥

त्यर्थः। यानि तर्हीति। कानिचिदकारान्तानि पिच्छादिषु पठितानि कानिचित्तु तुन्दादिषु पठितानि। तत्र भेदेन पाठो ज्ञापक एव यथोक्तार्थस्येत्यर्थः। वस्य च पुनर्वचनमिति। केशाद्व इत्येव वक्तव्यम्। तत्र प्रकृतान्यतरस्यांग्रहणानुवृत्त्या ठन्निनिमतुपो भविष्यन्तीति किमन्यतरस्यांग्रहणेन ठन्निनिप्राप्त्यर्थेन। तत्पुनः क्रियमाणं पूर्वस्यान्यतरस्यांग्रहणस्य मतुप्समुच्चयार्थत्वं ज्ञापयतीत्यर्थः। द्युद्रुभ्यामिति। सति प्रयोजने ज्ञापकं न भवतीति पूर्वोक्तमेव ज्ञापकमाश्रयणीयम् ॥ एम: ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोमा।नप्रकरणइति।प्रकरणंप्रस्तावः।महत्शाकंशाकी।नानाजातीयकशाकसमाहारोवाशाकी।पललीपललस्तेदोः।य
वाभिन्नानिशालिकोद्रवादिपलालानिपलाली।वि ष्वगिति।विषुनानाञ्चतीतिविषञ्चितानिसन्त्यस्येतिविषुणम्।विष्वगाता
नीति।अर्थप्रदर्शनपरमेतत्।यानिहिविषञ्चितानिविषग्गातानिविषग्गतंगमनमेषामित्यर्थः।तत्रविषुणशब्देनविषुव
दाख्यःकालउच्यते।तस्यहिनानागतानिदिनानिसन्तितदाश्रयत्वाद्दिवसान्तराणांन्यूनाधिकभावस्य।तथावायुर्मृत्युश्च
विषुणस्तथान्योप्यनवस्थितप्रकृतिर्मनुष्यादिर्विषुणस्तत्रवृत्तिविषयेगमनक्रियान्तर्भावाद्विष्वग्गमनमस्यास्तीत्येववाच्यादेर
भिधानमित्याहुः॥प्रज्ञा॥वार्त्तमिति।वृत्तिशब्दोविच्छेदप्रतिविधानादिषुवर्तते।इहप्रज्ञ शब्दात्स्वार्थेणिविहितेप्राज्ञोव्याकर

लोमादिपामादिपिच्छादिभ्यः शनेलचः॥नप्रकरणेदद्रूह्रस्वत्वंच।नप्रकरणेदद्रुउपसंख्यानंकर्तव्यम्।ह्रस्व
त्वंचवक्तव्यम्।दद्रुणः।अत्यल्पमिदमुच्यते।शाकीपलालीदद्रूह्रस्वत्वंचेतिवक्तव्यम्।शाकिनम्।पलालिनम्।
दद्रुणम्।विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः॥विष्वगित्युपसंख्यानंकर्तव्यम्।उत्तरपदलोपश्चाकृतसन्धे
र्वक्तव्यः।विष्वग्गातान्यस्यविषुणः॥प्रज्ञाश्रद्धार्चाभ्योणः॥वृत्तेश्च॥वृत्तेश्चेतिवक्तव्यम्।वार्त्तम्॥तपःसहस्राभ्यां
विनीनी॥अण्च॥किमर्थंतपःशब्दाद्विन्विधीयते।न।असन्तादित्येवसिद्धम्।तपसोविन्वचनमणिवधानात्।त
पसोविन्व चनंक्रियते।किंप्रयोजनम्।अण्विधानात्।तपःशब्दादण्विधीयते।सविशेषविहितःसामान्यविहि
तंविनंबाधेत।अण्प्रकरणेज्योत्स्नादिभ्यउपसंख्यानम्॥अण्प्रकरणेज्योत्स्नादिभ्यउपसंख्यानंकर्तव्यम्।ज्यौ
त्स्नः।तामिस्रः।कौण्डलः।कौतपः। वैपादिकः॥ऊषसुषिमुष्कमधोरः॥अयंमधुशब्दोऽस्त्येवद्रव्यपदार्थकः।
अस्तिरसवाची।आतश्चरसवाची ॥

णमितिभाष्यम्।यथाकृतपूर्वीकटमितिकृदूहणात्तद्धितप्रयोगेषष्ठ्यभावोयदातुप्रज्ञाशब्दान्मत्वर्थीयोणोविधीयते।तदाप्र
ज्ञावतःप्राधान्यात्प्रज्ञानक्रियायाउपलक्षणत्वादनाविर्भावाद्व्याकरणादिभिःकर्मभिःसंबन्धाभावः।केचित्तत्रापिगुणभूत
याप्रज्ञानक्रिययाव्याकरणादीनांसंबन्धमिच्छन्तः प्राज्ञोव्याकरणमितिभवितव्यमित्याहुः।विषयत्वविवक्षायांतुप्राज्ञोव्या
करणइति॥अण्च॥तामिस्रमिति॥तमःसमूहस्तमिस्रम्।तद्यत्रास्तितमिस्रारात्रिर्वा यस्मिन्नस्तितत्तामिस्रम्।कुण्डलार्हः
कौण्डलइत्याहुः॥ऊष॥द्रव्यपदार्थइति।मासिकेमाध्वीकेचप्रसिद्धमित्यर्थः।आतश्चेति।रसमात्रेमधुशब्दस्यप्रवृत्त्यभावा
दितिविषयएवयत्नप्रतिपाद्यंरसवाचित्वंमन्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुन्येवेति। नहितद्देवतस्मिन्विद्यत इति सामर्थ्याद्वृत्तिविषयेरसविशेषवाची मधुशब्द इत्यर्थः। तयोरसवाचीति। अभिधानशक्तिस्वाभाव्यादितिभावः। मतुबपिरसवाचिनो नमिधानान्नभवति। खरइति। शब्दनिष्पत्तिकारणं कण्ठविवरं महदस्यास्तीत्यर्थः। मुखरइति। स्वव्यापारे शब्दोच्चारणेऽप्रतिबद्धं मुखमस्येत्यर्थः। कुञ्जरइति। वृत्तिविषये कुञ्जशब्देन हस्तिहनुरुच्यते। तेन तद्वान्कुञ्जरो हस्तिशब्दवज्जातिशब्दोयम्। नगरमिति। नगावृक्षाः पर्वताश्च। नगरशब्दोपिजातिशब्द एव। नगशब्दोस्मादिगुपधज्ञाप्रीकिरः कः इत्यादिना नगरशब्दस्य सिद्धत्वान्नगाच्चेतिनवक्तव्यम्। केशाः। मणिवइति। नागविशेषस्येयं संज्ञा। हिरण्यवइति। निधिविशेषस्य। केचित्तु कुञ्जरस्येत्याहुः। छन्दसीवनिपौचेति। चशब्दो वस्य समुच्चयार्थोन्यतरस्यां

अपि मधुन्येव हिमध्विदं मधुरमिति प्रयुज्यते। तयोरसवाचीतस्येदं ग्रहणम्। यदि हि द्रव्यपदार्थकस्य ग्रहणं स्यादिहापि प्रसज्येत। मध्वस्मिन्घटेस्ति॥ रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्॥ रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानं कर्तव्यम्। खरः। मुखरः। कुञ्जरः॥ नगाच्च॥ नगाच्चेति वक्तव्यम्। नगरम्। केशाद्वोन्यतरस्याम्॥ वप्रकरणे मणिहिरण्याभ्यामुपसंख्यानम्॥ वप्रकरणे मणिहिरण्याभ्यामुपसंख्यानं कर्तव्यम्। मणिवः। हिरण्यवः॥ छन्दसीवनिपौ च। छन्दसि ईवनिपौ च वक्तव्यौ। वञ्च मतुप्च। रथीरभून्मुद्गलानी गविष्टौ। सुमङ्गलीरिमं वधूः। ऋतावानम्। मघवानमीमहे॥ उद्वा च॥ उद्वतीच। मेधारथाभ्यामिरन्निरचौ वक्तव्यौ। मेधिरः। रथिरः। अपर आह। वप्रकरणे अन्येभ्योपि दृश्यत इति वक्तव्यम्। बिम्बावं कुररावमिष्टकावम्। रजःकृष्यासुति परिषदो वलच्॥ वलच्प्रकरणेऽन्येभ्योपि दृश्यते॥ वलच्प्रकरणे अन्येभ्योपि दृश्यत इति वक्तव्यम्। भ्रातृवलः। पुत्रवलः। उत्सङ्गवलः ॥

ग्रहणस्य सर्वसंबन्धान्मतुबपि भवतीति मत्वाह। वञ्च मतुप्चेति। रथीरिति। रथोस्यास्तीत्यर्थः। सुमङ्गलीरिति। लाघवाद्बहुव्रीहिणा भाव्यमिति न्यायः छान्दसत्वादत्र नाश्रितः। मघवेति। मघमस्यास्तीति मघवा। मतुपि तु मघवत् शब्दः। मघवा बहुलमित्येतन्न कर्तव्यम्। श्वन्नुक्षन्निति निपातनान्मघशब्दान्मतुपा च भाषायामपि शब्दद्वयस्य सिद्धत्वात्। उद्वा चेति। उद्गतमस्यास्तीति ससाधनक्रियावचनादुपसर्गात्प्रत्ययः। मेधारथाभ्यामिति। एतदपि छन्दोविषयम्। बिम्बावं कुररावमिति। अन्येषामपि दृश्यत इति दीर्घः॥ रजः॥ भ्रातृवल इति। वल इत्यत्राण्ग्रहणानुवर्तनाद्दीर्घाभावः। पुत्रवल इति। दीर्घत्वं वनगिर्योः संज्ञायामित्यः संज्ञानुवृत्त्या संज्ञायां विधीयते। तेन पुत्रावल उत्सङ्गावल इति संज्ञायां भवतीत्यसंज्ञायां दीर्घाभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ०॥अतइनिठनौ॥इनिठनोरेकाक्षरात्प्रतिषेधः॥इनिठनोरेकाक्षरात्प्रतिषेधोवक्तव्यः।स्ववान्।खवान्।अत्यल्पमिदमु
च्यतेएकाक्षरादिति।एकाक्षरात्कृतोजातेःसप्तम्यांचनतौस्मृतौ।एकाक्षरात्।स्ववान्।खवान्।कृतः।कारकवान्।
जातेः।वृक्षवान्।प्लक्षवान्।व्याघ्रवान्।सिंहवान्।सप्तम्यांचनतौ स्मृतौ।दण्डाअस्यांशालायांसन्तीति।यदिकृतोने
त्युच्यते।कार्यीकार्यिकइतिनसिध्यति।तथाजातेर्नेत्युच्यते।तण्डुलीतण्डुलिकइतिनसिध्यति।एवंतर्हिनायंस
मुच्चयःकृतश्चजातेश्चेति।किंतर्हि।जातिविशेषणंकृद्ग्रहणम्।कृद्योजातिरिति।कथंकारकवान्।अनभिधानान्न
भविष्यति।यद्येवंनार्थोऽनेन।कथंस्ववान्वृक्षवान्प्लक्षवान्दण्डाअस्यांशालायांसन्तीति।अनभिधानान्नभविष्य
ति॥व्रीह्यादिभ्यश्च॥शिखादिभ्यइनिर्वाच्यः इकन्यवखदादिषु।किंप्रयोजनम्।नियमार्थम्।इनिरेवशिखादि
भ्यइकन्नेवयवखदादिभ्यः।शिखायवखदादिभ्योनियमस्यावचनंनिवर्तकत्वात्।शिखायवखदादिभ्योनि
यमस्यावचनम्।किंकारणम्।निवर्तकत्वात्।किंनिवर्तकम्।अनभिधानम्।एकगोपूर्वाट्ठञ्नित्यम्।नित्यग्रह
णंकिमर्थम्।विभाषा माभूत्।नैदस्तिप्रयोजनम्।पूर्वस्मिन्नेवयोगेविभाषाग्रहणंनिवृत्तम्।एवंतर्हियत्सिद्धे
सतिनित्यग्रहणंकरोतितज्ज्ञापयत्याचार्यःप्रागेतस्माद्योगाद्विभाषेत्यनुवर्ततइति।अथअतइत्यनुवर्तते।
उताहोन।किंचातः।यद्यनुवर्तते।ऐकगविकोनसिध्यति।समासान्तेकृतेभविष्यति।एवमपिगोशकटिकोन
सिध्यति।अथनिवृत्तमिहापिप्राप्नोति गोविंशतिरस्यास्तीति।निवृत्तम्।इहकस्मान्नभवति गोविंशतिरस्यास्ती
ति।अनभिधानान्नभविष्यति॥रूपादाहतप्रशंसयोर्यप्॥यप्प्रकरणेऽन्येभ्योपिदृश्यते॥यप्प्रकरणेऽन्येभ्योपि
दृश्यतइतिवक्तव्यम्।हिम्याःपर्वताः।गुण्याब्राह्मणाः॥बहुलंछन्दसि॥छन्दोविन्प्रकरणेऽष्ट्रामेखलाद्वयोभयरु
जाहृदयानांदीर्घश्च।छन्दोविन्प्रकरणेऽष्ट्रामेखलाद्वयोभयरुजाहृदयानांदीर्घश्चेतिवक्तव्यम्।अष्ट्रावी।मेख
लावी।द्वयावी।उभयावी।रुजावी।हृदयावी।मर्मणश्चेतिवक्तव्यम्।मर्मावी॥सर्वत्रामयस्योपसंख्यानम्॥सर्वत्रा
मयस्योपसंख्यानंकर्तव्यम्।आमयावी।शृङ्गवृन्दाभ्यामारकन्॥शृङ्गवृन्दाभ्यामारकन्वक्तव्यः।शृङ्गारकः।वृ
न्दारकः।फल बर्हीभ्यामिनच्वक्तव्यः।फलिनः।बर्हिणः॥हृदयाच्चालुरन्यतरस्याम्॥ हृदयाच्चालुर्वक्तव्यः।
अन्यतरस्याम्।हृदयालुः।हृदयी।हृदयिकः।हृदयवान्।शीतोष्णतप्रेभ्यस्तन्नसहतइतिचालुर्वक्तव्यः।शीतालु
रुष्णालुः तृप्रालुः॥हिमाच्चेलुः॥हिमाच्चेलुर्वक्तव्यः।तन्नसहतइत्येतस्मिन्नर्थे।हिमेलुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वामि॥ स्वमस्येति। धनवाच्यत्र स्वशब्दः। नायं प्रत्ययार्थ इति। प्रत्ययार्थविषयत्वात् प्रत्ययार्थ उच्यते। ऐश्वर्य इति। यदि विषय सप्तमी स्यात्तदा ईशितरि धनवाचिनोपि प्रत्ययः स्यात् प्रकृत्यर्थस्त्वैश्वर्यमिहोपात्तमिति वृत्तिविषय एव च स्वशब्द ऐश्वर्ये वर्तते। तेन धनवान्निर्धनो वेशिता स्वामिशब्दाभिधेयः॥ पुष्क॥ अर्थाच्चेति। विरोधादस्तीति न संबध्यते। अर्थो संनिहितोस्येत्यर्थः प्राप्ते एव विनिर्विधीयते। तत्र कौण्डिन्यन्यायेनास्तुपाधिकादिनेरभावः। धान्यार्थीति। धान्यमर्थ इति कर्मधारयो धान्य

बलाच्चोलः। बलाच्च ऊलो वक्तव्यः तन्न सहतद्दत्येतस्मिन्नर्थे। बलूलः॥ वातात्समूहे च॥ वातात्समूहे चातन्न सहत इत्येतस्मिन्नर्थे च ऊलो वक्तव्यः। वातूलः। पर्वमरुद्भ्यां तप्॥ पर्वमरुद्भ्यां तप् वक्तव्यः। पर्वतः। मरुत्तः। ददातिवृत्तं वा द्दातिवृत्तं वा पुनरेतद्भविष्यति। मरुद्भिर्दत्तो मरुत्तः॥ आलजाटचौ बहुभाषिणि॥ कुत्सित इति वक्तव्यम्। यो हि सम्यग्बहु भाषते वाग्मीत्येव स भवति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नानायोगकरणसामर्थ्यान्न भविष्यति॥ स्वामिन्नैश्वर्ये॥ इह कस्मान्न भवति स्वमस्यास्तीति। नैष दोषः। नायं प्रत्ययार्थः। किं तर्हि। प्रकृतिविशेषणमेतत्। स्वामिन्नैश्वर्ये निपात्यत इति॥ वातातीसाराभ्यां कुक्॥ पिशाचाच्चेति वक्तव्यम्॥ पिशाचकी वैश्रवणः॥ पुष्करादिभ्यो देशे॥ इति प्रकरणे बलाद्बाहूरुपूर्वपदादुपसंख्यानं कर्तव्यम्। बाहुबली। ऊरुबली॥ सर्वादेश्च॥ सर्वादेश्चेनिर्वक्तव्यः। सर्वधनी। सर्वबीजी। सर्वकेशी॥ अर्थाच्चासंनिहिते॥ अर्थाच्चासंनिहिते इनिर्वक्तव्यः। अर्थी। असंनिहित इति किमर्थम्। अर्थवान्। तदन्ताच्च। तदन्ताच्चेति वक्तव्यम्। धान्यार्थी। हिरण्यार्थी। किमर्थं तदन्तादित्युच्यते। न तदन्तविधिना सिद्धम्। ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते। एवं तर्हि इनन्तेन सह समासो भविष्यति। धान्येनार्थी धान्यार्थी। स हि समासो न प्राप्नोति। यदि पुनरयमर्थयतेर्णिनिः स्यादेवमपि क्रियाकुर्वाणे स्यात्। तूष्णीमप्यासीनो यस्तत्समर्थ्यं नाचरति सोभिप्रायेण गम्यते। अर्थी अयमनेनेति। एवं तर्ह्ययमर्थशब्दोस्त्येव द्रव्यपदार्थकः। तद्यथा। अर्थवानयं देश इत्युच्यते। यस्मिन् गावः सस्यानि च वर्तन्ते ॥

र्थो संनिहितोस्येति प्रत्ययः। एवं तर्हीति। धान्येनार्थी धान्यार्थीति तृतीयासमासो भविष्यतीत्यर्थः। स हीति। तृतीयातत्कृतार्थेनेत्यनेनार्थशब्देन समासो विधीयमानोर्थीशब्देन न प्राप्नोतीत्यर्थः। सुप्सुपेत्येतन्नाश्रितम्। न्याय्यस्य परिहारस्याभिधास्यमानत्वात्। एवमपीति। कृतासु द्भूतक्रियासाधनाभिधायित्वात्। न ह्यगच्छन् गन्तेत्यभिधीयते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्यः क्रियापदार्थक इति। नन्वत्रापि निरीहे न प्राप्नोति। नैष दोषः। णिनिपक्ष एव दोषस्यावतारो णिनेः कर्तरि विधानात्। क्रियां हि कुर्वन् कर्तेत्युच्यते। मत्वर्थीयस्तु शेषसंबन्धे भवति। तत्र क्रियाकारकभावस्यान्यस्याभावान्निरीहेपि सिद्धः प्रत्ययः। एवं च कृत्वेति यद्यर्थोऽत्रासंनिहित इत्युच्यते तदेने रेव विधानाट्ठन्न स्यात्। अथापि णिनिनार्थीति साध्यते तथाप्यर्थिक इति न सिध्येदिति। क्रियापदार्थकत्वे अत इनिठनाविति प्रत्ययद्वयं सिध्यति। मतुप्तु क्रियापदार्थकादनभिधानान्न भवति धनवाचिनोप्यनभिधानादिनिठनोरभावः ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे पञ्चमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्। पादश्च समाप्तः ॥ प्राग्दिशो विभक्तिः ॥ किं प्रयोजनमिति। प्रयोजनसामान्यविवक्षायामेकवचननिर्देशः। इत्प्रतिषेध इति। अन्यथामि

अस्ति क्रियापदार्थको भावसाधनः। अर्थनमर्थ इति। तद्यः क्रियापदार्थकः तस्येदं ग्रहणम्। एवं च कृत्वाऽर्थिकप्रत्यर्थिकावपि सिद्धौ भवतः ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये पञ्चमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥ पादश्च ॥ ॥ प्राग्दिशो विभक्तिः। विभक्तित्वे किं प्रयोजनम्। विभक्तित्वे प्रयोजनमित्प्रतिषेधः। इदानीं न विभक्तौ तुस्मा इतीत्प्रतिषेधः सिद्धो भवति। यद्येवम्। किमोत्। अक्षप्रेप्सन् दीव्यसे क्वाद्य मासाः अत्रापि प्राप्नोति। तौ चोक्तम्। किमुक्तम्। विभक्तौ तवर्गप्रतिषेधोऽतद्धित इति। इदमो विभक्तिस्वरश्च। इदमो विभक्तिस्वरश्च प्रयोजनम्। इतः। इह। इदमस्तृतीयादि विभक्तिरुदात्ता भवतीत्येष स्वरः सिद्धो भवति। त्यदादिविधयश्च। त्यदादिविधयश्च प्रयोजनम्। यतः। यत्र। कुतः। कुत्र। विभक्ताविति त्यदादिविधयः सिद्धा भवन्ति ॥ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ॥ बहुग्रहणे संख्याग्रहणम्। बहुग्रहणे संख्याग्रहणं कर्तव्यम्। इह मा भूत्। बह्वीबहोरिति। अथ किमर्थं किम उपसंख्यानं क्रियते। न। सर्वनाम्न इत्येव सिद्धम् ॥

इचोन्त्यात्पर इति देशविध्यर्थो ह्यनीमोमकारस्य हलन्त्यमितीत्संज्ञा स्यात्। तौ चोक्तमिति। तवर्गस्य चोक्तमित्यर्थः। अमो रित्संज्ञापरित्राणार्थमुकारकरणमित्संज्ञायाः प्रतिषेधस्यानित्यत्वं ज्ञापयतीति तद्धितपर्युदासोपि न वक्तव्यः। इत इहेति। इत इति मुख्यमुदाहरणम्। अत्र हि लित्स्वरे प्राप्ते विभक्ते रूडिदमित्युदात्तत्वं भवति। इहेत्यत्र तु प्रत्ययस्वरेणान्तोदात्तत्वं सिध्यति। ननु मध्येऽपवादा इति न्यायादनुदात्तौ सुप्पिताविति एतं स्वरं विभक्तिस्वरो बाधते न लित्स्वरम्। लित्स्वर एव तु परत्वाद्विभक्तिस्वरं बाधते। नैष दोषः। ऊडिदमित्येतत्सूत्रं लितीत्यत्रानुवर्तते। तेन लित्स्वरं बाधित्वा विभक्तिस्वरो भवति। तृतीयादिग्रहणे न च तृतीयामारभ्य प्राग्दिशः प्रत्यया विभक्तिसंज्ञा गृह्यन्ते ॥ किंस ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ किमउपसंख्यानमिति। उपेत्यसंख्यानंप्रतिपदंसूत्रउच्चारणमित्यर्थः। त्यदादिषुकिंशब्दस्यपाठेप्रयोजनंकश्चभवांश्चकावि ५५१
५३ तित्यदादीनांयद्यत्परंतच्छिष्यतइति किमः शेषोत्यदादिभ्यस्तुप्राक्पाठेभवतः शेषः स्यात्॥ एतदो॥ इहकेचिदंशंपठन्ति।
केचिदनम्। तत्रोत्तरपाठापेक्षया विचारः। क्वायंनकारइति। इत्कार्याभावादित्संज्ञायामसत्यांश्रवणेनभाव्यमितिप्रश्नः।
लोपोस्येति। नेत्संज्ञाद्वारेणलोपः। किंतर्हि। संपादितानेकाल्व्यपदेशस्यकृतकार्यत्वाल्लक्षणान्तरेणेतिभावः। क्रियमाणेपी
ति। ननुयावदेतदःस्थानेआदेशोनप्रवृत्तस्तावत्प्रातिपदिकान्तत्वाभावान्नलोपाप्रसङ्गः। प्रवृत्तिकालेत्वनेकाल्त्वात्सिद्धः स

त्यदादिप्रतिषेधात्किमउपसंख्यानंक्रियते। अत्यदादिभ्यइतिप्रतिषेधेप्राप्तेकिमउपसंख्यानंक्रियते॥ एतदो
न्॥ क्वायंनकारः श्रूयते। नक्वचिच्छ्रूयते लोपोऽस्यभवति नलोपः प्रातिपदिकान्तस्येति। यदिनक्वचिच्छ्रूय
तेकिमर्थमुच्चार्यते। अनेकाल्शित्सर्वस्येतिसर्वादेशोयथास्यात्। क्रियमाणेपिवैनकारेसर्वादेशोनप्राप्नोति।
किंकारणम्। नलोपेकृतेएकाल्त्वात्। इदमिहसंप्रधार्यम्। नलोपःक्रियताम् सर्वादेशइति। किमत्रकर्तव्य
म्। परत्वान्नलोपः। असिद्धोनलोपः। तस्यासिद्धत्वात्सर्वादेशोभवति। परिगणितेषुकार्येषुनलोपोऽसिद्धः। नचे
दंतत्रपरिगण्यते। एवंतर्ह्यानुपूर्व्यात्सिद्धमेतत्। नात्राकृतेसर्वादेशेप्रातिपदिकसंज्ञाप्राप्नोति। नचाकृतायां
प्रातिपदिकसंज्ञायांनलोपःप्राप्नोति। तदानुपूर्व्यात्सिद्धमेतत्। नैतदस्तिप्रयोजनम्। अलोन्त्यस्यविधयोभ
वन्तीति। अकारस्याकारवचनेप्रयोजनंनास्तीतिकृत्वाऽन्तरेणनकारंसर्वादेशोभविष्यति। अस्त्यन्यदका
रस्याकारवचनेप्रयोजनम् ॥

र्वादेशः। एवंमन्यते। स्वरूपेणार्थेनार्थवत्त्वादप्रवृत्तोप्येतदःस्थानेबुद्धिस्थइतिप्रातिपदिकंभवत्येव। ततश्चनलोपेकृ
तेअनेकाल्त्वाभावात्सर्वादेशोनप्राप्नोति। आनुपूर्व्यात्सिद्धमिति। यदुक्तंस्वरूपेणार्थेनार्थवत्त्वात्प्रातिपदिकमिति। त
दयुक्तम्। सर्वत्रस्वरूपप्रवृत्तिप्रतिपत्तिसंभवादर्थवद्ग्रहणसामर्थ्याद्व्यतिरिक्तबाह्यार्थग्रहणादन्यथानक्वचिन्नकारस्यश्रव
णंस्यात्। नात्राकृतइति। अर्थवतःसंज्ञाविधानात्। स्थान्यर्थेनार्थवत्त्वमेष्टव्यमित्यर्थः। अकारस्याकारवचनइति। त्यदाद्य
त्वंकृत्वादेशंमन्यते। बाध्यबाधकभावमनपेक्ष्यैतदुक्तम्। तदपेक्षायांहिइकारस्यस्थानेत्यदाद्यत्वस्यास्यचात्वस्यविशेषो राम:
नास्तीतिवक्तव्यम् ॥ ५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येन्यइति।एतच्छब्दाकारेण सह पररूपं लित्स्वरश्च बाध्येत। योगविभागइति। अनुबाधनार्थम्। तत्ररेफादिरनद्यतने
र्हिलन्यतरस्यामिति र्हिल्प्रत्ययः। अविशेषविहितइति। प्रकारवचनेथालितिभावः। इदमेति। एवंचथमुनाथाल्बाध्य

किम्।येऽन्येऽकारादेशाः प्राप्नुवन्ति तद्बाधनार्थम्। तद्यथा। मोराजिसमः क्वाविति मकारस्य मकारवचनसामर्थ्यादनु
स्वारादयो न भवन्ति। तस्मान्नकारः कर्तव्यः। न कर्तव्यः। क्रियते न्यास एव। प्रश्लिष्टनिर्देशोयम्। अअ इति। सोने
काल्शेत्सर्वस्येति सर्वादेशो भविष्यति। एतद इति योगविभागः॥ एतद इति योगविभागः कर्तव्यः। एतदः। एतइत् इत्येतावा
देशौ भवतः। रथोः। ततअन्।अंश्च भवति। एतद इति। केन विहिते थकारे एतद आदेश उच्यते। एतदश्च थमउपसंख्या
नं कर्तव्यम्। एतस्त्रकारमि   त्थम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। एतज्ज्ञापयति भवत्यत्र थमुरिति। यद
यं थकारादावादेशं शास्ति। कुतो नु खल्वेतत्। ज्ञापकादत्र थमुर्भविष्यति। न पुनर्य एवासावविशेषविहितः
थकारादिस्तस्मिन्नादेशः स्यादिदमाथकारादिं विशेषयिष्यामः। इदमोथः थकारादिरिति। पञ्चम्यास्तसिल्। स
प्तम्यास्त्रल्। इदं विचार्यते। इमे तसिलादयो विभक्त्यादेशा वा स्युः परे वेति। कथं वा आदेशाः स्युः। कथं वा परे।
यदि पञ्चम्याः सप्तम्या इति षष्ठी तदादेशाः। अथ पञ्चमी ततः परे। कुतः संदेहः। समानो निर्देशः। कश्चात्र विशेषः।
तसिलादयो विभक्त्यादेशाश्चेत् सुब्लुक्स्वरगुणदीर्घत्वैत्वौत्वस्मादादिविधिप्रतिषेधः। तसिलादयो विभक्त्यादे
शाश्चेत् सुब्लुक्स्वरदीर्घत्वैत्वौत्वस्मादादिविधीनां प्रतिषेधो वक्तव्यः। सुब्लुक्। ततस्त्यो यतस्त्यः। तत्रत्यः। यत्रत्यः।
सुपो धातुप्रातिपदिकयोरिति सुब्लुक् प्राप्नोति। सुब्लुक्। स्वर। यदा। तदा। अनुदात्तौ सुप्पिताविति सुपस्वरः प्राप्नोति।
स्वर। गुण। कस्मात्। कुतः। घेर्ङितीति गुणः प्राप्नोति। गुण। दीर्घ। तस्मिंस्तर्हि। अतो दीर्घो यञि सुपि चेति दीर्घत्वं प्राप्नोति।
दीर्घ। एत्व। तेषु। तत्र। बहुवचने झल्येदित्येत्वं प्राप्नोति। एत्वम्। औत्वम्। कस्मिन्। कुत्र। इदुद्भ्यामौत्। अच्च घेरित्यौत्वं प्रा
प्नोति। स्मादादिविधिः। तस्मात्तत्र तस्मिंस्तत्र। ङसिङ्योः स्मात्स्मिनाविति स्मायादयः प्राप्नुवन्ति। पञ्चमीनिर्देशा
त्सिद्धम्। सन्तु परे। यदि परे समानशब्दानां प्रतिषेधः॥ यदि परे समानशब्दानां प्रतिषेधो वक्तव्यः ॥

ते। पञ्चम्याः। पञ्चमीनिर्देशादिति। आदेशपक्षस्य बहुदोषत्वात् प्राथम्यात्पञ्चम्याश्रयेण प्रत्ययाश्रयणमित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तस्मात्तस्यतीति। पञ्चमीनिर्देशे तसेश्चेत्यस्यायमर्थः। पञ्चम्याः परस्य तसेस्तसिलादेशो भवतीति। तसेरिति निर्देशे इकार उ
च्चारणार्थः। ततश्च धातोरपि तस्यतेः पञ्चम्याः परस्य तसिलादेशः तद्धितादेशवत्त्वप्रसज्येत। तद्विधानसामर्थ्याच्च प्रत्ययस्वरत्वे
पि लित्स्वरप्रसङ्गः। आदेशपक्षे तु नायं दोषः। अपादाने चाहीयरुहोरित्यत्रापादेशपक्षाश्रयणात्ततश्च पञ्चम्याः स्थाने यस्तसि
स्तस्य तसिल्विधानाद्धातोः प्रसङ्गाभावः। स्वार्थे वर्तमानस्येति। पञ्चम्यन्तप्रकृत्यर्थ इत्यर्थः। इह स्वार्थिकैः साहचर्यात्तसिलादे

तस्मात्तस्यतियस्मात्तस्यति। पञ्चम्यन्तात्परस्य तसेतसिल्भवतीति तसिल्प्राप्नोति। अनादेशे स्वार्थविज्ञा
नात्समानशब्दाप्रतिषेधः। अनादेशे स्वार्थविज्ञानात्समानशब्दानामप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्र
तिषेधः। तसिल्कस्मान्न भवति। स्वार्थविज्ञानात् पञ्चम्यन्तात्परस्य स्वार्थे वर्तमानस्य तसिला भवितव्यम्।
न चात्र पञ्चम्यन्तात्परस्तसिः स्वार्थे वर्तते। तसेश्च। किमर्थं तसेस्तसिलुच्यते। तसेस्तसिल्वचनं क्रियते। किं
प्रयोजनम्। स्वरार्थम्। लितिप्रत्ययात्पूर्वमुदात्तं भवतीत्येष स्वरो यथा स्यात्। ननु चायं तसिल् तसिं बाधिष्यते।
न सिद्ध्यति। परत्वात्तसिः प्राप्नोति। तसिलोऽवकाशः। ततो हीयते। ततोऽवरोहति। तसेरवकाशो ग्रामत आगच्छ
ति नगरत आगच्छति। इहोभयं प्राप्नोति। ततः आगच्छति यत आगच्छतीति। परत्वात्तसिः प्राप्नोति। तस्मात्सु
षूच्यते तसेस्तसिल्वचनं स्वरार्थमिति॥ पर्यभिभ्यां च। पर्यभिभ्यां च सर्वोभयार्थे। पर्यभिभ्यां चेति यदुच्यते
तत्सर्वोभयार्थे द्रष्टव्यम्। यावत्सर्वतः तावत्परितः। यावदुभयतः तावदभितः॥ इतराभ्योऽपि दृश्यन्ते। इह क
स्मान्न भवति। सः। तौ। ते। भवदादिभिर्योगे॥ भवदादिभिर्योग इति वक्तव्यम्। के पुनर्भवदादयः। भवान्दीर्घा
युर्देवानांप्रियमायुष्मानिति। स भवान्। तत्रभवान्। ततो भवान्। तं भवन्तम्। तत्र भवन्तम्। ततो भवन्तम्। ते
न भवता। तत्रभवता। ततो भवता ॥

शोऽपि स्वार्थिको विज्ञायते। यदि च स्वार्थिकस्य स्थाने भवति। ततः स्वार्थिको भवति। अथवा तसेरितीकारो विवक्षितो न तूच्चार
णार्थः। तसेश्च। स्वरार्थमिति। ननु त्यदाद्यर्थत्वाद्रूपाद्यर्थमपि तसिल्वचनम्। न च विभक्त्यादेशपक्षाश्रयेण त्यदादौ विधिसिद्धि
रादेशपक्षस्य सदोषत्वात्परित्यागात्। एवं तर्हि स्थान्यादेशभावः किमर्थमाश्रितः। तसिश्चेति प्रत्यय एव परत्वात्तसेर्बाधक
स्य तसिलो बाधकः कर्तव्यः। तस्य च विभक्तिसंज्ञकत्वात्त्यदादिविधिः सिध्यतीत्याशङ्क्य स्वरार्थमित्युक्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानीम्। केचिदिदानीमितिसूत्रंपठन्ति। अन्येतुदानींचेति। एषस्वरइति। अलोन्त्यस्येतिवचनादन्त्यस्योदात्तत्वंप्राप्नोति।
आदेःसिद्धमिति। आदेःपरस्येतिवचनात्॥ तदो॥ दावचनमिति। सूत्रकारेणत्वदाप्रत्ययःकृतइत्याहुः। स्वरेचविशेषः। अ
दाप्रत्ययेतदाशब्दआद्युदात्तोभवति। दाप्रत्ययेत्वन्तोदात्तः। तयोर्योगयोर्वेति। तत्रपूर्वयोर्योगयोर्विषयेदार्हिलौभवतः।
चशब्दाद्योगद्वयविहितौप्रत्ययाविति सूत्रार्थःस्यात्तत्रयदियथासंख्यमाश्रीयतेततइदमःछन्दसिइदाइदानीमितिरूपद्व

तस्मैभवते। तत्रभवते। ततोभवते। तस्माद्भवतः। तत्रभवतः। ततोभवतः। तस्यभवतः। तत्रभवतः। ततोभव
तः। तस्मिन्भवति। तत्रभवति। ततोभवति। सदीर्घायुः। तत्रदीर्घायुः। ततोदीर्घायुः। तंदीर्घायुषम्। तत्रदीर्घा
युषम्। ततोदीर्घायुषम्। सदेवानांप्रियः। तत्रदेवानांप्रियः। ततोदेवानांप्रियः। तंदेवानांप्रियम्। त
त्रदेवानांप्रियम्। ततोदेवानांप्रियम्। सआयुष्मान्। तत्रायुष्मान्। ततआयुष्मान्। तमायुष्मन्तम्।
तत्रायुष्मन्तम्। ततआयुष्मन्तम्॥ अधुना॥ अधुनेतिकिंनिपात्यते। इदमोऽश्भावोधुनाचप्रत्ययः।
इदमोवालोपःअधुनाचप्रत्ययः। अस्मिन्कालेअधुना॥ दानींच॥ इदानीमिति इदमस्तृतीयादिर्वि
भक्तिरुदात्ताभवतीत्येषस्वरःप्राप्नोति। इदानीमिति निपातनात्स्वरसिद्धिः। इदानीमितिनिपात
नात्स्वरसिद्धिर्भविष्यति। आद्युदात्तनिपातनंकरिष्यते। सनिपातनस्वरःविभक्तिस्वरस्यबाधकोभविष्यति।
उक्तंवा। किमुक्तम्। आदेःसिद्धमिति॥ तदोदाच॥ तदोदावचनमनर्थकंविहितत्वात्। तदोदावचनमनर्थकम्।
किंकारणम्। विहितत्वात्। विहितोत्रदाप्रत्ययः॥ सर्वैकान्यकिंयत्तदःकालेदेति। तयोर्दार्हिलौचच्छन्दसि॥ तयोरि
तिप्रातिपदिकनिर्देशोद्रष्टव्यः। इदंविजानीयात् तयोर्योगयोर्वाप्रत्यययोर्वेति। तदाचार्यःसुहृद्भूत्वान्वाचष्टे
तयोरिति प्रातिपदिकनिर्देशइति ॥

यमेवस्यान्नत्वधुनाएतर्हीति। विशेषविहिताभ्यांछन्दोविषयाभ्यांदादानीभ्यांर्हिलधुनाप्रत्यययोर्बाधप्रसङ्गात्। तदस्तुतदानीं
तदातर्हीतिरूपत्रयंसिद्ध्यत्येव। अथापियथासंख्यानाश्रयणादिदमोर्हिल्विधीयतेतथाप्यधुनेतिछन्दसिनस्यादेव। अथत
योरितिप्रत्ययपरामर्शस्तयोःपूर्वसूत्रविहितयोर्विषयेदार्हिलौभवतस्तदानन्तर्यात्तदएवदार्हिलौस्याताम्। इतिइदमइ
दाइतिनसिध्येत्। प्रातिपदिकपरामर्शेतुचकारेणयथाप्राप्तमभ्यनुज्ञानेनकश्चिद्दोषः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सद्यः परुत्परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरप
 रेद्युरधरेद्युरुभ येद्युरुत्तरेद्युः॥सद्य इति किं निपात्यते। समानस्य सभावो द्यश्चाहनि। समानस्य सभावो
निपात्यते द्यश्च प्रत्ययः। अहन्यभिधेये समानेऽहनि सद्यः। परुत्परारी इति किं निपात्यते। पूर्वपूर्वतरयोः
परभावः उदारी च संवत्सरे। पूर्वपूर्वतरयोः परभावो निपात्यते। उदारी च प्रत्ययौ संवत्सरेऽभिधेये। पूर्व
स्मिन्संवत्सरे परुत्। पूर्वतरे संवत्सरे परारि। ऐषम इति किं निपात्यते। इदमः समसण्। इदमः समसण्
प्रत्ययो निपात्यते। संवत्सरेऽभिधेये। अस्मिन्संवत्सरे ऐषमः। परेद्यवी इति किं निपात्यते। परस्मादेद्यव्य
हनि। परस्मादेद्यवि प्रत्ययो निपात्यतेऽहन्यभिधेये। परस्मिन्नहनि परेद्यवि· अद्येति किं निपात्यते। इ
दमोऽशभावो द्यश्च। इदमोऽशभावो निपात्यते द्यश्च प्रत्ययोऽहन्यभिधेये। अस्मिन्नहनि अद्य। पूर्वेद्यु र
न्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युरिति किं निपात्यते। पूर्वान्यान्यतरेतरापराध
रोभयोत्तरेभ्य एद्युसुच्। पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युसुच् प्रत्ययो निपात्यते। अहन्यभि
धेये· पूर्वस्मिन्नहनि पूर्वेद्युः। अन्यस्मिन्नहनि अन्येद्युः अन्यतरस्मिन्नहनि अन्यतरेद्युः। इतरस्मिन्नह
नि इतरेद्युः। अपरस्मिन्नहनि अपरेद्युः। अधरस्मिन्नहनि अधरेद्युः। उत्तरस्मिन्नहनि उत्तरेद्युः। उभयोर
ह्नोः उभयेद्युः। द्युश्चोभयात्। उभयशब्दाद् द्युश्च वक्तव्यः। तस्मान्मनुष्येभ्य उभयद्युः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिक्शब्दे। दिशांशब्दादिक्शब्दारूढ्यायेदिशोवाचकाः पूर्वादयस्तेगृह्यन्ते। नत्वैन्द्र्यादयोयौगिकाः तत्रदिशउपल
क्षणत्वेनोपादानादिहापिप्राप्नोति पूर्वस्मिन्गुरौवसतीति। अत्रहिदेशसंबन्धात्कालसंबन्धाद्वापूर्वशब्दोगुरौवर्ततेतद
र्थविशेषणोपादानम्। दिग्देशकालेष्विति। विभक्तीनामुपाधीनांचसाम्येपियथासंख्याभावस्तदर्थस्वरितत्वाप्रतिज्ञानात्।
तत्रयथापूर्वादयःस्वभावाद्दिशिवर्तन्तेतथादेशकालयोरपि। यथाकालेवर्तमानादिशंनापेक्षन्तेतथादेशेपिदिगनपे
क्षाः। यद्यपिभिन्नार्थवृत्तित्वाद्भिन्नाएवपूर्वादयोदिग्देशकालेषुतथापितत्रव्यपदेशनिबन्धनसादृश्याश्रयोदिक्शब्दे
भ्यइतिव्यपदेशः। अनिर्दिष्टार्थत्वाच्चस्वार्थेयंप्रत्ययः। एवंस्थितेचोदकःपृच्छति। इहकस्मान्नभवति पूर्वस्मिन्देशेवस
तीति। पूर्वशब्दस्यदिक्छब्दत्वाद्देशवृत्तित्वाच्चप्रसङ्गः। आचार्यआह। नैषदेशोदेशविशेषणमेतदिति। अयमर्थः। वि
शेषणविशेष्ययोःकाणखञ्जवत् कामचाराद्यदापूर्वोर्थोविशेष्यत्वेनप्रक्रम्यतेदेशोविशेषणत्वेनतदाप्रत्ययोभवति। य

॥ दिक्शब्देभ्यःसप्तमीपञ्चमीप्रथमाभ्योदिग्देशकालेष्वस्तातिः॥ इहकस्मान्नभवतिपूर्वस्मिन्देशेवसतीति। नै
षदेशोदेशविशेषणमेतत्॥ दक्षिणोत्तराभ्यामतसुच्॥ किमर्थमतसुच्क्रियते। नतुसुजेवक्रियेत। तत्रा
यमप्यर्थः। स्वरार्थश्चकारेणकर्तव्योभवति। प्रत्ययस्वरेणैवसिद्धम्। कारूपसिद्धिः। दक्षिणतोग्रामस्य। उ
त्तरतोग्रामस्य। दक्षिणोत्तरशब्दावकारान्तौतसुशब्दःप्रत्ययः ।

तौविशेष्यंप्राधान्याद्विशेषणमन्तर्भावयितुंशक्नोति। सत्यपिचान्तर्भावेदिग्देशकालानामविशेषेणान्तर्भावाद्विशेषाभि
व्यक्तयेदेशादिशब्दप्रयोगोभवति। पुरस्ताद्दिशआगतोदेशात्कालाद्वेति। यदातुदेशोविशेष्यत्वेनप्रक्रम्यतेपूर्वोर्थोविशे
षणत्वेनतदाप्रत्ययाभावः। दिग्देशकालेष्वित्यनेनह्युपाधिभावोदिगादीनांसमर्थितोनतुप्राधान्यंनापितद्वृत्तौगुणःप्रधानम
न्तर्भावयितुंशक्नोति। नैषदेशइति। नैषपूर्वार्थोदेशेनविशेष्यतइत्यर्थः। योहिदेशेनविशेष्यमाणोदेशोभवतितः प्रत्य
योनतुविशेषणादित्यर्थः। अन्येत्वाहुः। अवध्यपेक्षार्थाभिधायिभ्यःपूर्वादिभ्यःप्रत्ययेनभवितव्यम्। इहतुपूर्वदेशेवधि
निरपेक्षएवपूर्वशब्दःप्रयुज्यते। तथाहि। पूर्वदेशाद्दक्षिणापथंगच्छन्कुतआगतस्त्वमितिपृष्टः पूर्वदेशादागतोहमिति
वक्ति। प्रत्यागच्छंश्चदक्षिणपथादिति। तत्रनैषदेशइत्यस्यायमर्थः। नायमवधिमत्त्वेनदेशउपात्तः। किंतर्हिअवधिनिर
पेक्षदेशस्यैतद्विशेषणम्। वास्तवीतुव्यवस्थाविद्यतइतिसर्वनामसंज्ञाप्रवर्ततएव ॥ दक्षिण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकृत्यन्तर इति। अन्यादिगाकृतिरन्याव्यवस्थाकृतिरिति भावः। दिशि वर्तमानाः पूर्वादयो निमित्तान्तरनिरपेक्षाः। देशकालयोस्तु व्यवस्थापेक्षाः। यदि पुनरिति। सर्वत्र व्यवस्थाशब्दाः सन्त्विति भावः। व्यवस्था मर्यादेति केचिदाहुः। एवं तु उत्तराः कुरव इति संज्ञायां मर्यादानपेक्षणात् कुरूनुत्तरेणाप्यासीनानामुत्तराः कुरव इति प्रयोगाद्व्यवस्थाभावादसंज्ञायामिति प्रतिषेधानर्थक्यप्रसङ्गाद्यावद् व्यमनपायो व्यवस्थेत्यपरे मन्यन्ते। दक्षिणा गाथका इति। सत्त्वेव गाथकेषु प्रावीण्यलक्षणस्य दाक्षिण्यस्य कादाचित्कत्वाद् व्यवस्थाभावो दिग्देशकालसंज्ञासु तु व्यवस्थासद्भावः। मर्यादालक्षणव्यवस्था वादिन स्तूत्तराः कुरव इत्यत्रापि मेरुं जम्बूद्वीपं वाऽपेक्ष्योत्तरत्वविज्ञानात् प्रयोगकाले निरूढत्वाद्व्यवहारस्य प्रयोक्तृभिरनपेक्ष्यमाणापि वस्तुतो व्यवस्थास्तीति मन्यन्ते। अन्ये तु परस्परापेक्षात्मस्थितिर्व्यवस्थेत्याहुः। कथं यानीति। दिक्शब्देभ्यः सप्त

भवेत्सिद्धम्। यदा अकारान्तौ यदा तु खलु आकारान्तौ तदा न सिद्ध्यति। तदापि सिद्धम्। कथम्। पुंवद्भावेन। कथं पुंवद्भावः। तसिलादिष्वाकृत्वसुच इति। न सिध्यति। भाषितपुंस्कस्य पुंवद्भावः। न चैतौ भाषितपुंस्कौ। ननु च भोः दक्षिणशब्द उत्तरशब्दश्च पुंसि भाष्येते। समानायामाकृतौ यद्भाषितपुंस्कमित्युच्यते। आकृत्यन्तरे चैतौ भाषितपुंस्कौ। दक्षिणोत्तरेति। दिक्शब्दौ। दक्षिण उत्तर इति व्यवस्थाशब्दौ। यदि पुनर्दिक्शब्दा अपि व्यवस्थाशब्दाः स्युः कथं यानि दिग्गुपदिष्टानि कार्याणि। दिशो यदा व्यवस्थां वक्ष्यन्ति। यदि तर्हि यो यः दिशि वर्तते स स दिक्शब्दः रमणीयादिष्वति प्रसङ्गो भवति ॥

मीत्यादिविहितानि। व्यवस्थाशब्दत्वे हि दिश उपलक्षणत्वं न स्यात्तस्यानिमित्तत्वाभावादिति भावः। दिशो यदेति। निमित्तवतोप्यर्थस्योपलक्षणत्वात्। तथा च संख्याशब्दाः कालवृत्तयः कालशब्दत्वात्कालाधिकारविहितप्रत्ययभाजः। षष्टिवर्षाणि भूतः षाष्टिक इति भावः। एनत्पक्षाश्रयेऽतिप्रसङ्गमाह। यदि तर्हीति। रमणीयादयो गुणक्रियानिमित्ता दिशि वर्तमाना दिक्शब्देन व्यपदिश्येरन्नित्यर्थः। दिशं यो न व्यभिचरतीति। व्यवस्थानिमित्तो यो न भवति स्वभावत एव यो दिशि वर्तत इत्यर्थः। दिशि दृष्ट इत्यर्थप्रदर्शनं दिशां शब्द इति तु षष्ठीसमासः। स्वरूपव्यतिरिक्तप्रवृत्तिनिमित्तनिरपेक्षो दिशो यो वाचकः पूर्वादिशब्दः स दिक्शब्द आश्रीयते शब्दग्रहणादन्यथा दिग्भ्य इत्येव ब्रूयादित्यर्थः। यद्येवं दिशः पूर्वादीनि नामधेयानीत्यसंज्ञायामिति सर्वनामसंज्ञानिषेधात्पूर्वस्यां दिशि वसतीत्यादि न सिध्यति। पौरुषेयसंज्ञाश्रयणादिह च तदभावाद्दोषः। पुंवद्भावस्त्विति। दिशि वर्तमानानां प्रवृत्तिनिमित्तानपेक्षणात् समानायामाकृतौ भाषितपुंस्कत्वाभावात् ॥ रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वनाम्न इति। यद्यपि दिशि वर्तमानानां व्यवस्थानप्रवृत्तिनिमित्तं तथापि वास्तवी व्यवस्था विद्यत इति सर्वनामसंज्ञायाः प्रवर्तनात्। तदेवं व्यवस्थायामिति विषयो निर्दिश्यते न तु प्रवृत्तिनिमित्तं सर्वनाम्न इत्येतच्चावश्यं कर्तव्यमित्याह। दक्षिणोत्तरपूर्वाणामिति। अयं समानाकृतित्वानपेक्षः पुंवद्भावः दिग्वाचिनां त्वयं द्वन्द्वः। वृत्तिमात्र इति। तद्धितवृत्तिः समासवृत्तिश्च। ततो ग्रामादिति।

रमणीयादिक् शोभनादिगिति। अथ मतमेतत्। दिशि दृष्टः दिग्दृष्टः दिग्दृष्टः शब्दो दिक्शब्द इति दिशं योऽनव्यभिचरति न रमणीयादिषु तत्प्रसङ्गो भवति। पुंवद्भावस्तु न प्राप्नोति। एवं तर्हि सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यः। दक्षिणोत्तरपूर्वाणामित्येवमर्थम्। विशेषणार्थं तर्हि। क्व विशेषणार्थेनार्थः। षष्ठ्यतस र्थप्रत्ययेने ति। षष्ठ्यतसर्थप्रत्ययेनेत्युच्यमाने इहापि स्यात्। ततो ग्रामात्। यतो ग्रामादिति । उपर्यु परिष्टात्॥ उपर्युपरिष्टादिति किं निपात्यते। ऊर्ध्वस्योपभावो रिल्रिष्टातिलौ च। ऊर्ध्वस्योपभावो रिल् रिष्टातिलौ च प्रत्ययौ निपात्येते। उपरि। उपरिष्टात्॥ पश्चात्॥ पश्चादिति किं निपात्यते। अपरस्य पश्चभाव आतिश्च प्रत्ययः। अपरस्य पश्चभावो निपात्यते आतिश्च प्रत्ययः। पश्चात्। दिक्पूर्वपदस्य च। दिक्पूर्वपदस्य पु(अ)परस्य पश्चभावो वक्तव्य आतिश्च प्रत्ययः। दक्षिणपश्चात्। उत्तरपश्चात्। अर्धोत्तरपदस्य च समासे॥ अर्धोत्तरपदस्य च समासे अपरस्य पश्चभावो वक्तव्यः। दक्षिणपश्चार्द्धः। उत्तरपश्चार्द्धः॥ अर्द्धे च॥ अर्द्धे च परतः अपरस्य पश्चभावो वक्तव्यः। पश्चार्द्धः। उत्तरपश्चार्द्धः॥ पञ्चम्याः॥ अपञ्चम्या इति प्रागसेः। अपञ्चम्या इति यदुच्यते प्रागसेस्तद्द्रष्टव्यम्। इहैवं विजानीयात्। अविशेषेण इत उत्तरमपञ्चम्या इति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे अपञ्चम्या इति प्रागस इति॥ दक्षिणादाच्॥ किमर्थश्चकारः। स्वरार्थः। चितोऽन्त उदात्तो भवतीति अन्तोदात्तत्वं यथा स्यात्। नैतदस्ति प्रयोजनम्। एकाजयं तत्र नार्थः स्वरार्थेन चकारेणानुबन्धेन। प्रत्ययस्वरेणैव सिद्धम्। विशेषणार्थस्तर्हि। क्व विशेषणार्थेनार्थः। अन्यारादितरर्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ॥

अन्यादियोगे पञ्चमीं बाधित्वा षष्ठी स्यात्। यदा ग्रामस्यापादानत्वं तदोपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायाद प्रसङ्गः षष्ठ्याः॥ दक्षिणादाच्॥ विशेषणार्थ इति। वाक्यस्मरणयोर्य आकारो ननुबन्धकस्तद्व्यावृत्त्यर्थ इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संख्या॥ यदा विधाशब्दः स्त्रीलिङ्ग उपादीयते तदा तस्याने कार्थत्वादनिष्टेपि विषये प्रसङ्गः। यदा तु विधानं विध इति घ ञर्थे क विधानमिति के कृते पुल्लिङ्गनिर्देशस्तदा तस्यैकार्थत्वा न्नानिष्टप्रसङ्गः। विधाया अर्थ इत्याचार्यदेशीयवच नम्। गो विधेति। अन्ये विधोच्यते। कः पुनरिति। किं धातुकृतो र्थो धात्वर्थ इति कारकं विवक्षितम थवा धातोरर्थो धात्वर्थः क्रिया विवक्षितेति प्रश्नः। कल्प इति। कल्पमहर्मुखमुच्यते। कालपृथग्भावात्पृथग्भावं मन्यते। कारकाणामिति। पूर्वप दार्थविषय एव प्रश्नप्रतिवचने। पृथग्भावस्य सुज्ञानत्वात्तद्विषयप्रश्नायोगात्। तत्र पञ्चधा गच्छतीत्येकस्या गमनक्रि याया धाशब्देन निवृत्तभेदायाः प्रकारलक्षणपृथग्भावप्रतिपत्तिः। यद्येवमिति। सूत्रन्यासेनैव सिद्धे वार्त्तिकं नारम्भणीय

संख्याया विधार्थे धा॥ विधार्थ इत्युच्यते। को विधार्थो नाम। विधाया अर्थो विधार्थः। यद्येवम्। एका गोविधा। एका हस्तिवि धा। अत्रापि प्राप्नोति। एवं तर्हि धा विधानं धात्वर्थपृथग्भावे॥ धाविधानं धात्वर्थपृथग्भाव इति वक्तव्यम्। कः पुनर्धात्व र्थः पृथग्भावः। किं यत्तद्देवदत्तः कंसपात्र्यां पाणिनाओदनं भुङ्क्त इति। नेत्याह। कारकपृथक्त्वमेतत्। यत्तर्हि त त्कल्ये भुङ्क्ते सायं भुङ्क्त इति। नेत्याह। कालपृथक्त्वमेतत्। यत्तर्हि शीतं भुङ्क्ते उष्णं भुङ्क्त इति। नेत्याह। गुणपृथक्त्वमे तत्। कस्तर्हि धात्वर्थे पृथग्भावः। कारकाणां प्रवृत्तिविशेषः क्रिया। यद्येवं क्रियाप्रकारे यं भवति। विधयुक्त गताश्च प्रकारे भवन्तीति। एवंविधम्। एवंयुक्तम्। एवंगतम्। एवंप्रकारमिति ॥

मित्यर्थः। तथा हि सामान्यस्य भेदको विशेषः प्रकार उच्यते। न च गुणकालकारकपृथक्त्वे किंचित्सामान्यमुपात्तं यस्य प्रका रः स्यात्। ननु सूत्रन्यासे पञ्चधा श्लोका इत्यादावपि प्रत्ययेन भाव्यं वार्त्तिकन्यासे तु न भाव्यमेकधा भुङ्क्त इति च पृथग्भावाभा वात्प्रत्ययस्य न प्रसङ्ग इति भिन्नं फलं सूत्रवार्त्तिकयोः। नैष दोषः। पञ्चधा श्लोका इत्यादौ क्रियापदाप्रयोगेपि अस्तीति क्रियाप दानुषङ्गादस्ति क्रियापृथग्भावः। एकधा भुङ्क्त इत्यादावनेकप्र कारभुजिक्रिया पेक्षएकप्रकारस्य भुजे रस्त्येव पृथग्भावः। एकः पाक इत्यादौ प्रकारस्याविवक्षितत्वात्प्रत्ययाभावः। प्रकारविवक्षायां तु भवत्येवैकधा पाक इति। एमः पञ्चपाका इत्यादौ भिन्ना एव पाका न त्वेकस्य प्रकारवत्त्वं विवक्षितमिति प्रत्ययो न भवति। पञ्चधा पाक इत्यादौ तु भवत्येव। ५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकाद्धो॥ धाग्रहणेनुवर्तमानेपुनर्धाग्रहणंधामात्रस्यादेशार्थमन्यथानन्तर्यादध्यधिकरणविचालएवध्यमुञ्विज्ञायेत। त
तश्चविधार्थेनस्यादैकध्यंमुङ्क्ष्व इति। सहभावइति। अनेकस्यार्थस्यैकीकरणंसहभावः। इहाधिकरणविचालएकस्यद्रव्य
स्यविभागेनावस्थापनम्। यथैकंराशिंपञ्चधाकुरु इति। ऐकध्यंराशिंकुर्वित्यत्रत्वेकस्यविभागावस्थापनाभावान्नास्त्यधि
करणविचालइतिमन्यते। वचनंतुविधार्थमेवस्यात्। धाग्रहणंतूत्तरार्थमेवस्मात्। इयोरर्थयोर्धमुञ्पर्ये द्वैधंभुङ्क्ष्व। एकंराशिं
द्वैधंकुर्विति। नचावश्यमिति। अधिकरणंद्रव्यमुच्यते। तस्यविचालोन्यथाकरणंतच्चैकस्यानेकीकरणमनेकस्यवा
एकीकरणमितिसूत्रेणैवेष्टसिद्धिरित्यर्थः। अनेकस्ययदेकीकरणंतत्रप्रकाराभावात्तदर्थमेवाधिकरण

एकाद्धोध्यमुञन्यतरस्याम्॥ सहभावेध्यमुञ्॥ सहभावेध्यमुञ्वक्तव्यः। ऐकध्यंराशिंकुरु। सतर्हिवक्तव्यः।
नवक्तव्यः। अधिकरणविचालइत्युच्यतेनचावश्यंसएवाधिकरणविचालः। यदेकमनेकंक्रियते। यदप्य
नेकमेकंक्रियतेसोप्यधिकरणविचालः॥ द्वित्र्योश्चधमुञ्॥ धमुञन्तात्स्वार्थेडदर्शनम्। धमुञन्तात्स्वार्थे
डोदृश्यते। सचविधेयः। पथिद्वैधानि। संशयेद्वैधानि॥ याप्येपाशप्॥ पाशपिकुत्सितग्रहणम्। पाशपिकुत्सि
तग्रहणंकर्तव्यम्। वैयाकरणपाशः। याज्ञिकपाशः। योहियापयितव्योयाप्यस्तत्रमाभूदिति। अथवैयाकरणः
शरीरेणकृशःव्याकरणेनशोभनःकर्तव्योवैयाकरणपाशइति। नकर्तव्यः। कथम्। यस्यभावाद्द्रव्येशब्दनिवे
शस्तदभिधानेतद्गुणेवक्तव्येप्रत्ययेनभवितव्यम्। नचकार्श्यस्यभावाद्द्रव्येवैयाकरणशब्दः॥

विचालेचेतिसूत्रमेकस्यानेकीकरणेप्रकारस्यापिसंभवात्पूर्वेणैवसिद्धत्वादित्याहुः। द्वित्र्यो॥ पथिद्वैधानीति। स्वार्थिकत्वे
पिस्वभावात्सत्ववाचित्वाल्लिङ्गसंख्यायोगस्तत्रैकशेषेणबहुवचनम्। कविमतिद्वैधानीतिपाठः॥ याप्ये। याप्यशब्दोय
मस्त्यपादानसाधनोयापिताअस्माद्गुणाइति याप्यःकुत्सितः। अस्तिकर्मसाधनोयापयितव्योयाप्यःदेशान्तरंप्रापयितव्य इ
त्यर्थः। तत्रविशेषानुपादानादतिप्रसङ्गं मत्वाह। पाशपीति। तद्गुणइति। कुत्सितत्वेनप्रतिपाद्यइत्यर्थः। एतच्चान्तरङ्गत्वाल्ल
भ्यतेप्रवृत्तिनिमित्तस्यप्रत्यासन्नत्वात्कुत्साश्रयणस्यन्याय्यत्वात्। यत्रतुप्रवृत्तिनिमित्तस्यकुत्सानसंभवत्यश्वकोदेवदत्त
कःसकइत्यादौतत्रसहचरितगुणक्रियाकुत्साश्रयेणप्रत्ययोभवत्येव। एवंचदेवदत्तपाशइत्याद्यपिभवतियद्यभिधानमस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकाद॥एकादाकिनिचेति।एकशब्दः संख्यावाच्येवेति मन्यते।असहायग्रहणं च तदर्थस्य विशेषणत्वान्नाभिधेयनिर्देशो विद्यमानतुल्यजातीयैककार्यसहायार्थवाचिनः प्रत्ययोयथास्यादेकमाकाशमित्यादौ माभूदिति। कथंपुनर्द्विबह्वर्थे प्रत्ययोविधीयते न ह्येकशब्दो द्विबह्वर्थे वर्तत इत्याह।सिद्धंत्विति।संख्यैवादेशः संख्यादेशः सच द्विबहुशब्दयोरसहायस्यवेत्यर्थः

पूरणाद्भागेतीयादन्॥ पूरणग्रहणंशक्यमकर्तुम्। नह्यपूरणस्तीयशब्दोस्ति यत्र दोषः स्यात्। ननु चायमस्ति मुखतीयः। पार्श्वतीय इति। अर्थवद्ग्रहणेनानर्थकस्येति। एवमप्यनभविष्यति। उत्तरार्थं तर्हि पूरणग्रहणं कर्तव्यम्। प्रागेकादशभ्योऽच्छन्दसीति पूरणाद्यथास्यात्। एकादाकिनिच्चासहाये॥ एकादाकिनिचि द्विबह्वर्थे प्रत्ययविधानम्॥ एकादाकिनिचि द्विबह्वर्थे प्रत्ययो विधेयः। एकाकी। एकाकिनौ। एकाकिन इति। किं पुनः कारणम्। न सिध्यति। एकशब्दोयं संख्यापदम्। संख्यायाश्च संख्येयमर्थः। सिद्धं तु संख्यादेशवचनात्। सिद्धमेतत्। कथम्। द्विबह्वर्थायाः संख्याया एकशब्द आदेशो वक्तव्यः।असहायस्य वा। असहायस्य वा एकशब्द आदेशो वक्तव्यः। असहायः एकाकी। असहायौ एकाकिनौ।असहाया एकाकिनः।सिध्यति।सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तमेकादाकिनिचि द्विबह्वर्थे प्रत्ययविधानमिति। नैष दोषः। अयमेकशब्द अस्त्येव संख्यापदम्। तद्यथा। एकः द्वौ बहव इति।अस्त्यन्यार्थे वर्तते। तद्यथा सधमादो द्युम्न्य एकास्ताः।अन्या इत्यर्थः।अस्त्यसहायवाची।तद्यथा एकाग्नयः।एकहलानि।एकाकिभिः क्षुद्रैर्जितमिति।तद्योऽसहायवाची तस्यैष प्रयोगः॥ इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये पञ्चमाध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

द्विबहुशब्दयोरप्यसहायग्रहणं विशेषणमाश्रयणीयमेव।अयमेकशब्द इति।उपलक्षणं चैतदर्थप्रदर्शनम्। प्राथम्येपि हि वर्तते।एके अल्पप्राणाः।एको गोत्र इति। समानार्थेपि वर्तते तेनैकदिगिति।साधारणेपि वर्तते देवदत्तयज्ञदत्तयोरेकामातेति।एकाग्नय इति।अत्राकिनिचः कनो वा लुग्विज्ञेयः॥ भाष्यप्रदीपे तृतीयपादे प्रथममाह्निकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिशायने तमबिष्ठनौ। किमिदमिति। किमयं ण्यन्तस्य निर्देशः आहोस्विदण्यन्तस्य कश्चेह शेत्यर्थ इति संदिहानः पृच्छ
ति। देश्या इति। देश्याद्देश्याः साधुत्वेन प्रतिपाद्या एते सूत्रे निबध्यन्ते प्रसङ्गे न साधुत्वप्रतिपादनार्थम्। ततो निपातनाद्दी
र्घत्वमित्युक्तं भवति। यावदिति यावन्तोऽर्था शब्दोपरिमाणोपाधिकावपि परिच्छेदसाधर्म्यादन्यत्रापि प्रयुज्येते। प्रकर्ष इति। अने
कार्थत्वाद्धातूनां शेतिरस्मिन्नेवे अतिशब्दस्तु द्योतकस्तस्यैवार्थस्य। यथा तिष्ठतिर्गतिनिवृत्तौ वर्तते। स एव गतावपि। प्रश
ब्दस्तु तदुतस्य प्रारम्भस्य द्योतकः प्रतिष्ठत इति। कस्य पुनरिति। द्रव्यवाचिनी ह प्रकृतिर्न च द्रव्यस्य प्रकर्षोऽस्तीति मत्वा प्र
श्नः। ङ्याप्प्रातिपदिकादिति वर्तत इति। ननु सुबन्तसमानाधिकरणवृत्तिभिरेतैस्तद्धितैर्भवितव्यम्। यदुक्तं प्रियपक्तृत्वना
दिषु ततः प्रवर्तते सौ विभक्त्यन्त इति। घकालतनेषु कालनाम्न इत्यलुग्विधानाल्लिङ्गाच्च। नैष दोषः। प्रकृतेरिदमुपलक्ष
णम्। सा च प्रकृतिः सुबन्ता वा भवतु ङ्याप्प्रातिपदिकं वेति विशेषे तात्पर्याभावः। न च शब्दस्येति। शब्दस्याभिधानत्वादभि

अतिशायने तमबिष्ठनौ॥ अतिशायन इत्युच्यते किमिदमतिशायनमिति। देश्याः सूत्रनिबन्धाः क्रियन्ते॥
यावद्ब्रूयात्प्रकर्षे अतिशय इति तावदतिशायन इति। कस्य पुनः प्रकर्षे प्रत्यय उत्पद्यते। ङ्याप्प्रातिपदि
कादिति वर्तते। ङ्याप्प्रातिपदिकस्य प्रकर्षे ङ्याप्प्रातिपदिकं वै शब्दः। न च शब्दस्य प्रकर्षापकर्षौ स्तः। शब्दे ऽ
संभवादर्थे कार्यं विज्ञास्यते। कः पुन ङ्याप्प्रातिपदिकार्थः। द्रव्यम्। न वै द्रव्यस्य प्रकर्ष इष्यते ॥

धानस्य चाभिधेये गुणभावाद्गुणस्य च स्वोपकारं प्रत्यनपेक्षत्वादिति भावः। यदा तु तस्य गुणभावो नास्ति तदा भवत्येव प्रक
र्षयोगः। उच्चतरः शब्दो नीचतरः शब्द इति। ननु च यथा शुक्लतरः पट इति गुणस्यापि प्रकर्ष आश्रीयते द्रव्यप्रकर्षहेतुत्वेन त
था शब्दस्याप्याश्रीयताम्। नैतदस्ति। शुक्लादयो द्रव्यसमवेताः स्वयं प्रकृष्टा द्रव्यप्रकर्षहेतवो भवन्तीति युक्तस्तत्र गुणप्रकर्षा
श्रयः। शब्दस्तु वाचकत्वादभिधेयासमवायात्स्वगतेन प्रकर्षेणाभिधेयं प्रकर्षयुक्तं न शक्नोत्यवगमयितुमिति तत्प्रकर्षं प्रत्य
नपेक्ष एव। द्रव्यमिति। यत्किंचिदिदं तदिति सर्वनामपरामर्शयोग्यं वस्तु तद्द्रव्यत्वेन विवक्षितम्। तेन जातिगुणक्रिया
अपि गृह्यन्ते। न वै द्रव्यस्येति। यद्वस्तु स्वातन्त्र्येणाभिधीयते तस्य प्रकर्षो नास्तीत्यर्थः। तथा हि। शुक्लतरं रूपमित्यत्र गुणस्या
पि प्राधान्येनाश्रयणाद्द्रव्यस्याश्रितादेव निमित्तान्तरात्प्रकर्षः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं तर्हीति। आश्रितोऽभिधेयधर्मो गुणः स च कश्चिच्छब्दप्रवृत्तिनिमित्तं शुक्लतरः पट इति यथा। पटस्य स्वतो न शुक्लस्य नाप्यशुक्लस्य शुक्लो गुणो व्यपदेशहेतुरेवं स्वगतप्रकर्षद्वारेण द्रव्यस्य स्वतोऽप्रकृष्टस्य प्रकृष्टव्यपदेशहेतुर्भवति। तदुक्तं हरिणा। द्रव्यस्याव्यपदेशस्य य उपादीयते गुणः। भेदको व्यपदेशाय तत्प्रकर्षोऽभिधीयत इति। अरूपं पररूपेण द्रव्यमाख्यायते यथा। अप्रकर्षं प्रकर्षेण गुणस्यापीष्यते तथेति। यद्यपि तत्र द्रव्ये बहवो गुणाः सन्ति तथाप्यन्तरङ्गत्वात्प्रवृत्तिनिमित्तगुणप्रकर्षाश्रयः प्रत्ययः। क्रियाशब्देभ्यः पाचकादिभ्यः क्रियायाः प्रवृत्तिनिमित्तत्वात् तत्प्रकर्षप्रत्ययो जातिशब्देभ्यस्तु जातेः प्रकर्षाभावात्तत्सहचरितप्रसिद्धवाहदोहादिप्रकर्षप्रत्ययः। उपाधिसंसर्गेण तु विना द्रव्यस्य न प्रकर्षो नापि शब्दवाच्यत्वमस्ति। तदुक्तम्। सर्वस्यैव प्रधानस्य न विना भेदहेतुना। प्रकर्षो विद्यते नापि शब्दस्योपैति वाच्यतामिति। तत्र वास्तवः प्रकर्षो द्रव्ये भवतु मा वा आश्रितधर्मद्वारकस्तु तस्य

एवं तर्हि गुणः। एवमपि गुणग्रहणं कर्त्तव्यम्। द्रव्यमपि ह्या प्रातिपदिकार्थो गुणोऽपि। तत्र कुत एतत्। गुणस्य प्रकर्षो भविष्यति न पुनर्द्रव्यस्य प्रकर्ष इति। क्रियमाणे चापि गुणग्रहणे समानगुणग्रहणं कर्त्तव्यम्। शुक्लात्कृष्णे मा भूदिति। न तर्हीदानीमिदं भवति। अध्वर्युर्वै श्रेयान्। पापीयान् प्रतिप्रस्थाता। अन्धानां काणतम इति। समानगुणे एषा स्पर्द्धा भवति। अध्वर्युर्वै श्रेयान् अन्येभ्यः प्रशस्तेभ्यः। पापीयान् प्रस्थाता अन्येभ्यः पापेभ्यः। अन्धानां काणतम इति॥ कणिरयं सौक्ष्म्ये वर्त्तते। सर्वइमे किंचित्पश्यन्ति अयमेषां काणतम इति॥

कर्षः शब्देनाभिधीयते न तु तन्निरपेक्षः स्वगतः। अद्रव्यप्रकर्ष इति निषेध उपचरितगुणक्रियागतप्रकर्षद्रव्यविषयो द्रष्टव्यः। एवमपीति। यथा गुणस्य नित्यस्यानित्यद्रव्यसमवेतत्वे तस्य कस्यचिन्महत्त्वादेः स्वतः प्रकर्षो नित्यस्य तु कारणकृतस्तथा द्रव्यस्यापीति मन्यते। समानगुणग्रहणमिति। द्वयोः परिपूर्णयोर्भिन्नजातीययोर्गुणयोरेकस्य परिपूर्णतरत्वे सति प्रकर्षस्य ज्ञानात्। कृष्णाच्छुक्लतर इति मा भूदित्येवमर्थमित्यर्थः। अध्वर्युर्वै श्रेयानिति। अध्वर्योः परिपूर्णप्रशस्यत्वम्। प्रस्थातुरपि पापत्वं तयोः परस्परापेक्षः प्रकर्ष इति मन्यते। अन्धानां काणतम इति। अन्धा नेत्रद्वये न न पश्यन्ति काणस्त्वेकेनेति तदपेक्षं काणस्य प्रकर्षं मन्यते। समानगुण इति। समानगुणे भिन्नाश्रयवर्त्तिनि विवक्षिते तदाश्रयास्पर्द्धेत्यर्थः। कणिरयमिति। ततश्चान्धानामपि वास्तवं काणत्वं विद्यते न तु लोकप्रसिद्धम्। तत्र दर्शनप्रकर्षाश्रयः प्रत्ययस्तथा च लोके प्रसिद्धिरन्धानां काणो राजेति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महान्हिमवानिति। सर्षपान्महीयान्हिमवानिति माभूदित्यर्थः। जातेरिति। आश्रयप्रकर्षाज्जातेः प्रकर्षं मन्यते। कस्य तर्हीति। प्र
श्नः। गुणस्येति। परिहारः। अभिधेयसहचरितलोके प्रसिद्धगुणप्रकर्षाश्रयो द्रव्यस्य प्रकर्ष इत्यर्थः। केचित्तु गुणसमुदाये शब्दप्र
वृत्तिं मन्यमानाः शब्दार्थान्तर्भूतस्यैवायं गुणस्य प्रकर्ष इत्याहुः। साधनप्रकर्षे माभूदिति। ननु च साधनस्य गुणभावात्प्रधानस्य
च क्रियायाः प्रकर्षसंभवात्तत्प्रकर्ष एव प्रत्ययो भविष्यति। एवं मन्यते। प्रधानानि स्वगतेनापि धर्मेण तद्वत्तेन व्यपदिश्यन्ते गु
णगतेनापि तत्र साधनप्रकर्षाश्रये क्रियाप्रकर्षे प्रत्ययो माभूत्। स्वगतेऽपि यथा स्यादित्येवमर्थं क्रियाग्रहणं कर्तव्यम्। नैष दोष

अदूरविप्रकर्ष इति वक्तव्यम्। इह माभूत्। महान्सर्षपः महान्हिमवानिति॥ जातेर्न॥ जातेर्नेति वक्तव्यम्। इ
ह माभूत्। वृक्षोऽयं प्लक्षोऽयमिति। न तर्हीदानीमिदं भवति। गोतरः गोतरा। अश्वतरः। अश्वतरेति। नैष जातेः प्रक
र्षः। कस्य तर्हि गुणस्य। गौरयं यः शकटं वहति। गोतरोऽयं यः शकटं वहति सीरं च। गौरियं या समां समां विजायते।
गोतरेयं या समां समां विजायते स्त्रीवत्सा च। अश्वोऽयं यश्चत्वारि योजनानि गच्छति। अश्वतरोऽयं योऽष्टौ योजना
नि गच्छति। तथा तिङश्चेत्यत्र क्रियाग्रहणं कर्तव्यम्। साधनप्रकर्षे माभूत्। नैष दोषः। यत्तावदुच्यते गुणग्रह
णं कर्तव्यमिति। न कर्तव्यम्। यस्य प्रकर्षोऽस्ति तस्य प्रकर्षे भविष्यति। गुणस्य चैव प्रकर्षो न द्रव्यस्य। कथं विज्ञाय
ते। एवं हि दृश्यते लोके। इह समाने आयामे विस्तारे पटस्यान्योऽर्घो भवति काशिकस्यान्यो माथुरस्य। गुणान्तरं च
खल्वपि शिल्पिन उत्पादयमानाः द्रव्यान्तरेण प्रक्षालयन्ति। अन्ये तु शुद्धं धौतकं कुर्वन्ति अन्येन शेफालिकमन्येन
माध्यमिकम्। यदप्युच्यते क्रियमाणे चापि गुणग्रहणे समानगुणग्रहणं कर्तव्यम्। शुक्लात्कृष्णे माभूदिति।
न कर्तव्यम्। समानगुण एव स्पर्धा भवति ॥

इति। बहूनामपि दोषाणां प्रक्रमे सामान्यस्य विवक्षितत्वादेकवचननिर्देशः। यस्य प्रकर्षोऽस्तीति। संभवव्यभिचारापेक्षत्वादुपा
धिनिर्देशस्येति भावः। काशिकस्येति। काशिषु भव इति ठञ्ठिठयोरेकतरः प्रत्ययः। गुणान्तरमिति। पूर्वं मूल्यान्तरदर्शना
द्गुणप्रकर्षः प्रतिपादितोऽत्र तु प्रयत्नभेददर्शनादिति विशेषः। शुक्लादिति। कृष्णे प्रतियोगिनि विवक्षिते शुक्लशब्दात्प्र
त्ययो माभूदित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नह्याढ्याभिरूपाविति। स्पर्द्धाहेतोर्गुणस्य शब्देनानाश्रयणाच्छब्दाश्रितस्पर्द्धाहेतुप्रकर्षे तु भवत्येव प्रत्ययः आढ्याभि
रूपयोराढ्यः श्रेयानिति। शुक्लकृष्णयोरपि तदा भवति प्रत्ययः उज्ज्वलतरोऽयं कृष्णाच्छुक्ल इति। न च शुक्लादिति। शु
क्लतर इत्युक्ते शब्दप्रवृत्तिनिमित्तप्रत्यासन्नः शुक्लगुणान्तरापेक्षः प्रकर्षः शुक्लगुणनिमित्तद्रव्यप्रकर्षावगमादिति भा
वः। नहि निष्कधन इति। अदूरान्तरयोरेव संप्रधारणविषयत्वादिति भावः। जननेनेति। अयत्नलभ्यत्वप्रतिपादनपरमे
तत्। नित्यानां परमाण्वादीनां जननाभावात् तद्गताया जातेर्जननेनाप्राप्यत्वाद् अयत्नलभ्यत्वमयमर्थः सत्तादिर्न प्रकर्षाप
कर्षभाक् घटादिके च द्रव्ये यत्नेनोत्पाद्यमाने पुरुषप्रयत्नेन विना नित्या जातयो व्यक्तिमायान्ति। यद्यपि बलाकादिगतस्य
शौक्ल्यादेरयत्नलभ्यत्वं तथाप्याश्रयभेदाद्गुणस्य भेदावगमादस्ति प्रकर्षापकर्षयोगो जातेस्त्वाश्रयभेदेऽपि भेदाभावात्प्रक

नह्याढ्याभिरूपौ स्पर्द्धेते वाचके न खल्वप्युत्पत्तव्यम्। न च शुक्लात्कृष्णे प्रत्यय उत्पद्यमानो वाचकः स्यात्।
यद्यप्युच्यते। अदूरविप्रकर्षे इति वक्तव्यमिति। न वक्तव्यम्। अदूरविप्रकर्ष एव स्पर्द्धा भवति। नहि नि
ष्कधनः शतनिष्कधनेन स्पर्द्धते। यदप्युच्यते। जातेर्नेति वक्तव्यमिति। न वक्तव्यम्। जननेन या प्राप्यते
सा जातिः। न चैतस्यार्थस्य प्रकर्षापकर्षौ स्तः। यदप्युच्यते। तिङश्चेत्यत्र क्रियाग्रहणं कर्तव्यम्। साधनप्र
कर्षे मा भूदिति। न कर्तव्यम्। साधनं वै द्रव्यं न च द्रव्यस्य प्रकर्षापकर्षौ स्तः ॥

र्षापकर्षयोगः। साधनं वै द्रव्यमिति। ननु च शक्तिः साधनमस्ति च तस्याः प्रकर्षो यदाह साधकतमं करणमिति। नैष दोषः। पचति
देवदत्त इति सामानाधिकरण्यदर्शनाच्छक्तिद्रव्ययोस्तिङन्तेन भेदस्यानवगमादभेदमाश्रित्य निर्देशः। न च प्रधानस्य क्रिया
याः स्वतः प्रकर्षसंभवे गुणभूतसाधनप्रकर्षापेक्षास्ति। पचतितरामिति चोक्ते क्रियाप्रकर्षो गम्यते न तु साधनप्रकर्षः। प्रकर्षयु
क्तेऽपि साधने कदाचित् क्रियाप्रकर्षाभावात्। क्रियाप्रकर्षे तु कार्यस्य कारणाव्यभिचारान्नियमेन साधनप्रकर्षानुमानात्। क्रि
याप्रकर्ष एव प्रत्ययः। एको द्वौ त्रय इत्यादिका याः संख्या याः सर्वत्र परिच्छेदकत्वाविशेषात् प्रकर्षाभावः। बहुत्वसंख्या यास्त्वनि
यतसंख्येयत्वाद्भवति प्रकर्षः। बहुतरा इति। एवमुन्मानप्रमाणपरिमाणानामपि प्रकर्षाभावो विज्ञेयः। भाष्यकारेण तु जा
तिप्रकर्षाभावोक्तन्यायानुसारेण गम्यमानत्वान्नोक्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंपुनरेकमिति। ननु समानधर्मोपलम्भाद्विशेषाग्रहणाच्च संशयो न चैकानेकयोर्विशेषाग्रहणम्। नैष दोषः। एकस्यापि भेदव्यवहारो दृश्यते। पटुर्ह्यन्यदुरासीत् पटुतरश्चैषमः। अन्य एवायं संवृत्त इति। तथानेकस्मिन्नप्येकव्यवहारो दृश्यते। यथा भिन्नापि क्रिया निवृत्तभेदा सत्या तेनाभिधीयते इत्येकोच्यते। तत्त्वतो हि भवद्भिरास्यते भवन्त आसत इत्यादौ भिन्नैः कर्तृभिः साध्यानि स्वसमवेतानि भिन्नान्येवासनानि। एकत्वं चाश्रित्योक्तं न तिङन्तान्येकशेषारम्भं प्रयोजयन्ति क्रियाया एकत्वादिति। एवं च किमेकं शौक्ल्यमाश्रयभेदात्तूपचरितभेदमुतानेकमेवेति संशयात्प्रश्न उपपन्नः। यद्येकमिति। एकत्वे जातिवद्गुणस्य प्रकर्षानुपपत्तिः। समानगुणग्रहणमिति तुल्ये भेदे यथा शौक्ल्यस्य शौक्ल्यान्तरापेक्षः प्रकर्ष एवं कृष्णाद्यपेक्षोऽपीति तदपेक्षे प्रकर्षे प्रत्ययनिवृत्त्यर्थं समानगुणग्रहणं कर्तव्यमित्यर्थः। ननु यस्याप्येकं शौक्ल्यं तेनापि भिन्नगुणापेक्षे प्रकर्षे प्रत्ययस्य निवृत्तिर्विधेया। नैष दो

किंपुनरेकं शौक्ल्यमाहोस्विन्नाना। किं चातः। यद्येकं प्रकर्षो नोपपद्यते। नहि तेनैव तस्य प्रकर्षो भवति। अथ नाना। समानगुणग्रहणं कर्तव्यम्। शुक्लात्कृष्णे माभूदिति। अस्त्वेकं शौक्ल्यं तत्तु विशेषवत्। किंकृतो विशेषः। अल्पत्वमहत्त्वकृतः। अथवा पुनरस्त्वेकं निर्विशेषं च। ननु चोक्तं प्रकर्षो नोपपद्यते। नहि तेनैव तस्य प्रकर्षापकर्षौ स्तः। गुणान्तरेण प्रच्छादनात्प्रकर्षो भविष्यति। अथवा पुनरस्तु नाना। ननु चोक्तम्। समानगुणग्रहणं कर्तव्यम्। शुक्लात्कृष्णे माभूदिति। न कर्तव्यम्। समानगुण एव स्पर्धा भवति। नह्याढ्याभिरूपौ स्पर्धेते वाचकेन खल्वपि स्युक्तव्यम्। न च शुक्लात्कृष्णे उत्पद्यमानो वाचकः स्यात्। किमन्तात्पुनरुत्पत्त्या भवितव्यम् ॥

षः। एकत्ववादिनो यथा शौक्ल्यस्यात्मापेक्षप्रकर्षानुपपत्तिरेवं गुणान्तरापेक्षोऽपि प्रकर्षो नोपपद्यते। यथा गोत्वं नात्मापेक्षया नापि जात्यन्तरापेक्षया प्रकृष्यते गुणभेदवादी तु भेदनिबन्धनं प्रकर्षं सर्वत्रेच्छतीति तेनैव समानगुणग्रहणं कर्तव्यम्। विशेषवदिति। ततो विशेषाश्रयत्वादन्यत्वादुपपन्नः प्रकर्षः। अल्पत्वमहत्त्वकृत इति। क्वचिदाश्रये अल्पं शौक्ल्यं क्वचिन्महदित्यर्थः। गुणान्तरेण प्रच्छादनादिति। संभेदात् मिश्रीकरणादित्यर्थः। यथा जातुषत्वादिना सितायाः मल्लिकायाः। किमन्तादिति। अतिशायन इति किं प्रत्ययार्थनिर्देश आहोस्वित्प्रकृत्यर्थस्य विशेषणमिति समर्थविभक्तिप्रश्नद्वारेण विचारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयान्तादिति। यदातिङन्तेन विस्पष्टार्थे निग्रहवाक्यं प्रदर्श्यते। तदा द्वितीयान्तादुत्पत्तिः। कृदन्तेन तु वाक्यप्रदर्शने षष्ठ्यन्तम्। शुक्लस्यातिशायनमिति तदा षष्ठ्यादौ संदेहो भवति। कर्त्तरि षष्ठी वा स्यात् कर्मणि वा। करणे ल्युट् स्यात् कर्त्तरि वेति। अथवा द्वितीयाग्रहणमुपलक्षणार्थमिति षष्ठ्यपि गृह्यते। प्रत्ययार्थसामर्थ्यलभ्या च समर्थविभक्तिः। कालितर इति। घरूपकल्पेति ह्रस्वः। गर्गतर इति प्राप्नोतीति। वृत्तावपि लुग्विधानात्संख्याविशेषसंप्रत्ययाद्बहुवचनान्तात्प्रत्ययोत्पत्तिर विरुद्धा। अव्यतिरिक्तं वय इति। प्रत्ययार्थपक्षे त्वार्थी वयः प्रतिपत्तिः वयः प्रकर्षेणो वा सौ कुमारीमतिशेते न तु गुणान्तरेण तस्य विप्रकर्षाच्छब्दो तु वयः प्रतिपत्तिर्नास्तीति ङीपोऽप्रसङ्गः। स्वार्थिकत्वे तु शब्दादेव वयः प्रतिपत्तिरिति ङीप्प्राप्तिः। तरपो क्त

द्वितीयान्ताद् अतिशय्यमानात्। शुक्लमतिशेते शुक्लतरः। कृष्णमतिशेते कृष्णतरः। यदि द्वितीयान्तादतिशय्यमानात् कालीतिशेते कालीं कालितर इति प्राप्नोति। कालतर इति चेष्यते। तथा काली अतिशेते कालं कालतर इति प्राप्नोति कालितरेति चेष्यते। तथा गार्ग्योतिशेते गर्गान् गर्गतर इति प्राप्नोति गार्ग्यतर इति चेष्यते। तथा गर्गा अतिशेरते गार्ग्यं गार्ग्यतरा इति प्राप्नोति गर्गतरा इति चेष्यते। एवं तर्हि प्रथमान्तात्स्वार्थिको भविष्यति। कालोतिशेते कालतरः। काली अतिशेते कालितरा। गार्ग्यः अतिशेते गार्ग्यतरः। गर्गा अतिशेरते गर्गतराः। यदि प्रथमान्तात्स्वार्थिकः। कुमारितरा। किशोरितरा। अव्यतिरिक्तं वयः कृत्वा वयसि प्रथम इति ङीप् प्राप्नोति। तरपोक्तत्वात्स्त्रीत्वस्य प्रत्ययो न भविष्यति। टाबपि तर्हि न प्राप्नोति। उक्तेपि हि भवन्त्येते टाबादयः। उक्तमेतत्। स्वार्थिका ष्टाबाद य इति ङीबपि तर्हि प्राप्नोति। एवं तर्हि गुणोभिधीयते ॥

त्वादिति। तरपः स्वार्थिकत्वात्सर्वः प्रकृत्यर्थस्तेन द्योत्यत इति भावः। ङीबपीति। टाबपवादत्वात् ङीप इति भावः। अन्ये त्वाहुः कुमारशब्दादुत्पन्नेन ङीपा प्रथमवयोविशिष्टार्थगतस्य स्त्रीत्वस्याभिव्यक्तत्वात्तरबन्तात्स्त्रीत्वमात्रमभिव्यक्तमिति टाबेव भविष्यति। यथा यत्र तत्रेत्यादौ त्रलाधिकरणस्याभिव्यक्तत्वात्तद्धितान्तात्सामयिकी प्रथमैवोत्पद्यते न सप्तमी। भाष्यकारस्तु निमित्तस्य संनिधानादपवादेनैवात्र ङीपा भाव्यं न तु टापेति पक्षान्तरमाश्रयति। एवं तर्हि गुण इति। अतिशेतेनेनेति अतिशायनो गुणोभिधीयते। करणे ल्युट्। आश्रयद्रव्यवाचिनः स्वसमवेते गुणे प्रत्ययविधिः। ततो व्यतिरिक्तार्थाभिधानाद्धून्ताद्वयोलक्षणङीबभावः। गुणाभिधाने कालितर इति। सामानाधिकरण्याभावाद्घादिष्विति ह्रस्वो न प्राप्नोतीति चेद्वचनाद्वैयधिकरण्येपि भविष्यति ॥ रा॰मः ६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमपीति। षष्ठीप्रसङ्गः स्वदुद्रत्वस्य वचनान्न चोदितः। सोऽयमित्यभेदस्य गुणगुणिनोः सर्वदा न्न विवक्षितत्वात् सत्यामपि त्वभेद विवक्षायां मा स्त्रादिवत्स्वलिङ्गसंख्यापरित्यागप्रसङ्गः। आश्रयतइति। विशेषणानां चाजातेरितिवचनात् तत्रहि विशेष णशब्देन परोपकारायोपात्ताः शेषभूताः शुक्लादयो गुणा गृह्यन्ते। अथ वा क्रियेति। अतिशयोऽतिशायनमिति भावे ल्युड्विधा नात्। आश्रयौ भवतइति। उभयोर्निर्वर्त्तकत्वादितिभावः। अकर्मका अपीति। अर्थान्तरवृत्तित्वात्। कर्मापदिष्टाइति। अति श

एवमपि लिङ्गवचनानि न सिध्यन्ति। शुक्लतरम्। शुक्लतरा। शुक्लतरः। शुक्लतरौ। शुक्लतराइति। आश्रय तो लिङ्गवचनानि भवन्ति। गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति। तद्यथा। शुक्लं व स्त्रम्। शुक्ला शाटी। शुक्लः कम्बलः। शुक्लौ कम्बलौ शुक्लाः कम्बलाइति। यदसौ द्रव्यं श्रितो भवति। गुणस्तस्य यल्लि ङ्गं वचनं च तद्गुणस्यापि भविष्यति। अथवा क्रियाभिधीयते। एवमपि लिङ्गवचनानि न सिध्यन्ति। आश्रयतो लिङ्गवचनानि भविष्यन्ति। एवमपि द्विवचनं प्राप्नोति। यश्च हि अतिशेते यश्चातिशय्यते उभौ तौ तस्याश्रयौ भ वतः। नैष दोषः। कथं शेतिरकर्मकः। अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति। कर्मापदिष्टा विध यः कर्मस्थभावकानां कर्मस्थक्रियाणां वा भवन्ति। कर्तृस्थभावकश्च शेतिः। अथ यद्येवं द्वितीयान्तादुत्पत्तिः। प्रथमान्ताद्वा स्वार्थिकः। अथापि गुणोऽभिधीयते। अथापि क्रिया। किं गतमेतदियता सूत्रेण। आहोस्विदन्यतर स्मिन्पक्षे भूयः सूत्रं कर्त्तव्यम्। गतमित्याह। कथम्। यदा तावद्द्वितीयान्तादुत्पत्तिः प्रथमान्ताद्वा स्वार्थिकः। तदा कृत्यल्युटो बहुलमित्येवमत्र ल्युड्भविष्यति। यदा गुणोऽभिधीयते तदा न्यायसिद्धमेव। यदापि क्रिया तदा पि न्यायसिद्धमेव। अथवाऽतिशायतीत्यतिशायनम्। कः प्रयोज्यार्थः। गुणा गुणिनं प्रयोजयन्ति। गुणी वा गुणान्प्रयोजयति। कः पुनरिह शेत्यर्थः ॥

यत्क्रिया कर्तर्य्येव समवेता न तु कर्मणीति कर्माश्रयलिङ्गसंख्याभावइत्युक्तं भवति। कर्मापदिष्टाइति द्विवचनमिह कर्मापदिष्टो विधिः कर्माश्रितस्तस्य चोदितत्वात्। आश्रयतो लिङ्गवचनानीत्यत्र समवाय्याश्रयो गृह्यते न तु निर्वर्तकइत्यर्थः। ल्युड्भविष्यतीति। कर्त साधनः। कः प्रयोज्यार्थइति। अचेतनत्वाद्गुणानां प्रयोजकत्वानुपपत्तिं मन्यते। गुणा गुणिनमिति। अस्माभिः प्रकृष्टैस्त्वमतिशेषेति तत्समर्थाचरणे लक्षणश्चाचेतनानामपि प्रयोजकव्यापारइति कारकप्रकरणे प्रतिपादितम्। कः पुनरिति। शेतेरनेकार्थत्वात्प्रश्नः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योयत्रेति। स्थानार्थः। शेतिर्यथा जलाशय इत्यत्रेति भावः। गुणा गुणिनीति। अवतिष्ठन्त इत्यर्थः। तान्गुणान्गुण्यतिशाययति अति
शयेनावस्थापयतीत्यर्थः। पूर्वं गुणानां प्रयोजकत्वमुक्तं पश्चाद्गुणिनः। शेत्यर्थ इति। प्रकृत्यर्थो ण्यर्थोपि वात्र गृह्यत इत्यर्थः। शेत्य
र्थे नास्तीति। तस्य प्रसिद्धत्वात्। गुणी वेति। गुणसंबन्धाद्गुणवानतिशेते गुणिसंबन्धाद्गुणो वा। अभिव्यज्येतेति। प्रकृष्टत्वेनेति भावः। का
रितार्थ इति। गुणो गुणिनमतिशाययति गुण्यपि गुणमित्यस्ति ण्यर्थोपपत्तिः। परत्वादिति। सूक्ष्मतरवस्त्र इति प्राप्नोति। सूक्ष्मव
स्त्रतर इति चेष्यते। प्रकर्षस्यान्यपदार्थं प्रति विशेषणत्वस्य च युगपद्विवक्षायां विप्रतिषेधोपपत्तिः। आतिशायिकादिति। पूर्ववि
प्रतिषेधेनेति भावः। उत्तरपदातिशय इति। विप्रतिषेधेन तत्र स्वरे विशेषस्तरबन्तेन समासे बहोर्नञ्वदुत्तरपदभूम्नीति बहु

इह योयत्र भवति शेते। सो तत्र। गुणाश्च गुणिनि शेरते। शेत्यर्थः कारितार्थो वा निर्देशोयं समीक्षितः। शेत्यर्थे
नास्ति वक्तव्यं कारितार्थं ब्रवीमि ते। गुणी वा गुणसंयोगाद्गुणो वा गुणिनाऽयदि। अभिव्यज्येत संयोगात्कारिता
र्थो भविष्यति। इहास्यापि सूक्ष्माणि वस्त्राणि अस्यापि सूक्ष्माणि वस्त्राणीति परत्वादातिशायिकः प्राप्नोति। अ
तिशायने बहुव्रीहावुक्तम्। किमुक्तम्। पूर्वपदातिशये आतिशायिकाद्बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थ इति। उ
त्तरपदातिशये आतिशायिको बहुव्रीहेर्बहुसूक्ष्मतराद्यर्थ इति। इह त्रीणि शुक्लानि वस्त्राणि प्रकर्षापकर्ष
युक्तानि। तत्र पूर्वमपेक्ष्य उत्तरे द्वे तरबन्ते। तत्र द्वयोस्तरबन्तयोरेकस्मात्प्रकर्षयुक्ताच्छुक्लतरशब्दादु
त्पत्तिः प्राप्नोति। शुक्लशब्दादेव चेष्यते ॥

ह्यतरशब्दोन्तोदात्तो भवति। बहुव्रीहेस्तरपि सति तरपः पित्वादनुदात्तत्वान्मध्योदात्तत्वप्रसङ्गः स्थाकपिविशेषो बहु
ह्यतरं इति तरबन्तेन समासे भवति। बहुव्रीहेस्तरपि बहुह्यकतर इति स्यात्। यदा त्वत्रैव पूर्वपदार्थातिशयस्तदा बहुव्री
हौ कृते तरब्विदितव्यः। प्रकर्षापकर्षयुक्तानीति। अवयवधर्मेण समुदायस्य व्यपदेशस्तत्र प्रथममपकर्षयुक्तं मध्यमं
पूर्वापेक्षया प्रकर्षयुक्तमन्त्यापेक्षयाप्रकर्षयुक्तमन्त्यं तु प्रकर्षयुक्तमेवेति योज्यम्। तत्रेति। पूर्वापेक्षया द्वयोरपि प्र रा.म:
कृष्टत्वाच्छुक्लतरत्वं तयोस्त्वेकतरस्यान्यतरापेक्षया प्रकर्षविवक्षायां तरबन्तात्तरबुत्पत्तिप्रसङ्गः ॥ ६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुक्लतरस्येति। न्यूनमध्यमोत्कृष्टानां सर्वेषां शौक्ल्यसंभवाच्छुक्लव्यपदेशाच्छुक्लशब्दादेव तरबुत्पत्त्यस्य तद् इत्यर्थः। शुक्लतरश ब्द इति। शुक्लतरशब्दो वाचकोयस्यार्थस्य तस्मिन्नर्थे शुक्लशब्दो वाचकत्वेनास्तीत्यर्थः। उत्पत्तिः प्राप्नोतीति। अनिष्टमपि प्राप्नो तिसत्यामपीष्टसिद्धाविर्थः। श्रेष्ठतमायेति। श्रेष्ठायेत्यर्थः। मध्यमादिति। मध्यमवाचिनः शुक्लादन्त्येभिधेये प्रत्ययो वक्त व्यः। शुक्लमतिशेते शुक्लतर इति। अनेन च वक्तव्येन तक्रकौण्डिन्यन्यायेन तृतीयशुक्लवाचिनः शुक्लतरशब्दादुत्पत्तिर्बाध्य ते। मध्यमश्च शुक्लः पूर्वापेक्षया शुक्लतरो भवति। तृतीयापेक्षया तु न्यूनत्वाच्छुक्ल एव भवति न शुक्लतर इति शुक्लशब्दादेव म ध्यमशब्दवाचिनः प्रत्ययो वक्तव्य इत्यर्थः। न च न्यूनः प्रवर्त्तत इति। स्वगतप्रकर्षापेक्षायां तद्धितोत्पत्ताविर्थः। ततश्च पूर्व

शुक्लतरस्य शुक्लभावात्प्रकृतेः प्रत्ययविज्ञानम्। शुक्लतरस्य शुक्लभावात्प्रकृतेः प्रत्ययो विज्ञायते। शुक्लतरशब्दे शुक्लशब्दोस्ति। तस्मादुत्पत्तिर्भविष्यति। नैतद्विवदामहे। शुक्लतरशब्दे शुक्लशब्दोस्ति नास्तीति। किं तर्हि शुक्ल तरशब्दोप्यस्ति तत उत्पत्तिः प्राप्नोति। तदन्तात्स्वार्थे छन्दसि दर्शनं श्रेष्ठतमायेति। तदन्तादातिशायिका न्तात्स्वार्थे छन्दसि आतिशयिको दृश्यते। देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे। एवं तर्हि मध्यमात् शु क्लशब्दात्पूर्वपरापेक्षादुत्पत्तिर्वक्तव्या। मध्यमश्च शुक्लशब्दः पूर्वमपेक्ष्य प्रकृष्टः परमपेक्ष्य न्यूनः। न च न्यूनः प्रवर्त्तते। अथवा उत्पद्यतां लुग्भविष्यति। वाचके न खल्वप्युत्पत्तव्यम्। न च शुक्लतरशब्दादुत्पद्य मानो वाचकः स्यात्। न खल्वपि बहूनां प्रकर्षे तरपा भवितव्यम्। केन तर्हि तमपा। पूर्वेण स ईमानो यो मध्य मो लभते सितः। परस्मिन् न्यूनतामेति न च न्यूनः प्रवर्त्तते ॥

मतद्धितान्त एव शुक्लशब्दस्तृतीये शुक्लेभिधेये प्रत्ययमुत्पादयति। लुग्भविष्यतीति। गतार्थत्वादप्रयोग एव लुक्। एकेनैव तरपा आद्यमध्यमशुक्लापेक्षया तृतीयप्रकर्षस्य प्रतिपादनात्। न चेति। शुक्लशुक्लतरशब्दस्य प्रयोगाभावादवाचकत्वम्। न ख ल्वपीति। यदि तावत्त्रयाणामन्यतमस्य प्रकर्षो विवक्ष्यते। तदा शुक्लतममिति भाव्यम्। न तु शुक्लतरमित्यर्थः। पूर्वमनपेक्ष्य द्व योरन्यतरस्य प्रकर्षविवक्षा तदा पूर्वानपेक्षायां मध्यमं शुक्लमेव भवति न तु शुक्लतरमिति। शुक्लशब्दादेवोत्पत्तिः सिद्धा शुक्लवदिति न कश्चिद्दोषः। पूर्वोक्तार्थसंग्रहश्लोकाः। पूर्वेणेति। सितः शुक्लः पूर्वेण स ईमानस्तदपेक्षयोत्तरः प्रकर्षं लभते। तृतीयापेक्षया न्यून एवेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपेक्ष्येति। पूर्वेणसमानार्थो दृष्टान्तोपादानायत्तु पुनरुक्तः। नापशब्द इति। गवार्थत्वात्तु लुग्भावाद्वाचकश्चेत्प्रयोक्तव्य इति। त्वंम न्यसेतदाशुक्लतरत्वमिति। यदि वाचकस्ततः प्रयुज्यतां न तु वाचकस्तस्मान्न प्रयोक्तव्य इत्यर्थः॥ द्विवचन॥ द्विवचनं च विभज्यं च द्विवचनविभज्यम्। निपातनाद्भजेः विपूर्वाद्यप्रत्ययो द्विवचनविभज्यं च तदुपपदं चेति कर्मधारयः। तस्मिन्सति तिङन्तात्सुबन्ताच्चातिशायने तरबीयसुनौ भवतः। तच्चोपपदं विग्रहवाक्य एव प्रयुज्यते। वृत्तौ तु गतार्थत्वान्नावश्यं प्रयुज्यते। एवं चोपपदग्रहणं विस्पष्टार्थम्। तत्रेदं न सिध्यतीति। पारिभाषिकद्विवचनाश्रयः पूर्वपक्षः। अर्थाश्रयस्तूत्तरपक्षः। अस्माकं चेति। अस्मदो द्वयोश्चेत्येकस्मिन्बहुवद्भावः। यदि पुनरिति। पूर्वोक्तेषूदाहरणेषु क्वचिद्राशिद्वयापेक्षस्य क्वचिदर्थद्वयापेक्षस्य द्व्यर्थस्य विद्यमानत्वा

अपेक्ष्य मध्यमः पूर्वमाधिक्यं लभते स्थितः। परस्मिन्न्यूनतामेति यथामात्यः स्थिते नृपे। अस्तु वापि तरप्तस्मान्नापशब्दो भविष्यति। वाचकश्चेत्प्रयोक्तव्यो वाचकश्चेत्प्रयुज्यताम्॥ द्विवचनविभज्योपपदे तरबीयसुनौ॥ द्विवचन इत्युच्यते। तत्रेदं न सिध्यति। दन्तोष्ठस्य दन्ताः स्निग्धतराः। पाणिपादस्य पादौ सुकुमारतरौ। अस्माकं च देवदत्तस्य च देवदत्तोभिरूपतरः। यदि पुनर्द्व्यर्थोपपद इत्युच्यते तत्रायमप्यर्थः। विभज्योपपदग्रहणं न कर्त्तव्यं भवति। इहापि सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति। द्व्यर्थोपपद इत्येव सिद्धम्। नैवं जातीयिकाद्व्यर्थता शक्या विज्ञातुम्। इहापि प्रसज्येत। सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपतमा इति। अवश्यं खल्वपि विभज्योपपदग्रहणं कर्तव्यम्। बहूनां विभागस्तदर्थम्। सांकाश्यकेभ्यश्च पाटलिपुत्रकेभ्यश्च माथुरा अभिरूपतरा इति। तत्तर्हि द्व्यर्थोपपद इति वक्तव्यम्॥

त्प्रत्ययः सिद्ध इति भावः। इहापीति। सांकाश्यकपाटलिपुत्रकराशिद्वयसंभवात्। सांकाश्यकानामिति। अत्रापि राशिद्वयस्य सद्भावात्तरप्स्यात्। सांकाश्यकावयवः समुदायः सांकाश्यकशब्देनोच्यते। पाटलिपुत्रकावयवश्च पाटलिपुत्रकशब्देनोच्यते। एवं निर्धारणमुपपद्यते। बहूनां विभाग इति। बहूनां राशीनां मध्यादेकस्य राशेर्यत्र विभागः तत्र राशित्रयादिसद्भावात्तरप् स्यात्। तत्तर्हीति। ननु चैवं जातीयिकाद्व्यर्थतेत्यादिनातिप्रसङ्गोद्भावनेनास्य पक्षस्य दूषितत्वात्कथं पुनरङ्गीकरणम्। नैष दोषः। इह राशिद्वयापेक्षां द्व्यर्थतामाश्रित्याचार्यदेशीयेन यदि पुनरित्याद्युक्तं तत्रायमर्थ इति च। तत आचार्येणैवंजातीयिकेति राशिद्वयापेक्षार्थता दूषिता। ततोन्याद्व्यर्थताचार्यस्याभिमतेति ज्ञात्वा शिष्य आह। तत्तर्हीति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्य्य आह । न वक्तव्यमिति । इयमाचार्य्यस्य द्व्यर्थताभिमता । इह दन्तोष्ठस्य पाणिपादस्येति तिरोहितावयवभेदः समूहः समासार्थः ।
तत्रैतस्यां दशावभेदैकत्वसंख्योपादानमिलाद्द्विपदस्य परित्यक्तभेदाङ्गीकृताभेदलक्षणैकदन्तोष्ठलक्षणार्थद्वयाश्रया द्व्यर्थताऽस्ति । य
दा त्वितरेतरयोगे द्वन्द्वस्तदावयवार्थभेदस्फुरणाद् द्व्यर्थता नास्तीति तरप् न भवति प्लक्षन्यग्रोधानां प्लक्षाः स्निग्धतमा इति । अस्माकं च दे
वदत्तस्य चेत्यत्राप्यर्थद्वयसद्भावादस्ति द्व्यर्थत्वम् । सांकाश्यकानां च पाटलिपुत्रकाः अभिरूपतमा इत्यपरित्यक्तभेदाः
समूहिनः शब्देन प्रत्याय्यन्ते न च राशिद्वयापेक्षार्थता शब्देन प्रतिपादिता राशिद्वयस्याप्रयोगादिति द्व्यर्थताभावात्तरबभावः । अथात्र य
तश्च निर्द्धारणमिति कथं षष्ठी यावता पञ्चमी विभक्त इति पञ्चम्या तदपवादेन भाव्यम् । नैष दोषः । सर्वत्रैव निर्द्धारणे विभागोऽस्तीति वि
भक्तग्रहणसामर्थ्याद्यत्र विभाग एव शब्देन प्रतिपाद्यते स एव पञ्चम्या विषयः स एव च विभज्योपपदनिमित्तस्य प्रत्ययस्य । माथुराः पा
टलिपुत्रकेभ्य आढ्यतरा इति । समुदायशब्दप्रयोगे तु गवां कृष्णा संपन्नक्षीरतमेत्येवमादौ विभागाविभागसंभवान्न पञ्चमी नापि तरप् प्रत्ययो
निर्द्धारणाश्रये तु षष्ठीसप्तम्यौ भवतो यस्मान्निर्द्धार्यते यश्चैकदेशो निर्द्धार्यते यश्च निर्द्धारणहेतुरेतत्त्रयसंनिधाने निर्द्धारणं भवतीति तत्रैव ष

न वक्तव्यम् । नेदं पारिभाषिकस्य द्विर्वचनस्य ग्रहणम् । किं तर्ह्यन्वर्थग्रहणम् । उच्यते इति वचनं द्वयोरर्थयोर्वचनं द्वि
वचनमिति । तरबीयसुनोरेकद्रव्यस्योत्कर्षापकर्षयोरुपसंख्यानम् । तरबीयसुनोरेकद्रव्यस्योत्कर्षापकर्ष
योरुपसंख्यानं कर्तव्यम् । पटु इवान्यदासीत् । पटुतरस्त्वैषम इति । सिद्धं तु गुणप्रधानत्वात् । सिद्धमेतत् ॥

ष्ठीसमासनिषेधो भवति । इह तु नागानामुत्तमो नागोत्तम इति त्रयसंनिधानाभावात्संबन्धसामान्ये षष्ठीति समासो भवत्येव । सांका
श्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपतमा इत्यत्रापि शब्देन समुदायस्य प्रतिपादनाद्विभज्यमानस्य द्विरूपादा
नाद्विभागाविभागसद्भावाद्विभागविषयककार्याभावः । प्रतियोग्यपेक्षत्वात् प्रकर्षस्य विप्रकर्ष आक्षिप्ते विभज्यग्रहणादिहाप्य
वधारणमाश्रीयते । तेन समुदायशब्द उच्चार्यमाणे विभज्योपपदनिमित्तप्रत्ययाप्रसङ्गः । पटु इवानिति । पाटवस्यातिशये
ऽपि प्रतियोग्यपेक्षत्वात् प्रकर्षस्य सत्यपि विप्रत्यभिज्ञानाद् गुणिन एकत्वात्तस्यैव प्रतियोगित्वायोगात् प्रकर्षप्रत्ययाप्रसङ्गः ।
सिद्धं त्विति । यद्यपि शब्देन गुणी प्राधान्येनोच्यते । तथापि गुणाश्रयप्रकर्षनिमित्तत्वात्प्रत्यययोस्तेषां प्रतिगुणस्य प्राधान्यमाश्रि
त्य गुणप्रधानत्वादित्युच्यते । तत्र गुणभेदेन गुणिनो भेदारोपादुपपन्नो भेदाश्रयप्रकर्षनिमित्तः प्रत्ययः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अजादी। नियमार्थइति। अन्यथाप्रकर्षेःजाद्योर्विधानादप्रकर्षेविधिःस्यात्। सिद्धेविधिरिति। स्वरितत्वादतिशायनस्यानु
वर्तनात्तत्रैवपुनर्विधानंनियमार्थम्। प्रशस्य॥ एवमपीति। अन्यथातरप्तमपोरादेशविधानंस्यादितिनज्ञापकंस्यादजादिभाव
स्य। यदिपुनरिति। अजादीत्यत्रानुवर्त्यप्रशस्यशब्दादजादीभवतः आदेशश्चेत्येवंव्याख्यानात्। व्यञ्जनादीइति। विशेषविहिताभ्यामजा
द्भ्यांबाधनात्। ज्ञापकत्वेतुनियमाप्रवृत्तिज्ञापनात्स्वशास्त्रेणैवाजाद्योर्विधानाद्व्यञ्जनाद्योर्बाधस्याप्रसङ्गः। द्विवचनविभ

कथम्। गुणप्रधानत्वाद्गुणप्रधानोयंनिर्देशःक्रियते। गुणान्तरयोगाच्चान्यत्वंभवति। तमेवगुणान्तरयुक्तंव
क्तारोभवन्ति। अन्योभवान्स्तरत्वइति॥ अजादीगुणवचनादेव॥ एवकारःकिमर्थः। नियमार्थः। नैतदस्तिप्रयो
जनम्। सिद्धेविधिरारभ्यमाणोन्तरेणैवकारंनियमार्थोभविष्यति। इष्टतोवधारणार्थस्तर्हि। यथैवंविज्ञायेत
अजादीगुणवचनादेवेति। मैवंविज्ञायि अजादीगुणवचनादिति। किंचस्यात्। नव्यञ्जनादीगुणवचनात्स्याता
म्॥ प्रशस्यस्यश्रः॥ इदमयुक्तम्। किमत्रायुक्तम्। अजादीगुणवचनादेवेत्युक्त्वा अगुणवचनानामपिअजाद्यो
रादेशाउच्यन्ते। नैषदोषः। एतदेवज्ञापयतिभवतएतेभ्योगुणवचनेभ्योपिअजादीइति। यदयमजाद्योःपर
तःआदेशान्शास्ति। एवमपितयोरितिवक्तव्यंस्यात्। तयोःपरतइति। यदिपुनरयंविधिर्ज्ञायते नैवंशक्यंव्य
ञ्जनादीहिनस्याताम्। उपाधीनांचसंकरःस्यात्। पुनर्विधानादजाद्योः। ननुचैतेविशेषाअनुवर्त्तेरन्। यद्यप्ये
तेअनुवर्त्तेरन्। व्यञ्जनादीतर्हिनस्याताम्। एवंतर्हिआचार्यप्रवृत्तिर्ज्ञापयतिभवतएतेभ्योऽगुणवचनेभ्यो
प्यजादीइति। यदयमजाद्योरादेशंशास्ति। ननुचोक्तंतयोरितिवक्तव्यमिति। नवक्तव्यम्। प्रकृतमजादिग्रह
णमनुवर्त्तते। क्वप्रकृतम्। अजादीगुणवचनादेवेति। तद्वैप्रथमानिर्दिष्टंसप्तमीनिर्दिष्टेनचेहार्थः॥

ज्योपपदेईयसुनस्यत्रेष्ठन्नित्सुपाधिसंकरोनभवति। ननुचैतदिति। अतिशायनइष्ठन्द्विवचनविभज्योपपदेईयसुन्नित्यनुवर्तिष्यत
इत्यर्थः। व्यञ्जनादीतर्हीति। यदितरप्तमपावनुवर्त्तेयातांतदातयोरपिश्रादयआदेशाःस्युः। तस्मात्तौनानुवर्त्यौ। ततश्चविशेषविहिता
भ्यांतयोर्बाधप्रसङ्गएव। आचार्यप्रवृत्तिरिति। नियमाप्रवृत्तिज्ञापनद्वारेणअजादीभावोज्ञाप्यते नतुसाक्षादन्यथापुनरपिव्यञ्ज
नाद्योर्बाधःस्यात्। क्वप्रकृतमिति। अजाद्योरितिसप्तम्यन्तंनप्रकृतंयत्तुप्रकृतमजादीइतिनतदेवात्रसंबध्यतइतिप्रश्नः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थादिति। सामर्थ्यादित्यर्थः। ननु चाजादीइति। यथाश्रुतविभक्तिसंबन्धेऽजादिविधानार्थे संभवति कथं विभक्तिविपरिणामः श
क्य आश्रयितुम्। नैष दोषः। प्रशस्यस्येति षष्ठीश्रवणात् स्थान्यादेशभावावगमादादेशस्य विधीयमानत्वात् प्राधान्यं प्रतीयते। तत्रा
जादीइत्यनुवर्त्तनादादेशविधौ प्रत्यययोर्गुणभावः। ततः सामर्थ्याद्विभक्तिविपरिणामः। विभक्तिशब्देन विभक्त्यन्तार्थ उच्यते। तस्य
पूर्वशक्तित्यागे नशक्त्यन्तरोपजनेन विपरिणामव्यवहारः। प्रातिपदिकार्थयोगएव हि नानाशक्तियोगात् कर्मादिशक्तिवाच्य इति
सएव विशिष्टशक्तियुक्तो विभक्त्यन्तरवाच्यः। अथवा तात्त्विकेऽपि भेदे शब्दस्य सारूप्यात्तत्त्वाध्यवसायाश्रयेण विभक्तिप्रत्ययत्वा
गोपादानाभ्यां प्रातिपदिकस्य विपरिणामव्यवहारो वसीयते। विभक्तेस्तूपचरितो विपरिणामव्यवहारः। नहि प्रथमायाः सप्तमीरूपे
ण विपरिणामसंभवः। प्रशंसा। इह प्रत्ययस्य विधीयमानतया प्राधान्यान्तदङ्गत्वाच्च प्रकृतेः प्राधान्येन प्रशंसायाः संबन्धस्य न्याय्यत्वात
साः प्रत्ययार्थत्वं मत्वाह। स्त्रीलिङ्गेनायमिति। ततश्च पटोः प्रशंसा पटुरूपेति प्राप्नोति। अथ पटुरूपो देवदत्त इति सामानाधिकरण्या

अर्थाद्विभक्तिविपरिणामो भविष्यति। तद्यथा। उच्चानि देवदत्तस्य गृहाणि. आमन्त्रयस्वैनम्। देवदत्तमिति
गम्यते। देवदत्तस्य गावोऽश्वा हिरण्यम् आढ्यो वैधवेयः। देवदत्तः इति गम्यते। पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्र
थमानिर्दिष्टं द्वितीयानिर्दिष्टं च भवति। एवमिहापि पुरस्तात्प्रथमानिर्दिष्टं सत्सप्तमीनिर्दिष्टं भविष्यति॥
प्रशंसायां रूपप्॥ स्त्रीलिङ्गेनायं निर्देशः क्रियते एकवचनान्तेन च ॥

प्रसङ्गः कस्मान्न चोदितः। तत्र केचिदाहुः। दोषोपलक्षणायैतदुक्तम्। अन्ये त्वाहुः। सोऽयमित्यभेदविवक्षायां सामानाधिकरण्यं भवि
ष्यति। भेदविवक्षा तु तथात्वस्य प्रयोगाभावान्न क्रियते। यद्येवं गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्तीत्यतिशायनप्रत्यया
न्तवदभिमतलिङ्गवचनयोगाभावाद्दोषाभावः। अत्राहुः। प्रकृत्यर्थविशेषणपक्षस्योभयानुग्रहात् न्याय्यत्वादयं परिहारो भाष्यका
रेण नाश्रितः। अन्ये त्वाहुः। प्रशंसामात्रे प्रत्ययविधानादन्तरङ्गत्वात् स्त्रीप्रत्ययेन भाव्यम्। पश्चात्सोऽयमित्यभिसंबन्धात्तदभिधानेऽप्यन्तरङ्गः स्त्रीप्र
त्ययो न निवर्त्तते। प्रत्ययार्थविशेषणपक्षे प्रकृत्यर्थविशेषणपक्षे कुमारिरूपेत्यव्यतिरिक्तं वयइति ङीपू कस्मान्न भवति कुमारी
शब्दात्तु सन्नेनङीपा वयोविशिष्टार्थगतस्य स्त्रीत्वस्य द्योतितत्वाद्रूपबन्तात् स्त्रीत्वमात्रमभिव्यङ्क्तुं टाबेव क्रियते। ननु ङीपेव तदभि
व्यक्तमिति टाप्न प्राप्नोति। नैतदस्ति। कुमारिरूपदृश्यमाने कुटीरादिवल्लिङ्गान्तरं प्रतीयेत। तस्मादवश्यमस्मिन्टाप्यं स्त्रीत्वमितिटा
बुत्पद्यते। अयमेव च परिहार आतिशायिकप्रत्ययानां स्वार्थिकत्वपक्षे कुमारितरेत्यादावभिधानीयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिङ्प्रकृतेरिति। तिङ्प्रकृतिर्यस्य रूपपः ततः परस्या विभक्तेरभावो वक्तव्यः। एकाच क्रियेति। आख्यातशब्दात् क्रियाभेदस्यानवगमात् क्रियाया एकत्वमुच्यते। भवद्भिरास्यतइत्यादौ तु केवलक्रियावचने द्विवचनबहुवचनादर्शनात्। पचतः पचन्तीत्यादौ लकारवाच्यकर्तृसमवेतद्वित्वबहुत्वाश्रयो वचनभेदइति न ततः क्रियाभेदसिद्धिः। एकत्वाच्च क्रियाया रूपप्रत्ययान्ताद्द्विवचनबहुवचनाभावः। द्रव्यप्रधानं नामेति। प्रसङ्गेनोक्तं नत्वस्य कश्चित्प्रकृतोपयोगः। किं च देवदत्तः करोतीति करोतिरत्र क्रियासामान्यवचनः। तत्र विशेषपरिज्ञानाय किंशब्दः क्रियाविशेषणं प्रवर्त्तते क्रियाविशेषणत्वाच्च किमित्येतद्द्वितीयान्तं नपुंसकं च। प्रकरणादिवशाच्च क्रियाशब्दावगतिः। गुणद्रव्यविषयस्यापि प्रश्नस्य संभवात्। वायकः

तेन स्त्रीलिङ्गादेवोत्पत्तिः स्यादेकवचनान्ताच्च। पुंनपुंसकलिङ्गाद्द्विवचनान्ताच्च न स्यात्। नैष दोषः। नायं प्रत्ययार्थः किं तर्हि प्रकृत्यर्थविशेषणमेतत्। प्रशंसायां यत्प्रातिपदिकं वर्त्तते तस्माद्रूपब्भवति। कस्मिन्नर्थे स्वार्थ इति। स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यनुवर्त्तन्ते। प्रकृतेर्लिङ्गवचनाभावात् तिङन्तप्रकृतेरभाववचनम्। प्रकृतेर्लिङ्गवचनाभावात्तिङन्तप्रकृते रूपपोऽभावो वक्तव्यः। पचतिरूपं पचतोरूपं पचन्तिरूपमिति। सिद्धं तु क्रियाप्रधानत्वात्। सिद्धमेतत्। कथम्। क्रियाप्रधानमाख्यातं भवति। एका च क्रिया। द्रव्यप्रधानं नाम। कथं पुनर्ज्ञायते क्रियाप्रधानमाख्यातं भवति द्रव्यप्रधानं नामेति। यत्क्रियां पृष्टः तिङाचष्टे। किं देवदत्तः करोति। पचतीति ॥

किं सुक्लं वस्त्रं करोत्यथ कृष्णं तथा किं शाटकं करोत्यथ प्रावारकमिति। केचित्तु क्रियाप्रश्नेऽप्यभूततद्भाववचनं करोतिं मन्यन्ते। किं करोति कां क्रियां निर्वर्त्तयतीत्यर्थः। तत्राख्यातवति प्रश्नवाक्ये प्रकरणादिवशात् क्रियाप्रश्नावगमादाख्यातेनैवोत्तरोपादानात् कालसंख्यासाधनोपग्रहाभिधानेऽप्याख्यातस्य क्रियाप्रधानत्वावगमः। एकपदोपात्तार्थापेक्षया च क्रियाप्रधानत्वमभिधीयते। व्रीहीनवहन्तीत्यादौ व्रीहिद्रव्यसंस्कारार्थत्वादवघातस्याप्राधान्यम्। अथवा यद्यप्यार्थं व्रीहीणां प्राधान्यं तथापि साध्यत्वात् क्रियायाः शाब्दं प्राधान्यं न तु व्रीहीणां साधनत्वात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रव्यं पृष्ट इति। यद्यपि यः पचतीति तिङन्तेनापि उच्चरं भवति। तथापि सर्वनाम्नः परामृश्य पाकक्रियायां कृतीस देवदत्त इत्य भिधानात् केवलेनाख्यातेनोच्चरस्यादानादाख्यातस्य साधनत्वाप्रसङ्गः। पदान्तरेण हि द्रव्योपलक्षणायगुणभावं क्रियानीयते। यदि तर्हीति। क्रियागतसंख्यापेक्षं वचनभेदं मन्यते। नैतानीति। लकारादिवाच्यकर्तृकर्मगतसंख्यापेक्षो वचनभेद इत्यर्थः। तिङोक्तत्वादिति। उक्तार्थानामप्रयोग इति न्यायात्। एकवचनमपीति। पचतिरूपमित्यत्र तिङोक्तत्वादिति भावः। समयादिति। परश्चेति नियमान्न केवला प्रकृतिः प्रयोक्तव्येत्येवं रूपात्। द्विवचनबहुवचनान्यपीति। तैरपि समयस्य परिपालनात्। यद्यपि प्राथम्यादेकवचनेनैव समयः पाल्यत इति परिहारसंभवः। तथापि परिहारान्तरमाह।

द्रव्यं पृष्टः कतरः चेष्टकतरो देवदत्तो यः कारको हारक इति। यदि तर्ह्येका क्रिया। द्विवचनबहुवचनानि न सिद्ध्यन्ति। पचतः पचन्तीति। नैतानि क्रियापेक्षाणि किं तर्हि साधनापेक्षाणि। इहापि तर्हि प्राप्नुवन्ति। पचतिरूपं पचतोरूपं पचन्तिरूपमिति। तिङोक्तत्वात्तस्याभिसंबन्धस्य न भविष्यति। एकवचनमपि तर्हि न प्राप्नोति। समयाद्भविष्यति। द्विवचनबहुवचनान्यपि तर्हि समयात्प्राप्नुवन्ति। एवं तर्हि एकवचनमुत्सर्गतः करिष्यते। तस्य द्विबह्वोरर्थयोर्द्विवचनबहुवचने अपवादौ भविष्यतः। एवमपि नपुंसकत्वं वक्तव्यम्। न वक्तव्यम्। उक्तं वा। किमुक्तम्। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति। वृषलादिभ्य उपसंख्यानम्। वृषलादिभ्य उपसंख्यानं कर्तव्यम्। वृषलरूपः दस्युरूप इति ॥

एकवचनमिति। द्व्येकयोर्द्विवचनैकवचने इत्यत्रैकवचनग्रहणं न कर्तव्यम्। द्वयोर्द्विवचनमित्येव कर्तव्यम्। तत्र ङ्याप्प्रातिपदिकात्स्वादयो भवन्तीति संख्यानिरपेक्षमेकवचनमुत्सर्गो भवति। तस्य द्वित्वबहुत्वयोर्द्विवचनबहुवचनयोरपवादयोर्विधानादेकत्ववत्यर्थे अभेदैकत्ववति च संख्यारहिते अव्ययाद्यर्थे चावस्थितमेकवचनम्। तस्मादेकवचनेनैवात्र समयः पाल्यते न तु द्विवचनबहुवचनाभ्यां तिङोक्ताभ्यामित्यर्थः। लिङ्गमशिष्यमिति। शास्त्रोपदेशेन विनापि सिद्धिर्लिङ्गस्य लोकव्यवहारगम्या। वृषलादिभ्य इति। वृषलादीनां निकृष्टत्वादुत्कृष्टविषयत्वाच्च प्रशंसायास्तत्राभावं मन्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यासान्तरेण सिद्धिं मत्वाह। सिद्धं त्विति। ननु प्रशंसायामित्येव सिद्धः प्रत्ययः। सर्वस्य हि वस्तुनः स्वव्यापारेऽतिशयात् प्रशंसाक्रिय
ते रूपबादीनामप्यसावस्ति। एवं तर्हि यदा निन्दाप्रतिपादनाय चोररूप इत्युच्यते तदा प्रत्ययाप्रसङ्गाद्व्यापकं वैयाकरणस्य ग्रहणमे
व कर्तव्यम्। सत्येव पारवादे वैयाकरणस्य प्रशंसासद्भावाद्विवक्षावशाच्च येषामेव प्रशंसा वाचित्वं तेषामेव निन्दावचनत्वं दृश्य
ते। यथा राक्षस इति। पुरुषातिशयप्रतिपादने प्रशंसा गम्यते। निर्घृणत्वप्रतिपादने तु निन्दा। अथ तमबादीनां रूपपश्च को विष
यविभागः। यावता अतिशायनमपि पूजानिन्दाविषयः। पटुतमः पापीयानिति। रूपप्प्रत्ययोऽप्युभयविषयः। पटुरूपः चोररूप
इति। उच्यते। अतिशायनं समानप्रतियोग्यपेक्षं वैयाकरण्यं तु तन्निरपेक्षमिति स्पष्ट एव विषयविभागः। अप्ययं पलाण्डुनेत्यादौ
गर्हायामपिशब्दः कर्मप्रवचनीयसंज्ञः॥ ईषदस॥ प्रत्ययानां विधेयतया प्राधान्यात्तदर्थत्वमीषदसमाप्तेर्मत्वाह। ईषदसमाप्ता वि

मिद्धं तु प्रकृत्यर्थे वैयाकरणवचनात्। सिद्धमेतत्। कथम्। प्रकृत्यर्थस्य वैयाकरण्यं वक्तव्यम्। वृषलरूपोऽयमप्ययं
पलाण्डुना सुरां पिबेत्। चोररूपोऽयमप्यक्ष्णोरञ्जनं हरेत्। दस्युरूपोऽयमप्यध्वगं धावतो लोहितं पिबेत्॥ ईषद
समाप्तौ कल्पब्देश्यदेशीयरः॥ ईषदसमाप्तौ क्रियाप्रधानत्वाल्लिङ्गवचनानुपपत्तिः। ईषदसमाप्तौ क्रियाप्रधा
नत्वाल्लिङ्गवचनयोरनुपपत्तिः। पटुकल्पः। पटुकल्पम्। पटुकल्पा। पटुकल्पौ। पटुकल्पा इति। एकोऽयमर्थः ईषद
समाप्तिर्नाम। तस्यैकत्वाद्बहूनैकवचनं प्राप्नोति। प्रकृत्यर्थविशेषणत्वात्सिद्धम्। सिद्धमेतत्। कथम्। नायं प्रत्यया
र्थः। किं तर्हि प्रकृत्यर्थविशेषणमेतत् ॥

ति। ईषदसमाप्तौ यथेष्टं लिङ्गवचनासिद्धिरित्यर्थः। एकवचनमिति। एकत्वादीषदसमाप्तेः षष्ठीप्रसङ्गं तु न चोदयति। गुणगुणि
नोरिह सर्वदा सोऽयमित्यभेदसंबन्धस्य विवक्षितत्वात्भेदनिबन्धनायाः षष्ठ्या अप्रसङ्गात्। यद्येवं गुणवचनानामाश्रयतो लिङ्ग
वचनानीति लिङ्गवचनदोषोऽपि नास्ति। नैवं शक्यम्। इह गुडकल्पा द्राक्षा बहुगुडा द्राक्षेति। यदि ईषदसमाप्तेर्द्राक्षाश्रयत्वं तदा ब
हुगुड इति न सिध्यति। अथ गुडाश्रयत्वं ततो गुडकल्पेति न सिध्यति। का पुनर्द्राक्षायां गुडस्येषदसमाप्तिर्येन माधुर्येण गणेन द्राक्षा
यां गुडशब्दो वर्तते तस्येषदसमाप्त्या गुडस्येषदसमाप्तिः। प्रकृत्यर्थविशेषणत्वादिति। उभयानुग्रहादेव हि प्रकृतिरप्यनुगृहीता भ
वति प्रत्ययोऽपि द्योतकत्वात्तस्यैव चस्वार्थिकत्वात्प्रकृतितो लिङ्गवचनानि सिध्यन्ति। यत्र तु नेष्यते तत्र णचः स्त्रियामञिति ज्ञाप
केन तदन्तवृत्तिरिति वक्ष्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृत्यर्थे चेदिति। ननु गुडकल्पा द्राक्षेत्यादौ गुड इयं द्राक्षेत्यभेदविवक्षायां गुडादयो द्राक्षायां वर्त्तमानाः प्रत्ययमुत्पादयन्तीति द्राक्षादिगतलिङ्गवचनोपपत्तौ नास्त्यव्याप्तिदोषः। नैतदस्ति। गुडादयः शब्दा इवार्थाभ्यन्तरीकरणेन सोऽयमित्यभेदसंबन्धेन द्राक्षादिषु वर्त्तमाना अपरित्यक्तस्वलिङ्गसंख्या एव वर्त्तन्ते तत्र बहुगुडो द्राक्षेत्यादि सिध्यति। गुणशब्देभ्यश्च पट्वादिभ्यः कल्पादिषु दोषाभावो जातिशब्दोऽयस्तु कल्पादिषु भिन्नलिङ्गसंख्य जात्यभिधाने गुडकल्पा द्राक्षेत्यादौ दोषः। सिद्धं त्विति। यद्यप्युत्तरपदशब्दः समासावयवे रूढस्तथापीह प्रकृत्यर्थस्य पश्चात्प्रत्ययार्थस्याभावात् प्रत्ययार्थविशेषवाचिनि द्राक्षादिपदे यौगिको वर्त्तते तेन गुडादिभ्य उपमानवाचिभ्य उपमेये द्राक्षादौ प्रत्यय इत्युक्तं भवति। गुड इवेयं द्राक्षेषदसमाप्ता।

ईषदसमाप्तौ यस्मात्प्रातिपदिकं वर्त्तते तस्मात्कल्पबादयो भवन्ति। कस्मिन्नर्थे स्वार्थ इति। स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यनुवर्त्तन्ते। प्रकृत्यर्थे चेल्लिङ्गवचनानुपपत्तिः। प्रकृत्यर्थे चेल्लिङ्गवचनयोरनुपपत्तिः। गुडकल्पा द्राक्षा। तैलकल्पा प्रसन्ना। पयस्कल्पा यवागूरिति। सिद्धं तु तत्संबन्ध उत्तरपदार्थे प्रत्ययवचनात्। सिद्धमेतत्। कथम्। तत्संबन्धे ईषदसमाप्तिसंबन्धे उत्तरपदार्थे प्रत्ययो भवतीति वक्तव्यम्। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तमीषदसमाप्तौ क्रियाप्रधानत्वाल्लिङ्गवचनानुपपत्तिरिति। परिहृतमेतत् प्रकृत्यर्थविशेषणत्वात्सिद्धमिति। ननु चोक्तं प्रकृत्यर्थे चेल्लिङ्गवचनानुपपत्तिरिति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति। स्वार्थिका अतिवर्त्तन्ते लिङ्गवचनानीति। यदयं णचः स्त्रियामञिति स्त्रीग्रहणं करोति। यद्येतज्ज्ञाप्यते बहुगुडो द्राक्षा बहुतैलं प्रसन्ना बहुपयो यवागूरिति। अत्रापि प्राप्नोति ॥

गुडकल्पेति। यद्यप्युपमानग्रहणं नोपात्तं तथापि सामर्थ्यादत्रोपमानोपमेयभाव आश्रीयते। पट्वादिभ्योऽपि तत्रैव प्रत्ययोस तिर्यस्य परिपूर्णं पाटवं स लोके पटुरिति प्रसिद्धः तेन तुल्य ईषदसमाप्तः पटुकल्पो देवदत्त इति तत्संबन्ध इति वचनादीषत्तादृश्ये प्रत्ययाभावः। सिध्यतीति। यद्यप्यस्मिन्पक्षे बहुगुडो द्राक्षेत्यादि न सिध्यति द्राक्षादिगतलिङ्गवचनप्रसङ्गात्तथाप्युक्तदोषपरिहारात् सिध्यतीत्युक्तम्। स्त्रीग्रहणमिति। कर्मव्यतिहारेण च स्त्रियामिति स्त्रीलिङ्गभावेण चो विधानात्तदन्ताद् ञ् प्रत्ययः स्वार्थिकत्वात् स्त्रियामेव भविष्यतीति स्त्रीग्रहणं न कर्तव्यम्। तत्क्रियमाणं लिङ्गवचनातिवृत्तिं ज्ञापयति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नापीति। उत्तरसूत्रेष्वग्रहणाद्वक्ष्यमाणनियमार्थात्प्रकृतेर्येलिङ्ग-वचने ते एव बहुव्रीहौ तत्र भवतः। अथवा स्त्रीग्रहणे नानुवृत्तिनियमाभावो ज्ञाप्यते इत्यनुवृत्तिः स्वीक्रियते। तथा प्रयोगं भवतः। अथवाकाराद्गोणीभ्यां इष्टरजिति विकल्पकरणेन स्त्रियां ङीषर्थे नानुवृत्तिरपि ज्ञाप्यत इत्युभयसिद्धिः। किंपुनरिति। गुणशब्दानामनक्तपरिमाणविषयत्वाद्गुणसंबन्धमात्रेण मन्दमध्यमोत्कृष्टगुणे सर्वत्र वर्त्तनादीषदसमाप्तेरभावं मत्वा प्रश्नः। निर्ज्ञातस्येति। अयमेवेत्येवं निश्चितस्येत्यर्थः। विसमाप्तिश्चेति। नञर्थे विशब्दः। गुणश्चानिर्ज्ञात इति। इयदेव पाटवमितीयत्तया न ज्ञायते गुणः। द्रव्यमिदानीमुपन्यस्यति। इदं तर्हीति। नन्वत्र न गुडाद्य ईषदसमाप्ताः किं तर्हि द्राक्षादय इति द्राक्षादिभ्य एव प्रत्ययेन भाव्यम्। नैष दोषः। यदपेक्षया परस्येषदसमाप्तिर्भवति त

नाप्यतिवर्त्तन्ते। किंपुनरिहोदाहरणम्। पटुकल्पो मृदुकल्प इति। नैतदस्ति। निर्ज्ञातस्यार्थस्य समाप्तिर्वा विसमाप्तिर्वा भवति गुणश्चानिर्ज्ञातः। इदं तर्हि गुडकल्पा द्राक्षा तैलकल्पा प्रसन्ना पयस्कल्पा यवागूरिति। द्रव्यमप्यनिर्ज्ञातम्। इदं तर्हि कृतकल्पम्। भुक्तकल्पम्। पीतकल्पम्। क्तान्तात्प्रत्ययविधानानुपपत्तिः। क्तस्य भूतकाललक्षणत्वात्कल्पादीनां चासमाप्तिवचनात्। क्तान्तात्प्रत्ययविधेरनुपपत्तिः। किं कारणम्। क्तस्य भूतकाललक्षणत्वाद्भूतकाललक्षणः क्तः। कल्पादीनां चासमाप्तिवचनात्। विसमाप्तिवचनाश्च कल्पादयः। न चास्ति संभवो यद्भूतकालश्च स्यादसमाप्तिश्चेति ॥

द्राक्षिणः प्रत्ययेन भाव्यम्। तत्रैवार्थमभ्यन्तरीकृत्याभेदोपचाराद्गुड इव गुडो द्राक्षेति माधुर्याद्द्राक्षायां गुडत्वस्यारोपाद्रोपनिमित्तस्य माधुर्यस्येषदसमाप्तत्वाद्गुडादिभ्यः प्रत्ययोत्पत्तिरविरुद्धा। द्रव्यमपीति। इयता माधुर्येण द्राक्षा गुड उच्यते इत्येवमपरिज्ञानाद्देशभेदेन च गुडस्य भेदात्कं गुडमपेक्ष्य द्राक्षा गुड ईषदसमाप्ता उच्यत इत्येवमपरिज्ञानम्। कृतकल्पमिति। आशंसायां भूतवद्भविष्यति प्रत्ययविधानादस्ति क्रियाया ईषदसमाप्तिरुपाधिरिति भावः। इतरो यथोक्तमभिप्रायमप्रतिपद्याह। क्तान्तादिति। क्रियाफलनिवृत्तौ क्रियापवर्गो भवति सति च क्रियापवर्गे कुतः क्रियाया ईषदसमाप्तिरित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धं त्विति। भविष्यत्कालाया ईषदसमाप्तायाः क्रियाया आशंस्यमानत्वादित्यर्थः। जीतः क्तो मतिबुद्धिपूजार्थेभ्यश्चेति व
र्त्तमानकालविषयक्तान्तादपि प्रत्ययैर्भाव्यम्। ज्ञातकल्पं पूजितकल्पमिति तथा तिङन्तादपि पचतिकल्पमिति। यदा
पि क्रियैकदेशापवर्गाश्रयेण भूते क्तो विधीयते तदापि कल्पादयो भवन्ति। कृतकल्पं वस्त्रमिति। एवं च कृताकृतादय
एकदेशाकरणाकरणाश्रयाः प्रयोगा उपपन्ना। सकलक्रियापवर्गाश्रयभूतकालविषयक्तप्रत्ययापेक्षे तु चोद्यप्रतिस

सिद्धं तु आशंसायां भूतवद्वचनात्। सिद्धमेतत्। कथम्। आशंसायां भूतवच्चेति एवमत्र क्तो भविष्यति। इदं
चाप्युदाहरणं पटुकल्पो मृदुकल्प इति। ननु चोक्तं निर्ज्ञातस्यार्थस्य समाप्तिर्वा भवति विसमाप्तिर्वा। गुण
श्चानिर्ज्ञात इति। लोकतो व्यवहारं दृष्ट्वा गुणस्य निर्ज्ञानम्। तद्यथा। पटुरयं ब्राह्मण इत्युच्यते यो लघुनोपा
येनार्थान्साधयति। पटुकल्पोऽयमित्युच्यते यो न तथा साधयति। इदं चाप्युदाहरणम्। गुडकल्पा द्राक्षा तै
लकल्पा प्रसन्ना पयस्कल्पा यवागूरिति। ननु चोक्तं द्रव्यमनिर्ज्ञातमिति। लोकतो द्रव्यमपि निर्ज्ञातम्॥ वि
भाषा सुपो बहुच्पुरस्तात्तु॥ विभाषाग्रहणं किमर्थम्। विभाषा बहुच् यथा स्याद् बहुचा मुक्ते वाक्यमपि यथा
स्यात्। नैतदस्ति प्रयोजनम्। प्रकृता महाविभाषा तया वाक्यमपि भविष्यति। इदं तर्हि प्रयोजनम्। कल्पा
दयोऽपि यथा स्युरिति। ननु च बहुजप्युच्यते कल्पादयोऽप्युच्यन्ते। तदुभयं वचनाद्भविष्यति। नैवं शक्यम्।
अक्रियमाणे हि विभाषाग्रहणेऽनवकाशो बहुच् कल्पादीन्बाधेत। कल्पादयोऽप्यनवकाशास्ते वचनाद्भ
विष्यन्ति। सावकाशाः कल्पादयः। कोऽवकाशः। तिङन्तान्यवकाशः। अथ सुब्ग्रहणं किमर्थम्। सुबन्ता
दुत्पत्तिर्यथा स्यात् ॥

माधाने। एवं च कालत्रयविषयेभ्यस्तिङन्तेभ्यः कल्पादयो भवन्ति। पचतिकल्पं पक्ष्यतिकल्पमपाक्षीत्कल्पमिति। लोकत
इति। यावता माधुर्येण लोके द्राक्षायां गुडव्यवहारस्तावदाश्रय ईषदसमाप्तिसंभवः। अथवा गुडगतमाधुर्याश्रयेण द्राक्षायां गुड
त्वारोपाद्गुडजात्यभावाच्चेषदसमाप्तं गुडत्वं द्राक्षाया गुड इयं द्राक्षा गुडकल्पा द्राक्षेति प्रयोगाः॥ विभाषा॥ अथ सुब्ग्रह
णमिति। सुबन्तस्य प्रियकुत्सनादिप्रवर्त्तनादर्थलभ्यं सुबन्तत्वमिति प्रश्नः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा॰ प्रातिपदिकान्माभूदिति। अन्वयव्यतिरेकाभ्यांप्रकृतिप्रत्ययानामिह शास्त्रेऽर्थवत्तापरिकल्पनात् प्रातिपदिकमपिस्वार्थो ५ ३ २
६च दिपञ्चके प्रवर्त्तमानप्रियकुत्सनादिषु प्रवर्त्ततइतिततोपिप्रत्ययप्रसङ्ग इतिभावः। नास्त्यत्रविशेषइति। ननुसुबन्तादुत्प
त्तौसत्यांबहुसेचइत्यादौसात्पदाद्योरितिषत्वप्रतिषेधः सिध्यति। प्रातिपदिकात्तूत्पत्तौषत्वप्रसङ्गः। नैषदोषः। सुबन्तादुत्प
त्तावप्यस्यपदसंज्ञानिबन्धनकुत्वादिनिषेधार्थोयत्नः कर्त्तव्यः। बहुच्छूर्पस्त्वमुमतानुप्रेपदादिविधौप्रत्ययलक्षणमिति त

प्रातिपदिकान्माभूदिति। नैतदस्तिप्रयोजनम्। नास्त्यत्रविशेषः। सुबन्तादुत्पत्तौसत्यांप्रातिपदिकाद्वायद्वे
वमिहापिनार्थः सुब्ग्रहणेनसुपआत्मनःक्यजिति। इहापिनास्तिविशेषः। सुबन्तादुत्पत्तौसत्यांप्रातिपदिका
द्वा। अयमस्तिविशेषः। सुबन्तादुत्पत्तौसत्यांपदसंज्ञासिद्धाभवति। प्रातिपदिकादुत्पत्तौसत्यांपदसंज्ञानप्रा
प्नोति। ननुचप्रातिपदिकादुत्पत्तौसत्यांपदसंज्ञासिद्धा। कथम्। आरभ्यतेनःक्यइति। तच्चावश्यंवक्तव्यम्। सुब
न्तादुत्पत्तौसत्यांनियमार्थम्। तदेवप्रातिपदिकादुत्पत्तौसत्यांविध्यर्थंभविष्यति। इदंतर्हिप्रयोजनम्। सु
बन्तादुत्पत्तिर्यथास्यात्तिङन्तान्माभूदिति। एतदपिनास्तिप्रयोजनम्। ङ्याप्प्रातिपदिकादितिवर्त्तते। अ
तउत्तरंपठति। बहुचिसुब्ग्रहणात्पूर्वत्रतिङोविधानम्। बहुचिसुब्ग्रहणंक्रियतेपूर्वत्रतिङोविधिर्यथा
विज्ञायेत। नैतदस्तिप्रयोजनम्। प्रकृतंतिङ्ग्रहणमनुवर्तते। क्वप्रकृतम्। अतिशायनेतमबिष्ठनौ। तिङश्चे
ति। एवंतर्हिबहुचिसुब्ग्रहणंपूर्वत्रतिङोविधानात्। बहुचिसुब्ग्रहणंक्रियतेपूर्वत्रतिङोविधानात्। पूर्व
त्रतिङश्चेत्यनुवर्त्तते। तदिहापिप्राप्नोति। ननुचतिङ्ग्रहणंनिवर्त्तते। अवश्यमुत्तरार्थमनुवर्त्त्यम्। अव्ययसर्व
नाम्नामकच्प्राक्टेरिति। पचतकिजल्पतकीत्येवमर्थम्। यदिसुब्ग्रहणंक्रियतेस्वरोनसिध्यति। बहुपटवएवंस्व
रःप्रसज्येत। बहुपटवइतिचेष्यते। पठिष्यत्याचार्यः चितःसप्रकृतेर्बह्वकजर्थमिति ॥

नियमार्थेपदादिविधावेवचनपदान्तविधाविति। एवंचप्रातिपदिकादुत्पत्तौयत्नः करिष्यते। सात्पदाद्योर्बहुचश्चेति। अत
एवतुल्यन्याय तयासुपआत्मनःक्यजित्यस्यसुब्ग्रहणस्यापेक्षः। पूर्वत्रतिङोविधिरिति। अस्यैवार्थस्यज्ञापनार्थमिहसुब्ग्र
हणंतेनपूर्वत्रप्रातिपदिकात्तिङन्ताच्चकल्पादयः सिध्यन्तीत्यर्थः। नैतदस्तीति। ज्ञापकमन्तरेणापितिङोनुवृत्तिः सिध्यती रामः
त्यर्थः। एवंस्वरइति। जसउदात्तत्वंस्यात्। पटुशब्दोकारस्यचेष्यतइत्यर्थः ॥ ६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरः प्रातिपदिकत्वादिति। बहुचि कृते प्रकृतिप्रत्ययसमुदायस्यार्थवत्त्वात्समुदायाच्च जसो विधानात्तस्याप्रत्ययान्तत्वात्प्रा
तिपदिकसंज्ञायां सत्यां पूर्वोत्पन्नाया विभक्तेर्लुकि कृते पटुशब्दस्योकारस्योदात्तत्वं भवति। या ह्यन्या विभक्तिरुत्पद्यते न सा
प्रकृत्यवयवइति तस्या उदात्तत्वाऽप्रसङ्गः। ननु समासग्रहणस्य नियमार्थत्वात्प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा
न प्राप्नोति। नैष दोषः। अप्रत्यय इति प्रतिषेधो ज्ञापयति प्रकृतिप्रत्ययसमुदायस्य समासग्रहणेन प्रातिपदिकसंज्ञा न निवर्त्य

स्वरः कथम्। स्वरः प्रातिपदिकत्वात्। सुब्लुकि कृते प्रातिपदिकत्वात्स्वरो भविष्यति। अथ तुग्रहणं किमर्थ
म्। तुग्रहणं नित्यपूर्वार्थम्। तुग्रहणं क्रियते नित्यं पूर्वो यथा स्यात्। विभाषा मा भूदिति। नैतदस्ति प्रयोज
नम्। न विभाषाग्रहणेन पूर्वमभिसंबध्यते। किं तर्हि बहुजमभिसंबध्यते विभाषा बहुज्भवतीति। यदा च भ
वति तदा पूर्वो भवतीति। इदं तर्हि प्रयोजनम्। प्रागुत्पत्तेर्यल्लिङ्गं वचनं च तदुत्पन्नेऽपि यथा स्यात्। बहुगु
डो द्राक्षा बहुतैलं प्रसन्ना बहुपयो यवागूरिति। एतदपि नास्ति प्रयोजनम्। स्वार्थिकोऽयम्। स्वार्थिकाश्च प्र
कृतितो लिङ्ग-वचनान्यनुवर्त्तन्ते। एवं तर्हि सिद्धे सति यत्तुग्रहणं करोति तज्ज्ञापयत्याचार्यः। स्वार्थिका अ
तिवर्तन्त अपि लिङ्ग-वचनानीति। किमेतस्य ज्ञापने प्रयोजनम्। गुडकल्पा द्राक्षा तैलकल्पा प्रसन्ना पयस्क
ल्पा यवागूरित्येतत्सिद्धं भवति। तमादिभ्यः कल्पादयो विप्रतिषेधेन। तमादिभ्यः कल्पादयो भवन्ति विप्रति
षेधेन। तमादीनामवकाशः प्रकर्षस्य वचनम्। ईषदसमाप्तेरवचनम्। पटुतरः पटुतमः। कल्पादीनामव
काशः ईषदसमाप्तेर्वचनं प्रकर्षस्यावचनम्। पटुकल्पो मृदुकल्पः। उभयत्र वचने उभयं प्राप्नोति ॥

तइति। अन्यथाऽप्रत्यय इति निषेधोऽनर्थकः स्यात्। नित्यपूर्वार्थमिति। पुरस्तादेवेत्यवधारणार्थं तुग्रहणमित्यर्थः। अन्य
था प्रत्ययवत्पूर्वत्वस्यापि विधेयतया प्राधान्याद्विभाषाग्रहणेन संबन्धः स्यादिति भावः। किं तर्हि बहुजिति। बहुजेव विधे
यत्वात्प्रधानं विभाषाग्रहणेन संबध्यते। तस्य तु परदेशप्राप्तत्वे पुरस्तादित्यनेन विशेषणेन विशेषो निर्दिश्यते ततश्च विभाषाग्रह
णेन पुरस्तादित्यस्य संबन्धाभावो गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यादिति न्यायात्। प्रागुत्पत्तेरिति। तुशब्दो नियमा
र्थः पुरस्तादेव स्वर्वं भवतीति। तेन लिङ्ग-संख्ये प्रकृतिगते भवतः। प्रयोगश्च प्राक् प्रकृतेः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ पटुकल्पतरद्इति। ननुपरत्वात्कल्पबादिभिर्बाधितत्वात्तरप्प्रसङ्गोऽयंनभाव्यम्। नैषदोषः। कल्पबादिभिः प्रकर्षस्याद्योतनात्सु ५।३।२
६९ नः प्रसङ्गविज्ञानात्कल्पबाधनात्प्रकर्षज्ञापनायतरप्प्रमयौ भवतः। प्रकृतेरेवेति। कल्पबादीनांयाप्रकृतिः पट्वादिः तद
र्थस्यैवप्रकर्षः संभवति नत्वीषदसमाप्तेः। असमाप्तिप्रकर्षेसमाप्तावीषदर्थाभावान्नास्तीषदसमाप्तेः प्रकर्षः॥ अव्यय॥ अ
न्यतरदिति। प्रातिपदिकस्यप्राक्टेरकज्भवतिसुबन्तस्यवाप्राक्टेरित्येवंप्राक्टेरित्यनेनान्यतरच्छक्यतेविशेषयितुमव्यवस्थापयि

पटुकल्पतरोमृदुकल्पतरः। कस्मान्नकल्पादयोभवन्तिविप्रतिषेधेन। यद्येवमीषदसमाप्तेः प्रकर्षेतमादिः प्रत्य
यः प्राप्नोति प्रकृतेरेव चप्रत्ययः प्रकर्षइष्यते। तमादिरीषत्प्रधानादपिभवन् यस्यप्रकर्षोऽस्तितस्यप्रकर्षे
भविष्यति। कस्यचप्रकर्षोऽस्ति॥ प्रकृतेरेव। अव्ययसर्वनाम्नामकच्प्राक्टेः॥ कस्यचदः॥ किमयंसुबन्तस्यप्रा
क्टेर्भवत्याहोस्वित्ङ्याप्रातिपदिकस्य। कुतः संदेहः। उभयंप्रकृतम्। अन्यतरच्छक्यंविशेषयितुम्। किंचा
तः। यदिसुबन्तस्य। युष्मकाभिः अस्मकाभिः युष्मकासु अस्मकासु युवकयोः आवकयोरितिनसिध्यति। अथ
प्रातिपदिकस्य। त्वयका मयका त्वयकि मयकि इत्यत्रापिप्राप्नोति। अस्तुसुबन्तस्य। कथंयुष्मकाभिः अस्म
काभिः युष्मकासु अस्मकासु युवकयोरावकयोरिति। अनोकारसकारभकारादाविति वक्तव्यम्। अकच्प्रक
रणेतूष्णीमः काम्। अकच्प्रकरणेतूष्णीमः काम्वक्तव्यः॥ आसितव्यंकिल तूष्णीकाम्। शीलेकोमलोपश्च॥
शीलेकोमलोपश्चवक्तव्यः। तूष्णींशीलः तूष्णीकः। इहभिनत्तिच्छिनत्तीतिश्नमिकृतेशप्प्राप्नोति। बहुभुक्तंब
हुपीतं बहुविकृते कल्पादयः प्राप्नुवन्ति। उच्चकैः नीचकैः अकचिकृते कादयः प्राप्नुवन्ति। ननुश्नम् बहुज
कचोपवादास्तेबाधकाभविष्यन्ति॥

तुमित्यर्थः। तूष्णीमः काम्इति। मित्वादचोऽन्त्यात्परः काम्भवति। अज्ञाताद्यर्थाविवक्षायांतूष्णीमित्येवभवति। शीलेकइति। शी
लंस्वभावोनियमश्च। अज्ञाताद्यपवादः। शीलंशब्दशक्तिस्वभावाच्चतद्वांस्तूष्णीकउच्यते। इहभिनत्तीति। भिन्नदेशत्वाद्विरोधा
भावादनेकेनापिप्रत्ययेनप्रदीपेनेवघटादेर्गार्ग्यायण्यांष्फङीष्भ्यांस्त्रीत्वस्येवाज्ञातादेरेकस्यार्थस्यद्योतनमविरुद्धंमन्य उ॰
मानोवार्तिककारउत्सर्गप्रतिषेधंशास्ति। भाष्यकारस्तुविरोधमन्तरेणापिसामान्यविधेर्बाधकंविशेषविधिमन्यत्रादृष्टत्वात्। ६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कविधेरिति। अज्ञातः प्रकृष्टः पटुरित्यर्थद्वयविवक्षायां पटुतमकइतिभवति। छिन्नकतरमिति। अनन्त्यन्तगतो क्कादितिकनि कृते तरप्। अर्द्धपिप्पलिकेति। कुत्सितमर्द्धपिप्पल्याइत्याद्यर्थविवक्षायांसमासेकृतेततः कप्रत्ययः। नवग्रामकमितिसमासात्संज्ञायांकनितिकुत्सायांह्रस्वत्वेकनिसत्याद्युदात्तत्वंभवति। पूर्वंतुकनिसतिपश्चात्समासेक्रियमाणेअन्तोदात्तत्वप्रसङ्गः अत्रसंज्ञाकुत्सनादिहेतुकाविषयभावेनास्तिसामानाधिकरण्यंच पदयोरिति युगपत्कार्यद्वयप्रसङ्गादस्तिविप्रति

अम्बष्ठकजकप्सुनानादेशत्वादुत्सर्गप्रतिषेधः। अम्बष्ठकजकप्सुनानादेशत्वादुत्सर्गस्यप्रतिषेधोवक्तव्यः समानदेशैरपवादैरुत्सर्गाणांबाधनंभवति। नानादेशत्वान्नप्राप्नोति। कविधेस्तमादयः पूर्वविप्रतिषिद्धम्॥ कविधेस्तमादयोभवन्ति पूर्वविप्रतिषेधेन। कविधेरवकाशः कुत्सादीनांवचनंप्रकर्षस्यावचनम्। पटुकः मृदुकः। तमादीनामवकाशः प्रकर्षस्यवचनंकुत्सादीनामवचनम्। पटुतरः पटुतमः। उभयवचनेउभयंप्राप्नोति। पटुतरकः पटुतमकः। तमादयोभवन्तिपूर्वविप्रतिषेधेन। कदाचित्छिन्नकतरादयः। कदाचित्छिन्नकतरादयोभवन्तिपूर्वविप्रतिषेधेन। छिन्नकतरंछिन्नकतमम्। एकदेशिप्रधानश्चसमासः॥ एकदेशिप्रधानश्चसमासः कविधेर्भवतिपूर्वविप्रतिषेधेन। अर्द्धपिप्पलिका अर्द्धकोशातकिका। उत्तरपदार्थप्रधानश्चसंज्ञायांकन्विध्यर्थम्॥ उत्तरपदार्थप्रधानश्चसमासोभवतिपूर्वविप्रतिषेधेन। किंप्रयोजनम्। संज्ञायांकन्विध्यर्थम्। संज्ञायांकन्यथास्यात्। नवग्रामकम्। नवराष्ट्रकम्। नवनगरकम्। कदाचिद्द्वन्द्वः कविधेर्भवतिपूर्वविप्रतिषेधेन। प्लक्षकन्यग्रोधकौप्लक्षन्यग्रोधाविति वा॥ कुत्सिते॥ इहकुत्सितकः अनुकम्पितकइतिस्वशब्देनोक्तत्वाचस्यार्थस्यप्रत्ययोनप्राप्नोति ॥

षेधः॥ कुत्सिते॥ स्वशब्देनोक्तत्वादिति। अनिर्द्धारितशेषेर्थेयदाप्रकृतिर्वर्त्ततेतदातद्विशेषद्योतनायस्वार्थिकः प्रत्ययोविधीयते। यदातुनिर्ज्ञातविशेषएवार्थेकुत्सितादयः शब्दावर्त्तन्तेतदाविशिष्टस्यार्थस्यप्रतीतत्वाच्चरितार्थत्वात्प्रत्ययाप्रसङ्गः। प्रतीतप्रत्यायनेः नवस्थाप्रसङ्गादितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुत्सितस्येति। अर्थान्तराश्रयः प्रत्ययइत्यर्थः। अथवेति। कुत्सितकुत्सायामपिकुत्सितकइतिभवतीत्यर्थः। स्वशब्दोत्रा ५३२
त्मीयपर्यायवचनोर्थशब्दोर्थशब्दाभिधेयवचनः। स्वोर्थः स्वार्थः। सचानेकप्रकारोजातिगुणक्रियासंबन्धस्वरूपलक्षणः। गौः
शुक्लः पाचकोराजपुरुषोडित्थइति। तंस्वार्थमभिधायतेनस्वार्थेनसमवेतंसंबद्धंद्रव्यमाह। शब्दोनिरपेक्षइत्यनेनेत
द्दर्शयति। यथाद्रव्येभिधातव्येस्वार्थापेक्षतेनतथास्वार्थेऽभिधातव्येर्थगतंनिमित्तान्तरमपेक्षते। द्रव्यशब्देनचइदंतदि
तिपरामर्शयोग्यंवस्त्वभिधीयते। तत्रजातिशब्दोयदाजातौवर्त्ततेतदारोपितस्वरूपांस्वरूपेणैकीकृतांजातिमाहेति
तदातेषांस्वरूपंस्वार्थः। जातिस्तुद्रव्यम्। यदातुजातिविशिष्टंद्रव्यमाह। तदाजातिः स्वार्थः। शुक्लादयोयदागुणजातौव
र्त्तन्तेतदातेषांस्वरूपंस्वार्थः जातिर्द्रव्यम्। यदातुगुणेवर्त्तन्तेतदागुणसामान्यंस्वार्थोगुणोद्रव्यम्। यदाद्रव्येवर्त्तन्तेतदा

नैषदोषः। कुत्सितकस्यानुकम्पायामनुकम्पितस्य कुत्सायाम्। अथवास्वार्थमभिधायशब्दोनिरपे
क्षोद्रव्यमाहसमवेतम्। समवेतस्यवचनेलिङ्गंवचनंविभक्तिंच। अभिधायतान्विशेषाननपेक्षमाण
श्चकृत्स्नमात्मानम् ॥

गुणः स्वार्थः। समवेतस्यद्रव्यस्याभिधानेसतिलिङ्गंवचनंविभक्तिंचाहेतिसंबन्धः। तान्विशेषानिति। लिङ्गादीनामेवपरा
मर्शः। लिङ्गंस्त्रीत्वादिवचनम्। संख्याविभक्तिः कारकंकर्मादिक्वचिल्लिङ्गसंख्याकारकाण्येवस्वार्थोयथास्त्रीपुमान्नपुं
सकम्। एकोद्वौबहवः कर्मकरणंसंप्रदानमिति। प्रवृत्तिनिमित्तलिङ्गसंख्याव्यतिरिक्तलिङ्गसंख्याभिधानम्। यथास
नपुंसकोभवत्। गावोविंशतिरिति। तत्रायमेवक्रमोयत्रतुप्रवृत्तिनिमित्तव्यतिरिक्तलिङ्गसंख्याऽसंभवः स्त्रीपुमानेको
द्वौबहवइति। तत्रपुनर्लिङ्गसंख्ययोरभिधानाभावः। यद्यपितोकेपदादुच्चरिताद्युगपत्सर्वार्थाः प्रतीयन्तेशब्दस्यविरम्यव्या
पाराभावात्तथाप्यन्वयव्यतिरेकाभ्यांशास्त्रेसंव्यवहारायकल्पिताभ्यांप्रातिपदिकस्याप्रयोगार्हस्यकल्पितामर्थवत्तां रामः
कल्पितन्यायवशात्क्रमवतीमाश्रित्येदमुच्यते। ॥ १०

CC-0. In Public Domain. Digitization by eGangotri

तथाहि। ——नागृहीतविशेषणा विशेष्ये बुद्धिरिति न्यायात्पूर्वं स्वार्थाभिधानेन भाव्यम्। पश्चात्तद्धितविशिष्टस्य लिङ्गा
श्रयस्य द्रव्यस्याभिधानेन। ततो भेदापेक्षबहिरङ्ग-संख्यापेक्षया लिङ्गमन्तरङ्ग मिति तदभिधीयते। ततः संख्या सा
हि विजातीयक्रियापेक्षसाधनापेक्षया तुल्यजातीयक्रियापेक्षान्तरङ्गा। संख्याभिधानानन्तरं तु कारकाभिधानम्। एता
न्विशेषानभिधाय स्वार्थादिपञ्चकवृत्तं कुत्समात्मानमपेक्षमाणः शब्दः प्रियकुत्सनादिषु विभक्त्यन्तः पुनः पुनः प्र
वर्त्तते। पुनः शब्दस्तु शब्दस्यार्थे वर्त्तते विभक्त्यन्तस्त्वित्यर्थः। तत्र कुत्सितशब्दप्रवृत्तिनिमित्तव्यतिरिक्तायां कुत्सितत्व
स्य कुत्सायां कप्रत्ययस्य उपपन्नो भवति। यथा प्रकृष्टतम इति। प्रकृष्टस्य प्रकर्षे तमप्प्रत्ययः तथा कुत्सितत्वम्। य
दा कुत्स्यते नास्य सम्यक् कुत्सितत्वमिति तदा प्रत्ययः। अन्ये त्वाहुः। अनिर्द्धारितविशेषधर्मनिबन्धना कुत्सा कु
त्सितशब्दप्रवृत्तिनिमित्तं ब्रह्महत्यादिविशेषनिबन्धना तु कुत्सा प्रत्ययनिबन्धनम्। अनुकम्पितँक इत्यत्रापि प्र

प्रियकुत्सनादिषु पुनः पुनः प्रवर्त्तते। सो विभक्त्यन्तः ॥

योक्तधर्मा अनुकम्पायां प्रवृत्तिनिमित्तव्यतिरिक्तायां कप्रत्ययः। केचित्तु निरपेक्षत्वं शब्दस्य स्वार्थादिपञ्चकाभिधा
ने मुख्यसत्तानपेक्षणाद् बुद्ध्युपारूढोपचरितार्थसत्तामात्रापेक्षणाद्याचक्षते। तत्र परिसमाप्तस्वार्थादिपञ्चकस्य
पदस्य कुत्सादिषु प्रवृत्तिः। यस्मात्स्वार्थादयः कुत्सादिहेतवः। तथाहि। कश्चित् स्वार्थकुत्सया कुत्स्यते। पटुकः पण्डि
तक इति। कश्चिल्लिङ्गेन। यथा प्राप्य गाण्डीवधन्वानं विद्धि कौरवकान् स्त्रियम् इति। कदाचित् संख्यया यथेदमेकक
मेव शतमिति। शतभरणे यद् दुःखं तदेकस्य भरण इति शतत्वारोपेण कुत्सा। यत्र तु प्रवृत्तिनिमित्तकुत्सा न संभव
ति देवदत्त—कोडित्यक इति। तत्राभिधेयसहचरितधर्मान्तराश्रयः कुत्साश्रयः प्रत्ययः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· कथंपुनरीति। यदाकुत्सितशब्दोभावसाधनः कुत्साकुत्सितमितितदा प्रत्ययार्थपक्षः। यदातुकर्मसाधनः कुत्स्यतइति कु ५३२
७१ त्सितंमत्यादिसूत्रेचकारस्यानुक्तसमुच्चयार्थत्वात्वर्त्तमानेक्तः। क्रियावयवत्वमपवर्गाश्रयोभूतेवातदाकुत्सार्थवाचिनः
कः प्रत्ययोभवतीतिसामानाधिकरण्यपक्षोपपत्तिः। कःपुनर्वक्ष्यमाणस्यप्रकृत्यर्थविशेषणपक्षस्यसामानाधिकरण्यपक्ष
स्यचविशेषःउच्यते। समानाधिकरणपक्षउपात्तकुत्सोऽनुपात्तकुत्सोवाकुत्सितत्वोपलक्षितार्थवृत्तिः प्रत्ययमुत्पादयतिप्र
कृत्यर्थविशेषणपक्षेलङ्गीकृतकुत्सादेवप्रत्ययेनभाव्यम्। तत्रप्रकृत्यर्थविशेषणपक्षेअनुगृहीतकुत्सापदसामानाधिक
रण्येव्ययसर्वनामशब्देभ्यः प्रत्ययेनभाव्यम्। पटुकोनीचैरयंदेवदत्तइति। यदात्वङ्गीकृतकुत्सपदान्तराप्रयोगः तदा

कथंपुनरिदंविज्ञायतेकुत्सितादीनामर्थइति। आहोस्वित्कुत्सितादिसमानाधिकरणात्प्रातिपदिकादिति।
कश्चात्रविशेषः। कुत्सितादीनामर्थेचे लिङ्गवचनानुपपत्तिः। कुत्सितादीनामर्थेचेल्लिङ्गवचनयोरनुपपत्तिः।
पटुकं पटुकापटुकः पटुकौपटुकाः। पटुकीपटुकाइति। एकोयमर्थःकुत्सितंनाम। तस्यैकत्वादेकवचनमे
वप्राप्नोति। अस्तुतर्हिकुत्सितादिसमानाधिकरणात्प्रातिपदिकादिति। कुत्सितादिसमानाधिकरणात्प्राति
पदिकादितिचेदतिप्रसङ्गोयथाटाबादिषु। कुत्सितादिसामानाधिकरणात्प्रातिपदिकादितिचेदतिप्रसङ्गोयथाटा
बादिषु। कथंचटाबादिषु। उक्तंतत्र। स्त्रीसमानाधिकरणादितिचेद्भूतादिष्वतिप्रसङ्गइति। एवमिहाप्यतिप्रस
ङ्गोभवति। इदंघृतकमिदंतैलकम्। इदंशब्दादपिप्राप्नोति। सिद्धंतुयेनकुत्सितादिवचनंतद्युक्तात्स्वार्थेप्रत्य
यविधानात्। सिद्धमेतत्। कथम्। येनकुत्सितादयोर्थागम्यन्ते तद्युक्तात्स्वार्थेप्रत्ययोभवतीतिवक्तव्यम्।
सिद्ध्यति। सूत्रंतर्हिभिद्यते। यथान्यासमेवास्तु ॥

तेभ्यएवाश्रितकुत्सेभ्यः प्रत्ययोभवति। नीचैरस्तिकोदेवदत्तइति। लिङ्गवचनानुपपत्तिरिति। यथेष्टलिङ्गवचनानुपपत्तिरित्यर्थः। एतच्चोत्पक्ष
णंकुत्सनमात्रस्यप्रत्ययेनाभिधानेषष्ठ्यपिद्रव्यवाचिनः प्राप्नोति। यद्यपिगुणगुणिनोरत्रसर्वदासोयमित्यभेदसंबन्धेनषष्ठ्याअप्र
सङ्गोगुणवचनानांचाश्रयतोलिङ्गवचनानीतिदोषपरिहारोस्तितथापिनिर्दोषप्रकृत्यर्थविशेषणपक्षसंभवात्प्रत्ययार्थ
र्थपक्षोभाष्यकारेणनाश्रितः। इदंशब्दादिति। कुत्सितत्वयुक्तार्थवृत्तित्वाचस्य। सिद्धंत्विति। येनधर्मेणकुत्सादयस्तद्धर्म रामः
युक्तार्थाभिधायिनः स्वार्थेप्रत्ययविधानमित्यर्थः ॥ ७१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ठाजा॥अप्रत्ययइतिप्रत्ययाभावेपिपूर्वोत्तरपदयोरन्यतरस्यवालोपइत्यर्थः।भाष्येतुपूर्वपदलोपउदाहरणमात्रम्।उवर्णादि
ति।लोपस्यलइतिपूर्वाचार्यसंज्ञा।तत्रादेः परस्येतीकारलोपः।कादेशोनभवतीति।संनिपातलक्षणपरिभाषाया आश्रयणात्।
यदाचदेवभान्वादिभ्यष्ठज्विधीयतेतदेकदेशाभावादजादिलक्षणलोपाप्रसङ्गात्तदर्थमपिठग्रहणम्।तदादेरिति।संध्यक्षरा

नचोक्तंकुत्सितादीनामर्थेचेल्लिङ्गवचनानुपपत्तिरिति।नैषदोषः।नायंप्रत्ययार्थः।किंतर्हिप्रकृत्यर्थविशे
षणमेतत्।कुत्सितादिषुयत्प्रातिपदिकंवर्त्ततेतस्मात्कादयोभवन्ति।कस्मिन्नर्थे,स्वार्थइति।स्वार्थिकाश्चप्रकृ
तितोलिङ्गवचनान्यनुवर्त्तन्ते॥ठाजादावूर्ध्वंद्वितीयादचः॥चतुर्थात्।चतुर्थाल्लोपोवक्तव्यः।बृहस्पतिदत्तकः।बृ
हस्पतिकः।प्रजापतिदत्तकः।प्रजापतिकः।अनजादौचलोपोवक्तव्यः।देवदत्तकोदेवकः।यज्ञदत्तकोयज्ञकः।
लोपःपूर्वपदस्यच।पूर्वपदस्यचलोपोवक्तव्यः।देवदत्तकोदत्तकः।यज्ञदत्तकोदत्तकः।अप्रत्ययेतथैवेष्टः।दे
वदत्तोदत्तः।उवर्णाल्लइलस्यच।उवर्णादिलस्यचलोपोवक्तव्यः।भानुदत्तकोभानुलः।वसुदत्तकोवसुलः।अथ
ठग्रहणंकिमर्थम्।नइकेकृतेअजादावित्येवसिद्धम्।ठग्रहणमुकोद्वितीयत्वेकविधानार्थम्।ठग्रहणंक्रियते।उ
कःद्वितीयत्वेकविधिर्यथास्यात्।वायुदत्तकोवायुकः।पितृदत्तकःपितृकः।अजादिलक्षणेहिमाथितिका
दिवत्प्रसङ्गः।अजादिलक्षणेहिमाथितिकादिवत्प्रसज्येत।तद्यथामथितंपण्यमस्यमाथितिकइतिअका
रलोपेतान्तादितिकादेशोनभवति।एवमिहापिनस्यात्।द्वितीयादचोलोपेसंध्यक्षरस्यद्वितीयत्वेतदादेः
र्लोपोवक्तव्यः।लहोडःलहिकः।कहोडःकहिकः।शेवलसुपरि॥वरुणादीनांचतृतीयात्।सचाकृतसंधीनांव
रुणादीनांचतृतीयाल्लोपउच्यते।सचाकृतसंधीनांचवक्तव्यः।सुपर्याशीः।सुपरिकः।सुपरियः।सुपरिलः।इह
षडङ्गुलिःषडिकइत्यजादिलोपेकृतेपदसंज्ञानप्राप्नोति।तत्रकोदोषः।जश्त्वंनस्यात्।षडिकेजश्त्वमुक्तम्।किमुक्तम्।

रस्यलोपेप्राप्तेतदादेर्लोपवचनम्॥शेवल॥वरुणादीनामिति।आदिशब्दःप्रकारे।एकसूत्रोपात्तत्वंचसादृश्यनिमित्तम्।सु
परिकइति।संहिताकार्येतुकृतेलोपेसतिसुपर्यिकइतिस्यात्।जश्त्वंनस्यादिति।भसंज्ञयापदसंज्ञायाअन्तर्वर्त्तिविभक्त्याश्र
यायास्तद्धिताश्रयायाश्चद्विविधायाअप्येकसंज्ञाधिकाराद्बाधितत्वात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ सिद्धमचइति। षडङ्गुलिशब्दे द्व्यङ्गुलिशब्दस्थानेन लोपे कृते यस्येति चेत्यकारलोपः क्रियते। तस्य स्थानिवत्त्वाद्भसंज्ञां प्रत्यकार ५२२
७२ न्तमेतद्भवति। अन्तर्वर्तिविभक्त्याश्रयात्तु षकारान्तस्य पदसंज्ञा ततो भिन्नावधिकत्वाद्भसंज्ञया पदसंज्ञा न बाध्यत इति तन्निब
न्धनजश्त्वप्रवृत्तिः। यातुस्त्वादौ पदमिति पदसंज्ञा सैवैकावधिकत्वाद्भसंज्ञया बाध्यते। न च पदान्तविधिं प्रति न स्थानिवदिति स्था
निवत्त्वनिषेधोत्रावतरति। विधिशब्दस्य भावसाधनस्य तत्राश्रयणात्। इह पदान्तस्य कस्यचिद्विधेयत्वात्। पदवृत्तप्रतिषेध इ
ति पदस्य यद्वृत्तं कार्यं तत्प्रतिषेध इत्यर्थः। सिद्धमिति। उत्तरपदस्याज्झलसमुदायत्वात्तल्लोपस्यानजादेशत्वादस्थानिवत्त्वात्तुल्यावधिकया
भसंज्ञयाद्विविधापि पदसंज्ञा बाध्यत इति पदनिबन्धनकार्याप्रसङ्गः। अत्रेदं बोध्यम्। संज्ञाशब्दैकदेशे लुप्ते संज्ञास्वरूपानुपलम्भा
त्तत्संज्ञिनोऽवगमः। नहि यस्य देवदत्त इति संज्ञा कृता स देवशब्दाद्दत्तशब्दाद्वा प्रतीयते। न चैकदेशेन समुदायोऽनुमीयते समु

सिद्धमचः स्थानिवत्त्वादिति। यद्येवं वाचिकादिषु पदवृत्तप्रतिषेधः॥ वाचिकादिषु पदवृत्तस्य प्रतिषेधो वक्त
व्यः। वागाशीः वाचिक इति। सिद्धमेकाक्षरपूर्वपदानामुत्तरपदस्य लोपो वक्तव्यः। वाचिकः। इहापि तर्हि प्राप्नो
ति। षडङ्गुलिः षडिक इति। षषष्ठाजादिवचनात्सिद्धम्। षषष्ठाजादिवचनात्सिद्धमेतत्॥ अल्पे॥ ह्रस्वे॥ किमर्थ
मिमावुभावर्थौ निर्दिश्येते। न यदल्पं ह्रस्वमपि तद्भवति। यच्च ह्रस्वमल्पमपि तद्भवति। नैतयोरावश्यकः समावेशः।
अल्पं तैलमल्पं घृतमित्युच्यते। न कश्चिदाह ह्रस्वं घृतं ह्रस्वं तैलमिति। तथा ह्रस्वः पटः ह्रस्वः शाटक उच्यते। नहि
कश्चिदाह अल्पः पटः अल्पः शाटक इति ॥

दायस्त्वार्थवाचक इति युक्तं कल्पयितुमुच्चार्यमाणस्य प्रत्यायकत्वादेवं तर्ह्यनुनिष्पन्नत्वादवयवानामपि संज्ञात्वम्। तत्र
वर्णानामनुनिष्पादिनां शास्त्रेणानन्वाख्यानादसाधुत्वम्। पदानामेव तु संज्ञैकदेशानां साधुत्वमिष्यत इति लोपविधानद्वा
रेण तदभ्यनुज्ञायते। तदुक्तम्। तुल्यायामनुनिष्पत्तौ योज्याख्याद्वयसाधवः। नह्यन्वाख्यायते शास्त्रे तेषु दत्तादिवत्स्मृति
रिति। दृश्यते चायं लोके व्यवहारो यत्समुदायस्य संज्ञात्वेन तदेकदेशः प्रयुज्यते। तत्र समुदायस्य मुख्यसंज्ञात्वमवयवानां त्वनुनिष्प
न्नम्॥ अल्पे॥ किमर्थमिति। वंशादिष्वल्पत्वह्रस्वत्वयोः समावेशदर्शनादन्यतरोपादानेन सिध्यतीति प्रश्नः। न कश्चिदाहाल्पः
पट इति। ननु वोच्यत एव लोकेऽल्पः पट इति। यद्यप्युच्यते तथाप्यायामविस्तारहीनोऽल्प उच्यते यस्त्वायामहीनो विस्तीर्णश्च राम:
स ह्रस्व उच्यते न स्वल्पोऽपि तु महान् ॥ ७२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुटी। पुंवद्वचनमिति। प्रकृतिप्रत्ययसमुदायस्यायं पुंवद्भावो न तु प्रकृतेरिति स्त्रीप्रत्ययो न निवर्त्तते॥ वत्सो॥ कार्श्ये प्रतिषे धइति। तनुत्वइति सामान्येनोपादानादतिप्रसङ्ग इति भावः। यस्य गुणस्येति। अन्तरङ्गत्वात् प्रवृत्तिनिमित्तस्यैव तानवे प्रत्ययइति भावः॥ किंयत्॥ उपाध्यानर्थक्यमिति। अयं भावः। द्वयोरित्यनर्थकं बहूनामपि निर्द्धारणे डतरचइष्टत्वाद् जातिप रिप्रश्नेऽपि कतमशब्ददर्शनाद् बहूनामित्यत्र जातिपरिप्रश्नग्रहणं न कर्त्तव्यम्। अथवा द्वयोरित्यस्य निर्द्धारणषष्ठ्यन्तत्वादे

कुटीशमीशुण्डाभ्योरः॥ कुटीशमीशुण्डाभ्यः प्रत्ययसंनियोगेन पुंवद्वचनम्। कुटीशमीशुण्डाभ्यः प्रत्यय संनियोगेन पुंवद्भावो वक्तव्यः। कुटी कुटीरः। शमी शमीरः। शुण्डा शुण्डार इति। किं पुनः कारणं न सिध्यति। स्वार्थिकोऽयं स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यनुवर्त्तन्ते उक्तं वा। किमुक्तम्। स्वार्थिका अतिवर्त्तन्ते लिङ्ग वचनानीति॥ वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे॥ वत्सादिभ्यस्तनुत्वे कार्श्ये प्रतिषेधः। वत्सादिभ्यस्तनुत्वे कार्श्ये प्रतिषेधो वक्तव्यः। कृशो वत्सो वत्सतर इति मा भूदिति। स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने तस्मिन् गुणे वक्तव्ये प्रत्ययेन भवितव्यम्। न च कार्श्यस्य भावाद् द्र व्ये वत्सशब्दः॥ किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच्॥ वा बहूनां जातिपरिप्रश्ने डतमच्॥ किमादीनां द्वि बह्वर्थे प्रत्ययविधानादुपाध्यानर्थक्यम्॥ किमादीनां द्विबह्वर्थे प्रत्ययविधानादुपाधीनां ग्रहणमनर्थक म्। किं कारणम्। बहिर्धारणं निर्द्धारणमिति। यावता द्वयोरेकस्यैव बहिर्धारणं भवति। अपर आह। बहूनां जातिपरिप्रश्ने डतमजित्यत्र बहुग्रहणमनर्थकम्। किं कारणम्। किमित्ययं परिप्रश्ने वर्त्तते। परिप्रश्नश्चानि र्ज्ञाते। अनिर्ज्ञातं च बहुषु द्व्येकयोः पुनर्निर्ज्ञातम्। निर्ज्ञातत्वाद् द्व्येकयोः परिप्रश्नो न। परिप्रश्नाभावात् किमे वनास्ति कुतः प्रत्ययः॥ एकाच्च प्राचाम्॥ प्राग्वचनं किमर्थम्। विभाषा यथा स्यात् ॥

कस्येति न वक्तव्यम्। बहुग्रहणमिति। डतमच उत्सर्गस्य द्वयोरेकस्य निर्द्धारणे डतरचोऽपवादस्य विधानात्। बहूनामेव निर्द्धारणे डतमज् भविष्यतीत्यर्थः। किं कारणं किमेतदित्यादिरिहाग्रन्थः। किमः संख्यापरिमाणे डति चेत्यत्रस्य एवायं ग्रन्थ इत्याहुः। न्वी नहीह सं ख्याग्रहणमस्ति येनास्य ग्रन्थस्योपयोगः स्यादत्यन्तासंबद्धश्चेहायं ग्रन्थः। एकद्विविषयस्यापि प्रश्नस्य संभवात् कौ भवन्तौ कतरो भवतोः कठ इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवक्षे॥ क एतयोरर्थयोर्विशेष इति। यद्यपि ककनोः स्वरभेदस्तथाप्यसत्यर्थभेदे कुत्सिते कं स्मेत्येव वक्तव्यम्। ननु च अन्यो
गर्हयैव योगकरणान्नूनमनयोरर्थयोर्भेदः स तु न निश्चीयत इति प्रश्नः। अवक्षेपणमिति। येनावक्षिप्यते निन्द्यते तद्वाचिनः क
न् प्रत्ययो यत्तु स्वयं कुत्स्यते ततः क इति विषयविभागः। अवक्षेपणं वै कुत्सितमिति। न हि स्वयमकुत्सितमवक्षेपणं भवती
त्यवक्षेपस्यापि कुत्सितत्वमस्तीत्यर्थः। यत्परस्य कुत्सार्थमिति। व्याकरणादि स्वयमकुत्सितमप्याश्रयविशेषपदमुपाहरद्

प्रागवचनानर्थक्यं च विभाषाप्रकरणात्। प्रागवचनमनर्थकम्। किं कारणम्। विभाषाप्रकरणात्। प्रकृता म
हाविभाषा तयैव सिद्धम्। अवक्षेपणे कन्॥ अवक्षेपणे कन् विधीयते। कुत्सिते कः। क एतयोरर्थयोर्विशेषः। अ
वक्षेपणं करणम्। कुत्सितं कर्म। अवक्षेपणं वै कुत्सितं करणं तेन यत्कुत्स्यते तदपि कुत्सितं भवति। तत्र कुत्सि
त इत्येव सिद्धं भवति। एवं तर्हि यत्परस्य कुत्सार्थमुपादीयते तदिहोदाहरणम्। व्याकरणकेन नामायं गर्वि
तः। याज्ञिक्यकेन नामायं गर्वितः। यत्कुत्सार्थमुपादीयते तत्तत्रोदाहरणम्। देवदत्तको यज्ञदत्तकः॥ लुम्मनुष्ये॥
किमर्थं मनुष्ये लुबुच्यते। न लुगेवोच्येत। लिङ्गसिद्ध्यर्थं लुम्मनुष्ये। लिङ्गसिद्ध्यर्थं मनुष्ये
लुबुच्यते। चञ्चेव चञ्चा वध्रिकेव वध्रिका। खरकुटीव खरकुटी॥ जीविकार्थे चापण्ये॥ अपण्य इत्युच्यते त
त्रेदं न सिध्यति। शिवः स्कन्दो विशाख इति। किं कारणम्। मौर्यैर्हिरण्यार्थिभिरर्चाः प्रकल्पिताः। भवेत्तासु न स्यात्।
यास्त्वेताः संप्रति पूजार्थास्तासु भविष्यति॥ समासाच्च तद्विषयात्॥ तदित्यनेन किं प्रतिनिर्दिश्यते। कः।
कथं पुनः समासो नाम कविषयः स्यात्॥

वक्षेपणं परस्य भवतीति तद्वाचिनः कन्प्रत्ययः॥ लुम्मनुष्ये॥ लिङ्गसंख्यासिद्ध्यर्थमिति। वचनं त्वभिधेयवदेव भवति च
ञ्चेव मनुष्याविति। तदुक्तम्। हरीतक्यादिषु व्यक्तिरिति। लुकि मनुष्यलिङ्गप्रसङ्गः। जीविकार्थे॥ यास्त्वेता इति। याः परि
गृह्य गृहाद्गृहमटन्ति तास्वित्यर्थः। यास्तु विक्रीयन्ते तासु न भवति। शिवकान् विक्रीणीत इति॥ समा॥ तदित्यनेनेति। द्वा
भ्यां प्रकृत इति कस्य सर्वनाम्ना परामर्शः। इति प्रश्नः। आचार्यदेशीय आह। क इति। कथं पुनरिति। अनेनैव कस्य विधानाच्च विष रा भः
यस्यानुवादानुपपत्तिरित्यर्थः॥ ७३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं तर्ह्यैवार्थ इति। प्रधानस्यापि च्छस्य परामर्शः स्यादुक्तत्वाद्गुणभूतस्यैवेवार्थस्य परामर्शः। छे च विधीयमाने ऽस्मादेव ज्ञापकादिवार्थे समासः सुप्सुपेति वा। समासेनोक्तत्वादिति। वचनसामर्थ्यात्त्यादिर्वे च्छस्तो ऽश्यामादिभ्यो ऽतिप्रसङ्गः। एवं तर्हि शस्त्रीश्यामादीनां त्वन्तर्भूतेवार्थानामुपमेयप्रधानानामुपमेयान्तरेण संबन्धाभावाच्छस्याप्रसङ्गात्। काकागमनमिवेति। वृत्तिविषये काकतालशब्दौ काकतालसमवेतक्रियावाचिनौ। तत्र काकागमनं देवदत्तागमनस्योपमानं तालपतनं दस्यूपनिपातस्य। तालेन तु यः काकस्य वधः स देवदत्तस्य दस्युना वधस्योपमानमिति वधादिः काकतालीयादिशब्दवाच्यः संपद्यते॥ अभि॥ अणो गोत्रादिति। गोत्रे ऽणा विशेष्यते। गोत्रे यो विहितो ऽण् तदन्तेभ्यो ऽभिजिदादिभ्यो यञ् यथा स्यात्। आभिजित

एवं तर्ह्यैवार्थः। यदि तर्हि समासो ऽपीवार्थे प्रत्ययो ऽपि समासेनोक्तत्वात्प्रत्ययो न प्राप्नोति। एवं तर्हि द्वाविवार्थौ। काकागमनमिव तालपतनमिव काकतालं काकतालमिव काकतालीयम्॥ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्॥ अणो गोत्रादिति वचनम्। अणो गोत्रात् गोत्रग्रहणं कर्तव्यम्। गोत्रादिति वक्तव्यम्। इह मा भूत्। आभिजितो मुहूर्तः। आभिजितः स्थालीपाक इति। गोत्र इति वक्तव्यम्। किं प्रयोजनम्। आभिजितकः। गोत्राश्रयो वुञ् यथा स्यात्। गोत्रमिति शक्यमकर्तुम्। कथमाभिजितकः। गोत्राद यं स्वार्थिको गोत्रमेव भवति॥ इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये पञ्चमाध्यायस्य तृतीये पादे द्वितीयमाह्निकम्॥ पादश्च समाप्तः॥

इति। एकत्र नक्षत्रेण युक्तः कालः इति लक्षणा। अपरत्र सास्य देवतेति। गोत्रमिति च वक्तव्यमिति। एवं मन्यते गोत्रचरणाद्वुञित्यत्र गोत्रग्रहणस्य स्वरितत्वाद्गोत्रे कुञ्जादिभ्यश्च्फञिति गोत्राधिकारविहितप्रत्ययस्य ग्रहणे सति अस्य यञो ग्रहणं न स्यात्। गोत्रत्वातिदेशात्तु भवति। अभिजितक इति। अभिजित्यस्यायमिति वुञ्। आपत्यस्य च तद्धितेनातीति यलोपः। गोत्रादयमिति। गोत्रचरणाद्वुञित्यत्र गोत्रग्रहणे नार्थो गृह्यते तेन तद्धाविनः प्रत्ययो विधीयमानो ऽस्मादपि यञो भवति। गोत्राधिकारविहितस्य ग्रहणे लौपगव इत्यादावपि घन्ताद्वुञ् स्यात्॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे पञ्चमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· पादशतस्य॥ पादशतग्रहणमिति। द्वौ द्वौ माषौ ददातीत्यादावतिप्रसङ्गेन भवत्यनभिधानात्। यस्येति लोपेन सिद्धे पुनर्लोप ५४१
७४ विधानमपरनिमित्तकत्वार्थम्। तेन लोपस्यास्थानिवत्वात् द्विपदिकेत्यादौ पादः पदिति पद्भावः सिध्यति॥ स्थूला॥ चञ्चत्क
इति। सादृश्यस्य द्योतकः कन् प्रत्ययः। अचञ्चन्नपि यश्चञ्चन्निव लक्ष्यते स चञ्चत्को यथा मणिः स्यन्दमानप्रभत्वात्। अवृ
हन्नपि वृहन्निव प्रसृतप्रभत्वाद्यो दृश्यते स वृहत्कः॥ अनत्यन्त॥ भिन्नतरकमिति। भेदस्य प्रकर्षानत्यन्तगत्योर्युगपद्विवक्षा
यां पूर्वविप्रतिषेधात्तरपि कृते क्तान्तत्वाभावात्कन्न प्राप्नोतीत्याह। तदन्ताच्चेति। स्वार्थः पुनरनत्यन्तगतिरुक्त एव न तु शुद्धः। शुद्धे

पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च॥ पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात्। पादशतग्रहणमन
र्थकम्। किं कारणम्। अन्यत्रापि दर्शनात्। अन्यत्रापि हि वुन् दृश्यते। द्विमोदकिकां ददाति॥ स्थूलादिभ्यः प्रका
रवचने कन्॥ कन्प्रकरणे चञ्चद्बृहतोरुपसंख्यानम्। कन्प्रकरणे चञ्चद्बृहतोरुपसंख्यानं कर्तव्यम्।
चञ्चत्कः बृहत्कः॥ अनत्यन्तगतौ क्तात्॥ अनत्यन्तगतौ क्तात्तमादयः पूर्वविप्रतिषिद्धम्। अनत्यन्तगतौ क्ता
त्तमादयो भवन्ति पूर्वविप्रतिषेधेन। अनत्यन्तगतौ क्तात्कन् भवतीत्यस्यावकाशः। अनत्यन्तगतेर्वचनं
प्रकर्षस्यावचनम्। छिन्नकं भिन्नकम्। तमादीनामवकाशः प्रकर्षस्य वचनं प्रकर्षस्यावचनम्। पटुतरः प
टुतमः। उभयवचने उभयं प्राप्नोति। भिन्नतरकं छिन्नतरकम्। तमादयो भवन्ति पूर्वविप्रतिषेधेन। तदन्ता
च्च स्वार्थे कन्वक्तव्यः। भिन्नतरकं छिन्नतरकम्॥ न सामिवचने॥ सामिवचने प्रतिषे
धानर्थक्यं प्रकृत्यभिहितत्वात्। सामिवचने प्रतिषेधोऽनर्थकः। किं कारणम्। प्रकृत्यभिहितत्वात्। प्रकृ
त्याभिहितः सोऽर्थ इति कृत्वा न भविष्यति॥

हि स्वार्थिके निसत्यनत्यन्तगतिर्नाद्योतिता स्यात्। नन्वेवं स्वार्थमात्रे कन् प्रतिपादितो दृश्यते चासौ यथैवं सूत्रमभिन्नतरकं भवति।
बहुतरकं व्याप्यते सुकरतरकं मन्यत इति। एवं तर्हि न सामिवचन इति प्रतिषेधेन स्वार्थिकः कन्नस्तीति ज्ञाप्यते। न हि सामिकृता
दिभ्योऽनत्यन्तगतौ क्तादित्यस्य कनः प्रसङ्गोऽसमासे सामिवचने नैवानत्यन्तगतेर्द्योतनात्। समासेभ्यस्तु क्तान्तत्वाभावात्कृद्ग्र राम:
हणे गतिकारकपूर्वस्यापि ग्रहणमिति वचनात्सामिशब्दस्य गतिकारकत्वाभावात्। तस्मात्स्वार्थिकस्यैवासौ कनो निषेधः स्वार्थिकं कनं ज्ञापयति। ७४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ॥विग्रहाभावादिति।अन्यत्रविग्रहपूर्विका वृत्तिर्दृश्यते।यथायावोय।वक इति।यत्रतुविग्रहो नेष्यतेतत्रनित्यग्रहणंक्रियते
यथात्रैमेम्नित्यमिति।इहतुमहाविभाषाधिकारस्यनकिंचिन्निवर्तकमस्तीतिविग्रहः प्राप्नोति।नचासौदृश्यत इति।प्रत्ययवि
धानंनोपपद्यतइत्यर्थः।सूत्रमुपालभ्यन्यासान्तरंपठति।तस्मात्तत्रेदमिति।तत्रमहाविभाषाधिकारात्पक्षेवाक्यंभवति राजनीद
दमायत्तमितिपक्षेप्रत्ययः।राजाधीनमिति।भाष्यकारोन्यासान्तरं दूषयति।यदीति।पदसंज्ञाचलोपाद्यर्थमवश्यमभ्युपेया।त
मादयइति।अवक्षेपणेकन्नित्यस्मात्कनः प्रागित्यर्थः।यवक्के इत्युकेसामान्यशब्दत्वात् प्रकर्षस्यानवगमात्प्रकर्षाद्युपाधिद्योतनाय

अषडक्षाशितंगवलंकर्मालंपुरुषाध्युत्तरपदात्खः॥अध्युत्तरपदात् प्रत्ययविधानानुपपत्तिर्विग्रहाभावात्।अ
ध्युत्तरपदात्प्रत्ययविधेरनुपपत्तिः।किंकारणम्।विग्रहाभावात्।विग्रहपूर्विका तद्धितोत्पत्तिः।नचाध्युत्तरपदे
नविग्रहो दृश्यते।तस्मात्तत्रेदमितिसधीनप्रत्ययोवक्तव्यः।राजनीदं राजाधीनम्।यदिसधीनप्क्रियते सकार
स्येत्संज्ञानप्राप्नोति।इहचस्वधीनोऽस्वधीन इत्यवङ् स्फोतिइयङुवङौस्याताम्।सूत्रंचभिद्यते।यथान्यासमेवास्तु।
ननुचोक्तमध्युत्तरपदात् प्रत्ययविधानानुपपत्तिर्विग्रहाभावात्।नैषदोषः।अस्तिकारणंयेनात्रविग्रहो
नभवति।किंकारणम्।नित्यप्रत्ययोयम्।केपुनर्नित्यप्रत्ययाः।तमादयःप्राक्कनः।ञ्यादयःप्राग्वुनः।आमादयःप्रा
ङ्मयटः।बृहतीजात्यन्ताःसमासान्ताश्चेति।एवंतर्हिनायंप्रत्ययविधिरुपालभ्यते।किंतर्हि।प्रकृतिरुपालभ्यते।अ
ध्युत्तरपदाप्रकृतिर्नास्ति।किंकारणम्।विग्रहाभावात्।विग्रहपूर्विकासमासप्रवृत्तिः।नचाऽधिनाविग्रहो दृश्यते।एवं
तर्हिबहुव्रीहिर्भविष्यति।किंकृतंभवति।भवतिवैकश्चिदस्वपदविग्रहो बहुव्रीहिः।तद्यथा।शोभनंमुखमस्याः
स्याःसुमुखीति।नैवंशक्यम्।इहहिमहदधीनमित्यात्वंकपचप्रसज्येयाताम्।एवंतर्ह्यव्ययीभावोभवि
ष्यति।एवमप्यधेःपूर्वनिपातःप्राप्नोति ॥

वश्यप्रयोज्यास्तमादयइतिसामर्थ्यात्तेनित्याः।आमादयइति।किमेतिङव्ययघादेत्याद्यस्यतत्रकृतवचनेमयडित्यस्मात् प्रागित्य
र्थः।बृहतीजात्यन्ताइति।बहुवचननिर्देशादेतत्सूत्रविहितस्यखस्यग्रहणम्।किंतर्हिप्रकृतिरिति।प्रकृत्यभावात्प्रत्ययोपिनप्राप्नोति।
एतच्चशौण्डादिष्वधिशब्दस्यपाठमनपेक्ष्योच्यते।एवंतर्हिबहुव्रीहिरिति।वृत्तिविषयेस्साधनक्रियावाचित्वादधिशब्दस्य राजाधिकृतो
यस्मिंस्तद्राजाधीनमितिबहुव्रीहिःकरिष्यते।विशेषणत्वविवक्षयाचराजादीनांपूर्वनिपातः।यदित्वतिखट्वादिवद्राजानमधिगत इतितत्पुरुषः
क्रियते।तदाधेःपूर्वनिपातःस्यात्।कप्वेति।शेषाद्विभाषेत्यनेन।तस्मिंश्चसत्यध्युत्तरपदत्वाभावात्खोनस्यात्।एवमप्यधेरिति।यथाधिस्त्रीति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजदन्तादिष्विति। ननु विभक्त्यर्थवृत्तेरधेरव्ययीभावो विधीयमानोऽधिकरणप्रधानः स्यान्नाधेयप्रधानः। नैष दोषः। साहचर्यादाधेय
प्रधानो भविष्यति। खप्रत्यये च कृते कुटीरादिवच्छेषं लिङ्गसंख्यं भविष्यति। राजदन्तादिषु चाधेयेऽधिरित्येवं विशिष्य पठितव्यं तेना
धिस्त्रीत्यादावधिकरणप्रधानविधेः परनिपाताभावः। अधिः शौण्डादिष्विति। अधिरीश्वर इत्यधेः कर्मप्रवचनीयत्वात् यस्य चेश्वरवच
नमिति सप्तम्यन्ता राजादयोऽपि नास समस्यन्ते। एवं च वाक्यमपि भवति। यथाधि ब्रह्मदत्ते पञ्चाला इत्येवं राजन्यधि राजाधीनमिति वृ
त्तिविषये चाधिशब्द ईशितर्येव वर्तते। अथवाधिकरण एव सप्तमी वृत्तिविषये च ससाधनक्रियावचनोऽधिर्न तु वाक्ये इत्यस्वपदवि
ग्रहो राजन्यधिकृतं राजाधीनं राजायत्तमित्यर्थः॥ विभाषाञ्चेः॥ इह विभाषाग्रहणं पूर्वविधेर्नित्यत्वज्ञापनार्थम्। द्वयोर्विभाषयोर्म

राजदन्तादिषु पाठः करिष्यते। अथवा सप्तमीसमासोऽयम्। अधिः शौण्डादिषु पठ्यते॥ अषडक्षा॥ विभाषाञ्चेरदिक्
स्त्रियाम्। दिग्ग्रहणं किमर्थम्। अस्त्रियामितीयत्युच्यमाने प्राचीना ब्राह्मणी प्राचीना शिखेत्यत्रापि प्रसज्येत। दिग्ग्र
हणे पुनः क्रियमाणे न दोषो भवति। अथ स्त्रीग्रहणं किमर्थम्। न यावता दिक्शब्दः स्त्रीविषय एव। भवति वै कश्चि
द्दिक्शब्दोऽस्त्रीविषयोऽपि। प्राक् प्राचीनम्। उदक् उदीचीनम्॥ विभाषा॥ णचः स्त्रियामञ्॥ स्त्रीग्रहणं किमर्थम्।
न स्वार्थिकोऽयम्। स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते। एवं सिद्धे यत् स्त्रीग्रहणं करोति तज्ज्ञापयत्याचा
र्यः स्वार्थिका अनुवर्तन्ते लिङ्गवचनानीति। किमेतस्य ज्ञापने प्रयोजनम्। गुडकल्पा द्राक्षा तैलकल्पा प्रसन्ना पयः
कल्पा यवागूरित्येतत्सिद्धं भवति॥ णचः॥ एकस्य सकृच्च॥ सकृदादेशोऽभ्यावृत्तिग्रहणं निवर्त्यम् ॥

ध्ये नित्याविधय इति न्यायात्। दिग्ग्रहणमिति। अञ्चत्यन्तः स्त्रियां वर्तमानो दिश्येव वर्तेत इति प्रश्नः। प्राचीना ब्राह्मणीति। क्रियानि
मित्तको दिग्देशकालनिमित्तको वा ब्राह्मण्यादौ स्त्रियां वर्तत इति खस्य प्रतिषेधाभावः। प्रागिति। प्राचीशब्दाद्दिग्वाचिनो दिक्शब्देभ्य
इत्यस्तातेरुत्पन्नस्याञ्चेर्लुगिति लुक्। ततोऽव्ययत्वात् स्त्रीत्वाभावः। खे तु कृते शब्दान्तरत्वान्नपुंसकत्वम्। एकस्य। सकृदादेश इ
ति। अभ्यावृत्तिगणने सकृच्छब्दस्यासामर्थ्यात् पुनः पुनरावृत्तिः क्रियायाः क्रियाभ्यावृत्तिस्तद्गणनेन तेमानात्वं स्वाशब्दात्कत्वसुजित्येवं पू
र्वसूत्रार्थमाश्रित्येदमुच्यते। यदा त्वभिमुखीवृत्तिरभ्यावृत्तिर्जन्मलक्षणोच्यते तदा तदनुवृत्तावपीह दोषाभावः। अस्मिन्पक्षेऽधा
त्वर्थस्यानुवादरूपक आङ्। यथा अधिपरी अनर्थकाविति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं प्रयोजनमिति। अभिमुखी वृत्तिरभ्यावृत्तिरित्यर्थेन दोष इति प्रश्नः। न चैकस्येति। ननु चैकस्यैव पुनः पुनरावृत्तिर्यथा पञ्चकृत्वो भुङ्क्त इति। एकैवात्र भुजिक्रिया निवृत्तभेदाख्यातेनाभिधीयते। तस्याः पञ्चावृत्तयः पञ्चसंख्यया गण्यन्ते। सत्यमेतत्। अयं त्वत्रार्थः। न चैकस्य पुनः पुनरावृत्तिर्भवतीति। इह सकृद्भुङ्क्त इति। भोजनमेककालं विवक्षितमेककालस्यैकशब्दवाच्यस्य कालभेदादप्यलब्धभेदस्य पुनरावृत्त्यभावादभ्यावृत्त्यभावस्तत्र यथा साधु पचतीति। भवत्येवमेकं भुङ्क्त इति प्राप्ते सकृच्छब्दप्रयोगार्थमिदं सूत्रम्। अथ क्रियाग्रहणमिति। प्रधाने निवर्तमाने गुणस्यापि निवृत्त्या भाव्यमिति मत्वा प्रश्नः। किं चार्थ इति। यदि प्रयोजनमस्ति ततः स्वरितत्वात् क्रियाग्रहणं निवर्तमानेऽप्यभ्यावृत्तिग्रहणेऽनुवर्तिष्यत इति भावः। एको भुङ्क्त इति। तन्निवृत्त्यर्थक एकशब्दप्रयोगः। अथानुवर्तमानेऽपीति। यथा तुमुण्वुलौ क्रियायां क्रियार्थायामित्यादिषु क्रियाप्रदेशेषु पाकादेर्ग्रहणं भोक्तुं पाक इत्यादिसिध्यर्थं त।

किं प्रयोजनम्। पुनरावृत्तिरभ्यावृत्तिः। न चैकस्य पुनः पुनरावृत्तिरभ्यावृत्तिर्भवति। अथ क्रियाग्रहणमनुवर्तते उताहो न। किं चार्थोऽनुवृत्त्या। बाढमर्थः। इह मा भूत्। एको भुङ्क्त इति। अथानुवर्तमानेऽपि क्रियाग्रहणे इह कस्मान्न भवति। एकः पाक इति। पूर्वयोश्चापि योगयोः कस्मान्न भवति। द्वौ पाकौ त्रयः पाकाः चत्वारः पाकाः पञ्च पाकाः दश पाका इति। नैतत् क्रियागणनम्। किं तर्हि। द्रव्यगणनमेतत्। कथम्। कृदभिहितो भावो द्रव्यवद्भवतीति ॥

इहापि ग्रहणेन भाव्यमिति मत्वा प्रश्नः। द्वौ पाकाविति। यदैकमेव पाकं द्विधा कृतं तदैतदुदाहरणम्। सुवर्णस्य द्वौ पाकाविति। एवमभ्यावृत्तिर्भवति तद्भेदाच्च पाकस्य भेदो यदा तु पाक्यद्रव्यभेदात् पाकभेदस्तदाभ्यावृत्त्यभावादेव पूर्वयोगाभ्यां प्रत्ययाप्रसङ्गः। नैतत्क्रियागणनमिति। अभ्यावृत्तिग्रहणादेव क्रियासंप्रत्ययः सिद्धः। न हि द्रव्यगुणयोः स्वभावसिद्धयोः शब्देन प्रतिपाद्यमानयोरभ्यावृत्तिः संभवति। साध्यार्थविषयत्वात्तस्याः। तस्मात् क्रियाविशेषणप्रतिपत्त्यर्थं क्रियाग्रहणं कृतं तेन साध्यस्वभावैव क्रिया गृह्यते पाकादिभिस्तु शब्दैः सिद्धस्वभावाभिधीयते। सिद्धता च घञादिविधानात्। यद्यपि धातुनात्र साध्यस्वभावात् क्रियाभिधीयते तथापि प्रत्ययार्थस्य प्राधान्यात् साध्यत्वं गुणभूतमिति क्रियाग्रहणादिह सिद्धता धर्मयुक्त पाकाद्यग्रहो ऽन्यत्र तु धातुवाच्यक्रियाश्रयं पाकादिष्वपि कार्यं भवति। यादृशी च सूत्रे क्रिया गृहीता तादृश्येवेहानुवर्तत इत्येकः पाक इत्यत्राप्यसंपरिहार उपपन्नः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यथोक्तं न्यायमप्रतिपद्य कृदभिहितइति सामान्येनाभिधानाद् घञादीनामव्ययकृतां च विशेषबुद्ध्याशङ्कते। इहापित र्हीति। दोषान्तरं चाह। यदि खल्वपीति। आवृत्तिर्हि क्रियाप्रवृत्तिरभ्यावृत्तिर्न भव...ति। किं तर्ह्यभिमुखीति। एतच्चाभिग्रहणा

इहापि तर्हि द्रव्यगणनान्न प्राप्नोति। सकृद्भुक्त्वा सकृद्भोक्तुमिति। पूर्वयोश्चापि योगयोर्द्विर्भुक्त्वा द्विर्भोक्तुम्। पञ्चकृत्वो भुक्त्वा पञ्चकृत्वो भोक्तुम्। दशकृत्वो भुक्त्वा दशकृत्वो भोक्तुमिति। द्रव्यगणनान्न प्राप्नोति। यदि खल्वपि पुनः पुनरावृत्तिरभ्यावृत्तिर्द्विरावृत्तेः सकृदिति स्यात्। त्रिरावृत्तेर्द्विरिति। एवं तर्ह्यनुवर्तते अभ्यावृत्तिग्रहणम्। न तु पुनः पुनरावृत्तिरभ्यावृत्तिः। किं तर्ह्यभिमुखी प्रवृत्तिरभ्यावृत्तिः। पूर्वा च परे प्रत्यभिमुखी। परे च पूर्वां प्रत्यभिमुख्यौ। यदप्युच्यते। अनुवर्तमानेपि क्रियाग्रहणे इह कस्मान्न भवति एकः पाकः। पूर्वयोश्चापि योगयोः द्वौ पाकौ त्रयः पाकाः चत्वारः पाकाः पञ्च पाका दश पाका इति। परिहृतमेतत्। नैतत्क्रियागणनम्। किं तर्हि। द्रव्यगणनमेतत्। कृदभिहितो भावो द्रव्यवद्भवतीति। ननु चोक्तमिहापि द्रव्यगणनान्न प्राप्नोति सकृद्भुक्त्वा सकृद्भुक्तमिति। पूर्वयोश्चापि योगयोः द्विर्भुक्त्वा द्विर्भुक्तं त्रिर्भुक्त्वा त्रिर्भुक्तं पञ्चकृत्वो भुक्त्वा पञ्चकृत्वो भोक्तुं दशकृत्वो भुक्त्वा दशकृत्वो भोक्तुमिति। द्रव्यगणनान्न प्राप्नोति। नैष दोषः। क्रियागणनाद्भविष्यति ॥

ल्लप्स्यते। अन्यथा हि क्रियागणन इति ब्रूयात्। पूर्वा चेति। अस्ति हि तासां प्रवृत्तीनामेकसाधनानां परस्परापेक्षा एतावत्प्रवृत्तयः एताः यइति। सकृदुड्कः इत्यादौ त्वेकस्या अपि वृत्तेः स्वरूपलाभं प्रत्याभिमुख्यमस्ति ॥

CC-0. In Public Domain. Digitization by eGangotri

द्रव्यवदपीति। यथा द्रव्यं लिङ्गसंख्यासाधनैः संबध्यते तथा घञाद्यभिहितो भावइत्यर्थः। अव्ययकृदभिहितस्तु भावो लिङ्ग-
संख्यासाधनसंबन्धाभावात्साध्यस्वभाव एव प्रतीयते न तु सिद्धस्वभावइति क्रियावदेवासौ भवति न तु द्रव्यवदिति तत्र
क्रियाभ्यावृत्तिसद्भावाद्भुवत्स्येव प्रत्ययः। अविप्रतिपत्तिविषयाख्यातवाच्यक्रियापेक्षश्च क्रियावदित्यतिदेशः। पूर्वसूत्रे
संख्याग्रहणमनियतविशेषवाचिभूयआदिनिवृत्त्यर्थम्। ते हि बहुगणशब्दाभ्यां नियमार्थाभ्यां संख्याप्रदेशेषु निषिद्ध-
ग्रहणाः। अभ्यावृत्तिग्रहणं किमर्थं पञ्चपाकाइत्यत्र क्रियामात्रगणने माभूदभ्यावृत्तिग्रहणे च क्रियमाणे क्रियाग्रहणा-
त् क्रियाया विशेषो गृह्यते नान्यथा। तदेवं यदैकस्या एव क्रियाया आजन्मलक्षणाः प्रवृत्तयो गण्यन्ते तदा कृत्वसुजादयो भ-
वन्ति नान्यथा। यदि तर्हि घञाद्यन्तप्रयोगे कृत्वसुजादयो न भवन्ति कथं द्विर्वृत्तिः। द्विः प्रयोगो द्विर्वचनमित्यादयः प्रयोगाः

भा। कथं कृदभिहितो भावो द्रव्यवदपि क्रियावदपि॥ देवतान्तात्तादर्थ्ये यत्॥ देवतान्तादित्युच्यते। तत्रेदं न
सिद्ध्यति। पितृदेवत्यमिति। न हि पितरो देवता। नैष दोषः। दिवेरैश्वर्यकर्मणो देवः तस्मात्स्वार्थे तल्। ए-
वं च कृत्वा देवदेवत्यम पि सिद्धं भवति॥ देवात्तल्॥ तलि स्त्रीलिङ्गवचनम्। तलि स्त्रीलिङ्गं वक्तव्यम्।
देवता। किं पुनः कारणं न सिद्ध्यति। देवशब्दो ऽयं पुल्लिङ्गः स्वार्थिकश्चायम्। स्वार्थिकाश्च प्रकृतितो लिङ्गव-
चनान्यनुवर्त्तन्ते। उक्तं वा। किमुक्तम्। स्वार्थिका अतिवर्त्तन्ते लिङ्गवचनानीति ॥

द्विर्वचने चेति ज्ञापकात् क्वचित् घञाद्यन्तप्रयोगे ऽपि कृत्वोर्थप्रत्ययो भवतीत्यदोषः। गणनग्रहणं यत्र साक्षादभ्यावृत्तिगण-
नं तत्र प्रत्ययार्थमन्यथा क्रियाभ्यावृत्ताविष्यमाने सप्तदश प्राजापत्यान्पशूनालभेतेत्यत्राप्यालम्भनक्रि-
याया आभिमुख्येन प्रवृत्तिसंभवात् साधनभेदसामर्थ्यप्रतिपन्नभेदालम्भनक्रियाभ्यावृत्तिविषये साधनगणनवाचिनो
ऽपि सप्तदशशब्दात् प्रत्ययः स्यात्। इह पञ्चकृत्वः पाक इत्यादौ करोत्यादिक्रियापेक्षः प्रत्ययः यथा पञ्चकृत्वः पटो रक्त इ-
ति॥ देवता॥ न हि पितर इति। देवताशब्दस्य जातिविशेषवाचित्वाद्भिन्नजातीयाभिधायिना सामानाधिकरण्याभावात्स-
मासाभावात्प्रकृतिरेव नास्ति कुतः प्रत्यय इत्यर्थः। दिवेरिति। क्रियाशब्दो देवताशब्दो न तु जातिवाचीत्यर्थः। देवदेवत्यमिति।
जातिशब्दत्वे तु देवताशब्दस्य द्वयोः पर्यायत्वाद्युगपत्प्रयोगो न स्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 लोहिता॥ लोहितादिति॥ प्रतिपदविधेर्बलवत्त्वात्पूर्वमेव वक्तव्यं स्यात्। तथा च लोहिनिकेति न सिध्येदिति वचनं नित्ये लिङ्गा
र्थप्रत्ययबाधे प्राप्ते विकल्पार्थम्। स्वार्थविज्ञानात्सिद्धमिति॥ वसोः समूहे चेत्यत्रोक्तम्। अपस्वो॰ वसानादिति। अपू॰ष्

लोहितान्मणौ॥ लोहितात्लिङ्गबाधनं वा। लोहितात्लिङ्गबाधनं वेति वक्तव्यम्। लोहिनिका लोहितिका। अक्ष
रसमूहे छन्दस्युपसंख्यानम्। अक्षरसमूहे छन्दस्युपसंख्यानं कर्त्तव्यम्। ओश्रावयेति चतुरक्षरमस्तु श्रौष
डिति चतुरक्षरं ये यजामह इति पञ्चाक्षरं यजेति द्व्यक्षरं द्व्यक्षरो वषट्कारः। एष वै सप्तदशाक्षरः छन्दस्यः
प्रजापतिर्यज्ञमनुविहितः। छन्दसि बहुभिर्वसव्यैरुपसंख्यानम्॥ छन्दसि बहुभिर्वसव्यैरुपसंख्यानं
कर्त्तव्यम्। हस्तैः पृणस्व बहुभिर्वसव्यैः। अग्निरीशे वसव्यस्येति। उक्तं वा। किमुक्तम्। स्वार्थविज्ञानात्सिद्धमि
ति। अपस्यो वसनाः। अपो वसनाः। स्वओकाः। स्वओकः। कव्यो सि हव्यसूदनः कविरसि। रौद्रेणानीकेन कव्य
तायै कवितायै। आमुष्यायणस्य। अमुष्यपुत्रस्य। क्षेम्यस्येशे। क्षेमस्येशे। क्षेम्यमध्यवस्यति। वासुदेव चस्यवम्।
चस्यम्। निष्केवल्ये निष्केवलम्। उक्थ्यमुक्थम्। जन्यन्ताभिः सजन्यन्ताभिः। जनन्ताभिः सजनन्ताभिः। स्तोमैर्ज
नयामि नव्यं नवम्। प्र णो नव्येभिः नवैः। ब्रह्म पूर्व्यम्। पाथः पूर्वं तं प्रत्नपूर्व्यम्। पूर्वं पूर्व्या अहः। पूर्वाहः। पूर्व्या विशः। पूर्वा क्रियाः। पूर्वासः।
मू॰ पूर्वासः। समपूर्व्याः समपूर्वः। अग्निं वः पूर्व्यं पूर्व्यं तं जुषस्व। यविष्ठ्य यविष्ठ। होत्र वाहं यविष्ठ्य यविष्ठस्य त्वं
हव्य यविष्ठ्य यविष्ठ। समावद्वसति समावद्गृह्णाति। समं वसति समं गृह्णाति। समावद्वेव पत्नेह स्तौ समांसमा
वहीयी वहानि। समानि समावद्वीर्याणि करोति समानि। यदीवते लोके यदीवते ब्रह्मणः। यदिवते। नवस्य नूलप्तनं स्वोश्च।
नवस्य नू इत्ययमादेशो वक्तव्यः तप्तनप्खाश्च प्रत्यया वक्तव्याः। नूत्नं नूतनं नवीनम्। नश्च पुराणे प्रादिवक्त
व्यः तप्तनप्खाश्च प्रत्यया वक्तव्याः। प्रत्नं प्रणं प्रतनं प्रीणम्॥ तद्युक्तात्कर्मणोऽण्॥ तदित्यनेन किं प्रतिनिर्दि
श्यते। वागेव। यदेव वाचा द्रियते तत्कर्मणा क्रियते। अण्प्रकरणे कुलालवरुडनिषादचण्डालामित्रेभ्यश्छन्दसि।

न्दादिति द्वितीयाबहुवचनान्तात् यत् प्रत्ययो विभक्तेश्चालुक्॥ तद्युक्तात्॥ यदेव वाचेति। इदं त्वया कर्त्तव्यमिति संदेशवा
चं श्रुत्वा यत्कर्म क्रियते तत्कार्मणमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृभ्वस्तियोगे सं॥ च्विँधाविति॥ अभूततद्भावग्रहणं वार्त्तिके दृष्ट्वान्यैः सूत्रे प्रक्षिप्तम्। संपद्यन्ते अस्मिन्निति। अभूता भवन्ति। संपद्यकर्त्तरि च्विरिति च्विप्रसङ्गः। एतच्चोपलक्षणम्। कृभ्वस्तियोगाभावादत्र च्वेरप्रसङ्गात्तस्मादिदमुदाहरणम्। भवत्यस्मिन् क्षेत्रे शालयइति। प्रकृतिविवक्षाग्रहणं चेति। तेनात्र प्रकृतेरविवक्षितत्वात् च्वेरभावः। यदा तु प्रकृतिरेव विकारात्मना संपद्यमाना विकारभेदेन भवनक्रियायां कर्त्री विवक्ष्यते तदा च्विप्रत्ययः अङ्कुरीभवन्ति यवाइत्यस्त्राभूततद्भाव एव प्रकृतिविवक्षाग्रहणेन

अण्प्रकरणे कुलालवरुडनिषादचण्डालामित्रेभ्यश्छन्दस्युपसंख्यानं कर्त्तव्यम्। कौलालः। वारुडः। नैषादः। चाण्डालः। आमित्रः। भागरूपनामभ्यो धेयः॥ भागरूपनामभ्यो धेयो वक्तव्यः। भागधेयं रूपधेयं नामधेयम्। मित्राच्छन्दसि धेयो वक्तव्यः। मित्रधेये यतस्व। अण् मित्राच्च। अण् मित्राच्चेति वक्तव्यम्। मैत्रसामित्रः। सान्नाय्यानुजावरानुषूकचातुष्प्राश्यराक्षोघ्नवैयातवैकृतवारिवस्कृताग्रायणाग्रहायणसांतपनानि निपात्यन्ते। सान्नाय्यः। आनुजावरः। आनुषूकः। चातुष्प्राश्यः। राक्षोघ्नः। वैयातः। वैकृतः। वारिवस्कृतः। आग्रायणः। आग्रहायणः। सांतपनः। आग्नीध्रसाधारणादञ्॥ आग्नीध्रसाधारणादञ् वक्तव्यः। आग्नीध्रम्। साधारणम्। अपवसमरुद्भ्यां छन्दस्यञ् वक्तव्यः। आपवसे वर्द्धन्तं मारुतं शर्द्धः॥ नवसूरमर्त्तयविष्ठेभ्यो यत्॥ नवसूरमर्त्तयविष्ठेभ्यो यद्वक्तव्यः। नव्यः। सूर्यः। मर्त्यः। यविष्ठ्यः॥ क्षेमाद्यः॥ क्षेमाद्यो वक्तव्यः। क्षेम्यस्तिष्ठन् प्रतरणः सुवीरः। बहुल्यार्थाच्छस्कारकादन्यतरस्याम्॥ बहुल्यार्थान्मङ्गलामङ्गलवचनम्। बहुल्यार्थान्मङ्गलामङ्गलवचनं कर्त्तव्यम्। बहुशो देहि अनिष्टेषु श्राद्धादिषु मा भूत्। दृष्टेषु प्राशित्रादिषु यथा स्यात्। अल्पशो देहि। दृष्टेषु प्राशित्रादिर्मा भूद् अनिष्टेषु श्राद्धादिषु यथा स्यात्॥ प्रतियोगे पञ्चम्यास्तसिः॥ तसिप्रकरणे आद्यादीनामुपसंख्यानम्॥ तसिप्रकरणे आद्यादीनामुपसंख्यानं कर्त्तव्यम्। आदितः मध्यतः अन्ततः॥ कृभ्वस्तियोगे संपद्यकर्त्तरि च्विः॥ च्विविधावभूततद्भावग्रहणम्। च्विविधावभूततद्भावग्रहणं कर्त्तव्यम्। इह मा भूत्। संपद्यन्ते यवाः। संपद्यन्ते शालयइति। अथ क्रियमाणेपि वै अभूततद्भावग्रहणे इह कस्मान्न भवति। संपद्यन्तेऽस्मिन् क्षेत्रे शालयइति। प्रकृतिविवक्षाग्रहणं च। प्रकृतिविवक्षाग्रहणं च कर्त्तव्यम्॥

त्याख्यातइत्याहुः। येन रूपेण प्रागभूतं कारणं तेन रूपेण तस्य भावोऽभूततद्भाव इत्याश्रयणादतिप्रसङ्गाभावः॥ संपद्यकर्त्तेत्यादेवाभूततद्भावे लब्धे पुनस्तदुपादानाद्यथोक्तविशेषलाभोऽथवा जन्मग्रहणे कर्त्तव्ये अभूततद्भावग्रहणाद्यथोक्तार्थपरिग्रहः। विकारशब्दाच्च प्रकृतिविकारभेदविवक्षायां प्रकृतौ विकारावस्थां प्राप्नुवत्यां वर्त्तमानात्स्वार्थे च्विप्रत्ययः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समीपादिभ्यइति। प्रकृतिविकारभावाभावान्नप्राप्नोतीतिवचनम्। तात्स्थ्यादिति। असमीपस्यस्यतस्यसमीपस्थत्वभावात्सिद्धः
सूत्रेणप्रत्ययइत्यर्थः॥समासान्ताः॥अन्तग्रहणमिति॥समीपवचनमन्तशब्दंमत्वा प्रश्नः॥अवयववचनाश्रयेणोत्तरमाह। अ

समीपादिभ्यः उपसंख्यानम्। समीपादिभ्यउपसंख्यानंकर्त्तव्यम्। समीपीभवति। अभ्याशीभवति। अन्तिकीभवति। किंपुनःकार
णंनसिध्यति। नह्यसमीपंसमीपंभवति। किंतर्हि। असमीपस्थंसमीपस्थंभवति। तत्तर्हिवक्तव्यम्। नवक्तव्यम्।
तात्स्थ्यात्ताच्छब्द्यंभविष्यति॥ अव्यक्तानुकरणात्॥ किमर्थश्चकारः। स्वरार्थः। चितोन्तउदात्तोभवतीत्य
न्तोदात्तत्वंयथास्यात्। नैतदस्तिप्रयोजनम्। एकाजयंतत्रनार्थःस्वरार्थेनचकारेणानुबन्धेन। प्रत्ययस्वरेणैवसि
द्धम्। अतउत्तरंपठति। डाचिचित्करणंविशेषणार्थम्। डाचिचित्करणंक्रियते। विशेषणार्थम्। कविशेषणार्थेनार्थः।
लोहितादिडाज्भ्यःक्यषिति। डाइतिउच्यमानेइडाइत्योपिप्रसज्येत। अर्थवद्ग्रहणेनानर्थकस्येत्येवमेतस्य
नभविष्यति। इदंतर्हिनाभाष्टथिव्यानिहितोदविद्युतत्। तस्माच्चकारःकर्त्तव्यः॥मद्रात्परिवापणे। भद्राच्चाभद्राच्चेति
वक्तव्यम्। भद्राकरोति॥समासान्ताः॥अन्तग्रहणंकिमर्थम्। अन्तोयथास्यात्। नैतदस्तिप्रयोजनम्। प्रत्ययपर
त्वेनाप्येतत्सिद्धम्। इदंतर्हिप्रयोजनम्। तद्ग्रहणेनग्रहणंयथास्यात्। कानिपुनस्तद्ग्रहणस्यप्रयोजनानि। प्रयो
जनमव्ययीभावद्विगुद्वन्द्वतत्पुरुषबहुव्रीहिसंज्ञाः। अव्ययीभावःप्रयोजनम्। प्रतिराजम्। उपराजम्। अव्य
यीभावश्चसमासोनपुंसकलिङ्गोभवतीतिनपुंसकलिङ्गतायथास्यात्। नैतदस्तिप्रयोजनम्। लिङ्गमशि
ष्यंलोकाश्रयत्वाल्लिङ्गस्य। इदंतर्हिप्रयोजनम्। नाव्ययीभावादतोम्त्वपञ्चम्याइत्येषविधिर्यथास्यात्। अव्य
यीभावः। द्विगुः। द्विगुसंज्ञाचप्रयोजनम्। पञ्चगवंदशगवंद्विगुश्चसमासोनपुंसकलिङ्गोभवतीतिनपुंसकलिङ्गता
यथास्यात्। नैतदस्तिप्रयोजनम्। लिङ्गमशिष्यंलोकाश्रयत्वाल्लिङ्गस्य। इदंतर्हिप्रयोजनम्। द्विपुरंत्रिपुरी। द्विगो
रकारान्तादितिङीकारोयथास्यात्। एतदपिनास्तिप्रयोजनम्। पुरशब्दोयमकारान्तः तेनसमासोभविष्यति।
आतश्चाकारान्तः। एवंह्याह। क्षेमेसुभिक्षेकृतसंचयानिपुराणिराज्ञांविनयन्तिकोपमिति ॥

न्तोयथास्यादिति॥इतरोऽगृहीताभिप्रायआह॥नैतदस्तीति। इतरोभिप्रायंप्रकाशयन्नाह॥इदंतर्हीति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।:भा० ॥ इदं तर्हि प्रयोजनम्। द्विधुरी निधुरी। द्विगोरकारान्तादिति ङीब्यथा स्यात्। द्विगुद्वन्द्वः द्वन्द्वसंज्ञा च प्रयो
जनम्। वाक्त्वचं स्रक्त्वचम्। द्वन्द्वश्च समासो नपुंसकलिङ्गो भवतीति नपुंसकलिङ्गता यथा स्यात्। नैतदस्ति
प्रयोजनम्। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य। इदं तर्हि प्रयोजनम्। कोशश्च निषच्च कोशनिषदं कोश
निषदिनी। द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिरितीनिर्यथा स्यात्। तत्पुरुषः। तत्पुरुषसंज्ञा च प्रयोजनम्।
परमधुरा उत्तमधुरा। परवल्लिङ्गमिति परवल्लिङ्गता यथा स्यात्। नैतदस्ति प्रयोजनम्। उत्तरपदार्थप्रधान
स्तत्पुरुषः। इदं तर्हि प्रयोजनम्। अर्द्धधुरा। एतदपि नास्ति प्रयोजनम्। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्ग
स्य। इदं तर्हि प्रयोजनम्। निर्द्धुरः। अव्ययं तत्पुरुषे प्रकृतिस्वरं भवतीत्येष स्वरो यथा स्यात्। बहुव्रीहिः। ब
हुव्रीहिसंज्ञा च प्रयोजनम्। उच्चधुरः नीचधुरः। बहुव्रीहौ प्रकृत्या पूर्वपदं भवतीत्येष स्वरो यथा स्यात्॥
न पूजनात्॥ इदं विप्रतिषिद्धम्। को विप्रतिषेधः। परिगणिताभ्यः प्रकृतिभ्यः समासान्तो विधीयते। न
च तत्र काचन पूजनान्ता प्रकृतिर्निर्दिश्यते। नैतद्विप्रतिषिद्धम्। नैवं विज्ञायते याभ्यः प्रकृतिभ्यः समासा
न्तो विधीयते न चेताः पूजनान्ता भवन्तीति। कथं तर्हि न चेत्ताः पूजनात्परा भवन्तीति। पूजायां स्वतौ॥
पूजायां स्वति ग्रहणं कर्तव्यम्। सुराजा अतिराजा। क्व मा भूत्। परमगवः उत्तमगवः। प्राग्बहुव्रीहिग्रहणं
च। प्राग्बहुव्रीहिग्रहणं च कर्तव्यम्। इह मा भूत्। स्वक्षः अत्यक्ष इति। किमः क्षेपे॥ क्षेप इति किमर्थम्। क
स्य राजा किंराजः। क्षेप इति शक्यमकर्तुम्। कस्मान्न भवति कस्य राजा किंराज इति। लक्षणप्रतिपदोक्त
योः प्रतिपदोक्तस्यैवेति॥ बहुव्रीहौ संख्येये डजबहुगणात्॥ डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्य
र्थम्॥ डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं कर्तव्यम्। किं प्रयोजनम्। निस्त्रिंशाद्यर्थम्। निस्त्रिंश
नि निर्गतानि त्रिंशतः निस्त्रिंशानि वर्षाणि। अन्यत्राधिकलोपात्। अन्यत्राधिकलोपादिति वक्तव्यम्। इह मा भूदेका
धिका विंशतिः एकविंशतिः। द्व्यधिका विंशतिः द्वाविंशतिः। अव्ययादेरिति च वक्तव्यम्। इह मा भूत्। गोच
त्वारिंशदिति। तत्तर्हि वक्तव्यम्। यद्यप्येतदुच्यते। अथ वै तर्हि अन्यत्राधिकलोपादित्येतन्न क्रियते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प.वै. ऋक्पूरब्धूः। कथमिदमिति। यद्यक्ष इति स्वरूपग्रहणमक्षशब्दे पूर्वपदे धूरन्तात्समासान्तो न भवतीति तस्य न चेदक्षस्य धूरन्तः समास ५४१
७८ इत्ययं पक्षो भवति। यदा त्वक्ष इत्यर्थग्रहणं तदा न चेदक्षः समासार्थ इत्ययं पक्षः। उभयथा च दोषप्रसङ्ग इति प्रश्नः। अक्षधूरन्त
इत्यस्यायमर्थो ऽक्षशब्दस्य धूः समीपे धूःशब्दस्तदन्तः समास इति। न चेदक्षस्य धूरिति। अक्षस्य धूरपेक्षयाधिकरणत्वादनक्ष
इत्यधिकरणसप्तमी। चक्रसंबद्धः काष्ठविशेषः। शकटावयवो ऽक्षः॥ अक्ष्णो॥ अदर्शनादिति वचनादक्षीवाक्षी त्वक्षिरित्यर्थ

ऋक्पूरब्धूःपथामानक्षे॥ अनक्ष इति कथमिदं विज्ञायते। न चेदक्षस्य धूरन्तः समास इति। आहोस्विन्न चेदक्षः समासा
र्थ इति। किं चातः। यदि विज्ञायते न चेदक्षस्य धूरन्तः समास इति। सिद्धमक्षस्य धूः अक्षधूरिति। इदं तु न सिध्यति। दृढ
धूरयमक्षः। अस्तु तर्हि न चेदक्षः समासार्थ इति। सिद्धं दृढधूरक्ष इति। इदं तु न सिध्यति। अक्षस्य धूः अक्षधूरिति।
एवं तर्हि नैवं विज्ञायते। अक्षधूरन्तः समास इति। नापि न चेदक्षः समासार्थ इति। कथं तर्हि। न चेदक्षस्य धूरिति।
एवं च कृत्वा नापि न चेदक्षधूरन्तः समास इति विज्ञायते नाप्यक्षः समासार्थ इति। अथ वोभयोर्न भवति॥ अक्ष्णो ऽ
दर्शनात्॥ अदर्शनादित्युच्यते। तत्रेदं न सिध्यति। कम्बलाक्षम्। अदर्शनादिति शक्यमकर्तुम्। कथं ब्राह्मणाक्षि
ति अप्राण्यङ्गादिति वक्तव्यम्॥ अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीव
पदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोप
शुनगोष्ठश्वाः॥ आद्यास्त्रयो बहुव्रीहयः। अद्रष्टा चतुर्णामचतुरः। विद्रष्टा चतुर्णां विचतुरः। सुद्रष्टा चतुर्णां सुचतुरः।
ततः परे एकादश द्वन्द्वाः। स्त्रीपुंसा। धेन्वनडुहा। ऋक्सामा। वाङ्मनसा। अक्षिभ्रुवा। दारगवा। ऊर्वष्ठीवा। पदष्ठीवा। न
क्तंदिवा। रात्रिंदिवा। अहर्दिवा। ततो ऽव्ययीभावः। सह रजसा सरजसम्। ततस्तत्पुरुषः। निश्चितं श्रेयो निःश्रेयसम्। त
तः षष्ठीसमासः। पुरुषस्यायुः पुरुषायुषम्। ततो द्विगुः। द्वे आयुषी द्व्यायुषम्। त्रीण्यायूंषि त्र्यायुषम्। ततो द्वन्द्वः।
ऋक्च यजुश्च ऋग्यजुषम्॥

प्रवृत्तिरिहाक्षिशब्दरूपातः। लवणाक्षमित्युदाहरणं दर्शनवाचित्वे तु ब्राह्मणाक्षीत्यादौ समासान्ताभावः। कम्बलाक्षमिति। अक्ष्वाना बहु
च्छिद्रकं कम्बलावरणमुच्यते। तेनाक्ष्णाः पश्यन्तीति दर्शनत्वात्समासान्तप्रसङ्गः। एवं गवाक्षे ऽपि अप्राण्यङ्गादिति। तेन गवाक्षकम्बलाक्षे सिध्य रामः
तः॥ अच॥ अदृष्टा चतुर्णामिति। अर्थप्रदर्शनमेतदस्यानित्यत्वार्थस्येति अन्यपदार्थबहुव्रीहयः आद्यास्त्रयः कर्तव्याः॥ ७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अह्नो॥ अह्नोह्रस्ववचनानर्थक्यमिति। अह्न एतेभ्य इति सूत्रमज्विधानार्थं कर्तव्यम्। टजचोरविशेषाभावात्। रात्राह्नाहाः पुंसीति षचनात् स्त्रियां वृत्त्यभावात्। तत्राह्नष्टखोरेवेति नियमादह्नो लोपाभावाट्टिलोपेन पूर्वाह्णादयः सिद्धा इति नार्थो ह्रादेशविधानेनेत्यर्थः॥ बहु॥ अनन्तोदात्तार्थमिति। सक्थ्यं चाक्रान्तादिति विभाषान्तोदात्तत्वं विधीयते। तत्रान्तोदात्तान्ङीब् ङीपोर्नास्ति विशेषः। ङीप उदात्तनिवृत्तिस्वरेणान्तोदात्तत्वात्। यदा तु पूर्वपदप्रकृतिस्वरेणानुदात्तत्वं तदा ङीषि सतीकारस्योदात्तत्वं भवति। ङीपि तु सत्यनुदात्त ईकारः स्यादित्य

जातादय उक्षान्ताः समानाधिकरणाः। जातः उक्षा जातोक्षः। महानुक्षा महोक्षः। वृद्ध उक्षा वृद्धोक्षः। ततोऽव्ययीभावः। शुनः समीपमुपशुनम्। ततः सप्तमीसमासः। गोष्ठे श्वा गोष्ठश्वः। चतुरोऽच्प्रकरणे त्र्युपाभ्यामुपसंख्यानम्। चतुरोऽच्प्रकरणे त्र्युपाभ्यामुपसंख्यानं कर्तव्यम्। त्रिचतुराः। उपचतुराः॥ ब्रह्महस्तिभ्यां वर्चसः॥ पल्यराजभ्यां च॥ पल्यराजभ्यां चेति वक्तव्यम्। पल्यवर्चसम्। राजवर्चसम्। अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः॥ अहर्ग्रहणं द्वन्द्वार्थं दृष्टव्यम्। किमुच्यते द्वन्द्वार्थमिति। न पुनस्तत्पुरुषार्थमपि स्यात्। तत्पुरुषाभावात्। न हि रात्र्यन्तोऽहरादिस्तत्पुरुषोऽस्ति॥ अह्नोऽह्न एतेभ्यः॥ अह्नो ह्रवचनानर्थक्यं चाह्नष्टखोर्नियमवचनात्। अह्नो ह्रवचनमनर्थकम्। किं कारणम्। अह्नष्टखोर्नियमवचनात्। अह्नष्टखोरेवेत्येतन्नियमार्थं भविष्यति। अनसन्तान्नपुंसकाच्छन्दसि॥ अनसन्तान्नपुंसकाच्छन्दसि वेति वक्तव्यम्। ब्रह्मसामम्। ब्रह्मसाम। देवच्छन्दसं देवच्छन्दः॥ बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्॥ किमर्थं षच् प्रत्ययान्तरं विधीयते। न टच् प्रकृतः सोऽनुवर्तते। अत उत्तरं पठति। षचि प्रत्ययान्तरकरणमन्तोदात्तार्थम्। षचि प्रत्ययान्तरं क्रियते। अन्तोदात्तार्थम्। अन्तोदात्ताः प्रयोजयन्ति चक्रसक्थं चक्रसक्थी॥ द्वित्रिभ्यां ष मूर्ध्नः॥ द्वित्रिभ्यां ष मूर्ध्नः किमर्थम्। मूर्ध्नः षः प्रत्ययान्तरं क्रियते न षच् प्रकृतः सोऽनुवर्तते। मूर्ध्नः षवचनं किम्। अन्तोदात्तार्थमित्येव। द्विमूर्धः॥

र्थः। चक्रसक्थीति। अयुक्तोऽयं पाठोऽत्र ह्याक्रान्तादिति विकल्पनिषेधाच्चिन्त्यनित्येनान्तोदात्तत्वेनाभाव्यम्। तस्माद्गौरसक्थीत्यन्तोदात्तत्वाभावपक्ष उदाहार्यः॥ द्वित्रिभ्याम्॥ द्विमूर्ध इति। यद्यत्र षच् स्यात् तदा चित्वान्नित्यमन्तोदात्तत्वं स्यात्। द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहावितितु विभाषान्तोदात्तत्वम्। यदा समासान्तविधेरनित्यत्वाद् द्विमूर्धेति समासान्ताभावस्तदा स्यात्कार्यम्। षे तु सति समासान्तपक्षेऽपि पक्षेऽन्तोदात्तत्वम्। पक्षे पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमिति स्वरद्वयसिद्धिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ अपूरणी॰ कल्याणपञ्चमीकः पक्ष इति। अत्र वर्त्तिपदार्थस्य पूरणीनत्वस्य पदार्थः। पक्षस्य तिरोहितावयवभेदस्यान्यपदा
८० र्थत्वात् यथात्र सद्रूपस्य शब्दस्यावयवमभिधेयो मत्वार्थवादयोः न यथा अनुमीयमानस्याशब्दार्थत्वादित्यप्राधान्यं पूरण्याः।
कल्याणीपञ्चमा इति। अत्रावयवेन विग्रहः। समुदाय उद्भूतावयवभेदः समासार्थ इति रात्रिशुपञ्चम्या अन्तर्भावादन्यपदार्थ
त्वात् प्राधान्यं पूरण्याः। पञ्चकमासिक इति। पञ्चभृतिरस्य मासस्य पञ्चको मासः। सोऽस्यां शवस्य भृतय इति संख्यायाः कन्।
पञ्चको मासोऽस्येति बहुव्रीहौ कृते स्वार्थे ठच्। अज्नासि। खुरखराभ्यामिति। आदेशप्रत्यययोः प्रसङ्गे केवलादेशविधानार्थं व

अपूरणीप्रमाण्योः॥ अपि प्रधानपूरणीग्रहणम्। अपि प्रधानपूरणीग्रहणं कर्त्तव्यम्। प्रधानं या पूरणीति वक्त
व्यम्। इह मा भूत्। कल्याणी पञ्चमी अस्य पक्षस्य कल्याणपञ्चमीकः पक्षः। अथेह कथं भवितव्यम्। कल्याणी
पञ्चमी आसां रात्रीणामिति कल्याणपञ्चमा रात्रय इति भवितव्यम्। रात्रयोऽत्र प्रधानम्। नेतुर्नक्षत्रे उपसंख्यान
म्॥ नेतुर्नक्षत्रे उपसंख्यानं कर्त्तव्यम्। पुष्यनेत्राः। मृगनेत्राः। छन्दसि च नेतुरुपसंख्यानं कर्त्तव्यम्। बृहस्पति
नेत्राः। सोमनेत्राः। मासात्भृतिप्रत्ययपूर्वपदाट्ठज्विधिः। मासात्भृतिप्रत्ययपूर्वपदात् ठच् विधेयः। पञ्चकमा
सिकः। षट्कमासिकः। दशकमासिकः॥ अज्नासिकायाः संज्ञायां नसं चास्थूलात्॥ खरखुराभ्यां नस् वक्तव्यः। ख
रणाः। खुरणाः। शितिनाः। अर्चनाः। अहिना इति नैगमाः। शितिनाः। अर्चनाः। अहिनाः। उपसर्गाच्च वेर्ग्रो वक्तव्यः।
विग्रः। ख्यश्च वक्तव्यः। विख्यः। ऊधसोऽनङ्॥ ऊधसो नङि स्त्रीग्रहणं कर्त्तव्यम्। इह मा भूत् महोधाः पर्जन्य इति।
गन्धस्येदुत्पूतिसुसुरभिभ्यः॥ गन्धस्येत्त्वे तदेकान्तग्रहणम्। गन्धस्येत्त्वे तदेकान्तग्रहणं कर्त्तव्यम्। इह मा भूत्। शो
भना गन्धा अस्य सुगन्ध आपणिक इति। अथात्रानुपलिप्ते कथं भवितव्यम्। यदि तावद्यदनुगतं तदभिसमीक्षितं सु
गन्धि इति भवितव्यम्। अथ यत्प्रविशीर्णं सुगन्ध इति भवितव्यम्॥

वचनम्। उप॥ विग्र इति। विगता नासिका यस्य स विग्रः॥ गन्धस्य॥ गन्धशब्दोऽस्ति द्रव्यवाची गन्धान् पिनष्टीति। अस्ति च गुणवाची च
न्दनगन्ध इति। तत्र गुणवाचिग्रहणार्थमाह। गन्धस्येत्त्व इति। रूपादिसमुदायात्मकस्य द्रव्यस्य गन्धो लक्षणो गुण एकान्तो भवति।
रूपादिव्यतिरिक्तावयविद्रव्यवादिपक्षे त्वेकान्तद्वैकान्तत्वस्य सोपलम्भादित्याश्रीयते। यदनुगतमिति। अनुगतं निलीनमविभा
गापन्नं कुङ्कुमादिर्यदा देवदत्तादेर्भवति तदा तत्स्थत्वाद् गन्धस्यैकान्तत्वादित्वं भवति। प्रविशीर्णमिति। विभागेनावस्थितं देव उ॰ म॰
दत्तादेः पृथगुपलभ्यमित्यर्थः॥ ८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषा॥ कः शेष इति। अनेकस्योपयुक्तत्वात्किमपेक्षः शेष आश्रीयत इति प्रश्नः। इतरः सामान्येनाह। याभ्य इति। समासान्तवि-
शेषस्तु न प्रदर्शितः। किमर्थमिति। सामान्येन विभाषा कब्विधीयताम्। तस्य विशेषे समासान्ता बाधका भविष्यन्तीति प्रश्नः। पर-
त्वात्कप्प्राप्नोतीति। उपदश उपविंशा इत्यादिषु निसंडजादयद्दृश्यन्ते। किं पुनरिति। पूर्वं याभ्यः प्रकृतिभ्य इति सामान्येनो-
क्तं ततो विशेषज्ञापनाय प्रश्नः। यद्यपि कबपेक्षे शेषत्वे शेषग्रहणमनर्थकमन्तरेणापि शेषग्रहणमशेषान्नित्यं कब्विधान,

शेषाद्विभाषा॥ शेषादित्युच्यते। कः शेषः। याभ्यः प्रकृतिभ्यः समासान्तो न विधीयते। स शेषः। किमर्थं पुनः
शेषग्रहणं क्रियते। याभ्यः प्रकृतिभ्यः समासान्ता विधीयन्ते ताभ्यः कब्माभूदिति। नैतदस्ति प्रयोजनम्।
ये प्रतिपदं विधीयन्ते तेऽत्र बाधका भविष्यन्ति। अनवकाशा हि विधयो बाधका भवन्ति सावकाशाश्च समा-
सान्ताः। कोऽवकाशः। विभाषा कप्। यदा न कप्। सोऽवकाशः। कपः प्रसङ्गे उभयं प्राप्नोति। परत्वात्कप्प्रा-
प्नोति। तस्माच्छेषग्रहणं कर्त्तव्यम्। किं पुनरिदं शेषग्रहणं कबपेक्षम्। यस्माद्बहुव्रीहेः कप् न विहित इ-
ति। आहोस्वित्समासान्तापेक्षम्। यस्माद्बहुव्रीहेः समासान्तो न विहित इति। किं चातः। यदि विज्ञायते कब-
पेक्षम्। अनृचो बह्वृच इत्यत्रापि प्राप्नोति। अथ समासान्तापेक्षम्। अनृक्कं साम बह्वृक्कं सूक्तमिति न सिद्ध्यति।
अस्तु कबपेक्षम्। कथमनृचो बह्वृच इति। विशेष एतद्वक्तव्यम्। अनृचो माणवे। बह्वृचश्चरणाख्यायामिति।
इदं तर्हि ऊधसोनङ् स्त्रीग्रहणं चोदितं तस्मिन्क्रियमाणेपि प्राप्नोति। एवं तर्हि नैव कबपेक्षं शेषग्रहण-
म्। नापि समासान्तापेक्षम्। किं तर्हि योऽनन्तरो यो बहुव्रीह्यधिकारः सोऽपेक्ष्यते॥

सामर्थ्याद्विभाषितकप्प्रसङ्गाभावाच्छेषादेव कब्विकल्पविज्ञानात्। तथापि विचारमात्रं क्रियते। अनृच इति। ऋगन्तात्स-
विहित इति शेषत्वात्पक्षे परत्वात्कप्प्रसङ्गः। कब्भावपक्षेऽस्त्वकारस्यावकाशः समासान्तस्य च। विशेष एतदिति। तत एव वि-
शेषविषयाद्वचनादत्र कन्न भविष्यतीत्यर्थः। तस्मिन्क्रियमाणेपीति। अक्रियमाणे स्त्रीग्रहणे कुण्डोध्नीत्यत्र पक्षे परत्वात्क-
प्प्राप्नोति। क्रियमाणेपि स्त्रीग्रहणे तस्य पुंनपुंसकनिवृत्त्यर्थत्वात् पक्षे परत्वात्कपः प्रसङ्ग एव। एतच्चोदाहरणमात्रम्। उपदशादि-
षु पक्षे कप्प्रसङ्गात्। नैव कबपेक्षमिति। शेषग्रहणानर्थक्यप्रसङ्गात्। यस्माद्धि नित्यः कब्विहितस्तस्माद्विभाषा न प्राप्नोतीति विरो-
धादिति पूर्वोक्तन्यायात्। समासान्तापेक्षमपि न भवति। अनृक्कं बह्वृक्कमित्यत्र कपोऽप्रसङ्गात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनन्तरे बहुव्रीह्यधिकार इति। एवं चोधसो नङित्यनन्तरे बहुव्रीह्यधिकारे नङो विधानात्कुण्डोध्नीत्यादौ लिङ्गं कस्मभवति। कथमनृच इति। बहुव्रीह्यधिकारात्प्रागकारविधानाच्छेषलात्पक्षे कप्प्रसङ्गः। वक्तव्यमेवैतदिति। यद्येवं समासान्तापेक्षे विशेषत्वे ऋचबह्वृचयोर्विशेषवचनादन्यत्रानृक्कबह्वृक्कयोः पक्षे कपः सिद्धत्वात्कस्यचिद्दोषस्याप्रसङ्गात्किमर्थमनन्तरबहुव्रीह्यधिकारापेक्षः शेष आश्रीयते। बहुव्रीह्यधिकारात्त्वतत्पुरुषादिभ्यः कपो प्रसङ्गः। किं चोपदशाद्यादौ पक्षे कप्प्राप्नोति। अनन्तरे बहुव्रीह्यधिकारे डचो विधानात्तथा प्रियपथ प्रियधुर इत्यत्रापि प्राप्नोति। तस्मात्समासापेक्षमेव शेषत्वमाश्रयणीयमिति विन्त्यमेतद्भाष्यम्॥ ईय॥ उपसर्जनदीर्घत्वमिति। ह्रस्वापवादो दीर्घत्वं विधेयम्। पुंवद्वचनादि

अनन्तरे बहुव्रीह्यधिकारे यस्माद्बहुव्रीहेः समासान्तो न विहित इति। कथमनृचो बह्वृच इति। वक्तव्यमेवैतत्। अनृचो माणवो बह्वृचश्चरणाख्यामिति। ईयसश्च॥ ईयस उपसर्जनदीर्घत्वं च। ईयस उपसर्जनदीर्घत्वं चेति वक्तव्यम्। बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी विद्यमानश्रेयसी। पुंवद्वचनात्सिद्धम्। पुंवद्वचनात्सिद्धमेतत्। पुंवद्भावोऽत्र भवति। ईयसो बहुव्रीहौ पुंवद्वचनमिति॥ इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये पञ्चमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम्॥ पञ्चमोऽध्यायः समाप्तः॥

ति। गोस्त्रियोरुपसर्जनस्येति ह्रस्वः प्राप्तः पुंवद्भावेन निवर्त्यते। यथा पुंविषयस्यैकारस्य ह्रस्वो न भवति। एवमीयसः परस्येति ग्रहणं भवति। बहुश्रेयसीत्यत्र हल्ङ्यादिलोपे विवदन्ते। केचिदाहुः। हल्ङ्यादिलोपेन न भाव्यम्। ङ्याब्ग्रहणात् स्त्रीप्रत्ययग्रहणात् स्त्रीप्रत्यये चानुपसर्जने तदादिनियमाभावादत्रोपसर्जनत्वान्ङीपस्तदादिनियमाद्धल्ङ्यादिलोपस्य प्रसङ्गाभावात्। अन्ये त्वाहुः। दीर्घग्रहणं तत्र ह्रस्वनिरसार्थं कृतम् अतिखट्व इत्यत्र लोपो माभूदिति। यदि चोपसर्जने तदादिनियमः स्यात्तदा ह्रस्वाल्लोपस्य प्रसङ्गाभावात्तद्व्यावृत्तये दीर्घग्रहणं न कुर्यात् कृतं तु यथेष्टमुपसर्जनादपि दीर्घाल्लोपं ज्ञापयतीति बहुश्रेयसीति सिद्धमिष्टम्॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे पञ्चमोऽध्यायः॥

CC-0. In Public Domain. Digitization by eGangotri

॥ विद्योदयो निराकुर्याद् अविद्या तिमिरं सदा ॥

॥ अथ षष्ठाध्यायः प्रारभ्यते ॥

॥ सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः॥ एकाचोद्वे प्रथमस्य॥ एकाचइतिकिमयमिति। निर्देशस्यसमानत्वाद्भिन्नार्थत्वाच्च एकवचननिर्देशाच
द्वयोर्युगपदाश्रयितुमशक्यत्वाद्धलादिः शेषइत्यादेर्बहुव्रीहिलिङ्गस्यदर्शनाद्दीर्घइणः किती तितत्पुरुषलिङ्गोपलम्भा
त्स्वरस्यदुरवधारणत्वादेकश्रुत्यावासूत्रपाठात्स्वरानिश्चयाभावात्प्रश्नः। बहुव्रीहितत्पुरुषयोर्विग्रहप्रदर्शनंविरुद्धार्थप्रति
पादनार्थम्। नहिसंज्ञाभेदमात्राद्दोषः। किंतुविरुद्धार्थप्रतिपादनात्। किंचातइति। द्वयोर्विशेषंपृच्छति। सिद्धंपपाचेति। प्रथम
त्वाभावेपिव्यपदेशिवद्भावाद्वक्ष्यमाणयोगविभागाद्वा बहुव्रीहिपक्षेपचेर्द्विर्वचनंसिद्ध्यतिनतुतत्पुरुषपक्षे। बहुव्रीहिनिर्दे
शइति। बहुव्री हेर्निर्देशउच्चारणंबहुव्रीहिणावार्थस्यनिर्देशः प्रतिपादनमित्यर्थः। व्याप्तिन्यायाश्रयेणबहुव्रीहिराश्रीयते। वक्ष्य

श्रीगणेशायनमः॥ एकाचोद्वे प्रथमस्य॥ एकाचइतिकिमयंबहुव्रीहिः। एकोऽच्यस्मिन्सएकाच् एका
चइति। आहोस्वित्तत्पुरुषोयंसमानाधिकरणः। एकोऽच्एकाच्एकाचइति। किंचातः यदिबहुव्रीहिः। सिद्धं
पपाचपपाठइयायआरेति नसिद्ध्यति। अथतत्पुरुषः समानाधिकरणः। सिद्धमियायआरेति। पपाचपपाठे
तिनसिद्ध्यति। अतउत्तरंपठति। एकाचोद्वेप्रथमस्येतिबहुव्रीहिनिर्देशः। एकाचोद्वेप्रथमस्येतिबहुव्रीहिनि
र्देशोयम्। एकवर्णेषुचकथम्। एकवर्णेषुव्यपदेशिवद्वचनात्। व्यपदेशिवदेकस्मिन्कार्यंभवतीतिवक्तव्य
म्। एवमेकवर्णेषुद्विर्वचनंभविष्यति। एकाचोद्वेभवतइत्युच्यते। तत्रनज्ञायतेकस्यैकाचोद्वेभवतइति। वक्ष्य
तिलिटिधातोरनभ्यासस्येति। तेनधातोरेकाचइतिविज्ञायते। यदिधातोरेकाचइतिसिद्धंपपाचपपाठ ॥

माणव्यपदेशिवद्भावात्तत्पुरुषफलस्यबहुव्रीहिणाकृतत्वादतएवप्रयोजनाभावात् तन्त्रावृत्त्येकशेषाणामन्यतमाश्र
यणंलिङ्गमप्यनेकंबहुव्रीहेरस्तिहलादिः शेषः शर्पूर्वाः खयः लिड्यभ्यासस्योभयेषामितिअज्मात्रस्यद्विर्वचनेऽभ्यासस्य
हलभावाच्छेषसंप्रसारणाद्ययोगात्। एकवर्णेषुचेति। मुख्यएकाज्व्यपदेशोयेषांतेव्यपदेशिनः पचादयस्तेयथाद्विर्वच
नंप्रतिपद्यन्तेतथैकवर्णाअपि। कस्यैकाचइति। विधिंमत्वाविशेषानुपादानात्पृच्छतिवक्ष्यतीति। नायंविधिः। किंतर्हिअ
धिकारइत्यस्यातन्त्र्यादस्योत्तरवाक्येष्वर्थविशेषस्यव्यवस्थानम्। धातोरेकाचइति। वैयधिकरण्येनसंबन्धोभिमतोधातोर
वयवस्यैकाचइत्यर्थः। इतरस्तुसामानाधिकरण्येनसंबन्धंमत्वाह। यदिधातोरिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैषेति। सर्वानुग्रहायवैयधिकरण्यसमाश्रीयते। तस्मिन्ननेकविषयत्वाल्लक्षणस्य। प्रथमग्रहणात्सामानाधिकरण्येचव्यवच्छेद्याभावात्प्रथमग्रहणमनर्थकं स्यात्। यत्रैव प्रथमश्चेति। प्राथम्यस्यद्वितीयापेक्षत्वात्। अवचनादिति। वचनरहितंयल्लोकविज्ञानंवचनेनानिबद्धंलोकव्यवहारात्मकंतस्मात्सिद्धमित्यर्थः। तथाहि। लोकेशिलापुत्रकस्यशरीरमितिबहिर्वस्तुभेदेऽसत्यपिभेदस्यव्यवहारोऽवस्थाभेदाश्रयोदृश्यते। शिलापुत्रः क्रीयमाणविक्रीयमाणत्वाद्यनेकावस्थायुक्तो यो दृष्टस्तस्येदंशरीरमितिपरिदृश्यमानावस्थाभेदेननिर्दिश्यते। एकमेवहिवस्तु तदेवेदमितिप्रत्यभिज्ञानादेकत्वप्रत्ययः। तदप्यवस्थाभेदान्नानारूपमाभाति। तथाहन्त्यात्मानमात्मनेत्येकस्यापिबुद्ध्यवस्थापितावस्थाभेदाश्रयःकर्तृकर्मकरण

जजागारपुपुत्रीयिषतीतिनसिद्ध्यति। धातोरितिनैषैकाच्समानाधिकरणाषष्ठीधातोरेकाचइति। किं तर्हि अवयवयोगेषाषष्ठीधातोर्यएकाजवयवइति। अवयवयोगेषाषष्ठीचेत्सिद्धं जजागार। पुपुत्रीयिषतीति। पपाचपपाठेतिनसिद्ध्यति। एषोपिव्यपदेशिवद्भावेनधातोरेकाजवयवइतिभवति। एकाचोद्वेप्रथमस्येत्युच्यते तेन यत्रैव प्रथमश्चास्तितत्रद्विर्वचनंस्यात्। जजागारपुपुत्रीयिषतीति। पपाचपपाठेत्यत्रनस्यात्। प्रथमत्वेच। प्रथमत्वेचकिम्। व्यपदेशिवद्भावात्सिद्धमित्येव। सतर्हिव्यपदेशिवद्भावोवक्तव्यः॥ नवक्तव्यः। उक्तंवा। किमुक्तम्। तत्रव्यपदेशिवद्वचनमेकाचोद्वेप्रथमार्थम्षत्वेचादेशसंप्रत्ययार्थम्। नैषदोषः। अवचनाल्लोकविज्ञानात्सिद्धमित्येव ॥

भावः। इयायेत्यत्रापिप्रयोगभेदादेतिइतोयन्तिआयन्। जिगमिषतिइत्याद्यनन्तरूपस्येणएकोयमिकारोऽजितिव्यपदिश्यते। अथवान्वयव्यतिरेकाभ्यांपरिकल्पितार्थत्वाच्छब्दार्थसमुदायस्याविवक्षितार्थएकोवर्णोऽजितिव्यपदिश्यते। एवंपचेरनन्तप्रयोगंविषयस्यप्रयुज्यमानंलिडादिपरंरूपमवयवइतिव्यपदिश्यते। प्रथमव्यपदेशोपिप्रयोगभेदादेवेतिप्रथमगर्भेणहतेत्यादिलोकेव्यवहारएकस्मिन्नपिदृश्यते। असतोपिद्वितीयादीन्बुद्ध्यापरिकल्प्यव्यवहारान्मुख्यप्रथमसाधर्म्याद्वा। प्रसिद्धत्वाच्चैवंविधस्यव्यवहारस्यनास्तिगौणत्वम्। सत्यपिगौणत्वेलिङ्भ्यासस्योभयेषांदीर्घइणः कितीत्यादेर्ज्ञापकाद्भवतिशास्त्रीयकार्यप्रवृत्तिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगविभागो वेति। तेन प्राथम्यार्थोऽव्यपदेशिवद्भावो नाश्रयितव्यः। तत्र हि योगविभागसामर्थ्याल्लिटि धातोरनभ्यासस्येत्यादावेकाच इति प्रथमस्येति च वाक्यभेदेन संबध्यते। एकवाक्यतायां तस्यैव दोषस्य प्रसङ्गात्। तस्मादेतस्माद्ग्रहणकवाक्यात् प्रक्रियावाक्यानि लक्ष्यसंस्कारकाणि उपप्लवन्ते। धातोरवयवस्यैकाचो द्वे भवत इत्येकं वाक्यम्। धातोः प्रथमस्यैकाच इति नियमार्थं द्वितीयम्। अजादेर्धातोर्द्वितीयस्यैकाच इति तृतीयम्। एकाच इति। अवयवावयवोऽप्येकाचः। समुदायोऽपि व्यपदेशिवद्भावाद्धातोरवयवश्चातः तो विशेषानुपादानात्सर्वेषां द्विर्वचनप्रसङ्गः। निजशब्दोऽपीति। यथा येनैव हस्तेन बाहुर्हस्तवानुच्यते तेनैव देवदत्तोऽपि। एवमिकारेण सर्व एकाज्व्यपदेशभाज इति भावः। इकारोऽपीति। व्यपदेशिवद्भावादिति भावः। अर्थवता व्यपदेशिवद्भाव इत्यनाश्रित्येकारोऽपीत्युक्तम्। नह्येतद्वचनमपि तु न्यायः। अर्थवतो भेदकस्यासंभवादनर्थकोऽपि। यदि भेदेनाश्रयितुं शक्यते तत तस्यापि भवत्येव व्यपदेशिवद्भावः। शक्यते चैकारोऽप्यनेकसमुदायान्तर्भावान्नानारूपवदुपलभ्यमानेन रूपेणैकाजिति व्यपदेष्टुम्। नन्वर्थवत्समुदा

योगविभागो वा एकाज्मात्रस्य द्विर्वचनार्थः। अथवा योगविभागः करिष्यते। एकाचो द्वे भवतः। किमर्थं योगविभागः। एकाज्मात्रस्य द्विर्वचनार्थः एकाज्मात्रस्य द्विर्वचनं यथा स्यात्। इयाय पपाच। ततः प्रथमस्य प्रथमस्यैकाचो द्वे भवतः। इदमिदानीं किमर्थम्। नियमार्थम्। यत्र प्रथमश्चाप्रथमश्चास्ति तत्र प्रथमस्यैवैकाचो द्विर्वचनं यथा स्यात्। अप्रथमस्य मा भूदिति। जजागार पुपुत्रीयिषतीति। एकाचोऽवयवैकत्वादवयवानां द्विर्वचनप्रसङ्गः। एकाचोऽवयवैक[त्वा]त्वादवयवानां द्विर्वचनं प्राप्नोति। नेनिजतीत्यत्र निजशब्दोऽप्येकाच्। इजशब्दोऽप्येकाच्। इकारोऽप्येकाच्। निशब्दोऽपि ॥

यस्यैव द्विर्वचनं भविष्यति नावयवानामनर्थकानाम्। नैतदस्ति। यत्र विशिष्टं शब्दस्वरूपमुपादीयते तत्रार्थवत्परिभाषोपतिष्ठते। यथा गोरित्यत्र। अन्यथाऽर्थवद्धातुरित्यत्रार्थवद्ग्रहणमनर्थकं स्यात्। अधातुरप्रत्यय इति पर्युदासाश्रयणात्तत्सदृशशब्दग्रहणादर्थवत्परिभाषोपस्थानादनर्थकस्याग्रहणाप्रसङ्गाद्धातोरवयवस्यैकाच इत्यवयवत्वेनाश्रयणाच्चानर्थकस्याप्यङ्गीकरणात्तसौ हि तत्परिभाषोपस्थानम्। अत्र च पर्यायेण सर्वेषां द्विर्वचनप्रसङ्गश्चोद्यते। न तु युगपत्। न ह्येकोऽवयवो युगपदनेकस्यावयविनोऽवयवत्वेन शक्योऽपेक्षितुमवय च स्वगुणत्वात्परार्थत्वादेकं प्रति गुणभावादपरं प्रति गुणभावायोगात्पर्यायेण त्वपेक्षाया अविरोधात्सर्वप्रसङ्ग उच्यते। एकस्यैवैकाचो द्विर्वचने कृते एकाज्व्यपदेशहेतोरचोऽपि द्विरुक्तत्वात्तस्मिन्नेव प्रयोगेऽपरस्यैकाचो द्विर्वचनाप्रसङ्गः। प्रवृत्तत्वाल्लक्षणस्य। तस्मात्प्रयोगान्तरे पर्यायेण सर्वेषां द्विर्वचनप्रसङ्गः ॥ राम॰ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इज्शब्दस्येति। इकारस्य लघूपधगुणे सत्यभ्यासस्यासवर्ण इति ईकारस्य इयङि नियेजेति रूपं स्यात्। इकारस्यापि द्विर्वचन एतदेव रूपम्। दोषा अपि न सन्तीति। रूपासिद्धेरन्यस्य जुस्भावाद्यसिद्धिदोषस्याप्रसङ्गात्। स्वरविधौ व्यञ्जनस्याविद्यमानत्वात् स्वरसिद्धिरिति चेन्न। हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवदित्येवव्यवस्थापनात्। यत्परिवेविषतीति। यच्छब्दप्रयोगो निपातैर्यद्यदीति निघातप्रतिषेधार्थः। शास्त्रहानिश्चेति। एकस्मिन्नेकाच्यवयवे द्विरुच्यमाने पूर्वोक्तेन न्यायेनान्येषां तस्मिन्नेव

तत्र निज्शब्दस्य द्विर्वचने रूपं सिद्धम्। दोषाश्च न सन्ति। इज्शब्दस्य द्विर्वचने रूपं न सिध्यति। दोषा अपि न सन्ति। इकारस्य द्विर्वचने रूपं न सिद्ध्यति। दोषाश्च सन्ति। निशब्दस्य द्विर्वचने रूपं सिद्धम्। दोषास्तु भवन्ति। तत्र को दोषः। तत्र जुस्भावः वचनम्। तत्र जुस्भावो वक्तव्यः॥ अनेनिजुः पर्यवेविषुः। अभ्यस्तात्झेर्जुस् भवतीति। जुस्भावो न प्राप्नोति जकारेण व्यवधानात्। स्वरश्चो स्वरश्च न सिध्यति। नेनिजति यत्परिवेविषतीति। अभ्यस्तानामादिरुदात्तो भवतीत्यजादौ लसार्वधातुक इत्येष स्वरो न प्राप्नोति। अड्भावश्च। अड्भावश्च न सिध्यति। नेनिजति। परिवेविषतीति। अदभ्यस्तादित्यद्भावो न प्राप्नोति। नुम्प्रतिषेधश्च। नुम्प्रतिषेधश्च न सिद्ध्यति। नेनिजत्। परिवेविषत्। नाभ्यस्ताच्छतुरिति नुम्प्रतिषेधो न प्राप्नोति। जकारेण व्यवधानात्। शास्त्रहानिश्च। शास्त्रहानिश्च भवति। समुदायैकाचः शास्त्रं हीयते। सिद्धं तु तत्समुदायैकाच्त्वात् शास्त्राहानेः। सिद्धमेतत्। कथम्। तत्समुदायैकाच्त्वात्। किमिदं तत्समुदायैकाच्त्वादिति। तस्य समुदायस्तत्समुदायः। एकाज्भाव एकाच्त्वम्। तत्समुदायस्यैकाच्त्वं तत्समुदायस्यैकाच्त्वादिति। तत्समुदायैकाचो द्विर्वचनं भविष्यति। कुत एतत्। शास्त्राहानेः। एवं हि शास्त्रमहीनं भवति। ननु च समुदायैकाचो द्विर्वचने क्रियमाणे अवयवैकाचः शास्त्रं हीयते। न हीयते। किं कारणम्। अवयवात्मकत्वात्समुदायस्य। अवयवात्मकः समुदायः। अभ्यन्तरो हि समुदाये अवयवः। तद्यथा। वृक्षः प्रचलन्सहावयवैः प्रचलति ॥

प्रयोगे वयवान्तराणां द्विर्वचनाभावात्तद्विषयं शास्त्रं त्यक्तं स्यात्। सिद्धं त्विति। समुदाये द्विरुच्यमानेऽवयवानामपि तत्रान्तर्भावाद्द्विर्वचनसंबन्धान्न कस्मिंश्चिच्छास्त्रे हीनमित्यर्थः। नन्विति। शास्त्रेण साक्षात्समुदाय एवानुगृहीतः स्यात्। न त्ववयवा इति प्रश्नः। न हीयत इति। यद्यपि समुदाये द्विरुच्यमाने साक्षादवयवेषु शास्त्रं न प्रवृत्तं तथापि शास्त्रीयफलसंपत्त्या शास्त्राहानिरुच्यते। अवयवे तु द्विरुच्यमाने तस्मिन्प्रयोगेऽवयवान्तराणां समुदायस्य च शास्त्रीयफलसंबन्धाभावाद्धीनमेव शास्त्रं स्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनक्तस्येति। एकस्य वाऽनेकस्य वा हल एव द्विर्वचनप्रसङ्गः। तद्यथेति। चित्रगु शब्दस्यान्यपदार्थ एव वाच्यो न तु वर्तिप
दार्थ इति न तस्य कार्येण सम्बन्धः। सिद्धं त्विति। तस्यान्यपदार्थस्य गुणो विशेषणं तस्य संविज्ञानं स वर्तिपदार्थो गुणो वा यस्य
न्यस्य पदार्थस्य तस्य संविज्ञानम्। संनिहितविशेषणस्यान्यपदार्थस्य विशिष्टसंबन्धाश्रयेण केन चिद्बहुव्रीहिणाभिधाना
दित्यर्थः। शुक्लवाससमिति। सत्यपि स्वस्वामिभावे वासःसंयोगाश्रयो बहुव्रीहिरिति। शुक्लवासःसंयुक्तपुरुषानयने पृथग
चोदितान्यपि वासांसि सामर्थ्यादानयनेन संबध्यन्ते। इह तु यः शुक्लवासा दृश्यते तमानयेति दर्शनक्रियायां वासांस्युपलक्ष
णत्वेनोपात्तानि। तथा च तानि प्रयुक्तान्येव दर्शनक्रियात्वानयनक्रियोपलक्षणत्वेन निर्दिष्टेति नावश्यं तत्र शुक्लानां वाससां सं
विज्ञानम्। चित्रगुशब्दस्तु स्वस्वामिभावविशिष्टमन्यपदार्थमाहेति नास्त्यानयने वर्तिपदार्थसंनिधानम्। इह तु एको च्य

तत्र बहुव्रीहिनिर्देशे अनक्तस्य द्विर्वचनमन्यपदार्थत्वात्। तत्र बहुव्रीहिनिर्देशे अनक्तस्य द्विर्वचनं प्राप्नो
ति। आटतुः। आटुः। किं कारणम्। अन्यपदार्थत्वाद्बहुव्रीहेः अन्यपदार्थे बहुव्रीहिर्वर्तते। तेन यदन्यदचस्त
स्य द्विर्वचनं स्यात्। तद्यथा। चित्रगुरानीयतामित्युक्ते यस्य गावः सन्ति स आनीयते न गावः। सिद्धं तु तद्गुणसं
विज्ञानात्पाणिनेर्यथा लोके। सिद्धमेतत्। कथम्। तद्गुणसंविज्ञानाद्भगवतः पाणिनेराचार्यस्य यथा लोके तद्
यथा लोके शुक्लवाससमानय लोहितोष्णीषाः ऋत्विजः प्रचरन्तीति तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति। ए
वमिहापि। अथ यस्य द्विर्वचनमारभ्यते। किं तस्य स्थाने भवति। आहोस्विद्द्विःप्रयोग इति ॥

स्य सस्काजिति विशिष्टावयवोपलक्षितस्यावयविनोऽन्यपदार्थत्वादपरित्यागेनावयविनोऽभावात्तस्य कार्ये विधीयमानं त
त्रान्तर्भावात्तं निहितोऽवयव उपलक्षणभावेनाप्युपादीयमानः प्रतिपद्यते। अथ यस्येति। सोपस्कारत्वात्सूत्राणां तन्निबन्ध
नानि लक्ष्यसंस्कारकाणि वाक्यान्तराण्युप प्लवन्ते। तत्र द्वेद्वत्येतत्संख्येये वर्तते। तच्च संख्येयं शब्दानामन्वाख्येयत्वेन प्र
स्तुतत्वाच्छब्दरूपं वा स्यात्तत्संबन्धि वोच्चारणम्। तत्र यदा शब्दरूपं संख्येयं तदैकाच इति स्थानेयोगा षष्ठी षष्ठीस्थानेयो
गेति परिभाषोपस्थानात्तदा स्थाने द्विर्वचनमित्येष पक्षो भवति। यथास्तेर्भूरिति। यदा तूच्चारणं संख्येयं तदा तस्य क्रियारूपत्वात् क्रियायाः
शब्दस्य च स्थान्यादेशभावायोगादेकाच इति कर्मणि षष्ठी विज्ञायते। उच्चारणशब्दाध्याहारेण वा शेषलक्षणा वा यथा मातुः स्म
रतीति। द्विःप्रयोगो द्विर्वचनमित्येष पक्षो भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रगुणदोषपरीक्षार्थोविचारःक्रियते। आटिटदिति। प्रागुद्विर्वचनंभवति। द्विर्वचनंयणयवायावेकादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्यइति। अथवाकृतेयणिलोपेद्विर्वचनेचीतिरूपस्यानिवद्भावात्कृताकृतप्रसङ्गित्वान्नित्यत्वाद्द्विर्वचनम्। तच्चैकस्यटिशब्दस्यशब्दान्तरंसमुदायरूपमादेशस्तत्रणेरभावादिकारलोपाप्रसङ्गः। नचस्थानिवद्भावासिग्रहणेनादेशस्यग्रहणम्। नह्ययंणेरादेशः। किंतर्हिसमुदायस्यटिशब्दस्य। यत्रचद्वौस्थानित्वेन निर्दिष्टौयथैकः

कश्चात्रविशेषः। स्थानेद्विर्वचनेणिलोपवचनंसमुदायादेशत्वात्। स्थानिद्विर्वचनेणिलोपोवक्तव्यः॥ आटिटत्। आशिशत्। किंकारणम्। समुदायादेशत्वात्। समुदायस्यसमुदायआदेशः। तत्रसंप्रमुग्धत्वात्प्रकृतिप्रत्ययसमुदायस्यनष्टोणिर्भवतीतिणेरनिटीतिणिलोपोनप्राप्नोति। इदमिहसंप्रधार्यम्। द्विर्वचनंक्रियतांणिलोपइति। किमत्रकर्तव्यम्। परत्वाण्णिलोपः। नित्यद्विर्वचनंकृतेपिणिलोपेप्राप्नोत्यकृतेपि। द्विर्वचनमप्यनित्यम्। अन्यस्यकृतेलोपेप्राप्नोत्यन्यस्याकृते। शब्दान्तरस्यचप्राप्नुवन्विधिरनित्योभवति। नित्यमेवद्विर्वचनम्। कथम्। रूपस्यस्थानिवत्वात्। यच्चसन्यङन्तस्यद्विर्वचने। यच्चसन्यङन्तस्यद्विर्वचनेचोद्यंतदिहापियोज्यम्। किंपुनस्तत्। सन्यङन्तस्येतिचेदशेः सन्यनिटःदीर्घकुत्वेसंप्रसारणषत्वमधिकस्यद्विर्वचनात्। आरब्धोश्चाभ्यस्तविधिप्रतिषेधः॥ सन्यङाश्रयेचसमुदायादेशत्वात्। झलाश्रयेवाव्यपदेशआसिद्धत्वादिति। अस्तुतर्हिद्विःप्रयोगोद्विर्वचनम्। द्विष्प्रयोगोद्विर्वचनमितिचेत्सकारषकारादेशादेरेत्ववचनम्। लिटिद्विष्प्रयोगइतिचेत्सकारषकारादेशादेरेत्वंलिटिवक्तव्यम् ॥

पूर्वपरयोरिति। तत्रान्यतरेणादेशस्यव्यपदेशोभवति खट्वर्श्यइति। इहतुसमुदायेणिरन्तर्भूतत्वाद्आदेशेनसंबध्यतेनतुसाक्षादित्यविषयोयंस्थानिवद्भावस्य। अनित्यंद्विर्वचनमिति। द्विर्वचनेऽचीतिकार्यंस्थानिवद्भावंमन्यते। अशेःसन्यनिटइत्यादिसन्यङोरित्यत्रव्याख्यास्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेमतुरिति। णो नइति नत्वे कृते धातु एदेशादिर्भवति। ततो द्विष्प्रयोगेप्यादेशादित्वं नन्यावर्त्तते। स्थाने द्विर्वचने तु शब्दान्तरत्वादादेशादित्वाभावः। आदेशादित्वपदेशस्य चात्रालाश्रयत्वात्स्थानिवत्वाभावः। लिटीति। सत्वनत्वयोर्नैमित्तिकत्वाल्लिण्निमित्तत्वाभावः। बेभिदितेति। बेभिद्यशब्दात्त जल्लोपयलोपयोः कृतयोरिट्प्रतिषेधः प्राप्नोति। पूर्वस्मादपि विधौ स्थानिवद्भावद्स्यनाश्रित्य चोद्यप्रतिसमाधाने। एकाचोङ्गादिति। उपदेशग्रहणे नानुदात्त एव विशेष्यते नत्वेकाजिति भावः। आवृत्तिसंख्य

नेमतुः। नेमुः। सेहे। सेहाते। सेहिरे। अनादेशादेरिति प्रतिषेधः प्राप्नोति। स्थाने द्विर्वचने सति समुदायस्य समुदाय आदेशः। तत्र संप्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टः स आदेशादिर्भवति। द्विष्प्रयोगे चापि द्विर्वचने सति न दोषः। वक्ष्यति तत्र लिङ्ग्रहणस्य प्रयोजनम्। लिटि य आदेशादिस्तदादेर्नेति। इड्वचनं च यङ्लोपे। इड्भावश्च यङ्लोपे वक्तव्यः। बेभिदिता। बेभिदितुम्। एकाच उपदेशेनुदात्तादितीट्प्रतिषेधः प्राप्नोति। स्थाने पुनर्द्विर्वचने सति समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टः स भवति य एकाजुपदेशेनुदात्तः। द्विष्प्रयोगे चापि द्विर्वचनेन दोषः। एकाज्ग्रहणे नाङ्गं विशेषयिष्यामः। एकाचोङ्गादिति। ननु चैकैकमत्राङ्गम्। समुदाये यां वाक्यपरिसमाप्तिस्तयाङ्गसंज्ञा भविष्यति। कुत एतत्। शास्त्राहानेः। एवं हि शास्त्रमहीनं भवति। इड्दीर्घप्रतिषेधश्च। इटो दीर्घत्वस्य च प्रतिषेधो वक्तव्यः। जरीगृहिता। जरीगृहितुम्। ग्रहो लिटि दीर्घ इति दीर्घत्वं प्राप्नोति। स्थाने पुनर्द्विर्वचने समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टो ग्रहिः। द्विष्प्रयोगे चापि द्विर्वचनेन दोषः। ग्रहिणाङ्गं विशेषयिष्यामः। ग्रहेरङ्गादिति। ननु चैकैकमप्यत्राङ्गम्। समुदाये यां वाक्यपरिसमाप्तिस्तयाङ्गसंज्ञा भविष्यति। कुत एतत्। शास्त्राहानेः। एवं हि शास्त्रमहीनं भवति। पदादिविप्रतिषेधश्च। पदादिलक्षणविधेः प्रतिषेधो वक्तव्यः ॥

या चैतद्ध्यजङ्गं नैकाच्। ननु चैकैकमिति। एकमेव द्विरुच्यत इत्येकस्माद्यः प्रत्ययविधिः सोपरस्मादपीति द्वे अङ्गे भवतस्तत्र परस्य देकाजङ्गं तदाश्रय इट्प्रतिषेधः प्राप्नोतीत्यर्थः। आवृत्तिसंख्याश्रया चैकैकमिति वीप्सा। समुदाय इति। एकैवाङ्गसंज्ञा समुदायस्य न पृथगवयवयोः समुदायस्य प्राधान्यात् प्रधाने कार्यसंप्रत्ययात् समुदायव्यवहारो व्यावृत्तिसंख्याश्रयः। जरीगृहितेति। जरीगृह्यशब्दात्तृच्। ग्रहिणाङ्गमिति। अत्रत चो जरीगृही त्यङ्गं न तु ग्रहिः। विशेषणसामर्थ्याद्धि यथाश्रुतरूपाङ्गीकरणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिषेचेति। सिचेर्लिड्विहितइतिलिङन्तंपदमितितदादेरेवपदत्वात्सदादिः सकारइतिषत्वप्रतिषेधप्रसङ्गः। प्रकृतिप्रत्ययस्येति। प्रत्ययोज्ञानम्। प्रकृतिविज्ञानस्येत्यर्थः। अथवा प्रकृतेः प्रत्ययस्य चेत्यर्थः। तावेवेति। परिहारान्तरम्। उच्चारणक्रियाया एव द्वित्वं न तूच्चार्यमाणस्य शब्दस्य। ततश्चैकस्मादेवप्रत्ययविधिः। न तु द्वाभ्यामित्येकैवाङ्गसंज्ञापदसंज्ञा चेति नास्ति दोषः। आदिग्रहणं चेति। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणं भवतीत्यत्र। समुदायपदत्वमिति। सिषेच शब्दस्य पदसंज्ञा न तु सेच शब्दस्य तदवयवस्य। नन्वेवं बेभिदितेति स एवेकाज्धातुरिती ट्प्रतिषेधः प्राप्नोति। नैष दोषः। उच्चारणभेदाद्द्विरोधिसंख्याप्रादुर्भावात्पूर्वसंख्याकृतव्यपदेशनिवर्तनात्। तथा च क्रिरिणेत्या

सिषेच। सुष्वाप। सात्पदाद्योरिति षत्वप्रतिषेधः प्राप्नोति। स्थाने पुनर्द्विर्वचने सति न दोषः। समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः सपदादिर्भवति। द्विःप्रयोगे चापि द्विर्वचने न दोषः। सुप्तिङ्स्यां पदं विशेषयिष्यामः। सुप्तिङन्तं पदम्। यस्मात्सुप्तिङ् विधिः तदादि सुबन्तं तिङन्तं च। ननु चैकैकस्मादप्यत्र सुप्तिङ्विधिः। समुदाये चावाक्यपरिसमाप्तिः तया पदसंज्ञा भविष्यति। कुत एतत्। शास्त्राहानेः। एवं हि शास्त्रमहीनं भवति। तावेव सुप्तिङौ यौ ततः परौ सैव च प्रकृतिराद्या। आदिग्रहणं च कृतं समुदायपदत्वमेतेन॥ अजादेर्द्वितीयस्य॥ द्वितीयस्येत्यवचनमजादेरिति कर्मधारयात्पञ्चमी। द्वितीयस्येति शक्यमवक्तुम्। कथम्। अजादेरिति नैषा बहुव्रीहेः षष्ठी। अज् आदिर्यस्य सोयमजादिः अजादेरिति। किं तर्हि कर्मधारयात्पञ्चमी अच् आदिः अजादिः अजादेः परस्येति। तत्रान्तरेण द्वितीयग्रहणं द्वितीयस्यैव भविष्यति। तत्र द्वितीयद्विर्वचने प्रथमनिवृत्तिः

दौ सावेकाचइति विभक्तेरुदात्तत्वं न भवति। तदत्रावृत्तिभेदाद्रूपद्वयमाश्रित्य समुदाये वाक्यपरिसमाप्तिरिति परिहार उक्तः। रूपभेदानङ्गीकरणे तु तावेव सुप्तिङाविति द्वितीयः परिहारः॥ अजादेः॥ द्वितीयस्येति शक्यमवक्तुमिति। अजादेरिति बहुव्रीहिपक्षे सामर्थ्याद्प्रथमार्थेऽप्रारम्भे विज्ञायमाने तृतीयानामप्येकाचां द्विर्वचनप्रसङ्गाद्द्वितीयस्येति वक्तव्यम्। कर्मधारयपक्षे त्वजादेरिति पञ्चमीनिर्देशात्तस्मादित्युत्तरस्येति परिभाषोपस्थानादनन्तरस्यैव कार्येण भाव्यं न व्यवहितस्येति नार्थो द्वितीयग्रहणेन। तत्र व्याख्यानात्स्वपदार्थप्रधानत्वादन्तरङ्गत्वाद्वा कर्मधारय एवाश्रयितव्य इति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तत्वादिति। यद्यपि सत्यामेव प्राप्तौ निवृत्तिरुच्यते न त्वसत्यां तथापि विशिष्टा प्राप्तिरिह हेतुत्वेन विवक्षिता प्राप्तेर्विघातका
भावादित्यर्थः। ननु चेति। येन नाप्राप्तिन्यायात्। कथमन्यस्येति। विरोधाद्बाध्यबाधकभावं मन्यते। यथाकाणोः। इह च वि
रोधाभावः। अविरोधे हि समुच्चयो दृश्यते। यथा कृत्कृत्यप्रत्ययसंज्ञानाम्। भिन्नफलत्वात्संज्ञानां समुच्चय इति चेदिहाप्य
स्येव फलभेदः। एकेन प्रथमस्य द्विर्वचनविधानादजादेर्द्वितीयस्येत्यनेन तु द्वितीयस्य। नवेति। अनेनासंभवः प्रदर्श्यते।
यस्य द्वितीयस्यैकाचो द्विर्वचनं विधेयम्। तस्य प्रथमद्विर्वचने कृते द्वितीयत्वात् द्वितीयद्विर्वचनं न प्राप्नोतीत्यर्थः। ननु य
दि नियोगतः प्राक् प्रथमद्विर्वचनं स्यान्न तोऽयं विरोधः स्याद्यदा तु पूर्वं द्वितीयद्विर्वचनं तदा विरोधाभावात्स्यादेव प्रथम

प्राप्तत्वात्। द्वितीयद्विर्वचने प्रथमस्य निवृत्तिर्वक्तव्या॥ अटिटिषति। अशिशिषतीति। किं कारणम्। प्राप्तत्वा
त्। प्राप्नोत्येकाचो द्वे प्रथमस्येति। ननु च द्वितीयद्विर्वचनं प्रथमद्विर्वचनं बाधिष्यते। कथमन्यस्योच्यमान
मन्यस्य बाधकं स्यात्। असति खल्वपि संभवे बाधनं भवति। अस्ति च संभवो यदुभयं स्यात्। न वा प्रथमस्य
विज्ञाने हि द्वितीयाप्राप्तिरद्वितीयत्वात्। न वा वक्तव्यम्। किं कारणम्। प्रथमविज्ञाने हि सति द्वितीयस्या
प्राप्तिः स्यात्। किं कारणम्। अद्वितीयत्वात्। न हीदानीं प्रथमद्विर्वचने कृते द्वितीयो द्वितीयो भवति। कस्तर्हि।
तृतीयः। तद्यथा। द्वयोरासीनयोस्तृतीय उपजायमाने न द्वितीयो द्वितीयो भवति। कस्तर्हि। तृतीयः। न हि किंचि
दुच्यते अकृते द्विर्वचने यो द्वितीयस्तस्य भवितव्यमिति। किं तर्हि कृते द्विर्वचने यो द्वितीयस्तस्य द्विर्वचनं भविष्य
ति। अनारभ्यसममेवं स्यात्। अटेः प्रथमस्य द्विर्वचनं स्यात् हलादिः शेषः। द्वितीयस्य द्विर्वचनम्। हलादिः शेषः।

द्विर्वचनम्। नैतदस्ति। नित्यत्वात्प्राथम्यात्क्रमव्यतिक्रमहेत्वभावात्पूर्वं प्रथमद्विर्वचनं तत्र कृते द्वितीयत्वाद्द्वितीयद्विर्वच
नाप्रसङ्ग इत्यनवकाशत्वाद्द्वितीयद्विर्वचनेन प्रथमद्विर्वचनं बाध्यते। तद्यथेति। यदा द्वयोः पुरस्तान्मध्ये वा तृतीय उपजायते
तदायं दृष्टान्तो यदा तु परतः उपजायते तदा न भवति। न हि किंचिदिति। द्वितीयत्वनिर्देशात्। विशेषानुपादानात्। सामर्थ्यादत्र वि
शेष आश्रीयत इति मत्वाह। अनारभ्यसममिति। अटिस् इति स्थिते प्रथमद्विर्वचन मट् अट् हलादिः शेष इति टकारस्य निवृत्तिः। द्वि
तीयद्विर्वचनमट् अट्। ततो हलादिः शेषः तत्र द्वयोस्त्वसाणां वाऽकाराणां पररूपे विशेषाभावाद्द्वितीयद्विर्वचनमनर्थकं स्या
दित्यर्थः। हलादिः शेषो द्वितीयद्विर्वचनमित्ययं क्रमः कथं लभ्यते। विपरीतक्रमः कस्मान्न भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उच्यते। नित्यत्वात्पूर्वं हलादिःशेषो भवति द्वितीयद्विर्वचनं तु शब्दान्तरप्राप्त्याऽनित्यम्। तद्धि कृते हलादिःशेषेऽटः प्राप्नोति। अकृते तु टट्शब्दस्य। अन्तरङ्गत्वात्त्वतो गुण इति पररूपं सन्यतइतीत्वस्य बाधकं मन्यते। इत्वं हि सनमभ्यासं चापेक्ष्य तद् इति बहिरङ्गम्। प्रागभ्यासविकारेभ्योऽङ्गाधिकार इति पक्षे इत्वमाङ्गं न भवतीति वार्णादाङ्गं बलवदित्यपि नास्ति। सत्यपि चेत्वस्याङ्गत्वे नानाश्रयत्वादाङ्गवार्णयोरत्र परिभाषानुपस्थानमिति भावः। तस्मात्सामर्थ्यादकृते प्रथमद्विर्वचने यो द्वितीयस्तस्य द्विर्वचनेन भाव्यम्। स च प्रथमद्विर्वचने कृते द्वितीयो न भवतीति सामर्थ्यात्प्रथमद्विर्वचनं द्वितीयद्विर्वचनेन बाध्यते। कृतेऽपि प्रथमद्विर्वचने यो द्वितीयस्तस्य द्विर्वचनं नानर्थकमिति मत्वाह। नानारम्भसममिति। इत्वमिति। आसप्तमपरिसमाप्तेरङ्गाधिकारादाङ्गमित्वम्। सामान्येन च वार्णादाङ्गं बलवदित्याश्रीयते न समानाश्रयाङ्गवार्णविषयमेवेति इत्वमेव प्रवर्तते। न पररूपम्। तत्र कृते द्वितीयद्विर्वचनं प्राप्नोत्यभ्यासस्यासवर्ण इतीयङादेशश्च। तत्र नित्यत्वाद्द्वितीय

त्रयाणामकाराणां पररूपत्वे अटिषतीत्येतद्रूपं स्यात्। नानारम्भसममते: प्रथमस्य द्विर्वचनम्। हलादिःशेषः। इत्वम्। द्वितीयस्य द्विर्वचनम्। हलादिःशेषः। इत्वम्। इयोरिकारयोः सवर्णदीर्घत्वम्। अभ्यासस्यासवर्ण इतीयङादेशः। इयटिषतीत्येतद्रूपं यथा स्यात् ।

द्विर्वचनम्। इयङादेशो ह्यनित्यः। कृते द्वितीयद्विर्वचने नित्यत्वादित्वे चासवर्ण इति वचनादियङोऽप्रसङ्गात्। ननु परस्य कृतेऽपीत्वे तस्य स्थानिवद्भावात्पूर्वस्येयङ् प्राप्नोति। नैष दोषः। सवर्णे न भवतीति प्रसज्यप्रतिषेध आश्रीयते। सवर्णे च यो विधिः स सवर्णस्य विधिर्भवतीति सवर्णविधौ स्थानिवत्त्वप्रतिषेधादियङोऽप्रसङ्गात्। इयोरिकारयोरिति। अथ परस्येयङादेशः कस्मान्न भवति। अन्तरङ्गत्वात्पूर्वमेकादेशं मन्यते। एकादेशस्य त्वभ्यासह्रस्वत्वं विशेषाभावान्नोक्तम्। इयटिषतीति। अस्यामपि प्रक्रियायां नास्ति द्वितीयद्विर्वचने विशेषः। अकृतेऽपि तस्मिन्नेतद्रूपलाभात्। प्रथमद्विर्वचने कृते हलादिःशेषः इत्वमियङिति कार्यप्रवर्तनात् तत एवान्येषां ग्रन्थ इत्वं परस्येयङादेशो इयोरिकारयोः सवर्णदीर्घत्वाद् ईयटिषतीत्येतद्रूपं यथा स्यादिति युक्त एवायं ग्रन्थो वार्णादाङ्गं बलवदिति परस्येकारस्येयङभावं न त्वेकादेशेन। तस्मिन्कृते एकादेशस्तस्य त्वे त्वद्भावाद्ध्रस्वत्वं न भवति। नाभ्यासादीनां ह्रस्वत्वमित्यन्तादिवद्भावप्रतिषेधात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओणेश्चेति। अत्रापिर्उवोणिषतीति पाठे नभाव्यम्। उवोणिषतीत्येतस्याकृतेद्वितीयद्विर्वचनेत्तिद्वत्वात्। नानिष्टार्थेति।
द्वितीयस्येतिव्यक्तिराश्रीयतेनजातिः। याचाकृतेप्रथमद्विर्वचनेद्वितीयव्यक्तिःसाकृतेतस्मिन्द्वितीयानभवतीतिवि
रोधाद्द्वितीयद्विर्वचनेनप्रथमद्विर्वचनंबाध्यते। यथावेति। भवतुद्वितीयस्येतिजातिनिर्देशस्तथापिसामान्यविहित
स्यविशेषविहितमसत्यपिविरोधेबाधकंभवतियथाद्वीपमितीत्यादावादेः परस्येत्यादेर्विधीयमानंपीत्वमस्यस्यनभ
वत्येवमिहापिद्वितीयद्विर्वचनंविधीयमानंप्रथमस्यनभवति। ननुचापद्त्येकाषष्ठ्यादेः परस्येत्यादिमलमनुसंहृते

ओणेश्चोवोणिषतीति। नानिष्टार्थाशास्त्रप्रवृत्तिर्भवितुमर्हति। यथावादिविकारेऽलोन्त्यविकाराभा
वः। यथावाआदिविधावलोन्त्यविधिर्नभवति। एवंद्वितीयद्विर्वचनेप्रथमद्विर्वचनंनभविष्यति।
विषमउपन्यासः। नाप्राप्तेऽलोन्त्यविधानेआदिविधिरारभ्यतेसतस्यबाधकोभविष्यति। इदमप्येवं
जातीयकम्। नाप्राप्तेप्रथमद्विर्वचनेद्वितीयद्विर्वचनमारभ्यतेतद्बाधकंभविष्यति। यदप्युच्यतेअस
तिखल्वपिसंभवेबाधनंभविष्यति। अस्तिचसंभवोयदुभयंस्यादिति। नैतदस्ति। सत्यपिसंभवेबाध
नंभवति। तद्यथा। दधिब्राह्मणेभ्योदीयतांतक्रंकौण्डिन्यायेतिसत्यपिदधिदानस्यसंभवेतक्रदानं
निवर्तकंभवति। एवमिहापिसत्यपिसंभवेप्रथमद्विर्वचनस्यद्वितीयंद्विर्वचनंबाधिष्यते। तत्रपूर्व
स्याचोनिवृत्तौव्यञ्जनानिवृत्तिः। तत्रपूर्वस्याचोनिवृत्तौव्यञ्जनस्यानिवृत्तिर्वक्तव्या। अटिटिषतीति।
यथैवाचोनिवृत्तिरेवंव्यञ्जनस्यापिप्राप्नोति। तत्रपूर्वस्याचोनिवृत्तौव्यञ्जनस्यानिवृत्तिरशासनात्पूर्व
स्य। तत्रपूर्वस्याचोनिवृत्तौव्यञ्जनस्यानिवृत्तिःसिद्धा। कुतः ।

तिकुतोलोन्त्यस्यप्रसङ्गः। इहतुप्रथमस्येतिद्वितीयस्येतिचषष्ठीद्वयसंभवादुभयोःप्रसङ्गः। नैतदस्ति। अपइत्येका
पिषष्ठीवचनद्वयप्रामाण्यादाद्यन्तावुपसंह्रियेत। अपआद्यन्तयोरीत्वंभवतीति। एकस्माद्विग्रहणकवाक्याल्लक्ष्यसं
स्कारकमनेकंप्रक्रियावाक्यमुपप्लवते। यथैवाचोनिवृत्तिरिति। यथाभूतस्यप्रथमैकाचोद्विर्वचनंप्राप्तंतथाभूतस्य
द्वितीयद्विर्वचनेनबाध्यंसव्यञ्जनस्यचप्राप्तमितिव्यञ्जनानामपिद्विर्वचनबाधप्रसङ्ग इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशासनात्पूर्वस्येति। अप्राप्त्यनुमानं बाधो नहि प्रमाणेन प्राप्तं बाधितुं शक्यते प्रमाणत्वाविशेषात् तस्मादजादिधातुद्वि
तीयद्विर्वचनविषयेप्रथमद्विर्वचनं नवि हितं न प्रतिषिद्धम्। नटभार्यावच्चव्यञ्जनानि भवन्तीति द्वितीयैकाजन्तर्भा
वात्तानि द्विरुच्यन्त इत्यर्थः। न्यायसिद्धेर्थे लिङ्गदर्शनमाह। न्द्रादिप्रतिषेधाच्चेति। न्द्राश्चते आदयस्तेषां द्विर्वचनप्रतिषे
धादन्यानि द्वितीयैकाचा सह द्विरुच्यन्ते। तत्र द्वितीयाभाव इति। इहाजादेरित्यजादिसामान्यनिर्देशात्तत्र द्वितीयद्विर्व
चनं मा रभ्यमाणं प्रथमद्विर्वचनस्य बाधकमिति यस्यामप्यजादिव्यक्तौ द्वितीयाभावाद्द्वितीयद्विर्वचनाभावस्तस्यामपि
प्रथमद्विर्वचनाप्रसङ्गः। अटिटिषतीत्यादावजाद्याकृतौ विधीयमानं द्वितीयद्विर्वचनमारतुरित्यादावपि प्रथमद्वि

अशासनात्पूर्वस्य। नेह वयं पूर्वस्य प्रतिषेधं शिष्मः। किं तर्हि द्वितीयस्य द्विर्वचनमारभामहे। व्यञ्ज
नानि पुनर्नटभार्यावद्भवन्ति। तद्यथा। नटानां स्त्रियो रङ्गगता यो यः पृच्छति कस्य यूयं कस्य यूयमि
ति तं तं तव तवेत्याहुः। एवं व्यञ्जनान्यपि यस्य यस्याचः कार्यमुच्यते तं तं भजन्ते। न्द्रादिप्रतिषेधाच्च।
यदयं नन्द्राः संयोगादय इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः पूर्वनिवृत्तौ व्यञ्जनस्यानिवृत्तिरिति।
तत्र द्वितीयाभावे प्रथमद्विर्वचनं प्रतिषिद्धत्वात्। तत्र द्वितीयस्यैकाचोऽभावे प्रथमस्य द्विर्वचनं न
प्राप्नोति। आरतुः। आटुः। किं कारणम्। प्रतिषिद्धत्वात्। अजादेर्द्वितीयस्येति प्रतिषेधात्। नैष दोषः।
सति तस्मिन्प्रतिषेधः। सति द्वितीयस्य द्विर्वचने प्रथमस्य प्रतिषेधः ॥

र्वचनं बाधेतेत्यर्थः। अप्राप्तिरेवात्र प्रतिषेधत्वेन विवक्षिता। सति तस्मिन्निति। अजादेरिति व्यक्तिनिर्देशो न त्वाकृतिनिर्दे
शः। अतो नायमपवादोऽजादिमात्रनिबन्धनो द्वितीयस्यैकाचः संभवमभिसमीक्ष्य प्रवर्तते। यत्रेदानीं द्वितीयो नास्ति तत्रानु
पजातनिमित्तोऽपवाद एव न प्रवर्तत इति प्रथमैकाचो द्विर्वचनमुत्सर्गः प्रवर्तत एव। तेन यस्यामेवाजादिव्यक्तौ द्विती
यद्विर्वचनं प्रवर्तते तस्यामेव प्रथमद्विर्वचनं बाध्यते नान्यस्यामित्यर्थः। जात्युपलक्षिता व्यक्तिः प्राधान्येनाश्रीयते न
तु जातिः। तेन सर्वस्यामेवाजादिव्यक्तौ द्वितीयवत्यामिदं शास्त्रं प्रवर्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यक्तिपदार्थाश्रयणे दोषमाह। सतितस्मिन्निति। लोकवदिति। आकृतिपदार्थस्तत्राश्रीयत इति भावः। प्रागाङ्गमिति। यथा ग्रामाकृतेराश्रयणात् क्वचिदपि ग्रामे वर्तमानो ब्राह्मणो मनुष्यान्तरानयनं निवर्तयति तथाभ्यासजातेराश्रयणात् क्वचिदप्यभ्यासे वर्तमानो हलादिः सर्वत्रानादेर्हलो निवृत्तिं करोतीत्यर्थः। तस्मादस्त्विति। इह व्यक्तिपक्ष आश्रीयते। हलादिःशे

सतितस्मिन्प्रतिषेध इति चेद्धलादिःशेषे दोषः। सतितस्मिन्प्रतिषेध इति चेद्धलादिःशेषे दोषो भवति। हलादिःशेषे सत्याद्ये हल्यनाद्यस्य हलो लोपः स्यात्। इहैव स्यात्। पपाच। पपा[illegible]ति। इह न स्यात्। आटतुः। आटुरिति। लोकवद्धलादिःशेषे। लोकवद्धलादिःशेषे सिद्धम्। तद्यथा। लोके ईश्वर आज्ञापयति ग्रामाद्ग्रामान्मनुष्या आनीयन्तां प्रागाङ्गं ग्रामेभ्यो ब्राह्मणा आनीयन्तामिति। येषु तत्र ग्रामेषु ब्राह्मणा न सन्ति न त हीदानीं ततोऽन्यस्यानयनं भवति। यथा तत्र क्वचिदपि ब्राह्मणस्य सत्ता सर्वत्राब्राह्मणस्य निवर्तिका भवति। एवमिहापि क्वचिदपि हलाद्यः सन् सर्वस्यानाद्यस्य हलो निवर्तको भवति। क्वचिदन्यत्र लोप इति चेद्द्विर्वचनम्। क्वचिदन्यत्र लोप इति चेद् द्विर्वचनमप्येवं प्राप्नोति। क्वचिदपि द्वितीयः सन् सर्वस्य प्रथमस्य निवर्तकः स्यात्। तस्मादस्तु सतितस्मिन्प्रतिषेध इत्येव। ननु चोक्तं सतितस्मिन्प्रतिषेध इति चेद्धलादिःशेषे दोष इति। प्रतिविधास्यते हलादिःशेषे॥ नन्द्राः संयोगादयः॥ किमर्थमिदमुच्यते। [illegible]न्द्रादेर्द्विर्वचनप्रसङ्गस्तत्र न्द्राणां प्रतिषेधः। न्द्रादेरेकाचो द्विर्वचनं प्राप्नोति। तत्र न्द्राणां संयोगादीनां प्रतिषेध उच्यते॥ ईर्ष्यतेस्तृतीयस्य द्वे भवतः॥ ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यम्। केचिदाहुः। एकाच इति। ईर्ष्यिषिषति। अपर आह। व्यञ्जनस्येति। ईर्ष्यिषिषति॥ कण्ड्वादीनां च॥ कण्ड्वादीनां च तृतीयस्य द्वे भवत इति वक्तव्यम्॥ कण्डूयियिषति। असूयियिषति। वा नामधातूनां तृतीयस्य द्वे भवत इति वक्तव्यम्॥ अश्वीयियिषति। अशिश्वीयिषति। अपर आह। यथेष्टं वा। यथेष्टं वा नामधातूनामिति। पुपुत्रीयिषति। पुतित्रीयिषति। पुत्रीयियिषति ॥

षेतु जातिपक्षः। व्यक्तिपक्षेऽपि वा प्रतिविधास्यते अहलभ्यासो भवति तत आदिःशेष इति॥ नन्द्राः॥ किमर्थमिति। पूर्वस्याचो व्यञ्जनानीति पूर्वपक्षो नटभार्यावद् व्यञ्जनानीत्युत्तरः पक्षः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वोभ्यासः॥कस्यपूर्वइति।अवध्यवधिमत्संबन्धेदिग्योगलक्षणापञ्चमीभवति।यथाग्रामात्पूर्वइति।इहत्ववयवावयवि संबन्धोविवक्षितःकस्यपूर्वोवयवइतिपञ्चम्याभावोयथापूर्वंकार्यस्येति।विभक्तिविपरिणामइति।पूर्वविभक्तित्यागेन सामर्थ्याद्विभक्त्यन्तरस्योहइत्यर्थः॥उभे॥सहग्रहणमिति।सहभूतयोःपरस्परापेक्षयोरेकाभ्यस्तसंज्ञायथास्यादित्येव मर्थंसहेतिकर्तव्यम्।आद्युदात्तत्वइति।यस्यानुदात्तेक्रियमाणेउदात्तस्वरितविधानमनर्थकमापद्यतेसवर्ज्यइति

पूर्वोभ्यासः॥पूर्वोभ्यासइत्युच्यते।कस्यपूर्वोभ्याससंज्ञोभवति।द्वेइतिवर्तते।द्वयोरितिवक्तव्यम्।सतर्हि तथानिर्देशःकर्तव्यः।नकर्तव्यः।अर्थाद्विभक्तिविपरिणामोभविष्यति।तद्यथा।उच्चानिदेवदत्तस्यगृहाणि। आमन्त्रयस्वैनम्।देवदत्तमितिगम्यते।देवदत्तस्यगावोश्वाहिरण्यंचआढ्योवैधवेयः।देवदत्तइतिगम्यते। पुरस्तात्षष्ठीनिर्दिष्टंसदर्थात्प्रथमानिर्दिष्टंद्वितीयानिर्दिष्टंचभवति।एवमिहापिपुरस्तात्प्रथमानिर्दिष्टंस दर्थात्षष्ठीनिर्दिष्टंभविष्यति॥उभेअभ्यस्तम्॥अभ्यस्तसंज्ञायांसहग्रहणम्॥अभ्यस्तसंज्ञायांसहग्रहणंक र्तव्यम्।उभेअभ्यस्तंसहेतिवक्तव्यम्॥किंप्रयोजनम्।आद्युदात्तत्वेयुगपत्प्रसङ्गार्थम्।आद्युदात्तत्वंसहभूत योर्यथास्यादेकैकस्यमाभूदिति।यस्मिन्नेवाभ्यस्तकार्येदोषस्तदेवपठितम्।अनुदात्तंपदमेकवर्जमिति।ना स्तियौगपद्येनसंभवः।पर्यायस्तर्हिप्रसज्येत।पर्यायश्चतावत्पूर्वस्यपरेणरूपेणव्यवहितत्वान्नभविष्यति। परस्यतर्हिस्यात्।तत्राचार्यप्रवृत्तिर्ज्ञापयति।नपरस्यभवतीति।यदयंबिभेत्यादीनांपितिप्रत्ययात्पूर्वमुदात्तं भवतीत्याह।एवंव्यवधानान्नपूर्वस्यज्ञापकान्नपरस्य।उच्यते चेदमभ्यस्तानामादिरुदात्तोभवति।तत्रसए ति वदोषः।पर्यायःप्रसज्येत।तस्मात्सहग्रहणंकर्तव्यम्।नकर्तव्यम्।उभेग्रहणंक्रियतेतत्सहार्थंविज्ञास्यते। अस्त्यन्यदुभेग्रहणस्यप्रयोजनम्।किम्।उभेग्रहणंसंज्ञिनिर्देशार्थम्।अन्तरेणाप्युभेग्रहणंप्रक्लृप्तः सं ज्ञिनिर्देशः।कथम्।द्वेइतिवर्तते ॥

व्याख्यानेप्रधानवाचिन्येकशब्देयौगपद्यप्रसङ्गः।एकवर्जमिति।संख्यावचनेतुविरोधाद्यौगपद्यासंभवात्पर्यायप्रस ङ्गः।उभेग्रहणमिति।सहभावोपसर्जनद्वित्वमुभशब्दस्यार्थइतिभावः।द्वेइत्यनुवृत्त्याद्विरुक्तस्याभ्यस्तसंज्ञायांलब्धा यामुभेग्रहणंसहभूतयोरेकाभ्यस्तसंज्ञार्थम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईर्त्सतीति। कृते द्विर्वचनेऽकृत एवाभ्यासलोपेऽन्तरङ्गत्वादुभयोः प्रत्येकं प्रवृत्ताभ्यस्तसंज्ञाकृतेऽभ्यासलोपे परस्य न नि
वर्तेत उभेग्रहणानुनिरस्यत इति भावः। ऋध आप्नुसन्। सनीवन्तर्धेति इडभावपक्षे द्विर्वचनात्परत्वात्प्रतिपदविधे
र्बलवत्वादाप्ज्ञप्यृधामीदितीत्वं परत्वं च। नन्द्राः संयोगादय इति रेफस्य द्विर्वचनप्रतिषेधः। पूर्वत्रासिद्धीयमद्विर्वच
न इति वचनाद्धकारस्य चर्त्वे न तकारे कृते त्स इत्यस्य द्विर्वचनम्। अन्ये त्वाहुः। अभ्यासलोपसंनियोगेनेत्वमुच्यमा
नं द्विर्वचनं प्रतीक्षत इति प्राग्द्विर्वचनम्। तच्च यदा पूर्वत्रासिद्धीयमद्विर्वचन इत्येतदुभौ साभ्यासस्येति सूत्रारम्भादनि
त्यत्वादनाश्रीयते तदा धृ सित्यस्य तदाश्रयणे तु त्स इत्यस्य। तत ईत्वाभ्यासलोपौ। ईर्त्स ईप्स इति स्थिते लट् तिः। अड्डाव
श्च प्राप्नोति शप्च। कृताकृतप्रसङ्गित्वान्नित्यत्वाच्छप्। अड्डावस्तु शपि कृते तेन व्यवधानान्न प्राप्नोतीत्यनित्यः। त

इदं तर्हि प्रयोजनम्। किम्। यत्रोभे शब्दरूपे श्रूयते। तत्राभ्यस्तसंज्ञा यथा स्यादिह मा भूत्। ईर्त्सति। ऐ
र्त्सन्। ईप्सन्ति। ऐप्सन्। किं च स्यात्। अड्डावो नुम्प्रतिषेधो जुस्भावइत्येते विधयः प्रसज्येरन्। अड्डावे
तावन्न दोषः। सप्तमे योगविभागः करिष्यते। इदमस्त्यदभ्यस्तादिति। तत आत्मनेपदेषु। तत आत्म
नेपदेष्वचाद्भवति। अनत इत्युभयोः शेषः। यदप्युच्यते नुम्प्रतिषेध इति। एकादेशे कृते व्यपवर्गाभा
वान्न भविष्यति। इदमिह संप्रधार्यं नुम्प्रतिषेधः क्रियतामेकादेश इति। किमत्र कर्तव्यम्। परत्वान्नु
म्प्रतिषेधः। नित्य एकादेशः कृतेऽपि नुम्प्रतिषेधे प्राप्नोत्यकृतेऽपि ॥

तो झोऽन्त इत्यन्तादेशश्च प्राप्नोति पूर्वेण सह शप एकादेशश्च। तत्र वर्णाश्रयत्वादन्तरङ्गत्वादेकादेशस्ततोऽड्डावः प्राप्नो
ति। अथवा शपः प्रागेव परत्वादड्डावः प्राप्नोति। सोऽपि हि नित्यः। शप एकादेशे कृतेऽन्तवद्भावात्तस्य प्रसङ्गात्। ईर्त्स
न्निति। शब्दरि कृते शप्च प्राप्नोत्ये वर्णा कादेशश्च। तत्राश्रयत्वादन्तरङ्गत्वादेकादेशे कृते धातुसार्वधातुकयोर्व्यपव
र्गाभावाच्छपोऽप्राप्तिः। तत्र सार्वधातुकमात्रापेक्षत्वाच्छबेवान्तरङ्गत्वात्पूर्वं भवति। तत्र शब्दपरविप्रतिषेधात्परयो
रकारयोः पूर्वमेकादेशस्ततः पूर्वेणेति प्रक्रियाश्रयः सिद्धान्तो भविष्यति। पूर्वपक्षे तु पूर्वयोरकारयोरेकादेशे कृते नुम्प्रति
षेधप्रसङ्गश्चोद्यते। ऐर्त्सन्निति। ईर्त्स लङ् झिः शप्। अकारयोः पररूप एकादेशे कृते तस्यान्तवद्भावाज्जुस्प्राप्नोति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यस्याकृतद्दति। मितः पूर्वभक्तत्वान्नुमिकृते शब्दान्तरत्वम्। निमित्तवानिति। अन्तादेशे प्राक्कृते एकादेशे चव्यपवर्गाभावाज्जुसोऽप्रसङ्गः। पूर्वं हीति। उत्सर्गाणां विषयान्तरस्यापि संभवादपवादविवर्जिते विषये प्रवृत्तेर्न्याय्यत्वात्।

एकादेशोप्यनित्यः। अन्यस्यकृतेनुम्प्रतिषेधे प्राप्नोति। अन्यस्याकृते। शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति। अन्तरङ्गस्तर्ह्येकादेशः। कान्तरङ्गता। वर्णावाश्रित्यैकादेशः। विधिविषयेनुम्प्रतिषेधः। विधिश्च नुमः सर्वनामस्थाने। प्राक्नुसर्वनामस्थानोत्पत्तेरेकादेशस्तत्र नित्यत्वाच्चान्तरङ्गत्वाच्चैकादेशः। एकादेशे कृते व्यपवर्गाभावान्नुम् प्रतिषेधो न भविष्यति। यदप्युच्यते जुस्भावद्दति। एकादेशे कृते व्यपवर्गाभावान्न भविष्यति। एकादेशद्दत्युच्यते। केन चान्नैकादेशः। अन्तिना। नान्नान्तिभावः प्राप्नोति। किं कारणम्। जुस्भावेन बाध्यते। नान्न जुस्भावः प्राप्नोति। किं कारणम्। शपा व्यवहितत्वात्। एकादेशे कृते नास्ति व्यवधानम्।

।किं पुनः कारणम्। निमित्तवानन्तिरेकादेशं तावत्प्रतीक्षते न पुनस्तावत्येव निमित्तमस्तीत्यन्तिभावेन भवितव्यम्। इहापि तर्हि तावत्येव निमित्तमस्तीत्यन्तिभावः स्यात्। अनेनिजुः। पर्यवेविषुः। अस्तु अन्तिभावे कृते स्थानिवद्भावाज्झिग्रहणेन ग्रहणाज्जुस्भावो भविष्यति। अथवा यद्यपि निमित्तवानन्तिरयं तस्य जुस्भावोऽपवादः। न चापवादविषये उत्सर्गोभिनिविशते। पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः। प्रकल्प्य चापवादविषयमुत्सर्गः प्रवर्तते। तत्तावदत्र न कदाचिदप्यन्तिभावो भवति। अपवादं जुस्भावं प्रतीक्षते। न खल्वपि कश्चिदभ्यस्तानां झेश्चानन्तर्यम्। सर्वत्र विकरणैर्व्यवधानं तेनावश्यं विकरणनाशः प्रतीक्ष्यः। क्वचिल्लुका क्वचित्श्लुना क्वचिदेकादेशेन। स यथैव श्लुलुकौ प्रतीक्षते तथैकादेशमपि। एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति। किम्। स्थानिवद्भावम्। स्थानिवद्भावाद्व्यवधानम्। व्यवधानान्न भविष्यति। पूर्वविधौ स्थानिवद्भावः ॥

प्रकल्प्य चेति। यथा न संप्रसारणे संप्रसारणमिति वचनात्परस्य यणः पूर्वं संप्रसारणं प्रवर्तते। पूर्वस्य तु तन्निमित्तः प्रतिषेधः। यदि तु परस्य यणः पूर्वं न प्रवर्तेत तदा पूर्वस्यापि प्रतिषेधो न स्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जक्षित्या॥ जक्षितिरादिर्येषान्ते जक्षित्यादयः इत्यान्नित्याद् जक्षित्यादिष्विति। वेव्यत इति। अभ्यस्तानामादिरित्युदात्तत्वं भवति। अन्यथा धातुस्वरे ङित्त्वाल्लसार्वधातुकानुदात्तत्वे यणादेशे च कृते उदात्तस्वरितयोर्यण इति स्वरितत्वं प्रसज्येत। आङः शास्विति। वेवीङो नन्तरमयं केश्चित्पठ्यत इति भावः। भूयिष्ठानीति। बहुतराणीत्यर्थः। षसिवशीइति। षस स्वप्ने शास्ति

नचायं पूर्वस्य विधिः। पूर्वस्मादपि विधिः। तदेतदसति प्रयोजने उभेग्रहणं सहार्थं विज्ञास्यते। कथं चैकैकस्याप्यभ्यस्तसंज्ञा प्राप्नोति। प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति। तद्यथा। प्रत्येकं वृद्धिगुणसंज्ञे भवतः। ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिरिति। तद्यथा। गर्गाः शतं दण्ड्यन्तामिति। अर्थिनश्च राजानो हिरण्येन भवन्ति। न च प्रत्येकं दण्डयन्ति। सत्येतस्मिन् दृष्टान्ते तत्र यदि प्रत्येकमित्युच्यते। इहापि सहग्रहणं कर्तव्यम्। अथ तत्रान्तरेण प्रत्येकमिति वचनं प्रत्येकं गुणवृद्धिसंज्ञे भवतः। इहापि नार्थः सहग्रहणेन॥ जक्षित्यादयः षट्॥ जक्षित्यादिषु सप्तग्रहणं वेवीत्यर्थम्। जक्षित्यादिषु सप्तग्रहणं कर्तव्यम्। सप्त जक्षित्यादयोभ्यस्तसंज्ञा भवन्तीति वक्तव्यम्। किं प्रयोजनम्। वेवीत्यर्थम्। वेवीतेरभ्यस्तसंज्ञा यथा स्यात्। वेव्यते। अभ्यस्तानामादिरित्याद्युदात्तत्वं भवति। अपरिगणनं वा गणान्तत्वात्। न वार्थः परिगणनेन अत्रागणान्तमभ्यस्तसंज्ञा। इहापि तर्हि प्राप्नोति। आङः शासु। अस्तु। अभ्यस्तकार्याणि कस्मान्न भवन्ति। भूयिष्ठानि कार्याणि परस्मैपदेषु। आत्मनेपदी चायम्। स्वरस्तर्हि प्राप्नोति। यश्चाप्यस्यात्मनेपदे घभ्यस्तकार्यं स्वरस्तत्राप्यस्यानुदात्तेतः परं लसार्वधातुकमनुदात्तं भवतीत्यनुदात्तत्वे कृते नास्ति विशेषो धातुस्वरेणोदात्तत्वे सत्यभ्यस्तस्वरेण वा। षसिवशी छान्दसौ। दृष्टानुविधयश्छन्दसि भवन्ति। चर्करीतमभ्यस्तसंज्ञमेव। हुङः स्तर्हि प्राप्नोति। अस्तु। अभ्यस्तकार्याणि कस्मान्न भवन्ति। भूयिष्ठानि परस्मैपदेषु। आत्मनेपदी चायम्। स्वरस्तर्हि प्राप्नोति ॥

स्वप्न इति येन पठन्ति केवलं षसस्वप्ने वशकान्ताविति तन्मते नैतदुक्तम्। अन्ये त्वाहुः। शास्तीति धातुपाठ एव शासस्त्या निर्देशः कृतोऽर्थभेदात्तु द्विः पठ्यते। अन्ये तु। षस स्वप्न इति न पठन्ति। वशेर्भाषायां वार्तिककारमतेन प्रयोगः साधुः। चर्करीतमिति। यङ्लुगन्तस्य पूर्वाचार्यसंज्ञा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अह्निङ्गोरिति। यदि ह्नुङ्गोभ्यस्तसंज्ञा स्यात् ह्नुवाते ह्नुवत इत्यादौ कृतेऽभ्यस्तस्वरे लसार्वधातुकस्य भवितव्यमेवेति घातेने
तिप्रतिषेधोऽनर्थकः स्यात्। तस्मात्प्रतिषेधसामर्थ्यात् प्रत्ययस्वर एव भवति नाभ्यस्तस्वरः। ननु च सति प्रयोजने ज्ञापकम्।
अस्ति च प्रतिषेधस्य प्रयोजनं ह्नुते ह्नुष इत्यादावनुदात्तत्वं मा भूत् प्रत्ययस्वर एव यथा स्यात्। अत्र ह्यभ्यस्तानामादिरिति
न प्रवर्तते। अजादौ तस्य विधानात्। तत्रासति प्रतिषेधे अनुदात्ते चेत्यानुदात्तं पदं स्यात्। सति तु प्रतिषेधेऽन्तोदात्तं भवती

अह्निङ्गोरिति प्रतिषेधविधानसामर्थ्यात्स्वरो न भविष्यति। अथवा सप्तैवेमे धातवः पठ्यन्ते जक्ष् अभ्य
स्तसंज्ञो भवति। इत्यादयश्च षट् जक्षित्यादयः षडिति॥ तुजादीनाम्। तुजादिषु छन्दः प्रत्ययग्रहणम्॥
तुजादिषु छन्दः प्रत्ययग्रहणं कर्तव्यम्। छन्दसि तुजादीनां दीर्घो भवतीति वक्तव्यम्। प्रत्ययग्रहणं च क
र्तव्यम्। अस्मिंश्च प्रत्यय इति वक्तव्यम्। इह मा भूत्। तुतोज शबलान् हरीन्। अनारम्भो वाऽपरिगणितत्वा
त्। अनारम्भो वा छन्दसि दीर्घत्वस्यान्याय्यः। कुतः। अपरिगणितत्वात्। नहि छन्दसि दीर्घत्वस्य परिगणनं क
र्तुं शक्यम्। किं कारणम्। अन्येषां च दर्शनात्। येषामपि दीर्घत्वं नारभ्यते तेषामपि छन्दसि दीर्घत्वं दृश्य
ते। तद्यथा। पूरुषो नारक इति। अनेकान्तत्वाच्च। येषां चाप्यारभ्यते तेषामप्यनेकान्तः। यस्मिन्नेव च प्रत्य
ये दीर्घत्वं दृश्यते तस्मिन्नेव च प्रत्यये न दृश्यते। मामहान उक्थपात्रम्। ममहान इति च॥ लिटि धातो र
नभ्यासस्य। धातोरिति किमर्थम्। ईहाञ्चक्रे। नैतदस्ति। लिटीत्युच्यते। न चात्र लिटं पश्यामः। प्रत्ययलक्षणे
न। न लुमता तस्मिन्निति प्रत्ययलक्षणप्रतिषेधः। इदं तर्हि सस्वांसो विशृण्विरे। लिटि द्विर्वचने जाग
र्तेर्वेति वक्तव्यम्। यो जागार तमृचः कामयन्ते। यो जजागार तमृचः कामयन्ते। अनभ्यासस्येति किम्। रु
स्रो नोनाव वृषभो यदीदम्। नोनूयतेर्नोनाव ॥

तिज्ञापकत्वं नोपपद्यते। एवं तर्ह्यभ्यस्तानामादिरित्यत्राह्निङ्गोरित्यनुवृत्त्या प्रतिषेधसामर्थ्यादित्यर्थोऽभिप्रेतः। अथवे
ति। नायं श्तिपा निर्देशः किं तर्हि जक्षिति पृथक्पदम्। इत्यादय इत्यत्र इतिशब्देन जक्षितिः परामृश्यते। आदिशब्दश्च
समीपवाची। तेन तत्समीपाः षडभ्यस्तसंज्ञा इति सप्तानामेवाभ्यस्तसंज्ञासूत्रेण संगृहीतेत्यर्थः॥ लिटि धातोः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यास प्रतिषेधानर्थक्यमिति। जुगुप्सिषते। लोलूयिषते। द्वित्वादीसकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात्पुनः प्रवृत्त्यभावादुत्तरार्थोऽप्यभ्यासप्रतिषेधोऽनर्कर्तव्यः। चङीत्येतदर्थस्तु कर्तव्य एव। यदा सन्यङन्तात्सिचिकृते चङ् भवति। अजुगुप्सदलोलूयदिति तदा द्विर्वचनं माभूदिति चिन्त्यमेतत्॥ सन्यङोः॥ किमियं षष्ठीति। विभक्तिविचारद्वारेण तदर्थो विचार्यते। किं चात इति। अर्थभेदप्रश्नः। सन्यङन्तस्येति। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्येति षष्ठीपक्षे तदन्तविधिः। स

अभ्यासप्रतिषेधानर्थक्यं च छन्दसि वावचनात्। अभ्यासप्रतिषेधश्चानर्थकः। किं कारणम्। छन्दसि वावचनात्। अवश्यं छन्दसि वा द्वे भवत इति वक्तव्यम्। किं प्रयोजनम्। प्रयोजनम् आदित्यान्याचिषामहे। यियाचिषामह इति प्राप्ते। देवता नो ददाति प्रियाणि। ददाति प्रियाणि। मघवा दातु। मघवा ददातु। सनस्तुतो वीरवद्धातु। वीरवद्दधातु। यावता इदानीं छन्दसि वा द्वे भवत इत्युच्यते। धातुग्रहणेनापि नार्थः। कस्मान्न भवति सस्तवांसो विशृण्विर इति। छन्दसि वावचनात्। तदेतद्धातुग्रहणं सान्यासिकं तिष्ठतु तावत्॥ सन्यङोः॥ किमियं षष्ठी आहोस्वित्सप्तमी। कुतः सन्देहः। समानो निर्देशः। किं चातः। यदि षष्ठी सन्यङन्तस्य द्विर्वचनेन भवितव्यम्। अथ सप्तमी सन्यङोः परतः पूर्वस्य द्विर्वचनेन भवितव्यम्। कश्चात्र विशेषः। सन्यङोः परत इति चेदिटो द्विर्वचनं परादित्वात्। सन्यङोः परत इति चेदिटो द्विर्वचनं कर्तव्यम्। अटिटिषति। अशिशिषति। किं पुनः कारणं न सिध्यति। परादित्वात्। इट् परादिः। हन्तेश्च ईटो द्विर्वचनं कर्तव्यम्। जेघ्नीयते। ननु च यस्यापि सन्यङन्तस्य द्विर्वचनं तस्यापि स्थानिवद्भावप्रसङ्गः। ईटि स्थानिवद्भावादीटो द्विर्वचनं न प्राप्नोति। नैष दोषः। द्विर्वचननिमित्ते ऽचि स्थानिवदित्युच्यते न चासौ द्विर्वचननिमित्तम्। यस्मिन्नपि द्विर्वचनं यस्यापि द्विर्वचनं सर्वोऽसौ द्विर्वचननिमित्तम्। तस्मादीटो द्विर्वचनम्। तस्मादुभाभ्यामेवेटो द्विर्वचनं कर्तव्यम् ॥

सप्तमीपक्षे तु तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्धातोरित्यधिकाराच्च पूर्वस्य धातोः कार्यभाक्त्वम्। कश्चात्र विशेष इति। लक्ष्यगतविशेषप्रश्नः। हन्तेश्चेति। गमहनेत्युपधालोपस्य स्थानिवद्भावाद्धन एव द्विर्वचनप्रसङ्गः। यस्यापीति। सति तस्मिन्कार्यभावादस्येव निमित्तत्वमिति भावः। यद्यपि रूपस्थानिवद्भावादीटो न भवति द्विर्वचनं तथापि प्राप्तिमात्राश्रयेण द्विर्वचननिमित्तत्वमीकारस्योच्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुदात्तविशेषणं चेदिति। यदा तूभयविशेषणं तदा न दोषः। उपदेशएकाचूत्वात्। सन्नन्तस्यापि द्विप्रयोगे द्विर्वचने दो
षएवास्याने द्विर्वचने तु प्रकृतिप्रत्ययस्यसंप्रमुग्धत्वादिटः प्राप्तिरेवनास्ती तिनदोषः। इ यक्षमाणा इति। अश्नोतेः सन्।
सिपूङ्रञ्ज्वशांसनीति प्राप्त इट् छान्दसत्वान्नभवति। द्विर्वचनम्। हलादिः शेषः। सन्यतइतीत्वम्। अभ्यासस्यासवर्णं

यश्नोभयोर्दीर्घेणनतमेकश्नोदेशोभवति। एकाचउपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं
चेत्सनइट्प्रतिषेधः। एकाचउपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणंचेत्सनइट्प्रतिषे
धोवक्तव्यः। बिभित्सति। चिच्छित्सति। द्विर्वचने कृते उपदेशेनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधोन
प्राप्नोति। अस्तु तर्हि सन्यङन्तस्य। सन्यङन्तस्येति चेदशेः सन्यनिटः। सन्यङन्तस्येति चेदशेः सन्यनिटो द्वि
र्वचनं वक्तव्यम्। इ यक्षमाणा भृगुभिः सजोषा। यस्यापि सन्यङोः परतो द्विर्वचनम्। तेनाप्यत्रावश्यमिड्भा
वे यत्नः कर्तव्यः। अशेर्हि प्रतिपदमिड्विधीयते स्मिपूङ्रञ्ज्वशांसनीति। तेनैव द्वितीयद्विर्वचनमपि न भवि
ष्यति। अथवा नैतदशेरूपम्। यजेरेतच्छान्दसो वर्णलोपः। तद्यथा। तुभ्येदमग्ने। तुभ्यमिदमग्नय इति प्राप्ते। आ
म्बानांचरुम्। नाम्बानांचरुमिति प्राप्ते। आव्याधिनीउगणाः। सुगणा इति प्राप्ते। इष्कर्तारमध्वरस्य। निष्क
र्तारमध्वरस्येति प्राप्ते। शिवा उद्रस्यभेषजी। शिवारुद्रस्य भेषजीति प्राप्ते। अ थ्यर्थो वै गम्यते। कः पुनर
श्नोत्यर्थः। अश्नोतिर्व्याप्तिकर्मा। एवन्तर्हि यजिरप्यश्नोत्यर्थे वर्तते। कथं पुनरन्यो नामान्यस्यार्थे वर्तते। बह्वर्था
अपि धातवो भवन्ति। तद्यथा। वपिः प्रकिरणे दृष्टश्छेदनेपि वर्तते। केशान्वपति। ईडिः स्तुतिचोदनायाञ्चा
सु दृष्ट ईरणे चापि वर्तते। अग्निर्वा इतो वृष्टिमीट्टे मरुतो मुतश्च्यावयन्ति ॥

इतीयडू। षत्वकत्वषत्वानि। पूर्ववत्सन इत्यात्मनेपदं शानच्। अचिक्षमाणा इति तु षष्ठीपक्षे प्राप्नोति। तेनैवेति।
यथाछान्दसत्वादिण्न भवत्येवं द्वितीयद्विर्वचनमपि। तदभावात्प्रथमद्विर्वचनम्। वर्णलोप इति। यियक्षमाणा इति प्रा
प्ते यकारस्य लोपः। उपेय प्राप्त्यर्थत्वादुपायानां धातूनां चानेकार्थत्वात्तन्नियम आदराभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीर्घकुत्वेति। यस्माद्द्विर्वचनादाधिक्यमुपजायते तस्माद्दीर्घत्वादीनि न सिध्यन्ति। समुदायादेशत्वात्संप्रमुग्धत्वात्। यद्यपि तु सन्यङोः परतो द्विर्वचनं तदा प्रत्ययसंमोहाभावाद्दीर्घत्वादीनि सिध्यन्ति। दीर्घत्वं द्विर्वचनाधिकस्येति। द्विर्वचनेन शब्दान्तरेणादेशेनाधिकत्वाद्दीर्घाद्यप्रसिद्धिः। स्थाने द्विर्वचने चायं दोषो न तु द्विष्प्रयोगे। तत्र प्रकृतिप्रत्ययसंप्रमोहाभा

करोतिरयमभूतप्रादुर्भावे दृष्टः निर्मलीकरणे चापि वर्तते। पृष्ठं कुरु पादौ कुरु उन्मृदानेति गम्यते। निक्षेपणे चापि दृश्यते। कटे कुरु घटे कुरु अश्मानमितः कुरु स्थापयेति गम्यते। एवं तर्हि दीर्घकुत्वसंप्रसारणषत्वमधिकस्य द्विर्वचनात्। दीर्घत्वं द्विर्वचनाधिकस्य न सिध्यति। चिचीषति। तुष्टूषति। समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टः सन्भवति। तत्राजन्तानां सनीति दीर्घत्वं न प्राप्नोति। इदमिह संप्रधार्यं दीर्घत्वं क्रियतां द्विर्वचनमिति। किमत्र कर्तव्यम्। परत्वाद्दीर्घत्वम्। नित्यं द्विर्वचनम्। कृतेऽपि दीर्घत्वे प्राप्नोत्यकृतेऽपि प्राप्नोति। दीर्घत्वमपि नित्यम्। कृतेऽपि द्विर्वचने प्राप्नोत्यकृतेऽपि प्राप्नोति। अनित्यं दीर्घत्वम्। न हि कृते द्विर्वचने प्राप्नोति। किं कारणम्। समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्याजन्तता नास्तीति दीर्घत्वं न प्राप्नोति। द्विर्वचनमप्यनित्यम्। अन्यस्य कृते दीर्घत्वे प्राप्नोत्यन्यस्याकृते शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति। उभयोरनित्ययोः परत्वाद्दीर्घत्वम्। यत्तर्हि नाकृते द्विर्वचने दीर्घत्वं तत्र न सिध्यति। जुहूषति। कुत्वं द्विर्वचनाधिकस्य न सिद्ध्यति। जिघांसति। जङ्घन्यते। किं कारणम्। समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टो हन्तिर्भवति। तत्राभ्यासाद्धन्तिहकारस्येति कुत्वं न प्राप्नोति। संप्रसारणं चद्विर्वचनाधिकस्य न सिद्ध्यति ॥

वात्। सर्वे सर्वपदादेशादृत्याश्रयेण संप्रमोहः। प्रागेव दीर्घत्वं भविष्यति ततो द्विर्वचनमिति मत्वाह। इदमिहेति। नित्यं द्विर्वचनमिति। आकृतिपक्षे शब्दान्तरप्राप्त्यभावात्। अनित्यमिति। व्यक्तिपक्ष इति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जुहूषतीति। ह्वातुमिच्छतीति सन्। अत्राकृते द्विर्वचने ऽभ्यस्तत्वाभावात् संप्रसारणाभावाद् दीर्घाप्रसङ्ग इति पूर्वं द्विर्वचनं त
तः संप्रसारणं ततो हल इति दीर्घत्वात् परत्वादज्झनगमां सनीति दीर्घत्वम्। क्षीरोदक इति। व्यक्तिविशेषविवक्षायां जातिप

जुहूषति। जोहूयते। समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टो ह्वयतिर्भवति। त
त्र ह्वोऽभ्यस्तस्येति संप्रसारणं न प्राप्नोति। नैष दोषः। वक्ष्यत्येतत्। ह्वोऽभ्यस्तनिमित्तस्येति। यावता चेदानीं ह्वोऽभ्यस्तनिमित्तस्येत्यु
च्यते सोऽप्यदोषो भवति। यदुक्तं यत्तर्हि नाकृते द्विर्वचने दीर्घत्वं तन्न सिद्ध्यतीति। षत्वं च द्विर्वच‾नाधिक‾
स्य न सिद्ध्यति। पिपक्षति। समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टः सन् भवति।
तत्रेण्कुभ्यामुत्तरस्य प्रत्ययसकारस्येति षत्वं न प्राप्नोति। इदमिह संप्रधार्यं द्विर्वचनं क्रियतां षत्वमिति।
किमत्र कर्तव्यम्। परत्वात् षत्वं पूर्वत्रासिद्धे षत्वं सिद्धासिद्धयोश्च नास्ति संप्रधारणा। आवृद्धोश्चाभ्यस्तविधि
प्रतिषेधः। आवृद्धोश्चाभ्यस्ताश्रयो विधिः प्राप्नोति स प्रतिषेध्यः। ईप्सन्ति। ईर्त्सन्ति। ईप्सन्। ईर्त्सन्। ऐप्सन्।
ऐर्त्सन्। किं च स्यात्। अद्भ्यो वो नुम्प्रतिषेधो जुस्भाव इत्येते विधयः प्रसज्येरन्। नैष दोषः। उक्ता अत्र परिहाराः।
सङ्घाश्रये च कार्ये समुदायस्य समुदायादेशत्वाद् झलाश्रये चाव्यपदेश आमिश्रत्वात्। सङ्घाश्रये च कार्ये समु
दायस्य समुदायादेशत्वाद् झलाश्रये चाव्यपदेशः। किं कारणम्। आमिश्रत्वात्। आमिश्रीभूतमिवेदं भवति।
तद्यथा क्षीरोदके संसृष्टे आमिश्रत्वान्न ज्ञायते कियत्क्षीरं कियदुदकमिति कस्मिन्वाऽवकाशे क्षीरं कस्मि
न्नवकाशे उदकमिति। एवमिहाप्यामिश्रत्वान्न ज्ञायते का प्रकृतिः कः प्रत्ययः कस्मिन्नवकाशे प्रकृतिः
कस्मिन्नवकाशे प्रत्यय इति। तत्र को दोषः। सङ्झलीति कुत्वादीनि न सिद्ध्यन्ति। इदमिह संप्रधार्यं द्वि
र्वचनं क्रियतां कुत्वादीनीति। किमत्र कर्तव्यम्। परत्वात् कुत्वादीनि। पूर्वत्रासिद्धे कुत्वादीनि सिद्धासिद्ध
योश्च नास्ति संप्रधारणा। एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचन इति कर्तव्यम्। तच्चावश्यं वक्तव्यम्। विभा
षिताः प्रयोजयन्ति। दोग्धा। दोग्धा। द्रोढा। द्रोढा ॥

रत्वाभावादेकवद्भावो न कृतः। सप्तम्येकवचनं वा प्रत्ययसकारसहितस्य प्रथमस्यैकाचो द्विर्वचनादामिश्रत्वम्। सङ्झली
ति। सनः सकारादारभ्य महिङो ङकारेण प्रत्याहारः। विभाषितादिति। विधय इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाश्वान्साह्वान् मीढ्वांश्च ॥ ६।१
दाश्वान्‌षहमर्षणइति चौरादिकस्याधृषादेर्निविभाषितणिचः क्वसौ साह्वानिति रूपम्।चक्रमिति।घञर्थे क विधानमिति कः।
यावताचेदानीं पूर्वत्रासिद्धीयमद्विर्वचनइत्युच्यते सोप्यदोषो भवति यदुक्तं षत्वंनसिध्यतीति।इहस्थाने
द्विर्वचनेणिलोपोऽपरिहृतः।सन्यङोःपरत्वोद्विर्वचनमिटोद्विर्वचनं वक्तव्यम्।सन्यङन्तस्यद्विर्वचनेह
न्तेःकुत्वमपरिहृतम्।तत्रसन्यङन्तस्यद्विर्वचनंद्विप्रयोगश्चेत्येषपक्षोनिर्दिश्यः।तत्रेदमपरिहृतंसन
इट्प्रतिषेधइति।एतस्यापिसप्तमेपरिहारंवक्ष्यति।उभयविशेषणत्वात्सिद्धमिति।कथंजेघ्रीयते।वक्ष्य
त्येतत्।यङ्प्रकरणेहन्तेर्हिंसायांघ्नीति।दाश्वान् साह्वान्।दाश्वानितिकिंनिपात्यते।दाशेर्वसौद्विर्वेट्प्र
तिषेधौ॥दाशेर्वसौद्विर्वेट्प्रतिषेधौनिपात्येते।दाश्वांसोदाशुषःसुतम्।दाश्वान्।साह्वानितिकिंनिपात्य
ते।सहेर्दीर्घत्वंच।किंच।द्वित्वेट्प्रतिषेधौच।साह्वान्बलाहकः।साह्वान्।मीढ्वानितिकिंनिपात्यते।मिहेर्ढत्वं ति
चयच्चपूर्वयोर्द्वित्वेट्प्रतिषेधौदीर्घत्वंच।मीढुस्तोकायतनयायमृड।यथैयमिन्द्रमीढ्वः।महदर्थोवेग
म्यते।कःपुनर्महदर्थः।महिर्दानकर्मा।अतःकिम्।ढत्वमपिनिपात्यम्।महदर्थइतिचेद्मिहेस्तदर्थत्वा
त्सिद्धम्।महदर्थइतिचेन्मिहिरपिमहदर्थेवर्तते।कथंपुनरन्योनामान्यस्यार्थेवर्तते।कथंमिहिर्महदर्थेव
र्तते।बह्वर्थाअपिधातवोभवन्ति।अस्तिपुनरन्यत्रापिकश्चिन्मिहिर्महदर्थेवर्तते।अस्तीत्याह।मिहेर्मेघः।
मेघश्चकस्माद्भवति।अपोददातीति।द्विर्वचनप्रकरणेकृञादीनांके॥द्विर्वचनप्रकरणेकृञादीनांकेउ
पसंख्यानंकर्तव्यम्।चक्रम्।चिक्लिदम्।चक्नसमिति।कादिष्वितिवक्तव्यम्।इहापियथास्यात्।बभ्रुः।
पप्रुरिति।चरिचलिपतिवदीनामच्याक्काभ्यासस्य॥चरिचलिपतिवदीनामचिद्वेभवतइतिवक्तव्यम्।
आक्काभ्यासस्य।चराचरः।चलाचलः।पतापतः।वदावदः।हन्तेर्घश्च॥हन्तेर्घश्चवक्तव्यः।अचिद्वेभवतआ
क्काभ्यासस्य।घनाघनः।पाटेर्णिलुक् दीर्घश्चाभ्यासस्योक्।पाटयतेर्णिलुग्वक्तव्यः।अचिद्वेभवतइतिवक्त
व्यम्।दीर्घश्चाभ्यासस्यऊक्चागमः।पाटूपटः।द्विर्वचनंयणयवायावादेशाल्लोपोपधालोपणिलोपकि
किनोरुत्वेभ्यः।यणयव।यावादेशाअल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्योद्विर्वचनंभवतिपूर्ववि
प्रतिषेधेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पपुरिति। योद्वे चेत्यत्र द्वे चेति न वक्तव्यं भवतीति भावः। चराचर इति। अभ्यासस्यानचीति वचनाद्धलादिः शेषाभावः। सोऽपुष्यत

द्विर्वचनस्यावकाशः। बिभिदतुः। बिभिदुः। यणादेशस्यावकाशः। दध्यत्र। मध्वत्र। इहोभयं प्राप्नोति। च
क्रतुः। चक्रुरिति। अयवायावादेशानामवकाशः। चयनम्। चायकः। लवनम्। लावकः। द्विर्वचनस्य
स एव। इहोभयं प्राप्नोति। चिचाय। चिचयिथ। लुलाव। लुलविथ। आल्लोपस्यावकाशः। गोदः। कम्ब
लदः। द्विर्वचनस्य स एव। इहोभयं प्राप्नोति। पपतुः। पपुः। तस्थतुः। तस्थुः। उपधालोपस्यावकाशः।
श्लेष्मघ्नं मधु। पित्तघ्नं घृतम्। द्विर्वचनस्य स एव। इहोभयं प्राप्नोति। जग्मतुः। जग्मुः। जघ्नतुः। जघ्नुः। णि
लोपस्यावकाशः। कारणा। हारणा। द्विर्वचनस्य स एव। इहोभयं प्राप्नोति। आटिटत्। आशिशत्। उत्व
स्यावकाशः। निपूर्त्तीः पिण्डाः। द्विर्वचनस्य स एव। इहोभयं प्राप्नोति। मित्रावरुणौ ततुरिः। दूरे ह्यध्वा
जगुरिः। द्विर्वचनं भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वक्तव्यः। इष्टवाची पर
शब्दः। विप्रतिषेधे परं यदिष्टं तद्भवतीति। द्विर्वचनात् प्रसारणात्वधात्वादिविकारील्वेत्वोत्वगुणवृद्धि
विधयः। द्विर्वचनात् प्रसारणात्वधात्वादिविकारील्वेत्वोत्वगुणवृद्धिविधयो भवन्ति विप्रतिषेधेन।
द्विर्वचनस्यावकाशः। बिभिदतुः। बिभिदुः। संप्रसारणस्यावकाशः। इष्टम्। सुप्तम्। इहोभयं प्राप्नोति। ईज
तुः। ईजुरिति। नैतदस्ति। अस्त्वत्र द्विर्वचनं द्विर्वचने कृते परस्य रूपस्य कितीति भविष्यति पूर्वस्य लिट्य
भ्यासस्योभयेषामिति। इदं तर्हि सोऽपुष्यते। इदं चाप्युदाहरणम्। ईजतुः। ईजुः। ननु चोक्तमस्त्वत्र द्विर्वचनं
द्विर्वचने कृते परस्य रूपस्य किति भविष्यति पूर्वस्य लिट्यभ्यासस्योभयेषामिति। न सिध्यति। न संप्रसा
रणे संप्रसारणमिति प्रतिषेधः प्राप्नोति। अकारेणाव्यवहितत्वान्न भविष्यति। एकादेशे कृते नास्ति व्यव
धानम्। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव। एवं तर्हि समानाङ्गग्रहणं त
त्र चोदयिष्यति। आत्वस्यावकाशः। ग्लाता। म्लाता। द्विर्वचनस्य स एव। इहोभयं प्राप्नोति। जग्ले। मम्ले।
धात्वादिविकाराणामवकाशः। नमति। सिञ्चति ॥

इति। स्वपिस्यमिव्येञां यङीति संप्रसारणम्। जग्ल इति। आवे लकारः। अशितीति पर्युदासपक्षे विप्रतिषेधः। प्रसज्यप्र
तिषेधे त्वनैमित्तिकत्वादात्वमन्तरङ्गम्। एवं सत्वनत्वे अपि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वेक्रीयतइति।यङिरीङृतइतिरीङादेशः।उवोणेति।अमन्त्रइतिप्रतिषेधादिजादेरित्याम्नभवति।नैकमुदाहरणमिति अन्यथाऽभ्यासस्यार्तेरितिब्रूयात्।उवोणेत्यादौतु छन्दस्त्वाद्यथाम्नदृश्यते।ततइयङादिप्रकरणेतन्वादीनांछन्दसि

द्विर्वचनस्यसएव।इहोभयंप्राप्नोति।ननाम।सिषेच।सस्नौ।रीत्वस्यावकाशः।मात्रीयति।पित्रीयति।द्विर्वचनस्यसएव।इहोभयंप्राप्नोति।चेक्रीयते।जेह्रीयते।ईत्वस्यावकाशः।पीयते।गीयते।द्विर्वचनस्यसएव।इहोभयंप्राप्नोति।पेपीयते।मेमीयते।इत्वोत्वयोरवकाशः।आस्तीर्णं।निपूर्तम्।द्विर्वचनस्यसएव।इहोभयंप्राप्नोति।आतेस्तीर्यते।निपोपूर्यते।गुणवृद्ध्योरवकाशः।चेता।गौः।द्विर्वचनस्यसएव।इहोभयंप्राप्नोति।चिचाय।चिचयिथ।लुलाव।लुलविथ।नैतदस्तिप्रयोजनम्।अस्त्वत्रद्विर्वचनं।द्विर्वचनेकृतेपरस्यगुणवृद्धीभविष्यतः।इदंतर्हिप्रयोजनम्।इयाय।इययिथ।ननुचात्राप्यस्तुद्विर्वचनं।द्विर्वचनेकृतेपरस्यगुणवृद्धीभविष्यतः।नसिद्ध्यति।अन्तरङ्गत्वात्सवर्णदीर्घत्वंप्राप्नोति।वार्णादाङ्गंबलीयइतिगुणवृद्धीभविष्यतः।किंवक्तव्यमेतत्।नहि।कथमनुच्यमानंगंस्यते।आचार्यप्रवृत्तिर्ज्ञापयतिवार्णादाङ्गंबलीयोभवतीति।यदयमभ्यासस्यासवर्णइत्यसवर्णग्रहणंकरोति।कथंकृत्वाज्ञापकम्।नह्यन्तरेणगुणवृद्धीअसवर्णपरोऽभ्यासोभवति।नैतदस्तिज्ञापकम्।अर्त्यर्थमेतत्स्यात्।इयर्तः।इयृथः।उवोण।उवोणिथ।यत्तर्हिदीर्घइणःकितीतिदीर्घत्वंशास्ति।एतस्याप्यस्तिवचनेप्रयोजनम्।किम्।सवर्णदीर्घबाधनार्थमेतत्स्यात्।सत्यमेवंतर्हिसवर्णदीर्घत्वंबाधतेएवंयणादेशमपिबाधेत।एवंतर्हियणादेशेयोगविभागःकरिष्यते।इदमस्ति।इणोयण्भवति।ततएरनेकाचः।एश्चानेकाचः इणोयण्भवति।ततोऽसंयोगपूर्वस्य।एरनेकाचइत्येव।असवर्णग्रहणमेवतर्हिज्ञापकम्।ननुचोक्तमर्त्यर्थमेतत्स्यादिति।नैकमुदाहरणमसवर्णग्रहणंप्रयोजयति।एवमपिस्थानिवद्भावादियङ्प्राप्नोति।अथसत्यपिविप्रतिषेधेयावतास्थानिवद्भावःकथमिवैतत्सिद्ध्यं।कस्मादेवात्रनभवति।योनादिष्टादचःपूर्वस्तस्यविधिंप्रतिस्थानिवद्भावः।आदिष्टाच्चैषोऽचःपूर्वइति॥ इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येषष्ठाध्यायस्यप्रथमेपादेप्रथममाह्निकम्॥

ति

बहुत्वमित्युवङ्भविष्यति।यथासुवर्गोलोकइतिभावः।एवमपीति।यदिपूर्वंद्विर्वचनंक्रियतेपश्चाद्गुणवृद्धीइत्यर्थः॥ इत्युपाध्यायजैयटपुत्रकैयटकृतेभाष्यप्रदीपेषष्ठाध्यायस्यप्रथमेपादेप्रथममाह्निकम्॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यङः संप्रसारणम्॥ कारीषगन्ध्यापुत्रकुलमिति। पुत्रस्य कुलं पुत्रकुलं कारीषगन्ध्यायाः पुत्रकुलं कारीषगन्ध्यापुत्रकुलम्। यद्यप्यत्र तदादिविधिर्नास्ति तथापि पुत्रपतिशब्दानन्तर्यमाश्रय संप्रसारणप्रसङ्गश्चोद्यते। यदा तु कारीषगन्धीपुत्रस्य कुलमिति विग्रहस्तदा कारीषगन्धीपुत्रकुलमिति भवत्येव। वर्णग्रहणादिति। वर्णग्रहणे तदादिविधिविज्ञानादिह च वर्णग्रहणात्सिद्धमित्यर्थः। न च तदादिविध्यभावेपि तदादौ पुत्रपत्यानन्तर्यमाश्रय संप्रसारणप्रसङ्गो यस्मात्तत्पुरुष इत्यनेनाधाहारः। ष्यङन्तस्य पुत्रपत्योश्चोपात्तस्तत्पुरुषः तत्पुरुषावयवत्वं पुत्रपत्योः स्थापयति। यथा वृक्षे शाखेति वृक्षः शाखायाः प्रत्यासत्त्याऽवयवी प्रतीयते। यथा च वृक्षात्पर्णं पततीत्यपादानत्वेनाप्युपात्तो वृक्षः पर्णस्यावयवित्वेन प्रत्यासत्त्या

ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे॥ ष्यङः संप्रसारणे पुत्रपत्योस्तदादावतिप्रसङ्गः। ष्यङः संप्रसारणे पुत्रपत्योस्तदादावतिप्रसङ्गो भवति। पुत्रपत्यादौ संप्रसारणं प्राप्नोति। कारीषगन्ध्यापुत्रकुलम्। कारीषगन्ध्यापतिकुलम्। वर्णग्रहणात्सिद्धम्। वर्णग्रहण एतद्भवति। यस्मिन्विधिस्तदादाविति। न चेदं वर्णग्रहणम्। वर्णग्रहण इति चेत्तदन्तस्य प्रतिषेधः। वर्णग्रहण इति चेत्तदन्तस्य प्रतिषेधो वक्तव्यः। पुत्रपत्यन्ते संप्रसारणं प्राप्नोति। कारीषगन्ध्यापरमपुत्रः। कारीषगन्ध्यापरमपतिः। कौमुदगन्ध्यापरमपुत्रः। कौमुदगन्ध्यापरमपतिः। किं कारणम्। यत्र हि तदाविधिर्नास्ति तदन्तविधिना तत्र भवितव्यम्। सिद्धं तूत्तरपदवचनात्। सिद्धमेतत्। कथम्। उत्तरपदवचनात्। पुत्रपत्योरुत्तरपदयोरिति वक्तव्यम्॥

गम्यते। यत्तु कारकसूत्रे भाष्य उक्तं न ज्ञायते कङ्कस्य वा कुररस्य वेति। तच्छब्दव्यापाराभिप्रायेण। इह च पुत्रपत्यादौ तत्पुरुषे यौ पुत्रपती तौ ष्यङन्तावयवस्य तत्पुरुषस्यावयवौ न भवत इति संप्रसारणाभावः। तदन्तप्रतिषेध इति। तदन्तविध्यपवादस्तदादिविधिरिति तदभावे तदन्तविधिना भाव्यम्। तत्पुरुषेण सन्निधापितमुत्तरपदं पुत्रपतिभ्यां विशेष्यत इत्यस्ति तदन्तविधिप्रसङ्गः। सिद्धं त्विति। तत्पुरुषे नियतसंनिधाने पूर्वपदोत्तरपदे। विशेषणविशेष्यभावे च कामचारादुत्तरपदेन पुत्रपती विशेष्येते। तत्रोत्तरपदान्तयोः पुत्रपत्योरसंभवादुत्तरपद एव पुत्रपती गृह्येते। पुत्रपतिभ्यां तूत्तरपदं न विशेष्यत इति तदन्तविध्यभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ष्यङन्तमिति।प्रत्ययग्रहणपरिभाषयातदन्तस्यकार्यित्वात्।हंसशिरांसीति।अनुस्वारस्यासिद्धत्वाद्धकाराकारस्यदीर्घप्रसङ्गः।
 तत्तर्हिवक्तव्यम्।नवक्तव्यम्।पूर्वपदमुत्तरपदमितिसंबन्धिशब्दावेतौ।सतिपूर्वपदेउत्तरपदंभवति।
सतिचोत्तरपदेपूर्वपदमिति।नचात्रपुत्रपतीउत्तरपदे।इहापितर्हिनप्राप्नोति।कारीषगन्धीपुत्रः।का
रीषगन्धीपतिरिति।किंकारणम्।पूर्वपदमित्युच्यते।नह्यत्रष्यङ्पूर्वपद मस्ति।ष्यङन्तमेतत्पूर्वपद
म्।कथम्।प्रत्ययग्रहणेयस्मात्सतदादेर्ग्रहणंभवतीति।यदिप्रत्ययग्रहणेयस्मात्सतदादेर्ग्रहणंभव
तीत्युच्यते।परमकारीषगन्धीपुत्रः।परमकारीषगन्धीपतिरितिनसिध्यति।प्रत्ययग्रहणेयस्मात्स
तदादेर्ग्रहणंभवत्यस्त्रीप्रत्ययेनेति।यद्यस्त्रीप्रत्ययेनेत्युच्यते।अतिक्रान्तःकारीषगन्ध्यामतिकारी
षगन्ध्यः।तस्यपुत्रः।अतिकारीषगन्ध्यपुत्रः।अतिकारीषगन्ध्यपतिरित्यत्रापिप्राप्नोति।अस्त्रीप्रत्यये
नानुपसर्जनेन।योह्युपसर्जनंस्त्रीप्रत्ययोभवत्येषातत्रपरिभाषाप्रत्ययग्रहणेयस्मात्सतदादेर्ग्रहणंभव
तीति।ष्यङन्तेयावन्तोयणस्तेषांसर्वेषांसंप्रसारणंप्राप्नोति।वाराहीपुत्रः।तार्णकर्णीपुत्रः।तत्राप्र
त्ययस्थस्यप्रतिषेधः।तत्राप्रत्ययस्थस्यप्रतिषेधोवक्तव्यः॥यथागृहीतस्यादेशवचनादप्रत्ययस्थेसि
द्धम्।निर्दिश्यमानस्यादेशाभवन्तीत्येवमप्रत्ययस्थस्यनभविष्यति।अनन्त्यविकारेऽन्त्यसदेशस्यवा।
अथवाऽनन्त्यविकारेऽन्त्यसदेशस्यकार्यंभवतीत्येषापरिभाषाकर्तव्या।कःपुनरत्रविशेषः।एषावाप
रिभाषाक्रियेत।अप्रत्ययस्थस्यवाप्रतिषेधउच्येत।अवश्यमेषापरिभाषाकर्तव्या।बहून्येतस्याःप
रिभाषायाःप्रयोजनानि।कानि।प्रयोजनं नसंप्रसारणेसंप्रसारणम्।नसंप्रसारणेसंप्रसारणमित्ये
तन्नवक्तव्यंभवति।कथंव्यधेर्विद्धइति।अनन्त्यविकारेन्त्यसदेशस्यकार्यंभवतीतिनदोषोभवति।नैत
दस्तिप्रयोजनम्।क्रियतेन्यासएव।सान्तमहतोदीर्घत्वेप्रयोजनम्।पयांसि।यशांसि।पय इत्यस्यापिप्रा
प्नोति।अनन्त्यविकारेन्त्यसदेशस्यकार्यंभवतीतिनदोषोभवति।एतदपिनास्तिप्रयोजनम्।नोपधाया इति
तन्त्रवर्तते।एवमप्यनांसिमनांसीत्यत्रापिप्राप्नोति।सान्तसंयोगेनोपधांविशेषयिष्यामः।सान्तसंयोगस्यनो
पधाया इति।एवमपिहंसशिरांसि।ध्वंसशिरांसि अत्रापिप्राप्नोति।नैषदोषः।हस्मतेर्हंसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हन्तेरिति। वृत्रवदिहनीति लक्षणसद्भावात्। हन्तीति। गच्छतीत्यर्थः। यथापरिभाषितमिति। परिभाषितानतिक्रमेणेत्यर्थः।
कः पुनराह। हस्मतेर्हंस इति। किं तर्हि हन्तेर्हंसः। हन्त्यध्यानमिति। एवं तर्हि सर्वनामस्थान इति वर्तते।
सर्वनामस्थानपरतया सान्तसंयोगं विशेषयिष्यामः। सान्तसंयोगेन नोपधां वि
शेषयिष्यामः। सर्वनामस्थानपरस्य सान्तसंयोगस्य नोपधाया इति। अन्कारान्तस्याल्लोपे प्रयोजनम्। त
क्ष्णा। तक्षण इति। तदित्यत्रापि प्राप्नोति। अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवतीति न दोषो भवति। एतद
पि नास्ति प्रयोजनम्। अनाकारं विशेषयिष्यामः। अनो योऽकार इति। एवमप्यनसा नस इत्यत्रापि प्राप्नोति।
अन्कारेणाङ्गं विशेषयिष्यामः। अनाऽकारम्। अन्कारान्तस्यानो योऽकार इति। एवमप्यनस्तक्ष्णा नस्तक्ष्णे
इत्यत्रापि प्राप्नोति। एवं तर्हि कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्। भस्येति तत्रोप
स्थितमिदं भवति यचि भमिति। तत्र यजादिपरतयाऽन्कारं विशेषयिष्यामः। अनाऽकारम्। यजादिप
रस्यानो योऽकार इति। मृजेर्वृद्धिविधौ प्रयोजनम्। न्यमार्ट्। अटोपि वृद्धिः प्राप्नोति। अनन्त्यविकारेऽन्त्यसदे
शस्य कार्यं भवतीति न दोषो भवति। एतदपि नास्ति प्रयोजनम्। यथापरिभाषितमिको गुणवृद्धी इति
इक एव वृद्धिर्भविष्यति। एवमपि मिमार्जिषतीत्यत्र प्राप्नोति। अस्त्वभ्यासनिर्ह्रासेन ह्रस्वो भविष्यति। वसोः
संप्रसारणे। वसोः संप्रसारणे च प्रयोजनम्। विदुषः पश्य। विदिवकारस्यापि प्राप्नोति। अनन्त्यविकारेऽन्त्य
सदेशस्येति न दोषो भवति। एतदपि नास्ति प्रयोजनम्। न संप्रसारणे संप्रसारणमिति प्रतिषेधो भविष्य
ति। इकारेण व्यवहितत्वान्न प्राप्नोति। एवं तर्हि निर्दिश्यमानस्यादेशा भवन्तीति न भविष्यति। युवादीनां
च संप्रसारणे प्रयोजनम्। यूनः पश्य। यूना। यूने। यकारस्यापि प्राप्नोति। अनन्त्यविकारेऽन्त्यसदेशस्येति न
दोषो भवति। एतदपि नास्ति प्रयोजनम्। न संप्रसारणे संप्रसारणमिति न भविष्यति। उकारेण व्यवहित
त्वान्न प्राप्नोति। एकादेशे कृते नास्ति व्यवधानम्। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यव
धानमेव। एवं तर्हि समानाङ्गग्रहणं तत्र चोदयिष्यति। र्वोरुपधाग्रहणं च। र्वोरुपधाग्रहणं न कर्तव्यं भ
वति। र्वोरुपधाया दीर्घ इक इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अबिभरिति। डुभृञोलङ् तिप्‌सिपोरन्यतरः। शप्‌श्लुः। द्विर्वचनम्। भृञामिदितीत्वम्। सोतेति। धात्वन्त्यसदेशस्यैवसत्वनत्व
प्रसङ्गः। स्यदस्यत्रेतितदोःसः सावनन्त्ययोरितिसत्वंतकारस्यान्त्यसदेशत्वाभावान्नप्राप्नोति। मङ्क्ष्यतिति। पदान्त्यसदे
शत्वाभावात्संयोगादिलोपाप्रसङ्गः। माषवापाणामिति। विभक्तिस्थस्यनकारस्यपदान्त्यसदेशत्वाभावाण्णत्वाप्रसङ्गः

इहकस्मान्नभवति। अबिभर्भवान्। अनन्त्यविकारेन्त्यसदेशस्येतिनदोषोभवति। एतदपिनास्तिप्रयोजन
म्। क्रियतेन्यासएव। आदित्यदादिविधिसंयोगादिलोपकुत्वढत्वभष्भावषत्वणत्वेष्वतिप्रसङ्गः। आदिवि
धावतिप्रसङ्गोभवति। धात्वादेःषःसः। णोनः। इहैवस्यात्। नेता। सोता। इहनस्यात्। नमति। सिञ्चतीति। आदि
त्यदादिविधिः। इहैवस्यात्। तद् सः। त्यद् स्यः। इत्यत्रनस्यात्। त्यदादिविधिः। संयोगादिलोपः। इहैवस्यात्।
मङ्क्ता। मङ्क्ष्यमित्यत्रनस्यात्। संयोगादिलोपः। कुत्वम्। इहैवस्यात्। पक्ता। पक्तव्यमित्यत्रनस्यात्। ढत्वम्। इहै
वस्यात्। लेढा। लेढव्यमित्यत्रनस्यात्। भष्भावः। इहैवस्यात्। अभुत्सि। अभुत्साताभित्यत्रनस्यात्। षत्वमिहैवस्या
त्। द्रष्टा। द्रष्टव्यमित्यत्रनस्यात्। णत्वम्। इहैवस्यात्। माषवापेण। माषवापाणामित्यत्रनस्यात्। एतेदोषाःसमा
भूयांसोवा। तस्मान्नार्थोऽनयापरिभाषया। नहिदोषाःसन्तीतिपरिभाषानवक्तव्या। लक्षणंवानप्रणेयम्। नहिभि
क्षुकाःसन्तीतिस्थाल्योनाधिश्रीयन्ते। नचमृगाःसन्तीतियवानोप्यन्ते। दोषाःखल्वपिसाकल्येनपरिगणिताः।
प्रयोजनानामुदाहरणमात्रम्। कुतएतत्। नहिदोषाणांलक्षणमस्ति। तस्माद्यान्येतस्याःपरिभाषायाःप्रयोज
नानितदर्थमेषापरिभाषाकर्तव्या। प्रतिविधेयंदोषेषु। इदंप्रतिविधीयते। उदात्तनिर्देशात्सिद्धम्। यत्रैषाप
रिभाषेष्यतेतत्रोदात्तनिर्देशःकर्तव्यः। ततोवक्तव्यम्। अनन्त्यविकारेन्त्यसदेशस्यकार्यंभवत्युदात्तनिर्देशादि
ति। सतर्ह्युदात्तनिर्देशः कर्तव्यः। नकर्तव्यः। यत्रैवान्त्यसदेशश्चानन्त्यसदेशश्चयुगपत्संभवस्तितत्रैषाप
रिभाषाभवति। दोषेषुचान्यत्रान्त्यसदेशः। अन्यत्रानन्त्यसदेशः। प्रयोजनेषुपुनस्तत्रैवान्त्यसदेशश्चानन्त्यस
देशश्च। तथाजातीयकानिखल्वप्याचार्येणप्रयोजनानिपठितानि। यान्युभयवन्तिभवन्ति ॥

उदात्तनिर्देशादिति। यथास्वरितेनाधिकारः। एवमुदात्तेनैषापरिभाषेत्यर्थः। नकर्तव्यइति। सर्वत्रापिपरिभाषोपस्थाने
दोषाभावात्। यत्रैवेति। विधिनिषेधयोरेकविषयत्वाश्रयणात् ॥

CC-0. In Public Domain. Digitization by eGangotri

इदमेकमिति। अविभरित्यत्रान्त्यसदेशस्यैकोऽसंभवादनन्त्यसदेशस्यैकः प्राप्नोति दीर्घ उपधाग्रहणेन निवर्त्यते॥ बन्धु॥ का
रीषगन्ध्यामातास्येति बहुव्रीहौ कृते ऽस्मादेव वचनान्मातृशब्दस्य मातजादेशश्चकारः स्वरार्थस्तेन पूर्वपदप्रकृतिस्वरत्वं ब

इदमेकं यथादेशास्तथा वोर्हपधाग्रहणमिति। अविभर्भवान्। तत्रापि क्रियते न्यास एव। ष्यङः संप्रसारणम्॥ ब
न्धुनि बहुव्रीहौ॥ मातज्मातृकमातृषु ष्यङः प्रसार्यो विभाषया। मातच्। कारीषगन्ध्यामातास्य कारीषगन्धीमातः।
कारीषगन्ध्यामातः। मातच्। मातृक। कारीषगन्धीमातृकः। कारीषगन्ध्यामातृकः। मातृ। कारीषगन्धीमाता। का
रीषगन्ध्यामाता॥ ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च॥ वयिग्रहणं किमर्थम्।
न वेञ्यजादिषु पठ्यते। वेञश्च वयिरादेशः क्रियते। तत्र यजादीनां कितीत्येव सिद्धम्। तत्रैतत्स्यात् ङिदर्थो
यमारम्भ इति। तच्चन। लिड्यमादेशः। लिट् चकिदेव। अत उत्तरं पठति। वयि ग्रहणं वेञः प्रतिषेधात्। वयि
ग्रहणं क्रियते। वेञः प्रतिषेधात्। वेञो लिटि प्रतिषेधं वक्ष्यति। सः वयेर्माभूदिति। यथैव हि वेञ्ग्रहणाद्वि
धिः प्राप्यते एवं प्रतिषेधोपि प्राप्नोति। न वा यकार प्रतिषेधो ज्ञापकोऽप्रतिषेधस्य। न वा एष दोषः। किं कार
णम्। यदयं लिटि वयो य इति वयेर्यकारस्य संप्रसारणस्य प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो न वेञ्ग्र
हणाद्वयेः संप्रसारणप्रतिषेधो भवतीति। नैतदस्ति ज्ञापकम्। पित्यभ्यासार्थमेतत्स्यात्। वयेः पित्सु वचने
ष्वभ्यासयकारस्य संप्रसारणं माभूदिति। ननु च वेञ्ग्रहणादेव वयेः पित्स्वपि वचनेष्वभ्यासयकारस्य सं
प्रसारणप्रतिषेधः सिद्धः। न सिध्यति। किं कारणम्। कितीति तत्रानुवर्तते। एवमपि वयेः पित्सु वचनेष्वभ्या
सस्य यकारस्य संप्रसारणं न प्राप्नोति। किं कारणम्। हलादिः शेषेण बाध्यते। नात्र हलादिः शेषः प्राप्नोति। किं
कारणम्। वक्ष्यति ह्येतत्। अभ्याससंप्रसारणं हलादिः शेषाद्विप्रतिषेधेनेति। स एष वयेर्यकारस्य संप्रसार
णप्रतिषेधः पित्यभ्यासार्थो न ज्ञापकार्थो भवति। पित्यभ्यासार्थमिति चेन्नाविशिष्टत्वात्। पित्यभ्यासार्थमि
ति चेत्। तन्न। किं कारणम्। अविशिष्टत्वात्। अविशेषेण प्रतिषेधः। निवृत्तं तत्र कितीति। आतश्चाविशेषेण।
वेञोपि हि पित्सु वचनेष्वभ्यासस्य संप्रसारणं नेष्यते। ववौ। ववियेति ॥

पित्वान्नोदात्तत्वं न भवति। मातृमातृकशब्दयोश्च भेदेनोपादानान्नद्यृतश्चेति प्राप्ते समासान्ताभावः॥ ग्रहिज्या ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पा॰ कै॰ विकृतिग्रहणमिति। कश्चिद्ब्रूयादेजइतिसूत्रंमाकारि। वयिग्रहणेनवेञोग्रहणाल्लिटिसंप्रसारणप्रतिषेधोभविष्यती ६ १ २
१६ त्याशङ्क्योक्तंविकृतिग्रहणमिति। यद्यपिवयोयकारस्यप्रतिषेधउक्तोनचवेञोयकारोस्तितथापिपुष्कलपरिहारंव
क्तुमेतन्नाश्रितम्। अथवालिटिवयइतियोगविभागःकरिष्यते। तत्रवयिग्रहणेनवेञोग्रहणात्संप्रसारणप्रतिषेधोभ
विष्यति। ततोयइतिद्वितीयोयोगोनियमार्थोयस्ययकारस्यान्यस्यास्तितस्यवयेर्यकारस्यैवनिषेधोभवतीत्याशङ्क्यो

विकृतिग्रहणंखल्वपिप्रतिषेधेक्रियते। नचविकृतिःप्रकृतिंगृह्णाति॥ लिट्यभ्यासस्योभयेषाम्॥ ग्रहिव
श्चतिपृच्छतिभृज्जतीनामविशेषः। यदुच्यतेवृश्चेरविशेषइति। तन्न। यद्यत्ररेफस्यसंप्रसारणंनस्यात्।
वकारस्यप्रसज्येत। रेफस्यपुनःसंप्रसारणेसतिउरदत्वस्यस्थानिवद्भावान्नसंप्रसारणेसंप्रसारणमितिप्र
तिषेधःसिद्धोभवति। तस्माद्वक्तव्यमेतत्। ग्रहेरविशेषःपृच्छतिभृज्जत्योरविशेषइति। अथोभयेषांग्रहणं
किमर्थम्। उभयेषामभ्यासस्यसंप्रसारणंयथास्यात्। वचिस्वपियजादीनाम्। ग्रहादीनांच। नैतदस्तिप्रयो
जनम्। प्रकृतमुभयेषांग्रहणमनुवर्तते। यद्यनुवर्ततेग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छति
भृज्जतीनांङितिचेतियजादीनांङित्यपिप्राप्नोति। नैषदोषः। संबन्धमनुवर्तिष्यते। वचिस्वपियजादी
नांकिति। ग्रहादीनांङितिच। वचिस्वपियजादीनांकिति। ततोलिट्यभ्यासस्योभयेषाम्। किति ङितीतिनि
वृत्तम्। अथवामण्डूकगतयोऽधिकाराः। यथामण्डूकाउत्प्लुत्योत्प्लुत्यगच्छन्तितद्वदधिकाराः। अथवैक
योगःकरिष्यते। वचिस्वपियजादीनांकितिग्रहादीनांङितिचेतिततोलिट्यभ्यासस्येति। नचैकयो
गेऽनुवृत्तिर्भवति। अथवोभयंनिवृत्तम्। तदपेक्षिष्यामहे ॥

क्तंविकृतिग्रहणमिति। प्रकृत्याविकृतिर्गृह्यतेस्थानिवद्भावान्नतुविकृत्याप्रकृतिर्भिन्नरूपत्वादितिभावः। तदेवं
वयिग्रहणंप्रत्याख्यातम्॥ लिट्यभ्या॥ ग्रहीति॥ असतिसूत्रेयद्रूपंतदेवसतीत्यभिप्रायेणैतदुक्तम्। भाष्यकारस्तुरे रामः
फस्यसंप्रसारणेसत्यसतिवाविशेषोनास्तीतिमत्वावार्तिककारेणैतदुक्तंतच्चायुक्तमितिमन्यमानआह। यदुच्यतइति। १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं तर्हीति। उभयेषां ग्रहणात्पुनः संप्रसारणस्य विधिर्भवन् विध्यन्तरस्य बाधको भवति। आकारलोपश्चेति। सति चाकार

इदं तर्हि उभयेषां ग्रहणस्य प्रयोजनम्। उभयेषामभ्यासस्य संप्रसारणमेव यथा स्यात्। यदन्यत्प्राप्नोति
तन्मा भूदिति। किं चान्यत्प्राप्नोति। हलादिशेषः। अभ्यासस्य संप्रसारणं हलादिःशेषाद्विप्रतिषेधेनेति वक्ष्य
ति। स पूर्वविप्रतिषेधो न पठितव्यो भवति। अभ्याससंप्रसारणं हलादिःशेषाद्विप्रतिषेधेन अभ्याससंप्रसारणस्य
णं भवति हलादिशेषाद्विप्रतिषेधेन। अभ्याससंप्रसारणस्यावकाशः। इयाज। उवाय। हलादिशेषस्याव
काशः। बिभिदतुः। बिभिदुः। इहोभयं प्राप्नोति। विव्याध। विव्यधिथ। अभ्याससंप्रसारणं भवति पूर्वविप्रति
षेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वा संप्रसारणाश्रयबलीयस्त्वादन्यत्रापि। न वा वक्तव्यः। किं का
रणम्। संप्रसारणाश्रयस्य बलीयस्त्वादन्यत्रापि। संप्रसारणं संप्रसारणाश्रयं च बलीयो भवतीति वक्त
व्यम्। अन्यत्रापि नावश्यमिहैव वक्तव्यम्। किं प्रयोजनम्। प्रयोजनं रमाल्लोपेयङ्यणः। रम्। भृष्टः। भृष्टवा
न्। संप्रसारणं च प्राप्नोति रमभावश्च। परत्वाद्रमभावः स्यात्। संप्रसारणं बलीयो भवतीति वक्तव्यम्। संप्रसा
रणं यथा स्यात्। आल्लोपः। जुहुवतुः। जुहुवुः। संप्रसारणं च प्राप्नोत्याकारलोपश्च। परत्वादाकारलोपः स्यात्।
संप्रसारणं बलीयो भवतीति वक्तव्यम्। संप्रसारणं यथा स्यात्। संप्रसारणे कृते पूर्वत्वं च प्राप्नोत्याकारलोप
श्च। परत्वादाकारलोपः स्यात्। संप्रसारणाश्रयं च बलीयो भवतीति वक्तव्यम्। पूर्वत्वं यथा स्यात्। इयङ्। शु
शुवतुः। शुशुवुः। संप्रसारणं च प्राप्नोति। इयङादेशश्च। परत्वादियङादेशः स्यात्। संप्रसारणं बलीयो भव
तीति वक्तव्यम्। संप्रसारणं यथा स्यात्। यण्। संप्रसारणे कृते पूर्वत्वं च प्राप्नोति। यणादेशश्च। परत्वाद्यणा
देशः स्यात्। संप्रसारणाश्रयं च बलीयो भवतीति वक्तव्यम्। पूर्वत्वं यथा स्यात्। नैतानि सन्ति प्रयोजनानि।
यत्तावदुच्यते रमिति। इदमिह संप्रधार्यम्। रमभावः क्रियतां संप्रसारणमिति। किमत्र कर्तव्यम्। परत्वाद्र
मभावः। नित्यं संप्रसारणं कृतेपि रमभावे प्राप्नोत्यकृतेपि। रमभावोपि नित्यः कृतेपि संप्रसारणे प्राप्नोत्यकृतेपि॥

लोपे तस्य स्थानिवद्भावादुवङ् न स्यात्ततश्च यणादेशः प्रसज्येत। यणादेशश्चेति। एरनेकाच इत्यनेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपदेश इति। तेनोपदेशयोरेफस्तस्य रस्भावः। उरुव्यचा इति। उरु विचतीति मिथुनेऽसिः पूर्ववच्च सर्वमित्यसिप्रत्ययः ॥
स्वापेः॥ ङितीति वर्तत इति। कितीत्येतत्तु चानुकृष्टत्वात्स्वरितत्वाद्वा नानुवर्तिष्यत इति भावः। तच्च ङिद्ग्रहणं लिट्यभ्यास
स्योभयेषामित्यत्र नानुवर्तते। लिटो ङित्वासंभवादिहैव त्वनुवर्तते। नचान्य इति। यङ् तावदनेकाच्त्वात्स्वापेर्नास्ति। अ
पि सार्वधातुकं तु विकरणैर्व्यवहितमङादयः स्वापेर्न विहिताः॥ नवशः॥ वशेर्यङीति। यथा स्वापेश्चङीत्यत्र ङिद्ग्रह
णानुवृत्त्या चङीति प्रत्याख्यातं तथेहापि ङिद्ग्रहणानुवृत्त्या ङित्त्वान्नेप्रतिषेध इत्याशङ्कानिवारणाय वार्त्तिककारो यङ्ग्र

कथम्। योसावृकारे रेफस्तस्य चोपधायाश्च प्राप्नोति। अनित्योरस्भावः। नहि कृते संप्रसारणे प्राप्नोति। किंका
रणम्। नहि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते। अथापि गृह्यन्ते एवमप्यनित्यः। उपदेश इति वर्तते। तच्चाव
श्यमुपदेशग्रहणमनुवर्त्यं बरीभृज्यत इत्येवमर्थम्। आल्लोपे यङ्ण इति। नित्यं संप्रसारणम्। अन्तरङ्गं
पूर्वत्वम्। तदेतदनन्यार्थं संप्रसारणं तदा अयं च बली यो भवतीति वक्तव्यम्। पूर्वविप्रतिषेधो वक्तव्यः ।
उभयेनवक्तव्यम्। उक्तमुभयेषां ग्रहणस्य प्रयोजनम्। उभयेषामभ्यासस्य संप्रसारणमेव यथा स्यात्। य
दन्यत्प्राप्नोति तन्मा भूदिति। व्यचेः कुटादित्वमनस्यञ्णिति संप्रसारणार्थम्। व्यचेः कुटादित्वमनसि वक्त
व्यम्। किं प्रयोजनम्। अञ्णिति संप्रसारणार्थम्। अञ्णिति संप्रसारणं यथा स्यात्। उद्विचिता उद्विचितुम्। उद्वि
चितव्यम्। अनसीति किमर्थम्। उरुव्यचाः। कण्टकः॥ स्वापेश्चङि॥ चङ्ग्रहणं शक्यमकर्तुम्। कथम्। ङिती
ति वर्तते। नचान्यः स्वापेर्ङिदस्त्यन्यदतश्चङः॥ नवशः॥ वशेर्यङि प्रतिषेधः। वशेर्यङि प्रतिषेधो वक्तव्यः
संप्रसारणस्य। वावश्यते। क्व मा भूत्। उष्टः। उशन्तीति। स तर्हि तथा प्रतिषेधो वक्तव्यः। न वक्तव्यः। यङीति व
र्तते। एवं तर्ह्यन्वाचष्टे यङीति वर्तत इति। नैतदन्वाख्येयमधिकारा अनुवर्तन्त इति। एष एव न्यायो यदुता
धिकारा अनुवर्तेरन्निति॥ शृतं पाके॥ किं निपात्यते। श्राश्रप्योः शृभावः॥ श्राश्रप्योः शृभावो निपात्यते ॥

हणानुवृत्तिमन्वाचष्टे। नैतदन्वाख्येयमिति। स्वापेश्चङीत्यत्र चङ्ग्रहणं कृतमेव। ततश्च ङितीत्यस्यानधिकाराद्यङेव संबध्य
ते। अनन्तरत्वात्॥ शृतं पाके॥ श्राश्रप्योरिति। श्रा पाक इत्यदादौ पठ्यते। श्रै पाक इति भ्वादौ। घटादिषु तु मित्वार्थं श्रा पाक इति पठ्यते।
श्रातिश्च कर्मकर्तृविषयस्य पचेरर्थे पच्यमानकर्तृकव्यापारे वर्तते। ततः पक्तृव्यापारे णिजुत्पद्यते। ततश्च पचतीति योर्थः स एव श्रपय
तीति गम्यते। तत्र यदा श्रातेः क्त उत्पद्यते तदा कर्मकत्वात्कर्तरि भवति श्रपेस्तु कर्मणि। शृतं क्षीरं स्वयमेव। शृतं क्षीरं देवदत्तेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपेः शृतमन्यत्र हेतोरिति। हेतुशब्देन प्रयोजकस्य हेतोर्व्यापारः प्रेषणादिलक्षणः उपचारादुच्यते तेन पक्तुर्यः प्रयोजकस्तदीये
व्यापारे पचिप्रकृतिणिज्वाच्ये श्रपयते रुत्पन्नस्य णिचो भिधेये क्षीरं हविषोरपि शृतमिति न भवति किं तु श्रपितमिति। तत्र श्रा
श्रप्योरिति वचनादाद्यपक्तृलक्षणप्रयोजकव्यापाराङ्गीकरणादन्यत्र हेतोरित्यनेन पाचयितृलक्षणप्रयोजकव्यापारनिषे
धः सामर्थ्यादवसीयते। एतच्च पाकग्रहणाल्लभ्यते। द्विविधो हि पाको विक्लित्तिलक्षणो विक्लेदनालक्षणश्च। पाचयितृव्यापारे तु
णिविकृते पाचनालक्षणोऽर्थः प्राधान्येनाभिधीयते न तु पाकलक्षण इति निपातनाभावः॥ प्यायः पी॥ आङ्पूर्वस्य चेति। आङा श्र

क्षीरहविषोरिति वक्तव्यम्। शृतं क्षीरम्। शृतं हविः। क्व माभूत्। श्राणा यवागूः। श्रपिता यवागूरिति। अपेः शृत
मन्यत्र हेतोः। अपेः शृतमन्यत्र हेतोरिति वक्तव्यम्। इह माभूत्। श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेनेति॥ प्यायः
पी॥ आङ्पूर्वादन्धूधसोः। आङ्पूर्वादन्धूधसोरिति वक्तव्यम्। आपीनोऽन्धुः। आपीनमूधः। किं प्रयोजनम्। नि
यमार्थम्। आङ्पूर्वादन्धूधसोरेव। क्व माभूत्। आप्यानश्चन्द्रमा इति। उभयतो नियमश्चायं द्रष्टव्यः। आङ्
पूर्वादेवान्धूधसोः। अन्धूधसोरेवाङ्पूर्वादिति। क्व माभूत्। प्रप्यानोऽन्धुः। प्रप्यानमूधः। आङ्पूर्वाच्चेष नि
यमो द्रष्टव्यः। भवति हि पीनं मुखम्। पीना शाटी। पीनाः शंवत्याः। क्लक्ष्णपीनमुखी कन्येति॥ विभाषा श्वेः॥ श्वेर्लिट्यभ्यास
लक्षणप्रतिषेधः॥ श्वेर्लिट्यभ्यासलक्षणं संप्रसारणं नित्यं प्राप्नोति। तस्य प्रतिषेधो वक्तव्यः। शिश्वियतुः।
शिश्वियुः। किमुच्यतेऽभ्यासलक्षणस्येति। न पुनः किल्लक्षणस्यापि। किल्लक्षणमपि हि नित्यमत्र प्राप्नोति।
किल्लक्षणं च विभाषा बाधिष्यते। यथैव तर्हि किल्लक्षणं श्वयतिलक्षणं बाधत एवमभ्यासलक्षण
मपि बाधेत॥

यणेन नियमद्वयविधानात्केवलस्य सर्वत्र पीभावः। आङ्पूर्वादेवान्धूधसोरित्यनेन नियमेन तुल्यजातीयत्वादुपसर्गान्तरं निवा
र्यते न तु केवलः प्यायतिः॥ विभाषा श्वेः॥ लिटः कित्त्वाकित्त्वभेदेन द्वैविध्यादुभयत्र विभाषेयम्। तत्र संप्रसारणपक्षे कृते संप्रसारण
स्य द्विर्वचनान्नास्ति वक्तव्यं संप्रसारणाभावपक्षे त्वभ्यासस्य लिट्यभ्यासस्योभयेषामिति संप्रसारणं प्राप्नोतीति मत्वाह। श्वेर्लि
टीति। यथैवेति। किल्लक्षणं नित्यं संप्रसारणं परत्वादियं विभाषा बाधते यथा तथाभ्यासलक्षणमपीति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्येयजादयइति। केषुचिदवयवेषुकृतंशास्त्रंसमुदायेप्रवृत्तंभवति। नहिश्वयतेरितियजादीनामितिव्यवस्थावाच्यादि शब्दोपादानाद्वयश्चपाठंसर्वेषांचोदितत्वात्कार्येणभाव्यम्। सर्वकार्यार्थश्चगणपाठः इतिकितिसंप्रसारणंयजादिषुश्व यतिपाठस्यावकाशइत्यपिनशक्यतेवक्तुम्। ह्वः सं॥ ह्वः संप्रसारणेयोगविभागइति। इहैकमनेकंवाकार्यविधातुकाल विच्छेदाभावेननिर्देशएकयोगः। तत्रैकस्मिन्योः गेपठ्यमानेऽव्याप्तिरितियोगविभागः कर्तव्यः। ह्वोऽभ्यस्तस्येत्युच्य

नन्वभ्यासोऽपवादत्वाच्छ्वयतिलक्षणंकिल्लक्षणंबाधिष्यतइति। किंतर्हिपरत्वात्। श्वयतिलक्षणस्यावका शः। यित्तिवचनानि। शुशाव। शुशविथ। शिश्वाय। शिश्वयिथ। किल्लक्षणस्यावकाशोऽन्येकितः। ऊनः। ऊ नवान्। इहोभयंप्राप्नोति। शिश्वियतुः। शिश्वियुरिति। श्वयतिलक्षणंभवतिविप्रतिषेधेन। अभ्यासल क्षणादपितर्हिश्वयतिलक्षणंभविष्यति विप्रतिषेधेन। अभ्यासलक्षणस्यावकाशोऽन्येयजादयः। इ याज। उवाप। श्वयतिलक्षणस्यावकाशः परंधातुरूपम्। शुशुवतुः। शुशुवुः। शुशविथ। श्वयतेरभ्यास स्योभयंप्राप्नोति। शिश्वियुः। श्वयतिलक्षणंभविष्यतिविप्रतिषेधेन। नैषयुक्तोविप्रतिषेधः। नहिश्वयते रभ्यासस्यान्येयजादयोऽवकाशः। श्वयतेर्यजादिषुयः पाठः सोऽनवकाशस्तस्यानवकाशत्वादयुक्तो विप्रतिषेधः। तस्मात्सुष्ठुच्यतेश्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधइति॥ ह्वः संप्रसारणम्॥ अभ्यस्त स्यच॥ ह्वः संप्रसारणेयोगविभागः। ह्वः संप्रसारणेयोगविभागः कर्तव्यः। ह्वः संप्रसारणंभवति। णौच संश्चङोः। ततोऽभ्यस्तस्यचसंप्रसारणंभवतीति। किमर्थोयोगविभागः। णौचसंश्चङ्विषयार्थः। णौचसं श्चङ्विषयेह्वः संप्रसारणंयथास्यात्। जुहावयिषति। अजूहवत्। किंपुनः कारणंनसिद्ध्यति। ह्वोऽभ्यस्तस्येत्युच्यते।

तद्व्यभिहितेएवंतर्हिह्वयतेरभ्यस्तस्येत्यादिकमर्थभेदाभावात्पुनरुक्तमित्याहुः। तत्रपौनरुक्त्यंपरिहरति। जिह्वाय कीयिषतीत्यादौसंप्रसारणंमाप्रवर्तिष्टेतिह्वयतेरर्थाव्यतिरेको रूपाव्यतिरेकोवाश्रयितव्यस्तत्रपूर्वग्रन्थोऽर्थव्यतिरे काश्रयउत्तरस्तुरूपव्यतिरेकाश्रयः। इहह्वयतेरर्थोयत्रनव्यतिरिच्यतेयथाजुहावजुहविथेति। तत्रसंप्रसारणेनभाव्य मानत्वर्थव्यतिरेके। ह्वाययतौचण्यर्थस्यप्राधान्याद्व्यतिरिक्तार्थोह्वयतिरितिपूर्वपक्षः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचैतदिति। अव्यतिरेक्तार्थस्येतिभावः। अव्यतिरिक्तार्थत्वाश्रीयमाणे जुहूषतीत्यत्र न प्राप्नोति। प्रत्ययार्थस्येच्छायाः प्राधान्या
त्प्रकृत्यर्थस्य गुणभावादिति मत्वाह। ह्वू एतदिति। णिचि तर्हि युकि कृते रूपस्याव्यतिरिक्तत्वात्संप्रसारणाप्राप्तिरिति मत्वा
ह। एवं तर्हि ह्वयतेरिति। युगागमस्य तद्भक्ततया नास्ति रूपव्यतिरेक इत्याह। ह्वयतिरिति। प्रकारान्तरेण संप्रसङ्गपरेणाव
प्राप्तिमाह। एवमपीति। अनभ्यस्तस्येति। अकृतद्विर्वचनस्येत्यर्थः। व्यवहितत्वादिति। अवर्णहकाराभ्यां पूर्वो यण् व्यवहित इ
ति तस्य संप्रसारणप्रतिषेधो न भविष्यतीत्यर्थः। तद्यथेति। ननु दृष्टान्तेषु विरुद्धपदसामानाधिकरण्याद्गौणार्थत्वं प्रती

नचैतद्ह्वोऽभ्यस्तम्। कस्य तर्हि ह्वाययतेः। ह्वू एतदभ्यस्तम्। कथम्। एकाचो द्वे प्रथमस्येति। एवं तर्हि ह्वयते
रभ्यस्तस्येत्युच्यते। न चात्र ह्वयतिरभ्यस्तम्। कस्तर्हि ह्वाययतिः। ह्वयतिरेवात्राभ्यस्तम्। कथम्। एकाचो द्वे
प्रथमस्येति। एवमप्यभ्यस्तनिमित्तेऽनभ्यस्तसंप्रसारणार्थम्। अभ्यस्तनिमित्त इति वक्तव्यम्। किं प्रयो
जनम्। अनभ्यस्तस्य संप्रसारणार्थम्। अनभ्यस्तस्य संप्रसारणं यथा स्यात्। जुहूषति। जोहूयते। अभ्यस्त
प्रसारणे ह्यभ्यासप्रसारणाप्राप्तिः। अभ्यस्तप्रसारणे हि अभ्यासप्रसारणस्याप्राप्तिः स्यात्। न संप्रसारणे संप्र
सारणमिति प्रतिषेधः प्रसज्येत। ननु च व्यवहितत्वान्न भविष्यति। समानाङ्गे प्रसारणप्रतिषेधात् प्रति
षेधः। समानाङ्गे प्रसारणप्रतिषेधात्प्रतिषेधः प्राप्नोति। समानाङ्गग्रहणं तत्र चोदयिष्यति। कृदन्तप्रतिषे
धार्थं वा। अभ्यस्तनिमित्त इति वक्तव्यम्। किं प्रयोजनम्। ह्वायकमिच्छति ह्वायकीयति। ह्वायकीयतेः सन्
जिह्वायकीयिषति। स तर्हि निमित्तशब्द उपादेयः। न ह्यन्तरेण निमित्तशब्दं निमित्तार्थो गम्यते। अन्तरे
णापि निमित्तशब्दं निमित्तार्थोऽवगम्यते। तद्यथा। दधित्रपुसं प्रत्यक्षो ज्वरः। ज्वरनिमित्तमिति गम्यते। नड्वलो
दकं पादरोगः। पादरोगनिमित्तमिति गम्यते। आयुर्वै घृतम्। आयुषो निमित्तमिति गम्यते। अथवाऽकारो म
त्वर्थीयः। अभ्यस्तमस्त्यस्मिन्सोऽयमभ्यस्तोऽभ्यस्तस्येति। अथवाऽभ्यस्तस्येति नैषा ह्वयतिसमानाधिकरणा षष्ठी।

यते। इह तु मुख्यार्थसंभवे कथं गौणस्य ग्रहणम्। लक्ष्यसंस्कारार्थत्वाल्लक्षणस्य तत्सिद्धये गौणस्याप्यर्थस्येहाङ्गीकरणाददो
षः। अथवेति। यौगिकत्वान्निमित्तेऽभ्यस्तशब्दस्य गौणार्थत्वाभावः। ह्वयतिरेवाभ्यस्तशब्देनोच्यते। ननु सनादिः प्रत्यय इ
ति षष्ठीनिर्देशो न चोदनीयः। अभ्यस्तमस्मिन्नस्तीत्यधिकरणत्वेन ह्वयतिरेव निर्दिष्टः। प्रत्ययाभिधाने वा सप्तम्याः स्थाने ष
ष्ठीकृता। व्यधिकरणैवा षष्ठ्यौ। अभ्यस्तस्य सनादेः प्रकृतिर्यो ह्वयतिस्तस्येत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यस्तस्य योह्वयतिरिति। एवं चोभयप्रसङ्गे परत्वात्संप्रसारणे कृते द्विर्वचनमित्यदोषः। जिह्वामकीयिषतीत्यत्र तु नभवत्यभ्यस्तेन प्रत्ययविशेषस्याक्षेपादभ्यस्तनिमित्ते प्रत्यये ऽनन्तरं स ह्वयतेः संप्रसारणाभावात् तएव सन् चङ् परे णौ न प्राप्नोतीति योगविभागः कर्तव्यः॥ अपस्पृ॥ कस्यांचिच्छाखायामपस्पृधेथामित्येकं पदमाद्युदात्तं पठ्यते। पदद्वयं चाभ्यस्याम्। तत्र द्वितीयमाद्युदात्तम्। तदुभयमप्यनेन न संगृह्यते। एकश्रुत्या स्वरसर्वनाम्नापाठात्। तत्रैकपद्ये तिङ्ः तिङ इति निघातः

कातर्हि संबन्धषष्ठी। अभ्यस्तस्य योह्वयतिः। किं चाभ्यस्तस्य ह्वयतिः प्रकृतिः। ह्वोऽभ्यस्तस्य प्रकृतेरिति। योगविभागस्तु कर्तव्य एव। नात्र ह्वयतिरभ्यस्तप्रकृतिः। किं तर्हि ह्वाययतिः। अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताश्रितमाशीराशीर्तीः। अपस्पृधेथामिति किं निपात्यते। स्पर्धेर्लङ्यात्मनेपदानां मध्यमपुरुषस्य द्विर्वचने आथामि द्विर्वचनं संप्रसारणमकारलोपश्च निपात्यते। इन्द्रश्च विष्णो यदपस्पृधेथाम्। अस्पर्धेथामिति भाषायाम्। अपर आह। अपपूर्वात्स्पर्धेर्लङ्यात्मने पदानां मध्यमपुरुषस्य द्विवचने आथामि संप्रसारणमकारलोपश्च निपात्यते। इन्द्रश्च विष्णो यदपस्पृधेथाम्। अपास्पर्धेथामिति भाषायाम्। श्राताश्रितमिति किं निपात्यते। श्रीणातेः क्ते श्राभावश्रिभावौ निपात्येते। क्व पुनः श्राभावः। क्व वा श्रिभावः। सोमे श्राभावः अन्यत्र श्रिभावः। न तर्हीदानीमिदं भवति। श्रितः सोम इति। बहुवचने श्राभावः। न तर्हीदानीमिदं भवति। श्रितानो ग्रहा इति। सोमबहुत्वे श्राभावः। अन्यत्र श्रिभावः॥ न संप्रसारणे संप्रसारणम्॥ किमर्थमिदमुच्यते। वचिस्वपियजादीनां च ग्रहादीनां च संप्रसारणमुक्तम्। तत्र यावन्तो यणः सर्वेषां प्राप्नोति। इष्यते च परस्य यथा स्यात् न पूर्वस्येति। तच्चान्तरेण यत्नं न सिध्यतीति न संप्रसारणे संप्रसारणम्। एवमर्थमिदमुच्यते। किमन्येऽप्येवंविधयो भवन्ति। अतो दीर्घो यञि सुपि चेति। घटाभ्याम्। अकारमात्रस्य दीर्घत्वं कस्मान्न भवति। अस्त्यत्र विशेषः। इयमत्र परिभाषोपतिष्ठते अलोन्त्यस्येति॥

प्राप्नो यद्वृत्तान्नित्यमिति प्रतिषिद्धः। ततो इस्वरेणाद्युदात्तं पदं भवति। यदा द्वे पदे तदा निपातैर्यद्यदीति निघाते प्रतिषिद्धे तास्यनुदात्तेदिति लसार्वधातुकानुदात्तत्वे धातुस्वरेण स्पृधेथामिति पदमाद्युदात्तम्। तिङि चोदात्तवतीत्यपशब्दस्य निघातः। सोमबहुत्व इति। सोमस्यैव बहुत्वे श्राभाव इति नियमाश्रयणात् सोमादन्यत्रैकत्वेऽपि श्राभावः क्वचिद्दृश्यते॥ न संप्र॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

किं तर्हीति। संप्रसारणनिमित्तं पूर्वत्वं संप्रसारणशब्देनोपचारादुच्यते ॥

ननु चेदानीमेतया परिभाषयेहापि शक्यमुपस्थातुम्। नेत्याह। नहि वचिस्वपियजादीनां ग्रहादीनां चान्त्यो यणस्ति। एवं तर्हि नान्त्यविकारेऽन्त्यसदेशस्येति। अन्त्यसदेशो यो यण् तस्य कार्यं भविष्यति। नैतस्याः परिभाषायाः प्रयोजनानि। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न सर्वस्य यणः संप्रसारणं भवतीति। यदयं प्यायः पीभावं शास्ति। कथं कृत्वा ज्ञापकम्। पीभावस्यैतत्प्रयोजनम्। आपीनोऽन्धुः। आपीनमूधः। एतद्रूपं यथा स्यादिति। यदि चात्र सर्वस्य यणः संप्रसारणं स्यात्। पीभाववचनमनर्थकं स्यात्। संप्रसारणे कृते संप्रसारणपूर्वत्वे द्वयोरिकारयोरेकादेशे सिद्धं रूपं स्यात्। आपीनोऽन्धुः। आपीनमूधइति। पश्यति त्वाचार्यः। न सर्वस्य यणः संप्रसारणं भवतीति। ततः प्यायः पीभावं शास्ति। नैतदस्ति ज्ञापकम्। सिद्धे हि विधिरारभ्यमाणो ज्ञापको भवति। न च प्यायः संप्रसारणेन सिध्यति। संप्रसारणे हि सत्यन्त्यस्य प्रसज्येत। एवमपि ज्ञापकमेव। कथम्। प्यायइति नैषा स्थानषष्ठी। का तर्हि विशेषणषष्ठी। प्यायो यणिति। तदेतज्ज्ञापयत्याचार्यो न सर्वस्य यणः संप्रसारणं भवतीति। यदयं प्यायः पीभावं शास्ति। एवमप्यनैकान्तिकमेतत्। एतावज्ज्ञाप्यते न सर्वस्य यणः संप्रसारणं भवतीति। तत्र कुत एतत्परस्य भविष्यति न पूर्वस्येति। उच्यमानेऽप्येतस्मिन्सूत्रे कुत एतत्परस्य भविष्यति न पूर्वस्येति। एकयोगलक्षणं खल्वपि संप्रसारणं तद्यदि तावत्परमभिनिर्वृत्तं पूर्वमप्यभिनिर्वृत्तमेव। प्रसक्तस्य चानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुं नाभिनिर्वृत्तस्य। यो हि भुक्तवन्तं ब्रूयान्मा भुङ्क्था इति किं तेन कृतं स्यात्। अथापि पूर्वमनभिनिर्वृत्तम्। परमप्यनभिनिर्वृत्तमेव। तन्निमित्तसंप्रयोगोऽनुपपन्नः न संप्रसारणे संप्रसारणमिति। नैष दोषः। यत्तावदुच्यते। उच्यमानेऽप्येतस्मिन्कुत एतत्परस्य भविष्यति न पूर्वस्येति। इङ्गितेन चेष्टितेन निमिषितेन महता वा सूत्रप्रबन्धेनाचार्याणामभिप्रायो गम्यते। एतदेव ज्ञापयति। परस्य भविष्यति न पूर्वस्येति। यदयं न संप्रसारणे संप्रसारणमिति प्रतिषेधं शास्ति। यदप्युच्यते। एकयोगलक्षणं खल्वपि संप्रसारणं तद्यदि तावत्परमभिनिर्वृत्तं पूर्वमप्यभिनिर्वृत्तमेव। प्रसक्तस्य चानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुमिति। अस्तूभयोरभिनिर्वृत्तिः। न च वयं पूर्वस्य प्रतिषेधं शिष्मः। किं तर्हि ॥

हलादिः शेषापवाद इति। उत्सर्गस्तदेशश्चापवादो भवतीति परस्यैव संप्रसारणं भवति न पूर्वस्य। एकादेशे कृते इति। प
रं प्रत्यादिवद्भावात्। उपो षुषेति। उपपूर्वाद्वसेर्भीणायां सदवसश्रुव इति क्वस्वादेशविधानाद्भूतसामान्ये लिडनुमीयते

संप्रसारणाश्रयं यत् प्राप्नोति तस्य प्रतिषेधम्। ततः पूर्वत्वे प्रतिषिद्धे यणादेशे न सिद्ध्य यदप्युच्य
ते। अथापि पूर्वमनभिनिर्वृत्तं परमप्यनभिनिर्वृत्तमेव तत्र निमित्तसंश्रयोऽनुपपन्न इति। तादर्थ्यात्ताच्छ
ब्द्यं भविष्यति। तद्यथा। इन्द्रार्था स्थूणा इन्द्र इति। एवमिहापि संप्रसारणार्थं संप्रसारणम्। तत्र यत्प्रसारणा
र्थं प्रसारणं तस्मिन् प्रतिषेधो भविष्यति। अथ संप्रसारणमिति वर्तमाने पुनः संप्रसारणग्रहणं किमर्थम्।
संप्रसारणप्रकरणे पुनः संप्रसारणग्रहणमतोऽन्यत्र प्रसारणप्रतिषेधार्थम्। प्रसारणमिति वर्तमाने पु
नः संप्रसारणग्रहणे एतत्प्रयोजनं विदेशस्थमपि यत्संप्रसारणं तत्रापि प्रतिषेधो यथा स्यात्। व्यचो
लिटि विव्यचे नैतदस्ति प्रयोजनम्। हलादिः शेषापवादोऽत्र संप्रसारणम्। इदं तर्हि श्वयुवमघोना
मतद्धिते। शूना। शूने। उच्यमाने प्येतस्मिन्न सिद्ध्यति। किं कारणम्। उकारेण व्यवधानात्। एकादेशे कृते ना
स्ति व्यवधानम्। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव। एवं तर्हि समानाङ्ग
ग्रहणं च। समानाङ्गग्रहणं च कर्तव्यम्। न संप्रसंप्रसारणे संप्रसारणं समानाङ्ग इति वक्तव्यम्। तत्रो
पो षुषि दोषः। तत्रोपो षुषि दोषो भवति। उपो षुषा। उपो षुषे। उपो षुषि। न वा यस्याङ्गस्य प्रसारणप्रा
प्तिस्तस्मिन् प्राप्तिप्रतिषेधात्। न वा एष दोषः। किं कारणम्। यस्याङ्गस्य प्रसारणप्राप्तिस्तस्मिन् द्वितीया या
प्राप्तिः सा प्रतिषिध्यते। अत्र च वसिः क्वसावङ्गम्। क्वस्वन्तं पुनर्विभक्तौ ॥

तस्य क्वसुर्वेचि स्वपीति संप्रसारणम्। द्विर्वचनमकः सवर्णे दीर्घः। वस्वेकाजाद्घसामितीट्। शासि वसीति षत्वम्। तृती
येकवचनम्। वसोः संप्रसारणमिति संप्रसारणम्। वलादित्वाभावादिडभावः। अत्र समानाङ्गग्रहणाद्वचिस्वपी
ति संप्रसारणस्य निषेधप्रसङ्गः ॥

CC-0. In Public Domain. Digitization by eGangotri

वृचमिति। तिसृणामृचोऽस्मिन्निति समासः। ऋक्पूरब्धूरिति समासान्तः। कक्ष्याया इति। आसन्दीवदष्ठीवदित्यत्र कक्षीवच्छब्दस्य निपातनाद्वार्तिकं नारब्धव्यम्॥ वष्काश्चान्यतरस्याम्॥ अन्यतरस्यां कितीति वेञ इति सूत्रं कर्तव्यम्। तत्र

अथवा यस्याङ्गस्य प्रसारणप्राप्तिरित्यनेन न किंचित्क्रियते। यावद्ब्रूयात् प्रसक्तस्यानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुमिति। अत्र च यदा वसेर्न तदा कसोः। यदा च कसोरभिनिर्वृत्तं तदा वसेर्भवति। अथवा यस्याङ्गस्य प्रसारणप्राप्तिरित्यनेन न किंचित्क्रियते यावद्ब्रूयादसिद्धं बहिरङ्गमन्तरङ्ग इति। असिद्धत्वाद्बहिरङ्गलक्षणस्य वसुसंप्रसारणस्यान्तरङ्गलक्षणः प्रतिषेधो न भविष्यति। ऋचित्रेरुत्तरपदादिलोपश्छन्दसि। ऋचित्रेः संप्रसारणं कर्तव्यम्। उत्तरपदादिलोपश्छन्दसि वक्तव्यः। तृचं सूक्तम्। तृचं साम। छन्दसीति किम्। त्र्यृचानि। रयेर्मतौ बहुलम्। रयेर्मतौ संप्रसारणं बहुलं वक्तव्यम्। आ रेवानेतु नो विशः। न च भवति रयिमान्पुष्टिवर्द्धनः। कक्ष्यायाः संज्ञायाम्॥ कक्ष्यायाः संज्ञायां मतौ संप्रसारणं कर्तव्यम्। कक्षीवन्तं य औशिजः। कण्वः कक्षीवान्। संज्ञायामिति किमर्थम्। कक्ष्यावान् हस्ती॥ वष्काश्चान्यतरस्यां किति। वष्काश्च ग्रहणं शक्यमकर्तुम्। अन्यतरस्यां किति वेञो न संप्रसारणं भवतीत्येव सिद्धम्। कथम्। प्रसारणे कृते उवङादेशे च द्विर्वचनम्। सवर्णदीर्घत्वम्। तेन सिद्धम्। ववतुः। ववुः। ऊवतुः। ऊवुः। वयेरपि नित्यं यकारस्य प्रतिषेधः संप्रसारणस्य। ऊयतुः। ऊयुः। नैषशब्दं चेह साध्यम्। तच्चैवं सति सिद्धं भवति। यद्येवं ववौ ववियेति न सिद्ध्यति। ल्यपि चेत्यनेन चकारेण लिडप्यनुकृष्यते। तस्मिन्नित्ये संप्रसारणप्रतिषेधे प्राप्ते कितिविभाषा आरभ्यते ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते महाभाष्ये षष्ठस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ॥

लिटीत्यनुवर्तनात्कितिलिटि वेञः संप्रसारणविकल्पे सत्यकितिलिटि ल्यपि चेति चकारेण लिटोऽनुकर्षणात् संप्रसारणनिषेधात्सर्वेष्टसिद्धिरिति भाष्यार्थः ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आदेच उपदेशेऽशिति॥ कथमिदमिति। यदोपदेशशब्देन करणसाधनेन शास्त्रमुच्यते तदा विशेष्यस्यानुपादानादेव नास्ति तदन्तविधिरित्ययं पक्षो भवति एज्य उपदेश इति। यदा तु कर्मसाधन उपदेशशब्द उपदिश्यमानार्थवाची षष्ठ्यर्थे च सप्तमी तदा उपदेशस्यैव विशेषणात्तदन्तविधौ सत्ययं पक्षो भवति एजन्तं यदुपदेश इति। समुदायश्च ग्लैप्रभृति प्राधान्येनोपदिश्यते। धातुसंज्ञाद्यर्थो नान्तरीयकत्वेन त्ववयवः। एतदपीति। उपदेशो ह्ययमौकारो भवति नान्तरीयकत्वादवयवानामुपदेशादित्युक्तत्वात्। अर्थवतेति। यः शब्दोऽर्थवांस्तदर्थोपादानपरित्यागाभ्यां व्यपदेशिवद्भावो भवति बुद्ध्या नानात्वकल्पनाद्य

आदेच उपदेशेऽशिति॥ कथमिदं विज्ञायते। एज्य उपदेश इति। आहोस्विदेजन्तं यदुपदेश इति। किं चातः। यदि विज्ञायते एज्य उपदेश इति। ढौकिता। त्रौकिता। अत्रापि प्राप्नोति। अथ विज्ञायते एजन्तं यदुपदेश इति न दोषो भवति। ननु चैजन्तं यदुपदेश इत्यपि विज्ञायमानेऽत्रापि प्राप्नोति। एतदपि ह्युपदेशिवद्भावेनैजन्तं भवत्युपदेशः। अर्थवता व्यपदेशिवद्भावः। ननु चैज्य उपदेश इत्यपि विज्ञायमाने न दोषो भवति। अशितीत्युच्यते। न चात्राशितं पश्यामः। ननु च ककार एवात्राशित्। न च ककारे भवितव्यम्। किं कारणम्। नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः। नञ्युक्तमिवयुक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते। तथा ह्यर्थो गम्यते लोके। अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशमानयति नासौ लोष्टमानीय कृती भवति। एवमिहापि अशितीति प्रतिषेधादन्यस्मिन्नशिति शित्सदृशे कार्यं विज्ञास्यते। किं चान्यदशिच्छित्सदृशम्। प्रत्ययः। इदं तर्हि। ग्लौ ग्लानीयम्। वेञ्। वानीयम्। शो निशानीयम्। परत्वादायादयः प्राप्नुवन्ति। ननु चैजन्तं यदुपदेश इत्यपि विज्ञायमाने परत्वादायादयः प्राप्नुवन्ति। सन्तु। आयादिषु कृतेषु स्थानिवद्भावादेज्ग्रहणेन ग्रहणात्पुनरात्त्वं भविष्यति। ननु चैज्य उपदेश इत्यपि विज्ञायमाने परत्वादायादिषु कृतेषु स्थानिवद्भावादेज्ग्रहणेन ग्रहणादात्त्वं भविष्यति॥

शेयायेतीण एकाज्व्यपदेशः। लोकेऽपि स्थूलशिरा राहुरिति शिरोमात्रस्य समुदायस्यार्थक्रियाकरणाद्भेदविवक्षया व्यपदेशो भवति। न त्वनर्थके छिन्ने देवदत्तशिरसि स्थूलशिरा अयं देवदत्त इति व्यपदेशः प्रवर्तते। आद्यन्तवदेकस्मिन्नित्यतिदेशोऽपि न प्रवर्तते सहायत्वाभावादौकारस्य। इदं तर्हीति। एज्य उपदेश इत्यस्मिन्पक्षे दोषोद्भावनम्। परत्वादिति। पर्युदासपक्षे समानाश्रयत्वादात्वस्यायादीनां चानित्यत्वात्तेषां विप्रतिषेधोपपत्तिः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अल्विधिश्चायमिति। नन्वेजन्तं यदुपदेश इत्यत्रापि पक्षे आत्वमल्विधिरेव गुणभूतालाश्रयस्याप्यल्विधित्वेनाश्रयणा त्तथा च प्रपक्ष्येत्यादाविड्भावः। नैतदस्ति। एजन्तस्यात्वं भवतीत्येवं विज्ञायमाने स्यादात्वमल्विधिः। यदा त्वेवं व्याख्या यते उपदेशे यदेजन्तं दृष्टं तस्यात्वं भवतीति तदा त्वस्याल्विधित्वाभावः। एज्यउपदेशे तस्यात्वमित्यत्र तु पक्षे एचः स्था नित्वेनोपादानादात्वस्याल्विधित्वाद् ग्यादिषु कृतेषु स्थानिवत्त्वाभावादप्राप्तिः। नन्वायादिषु कृतेषु लीन्यस्यात्वे कृ तेयद्यपि ग्लानीयमित्यादि सिध्यति। तथापि जग्लतुरित्यादि न सिध्यति। यकारस्यात्वे कृते पूर्वेण सह एकादेशश्च प्र

अनल्विधौ स्थानिवद्भावः। अल्विधिश्चायम्। एवं तर्हि एजन्तं यदुपदेश इत्यपि विज्ञायमाने ह्वतः। ह्वतवानित्यत्रापि प्राप्नोति। भवत्येवात्रात्वम्। श्रवणं कस्मान्न भवति। पूर्वत्वमस्य भवति। न सिध्य ति। इदमिह संप्रधार्यमात्वं क्रियतां पूर्वत्वमिति। किमत्र कर्तव्यम्। परत्वात्पूर्वत्वम्। एवं तर्हीदमि ह संप्रधार्यमात्वं क्रियतां संप्रसारणमिति। किमत्र कर्तव्यम्। परत्वादात्वम्। नित्यं संप्रसारणम्। कृतेप्यात्वे प्राप्नोत्यकृतेपि। आत्वमपि नित्यम्। कृतेपि संप्रसारणे प्राप्नोत्यकृतेपि। अनित्यमात्वम्। न हि कृते संप्रसारणे प्राप्नोति। किं कारणम्। अन्तरङ्गं पूर्वत्वम्। तेन बाध्यते। यस्य च लक्षणान्तरेण नि मित्तं विहन्यते न तदनित्यम्। न च संप्रसारणमेवात्वस्य निमित्तं विहन्ति। अवश्यं लक्षणान्तरं पूर्वत्वं प्र तीक्ष्यम्। उभयोर्नित्ययोः परत्वादात्वे कृते संप्रसारणम्। संप्रसारणे संप्रसारणपूर्वत्वं कार्यं कृत त्वात्पुनरात्वं न भविष्यति ॥

प्नोति लोपश्च। तत्र यद्यपि वर्णाश्रयत्वादेकादेशोन्तरङ्गस्तथापि वार्णादाङ्गं बलवदित्याकारलोपः प्राप्नोति। यथा आह्वः प्र ह्व इत्यादौ। तत्राकारलोपस्य स्थानिवद्भावादसिद्धवदत्राभादित्यसिद्धत्वाच्च पूर्वस्याकारस्य लोपो न प्राप्नोति। एवं तर्हि वार्णादाङ्गं बलवदित्यनाश्रित्येदमुक्तम्। अत एवात्र परिहारः समासाच्चासादशितीति ज्ञापकाद्यायादय आत्वं न बाधन्त इ ति सिद्धान्तो भविष्यति। ह्वत इति। ह्वेञः संप्रसारणादिषु कृतेषूपदेश एजन्तत्वादुत्तरकालमसत्यप्येजन्तत्वे लीन्यस्येति वचनाद्दूकारस्यात्वप्रसङ्गः। भवत्येवेति। प्रागेव संप्रसारणादिति भावः। इतरस्तु पश्चादात्वमनेनोक्तमिति मत्वाह। श्रवणमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ अथापीति। यदि यस्य लक्षणान्तरेणेति नाश्रीयत इति भावः। उपदेशग्रहणमिति। उपदेशग्रहणात्संप्रसारणादिप्रवृत्ते ६१३
२२ र्ध्यात्वप्रसङ्गान्न कर्तव्यम्। अकृते च तस्मिन्नेजन्तस्यात्वं भवतीति सूत्रार्थाश्रयणादात्वस्यालिविधित्वात्स्थानिवत्त्वाभावात्सं
प्रसारणादिप्रवृत्ते एष प्रसङ्गः। शित्यपि बाधेरन्निति। ततश्च ग्लायतीत्यादीनां सिद्धत्वादशितीति प्रतिषेधोऽनर्थकः स्यात्त
स्मात्पूर्वविप्रतिषेधेनात्वं भवतीति ज्ञायते। नत्वशितीत्यस्यान्यत्प्रयोजनमस्ति ध्यातिस्वतीत्यादौ हलादावात्वं माभूत्।

अथापि कथंचिदात्वमनित्यं स्यात्। एवमपि न दोषः। उपदेशग्रहणं न करिष्यते। यदि तन्न क्रियते चे
तास्तो तेत्यत्रापि प्राप्नोति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति। न परनिमित्तकस्यात्वं भवतीति। य
दयं क्रीङ्जीनां णावित्यात्वं शास्ति। नैतदस्ति ज्ञापकम्। नियमार्थमेतत्स्यात् क्रीङ्जीनां णावेवेति।
यत्तर्हि मीनातिमिनोतिदीङां ल्यपि चेत्यत्रैज्ग्रहणमनुवर्तयति। इह तर्हि ग्लै। ग्लानीयम्। म्लै। म्ला
नीयम्। शो। अवनिशानीयम्। परत्वादायादयः प्राप्नुवन्ति। अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति नायादय आत्वं
बाधन्त इति। यदयमशितीति प्रतिषेधं शास्ति। यदि हि बाधेरन्। शित्यपि बाधेरन्। तत्राशित्करणमनर्थ
कं स्यात्। अथवा। पुनरस्तु एज्य उपदेश इति। ननु चोक्तम्। ग्लै। ग्लानीयम्। म्लै। म्लानीयम्। वेञ्। वानीय
म्। शो। निशानीयम्। परत्वादायादयः प्राप्नुवन्ति। अत्रापि शित्प्रतिषेधो ज्ञापकः। नायादय आत्वं बाधन्त
इति। आत्व एश्युपसंख्यानम्। आत्वे एश्युपसंख्यानं कर्तव्यम्। जग्ले। मम्ले। अशितीति प्रतिषेधः प्राप्नो
ति। नैष दोषः। नैवं विज्ञायते। शकार इद्यस्य सोऽयं शित् न शित् अशित्। अशितीति। कथं तर्हि। शकार इत् शि
त् न शित् अशित् अशितीति। यद्येवं स्तनंधय इत्यत्रापि प्राप्नोति। अत्रापि शब् शिद्भवति ।

नैतदस्ति। ओतः श्यनीत्योकारलोपविधानादात्वं श्यनि न भवतीति ज्ञायते। शकार इदिति। तत्रेताशकारेण प्रत्ययस्या
क्षेपाद्यस्मिन्विधिस्तदादावल्ग्रहण इति परिभाषोपस्थानात् शिदादावात्वनिषेधादेश्यात्वं भवत्येव। यद्येवं स्तनंधय
इति। विकरणेन रूपविशेषाभावात्प्रयोजनाभावान्न भवतीति मन्यते॥ अत्रापि शबिति। आत्वनिवृत्तिरेव शपः एमः
प्रयोजनम् ॥ २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंपुनरिति। तत्र पर्युदासे एकवाक्यत्वम् उत्तरपदार्थेन नञः संबन्धात् समर्थसमासः। उत्तरपदार्थसदृशं वस्त्वन्तरं समासार्थः। प्रसज्यप्रतिषेधे तु विधिनिषेधलक्षणार्थद्वयविधानाद्वाक्यभेदो नञः क्रियया संबन्धादसमर्थसमासः। स चाकर्त्तरि च कारके इति ग्रहणेन ज्ञापितः। ग्लायन्तीति। लावस्थायामेवात्र कृते शुतिबादिषात्वं न प्रवर्तते। ग्लैप्रभृतीनामेजन्तानामुपदेश सामर्थ्यादशितीति वचनसामर्थ्याद्वा पाघ्राध्माधेट्दृशः शइत्यैषोः शितिवचनस्यावकाश इति चेन्नैकमुदाहरणमशिद्ग्रहणं प्रयोजयति। अन्यथाऽऽश इति ब्रूयात्। अथवा। नित्यत्वान्तरङ्ग त्वाभ्यां पूर्वं तिबादयो भवन्ति। तेषु कृतेषु नित्य

किंपुनरयं पर्युदासो यदन्यच्छित् इति। आहोस्वित् प्रसज्यायं प्रतिषेधः। शिति नेति। कश्चात्र विशेषः। अशित्येकादेशे प्रतिषेध आदिवत्त्वात्॥ अशित्येकादेशे प्रतिषेधो वक्तव्यः। ग्लायन्ति। म्लायन्ति। किं कारणम्। आदिवत्त्वात्। शिदशितोरेकादेशोऽशित आदिवत् स्यात्। अस्त्वन्यच्छित् इति कृत्वा आत्वं प्राप्नोति। प्रत्ययविधिश्च न सिद्ध्यति। सुग्लः। सुम्लः। आकारान्तलक्षणः प्रत्ययविधिर्न प्राप्नोति। अनिष्टे प्रत्ययेऽवस्थिते आत्वम्। अनिष्टस्य प्रत्ययस्य श्रवणं प्रसज्येत। अभ्यासरूपं च॥ अभ्यासरूपं च न सिद्ध्यति। जग्ले। मम्ले। इवर्णाभ्यासता प्राप्नोति। अयवायावां प्रतिषेधश्च॥ अयादीनां च प्रतिषेधो वक्तव्यः। ग्लैग्लानीयम्। म्लैम्लानीयम्। शोनिशानीयम्। वेञ्। वानीयम्। परत्वादयादयः प्राप्नुवन्ति। अस्तु तर्हि प्रसज्यप्रतिषेधः। शिति नेति। शिति प्रतिषेधे श्लुलुकोरुपसंख्यानम्। ररीध्वम्। शिशीते। त्राध्वम्। शिति प्रतिषेधे श्लुलुकोरुपसंख्यानं कर्तव्यम्। दिवो नो रश्मिं मरुतो ररीध्वमिति। त्राध्वं नो देवा निजुरो वृकस्य। शिशीते शृङ्गे रक्षसे विनिक्षे ॥

त्वाच्छत्वं भवति। ततोऽकारयोः पररूपएकादेशे कृते तस्य परं प्रत्यादिवद्भावादात्वप्रसङ्गः। जग्ले इति। एशि परत आत्वं तस्य द्विर्वचनेऽचीति स्थानिवद्भावाद्ग्लै शब्दस्य द्विर्वचने ह्रस्वत्वे चाऽभ्यासइवर्णान्तता स्यात्। ररीध्वमिति। रै शब्द इत्यस्मात् लोटो मत्ययेनात्मनेपदम्। ध्वं शपो बहुलं छन्दसीति श्लुः। तत्र प्रसज्यप्रतिषेध आत्वं न प्राप्नोति। शबाश्रयप्रतिषेधप्रसङ्गात्। पर्युदासे तु ध्वमाश्रयमात्वं भवति। श्लौ द्विर्वचनम्। ईहल्यघोरितीत्वम्। शिशीत इति। श्यतेर्लटो मत्ययेनात्मनेपदम्। शपः श्लुः। तस्य द्विर्वचनम्। अभ्यासस्य बहुलं छन्दसीतीत्वम्। ईहल्यघोरितीत्वम्। त्राध्वमिति। त्रैङ् पालने। लोट्। ध्वम्। शपो बहुलं छन्दसीति लुक् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 स्यत्यर्थ इति। वृषभः शृङ्गे तीक्ष्णीकरोति। रक्षसेरक्षोर्थं विनिक्षे विनिपातनायेत्यर्थः। त्राध्वमिति। लोडर्थे व्यत्ययेन लुङ्। ध्वं धि चेति सलोपः। बहुलं छन्दस्यमाङ्योगेपीति अडभावः। यद्यमिति। आत्वाभावे न एजन्ताद् आकारान्तनिमित्तकः प्रत्ययो ज्ञाप्यते सर्वो ह्वावामश्चेत्यणा पुनः॥ प्रत्याख्यायत इति। द्विर्वचनेचीत्ययं योगः पूर्वविप्रतिषेधाश्रयेण प्रत्याख्यायते। त

नैष दोषः। इह तावद् द्विवो नो वृष्टिं मरुतो रीध्वमिति। नैतद् ददातेः रूपम्। कस्य तर्हि। एतेर्दानकर्मणः। शिशीते शृङ्गे इति। नैतत् श्यतेः रूपम्। कस्य तर्हि। शीङः। श्यत्यर्थो वै गम्यते। कः पुनः श्यतेरर्थः। श्यतिर्निशाने वर्तते। शीङपि श्यत्यर्थे वर्तते। कथं पुनरन्यो नामान्यस्यार्थे वर्तेत । बह्वर्था अपि धातवो भवन्ति। तद्यथा। वपिः प्रकिरणे दृष्टः छेदने चापि वर्तते। केशान्वपतीति। ईडिः स्तुतिचोदनायाच्ञासु दृष्टः। प्रेरणे चापि वर्तते। अग्निर्वा इतो वृष्टिमीट्टे मरुतोमुतश्च्यावयन्ति। करोतिरभूतप्रादुर्भावे दृष्टः। निर्मलीकरणे चापि वर्तते। पृष्ठं कुरु पादौ कुरु उन्मृदानेति गम्यते। निःक्षेपणे चापि वर्तते घटे कुरु अश्मानमितः कुरु स्थापयेति गम्यते। सर्वेषामेष परिहारः। शितीत्युच्यते। न चात्र शितं पश्यामः। प्रत्ययलक्षणेन। न लुमता तस्मिन्निति प्रत्ययलक्षणप्रतिषेधः। त्राध्वमिति। लुङे व्यत्ययेन भविष्यति। अथ वा पुनरस्तु पर्युदासः। ननु चोक्तम् अशित्येकादेशे प्रतिषेधः आदिवत्त्वादिति। नैष दोषः। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानम्। यदपि प्रत्ययविधिरिति। आचार्यप्रवृत्तिर्ज्ञापयति। भवत्येजन्तेभ्य आकारान्तलक्षणः प्रत्ययविधिरिति। यदयं ह्वावामश्चेत्यणं कबाधनार्थं शास्ति। यदप्यभ्यासरूपमिति। प्रत्याख्यायते स योगः। अथापि क्रियते। एवमपि न दोषः। कथम्। लिटीत्यनुवर्तते। द्विलकारकश्चायं निर्देशः। लिटि लकारादाविति। एवं च कृत्वा सोप्यदोषो भवति। यदुक्तम् आत्व एषु उपसंख्यानमिति। यदप्युक्तम् अवायावां प्रतिषेधश्चेति। शितिप्रतिषेधो ज्ञापको नायादय आत्वं बाधन्त इति। प्रातिपदिकप्रतिषेधः॥ प्रातिपदिकानां प्रतिषेधो वक्तव्यः ॥

त् प्रत्याख्यानात् स्थानिवत्त्वाभावः। द्विलकार इति। लिटिवयो यइत्यत्र द्विलकारको निर्देशस्तत्र च द्वितीयस्य लकारस्य प्रयोजनाभावादिहार्थत्वं विज्ञायते। लावस्थायामेव लिरित्यात्वं न त्वजादाविति स्थानिवत्त्वाभावाज्जुग्ल इत्यादि सिध्यति। प्रातिपदिकप्रतिषेध इ
ति। उणादीनां व्युत्पत्तिपक्षे गमेर्डो ग्लानुदिभ्यां डौ इत्यादावुपदेशे भवत्ययमेच् एजन्तो वा ऽर्थवत्त्वाद्व्यपदेशिवद्भावादिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अमिवृद्धिबाधनार्थमिति। गांपश्येत्यत्रगोतोणिदितिणित्वेवृद्धिप्रसङ्गात्। गाःपश्येत्यत्राशितीत्यात्वाप्रसङ्गः। उद्देश
श्चेति। उणादयोव्युत्पन्नानिप्रातिपदिकानीतिभावः। एतच्चातःकृकमिकंसेत्यत्रकंसशब्दस्यभेदेनोपादानाद्विज्ञाय
ते। उणादयोबहुलमित्यस्यतुसूत्रस्योदाहरणप्रदर्शनायोणादिपाठइत्युणादीनामुपदेशाभावः। ननुगवादिभ्योयदि
त्यत्रगवादिगणेगोहविस्अष्टकेतिगोशब्दस्यास्त्युपदेशः। तथानौवयोधर्मेत्यत्रनौशब्दस्य। नैषदोषः। अर्थवदितिप्रा
तिपदिकसंज्ञाविधानाल्लब्धसाधिमानःप्रत्ययविधानायपरार्थीगवादयउपात्ताः। येषांतुस्वरूपज्ञानायपूर्वसूत्रा

गोभ्याम्। गोभिः। नौभ्याम्। नौभिः। सतर्हिवक्तव्यः। नवावक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति। नप्रातिपदिकाना
मात्वंभवतीति। यदयंरायोहलीत्यात्वंशास्ति। नैतदस्तिज्ञापकम्। नियमार्थमेतत्स्यात्। रायोहल्येवेति। य
त्तर्हिऔतोम्शसोरित्यात्वंशास्ति। एतस्याप्यस्तिवचनेप्रयोजनम्। अमिवृद्धिबाधनार्थमेतत्स्यात्। शसि
प्रतिषेधार्थंच। तस्मात्प्रातिपदिकानांप्रतिषेधोवक्तव्यः। धात्वधिकारात्प्रातिपदिकस्याप्राप्तिः। धात्वधि
कारात्प्रातिपदिकस्यात्वंनभविष्यति। धातोरितिप्रकृतम्। क्वप्रकृतम्। लिटिधातोरनभ्यासस्येति। अथा
पिनिवृत्तम्। एवमप्यदोषः। उपदेशइत्युच्यते। उद्देशश्चप्रातिपदिकानांनोपदेशः॥ क्रीङ्जीनांणौ॥ आ
त्वेणौलीयतेरुपसंख्यानं प्रलम्भनशालीनीकरणयोः। आत्वेणौलीयतेरुपसंख्यानंकर्तव्यम्। प्र
लम्भनशालीनीकरणयोः। किंप्रयोजनम्। प्रलम्भनेचार्थेशालीनीकरणेचनित्यमात्वंयथास्यात्। प्र
लम्भनेतावत्। जटाभिरालापयते। श्मश्रुभिरालापयते। शालीनीकरणे। श्येनोवर्तिकामुल्लापयते। र
थीरथिनमपलापयते॥ सिध्यतेरपारलौकिके ॥

रणंतेषामेवोपदेशव्यवहारः॥ क्रीङ्जीनांणौ॥ आत्वेणाविति। विभाषालीयतेरितिविकल्पेप्राप्तेनित्यार्थंवचनम्। सं
माननेतुविकल्पएवभवति। अन्येत्वाहुः। प्रलम्भनशालीनीकरणग्रहणमात्मनेपदविषयोपलक्षणार्थमितिसंमा
ननेपिनित्यमात्वंभवति॥ सिध्यते॥ परलोकःप्रयोजनमस्येतिपारलौकिकम्। प्रयोजनमस्येतिठञ्। अनुशतिका
दीनांचेत्युभयपदवृद्धिः। धात्वर्थोपाधिश्चायंनचेत्सिध्यतिरदृष्टफलेर्थेवर्ततेतदातस्यात्वंभवति ॥

CC-0. In Public Domain. Digitization by eGangotri

षिध्यतेरज्ञानार्थस्येति। सांकाश्येसिद्ध इत्यादौ सिध्यतिर्ज्ञानार्थः प्रयुज्यते। सांकाश्ये ज्ञायत इत्यर्थावगमात्। इह तु ज्ञाप्यमानकर्तृकार्थवृत्तिः सिध्यतिरिति प्रतिषेधो न भवति। राजकुले देवदत्तं साधयतीति। ज्ञातृव्यापारवृत्तेस्त्वात्त्वं निषिध्यते। तत्रैव ज्ञानस्य मुख्यत्वात् सिध्यति तापसः। आविर्भूतज्ञानलक्षणप्रकाशो भवतीत्यर्थः। तपः सेधयतीति। ज्ञानपूर्विकायां तु संपत्तौ योवर्तते तत्र ज्ञानस्य गुणभावात् प्रतिषेधाभावो राजकुले देवदत्तं साधयतीति। अन्नं साधयतीति। ननु ब्राह्मणेभ्यो दास्यामीति वाक्यात् पारलौकिकत्वं गम्यते। ननु पदात् धात्वर्थस्य तत्र निष्पत्तिमात्रम्। अन्नं निष्पादयतीत्यर्थावगमादिति प्रतिषेधो न भविष्यति। नैतदस्ति। तपस्तापसं सेधयतीत्यत्रापि पदान्तरसंनिधानात्सिद्ध्यर्थस्य

सिध्यतेरज्ञानार्थस्य॥ सिध्यतेरज्ञानार्थस्येति वक्तव्यम्। इतरथा ह्यनिष्टप्रसङ्गः। अपारलौकिक इत्युच्यमानेऽनिष्टं प्रसज्येत। अन्नं साधयति। ब्राह्मणेभ्यो दास्यामीति। अस्ति पुनरयं सिध्यतिः क्वचित् ज्ञानार्थे वर्त्तते। अस्तीत्याह। तपस्तापसं सेधयति। ज्ञानमस्य प्रकाशयतीत्यर्थः। स्वान्येवैनं कर्माणि सेधयन्ति। ज्ञानमस्य प्रकाशयन्तीत्यर्थः॥ मीनातिमिनोतिदीङां ल्यपि च॥ मीनात्यादीनामात्वे उपदेशवचनं प्रत्ययविध्यर्थम्। मीनात्यादीनामात्वं उपदेशिवद्भावो वक्तव्यः। उपदेशावस्थायामात्वं भवतीति वक्तव्यम्। किं प्रयोजनम्। प्रत्ययविध्यर्थम्। उपदेशावस्थायामात्वे कृते इष्टः प्रत्ययविधिर्यथा स्यात्। के पुनः प्रत्यया उपदेशिवद्भावं प्रयोजयन्ति। का। कास्तावन्न प्रयोजयन्ति। किं कारणम्। एच इत्युच्यते ॥

पारलौकिकत्वं प्रतीयत इति सर्वत्र वाक्यगम्यत्वात्पारलौकिकत्वस्य प्रतिषेधप्रसङ्गः। वार्तिककारेण सूत्रार्थ एव व्याख्यात इत्याहुः। अन्नं साधयतीत्यत्र दृष्टमेवान्नलक्षणं फलं — सिद्ध्यर्थस्येति निषेधो न भवति हेयोपादेयतत्त्वप्रत्यक्षीकारलक्षणं तु ज्ञानं — पारलौकिकमिति तत्रैव प्रतिषेधः प्रवर्तते॥ मीनाति॥ उपदेशवचनमिति आद्युच्चारणेऽनुत्पन्न एव प्रत्यय आत्वं कर्तव्यमित्यर्थः। भाष्यकारस्त्वनेनमेवार्थमन्यथाव्याचष्टे। उपदेशिवद्भावो वक्तव्य इति। उपदेशिन आकारान्ता आवाप्रभृतय आकारान्तनिमित्तप्रत्ययप्रकृतित्वं यथा प्रतिपद्यन्ते। तथा मीनात्यादयोपीत्यर्थः। का इति। आतश्चोपसर्ग इति कः। आतोनुपसर्गे इति कः। कौ च अङ् च काः आतश्चोपसर्ग इत्यङ् त्र निर्दिष्टः ॥ रामः २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचकेचिति। प्राक्स्यादित्वात्स्वरूपमन्यथाकाल्वितिस्यात्। क्ङितिचेतिगुणप्रतिषेधात्तत्रैजभावः। आतस्तुविज्ञाय
तइति सामर्थ्यात्। तथाहि। मीनात्यादीनामुपदेशएवात्वेकृतेइवर्णान्तलक्षणोऽजपवादोनप्रवर्ततइति घञेवस्यात्।
इदंविप्रतिषिद्धमिति। नहिमीनात्यादीनामुपदेशएजस्ति प्रत्ययनिमित्तत्वादेचः। तेवयंविषयमिति। सतुविषयः

नचकेषेजस्ति। णघञुञ्विषयस्तर्हिप्रयोजयन्ति। णअवदायः। आतइतिणःसिद्धोभवति। घञ्अ
वदायोवर्तते। आतइतिघञ्सिद्धोभवति। किंचभोःआतइतिघञुच्यते। नखल्वप्यातइत्युच्यते। आ
तस्तुविज्ञायते। कथम्। अविशेषेणघञुत्सर्गः। तस्यइवर्णान्तादुवर्णान्ताच्चाजपावपवादौ। तत्रोपदेशाव
स्थायामात्वेकृतेअपवादस्यनिमित्तंनास्तीतिकृत्वाउत्सर्गेणघञ्सिद्धोभवति। एवंचकृत्वानचआतइ
त्युच्यते। आतस्तुविज्ञायते। युच्। ईषद्वदानम्। स्ववदानम्। आतइतियुच्सिद्धोभवति। इदंविप्रतिषिद्ध
म्। एचउपदेशइति। यद्येचः। नोपदेशे। अथोपदेशे। नैचः। एचश्चोपदेशेचेतिविप्रतिषिद्धम्। नैतद्विप्रतिषि
द्धम्। आह्वायमेचउपदेशइति यद्येचोनोपदेशेऽथोपदेशेनैचः। तेवयंविषयंविज्ञास्यामः। एज्विषयइति।
तत्तर्हिउपदेशग्रहणंकर्तव्यम्। नकर्तव्यम्। प्रकृतमनुवर्तते। क्वप्रकृतम्। आदेचउपदेशेशितीति॥ तद्वैप्र
कृतिविशेषणम्। विषयविशेषविशेषणेनचेहार्थः। नचान्यार्थं प्रकृतमन्यार्थंभवति। नखल्वप्यन्यदनु
वर्तनादन्यद्भवति। नहिगोधासर्पन्तीसर्पणादहिर्भवति। यत्तावदुच्यते। नचान्यार्थंप्रकृतमन्यार्थंभवती
ति। अन्यार्थमपिप्रकृतमन्यार्थंभवति। तद्यथा शाल्यर्थंकुल्याःप्रणीयन्ते। ताभ्यश्चपानीयंपीयते। उपस्
पृश्यतेच। शालयश्चभाव्यन्ते। यदप्युच्यते। नखल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति। नहिगोधासर्पन्ती
सर्पणादहिर्भवतीति। भवेद्द्रव्येषुएतदेवंस्यात् ॥

प्रत्ययोयस्मिन्प्रत्ययेएचाभाव्यंतस्मिन्ननुत्पन्नएवात्वम्। अन्येत्विवर्णमेज्विषयमाहुः। यस्यैवर्णस्यैत्वाभाव्यंतस्यात्वम्।
केचित्त्वेजेवविषयइत्याहुः। एचिभावित्वेनबुद्ध्याश्रितेआत्वंभवतीत्यर्थः। नचान्यार्थमिति। तस्यैवतदर्थस्यैवोत्तरत्रानुवर्त
नादितिभावः। तत्रैतस्मादन्यदेवशब्दरूपंवाक्यान्तरेष्वनुमीयते इत्याशङ्क्याह। नखल्वपीति। अन्यार्थमपीति। स्वरित
त्वप्रतिज्ञानाच्छब्दस्वरूपमात्रमुत्तरत्रानुवर्ततेतस्ययदर्थस्योपयोगस्तदर्थमेवावतिष्ठते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दस्त्विति। स्वरितत्वप्रतिज्ञानात्तदर्थं शब्दान्तरं वाक्यार्थानुगुणार्थमनुमीयते। सादृश्यात्तु तदेवेदमिति तत्त्वाध्यवसायो भिन्नेष्वपि शब्दरूपेषु भवति। तत्रोपदेशशब्देन प्रत्ययोऽभिधीयते। उपदिश्यते तस्मिन्नेजित्युपदेशः। विषयसप्तमी चेयम्। न चेयं परसप्तमी। तेनानुसन्न एव प्रत्यय आत्वम्। इवर्णो वोपदेशः। अथ वोपदेशनमुपदेशः। एचः प्रतिपादनम्। तत्र पूर्वसूत्र उपदेशग्रहणं प्रकृत्याभिसंबन्धात्तद्विशेषणमिह तु विषयविशेषणमिति न कश्चिद्दोषः। खलचोरिति। पचाद्यचः एरच्च सामान्यग्रहणम्॥ विभाषालीयतेः॥ यकानिर्देश इति। श्यना निर्देशे लीनातेर्ग्रहणं न स्यात् इति सामान्यग्रहणाय यका निर्देश आश्रीयते। यक्त्विह शिल्करणसामर्थ्याद्भावकर्मवाचिन्यपि प्रवर्तते। यथाशाबादयोः कर्तृवाचिन्येपीति भावः।

शब्दस्तु खलु येन येनाभिसंबध्यते तस्य तस्य विशेषको भवति। तद्यथा। गौः शुक्लः अश्वः श्यामः शुक्ल इति गम्यते। निमिमीलियां खलचोः प्रतिषेधः॥ निमिमीलियां खलचोः प्रतिषेधो वक्तव्यः॥ ईषन्निमयः सुनिमयः। निमयो वर्तते। निमयः। मी। ईषत्प्रमयः सुप्रमयः। प्रमयो वर्तते। प्रमयः। ली। ईषद्विलयः सुविलयः। विलयो वर्तते। विलयः॥ विभाषालीयतेः॥ किमिदं लीयतेरिति। लीनातिलीयत्योर्यका निर्देशः॥ बिभेतेर्हेतुभये॥ हेतुभय इति किमर्थम्। कुञ्चिकयैनं भाययति। अहिनैनं भाययति। हेतुभय इत्युच्यमानेऽप्यत्र प्राप्नोति। एतदपि हेतुभयम्। हेतुभय इति नैवं विज्ञायते। हेतोर्भयं हेतुभयं हेतुभय इति। कथं तर्हि हेतुरेव भयं हेतुभयं हेतुभय इति। यदि स एव हेतुर्भयं भवतीति ॥

बिभेतेर्हेतुभये॥ हेतुभय इति किमर्थमिति। इह णिचिति वर्तते प्रयोजकव्यापारे णिज्विधीयत इति सर्वत्र हेतुसंबन्धिभयसद्भावात् व्यावर्त्याभावादनर्थकं हेतुभयग्रहणमिति मत्वा प्रश्नः। हेतुरेव भयमिति। अपादानसाधनो भयशब्दो न तु भावसाधनः। समानाधिकरणपदः समासो न षष्ठीसमासः। तेन यदा साक्षात्प्रयोजको भयस्यापादानम् तदैतदात्वम्। यदा तु कुञ्चिकादीनि भयस्यापादानं तदात्वाभावः। एतच्च हेतुभयग्रहणसामर्थ्यादाश्रीयते। भावसाधनत्वे षष्ठीसमासे च तदनर्थकं स्यात्। यद्यपि भावसाधनपक्षेऽपि पञ्चमीसमासाश्रयणेनायमेवार्थो लभ्यते। तथापि षष्ठीसमासनिराकरणपरत्वाद्भाष्यस्य हेतोरपादानत्वमवश्यमाश्रयितव्यमित्यत्र तात्पर्यात्पञ्चमीसमासो न निवार्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्रजिद्॥ अकितीतियद्यपिपर्युदासोऽयापिप्रसज्यप्रतिषेधोऽभ्युपगम्यम् भवतिकितिभिन्नलिनेतिसर्वथारज्जुसृड्भ्यामित्यादौ प्राप्नोतीति मत्वाह। असिसङ्ग्रहणमिति॥ शीर्षन्॥ आदेशप्रतिषेधार्थमिति। यद्यपिशिरसइतिस्थानीसाक्षान्ननिर्दिष्टस्तथापिसमानार्थत्वादादेशेनाक्षिप्यते। यथाशिवादिषुविश्रवणशब्देनविश्रवस्शब्दइतिस्थानिनोऽस्यन्तमप्रयोगःस्यादिति स्थान्यादेशाभावपरिहारेणप्रकृत्यन्तरत्वमाश्रयणीयमित्यर्थः। यद्यपिपूर्वसूत्रादन्यतरस्यांग्रहणानुवृत्त्येष्टसिद्धिर्भवति। तथाप्युत्तरत्रतदनुवृत्तिराशङ्क्येतेतितत्परित्यागेनप्रकृत्यन्तरपक्षोनिर्दोषआश्रितः॥ येच॥ वाकेशेष्विति। तत्रशिरस्शब्दस्यकेशवि

सृजिदृशोर्झल्यमकिति॥ असिसङ्ग्रहणम्॥ असिसङ्ग्रहणंकर्तव्यम्। किमिदंसङिति। प्रत्याहारग्रहणम्। क्सन्निविष्टानांप्रत्याहारः। सनःप्रभृत्यामहिङोङकारात्। किंप्रयोजनम्। क्विप्प्रतिषेधार्थम्। क्विबन्तस्यमाभूत्। रज्जुसृड्भ्याम्। रज्जुसृड्भिः। देवदृग्भ्याम्। देवदृग्भिः। उक्तंवा। किमुक्तम्। धातोःस्वरूपग्रहणेतत्प्रत्ययेविज्ञानात्सिद्धमिति॥ शीर्षंश्छन्दसि॥ शीर्षन्छन्दसिप्रकृत्यन्तरम्। शीर्षन्छन्दसिप्रकृत्यन्तरंद्रष्टव्यम्। किंप्रयोजनम्। आदेशप्रतिषेधार्थम्। आदेशोमाविज्ञायि। प्रकृत्यन्तरंयथाविज्ञायेत। किंचस्यात्। अ स्कारान्तस्यछन्दसिश्रवणंनस्यात्। शिरोमेश्रीर्यतेमुखेइदंते शिरोमेभिनमीति। तद्वाअथर्वणःशिरः॥ येचतद्धिते॥ येचतद्धितेशिरसआदेशार्थम्। येचतद्धितइत्यत्रशिरसोग्रहणंकर्तव्यम्। किंप्रयोजनम्। आदेशार्थम्। आदेशोयथाविज्ञायते। प्रकृत्यन्तरंमाविज्ञायि। किंचस्यात्। यकारादौतद्धितेःस्कारान्तस्यश्रवणंप्रसज्येत। शीर्षण्योहिमुख्योभवति। शीर्षण्यःस्वरः॥ वाकेशेषु॥ वाकेशेषुशिरसःशीर्षन्भावोवक्तव्यः। शीर्षण्याःकेशाः। शिरस्याः॥ अचिशीर्षः॥ अचिपरतःशिरसःशीर्षभावोवक्तव्यः। हास्तिशीर्षिः। पैलुशीर्षिः। छन्दसिच॥ शिरसःशीर्षभावोवक्तव्यः। इङ्शीर्षे। इहहास्तिशीर्ष्यापैलुशीर्ष्येतिशिरसोग्रहणेनग्रहणात्शीर्षन्भावःप्राप्नोति। अस्तुनस्तद्धितइतिटिलोपोभविष्यति। नसिध्यति। येचाभावकर्मणोरितिप्रकृतिभावःप्रसज्येत ॥

ण्यत्वाच्छिरस्यशब्दादेवकेशार्थावगमात्केशशब्दोनप्रयोक्तव्यः। शीर्षण्यशब्दस्तुसामान्यवाचीतितत्प्रयोगेविशेषावगमायकेशशब्दःप्रयुज्यतइत्याहुः। अचिशीर्षइति। वार्तिकंदृष्ट्वाकैश्चित्सूत्रेषुप्रक्षिप्तम्। हास्तिशीर्षिरिति। बाह्वादिषुशिरस्शब्दस्यपाठात्केवलस्यापत्येनायोगात्तदन्तविधिः। छन्दसिचेति। अतद्धितेऽप्यजादौयथास्यादितिवचनम्। यद्येवमजादौछन्दसिशिरस्शब्दप्रयोगोनप्राप्नोतिशीर्षादेशेनबाधात्। सतिदर्शनेसर्वेविधयःछन्दसिविकल्प्यन्तइतिदोषाभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येवितद्धितइति। यकारादावजादौ च तद्धिते शीर्षन्भवति। तत्रेञिप्रत्यये शीर्षन्भावे कृते टिलोपे च ष्यङादेशः करिष्यत इत्यर्थः॥ यद्यो॥ सर्वे विधयः छन्दसि विकल्प्यन्त इति पादादयोपि छन्दसि प्रयुज्यन्ते। दोषणी याचत इति। औदिदोः शब्दस्य दोषन्नादेशः यत्तसक्षुद्रेष्विति। यत्तसी प्रत्ययौ। क्षुद्रशब्द उत्तरपदम्। नस्यमिति। नासिकायां भवो नासिकायै हितमिति वा शरीरावयवाद्य तानस्त्विति। अपादाने चाहीयरुहोरिति तसिः। नः क्षुद्र इति। नासिकया क्षुद्र इति सुप्सुपेति समासः। अवर्णनगरयोरिति। यतरं

यदि पुनर्ये चि तद्धित इत्युच्येत। किं कृतं भवति। इञि शीर्षन्भावे कृते टिलोपेन सिद्धम्। नैवं हि शक्यम्। इह हि स्थूलशिरस इदं स्थौलशीर्षम्। अन्नणीति प्रकृतिभावः प्रसज्येत। तस्मान्नैवं शक्यम्। न चेदेवं शिरसो ग्रहणेन ग्रहणाच्छीर्षन्भावः प्राप्नोति। पाक्षिक एष दोषः। कस्मिन्पक्षे। ष्यङि यौ द्वैतं भवति। अणिञोर्वादेशः ष्यङ्। अणि ञ्यां वा पर इति। तद्यदा तावदणिञो रादेशः। तत्रैष दोषः। यदा ह्यणिञ्यां परः। न तदा दोषो भवति। अणिञ्यां व्यवहितत्वात्॥ पद्दन्नो मास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस प्रभृतिषु॥ शस्प्रभृतिष्विष्यते। अशस्प्रभृतिष्वपिदृश्यते। शलादोषणीकक्षुद्दोषणी याचते महादेवः। पदादिषु मांसपृतनासानूनामुपसंख्यानम्॥ पदादिषु मांसपृतनासानूनामुपसंख्यानं कर्तव्यम्। पन्नीक्षणं मांस्पचन्याः मांसपचन्या इति प्राप्ते। मांस्त्पृत्पृत्सु मर्त्यम्। पृतनासु मर्त्यमिति प्राप्ते। स्नुः नतेदिवो नष्टथिव्या अधि स्नुषु। अधि सानुष्विति प्राप्ते। नस्नासिकायायत्तस्क्षुद्रेषु॥ यत्तस्क्षुद्रेषु परतो नासिकाया नस् भावो वक्तव्यः। यत्। नस्यम्। तस्। नस्तः। क्षुद्र। नःक्षुद्रः। अवर्णनगरयोरिति वक्तव्यम्॥ इह मा भूत्। नासिक्यो वर्णो नासिक्यं नगरम्। तत्त र्हि वक्तव्यम्। न वक्तव्यम्। इह तावन्नासिक्यो वर्ण इति। परिमुखादिषु पाठः करिष्यते। नासिक्यं नगरमिति। संकाशादिषु पाठः करिष्यते॥

तद्विशेषणम्। परिमुखादिषु पाठ इति। तत्र ञ्ये कृते सिद्धं नासिक्यमिति। ननु तित्स्वरितमिति यतिस्वरितत्वं भवति। ण्य ञ्योस्त्वाद्युदात्तत्वान्तोदात्तत्वे भवत इति स्वरभेदप्रसङ्गः। राजन्यसांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानामादिर्वान्तो वेति प्रतिपदं स्वरविधानादाद्युदात्त त्वान्तोदात्तत्वाभ्यां पर्यायेण भाव्यमिति नास्ति स्वरभेदः। यत्तस्यये च सत्यनासिक्यमित्य न्नयतोऽस्मात्दर्थ इत्युत्तरपदान्तोदात्तत्वं प्रसज्येत। अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्त त्वमिष्यत इति प्रत्याख्यानमेवयुक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धात्वादेः॥ उपदेशग्रहणानुवृत्त्या प्रातिपदिकानां षत्वं न भविष्यतीति मत्वाह। धातुग्रहणं किमर्थमिति। इतरः पूर्वसूत्रेणु विच्छि
न्न उपदेशाधिकार इत्याह। षोडन्निति। षड् दन्ता अस्येति बहुव्रीहिः। वयसि दन्तस्य दतृ विदन्नादेशः। षष उत्वं दतृदशसूत्तर
पदादेः ष्टुत्वं चेति उत्वष्टुत्वे। षण्डशब्दोऽव्युत्पन्नं प्रातिपदिकम्। षडिक इति। अनुकम्पितः षडङ्गुलिरिति। बह्वचो मनुष्यना
म्नः ठज्वेति ठच्। ठाजादावूर्ध्वं द्वितीयादचः इति अङ्गुलिशब्दस्य लोपः ठस्येक इति कादेशः। यस्येति चेत्यकारलोपः। लषितेति। षकारोपदेश
धात्वादेः षः सः॥ धातुग्रहणं किमर्थम्। इह मा भूत्। षोडन्। षण्डः। षडिकः। अथादिग्रहणं किमर्थम्। इह मा भूत्। पे
ष्टा पेष्टुम्। नैतदस्ति प्रयोजनम्। अस्त्वत्र सत्वम्। सत्वे कृते इण उत्तरस्यादेशसकारस्येति षत्वं भविष्यति। इदं तर्हि लषिता लषि
तुम्। इदं चाप्युदाहरणम्। पेष्टा। पेष्टुम्। ननु चोक्तमस्त्वत्र सत्वं सत्वे कृते इण उत्तरस्य आदेशसकारस्येति षत्वं भ
विष्यतीति। नैवं शक्यम्। इह हि पेक्ष्यतीति षत्वस्यासिद्धत्वात् षढोः कः सीति कत्वं न स्यात्। सादेशे सुब्धातुष्ठिवु
ष्वष्कतीनां प्रतिषेधः॥ सादेशे सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः। सुब्धातुः। षोढीयति। षण्ढीयति। ष्ठि
वु। ष्ठीवति। ष्वष्क। ष्वष्कते। सुब्धातूनां तावन्न वक्तव्यः। उपदेश इति वर्तते। उद्देशश्च प्रातिपदिकानां नोपदेशः। य
द्येवं नार्थो धातुग्रहणेन। कस्मान्न भवति। षोडन्। षण्ढः। षडिक इति। उपदेश इति वर्तते। उद्देशश्च प्रातिपदिकानां नो
पदेशः। ष्ठिवेरपि द्वितीयो वर्णष्ठकारः। यदि ठकारः। तेष्ठीव्यत इति न सिध्यति। एवं तर्हि थकारः। यदि थकारः। टु
ष्ठूषति। तेष्ठीव्यत इति न सिध्यति। एवं तर्हि द्वावि मौ ष्ठिवू। एकस्य द्वितीयो वर्णष्ठकारः। अपरस्य थकारः। यस्य थ
कारस्तस्य सत्वं प्राप्नोति। एवं तर्हि द्वावि मौ द्विषकारकौ ष्ठिवुष्वष्कतौ। किं कृतं भवति। पूर्वस्य षकारस्य सत्वे कृते प
रेण सन्निपाते ष्टुत्वं भविष्यति। नैवं शक्यमिह हि मधुलिट् ष्ठीवति। मधुलिट् ष्वष्कते। ष्टुत्वस्यासिद्धत्वात् डः सि धु
डिति धुट् प्रसज्येत। एवं तर्हि यकारादी ष्ठिवुष्वष्कती। किं यकारो न श्रूयते। लुप्तनिर्दिष्टो यकारः॥
सुप्रतिलषतीत्यादौ शेषे विभाषा करवादावषान्त उपदेश इति नेर्णत्वप्रतिषेधार्थः स्यात्। षोडीयतीति। षोडन्तमाचष्टे इति णि
चि टिलोपे पश्चाद्यचि कृते षोडमिच्छति आत्मन इति क्यच्। क्यचि चेतीत्वम्। उद्देश इति। लक्षणेन प्रतिपादनं सुब्धातूनां न तु
साक्षादुच्चारणमित्यर्थः। द्वितीयो वर्णष्ठकार इति। तत्र षस्य सत्वे कृते ष्टुत्वं क्रियते। लुप्तनिर्दिष्ट इति। लोपो व्योर्वलीति लक्षणे
न लुप्तः। तत उपदेशे धात्वादित्वाभावात् सत्वाभावः। तत्र यदा ष्ठिवु द्वितीयो वर्णस्थकारस्तदा पूर्वत्रासिद्धीयमद्विर्वचन इति क
ष्टुत्वस्यापि द्विर्वचने शर्पूर्वाः खय इति शरो लोपे कर्तव्ये पूर्वत्रासिद्धत्वात् ष्टुत्वनिवृत्तौ तेष्ठीव्यत इति भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केपुनरिति। पाठभ्रंश संभवात्प्रश्नः। अजदन्त्यपरा इति। दन्त्यग्रहणेन वकारो गृह्यते इत्याशङ्कास्यादिति स्विदादयो भेदेन निर्दिष्टाः॥ लोपो व्योः॥ कण्डूयतेरप्रत्यय इति। ननु च कण्ड्वादिभ्यो यगित्यन्नैतेभ्यः क्विप् दृश्यते तद्युक्तं तत्कथमप्रत्ययः। एवं तर्हि कण्डूमिच्छतीति क्यजन्तात् क्विप् क्रियते। द्विविधा हि कण्ड्वादयः। तत्र धातुभ्यो यग्विधानात् प्रातिपदिकेभ्यः क्यजादयो भवन्त्येव। तत्र क्यजन्तात्कण्डूयशब्दात् क्विपि कृते वेरपृक्तस्येति लोपे अतो लोपे वलः परस्याभावाद्यलोपो न प्राप्नोतीति वचनम्। न चात्र वलादिमिति। यद्यपि विशेष्यासंनिधानात्तदादिविधेरभावस्तथापि संभवमात्रेणैतदुक्तम्। संभवति हि क्रूतमित्यादौ वलादि प्र

अथ किमर्थं षकारमुपदिश्य तस्य स आदेशः क्रियते। न सकार एवोपदिश्येत। लघ्वर्थमित्याह। कथम्। अविशेषेणायं षकारमुपदिश्य सकारमादेशमुक्त्वा लघुनोपायेन षत्वं निवर्तयति। आदेशप्रत्यययोरिति। इतरथा हि येषां षत्वमिष्यते तेषां तत्र ग्रहणं कर्तव्यं स्यात्। के पुनः षोपदेशा धातवः पठितव्याः। अथ कोऽत्र भवतः पुरुषकारः। यद्यन्तरेण पाठं किंचिच्छक्यते वक्तुं तदुच्यताम्। अन्तरेणापि पाठं किंचिच्छक्यते वक्तुम्। कथम्। अजदन्त्यपराः सादयः षोपदेशाः। स्मिङ् स्वदि स्विदि स्वञ्जि स्वपश्च। सृपिसृजिस्तृस्त्यासेकृसृवर्जम्। णो नः॥ अथ किमर्थं णकारमुपदिश्य नकार आदेशः क्रियते। न नकार एवोपदिश्येत। लघ्वर्थमित्याह। अविशेषेणायं णकारमुपदिश्य तस्य नकारमादेशमुक्त्वा तस्य लघुनोपायेन णत्वं निवर्तयति। उपसर्गादसमासेऽपि णोपदेशस्येति। इतरथा हि येषां तत्र णत्वमिष्यते तेषां तत्र ग्रहणं कर्तव्यं स्यात्। के पुनर्णोपदेशा धातवः पठितव्याः। कोऽत्र भवतः पुरुषकारो यद्यन्तरेण पाठं किंचिच्छक्यते वक्तुं तदुच्यताम्। अन्तरेणापि पाठं किंचिच्छक्यते वक्तुम्। कथं सर्वे णादयो णोपदेशाः। नृतिनन्दिनर्दिनक्किनाटिनाथनाधनॄवर्जम्॥ लोपो व्योर्वलि॥ व्योर्लोपे क्वावुपसंख्यानम्। व्योर्लोपे क्वावुपसंख्यानं कर्तव्यम्। इहापि यथा स्यात्। कण्डूयतेरप्रत्ययः कण्डूरिति। किं पुनः कारणं न सिध्यति। वलीत्युच्यते। न चात्र वलादिं पश्यामः। ननु चायं क्विवेव वलादिः॥

त्ययः। ननु चायमिति। अतो लोपस्य चात्र यलोपविधिं प्रति स्थानिवत्त्वनिषेधः। अथ कण्डूयशब्दस्य धातुत्वाद्यलोपे कृते परिशिष्टस्य धातुसंज्ञासद्भावादतो लोपस्य स्थानिवद्भावादुवङ् कस्मान्न भवति। उच्यते। अतो लोपस्य स्थानिवद्भावादेव कण्डूशब्दस्य धातुत्वाभावादुवङोऽप्रसङ्गः। तस्य हि स्थानिवत्त्वे पूर्वस्य धातुत्वं नास्ति। यणादेशस्तर्ह्यल्लोपस्य स्थानिवद्भावात् प्राप्नोति। भवतु तस्य क्विबाश्रय ऊठ् करिष्यते। ऊठि च कर्तव्ये नास्ति स्थानिवद्भावः। आदिष्टादचः पूर्वत्वादूकारस्य। अत एव कण्डुवौ कण्डुव इत्यादावूठुवङ् कर्तव्ये नास्त्यल्लोपस्य स्थानिवद्भावः। यदा तु कण्डूशब्दात् प्रातिपदिकाद्विभक्तिस्तदोवङ् भवति कण्ड्वौ रामः २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परत्वादिति। न चकृतेऽतोलोपे यलोपस्याप्रसङ्गः तत्राल्लोपादन्तरङ्गत्वात् पूर्वं विलोपेन भाव्यमिति यलोपक्विल्लोपयोर्विप्रतिषेधाभावः। एवं तर्ह्यार्द्धधातुक इति विषयसप्तम्याश्रयणात्पूर्वमतोलोपः पश्चात्क्विबिति भवति विप्रतिषेधः। यदि वेति। यथाऽतृणेडित्यत्रेमागमः। ननु यस्य प्रत्ययत्वं निमित्तं वर्णस्तु प्रत्ययविशेषणत्वेनोपादीयते। तद्वत्तु प्रत्ययलक्षणेन यथेमागमो हलादौ पितिसार्वधातुके विधीयमानः। यलोपस्तु वर्णनिमित्तो न प्रत्ययनिमित्त इति कथं प्रत्ययलक्षणेन स्यादि

क्विल्लोपे वलाद्यभावान्न प्राप्नोति। एवं तर्हि इदमिह संप्रधार्यं क्विल्लोपः क्रियतां यलोप इति। किमत्र कर्तव्यम्। परत्वात् क्विल्लोपः। नित्यत्वाच्च। नित्यः खल्वपि क्विल्लोपः। कृतेपि यलोपे प्राप्नोत्यकृतेपि। नित्यत्वात्परत्वाच्च क्विल्लोपः। क्विल्लोपे कृते वलाद्यभावाद्यलोपो न प्राप्नोति। एवं तर्हि प्रत्ययलक्षणेन भविष्यति। वर्णाश्रये नास्ति प्रत्ययलक्षणम्। यदि वा कानिचिद्वर्णाश्रयाण्यपि प्रत्ययलक्षणेन भवन्ति तथेदमपि भविष्यति। अथ वैवं वक्ष्यामि। लोपो व्योर्वलि ततो वेः। व्यन्तयोश्च व्योर्लोपो भवति। ततोऽपृक्तस्य। अपृक्तस्य च लोपो भवति। वेरित्येव। वलोपाप्रसिद्धिरूठ्भाववचनात्। वलोपस्याप्रसिद्धिः। अस्रेमाणं जीरदानुरिति। किं कारणम्। ऊठ्भाववचनात्। च्छ्वोः शूडनुनासिके चेत्यूठ् प्राप्नोति। अतिप्रसङ्गो व्रश्चादिषु। व्रश्चादिषु चातिप्रसङ्गो भवति। इहापि प्राप्नोति। व्रश्चनः। व्रीहयः व्रण इति। उपदेशसामर्थ्यात्सिद्धम्। उपदेशसामर्थ्याद्व्रश्चादिषु लोपो न भविष्यति। उपदेशसामर्थ्यात्सिद्धमिति चेत्संप्रसारणहलादिशेषेषु सामर्थ्यम्। उपदेशसामर्थ्यात्सिद्धमिति चेदस्त्यन्यदुपदेशवचने प्रयोजनम्। संप्रसारणहलादिःशेषेषु वकारस्य श्रवणं यथा स्यात्। वृक्णः वृक्णवात् वृश्चति विव्रश्चिषतीति ॥

त्याशङ्क्य परिहारान्तरमाह। अथ वेति। वेरपृक्तस्येत्ययं योगो विभज्यते। वेरित्येको योगस्तत्र व्योरिति निवर्तते। वेरिति च प्रत्ययग्रहणपरिभाषया तदन्तस्य ग्रहणं तस्यैव व्योरिति विशेषणम्। तेन वकारयकारान्तस्य विप्रत्ययान्तस्यालोन्त्यस्य लोपो भवति। प्रत्ययलक्षणेन च विप्रत्ययान्तत्वम्। जीरदानुरिति। ननु नात्रोठ् प्राप्नोति। एवं तर्हि तुल्यप्रतिविधानत्वादुपक्षिप्तम्। वलोपावकाशं प्रदर्शनेन चास्रेमाणमित्यत्र वलोपसिद्धिः प्रदर्श्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अन्तरङ्गो लोप इति। ततश्चाकृतयोरेव संप्रसारणहलादिःशेषयोर्वलोपः प्राप्नः उपदेशसामर्थ्यान्न भवति। अनारम्भो वे
ति। वाग्रहणात्समाधानं वाश्लेमाणमित्यत्राश्रयणीयम्। छान्दसत्वादूठ् न भवतीत्युक्तं भवति। वलोपश्चात्र प्रत्याख्याय
ते न यलोपः। गौधेरः पचेरन्नित्यादौ तस्योपयोगात्॥ वेरपृक्तस्य॥ भवति वै किंचिदिति। यद्यप्यत्र न क्रियते वस्तुतदाचार्याश्चोद
यन्ति। तदर्थस्यान्यथासिद्धत्वप्रतिपादनाय तत्र भवति वै किंचिदित्येकं वाक्यम्। किं तदित्याह आचार्याः क्रियमाणमपि चोद

नवा बहिरङ्ग·लक्षणत्वात्। नवा एतत्प्रयोजनमस्ति। किं कारणम्। बहिरङ्ग·लक्षणत्वात्। बहिरङ्गाः संप्रसा
रणहलादिःशेषाः। अन्तरङ्गो लोपः। असिद्धं बहिरङ्ग·मन्तरङ्गे॥ अनारम्भो वा। अनारम्भो वा पुनर्वलोपस्य न्याय्यः। कथमश्लेमा
णंजीरदानुरिति। अश्लेमाणंजीरदानुरिति वर्णलोपात्। अश्लेमाणंजीरदानुरिति छान्दसाद्वर्णलोपात्सिद्धम्।
यथा संस्कानो गयस्कानः। तद्यथा। संस्कायनः। संस्कानः। गयस्कायनः। गयस्कानइति॥ वेरपृक्तस्य॥ दर्वि
जागृव्योः प्रतिषेधः॥ दर्विजागृव्योः प्रतिषेधो वक्तव्यः। दर्विः। जागृविः। किमुच्यते दर्विजागृव्योः प्रतिषेधो वक्त
व्य इति। यदापृक्तस्येत्युच्यते। भवति वै किंचिदाचार्याः क्रियमाणमपि चोदयन्ति। तद्धा कर्तव्यम्। दर्विजागृ
व्योः प्रतिषेधो वा वक्तव्यः। वेर्लोपे दर्विजागृव्योरप्रतिषेधोऽनुनासिकपरत्वात्। वेर्लोपे दर्विजागृव्योरप्रतिषेधः।
अनर्थकः प्रतिषेधोऽप्रतिषेधः। लोपः कस्मान्न भवति। अनुनासिकपरत्वात्। अनुनासिकपरस्य विशब्दस्य ग्र
हणम्। न चात्रानुनासिकपरो विशब्दः। शुद्धपरश्चात्र विशब्दः। यद्यनुनासिकपरस्य विशब्दस्य ग्रहणमित्यु
च्यते। घृतस्पृक्। दलस्पृक् अत्र न प्राप्नोति। नह्येतस्माद्विशब्दादनुनासिकपरं पश्यामः। अनुनासिकपरत्वादिति।

यन्तीति। अथवा चोदनक्रिया भवति क्रियायाः कर्त्री भवतीत्येकमेव वाक्यम्। अप्रतिषेध इति। अपृक्तस्येति न वक्तव्यमित्य
र्थः। अनुनासिकपरत्वादिति। परशब्दो विशिष्टदेशावयववाची। यस्य विशब्दस्य पर इकारोऽनुनासिकोऽस्ति एवेत्संज्ञकः
स एवानुकृतो लोपविधानाय नत्वननुनासिकपर इत्यर्थः। इतरः पञ्चम्यर्थे बहुव्रीहिं मत्वा चोदयति। यदीति। क्विनो नकारस्य
लुप्तत्वादनुनासिकपरत्वाभावान्मा भूल्लोपो घृतस्पृगित्यादावेव न प्राप्नोति क्विनो नकारस्य लुप्तत्वात् ॥

CC-0. In Public Domain. Digitization by eGangotri

नैवंविज्ञायतइति। एवंहिविज्ञायमानेप्रियदर्विमन्यइत्यादौस्यादिष्टेचविषयेनस्यात्। प्रियदर्वीति। अत्राणोप्रगृह्यस्यानुनासिकइत्यनुनासिकः। प्रियादर्विर्यस्यतत्प्रियदर्वि। असिद्धइति। पूर्वत्रासिद्धमितिवचनात्। अर्थवतइति। क्विबादयः कर्त्तरिकृदितिप्रतिज्ञापितेनार्थेनार्थवन्तः। वस्येति। अनुनासिकवकारस्येदमनुकरणंवेरिति॥ हल्ङ्याब्भ्यो॥ द्विहल्पृक्तग्रहणमिति। ङ्याप्पोर्दीर्घात्सोरित्येववक्तव्यमित्यर्थः। राजेति। नलोपेकर्त्तव्येसंयोगान्तलोपस्यासिद्धत्वान्नकारान्तंपदंनभवति।

नैवंविज्ञायते। अनुनासिकःपरोयस्मात्सोयमनुनासिकपरः अनुनासिकपरत्वादिति। कथंतर्हि। अनुनासिकःपरोऽस्मिन्सोयमनुनासिकपरः अनुनासिकपरत्वादिति। एवमपिप्रियदर्विअत्रापिप्राप्नोति। असिद्धोत्रानुनासिकः। एवमपिधात्वन्तस्यप्रतिषेधः॥ धात्वन्तस्यप्रतिषेधोवक्तव्यः। इविदिविधिवि। धात्वन्तस्यचार्थवद्ग्रहणात्। अर्थवतोविशब्दस्यग्रहणंनधात्वन्तोऽर्थवान्। वस्यचानुनासिकत्वात्सिद्धम्। अथवावकारस्यैवेदमनुनासिकस्यग्रहणम्। सन्तिहियणःसानुनासिकाःनिरनुनासिकाश्च॥ हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहल्॥ यदिपुनरयमपृक्तलोपःसंयोगान्तलोपोविज्ञायेत। किंकृतंभवति। द्विहल्पृक्तग्रहणंतिस्योश्चग्रहणंनकर्त्तव्यंभवति। हलन्तादपृक्तलोपःसंयोगान्तलोपश्चेन्नलोपाभावोयथापचन्निति। हलन्तादपृक्तलोपःसंयोगान्तलोपश्चेन्नलोपाभावः। राजातक्षा। संयोगान्तलोपस्यासिद्धत्वान्नलोपोनप्राप्नोति। यथापचन्निति। तद्यथा। पचन्यजन्नित्यत्रसंयोगान्तलोपस्यासिद्धत्वान्नलोपोनभवति। नैषदोषः। आचार्य्यप्रवृत्तिर्ज्ञापयति। सिद्धःसंयोगान्तलोपोनलोपइति। यदयंनङिसंबुद्ध्योरितिसंबुद्धौप्रतिषेधंशास्ति। इहापितर्हिप्राप्नोति। पचन्। यजन्। तुल्यजातीयस्यज्ञापकंभवति ॥

किंतर्हिसकारान्तम्। यदातुस्वादिष्वसर्वनामस्थानेयचीति। अयचिसर्वनामस्थानेपूर्वंपदमितिव्याख्यानंतदासावपिपरतःपदसंज्ञायांसत्यांनलोपःसिद्ध्यति। कृतेतुलोपेसंयोगान्तत्वाभावात्सुलोपोनप्राप्नोतीत्युभयथादोषप्रसङ्गः। पचन्निति। ननुचात्रनकारलोपस्यैवनप्राप्नोति। सुलोपस्यासिद्धत्वात्। नैषदोषः। पूर्वत्रपरस्यासिद्धत्वमुच्यते। ततश्चसंयोगान्तलोपेसंयोगान्तलोपस्यसिद्धत्वाद्भवत्येवतलोपः। तस्यत्वसिद्धत्वान्नलोपाभावः। आद्यन्यासेवारूपेसिद्धेदृष्टान्तउपात्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 यःसंबुद्धावनन्तरइति। पचन्नित्यत्रनकार सकारेणव्यवहितः। उखास्रदिति। उखास्रस्सदितिस्थितेसंयोगान्तलोप
मपवादत्वाद्बाधित्वासंयोगादिलोपः प्राप्नोति। परोपिह्यपवादोवचनप्रामाण्यादुत्सर्गैकर्तव्येनासिद्धोभवति। संयोगादिलो
पेचकृतेसंयोगाभावात्संयोगान्तलोपाभावः। ततोविभक्तिसकारःसंसतेरवयवोनभवति इतिदत्वंनप्राप्नोति। काष्टतड्इ
ति। काष्टंतक्षतीतिक्विप्। संयोगादिलोपेकृतेषस्यजश्त्वंडकारः। दत्वेकृतेइति। सावपिपदमितिदत्व भाव्यः। उभयतस्याशेति।

कश्चतुल्यजातीयः। यःसंबुद्धावनन्तरः। वस्वादिषुदत्वंसंयोगादिलोपबलीयस्त्वात्। वस्वादिषुदत्वंचन
सिध्यति। उखास्रत्। पर्णध्वत्। किंकारणम्। संयोगादिलोपबलीयस्त्वात्। संयोगान्तलोपात्संयोगादिलोपोब
लीयानिति। यथाकाष्टतडिति। तद्यथा। कूटतट्काष्टतडित्यत्रसंयोगान्तलोपात्संयोगादिलोपोबलीयान्भवति।
ननुचदत्वेकृतेनभविष्यति। असिद्धंदत्वंतस्यासिद्धत्वात्प्राप्नोति। सिद्धकाण्डेपठितंवस्वादिषुदत्वंसौदीर्घ
त्वइति। तत्रसौदीर्घग्रहणंनकरिष्यते। वस्वादिषुदत्वंसिद्धमित्येव। एवमप्यपदान्तत्वान्नप्राप्नोति। अथसाव
पिपदंभवति। राजा। तक्षा। नलोपेकृतेविभक्तेःश्रवणंप्राप्नोति। सैषोभयतस्पाशारज्जुर्भवति। रात्तलोपोनिय
मवचनात्॥ रात्तस्यलोपोवक्तव्यः। अबिभर्भवान्। अजागर्भवान्। किंपुनःकारणंनसिध्यति। नियमवचनात्।
रात्सस्येत्येतस्मान्नियमान्नप्राप्नोति। नैषदोषः। रात्सस्येत्यत्रतकारोपिनिर्दिश्यते। यद्येवंकीर्तयतेरप्रत्ययः
कीरितिप्राप्नोति। कीर्तइतिचेष्यते। यथालक्षणमप्रयुक्ते। रोरुत्वंच। रोरुत्वंचवक्तव्यम्। अभिनोत्र। अच्छिनो
त्र। संयोगान्तलोपस्यासिद्धत्वादतःअतीत्युत्वंनप्राप्नोति ॥

स्पशबाधनस्पर्शनयोरितिभौवादिकस्यस्पशग्रहणसंश्लेषणयोरितिचौरादिकस्यवारूपमेतत्। रात्सस्येति। रेफात्परस्य
तकारस्येत्यर्थः। तकारोपीति। रात्सस्येतिद्वितकारकोनिर्देशः। यथालक्षणमिति। लोकेप्रयुक्तानामिदमन्वाख्यानमित्यप्रयु
क्तेलक्षणानामप्रवृत्तिलक्षणंलक्षणमित्यर्थः। तत्रास्यप्रयोगाभावान्नदोषोनप्रयोजनमित्युक्तंभवति। अभिनोत्रेति। भिदेर्ल
ङि सिपिश्नमिसंयोगान्तलोपः। सचपरत्वादुत्वस्यतत्रसिद्धइतिदश्चेतिरुत्वम्। उत्वेतुसंयोगान्तलोपस्यसिद्धत्वाद्व्यवधा
नादुत्वंनप्राप्नोति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्वे सिद्ध इति। संयोगान्तलोपो रोरुत्वे सिद्धो वक्तव्य इत्यवश्यं वक्तव्यमित्यर्थः॥ एङ्॥ हे कतरदिति। कतरद् इति स्थिते संबुद्धिलोपश्च प्राप्नोति। अद्भावश्च। शब्दान्तरप्राप्त्या संबुद्धिलोपोऽनित्यः। अद्भावस्तु कृते संबुद्धिलोपेन प्राप्नोतीत्यनित्यः। उभयोरनि

नवा संयोगान्तलोपस्योत्वे सिद्धत्वात्। नवा वक्तव्यम्। किं कारणम्। संयोगान्तलोपस्योत्वे सिद्धत्वात्। संयोगान्तलोप उत्वे सिद्धः। तद्यथा। हरिवो मेदिनमिति। तद्यथा। हरिवो मेदिनं त्वा इत्यत्र संयोगान्तलोप उत्वे सिद्धो भवति। स एव तर्हि दोषः उभयतस्पाशेति। तस्मादशक्यो हलपृक्तलोपः संयोगान्तलोपो विज्ञातुम्। न चेद्विज्ञायते। द्विहलपृक्तग्रहणं तिस्योश्च ग्रहणं कर्तव्यमेव॥ एङ् ह्रस्वात्संबुद्धेः॥ संबुद्धिलोपे ङतरादिभ्यः प्रतिषेधः॥ संबुद्धिलोपे ङतरादिभ्यः प्रतिषेधो वक्तव्यः। हे कतरत्। हे कतमत्। किमुच्यते ङतरादिभ्यः प्रतिषेधो वक्तव्य इति। यदाऽपृक्तस्येत्यनुवर्तते। अपृक्ताधिकारस्य निवृत्तत्वात्। निवृत्तोऽपृक्ताधिकारः। किं ङतरादिभ्यः प्रतिषेधं वक्ष्यामीत्यतोऽपृक्ताधिकारो निवर्तते। नेत्याह। तच्चामर्थम्। स चावश्यमपृक्ताधिकारो निवर्त्यः। किमर्थम्। अमर्थम्। अमो लोपो यथा स्यात्। हे कुण्ड हे पीठ। निवृत्तेऽपि वै अपृक्ताधिकारे अमो लोपो न प्राप्नोति। किं कारणम्। न हि लोपः सर्वापहारी। मा भूत्सर्वस्य लोपः। अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य लोपे कृते द्वयोरकारयोः पररूपे सिद्धं स्यात्। हे कुण्ड हे पीठेति। यद्येतल्लभ्येत कृतं स्यात्तत्तु न लभ्यम्। किं कारणम्। अत्र हि तस्मादित्युत्तरस्यादेः परस्येत्यकारस्य लोपः प्राप्नोति। अकारलोपे च सति मकारेऽतो दीर्घो यञि सुपि चेति दीर्घत्वे हे कुण्डां हे पीठामित्येतद्रूपं प्रसज्येत। एवं तर्हि हल्लोपः संबुद्धिलोपः तद्धल्ग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हलिति। तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। नैष दोषः। एङ् ह्रस्वादित्येषा पञ्चमी हलित्यस्याः प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति। एवमपि प्रथमयोः पूर्वसवर्णदीर्घत्वे कृते हे कुण्डा हे पीठा इत्येतद्रूपं प्रसज्येत। अमि पूर्वत्वमत्र बाधकं भविष्यति। अमीत्युच्यते॥

त्ययोः परत्वादद्भावे कृते पुनः प्रसङ्गविज्ञानात्संबुद्धिलोपप्रसङ्गः। अकारलोप इति। अकारलोपस्यापरनिमित्तत्वाद्दीर्घविधौ प्रतिषेधादस्य स्थानिवत्त्वाभावः। एवमपीति। एकदेशविकृतस्यानन्यत्वादिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नचात्रासमिति। मकारस्य लुप्तत्वात्। अथवेति। तस्यामेव हल्ग्रहणानुवृत्तावयं विचारः। व्यपवर्गाभावादिति। ह्रस्वात्संबुद्धे रित्युच्यते तानेकृते चैकादेशे नास्ति ह्रस्वसंबुद्ध्योः पौर्वापर्यमित्यर्थः। ह्रस्वादुत्तरस्येति। पूर्वं प्रत्ययान्तवद्भावाद्ध्रस्वान्तमेतद्भवति। संबुद्ध्या सिप्तं हि प्रकृतिरूपमेङ् ह्रस्वेन विशेष्यत इति तदन्तविधिः। उक्तं वेति। वक्ष्यमाणपरिहारापेक्षो वाशब्दः। अनुनासिकोपधत्वादिति। आदेशस्याकारो नुनासिक इत्संज्ञको लुप्त इति तकारो वशिष्यते। स च भेदाभावात्संबुद्ध्यवयवो न भवतीति न लुप्य

नचात्रासं पश्यामः। एकदेशविकृतमनन्यवद्भवतीति। अथ वेदमिह संप्रधार्यं संबुद्धिलोपः क्रियतामेकादेश इति। किमत्र कर्तव्यम्। परत्वादेकादेशः। एवमप्येकादेशे कृते व्यपवर्गाभावात्संबुद्धिलोपो न प्राप्नोति। अन्तादिवद्भावेन व्यपवर्गो भविष्यति। उभयत आश्रयणे नान्तादिवत्। नोभयत आश्रयः करिष्यते। कथम्। नैवं विज्ञायते। ह्रस्वादुत्तरस्याः संबुद्धेर्लोपो भवति। कथं तर्हि। ह्रस्वादुत्तरस्य हलो लोपो भवतीति। स चेत्संबुद्धेरिति। डतरादिभ्यः स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। उक्तं वा। किमुक्तम्। सिद्धमनुनासिकोपधत्वादिति। एवमपि हलो लोपः साधीयः प्राप्नोति। दुक्करणाद्वा। अथवा डुकृ डतरादीनामिति वक्ष्यामि। डित्करणाद्वा। अथवा डिदच्छब्दः करिष्यते। स तर्हि डकारः कर्तव्यः। क्रियते न्यास एव। द्विडकारको निर्देशः। अड्डतरादिभ्य इति। एवमपि लोपः प्राप्नोति। विहितविशेषणं ह्रस्वग्रहणम्। यस्माद्ध्रस्वात्संबुद्धिर्विहितेति। अपृक्तसंबुद्धिलोपाभ्यां लुक्॥ अपृक्तसंबुद्धिलोपाभ्यां लुग्भवति विप्रतिषेधेन। अपृक्तलोपस्यावकाशः। गोमान्। यवमान्। लुकोऽवकाशः। त्रपु। जतु। इहोभयं प्राप्नोति। तद्ब्राह्मणकुलम्। यद्ब्राह्मणकुलम्। संबुद्धिलोपस्यावकाशः। अग्ने वायो। लुकः स एव ॥

तदिति भावः। साधीय इति। व्यपदेशिवद्भावाद्यथा हे रक्षेत्यादाविति भावः। दुक्करणाद्वेति। दुकि कृते स्वमोर्नपुंसकादिति स्वमोर्लुक् क्रियते। एवमपीति। अकाराद्ध्रस्वात्परत्वाद्दकारस्येति भावः। विहितविशेषणमिति। प्रतिपादितत्वाच्च तदन्तविधेर्ह्रस्वान्तात्परस्य संबुद्धिसंबन्धिनो हलो लोपो भवतीति सूत्रार्थः। ततश्च सामर्थ्यात्प्रकृतिरूपावयवह्रस्वग्रहणाद्यस्माद्ध्रस्वात्संबुद्धिर्विहिता तस्मादेव परस्य हलो लोप इत्यर्थो वतिष्ठते। तेन कतरदित्यत्र टिलोपे कृते प्रकृतेर्ह्रस्वान्तत्वाभावाद्दकारलोपाभावः ॥

CC-0. In Public Domain. Digitization by eGangotri

हेत्रघिति। लुकिकृते प्रत्ययलक्षणप्रतिषेधात्संबुद्धिगुणाभावः। इकोचिविभक्तावित्यत्रत्वजग्रहणस्यप्रयोजनंवक्ष्यते। इह
किंचित्त्रपो इतिततोगुणेनभाव्यम्। नवक्तव्यइति। नव्याख्यातव्यः। कस्मादित्याह। नचेति। अन्तरङ्गानपिविधीन्बाधमानोलु
ग्बलवान्नित्यतुल्यबलेनलोपेनस्पर्द्धांनार्हतीतिविप्रतिषेधोनोपन्यसनीयः। अनडुह्यतइति। सुलोपेसतिप्रत्ययलक्षणेननुम

इहोभयंप्राप्नोति। हेत्रपु। हेजतु। लुम्भवतिविप्रतिषेधेन। सतर्हिविप्रतिषेधोवक्तव्यः। नवक्तव्यः। नवालोप
लुकोर्लुगवधारणाद्यथानडुह्यतइति। नवार्थोविप्रतिषेधेन। किंकारणम्। लोपलुकोर्लुगवधारणात्। लोपलु
कोर्हिलुगवधार्यते। लुग्लोपयणयवायावेकादेशेभ्योयथानडुह्यतइति। तद्यथा। अनड्वानिवाचरतिअनुड्
ह्यतइत्यत्रलोपलुकोर्लुगवधार्यते। शेश्छन्दसिबहुलम्॥ अयंयोगः शक्योवक्तुम्। कथमग्नेत्रीतेवाजिना
त्रीषधस्था। तातापिण्डानामिति। पूर्वसवर्णेनाप्येतत्सिद्धम्। नसिध्यति। नुमाव्यवहितत्वात्पूर्वसवर्णोनप्राप्नो
ति। छन्दसिनपुंसकस्यपुंवद्भावोवक्तव्यः॥ मधोर्गृह्णाति। मधोस्तृप्तइवासतइत्येवमर्थम्। तत्रपुंवद्भावेननु
मोनिवृत्तिः। नुमिनिवृत्ते पूर्वसवर्णेनसिद्धम्। भवेत्सिद्धम्। अग्नेत्रीतेवाजिनात्रीषधस्था। इदंतुनसिध्यति। ताता
पिण्डानामिति। इदमपिसिद्धम्। कथम्। साप्तमिके पूर्वसवर्णेकृते पुनः षाष्ठिकोभविष्यति। एवमपिजसिगुणः
प्राप्नोति। वक्ष्यत्येतत्। जसादिषुवावचनंप्राङ्णौचङ्युपधायाः॥ ह्रस्वस्यपितिकृतितुक्॥ तुकिपूर्वान्तेनपुंस
कोपसर्जनह्रस्वत्वंद्विगुस्वरश्च॥ तुकिपूर्वान्तेनपुंसकोपसर्जनह्रस्वत्वंद्विगुस्वरश्चनसिध्यति। आराशस्त्रि
च्छत्रम्। धानाशष्कुलिच्छत्रम्। निष्कौशाम्बिच्छत्रम्। निर्वाराणसिच्छत्रम्। द्विगुस्वरः। पञ्चारत्निच्छत्रम्। दशार
त्निच्छत्रम्। तुकिकृतेऽजन्तत्वादेतेविधयोनप्राप्नुवन्ति। नवाबहिरङ्गलक्षणत्वात्। नवाएषदोषः। किंकारण
म्। बहिरङ्गलक्षणत्वात्। बहिरङ्गलक्षणस्तुक्। अन्तरङ्गाएतेविधयः। असिद्धंबहिरङ्गमन्तरङ्गे ॥

मौस्याताम्। लुकिप्रत्ययलक्षणप्रतिषेधान्नभवतः॥ षेश्छं॥ नुमोनिवृत्तिरिति। अप्रवृत्तिरेवनिवृत्तिः। तातापिण्डानामिति
तइतिस्थितेनादिचीति पूर्वसवर्णदीर्घप्रतिषेधाद्गुणः प्राप्नोति। साप्तमिकइति। सुपांसुलुगितीकारस्याकारेकृतेषाष्ठिकःपू
र्वसवर्णदीर्घः क्रियते। जसिगुणइति। अग्नेत्रीतइत्यत्रेतिभावः॥ ह्रस्वस्य॥ पूर्वान्तकरणेप्रेक्षापूर्वकारित्वप्रदर्शनायात्रविचारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रामणिपुत्र इति। अत्र तुगन्तरङ्गो ह्रस्वो बहिरङ्गः पूर्वत्र तुग्बहिरङ्गः ह्रस्वह्रस्वावन्तरङ्गौ। परीतदिति। तनोतेः क्विपि क्वौ च गमा
दीनामित्यनुनासिकलोपः। अत्र तुटि परादौ क्रियमाणे दूद्प्रसङ्गः। नहि वृतीति दीर्घः॥ संहितायाम्॥ परो यः सन्निकर्षो वर्णा
नां वर्णशून्येन कालेनाव्यवधानं सा संहिता। ह्रादा विरामो वा। ह्रादः शब्देन वर्णाभिव्यक्तिहेतवो नादा उच्यन्ते। तेनैकवर्णाभि
व्यक्तिहेतुनादानन्तरमेव यदा नादान्तरं वर्णान्तराभिव्यक्तये उच्चार्यते तदा संहिता। सा च निरन्तरवर्णद्वयविषया। ततश्च

इह तर्हि ग्रामणिपुत्रः। सेनानिपुत्रः। ह्रस्वत्वे कृते तुक् प्राप्नोति। ग्रामणिपुत्रादिषु चाप्राप्तिः। ग्रामणिपुत्रादिषु चा
प्राप्तिः। किं कारणम्। बहिरङ्गलक्षणत्वादेव। अथवा परादिः करिष्यते। परादौ संयोगादिरित्यतिप्रसङ्गः। परादौ
संयोगादिरित्यतिप्रसङ्गो भवति। अपच्छायात्। वान्यस्य संयोगादेरित्येत्वं प्रसज्येत। विलोपवचनं च। वेश्च लोपो
वक्तव्यः॥ अग्निचित्। सोमसुत्। अष्टकस्येति वेर्लोपो न प्राप्नोति। नैष दोषः। अष्टकग्रहणं न करिष्यते। यदि न
क्रियते। दर्विः जागृविरत्रापि प्राप्नोति। अनुनासिकपरस्य विशब्दस्य ग्रहणम्। शुद्धपरश्चात्र विशब्दः। एवमपि स
तुक्कस्य लोपः प्राप्नोति। निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यति। इट्प्रतिषेधश्च॥ इट्प्रतिषेधश्च वक्तव्यः। प
रीततत्। सतुक्कस्य वलादिलक्षण इट् प्रसज्येत। एवं तर्ह्यभक्तः करिष्यते। अभक्ते स्वरः। यद्यभक्तः स्वरे स्वरभेदो भवति।
दधिच्छादयति मधुच्छादयति। तिङ्ङतिङः इति निघातो न प्राप्नोति। ननु च तुगेवातिङ्। न तुकः परस्य निघातः प्राप्नोति।
किं कारणम्। नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः। नञि युक्ते इवयुक्ते वाऽन्यस्मिन् तत्सदृशे कार्यं विज्ञाय
ते तथा ह्यर्थो गम्यते। तद्यथा। अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशमेवानयति नासौ लोष्टमानीय कृती भवति। एवमि
हाप्यतिङिति प्रतिषेधादन्यस्मिंस्तिङ्सदृशे कार्यं विज्ञास्यते। किं चान्यत् तिङ्। तिङ्सदृशम् पदम्। संहितायाम्॥
अयं योगः शक्यो वक्तुम्। कथम्। अधिकरणं नाम त्रिःप्रकारम्। व्यापकमौपश्लेषिकं वैषयिकमिति ॥

त्रिविदत्रेत्यादावि कारा कारयोस्तवर्गीयेण विच्छेदात् संहिताभावाद्यणोः प्रसङ्गान्निर्दिष्टग्रहणमानन्तर्यार्थं न कर्तव्यमित्याहुः।
त्रिप्रकारमिति। आधारस्त्रयो भेदास्तद्भेदान्नान्त्वानन्त्यमित्याहुः। व्यापकमिति। यथा दध्नि सर्पिः तिलेषु तैलमिति। औपश्लेषिकमि
ति। यथा कटे तिष्ठति। मथुरायां वसतीति। सर्वावयवव्याप्त्यभावात् कटादेर्व्यापकत्वाभावः। वैषयिकमिति। यथाकाशे शकुन
यः। गुरौ वसतीति ॥ रामः ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्य द् तउपश्लेषादिति। ननु चार्द्धधातुक इत्यादौ विषयसप्तमीपक्षस्याश्रितत्वात्कथमिह संबन्धाल्लाभावः। उच्यते। यदा सामान्यस्य प्राधान्यमाश्रीयते। तदा तेन पौर्वापर्याभावाद्विषयभाव आश्रीयते। विशेषस्य तु प्राधान्ये आश्रीयमाणे तेन पौर्वापर्यसंभवादुपश्लेषाश्रयणम्। तन्नेको यणचीत्यादौ विशेषः प्राधान्येनाश्रीयते। न तु सामान्यमिति न कश्चिद्दोषः। उपश्लेषे चाश्रिते निर्दिष्टग्रहणमपि न कर्तव्यम्। व्यवहितयोरुपश्लेषाभावात्। उपश्लेषनिमित्तकार्यप्रसङ्गात् संहिताधिकारे च प्रत्याख्याते संहितासंज्ञापि प्रयोजनाभावात्प्रत्याख्यातैव। आङ्। आङ्माङोरिति। कर्मप्रवचनीयग्रहणमुपलक्षणार्थम्। तेने षदर्थस्याप्या

शब्दस्य च शब्देन कोऽन्योऽभिसंबन्धो भवितुमर्हति अन्यदत उपश्लेषात्। इको यणचि अचि उपश्लिष्टस्येति। तत्रान्तरेण संहिताग्रहणं संहितायामेव भविष्यति॥ आङ्माङोश्च॥ अथ किमर्थमाङ्माङोः सानुबन्धकयोर्निर्देशः। आङ्माङोः सानुबन्धकयोर्निर्देशो गतिकर्मप्रवचनीयप्रतिषेधसंप्रत्ययार्थः। आङ्माङोः सानुबन्धकयोर्निर्देशः क्रियते। आङो गतिकर्मप्रवचनीयसंप्रत्ययार्थः। माङः प्रतिषेधसंप्रत्ययार्थः। इह माभूत्। आ छायामानयति। प्रमा छन्दः। दीर्घात्पदान्ताद्वा॥ दीर्घात्पदान्ताद्वा विश्वजनादीनां छन्दसि॥ दीर्घात्पदान्ताद्वेत्यत्र विश्वजनादीनां छन्दस्युपसंख्यानं कर्तव्यम्। विश्वजनस्य छत्रं विश्वजनस्यच्छत्रम्। न छायां कुरवो परां न च्छायां कुरवोऽपराम्। इको यणचि॥ इग्ग्रहणं किमर्थम्। इह माभूत्। अग्निचिदत्र। सोमसुदत्र। नैतदस्ति प्रयोजनम्। जश्त्वमत्र बाधकं भविष्यति। जश्त्वे न सिद्धं यणमत्र पश्य। असिद्धमत्र जश्त्वं तस्यासिद्धत्वाद्यणादेशः प्राप्नोति। यश्चापदान्तो हलचश्च पूर्वः। यश्चापदान्तो हल् अचश्च पूर्वः तस्य प्राप्नोति। पचतीति। एवं तर्हि दीर्घस्य यण्। दीर्घस्य यणादेशं वक्ष्यामि। तद्दीर्घग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। दीर्घात्पदान्ताद्वेति। तद्वै पञ्चमीनिर्दिष्टम्। षष्ठीनिर्दिष्टेन चेहार्थः ॥

ङोग्रहणम्। ईषच्छाया आच्छायेति। वाक्यस्मरणयोस्त्वाकारस्येह ग्रहणाभावाद्विकल्पो भवति। आच्छाया। आछायेति॥ इको यण्॥ इग्ग्रहणमिति। वक्ष्यमाणोऽभिप्रायः। जश्त्वमत्रेति। परत्वादिति भावः। उभयोरप्यनित्यत्वादस्ति विप्रतिषेधः। तत्र शब्दान्तरप्राप्त्या यणो नित्यत्वं जश्त्वस्य तु कृते यण्प्राप्त्या। जश्त्वमिति। पूर्वत्रासिद्धमिति जश्त्वस्यासिद्धत्वात्। सिद्धासिद्धयोर्विप्रतिषेधाभावाद्यणादेशमेवान्ननिष्पत्तिहृद्वितं प्राप्नुवन्। यश्चेति। पदान्तस्य जश्त्वविधानादपदान्तहलोऽपि यणस्यादेवेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अचीत्येवेति। अकृतार्थासप्तमी दीर्घादिति पञ्चम्याः पूर्वत्र योर्वापर्यकल्पने कृतार्थायाः षष्ठ्याः प्रकल्पिकेति भावः। पूर्वत्र तु छे इति सप्तम्यां छे चेत्यत्र कृतार्था या अपि दीर्घादिति पञ्चम्याः शाच्छासाह्वेत्यादेर्ज्ञापकात् षष्ठी न प्रकल्पिता। ह्रस्वाद पीति छे चेत्यत्र तु अपदान्तो ह्रस्वोऽवकाशः इच्छति गच्छतीति। संबन्धमिति। यद्येवं छे चेत्यत्रापि दोषः। पिति कृतीति संबद्धस्य ह्रस्वस्य छेन संबन्धाभावप्रसङ्गात्। नैष दोषः। छे चेति समुच्चयस्य चशब्देन द्योतनाच्छे च पिति कृति च ह्रस्वस्य तुग्भवति। तदेवं ह्रस्वदीर्घयोर्यथाविधानात् प्लुतस्य प्रकृतिभावस्येष्टत्वान्नार्थ इग्ग्रहणेन हलन्त्यास्त्यर्थेन। चयनमिति। व्यक्तौ पदार्थे प्रतिव्यक्ति लक्षणे

अचीत्येषा सप्तमी दीर्घादिति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति। तस्मिन्निति निर्दिष्टे पूर्वस्येति। भवेत्सिद्धम्। कुमार्यैत्र्यं ब्रह्मबन्ध्वर्थमिति। इदं तु न सिद्ध्यति। दध्यत्र मध्वत्रेति। ह्रस्व इति प्रकृतम्। ह्रस्वग्रहणमपि प्रकृतमनुवर्तते। क्व प्रकृतम्। ह्रस्वस्य पिति तीति। यदि तदनुवर्तते। दीर्घात्पदान्ताद्वा ह्रस्वस्येति ह्रस्वादपि पदान्ताद्विकल्पेन प्राप्नोति। संबन्धवृत्त्या। संबन्धमनुवर्तिष्यते। ह्रस्वस्य पिति कृति तुक् संहितायाम्। ह्रस्वस्य पिति कृति तुक् छे च। ह्रस्वस्य पिति कृति तुक् आङ्माङोश्च। ह्रस्वस्य पिति कृति तुक् दीर्घात्पदान्ताद्वा। ह्रस्वस्य पिति कृति तुक्। इको यणचि। ह्रस्वस्येति वर्तते। पिति कृति तुगिति निवृत्तम्। इह तर्हि प्राप्नोति। चयनम्। चायकः। लवणम्। लावकः। आयादयोऽत्र बाधका भविष्यन्ति। इह तर्हि प्राप्नोति। खट्वेन्द्रः। मालेन्द्रः। खट्वैलका। मालैलका। गुणवृद्धी बाध्यम्। गुणवृद्धी अत्र बाधिके भविष्यतः। इदं तर्हि प्रयोजनम्। इकः अविषये एव यथा स्यात्। यदन्यत् प्राप्नोति तन्मा भूदिति। किं चान्यत्प्राप्नोति। शाकलं सिन्नित्यसमासयोः शाकलप्रतिषेधं चोदयिष्यते स न वक्तव्यो भवति। यणादेशः प्लुतपूर्वस्य। यणादेशः प्लुतपूर्वस्य चेति वक्तव्यम्। अग्ना ३ इ इन्द्रम्। अग्ना ३ यिन्द्रम्। पटा ३ उ उदकम्। पटा ३ वुदकम्। अग्ना ३ इ आशा। अग्ना ३ याशा। पटा ३ उ आशा। पटा ३ वाशा ॥

न प्रवर्तितव्यमित्येचोऽपि यणादेशो यादयश्च पर्यायेण प्रवर्तेरन्। आयादयो न्नेति। द्रव्येऽपि पदार्थे उत्सर्गापवादाभावः संदिग्धासंदिग्धाश्रयोस्त्येव। स न वक्तव्य इति। इग्ग्रहणमन्तरेणापि इको यणचि सिद्धे पुनरिग्ग्रहणं शाकलयणादेशयोरेकविषयत्वाद्विकल्पितयोर्व्यवस्थितविभाषार्थं विज्ञायते। तेन सिन्नित्यसमासयोर्यणादेश एवान्यत्रतूभयम्। अग्ना ३ यिद्रमिति। अग्ने इन्द्र इति स्थिते एचोऽप्रगृह्यस्येति पूर्वस्यार्द्धस्य मात्राया आकार आदेशः। स च प्लुतः। उत्तरस्यार्द्धस्य मात्राया इदुतौ। तावुदात्तत्वमाकारस्येदुतोश्च युगपद्भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्लुतविकाराविति। प्लुतसहितौ विकाराविस्यर्थः। यद्यपि स्वतो सिद्धत्वमिदुतोरस्ति तथापि प्लुतसिद्धातयोः सिद्धत्वं प्रतिपाद यितुं प्लुतासिद्धातयोरसिद्धत्वमुच्यते। वार्त्तिकारस्मेतु आग्रस्मादिदुतोः सिद्धत्वम्। स्वरसन्धिष्विति। सन्धिः संहितातत्कार्येषु सिद्ध इत्यर्थः। यदयमिति। ननु च प्रकृतिभाव एव कर्तव्ये प्लुतस्याश्रयणात्सिद्धत्वं स्यादिति कथं ज्ञापकम्। नैष दोषः। अनेक कल्पनासंभवेपीष्टसिद्ध्यर्थमियमेव कल्पनाश्रीयते। स्वरसंधिकार्येषु सिद्धं प्लुतप्रकरणमितीदुतोरपि सिद्धत्वं भवति। दीर्घे

किं पुनः कारणं न सिध्यति। असिद्धः प्लुतः प्लुतविकारा विमौ। सिद्धः प्लुतः स्वरसन्धिषु। कथं ज्ञायते। यदयं प्लुतप्रगृह्या अचीति प्लुतस्य प्रकृतिभावं शास्ति। तज्ज्ञापयत्याचार्यः सिद्धः प्लुतः स्वरसन्धिष्विति। कथं कृत्वा ज्ञापकम्। सतो हि कार्यिणः कार्येण भवितव्यम्। इदं तर्हि प्रयोजनम्। दीर्घशाकलप्रतिषेधार्थम्। दीर्घत्वं शाकलं च मा भूदिति। एतदपि नास्ति प्रयोजनम्। आरभ्यते प्लुतपूर्वस्य यणादेशः। तयोर्य्वावचि संहितायामिति। तदेव दीर्घशाकलप्रतिषेधार्थं भविष्यति। तन्न वक्तव्यं भवति। ननु च तस्मिन्नप्युच्यमाने इदं न वक्तव्यं भवति। अवश्यमिदं वक्तव्यम्। यो प्लुतपूर्वाविदुतावप्लुतविकारौ तदर्थम्। भो ३ इ इन्द्र। भो ३ यिन्द्र। भो ३ इ इह। भो ३ यिहेति। यदि तर्ह्यस्य निबन्धनमस्ति। इदमेव वक्तव्यम्। तन्न वक्तव्यम्। तदप्यवश्यं स्वरार्थं वक्तव्यम्। अनेन हि सत्युदात्तस्वरितयोर्यण इत्येष स्वरः प्रसज्येतेति। तेन पुनः सत्यसिद्धत्वान्न भविष्यति। यदि तर्हि तस्य निबन्धनमस्ति तदेव वक्तव्यम्। इदं न वक्तव्यम्। ननु चोक्तमिदमप्यवश्यं वक्तव्यम्। यो प्लुतपूर्वाविदुतावप्लुतविकारौ तदर्थम्। भो ३ यिन्द्रम्। भो ३ यिहेति। छान्दसमेतत् ॥

ति। अग्ना३यिन्द्रमित्यादावकः सवर्णे दीर्घ इति दीर्घः प्राप्नोति। अग्नायाशेत्यादौ त्विको सवर्णे शाकल्यस्य ह्रस्वश्चेति प्रकृतिभावः। भो ३ यिन्द्रमिति। भोशब्दस्य वर्णव्यत्ययेन छान्दसः प्लुतः। इकारो निपातः तस्य निपात एकाजनाङिति प्रगृह्यसंज्ञा प्लुतप्रगृह्या अचीति प्रकृतिभावे प्राप्ते यण्विधानम्। अनेन हीति। स्वरे कर्तव्ये स्य यणः सिद्धत्वात्तयोर्य्वावित्यनेन तु यणादेश उदात्तस्वरितयोर्यण इति स्वरेऽसिद्ध इति ततः परस्यानुदात्तस्य स्वरितत्वाभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ दृष्टानुविधिरिति। सर्वे विधयश्छन्दसि विकल्प्यन्त इति प्रकृतिभावः सवर्णदीर्घत्वाभावे यण् भविष्यतीत्यर्थः। एषोऽपीति। छान्दसस्ये ६१३
३३ दमनुकरणम्। साम्नो नामधेयत्वेन प्रसिद्धमित्यर्थः। गीतिरहितस्वरूपमात्रमनुक्रियत इति। अनुकरणे गीत्यभावः। सामर्थ्ययो
गादिति। शास्त्रस्य सामर्थ्यात् सूत्रार्थव्यवस्थापनात् किंचित्पदमात्रमपीहानर्थकमित्यर्थः॥ वान्तो यि॥ वान्तादेश इति। पूर्वत्रस्थानिविशेष

दृष्टानुविधिश्छन्दसि भवति। यत्तर्हि न छान्दसम्। ओ३ यिन्द्रा ओ३ यिहेति साम गायति। एषोऽपि छन्दसि दृष्टानुप्रयोगः क्रियते। जश्च्वं नसिद्धं यणमत्र पश्य यस्मादपदान्तो हलचश्च पूर्वः॥ दीर्घस्य यण् ह्रस्व इति प्रवृत्तं संबन्धवृत्त्या गुणवृद्धिबाध्यम्। नित्ये च यः शाकलभाक् समासे तदर्थमेतद्भगवांश्चकार॥ सामर्थ्ययोगान्नहि किंचिदस्मिन्पश्यामि शास्त्रे यदनर्थकं स्यात्॥ वान्तो यि प्रत्यये॥ वान्तादेशे स्थानिनिर्देशः॥ वान्तादेशे स्थानिनिर्देशः कर्तव्यः। ओकारौकारयोरिति वक्तव्यम्॥ एकारैकारयोर्माभूदिति। स तर्हि वक्तव्यो न वक्तव्यः। वान्तग्रहणं न करिष्यते। एचोऽयि प्रत्यये ऽयादयो भवन्तीत्येव सिद्धम्। यदि वान्तग्रहणं न क्रियते चेयं जेयमित्यत्रापि प्राप्नोति। क्षय्यजय्यौ शक्यार्थे इत्येतन्नियमार्थं भविष्यति। क्षिज्योरेवैच इति। तयोस्तर्हि शक्यार्थादन्यत्रापि प्राप्नोति। क्षेयं पापम्। जेयो वृषल इति। उभयतो नियमो विज्ञास्यते। क्षिज्योरेवैच तयोश्च शक्यार्थ एवेति। इहापि तर्हि नियमान्न प्राप्नोति। लव्यम्। पव्यम्। अवश्यलाव्यम्। अवश्यपाव्यम्। तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः। यथाजातीयकः क्षिज्योरेच्। कथंजातीयकः क्षिज्योरेच्। एकारः। एवमपि रायमिच्छति रैयति। अत्रापि प्राप्नोति। रायिश्छान्दसः। दृष्टानुविधिश्छन्दसि भवति। गोर्यूतौ छन्दसि॥ गोर्यूतौ छन्दस्युपसंख्यानं कर्तव्यम्॥ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। गोयूतिमित्येवान्यत्र। अध्वपरिमाणे च॥ अध्वपरिमाणे च गोर्यूतावुपसंख्यानं कर्तव्यम्। गव्यूतिमध्वानं गतः। गोयूतिमित्येवान्यत्र॥ धातोस्तन्निमित्तस्यैव॥ एवकारः किमर्थः। नियमार्थः। नैतदस्ति प्रयोजनम्। सिद्धे विधिरारभ्यमाणोऽन्तरेणैवकारं नियमार्थो भविष्यति। इष्टतोऽवधारणार्थस्तर्हि॥

लाभो यथासंख्यसंबन्धात्। इह तु निमित्ताभावात्तल्लाभाभावः। उभयतो नियम इति। योगविभागाश्रयणादिति भावः। रायिश्छा राम॰
न्दस इति। एतद्भाष्यवशाद्भाषायां रैशब्दोऽसाधुरिति लक्ष्यते। अथवा क्यच्यर एव रायिः छान्दस इति व्याख्यायते॥ ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रय्यः॥तदित्यनेनेति। प्रकृत्यर्थस्याप्राधान्यात्परामर्शोनयुक्तः। प्रत्ययार्थपरामर्शेपितदर्थग्रहणमयुक्तम्। तथाहि। यदि
सएवार्थस्तदर्थइतितत्पुरुषआश्रीयते तदावश्यमेवस्वस्मिन्नर्थेक्रय्यशब्दोवर्ततइतिनार्थस्तदर्थग्रहणेन। अथसोर्थो
यस्यासौतदर्थःशब्दःतदाशब्देशब्दस्य वृत्त्यसंभवात्तदर्थग्रहणमनर्थकमितिमत्वाएच्छति। सएवेति। प्रधानस्यपरा
मर्शासंभवेगुणभूतस्यप्रकृत्यर्थस्यविनिमयलक्षणस्यपरामर्शः तस्मैक्रयायपदापणेगवादिद्रव्यंव्यवस्थापितंतत्रक्रय्य
शब्दोनिपात्यते। क्रेयमिति। मूल्येनोपादातव्यमित्यर्थः। नचास्तिक्रय्यमिति। आपणेक्रयायप्रसारितंधान्यंनास्तीत्यर्थः।

यद्येवंविज्ञायेतथातोस्तन्निमित्तस्यैवेति। मैवंविज्ञायिधातोरेवतन्निमित्तस्येति। किंचस्यात्। अथातो
स्तन्निमित्तस्यनस्यात्। शङ्कव्यंदारु। पिचव्यःकार्पासः इति॥ क्रय्यस्तदर्थे॥ तदित्यनेनकिंप्रतिनिर्दि
श्यते। सएवक्रीणात्यर्थः। इहमाभूत्। क्रेयंनोधान्यंक्रेतव्यमित्यर्थः। नचास्तिक्रय्यमिति॥ भय्यप्रवय्ये
चच्छन्दसि॥ भय्यादिप्रकरणेहृदय्याउपसंख्यानम्। भय्यादिप्रकरणेहृदय्याउपसंख्यानंकर्तव्यम्। हृ
दय्याआपः। अवृशरस्यच॥ अवादेशोभवतीतिवक्तव्यम्। शरस्यचहृ दस्यचवान्तोवादेशोवक्तव्यः॥
हृदव्याआपः। शरव्यावैतेजनम्। शरव्यस्यपशूनभिधातुकःस्यात्। शरुवृत्ताद्वासिद्धम्। शरुवृत्ताद्वापुनः
सिद्धमेतत्। कृञ्जतीशरु रित्यपिदृश्यते। कृञ्जतीशरुरित्यपिशरु शब्दप्रवृत्तिर्दृश्यते। शरुहस्तद्
तिचलोके शरहस्तमुपाचरन्ति॥ इतिश्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येषष्ठाध्या
यस्यप्रथमेपादेतृतीयमाह्निकम् ॥

केचित्तुक्रय्यशब्देक्रीणातिर्विक्रयेवर्ततइतिव्याचक्षते। तेनापणेविक्रयार्थंयद्द्रव्यंन्यस्तंतत्क्रय्यमित्यर्थः॥ भय्य॥ हृद
य्याइति। हृदेभवाः। भवेछन्दसीतियत्प्रत्ययः। अकारस्यायादेशः। शरव्यस्येति। शरशब्दस्ययतिपरतोऽकारस्यावादेशः।
शरुवृत्तादिति। शरुशब्दः शृस्वृस्निहीत्यौणादिकः तस्माद्यतिकृतेओर्गुणइतिगुणेवान्तोयिप्रत्ययइतिवान्तादेशेसिद्धःश
रव्यइति॥ इतिउपाध्यायजैयटपुत्रकैयटकृतेप्रथमपादेतृतीयमाह्निकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एकः पूर्वपरयोः। एकवचनमिति। आद्गुणइत्यादावेकस्यादेशस्यसूत्रउपादानात्संख्यायाश्चविवक्षितत्वाच्छन्दोपात्तसंख्यात्यागेकारणाभावाद्गुणभेदेप्रधानस्याभेदात्स्थानिभेदेप्येकस्यैवादेशस्यप्रवृत्तिःसिद्धेतिप्रश्नः। पृथगादेशप्रतिषेधार्थमिति। आदेशस्यविधेयत्वात्प्राधान्यात्प्रधानेचग्रहंसमाष्टीत्यादौसंख्यायाअविवक्षितत्वात्स्थानिभेदाद्द्वावादेशौस्यातामि

एकः पूर्वपरयोः॥ एकवचनंकिमर्थम्। एकवचनंपृथगादेशप्रतिषेधार्थम्। एकवचनंक्रियते। एकआदेशोयथास्यात् पृथगादेशोमाभूदिति। नवाद्रव्यवत्कर्मचोदनायांद्वयोरेकस्याभिनिर्वृत्तेः। नवाएतत्प्रयोजनम्। किंकारणम्। द्रव्यवत्कर्मचोदनायांद्वयोरेकस्याभिनिर्वृत्तेरेकआदेशोभविष्यति। तद्यथा। द्रव्येषुकर्मचोदनायांद्वयोरेकस्याभिनिर्वृत्तिर्भवति। अनयोःपूलयोःकटंकुरु। अनयोर्मृत्पिण्डयोर्घटंकुर्विति। नचोच्यतेएकमिति। एकंचासौकरोति। किंपुनःकारणंद्रव्येषुकर्मचोदनायांद्वयोरेकस्याभिनिर्वृत्तिर्भवति। तच्चैकवाक्यभावात्। एकवाक्यभावाद्द्वयोरेकस्याभिनिर्वृत्तिर्भवति। आतश्चैकवाक्यभावाद्व्याकरणेपिह्यन्यत्रद्वयोःस्थानिनोरेकआदेशोभवति। ज्वरत्वरस्रिव्यविमवामुपधायाश्च॥ अस्लोरोपधयोरन्यतरस्यामिति। यत्तावदुच्यते। एकवाक्यभावादिति। तन्न। अर्थात्प्रकरणाद्वालोकेद्वयोरेकस्याभिनिर्वृत्तिर्भवति। अर्थोवास्यैकेनभवतिप्रकरणंवातत्रभवति। इदमेकमेवकर्तव्यमिति। आतश्चार्थाद्वाप्रकरणाद्वा। व्याकरणेपिह्यन्यत्रद्वयोःस्थानिनोर्द्वावादेशौभवतः। रदाभ्यांनिष्ठातोनःपूर्वस्यचदः। उभौसाभ्यासस्येति। कथंयत्तदुक्तंव्याकरणेपिहिअन्यत्रद्वयोःस्थानिनोरेकआदेशोभवति। ज्वरत्वरस्रिव्यविमवामुपधायाश्च। अस्लोरोपधयोरन्यतरस्यामिति। इहतावज्ज्वरस्रिव्यविमवामुपधायाश्चेतिस्त्रांद्वावूठौ। नास्तिदोषःसवर्णदीर्घत्वेनसिद्धम्॥

त्येकग्रहणंकृतम्। नवेति। कर्मचोदनाकर्मणःकारकस्यक्रियमाणत्वेन याचोदनातस्यामित्यर्थः। एकवाक्यभावादिति। यत्रोपात्तकारकान्वितक्रियैवसाध्यमानावाक्यार्थइत्यर्थः॥

CC-0. In Public Domain. Digitization by eGangotri

आयमोरस्मिति। तेननासौद्वयोः स्थाने विधीयते इत्यनेकोनभविष्यतीत्यर्थः। उभौग्रहणसामर्थ्यादिति। प्राणिणिषती
त्यादौ अनितेरित्यनेनोपसर्गादनन्तरस्य नकारस्य णत्वे सिद्धे साभ्यासस्येत्येतावतैव द्वयोर्नकारयोर्णत्वं सिद्धमित्यु
भौग्रहणमादेशनिर्देशार्थं विज्ञायते। साभ्यासस्यानितेरुभौ णकारौ भवत इति। तदेवमेकग्रहणं प्रत्याख्यातम्। आदु

इह भ्रस्जो रोपधयोरमन्यतरस्यामिति। वक्ष्यति ह्येतत्। भ्रस्जो रोपधयोर्लोप आगमोरम्विधीयत इति।
यदुच्यते। अर्थात्प्रकरणाद्वेति। तन्न। किं कारणम्। एकवाक्यभावादेव लोके द्वयोरेकस्याभिनिर्वृत्तिर्भव
ति। आतश्चैकवाक्यभावात्। अङ्ग हि भवान्ग्राम्यं पांसुलपादमप्रकरणज्ञमागतं ब्रवीतु। अनयोः पूलयोः
कटं कुरु। अनयोर्मृत्पिण्डयोर्घटं कुर्विति। एकमेवासौ करिष्यति। कथं यदुक्तम्। व्याकरणेऽपि ह्यन्यत्र
द्वयोः स्थानिनोर्द्वावादेशौ भवतः। रदाभ्यां निष्ठातो नः पूर्वस्य च दः उभौ साभ्यासस्येति। इह तावद् रदाभ्यां
निष्ठातो नः पूर्वस्य च द इति द्वे वाक्ये। कथम्। योगविभागः करिष्यते। रदाभ्यां निष्ठातो नः। ततः पूर्वस्य च द इति।
इहापि उभौ साभ्यासस्येति। उभौग्रहणसामर्थ्याद् द्वावादेशौ भविष्यतः। तत्रावयवे शास्त्रार्थसंप्रत्ययो
यथा लोके। तत्रावयवे शास्त्रार्थसंप्रत्ययः प्राप्नोति। यथा लोके। तद्यथा। लोके वसन्ते ब्राह्मणोऽग्नीनादधीते
ति सकृदाधाय कृतः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तिर्न भवति। गर्भाष्टमे ब्राह्मण उपनेय इति सकृदुप
नीय कृतः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तिर्न भवति। तथा त्रिर्हृदयंगमाभिरद्भिरशब्दाभिरुपस्पृशेदिति
सकृदुपस्पृश्य कृतः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तिर्न भवति। एवमिहापि खट्वेन्द्रे कृतः शास्त्रार्थ इति कृत्वा
मालेन्द्रादिषु न स्यात् ॥

ण इत्यादौ संख्यायाः शब्दोपात्ताया विवक्षणात्। यत्र तु संख्या न विवक्ष्यते तत्र लक्ष्यसिद्धिरविवक्षितत्वे हेतुः। तत्रावय
व इति। व्यक्तिसमुदायापेक्षया एकाव्यक्तिरवयवस्तत्रैव शास्त्रीयं कार्यं प्राप्नोति तावतैव शास्त्रार्थस्यानुष्ठानात् न तु सर्वा
सु व्यक्तिष्वित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सिद्धं त्विति। साधुभिर्भाषितव्यमिति धर्मनियमोऽनेन क्रियते इत्यर्थप्रतिपादनाय प्रयुज्यमानेषु सर्वेष्वेव शब्देष्विदं शास्त्रम्
न्वाख्यानाय प्रवर्तते तत्तु कस्यांचिदेव शब्दव्यक्तावित्यर्थः। अवयवेनेति। साकल्येनेत्यर्थः। तद्यथा पूर्ववया इति। न केवलं नि

सिद्धं तु धर्मोपदेशनेऽनवयवविज्ञानाद्यथा लौकिकवैदिकेषु। सिद्धमेतत्। कथम्। धर्मोपदेशनमिदं
शास्त्रम्। धर्मोपदेशनेऽस्मिंश्च शास्त्रेऽनवयवेन शास्त्रार्थः संप्रतीयते। यथा लौकिकवैदिकेषु च कृतान्तेषु।
लोके तावत्। ब्राह्मणो न हन्तव्यः सुरा न पेयेति। ब्राह्मणमात्रं न हन्यते सुरामात्रं न पीयते। यदि चावयवेन
शास्त्रार्थसंप्रत्ययः स्यात्। एकं च ब्राह्मणमहत्वा एकां च सुरामपीत्वाऽन्यत्र कामचारः स्यात्। तद्यथा पूर्ववया
ब्राह्मणः प्रत्युत्थेय इति। पूर्ववयोमात्रं प्रत्युत्थीयते। यदि चावयवेन शास्त्रार्थसंप्रत्ययः स्यात्। एकं पू
र्ववयसं प्रत्युत्थायाऽन्यत्र कामचारः स्यात्। तथा वेदे खल्वपि वसन्ते ब्राह्मणोऽग्निष्टोमादिभिः क्रतुभिर्यजे
तेति। अग्न्याधाननिमित्तं वसन्ते वसन्ते इज्यते। यदि चात्रावयवेन शास्त्रार्थसंप्रत्ययः स्यात्। सकृदिष्ट्वा
पुनरिज्यायां न प्रवर्तेत। उभयथेह लोके दृश्यते। अवयवेनापि शास्त्रार्थसंप्रत्ययोऽनवयवेनापि। कथं पु
नरिदमुभयं लभ्यते। लभ्यमित्याह। कथम्। इह तावद् वसन्ते ब्राह्मणोऽग्नीनादधीतेत्यग्न्याधानं यज्ञमु
खप्रतिपत्त्यर्थं सकृदाधाय कृतः शास्त्रार्थः प्रतिपन्नं यज्ञमुखमिति कृत्वा पुनः प्रवृत्तिर्न भवति। अतोऽ
त्रावयवेन शास्त्रार्थः संप्रतीयते। तथा गर्भाष्टमे ब्राह्मण उपनेय इति उपनयनं संस्कारार्थं सकृच्चा
सावुपनीतः संस्कृतो भवति। अतोऽत्राप्यवयवेन शास्त्रार्थः संप्रतीयते। तथाद्भिर्हृद्गमाभिरद्भिरशब्दाभि
रुपस्पृशेदित्युपस्पर्शनं शौचार्थम्। सकृच्चासावुपस्पृश्य शुचिर्भवत्यतोऽत्राप्यवयवेन शास्त्रार्थः संप्रती
यते। इहेदानीं ब्राह्मणो न हन्तव्यः। सुरा न पेयेति ॥

षेधः सर्वविषयोऽनुष्ठीयते यावद्विधिरपि यथासंभवमिति दर्शयितुमुपन्यासः। अग्न्याधाननिमित्तमिति। अग्न्याधा
नं निमित्तमस्येति बहुव्रीहिः। सत्यग्न्याधानेऽग्निष्टोमाद्यधिकारात्। यज्ञमुखमिति। यज्ञद्वारं यज्ञोपायमित्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणवध इति। एकस्मिन्नपि ब्राह्मणे हते निषेधातिक्रमात्सर्वब्राह्मणविषयो हनननिषेधः प्रतीयते। ऊर्ध्वं प्राणा इति। अर्थवादोयं प्रत्युत्थानप्रशंसापरः। वसन्त इति। अङ्गभूयस्त्वात्फलभूयस्त्वमिति। काम्यानि कर्माणि पुनः पुनरधिकारिभिरनुष्ठीयन्ते। यस्य पुनः कामना नास्ति नासौ पुनरनुतिष्ठति। नैमित्तिकान्यपि कर्माणि यदा यदा निमित्तावगमस्तदा तदाव

ब्राह्मणवधे सुरापाने महादोष उक्तः। स ब्राह्मणवधमात्रे सुरापानमात्रे च प्रसक्तः। अतोऽत्रानवयवेन शास्त्रार्थः संप्रतीयते। तथा पूर्ववया ब्राह्मणः प्रत्युत्थेय इति पूर्ववयसोऽप्रत्युत्थाने दोष उक्तः। प्रत्युत्थाने च गुणः। कथम्। ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति। प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यत इति। स च पूर्ववयोमात्रे प्रसक्तोऽतोऽत्राप्यनवयवेन शास्त्रार्थः संप्रतीयते। तथा वसन्ते ब्राह्मणोऽग्निष्टोमादिभिः क्रतुभिर्यजेतेति। इज्यायाः किंचित्प्रयोजनमुक्तम्। किं तत्स्वर्गे लोके अप्सरस एनं जाया भूत्वोपशेरते। तच्च द्वितीयस्याम्वृत्तीयस्यां चेज्यायाः फलं भवितुमर्हति। अतोऽत्राप्यनवयवेन शास्त्रार्थः संप्रतीयते। तथा शब्दस्यापि ज्ञाने प्रयोजनमुक्तम्। किम्। एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति। यद्येकः शब्दः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति। किमर्थं द्वितीयस्तृतीयश्च प्रयुज्यते। न वै कामानां तृप्तिरस्ति। अथ पूर्वपरग्रहणं किमर्थम्। पूर्वपरग्रहणं परस्यादेशप्रतिषेधार्थम्। पूर्वपरग्रहणं क्रियते। परस्यादेशप्रतिषेधार्थम्। परस्यादेशो मा भूत्। आद्गुण इति। कथं च प्राप्नोति। पञ्चमीनिर्दिष्टाद्धि परस्य। पञ्चमीनिर्दिष्टाद्धि परस्यादेशः प्राप्नोति। तद्यथा। द्व्यन्तरुपसर्गेभ्योऽप ईदिति। षष्ठीनिर्दिष्टार्थं तु। षष्ठीनिर्देशार्थं तु पूर्वपरग्रहणं क्रियते। षष्ठीनिर्देशो यथा प्रकल्पेत। अनिर्दिष्टे हि षष्ठ्यर्थोऽप्रसिद्धिः। अक्रियमाणे हि पूर्वपरग्रहणे षष्ठ्यर्थस्याप्रसिद्धिः स्यात्। कस्य। स्थानेयोगत्वस्य ॥

स्यानुष्ठेयानि नित्यानां तु नित्यत्वादेवाविच्छेदः। अथ पूर्वेति। आद्गुण इत्यादावादित्यादिका पञ्चमी अचीत्यादेः षष्ठीं प्रकल्पयिष्यति। अचीत्यादिका सप्तम्यादित्यादेरिति मत्वा प्रश्नः। पूर्वपरग्रहणमिति। परस्यैवादेशो मा भूत्पूर्वपरयोर्यथा स्यादित्यर्थः। षष्ठीनिर्दिश्यर्थे त्विति। निर्देशो निर्दिश्यम्। तुश्च शब्दार्थे। अनिष्टनिवृत्तिरिष्टसिद्धिश्च प्रयोजनमित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदुक्तमिति। तस्मादित्युत्तरस्येत्यत्र। सप्तमीपञ्चम्योश्चेति। आनेमुगीदास इत्यादौ। न चोभयोः प्रकल्पनं विरुद्धं यतो विरोधान्न भवेत्। तत्रहि यप्रमाणत्वाद्द्वे भवेतां प्रकल्पिके। षष्ठ्याविभक्तौ तेनात्र ज्ञापकार्थत्वमाश्रितम्। अन्ता॥ किमर्थमिति। स्थानिवद्भावेन कार्याणां सिद्धिं मत्वा प्रश्नः। आमिश्रस्येति। समुदायस्येत्यर्थः। पूर्वपरसमुदायो ह्येकादेशस्य स्थानी न प्रत्येकं पूर्वपराविति तदाश्रयं कार्यं स्थानिवद्भावादप्राप्तमनेनातिदिश्यते। क्षीरोदके इति। नियतत्व कि विवक्षायां जातिप्राधान्याभावादेकवद्भावाभावः। यदि तर्हि समुदायः स्थानी नावयवः तत्कथमुक्तं यो ह्युभयोः स्थाने भवति लभते सावन्यतरतोऽव्यपदेशमिति खट्वर्श्य इत्यादौ रपरत्वं भवतीति समुदायिव्यतिरिक्तसमुदायाभावाद्वस्तुस्थित्याश्रयेणान्यतरतोऽव्यपदेशाविरोधः। स्थानिवद्भावे

नैष दोषः। आदित्येषापञ्चमी भवतीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति। तस्मादित्युत्तरस्येति। तथाऽचीत्येषा सप्तमी। आदितिपञ्चम्याः षष्ठीं प्रकल्पयिष्यति। तस्मिन्निति निर्दिष्टे पूर्वस्येति। एवं तर्हि सति सिद्धे यत्पूर्वपरग्रहणं करोति तज्ज्ञापयत्याचार्यः। नउभे युगपत्प्रकल्पिके भवत इति। किमेतस्य ज्ञापने प्रयोजनम्। यदुक्तं सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रकॢप्तिस्तत्रोभयकार्यप्रसङ्ग इति स न दोषो भवति॥ अन्तादिवच्च॥ किमर्थमिदमुच्यते। अन्तादिवद्वचनमामिश्रस्यादेशवचनात्। अन्तादिवद्वचनं क्रियते। आमिश्रस्यादेशवचनात्। आमिश्रस्यायमादेश उच्यते। स नैव पूर्वग्रहणेन गृह्यते। नापि परग्रहणेन। तद्यथा। क्षीरोदके संपृक्ते आमिश्रत्वान्नैव क्षीरग्रहणेन गृह्यते नाप्युदकग्रहणेन। इष्यते च ग्रहणं स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्यन्तादिवद्वचनम्। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति ।

तु स्थानी साक्षान्निर्दिष्ट आश्रीयते। नन्वादेशग्रहणादानुमानिकस्याप्यादेशस्य स्थानिवद्भावात्स्थान्यप्यानुमानिक आश्रीयते। यथोदाहृतमेरुः पचतु। अत्र हीकारेणेकारान्तः स्थान्यनुमीयते। उकारेणाप्युकारान्त आदेशः तस्य स्थानिवद्भावात्तिङन्तं पदमिति पदसंज्ञा भवति। एवमेकादेशस्यानुमीयमानस्थानित्वपूर्वपरावयवाश्रयं कार्यं सिद्धमिति किमनेनातिदेशेन। एवं तर्हि नल्विधाविति स्थानिवद्भाव उक्तोऽल्विध्यर्थमिति। तथा च क्षीरपेणेत्यादावेकाज्उत्तरपदे णइति णत्वमल्विधिरप्यन्तवद्भावादुवति। यत्त्विह वार्तिकमन्तादिवद्वचनमामिश्रस्यादेशवचनादिति तदादेशग्रहणप्रयोजनापरामर्शेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रयस्येति। अन्तादिशब्दयोरवयवविशेषवाचित्वादवयविमात्राक्षेपेपिअवयविविशेषप्रतिपादनायतन्निर्देशः कर्तव्यइत्यर्थः। पूर्वस्येति। क्वचिदादेशविधानात्प्राक्स्थौपूर्वपरौतौगृह्येतेयथारुसऔरुसावित्यत्रसुपमौकारंपरंप्रत्यादिवद्भावादेकादेशस्यसुबन्तंपदमितिपदसंज्ञाभवति। क्वचित्तुकृतएकादेशेयौपूर्वपरौतौगृह्येते। उभयतइति। यथाएतेलिङ्गेतिहृस्वत्वमुपसर्गात्स्वरस्यविधीयमानमतीयात्परीयादित्यादौनभवति। तथाह्यन्तादिशब्दाववयवविशेषवाचिनौतत्रयदिष्ट

तत्रयस्यान्तादिवत्तन्निर्देशः। तत्रयस्यान्तादिवद्भावइष्यतेतन्निर्देशः कर्तव्यः। अस्यान्तवद्भवति अस्यादिवद्भवतीतिवक्तव्यम्। सिद्धंतुपूर्वपराधिकारात्। सिद्धमेतत्। कथम्। पूर्वपराधिकारात्। पूर्वपरयोरितिवर्ततेपूर्वस्यकार्यंप्रत्यन्तवद्भवति परस्यकार्यंप्रत्यादिवद्भवति। अथयत्रोभयमाश्रीयतेकिंतत्रपूर्वस्यान्तवद्भवतिआहोस्वित्परस्यादिवद्भवतिउभयतआश्रयेनान्तादिवत्॥ किंवक्तव्यमेतत्। नहि। कथमनुच्यमानंगंस्यते। लौकिकोयंदृष्टान्तः तद्यथालोकेद्वयोस्तुल्यबलयोरेकः प्रेष्योभवतिसतयोः पर्यायेणकार्यंकरोतियदातमुभौयुगपत्प्रेषयतः नानादिक्षुचकार्येभवतः तत्रयद्यसावविरोधार्थीभवतिउभयोर्नकरोति। किंपुनः कारणमुभयोर्नकरोति। यौगपद्यासंभवात्। नास्तियौगपद्येनसंभवः। अथान्तवत्त्वेकानिप्रयोजनानि। अन्तवत्त्वेप्रयोजनम्। बह्वच्पूर्वपदाट्ठज्विधानेप्रयोजनम्। द्वादशान्यिकः। पूर्वपदोत्तरपदयोरेकादेशः पूर्वस्यान्तवद्भवति। यथाशक्यतेकर्तुम्। बह्वच्पूर्वपदात्ठञ्भवतीति। क्वतर्हिस्यात्। यत्रक्वतेप्येकादेशेबह्वच्पूर्वपदंभवति। त्रयोदशान्यिकः॥ प्रत्ययैकादेशः पूर्वविधौ॥ प्रत्ययैकादेशः पूर्वविधौप्रयोजनम् ॥

र्वप्रत्य वयववुद्ध्याएकादेशआश्रीयतेतदातस्यैवपरंप्रतिकथमादिवद्भावः स्यादेवंपरंप्रत्यादिवत्त्वेपूर्वंप्रत्यन्तवद्भावोनस्यादेकस्योभयापेक्षयापारतन्त्र्यविरोधादितिभावः। द्वादशान्यिकइति। द्वादशान्यानिकर्माणिअध्ययनेप्रवृत्तान्यस्येतितद्धितार्थेसमासः। एकादेशस्यान्तवत्त्वाद्बह्वच्पूर्वपदंभवतीतिठञ्सिध्यति। अत्रोत्तरपदविशेषः शब्देननाश्रितद्वयुभयाश्रयाभावात् प्रतिषेधाभावः। क्वतर्हीति। वचनाद्भूतपूर्वगतिराश्रयिष्यतइतिमन्यते। यत्रेति। सांप्रतिकसद्भावेभूतपूर्वगत्याश्रयणस्यायुक्तत्वात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिबन्तीति।पा॰अन्तिइतिस्थितेअन्तरङ्गत्वाच्चैकादेशेकृतेपिबादेशोनप्राप्नोतिशितंप्रत्यन्तवद्भावाद्भवति।वार्णादाङ्गमि त्यनाश्रित्येदमुक्तम्।वैभक्तस्येति।विभक्तौभवोवैभक्तः।अमीइति।अदसस्त्यदाद्यत्वमतोगुणइतिपररूपेजसःशीआद्गुणः।अ इइतिस्थितेईत्वमत्वे।अमूइति।अदौइतिस्थितेऊत्वमत्वे।कृतर्हीति।अदसइतिपञ्चम्याश्रयिष्यते नषष्ठी।आनन्तर्यसंब

मधुपिबन्ति।शिदशितोरेकादेशः शितोन्तवद्भवति।यथाशक्यतेकर्तुम्।शितीतिपिबादेशः।क्व तर्हिस्यात्।य न्नैकादेशोनभवति,पिबति।वैभक्तस्यणत्वे।वैभक्तस्यणत्वेप्रयोजनम्।क्षीरपेणसुरापेण।उत्तरपदविभक्त्यो रेकादेशउत्तरपदस्यान्तवद्भवति।यथाशक्यतेकर्तुम्।एकाजुत्तरपदेणोभवतीति।क्व तर्हिस्यात्।यन्नैकादेशो नभवति,क्षीरपाणांसुरापाणाम्।अदसईत्वोत्वेप्रयोजनम्।अमीअत्रअमीआसाते।अमूअत्रअमूआसाते।अदस्विभक्त्यो रेकादेशोऽदसोऽन्तवद्भवति।यथाशक्यतेकर्तुम्।अदसोसेर्दादुदोमः।एतईद्बहुवचनइति।क्व तर्हिस्यात्।यन्नै कादेशोनभवति।अमीभिः।अमूभ्याम्।स्वरितत्वेप्रयोजनम्।कार्याहार्या।तिइतितोरेकादेशस्तितोन्तवद्भवति। यथाशक्यतेकर्तुम्।तित्स्वरितमिति।क्व तर्हिस्यात्।यन्नैकादेशोनभवति,कार्योहार्यः।स्वरितत्वंविप्रतिषेधात्। स्वरितत्वंक्रियतामेकादेशइति।किमत्रकर्तव्यम्।परत्वात्स्वरितत्वंभविष्यतिविप्रतिषेधेन।नैषयुक्तोविप्र तिषेधः।नित्यएकादेशः।कृतेपिस्वरितत्वेप्राप्नोत्यकृतेपि।अनित्यएकादेशः।अन्यथास्वरस्यकृतेस्वरितत्वेप्राप्नो त्यन्यथास्वरस्याकृते स्वरितत्वेप्राप्नोति।स्वरभिन्नस्यचप्राप्नुवन्विधिरनित्योभवति।अन्तरङ्गस्तर्ह्येकादेशः।का न्तरङ्गता।वर्णावाश्रित्यैकादेशः।पदस्यस्वरितत्वम्।स्वरितत्वमप्यन्तरङ्गम्।कथम्।उक्तमेतत्।पदग्रहणं परिमाणार्थमिति।उभयोरन्तरङ्गयोः परत्वात्स्वरितत्वम्।स्वरितत्वेकृतेआन्तर्यतः स्वरितानुदात्तयोरेकादे शः स्वरितोभविष्यति ॥

न्धेवाषष्ठीविज्ञास्यतइतिभावः।अमीभिरिति।पूर्वोक्तार्थाश्रयणे अत्रनस्यात्।तामीत्वोत्वेइत्यवयवावयविसंबन्धेषष्ठ्या श्रीयते।कार्येति।कार्यआइतिविभज्यान्वाख्यानेविचारः।यदात्वर्थमभिधायेतिक्रमआश्रीयतेतदात्वर्थसंस्कारात्स्वरि तान्तात् कार्यशब्दाट्टाबुत्पत्तौप्रयोजनाभावः।नित्यएकादेशइति।स्वरितत्वंतुकृतएकादेशेऽनक्त्वान्नप्राप्नोतीत्यनित्य म्।आन्तर्यतइति।स्वरितेनुदात्तस्यसद्भावात् ॥ रामः ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गविशिष्टेति। तित्स्वरितमित्यत्रतिदिति प्रत्ययग्रहणमितिवचनात् प्रत्ययग्रहणेयस्मात्सविहितइतितदन्तस्य ग्रहणात्तस्यचप्रातिपदिकत्वात् प्रातिपदिकग्रहणेलिङ्गविशिष्टस्यापिग्रहणमितिपरिभाषोपस्थानात्। नचेयंस्वरूपविधावेवपरिभाषोपतिष्ठतेइतिङ्याप्प्रातिपदिकादित्यत्रप्रतिपादितम्। गुडोदकमिति। उभयाश्रयत्वादत्रनिषेधोनभवति। एकदेशविकृतस्यानन्यत्वाद्दकशब्दस्याप्युदकशब्देनग्रहणात्पूर्वपदंप्रत्यन्तवत्त्वमेवोपयुज्यते। एतस्य

लिङ्गविशिष्टग्रहणाद्वा। अथवाप्रातिपदिकग्रहणेलिङ्गविशिष्टस्यापिग्रहणंभवतीत्येवमत्रस्वरितत्वंभविष्यति। पूर्वपदान्तोदात्तत्वंचप्रयोजनम्। गुडोदकंमथितोदकम्। पूर्वपदोत्तरपदयोरेकादेशः पूर्वपदस्यान्तवद्भवति। यथाशक्येतकर्तुम्। उदकेकेवलेपूर्वपदस्यान्तउदात्तोभवतीति। क्वतर्हिस्यात्। यत्रैकादेशोनास्ति। उदश्विदुदकम्। पूर्वपदान्तोदात्तत्वंचप्रतिषेधात्। पूर्वपदान्तोदात्तत्वंक्रियतामेकादेशइति। किमत्रकर्तव्यम्। परत्वात्पूर्वपदान्तोदात्तत्वम्। पूर्वपदान्तोदात्तस्यावकाशः। उदश्विदुदकम्। एकादेशस्यावकाशः दण्डाग्रंसुपाग्रम्। इहोभयंप्राप्नोति। मथितोदकंगुडोदकम्। पूर्वपदान्तोदात्तत्वंभवतिविप्रतिषेधेन। सचावश्यंविप्रतिषेधआश्रयितव्यः। एकादेशेहिस्वरिताप्रसिद्धिः। एकादेशेहिस्वरितस्याप्रसिद्धिःस्यात्। योहिमन्यते। स्वत्रैकादेशः। एकादेशेकृतेपूर्वपदान्तोदात्तत्वंभविष्यतीति। स्वरितत्वंतस्यनसिध्यति। स्वरितोवानुदात्तेपदादावितिगुडोदकंमथितोदकम्। कृदन्तप्रकृतिस्वरत्वंचप्रयोजनम् ॥

योजननिराकरणायाह। पूर्वपदान्तोदात्तत्वमिति। ननुवर्णाश्रयत्वादेकादेशोन्तरङ्गः पूर्वपदोत्तरपदाश्रयत्वात्स्वरोबहिरङ्गइत्ययुक्तोयंविप्रतिषेधः। नेदमपूर्वंचोद्यते। एकादेशप्रसङ्गस्त्वन्तरङ्गबलीयस्त्वादितिवक्ष्यमाणत्वान्नेन्द्रस्य परस्येतिज्ञापकाश्रयेणपरिहरिष्यते। स्वरितत्वंतस्यनसिद्ध्यतीति। एकादेशस्योदात्तत्वमेवपूर्वपदान्तोदात्तत्वेन स्यात्। पूर्वंतुपूर्वपदान्तोदात्तत्वेसत्यनुदात्तंपदमेकवर्जमित्युदकशब्दोनुदात्तइत्येकादेशःपक्षेस्वरितोभवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ प्राशितेति। तृच्। तनितृचात्रौ चनिति कृत्स्वरतावितिपूर्वपदप्रकृतिस्वरो भवति। नहीदानीमिति। एकादेशेनव्यवधानात्। ६।१४
२ण नचैकदेशविकृतस्यानन्यत्वेनोत्तरपदं परं भविष्यति। एकादेशस्तु पूर्वं प्रत्यन्तवद्भावेन स्वरः सेत्स्यतीतियुक्तं कल्प
यितुम्। प्राशनमित्यादौ दोषप्रसङ्गात्। तथाह्यशनशब्दो लित्स्वरेणाद्युदात्तस्तत्रैकादेशस्य पूर्वं प्रत्यन्तवत्त्वे प्रत्ययात्पूर्व
उदात्तभावो नास्तीति कथमुत्तरपदस्य स्वरः स्यात्। तस्मात्पूर्वं स्वरः कर्तव्यः पश्चादेकादेशः। पूर्वं त्वैगर्तक इति। पूर्वेषुत्रिग

प्रादिता प्राशिता। कृद्रूत्योरेकादेशो गतेरन्तवद्भवति। यथा शक्यते कर्तुम्। गतिकारकोपपदात्कृदन्तमुत्तरपदं प्रकृतिस्वरं भवती
ति। क्व तर्हि स्यात्। यत्रनैकादेशः। प्रकारकः प्रकरणम्। कृदन्तप्रकृतिस्वरत्वं विप्रतिषेधात्। कृदन्तप्रकृतिस्वरत्वं क्रियतामेका
देश इति। किमत्र कर्तव्यम्। कृदन्तप्रकृतिस्वरत्वं भवति विप्रतिषेधेन। कृदन्तप्रकृतिस्वरस्यावकाशः। प्रकारकः प्रकरण
म्। एकादेशस्यावकाशः। दण्डाग्रं क्षुपाग्रम्। इहोभयं प्राप्नोति प्रादिता प्राशिता। कृदन्तप्रकृतिस्वरत्वं भवति वि
प्रतिषेधेन। स चावश्यं विप्रतिषेध आश्रयितव्यः। एकादेशे ह्यप्रसिद्धिरुत्तरपदस्यापरत्वात्। सो हि मन्यते
तत्रैकादेशः। एकादेशे कृते कृदन्तप्रकृतिस्वरत्वं भविष्यतीति। कृदन्तप्रकृतिस्वरत्वं तस्य न सिध्यति। किं का
रणम्। उत्तरपदस्यापरत्वात्। नहीदानीमेकादेशे कृते उत्तरपदं परं भवति। ननु चान्तादिवद्भावेन परम्। उभ
यत आश्रयेनान्तादिवत्। उत्तरपदवृद्धिश्चैकादेशात्। उत्तरपदवृद्धिश्चैकादेशाद्भवति विप्रतिषेधेन। उत्तरप
दवृद्धेरवकाशः। पूर्वं त्वैगर्तकः अपरत्वैगर्तकः। एकादेशस्यावकाशः। दण्डाग्रं क्षुपाग्रम्। इहोभयं प्राप्नोति। पू
र्वैषुकामशमः। अपरैषुकामशमः। उत्तरपदवृद्धिर्भवति विप्रतिषेधेन। एकादेशप्रसङ्ग॰स्त्वन्तरङ्ग॰बलीय
स्त्वात्। एकादेशस्तु प्राप्नोति। किं कारणम्। अन्तरङ्ग॰बलीयस्त्वात्। अन्तरङ्गं बलीयो भवति। तत्र को दोषः। त
त्र वृद्धिविधानम्। तत्र वृद्धिर्विधेया। नैष दोषः ॥

त्रैषुभव इति तद्धितार्थे समासः। सुखवीद्धादृदि कुशब्देभ्यो जनपदस्येति तदन्तविधिनाऽवृद्धादपीति वुञ् प्रत्ययः। दि
शोऽमद्राणामित्युत्तरपदवृद्धिः। ननु प्राचां ग्रामनगराणामित्यस्या वृद्धेरवकाशो दर्शनीयः। एवं तर्हि प्रकरणाश्रयेणोक्तमाद ग्रामः
दं तूदाहरणं पूर्वकार्ष्णमृत्तिक इति। तत्र वृद्धिविधानमिति। एकादेशस्योभयाश्रयणादन्तादिवद्भावाभावाद्वृद्धेरप्रसङ्गात्॥ २८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0: In Public Domain. Digitization by eGangotri

अव्याहत इति। वाक्यसंस्कारपक्षाश्रयाण्येतान्युदाहरणानि। धारय इति। धारयतीति धारयः। अनुपसर्गाल्लिम्पेति शः। कर्तरि शप्।

आचार्यप्रवृत्तिर्ज्ञापयति पूर्वोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति। यदयं नेन्द्रस्य परस्य प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्। इन्द्रे द्वावचौ तत्रैको यस्येति लोपेन ह्रियते ऽपर एकादेशेन। अनक्क इन्द्रः संपन्नः तत्र को वृद्धिप्रसङ्गः। पश्यति त्वाचार्यः पूर्वपदोत्तरपदयोः तावत्कार्यं भवति नैकादेश इति। ततो नेन्द्रस्य परस्येति प्रतिषेधं शास्ति। अथादिवत्त्वे कानि प्रयोजनानि। आदिवत्त्वे प्रयोजनं प्रगृह्यसंज्ञायाम्। आदिवत्त्वे प्रयोजनं प्रगृह्यसंज्ञायां भवति। अग्नी इति वायू इति। द्विवचनाद्विवचनयोरेकादेशो द्विवचनस्यादिवद्भवति। यथा शक्येत कर्तुम् ईदूदेद्द्विवचनं प्रगृह्यमिति। कृतर्हि स्यात्। यत्रैकादेशो न भवति। त्रपुणी इति जतुनी इति। सुप्तिङ्ग्वाविधिषु प्रयोजनम्। सुप्। वृक्षेति ष्ठति प्लक्षेति ष्ठति। सुबसु पोरेकादेशः सुप आदिवद्भवति। यथा शक्येत कर्तुम् सुबन्तं पदमिति। कृतर्हि स्यात्। यत्रैकादेशो न। वृक्षास्तिष्ठति प्लक्षास्तिष्ठति। सुप्। तिङ्। पचेयजेद् ति। तिङ्। तिङोरेकादेशस्तिङ आदिवद्भवति। यथा शक्येत कर्तुं तिङन्तं पदमिति। कृतर्हि स्यात्। यत्रैकादेशो न। पचन्ति यजन्ति। आप्। खट्वा। आबनापोरेकादेश आप आदिवद्भवति। यथा शक्येत कर्तुम् आबन्तात्सोर्लोपो भवतीति। कृतर्हि स्यात्। यत्रैकादेशो न। कुब्जा उष्णिहा देवविशा। आङ्ग्रहणे परविधौ प्रयोजनम्। अयाहते। कदाहते। आङ्नाङोरेकादेश आङ आदिवद्भवति। यथा शक्येत कर्तुमाङो यमहन इत्यात्मनेपदं भवतीति। कृतर्हि स्यात्। यत्रैकादेशो न। आहते। आटश्च वृद्धिविधौ प्रयोजनम्। आद्यैहिष्ट कदैहिष्ट। आटोऽद्यशब्दस्य चैकादेश आट आदिवद्भवति। यथा शक्येत कर्तुम् आटश्च वृद्धिर्भवतीति। कृतर्हि स्यात्। यत्रैकादेशो न। ऐक्षिष्ट। कृदन्तप्रातिपदिकत्वे च प्रयोजनम्। धारयः पारयः। कृदकृतोरेकादेशः कृद्ग्रहणेन गृह्यते। यथा शक्येत कर्तुम् कृदन्तं प्रातिपदिकमिति। कृतर्हि स्यात्। यत्रैकादेशो न। कार्यं हार्यम्। नाभ्यासादीनां ह्रस्वत्वे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपेयाजेति। उपइयाजइतिस्थिते आट्गुणस्तस्य परं प्रत्यादिवद्भावाद्ध्रस्वत्वप्रसङ्गः। प्रोह्यतइति। अणग्रहणानुवृत्तिसु भ
यत आश्रयणेनान्तादिवदिल्यनपेक्ष्येदमुक्तम्। अम्बात्रेति। अम्बार्थनद्यो र्ह्रस्वत्वे कृते एकादेशेचतस्यान्तवद्भावात्पुनर्ह्रस्वत्व
प्रसङ्गः। निकौशाम्बीदमिति। नपुंसकह्रस्वत्वात्परत्वादुपसर्जनह्रस्वः। जुहावेति। ह्वयतेर्लिटि तिपि णल्यभ्यस्तस्य चेति
संप्रसारणम्। संप्रसारणाच्चेति पूर्वैकादेशस्तस्याकारं प्रत्यादिवद्भावात् णल औत्वप्रसङ्गः। अस्याअश्वइति। इदमश्चतुर्थ्येक

अभ्यासादीनां ह्रस्वत्वे नान्तादिवद्भवतीति वक्तव्यम्। के पुनरभ्यासादयः। अभ्यासोहाम्बार्थनदीनपुंसको
पसर्जनह्रस्वत्वानि। अभ्यासह्रस्वत्वम्। उपेयाय उपोयाज। ऊहे र्ह्रस्वत्वम्। उपोह्यते प्रोह्यते। अम्बार्थनदी
नपुंसकोपसर्जनह्रस्वत्वानि। अम्बात्र। अक्कात्र। कुमारीदम्। किशोरीदम्। आराशस्त्रीदम्। धाना शष्कुली
दम्। निकौशाम्बीदं निर्वाराणसीदम्। अभ्यासोहां नदीनपुंसकोपसर्जनग्रहणे नग्रहणाद्ध्रस्वत्वं प्राप्नो
ति। नवा बहिरङ्गलक्षणत्वात्। नवा एतद्वक्तव्यम्। किं कारणम्। बहिरङ्गलक्षणत्वात्। अन्तरङ्गं ह्रस्वत्वं
बहिरङ्गा एते विधयः। असिद्धं बहिरङ्गमन्तरङ्गे। वर्णाश्रयविधौ च। वर्णाश्रयविधौ च नान्तादिवद्भवतीति
वक्तव्यम्। किं प्रयोजनम्। खट्वाभिर्जुहाव। अस्याअश्वइति। इह खट्वाभिः मालाभिः अतो भिस ऐस्भवतीत्यै
स्भावः प्राप्नोति। नैष दोषः। तपरकरणसामर्थ्यान्न भविष्यति। अस्त्यन्यत्तपरकरणे प्रयोजनम्। किम्।
कीलालपाभिः शुभंयाभिः। जुहाव। आत औ णलइत्यौत्वं प्राप्नोति। अस्याअश्वइति। एङः पदान्तादिति पूर्व
त्वं प्राप्नोति। नवा तादूप्यातिदेशात्। नवा वक्तव्यम्। किं कारणम्। अतादूप्यातिदेशात्। न हि तादूप्यमतिदि
श्यते। रूपाश्रया एते विधयः। अतादूप्यान्न भविष्यन्ति ॥

वचनम्। त्यदाद्यत्वं टाप्। सर्वनाम्नः स्याड्ढ्रस्वश्चेति स्याट् ह्रस्वश्चेति। वृद्धिरेकादेशः। हलि लोपइति इदूपस्य लोपः। ए
चोयवायाव इत्यैकारस्यायादेशः। लोपः शाकल्यस्येति यलोपः। नवेति। कार्यमात्रमनेनातिदिश्यते न तु रूपम्। वि
शिष्टवर्णरूपाश्रयाश्चैते विधयो नातिदिश्यन्ते तुक्यसिद्धवचनं चास्यार्थस्य लिङ्गं यदि हि वर्णाश्रयो विधिरनेनातिदिश्येत
तदाधीत्य प्रेत्येत्यादौ एकादेशस्य ह्रस्वत्वं प्रत्यादिवद्भावात्तुकः सिद्धत्वात्तुक्यसिद्धत्वं न ब्रूयात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षत्वतु॥ उत्सर्गेति। उत्सर्गः स्थानी सामान्येनोत्सृष्टत्वात्। नान्यस्येति। कार्यासिद्धत्वाश्रयेणेदमुच्यते। आदेशेन स्थानिनो निवर्तितत्वात् सत्यप्यादेशस्यासिद्धत्वे स्थानिनः प्रत्यापत्त्यभावात्। असिद्धत्वं चेति। षत्वेऽसिद्धत्वं स्थानिवद्भावे तु स्वाश्रयस्यानिवर्तनात् षत्वप्रसङ्गः। एकादशशास्त्रमिति। ततश्च पूर्वं तुक्शास्त्रं प्रवर्तते पश्चादेकादेशशास्त्रमित्युक्तं भवति। शकहूष्विति।

षत्वतुकोरसिद्धः॥ किमर्थमिदमुच्यते। षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च॥ षत्वतुकोरसिद्धत्वमुच्यते। आदेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च। आदेशलक्षणप्रतिषेधार्थं तावत्। कोऽसिचत्। सोऽसिचत्। एकादेशे कृते इण इति षत्वं प्राप्नोति। असिद्धत्वान्न भवति। उत्सर्गलक्षणभावार्थं च। अधीत्य प्रेत्य। एकादेशे कृते ह्रस्वस्येति तुग्न प्राप्नोति। असिद्धत्वाच्च भवति। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्रोत्सर्गलक्षणाप्रसिद्धिरुत्सर्गाभावात्। तत्रोत्सर्गलक्षणस्य कार्यस्याप्रसिद्धिः। अधीत्य प्रेत्य। किं कारणम्। उत्सर्गाभावात्। ह्रस्वस्येति उच्यते। न चात्र ह्रस्वं पश्यामः। ननु चात्राप्यसिद्धवचनात्सिद्धम्। असिद्धवचनात्सिद्धमिति चेन्नान्यस्यासिद्धवचनादन्यस्य भावः। असिद्धवचनात्सिद्धमिति चेन्न। किं कारणम्। नान्यस्यासिद्धवचनादन्यस्य भावः। न ह्यन्यस्यासिद्धवचनादन्यस्य प्रादुर्भावो भवति। न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति। तस्मात्स्थानिवद्वचनमसिद्धत्वं च। तस्मात्स्थानिवद्भावो वक्तव्यः। असिद्धत्वं च। अधीत्य प्रेत्येति स्थानिवद्भावः। कोऽसिचत्सोऽसिचदित्यत्रासिद्धत्वम्। स्थानिवद्वचनानर्थक्यं शास्त्रासिद्धत्वात्। स्थानिवद्वचनमनर्थकम्। किं कारणम्। शास्त्रासिद्धत्वात्। नानेन कार्यस्यासिद्धत्वं क्रियते। किं तर्हि शास्त्रासिद्धत्वमनेन क्रियते। एकादेशशास्त्रं तुक्शास्त्रेऽसिद्धं भवतीति। संप्रसारणङीट्सु सिद्धः। संप्रसारणङीट्सु सिद्ध एकादेश इति वक्तव्यम्। शकहूषु परिवीषु। संप्रसारण। ङि। वृक्षे छत्त्रं वृक्षेच्छत्त्रं प्लक्षे छत्त्रं प्लक्षेच्छत्त्रम्। इट्। अपचे छत्त्रम् अपचेच्छत्त्रम्। अयजे छत्त्रम् अयजेच्छत्त्रम्।

शकान् ह्वयतीति क्विप्। संप्रसारणम्। पूर्वैकादेशः। हल इति दीर्घत्वम्। तत्रैकादेशस्यासिद्धत्वादिण उत्तरस्य विधीयमानं षत्वं न स्यात्। वृक्षेच्छत्त्रमिति। एकादेशस्यासिद्धत्वान्नित्यो ह्रस्वाश्रयस्तुक् स्यात्। दीर्घात्पदान्ताद्वेति विकल्पेन त्विष्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ·कौ· ५० पदान्तपदाद्योरिति। ननु तुल्येवाचनिकत्वे को विशेषो येन संप्रसारणङीट्सुसिद्ध इति प्रत्याख्यायते पदान्तपदाद्योरिति तु क्रियते। उच्यते। लाघवात्पदस्येत्येव वक्तव्यम्। अन्तादिग्रहणं च पूर्वसूत्रादनुवर्तते। तेन पदान्तपदाद्योरेकादेशोऽसिद्धो भवतीत्यर्थो लभ्यते। ओषधीस्कधीति। ओष धिशब्दाद्द्वितीयाबहुवचनम्। ओषधेश्च विभक्तावप्रथमायामिति दीर्घः। ततः पूर्वसवर्णदीर्घो रुत्वविसर्जनीयौ। कः करत्करतीति विसर्जनीयस्य सकारो विधीयते। इणः ष इत्यधिकारादिण उत्तरस्य षकारः। तत्रैकादेशस्य पदान्तपदाद्योरिति वचनादसिद्धत्वाभावात् षत्वप्रसङ्गः। असिद्धत्वे त्वेकादेशस्य षत्वाप्रस ६१४

संप्रसारणङीट्सुसिद्धः पदान्तपदाद्योरेकादेशस्यासिद्धवचनात् संप्रसारणङीट्सुसिद्ध एकादेशः। किं कारणम्। पदान्तपदाद्योरेकादेशस्यासिद्धवचनात्। पदान्तपदाद्योरेकादेशोऽसिद्धो भवतीत्युच्यते। न चैष पदान्तपदाद्योरेकादेशः। यदि पदान्तपदाद्योरेकादेशोऽसिद्धः। सुसस्या ओषधीस्कधि। सुपिप्पला ओषधीस्कधि। अत्र षत्वं प्राप्नोति। तु विधिं प्रति पदान्तपदाद्योरेकादेशोऽसिद्धः। षत्वं प्रत्येकादेशमात्रमसिद्धम्। यदि षत्वं प्रत्येकादेशमात्रमसिद्धम्। शकहूष्वपरिवीष्वत्र षत्वं न प्राप्नोति। अस्तु तर्ह्यविशेषेण। कथं सुसस्या ओषधीस्कधि सुपिप्पला ओषधीस्कधि नैष दोषः। भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात् षत्वप्रतिषेधस्य। यदयं कस्कादिषु भ्रातुष्पुत्रग्रहणं करोति तज्ज्ञापयत्याचार्यो नैकादेशनिमित्तात् षत्वं भवतीति। यद्येतज्ज्ञाप्यते। शकहूष्वपरिवीषु अत्र षत्वं न प्राप्नोति। तुल्यजातीयस्य ज्ञापकम्। किं च तुल्यजातीयम्। यः कुवोः। यद्येवं वेञोऽप्रत्यये परत उरिति प्राप्नोति। उदिति चेष्यते। यथालक्षणमप्रयुक्ते ॥

ङ्गात्सकारः सिध्यति। भ्रातुष्पुत्रग्रहणमिति। ऋतो विद्यायोनिसंबन्धेभ्य इत्यलुक्। ऋत उदित्युकार एकादेशो रपरत्वं रात्सस्येति सलोपो रेफस्य विसर्जनीयः। तत्रैकादेशस्यासिद्धत्वादिदुदुपधस्य चाप्रत्ययस्येति षत्वे सिद्धे कस्कादिषु षत्वार्थं भ्रातुष्पुत्रग्रहणं ज्ञापयति नैकादेशात्परस्य विसर्जनीयस्य षत्वं भवतीति। वेञ इति। वकारस्य संप्रसारणं प्रथमैकवचनं ततः सावपि पदमिति पदसंज्ञायां सत्यामुकारः पदादिरकारः पदान्त इति तयोरेकादेशस्यासिद्धत्वाभावाद्धस्वान्तत्वाभावात्तुग्न प्राप्नोतीति भावः। यथालक्षणमिति। माभूत्तुगागम इत्यर्थः ॥ रामः ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। पूर्वपरयोरित्यनुवर्तते। अन्तादिग्रहणं च। तत्र यथासंख्यसंबन्धात्पूर्वस्य पदस्यान्तस्य परस्य पदस्यादेश्चैकादे
शोऽसिद्ध इत्यर्थः संपद्यते। आकारश्चात्र पदादिर्न भवति नाप्युकारः पदान्त इत्यसिद्धत्वाभावात्तु भवत्येवेत्यर्थः। किमर्थं षत्वतु
कोरेकादेशस्यासिद्धत्वमुच्यते यावता द्विपदाश्रयत्वाद्बहिरङ्गत्वादेवैकादेशस्यासिद्धत्वं सिद्धम्। एवं तर्हि ज्ञापनार्थम्। एत
ज्ज्ञापयत्यचोरानन्तर्ये बहिरङ्गस्यापि नासिद्धत्वं भवति। तेनास्यूरित्यत्रोठोः सिद्धत्वाभावाद्यणादेश उपपन्नो भवति॥ आ
द्गुणः॥ गुणग्रहणमिति। वक्ष्यमाणान्नियमाद्गुण एव भविष्यतीति प्रश्नः। स्थानेन्तरतमो हि स इति। पूर्वपरयोः कण्ठतालव्य

अथवा नैवं विज्ञायते। पूर्वस्य च पदादेः परस्य च पदान्तस्येति। कथं तर्हि। परस्य च पदादेः पूर्वस्य च पदान्तस्ये
ति॥ आद्गुणः॥ गुणग्रहणं किमर्थम्। न आदेङ्भवतीत्युच्येत। आदेङ्श्चेद्गुणः केन। आदेङ्श्चेद्गुणः केनेदा
नीं भविष्यति। खट्वेन्द्रो मालेन्द्रः। खट्वोदकं मालोदकम्। स्थानेन्तरतमो हि सः। स्थाने प्राप्यमाणानामन्तरत
म आदेशो भवति। ऐदौतावपि तर्हि प्राप्नुतः। ऐदौतौ नैचि तावुक्तौ। ऐदौतौ न भविष्यतः। किं कारणम्। एचि ऐ
दौतावुच्येते। इह तर्हि खट्वर्श्यः मालर्श्यः। ऋकारस्तर्हि प्राप्नोति। ऋकारो नोभयान्तरः। उभयोर्योन्तरतम
स्तेन भवितव्यम्। न च ऋकार उभयोरन्तरतमः। आकारस्तर्हि प्राप्नोति। आकारो नर्ति धातौ सः। आकारोत्र
न भविष्यति। किं कारणम्। ऋति धातावाकार उच्यते। तन्नियमार्थं भविष्यति। ऋकारादौ धातावेव ना
न्यत्रेति। प्लुतस्तर्हि प्राप्नोति। प्लुतश्च विषये स्मृतः॥ विषये प्लुत इत्युच्यते। यदा च स विषयो भवितव्यमेव तदा
प्लुतेन। आन्तर्यात् त्रिचतुर्मात्राः। इदं तर्हि प्रयोजनम्। आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतु
र्मात्रा आदेशा माभूवन्निति। खट्वा इन्द्रः खट्वेन्द्रः। खट्वा उदकं खट्वोदकम्। खट्वा ईषा खट्वेषा।

योरन्तरतमः कण्ठतालव्य एकारः कण्ठोष्ठयोस्तु कण्ठोष्ठ्य ओकारः। ऐदौतावपीति। ऐकारस्यापि कण्ठतालव्यत्वादौकारस्य कण्ठो
ष्ठ्यत्वाच्चेति भावः। ऐदौतौ नैचीति। ऐदौतोरनेन सिद्धयोर्वृद्धिरेचीति नियमार्थं भविष्यति। एच्येव वृद्धिर्भवतीति। उभयतो नियमश्च
व्याख्यास्यते। वृद्धिरेचीति। नोभयान्तर इति। अकारस्तु शिष्यमाणः स्वरपरो भवतीति स्थानत उभयान्तरः। प्लुतश्चेति। प्लुतविधाने
सति यस्मिन्विषये प्लुतो विहितस्तस्मिन्नप्यनेनैव भाव्यम्। अस्मिन्कर्तव्ये आष्टमिकस्य प्लुतस्यासिद्धत्वादिति पक्षेऽनुवादप्रसङ्गात्
प्लुतो न भविष्यतीत्यर्थः। त्रिचतुर्मात्रा इति। प्लुताप्लुतप्रसङ्गे प्लुतश्च विषये स्मृत इति न्यायो न तु प्लुतप्रसङ्ग इति त्रिमात्रप्रसङ्ग उच्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तपरत्वान्नते स्मृताइति। सतिहि गुणग्रहणे गुणसंज्ञाया विधीत परकरणात्त्रिमात्रचतुर्मात्राणां गुणसंज्ञाया अभावात्प्र
सङ्ग इत्यर्थः। खसृद्वन्द्व इति। ऋलृद्वन्द्व इति स्थिते आद्गुण इत्यकारेकारयोर्गुणः प्राप्नोति इकारयोः सवर्णदीर्घत्वं च। तत्र शब्द
परविप्रतिषेधाद्दीर्घप्रसङ्गे गुण उच्यते। नवेति। एकपदाश्रयत्वाद्गुणोऽन्तरङ्गः॥ एत्ये॥ एत्येधत्यूठ्सु। एङि पररूपमिति प्र

खट्वा ऊढा खट्वोढा। खट्वा ऐलका खट्वैलका। खट्वा ओदनः खट्वौदनः। खट्वा ऐतिकायनः खट्वैतिकायनः। खट्वा
औपगवः खट्वौपगवः। अथ क्रियमाणेपि गुणग्रहणे कस्मादेवात्र त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतु
र्मात्रा आदेशा न भवन्ति। तपरत्वान्न ते स्मृताः। तपरे गुणवृद्धी। ननु च तः परो यस्मात्सोयं तपरः। नेत्याह। तादपि
परस्तपरः। यदि तादपि परस्तपरः ऋदोरप् इहैव स्यात्। यवः स्तवः। लवः पव इत्यत्र न स्यात्। नैष तकारः। क
स्तर्हि दकारः। किं दकारे प्रयोजनम्। अथ किं तकारे। असंदेहार्थस्तकारः। यद्यसंदेहार्थस्तकारः दकारोपि। य
दि मुखसुखार्थस्तकारस्तदा दकारोपि। गुणे ङिशीटामुपसंख्यानं कर्तव्यम्। ङिः ऋस्इन्द्रः प्रसइन्द्रः। शी। अद्
न्दूंत इन्द्रम् आइदू। अपचद्इन्द्रम् अयजइन्द्रम्। किं प्रयोजनम्। दीर्घत्वबाधनार्थम्। सवर्णदीर्घत्वं माभूदिति। नवा
बहिरङ्गलक्षणत्वात्। नवा कर्तव्यम्। किं कारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गलक्षणं सवर्णदीर्घत्वमन्तर
ङ्गो गुणः। असिद्धं बहिरङ्गमन्तरङ्गे॥ आदेकश्चेद्गुणः केन स्थानेन्तरतमो हि सः। ऐदौतौ नैचितावुक्तावकारो
नोभयान्तरः॥ आकारो न तिथा तौ सः प्लुतश्चविपर्ययेस्मृतः। आन्तर्यात् त्रिचतुर्मात्रास्तपरत्वान्न ते स्मृताः॥ एत्ये
धत्यूठ्सु॥ किमिदमेत्येधत्योः रूपग्रहणम् आहोस्विद्धातुग्रहणम्। किं चातः। यदि रूपग्रहणं सिद्धमुपैति प्रैति। उ
पैषि उपैमि प्रैमि इति न सिद्ध्यति। अथ धातुग्रहणं सिद्धमेतद्भवति। किं तर्हीति। इणीकारादौ प्रतिषेधः॥ इणीकारादौ
वृद्धेः प्रतिषेधो वक्तव्यः। उपेतः प्रेत इति। योगविभागात्सिद्धम्। योगविभागः करिष्यते। वृद्धिरेचि। ततः एत्येध
त्योः। एत्येधत्योरचि वृद्धिर्भवति। ततः ऊठि। ऊठि च वृद्धिर्भवतीति ॥

त्रेऊठ्याद्गुणे च वृद्धिविधानम्। किमिदमिति। एतिरेवात्र विचार्यते। एधेस्त्वात्मनेपदित्वाद्रूपग्रहणाभावः। साहचर्यात्तुद्वयोर्निर्देशः।
एधेतीति तिङन्तानुकरणं ततो रूपग्रहणम्। अथ एकृश्तिपाविति श्तिपा निर्देशः। ततो धातुग्रहणमिति संशयासङ्गः। योगविभागादि
ति। एकस्मिन्योगे एचीत्यस्योठा संबन्धाभावाय विभागस्य कर्तुमशक्यत्वाद्योगविभागसंश्रयः ॥

CC-0. In Public Domain. Digitization by eGangotri

सा यथैवेति। बाध्यमात्रापेक्षायां सर्वस्य बाध्याप्रसङ्ग इति भावः। येन नाप्राप्त इति। कार्यविशेषचिन्तायां सर्वविषयव्यापि
बाधस्यान्याय्यत्वात्। अथवेति। अनन्तरे बाध्ये विज्ञाते तद्बाधया वचनस्य चरितार्थत्वादुत्तरेण सह स्पर्द्धायां परत्वादुत्तरं भव
तीत्यर्थः। अक्षादिति। अक्षानूहते ऽवश्यमित्यावश्यके णिनिः। साधनं कृतेति समासः। प्रादिति। प्रेष्यशब्दस्त्रीष्यशब्दे भवति। प्रो
ढशब्द आ ऊढा ओढा प्र ओढा इति स्थिते ओमाङोश्चेति पररूपं भवति। स्वैरीति। स्वेनात्मने ईरितुं शीलमस्य वश्यमिति णिनिः। इनिने

एवमपि आद्गुण एतः। प्रेत इत्यत्रापि प्राप्नोति। आङि पररूपमत्र बाधकं भविष्यति। न भविष्यति। नाप्राप्ते पररू
पे इयं वृद्धिरारभ्यते। सा यथा एङि पररूपं बाधते एवमाङि पररूपं बाधेत। न बाधते। किं कारणम्। येन नाप्राप्ते
तस्य बाधनं भवति। न चाप्राप्ते एङि पररूपे इयं वृद्धिरारभ्यते। आङि पररूपे पुनः प्राप्ते चाप्राप्ते च। अथवा पुरस्ता
दपवादा अनन्तरान्विधीन्बाधन्त इतीयं वृद्धिरेङि पररूपं बाधिष्यते नाङि पररूपम्॥ अक्षादूहिन्याम्॥ अ
क्षादूहिन्यां वृद्धिर्वक्तव्या। अक्षौहिणी॥ प्रादूहोढोढ्येषैष्येषु॥ प्रात् ऊह ऊढ ऊढि एष एष्य इत्येतेषु वृद्धिर्वक्त
व्या। प्रौहः प्रौढः प्रौढिः। प्रैषः प्रैष्यः॥ स्वादीरेरिणोः॥ स्वात् ईर ईरिन् इत्येतयोर्वृद्धिर्वक्तव्या। स्वैरं स्वैरी। ईरिन्ग्र
हणं शक्यमकर्तुम्। कथं स्वैरीति। इनिनैतन्मत्वर्थीयेन सिद्धम्। स्वैरो ऽस्यास्तीति स्वैरी॥ ऋते च तृतीयासमासे॥
ऋते च तृतीयासमासे वृद्धिर्वक्तव्या। सुखार्तो दुःखार्तः। ऋत इति किम्। सुखेतो दुःखेतः। तृतीयाग्रहणं किम्। प
रमर्तः। समास इति किम्। सुखेनर्तः॥ प्रवत्सतरकम्बलवसनानां चर्णे॥ प्रवत्सतरकम्बलवसनानां चर्णे वृद्धिर्व
क्तव्या। प्रार्णम्। वत्सतरार्णम्। कम्बलार्णम्। वसनार्णम्। ऋणदशाभ्यां च॥ ऋणदशाभ्यां च वृद्धिर्वक्तव्या। ऋणार्णं
दशार्णम्॥ आटश्च॥ किमर्थश्चकारः। वृद्धेरनुकर्षणार्थः। नैतदस्ति प्रयोजनम्। प्रकृता वृद्धिरनुवर्तिष्यते। इदं तर्हि
आटो ऽचि वृद्धिरेव यथा स्याद्यदन्यत्प्राप्नोति तन्माभूदिति। किं चान्यत्प्राप्नोति। पररूपम्। उस्योमाङ्क्ष्वाटः पररूपप्रति
षेधं चोदयिष्यति स न वक्तव्यो भवति। उपसर्गादृति धातौ॥ धाताविति किमर्थम्। इह माभूत्। प्रर्षभं वनम्। उपसर्गाद्वृद्धिवि
धौ धातुग्रहणे उक्तम्। किमुक्तम्। गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्ताः प्रादयस्तं प्रतीति वचनमिति ॥

ति। णिनिस्त्वनभिधानान्न भविष्यति स्वैरीति प्रयोगाभावादिति भावः। दशार्णशब्दो नदीविशेषस्य देशविशेषस्य च संज्ञा॥ उपसर्गा॥ प्र
र्षभमिति। प्रगता ऋषभा अस्मादिति बहुव्रीहिः। उणादीनामव्युत्पत्तिपक्षे धातुर्ऋषभशब्दे नास्ति। उपसर्गादिति। उपसर्गेणैव धातोरा
क्षेपाद्धातुग्रहणं न कर्तव्यम्। यत्रोपसर्गत्वं न संभवति तत्रोपसर्गग्रहणेन प्रादयो लक्ष्यन्ते। यथा नासिकायानसुभावविधौ नसुं संभवत्युपसर्गत्वे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रर्छकइति। प्रगताऋच्छका अस्मादितिबहुव्रीहिः। यदन्यदिति। सतिधातुग्रहणे योगविभागेनपुनर्विधीयतेइति शाकलं बाध्यते। अग्नेऋत्रमिति। अग्निरृत्रमितिस्थितेएङ्ह्रस्वात्संबुद्धेरितिसुलोपेकृतेयदिपूर्वंतुक्स्यात्तदाह्रस्वान्तत्वाभावाद्गुणोनस्यात्पूर्वंतुगुणेह्रस्वाभावात्तुग्नस्यादितिविप्रतिषेधोपन्यासः। बहिरङ्गलक्षणस्तुगिति। द्विपदाश्रयत्वात्। आचार्यदेशीयः पण्डितं

क्रियमाणेपिधातुग्रहणेप्रर्छकइतिप्राप्नोति। यत्क्रियायुक्ताः प्रादयस्तंप्रतीतिवचनान्नभवति। इदंतर्हिप्रयोजनम्। उपसर्गादृतिधातोरितिवृद्धिरेवयथास्याद्यदन्यत्प्राप्नोतितन्माभूदिति। किंचान्यत्प्राप्नोति। ह्रस्वत्वं मृत्यकइति। ऋतिह्रस्वादुपसर्गाद्वृद्धिः पूर्वविप्रतिषेधेनेतिचोदयिष्यतिसनवक्तव्योभवति। छेतुकः संबुद्धिगुणः। छेतुग्भवतीत्यस्मात्संबुद्धिगुणोभवतिविप्रतिषेधेन। छेतुग्भवतीत्यस्यावकाशः। इच्छतियच्छति। संबुद्धिगुणस्यावकाशः। अग्नेवायो। इहोभयंप्राप्नोति। अग्नेच्छत्रंअग्नेछत्रं। वायोच्छत्रंवायोछत्रम्। संबुद्धिगुणोभवति विप्रतिषेधेन। सतर्हिविप्रतिषेधोवक्तव्यः। नवाबहिरङ्गलक्षणत्वात्। नवावक्तव्यः। किंकारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गलक्षणस्तुक्। अन्तरङ्गलक्षणः संबुद्धिगुणः। असिद्धंबहिरङ्गमन्तरङ्गे। अन्तरेणापिविप्रतिषेधमन्तरेणापिचैतांपरिभाषांसिद्धम्। कथम्। इदमिहसंप्रधार्यंसंबुद्धिलोपः क्रियतांगुणइति। किमत्रकर्तव्यम्। परत्वाद्गुणः। नित्यःसंबुद्धिलोपः। कृतेपिगुणेप्राप्नोत्यकृतेपि। गुणोपिनित्यः। कृतेपिसंबुद्धिलोपेप्राप्नोत्यकृतेपि। अनित्योगुणः। नहिकृतेसंबुद्धिलोपेप्राप्नोति। तावत्येवच्छेनानन्तर्यंतत्रतुकाभवितव्यम्। तस्मात्सुष्ठूच्यतेछेतुकः संबुद्धिगुणः नवाबहिरङ्गलक्षणत्वादिति। संप्रसारणदीर्घत्वण्यल्लोपाभ्यासगुणादयश्चतुकोभवन्तिविप्रतिषेधेन। संप्रसारणदीर्घत्वस्यावकाशः। हूतः। जीनः। संवीतः। भूनः। तुकोवकाशः। अग्निचित्। सोमसुत्। इहोभयंप्राप्नोति। परिवीषुशकहूषु। णिलोपस्यावकाशः। कारणाहारणा। तुकः सएव। इहोभयंप्राप्नोति। प्रकार्यगतः। प्रहार्यगतः। अल्लोपस्यावकाशः। प्रचिकीर्षिताप्रजिहीर्षिता। तुकः सएव ॥

मन्यत्वादाह। अन्तरेणापीति। आचार्यआह। अनित्योगुणइति। तस्मादिति। पूर्वोक्तार्थंनिगमयति। शकहूषिति। ह्वयतेःक्विपिसंप्रसारणेपूर्वैकादेशेचकृतेह्रस्वस्यपीतिकृतीतितुक्प्राप्नोतिहलइतिदीर्घत्वंच। प्रकार्येति। तुकिसतितेनव्यवधानाण्णिलोपाप्रसङ्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपचच्छतुरिति। छो छेदने आत्वम्। अतुस्। आतो लोप इटि चेत्याल्लोपः। तस्य स्थानिवत्त्वाद्द्विर्वचनम्। छा छा इति स्थिते यदि दी
र्घादिति पूर्वं तु क्स्यात् तदाजन्तत्वाभावाद् ह्रस्वो न स्यात्। अपचच्छदतुरिति। उछृदिर् दीप्तिदेवनयोः इत्यस्य द्विर्वचने कृते यदि
पूर्वं तुक् स्यात् तत ऋकारान्तत्वाभावादुरदित्युत्वं न स्यात्। चिच्छर्दयिषतीति। छर्द वमने चुरादिः। ऋस्रोत्रेति। ऋ स्रस् अत्रेति
स्थिते ससजुषोरुः। अतो रोरित्युत्वम्। तत उकारस्याकारस्य च यो यण् प्राप्नोति पूर्वेण सह गुणश्च। ततुरिरिति। आद्गमेति कि

इहोभयं प्राप्नोति। प्रचिकीर्ष्यगतः। प्रजिहीर्ष्यगतः। अभ्यासगुणादयश्च तुकोऽभवन्ति विप्रतिषेधेन। केपुनर
भ्यासगुणादयः। ह्रस्वत्वालेत्वगुणाः। ह्रस्वस्यावकाशः। ययतुः ययुः। तस्थतुः तस्थुः। तुकः स एव। इहोभयं प्राप्नो
ति। अपचच्छतुः अपचच्छुः। अत्वस्यावकाशः। चक्रतुः चक्रुः। तुकः स एव। इहोभयं प्राप्नोति। अपचच्छदतुः अपच
च्छदुः। इत्वस्यावकाशः। यियक्षति पिपक्षति। तुकः स एव। इहोभयं प्राप्नोति। चिच्छादयिषति चिच्छर्दयिषति। गुण
स्यावकाशः। लोलूयते बेभिद्यते। तुकः स एव। इहोभयं प्राप्नोति। चेच्छिद्यते चोच्छुप्यते। यणादेशादाद्गुणः। यणादेशाद
द्गुणो भवति विप्रतिषेधेन। यणादेशस्यावकाशः। दध्यत्र मध्वत्र। आद्गुणस्यावकाशः। खट्वेन्द्रः खट्वोदकम्। इहोभयं प्राप्नोति। इ
स्रोत्र प्रस्रोत्र। इह गुणवृद्धिविधयश्च यणादेशाद्भवन्ति विप्रतिषेधेन। इहरोरवकाशः। आस्तीर्णं निपूर्ताः पिण्डाः।
यणादेशस्यावकाशः। चक्रतुः चक्रुः। इहोभयं प्राप्नोति। इहेह्यध्वाजगुरिः। मित्रावरुणौ ततुरिः। किरति। गिरति। गु
णवृद्ध्योरवकाशः। चेता गौः। यणादेशस्य स एव। इहोभयं प्राप्नोति। चयनं चायकः। लवनं लावकः। अल्लोपधातुप्राति
पदिकप्रत्ययसमासान्तोदात्तोदात्तनिवृत्तिस्वरा एकादेशाच्च यणादेशाच्च भवन्ति विप्रतिषेधेन। अल्लोपस्यावका
शः। गार्ग्यः वात्स्यः। एकादेशयणादेशयोरवकाशः। दधीन्द्रः मधूदकं दध्यत्र मध्वत्र। इहोभयं प्राप्नोति। दाक्षीदाक्षा
यणः। प्लाक्षीप्लाक्षायणः। अचि अल्लोप एकादेशाद्भवति विप्रतिषेधेन। अचि अल्लोपस्यावकाशः। दाक्षीदाक्षायणः।
प्लाक्षीप्लाक्षायणः। एकादेशस्यावकाशः। दण्डाग्रं क्षुपाग्रम्। इहोभयं प्राप्नोति ॥

किनोरन्यतरः। लिङ्द्वाद्वाद्द्विर्वचनं बहुलं छन्दसीत्युत्वम्। रपरत्वं च। दाक्षीति। दक्षस्यापत्यं स्त्री अत इञ्। इतो मनुष्यजाते
रिति ङीष्। सवर्णदीर्घत्वं बाधित्वा यस्येति लोपो भवति। दाक्षायण इति। दाक्षेरपत्यं युवा। यञिञोश्चेति फक्। फस्यायनादेशः।
तत इकारस्य यण् च प्राप्नोति लोपश्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गाङ्गे यद्दति। शुभ्रादिभ्यश्चेति ढक्। ढस्य एयादेशः। वृद्धिरेचीति वृद्धिर्लोपेन बाध्यते। गाङ्ग इति। शिवाद्यणा सवर्णदीर्घत्वं लोपेन बाध्यते। श्यर्थमिति। अर्थ इति पूर्वपदप्रकृतिस्वरेण धातुस्वरे सति यणादेशे उदात्तस्वरितयोर्यण इति स्वरितत्वं भवति। श्रीषेति। इषेरिगुपधलक्षणः कः। श्रीरीषा यस्येति बहुव्रीहिः। बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरेण धातुस्वरः। तत एकादेशः स्वरितो वानुदात्ते पदादाविति स्वरित उदात्तो वा। अथवाग्निमिच्छतीति क्विप्। कृदुत्तरपदप्रकृतिस्वरेण धात्वन्तोदात्तत्वे सत्यन्तोदात्तादुत्तरपदादिति विभक्तेरुदात्तत्वं वा भवति। अग्न्युदकमिति। अग्निसहितमुदकमग्न्युदकम्। समानाधिकरणाधिकारे तृतीयापूर्वपद उत्तरपदलोपश्चेति समासः। उदके केवल इति पूर्वपदान्तोदात्तत्वम्। एवं तु व्याख्यायमाने प्रातिपदिकस्वरो न प्रदर्शितो भवति। तस्मादग्निरुदकमस्मिन्नस्ति ...

गाङ्गे यो गाङ्गः। धातुस्वरस्यावकाशः। पचति पठति। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। श्यर्थम्। श्रीईषा श्रीषा। प्रातिपदिकस्वरस्यावकाशः। आम्रः शालः। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। अग्न्युदकम्। वृक्षार्थम्। प्रत्ययस्वरस्यावकाशः। चिकीर्षुः। औपगवः। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। चिकीर्ष्वर्थम्। औपगवार्थम्। समासान्तोदात्तस्यावकाशः। राजपुरुषः। ब्राह्मणकम्बलः। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। राजवैद्यर्थम्। राजवैदीहते। उदात्तनिवृत्तिस्वरस्यावकाशः। नदीकुमारी। एकादेशयणादेशयोः स एव। इहोभयं प्राप्नोति। कुमार्यर्थम्। कुमारीहते। अल्लोपाल्लोपौ चार्द्धधातुके एकादेशाद्बलवतो विप्रतिषेधेन। अल्लोपस्यावकाशः। चिकीर्षिता। जिहीर्षिता। एकादेशस्यावकाशः। पचन्ति। पठन्ति। इहोभयं प्राप्नोति। चिकीर्षको जिहीर्षकः। आल्लोपस्यावकाशः। पपिः सोमं ददिर्गाः। एकादेशस्यावकाशः। यान्ति। वान्ति। इहोभयं प्राप्नोति। ययतुः ययुः।

तृतीयापूर्वपद उत्तरपदलोपश्चेति समासः। उदके केवल इति पूर्वपदान्तोदात्तत्वम्। एवं तु व्याख्यायमाने प्रातिपदिकस्वरो न प्रदर्शितो भवति। तस्मादग्निरुदकमस्मिन्नाहृत ह कलाद्यस्मिन्निति बहुव्रीहिः कर्तव्यः। ततो बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरेण प्रातिपदिक——स्वरे सति यणादेशे चोदात्तस्वरितयोरिति स्वरितत्वं भवति। पूर्वं यणि सति न सिद्ध्येत्। वृक्षार्थमिति। अर्थ इति पूर्वपदप्रकृतिस्वरे सति एकादेशे स्वरितो वानुदात्ते पदा दाविति सिद्ध्यति। पूर्वत्वेकादेशे न सिद्ध्येत्। चिकीर्ष्वर्थमिति। उदात्तस्वरितयोर्यण इति अकारस्य स्वरितत्वम्। औपगवार्थमिति। स्वरितो वानुदात्ते पदादाविति वा स्वरितत्वम्। राजवैदीहत इति। राज्ञो वैदीति षष्ठीसमासः। ईहत इत्यस्य तिङ्ङतिङ इति निघातः ॥

CC-0. In Public Domain. Digitization by eGangotri

चिक्षियिवेति।क्षि क्षिये लिट्।क्रादिनियमादिट्।सवर्णदीर्घत्वे प्राप्ते इयङ्।येननाप्राप्तिन्यायेन यणोपवादाविवयङुवङौ सवर्णदीर्घस्य तु परत्वाद्बाधकौ।साधु चिनोतीति।साधुचायी।साधुकारिणि चेति णिनिः।सुचिनोतीति तच्छीलः सुचायी।सुप्यजाताविति णिनिः।सुपीति वर्तमाने सुब्ग्रहणं सुब्मात्रे यथा स्यादिति भाष्ये ह्युक्तम्।अनग्नो नग्नो भवतीति नग्नंभावुकः।आढ्यसुभगेत्यत्र वर्तमाने कर्तरि भुवः खिष्णुच्खुकञाविति खुकञ्प्रत्ययः।तत्र सवर्णदीर्घत्वे प्राप्ते वृद्धिः।वृक्षाणामिति।नुडागममात्रमनपेक्षितलक्षणभेदमाश्रित्य विप्रतिषेधोपन्यासः।नहि ह्रस्वलक्षणस्य नुटः पञ्चानामित्यादिरवकाशः।क्वचिदग्नी

इयङुवङ्गुणवृद्धिदित्किन्नित्पूर्वपदविकाराश्च एकादेशयणादेशाभ्यां भवन्ति विप्रतिषेधेन।इयङुवङोरवकाशः।श्रियौ श्रियः।भ्रुवौ भ्रुवः।एकादेशयणादेशयोः स एव।इहोभयं प्राप्नोति।चिक्षियिव।चिक्षियिम।लुलुवुः पुपुवुः।गुणवृद्ध्योरवकाशः।चेता।गौः।एकादेशयणादेशयोः स एव।इहोभयं प्राप्नोति।साधुचायी।सुचायी।नग्नंभावुकोऽध्वर्युः।शयिता शयितुम्।टितोऽवकाशः।षण्णां सप्तानां पञ्चानाम्।एकादेशयणादेशयोः स एव।इहोभयं प्राप्नोति।वृक्षाणाम्।कितोऽवकाशः।साधुदायी।सुष्ठुदायी।एकादेशयणादेशयोः स एव।इहोभयं प्राप्नोति।दायको धायकः।मितोऽवकाशः।त्रपुणी।जतुनी।एकादेशयणादेशयोः स एव।इहोभयं प्राप्नोति।अस्थीनि।दधीनि।अतिसखीनि ब्राह्मणकुलानि।पूर्वपदविकाराणामवकाशः।होतापोतारौ।एकादेशयणादेशयोः स एव।इहोभयं प्राप्नोति।नेष्टोद्गातारौ।आग्नेन्द्रम्।उत्तरपदविकाराश्चेति वक्तव्यम्।उत्तरपदविकाराणामवकाशः।समीपं दुरीपम्।एकादेशयणादेशयोः स एव।इहोभयं प्राप्नोति।नीपं वीपं प्रेपं परेपम् ॥

नासिति पाठः।तत्रायं भावः।अधिकविषयव्यापिनो यण एवापवादो न तु दीर्घस्य तु परत्वाद्बाधकः।दायक इति।येननाप्राप्तिन्यायेन युगागम आद्गुणं बाधते परत्वेन तु सवर्णदीर्घत्वमिति मत्वा विप्रतिषेधोपन्यासः।अस्थीनीति।येननाप्राप्तिन्यायेन नुमागमो यणादेशं बाधते परत्वेन तु सवर्णदीर्घत्वम्।अतिसखीनीति बहुव्रीहिः।वीपमिति।अत्र यण प्राप्तः।प्रेपमिति।सवर्णदीर्घत्वं चेत्त्वेन बाध्यते।ईत्वमनवर्णान्तादिति वक्तव्यमित्येकीयमतत्वान्नाश्रीयते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

औतो॥ ओतस्तिङीति। साहचर्यस्याव्यवस्थाहेतुत्वमनाश्रित्योच्यते। सुप एव हि षसोत्र संभवो चीत्यधिकारात्तद्धितस्याग्रह
णात्। अचिनवमिति। लङ्। सिप्। अस्मावः। विकरणस्य गुणे कृते आत्वप्रसङ्गः। न्यासान्तराश्रयणेऽव्याप्तिरितिदर्शयन्नाह। गोग्रह

औतोम्शसोः॥ ओतस्तिङि प्रतिषेधः। ओतस्तिङि प्रतिषेधो वक्तव्यः। अचिनवम्। असुनवम्। स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। गोग्रहणं करिष्यते। आ गोतइति वक्तव्यम्। गोग्रहणे द्योरुपसंख्यानम्। गोग्रहणे द्योरुपसंख्यानं कर्तव्यम्। द्यां गच्छ। समासाच्च प्रतिषेधः॥ समासाच्च प्रतिषेधो वक्तव्यः। चित्रगुं पश्य। शबलगुं पश्य। ननु च औतइत्युच्यमानेपि समासात्प्रतिषेधो वक्तव्यः। न वक्तव्यः। ह्रस्वे कृते न भविष्यति। इदमिह संप्रधार्यम्। आत्वं क्रियतां ह्रस्वत्वमिति। किमत्र कर्तव्यम्। परत्वादात्वम्। न वा बहिरङ्गलक्षणत्वात्। न वा वक्तव्यः। किं कारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गलक्षणमात्वम्। अन्तरङ्गं ह्रस्वत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे। ननु च आ गोतइत्युच्यमानेपि समासात्प्रतिषेधो न वक्तव्यः। कथम्। ह्रस्वे कृते न भविष्यति। स्थानिवद्भावात्प्राप्नोति। ननु चौतइत्युच्यमानेपि स्थानिवद्भावात्प्राप्नोति। नेत्याह। अनल्विधौ स्थानिवद्भावः। आ गोतइत्युच्यमानेपि न दोषः। प्रतिषिध्यते त्र स्थानिवद्भावः। गोः पूर्वणित्वात्वस्वरेषु स्थानिवन्न भवतीति। स एव तर्हि दोषो गोग्रहणे द्योरुपसंख्यानमिति। सूत्रं च भिद्यते। यथा न्यासमेवास्तु। ननु चोक्तमोतस्तिङि प्रतिषेधइति। सुबधिकारात्सिद्धम्। सुपीति प्रकृतं वर्तते। क्व प्रकृतम्। वा सुप्यापिशलेरिति। यद्यनुवर्तते इहापि विभाषा प्राप्नोति। सुब्ग्रहणमनुवर्तते वाग्रहणं निवृत्तम्। कथं पुनरेकयोगनिर्दिष्टयोरेकदेशोनुवर्तते एकदेशो न। एकयोगे चैकदेशानुवृत्तिरन्यत्रापि नावश्यमिहैव। एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिर्भवति। अन्यत्रापि नावश्यमिहैव। क्वान्यत्र। अलुगधिकारः प्रागानङः। उत्तरपदाधिकारः प्रागङ्गाधिकारात्। एवमप्यस्युपसंख्यानं वृद्धिर्बलीयस्त्वात्। अम्युपसंख्यानं कर्तव्यम्। गां पश्य। किं पुनः कारणं न सिध्यति। वृद्धिर्बलीयस्त्वात्। परत्वाद्वृद्धिः प्राप्नोति। न वानवकाशत्वात्। न वा वक्तव्यम्। किं कारणम्। अनवकाशत्वात्। अनवकाशमात्वम्। वृद्धिं बाधिष्यते। सावकाशमात्वम्। कोवकाशः। द्यां गच्छ ॥

णइति। अतिव्याप्तिरप्यत्रेति दर्शयति। समासाच्चेति। एकयोगे चेति। यस्य स्वरितत्वं प्रतिज्ञायते तदेवानुवर्तते नान्यदिति भावः। द्योश्चेति। ओतोणिदिति सूत्रं पठितव्यं गोतइत्योकारान्तोपलक्षणार्थत्वाद्व्याख्येयम्। वर्णनिर्देशे हि तपरत्वं प्रसिद्धम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एङि॥ तुन्वोरिति। सप्तमीनिर्देशात्तदादिविधिः। तु आवत् त्वावत्। नुवानीति। वातेर्लोडुत्तमैकवचने वानीतिरूपम्। एक एवेति।
अर्थभेदाभावादेको निपातः। एवे चानियोग इति। नियोगोऽवश्यंभावोऽवधारणं तस्मादन्यत्रार्थे पररूपं भवति। यथाक्वेव भोक्ष्य
ते। अत्रानवक्लृप्तावेव शब्दः। यदात्ववधारणे वर्तते तदा वृद्धिः। शकन्ध्विति। अन्धुरुदपानम्। कुलटेति। अटतीत्यटा पचाद्य

वोश्च सर्वनामस्थाने वृद्धिविधिः॥ घोश्च सर्वनामस्थाने वृद्धिर्विधेया। किं प्रयोजनम्। यद्यावदन्द्वेति दर्शनात्। य
ते द्यावद्न्द्वँ शतं शतं भूमी रुतस्कः। यावता चेदानीं घोरपि सर्वनामस्थाने वृद्धिरुच्यते। अनवकाशमात्वं वृद्धिं बाधि
ष्यते॥ एङि पररूपम्॥ पररूपप्रकरणे तुन्वोर्विनिपातउपसंख्यानम्॥ पररूपप्रकरणे तुनु इत्येतयोर्वकारादौ
निपातउपसंख्यानं कर्तव्यम्। तु वैतै। नु वैन्वै। वकारादौ किमर्थम्। त्वावत् न्वावत्। निपातइति किमर्थम्। तुवा
नि। नुवानि नवानिपातैकत्वात्। नवा कर्तव्यम्। किं कारणम्। निपातैकत्वात्। एक एवायं निपातः। तैन्वै॥ एवे चा
नियोगे॥ पररूपं वक्तव्यम्। इह एव। इहेव। अद्येव। अनियोग इति किमर्थम्। इहैव भव मा स्म गाः। अत्रैव त्वमिह
वयं सुशेवाः। शकन्ध्वादिषु च॥ शकन्ध्वादिषु पररूपं वक्तव्यम्। शक अन्धुः। शकन्धुः। कुल
अटा। कुलटा। सीम अन्तः। सीमन्तः। केशेष्विति वक्तव्यम्। यो हि सीम्नोऽन्तः सीमान्तः स भवति॥ ओत्वोष्ठयोः स
मासे वा॥ पररूपं वक्तव्यम्। स्थूलोतुः स्थूलौतुः। बिम्बोष्ठी। बिम्बौष्ठी॥ एमन्नादिषु छन्दसि॥ पररूपं वक्त
व्यम्। अपां त्वेमन्सादयाम्यपां त्वोद्मन्सादयामि॥ ओमाङोश्च॥ किमर्थश्चकारः। एङीत्यनुकृष्यते। किं प्रयो
जनम्। इह माभूत्। आ अश्यात्। अश्यात्। अद्य अश्यात्। अद्याश्यात्। कदा अश्यात्। कदाश्यात्। नैतदस्ति प्र
योजनम्। अद्याश्यादित्येव भवितव्यम्। एवं हि सौनागाः पठन्ति। चोऽनर्थको नधिकारादेङः॥ उस्योमाङ्क्ष्वा
टः प्रतिषेधः॥ उसि पररूपे ओमाङोश्चाटः प्रतिषेधो वक्तव्यः। औस्रीयत्। औढीयत्। औङ्कारीयत्। स तर्हि
प्रतिषेधो वक्तव्यः। न वक्तव्यः। उक्तमाटश्चेत्यत्र चकारस्य प्रयोजनम्। आटो चिद्वृद्धिरेव यथा स्यात् यदन्यद्दू प्रा
प्नोति तन्माभूदिति ॥

च्। पश्चात्कुलेन संबन्धः। अन्यथा कर्मण्यणित्यण्प्रसङ्गः। ओत्वोष्ठयोरिति। ओतुर्बिडालः॥ ओमा॥ अद्याश्यादिति। प्रतिपदविधे
र्बलवत्त्वात्परोऽपि सवर्णदीर्घो बाध्यते। औढीयदिति। वहेराङ्पूर्वस्य क्तप्रत्यये परे ओढमिति रूपं ततः क्यचि लङि रूपमेतत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· उस्य॥अर्थवद्ग्रहणमिति।अस्युत्पन्नं प्रातिपदिकमुस्त्रशब्दस्तस्यआनर्थक्यम्।नैषेति।ननु न प्रयोजनानुवर्त्ति प्रमाणमितिक ६१४
४५ थमनाश्रयणमुपपद्यते।अनित्यत्वादस्याः परिभाषायाः।तच्चानित्यत्वमग्नृन्तजितितन्त्रचोर्भेदेनोपादानेनावादेशात् निव
र्त्यर्थेन ज्ञापितम्।नित्यत्वे ह्यानर्थक्यादवादेशग्रहणाप्रसङ्गान्निवृत्तेः सिद्धत्वात्।भिन्द्युरिति।अनागमकानां सागमका आदे
शा इति न्यायाद्यासुडादेः प्रत्ययस्यार्थवत्त्वं न तु तदेकदेशस्य।यदा त्वर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यत इति न्यायस्त
दार्थवत्त्वमेवोसः।एवं तर्हीति।उस्रशब्दो वसेः स्फायितञ्चीति रक्संप्रसारणे व्युत्पाद्यते।शासिवसीति षत्वं न रपरे इति प्रतिषेधा

उस्यपदान्तात्। अपदान्तादिति किमर्थम्।काउस्रा कोस्रा।अपदान्तादिति शक्यमकर्तुम्।कस्मान्न भवति।
काउस्रा कोस्रा।अर्थवद्ग्रहणे नानर्थकस्येति।नैषा परिभाषेह शक्या विज्ञातुम्।इह हि दोषः स्यात्।भिन्द्युः।एवं
तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति।उत्तरार्थं तर्ह्यपदान्तग्रहणं
कर्तव्यम्।अतो गुणे अपदान्ताद्यथा स्यादिति।इह मा भूत्।दण्डाग्रं क्षुपाग्रमिति॥अव्यक्तानुकरणस्यात इतौ॥इता व
नेकाज्ग्रहणं श्रदर्थम्।इतावनेकाज्ग्रहणं कर्तव्यम्।किं प्रयोजनम्।श्रदर्थम्।इह मा भूत्।श्रदिति।नाम्रेडि
तस्यान्त्यस्य तु वा॥नित्यमाम्रेडिते डाचि। पररूपं कर्तव्यम्।पटपटायति।अकारान्तानुकरणाद्वा॥अथवा अ
कारान्तमेतदनुकरणम्।भवेत्सिद्धं यदा अकारान्तम्।यदा तु खलु अव्यक्तान्तं तदा न सिध्यति।विचित्रास्तद्धितवृ
त्तयः।नातस्तद्धित उत्पद्यते॥अकः सवर्णे दीर्घः॥सवर्णदीर्घत्वे ऋति ऋ वा वचनम्।सवर्णदीर्घत्वे ऋति ऋ वा
भवतीति वक्तव्यम्।होतृऋकारो होतृकारः।लृति लृ वा लृति लृ वा भवतीति वक्तव्यम्।होतृलृकारः होत्लृकारः।
इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठाध्यायस्य प्रथमे पादे चतुर्थमाह्निकम् ॥

न्न भवति।एवमत्रोसितिलाक्षणिकं रूपम्।नाम्रेडि॥नित्यमाम्रेडिते डाचीति वार्त्तिकदर्शनात्सूत्रैकैश्चित्प्रक्षिप्तम्।विचित्रा इति।
प्रयोगमूलत्वादस्य शास्त्रस्य प्रयोगाभावादप्रवृत्तिरिति भावः॥अकः॥ऋ वेति।ऋलृ इत्येतयोः संवृतत्वाद्विवृताभ्यामकारल
काराभ्यामसावर्ण्यादज्ग्रहणेनाग्रहणाद् ईत्तीयमात्रत्वाद्वा ऊकालत्वाभावाद्दीर्घसंज्ञाया अभावाद्वचनम्॥ इत्युपाध्यायजै शमः
यटपुत्रकैयटविरचिते भाष्यप्रदीपे षष्ठाध्यायस्य प्रथमे पादे चतुर्थमाह्निकम् ॥ ४५

CC-0. In Public Domain. Digitization by eGangotri

प्रथमयोः पूर्वसवर्णः॥ प्रथमशब्दः संनिवेशविशेषापेक्षोऽभिधेये वर्तते। तत्र विशेषानवधारणात् पृच्छति। कयोरिति। ननु धातु निपातादीनामपि प्राथम्यसंभवाद्विशेषविषयः प्रश्नो नोपपद्यते। नैष दोषः। दीर्घाज्जसि चेति लिङ्गाद्धात्वादीनामग्रहणाद्विभ क्त्योः प्रत्यययोर्वा ग्रहणे यतः प्रतिषेध उपपद्यते न तु धात्वादीनामन्यतमग्रहणात्। ननु सामान्यग्रहणेऽपि प्रतिषेधोपपत्तेलि ङ्गत्वानुपपत्तिः। नैतदस्ति। प्रथमयोरिति कस्यचिदेव विशेषस्य ग्रहणं न तु यौगपद्येन सर्वेषां विशेषाणाम्। सर्वविशेषविष यस्य संनिवेशापेक्षस्य प्राथम्यस्य युगपद्बुद्ध्यापेक्षितुमशक्यत्वात्। प्रतिनियतविशेषालम्बित्वात्प्राथम्यज्ञानस्य। तत्र प्रसिद्धा श्रयेण विभक्तिग्रहणमाशङ्कितम्। प्रातिपदिकार्थे त्वाद्यौ विभक्तिग्रहणस्य प्रसिद्धत्वात्। अन्तरङ्गत्वात्तु प्रत्ययग्रहणमाशङ्कित म्। प्रत्ययस्य हि प्रथमत्वमन्तरङ्गं त्रिकस्य तु बहिरङ्गम्। तत्र प्रथमसाहचर्यात्प्राथम्यारोपणाद्द्वितीयस्यापि प्रथमशब्देनाभिधा नम्। यथार्द्धर्चाः पुंसि चेति गोमयादीनामर्द्धर्चशब्देन। तथा च बहुवचनं कृतम्। अन्ये त्वाहुः। द्वितीयस्य तु प्रथमापेक्षत्वाद्द्वितीयत्वं नान्यथा। ततः प्रथमद्वितीययोरनपेक्षितपरस्परयोरपि परापेक्षं प्राथम्यं तुल्यमेव। तत्र प्रथमयोरिति स्त्रीलिङ्गनिर्देशे विभक्ति

प्रथमयोः पूर्वसवर्णः॥ प्रथमयोरित्युच्यते। कयोरिदं प्रथमयोर्ग्रहणम्। किं विभक्त्योराहोस्वित् प्रत्यययोः।
विभक्त्योरित्याह। कथं ज्ञायते। अचीति वर्तते। न चाजादी प्रथमौ प्रत्ययौ स्तः। ननु चैवं विज्ञायते। अजादी यौ
प्रथमौ। अजादीनां वा यौ प्रथमाविति ।

ग्रहणम्। पुल्लिङ्गनिर्देशे तु प्रत्ययग्रहणम्। समानश्च निर्देश इति सन्देहः। न चाजादी इति। प्रथमयोरिति विशेष्यं तद्विशेषणमचीति तेनाजाद्योः प्रथमयोरिह ग्रहणं न च सुशब्दोऽजादिर्भवतीति नासाविह प्रथमशब्देन गृह्यते विभक्त्योस्त्वजादित्वं संभवतीति तयोरे व ग्रहणम्। यद्यपि प्रथमे त्रिके सुशब्दस्याजादित्वासंभवस्तथाप्यवयवान्तरद्वारकस्त्रिकस्याजादिव्यपदेश इति अजाद्योः प्रथम योरिति संबन्धोपपत्तिः। प्रत्यययोस्तु ग्रहणे सुशब्दस्यानजादित्वादौजसोश्चाप्राथम्यात्प्रत्यययोरजाद्योरिति संबन्धायोगः। अजादी यौ प्रथमाविति। अजादी विशेष्यौ तद्विशेषणं प्रथमयोरिति। तेनायमर्थो भवत्यजादी यौ प्रत्ययौ अन्यापेक्षया लब्धप्रथमव्यपदेशौ तयोः परतः पूर्वसवर्णदीर्घ इत्येवमौजसोरेव ग्रहणं प्राप्नोतीति विभक्तिद्वयग्रहणस्याज्ग्रहणं न लिङ्गम्। अजादीनां वेति। अचीति वर्तते निर्द्धारणसप्तमी चेहाश्रीयते जातौ चैकवचनम्। तुल्यजातीयस्य च निर्द्धारणं भवतीत्यजादीनां प्रथमौ यावजादी अन्या जादिप्रत्ययापेक्षया लब्धप्रथमव्यपदेशौ तौ चौजसावेवेति विभक्तिग्रहणे लिङ्गाभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। वा सुप्यापिशलेरित्यतः सुपीति वर्त्तते तत्र दीर्घाज्जसि चेति प्रतिषेधाल्लिङ्गात्सुपः परिग्रहे सिद्धे सुब्ग्रहणानुवृत्त्या सुपां प्रसिद्धो यो धर्मः स परिगृह्यते। सुपो विभक्तिश्चेत्यत्राग्नी गिरी णीत्यनुवृत्त्यानिकस्य विभक्तित्वं प्रसिद्धः सुब्धर्म इति विभक्तेर्ग्रहणं संपत्स्यते। अथ किमर्थमिति। खट्वां कुमारीमित्यादौ लक्षणयोः फलाभेदं दृष्ट्वा प्रश्नः। इतरो वृक्षमग्निमित्यादौ फलभेदं मत्वाह। न सिध्यतीति। यत्पूर्वस्मिन्निति। अकः सवर्णे दीर्घ इत्यतो दीर्घग्रहणं नानुवर्तत इत्यर्थः। एवमपीति। अमीत्यादि सिद्ध्यर्थं सवर्णग्रहणमवश्यं कर्तव्यम्। सवर्णग्रहणमिति। ततश्च वृक्षमग्निं कुमारीं कुमारीः पश्य वधूं वधूरित्यादि सर्वं सिद्ध्यति। कुतो व्यवस्थे

यत्तर्हि तस्माच्छसो नः पुंसीत्यनुक्रान्तं पूर्वसवर्णं प्रतिनिर्दिशति तज्ज्ञापयत्याचार्यः। विभक्त्योर्ग्रहणमिति।
अथवा सुपीति वर्तते। अथ किमर्थं पूर्वसवर्णदीर्घः अमि पूर्वस्त्वं चोच्यते। न प्रथमयोः पूर्वसवर्ण इत्येव सिद्धम्। न
सिध्यति। प्रथमयोः पूर्वसवर्णदीर्घ इत्युच्यमानेऽम्यपि दीर्घः प्राप्नोति। वृक्षम्। प्लक्षम्। नैष दोषः। यत्पूर्वस्मिन्योगे दीर्घग्र
हणं तदुत्तरत्र निवृत्तम्। एवमपि इदमिह पूर्वसवर्णग्रहणं क्रियते तेनाम्यपि पूर्वसवर्णः प्रसज्येत। वृक्षम्। प्लक्ष
म्। द्विमात्रः प्राप्नोति। नैष दोषः। सवर्णग्रहणं न करिष्यते। यदि सवर्णग्रहणं न क्रियते। कुतो व्यवस्था। आन्तर्यतः।
यद्येवमग्नी वायू त्रिमात्रः प्राप्नोति। वृक्षम्। प्लक्षम्। द्विमात्रः प्राप्नोति। तस्मात्सवर्णग्रहणं कर्तव्यम्। तस्मिंश्च क्रि
यमाणे दीर्घग्रहणमनुवर्त्यम्। तस्मिन्ननुवर्तमानेऽमि पूर्व इत्यपि वक्तव्यम्। अथ किमर्थं पृथगुच्यते नेह
वोच्येत प्रथमयोः सर्वसवर्णोऽमि चेति। यदि प्रथमयोः पूर्वसवर्णदीर्घो भवति अमि चेत्युच्यते तेनाम्यपि
दीर्घः प्रसज्येत। वृक्षम्। प्लक्षम्। नैष दोषः। दीर्घग्रहणं निवर्तयिष्यते। एवमपि पूर्वसवर्णः प्रसज्येत। सव
र्णग्रहणं न करिष्यते। यदि सवर्णग्रहणं न क्रियते ।

ति। वृक्षमग्निं वायुमित्यादौ ह्रस्व एवाग्नी वायू वृक्षा इत्यादौ दीर्घ एवेति व्यवस्था न सिध्यति। तथा हि। यदि पूर्वाकृतिराश्रीयते त
दाऽग्नी इत्यादावपि ह्रस्वप्रसङ्गः। अथ पूर्वाकृतिराश्रीयते तदाग्निमित्यादावपि दीर्घप्रसङ्ग इति भावः। आन्तर्यत इति। पूर्वाकृति
राश्रीयते प्लुतश्च विषये स्मृत इति प्लुतो न भविष्यति दीर्घश्च भविष्यतीति मन्यते। त्रिमात्रः प्राप्नोतीति। प्लुताप्लुतप्रसङ्गे प्लुतश्च विष
ये स्मृत इत्युच्यते इह तु प्लुतस्यैव प्रसङ्ग इति भावः। तस्मादिति। यस्मात्पूर्वाकृतिपक्षे पूर्वव्यक्तिपक्षे च दोषस्तस्मादित्यर्थः। अमि चेति।
पुनः पूर्वग्रहणं न कर्तव्यं भवतीति भावः। दीर्घग्रहणमिति। अमि चेत्यत्रेति भावः। एवमपीति। ततश्च कुमारीमित्यादौ त्रिमात्रप्रसङ्गः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वस्मिन्योग इति। पूर्वत्वव्यक्त्याश्रये अग्नीद्रित्यादौ पूर्वव्यक्तिर्न दीर्घेति विप्रतिषिद्धं स्यात्। पूर्वो दीर्घ इत्याकृत्याश्रये तूक्तदोषः। प्रथमयोः पूर्व इत्यत्रानुवृत्त्या पूर्वाकृतिराश्रयिष्यते। अमि चेत्यत्र तु दीर्घग्रहणनिवृत्त्या व्यक्तिरिति दुर्लभमेतत्। तस्मादुभयमिति। अथोभयस्मिन्पृथक्कर्तव्ये प्रथमयोः पूर्वसवर्ण इत्यत्र सवर्णग्रहणं किमर्थं कृतम्। यावता दीर्घानुवृत्त्या पूर्वाकृतिराश्रयिष्यते। नैतदस्ति। व्यक्तिपक्षस्यापि संभवाद् अग्नीद्रित्यादौ विरोधाशङ्का स्यात्। वृक्षा इति। अत्राद्गुणः प्राप्तः। ततो दीर्घः। ततः परत्वात्पूर्वसवर्णदीर्घः। ततः

पूर्वस्मिन्योगे विप्रतिषिद्धम्। यदि पूर्वो न दीर्घः। अथ दीर्घो न पूर्वः। पूर्वश्च दीर्घश्चेति विप्रतिषिद्धम्। तस्मादुभयमारब्धव्यम्। पृथक्त्वं वक्तव्यम्। प्रथमयोरिति योगविभागः सवर्णदीर्घार्थः। प्रथमयोरिति योगविभागः कर्तव्यः। प्रथमयोरकः सवर्णे दीर्घो भवति। ततः पूर्वसवर्णः। पूर्वसवर्णदीर्घो भवत्यकः प्रथमयोरिति। किमर्थो योगविभागः। सवर्णदीर्घार्थः। सवर्णदीर्घत्वं यथा स्यात्। वृक्षाः। प्लक्षाः। वृक्षान्। प्लक्षान्। एकयोगे हि जश्शसोः पररूपप्रसङ्गः। एकयोगे हि जश्शसोः पररूपं प्रसज्येत। वृक्षाः। प्लक्षाः। वृक्षान्। प्लक्षान्। ननु च पूर्वसवर्णदीर्घत्वं पररूपं बाधिष्यते। नोत्सहते बाधितुम्। किं कारणम्। आद्गुणयणादेशयोरपवादा वृद्धिसवर्णदीर्घपूर्वसवर्णादेशास्तेषां पररूपं स्वरसन्धिषु। आद्गुणयणादेशावुत्सर्गौ। तयोरपवादा वृद्धिसवर्णदीर्घपूर्वसवर्णादेशाः। तेषां सर्वेषां पररूपमपवादः। तत्सर्वबाधकम्। सर्वबाधकत्वात्प्राप्नोति। अथ क्रियमाणेऽपि योगविभागे यावता पररूपमपवादः कस्मादेव न बाध्यते। योगविभागोऽन्यशास्त्रनिवृत्त्यर्थः। योगविभागोऽन्यशास्त्रनिवृत्त्यर्थो विज्ञायते। योगविभागोऽन्यशास्त्रनिवृत्त्यर्थश्चेद् अम्यतिप्रसङ्गः। योगविभागोऽन्यशास्त्रनिवृत्त्यर्थश्चेदम्यतिप्रसङ्गो भवति। वृक्षम्। प्लक्षम्। यथैव हि योगविभागः पररूपं बाधत एवममि पूर्वत्वमपि बाधेत। नकाराभावश्च तस्मादित्यनन्तरनिर्देशात् ॥

पररूपप्रसङ्ग इति। आद्गुणेति। तत्र वृद्ध्यादयो द्वितीयकस्याप्राप्ताः पररूपं तु तृतीयकस्याप्राप्तमिति भावः। अथ क्रियमाणेऽपीति। यथा वृक्षा इत्यादौ योगविभागेन पररूपं पचन्तीत्यादौ सावकाशं बाध्यते तथाऽग्निं वायुमित्यादौ सावकाशमपि पूर्वत्वं वृक्षमित्यादौ बाध्येत। अथामि पूर्वत्वं न बाध्यते। पररूपमेव बाध्यत इत्युच्यते तदास्य विभागस्य कारणं वाच्यमिति भावः। अथवा अयमभिप्रायो यदि पररूपं सवर्णदीर्घस्येव पूर्वसवर्णस्यापि बाधकं ततो योगविभागेऽपि क्रियमाणे बाधकं स्यादिति। योगविभाग इति। चतुर्थकस्याप्राप्तत्वाद्योगविभागः पररूपस्य बाधक इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नत्वस्येति। तस्माच्छसो नः पुंसीत्यत्र तच्छब्देनानन्तरस्य पूर्वसवर्णदृत्यनेन विहितस्य परामर्शादृ गिरीन् वायूनित्यादावेव नत्वं स्यात्। न तु वृक्षानित्यादौ प्रथमयोरिति योगविभागेन दीर्घे विधीयमान इत्यर्थः। एतच्च भेदेन लक्षणयोरपेक्षामाश्रित्य चोदितम्। यत्रोच्यते अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। यदा तु सूत्रद्वयसमुदायमेकमाबुद्ध्यापेक्ष्य तस्मादिति परामर्शः क्रियते तदा नास्ति दोषः। यत्रोच्यते उभयं निर्दिष्टं तदपेक्षिष्यामहे इति। एतानृगाद इति। औतोम्शसोरित्याकार एकादेशः। इज्ग्रहणत्वस्य चाभावः।

नत्वस्य चाभावः। वृक्षान्। प्लक्षान्। किं कारणम्। तस्मादित्यनन्तरनिर्देशात्। तस्मादित्यनेनान्तरो योगः प्रतिनिर्दिश्यते। प्रथमयोः पूर्वसवर्णः। तस्माच्छसो नः पुंसि। किं पुनः कारणं तस्मादित्यनन्तरो योगो निर्दिश्यते। इह मा भूत्। एतानृगाश्च तु रो बलीवर्दान्यश्येति। अस्तु तर्ह्येकयोग एव। ननु चोक्तमेकयोगे हि जश्शसोः पररूपप्रसङ्ग इति। नैष दोषः। इज्ग्रहणं तु ज्ञापकं पररूपाभावस्य। यदयं नादिचीती ज्ग्रहणं करोति तज्ज्ञापयत्याचार्यः। न जश्शसोः पररूपं भवतीति। कथं कृत्वा ज्ञापकम्। इज्ग्रहणस्यैतत्प्रयोजनम्। इह मा भूत्। वृक्षाः। प्लक्षाः। वृक्षान्। प्लक्षान्। यदि च जश्शसोः पररूपं स्यादिज्ग्रहणमनर्थकं स्यात्। पश्यति त्वाचार्यो न जश्शसोः पररूपं भवतीति ततइज्ग्रहणं करोति। नैतदस्ति ज्ञापकम्। उत्तरार्थमेतत्स्याद्दीर्घाज्जसि चेति। यद्युत्तरार्थमेतत्स्यात्तत्रैवायमिज्ग्रहणं कुर्वीत। इहापि क्रियमाणं यद्युत्तरार्थं न ज्ञापकं भवति। एवं तर्हि यद्युत्तरार्थमेतत्स्यात् इ नैवायमिज्ग्रहणं कुर्वीत नापि जस्ग्रहणं कुर्वीत एतावदयं ब्रूयात् दीर्घाच्छसि पूर्वसवर्णो भवतीति तन्नियमार्थं भविष्यति। दीर्घाच्छस्येव नान्यत्रेति। सोयमेवं लघीयसा न्यासेन सिद्धे यदिज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो न जश्शसोः पररूपं भवतीति। अथवा पुनरस्तु योगविभागः ॥

णं त्विति। यदि जश्शसोः पररूपं स्यात्तदा नादित्येव ब्रूयादिच्येव पूर्वसवर्णदीर्घप्रसङ्गात् प्राप्तिपूर्वकत्वाच्च प्रतिषेधस्येति भावः। उत्तरार्थमिति। कुमार्यौ वध्वावित्यादौ पूर्वसवर्णदीर्घप्रतिषेधार्थमित्यर्थः। यद्युत्तरार्थमिति। एवं सति पृथग्विभक्त्यनुच्चारणाच्चकाराकरणाच्च दीर्घादिज्जसोरिति लाघवं भवति। इहापीति। सर्वत्र लाघवं प्रत्यनादरादिहापि क्रियमाणस्येज्ग्रहणस्योत्तरार्थतया प्रयोजनवलाद्ज्ञापकत्वाभाव इत्यर्थः। दीर्घाच्छसीति। दीर्घादिज्जसोरित्यस्मादपि लघुतरोयं सूत्रन्यास इति भावः। तस्मादिज्ग्रहणं नोत्तरार्थमेव क्रियते किं त्विहार्थमपीति ज्ञापकमेवेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमियदुक्तमिति।प्रथमयोरितियोगविभागेनदीर्घत्वमित्यर्थः।तस्मादक्कोदीर्घादिति।एकयात्रुद्धाअकृस्यानिकस्त्रिसूत्रीविहि
तोदीर्घःपरामृश्यतइत्यर्थः।अकःसवर्णेदीर्घइत्यनेनविहितस्यदीर्घस्यानर्थकःपरामर्शइतिमत्वाह।अथवेति।प्रथमयोरि
त्येवंयोविहितोदीर्घःपरामृश्यतेइतिसूत्रद्वयविषयेनत्वंसिध्यति।मध्येपवादाइति।न्यायश्चायंनतुवचनम्।यद्वस्यतिय
द्येतदस्तीति।नहिवचनस्यासंचासंभावनान्यायस्तुक्वचित्कश्चिदाश्रीयतइतियुज्यतेवक्तुम्।यद्येतदस्तीति।यदाबाध्या

ननुचोक्तंयोगविभागोऽन्यशास्त्रनिवृत्त्यर्थश्चेदस्यतिप्रसङ्ग इति।नैषदोषः।अस्यापियोगविभागःकरिष्यते।
अमियदुक्तंतन्नभवतीति।ततःपूर्वः।पूर्वश्चभवत्यमीति।यदप्युच्यतेनकाराभावश्चतस्मादित्यनन्तरनिर्दे
शादिति।कःपुनरर्हतितस्मादित्यनेनानन्तरंयोगंनिर्देष्टुम्।एवंकिलप्रतिनिर्दिश्येततस्मात्पूर्वसवर्णदीर्घा
दिति।तच्चन।एवंप्रतिनिर्दिश्यते।तस्मादकोदीर्घादिति।अथवातस्मात्प्रथमयोर्दीर्घादिति।अथवापुनरस्तुअ
स्त्येकयोगः।ननुचोक्तंयोगविभागोऽन्यशास्त्रनिवृत्त्यर्थश्चेदस्यतिप्रसङ्ग इति।नैषदोषः।मध्येपवादाःपूर्वान्वि
धीन्बाधन्तेइत्येवमयंयोगविभागःपररूपंबाधिष्यते।अमिपूर्वत्वंनबाधिष्यते।यद्येवदस्तिमध्येपवादाःपु
रस्तादपवादाइतिनार्थएकेनापियोगविभागेन।पुरस्तादपवादाअनन्तरान्विधीन्बाधन्तइत्येवंपररूपमकः
सवर्णेदीर्घत्वंबाधिष्यते।प्रथमयोःपूर्वसवर्णत्वंनबाधिष्यते।अथवासप्तमेयोगविभागःकरिष्यते।इदमस्ति।
अतोदीर्घोयञिसुपिचेति।ततोबस्यामिबहुवचने।बहुवचनेचअतोदीर्घोभवति।ततोझल्येत्।एकारश्चभव
तिबहुवचनेझलीति।इहापितर्हिप्राप्नोति।वृक्षाणाम्।प्लक्षाणाम्।तत्रकोदोषः।दीर्घत्वेकृतेह्रस्वाश्रयोनुण्नप्रा
प्नोति।इदमिहसंप्रधार्यंदीर्घत्वंक्रियतांनुडिति।किमत्रकर्त्तव्यम्।परत्वाद्दीर्घत्वम्।नित्यंखल्वपिदीर्घत्वम्।
कृतेपिनुटिप्राप्नोत्यकृतेपि।नित्यत्वात्परत्वाच्चदीर्घत्वेकृतेह्रस्वाश्रयोनुण्नप्राप्नोति ॥

निलक्षणानिमेदेनापेक्ष्यन्तेतदाक्रमव्यतिक्रमेहेत्वभावात्पूर्वविज्ञातबाध्यविषयलाभान्मध्येपवादाइतिपुरस्तादपवादा
इतिचाश्रीयते।यदात्तुलक्षणसमुदायोबाध्यत्वेनापेक्ष्यतेतदातस्यैकत्वान्नास्त्येवैतन्मध्येपवादाइतिपुरस्तादपवादाइति
च।अथवासप्तमइति।वृक्षअसइतिस्थितेपूर्वस्यदीर्घविधानात्पररूपाभावाज्जस्यकःसवर्णेदीर्घइतिदीर्घःशसितुप्रथमयोःपू
र्वसवर्णइति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंतर्हीति। अकारेण चाणत्वादाकारो गृह्यते। कीलालपानामिति। ह्रस्वो नपुंसक इति ह्रस्वत्वे बहुवचन इति दीर्घत्वे कृते आ
तो धातोरित्यधिकारादाकारलोपप्रसङ्गः। नपुंसकस्य नेति। ह्रस्वनद्यापो नुडित्यत्र सूत्रे स्वमोर्नपुंसकादित्यतो नपुंसकग्रह
णं नेतराच्छन्दसीत्यतो नेति चानुवर्त्तते। आतो धातोर्लोप इति च ततो नपुंसकस्यातो धातोर्लोपाभावे नुडेव भविष्यतीत्यर्थः॥

एवंतर्ह्याद्गुण मिहापि प्रकृतमनुवर्त्तते। क्व प्रकृतम्। आज्जसेरसुक्। तेन कृतेपि दीर्घत्वे नुड्भविष्यति।
इहापि तर्हि प्राप्नोति। कीलालपांशुभंयाम्। आतो लोपोऽत्र बाधको भविष्यति। इदमिह संप्रधार्यं लोपः क्रिय
तां नुडिति। किमत्र कर्त्तव्यम्। परत्वान्नुट्। एवंतर्हि ह्रस्वनद्यापो नुडित्यत्रातो धातोरित्यातो लोपः संबन्धमनु
वर्त्तिष्यते। इहापि तर्हि प्राप्नोति। कीलालपानां ब्राह्मणकुलानाम्। नपुंसकस्येत्यप्यनुवर्त्तिष्यते॥ तस्माच्छ
सोनः पुंसि॥ किमिदं नत्वं पुंसां बहुत्वे भवत्याहोस्वित्पुंशब्दाद्बहुषु। कश्चात्र विशेषः। नत्वं पुंसां बहुत्वे चेत्पुं
शब्दादिष्यते स्त्रियाम्। तन्न सिद्ध्यति। भ्रुकुंसान्पश्येति। नपुंसके तथैवेष्टम्। तच्च न सिद्ध्यति। षण्ढान्पश्य पण्ड
कान्पश्येति। स्त्रीशब्दाच्च प्रसज्यते। स्त्रीशब्दाच्च प्राप्नोति। चञ्चाः पश्य। वध्रिकाः पश्य। खरकुटीः पश्य। अस्तु त
र्हि पुंशब्दाद्बहुषु। पुंशब्दादिति चेदिष्टं स्थूरापत्ये न सिद्ध्यति। स्थूरान्पश्येति। कुण्डिन्याः अररकायाः। अपत्ये
च न सिध्यति। कुण्डिनान्पश्य। अररकान्पश्य। पुंस्प्राधान्यात्प्रसिध्यति। पुंप्रधाना एते शब्दाः। ततो नत्वं भवि
ष्यति। पुंप्राधान्येः तएवास्युर्ये दोषाः पूर्वं चोदिताः। भ्रुकुंसान्पश्य षण्ढान्पश्य पण्डकान्पश्य चञ्चाः पश्य व
ध्रिकाः पश्य खरकुटीः पश्येति ॥

तस्मात्॥ किमिदमिति। पुंसीति किं शसो विशेषणं पुंबहुत्वे यः शस्तस्यन्न इति अथ प्रकृतेः पुंशब्दाद्यः शसिति प्रश्नः। भ्रुकुंसा
न्पश्येति। स्तनकेशसंबन्धात्स्त्रीप्रतिभासं भ्रुकुंसार्थस्य मन्यते। षण्ढानिति। षण्ढशब्देन प्रसवासमर्थस्य नपुंसकस्याभि
धानम्। चञ्चा इति। चञ्चेव चञ्चा इवे प्रतिकृतौ संज्ञायामिति कन्। लुम्मनुष्य इति लुप्। चञ्चाशब्देन पुंसोभिधानान्नत्वप्रसङ्गः। स्थूरानिति।
स्थूराया अपत्यानि। गर्गादिभ्यो यञ्। यञञोश्चेति लुक्। लुक्तद्धितलुकीति टापो लुक्। ततः स्थूरशब्दस्य स्त्रीलिङ्गत्वान्नत्वाप्रसङ्गः। कु
ण्डिनानिति। कुण्डिन्या अपत्यानि। गर्गादिभ्यो यञ्। आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनजिति यञो लुक्। कुण्डिनीशब्दस्य कुण्डिन
जादेशः स च स्त्रीलिङ्गादेशत्वात्स्त्रीशब्दः। अररकायाः पूर्ववद्यञादि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्माद्यस्मिन्निति। अर्थपक्षं परत आश्रयिष्यति। द्वयोरपि तु पक्षयोर्दोषाभावः। तथाहि। पुंवाची शब्दः पुंशब्द उच्यते। ततो भ्रुकुं
साद्यः शब्दाः पुमांसमाचक्षाणाः पुंशब्दा उच्यन्त इति नानयोः पक्षयोः फलभेदः। षण्ढपण्डकशब्दाभ्यामपि पुंस्त्वानुगत ए
व नपुंसकरूपोऽर्थ उच्यते। यथा न पुंसको भवदिति नपुंसकशब्देन। स्त्रीसूत्रे हि न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुमि
त्यादिना विशिष्टमेव लिङ्गलक्षणं भाष्यकारेणाश्रितम्। स्थूराद्योऽपि प्रत्ययलुकि कृते पुंसि वर्तमानाः पुंशब्दा एव भवन्ति। व
ध्रिकादिप्रयुक्तवदिति। लुपि युक्तवद्व्यक्तिवचने इति पुंसः स्त्रीत्वातिदेशान्नत्वाभावदूत्पर्यः।। असि।। वाच्छन्दसीत्येवेति। एत

तस्माद्यस्मिन्पक्षे स्त्रीयांसो दोषाः तमास्थाय प्रविधेयं दोषेषु। न त्वं पुंसां बहुत्वे चेत्पुंशब्दादिष्यते स्त्रियाम्। का
नपुंसके तथैवेष्टं स्त्रीशब्दाच्च प्रसज्यते। पुंशब्दादिति चेदिष्टं स्थूरापत्येन सिध्यति। कुण्डिन्या अररकायाः पुं
स्प्राधान्यात्प्रसिध्यति।। पुंस्प्राधान्ये तत एव स्युर्दोषाः पूर्वचोदिताः। तस्मादर्थे भवेन्नत्वं वध्रिकादिप्रयुक्तवत्।।
अमि पूर्वः।। वाच्छन्दसीत्येव। यमीं च यम्यं च शमीं च शम्यं च। गौरीं च गौर्यं च किशोरीं च किशोर्यं च।। संप्रसार
णाच्च।। वाच्छन्दसीत्येव। मित्रावरुणौ यज्यमानः। मित्रावरुणौ इज्यमानः। संप्रसारणात्परपूर्वत्वे समाना
ङ्गग्रहणमसमानाङ्गप्रतिषेधार्थम्। संप्रसारणात्परपूर्वत्वे समानाङ्गग्रहणं कर्तव्यम्। किं प्रयोजनम्। अ
समानाङ्गप्रतिषेधार्थम्। असमानाङ्गस्य माभूदिति। शकहूर्थम्। परिव्यर्थम्। सिद्धमसंप्रसारणात्। सिद्ध
मेतत्। कथम्। असंप्रसारणात्। कथमसंप्रसारणम्। वाक्यस्य संप्रसारणसंज्ञा न वर्णस्य ॥

च्च वाक्यभेदेन संबध्यते। अन्यथाभावार्थां न स्यात्। शम्यं चेति। विकल्पविधानसामर्थ्यात्पूर्वत्वाभावे पूर्वसवर्णदीर्घोऽपि
न भवति तयोरत्र विशेषाभावादिति यणादेश एव भवति।। संप्र।। समानाङ्गग्रहणमिति। यदि संप्रसारणं तस्माच्च परो जेक
स्मिन्नङ्गे भवतस्तदा पूर्वैकादेशो भवति नान्यथा। शकहूर्थमिति। अन्यस्मिन्नङ्गे संप्रसारणमन्यस्मिन्नजिति पूर्वैकादेशाभा
वः। अत्रान्तवद्भावेनोकारस्य संप्रसारणत्वम्। सिद्धमिति। वाक्यस्य संप्रसारणसंज्ञायां वर्णस्य नास्ति संप्रसारणसंज्ञा। स तु सं
प्रसारणनिर्वर्तितत्वात्संप्रसारणव्यपदेशमौपचारिकं लभते। शकहूर्थमित्यादौ त्वेकादेशशास्त्रेण निर्वर्तित उकार इति ना
स्ति संप्रसारणव्यपदेशः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णस्य चेति। यणः स्थाने यो वर्णः स संप्रसारणसंज्ञः एकादेशस्तु न यण्स्थानिकः। अन्तवद्भावोपि नास्ति वर्णविधावन्तवद्भावप्रतिषेधात्। अन्तरङ्गत्वाच्च हलद्द इति संप्रसारणदीर्घे कृते उकारस्य संप्रसारणसंज्ञाभावात्पूर्वैकादेशाभावः। संप्रसारणदीर्घे तु वचनसामर्थ्यादेकादेशस्यान्तवद्भावात्संप्रसारणव्यपदेश आश्रीयते। कार्यकृतत्वादिति। शास्त्रस्यासिन्नि विषये प्रवृत्तत्वात्तस्य पुनः प्रवृत्त्यभावः। युक्तं यत्तस्यैवेति। पराङ्गमग्न्याधानं यज्ञस्य प्रतिपत्त्यर्थमिति पुनः क्रियमाणं फलभेदाभावात्तदेवेत्युच्यते। तत्प्रयोजना

अथ वर्णस्य संप्रसारणसंज्ञायां दोष एव। वर्णस्य च संप्रसारणसंज्ञायां न दोषः। कथम्। अन्योन्यं संप्रसारणसंप्रसारणयोः स्थाने एक आदिश्यते। कार्यकृतत्वाद्वा। अथवा सकृत् कृतं पूर्वत्वमिति कृत्वा पुनर्न भविष्यति। तद्यथा वसन्ते ब्राह्मणोऽग्नीनादधीतेति सकृदाधाय कृतः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तिर्न भवति। विषम उपन्यासः। युक्तं यत्तस्यैव पुनः प्रवृत्तिर्न भवति। यत्तु तदाश्रयं प्राप्नोति न तच्छक्यं बाधितुम्। तद्यथा। वसन्ते ब्राह्मणोऽग्निष्टोमादिभिः क्रतुभिर्यजेतेति। अग्न्याधाननिमित्तं वसन्ते वसन्ते इज्यते। तस्मात्पूर्वोक्त एव परिहारः सिद्धमसंप्रसारणादिति। यदि तर्हि नेदं प्रसारणं हलद्द इति दीर्घत्वं न प्राप्नोति। दीर्घत्वं च वचनप्रामाण्यात्। अनवकाशं दीर्घत्वं तद्वचनप्रामाण्याद्भविष्यति। अन्तवत्त्वाद्वा। अथवा पूर्वस्य कार्यं प्रत्यन्तवद्भवतीति दीर्घत्वं भविष्यति। आटो वृद्धेरियङ्। आटो वृद्धिर्भवतीत्येतस्मादियङ् भवति विप्रतिषेधेन। आटो वृद्धिर्भवतीत्यस्यावकाशः। ऐक्षिष्ट। ऐहिष्ट। इयङोऽवकाशः। अधीयाते। अधीयते। इहोभयं प्राप्नोति। अध्यैयाताम्। अध्यैयत। इयङादेशो भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। अन्तरङ्गा आटो वृद्धिः। कान्तरङ्गता। वर्णाश्रि स्याटो वृद्धिः। अङ्गस्येयङादेशः। एवं तर्हीदमिह संप्रधार्यम्। आट् क्रियतामियङादेश इति। किमत्र कर्तव्यम्। परत्वादियङ्॥

भावान्नानुष्ठीयते। यत्तु तदाश्रयमिति। यस्मात्फलावाप्तिस्तत्फलभेदाद्भिद्यमानमसकृदनुष्ठीयत इति भावः। अग्न्याधाननिमित्तमिति। अग्न्याधानं निमित्तं हेतुरस्येति बहुव्रीहिः। क्रियाविशेषणं चैतत्। एवमिहापि शास्त्रपूर्वके ज्ञाने प्रयोगे वा फलमिति फलान्तरार्थी शब्दान्तरे लक्षणमावर्तयेदित्यपरिहारः। कार्यकृतत्वादिति। अध्यैयातामिति। कृते पुलादेशे षाट् क्रियत इति प्रक्रियामाश्रित्य विचार्यते। अन्तरङ्गेति। वार्णादाङ्गमित्यनाश्रित्येदमुच्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्य च लक्षणान्तरेणेति। एतत्क्वचिदाश्रीयते क्वचिन्न। यथोक्तं ब्राह्मणकुलमित्यादौ त्यदादिभ्यो लुग्वक्तव्य इति। यस्य च लक्षणान्तरेणेति त्वाश्रीयमाणे नित्यत्वाल्लुक्सिद्धस्तस्य ह्यतोऽमिति लक्षणेन निमित्तं त्वविहन्यते न पुनस्त्यदाद्यत्वेनैवेति न स्यादनित्यत्वं लुकः। तत्र यदा लक्षणयोरेव विचारः किं लक्षणं नित्यं किमनित्यमिति तदा च यस्य च लक्षणान्तरेणेति न्यायः। यदा तु कार्ययोर्विचारः कस्मिन्कार्ये प्रवृत्ते किं प्रवर्त्तते किं न प्रवर्त्तत इति तदा नास्त्येतद्यस्य च लक्षणान्तरेणेति। उपद्दूजतुरिति। पूर्वं सवर्णदीर्घ

नित्य आडागमः। कृतेऽपीयङि प्राप्नोत्यकृतेऽपि। इयङपि नित्यः। कृतेऽप्याटि प्राप्नोत्यकृतेऽपि। अनित्य इयङ्। न हि कृते आटि प्राप्नोति। किं कारणम्। अन्तरङ्गा आटो वृद्धिः। यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्। न चात्राडेवेयङो निमित्तं विहन्ति। अवश्यं लक्षणान्तरमाटो वृद्धिः प्रतीक्ष्या। उभयोर्नित्ययोः परत्वादियङा देश्यः। आद्गुणात्सवर्णदीर्घत्वमाङभ्यासयोः। आद्गुणात्सवर्णदीर्घत्वं भवति विप्रतिषेधेन। क्व। आङभ्यासयोः। आद्गुणस्यावकाशः। खट्वा इन्द्रः। खट्वेन्द्रः। खट्वा उदकम्। खट्वोदकम्। सवर्णदीर्घस्यावकाशः। दण्डाग्रम्। क्षुपाग्रम्। इहोभयं प्राप्नोति। अद्य आ ऊढा। अद्योढा। कदा आ ऊढा। कदोढा। उपद्द्जतुः। उपेजतुः। उपउॅपतुः। उ (उ) पोपतुः। सवर्णदीर्घत्वं भवति विप्रतिषेधेन। अभ्यासार्थं न तावन्नार्थः। असत्यत्वाद्गुणः। आद्गुणे कृते अयवौचाहलादिशेषः पुनराद्गुणो भविष्यति। भवेत्सिद्धं उपेजतुः उपेजुरिति। इदं तु न सिद्ध्यति। उपोपतुरुपोपुरिति। अत्र ह्याद्गुणे कृते ओदन्तो निपात इति प्रगृह्यसंज्ञा प्रगृह्यः प्रकृत्येति प्रगृह्याश्रयः प्रकृतिभावः प्राप्नोति। पदान्तप्रकरणे प्रकृतिभावः। न चैष पदान्तः। पदान्तभक्तः पदान्तग्रहणेन ग्राहिष्यते। एवं तर्ह्येतदेवात्र नास्ति ओदन्तो निपात इति। किं कारणम्। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। इहापि तर्हि अद्योढा कदोढेति भवेद्रूपं सिद्धं स्यात् ॥

त्वं भवति पश्चादाद्गुणः। अन्तरङ्गत्वादप्येतत्सिध्यति। प्रकारान्तरेण तत्सिद्धिं प्रदर्शयितुमाह। अभ्यासेति। हलादिः शेष इति। अभ्यासानभ्या—सयोरेकादेश एकारोऽभ्यासस्यादिवद्भावादभ्यासग्रहणेन गृह्यते तत्स्थानिकोऽप्ययादेशः स्थानिवद्भावादभ्यास इति भावः। एकारस्य त्वभ्यासह्रस्वो न भवति। ह्रस्वे कर्त्तव्ये नाभ्यासादिषित्यन्तादिवद्भावनिषेधात्। पदान्तभक्त इति। अन्तवद्भावात्पदान्तकार्यं लभत इत्यर्थः। इहापीति। विप्रतिषेधोपालम्भः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वरदोषस्त्विति। अद्यशब्दः प्रत्ययस्वरेणान्तोदात्तः। आङ्‌ गतिरनन्तर इति पूर्वपदप्रकृतिस्वरेणोदात्तः। शिष्टमनुदात्तम्। तन्नय
दि पूर्वसवर्णदीर्घः स्यात् तदा द्वयोरुदात्तयोरेकादेश उदात्तस्ततश्च गुण एकादेश उदात्तेनोदात्तः स्वरितो वानुदात्ते पदादाविति
पक्ष उदात्तः स्यात्पक्षे स्वरितः। यदा तु पूर्वमाद्गुणः पश्चादोमाङोश्चेति पररूपं तदा पूर्वत्रासिद्धमिति पररूपे कर्त्तव्ये एकादेश
स्वरयोरुदात्तस्वरितयोरसिद्धत्वाच्छास्त्रदृष्ट्या अस्वरस्यैकादेशस्य पूर्वेणोदात्तेन सहैकादेश आन्तरतम्यादुदात्त एव भवति।
आङि पररूपवचनं चेति। न केवलं स्वरदोषो यावदाचार्यवचनमपि लक्ष्यानप्रमाणीकृतमित्यर्थः। विप्रतिषेधवादानर्थक्यं प
रिहर्त्तुमाह। नानर्थकमिति। यदा पूर्वमाद्गुणः प्रवर्त्तेत तदा वृद्धिरेचीति वृद्धिबाधनार्थमोमाङोश्चेति वक्तव्यमित्यज्ञापकम्। वि

स्वरदोषस्तु। स्वरे तु दोषो भवति। अद्योढा एवं स्वरः प्रसज्येत। अद्योढा इति चेष्यते। आङि पररूपवचनं चेद
नीमनर्थकं स्यात्। नानर्थकम्। ज्ञापनार्थम्। किं ज्ञाप्यम्। आङि पररूपं तु ज्ञापकम्। अन्तरङ्गं बलीयस्त्वस्य।
एतज्ज्ञापयत्याचार्योऽन्तरङ्गं तु लीयो भवतीति। किं पुनरिहान्तरङ्गं किं बहिरङ्गम्। यावता द्वे पदे आश्रित्य स
वर्णदीर्घत्वमपि भवत्याद्गुणोऽपि। धातूपसर्गयोर्यत्कार्यं तदन्तरङ्गम्। कुत एतत्। पूर्वं सुपसर्गस्य हि धातुना
योगो भवति नाद्यशब्देन। किमर्थं तर्ह्यद्यशब्दः प्रयुज्यते। अद्यशब्दस्यापि समुदायेन योगो भवति। किमेतस्य
ज्ञापने प्रयोजनम्। प्रयोजनं पूर्वसवर्णपूर्वत्वलहिलोपटेनङेयङि स्मिन्ङिणलोऽलमन्तरङ्गं बहिरङ्गं लक्ष
णाद्गूर्णविकारात्। पूर्वसवर्णः प्रयोजनम्। अग्नी अत्र। वायू अत्र। पूर्वसवर्णश्च प्राप्नोति बहिरङ्गलक्षणश्च वर्ण
विकार आवादेशः। पूर्वसवर्णदीर्घत्वं भवत्यन्तरङ्गतः। पूर्वसवर्ण। पूर्वत्व। शकहूर्थं परिव्यर्थं पूर्वत्वं च प्राप्नो
ति बहिरङ्गलक्षणश्च वर्णविकारः ॥

प्रतिषेधे त्वाश्रीयमाणे सवर्णदीर्घेण सिद्धे रूपे पररूपवचनं ज्ञापकं भवति। नाद्यशब्देनेति। अद्येत्यस्याधारार्थस्याङा संबन्धो नास्ति
क्रियासापेक्षत्वादाधारस्य। अङादिष्ववस्यार्थं तु धातूपसर्गौ पृथगुपादिष्टौ। परमार्थतस्तु धातूपसर्गसमुदायः संग्रामयतिवत्
क्रियाविशेषवाचीति भावः। अग्नी अत्रेति। अग्नि औ अत्रेति स्थिते विचारः। एवं शकहू आ अर्थम्। अकारित अत्र। पचहि इदम्। वृक्ष
आ अत्र। वृक्ष ए अत्र। अग्नि इदम्। यया अ अत्र। वृक्षा अत्रेति। अनुदाहरणमेतदित्याहुः। वृक्ष अस् अ इति स्थिते कृते रुत्वे उत्वस्य
प्राप्तिः। तच्च रुत्वं पूर्वत्रासिद्धमिति पूर्वसवर्णदीर्घे क्रियमाणे असिद्धमुत्वे त्वाश्रयासिद्धं वृक्षोऽत्रेति। ततश्च पूर्वसवर्णदीर्घेणैव पू
र्वभाव्यम्। तत्र कृते अतः परो रुर्न भवतीत्युक्ताभावः ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रतिविधेयमिति। पूर्वोत्तरपदयोर्वृद्धिस्वरावेकादेशादित्यादयो दोषा विप्रतिषेधसूत्र उक्ताः॥ ख्यत्यात्॥ किमिदमिति। किमका
रान्तयोर्ग्रहणमथ कृतयणादेशयोः। आद्ये पक्षे सुख्यापत्यादीनां ग्रहणप्रसङ्ग इति मत्वा प्रश्नः। सखिपत्योरिति। सख्युर्यः पत्युर्न
इति लिङ्गादकारान्तयोर्न ग्रहणमपि तु कृतयणादेशयोः। नसखिपतिभ्यामिति। विकारनिर्देशे क्रियेत तयोः प्रतिपत्तिः। साक्षा
न्निर्देशे तु स्पष्टावगतिः। अतिसखेरिति। अतिक्रान्तः सखा येनेति बहुव्रीहिः। अथवा शोभनः सखा अतिसखा न पूजनादिति समा

सवर्णदीर्घत्वम्। पूर्वत्वं भवत्यन्तरङ्गतः। पूर्वत्व। तर्हि लोप। अकार्यन्न। अहार्यन्न। यथेदम्। तर्हि लोपश्च प्राप्नुतः।
बहिरङ्गलक्षणश्च वर्णविकारः सवर्णदीर्घत्वम्। तर्हि लोपो भवत्यन्तरङ्गतः। तर्हि लोप। टेन। वृक्षेणात्र प्लक्षेणा
त्र। इनादेशश्च प्राप्नोति बहिरङ्गलक्षणश्च वर्णविकारः सवर्णदीर्घत्वम्। इनादेशो भवत्यन्तरङ्गतः। टेना। ङे
र्य। वृक्षायात्र प्लक्षायात्र। ङेर्यादेशश्च प्राप्नोति बहिरङ्गलक्षणश्च वर्णविकारः एङः पदान्तादतीति पररूपत्वम्।
ङेर्यादेशो भवत्यन्तरङ्गतः। ङेर्य। ङिस्मिन्। यस्मिन्निदम्। तस्मिन्निदम्। स्मिन्भावश्च प्राप्नोति बहिरङ्गलक्षणश्च व
र्णविकारः सवर्णदीर्घत्वम्। स्मिन्भावो भवत्यन्तरङ्गतः। ङिस्मिन्। ङिणलौत्वम्। अग्नाविदम्। यथावत्र। ङिणलौ
त्वं प्राप्नोति बहिरङ्गलक्षणश्च वर्णविकारः सवर्णदीर्घत्वम्। औत्वं भवत्यन्तरङ्गतः। नैतानि सन्ति प्रयोजनानि।
विप्रतिषेधेनाप्येतानि सिद्धानि। इदं तर्हि प्रयोजनम्। वृक्षा अत्र। प्लक्षा अत्र। पूर्वसवर्णश्च प्राप्नोति बहिरङ्गल
क्षणश्च वर्णविकारः अतो रोरप्लुतादप्लुत इत्युत्वम्। पूर्वसवर्णो भवत्यन्तरङ्गतः। न चावश्यमिदमेव प्रयोजनम्।
आद्ये योगे बहूनि प्रयोजनानि सन्ति तदर्थमेषा परिभाषा कर्तव्या। प्रतिविधेयं दोषेषु॥ ख्यत्यात्परस्य॥ किमिदं
ख्यत्यादिति। सखिपत्योर्विकृतग्रहणम्। किं पुनः कारणं विकृतयोः सखिपत्योर्ग्रहणं क्रियते। नसखिपतिभ्यामि
त्येवोच्येत। नैवं शक्यम्। गरीयांश्चैव निर्देशः स्यात्। इह च प्रसज्येत। अतिसखेरागच्छति। अतिसखेः स्वम्। इह च न स्यात्॥

सान्तनिषेधः। सखिपतिभ्यामुत्तरयोर्ङसिङसोरुत्वप्रसङ्गः। अथ तु विहितविशेषणपक्ष आश्रीयते सखिपतिभ्यां यौ विहि
तौ ङसिङसाविति तदात्रोत्वप्रसङ्गः। अव्याप्तिस्तु प्रसज्येत तदाह। इह चेति। अतिसखेरित्यत्र। सखेति घिसंज्ञाप्रतिषेधो न भव
ति। गुरुणवा प्रातिपदिकेन तदन्तविधिप्रतिषेधात्। केवलस्यैव सखिशब्दस्य प्रतिषेधविधानात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सखीयतेरिति। विद्यमानं खमस्य सखः तमिच्छत्यात्मन इति क्यच् क्यचि चेतीत्वम्। लून्युरिति। लूनमिच्छतीति क्यच्। अ
त्र पूर्वत्रासिद्धमिति नत्वस्यासिद्धत्वात् स्य शब्दो भवति। अत्र चोदयन्ति। सखीयादिभ्यः क्विपि कृते अल्लोपयलोपयोः स्थानिवद्भावादि
कोयणचीति ईकारस्य यणाभावः स्यात्। तत्र कृते यलोपे स्थानित्वनिषेधादादिष्टादचः पूर्वत्वात् स्थानिव
त्त्वाप्रसङ्गाद् लोपो व्योर्वलीति यलोपप्रसङ्गः। ततश्च सख्युरित्यादिरूपाणि न सिध्यन्ति। नैतदस्ति। क्वौ लुप्तं न स्थानिवदिति स्था
निवत्त्वनिषेधात्॥ अतो॥ किमर्थमिति। प्रकृतिभावविधानाद् ज्ञापकात्त्वरसन्धिप्रकरणे प्लुतस्य सिद्धत्वात् परप्रकरणेनैवउ
त्वं निवारितमिति मत्वा प्रश्नः। असिद्ध इति। प्रकृतिभाव एव सिद्धः प्लुतः। अप्लुतभाविन इति। प्लुतभावित्वादुपचारात्तस्यान्येवाक

सखीयतेरप्रत्ययः। सख्युः। पत्युः ।लूनीयतेरप्रत्ययः। लून्युः। पून्युः॥ अतोरोरप्लुतादप्लुते॥ किमर्थमप्लुतादप्लुत
इत्युच्यते। प्लुतात्परस्य प्लुते वा परतो मा भूत्। प्लुतात्परस्य सुस्रोता अत्र त्वमसि। प्लुते परत स्तिष्ठतु पय आ ३ ग्निदत्त।
अतः अतीत्युच्यते कः प्रसङ्गः प्लुतात्परस्य प्लुते वा परतः स्यात्। असिद्धः प्लुतस्तस्यासिद्धत्वात् प्राप्नोति। अथाप्लुता
दप्लुत इत्युच्यमाने यावता असिद्धः प्लुतः कस्मादेवात्र न प्राप्नोति। अप्लुतभाविनः अप्लुतभाविनीत्येवमेतद्विज्ञाय
ते। नैतदस्ति प्रयोजनम्। सिद्धः प्लुतः स्वरसंधिषु। कथं ज्ञायते। यदयं प्लुतः प्रकृत्येति प्लुतस्य प्रकृतिभावं शास्ति।
सतो हि कार्यिणः कार्येण भवितव्यम्। अप्लुतादप्लुतवचने अकारहशोः समानपदे प्रतिषेधः। अप्लुतादप्लुतवच
ने अकारहशोः समानपदे प्रतिषेधो वक्तव्यः। पयो३ पयोदा नवा बहिरङ्गलक्षणत्वात्। न वा वक्तव्यः। किं कारण
म्। बहिरङ्गलक्षणत्वात्। बहिरङ्गः प्लुतोन्तरङ्गमुत्वम्। असिद्धं बहिरङ्गमुत्तरङ्गे। इहापि तर्हि प्राप्नोति। सुस्रोता अत्र
त्वमसि। अन्तरङ्गोत्र प्लुतः ॥

रः प्लुतशब्देनोच्यत इत्यर्थः। यद्यपि प्रतिषेधोपादानसामर्थ्यात्सिद्धः प्लुत इति परिहारोस्ति तथापि परिहारान्तरसद्भावादेष परि
हारो नाश्रितः। यदयमिति। सामान्येन संहिताधिकारविहितकार्यापेक्षया ज्ञापकमाश्रीयते। अकारहशोरिति। उत्वप्रतिषेधस्य प्रति
षेध इत्यर्थः। तत उत्वे कृते आद्गुणः एङः पदान्तादतीति पूर्वैकादेशः। ततः प्लुतः। पयो ३ डिति। पयः ऽदतीति क्विप्। ततः संबुद्धिः
दूराद्धूते चेत्यकारस्य वाक्यस्य टेः प्लुतभावित्वादुत्वप्रतिषेधप्रसङ्गः। पयोदेति। पयोददातीति कप्रत्ययः। ततः संयो राम: ५१
गपरस्याकारस्य गुरुत्वाद् गुरोरनृतो इति प्लुतभावित्वादप्लुतादिति निषेधाद्यपि चेत्युत्वं न प्राप्नोति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यान्तस्येति। प्लुतो ता इत्यादौ पदान्तरानपेक्षणात् प्लुतोन्तरङ्गः। वाक्यादाविति। वाक्यादौ परतो वाक्यान्तस्येत्यर्थः। उक्त
प्रसङ्गं कथनार्थं चैतत्। उक्तं तु तत्र पदद्वयापेक्षत्वाद्बहिरङ्गम् प्लुत इति। दूराद्धूतादर्थापेक्षत्वात्। किं पुनः कारणमिति। द्वि
विधे सिद्धत्वे संभवति कस्माद्बहिरङ्गासिद्धत्वमुच्यते न तु पूर्वत्रासिद्धत्वमपि। अथाश्रयात्सिद्धत्वेनासिद्धत्वं वाध्यते तथा
बहिरङ्गासिद्धत्वमपि बाध्यतामिति मत्वा प्रश्नः। असिद्ध इति। पूर्वत्रासिद्धमिति वचनात्। आश्रयादिति। अप्लुतादप्लुत इति
प्रतिषेधाश्रयणसामर्थ्यात्पूर्वत्रासिद्धमित्येतदसिद्धत्वं प्रत्यासत्त्या बाध्यते न तु बहिरङ्गासिद्धत्वमौपसंख्यानिकं बाह ऊडित्य

बहिरङ्गमुक्तम्। क्व पुनरिहान्तरङ्गः प्लुतः क्व वा बहिरङ्गमुक्तं प्लुतो वा बहिरङ्गः वाक्यान्तस्य वाक्यादावन्त
रङ्गः प्लुतः। बहिरङ्गमुक्तम्। समानवाक्ये पदान्तस्य पदादावुक्तमन्तरङ्गम्। बहिरङ्गः प्लुतः। किं पुनः कार
णं बहिरङ्गलक्षणमुक्ते हेतुर्व्यपदिश्यते न पुनरसिद्धत्वमपि। यथैव ह्ययं बहिरङ्ग एवमसिद्धोपि। एवं मन्यते
असिद्धः प्लुतः आश्रयात्सिद्धो भवति। अथ वा यस्यां नाप्राप्तायां परिभाषायामुक्तमारभ्यते सा आश्रयात्सिद्धास्या
त्। कस्यां च नाप्राप्तायाम्। असिद्धपरिभाषायाम्। बहिरङ्गपरिभाषायां पुनः प्राप्तायामप्राप्तायां च॥ नान्तःपाद
म्॥ कस्यायं प्रतिषेधः। नान्तःपादमिति सर्वप्रतिषेधः। नान्तःपादमिति सर्वस्यायं प्रतिषेधः। कथम्। अचीति व
र्तते। अचि यत्प्राप्नोति तस्य प्रतिषेधः। नान्तःपादमिति सर्वप्रतिषेधश्चेदतिप्रसङ्गः। नान्तःपद मिति सर्वप्रतिषे
धश्चेदतिप्रसङ्गो भवति। इहापि प्राप्नोति। अन्वग्निरुषसामग्रमख्यत्। एवं तर्ह्यतीति वर्तते। अकाराश्रयं यत्प्रा
प्नोति तस्य प्रतिषेधः। अकाराश्रयमिति चेदुक्तवचनम्। अकाराश्रयमिति चेदुक्तं वक्तव्यम्। कालोऽम्बः शत
धारोऽयं मणिः ॥

तत्रापि तं च विप्रकृष्टत्वात्पयोडित्यादौ तु बहिरङ्गपरिभाषया प्लुतस्यासिद्धत्वापादनात् पूर्वत्रासिद्धमित्यस्याप्रवृत्तावाश्रया
त्सिद्धत्वाभावः। आश्रयात्सिद्धा स्यादिति। तद्विषयस्य प्लुतस्यासिद्धत्वात् सिद्धेरुक्तम्। अनाश्रयणं तु तस्या अत्राभिमतम्॥ अ
नान्तः॥ कस्यायमिति। यद्येङः पदान्तादतीति प्राप्तस्य पूर्वैकादेशस्य प्रतिषेधस्तदा यवौ प्राप्नुत इति प्रश्नः। सर्वप्रतिषेध इति।
शेषमनपेक्ष्य प्रतिषेधविधानात्। अन्वग्निरिति। यणादेशस्यापि प्रतिषेधप्रसङ्गः। आकाराश्रयमिति। अकार एव निमित्तं यस्य
तस्य प्रतिषेधो यणादेशस्त्वज्मात्रनिमित्तो नाकाराश्रय इति न विप्रतिषिध्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ अयवोश्चेति। अयवौ ह्यज्मात्रामुचौ नाकारमुचौ। उत्प्रतिषेध इति। एङ्ग्रहणमिहानुवर्तमानमतोऽरप्लुतादप्लुत इत्यस्मा
५२ दिमनुवर्त्तत इत्येङ्पररूपेऽतस्त्वप्रसङ्गः॥ अवङ्॥ गोरवचनमिति। अव्युत्पत्तिपक्षे गोशब्दः फिषित्यन्तोदात्त इत्योकार
स्यान्तोदात्तस्य स्थानेऽवङ् भवन्नन्तोदात्तः प्राप्नोतीति अभिधेयः। स चागमा अनुदात्तादुत्वनुदात्तः। तेन चौकारस्य पदान्तता

अयवोः प्रतिषेधश्च। अयवोश्च प्रतिषेधो वक्तव्यः। सुजाते अश्वसूनृते अध्वर्यो अद्रिभिः सुतम्। एङ्प्रकरणात्सिद्धम्। एङः अतीति वर्त्तते। एङः अति यत्प्राप्नोति तस्य प्रतिषेधः। एङ्प्रकरणात्सिद्धमिति चेदुत्वप्रतिषेधः। एङ्प्रकरणात्सिद्धमिति चेदुत्वस्य प्रतिषेधो वक्तव्यः। अग्नेरत्र वायोरत्र। अतोऽरप्लुतादप्लुते एङश्चेत्युत्वं प्राप्नोति। पुनरेङ्ग्रहणात्सिद्धम्। पुनरेङ्ग्रहणं कर्त्तव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। प्रकृतमनुवर्तते। ननु चोक्तमेङ्प्रकरणात्सिद्धमिति चेदुत्वप्रतिषेध इति। नैष दोषः। पदान्ताभिसंबद्धमेङ्ग्रहणमनुवर्त्तते। न चैङः पदान्तात्परोऽकरस्ति॥ अवङ्स्फोटायनस्य॥ गोरवचनं गवाग्रे स्वरसिद्ध्यर्थम्। गोरवक्तव्यः। किं प्रयोजनम्। गवाग्रे स्वरसिद्ध्यर्थम्। गवाग्रे स्वरसिद्धिर्यथा स्यात्। गवाग्रम्। अवङादेशे हि स्वरे दोषः। अवङादेशे हि स्वरे दोषः स्यात्। अन्तोदात्तस्यान्तर्यतोऽन्तोदात्त आदेशः प्रसज्येत। कथं पुनरयमन्तोदात्तः। यदा एकाच्। व्यपदेशिवद्भावेन। यथैव तर्हि व्यपदेशिवद्भावेनान्तोदात्त एवमाद्युदात्तोऽपि। तत्रान्तर्यत आद्युदात्तस्याद्युदात्त आदेशः प्रसज्येत। सत्यमेवं तत्। न त्विदं लक्षणमस्ति प्रातिपदिकस्यादिरुदात्तो भवतीति। इदं पुनरस्ति प्रातिपदिकस्यान्त उदात्तो भवतीति। सोऽसौ लक्षणेनान्तोदात्तः तत्रान्तर्यतोऽन्तोदात्तस्यान्तोदात्त आदेशः प्रसज्येत। यदि पुनर्गामेर्डो विधीयते किं कृतं भवति। प्रत्ययाद्युदात्तत्वे कृते आन्तर्यत आद्युदात्तस्याद्युदात्त आदेशो भविष्यति। कथं पुनरयमाद्युदात्तो यदा एकाच्। व्यपदेशिवद्भावेन। यथैव तर्हि व्यपदेशिवद्भावेनाद्युदात्त एवमन्तोदात्तोऽपि। तत्रान्तर्यतोऽन्तोदात्तस्यान्तोदात्त आदेशः प्रसज्येत। सत्यमेवं तत्। न त्विदं न लक्षणमस्ति प्रत्ययस्यान्त उदात्तो भवतीति। इदं पुनरस्ति प्रत्ययस्यादिरुदात्तो भवतीति। सोऽसौ लक्षणेनाद्युदात्तस्तत्रान्तर्यत आद्युदात्तस्याद्युदात्त आदेशो भविष्यति॥

विघातात्। तूर्वैकादेशाभावे अवादेशो भवति। गवाग्रमिति। बहुव्रीहिः। तत्र पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं भवति। तत्पुरुषे तु रा॰स॰
समासान्तोदात्तत्वेन भाव्यम्। यदि पुनरिति। आद्युदात्तशास्त्रविधानप्रवृत्तये व्युत्पत्तिपक्ष आश्रीयत इत्यर्थः॥ ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदपीति। आद्यन्तवदेकस्मिन्निति व्यपदेशाति — देशेत्वदुक्तं स्यात्। यदा त्वनेन कार्यमात्रमुदात्तत्वमसत्येवादित्वेन्तत्वे वा
तिदिश्यते तदौकारस्यादिव्यपदेशाभावः कुतस्तदादेशस्याद्युदात्तत्वम्। उदात्तत्वं चानियतदेशं पर्यायेण स्यादिति पक्षेऽनिश्
स्वरप्रसङ्गः। स निपातनस्वर इति। एकश्रुत्या सूत्रपाठे यत्नेनाप्युदात्तोच्चारणमन्तोदात्तत्वबाधनार्थं विज्ञायते। एवमपीति पर
त्वात्पूर्वं समासान्तोदात्तत्वे सत्यवङ्प्रसङ्ग इत्युपदेशिवद्भावात्पूर्वमवङि सति पश्चात् समासान्तोदात्तत्वं भवति॥ इन्द्रे॥ इ
न्द्रादाविति। इन्द्रशब्द आदिर्यस्य तस्मिन्परत इत्यर्थः। केवले चेन्द्रशब्दे व्यपदेशिवद्भावाद्भवति। व्यपदेशिवद्भावोऽप्रातिप

एतदप्यादेशे नास्ति आदेशस्यादिरुदात्तो भवतीति। प्रकृतितोऽनेन स्वरो लभ्यः। प्रकृतिरस्य यथैवाद्युदात्ता
एवमन्तोदात्तापि। एवं तर्ह्याद्युदात्तनिपातनं करिष्यते। स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति। एव
मप्युपदेशिवद्भावो वक्तव्यः। यथैव निपातनस्वरः प्रकृतिस्वरस्य बाधक एवं समासस्वरस्यापि। गवाक्षि गवाक्षि।
इन्द्रे च॥ इन्द्रादाविति वक्तव्यम्। इहापि यथा स्यात्। गवेन्द्रयज्ञे वीहीति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नैतद्वि
ज्ञायते इन्द्रे चेति। कथं तर्हि। अचि भवति कतरस्मिन्निन्द्रे चेति॥ प्लुतप्रगृह्या अचि नित्यम्॥ नित्यग्रहणं किमर्थ
म्। विभाषा मा भूदिति। नैतदस्ति प्रयोजनम्। पूर्वस्मिन्नेव योगे विभाषाग्रहणं निवृत्तम्। इदं तर्हि प्रयोजनम्। प्लुत
प्रगृह्याणां स विप्रकृतिभाव एव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति। किं चान्यत्प्राप्नोति। शाकलम्। अथाज्ग्र
हणं किमर्थम्। अचि प्रकृतिभावो यथा स्यात्। प्लुतप्रगृह्येष्वज्ग्रहणमनर्थकमधिकारात्सिद्धम्। प्लुतप्रगृह्येष्वज्
ग्रहणमनर्थकम्। किं कारणम्। अधिकारादेव सिद्धम्। अचीति प्रकृतमनुवर्तते। क्व प्रकृतम्। इको यणचीति॥

दिकेनेति तु निषेधः प्रत्ययविधिविषयः। इन्द्रे चेति। इन्द्रशब्दो विशेष्योऽचीति विशेषणम्। सिद्धान्ते त्वज्विशेष्य इन्द्रशब्दो
विशेषणम्। तदादावपि इन्द्रशब्दस्योऽङ्भवतीत्यवङ्सिद्धिः। प्लुतः॥ नित्यग्रहणमिति। इन्द्रे चेति ये सूत्रं पठन्ति प्लुतप्रगृह्या
अचि नित्यमिति तु द्वितीयं तन्मते नैष प्रश्नः। पूर्वस्मिन्नेवेति। इन्द्रे चेत्यत्र। शाकलमिति। ह्रस्वत्वमित्यर्थः। नित्यग्रहणादय
मर्थो लभ्यते। प्लुतप्रगृह्या रूपा एव नित्यं प्रकृतिभावं प्रतिपद्यन्ते न तु रूपान्तरयुक्ता इति। अथवा प्लुतप्रगृह्याणामयमेव प्र
कृतिभावो नित्यं भवति न तु सूत्रान्तरेण कार्यान्तरसहितः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तु तस्मिन्निति। यस्मिन्नच्यादेशो विधीयते तस्मिन्नेवाचि परतः प्लुतप्रगृह्याणां प्रकृतिभावो यथा स्यादित्यर्थः। जानु उ अस्येति।
उञ्निपातः तस्य पूर्वेण सहैकादेशे कर्त्तव्ये अकारस्य निमित्तत्वाभावात्प्रकृतिभावाभावादेकादेशो भवत्येव। तन्मादिवद्भावादे
कादेशः प्रगृह्यः। तस्येको यणादेशः प्रकृतिभावान्न भवति। म य उञो वो वेति पक्षे वकारः। अथ किमर्थमिति। पूर्वत्रासिद्धमिति
प्लुतस्यासिद्धत्वादेकादेशः प्रागेव प्राप्नोतीत्यनर्थकः प्रकृतिभाव इति प्रश्नः। प्लुतप्रकृतिभाववचनमिति। ज्ञापकादस्मात्प्लुतः
सिद्ध इति भावः। न चेति। शालेन्द्रे एकादेशोऽन्तरङ्गः। प्लुतो दूराद्धूतादर्थापेक्षत्वाद्बहिरङ्गः। एवं तु सति देवदत्त अत्र न्वसीति प्लुते

तत्तु तस्मिन्प्रकृतिभावार्थम्। तत्तु द्वितीयमज्ग्रहणं कर्त्तव्यम्। प्रकृतिभावार्थम्। तस्मिन्नचि पूर्वस्य प्रकृतिभा
वो यथा स्यात्। इह माभूत्। जानु उ अस्य रुजति जानू अस्य रुजति जान्वस्य रुजतीति। अथ किमर्थं प्लुतस्य प्रकृतिभा
व उच्यते। स्वरसन्धिर्माभूदिति। उच्यमानेऽप्येतस्मिन्स्वरसन्धिः प्राप्नोति। प्लुते कृते न भविष्यति। असिद्धः प्लुतस्तस्या
सिद्धत्वात्प्राप्नोति। प्लुतप्रकृतिभाववचनं तु ज्ञापकमेकादेशात्प्लुतो विप्रतिषेधेनेति। यदयं प्लुतः प्रकृत्येति प्र
कृतिभावं शास्ति तज्ज्ञापयत्याचार्य्य एकादेशात्प्लुतो भवति विप्रतिषेधेनेति। एकादेशात्प्लुतो विप्रतिषेधेनेति
चेच्छालेन्द्रेऽतिप्रसङ्गः। एकादेशात्प्लुतो विप्रतिषेधेनेति चेत् शालेन्द्रेऽतिप्रसङ्गो भवति। शालायामिन्द्रः शा
लेन्द्रः। न वा बहिरङ्गलक्षणत्वात्। न वातिप्रसङ्गः किं कारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गः प्लुतः। अन्त
रङ्ग एकादेशः। असिद्धं बहिरङ्गमन्तरङ्गे ॥ आङोऽनुनासिकश्छन्दसि ॥ आङोऽनर्थ
स्य। आङोऽनर्थकस्येति वक्तव्यम्। इह माभूत्। इन्द्रो बाहुभ्यामातरत्। न तर्हि वक्तव्यम्। न वक्तव्यम्। बहुल
वचनात्सिद्धं भविष्यति आङोऽनुनासिकश्छन्दसि बहुलम्। इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥ किमर्थश्चकारः। प्र
कृत्येत्येतदनुकृष्यते। किं प्रयोजनम्। स्वरसन्धिर्माभूदिति। नैतदस्ति प्रयोजनम्। ह्रस्ववचनसामर्थ्यान्न भविष्यति॥

कादेशयोर्विप्रतिषेधो नोपपद्यते प्लुतस्यैकपदाश्रयत्वादन्तरङ्गत्वादेकादेशस्य तु पदद्वयाश्रयत्वाद्बहिरङ्गत्वादिति चिन्त्यमेत
त्॥ आङो॥ आङोऽनर्थकस्येति। अभ्र आँ अपः इत्यादौ सप्तम्येव तदर्थस्योक्तत्वादर्थवृत्तिरेवाङनर्थकोऽनर्थान्तरवाचित्वात्। य
था अधिपरी अनर्थकावित्युक्तम्। आ तरदित्यत्र तु क्रियाविशेषणत्वादर्थवानाङ्॥ इको॥ लुटि च क्लृप इत्यत्र प्रत्याख्यानादधि
कारस्यासिद्धत्वात्सर्वचकाराणां प्रत्याख्यानादधिकाराभिव्यक्तये क्रियमाणेऽप्यपि वा चकारेषु ह्रस्वविधानसामर्थ्यात्स्वरसं
ध्यभावस्य सिद्धत्वादनर्थकश्चकार इति मत्वाह। किमर्थ इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेदिति। दीर्घा ह्रस्वाश्चैकः सन्ति। कुमारी अत्र दधि अत्रेति। ह्रस्वश्च दीर्घाणामारभ्यते न ह्रस्वानाम्। स्वत एव ह्रस्वरूपत्वात्। नहि भु
क्तवानिति। भुजेस्तृप्तिफलत्वात्फलाभावात्पुनर्भोजनाप्रवृत्तिः। अनैकान्तिकमेतदित्याह। ननु चेति। सामर्थ्यादिति। फलविशेष
सद्भावादित्यर्थः। प्रीत्यतिशयो भोजनविशेषस्य फलम्। इह तु फलाभावात्प्रवृत्तिर्नास्तीत्यर्थः। स्वरसन्धिर्माभूदिति। यणादेशबा
धनार्थं ह्रस्वस्य ह्रस्वविधानं स्वरूप प्रत्यापत्त्यर्थं किमित्यर्थः। अग्निर्दग्धं न दहति अयोग्यत्वादिति नासौ दृष्टान्त उपादेयः।

भवेद्दीर्घाणां ह्रस्ववचनसामर्थ्यात्स्वरसन्धिर्न स्याद् ह्रस्वानां तु खलु स्वरसन्धिः प्राप्नोति। ह्रस्वानामपि ह्रस्ववच
नसामर्थ्यात्स्वरसन्धिर्न भविष्यति। न ह्रस्वानां ह्रस्वाः प्राप्नुवन्ति। नहि भुक्तवान्पुनर्भुङ्क्ते। न च कृतश्मश्रुः पुनः
श्मश्रूणि कारयति। ननु च पुनः प्रवृत्तिरपि दृष्टा। भुक्तवानपि पुनर्भुङ्क्ते। कृतश्मश्रुरपि पुनः श्मश्रूणि कारयति। सा
मर्थ्यात्तत्र पुनः प्रवृत्तिर्भवति भोजनविशेषात् शिल्पिविशेषाद्वा। ह्रस्वानां पुनर्ह्रस्ववचनेन किंचित् प्रयोजनम
स्ति। अकृतकारि खल्वपि शास्त्रमग्निवत्। तद्यथा। अग्निर्यददग्धं तद्दहति। ह्रस्वानामपि ह्रस्ववचन एतत् प्र
योजनं स्वरसन्धिर्माभूदिति। कृतकारि खल्वपि शास्त्रं पर्जन्यवत्। तद्यथा। पर्जन्यो यावदूनं पूर्णं च सर्वं चाभि
वर्षति। इदं तर्हि प्रयोजनम्। प्लुतप्रगृह्या अनुकृष्यन्ते। इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च। प्लुतप्रगृह्याश्च प्रकृत्या।
नित्यग्रहणस्याप्येतत् प्रयोजनम्। अन्यतरच्छक्यमवक्तुम्। सिन्नित्यसमासयोः शाकलप्रतिषेधः॥ सिन्नित्य
समासयोः शाकलप्रतिषेधो वक्तव्यः। अयं ते योनिर्ऋत्वियः। प्रजां विन्दाम ऋत्वियाम्। वैयाकरणः। सौवश्वः॥ नि
त्यग्रहणेन नार्थः। सित्समासयोः शाकलं न भवतीत्येवेदमपि सिद्धं भवति। वाप्याम् अश्वो वाप्यश्वः। नद्यामातिर्न
द्यातिः। ईषा अक्षादिषु छन्दसि प्रकृतिभावमात्रम्। ईषा अक्षादिषु च छन्दसि प्रकृतिभावमात्रं द्रष्टव्यम्। ईषा अ
क्षः का ईमिरे पिशंगिला। यथा अङ्गदः॥ ऋत्यकः॥ किमर्थमिदमुच्यते। ऋत्यकः सवर्णार्थः। सवर्णार्थोऽयमारम्भः।
होतृ ऋश्यः। अनिगन्तार्थं च। खट्व ऋश्यः। माल ऋश्यः। ऋति ह्रस्वादुपसर्गाद्वृद्धिर्विप्रतिषेधेन ॥

इहापि पुनर्नेदुर्लभो दृष्टान्त इत्याह। कृतकारीति। सिन्नित्यसमासयोरिति। नित्याधिकारविहितः समासो नित्यसमासः। यो
वाऽविग्रहाभावादस्वपदविग्रहत्वान्नित्यः समासः सोऽपि नित्यसमासः। वैयाकरणः सौवश्व इति। प्रदेशान्तरपाठात्प्रयेणैवं पठितम्।
व्याकरणं स्वश्व इत्येतावदप्यत्रोदाहरणं संभवति। वाप्यश्व इति। सुप्सुपेति समासः। संज्ञायामिति तु समासस्य नित्यत्वात्सिद्धः प्रतिषेधः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्लुत॥अनार्षइति।पदस्येयत्तापरिज्ञानायस्वरूपेऽवस्थापनार्थइति: प्रयुज्यतइत्यर्थः।अथेति।प्लुतस्याश्रवणेननभाव्यमि तिप्लुतएवनिषिध्यतांकिमतिदेशार्थेनवद्वचनेनेतिभावः।अग्नीइति।अत्रप्लुताश्रयोऽपिप्रकृतिभावःप्राप्नोतिप्रगृह्याश्रयोऽपित त्रप्लुताश्रयेप्रतिषिद्धेऽपिप्रगृह्याश्रयप्रकृतिभावात् प्लुतस्याश्रवणंसिध्यति।प्लुतस्यतुनिषेधेक्रियमाणेश्रवणंनस्यात्॥ईचाक्र॥

ऋतिह्रस्वोभवतीत्येतस्मादुपसर्गाद्दृद्धिर्भवतिविप्रतिषेधेन।ऋतिह्रस्वोभवतीत्येतस्यावकाशः।खट्वऋ श्यः।मालऋश्यः।उपसर्गाद्दृद्धेरवकाशः।विभाषाह्रस्वत्वम्।यदानह्रस्वत्वंसोऽवकाशः।ह्रस्वप्रसङ्गेउभयंप्रा प्नोति।उपार्ध्नोतिप्रार्ध्नोति।उपसर्गाद्दृद्धिर्भवतिविप्रतिषेधेन।सतर्हिविप्रतिषेधोवक्तव्यः।नवक्तव्यः।उक्तंतत्र धातुग्रहणस्यप्रयोजनम्।उपसर्गादृतिधातौवृद्धिरेवयथास्याद्यदन्यत्प्राप्नोतितन्माभूदिति॥अप्लुतवदु पस्थिते॥उपस्थितेइत्युच्यते।किमिदमुपस्थितंनाम।अनार्षइतिकरणः।सुश्लोकइति।सुश्लोकेति।अथव द्वचनंकिमर्थम्।वद्वचनंप्लुतकार्यप्रतिषेधार्थम्।वद्वचनंक्रियते।प्लुतकार्यप्रतिषेधार्थम्।प्लुतकार्यंप्रति षिध्यते।त्रिमात्रतानप्रतिषिध्यते।किंचेदानींत्रिमात्रतायाअप्रतिषेधेप्रयोजनंयावताप्लुतकार्येप्रतिषिद्धे स्वरसन्धिनाभवितव्यम्।प्लुतप्रतिषेधेहिप्रगृह्यप्लुतप्रतिषेधप्रसङ्गोऽन्येनविहितत्वात्।प्लुतप्रतिषेधेहिस तिप्रगृह्यस्यापिप्लुतस्यत्रिमात्रतायाःप्रतिषेधःप्रसज्येत।अग्नीइति।वायूइति।किंचेदानींतस्याअपित्रिमात्र तायाअप्रतिषेधेप्रयोजनंयावताप्लुतकार्येप्रतिषिद्धेस्वरसन्धिनाभवितव्यम्।नभवितव्यम्।किंकारणम्।अ न्येनविहितत्वात्।अन्येनहिलक्षणेनप्लुतप्रगृह्यस्यप्रकृतिभावउच्यते।प्रगृह्याःप्रकृत्येति॥ईचाक्रवर्मणस्य॥ किमर्थमिदमुच्यते।ईचाक्रवर्मणस्येत्यनुपस्थितार्थम्।अनुपस्थितार्थोऽयमारम्भः।चिनुहीरइदम्।चिनुहीदम्।सु नुहीरइदम्।सुनुहीदम्।ईकारग्रहणेननार्थः।अविशेषेणचाक्रवर्मणस्याचार्यस्यप्लुतवद्भवतीत्येव।इदमपिसिद्धं भवति।वशाइइयंवशेयम् ॥

ईइतित्रिमात्रस्यनिर्देशः।किमर्थमिति।किमुपस्थितग्रहणानुवृत्त्याप्राप्तविभाषेयम्।अथतन्निवृत्त्यापूर्वविप्रतिषेधादप्रा प्तविभाषा।अथपरविप्रतिषेधादुभयतोविभाषेतिप्रश्नः।अनुपस्थितार्थमिति।उभयत्रविभाषेयंपरविप्रतिषेधस्यान्याय्यत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवउत्॥ऊठिकृतइति।द्युभ्यामित्यादौपरत्वादूठिकृतेपुनःप्रसङ्गविज्ञानादुत्वंक्रियते।ऊड्विधौतुङ्कितीतिनानुवर्त्ततंइ
तिपक्षमाश्रित्येदमुक्तम्।ननुभाव्यमानत्वादुकारोभिन्नकालंनग्रहीष्यतीतिनार्थस्तकारेणएवंतर्हितपरत्वमेवज्ञापकं
भाव्यमानोप्युकारोभिन्नकालंसवर्णंगृह्णातीति।तेनाद्यूभ्यामित्यादौदीर्घस्यदीर्घोभवति॥सुट्कात्॥वक्ष्यमाणैःसूत्रैःकका
रादेरेवधातोःसुड्विधीयतइतिइच्छति।कात्पूर्वग्रहणमिति।अथवाधातूपसर्गयोःकार्यमन्तरङ्गमित्यडभ्यासाभ्यांपूर्वमे

दिवउत्।किमर्थस्तकारः।तपरस्तत्कालस्येतितत्कालोयथास्यात्।नैतदस्तिप्रयोजनम्।आन्तर्यतोर्द्धमा
त्रिकस्यव्यञ्जनस्यमात्रिकउकारोभविष्यति।नसिद्ध्यति।ऊठिकृतेआन्तर्यतोदीर्घस्यदीर्घःप्राप्नोतितदर्थं
तपरःकृतः।एवमर्थंतपरःक्रियते॥सुट्कात्पूर्वः॥कात्पूर्वग्रहणंकिमर्थम्।कात्पूर्वोयथास्यात्।संस्कर्त्ता।सं
स्कर्तुम्।नैतदस्तिप्रयोजनम्।सुडित्यादिलिङ्गोयंक्रियते।करोतिश्चककारादिः।तत्रान्तरेणकात्पूर्वग्रह
णंकात्पूर्वएवभविष्यतीति।अतउत्तरंपठति।सुटिकात्पूर्ववचनमककारादौकात्पूर्वार्थम्।सुटिकात्पू
र्ववचनंक्रियते।अककारादौकरोतौकात्पूर्वोयथास्यात्।संचस्करतुः।संचस्करुः।सुटिकात्पूर्ववचन
मककारादौकात्पूर्वार्थमितिचेदन्तरेणापितत्सिद्धम्।सुटिकात्पूर्ववचनमककारादौकात्पूर्वार्थमि
तिचेदन्तरेणापिकात्पूर्वग्रहणंसिद्धम्॥कथम्।द्विर्वचनात्सुड्विप्रतिषेधेन॥द्विर्वचनंक्रियतांसुडिति।
सुड्भविष्यतिविप्रतिषेधेन।तत्रद्विर्वचनंभवतीत्यस्यावकाशः।बिभिदतुः।बिभिदुः।सुटोवकाशः।सं
स्कर्त्ता।संस्कर्तुम्।इहोभयंप्राप्नोति।संचस्करतुः।संचस्करुरिति।सुड्भवतिविप्रतिषेधेन।द्विर्वचना
त्सुड्विप्रतिषेधेनेतिचेद्द्विर्भूतेशब्दान्तरभावात्पुनःप्रसङ्गः ॥

वसुड्भविष्यतिसचटित्वात्पूर्वइतिप्रश्नः।अथवावक्ष्यमाणानेकप्रयोजनसंभवेतद्विशेषज्ञानायप्रश्नः।आदिलिङ्गइ
ति।आदिलिङ्गमस्यास्तीत्यकारोमत्वर्थीयः।सुटिकात्पूर्ववचनमिति।अडभ्यासयोरन्तरङ्गत्वंमन्यते।द्विर्वचनात्सुडिति।
अन्तरङ्गबहिरङ्गभावमनपेक्ष्यविप्रतिषेधउच्यते।तत्रसुटिकृतेपुनःप्रसङ्गविज्ञानात्स्कृशब्दस्यद्विर्वचनेशर्पूर्वाःखय
इतिखयःशेषेसिद्धंरूपम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दान्तरस्येति। स्थानेद्विर्वचने शब्दान्तरत्वम् । व्यक्तौ पदार्थे चक्रकदोषानवतारः। सकृद्गतौ विप्रतिषेध इति सुटि कृते द्विर्वचनात् प्रसङ्गात् तस्मादाकृतिपक्षे पुनः प्रसङ्ग विज्ञानात् सुटि कृते द्विर्वचनमिति व्यक्त्यन्तरेपि जातिसद्भावात्तद्वारेण पुनः कार्यप्रवृत्त्या चक्रकदोषापत्तिः। सकृत्प्रवृत्तस्यैव लक्षणस्य चरितार्थत्वमाश्रित्य परिहारः। चक्रमिव विपरिवर्त्तनात् चक्रकम्। इवार्थे संज्ञायामिति कन् प्रत्ययः। पुनर्द्विर्वचनप्रसङ्ग इत्यनभ्यासस्येत्यस्य प्रत्याख्यानादुच्यते। अथवा साभ्यासाद्यः प्रत्ययो विधीयते तत्रानभ्यासस्येति प्रतिषेधः। अड्व्यवाय इति। अडभ्यासव्यवायेपीति सूत्रस्यापाठे वार्त्तिकप्रवृत्तिः। परत्वाद्धि करणान्तस्याडागमे कृते तेन व्यवधानात्समेनन्तरः करोतिर्न भवतीति वचनम्। अभ्यासव्यवाये चेति। नाप्राप्तः सुडुपसंख्यायते अपितु प्राप्त एव वचनेन देशविशेषे व

द्विर्वचनात्सुड्विप्रतिषेधेनेति चेद्विर्भूते शब्दान्तरस्याकृतः सुडिति पुनः सुट् स्यात्। द्विर्भूते शब्दान्तरभावात्पुनः प्रसङ्ग इति चेद्द्विर्वचनम्। सुटि कृते शब्दान्तरस्याकृतं द्विर्वचनमिति पुनर्द्विर्वचनं प्राप्नोति। तथा चानवस्था। पुनः सुट् पुनर्द्विर्वचनमिति चक्रकमनवस्था प्रसज्येत। नास्ति चक्रकप्रसङ्गः। नह्यनवस्थाकारिणा शास्त्रेण भवितव्यम्। शास्त्रतो हि नाम व्यवस्था। तत्र सुटि कृते द्विर्वचनं द्विर्वचनेनावस्थानं भविष्यति। अड्व्यवाय उपसंख्यानम्॥ अड्व्यवाये उपसंख्यानं कर्तव्यम्। समस्करोत्। समस्कार्षीत्॥ अभ्यासव्यवाये च॥ अभ्यासव्यवाये चोपसंख्यानं कर्तव्यम्। संचस्करतुः। संचस्करुः। किमुच्यते अभ्यासव्यवाय इति। यदिदानीमेवोक्तं द्विर्वचनात्सुड्विप्रतिषेधेनेति। अविप्रतिषेधो वा बहिरङ्गलक्षणत्वात्सुटः। अविप्रतिषेधो वा पुनः सुटः। किं कारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गलक्षणः सुट्। अन्तरङ्गं द्विर्वचनम्। असिद्धं बहिरङ्गमन्तरङ्गे। एवमर्थमेव तर्हि कात्पूर्वग्रहणं कर्तव्यम्। कात्पूर्वो यथा स्यात्। क्रियमाणेपि कात्पूर्वग्रहणेऽत्र न सिध्यति। किं कारणम्। नह्ययं कात्पूर्वग्रहणेन शक्यो मध्ये प्रवेशयितुम्। किं कारणम्। आदिलिङ्गोयं क्रियते। करोतिश्च ककारादिः॥

स्याप्यते। अविप्रतिषेध इति। पदद्वयाश्रयत्वात्सुड्बहिरङ्गः। एकपदाश्रयत्वात्तु द्विर्वचनमन्तरङ्गमिति तुल्यबलत्वाभावाद्विप्रतिषेधाभावः। एवमर्थमिति। अन्तरङ्गत्वाद्द्विर्वचने कृते परत्वादन्तरङ्गत्वाद्वाडागमे मध्यानुप्रवेशार्थं सुटः कात्पूर्वग्रहणम्। कालावधारणार्थं वा। करोतेः कादित्वावस्थायामेव सुड् भवति। कृते सुड्ड्डु द्विर्वचने भवतः। क्रियमाणेपीति। परत्वान्तरङ्गत्वाभ्यामड्द्विर्वचनयोः कृतयोः स्थितत्वात्सुटो मध्ये अनुप्रवेशाभावः। करोतिश्चेति। संस्कर्त्तेत्यादौ। ततश्चात्रैव स्यात्। अड्द्विर्वचनयोस्तु कृतयोः स्थितत्वात्कात्पूर्वग्रहणाच्च विरुद्धदेशसमर्पणादप्रवृत्तिरेव सुटः स्यात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इष्टश्चेति। अड्भ्यासवानित्यर्थः। सहि स्थानिवद्भावादातिदेशिकः। अनागमकानां सागमका आदेशाद् इत्यडागमे युक्तो व्याति
देशिकस्ततश्च कात्पूर्वग्रहणात्ककारादेरेव स्यात् नल भ्यासवत इत्यर्थः। सुड्विधौ द्वैतमिति। कात्पूर्वग्रहणमडभ्यासव्य
वायनिवृत्त्यर्थं वा स्यात् प्राप्त्यर्थं वेति पक्षद्वयसंभवः। अविशेषेणेति। कालविशेषानङ्गीकरणमविशेषः। तस्मिन्करोतौ सु
ड् भवति यत्र भवन् कात्पूर्वो भवतीत्यडभ्यासविषये निवृत्त्यर्थं कात्पूर्वग्रहणं भवति। विशेषेण वेति। यत्रानेकलक्षणसंनि
पाताभावस्तत्रानर्थकं कात्पूर्वग्रहणं कालावधारणार्थं विज्ञायते कात्पूर्वः सुट् कर्तव्यः कार्यान्तराच्च प्राग्भवन्कात्पूर्वः कृतो
भवति। तद्यदा द्विःप्रयोग इति। उच्चारणक्रियाभेदाच्छब्दो भिद्यत इत्यभ्यासेन परस्य ककारादेरूपस्य व्यवधानात्तं परि

इष्टश्च पुनरातिदेशिकः करोतिरककारादिः। पाक्षिक एष दोषः। कतरस्मिन्पक्षे। सुड्विधौ द्वैतं भवति। अविशे
षेण वा विहितस्य सुटः कात्पूर्वग्रहणं देशप्रक्लृप्त्यर्थं स्यात्। विशेषेण वा विधिरिति। द्विर्वचनविषये चापि द्वै
तं भवति। स्थाने द्विर्वचनं स्याद् द्विःप्रयोगो वा द्विर्वचनमिति। तद्यदा द्विःप्रयोगो द्विर्वचनमविशेषेण विहित
स्य सुटः कात्पूर्वग्रहणं देशप्रक्लृप्त्यर्थं तदैष दोषः। यदा हि स्थाने द्विर्वचनं तदा यद्यविशेषेण विहितस्य सुटः का
त्पूर्वग्रहणं देशप्रक्लृप्त्यर्थम्। अथापि विशेषविधिर्न तदा दोषो भवति। द्विःप्रयोगे चापि द्विर्वचने न दोषः। संपरि
भ्यामिति नैषा पञ्चमी। का तर्हि। तृतीया। संपरिभ्यामुपसृष्टस्येति व्यवहितस्याप्युपसृष्टो भवति॥ उपदेशिव
द्वचनं च॥ उपदेशिवद्भावश्च वक्तव्यः। किं प्रयोजनम् ॥

भ्यामुत्तरोऽनन्तरः करोतिः ककारादिर्न भवतीति सुटोऽप्रसङ्गः। यदा तु कालावधारणार्थं कात्पूर्वग्रहणं तदा विशेषविधि
र्भवतीत्यकृत एव द्विर्वचने सुट् क्रियत इति न दोषः। स्थाने द्विर्वचने स्थानिवद्भावादेक एव करोतिः स चाव्यवहित इति
च कारात्पूर्वः सुट् प्राप्तः कात्पूर्वग्रहणेन ककारात्पूर्वः क्रियत इति दोषाभावः॥ विशेषविधाने तु पूर्वमेव सुट् क्रियत इति प
क्षद्वयेऽपि दोषाभावः। उपसृष्ट इति। संबद्ध इत्यर्थः। द्विःप्रयोगे च द्विर्वचने द्वयोः साधारणोऽर्थ इति द्वावप्यर्थवन्ताविति
परस्यरूपस्यार्थद्वारक उपसर्गसंबन्धो न विरुध्यते। समुदायस्य त्वर्थवत्तामाश्रित्य वक्ष्यते। विसुषापेति केन न अनर्थ
क इति। उपदेशिवद्वचनं चेति। अन्यथा पदद्वयाश्रयत्वात्सुटो बहिरङ्गत्वादसिद्धत्वाल्लिटि गुणो न स्यात्। चङि च दीर्घो
लघोरिति दीर्घप्रसङ्गः। संयोगोपधग्रहणमिति। ततो वचनेनासिद्धत्वं बाध्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ पदमिति। अनेनपदद्वयाश्रयत्वंसुटोनिवार्यते। अनुत्पन्नएवतिङि सुधातूपसर्गसंबन्धेसुटाभाव्यमित्यर्थः। कृ
५६ रोतिनाचेहतदादिविधिर्नास्ति। विशेष्यस्यासंनिधानात्। अतःकृकमीत्यत्रसमासाधिकारात्समासेनाश्लिष्टमुत्तरपदं
कृशब्देनविशेष्यतइतिभवति तदादिविधिः। अनिगन्तोऽञ्चतौवप्रत्ययइत्यत्रवप्रत्ययग्रहणेनज्ञापितंधातुनाविशेष
णेनतदादिविधिर्भवतीति। युक्तमिति। यद्युक्तंतदेवदर्शनमर्हतीतितदेवाश्रयणीयमित्यर्थः। पूर्वंहिधातुरिति। विशि
ष्टक्रियासाधनेनार्थलाभायसंबध्यतइतिपूर्वंविशेषणेनयुज्यतइत्यर्थः। इतरोलब्धस्वरूपांक्रियांविशेषणमाका

लिटिगुणचङिदीर्घप्रतिषेधार्थम्। लिटिगुणार्थंतावत्। संचस्करतुः। संचस्करुः। चङिदीर्घप्रतिषेधा
र्थंच। समचिस्करत्। लिटिगुणार्थेनतावन्नार्थः। वक्ष्यत्येतत्संयोगादेर्गुणविधानेसंयोगोपधग्रहणंकृ
ञर्थमिति। चङिदीर्घप्रतिषेधेनापिनार्थः। पदमितीयंभगवतःकृत्रिमासंज्ञा। युक्तमिहद्रष्टव्यंकिमन्त
रङ्गंकिंबहिरङ्गमिति। धातूपसर्गयोःकार्यंयत्तदन्तरङ्गम्। कुतएतत्। पूर्वंधातुरुपसर्गेणयुज्यतेप
श्चात्साधनेनेति। नैतत्सारम्। पूर्वंधातुःसाधनेनयुज्यतेपश्चादुपसर्गेण। साधनंहिक्रियांनिर्वर्तयति।
तामुपसर्गोविशिनष्टि। अभिनिर्वृत्तस्यचार्थस्योपसर्गेणविशेषःशक्योवक्तुम्। सत्यमेवमेतत्। यस्त्वसौ
धातूपसर्गयोरभिसंबन्धस्तमभ्यन्तरंकृत्वाधातुःसाधनेनयुज्यते। अवश्यंचैतदेवंविज्ञेयम्। योहिम
न्यतेपूर्वंधातुःसाधनेनयुज्यतेपश्चादुपसर्गेणेति। तस्यास्यतेगुरुणेत्यकर्मकः। उपास्यतेगुरुरितिकेनस
कर्मकःस्यात्। एवंचकृत्वासुट्सर्वतोऽन्तरङ्गतरकोभवति। कात्पूर्वग्रहणंचापिशक्यमकर्तुम्। यदिपुनर
यंसुट्कात्पूर्वोऽन्तःक्रियते। कात्पूर्वान्तइतिचेद्द्विविधिप्रतिषेधः। कात्पूर्वान्त इतिचेद्गुरुःकश्चिद्विधेयः।
कश्चित्प्रतिषेध्यः। संस्कर्ता समोविधेयः। सुटःप्रतिषेध्यः। समस्तावन्नविधेयः ॥

ङ्क्षतीतिमत्वाह। नैतदिति। इतरोविशिष्टाक्रियासाधनेनसाध्यतेनतुसाधनाल्लब्धस्वरूपान्यतोविशेषंलभतइतिमत्वा
बुद्धिनिरूपितविशिष्टसाध्यभाविसाधनसंबन्धाश्रयेणाह। सत्यमिति। सर्वतइति। धातुसंज्ञायाअपीत्यर्थः। यस्माद्धातू
पसर्गसमुदायेनविशिष्टक्रियाप्रतिपाद्यते। अडादिव्यवस्थार्थंतुपश्चाद्धातूपसर्गप्रकल्पनम्। तत्रसंकृशब्देव्यवस्थि
तएवसुड्भवति पश्चात्समुदायावयवस्यतेनार्थेनार्थवतोधातुसंज्ञा। यदिपुनरिति। सुगितिककारानुबन्धंकृत्वेत्यर्थः। ताम:
संस्कर्तेति। समःसुकीत्युच्यमानेसंभक्तत्वात्सुकःपौर्वापर्याभावान्मकारस्यरुत्वंनप्राप्नोति। सुकस्तुपदान्तत्वादुत्वप्रसङ्गः। ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपुंकानामिति। एतच्च यथान्यासेऽपि वक्तव्यमिति भावः। सुटि सकारादाविति। यथान्यासमाश्रयेणैतदुच्यते। सुकि सकारादाविति तु वक्तव्यं तत्र सकारादित्वविशेषणानर्थक्यानुपपत्त्या सुको हलाभावः। पौर्वापर्यं च श्रुतिकृतमाश्रयिष्यते। अभक्त इति। टकारोऽनुबन्धो न करिष्यते। स्वरेण सिद्ध्यतीति। स्वरविधौ व्यञ्जनमविद्यमानवदिति परिभाषा नास्ति। कथं तर्हि हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवदिति। तदेवमभक्तपक्षे स्वरदोषप्रसङ्गात् परादिः सुट् क्रियते। इकुणयोश्च प्रतिषेधो वक्तव्य एव। अथवा एकाचउपदेशेऽनुदात्तादित्यत उपदेशग्रहणमृतश्च संयोगादेरित्यत्रानुवर्तते। तेनोपदेशे सं

वस्यत्येतत् संपुंकानां सत्वं रुत्वविधौ ह्यनिष्टप्रसङ्ग इति। सुट्श्चायं न प्रतिषेधः। समः सुटीति द्विसकारको निर्देशः। सुटि सकारादाविति। अथवा परादिः क्रियते। परादाविङ्गुणप्रसङ्गः। यदि परादिः इङ्गुणौ प्राप्नुतः। संस्कृषीष्ट। ऋतश्च संयोगादेरितीट् प्राप्नोति। संस्क्रियते। गुणोऽर्तिसंयोगाद्योरिति गुणः प्राप्नोति। एवं तर्ह्यभक्तः करिष्यते। अभक्ते स्वरः। यद्यभक्तः स्वरेण सिध्यति। संस्करोति। तिङ्ङतिङ इति निघातो न प्राप्नोति। ननु चात्र सुडेवातिङ्। न सुटः परस्य निघातेन भवितव्यम्। किं कारणम्। नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः। नञ्युक्तमिवयुक्तं चान्यस्मिन् सदृशे कार्यं विज्ञायते। तथा ह्यर्थो गम्यते। तद्यथा। अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं क्षत्रियमानयति। नासौ लोष्टमानीय कृती भवति। एवमिहापि अतिङि तिप्रतिषेधादन्यस्मादतिङस्तिङ्सदृशात् कार्यं विज्ञास्यते। किं चान्यदतिङ् तिङ्सदृशम्। पदम्॥

अपाच्चतुष्पाच्छकुनिष्वालेखने॥ किरतेर्हर्षजीविकाकुलायकरणेषु॥ किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्यम्। अपस्किरते वृषो हृष्टः। अपस्किरते कुक्कुटो भक्षार्थी। अपस्किरते श्वा आश्रयार्थी ॥

योगादेरिड्विधानात् सुटि कृते न भविष्यति। गुणोऽर्तिसंयोगाद्योरित्यत्रापि नित्यं छन्दसीत्यतो नित्यग्रहणानुवृत्त्या नित्यसंयोगादित्त्वस्य गुणविधानात् सुटि कृते संयोगादेर्गुणाभावः॥ अपा॥ किरतेरिति। हर्षादय एवोपाधय उपादातव्याः न च चतुष्पाच्छकुनयः। तथा चात्मनेपदविधौ हर्षादय एवोपात्ता न चतुष्पाच्छकुनयः। न चातिप्रसङ्गो विशिष्टहर्षादिविषयत्वात् सुडात्मनेपदयोः प्रयुक्तानां शब्दानां साधुत्वान्वाख्यानात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अपरस्वराः॥ किमिदमिति। मकारलोपलक्षणानुपलम्भान्निपातनाश्रयेणेन बाधकत्वान्निपातनानां संततशब्दस्य बाधप्रसङ्गात् प्रश्नः। इतरो लक्षणान्तरं शब्दान्तरसिद्ध्यर्थमवश्याश्रयितव्यमिति मन्यमान आह। समोहिततततयोर्वेति। अव्ययविकल्पाश्रयेण तु संततस्य भाव इति वाक्यमेव भवति न तु ष्यञिति सांतत्यमिति न भवति। संहितापां समासे चैषां मकारलोप इष्यते नान्यत्रेत्याहुः॥ गोष्पदम्॥ सेवितप्रसङ्ग इति। यत्र सेवनं संभवति तत्रैव स्यात्। यत्र तु गवामत्यन्तमसंभवस्तत्र न स्यात्। असेवितग्रहणसामर्थ्यात्तु बहुव्रीहिराश्रीयते। तेन यत्र गवामत्यन्तमसंभवस्तत्रैवा गोष्पदशब्दः प्रयोक्तव्यो न तु सेवितप्रसङ्ग इति केचिदाहुः। अन्ये त्वविशेषेणा गोष्पदशब्दप्रयोगमिच्छन्ति। असेविते गोष्पदशब्दस्यासंभवाद् गोष्पदशब्दार्थमसेवित

अपरस्वराः क्रियासातत्ये॥ किमिदं सातत्यमिति। संततस्य भावः सातत्यम्। यद्येवं सांतत्ये इति भवितव्यम्। समोहिततततयोर्वा लोपः। समोहिततततयोर्वा लोपो वक्तव्यः। संहितम्। सहितम्। संततम्। सततम्। समस्तुमुनः कामे लोपो वक्तव्यः। सकामः। भोक्तुकामः॥ मनसि च। मनसि चेति वक्तव्यम्। समनाः। भोक्तुमनाः। अवश्यमः कृत्ये लोपो वक्तव्यः। अवश्यभाव्यम्॥ गोष्पदं सेवितासेवितप्रमाणेषु॥ इदमतिबहु क्रियते। सेवितासेवितप्रमाण इति। सेवितप्रमाणयोरित्येव सिद्धम्। केनेदानीमसेविते भविष्यति। नञासेवितप्रतिषेधे विज्ञास्यामः। नैवं शक्यम्। सेवितप्रसङ्ग एव स्यात्। असेविते न स्यात्। असेवितग्रहणे पुनः क्रियमाणे बहुव्रीहिरयं विज्ञास्यते। अविद्यमानसेविते असेवित इति। तस्मादसेवितग्रहणं कर्तव्यम्। विष्किरः शकुनौ विकिरो वेति वक्तव्यम्। शकुनौ वेत्युच्यमाने शकुनौ वा स्यादन्यत्रापि नित्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम् ॥

ग्रहणम्। इह प्रमाणे गोष्पदशब्दो निपात्यते। यदा वर्षादेः परिच्छेदः प्रतिपाद्यते गोष्पदपूरं वृष्टो देवः। गोष्पदमात्रं क्षेत्रमिति नात्र गोष्पदं स्वार्थमुपादीयते। यथा चेलक्नोपं वृष्टो देव इत्यसत्यपि चेलक्नोपे प्रयुज्यते तथा गोष्पदपूरं वृष्टो देव इत्यसत्यपि पादपूरणे॥ विष्किरः॥ विष्किरः शकुनौ वेति सूत्रपाठमाश्रित्य वार्तिकारम्भः। शकुनौ वा स्यादिति। इह सिद्धस्य शब्दस्य विकल्पेनाभिसंबन्धो नास्ति यथा मेध्यः पशुर्विभाषित इति। नात्र पशुत्वं विकल्प्यते किं तर्ह्यालम्भनम्। ततश्चाधिकरण विकल्पः प्राप्नोतीति भावः। यदि तर्ह्यन्यत्रापि स्यात् किमर्थं शकुनिग्रहणमिति चेत् तत्तुल्यजातीयप्रतिपत्त्यर्थं स्यात्। शकुनौ वा भवति तत्तुल्यजातीये चान्यस्मिन्नर्थ इति ॥

CC-0. In Public Domain. Digitization by eGangotri

नवावचनेनेति। सुटोभावो विकल्प्यत इत्यर्थः। आश्चर्यमा। आश्चर्यमद्भुत इति। अद्भुतं विस्मयहेतुः। अनित्य इत्येवेति। निपातनाच्चानित्यविशेषो विस्मयहेतुर्गृह्यते। सा चानित्येति। वृक्षान्तरे तथाविधाया उच्चताया अदर्शनात्। नीलतेति। सा च सदादिविन दृश्यत इत्यनित्यता। पतनक्रियेति। नञर्थयुक्तेति भावः। अबन्धनस्यान्यस्य पतनं न दृश्यत इत्यनित्यम्॥ मस्क

नवावचनेन न शकुनिरभिसंबध्यते। किं तर्हि निपातनमभिसंबध्यते। विष्किर इत्येतन्निपातनम्। शकुनौ वा निपात्यत इति॥ आश्चर्यमनित्ये॥ आश्चर्यमद्भुत इति वक्तव्यम्। इहापि यथा स्यात्। आश्चर्यमुच्चता वृक्षस्य। आश्चर्यं नीला द्यौः। आश्चर्यमन्तरिक्षे अबन्धनानि नक्षत्राणि न पतन्तीति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। अनित्य इत्येव सिद्धम्। इह तावदाश्चर्यमुच्चता वृक्षस्येत्याश्चर्यग्रहणेन न वृक्षोऽभिसंबध्यते। किं तर्हि। उच्चता। सा चानित्या। आश्चर्यं नीला द्यौरिति नाश्चर्यग्रहणेन द्यौरभिसंबध्यते। किं तर्हि नीलता। सा चानित्या। आश्चर्यमन्तरिक्षेऽबन्धनानि नक्षत्राणि न पतन्तीति नाश्चर्यग्रहणेन नक्षत्राण्यभिसंबध्यन्ते। किं तर्हि। पतनक्रिया। सा चानित्या। तत्रानित्य इत्येव सिद्धम्॥ मस्करमस्करिणौ वेणुपरिव्राजकयोः॥ मस्करिग्रहणं शक्यमकर्तुम्। कथं मस्करी परिव्राजक इति। इनिनैतन्मत्वर्थीयेन सिद्धम्। मस्करोऽस्यास्तीति मस्करी। न वै मस्करोऽस्यास्तीति मस्करी परिव्राजकः। किं तर्हि। मा कृत कर्माणि मा कृत कर्माणि शान्तिर्वः श्रेयसीत्याहातो मस्करी परिव्राजकः॥ पारस्करप्रभृतीनि च संज्ञायाम्॥ अविहितलक्षणः सुट् पारस्करप्रभृतिषु द्रष्टव्यः। पारस्करो देशः। कारस्करो वृक्षः। रथस्पा नदी। किष्किन्धा गुहा। किष्कुः। तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च वक्तव्यः। तस्करः। बृहस्पतिः॥ प्रायस्य चित्तिचित्तयोः सुडस्कारो वा॥ प्रायश्चित्तिः। प्रायश्चित्तम्॥ इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य प्रथमे पादे पञ्चममाह्निकम् ॥

र॥ माकृतेति। अयं माकृत अयं माकृतेत्युपक्रम्य शान्तिलः काम्यकर्मपरिहाणिर्मुमुक्षोः श्रेयसीत्युपदेष्टा मस्करीत्युच्यते। माङ्पूर्वात्करोतेरिनिः। सुडागमो माङो ह्रस्वश्च निपात्यते॥ पारस्कर॥ तत्करोतीति तस्करः। तच्छब्देन चोरकर्म प्रसिद्धं नित्यं परामृश्यते। अस्कार इति। अस्यस्यानेऽस्कारोऽस्कारः। शकन्ध्वादित्वात्पररूपम्॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठस्याध्यायस्य प्रथमे पादे पञ्चममाह्निकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा०कै० ५८ अनुदात्तं पदमेकवर्ज्जम्॥ किमनुदात्तानीति। पदमिति जातावेकवचनं मन्यते। यथा ग्रहं संमार्ष्टीति। ग्रहार्थस्य संस्कार्यत्वात् प्राधान्यात् संख्याया अविवक्षा तथा पदमित्यत्रापि पदस्य संस्कार्यत्वात्। अनुदात्तशब्दं च लौकिकं मन्यते। लोकाह्यनुदात्तं पदमनुदात्तं पदमिति व्यपदिशन्ति। अनुदात्तगुणयोगात्पदमनुदात्तम्। तत्राचामनुदात्तयोगे स्वज्ञानमपि तस्याह च यत्तद्भिगृह्यत इत्यज्झल्समुदायरूपं पदमनुदात्तगुणयोगादनुदात्तमिति सामानाधिकरण्येन निर्देश उपपद्यते। एकवर्जमित्यत्रैकशब्देन प्रत्यासत्त्या पदमेवोच्यते। तत्रायं सूत्रार्थो वाक्ये पदमेकं वर्जयित्वा पदान्तराण्यनुदात्तानि भवन्तीति पूर्वपक्षः। पदे येषामिति। यथा पशुना यजेतेति व्यक्तिगतमेकत्वं पशोर्गुणत्वाद्यागस्य प्राधान्याद्विवक्ष्यते। तथा पदमित्यत्रापि पदानुवादेनाच्यनुदात्तविधानात्पदस्य गुणत्वाद्गुणे च संख्याया विवक्षितत्वात्। कृत्रिमाकृत्रिमयोः कृत्रि

अनुदात्तं पदमेकवर्जम्॥ किमनुदात्तानि पदानि भवन्ति एकं पदं वर्जयित्वा। नेत्याह। पदे येषामुदात्तप्रसङ्गस्तेऽनुदात्ता भवन्ति एकमचं वर्जयित्वा। स तर्हि तथा निर्देशः कर्तव्यः अनुदात्ताः पदे अनुदात्ताः पदस्येति वा। न कर्तव्यः। अनुदात्तं पदमेकवर्जमित्येव सिद्धम्। कथम्। मतुब्लोपोऽत्र द्रष्टव्यः। तद्यथा। पुष्यका एषां ते पुष्यकाः। कालका येषां ते कालका इति। अथवा अकारो मत्वर्थीयः। तद्यथा। तुन्दो घाट इति। किमर्थं पुनरिदमुच्यते। आगमस्य विकारस्य प्रकृतेः प्रत्ययस्य च। पृथक् स्वरनिवृत्त्यर्थमेकवर्जं पदस्वरः॥

मेसं प्रत्यय इति च न्यायादनुदात्तशब्देनाच उच्यन्ते। एकवर्ज्जमित्यत्राप्येकशब्देनाजेव गृह्यते। यदि ह्येकशब्देन पदं गृह्येत तन्नो नियमकारणाभावात्सर्वेषां पदानां पर्यायेण वर्जनात्स्वरनियमो न स्यात्। अच्त्वग्रहणे यस्याचः स्वरो बलवान् स वर्ज्य इत्यनियमाभावः। स तर्हीति। अज्झल्समुदायवाचिनः पदशब्दस्याज्मात्रवाचिनानुदात्तशब्देन सामानाधिकरण्यमनुपपन्नमिति भावः। मतुब्लोप इति। अवयवावयविनोरभेदोपचारादनुत्पत्तिरेव मतुब्लोपः। ननु गुणवचनेभ्यो लुगिति मतुब्लोपः। अनुदात्तशब्दस्याचि संज्ञात्वेन विनियोगाद्गुणवचनत्वाभावात्। पुष्यका इति। त्रयो बिन्दव उच्यन्ते तद्योगाद्बिडालाः पुष्यका इत्याहुः। अथवेति। भेदसंबन्धाश्रयेण प्रतिपाद्यते। अर्श आदेराकृतिगणत्वादकारः। किमर्थमिति। पर्यायेण योगपद्येन वा वक्ष्यमाणेन ज्ञापकेन निरासान्नार्थः सूत्रेणेति मत्वा प्रश्नः॥ रा०म० ५८

CC-0. In Public Domain. Digitization by eGangotri

चत्वार इति। चतेरुरन्निति चतुःशब्द आद्युदात्तः। आमुदात्तस्तत्र विरोधाभावादुदात्तद्वयप्रसङ्गः। अनड्वाह इति। अनो वहतीति अनसि वहेः क्विप्। डश्चानस इति क्विप्। अनःशब्दोऽसुन्प्रत्ययान्त आद्युदात्तः। गतिकारकोपपदात्कृदिति उत्तरपदप्रकृतिस्वरे प्राप्ते धातुरन्तोदात्तः। अस्थ्नेति। अस्तिसञ्जिभ्यां क्थिन् नित्त्वादाद्युदात्तोऽस्थिशब्दः। दधिशब्दो नब्विषयस्यानिसन्तस्येत्याद्युदात्तः॥ तवै चान्तश्च युगपदिति॥ अनेन गतेः पूर्वस्य पदस्य प्रकृतिस्वरो विधीयते। तवैप्रत्ययान्तस्य चान्तोदात्तत्वम्। तत्र युगपद्ग्रहणमन्तरेण विरोधाभावाद्यौगपद्ये सिद्धे युगपद्ग्रहणमन्यत्र यौगपद्याभावस्य ज्ञापकम्। पर्यायस्तर्हीति। ज्ञापकेन यौगपद्ये निरस्ते पर्यायप्रसङ्गः। रिक्ते विभाषेति। अनेनाद्युदात्तत्वम्। पक्षे त्वन्तोदात्तत्वं तस्य प्रत्ययस्वरेण। तदेवं पर्याययौगपद्यनिरा

आगमस्य। चतुरनडुहोरामुदात्तः। चत्वारः। अनड्वाहः। विकारस्य। अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः। अस्थ्ना। दध्ना। प्रकृतेः। गोपायति। धूपायति। प्रत्ययस्य च। कर्तव्यम्। तैत्तिरीयः। एतेषां पदे युगपत्स्वरः प्राप्नोति। इष्यते चैक एव स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्यनुदात्तं पदमेकवर्जमेवमर्थमिदमुच्यते। नैतदस्ति प्रयोजनम्। यौगपद्यं तवै सिद्धम्। यदयं तवै चान्तश्च युगपदिति सिद्धे यौगपद्ये यौगपद्यं शास्ति तज्ज्ञापयत्याचार्यः। न युगपत्स्वरो भवतीति। पर्यायस्तर्हि प्राप्नोति। पर्यायो रिक्तशासनात्। यदयं रिक्ते विभाषेति सिद्धे पर्याये पर्यायं शास्ति तज्ज्ञापयत्याचार्यो न पर्यायो भवतीति। उदात्ते ज्ञापकं त्वेतत्। एतदुदात्ते ज्ञापकं स्यात्। स्वरिते न समाविशेत्। स्वरिते न तु समावेशः प्राप्नोति स्वरिते ह्युदात्तोऽस्ति। तस्मान्नार्थोऽनेन योगेन ॥

सेऽपरनित्यादियुक्तस्वरो भविष्यतीति नार्थः सूत्रेण। स्वरिते नेति। उदात्तस्वरितयोरेकस्मिन्पदे समावेशप्रसङ्गः। स्वरितेऽपीति। उदात्ते पर्याययौगपद्यनिरासे ज्ञापकात्कृतेऽप्युदात्तसद्भावादुदात्तस्वरितयोरपि पर्याययौगपद्यनिरासः सिद्ध इत्यर्थः। उदात्तश्रुतिमात्रविषयस्य ज्ञापकस्याश्रयणादेवं लभ्यते। यत्तूदात्तश्रुत्या स्वरितस्याग्रहणमिह शास्त्रे तदुक्तम्। तुल्यस्योदात्तस्याचः संज्ञिनो ग्रहणस्य युक्तत्वात्। तथा चोदात्तस्वरितयोरित्यादावभेदेन स्वरितो निर्दिष्टः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरभ्यमाणेपीति। ज्ञापकादस्पष्टासंदिग्धा वाप्रतिपत्तिर्भवति साक्षाद्विधाने तु स्पष्टा असंदिग्धा चेति यदि योग आरभ्यते तदा
आरभ्यमाणे दोषप्रसङ्गः। इदमेवानुदात्तस्य विधायकं लक्षणमिति मत्वा दोषोपन्यासः। एकमचं वर्जयित्वा शिष्टानामचा
मनेनानुदात्तत्वं क्रियते तत्र येषामचामुदात्तत्वं स्वरितत्वं वा साक्षान्न विधीयते तेऽस्यावकाश इति येषां शास्त्रेणोदात्तत्वं स्व
रितत्वं वा विधीयते तत्रैषां न निदर्शयेत्। यथामलकीज इत्यत्र चतुर्णामुदात्तत्वं शास्त्रेण विधीयते ङीषः प्रत्ययानुदात्तत्व
म्। गतिकारकोपपदात्कृदिति कृत्स्वरः। दीर्घकाशतुषभ्राष्ट्रवटं जे इति पूर्वपदाद्युदात्तत्वम्। अन्त्यात्पूर्वं बह्वच इति लकारस्यो
दात्तत्वमिति विरोधाभावाद्युगपदुदात्तचतुष्टयं स्यात्। शिष्टस्य चानुदात्तत्वमेकवर्जमित्यस्माद्विवचनाद्यस्य यस्योदात्तस्वरि
तविधानं स स वर्ज्यत इति विप्रतिषेधानुपपत्तिश्चोद्यते। तथा चानन्तरमेव युगपदित्यादिषु पूर्वोक्तेन प्रकारेण द्वावपि वर्ज्ये

आरभ्यमाणेप्येतस्मिन् अनुदात्ते विप्रतिषेधानुपपत्तिरेकस्मिन्युगपत्त्वंभवात्। अनुदात्ते विप्रतिषेधो नोप
पद्यते। पठिष्यति ह्याचार्यो विप्रतिषेधम्। जे दीर्घाद् बह्वच इति। स विप्रतिषेधो नोपपद्यते। किं कारणम्। एक
स्मिन्युगपत्त्वंभवात्। असति खलु संभवे विप्रतिषेधो भवति। अस्ति च संभवो यदुभयं स्यात्। कथं संभवः।
यदानुदात्तं पदमेकवर्जमित्युच्यते। तदिह नास्ति। किं कारणम्। नानेनोदात्तत्वं प्रतिषिध्यते। किं तर्हि। अ
नुदात्तत्वमनेन क्रियते। अस्ति च संभवो यदुभयोश्चोदात्तत्वं स्यात्। अन्येषां चानुदात्तत्वम्। यदि पुनर
यमधिकारो विज्ञायेत। किं कृतं भवति ॥

ते। उदात्तादनुदात्तस्य स्वरित इति स्वरितत्वं न भवति। नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानामिति पक्षे प्रतिषे
धात्। एकस्मिन्निति। पद इत्यर्थः। नानेनोदात्तत्वं प्रतिषिध्यत इति। यदि नोदात्तं पदमेकवर्जमिति सूत्रन्यासं कृत्वा उदा
त्तत्वं प्रतिषिध्येत न स्याद्दोषः। एकमचं वर्जयित्वा पूर्वेषामनुदात्तत्वनिषेधात्। क्वचित्पाठो नानेनोदात्तत्वं क्रियत इति। तत्रा
यमर्थो यदनुदात्तं पदमेकमिति सूत्रं कृत्वोदात्तमेकमेव पदं भवतीति नियमायोदात्तत्वं क्रियते तदा न स्याद्दोषः। आचार्य
देशीय आह। यदि पुनरिति। अस्य स्वातन्त्र्याभावादुत्तरैर्वाक्यैरेकवाक्यत्वे सति यस्य स्वरो विधीयते तद्वर्जमन्येषामनुदा
त्तत्वं क्रियत इति द्वयोरपि योगयोरस्योपस्थाने कएकोऽनुदात्तत्वे वर्ज्यते एको न वर्ज्यत इत्युपपद्यते विप्रतिषेधः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैवं शक्यमिति। अधिकार आश्रयितुमशक्योऽव्याप्तिप्रसङ्गात्। सिद्धं त्विति। एकानुदात्तं पदमिति परिभाषा कर्तव्या। यस्याचः स्वरो विधीयते स एव विद्य-मानो दात्तो न भवति शिष्टस्त्वविद्यमानोदात्त इति उदात्तनिषेधः संपद्यते। यत्र चैकस्य स्वरो विधीयते तत्रेदमुपतिष्ठते इति उभयोरस्योपस्थाने विप्रतिषेधोपपत्तिः। परिभाषेयमिति। न्यासान्तरे यदि प

र्वेव

अधिकारः प्रतियोगं तस्यानिर्देशार्थ। इति योगे योग उपतिष्ठते। जेदीर्घान्तस्यादिरुदात्तो भवति। उपस्थितमिदं भवति अनुदात्तं पदमेकवर्जमिति। अन्त्यात्पूर्वं बहूचः। उपस्थितमिदं भवति अनुदात्तं पदमेकवर्जमिति। तत्र पूर्वेणास्तु वर्ज्यमानता परेण वेति परेण भविष्यति। परत्वात्। नैवं शक्यम्। षाष्ठिक एकः स्वरः संगृहीतः स्यात्। येऽन्ये सप्ताध्यायां स्वरास्ते न संगृहीताः स्युः। समानोद्देशयितओचोदात्तः। अस्थिदधिसक्थ्यक्ष्णामनङुदात्त इति। सिद्धं त्वेकानुदात्तत्वात्। सिद्धमेतत्। कथम्। एकानुदात्तत्वात्। एकानुदात्तं पदं भवतीति वक्तव्यम्। किमिदमेकानुदात्तत्वादिति। न उदात्तः अनुदात्तः। न अनुदात्तः अननुदात्तः। एक अननुदात्तोऽस्मिंस्तदिदमेकाननुदात्तम्। एकाननुदात्तत्वादिति। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तमनुदात्ते विप्रतिषेधानुपपत्तिरेकस्मिन्युगपत्संभवादिति। नैष दोषः। परिभाषेयम्। किं कृतं भवति। कार्यकालं संज्ञापरिभाषम्। यत्र कार्यं तत्रोपस्थितमिदं द्रष्टव्यम्। जेदीर्घान्तस्यादिरुदात्तो भवतीत्युपस्थितमिदं भवति। अनुदात्तं पदमेकवर्जमिति। अन्त्यात्पूर्वं बहूच इत्युपस्थितमिदं भवति। अनुदात्तं पदमेकवर्जमिति। तत्र पूर्वेणास्तु वर्ज्यमानता परेण वेति। परेण भविष्यति परत्वात् ॥

रिभाषात्वमाश्रीयते तदा यथान्यासेऽपि न दोषः फले विशेषाभावात्। स्वरविधिलिङ्गा चेयं परिभाषा एकशब्दः संख्येयवाची अनुदात्तश्रुत्युपादानात्तद्विरोधी स्वरित उदात्तश्च संख्येयो गृह्यते। ततश्चोदात्तस्वरितविधानस्यानुपस्थानादृ द्वयोर्लक्षणयोरस्या उपस्थाने विप्रतिषेधोपपत्तिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ वेति। लक्षणमिदमुदात्तत्वप्रतिषेधार्थमेकवर्जमित्यनेन तु प्रतिषेधपर्युदासः क्रियत इति लक्षणद्वयस्यैकस्मिन्न्
देसंनिपाते कोवर्ज्यतामित्यपेक्ष्यते विप्रतिषेधः। स्वरितेणुदात्तोस्तीति तस्यापि प्रतिषेधो नेन न विधीयते। एकवर्जमिति चाप्र
सिद्धिरिति। परनित्यान्तरङ्गत्वेन सर्वत्र व्यवस्था नाभिमतेति भावः। सिद्धं त्विति। अनवकाशः स्वरो वर्ज्य इत्यर्थः। अनवका
शत्वेन सर्वत्र व्यवस्था नोपपद्यत इति मत्वाह। प्रकृतिप्रत्यययोरिति। विप्रतिषेधादिति। पूर्वविप्रतिषेधादित्यर्थः। काम्याया द
य इति। काम्यचश्चित्करणं प्रत्याख्यातं तत्कर्तव्यमेव आयेयङोस्तु पूर्वं चित्त्वं कर्तव्यमित्युभयोपादानम्। अन्यथा पूर्ववि

अथवा नेदं पारिभाषिकानुदात्तस्य ग्रहणम्। किं तर्ह्यन्वर्थग्रहणम्। अविद्यमानोदात्तमनुदात्तमिति। एक
वर्जमिति चाप्रसिद्धिः संदेहात्। एकवर्जमिति चाप्रसिद्धिः। कुतः। संदेहात्। न ज्ञायते क एको वर्जयितव्य इति। सि
द्धं तु यस्मिन्ननुदात्त उदात्तवचनानर्थक्यं तद्वर्जम्। सिद्धमेतत्। कथम्। यस्मिन्ननुदात्ते उदात्तवचनमनर्थकं स्यात्स
एको वर्जयितव्यः। प्रकृतिप्रत्यययोः स्वरस्य सावकाशत्वादप्रसिद्धिः। प्रकृतिप्रत्यययोः स्वरस्य सावकाशत्वा
दप्रसिद्धिः स्यात्। प्रकृतिस्वरस्यावकाशः। यत्रानुदात्तः प्रत्ययः। पचति। पठति। प्रत्ययस्वरस्यावकाशः यत्रानु
दात्ता प्रकृतिः। समत्वम्। सिमत्वम्। इहोभयं प्राप्नोति। कर्तव्यम्। तैत्तिरीयः। विप्रतिषेधात्प्रत्ययस्वरो भवि
म॰ ष्यति। नैवं विप्रतिषेधे परमित्युच्यते। न परः। प्रत्ययस्वरः। नैष दोषः। इष्टवाची परशब्दः। विप्रतिषेधे
परं यदिष्टं तद्भवतीति। विप्रतिषेधात्प्रत्ययस्वर इति चेत्काम्यादिचित्करणम्। विप्रतिषेधात् प्रत्ययस्वर
इति चेत्काम्यादयश्चितः कर्तव्याः। पुत्रकाम्यति। गोपायति। ऋतीयते। नैष दोषः। प्रकृतिस्वरोत्र बाधको
भविष्यति। प्रकृतिस्वरे प्रत्ययस्वराभावः। कर्तव्यम्। तैत्तिरीयम्। सिद्धं तु प्रकृतिस्वरबलीयस्त्वात्प्रत्यय
स्वराभावः। सिद्धमेतत्।

प्रतिषेधाद्धातुस्वरं बाधित्वा प्रत्ययाद्युदात्तत्वं स्यात्। प्रकृतिस्वर इति। धातुस्वरः सतिशिष्टत्वाद्भविष्यतीति भावः।
सिद्धमिति। प्रकृतिस्वराद्बलीयस्त्वमिति सुप्सुपेति समासः। सतिशिष्टबलीयस्त्वाद्धि कर्तव्यमित्यादौ प्रकृतिस्वरं बा रामः
धित्वा प्रत्ययस्वरो भवति। गोपायतीत्यादौ धातुस्वर एव सतिशिष्ट इति प्रत्ययस्वराभावः ॥ ६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कः पुनर्विशेषः कास्मादयश्चितः क्रियेरन् सतिशिष्टबलीयस्त्वं वोच्येतेत्याशङ्क्याह। तच्चेति। औपगवत्वमिति। एकयोगलक्षणो त्र स्वर इति विप्रतिषेधेन व्यवस्थाया असिद्धत्वात्। स्यादिस्वर इति। विकरणस्वर इत्यर्थः। सार्वधातुके परतः स्यादीनां विधानात्तत्स्वरः सतिशिष्टः। तासेः परस्येति। परत्वाल्लादेशेषु कृतेषु तासिरिति प्रक्रियाश्रयेण ज्ञापकमुच्यते। लावस्थायां तु तासौ कृते सार्वधातुको स्त्यतौ न ज्ञापकं भवति लसार्वधातुकस्वरस्य सतिशिष्टतया प्रसङ्गात् तद्बाधनार्थत्वादनुदा

कथम्। प्रकृतिस्वराद्बलीयस्त्वात् प्रत्ययस्वरस्याभावः सिद्धः। कथम्। प्रकृतिस्वरात् प्रत्ययस्वरो बलवान्भवतीति वक्तव्यम्। सतिशिष्टस्वरबलीयस्त्वं च वक्तव्यम्। तच्चानेकप्रत्ययसमासार्थम्। तच्चावश्यं सतिशिष्टस्वरबलीयस्त्वं वक्तव्यम्। किं प्रयोजनम्। अनेकप्रत्ययार्थमनेकसमासार्थं च। अनेकप्रत्ययार्थं तावत्। औपगवः। प्रकृतिस्वरमण्स्वरो बाधते। औपगवत्वम्। त्वस्वरोऽण्स्वरं बाधते। औपगवत्वकम्। त्वस्वरं कस्वरो बाधते। अनेकसमासार्थम्। राजपुरुषः। राजपुरुषपुत्रः। राजपुरुषपुत्रपुरुषः। यदि सतिशिष्टस्वरबलीयस्त्वमुच्यते। स्यादिस्वरः सार्वधातुकस्वरं बाधेत। सुनतः। चिनुतः। स्यादिस्वराप्रसङ्गश्च तासेः परस्यानुदात्तवचनात्। स्यादिस्वरस्य चाप्रसङ्गः। कुतः। तासेः परस्यानुदात्तवचनात्। यदयं तासेः परस्य लसार्वधातुकस्यानुदात्तत्वं शास्ति। तज्ज्ञापयत्याचार्यः सतिशिष्टोऽपि विकरणस्वरो लसार्वधातुकस्वरं न बाधत इति। शास्त्रपरविप्रतिषेधानियमाद्वा शब्दपरविप्रतिषेधात्सिद्धम्। अथवा शास्त्रपरविप्रतिषेधेन सर्वमिष्टं संगृहीतं भवतीति कृत्वा शब्दपरविप्रतिषेधो विज्ञास्यते। यदि शब्दपरविप्रतिषेधो भवति कास्मादयः चितः कर्तव्याः। पुत्रकाम्यति। गोपायति ऋतीयते ॥

तद्विधानस्य। शास्त्रपरेति। विप्रतिषेधे परं कार्यमित्यत्र नायं नियमो लक्षणयोर्विप्रतिषेधे परं भवतीति। किं तर्ह्येकलक्षणविहितयोरपि कार्ययोर्विप्रतिषेधे परशब्दविषयत्वात्परं कार्यं भवतीत्येषो प्यर्थ आश्रीयते। यदीति। पुत्रकाम्यतीत्यत्र काम्यप्रत्ययस्याद्युदात्तत्वं प्राप्नोति। नह्यत्र शब्दपरविप्रतिषेधोपपत्तिः एकत्वात्प्रत्ययस्येति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 यत्रोभयोरिति। गोपायतीत्यादौतु प्रत्ययाद्युदात्तत्वस्य धातुस्वरस्य युगपत्प्रसङ्गाभावः। कृते प्रत्ययस्वरे आयाद्यन्तस्य धा
तुत्वे सति धातुस्वरस्य प्रसङ्गात्। तस्मादत्र सतिशिष्टस्यैव बलीयस्त्वमाश्रयणीयम्। विभक्तिस्वरादिति। सतिशिष्टत्वाद्वि
भक्तिस्वरे प्राप्ते वचनम्। तिसृ इति। तिसृभ्यो जस इति विभक्तेरुदात्तत्वम्। अतिसृ इति। तत्पुरुषे तुल्यार्थेति नञः प्रकृ
तिस्वरो भवति। विभक्तिनिमित्तस्वरादिति। विभक्तिर्निमित्तं यस्य तस्य यः स्वरस्तस्मादित्यर्थः। अकरणिरिति। आक्रोशे न
ञ्यनिरित्यनिः। गतिकारकोपपदात् कृदित्युत्तरपदप्रकृतिस्वरो नञ्स्वरेण बाध्यते। अव्यथीति। जिदृक्षीति निप्रत्ययः। अ

शब्दपरविप्रतिषेधो नाम स भवति यत्रोभयोर्युगपत्प्रसङ्गः। न च कास्यादिषु युगपत्प्रसङ्ग इति। विभ
क्तिस्वरान्नञ्स्वरो बलीयान्। विभक्तिस्वरान्नञ्स्वरो बलीयान्भवतीति वक्तव्यम्। विभक्तिस्वरस्यावकाशः।
तिसृस्तिष्ठन्ति। नञ्स्वरस्यावकाशः। अब्राह्मणः। अवृषलः। इहोभयं प्राप्नोति। अतिसृः। नञ्स्वरो भवति। विभ
क्तिनिमित्तस्वराच्च नञ्स्वरो बलीयानिति वक्तव्यम्। विभक्तिनिमित्तस्वरस्यावकाशः। चत्वारः। अनड्वाहः।
नञ्स्वरस्य स एव। इहोभयं प्राप्नोति। अचत्वारः। अनड्वाहः। यच्चोपपदं कृति नञ् तस्य च स्वरो बलीयानिति
वक्तव्यम्। अकरणिर्हन्त ते वृषल। सह नञ्निर्दिष्टस्य च। नञ्स्वरो बलीयानिति वक्तव्यम्। अव्यथी॥ कर्षा
त्वतो घञोन्त उदात्तः॥ किमर्थं कृषेर्विकृतस्य ग्रहणं क्रियते। न कृषात्वत इत्येवोच्येत। यस्य कृषेर्विकरणए
तद्रूपं तस्य यथा स्यात्। इह मा भूत्। हलस्य कर्ष इति। अथ किमर्थं मतुपा निर्देशः क्रियते न कर्षात्त इत्येवो
च्येत। कर्षात्त इतीयत्युच्यमाने यत्रैवाकारान्तादनन्तरो घञस्ति तत्रैव यथा स्यात्। दायः। धायः। इह न स्यात्। पा
कः। पाठः। न क्वचिदाकारान्तादनन्तरो घञस्ति ॥

त्राव्यथेति धातुना सह निर्दिष्टो नञ् न पृथगिति प्रत्ययस्वरं बाधित्वा नञ्स्वरो भवति। नञः सप्तमीनिर्देशाभावादुपपदत्वा
भावात्पृथग्वचनमारब्धम्। तत्राव्यथेति निपातान्नञो धातुना समासे लोपे च कृते प्रत्यय इति सतिशिष्टः प्रत्ययस्वरः प्रा
प्नोतीति वचनम्॥ कर्षात्व॥ यस्य कृषेरिति। विकरणे तस्यानुकरणं कर्षेति निर्दिष्टमित्यर्थः। हलस्य कर्ष इति। अत्राद्यु
दात्तत्वमेव भवति। अथ किमर्थमिति। आकारोत्स्वरो न क्वचिद्घञस्तीति सामर्थ्यात्तद्वतो ग्रहणं सिध्यतीति प्रश्नः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युकाव्यवधानमिति। परत्वान्नित्यत्वाच्च युक्। तेन व्यवधानादानन्तर्याभावः। एवमपीति। घञाधातुराक्षिप्तः। आतइत्यनेनविशेष्यतइतितदन्तविधौविज्ञायमानआनन्तर्यसंभवाद्विधानंविशेष्यतइतिमत्तुम्निर्देशः सर्वसंग्रहार्थं क्रियते॥ अनुदात्तस्य॥ अनुदात्तस्येतिकिमर्थमिति। यत्रोदात्तलोपइत्येवानुदात्तेलोपोलभ्यतेनह्यत्रोदात्तोलुप्यतइतिप्रश्नः। प्रासङ्ग्य इति। प्रासज्यतइतिप्रसङ्गः कर्मणिघञ्। थाथादिस्वरेणान्तोदात्तत्वम्। तद्वहतीतियत्प्रत्ययः। तित्स्वरितइतिस्वरितः। सोसाविति। अलब्धोदात्तगुणएवाकारोलुप्यतइत्यर्थः। तदेवमनुदात्तग्रहणंप्रत्याख्यातम्। किंपुनरिति। यद्यन्तग्रहण

इहापिदायोधायइतियुकाव्यवधानम्। एवमपिविहितविशेषणमाकारग्रहणंविज्ञायेत। आकाराद्योविहितइति। मत्तुब्ग्रहणेपुनः क्रियमाणेनदोषोभवति। अनुदात्तस्यचयत्रोदात्तलोपः॥ अनुदात्तस्येतिकिमर्थम्। प्रासङ्ग्यं वहतिप्रासङ्ग्यः। उदात्तलोपेस्वरितोदात्तयोरभावादनुदात्तग्रहणानर्थक्यम्। उदात्तलोपेस्वरितोदात्तयोरभावादनुदात्तग्रहणमनर्थकम्। नहिकश्चिदुदात्तः उदात्तेस्वरितेवालुप्यते। सर्वोनुदात्तएव। ननुचायमुदात्तः स्वरितेलुप्यते। प्रासङ्ग्यं वहतिप्रासङ्ग्यः इति। एषोपिनिघातेकृतेऽनुदात्तएवलुप्यते। इदमिहसंप्रधार्यं निघातः क्रियतांलोपइति। किमत्रकर्तव्यम्। परत्वाल्लोपः। एवंतर्ह्ययमेवनिघातस्वरः सर्वस्वराणामपवादः। नचापवादविषयउत्सर्गोभिनिविशते। पूर्वंह्यपवादाअभिनिविशन्तेपश्चादुत्सर्गाः। प्रकल्प्यचापवादविषयंततउत्सर्गोभिनिविशते। तन्नतावदत्रकदाचिदन्तोदात्तस्याथादिस्वरोभवति। अपवादंनिघातंप्रतीक्षते। तत्रनिघातः क्रियतांलोपइति। यद्यपिपरत्वाल्लोपः सोसावविद्यमानोदात्तः अनुदात्तेलुप्यते। किंपुनरनुदात्तस्यान्तउदात्तोभवति। आहोस्विदादिः। कश्चात्रविशेषः। अन्तइतिचेत्श्नमस्तयुष्मदस्मद्इदंकिम्लोपेषुस्वरोनसिध्यति। श्नम्। विन्दाते खिन्दा ॥

मनुवर्ततेततोन्तस्यभवितव्यम्। अथनानुवर्ततेतदाक्रमातुलङ्घनादादेर्भाव्यमितिपक्षद्वयसंभवः। विन्दातइति। विदविचारणेखिददैन्यइत्यनयोरूपे। तास्यनुदात्तेदितिलसार्वधातुकस्यानुदात्तत्वम्। श्नमः प्रत्ययस्याद्युदात्तत्वं श्नसोरल्लोपः। तत्राकारस्योदात्तत्वमिष्यते। एकारस्यतुप्राप्नोति। नन्वागमाअनुदात्ताभवन्तीतिश्नमोनुदात्तत्वंप्राप्नोति। एवंतर्हितन्मध्यपतितस्तद्ग्रहणेनगृह्यतइतिधातुस्वरः परत्वादागमानुदात्तत्वंबाधते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा०वृ० ६२ माहिधुक्षातामिति। दुहेर्माङि लुङ्। आत्मनेपदम्। च्लेः क्सः। अदुपदेशादिति लसार्वधातुकानुदात्तत्वम्। क्सः प्रत्ययस्वरेणान्तो दात्तः। क्सस्याचीत्यकारलोपः। माङ्प्रयोगोऽडागमनिवृत्त्यर्थः। अदिहि स्तिपदमनुदात्तं भवति। हिशब्दप्रयोगो हि चेति निघा तप्रतिषेधार्थः। युष्मभ्यमिति। भ्यसोभ्यमित्यभ्यमादेशः। शेषे लोप इति लोप इति प्रक्रियाश्रयेण चोद्योद्भावनम्। यदा तुभ्यमादे शः शेषे लोप श्चान्त्यलोपस्तदा दोषाभावः। इयानिति। किमिदंभ्यां वो घ इति वतुप्। स च पित्त्वादनुदात्तः। वकारस्य घः। घस्येयादे शः। इदंकिमोरीश्की इतीदंकिमोः शब्दावादेशौ। यस्येतीकारलोपः। इध्मीतेति। इन्धेर्लिङ्। तास्यनुदात्तेदित्यनुदात्तत्वं सीयुट्। त स्यागमत्वादनुदात्तत्वम्। अन्नम्। अन्नाल्लोपः। अस्योरल्लोप इत्यकारलोपे कृते ईकारस्योदात्तत्वप्रसङ्गः। द्वयमिति। द्ववयवावस्य। सं ख्याया अवयवे तयप्। द्वित्रिभ्यां तयस्यायजादेशः। अनुदात्तस्थानिकत्वादनुदात्तः। यस्येति चेतीकारलोपे कृते आदेरुदात्तत्वप्रसङ्गे न्त

दत्तामाहिधुक्षातम्। माहिधुक्षाथाम्। युष्मदस्मद्भ्याम्। युष्मभ्यम्। अस्मभ्यम्। इदम् किम् लोपः। इयान्। कियान्। अस्तु तर्ह्यादिः। आदिरि ति चेदिन्धीत द्वयमित्यन्तोदात्तत्वं विधेयम्। इन्धीत। द्वयम्। त्रयम्। आदेरिति द्व ति चेदिन्धीत द्वयमित्यन्तः। आदिरिति चेदिन्धीत द्वयमित्यन्तोदात्तत्वं विधेयम्। इन्धीत। द्वयम्। त्रयम्। आदेरिति द ति चेदिन्धीत द्वयमित्यन्तः। आदिरिति चेदिन्धीतद्वयमित्यन्त इति। विदीध्यिखिदिभ्यश्च लसार्वधातुका म्। अस्तु तर्ह्यादिरुदात्तो भवतीति। ननु चोक्तमादिरिति चेदिन्धीत द्वयमित्यन्त इति। विदीध्यिखिदिभ्यश्च लसार्वधातुका नुदात्तप्रतिषेधाल्लिङि सिद्धम्। विदीध्यिखिदिभ्यश्च लसार्वधातुकानुदात्त त्वं लिङि नेति वक्तव्यम्। लिङ्ग्रह णेननार्थः। अविशेषेण विदीध्यिखिदिभ्यश्च लसार्वधातुकानुदात्तत्वं नेत्येव। इदमपि सिद्धं भवति। विन्द्याते। अथ चिकथ म्। अथ चिच्चिकरणात्। अथ चिच्चिकरणसामर्थ्यादन्तोदात्तत्वं भविष्यति॥ धातोः॥ किं धातोरन्त उदात्तो भवत्याहोस्वि दादिरिति। कश्चात्र विशेषः। धातोरन्त इति चेदनुदात्ते च वग्रहणम्। धातोरन्त इति चेदनुदात्ते च वग्रहणं कर्तव्यम्। अभ्य स्तानामादिरनुदात्ते चेति वक्तव्यम्। वग्रहणं च कर्तव्यम्। तान्तस्यापि वृतिरनुदात्तो भवतीति वक्तव्यम् ॥

स्तानामादिरनुदात्ते चेति वक्तव्यम्। वग्रहणं च कर्तव्यम्। इहत्वन्तग्रहणानुवृत्तौ न कर्तव्यमिति मत्वोपन्यासः। विदीध्यिखिदिभ्य इति। लसार्वधातुकानुदात्त स्येष्यते तदर्थे चिल्लमयत्नः कर्तव्यम्। इहत्वन्तग्रहणानुवृत्तौ न कर्तव्यमिति मत्वोपन्यासः। विदीध्यिखिदिभ्य इति। लसार्वधातुकानुदात्त त्वे प्रतिषिद्धे प्रत्ययस्वरेण तशब्द उदात्तः। सीयुडागमत्वादनुदात्तः। अथवा न विकरणस्वरो लसार्वधातुकस्वरं बाधत इति वर्ज्यमानस्वरे णाश्रमनुदात्त इति न कश्चिद्दोषः। इदमपीति। अन्तग्रहणानुवृत्तावपि श्नमो लोपे दोषो नास्तीति भावः। अथ चीति। चित्करणमेव ज्ञापक म्। अथ न संबध्यते तदा क्रमानुलङ्घनादादेरिति प्रश्नः। अनुदात्त इति। ददातीति लिस्थिते धातोरित्यन्तोदात्तत्वे प्राप्ते आद्युदात्तार्थमनुदा त्ते चेति वक्तव्यम्। पिबतीति। लघूपधगुणनिवृत्त्यर्थो इन्तः पिबिरादेशः। ततश्चान्तोदात्तत्वबाधनार्थमाद्युदात्तत्वं वक्तव्यम् ॥

राम० ६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संश्चेति। धातुस्वरबाधनाय। क्रियते न्यास एवेति। अनुदात्ते चेत्येतदेव ज्ञापकमिहान्तग्रहणाधिकारस्य। अर्थवद्ग्रहणमि
ति। अव्युत्पन्नत्वादुणादीनामानर्थक्यं मन्यते। जुगुप्सत इति। सनो ऽर्थनिर्देशात्समुदायस्यैवार्थवत्त्वं मन्यते। अन्त इति।
यस्यार्थान्तरं न निर्दिश्यते स प्रत्यासन्ने स्वार्थे भवति। इहापीति। व्युत्पत्तिपक्षाश्रयेण चोद्यम्। पक्षान्तराश्रयेण परि

संश्चनित्कर्त्तव्यः। किं प्रयोजनम्। चिकीर्षति। जिहीर्षति। नितीत्याद्युदात्तत्वं यथा स्यात्। अस्तु तर्ह्यादिः
आद्युदात्तत्वम्। आद्युदात्तप्रत्ययधातुघन्तोदात्तत्वं न सिध्यति। ऊर्णोति। प्रत्य
य धातु। गोपायति। धूपायति। ऋतीयते। अन्तोदात्तवचनात्सिद्धम्। अस्तु तर्ह्यन्तोदात्तो भवतीति। ननु
चोक्तं धातोरन्त इति चेदनुदात्ते च बग्रहणं कर्त्तव्यमिति। यत्तावदुच्यते अनुदात्ते च बग्रहणं कर्त्तव्यमि
ति। क्रियते न्यास एव। अस्य स्त्नामादिरनुदात्ते चेति। बग्रहणं कर्त्तव्यमिति। पिबेर्निपातनात्। पिबाद्यु
दात्तनिपातनं क्रियते। स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति। संश्चनित्कर्त्तव्य इति। अवश्यं
सनो विशेषणार्थो नकारः कर्त्तव्यः। क्व विशेषणार्थेनार्थः। सन्यङोरिति। सन्यङोरित्यत्रोच्यमाने हं
सो वत्सः। अत्रापि प्राप्नोति। अर्थवद्ग्रहणेनानर्थकस्येत्येवं न भविष्यति। इहापि तर्हि न प्राप्नोति। जुगुप्स
ते मीमांसत इति। अर्थवानेषः। नैव कश्चिदर्थ आदिश्यते यद्यपि कश्चिदर्थो नादिश्यते अनिर्दिष्टार्थाः प्रत्ययाः
स्वार्थे भवन्तीत्यन्ततः स्वार्थे भविष्यति। कश्चास्य स्वार्थः। प्रकृत्यर्थः। इहापि तर्हि प्राप्नोति। हंसो वत्स इ
ति। उणादयो ऽव्युत्पन्नानि प्रातिपदिकानि। स एषो ऽनन्यार्थो नकारः कर्त्तव्यः। न कर्त्तव्यः। क्रियते न्यास
एव। अथवा धातोरिति वर्त्तते। धातोः सशब्दान्तस्य द्वे भवत इति ॥

हारः। उणादय इति। एतदनन्तरमथवा धातोरिति वर्त्तत इति ग्रन्थेन भाव्यम्। लेखकप्रमादात्तु स्थानान्तरे न्यस्तः। पाठ
क्रमाद्ध्यर्थक्रमस्य बलीयस्त्वादत्र प्रदेशे संबध्यते। लिटि धातोरनभ्यासस्येत्यतो धातुग्रहणानुवर्त्तनात्सान्तस्य धातो
र्द्विर्वचनविधानात् हंसो वत्स इत्यादौ द्विर्वचनाभावः सिद्ध इति स्वरार्थ एव सनो नकारः कर्त्तव्यः। स च कृत एव ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चितः॥ अन्त इति वर्त्तते। धुरजादेः प्रत्ययस्य कुण्डिनजादेरप्रत्ययस्य चेह ग्रहणम्। बहुकजर्थमिति। बहुजकचोरन्तोदात्तत्वे प्राप्ते चितः सप्रकृतेरिति वचनम्। मतुब्लोप इति। चिदवयवत्वात्समुदायश्चिदुच्यते। लक्ष्यानुरोधाच्च गौणोप्यर्थः क्वचिदाश्रीयते। अकच्श्चित्त्वमस्यैवार्थस्य लिङ्गम्। अन्यथैकाच्त्वादकचश्चित्त्वं न कुर्यात्। अथवेति। मुख्य एव शब्दार्थ एवमाश्रितो भवति। नन्वेवं चितस्येति भाव्यमित्याह। पूर्वसूत्रनिर्देश इति। पूर्वव्याकरणे प्रथमया कार्यी निर्दिश्यते। तेन चित्त्वात्समुदायोन्तोदात्तत्वं प्रतिपद्यत इत्यर्थः। कुण्डिनजादयोपि व्यपदेशिवद्भावाच्चितन्त उच्यन्ते॥ तिसृ॥ अर्थगतं बहुत्वं शब्दे आरोप्य बहु

चितः॥ चितः सप्रकृते बह्वकजर्थम्॥ चितः सप्रकृतेरिति वक्तव्यम्। किं प्रयोजनम्। बह्वकजर्थम्। बह्वर्थमकजर्थं च। बह्वर्थं तावत्। बहुभुक्तम्। बहुकृतम्। अकजर्थम्। सर्वकैः। विश्वकैः। उच्चकैः। नीचकैः। सर्वके। विश्वके। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। मतुब्लोपोत्र द्रष्टव्यः। तद्यथा। पुष्पका एषां ते पुष्पकाः। कालका एषां ते कालकाः। अथवाऽकारो मत्वर्थीयः। तद्यथा। तुन्दो घाट इति। पूर्वसूत्रनिर्देशश्चायं चित इति॥ तिसृभ्यो जसः॥ जस इति किमर्थम्। तिसृकाः। तिसृभ्यो जस्ग्रहणानर्थक्यमन्यत्राभावात्। तिसृभ्यो जस्ग्रहणानर्थक्यम्। किं कारणम्। अन्यत्राभावात्। न ह्यन्यत्र तिसृशब्दादन्तोदात्तत्वं प्रयोजयति। अन्यदतो जसः। किं कारणम्। बहुवचनविषय एव तिसृशब्दः। तेनैकवचनद्विवचने न स्तः। शसि भवितव्यम्, उदात्तयणो हल्पूर्वादिति। अन्याः सर्वा हलादयो विभक्तयः। तत्र षड्त्रिचतुर्भ्यो हलादिः झल्युपोत्तममित्यनेन स्वरेण भवितव्यम्। तत्रान्तरेण जस्ग्रहणं जस एव भविष्यति। ननु चेदानीमेवोदाहृतं तिसृकेति नित्स्वरोत्र बाधको भविष्यति। नाप्राप्तेऽन्यस्वरे तिसृस्वर आरभ्यते। स यथैवानुदात्तौ सुप्पिताविति एतं स्वरं बाधते एवं नित्स्वरमपि बाधेत। नैष दोषः। येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्तेऽनुदात्तौ सुप्पिताविति एतस्मिंस्तिसृस्वर आरभ्यते। नित्स्वरे पुनः प्राप्तेऽप्राप्ते च॥

वचननिर्देशः। अन्तोदात्तस्त्रिशब्दस्य स्थाने तिसृशब्द आदेशः। स्थानिवद्भावादन्तोदात्तः। ततः परस्य जसोऽनुदात्तत्वापवाद उदात्तत्वं विधीयते। उदात्तयणो हल्पूर्वादित्यत्रासर्वनामग्रहणानुवृत्तेर्नाज्जस उदात्तत्वं प्राप्नोतीति वचनम्। तिसृकेति। स्वार्थिकः प्रत्ययः। तिसृभावे संज्ञायां कन्युपसंख्यानमिति तिस्रादेशः। न चाप्राप्त इति। तिसृकेत्यत्रापि टापा सहैकादेशस्यादिवद्भावात्स्वरः प्राप्नोतीति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। पूर्वविज्ञातबाध्यविषयेप्रवृत्त्याचरितार्थोविधिर्विप्रतिषेधात्परोविधिर्बाध्यते। उपसमस्तार्थमिति। समासेपिति सृशब्दात्स्वरःसुबुसत्तिस्त्रियतितिस्राविस्वत्रावेरुत्यदृत्यत्रातेर्धातुलोपइतिवक्तव्यमिति वचनात्प्राप्तमन्तोदात्तत्वंबाधित्वाविभक्तेरुदात्तत्वंस्यात्। अत्रचोदात्तस्वरितयोर्यणइति स्वरितोभवति। अतितिसृइत्यत्रत्विष्यतएवजसउदात्तत्वमित्युदाहरण

अथवामध्येपवादाःपूर्वान्विधीन्बाधन्तइत्येवंतिसृस्वरोनुदात्तौसुप्पितावितिस्वरंबाधिष्यतेनित्स्वरंनबाधिष्यते। उपसमस्तार्थमेकेजसोग्रहणमिच्छन्ति। अतितिस्रौ। अतितिसृः॥ चतुरःशसि॥ शसिस्त्रियांप्रतिषेधोवक्तव्यः। चतस्रःपश्य। चतुरःस्त्रियामप्रतिषेधआद्युदात्तनिपातनात्। चतुरःशसिस्त्रियामप्रतिषेधः। अनर्थकःप्रतिषेधोऽप्रतिषेधः। शसिस्वरःकस्मान्नभवति। आद्युदात्तनिपातनात्। आद्युदात्तनिपातनंकरिष्यते। सनिपातनस्वरःशसिस्वरस्यबाधकोभविष्यति। एवमप्युपदेशिवद्भावोवक्तव्यः। यथैवतर्हिनिपातनस्वरःशसिस्वरंबाधते। एवंविभक्तिस्वरमपिबाधेत। चतसृणामिति। विभक्तिस्वरभावश्चहलादिग्रहणात्। विभक्तिस्वरस्यचभावःसिद्धः। कुतः। हलादिग्रहणात्। यदयंषट्त्रिचतुर्भ्योहलादिरितिहलादिग्रहणंकरोति। तज्ज्ञापयत्याचार्योननिपातनस्वरोविभक्तिस्वरंबाधते। कथंकृत्वाज्ञापकम्। आद्युदात्तनिपातनेहलादिग्रहणानर्थकम्। आद्युदात्तनिपातनेसतिहलादिग्रहणमनर्थकंस्यात्। नह्यन्यद्धलादिग्रहणंप्रयोजयति। अन्यदतश्चतसृशब्दात्। षट्संज्ञास्तावन्नप्रयोजयन्ति। किंकारणम्। बहुवचनविषयत्वात्। तेनद्विवचनैकवचनेनस्तः। जसिशसिचातोलुप्येते। अन्याःसर्वाहलादयोविभक्तयः ॥

त्वेनभाष्यकृतोपन्यस्तम्॥ चतुरः॥ स्त्रियामिति। स्थानिवद्भावेनप्राप्नोति। आद्युदात्तनिपातनमिति। स्थानिवद्भावादाद्युदात्तत्वेसिद्धेपुनराद्युदात्तनिपातनमस्यस्वरस्यबाधकमित्यर्थः। एवमपीति। उपदेशिवद्भावात्सतिशिष्टेनविभक्तिस्वरेणनिपातनस्वरोबाध्यते। बहुवचनविषयत्वादिति। विहितविशेषणादुत्तरपदार्थस्योपसर्जनत्वाद्वासमासेनभाव्यमितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र चतसृशब्दादिति। यदि निपातनस्वरेण विभक्तिस्वरो बाध्येत तदा हलादिग्रहणमनर्थकं स्यात्। चतस्रः पश्येत्यत्र नि
पातनस्वरेणैव बाधितत्वाद्विभक्तिस्वरस्याप्रसङ्गात्। किं तर्हि हलादिग्रहणेन तत्क्रियमाणं विभक्तिस्वरस्य बली
यस्त्वं ज्ञापयतीति चतसृणामित्यत्र विभक्तिस्वरसिद्धिः। नचैवेति। चतस्रः पश्येत्यत्र। ततश्चाद्युदात्तनिपातनमपि न कर्तव्य

त्रिशब्दोपि न प्रयोजयति। किं कारणम्। बहुवचनविषयत्वात्। तेन हि द्विवचनैकवचनेन स्तः। असर्व
नामस्थानमिति वचनाज्जसि न भविष्यति। शसि भवितव्यमेकादेश उदात्तेनोदात्त इति। अन्याः सर्वा ह
लादिविभक्तयः। तिसृशब्दोपि न प्रयोजयति। किं कारणम्। बहुवचनविषयत्वात्। तेन हि द्विवचनैकवचने न
स्तः। असर्वनामस्थानमिति वचनाज्जसि न भवितव्यम्। शसि भवितव्यम्। उदात्तयणो हल्पूर्वादिति। अन्याः
सर्वा हलादिविभक्तयः। चतुःशब्दश्चापि न प्रयोजयति। किं कारणम्। बहुवचनविषयत्वात्। तेन हि द्विवचनै
कवचने न स्तः। असर्वनामस्थानमिति वचनाज्जसि न भवितव्यम्। शसि भवितव्यं चतुरः पश्येति। अन्याः स
र्वा हलादिविभक्तयः। तत्र चतसृशब्दादेकमाचष्टे। असर्वनामस्थानमजादिर्विभक्तिरस्ति। यदि चात्र निपात
नस्वरः स्यात् हलादिग्रहणमनर्थकं स्यात्। नैव वा पुनरत्र शसि स्वरः प्राप्नोति। किं कारणम्। यणादेशे कृते
शसः पूर्व उदात्तभावी नास्तीति कृत्वा। अवशिष्टस्य तर्हि प्राप्नोति। ऋकारेण व्यवहितत्वान्न भविष्यति। यणा
देशे कृते नास्ति व्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव। प्रतिषिध्यते तत्र स्थानिवद्भावः। स्वरविधिं प्रति न स्था
निवद्भवतीति। नैषोस्ति विप्रतिषेधः। उक्तमेतत्। प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवदिति॥
सावेकाचस्तृतीयादिर्विभक्तिः॥ साविति किमिदं प्रथमैकवचनस्य ग्रहणमाहोस्वित्सप्तमीबहुवचनस्य
कुतः संदेहः। समानो निर्देशः। सप्तमीबहुवचनस्य ग्रहणम्। कथं ज्ञायते॥

म। यणादेशे कृत इति। अविरुक्त इत्यनेन स्वरात्पूर्वं परत्वादिति भावः। अवशिष्टस्येति। तकाराकारस्येत्यर्थः। ऋकारेणे
ति। पूर्वविधौ रेफस्य स्थानिवद्भावात्॥ सावेका॥ साविति किमिति। यदि शास्त्रीयं सुरूपं गृह्यते तदा प्राथम्यात् प्रथमैकव
चनस्य ग्रहणेन भाव्यम्। अथ प्रायोगिकम्। ततः सप्तमीबहुवचनस्य। तद्धि प्रयोगे सुरूपं श्रूयते। प्रथमैकवचनं तु विकृतं
रूपं प्रयोगे न सुरूपमिति संशयानः पृच्छति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यमिति। गोष्वश्वस्विति सप्तमीबहुवचन एकाच्त्वाद्गोभ्यां श्वभ्यामित्यादौ विभक्तेः प्राप्तमुदात्तत्वं प्रतिषिध्यते। प्रथमै
कवचनग्रहणे तु प्राप्त्यभावात्प्रतिषेधोनर्थकः। प्रथमैकवचने हि यदेकाच्छब्दरूपं गौरित्यौकारान्तं श्वेत्याकारान्तं न च तस्मा
त्तृतीयादिविभक्तिः परासंभवतीति प्राप्त्यभावात्किं प्रतिषेधेनेति भावः। प्रकृतिग्रहणे हि विकृतेर्ग्रहणं भवति स्थानिवद्भा
वान्न तु विकृतिग्रहणे प्रकृतेः। अनुगृहीताइति। प्रतिषेधमन्तरेणेष्टस्यार्थस्य सिद्धत्वात्। श्विनेति। प्रथमैकवचने श्वेति विकृत
प्रयोगात्तृतीयादौ प्रकृतिरूपस्य श्रवणादिकृत्वा प्रकृतेरग्रहणादित्यर्थः। सप्तमीबहुवचने श्विष्विति प्रकृतिरूपस्य प्रयोगा
त्स्वरविधौ नलोपस्यासिद्धत्वात्तस्यैव तृतीयादौ प्रयोगात्सिध्यत्यन्तोदात्तत्वम्। याद्भ्यामिति। सप्तमीबहुवचने यात्स्विति पदेका

यद्यं न गोश्वनोः प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्। यदि प्रथमैकवचनस्य ग्रहणं स्यात् गोश्वनोः प्रतिषेध
वचनमनर्थकं स्यात्। ननु चार्थसिद्धिरेवैषा। अनुगृहीताः स्मः। ये वयमस्माभिः प्रथमैकवचनमास्थाय गोश्वनोः प्रति
षेधो न वक्तव्यो भवति। भवेत्प्रतिषेधो न वक्तव्यः। दोषास्तु भवन्ति। तत्र को दोषः। श्विना श्विना। अन्तोदात्तत्वं न
प्राप्नोति। श्वि श्वि नौ नस्तः। उक्तमेतत्। एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ॥ स्ववान् स्ववान् इत्येवं भवितव्य
म्। इह तर्हि याद्भ्यां याद्भिरिति न सिध्यति। तस्मात्सप्तमीबहुवचनस्य ग्रहणम्। सावेकाचस्तृन्नन्मदोरुदात्तत्वे प्रति
षेधः। सावेकाचउदात्तत्वे तृन्नन्मदोः प्रतिषेधो वक्तव्यः। त्वया। मया। सिद्धं तु यस्मात् तृतीयादिस्तस्याभावात्सौ। सिद्ध
मेतत्। कथम्। यस्मादत्र तृतीयादिर्न तत्सावस्ति। यद्यपि तत्सौ नास्ति प्रकृतिस्तस्य सावस्ति ॥

त्वत एव तृतीयादिरिति सिध्यत्यन्तोदात्तत्वं प्रथमैकवचने तु यानिति यद्रूपं न तस्मात्तृतीयादिरित्याद्युदात्तत्वं न प्राप्नोतीत्यर्थः। न
च तन्मध्यपतितत्वान्नुमो भेदकत्वाभावो विशिष्टरूपशब्दविषयत्वात्तन्मध्यपतितपरिभाषायास्तथा चनेदमदसोरकोरिति तथा
भूतमेवास्य ज्ञापकम्। अन्ये त्वन्वादेशे शामुदाहरन्ति। एभ्य एभिरिति। सप्तमीबहुवचन एष्वित्यशादेशे कृते भवत्येकाच्। प्रथमै
कवचने त्वयमित्येकाज्न भवतीति स्वराप्रसङ्गः। ऊडिदमित्यत्रान्तोदात्ताधिकारादशादेशस्यानुदात्तत्वादनेन स्वरेण प्रयोजन
म्। तृन्नन्मदोरिति। सोयमृष्टं तस्मादेकाचः परा तृतीयादिरुदात्ता भवतीति सूत्रार्थाश्रयेण प्रतिषेध उच्यते। तृतीयादावेकाज्त्व
माश्रीयते न तु सावित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतेर्वेति। सोऽयदेकाच्त्वात्स्वरात्तृतीयादिरुदात्तेति सूत्रार्थ आश्रीयत इत्यर्थः॥ अन्तोदा॥ उत्तरपदग्रहणमिति। अनित्यसमा
सइत्याधारसप्तमी विज्ञास्यते। अनित्यसमासस्यान्तोदात्तादेकाचः परा तृतीयादिर्विभक्तिरन्यतरस्यामुदात्ता भवतीति सूत्रार्थ
आश्रयिष्यत इति नार्थ उत्तरपदग्रहणेनेति भावः। समासविशेषणमिति। अनित्यसमास इति सत्सप्तमी विज्ञायेत। तत्र समास
स्य श्रुतत्वात्तस्यैवैकाज्ग्रहणमन्तोदात्तत्वं च विशेषणं विज्ञायेत न त्वश्रुतस्योत्तरपदस्येत्यर्थः॥ ऊडिदम्॥ पदादिष्विति। पद्नो
मासिति सूत्रनिर्देशः पदादयो गृह्यन्ते एकाज्ग्रहणं चेहानुवर्तत इति निष्कर्षः परेऽनेकाच्त्वान्न गृह्यन्ते। यदात्वल्लोपे कृते ए

प्रकृतेस्त्वनेकाच्त्वात्। यद्यपि तस्य प्रकृतिरस्ति सा त्वेकाच् सा भवति। अन्तोदात्तादुत्तरपदादन्यतरस्यामनि
त्यसमासे॥ उत्तरपदग्रहणं किमर्थम्। यथैकाज्ग्रहणमुत्तरपदं विशेषणं विज्ञायते। एकाजुत्तरपदादि
ति। अथाक्रियमाण उत्तरपदग्रहणे कस्यैकाज्ग्रहणं विशेषणं स्यात्। समासविशेषणम्। अस्ति चेदानीं कश्चिदेका
च्समासः यदर्थमेकाज्ग्रहणं स्यात्। अस्तीत्याह। पुनः ऊर्क् स्वोर्कुभ्यो जोर्भ्यो जेदिति॥ ऊडिदं पदाद्यप्पुम्रैद्युभ्यः॥
पदादिषु निशत्पर्यन्तानि प्रयोजयन्ति। अन्यानि पदादीनि उदात्तनिवृत्तिस्वरेण सिद्धानि। ऊठ्युपधाग्रहणम्।
ऊठ्युपधाग्रहणं कर्तव्यम्। अन्त्यप्रतिषेधार्थम्। अन्त्यस्य मा भूदिति। अक्षद्युवा। अक्षद्युवे॥ अष्टनो दीर्घात्॥ दी
र्घादिति किमर्थम्। अष्टसु प्रक्रमेषु ब्राह्मणा आदधीत। दीर्घादिति शक्यमकर्तुम्। कस्मान्न भवति अष्टसु प्रक्रमेषु
ब्राह्मण आदधीतेति। षट्स्वरोऽत्र बाधको भविष्यति। नाप्राप्ते षट्स्वरे अष्टनः स्वर आरभ्यते। स यथैव दीर्घाद्बाधत ए
वं ह्रस्वादपि बाधेत। न दीर्घात्षट्स्वरः प्राप्नोति। किं कारणम्। आत्वे कृते षट्संज्ञाभावात्। अत उत्तरं पठति। अष्टनो
दीर्घग्रहणं षट्संज्ञाज्ञापकं मा कारान्तस्य नुडर्थम्। अष्टनो दीर्घग्रहणं क्रियते ज्ञापकार्थम्। किं ज्ञाप्यम्॥

काचो भवन्ति तदोदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं सिद्धम्। येष्वा ह्युदात्तानां स्थाने विधीयन्ते आदेशास्तेन्तोदात्ता निपात्य
न्त इति भाष्यकारवचनाद्विज्ञायते। ऊठ्युपधाग्रहणमिति। उपधारूप ऊठ् गृह्यते न त्वन्यदित्यर्थः॥ अष्टनो दी॥ दीर्घादिति। अ
ष्टन आ विभक्ताविति नित्यत्वादात्वविधेर्व्यभिचाराभावाद्विकल्पे चात्वस्य ह्रस्वान्तात्परत्वात्षट्स्वरेण भाव्यमिति प्रश्नः। अष्ट
स्विति। अस्मादेव दीर्घग्रहणादात्वं विकल्पितमिति भावः। अष्टनो दीर्घग्रहणमिति। न्यायसिद्धस्यैवार्थस्य दीर्घग्रहणं लि
ङ्गम्। आत्वस्य बहिरङ्गत्वादन्तरङ्गायां षट्संज्ञायां कर्तव्यायामसिद्धत्वाद् नान्तत्वादेव षट्संज्ञायाः सिद्धत्वात्॥ रामः ६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवेति। दीर्घग्रहणेनान्यथानुपपत्त्यायमर्थो ज्ञाप्यते॥ शतु॥ बृहन्महतोरिति। शतृवद्भावादेव सिद्धत्वान्नियमार्थमेतत्। पृषदादिभ्यो मा भूदित्येवमर्थम्। ये तु गौरादिषु बृहन्महदिति पठन्ति तेषामनर्थकोऽसौ पाठः। अनुपसर्जनाधिकाराच्चातिबृहत्यतिमहतीति गौरादिङीष् नास्तीति ङीबेवोगिल्लक्षणः कर्तव्यस्तस्यैवानेनोदात्तत्वम्। नन्वत्र तदन्तविध्यभावान्न प्राप्नोति। नैतदस्ति। तदन्ते बृहन्महद्भ्यां परे नद्यजादी भवतः॥ उदात्त॥ उदात्तयणीति। उदात्तयण इत्यपनीयोदात्त हल इति वक्तव्यमित्यर्थः। वाक्यलीति। तत्पुरुषे न भूवाक्चिद्दिधिषुरिति पूर्वपदप्रकृतिस्वरनिषेधात्समासान्तोदात्तत्वम्। विभाषा स पूर्वस्येति न

एतज्ज्ञापयत्याचार्यः। भवत्यात्वे कृते षट्संज्ञेति। किमेतस्य ज्ञापने प्रयोजनम्। आकारान्तस्य नुडर्थम्। आकारान्तस्य नुट् सिद्धो भवति। अष्टानामिति। ननु च नित्यमात्वम्। एतदेव ज्ञापयति विभाषात्वमिति। यदयं दीर्घग्रहणं करोति। इतरथा हि अष्टन इत्येव ब्रूयात्॥ शतुरनुमो नद्यजादी॥ नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानम्। नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानं कर्तव्यम्। बृहती। बृहता। महती। महता॥ उदात्तयणो हल्पूर्वात्॥ हल्पूर्वादिति किमर्थम्। अग्नये। वायवे। उदात्तयणि हल्ग्रहणं नकारान्तार्थम्। उदात्तयणि हल्ग्रहणं कर्तव्यम्। किं प्रयोजनम्। नकारान्तार्थम्। नकारान्तादपि यथा स्यात्। वाक्यली। चित्यली। हल्पूर्वग्रहणानर्थक्यं च समुदायादेशत्वात्। हल्पूर्वग्रहणं चानर्थकम्। किं कारणम्। समुदायादेशत्वात्। समुदायोऽत्रादेशः। स्वरितत्वे चावचनात्। स्वरितत्वे च हल्पूर्वग्रहणस्य चावचनाद्मन्यामहे हल्पूर्वग्रहणमनर्थकमिति। यत्तावदुच्यते उदात्तस्य यणि हल्ग्रहणं नकारार्थमिति। क्रियते न्यास एवाहि नकारको निर्देशः। उदात्तयणो हल्पूर्वाच्चोङूधात्वोरिति। यदप्युच्यते हल्पूर्वग्रहणानर्थक्यं च समुदायादेशत्वादिति। अयमस्ति केवल आदेशः

कारादेशः। हल्पूर्वग्रहणानर्थक्यमिति। यथोरणुपरइत्यनेनाणनणः समुदायस्य सो धातकिरित्यादौ रपरत्वं न भवत्येवमग्नय इत्यादौ यणयणः समुदायोदात्तस्य स्थाने विधीयते न यणेव केवल इति स्वरो न प्रवर्तिष्यत इत्यर्थः। स्वरितत्वे चेति। उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येत्यत्र समुदायादेशस्याश्रयणादेवाग्नय इत्यादौ स्वरितत्वनिवृत्त्यर्थं हल्पूर्वग्रहणं न कृतमित्यर्थः। द्विनकारक इति। तत्रैको नकारो लुप्तपञ्चमीको निर्दिष्टस्तस्योदात्तग्रहणेन विशेषणादुदात्तनकारात्परस्यानद्या उदात्तत्वं भवति। भाष्यकारेण भक्त्यतिशयः सूत्रकारं प्रति दर्शितो न त्वियं स्पष्टा गतिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बह्वृतितवेति। बह्वृनिति तजन्यस्यादिति बहुव्रीहिः। बहोर्नञ्वदुत्तरपदभूम्नीत्यतिदेशादन्तोदात्तत्वमत्र विभक्तेरुदात्तत्व निवृत्त्यर्थे हल्पूर्वग्रहणं कृतमुदात्तस्वरितयोर्यणइत्यनेन तु स्वरितत्वं भवति॥ ह्रस्वनु॥ आरेवानिति। रयिरस्यास्तीति मतुप् रयेर्मतौ बहुलमिति संप्रसारणं पूर्वैकादेश आद्गुणस्ततो ह्रस्वाभावान्मतुप्स्वरेण न प्राप्नोतीति वचनम्। त्रिवतीरिति। छन्दसीर इति वत्वम्। वाछन्दसीति पूर्वसवर्णदीर्घः॥ नाम॥ मतौ ह्रस्वान्तादिति। मतुपि ह्रस्वान्तं यद्दृष्टं तस्मात्परो नामन्यतर

बह्वृतितवा। बह्वृतितवदिति॥ ह्रस्वनुड्भ्यां मतुप्॥ मतुबुदात्तत्वे रेग्रहणम्। मतुबुदात्तत्वे रेग्रहणं कर्तव्यम्। आरेवानेतु नो विशः॥ त्रिप्रतिषेधश्च॥ त्रेश्च प्रतिषेधो वक्तव्यः। त्रिवतीर्याज्यानुवाक्या भवन्ति॥ नामन्यतरस्याम्॥ इह कस्मान्न भवति किशोरीणां कुमारीणाम्। ह्रस्वादिति वर्तते। इहापि तर्हि प्राप्नोति। अग्नीनां वायूनाम्। किं कारणम्। दीर्घत्वे कृते ह्रस्वाभावात्। इदमिह संप्रधार्यं दीर्घत्वं क्रियतां स्वर इति। किमत्र कर्तव्यम्। परत्वाद्दीर्घत्वम्। एवं तर्हि नाम् स्वरे मतौ ह्रस्वग्रहणम्। नाम् स्वरे मतौ ह्रस्वग्रहणं कर्तव्यम्। मतौ ह्रस्वान्तादिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। आहायं ह्रस्वान्तादिति। न च नामि ह्रस्वान्तोऽस्ति। तत्र भूतपूर्वगतिर्विज्ञास्यते। ह्रस्वान्तं भूतपूर्वमिति। सांप्रतिकाभावे भूतपूर्वगतिर्विज्ञायते। अयं चास्ति सांप्रतिकः॥ तिसृणां चतसृणामिति नैतदस्ति। षट्त्रिचतुर्भ्यो हलादिरित्यनेनात्र भवितव्यम्। तस्मिन्नित्ये प्राप्त इयं विभाषा आरभ्यते। एवं तर्हि योगविभागः करिष्यते। त्रिचतुर्भ्यो नामुदात्तो भवति। ततो हलादिः। हलादिश्च विभक्तिरुदात्ता भवति। षट्त्रिचतुर्भ्य इति। इदं तर्हि त्वं नृणां नृपते जायते शुचिः। ननु चात्रापि नृ चान्यतरस्यामित्येष स्वरोऽत्र बाधको भविष्यति। न सिध्यति। किं कारणम्। झल्ग्रहणं तत्रानुवर्तते। किं पुनः कारणं झल्ग्रहणं तत्रानुवर्तते। इह मा भून्नाने॥ उदात्तयणो हल्पूर्वादित्येष स्वरोऽत्र बाधको भविष्यति। इदं तर्हि नरि। नैकमुदाहरणं ह्रस्वग्रहणं प्रयोजयति ॥

स्यामुदात्तो भवतीत्यर्थः। भूतपूर्वगतिरिति। अकृते दीर्घे ह्रस्वान्तात्परो नाम भूदिति दीर्घे कृते स्वरः प्रवर्तते। षट्त्रिचतुर्भ्यो नामिति। विकल्पे प्राप्ते नित्यार्थो योगविभाग इति सांप्रतिकाभावाद्भूतपूर्वगतिराश्रीयते। नैकमुदाहरणमिति। ह्रस्वनुड्भ्यां मतुबित्यत्र ह्रस्वग्रहणस्य स्वरितत्वमिहार्थं प्रतिज्ञातं तच्च सर्वह्रस्वसंग्रहार्थमिति विषयसंकोचो न युक्तोऽन्यथा लाघवाय नृ चान्यतरस्यामित्यनन्तरं नामिति ब्रूयादित्यर्थः ॥ नाम: ६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मतौह्रस्वादिति वर्त्तत इति। मतुब्ग्रहणमिहानुवृत्तं सामर्थ्यात्सप्तम्यन्तं संपद्यते। ततो मतौ यद्ध्रस्वान्तं दृष्टं तस्मात्परो नासुदात्तो भवतीत्यर्थः संपद्यते॥ नगोश्व॥ इहापीति। एकप्रकरणोपादानादिति भावः। ताभ्यामिति। सप्तमीबहुवचने ते ष्विति वर्णान्तत्वाभावात्प्रतिषेधो न प्राप्नोति। विधिरप्यत्रेति। तेष्विति सप्तमीबहुवचने यदकारान्तं रूपं न तस्मादत्र परा तृतीयादिः। ताभ्य इति। तास्विति सप्तमीबहुवचने वर्णान्तत्वात्। तेनेति। स इति प्रथमैकवचने यदवर्णान्तं न तस्मात्परं तृतीयैकवचनं किं त

र्ह्येतावत्प्रयोजनं स्यान्नामित्येव ब्रूयात्। तत्र वचनाद्भूतपूर्वगतिर्विज्ञास्यते। ह्रस्वान्तं यद्भूतपूर्वमिति। अथवा नैवं विज्ञायते। नाम्स्वरे मतौ ह्रस्वग्रहणं कर्त्तव्यम् इति। कथं तर्हि नाम्स्वरे मतौ ह्रस्वादिति वर्त्तत इति॥ नगोश्वन्त्सावबर्णराडङ्क्रुङ्कृद्भ्यः॥ साविति किमिदं प्रथमैकवचनस्य ग्रहणमाहो स्वित्सप्तमीबहुवचनस्य। कुतः संदेहः। समानो निर्देशः। पुरस्तादेव निर्णयः सप्तमीबहुवचनस्य ग्रहणमिति। इहापि तदेव भवितुमर्हति। यदि सप्तमीबहुवचनस्य ग्रहणम्। ताभ्यां ब्राह्मणाभ्यां याभ्यां ब्राह्मणाभ्यामत्र न प्राप्नोति। विधिरप्यत्र न सिध्यति। किं कारणम्। नह्येतद्भवति यत्सौ भवति रूपम्। इदं तर्हि तेभ्यो ब्राह्मणेभ्यो येभ्यो ब्राह्मणेभ्यः। विधिश्चासिद्धो भवति। निषेधस्तु न प्राप्नोति। अस्ति पुनः सप्तमीबहुवचनस्य ग्रहणे किंचिदिष्टं संगृहीतं भवति आहो सिद्दोषान्तमेव। अस्तीत्याह। इह याभ्यो ब्राह्मणीभ्यस्ताभ्यो ब्राह्मणीभ्य इति। विधिश्चासिद्धो भवति प्रतिषेधश्च। अस्तु तर्हि प्रथमैकवचनस्य ग्रहणम्। यदि प्रथमैकवचनस्य ग्रहणं तेनेति स्वरः पुंसि न सिध्यति। न चावश्यं पुंस्येव स्त्रियां पुंसि नपुंसके च तेन ब्राह्मणेन। तया ब्राह्मण्या। तेन कुण्डेनेति। सप्तमीबहुवचनस्यापि ग्रहण एष दोषः॥

र्हि रूपान्तरयुक्तात्। तयेति। सेति प्रथमैकवचने यदवर्णान्तं तस्मात्परा तृतीया। नपुंसके च तदिति सावबर्णान्तमेव न भवतीति तेन ब्राह्मणकुलेनेति प्रतिषेधाप्रसङ्गः। सप्तमीबहुवचनस्यापीति। तेष्विति पुंनपुंसकयोस्तावदवर्णान्तं न भवति। तास्विति। स्त्रियां यद्यप्यवर्णान्तं तथापि तयेत्यत्र रूपान्तरयुक्तात्परा तृतीयेति प्रतिषेधो न प्राप्नोति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति। प्रथमैकवचनस्यत्विह ग्रहणमितिनिर्णयस्तेन नृत्सवानित्यादावपि मतुप उदात्तत्वप्रतिषेधो भवति। सप्तमी बहुवचने त्ववर्णान्तात्तृत्सादयो न भवन्तीति मतुप उदात्तत्वनिषेधो न स्यात्। तेनेति यदुपन्यस्तं प्राप्तस्तत्र कथं स्वरः। एकारान्तं पदे कार्यसौ तस्मादत्र परो नदा॥ न चादुणे कृते प्राप्तिर्निषेधादुभयाश्रये॥ विधावन्तादिवत्तस्य चिन्त्यं तस्मादिदं द्वयम्॥ तित्स्वरितम्॥ किरतीति। इता प्रत्यायितः संज्ञाधर्मेण संज्ञी कथ्यते इत्यस्ति तिद्व्यपदेश आदेशस्य यथाऽचोयदिति प्रत्ययस्य। इत्संज्ञा प्रत्यायकत्वेन व्यवस्थितस्य प्रवर्तते। लोपविधानद्वारेण च तस्यासत्त्वं प्रत्याय्ये प्रतिपाद्यते। तथा चायमर्थः जन्तादुतोर्यः प्रत्ययो भवति स चतित्कार्यं लभत इति अनेकप्रयोजनदर्शनाच्चानुबन्धानां तकारस्तत्कालग्रहणार्थश्च स्यात् स्वरितार्थश्च। प्रत्यया

तस्मादुभाभ्यामपि प्रतिषेधे यत्त दोश्च ग्रहणं कर्तव्यमिति। न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यो यत्तदोश्चेति॥
तित्स्वरितम्॥ तिति प्रत्ययग्रहणम्॥ तिति प्रत्ययग्रहणं कर्तव्यम्। इह माभूत्। कृतद्रुतोः। किरति। गिरति। न तर्हि वक्तव्यम्। न वक्तव्यम्। नैष तकारः। कस्तर्हि। दकारः। यदि दकारः। आन्तर्यतो दीर्घः प्राप्नोति। भाव्यमानेन सवर्णानां ग्रहणं नेत्येवं न भविष्यति। यदि भाव्यमानेन सवर्णानां ग्रहणं नेत्युच्यते। अदसोसेर्दादुदोमः अमूभ्यामित्यत्र न प्राप्नोति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति। भवत्युकारेण भाव्यमानेन सवर्णानां ग्रहणमिति। यदयं दिव उदिति उकारं तपरं करोति। एवमर्थमेव तर्हि प्रत्ययग्रहणं कर्तव्यमत्र माभूदिति। नैष तकारः। कस्तर्हि दकारः। यदि दकारो न ज्ञापकं भवति। एवं तर्हि तपरस्तत्कालस्येति दकारोपि चर्त्वभूतो निर्दिश्यते। यद्येवं चर्त्वस्यासिद्धत्वाद्रुशि चेत्युत्वं प्राप्नोति। सौत्रो निर्देशः। अथवा असंहितया निर्देशः करिष्यते। अणुदित्सवर्णस्य चाप्रत्ययस्तपरस्तत्कालस्येति ॥

प्रत्यययोः प्रत्यये सं प्रत्यय इति परिभाषा भाष्यवार्तिककाराभ्यां न क्वचिदाश्रिता। एवमर्थमेवेति। उकारार्थमित्यर्थः। कस्तर्हि दकार इति। इत्संज्ञायां च कर्तव्यायां दावसान इति चर्त्वस्य पूर्वत्रासिद्धमित्यसिद्धत्वात् तित्त्वाभावात्स्वरितत्वाभावः। दकारोपीति। नन्वेवं सति तपरस्तत्कालस्येत्यत्र पञ्चमीसमासस्याश्रयणादृदोरबित्यत्रोकारस्य दपरत्वाद्भिन्नकालग्रहणाप्रसङ्गः। एवं तर्हि थकारस्यस्थाने जश्त्वं कृत्वा निर्देशः ऋदोरबिति करिष्यते। जश्त्वस्य पूर्वत्रासिद्धमित्यसिद्धत्वाद्दपरत्वाभावः। अन्यत्रापि भाष्ये यदुक्तं नैष तकारः कस्तर्हि दकार इति तस्यापि थस्य जश्त्वेन यो दकारः स विज्ञेयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तास्यनुदात्ते॥ कथमिति। यदोपदेशो कारेण विशेष्यते तदा तदन्तविधिसद्भावादकारान्तउपदेशादित्यर्थः संपद्यते। यदातूपदेशे
नाकारो विशेष्यते निपातनाच्चविशेषणस्यपरनिपातस्तदाऽकारउपदेशइत्यर्थ इति पक्षद्वयसंभवात्प्रश्नः। हतइति। हन्तेर
कारउपदेशोभवति ततः परंलसार्वधातुकमितिस्वरप्रसङ्गः। हन्तिस्त्वकारान्तउपदेशेनभवतीत्यकारान्तउपदेशइतिविज्ञा
यमानेनदोषः। तदपीति। अथहकारएवादन्तत्वाकस्मान्नाश्रीयते। नैतदस्ति। समुदायपरत्वादुपदेशस्यनास्तिहकारस्यो
पदेशत्वम्। तथाहि। हन्तिर्नकारान्तोव्यवसितउपदेशेहकारस्तुकल्पितोकारान्तत्वे नेति नासाविहगृह्यते। अर्थवतेति। यः

तास्यनुदात्तेन्ङिदुपदेशाल्लसार्वधातुकमनुदात्तमह्निङोः॥ अदुपदेशादिति कथमिदं विज्ञायते अकारो
यउपदेशइति आहोस्विदकारान्तंयदुपदेशइति। किंचातः। यदिविज्ञायते अकारोयउपदेशइति। हतोह
यइत्यत्रापिप्राप्नोति। अथविज्ञायतेअकारान्तंयदुपदेशइति। नदोषोभवति। ननुचाकारान्तंयदुपदेशइत्य
पिविज्ञायमानेऽत्रापिप्राप्नोति। एतदपिव्यपदेशिवद्भावेनाकारान्तंभवत्युपदेशः। अर्थवताव्यपदेशिवद्भावः।
यदितर्हिअकारान्तंयदुपदेशइतिविज्ञायते। माहिधुक्षातांमाहिधुक्षाथामत्रापिप्राप्नोति। अस्त्वनुदात्तत्वेकृ
तेलोपः। उदात्तनिवृत्तिस्वरेणसिद्धम्। नसिध्यति। इदमिहसंप्रधार्यम्। अनुदात्तत्वंक्रियतांलोपइति। किमत्र
त्रकर्तव्यम्। परत्वाल्लोपः। एवंतर्हि इदमद्यलसार्वधातुकानुदात्तत्वंप्रत्ययस्वरस्यापवादः। नचापवादविषय
उत्सर्गोभिनिविशते। पूर्वंह्यपवादाअभिनिविशन्ते पश्चादुत्सर्गाः। प्रकल्प्यचापवादविषयंततउत्सर्गोभिनिवि
शते। तत्र तावत्कदाचित्प्रत्ययस्वरोभवति अपवादविषयंलसार्वधातुकानुदात्तत्वंप्रतीक्षते। तत्रानुदात्तत्वं
क्रियतांलोपइति। किमत्रकर्तव्यम्। परत्वाल्लोपः॥

शब्दोर्थवान्सोर्थस्यत्यागोपादानाभ्यांभेदंप्रतिपाद्यते। यथेयायेत्यत्रेण्धातुस्ततश्चैकाजितिव्यपदिश्यते। अनर्थकस्यतुभे
दनिबन्धनाभावाद्व्यपदेशिवद्भावाभावः। माहिधुक्षातामिति। लोपेकृतेऽकारादुपदेशात्परंलसार्वधातुकंनभवतीतिना
स्त्यनुदात्तत्वप्रसङ्गः। उपदेशेयदकारान्तमित्यत्र तुपक्षे क्सस्यौपदेशेऽकारान्तत्वात्कृतेलोपएकदेशविकृतस्यानन्यत्वा
त्तदुत्तरंलसार्वधातुकमितिस्वरप्रसङ्गः। तत्रत्वावदत्रेति। लसार्वधातुकस्यप्रत्ययाद्युदात्तत्वंनप्रवर्तत इत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा·कौ· ६८

सोऽसाविति। परत्वाल्लोपे कृते उदात्तनिवृत्तिस्वरः क्रियतां लसार्वधातुकानुदात्तत्वं चेति विचारे यद्यपि परत्वाल्लसार्वधातुकानु ६११
दात्तत्वं भवति तथापि पुनः प्रसङ्गविज्ञानादुदात्तनिवृत्तिस्वरेऽभ्यस्तेवा। तस्यैवानुदात्तत्वं स्यादिति। असति सप्तमीनिर्देशेऽभ्य
स्तानामादिरुदात्तो लसार्वधातुकं चोदात्तमिति सूत्रार्थः स्यात्। वचनसामर्थ्याद्योगपद्यं स्यात्। यथान्तरङ्गतवैयुगपदित्यत्र
पर्यायो न प्रसज्येत। न चैतच्छक्यते वक्तुं लसार्वधातुकमित्युच्यमानेऽर्थाद्विभक्तिविपरिणामो भविष्यतीति यथाश्रुतसंभव

यद्यपि परत्वाल्लोपः सोऽसाववियमानोदात्ते उदात्तो लुप्यते। तास्यादिभ्योऽनुदात्तत्वे सप्तमीनिर्देशोऽभ्यस्तसिज
र्थः। तास्यादिभ्योऽनुदात्तत्वे सप्तमीनिर्देशः कर्तव्यः। लसार्वधातुक इति वक्तव्यम्। किं प्रयोजनम्। अभ्यस्तसिज
र्थम्। अभ्यस्तानामादिरुदात्तो भवति लसार्वधातुके सिजन्तस्यादिरुदात्तो भवति लसार्वधातुके। लसार्वधातुक
मित्युच्यमाने तस्यैवानुदात्तत्वं स्यात्। सप्तमीनिर्देशः क्रियते लसार्वधातुके तास्यादीनामनुदात्तत्वं प्राप्नोति।
नैष दोषः। तास्यादिभ्य इत्येषा पञ्चमी लसार्वधातुक इति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति।
चित्स्वरात् तास्यादिभ्योऽनुदात्तत्वं विप्रतिषेधेन। चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं भवति विप्रतिषेधेन। चित्स्वर
स्यावकाशः। चलनः। चोपनः। तास्यादिभ्योऽनुदात्तत्वस्यावकाशः। आस्ते। शेते। इहोभयं प्राप्नोति। आसीनः। शयानः।
तास्यादिभ्योऽनुदात्तत्वं भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। किं कारणम्। द्विकार्ययोगो हि विप्रतिषेधः।
न चात्रैको द्विकार्ययोगः। आदेरनुदात्तत्वमन्तस्योदात्तत्वम्। नावश्यं द्विकार्ययोग एव विप्रतिषेधः। किं तर्हि संभवो
ऽपि। न तु चात्रास्ति संभवो यदुभयं स्यात्। आदेरनुदात्तत्वमन्तस्य चोदात्तत्वमिति। अस्ति च संभवो यदुभयं स्यात्।
नैषोऽस्ति संभवः। आदेरनुदात्तत्वमन्तस्य चोदात्तत्वमिति। कथम्। वक्ष्यत्येतत् स्वरविधौ सङ्घातः कार्यी भव
ति। मुकश्चोपसंख्यानम् ॥

स्य संभवे विभक्तिविपरिणामस्यायोगात्। तास्यादिभ्य इत्येषेति। अकृतार्था हि पञ्चमीसप्तमीनिर्देशस्तत्र कृतार्थः। संघातः कार्यीति।
तत्र स्थानस्य सर्वस्यानुदात्तत्वेन भाव्यं न त्वादेः परस्येति वचनाद्देः। तत्रोदात्तानुदात्तयोरेकविषयत्वादस्ति विरोधः इति पर रामः
त्वात् चित्स्वरं बाधित्वाऽनुदात्तत्वं भवतीत्यर्थः ॥ ६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्ष्यतीति। सप्तमेध्यायेङ्गस्ययोऽकारस्तस्यमुगितिसूत्रार्थव्यवस्थापनात्तत्रस्वावयवे नव्यवधानाभावादुपदेशग्रहणान्मु किसत्यप्यर्धमात्रत्वेपिप्रवर्ततेनिघातः। आतोङितइतीयादेशस्त्वाकारस्यातइतितपरकरणान्नभवति। स्वरविधौव्यञ्जनम विद्यमानवदितिपरिहारोनोक्तः। हल्स्वरप्राप्तौव्यञ्जनमविद्यमानवदित्येवंव्यवस्थापनात्। इतश्चेति। तुदतइत्यादौस्तव कार्यंवचनंपचतइत्यादौनप्रवर्तेत। शपउपदेशेहलन्तत्वादकारान्तत्वाभावादिति वचनमित्यंतत्कादनुदात्तार्थम्। अने कान्तादृति। यद्यपितस्यलोपइत्यत्रैकान्तपक्षःस्थापितस्तथापिपक्षान्तराश्रयेणात्रपरिहारउक्तः। एकान्तपक्षेपुदीचामाङः

मुकश्चोपसंख्यानंकर्त्तव्यम्। पचमानोयजमानः। मुकाव्यवहितत्वादतुपदेशाल्लसार्वधातुकमनुदात्तंभ वतीत्यनुदात्तत्वंनप्राप्नोति। ननुचायंमुकूअदुपदेशभक्तः अदुपदेशग्रहणेनग्राहिष्यते। नसिध्यति। अ ङ्गस्यमुगुच्यते। विकरणान्तंचाङ्गं सोऽसौसंङ्घातभक्तः। अशक्योमुकूअदुपदेशग्रहणेनग्रहीतुम्। अथाय मतोभक्तःस्यादृगृह्येतायमदुपदेशग्रहणेन। बाढंगृह्येत। अङ्गकस्तर्हिभविष्यति। तत्कथम्। वक्ष्यत्येत स्यपरिहारम्। इतश्चोपसंख्यानम्। इतश्चोपसंख्यानंकर्तव्यम्। इडिश्चव्यव हितत्वादनुदात्तत्वंप्राप्नोति। पचतः। पठतः। इतश्चानेकान्तत्वात्। अनेकान्ताअनुबन्धाः। यद्यनेकान्ताअनुबन्धाः। अदिप्रभृतिजुहोत्या दिभ्यःप्रतिषेधोवक्तव्यः। अत्तः। जुह्वतइति। अदुपदेशादित्यनुदात्तत्वंप्राप्नोति। तत्रादिप्रभृतिभ्योजुहोत्या दिभ्योऽप्रतिषेधःस्यान्यादेशाभावात्। तत्रादिप्रभृतिभ्योजुहोत्यादिभ्योऽप्रतिषेधः। अनर्थकःप्रतिषेधोऽ प्रतिषेधः। अनुदात्तत्वंकस्मान्नभवति। स्थान्यादेशाभावात्। नैवात्रस्थानिनंनैवादेशंपश्यामः ॥

इतिकृतात्त्वस्यनिर्देशाज्ज्ञापकात्कार्येष्वनुबन्धानामप्रतिबन्धकत्वमनुमीयते। अत्तइति। यथापचावइति कृतेपि दीर्घत्वउपदेशग्रहणान्निघातोभवत्येवंशब्लोपेपिप्राप्नोतीतिभावः। नैवात्रेति। आदेशस्यात्राभावरूपत्वादतुपदेशात्प रंलसार्वधातुकंनभवति। नचस्थानिवद्भावोस्ति। अल्विधित्वात्। नापिप्रत्ययलक्षणम्। वर्णाश्रयत्वात्। पचावइत्यत्रतु दीर्घीभूतोकारोविद्यतएवेतिप्रवर्त्ततएवनिघातः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुदात्तङिद्ग्रहणाद्वेति। आस्ते शेत इत्येवमाद्यर्थाल्। विन्दात इति। विन्दीधिखिदिभ्यः प्रतिषेधमनाश्रित्येदमुक्तम्। विकरणेभ्य इति। सिद्धं तु पूर्वस्य कार्यातिदेशादित्यनपेक्ष्य चोद्यप्रतिसमाधाने उक्ते॥ आदिः॥ अनिटः पित इति। अनिटः सिचः परः पित्सक्षउदात्तो भवति। पक्षे त्वनुदात्तः। तेन माहिकार्षमिति तिङन्तं पक्षआद्युदात्तं पक्षे त्वन्तोदात्तं भवति। अन्यथा धातुस्वरेण नित्यमाद्युदात्तं स्यात्। माहिलाविषमिति पक्षआद्युदात्तं तिङन्तं पक्षे मध्योदात्तं सिचः स्वरेण न त्वन्तोदात्तम्॥ स्वपादि॥

अनुदात्तङिद्ग्रहणाद्वा। अथवा यदयमनुदात्तङिद्ग्रहणं करोति तज्ज्ञापयत्याचार्यो न लुक्स्नु विकरणेभ्यो नुदात्तत्वं भवतीति। नैतदस्ति ज्ञापकम्। अस्मर्थमेतत्स्यात्। विन्दाते खिन्दाते। यत्तर्हि ङिद्ग्रहणं करोति। न ह्यस्मिन् विकरणो ङिदस्ति। ङितोनुदात्तत्वे विकरणेभ्यः प्रतिषेधश्च वक्तव्यः। चिनुतः। लुनीतः। ङित इत्यनुदात्तत्वं प्राप्नोति। ङितोनुदात्तत्वे विकरणेभ्यः प्रतिषेधः सर्वस्योपदेशविशेषणत्वात्। ङितोऽनुदात्तत्वे विकरणेभ्यः प्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। अनुदात्तत्वं कस्मान्न भवति। सर्वस्योपदेशविशेषणत्वात्। सर्वमुपदेशग्रहणेन विशेषयिष्यामः। उपदेशेऽनुदात्तेतः। उपदेशे ङितः। उपदेशेऽकारान्तादिति॥ आदिः सिचोन्यतरस्याम्॥ सिच आद्युदात्तत्वेऽनिटः पित उपसंख्यानम्। सिच आद्युदात्तत्वेऽनिटः पित उपसंख्यानं कर्तव्यम्। माहिकार्षम्। अनिट इति किमर्थम्। माहिलाविषम्॥ स्वपादिर्हिंसामच्यनिटि॥ स्वपादीनां वावचनादभ्यस्तस्वरो विप्रतिषेधेन॥ स्वपादीनां वावचनादभ्यस्तस्वरो भवति विप्रतिषेधेन। स्वपादीनां वावचनस्यावकाशः। स्वपन्ति। श्वसन्ति। अभ्यस्तस्वरस्यावकाशः। ददति। दधति। इहोभयं प्राप्नोति। जाग्रति। अभ्यस्तस्वरो भवति विप्रतिषेधेन॥ अनुदात्ते च॥ अनुदात्ते चेति बहुव्रीहिनिर्देशो लोपयणादेशार्थः॥ अनुदात्ते चेति बहुव्रीहिनिर्देशः कर्तव्यः। अविद्यमानोदात्तेऽनुदात्त इति वक्तव्यम्। किं प्रयोजनम्। लोपयणादेशार्थं। लोपयणादेशयोः कृतयोराद्युदात्तत्वं यथा स्यात्। माहिस्म दधात्। दधात्यत्र॥

आगणान्ताः स्वपादयः। स्वपन्तीति। पक्षे आद्युदात्तं पदं पक्षे प्रत्ययस्वरेण मध्योदात्तम्॥ अनुदात्ते॥ माहिस्म दधादिति। शास्त्रीयेऽनुदात्ते गृह्यमाणे नित्यत्वादन्तरङ्गत्वादेकारलोपे कृतेऽचोऽनुदात्तस्य परस्याभावादाद्युदात्तं न स्यात्। बहुव्रीहिविज्ञाने तु भवति। दधात्यत्रेति। अत्र यणादेशस्य बहिरङ्गत्वादसिद्धत्वादपि स्वरः सिध्यति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वस्य॥ सर्वशब्दउणादिष्वन्तोदात्तो निपातितः। सर्वस्य विकारः सार्वइत्यत्रानुदात्तादिलक्षणोऽञ्यथा स्यादिति। तस्य सुप्याद्यु दात्तत्वं विधीयते। सर्वस्वरोनकच्कस्येति। तन्मध्यपतितस्तद्ग्रहणेनगृह्यतइति साकच्कस्याप्युदात्तत्वे प्राप्तेवचनम्॥ भीह्री॥ अनुदात्तेचेत्याद्युदात्तत्वे प्राप्तेवचनम्। भ्यादिग्रहणमिति। अनुदात्तेचेत्यनेनाद्युदात्तत्वं विधीयते। अनेन चप्रत्ययात्पूर्वस्योदात्तत्वमितिविरोधाल्लक्ष्यस्यदर्शनवशाद्भ्यादीनामेवप्रत्ययात्पूर्वस्योदात्तत्वंभविष्यतीतिप्रश्नः। ददातीति। वचनमन्तरेणविषयविभागोनलभ्यतइतिभावः। पूर्वोक्तेनाभिप्रायेणचोदकआह। अभ्यस्तस्वरइति। सिद्धान्तवाद्याह। अन्ततइति। विरोधात्समावेशाभावेपर्यायेणोभयंस्यादित्यर्थः। अथवा सर्वेषामभ्यस्तानांपितोलसार्वधातुकात्पूर्वस्योदात्तत्वंस्यादितिप्रतिपाद

सर्वस्यसुपि॥ सर्वस्वरोनकच्कस्य॥ सर्वस्वरोऽनकच्कस्येतिवक्तव्यम्। इहमाभूत्। सर्वके॥ भीह्रीभृहुमदजनधनदरिद्राजागरांप्रत्ययात्पूर्वंपिति॥ भ्यादिग्रहणंकिमर्थम्। इहमाभूत्। ददाति। दधाति। नैतदस्तिप्रयोजनम्। अभ्यस्तस्वरोऽत्रबाधकोभविष्यति। अन्ततउभयंस्यात्। अनवकाशाःखल्वपिविधयोबाधकाभवन्ति। सावकाशश्चाभ्यस्तस्वरः। कोऽवकाशः। मिमीते। अथप्रत्ययग्रहणंकिमर्थम्। प्रत्ययात्पूर्वस्योदात्तत्वंयथास्यात्। आटः पूर्वस्यमाभूदिति। बिभयानि। नचैवास्तिविशेषः। प्रत्ययाद्वापूर्वस्योदात्तत्वेसत्याटोवा। अपिचपिद्ग्रहणेन ग्राहिष्यते। इदंतर्हिप्रयोजनंप्रत्ययात्पूर्वस्योदात्तत्वंयथास्यात्। आटएवमाभूदिति। एतदपिनास्तिप्रयोजनम्। पिद्ग्रहणेनग्राहिष्यते॥

पितुमाह। अनवकाशइति। मिमीतइति। ङित्वाल्लसार्वधातुकानुदात्तत्वेकृतेअनुदात्तेचेत्याद्युदात्तत्वम्। अथप्रत्ययग्रहणमिति। भ्यादिभ्यः परःप्रत्ययएवपित्त्वंभवतीतिप्रश्नः। आटःपूर्वस्येति। आडुत्तमस्यपिच्चेतिपिल्लमाटएवविधीयतइतिपक्षाश्रयेणेदमुक्तम्। आट्चागमोनप्रत्ययः। प्रत्ययाद्वेति। अत्रहियःप्रत्ययात्पूर्वःसएवाटइतिविशेषाभावः। अपिचेति। पित्त्वंलोडुत्तमस्यैवविधीयतेनत्वाटइत्याट्सहितोलोडुत्तमःपिद्भवति। ततश्चपूर्वस्योदात्तत्वंभवत्येवेत्यर्थः। आटएवेति। लोडादेशास्थितःपूर्वआड्भवतिप्रत्ययात्तुपूर्वोनभवत्याट्सहितस्यप्रत्ययत्वात्। पिद्ग्रहइति। तदवयवत्वेनपौर्वापर्याभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवं तर्हीति। प्रत्ययग्रहणमन्तरेणासङ्घातितः पूर्वस्योदात्तत्वे सिद्धे प्रत्ययग्रहणं प्रत्ययात्पूर्वस्यैव चउदात्तत्वं यथा स्यात् संघा
तस्य माभूदित्येवमर्थम्। संघातस्य कार्यित्वे पर्याये णोदात्तत्वप्रसङ्गः। यदि च स्वरविधौ संघातः कार्यी भवति तत स्तन्निवृत्त्य
र्थमिह प्रत्ययग्रहणमर्थवद्भवतीत्यर्थः। चित्स्वर इदिति। यतो लसार्वधातुकस्य सर्वस्यानुदात्तत्वं न लादेस्ततो विप्रतिषेध उपप
द्यते। एकस्मिन्विषये प्रसङ्गादुदात्तानुदात्तयोरित्यर्थः। पूर्वग्रहणमिति। प्रत्यये पितीति वक्तव्यमिति प्रश्नः। स्वरविधौ प्रत्ययग्रहणं सङ्घातस्य प्रत्ययान्तस्य कार्यनिवृत्त्यर्थं पूर्वग्रहणं स्वरविधौ तदन्तस्य कार्यित्वं ज्ञापयतीत्यर्थः। स्वरविधौ प्रत्यय इति
विहितपिदन्तस्योदात्तत्वं भवतीति। उपोत्तमं रितीति। अत्र हिरिति प्रत्यये परत उपोत्तमोदात्तप्रसङ्गो विप्रत्ययान्तस्य चोपोत्तमोदा

एवं तर्हि सिद्धे सति यत्प्रत्ययग्रहणं करोति तज्ज्ञापयत्याचार्यः स्वरविधौ सङ्घातः कार्यी भवतीति। किमेतस्य ज्ञा
पने प्रयोजनम्। चित्स्वराचास्यादिभ्योऽनुदात्तत्वं विप्रतिषेधेनेत्युक्तं तदुपपन्नं भवति। अथ पूर्वग्रहणं किमर्थम्। अन्त
स्मिन्निति निर्दिष्टे पूर्वस्येति पूर्वस्य भविष्यति। एवं तर्हि सिद्धे सति यत्पूर्वग्रहणं करोति तज्ज्ञापयत्याचार्यः स्वरवि
धौ सप्तम्यस्तदन्तसप्तम्यो भवन्ति। किमेतस्य ज्ञापने प्रयोजनम्। उपोत्तमं रितीति रिदन्तस्य। चङ्यन्यतरस्यां चङन्त
स्य। यद्येतज्ज्ञाप्यते चतुरः शसि शसन्तस्यापि प्राप्नोति। शस्ग्रहणसामर्थ्यान्न भविष्यति। इतरथा हि तत्रैवायं ब्रूया
दूऊडिदंपदाद्यप्पुम्रैद्युभ्यः चतुर्भ्यश्चेति। अथापि द्विग्रहणं किमर्थम्। इह माभूत्। जाग्रति। नैतदस्ति प्रयोजनम्।
भवत्येवात्र पूर्वेण। इदं तर्हि प्रयोजनम्। दरिद्रति। आकारेण व्यवहितत्वान्न भविष्यति। लोपे कृते नास्ति व्यवधानम्।
स्थानिवद्भावाद्व्यवधानमेव। प्रतिषिध्यतेऽत्र स्थानिवद्भावः स्वरविधिं प्रति न स्थानिवद्भवतीति ॥

त्त्वमिष्यते। चतुर्भ्यश्चेति। असर्वनामस्थानग्रहणानुवृत्त्या षड्भि चतुर्भ्यो हलादिरिति हलादेर्भ्योदात्तत्वविधानाच्छसेवं भविष्यती
तिभावः। भवत्येवात्र पूर्वेणेति। अभ्यस्तानामादिरित्यनेन। ननु च स्वरभेदो भवति। अनेन पूर्वस्याकारस्योदात्तत्वं भवति। तत्रश्चो
दात्तस्वरितयोर्यण इति ——— स्वरितप्रसङ्गोऽभ्यस्तानामादिरित्यनेन तूदात्तत्वे पदमात्रानुदात्तं भवति। एवं तर्हि नित्य
त्वात्पूर्वं यणादेशे कृते नास्ति स्वरभेदः। ननु स्वरभिन्नस्य प्राप्नुवन्यणादेशोऽप्यनित्यः। एवं तर्हि स्पष्टोदाहरणान्तरसद्भावात्सुखु
भाष्यकारेणैतन्निरूपितम्। दरिद्रतीति। अत्रेकारस्योदात्तत्वं माभूदाद्युदात्तमेव यथा स्यादित्येवमर्थं पिद्ग्रहणमित्यर्थः। लो
पे कृतवदिति। श्नाभ्यस्तयोरात इति परत्वाल्लोपः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अचः कर्तृ॥ जायते स्वयमेवेति। अन्तर्भावितण्यर्थत्वाज्जनिः कर्मकर्तृयग्विषयः। एवं ह्यादशधाजन्नद्गत्यादौ चान्तर्भावितण्य
र्थस्य सकर्मकस्य दृश्यते प्रयोगः। न कर्तव्यमिति। योगविभागमन्तरेणोपदेशग्रहणानुवृत्त्यैव सिद्धत्वात्। तत्र यग्विभाषेति य
कारादिप्रत्ययविषयभावउपदेशे जनादीनामात्वविधानादिह च तास्यादिसूत्रादुपदेशग्रहणानुवर्तनादुपदेशे जन्तस्य कर्तृ
यक्याद्युदात्तस्य विधानात् सर्वत्रेष्टविषये स्वरः सिद्धः॥ थलि॥ सेड्ग्रहणमिति। इड्ग्रहणाद्देव थल् सेड् ग्रहीष्यत इति प्रश्नः। प

अचः कर्तृयकि॥ यकि रपरउपसंख्यानम्। यकि रपरउपसंख्यानं कर्तव्यम्। स्तीर्यते स्वयमेव। उपदेशवच
नात्सिद्धम्। उपदेश इति वक्तव्यम्। उपदेशे जनादीनाम्। उपदेशवचने जनादीनां स्वरो न सिध्यति। जायते
स्वयमेव। जायते स्वयमेव। योगविभागात्सिद्धम्। योगविभागः करिष्यते। अजन्तानां कर्तृयकि। वा आदिरु
दात्तो भवति। चीयते स्वयमेव चीयते स्वयमेव। जायते स्वयमेव जायते स्वयमेव। तत उपदेशे। उपदेशे वाज
न्तानां कर्तृयकि वा आदिरुदात्तो भवति। स्तीर्यते स्वयमेव स्तीर्यते स्वयमेव तत्तर्ह्युपदेशग्रहणं कर्तव्यम्। द
नह्यन्तरेणोपदेशग्रहणं योगाङ्गं जायते। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। तास्यनुदात्तेन्ङिदुप
देशाल्लसार्वधातुकमनुदात्तमह्न्विङोरिति। ननु चोक्तमुपदेशे जनादीनामिति। नैष दोषः। नैवं विज्ञायते।
उपदेशवचने जनादीनां स्वरो न सिध्यतीति। कथं तर्हि। जनादीनामप्यात्वे उपदेशवचनं कर्तव्यमिति।
तत्तर्हि तत्रोपदेशग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। अनुदात्तोपदेशवनतितनो
त्यादीनामनुनासिकलोपो झलि क्ङितीति॥ थलि च सेटीडन्तो वा॥ सेड्ग्रहणं किमर्थम्। न थलीडन्तो वेत्युच्ये
त। इडन्तो वेत्युच्यमाने इहापि प्रसज्येत। पपक्थ। नैतदस्ति प्रयोजनम्। अच इति वर्तते। इदं तर्हि प्रयोजनम्।
पयाथेति ॥

पक्थेति। थलीत्यनेन थलन्तस्य ग्रहणादत्राप्यन्तोदात्तत्वम्। पक्षे चाद्युदात्तत्वं स्याल्लित्स्वरेण मध्योदात्तत्वं चेष्यते। इड्ग्रह
णं तु यदेडागमः क्रियते प्रेचिथेति तदोदात्तत्वार्थं स्यात्। यथा चलुलविथेत्यादौ चतुर्णां पर्यायेणोदात्तत्वविधाने पपिथेत्यादौ चतुर्था
भावे पि पर्यायेणोदात्तत्रयं भवत्येवमिड्भावे पि पपक्थेत्यत्र स्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· ७१

संज्ञायाम्॥प्रत्ययलक्षणेनेति। चञ्चेव चञ्चा वध्रिकेव वध्रिकेत्यादौ संज्ञायामिति विहितस्य कनो लुम्मनुष्य इति लुब्विधानात्। अङ्गाधिकार इति। सोवर्यः सप्तम्य इति वचनान्नलुमतातस्मिन्निति न्यासेपि नास्ति प्रत्ययलक्षणप्रतिषेध इत्यर्थः। अनुबन्धलक्षण इति। अनुबन्धमात्राश्रयस्वरविषयं ज्ञापकमित्यर्थः। उष्ट्रग्रीवेति। इवे प्रतिकृताविति विहितस्य कनो ञ्नीचि कार्थे चापण्य इति लुप्। पथिप्रिय इति। बहुव्रीहौ प्रकृत्या पूर्वपदमिति प्रकृतिस्वर आद्युदात्तत्वं प्राप्नोत्यन्तोदात्तत्वं चेष्यते। सर्वस्तो ६ ११

संज्ञायामुपमानम्॥ किमर्थमिदमुच्यते। नञ्त्यादिर्नित्यमित्येव सिद्धम्। ञ्नितीत्युच्यते। न चात्र ञ्नितं पश्यामः। प्रत्ययलक्षणेन। ननु मतातस्मिन्निति प्रत्ययलक्षणप्रतिषेधः। अङ्गाधिकारोक्तस्य स प्रतिषेधः। न लुमताङ्गस्येति। अत उत्तरं पठति। उपमानस्याद्युदात्तवचनं ज्ञापकमनुबन्धलक्षणे स्वरे प्रत्ययलक्षणप्रतिषेधस्य। उपमानस्याद्युदात्तवचनं ज्ञापकार्थं क्रियते। किं ज्ञाप्यम्। एतज्ज्ञापयत्याचार्यो ऽनुबन्धलक्षणे स्वरे प्रत्ययलक्षणं न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। गर्गाः। वत्साः। विदाः। ऊर्वाः। उष्ट्रग्रीवा। वामरज्जुः। ञ्नितीत्याद्युदात्तत्वं न भवति। इह वात्रप इति तद्धितस्य कित इत्यन्तोदात्तत्वं न भवति। यद्यनुबन्धलक्षण इत्युच्यते पथिप्रियो मथिप्रिय इति पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं प्राप्नोति। एवं तर्ह्याचार्यो ज्ञापयति स्वरे प्रत्ययलक्षणं न भवतीति। एवमपि सर्पिरागच्छ सप्तागच्छतेति। आमन्त्रितस्येत्याद्युदात्तत्वं न प्राप्नोति। इह च माहि दाता माहि धाता मादिः सिचोऽन्यतरस्यामित्येष स्वरो न प्राप्नोति। एवं तर्हि ज्ञापयत्याचार्यः सप्तमीनिर्दिष्टे स्वरे प्रत्ययलक्षणं न भवतीति। एवमपि। सर्वस्तोमः सर्वपृष्ठः। सर्वस्य सुपीत्याद्युदात्तत्वं न प्राप्नोति। एवं तर्ह्यनुबन्धलक्षण इत्येव। कथं पथिप्रियो मथिप्रियः। वक्तव्यमेवैतत्। पथिमथोः सर्वनामस्थाने लुकि लुमता लुप्ते प्रत्ययलक्षणं भवतीति ॥

म इति। बहुव्रीहौ प्रकृत्याद्युदात्तत्वं सर्वशब्दस्येष्यते। अनुबन्धलक्षण इत्येवेति। एवं च कित्स्वरोपि प्रत्ययलक्षणेन न भवति। सिच्स्वर आमन्त्रितस्वरास्तु न भवन्ति। अत्र यद्यप्यत्रेतस्यानिजइति ढक्कोऽ त्रिभृगुकुत्सेति लुक्। सर्पिरागच्छेत्यत्र स्वमोर्नपुं राम: सकादिति सोर्लुक्। माहि दाता मित्यत्र गातिस्थाघ्विति सिचो लुक् ॥ ७१

CC-0. In Public Domain. Digitization by eGangotri

निष्ठा च॥ निष्ठायां यजीति। अनाकारान्तार्या निष्ठेत्याश्रित्य वार्त्तिकारम्भः। निर्देश इति। अनात इति भाष्यमित्यर्थः। इह च प्राप्नोतीति। विधिः। प्रतिषेधाभावात्। न चेदाकार इति। तेनाप्नोरिद्ध इत्यादावाकारस्योदात्तत्वाभावः। अद्याष्ट इति। एकादेशे कृते आकारः कार्यीत्याद्युदात्तत्वं न प्राप्नोति। तस्मात्कार्यिविशेषणपक्षेप्यवश्यमाश्रयितव्या बहिरङ्ग परिभाषेत्याह। तस्मादिति। बहिरङ्गलक्षणत्वादिति सुष्ठूच्यते। अवश्याश्रयितव्यत्वादस्याः परिभाषायास्तत्राद्याष्ट इत्यत्रैकादेशस्य बहिरङ्गत्वादसिद्धत्वादनादिति प्र

निष्ठा च द्व्यजनात्॥ निष्ठायां यजि दीर्घत्वे प्रतिषेधः॥ निष्ठायां यजि दीर्घत्वे प्रतिषेधो वक्तव्यः। दत्तीभ्यां गुप्ताभ्याम्। न वा बहिरङ्गलक्षणत्वात्। न वा वक्तव्यः। किं कारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गोत्र दीर्घः। अन्तरङ्गः स्वरः। असिद्धं बहिरङ्गमन्तरङ्गे। अन्तरेण प्रतिषेधमन्तरेण चैतां परिभाषां सिद्धम्। कथम्। नैवं विज्ञायते। न चेदकारान्ता निष्ठेति। कथं तर्हि न चेदाकारात्परा निष्ठेति। यद्येवं निर्देशश्चैवं नोपपद्यते। न ह्येषा आकारात्परा पञ्चमी युक्ता। इह च प्राप्नोति। आप्नोरिद्ध इति। एवं तर्हि न चेदवर्णात्परा निष्ठेति। भवेन्निर्देश उपपन्न इह तु प्राप्नोति। आप्नोरिद्ध इति। इह च न प्राप्नोति। यतः रत इति। एवं तर्हि विहितविशेषणमकारान्तग्रहणम्। न चेदकारान्ताद्विहिता निष्ठेति। एवमपि दत्तः। अत्र न प्राप्नोति। इह च प्राप्नोति। आप्नोरिद्ध इति। एवं तर्हि कार्यिविशेषणमाकारग्रहणम्। न चेदाकारः कार्यी भवतीति। एवमप्यद्याष्टः कदाष्टः। अत्र न प्राप्नोति। तस्मात्सुष्ठूच्यते। निष्ठायां यजि दीर्घत्वे प्रतिषेधो न वा बहिरङ्गलक्षणत्वादिति॥ आशितः कर्त्ता॥ किं निपात्यते। आशिते कर्त्तरि निपातनमुपधादीर्घत्वमाद्युदात्तत्वं च। आशित इति क्तः कर्त्तरि निपात्यते। आशितवान्। आशितः। उपधादीर्घत्वमाद्युदात्तत्वं निपात्यते। आद्युदात्तत्वमनिपात्यमधिकारात् सिद्धम्। उपधादीर्घत्वमनिपात्यम्। आङ्पूर्वस्य प्रयोगः। यद्येवमच्ग्रहः प्राप्नोति। न हि लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यम्। यथालक्षणं पदं कर्त्तव्यम्॥

तिषेधाभावः॥ आशितः॥ सकर्मकत्वादशेः कर्त्तर्यप्राप्तः क्तो निपात्यते। न चाविवक्षितकर्मत्वादकर्मकव्यपदेशात्कर्त्तरि क्तो लभ्यते। पचिददात्यादीनामपि कर्मविशेषाविवक्षायां कर्त्तरि क्तप्रसङ्गात्। तस्माद्यस्य न कदाचिदेकस्मिन्नेवार्थे द्रव्यकर्मणा संबन्धः सोऽकर्मको नान्यः॥ आङ्पूर्वस्येति। थाथादिस्वरापवाद आद्युदात्तत्वं विधीयते। न लक्षणेनेति। संहितैव पौरुषेयी पदानि तु पौरुषेयाणीति भावः।

CC-0. In Public Domain. Digitization by eGangotri

रिक्ते॥ वेणुरिक्तयोरिति। संज्ञायां पूर्वविप्रतिषेधान्नित्यो विधिः प्रवर्तत इति भावः॥ उपोत्तमम्॥ नरितीति। रइति रसंज्ञोऽन्त्यो वर्णो रित्युच्यते नोऽन्त्ये। तस्मिन्पूर्वमुदात्तमिति विज्ञायमाने नार्थ उपोत्तमग्रहणेनेत्यर्थः। माहिस्मदधदिति। धेटो विभाषा धेट्श्व्योरिति च्ले श्चङादेशः। तत्र त्रिप्रभृतीनामभावादुपोत्तमं चङन्तस्य नास्तीति चङ एवोदात्तत्वं भवति। पूर्वग्रहणे क्रियमाणे चङः पूर्वस्य धातोः स्यात्॥ चौ॥ चौरतद्धित इति। चौ यः स्वरो विधीयते स चोः संबन्धी भवतीति षष्ठीनिर्देशः कृतः। प्रत्ययस्वरोऽत्रेति। यत्रानुदात्तः प्रत्ययः स

रिक्ते विभाषा॥ विभाषा वेण्विन्धानयोः॥ किमियं प्राप्ते विभाषा आहोस्विदप्राप्ते। कथं च प्राप्ते कथं वाप्राप्ते। यादिसंज्ञायामुपमानं निष्ठा वद्व्यञ्जनादिति च नित्ये प्राप्ते आरम्भः ततः प्राप्ते। अन्यथा त्वप्राप्ते। वेणुरिक्तयोरप्राप्ते विभाषा प्राप्ते नित्यो विधिः। वेणुरिव वेणुः। रिक्तो नाम कश्चित्॥ उपोत्तमं रिति॥ उपोत्तमग्रहणं किमर्थम्। नरिति पूर्वमित्येवोच्येत। तत्रायमर्थः। मतोः पूर्वमात्संज्ञायां स्त्रियामित्यत्र पूर्वग्रहणं न कर्तव्यं भवति। एवं तर्हि उपोत्तमग्रहणमुत्तरार्थम्। चङ्यन्यतरस्याम् उपोत्तममित्येव। इह मा भूत्। माहिस्मदधत्॥ अन्तोऽवत्याः॥ ईवत्याः॥ किमर्थमिदमुभयमुच्यते। नवत्या इत्येवोच्येत। वत्या इतीयत्युच्यमाने राजवती। अत्रापि प्रसज्येत। अथावत्या इत्युच्यमाने कस्मादेवात्र न भवति। असिद्धो नलोपस्तस्यासिद्धत्वान्नैषोऽवती शब्दः। कस्तर्हि। अन्वती शब्दः। यथैव तर्हि नलोपस्यासिद्धत्वान्नावती शब्दः एवं वत्वस्यासिद्धत्वान्न ईवती शब्दः। आश्रयात्सिद्धत्वं स्यात्॥ चौ॥ चौरतद्धिते॥ चुस्वरः अतद्धित इति वक्तव्यम्। इह मा भूत्। दाधीचो माधूच इति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। प्रत्ययस्वरोऽत्र बाधको भविष्यति। स्थानान्तरप्राप्तश्चुस्वरः प्रत्ययस्वरस्यापवादः। अनुदात्तौ सुप्पितावितीति। अनुदात्तौ सुप्पितावेतस्योदात्तनिवृत्तिस्वरः उदात्तनिवृत्तिस्वरस्य चुस्वरः। स यथैवोदात्तनिवृत्तिस्वरं बाधते एवं प्रत्ययस्वरमपि बाधेत। नात्रोदात्तनिवृत्तिस्वरः प्राप्नोति। किं कारणम्। न गोश्वन्साववर्णेति प्रतिषेधात् ॥

चुस्वरस्यावकाशः। दधीचो दधीचेति भावः। स्थानान्तरप्राप्त इति। अपवादस्थानं प्राप्तो बलवानित्यर्थः। तदेवापवादत्वं दर्शयति। प्रत्ययस्वरस्येति। प्रत्ययस्वरस्यैवोदात्तनिवृत्तिस्वरेण प्रत्यापत्तिः क्रियत इति प्रत्ययस्वरापवादश्चुस्वर इत्यर्थः। कृत्स्वरेण चाञ्चतेरकार उदात्तः। न गोश्वन्निति। अञ्चतिर्धातुरेव तत्रोपात्तो न तु नाञ्चेः पूजायामिति प्रतिषिद्धनलोपः क्विन्नन्तः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयादिस्वरस्येति। नगोश्वन्नित्यत्र सावेकाचइत्यतस्तृतीयादिग्रहणमनुवर्त्तते। यत्रतर्हीति। तत्रोदात्तनिवृत्तिस्वरस्य
बाधकएवत्तुस्वर इत्यर्थः। एवंतर्हीति। नगोश्वन्नित्यत्र विभक्तिग्रहणमेवानुवर्त्ततेनतृतीयादिग्रहणमित्यर्थः। ततश्चतुस्वरः
प्रत्ययस्वरस्यनबाधकइतिउपसंख्यानंनारब्धव्यम्। प्रत्ययस्वरेणासिद्धत्वात्। दृसवानिति। मतुपोविभक्तित्वाभावात्प्र
तिषेधाभावेह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वंप्राप्नोति। वेतस्वानिति। कुमुदनडवेतसेभ्योड्मतुप्प्रत्ययः। तत्रलक्ष
णविशेषानपेक्षेउदात्तत्वमात्रप्रतिषेधेविज्ञायमानेउदात्तनिवृत्तिस्वरस्यात्रनिषेधः प्राप्नोतीत्यर्थः। ड्मतुप्चैषइति। त

नैषउदात्तनिवृत्तिस्वरस्यप्रतिषेधः। कस्यतर्हि। तृतीयादिस्वरस्य। यत्रतर्हितृतीयादिस्वरोनास्ति। दधीचःपश्ये
ति। एवंतर्हिनतृतीयादिलक्षणस्यप्रतिषेधंशिष्मः। किंतर्हि। येनकेनचिल्लक्षणेनप्राप्तस्यविभक्तिस्वरस्य
प्रतिषेधम् । ।यदिविभक्तिस्वरस्यप्रतिषेधः। दृसवान्द्रुस्वान्। अत्रनप्राप्नो
ति। मतुब्ग्रहणमपिप्रकृतमनुवर्त्तते। क्वप्रकृतम्। ह्रस्वनुड्भ्यांमतुबिति। यदितदनुवर्त्तते। वेतस्वानत्रापि
प्राप्नोति। मतुब्ग्रहणमनुवर्त्तते। ड्मतुबेषः। यदितर्हिमतुपोग्रहणेड्मतुपोग्रहणंनभवति। वेतस्वानिति
वत्वंनप्राप्नोति। सामान्यग्रहणंवत्वे। इहपुनर्विशिष्टस्यग्रहणम्। यत्रतर्हिविभक्तिर्नास्तिदधीचीइति। यदि
पुनरयमुदात्तनिवृत्तिस्वरस्यापिप्रतिषेधोविज्ञायेत। नैवंशक्यम्। इहापिप्रसज्येत। कुमारीति। सतिशिष्टः
खल्वपित्तुस्वरः। कथम्। चाविरयुच्यते। यत्रास्यैतद्रूपम्। क्वचास्यैतद्रूपम्। यज्ञादावसर्वनामस्थानेअभिनिर्दिष्टेन
कारलोपेअकारलोपेच। तस्मात्सुष्ठूच्यते। चौरतद्धितइति॥ समासस्य॥ समासान्तोदात्तत्वेव्यञ्जनान्तेषूपसंख्यान
म्॥ समासान्तोदात्तत्वेव्यञ्जनान्तेषूपसंख्यानंकर्तव्यम्। राजदृषत्। ब्राह्मणसमित् ॥

दनुबन्धकग्रहणेनातदनुबन्धकस्येतिमतुब्ग्रहणेनड्मतुपोग्रहणंनभवति। वत्वविधौतुमतोरित्यपकारानुबन्धकनिर्देशात्
परिभाषानुपस्थानादुभयोरपिग्रहणम्। यत्रतर्हीति। ततश्चस्थानान्तरप्राप्तत्वमस्येवत्तुस्वरस्येत्यर्थः। कुमारीति। कुमारशब्दःस्वाव
र्णान्तइतिईकारस्योदात्तनिवृत्तिस्वरप्रतिषेधप्रसङ्गः। तस्माद्दधीचीत्यत्रस्थानान्तरप्राप्तएवत्तुस्वरइति चौरतद्धितइतिवक्तव्य
मेव। सतिशिष्टइति। दधिअचअसइतिस्थितेअन्तरङ्गानपिविधीन्बहिरङ्गोलुग्बाधतेलुङ्मिसंवेतिपूर्वंतद्धितःपश्चादचइत्यल्लोपः॥ स
मासस्य॥ व्यञ्जनान्तेष्विति। उच्चैरुदात्तइत्यत्राचइत्यनुवर्तनाद्धलन्तस्यसमासस्यान्तोदात्तत्वविधानाद्धलन्तस्यनप्राप्नोतीतिवचनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ हल्स्वरप्राप्ताविति। हल एव प्रकृतत्वादविद्यमानत्वं प्रतिज्ञायते। स्वरप्राप्ताविति। प्रकृतत्वाद्व्यञ्जनस्यैव प्राप्तिः प्र ६१६
७३ तीयते। द्विर्बद्धमिति। उभयोपादाने स्पष्टावगतिर्भवतीत्यर्थः। स्वरितत्वं न प्राप्नोतीति। हल्स्वरप्राप्त्यभावादुका
रस्य व्यवधायकत्वात्। औरिकिविधमिति। औरिकीणां विषयो देशः। औरिकाद्येषुकार्यादिभ्यो विधल्भक्तलाविति विध

हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत्॥ अथवा हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद्भवतीत्येषा परिभाषा कर्तव्या। किमर्थमिदमुभयमुच्यते। न हल्स्वरप्राप्तावविद्यमानवदित्येवोच्येत। स्वरप्राप्तौ व्यञ्जनमविद्यमानवद्भवतीति वा। द्विर्बद्धं सुबद्धं भवतीति। यदि हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद्भवतीत्युच्यते। दधि। उदात्तादनुदात्तस्य स्वरित इति स्वरितत्वं न प्राप्नोति। उदात्तस्वरितविधौ व्यञ्जनमविद्यमानवद्भवतीत्येषा परिभाषा कर्तव्या। कान्येतस्याः परिभाषायाः प्रयोजनानि। प्रयोजनं लिदाद्युदात्तत्वोदात्तविधयः॥ लिति प्रत्ययात्पूर्वमुदात्तं भवतीति। इहैव स्यात्। औरिकिविधम्। औलिकिविधम्। चिकीर्षकः। जिहीर्षक इत्यत्र न स्यात्। ञ्नित्यादिरुदात्तो भवतीति। इहैव स्यात्। अहिचुम्बकायनिः। आग्निवेश्यः। गार्ग्यः कतिरित्यत्र न स्यात्। धातोरन्त उदात्तो भवतीति। इहैव स्यात्। उर्णौति। पचतीत्यत्र न स्यात्। इदं तावदयुक्तम्। यदुच्यते हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद्भवतीति ॥

ल्प्रत्ययः। चिकीर्षक इति। रेफषकाराभ्यामीकारस्य व्यवधानात्। अहिचुम्बकायनिरिति। प्राचामवृद्धात्फिन्बहुलमि रामः
ति फिन्। आग्निवेश्य इति। गर्गादित्वाद्यञ्। गार्ग्य इति। हलादित्वादचआदित्वाभावात् ॥ ७३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथं हीति। अज्धर्मत्वादुदात्तादीनाम्। सर्वविभक्त्यन्त इति। सर्वविभक्त्यन्तावयवत्वात्सर्वविभक्त्यन्तः। सर्वग्रहणमनेकोपलक्षणार्थम्। सर्वविभक्तीनामिहानुपयोगात्। अविद्यमानोदात्तमिति। अज्झल्समुदायोऽनुदात्तउदात्तस्वर इ

कथं ह्रिह्लो नाम स्वरप्राप्तिः स्यात्। तत्रापि ब्रुवता उदात्ताच्च स्वरितविधाविति वक्तव्यम्। तथानुदात्तादेरन्तोदात्ताच्च यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्ताच्च न प्राप्नोति। यदि पुनः स्वरविधौ व्यञ्जनमविद्यमानवद्भवतीत्युच्येत। अथ स्वरविधौ व्यञ्जनमविद्यमानवद्भवतीत्युच्यमानेऽनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत्किं सिद्धं भवति। व्यञ्जनादेर्व्यञ्जनान्ताच्च। बाढं सिद्धम्। कथम्। स्वरविधिरिति सर्वविभक्त्यन्तः समासः। स्वरेण विधिः स्वरविधिः। स्वरस्य विधिः स्वरविधिः। स्वरतो विधिः स्वरविधिरिति। नैवं शक्यम्। इह हि दोषः स्यात्। उदश्वित्वान्घोषः। विद्युत्वान्बलाहक इति। ह्रस्वनुड्भ्यां मतुब्विति (?) एष स्वरः प्रसज्येत। अस्तु तर्हि हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद्भवतीति। ननु चोक्तं कथं ह्रिह्लो नाम स्वरप्राप्तिः स्यादिति। उच्चैरुदात्तः। नीचैरनुदात्तः इत्यत्र पश्चीति निर्दिष्टमज्ग्रहणं निवृत्तम्। तस्मिन्निवृत्ते हलोऽपि स्वरप्राप्तिर्भवति। यदप्युच्यते उदात्ताच्च स्वरितविधाविति वक्तव्यमिति। न वक्तव्यम्। नेदं पारिभाषिकानुदात्तस्य ग्रहणम्। किं तर्हि अन्वर्थग्रहणम्। विद्यमानोदात्तमनुदात्तं भवति। उदात्तादनुदात्तस्य स्वरित इति। यदप्युच्यते अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्ताच्च न प्राप्नोति। आचार्यप्रवृत्तिर्ज्ञापयति। तत्र सिद्धं तद्भवति व्यञ्जनादेर्व्यञ्जनान्ताच्चेति। यदयं नोत्तरपदेऽनुदात्तादावित्युक्त्वा अपृथिवीरुद्रपूषमन्थिष्विति प्रतिषेधं शास्ति। सा तर्ह्येषा परिभाषा कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति। यदयं यतोऽनाव इति नावः प्रतिषेधं शास्ति ॥ इति श्रीषष्ठस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम्। पादश्च समाप्तः ॥

ति दधिशब्दे स्वरितः सिद्धः ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठाध्यायस्य प्रथमे पादे षष्ठमाह्निकम्। पादश्च प्रथमः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुव्रीहौ प्रकृत्या पूर्वपदम्॥ किमर्थमिति। अन्तरेणैतत्सूत्रमिष्टस्यार्थस्य सिद्धिं मत्वा प्रश्नः। समासान्तविधेरिति। समासान्तस्यो
दात्तविधानात्तद्बाधनार्थमिदमित्यर्थः। सुकृदिति। शोभनं लक्षणं कृतवानिति सुकर्मपापेति क्विप्। नञ्सुभ्यामिति। सिद्धे विधि
रारभ्यमाणो नियमाय भवतीति न्यायात्। एवमपीति। नानास्वरपदप्राप्तौ समासान्तोदात्तत्वविधानान्नियमेन तद्व्यावृत्तौ
द्वयोरपि पूर्वपदोत्तरपदयोः प्रकृतिस्वरप्रसङ्गः। परस्येति। उत्तरपदस्य नियमादसति प्रकृतिस्वरे पारिशेष्यात्पूर्वपदस्यैव प्र
कृतिस्वरो भविष्यतीत्यर्थः। क्षेपे विधिरिति। अनुदरः सूदरइत्यादौ पूर्वपदान्तोदात्तत्वं क्षेपइति प्राप्तं तद्बाधनार्थं नञ्सुभ्यामिति

बहुव्रीहौ प्रकृत्या पूर्वपदम्॥ किमर्थमिदमुच्यते। बहुव्रीहिस्वरं शास्ति समासान्तविधेः सुकृत्। सुकृदाचार्यैः
समासान्तोदात्तत्वे प्राप्ते बहुव्रीहिस्वरमपवादं शास्ति। नैतदस्ति प्रयोजनम्। नञ्सुभ्यां नियमार्थं तु। नञ्सुभ्या
मित्येतन्नियमार्थं भविष्यति। नञ्सुभ्यामेव बहुव्रीहेरन्तउदात्तो भवति नान्यत इति। एवमपि कुत एतत् पूर्वप
दप्रकृतिस्वरत्वं भविष्यति न पुनः परस्येति। परस्य शितिशासनात्। शितेर्नित्याबह्वज्जित्येतन्नियमार्थं भविष्य
ति। शितेरेव नान्यत इति। यत्तावदुच्यते नञ्सुभ्यामिति नियमार्थमिति। क्षेपे विधिर्नञो सिद्धः। उदराश्वेषुषु
क्षेपइत्येतस्मिन्प्राप्ते तत एतदुच्यते। यदप्युच्यते परस्य शितिशासनादिति। परस्य नियमो भवेत्। परस्यैष
नियमः स्यात्। शितेर्नित्याबह्वज्जे वनान्यदिति। यदि तर्हि पूर्वपदप्रकृतिस्वरत्वे समासान्तोदात्तत्वं बाधेत च प्रियः।
वाप्रियः। अत्रापि बाधेत। अन्तश्च वाप्रिये सिद्धम्। अन्तोदात्तत्वं च वाप्रिये सिद्धम्। कुतः। संभवात्। असत्य
पि संभवे बाधनं भवति। अस्ति च संभवो यदुभयं स्यात् ॥

स्याद्भ नतु नियमार्थम्। विधिनियमसंभवे विधेर्बलवत्त्वात्। नञ्ग्रहणमुपलक्षणम्। सोऽपि क्षेपविषयत्वसंभवात्।
शितेर्नित्याबह्वज्जे वेति। शितिललाटादिषूत्तरपदप्रकृतिस्वरो नियमेन निवर्त्यते न तु चित्रगुप्रभृतिष्वित्यर्थः। तदेवं सू
त्रं कर्त्तव्यत्वेन स्थापितम्। चप्रियइति। चादयोऽनुदात्ता इति चवाशब्दावनुदात्तौ तयोः प्रकृतिस्वरे सति समासान्तोदात्त
त्वं न प्राप्नोति। अस्ति च संभव इति। उदात्तानुदात्तयोर्भिन्नविषययोर्विरोधाभावात् ॥ राम: ७४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यपीति।सामान्यविशेषविषयत्वनिबन्धनत्वाद्बाध्यबाधकभावस्य।ननुचासत्यपिसमासान्तोदात्तत्वेप्रियशब्दः प्र
त्ययस्वरेणान्तोदात्तएवभविष्यति।नचप्रत्ययस्वरस्यबाधकःपूर्वपदप्रकृतिस्वरः।एवंतर्ह्युदाहरणदिक्भाष्यकारेण
प्रदर्शिता।इदंतूदाहरणंसमपादइति।समशब्दःसर्वानुदात्तः।पादशब्दोवृषादित्वादाद्युदात्तएव।पूर्वपदप्रकृतिस्वरेण
समासान्तोदात्तत्वेबाधितेपादशब्दआद्युदात्तःश्रूयेत।प्रकृतादिधेरिति।उदात्तस्ययत्प्रकृतंविधानंतस्मात्प्रकृतिभावइ

सत्यपिसंभवेबाधनंभवति।तद्यथादधिब्राह्मणेभ्योदीयतांतक्रंकौण्डिन्यायेति।सत्यपिसंभवेदधिदा
नस्यतक्रदानंनिवर्तकंभवति एवमिहापिसत्यपिसंभवेपूर्वपदप्रकृतिस्वरत्वंसमासान्तोदात्तत्वंबाधि
ष्यते।एवंतर्हि प्रकृतादिधेः बहुव्रीहौप्रकृत्यापूर्वपदंप्रकृतिस्वरंभवतीति।किंचप्रकृतम्।उदात्तइति
वर्तते।एवमपिकार्यप्रियःहार्यप्रियइत्यत्रनप्राप्नोति।स्वरितेप्युदात्तोस्ति।अथवास्वरितग्रहणमपिप्रकृत
मनुवर्तते।क्वप्रकृतम्।तित्स्वरितमिति।बहुव्रीहावितिसिद्धम्।अन्तरेणापिबहुव्रीहिग्रहणंसिद्धम्।तत्पुरु
षेकस्मान्नभवति।तत्पुरुषेतुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याइत्येतन्नियमार्थंभविष्यति।
द्विगौतर्हिकस्मान्नभवति।इगन्तेद्विगावित्येतन्नियमार्थंभविष्यति।द्वन्द्वेतर्हिप्राप्नोति।राजन्यबहुवचनद्व क्यवे
न्द्वेन्धकवृष्णिष्वितिनियमार्थंभविष्यति।अव्ययीभावेतर्हिप्राप्नोति।परिप्रत्युपापावर्ज्यमानाहोरात्रावयवे
तन्नियमार्थंभविष्यति।एवमपिकृतएतत्।एवंनियमोनभविष्यति।एतेषामेवतत्पुरुषादिष्विति।नपुन
रेवंनियमःस्यादेतेषांतत्पुरुषादिष्वेवेति ॥

रेणानुज्ञायमानात्वप्रियादौप्रकृतिस्वरोनभवतीत्यर्थः।स्वरितेपीति।नन्वचउदात्तसंज्ञाविहितावर्णैकदेशस्यवर्णग्रह
णेननगृह्यते।एवंतर्ह्युदात्तावयवत्वात्स्वरितोप्युदात्तग्रहणेनगृह्यते।गौणमुख्यन्यायस्थलस्यदर्शनवशान्नाश्रीयते।
अतएव।स्मिन्पक्षेअसमाधानस्यपक्षान्तरमाह।अथवेति।बहुव्रीहाविति।विनापिबहुव्रीहिग्रहणेनबहुव्रीहौपूर्वपद
प्रकृतिस्वरःसिद्धइत्यर्थः।द्विगौतर्हीति।यद्यपिद्विगुस्तत्पुरुषस्तथापितत्रनियमान्तरप्रतिपादनायप्रश्नः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 इष्टतश्चेति। प्रयुक्तानामन्वाख्यानान्नानिष्टार्थाशास्त्रप्रवृत्तिः। एतेषामिति। तत्पुरुषादीनामित्यर्थः। असति बहुव्रीहिग्रह
णे समासान्तोदात्तत्वस्य पूर्वपदप्रकृतिस्वरस्य चैकविषयत्वाद्विरोधाच्च पर्यायः प्राप्नोति। चित्रगुस्तुल्यश्चेतः पञ्चारत्निरित्या
दौ यस्मात्तत्पुरुषादिषु तुल्यार्थादीन्येव पूर्वपदप्रकृतिस्वराणि भवन्ति नान्यानीत्येवंरूपो नियमः कृतो न तु प्रकृतिस्वराण्ये
वेति नियमस्ततश्च पर्यायप्रसङ्गः। द्विपादिति। द्वौ पादावस्य द्विपादित्यादौ समासान्तोदात्तत्वपूर्वपदप्रकृतिस्वरौ पर्यायेण सि
द्धाविति द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहावित्यन्तोदात्तविकल्पो न विधेयो विहितस्तु ज्ञापयति बहुव्रीहिरन्तोदात्तो न भवतीति। त

इष्टतश्चावधारणम्। इष्टतश्चावधारणं भविष्यति। एतेषां तर्हि बहुव्रीहेश्च पर्यायः प्राप्नोति। द्विपाद्दिष्टिवितस्ते
श्च पर्यायो न प्रकल्पते। यदयं द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ दिष्टिवितस्त्योश्चेति सिद्धे पर्याये पर्यायं शास्ति त
ज्ज्ञापयत्याचार्यः पर्यायो न भवतीति। उदात्ते ज्ञापकं त्वेतत्। उदात्त एतज्ज्ञापकं स्यात्। स्वरितेन समाविशेत्। स्वरितेन
च समावेशः प्राप्नोति। स्वरिते प्युदात्तोस्ति। बहुव्रीहिस्वरं शास्ति समासान्तविधेः सुकृत। नञ्सुभ्यां नियमार्थं तु
परस्येति शासनात्॥ क्षेपे विधिर्नञो सिद्धः परस्य नियमो भवेत्। अन्तश्च वा प्रिये सिद्धं संभवात्प्रकृताद्विधेः। ब
हुव्रीहावेतसिद्धमिष्टतश्चावधारणम् ॥ द्विपाद्दिष्टिवितस्तेश्च पर्यायो न प्रकल्पते। उदात्ते ज्ञापकं त्वेतत्स्वरितेन
समाविशेत्॥ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः॥ तत्पुरुषे विभक्तिप्रकृतिस्वरत्वे
कर्मधारये प्रतिषेधः। तत्पुरुषे विभक्तिप्रकृतिस्वरत्वे कर्मधारये प्रतिषेधो वक्तव्यः। परमं कारकम्। परमकार
कम्। परमेण कारकेण परमकारकेण। परमे कारके। परमकारक इति। सिद्धं तु लक्षणप्रतिपदोक्तयोः प्रति
पदोक्तस्यैव ग्रहणात्। सिद्धमेतत् ॥

थादिष्टिवितस्त्योश्चेति ज्ञापकम्। येषामिह पूर्वपदप्रकृतिस्वरो नियम्यते तेषां समासान्तोदात्तत्वं पक्षे न भवतीति बहुव्रीहिग्रहणं प्र
त्याख्यातम्। उदात्ते ज्ञापकमिति। इहोदात्तग्रहणानुवृत्त्या द्वयोरुदात्तयोः पर्यायो मा भूत्। कार्यप्रियइत्यादौ तूदात्तस्वरितयोः स
मावेशः प्राप्नोत्येवेत्यर्थः। स्वरिते पीति। एतत्पूर्वमेव व्याख्यातम्॥ तत्पुरुषे॥ कर्मधारये प्रतिषेध इति। विशेषणसमासान प्र
थमान्तानामेव भवत्यपि तु द्वितीयाद्यन्तानामपीति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लक्षणोक इति। विभक्तिविशेषमनुपादाय सामान्यलक्षणेनायं समासो विहित इत्यर्थः। नञ्कुनिपातानामिति। निपातत्वा
देव सिद्धे नञ्ग्रहणं विस्पष्टार्थम्। अकरणिरित्यादौ कृत्स्वरादिबाधनार्थम् वा तेन यत्रोपपदं कृति नञ् तस्य च स्वरो बलीया
न्भवति सह निर्दिष्टस्य च नञ्स्वरो बलीयावान्भवतीति न वक्तव्यं भवति। क्त्वायां वेति। परिगणनं वा कर्तव्यम्। क्त्वायां प्रतिषेधो
वा वक्तव्य इत्यर्थः। ननु भिन्नफलत्वाद्विकल्पयोरनुपपन्नः परिगणने सति सामिकृतं स्वयंधौतमित्यादिषु प्रकृतिस्वराभावः। क्त्वा

कथम्। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति प्रतिपदं यो द्वितीयासप्तमीतृतीयासमासस्तस्य ग्रहणम्।
लक्षणोक्तश्चायम्। अव्यये परिगणनं कर्तव्यम्। अव्यये नञ्कुनिपातानाम्। अव्यये नञ्कुनिपातानामिति वक्त
व्यम्। नञ्। अब्राह्मणः अवृषलः। नञ्। कु। कुब्राह्मणः कुवृषलः। कु। निपात। निष्कौशाम्बिः निर्वाराणसिः। क्त्वा भू
त्। स्नात्वाकालकः पीत्वास्थिरकः॥ क्त्वायां वा प्रतिषेधः॥ क्त्वायां वा प्रतिषेधो वक्तव्यः। स्नात्वाकालकः पीत्वास्थि
रकः। उभयं न वक्तव्यम्। निपातनात्सिद्धम्। किं निपातनम्। अवश्यमत्र समासार्थं त्वबभावार्थं च निपातनं कर्त
व्यम्। तेनैव यत्नेन स्वरो न भविष्यति॥ सदृश। सदृशग्रहणमनर्थकं तृतीयासमासवचनात्॥ सदृशग्रहण
मनर्थकम्। किं कारणम्। तृतीयासमासवचनात्। सदृशशब्देन तृतीयासमास उच्यते। तत्र तृतीयापूर्वपदं प्र
कृतिस्वरं भवतीत्येव सिद्धम्। षष्ठ्यर्थं तर्हीदं वक्तव्यम्। पितुः सदृशः पितृसदृश इति। षष्ठ्यर्थमिति चेत्तृतीया
समासवचनानर्थक्यम्। षष्ठ्यर्थमिति चेत् तृतीयासमासवचनमनर्थकं स्यात्। किं कारणम्। इहास्माभिस्त्रैशब्द्यं
साध्यम्। पित्रा सदृशः पितुः सदृशः पितृसदृश इति। तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः। अपरेण वृ
त्तिर्भविष्यति। अविरविकन्यायेन। तद्यथा अवेर्मांसमिति विगृह्य आविकशब्दादुत्पत्तिर्भवति। आविकमिति। एवं
पितुः सदृश इति विगृह्य पितृसदृश इति भविष्यति। पित्रा सदृश इति विगृह्य वाक्यमेव भविष्यति ॥

यां प्रतिषेधे तु प्रकृतिस्वरप्रसङ्ग इति चिन्त्यमेतत्॥ अवश्यमत्रेति॥ अनेकप्रयोजनसंपत्तिर्निपातनाद्भवतीत्यर्थः। तेनैवे
ति। अन्तोदात्तानां पाठेनेत्यर्थः॥ सदृश॥ अविरविकन्यायेनेति। अविरविक इति समुदायैकदेशानुकरणमिति सुप्त्वाभावाल्लो
पाभावः। अनेनैतद्दर्शयति अवेर्मांसमिति प्राप्तोऽपि तद्धितोऽनभिधानान्न भवति। किं पुनः पित्रा सदृश इत्यत्राविहितस्तृती
यासमासो भविष्यति ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोजनसदृशइति। हेतावितिभोजनादिभ्यस्तृतीया अत्र षष्ठ्यर्थाभावात्षष्ठीसमासाभावः। दास्याःसदृशइति। षष्ठ्याआक्रोशइ
त्यलुक्। उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम्॥ इगन्त॥ यणगुणयोरिति। पदस्यस्वरविधानात्सुप्युत्पन्नेनित्यत्वाद्य
णगुणयोःकृतयोरिगन्तत्वाभावात्प्रकृतिस्वरोनप्राप्नोतीतिवचनम्। पञ्चारत्न्यइति। पञ्चारत्नयःप्रमाणमेषामितितद्धि
तार्थेद्विगुः। प्रमाणेलोद्विगोर्नित्यमितिमात्रचोलुक्जस्जसिचेतिगुणोजसादिषुच्छन्दोवावचनमितिवचनान्नभवति।
तयोर्यणादेशः नवेति। पदग्रहणस्यपरिमाणार्थत्वात्प्राक्सुबुत्पत्तेःस्वरोभवन्नन्तरङ्गःसंपद्यते। यणगुणौतुसुबपेक्षत्वा

अवस्यंतृतीयासमासोवक्तव्यः यत्रषष्ठ्यर्थोनास्तितदर्थंभोजनसदृशो ध्ययनसदृशइति। यदितर्हितस्य
निबन्धनमस्ति। तदेववक्तव्यम्। इदंनवक्तव्यम्। इदमप्यवश्यंवक्तव्यम्। यत्रषष्ठीश्रूयतेतदर्थंदास्याःसदृ
शःवृषल्याःसदृशइति। इगन्तकालकपालभगालशरावेषुद्विगौ॥ इगन्तप्रकृतिस्वरत्वेयणगुणयोरुपसं
ख्यानम्। इगन्तप्रकृतिस्वरत्वेयणगुणयोरुपसंख्यानंकर्तव्यम्। पञ्चारत्न्योदशारत्न्यः॥ पञ्चारत्नयःदशा
रत्नयः। यणगुणयोःकृतयोरिगन्तेद्विगावित्येषस्वरोनप्राप्नोति। नवाबहिरङ्गलक्षणत्वात्। नवावक्तव्यम्।
किंकारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गौयणगुणौ। अन्तरङ्गःस्वरः। असिद्धंबहिरङ्गमन्तरङ्गे॥ परिप्रत्यु
पापावर्ज्यमानाहोरात्रावयवेषु। परिप्रत्युपापेभ्योवनंसमासेविप्रतिषेधेन। परिप्रत्युपापेभ्योवनंसमास
इत्येतद्भवतिविप्रतिषेधेन। परिप्रत्युपापावर्ज्यमानाहोरात्रावयवेष्वित्यस्यावकाशः। परित्रिगर्तम्। परिसौ
वीरम्। वनंसमासइत्यस्यावकाशः। प्रवणेयष्टव्यम्। इहोभयंप्राप्नोति। परिवनम्। अपवनम्। वनंसमासइत्ये
तद्भवतिविप्रतिषेधेन। नवावनस्यान्तोदात्तवचनंतदपवादनिवृत्त्यर्थम्। नवार्थोविप्रतिषेधेन। किंकारणम्॥

द्बहिरङ्गत्वात्स्वरेकर्तव्येअसिद्धावित्यर्थः॥ परिप्र॥ परिप्रत्युपापेभ्यइति। सर्वनिर्देशोप्यपपरीएवगृह्येते। तयोरेववर्जे
नविषयत्वसंभवादनशब्दस्यचवर्ज्यमानार्थत्वसंभवात्। प्रवणइति। तत्पुरुषः। वनंसमासइत्येतत्सूत्रंक्रमापेक्षयाप्राप्त
स्याद्बहुव्रीहितत्पुरुषपूर्वपदप्रकृतिस्वरस्यापवादंमत्वाविप्रतिषेधोपन्यासः। अनेनतुसूत्रेणपारिशेष्यादव्ययीभावे एमः
स्वरविधिः। परिवनमिति। वनंवर्जयित्वेत्यर्थः। अपपरिबहिर ञ्चवः पञ्चम्येत्यव्ययीभावः ॥ ७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सयथैवेति। बाध्यसमुदायापेक्षायांविशेषाभावात्सर्वस्यप्रकृतिस्वरस्यासौबाधकः। आचार्यो। अनेकस्यापीति। द्वयोर्द्वन्द्वेऽस्यच
रितार्थत्वाद्बहूनांद्वन्द्वेसंदेहादप्रतिपत्तिः पर्यायेणवाप्राप्नोति। लोकविज्ञानादिति। आद्यस्याव्यभिचारिपूर्वपदत्वंमध्यमस्यतुप
रापेक्षयापूर्वपदत्वम्। पूर्वापेक्षयातुनपूर्वपदत्वमितितस्याग्रहणम्। सर्वपूर्वइति। सर्वेषांपूर्वइत्यवयवावयविसंबन्धेषष्ठींवि

वनस्यान्तोदात्तवचनंतदपवादनिवृत्त्यर्थम्। सिद्धम्. अन्तोदात्तत्वमुत्सर्गेणैव। तस्यपुनर्वचनएतत्प्रयोजनंये
येतदपवादाःप्राप्नुवन्तितद्बाधनार्थम्। सयथैवतदपवादमव्ययस्वरंबाधते। एवमिममपिबाधिष्यते। आचार्यो
पसर्जनश्चान्तेवासी॥ आचार्योपसर्जनेनेकस्यापिपदस्यपूर्वपदत्वात्संदेहः॥ आचार्योपसर्जनेनेकस्यापिपूर्वप
दत्वात्संदेहोभवति। आपिशलपाणिनीयव्याडीयगौतमीयाः। एकंपदंवर्जयित्वासर्वाणिपूर्वपदानि। तत्रनज्ञाय
तेकस्यपूर्वपदस्यस्वरेणभवितव्यमिति। लोकविज्ञानात्सिद्धम्। तद्यथा। लोकेमीषांब्राह्मणानांपूर्वमानयेतिय:
सर्वपूर्वःसआनीयते। एवमिहापियत्सर्वपूर्वपदंतस्यप्रकृतिस्वरत्वंभविष्यति॥ महान्व्रीह्यपराह्णगृष्टीष्वास
जाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु॥ किमर्थंमहतःप्रवृद्धशब्दउत्तरपदेपूर्वपदप्रकृतिस्वरत्वमुच्यते।
नकर्मधारयेनिष्ठेत्येवसिद्धम्। नसिध्यति। किंकारणम्। श्रेण्यादिसमासइत्येवंतत्। किंपुनःकारणंश्रेण्यादिस
मासइत्येवंतत्। इहमाभूत्। महानिरष्टोदक्षिणादीयते। कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापा
रेवडवातैतिलकद्रूःपण्यकम्बलोदासीभाराणांच॥ कुरुवृज्योर्गार्हपते॥ कुरुवृज्योर्गार्हपतइतिवक्तव्यम्।
कुरुगार्हपतम्। वृजिगार्हपतम्। कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूः
पण्यकम्बलोदासीभारादीनामितिवक्तव्यम्। इहापियथास्यात्। देवहूतिः। देवनीतिः। वसुनीतिः। ओषधीचन्द्र
माः। तत्तर्हिवक्तव्यम्। नवक्तव्यम् ॥

धारयसमासोविधेयः॥ महान्व्रीहि॥ श्रेण्यादिसमासइति। लक्षणप्रतिपदोक्तपरिभाषयाक्तान्तेनप्रतिपदोक्तोयः कर्मधा
रयस्तस्यग्रहणमित्यर्थः॥ कुरु॥ दासीभारादीनामितिवक्तव्यमिति। दासीभाराणा मितिबहुवचनंद्वन्द्वसमासार्थं अयंम
त्वावचनंविभक्त्यलोपस्तुसौत्रत्वान्निर्देशस्यस्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 योगविभागइति। नायंद्वन्द्वः। किंतर्हिअसमस्तान्येवपदानिनिर्दिष्टानि। तथाचतैतिलकद्रूःपण्यकम्बलइतिविभक्तिरुच्चारि
ता। तत्रदासीभारशब्दसहचरितेषुतद्रूपारोपाद्बहुवचननिर्देशः। एवंचगणपाठः संगृहीतोभवति। पण्यकम्बलःसंज्ञाया
मिति। कृत्यप्रत्ययान्तत्वात्पूर्वपदप्रकृतिस्वरेसिद्धेनियमार्थंवचनम्। संज्ञायामेवपण्यकम्बलःप्रकृतिस्वरपूर्वपदो
भवतिनान्यत्रेति। तत्रनियतप्रमाणोनियतमूल्योव्यावहारिकोयःकम्बलस्तस्यपण्यकम्बलइतिसंज्ञेत्याहुः। अपरआ
हेति। कम्बलएवोत्तरपदेपण्यशब्दःप्रकृतिस्वरोयथास्यादन्यत्रमाभूदितिनियमः। पण्यगवइति। पण्योगौरितिविशे
षणसमासः। गोरतद्धितलुकीतिटच्समासान्तः। अत्रतुचित्वादेवान्तोदात्तत्वंसिद्धमितिद्वितीयमुदाहरणमुक्तम्। पण्य
हस्तीति। कृत्यतुल्याख्याअजात्येति एतत्तुगुणक्रियावाचिनोविशेषणविशेष्यभावस्यानियमात्पूर्वनिपातानियमप्रस

योगविभागःकरिष्यते। कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूःपण्यकम्ब
लइति। ततःदासीभाराणांचेति। तत्रबहुवचननिर्देशाद्दासीभारादीनांचेतिविज्ञास्यते। पण्यकम्बलःसंज्ञाया
म्। पण्यकम्बलःसंज्ञायामितिवक्तव्यम्। योहिपणितव्यःकम्बलः। पण्यकम्बलएवासौस्यात्। अपरआह। प
ण्यकम्बलएवयथास्यात्। इहमाभूत्। पण्यगवःपण्यहस्ती। अहीनेद्वितीया॥ अहीनइतिकिमर्थम्। कान्ता
रातीतः। योजनातीतः। अहीनेद्वितीयानुपसर्गे। अहीनेद्वितीयानुपसर्गइतिवक्तव्यम्। इहमाभूत्। सुखंप्रा
प्तः। सुखप्राप्तः। दुःखंप्राप्तोदुःखप्राप्तः। तत्तर्हिवक्तव्यम्। यद्यप्येतदुच्यते ।

र्थे कृत्यान्तस्यपूर्वनिपातार्थंवचनं नतुजातिप्रतिषेधार्थम्। अजात्येतितुवचनंन्यायसिद्धार्थानुवादएवेतिभाष्यकारमता
नुसारिणआहुः। तत्सुकृषेतुल्यार्थैस्तत्रप्रतिपदोक्तपरिभाषाकृत्येषुयदानाश्रीयते। तदानियमार्थमुच्यते। तदाश्रयणेतु
विध्यर्थत्वान्नियमानुपपत्तिः। नापिपण्यगवइत्यादौप्रकृतिस्वरप्रसङ्गः॥ अहीने॥ थाथादिस्वरापवादोयोगः। अहीनइति
किमर्थमिति। प्रत्याख्यानायप्रश्नः। कान्तारातीतइति। कान्तारंस्पृक्तवानित्यर्थेद्वितीयाश्रितेतिसमासः। हीनत्वाच्चात्रद्वितीया
न्तमितिथाथादिस्वरोभवति। सुखप्राप्तइति। अत्रापिथाथादिस्वरः। अनुपसर्गग्रहणेचेहक्रियमाणेप्ररूढादिषुसप्ताम्यन्तकरूढ
शब्दोनपठितव्यआरूढशब्दस्यसोपसर्गत्वादेतत्स्वराभावेथाथादिस्वरेणान्तोदात्तस्यसिद्धत्वात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गति॥अनन्तर इति किमर्थमिति। किं व्यवहितगतिनिवृत्त्यर्थमथानन्तरस्यैव पूर्वपदस्यापि गतेस्थाथादिस्वरबाधनार्थम्। प्रकृतिस्वरविधानार्थम् अथ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषाज्ञापनार्थमित्यनेकार्थसंभवात् प्रश्नः। अभ्युद्धृतमिति। कृद्ग्रहणपरिभाषया क्तान्त उद्धृतशब्दे परतो ऽभिशब्दस्य प्रकृतिस्वरो मा भूदित्येवमर्थमनन्तरग्रहणम्। ननु च क्रियमाणे ऽप्यनन्तरग्रहणे प्राप्नोत्येव उद्धृतशब्दस्य क्तान्तस्यानन्तर एव गतिर्भवतीति। अनन्तरग्रहणसामर्थ्याद्धातोरनन्तरो गतिराश्रीयत इत्यदोषः। तद्बाधकमिति। परत्वादिति भावः। तस्माद्व्यवहितगतिनिवृत्त्यर्थमनन्तरग्रहणं न कर्तव्यम्। तत्र यस्येति। गतिर्गताविति निघाते कृते ऽभेः प्रकृतिस्वरो नास्ति। तस्मात्तु परस्योद्धृतशब्दस्य सति शिष्टत्वात्स्याथादिस्वरेणान्तोदात्तत्वं

अथैवं तर्हि हीनग्रहणं न करिष्यते। इहापि कान्तारातीतो योजनातीत इत्यनुपसर्गे इत्येव सिद्धम्॥ गतिरनन्तरः॥ अनन्तर इति किमर्थम्। अभ्युद्धृतम्। उपसमाहृतम्। गतेरनन्तरग्रहणमनर्थकं गतिर्गताविति वचनात्। गतेरनन्तरग्रहणमनर्थकम्। किं कारणम्। गतिर्गताविति वचनात्। गतौ परतो गतेरनुदात्तत्वमुच्यते। तद्बाधकं भविष्यति। तत्र यस्याप्रकृतिस्वरत्वं तस्मादन्तोदात्तत्वप्रसङ्गः। तत्र यस्य गतेरप्रकृतिस्वरत्वं तस्मादन्तोदात्तत्वं प्राप्नोति। अन्तस्थाथघञ्क्ताजबित्रकाणामिति। प्रकृतिस्वरवचनाद्धानन्तोदात्तत्वम्। प्रकृतिस्वरवचनसामर्थ्यादन्तोदात्तत्वं न भविष्यति। यदि हि स्यात्। प्रकृतिस्वरवचनमिदानीं किमर्थं स्यात्। प्रकृतिस्वरवचनं किमर्थमिति चेदेकगत्यर्थम्। प्रकृतिस्वरवचनं किमर्थमिति चेदेकगत्यर्थम्। यएको गतिस्तदर्थमेतत्स्यात्। प्रकृतं प्रहृतम्॥

प्राप्नोति तत्कथम्। उच्यते उद्धृतशब्दे तावत्समासस्वराव्ययस्वरकृत्स्वरथाथादिस्वरेषु प्राप्तेषु गतिस्वरस्ततो ऽभेः समासे कृते कस्यान्तरप्राप्तः थाथादिस्वरः प्राप्नोति। कृद्ग्रहणपरिभाषयोद्धृतशब्दस्य क्तान्तत्वात्। तथा हि। समासे कृते समासान्तोदात्तत्वं प्राप्नोति। ततस्तदपवादः कृत्स्वरेणोद उदात्तत्वं प्राप्नोति। ततस्तदपवादस्याथादिस्वरप्रसङ्गः। प्रकृतिस्वरवचनादिति। नाप्राप्ते थाथादिस्वरे गतिस्वर आरभ्यमाणस्तद्बाधकः। यएको गतिरिति। एकस्मिन्नेव गतावस्य बाधकत्वम्। अभ्युद्धृतादौ तु कस्यान्तरप्राप्तत्वात्थाथादिस्वर एव सति शिष्टत्वाद्बलवत्त्वात् प्राप्नोति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवमर्थमेवेति। कस्यान्तरप्राप्तस्यापि थाथादिस्वरस्य बाधनार्थमनन्तरग्रहणमित्यर्थः। यत्र ह्येक एव गतिस्तत्रानन्तरग्रहण
स्यानप्रयोजनमित्यनेकगतिसंनिधाव प्राप्तस्य गतिस्वरस्यानन्तरग्रहणेन पुनः प्राप्तिः क्रियते। क्रियमाणेपीति। कुगति
प्रादय इत्यत्र सुपेति निवृत्तं सुबित्यनुवर्तत एव निष्कृतादिषु पदकार्यप्रसिद्ध्यर्थम्। तत्र युगपत्सुबन्तसमुदायस्य सुबन्त
त्वाभावात्समासस्याप्रसङ्गात् क्रमेणासौ विधेयस्ततोभिशब्दस्योद्धृतशब्देन समासे सत्यपि शब्द एव पूर्वपदं नोद्धृत इ
ति पूर्वपदस्य गतेः प्रकृतिस्वरो विधीयमानः सत्यप्यनन्तरग्रहणे पूर्वपदत्वादुदोनप्राप्नोतीत्यर्थः। अपूर्वपदार्थे तर्हीति। सुत्या
प्रकरणं दुर्बलं बाध्यते। तत्र योगविभागः क्रियते। गतिः पूर्वपदं प्रकृतिस्वरो भवति। ततोनन्तरो गतिरपूर्वपदमपि प्रकृत्ये

एवमर्थमेव तर्ह्यनन्तरग्रहणं कर्तव्यम्। अत्र यथा स्यात्। क्रियमाणेपि वै अनन्तरग्रहणे अत्र न सिध्यति। किं का
रणम्। गतिरनन्तरः पूर्वपदं प्रकृतिस्वरं भवतीत्युच्यते। यश्चात्र गतिरनन्तरः नासौ पूर्वपदम्। यच्च पूर्वपदं नासा
वनन्तरः॥ अपूर्वपदार्थे तर्हीदं वक्तव्यम्। अपूर्वपदस्यापि गतेः प्रकृतिस्वरत्वं यथा स्यात्। अपूर्वपदार्थमिति चे
त् कारकेति प्रसङ्गः। अपूर्वपदार्थमिति चेत्कारकेऽतिप्रसङ्गो भवति। आगतः दूरात्। दूरादागतः। सयथैव
गतिपूर्वस्य गतेरपूर्वपदस्य भवति। एवं कारकपूर्वपदस्यापि प्राप्नोति। सिद्धं तु गतेरन्तोदात्तप्रसङ्गात्। सिद्ध
मेतत्। कथम्। यत्तदन्तः थायघञ्क्ताजबित्रकाणामित्येतद्गतेर्न प्रसङ्क्ष्यम्। किं कृतं भवति। कृत्स्वरापवादोयं
भवति। तत्र गतिरनन्तर इत्यस्यावकाशः। प्रकृतम्। प्रहृतम्। अन्तः थायघञ्क्ताजबित्रकाणामित्यस्यावकाशः॥

ति॥ इदानीमतिप्रसङ्गमाह॥ अपूर्वपदार्थमिति चेदिति। दूरादागत इति। अत्र कर्मणि क्तो विधेयः। तृतीयाकर्मणीत्यतः क
र्मग्रहणानुवर्तनात्कर्मवाचिनः क्तस्य ग्रहणम्। अत्र थाथादिस्वर इष्यते। गतिस्वरोनन्तरग्रहणात्प्राप्नोति। सिद्धं त्विति। था
थादिसूत्रे कारकोपपदग्रहणमेवानुवर्तते। तेन गतिग्रहणमस्वरितत्वा च तत्र गतिस्वरः कृत्स्वरस्यापवादोन थाथादिस्व
रस्य तत्र दूरादागते कृत्स्वरापवादयोर्गतिस्वरथाथादिस्वरयोः प्रसङ्गे परत्वात् थाथादिस्वर एव प्रवर्तते। अनन्तरग्रह
णं त्वपूर्वपदार्थमस्तु दूरादागत इत्यत्र दावेव स्वरं संपादयति। प्रकृतमिति। अवकाशप्रदर्शनमात्रमेवानेन कृतमनन्तर इत्यस्य तत्र
हुतादिरवकाशः प्रदर्शयितव्यः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवश्यंगतेरिति। थाथादिसूत्रेऽवश्यानुवर्त्ये गतिग्रहणमन्यथा प्रभेद इत्यत्र कृत्स्वरेण घञोजित्वादन्तोदात्तत्वं स्यादन्तोदात्तत्वं चेष्यते। एवं तर्हीति॥ थाथादिसूत्रात्तत्र ग्रहणमपनीयपृथक्कर्त्तव्यम्। गतिग्रहणं निवृत्तमिति। ननु विशुष्क इत्यादौ कृत्स्वरेणोत्तरपदाद्युदात्तत्वं प्राप्नोति। शुष्कधृष्टावित्याद्युदात्तविधानादन्तोदात्तत्वं चेष्यते इत्याशङ्क्य योगविभागान्तरमाह। कारकादिति। तत्र दूरायात इत्यादौ थाथादिस्वरेणैवान्तोदात्तत्वस्य सिद्धत्वात् कारकादित्ययं योगो गतिरनन्तर इत्यस्य बाधको विज्ञायते। एवं चेति। कारकादिति योगविभागे सति अनन्तरग्रहणं न कर्त्तव्यम्। कथमिति चेत्। उच्यते। आगत इत्यस्य गतिस्वरेणाद्युदात्तत्वे प्रवृत्ते दूरशब्दस्य स्तोकान्तिकेति समासस्ततः कृत्स्वरान्तरप्राप्त्या समासस्वरः प्राप्नोति। ततः कृत्स्वरस्त

दूरादागतः। दूरादायातः। इहोभयं प्राप्नोति। आगतः दूरात् दूरादागतः। अन्तः थाथघञ्क्ताजबित्रकाणामित्येतद्भवति विप्रतिषेधेन। अवश्यंगतेस्तत्प्रसङ्गः यं भेद प्रभेद इत्येवमर्थम्। एवं तर्हि योगविभागः करिष्यते। अन्तः थाथघञ्क्ताजबित्रकाणाम्। ततः क्तः। क्तान्तमुत्तरपदमन्तोदात्तं भवति। अत्र कारकोपपदग्रहणमनुवर्त्तते। गतिग्रहणं निवृत्तम्। अथवोपरिष्टाद्योगविभागः करिष्यते। इदमस्ति सूपमानात्क्तः संज्ञायामनाचितादीनां प्रवृद्धादीनां चेति। ततो वक्ष्यामि कारकात्। कारकाच्च क्तान्तमुत्तरपदमन्तोदात्तं भवतीति। ततः इत्तश्रुतयोरेवाशिषि। कारकादिति। एवं च कृत्वा नार्थोऽनन्तरग्रहणेन। कथमभ्युद्धृतम्। उद्धरतिः क्रियाविशिनष्टि। उदा विशिष्टामभिर्विशिनष्टि। तत्र गतिरनन्तर इति च प्राप्नोति गतिर्गताविति च। गतिरनन्तर इत्यस्यावकाशः। प्रकृतं प्रहृतम्। गतिर्गतावित्यस्यावकाशः। अभ्युद्धरति। उपसमादधाति। इहोभयं प्राप्नोति। अभ्युद्धृतम्। उपसंहृतम्। उपसमाहृतम्। गतिर्गतावित्येतद्भवति विप्रतिषेधेन ॥

तः कृत्स्वर इत्येवं कृत्स्वरे सिद्धे कारकादिति सूत्रं नियमार्थम्। तत्र च गतिग्रहणमनुवर्त्तते। तेनायमर्थः। कारकादेव परं गतिपूर्वपदं क्तान्तमन्तोदात्तमिति। तेनाभ्युद्धृत इत्यादौ परत्वादुद्धृतिनिघाते उदात्तस्वरितानुवृत्त्या सर्वानुदात्तस्य प्रकृतिभावाभावे थाथादिस्वरे च नियमेन निवर्त्तिते कृत्स्वरेण उद एवोदात्तत्वं भविष्यतीत्यर्थः। कथमिति। अपूर्वपदत्वादुच्छब्दस्य गतिस्वरो न प्राप्नोतीति तदर्थमनन्तरग्रहणं स्यादिति मत्वा प्रश्नः। उद्धरतिः क्रियामिति। अयमर्थः। उच्छब्देन हरतेः संबन्धादेक उद्धृतशब्दयोः समासस्तत्रोच्छब्दस्य पूर्वपदत्वाद्भवति गतिस्वरः। पश्चादभिशब्दस्य समासेऽभेर्गतिस्वरं बाधित्वा निघातेन भाव्यम्। तत्र कृदुत्तरपदप्रकृतिस्वरेण उद एव गतिस्वरो भविष्यति नार्थोऽनन्तरग्रहणेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवोद्धरतिक्रियामित्यादिनाभेदेगतित्वंप्रतिपाद्यते।एवंतर्हीति। परविप्रतिषेधमनपेक्ष्यव्यवहितगतिनिरस्यर्थमनन्तरग्रहणंक्रियते।यदिचकृद्ग्रहणपरिभाषानस्यात्।ततःक्रान्तउत्तरपदेगतेः स्वरोविधीयमानोव्यवहितस्यनप्राप्नोतीतिकिंतन्निरस्यर्थेनानन्तरग्रहणेनतत्कृतमेतांपरिभाषांज्ञापयति।परिभाषाज्ञापनार्थमेवचपरप्रतिषेधोनापेक्ष्यते।ननुचकृद्ग्रहणेगतिपूर्वस्यापिग्रहणंज्ञाप्यतांकारकपूर्वस्यकथंज्ञाप्यते।उच्यते।पूर्वाचार्यैस्तावदेषापरिभाषापठिता।इहत्वनन्तरग्रहणेनसैवाभ्यनुज्ञायते॥तादौ॥गतेःस्वरविधानात् क्रियायोगेगतिसंज्ञाविधानात्तकारादिःकृदेवसंभवतिनान्यइति

एवंतर्हिसिद्धेसतियदनन्तरग्रहणंकरोति।तज्ज्ञापयत्याचार्यः।भवत्येषापरिभाषाकृद्ग्रहणेगतिकारकपूर्वस्यापीति।किमेतस्यज्ञापनेप्रयोजनम्।प्रतप्तेनकुलस्थितंतएतत्।उदकेविशीर्णंतएतत्।सगतिकेनसनकुलेनचसमासःसिद्धोभवति॥तादौचनितिकृत्यतौ॥कृद्ग्रहणंकिमर्थम्।यथातकारादिग्रहणंकृद्विशेषणंविज्ञायेत।तकारादौनितिकृतीति।अथाक्रियमाणेकृद्ग्रहणेतकारादिग्रहणंकस्यविशेषणंस्यात्।उत्तरपदविशेषणम्।तत्रकोदोषः।इहैवस्यात्।प्रतरिताप्रतरितुम्।इहनस्यात्।प्रकर्ताप्रकर्तुम्।तादौनिति कृद्ग्रहणानर्थक्यम्।तादौनिति कृद्ग्रहणमनर्थकम्।क्रियमाणेपिवैकृद्ग्रहणेऽनिष्टंशक्यंविज्ञातुम्।तकारादावुत्तरपदेनितिकृतीति।अक्रियमाणेपिचेष्टंनियस्तकारादिस्तदन्तउत्तरपदइतियावताक्रियमाणेचानिष्टंविज्ञायते।अक्रियमाणेचेष्टम्।अक्रियमाणएवेष्टंविज्ञास्यामः।कृदुपदेशेवाताद्यर्थमिडर्थम्।कृदुपदेशेतर्हिताद्यर्थंकृद्ग्रहणमिडर्थंकर्तव्यम्।कृदुपदेशेयस्तकारादिरित्येवंयथाविज्ञायेत।किंप्रयोजनम्।इडर्थम्।इडादावपिसिद्धंभवति।प्रलपिताप्रलपितुम् ॥

मत्वाहकृद्ग्रहणंकिमर्थमिति।यथेति।नितीत्यनेनप्रत्ययग्रहणपरिभाषयातदन्तस्योपस्थानात्तस्यैवतकारादित्वंविशेषणंस्यात्।कृद्ग्रहणेतुश्रुतस्यतादित्वंविशेषणंविज्ञायते।तादौनितीति।यथोतश्चप्रत्ययादसंयोगपूर्वादित्यत्रविशेषणविशेष्यभावेकामचारादसंयोगपूर्वग्रहणेनोकारोविशेष्यते नतुप्रत्यय स्तथेहापितादिग्रहणेननिर्दिश्यते नतुतदन्तम्।कृदुपदेशेवेति।वाशब्दस्तर्ह्यर्थेकृतामुपदेशः शास्त्रंतत्रयस्तादिरितिप्रत्ययार्थंकृद्ग्रहणमित्यर्थः ॥ ऋम: ७९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनिगं। अनिगन्तेति। प्रतीचे स्यादावर्ष्येवद् निगन्तग्रहणमितिप्रत्यङि स्यत्रयणादेशे निगन्त्वात् प्रकृतिस्वरप्रसङ्गः। अनिगन्त
वचनमिति। प्रतीचइत्यादिषु तु स्वरेणभाव्यमिति अनवकाशमनिगन्तग्रहणंमन्यते। यत्तर्हि न्यध्योरिति। न्यध्योरेवकृतेयणा
देशे प्रकृतिस्वरो नान्यस्येतिनियममाश्रीयते। यत्रतर्हीति। अधीचे स्यादावित्यर्थः। यत्तर्हि नेरेवेति। निशब्दस्येकारत्वान्नीचे
त्यादौ तु स्वरस्यप्रकृतिस्वरस्य च विशेषो नास्ति। एषहियणादिष्टार्थइति। ननु नेर्यणादेशे कृते। न चकृतत्वात्तस्यस्वरः। एवंमन्य

अनिगन्तः। अनिगन्तप्रकृतिस्वरत्वे यणादेशे प्रकृतिस्वरभावप्रसङ्गः। अनिगन्तप्रकृतिस्वरत्वे यणादेशे प्रकृ
तिस्वरभावः प्राप्नोति। प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः। अनिगन्तवचनमिदानीं किमर्थं स्यात्। अनिगन्तवचनं किमर्थं
मिति चेद् यणादिष्टार्थम्। अयणादेशार्थमेतत् स्यात्। यदा यणादेशो न। कदा च यणादेशो न। यदा शाकलम्। उ
क्तं वा। किमुक्तम्। समासे शाकलं न भवतीति। एवं तर्ह्यञ्चतेरकारो लुप्यते प्रतीचः प्रतीचा। तु स्वरस्तत्र बाधको भवि
ष्यति। अयमेवेष्यते। वक्ष्यत्येतत्। चौ रनिगन्तोऽञ्चतौ वप्रत्यय इति। यत्तर्हि न्यध्योः प्रकृतिस्वरं शास्ति। एषहि
यणादिष्टार्थमारम्भः। एतदप्ययणादिष्टार्थमेव। यदा यणादेशो न। कदा यणादेशो न। यदा शाकलम्। उक्तं वा। कि
मुक्तम्। समासे शाकलं न भवतीति। यत्रतर्ह्यञ्चतेरकारो लुप्यते अधीचः अधीचा। तु स्वरस्तत्र बाधको भविष्य
ति। अयमेवेष्यते। वक्ष्यत्येतत्। चौ रनिगन्तोऽञ्चतावप्रत्यय इति। यत्तर्हि नेरेव प्रकृतिस्वरं शास्ति। एषयणादिष्टा
र्थ आरम्भः। एतदप्ययणादिष्टार्थमेव। कथम्। अकृते यणादेशे पूर्वपदप्रकृतिस्वरत्वे कृते उदात्तस्वरितयोर्यणः
स्वरितोऽनुदात्तस्येत्येष स्वरः सिद्धो भवति। न्यङ्। तस्मात्सुष्ठूच्यते अनिगन्तप्रकृतिस्वरत्वे यणादेशे प्रकृतिस्व
रत्वप्रसङ्ग इति। चौ रनिगन्तोऽञ्चतावप्रत्यये। तु स्वरादनिगन्तोऽञ्चतावप्रत्यय इत्येतद्भवति विप्रतिषेधेन ॥

ते। यत्र यण् भविष्यति। तस्मिन्विषयेऽन्तरङ्गमपि यणं बाधित्वा पूर्वं नेः स्वरो भवति। एवं प्रत्यङादिष्वनिगन्त इति प्रतिषेधो भ
विष्यति। पश्चाद्यणादेशः। एतदपीति। वचनसामर्थ्यादकृत एवान्तरङ्गे यणादेशे निशब्दस्वरो भवति। यणि कृते स्वरभाजो
भावात् प्रत्यङादिषु तु यणादेश एवान्तरङ्गत्वात् प्राप्नोति। तस्मादिति। न च यणादेशस्यास्यानिवद्भावोऽस्ति। पूर्वपदप्रकृ
तिस्वरविधानादपूर्वविधित्वात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदितावदिति। सर्वापवादत्वं तु स्वरस्य निवर्त्तयति। लक्षणगणना यां द्वयोरपि चरितार्थत्वमित्यर्थः। अव्ययस्वर इति। तत्पुरुषे तु

तुस्वरस्यावकाशः दधीचः पश्य। दधीचा। दधीचे। अनिगन्तोऽञ्चतौ वप्रत्यय इत्यस्यावकाशः। पराङ्। पराञ्चौ। पराञ्चः। इहोभयं प्राप्नोति। अवाचा। अवाचे। अनिगन्तोऽञ्चतौ वप्रत्यय इत्येतद्भवति विप्रतिषेधेन। नवा तुस्वरस्य पूर्वपदप्रकृतिस्वरभाविनि प्रतिषेधादितरथाहि सर्वापवादप्रसङ्गः। नवा एतद्विप्रतिषेधेनापि सिध्यति। कथं तर्हि सिध्यति। तुस्वरस्य पूर्वपदप्रकृतिस्वरभाविनि प्रतिषेधात्। तुस्वरः पूर्वपदप्रकृतिस्वरभाविनः प्रतिषेध्यः। इतरथाहि सर्वापवादस्तुस्वरः। अक्रियमाणे हि प्रतिषेधे सर्वापवादोऽयं तुस्वरः। कथम्। प्रत्ययस्वरस्यापवादोऽनुदात्तौ सुप्पितौ। अनुदात्तौ सुप्पितावित्यस्योदात्तनिवृत्तिस्वरः। उदात्तनिवृत्तिस्वरस्य तुस्वरः। स यथैवोदात्तनिवृत्तिस्वरं बाधते। एवमनिगन्तस्वरमपि बाधेत। यदितावदयं स्यात्। साम्यम्। अयमपि चतुर्थः समासान्तोदात्तत्वस्यापवादोऽव्ययस्वरः। अव्ययस्वरस्य कृत्स्वरः। कृत्स्वरस्यायम्। उभयोश्चरितार्थयोर्युक्तो विप्रतिषेधः। सतिशिष्टस्तर्हि तुस्वरः। कथम्। चावित्युच्यते यत्रास्यैतद्रूपं भवति। क्व चास्यैतद्रूपं भवति। यजादावसर्वनामस्थाने। सिनिर्वृत्ते अकारलोपे नकारलोपे च कृते। तस्मात्तु शूच्यते। नवा तुस्वरस्य पूर्वपदप्रकृतिस्वरभाविनि प्रतिषेधादितरथाहि सर्वापवाद इति। विभक्तीषत्स्वरात्कृत्स्वरः। विभक्तिस्वरान्नञ्स्वरात्कृत्स्वरो भवति विप्रतिषेधेन। विभक्तिस्वरस्यावकाशः। अक्षशौण्डः। स्त्रीशौण्डः। कृत्स्वरस्यावकाशः। इध्मव्रश्चनः पलाशशातनः। इहोभयं प्राप्नोति। पूर्वाह्णे स्फोटकः। अपराह्णे स्फोटकः। कृत्स्वरो भवति विप्रतिषेधेन। ईषत्स्वरस्यावकाशः। ईषत्कडारः। ईषत्पिङ्गलः। कृत्स्वरस्य स एव। इहोभयं प्राप्नोति। ईषद्भेदः। कृत्स्वरो भवति विप्रतिषेधेन। चित्स्वराद्धारिस्वरः। चित्स्वराद्धारिस्वरो भवति विप्रतिषेधेन। चित्स्वरस्यावकाशः। चलनः। चोपनः। हारिस्वरस्यावकाशः। याज्ञिकाश्वः। वैयाकरणहस्ती। इहोभयं प्राप्नोति। पितृगवः। मातृगवः। हारिस्वरो भवति विप्रतिषेधेन। कृत्स्वराच्च हारिस्वरो विप्रतिषेधेन। कृत्स्वरस्यावकाशः। इध्मव्रश्चनः। पलाशशातनः। हारिस्वरस्य स एव। इहोभयं प्राप्नोति ॥

त्यार्थेति प्रकृतिस्वरः। इहचगतिग्रहणमनुवर्त्तते। सतिशिष्ट इति। ततः सर्वापवाद एव तुस्वरः। कृत्स्वरादिति। पूर्वविप्रतिषेधोऽत्र विवक्षितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0, In Public Domain. Digitization by eGangotri

अक्षहृतइति। अनुदाहरणमेतदित्याहुः। अत्र हि तृतीया कर्मणीत्यनेन कृत्स्वरापवादः पूर्वपदप्रकृतिस्वरत्वं प्राप्नोति। तत्स्वरत्वादेव हारिस्वरो बाध्यते। न कृत्स्वर इति। परोपीत्यर्थः। अनो भावकर्मवचन इत्यनेनोदात्तत्वं विधीयते। कर्मवाचीहरणशब्दो बाडवहरणमित्युदाहरणम्। किं पुनस्तमिति। कृत्स्वरमित्यर्थः। तस्मादहरणइति प्रतिषेधो येन केन चिल्लक्षणेन प्राप्तस्य स्वरस्य हारिस्वरो बाधक इति ज्ञापयतीत्यर्थः। युक्तस्वरश्चेति। पूर्वपदाद्युदात्तत्वमत्रापि पूर्वं विप्रतिषेधो विवक्षितः। गोसंख्यइति। ननु अत्रथाथादिस्वरः प्राप्नोति न कृत्स्वरः। एवं तर्हि मूलप्राप्तिमाश्रित्योक्तमित्यदोषः। उपमा

अक्षहृतः। बाडवहार्यः हारिस्वरो भवति विप्रतिषेधेन। नवाहरण प्रतिषेधो ज्ञापकः कृत्स्वराबाधकत्वस्य। नवार्थो विप्रतिषेधेन। किं कारणम्। हरणप्रतिषेधो ज्ञापकः कृत्स्वराबाधकत्वस्य यदयमहरणइति प्रतिषेधं शास्ति। तज्ज्ञापयत्याचार्यः न कृत्स्वरो हारिस्वरं बाधत इति। नैतदस्ति ज्ञापकम्। अनो भावकर्मवचन इत्येतस्मिन् प्राप्ते तत एतदुच्यते। यद्येवं साधीयो ज्ञापकं कृत्स्वरस्यापवादो नो भावकर्मवचन इति बाधकं किलायं बाधते। किं पुनस्तं न बाधिष्यते। युक्तस्वरश्च कृत्स्वराद्भवति विप्रतिषेधेन। युक्तस्वरस्यावकाशः। गोवल्लवः। अश्ववल्लवः। कृत्स्वरस्य स एव। इहोभयं प्राप्नोति। गोसंख्यः। पशुसंख्यः। अश्वसंख्यः। युक्तस्वरो भवति विप्रतिषेधेन॥ उपमानम्॥ उपमानमिति किमर्थम्। शब्दार्थप्रकृतावेवेति यदुच्यमाने पूर्वेणातिप्रसक्तमिति कृत्वा नियमोयं विज्ञायेत। तत्र को दोषः। इह न स्यात्। पुष्पहारी। फलहारी। उपमानग्रहणे पुनः क्रियमाणे न दोषो भवति। अथ शब्दार्थग्रहणं किमर्थम्। उपमानं प्रकृतावेवेतीयत्युच्यमाने इहापि प्रसज्येत। वृकवञ्ची। वृकप्रेक्षी। शब्दार्थग्रहणे पुनः क्रियमाणे न दोषो भवति। अथ प्रकृतिग्रहणं किमर्थम् ॥

नम्। उपमानमिति किमर्थमिति। योगविभागकरणसामर्थ्याच्छिष्टप्रयोगाच्चोपमानमेव नियम्यत इति प्रश्नः। इतरः सत्यपि योगविभाग इष्टाव्यवस्था न लभ्यते। लक्ष्यानुसारेण च प्रतिपत्तिगौरवप्रसङ्ग इत्याह। शब्दार्थप्रकृतावेवेति। अथ शब्दार्थग्रहणमिति। प्रकृतिग्रहणादेव विशिष्टार्थप्रकृतिर्ग्रहीष्यत इति प्रश्नः। इतरस्तु दुर्ज्ञानो विशेष इति मत्वाह। उपमानमिति। वृकवञ्चीति। कर्तर्युपमान इति णिनिः। कृत्स्वर एवात्र भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दार्थप्रकृतिरेवयोनित्यमिति। उपसर्गसंबन्धमन्तरेणैवयोधातुः शब्दे वर्तते सइहगृह्यते। यस्य तूपसर्गेण शब्दार्थत्वंद्यो त्यते तस्यग्रहणंनभवतीत्यर्थः। नभूत ॥ दिवोदासायेति। दिवश्चदासइति अलुक्। सर्वेगु॥ यत्रगुणान्तरस्याभावः तत्रगुणका र्त्स्न्यंभवति। यथासर्वशुक्लइति। शुक्लेनगुणेनसर्वावयवानांव्यापनात्। परमशुक्लइति। आम्रयव्याश्यामशुक्लस्यपरस्यमिति ग

शब्दार्थप्रकृतिरेवयोनित्यंतत्र यथास्यात्। इहमाभूत्। कोकिलाभिव्याहारी। गर्दभोच्चारी। अथैवकारःकिम र्थः। नियमार्थः। नैतदस्तिप्रयोजनम्। सिद्धेविधिरारभ्यमाणोन्तरेणैवकारंनियमार्थोभविष्यति। इष्टतोवधा रणार्थस्तर्हि। यथैवविज्ञायेत। उपमानंशब्दार्थप्रकृतावेवेति। मैवंविज्ञायि उपमानमेवशब्दार्थप्रकृताविति। शब्दार्थप्रकृतौह्युपमानंचानुपमानंचाद्युदात्तमिष्यते। साध्वध्यायी। विलम्बाध्यायी॥ दीर्घका॥ जेदीर्घान्तस्या दिरुदात्तोभवतीत्येतस्माद् अन्त्यात्पूर्वंबहुचइत्येतद्भवतिविप्रतिषेधेन। जेदीर्घान्तस्यादिरुदात्तोभवतीत्यस्यावकाशः। कुटीजः शमीजः। अन्त्यात्पूर्वंबहुचइत्यस्यावकाशः। उपसरजोमन्दुरजः इहोभयंप्राप्नोति। आमलकीजः। वलभीजः। अन्त्यात्पूर्वंबहुचइत्येतद्भवतिविप्रतिषेधेन॥ नभूता॥ आद्युदात्तप्रकरणेदिवोदासादीनांछन्दस्युपसंख्या नंकर्तव्यम्। दिवोदासायगायते। वध्र्यश्वायदाशुषे॥ अन्तः॥ सर्वेगुणकार्त्स्न्ये॥ सर्वग्रहणंकिमर्थम्। गुणका र्त्स्न्यइतीयत्युच्यमानेइहापिप्रसज्येत। परमशुक्लः। परमकृष्णइति। सर्वग्रहणेपुनःक्रियमाणेनदोषोभव ति। अथगुणग्रहणंकिमर्थम्। सर्वकार्त्स्न्यइतीयत्युच्यमानेइहापिप्रसज्येत। सर्वसौवर्णः। सर्वराजतइति। गुणग्रहणेपुनःक्रियमाणेनदोषोभवति। अथकार्त्स्न्यग्रहणंकिमर्थम्। सर्वेगुणइतीयत्युच्यमानेइहा पिप्रसज्येत। सर्वेषांश्वेतः सर्वश्वेतइति। कथंचात्रसमासः। षष्ठीसुबन्तेनसमस्यतेइति गुणेननेतिप्रति षेधः प्राप्नोति ॥

णकार्त्स्न्यमस्ति। सर्वसौवर्णइति। विकारविषयइत्यत्रकार्त्स्न्यंनगुणविषयम्। अथकार्त्स्न्यग्रहणमिति। सर्वशब्दःकार्त्स्न्य एववर्ततइतिप्रश्नः। सर्वेषांश्वेतइति। सर्वशब्दोनगुणिकार्त्स्न्येवर्तते। नतुगुणकार्त्स्न्यंसर्वेषांश्वेतोगुणइत्यर्थः ॥ शमः ८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणान्तरेणेति। गुणात्मकोयस्तरप्तदन्तेनेत्यर्थः। सर्वेषामिति। गुणसंबन्धेषष्ठी। पटस्यशौक्ल्यमिति। यथाश्वेततरइति। गुणवा
चिन एवाश्रितगुणान्तरप्रकर्षनिमित्तः प्रत्ययः। सर्वेषांपदानांद्रव्यान्तराधारस्येद्गुणापेक्षयासातिशयःश्वेतोगुणइत्यर्थः। उ

एवंतर्हिगुणान्तरेणसमासस्तरलोपश्च॥ गुणान्तरेणसमासोवक्तव्यः॥ तरलोपश्च। सर्वेषांश्वेततरःसर्वश्वेतः॥ उ
त्तरपदवृद्धौ॥ अयुक्तोयंनिर्देशः। नह्युत्तरपदंनामवृद्धिरस्ति। कथंतर्हिनिर्देशःकर्तव्यः। वृद्धिमत्युत्तरपदइति।
सतर्हितथानिर्देशःकर्तव्यः। नकर्तव्यः। नैवंविज्ञायते उत्तरपदंवृद्धिः उत्तरपदवृद्धिः उत्तरपदवृद्धाविति। कथंत
र्हिउत्तरपदस्यवृद्धिरस्मिन्सोयमुत्तरपदवृद्धिः उत्तरपदवृद्धाविति। बहुव्रीहौ॥ बहुव्रीहौविश्वस्यान्तोदात्तत्वंसंज्ञा
यांमित्राजिनयोरन्तः॥ बहुव्रीहौविश्वस्यान्तोदात्तात्संज्ञायांमित्राजिनयोरन्तइत्येतद्भवतिविप्रतिषेधेन। बहुव्री
हौविश्वंसंज्ञायामित्यस्यावकाशः। विश्वदेवः। विश्वयशाः। मित्राजिनयोरित्यस्यावकाशः। कुलमित्रम्। कुलाजिनम्। इहो
भयंप्राप्नोति। विश्वामित्रः। विश्वाजिनः। मित्राजिनयोरन्तइत्येतद्भवतिविप्रतिषेधेन। अन्तोदात्तप्रकरणेमरुद्वृधादी मु।
नांछन्दस्युपसंख्यानंकर्तव्यम्। मरुद्वृधः। सुवयाउपतस्थे॥ उदराश्वेषुषु क्षेपे॥ उदरादिभ्योनञ्सुभ्यांउदराश्वेषुषु
क्षेपइत्येतस्मान्नञ्सुभ्यामित्येतद्भवतिविप्रतिषेधेन। उदराश्वेषुषुक्षेपेइत्यस्यावकाशः। कुण्डोदरोघटोदरः। नञ्
सुभ्यामित्यस्यावकाशः। अयवः। अतिलः। अमाषः। सुयवः। सुतिलः। सुमाषः। इहोभयंप्राप्नोति। अनुदरः सूदरः न
ञ्सुभ्यामित्येतद्भवतिविप्रतिषेधेन। सोर्मनसीअलोमोषसी॥ सोर्मनसोःकपि॥ सोर्मनसीअलोमोषसीइत्येत
स्मात्कपिपूर्वमित्येतद्भवतिविप्रतिषेधेन। सोर्मनसीअलोमोषसीइत्येतस्यावकाशः। सुशर्माणमधिनावंरु
हेम। सुशर्मासिसुप्रतिष्ठानः। सुस्रोताः। सुपयाः। सुवर्चाः। कपिपूर्वमित्यस्यावकाशः। अयवकः। अतिलकः।
इहोभयंप्राप्नोति। सुशर्मकः। सुस्रोतस्कः। कपिपूर्वमित्येतद्भवतिविप्रतिषेधेन ॥

दर॥ वृद्धाविलेव वृद्धिमदुत्तरपदमिति परिग्रहे सिद्धे उत्तरपदग्रहणंतदधिकारविहितवृद्धिपरिग्रहार्थम् ॥ उद
र ॥ सूदरइति। प्रकरणादिवशादत्रक्षेपप्रतिपत्तिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ कुण्डम्॥ कुण्डशब्दोस्तिभाजनविशेषवाची। अस्तिसमुदायवाची। इषुकुण्डमिषुसमुदाय इत्यर्थः। तत्र शब्देनभाजन ६२१
८८ विशेषवाचीनिवर्त्यते। वनशब्दस्तुसमुदायवाच्यप्यस्तिआम्रवणमिति। जलपर्यायोप्यस्ति। ततश्चयथातटाकादयो
विशिष्टाधारजलवाचिनएवंकुण्डशब्दोपिपानीयंकुण्डमिति। ततश्चवनग्रहणे प्युपादीयमानेनास्त्यतिप्रसङ्गनि
वृत्तिरित्याह। कुण्डाद्युदात्तत्वइति। तच्छब्देनपूर्वपरामर्शः। वनसमुदायवाचीति॥ वनमेवसमुदायोव

कूलतीर॥ पर्यादिभ्यः कूलादीनामाद्युदात्तत्वम्। पर्यादिभ्यः कूलादीनामाद्युदात्तत्वंभवतिविप्रतिषेधे
न। परिप्रत्युपापावर्ज्यमानाहोरात्रावयवेष्वित्यस्यावकाशः। परित्रिगर्त्तम्। परिसौवीरम्। कूलादीनामाद्यु
दात्तत्वस्यावकाशः। अनुकूलम्। अतिकूलम्। इहोभयंप्राप्नोति। परिकूलम्। प्रतिकूलम्। कूलादीनामाद्युदात्तत्वंभव
तिविप्रतिषेधेन। चेलखेटकटुक॥ अकर्मधारयेराज्यम्। चेलराज्यादिभ्योव्ययम्। चेलराज्यादिस्वरादव्ययस्व
रोभवतिविप्रतिषेधेन। चेलराज्यादिस्वरस्यावकाशः। भार्याचेलम्। पितृचेलम्। ब्राह्मणराज्यम्। अव्ययस्वर
स्यावकाशः। निष्कौशाम्बिः। निर्वाराणसिः। इहोभयंप्राप्नोति। कुचेलम्। कुराज्यम्। अव्ययस्वरोभवतिविप्रतिषे
धेन। सतर्हिपूर्वविप्रतिषेधोवक्तव्योनवक्तव्यः। इष्टवाचीपरशब्दः। विप्रतिषेधेपरंयदिष्टंतद्भवति। कुण्डंव
नम्॥ कुण्डाद्युदात्तत्वेतत्समुदायग्रहणम्। कुण्डाद्युदात्तत्वेतत्समुदायग्रहणंकर्तव्यम्। वनसमुदायवाची
चेत्कुण्डशब्दोभवतीतिवक्तव्यम्। इहमाभूत्। मृत्कुण्डम्। कुण्डंवनम्॥ इतिश्रीमद्भगवत्पतञ्जलिवि
रचितेव्याकरणमहाभाष्येषष्ठस्याध्यायस्यद्वितीयेपादेप्रथममाह्निकम् ॥

नसमुदायः वनशब्दवाच्यत्वाद्ववनंसमुदायउच्यते। समुदायवाचीवनशब्दोत्राश्रयणीयोनतूदकवाचीत्यर्थः। अन्ये
त्वाहुः। वनानांसमुदायोवनसमुदायइति। तेनशरवणसमुदायोवनसमुदायःशरकुण्डशब्देनोच्यते। मृत्कुण्डमिति।
भाजनविशेषवाचीविशिष्टसंस्थानाधारजलवाचीचात्रकुण्डशब्दः॥ इत्युपाध्यायजैयटपुत्रकैयटकृतेभाष्यप्रदीपे हमः
षष्ठस्याध्यायस्यद्वितीयेपादेप्रथममाह्निकम् ॥ ८२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतिका॥ परमकारकमिति। विचार्यं किंचिदत्रास्तीत्यस्योपन्यासः। यथासंप्रदानादयः शब्दा नकारकरूपतां प्रतिपादयन्ति। तथा कारकशब्दोपि। तदुक्तम्। स्वशब्दैरभिधानेतु सधर्मो नाभिधीयते। विभक्त्यादिभिरेवासावुपकारः प्रतीयत इति॥ एवंचतद्विशेषणमपि परमशब्दः कारकवाची नभवतीति प्रत्युदाहरणम्। एतदपीति। नह्यकारकस्य कारकशब्देनाभिधानम्। ततश्च तद्विशेषणस्यापि कारकत्वमस्त्येव। यथा कटंकरोति भीष्ममित्यादौ। देवदत्तस्येति। शेषविवक्षायां षष्ठी तृजकाभ्यां कर्तरि कर्त्तरि चेति कारकषष्ठ्याः समासप्रतिषेधादिह षष्ठीसमासो भवत्येव। नैतत्कारकमिति। कृदन्ता हि क्रियायोग्यताविशिष्टद्रव्यवाचिनो ननु द्रुतां कारक

गतिकारकोपपदात्कृत्॥ गतिकारकोपपदादिति किमर्थम्। इह माभूत्। परमंकारकं परमकारकम्। गतिकारकोपपदादित्युच्यमानेऽप्यत्र प्राप्नोति। एतदपि हि कारकम्। इदं तर्हि देवदत्तस्य कारकं देवदत्तकारकम्। इदं चाप्युदाहरणम्। परमंकारकं परमकारकमिति। ननु चोक्तं गतिकारकोपदादित्युच्यमानेऽप्यत्र प्राप्नोति। एतदपि हि कारकमिति। नैतत्कारकम्। कारकविशेषणमेतद्। यावद्ब्रूयात् प्रकृष्टं कारकं शोभनं कारकमिति तावदेवैतत्परमकारकमिति। अथ कृद्ग्रहणं किमर्थम्। इह माभूत्। निष्कौशाम्बिः। निर्वाराणसिरिति। गत्यादिभ्यः प्रकृतिस्वरत्वे कृद्ग्रहणानर्थक्यम्। अन्यस्योत्तरपदस्याभावात्। गत्यादिभ्यः प्रकृतिस्वरत्वे कृद्ग्रहणमनर्थकम्। अन्यस्योत्तरपदस्याभावात्। नह्यन्यद्गत्यादिभ्य उत्तरपदमस्ति। अन्यदतः कृतः। किं कारणम्। धातोर्हि द्वये प्रत्यया विधीयन्ते। तिङः कृतश्च। तत्र कृता सह समासो भवति। तिङा चन भवति। तत्रान्तरेण कृद्ग्रहणं कृत एव भविष्यति। ननु चेदानीमेवोदाहृतम्। निष्कौशाम्बिः निर्वाराणसिरिति। यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतः। नच निसः कौशाम्बीशब्दं प्रति क्रियायोगः ॥

तां प्रतिपादयन्ति। परममित्येतच्च न करोति क्रियाविशेषणम्। यतः कर्मकारकमेतत्स्यादपि तु द्रव्यविशेषणं तथा च समानाधिकरणसमास उपपद्यते। अथ कृद्ग्रहणमिति। यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो नान्यं भवतीति प्रश्नः। निष्कौशाम्बिरिति। क्रमणक्रियापेक्षमस्ति निसो गतित्वमिति भावः। अन्यस्योत्तरपदस्याभावादिति। गतिकारकाभ्यां तावत्संबन्धात् क्रियावाचि कृदन्तमेवोत्तरपदमासिन्नमुपपदसमिधात्वधिकारे सप्तमीनिर्दिष्टं प्रत्ययनिमित्तमुच्यते इति तेनापि कृदन्तमेवासिन्नम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·वै· कृत्वंकृतौवेवि।वाशब्दस्त्वर्थे।धातुप्रत्ययसमुदायपरिग्रहार्थंकृद्ग्रहणमन्यथाधातावेवोत्तरपदेस्वरः स्यादित्यर्थः।प्रणीरि ६ २१
८३ तिअव्ययस्वरापवादोत्रकृत्स्वरः।यस्यक्रियेति।अन्वयव्यतिरेकाभ्यांयस्यवाच्याक्रियेत्यर्थः॥धातोरेवचक्रियावाच्येतितमेवप्र
तिगत्युपसर्गसंज्ञाप्रसङ्गः।याक्रियेति।क्रियालक्षणमर्थंप्रतिगत्युपसर्गसंज्ञेभवतः केवलायाश्चक्रियायाव्यवहारानङ्गत्वाद्द्र
व्यान्तरसंसृष्टक्रियावाचिकृदन्तपरिग्रहः सिद्ध इत्यर्थः।नचकश्चित्केवलइति।केवलक्रियावाचित्वात्केवलइत्युक्तम्।इ
तरस्तुशब्दकैवल्यमनेनोक्तमितिमत्वाचोदयति॥ननुचायमिति॥एषोपीति।तस्मात्कारकसहितायाएवक्रियायाः सर्वत्रप्रति

कृत्स्नकृतौवागतित्वादधिकार्थंकृद्ग्रहणम्।कृत्वकृतौतर्हिगतित्वादधिकार्थंकृद्ग्रहणंकर्त्तव्यम्॥कृत्स्नकृतिधा
तुः।धातुंचप्रतिक्रियायोगः।तत्रयत्क्रियायुक्तास्तंप्रतिगत्युपसर्गसंज्ञेभवतइतिइहैवस्यात्।प्रणीरुन्नीरिति।इ
हनस्यात्।प्रणायकः।उन्नायकः।एतदपिनास्तिप्रयोजनम्।यत्क्रियायुक्ताइतिनैवंविज्ञायते।यस्यक्रियायत्क्रिया
यत्क्रियायुक्तास्तंप्रतिगत्युपसर्गसंज्ञेभवतइति॥कथंतर्हियाक्रियायत्क्रियायत्क्रियायुक्तास्तंप्रतिगत्युपसर्गसं
ज्ञेभवतइति॥नचकश्चिच्छब्दोऽस्तिकेवलोयस्तस्यार्थस्यवाचकः स्यात्।केवलस्तस्यार्थस्यवाचकोनास्तीतिकृत्वा
कृदधिकस्यभविष्यति॥ननुचायंतस्यैवार्थस्यवाचकः प्रणीरुन्नीरिति॥एषोऽपिहिकर्तृविशिष्टस्यैव।अयंतर्हि
तस्यैवार्थस्यवाचकः॥प्रभवनमिति॥तस्मात्कृद्ग्रहणंकर्त्तव्यम्॥यदिकृद्ग्रहणंक्रियते।आमन्तेस्वरोनप्राप्नोति॥प्र
पचतितरामिति।प्रजल्पतितरां प्रजल्पतितमाम्॥असतिपुनः कृद्ग्रहणेक्रियाप्रधानमाख्यातंतस्यातिशये
तरबुत्पद्यते॥तरबन्तात्स्वार्थेआम्।तत्रयत्क्रियायुक्ताइतिभवत्येवसंघातंप्रतिक्रियायोगः।नचकश्चित्
केवलः शब्दोऽस्तियस्तस्यार्थस्यवाचकः स्यात्।केवलस्तस्यार्थस्यवाचकोनास्तीतिकृत्वाधिकस्यभविष्यति।
ननुचायंतस्यार्थस्यवाचकः प्रभवनमिति ॥

पादनात्प्रणीप्रणायकादीनांनकश्चिद्भेदः।प्रभवनमिति।भावेल्युड्विधानात्कारकासंसृष्टैवक्रियाभिधीयते।प्रप
चतितरामिति।प्रशब्दस्यामन्तेनसमासः।गतिकारकोपपदानांकृद्भिःसहसमासवचनंप्राक्सुबुत्पत्तेरित्यस्यत्वयमर्थो य
दागत्यादीनांकृद्भिःसहसमासोभवतितदाप्राक्सुबुत्पत्तेरितिनतुकृद्भिरेवसमासइति।तेनतद्धितान्तेनापिसुप्युत्पन्नेसमा
सः प्रवर्त्तते।नन्वसत्यपिकृद्ग्रहणेत्रस्वरोनसिध्यतिसंख्याकालसाधनोपग्रहविशिष्टायाः क्रियायाअभिधानान्नकेवलाया रामः
इत्याह।असतिपुनरिति ॥ ८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रव्यविशिष्टस्येति। धातुःसाध्यरूपतांप्रतिपादयतिप्रत्ययस्तुद्रव्यधर्मे लिङ्गसंख्यायुक्तमर्थमितिभावः। द्रव्यवदिति। प्रसिद्धघटादि
द्रव्यापेक्षोवतिनिर्देशो यथा घटादिद्रव्यंघटादिभिः शब्दैर्लिङ्गसंख्याकर्मादिशक्तियुक्तमभिधीयतेतथापाकादिभिःशब्दैःपाकादि
कोभावः। क्रियावदपीति। तेनभोक्तुंपाकइत्यादौक्रियोपपदाश्रयः प्रत्ययस्तद्देवमव्याप्तिप्रसङ्गात्प्रत्याख्यातंकृद्ग्रहणम्॥ अन्तः॥
उभयंप्रकृतमिति॥ समासस्येत्यपिप्रकृतमुत्तरपदादिरित्यत उत्तरपदग्रहणमपि॥ तत्रान्यतरदिति॥ अन्तोदात्तविधानेनविशेषेव
स्थापयितुमित्यर्थः। अथवासमासेनोत्तरपदमुत्तरपदेनवासमासइत्यर्थः। इदंप्रथमकाइति॥ मशब्दाकारस्यान्तोदात्तत्वमिष्यतेकप
स्तुसमासान्तत्वात्प्राप्नोतीतिकपिचेतिवक्तव्यम्। तेनकपिपरतःपूर्वस्योदात्तत्वंसिध्यति॥ अनृचइति। अकारःसमासस्यावयवोनोत्त

एषोपिहिद्रव्यविशिष्टस्यवाचकः। कथम्। कृदभिहितोभावोद्रव्यवद्भवतिक्रियावदपीति॥ अन्तः॥ किंसमासस्यान्तउ
दात्तोभवति आहोस्विदुत्तरपदस्य। कुतःसंदेहः। उभयंप्रकृतम्॥ तत्रान्यतरच्छक्यंविशेषयितुम्। कस्मात्रविशेषः।
अन्तोदात्तत्वंसमासस्येतिचेत्कप्युपसंख्यानम्। अन्तोदात्तत्वंसमासस्येतिचेत्कप्युपसंख्यानंकर्तव्यम्। इदमेतत्तद्भ्यः
प्रथमपूरणयोःक्रियागणनेकपिचेतिवक्तव्यम्। इहापियथास्यात्॥ इदंप्रथमकाः। अस्तुतर्ह्युत्तरपदस्य॥ उत्तरपदा
न्तोदात्तत्वेनञ्सुभ्यांसमासान्तोदात्तत्वम्॥ उत्तरपदस्यान्तोदात्तत्वेनञ्सुभ्यांसमासान्तोदात्तत्वंवक्तव्यम्॥ अनृचोबह्वृ
चः॥ अपरआह॥ उत्तरपदान्तोदात्तत्वेनञ्सुभ्यांसमासान्तोदात्तत्वम्। उत्तरपदान्तोदात्तत्वेनञ्सुभ्यांसमासान्तोदात्तत्वं
वक्तव्यम्॥ अज्ञकः॥ अभ्रकः॥ कपिपूर्वमित्यस्यापवादः ह्रस्वान्तेन्त्यात्पूर्वमिति॥ तत्रह्रस्वान्तेन्त्यात्पूर्वमुदात्तभा
वीनास्तीतिकृत्वोत्सर्गेणान्तोदात्तत्वंप्राप्नोति ॥

रपदस्येतितस्योदात्तत्वंनप्राप्नोति॥ अपरआहेति। प्रकारान्तरसद्भावात्पूर्वस्माद्भेदः। अज्ञकइति। अत्रकपउदात्तत्वमिष्यतेतच्चउत्तरप
दस्यकार्यित्वेनसिध्यति॥ समासेतुकार्यभाजिसिध्यति॥ कपिपूर्वमित्यस्यापवादइति॥ अज्ञकशब्देनञःपरस्यकपिपूर्वस्यएकाच्त्वा
दन्त्यात्पूर्वमुदात्तभावीनास्तीतिनञ्सुभ्यामित्यनेनस्वरेणभाव्यम्। सचस्वरःकपोनसिध्यति। नन्वन्त्यात्पूर्वोयत्रोदात्तभाव्यस्तिअय
वकइत्यादौतत्रकपिपूर्वमित्येतद्बाध्यतामज्ञकादौतुकथंबाध्यते॥ नह्यपवादोप्रवर्तमानएवोत्सर्गंबाधते। नैषदोषः। यथाहलादिः
शेषइत्यभ्यासजातेराश्रयणादाटतुरित्यादावप्यनादेर्हलोनिवृत्तिर्भवतिएवंह्रस्वान्तेन्त्यात्पूर्वमित्यत्रापिह्रस्वजातेराश्रयणात्तत्क्र
कौण्डिन्यन्यायात्सर्वत्रह्रस्वान्तेकपिपूर्वमित्यस्याप्रवृत्तिरथवाह्रस्वान्तेन्त्यादित्येववक्तव्यम्। कपिपूर्वमित्यतःपूर्वग्रहणमनुवर्तिष्यतेत
त्रपूर्वग्रहणंनियमार्थम्। ह्रस्वान्तेन्त्यादेवपूर्वमुदात्तंभवतिनतुकपिपूर्वमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपक्षद्वयेदोषमभिधायलिङ्गेनसमासस्यकार्यित्वप्रतिपादयितुमाह। नवेति। अकुमारीकइत्यादौकपिपूर्वस्यउदात्तार्थंकपिपूर्वमित्युच्यते॥ यदिचनञ्सुभ्यामित्यनेनोत्तरपदस्यान्तोदात्तत्वंस्यात्ततस्तेनैवसिद्धत्वात्कपिपूर्वमितिनकर्त्तव्यंस्यात्। नञ्सुभ्यामिति। नञ्सुभ्यांयदुत्तरपदंतदन्तस्यसमासस्येत्यर्थः॥ कारकात्। संज्ञायामनाचितादीनामितिविहितमन्तोदात्तत्वमनेननियम्यतेतेनदेवपालितइत्यादौनभवति। तृतीयाकर्मणीत्यनेनतुपूर्वपदप्रकृतिस्वरोभवति। अनाहतइति। देवदत्तशब्दःशङ्खविशेषस्यसंज्ञा। तत्राशीरभावादन्तो

नवाकपिपूर्ववचनंज्ञापकमुत्तरपदान्तोदात्तत्वस्य। नवाएषदोषः। किंकारणम्। यदयंकपिपूर्वमित्याहतज्ज्ञापयत्याचार्यः। उत्तरपदस्यान्तोदात्तत्वंनभवतीति। एवमपिकृतएतत्समासस्यान्तउदात्तोभवतीति। प्रकरणाच्चसमासान्तोदात्तत्वम्। प्रकृतंसमासग्रहणमनुवर्त्तते। क्वप्रकृतम्। त्रैसमासस्येति। ननुचोक्तमन्तोदात्तत्वंसमासस्येतिचेत्कपिउपसंख्यानमिति॥ नैषदोषः॥ उत्तरपदग्रहणमपिप्रकृतमनुवर्त्तते। क्वप्रकृतम्। उत्तरपदादिरिति॥ तत्रैवमभिसंबन्धःकरिष्यते। नञ्सुभ्यांसमासस्यान्तउदात्तोभवतीति। इदमेतत्तद्ध्यःप्रथमपूरणयोःक्रियागणनेउत्तरपदस्येति॥ कारकादृत्त॥ कारकादृत्तश्रुतयोरनाशिषिप्रतिषेधः। कारकादृत्तश्रुतयोरनाशिषिप्रतिषेधोवक्तव्यः। अनाहतोनदतिदेवदत्तः। सिद्धंतूभयनियमात्। सिद्धमेतत्। कथम्। उभयनियमात्। उभयतोनियमःकरिष्यते। कारकादृत्तश्रुतयोरेवाशिषि॥ आशिष्येवकारकादृत्तश्रुतयोरिति॥ संज्ञायाम्॥ ऋषिप्रतिषेधोमित्रे॥ ऋषिप्रतिषेधोमित्रेवक्तव्यः। विश्वामित्रऋषिः॥ बह्वोर्नञ्वदुत्तरपदभूम्नि॥ किमर्थंबह्वोर्नञ्वदितिदेशःक्रियते। नञ्सुबहुभ्यइत्येवोच्येत। नैवंशक्यम्। उत्तरपदभूम्नीतिवक्ष्यति। तद्बह्वोरेवयथास्यात्नञ्सुभ्यांमाभूदिति। नैतदस्तिप्रयोजनम्। एकयोगेपिहिसतियस्योत्तरपदभूमास्तितस्यभविष्यति॥ कस्यचास्तिबह्वोरेव। इदंतर्हिप्रयोजनम्। नगुणादयोवयवाइतिवक्ष्यतितद्बह्वोरेवयथास्यात्। नञ्सुभ्यांमाभूदिति॥ एतदपिनास्तिप्रयोजनम्। एकयोगेपिहिसतियस्यगुणादयोवयवाःसन्तितस्यभविष्यति ॥

दात्तत्वाभावः। सिद्धंत्विति। तन्त्रेणसूत्रद्वयस्योच्चारणादेकंसूत्रम्। आशिष्येवेति। भिन्नक्रमत्वादेवकारस्येतिभावः॥ संज्ञायांमि॥ विश्वामित्रइति। मित्रेचर्षाविति दीर्घः। परत्वादनेनान्तोदात्तत्वंप्राप्तंप्रतिषिध्यते। ततोबहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वंभवति॥ बह्वोः॥ यस्यगुणादयइति। यस्यविशेष्यादित्यर्थः॥ ननुचागुणःसुगुणइत्यादौनञ्सुभ्यामुत्तरेगुणादयःसन्त्येव॥ एवंतर्ह्युत्तरपदभूमग्रहणेनपूर्वपदस्यविशेषणाद्बह्वोरेवपरेषांगुणादीनांप्रतिषेधोभविष्यतियस्योत्तरपदभूम्निवर्त्तमानस्येतिहि भाष्यकाराभिप्रायः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसर्गात्॥ नित्यं यदेकरूपं तदिह ध्रुवं गृह्यते। निर्गतं ललाटमस्य निर्ललाट इति। ललाटस्य नित्यं निर्गमनाद् ध्रुवत्वम्। इह तु न भवत्य-
न्तोदात्तत्वमुद्बाहुः क्रोशतीति। न हि बाहोर्नित्यमूर्ध्वदिगवस्थानम्॥ प्रमुख इति। यस्य नित्यं प्रगतं मुखं स प्रमुखः। अत्राहुः। मुखं स्वा-
ङ्गमिति प्राप्तिर्नाव्ययदिक्शब्देति प्रतिषिद्धा ततो विप्रतिषेधानुपपत्तिः। उच्यते॥ नाव्ययदिक्शब्देति प्रतिषेधो बाधकोऽस्त्वथोप-
सर्गादिति। तत्र परत्वात्प्रतिषेधं बाधित्वैतदन्तोदात्तत्वं बाधकं प्रवर्तते॥ अतेर॥ अतिकारक इति। कारकमतिक्रान्त इति समासः। अ-

कस्य च सन्ति। बहोरेव। अत उत्तरं पठति। बहोर्नञ्वदुत्तरपदाद्युदात्तार्थे॥ बहोर्नञ्वदतिदेशः क्रियते। उत्तरपद-
स्याद्युदात्तार्थम्॥ उत्तरपदस्याद्युदात्तत्वं यथा स्यात्। विदेशस्थमपि यन्नञः कार्यं तदपि बहोर्यथा स्यात्॥ नञो जर-
मरमित्रमृताः। अजरः। अमरः। अमित्रः। अमृतः। बहुजरः। बहुमित्रः। बहुमृतः॥ उपसर्गात्॥ मुखस्यान्तोदात्तत्वा-
दुपसर्गात्स्वाङ्गं ध्रुवम्॥ मुखस्यान्तोदात्तत्वादुपसर्गात्स्वाङ्गं ध्रुवं भवति विप्रतिषेधेन। मुखस्यान्तोदात्तत्वस्यावका-
शः। गौरमुखः। श्लक्ष्णमुखः। उपसर्गात्स्वाङ्गं ध्रुवमित्यस्यावकाशः। प्रस्फिक्। प्रोदरः। इहोभयं प्राप्नोति। प्रमुखः। उपस-
र्गात्स्वाङ्गं ध्रुवमित्येतद्भवति विप्रतिषेधेन। कः पुनरत्र विशेषः॥ तेन वा सत्यनेन वा। सापवादः सविधिः। अयं पुनर्निरपवा-
दः। अव्ययात्तस्य प्रतिषेधोपवादः॥ अमेर्मुखम्॥ अपाद्य॥ किमर्थमिदमुच्यते॥ न उपसर्गात्स्वाङ्गं ध्रुवमित्येव सिद्धम्।
अमेर्मुखमपाद्याध्रुवार्थम्। अध्रुवार्थोऽयमारम्भः। अबहुव्रीह्यर्थो वा॥ अथवा बहुव्रीहेरिति वर्त्तते। अबहुव्रीह्यर्थोऽय-
मारम्भः॥ स्फिगपूत॥ स्फिगपूतग्रहणं किमर्थम्। न उपसर्गात्स्वाङ्गं ध्रुवमित्येव सिद्धम्। स्फिगपूतग्रहणं च। किं। अध्रु-
वार्थमबहुव्रीह्यर्थमेव वा॥ अतेरकृत्पदे॥ अतेर्धातुलोपे। अतेर्धातुलोप इति वक्तव्यम्। अकृत्पद इत्युच्यमा-
न इह च प्रसज्येत। शोभनो गार्ग्यः अतिगार्ग्य इति। इह च न स्यात्। अतिकारकः। अतिपदा शक्करी॥ द्वित्रिभ्यां पाद्॥ कि-
मिदं द्वित्रिभ्यां मूर्द्धन्यकारान्तग्रहणमाहोस्विन्नकारान्तग्रहणम् ॥

तिशब्दो वृत्तिविषयेऽक्रान्तार्थे वृत्तिरिति क्रमेरप्रयोगस्यात्र लोपः। स्वरूप इह अत्र धातुलोपः। यदा पूर्वपदप्रकृतिस्वरस्तदा शोभ-
नः कारक इत्यतिकारकशब्दस्यार्थः॥ द्वित्रि॥ पूर्वपदप्रकृतिस्वरापवादो योगः। किमिदमिति॥ ननु चाकारान्तनिर्देशे मूर्ध्निषिति भा-
व्यमिति द्वैतानुपपत्तिः। उच्यते॥ न शब्दाश्रयं द्वैतं किं तु कार्यभेदाश्रयम्। यदा समासस्यान्तोदात्तत्वं विधीयते नित्यश्च समासान्त इ-
ति पक्षस्तदाकारान्तग्रहणमेव सामर्थ्याद्भवति। यदा तूत्तरपदस्यान्तोदात्तत्वमिति पक्षस्तदाकृतेऽपि समासान्ते तस्योत्तरपदे अ-
नन्तर्भावान्नकारान्तस्य स्वरविधिरिति पक्षो व्यवतिष्ठते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकारान्तस्योपसंख्यानमिति। समासश्चेत्कार्यी नित्यश्च समासान्तस्तदा नकारान्तस्य साधुत्वं स्वरश्चोपसंख्येय इत्यर्थः। द्विमूर्धइति। यदोत्तरपदस्य कार्यित्वं तदाकृते समासान्ते उत्तरपदस्यान्तोदात्तत्वं विधीयमानं प्रत्ययस्य न प्राप्नोति॥ उदात्तलोपादिति॥ उत्तरपदस्यान्तोदात्तत्वे सति शेषनिघातेन प्रत्ययोनुदात्तस्तत्रानुदात्तस्य च यत्रोदात्तलोप इति प्रत्ययस्योदात्तत्वं सिद्धमित्यर्थः। परत्वाल्लोप इति॥ ततश्चोदात्तलोपो न भवतीत्यर्थः॥ एवं तर्हि इदमिहेति॥ यदाकृते समासे समासान्तः क्रियत इति पक्षस्तदेयं संप्रधारणा। यदा तु समासार्थादुत्तरपदात्समासान्तः क्रियत इति पक्षस्तदा संप्रधारणैवात्र नास्ति। युक्तं पुनरिति॥ ननु कृतेपि समासान्ते नकारान्त एव मूर्धशब्द उत्तरपदं संभवतीति किमत्रायुक्तम्। एवं मन्यते। यथा पाद इति समासान्तनिर्देशः एवं मूर्ध्ने षिति समासान्तनिर्देश एवन्या

कृष्वान्न विशेषः। द्वित्रिभ्यां मूर्धन्यकारान्तग्रहणं चेन्नकारान्तस्योपसंख्यानम्। द्वित्रिभ्यां मूर्धन्यकारान्तग्रहणं चेन्नकारान्तस्योपसंख्यानं कर्तव्यम्। द्विमूर्धा। त्रिमूर्धा॥ अस्तु तर्हि नकारान्तग्रहणम्॥ नकारान्तेऽकारान्तस्य॥ नकारान्ते सत्यकारान्तस्योपसंख्यानं कर्तव्यम्। द्विमूर्धः। त्रिमूर्धः। उदात्तलोपात् सिद्धम्॥ अस्तु तर्हि नकारान्तग्रहणम्। अन्तोदात्तत्वे कृते लोपः। उदात्तनिवृत्तिस्वरेण सिद्धम्। इदमिह संप्रधार्यम्। अन्तोदात्तत्वं क्रियतां लोप इति। किमत्र कर्तव्यम्। परत्वाल्लोपः॥ एवं तर्हि इदमिह संप्रधार्यम्। अन्तोदात्तत्वं क्रियतां समासान्त इति। किमत्र कर्तव्यम्। परत्वादन्तोदात्तत्वम्। नित्यः समासान्तः। कृतेप्यन्तोदात्तत्वे प्राप्नोत्यकृतेऽपि प्राप्नोति। अन्तोदात्तत्वमपि नित्यम्। कृतेऽपि समासान्ते प्राप्नोत्यकृतेऽपि प्राप्नोति॥ अनित्यमन्तोदात्तत्वम्। न हि कृते समासान्ते प्राप्नोति। परत्वाल्लोपेन भवितव्यम्। भवत्येव लोपः। यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यं। न च समासान्त एवान्तोदात्तत्वस्य निमित्तं विहन्ति। अवश्यं लक्षणान्तरं लोपः प्रतीक्ष्यः। उभयोर्नित्ययोः परत्वादन्तोदात्तत्वम्। अन्तोदात्तत्वे कृते समासान्तः। टिलोपः। टिलोपे कृते उदात्तनिवृत्तिस्वरेण सिद्धम्॥ युक्तं पुनरिदं विचारयितुम्॥ नन्वनेनासंदिग्धेन नकारान्तग्रहणेन भवितव्यम्। यावता मूर्ध्वस्वित्युच्यते॥ यद्यकारान्तग्रहणं स्यात् मूर्ध्ने षिति ब्रूयात्॥ सैषा समासान्तार्था विचारणा ॥

यः। एवं ह्यसंदिग्धं समासस्य कार्यित्वं विज्ञायते। न चकृतम्। तस्मादुत्तरपदस्यैव कार्यित्वेन भाव्यम्। सैषा समासान्तार्थेति। यदि नित्यः समासान्तः स्यात्सदा कार्यिविशेषसंदेहस्य वृत्तये प्रक्रमाभेदाय वा समासान्त एवोच्चार्येत। तदनुच्चारणात्तु समासान्तस्यानित्यत्वं ज्ञाप्यते। तत्र यदा समासान्तो नास्ति तदा समासस्योत्तरपदस्य वा कार्यित्वे विशेषाभावो यदा तु समासान्तः क्रियते तदा समासस्य कार्यित्वे सिद्धं समासान्तस्योदात्तत्वम्। यदाप्युत्तरपदस्य कार्यित्वं तदा परत्वादन्तोदात्तत्वे कृते समासान्तस्तत्र टिलोप इति उदात्तनिवृत्तिस्वरेणापि सिद्धम्। रोमः

ननु प्रत्ययस्वरेण समासान्तस्य भाव्यम्। नैतदस्ति। बहुव्रीहिस्वरेण तस्य बाधनात्। बहुव्रीहिस्वरस्याप्यनेन ॥ ८५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परादिः॥व्यत्ययोबहुलंस्मृतइति॥बहुलग्रहणलभ्यःस्वरव्यत्ययइत्यर्थः।त्रिचक्रेणेत्यादौबहुव्रीहिस्वरेप्राप्तेन्तोदात्तत्वंविधीयते॥इ
त्युपाध्यायजैयटपुत्रकैयटकृतेभाष्यप्रदीपेषष्ठस्याध्यायस्यद्वितीयेपादेद्वितीयमाह्निकम्।पादश्चद्वितीयःसमाप्तः॥अलुगुत्तरपदे॥
आकुतोऽयमिति।अन्येत्वधिकारेपुन्व्याख्यानादवधिनिर्णयोऽत्रतुसामर्थ्यादितिप्रतिपादयितुंचोद्यप्रतिसमाधानोपन्यासः।प्रागानङ
इति।उत्तरपदेऽनन्तरस्यऋकारान्तस्यानङाभाव्यम्।अलुकिचसतिविभक्त्याव्यवधानादृकारान्तयोःपूर्वपदोत्तरपदयोरानन्तर्येन
स्यादितिसामर्थ्यात्प्रागानङोलुगधिकारः।अथवाकार्यान्तरंप्रकृतस्यविधेर्निवर्त्तकमित्यलुगधिकारःप्रागानङः।प्रागङ्गाधिकारादि
ति।प्रत्ययेपरतोऽङ्गंभवतिनतूत्तरपदइतिसामर्थ्यादवधिपरिच्छेदः।कानीति।समासएवलुक्प्राप्तःप्रतिषिध्यतइतिसामर्थ्यात्

एवंतर्हिज्ञापयत्याचार्योविभाषासमासान्तोभवतीति॥परादिश्छन्दसिबहुलम्॥अस्यस्यमिदमुच्यते।परादिश्च
परान्तश्चपूर्वान्तश्चापिदृश्यते॥पूर्वादयश्चदृश्यन्तेव्यत्ययोबहुलंस्मृतः॥अन्तोदात्तत्वप्रकरणेत्रिचक्रादीनांछन्द
सि॥अन्तोदात्तत्वप्रकरणेत्रिचक्रादीनांछन्दस्युपसंख्यानंकर्त्तव्यम्।त्रिचक्रेणत्रिबन्धुरेणत्रिवृतारथेन॥ इति
श्रीमद्भगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येषष्ठस्याध्यायस्यद्वितीयेपादेद्वितीयमाह्निकम्।पादश्चसमाप्तः।
अलुगुत्तरपदे॥आकुतोयमधिकारः।अलुगधिकारःप्रागानङः।उत्तरपदाधिकारःप्रागङ्गाधिकारात्।कानिपुनरुत्तरप
दाधिकारस्यप्रयोजनानि।उत्तरपदाधिकारस्यप्रयोजनम्।स्तोकादिभ्योऽलुगानङिकोह्रस्वनलोपाः।पञ्चम्याःस्तो
कादिभ्यःस्तोकान्मुक्तः।अल्पान्मुक्तः।कतिपयान्मुक्तः।उत्तरपदइतिकिमर्थम्।निष्क्रान्तःस्तोकान्निःस्तोकः।आनङि
कोह्रस्वनलोपाःप्रयोजनम्।आनङ्होतापोतारौ।उत्तरपदइतिकिमर्थम्।होतापोतृभ्याम्।इकोह्रस्वोऽङ्योगाल
वस्यप्रयोजनम्।ग्रामणिकुलम्।सेनानिकुलम्।उत्तरपदइतिकिमर्थम् ॥

समासाधिकाराद्वोत्तरपदंलभ्यते।कार्यान्तरविधावपिवनंसमासइत्यतःसमासग्रहणानुवृत्त्योत्तरपदलाभइतिप्रश्नः।निःस्तोक
इति।यद्यप्यत्रस्तोकान्निकेतिप्रतिपदोक्तसमासाश्रयणादलुङ्भवतीतिशक्यतेवक्तुंतथाप्यन्यार्थोवश्यंवक्तव्यउत्तरपदाधि
कारइतिलक्षणप्रतिपदोक्तपरिभाषानाश्रिता।होतापोतृभ्यामिति।पोतृशब्दस्यानङ्नभवति।होतापोत्तारावित्यत्रतुपर
त्वाद्गुणेनानङ्बाध्यतइत्युदाहरणान्तरोपन्यासः।अथविभक्त्यपेक्षत्वाद्गुणोबहिरङ्गआनङ्तुतदनपेक्षत्वादन्तरङ्ग
स्तथासतिहोतापोतारावित्युदाहरणंभवति॥ग्रामणिकुलमिति।षष्ठीसमासः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰वृ॰ ग्रामण्योरिति। समासाधिकारेप्यत्रोत्तरपदेस्यह्रस्वप्रसङ्गः। परमनेति। यथानतरामितिप्रतिषेधस्यप्रकर्षं एवंपारम्यमपीतिभावः।
८६ नैषोस्तिप्रयोगइति। प्रयुक्तानामिदमन्वाख्यानंप्रवृत्तमितिभावः। नतरांगमनमिति। गमनस्यायुक्ततरस्यप्रतिपादनात्प्रतिषे
धप्रकर्षोप्ययस्तरपः प्रयोगः। अत्रतुसमासानुवृत्त्यापिनलोपः शक्यतेपराकर्तुम्। एकवच्चेति। अर्थातिदेशोयंतेनद्वावर्थाव
हवश्चैकवत्समासेभवन्तीतिस्तोकाभ्यांमुक्तः स्तोकेभ्योमुक्तइतिसमासेस्तोकान्मुक्तइत्येवभवति। द्विबह्वोरिति। भावप्रत्ययमन्तरे
णापिवृत्तिविषयेद्विबहुशब्दौद्वित्वबहुत्वयोर्वर्तेते। यथाद्व्येकयोरिति। अनभिधानादिति। समासउपसर्जनार्थस्यद्वित्वबहुत्वानव
गमाद्भेदैकत्वसंख्यायाएवोपजनाद्विशेषपरित्यागात्संख्यासामान्यमभेदैकत्वसंख्योच्यते। यथासन्तमसेरूपमात्रमव
धार्यतेनतुशुक्लकृष्णादिर्विशेषः। एवंराजपुरुषइत्यत्रसंख्यावान्राजार्थोनलभ्यार्थवदसंख्यइत्येतावान्संप्रत्ययोभव

ग्रामणीः। सेनानीः। नलोपः प्रयोजनम्। नलोपोनञः। अब्राह्मणः। अवृषलः। उत्तरपदइतिकिमर्थम्। परमन।
नैषोऽस्तिप्रयोगः। इदंतर्हिनतरांगमनम्। एकवच्च। एकवच्चात्तुभवतीतिवक्तव्यम्। किंप्रयोजनम्। स्तोकाभ्यांमु
क्तः स्तोकेभ्योमुक्तइतिविगृह्यस्तोकान्मुक्तइत्येवयथास्यात्। एकवद्वचनमनर्थकम्। एकत्वङ्गावस्यानर्थकः।
द्विबह्वोरलुक्कस्मान्नभवति। द्विबहुषसमासः। द्विवचनबहुवचनान्तानामसमासः। किंवक्तव्यमेतत्। नहि। क
थमनुच्यमानंगंस्यते। उक्तंवा। किमुक्तम्। अनभिधानादिति। तत्रावश्यमनभिधानमाश्रयितव्यम्। एकवद्वच
नेहिगोषुचरेऽतिप्रसङ्गः। एकवचनेहिगोषुचरेऽतिप्रसङ्गः स्यात् ॥

तिनतुसंख्याविशेषप्रतिपत्तिः। अन्येतुसर्वसंख्याविशेषाणामविभागोभेदैकत्वसंख्येत्याहुः। यथोपधिरसाः सर्वेमधु
न्यविभागेनावस्थिताएवमुपसर्जनार्थेसंख्याविशेषाः। क्वचित्तुवृत्तावपिसंख्याविशेषावगमो यथालावकीनइत्यादावादे
शप्रयोगादेकत्वप्रतीतिः। मासजातः शौर्पिकइत्यादौप्रातिपदिकस्यैवविशिष्टार्थाभिधायित्वादेकत्वावगमः। कुण्डशोदद
तिवनशः प्रविशतीत्यादौप्रकरणादिवशादेकत्वावसायः। स्तोकाभ्यांमुक्तइत्यादावपितर्ह्यलुग्विधानाद्वित्वबहुत्वावगमा
त्समासोस्तु। नैतदस्ति। प्रयुक्तानामन्वाख्यानान्नचस्तोकाभ्यांमुक्तइतिसमासोलोकेप्रयुज्यते। तन्निबन्धनस्यैकस्यर्यस्याभा राम:
वात्। स्तोकाभ्यांमुक्तइत्यादावपादानेपञ्चमी। नतुकरणेचस्तोकात्स्येत्यनेन। धर्ममात्रवाचित्वेद्वित्वबहुत्वयोर्दुर्लभत्वादित्याहुः। ८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोषुचरइति। ———— गोशब्दोबहुवचनान्तएवाप्शब्दवदुदकस्यवाचकस्तस्मैकवद्भावेसतिगविचरइतिप्राप्नोति।एवंव
र्षासुजइतिवर्षाशब्दोबहुवचनान्तऋतुविशेषवाची।ननुऋतुप्रचयापेक्षमत्रबहुत्वम्।अप्स्वयमिति।अप्सुसाधुःतत्रसा
धुरितियत्॥पञ्चम्याः॥अन्यार्थइति।वृत्तिविषयेचद्वितीयार्थेपञ्चमीवक्तव्येत्यर्थः।युक्तएवेति।आहरणाङ्गे-शंसनेशंसिर्वर्त
तइत्युपात्तविषयमेतदपादानम्।यथाबलाहकाद्विद्योततेविद्युदितिनिस्सरणाङ्गे-विद्योतनेविद्युतिर्वर्ततइतिबलाहकोपा

गोषुचरः।वर्षास्वयम्भजे।वर्षास्वयम्भजेऽतिप्रसङ्गोभवति।वर्षासुजः।अपोयोनियन्मतिषुचोपसंख्यानम्।अ
पोयोनियन्मतिषुचोपसंख्यानंकर्त्तव्यम्।जेचरेच।अतिप्रसङ्गोभवति।योनि।अप्सुयोनिः।योनि।यत्।अप्स्व
म्।यत्।मति।अप्सुमतिः।मति।जे।अप्सुजः।जे।चरे।अप्सुचरोगह्वरेष्ठ॥पञ्चम्याः॥पञ्चमीप्रकरणेब्राह्मणाच्छं
सिनउपसंख्यानम्।पञ्चमीप्रकरणेब्राह्मणाच्छंसिनउपसंख्यानंकर्त्तव्यम्।ब्राह्मणाच्छंसी।अन्यार्थेच।अन्या
र्थेचैषापञ्चमीद्रष्टव्या।ब्राह्मणानिशंसतीतिब्राह्मणाच्छंसी।अथवायुक्तएवात्रपञ्चम्यर्थः।ब्राह्मणेभ्योगृही
त्वाहृत्याहृत्यशंसतीतिब्राह्मणाच्छंसी॥ओजः॥तृतीयायामञ्जसउपसंख्यानम्।तृतीयायामञ्जसउपसंख्या
नंकर्त्तव्यम्।अञ्जसाकृतम्।पुंसानुजोजनुषान्धोविकृताक्षइतिच।पुंसानुजोजनुषान्धोविकृताक्षइतिचोपसंख्या
नंकर्त्तव्यम्।पुंसानुजः।जनुषान्धः।विकृताक्षः॥आज्ञायिनिच॥आत्मनश्चपूरणे।आत्मनश्चपूरणउपसंख्यानं
कर्त्तव्यम्।आत्मनापञ्चमः।आत्मनादशमः।अन्यार्थेच।अन्यार्थेचैषातृतीयाद्रष्टव्या।आत्मापञ्चमोस्यआत्मना
पञ्चमः।आत्मनादशमः।अथवायुक्तएवात्रतृतीयार्थः।आत्मनाकृतंतस्यतद्भूयेनासौपञ्चमः।कथंजनार्द
नस्त्वात्मचतुर्थएवेति।बहुव्रीहिरयम्।आत्माचतुर्थोस्येति॥वैयाकरणाख्यायाम्॥परस्य च॥आत्मनेभाषपरस्मैभाष
येभ्यउपसंख्यानम्।आत्मनेभाषपरस्मैभाषयोरुपसंख्यानंकर्त्तव्यम्।आत्मनेभाषः।परस्मैभाषः।तत्कथंकर्त्तव्यम्॥

दानम्॥अज्ञायि॥अन्यार्थइति।आत्मापञ्चमोस्येत्यन्यार्थेआत्मनापञ्चमइत्यादिप्रयुज्यतइत्यर्थः।अत्रचवेतिवक्तव्यंतेनात्म
पञ्चमइत्यपिभवति।आत्मनाकृतमिति।वृत्तिविषयेप्रतीयमानाकरोतिक्रियाकारकत्वनिमित्तंभवति।हेतौवातृतीयाकार्या।अ
थवाद्ध्योदनादौउदपसेकादिवत्।करोतिक्रियायाअन्तर्भावात्करोतेरप्रयोगः।आत्मनापञ्चमइत्युक्तेआत्मनास्यकृतंपञ्चमत्व
मितिसंप्रत्ययात्।आत्माचतुर्थोस्येति।एकस्यैववस्तुनोबुद्धिप्रकल्पितभेदस्यवर्त्तिपदार्थत्वमन्यपदार्थत्वंचनविरुध्यतेवैयाकर॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याकरणेभवेति। अणगयनादिभ्यइत्यण्। अत्रपक्षेआख्याशब्दः संज्ञापर्यायः। आत्मनेभाषपरस्मैभाषशब्दौ वचनकेषुविद्याकरणेषु
संज्ञात्वेनविनिगुक्ताविति अलुकोप्रसङ्गः। अथहीति। आख्या प्रतिपादनंव्यवहारइत्यर्थः। आत्मनेपदिनश्चधा सर्वोवैयाकरणेरा
त्मभाषशब्देनव्यवह्रियन्ते परस्मैपदिनः परस्मैभाषशब्देनेत्यलुक्सिद्धः। यद्यपीति। आत्मनेपदपरस्मैपदशब्दयोर्निपातनादेवालुकः
सिद्धत्वादाख्याशब्देनसंव्यवहारमात्रमुच्यतइत्यर्थः॥ हलदन्तात्॥ हृदयंस्पृशतीति। स्पर्शनक्रियायांहृदयस्यकर्मत्वंनत्वधिकरण
त्वमितिवृत्तिविषयेद्वितीयार्थेसप्तमीवक्तव्येत्यर्थः। पद्दन्नोमास्हृन्निशितिच्छन्दसोहृदयस्यहृदादेशः। दिविस्पृगित्येतत्तुभाषाया
मपिभवति। लुकोऽवादेशइति। ननुचावादेशोन्तरङ्गोलुक्बहिरङ्गइतिकुतोविप्रतिषेधः। अपिचान्तरङ्गानपिविधीन्बहिरङ्गोलुग्बाध
यदिव्याकरणेभवावैयाकरणीवैयाकरणीआख्यावैयाकरणाख्यावैयाकरणाख्यायामिति। अथहिवैयाकरणाना
माख्यावैयाकरणाख्यावैयाकरणाख्यायामितिनार्थउपसंख्यानेन। यद्यपिव्याकरणेभवावैयाकरणीवैयाकरणी
आख्यावैयाकरणाख्यावैयाकरणाख्यायामिति। एवमपिनार्थउपसंख्यानेन। वचनाद्भविष्यति। अस्तिवचनेप्रयोज
नम्। आत्मनेपदंपरस्मैपदमिति। निपातनादेतत्सिद्धम्। किंनिपातनम्। अनुदात्तङितआत्मनेपदम्। शेषात्कर्तरि
परस्मैपदमिति॥ हलदन्तात्॥ हृद्युभ्यांङेरुपसंख्यानम्। हृद्युभ्यांङेरुपसंख्यानंकर्तव्यम्। हृदिस्पृक्। दिविस्पृक्।
अन्यार्थेच। अन्यार्थेचैषांसप्तमीदृश्या। हृदयंस्पृशतीतिहृदिस्पृक्। दिवंस्पृशतीतिदिविस्पृक्। हलदन्ताधिकारेगोरुप
संख्यानम्। हलदन्ताधिकारेगोरुपसंख्यानंकर्तव्यम्। गविष्ठिरः। नकर्तव्यम्। लुकोऽवादेशोविप्रतिषेधेन। लुक्क्रियताम्अवादेश
इति। अवादेशोभविष्यतिविप्रतिषेधेन। अवादेशेकृतेहलदन्तादित्येवसिद्धम्। लुकोऽवादेशोविप्रतिषेधेनेतिचेत्सुपिपरतःप्रसङ्गः।
तदन्तवादेशेननभाव्यम्। एवंतर्ह्यन्तरङ्गभावमनपेक्ष्यविप्रतिषेधउच्यते। कृतेचावादेशेऽलुकाभाव्यमितिलुकःप्रवृत्तिःसंदिग्धेति
बाधकत्वमपिलुकःसंदिग्धमितिविप्रतिषेधोपपत्तिः। अन्येत्वाहुः। किंव्यक्तिपक्षाश्रयेएतद्विषयेलक्षणस्याचरितार्थत्वाद्भाविहल
न्तत्वाश्रयेणालुकालुकोबाधनादेवादेशोऽस्त्वथजातिपक्षेसंप्रतिकहलन्तेषुसावकाशोऽलुगप्युपजातनिमित्तोनालुकंबाधि
तुमितिलुक्प्रवर्ततामित्येवंविधोविप्रतिषेधः। जातौपदार्थेदृषदिमाषकादिषुसांप्रतिकहलन्तेषुलुक्सावकाशोभाविहल
न्तत्वाश्रयणेननशक्नोतिलुकंबाधितुमन्तरङ्गाणांचविधीनांबाधकोलुगितिमन्यमानआह। लुकइति। अत्रापियणादेशेकृतेहल
न्तत्वाद्लुक्प्रसङ्गः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकद्दूति। सप्तम्याः संज्ञायामिति कृत्वा ऽकोतद्दूतिनियमार्थं कर्त्तव्यमित्यर्थः। तत्संध्यक्षरार्थमिति। संध्यक्षरान्तेभ्योऽलुगर्थमित्यर्थः। असकृदिति। नाऽविषयमेव निपातनमपितु सर्वार्थमिति दर्शयति। गवियुधिभ्यांस्थिरद्दूत्यनेन समासे गविशब्दात्परस्य स्थिरस्य सकारस्य षत्वं विदधत् गविष्ठिरशब्दे सप्तम्या अलुकमभ्यनुजानाति॥ कारे॥ कारः स्वामिग्राह्यो भागः। यदिसंज्ञायामिति। संज्ञाग्रहणानुवृत्तौ रूढोयः कारो नियतद्रव्यो नियतपरिमाणस्तस्य ग्रहणेन भाव्यम्। यस्तु सांप्रतिकः कारः केनचिदेवोत्पादितस्तस्य ग्रहणाभावस्तत्र पूर्वेण नित्यमलुकि प्राप्ते विभाषेयं संपद्यते। अथ संज्ञाग्रहणं नानुवर्त्तते पूर्वविप्रतिषेधाच्च संज्ञायां नित्येनालुकाभाव्यम्। तदा सांप्रतिककाराभिधायिन्यप्राप्तो विभाषालुग्विधीयत इति पक्षो व्यवतिष्ठते। तस्मिंश्च पक्षे कारनाम्नीति नामशब्दो व्यलुकोऽवादेशो विप्रतिषेधेनेति चेद्भूमिपाशेऽतिप्रसङ्गो भवति। भूम्यां पाशो भूमिपाशः। अकोत इति चा तत्संध्यक्षरार्थम्। एवं तर्हि अविशेषेण सप्तम्या अलुकमुक्त्वा ऽकोऽत इति वक्ष्यामि। तन्नियमार्थं भविष्यति। अकोत एव भवति नान्यत इति। तत्संध्यक्षरार्थम्। तेन संध्यक्षराणां सिद्धं भवति॥ सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं हलदन्ताधिकारे गोरूपसंख्यानमिति। नैषदोषः। निपातनात्सिद्धम्। किं निपातनम्। गविष्ठिरशब्दो बिदादिषु पठ्यते। असकृद्वन्वपि निपातनं क्रियते गवियुधिभ्यां स्थिर इति॥ कारनाम्नि च प्राचां हलादौ॥ किमियं प्राप्ते विभाषा आहोस्विदप्राप्ते। कथं च प्राप्ते कथं चाप्राप्ते। यदि संज्ञायामिति वर्त्तते ततः प्राप्ते। अथ निवृत्तं ततोऽप्राप्ते। कश्चात्र विशेषः। कारनाम्नि वावचनार्थं चेदजादावतिप्रसङ्गः। कारनाम्नि वा वचनार्थं चेदजादावतिप्रसङ्गो भवति। इहापि प्राप्नोति अविकटे उरणो दातव्यः। अविकटोरणः॥

पदे शमात्राभिधायी। अविकटोरण इति। अवीनां संघातोऽविकटः। संघाते कटच्। उरणो मेषः। कारविशेषस्य रूढिरियमिति पूर्वेणालुक् प्राप्नोतीत्यर्थः। प्राचामिति चैतदुभयथा व्याख्यायते। प्राचामाचार्याणां मते न हलादावुत्तरपदे कारनाम्न्यलुक् भवति नान्येषामिति विकल्पः संपद्यते। व्यवस्थितविभाषा च विज्ञायते तेन प्राग्देशे कारनाम्नि हलादौ नित्यमलुक् भवति देशान्तरे तु कारनाम्नि लुगेव यूथपशुरिति। अथवा प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदेऽलुक् न तु देशान्तरे यूथपशुः इत्यादाविति सामर्थ्याद्देशभेदेन लुगलुकोर्व्यवस्थानाद्विकल्पः संपद्यते। यूथपश्वादयउदग्देशे काराः। हलेद्विपदिकादयः प्राग्देशा अविकटोरणादयः प्रागुदक् चेति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवेति। समाससमन्तरेणलुक्प्रसङ्गाभावादलुग्विधानादत्रसमासोनुमीयतइत्यर्थः। अस्मिन्स्थानेअविकटोरणः सांप्रति
ककारइत्यभ्युपगमः। यथैवस्तूपेशाणादयः॥ अत्रहलादिग्रहणादजादिनिवृत्त्यर्थादजादावपिसमासानुमानम्। यद्यपीति।
यथापरमेकारकेपरमकारकेइत्यत्रपूर्वपदप्रकृतिस्वरोनभवतिलाक्षणिकत्वात्सप्तमीसमासस्यएवंस्तूपेशाणादावपि
पूर्वपदप्रकृतिस्वराप्राप्तिः। इतरोयद्यपिसंज्ञायामितिप्रतिपदोक्तःसप्तमीसमासोविधीयतेतथापिस्वरान्तरेणैवात्रभा
व्यमित्याह। नैवात्रेति। पूर्वपदाद्युदात्तत्वेनभाव्यमित्यर्थः। एवंस्थितेनिर्णेतुमाह। किंचभोइति। अयमर्थः। संज्ञाग्रहणानुवृ

अस्तुतर्ह्यप्राप्ते। अप्राप्तेसमासविधानम्। यद्यप्राप्तेसमासोविधेयः। प्राप्तेपुनःसतिसंज्ञायामित्येवसमासः
सिद्धः। नैषदोषः। एतदेवज्ञापयतिभवत्यत्रसमासइति। यदयंकारनाम्निसप्तम्याअलुकंशास्ति। यद्यपिता
वज्ज्ञापकात्समासःस्यात्स्वरस्तुनसिध्यति। यद्धितत्सप्तमीपूर्वपदंप्रकृतिस्वरंभवतीतिलक्षणप्रतिपदो
क्तयोःप्रतिपदोक्तस्येत्येवंतत्। नैवात्रानेनस्वरेणभवितव्यम्। किंतुसप्तमीहारिणौधर्म्येहरणइत्येतेनात्र
स्वरेणभवितव्यम्। किंचभोःसंज्ञाअपिशास्त्रेक्रियन्तेनलोकःसंज्ञासुप्रमाणम्। लोकेचकारनामसंज्ञा। ननुचो
क्तंकारनाम्निवावचनार्थंचेदजादावतिप्रसङ्ग इति। नैषदोषः। योगविभागात्सिद्धम्। योगविभागःकरिष्य
ते। कारनाम्निचप्राचाम्। ततोहलादौ। हलादौचकारनाम्निसप्तम्याअलुग्भवति। इदमिदानींकिमर्थम्। निय
मार्थम्। हलावेवकारनाम्निसप्तम्याअलुग्भवतिनान्यत्र। क्वमाभूत्। अविकटेउरणोदातव्यः। अविकटोर
णः॥ मध्याद्गुरौ॥ गुरावन्ताच्च। गुरावन्ताच्चेतिवक्तव्यम्। अन्तेगुरुः॥ बन्धेच॥ स्वाङ्गग्रहणमनुवर्तते। उताहोन।
किंचातः। यद्यनुवर्ततेसिद्धम्। हस्तेबन्धःहस्तबन्धः। चक्रेबन्धःचक्रबन्धइतिनसिध्यति ॥

त्तौस्तूपेशाणादयोरूढाः। तन्निवृत्तौनरूढाःइत्येतन्नक्रियते। एकस्यरूढित्वारूढित्वविरोधात्। लोकेचेति। रूढाएवस्तूपेशाणा
दयस्तेतुचिरन्तनाःसांप्रतिकावाभवन्त्वित्यर्थः। संज्ञाग्रहणानुवृत्त्यैवसिद्धेर्थेनामग्रहणंविस्पष्टार्थम्। एवंहिस्फुटाप्राप्तेविभाषाभव
त्यन्यथासंज्ञाग्रहणानुवृत्तिःसंदिह्येत। कारनाम्निचप्राचामिति। प्राचामेवकारनाम्नीतिनियमादुदीचांकारेऽविकटोरणेऽलुङ् निवर्त्य
तेप्राचामपिकारेऽविकटोरणेहलादावित्यनेनद्वितीयेननियमेनालुगनिवृत्तिः॥ बन्धेच॥ नेनसिद्धेतिनिषेधस्यास्यचविकल्पस्यवि
षयविभागज्ञानायोपन्यस्यति। स्वाङ्गग्रहणमिति। स्वाङ्गग्रहणेऽनुवर्तमानेस्वाङ्गादुत्तरस्याःसप्तम्याअलुक्कोविकल्पःअन्यस्मात्तु
वद्यतिषेधइतिविषयविभागसिद्धिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ निवृत्तमिति। नदा विकल्पनिषेधयोर्विषयविभागाविज्ञानाद्यथेष्टसिद्ध्यभावः। सर्वत्रेति। चक्रबन्धनमित्यादौ सर्वत्रैव धाति
धात्वादावुत्तरपदे लुक्प्रतिषेधः। अत्र तु सूत्रे बन्धशब्दो घञन्त उपात्तो न धातुमात्रनिर्देश इत्यर्थः॥ तत्पुरुषे॥ बहुलवचनादिति।
प्रकृतत्वादलुगिति विज्ञेयम्। न्यायोऽप्यत्रास्ति। अन्तरङ्गा कृदन्तवाच्यक्रियानिमित्ता सप्तमी गृह्यते इह तु क्रियान्तरनिमित्ता परमेका
रके निधेहीति बहिरङ्गेति न गृह्यते। अकृत्स्नस्यादिति। अकृत्स्नकारित्वादित्यर्थः नहि बहुलग्रहणमात्राल्लुगलुकोर्विषयविभाग
निश्चयः। इतरस्त्वपरिपूर्णत्वमकृत्स्नत्वं मन्यमान आह। प्रयुक्तत्वमिति। कृत्स्नं चेति एतावत्युक्ते अवयवसाकल्यमपि कार्त्स्न्येन

अथ निवृत्ते सिद्धं चक्रेबन्धः चक्रबन्धः। हस्तेबन्धः हस्तबन्ध इति न सिध्यति। किं कारणम्। नेन्सिद्धबध्नातिषु
इति प्रतिषेधः प्राप्नोति। नैष दोषः। सर्वत्रैवोत्तरपदाधिकारे तत्पुरुषे कृति बहुलमिति प्राप्ते नेन्सिद्धबध्नातिषु
इति प्रतिषेध उच्यते तस्मिन्नित्ये प्राप्ते इयं विभाषा आरभ्यते। एवमपि न ज्ञायते कस्मिन्विषये विभाषा कस्मिन्विषये
प्रतिषेध इति। घञन्तस्येदं बन्धशब्दस्य ग्रहणं प्रतिषेधे पुनर्धातुग्रहणम्। तेन घञन्ते विभाषा अन्यत्र प्रतिषेधः॥
तत्पुरुषे॥ तत्पुरुषे कृति बहुलमकर्मधारये। तत्पुरुषे कृति बहुलमित्यत्राकर्मधारय इति वक्तव्यम्। इह माभूत्।
परमे कारके परमकारक इति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। बहुलवचनान्न भविष्यति। अथ किमर्थं लुगलुगनुक्र
मणं क्रियते न तत्पुरुषे कृति बहुलमित्येव सिद्धम्। लुगलुगनुक्रमणं बहुलवचनस्याकृत्स्नत्वात्। लुगलुगनुक्रमणं
क्रियते अकृत्स्नं बहुलवचनमिति। यद्यकृत्स्नं बहुलवचनं यदनेन कृतं मकृतं तत्। एवं तर्हि न ब्रूमो ऽकृत्स्नमिति।
कृत्स्नं च कारकं च साधकं च निर्वर्तकं च यदनेन कृतं सुकृतं तत्। किमर्थं तर्हि लुगलुगनुक्रमणं क्रियते। उदाहरणभूय
स्त्वात्। तैस्तैः खल्वपि विधयः सुपरिगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्च। केवलं लक्षणं केवलः प्रपञ्चो वा न तथा कारकं भवति।

ष्यत इत्याह। कारकं चेति। कृत्स्नकारित्वात्कृत्स्नमित्यर्थः। कारकमपि प्रारब्धस्यान्तागमनात्प्रतिबन्धसद्भावादकृत्स्नं स्यादि
त्याह। साधकं चेति। साधकमपि कदाचित्सामर्थ्यादकृत्स्नं स्यादित्याह। निर्वर्तकं चेति। सर्वदा सर्वं कार्यं निष्पादयतीत्यर्थः। उ
दाहरणभूयस्त्वादिति। भूयांस्युदाहरणानि प्रपञ्चेन ज्ञायन्त इत्यर्थः। लक्षणमिति। सामान्यलक्षणं बहुलग्रहणादियुक्तम्। वि
षयविभागस्याप्रतिपादकत्वान्न तथा कारकम्। प्रपञ्चो व्याप्त्यप्रसङ्गान्न कारक इति मध्यमावस्थाश्रीयत इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवश्यंखल्विति।प्रातिशाख्यसद्भावेपिसर्ववेदसाधारणेनानेनशब्दानांप्रतिपादनंक्रियतेतच्चप्रतिपदपाठस्याशक्यत्वाद्बहुलादिग्रहणेनकर्तव्यमित्यर्थः।सर्ववेदपारिषदमिति।अध्येतृसंघः परिषत्।तत्रभवंपारिषदम्।सर्ववेदानांपारिषदमितिषष्ठीसमासः।नैकइति।वेदेषुवैचित्र्येणव्यवहारात्तदङ्गव्याकरणेपितथैवबहुलादिशब्देनव्यवहारः।तेनैतन्नचोदनीयम्।वाग्रहणमेवक्रियतांव्यवस्थितविभाषावाश्रीयतांकिंबहुलग्रहणेनेति।षष्ठ्या आ॥पश्यतोहर इति।षष्ठीचानादर इतिषष्ठीपश्यन्तमनादृत्यहरती

अवश्यंखल्वप्यस्माभिरिदंवक्तव्यंबहुलमन्यतरस्यामुभयथैकेषामिति।सर्ववेदपारिषदंहीदंशास्त्रंतत्रनैकः पन्थाःशक्यआस्थातुम्॥षष्ठ्याआक्रोशे॥षष्ठीप्रकरणेवाग्दिक्पश्यद्भ्योयुक्तिदण्डहरेषूपसंख्यानंकर्तव्यम्।वाचोयुक्तिः।दिशोदण्डः।पश्यतोहरः।आमुष्यायणामुष्यपुत्रिका।आमुष्यायणामुष्यपुत्रिकेत्युपसंख्यानंकर्तव्यम्।आमुष्यायणः।अमुष्यपुत्रिका।अमुष्यकुलिकेतिचैववक्तव्यम्।अमुष्यकुलिका।देवानांप्रियइतिचैउपसंख्यानंकर्तव्यम्।देवानांप्रियः।शेपपुच्छलाङ्गूलेषुशुनःसंज्ञायामुपसंख्यानम्।शेपपुच्छलाङ्गूलेषुशुनःसंज्ञायामुपसंख्यानंकर्तव्यम्।शुनःशेपः।शुनःपुच्छः।शुनोलाङ्गूलः।दिवश्चदासेउपसंख्यानंकर्तव्यम्।दिवोदासायगायते॥ऋतोविद्यायोनि॥विद्यायोनिसंबन्धेभ्यस्तत्पूर्वपदोत्तरपदग्रहणम्।विद्यायोनिसंबन्धेभ्यस्तत्पूर्वपदोत्तरपदग्रहणंकर्तव्यम्।विद्यासंबन्धेभ्योविद्यासंबन्धेषुयथास्यात्।योनिसंबन्धेभ्योयोनिसंबन्धेषुयथास्यात्।व्यतिकरोमाभूत्।अथैषांव्यतिरेकेनभवितव्यम्।बाढंभवितव्यम्।होतुःपुत्रः।पितुरन्तेवासी॥आन॥क्वायंनकारःश्रूयते।नक्वचिच्छ्रूयते।लोपोऽस्यभवतिनलोपःप्रातिपदिकान्तस्येति।यदिनक्वचिच्छ्रूयतेकिमर्थमुच्चार्यते।रपरत्वंमाभूदिति।क्रियमाणेपिवैनकारेरपरत्वंप्राप्नोति।किंकारणम्।नलोपेकृतेएषोऽपिहिउःस्थानेअण्शिष्यते।नैषदोषः।उःस्थानेअण्प्रसज्यमानएवरपरोभवतीत्युच्यतेनचायमुःस्थानेअणेवशिष्यते।किंतर्हिअण्चानण्च।कथंपुनरिदंविज्ञायतेकिमृकारान्तानांयोद्वन्द्वइतिआहोस्विद्द्वन्द्वऋकारान्तस्येति ॥

त्यर्थः।शुनःशेपइति।ऋषिविशेषसंज्ञेयमकारान्ताप्यस्तिशेपशब्दोनकेवलंसकारान्तःशुनइवशेपोस्येतिबहुव्रीहिः॥ऋतो॥तत्पूर्वपदोत्तरपदग्रहणमिति।अन्यनिवृत्तिपरत्वादस्यव्यतिकरेपिकार्यप्रवृत्तिः।आनङ्॥क्वायमिति।क्वापीत्यर्थः।श्रवणार्थोवावर्णानामुपदेशइतिमत्वाप्रश्नः।क्रियमाणेपीति।उःस्थानेयःकृतोण्सरपरइतिसूत्रार्थंमन्यते।इतरःस्थानग्रहणद्वयानुवृत्त्याश्रयेणाह।नैषदोषइति।पुत्रेपीति।अनाक्रोशेपिभ्रातुःपुत्रादावित्यभिप्रायः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संबन्धमिति। आक्रोशग्रहणेन संबन्धात् संबन्ध्यन्तरेण पुत्रशब्दो न संबध्यते तन्निवृत्तौ तु संबध्यत इत्यर्थः॥ देवता॥ उभयत्रेति। पूर्वपदत्वे उत्तरपदत्वे चेत्यर्थः। लोकवेदयोरिति। साहचर्येण यौ लोकवेदयोः प्रसिद्धौ द्वन्द्वसमासवाच्यौ तत्रानङित्यर्थः। सहनिर्वापः। सहदानम्॥ मातर॥ पूर्वोत्तरपदयोरिति। सप्तम्यन्तमेतत् तत्र मातरपितरावित्यत्र पूर्वपदस्यारशब्दोऽन्तादेशो निपात्यते उत्तरपदस्य तु ऋतो

कश्चात्र विशेषः। ऋकारान्तानां द्वन्द्वे पुत्र उपसंख्यानम्। ऋकारान्तानां द्वन्द्वे पुत्र उपसंख्यानं कर्तव्यम्। पितापुत्रौ। कार्यी चानिर्दिष्टः। कार्यी चानिर्दिष्टो भवति। ऋकारान्तानां द्वन्द्वे न ज्ञायते कस्यानङा भवितव्यमिति। अस्तु तर्हि द्वन्द्वे ऋकारान्तस्येति। अविशेषेण पितृपितामहादिषु अतिप्रसङ्गः। अविशेषेण पितृपितामहादिष्वतिप्रसङ्गो भवति। पितृपितामहाविति। अस्तु तर्हि ऋकारान्तानां यो द्वन्द्व इति। ननु चोक्तम् ऋकारान्तानां द्वन्द्वे पुत्र उपसंख्यानमिति। नैष दोषः। पुत्रग्रहणमपि प्रकृतमनुवर्तते। क्व प्रकृतम्। पुत्रेऽन्यतरस्यामिति। यदि तदनुवर्तते विभाषा स्वसृपत्योः पुत्रे वेति पुत्रेऽपि विभाषा प्राप्नोति। नैष दोषः। संबन्धमनुवर्तिष्यते। षष्ठ्या आक्रोशे पुत्रेऽन्यतरस्याम्। षष्ठ्या आक्रोशे। ऋतो विद्यायोनिसंबन्धेभ्यः। पुत्रेऽन्यतरस्याम्। षष्ठ्या आक्रोशे। विभाषा स्वसृपत्योः। पुत्रेऽन्यतरस्याम्। षष्ठ्या आक्रोशे। आनङ् ऋतो द्वन्द्वे। पुत्रग्रहणमनुवर्तते। षष्ठ्या आक्रोश इति निवृत्तम्। यदप्युच्यते कार्यी चानिर्दिष्ट इति। कार्यी च निर्दिष्टः। कथम्। उत्तरपद इति वर्तते। ङिच्चायं क्रियते। सोऽन्तरेणापि कार्यिनिर्देशम् ऋकारान्तस्यैव भविष्यति। पुत्रे तर्हि कार्यी अनिर्दिष्टः। पुत्रे च कार्यी निर्दिष्टः। कथम्। ऋकारग्रहणमपि प्रकृतमनुवर्तते। क्व प्रकृतम्। ऋतो विद्यायोनिसंबन्धेभ्य इति। तद्वै पञ्चमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। पुत्र इत्येषा सप्तमी ऋत इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति। तस्मिन्निति निर्दिष्टे पूर्वस्येति॥ देवता॥ देवताद्वन्द्वे उभयत्र वायोः प्रतिषेधः। देवताद्वन्द्वे उभयत्र वायोः प्रतिषेधो वक्तव्यः। अग्निवायू। वाय्वग्नी। ब्रह्मप्रजापत्यादीनां च। ब्रह्मप्रजापत्यादीनां च प्रतिषेधो वक्तव्यः। ब्रह्मप्रजापती। शिववैश्रवणौ। स्कन्दविशाखौ। स तर्हि वक्तव्यः। न वक्तव्यः। द्वन्द्व इति वर्तमाने पुनर्द्वन्द्वग्रहणस्यैतत्प्रयोजनम्। लोकवेदयोर्यो द्वन्द्वः तत्र यथा स्यात्। कश्च लोकवेदयोर्द्वन्द्वः। वेदे ये सहनिर्वापनिर्दिष्टाः। न चैते वेदे सहनिर्वापनिर्दिष्टाः॥ इद्वृद्धौ॥ इद्वृद्धौ विष्णोः प्रतिषेधः। इद्वृद्धौ विष्णोः प्रतिषेधो वक्तव्यः। आग्नावैष्णवं चरुं निर्वपेत्॥ मातरपितरावुदीचाम्॥ पितरामातरा च च्छन्दसि॥ किं निपात्यते। पूर्वोत्तरपदयोः ऋकारस्यारारौ निपात्येते॥ मातरपितरौ भोजय। मातरपितरावानय। आ मा गन्तां पितरामातरा चामा सोमो अमृतत्वाय गम्यात्॥ इति श्री० षष्ठाध्यायस्य तृ० पा० प्रथममा०

ङि सर्वनामस्थानयोरिति गुणो रपरत्वं च। पितरामातरेत्यत्र पूर्वपदस्यारा शब्दोऽन्तस्य निपात्यते समासात् तु परस्य प्रथमाद्विवचनस्य सुपां सुलुगित्याकारः पूर्ववद् गुणरपरत्वे॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठाध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रियाः पुंवत्॥ कथमिदमिति। भाषितः पुमान्यस्मिन्नर्थे प्रवृत्तिनिमित्तलक्षणे स भाषितपुंस्क इति प्रवृत्तिनिमित्तस्यान्यपदार्थतामुपगतेतद्योगाच्च शब्दस्यापि भाषितपुंस्कत्वविज्ञाने समानायामाकृताविस्यर्थो लभ्यते। प्रत्यासत्त्याच यस्य शब्दस्य पुंवद्भावो विधीयते तेनैव पुमान् भाषित इति गृह्यते। भाषितपुंस्कग्रहणसामर्थ्याच्च। शब्दान्तरेण सर्वस्यार्थस्य भाषितपुंस्कत्वादन्ततोऽर्थशब्देनापीति व्यवच्छेद्याभावादनर्थकं भाषितपुंस्कग्रहणं स्यात्। यदा तु भाषितः पुमान् येन शब्देन स भाषितपुंस्क इति शब्दोऽन्यपदार्थ आश्रीयते तदा समानायामाकृताविस्यस्य विशेषस्य नास्ति लाभः। गर्भिभार्य इति। स्त्रियां वर्तमानस्य गर्भिशब्दस्यावयवभूतगर्भसंबन्धः प्रवृत्तिनिमित्तम्। गर्भो व्रीहिरित्यादौ तु पुंसि वर्तमानस्यावयवभूतगर्भसंबन्ध इति समानाकृतित्वाभावः। प्रसूतप्र

स्त्रियाः॥ भाषितपुंस्कादिति कथमिदं विज्ञायते समानायामाकृतौ यद्भाषितपुंस्कमाहोस्वित् क्वचिद्यद्भाषितपुंस्कमिति। किं चातः। यदि विज्ञायते समानायामाकृतौ यद्भाषितपुंस्कमिति। गर्भिभार्यः। प्रसूतभार्यः। प्रजातभार्यः। अत्र न प्राप्नोति। अथ विज्ञायते क्वचिद्यद्भाषितपुंस्कमिति। द्रोणीभार्यः। कुटीभार्यः। पात्रीभार्यः। अत्रापि प्राप्नोति। अस्तु तर्हि समानायामाकृतौ यद्भाषितपुंस्कमिति। कथं गर्भिभार्यः। प्रसूतभार्यः। प्रजातभार्य इति। कर्तव्योऽत्र यत्नः। अथ किमर्थमूङः पृथक्प्रतिषेध उच्यते न यत्रैवान्यः प्रतिषेधः तत्रैवायमप्युच्येत नकोपधाया इत्युक्तात ऊङश्चेत्येवोच्येत। तत्रायमप्यर्थः। द्विः प्रतिषेधो न वक्तव्यो भवति। नैवं शक्यम्। पठिष्यति ह्याचार्यः पुंवत्कर्मधारये प्रतिषेधार्थमिति। स पुंवद्भावो यथेह भवति। कारिकावृन्दारिका कारकवृन्दारिका। एवमिहापि स्यात्। ब्रह्मबन्धूवृन्दारिका ब्रह्मबन्धूवृन्दारिकेति। अथ पृथक्प्रतिषेधे पुनरुच्यमाने यस्मादेव स प्रतिषिद्धार्थ आरम्भः कस्मादेवात्र न भवति।

जातशब्दो स्त्रियां वर्तमानो गर्भविमोचनं प्रवृत्तिनिमित्तमाश्रयतः। पुंसि तु गर्भाधानमिति समानाकृतित्वाभावः। द्रोणीभार्य इति। द्रोणशब्दः परिमाणवृत्तिर्भाषितपुंस्कः स एव च सादृश्यनिबन्धनप्रत्यभिज्ञानवशात्तत्त्वनिबन्धनप्रत्यभिज्ञानवशाद्वाऽभेदेनावसीयमानो गवादन्यां वर्तत इति नास्ति समानाकृतित्वमेवं कुटशब्दो घटे भाषितपुंस्को गेहे स्त्रीलिङ्गः। पात्रशब्दोऽर्घ्यादिस्वभाषितपुंस्को भाजनविशेषे स्त्रीलिङ्गः। कर्तव्योऽत्र यत्न इति। गर्भिशब्दस्य गर्भसंबन्धः प्रवृत्तिनिमित्तं पुंसि स्त्रियां च समानमवान्तरभेदस्त्वविवक्षितः। प्रसूतप्रजातशब्दयोरपत्यापत्यवत्संबन्धः समानं प्रवृत्तिनिमित्तमस्तीति दोषाभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथगिति। पृथक्प्रतिषेधः प्रतिषेधान्तरं द्वैलक्षण्यं सूचयतीत्यर्थः। अथवा नायमिति। सत्यामेवानुवृत्तौ पर्युदास आश्रीयते न प्र
सज्यप्रतिषेध इति पूर्वस्मात्पक्षाद् स्य पक्षस्य भेदः। भाष्यकारेणात्रानूङ्ग्रहस्यैवोत्तरत्रानुवृत्तिर्दर्शिता नत्वपूरणीप्रियादिषि
त्यस्य। तेन सह्यानवसी महाह्लादशीत्यादावपि पुंवद्भावो भवति। किं पुनरिति। यदा स्त्रीग्रहणं स्वर्यते तदा स्वरितेनाधिकारगतिर्भ
वतीति स्त्र्यधिकारविहितटाबादिग्रहणं भवति तेन भाषितपुंस्कात्परस्यानूङः स्त्रीप्रत्ययस्य पुंवद्भवतीति सूत्रार्थः संपद्यते।
यदा तु स्त्र्यर्थवाची शब्दः स्त्रीशब्देनोच्यते तदा शब्दग्रहणं भवति। यदा तु स्त्रीत्वयुक्तं वस्तु स्त्रीशब्देनोच्यते तदार्थग्रहणं भवति। त

पृथक्प्रतिषेधवचनसामर्थ्यात्। अथवा अनूङिति तत्रानुवर्तिष्यते। अथवा नायं प्रसज्यप्रतिषेधः। किं तर्हि पर्युदा
सोऽयं यदन्यदूङ इति। स च प्रतिषेधार्थ आरम्भः। किं पुनरिदं पुंवद्भावे स्त्रीग्रहणं स्त्रीप्रत्ययग्रहणमुत स्त्रीशब्दस्य ग्र
हणमाहोस्वित् स्त्र्यर्थस्य ग्रहणम्। कश्चात्र विशेषः। पुंवद्भावे स्त्रीग्रहणं स्त्रीप्रत्ययग्रहणं चेत् तत्र पुंवदित्युत्तरपदे त
त्प्रतिषेधविज्ञानम्। पुंवद्भावे स्त्रीग्रहणं स्त्रीप्रत्ययग्रहणं चेत् तत्र पुंवदित्युत्तरपदे तत्प्रतिषेधोऽयं विज्ञायेत। क
स्य। स्त्रीप्रत्ययस्य। किमुच्यते स्त्रीप्रत्ययस्य प्रतिषेध इति न पुनरन्यदपि किंचित् पुंसः प्रतिपदं कार्यमुच्यते यत्समा
नाधिकरण उत्तरपदे भाषितपुंस्कस्यातिदिश्येत। तत्र च अनारम्भात् पुंसि। न किंचित् पुंसः प्रतिपदं कार्यमुच्य
ते यत्समानाधिकरणे उत्तरपदे भाषितपुंस्कस्यातिदिश्येत। तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः स्त्रीप्रत्ययप्रति
षेधात्। कथं पुनः पुंवदित्यनेन स्त्रीप्रत्ययस्य प्रतिषेधः शक्यो विज्ञातुम्। वति निर्देशोऽयम्। कामचारश्च वतिनिर्दे
शे वाक्यशेषं समर्थयितुम्। तद्यथा। उशीनरवन्मद्रेषु यवाः सन्ति न सन्तीति। मातृवदस्याः कलाः सन्ति न सन्तीति।
एवमिहापि पुंवन्न भवतीत्येवं वाक्यशेषं समर्थयिष्यामहे। यथा पुंसः स्त्रीप्रत्ययो न भवति एवं समानाधिक
रणे उत्तरपदे भाषितपुंस्कस्यापि न संभवतीति। प्रातिपदिकस्य च प्रत्यापत्तिः ॥

त्रार्थग्रहणे स्त्रीशब्दो मुख्यः अर्थस्य तूत्तरपदेन पौर्वापर्यानुपपत्तिः। शब्दग्रहणे तु स्त्रीशब्दो गौणः उत्तरपदेन तु शब्दस्य पौर्वाप
र्योपपत्तिः। कथं पुनरिति। पुंवदित्यनेन प्रतिषेधो न प्रत्याप्यत इति मत्वा प्रश्नः। वतिनिर्देशोऽयमिति। उपमानोपमेयभावविव
क्षायां वतिस्तत्रोपमाने सत्ता सत्ता वा प्रसिद्धोपमेये प्रतिपाद्यत इति यथासंभवं वाक्यशेषपरिकल्पने कामचार इत्यर्थः। पुंसि च स्त्री
प्रत्ययस्याभावात् स्त्रियामभावोऽतिदिश्यत इति न भवतीति वाक्यशेषः कल्प्यते। अस्मिन्पक्षे यदुक्तं तदाह। प्रातिपदिकस्य
चेति। चशब्दो वक्ष्यमाणापेक्षः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. कै. ६१ एनीभार्येति। एतशब्दाद्वर्णादनुदात्तात्तोपधात्तो नइति ङीप्रकारस्य च नकारस्तत्रैकदेशविकृतमनन्यवदिति भाषितपुंस्कादेतश ६. ३. २
ब्दात्परईकार इति तन्निवृत्तावर्थस्यानिवृत्तत्वान्नकारश्रवणप्रसङ्गः। ननु च सन्नियोगशिष्टत्वादीकारनिवृत्तौ नकारस्यापि निवृ
त्तिर्भविष्यति। एवं तर्हि स्थानिवद्भावात्पुनर्नकारस्योन्मज्जनं मन्यते उत्तरपदनिमित्तत्वाच्च स्त्रीप्रत्ययनिवृत्तेः स्थानिवद्भा
वः। स्थानिवद्भावोऽपि चोदितः स्यादिति। ननु च प्रातिपदिकस्य च प्रत्यापत्तिरिति परिहारः स्थानिवत्प्रसङ्गश्चेति तु चोद्यं तत्रैवं व
क्तव्यं स्थानिवद्भावोऽपि परिहृतः स्यादिति। नैष दोषः। अयं हि भाष्यार्थो यथा दोषसद्भावात् प्रत्यापत्तिवचनं परिहारस्तथा स्थानिव

प्रातिपदिकस्य च प्रत्यापत्तिर्वक्तव्या। एनी भार्या अस्य एतभार्यः। श्येनी भार्या अस्य श्येतभार्यः। पुंवद्भावेन किं
क्रियते। स्त्रीप्रत्ययस्य निवृत्तिः। अर्थो निवृत्तः स्त्रीत्वम्। तस्यानिवृत्तत्वात्केन न शब्दो न श्रूयेत। स्त्रियामित्यु
च्यमानः प्राप्नोति। स्थानिवत्प्रसङ्गश्च। स्थानिवद्भावश्च प्राप्नोति। पट्वी भार्या अस्य पटुभार्यः। पुंवद्भावेन किं क्रि
यते। स्त्रीप्रत्ययस्य निवृत्तिः। तस्य स्थानिवद्भावाद्गुणादेशः प्राप्नोति। किमर्थमिदमुभयमुच्यते। न प्रातिपदि
कस्य प्रत्यापत्तिरित्येव स्थानिवद्भावोऽपि चोदितः स्यात्। पुरस्तादिदमाचार्येण दृष्टं स्थानिवत्प्रसङ्गश्चेति त
त्पठितम्। तत उत्तरकालमिदं दृष्टं प्रातिपदिकस्य प्रत्यापत्तिरिति। तदपि पठितम्। न चेदानीमाचार्याः सू
त्राणि कृत्वा निवर्तयन्ति। वतण्ड्यादिषु पुंवद्वचनम्। वतण्ड्यादिषु पुंवद्भावो वक्तव्यः। के पुनर्वतण्ड्यादयः॥

द्भावोऽपि चोदितः परिहृतश्च भवति। पुरस्तादिदमिति। यद्यपि पश्चात्पठितं तथापि पाठक्रमो बलवानिति पूर्वं दृष्टमित्युच्यते
पूर्वं चोद्यदर्शनं पश्चात्समाधानमिति न्यायात्। तत्पठितमिति। पुरस्तादपि दृष्टं पश्चात्पठितमित्यर्थः। प्रत्यापत्तिवचनमेव
व्याप्यमुपगम्य तां स्थानिवत्प्रसङ्गश्चेत्येतत्तु परित्यज्यतामित्याशंक्याह। न चेदानीमिति। सूत्रव्याख्यानार्थत्वाद्वाक्यानां वि
स्पष्टार्थमुभयोरुपादानमित्यर्थः। तत्रैतभार्ये यद्यपि स्थानिवद्भावाश्रयो दोषस्तथापि सन्नियोगशिष्टत्वात् संभावितनिवृ
त्तेर्नकारस्य स्थानिवद्भावाश्रयं पुनरुपस्थानं न तत्रोकारेण नकारस्य निमित्तमीकारनकारयोः सह विधानाद्गुणादेशस्य तु नि ए स: ६१
मित्तमीकार इत्येतावता भेदेनैतभार्यश्येतभार्ययोः पृथगुपन्यासः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लुगलुगिति। लुगलुकोर्यथायोगमिष्यमाणेन सिध्यत इति पुंस्त्वलक्षणार्थोतिदेशः कर्तव्य इत्यर्थः। यदि पुनरिति। लुक् स्त्रियामि
त्यनेन चेदीकारे परतो लुग्विधीयते तदेकारे पुंवद्भावेन निवर्त्तिते यकारनिवृत्तौ कर्त्तव्यायां स्थानिवत्त्वप्रसङ्गश्चेति स्थानिवद्भा
वे प्रतिषिद्धे वातण्ड्यवृन्दारिकेति सिध्यतीति भावः। स्त्रीई इति। स्त्रियां य ईकारस्तस्मिन् परत इत्यर्थः। एकादेशस्य पूर्वान्तव
द्भावात् स्त्रियादिति यङादेशः। ईकारविधाविति। शार्ङ्गरवादिगणे वतण्डशब्दः कृतयञ्लुक् पठ्यते तत्स्मात्कृते लुकीका
रेनास्य कृते चेकारे लुको प्रसङ्ग इतीतरेतराश्रयदोषप्रसङ्गः। अन्तरङ्गत्वाच्चेति। उत्तरपदमनपेक्ष्य लुग्विधीयमानोऽन्तरङ्ग

लुगलुगस्त्रीविषयद्विस्त्रीप्रत्ययाः। लुक् गार्ग्यो वृन्दारिकाः। गर्गवृन्दारिकाः। पुंवद्भावेन किं क्रियते। स्त्रीप्र
त्ययस्य निवृत्तिः। अर्थोऽनिवृत्तः स्त्रीत्वं तस्यानिवृत्तत्वात् केन यशब्दो न श्रूयेत। अस्त्रियामिति हि लुगुच्यते।
लुक्। अलुक्। वतण्डी वृन्दारिका वातण्ड्यवृन्दारिका। पुंवद्भावेन किं क्रियते। स्त्रीप्रत्ययस्य निवृत्तिः। अर्थोऽनि
वृत्तः स्त्रीत्वं तस्यानिवृत्तत्वाल्लुक् स्त्रियां वतण्डाच्चेति यकारस्य लुक् प्राप्नोति। यदि पुनरयमीकार एव लुगुच्ये
त। तदीकारग्रहणं कर्त्तव्यम्। न कर्त्तव्यम्। क्रियते न्यास एव। प्रश्लिष्टनिर्देशोऽयम्। स्त्रीई स्त्री स्त्रियामिति। ईकार
विधाव प्रत्ययकस्य पाठः क्रियते वतण्डेति। शार्ङ्गरवादौ वै सप्रत्ययकस्य पाठः करिष्यते। स वै तत्र सप्रत्ययकस्य
पाठः कर्तव्यः। अन्तरङ्गत्वाच्च लुक् प्राप्नोति। अलुक्। अस्त्रीविषय। कौण्डीवृसी वृन्दारिका कौण्डीवृस्यवृन्दारि
का। पुंवद्भावेन किं क्रियते॥ स्त्रीप्रत्ययस्य निवृत्तिः॥ अर्थोऽनिवृत्तः स्त्रीत्वं तस्यानिवृत्तत्वात् केन यशब्दः श्रूयेत।
अस्त्रियामिति हि ञ्यो विधीयते। अस्त्रीविषय। द्विस्त्रीप्रत्यय। गार्ग्यायणी वृन्दारिका गार्ग्यवृन्दारिका इत्यत्र पुंव
द्भावो न प्राप्नोति। किं कारणम्। भाषितपुंस्कादनूङः समानाधिकरणे उत्तरपदे पुंवद्भावो भवतीत्युच्यते। यच्चा
त्र भाषितपुंस्कात् परं नैतदुत्तरपदे यच्चोत्तरपदे न तद्भाषितपुंस्कात् परमिति ॥

त्वात् प्रागेव स्त्रीप्रत्ययनिवृत्तेः प्राप्नोति। तत्रैतस्या निमित्ताभावाल्लुक् निवर्त्तिष्यत इति। एतच्च नास्ति। न ह्येषा परिभाषा सर्व
त्राश्रीयते ल्यानि स्वादौ निवृत्तावामपि प्रकृतौ प्रत्ययस्यानिवर्त्तनादसिद्धं बहिरङ्गमन्तरङ्ग इतीकारनिवृत्तेरसिद्धत्वाच्च।
कौण्डीवृस्यवृन्दारिकेति। स्त्रीत्वस्यानिवर्त्तनात् व्रातच्फञोरस्त्रियामिति ञ्यो न प्राप्नोति। गार्ग्यायणीति। ष्फस्योत्तरपदेनानन्त
र्याभावात् पुंवद्भावेन निवृत्तिर्न प्राप्नोति। ङीषस्तु भाषितपुंस्काद्विधानात् श्रवणप्रसङ्ग इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ सर्वप्रसङ्ग इति। यथाप्रत्ययपक्षे भाषितपुंस्कात्परः स्त्रीप्रत्यय इति शक्यते विशेषयितुं नैवं स्त्र्यर्थाभिधायी शब्दो भाषितपुं ६३२
९२ स्कात्पर इति शक्यते विशेषयितुम्। शुक्लचूडादौ पुंवद्भावस्याप्रसङ्गात्। नह्यत्र शुक्लाशब्दो भाषितपुंस्कात्परः। अङ्गारकाद्
ति। अङ्गारकशब्देन न कदाचित् स्त्रिया अभिधानं कालिकाशब्देन च पक्षिजातीतस्याः स्त्रिया एवाभिधानमिति। पुंवत्कर्मधा

अस्तु तर्हि स्त्रीशब्दग्रहणम्। स्त्रीशब्दस्य पुंशब्दातिदेश इति चेत् सर्वप्रसङ्गो विशेषात्। स्त्रीशब्दस्य पुंशब्दातिदेश इ
ति चेत् सर्वस्य स्त्रीशब्दस्य पुंशब्दातिदेशः प्राप्नोति। अस्यापि प्राप्नोति। अङ्गारका नाम शकुनयः। तेषां कालिकाः स्त्रि
यः। कालिकावृन्दारिकाः अङ्गारकवृन्दारिकाः प्राप्नुवन्ति। क्षेमवृद्धयः क्षत्रियाः। तेषां तनुकेश्यः स्त्रियः। तनुकेश्यो वृ
न्दारिकाः क्षेमवृद्धिवृन्दारिकाः प्राप्नुवन्ति। हंसस्य वरटा। कच्छपस्य डुली। ऋश्यस्य रोहित्। अश्वस्य वडवा। पुरुषस्य
योषित्। किं कारणम्। अविशेषात्। नहि कश्चित् विशेष उपादीयते एवंजातीयकस्य स्त्रीशब्दस्य पुंशब्दातिदेशो भव
तीति। अनुपादीयमाने हि विशेषे सर्वप्रसङ्गः। कथं च नाम नोपादीयेत। यावता भाषितपुंस्कादित्युच्यते। भाषितपुंस्का
नुपपत्तिस्त्वर्थे चायं चः पठितः सर्वो हि शब्दो भाषितपुंस्कात्परः शक्यः कर्तुम्। अस्तु तर्हि अर्थग्रहणम्। अर्थातिदेशे वि
प्रतिषेधानुपपत्तिः। अर्थातिदेशे विप्रतिषेधो नोपपद्यते। पठिष्यति ह्याचार्यो विप्रतिषेधं पुंवद्भावाद्ध्रस्वत्वं खिद्घादि
केष्विति स विप्रतिषेधो नोपपद्यते। किं कारणम्। द्विकार्ययोगो हि नाम विप्रतिषेधः। न चात्रैको द्विकार्ययुक्तः। शब्द
स्य ह्रस्वत्वमर्थस्य पुंवद्भावः। किं च सर्वप्रसङ्गोऽविशेषादिति सर्वस्य अर्थस्य पुंवदर्थः प्राप्नोति। अस्यापि प्राप्नोति।
अङ्गारका नाम शकुनयः तेषां कालिकाः स्त्रियः। कालिकावृन्दारिकाः अङ्गारकवृन्दारिकाः प्राप्नुवन्ति। क्षेमवृद्धयः
क्षत्रियाः। तेषां तनुकेश्यः स्त्रियः। तनुकेश्यो वृन्दारिकाः क्षेमवृद्धिवृन्दारिकाः प्राप्नुवन्ति। हंसस्य वरटा। कच्छपस्य डुली। ऋ
श्यस्य रोहित्। अश्वस्य वडवा। पुरुषस्य योषित्। किं कारणम्। अविशेषात्। नहि कश्चित् विशेष उपादीयते एवंजातीयक
स्यार्थस्य पुंवदर्थो भवतीति। अनुपादीयमाने हि विशेषे सर्वप्रसङ्गः। कथं नाम नोपादीयते यावता भाषितपुंस्कादित्युच्य
ते। भाषितपुंस्कानुपपत्तिश्च भवति। नह्यर्थेन पौर्वापर्यमस्ति ॥

रयेत्यनेनार्थत आनन्तर्यादङ्गारकशब्दादादेशप्रसङ्गः। शक्यन्ते हि कालिका अङ्गारकशब्देन साहचर्यादभिधातुमेवमन्यत्रापि योज्यम्। स
र्वो हि शब्द इति। एताः कालिकावृन्दारिका इति भवत्येतच्छब्दात् भाषितपुंस्कात्परः कालिकाशब्द इति पुंवत्प्रसङ्गः। अर्थातिदेश इति। रामः
स्त्र्यर्थस्य पुमर्थो भवतीत्यर्थेऽतिदिष्टे तद्वाची शब्दः प्रवर्तते। भिन्नविषयत्वात्तु विप्रतिषेधानुपपत्तिरन्योऽह्रस्वोऽर्थस्य पुंवद्भावः ॥ ९२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंवद्भावोऽभिनिर्वर्त्तमान इति। स्त्रीप्रत्ययस्य निवृत्तौ दीर्घान्तत्वाभावाद्ध्रस्वस्याप्रवृत्तिरित्यर्थः। ह्रस्वत्वमिति। ननु ह्रस्वे प्रवृत्ते प्यर्थस्या
निवृत्तत्वात्कथं पुंवद्भावो ह्रस्वेन बाध्यते। उच्यते। यद्धि कृतं ह्रस्वत्वं प्रयोगे श्रूयते एवं तत्कृतं भवति यद्धि तु कृतमपि पुंवद्भावेन
निवर्त्त्येत तदा ऽकृतमेव तत्स्यादिति परत्वात्प्रवर्त्तमानं ह्रस्वत्वं पुंवद्भावं बाधते। तस्मादस्त्विति। शब्दपरो सामासादुत्तरपदेन पोर्वा
पर्यसंभवात्। भाषितपुंस्कादनूङ् यस्मिन्निति। समुदायः समासार्थोऽवयवेन विग्रहः। निपातनादिति। नन्वलौकिकत्वाद
स्य कथं निपातनादिति परिहारः। लुकापि तर्ह्यलौकिकत्वान्न भाव्यम्। अपत्तुक्प्रसङ्गोऽध्यवसीयते ऽलुगप्यध्यवसीयतामि

ति

अयं तावद्दोषः। यदुच्यते अर्थातिदेशे विप्रतिषेधानुपपत्तिरिति। नावश्यं द्विकार्ययोग एव विप्रतिषेधः किं
तर्ह्यसंभवेपि। स चात्रास्त्यसंभवः। कोसावसंभवः। पुंवद्भावोऽभिर्वर्त्तमानो ह्रस्वत्वस्य निमित्तं विहन्ति। ह्रस्व
त्वमभिनिर्वर्त्तमानं पुंवद्भावं बाधते एषोऽसंभवः। सत्यसंभवे युक्तो विप्रतिषेधः। अयं तर्हि दोषः। सर्वप्रसङ्गोऽ
विशेषादिति। तस्मादस्तु स एव मध्यमः पक्षः। ननु चोक्तं स्त्रीशब्दस्य पुंशब्दातिदेश इति चेत्सर्वप्रसङ्गोऽविशे
षादिति। नैष दोषः। समासनिर्देशोऽयं भाषितपुंस्कादनूङ् यस्मिन्सोऽयं भाषितपुंस्कादनूङिति। यद्येवं लुक्प्रा
प्नोति। निपातनान्न भविष्यति। अथवा अलुक्प्रकृतः सोऽनुवर्त्तिष्यते। कथं पुनरनूङित्यनेन स्त्रीप्रत्ययस्य ग्रह
णं शक्यं विज्ञातुम्। नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः। नञ्युक्तं इवयुक्तं चान्यस्मिंस्तत्सदृशे का
र्यं विज्ञायते तथा ह्यर्थो गम्यते। तद्यथा अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृश आनीयते नासौ लोष्टमानीय कृती
भवति। एवमिहाप्यनूङित्युक्ते ऊङ्प्रतिषेधादन्यस्मिन्नूङ्सदृशे कार्यं विज्ञास्यते। किं चान्यत्। अनूङ् ऊङ्स
दृशं स्त्रीप्रत्यय इति। एवमपि दृडविडवृन्दारिका ऐडविडवृन्दारिका। पृथवृन्दारिका पार्थवृन्दारिका। उशिकृवृ
न्दारिका औशिजवृन्दारिका। दरदूवृन्दारिका दारदवृन्दारिका। अत्र पुंवद्भावो न प्राप्नोति ॥

त्यदोषः। अयमेवेति। ननु च परार्थत्वात्कथं लक्षणयोः संबन्धः। उच्यते अलुगधिकारसामर्थ्याल्लक्षणाङ्गमपि लक्षणं भवि
ष्यति संज्ञापरिभाषवत्। दृडविडिति। दृडविडोऽपत्यं पृथोऽपत्यं जनपदशब्दादित्यञ्। उशिग्दरद्भ्यां द्व्यञ्मगधेत्यण्। उ
भयोरतश्चेति स्त्रियां लुक् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्तव्योऽत्र यत्न इति। नेह टाबादीनामेव ग्रहणं किं तर्हि प्रत्ययमात्रस्य लुक् च स्यानिवद्भावात्प्रत्ययो भवत्येव। यदा तु भाषितपुंस्का दूङ् यस्मिन्नकृतः स भाषितपुंस्कादनूङिति प्रसज्यप्रतिषेध आश्रीयते तदा दोषस्याप्रसङ्ग एव। पट्वी मृदुभार्य इति। पट्वी श ब्दस्योत्तरपदेनानन्तर्याभावात्संबन्धाभावो मृद्वीशब्दस्यानन्तर्येन पुंवद्भावः। इतरो यथोक्तमप्रतिपद्याह। पुंवद्भावः कस्मा न्न भवतीति। भाषितपुंस्कादिति। एकदेशेन समस्तस्य सूत्रस्य लक्षितत्वात्तत्रोत्तरपदेनानन्तर्याभावात् पट्वीशब्दस्य पुंवद्भावाभावः। इतरस्तु भाषितपुंस्कत्वमत्र नास्तीत्यनेनोक्तमिति मत्वाह। ननु चेति। इतरः शिष्यबुद्धिपरीक्षार्थमाह। समानायामिति। आ कृत्यन्तर इति। पटुर्गुणो मृदुर्गुण इति गुणे भाषितपुंस्कौ भार्यादौ तु स्त्रीलिङ्गाविति भावः। आरभ्यत इति। ततश्च पाटवे मार्द

कर्त्तव्योऽत्र यत्नः। अथेह कथं भवितव्यं पट्वी मृद्वी भार्ये अस्य पट्वीमृदुभार्यः। आहोस्वित्पटुमृदुभार्यः। पट्वीमृ दुभार्य इति भवितव्यम्। पुंवद्भावः कस्मान्न भवति। भाषितपुंस्कादित्युच्यते। ननु च भोः पटुशब्दो मृदुशब्दश्च पुं सि भाष्येते। समानायामाकृतौ यद्भाषितपुंस्कम्। आकृत्यन्तरे चैतौ भाषितपुंस्कौ। समानायामाकृतावपि भाषि तपुंस्कौ। कथम्। आरभ्यते ऽत्र तु लोपः। एवं तर्हि भाषितपुंस्कादनूङः समानाधिकरण उत्तरपदे पुंवद्भवतीत्यु च्यते। यस्मात्र भाषितपुंस्कादनूङ् समानाधिकरण उत्तरपदे कृतस्तस्य पुंवद्भावः। यस्य चाकृतौ नासौ भाषितपुं स्कादनूङ् समानाधिकरण उत्तरपदे॥ पूरण्यां प्रधानपूरणीग्रहणम्। पूरण्यां प्रधानपूरणीग्रहणं कर्त्तव्यम्। प्रधानं या पूरणी तत्रेति वक्तव्यम्। इह मा भूत्। कल्याणी पञ्चमी अस्य पक्षस्य कल्याणपञ्चमीकः पक्ष इति। अथेह कथं भवितव्यम्। कल्याणी पञ्चमी आसां रात्रीणामिति कल्याणीपञ्चमा रात्रय इति भवितव्यम्। रा त्रयोऽत्र प्रधानम् ॥

वे च समानप्रवृत्तिनिमित्ते पटुमृदुशब्दौ पुंसि स्त्रियां च वर्त्तेते। इदानीमाचार्यः स्वाभिप्रायं प्रकाशयति। एवं तर्हीति। कल्याणप ञ्चमीक इति। पक्षेऽन्यपदार्थे ऽवयवानामत्यन्ततिरोधानान्नास्ति पूरण्याः प्राधान्यं अप्पूरणीप्रमाण्योरिति समासान्तोऽपि प्रधानपू रण्या एव विहित इत्यत्र न भवतीति नद्युतश्चेति कप् भवति। इतरस्तु सर्वत्र बहुव्रीहौ वृत्तिपदार्थस्याप्राधान्यं मत्वा पृच्छति। अथेह क थमिति। रात्रयोऽत्रेति। उद्भूतावयवा रात्रयोऽत्र प्रधानं तत्र यथैव प्रथमादा रात्रयः समासाभिधेया एवं पञ्चम्यपीति वृत्तिपदा र्थस्यान्यपदार्थे तु प्रवेशात् प्राधान्यमित्यर्थः। प्रधाने कार्यसंप्रत्ययात् प्रधानपूरणीग्रहणमित्याहुः ॥ राम: ६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तसिला॥ पटुकल्पेत्यपपाठः। घरूपकल्पेतिपरत्वात् ह्रस्वस्य भावात्। तस्माद्दर्शनीयकल्पेति पाठः। वृकतिरिति। लिङ्ग-विशिष्ट परिभाषया वृकीशब्दात् वृकज्येष्ठाभ्यामिति तिल्प्रत्ययः। परिगणनसामर्थ्याच्च जातेश्चेति पुंवद्भावप्रतिषेधाभावः। अजथ्येति। पूर्ववदजाशब्दादजाविभ्यां थ्यन्निति थ्यन् प्रत्ययः। हास्तिकमिति। यद्यत्र पुंवद्भावो न स्यात् तदा हस्तिनीशब्दस्य यस्येति चेति लोपे कृते तस्य स्थानिवत्त्वादसिद्धवदत्राभादित्यसिद्धत्वाच्च नस्तद्धित इति टिलोपो न स्यादिति पुंवद्भावो वि

तसिला॥ इह केचित् तसिलादयः आकृत्वसुचः पठ्यन्ते येषु पुंवद्भावो नेष्यते। केचिच्चान्यत्र पठन्ति। येषु पुंवद्भावदृष्यते। तत्र किं न्याय्यम्। परिगणनं कर्तव्यम्। तसिलादीन्त्र तसौ। त्र तसौ तसिलादौ दृष्टव्यौ। तस्यां शालायां वसति। तत्र वसति। तस्याः ततः। यस्याः यतः। तरप्तमपौ। तरप्तमपौ तसिलादौ दृष्टव्यौ। दर्शनीयतरा। दर्शनीयतमा। चरट्जातीयरौ। चरट्जातीयरौ तसिलादौ दृष्टव्यौ। पटुचरी। पटुजातीया। कल्पब्देशीयरौ तसिलादौ दृष्टव्यौ। दर्शनीयकल्पा। दर्शनीयदेशीया। रूपप् पाशपौ रूपप्पाशपौ तसिलादौ दृष्टव्यौ दर्शनीयरूपा। दर्शनीयपाशा। थम्थालौ तसिलादौ दृष्टव्यौ। कया प्रकृत्या कथम्। यया प्रकृत्या यथा। दार्हिलौ दार्हिलौ तसिलादौ दृष्टव्यौ। तस्यां वेलायां तदा। तस्यां वेलायां तर्हि। तिल्थ्यनौ। तिल्थ्यनौ तसिलादौ दृष्टव्यौ। वृकी। वृकतिः। अजथ्या यूथिः। शस्विबह्वल्पार्थस्य। बह्वल्पार्थस्य शसि पुंवद्भावो वक्तव्यः। बह्वीभ्यो देहि बहुशो देहि। अल्पशो देहि। त्वतलोर्गुणवचनस्य। त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः। पट्वीभावः पटुत्वम्। मृद्वीभावः मृदुत्वम्। पटुता। मृदुता। गुणवचनस्येति किमर्थम्। कठीभावः कठीत्वम्। कठीता। भस्याढे तद्धिते पुंवद्भावो वक्तव्यः। हस्तिनीनां समूहो हास्तिकम्। अढ इति किमर्थम्। श्यैनेयो रौहिणेयः। यद्य ढ इत्युच्यते। अग्नायी देवता अस्य स्थालीपाकस्य आग्नेयः स्थालीपाकः। अत्र न प्राप्नोति। इह च प्राप्नोति। कौण्डिन्यः। सापत्न इति॥

धीयते। ठक्छसोश्चेत्यनेनात्र पुंवद्भावो न भवति. कंसास्त्रहचरितस्य ठको ग्रहणात्। श्यैनेय इति। श्येतरोहिताभ्यां वर्णादिति ङीप्नकारौ। पुंवद्भावे श्येतेयो रौहितेय इति स्यात्। अग्नायीति। अग्नेर्ढगिति वा सर्वत्राग्निकलिभ्यां ढग्वक्तव्य इति ढक्। वत्र पुंवद्भावप्रतिषेधादाग्नायेय इति प्राप्नोति। कौण्डिन्य इति। कुण्डिन्या अपत्यं गर्गादित्वाद्यञ्। तत्र पुंवद्भावे सति कौण्ड्य इति प्राप्नोति। सपत्नीशब्दादणि सापत इति प्राप्नोति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदिपुनररिति। अढइत्यपनीयानपत्यइतिउच्यमानेआग्नेयइत्यनपत्यत्वात्सिध्यति। श्यैतेय रौहिणेयकौण्डिन्यसा पत्नाश्चापत्यप्रत्ययान्तत्वात्सिध्यन्ति। गार्ग्यायण्यादिति। गोत्रस्त्रियाःकुत्सनेणचेतिणेऽपत्यप्रत्ययेपुंवद्भावोनप्राप्नोति। सपत्न शब्दइति। व्यस्तपत्नइतिनिर्देशोऽत्रलिङ्गं तस्मादेवशार्ङ्गरवादिषुदृष्टानुङ्गोनिकृतेसपत्न्याअपत्यमितिशिवाद्य णिपुंवद्भावेसापत्नःसिध्यति। कर्त्तव्योऽत्रेति। स्त्रियांयोढोविहितःस्त्रीभ्योढगित्यनेनतत्रपुंवद्भावप्रतिषेधोनत्वग्नेर्ढगित्य स्मिन्नितिव्याख्येयम्। ठक्छसोरिति। छसःसित्वात्तत्रसितिचेतिपदसंज्ञाविधानाद्भत्वाभावादिचनम्। तान्तादितिका

यदिपुनरनपत्यइत्युच्यते। नैवंशक्यम्। इहहिनस्यात्। गार्ग्यायण्याअपत्यंमाणवकः। गार्गीजाल्मः। अस्तुत र्हिअढइत्येव। कथं कौण्डिन्यःसापत्नइति। कौण्डिन्येनिपातनात्सिद्धम्। किंनिपातनम्। आगस्त्यकौण्डिन्य योरिति। सापत्नःप्रकृत्यन्तरत्वात्। सपत्नशब्दःप्रकृत्यन्तरमस्ति। कथमग्नायीदेवताअस्यस्थालीपाकस्य आग्नेयःस्थालीपाकइति। अस्तुतर्ह्यनपत्यइत्येव। कथंगार्गीजाल्मः। गार्गीत्वेयोनसंवदेते। कर्त्तव्योऽत्रयत्नः। ठक्छसोश्च। ठक्छसोश्चपुंवद्भावोवक्तव्यः। भवत्याःछात्राः भावत्काः भवदीयाः। ठक्ग्रहणंकिमर्थम्। नइके कृतेअजादावित्येवसिद्धम्। नैवंशक्यम्। अजादिलक्षणेहिमाथितिकादिवत्प्रसज्येत। अजादिलक्षणेहिमाथि तिकादिवत्प्रसज्येत। तद्यथा। मथितंपण्यमस्यमाथितिकइत्यकारलोपेकृतेतान्तादितिकादेशोनभवति। एवमिहापिनस्यात्॥ तसिलादि॥ क्यङ्मा॥ मानिन्ग्रहणंकिमर्थम्। मानिन्ग्रहणमस्त्र्यर्थमसमानाधिक रणार्थंच। मानिन्ग्रहणंक्रियते। अस्त्र्यर्थमसमानाधिकरणार्थंच। अस्त्र्यर्थंतावत्। दर्शनीयांमन्यतेदेवदत्तो यज्ञदत्तांदर्शनीयमानीअयमस्याः। असमानाधिकरणार्थम्। दर्शनीयांमन्यतेदेवदत्तांयज्ञदत्तादर्शनीयमा निनीइयमस्याः॥ नकोपधायाः॥ किमिदमेवमाद्यनुक्रमणंआद्यस्ययोगस्यविषये। आहोस्वित्पुंवद्भावमा त्रस्य। किंचातः। यद्याद्यस्ययोगस्यविषये ॥

देशोनभवतीति। ठस्येतिवर्णमात्रस्यस्थानित्वेऽल्विधित्वात्स्थानिवत्त्वाभावात्। संघातस्यतुस्थानित्वेसंनिपातपरिभाषोपस्थाना त्॥ क्यङ्मा॥ मानिन्ग्रहणमिति। स्त्रीलिङ्गेसमानाधिकरणेउत्तरपदेपूर्वेणसिद्धत्वाद्यथादर्शनीयामात्मानंमन्यतेदर्शनीय मानिनीदेवदत्तेति। अत्रह्येकस्याएवकर्मत्वात्कर्त्रीत्वाच्चास्तिसामानाधिकरण्यम्॥ नकोप॥ आद्यस्येति। पाणिनिपठितसूत्र त्रयस्येत्यर्थः। पुंवद्भावमात्रस्येति। औपसंख्यानिकस्यापीतियावत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माध्यमिकीयइति। मध्यमिकायांभवइतिवेणुकादिभ्यश्छण्वक्तव्यइतिच्छण्प्रत्ययः तत्रभस्याढइतिपुंवद्भावप्रसङ्गः। शालूकिकीयइति। शालूकानिविद्यन्तेऽस्यामितिवुञ्छण्केतिकः। शालूकिकायांभवइतिवृद्धाट्ठकेकान्तखोपधादितिच्छः। विधिरपीति। नगर्यांग्रामेवाभाषितपुंस्कत्वात्। वैलेपिकमिति। अण्महिष्यादिभ्यइत्यण्। एवंतर्हीति। प्रयोगमूलाद्व्याख्यानादूर्ध्वेष्टविषयविभागलाभः। पाकभार्यइति। पाकशब्दः प्रथमवयोवाचीततोङीबपवादोऽजादित्वाट्टाप्। भेकभार्यइति। भेकशब्दः क्रिया

माध्यमिकीयः। शालूकिकीयः। अत्रनप्राप्नोति। विधिरप्यत्रनसिध्यति। किंकारणम्। भाषितपुंस्कादनूङिस्युच्यते न ह्येतद्भाषितपुंस्कादनूङ्। इहतर्हिवैलेपिकायाधर्म्यंवैलेपिकंविधिश्चसिद्धोभवतिप्रतिषेधश्चनप्राप्नोति। अथपुंवद्भावमात्रस्यविषयेहस्तिनीनांसमूहोहास्तिकंजातिलक्षणःपुंवद्भावप्रतिषेधःप्राप्नोति। एवंतर्हिनकोपधाया इत्ययंयोगःपुंवद्भावमात्रस्यविषये। ततउत्तरसेवमाद्यनुक्रमणमाद्यस्ययोगस्यविषये। कोपधप्रतिषेधेतद्धितवुग्रहणम्। कोपधप्रतिषेधेतद्धितस्यवः ककारोवोऽस्यः तस्यग्रहणंकर्त्तव्यम्। इहमाभूत्। पाकभार्योभेकभार्यः॥ स्वाङ्गा॥ स्वाङ्गाच्चेतोऽमानिनीश्लक्ष्णमुखमानिनीतिनसिध्यति। प्रातिपदिकग्रहणेलिङ्गविशिष्टस्यापिग्रहणं भवतीत्येवंभविष्यति॥ पुंवत्॥ किमर्थमिदमुच्यते। नसामान्येनसिद्धम्। पुंवत्कर्मधारयेप्रतिषिद्धार्थम्। प्रतिषिद्धार्थोयमारम्भः। नकोपधायाइत्युक्तम्। तत्रापिपुंवद्भावोभवति। कारिकावृन्दारिकाकारकवृन्दारिका। कारकजातीया। कारकदेशीया। संज्ञापूरण्योश्चेत्युक्तंतत्रापिपुंवद्भवति। दत्तावृन्दारिकादत्तवृन्दारिका। दत्तजातीया। दत्तदेशीया। पञ्चमीवृन्दारिकापञ्चमवृन्दारिका। पञ्चमजातीया। पञ्चमदेशीया। वृद्धिनिमित्तस्येत्युक्तम्। तत्रापि पुंवद्भावोभवति। स्रौघ्नीवृन्दारिकास्रौघ्नवृन्दारिका। स्रौघ्नजातीया। स्रौघ्नदेशीया। स्वाङ्गाच्चेतोऽमानिनीत्युक्तम्॥

शब्दोमण्डूकजातिवाचित्वेतुभेकीभार्यइतिभाव्यम्। जातेश्चेतिपुंवद्भावनिषेधात्॥ स्वाङ्गाच्चेतः॥ स्वाङ्गाच्चेतइत्येतावत्सूत्रमितिमत्वावार्त्तिकारम्भः॥ पुंवत्॥ किमर्थमिति। कर्मधारयेस्त्रियाःपुंवदितिसिद्धःपुंवद्भावोजातीयदेशीययोरपितस्मिलादिष्वितिमत्वाप्रश्नः। प्रतिषिद्धार्थमिति। प्रतिषिद्धोपिपुंवद्भावोयथास्यादित्येवमर्थम् ॥

भा०९ नि॥ स्वाङ्गाच्चेतोऽमानिनीतिवक्तव्यम्। इहापियथास्यात्। दीर्घमुखमानी। श्लक्ष्णमुखमानी। यद्यमानिनीत्युच्यते। दीर्घमुखमानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नवेति। पुमानुक्तिवाक्यविषयः। स्त्रियं तु वाक्यमेव भवति रुचिस्त्वनभिधानान्न भवति। द्रढ्हतुकथमिति। न हि पुंसा क्षीरस्य संबन्धसंभवः। अत्रापीति। जात्यन्तरनिवृत्तिपरत्वात्वचोद्नायां स्त्रीत्वमनुपकारित्वादविवक्षितमित्यर्थः। यत्र तु लिङ्गविशेष उपकारकस्तत्रासौ विवक्ष्यत एव यथाऽजासूत्रेण पर्युक्षितं दातव्यमिति। असतश्चेति। विवक्षाया एव बलीयस्त्वमित्यनेन प्रतिपाद्यते। समुद्रः कुण्डिकेति। असदेव समुद्रत्वं कुण्डिकायामसत् कुण्डिकात्वं समुद्रे वारोप्य शब्दप्रयोगः। वायुवारुणमिति। उभयत्र

तत्रापि पुंवद्भावो भवति। श्लक्ष्णमुखी वृन्दारिका श्लक्ष्णमुखवृन्दारिका। श्लक्ष्णमुखजातीया। श्लक्ष्णमुखदेशीया॥ जाते श्चेत्युक्तम् तत्रापि पुंवद्भवति। कठी वृन्दारिका कठवृन्दारिका। कठजातीया। कठदेशीया। कुक्कुट्यादीनामण्डादिषु पुंवद्वचनम्। कुक्कुट्यादीनामण्डादिषु पुंवद्भावो वक्तव्यः। कुक्कुट्या अण्डं कुक्कुटाण्डम्। मृग्याः पदं मृगपदम्। काक्याः शावः काकशावः। नवाऽस्त्रीपूर्वपदविवक्षितत्वात् नवा वक्तव्यम्। किं कारणम्। अस्त्रीपूर्वपदविवक्षितत्वात्। नात्र स्त्रीपूर्वपदं किं तर्हि अस्त्रीपूर्वपदं विवक्षितम्। उभयोरण्डमुभयोः पदमुभयोः शावः। यद्यपि तावदत्रैतच्छक्यते वक्तुम्। इह तु कथं मृग्याः क्षीरं मृगक्षीरम्। अत्रापि नवाऽस्त्रीपूर्वपदविवक्षितत्वादित्येव। कथं पुनः सतो नामाविवक्षा स्यात्। सतोऽप्यविवक्षा भवति। तद्यथा। अलोमिका एडका। अनुदरा कन्या। असतश्च विवक्षा भवति। तद्यथा। समुद्रः कुण्डिका। विन्ध्यो वर्धितकमिति। अग्नेरीत्वाद्वरुणस्य वृद्धिर्विप्रतिषेधेन। अग्नेरीत्वाद्वरुणस्य वृद्धिर्भवति विप्रतिषेधेन। अग्नेरीत्वस्यावकाशः। अग्नीषोमौ। वरुणस्य वृद्धेरवकाशः। वायुवारुणम्। इहोभयं प्राप्नोति। आग्निवारुणीमनड्वाहीमालभेत। वरुणस्य वृद्धिर्भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। द्विकार्ययोगो हि विप्रतिषेधः। नात्रैको द्विकार्ययुक्तः। कथं अग्नेरीत्वं वरुणस्य वृद्धिरिति। नावश्यं द्विकार्ययोग एव विप्रतिषेधः। किं तर्हि असंभवोऽपि। स चात्रास्त्यसंभवः। कोऽसावसंभवः। अग्नेरीत्वमभिनिर्वर्तमानं वरुणस्य वृद्धिं बाधते। वरुणस्य वृद्धिरभिनिर्वर्तमाना अग्नेरीत्वं बाधते। एषोऽसंभवः। सत्यसंभवे युक्तो विप्रतिषेधः॥ पुंवद्भावाद्ध्रस्वत्वं खिद्घादिकेषु पुंवद्भावाद्ध्रस्वत्वं भवति विप्रतिषेधेन। पुंवद्भावस्यावकाशः। पटुभार्यः। मृदुभार्यः। खितिह्रस्वत्वं भवतीत्यस्यावकाशः॥

वायोः प्रतिषेधो वक्तव्य इत्यानङ् न भवति। वायुवरुणौ देवतास्य सास्य देवतेत्यण् देवताद्वन्द्वे चेत्युभयपदवृद्धिः। आग्निवारुणीमिति। नन्वीत्वमन्तरङ्गं बहिरङ्गात्तु उत्तरपदवृद्धिस्तद्धितापेक्षणादित्ययुक्तो विप्रतिषेधः। नैतदस्ति। इद्वृद्धाविती त्वस्यापवाद इत्वं विधीयते ततो अपवादविषयापेक्षणान्नास्यान्तरङ्गत्वमीत्वस्यात्र विषये। वरुणस्य वृद्धिमिति। दीर्घाच्च वरुणस्येति निषेधात् इत्वं बाधत इति इद्वृद्धाविति वचनात्।

CC-0. In Public Domain. Digitization by eGangotri

कालिंमन्यइति। कालीमात्मानंमन्यते कात्येवाहमितिमन्यतइत्यर्थः। नर्त्तकितरेति। अत्रनकोपधायाइतिपुंवद्भावःप्रतिषिद्धः। दारदिकेति। दरदोऽपत्यंस्त्री। द्व्यञ्मगधेत्यण्। तस्यातश्चेतिलुक्। ततःप्रागिवात्कइतिकः। तसिलादिष्विति पुंवद्भावः। ननुपरिगणितास्तसिलादयो न चकप्रत्ययः परिगणितः। एवंतर्हिविप्रतिषेधाभिधानात्कप्रत्ययोपितत्रास्त्युपगतइत्यनुमीयतेतेन

कालिंमन्यःहरिणिंमन्यः। इहोभयंप्राप्नोति। कालिंमन्या। हरिणिंमन्या। ह्रस्वोभवतिविप्रतिषेधेन। घादिषुनद्या ह्रस्वोभवतीत्यस्यावकाशः। नर्त्तकितरा नर्त्तकितमा। पुंवद्भावस्यावकाशः। दर्शनीयतरा। दर्शनीयतमा। इहोभयंप्राप्नोति। पट्वितरा। पट्वितमा। ह्रस्वोभवतिविप्रतिषेधेन। केह्रस्वोभवतीत्यस्यावकाशः। नर्त्तकिका। पुंवद्भावस्यावकाशः। दारदिका। इहोभयंप्राप्नोति। पट्विका। मृद्विका। ह्रस्वत्वंभवतिविप्रतिषेधेन। अथेदानींह्रस्वत्वेकृते पुनःप्रसङ्गविज्ञानात्पुंवद्भावःकस्मान्नभवति। सकृद्गतौविप्रतिषेधेयद्बाधितंतद्बाधितमेवेति॥ घरूप॥ ङीग्रहणंकिमर्थम्। अनेकाचोह्रस्वइतीयत्युच्यमानेखट्वातरामालातरा अत्रापिप्रसज्येत। नैतदस्तिप्रयोजनम्। भाषितपुंस्कादित्युच्यते। एवमपिदत्तातरागुप्तातरा अत्रापिप्राप्नोति। ईतइतिवर्त्तते। क्वप्रकृतम्। स्वाङ्गाच्चेतोऽमानिनीति। एवमपिग्रामणीतरःसेनानीतरः अत्रापिप्राप्नोति। स्त्रियामितिवर्त्तते॥ एवमपिग्रामणीतरासेनानीतरा अत्रापिप्राप्नोति। स्त्रियाः। स्त्रियामितिवर्त्तते। शेषप्रकॢप्त्यर्थंतर्हिङीग्रहणंकर्त्तव्यम्। नद्याःशेषस्यान्यतरस्यामिति॥ कश्चशेषः। अङीचयानदीङ्यन्तं चयदेकाच्। अन्तरेणापिङीग्रहणंप्रकॢप्तःशेषः। कथम्। ईतइतिवर्त्तते। अनीच्चयानदीईदन्तंचापियदेकाच्। शेषग्रहणंचापिकर्त्तुमशक्यम्। कथम्। अविशेषेणघादिषुनद्या अन्यतरस्यांह्रस्वत्वमुत्सर्गस्तस्यानेकाचइतिनित्यंह्रस्वत्वमपवादः। तस्मिन्नित्येप्राप्तेउगितोविभाषेयमारभ्यते ॥

नासौपरिगणितः॥ घरूप॥ ईतइतिवर्त्ततइति। स्वाङ्गाच्चेतइत्यतः। स्त्रियाः स्त्रियांक्षितिवर्त्ततइति। तेनस्त्रीवाचिनईकारस्यह्रस्वोविधीयमानोग्रामणीशब्दस्यनभविष्यत्यनर्थकत्वादीकारस्य। शेषप्रकॢप्त्यर्थमिति। विशिष्टस्यशेषस्यप्रकॢप्त्यर्थमित्यर्थः। अनीच्चयानदीति। ब्रह्मबन्धुतराब्रह्मबन्धूतरेति। इदन्तंचेति। स्त्रितरास्त्रीतरेति। अविशेषेणेति। इतोऽनेकाचइतिविशेषणानाश्रयात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा०कै० ९६

यद्येवमिति। यदीतइत्यनुवृत्त्या ङीग्रहणं शेषग्रहणं च प्रत्याख्यायते स्त्रियामित्यनेनेकारो विशेष्यते तदा लक्ष्मीतन्त्रीतरीका ६३२
रः स्त्रियां न विहित इति नित्यह्रस्वत्वं नास्ति। नद्या अन्यतरस्यामित्यत्रापि स्त्रियामित्यनुवर्त्तनात् विकल्पेन ह्रस्वत्वं नास्ति।
सति त्विह ङीग्रहणे स्त्रियामित्यस्य प्रयोजनाभावादनुवृत्त्यभावान्नद्याः शेषस्येत्यनेन ह्रस्वः सिध्यतीति भावः। इष्टमिति। स
ति इह ङीग्रहणे नद्याः शेषस्येति विकल्पेन प्राप्तं ह्रस्वत्वं वचनप्रतिषेध्यमसति तु ङीग्रहणे स्त्रियामित्यस्य सूत्रद्वयेप्यनुव
त्त्या ह्रस्वस्याप्रसङ्गः कृत्स्त्रियामिति नास्ति लक्ष्यभेद इति सिद्धं सर्वमिष्टम् ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदी
पे षष्ठस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥ आन्महतः समानाधिकरणजातीययोः ॥ महद्भूतइति। महच्छब्दो भू

यद्येवं लक्ष्मितरा तन्त्रितरा इति न सिध्यति। लक्ष्मीतरा तन्त्रीतरा इति प्राप्नोति। इष्टमेवैतत्संगृहीतं लक्ष्मीत
रा तन्त्रीतरा इत्येव भवितव्यम्। एवं हि सौनागाः पठन्ति घादिषु नद्या ह्रस्वत्वे कृन्नद्याः प्रतिषेध इति ॥ इति
श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥ आन्म
ह ॥ इह कस्मान्न भवति। अमहान्महान्संपन्नो महद्भूतश्चन्द्रमा इति। अन्यप्रकृतिरमहान्भूतप्रकृतौ मह
न्महत्येव ॥ अन्यो महान्। अन्यः अमहान्भूतप्रकृतौ वर्त्तते। महान्महत्येव। तस्मादात्वं न स्यात्। तस्मादात्वं
न भविष्यति ॥

तशब्दश्चैकस्मिन्नर्थे चन्द्रादौ वर्त्तत इति सामानाधिकरण्यादात्वं प्राप्नोति। अन्यप्रकृतिरिति। अन्यस्य महतः प्रकृतिः
कारणमन्यप्रकृतिरमहान्। भूतप्रकृताविति। भूतशब्दस्य प्रकृतिः कारणमर्थोऽर्थप्रतिपादनाय शब्दोच्चारणाच्छब्दस्या
र्थः कारणमुच्यते। तदयमर्थो भूतशब्दार्थो महान् वर्त्तते। अमहतो भूतेन सामानाधिकरण्यं न तु महत इत्यर्थः। महान्मह
त्येवेति। महच्छब्दो महत्येव वर्त्तते न तु भूतार्थे त्रिविषये हि प्रकृतिः कर्त्री न विकृतिः। तथा हि। संघीभवन्ति ब्राह्मणाः। पटीभवन्ति त
न्तव इति प्रकृतिसंख्याश्रयं वचनं दृश्यते न विकृतिसंख्याश्रयं तथा अलं त्वं संपद्यते त्वद्भवतीति प्रकृत्याश्रयः प्रथमपुरुषो भव
ति। न विकृत्याश्रयो मध्यमपुरुषः। ततश्च भूत इति निष्ठाप्रत्ययो भवनक्रियायाः कर्त्तर्यमहत्युत्पन्नो न तु विकारे महति ॥ राम: ९६

CC-0. In Public Domain. Digitization by eGangotri

पुंवत्त्विति। वैयधिकरण्यादात्ववत्पुंवद्भावोऽपि न प्राप्नोति। यथा च प्रकृतेः कर्तृत्वं दृश्यते तथा विकृतेरपि। सुवर्णपिण्डः खदि
राङ्गारसवर्णं कुण्डलं भवतीति विकारसंख्याश्रयं द्विवचनदर्शनात्। तथा कृपि संपद्यमाने चतुर्थीति विकाराच्चतुर्थी दृश्यते
न प्रकृतेः। सूत्राय संपद्यते यवागूः उच्चाराय कल्पते यवान्नमिति। तथा असंघो ब्राह्मणाः संघः संपद्यते अपटस्तन्तवः पटः सं
पद्यते इति विकारसंख्याश्रयं वचनं दृश्यते। तत्र यदि महद्भूतेत्यत्र सामानाधिकरण्यमाश्रित्य पुंवद्भावो विधीयते तदा
गोमतीभूतेत्यत्रापि प्राप्नोति। आत्वप्रसङ्गश्च। तत्र पुंवद्भावं तावत्साधयितुमाह। एवं तर्हीति। असमहत्यर्थे महच्छब्दो वर्त्त
त इति भूतशब्दसामानाधिकरण्ये पुंवद्भावो भवतीत्यर्थः। महद्वाचीति। अयं भावः। च्व्यन्तोऽत्र महच्छब्दः। च्विप्रत्ययश्च य

पुंवत्तु कथं भवेदत्र। पुंवद्भावोऽपि तर्हि न प्राप्नोति। असमहती महती संपन्ना महद्भूता ब्राह्मणी। एवं तर्हि अ
महति महान् हि वृत्तस्तद्वाची चात्र भूतशब्दोऽयम्। असमहति हि महत्शब्दो वर्त्तते तद्वाची भूतशब्दो यः प्रयु
ज्यते। किंवाची। महद्वाची। तस्मात् सिध्यति पुंवत्। तस्मात् सिध्यति पुंवद्भावः। यद्येवमात्वमपि प्राप्नोति।
महद्भूतश्चन्द्रमा इति ॥

दा प्रकृतिर्विकाररूपतामापद्यमाना विवक्ष्यते तदोत्पद्यते। परिणामविषयत्वात् च्विप्रत्ययस्य। यदा चैकोऽर्थः प्रकृति
विकारात्मकतया आश्रीयते तदा परिणामव्यवहारो भवति। यथोक्तम्। जहद्धर्मान्तरं पूर्वमुपादत्ते यदा परम्। तत्त्वादप्र
च्युतो धर्मी परिणामः स उच्यते इति। यदा तूत्तरावस्था पूर्वावस्थावान्नाश्रीयते तदा च्वेरभावस्तन्तवो भवन्ति पटो भवती
ति। उक्तं च हरिणा। पूर्वावस्थामविजहत् संस्पृशद्धर्ममुत्तरम्। संमूर्छित इवार्थात्मा जायमानोऽभिधीयते इति। तत्र
विकारस्य कर्तृत्वाद्भूतशब्देन सामानाधिकरण्यात् सिद्धः पुंवद्भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवर्त्तेमिति। पुंवद्भाववद्दात्वस्यापिप्रसङ्गात्। तदत्रकुचित्सामानाधिकरण्यंक्वचिद्वैयधिकरण्यमाश्रित्यप्रयोगाः समर्थ्यन्ते
महद्भूतेत्यत्रविकारभागः कर्तृत्वेनाश्रीयते। गोमतीभूतेत्यत्रतुप्रकृतिभागोमहद्भूतश्चन्द्रमाइत्यत्रापिप्रकृतिभागः। संघीभवन्ति
ब्राह्मणाइत्यादौतुप्रकृतेरेवकर्तृत्वम्। च्व्यन्तस्यगतित्वाद्वृत्तीनांच्विक्रियाविशेषकत्वात् संघीभवनलक्षणायांविशिष्टायांक्रिया
यांब्राह्मणानांकर्तृत्वात्। संघः संपद्यतइत्यादौतुवाक्येजन्ममात्रस्यसंघः कर्ता। यथाव्याकरणस्यसूत्रंकरोतीतिकरोतिमा
त्रस्यसूत्रंकर्म। व्याकरणंसूत्रयतीत्यत्रसूत्रविशिष्टस्यकरोतेर्व्याकरणमेवमिहापिप्रकृतिविकृत्योर्भिन्नक्रियाविषयंकर्तृत्व
म्। तेनवृत्तौप्रकृतिसंबन्धाश्रयंवचनमेवंमहद्भूतशब्दःप्रकृतेरेवकर्तृत्वमवगमयितुंशक्तोमहद्भूतेत्यत्रतुविकृतेरिति
दोषाभावः। तत्रतुविकृतेःकर्तृत्वेप्रकृतिरानुमानिकी। महतीसंपन्नाकेतिसामर्थ्यादेवामहतीविगम्यते। प्रकृतेस्तुकर्तृत्वेसा

निवर्त्तेसात्वत्तुमन्यन्ते। आत्वमपिप्राप्नोति। नैषदोषः। कथम्। यस्तुमहतः प्रतिपदंसमासउक्तः तदाश्रयं
ह्यात्वम्। कर्त्तव्यं— मन्यन्तेनलक्षणेनलक्षणोक्तस्यायम्। एवंतर्हिलक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवे
तिप्रतिपदंयः समासोविहितः तस्यग्रहणम्। कर्त्तव्यं— मन्यन्तेनलक्षणेनलक्षणोक्तस्यायम्। इहापितर्हि
नप्राप्नोतिमहान्बाहुरस्यमहाबाहुरिति। शेषवचनात्तुयोसौप्रत्यारम्भात्कृतोबहुव्रीहिः। तस्मात्सिद्धाति
तस्मिन्। यस्माच्छेषोबहुव्रीहिरितिसिद्धेः नेकमन्यपदार्थेइत्याहतेनप्रतिपदोक्तंतत्रभवति ॥

मर्थ्यादिकारावस्थाप्रतीयते। अमहान्संपन्नः केनधर्मेणेतिमहत्वेनेतिगम्यते। अत्वंत्वंसंपद्यतेत्वद्भवतीत्यत्रतुवृत्तौ
वाक्येचप्रकृतेरेवकर्तृत्वमिति। तदाश्रयः पुरुषोभवति। मध्यमेतुक्रियमाणेयुष्मदर्थस्यप्रकृतित्वंप्रतीयेततमन्योभ
वसीतिसर्वत्रचात्रशब्दशक्तिःप्रयोगानुसारिणीप्रमाणमेषत्वन्यायोमहद्भूतइत्यत्रपरिहारान्तरसंभवाद्महद्भूतेत्य
त्रचपुंवद्भाववदात्वप्रसङ्गाद्भाष्यकृतानोक्तस्तद्दर्शयति। यस्तुमहतइति। सन्महदितिप्रतिपदोक्तसमासस्येहग्रहणम्।
महद्भूतइत्यत्रतुकुगतिप्रादयइतिलाक्षणिकः समासइत्यात्वाभावः। शेषवचनादिति। शेषग्रहणमन्यपदार्थग्रहणंवा
कर्त्तव्यमन्यतरेणेष्टस्यलाभादुभयोपादानन्तुपुनर्विधानार्थंपुनर्विधानाच्चप्रतिपदोक्तवद्बहुव्रीहिर्भवतीत्यर्थः संपद्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रधानतो देति। यस्मात्प्रधानस्य वृत्तिरस्ति तस्माद्गौणस्यात्वं न भवतीत्यर्थः। गुणादागतो गौणः। मुखमिव मुख्यः प्रधानमित्यर्थः। शाखादिभ्यो य इति यप्रत्ययः। लोके हि शब्दे उच्चारिते गौणमुख्यार्थसंभवे मुख्य एवार्थे कार्याणि क्रियन्ते। व्याकरणेपि स्वं रूपमित्यत्र रूपग्रहणेन ज्ञापितं रूपवदर्थोऽप्यङ्गीक्रियत इति तत्रापि मुख्यस्यैवार्थस्य कार्येऽङ्गीकरणम्। कथं पुनरत्र गौणता महदर्थस्य। उच्यते। यस्यानुपचरितं महत्त्वं स मुख्योऽर्थः यस्त्वन्तेन तु पूर्वावस्थ उपचरितोत्तरावस्थोऽर्थस्तमभिधीय तदिति महत्त्वसमहत्स्वुपचरितमिति गौणार्थाभिधायी महच्छब्दो यथा गौर्वाहीक इति वाहीके गोशब्दः। पुंवद्भावे तु शब्दविशेषस्यानाश्रयणाद्गौणमुख्यन्यायानवतारान्महद्भूतेति पुंवद्भावः सिद्धः। कथं तर्ह्यौदित्यत्र शब्दविशेषानाश्रयेऽपि गोभवदित्यत्र गौणमुख्यन्यायाश्रयेण प्रगृह्यसंज्ञा परिहृता। एवं तर्हि महद्भूतेत्यत्र स्त्रीत्वमर्थस्य मुख्यमेव तदाश्रयश्च पुंवद्भावो गोमतीभूतेत्यत्र तु प्रकृतेः कर्तृत्वाश्रयणाद्वैयधिकरण्यात्पुंवद्भावाभावः। गोभवदित्यत्रौदन्तस्य निपातस्य

प्रधानतो वा यतो वृत्तिः। अथवा गौणमुख्ययोर्मुख्ये संप्रत्ययः। यथा गौरनुबन्ध्योऽजोऽग्नीषोमीय इति न वाहीकोऽनुबध्यते। कथं तर्हि वाहीके वृद्ध्यात्वे भवतः। गौस्तिष्ठति गामानयेति। अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति॥ शब्दाश्रये च वृद्ध्यात्वे ॥

गौणार्थत्वात्प्रगृह्यसंज्ञाभावः। शब्दाश्रये च वृद्ध्यात्वे इति। प्रातिपदिकस्य सर्वनामस्थानेऽसम्बुद्धौ गोतो णिदित्यादिविधानात्प्रातिपदिकस्य चान्वयव्यतिरेकाभ्यां कल्पितात्सामर्थ्यवत्ताकल्पनात्तस्यामवस्थायां नास्ति गौणार्थत्वम्। पदान्तरसंबन्धे हि पदस्य गौणार्थत्वाभिव्यक्तिः। अथवा शब्दो न कदाचित्स्वार्थपरित्यागेनार्थान्तरमभिदधाति नित्यत्वप्रसङ्गात् शब्दार्थसंबन्धस्य। गोत्वं तु क्वचिदारोपितं गोशब्दप्रयोजकं गौर्वाहीक इति। क्वचित्तु मुख्यम्। यथा रज्जुः सर्पत्वेनाध्यवसाय सर्पशब्दः प्रयुज्यमानो न स्वार्थं जहात्यर्थस्तु विपर्यस्तः। तत्र पदस्य पदान्तरसंबन्धेऽर्थविपर्याससंभवात्पदकार्येष्वेव गौणमुख्यन्यायो न प्रातिपदिककार्येष्विति विपर्यस्त एव चार्थे वृद्ध्यात्वेऽनुभूय गोशब्दो वाहीके समारोपितगोत्वे प्रवर्तते। अग्निसोमौ माणवकावित्यत्राग्नेः स्तुत्सोमसोमादिति षत्वं न भवति। गौणत्वादग्निसोमशब्दार्थयोः प्रसिद्ध्यप्रसिद्धिकृतत्वान्मुख्यगौणव्यवस्थायाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महद्धातद्‌ति। केचिद्‌न्वाचयेचशब्दंमन्यमानामहतोघासोमहाघासइत्यत्राप्यात्वंवर्णयन्ति। यथातुभाष्यंतथासमुच्चयेचशब्दइतिपुंवद्भावसन्नियोगेनात्वंविधीयमानमन्यत्रनभवतीतिलक्ष्यते॥ अष्टाकपालइति। अष्टसुकपालेषुसंस्कृतइतितद्धितार्थेसमासः। संस्कृतंभक्षाइत्यण्‌तस्यद्विगोर्लुगनपत्येइतिलुक्‌। अष्टकपालमिति। समाहारेद्विगुः पात्रादिभ्यः प्रतिषे

महदात्वेघासकरविशिष्टेषूपसंख्यानंपुंवद्वचनंचासमानाधिकरणार्थम्। महदात्वेघासकरविशिष्टेषूपसंख्यानंकर्त्तव्यम्। पुंवद्भावश्चासमानाधिकरणार्थोद्रष्टव्यः। महत्याघासोमहाघासः। महत्याःकरोमहाकरः। महत्याविशिष्टोमहाविशिष्टः। अष्टनःकपालेहविषि। अष्टनःकपालेहविषिउपसंख्यानंकर्त्तव्यम्। अष्टाकपालःहविषीतिकिमर्थम्। अष्टकपालंब्राह्मणस्य। गविचयुक्ते। गविचयुक्तउपसंख्यानंकर्त्तव्यम्। अष्टागवेनशकटेन॥ युक्तइतिकिमर्थम्। अष्टगवंब्राह्मणस्य। अन्यप्रकृतिमहानभूतप्रकृतौमहान्महत्येव। तस्मादात्वंनस्यात्पुंवत्तुकर्यंभवेत्तत्र॥ अमहतिमहान्भूतस्तद्वाचीचात्रभूतशब्दोऽयम्॥ तस्मात्सिद्धातिपुंवन्निवर्त्यमात्वंतुमन्यन्ते॥२॥ यस्तुमहतःप्रतिपदंसमासउक्तस्तदाश्रयंह्यात्वम्। कर्त्तव्यमन्यंतेनलक्षणेनलक्षणोक्तश्चायम्॥३॥ शेषवचनात्तुयोसौप्रत्यारम्भात्कृतोबहुव्रीहिः। तस्मात्सिध्यतितस्मिन्प्रधानतोवाप्यतोवृत्तिः॥४॥ द्व्यष्टनः॥ प्राक्‌शतादितिवक्तव्यम्। इहमाभूत्। द्विशतम्। अष्टशतम्। द्विसहस्रम्। अष्टसहस्रम्॥ विभाषा॥ सर्वेषांग्रहणंकिमर्थम्। चत्वारिंशत्प्रभृतौसर्वेषांग्रहणंसर्वेषांविभाषायथास्यात्। द्व्यष्टनःत्रेश्च। नैतदस्तिप्रयोजनम्। प्रकृतंद्व्यष्टनोर्ग्रहणमनुवर्तिष्यते। यदितदनुवर्त्ततेत्रेस्त्रयस्द्व्यष्टनोरपित्रयआदेशःप्राप्नोति। नैषदोषः। मण्डूकगतयोऽधिकाराः। तद्यथा। मण्डूकाउत्प्लुत्योत्प्लुत्यगच्छन्तितद्वदधिकाराः ॥

धइतिष्टुत्वाभावः। अष्टागवेनेति। अष्टौगावोयुक्ताअस्मिन्नितित्रिपदेबहुव्रीहौद्वयोर्द्विगुर्गोरतद्धितलुकीतिटच्‌समासान्तस्तत्रदीर्घत्वेनयुक्तार्थसंप्रत्ययाद्‌गतार्थत्वाद्युक्तशब्दस्यनिवृत्तिरथवासमाहारेद्विगुस्तत्रसाहचर्यादभेदोपचाराद्‌ष्टागवेनयुक्तंशकटमष्टागवमुच्यते॥ विभाषा॥ मण्डूकगतयइति। द्व्यष्टन्शब्दार्थंत्रयआदेशोनशक्नोतिवक्तुमितित्रयआदेशोनसंबन्धाभावादिहैवद्व्यष्टनोरभिसंबन्धः ॥ राम: ९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। एकाभवतिक्रिया आल्वन्त्रय आदेशकर्त्रीकोपादीयते। ततो यस्मिन्काले द्यष्टनो रात्वं तस्मिन्नेव त्रिशब्दस्य त्रय आदेश इत्यर्थः। अथवोभयमिति। समुदायोऽपेक्ष्यते स तु एक एवेत्यनन्तरस्य विधिर्वा भवति प्रतिषेधो वेत्यपि नास्ति॥ ह्रस्व॥ रूपग्रहणमिति। स्वरूपस्य ग्रहणं न तु तदन्तस्येत्यर्थः। लेखग्रहणादिति। एतद्वचनान्यथानुपपत्त्या च लेखशब्दोऽणन्तो गृह्यते न तु घञन्त इति घञि हृदयलेख इत्येव भवति। सर्वत्रैवेति। प्रकरणापेक्षं ज्ञापकमाश्रीयते तेन तेतद्योगापेक्षमेवेत्यर्थः। कुमारीगौरितरेति। उदाहरणदिगियं समासस्तूदाहार्यः कुमारगौरितरेति। अत्र हि घान्त उत्तरपदे पुंवद्भावं बाधित्वा ह्रस्वः स्यात्। सं

अथवाऽस्त्वेकयोगः करिष्यते। द्यष्टनः संख्यायामबहुव्रीह्यशीत्योः त्रेस्त्रयः। ततो विभाषा चत्वारिंशत्प्रभृतौ सर्वेषामिति। नैकयोगेऽनुवृत्तिर्भवति। अथवा उभयं निवृत्तं तदपेक्षिष्यामहे॥ ह्रस्व॥ यदण्ग्रहणमिदं प्रत्ययग्रहणम्। तत्र प्रत्ययग्रहणे यस्मात्स विहितः तदादेर्ग्रहणं भवतीति यदणन्ते प्राप्नोति। यदण्ग्रहणे रूपग्रहणं लेखग्रहणात्। यदण्ग्रहणे रूपग्रहणं द्रष्टव्यम्। कुतः। लेखग्रहणात्। यदयं लेखग्रहणं करोति तज्ज्ञापयत्याचार्यो न यदणन्ते भवतीति। अपर आह। अत्यल्पमिदं ज्ञाप्यते। सर्वत्रैवोत्तरपदाधिकारे प्रत्ययग्रहणे रूपग्रहणं द्रष्टव्यम्। कुतः। लेखग्रहणादेव। किं प्रयोजनम्। कुमारीगौरितरा। घादिषु नद्या ह्रस्वो भवतीति ह्रस्वत्वं प्रसज्येत। यद्येतज्ज्ञाप्यते खित्यनव्ययस्येति खित्येवानन्तरस्यानव्ययस्य ह्रस्वत्वं प्राप्नोति। खित्यनन्तरो ह्रस्वभावी नास्तीति कृत्वा खिदन्ते उत्तरपदे भविष्यति। ननु चायमस्ति स्तनंधय इति। अत्रापि शपा व्यवधानम्। एकादेशे कृते नास्ति व्यवधानम्। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव। अथवैतज्ज्ञापयत्याचार्यः खित्यनन्तरस्य न भवतीति यदयमनव्ययस्येति प्रतिषेधं शास्ति। न हि खित्यनन्तरमव्ययमस्ति ॥

ज्ञाविधौ च प्रत्ययग्रहणे तदन्तविधेः प्रतिषेध उत्तरपदाधिकारे तूत्तरपदस्य येन विशेषणात्स्यादेव तदन्तविधिः। संज्ञाविधौ तदन्तविधिनिषेधस्य तु फलं दृषत्तीर्ण इत्यत्र धातुवकारस्य नत्वनिवारणम्। विशेष्यानिर्देशान्नत्वे निष्ठा तदन्तविध्यभावात् क्तवतु तकारस्यैव नत्वं प्रवर्तते। ननु चायमिति। खशैव कर्तुरभिधानाच्छपोऽप्रवृत्तिं मन्यते। अत्रापीति। यथा पचतीत्यत्र लेनाभिहिते कर्तरि शप् भवति। एवमत्रापीति भावः। एकादेशे कृत इति। अयादेशात् परत्वादेकादेश इति भावः। स्थानिवद्भावादिति। श्रुतेर्लिङ्गं दुर्बलमिति स्थानिवद्भावो न बाध्यते। अथवेति। न ह्यव्ययात्परः खित्प्रत्ययः संभवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पादशब्दोवृषादित्वात्स्वाङ्गशिटामदन्तानामितिवाद्युदात्तस्तदादेशआन्तर्यादाद्युदात्तएवप्राप्नोतीत्याह। पदादेशइति।
पदोपहतमिति। अत्रतृतीयाकर्मणीत्यनेनपूर्वपदप्रकृतिस्वरोऽन्तोदात्तत्वंभवति। ततएकादेशःस्वरितोवानुदात्तेपदादाविति पक्षेस्वरितः पक्षेतूदात्तः। उपदेशिवद्वचनमिति। यथोपदेशिनःस्वरःसतिशिष्टेनस्वरेणबाध्यतेतथास्यापीत्यर्थः। समासस्वरेणेति। समासाश्रयेणकृत्स्वरेणेत्यर्थः॥ पद्व॥ पदिकइति। पादादिभ्यःष्ठन्नितिष्ठन्प्रत्ययः॥ उदक॥ उदकशब्दसमानार्थउदशब्दोविद्यतेतथाचाप्रसन्नःप्रसन्नोदमित्यसंज्ञायामप्युदशब्दःप्रयुज्यते। संज्ञायांन्तूदकशब्दप्रयोगनि

पादस्यप॥ पदादेशोऽन्तोदात्तनिपातनम्। पदादेशोऽन्तोदात्तनिपातनंकर्त्तव्यम्। किंप्रयोजनम्। पदोपहतार्थम्। पादेनोपहतंपदोपहतम्। तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वेपूर्वपदान्तोदात्तत्वंयथास्यात्। उपदेशिवद्वचनंचस्वरसिद्ध्यर्थम्। उपदेशिवद्भावश्चवक्तव्यः। किंप्रयोजनम्। स्वरसिद्ध्यर्थम्। उपदेशावस्थायामन्तोदात्तनिपातनेकृतेसमासस्वरेणबाधनंयथास्यात्। पदाजिः। पदातिः॥ पद्यत्य॥ पद्भावेइकेचरतावुपसंख्यानम्। पद्भावइकेचरतावुपसंख्यानंकर्त्तव्यम्। पादेनचरतिपदिकः॥ वाघोष॥ निष्केचोपसंख्यानम्। निष्केचोपसंख्यानंकर्त्तव्यम्। पन्निष्केण। पद्निष्केण॥ उदकस्यो॥ संज्ञायामुत्तरपदस्यच। संज्ञायामुत्तरपदस्यचेतिवक्तव्यम्। इहापियथास्यात्। लोहितोदःक्षीरोदइति॥ एक॥ एकहलादावितिकिमर्थम्। उदकस्थानम्। उच्यमानेप्येतस्मिन्वचनेऽत्रापिप्राप्नोति। एतदप्येकहलादि। किंकारणम्। एकैकवर्णवृत्तित्वाद्वाचः। उच्चरितप्रध्वंसित्वाच्चवर्णानाम्। एकैकवर्णवर्त्तिनीवाक्नद्वौयुगपदुच्चरति। तद्यथा। गौरित्युक्तेयावद्गकारेवाक्प्रवर्त्ततेनतावदौकारेनविसर्जनीये। यावदौकारेनतावद्गकारेनविसर्जनीये। यावद्विसर्जनीयेनतावद्गकारेनापिऔकारे॥ उच्चरितप्रध्वंसित्वाच्चवर्णानाम्। उच्चरितोवर्णःप्रध्वस्तइति ॥

वृत्त्यर्थमुदादेशविधानमित्याहुः। एतदन्येनमृष्यन्ति। एवमभ्युपगमेवक्ष्यमाणोविकल्पोऽनर्थकःस्यात्॥ एक॥ एकहलादावितिकिमर्थमिति। अतिप्रसङ्गनिवारणासामर्थ्यादनर्थकमितिभावः। एतदपीति। सकारस्यैवादित्वात्। एकैकवर्णवृत्तित्वादिति। यद्यनेकस्यवर्णस्ययुगपदुच्चारणंस्यात्तदास्थानशब्दएकहलादिर्नस्यात्। क्रमोच्चारिताअपिवर्णायद्यवतिष्ठेरन्घटादिवत्तदास्थानशब्देयुगपद्रूपोपलम्भादादित्वंस्याद्यतस्तुनोच्चारणेनाप्युपलब्धौवर्णानांयौगपद्यंत्तस्मा
देकस्यैवहलआदित्वमितिनार्थएकग्रहणेनहलादावित्येवाजादिनिवृत्त्यर्थंवक्तव्यमितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रप्रकर्षगतिरिति। असहायवाच्येकशब्दआश्रीयते। समानजातीयस्यसहायत्वेनप्रसिद्धतरइतिसएवनिवर्त्यतेतत्रय
द्यप्युच्चारणउपलब्धौवावर्णोवर्णस्यनसहायस्तथापिबुद्धौकृत्वासर्वोऽयंशब्दइत्यनेनन्यायेनयस्यानन्तरंद्वितीयोहलनो
च्चार्यतेसोऽसहायोहलादिरस्येत्याश्रीयते॥ इको॥ उत्तरपदमात्रइति। यस्यान्यापेक्षयाऽभिचार्युत्तरपदत्वं तस्मिन्नपी

अथापरःप्रयुज्यतेनवर्णोवर्णान्तरस्यसहायः। एवं तर्ह्येकहलादावित्युच्यते सर्वश्चैवैकहलादिः। तत्र
प्रकर्षगतिर्विज्ञास्यते। साधीयोयएकहलादिरिति। कश्चसाधीयः। यत्रैकंहलमुच्चार्यमुच्यते॥ इको॥

इकोह्रस्वत्वमुत्तरपदमात्रे। इकोह्रस्वत्वमुत्तरपदमात्रेवक्तव्यम्। इहापियथास्या
त्। अलाबुकर्कन्धुदृन्भुफलमिति। किंपुनःकारणंनसिध्यति। सर्वान्तेलोकविज्ञानम्। लोकविज्ञानाद्धियदेत
त् सर्वान्तं पदंतस्मिन्पूर्वपदस्यह्रस्वत्वंस्यात्। अथवाएवंविग्रहःकरिष्यते॥ अलाबूश्चकर्कन्धूश्चअलाबुक
र्कन्ध्वौअलाबुकर्कन्ध्वौचदृन्भूश्चअलाबुकर्कन्धुदृन्भ्वः। अलाबुकर्कन्धुदृन्भूनांफलमलाबुकर्कन्धुदृन्भुफ
लमिति। यद्येवंदृन्भ्वाःपूर्वनिपातःप्राप्नोति। राजदन्तादिषुपाठःकरिष्यते। अथवाएवंविग्रहःकरिष्यते। दृ
न्भ्वाःफलंदृन्भुफलंकर्कन्धूश्चदृन्भूफलंचकर्कन्धुदृन्भुफलमलाबूश्चकर्कन्धुदृन्भुफलंचअलाबुक
र्कन्धुदृन्भुफलमिति। एवमपिफलेनाकृतोऽभिसंबन्धोभवति। नैषदोषः। प्रत्येकंफलशब्दःपरिसमा
प्यते। इयङुवङ्भाव प्रतिषेधः। इयङ्वङ्भाविनामव्ययानांचप्रतिषेधोवक्तव्यः। श्रीकुलम्। भ्रूकुल
म्। काण्डीभूतंकुड्यीभूतम्। वृषलकुलम्। अभ्रूकुंसादीनामितिवक्तव्यम्। भ्रुकुंसः। भ्रूकुंसः। भ्रुकुटिः।
भ्रूकुटिः। अपरआह। अकारोभ्रूकुंसादीनामिति वक्तव्यम्। भ्रकुंसः। भ्रकुटिः॥ एक॥ एकतद्धितेकिमुदाहर
णम्। एकत्वमेकतेति। नैतदस्तिप्रयोजनम्। पुंवद्भावेनाप्येतत् सिद्धम्। कथम्। तसिलादिष्वाकृत्वसुचइ
ति। इदंतर्हिप्रयोजनम्। एकस्याआगतमेकरूप्यमेकमयम्। इदंचाप्युदाहरणमेकत्वमेकता। ननुचोक्तं
पुंवद्भावेनाप्येतत्सिद्धमिति। नसिध्यति। उक्तमेतत् त्वतलोर्गुणवचनस्येति ॥

त्वर्थः। अलाबुकर्कन्ध्वाविति। जातिपरत्वाभावादेकवद्भावोनकृतः। यद्येवमिति। अल्पाच्तरमित्यनेन। त्रयाणां तुद्वन्द्वेतन्त्रेतरयोर्नि
र्दिष्टोऽल्पाच्तरत्वाभावात् पूर्वनिपाताप्रसङ्गः। प्रत्येकमिति। ओरञित्यञः फलेलुकिकृतेनपुंसकाश्रयंह्रस्वत्वमितिप्रकारान्तरेणोक्तं
भवति॥ एक॥ त्वतलोर्गुणवचनस्येति। एकशब्दोयदासंख्यावाचीतदागुणवचनःयदाअसहायवाचीतदागुणवचनोनभवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ उक्तमेतदिति। नकोपधायाइति। प्रतिषेधाभावेस्त्रियाः पुंवदित्यनेनान्नपुंवद्भावोनतुपुंवत्कर्मधारयेत्यनेन। तस्यप्रतिषिद्धार्थी
१०० त्वात्। अथोच्येत। परत्वात्कर्मधारयलक्षणेनपुंवद्भावेनभाव्यमिति। नैतदस्ति,परत्वाश्रयणेह्रस्वत्वेनैवानेनपरत्वाद्भाव्यम्। भाष्य
कारस्तुतात्पर्येणोदाहरणत्वमस्यनिराकृतवान् रूपस्यान्यथासिद्धत्वात्॥ खित्य॥ खितिह्रस्वाप्रसिद्धिरिति। इहह्रस्वश्रुत्याच्यु
पस्थापितेऽचापूर्वपदस्यविशेषणादजन्तस्यह्रस्वेनभाव्यंपूर्वपदेनत्वचिविशेष्यमाणेवाङ्गन्यादिष्वपिह्रस्वप्रसङ्गः स्तन्नमुमि

अथोत्तरपदेकिमुदाहरणम्। एकशाटी। नैतदस्ति। पुंवद्भावेनाप्येतत्सिद्धम्। कथंपुंवद्भावः। समानाधिकरणा
लक्षणः पुंवद्भावः। इदंतर्हि एकस्याः क्षीरमेकक्षीरम्। इदंचाप्युदाहरणम्। एकशाटी। ननुचोक्तंपुंवद्भावेनाप्ये
तत्सिद्धमिति। नसिद्ध्य॰॰ति। नकोपधायाइतिप्रतिषेधः प्राप्नोति। नैषोऽस्तिप्रतिषेधः। उक्तमेतत्। कोपधप्रति
षेधेतद्धितवुग्रहणमिति॥ खित्य॥ खितिह्रस्वाप्रसिद्धिरनजन्तत्वात्। खितिह्रस्वस्याप्रसिद्धिः। कालिंमन्या। हरि
णिंमन्या। किंकारणम्। अनजन्तत्वात्। मुमिकृतेऽनजन्तत्वाद्ध्रस्वत्वंनप्राप्नोति। सिद्धंतुह्रस्वान्तस्यमुम्वचनात्। सि
द्धमेतत्। कथम्। ह्रस्वान्तस्यमुम्भवतीतिवक्तव्यम्। सन्नियोगाद्वा। अथवासन्नियोगः करिष्यते। कएषयत्नश्चोद्य
तेसन्नियोगोनाम। चकारः कर्त्तव्योमुम्च। किंच। यच्चान्यत्प्राप्नोति। किंचान्यत्प्राप्नोति। ह्रस्वत्वम्। सिद्ध्यति। सूत्रंतर्हि
भिद्यते। यथान्यासमेवास्तु। ननुचोक्तंखितिह्रस्वाप्रसिद्धिरनजन्तत्वादिति। परिहृतमेतत्। सिद्धन्तुह्रस्वान्त
स्यमुम्वचनादिति। तत्तर्हि ह्रस्वग्रहणंकर्त्तव्यम्। नकर्त्तव्यम्। प्रकृतमनुवर्त्तते। क्वप्रकृतम्। इकोह्रस्वोऽङ्यो
गालवस्येति। तद्वैप्रथमानिर्दिष्टंषष्ठीनिर्दिष्टेनचेहार्थः। खितीत्येषासप्तमीह्रस्वइतिप्रथमायाः षष्ठींप्रकल्प
यिष्यतितस्मिन्नितिनिर्दिष्टेपूर्वस्येति ॥

कृतेऽनजन्तत्वाद्ध्रस्वाप्रसङ्गः। अथस्तनंधयादिषुसावकाशोमुमागमः कालिंमन्यादिषुह्रस्वत्वेनबाध्यतेतथापिमुम्नप्राप्नो
तीतिमुमर्थोयत्नः कर्त्तव्यः। अत्रोत्तरमाह। सिद्धंत्विति। सन्नियोगाद्वेति। सन्नियोगोयौगपद्यमित्यर्थः। खितीत्येषासप्तमीति
इहसूत्रेह्रस्वस्यविधीयमानत्वात् खितीतिसप्तम्याषष्ठीप्रकल्पनंनास्ति। उत्तरसूत्रेतुखितिइत्यनुवृत्तासप्तमीह्रस्वइतिप्र
थमायाः षष्ठींप्रकल्पयति। तत्रकालिंमन्यादिषुस्तनंधयादिषुचपर्जन्यवल्लक्षणप्रवृत्त्याकृतेह्रस्वान्तस्यमुमागमइतिह्रस्व रा॰म॰
मुमागमयोर्निमित्तनिमित्तिभावादुत्सर्गापवादभावाभावः ॥ १००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वस्यापि ह्रस्वेन भाव्यमित्येकविषयत्वाद्ध्रस्वनुमागमयोरुत्सर्गापवादभावाभावात्
विरोधाभावाच्च नुमि कृते भूतपूर्वाजन्तत्वाश्रयेण ह्रस्वः प्रवर्तते। तत्रवचनादिति। पूर्वपदेनाज्विशेष्यते ख्वितीत्यनेन चा। तत्र
येन नाव्यवधानमिति न्यायेन नुमि कृते एकहल्व्यवहितस्याचो ह्रस्वप्रवृत्तिः॥ इचाश्शसा सहचरितद्विति। साहचर्यं विशेषस्मृति
हेतुर्भवति यथा रामलक्ष्मणाविति तथा औतोऽम्शसोरित्यत्र शस्सहचरितस्यामो ग्रहणादन्यस्याग्रहणाभावः। सामान्यातिदे

अथवा ख्विति ह्रस्वो भवतीत्युच्यते। ख्वित्यनन्तरो ह्रस्वभावी नास्तीति कृत्वा भूतपूर्वगतिर्विज्ञास्यते। अजन्तं यद्भूत
पूर्वमिति॥ अथवा कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यं ख्विति ह्रस्वो भवतीत्युपस्थितमिदं भवति अचइ
ति। तत्र वचनादनजन्तस्यापि भविष्यति। इहापि तर्हि वचनात्प्राप्नोति। वाचंयमम्मन्य इति। नैतदस्ति। इक इति वर्त
ते। एवमपि खट्वंमन्यः अत्र न प्राप्नोति। नैष दोषः। आपो ग्रहणमपि प्रकृतमनुवर्तते। क्व प्रकृतम्। ङ्याप्योः संज्ञा
छन्दसोर्बहुलमिति। एवमपि किलालपंमन्यः। शुभंयंमन्यः। अत्र न प्राप्नोति। तस्मात्पूर्वोक्तावेव परिहारौ॥ इ
चा॥ अमः प्रत्ययवदनुदेशे किं प्रयोजनम्। अमः प्रत्ययवदनुदेशे प्रयोजनमात्वपूर्वसवर्णगुणेयङुवङादे
शाः। अमः प्रत्ययवदनुदेशे आत्वपूर्वसवर्णगुणेयङुवङादेशाः प्रयोजनम्। आत्वं प्रयोजनम्। गां मन्यः। पूर्व
सवर्णः प्रयोजनम्। स्त्रीं मन्यः। गुणः प्रयोजनम्। नरं मन्यः। इयङुवङौ प्रयोजनम्। श्रियं मन्यः। भुवं मन्यः। अ
मः प्रत्ययवदनुदेशे आत्वपूर्वसवर्णाप्रसिद्धिरप्रथमात्वात्। अमः प्रत्ययवदनुदेशे आत्वपूर्वसवर्णयोरप्रसिद्धिः।
किं कारणम्। अप्रथमात्वात्। प्रथमयोरित्युच्यते। न चात्र प्रथमां पश्यामः। किं च भोः आत्वं प्रथमयोरित्युच्यते। न ख
लु प्रथमयोरित्युच्यते प्रथमयोरिति विज्ञायते। कथम्। अम्शसोरित्युच्यते तत एवं विज्ञास्यामः शस्सहचरितो
योऽम्शब्दः। कश्च शस्सहचरितः। प्रथमैव। ननु च प्रत्ययवदनुदेशाद्भविष्यति। न सिद्ध्यति। किं कारणम्। सामान्या
तिदेशे हि विशेषानतिदेशः। सामान्ये ह्यतिदिश्यमाने विशेषो नातिदिष्टो भवति ॥

श इति। सामान्यस्य शब्दार्थत्वाद्विशेषाणां त्वशब्दार्थत्वात्सामान्यशब्दोपादानेनातिदेशः क्रियमाणः सामान्यनिबन्धनमेव
कार्यं प्रापयति न तु विशेषनिबन्धनम्। विशेषशब्दाश्रयेण त्वतिदेशे क्रियमाणे तस्मिन्विशेषे यत्कार्यं सामान्यनिबन्धनं वि
शेषनिबन्धनं च तत्सर्वमतिदिश्यते। आत्वपूर्वसवर्णवद्गुणस्याप्यसिद्धिर्वक्तव्या ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एकशेषनिर्द्देशाद्वेति। यद्यपि सहविवक्षायामेकशेषोऽत्र च तस्या असंभवोऽमागमस्य विधेयत्वाद् परस्यामः प्रत्ययविशेषण
त्वाच्चयापि जातिपक्षाश्रयेण रूसाद्यर्थः प्रत्याख्यातः एकशेषः सहविवक्षाया अभावेऽपि संज्ञापरिभाषावल्लक्षणाङ्गं विज्ञायते।
अपेति। अत्र विषये श्रीशब्दो ब्राह्मणकुले स्वलिङ्गं परित्यागेन वर्तते यथा प्रष्ठादयः पुंयोगात् स्त्रियां वर्तमानाः स्वलिङ्गमपहा
य स्त्रीलिङ्गमुपाददते। नाप्राप्ते लुकीति। अमागमोऽम्प्रत्ययवदित्यतिदेशात् कार्याण्यात्मविनाशं वर्जयित्वा प्रतिपद्यते। विधा
तव्यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति सामान्यं यद्ब्राह्मणकार्यं तत् क्षत्रियेऽतिदिश्यते। यद्विशि
ष्टं माठरे कौण्डिन्ये वा न तदतिदिश्यते। एवमिहापि सामान्यं यत् प्रत्ययकार्यं तदतिदिश्यते यद्विशिष्टं द्वितीयैक
वचने भवति प्रथमयोरिति न तदतिदिश्यते। सिद्धं तु द्वितीयैकवचनवद्वचनात्। सिद्धमेतत्। कथम्। द्वितीयैक
वचनवद्वचनात्। द्वितीयैकवचनवद्भवतीति वक्तव्यम्। एकशेषनिर्द्देशाद्वा। अथवैकशेषनिर्द्देशोऽयम्। अम्
च अम् च अम्। द्वय एकादेशः अम् भवति अम् प्रत्ययवच्चास्मिन् कार्यं भवति। अथेह कथं भवितव्यम्। श्रियमा
त्मानं मन्यते ब्राह्मणकुलम्। श्रियंमन्यं ब्राह्मणकुलम्। आहोस्विच्छ्रिमन्यमिति। श्रियंमन्यमिति भवितव्यम्। स्व
मोर्नपुंसकादिति लुक् कस्मान्न भवति। नाप्राप्ते लुक्यय मारभ्यते स यथैव सुपो धातुप्रातिपदिकयोरित्येवं बाधते
एवं स्वमोर्नपुंसकादित्येतमपि लुकं बाधते। न बाधते। किं कारणम्। येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते
सुपो धातुप्रातिपदिकयोरित्येतस्मिन्नेतदारभ्यते स्वमोर्नपुंसकादित्येतस्मिन् पुनः प्राप्ते चाप्ते च। अथवा मध्येऽ
पवादाः पूर्वान् विधीन् बाधन्त इत्येवमयममागमः सुपो धातुप्रातिपदिकयोरित्येतं बाधते स्वमोर्नपुंसकादि
त्येतन्न बाधते। एवं तर्ह्यसिद्धं बहिरङ्गमन्तरङ्ग इत्यसिद्धत्वाद्बहिरङ्गलक्षणस्यामोऽन्तरङ्गलक्षणो लुक् न भवि
ष्यति। नैषा परिभाषेहोत्तरपदाधिकारे शक्या विज्ञातुम्। इह हि दोषः स्यात्। द्विषन्तपः परन्तप इति। संयोगान्तलोपो न स्या
त्। तस्माच्छ्रिमन्यमित्येवं भवितव्यम्। करे। अस्तुसत्यागदस्य कार उपसंख्यानम्। अस्तुसत्यागदस्य कार उपसंख्यानं कर्तव्यम्।
न सामर्थ्याद्वि लुकं न प्रतिपद्यते। यथा परिधिर्यूपो भवतीति यूपकार्याणि तक्षणं विहाय परिधौ क्रियन्तेऽतष्टाः परिधयो भवन्तीति
वचनात्तक्षणे परिधित्वहानिप्रसङ्गात्। द्विषन्तप इति। संयोगान्तलोपो न स्यादिति केचिदाहुः। एतत्तु द्वयोरेकस्य वा तकारस्य श्रु
तौ विशेषानवधारणादन्ये साधु मन्यमाना अनुस्वाराप्राप्तिलक्षणं दोषमाहुः। एवं च परन्तप इत्यपि समर्थितं भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अस्तुंकार इति। अभ्युपगमकरणमुच्यते। सत्यंकारः शपथकरणम्। अशपथे पिडादेः परत्वात् बाधित्वा कारशब्दे मुम् भवति। अगदंकारो विषप्रतिपक्षद्रव्यकरणम्। भक्षंकारस्येति। यागशेषद्रव्यभक्षणस्य कर्तुरित्यर्थः। धेनुंभव्याशब्देन भविष्यन्ती धेनुरुच्यते। भव्यगेयेति कर्त्तरि कृत्यो धेनुर्भव्येति विशेषणसमासः। लोकंपृणस्येति। पृणतिः पूरणार्थः। लोकस्य पूरकस्येत्यर्थः। इत्य इति। अ

अस्तुंकारः। सत्यंकारः। अगदंकारः। भक्षस्य छन्दसि। भक्षस्य छन्दस्युपसंख्यानं कर्त्तव्यम्। तस्य ते भक्षंकारस्य। छन्दसीति किमर्थम्। भक्षकारस्य तन्मतमिति। धेनोर्भव्यायाम्। धेनोर्भव्यायामुपसंख्यानं कर्त्तव्यम्। धेनुंभव्या। लोकस्य पृणे। लोकस्य पृण उपसंख्यानं कर्त्तव्यम्। लोकंपृणस्य धन्वितः। इत्येऽनभ्याशस्य। इत्येऽनभ्याशस्योपसंख्यानं कर्त्तव्यम्। अनभ्याशमित्यम्। भ्राष्ट्राग्न्योरिन्धे। भ्राष्ट्राग्न्योरिन्ध उपसंख्यानं कर्त्तव्यम्। भ्राष्ट्रमिन्धः। अग्निमिन्धः। गिलेऽगिलस्य। गिलेऽगिलस्य उपसंख्यानं कर्त्तव्यम्। तिमिंगिलः। अगिलस्येति किमर्थम्। गिलगिलः। गिलगिले च। गिलगिले चेति वक्तव्यम्। तिमिंगिलगिलः। उष्णभद्रयोः करणे। उष्णभद्रयोः करण उपसंख्यानं कर्त्तव्यम्। उष्णंकरणम्। भद्रंकरणम्। सूतोग्रराजभोजकुलमेरुभ्यो दुहितुः पुत्रड् वा। सूतोग्रराजभोजकुलमेरुभ्यो दुहितुः पुत्रड् वा भवतीति वक्तव्यम्। सूतपुत्री। सूतदुहिता। सूत। उग्रपुत्री। उग्रदुहिता। उग्र। राजपुत्री। राजदुहिता। राज। भोजपुत्री। भोजदुहिता। भोज। कुलपुत्री। कुलदुहिता। कुल। मेरुपुत्री। मेरुदुहिता। मेरु। रात्रेः किमियं प्राप्ते विभाषा आहोस्विदप्राप्ते। कथं च प्राप्ते कथं वाऽप्राप्ते। यदि खितीत्यनुवर्त्तते ततो नित्ये प्राप्ते। अथ नानुवर्त्तते ततोऽप्राप्ते। रात्रेरप्राप्ते विभाषा प्राप्ते नित्यो विधिः। रात्रिंमन्यः। अप्राप्ते विभाषा। रात्र्यटः। रात्रिमटः। नलोपो नञः। किमर्थं नञः सानुबन्धकस्य ग्रहणं क्रियते। नन्नस्येत्येवोच्यते। नस्येत्युच्यमाने। कर्णपुत्रः पर्णपुत्र इत्यत्रापि प्रसज्येत। नैष दोषः। अर्थवद्ग्रहणे नानर्थकस्येत्येवमत्र न भविष्यति ॥

नभ्याशं दूरमित्यस्येति समासः। दूरात्परिहर्त्तव्य इत्यर्थः। तिमिंगिलगिल इति। तिमेर्गिलगिल इति समासः। तिमिंगिलं गिलतीति खुस्। ततोऽनर्थ उपसंख्यानेन। रात्रेः प्राप्ते नित्य इति। पूर्वविप्रतिषेधेनेति भावः। नलो। किमर्थमिति। चादिषु नञनुबन्धक एव पठ्यतां स एव चेहानुक्रियतामिति भावः। अर्थवद्ग्रहण इति। उणादीनामव्युत्पन्नत्वान्नस्यानर्थकस्य व्युत्पत्तिपक्षाश्रयणे च नकारोऽपि न भवति किं तर्हि णकारः। व्युत्पत्तिपक्षे हि णत्वस्य पूर्वत्रासिद्धत्वान्नकारो भवति ॥

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति। अथक्रियमाणेपि सानुबन्धकग्रहणे क्षैणभ्रूणहत्यक इत्यत्र कस्मान्न भवति। प्रत्ययजित्वस्य वृद्धिस्वरयोश्चरितार्थत्वान्निपातजित्वस्यत्वनन्यार्थत्वात्। अवक्षेपेतिङीति। अवक्षेपो निन्दा॥ तस्मा॥ नञ एवेति। तस्मिन्निति निर्दिष्टे पूर्वस्येति वचनात्तस्मादिति तूच्यमाने पञ्चमीनिर्देशसामर्थ्यात्तस्मादित्युत्तरस्येति परिभाषोपस्थानादजादेरुत्तरस्य पदस्य नुम् भवति। सप्तमीनिर्देशोऽप्यागमसंबन्धे युज्यते। अवयवत्वादागमस्यावयविन आधारत्वात्संबन्धविवक्षायां तु षष्ठी भवति। तवर्गादिनिर्देश इति। तदो

एवमपि प्रश्नपुत्रो विश्नपुत्र इत्यत्रापि प्राप्नोति। नैष दोषः। अननुबन्धकग्रहणे न सानुबन्धकस्ये त्येवमस्य न भविष्यति। एवमपि वामनपुत्रः पामनपुत्र इत्यत्रापि प्राप्नोति। तस्मात् सानुबन्धकग्रहणं कर्तव्यम्। नञो नलोपे अवक्षेपे तिङ्युपसंख्यानम्। नञो नलोपेऽवक्षेपे तिङ्युपसंख्यानं कर्तव्यम्। अपचसि वै त्वं जाल्म। अपकरोषि वै त्वं जाल्म तस्मान्नुडचि। किमर्थं तस्मादित्युच्यते। नन्नुडचीत्येवोच्येत नुडचीतीयत्युच्यमाने नञ एव नुट् प्रसज्यते। एवं तर्हि पूर्वान्तः करिष्यते तत्रायमप्यर्थः। तदोः सः सावनन्त्ययोरिति तदोर्ग्रहणं न कर्तव्यं भवति तत्र हि तवर्गानिर्देश एतत्प्रयोजनमिह माभूत् अनेषः करोतीति। यावता पूर्वान्तोयं न दोषो भवति। नैवं शक्यम्। इह हि अनुत्स इति नलोपः प्रातिपदिकान्तस्येति नलोपः प्रसज्येत। नुम्वचनान्न भविष्यति। ङमुट् तर्हि प्राप्नोति तस्मात्परादिः कर्त्तव्यः परादौ च क्रियमाणे तस्मादिति च वक्तव्यम्। एकादिश्चैकस्य चादुक्। किमर्थमादुगुच्यते न अदुगेवोच्येत का रूपसिद्धिः। एकान्नविंशतिः। एकान्नत्रिंशत्। सवर्णदीर्घत्वेन सिद्धम्। न सिध्यति। अतो गुण इति पररूपत्वं प्राप्नोति। एवं तर्ह्यदुट् करिष्यते। अदुट् चाशक्यः कर्तुम्। आनुनासिक्यं हि न स्यात्। यद्वितस्य रेनुनासिके नुनासिको वेति। पदान्तस्येत्येवं तत्। किं पुनः कारणम्। पदान्तस्येत्येवं तत्। इह माभूत् व्रघ्नः बुध्नः। ब्रध्नातिदभ्नाग् इह्नावीति। एवं तर्ह्यनुट् करिष्यते। अनुट् चाशक्यः कर्तुम्। विभाषा ह्यानुनासिक्यम्। तेनेदमेव रूपं स्यात् एकान्नविंशतिरिति। इदं न स्यादेकाद्नविंशतिरिति। अस्तु तर्ह्यदुगेव ॥

रित्यपनीयतोरित्येवमनिर्देश इत्यर्थः। अनेषः करोतीति। परादावपि तु टि बहिरङ्गत्वात्तस्यासिद्धत्वात्तोः सः सावित्यपि क्रियमाणे सत्वं न भविष्यतीति चिन्त्यमेतत्। एकादिः। तुल्यायामपि संहितायां प्रतिपत्तिलाघवाय वृत्तिकारैरादुगाश्रितो भाष्यकारेण तु न्यायाददुगेवस्थापितः। एवं तर्हीति। अदुक् क्रियमाणे एकस्येति न वक्तव्यं नञः प्रकृतत्वादागमित्वादकारस्य च पदान्तत्वात्स्वरूपाप्रसङ्गः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहनिपाता आद्युदात्ता इति सहशब्द आद्युदात्तः। प्रकृतिस्वरस्येति। आन्तर्यतः प्राप्तस्य स्वरितस्येत्यर्थः। एवमपीति। तेनैतदाद्युदात्तत्वं सपुत्र इत्यादौ बहुव्रीहौ पूर्वपदप्रकृतिस्वरविधौ अनूद्यते। अव्ययीभावे तु समासान्तोदात्तत्वमेव भवति। ग्रन्थान्ताद्यस्त्वहीति। बहुव्रीहेः परत्वादिकल्पेन भाव्यमित्यव्ययीभाव एवोदाहरणम्। सकाष्ठमिति। काष्ठादयः शब्दाः कालविशेषवाचिनः उ

ननु चोक्तमतो गुण इति पररूपत्वं प्राप्नोतीति। नैष दोषः। अकारोच्चारणसामर्थ्यान्न भविष्यति। यदि तर्हि प्राप्नुवन् विधिरकारोच्चारणसामर्थ्याद्बाध्यते। सवर्णदीर्घत्वमपि तर्हि न प्राप्नोति। यं विधिं प्रत्यकारोच्चारणमनर्थकं भवति स विधिर्बाध्यते। यस्य तु विधेर्निमित्तमेव। नासौ बाध्यते। पररूपं च प्रत्यकारोच्चारणमनर्थकम्। सवर्णदीर्घत्वस्य पुनर्निमित्तमेव। सहस्य सः संज्ञायाम्। सहस्य हलोपवचनम्। सहस्य हलोपो वक्तव्यः॥ आदेशे हि सति स्वरदोषः। आदेशे हि स्वरदोषः। आन्तर्यत उदात्तानुदात्तयोः स्थाने स्वरित आदेशः प्रसज्येत। सपुत्रः। सभार्यः। सति हि लोपो वक्तव्यः। न वक्तव्यः। आद्युदात्तनिपातनं करिष्यते। स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति। एवमप्युपदेशिवद्भावो वक्तव्यः। समर्थ एव निपातनस्वरः प्रकृतिस्वरं बाधते। एवं समासस्वरमपि बाधेत सेष्टि सपशुबन्धमिति। ग्रन्थान्ताधिके च ग्रन्थान्ते वचनानर्थक्यमव्ययीभावेन कृतत्वात्। अव्ययीभावे चाकाल इत्येव सिद्धम्। यस्तर्हि कालोत्तरपदो ग्रन्थान्तस्तदर्थमिदं वक्तव्यम्। सकाष्ठं ज्योतिषमधीते। सकलं समुहूर्त्तम्। वोपसर्जनस्य। उपसर्जनस्यवावचनेस्त्वर्वप्रसङ्गो विशेषात्। उपसर्जनस्यवावचने सर्वप्रसङ्गः सर्वस्योपसर्जनस्य सादेशः प्राप्नोति अस्यापि प्राप्नोति सहयुध्वा सहकृत्वा। किं कारणम्। अविशेषात्। न हि कश्चिद्विशेष उपादीयते एवं जातीयकस्य सहशब्दस्योपसर्जनस्य सादेशो भवतीति। अनुपादीयमाने विशेषे सर्वप्रसङ्गः। सिद्धन्तु बहुव्रीहिनिर्देशात्। सिद्धमेतत्। कथं बहुव्रीहिनिर्देशात्। बहुव्रीहिनिर्देशः कर्तव्यः। एवमपि सहयुध्वप्रियः सहकृत्वप्रियः अत्र प्राप्नोति। बहुव्रीहौ यदुत्तरपदमित्येवं विज्ञास्यते। नन्वेतदपि बहुव्रीहावुत्तरपदम्॥

पाचारास्तदर्थे ग्रन्थे वर्त्तन्ते तत्रान्तवचने अव्ययीभावः। वोपस। नन्वेतदपीति। ननु बहुव्रीहौ यदुत्तरपदं तत्स्वरः सहशब्दो न भवतीति व्यवधानाद्युध्वकृत्वशब्दयोश्च बहुव्रीहावनुत्तरपदत्वात्। एवं तर्हि बहुव्रीहिग्रहणस्य कर्तव्यत्वेनास्थितत्वान्नैतद्विचारितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्यउपसर्जनानामिति। सहशब्दस्यतावदसत्ववाचित्वाद्द्वन्द्वाभावोऽन्यस्मिंस्तुसमासेसहशब्दउपसर्जनमेवेत्युपसर्जनग्रहण
सामर्थ्यात्सर्वोपसर्जनावयवः समासः उपसर्जनशब्देनमत्वर्थीयाकारान्तेनवोच्यते। प्रकृत्याऽगोत्रलहलेष्विति भाष्यवा
र्तिकदर्शनात्तत्रैकेनचित्प्रक्षिप्तं चरणेसब्रह्मचारिशब्देनचरणेनतुल्यउच्यतेअतएवचरणेसभावोविधीयतेतत्रब्रह्मणोग्र
हणात्स्वर्यमाणतानसंभवतीतिनिपातनमाश्रयितव्यमितिमत्वाप्रश्नः। ब्रह्मण्युपपदइति। अवयवनिपातनद्वारेणविशिष्टे

एवन्तर्हिबहुव्रीहौयदुपसर्जनमित्येवंविज्ञास्यते। बहुव्रीहौचयदुपसर्जनम्। बहुव्रीहिंप्रतिचयदुपसर्जनम्। सतर्हिबहुव्रीहिनिर्देशः कर्त्तव्यः। नकर्त्तव्यः। इहकश्चित्प्रधानानामेवसमासः कश्चिदुपसर्जनानामेव। कश्चित्प्रधानोपसर्जनानामेव। तद्यउपसर्जनानामेवसमासः तदुपसर्जनंतस्येदंग्रहणम्। अथवाऽकारोमत्वर्थीयः। तद्यथा। तुन्दोघाटइति। अथवामतुब्लोपोऽत्रद्रष्टव्यः। तद्यथा। पुष्यकायेषांतइमेपुष्यकाः कालकायेषां तइमेकालकाइति॥ प्रकृत्याशिषि॥ प्रकृत्याशिष्यगवादिषु॥ प्रकृत्याशिष्यगवादिष्विति वक्तव्यम्। इह माभूत्। स्वस्ति भवते सगवे सवत्साय सहलायेति॥ चरणेब्रह्मचारिणि॥ अत्रचरणेकिंनिपात्यते। ब्रह्मण्युपपदेसमानपूर्वेव्रतेकर्मणि चरेर्णिनिर्व्रतलोपश्च। ब्रह्मण्युपपदेसमानपूर्वेव्रतेकर्मणिचरेर्णिनिः प्रत्ययोव्रतलोपश्चनिपात्यते। समानेब्रह्मणिव्रतचारीसब्रह्मचारी॥ दृग्दृशवतुषु॥ दृग्दृशवतुषुदृक्षउपसंख्यानम्। दृग्दृशवतुषुदृक्षउपसंख्यानंकर्त्तव्यम्। सदृक्षासः प्रतिदृक्षासः। समः समि। नद्यृति। किमर्थमञ्चतिनद्यादिषुक्विब्ग्रहणंक्रियतेइहमाभूत्। समञ्चनम्। उपनहनम्। नैतदस्तिप्रयोजनम्। उत्तरपदइतिवर्त्तते। नचान्तरेणक्विपमञ्चतिनह्यादयउत्तरपदानिभवन्तितत्रान्तरेणक्विब्ग्रहणंक्विबन्तएवभविष्यति। तदादिविधिनाप्राप्नोति। अतउत्तरंपठन्ति। अञ्चतिनह्यादिषुक्विब्ग्रहणानर्थक्यंयस्मिन्विधिस्तदादावल्ग्रहणे। अञ्चतिनह्यादिषुक्विब्ग्रहणमनर्थकम्। किंकारणम्। यस्मिन्विधिस्तदादावल्ग्रहणे। अल्ग्रहणेह्येतद्भवति। नचेदमल्ग्रहणम् ॥

र्थेसमुदायस्यैवसाधुत्वमन्वाख्येयमितिमत्वासमुदायमेवनिपात्यत्वेनोपन्यस्यति। समानेसाधारणेब्रह्मणिवेदेयोव्रतंचरतिसमब्रह्मचारीत्यर्थः। व्रतलोपश्चेति। गतार्थत्वादप्रयोगएवव्रतशब्दस्यलोपः ब्रह्मशब्देनहितादर्थ्याद्व्रतमुच्यते। ब्रह्मणश्चसमानत्वात्समानोब्रह्मचारीत्युच्यते॥ दृग्दृश॥ सदृक्षासइति। दृशेः क्सोवक्तव्यः। जसआज्जसेरसुगित्यसुगागमः। समः। विचारस्य
समानत्वान्नह्यादिग्रहणंकृतम्। तदादिविधिनेति। अतः कृकमीत्यादौधातुग्रहणेदृष्टस्तदादिविधिरितिभावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं तर्हीति। अनल्ग्रहणेऽपि धातुग्रहणे तदादिविधिर्भवतीति ज्ञाप्यते स च तदन्तविधिवत् विशेषणविशेष्यभावसंनिपाते भवतीति तत्रातः कृकमीत्यत्र समासानुवृत्त्या समासाक्षिप्तमुत्तरपदं करोतिना विशेष्यत इति भवति तदादिविधिः सुड्विधौ तु विशेष्यासंनिधानात्तदादिविध्यभावेऽन्तरङ्गत्वं धातूपसर्गाश्रयत्वात्तु र उच्यते। अयस्कृदयस्कार इत्यपीति। अयमपीत्यर्थोऽन्यथा यस्कृदित्यत्रैव स्यात्। विष्वग्देवयोः॥ विषद्र्यङिति। उदात्तस्वरितयोरिति स्वरितोऽत्र त्यकारो भवति। ऊदनोर्देशे। अवग्रहे दोषः

एवं तर्हि सिद्धे सति यदच्छतिनञादिषु क्मिन्ग्रहणं करोति तज्ज्ञापयत्याचार्योऽन्यत्र धातुग्रहणे तदादिविधिर्भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्येत्यत्र। अयस्कृत्। अयस्कार इत्यपि सिद्धं भवति। विष्वक्॥ सहस्य सध्रिः॥ अद्रिसध्र्योरन्तोदात्तवचनं कृत्स्वरनिवृत्त्यर्थम्। अद्रिसध्र्योरन्तोदात्तत्वं वक्तव्यम्। किं प्रयोजनम्। कृत्स्वरनिवृत्त्यर्थम्। कृत्स्वरो माभूदिति। विषद्र्यङ् विषद्र्यञ्चौ विषद्र्यञ्चः। सध्र्यङ् सध्र्यञ्चौ सध्र्यञ्चः। तत्र छन्दसि स्त्रियां प्रतिषेधः। तत्र छन्दसि स्त्रियां प्रतिषेधो वक्तव्यः। विष्वाची घृताची। यदि छन्दसि स्त्रियां प्रतिषेध उच्यते। कथं साकद्रीची। एवं तर्हि छन्दसि स्त्रियां बहुलमिति वक्तव्यम्। घ्यन्तरुपसर्गेभ्योऽप ईत्। समाप ईत्वप्रतिषेधः। समाप ईत्वस्य प्रतिषेधो वक्तव्यः। समापं नाम देवयजनम्। अपर आह। ईत्वमनवर्णादिति वक्तव्यम्। समीपम् अन्तरीपम्। इह माभूत्। प्रापं परापम्। ऊदनोर्देशे। दीर्घोच्चारणं किमर्थम्। न उदनोर्देश इत्येवोच्येत। का रूपसिद्धिः। अनूपम्। सवर्णदीर्घत्वेन सिद्धम्। न सिध्यति। अवग्रहे दोषः स्यात्। अषष्ठ्य॥ अषष्ठ्यतृतीयास्थस्येत्युच्यते। तत्रेदं न सिध्यति। अन्यस्येदम् अन्यदीयम्। अन्यस्य कारको न्यत्कारक इति। एवं तर्ह्यविशेषेणान्यस्य दुक् कुक्कारकयोरित्युक्त्वा ततो वक्ष्यामि। अषष्ठ्यतृतीयास्थस्याशीराशास्थास्थितोत्सुकोतिरागेषु इति। कोः कत्तत्पुरुषेऽचि॥ कद्भावे त्रावुपसंख्यानम्। कद्भावे त्रावुपसंख्यानं कर्तव्यम्। कत्त्रयः किमिदं कत्त्रय इति। कुत्सितास्त्रयः कत्त्रयः। के वा त्रयो न बिभृयुः कत्त्रय इति। पृषोदरादीनि॥ पृषोदरादीनीत्युच्यते। कानि पृषोदरादीनि। पृषोदरप्रकाराणि। कानि पुनः पृषोदरप्रकाराणि। येषु लोपागमवर्णविकाराः श्रूयन्ते न चोच्यन्ते। अथ यथेति किमिदम् ॥

स्यादिति। न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यं यथालक्षणं पदं कर्तव्यमिति प्रदेशान्तरोक्तेनैतद्विरुध्यते। कोः कत्। के वा त्रय इति। किंशब्दस्याक्षेपार्थकस्य कद्भावः। पृषोद॥ कानीति। किमादिशब्दः प्रकारेऽथ व्यवस्थायामिति संदेहात्प्रश्नः। पृषोदरप्रकाराणीति। प्रकार आदिशब्दोऽव्यवस्थार्थे ह्यादिशब्दे यथोपदिष्टग्रहणमनर्थकं स्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकारवचने थालिति। येन प्रकारेणोपदिष्टानि तेन साधूनि भवन्तीत्यर्थः। अथेति। उपदेशः शास्त्रेण भवति स चैषां नास्ति सद्भावे वा किंनिपातनेनेति प्रश्नः। प्रागादर्शादिति। आदर्शादयः पर्वतविशेषाः। प्राग्विदेशे प्राक्दिक्शब्देभ्य इत्यस्तातेरुत्पन्नस्याञ्चेर्लुगिति लुक्। अस्मात्तरपदलक्षणा पञ्चमी। दक्षिणेनेति। दक्षिणस्मिन्देश इत्येनबन्यतरस्यामित्येनप्रत्ययेन पाद्वितीयेति द्वितीया। आचारमाह। कुम्भीधान्या इति कुम्भ्यामेव येषां धान्यं इत्यार्थेऽकुम्भीधान्यस्यादित्याह। अलोलुपा इति। अगृह्यमाणकारणा इति। दृष्ट

प्रकारवचने थाल्। अथ किमिदमुपदिष्टानीति। उच्चारितानि। कुत एतत्। दिशिरुच्चारणक्रियः। उच्चार्य हि वर्णानाह। उपदिष्टा इमे वर्णा इति। कैः पुनरुपदिष्टाः। शिष्टैः। के पुनः शिष्टाः। वैयाकरणाः। कुत एतत्। शास्त्रपूर्विका हि शिष्टिः वैयाकरणाश्च शास्त्रज्ञाः। यदि तर्हि शास्त्रपूर्विका शिष्टिः शिष्टिपूर्वकं च शास्त्रम्। तदितरेतराश्रयं भवति। इतरेतराश्रयाणि च न प्रकल्पन्ते। एवं तर्हि निवासतश्चाचारतश्च। स चाचार आर्यावर्त एव। क पुनरार्यावर्तः। प्रागादर्शात्प्रत्यक्कालकवनात्। दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम्। एतस्मिन्नार्यावर्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किंचिदन्तरेण कस्याश्चिद्विद्यायाः पारङ्गताः। तत्रभवन्तः शिष्टाः। यदि तर्हि शिष्टाः शब्देषु प्रमाणम्। किमष्टाध्याय्या क्रियते। शिष्टपरिज्ञानार्थाष्टाध्यायी। कथं पुनरष्टाध्याय्या शिष्टाः शक्या विज्ञातुम्। अष्टाध्यायीमधीयानोऽन्यं पश्यत्यनधीयानं येऽत्र विहिताः शब्दाः तान्प्रयुञ्जानं स पश्यति। नूनमस्य दैवानुग्रहः स्वभावो वा योऽयं न चाष्टाध्यायीमधीते। ये चास्यां विहिताः शब्दाः तांश्च प्रयुङ्क्ते। नूनमयमन्यानपि जानातीति। एवमेषा शिष्टज्ञानार्थाष्टाध्यायीति। दिक्शब्देभ्यस्तीरस्य तारभावो वा वक्तव्यः। दक्षिणतीरम्। दक्षिणतारम्। उत्तरतीरम्। उत्तरतारम्। वाचो वादे डत्वं वलभावश्चोत्तरपदस्येति। वाचो वादे डत्वं वक्तव्यं वलभावश्चोत्तरपदस्य इति वक्तव्यः। वाग्वादस्यापत्यं वाड्वलिः ॥

कारणमन्तरेणैव सदाचारानुवर्तिन इत्यर्थः। किंचिदन्तरेणेति। विनैवाभियोगादिना सर्वविद्यापारगाः ते हि साधुत्वपरिज्ञाने प्रमाणम्। तदुक्तम्। आविर्भूतप्रकाशानामनपप्लुतचेतसाम्। अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते। अतीन्द्रियानसंवेद्यान्पश्यन्त्यार्षेण चक्षुषा। ये भावान्वचनं तेषां नानुमानेन बाध्यत इति। दक्षिणतीरमिति। विशेषणसमासः ॥ राम॰ १०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडन्निति। षड्दन्ता अस्येति बहुव्रीहिः। वयसि दन्तस्य दत्रिति दन्नादेशः। धासुवेति। उत्वं विकल्प्यते तेन ष्टुत्वं नित्यमेव भवति उत्तरपदशब्देनात्र भाष्ये धाप्रत्ययो ऽभिधीयते। पद्यते ऽनेनार्थ इति पदं प्रत्यय उच्यते। उत्तरं पदमिति विशेषणसमासः। नानाधिकरणवाचीति। अर्थगतं बहुत्वं शब्दे समारोप्य धास्विति बहुवचननिर्देश इत्यर्थः। तेनाधिकरणविचाले चेति विहितस्य धाप्रत्ययस्य ग्रहणम्। षड्ढेति। न पदान्ताट्टोरनामिति ष्टुत्वप्रतिषेधः। दूडाश इति। दुःखेन दाश्यते नाश्यते दभ्यते इति खल्। दभूर्णेन लोपः। तत एव निपातनात्। दुर्ध्यं ध्यायतीत्यातश्चोपसर्गे इति कः। रोहावेति। लोडुत्तमद्विवचनम्। पीवोपवसनानामिति। पीवस् प

षष उत्वं दतृदशस्सूत्तरपदादेः ष्टुत्वं च। षष उत्वं वक्तव्यमुत्तरपदादेः ष्टुत्वं च वक्तव्यम्। षोडन्। षोडश। धासु वा।
धासु वेति वक्तव्यम्। उत्तरपदादेः ष्टुत्वं च वक्तव्यम्। षोढा। षड्ढा कुरु। अथ किमर्थं बहुवचननिर्देशः क्रियते न पु
नर्धायामित्येवोच्येत। नानाधिकरणवाची यो धाशब्दः तस्य ग्रहणं यथा विज्ञायेत। इह मा भूत्। षड् दधातीति षड्
धेति। दुरो दाशनाशदभध्येषु उत्वं वक्तव्यम्। उत्तरपदादेश्च ष्टुत्वम्। दूडाशः। दूणाशः। दूडभः। दूढ्यः। स्वरो रोहतौ छ
न्दस्युत्वम्। स्वरो रोहतौ छन्दस्युत्वं वक्तव्यम्। एहि त्वं जाये स्वो रोहावेति। पीवोपवसनादीनां छन्दसि लोपः। पीवो
पवसनादीनां छन्दसि लोपो वक्तव्यः। पीवोपवसनानाम्। पयोपवसनानां श्रियेदम्। ढ्रलोपे॥ पूर्वग्रहणं किमर्थ
म्। न तस्मिन्निति निर्दिष्टे पूर्वस्येति पूर्वस्य भविष्यति। न सिध्यति। न हि ढ्रलोपेनानन्तर्यमस्ति। अथेह कस्मान्न भ
वति करणीयं हरणीयमिति। नैष दोषः। नैवं विज्ञायते। ढ्रो लोपो ढ्रलोपः। ढ्रलोप इति। कथं तर्हि ढ्रो र्लोपो ऽस्मिन् सोयं
ढ्रलोप इति। यद्येवं नार्थः पूर्वग्रहणेन। भवति ढ्रलोपेनानन्तर्यम्। इदं तर्हि प्रयोजनम्। उत्तरपद इति वर्त्तते तेनान
न्तर्यमात्रे यथा स्यात्। औदुम्बरी राजा धूमाकीरथेन। पुनारूपाणि प्रकल्पयन्॥ सहि वहोरोदवर्णस्य॥ वर्णग्रहणं किम
र्थम्। नहि सहिवहोरोदस्येत्येवोच्येत। वृद्धावपि कृतायामोत्वं यथा स्यात्। उदवोढाम् उदवोढम् उदवोढेति ॥

यस इत्येतयोः सलोपः। श्रियेदमिति। श्रिये इदमिति स्थिते इकारलोपः। ढ्रलोपे॥ न हि ढ्रलोपेनेति। आचार्यदेशीयस्तत्पुरुषं मत्वा परिहरति। निर्दिष्टग्रहणस्य प्रयोजनमुक्तं शब्दे सप्तमीनिर्दिष्टे परिभाषोपस्थानं यथा स्यादर्थे मा भूच्छब्दो हि शब्दादूहिर्भूतः। अर्थस्तु बहिर्भूतो निःशब्दो हि बहिर्भाववाच्याश्रीयते॥ सहि॥ उदवोढामिति। वहेर्लुङि तामादिषु सिचि वृद्धौ सलोपे ढत्वधत्वष्टुत्वढलोपेषु ओत्वे च रूपम्। अत्रासति वर्णग्रहणे तादपि परस्तपर इत्यकारस्य तपरत्वाद्भिन्नकालस्य ग्रहणं न स्याद्वर्णग्रहणात्तु वर्णमात्रस्य भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· १०५ परत्वादोत्वमिति। ननु ढ्लोपनिमित्तमोत्वं तत्र पूर्वत्रासिद्धमिति ढलादीनामसिद्धत्वात्पूर्वं संप्रसारणेन भाव्यमिति युगपत्प्राप्त्यभावाद्विप्रतिषेधानुपपत्तिः। अत्राहुः। वर्णमात्रापेक्षत्वाड्ढत्वादीनामन्तरङ्गत्वात्प्रकृतिप्रत्ययविशेषाश्रयत्वात्संप्रसारणस्य बहिरङ्गत्वादसिद्धत्वात्पूर्वत्रासिद्धमित्यस्यानुपस्थानाड्ढत्वादिषु कृतेषु युगपत्प्राप्तिसद्भावाद्युक्तो विप्रतिषेधः। केचित्तु वर्णयन्ति।

अथावर्णग्रहणं किमर्थम्। इह माभूत्। ऊढ ऊढवानिति। नैतदस्ति प्रयोजनम्। भवत्येवात्रौत्वम्। अवर्णं कस्मान्न भवति। पूर्वत्वमस्य भविष्यति। इदमिह संप्रधार्यम्। ओत्वं क्रियतां पूर्वत्वमिति। किमत्र कर्तव्यम्। परत्वादोत्वम्। अन्तरङ्गं पूर्वत्वम्। एवं तर्हीदमिह संप्रधार्यम्। ओत्वं क्रियतां संप्रसारणमिति। किमत्र कर्तव्यम्। परत्वादोत्वम्। नित्यं संप्रसारणम्। कृतेप्योत्वे प्राप्नोत्यकृतेपि। ओत्वमपि नित्यम्। कथम्। कृतेऽपि संप्रसारणे प्राप्नोत्यकृतेऽपि। अनित्यमोत्वम्। न हि कृते संप्रसारणे प्राप्नोति। किं कारणम्। अन्तरङ्गं पूर्वत्वम्। यस्य लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्। न च संप्रसारणमेवौत्वस्य निमित्तं विहन्ति। अवश्यं लक्षणान्तरं पूर्वत्वं प्रतीक्ष्यम्। उभयोर्नित्ययोः परत्वादोत्वम्। ओत्वे कृते संप्रसारणे कृते संप्रसारणपरपूर्वत्वम्। तत्र कार्यकृतत्वात्पुनरोत्वं न भविष्यति॥ इको वहेऽपीलोः॥ अपील्वादीनामिति वक्तव्यम्। इह माभूत्। कुचिवहम्॥ चारुवहम्॥ उपसर्गस्य॥ अमनुष्यादिष्विति वक्तव्यम्। इह माभूत्। प्रसेवः। प्रसारः। प्रहारः। सादकारयोः कृत्रिमे। सादकारयोः कृत्रिम इति वक्तव्यम्। इहैव यथा स्यात्। एषोऽस्य प्रासादः। एषोऽस्य प्राकारः। कृत्रिम इति किमर्थम्। एषोऽस्य प्रकारः। एषोऽस्य प्रसाद इति। प्रतिवेशादीनां विभाषा। प्रतिवेशादीनां विभाषा दीर्घत्वं वक्तव्यम्। प्रतिवेशः प्रतीवेशः। प्रतिकारः प्रतीकारः॥

ढ्लोपस्यौत्वदीर्घत्वविधौ निमित्तत्वेनाश्रयणादत्र विषये ढत्वादीनां सिद्धत्वमनुमीयत इति भाष्यकारस्याभिप्रायः। ओत्वे कृत इति। ओत्वस्य पुनः प्रवृत्त्यभावे निमित्तसद्भावाद्दीर्घत्वं प्रवर्तिष्यते॥

CC-0. In Public Domain. Digitization by eGangotri

इत्ति॥ कथमिदमिति। उत्तरपदमिह सन्निहितं तत्र विशेषणविशेष्यभावे कामचारान्नीत्यनेन पूर्वमुदात्तरपदं विशेष्यते
तदा यस्मिन्विधिस्तदादावल्ग्रहण इति तकारादावुत्तरपद इति विज्ञायते पश्चाद्दद्इत्यनेन तकारो विशेष्यते दः संबन्धी
यस्तकारस्तदो विसर्गः संपद्यते। अथ तु दद्इत्यनेन पूर्वं तकारो विशेष्यते तदा यो दाशब्दसंबन्धित्वेन सिद्धस्तकारः सो
नूद्यते। चर्त्वस्य चासिद्धत्वाद्दादिभूतो नास्तीति सामर्थ्याद्दन्तभूतस्य ग्रहणमिति तकारान्त इत्येष पक्षोऽवतिष्ठते। तत्र नि

इत्ति॥ कथमिदं विज्ञायते दा इत्येतस्मिंस्तकारादाविति आहोस्वित्तकारान्त इति। किं चातः। यदि विज्ञायते त
कारादाविति। नीत्ता। वीत्ता। अत्र न प्राप्नोति॥ अथ विज्ञायते तकारान्त इति। सुदत्तं प्रतित्तमत्रापि प्राप्नोति॥
यथेच्छसि तथास्तु। अस्तु तावत्तकारादाविति। कथं नीत्ता वीत्ता। चर्त्वे कृते भविष्यति। असिद्धं चर्त्वं तस्यासिद्ध
त्वान्न प्राप्नोति। आश्रयात्सिद्धत्वं भविष्यति॥ अथवा पुनरस्तु तकारान्त इति। कथम्। सुदत्तं प्रतित्तम्। नैत
त्तकारान्तं किं तर्हि थकारान्तमेतत्॥ चौ॥ इहान्ये आचार्याः चौ प्रत्यङ्गस्य प्रतिषेधमाहुः। तदिहापि साध्यम्।
नैष दोषः। एतदेव ज्ञापयत्याचार्यः न चौ प्रत्यङ्गं भवतीति यदयं चौ दीर्घत्वं शास्ति॥ संप्रसारणस्य॥ इको ह्र
स्वात्संप्रसारणदीर्घत्वं विप्रतिषेधेन। इको ह्रस्वात्संप्रसारणदीर्घत्वं भवति विप्रतिषेधेन। इको ह्रस्वस्याव
काशः। ग्रामणिकुलम्। सेनानिकुलम्। संप्रसारणदीर्घत्वस्यावकाशः विभाषा ह्रस्वत्वं यदा न ह्रस्वत्वम्।
सोऽवकाशः। ह्रस्वप्रसङ्ग उभयं प्राप्नोति। कारीषगन्धीपुत्रः। कौमुदगन्धीपुत्रः। संप्रसारणदीर्घत्वं भवति
विप्रतिषेधेन। अथेदानीं दीर्घत्वे कृते पुनः प्रसङ्गाद्ध्रस्वत्वं कस्मान्न भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं
तद्बाधितमेवेति॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य तृतीये पादे
तृतीयमाह्निकम्॥ पादश्च समाप्तः॥

र्णीयाय प्रश्नप्रतिवचनोपन्यासः। नीत्तेति। दाशब्दस्य निष्ठायामच उपसर्गात्त इत्यन्तस्य तादेशे दकारस्य चर्त्वेऽपि च कृते रूपम्।
थकारान्तमिति। तत्र चर्त्वस्यासिद्धत्वात्तकारान्तत्वाभावः। क्वचित्प्रदत्तमिति पाठः सोऽयुक्त इक इत्यधिकाराद्दीर्घाप्रसङ्गात्॥
चौ॥ प्राचा दधीचेत्यादौ अन्तरङ्गत्वादेकादेशयणादेशयो कृतयोः अजन्तत्वाद्दीर्घो न प्राप्नोतीत्याह। इहान्य इति॥ इत्युपाध्या
यजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे षष्ठस्याध्यायस्य तृतीये पादे तृतीयमाह्निकम्॥ पादश्च तृतीयः समाप्तः॥ १०६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्योदयो निराकुर्याद्विद्यातिमिरं सदा॥

॥ इतिषष्ठाध्यायस्यतृतीयः पादः॥

॥ सहस्रांशुरिवाशेषंसुद्राकिरणराजिभिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥विद्योदयोनिराकुर्यादविद्यातिमिरं सदा॥

॥श्रीसंकष्टनाशिन्यैनमः॥

॥अथाङ्काधिकारआरभ्यते॥

श्वरा
॥श्रीविश्वैरायनमः॥

॥सहस्रांशुरिवाशेषंमुद्राकिरणराजिभिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥श्रीगणेशायनमः॥अङ्गस्य॥आ कुत इति।अवधिविशेषनिश्चयेऽप्रमाणमदृष्ट्वा पृच्छति। इतरोऽत्र वव्रश्चेत्यादिसिद्धिं प्रयोजनम
भिसन्धायाह।आसप्तमाध्यायपरिसमाप्तेरिति।इतरोऽस्मिन्पक्षे गौरवमुद्भावयितुमाह।यदि तर्हीति।ननु मताङ्गस्येत्यनेनाङ्गा
धिकारविहिते कार्ये प्रतिषिध्यमान इति भावः।ननु मतान्तस्मिन्निति पाठे तूभयथा दोषप्रसङ्गाल्लुग्ग्रहणं कर्तव्यमेव। उरदत्व
स्येति।वव्रश्चेर्लिटि द्विर्वचने कृते रेफस्य संप्रसारणं च प्राप्नोति। हलादिःशेषेण निवृत्तिश्च।तत्र हलादिःशेषात्संप्रसारणं विप्रतिषे
धेनेति पूर्वविप्रतिषेधादुभयेषां ग्रहणाद्वा संप्रसारणमुरदत्वम्। तस्याङ्गाधिकारे विधीयमानस्याङ्गे न प्रत्ययस्याक्षेपात्परनि

अङ्गस्य॥आ कुतोऽयमधिकारः।आसप्तमाध्यायपरिसमाप्तेरङ्गाधिकारः।यदि तर्ह्यासप्तमाध्यायपरिस
माप्तेरङ्गाधिकारः गुणो यङ्लुकोरिति यङ्लुग्ग्रहणं कर्तव्यम्।प्रागभ्यासविकारेभ्यः पुनरङ्गाधिकारे सति
प्रत्ययलक्षणेन सिद्धम्।अस्तु तर्हि प्रागभ्यासविकारेभ्योऽङ्गाधिकारः यदि प्रागभ्यासविकारेभ्योऽङ्गाधिकारः
वव्रश्च।वकारस्य संप्रसारणं प्राप्नोति।आसप्तमाध्यायपरिसमाप्तेः पुनरङ्गाधिकारे सति उरदत्वस्य स्थानिव
द्भावान्न संप्रसारणे संप्रसारणमिति प्रतिषेधः सिद्धो भवति॥स चेदानीमपरिहारो भवति॥

मित्तत्वात्तस्य स्थानिवद्भावान्न संप्रसारणे संप्रसारणमिति वकारस्य संप्रसारणनिषेधः सिध्यति।प्रागभ्यासविकारेभ्यस्त्वङ्गा
धिकारे उरदत्वस्यापरनिमित्तत्वान्न स्थानिवद्भावाप्रसङ्गः। तत्र यदा प्रतिषेधवचनात्परस्य नावयवाणः संप्रसारणं क्रियते पूर्व
स्य तु प्राप्तं संप्रसारणं संप्रसारणे परतः प्रतिषिध्यते तदैतदुदाहरणम्।यदा तु संप्रसारणभाविनि यणि परतः पूर्वस्य संप्रसा
रणप्रतिषेध इति पक्षः समाश्रीयते तदा वव्रश्चेति सिद्धमेवेत्यप्रयोजनमुरदत्वेऽङ्गाधिकारस्य। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अङ्गान्यत्वाच्च सिद्धमिति। सन्वल्लघुनि चङ्परे ऽनग्लोप इत्यत्रामीमयदित्यादौ सन्वद्भावादभ्यासलोपः प्राप्नोतीति चोदिते परिहा
रो ऽङ्गान्यत्वाच्च सिद्धमिति। सन्यङ्गानां मीमादीनामभ्यासलोप इत्युच्यते। एतान्यङ्गान्तराणीत्यभ्यासलोपाभावः। सति चाभ्यास
विकारे ऽङ्गाधिकारे ऽयं परिहार उपपद्यते नान्यथा। एष तु परिहारस्तत्रैव दूषयिष्यते। इह तु सिद्धवदुपन्यस्तः। किं पुनरि
ति। यदाङ्गस्येति शब्दस्वरूपमनपेक्षितार्थविशेषमधिक्रियते तदा षष्ठीस्थानेयोगेत्यस्याः परिभाषाया उपस्थानं नास्ति।
अनेकसंबन्धसंभवे संबन्धविशेषप्रतिपादकत्वात्तस्याः परिभाषायाः। यदा त्वर्थाधिकारपक्षस्तदा परिभाषोपस्था
नमिति द्वैतसंभवात्प्रश्नः। आचार्यदेशीयः परिभाषाश्रयेणाह। एवं भवितुमर्हतीति। चोदक आह। अङ्गस्येति स्थानष

यत्तदुक्तमङ्गान्यत्वाच्च सिद्धमिति। अस्तु तर्ह्यासप्तमाध्यायपरिसमाप्तेरङ्गाधिकारः। ननु चोक्तमिदानीं गु
णो यङ्लुकोरिति यङ्लुग्ग्रहणं कर्तव्यमिति। क्रियते न्यास एव। किं पुनरियं स्थानषष्ठी अङ्गस्य स्थान इति। ए
वं भवितुमर्हति। अङ्गस्येति स्थानषष्ठी चेत्पञ्चम्यन्तस्य चाधिकारः। अङ्गस्येति स्थानषष्ठी चेत्पञ्चम्यन्तस्य
चाधिकारः कर्तव्यः। अङ्गादित्यपि वक्तव्यम्। अनुच्यमाने ह्यतो भिस ऐस् भवतीति। अत इति पञ्चमी अङ्गस्ये
ति स्थानषष्ठी तत्राशक्यं विविभक्तिकत्वात् अत इति पञ्चम्या अङ्गं विशेषयितुम्। तत्र को दोषः अतो भिस ऐसिति
अकारान्तात्परस्य भिस्मात्रस्यैस्भावो भवतीति। इहापि प्रसज्येत। ब्राह्मणभिस्सा। ओदनभिस्सटा इति। अवयवषष्ठ्यादीनां चाप्रतिपत्तिः।

ष्ठीति चेदिति। चशब्दात्पञ्चम्यन्तस्य चेति विज्ञेयम्। तत्राशक्यं विविभक्तिकत्वादिति। ननु चात इति संबन्धादङ्गस्येत्यस्या
विभक्तिविपरिणामो भविष्यति। यथोच्चानि देवदत्तस्य गृहाण्यामन्त्रयस्वैनमिति। उच्यते। सर्वनामपरामर्शात्तत्र विपरिणामः
इह तु नान्तरीयकमुत्तरार्थत्वादङ्गस्येत्यस्योपस्थानं स्यादिति कुतो विभक्तिविपरिणामः। यद्येवं विशेष्यस्यासंनिधानादका
रान्तादिति कथं तदन्तविधिः। नेदमदसोरकोरिति प्रतिषेधात्सप्तमीशौण्डैरित्यादेर्ज्ञापकात्तदन्तविधिर्भविष्यति। क्वचिदका
रान्तपरस्येति पाठः। भिस्सा भिस्सटा शब्दावोदनतद्विकारयोर्वाचकौ। अवयवषष्ठ्यादीनामिति। आदिशब्दो निमित्तषष्ठीपरिग्रहा
र्थः। ठस्येक इत्यत्राङ्गस्य निमित्तं यष्ठस्तस्येक इत्याश्रीयते। ननु च षष्ठी स्थानेयोगेत्यत्रैव विचारितं तत्किमर्थं पुनर्विचार्यते।
उच्यते। ऊदुपधाया गोह इत्यत्र गोह इत्येषा षष्ठी स्यादित्येवं तत्र विचारितम्। इह त्वङ्गस्येत्यस्यां स्थानषष्ठ्यां विज्ञायमाना
यां तत्सामानाधिकरण्याद्गोह इत्यपि स्थानषष्ठी स्यादिति विचार्यते। ततश्च स्थानषष्ठ्या अन्त्ये ऽलुपसंहारादुपधाग्रहणाच्च
गोहो ऽन्त्यस्योत्वमुच्येत उपधामात्रस्य च।

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ प्र॰ २ आयं तावच्चोद्यं परिहर्तुमाह। सिद्धं त्विति। प्रत्ययोत्पत्तौ प्रकृतेर्निमित्तत्वेनाश्रयणात् प्रकृतिमन्तरेण प्रत्ययो नास्ति। प्रत्ययेप- ६ ४ १
रतोऽङ्गसंज्ञाविधानात् प्रत्ययानपेक्षमङ्गं नास्ति। तत्रान्यतरस्मिन्नुपादीयमानेऽव्यभिचारादितरस्याक्षेप इत्यर्थः। इत-
रस्तु सत्यपि परस्याक्षेपे स्थानषष्ठ्यां सत्यां संबन्धान्तरस्य विनाशं मत्वाऽऽह। किमतदिति। संबन्धषष्ठीनिर्देशश्चेति।
तत्रायं भावः। प्रतिसूत्रमङ्गस्येत्यस्य शब्दरूपस्योपस्थाने यत्र विशिष्टसंबन्धो निमित्तनिमित्तिभावादिकः संभवति
तत्र परिभाषाया उपस्थानाभावः। यत्रानेकसंबन्धसंभवस्तत्र संबन्धान्तरव्यवच्छेदफलायाः परिभाषाया उपस्थानम्।
तत्र संबन्धसामान्येऽनाश्रितविशेषेऽङ्गस्येति षष्ठी न तु स्थान्यादेशसंबन्ध एवेत्ययमर्थः। संबन्धषष्ठीनिर्देशश्चे-

अवयवषष्ठ्यादयश्च न सिध्यन्ति। तत्र को दोषः। शास इदङ्हलोरिति शासेश्चान्त्यस्य स्यादुपधामात्रस्य च। ऊ-
दुपधाया गोह इति गोहेश्चान्त्यस्य स्यादुपधामात्रस्य च। सिद्धं तु परस्परं प्रत्यङ्गप्रत्ययसंज्ञाभावात्। सिद्ध-
मेतत्। कथम्। यत् परस्परं प्रत्यङ्गप्रत्ययसंज्ञे भवतः। अङ्गसंज्ञां प्रति प्रत्ययसंज्ञा प्रत्ययसंज्ञां प्रत्यङ्ग-
संज्ञा। किमतो यत्परस्परं प्रत्यङ्गप्रत्ययसंज्ञे भवतः। संबन्धषष्ठीनिर्देशश्च। संबन्धषष्ठीनिर्देशश्चायं
कृतो भवति। अङ्गस्य यो भिस् शब्द इति। किं चाङ्गस्य भिस् शब्दः। निमित्तम्। यस्मिन्नङ्गमित्येतद्भवति। क-
स्मिंश्चैतद्भवति। प्रत्यये।

ति। अस्याधिकारस्य पारार्थ्याद्वक्ष्यमाणानेकसंबन्ध्यनुग्रहाय संबन्धसामान्यमुपादाय प्रवृत्ता षष्ठी प्रतियोगमुप तिष्ठमाना यथा-
संभवं संबन्धविशेषफलोपतिष्ठते। इह तु प्रतियोग्यनुपादानादपर्याप्ता विशेषमवगमयितुम्। तेनो यथा देवदत्तस्य संबन्धमा-
त्राश्रयेणोपात्ता षष्ठी पुत्रः पाणिः कम्बल इत्येवमादिभिर्विजातीयैः संबन्धिभिः संबध्यमाना विशेषावगतिनिमित्तं तां यात्येवम-
ङ्गस्येत्यपि। तत्र शब्दस्वरूपं वाधिक्रियतामर्थो वा संबन्धमात्रलक्षणः। उभयथा दोषाभावात्। तत्राङ्गस्य भिसा संबन्धान्त- एमः
रं न संभवतीति भिसा निमित्तनिमित्तिभावः समाश्रीयत इति ब्राह्मणभिस्सादावतिप्रसङ्गाभावः। ॥ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरोऽयथोक्तमर्थमप्रतिपद्यन्निमित्तनिमित्तिभावएवसंबन्धेऽङ्गस्येति षष्ठीत्यनेनोक्तमिति मत्वा पृच्छति।एवमपीति
।इतरः पूर्वोक्तेनाभिप्रायेणाह।अवयवषष्ठ्यादय इति।स्थानसंबन्धः सर्वथा परित्यक्त इति मत्वाऽऽह॥एवमपीति।स्था
नमपि संबन्ध एवेति।संबन्धनिमित्तत्वात्संबन्ध इत्यर्थः।यत्र षष्ठीति॥सामर्थ्याद्विषयविभागोऽवतिष्ठत इत्यर्थः।
उदुपधाया गोह इत्यवयवस्य उपादानादङ्गस्य गोह इत्युपधापेक्षा अवयवषष्ठी संपद्यते।अतो भिस ऐस् इत्यादौ तु निमित्तष
ष्ठी।संबन्धविशेषावधारणहेत्वभावे तु स्थानषष्ठीत्यर्थः।कानि पुनरिति ।अर्थवद्ग्रहणप्रत्ययग्रहणाभ्यां सर्वस्येष्टस्य सिद्धिं
मत्वा प्रश्नः।संप्रसारणदीर्घत्व इति।हल इत्यत्राङ्गस्येत्यस्यानुवृत्तस्यावृत्त्याऽङ्गस्येत्यनेन हल् विशेष्यते। संप्रसारणेन-

एवमप्यवयवषष्ठ्यादयोऽविशेषिताः भवन्ति।अवयवषष्ठ्यादयोपि संबन्ध एव।एवमपि स्थानमविशे
षितं भवति।स्थानमपि संबन्ध एव।एवमपि न ज्ञायते क्व स्थानषष्ठी क्व विशेषणषष्ठीति।यत्र षष्ठी अन्ययो
गं नापेक्षते सा स्थानषष्ठी।यत्र ह्यन्ययोगमपेक्षते सा विशेषणषष्ठी।कानि पुनरङ्गाधिकारस्य प्रयोजनानि
।अङ्गाधिकारस्य प्रयोजनं संप्रसारणाद्दीर्घत्वे।हल उत्तरस्य संप्रसारणस्य दीर्घत्वं भवति।हूतः।जीनः।संवी
तः।शूनः।अङ्गस्येति किम्।निरुतम्।दुरुतम्।नाम्यसनोर्दीर्घत्वे प्रयोजनम्। नामि दीर्घो भवति।अग्नीनाम्।वायू
नाम्।अङ्गस्येति किम्।क्रिमिणां पश्य।पामनां पश्य

चाङ्गं विशेष्यत इति तदन्तविधिर्भवतीत्ययमर्थो भवति।अङ्गावयवाद्धलो यदुत्तरं संप्रसारणं तदन्तस्याङ्गस्य दीर्घो भवती
ति।हूत इति।ह्वेञ् क्तः।जीन इति। ज्या वयोहानौ क्तः।ग्रहिज्येति सूत्रेण संप्रसारणं ल्वादिभ्य इति निष्ठातकारस्य नत्वम्।संवीत इति
।व्येञ् संवरणे क्तः।यजादित्वात्संप्रसारणम्।संप्रसारणान्ताङ्गग्रहणाद्विद्ध इत्यादौ दीर्घाभावः।निरुतमिति।वेञो निरुपसृष्ट
स्य निष्ठायां संप्रसारणम्।क्रिमिणामिति।क्रिमयोऽस्यां सन्तीति पामादित्वान्नप्रत्ययः।टाप् प्रत्ययः द्वितीयैकवचनम्।लाक्ष
णिकत्वादस्य न भवतीति चेन्न।प्रतिपदोक्तस्य नामोऽभावात्।षष्ठीबहुवचनस्यापि नुटि कृते लाक्षणिकमेव नामिति रूपम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ ३ दधिसनोतीति। सानुबन्धोऽयं धातुरिति चेन्न प्रत्ययोऽपि नकारेत्संज्ञकत्वात् सानुबन्धकः। धातोर्व्यभिचारी नकार इति नस्यै ६५१
वग्रहणं प्रसङ्गः। रचहिइति। हिनू निपातौ। नत्वाशिषि लोटो हेरन्यत्र स्यात्। तातङि ध्यानास्येन दर्भावाद् नो हेरिति हेर्लुकि।
कृते निपातयोरपि तु स्तोः प्रतिव्यक्ति लक्षणप्रवृत्तावभावेऽपक्रमेऽपि तातङ् प्रसङ्गः। तथा चोच्यते। विभाषिताः प्रयोजयन्ति
द्रोग्धा द्रोग्धा द्रोढा द्रोढेति। प्राणइति। प्रपूर्वस्यानितेर्घञि रुदन्तौ च रुनायां प्र आ न इति स्थिते मुक् प्रसङ्गः सार्वधातुकाधिकारे

सनि दीर्घो भवति। चिचीषति। तुष्टूषति। अङ्गस्येति किमर्थम्। दधि सनोति। मधु सनोति। लिङ्येत्वे प्रयोजनम्। ग्लेयात्। म्लेयात्। अङ्गस्येति किम्। निर्वीयात्। निर्यायात्। अतो भिस ऐस्त्वे प्रयोजनम्। वृक्षैः। प्लक्षैः। अङ्गस्येति किम्। ब्राह्मणभिस्सा। ओदनभिस्सटा। लुङादिष्वडाटौ प्रयोजनम्। अकार्षीत्। ऐहिष्ट। अङ्गस्येति किम्। प्राकरोत्। अवैहिष्ट। इयङ्वङ् युष्मदस्मदाताङामिनु डानेमु केहस्वयिदीर्घणि नत्वानि। इयङ्वङोः प्रयोजनम्। श्रियौ। श्रियः। भ्रुवौ। भ्रुवः। अङ्गस्येति किम्। श्र्यर्थं भ्र्वर्थम्। युष्मदस्मदोः प्रयोजनम्। साम आकम्। युष्माकम्। अस्माकम्। अङ्गस्येति किम्। युष्मत्साम। अस्मत्साम। तातङः प्रयोजनम्। जीवतु। जीवतात्। भवान्। अङ्गस्येति किम्। पचहितावत्त्वम्। पचतुतावत्त्वम्। जल्पहितावत्त्वम्। जल्पतुतावत्त्वम्। आमि नुट् प्रयोजनम्। किशोरीणाम्। कुमारीणाम्। अङ्गस्येति किमर्थम्। कुमारी आमित्याह। किशोरी आमित्याह। आने मुक् प्रयोजनम्। यजमानः। पचमानः। अङ्गस्येति किमर्थम्। प्राणः। के ह्रस्वः प्रयोजनम्। कुमारिका। किशोरिका। अङ्गस्येति किमर्थम्। कुमारी कायति कुमारीकः। यि दीर्घः प्रयोजनम्। चीयते। स्तूयते। अङ्गस्येति किमर्थम्। दधियानम्। मधुयानम्। भित्त्वं प्रयोजनम्। अद्भिः। अद्भ्यः। अङ्गस्येति किमर्थम्। अब्भारः। अब्भक्षः। नैतानि सन्ति प्रयोजनानि॥

ऽनपेक्षमाणे। ननु धातूपसर्गयोरेकादेशेनान्तरङ्गत्वाद्भाव्यं न तु ह्रस्वेनेति चेदस्ति। वार्णादाङ्गं बलीयस्त्वात्। तथा च प्र रामः
त्यय इत्यादौ सवर्णदीर्घत्वाभावः। अत्र तु लाक्षणिकत्वेनाधिमुको निरासो वक्तुं शक्यते। कुमारिकेति। अल्प्यादार्थे प्राग ३
वात्कः। कुमारीक इति। अत्रापि लाक्षणिकत्वात् कस्य ह्रस्वाभावः सिध्यति।

CC-0. In Public Domain. Digitization by eGangotri

क्वचिदर्थवद्ग्रहणमिति। अयं परिहारो निरुतं विद्धृत्यादौ संप्रसारणदीर्घत्वेन संभवति। ननु ङिमिणामित्यत्र नाम्नः प्रत्ययो
नाप्यर्थवान्। प्रत्ययस्तत्र यार्थस्य परस्य राम्नश्च याडिति दीर्घप्रसङ्गः। दधिसनोतीति सनोऽप्रत्ययत्वाद्दीर्घाभावः। निर्यायादिष्या
दौ संयोगादेरानर्थक्यादित्वाभावः। अडाटौ तु नायं परिहारः। ब्राह्मणभिस्सेत्यादौ भिसोऽप्रत्ययत्वादानर्थक्याच्चैसो प्रसङ्गः।
इयङुवङौ तु नायं परिहारः। वर्णग्रहणेषु परिभाषाद्वयस्यानुपस्थानाद्यथेको यणचीति इ ध्याशयती
त्यादावप्रत्ययेऽप्यनर्थकेऽप्यचि यणादेशो भवत्येवं श्र्यर्थमित्यादावियङुवङ्प्रसङ्गः। युष्मत्सामेति साम्नोऽप्रत्ययत्वादा
नर्थक्याच्चाकमो प्रसङ्गः। तुह्योर्निपातयोरप्रत्ययत्वात्तातङोऽप्रसङ्गः। एवं मामोऽप्रत्ययस्यानुकरणस्य नुडभावः। प्राण इ

कथम्। अर्थवद्ग्रहणप्रत्ययग्रहणाभ्यां सिद्धम्। अर्थवद्ग्रहणप्रत्ययग्रहणाभ्यामेवैतानि सिद्धानि। क
चिदर्थवद्ग्रहणेनानर्थकस्येत्येवं न भविष्यति। क्वचित्प्रत्ययग्रहणेऽप्रत्ययस्येति। अथवा प्रत्यय इति प्र
कृत्याङ्गकार्यमध्येष्ये। यदि प्रत्यय इति प्रकृत्याङ्गकार्यमधीषे। प्राकरोत्। उपैहिष्ट। उपसर्गात्पूर्वमडा
टौ प्राप्नुतः। सिद्धं तु प्रत्ययग्रहणे यस्मात्स विहितस्तदादितदन्तविज्ञानात्। सिद्धमेतत्। कथम्। प्रत्ययग्र
हणे यस्मात्स विहितस्तदादितदन्तस्य ग्रहणं भवतीति। एवं तु उपसर्गात्पूर्वमडाटौ न भविष्यतः॥

त्यत्रानस्याप्रत्ययत्वान्नुगभावः। भितत्त्वे यं परिहारो नोपपद्यते वर्णग्रहणात्। अत एवाव्यापकत्वमस्य परिहारस्य मत्वा
ह। अथवेति। सिद्धं त्विति। यत्र प्रत्ययो निमित्तत्वेनोपादीयते तत्र पूर्वः कार्यित्वेन गृह्यमाणो यस्मात्स विहितस्तदादिर्गृह्य
ते। एतच्चाङ्गसंज्ञासूत्रे योगविभागेन साधितम्। यत्र तु प्रत्यय एव कार्यित्वेनोपादीयते तत्र तदन्तग्रहणमिति द्वे एते परि
भाषे। अङ्गाधिकारप्रत्याख्यानाय प्रत्ययाधिकारे क्रियमाणे न किंचित्प्रयोजनं दृश्यते। अतो भिस ऐसित्यादिषु विविभ
क्तिकत्वाद्भिसादीनां प्रत्ययेन संबन्धो दुरुपपादः। हलद्गुतिसंप्रसारणदीर्घत्वं च निरुतं दुरुतमित्यादौ न परिहृतं भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हलः॥ अण्ग्रहणमिग्ग्रहणेन विच्छिन्नमिति मत्वाह। इहकस्मादिति। अविशेषणमिति। प्रकाशइत्यादावकारस्य दीर्घनिवृत्त्य
र्थमिकाराविशेष्यतइत्यर्थः। अवाचेति। चावित्यत्रेग्ग्रहणानुवर्तनादकारस्य दीर्घो प्रसङ्गः। यथेकः काशइत्यत्र विरोधाभा
वादणिकोः संबन्धएवं योगान्तरेपीति भावः। लक्ष्यनिबन्धनापेक्षावशादधिकाराणां निवृत्त्यनुवृत्तीइति मत्वाह। नैषदो
षइति। एवमपीति। केवलाण्ग्रहणानुवृत्तावपि दोषइत्यर्थः। तन्निवृत्तौ त्वच्यरिभाषोपस्थानादकारस्यापि दीर्घः सिद्धा
ति यथालक्षणमिति। माभूदत्र दीर्घत्वमित्यर्थः। अयानन्त्यानुप्रयोगविषयस्य कर्तृचेत्यादिप्रयोगः स्यादित्युच्यते नेतन्त्रा

हलः॥ इहकस्मान्न भवति। तृतीयः। अण्प्रकरणात् ऋकारस्याप्राप्तिः॥ अण्प्रकरणादकारस्य दीर्घत्वं न भवि
ष्यति। अणइति वर्तते। कप्रकृतम्। ढ्रलोपे पूर्वस्य दीर्घोणइति। तद्वैइकः काशइत्यनेनेग्ग्रहणेन व्यवच्छिन्नं
न शक्यमनुवर्तयितुम्। इग्ग्रहणस्य चाविशेषणत्वात्। अविशेषणमिग्ग्रहणमणइकइति। यदि तर्ह्य
विशेषणमिग्ग्रहणम्। चौ दीर्घो भवतीति। इह न प्राप्नोति। अवाचा। अवाचे। नैषदोषः। अण्ग्रहणमनुव
र्तते। इग्ग्रहणं निवृत्तम्। एवमपि कर्तृचः कर्तृचा कर्तृचे अत्र न प्राप्नोति। यथालक्षणमप्रयुक्ते। अथ यो भयं
निवृत्तम्। कस्मान्न भवति तृतीयइति। निपातनात्। किं निपातनम्। द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्या
मिति॥ नामि॥ किमर्थमामः सनकारस्य ग्रहणं क्रियते। न आमि दीर्घइत्येवोच्येत। केनेदानीं सनकारस्य भ
विष्यति। नुडयमामृभक्त आम्ग्रहणेन ग्राहिष्यते। अतउत्तरं पठति। नामि दीर्घ आमि चेत्स्यात्कृते दीर्घे न
नुड्भवेत्। नामि दीर्घ आमि चेत्स्यात्कृते दीर्घे न नुट् स्यात्। अग्नीनाम्। इन्द्रूनाम्

पिन्नस्म। अथवेति। चावित्यत्रोभयाननुवर्तनात्कर्तृचइत्यादिसिद्धिः॥ नामि॥ नुट्दीर्घयोरेकविषयत्वादुभयानुग्रहाय पू
र्वं नुटि कृते ऽव्यवधायकत्वादागमानां दीर्घो भविष्यत्यन्तरेण सनकारकनिर्देशमिति मत्वाह। किमर्थमिति। इतरश्चोदकबु
द्धिपरीक्षार्थमाह। केनेदानीमिति। चोदकः स्वाभिप्रायमाह। आमिति। नामि दीर्घइति। यो यं नामि दीर्घ उच्यते स यथा मीतिसू
त्रन्यासेनामि स्यात्तदा नित्यत्वान्नुटं बाधित्वा दीर्घप्रवृत्ते ह्रस्वान्तत्वाभावादग्नीनामित्यादौ नुट् न स्यादित्यर्थः। राम: ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्त्वनवकाशत्वादशक्यो नुट् बाधितुमिति मत्वाह। इदमिहेति। नन्वनवकाशत्वाद्धि प्रतिषेधानुपपत्तौ कथमुच्यते पर-
त्वान्नुडिति। एवं मन्यते ह्रस्वपि नुट् दीर्घो ऽनवकाशो। तत्राङ्गप्रत्यययोर्युगपन्निमित्तनिमित्तिभावाभावादवश्याश्रयितव्ये क्रमे वि
प्रतिषेधोपपत्तिः। वाक्यकारेण तु संभवमात्रमाश्रित्योक्तम्। द्वौ प्रसङ्गावन्यार्थावेकस्मिन्युगपत्प्राप्नुतः स विप्रतिषेध इति
। तत्रानवकाशत्वात्पुनः प्रसङ्गविज्ञानाद्दीर्घत्वम्। नित्यं दीर्घत्वमिति॥ तिसृणां च तसृणां नृणामित्यत्र सावकाशो नुट् अग्नी-
नामित्यत्र नित्यत्वाद्दीर्घेण बाध्यते। तत्र वचनादिति। भूतपूर्वगत्यैवेति भावः। वचनादिति। वचनात्स्यादिति चेद् यत्र दीर्घत्वं

इदमिह संप्रधार्यम्। दीर्घत्वं क्रियतां नुडिति। किमत्र कर्तव्यम्। परत्वान्नुट्। नित्यं दीर्घत्वम्। कृतेऽपि नुटि प्रा-
प्नोत्यकृतेऽपि। नित्यत्वाद्दीर्घे कृते ह्रस्वाश्रयो नुड् न प्राप्नोति। एवं तर्ह्याह। यं ह्रस्वान्तान्नुडिति। न च ह्रस्वान्तोऽस्ति।
तत्र वचनाद्भविष्यति। वचनाद्यत्र तन्नास्ति। नेदं वचनाल्लभ्यम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। किम्।
यत्र दीर्घत्वं प्रतिषिध्यते। तिसृणां च तसृणामिति। नैतदस्ति प्रयोजनम्। इहतावच्च तसृणामिति षट्चतु-
र्भ्यश्चेत्येवं भविष्यति। तिसृणामिति त्रिग्रहणमपि प्रकृतमनुवर्तते। क्व प्रकृतम्। त्रेस्त्रय इति। इदं त-
र्हि। त्वं नृणां नृपते जायसे शुचिः। नैकमुदाहरणं ह्रस्वग्रहणं प्रयोजयति। तत्र वचनाद्भूतपूर्वगतिर्विज्ञा-
स्यते। ह्रस्वान्तो यो भूतपूर्व इति। उत्तरार्थं तर्हि सनकारग्रहणं कर्तव्यम्। नोपधायाश्च चर्मणाम्॥ नोपधा-
या नामि यथा स्यात्। इह मा भूत्। चर्मणाम्। नामि दीर्घ आमि चेत्स्यात्कृते दीर्घे न नुड्भवेत्। वचनाद्यत्र तन्ना-
स्ति नोपधायाश्च चर्मणाम्॥

नास्ति तत्र वचनस्य चरितार्थत्वात्सांप्रतिकसद्भावे भूतपूर्वगत्याश्रयणस्यायुक्तत्वादग्नीनामित्यादौ कृते दीर्घे नुडनस्या-
दित्यर्थः। तिसृणामित्यादौ नुटोऽन्यथासिद्धत्वाद् ह्रस्वलक्षणो नुडनवकाश एवेति दर्शयन्नाह। नैकमुदाहरणमिति। अन्यथा
नृनद्यापो नुडिति ब्रूयात्। तदेवं वचनसामर्थ्याद्भूतपूर्वगत्या नुटः सिद्धत्वान्नार्थः सनकारकनिर्देशेनेति स्थिते प्रयोज-
नान्तरोपन्यासः। उत्तरार्थमिति। नोपधायाश्चेति। चपाद्धस्वार्थे। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इन्हन्॥ हनः क्वाविति। वृत्रं हतवान् ब्रह्मभ्रूणेति क्विप्। तत्र अनुनासिकस्य क्विझलोरिति दीर्घत्वं सर्वत्र प्राप्नोति। सर्वनामस्थाने तु नोपधायाः सर्वनामस्थाने चासंबुद्धाविति प्राप्नोति। तत्र सर्वनामस्थाने वृत्रहणावित्यादौ नियमविधानसामर्थ्याद्यद्यप्युभयोर्दीर्घनिवृत्तिः सिध्यति। तथापि सर्वनामस्थानप्रकरणात्सर्वनामस्थान एव दीर्घस्य नियमेन निवृत्त्याभाव्यं नान्यत्रेति वृत्रहणीति सप्तम्येकवचने विभाषाङिश्योरित्यल्लोपाभावपक्षे नुनासिकलक्षणो दीर्घप्रसङ्गः। सर्वत्र च हनः क्वौ दीर्घत्वप्रसङ्गान्न क्वचिदल्लोपः स्यात्। इन्नरत्सु यथोक्तमभिप्रायमप्रतिपद्य दूषणार्थं सर्वनामस्थानमुपन्यस्यति। वृत्रहणाविति। अत्र चेद्दीर्घत्वं म-

इन्हन्पूषार्यम्णां शौ॥ सौ च॥ हनः क्वावुपधादीर्घत्वप्रसङ्गः॥ हनः क्वावुपधालक्षणं दीर्घत्वं प्राप्नोति। अनुनासिकस्य क्विझलोः क्ङितीति तस्य प्रतिषेधो वक्तव्यः। वृत्रहणौ वृत्रहण इति। नियमवचनात्सिद्धम्। इन्हन्पूषार्यम्णां शौ सौ चेत्येतस्मान्नियमवचनाद्दीर्घत्वं न भविष्यति। नियमवचनात्सिद्धमिति चेत्सर्वनामस्थानप्रकरणे नियमवचनादन्यत्रानियमः। नियमवचनात्सिद्धमिति चेत्सर्वनामस्थानप्रकरणे नियमवचनादन्यत्रानियमो न प्राप्नोति। क्वान्यत्र। ब्रह्महणि। भ्रूणहनि। एवं तर्हि दीर्घविधिर्य इन्हन्प्रभृतीनां तं विनियम्य सुटीति सुवि ह्यनाद्दीर्घविधिर्य इहेन्प्रभृतीनां तं सर्वनामस्थाने विनियम्य इन्हन्पूषार्यम्णां सर्वनामस्थाने दीर्घो भवति। किमर्थमिदम्। नियमार्थम्।

न्यसेतन्न। यतो नियमवचनात्सिद्धमिति नियमविधानसामर्थ्यात्सर्वस्य दीर्घस्य व्यावर्तनमित्यर्थः। इदानीं चोदकः स्वाभिप्रायं प्रकाशयन्नाह। नियमवचनात्सिद्धमिति चेदिति। एवं तर्हीति। अत्र तु योगविभागः क्रियते। तत्राद्येन नियमेनान्तरङ्गोऽप्यनु-नासिकलक्षणो दीर्घो निवर्त्यते। द्वितीयेन वृत्रहणावित्यादौ सर्वनामस्थानलक्षणः। सुडग्रहणं सर्वनामस्थानोपलक्षणमिति प्रसादे प्रोपविशिर्गृह्यते। इति प्रश्नो हेतौ। स च भिन्नक्रमः। नवृद्धेरित्यनेन च संबध्यते।

CC-0. In Public Domain. Digitization by eGangotri

शावेवेति। अस्मिन्नियमे स्थिते सौ चेति सूत्रं विध्यर्थं सौ संपद्यते। यदा च शौ सौ चेति योगपद्येन अपेक्ष्यते तदा प्रत्ययद्वयाश्रयो नियमः क्रियते। भाष्यकारस्तु योगपद्याश्रयं नियमं क्रममाश्रित्य व्याचष्टे। ततः साविति। एवं योगविभागेन चोद्यं परिहृत्य एकस्मिन्नपि योगे परिहर्तुमाह। शास्मीति। शास्मि उपदिशामि तं प्रकारं येनैकयोगेपि दोषाभावः। पूर्ववत्सुटीत्येकदेशेन सर्वनामस्थानं लक्ष्यते। सर्वनामस्थानग्रहणं निवर्त्य अनाश्रितसर्वनामस्थानत्वविशेषे प्रत्ययत्वमात्राश्रयेण शौ नियमं कुरु। असत्यपि शाब्दीयेऽधिकारेऽपेक्षाकृतः संबन्धः स्यादित्यत इति निवृत्त्यर्थमाह। असमीक्ष्येति। सर्वनामस्थानं विशेषमनपेक्ष्य शौ नियमः क्रियमाणः प्रत्ययत्वेन तुल्यजातीये सर्वत्र प्रत्ययान्तरे दीर्घनिवृत्तिं करोतीत्यर्थः। इहापीति। विशेषानाश्रयणात्। वृत्रहेवाचरतीति

वृत्रहन्नू षार्यमणां सर्वनामस्थान एव नान्यत्र। शौ नियमं पुनरेव विदध्यात्। ततः शौ। शावेव सर्वनामस्थाने नान्यत्र। ततः सौ। सावेव सर्वनामस्थाने नान्यत्र। भ्रूणहनीति तथा स्यन्न दुष्येत्। तथा स्य भ्रूणहनीति न दोषो भवति। शास्मि निवर्त्य सुटीत्यविशेषे शौ नियमं कुरुवाप्यसमीक्ष्य॥ अथवा निवृत्ते सर्वनामस्थानप्रकरणे अविशेषेण शौ नियमं वक्ष्यामि॥ इन्नहन्पूषार्यमणां शावेव। ततः सौ। सावेव। इहापि तर्हि नियमान्न प्राप्नोति। वृत्रहायते॥ दीर्घविधेरुपधानियमान्मे हन्तियि दीर्घविधौ च न दोषः॥ उपधालक्षणदीर्घस्य नियमः। न चैतदुपधालक्षणं दीर्घत्वम्।

कयङ्। अकृत्सार्वधातुकयोरिति दीर्घः। दीर्घविधेरिति। इह यदि येन नाप्राप्ते इत्याश्रीयते तदाऽनुनासिकलक्षणस्यैव दीर्घस्य नियमेन व्यावृत्तिः स्यात्। अथ मध्येऽपवादा इत्याश्रीयते तथापि सर्वनामस्थाने चासंबुद्धावित्यस्यैव व्यावृत्तिप्रसङ्गः इत्यनपेक्षितविशेषं दीर्घत्वमात्रं निवर्त्यते। तत्रोपधाग्रहणानुवृत्त्याऽजन्तलक्षणदीर्घत्वस्याकृत्सार्वधातुकयोरिति प्राप्तस्य नियमेनाव्यावर्तनाद्दोषाभावः॥ हन्तेर्यः हन्तियस्तस्मिन्यो दीर्घविधिस्तत्र न दोषः। क्वचित्तु हन्तेति निपातोऽभिमुखीकरणार्थः पठ्यते। यिग्रहणस्य चोपलक्षणार्थत्वाद्दण्डीभूतवृत्त्यादौ चावपि न दोषः॥ ॥ रामः ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकस्मिन्नपियोगेसर्वनामस्थानानुवृत्तावपिदोषंपरिहर्तुमाह।सुट्यपिवेति।अपिशब्दोभिन्नक्रमः।अप्रक्तनप्रतिषेधइ त्यनेनसंबध्यते।इहहिद्विविधंसर्वनामस्थानंशिःसुट्च।शिर्नपुंसकसंबन्धी।सुट्स्त्रीपुंसयोः।सुडनपुंसकस्येतिवचनात्।तत्रतुल्यजातीयापेक्षेनियम आश्रीयमाणेव्यवच्छेद्याभावादनर्थकएवनियमःस्यादितिनियमविधिसामर्थ्यात्सर्वस्य दीर्घस्यनियमेनव्यावृत्तिरित्यर्थः।यस्यहीति।यस्यनपुंसकस्यसंबन्धिनिशौनियमःक्रियतेसुटिसर्वनामस्थानसंज्ञकेत त्तन्नपुंसकंनास्त्यनपुंसकस्येतिवचनात्।तेनकारणेनतत्रसर्वनामस्थानेसुटिनियन्तव्यंदीर्घत्वंनसंभवतीतिसामर्थ्यादवि

सुट्यपिवाप्रक्तेनवकाशः शौनियमोऽप्रक्तनप्रतिषेधे।अथवानुवर्तमानेसर्वनामस्थानप्रकरणेऽनव काशःशौनियमःअप्रक्तस्यापिदीर्घत्वस्यनियामकोभविष्यति।कथम्।यस्यहिशौनियमःसुटिनैतत्ते ननतत्रभवेद्धिनियम्यम्।।यस्यहिशिःसर्वनामस्थानंनतस्यसुट्।यस्यचसुट्सर्वनामस्थानंनचतस्यशिः।तत्रसर्वनामस्थानप्रकरणेनियम्यंनास्तीतिकृत्वाऽविशेषेणशौनियमोविज्ञास्यते।दीर्घविधिर्यइहे त्थम्भूतीनांतंहिनियम्यसुटीतिसुविद्वान्।।शौनियमंपुनरेवविदध्याद्गुणहनीतितथास्यनदुष्येत्।।शास्ति निवर्त्यसुटीत्यविशेषेशौनियमंकुरुवाप्ययसमीक्ष्य।।दीर्घविधेरुपधानियमान्मेहन्तिपिदीर्घविधौच नदोषः।।सुट्यपिवाप्रक्तेऽनवकाशः शौनियमोऽप्रक्तनप्रतिषेधे।।यस्यहिशौनियमःसुटिनैतत्ते ननतत्रभवेद्धिनियम्यम्।

शेषेणनियमआश्रीयते।एतदुक्तंभवति।यदितुल्यजातीयापेक्षोनियमआश्रीयतेतदाशेर्नपुंसकलिङ्गसंबन्धित्वंसर्वना मस्थानत्वंचास्तीतितदाश्रयेनियमेविज्ञायमानेऽयमर्थःस्यात्।इन्हन्पूषार्यम्णांनपुंसकानांशावेवसर्वनामस्थानेदी र्घोभवतिनसर्वनामस्थानान्तरेइति।नचतेषांनपुंसकानामन्यत्सर्वनामस्थानमस्तीतिनियमविधानसामर्थ्यात्तुप्र करणापन्नंसर्वनामस्थानत्वंसामर्थ्यप्रापितसंनिधानंचनपुंसकत्वमुभयमप्यविशेषादनपेक्ष्यप्रत्ययमात्रेस्त्रीपुं नपुंसकसंबन्धिनिदीर्घत्वव्यावृत्तिःक्रियतइतिसर्वमिष्टंसिद्धम्।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्वसन्तस्य चाधातोः॥ अत्वसन्तस्येति। सूत्रन्यासप्रदर्शनपरमिदम्। अत्वन्तविषयं तु वचनम्। अननुबन्धकग्रहणे
इति। उकारस्यानुबन्धस्य सत्त्वे। पात्तत्वात् तद्व्यतिरिक्तानुबन्धाभावेनाननुबन्धकत्वमवसेयम्। भाष्यकारस्त्वनुबन्धसत्त्वा
भावेऽननुबन्धकव्यपदेशो युक्तः। इह चानुबन्ध उकारोऽस्तीति मत्वाह। अननुबन्धकग्रहण इत्युच्यत इति। परिभाषा
न्तरमाश्रित्याह। एवं तर्हीति। स एवानुबन्धो यस्यासौ तदनुबन्धकः। स चान्यश्चानुबन्धो यस्य सोऽतदनुबन्धकः॥
यद्येवं क्तक्तवतोरपि ककारानुबन्धसद्भावाद्ग्रहणं न प्राप्नोति। उच्यते। आनन्तर्यलक्षणेऽनुबन्धानुबन्धवतोः संब-

अत्वसन्तस्य चाधातोः॥ अत्वसन्तस्य दीर्घत्वे पित उपसंख्यानम्। अत्वसन्तस्य दीर्घत्वे पित उपसंख्यानं कर्तव्यम्। गोमा
न्। यवमान्। किं पुनः कारणं न सिध्यति। अननुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम्। अननुबन्धकग्र
हणे सानुबन्धकग्रहणं नेत्येवं पितो न प्राप्नोति। अननुबन्धकग्रहण इत्युच्यते। सानुबन्धकस्येदं ग्रह
णम्। एवं तर्हि तदनुबन्धकस्य ग्रहणे अतदनुबन्धकस्य ग्रहणं नेत्येवं पितोऽपि न प्राप्नोति। तत्तर्हि उपसं
ख्यानं कर्तव्यम्। न कर्तव्यम्। पकारस्य लोपे कृते नानुबन्धं भवति। अत्वन्तमेव। यथैव तर्हि पकारलोपे कृते ना
नुबन्धमेवमुकारलोपे कृते नात्वन्तम्। ननु च भूतपूर्वगत्या भविष्यति अत्वन्तम्। यथैव तर्हि भूतपूर्व
गत्यात्वन्तमेवमनुबन्धमपि। एवं तर्हि आश्रीयमाणे भूतपूर्वगतिः॥ अत्वन्तं चाश्रीयते नानुबन्धम्।

न्धे तवतु शब्दस्य ककारोऽनुबन्धो न त्व— तु शब्दस्य। मतुपि तु पकारोऽनु पूर्वशब्दस्यानन्तर इति तेनासावनुबन्धवानिति
तत्रैव दोषः। पकारलोप इति। अयमत्रार्थः। पकारोऽनुबन्धः प्रत्ययस्य न तु तदेकदेशस्य। न तत्र प्रत्ययैकदेशग्रहणाद
व्यापार एव पूर्वोक्तयोः परिभाषयोः। श्रूयमाणश्च वर्णो रूपं भिन्द्यात्। न च पकारः श्रूयते। इतरस्तु श्रूयमाणस्ये
व भेदकत्वे उकारोऽपि लोपान्न भेदकः स्यादिति मत्वाह। यथैवेति। इतरस्तु भेदकत्वेनाश्रितस्य लुप्तस्यापि भू
तपूर्वगत्यास्त्युपारूढस्य भेदकत्वं युक्तं मत्वाह। भूतपूर्वगत्येति। इतरस्तूभयोस्तुल्यं भूतपूर्वत्वं मत्वाह।
यथैवेति। इतरो भेदकत्वेनाश्रीयमाणे भूतपूर्वगतिर्युक्ता नान्यत्रेति मत्वाह। एवं तर्हीति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्तु यथोपलब्धि स्मरणं न्याय्यं न च मतुपः क्वचिदप्यत्वन्तत्वमुपलब्धमिति मत्वाह। न सिध्यतीति। सानुबन्धकप्रस्तावात्।
सानुबन्धके चित्युक्तम्। रूपनिर्ग्रहश्चेति। रूपनिश्चय इत्यर्थः। नान्तरेण लौकिकमिति। अव्यभिचाराल्लौकिकस्य प्रयोगस्य प्रा-
धान्येनोपादानम्। तदसंभवे तु शास्त्रीयप्रसङ्गाश्रय इत्याह। तस्मिंश्चेति। उपदेशे चैतदिति। प्रकारे सत्यत्वन्तत्वाभावात्। अत-
स्त्वेकदेशं यतमाश्रित्य यद्यतोऽस्मात्तदर्थ इत्यत्र ग्रहणे प्राप्ते तदनुबन्धकपरिभाषया निवृत्तिः क्रियते। यदि पुनरिति। सूत्रे उका-
रमनुच्चार्येत्यर्थः। तत्राच्छब्दस्य केवलस्य शास्त्रेऽभावात्प्रत्ययैकदेशग्रहणं भविष्यतीति नार्थः पितउपसंख्यानेन। जगदि-
ति। द्युतिगमिजुहोतीनां द्वे चेति क्विप्यागमः काविति मलोपः। जनं गच्छतीति क्विप्चेति क्विप्। पचन्निति। अच्छब्दोऽत्रार्थवा

न सिध्यति। इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते। यत्रास्यैतद्रूपमिति। रूपनिर्ग्रहश्च
शब्दस्य नान्तरेण लौकिकं प्रयोगम्। तस्मिंश्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः
प्रयोग उपास्यते। कोऽसौ। उपदेशः। उपदेशे चैतदनुबन्धं नात्वन्तम्। यदि पुनरच्छब्दं गृहीत्वा दीर्घत्वमुच्यते।
नैवं शक्यम्। इहापि प्रसज्येत॥ जगत्॥ जनगत्। अर्थवद्ग्रहणेनानर्थकस्येत्येवमेतस्य न भविष्यति। इहा-
पि तर्हि न प्राप्नोति। कृतवान्। भुक्तवानिति। क्व तर्हि स्यात्। पचन्। यजन्। न वै अत्रेष्यते। अनिष्टं च प्राप्नोति।
इष्टं च न सिध्यति। तस्मादुपसंख्यानं कर्तव्यम्। अज्झनगमां सनि॥

नित्यत्रैव दीर्घप्रसङ्गः। तस्माद्व्याप्त्यतिव्याप्तिलक्षणदोषद्वयप्रसङ्गादच्छब्दं गृहीत्वा दीर्घो विधातुमशक्य इति पित
उपसंख्यानं कर्तव्यमेव। अन्ये त्वसे वान्तशब्दसंबन्धो न त्वतु नैवेति व्याचक्षाणा मतुपो ग्रहणं साधयन्ति। अपरे त्वन्तग्रह-
णात्सामर्थ्यलब्धे तदन्तविधावधिकत्वात् यथाकथंचित्तदन्तता गृह्यत इति मन्यमाना मतुपो ग्रहणं व्याचक्षते॥ अज्झनग-
मां सनि॥ इह बहवो गमयः। गम्लृ गताविति धातुः। णौ गमिरबोधने सनि चेति णिचो देशो गमिः। इण्वदिक इति वक्तव्यमि-
तीकादेशः। इङश्चेति इङादेशश्च॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्राविशेषात्सर्वप्रसङ्गे सत्याह। गमेर्दीर्घत्व इति। इक्इण्इङ् इत्यागमिरेक एवादेश इङ्ङो पलक्ष्यते। तथा च भाष्यकृत्स्वरतीव
क्ष्यति। अचः स्थाने यो हनिगमी इति। एवं चेणि गादेशस्यापि गमेरात्मनेपद इङ्भावे दीर्घत्वे न भाव्यमित्याहुः। संजिगांसदिति। सं
पूर्वाद्गमेः सन्। छान्दसत्वादिड्भावः। लङ्। सकर्मकत्वात्परस्मैपदम्। बहुलं छन्दस्यमाङ्योगेपीत्यड्भावः। तस्मादिङ्ग्र
हणमिति। भाषायामनादेशस्य गमेर्दीर्घनिवृत्त्यर्थमित्यर्थः। छन्दसि तु वर्णव्यत्ययेन ह्रस्वस्य दीर्घः। ये तु इङ्ग्रहणमुपलक्षणा
र्थमिच्छन्ति तन्मते न इणादेशस्य गमेश्छन्दसि प्रयोगः। योगविभाग इति। अचः सनीत्येको योगः। तत्र दीर्घश्रुत्याच्चरिभाषोप

गमेर्दीर्घत्वे इङ्ग्रहणम्। गमेर्दीर्घत्वे इङ्ग्रहणं कर्तव्यम्। इङ्को गमेरिति वक्तव्यम्। इह माभूत्। संजिगं
सते वत्सो मात्रेति ।। अग्रहणे ह्यनादेशस्यापि दीर्घप्रसङ्गः। अक्रियमाणे हीङ्ग्रहणेऽनादेशस्यापि दी
र्घत्वं प्रसज्येत। संजिगंसते वत्सो मात्रेति। न वा छन्दस्यनादेशस्यापि दीर्घत्वदर्शनादिङ्ग्रहणानर्थक्यम्।
न वा इङ्ग्रहणं कर्तव्यम्। किं कारणम्। छन्दस्यनादेशस्यापि दीर्घत्वदर्शनात्। छन्दस्यनादेशस्यापि गमे
र्दीर्घत्वं दृश्यते। स्वर्गं लोकं संजिगांसत्। छन्दस्यनादेशस्यापि गमेर्दीर्घत्वदर्शनादिङ्ग्रहणमनर्थकम्।
यथैव तर्हि छन्दस्यनादेशस्यापि गमेर्दीर्घत्वं भवति। एवं भाषायामपि प्राप्नोति। तस्मादिङ्ग्रहणं कर्त
व्यम्। न कर्तव्यम्। योगविभागः करिष्यते। अचः सनि। अजन्तानां सनि दीर्घो भवति। ततो हनिगम्योः। हनि
गम्योश्च सनि दीर्घो भवति। अच इत्येव। अचः स्थाने यो हनिगमी। अथोपधाग्रहणमनुवर्तते उताहो न।
किं चातः। सनि दीर्घ उपधाधिकारश्चेद् व्यञ्जनप्रतिषेधः। सनि दीर्घ उपधाधिकारश्चेद् व्यञ्जनस्य प्रति
षेधो वक्तव्यः। चिचीषति। तुष्टूषतीत्येवमर्थम्। एवं तर्हि निवृत्तम्। अनधिकारे उक्तम्। किमुक्तम्। हनि
गमि दीर्घत्वेऽजग्रहणमिति।

स्थानादजन्तस्य दीर्घे सिद्धे अज्ग्रहणमुत्तरार्थं विज्ञायते। अच् स्थाने इति। संभवाद्गमिरेवात्र विशेष्यते न तु हनिः। स हनि
ईशात्तूभयोपादानम्। चिचीषतीति। अत्र चकारस्य दीर्घः प्राप्नोति। उपधाधिकारादजन्तस्य या उपधा तस्या दीर्घ इति
सूत्रार्थव्यवस्थापनात्। हनिगमि दीर्घत्वे इति। अच इत्येतत्र तच्छेषपक्षे आश्रीयमाणे इहाज्ग्रहणं हनिगम्यर्थं
कर्तव्यमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

८ उक्तमेतद्धि ति। न तल्लोपेनापि तदपवादः। किं तर्हि। द्वितीयाषष्ठीप्रदेशेषु प्रादुर्भाव्यते। तत्र विशेषणविशेष्यभावस्य यथे
ष्टत्वाद्धनिगमिभ्यामज्विशेष्यत इति सिद्धम्। च्छ्वोः शूडनुनासिके च। अथेति। च्छ्वोरिति एकापि षष्ठी हग्रहणकवाक्ये श्रुता
प्रक्रियावाक्यसंबन्धिभेदाद्भिद्यते। क्वचित्स्थाने षष्ठी। क्वचिदवयवषष्ठी। यथा फलिपाटिनमिमनिजनां गुक्पटिनाकि
धतश्चेति भावः। अस्त्विति। रूपभेदाभावादङ्गस्य यो वकारस्तस्यानुनासिकादौ प्रत्यये परे वो झलादौ च परतः ऊठिति
सूत्रार्थाश्रयणाद्वकारस्यादिरूड् भवति। लोपो भविष्यतीति। ननु नाप्राप्ते लोपे आरभ्यमाण ऊठ् लोपस्य बाधकः
प्राप्नोति। अत्र केचिदाहुः। भिन्नजातीयकत्वादागमेनादेशो न बाध्यते यथा दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्या

नैष दोषः। उक्तमेतत्। ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयात् अच इत्येतत्तत्रोपस्थितं द्रष्टव्यम्॥ च्छ्वोः शूडनु
नासिके च॥ अथ ऊडादिः कस्मान्न भवति। आदिष्टिद्भवतीत्यादिः प्राप्नोति। कस्य पुनरादिः। वकारस्य।
अस्तु वकारस्य का प्रतिपत्तिः। लोपो व्योर्वलीति लोपो भविष्यति। नैवं शक्यम्। ज्वरत्वरस्रिव्यविमवामुपधा
याश्चेति द्वावूठौ स्याताम्। एवं तर्हि नैष टित्। कस्तर्हि। ठित्। यदि तर्हि ठित् धौतः पट इति। एत्येधत्यूठ्स्विति
वृद्धिर्न प्राप्नोति। चर्त्वे कृते भविष्यति। असिद्धं चर्त्वं तस्यासिद्धत्वान्न प्राप्नोति। आश्रयात्सिद्धत्वं भविष्यति।
असत्यन्यस्मिन्नाश्रयात्सिद्धत्वं स्यात्।

येति दध्नः कम्बलेन बाधकः। अन्ये त्वाहुः। व्यक्तौ पदार्थे प्रतिव्यक्तिलक्षणप्रवर्तनादूठि कृते यद्वलोपलक्षणं तदकृ-
तार्थम्। न च तस्मिन्नप्राप्ते ऊडारभ्यत इति तत्र वर्जनमेव। अकृते ऊठि यद्वलोपशास्त्रं तदेव बाध्यते। संसर्गिभेदाद्द्विवका-
रोऽभिधीयते। द्वावूठाविति। आगमिभेदादेको वकारात्पूर्व ऊट् स्यात्। अपर उपधाया इति दोषः। वृद्धिर्न प्राप्नोतीति। ठितस्त रामः
त्रनिर्देशादस्य च ठित्त्वात्। चर्त्वे कृत इति। धौत इत्यत्र वकारस्योठि कृते ठकारस्य खरि चेति चर्त्वं क्रियते कृते चर्त्वे ए ८
त्येधत्यूठ्स्वित्यत्रानुकृत इति भावः। असिद्धं चर्त्वमिति। पूर्वत्रासिद्धमिति। ऊकारस्यानुकरणे चर्त्वमसिद्धमित्येत्ये
धत्यूठ्स्वित्यत्र वाह ऊठित्यस्यौठो ग्रहणम्। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आश्रयादिति। एत्येधत्यूठ्स्वित्यत्रोठ एव कृतचर्त्वस्यानुकरणनिर्देशस्तत्र चर्त्वस्याश्रयात्सिद्धत्वमित्यर्थः। अस्ति चान्यदिति। ननु तस्यैव कृते निर्देशो युक्तः। तत्रोभयोरिति। धौत इत्यादावूठि कृते चर्त्वे च यदृकारान्तं रूपं यच्च वाह ऊडित्यत्र ठकारस्य जश्त्वे वावसान इति चर्त्वेन तयोः सामान्येनैत्येधत्यूठ्स्वित्यत्र निर्देश इति मन्यते। उभयोस्तु ठित्वे ठकारस्यैव जश्त्वे चर्त्वे च कृते एत्येधत्यूठ्स्विति निर्देशोपपादनान्न किंचिच्चर्त्वस्याश्रयासिद्धत्वे प्रयोजनं दृश्यत इति चिन्त्यमेतत्। अथेति। स्वरितत्वप्रतिज्ञानस्य व्याख्यानाधीनत्वादनुवृत्तौ ढ्शां षढ इति ढ्ग्रहणस्य लिङ्गस्यादर्शनान्निवृत्तौ दिव उदिति नपरकरणलिङ्गदर्शनाच्च प्रश्नः। शूट्त्वे इति। इह क्विदधिकारे क्विति तजादौ शकाराभावान्न षत्वे ढग्रहणं कर्तव्यम्।

अस्ति चान्यो वाह ऊडिति। एषोपि ठित्करिष्यते। तत्रोभयोश्चर्त्वे कृते आश्रयात्सिद्धत्वं भविष्यति। अथ क्विग्रहणमनुवर्तते। उताहो न। किं चातः। शूट्त्वे क्विदधिकारश्चेत् ढः षत्वम्।   शूट्त्वे क्विदधिकारश्चेत् ढः षत्वं वक्तव्यम्। प्रष्ठा प्रष्टुं प्रष्टव्यम्। तुक्प्रसङ्गश्च। तुक् प्रसज्येत। निवृत्तेपि वै क्विग्रहणेऽवश्यमत्र तुगभावार्थो यत्नः कर्तव्यः। अन्तरङ्गत्वाद्धि तुक् प्राप्नोति। छ्वोरिति तुका सह संनिपातग्रहणं विज्ञायते। ननु चैवमपि अन्त्यस्य प्राप्नोति।

क्वितस्त्वननुवर्तते क्विति चा क्विति चानेन शकारो विधीयत इति षत्वविधौ ढग्रहणं पृथक् कर्तव्यं भवति। तुक्प्रसङ्गश्चेति। क्रियमाणेपि षत्वविधौ ढग्रहणे पूर्वत्रासिद्धमिति षत्वस्यासिद्धत्वात्तुकि सति प्रतुष्ठेति प्राप्नोतीत्यर्थः। अस्य तु शकारस्य सिद्धत्वात्तुग्न भवति। निवृत्तेपीति। परमपि शत्वं बाधित्वा वर्णाश्रयत्वादन्तरङ्गत्वात्तुक् प्राप्नोति॥ वार्णादाङ्गं बलीय इत्येतच्चाङ्गवार्णयोर्युगपत्प्राप्तावुपतिष्ठते इति तुकोऽश्रवणाय सतुक्को निर्देशः कर्तव्य इत्यर्थः। ननु चैवमपीति। नानर्थकेऽलोन्त्यविधिरिति परिभाषाप्रयोजनाभावान्नादृता॥ सतुक्केन वा छकारेणाङ्गं विशेषणात्तदन्तविधौ सत्यङ्गस्यार्थवत्त्वादलोन्त्यस्य प्रसङ्गः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संनिपातग्रहणसामर्थ्यादिति। अलोन्त्यविधौ सतिसतुगूनिर्देशोनर्थकः स्यात्। वान्छतिनिवृत्त्यर्थत्वान्नानर्थक इति चेद्वक्ष्यत एतत्। यथालक्षणमप्रयुक्त इति। उत्सुच्छुयतेरिति। पुतंच्छादयतीति पुच्छन्। कर्मण्यण्। पृषोदरादित्वाद्धा नूपपदयोष्टिलोपः। पुच्छमुदस्यतीति णिङ्। क्विप्। सतकारस्यच्छकारस्य शकारे कृते षत्वे जश्त्वे च उत्सुडिति भवति। यदा तु केवलः छः स्थानी तदा छस्य शकारे कृते तस्य च संयोगान्तत्वाद्लोपे तकारस्य श्रवणं सिध्यति। तथेति। तकारसहितस्य छस्य स्थानितो निर्देशेन केवलस्य शकारेण प्राप्नोति। यथालक्षणमिति। उत्सुडिति वान्छाविति चाखिलत्यर्थः। अथवाऽप्रयुक्तेन किंचिल्लक्षणं प्रवर्तते। प्रयुक्तानामन्वाख्यानारम्भात्। दिवऊद्भावः प्राप्नोतीति। ऊठोऽवकाशः स्यूतः स्यूतवानिति।

संनिपातग्रहणसामर्थ्यात्सर्वस्य भविष्यति। एवमप्यङ्गस्य प्राप्नोति। निर्दिश्यमानस्यादेशा भवन्तीति। एवमङ्गस्य न भविष्यति। यद्येवमुत्सुच्छुयतेरप्रत्ययः उत्सुडिति प्राप्नोति। उत्सुदिति चेष्यते। तथा वान्छतेरप्रत्ययः। वानूर्वांशौ वांशइति न सिध्यति। यथालक्षणमप्रयुक्ते। तत्रत्वेतावान्विशेषः। अनुवर्तमाने क्विङ्ग्रहणे छ्वः षत्वं वक्तव्यम्। तत्र चापि संनिपातग्रहणं विज्ञेयम्। निवृत्ते दिवऊद्भावः। अथ निवृत्तं। दिवऊद्भावः प्राप्नोति। द्युभ्यां द्युभिः। अस्तु। कथं द्युभ्यां द्युभिरिति। ऊठि कृते दिव उदित्युत्त्वं भविष्यति। न भविष्यति। आन्तर्यतो दीर्घः प्राप्नोति। तदर्थं तपरः क्रियते।

उत्वस्यावकाशः विमलद्युअहरिति। द्युभ्यामित्यादौ तु परत्वादूठ्प्रसङ्गः। उत्वं भविष्यतीति। पुनःप्रसङ्गविज्ञानादेकदेशविकृतस्यानन्यत्वात् दीर्घः प्राप्नोतीति। भाव्यमानोप्युकारः सवर्णान् गृह्णातीति कृत्वा तउदिति तपरत्वेन ज्ञापनात्। तदर्थमिति। दीर्घस्यापि मात्रिको यथा स्यादिति तपरत्वं कृतम्। किमुच्यत एतावान्विशेष इति। यावता दिवादीनां यङ्लुगन्तानांति वा दिद्युभेदो भवति। ऊठि सति देद्योतीति भवति। असति तु देदेतीति। नैष दोषः। छान्दसो यङ्लुक्। न चैते प्रयोगाश्छन्दसि दृश्यन्ते।। भाषायां तु हुश्नुवोः सार्वधातुक इति अत्र हुश्नुग्रहणाज्ज्ञापकात् क्वचिदेव यङ्लुग्भवति न सर्वत्र। अन्यथा यङो चिचेत्यत्र छन्दोग्रहणानुवृत्तिरनर्थिके वस्यादिति भाष्यकारस्य दर्शनम्। ॥

रामः ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्व पुनरिति। क्ङिन्ग्रहणानुवृत्तावन्यस्यापितद्योगनिर्दिष्टस्यानुवृत्तिप्रसङ्गं मत्वा पृच्छति। सनिङ्ग्रहणादाविति। तेनेणिगादे
शस्य गमेरजादेः सनि दीर्घो न भवति। जिगमिषतीति अधि जिगमिषन्तीति। यदयमिति। वाक्यकारो वच्यादिग्रहजन्तानां दीर्घत्वं
शास्ति। तेन ज्ञापयति मण्डूकप्लुत्यादिभिर्न्यायैरिहैव क्ङिद्ग्रहणं संबध्यते न पूर्वत्रेत्यर्थः॥ इति कैयटकृते भाष्यप्रदीपे षष्ठाध्या
यस्य चतुर्थे पादे प्रथममाह्निकम्॥ असिद्धवत्॥ इह क्वचिदुपमानोपमेययोर्भेदं विवक्षित्वा सामानाधिकरण्येन निर्देशः क्रि
यतेऽयं ब्रह्मदत्त इति। शास्त्रेपि षत्वतुकोरसिद्धः। लिट्यपि तु गोतो णिदिति चात्र सामर्थ्यादतिदेशप्रतिपत्तिः।
॥ क्वचित्तु प्रतिपत्तिलाघवाय भेदोपक्रमे वतिना निर्देशः क्रियते ब्रह्मदत्तवदयमिति। इहापि असिद्धवदत्राभादिति।
अन्ये त्वाहुः। स्वाश्रयमपि यथा स्यादित्येवमर्थं वत्करणम्। तेन देभतुरित्यत्र स्वाश्रये कहलमध्यगताश्रयावेत्वाभ्यासलोपौ

क्व पुनः क्ङिद्ग्रहणं प्रकृतम्। अनुनासिकस्य क्विझलोः क्ङितीति। यदि तदनुवर्तते। अञ्झनगमां सनि क्विझलो
श्चेति क्विझलोरपि दीर्घत्वं प्राप्नोति। झलित्ता वर्तते दोषः। सनमत्र झल्ग्रहणेन विशेषयिष्यामः सनि झलादावि
ति। क्वाव्याचार्यप्रवृत्तिर्ज्ञापयति। नानेन क्वो दीर्घो भवतीति। यदयं क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दी
र्घोसंप्रसारणं चेति दीर्घत्वं शास्ति॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठाध्यायस्य
चतुर्थे पादे प्रथममाह्निकम्॥ असिद्धवदत्राभात्॥ असिद्धवचनं किमर्थम्।

भवत इति। एतदपरे न मृष्यन्ति। सत्यसति वा वतौ वतिदेशो घातिदेशिकाविरुद्धस्वाश्रयकार्यानिवृत्तिः सिद्धत्वासिद्धत्वयोर्वि
रोधात्कथं वतिना सिद्धत्वस्य प्रापणम्। कथं वा सिद्धत्वासिद्धयोर्विषयविभागो लभ्यते। स्थानिवदित्यादौ तु वतिमन्त
रेण संज्ञा स्यादिति वत्करणमतिदेशं गमयत् स्वाश्रयप्राप्त्यर्थो विज्ञायते। श्नसोरल्लोप इति तपरकरणात् क्वचित्सिद्धत्व-
शक्यमनुमातुम्। अन्यथा आस्तामासन्नित्यादावाटोऽसिद्धत्वात् लोपाप्रसङ्गात्किं तपरत्वेन। असिद्धवचनं किमर्थमिति। इ
ह शास्त्रस्य कार्यार्थत्वात्कार्यस्य प्राधान्यादसिद्धत्वेन भाव्यम्। तदसिद्धावपि स्थानिनो निवृत्तत्वात् लक्षणे [illegible] प्राप्नो
तीत्यव्याप्तिं मत्वा प्रश्नः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· १० दूरतरं व्यापकत्वाच्छास्त्रासिद्धत्वं प्रदेशान्तरे एवं स्थापितं मन्यमान आह। असिद्धवचन इत्युक्तमिति। उत्सर्गशब्देन सामान्यविषयत्वसाधर्म्यात्स्थान्यभिधीयते। आगहीति। शपो बहुलं छन्दसीति लुक्। जहीति। हन्तेर्जः। गतमिति। अत्र यद्यपि नामतो लोपो नास्तीत्येतत्परिभाषार्थमुपदेशग्रहणानुवृत्त्या भाष्यकारः संपादयिष्यति। एधीति। परत्वान्नित्यत्वाच्च पूर्वमेत्वम्। शाधीत्यत्रापि नित्यत्वात्पूर्वं शाभावोऽल्विधित्वाच्च धित्वे नास्ति स्थानिवद्भावः। अथात्रग्रहणमिति। यथाङ्गस्येत्यादयोऽधिकारा अव्युत्पादनमन्तरेणापि व्याख्यानाद्विशिष्टावधयो विज्ञायन्ते तथासिद्धवदधिकारोऽप्याभाद्विज्ञायते। तत्राभाद्ग्रहण-

असिद्धवच्चेन इत्युक्तम्। किमुक्तम्। तत्र तावदुक्तम्। षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं चेति। इहाप्यसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च। तत्रादेशलक्षणप्रतिषेधार्थं तावत्। आगहि। जहि। गतं गतवानिति। अनुनासिकलोपे जभावे च कृते अतो लोपः अतो हेरिति च प्राप्नोति। असिद्धत्वान्न भवति। उत्सर्गलक्षणभावार्थं च। एधि शाधीति। अस्तिशास्त्योरेत्वशाभावयोः कृतयोः झल्लक्षणं धित्वं न प्राप्नोति। असिद्धत्वाद्भवति। अथात्रग्रहणं किमर्थम्। अत्रग्रहणं विषयार्थम्। विषयः प्रतिनिर्दिश्यते। अत्रैतस्मिन्नाभाच्छास्त्रे आभाच्छास्त्रमसिद्धं यथा स्यात्। इह मा भूत्। अभाजि। रागः। उपबर्हणमिति।

स्वविषयावधारणार्थत्वादत्रग्रहणं न कर्तव्यमित्यर्थः। अत्रग्रहणं विषयार्थमिति। विशिष्टो यो विषयः समानलक्षणस्तन्निर्देशार्थम्। तेन समानाश्रयमसिद्धम्। व्याश्रयं तु सिद्धमित्येषोऽर्थो वार्तिककारस्याभिमतः। भाष्यकारोऽप्यमुमेवार्थमत्रग्रहणस्य परस्तात्स्थापयिष्यति। संप्रति त्वाभाद्ग्रहणमधिकारस्य प्रतिपत्तिलाघवायाव्युत्पादनार्थमत्वासिद्धवद्भावस्याभाच्छास्त्रमेव विषयोऽत्रग्रहणेन निर्दिश्यत इति व्याचष्टे। अभाजि रागः इति। भञ्जेश्चिणि। रञ्जेश्च घञि च भावकरणयोरिति नलोपोऽत उपधाया इति वृद्धौ कर्तव्यायां नासिद्धो भवति। उपबर्हणमिति। बृहि वृद्धावित्यस्य बृंहेरच्यनिटीति नलोपो गुणे सिद्धो भवति। ॥ उ·मः १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कानिपुनरिति। अन्यथासिद्धिंमत्वापृच्छति। शास्हाविति। इहेत्वबाधनायशासिरेवादेशः शासोविधीयते। ततोझलन्तत्वात्सिद्धंधित्वमित्यर्थः। धिचेतिसकारस्यलोपइति। धिसकारेसिचोलोपइतिनाश्रीयते। चकाधीत्येवंभवतीतिनिर्णेष्यते। एत्वमपीति। घ्वसोरेद्धावभ्यासलोपश्चेत्यस्यलोपस्यापवादोऽकारस्यस्थानेएत्वंविधीयते। घ्वसोरेद्धावभ्यासलोपश्चेत्यस्यविषयार्थस्यानुवर्तनात्तेनलोपविषयएत्वंभवतीत्यर्थः संपद्यतेतदाह। नचसकारस्येति। कुर्विति। कुउहिइतिस्थितेहिलुकः परत्वात्प्राग्गुणः उत्व

कानिपुनरस्ययोगस्यप्रयोजनानि॥ प्रयोजनंशेत्वंधित्वे॥ शाभावएत्वंचधित्वेप्रयोजनम्। एधिशाधीति। अस्तिशास्त्योरेत्वशाभावयोः कृतयोर्झलक्षणंधित्वंनप्राप्नोति। असिद्धत्वाद्भवति। शाभावस्तावन्नप्रयोजयति। एवंवक्ष्यामि। शास्हौशाहाविति। यत्वभूतः सकारः तत्रसातुधित्वंधिचेतिसकारस्यलोपः। अथवाआहाविति वक्ष्यामि। एवमपिसकारस्यप्राप्नोति। उपधायाइतिवर्तते। तत्रोपधायाआत्वेकृतेसातुधित्वंधिचेतिसकारलोपः। अथवानहाविनिवक्ष्यामि। तत्रेत्वप्रतिषेधेसातुधित्वंधिचेतिसकारलोपः। एत्वमपिलोपापवादोविज्ञास्यते। नचसकारस्यलोपः प्राप्नोति। करोतेर्हिलोपउत्वेप्रयोजनम्। कुर्वित्यत्रहिलोपेकृतेसार्वधातुकेपरेउकारइत्युत्वंनप्राप्नोति। असिद्धत्वाद्भवति। एतदपिनास्तिप्रयोजनम्। वक्ष्यतितत्रसार्वधातुकग्रहणस्यप्रयोजनम्। सार्वधातुकेभूतपूर्वमात्रेयथास्यादुत्वम्। तास्तिलोपेणयणादेशाअडाड्विधौ॥ तलोपोऽस्तिलोपइणश्चयणादेशअडाड्विधौप्रयोजनम्। अकारि। ऐहि। इति। तलोपेकृतेलुङीतिअडाटौनप्राप्नुतः। असिद्धत्वाद्भवतः। अस्तिलोपइणश्चयणादेशः प्रयोजनम्। आसन्। आयन्। इणस्त्योर्यणलोपयोः कृतयोरनजादित्वादाडुनप्राप्नोति। असिद्धत्वाद्भवति। अस्तिलोपस्तावन्नप्रयोजयति। आचार्यप्रवृत्तिर्ज्ञापयति। लोपादाड्बलीयानिति। यदयंघ्वसोरेद्धावभ्यासलोपश्चेतिपरकरणंकरोति।

स्प्राङ्नित्यत्वाद्धिलुक्। ततउत्वंनप्राप्नोति। असिद्धत्वात्तुहिलुकोभवति। तलोपेकृतेइति। नित्यत्वात्। यदयं[illegible]परकरणस्यप्रयोजनमास्तामासन्नित्यादावाटिकृतेवाणीदाडं बलीयइत्येकादेशंबाधित्वामाभूदाकारस्यलोपइति। यदिमालोपः स्यात्ततोऽनजादित्वादाटोभावात्तल्लोपनिवृत्त्यर्थंतपरत्वंनकर्तव्यंस्यादित्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एरनेकाच इति। आटमन्तरेणानेकाजिण्न भवतीति पूर्वमाड् भवतीत्यनुमीयते। ईयतुरित्यादौ योगविभागमन्तरेणायणः सि-
द्धत्वादाड्विध्यर्थमेव योगविभागो विज्ञायते तेन नित्योपि यणादेशोऽकृत आटि न भवति। तत्रोपदेशावस्थायामिति। अ-
न्तरङ्गानपि विधीन्बाधित्वा लुङाद्युपदेश एवाडाटौ भवत इत्यर्थः। अथवेति। आर्धधातुकग्रहणानुवृत्तिसामर्थ्यादकृ-
तेषु लुङादेशेषु लावस्थायां लब्धार्धधातुकसंज्ञायामडाटौ भवत इत्यर्थः। सर्वथेति। त्रिष्वपि परिहारेष्वियजादीनां लाव-

इणयणादेशश्चापि न प्रयोजयति। यणादेशे योगविभागः करिष्यते। इणो यण् भवतीति। ततः एरनेका-
चः इणो यण् भवतीति। ततः। असंयोगपूर्वस्य। असंयोगपूर्वस्य यण् भवति। एरनेकाच इत्येव। सर्वेषामेष प-
रिहारः। उपदेश इति वर्तते। तत्रोपदेशावस्थायामेवाडाटौ भवतः। अथवार्धधातुक इति वर्तते। अथ वा लु-
ङ्लङ्लृङ्क्ष्वडिति हि लकारको निर्देशः।। लुङादिषु लकारादिष्विति। सर्वथा ऐज्यत औप्यत इ-
ति न सिध्यति। वक्ष्यत्येतदजादीनामटासिद्धमिति। अनुनासिकलोपो हिलोपाऽल्लोपयोर्जभावश्च।। अनु-
नासिकलोपो हिलोपाल्लोपयोर्जभावश्च प्रयोजनम्।। आगहि। जहि। गतः। गतवानिति। अनुनासिकलोपे कृ-
ते जभावे च कृते अतो हेरतो लोप इति च लोपः प्राप्नोति। असिद्धत्वान्न भवति। अनुनासिकलोपस्तावन्न प्रयोज-
यति। अल्लोपे उपदेश इति वर्तते। यद्युपदेश इति वर्तते। धिनुतः। कृणुतः। अत्र न प्राप्नोति। नैष दोषः। नोपदे-
शग्रहणेन प्रकृतिरभिसंबध्यते। किं तर्हि आर्द्धधातुकमभिसंबध्यते।

स्थायां संप्रसारणाभावादनजादित्वादाटोऽभावादट्प्राप्नोतीत्यर्थः। अटासिद्धमिति। आटश्चेति यत्सूत्रं तदटश्चेति क्रियते।
अचीत्यधिकाराच्च हलि वृद्ध्यभावः। कथमायन्नासन्निति। यावतेणस्त्योर्यण्लोपयोः कृतयोर्वृद्धिर्नास्ति। अन्तरङ्गत्वाद्वृद्धि-
र्भविष्यतीत्यदोषः। नानाश्रयत्वाच्च वार्णादाङ्गं बलीय इति नास्ति। कृतायां वृद्धावासन्निति तपरकरणादाकारलोपाभावः।
इणो वृद्धे ऐकारस्य यण् न भविष्यतीति इणो यण् एरिति योगविभागात् इकारान्तस्येणो यणो विधानात्तदभावाच्च यादेशे
कृते आयन्निति भविष्यति।

CC-0. In Public Domain. Digitization by eGangotri

आर्धधातुकोपदेश इति। आर्धधातुकोपदेशकाले यदकारान्तमङ्गं तस्यार्धधातुके परतो लोप इति सूत्रार्थः। तत्र धिन्वि-
कृण्व्योरचेति उप्रत्ययसन्नियोगेनाकारस्य विधानादकारान्तत्वं धिन्विकृण्व्योरार्धधातुकोपदेशे भवतीति सिद्धमत्य-
ल्लोपस्तस्य च परनिमित्तत्वात्स्थानिवद्भावाद्धिनुतङ्क्त्यादौ गुणाभावः। प्रत्ययादित्युभयोः शेष इति। समुदायापेक्षणात्।
असंयोगपूर्वादित्यत्र तु भेदेनापेक्षणादानन्तर्यादुत इति संबध्यते न त्वत इति। संख्यातानुदेशो माभूदिति। यद्यपि प्रयोजना-
ख्यानपरत्वाद्वाक्यस्य यथासंख्याभावस्तथापि क्रमस्यान्यत्र व्यवस्थाहेतुत्वदर्शनादिहापि तदाशङ्का स्यादिति तन्निराकर-
णायैवं निर्देशः कृतः। आगहीति। अत्रापि प्रत्ययादित्यस्योभयोः शेषत्वाद्धेर्लुगभावः सिद्ध्यति। मघोन इति। मघमस्यास्तीति

आर्धधातुकोपदेशकाले यदकारान्तमिति। जभावश्चापि न प्रयोजयति। हिलोपे योगविभागः करिष्यते। अतो
हेः। ततउतश्चेति। हेर्लुग्भवतीति। ततः प्रत्ययात्। प्रत्ययादित्युभयोः शेषः। अथ किमर्थमनुनासिकलोपो हिलो-
पाल्लोपयोर्जभावश्चेत्युच्यते। न अनुनासिकलोपजभावौ अल्लोपहिलोपयोरित्येवोच्येत। संख्यातानुदेशो मा
भूदिति। अनुनासिकलोपो हिलोपे पि प्रयोजयति। मण्डूकिताभिरागहि। रोहि दस्व दुह्यागहि। मरुद्भिरग्न आगहि।
संप्रसारणमवर्णलोपे प्रयोजनम्। मघोनः पश्य। मघोना। मघोने। संप्रसारणे कृते यस्येति लोपः प्राप्नोति। असि-
द्धत्वान्न भवति। नैतदस्ति प्रयोजनम्। वक्ष्यत्येतत्। मघवन्शब्दोऽव्युत्पन्नं प्रातिपदिकमिति। रेभावे आल्लोपे प्रयो-
जनम्। किं स्विद्गर्भं प्रथमं दध्र आपः। रेभावे कृते आतो लोप इटि चेत्याकारलोपो न प्राप्नोति। असिद्धत्वाद्भवति। एतद-
पि नास्ति प्रयोजनम्। छान्दसो रेभाव इति।

न्दृशीवनिपो चेति वनिप्। असिद्धं बहिरङ्गमन्तरङ्ग इति परिभाषया संप्रसारणस्यासिद्धत्वं नास्ति। एषा हि परिभाषा वाहऊडित्य-
त्रज्ञापिता त्वाद्याभाष्ये स्थिता। तस्याः प्रवर्तमानायां मकारलोपसंप्रसारणयोरसिद्धत्वादन्तरङ्गबहिरङ्गयोर्युगपदनुपस्था-
नान्नाजानन्तर्य इति प्रतिषेधाद्वा। अव्युत्पन्नमिति। ततश्च तद्धिते विधीयमानो कारलोपो न भवति। ...ष्यत्वादसिद्धत्वमन-
पि न स्यादित्यव्युत्पत्तिपक्ष एवाश्रयणीयः। रेभावे कृत इति। नित्यत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिट्चेति। सार्वधातुकेऽप्यपूर्णोद्विर्वचनेऽचीति इत्वनिषेधादाकारलोपः। वार्तिककारोक्तेषु प्रयोजनेषु प्रत्याख्यातेषु श्लोकवार्तिककारोक्तप्रयोजनोपक्षेपः। उत्तुरुक्तजद्रूति। सार्वधातुके परे इति। अथ सार्वधातुके एव परतः कस्मादुत्वं न क्रियते। नैवं शक्यम्। उकारलोप एव सत्युत्वं स्यात्। कुरुतइत्यादौ तु विकरणेन व्यवधानान्न स्यात्। कुर्वइत्यादावपि स्थानिवद्भावाद्व्यवधानमिति चेन्न। वचनादीदृशं व्यवधानमाश्रीयते। ननु च सार्वधातुके परे उकार इत्याश्रीयमाणे नित्यत्वात्कृते गुणे उकारलोपेन लोपस्य स्थानिवद्भावादुत्वं भविष्यति। अत्र हि परत्वाद्गुणे कृते उकारलोपः। ततश्चानादिष्टादचः पूर्वस्य विधावस्य स्थानिवद्भावः। प्रत्ययलक्षणं तु वर्णाश्रयत्वान्मा भूत्। एवं तर्हि परिहारान्तरस्य वक्ष्यमाणत्वात्स्थानिवत्त्वं भाष्यकारेणाश्रि

लिट् च छन्दसि सार्वधातुकमपि भवति। तत्र सार्वधातुकमपिद्ङित् भवतीति ङित्वं श्नाभ्यस्तयोरात इत्याकारलोपो भवति। यदि तर्हि अयं योगो नास्ति॥ उत्तुरुक्तजः कथमोर्विनिवृत्तौ॥ इह कुर्वः। कुर्मः। कुर्यादिति। उकारलोपे कृते सार्वधातुके परे उकार इति उत्वं न प्राप्नोति॥ णेरपि चेटि कथं हि निवृत्तिः॥ इह चकारयतेः कारिष्यते। णेरनिटीति णिलोपो न प्राप्नोति॥ अनुवर्तस्व योगमिमं स्यात् लुक् च चिणो नु कथं न तरस्य॥ इह चाकारितराम् अहारितरामिति चिणो उत्तरस्य तरस्य लुक् कथं न स्यात्॥ चं भगवान्कृतवांस्तु तदर्थं तेन भवेदिटि णेर्विनिवृत्तिः ॥ इह स्यसिचूसीयुट्तासिषु भावकर्मणो रुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट्च। किं च णिलोपश्च॥

तम्। अथवा नित्यत्वात्पूर्वमुकारलोपः पश्चाद्गुणः कृतेऽप्युकारलोपे प्रत्ययलक्षणमिति गुणेन भाव्यम्। ततो लक्षणान्तरेण प्राप्नुवन्विधिरनित्य इति गुणस्यानित्यत्वम्। ततश्चादिष्टादचः पूर्वो कार इति तद्धि येनास्ति स्थानिवद्भावः। ननु व्याश्रयत्वादुकारलोपस्यासिद्धत्वं न प्राप्नोति। म्वोरुकारलोपविधानात्। सार्वधातुके परत उत्वविधानात्। नैतदस्ति। मकारवकारादौ प्रत्यये उकारलोपविधानादस्त्येव समानाश्रयत्वम्। कारिष्यत इति। प्रकृतिप्रत्ययाश्रयत्वादिण्णिलोपयोः समानाश्रयत्वम्। चं भगवानित्यादिना प्रयोजननिराकरणम्। इट् चेति। चकारेण णिलोपो विधीयत इत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य्वोरिति। अत उत्सार्वधातुके इत्यत्र य्वोर्ये चेत्यनुवर्त्तनात् कृते उकारलोपे अत उत्वं भविष्यतीत्यर्थः। मकारादिभिश्च वाक्यभेदेन सार्वधातुकस्य विशेषणात् कुर्म इत्यादावुत्वाभावः। आरभ्यमाणे पीति। अनेकपरिहाराश्रयणे प्रतिपत्तिगौरवं मा भूदित्येवमर्थमारभ्यमाणे इत्यर्थः। पपुष इति। ननु चान्तरङ्गत्वादिटा भाव्यम्। न च संप्रसारणे कृते पीटो निवृत्तिः। निमित्तापाये नैमित्तिकस्याप्यपाय इत्यस्याः परिभाषाया भाष्यकारेणानाश्रयणात् तथा च चावित्यत्रोक्तमिहान्ये चौ प्रत्यङ्गस्य प्रतिषेधमारभन्ते। तदिहापि साध्यमित्यकारस्य निवृत्तावपि यणाद्यादेशानिवर्त्तनाच्चैतदुक्तम्। तथा च च्छ्वोरित्यत्रोक्तमवश्यमत्र तुगभावार्थो य

य्वोरपि ये च तथाप्यनुवृत्तौ॥ इहापि कुर्वः। कुर्मः। कुर्यादिति। य्वोर्ये चेति। एतदप्यनुवर्तिष्यते॥ चिणो लुकि च क्ङित एव हि लुक् स्यात्॥ चिणो लुक्यपि हि प्रकृतं क्ङिद्ग्रहणमनुवर्त्तते। क्वप्रकृतं गमहनजनखनघसां लोपः क्ङित्यनङीति। तद्धि सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। चिण इत्येषा पञ्चमी क्ङितीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति। उक्तं तु कृत्स्नः कथमो विनिवृत्तौ णेरपि चेटि कथं विनिवृत्तिः॥ अन्नुवतस्त्वयोगमिमं स्याल्लुक् चिणो नु कथं न तरस्य॥ त्वं भगवान् कृतवांस्तु तदर्थं तेन भवेदिटि णेर्विनिवृत्तिः॥ य्वोरपि ये च तथाप्यनुवृत्तौ चिणो लुकि च क्ङित एव हि लुक् स्यात्॥ आरभ्यमाणेऽप्येतस्मिन्योगे सिद्धं वसुसंप्रसारणमज्विधौ॥ आरभ्यमाणेऽप्येतस्मिन्योगे वसोः संप्रसारणमज्विधौ सिद्धं वक्तव्यम्। किं प्रयोजनम्। पपुषः पश्य। तस्थुषः पश्य। निन्युषः पश्य। चिच्युषः पश्य। लुलुवुषः पश्य। पुपुवुषः पश्य इति। वसोः संप्रसारणे कृते अचीत्याकारलोपादीनि यथा स्युरिति।

तः कर्त्तव्योऽन्तरङ्गत्वादिति तु प्राप्तिरिति। कृते पि शकारे कृतस्य तुको निवृत्तिं मत्वा चैतदुक्तम्। एवं तर्हि नित्यशब्ददर्शने प्रविभज्यावयवेषु कल्प्यमानेषु तरङ्गबहिरङ्गभावो नास्तीति पपावस् अस् इति स्थिते नित्यत्वादिटि [illegible]धित्वा संप्रसारणं भवत्यल्विधित्वाच्च स्थानिवत्त्वाभावादिटो प्रसङ्गः। अथवा संप्रसारणं तदाश्रयं च बलीयो भवतीति अत्र विष[illegible]सर्वमिदं न प्रवर्तते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· पपुषइति। पपुंसनेनीतिजनसनेतिविट्। विड्वनोरित्यात्वंतस्यासिद्धत्वादातोधातोरित्याकारलोपाप्रसङ्गः। [illegible] प्रतिप ६५२
१३ द्योक्तपरिभाषात्वाश्रयेणनाश्रीयते। अव्याप्तिप्रसङ्गः तु। चाखायितेति। खननेर्यङि· द्विर्वचनात्परत्वाद्येविभाषेत्यात्वेद्विर्वच
नेचतद्विरूपम्। अधिकारादपीति। तत्र्थामाङ्गहणंविषयार्थमत्रग्रहणंतुसमानाश्रयत्वप्रतिपत्त्यर्थं संपद्यते। असि

किंपुनःकारणंनसिध्यन्ति॥बहिरङ्गलक्षणत्वादसिद्धत्वाच्च। बहिरङ्गलक्षणंचैववहिवसुसंप्रसारणमसि
द्धंच। आत्वंयलोपाल्लोपयोः। पपुषोनवाजान्। चाखायिता। चाखायितुम्॥ आत्वंयलोपाल्लोपयोः सिद्धंव
क्तव्यम्। किंप्रयोजनम्। पपुषोनवाजान्। पपुषइत्यात्वस्यासिद्धत्वाद् आतोधातोरित्याकारलोपोनप्राप्नो
ति। चाखायिता। चाखायितुमिति। आत्वस्यासिद्धत्वाद् यस्यहलइतियलोपःप्राप्नोति॥ समानाश्रयवचनात्सि
द्धम्॥ समानाश्रयमसिद्धंभवति। व्याश्रयंचैतत्। इहतावत्पपुषःपश्य। तस्थुषःपश्य। निन्युषःपश्य। चिच्युषः
पश्य। लुलुवुषःपश्य। लुलुवुषःपश्येति। वसावाकारलोपादीनि वस्वन्तस्यविभक्तौसंप्रसारणम्। पपुषइति।
विटिआत्वंविड्वन्तस्यविभक्तावाकारलोपः। चाखायिताचाखायितुमितियङ्यात्वंयङन्तस्यचार्द्धधातुकेलो
पइति। किंवक्तव्यमेतत्। नहि। कथमनुच्यमानंगंस्यते। अत्रग्रहणसामर्थ्यात्। ननुचान्यदत्रग्रहणस्यप्रयो
जनमुक्तम्। किमुक्तम्। अत्रग्रहणंविषयार्थमिति। अधिकारादप्येतत्सिद्धमिति। इहपपुषः। चिच्युषः। लुलु
वुषः। द्वौहेतूव्यपदिष्टौ। वहिरङ्गलक्षणमसिद्धत्वंचेति। तत्रभवेदसिद्धत्वंप्रत्युक्तम्। वहिरङ्गलक्षणंतुनैव
प्रत्युक्तम्। नैषदोषः।

द्धत्वंप्रत्युक्तमिति। समानाश्रयत्वपरिग्रहात्। बहिरङ्गल क्षणंचेति। यद्यपिनाजानन्तर्यइत्ययमत्रनिषेधोऽवतरतिन रामः
थापिपरिभाषायाःकारणाभावात्प्रसङ्गएवनास्तीतिप्रतिपादयितुमुपन्यासः। ॥ १३

CC-0. In Public Domain. Digitization by eGangotri

प्रतिद्वन्द्विभाविनाविति। नहिवस्त्वन्तरानपेक्षमन्तरङ्गं बहिरङ्गं वास्वभावसिद्धं किंचिदस्ति। परस्परापेक्षयायुगपत्प्राप्तौनयोरव
स्थानात्। यथासौनइत्यत्रयणगुणयोः। पपुषइत्यादौतुयुगपत्प्राप्तिर्नास्ति। संप्रसारणप्राप्तिकालेआल्लोपादीनांनिमित्ता
भावादप्रसङ्गः। आल्लोपप्राप्तिकालेचनिर्वृत्तंसंप्रसारणंनतस्यनिमित्तमेवाल्लोपादीनांसंप्रसारणमितिनास्तिपरिभाषो
पस्थानमित्यर्थः। यद्येवंपचावेदमित्यादावपिनाकृतेआद्गुणएतस्मैइत्यैवंप्राप्नोतीतिनिमित्तनिमित्तिभावात्परिभाषा
याअनुपस्थानप्रसङ्गः। एवंतर्ह्यन्यथाव्याख्यायते। असिद्धंबहिरङ्गमन्तरङ्गइत्येषापरिभाषावाहऊडित्यत्रज्ञापिते
त्याभाष्यकारीया। अथवाविप्रतिषेधेपरंकार्यमित्यत्रोपसंख्यातापिसज्ञापरिभाषाणांकार्यकालत्वाद्वसुसंप्रसारणदेशाच्चा

बहिरङ्गमन्तरङ्गमितिचप्रतिद्वन्द्विभाविनावेतावर्थौ। कथम्। सत्यन्तरङ्गेबहिरङ्गं सतिचबहिरङ्गेन्तरङ्ग
म्। नचात्रान्तरङ्गबहिरङ्गयोर्युगपत्समवस्थानमस्ति॥ नानभिनिर्वृत्तेबहिरङ्गे अन्तरङ्गंप्राप्नोति। नत्र
निमित्तमेवबहिरङ्गमन्तरङ्गस्यहूस्वयलोपाल्लोपाश्चायादेशेत्वपिसिद्धावक्तव्याः। प्रशमय्यगतः। प्रत
मय्यगतः। प्रबेभिदय्यगतः। प्रचेच्छिदय्यगतः। प्रस्तनय्यगतः। हूस्वयलोपाल्लोपानामसिद्धत्वात्तुल्य
पिलघुपूर्वादित्ययादेशोनप्राप्नोति। अत्रापिशेषपरिहारः। समानाश्रयवचनात्सिद्धमिति। कथम्। णावेते
विधयः। णेर्ल्यप्ययादेशः। वुग्युटावुवङ्यणोः सिद्धौवक्तव्यौ॥

दाभाष्यकारीया। आभाष्यकारीयेयाल्लोपादिषुकर्तव्येषुअसिद्धेतिनप्रवर्तते। तदप्रवृत्तौचाल्लोपादीनिभवन्तीतिवाक्यार्थः
। पदान्यस्मिन्नर्थेयोज्यन्ते। सत्यन्तरङ्गइति। बुद्ध्यापेक्षितइत्यर्थः। तत्रनिमित्तमेवेति। परिभाषायाअसिद्धत्वादप्रवृत्ताविति
भावः। वसुसंप्रसारणंचेदंपरिभाषायाआल्लोपादीनांचाश्रयइतिसमानाश्रयत्वाद्वत्पसिद्धत्वंपरिभाषायाः। प्रशमय्यगत
इति। हूस्वस्यासिद्धत्वाल्लघुपूर्वोमकारोनभवतीत्ययादेशोनप्राप्नोति। प्रबेभिदय्येति। भिदेर्यङन्तात्[illegible]णिच्। तत्रयलोपस्या
सिद्धत्वाल्लघुपूर्वोदुत्तरोणिज्नभवतियकारेणाव्यवधानादित्ययादेशाप्रसङ्गः। प्रस्तनय्येति। अदन्तात्[illegible]गदीदेव
शब्दइतिपठ्यते। तत्राल्लोपस्यासिद्धत्वादकारेणव्यवधानादयादेशाप्राप्तिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै ९८ बभूवतुरिति।भूअनुसुवुक्तस्यासिद्धत्वादुवङ्प्राप्नोति।नतुचनाप्राप्तेउवङिवुगारभ्यमाणस्तस्यापवादोभवति।सत्यपि ६ ४२
संभवेबाधनंभवतीत्येषन्यायः।नैतदस्ति।बाधकप्रवृत्त्यवस्थायांयद्विद्यतेनतद्बाधकेनानिवर्तितंप्रवर्तते।उवङ्तु
निरवकाशत्वात्प्रवर्त्तमानेवुकिअसिद्धत्वादात्मानमदर्शयन्नशक्योबाधितुमितिवुकिकृतेतस्यासिद्धत्वात्प्रवर्त्त
ते ।तेनोवर्णस्येति।उवर्णस्योपधायाउद्भवतीत्येवमाश्रयणादुवङिचकृतेउवर्णउपधाभवतिनान्यथा।इन्धिभव-

बभूवतुः।बभूवुः।वुकोऽसिद्धत्वादुवङादेशःप्राप्नोति।उपदिदीये।उपदिदीयाते।युटोऽसिद्धत्वाद्यणादेशः
प्राप्नोति।वुकस्तावन्नवक्तव्यम्।वुकंनवक्ष्यामि।एवंवक्ष्यामि।भुवोलुङ्लिटोरुदुपधाया इति।अत्रोवङा
देशेकृतेयाउपधातस्याउत्वंभविष्यति।एवमपिकुतोनुखल्वेतत्।उवङादेशेकृतेयाउपधातस्याउत्वं
भविष्यति।नपुनःसांप्रतिकीयोपधातस्याःस्याद्भकारस्येति।नैषदोषः।ओरितिवर्त्तते।तेनोवर्णस्यभवि
ष्यति।भवेत्सिद्धंबभूवतुः।बभूवुः।इदंतुनसिध्यति।बभूव।बभूविथेति।किंकारणम्।गुणवृद्ध्योःकृतयो
रुवर्णाभावात्।नात्रगुणवृद्धीप्राप्नुतः।किंकारणम्।क्ङितिचेतिप्रतिषेधात्।।कथंकित्त्वम्।इन्धिभवति
भ्यांचेति।नह्येकित्त्वंवयंप्रत्याचक्ष्महेवुका।इहतुकित्वेनवुक्प्रत्याख्यायते।किंपुनरत्रन्याय्यम्।भुव
वचनमेवन्याय्यम्।सतिहिकित्वेस्यातामेवात्रगुणवृद्धी।किंकारणम्।इग्लक्षणयोर्गुणवृद्ध्योःसप्रतिषेधः
।नचैषाइग्लक्षणावृद्धिः।एवंतर्हिनार्थोवुकानापिकित्वेन।स्तामत्रगुणवृद्धी।गुणवृद्ध्योःकृतयोःअवावो
श्चकृतयोःयाउपधातस्याउत्वंभविष्यति।कथम्।ओरित्यत्रावर्णमपिप्रतिनिर्दिश्यते।

तिभ्यांचेतिकित्वंप्रत्याख्यातमितिमत्वाह।भवेत्सिद्धमिति।नह्येकित्त्वंवयमिति।भुवोवुकोनित्यत्वादितिन्यायात्।इहतुकि
त्वेनेति।क्ङितिचेतिगुणवृद्धिनिषेधादुवङिचकृतेउवर्णस्योत्वविधानात्।स्तातामेवेति।गुणग्रहणंप्रसङ्गेनचारितम्। राम:
सिगुणस्येग्लक्षणत्वात्सिध्यतिहिप्रतिषेधः।नचैषेति।अचोञ्णितीत्यत्रेकइत्यनुपस्थानादिग्लक्षणत्वाभावः।ओरि १८
त्यत्रावर्णमिति।अकारोकारयोरन्तुणोकृतेइङ्सिङ्सोऽप्येतिपूर्वैकादेशेननिर्देशात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Public Domain Digitization by eGangotri

इहापीति। ओः सुपीत्यत्रावर्णस्यापि निर्देशाद्यण्प्रसङ्गः। लोपोऽत्रेति। परत्वादिति भावः। आतो धातोरिति लोपस्यावका-
शः संयोगपूर्वोकारान्तो धातुः। अकारप्रश्लेषस्यै नरत्रावकाशः। बभूव। बभूविथेति। कीलालप इत्यत्रोभयप्रसङ्गे परत्वादाकार
लोपः। विप्रतिषिद्धे चासिद्धत्वं न भवतीति ज्ञापयिष्यते। कीलालपाविति। असर्वनामस्थान इत्यनुवर्तनाद्भसंज्ञाया अभावादा
कारलोपाप्रसङ्गात्। एवं तर्हि य्वोरिति। यदेव य्वोरिति प्रकृतं तदेव वर्णक्रमव्यत्ययेन व्योरित्युक्तम्। तत्राकारोकारसमुदायनि-

इहापि तर्हि प्राप्नोति। कीलालपः पश्य। शुभंयः पश्येति। लोपोऽत्र बाधको भविष्यति। इह तर्हि प्राप्नोति। कीला
लपौ कीलालपा इति। एवं तर्हि व्योरिति वर्तते। तेनो वर्णं विशेषयिष्यामः। व्योरेरिति। इहेदानीमोरित्यनुवर्त
ते। व्योरिति निवृत्तम्। युटश्चापि न वक्तव्यम्। युड्वचनसामर्थ्यान्न भविष्यति। अस्त्यन्यद्युड्वचने प्रयोजनम्।
किम्। द्वयोर्यकारयोः श्रवणं यथा स्यात्। न व्यञ्जनपरस्यानेकस्यैकस्य वा यकारस्य श्रवणं प्रति विशेषोऽस्ति।
किं पुनः प्राग्भाद सिद्धं आहोस्वित्सह तेन। कुतः पुनरयं संदेहः। आङायं निर्देशः क्रियते आङ् च पुनः संदेहं ज
नयति। तद्यथा आ पाटलिपुत्राद् वृष्टो देव इति संदेहः। किं प्राक् पाटलिपुत्रात् सह तेनेति। एवमिहापि संदेहः प्राग्भा
त्सह तेनेति। कश्चात्र विशेषः। प्राग्भादिति चेच्छुनामघोनाम्गुणेषूपसंख्यानम्। प्राग्भादिति चेच्छुनामघोना
म्गुणेषूपसंख्यानं कर्तव्यम्। शुनः पश्य। शुना। शुने। संप्रसारणे कृते लोपो न इति प्राप्नोति। यस्य पुनः सह तेना
सिद्धत्वम्। असिद्धत्वात्तस्य न संयोगाद्वमन्तादिति प्रतिषेधो भविष्यति। यस्यापि प्राग्भाद सिद्धत्वं तस्याप्येष न
दोषः। कथम्। नास्त्यत्र विशेषः। अल्लोपे न वा निवृत्तौ सत्यां पूर्वत्वे न वा निवृत्तौ सत्याम्।

र्देशेऽपि य्वोरित्यनेन विशेषणादुकारस्यैव यण् भवति नत्ववर्णस्येति। इहेति। भुवो वुग्लुङ्लिटोरूदुपधाया इत्यत्र। न व्य
ञ्जनपरस्येति। व्यञ्जनात्परस्येति सुप्सुपेति समासः। श्रुतिभेदपक्षेऽपि यणो मय इति द्विर्वचनविधानाद्धलो यमां यमि लो
प इति पक्षे लोपविधानात्पक्षे यकारद्वयं भवत्येवेति नार्थो युटेति तद्विधानसामर्थ्याद्यण् न भवति। शुन इति। श्वन् शु
न इति स्थिते संप्रसारणं वार्णादाङ्गं बलीयस्त्वात् पूर्वैकादेशं बाधित्वाऽल्लोपः प्राप्नोति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंख्यानवादी विशेषं प्रतिपादयितुमाह। अयमस्तीति। अनुदात्तनिमित्तत्वादुदात्तलोपस्य। एकादेशेनु सत्येकादेश उदात्ते
नोदात्त इत्याद्युदात्तं पदं भवति। श्वशब्दाकारस्य प्रत्ययस्वरेणान्तोदात्तत्वात्। प्रत्याख्यानवाद्याह। नान्नेति। उपसंख्यानवाद्या
ह। नैषेति। तृतीयादिस्वरस्येति। शावेकाचइति प्राप्तस्य। तत्र प्रतिषिद्धेऽपि तृतीयादिस्वरे लोपे सत्युदात्तनिवृत्तिस्वरप्रसङ्ग इ
ति विशेषोऽस्ति। नगोश्वन्नित्यस्य तु निषेधस्य फलं श्वभ्यां श्वभिरिति हलादौ विभक्तावस्ति। स एवाह। यत्र तर्हीति। चार्थे तर्हि श
ब्दः। न केवलं शुना शुने इत्यत्र तृतीयादिस्वरे प्रतिषिद्धेऽस्त्युदात्तनिवृत्तिप्रसङ्गोऽपि तु यत्र तृतीयाद्यभावः शुनः पश्येति तत्रा
प्युदात्तनिवृत्तिस्वरप्रसङ्ग इत्यर्थः। नहि अत्रैतदपि शक्यते वक्तुं येन केनचिदपि लक्षणेन प्राप्तस्य तृतीयादिस्वरस्य प्रतिषे

अयमस्ति विशेषः। अल्लोपेन निवृत्तौ सत्यामुदात्तनिवृत्तिस्वरः प्रसज्येत। नाम्नोदात्तनिवृत्तिस्वरः प्राप्नोति।
किं कारणम्। न गोश्वन्साववर्णेति प्रतिषेधात्। नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः। कस्य तर्हि। तृतीयादिस्व
रस्याय तत्र तर्हि तृतीयादिस्वरो नास्ति। शुनः पश्येति। एवं तर्हि न वयं लक्षणस्य प्रतिषेधं शिष्मः। किं तर्हि येन
केनचिल्लक्षणेन प्राप्तस्य विभक्तिस्वरस्यायं प्रतिषेधः यत्र तर्हि विभक्तिस्वरो नास्ति बहुशुनीति। यदि पु
नरयमुदात्तनिवृत्तिस्वरस्यापि प्रतिषेधो विज्ञायेत। नैवं शक्यम्। इहापि प्रसज्येत। कुमारीति।

धइति। प्रत्याख्यानवाद्याह। एवं तर्हीति। न शावेकाच इत्यस्यैव लक्षणस्यायं निषेधः। किं तर्हि। विभक्तेः प्राप्तस्योदा
त्तमात्रस्येत्यर्थः। विभक्तिस्वरस्येति वचनाद्विभक्तिग्रहणानुवृत्तिरनेनाभ्युपगतेति। अत्रोपसंख्यानवाद्याह। यत्र
तर्हीति। बहवः श्वानो यस्यामिति बहुव्रीहिः। तत्राल्लोपवादिमते नानउपधालोपिन इति ङीप्। बहोर्नञ्वदुत्तरपद राम:
भूम्नीत्यन्तोदात्तत्वादुदात्तनिवृत्तिस्वरप्रसङ्गः। प्रत्याख्यानवाद्याह। यदि पुनरिति। विभक्तिग्रहणं नानुवर्तत इति भा ९५
वः। उपसंख्यानवाद्याह। नैवं शक्यमिति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्याख्यानवाद्याह। एवं तर्हीति। न गोश्वन्नित्यनेनानिषिध्यमानोऽप्युदात्तनिवृत्तिस्वरः शुनिज्ञापकत्वान्नावतरतीत्यर्थः। एवं
प्रत्याख्यानवादिना विशेषाभावः प्रतिपादितः। विद्यते तु विशेषः। अल्लोपे सत्युपधालोपित्वात् ङीपा भाव्यं बहुशुनीति। तद
भावे तु बहुश्वेति भवति। गौरादिङीषोऽप्यनुपसर्जनाधिकारात्त्राप्रसङ्गः। सह तेनासिद्धमित्येतच्चान्ते स्थापयिष्यते। तत्र
सुपर्वादिवद्बहुश्वेत्येव भाव्यम्। स्वरविशेषनिराकरणपरत्वात्तु प्रत्याख्यानेन तदत्र भाष्ये सुष्ठु निरूपितम्। डाबुभाभ्या
मित्यत्र तु बहुश्वेत्येव भवितव्यमिति व्यवस्थापितम्। क्वचित्तु पाठः नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः। कस्य तर्हि। तृतीया-

एवं तर्हि आचार्यप्रवृत्ति   र्ज्ञापयति। नोदात्तनिवृत्तिस्वरः शुन्यवतरतीति। यदयं श्वन्शब्दं गौरादि
षु पठति। अनोदात्तार्थं यमकरोति। सिद्धं हि स्यात् ङीपैव। मघोनः पश्य। तं घोना। मघोने। संप्रसारणे कृते यस्ये
ति लोपः प्राप्नोति। यस्य पुनः सह तेनासिद्धत्वमसिद्धत्वात्तस्य न भविष्यति। यस्यापि हि प्राग्भादसिद्धत्वं त
स्याप्येष न दोषः। कथम्। वक्ष्यत्येतत्। मघवन्शब्दोऽव्युत्पन्नं प्रातिपदिकमिति। भूगुणः। भूयान्। भूभावे कृ
ते ओर्गुणः प्राप्नोति। यस्य पुनः सह तेनासिद्धत्वमसिद्धत्वात्तस्य न भविष्यति। यस्यापि प्राग्भादसिद्धत्वं तस्याप्येष
न दोषः। कथम्। दीर्घोच्चारणसामर्थ्यान्न भविष्यति। अस्त्यन्यद्दीर्घोच्चारणस्य प्रयोजनम्। किम्। भूमेति। नि
पातनादेतत्सिद्धम्। किं निपातनम्। बहोर्नञ्वदुत्तरपदभूम्नीति। अथवा पुनरस्तु सह तेनेति।

दिस्वरस्य। एवं तर्हि येन केनचित्तस्य तृतीयादिस्वरस्य। यत्र तर्हि तृतीयादिर्नास्ति शुनः पश्येति। अत्र पाठेन तर्हि शब्द स्था-
र्थे व्याख्यातव्यो भिन्नकर्तृकत्वात्। यस्य पुनरिति। ननु च भूभावस्यासिद्धत्वाद्बहुशब्द एवायमिति स्यादेव गुणः। नैष दोषः।
गुणे कर्तव्ये भूभावस्यासिद्धत्वात्पूर्वं गुणे कृते भूभावः। न च गुणभूभावयोश्चक्रकापत्तिर्दोषश्चक्रके कृते व्यवस्थाश्रयणा
त्। भूमेति। भत्वाभावादत्र गुणाभावः। निपातनादिति। ह्रस्वान्तेयादेशेक्रियमाणे भूमेत्यत्र निपातनाद्दीर्घो भविष्यतीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ आभादितिचेदिति।सा आदित्यस्यपक्षस्यप्रतिपक्षभावेनोपादीयमानाद्भिविधावकारोबोद्धव्यः।पपुषइत्यादीनांपरिहृ ६४२
१६ तानामपिपुनरुपादानमस्मिन्पक्षेदोषःप्रागुद्भावितइतिप्रदर्शनार्थम्।सौरीति।सूर्येणैकदिगित्यण्।यस्येतिलोपस्ततोऽङी
पूर्वुनर्यस्येतिलोपः।तत्रद्वयोरल्लोपयोरसिद्धत्वाद्यकारउपधानभवतीतियलोपाप्रसङ्गः।ननुचप्रागाभादसिद्धत्वेलोप
द्वयस्यासिद्धत्वादुपधायकारोनभवतीतिलोपस्याप्रसङ्गएव।स्थानिवद्भावोऽपियलोपविधौप्रतिषिद्धः।भूतपूर्वगत्योप
धाश्रयणाददोषः।वचनसामर्थ्याद्वापूर्वंयलोपःपश्चादकारलोपइतिक्रमआश्रयिष्यते।नित्यत्वेयकारलोपस्य।टिलो

आभादितिचेद्वसुसंप्रसारणयलोपप्रस्थादीनांप्रतिषेधः॥आभादितिचेद्वसुसंप्रसारणयलोपप्रस्थादीनां
प्रतिषेधो वक्तव्यः।पपुषःपस्थातस्थुषःनिन्युषः।चिच्युषः।लुलुवुषः।युयुवुषइति।वसुसंप्रसारणे
कृतेतस्यासिद्धत्वादचीत्याकारलोपादीनिनसिद्ध्यन्ति।नैषदोषः।उक्तमेतत्।समानाश्रयवचनात्सिद्धमि
ति।कथम्।वस्वाश्रयावाकारलोपादीनिवस्वन्तस्यविभक्तौसंप्रसारणमिति।यलोपः।सौरी।बलाका।योऽसा
वण्यकारोलुप्यतेतस्यासिद्धत्वात्ईतियकारलोपोनप्राप्नोति।अत्राप्येषपरिहारः।समानाश्रयवचनात्सि
द्धमिति।कथम्।अणिअकारलोपः।अणन्तस्येतियलोपः।प्रस्थादिषु।प्रेयान्।स्थेयान्। प्रस्थादीनामसिद्ध
त्वात्प्रकृत्यैकाजिति प्रकृतिभावोनप्राप्नोति।नैषदोषः।यथैवप्रस्थादीनामसिद्धत्वात्प्रकृतिभावोन
प्राप्नोति।एवंटिलोपोऽपिनभविष्यति॥श्नान्नलोपः॥ अथकिमर्थंश्नमःशकारस्यग्रहणंक्रियतेनान्नलोप
इत्येवोच्येत।

पोऽपीति। नन्वादेशलक्षणःप्रकृतिभावोऽसिद्धत्वान्नभवतीतिवक्तुंयुक्तम्।टिलोपःपुनरुत्सर्गलक्षणःप्राप्नोति।नैषदोषः।आ
देशेननिरवकाशत्वात्प्रवृत्तेनस्थानिनोनिवर्तितत्वादसतःकुतष्टिलोपः।तत्रयद्यपिप्रादीनामसिद्धत्वात्प्राक्टिलोपःक्रि
यतेतथाप्यादेशेषुकृतेषुतेषामसिद्धत्वान्नतल्लक्षणष्टिलोपोनाप्युत्सर्गलक्षणः।उत्सर्गेषुप्रागेवप्रवृत्तत्वात्।अनवकाशत्वा रामः
च्चप्रादीनांचक्रकदोषोऽपिनास्ति॥श्नान्नलोपः॥किमर्थमिति।यथान्तरेणमकारनिर्देशंश्नादितिश्नमेवगृह्यतेअन्यस्यासंभवा १६
त्तथापिविनापिशिन्निर्देशेनश्नमेवग्राहिष्यतइतिभावः। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्दितेति। इदित्त्वमस्य किमर्थं स्यादिति चेदुदुपदेशावस्थायां नुमित्यप्रत्ययादित्यकारार्थं तथा ननन्दतुरित्यादौ कृतेपि नलो पेतस्यासिद्धत्वादेत्वाभ्यासलोपाप्रवृत्त्यर्थं स्यात्। क्ङितिसतीति। अमेवडिदित्त्विदितिहि नस्तीत्यादौ नलोपः सिद्धः। कथं पुनः संभ वत्यां परसप्तम्यां सत्सप्तमीशक्याविज्ञातुम्। यथेष्टं वाक्यशेषाध्याहाराददोषः। क्ङितिसतीत्येवहि विज्ञायमाने पौर्वापर्याना श्रयणान्नास्तितस्मिन्निति त्यस्याः परिभाषाया उपस्थानम्। यदा त्वौपश्लेषिकेधिकरणे सप्तमी तदा किं पूर्वस्य कार्यमथ पर स्येति अनियमप्रसङ्गे नियमाय परिभाषोपस्थानम्। नन्दमान इति। नाच्छीत्यादिषु चानशि कृते शपि च चानशो व्यवहि तस्यापि ङितो भावान्नलोपप्रसङ्गः। क्वचिन्नन्यमान इति पाठः। तत्र यगाश्रयेन लोपप्रसङ्गः। अर्थवत्परिभाषा तु विकरणाना

नान्नलोपइतीयस्तुच्यमाने नन्दितानन्दक इत्यत्रापि प्रसज्येत। एवं तर्हि एवं वक्ष्यामि नान्नलोपो निदिता म्। ततो हलउपधायाः क्ङितीति। अनिदितामिति। नैवं शक्यम्। इदंहि नस्यानुहिनस्ति। तस्मान्नैवं शक्यम्। न चे देवं नन्दितानन्दक इत्यत्रापि प्रसज्येत एवं तर्हि क्ङितीति वर्तते। एवमपि हि नस्ति त्यत्र न प्राप्नोति। नैषा परसप्तमी। का तर्हि। सत् सप्तमी क्ङिति सति। एवमपि नन्दमान इत्यत्रापि प्राप्नोति। एवं तर्हि नशब्द एवात्र क्ङित्त्वेन विशेष्य ते क्ङिद्यो नशब्दो भवतीति। एवमपि यज्ञानां यत्नानामित्यत्र प्राप्नोति। दीर्घत्वमत्र बाधकं भविष्यति। इदम त्र संप्रधार्यं दीर्घत्वं क्रियतां नलोप इति। किमत्र कर्तव्यम्। परत्वान्नलोपः। तस्मात् शकारस्य ग्रहणं कर्तव्यम्। अथ क्रियमाणेपि शकार ग्रहणे इह कस्मान्न भवति। विश्नानां प्रश्नानामिति।

नानर्थक्यान्नोपन्यस्तः। नशब्द एवेति। अर्थवशाद्विभक्तिविपरिणामो भवतीति सप्तमीपरित्यागेन पञ्चम्याश्रयणात्। प्रत्य याप्रत्यययोः प्रत्ययेसंप्रत्यय इत्यत्र परिहारः संभवति। यज्ञानामिति। पूर्वत्रासिद्धमिति श्चुत्वस्यासिद्धत्वान्नशब्दादुत्तरो नकारः। परत्वान्नलोप इति। अग्नीनामित्यादौ नामीति दीर्घत्वं सावकाशं नलोपो हि नस्तीत्यादौ सावकाशो यज्ञानामित्यादा वुभयप्रसङ्गे परत्वान्नलोपप्रसङ्गः। यत्तु उपिचेति दीर्घत्वं तत्सन्निपातलक्षणपरिभाषाबलान्न भवति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षणप्रतिपदोक्तयोरिति। लाक्षणिकस्यानुमेयरूपत्वादितरस्य तु प्रत्यक्षत्वात्। यदा तु विकरणानामपि स्वार्थे नार्थवत्ताश्री
यते तदार्थवद्ग्रहणपरिभाषया विश्नानां प्रश्नाना मितिनलोपव्यावृत्तिसिद्धिः॥ अनिदितां हल उपधायाः॥ विलगितद्दति। गत्यर्थत्वा
त्कर्तरि क्तः। कुञ्जधातिस्त्रोपतापोगृह्यते न तु रोगो द्वन्द्वोपतापगर्ह्यादिति यथा। अन्यथा शरीरविकारग्रहणं केवलं कुर्या
त्। विकपितद्दति। गत्यर्थाकर्मकेति गत्यर्थत्वात्कर्तरि क्तः। शरीरविकारोऽत्र व्याधिरुच्यते। न तु स्थौल्यादिः कम्पेरत द्विष

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्येत्येवं न भविष्यति॥ अनिदितां हल उपधायाः क्ङिति॥ अनिदितां नलोपे लङ्गिक
म्प्योरुपतापशरीरविकारयोरुपसंख्यानम्॥ अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरविकारयोरुपसं-
ख्यानं कर्तव्यम्। विलगितः। विकपितः। उपतापशरीरविकारयोरिति किमर्थम्। विलङ्गितः। विकम्पितः। वृंहे
रच्यनिटि। वृंहेरच्यनिटि उपसंख्यानं कर्तव्यम्। निबर्हयति। निबर्हकः। अचीति किमर्थम्। निबृंह्यते। अनिटीति
किमर्थम्। निबृंहिता। निबृंहितुम्। तत्तर्हि उपसंख्यानं कर्तव्यम्। न कर्तव्यम्। बृहिः प्रकृत्यन्तरम्। कथं ज्ञाय
ते। अचीति लोप उच्यते अनजादावपि दृश्यते। निबृह्यते। अनिटी त्युच्यते। इडादावपि दृश्यते। निबर्हिता। नि
बर्हितुम्। अजादावपि न दृश्यते। निबृंहयति। निबृंहकः। रञ्जेर्णौ मृगरमणे। रञ्जेर्णौ मृगरमणे उपसंख्या
नं कर्तव्यम्। रजयति मृगान्। मृगरमण इति किमर्थम्। रञ्जयति वस्त्राणि॥ घिनुणि च॥ घिनुणि चोपसं-
ख्यानं कर्तव्यम्। रागी॥ घिनुणि निपातनात्सिद्धम्। किं निपातनम्। त्यजरजेति। अशक्यं धातुनिर्देशे निपा
तनत्वमाश्रयितुम्। इह हि दोषः स्यात्। दशनद्दः करणे। दंष्ट्रा। नैतद्धातुनिपातनम्। किं तर्हि प्रत्ययान्तस्यै
तद्रूपम्। तस्मिंश्च प्रत्यये लोपो भवति। दंशसञ्जस्वञ्जशपीति। रजकरजनरजःसूपसंख्यानम्॥ रजकरजन
रजःसूपसंख्यानं कर्तव्यम्। रजकः। रजनं। रजद्दति। रजकरजनरजःसु कित्वात्सिद्धम्।

यत्वात्। वृंहेरिति। वृहि वृद्धावित्यस्य। बृहिः प्रकृत्यन्तरमिति। वृह वृहि वृद्धाविति पाठात्। अजादावपि न दृश्यत इति।
ततश्च दोषाये वोपसंख्यानं स्यादिन धातुलोप इति गुणनिषेधनिवारणाय यत्नश्च कर्तव्यः स्यादित्यनारम्भणीयमे
वोपसंख्यानम्। रजयतीति। नलोपे वृद्धौ च जनीजृष्क्नसुरञ्जोऽमन्ताश्चेति मित्वाद्ध्रस्वः। प्रत्ययान्तस्येति। शबन्तस्येत्यर्थ
। यङ्लुङ्निवृत्त्यर्थश्च तत्र शब्निर्देशः। घिनुण्स्तु ताच्छील्ये विधीयते रूढिशब्दप्रकाराश्च ताच्छीलिकाद्दति यङ्लुगन्ताद्द्रञ्जे
र्न भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

औणादिका इति। रजक इत्यत्र क्वुन् शिल्पिसंज्ञयोरिति क्वुन् प्रत्ययः। रजकीति पुंयोगादाख्यायामिति ङीष्। अपुंयोगे तु ङीषानभाव्यमिति भाष्यकाराभिप्रायः। रजनमित्यत्र रञ्जेः क्युन् प्रत्ययः। स च बाहुलकात् टिद्द्रष्टव्यः। तेन रजनीति ङीब्भवति। रज इत्यत्र भूरञ्जिभ्यां किदित्यसुन् प्रत्ययः किद्भवति॥ शास इदङ्हलोः॥ शासिमात्रस्येति। शासु अनुशिष्टावित्यस्य आङः शासु इच्छायामित्यस्य चेत्यर्थः। नियमार्थमिति। क्वावेव शास इत्त्वं यथा स्यादाशास्त इत्यादौ मा भूदित्यर्थः। यस्माच्छासेरिति। शासु अनुशिष्टावित्यस्मादङ्विहितः सर्तिशास्त्यर्तिभ्यश्चे त्यत्र परस्मैपदाधिकारात् तत्राङः संसर्गाद्विशिष्टस्य

किन्त एवैते औणादिकाः। तद्यथा। रजकः। रजनं रज इति॥ शास इदङ्हलोः॥ शास इत्त्वे आशासः क्वावुपसंख्यानम्। शास इत्त्वे आशासः क्वावुपसंख्यानं कर्त्तव्यम्। आशीरिति। किं पुनरिदं नियमार्थम्। आहोस्विद्विध्यर्थम्। कथं नियमार्थं स्यात्कथं वा विध्यर्थम्। यदि तावच्छासिमात्रस्य ग्रहणं ततो नियमार्थम्। अथ हि यस्माच्छासेरङ्विहितस्तस्य ग्रहणं ततो विध्यर्थम्। यद्यपि शासिमात्रग्रहणमेवमपि विध्यर्थमेव। कथम्। अङ्हलोरित्युच्यते। न चात्र हलादिं पश्यामः। ननु च क्विबेव हलादिः। क्विपो लोपे कृते हलाद्यभावान्न प्राप्नोति। इदमिह संप्रधार्यम्। क्विपो लोपः क्रियतामङ्हलोरित्वमिति। किमत्र कर्त्तव्यम्। परत्वादङ्हलोरित्वम्। नित्यः क्विब्लोपः। कृतेप्यङ्हलोरित्वे प्राप्नोत्यकृतेपि। नित्यत्वात् क्विपो लोपे कृते हलाद्यभावान्न प्राप्नोति।

शास्तेर्ग्रहणं संसर्गस्य विशिष्टस्मृतिहेतुत्वात्। यथा सकिशोरा धेनुरानीयतां सवत्सा सकरभेति विशिष्टा धेनुः प्रतीयते। यद्येवं शासिमात्रग्रहणं कथमाशङ्कितम्। अथ हलोऽप्युपादानात्तस्य च शासिमात्रेण संबन्धसंभवादित्युच्यते। ननु साधारणासाधारणसन्निपातेपि असाधारणसंबन्धिग्रहणं दृश्यते। यथा वृद्धानां किशोरीणां च मध्ये धेनवो बध्यन्तामित्युक्ते वडवा एव बध्यन्ते न तु गवादयः। एवं तर्ह्येकशेषाद्याश्रयणाच्छासिमात्रग्रहणपक्षसंभवः। यद्यपीति। आचार्यदेशीयस्येदं वचनम्। विध्यर्थे चाशास्ते इत्यादावित्वमनिवारितं स्यात्। आर्यशीरित्यत्र च न प्राप्नोति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदि वेति। यथैव वेत्यर्थः। तथा चेति। तथैवेत्यर्थः। यत्र कार्यं वर्णरूपमेव निमित्तत्वेनोपादीयते तत्र प्रत्ययलक्षणेन न भवति। यथा राय: कुलं रैकुलमित्यायादेशः। यत्तु वर्णविशिष्टप्रत्ययनिमित्तं तद्भवत्येव। यथाऽतृणेडिति हलादौ पिति सार्वधातुके विधानात् प्रत्ययनिमित्तत्वादिमागमः। इत्वमपि हलादौ प्रत्यये क्ङिति विधीयमानं प्रत्ययनिमित्तत्वात् प्रत्ययलोपेऽपि भवति। अथ वेति। वर्णाश्रयत्वात् प्रत्ययलक्षणेन प्राप्तमित्वं क्वावित्यनेन विधीयते। अविशेषेणेति। प्रत्ययमात्रे क्ङितीत्यर्थः। अङ्गे वाजादाविति। तेन शासति शशासुरित्यादावित्वाभावः। हलादौ क्ङिति क्वौ च नियमाभावादित्वं भवत्येव। तुल्य

एवं तर्हि प्रत्ययलक्षणेन भविष्यति। वर्णाश्रयेनास्ति प्रत्ययलक्षणम्। यदि वा कानिचिद्वर्णाश्रयाण्यपि प्रत्ययलक्षणेन भवन्ति तथा चेदमपि भविष्यति। अथैवं वक्ष्यामि। शास इदङ्हलोः। ततः क्वौ। क्वौ च शास इद्भवति। आर्यशीः। मित्रशीः। तत आङः। आङ्पूर्वाच्च क्वौ शास इद्भवति। आशीरिति। इदमिदानीं किमर्थम्। नियमार्थम्। आङ्पूर्वाच्छासेः क्वावेव। क्व मा भूत्। आशास्ते आशास्यते आशास्यमान इति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। अविशेषेण शास इद्भवतीत्युक्त्वा ततोऽङीति वक्ष्यामि। तन्नियमार्थं भविष्यति। अङ्गे वाजादौ नान्यस्मिन्नजादौ। इहापि तर्हि नियमादित्वं प्राप्नोति। आशास्ते आशास्यते आशास्यमान इति। यस्माच्छासेरङ्विहितस्तस्य ग्रहणम्। न चैतस्माच्छासेरङ्विहितः। कथमाशीरिति। निपातनात्सिद्धम्। किं निपातनम्। क्षियाशीःप्रैषेषु तिङाकाङ्क्षमिति। अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति। अनुदात्तोपदेशेऽनुनासिकलोपो ल्यपि च॥ अनुदात्तोपदेशेऽनुनासिकलोपो ल्यपि चेति वक्तव्यम्। प्रमत्य। प्रतत्य।

जातीयापेक्षत्वान्नियमस्याजादिरेव व्यावर्त्यते। इहापीति। शासिमात्रस्य ग्रहणं मत्वा चोदयति। यस्माच्छासेरिति। वाक्यान्तरेऽपि श्रुतः संसर्गो विशेषावगतिहेतुर्भवति। यथा धेनवो मुच्यन्तां किशोरा बध्यन्तामिति वडवा एव प्रतीयन्ते। निपातनादिति। यथान्यासे तु पूर्वोक्तेन न्यायेन प्रत्ययलक्षणसद्भावादार्यशीरित्यत्रेत्वं भवति। आशीरित्यत्र तु निपातनादेव॥ अनुदात्तो॥ रा॰भ॰ १८
वा ल्यपीति सूत्रन्यासेऽविशेषेण विकल्पः प्राप्नोतीति वार्त्तिकारम्भः। तेनामन्तानां गमियमिरमिनमीनां ल्यपि विकल्पोऽन्येषां तु अनुदात्तोपदेशवनतितनोत्यादीनां नित्यं लोपः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गमः क्वौ। परीतदिति। तनोतेः क्विपि नलोपे कृते तुकि नहिवृतीति पूर्वपदस्य दीर्घः। संयदिति। यमेः क्विप्। ऊङ् चेति। अनुनासिकलोपोऽकारस्योङ् च। विनापि ङित्त्वेनान्यस्य सिध्यत्यूकार इति नार्थो ङिद्ग्रहणेन। अग्रेगूरिति। ओः सुपीति यणादेशो धातुत्वादूवत्यग्रेग्वाविति। भ्रूरिति। अचि श्नुधातुभ्रुवामित्यत्र भ्रूग्रहणं न कर्त्तव्यं धातुत्वादुवङः सिद्धत्वात्॥ जन॥ अथकि मयमिति। यदि द्वन्द्वनिर्देशस्ततः समुच्चयः। अथ सौत्रनिर्देशस्ततो विशेषणविशेष्यभाव इति पक्षद्वयसंभवः।

ततो वामः। वा अम इति वक्तव्यम्। प्रगत्य। प्रगम्य। प्रयत्य। प्रयम्य। प्ररत्य। प्ररम्य। प्रणत्य प्रणम्य। गमः क्वौ। गमादीनामिति वक्तव्यम्। इहापि यथा स्यात्। परीतत् सह कुण्डिकया। संयत्। सुनदिति। ऊङ् च। ऊङ् च गमादीनामिति वक्तव्यम्। लोपश्च। अग्रेगूः। अग्रेभ्रूः॥ जनसनखनां सञ्झलोः॥ अथ किमयं समुच्चयः सनि च झलादौ चेति आहोस्वित् सनो विशेषणं झल्ग्रहणं सनि झलादाविति। किं चातः। यदि समुच्चयः सन्यझलादावपि प्राप्नोति। सिसनिषति। जिजनिषते। चिखनिषति। अथ सन्विशेषणं झल्ग्रहणम्। जातः जातवानित्यत्र न प्राप्नोति। यथेच्छसि तथास्तु। अस्तु तावत् समुच्चयः। ननु चोक्तं सन्यझलादावपि प्राप्नोतीति। नैष दोषः। प्रकृतं झल्ग्रहणमनुवर्त्तते तेन सनं विशेषयिष्यामः सनि झलादाविति। अथवा पुनरस्तु सन्विशेषणम्। कथं जातो जातवानिति। प्रकृतं झलि क्ङितीत्यनुवर्त्तते। यद्येवं नार्थो झल्ग्रहणेन। योगविभागः करिष्यते। जनसनखनामनुनासिकस्याकारो भवति झलि क्ङिति। ततः सनि च। सनि च जनसनखनामनुनासिकस्याकारो भवति झलीत्येव। तस्मान्नार्थो झल्ग्रहणेन॥ सनोतेरनुनासिकलोपादात्वं विप्रतिषेधेन॥ सनोतेरनुनासिकलोपादात्वं भवति विप्रतिषेधेन। सनोतेरनुनासिकलोपस्यावकाशः अन्ये तनोत्यादयः। आत्वस्यावकाशः।

सिसनिषतीति। सनीवन्तर्धेति पक्षे इडागमः। ततः सनि चेति। अक्ङिदर्थमेतत्। जन्तुरित्यादावात्वाप्रसङ्गा[illegible] पूर्वत्र क्ङिद्ग्रहणानुवृत्तिः। सनोतेरनुनासिकलोपस्येति। सनोतेरनुनासिकलोपः प्राप्नोति तनोत्यादित्वात्तस्यान्ये तनोत्यादयोऽवकाश इत्यर्थः। सनोतेस्तु तनोत्यादिषु पाठः तनादिकृञ्भ्य उः। तनादिभ्यस्तथासोरित्येवमर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै अन्येजनादयइति।समुदायस्यकार्येविधीयमानमवयवानांप्रवर्ततेतत्रकस्यचिदवयवस्यकृतंसमुदायस्यकृतंभवतीति ६४२
९९ भावः।जनादयइतिबहुवचननिर्देशः प्रयोगभेदारोपितबहुत्वजनखनापेक्षः।आत्त्वंभवतीति।सातःसातवानित्यादौ।सनूग्र
हणं तुसनोत्यर्थमेव सिषासतीति।जनखनाभ्यांतुसनःसेट्त्वाद्झलादित्वाभावः।भवतीहविप्रतिषेधइति।विप्रतिषेधेन

अन्येजनादयः।सनोतेरनुनासिकस्योभयंप्राप्नोति।सातःसातवानिति।आत्त्वंभवतिविप्रतिषेधेन।नैषयुक्तो विप्रतिषेधः।नहिसनोतेरनुनासिकलोपस्यान्यत्तनोत्यादयोवकाशःसनोतेर्यस्तनोत्यादिषुपाठःसोनवका शः।नखल्वप्यात्वस्यान्येजनादयोवकाशाः।सनोतेर्यदात्वेग्रहणंतदनवकाशम्।तस्यानवकाशत्वादयुक्तो विप्रतिषेधः।एवंतर्हितनोत्यादिषुपाठःसावकाशः।कोवकाशः।अन्यानितनोत्यादिकार्याणि।तनादिभ्य स्तथासोरिति।आत्वेपिग्रहणंसावकाशम्।कोवकाशः।सनिच।येविभाषाचाउभयोःसावकाशयोर्युक्तोवि प्रतिषेधः।एवमप्ययुक्तोविप्रतिषेधः।पठिष्यतिह्याचार्यःपूर्वत्रासिद्धेनास्तिविप्रतिषेधोभावादुत्तरस्येति ।एकस्यहिनामाभावेपिविप्रतिषेधोनस्यात्।किंपुनर्यत्रोभयंनास्ति।नैषदोषः।भवतिइहविप्रतिषेधः।किं वक्तव्यमेतत्।नहि।कथमनुच्यमानंगंस्यते।आचार्यप्रवृत्तिर्ज्ञापयतिभवतीहविप्रतिषेधइति।यदयं घुमास्थागापाजहातिसांहलीतिहल्ग्रहणंकरोति।कथंकृत्वाज्ञापकम्।हल्ग्रहणस्यैतत्प्रयोजनंहला दावीत्वंयथास्यात्।इहमाभूत्गोदः कम्बलदइति।यदिचात्रविप्रतिषेधोनस्यादिहहल्ग्रहणमनर्थ कंस्यात्।अस्त्यत्रईत्वम्।ईत्वस्यासिद्धत्वाल्लोपोभविष्यति।पश्यतित्वाचार्योभवतीहविप्रतिषेधः ।ततोहल्ग्रहणंकरोति।

व्यवस्थायांक्रियमाणायामसिद्धत्वंनभवतीत्यर्थः।गोदइत्यादावसतिहल्ग्रहणेपरत्वादीत्वंस्यादितिहल्ग्रहणंक्रिय रामः
ते।असतिहिविप्रतिषेधेद्वयोःपरस्परस्मिन्नसिद्धत्वात्कृतेपीत्वेआलोपेनगोदादेःसिद्धत्वादनर्थकंहल्ग्रहणंस्यात्। ९९

CC-0. In Public Domain. Digitization by eGangotri

नैतदस्तीति। हल्ग्रहणस्य ज्ञापकत्वं विघटयति। असत्यपि विप्रतिषेधे गोदङ्त्यादिर्न सिध्यति कृते ईत्वे इड्यङादेशप्रस-
ङ्गादिति तन्निवारणार्थं हल्ग्रहणं न ज्ञापकमित्यर्थः। ज्ञापकवादी चाह। ननु चासिद्धत्वादिति। ज्ञापकभङ्गवाद्याह। नश-
क्यमिति। धियाविति। ध्यानेः पिबतेश्च क्विपि लुप्तेऽपि प्रत्ययलक्षणेनेत्वं भवति। तस्यासिद्धत्वे आश्रीयमाणे दूयङ् प्राप्नोतीती
यङिः अवस्थाश्रयिण्यणीत्वस्यासिद्धत्वमित्यर्थः। ज्ञापकवाद्याह। नैतदीत्वमिति। अभ्युपगम्यापीत्वमाह। समानाश्रय
मिति। धियावित्यादावीत्वं व्याश्रयं गोदङ्त्यादौ तु समानाश्रयत्वादियङ् सिद्धमेवेति ज्ञापकमेव हल्ग्रहणं स्थितम्।

नैतदस्ति ज्ञापकम्। व्यवस्थार्थमेतत्स्यात्। हलादावीत्वं यथा स्यादजादौ माभूदिति। किंच स्यात्। यद्य
जादावपी त्वं स्याद्दूयङादेशः प्रसज्येत। ननु चासिद्धत्वादेव यङादेशो न भविष्यति। न शक्यमीत्वमिय
ङादेशेऽसिद्धं विज्ञातुम्। इह हि दोषः स्यात्। धियौ धियः पियौ पियः इति। नैतदीत्वम्। किं तर्हि ध्याप्योः संप्र
सारणमेतत्। समानाश्रयं खल्वप्यसिद्धं भवति। व्याश्रयं चैतत्। कथम्। कावीत्वम्। क्विबन्तस्य विभक्तावि
यङादेशः। व्यवस्थार्थमेव तर्हि हल्ग्रहणं कर्तव्यम्। कुत एतत्। ईत्वस्यासिद्धत्वाल्लोपः। न पुनर्लोपस्या
सिद्धत्वादीत्वमिति। ———— लोपे तु चक्रकमव्यवस्था प्रसज्येत। नास्ति चक्रकप्रसङ्गः
न ह्यव्यवस्थाकारिणा शास्त्रेण भवितव्यम्। शास्त्रतो नामव्यवस्था तत्रेत्वस्यासिद्धत्वाल्लोपः। लोपेनाव
स्थानं भविष्यति। न खल्वपि तस्मिंस्तदेवासिद्धं भवति।

पुनर्ज्ञापकभङ्गवाद्याह। व्यवस्थार्थमिति। ज्ञापकवाद्याह। नास्ति चक्रकप्रसङ्ग इति। द्वयोरपि शास्त्रयोः प्रवृत्तौ सत्यां पुनः प्र
वृत्तिकारणाभावादित्यर्थः। लोपेनावस्थानमिति। अथ विपरीतक्रमः कस्मान्न भवति पूर्वमल्लोपस्तस्यासिद्धत्वादीत्वमि
ति। उच्यते। अस्मिन्नपि क्रमे ईत्वस्यासिद्धत्वात्पुनरल्लोपो भविष्यति लक्ष्यसंस्कारार्थत्वाच्छास्त्रप्रवृत्तेः। न खल्वपीति। आ-
ल्लोपे कर्तव्ये ईत्वस्यासिद्धत्वं न त्वीत्वे कर्तव्ये। अस्मिन्निदमसिद्धमिति भेदनिबन्धनत्वाद्विषयविषयिभावस्य। ततश्चाल्लोपो
भविष्यति न पुनः पुनरीत्वमिति ज्ञापकमेव हल्ग्रहणमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· पुनर्ज्ञापकभङ्गं वा व्याह। व्यवस्थार्थमिति। नहि शास्त्रचक्षुरन्तरेण वचनमिदमिष्टमिदमनिष्टमिति मन्यते। तदेवेति। व्यक्ति
२० पदार्थपक्षे प्रतिलक्ष्यं लक्षणभेदाद्विषयविषयिविभागोपपत्तावीत्वशास्त्रमीत्वशास्त्रेण वासिद्धमिति पुनः पुनरीत्वप्रवर्त्त
नादपि चक्रकप्रसङ्ग इत्यर्थः। ज्ञापकं वा व्याह। एवं तर्हीति। ईच्च भवतीति। अत्र क्ङितीत्यपेक्ष्यते॥ सनः क्तिचि। इह रूपत्रयं सा

व्यवस्थार्थमेव तर्हीह हल्ग्रहणं कर्तव्यम्। हलादावीत्वं यथा स्यात्। अजादौ मा भूदिति। कुतो ह्येतत्। ईत्वस्या
सिद्धत्वाल्लोपः। लोपेनाव्यवस्थानं भविष्यति। न पुनर्लोपस्यासिद्धत्वादीत्वमीत्वेनाव्यवस्थानं स्यात्। तदेव
खल्वपि तस्मिन्नसिद्धं भवति। कथम्। पठिष्यति ह्याचार्यः। चिण्णमुलुकि तग्रहणानर्थक्यं संघातस्याप्रत्यय-
त्वात्। तलोपस्य चासिद्धत्वादिति। चिण्णलुकि चिण्लुकि वासिद्धो भवति। एवं तर्हि यदि व्यवस्थार्थमेत
त्स्यात्। नैवायं हल्ग्रहणं कुर्यात्। अविशेषेणायमीत्वमुक्त्वा तस्याजादौ लोपमपवादं विदधीत। तदेत
त्कथम्। इदमस्ति। आतो लोप इटि चेति। ततः। घुमास्थागापाजहातिसां लोपो भवति। इटि च अजादौ क्ङिती
ति। किमर्थं पुनरिदम्। ईत्वं वक्ष्यति तद्बाधनार्थम्। तत ई हलि। ईच्च भवति घ्वादीनाम्। ततः एर्लिङि। वान्यस्य
संयोगादेः। न ल्यपि। मयतेरिदन्यतरस्याम्। ततः। यति। यति च ईद्भवति। सोऽयमेवं लघीयसा न्यासेन सिद्धे
सति यद्धल्ग्रहणं करोति गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यो भवतीह विप्रतिषेध इति॥ सनः
क्तिचि लोपश्चास्यान्यतरस्याम्। इहान्यतरस्याग्रहणं शक्यमकर्तुम्। कथम्। सनः क्तिचि लोपश्च आ
त्वं च विभाषेति। अपर आह। सर्व एवायं योगः शक्योऽकर्तुम्। कथम्। इह लोपोऽपि प्रकृतः। आत्वमपि प्रकृ
तम्। विभाषाग्रहणमपि प्रकृतम्। तत्र केवलमभिसंबन्धमात्रं कर्तव्यम्। सनः क्तिचि लोपश्चात्वं च विभाषेति।

ध्यं सातिः सतिः सन्तिरिति। तच्च सनः क्तिचि लोपश्चेत्येतावति सूत्रे विभाषेत्यतो विभाषाग्रहणानुवृत्तौ सिध्यतीति मत्वाह। इहे रामः
ति। सर्व एवायमिति। सनः क्तिचीत्येव लोपस्य प्रकरणात्सिद्धत्वात् लोपश्चेत्यपि न वक्तव्यमित्यर्थः। बहूनां पदानां प्रत्याख्यानाच्च २०
सर्व एवायं योग इत्युच्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri

आर्धधातुके॥ अथ द्वितीयाध्यायविहिता आर्धधातुकनिमित्ता आदेशा इहैव कस्मान्नोक्ताः एवं ह्यार्धधातुकग्रहणं न कर्तव्यं भवति। नैव शक्यम्। आभाच्छास्त्रीये कार्ये कर्तव्ये तेषामसिद्धत्वप्रसङ्गात्। ततश्चास्त्यादेशस्य भुवो वुग् न स्यात् नादेशस्यैव तु स्यात्। तथा च ख्यतुरित्यादौ ख्याञोऽसिद्धत्वादाल्लोपाप्रसङ्गः। कानि पुनरिति। कानिचिदन्यथापि सिध्यन्तीति प्रश्नः। चिकीर्षतीति। अकारोच्चारणं तु सनः प्रतीषिषतीत्यादौ द्विर्वचनार्थं स्यात्। शप एव तर्हीति। शब्विधानं तु प्रत्ययलक्षणेन गुणाद्यर्थं स्यात्। अतो दीर्घो यञीति अस्य सर्वत्राकारलोपे कोऽवकाश इति चेत्। वचनादतो लोपं बाधित्वा पचाव इत्यादौ प्रवर्तेत तत्र च कृतार्थमुपदेशाद्धु सार्वधातुकमनुदात्तत्वमज्ञापकं सार्वधातुके अतो लोपाभावस्य। कार्यार्थमेव तत्स्यादिति। प्रत्ययलक्षणप्रतिषेधार्थमित्यर्थः। यत्तर्हीति। यदि शपोऽतो लोपः स्याद् यावाप्रभृतय आकारान्ता भूवादिष्वेव प

आर्धधातुके॥ कानि पुनरार्धधातुकाधिकारस्य प्रयोजनानि। अतो लोपो यलोप श्च णिलोपश्च प्रयोजनम्। आल्लोप ईत्वमेत्त्वं च चिण्वद्भावश्च सीयुटि॥ आतो लोपः। चिकीर्षिता चिकीर्षितुम्। आर्धधातुक इति किमर्थम्। चिकीर्षति। नैतदस्ति प्रयोजनम्। अस्त्वत्र सनोऽकारलोपः। शपोऽकारस्य श्रवणं भविष्यति। शप एव तर्हि मा भूदिति। एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति। नानेन शबकारलोपो भवतीति यदयमदिप्रभृतिभ्यः शपो लुकं शास्ति। नैतदस्ति ज्ञापकम्। कार्यार्थमेतत्स्यात्। वित्तो मृष्ट इति। यत्तर्हि आकारान्तेभ्यो लुकं शास्ति।

ह्मरनुनत्वदादिषु। लुग्लोपयोस्तत्र विशेषाभावात्। ननु शिं शपा चोद्यमिदं पाठस्यावश्यकर्तव्यत्वात्। नैष दोषः। विशेषकार्यार्थत्वाद्धि ग्रिष्ठगणपाठस्य। ननु यातीब्राह्मणी यान्तीब्राह्मणीत्यादौ शप्श्यनोर्नित्यमिति प्रत्ययलक्षणेन नित्यो नुम् मा भूदित्येवमर्थं लुग्विधानं स्यात्। नैतदस्ति। लुमता लुप्ते यदङ्गं तस्य कार्ये प्रत्ययलक्षणप्रतिषेधेन तत्र नुमागमस्तस्याङ्गस्य कार्यमिति। लुक्यपि क्रियमाणे प्रत्ययलक्षणप्रसङ्गः। सर्वत्र च शपोऽतो लोपे विज्ञायमाने शप्श्यनोर्नित्यमित्यत्र प्रत्ययलक्षणं भूतपूर्वविज्ञानं वाश्रयणीयमिति नास्त्येव लुग्लोपयोर्विशेष इति ज्ञापक एवाकारान्तानामन्येषां चागुणवृद्धिभाजां मदृहनासादीनामदादिषु पाठः सार्वधातुके अतो लोपाभावस्य। कथं तर्हि यानीकुले इत्यादौ प्रत्ययलक्षणेन नुम् भवति। शपाकारस्य विशेषणात्। शपो योऽकारस्तदन्तादङ्गादुत्तरस्य शतुर्नुम् भवतीति। न च शपि लुप्ते शपोऽकारः संभवति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृक्षस्येति। प्रागेव च स्यादतो लोपः। भूतपूर्वगत्या तु सादेशः। ननु परत्वात्स्यादेशो भविष्यतीति न तत्र कृते संनिपातपरिभा- ६४२
भा॰ कै॰ षया तो लोपेन भविष्यति। उच्यते। कष्टायेति निर्देशेनानित्यत्वज्ञापनादनुपस्थानादस्याः परिभाषायाः स्यादेवातो लोपः। पा
२९ चयतीति। णिज्विधानं तु प्रत्ययलक्षणार्थं स्यादिडाद्यर्थं च पाचयितेति। यान्तीति। ननु श्नाभ्यस्तयोरेवातः सार्वधातुके ना
न्यस्येति एवं नियमादत्र न भविष्यति। विपरीतोऽपि नियमः किं न स्यात् सार्वधातुक एव श्नाभ्यस्तयोरिति। ययतु रित्यादेः

याति। वाति॥ अस्तेश्च॥ अस्तेश्च श्यपो लुकं शास्ति। अस्ति। इदं तर्हि प्रयोजनम्। वृक्षस्य। अतो लोपः प्राप्नोति। यल्लोपोऽपि प्रयोजनम्। बेभिदिता। चेच्छिदिता। आर्द्धधातुक इति किमर्थम्। बेभिद्यते। चेच्छिद्यते। णिलोपः प्रयोजनम्। पाच्यते। याज्यते। कारणा। हारणा। आर्द्धधातुक इति किमर्थम्। पाचयति। याजयति। कारयति। हारयति। आल्लोपः। पपतुः। पपुः। ववतुः। ववुः। आर्द्धधातुक इति किमर्थम्। यान्ति। वान्ति। ईत्वम्। धीयते। दीयते। आर्द्धधातुक इति किम्। अदाताम्। अधाताम्। एत्वं ग्लेयात्। म्लेयात्। आर्द्धधातुक इति किम्। ग्लायात्। म्लायाताम्। चिण्वद्भावश्च सीयुटि। चिण्वद्भावे सीयुटि किमुदाहरणम्। कारिषीष्ट। हारिषीष्ट। आर्द्धधातुक इति किम्। क्रियेत। ह्रियेत। नैतदुदाहरणम्। यकाव्यवहितत्वान्न भविष्यति। इदं तर्ह्युदाहरणम्। प्रस्नुवीत। इदं चाप्युदाहरणम्। क्रियेत। ह्रियेत। ननु चोक्तं यकाव्यवहितत्वान्न भविष्यतीति। यक एव तर्हि मा भूदिति। किं च स्यात्।

न स्यात् श्नाग्रहणमुत्तरार्थं स्यात्। अदाताम् इति। लुङ् ताम् गातिस्थेति सिचो लुक्। प्रस्नुवीतेति। कर्मकर्तरीदमुदाहरणम्।
तत्र यकः प्रतिषेधात्। कर्मणि तु प्रस्नूयेतेति भाव्यम्। ननु चिणोऽपि प्रतिषेधात्कथं चिण्वद्भावः। एवं तर्हि भावकर्मणोश्चि- णमः
ण्दर्शनादत्र चिण्वद्भावप्रसङ्ग इत्याशयः। असमाप्तस्योदाहरणान्तरमाह। इदं चापीति। येभ्यो धातुभ्यः कर्मकर्तरि चि २९
ण् प्रतिषिध्यते तेषां चिण्वद्भावस्यापि निषेधः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृद्धिरिति। एतच्चरायहल्लोपावित्यायनम्पश्योक्तम्। अत्र हि णिज्वद्भावादातो लोपोपि प्राप्तो वृद्धिश्च। यावादिभ्यो हि शपो लुग्वि धानेन सार्वधातुके आतो लोपाभावो पिच्चापि तदिति स्वाश्रयो नो लोपो माभूत्। णिज्वद्भावाच्च णित्स्य दर्शनात्स्यादेवाभाष्यका रेण तु प्राप्तिमात्रं वृद्धेराश्रित्योक्तम्। अथवा दोषोपलक्षणं वृद्धिरतो लोपे पिरूपासिद्धिप्रसङ्गात्। वृद्धौ कृतायामाकुणश्च- प्राप्नोति युक् च। तत्र वार्णादाङ्गं बलीय इति युक्प्रसङ्गः। इट्प्रसङ्गस्तु विशेषाभावान्नोक्तः॥ भ्रस्जो रो। आदेशान्तराणां स्था नितुल्यदेशानां दर्शनात्स्यच्छति। अयं रमिति। रेफग्रहणस्योपलक्षणार्थत्वादुपधाया अपीति बोद्धव्यम्। रेफस्य तर्हीति। स्था तान्तरे प्रवृत्ते न रमोऽनिवर्तितत्वात्। षष्ठ्युच्चारणसामर्थ्यादिति। रोपधयोरिति स्थानषष्ठ्यात योरत्र विषयेऽप्रयोगः प्रतिपा द्यते। रोपधयोः प्रसङ्गे रमप्रयुज्यते रोपधो न प्रयुज्येतेत्यर्थः। रमप्रयुज्यमानो मित्वादचोन्त्यात्परो भवतीति वाक्यार्थः सं

वृद्धिः। वृद्धौ कृतायां युक् प्रसज्येत॥ भ्रस्जो रोपधयोरमन्यतरस्याम्॥ अयं रम् रेफस्य स्थाने कस्मान्न भवति। मिदचोन्त्यात्पर इत्यनेनाचामन्त्यात्परः क्रियते। रेफस्य तर्हि श्रवणं कस्मान्न भवति। षष्ठ्युच्चारणसामर्थ्यात्। ।भारद्वाजीयाः पठन्ति। भ्रस्जो रोपधयोर्लोप आगमो रम् विधीयत इति॥ भ्रस्जादेशात्संप्रसारणं विप्रतिषेधेन॥ भ्रस्जादेशात्संप्रसारणं विप्रतिषेधेन भवति। भ्रस्जादेशस्यावकाशः। भर्ष्टा भर्ष्टुम्। संप्रसारणस्यावकाशः। भृज्जति। इहोभयं प्राप्नोति। भृष्टः भृष्टवानिति। संप्रसारणं भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वक्तव्यः।

पद्यते। यस्य तु देशान्तरे नास्ति विधानं स स्थानि देश एव भवति। तत्प्रसङ्गे तस्य विधानादिति शिष्टदेशश्च स्थानिनः प्रसङ्ग इति तद्देशेनैवादेशेन भाव्यम्। भारद्वाजीया इति। ते हि सनः क्तिचि लोप इत्यतो लोपग्रहणमनुवर्त्य रोपधयोर्लोपं रमागमं चान्यतरस्यां विदधति। भृज्जतीति। आर्द्धधातुकाधिकारादत्र रमोऽप्रसङ्गः। रसोरिति। साधकस्य रेफस्य सकारस्य च ऋशब्दो वा आदे- शः। तत्र कृते क्ङितिगुणः प्रवर्तते भर्ष्टेति। ऋकाराभावपक्षे तु भ्रष्टेति। क्ङिति तु ऋशब्दे भृष्टमिति भवति। तदभावपक्षेपि संप्रसारणे सति भृष्टमिति। नार्थः पूर्वविप्रतिषेधेनेति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. कै. इतरोत्रापि पूर्वविप्रतिषेधो वक्तव्य इति तुल्यतां प्रतिपादयन्नाह । रसोरिति । भ्रस्जेः सिचि रमभावं विकल्पितं बाधित्वा परत्वा- ६ ४ २
२२ न्नित्यं हलन्तलक्षणा वृद्धिः प्राप्नोतीति रमभावार्थः पूर्वविप्रतिषेधो वक्तव्य एव । तेन रूपद्वयं सिध्यति अभ्राक्षीदभार्क्षीदि-
ति । ननु रमभावो नित्यः कृतायामपि वृद्धावेकदेशविकृतस्यानन्यत्वात्प्रसङ्गात् । वृद्धिस्तु शब्दान्तरस्य प्रसङ्गादनित्या । अ-
जाकृतेरेकत्वान्नास्ति वृद्धेः शब्दान्तरस्य प्राप्त्यानित्यत्वमिति द्वयोर्नित्ययोः परत्वाद्वृद्धिप्रसङ्गः । अन्तरङ्गः रमभाव इति-

रसोर्वचनात्सिद्धम् । रसोर्वा रमभवतीति वक्ष्यामि । रसोर्वचने सिचि वृद्धेर्भ्रस्जादेशः ॥ रसोर्वचने सिचि वृद्धेर्भ्रस्जादेशो वक्तव्यः । वृद्धौ कृतायामिदमेव रूपं स्यात् । अभ्राक्षीत् । इदं न स्यात् । अभार्क्षीत् इति । सर्वथा वयं पूर्वविप्रतिषेधान्न मुच्यामहे । सूत्रं च भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं भ्रस्जादेशात्संप्रसारणं पूर्वविप्रतिषेधेनेति । इदमिह संप्रधार्यम् । भ्रस्जादेशः क्रियतां संप्रसारणमिति । किमत्र कर्तव्यम् । परत्वात् भ्रस्जादेशः । नित्यत्वात्संप्रसारणम् । कृते भ्रस्जादेशे प्राप्नोत्यकृतेपि । भ्रस्जादेशोपि नित्यः । कृतेपि संप्रसारणे प्राप्नोति अकृतेपि । कथम् । योसावृकारो रेफस्तस्य चोपधायाश्च कृतेपि प्राप्नोति । अनित्यो भ्रस्जादेशः । न हि कृते संप्रसारणे प्राप्नोति । किं कारणम् । न हि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते । अथापि कथंचिद्गृह्यन्ते । एवमप्यनित्यः । कथम् । उपदेश इति वर्तते ।

चेत् । न सिच्यन्तरङ्गमस्तीति ज्ञापयिष्यते । रमभावे तु क्रियमाणे परत्वाद्वृद्धौ कृतायां पुनः प्रसङ्गविज्ञानाद्रमि सति सिद्धमभार्क्षीदिति । योसावृकारो रेफ इति । ननु च ऋकारावयवस्य रेफस्य रम् क्रियमाणः कथमन्त्यादचः परः स्यात् । माभूदन्त्यादचः परः । तत्र विषये आदेशो भविष्यति । मित्त्वं तु भर्ष्टन्त्यादौ सावकाशम् । उपदेश इति वर्तनादिति । भ्रस्जेरुपदेशे यो रेफस्तस्य स्थाने र- रामः
मभवति । न च ऋकारावयव उपदेशे भ्रस्जे रेफो भवति । २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri

वरीभृज्यत इति। तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति रीङो रेफोऽप्यज्झलेर्भवतीति रेफसङ्गः। अज्झले रूपदेशे तु नासौ रेफ इति
रस भावः। अनन्त्यविकारे इत्येतत्तु प्रयोजनाभावान्नाश्रितम्॥ अतो लोपः॥ यणादेशेनेति। एरनेकाच इत्यनेन। ततश्च यण
बाधनादियङः संप्रसारणगोचरत्वाभावः। सखायाविति। सख्युरसम्बुद्धाविति णित्त्वातिदेशपक्षे वृद्धेरयमवकाशो न तु-
कार्यातिदेशपक्ष इत्यवसेयम्। णिलोपस्यावकाश आटिटदिति। यणो णिलोपेन बाधितत्वादिति भावः। कारणेति। ननु

तत्रावश्यमुपदेशग्रहणमनुवर्त्यं वरीभृज्यत इत्येवमर्थम्॥ अतो लोपः॥ णयल्लोपावियङ्यण्गुणवृद्धि-
दीर्घेभ्यः पूर्वविप्रतिषिद्धम्। णयल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन भवतः। णिलोपस्याव-
काशः। कार्यते हार्यते। इयङादेशस्यावकाशः। श्रियौ श्रियः। इहोभयं प्राप्नोति। आटिटत्। आशिशत्। ननु चात्र
यणादेशेन भवितव्यम्। इदं तर्हि। अततक्षत्। अररक्षत्। यणादेशस्यावकाशः। निन्यतुः। निन्युः। णिलोपस्य
स एव। इहोभयं प्राप्नोति। आटिटत्। आशिशत्। वृद्धेरवकाशः। सखायौ। सखायः। णिलोपस्यावकाशः स एव।
इहोभयं प्राप्नोति। कारयते कारकः। हारयते। हारकः। गुणस्यावकाशः। चेता। स्तोता। णिलोपस्यावकाशः। आ-
टिटत्। आशिशत्। इहोभयं प्राप्नोति। कारणा हारणा। दीर्घत्वस्यावकाशः। चीयते। स्तूयते। णिलोपस्य स एव। इहो-
भयं प्राप्नोति। कार्यते। हार्यते। णिलोपो भवति विप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वक्तव्यः। सन्त्वत्रे-
ने विधयः।

चाऽत्रापि इयङोऽपवाद एरनेकाच इति यण् न प्राप्नोति परत्वात्तस्य गुणेन बाधनात्। गुणस्यापि पूर्वविप्रतिषेधाण्णिलोपेने-
त्यदोषः। एकैकेन सह णिलोपस्य बाधादियङादीनामन्यतमविषयेऽपि णिलोपस्यावकाश उपन्यस्यते। सन्त्वत्रे तदिति। ननु का-
रणा कारक इत्यत्र गुणवृद्ध्योः कृतयोरन्तरङ्गत्वाद्यादेशे कृते अन्त्यस्य णिलोपः प्राप्नोति वार्णादाङ्गं बलीय इत्ययायौ बाधि-
त्वा णिलोपो भविष्यतीत्यदोषः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· प्रापयतीति। प्रियस्य प्रादेशे वृद्धौ च पुगागमः। अनादिष्टधातुकत्वाण्णेर्धीतोरविधानादनेनालोपस्यात्राप्रसङ्गः॥ यस्य हलः॥ कि
२३ मिदमिति। यद्यागन्तुनाकारेणनिर्देशस्तनोवर्णमात्रग्रहणमन्यथातुसंघातग्रहणमितिपक्षद्वयसंभवः। अन्त्यस्येति।
अलोन्त्यस्येतिवचनात्। केमर्थक्यादिति। कोर्थोयस्यतत्किमर्थकंतस्यभावः कैमर्थक्यम्। प्रश्नविषययोः संबन्धोत्रभाव-

एतेषु विधिषु कृतेषु स्थानिवद्भावाण्णिग्रहणेनग्रहणाल्लोपो भविष्यति। नैवंशक्यम्। इयङादेशे हि दोषः स्यात्।
किम्। अन्त्यस्य लोपः प्रसज्येत। अल्लोपस्येयङ्यणोश्च नास्तिसंप्रधारणा। वृद्धेरवकाशः। प्रियमाचष्टे। प्रापयति। अ
ल्लोपस्यावकाशः। चिकीर्षिता। चिकीर्षितुम्। इहोभयंप्राप्नोति। चिकीर्षको जिहीर्षकः। गुणस्याल्लोपस्य च नास्तिसं
प्रधारणा। दीर्घत्वस्यावकाशः। अपिकाकः श्येनायते। अल्लोपस्य स एव। इहोभयंप्राप्नोति। चिकीर्ष्यते जिहीर्ष्य
ते। अल्लोपो भवति विप्रतिषेधेन। स तर्हि विप्रतिषेधो वक्तव्यः। न वक्तव्यः। इष्टवाचीपरशब्दः। विप्रतिषेधे यत्प
रमिष्टं तद्भवति॥ यस्य हलः॥ किमिदं यलोपे वर्णग्रहणमाहोस्वित्संघातग्रहणम्। कश्चात्र विशेषः। यलोपे
वर्णग्रहणं चेद्यान्तस्य प्रतिषेधो वक्तव्यः। शुच्यिता। मव्यिता। अस्तु तर्हि संघातग्रहणम्। यदि संघातग्रहण
मन्त्यस्य लोपः प्राप्नोति। सिद्धोन्त्यस्य पूर्वेणैव। तत्रारम्भसामर्थ्यात्सर्वस्य भविष्यति। एवमपि तेनातिप्रसक्त
मिति कृत्वा नियमो विज्ञास्यते यस्य हल एव नान्यतः। क्व मा भूत्। लोलूयिता। योयूयिता। कैमर्थक्यान्नियमो भव
ति विधेयं नास्तीति कृत्वा। इह चास्ति विधेयम्। किम्। अन्त्यस्य लोपः प्राप्तः सर्वस्य विधेयः। तत्रापूर्वो विधिर
स्तु नियमो वेति। अपूर्व एव विधिर्भविष्यति न नियमः। एवमप्यन्त्यस्य प्राप्नोति। किं कारणम्। न हि लोपः स
र्वापहारी।

प्रत्ययवाच्यः। अपूर्व एव विधिरिति। नियमे हि श्रुतार्थत्यागेनाश्रुतार्थो या अन्यनिवृत्तेः सामर्थ्यात्परिकल्पनमुक्तानुवाददोष एमः
श्च प्राप्नोति। एवमप्यन्त्यस्येति। अलोन्त्यपरिभाषोपस्थानादपूर्वस्य विधेरसंभवाद्विधिनियमसंभवे च विधिरेव ज्यायानिति- २३
अस्य न्यायस्यायमविषय इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संघातग्रहणसामर्थ्यादिति। किं यस्य हलइत्यस्य विधिरूपत्वं बाध्यतामुतालोन्त्यस्येति परिभाषेति। पारार्थ्याद् प्रधानायाः परि
भाषायाः परित्यागो युक्तो न तु प्रधानस्य विधिरूपस्य बाधनमुः सन्निधिनेति। सन्निधमिच्छत्यात्मन इति क्यच्। ततस्तृजू इट्। इह
वर्णग्रहणे क्यस्य विभाषेत्यत्र क्येन यकारो विशेष्यते। क्यस्य यो यकारो हलः परस्तस्य विभाषा लोपो भवत्यकारस्य त्वतो लोप-
इति नित्यो लोप इति यथेष्टं रूपद्वयं सिध्यति। संघातग्रहणे तु यस्य हलइत्यनेन येन नाप्राप्तिन्यायेनातो लोपो बाध्यो यल्लोपोपि
क्यस्य विभाषेति विकल्पेन बाध्यस्ततश्च पक्षे संघातस्यैव श्रवणं प्राप्नोति। नित्यं यलोपवदल्लोपस्यापि विकल्पेन बाधनात्। एव
तच्च न धातुलोप इत्यस्य प्रत्याख्यानाय यस्येति योगविभागो व्याख्यातस्तमनाश्रित्योक्तम्। तदाश्रये ल्लोपस्य सिद्धत्वात्। क्य-

ननु च संघातग्रहणसामर्थ्यात्सर्वस्य भविष्यति। संघातग्रहणं चेत्। क्यस्य विभाषायां दोषः। संघातग्रहणं चे
त् क्यस्य विभाषायां दोषो भवति। समिधिता। समिध्यिता। यदा लोपस्तदा सर्वस्य लोपः। यदाऽलोपस्तदा सर्वस्या
लोपः प्राप्नोति। आदेः परवचनात्सिद्धम्। हल इति पञ्चमी तस्मादित्युत्तरस्यादेः परस्येति यकारस्यैव भविष्य
ति। अथवा पुनरस्तु वर्णग्रहणम्। ननु चोक्तं यलोपे वर्णग्रहणं चेत्। धात्वन्तस्य प्रतिषेध इति। नैष दोषः। अ
ङ्गादिति हि वर्त्तते। न वै अङ्गादिति पञ्चम्यस्ति। एवं तर्ह्यङ्गस्येति संबन्धषष्ठी विज्ञास्यते। अङ्गस्य यो यका
रः। किं चाङ्गस्य यकारः। यस्मिन्नङ्गमित्येतद्भवति। कस्मिंश्चैतद्भवति। प्रत्यये।

स्येति कण्ड्वादियकोपि ग्रहणं केचिदिच्छन्ति। कितो विकल्पे यशब्दस्य ग्रहणे तात्पर्यात् ककारस्यानुबन्धस्यादित्वमविवक्षितमिति-
वदन्तः। एतदपरे नेच्छन्ति। आदिभूतककारानुबन्धनिर्देशे सत्यादित्वाविवक्षायां प्रमाणाभावात्लक्ष्यस्य च तथाशिष्टैरप्रद
र्शनात्। आदेरिति। ततश्च क्यस्य विभाषेति यकारस्यैव लोपेनाकारस्य तु नित्यमिति सिद्धमिष्टम्। अङ्गादिति वर्तत इति। अङ्गस्येति
निमित्तनिमित्तिभावसंबन्धाश्रयणे पञ्चम्यन्तलाभात्फलाभेदात्पञ्चमीनिर्देशः कृतः। इतरो यथाकाममभिप्रायमप्रतिपद्याह।
न वै अङ्गादिति। संबन्धषष्ठीति। अनेकसंबन्धसंभवेप्यत्र रङ्गत्वान्निमित्तनिमित्तिभावलक्षणसंबन्धः परिगृह्यते। प्रत्यय
इति। प्रत्ययहेतुकत्वादङ्गव्यपदेशस्य। ननु च समुदायः प्रत्ययोङ्गस्य निमित्तं न तु यकारमात्रमकारे लुप्ते यकारमात्रस्य प्र-
त्ययत्वाददोषः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.वै. णेरनिटि॥ निष्ठायामेव सेटीति। सेट्येव निष्ठायामिति नियमो न भवति अनिटो निष्ठाया अभावात्। अयादेशो भवतीति। लोपापवा ६४२
२५ दइत्यर्थः॥ निष्ठायाम्॥ संज्ञपित इति। सनीवन्तर्धेति सनि विकल्पविधानात् यस्य विभाषेतीट्प्रतिषेधः। सेड्ग्रहणसामर्थ्यात् च
पूर्वेणापि न भवति। वादान्तशान्तेत्यत्र ज्ञपेर्निपातनमाश्रीयते ज्ञसो ज्ञपित इति। एकाचो हीति। यस्य विभाषेत्यत्र एकाजित्यधि
कारात्। इड्भावार्थमिति। इटि कृते णिलोपो यथा स्यात् इट्कृते मा भूदिति कालावधारणार्थं सेड्ग्रहणमित्यर्थः। अक्रियमाणे से

णेरनिटि॥ अनिटीति किमर्थम्। कारयिता। कारयितुम्। अनिटीति शक्यमवक्तुम्। कस्मान्न भवति। कार
यिता। कारयितुम्। निष्ठायां सेटीत्येतन्नियमार्थं भविष्यति। निष्ठायामेव सेटि णेर्लोपो भवति नान्यत्रेति। क
माभूत्। कारयिता। कारयितुम्। अथ वा उपरिष्टाद्योगविभागः करिष्यते। इदमस्ति। निष्ठायां सेटि। जनिता
मन्त्रे शमिता यज्ञे। ततः अय्। अयादेशो भवति सेटि। ततआमन्ताल्वाय्येत्न्विष्णुषु। अय् भवतीत्येव। निष्ठायां से
टि। अथ सेड्ग्रहणं किमर्थम्। निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थम्। निष्ठायां सेड्ग्रहणं क्रियते अनि
टीति प्रतिषेधो यथा स्यादिति। संज्ञपितः पशुरिति। निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थमिति चेत्तन्न सिद्धम्।
निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थमिति चेदन्तरेणापि सेड्ग्रहणं तन्न सिद्धम्। कथम्। अनिड्भावात्। ननु च
यस्य विभाषेति ज्ञपेरिट्प्रतिषेधः। एकाचो हि प्रतिषेधः। एकाचो हि सप्रतिषेधः। ज्ञपिश्चानेकाच्। इड्भावार्थं तु
तन्निमित्तत्वाल्लोपस्य। इड्भावार्थं तर्हि सेड्ग्रहणं क्रियते। कथं पुनः सेटीत्यनेनेट् शक्यो भावयितुम्। तन्निमि
त्तत्वाल्लोपस्य। नात्र कृते इटि णिलोपेन भवितव्यम्। किं कारणम्। सेटीत्युच्यते। अवचने हि णिलोपइट्प्रति
षेधप्रसङ्गः। अक्रियमाणे हि सेड्ग्रहणे णिलोपे कृते एकाच इतीट्प्रतिषेधः प्रसज्येत। कारितं हारितम्।

ड्ग्रहणे कारितमिति स्थिते णिलोपश्च प्राप्नोति। इट् च। नित्यत्वाण्णिलोपः प्राप्नोति। तत्र कृते एकाजितीट्प्रतिषेधः प्राप्नोति। ए
कदेशविकृतस्यानन्यत्वात्स एव करोतिर्भवतीति। यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदनित्यमित्येतच्च कार्यगतभा राम:
वाभावापेक्षायां नाश्रीयत इत्यनित्य एवेडागमः। इटि तु णिलोपे क्रियमाणे न प्रवर्तते इट्प्रतिषेधः निर्वृत्तस्य प्रतिषे २५
द्धुमशक्यत्वात्। एतच्च प्रयोजनं पूर्वस्मादपि विधेः स्यान्नित्वमित्यनाश्रित्योक्तम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तमे योगविभाग इति। णेरध्ययने वृत्तमिति योगं विभज्य योगत्रयं क्रियते क्रमविपर्ययश्चाश्रीयते। णेरित्येको योगः। तत्र निष्ठायां नेटीति वर्तते। ततो वृत्तमिति द्वितीयो योगः। णिलोपनियमार्थो गुणप्रतिषेधार्थश्चानेकप्रयोजनत्वान्निपातनानां। अथवा वृत्तमित्येकशेषाश्रयणादेकस्य नियमार्थत्वमपरस्य गुणनिषेधार्थत्वं भविष्यति। ततोऽध्ययन इति तृतीयो योगो वृत्तशब्दस्यार्थविशेषनियमार्थः। रम्णात्विति। व्यत्ययेन श्नाप्रत्ययः॥ अया॥ किंपुनरिति। यद्यपि क्त्वावयामन्ताल्वाय्येत्विष्णुषु इति निर्देशानुपपत्तिः तथापि युक्तायुक्तत्वापेक्षया विचारः कः प्रत्यय आश्रयितुं युक्तः को न युक्त इति। अथवा किंकृते इडागमः त्नु

एवं तर्हि नार्थः सेड्ग्रहणेन नापि सूत्रेण। कथम्। सप्तमे योगविभागः करिष्यते। इदमस्ति। निष्ठायां नेड्भवति। ततः। णेः। ण्यन्तस्य निष्ठायां नेड्भवति। कारितम्। हारितम्। ततो वृत्तम्। वृत्तमिति च निपात्यते। किं निपात्यते। णेर्निष्ठायां लोपो निपात्यते। किं प्रयोजनम्। नियमार्थम्। अत्रैव निष्ठायां णेर्लोपो भवति नान्यत्र। क्व मा भूत्। कारितम्। हारितम्। इहापि तर्हि प्राप्नोति। वर्तितमन्नं वर्तिता भिक्षेति। ततः। अध्ययने। अध्ययने चेद्वृत्तिर्वर्तते। वृधिरमिशृधीनामुपसंख्यानं सार्वधातुकत्वात्। वृधिरमिशृधीनामुपसंख्यानं कर्तव्यम्। किं कारणम्। सार्वधातुकत्वात्। वर्धन्तु त्वा सुष्टुतयो गिरो मे। वर्धयन्त्विति प्राप्ते। बृहस्पतिष्ट्वा सुम्ने रम्णातु। रमयत्विति प्राप्ते। अग्ने शर्ध महते सौभगाय। शर्धयेति प्राप्ते। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। वृधिरमिशृधीनामार्धधातुकत्वात्सिद्धम्। कथमार्धधातुकत्वम्। अन्येऽपि हि धातुप्रत्ययाः। उभयथा छन्दसि दृश्यते॥

अयामन्ताल्वाय्येत्विष्णुषु॥ किंपुनरयं त्नुः। आहोस्विदित्नुः। कश्चात्र विशेषः। त्नौ विटि गुणवचनम्। त्नौ सति इटि णेर्गुणो वक्तव्यः। गदयित्नुः स्तनयित्नुः। अस्तु तर्हि इत्नुः। इत्नौ प्रत्ययान्तरकरणम्। यदि इत्नुः प्रत्ययान्तरं कर्तव्यम्।

इत्नुनिर्दिष्टेः प्रत्यय एवेत्नुरिति विचारः। त्नाविटीति। स्तनिहृषीत्यत्र यदि त्नुर्विधीयते तदा तस्येटि कृते अनिटीति वचनाल्लिलोपो नास्ति। किं तर्हि कित्वान्गुणप्रतिषेधे प्राप्ते गुणो विधेयः। इत्नाविति। स्तनिहृषीत्यत्र इत्नुर्विधेयः। कृहनिभ्यां त्नुर्विधेयः। यदा तु स्तनादिभ्यः त्नुर्विधीयते स एवोत्तरत्रानुवर्तते तदा प्रत्ययान्तरं न विधेयम्। स्वरेऽपि भेदो नास्ति उभयथाऽन्तोदात्तत्वाद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा॰कै॰ अयादेशे चेति। णिलोपस्य प्रसङ्गादुपसंख्यानग्रहणेनात्र सूत्रे पाठ उच्यते न त्वपूर्ववचनम्। भाष्यकारो गुरुलाघवमनादृत्य य-
२५ थान्यासं समर्थयितुमाह। उभयमिति। यद्यत्र ल्युग्रहणमयादेशार्थं क्रियते ल्यादिभ्यश्च ल्युर्विधीयते तदा स्यादेव लाघ
वम्। ल्यपि लघु। केचिदाचार्येण ल्यपि लघुपूर्वस्येति षष्ठ्यन्तमध्यापिताः। अन्ये तु लघुपूर्वादिति पञ्चम्यन्तम्। तत्र षष्ठीमा
श्रित्याह। ल्यपीति। प्रशमय्येति। शमेर्णिचि वृद्धौ मितां ह्रस्वस्तत्र णेः पूर्वं व्यञ्जनं अलब्धेति अयादेशो न प्राप्नोति। न चात्र व्यव
हितेऽपि पूर्वशब्दो वर्तत इति शक्यमाश्रयितुम्। चकास्तेर्दरिद्रादीनामपि ण्यन्तानामयादेशप्रसङ्गात् प्रचकास्य गत इति। न-
ह्यव्यवहिते संभवति व्यवहितपूर्वमाश्रयितुं शक्यम्। ततश्च प्रगणय्य प्रस्तनय्येत्यादावेव स्यादत्रेष्ट्यल्लोपस्यासिद्धत्वा

अयादेशे चोपसंख्यानम्। अयादेशे चोपसंख्यानं कर्त्तव्यम्। उभयं क्रियते न्यासे एव ल्यपि लघुपूर्वात्। ल्यपि लघुपूर्वस्येति चे
द्व्यञ्जनान्तेषूपसंख्यानम्। ल्यपि लघुपूर्वस्येति चेद्व्यञ्जनान्तेषूपसंख्यानं कर्त्तव्यम्। प्रशमय्य गतः।
प्रतमय्य गतः। अल्लोपे गुरुपूर्वात्प्रतिषेधो वक्तव्यः॥ प्रतिचिकीर्ष्य गतः। ल्यपि लघुपूर्वादिति वचनात् सिद्ध
म्। ल्यपि लघुपूर्वादिति वक्तव्यम्। एवमपि ह्रस्वयलोपाल्लोपानामसिद्धत्वात्। ल्यपि लघुपूर्वादित्ययादेशो न
प्राप्नोति। प्रशमय्य गतः। प्रतमय्य गतः। प्रवेच्छिद्य गतः। प्रवेभिद्य गतः। प्रगद्य गतः। प्रस्तनय्य गतः
। ह्रस्वादिषु चोक्तम्। किमुक्तम्। समानाश्रयवचनात्सिद्धम्। कथम्। णावेते विधयः। ल्यप्ययादेशः॥ वि
भाषापः॥ ईडादेशस्य प्रतिषेधो वक्तव्यः॥ अध्याप्य गतः॥

द्लघुपूर्वो णिर्भवति। अथापि व्याश्रयत्वादल्लोपस्यासिद्धत्वं न स्यात्। एवमपि भूतपूर्वगत्या लघुपूर्वाश्रयोऽयादेशः स्यात्।
अल्लोपे चेति। अल्लोपे कृते यो गुरुपूर्वः तस्मात्परस्य णेर्भूतपूर्वो लघुपूर्वतामाश्रित्यायादेशः प्राप्नोति। लघुपूर्वादिति वचना
दिति। लघुपूर्वादिति पञ्चम्यन्तं पठितव्यमित्यर्थः। लघुः पूर्वो यस्मादिति लघुपूर्वः तस्मात्परस्य णेरयादेशः। एवमपीति। क्व राम:
तर्हि स्यात्। प्रदमाचष्ट इति णिच् प्रकृत्यैकाजिति प्रकृतिभावाट्टिलोपप्रतिषेधः प्रमृद्य गत इत्यादौ स्यात्॥ विभाषापः॥ अ- २५
ध्याप्येति। कीङ्जीनां णाविति आत्वमर्तिह्रीत्यादिना पुगागमः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सानुबन्धकनिर्देशादिति। आपुलिति पठितव्यमित्यर्थः। आप्लृशब्दात्पञ्चम्येकवचने ऋल्लकारयोः सवर्णविधिरिति ऋत
उदित्युक्तम्। उरण्रपर इत्यत्र प्रत्याहारग्रहणाद्धु परत्वम्। भाष्यकारस्तु संदेहार्थमविभक्तिकमाश्रित्याह। आप्लृ इति। ल
क्षणप्रतिपदोक्तयोरिति। लाक्षणिकस्यानुमेयरूपत्वाद्विलम्बप्रतीतिगोचरत्वात् प्रतिपदोक्तस्य तु प्रत्यक्षत्वादविलम्बि
तप्रतीतिविषयत्वादाकृतौ च पदार्थे इयं परिभाषा न व्यक्तौ। तत्र हि सर्वस्यां व्यक्तौ लक्षणेन प्रवर्तितव्यम्॥ इत्युपाध्यायजै
यटपुत्रकैयटकृते महाभाष्यप्रदीपे षष्ठाध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम्॥ स्यसिच्सीयुट्॥ कथमिति। किं भावक-
र्मणोरित्यभिधेयनिर्देशो भावकर्मणोर्वर्तन्ते ये स्यादय इति। अथ भावकर्माभिधायी प्रत्ययो भावकर्मभ्यामभिधीयते-

आपः सानुबन्धकनिर्देशादिडि सिद्धम्। आपः सानुबन्धकनिर्देशः करिष्यते। आप्लृ इति। तेन इडादेशस्य न
भविष्यति। स तर्हि सानुबन्धकनिर्देशः कर्तव्यः। न कर्तव्यः। कथमध्याप्यगतः। लक्षणप्रतिपदोक्तयोः
प्रतिपदोक्तस्यैवेत्येवं न भविष्यति॥ इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठाध्याय
स्य चतुर्थे पादे द्वितीयमाह्निकम्॥ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च॥ कथ
मिदं विज्ञायते। भावकर्मणोर्ये स्यादय इति। आहोस्विद्भावकर्मवाचिनि परतो ये स्यादय इति। किं चातः। यदि विज्ञायते।
भावकर्मणोर्ये स्यादय इति सीयुड् विशेषितः। स्यसिच्तासयोऽविशेषिताः। अथ विज्ञायते भावकर्मवाचि
नि परतो ये स्यादय इति स्यसिच्तासयो विशेषिताः।

भावकर्मवाचिनि प्रत्यये परतो ये स्यादय इति। तत्राद्यपक्षे भावकर्मशब्दस्य मुख्यार्थवृत्तित्वं द्वितीये गौणार्थता। युगप
त्तु गौणमुख्यार्थवृत्तित्वासंभव इति प्रश्नः। यदि विज्ञायत इति। यदि प्रसिद्ध्यनुरोधेन मुख्यार्थपरिग्रहः। सीयुड् विशे
षित इति। आर्द्धधातुक इति वर्तते। न च सीयुट आगममात्रस्यार्द्धधातुकसंज्ञास्तीति सामर्थ्यात्सीयुडाद्यार्द्धधातुकं
गृह्यते। तस्य च संभवति भावकर्माभिधायित्वमित्यर्थः। स्यसिच्तासय इति। भावकर्तृकर्मणां लादेशार्थत्वेन शास्त्रे
व्यवस्थापितत्वाद्विकरणानामतदर्थत्वात्। अथेति। भूयसामनुग्रहाय यदि गौणार्थसंश्रयणमिति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सीयुड्विशेषितइति। तत्र सीयुटः प्रत्ययैकदेशत्वात् समुदायावयवयोः पौर्वापर्याभावादागमे ह्युपजाते सागमकस्य प्रत्ययादयः संज्ञा अर्थाभिसंबन्धश्चानन्तरवयवस्येति सीयुटो भावकर्मवाचिप्रत्ययपरत्वासंभवः सत्यप्यवयवयोः पौर्वापर्ये। अतोनन्तरं कश्चित्पाठः। उभयथापि चिण्वद्भावो विशेषितइति। तत्र न दोषान्तरोपन्यासः। किं तर्हि पक्षद्वयेदोषोपसंहारः। अन्यतरपक्षपरिग्रहे सर्वविषयाव्यापनाद्विशेषितश्चिण्वद्भावइत्यर्थः। स्यादयोपीति। स्यायनुवृत्तेरिदमेव प्रयोजनं भावकर्मणोः स्यादीनामप्यभिधेये यथा स्यातामिति। यथा च द्वन्द्वपदानि प्रत्येकं समुदायार्थवाचीनि तथा स्याद-

सीयुड्विशेषितः। उभयथा च चिण्वद्भावोऽविशेषितः। यथेच्छसि तथास्तु। अस्तु तर्हि भावकर्मणोर्ये स्यादय इति। ननु चोक्तं सीयुड्विशेषितः स्यसिच्तासयोऽविशेषिताइति। स्यसिच्तासयश्चाविशेषिताः। कथम्। भावकर्मणोर्ये भवतीत्यत्र स्यादयोप्यनुवर्तिष्यन्ते। अथवा पुनरस्तु भावकर्मवाचिनि परतो ये स्यादय इति। ननु चोक्तं स्यसिच्तासयोविशेषिताः सीयुड्विशेषितइति। सीयुट् च विशेषितः। कथम्। भावकर्मवाचिनि परतः सीयुड्नास्तीति कृत्वा भावकर्मवाचिनि सीयुटि कार्यं विज्ञास्यते। अथ इट् चेदुच्यते कस्मायमिड् भवति। अङ्गस्येति वर्तते। यद्येवमङ्गस्यादितइट् प्राप्नोति। अडाड्वतुः। तद्यथा। अडाटौ टित्वादादितो भवतः। एवं तर्हि स्यादीनां भविष्यति।

योल्लादेशाश्च भावकर्मणी अभिदधतीति न कश्चिद्दोषः। भावकर्मवाचिनि सीयुटीति। तन्त्रादिन्यायाश्रयणादेकं भावकर्मग्रहणं भिन्नेन रूपेण यथासंभवं स्यादिभिः संबध्यते। अथवा विषयसप्तम्येषाश्रीयते। भावकर्मविषयेषु स्यादिषु चिण्वत्कार्यं भवतीति नास्ति दोषावकाशः। कस्मायमिति। स्यादीनामागमसंबन्धे षष्ठ्यनिर्देशात् प्रश्नः। स एवाह। अङ्गस्येति वर्ततइति। प्रकरणस्य नियोजकत्वं चेदाश्रीयते तदानिष्टप्रसङ्ग इत्यर्थः। अथवा अङ्गस्येति वर्ततइति सिद्धान्तवादिवचनम्। अङ्गस्य निमित्तं यत्तस्येडागम इत्यर्थः। इतरस्त्वङ्गमेवानेनागमित्वेनोक्तमिति मत्वाह। यद्येवमिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठ्यभावादिति। इच्छामात्रेण स्यादीनामागमित्वमलभ्यमित्यर्थः। ननु च भावकर्मणोरित्येषा षष्ठीति षष्ठीनिमित्तत्वात्षष्ठी
त्युच्यते। यथा नड्वलोदकं पादरोगः। इह भावकर्मवाचिनि परतो ये स्यादय इति शब्देन शब्दस्य पौर्वापर्यसंभवात्तस्मिन्निति नि
र्दिष्टे पूर्वस्येति परिभाषोपतिष्ठत इत्यस्ति भावकर्मणोरित्यस्य षष्ठीप्रकॢप्तौ निमित्तभावः। इतरस्तु भावकर्मणोरित्यभिधेयस
प्तमीमत्वाह। नैषा षष्ठीति। इतरस्तु स्वाभिप्रायं प्रकाशयितुमाह। एवं तर्हीति। भावकर्मवाची प्रत्यय उपचाराद् भावकर्मशब्दवा
च्यः परत्वेन सप्तम्या प्रतिपादित इति सप्तमी स्यसिच्सीयुट्तासिष्विति सप्तम्याः कार्यातिदेशे चरितार्थायाः षष्ठीं प्रकल्पयति।
चोदको यथोक्तमभिप्रायमप्रतिपद्याह। न सिध्यतीति। तत्र हि निःशब्दस्य प्रयोजनं शब्दे सप्तमीनिर्दिष्टे परिभाषोपस्थानं यथा स्या

एवमपि षष्ठ्यभावान्न प्राप्नोति। ननु च भावकर्मणोरित्येषा षष्ठी। नैषा षष्ठी। किं तर्हि। अर्थनिर्देश एवासौ सप्त
मी। भावे चार्थे कर्मणि चेति। एवं तर्हि भावकर्मणोरित्येषा सप्तमी स्यादिष्विति सप्तम्याः षष्ठीं प्रकल्पयिष्यतीति त
स्मिन्निति निर्दिष्टे पूर्वस्येति। एवमपि न सिध्यति। किं कारणम्। न ह्यर्थेन पौर्वापर्यमस्ति। अर्थेऽसंभवाद्भावकर्म
वाचिनि शब्दे कार्यं विज्ञास्यते। एवमपि सीयुटो न प्राप्नोति। एवं तर्हि सप्तमे योगविभागः करिष्यते। आर्धधातु
कस्येट्। यावानिण्नाम सर्वं आर्धधातुकस्य भवतीति विज्ञेयम्। ततो वलादेः। वलादेरार्धधातुकस्येड् भव
तीति। यद्येवं स्यसिच्सीयुट्तासिष्विड् भवति। चिण्वद्भावश्चाविशेषितो भवति।

दर्थे मा भूत्। शब्दश्च शब्दाद्बहिर्भूतोऽर्थस्तु बहिर्भूतः। निःशब्दो बहिर्भाववाची। पूर्वोक्तेनाभिप्रायेणाह। अर्थेऽसंभवादिति। एवमपीति
। न हि सीयुटो भावकर्मवाचिना प्रत्ययेन पौर्वापर्यमस्ति सीयुटस्तदवयवत्वात्। आर्धधातुकस्येडिति परिभाषेयं क्रियते। यत्रेड् विधी
यते तत्रार्धधातुकस्येत्युपतिष्ठते। तेन स्यादीनामेवासत्यामपि षष्ठ्यां प्रकॢप्ताविड् भविष्यति। रुदादिभ्यः सार्वधातुक इत्यत्र विरोधादा
र्धधातुकस्येति नोपतिष्ठते। यद्येवमिति। स्यादीनामागमविधावुपयोगात् पुनः श्रुत्यभावादविशेषितश्चिण्वद्भावः। आर्धधातुकग्रहणे
ह्युपतिष्ठमाने तेन स्यादीनां विशेषणादागमसंबन्धयोग्यषष्ठ्युपादानादयमर्थः स्यात्। अजूहनुग्रहदृशां वा चिण्वदुवति यत्र कचि-
द्यत्र स्यादयः सन्ति तेषामिडिति। यथा कर्तुः क्यङ् सलोपश्चेत्यत्रेति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· स्यादीनेवेति। तेषामेवश्रुतत्वात्तत्परित्यागेनाश्रुतकल्पनायाअयुक्तत्वात् प्रत्ययापेक्षत्वादङ्गस्येति। सप्तमीनिर्देशसामर्थ्या ६४३
२७ द्वाचिण्वद्भावेपूर्वमुपयुक्तानांस्यादीनामार्धधातुकोपस्थानसामर्थ्यात्पश्चादिटासंबन्धः। केपुनरिति। सर्वेभ्यइष्यतेनचप्रा
प्नोतीतितिमत्वाप्रश्नः। सएवपराभिप्रायमाशङ्कते। येअनुदात्ताअथयेउदात्तास्तेषांकथंसिद्धं तेनैवपरत्वादिति। किमेवंभवा
न्मन्यतेइत्यर्थः। ततःसिद्धान्तवाद्याह। उदात्तेभ्योपीति। अथवाशिष्याचार्यदेशीययोः केपुनरित्यादिकेप्रश्नप्रतिवचनेपरत्वा
दित्यन्ते। आचार्यआह। उदात्तेभ्योपीति। उदात्तग्रहणंचोपलक्षणम्। ऋद्धनोःस्ये इत्यनुदात्तेभ्योपिइड्विधानात्तुल्यत्वान्न्यायस्य
तेभ्योप्यनेनेड्विधिः। इटोसिद्धत्वादिति। ततश्चानिटीतिप्रतिषेधाभावात् सिध्यतिणिलोपः। अपिचेट्संनियोगेनविधीयमा

तत्रकोदोषः। स्यसिच्सीयुट्तासिष्विड्भवति। अजनग्रहदृशांवाचिण्वदिति क्वचिदेवचिण्वद्भावःस्यात्।
एवंतर्हिस्यादीनेवात्रापेक्षिष्यामहे। स्यसिच्सीयुट्तासिष्विड्भवतिअजनग्रहदृशांवाचिण्वत्स्यादिष्विति।
केपुनरिममिटंप्रयोजयन्ति। येनुदात्ताः। अथयेउदात्तास्तेषांकथम्। सिद्धंतेनैवपरत्वात्। उदात्तेभ्योपिअनेनै
वेडेषितव्यः। किंप्रयोजनम्। कारयतेःकारिष्यते। हारिष्यते। इटोसिद्धत्वात्तस्मिन्ननिटीतिणिलोपोयथास्यात्।
कथंपुनरिच्छताभवता उदात्तेभ्योनेनैवेड्लभ्यः। नपुनरनेनास्तुतेनवेति। तेनैवस्यादिप्रतिषेधेन। नित्योय
म्। कृतेपितस्मिन्प्राप्नोत्यकृतेपि। नत्वस्मिन्कृतेसप्राप्नोति। किंकारणम्। अवलादित्वात्। तस्मादनेनैवेडेषित
व्यः। कानिपुनरस्ययोगस्यप्रयोजनानि। वृद्धिश्चिण्वद्युक्चहन्तेश्चघत्वंदीर्घश्चोक्तोयोमितांवाचिणीति॥ वृ
द्धिःप्रयोजनम्। चेष्यते। चायिष्यते। युक्प्रयोजनम्। ग्लास्यते। ग्लायिष्यते॥

नश्चिण्वद्भावोपिभवति। अन्यथैतदभावेचिण्वद्भावोनस्यात्संनियोगशिष्टानामन्यतराभावेद्वितीयाभावात्। अन्वाचयेतुविज्ञाय-
मानेस्याच्चिण्वद्भावः यथाकर्तुःक्यङ्सलोपाभावेपि। नित्योयमिति। वलादित्वानपेक्षणात्। आकृतिपक्षेचशब्दान्तरप्राप्त्यापिना
स्यानित्यत्वम्। भावकर्मार्थापेक्षणादस्यबहिरङ्गत्वमितिचेत्तस्यापिवलादित्वापेक्षत्वान्नास्त्यन्तरङ्गत्वमित्यदोषः। कानिपुनरि- राम:
ति। प्रकरणाद्यवस्थाश्रयणादाङ्गान्येवकार्याणिप्रयोजनान्यत्राविशेषेणेतिप्रश्नः। इतरआङ्गान्येवोदाहरति। वृद्धिरिति। ॥ २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विघातीति। अस्मिन्निटि सति वलादिलक्षणस्येटो वलादित्वाभावात् प्रवृत्तिलक्षणो विघातस्ततस्तस्यानित्यत्वमित्यर्थः। अथवा वलनिमित्त इट् विघाती अस्येटो प्रतिबन्धक इत्यर्थः। ऋकारगुणस्येति। अन्येषां तु गुणो जन्तत्वं न विहन्तीति नित्यत्वाच्चिण्वद्भावः सिध्यति। चायिष्यते। लाविष्यत इति भावः। परत्वादिति। द्वयोरप्यनित्यत्वात्। वधिभावादिति। ननु चार्धधातुक इति विषयसप्तम्याश्रयणादन्तरङ्गो वधिभावः। नैतदस्ति। लिङीति विशेषनिर्देशात् परसप्तमी तद्विशेषणत्वादार्धधातुक इत्यपि परसप्त

हन्तेश्च घत्वं प्रयोजनम्। हनिष्यते। घानिष्यते। दीर्घश्चोक्तो यो मितां वा चिणीति। स च प्रयोजनम्। शमिष्यते। शामिष्यते। तमिष्यते। तामिष्यते॥ इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वलनिमित्तो विघाती॥ इटोऽसिद्धत्वाण्णेरनिटीति णिलोपो यथा स्यात्। कथमयं नित्यः। कृताकृतप्रसङ्गित्वात्। कृताकृतप्रसङ्गी ह्ययम्। कृतेऽपि तस्मिन्निटि साप्तमिके आर्धधातुकस्येड्वलादेरिति पुनरनेनायं भवति। अस्मिंस्तु विहिते वलादित्वस्य निमित्तस्य विहतत्वात्साप्तमिको न भवति। निमित्तं विहतं भवति। अयं तस्य निमित्तं विहन्ति। तस्मादयं नित्यः। स त्वस्य निमित्तं न विहन्ति। अथोपदेशग्रहणं किमर्थम्। चिण्वद्भाव उपदेशवचनमृकारगुणबलीयस्त्वात्॥ चिण्वद्भाव उपदेशवचनं क्रियते ऋकारगुणस्य बलीयस्त्वात्। कारिष्यते। परत्वाद्गुणे रपरत्वे चानजन्तत्वात् चिण्वद्भावो न प्राप्नोति। उपदेशग्रहणाद्भवति॥ वधिभावात्सीयुटि चिण्वद्भावाभावो विप्रतिषेधेन॥ वधिभावात्सीयुटि चिण्वद्भावाभावो भवति विप्रतिषेधेन। वधिभावस्यावकाशः। वध्यात्। वध्यास्ताम्। वध्यासुः। चिण्वद्भावस्यावकाशः। घानिष्यते। अघानिष्यत। इहोभयं प्राप्नोति। घानिषीष्ट। घानिषीयास्ताम्। चिण्वद्भावो भवति विप्रतिषेधेन। अथेदानीं चिण्वद्भावे कृते पुनःप्रसङ्गविज्ञानाद्वधिभावः कस्मान्न भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति कृत्वा।

मी। यत्र तु विशेषनिर्देशाभावोऽस्तेर्भूरित्यादौ तत्रैव विषयसप्तमीविज्ञानं भव्यादिसिद्ध्यर्थम्। एकाच उपदेशेऽनुदात्तादित्यत्र तु वक्ष्यति भाष्यकारः। वधिषीष्टेत्यत्र निपातनस्वरं प्रत्ययस्वरो बाधिष्यते आर्धधातुकीयाः सामान्येन भवन्तीत्येवं ब्रुवता लिङीति विषयसप्तम्येवाभ्युपगता ततश्चान्तरङ्गत्वाद्वधिभावः प्राप्नोति। प्रतिपदविधेर्बलीयस्त्वाच्चिण्वद्भावो भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ हनिणिङादेशप्रतिषेधश्चेति। लुङ्परे आर्धधातुके विधीयमाना हनिणिङादेशास्तन्निमित्ता भवन्तीति चेदेवं ह्वा वा तत्प्राप्नुवन्ति। ६४३
२८ इह यस्य विशिष्टान्निमित्तं साक्षान्निर्दिष्टं तदस्यातिदिश्यते यथा युगागमः। यस्यापि प्रकारान्तरेणापि चिह्नेनिमित्तं तदपि। यथा वृद्धिरिति। हनिणिङादेशप्रसङ्गः। अङ्गस्येति तु प्रकरणादिति। अङ्गस्येति तु प्रकृत्य यत्कार्यं विहितं तदतिदिश्यते तस्यैव प्राकरणिकत्वात्। न च हनिणिङादेशा अङ्गस्येति प्रकृत्य विहिता इति तेषामप्रसङ्गः। आतो॥ इड्ग्रहणं किमर्थमिति। इहाचिक्रित्यार्धधातुक इति त्रयाणां प्रकृतत्वाद्विशेष्यभावे च कामचारात् तेषामन्यतमेनाननुभूत — विशेषणेनानुभूतद्विशेषणेन वा इटः समुच्चयसंभवादनेकपक्षसंभवः। तत्र यदि तावद्विशेषणसंबन्धात् प्रागेवेट् समुच्चीयते अङ्गाधिकाराक्षिप्तप्रत्ययविशेषणत्वादजादौ प्रत्यय इति विज्ञायते। तत्रेड्ग्रहणमनजाद्यर्थं विज्ञायते। अजादेरिटो जादिना प्रत्ययेन समुच्चयाभावात्। तदा क्डिदार्धधातुके अजादेरेव विशेषणे व्यवतिष्ठते। नेटः। हलादेरिटः क्डित्वासंभवादार्धधातुकत्वव्यभिचाराभावाच्चानन्तश्चदासीयेत्या

हनिणिङादेशप्रतिषेधश्च॥ हनिणिङादेशानां प्रतिषेधो वक्तव्यः। हनिष्यते। घानिष्यते। एष्यते। आयिष्यते। अध्येष्यते। अध्यायिष्यते। लुङीति हनिणिङादेशाः प्राप्नुवन्ति। अङ्गस्येति तु प्रकरणादाङ्गशास्त्रातिदेशात्सिद्धम्। अङ्गस्येति यत्कार्यं तत्स्यातिनिर्दिश्यते। न च हनिणिङादेशा आङ्गा भवन्ति॥ आतो लोप इटि च॥ इड्ग्रहणं किमर्थम्।

दावाल्लोपप्रसङ्गः। अथाजादेः प्रत्ययस्य क्डिदार्धधातुकाभ्यां विशेषणाभ्यां प्राक्संबन्धः पश्चादिटा समुच्चयस्तदायमर्थः। अजादौ क्डित्यार्धधातुके इटि चाकारलोप इति। तदेड्ग्रहणमनजाद्यर्थमक्डिदर्थमनार्धधातुकार्थं च भवतीति दासीयपपिथव्यत्यरइति सर्वत्रैवाल्लोपः प्राप्नोति। अथ क्डितानुभूतविशेषणेनेट् समुच्चीयते तदा क्ड्यार्धधातुक इति विशेषणद्वयमविशेषादिड्वा पिक्डिदिटावुपतिष्ठतीति अक्डिदर्थमेवेड्ग्रहणं विज्ञायते। तेन पपिथेत्यादावाल्लोपो भवति दासीयव्यत्यरइत्यनजादौ सार्वधातुके च न भवति। अनुभूतविशेषणद्वयसंबन्धे तु क्डितेटः समुच्चये पूर्ववत्सर्वत्रैवाल्लोपप्रसङ्गः। अथ त्वार्धधातुकेनाननुभूतविशेषणेनेटः समुच्चयः आर्धधातुके चेटि चेति। तदा सार्वधातुकार्थमिड्ग्रहणं विज्ञायत इति व्यत्यरइत्यादावाल्लोपप्रसङ्गः। तदा चिक्डितीति विशेषणद्वयमार्धधातुकस्यैव स्यादिनत्विटः। सार्वधातुकस्येटो ङित्वाजादित्वाव्यभिचारात्। अनुभूत — राम: विशेषणेनार्धधातुके नेटः समुच्चये सर्वत्रैवाल्लोपप्रसङ्गः। तदेवमनेकपक्षसंभवात्प्रश्नः। ॥ २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri

इतरः क्विता ननु भूतविशेषणेनेटः समुच्चयं पश्चादुभयोरपि विशेषणमुभयसंबन्धमाश्रित्याह। इड्ग्रहणमक्विदर्थमिति। आदीनि। दानः केवलादाडः पूर्वोह्याच्छन्दसि लुङ्लङ्लिट इति लुङ्लङोरन्यतरः। केचिदत्र पदकारा आ अदीत्यवगृह्णन्ति। केचित्त्वेकपदं मन्यन्ते तेषामाडागम इति पक्षः। तत्र लुङि च्लेर्मन्त्रे घसेति लुक्। लङि तु छान्दसत्वाच्छपो लुक्। स्नावसतिर्द्विर्वच

इड्ग्रहणमक्विदर्थम्॥ इड्ग्रहणं क्रियतेऽक्विति लोपो यथा स्यात्। पपिथ। तस्थिवेति॥ सार्वधातुके चादीत्यार्धधातुकाधिकारादुपसंख्यानम्॥ सार्वधातुके चादीत्यार्धधातुकाधिकारादुपसंख्यानं कर्तव्यम्। इषमूर्जमहमित आदीति। ननु च यथैवाक्विती निवर्तमाने इड्ग्रहणमक्विदर्थमेवमार्धधातुक इत्यपि वर्तमाने इड्ग्रहणं सार्वधातुकार्थं भविष्यति। न सिध्यति। किं कारणम्। न हि क्विताजू विशेष्यते। अचि भवति कतरस्मिन्क्विति। किं तर्हि। अचा क्विद्विशेष्यते क्विति भवति कतरस्मिन्नचीति। किं पुनः कारणम्। अचा क्विद्विशेष्यते यथा इडप्यच्ग्रहणेन विशेष्यते। अस्ति चेदानीं कश्चिदिडनजादिः यदर्थो विधिः स्यात्। अस्तीत्याह। दासीय धासीयेत्यादि। तत्तर्हि उपसंख्यानं कर्तव्यम्। न कर्तव्यम्। आर्द्धधातुकत्वात्सिद्धम्। कथमार्धधातुकत्वम्। उभयथा छन्दसीति वचनात्। अन्येऽपि हि धातुप्रत्यया उभयथा छन्दसि दृश्यन्ते॥ घुमास्थागा॥ ईत्वे वकारप्रतिषेधो घृतपावान इति दर्शनात्॥ ईत्वे वकारप्रतिषेधो वक्तव्यः। किं प्रयोजनम्। घृतं घृतपावान इति दर्शनात्। इह मा भूत्। घृतं घृतपावानः पिबत वसां वसपावानः पिबतेति। यदि तर्हि वकारप्रतिषेध उच्यते। कथं धीवरी पीवरी। धीवरीति चोक्तम्। किमुक्तम्। नैतदीत्वम्। किं तर्हि। ध्याप्योरेतत्संप्रसारणमिति।

न प्रकरणे छन्दसि चेति वक्तव्यमिति द्विर्वचनाभावः। सिद्धान्ते त्वार्धधातुकत्वाच्छबभावः। दासीयेति। इटः सीयुटि तस्य तदुक्तत्वादजादित्वाभावः॥ घुमा॥ ईत्व इति। वकारस्य निमित्तभावेन प्रतिषेधो वकारप्रतिषेधः। वकारादावीत्वं न भवतीत्यर्थः। घृतपावान इति। आतो मनिन्निति क्वनिप्। वसपावान इति। ङ्यापोः संज्ञाच्छन्दसोर्बहुलमिति वसाशब्दस्य ह्रस्वः। धीवरीति चोक्तमिति। जनसनखनां सञ्झलोरित्यत्रोक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वनिबेषद्इति। क्वनिप्छन्दसिद्दृष्टानुविधानान्न भविष्यति। भाषायामपि अन्येभ्योपि दृश्यन्त इति दृशिग्रहणात् प्रयोगानुसरणार्थात् प्रयोगाभावात्यादिभ्यो नास्ति क्वनिबिति भाष्यकारस्याभिप्रायः। तत्र वार्त्तिकारम्भो ज्यायानित्याहुः। स्यः कचेति चात् क्विपि संस्यादित्यत्रेत्वस्यादर्शनात्। भाष्यकारमतेन त्वीत्वं प्राप्नोति प्रत्ययलक्षणेन यथा तृणेडित्यत्रेडागमः। नमाङ्॥ कस्यायमिति। यदि इयोरडाटोरिहानुवृत्त्या प्रतिषेधस्ततो जादीनामडपि प्राप्नोति। अथानन्तर्यादाटः प्रतिषेधस्तथा सति माङ्योगेऽनिष्यमाणोपि आट् प्राप्नोतीति मत्वा प्रश्नः। स एवानन्तर्यमाश्रित्याह। आटः प्राप्नोतीति। इतरः समुदायापेक्षायां दोषाभावेपि स्वरितत्वादधिकारेपि दोषप्रतिविधानसंभवादाह। न कर्तव्यमिति। अडपि प्राप्नोतीति। अडाटोर्युगपदेकागम्यपेक्षया दित्वं न संभवतीति पर्यायप्रसङ्गो यथा

सत र्हि प्रतिषेधो वक्तव्यः न वक्तव्यः। वनिबेष भविष्यति न क्वनिबिति। नमाङ्योगे॥ कस्यायं प्रतिषेधः। आटः प्राप्नोति। अटोपि त्विष्यते। न तर्हीदानीं ग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। लुङ्लङ्लृङ्क्ष्वडुदात्त इति। यदि तदनुवर्तते। आडजादीनामट्चेत्यडपि प्राप्नोति। अस्त्वटि कृते पुनराड् भविष्यति। इहाप्यटि कृते पुनराट् प्राप्नोति। अकार्षीत्। अहार्षीत्। अङ्वचनान्न भविष्यति। इहापि तर्हि अङ्वचनान्न स्यात्। ऐहिष्ट। ऐक्षिष्ट।

लेटोडाटोः ततः पक्षेऽटि सति ऐक्षिष्टेत्यादि न सिध्यति। एक्षिष्टेत्याद्यनिष्टं प्राप्नोति। इतरस्तु विकल्पेनाप्यडाटोः प्रवृत्तौ द्व्येपदार्थे कृतेप्यटि शब्दान्तरत्वान्निमित्तसद्भावाच्चाटा भवितव्यमिति मत्वाहास्त्विति। इतरो यद्येकस्मिन्नागमे कृते परस्य प्रवृत्तिस्ततो हलादीनामप्यटि कृते आट्प्रसङ्ग इति मत्वाह। इहापीति। ननु चाटि कर्तव्येऽटोऽसिद्धत्वादजादित्वाभावः। यद्यपि शास्त्रापेक्षयाऽसिद्धत्वं तथापि प्रयोगरूपमाश्रित्य चोद्यते। यथोक्तं भार्थादीदावर्ण्यानामिति। परिहारान्तरसद्भावाद्वाऽसिद्धत्वं नोक्तम्।
अङ्वचनादिति। यदि हलादीनामप्यटि कृते आट् स्यात्तदा लुङ्लङ्लृङ्क्ष्वपि आडागमं विदध्यात्। इहापि तर्हीति। य-
द्यटि कृते आड् भवति ततो त्रापि न स्यात्।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आड्वचनादिति। यद्यारनस्यात्तद्विधानमनर्थकं स्यादित्यर्थः। ननु विकल्पितत्वादडाटोः अडभावे आट् कर्तव्य इति आटि सति नु प्राप्नोतीति। नै
ष दोषः। उत्तरार्थेन नान्तरीयकोपस्थानेन प्रवृत्तेनाप्याटा बाधितुमाटोऽशक्यत्वात्। अथवा संदिग्धप्रवृत्तिरडागमोऽसंदिग्धप्र
वृत्तिनाऽऽटा बाध्यत इत्येष वाक्यार्थः। यथान्यत्रोक्तम्। अन्यवचनाच्चकाराकरणात्प्रकृतस्याप्यपवादो यथोत्सर्गेण प्रसक्त-
स्येति। इतरस्त्वगृहीताभिप्रायो विशेषाभावं मत्वाह। इहापि तर्हीति। अकृतेऽटीति। अजादिग्रहणसामर्थ्यात्कृते त्वाटि सर्व
स्याजादित्वादडाटोरभेदेन विधानसामर्थ्याद्विषयविभागावसायो हलादीनामडेवाजादीनां कृतेऽकृते वाऽटि आडिति। अ-

आड्वचनाद्भविष्यति। इहापि तर्हि आड्वचनात्प्राप्नोति। अकार्षीत्। अहार्षीत्। अकृतेऽटि योऽजादिरित्येवमेतद्वि
ज्ञास्यते। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। आड्वचनसामर्थ्यात्। यदि हि कृतेऽटि योऽजादिस्तत्र स्याद्
आड्वचनमनर्थकं स्यात्। अथवोपदेश इति वर्तते। अथवा आर्धधातुक इति वर्तते। अथवा लुङ्लङ्लृङ्क्ष्विति लकारको निर्दे-
शः। लुङादिषु लकारादिषु योऽजादिरिति। सर्वथा ऐज्यत औप्यत इति न सिध्यति। एवं तर्हि॥ अजादीनामटा सिद्धमि
ति॥ अजादीनामटा सिद्धं नार्थ आटा। एवं तर्हि वृद्ध्यर्थमाड् वक्तव्यः॥ वृद्ध्यर्थमिति चेदटः॥ अटो वृद्धिं वक्ष्यते। यदि तर्हि
अटो वृद्धिरित्युच्यते। अस्त्वपोहसतीत्यत्र वृद्धिः प्राप्नोति रोरुत्वे कृते॥ धातौ वृद्धिमटः स्मरेत्॥ धातावटो वृद्धिं वक्ष्यामि। त
तर्हि धातुग्रहणं कर्तव्यम्। न कर्तव्यम्। योगविभागः करिष्यते। आटः। अचि वृद्धिर्भवति। तत उपसर्गादृति वृद्धिर्भव
ति। ततो धाताविति उभयोः शेषः।

थवेति। उपदेशे यान्यजादीनि तेषामाड् भवति। न च करोतिरुपदेशेऽजादिरिति आडभावः। अथवा आर्धधातुक इति वर्तत इति ते
नार्धधातुकसंज्ञकलकारोत्पत्तिकाले योऽजादिस्तस्माद्भवति। सर्वथेति। करोतीत्यादिवदजादीनामटि सत्याडभावादित्यर्थः। अ
सिद्धवदत्राभादित्यत्रासिद्धत्वप्रत्याख्यानाय सर्वेषामेवामीप्रकाराणामुदाहरणेषु तुस्थितरूपं वासिद्धत्वमेषामुपन्यासः। अस्त्वप इति
। स्वपते ङ्सिप्। अडागमे यागसवयोरित्यट्। शपो लुक्। सकारस्य रुत्वं हशि चेत्युत्वं तत्राद्गुणं बाधित्वा वृद्धिः प्राप्नोति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 आटीदिति।नेटीतिवृद्धौप्रतिषिद्धायांपरत्वाद्वृद्धिंबाधित्वापररूपंप्राप्नोति।पररूपंगुणेनाटइति।अटउत्तरेगुणेपररूपंनेतिव
क्तव्यमित्यर्थः।ओमाङोरुसितत्सममिति।औकारीयदोढीयदौस्रीयदित्यत्रवृद्धिंबाधित्वापरत्वादोमाङोश्चोसपदान्तादिति
पररूपंप्राप्नोतितस्यप्रतिषेधोवक्तव्यइत्युक्तम्।यदातुपररूपविधौनाङित्युच्यतेतदोस्योमाङ्स्वाटःपररूपप्रतिषेधोनवक्त
व्यइतितुल्यमेतद्भवति।ननुगौरवप्रसङ्गः।अन्तरङ्गत्वादिति।यण्लोपौबहिरङ्गौ।वृद्धौकृतायामियणोयणः।एरितियोगविभा
गाश्रयणाद्यणोभावः।रूपाश्रयणादन्तादिवद्भावोनास्ति।ताद्रूप्यानतिदेशात्।असोरल्लोपइति।तपरकरणाल्लोपाभावः।

एवंतर्हि।आटीत्।आशीत्।अतोगुणइतिपररूपंप्राप्नोति॥पररूपंगुणेनाटः॥आटोनेतिवक्ष्यामि।तत्तर्हिवक्तव्यम्।
नवक्तव्यम्॥ओमाङोरुसितत्समम्॥यद्यप्येतदुच्यते।अथवैतर्हिउस्योमाङ्स्वाटःप्रतिषेधश्चोदितःसनवक्तव्यो
भवति॥छन्दोर्थेतह्योड्वक्तव्यः।आरैगुक्ता।त्रितएनमायुनक्।ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः
॥छन्दोर्थेबहुलंदीर्घः॥छन्दसिदीर्घोबहुलंदृश्यते।नयथापूरुषोनारकइति।एवंतर्हि।आयन्।आसन्।इणस्त्योर्य
ण्लोपयोःकृतयोरनजादित्वाद्वृद्धिर्नप्राप्नोति॥इणस्त्योरन्तरङ्गतः॥अन्तरङ्गत्वाद्वृद्धिर्भविष्यति।तस्मान्नार्थआ
ड्ग्रहणेन॥अजादीनामटासिद्धंवृद्ध्यर्थमितिचेदटः॥अस्त्वपोहसतीत्यत्रधातोर्वृद्धिमटःस्मरेत्॥पररूपंगुणेना
ट ओमाङोरुसितत्समम्॥छन्दोर्थेबहुलंदीर्घइणस्त्योरन्तरङ्गतः॥अचिश्नु॥इयङादिप्रकरणेतन्वादीनांछन्दसि
सिबहुलम्॥इयङादिप्रकरणेतन्वादीनांछन्दसिबहुलमुपसंख्यानंकर्तव्यम्।तन्वंपुषेम।तनुवंपुषेम।विष्वंपश्य।वि
षुवंपश्य।स्वर्गंलोकम्।सुवर्गंलोकम्।त्र्यम्बकंयजामहे।त्रियम्बकंयजामहे॥

एतच्चवार्णादाङ्गंबलीयइत्यनाश्रित्योक्तम्।तदाश्रयेवृद्धिंबाधित्वायण्लोपौस्याताम्।अटासिद्धेआड्वचनमेवज्ञापक
मन्येवर्णयन्ति।भवत्येषापरिभाषावार्णादाङ्गंबलीयइति।तस्यांसत्यांयण्लोपयोर्वृद्धिंबाधित्वाप्रवृत्तयोरायन्नासन्नि
तिनस्यादित्याड्विधीयते॥अचिश्नु॥तन्वमिति॥छन्दसीत्यधिकारादश्निपूर्वत्वाभावाद्यणादेशः।तनुवमिति।अधातुत्वा
दप्राप्तउवङ्विधीयते।विष्वमिति।विसृतेइतिसत्सूद्विषेतिक्विप्।अत्रनित्यमोःसुपीतियणिप्राप्तेपक्षेउवङ्विधीयते।सुवर्गमि
ति।अधातुत्वादनङ्गत्वाच्चाप्राप्तउवङ्विधीयते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एरनेकाचः॥ ब्राह्मणस्यनियाविति। अन्येभ्योपिदृश्यतइतिताच्छील्यादिषुनिरुपपदात्नियःक्विप्। ततःकर्मणासंबन्धः। सत्यपिपूर्वेक
र्मणासंबन्धेपरत्वात्सोपपदंसत्सूद्विषेतिक्विपंबाधित्वाताच्छीलिकःक्विब्भवति। गतिकारकपूर्वस्येति। परमशब्दोत्रनगतिर्नच-
कारकम्। किंतर्हि। उत्तरपदार्थस्यसमानाधिकरणंविशेषणम्। उद्ध्याविति। भावेकर्तरिचात्रक्विप्। इकारःसंयोगपूर्वः। धातोरिति
। अविद्यमानधात्ववयवसंयोगपूर्वस्ययणित्यर्थः। उपसर्जनमिति। अन्यपदार्थंप्रति। नचोपसर्जनस्येति। संबन्धिशब्दाद्दन्यदुप
सर्जनंपदान्तरवाच्येनार्थेनसंबन्धंनोपैतीत्यर्थः। अस्त्यन्यदिति। गुणप्रधान संनिधौप्रधानस्यसत्यर्थित्वेविशेषणसंबन्धेनभाव्यम

संयोगपूर्वस्य॥

एरनेकाचो॥ इहकस्मान्नभवति। ब्राह्मणस्यनियौब्राह्मणस्यनियइति। अङ्गाधिकारादङ्गस्येतिवर्तते। एवमपियरमनियौ
परमनियइत्यत्रापिप्राप्नोति। गतिकारकपूर्वस्यैवेष्यते। यणादेशःस्वरपदपूर्वोपधस्यच॥ यणादेशःस्वरपूर्वोपधस्यप
दपूर्वोपधस्येतिवक्तव्यम्। स्वरपूर्वोचयस्योपधा॥ पदपूर्वोच। स्वरपूर्वा। निन्यतुः। पदपूर्वा। उन्न्यौ। उन्न्यः। उद्ध्यौ। उद्ध्यः। उ
भयपूर्वा। ग्रामण्यौ। ग्रामण्यः। सेनान्यौ। सेनान्यइति। असंयोगपूर्वेह्यनिष्टप्रसङ्गः। असंयोगपूर्वस्येत्युच्यमानेऽ
निष्टंप्रसज्येत। उन्न्यौ। उन्न्यः। उद्ध्यौ। उद्ध्यः। असंयोगपूर्वस्येतिप्रतिषेधःप्रसज्येत। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। धा
तोरितिवर्तते। धातुनासंयोगंविशेषयिष्यामः। धातोर्यःसंयोगस्तत्पूर्वस्येति। उपसर्जनंवैसंयोगः। नचोपसर्जनस्य
विशेषणमस्ति। धातोरित्यनुवर्तनसामर्थ्यादुपसर्जनस्यापिविशेषणंभविष्यति। अस्त्यन्यत्। धातोरित्यनुवृत्तौप्रयो
जनम्। किम्। इवर्णोविशिष्यते। नैतदस्तिप्रयोजनम्। यद्ध्यधातोरिवर्णोभवितव्यमेवतस्ययणादेशेन इकोयणचीति॥

नर्थित्वेप्रधानस्यगुणेनविशेषणेनसंबध्यते। यद्ध्यधातोरिति। यथाकुमार्याविति। ननुचमणीपाणीइत्यादावधातोःपूर्वसवर्णदीर्घ-
बाधनार्थोयणमाभूदितिधातुनेवर्णस्यविशेषणेप्रयोजनमस्ति। इवं तर्हिइयङ्बाधनार्थत्वाद्यणादेशस्याधातोरियङोप्रसङ्गाद
धातुनिवृत्त्यर्थाधातुग्रहणस्यानुवृत्तिर्नभवति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा· कौ वर्षासु भवति वर्षा वा भवते प्राप्नोतीति वर्षाभूरोषधिविशेषः। दृन्भूशब्दः। अन्दूदृन्भूरिति निपातितः। अत्र भूशब्दस्यानर्थक्यान्न भूसुधि ६४३
३१ योरित्यत्र ग्रहणाभावाद्यणादेशः सिद्धः॥ हुश्नुवोः॥ अधिकारानुवृत्तिसामर्थ्यादतिप्रसङ्गाभावं मत्वाह। हुश्नुग्रहणानर्थक्यमिति। भा

वर्षाभ्वश्च॥ वर्षाभूपुनर्भ्वे श्च॥ वर्षाभूरित्यत्र पुनर्भ्वश्चेति वक्तव्यम्। पुनर्भ्वौ पुनर्भ्वः इति। अत्यल्पमिदमुच्यते। वर्षादृ न्कारपुनः पूर्वस्य भुव इति वक्तव्यम्। वर्षाभ्वौ। वर्षाभ्वः। दृन्भ्वौ। दृन्भ्वः। कारभ्वौ। कारभ्वः। पुनर्भ्वौ। पुनर्भ्वः॥ हुश्नुवोः सा र्वधातुके। हुश्नुग्रहणानर्थक्यमन्यस्याभावात्। हुश्नुग्रहणमनर्थकम्। किं कारणम्। अन्यस्याभावात्। न ह्यन्यत्सार्व धातुके अस्ति यस्य यणादेशः स्यात्। ननु चायमस्ति याति वातीति। क्ङितीत्यनुवर्तते। इदं तर्हि। यातः वात इति। अचीति व र्तते। इह तर्हि यान्ति वान्तीति। य्वोरिति वर्तते। एवमपि धियन्ति पियन्ति अत्र प्राप्नोति। ओरिति वर्तते। एवमपि सुव- न्ति रुवन्तीत्यत्र प्राप्नोति। अनेकाजिति वर्तते। एवमप्ययुवन् अरुवन् इत्यत्रापि प्राप्नोति। एतद्प्यटोऽसिद्धत्वादेका ज्भवति। एवमपि प्रोर्णुवन्तीत्यत्र प्राप्नोति। असंयोगपूर्वस्येत्यनुवर्तते। यङ्लुगर्थं तर्हि हुश्नुग्रहणं कर्तव्यम्। यङ्लुगन्तमनेकाजसंयोगपूर्वमुवर्णान्तमस्ति तदर्थमिदम्। योयुवं योयुवतीनाम्। वृषभं भवतु रोरुवतीनाम्। यङ् लुगर्थमिति चेत्तन्न। किं कारणम्। आर्द्धधातुकत्वात्सिद्धम्। कथमार्धधातुकत्वम्। उभयथा छन्दसीति वचनात्। अन्येऽपि हि धातुप्रत्ययाश्छन्दस्युभयथा दृश्यन्त इति। एवं तर्हि सिद्धे सति यद् हुश्नुग्रहणं करोति तज्ज्ञापयत्या चार्यो भाषायामपि यङ्लुग् भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। बेभिदीति। चेच्छिदीत्येतत्सिद्धं भवति भाषा यामपीति॥ ऊदुपधाया गोहः॥ किमर्थं गुहेर्विकृतस्य ग्रहणं क्रियते। न गुह इत्येवोच्येत। गोहिग्रहणं विषयार्थ म्। गोहिग्रहणं क्रियते विषयार्थम्। विषयः प्रतिनिर्दिश्यते यत्रास्यैतद्रूपं तत्र यथा स्यात्। इह मा भूत्। निजुगुह तुः। निजुगुहुरिति।

षायामपीति। ततो यङ्लुङ्निवृत्त्यर्थं हुश्नुग्रहणमर्थवत्। ऊदुप॥ किमर्थमिति। लघुं विहाय निर्देशं कस्माद्गौरवमाश्रितमिति रामः
प्रश्नः। गोहिग्रहणमिति। कृतगुणस्योत्वं यथा स्यादकृतगुणस्य मा भूदित्येवमर्थमित्यर्थः। ॥ ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयादेशप्रतिषेधार्थमिति। गुणे कृते तस्य स्थाने ऊत्वे कृते सत्यूत्वस्यासिद्धत्वे गुरुपूर्वादुत्तरेणिर्भवति। न तु लघुपूर्वादिति ल्यप्य-यादेशो न भवति। गुहू इति निर्देशे क्रियमाणे नित्यत्वाद्बाधित्वा गुणमुकारस्थाने ऊकारः प्राप्नोति। तस्य चासिद्धत्वात् लघुपूर्वा-दुत्तरेणिर्भवतीति अयादेशः स्यात्। उऊत् ऊदिति। ह्रस्वदीर्घावादेशौ सूत्रे निर्दिश्येते तत्र स्थानेन्तरतमपरिभाषावशात् ह्रस्व-

अयादेशप्रतिषेधार्थं च॥ अयादेशप्रतिषेधार्थं च विकृतग्रहणं क्रियते। ह्रस्वादेशे ह्ययादेशप्रसङ्ग ऊत्वस्यासिद्धत्वात्॥ ह्रस्वादेशे हि सति अयादेशः प्रसज्येत। प्रतिगूह्य गतः उपगूह्य गत इति। किं कारणम्। ऊत्वस्यासिद्धत्वात्। लघुपूर्वादित्ययादेशः प्रसज्येत। विषयार्थेन तावन्नार्थो गोहिग्रहणेन। प्रश्लिष्टनिर्देशात्सिद्धम्। प्रश्लिष्टनिर्देशोयम्। उऊत् ऊदिति। तत्र ह्रस्वस्यावकाशः। निजुगुहतुः। निजुगुहुः। गुणस्यावकाशः। निगोढा। निगोढुम्। इहोभयं प्राप्नोति। निगूहयति। निगूहकः। साधुनिगूही। परत्वाद्गुणे कृते आन्तर्यतो दीर्घो भवति। अयादेशप्रतिषेधेन चापि नार्थः। समानाश्रयवचनात्सिद्धम्। समानाश्रयवचनात्सिद्धं भवति। व्याश्रयं चैतत्। णौ वुत्वं णौ ल्यप्ययादेश इति॥ दोषो णौ॥ किमर्थं दुषेर्विकृतस्य ग्रहणं क्रियते। न दुष इत्येवोच्येत। दोषिग्रहणे च। किम्। अयादेशप्रतिषेधार्थं विकृतग्रहणं क्रियते। ह्रस्वादेशे ह्ययादेशप्रसङ्ग ऊत्वस्यासिद्धत्वात्। ह्रस्वादेशे हि सति अयादेशः प्रसज्येत। प्रदूष्य गतः। उपदूष्य गतः। किं कारणम्। ऊत्वस्यासिद्धत्वात्। असिद्धमूत्वं तस्यासिद्धत्वाद्दुल्यपि लघुपूर्वादित्ययादेशः प्रसज्येत। समानाश्रयवचनात्सिद्धमित्येव। समानाश्रयमसिद्धम्। व्याश्रयं चैतत्। णौ वुत्वं णौ-ल्यप्ययादेश इति॥

स्वस्य ह्रस्वो दीर्घस्य दीर्घः। निजुगुहतुरिति। अत्र कित्वाद्गुणप्रतिषेधादुकारस्यादेश उकारः। निगोढेति। अचीत्यधिकारादूकारस्यात्राप्रसङ्गः। निगूहयतीति। उकारस्य गुणश्च प्राप्नोति ऊकारश्च। तत्र परत्वाद्गुणे कृते एकदेशविकृतस्यानन्यत्वादूकारादेश इति नार्थो विकृतनिर्देशेन। दोषो णाविति अत्र तु लक्ष्यदर्शनवशादूकारोपेक्ष्यते न तु ह्रस्व इति तत्रापि न दोषः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·वै· चिण्णमुलोर्दीर्घोऽन्यतरस्याम्। णिज्यवेतानामिति। चिण्णमुल्परे णौ मितामङ्गानां वा दीर्घ उच्यते। तत्र यदा ण्यन्ताद्यङ् यङन्ताच्च ६८३
३२ णिज्विधीयते तदा पूर्वेण णिचा यङ्कारेण च व्यवधानाद्दीर्घो न प्राप्नोतीति वचनम्। प्रयोजितवानिति। यद्यपि चिण्विषयं क
र्म प्रदर्शनीयं तथापि णिजुत्पत्तये हेतुव्यापारप्रदर्शनार्थं कर्तुरुपादानं न त्वत्र कर्ता विवक्षितः। शंशमयतेरिति। शमेर्यङि
नुगतोऽनुनासिकान्तस्येति नुकि कृते शंशम्यशब्दात् णिचि अस्य लोपे यलोपौ। लोपे कृत इति। यद्यपि परस्यापि णिचो लो

चिण्णमुलोर्दीर्घोऽन्यतरस्याम्। चिण्णमुलोर्णिज्यवेतानां यङ्लोपे च॥ चिण्णमुलोर्णिज्यवेतानां यङ्लोपे चोपसं
ख्यानं कर्तव्यम्। शमयन्तं प्रयोजितवान्। अशमि। शमंशमम्। शामंशामम्। शंशमयतेः। अशंशमि। अशंशामि। शं
शमंशंशमम्। शंशामंशंशामम्। किं पुनः कारणं न सिध्यति। चिण्णमुल्परे णौ मितामङ्गानां दीर्घो भवतीत्युच्यते। यश्चा
त्र णिश्चिण्णमुल्परो न तस्मिन् मिदङ्गम्। यस्मिंश्च मिदङ्गं नासौ चिण्णमुल्पर इति। लोपे कृते चिण्णमुल्परो भवति। स्था
निवद्भावान्नात्र चिण्णमुल्परः। ननु च प्रतिषिध्यते तत्र स्थानिवद्भावः। दीर्घविधिं प्रति न स्थानिवदिति। एवमप्यसिद्धत्वान्न
प्राप्नोति। एवं तर्हि चिण्णमुलोर्णिज्यवेतानां यङ्लोपे चान्तरङ्गलक्षणत्वात्सिद्धम्। किमिदमन्तरङ्गलक्षणत्वादि
ति। यावद्ब्रूयात्समानाश्रयवचनात्सिद्धमिति। व्याश्रयं चैतत्। कथम्। णौ णिलोपः। णौ चिण्णमुल्परे मितामङ्गानां दीर्घ
त्वम्। तस्मान्नार्थ उपसंख्यानेनेति॥

पस्तथापि प्रत्ययलक्षणेन भूतपूर्वगत्या वा चिण्णमुल्परो णिः। दीर्घविधिं प्रति नेति। एतदेव हि दीर्घग्रहणस्य प्रयोजनं स्थानिवत्व
प्रतिषेधो यथा स्यात्। यदि तु प्रकृतो ह्रस्वो विकल्प्येत तदा णौ णिलोपस्य स्थानिवत्त्वाद्विकल्पो ह्रस्वस्य न स्यात्। यङ्कारलोप- रा·म·
स्य स्थानिवद्भावान्नित्यं ह्रस्वः श्रूयेत। हेडृ वेष्टन इत्यस्य च ह्रस्वाभावपक्षे अहेडीति स्यात्। दीर्घे तु ह्रस्वस्य कृते अहीडीति सिध्यति। ३२
।अन्तरङ्गलक्षणत्वादिति। णियङोर्लोपो णिमात्रापेक्षत्वादन्तरङ्गः। दीर्घस्तु चिण्णमुल्परण्यपेक्षत्वाद्बहिरङ्ग इति समानाश्रयत्वा-
भावादसिद्धत्वाभाव इत्यर्थः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वादेः॥ अद्विप्रभृत्युपसर्गस्येति वक्तव्यमिति। इह संख्यान्तरोपजनने आश्रयाविनाशेऽपि पूर्वसंख्याविनाशात्तद्वाचिशब्दाप्रवृत्तिरिति भावः। यत्र त्रिप्रभृतय इति। वस्तुसद्भावमाश्रित्य परिहारः। अद्व्युपसर्गस्येति च प्रसज्यप्रतिषेधो वाक्यभेदेनाश्रीयते। पर्युदासाश्रयणे ह्यनुपसर्गस्य ह्रस्वो न स्यात्। न वा एष इति। संख्याशब्दानामेष स्वभावो यत्संख्यान्तरस्योत्तरस्य गौणस्य मुख्यस्य वा विषये न प्रवर्तन्ते। यथा चोक्तमेकाजनेकाज्ग्रहणेषु आवृत्तिसंख्यानात्सिद्धमिति। नैधेय इति च पूर्वग्रहणस्य प्रत्युदाहरणमुपन्यस्तं स्थानिवद्भावे सति त्र्यच्त्वाद्द्व्यच्त्वाभावात्तदाश्रयो ढक् न स्यादिति॥ घसिभ॥ अचीत्यधिकाराद्धलि न प्राप्नोतीति

२ विधि

ध्वादेर्घे॥ अद्विप्रभृत्युपसर्गस्येति वक्तव्यम्। इहापि यथा स्यात्। समुपाभिच्छादः। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। यत्र त्रिप्रभृतयः सन्ति द्वावपि तत्र स्तः। तत्राद्व्युपसर्गस्येत्येव सिद्धम्। न वा एष लोके संप्रत्ययः। न हि द्विपुत्र आनीयतामित्युक्ते त्रिपुत्र आनीयते। तस्मादद्विप्रभृत्युपसर्गस्येति वक्तव्यम्॥ घसिभसोर्हलि॥ हल्ग्रहणानर्थक्यमन्यत्रापि दर्शनात्॥ हल्ग्रहणमनर्थकम्। किं कारणम्। अन्यत्रापि दर्शनात्। अन्यत्रापि हि लोपो दृश्यते। अग्निर्वै नानि बप्सति। शरावे बप्सतीति॥ हुझल्भ्यो हेर्धिः॥ इटः प्रतिषेधो वक्तव्यः। रुदिहि। स्वपिहि। झल इति धित्वं प्राप्नोति। हेर्धित्वे हलधिकारादिटो प्रतिषेधः॥ हेर्धित्वे हलधिकारादिटोऽप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। धित्वं कस्मान्न भवति। हलधिकारात्। प्रकृतं हल्ग्रहणमनुवर्तते। क्व प्रकृतम्। घसिभसोर्हलीति। तद्वै सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। तद्वै तत्र प्रत्याख्यायते। प्रत्याख्यातं सद्यया विभक्त्या निर्दिश्यमानमर्थवद्भवति तया निर्दिष्टमिहानुवर्तते।

हल्ग्रहणं क्रियते। तदुपादाने चाचि न प्राप्नोतीति चकारोऽनुसंबन्धार्थः क्रियते तत्राज्ग्रहणस्येहानधिकारादेवं सर्वत्र लोपः सिध्यतीति हलि चेति न वक्तव्यम्। अन्यत्रापीति। वचनाद्वार्तिककारश्चकारं न पपाठेति लक्ष्यते। बप्सतीति। एकवचने प्राप्ते व्यत्ययेन सिः श्लौ द्विर्वचनम्। अदभ्यस्तादित्यदादेशः। उपधालोपः खरि चेति चर्त्वम्। अत्रान्तरङ्गत्वादुपधालोपात्पूर्वं द्विर्वचनं क्रियते। यदि तु झावेव पूर्वं लोपः स्यात्ततो द्विर्वचनं न स्यात्॥ हुझल्॥ रुदिहीति। शब्दान्तरप्राप्त्या द्वयोरप्यनित्यत्वात्परत्वादिटि कृते पुनःप्रसङ्गविज्ञानाद्धित्वप्रसङ्गः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ अथवेति। यद्यपि सप्तम्यचरितार्था तथापि हुझल्भ्य इत्यनया पञ्चम्या अचरितार्थया हेरित्येतदनुगुणा षष्ठी प्रकल्प्यते। ननु ष ६४३
३३ ष्ठीप्रकॢप्तौ तदादिविधेरसंभवः। यस्मिन्विधिस्तदादावल्ग्रहण इति ह्युच्यते। नैष दोषः। हल्ग्रहणानुवृत्तिसामर्थ्यात् हलन्त
त्वासंभवाच्च तदादिविधिर्विज्ञास्यते। अथवेति। यत्तु षष्ठ्या निर्दिश्यते तत्स्यैवादेशः। सागमस्त्वागमानामव्यभिचाराच्छब्दा
न्तरे श्रूयमाणोऽप्रतीयते। ननु स्वार्थ इति तस्यादेशाभावः। यत्तर्हीति। आगमं विहाय हि शब्दस्यादेशो भवत्वित्यर्थः। इटेति। तस्मा
दित्युत्तरस्येति वचनादनन्तरस्यैव षष्ठ्या कार्येण च भाव्यम्। तत्र यो निर्दिष्टो नासावनन्तरो यश्चानन्तरः सागमको नासौ निर्दिष्ट

अथवा हुझल्भ्य इत्येषा पञ्चमी हलीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति। अथवा निर्दिश्यमानस्या
देशा भवन्तीत्येवं न भविष्यति। यत्तर्हि निर्दिश्यते तस्य कस्मान्न भवति। इटा व्यवहितत्वात्। यद्येवं भिन्धकि छिन्धकी
त्यत्र धित्वं न प्राप्नोति। एवं तर्हि धित्वे कृतेऽकज्भविष्यति। इदमिह संप्रधार्यं धित्वं क्रियतामकजिति। किमत्र कर्तव्यम्
। परत्वाद्धित्वं नित्योऽकच्। कृतेऽपि धित्वे प्राप्नोत्यकृतेऽपि। अकजप्यनित्यः। अन्यस्य कृते धित्वे प्राप्नोति अन्यस्याकृ
ते। शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवतीति। उभयोरनित्ययोः परत्वाद्धित्वं धित्वे कृतेऽकज्भविष्यति। अथवा ह
कारस्यैवैतदशक्तिजेनेकारेण ग्रहणमिति॥

इति धित्वाभावः। यद्येवमिति। यदि निर्दिश्यमानस्यादेशस्तर्ह्यकचि कृते शब्दान्तरत्वाद्धित्वाप्रसङ्गः। धित्वे कृतेऽकजिति। पुनः प्रसङ्ग
विज्ञानाश्रयणात्। न ह्यन्यथा ज्ञाताद्यर्थावगतिर्भवति। अथवाऽज्ञाताद्यर्थापेक्षत्वाद्बहिरङ्गोऽकजिति पूर्वं धित्वं पश्चादकच्।
अथवेति। इकारेणागन्तुना हेरिति निर्देशः। हकारमात्रं तु स्थानित्वेन निर्दिश्यते। एवं धिरिति धकारमात्रमादेशः। इकारस्तूच्चा एमः
रणार्थो व्यञ्जनस्य स्वररहितस्योच्चारयितुमशक्यत्वात्। ननु रुदिहीत्यत्र हकारस्येटा व्यवधानादिकाराभावः। सहि समुदा ३३
यभक्तत्वात्तमेव न व्यवदध्यात्। अवयवं तु व्यवदधात्येव। तथा भिन्धकीत्यत्र सत्यपि पूर्वमकचि हकारस्य धकारे कृते रूपं सिध्यति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चिणो॥ नग्रहणमिति। इदमस्मिन्नसिद्धमिति भेदनिबन्धनत्वाद्विषयविषयिभावस्य चिणो लुगित्यस्य लक्षणस्यभेदाभावादकारित-
रामित्यत्र तलोपस्यासिद्धत्वाभावात्तरपो लुक् प्राप्नोति। एवं सति प्रत्ययत्रयात्मकस्य समुदायस्य लुक्प्रसङ्गः। इतरस्तु युगपत्प्र-
त्ययत्रयस्य लुक्प्रसङ्गोऽनेनोक्त इति मत्वाह। चिणो लुकीति। इतरः स्वाभिप्रायं प्रकाशयति। तलोप इति। तलोपस्यासिद्ध-
त्वादिति। प्रतिलक्ष्यं लक्षणभेदादस्ति विषयविषयिभावः। अभेदपक्षमाश्रित्याह। कार्यकृतत्वादिति। एकस्मिन्विषये सकृत्प्रव-
यलक्षणस्य चरितार्थत्वात्पुनःप्रवृत्त्यभावः। तद्यथेति। यथैकस्मिन्वसन्ते अग्न्याधानं कृत्वा वसन्तान्तरे ब्राह्मणोऽग्न्याधानं न कुरु-

चिणो लुक्॥ चिणो लुकि तग्रहणम्॥ चिणो लुकि तग्रहणं कर्तव्यम्। इह माभूत्। अकारितराम्। अहारितराम्। इति।
चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात्। चिणो लुकि तग्रहणमनर्थकम्। संघातस्य लुक्कस्मान्न
भवति। संघातस्याप्रत्ययत्वात्। प्रत्ययलुक्श्लुलुपो भवन्तीत्युच्यते। न च संघातः प्रत्ययः। तलोपे तर्हि कृते पर
स्य प्राप्नोति। तलोपस्य चासिद्धत्वात्। असिद्धस्तलोपस्तस्यासिद्धत्वान्न भविष्यति। कार्यकृतत्वाद्वा। अथवा कृत
श्चिणो लुगिति कृत्वा पुनर्न भविष्यति। तद्यथा। वसन्ते ब्राह्मणोऽग्नीनादधीतेति सकृदाधाय कृतः शास्त्रार्थ इति कृ
त्वा पुनःप्रवृत्तिर्न भवति। विषम उपन्यासः। युक्तं यत्तस्यैव पुनःप्रवृत्तिर्न स्यात्। यत्तु तदा अयं प्राप्नोति न तच्छक्यं
बाधितुम्। तद्यथा। वसन्ते ब्राह्मणोऽग्निष्टोमादिभिः क्रतुभिर्यजेतेति। अग्न्याधाननिमित्तं वसन्ते वसन्ते इज्यते। त
स्मात्पूर्वोक्तावेव परिहारौ। अथवा क्ङितीति वर्तते। क्व प्रकृतम्। गमहनजनखनघसां लोपः क्ङित्यनङीति। त
द्वै तत्र सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। चिण इत्येषा पञ्चमी क्ङितीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति त
स्मादित्युत्तरस्येति॥

ते शास्त्रस्यानुष्ठितत्वात्तथैकस्य प्रत्ययस्य लुकि कृते प्रत्ययान्तरस्य तरबादेर्लुग्न प्रवर्तते। युक्तं यत्तस्यैवेति। इहाभिन्नरूप-
मपि फलभेदाद्भिन्नमुच्यते। अग्न्याधानं तु कर्मान्तरेषु कर्तुर्योग्यतोत्पादनार्थमिति फलभेदाभावात्पुनर्न क्रियते। काम्या-
नां तु कर्मणां फलभेदात्पुनरनुष्ठानं भवति। न चेहापि तस्य लुकि कृते तरबादेर्लुक्प्रसङ्गः। अग्न्याधानं निमित्तमस्येति बहु-
व्रीहिः। क्रियाविशेषणं चैतत्। अनाहिताग्नेरनधिकारादग्न्याधाननिमित्तत्वं यागस्योच्यते॥

CC-0. In Public Domain. Digitization by eGangotri

भा० के० उतश्च॥ कथमिति। उतः प्रत्ययादित्यनयोर्विशेषणविशेष्यभावे कामचारादुकारः प्रत्ययेन विशेष्यते तदा तदन्तविधेरभावा ६५३
३४ दुकारात्प्रत्ययादिति पक्षो वतिष्ठते। उकारस्य विशेष्यत्वात् तेन नास्ति तदन्तता। न संभवति चोकारः प्रत्ययान्तो यदा पुनः। विशे
ष्यते उकारेण प्रत्ययोऽतस्तदन्तता। आश्रीयते प्रत्ययस्य तस्मात् पक्षद्वयोद्भवः। पक्षद्वयेपि दोषदर्शनात् प्रश्नः। तथेति। तदन्तप
क्षे यं दोषः। आद्ये तु पक्षे उकारस्याप्रत्ययत्वात् लुकू प्रसङ्ग एव नास्तीत्यत्र दोषाभावः। ननूकारात् प्रत्ययादिति विज्ञायमाने उका
रस्य प्रत्ययस्य संयोगपूर्वत्वासंभवादसंयोगपूर्वग्रहणं किमर्थं स्यात्। उच्यते। अङ्गविशेषणं स्यात्। तथा च क्षिणुहीत्यत्र न स्या

उतश्च प्रत्ययादसंयोगपूर्वात्॥ कथमिदं विज्ञायते उकारात् प्रत्ययादिति आहोस्विदुकारान्तात् प्रत्ययादि
ति। किं चातः। यदि विज्ञायते उकारान्तात् प्रत्ययादिति। सिद्धं तनु सुनु इति न सिध्यति। अथ विज्ञायते उकारान्तात् प्रत्यया
दिति सिद्धं चिनु सुनु। तनु कुर्विति न सिध्यति। तथा। असंयोगपूर्वग्रहणे नेहैव पर्युदासः स्यात्। अक्ष्णुहि। तक्ष्णु
हि॥ आप्नुहि। शक्नुहीत्यत्र न स्यात्। यथेच्छसि तथास्तु। अस्तु तावदुकारात् प्रत्ययादिति। कथं चिनु सुन्विति। तदन्तवि
धिना भविष्यति। अथवा पुनरस्तूकारान्तात् प्रत्ययादिति। कथं तनु सुनु। व्यपदेशिवद्भावेन भविष्यति। यदप्युच्य
ते। तथाऽसंयोगपूर्वग्रहणे नेहैव पर्युदासः स्यादक्ष्णुहि तक्ष्णुहि॥ आप्नुहि शक्नुहीत्यत्र न स्यादिति।

दित्ययमपि दोषो वक्तव्यः। तदन्तविधिनेति। ननूकारस्य विशेष्यत्वात् कथं तदन्तविधिः। विशेषणत्वात् तदन्तविधौ वक्ष्यमाणात् न्या
यादस्य भेदो न प्राप्नोति। एवं तर्हि तन्त्रेण सूत्रद्वयमभ्युपगम्यते तदुच्यते। तत्रैकस्मिन् सूत्रे प्रत्ययेनोकारो विशेष्यते। द्वितीये तूकारे
ण प्रत्यय इति दोषाभावः। व्यपदेशिवद्भावेनेति। आद्यन्तवदेकस्मिन्नित्यनेनेत्यर्थः। किं तर्हि उकारो विशेष्यते इति। ननूकारस्य राम:
संज्ञात्वात् संज्ञिपरतन्त्रत्वादप्रधानस्य कथं विशेषणेन संबन्धः। नैष दोषः। यावदस्य विशेषणत्वं न विवृत्तं तावत् संज्ञात्वं नास्तीत्य ३४
प्राधान्याभावः। तत्रासंयोगपूर्व उकारः प्रत्ययस्य विशेषणमिति विशेषणेन संबन्धमनुभूय संज्ञात्वमुकारो लभते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छन्दोग्रहणमिति। नित्यं करोतेरित्यत्र वाक्यभेदेन छन्दसि वेति संबध्यते। अत उत्॥ सार्वधातुक इति किमर्थमिति। सत्यपि सार्वधातुकग्रहणे स्यान्तस्य निवृत्त्यर्थोऽवश्यं कर्तव्यो यत्न इति तेनैव यत्नेनार्धधातुके न भविष्यतीति भावः। स्यान्तस्येति। इह सार्वधातुके विकरणेन कृतेन व्यवधानात् सार्वधातुके परतः करोतेरित्यस्यासंभवात् सार्वधातुके परतो यदङ्गं तदवयवस्य करोतेरित्या

नास्माभिरसंयोगपूर्वग्रहणेनोकारान्तो विशेष्यते। किं तर्हि। उकारो विशेष्यते। उकारो योऽसंयोगपूर्वस्तदन्तात्प्रत्ययादिति। उतश्च प्रत्ययात् छन्दो वा वचनम्। उतश्च प्रत्ययादित्यत्र छन्दसि वेति वक्तव्यम्। अवस्थिरा तनुहि यातुजूनाम्। धिनुहि यज्ञं धिनुहि यज्ञपतिम्। तेन मा भागिनं कृणुहि। उत्तरार्थं च केचित्तावदाहुः। छन्दोग्रहणं कर्तव्यमिति। अपर आहुः। वा वचनं कर्तव्यमिति। लोपश्चास्यान्यतरस्यामित्यत्रान्यतरस्यांग्रहणं न कर्तव्यं भवति। अत उत् सार्वधातुके॥ सार्वधातुक इति किमर्थम्। इह मा भूत्। संचस्करतुः संचस्करुरिति। स्यान्तस्य प्रतिषेधो वक्तव्यः। करिष्यति। करिष्यते। कृञ उत्त्वे उकारान्तनिर्देशात् स्यान्तस्याप्रतिषेधः॥ कृञ उत्त्वे उकारान्तस्य निर्देशात् स्यान्तस्याप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। उत्त्वं कस्मान्न भवति। उकारान्तनिर्देशात्। अशक्यः करोतावुकारान्तनिर्देश आश्रयितुम्। इह संपरिभ्यां भूषणसमवाययोः करोताविति। इहैव स्यात् संस्करोति। संस्कर्ता संस्कर्तुमित्यत्र न स्यात्। नन्वभूमोऽस्मादुकारान्तनिर्देशाद्योयं करोतेरिति। किं तर्हि। उकारान्तप्रकरणादुकारान्तमङ्गं संबध्यते। उत इति वर्तते। यद्येवं नार्थः सार्वधातुकग्रहणेन। कस्मान्न भवति संचस्करतुः संचस्करुरिति। उत इति वर्तते। उत्तरार्थं तर्हि सार्वधातुकग्रहणं कर्तव्यम्। श्नसोरल्लोप इति। श्नः सार्वधातुक एवास्तेरप्यार्धधातुके भूभावेन भवितव्यम्। उत्तरार्थमेव तर्हि श्नाभ्यस्तयोरात इति। श्ना सार्वधातुक एव।

श्रयणीयम्। एवं च स्यान्तस्यापि प्राप्नोति। स्यग्रहणमुपलक्षणं स्यतान्तस्यापि प्रसङ्गात्। कृञ उत्व इति। उत इत्यनुवर्तनादिति भावः। इतरस्तु करोतेरित्युकारनिर्देशाश्रयेणोक्तमिति मत्वाह। अशक्य इति। उत इति वर्तत इति। तेनोकारान्तस्याङ्गस्यावयवस्य करोतेरत उत् सार्वधातुके क्ङितीति भवतीति सूत्रार्थः संपद्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यस्तमपीति। यत्र नेष्यते लोप इति भावः। यत्र त्वस्ति तत्र भवत्येव लोपः। ययतुः ययुरिति। याया वर इति। ननु चातो लोपस्य स्थानिवद्भावा
त्प्राप्त आकारलोपे वरेऽजादेशस्य स्थानिवत्त्वं निषिध्यते। यद्विचात्र श्नाभ्यस्तयोरात इत्याल्लोपः स्यात् स्थानिवत्त्वनिषेधोऽनर्थकः स्या
त्। ई हल्यघोरितीत्वमत्र प्राप्नोतीति चेद् इस्यत्येव तत्प्राप्तिमिति वक्ष्यमाणेद्वदाभावः। एवं तर्हि भाष्यकार आल्लोपप्राप्तिमभ्युपेत्य परि
हारान्तरमाह। नैतदाकारान्तमिति। यायइति स्थिते सन्यङन्तस्य प्रथमैकाचो द्विर्वचनमिति यायूइत्यस्य द्विर्वचनं ततो यायायूइत्यभ्य
स्तमाकारान्तं न भवति। ननु यायायूशब्दस्याभ्यस्तसंज्ञायां यलोपे कृते भवत्येवावशिष्टस्याभ्यस्तसंज्ञा। एवं तर्हि उपदेशग्रहणानुवृ

अभ्यस्तमप्याकारान्तमार्द्धधातुके नास्ति। ननु चेदमस्ति। अप्सु यायावरः प्रवपेत पिण्डानिति। नैतदाकारान्तम्। किं त
र्हि। यकारान्तमेतत्। उत्तरार्थमेव तर्हि ई हल्यघोरिति। तत्रापि श्नाभ्यस्तयोरित्येव। अतोऽप्युत्तरार्थमेव तर्हि दरिद्रस्ये
ति। वक्ष्यत्येतद्दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति। अतोऽप्युत्तरार्थं भियोऽन्यतरस्याम्। अभ्यस्तस्ये
त्येव। अतोऽप्युत्तरार्थमेव जहातेश्च। अभ्यस्तस्येत्येव। अतोऽप्युत्तरार्थमा च हौ। हाविति उच्यते अभ्यस्तस्येत्येव। अतोऽप्युत्त
रार्थमेव लोपो यि। अभ्यस्तस्येत्येव। अतोऽप्युत्तरार्थमेव घ्वसोरेद्धावभ्यासलोपश्च। हाविति उच्यते। तदेव तर्हि प्रयोजनं
श्नसोरल्लोप इति। ननु चोक्तं श्नः सार्वधातुक एव अस्तेरप्यार्धधातुके भूभावेन भवितव्यमिति। अनुप्रयोगे तु भुवा
स्य बाधनं स्मरन्ति कर्तुर्वचनान्मनीषिणः। अनुप्रयोगे तु भूभावेनास्तेर्बाधनमिष्यते। ईहामासतुः। ईहामासुः। किं
च स्याद्यद्यत्र लोपः स्यात्। लोपे द्विर्वचनासिद्धिः। लोपे कृते न चकास्ति द्विर्वचनं न स्यात्। स्थानिवद्भावाद्भविष्यति।
स्थानिवदिति चेत्कृते भवे दूद्वित्वे। स्थानिवदिति चेत् कृते द्वित्वे लोपः प्राप्नोति।

त्वा उपदेशे यदकारान्तमभ्यस्तं तस्याल्लोपो न तु कृते यलोप इति मत्वा परिहार उक्तः। अभ्यस्तस्येत्येवेति। ननु च बिभीवान् इत्यत्रापि
प्राप्नोति। एवं तर्हि छान्दसः चक्रसुरिति भाष्यकारस्य दर्शनं छन्दसि च दृष्टमनुविधीयते। कृते द्वित्वे लोपः प्राप्नोतीति। ननु च निय-
तकालत्वात् स्थानिवद्भावस्य कृते द्वित्वे लक्षणप्रवृत्तिमन्तरेण स्वत एवादेशरूपमवतिष्ठत इति कथं लोपप्राप्तिः। उच्यते। पुनः
प्रवृत्तिर्लक्षणस्येति स्थानिवद्भावप्रकरणे प्रतिपादितम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तुतर्हीति। अॅन्त्यविकारेन्त्यस्यदेशस्येतिवचनात्। अथवा क्ङिति त्यनन्तरस्याकारस्यलोपः तत्रयेननाव्यवधानमित्येकवर्णाव्यवहि
तस्यलोपः दीर्घत्वमिति। अतआदेरित्यनेन। प्रत्यङ्गत्वादिति। वर्णाश्रयत्वात्पररूपमन्तरङ्गं तत्रकृतेश्नलोपे चसन्तुः स्युरितिप्राप्नोति
। दीर्घत्वमिति। येननाप्राप्तिन्यायेनपररूपंबाधित्वादीर्घत्वंभविष्यतीत्यर्थः। कुर्विति। अत्रनलुमताङ्गस्येतिप्रत्ययलक्षणप्रतिषे
धादुत्वंनस्यादितिभूतपूर्वगत्यासार्वधातुकग्रहणाद्भवति॥ श्नसोरल्लोपः॥ आस्तामिति। लङ्तान्। श्नल्लोपेकृतेतस्यासिद्धत्वा-
दाट्। नैतदस्तीति। अत्रप्रत्याख्यातंतपरकरणंपरस्तात्तुज्ञापकत्वमस्यवक्ष्यते। श्नसोरत्वेतकारेणज्ञाप्यतेत्वेत्वशासनमिति॥ इद्दरि
द्रस्य॥ सिद्धश्चेति। आर्धधातुकइतिविषयसप्तमीत्यर्थः। आकारान्तलक्षणइति। यद्यार्धधातुकइतिपरसप्तमीस्यात्तदादरिद्रा-

अस्तुतर्हिपरस्यलोपः। अभ्यासस्ययोकारस्तस्यदीर्घत्वंभविष्यति। नैवंसिध्यति। कस्मात्। प्रत्यङ्गत्वाद्धेद्धिपररूप
म्। नचैवंसिध्यति। कस्मात्। प्रत्यङ्गत्वात्पररूपंप्राप्नोति। तस्मिंश्चकृतेलोपः। पररूपेचकृतेलोपः प्राप्नोति। दीर्घत्वं-
बाधकंभवेत्। तत्रातआदेरितिदीर्घत्वंबाधकंभविष्यति। इदंतर्हिप्रयोजनंसार्वधातुकेभूतपूर्वमात्रेपियथास्या
त्। कुरुइति॥ श्नसोरल्लोपः॥ अथात्रतपरकरणंकिमर्थम्। इहमाभूत्। आस्ताम्। आसन्। नैतदस्तिप्रयोजनम्। अटो
सिद्धत्वान्नभविष्यति॥ इद्दरिद्रस्य॥ दरिद्रातेरार्द्धधातुकेलोपः॥ दरिद्रातेरार्धधातुकेलोपोवक्तव्यः॥ सिद्धश्चप्र
त्ययविधौ॥ सचसिद्धःप्रत्ययविधौ। किंप्रयोजनम्। दरिद्रातीति। दरिद्रः। आकारान्तलक्षणःप्रत्ययविधिर्माभूदिति।
नदरिद्रायकेलोपोदरिद्राणेचनेष्यते। दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा॥ अद्यतन्यां वा॥ अद्यतन्यांवेतिवक्त
व्यम्। अदरिद्रासीत् अदरिद्रीत्॥

तीति। दरिद्रइति। श्याद्व्यधेतिणेकृतेद्वयोरनित्ययोःपरत्वात्कचस्यात्। लोपस्यचशब्दान्तरप्राप्त्याऽनित्यत्वम्। अथाप्याकृतिपक्षेनि
त्यत्वाद्लोपस्तथाप्यदरिद्रइत्यत्राकावश्यकाविनन्त्योदात्तत्वंनस्यात्। ईषद्दरिद्रमित्यात्तोयुजितियुच्प्रसज्येत। दिदरिद्रासतीति।
ननिपतिदरिद्राणामुपसंख्यानमितिव्यवस्थितविभाषाविज्ञानाल्लोपपक्षइडागमः। लोपाभावपक्षेत्विडभावः। अदरिद्रासीदिति
यमरमेत्यत्रैकाचइत्यधिकारादेकाचःसगिटावित्यकीयमतामित्यनेकाचोपिभवतः। चिणि अदरिद्रि अदरिद्रायितइतिभवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत एक॥ लिटि य आदेशादिरिति। न लसन्नयोर्नैमित्तिकत्वात्लिटि एत्वनिमित्तकत्वाभावः। अभ्यासलोपसंनियोगेनेति। अभ्यासलोपश्चेति चशब्दः समुच्चयेन तत्वन्वाचये। दीर्घत्वमत्रेति। अभ्यासविकारेषु बाधका न बाधन्त इत्येतत्तु यत्र सर्वेषां प्रवृत्तिस्तत्राश्रीयते। यद्यपि कृते दीर्घत्वे एत्वाभ्यासलोपप्रसङ्गस्तथाप्येत्वाभ्यासलोपयोः कृतयोर्दीर्घत्वाप्रसङ्ग इति विरुद्धत्वादत्र बाधकत्वाभावः। नाप्रा-

अत एकहल्मध्येऽनादेशादेर्लिटि॥ एकारषकारादेरेत्ववचनं लिटि। एकारषकारादेरेत्वं लिटि वक्तव्यम्। नेमतुः। नेमुः। सेहे। सेहाते। सेहिरे। किं पुनः कारणं न सिध्यति। अनादेशादेरिति प्रतिषेधः प्राप्नोति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। लिटा देशादिं विशेषयिष्यामः। लिटि यः आदेशादिस्तदादेर्नेति। अस्त्यन्यल्लिड्ग्रहणस्य प्रयोजनम्। किम्। इह मा भूत्। पक्ता। पक्तुम्। नैतदस्ति प्रयोजनम्। क्ङिति निवर्तते। पक्वः। पक्ववानित्यत्र प्राप्नोति। अभ्यासलोपसन्नियोगेनैत्वमुच्यते। न चात्राभ्यासलोपं पश्यामः। एवमपि पापच्यते अत्र प्राप्नोति। दीर्घत्वमत्र बाधकं भविष्यति। नाप्राप्तेऽभ्यासविकार एत्वमारभ्यते। तद्यथा। अन्यानभ्यासविकारानसौ बाधते। एवं दीर्घत्वमपि बाधेत। सत्यमेवैतत्। अभ्यासविकारेष्वपि तु ज्येष्ठमध्यमकनीयांसः प्रकारा भवन्ति। तत्र ह्रस्वहलादिःशेषावुत्सर्गौ तयोर्दीर्घत्वमपवादः। एवं च। अपवादविप्रतिषेधाद्दीर्घत्वं भविष्यति। इहापि तर्हि बभणतुः बभणुरित्यभ्यासादेशस्यासिद्धत्वादेत्वं प्राप्नोति। फलिभजिग्रहणं तु ज्ञापकमभ्यासादेशसिद्धत्वस्य। यदयं फलिभज्योर्ग्रहणं करोति तज्ज्ञापयत्याचार्यः अभ्यासादेशः सिद्ध एत्व इति। यद्येवं प्रथमतृतीयादीनामादेशादित्वादेत्वाभावः। प्रथमतृतीयादीनामपि तर्ह्यादेशादित्वादेत्वं न प्राप्नोति।

प्तइति। क्वचित् ह्रस्वः क्वचिद्धलादिःशेषश्च प्राप्नोति। ज्येष्ठमध्यमकनीयांस इति। मध्यमापेक्षयोत्सर्गस्य प्रकर्षसद्भावात् कनीयानुत्सर्गोऽल्पतर इत्यर्थः। मध्यमोऽयः कस्यचिद्बाधकः कस्यचिद्बाध्यः ज्येष्ठो यो बाधकस्यापि बाधकः। असिद्धत्वादिति। पूर्वत्रासिद्धमिति लक्षणेन। चकणतुरित्यादावेव तु प्रतिषेधः स्यात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पेचतुरिति। प्रकृतिचरां प्रकृतिचरः प्रकृतिजशां प्रकृतिजश इत्यादेश्शादित्वम्। वचनं तु रेणतुर्येभतुरित्यादौ चरितार्थम्। अभ्यासे चर्चे
ति जश्चरोः प्राप्तयोः स्थानेऽन्तरतम इति परिभाषाया व्यापारदर्शनमिदं प्रकृतिचरां प्रकृतिचरः प्रकृतिजशां प्रकृतिजश इति। अनेश
मिति। लुङ् मिपोऽम्भावः। पुषादित्वादङादेशः छन्दसीति पूर्वेणापि संबन्धाङ्गाषायामेत्वाभावः। एवं तु मेनकेत्यपि भाषायां न प्राप्नोति। य
दि त्विष्यते एषो ह्यादित्वाद्भविष्यति। मनेराशिषि चेति वुन्प्रत्ययः। नयासयोरित्यत्राशिषि चोपसंख्यानमितीत्वाभावः। येमानमिति।
विपूर्वाद्रमतेस्ताच्छील्यादिषु चानश्छान्दसः शपो लुक्। पचेरन्निति प्राप्ते पचिरन्निति छान्दसे एत्वद्रष्टव्ये क्रियेते। आयेजे इति। ल

पेचतुः पेचुः देभतुः देभुः। न वा शसिदद्योः प्रतिषेधो ज्ञापको रूपाभेदे एत्वविज्ञानस्य॥ न वा एष दोषः। किं कारणम्। श
सिदद्योः प्रतिषेधो ज्ञापको रूपाभेदे एत्वविज्ञानस्य। यदयं शसिदद्योः प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः। रूपाभेदेन
ये आदेशादयो न तेभ्यः प्रतिषेधो भवतीति। दम्भ एत्वम्। दम्भ एत्वं वक्तव्यम्। देभुः। किं पुनः कारणम् न सिध्यति। नलोप-
स्यासिद्धत्वात्। असिद्धो नलोपस्तस्यासिद्धत्वादेत्वं न प्राप्नोति। नशिमन्योरलिट्येत्वम्। नशिमन्योरलिट्येत्वं वक्तव्यम्। छ
न्दस्यमिपचोरपि। छन्दस्यमिपचोरपीति वक्तव्यम्। किं प्रयोजनम्। अनेशं मेनकेत्येतद्व्येमानं लिडि पेचिरन्। य
ता येजे वपा वेपे। यजा आयेजे। वपा आवेपे। दम्भ एत्वमलक्षणम्। असिद्धत्वान्नलोपस्य दम्भ एत्वं न सिध्यति। श्नसोर
ल्लेन कारेण ज्ञायते त्वित्वशासनम्। अनित्योऽयं विधिरिति। थलि च सेटि॥ थल्ग्रहणं किमर्थम्। थल्ग्रहणमकिदर्थम्।
थल्ग्रहणं क्रियतेऽकिदर्थम्। अकित्यप्येत्वं यथा स्यात्। पेचिथ। शेकिथ। ॥

ङ इदूदृशापृच्छन्दस्यपि दृश्यत इति आट्। दम्भ एत्वमलक्षणमिति। लक्षणेन न प्राप्नोतीति नलोपस्यासिद्धत्वादित्यर्थः। श्नसोरल्लेन इ
ति। असिद्धत्वस्यानित्यत्वज्ञापनाय तकारः कृतः। नित्ये त्वसिद्धत्वे आसन्नित्यादावटो सिद्धत्वाल्लोपो न भविष्यतीति किं तन्नि
र्वृत्त्यर्थेन तकारेण। तेनासिद्धत्वाभावाद्दम्भ एत्वं सिध्यतीत्यर्थः। थलि च। थल्ग्रहणमिति। क्नित्सेटि एत्वस्यासिद्धत्वाल्ले
ग्रहणमेवाकिदर्थं भविष्यति थल्येव च सेट् क्नित् इति प्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्लिशः क्त्वानिष्ठयोरिति। यथा पेचिव पेचिमेति इडंवचनं न नियमार्थं सेटयेव क्त्विति। नियमे हि पेचतुरित्यादौ न स्यात्। किंतर्हि। एत्वस्य कालावधारणं क्रियते। यथा निष्ठायां सेटीत्यत्र। तेन पेचिवेत्यादावपि ठिकृते एत्वाभ्यासलोपौ भवतः। अन्यथैकाचइतीट्प्रतिषेधः प्रसज्येत। यदोपदेशग्रहणमनुदात्तविशेषणं नैकाच्विशेषणं तदाश्रयमाणादेकाच इतीट्प्रतिषेधेन भाव्यमिति कृसृभृवृ इति सूत्रं विध्यर्थं भवति न तु नियमार्थम्। तत्र पचेरेत्वाभ्यासलोपयोः कृतयोरेकाचत्वादिट्प्रतिषेधप्रसङ्गे पचादिभ्य इड्वचनमिति वक्ष्यते। क्त्विति च सेटीति तु कालावधारणार्थे सति पूर्वमिट् ततो भ्यासलोपावित्यानुपूर्व्यात्सिद्धं भवतीति नार्थो वचनेन। लुलविधेति। अवादेशे कृते एकहल्मध्यगतो ऽकार इत्येत्वप्रसङ्गः। समुदायग्रहणे लक्षणप्रतिपदोक्तपरिभाषोपतिष्ठते न वर्णमात्रग्रहणे। न चायमकारो गुणशब्दे

नैतदस्ति प्रयोजनम्। सेड्ग्रहणमेवात्रास्तु क्त्विदर्थं भविष्यति। इदं तर्हि प्रयोजनं समुच्चयो यथा स्यात्। थलि च सेटि क्त्विति च सेटीति। किं प्रयोजनम्। पेचिव। पेचिम। तत्र पचादिभ्य इड्वचनमिति वक्ष्यति तन्न वक्तव्यं भवति। इह कस्मान्न भवति लुलविथ। गुणस्य नेति प्रतिषेधात्। इहापि तर्हि न प्राप्नोति नेचिय। शेकिथ। गुणस्य यो ऽकार इत्येवमेतद्विज्ञास्यते। एवमपि शशरिथ अत्र न प्राप्नोति। गुणस्यैवैषो ऽकारः। कथम्। वृद्धिर्भवति गुणो भवतीति रेफशिरा गुणवृद्धिसंज्ञको ऽभिनिर्वर्तते। अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति नैवंजातीयकानामेत्वं भवतीति यदयं तृफलभजत्रपश्चेति तॄग्रहणं करोति॥ राधो हिंसायाम्। राधादिषु स्थानिनिर्देशः। राधादिषु स्थानिनिर्देशः कर्तव्यः।

व्याभिनिर्वृत्त इति न शसदददेति प्रतिषेधो विनास्तीति मत्वा प्रश्नः। गुणस्य यो ऽकार इति। वैयधिकरण्येन संबन्ध आश्रीयते। लुलविथेत्यादावोकारस्यावादेशविधानाद्गुणस्याकार इति प्रतिषेधः प्रवर्तते। पेचिथेत्यादौ तु गुण एवाकारो न तु गुणस्येति ते प्रतिषेधाभावः। एवमपीति। गुण एवात्राकारो न तु गुणस्येति प्रतिषेधा ऽप्रसङ्गः। गुणस्येति। अवयव इत्यर्थः। उः स्थाने एप्रसज्यमान एव रपरो भवति पूर्वभक्तश्च रेफ इत्ययं गुणः। राधादिष्विति। अलोन्त्यस्येति वचनादेत्वमन्त्यस्य प्राप्नोतीत्युपधाया इति वक्तव्यमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथवातद्इति।ततोऽम्मादीनामित्त्वमाकारस्यभवति।अकारेणेति।समुच्चयेऽतद्इत्यनर्थकंस्यादितिविशेषणविशेष्यभावाश्रयः॥
अर्वणः॥छान्दसमिति।छन्दसीवनिपावितिवनिबस्तिमतुश्चेतिप्रत्ययद्वयेनरूपद्वयसिद्धत्वान्नार्थः सूत्रद्वयेन।तत्रैनतस्या-
त्सर्वत्ररूपद्वयप्रसङ्गोऽतआह।दृष्टानुविधिरिति।भाषाशब्दाअपिनियतविषयाः।किंपुनश्छान्दसाः।तत्रऋद्इत्यस्यविचि

नकर्तव्यः।एकहल्मध्यइतिवर्तते।यद्येवंत्रेमतुः त्रेमुः।रशब्दस्येत्त्वंप्राप्नोति।अस्तु।अलोन्त्यस्यविधयोभवन्ती
तिअकारस्यभविष्यति।अनर्थकेलोन्त्यविधिर्नेत्येवंनप्राप्नोति।नैतस्याःसन्तिपरिभाषायाःप्रयोजनानि।अ
थवाऽतद्इतिवर्तते।एवमपिराधेर्नप्राप्नोति।आकारग्रहणमपिप्रकृतमनुवर्तते।क्वप्रकृतम्।श्नाभ्यस्तयोरातइ
ति।अथवाऽम्सोरल्लोपइत्यत्रतपरकरणंप्रत्याख्यायते।तत्प्रकृतमिहानुवर्तिष्यते।यदितदनुवर्तते।अतएक
हल्मध्येनादेशादेर्लिटि।अस्यचेति।अवर्णमात्रस्येत्त्वंप्राप्नोति।बबाधे।अकारेणतपरेणाऽवर्णंविशेषयि
ष्यामः।अस्याऽतद्इति।इहेदानीमस्येत्यनुवर्ततेअतद्इतिनिवृत्तम्।अर्वणस्त्रसावनञः॥मघवाबहुलम्।अर्व
णस्तृमघोनश्चनशिष्यंछान्दसंहितत्।अर्वणस्तृमघोनश्चनशिष्यम्।किंकारणम्।छान्दसंहितत्।दृष्टानुवि
धिश्छन्दसिभवतीति॥मतुब्वन्योर्विधानाच्च॥मतुवनौखल्वपिछन्दसिविधीयेते।छन्दस्युभयदर्शनात्।उभयं
खल्वपिछन्दसिदृश्यते।इमान्यर्वणःपदानिअनर्वाणंवृषभंमन्द्रजिह्वम्॥इतिश्रीमहाभाष्येषष्ठाध्यायस्य
चतुर्थेपादेतृतीयमाह्निकम्॥पादःपत्॥पादउपधाह्रस्वत्वम्।पादउपधायाह्रस्वत्वंवक्तव्यम्।द्विपदःपश्य।

गुणोअरितिरूपंतस्मान्मतुप्यर्वन्वानित्यादिभवति।वनिप्यर्वणइत्यादिभवति।मघशब्दादपिप्रत्ययद्वयेयथाविषयंरूपद्व
यंसिद्धम्।एवंचार्वन्मघवन्शब्दस्यभाषायांनास्तिप्रयोगइत्युक्तंभवति॥इत्युपाध्यायजैयटपुत्रकैयटकृतेभाष्यप्रदीपे
षष्ठाध्यायस्यचतुर्थेपादेतृतीयमाह्निकम्॥पादःपत्॥आदेरोहीति।पादन्तस्याङ्गस्यपदादेशोविधीयमानोऽनेकाल्त्वा
त्सर्वादेशःप्राप्नोति। ॥

CC-0. In Public Domain. Digitization by eGangotri

नवेति। यद्यपि षाच्छब्देन तदन्तः समुदायः प्रत्याय्यते। तथापि यो निर्दिश्यते यतः षष्ठी श्रूयते तस्यैव षष्ठीस्थाने योगे इति वचनात् आदेशो न तु प्रतीयमानस्य। यद्यप्युच्चार्यमाणानुकरणस्यादेशेन संबन्धाभावस्तथाप्यनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वादेवमुक्तम्। तत्र यथा लोन्त्यस्येति वचनाद्दुहः पदस्युक्ते रुहि हकारस्यापकारो भवति। एवं षाच्छब्दप्रत्यायिततदन्तस्य

आदेशे हि सर्वादेशप्रसङ्गः। आदेशे हि सर्वादेशः प्रसज्येत। सर्वस्य हि षाच्छब्दस्य त्रिषाच्छब्दस्य च षच्छब्द आदेशः प्रसज्येत। येन विधिस्तदन्तस्येति। तत्तर्हि वक्तव्यम्। न वा निर्दिश्यमानस्यादेशत्वात्। न वा वक्तव्यम्। किं कारणम्। निर्दिश्यमानस्यादेशा भवन्तीत्येषा परिभाषा कर्तव्या। कः पुनरत्र विशेषः एषा वा परिभाषा क्रियते उपधाह्रस्वत्वं वोच्यते। अवश्यमेषा परिभाषा कर्तव्या बहून्येतस्याः परिभाषायाः प्रयोजनानि। कानि पुनस्तानि प्रयोजनानि। प्रयोजनं सुप्तिङादेशेषु। सुप्। कुमार्याम्। किशोर्याम्। खट्वायाम्। मालायाम्। तस्याम्। यस्याम्। आडुयाट्स्याट्सु कृतेषु आडुयाट्स्याड्ढस्वाम्प्राप्नोति। निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति। इदमिह संप्रधार्यम्। आडुयाट्स्याटः क्रियन्तामामिति। किमत्र कर्तव्यम्। परत्वादाम्। नित्या आड्याट्स्याटः। कृतेप्यामि प्राप्नुवन्त्यकृतेपि। अनित्या आड्याट्स्याटः। कथम्। अन्यस्य कृते आमि प्राप्नुवन्त्यन्यस्याकृते। शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति। उभयोरनित्ययोः परत्वादाम्। इदं तर्हि यस्यै तस्यै स्याट्कृते सस्याद्धस्वस्यैभावः प्राप्नोति। निर्दिश्य मानस्यादेशा भवन्तीति न दोषो भवति। यस्तर्हि निर्दिश्यते न स्यः कस्मान्न भवति। स्याटा व्यवहितत्वात्।

मुदायावयवस्य षाच्छब्दस्य षदादेशः। न दोषो भवतीति। तत्रैवं वक्तव्यम्। यो निर्दिश्यते तस्यागमैर्व्यवधानादाम्न प्राप्नोति। अत एव परत्वाश्रयेण व्यवधानं कर्तुमाह। इदमिहेति। आडादीनामवकाशः। खट्वायाः। कुमार्याः। सर्वेषामित्यामोऽवकाशः। कृते ष्वाडादिषु वचनाद्व्यवधानेपि प्रवर्तनात्। यदि तु नाप्राप्ते ष्वाडादिष्वादेश आरभ्यते इत्युच्यते। ततोऽपवादत्वादामा तेषां बाधः प्राप्नोतीत्यागमानामादेशस्य चात्र समावेश एष्टव्यः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेड्कस्येति। प्राग्लादेशेभ्यो धात्वधिकार इत्यस्मिन्पक्षेऽ वध्यनुपादानाद्व्यवधानात्तामादीनामप्रसङ्ग इति नोच्यते। अन्तरङ्गा इति। प्राग्लादेशेभ्यो धात्वधिकारात्तामादयोन्तरङ्गाः। क्रियास्तामिति। परत्वादन्तरङ्गत्वाद्वा यासुटि कृते तामादयः। क्तान्तस्येति। प्रत्ययग्रहणपरिभाषया धातुप्रत्ययसमुदायस्यल्यपः प्रसङ्गः। कृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणमित्येषा तु परिभाषाऽनञ्पूर्व इति वचनान्नोपतिष्ठते। सामान्यशब्दस्यापिल्यपः प्रकरणाद्यपेक्षस्य विशेषावस्थायहेतुत्वं स्यात्। अतिस्य इति। शोभनः स्य इत्युत्तरपदार्थप्रधानस्तत्पुरुषोद्रष्टव्यः। उपसर्जने तु त्यदाद्यत्वाभावः। अत्र पदाङ्गाधिकार इति वचनात्तदन्त-

सुप्तिङः। अरुदिताम्। अरुदितम्। अरुदितेति इट्टि कृते सेट्कस्य तांतंतामादेशाः प्राप्नुवन्ति। निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति। इदमिह संप्रधार्यताम्। इट् क्रियतां तांतंताम इति। किमत्र कर्तव्यम्। परत्वादिडागमः अन्तरङ्गास्तांतंतामः। इदं तर्हि क्रियास्ताम्। क्रियास्तम्। क्रियास्त। क्रियास्म। यासुटि कृते सयासुट्कस्य तांतंतामः प्राप्नुवन्ति। निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवतीति॥ ल्यब्भावे च॥ ल्यब्भावे च प्रयोजनम्। प्रकृत्य। प्रहृत्य। क्तान्तस्य ल्यप् प्राप्नोति। निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति। त्रिचतुर्युष्मदस्मत्त्यदादिविकारेषु प्रयोजनम्। अतितिस्रः। अतिचस्रः। त्रिचतुरन्तस्य तिसृचतसृभावः प्राप्नोति। निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति। युष्मद् अस्मद् अतियूयम्। अतिवयम्। युष्मदस्मदन्तस्य यूयवयौ प्राप्नुतः। निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति॥ त्यदादिविकारः॥ अतिस्यः। उत्तमस्यः। अतिस्यौ। उत्तमस्यौ। त्यदाद्यन्तस्य त्यदादिविकाराः प्राप्नुवन्ति। किमन्तस्य कादेशः प्राप्नोति। अतिकः। परमकः। निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति। उदस्थास्तम्भोः पूर्वस्य प्रयोजनम्। उदस्थात्।

स्य समुदायस्यातिशब्दतकारस्यापि तदोः सः सावनन्त्ययोरिति सत्वप्रसङ्गः। अत्वं त्वलोन्त्यस्येति वचनादन्त्यस्यैव भवतीति न तत्र विशेषाभावः। परमक इति। अनेकाल्त्वात्सर्वादेशः कः प्राप्नोति। ननु सत्वविधौ त्यदादीनामिति न स्थानषष्ठी। का तर्हि। तदोरित्येषेति। कथं सत्वमतिशब्दतकारस्य परिह्रियते। एवं तर्हि त्यदादीनां गणसन्निविष्टानां यौ निर्दिश्येते तकारदकारौ तयोः सत्वविधानादतिप्रसङ्गाभावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा॰ वाह ऊठ्। ऊडादेरिति। यद्यपि च्छ्वोः शूडित्यत्रास्योठत्वं प्रतिपादितं तथापि यथाश्रुतं गृहीत्वा प्रश्नः। संप्रसारणमित्यनेनेति। वाक्य ६४४
३९ स्य भाविवर्णस्य वा संप्रसारणसंज्ञायां विज्ञायमानायां यणः स्थाने ऊड् भवति। अथ यण आदिरूठ् कस्मान्न भवति। संप्रसार
णप्रदेशेषु यण इति स्थानषष्ठ्या अयणादिष्टापि स्थानषष्ठ्येव युक्ता। यथोक्तं सप्तदशादेशाः स्थाने योगत्वं प्रयोजयन्तीति।
ठिङ्ग्रहणं तु वृद्ध्यर्थम्। यद्येवमिति। प्रष्ठवाह् अस् इति स्थिते वकारस्य संप्रसारणे पूर्वैकादेशे च कृते गुणे ओकारे णिव प्रत्यय
श्रयः। तथा वृद्धिरेचीति वृद्धौ कृतायां प्रष्ठौहः इत्यादि सिध्यति। अनकारान्ते चोपपदे छन्दसि ण्विर्न दृश्यत इति शाल्यूहः इत्या
दिसिध्यर्थमप्यूठ् विधानं नोपपद्यते। सत्यपि वा प्रयोगे वहत्यर्थे प्रवर्त्तमानस्योहतेः क्विपि शाल्यूह इत्यादि भविष्यति। उपसर्गे

उदः स्थास्तम्भोः। अटि कृते सा टकस्य पूर्वसवर्णः प्राप्नोति। उदः स्थास्तम्भोरिति। निर्दिश्यमानस्यादेशा भवन्तीति न दो
षो भवति। यस्तर्हि निर्दिश्यते न तस्य कस्मान्न भवति। अटा व्यवहितत्वात्। सा तर्ह्येषा परिभाषा कर्त्तव्या। न कर्त्तव्या
। उक्तं षष्ठी स्थानेयोगेत्यस्य योगस्य वचने प्रयोजनम्। षष्ठ्यन्तं स्थानेन युज्यते। यतः षष्ठी उच्चारितेति॥ वाह ऊ
ठ्॥ ऊडादिः कस्मान्न भवति। आदिष्टिद्भवतीत्यादिः प्राप्नोति। संप्रसारणमित्यनेन यणः स्थाने क्रियते। यद्येवं वा
ह ऊड्वचनानर्थक्यं संप्रसारणेन कृतत्वात्। वाह ऊड्वचनमनर्थकम्। किं कारणम्। संप्रसारणेन कृतत्वात्। संप्रसा
रणेनैव सिद्धम्। का रूपसिद्धिः। प्रष्ठौहः पश्य। गुणः प्रत्ययलक्षणत्वात्। प्रत्ययलक्षणत्वाद्गुणो भविष्यति॥ एज्ग्र
हणाद्वृद्धिः॥ एज्ग्रहणाद्वृद्धिर्भविष्यति। एवं तर्हि सिद्धे सति यद्वाह ऊठं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परि
भाषा असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षण इति। किमेतस्य ज्ञापने प्रयोजनम्। पचावेदम्। पचामेदम्।
असिद्धत्वाद्बहिरङ्गलक्षणस्याद्गुणस्यान्तरङ्गलक्षण ऐत्वं न भवति॥

प्युपपदे वहेर्ण्विः छन्दसि नास्ति। यतो वृद्धिबाधकं पररूपं प्रसज्येतेत्यूठ् विधानं सार्थकं स्यात्। एवं तर्हीति। संप्रसारणं यजा
दिप्रत्ययनिमित्तं भसंज्ञाश्रयत्वाद्बहिरङ्गमन्तरङ्गे व्याश्रये गुणे कर्त्तव्येऽसिद्धमिति गुणो न स्यात्तदभावे रूपं न सिध्येदित्यू राम॰
ठ्विधानमसिद्धपरिभाषां ज्ञापयति। ननु नैतज्ज्ञापकसाध्यं लोकतः सिद्धत्वात्। प्रत्यङ्गवर्ती हि लोकः। नैतदस्ति। यत्र युगप ३९
दन्तरङ्गबहिरङ्गयोः प्राप्तिस्तत्र लौकिकन्यायाश्रयणाद्भवत्वन्तरङ्गम्। इह तु बहिरङ्गनिमित्तमन्तरङ्गमिति लौकिकन्या
यानवतारः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वयुव॰ ॥ श्वादीनामिति। मघवा बहुलमिति त्रादेशे कृते एकदेशविकृतस्यानन्यत्वान्मघवतेत्यादौ संप्रसारणप्रसङ्गः। अर्वणस्त्रिति मघवच्छब्दो मतुबन्त इत्यर्थः। न वा विभक्ताविति। यद्यपि विभक्तिमाश्रित्य संप्रसारणं विधीयते तथापि विभक्तौ विधीयत इति लिङ्गविशिष्टपरिभाषानुपस्थानम्। अन इत्युभयोः शेष इति। समुदायापेक्षणात्। न च त्रादेशे कृते अनन्तत्वमस्ति। एकदेशविकृतस्यानन्यत्वेनाप्यनन्तत्वं नास्ति। सामान्यातिदेशे विशेषानतिदेशात्। युवतिशब्दोऽप्यनन्तो न भवतीति तस्यापि संप्रसारणाभावः

श्वयुवमघोनामतद्धिते॥ श्वादीनां संप्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम्। श्वादीनां संप्रसारणे नकारान्तग्रहणं कर्तव्यम्। किं प्रयोजनम्। अनकारान्तस्य मा भूत्। मघवता। मघवते। तथा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति यूनः पश्येति। एवं युवतीः पश्येत्यत्रापि स्यादिति। यत्तावदुच्यते नकारान्तग्रहणं कर्तव्यमिति। न कर्तव्यम्। उक्तं वा। किमुक्तम्। उक्तमेतत्। अर्वणस्त्र मघोनश्च न शिष्यं छान्दसं हि तदिति। यदप्युच्यते तथा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति यूनः पश्येति एवं युवतीः पश्येत्यत्रापि स्यादिति। लिङ्गविशिष्टग्रहणे चोक्तम्। न वा विभक्तौ लिङ्गविशिष्टाग्रहणादिति। अथवोपरिष्टाद्योगविभागः करिष्यते। श्वयुवमघोनामतद्धिते। अल्लोपः। अकारस्य च लोपो भवति। ततोऽन इत्युभयोः शेषः॥ श्वयुव॰ ॥ षपूर्वहन्धृतराज्ञामणि॥ अथ किमिदं षपूर्वादीनां पुनर्वचनमल्लोपार्थमाहोस्विन्नियमार्थम्। कथं वाल्लोपार्थं कथं वा नियमार्थम्। यद्यविशेषेणाल्लोप टिलोपयोः प्रकृतिभावस्ततो विध्यर्थम्। अथ हि अणि टिलोपस्यैव प्रकृतिभावस्ततो नियमार्थम्। अत उत्तरं पठति। षपूर्वादीनां पुनर्वचनमल्लोपार्थम्।

॥ षपूर्व॰ ॥ अथेति। किमिदं विध्यर्थमथ नियमार्थमिति प्रश्नः। यद्यविशेषेणेति। प्रकृत्यैकाजित्यादिः प्रकृतिभावः प्राकरणिकविध्यपेक्षो न तु वृद्धिगुणापेक्षः। नत्वाकरणिकानि कार्याणि भेदेनापेक्षेरन्। अभेदेन वेति पक्षद्वयोपपत्तिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविशेषेणेति। अल्लोपटिलोपसमुदायमपेक्ष्य प्रकृतिभावो विधीयते। ताक्ष्ण्यइति। तक्ष्णोपत्यमिति सेनान्तलक्षणेति ण्यः।
येचाभावकर्मणोरिति प्रकृतिभावाट्टिलोपाभावः। अस्मान्नियमादल्लोपाभावः। सामनइति। साम्यदेवतेत्यण्। अत्रान्नितिप्रकृतिभावाट्टिलोपाभावेऽल्लोपप्रसङ्गः। अथापीति। तन्त्रस्यावृत्तेर्वाश्रयणात्। सामन्यइति। तत्रसाधुरिति यत्॥ आतो॥ समासइति। ननु सौत्रोऽयं निर्देश इति किं तदर्थेन योगविभागेन। एवं तर्हि यदा वैयाकरणाः अनुकरणशब्दैर्व्यवहारमिच्छ-

षपूर्वादीनां पुनर्वचनं क्रियते अल्लोपार्थम्। अविशेषेणाल्लोपटिलोपयोः सप्रकृतिभावः। अवधारणे ह्यन्यत्र प्रकृतिभावे उपधालोपप्रसङ्गः। अवधारणे हि सति अन्यत्र प्रकृतिभावे उपधालोपः प्रसज्येत। कथम्। यदि तावदेवं नियमः स्यात् षपूर्वादीनामेवाणीति। एवमपि भवेदिह नियमान्न स्यात् सामनो वैमनइति। ताक्ष्ण्यइति च प्राप्नोति। अथाप्येवं नियमः स्यात् षपूर्वादीनामण्येवेति। एवमपि भवेदिह नियमान्न स्यात्। ताक्ष्ण्यइति। सामनो वैमनइत्यत्र तु प्राप्नोति। अथाप्युभयतो नियमः स्यात् षपूर्वादीनामेवाणि अण्येव षपूर्वादीनामिति। एवमपि सामन्यो वैमन्यइति प्राप्नोति। तस्मात्सुष्ठूच्यते षपूर्वादीनां पुनर्वचनमल्लोपार्थमवधारणे ह्यन्यत्र प्रकृतिभावे उपधालोपप्रसङ्ग इति॥ आतो धातोः॥ आतो नापः॥ आतोऽनापइति वक्तव्यम्। इहापि यथा स्यात्। समासेनञ्पूर्वेक्त्वो ल्यबिति। अथ नापइति किम्। खट्वायाम्। मालायाम्। यद्यनापइत्युच्यते कथं क्त्वायामिति। निपातनात्सिद्धम्। किं निपातनम्। क्त्वायां च प्रतिषेधइति। यद्येवं नार्थोऽनापइत्यनेन। कथम्। समासेनञ्पूर्वेक्त्वो ल्यबिति। निपातनादेतत्सिद्धम्। कथम्। हलः श्नः शानज्झाविति। एतदपि निपातनात्सिद्धम्। अथवा योगविभागः करिष्यते। आतः। आकारलोपो भवति। ततो धातोः। धातोश्चाकारस्य लोपो भवतीति॥

न्तितदर्थो योगविभागः। नेहि साधुभिर्व्यवहरमाणा अभ्युदयभाजो भवन्ति। क्त्वायामिति। निपातनादाल्लोपाभावो याडागमश्च। सामान्यापेक्षं च निपातनं सप्तम्यपेक्षम्। क्त्वायाइत्यपि भवति। ततो धातोरिति। इदं नित्यार्थं सत्पूर्वेण विकल्पं ज्ञापयति। सा च व्यवस्थितविभाषेत्यावन्तस्याल्लोपाभावोऽन्यस्य यथाप्रयोगं विकल्पः। कचित् स्त्रीलिङ्गं पुल्लिङ्गाश्रयं क्त्वायाइत्यादिरूपद्वयं व्याचक्षते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्त्रे॥ आङि·ति पूर्वाचार्यप्रक्रिययैकवचनग्रहणाद्व्याप्तिं मत्वाह। मन्त्रेष्विति। त्मन्येति। सप्तम्येकवचनस्य स्थाने याशब्द आदेशः। छान्दसत्वादिति। यथा शिवा रुद्रस्येति प्राप्ते शिवा उद्रस्येति रेफलोपः। एवमिहाकारलोपः। एवं च भुवतासूत्रमेव प्रत्याख्यातम्। सति त्वारम्भे नार्थ आदिग्रहणेन। आतो धातोरित्यत आत इत्यनुवर्तनात्। तिविं॥ कुतो नु खल्विति वचनसामर्थ्यादलोन्त्यपरिभाषाया अनुपस्थानात् समुदायस्यैव षष्ठीनिर्देशात् लोपः प्रसज्येत। न त्वसंशब्दितस्य तिशब्दस्य। तिग्रहणे तु सति तेर्लो

मन्त्रेष्वाङ्यादेरात्मनः॥ मन्त्रेष्वात्मनः प्रत्ययमात्रे। मन्त्रेष्वात्मनः प्रत्ययमात्रे लोपः प्रसङ्क्तव्यः। इहापि यथा स्यात्। त्मन्या समञ्जन्। त्मनोरन्तरस्य इति। यदि प्रत्ययमात्रे लोप उच्यते। कथमात्मन एव निर्मिमीष्वेति। तस्मान्नार्थः प्रत्ययमात्रे लोपेन। कथं त्मन्या समञ्जन्। त्मनोरन्तरस्य इति। छान्दसत्वात् सिद्धम्। दृष्टानुविधिश्छन्दसि भवति। आदिग्रहणानर्थक्यमाकारप्रकरणात्॥ आदिग्रहणं चानर्थकम्। किं कारणम्। आकारप्रकरणात्। आत इति वर्तते। मन्त्रेष्वाङ्यादेरात्मनः॥ तिविंशतेर्डिति॥ तिग्रहणं किमर्थम्। न विंशतेर्डिति लोप इत्येवोच्येत। नैवं शक्यम्। विंशतेर्डिति लोप इतीयत्युच्यमानेऽन्त्यस्य प्रसज्येत। सिद्धोऽन्त्यस्य यस्येति लोपेनैव। तत्रारम्भसामर्थ्यात्तिशब्दस्य भविष्यति। कुतो नु खल्वेतत्। अनन्त्यार्थ आरम्भे तिशब्दस्य भविष्यति न पुनरङ्गस्येति। तस्मात्तिग्रहणं कर्तव्यम्। अथ क्रियमाणेऽपि तिग्रहणेऽन्त्यस्य कस्मान्न भवति। निर्दिश्यमानस्यादेशा भवन्तीति न भविष्यति॥ टेः॥ अभस्योपसंख्यानम्॥ अभस्योपसंख्यानं कर्तव्यम्। इहापि यथा स्यात्। उपसरजो मन्दुरज इति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। कथमुपसरजो मन्दुरज इति। डित्यभस्याप्यनुबन्धकरणसामर्थ्यात्। अभस्याप्यनुबन्धकरणसामर्थ्याद्भविष्यति॥

पो भवति। निर्दिश्यमानस्यादेशा भवन्तीति। नानेन परिभाषाया व्यापारः कथ्यते। नहि निर्दिश्यमानपरिभाषा अलोन्त्यस्यादेः परस्येत्येतयोर्बाधिका। एतयोर्निर्विषयत्वप्रसङ्गात्। तस्मात्तिग्रहणसामर्थ्यादलोन्त्यस्यानुपस्थाने सर्वस्य लोपो भवतीत्ययमस्य भाष्यस्यार्थः॥ टेः॥ डित्यभस्यापीति। चुटू इति वचनादित्संज्ञा नावड्कारस्य प्रवर्तते। दीर्घकाशतुषभ्राष्ट्रवटं जे इति निर्देशात्। तत श्चानुबन्धकरणसामर्थ्याद् भस्येति प्रकरणमिह बाध्यते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नस्तद्धिते॥नकारान्तस्येति।इनण्यनपत्ये अन्निति च प्रकृतिभावे प्राप्ते वचनम्।सब्रह्मचारिण इति।तस्येदमित्यण्।पीठेन सर्पती
ति पीठसर्पी पूर्ववदण्।कलापिना प्रोक्तमधीयते कालापाः कलापिनोऽणित्यण्।ततो ध्येतृवेदितृणोः प्रोक्ताल्लुगिति लुक्।कौथु
मिना प्रोक्तमधीयते कौथुमाः।तेन प्रोक्तमित्यण्पूर्ववत्।द्वितीयस्याल्लुक्।तैतिलिजाजलिलाङ्गलिप्रोक्तमध्ययनं साह
चर्यात्तैतिल्यादिशब्देरुच्यते तेभ्यस्तदधीते तद्वेदेत्यण्प्रत्ययः।तेन प्रोक्तमित्यत्र तु शैषिके र्थे वृद्धाच्छ इति छः प्रसज्येत।के
चित्तु तितिलशब्दमत्राधीयते।चार्म इति।तस्य विकार इत्यण्।शौव इति।तस्येदमित्यण्।स्वेग्रामजनपदमनुष्येभ्य इत्य

नस्तद्धिते॥नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डि
सूकरसद्मसुपर्वणामुपसंख्यानम्॥नकारान्तस्य टिलोपे सब्रह्मचारिन्पीठसर्पिन्कलापिन्कौथुमिन्तैतिलि
न्जाजलिन्लाङ्गलिन्शिलालिन्शिखण्डिन्सूकरसद्मन्सुपर्वन् इत्येतेषामुपसंख्यानं कर्तव्यम्।सब्र
ह्मचारिन्।सब्रह्मचारिण इमे साब्रह्मचाराः सब्रह्मचारिन्।पीठसर्पिन्।पैठसर्पाः पीठसर्पिन्।कलापिन्।का
लापाः कलापिन्।कौथुमिन्।कौथुमाः कौथुमिन्।तैतिलिन्।तैतिलाः तैतिलिन्।जाजलिन्।जाजलाः जाजलि
न्।लाङ्गलिन्।लाङ्गलाः लाङ्गलिन्।शिलालिन्।शैलालाः शिलालिन्।शिखण्डिन्।शैखण्डाः शिखण्डिन्।
सूकरसद्मन्।सौकरसद्माः सूकरसद्मन्।सुपर्वन्।सौपर्वाः सुपर्वन्॥चर्मणः कोशे॥चर्मणः कोश उपसंख्यानम्।
चार्मः कोशः।अश्मनो विकार उपसंख्यानम्॥अश्मनो विकार उपसंख्यानं कर्तव्यम्।अश्मनो विकार आश्मः॥शुनः
संकोचे॥शौवः संकोचः।अव्ययानां च सायंप्रातिकाद्यर्थम्॥अव्ययानां च सायंप्रातिकाद्यर्थमुपसंख्यानं कर्त
व्यम्।किंप्रयोजनम्।सायंप्रातिकाद्यर्थम्।सायंप्रातिकः।पौनःपुनिकः।शाश्वतिके प्रतिषेधो वक्तव्यः।

ततु प्रत्याख्यातम्।अत्र परत्वाद्वृद्धौ प्राप्तायां द्वारादीनामेव तत्प्रतिषेधे ऐजागमे च कृते टिलोपः क्रियते।संकोचादन्यत्र शौव
न इति।विकारावयवोः प्राण्यणि प्रकृतिभावाच्छौव इत्येव भवति।सायंप्रातिक इति।सायंप्रातः शब्दाद्द्वन्द्वाट्ठञ्।प्रत्ययः।य
या कथंचित्कालशब्दादपि ठञ्भवतीति कालसमुदायवाचिनोऽपि ठञ्भवति।पौनःपुनिक इति।पूर्ववट्ठञ्।आदिशब्दः प्रकारे
टिलोपदर्शनेन च सादृश्यमाश्रीयत इति आरातीयः शाश्वतिक इत्यत्र टिलोपाभावः।॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निपातनादिति। अतएवनिपातनात्तान्तादितिकादेशाभावः। शाम्यतमिति। भाष्यकारवचनप्रामाण्यादण् प्रत्ययः॥ यस्येतिच॥ सवर्णदीर्घत्वेलोपेवानास्तिविशेषइतिमत्वापृच्छति। इवर्णस्येति। हेदाक्षीति। दाक्षिशब्दादितोमनुष्यजातेरितिङीषिकृतेतन्स्यसंबुद्धौह्रस्वेकृतेसवर्णदीर्घत्वेसतिसवर्णदीर्घस्यश्रवणप्रसङ्गः। ननुचान्तरङ्गत्वात्सवर्णदीर्घत्वेकृतेह्रस्वोभविष्यति। एवंतर्हिवार्णादाङ्गंबलीयइतिह्रस्वत्वंमन्यते। दाक्षिईआइतिस्थितेशब्दविप्रतिषेधात्परस्ययणादेशेकृतेपूर्वस्ययणादेशप्रसङ्गः। सवर्णदीर्घस्यापूर्वविधित्वात्तत्रकर्तव्येयणादेशस्यनास्तिस्थानिवत्वम्। यणादेशेपिकर्तव्येवरईइतिइकारप्रश्लेषाद्दीर्घविधिंप्रतिस्थानिवत्वनिषेधः दाक्षीईइतिस्थितेस्त्रीभ्योढगितिढकिकृतेपरस्यलोपेकृतेपूर्वस्यश्रवणप्रसङ्गः। परलोपस्यस्या-

नवक्तव्यः। निपातनादेतत्सिद्धम्। किंनिपातनम्। येषांचविरोधःशाश्वतिकइति। एवंतर्हिशाश्वतेप्रतिषेधोवक्तव्यः। शाश्वतम्॥ नस्तद्धिते॥ यस्येतिच। इवर्णस्येतिकिमुदाहरणम्। हेदाक्षि। दाक्ष्या। दाक्षेयः। हेदाक्षिइति। यदिलोपोनस्यात्परस्यह्रस्वत्वेकृतेसवर्णदीर्घत्वंप्रसज्येत। दाक्ष्याइति। यदिलोपोनस्यात्परस्ययणादेशेकृतेपूर्वस्यश्रवणंप्रसज्येत। दाक्षेयइति। यदिलोपोनस्यात्परस्यलोपेकृतेपूर्वस्यश्रवणंप्रसज्येत। नैतानिसन्तिप्रयोजनानि। सवर्णदीर्घत्वेनाप्येतानिसिद्धानि। इदंतर्हिअतिसखेरागच्छति। अतिसखेःस्वम्। यदिलोपोनस्यादुपसर्जनह्रस्वत्वेकृतेअसखीतिप्रतिषेधःप्रसज्येत।

निवङ्गावान्तद्धितनिमित्तस्यलोपस्याप्रसङ्गात्। नैतानीति। यत्राङ्गवार्णयोर्युगपत्प्रसङ्गस्तत्रवार्णादाङ्गंबलीयोभवतीतिभावः। यणढकौत्वाङ्गेनभवतः। इदंतर्हीति। सखिशब्दात्सख्यशिश्वीतिभाषायामितिङीषिकृतेसखीमतिक्रान्तइतिप्रादिसमासेकृतेलिङ्गविशिष्टपरिभाषायाअनित्यत्वादसनिटचिगोस्त्रियोरितिह्रस्वः। तत्रासतीकारलोपेएकादेशस्यपूर्वान्तवद्भावाद्घिसंज्ञाप्रतिषेधःस्यात्। प्रसज्यप्रतिषेधेचायंदोषोनतुपर्युदासेनरन्तस्यसखिशब्दादन्यत्वाद्घिसंज्ञायाःसिद्धत्वात्। ङीषितुलोपेकृतेह्रस्वत्वेचकृतेलाक्षणिकत्वात्सखिरूपस्यघिसंज्ञायाःप्रतिषेधाभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काण्डे इति। यचि भमिति मत्वा लोपः प्राप्नोति। सौर्ये इति। सूर्येणैकदिगिति तेनैकदिगित्यण्। तत्र यस्येति चेत्यकारलोपः प्राप्नोति सूर्यतिष्येति यलोपश्च। यथा तु वक्ष्यते सूर्यमत्स्ययोर्ङ्यामिति तथात्र यलोपस्याप्रसङ्गः। इह स्यामिति। विभाषा ङिश्योरित्यतः श्यग्रहणं न संयोगाद्वमन्तादित्यतो नेति चानुवर्तते। तेन वाक्यभेदेन श्यां कार्यं प्रतिषिध्यते। कामण्डलेय इति। चतुष्पाद्भ्यो ढञिति ढञ्। एवं वात्सप्रेय इति लैखाभ्रेय इति। शुभ्रादिभ्यश्चेति ढक्। इयङुवङादेशादिति। आदेशनमादेशो विधानम्। इयङुवङो।

यस्येत्यादेश्श्यां प्रतिषेधः॥ यस्येत्यादेश्श्यां प्रतिषेधो वक्तव्यः। काण्डे सौर्ये नाम हिमवतः शृङ्गे। स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। इह स्यामित्यपि प्रकृतं नेत्यपि। तत्राभिसंबन्धमात्रं कर्तव्यम्। यस्येत्यादेर्लोपो भवति श्यां न। इयङुवङ्भ्यां लोपो विप्रतिषेधेन॥ इयङुवङ्भ्यां लोपो भवति विप्रतिषेधेन। इयङुवङोरवकाशः। श्रियौ। श्रियः। भ्रुवौ। भ्रुवः। लोपस्यावकाशः। कामण्डलेयः। माद्रवाहेयः। इहोभयं प्राप्नोति। वात्सप्रेयो लैखाभ्रेयः। लोपो भवति विप्रतिषेधेन। गुणवृद्धी च॥ गुणवृद्धी चेयङुवङ्भ्यां भवतो विप्रतिषेधेन। गुणवृद्ध्योरवकाशः। चेता। गौः। इयङुवङोः स एव। इहोभयं प्राप्नोति। चयनम्। चायकः। गुणवृद्धी भवतो विप्रतिषेधेन। नवेयङुवङादेशस्यान्यविषयवाचनात्॥ नवार्थो विप्रतिषेधेन। किं कारणम्। इयङुवङादेशस्यान्यविषयवचनात्। इयङुवङादेशः अन्यविषये आरभ्यते। किंविषये। यणादेशविषये। यथैव यणादेशं बाधते एवं गुणवृद्धी अपि बाधेत। तस्मात्तत्र गुणवृद्धिविषये प्रतिषेधः। तस्मात्तत्र गुणवृद्धिविषये प्रतिषेधो वक्तव्यः। न वक्तव्यः। मध्येऽपवादाः पूर्वान्विधीन्बाधन्त इत्येवमियङुवङादेशो यणादेशं बाधिष्यते। गुणवृद्धी न बाधिष्यते॥ यस्येति च॥ सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः॥ सूर्यादीनामणन्तेऽप्रसिद्धिरङ्गान्यत्वात्॥ सूर्यादीनामणन्तेऽप्रसिद्धिः। सौरी बलाका।

ण्देश इति षष्ठीसमासः। यथेह इयङुवङौ सर्वत्रान्यपूर्वकौ। नैवं गुणवृद्धी इति विप्रतिषेधानुपपत्तिरित्यर्थः। सूर्य॥ सौरीति। तेनैकदिगित्यण्। तदन्तान्ङीप्। इकारे परतोऽत्र सूर्यशब्दोऽङ्गं न भवति। किं तर्हि। अणन्तमिति यकारलोपाप्रसङ्गः। पुंयोगविवक्षायां तु देवतायां चाभिधानादन्यत्र ङीषि कृते सूर्यशब्दोऽङ्गमीकारे भवतीति तत्रैव लोपः स्यात् सूरीति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अङ्गान्यत्वादिति। राजदन्तादित्वात्परनिपातः। यलोपविधिमिति। उपधाविधिंप्रतिनेतितु प्रतिषेधः प्रत्ययविधावेव। स्थानिव
त्वनिषेधेचावशिष्टस्याङ्गसंज्ञायामेकदेशविकृतस्यानन्यत्वाद्‌ यलोपः सिध्यति। अन्त्यएवेति। अकारद्य यलोपेसति यका
रस्यान्त्यत्वात्‌। तत्र यान्तानां सूर्यादीनां लोपोभवतीत्युच्यमाने अलोन्त्यस्येति यकारस्यैव भविष्यति। यग्रहणं तु नप्र-
त्याख्यायते। तदन्तरेणायान्तत्वाभावादुत्तरार्थत्वाच्च यग्रहणस्य। यातमिति। गतं ज्ञातं सिद्धमित्यर्थः। साधुच यातमि-
ति। अनेनसि द्धेर्दार्ढ्यं प्रतिपाद्यते। यदिप्रागिति। अकारद्य यलोपस्यासिद्धत्वादन्त्योयकारो भवति। अथेति। इति-

किंकारणम्‌। अङ्गान्यत्वात्‌। अणन्तमेतदङ्गमन्यद्भवति। लोपेकृते नाङ्गान्यत्वम्‌। स्थानिवद्भावादङ्गान्यत्वं भवति।
सिद्धंतु स्थानिवद्भावप्रतिषेधात्‌। सिद्धमेतत्‌। कथम्‌। स्थानिवत्प्रतिषेधात्‌। प्रतिषिध्यतेऽत्र स्थानिवद्भावः। यलोप
विधिंप्रति नस्थानिवद्भवतीति। एवमपि नसिध्यति। किंकारणम्‌। अङ्गान्यत्वात्‌। अन्योहि सूर्यशब्दः। अन्यः सौर्यश
ब्दः। नैषदोषः। एकदेशविकृतमनन्यवद्भवतीत्येवं भविष्यति। उपधाग्रहणानर्थक्यंच। स्थानिवद्भावे चेदानीं प्रतिषि
द्धे उपधाग्रहणमनर्थकम्‌। किंकारणम्‌। अन्त्यएवहि सूर्यादीनां यकारः। किंयातमेतद्भवति। सुष्ठुयातम्‌। साधुच
यातम्‌। यदिप्रागभादसिद्धत्वम्‌। अथसहतेनासिद्धत्वम्‌। असिद्धत्वाल्लोपस्यानन्त्योयकारो भवति। यद्यपि सहतेनासि
द्धत्वम्‌। एवमपि नदोषः। नैवं विज्ञायते सूर्यादीनामङ्गानां यकारलोपइति। कथंतर्हि। अङ्गस्ययलोपोभवति सचेत्सू
र्यादीनां यकारइति। एवमपि सूर्यचरी। अत्र प्राप्नोति। तस्मादुपधाग्रहणं कर्तव्यम्‌। विषयपरिगणनं च। विषयपरि
गणनंच कर्तव्यम्‌।

अकारलोपस्य समानाश्रयस्यासिद्धत्वाद्यान्तत्वाभावः। ततश्चोपधाग्रहणं कर्तव्यम्‌। यद्यपीति। नचोपधाग्रहणं क्रियतेना
पि सूर्यादीन्यङ्गत्वेन विशेष्यन्त इत्यर्थः। इतितद्धिते चयदङ्गमनाश्रित रूपविशेषं तस्य यकारस्य लोपः सचेद्यकारः सूर्याद्य
वयवो भवतीति सूत्रार्थः। सूर्यचरीति। सूर्यस्यस्त्री सूरी साभूतपूर्वेति चरट्‌प्रत्ययः। तसिलादिष्विति पुंवद्भावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सूर्यमत्स्ययोरिति। मत्स्यस्य ङ्याम्। सूर्यागस्त्ययोश्छे चेत्येवं सिद्धे र्थदर्शनपरत्वात्तु यत्नेनादरः कृतः। सौरी य इति। सौर्यस्याय मिति वृद्धाच्छः। अगस्त्यस्यापत्यमिति ऋष्यण्। तदन्तान्ङी वृद्धश्चा नक्षत्राणीति। नक्षत्रसंबन्धिन्यणीत्यर्थः। तिष्यपुष्ययोरित्युभयोपादानात्तिष्यशब्दस्य यलोपाभावः। अन्तित इति। अपादाने चाहीयरुहोरिति तसिः। तादेश्चेति। चकारात्कादेश्च। यदा तादेस्तदान्तमः कादिलोपे त्वन्तितमः। तसीत्येष इति। कादिलोपश्च बहुलमित्येवविषयमनुपादाय पठितव्यमित्यर्थः। दाशतय इति। दशावयवा अस्य दशतयस्तत्र भवो दाशतयः। चतुःषष्ट्याख्यो ग्रन्थः। यौ लोप इति। युशब्देनोत्तरपदं पूर्वाचार्यप्रसिद्ध्योच्यते। अन्तिके सीदतीति सत्सूद्विषेति क्विप्। पूर्वपदादिति षत्वम्। अयाविति। अनुत्तरपद इत्यर्थः। यो यत्प्रत्यये परतोन्तीति कृतकादिलोपे

सूर्यमत्स्ययोर्ङ्याम्। सूर्यमत्स्ययोर्ङ्यामिति वक्तव्यम्। सौरी। मत्सी। सूर्यागस्त्ययोश्छे च ङ्यां चेति वक्तव्यम्। सौरी। सौरीयः। आगस्ती। आगस्तीयः। तिष्यपुष्ययोर्नक्षत्राणि॥ तिष्यपुष्ययोर्नक्षत्राणि यलोपो वक्तव्यः। तैषम्। पौषम्। अन्तिकस्य तसि कादिलोपश्चाद्युदात्तत्वं च। अन्तिकस्य तसि कादिलोपो वक्तव्यः आद्युदात्तत्वं च वक्तव्यम्। अन्तितो न दूरात्॥ तमे तादेश्च॥ तमे तादेश्च लोपो वक्तव्यः। अग्ने त्वं नो अन्तमः अन्तितमे अवरोहति। तसीत्येष न वक्तव्यो दृष्टो दाशतये पि हि॥ यौ लोपोन्तिषदित्यत्र। अन्तिषत्। तथाऽयो येन्त्य एव सु॥ अन्तिये च दूरके। सूर्य॥ बिल्वकादिभ्यश्छस्य लुक्॥ छग्रहणं शक्यमकर्तुम्। इह कस्मान्न भवति। बिल्वकेभ्यः। भस्येति वर्तते। एवमपि बिल्वकायेत्यत्र प्राप्नोति। तद्धितस्येति वर्तते। एवमपि बिल्वकस्य विकारः अवयवो वा बैल्वकः। अत्र प्राप्नोति।

न्तिकशब्दो गृह्यते अथर्ववेदे। अन्तिके भव इति भवे छन्दसीति यति कृते अन्तिय इति भवति। कादिलोपस्यासिद्धत्वदन्नामादित्यसिद्धत्वाद्यस्येति लोपो न भवति॥ बिल्व॥ छग्रहणमिति। कृतकुगागमस्य निर्देशाच्छ एव ग्रहीष्यत इति भावः। बिल्वकेभ्य इति। बिल्वशब्दादल्पाद्यर्थे कप्रत्यये सति छग्रहणे कुगागमनिर्देश एव न निश्चीयते इति कप्रत्ययान्तादपि परस्य भ्यसो लुक्प्रसङ्गः। भस्येति वर्तत इति। तन्त्रार्थाद्धि भक्तिविपरिणामे सति भसंज्ञकेभ्यः परस्य लुग्भवति। बैल्वक इति। अनुदात्तादेश्चेत्यञ्।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्धितइति।नस्तद्धितइत्यनस्तद्धितइतिनिवर्तते।तेनविल्वकादिभ्योभसंज्ञकेभ्यःपरस्यतद्धितस्यतद्धितेपरेलुग्भवतीतिसूत्रार्थःसंपद्यते।एवमपीति।विल्वाविद्यन्तेस्यामितिउत्करादिभ्यश्छः।नडादीनांकुक्चेतिछः कुगागमश्च।ततस्तत्रभवइत्यण्।तस्मिन्परतश्छस्यलुक्।ततोवृद्धाच्छः।असतिछग्रहणेछेपरतोणोलुक्प्रसङ्गः।ततश्चनलुमताङ्गस्येतिप्रत्ययलक्षणप्रतिषेधाद्वृद्ध्यभावेरूपंनसिध्येत्।नसविल्वकादिति।विहितइतिशेषः।विल्वकादिभ्योयोविहितइति।विल्वकादिभ्यइत्यागन्तुनाकारेणकृतकुगागमनिर्देशः।तेनायमर्थः।भाविकुगागमेभ्योविल्वकादिभ्योयोविहितःप्रत्ययस्तस्यतद्धितेलुग्भवति।नचछादन्योभाविकुगागमेभ्योविल्वकादिभ्यःप्रत्ययोविधीयतेइतिनार्थश्छग्रहणेन।एवंतर्हीति।छग्रहणंछमात्रस्यलुग्यथास्यात्कुगागमोमाभूदनिष्ट-

तद्धितेतद्धितस्येतिनिवर्तते।एवमपिविल्वकीयायांभवोबैल्वकः।बैल्वकस्यकिंचित्‌बैल्वकीयम्।अत्रप्राप्नोति।नसविल्वकात्।विल्वकादिभ्योयोविहितइत्युच्यते।नचासौविल्वकशब्दाद्विहितः।किंतर्हि।विल्वकीयशब्दात्।एवंतर्हिसिद्धेसतियच्छग्रहणंकरोतितज्ज्ञापयत्याचार्योभवत्येषापरिभाषा।सन्नियोगशिष्टानामन्यतराभावेउभयोरप्यभावइति।तस्माच्छग्रहणंकर्तव्यम्।छस्यैवलुग्यथास्यात्कुकोमाभूदिति॥तुरिष्ठेमेयःसु॥तुःसदेशस्यलोपोवक्तव्यः।अन्त्यस्यमाभूदिति।सतर्हिवक्तव्यः।सर्वलोपस्यविज्ञानमन्त्यस्यवचनानर्थक्यात्।तुःसर्वलोपोविज्ञायते।कुतः।अन्त्यस्यवचनानर्थक्यात्।अन्त्यस्यलोपवचनेप्रयोजनंनास्तीतिकृत्वासर्वस्यभविष्यति।अथवालुक्प्रकृतःसोनुवर्तिष्यते।अशक्योलुगनुवर्तयितुम्।किंकारणम्।

तदित्येवमर्थंक्रियते।यदिचैषापरिभाषानस्यात्तदाकुकोनैवनिवृत्तिःप्राप्नोतीतिकिंतदभावार्थेनछग्रहणेन।क्वचित्त्वेषापरिभाषानाश्रीयते।यथाश्यैनेयइत्यादौयस्येतिलोपेननिवृत्तेपीकारेतत्संनियुक्तोनकारोननिवर्तते।तथाचस्त्रियाःपुंवदित्यत्रोक्तम्।एतमायेइत्यत्रपुंवद्भावेनस्त्रीप्रत्ययमात्रस्यनिवृत्तिःक्रियते।अर्थस्यत्वनिवृत्तत्वान्नकारस्यश्रवणंप्रसज्येतेति।तथाचश्रोत्रियस्ययल्लोपश्चेतिघेविनिवृत्तेपिश्रोत्रभावोननिवर्ततइति।तत्रानित्यापरिभाषेतिप्रतिविधेयम्॥तुरि॥तुःसर्वस्येति।सर्वस्यतृशब्दस्यलोपोनत्वन्त्यस्येत्यर्थः।अन्त्यस्यलोपइति।टेरित्येवान्त्यलोपस्यसिद्धत्वात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ विजयिष्ठेति। विजेतृशब्दात्तुश्छन्दसीति तृन्प्रत्ययः। तस्य तु किं सति न तुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद्गुणो न स्यात् पूर्वं तु- ६५५
५५ गुणो न प्रवर्तते। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति वचनात्। करिष्ठ इति। तृन्नन्तादिष्ठन्प्रत्ययः॥ टेः॥ णाविति। प्रातिप-
दिकग्रहणं प्रत्ययकार्यार्णमतिदेशो मा भूदित्येवमर्थम्। तेन बहून्याचष्टे भावयतीति णिचो पि यिण्न भवति। तदभावे भूभावेनापि
न भवितव्यं सन्नियोगशिष्टत्वादिति वहयतीति भवितव्यमिति केचित्। एनयतीति। न सिलादित्वादिष्ठे पुंवद्भावो विहित इति णा
वपि भवति। टिलोपेनैव संनियोगशिष्टत्वान्नकारनिवृत्तौ सिद्धायां पुंवद्वचनं सन्नियोगशिष्टपरिभाषाया अनित्यत्वज्ञापना-

विजयिष्ठकरिष्ठयोर्गुणदर्शनात्॥ विजयिष्ठकरिष्ठयोर्गुणो दृश्यते। विजयिष्ठः आसुनिं करिष्ठः॥ टेः॥ णाविष्ठवत्प्रा
तिपदिकस्य॥ णौ प्रातिपदिकस्येष्ठवद्भावो वक्तव्यः। किं प्रयोजनम्। पुंवद्भावरभावटिलोपयणादिपरार्थम्। पुंवद्भा
वार्थम्। एनीमाचष्टे एतयति। श्येतयति। रभावार्थम्। पृथुमाचष्टे प्रथयति म्रदयति। टिलोपः। पटुमाचष्टे पटयति।
यणादिपरार्थम्। दूरमाचष्टे दवयति। किं पुनरिदं परिगणनमाहोस्विदुदाहरणमात्रम्। उदाहरणमात्रमित्याह। प्रा
दयोपि ह्रीष्यन्ते। प्रियमाचष्टे प्रापयतीति। भारद्वाजीयाः पठन्ति। णाविष्ठवत् प्रातिपदिकस्य पुंवद्भावरभावटिलोप
यणादिपरप्रादिविन्मतोर्लुक्कन्विध्यर्थमिति॥ इष्ठस्य यिट् च॥ किमयमिट् शब्दः आहोस्विद्यकारः। किं चातः। यदि
लोपोप्यनुवर्तते ततो यि शब्दः। अथ निवृत्तं ततो यकारः॥ ज्यादादीयसः॥ किमर्थं ज्यात्परस्येयसः आत्वमुच्यते। न॥
लोपः प्रकृतः सोनुवर्तते। का रूपसिद्धिः। ज्यायान्। अकृत्यकार इति दीर्घत्वं भविष्यति। एवं तर्हि सिद्धे सति यत् ज्या
त्परस्येयस आत्वं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा।

र्थं तेन श्येतेनेयद्भ्यादि सिद्धं भवति। विन्मतोरिति। स्रग्विणमाचष्टे स्रजयति। अङ्गवृत्त इति वृद्धिरत्र न भवति। यत्राङ्गनिष्ठितमङ्गं
तत्र वृद्धिर्भवत्येव प्रापयति स्थापयतीति। युवानमाचष्टे ऽल्पमाचष्टे कनयति॥ इष्ठस्य॥ किमयमिति। किमिकारान्तः समुदाय आ रामः
गमो ऽथ यकारमात्रमिकारस्तूच्चारणार्थ इति प्रश्नः। किं चात इति। उभयथा दोषाभाव इत्यर्थः। तत्प्रतिपादयति। यदीति॥ ज्या ५५
दादीयसः॥ ज्यात्परस्येयस आदेः परस्येत्याकारः क्रियते तत्रोच्यते। किमर्थमिति। अकृद्यकार इति। क्ङितीति तत्र नानुवर्तत इति
भावः। उरुयेत्यादौ छान्दसत्वाद्दीर्घत्वाभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अङ्गवृत्त इति। अङ्गे वृत्तं निष्पन्नं यत्कार्यं तस्मिन्सति पुनरन्यस्याङ्गकार्यस्य प्रवृत्तावविधानं भवति। ज्ञाजनोर्जा इत्यत्रापीयं परिभाषा-
ज्ञापिता। तत्रास्मिन्स्थिते ज्ञापके जाइत्यादेशविधानं दीर्घश्रवणार्थम्। तस्मिंश्च ज्ञापके सति ज्यायानिति सिद्ध्यर्थमाद्वचनम्। अ
न्यथा हि लोपे कृते परिभाषावशाद्दीर्घो न स्यात्। पिबेरिति। पाघ्रादिसूत्रेण यदा पिबादेशो हलन्तः क्रियते तदा गुणप्रसङ्गः। यदा
त्वदन्तस्तदा गुणप्राप्त्यभावः॥ ऋतः॥ कथमिदमिति। इहाङ्गस्येति प्रकृतम्। ऋत इति च श्रुतम्। तत्र विशेषणविशेष्यभावे कामचा
रात्प्रश्नः। युक्तं पुनरिति। धात्वादेरित्यादाववयववाचिन आदिशब्दस्य दर्शनादवयव्यपेक्षत्वाच्चावयवस्यावयवा तदेरेण संबन्धाभावा

अङ्गवृत्ते पुनर्वृत्तावविधिरिति। किमेतस्य ज्ञापने प्रयोजनम्। पिबेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति। अथ
किमर्थं ज्यात्परस्येयसो दीर्घ उच्यते। न अकार एवोच्येत। का रूपसिद्धिः। ज्यायान्। आन्तर्यतो दीर्घस्य दीर्घो भवि
ष्यति। एवं तर्हि सिद्धे सति यद्दीर्घग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा भाव्यमानेन सवर्णानां ग्र
हणं नेति॥ ऋतो हलादेर्लघोः॥ कथमिदं विज्ञायते हलादेरङ्गस्येति आहोस्विद्धलादेर्ऋकारस्येति। युक्तं पुनरिदं
विचारयितुम्। नन्वनेनासंदिग्धेनाङ्गविशेषणेन भवितव्यम्। कथम्। ऋकारस्य नाम हलादिः स्यात्। अन्यस्यान्यः
। अयमादिशब्दोऽस्त्येवावयववाची। तद्यथा। ऋगादिः अर्धर्चादिः श्लोकादिरिति। अस्ति सामीप्ये वर्तते। तद्यथा। द
धिभोजनमर्थसिद्धेरादिः। दधिभोजनसमीपे। घृतभोजनमारोग्यस्यादिः। घृतभोजनसमीपे। यावता सामीप्येऽपि
वर्तते। जायते विचारणा। हल्समीपस्य ऋकारस्येति। अथवा हलादेरङ्गस्येति। किं चातः। यदि विज्ञायते हलादेर
ङ्गस्येति। अप्रथीयान्। अम्रदीयान्। अत्र न प्राप्नोति। अथ विज्ञायते हलादेर्ऋकारस्येति। अनृचीयान्। अत्रा
पि प्राप्नोति।

दिति भावः। अन्यस्यान्य इति। अत्यन्तभेदादसंबन्धं परस्परस्यावयवयोर्दर्शयति। यत्र भेदाभेदविवक्षा वृक्षाणां वनं वृक्षा वनमिति
तत्रावयवावयविभावो नान्यत्रेत्यर्थः। दधिभोजनमिति। यदृच्छोपनतं दधिभोजनं कार्यसिद्धेः सूचकत्वात्समीपमित्यर्थः। अपृ
थुशब्दात्पृथुसदृशगुणवचनादीयसुन्प्रत्ययः। अनृचीयानिति। न सन्त्यृचो येषां तेनृचा माणवकाः सन्ति यस्मिन्देशे सोनृचवान्।
ततईयसुन्। विन्मतोरिति मतुब्लुक्। तत्राङ्गं हलादि न भवति। ऋकारस्तु हलादिरिति रादेशप्रसङ्गः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दै स्रुचीयानिति। स्रुग्वच्छब्दादीयसुन् विन्मतोरिति मतुब्लुक्। यथेच्छसीति। यस्य माणपरिगणनादतिप्रसङ्ग इत्यसादिति भावः। ६४७
४५ न वै समासादिति। प्रकृताभिप्रायमेतदुच्यते। ईदृशात्समासादीदृशस्तद्धितो नोत्पद्यते। तथा हि। अपृथुशब्दस्तत्पुरुषो बहुव्रीहि-र्वा गुणवचनो न भवतीति तत ईयसुन्न भवत्येव। अथ मत्वन्तादीयसुन उत्पत्तिस्तत्र बहुव्रीहिणोक्तत्वान्मतुपोऽभावात्। नापि तत्पुरुषान्मतुबुत्पत्तिर्लाघवाद्बहुव्रीहेर्न्याय्यत्वात्। भवेद्यदीति। स ह्यन्यपदार्थप्रधानत्वाद्गुणवचनो न भवति। यदा त्विति। यथा अब्राह्मण इति ब्राह्मणसदृशः क्षत्रियादिरुच्यते। तथा अपृथुरिति पृथुसदृशगुणान्तरयुक्तोऽभिधीयते। न च समास इति। गुणयुक्तवान् गुणवचनः यः शब्दो गुणमभिधाय गुणोपसर्जने द्रव्ये वर्तते तस्मादिष्ठादिभिर्भाव्यम्। न च समासः केवले गुणे कदाचित्प्रयुज्यते नित्यं द्रव्यवाचित्वात्। अथवाऽपृथुशब्दः पृथुसदृशगुणवाचित्वेऽपि विशिष्टगुणवचनो न भवति पृथुशब्दवत्। अपृथ-

उभयथा स्रुचीयानित्यत्र प्राप्नोति। यथेच्छसि तथास्तु। अस्तु नाम बहुलादेरङ्गस्येति। कथमपृथीयानिति। तद्धितान्तेन समासो भविष्यति। न पृथीयान् अपृथीयानिति। भवेत्सिद्धं यदि तद्धितान्तेन समासः। यदा खलु समासात्तद्धितोत्पत्तिस्तदा न सिध्यति। न वै समासात्तद्धितोत्पत्त्या भवितव्यम्। किं कारणम्। बहुव्रीहिणोक्तार्थत्वान्मत्वर्थस्याभवेद्यदि बहुव्रीहिस्तदा न स्यात्। यदा तु तत्पुरुषस्तदा प्राप्नोति न पृथुः अपृथुः अयमपृथुः अयमप्यपृथुरयमनयोरतिशयेनापृथुरपृथीयानिति। न समासादिष्ठादिभिर्भवितव्यम्। किं कारणम्। गुणवचनादित्युच्यते। न च समासो गुणवचन इति। यदा तर्हि समासाद्विन्मतुपो विन्मतुबन्तादिष्ठादी तदा प्राप्नुतः। अविद्यमानाः पृथवोऽपृथवः अपृथवोऽस्य सन्त्यपृथुमान्। अयमपृथुमान्। अयमप्यपृथुमान्। अयमनयोरतिशयेनापृथुमान् अपृथीयानिति। नैष दोषः। अपृथव एव न सन्ति कुतो यस्यापृथवः इति।

व एव न सन्तीति। मतुपः प्रकृतय इति शेषः। समानेऽर्थे बहुव्रीहिणा भाव्यं न तु मत्वर्थीयार्थेन तत्पुरुषेण। भिन्नार्थत्वे तु भाव्यमेव। गोखरवदरण्यं कृष्णसर्पवान्वल्मीक इति। अत्र हि जातिविशेषेण नद्वृत्त्या प्रतिपिपादयिषिता नान्तरेण तत्पुरुषं मत्वर्थीयार्थं बहुव्रीहिमात्रेण प्रतिपादयितुं शक्यते। अन्ये त्वाहुः। अविद्यमाना ये पृथवस्ते सन्तीति विरोधादस्त्युपाधिकत्वाभावान्मतुन्न भवतीति। एतदपरे न क्षमन्ते। पृथुत्वगुणरहिताः स्वरूपेण विद्यमानाः पृथव एवापृथव उच्यन्त इति कथं सत्त्वोपाधिकत्वं न स्यात्। ननु च यथा स्रुची- रामः
यानित्यत्र बहुव्रीह्यर्थेन तद्वृत्ताविवक्षायां मत्वन्तादीयसुन्भवति तथापृथुशब्दादपि मतुपा तदन्ताच्चेयसुना भाव्यम्। एवं तर्ह्यभि- ४५
धानाद्बहुव्रीहेः कुतश्चिन्मतुपा न भवितव्यमिति मन्यते तदेवमपृथीयानिति तद्धितान्तेन समास इति स्थितम्। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वचीयानित्येतस्यापिपरिहाराय चोद्यमुपन्यस्यति। इह कस्मादिति। मातयतीति। उणादयोऽव्युत्पन्नानिप्रातिपदिकानीति प
क्षाश्रयणात्तुरिष्ठेमेयस्सु इति इष्ठवद्भावात्तृशब्दस्य तलोपः। यदिपुनरिति। टिलोपोप्यनुवर्तते ततश्चान्त्यस्य ऋशब्दस्य
टिलोपोऽनन्त्यस्य तु रभाव इति मातयतीत्यादौ रादेशाभावः। कृतयतीति। अत्रानन्त्य ऋकारोस्तीति रभावप्रसङ्गः। एवं स्वचीया
नित्यत्रापि। एवं तर्हीति। परिगणने च सति हलादेर्लघोरिति न कर्तव्यम्॥ प्रकृत्यैकाच्॥ किमिष्ठेमेयःस्विति। किं प्रत्यासत्त्याश्रये-
णेष्ठेमेयस्सेपेक्ष्यन्ते। अथवा व्याप्त्याश्रयेण तद्धित इति प्रश्नः। स्वीति। स्वशब्दादिनि कृते प्रकृतिभावाद्यस्येति लोपो न प्राप्नोति।

इह कस्मान्न भवति। मातयति। लोपोत्र बाधको भविष्यति। इदमिह संप्रधार्यम्। लोपः क्रियतां रभाव इति। कि
मत्र कर्तव्यम्। परत्वाद्रभावः। यदि पुनरवशिष्टस्य रभाव उच्यते। नैवं शक्यम्। इहापि प्रसज्येत। कृतमाचष्टे
कृतयति। एवं तर्हि परिगणनं क्रियते। पृथुमृदुभृशकृशदृढपरिवृढानामिति वक्तव्यम्॥ प्रकृत्यैकाच्॥
प्रकृत्यैकाजिति किमिष्ठेमेयस्सु आहोस्विदविशेषेण। किं चातः। यद्यविशेषेण स्वी। स्वी। श्रौवम्। अधु
ना॥ अत्रापि प्राप्नोति। स्विविनावेदनस्तः। कथमुक्तमेतदेकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ। स्ववा
न्। स्ववानित्येव भवितव्यम्। श्रौवमिति। परत्वादैजागमे कृते टिलोपेन भवितव्यम्। अधुनाद इति सप्रकृ
तिकस्य प्रत्ययस्य स्थाने निपातनं क्रियते। इह तर्हि प्राप्नोति द्रव्यम्। यस्येत्यादौ प्रकृतिभावः। यस्येति य
स्य लोपप्राप्तिस्तस्य प्रकृतिभावः। न चैतानि यस्येत्यादौ।

श्रौवमिति। स्रुनो विकारो वयवयोः प्राण्यञि कृते न स्तद्धित इति टिलोपो न प्राप्नोति। अधुनेति। इदमो धुना प्रत्यये परत इद
शादेशस्तस्य यस्येति लोपो न प्राप्नोति। श्रौवमिति। टिलोपं बाधित्वा परत्वाद्वृद्धिः प्राप्ता द्वारादीनां चेति प्रतिषिध्यते। ऐजा
गमश्च क्रियते। तत्रानेकाच्त्वाट्टिलोपाभावः। अधुनेति। इदम इश्भावो धुना प्रत्ययश्च निपात्यते। द्रव्यमिति। द्रोर्वि
कारो द्रोश्चेति यत्प्रत्ययः। ओर्गुण इति गुणोत्र न प्राप्नोति। यस्येत्यादाविति। यस्येत्यादीनि कार्याणि अपेक्ष्य प्रकृतिभावो-
विधीयते। ओर्गुणस्तु तेभ्यः पूर्व इति प्रकृतिभावाभावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रियेहितइति। प्राक्रीताच्छइतिछः। तत्र यस्येतिलोपेन प्राप्नोतीतीयङः प्रसङ्गः। प्रादीनामिति। असिद्धत्वादेवैकाच्त्वाभावात् प्र- ६ ५५
कृतिभावोप्यत्र नास्ति नापिटिलोपः। स्थान्याश्रयष्टिलोपः प्राप्नोतीति चेत्। विप्रतिषिद्धे तावदसिद्धत्वाभावस्य ज्ञापितत्वात्पर-
त्वात्प्रादिषु तेषामसिद्धत्वेनाविद्यमानत्वान्न स्थान्याश्रयो नापि पराश्रयष्टिलोपः प्राप्नोति। असिद्धाधिकाराद्बहिः प्रादिविधा-
नादसिद्धत्वाभावः। एकाचउच्चारणसामर्थ्यादिति। अकारउच्चारणार्थो न प्रतिज्ञातोऽपितु श्रवणार्थः। विन्मतोस्तु लुगर्थमि-

एवमपि प्रियेहितः प्रीयः। ह्रादेवतास्य स्थालीपाकस्य ह्रः स्थालीपाक इत्यत्र प्राप्नोति। तस्मादिष्ठेमेयस्सु प्रकृ-
तिभावः। अथेष्ठेमेयस्सु प्रकृतिभावे किमुदाहरणम्। प्रेयान्। प्रेष्ठः। नैतदस्ति। प्रादीनामसिद्धत्वान्न भविष्यति
। इदं तर्हि श्रेयान्। श्रेष्ठः। प्रकृत्यैकाजिष्ठेमेयस्सु चेदेकाचउच्चारणसामर्थ्यादवचनात्प्रकृतिभावः॥ प्रकृत्यै-
काजिष्ठेमेयःसु चेत्तन्न। किं कारणम्। एकाचउच्चारणसामर्थ्यात्। अन्तरेणापि वचनं प्रकृतिभावो भविष्यति। वि-
न्मतोर्लुगर्थं प्रकृतिभावो वक्तव्यः। स्रग्वितरः। स्रजीयान्। स्रग्वितमः। स्रजिष्ठः। स्रुग्वत्तरः। स्रुग्वत्तमः। स्रुचीयान्। स्रुचिष्ठः। ननु विन्मतोर्लुक् टिलो-
पं बाधिष्यते। कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात्। असति खल्वपि संभवे बाधनं भवति। अस्ति च संभवो यदु-
भयं स्यात्। यथैव खल्वपि विन्मतोर्लुक् टिलोपं बाधते। एवं नस्तद्धित इत्येतमपि बाधेत। यतरो नौ ब्रह्मीयान्
ब्रह्मवत्तर इति। यत्तावदुच्यते कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादिति। इदं तावदयं प्रष्टव्यः। यदि त-
र्हि विन्मतोर्लुङ्नोच्येत किमिह स्यादिति। टिलोप इत्याह। टिलोपश्चेन्नाप्राप्ते टिलोपे विन्मतोर्लुगारभ्यते स
बाधको भविष्यति। यदप्युच्यतेऽसति खल्वपि संभवे बाधनं भवति। अस्ति च संभवो यदुभयं स्यादिति। सत्यपि संभ-
वे बाधनं भवति। तद्यथा। ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति। सत्यपि संभवे दधिदानं तक्रदानस्य नि-
वर्तकं भवति। एवमिहापि सत्यपि संभवे विन्मतोर्लुक् टिलोपं बाधिष्यते। यदप्युच्यते।

ति। लुक्यर्थो यस्य तल्लुगर्थम्। लुकि कृते टिलोपाभावार्थमित्यर्थः। कथमन्यस्येति। विन्मतुबन्तस्य यष्टिलोपस्तं लु- राम:
ग्बाधते। तस्मिन्कृते यष्टिलोपः प्राप्नोति तं कथं बाधते न हि तस्मिन्प्राप्ते लुगारभ्यत इत्यर्थः। ॥ ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऐतेः यथैवेति। लुकोबाधकत्वाभ्युपगमेऽति प्रसङ्ग इत्यर्थः। ब्रह्मीयानिति। अति। एयेन ब्रह्मवानिति ई यसुनि मतुब्लुकि च नस्तद्धि
तइति टिलोपः। नाप्राप्त इति। यद्यपि विषयभेदेन टिलोपोभिन्नस्तथाप्यनपेक्षितविषयभेदं टिलोपशास्त्रं येन नाप्राप्तिन्या
येन लुका बाध्यते। तेन स्रजीयानित्येतस्मिन्नङ्गे संप्रति की भाविनी च टिलोपप्राप्तिः। परिशिष्टो सावकाशा लुका बाध्यते। न
त्र विन्नन्तस्य नान्तत्वान्नस्तद्धित इत्ययमपि टिलोपो लुका बाध्यते। मतो स्रुलुका नस्तद्धित इति टिलोपो न बाध्यते। ननु कि
मुच्यते नस्तद्धित इत्यस्मिन्पुनः प्राप्ते चाप्राप्ते चेति। यावता मतोनीन्तत्वाभावादप्राप्त एव नस्तद्धित इति टिलोपः। नैष दोषः। म
तुप्प्रत्ययो नकारान्तादनकारान्ताच्च विधीयते। तत्र यद्यप्यकृते मतुब्लुकि नस्तद्धित इति टिलोपो न प्राप्नोति तथापि कृते म
तुब्लुकि प्राप्नोति। एकदेशविकृतं चानन्यवदिति यदे वाङ्ग्ब्रह्मत्वहितिन देवब्रह्मवानिति। तदेवमभेदाश्रयेणोदमुक्तं प्राप्ते चाप्राप्ते चेति। अ

यथैव स्वल्वपि विन्मतोर्लुकू टिलोपं बाधते। एवं नस्तद्धित इत्येतमपि बाधेताँ न बाधेत। किं कारणम्। येन नाप्राप्ते तस्य
बाधनम्। नाप्राप्ते टिलोपे विन्मतोर्लुगारभ्यते। नस्तद्धित इत्येतस्मिन्पुनः प्राप्ते चाप्राप्ते च। अथवा पुरस्तादपवादा अनन्तरान्विधी-
न्बाधन्ते नोत्तरानित्येवं विन्मतोर्लुकू टिलोपं बाधिष्यते। नस्तद्धित इत्येतन्न बाधिष्यते। यदि तर्हि विन्मतोर्लुकू टिलोप
बाधते पयिष्ठ इति न सिध्यति। पयसिष्ठ इति प्राप्नोति। यथालक्षणमप्रयुक्त इति॥ प्रकृत्याके राजन्यमनुष्ययुवानः।

यथेति। ननु विन्मतोर्लुगित्येतस्य नस्तद्धित इत्ययमेव योगो नन्तरः। टेरित्ययं तु व्यवहितः। तत्र केचिदाहुः। पाठक्रमादर्थक्रमो बली
यानिति टेरित्येष योगः सर्वविषयस्य व्यापनादनन्तरो भवति। यद्येवं पूर्वमेवायमर्थ उक्तो येन नाप्राप्त इति किमर्थं पुनरुच्यते। पूर्वं
मुत्सर्गापवादन्यायउक्त इदानीं त्वर्थक्रमप्रतिपत्त्याश्रयणो नोच्यते। येन हि सर्वो॥ विषयो व्याप्तः स एव बाधितुं युक्तः। यस्तु विष
यविशेषे प्रवर्तते न तस्य बाधा युक्ता। सामान्ये हि पूर्वं प्रतिपत्ति रुदेति पश्चाद्विशेषेषु। अन्ये तु न्यासभेदाश्रयेण व्याचक्षते। टेरित्य-
स्य पश्चान्नस्तद्धित इति पठितव्यम्। पयिष्ठ इति। पयस्विन् इष्ठ इति स्थिते विनो लुकि कृते असो लोपो न प्राप्नोति। यथालक्षणमिति
। न भवति टिलोप इत्यर्थः। ततश्च रजस्विन् मात्र इष्ठे रजसयति। आयुष्मन्तमाचष्ट आयुषयति नि भवितव्यम्।

यन्तरे नो ब्रह्मीयान् ब्रह्मवत्तर इति यत्तावदुच्यते कथमन्यस्योच्यमानमन्यस्य
बाधकं स्यादिति इदं तावदयं प्रष्टव्यः यदि तर्हि विन्मतोर्लुकू नोच्येत किमिह-
स्यादिति टिलोप इत्याह टिलोपश्चेन्नाप्राप्ते टिलोपे विन्मतोर्लुगारभ्यते स बाध
को भविष्यति यदप्युच्यते ऽसति खल्वपि संभवे बाधनं भवति अस्ति च संभवो-

यदुभयं स्यादिति सत्यपि संभवे बाधनं भवति तद्यथा दधि ब्राह्मणेभ्यो दीयतां त
क्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति एवमिहा
पि सत्यपि संभवे विन्मतोर्लुकू टिलोपं बाधिष्यते यदप्युच्यते यथैव खल्वपि
विन्मतोर्लुकू टिलोपं बाधते एवं नस्तद्धित इत्येतमपि बाधेत

CC-0. In Public Domain. Digitization by eGangotri

राजन्यकमिति। समूहेऽर्थे गोत्रोक्षोष्ट्रेति वुञ्। आपत्यस्य च तद्धितेनातीति यलोपाभावार्थं प्रकृतिभावविधानम्। यस्येति लोपे सत्यस्य
निवाविशेषाभावान्न तदर्थं प्रकृतिभावः। यौवनिकेति। यूनां भावः इति मनोज्ञादित्वाद्वुञ्। न त्वनस्तद्धित इति टिलोपः प्राप्तः प्रकृ
तिभावान्न भवति॥ नमपूर्वो॥ हैतनाम नद्द इति। हितनाम्नोऽपत्यमित्यण्। अन्निति प्रकृतिभावात्पक्षे टिलोपाभावः॥ ब्राह्मो॥ ब्राह्मशब्दोऽपत्येऽन
पत्ये चेष्यते। ब्राह्मो मुहूर्तो ब्राह्मो नारदः ब्राह्मः स्थालीपाक इति। जातौ त्वपत्ये ब्राह्मण इतीष्यते। अनपत्ये तु जातौ ब्राह्मी ओषधिरि
ति टिलोप इष्यते। एतत्त्रयं यथाभिधानं न सिध्यतीति मत्वा पृच्छति। अथ किमिदमिति। यदित्ताव दिति। ब्रह्मणोऽपत्यमित्यण्। अह्नोपो
नद्वृत्यकारलोपः प्राप्तो नस्संयोगाद्वमन्तादिति निषिद्धः। नस्तद्धित इति टिलोपे प्राप्ते अन्निति प्रकृति प्रकृतिभावः प्राप्तो नमपूर्वोपत्ये वर्म

राजन्यमनुष्ययुवानः। अके प्रकृत्या भवन्तीति वक्तव्यम्। राजन्यकम्। मानुष्यकम्। यौवनिका॥ नमपूर्वोपत्ये वर्मणः॥ मपू
र्वात्प्रतिषेधे वा हितनाम्नः॥ मपूर्वात्प्रतिषेधे वा हितनाम्न इति वक्तव्यम्। हैतनामः। हैतनामनः। आरोहितो हैतनामः।
समानो हैतनाम इति॥ ब्राह्मो जातौ॥ अथ किमिदं ब्राह्मस्याजातौ अनोलोपार्थं वचनमाहोस्विन्नियमार्थम्। कथं चा
नोलोपार्थं स्यात्कथं च नियमार्थम्। यदित्तावदपत्य इति वर्ततेऽततो नियमार्थमथ निवृत्तं ततो लोपार्थम्। अत उत्तरं प
ठति। ब्राह्मस्याजातौ लोपार्थं वचनं क्रियते। अपत्य इति निवृत्तम्। तत्राप्राप्तविधाने प्राप्तप्रतिषेधः। तत्राप्राप्तस्य टिलो
पस्य विधाने प्राप्तस्य प्रतिषेधो वक्तव्यः। ब्राह्मणः। न वा पर्युदाससामर्थ्यात्। न वा वक्तव्यः। किं कारणम्। पर्युदाससाम-
र्थ्यात्। पर्युदासोऽत्र भविष्यति।

ण इति प्रतिषिद्धः। ततष्टिलोपे प्राप्ते नियमार्थमिदम्। अजातावेवापत्ये टिलोपो भवति ब्राह्मो नारद इति। जातौ त्वपत्ये न भवति ब्राह्म
ण इति। एवमपत्ये सिध्यति व्यवस्था। अनपत्ये त्वन्निति प्रकृतिभावाद् ब्राह्मशब्दो न भवति। अथ निवृत्तमिति। अपत्यग्रहणे नि
वृत्ते विधिनियमसंभवे विधिरेव ज्यायानिति अनपत्ये अन्निति प्रकृतिभावे प्राप्ते जातौ टिलोपार्थं निपातनं भवति। तत्र ब्राह्मो मु राम:
हूर्तो ब्राह्मः स्थालीपाक इति सिध्यति। ब्राह्मी ओषधिरिति न सिध्यति अजाताविति प्रतिषेधात्। ब्राह्मणी ओषधिरिति तु प्राप्नो ५७
ति। अपत्ये जातौ ब्राह्मण इति न सिध्यति। नमपूर्वोपत्ये वर्मण इति प्रकृतिभावप्रतिषेधाट्टिलोपप्रसङ्गात्। नवेति। वक्ष्यमा-
णोऽभिप्रायः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्त्वेतमभिप्रायमबुध्वाह। अस्त्यन्यदिति। ब्राह्मी ओषधिरित्यत्र कृतार्थः पर्युदासो ब्राह्मणादित्यत्र पूर्वसूत्रविहितप्रकृतिभावप्रतिषेधप्रासंगटिलोपं न निवर्तयेत्। नवै अत्रेष्यत इति। अजातावितिपर्युदासः न चानिष्टार्थशास्त्रप्रवृत्तिरिति पर्युदाससामर्थ्यादत्र ब्राह्मणइत्यत्र टिलोपो न भविष्यतीत्यर्थः। इतरस्तु लक्षणमुपालब्धुमाह। अनिष्टं च प्राप्नोतीति। ब्राह्मणी ओषधिरिति प्राप्नोत्यजातावितिपर्युदासात्। इष्टं च न सिध्यति ब्राह्मण इति। एवं तर्हीति। योगविभागः क्रियत इति भावः। तत्र ब्राह्म इत्यत्र सामर्थ्यादपत्य इति न संबध्यते अपत्ये टिलोपस्य सिद्धत्वात्। तेनानपत्ये सर्वत्र जातावजातौ च ब्राह्म इति निपात्यते। अपत्येपि ब्राह्मो नारद इत्यत्र प

अस्त्यन्यत्पर्युदासे प्रयोजनम्। किम्। या जातिश्चानापत्यं ब्राह्मी ओषधिरिति न वै अत्रेष्यते। अनिष्टं च प्राप्नोति इष्टं च न सिध्यति। एवं तर्ह्यनुवर्ततेऽपत्य इति। नात्रापत्य इत्यनेन निपातनमभिसंबध्यते। ब्राह्म इति निपात्यते अपत्येऽजाताविति। किं तर्हि। प्रतिषेधोऽभिसंबध्यते। ब्राह्म इति निपात्यते अपत्ये जातौ नेति॥ कार्मस्ताच्छील्ये॥ किमर्थमिदमुच्यते। नस्तद्धित इत्येव सिद्धम्। न सिध्यति। अन्नणीति प्रकृतिभावः प्रसज्येत। अणीत्युच्यते। णश्चायम्। एवं तर्हि सिद्धे सति यन्निपातनं करोति तज्ज्ञापयत्याचार्यः। ताच्छीलिकेऽणि कृतानि भवन्तीति। किमेतस्य ज्ञापने प्रयोजनम्। चौरी। तापसी। अणन्तादितीकारः सिद्धो भवति॥ दाण्डिनायन॥ अत्र भ्रौणहत्येति किं निपात्यते। यकारादौ तद्धिते तत्वं निपात्यते। भ्रौणहत्ये तत्वनिपातनानर्थक्यं सामान्येन कृतत्वात्। भ्रौणहत्ये तत्वनिपातनमनर्थकम्। किं कारणम्। सामान्येन कृतत्वात्। सामान्येनैवात्र तत्वं भविष्यति हनस्तोऽचिण्णलोरिति। ज्ञापकं तु तद्धिते तत्वप्रतिषेधस्य। एवं तर्हि ज्ञापयत्याचार्यस्तद्धिते तत्वं न भवतीति।

त्वाद्ब्राह्म इत्यनेनैव टिलोपो भवति। ततः अजाताविति। तत्रापत्य इत्यनुवर्तते तेनायमर्थो भवति अपत्य आजातौ ब्राह्मणशब्दे टिलोपो न भवति। अजाताविति प्रसज्यप्रतिषेधो भवति नानञः संबन्धादिति सर्वं सुस्थम्॥ कार्मः॥ किमर्थमिति। कर्मशीलमस्य छत्रादिभ्यो ण इति णे कृते सिद्धः टिलोप इति भावः। ताच्छीलिक इति। एवं च छत्रादिभ्यो णेति लाघवाय कर्तव्यं णवचने प्रयोजनाभावात्। प्रज्ञाश्रद्धेतिज्वलितिकसन्तेभ्य इति तद्‌स्यामहरणोमिति ङीबभावः प्रयोजनम्। दाण्डिनायन॥ यकारादाविति। भ्रूणघ्नो भाव इति ब्राह्मणादित्वात्ष्यञ्। ज्ञापकं त्विति। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमित्यनपेक्ष्य ज्ञापकमुक्तं तदपेक्षायां तत्वस्याप्रसङ्गात्। ननु टिलोपाभावार्थं निपातनं स्यादिति सति प्रयोजने ज्ञापकत्वमनुपपन्नम्। नैष दोषः। उभयोरनित्ययोः परत्वाट्टिलोपं बाधित्वा तत्वं भविष्यति। अनेकप्रयोजनत्वाद्वा निपातनानाम्। अत एव कुत्वप्रतिषेधार्थमपि निपातनम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऐक्ष्वाक इति। इक्ष्वाकोरपत्यमिति जनपदशब्दादित्यञ्। उकारलोपो निपात्यते। ञित्वादाद्युदात्तत्वम्। इक्ष्वाकुषु जात इत्यणि प्राप्ते ओर्दे
शठञिति ठञि प्राप्ते तं परत्वाद्बाधित्वा जनपदतदवध्योश्चा वृद्धादपि बहुवचनविषयादिति वुञि प्राप्ते कोपधादित्यण्। तत्रान्तोदात्तत्व
म्। तत्र भिन्नस्वरयोरेकस्मिन्निपात्यमानेऽपरस्यासंग्रहादुभयमपि निपात्यम्। एकश्रुतिनिर्देशादिति। स्वरभेदप्रत्ययस्तमयेन निपा
तनं सर्वस्वरलौकिकप्रयोगसंग्रहार्थमित्यर्थः। यथा नपुंसकमिति। सामान्यस्थितत्वाद्धाविर्भावतिरोभावस्थितिविशेषाणामन्तर्भावात्
मैत्रेय इति। मित्रयोरपत्यमिति गृष्ट्यादिभ्यश्चेति ढञ्। मित्रयुशब्द इति स्थिते ओर्गुण इति गुणापवादे ढे ~ लोपोऽकद्र्वा इति लोपे प्राप्ते केकय

किमेतस्य ज्ञापने प्रयोजनम्। औणञ्चा वा त्रैध इत्यत्र तन्त्वं न भवति। ऐक्ष्वाकस्य स्वरभेदान्निपातनं पृथक्त्वेन।। ऐक्ष्वाक
स्य स्वरभेदान्निपातनं पृथक्त्वेन कर्तव्यम्। ऐक्ष्वाकः ऐक्ष्वाकः। एकश्रुतिनिर्देशात्सिद्धम्। एकश्रुतिः स्वरसर्वनाम। य
था नपुंसकलिङ्गं सर्वनाम। अथ मैत्रेये किं निपात्यते। मैत्रेये ढञि यादिलोपनिपातनम्। मैत्रेये ढञि यादिलोपो निपा
त्यते। इदं मित्रयुशब्दस्य चतुर्ग्रहणं क्रियते। गृष्ट्यादिषु प्रत्ययविध्यर्थं पाठः क्रियते। द्वितीयेऽध्याये यस्कादिषु लुगर्थं
क्रियते। सप्तमेऽध्याये इयादेशार्थम्। इदं चतुर्थं यादिलोपार्थम्। द्विर्ग्रहणं शक्यमकर्तुम्। बिदादिष्वञ्प्रत्ययविध्य
र्थं पाठः कर्तव्यः। तत्र नैवार्थो लुका नापि यादिलोपेन। इयादेशेनैव सिद्धम्। नैवं शक्यमिह हि मैत्रेयकः संघ इति संघा
ङ्कलक्षणेष्वञ्यञिञामण् इत्यण् प्रसज्येत। हिरण्मये किं निपात्यते। हिरण्मये यलोपवचनम्। हिरण्मये यलोपो निपात्यते। हिरण्मयकन्
र्थं विभाषितं त्वया। अथ हिरण्मये किं निपात्यते। हिरण्यये छन्दसि मलोपवचनात्सिद्धम्। हिरण्यये छन्दसि मलो
पो निपात्यते। हिरण्ययीर्नौरचरत्। हिरण्ययाः पन्थान आसन्। हिरण्ययमासनम्।। इति श्रीमद्भगवत्पतञ्जलिवि
रचिते व्याकरणमहाभाष्ये षष्ठाध्यायस्य चतुर्थपादे चतुर्थमाह्निकम्।। पादोऽध्यायः षष्ठश्च समाप्तः।।

मित्रय्वि निर्यादेरियादेशे प्राप्ते लोपो निपात्यते। तल्लोपस्यासिद्धत्वाद्यस्येति लोपाभावादतो गुण इति पररूपमेकारः। द्वितीय इति
। मित्रयव इति बह्वुषु लुगर्थः पाठः। सप्तम इति। ढञोऽन्यत्रेयादेशः मित्रयोरिदं मैत्रेयमिति। मैत्रेयक इति। मित्रयूनां संघ इति गोत्रे वुञ्ग
चीति लक्षिप्रतिषिद्धडञन्ताद्गोत्र चरणाद्वुञिति वुञ्। यदि तु संघाङ्क इत्यत्र न मैत्रेयादित्युच्यते तदानीमिग्रहणानि स्युरिति इह निपात
नं न कर्तव्यं स्यादिष्टस्य सिद्धत्वात्। इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे षष्ठाध्यायस्य चतुर्थे पादे चतुर्थमाह्निकम्
।। इति षष्ठोऽध्यायः समाप्तः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥श्रीगणेशाय नमः॥ युवोरनाकौ॥ युवोरिति। समाहारद्वन्द्वे युवुनिति प्राप्नोति। इतरेतरयोगे तु य्वोरिति। तत्र सौत्रत्वान्निर्देशस्यनुममकृत्वोकारलोपं वा कृत्वा निर्देश इति न दोषः। केचित्तु कर्मधारयं व्याचक्षते। अवयवधर्मेण समुदायस्य व्यपदेशाद्यथा समं चूर्णीकृतेन इति। एवं युश्चासौ समुदायो युवुलक्षणो वुश्चासाविति। तत्र समुदायस्याङ्गनिमित्तत्वासंभवादवयवयोर्यथासंख्यं कार्यविज्ञानम्। यथा च भाष्यम्। कयोर्युवोरिति तथेतरेतरयोगे द्वन्द्व इति निर्णयः। अतिप्रसङ्गं मत्वा पृच्छति। कयोरिति। प्रत्यययोरिति। अङ्गाधिकारादङ्गस्य निमित्ते यौ युवू तयोरनाकाविति सूत्रार्थाश्रयणात्। कथं पुनरिति। अङ्गाधिकारादङ्गस्यैव कार्यित्वं युक्तमिति भावः। सिद्धान्तवादिना तु वैयधिकरण्येन संबन्धो दर्शयितव्यः। संप्रति तु सामानाधिकरण्येन संबन्धमाश्रित्य समाधीयते। यु-

युवोरनाकौ॥ युवोरनाकावित्युच्यते। कयोर्युवोरनाकौ भवतः। प्रत्यययोः। कथं पुनरङ्गस्येति वर्तमाने प्रत्यययोः स्याताम्। युशब्दवुशब्दान्तमेतद्विभक्तावङ्गं भवति। यदि युशब्दवुशब्दान्तस्यानाकौ भवतः। सर्वादेशौ प्राप्नुतः। निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यतः। यत्र तर्हि विभक्तिर्नास्ति नन्दनाकारिकेति। अत्रापि प्रत्ययलक्षणेन विभक्तिः। यत्र तर्हि प्रत्ययलक्षणं नास्ति नन्दनप्रियः कारकप्रिय इति। माभूत्तां यासौ सामासिकी विभक्तिस्तस्याम्। यासौ समासाद्विभक्तिस्तस्यां भविष्यतः। न चैतस्यां युशब्दवुशब्दान्तमङ्गं भवति।

शब्दवुशब्दान्तमिति। कृत्तद्धितान्तत्वात् युवुशब्दान्तस्य प्रातिपदिकत्वाद्विभक्तावुत्पन्नायां सत्यङ्गत्वेनाकौ क्रियेते इत्यर्थः। यत्र तर्हि विभक्तिर्नास्ति नन्दनाकारिकेति। लौकिके प्रयोगे अत्यन्तमत्र विभक्तेरभावः। अत्राहुः। विभक्तावुत्पन्नायामनाकयोः कृतयोरकारान्तलक्षणेन टापा भाव्यम्। ततो हल्ङ्यादिलोपेनेत्यानुपूर्व्या सिद्धमेतत्। यथा यासेति। ततश्चाग्रन्थोयमिति। नन्दनकारकेति पाठो युक्तः। नन्द युस् इति स्थिते संबुद्धिगुणे कृते ऽकृते वा नित्यत्वादेङ्ह्रस्वात्संबुद्धेरिति लोपे कृते अङ्गत्वाभावादनाकाप्रसङ्गः। नन्दनप्रिय इति। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति लुकि कृते न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधादनाकयोरप्रसङ्गः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· भवेदिति। विशेषणविशेष्यभावेकामचारादङ्गे नयुवू विशेष्येते। नचतावङ्गान्तौ संभवतः। नचुविशेष्येणनदन्तविधिर्भवतीतियु
५९ वुभ्यांतदन्तविध्यभावाद्यत्रतत्रस्थितयोरङ्गावयवयोर्युवोरनाकौभवतइति। नन्दनदधीतिस्वमोर्नपुंसकादितिलुकि
नित्यत्वात्कृतेनलुमताङ्गस्येतिप्रत्ययलक्षणप्रतिषेधादादेशाप्राप्तिः। नवापरमिति। नहीहविभक्तिः प्रत्ययान्तरंवापरंनि
मित्तत्वेनोपात्तमितिप्रत्ययलक्षणमनाकयोर्नास्तीतिनलुमताङ्गस्येतिप्रत्ययलक्षणप्रतिषेधस्यायमविषयःकेवलमङ्ग
स्ययुवोरनाकौभवतइत्युच्यते। अस्तिहिप्रत्ययलक्षणेनाङ्गसंज्ञा। नहितसांविधीयमानायांनलुमताङ्गस्येतिनिषेधः प्रवर्तते
लब्धाङ्गसंज्ञस्यकार्यान्तरेविधातव्येसप्रतिषेधः प्रवर्तते। नचाङ्गसंज्ञाङ्गस्यकार्यमितिप्रतिषेधाभावः। ननुचाङ्गस्येत्यत्रा

भवेद्योयुशब्दवुशब्दाभ्यामङ्गंविशेषयेत्। तस्यानन्त्ययोर्नस्याताम्। वयंखल्वङ्गे नयुशब्दवुशब्दौविशेषयि-
ष्यामः। अङ्गस्ययुवोरनाकौभवतोयत्रतत्रस्थयोरिति। यत्रतर्हिसमासाद्विभक्तिर्नास्तिनन्दनदधिकारकदधि। ए
वंतर्हिनवापरंनिमित्तंसंज्ञाचप्रत्ययलक्षणेन। नचेहपरंनिमित्तमाश्रीयते अस्मिन्परतोयुवोरनाकौभवतइति।
किंतर्हि। अङ्गस्ययुवोरनाकौभवतइति। अङ्गसंज्ञाभवतिप्रत्ययलक्षणेन। अथवातयोरेवयदङ्गंतन्निमित्तत्वे
नाश्रयिष्यामः। कथम्। अङ्गस्येतिसंबन्धसामान्येषष्ठीविज्ञास्यते। अङ्गस्ययोयुवू।

सप्तमाध्यायपरिसमाप्तेरङ्गाधिकारेवव्रश्चेत्यत्रोरदत्वस्यपरनिमित्तकत्वात्स्थानिवद्भावेसतिनसंप्रसारणेसंप्रसारणमितिवका
रस्यसंप्रसारणप्रतिषेधउक्तःसइहत्येननवापरंनिमित्तमित्यनेनग्रन्थेनविरुध्यते। नास्तिविरोधोलक्षणभेदात्। यथोद्देशंसं-
ज्ञापरिभाषमितिपक्षमाश्रित्यनवाअपरंनिमित्तमित्याद्युक्तम्। कार्यकालंसंज्ञापरिभाषमाश्रित्यवव्रश्चेत्युक्तम्। तत्रहिपक्षेउ
रदित्यत्राङ्गसंज्ञासूत्रोपस्थानात्संनिहितःप्रत्ययोनिमित्तत्वेनाश्रीयतइतिपरनिमित्तत्वंभवति। अथवेनिभवतुकार्यकालपक्षस्तत्रापि राम:
नदोषइतिभावः। निमित्तत्वेनेति। अनाकादेशविधाने। संबन्धसामान्येषष्ठीति। निमित्तनिमित्तिभावलक्षणसंबन्धोनङ्गत्वा ५९
दाश्रीयते। प्रत्ययनिमित्तत्वाद्याङ्गव्यपदेशस्यप्रत्यययोरेवग्रहणंविज्ञायते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धातुप्रतिषेधइति। नन्वधुनैवोक्तं प्रत्यययोर्ग्रहणमिति। सत्यमुक्तं न तु लभ्यते। सामानाधिकरण्येन संबन्धसंभवे वैयधिकरण्यप-
क्षाश्रयणस्यायुक्तत्वाद्द्वे हि निमित्तनिमित्तिभावो भवति। अभेदे च संभवति कथं भेद आश्रीयते। अथवा भाष्यकारेण पूर्वं स्वात-
न्त्र्येणोक्तमिदानीं वार्त्तिकमवतारितमित्यदोषः। भुज्य्वादीनामिति भुज्य्वादीनां संबन्धिनः प्रत्ययस्येत्यर्थः। सत्यपि वैयधिकरण्येन संब
न्धेऽतिप्रसङ्गः। भुज्युरिति। भुजिमृङ्भ्यां युक्त्युकौ चेति युक्प्रत्ययः। मृत्युरित्यत्र त्युप्रत्ययो न युरिति मत्वा भाष्यकारेण मृत्युरिति
नोदाहृतम्। कंयुरिति। कंशंभ्यां बभयुस्तितुतयस इति युस्प्रत्ययः। ननु सित्करणं पदत्वे सति हल्यनुस्वारार्थमिति न तएवादेशो न भ

किं चाङ्गस्य युवू। निमित्तम्। ययोर्युवोरङ्गमित्येतद्भवति। कयोश्चैतद्भवति। प्रत्यययोः। युवोरनाकाविति चेद्धातुप्रति
षेधः॥ युवोरनाकाविति चेद्धातुप्रतिषेधो वक्तव्यः। युत्वा। युतः। युतवान्। भुज्य्वादीनां च प्रतिषेधो वक्तव्यः। भुज्युः। किं
युः। शंयुः। अनुनासिकपरत्वात्सिद्धम्। अनुनासिकपरयोर्युवोर्ग्रहणम्। न चैतावनुनासिकपरौ। यद्यनुनासिकपरयो
र्ग्रहणम्। नन्दनः। कारकः। अत्र न प्राप्नुतः। न ह्येताभ्यां युशब्दवुशब्दाभ्यामनुनासिकं परं पश्यामः। अनुनासिकपरत्वा
दिति। नैवं विज्ञायतेऽनुनासिकः परस्त्वाभ्यां ताविमावनुनासिकपरौ अनुनासिकपरत्वादिति। कथं तर्हि। अनुनासिकः
परो ययोस्ताविमावनुनासिकपरौ अनुनासिकपरत्वादिति। यद्यनुनासिकपरयोर्ग्रहणमित्संज्ञा प्राप्नोति। तत्र को दोषः
॥ तत्र ङीम्नुमोः प्रतिषेधः॥ ङीम्नुमोः प्रतिषेधो वक्तव्यः। नन्दनः कारकः। नन्दना कारिका। उगित्त्वलक्षणौ ङीम्नुमौ प्राप्नुतः॥ धा
त्वन्तस्य च प्रतिषेधः॥ धात्वन्तस्य च प्रतिषेधो वक्तव्यः। दिवुसिवुषिद्धित्करणं तु ज्ञापकमुगित्कार्याभावस्य। यदयं युश
ब्दवुशब्दौ षिद्धितौ करोति। शिल्पिनि ष्वुन्। ष्युसुवो तुद्धेति। तज्ज्ञापयत्याचार्यो न युवोरुगित्कार्यं भवतीति। कथं कृत्वा ज्ञा
पकम्। षिद्धित्करणे एतत्प्रयोजनम्। षिद्धितद्धीकारो यथा स्यात्।

विष्यतीति नैतदस्ति। अवग्रहाद्यसित्त्वं स्यात्। अहल्त्वादावप्यनुस्वारार्थं वा। न ह्येताभ्यामिति। रजः कृषुन्। वुन्। वुञ्। ष्वुन्। इत्यादीनामेव प्र
सङ्गः। अनुनासिकः परोऽनयोरिति। अवयवान्तरापेक्षया लब्धपरव्यपदेशोऽवयवर्णो वानुनासिक आश्रीयते नान्यः। न च भुज्यु
रित्यादावुकारस्य सानुनासिकत्वं प्रतिज्ञातमिति दोषाभावः। इत्संज्ञा प्राप्नोतीति। लोपस्तु भवतु मा वाभूदिति न विचार्यते कृते
पि उकारलोपेऽवशिष्टस्यादेशविधानेन रूपनिष्पादनात्। धात्वन्तस्येति। दिवु इत्ययमपि अनुनासिकपर इत्यादेशप्रसङ्गः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· नवा षित्करणमिति। ङीपि सतीकारोऽनुदात्तो भवति। ङीषि तूदात्त इति सति प्रयोजने न ज्ञापकं षित्करणम्। टित्करणमिति। टिड्ढेत्यत्रानु
५० पसर्जनादिति वर्तते अत्रोगिल्लक्षणो ङीप्यविशेषेण प्राप्तोऽनुपसर्जनादेव यथा स्यादिति नियमार्थं टित्करणं स्यादित्यज्ञापकमु
गित्कार्याभावस्य। विप्रतिषेधादिति। पूर्वविप्रतिषेधोऽत्र विवक्षितः। एवं तर्हीति। यदीह वाचीपर शब्दो न गृह्यते नेतरा ऽनुवृत्ति र्वाक्य
भेदश्चाश्रीयत इत्यर्थः। एवमपीति। एकवाक्यताश्रयणेन पर्यनुयुङ्क्ते तत्रादन्तादुगितः पर्यायेण टाप्ङीपोः प्रसङ्गः। एवं तर्हि सं

यदि चोगित्कार्यं स्यात्। षिट्टित्करणमनर्थकं स्यात्। पश्यति त्वाचार्यो न युवोरुगित्कार्यं भवतीति। ततो युशब्दं वुशब्दं षिट्टितौ करोति। न वा षित्करणं ङीष्विधानार्थम्। नैतदस्ति ज्ञापकम्। अस्त्यन्यदेतस्य वचने प्रयोजनम्। किम्। षित्करणं क्रियते ङीष्विधानार्थम्। षित इति ङीष् यथा स्यात्। टित्करणमनुपसर्जनार्थम्। टित्करणेऽप्येतत्प्रयोजनमस्ति। अनुपसर्जनादिति इति ईकारो यथा स्यात्। टितोऽनुपसर्जनाद्भवति। उगित उपसर्जनाच्चानुपसर्जनाच्च। एवं तर्हि विप्रतिषेधाट्टापो बलीयस्त्वं भविष्यति। टापोऽवकाशः। खट्वा। माला। ङीपोऽवकाशः। गोमती। यवमती। ——— । इहोभयं प्राप्नोति। नन्दना। कारिका। टाब्भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। विप्रतिषेधे परमित्युच्यते। पूर्वश्च टाप्। परो ङीप्। ङीपः परष्टाप् करिष्यते। सूत्रविपर्यासः कृतो भवति। एवं तर्हि उगितो ङीब्भवतीत्यत्रापि अतष्टाबित्यनुवर्तिष्यते। एवमप्यकारान्तादुगित इहैव स्यात्। नन्दना। कारिका॥ गोमती। यवमतीत्यत्र न स्यात्। एवं तर्हि संबन्धानुवृत्तिः करिष्यते। अजाद्यतष्टाप्। ऋन्नेभ्यो ङीप्। अतष्टाप्। उगितश्च ङीब्भवति अतष्टाप्। वनो र च। वनो ङीब्भवति उगितः अतष्टाप्। पादोऽन्यतरस्यां ङीब्भवति उगित अतष्टाप्।

बन्धानुवृत्तिरिति। यद्यपि वाक्यभेदेन संबन्धे दोषाभावः। उगितो ङीब्भवति। अदन्तादुगितष्टाब्भवति। तथापि परिहारान्तरस
द्भावप्रतिपादनायेदमुक्तम्। उगितश्च ङीब्भवतीति। अतष्टाबित्युत्तरार्थमत्रानुवर्तते। वनो र चेत्यत्रातउगितष्टाबिति वर्तते रामः
तत्र वन्नन्तस्यानुगित्वाददन्तत्वासंभवाच्च वाक्यभेद आश्रीयते। वन्नन्तस्य ङीब्रौ भवतः। उगितोऽदन्तान्ङीबपवादष्टाबित्यस्यो ५०
त्तरत्रोपस्थानाय प्रतिसूत्रमनुवृत्तिं दर्शयति। टाप् चीत्यत्र टाब्ग्रहणं न कर्तव्यं भवतीति। यद्युत्तरत्रानुवृत्तिरुपयुज्यते टापः
स्वातन्त्र्यनिराकरणाय तत उगित इत्येताभ्यां संबन्धः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उगितोऽतदिति निवृत्तमिति। उगित इत्यस्य निवृत्तिराख्यायते। अत इत्येतत् सर्वत्र प्रकरणेऽनुवर्तते। शितिभ्रूरिति ङीब्भका
रोमा भूदिति। कुरुवाकुरित्यत्र जातिलक्षणो ङीष् मा भूदित्येवमर्थम्। धात्वन्तस्य चार्थवद्ग्रहणादिति। वर्णसमुदायग्रहणमि
ह न वर्णग्रहणमित्यर्थवद्ग्रहणपरिभाषोपतिष्ठते। प्रत्ययाप्रत्यययोः प्रत्यये संप्रत्यय इत्ययमप्यत्र परिहारः संभवति। एवं गो
मतीति। ईकारात्परो नुम् प्राप्तोऽझलन्तत्वान्न भवति। एवं नन्दनः कारक इत्यत्राझलन्तत्वान्नुमभावः। न वा विभक्ताविति। विभ

ततश्चाचि। अचि च टाब्भवति। उगितोऽतदिति निवृत्तम्। तत्रायमप्यर्थः। द्विष्टाब्ग्रहणं न कर्तव्यं भवति। प्रकृतमनु
वर्तते। सिध्यत्येवम्। यत्त्विदं वार्तिककारः पठति विप्रतिषेधाट्टापो बलीयस्त्वमिति। एतदसंगृहीतं भवति। एतच्च सं
गृहीतं भवति। कथम्। इष्टवाची परशब्दः। विप्रतिषेधे परं यदिष्टं तद्भवतीति॥ धात्वन्तस्य चार्थवद्ग्रहणात्। अर्थव
तो गोर्ग्रहणम्। न च धात्वन्तोऽर्थवान्॥ नुम्विधौ झल्ग्रहणम्॥ नुम्विधौ झल्ग्रहणं कर्तव्यम्। झलन्तस्य उगित इ
ष्यते। उगिदचां सर्वनामस्थाने धातोर्झल इति। तच्चावश्यं कर्तव्यम्। लिङ्गविशिष्टप्रतिषेधार्थम्। प्रातिपदिकग्रहणे
लिङ्गविशिष्टस्यापि ग्रहणं भवतीति। यथेह भवति। गोमान्। यवमान्। एवं गोमती यवमतीत्यत्रापि स्यात्॥ न वा विभक्तौ
लिङ्गविशिष्टाग्रहणम्। न वा वक्तव्यम्। किं कारणम्। विभक्तौ लिङ्गविशिष्टग्रहणं नेत्येषा परिभाषा कर्तव्या। कः पुनर
त्र विशेषः। एषा वा परिभाषा क्रियते झल्ग्रहणं वेति। अवश्यमेषा परिभाषा कर्तव्या। बहून्येतस्याः परिभाषायाः प्रयो
जनानि। कानि। प्रयोजनं श्रुनः स्वरे। यथेह भवति। श्रुना श्रुने श्रुन्य इत्यत्रापि स्यात्। यूनः संप्रसारणे प्रयोजनम्। य
थेह भवति यूनः पश्येति।

क्तौ यत्कार्यं विधीयते लिङ्गविशिष्टस्य तन्न भवतीत्यर्थः। श्रुनेति। सावेकाच इति प्राप्तं विभक्तेरुदात्तत्वं न गोश्वन्निति प्रतिषिध्यते। श्रुन्ये
ति। गौरादित्वात् ङीषि कृते उदात्तयणो हल्पूर्वादित्यस्य विभक्तिस्वरस्य प्रतिषेधप्रसङ्गः। ननु विभक्तेरेतत्कार्यं न तु विभक्तौ परतः पूर्व
स्येति कथं लिङ्गविशिष्टपरिभाषायाः प्रतिषेधः। नैष दोषः। विभक्तेर्यत्कार्यं यच्च विभक्तौ परतः कार्यं तत्सर्वं विभक्तौ कार्यमिति स
र्वत्र प्रतिषेधप्रवृत्तिः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंयुवतीरिति। एवमर्थमनद्यतनुभयोः शेषद्गृतिनाश्रयितव्यंभवति। पथीति। समासैकदेशउदाहृतः। इतरएतावदेवोदाहृतमिति मत्वाह। नकेवलइति। सुपथीति। शोभनः पन्था अस्यामिति बहुव्रीहिः। नपूजनादिति समासान्तप्रतिषेधः। ऋन्नेभ्योङीबिति ङीप्। भसंज्ञायां टेर्लोपइति टिलोपः। सुपुंसीति। शोभनाः पुमांसोऽस्यामिति बहुव्रीहिः। उरःप्रभृतिषु पुमानिति विभक्त्यन्तपाठस्य प्रयोजनमुक्तम्। एकवचनान्तस्यैव नित्यः कप् अन्यथा स्यादिति। तेनात्र शेषाद्विभाषेति विकल्पो भवति। पातेर्डुम्सुनिति प्रत्ययस्योगित्वादुगितश्चेति—

एवंयुवतीः पश्येत्यत्रापि स्यात्। उगिदचांतुम्विधौ प्रयोजनम्। यथेह भवति। गोमान्। यवमान्। एवंगोमतीयवमतीत्यत्रापि स्यात्। अनडुह आम्विधौ प्रयोजनम्। यथेह भवति अनड्वानिति। एवमनडुहीत्यत्रापि स्यात्। नवा भवत्यनड्वाहीति। भवत्यन्येन यत्नेन। आमनडुहः स्त्रियांवेति लिङ्गविशिष्टग्रहणादीकारान्तस्य प्राप्नोति। पथिमथ्योरात्वे प्रयोजनम्। यथेह भवति। पन्थाः। मन्थाः। एवंपथीमथीत्यत्रापि प्राप्नोति। नकेवलः पथिशब्दः स्त्रियांवर्तते। उपसमस्तस्तर्हि वर्तते। सुपथी। पुंसोऽसुङ्विधौ प्रयोजनम्। यथेह भवति। पुमान्। एवंपुंसीत्यत्रापि स्यात्। नकेवलः पुंशब्दः स्त्रियांवर्तते। उपसमस्तस्तर्हि वर्तते। सुपुंसीति। सख्युर्णित्वानङौ प्रयोजनम्। यथेह भवति। सखा। सखायौ। सखायः। एवंसखीसख्यौसख्य इत्यत्रापि प्राप्नोति॥ भवद्भगवदघवतामोऽव्वाप्रयोजनम्। यथेह भवति भोः। भगोः। अघोरिति। एवंभवतीभगवत्यघवतीत्यत्रापि स्यात्। एतान्यस्याः परिभाषायाः प्रयोजनानि। यदर्थमेषापरिभाषा कर्तव्या। एतस्यांचसत्यां नार्थोऽञ्जल्ग्रहणेन। तदेतदनन्यार्थमञ्जल्ग्रहणं कर्तव्यं तुम्प्रतिषेधो वा वक्तव्यः। उभयंनवक्तव्यम्। उपरिष्टात् ञ्जल्ग्रहणं क्रियते।

ङीप्सखीसख्यावितिसख्यशिश्वीतिभाषायामिति ङीष्। अनङ्णित्वे अत्र प्राप्नुतः। ङीब्विधानंतु सखीभ्यामित्याद्यर्थं स्यात्। भवद्भगवदिति। यदासंबुद्ध्याभवदादयो विशेष्यन्ते तदा भवत्यादीनामपि प्रसङ्गः। यदोत्व शब्दो विशेष्यते तदा येन ना व्यवधानमित्येकवर्णव्यवधाने ओत्वं प्रवर्तते। भवत्यादौ तु वर्णद्वयव्यवधानादोत्वाभावः। तदभावात्तत्संनियोगविहितस्य रुत्वस्याप्यभावइति केचिदाहुः। नार्थोऽञ्जल्ग्रहणेनेति। गोमत्याद्यर्थेनेत्यर्थः॥

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरस्तादिति। उगिदचां सर्वनामस्थानेऽधातोर्झलइति। ततो युजेरसमासे नपुंसकस्याचइति। अत्र झलइतिवर्तते। उभयोः शेषइ
ति। युजेर्झलन्तत्वाव्यभिचारादाद्यन्तावेव योगावपेक्ष्येते। झलिति लुप्तषष्ठीकं पदमाश्रीयते। घ्यातनितरेति। घ्यातिपातिभ्यांक
रणे ल्युटि कृते गौरादिषु घ्यातनयातनेति पाठान्ङीषु। उगितो या नदीति। उगिच्छब्दोऽत्रावरणेनेति भावः। कृतरोग्रहीताभिप्रायआह
। उगित एषेति। पूर्वेणैवाभिप्रायेणाह। उगितो यापरेति। उगिच्छब्दव्यापारेण विहितोगितः परेत्यर्थः। इतरआह। अत्रचैवेति। इ

न्तत्पुरस्तादपकृष्यते। एवमपि सूत्रविपर्यासः कृतो भवति। एवं तर्हि योगविभागः करिष्यते। उगिदचां सर्वनामस्था
नेऽधातोः। युजेरसमासे। ततो नपुंसकस्य। नपुंसकस्य नुम्भवति। झलइत्युभयोः शेषः। ततोऽचः अजन्तस्य च नपुंसक स्य नुम्भ
वति। यद्यपि तावदेतदुगित्कार्यं परिहृतम्। इदमपरं प्राप्नोति। घ्यातनितरा। यातनितरा। उगितो नद्या घादिषु ह्रस्वो भ
वतीत्यन्यतरस्यां ह्रस्वत्वं च प्रसज्येत। नित्यं चेष्यते। उगितो या नदी एवमेतद्विज्ञायते। उगित एषा नदी।

चै

उगितो यापरा। अत्रैव दोषो भवति। उगितो हि यापरा नदी। एषु मतितरायां च प्राप्नोति। उगितः परा या विहिता। उ
गित एषा विहिता। उगित इत्येवं विहिता। एवमपि भोगवतितरायां दोषो भवति। भोगवतितरा। भोगवतीतरा।
तस्मादुगितो या नदी। उगितो या विहितेत्येवमेतद्विज्ञास्यते। एवं विज्ञायमाने घ्यातनितरायां दोष एव।

षवो स्य सन्तीति पुमान्। तस्येदमित्यण्। ङीप्। यस्येति लोपे कृते उगितः परा नदीति विकल्पेन ह्रस्वत्वं प्राप्नोति नित्यं चेष्यते। पूर्वो
क्तेनाभिप्रायेणाह। उगितो या परा विहितेति। एषु मतितरायां चाणन्तान्नदी विहिता न तूगितः। इतरस्तु घ्यातनितरामाश्रित्या
ह। उगित एषेति। भोगवतितरेति। शार्ङ्गरवादिषु भोभगवन्नोरिमतोः संज्ञायामिति पाठान्ङीन् प्रत्ययः उगित इत्येवं न वि-
हित इति विकल्पेन ह्रस्वत्वं न प्राप्नोति। उगितस्तु विहित इति विधानाश्रयणाद्विकल्पः सिध्यति। घ्यातनितरायां तु विकल्पः प्राप्नोति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कौ· सिद्धंत्विति।भाष्यकारीयमिदंवाक्यमित्याहुः।अन्येत्वनुनासिकपरत्वादितिवाक्यमेवानेनव्याख्यातमित्याहुः।अनुनासिकप्रधान ७ ११
५२ त्वादितिहितस्यार्थः।अनुनासिकपरौयुवूइह्यानुक्तौइत्यतिप्रसङ्गाभावः।उकारस्तुनिरनुनासिकएवेत्युगित्कार्याभावः॥आ
यने॥आयन्तादिष्विति।अङ्गाधिकारेविधानात्प्रकृतिप्रत्ययापेक्षाबहिरङ्गाआयन्तादयः।प्रत्ययाद्युदात्तत्वंतुप्रकृतिनिरपेक्ष
त्वादन्तरङ्गमितितदेवपूर्वंप्राप्नोति।त्युपदेशिवद्वचनंकर्तव्यम्।शिलेयमिति।शिलेवशिलेयम्।शिलायाढः।तित्तिरिणाप्रोक्तम
धीतेतित्तिरिवरतन्तुखण्डिकेतिछण्।अस्वरकाःस्युरिति।प्रवृत्तिकालापेक्षयेदमुच्यते।प्रयोगेतुस्वररहितस्याचउच्चारणाभाव

सिद्धंतुयुवोरनुनासिकत्वात्॥सिद्धमेतत्।कथम्।यकारवकारयोरेवेदमनुनासिकयोरिहग्रहणम्।सन्तिहि
यणःसानुनासिकानिरनुनासिकाश्च॥आयने॥ ॥आयन्तादिषुउपदेशिवद्वचनंस्वरसिद्ध्यर्थम्॥आयन्तादि
षूपदेशिवद्भावोवक्तव्यः।उपदेशावस्थायामायन्तादयोभवन्तीतिवक्तव्यम्।किंप्रयोजनम्।स्वरसिद्ध्यर्थम्।उ
पदेशावस्थायामायन्तादिषुदृष्टःस्वरोयथास्यादिति॥शिलेयम्।तैत्तिरीयः।अक्रियमाणेह्युपदेशिवद्भावेप्र
त्ययसंज्ञासंनियोगेनाद्युदात्तत्वेकृतेआन्तर्यतआदेशाअस्वरकाणामस्वरकाःस्युः॥

त्।अनुदात्तंपदमेकवर्जमितिवचनाच्चानिष्टस्वराःप्राप्नुवन्ति।केचित्वान्तर्यतइत्यन्यथाव्याचक्षते।यथानुदात्तोच्चार
णेगात्राणांस्रंसनंस्वरस्यस्निग्धताकण्ठविवरस्यचमहत्त्वंचभवति।एवंव्यञ्जनोच्चारणेप्ययोग्यत्वादनुदात्तधर्मो रामः
पजनोव्यञ्जनेष्वनास्तितदेवमस्वरकाणामुदात्तत्वरहितानामस्वरकाइष्टोदात्तत्वरहितत्वादनुदात्ताएवस्युरित्यर्थः॥ ५२

न वेति। तत्राप्यङ्गाधिकारेऽङ्गत्वमनपेक्ष्य प्रत्ययोत्पत्तिकाल एवायन्नादयो भवन्तीति चित्करणेन ज्ञाप्यते। तत्राङ्गानपेक्षत्वादसति बहिरङ्गत्वे परत्वान्नित्यत्वाच्च कृते घायन्नादिषु प्रत्ययाद्युदात्तत्वं भवतीतीष्टस्वरसिद्धिः। तत्रैणादिप्रतिषेध इति। येत्वनुणादयः खलु घत्रादयस्तेषु खलघयोरित्संज्ञया भाव्यम्। रित्यनव्ययस्य चजोः कुघिण्यतोरिति लिङ्गात्। तद्धितेषु सावकाशो नादेशवि-

नवा कश्चिच्चित्करणात्॥ न वा वक्तव्यम्। किं कारणम्। कश्चिच्चित्करणात्। यदयं कश्चिद् घारीश्चितः करोति। अग्नायतः। घञ्चौ च। तज्ज्ञापयत्याचार्यः उपदेशावस्थायामायन्नादयो भवन्तीति। कथं कृत्वा ज्ञापकम्। चित्करणे प्रतत्प्रयोजनम्। चित इत्यन्तोदात्तत्वं यथा स्यात्। यदि चोपदेशावस्थायामायन्नादयो भवन्तीति ततश्चित्करणमर्थवद्भवति॥ तत्रैणादिप्रतिषेधः॥ तत्रैणादीनां प्रतिषेधो वक्तव्यः। शङ्खः। शण्ढः। धातोर्वेयङ् वचनात्। अथवा यदयम् ऋतेरीयङिति धातोरीयङं शास्ति तज्ज्ञापयत्याचार्यो न धातुप्रत्ययानामायन्नादयो भवन्तीति। यदि हि स्युः ऋतेश्छङित्येव ब्रूयात्। सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति। न च ऋतेश्छङ् सिध्यति। ऋच्छङि सति वलादिलक्षण इट् प्रसज्येत। इटि कृतेऽनादित्वादादेशो न स्यात्। इदमिह संप्रधार्यम्। इट् क्रियतामादेश इति। किमत्र कपि र्तव्यम्। परत्वादिडागमः। नित्य आदेशः। कृतेपीटि प्राप्नोत्यकृते। अनित्य आदेशः। न हि कृत इटि प्राप्नोति। किं कारणम्। अनादित्वात्। अन्तरङ्गस्तर्ह्यादेशः। कान्तरङ्गता। इदानीमेवोक्तमायन्नादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति। तदेतदृतेरीयङ्वचनं ज्ञापकमेव न धातुप्रत्ययानामायन्नादयो भवन्तीति। प्रातिपदिकविज्ञानाच्च पाणिनेः सिद्धम्॥ प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेराचार्यस्य सिद्धम्। उणादयोऽव्युत्पन्नानि प्रातिपदिकानि॥

धानेनेत्संज्ञा न बाध्यते॥ नित्य आदेश इति। उपदेशे यः प्रत्ययादिस्तस्यादेश इति कृतेपीटि प्राप्नोति। अनादित्वादिति। सांप्रतिकं प्रत्ययादित्वमाश्रित्यादेशो विधीयते। प्रातिपदिकविज्ञानादिति। पक्षान्तरैरपि परिहाराः संभवन्तीत्यव्युत्पत्तिपक्षाश्रयः। ॥

CC-0. In Public Domain. Digitization by eGangotri

॥झोन्तः॥ इह प्रत्ययग्रहणेऽनुवर्तमाने एकसमासनिर्दिष्टमादिग्रहणमप्यनुवर्तते। तथा च शयान्तेऽपि इत्यत्रानादित्वात् झस्यान्तादेशो न स्यादिति प्रत्ययग्रहणं नानुवर्त्यमिति मत्वाह। झादेश इति। झकारोपदेशस्तु प्रत्ययइत्वलाघवार्थः स्यात्। शयान्त इति। शीङ उपसंवादाशङ्कयोश्चेति लेट्। तस्य झः। लेटोडाटावित्याडागमे टेरेत्वं वैतोन्यत्रेत्यैत्वं झोन्तादेशः शपो लुक् शीङः सार्वधातुके गुण इति गुणः। कथं पुनरिति। यदार्थाधिकारपक्षस्तु पातार्थस्य व्याधिकारपक्षो वा तदायं पर्यनुयोगः। वर्तिपदार्थस्य समुदाये-

झोन्तः॥ झादेशे धात्वन्तप्रतिषेधः॥ झादेशे धात्वन्तस्य प्रतिषेधो वक्तव्यः। उज्झिता उज्झितुमिति। प्रत्ययाधिकारात्सिद्धम्। प्रत्ययग्रहणं प्रकृतमनुवर्तते। क्व प्रकृतम्। आयनेयीनीयियः फढखछघां प्रत्ययादीनामिति। प्रत्ययाधिकारात्सिद्धमिति चेदनादेरादेशवचनम्। प्रत्ययाधिकारात्सिद्धमिति चेदनादेरादेशो वक्तव्यः। अपि नः श्वो विजनिष्यमाणाः पतिभिः सह शयान्तै। एवं तर्हि प्रत्ययग्रहणमनुवर्तते आदिग्रहणं निवृत्तम्। कथं पुनः समासनिर्दिष्टानामेकदेशोऽनुवर्तते एकदेशो वा निवर्तते। असमासनिर्देशात्सिद्धम्। असमासनिर्देशः करिष्यते प्रत्ययस्यादीनामिति। स तर्ह्यसमासनिर्देशः कर्तव्यः। न कर्तव्यः। क्रियत एव न्यास एव। कथम्। अविभक्तिको निर्देशः। प्रत्यय आदीनामिति। तत्र शयान्तादिष्वनकारान्तत्वादङ्गस्याद्भावप्रतिषेधः। तत्रैतस्मिन्प्रत्ययग्रहणेऽनुवर्तमान आदिग्रहणे निवृत्ते शयान्तैइत्यनकारान्तत्वादङ्गस्याद्भावः प्राप्नोति तस्य प्रतिषेधो वक्तव्यः॥ सिद्धमनानन्तर्यादनकारान्तेनाद्भावनिवृत्तिः॥ सिद्धमेतत्। कथम्। अनानन्तर्यादनकारान्ते नाद्भावो न भविष्यति।

र्थेऽन्तर्भावात्पृथगनुवृत्त्यसंभवात्। यदा त्वनाश्रितार्थं शब्दमात्रं प्रतिज्ञातस्वरितत्वमनुवर्तत इति पक्षस्तदा नास्ति चोद्यावकाशः। संख्याव्ययादेर्ङीबित्यतो दामहायनान्ताच्चेत्यत्राव्ययग्रहणाननुवृत्तावपि संख्याग्रहणानुवृत्तिदर्शनात्। तत्रेति। अन्तरङ्गत्वादटि कृतेऽन्तादेशापवादोऽदादेशः प्राप्नोति। अनकारान्तादङ्गात्प्रत्ययस्य परत्वात्। सिद्धमिति। अनकारान्तेनाङ्गेन प्रत्ययस्य झकार एव विशेष्यते। तत्र व्यवधानाददादेशाभावः। अन्तादेशस्त्ववधिमनुपादाय विधीयमानो व्यवधानेऽपि भवति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेरतइति। प्रतिपदविधेर्बलवत्त्वाद्रुटि कृते व्यवधानाददादेशेन प्राप्नोति। निर्दिश्यमानस्यादेशा भवन्तीति वचनाज्झकारमात्रस्यादेशो विधीयते। तत्र रुटा व्यवधीयते। रुट्संनियोगवचनादिति। आगमादेशयोः सह विधानादागमेन स्थानिनो व्यवधानाभावः। एवमपि पर्याय इति। अद्भावे कृते रुड् न प्राप्नोति झस्य रुड्विधानादल्विधित्वात्स्थानिवत्त्वाभावाद्रुटि कृतेऽद्भावो न प्राप्नोति व्यवधानात्। न

कथं कृत्वा चोदितं कथं कृत्वा परिहारः। अनकारान्तग्रहणं प्रत्ययविशेषणमिति कृत्वा चोदितं झकारविशेषणमिति कृत्वा परिहारः। यद्यनकारान्तग्रहणं झकारविशेषणं शेरते अत्र न प्राप्नोति। तत्र रुट्संनियोगवचनात्सिद्धम्। तत्र रुट्संनियोगः करिष्यते। क एष यत्नश्चोद्यते संनियोगो नाम। चकारः कर्तव्यः। रुट् च। किं च। यच्चान्यत्प्राप्नोति। किं चान्यत्प्राप्नोति। अद्भावः। स तर्हि चकारः कर्तव्यः। न कर्तव्यः। योगविभागः करिष्यते। शीङः। शीङ उत्तरस्य झस्याद्भावो भवति। रुट्। रुट् च भवति शीङ इति। एवमपि पर्यायः प्रसज्येत। एवं तर्हि अच्छब्दस्य रुटं वक्ष्यामि। तदच्छब्दग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। अदभ्यस्तादिति। तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। शीङ इत्येषा पञ्चमी अदिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति॥ शीङो रुट्॥ ऋदृशोऽङि गुणप्रतिषेधः॥ ऋदृशोऽङि गुणः प्राप्नोति। अदृशन्नस्य केतव इति तस्य प्रतिषेधो वक्तव्यः। न वक्तव्यः।

तो विरोधात्तुल्यबलवत्त्वाच्च पर्यायप्रसङ्गः। एवं तर्हीति। अच्छब्दस्य रुटि सत्यवयवावयवोऽपि समुदायावयवो भवतीति रुटा व्यवधानाभावाद्गुणः शीङः प्रवर्तते॥ शीङो रुट्॥ अदृशन्निति। दृशेर्लुङि च्लेरङ्यन्तादेश इरितो वेत्यङि तत्रान्तरङ्गत्वाद्गुणात्पूर्वं रुटि कृते ऋदृशोऽङि गुण इति गुणप्रसङ्गः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै·
५४

परस्मिन्निति। यदा क्ङिति चेत्यत्र निमित्तसप्तमीपक्षस्त्यक्तः परसप्तमीपक्ष आश्रितस्तदैतदुच्यते। वार्णादाङ्गं बलवदित्यनपेक्षितैव र्णाश्रयत्वादन्तरङ्गे एकादेशे कृते तस्य परं मस्यादिवद्भावात्तु ङित्सार्वधातुकं परमाश्रित्य क्ङिति चेति गुणप्रतिषेधः प्रवर्तते। ये न नाप्राप्तिन्यायेन अङ्गनिमित्त एव प्रतिषेधो गुणेन बाध्यते न तु ङित्सार्वधातुकनिमित्तः। प्रतिषेधाश्च बलीयांसो भवन्तीत्युभयप्रसङ्गे प्रतिषेधः प्रवर्तते। अदृक्षमिति। मिथ्यादेशस्यानः पित्वाङ्गित्वाभावान्नास्ति गुणप्रतिषेधः। एवं तर्हीति। पूर्वान्ते रुटि अलघूपधत्वाद्गुणाभावः। लघूपधगुणस्यैव हि ऋदृशोऽङि गुण इति गुणप्रत्यापत्तिः क्रियते। अथवा गुणश्रुत्येकदेशे तूपस्थानात्तस्यैवाङ्गविशेषणाद्येन नाव्यवधानमित्येकवर्णव्यवहितस्य गुणो भवति रुटि कृते न भवति। शेरत इति। रुकि सत्यनिगन्तत्वाद्गुणाप्रसङ्गः। ७ २१

परस्मिन्निमित्ते क्ङिति चेति निषेधो भविष्यति। एवमदृक्षमस्य केतवदृत्यत्रापि प्राप्नोति। एवं तर्हि पूर्वान्तः करिष्यते। पूर्वान्ते शीङो गुणविधिः॥ पूर्वान्ते शीङो गुणो विधेयः। शेरते सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं रुडिदृशिगुणप्रतिषेध इति पूर्वान्तेप्येष दोषः। कथम्। अयं दृशिगुणः प्रतिषेधविषय आरभ्यते स यथा क्ङिति चेत्येतं प्रतिषेधं बाधत एवमनुपधाया अपि प्रसज्येत। तस्मादुभाभ्यामेव दृशेरकृप्रत्ययान्तरं वक्तव्यम्। पितरं च दृशेयं मातरं च दृशेयमित्येवमर्थम्।

पूर्वान्तेपीति। क्ङिति चेति गुणे प्रतिषिद्धे अपूर्वः ऋदृशोऽङि गुण इति गुणो विधीयते। स यथैव प्रतिषेधविषये प्रवर्तते तथैवानुपधाया अपीकः प्रवर्तेत। अङ्ग्रहणं च श्रुतत्वाद्दृशेरेव विशेषणं नेकः। दृशेरकृप्रत्ययान्तरमिति। यथा लिङ्याशिष्यङ्। यश्चारितो वेत्यङ्। तत्प्रसङ्गे छन्दसि दृशेरङ् वक्तव्यः। अथ भाषायामदृशन्नित्यत्र ङित्सार्वधातुकनिमित्तः प्रतिषेधः कस्मान्न भवति। ङ्किति निमित्तसप्तमीविज्ञानाद्वार्णादाङ्गं बलीय इत्येकादेशात्पूर्वमेव गुणविधानाद्वा स्थानिवद्भावाद्वा। एकादेशस्य व्यवधानात्कृतार्थस्य वा प्रतिषेधस्य परत्वाद्गुणेन बाधनात्। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

झादेशोपिनित्यइति।द्वयोश्चनित्यत्वेनचानित्यत्वाद्दाटइतिनशक्यतेवक्तुम्।झविशेषणपक्षेप्यभेदाश्रयेणाटोनित्यत्वम्।भेद
दर्शनेतुशब्दान्तरप्राप्त्याऽप्यनित्यः।यदिप्राग्लादेशादिति।तदाप्रत्ययमात्रापेक्षत्वादाडन्तरङ्गः।वेत्तेर्विभाषाबहुलंछन्द

झादेशादाट् लेटि॥ झादेशादाट् लेटिभवतिविप्रतिषेधेन।झादेशस्यावकाशः।लुनतेलुन
तामलुनत।अटोवकाशः।पताति दिद्युत्।उदधिंच्यावयति।इहोभयंप्राप्नोति अपिस्रुचोवाविजनिष्यमाणाःप
तिभिःसहशयान्तै।आट्लेटिभवतिविप्रतिषेधेन।सतर्हिपूर्वविप्रतिषेधोवक्तव्यः॥नवानित्यत्वादाटः॥न
वावक्तव्यः।किंकारणम्।नित्यत्वादाटः।नित्यआडागमः।कथंनित्यः।यद्यनकारान्तग्रहणंझकारविशेषणम्।
अथहिप्रत्ययविशेषणम्।झादेशोपिनित्यः।अन्तरङ्गलक्षणत्वाच्च।अन्तरङ्गःखल्वपिआडागमः।कथमन्तर
ङ्गः।यदिप्राग्लादेशाज्झाद्यधिकारः।अथहिलादेशेधात्वधिकारोनुवर्तते।उभयंसमानाश्रयम्।यद्येवमनका
रान्तग्रहणंप्रत्ययविशेषणम्।अथापिलादेशेधात्वधिकारोनुवर्तते।उभयथापिपूर्वविप्रतिषेधेननार्थः।कथ
म्।बहुलंछन्दसीत्येवमत्रशपोलुग्भविष्यति।तत्राननइतिप्रतिषेधोभविष्यति।वेत्तेर्विभाषा।बहुलंछन्दसि।
अतोभिसऐस्।बहुलंछन्दसि।इदंबहुलंछन्दसीतिद्विःक्रियते।एकंशक्यमकर्तुम्।कथम्।यदितावत्पूर्वंक्रिय
तेपरंनकरिष्यतेअतोभिसऐसित्यत्रबहुलंछन्दसीत्येतदनुवर्तिष्यते।अथपरंक्रियतेनपूर्वंकरिष्यते।बहुलं
छन्दसीत्यत्ररुडप्यनुवर्तिष्यते।अपरआह।उभेबहुलग्रहणे।एकंछन्दोग्रहणंशक्यमकर्तुम्।कथम्।इदम-
स्ति।वेत्तेर्विभाषा।ततः।छन्दसिचविभाषा।ततोतोभिसऐस्भवति।छन्दसिविभाषेति॥

सि॰अतोभिसऐस्इत्यत्रेति।वाक्यभेदेनसंबन्धाद्भाषायामपिऐस्भवति।छन्दसिचविभाषेति।प्रत्ययमात्रस्यछन्दसिरुड्विधीय
तेविभाषा।व्यवस्थितविभाषाविज्ञानाच्चयथाप्रयोगंरुड्विधिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कै. अतो भिस ऐस्॥ परत्वादिति॥ एत्वस्यावकाशो वृक्षेभ्य इति। ऐसोवकाशः कृत एत्वे प्रागेत्वादुभयप्रसङ्गे परत्वादेत्वप्रसङ्गः। मु- ७११
५५ ख्यशब्दार्थाश्रयणेनानवकाशं मत्वा पृच्छति ऐस्भावमिदानीमिति। कृत एत्वे इति। सांप्रतिकाभावे भूतपूर्वगतिराश्रीयते। ननु
नाप्राप्त एत्वे ऐस् आरभ्यमाणस्तस्यापवादो युक्तः। उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः। एवं तर्हि पूर्वपक्षवादिनोत्सर्गापवा

अतो भिस ऐस्॥ इह वृक्षैः प्लक्षैरिति परत्वादेत्वं प्राप्नोति। एत्वे कृते विहतनिमित्तत्वादैस्त्वं न भविष्यति॥ एत्वं भिसि परत्वाच्चेदनत ऐस् कं भविष्यति। ऐस्भाव इदानीं क भविष्यति॥ कृते एत्वे भौतपूर्व्यात्। कृते एत्वे भूतपूर्वमकारान्तमिति ऐस् भविष्यति॥ ऐस्तु नित्यस्तथा सति। एवं सति नित्य ऐस्भावः कृतेप्येत्वे प्राप्नोत्यकृतेपि। नित्यत्वादैस्त्वे कृते विहतनिमित्तत्वादेत्वं न भविष्यति॥ एत्वं भिसि परत्वाच्चेदनत ऐस् क भविष्यति। कृते एत्वे भौतपूर्व्यादैस्तु नित्यस्तथा सति॥ नेदमदसोरकोः॥ इमौ द्वौ प्रतिषेधावुच्येते उभौ शक्याववक्तुम्। कथम्। एवं वक्ष्यामि इदमदसोः कादिति। तन्नियमार्थं भविष्यति इदमदसोः कादेव नान्यत इति॥ टाङ्सिङसाम्॥ किमर्थमिनादेश उच्यते। न नादेश एवोच्येत। का रूपसिद्धिः। वृक्षेण। प्लक्षेण। एत्वे योगविभागः करिष्यते। कथम्। इदमस्ति बहुवचने झल्येत्। ओसि च। ततः आङि च। आङि च परतो ऽ त एत्वं भवति वृक्षेण। प्लक्षेण। ततः आपः। संबुद्धौ च। आङि च ओसि चेति। नैवं शक्यम्। इह हि अनेनेति इदम्लोपः प्रसज्यते। झलि लोपः करिष्यते। न शक्यो झलि लोपः कर्तुम्। इह हि दोषः स्यात्।

दमनाश्रित्य चोदितमिति तदनुसारेणैव सिद्धान्तवादी परिहरति। ऐस्तु नित्य इति॥ टाङ्सिङसाम्॥ आङि चेति। स्थानिवद्भावान्ना
देश एत्वं विज्ञायते। अनेनेति। तस्य हलादित्वाल्लोपे सत्येनेति प्राप्नोति। झलि लोप इति। हलि लोप इत्यपनीय झलि लोप इति- राम:
सूत्रं कर्तव्यम्। नकारस्तु झल् न भवतीति लोपाभावः। ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयेति। इदमश्चतुर्थ्येकवचनस्य सुपां सुलुगिति यादेशः। तस्याश्रलादित्वादिदंरूपलोपप्रसङ्गादलिलोप इति वक्तव्यं तथा चानेनेति
न सिध्यति। एवं तर्हीति। ।नश्च आघनापूतस्मिन्परतइदमोनादेशइतिसूत्रार्थ आश्रीयते। लुप्तनिर्दिष्ट इति। निर्दिश्यलुप्तइ
त्यर्थः। यद्येवं नलोपस्यासिद्धत्वाद्दीर्घत्वं प्राप्नोति यथा राजेति। नैष दोषः। छन्दोवत्सूत्राणि भवन्ति सुपां सुलुगिति लुकि कृते न लुम
ताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद्दीर्घत्वाभावः। सौत्र इति। सूत्रे कृतः सौत्रः कृत लब्धेत्यण्। अकारोच्चारणसामर्थ्यादिति। अन्य
थानकार एव विधीयेत। आदेः परस्येत्यादेर्नकारे विहिते संयोगान्तलोपे च वृक्ष इति सिध्यति। तदेवं भाष्यकारेणनादेशोऽदादेशश्च

अयाविष्टेति। एवं तर्हि श्नन्नलोपापवादो विज्ञास्यते। कथम्। एवं वक्ष्यामि। अनूने च आपिचेति। तन्न कारग्रहणं
कर्तव्यम्। न कर्तव्यम्। क्रियते न्यास एव। लुप्तनिर्दिष्टो नकारः। यद्येवं नोपधाया इति दीर्घत्वं प्राप्नोति। सौत्रो निर्दे
शः। अथवा नपुंसकनिर्देशः करिष्यते। अथ किमर्थमादित्युच्यते। न अदेवोच्येत। का रूपसिद्धिः। वृक्षात्। प्लक्षात्।
सवर्णदीर्घत्वेन सिद्धम्। न सिध्यति। अतो गुणे पररूपत्वं प्राप्नोति। अकारोच्चारणसामर्थ्यान्न भविष्यति। यदि प्राप्नु
वन्विधिरुच्चारणसामर्थ्याद्बाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति। यं विधिं प्रत्यकारोच्चारणमनर्थकं स विधिर्बाध्य
ते। यस्य तु विधेर्निमित्तमेव नासौ बाध्यते। पररूपं प्रत्यकारोच्चारणमनर्थकं सवर्णदीर्घस्य पुनर्निमित्तमेव। ङेर्यः॥ कि
मिदं चतुर्थ्येकवचनस्य ग्रहणमाहोस्वित्सप्तम्येकवचनस्य। कुतः संदेहः। समानो निर्देशः। चतुर्थ्येकवचनस्य ग्र
हणं कथं ज्ञायते।

व्यवस्थापितः। अन्ये त्वतिजरसिनाऽतिजरसादिति सिद्धये इन आच्च विहितावित्याहुः सन्निपातपरिभाषाया अनित्यत्वाज्जरसादेशं वदन्तः
। भाष्यकारस्तु सन्निपातपरिभाषामाश्रित्य जरसादेशमनभ्युपयन्नतिजरेणातिजरादिति भाव्यमिति मत्वा गौरवमुद्भावितवान्॥ ङे
र्यः॥ कुतः संदेह इति। प्रयोगे वृक्षायेत्यादौ चतुर्थ्यर्थावगमादयुक्तः संदेह इति भावः। इतरो लक्षणमात्रशरणो भूत्वाह। समानो-
निर्देश इति।
॥

CC-0. In Public Domain. Digitization by eGangotri

मा॰कै॰ लक्षणप्रतिपदोक्तयोरिति। चतुर्थ्येकवचनस्य ङे इति रूपं प्रतिपदोक्तम्। सप्तम्येकवचनस्य तु ङेर्ङिन्तीति गुणे कृते लाक्षणिकं रू- ७११
५६ पम्। इहापि तर्हीति। ङेरिति षष्ठ्यन्तं रूपमुपात्तं न त्वोभयोरपि लाक्षणिकमिति परिभाषाया अयमविषयः। अथ प्रत्यया त्पूर्वस्य भा
गस्य लाक्षणिकत्वप्रतिपदोक्तत्वसंभवापेक्षा परिभाषा प्रवर्तिस्तदाऽन्यत्रापि प्रवर्तेत। एवं तर्हीति। लिङ्गदर्शनं चास्ति। तस्मै प्रभव
ति संतापादिभ्यः। तदस्यां प्रहरणमिति क्रीडायां णः इति॥ सर्वनाम्नः स्मै॥ अष्टए कादिष्टत्वादिति। लोकेऽर्थप्रतिपादनाय वाक्यमु-

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। इहापि तर्हि चतुर्थ्येकवचनस्य ग्रहणं स्यात्। ङेराम्नद्याम्नीभ्यः। एवं तर्हि
व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमिति। इह चतुर्थ्येकवचनस्य ग्रहणं व्याख्यास्यामस्तत्र सप्तम्येक
वचनस्येति॥ ॥सर्वनाम्नः स्मै॥ ॥अष्टएकादिष्टत्वात्स्मायादीनामुपसंख्यानम्। अष्टएकादिष्टत्वात्स्मायादीनामुप
संख्यानं कर्तव्यम्। अयो अत्रास्मै। अयो अत्रास्मात्। अयो अत्रास्मिन्। एकादेशे कृते अत इति स्मायादयो न प्राप्नुव
न्ति। किं पुनः कारणम्। एकादेशस्तावद्भवति न पुनः स्मायादयः। न परत्वात्स्मायादिभिर्भवितव्यम्। न भवितव्यम्।
किं कारणम्। नित्यत्वादेकादेशः॥ नित्य एकादेशः॥ कृतेष्वपि स्मायादिषु प्राप्नोत्यकृतेष्वपि। नित्यत्वादेकादेशे कृतेऽ
त इति स्मायादयो न प्राप्नुवन्ति। किमुच्यते अष्ट इति। नाद्यापि कर्तव्यम्। अत्रास्मै। अत्रास्मात्। अत्रास्मिन्निति। एका
देशे कृतेऽत इति स्मायादयो न प्राप्नुवन्ति। आनुपूर्व्यात्सिद्धमेतत्। नात्राकृतेषु स्मायादिषु हलादिर्विभक्तिरस्ति हलादौ
चेदिदूपलोपः। न चाकृते इदूपलोपे एकादेशः प्राप्नोति। तदा आनुपूर्व्यात्सिद्धम्।

चार्यते तदेव व्याकरणेऽपि विभज्यान्वाख्यायते। ननु च अत्र अए इति स्थिते नित्यत्वादेकादेशः प्राप्नोति तस्मिन्कृतेऽदन्तत्वाभावा राम॰
दूर्णविधावन्तादिवद्भावाभावान्नाङ्ग्यानतिदेशात्स्मायः च सिद्धिरिति भावः। आनुपूर्व्येति। अत्र इदम् ए इति स्थिते त्यदा ५६
द्यत्वे कृते स्मायादयः। ततो नित्यत्वादाद्गुणं बाधित्वा इदूपलोपे कृते सवर्णदीर्घत्वेन रूपं सिध्यतीत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवेति। पदद्वयाश्रयत्वादेकादेशो बहिरङ्गः। एकपदाश्रयत्वात्स्यायादयोऽन्तरङ्गाः॥ जसः शी॥ शीभावशिभावयोः क्वचिद्रूपाभेदं दृष्ट्वा प्रश्नः। किमर्थमिति॥ औङ आपः॥ किमर्थ इति। औङ इति भूतानुवादः। न क्वचिदौङिति रूपं विज्ञातमभूत्तस्य च भूतवदुपादाने किं प्रयोजनमिति प्रश्नः। किमर्थ इति। औ इत्युच्यमान इति। निरनुबन्धकपरिभाषयेति भावः। यद्यपि टकारः प्रत्याहारार्थत्वात्समुदायानुबन्धस्तथाप्यनेकान्ता अनुबन्धा इति दर्शने एकान्ता इति दर्शने वा अवयवावयवस्यापि समुदायावयवत्वदर्शनात्प्रत्य

तत्र सुपसंख्यानं कर्तव्यम्। न वा बहिरङ्गलक्षणत्वात्। न वा कर्तव्यम्। किं कारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गलक्षण एकादेशः। अन्तरङ्गाः स्यायादयः। असिद्धं बहिरङ्गमन्तरङ्गे॥ ॥जसः शी॥ ॥जश्शसोः शिः॥ ॥ किमर्थं शीभावः शिभावश्चोच्यते। न शिभाव एवोच्येत। का रूपसिद्धिः। ते। ये। के। आद्गुणेन सिद्धम्। नैवं शक्यम्। इह हि त्रपुणी। जतुनी। दीर्घश्रवणं न स्यात्। एवं तर्हि शीभाव एवोच्येत। नैवं शक्यम्। इह हि कुण्डानि वनानीति ह्रस्वस्य श्रवणं न प्रसज्येत। तस्माच्छीभावः शिभावश्च॥ ॥औङ आपः॥ ॥किमर्थोऽङ्कारः। सामान्यग्रहणार्थः। औ इत्युच्यमाने प्रथमाद्विवचनस्यैव स्यात्। अथापि औङित्युच्यते। एवमपि द्वितीयाद्विवचनस्यैव स्यात्। अस्ति प्रयोजनमेतत्। किं तर्हीति। ङित्कार्यं तु प्राप्नोति। खट्वे। माले। याडापः इति याट् प्राप्नोति। नैष दोषः। नैवं विज्ञायते ङकार इत् यस्य सोऽयं ङित् ङिति ङितीति। कथं तर्हि। ङकार एव इत् ङित् ङिति ङितीति। एवं तर्हि वर्णग्रहणमिदं भवति। वर्णग्रहणेषु चैतद्भवति यस्मिन्विधिस्तदादावल्ग्रहण इति। न दोषो भवति।

यस्याप्यनुबन्धः स्यात्प्रयोजनाभावात्तथाप्यनुबन्धो न भविष्यतीति चेदिह तस्य ग्रहणं माभूदिति प्रयोजनं स्यात्। यद्येवमौङ इत्युच्यमाने तदनुबन्धकग्रहणे नातदनुबन्धकस्येति द्वितीयाद्विवचनग्रहणं न प्राप्नोति। ङकारोच्चारणसामर्थ्याद्भविष्यतीत्यदोषः। ङित्कार्यं त्विति। औङ इति वचनात्प्रथमाद्वितीयाद्विवचनयोरौङो विधायकं वाक्यमनुमीयत इत्युपदेशेऽन्त्यत्वान्ङकारस्येत्संज्ञायां सत्यां ङित्कार्यप्रसङ्गः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा॰ दी॰ अथवेति। ओङ् इति वर्णमात्रं निर्दिश्यते ङकारस्तु संदेहार्थो नानुबन्धार्थः। ऋदोरबिति यथा दकारः। अङ्गाक्षिप्तश्च प्रत्यय औ ७११
५२ कारेणाविशेष्यत इति ओकारान्तस्य शीभावो विधीयमानोन्तवद्भावात्केवलस्याप्योकारस्य प्रवर्तते। प्रत्ययस्य चानुबन्धमा
नाभावाभ्यां निरनुबन्धकपरिभाषाव्यवस्थां करोति नवर्णस्य। अथवेति। पूर्वाचार्यैर्ह्वे अपि द्विवचने ङितीपठिते। न चेह काचि
दप्यौङ् प्रत्ययोस्ति। सामान्यग्रहणार्थं च पूर्वसूत्रनिर्देशस्तेनयः पूर्वसूत्रे औङ् तस्य ग्रहणं भवतीति प्रथमाद्वितीयाद्विव
चनयोर्ग्रहणसिद्धिः। वर्णग्रहणमिति। औकारो वर्ण एव निर्दिष्टो न प्रत्यय इत्यर्थः। तेन ङित्वेन दोष इति। ङित्वे सति यो दोषः स ना
स्ति ङित्त्वस्यैवाभावादित्यर्थः॥ अष्टाभ्य औश्॥ औशश्चाविति। औशादेशो नाप्राप्ते लुक्यारभ्यमाणो विशेषाभावात्सर्वस्य लुको बा-

अथवा वर्णग्रहणमिदं भवति। न चैतद्वर्णग्रहणेषु भवति। अननुबन्धकग्रहणेन सानुबन्धकस्येति। अथवा पूर्व
सूत्रनिर्देशो यम्। पूर्वसूत्रे पुनश्च येऽनुबन्धा न तैरिह कार्याणि क्रियन्ते। औकारो यं शीविधौ ङिद्गृहीतो ङित्त्वास्माकं ना
स्ति कोयं प्रकारः। सामान्यार्थस्तस्य चासञ्जने स्मिन् ङित्कार्यं तथ्यं प्रसक्तं स दोषः॥ ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णोय
स्यान्तत्त्व विद्यात्तदादेः। वर्णग्रहणं यं तेन ङित्त्वेन दोषो निर्देशो यं पूर्वसूत्रेणवा स्यात्॥ ॥अष्टाभ्य औश्॥ औशद्यौ॥ औ
शद्याविति वक्तव्यम्। किमिदमद्याविति। अनुत्तरपद इति। किं प्रयोजनम्। इह माभूत्। अष्टपुत्रः। अष्टभार्यः। अ
सुलुक्तत्र। असत्यत्रौश्त्वं लुग्भविष्यति। षड्भ्योप्येवं प्रसज्यते। इहापि तर्हि प्राप्नोति। अष्टौ तिष्ठन्ति। अ[illegible]पश्येति।

धकः प्राप्नोतीति भावः। इतरो येन नाप्राप्तिन्यायेन षड्भ्यो लुगित्यस्यैवायमपवादः नसुपो धातुप्रातिपदिकयोरित्यस्यापीति म
त्वाह। स्त्विति। भवत्वौशादेशस्तस्य लुग्भविष्यतीत्यर्थः। एतच्चौशादेशप्रवृत्तिमभ्युपगम्योच्यते। नित्यत्वात्पूर्वमेव लुका भाव्य
म्। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति वा। इतरो लुको विशेषमपश्यन्नन्यद्यपवादे प्रवृत्ते उत्सर्गः प्रवर्तते तदानि प्रस एमः
ङ्ग इत्याह। षड्भ्य इति। सूत्रैकदेशानुकरणमेतत्। षड्भ्यो लुगित्ययमपौत्रो लुक् प्राप्नोति। अथ विधानसामर्थ्यान्न भवति त १८
दाष्टपुत्र इत्यत्रापि न प्राप्नोतीत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरेयेन नाप्राप्तेतस्य बाधनमित्याश्रित्याह। अपवाद इति। षड्भ्यो लुगिति सर्वत्र प्राप्नोतीति स एवौशा बाध्यते सुपो धातुप्राति
पदिकयोरित्ययं तु क्वचित् प्राप्नोतीति तं प्रत्यस्य बाधकत्वायोगादन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति पूर्वमेव लुक्
प्रवर्तते। यो वा तस्मादिति। औशः षड्भ्यो लुगित्ययमनन्तरः। द्वितीयाध्यायविहितस्तु व्यवहितः। ननु मध्येपवादाद्द्वितीयाध्यायविहितस्यैव लुको बाधः प्राप्नोति। नैष दोषः। यत्र द्वावपि व्यवहितौ पूर्वोत्तरौ तत्र पूर्वानुभवाहितसंस्कारोपज
नितस्य तु पारूढस्य पूर्वस्य युक्तो बाधः। इह त्वनेकाध्यायव्यवहितो द्वितीयाध्यायविहितो लुङ् महता यत्नेन स्मरणीयो
नन्तरस्त्वनुभवनीय इति स एव बाध्यते। अथवा सत्यामसत्यां चोपलब्धौ प्रत्यासत्त्याऽनन्तरस्यैव बाधेन भाव्यम्। एतच्च लु

अपवादः॥ अपवादत्वादत्रौश्त्वं लुकं बाधिष्यते। इहापि तर्हि बाधेत। अष्टपुत्रः। अष्टभार्यः॥ यस्य विषये॥ यस्य
लुको विषये औश्त्वं तस्यापवादः॥ यो वा तस्मादनन्तरः॥ अथवाऽनन्तरस्य लुको बाधकं भविष्यति। कुत एतत्।
अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। अथेह कस्मान्न भवत्यौश्त्वम्। अष्टतिष्ठन्ति अष्टपश्येति॥ आत्वं तु य
त्र तत्रौश्त्वम्॥ यत्रैवात्वं तत्रैवौश्त्वेन भवितव्यम्। कुत एतत्॥ तथा ह्यस्य ग्रहः कृतः॥ तथा ह्यस्यात्वभूतस्य ग्रहणं
क्रियते अष्टाभ्य इति। ननु च नित्यमात्वम्। एतदेव ज्ञापयत्याचार्यः। विभाषा आत्वमिति। यदयमात्वभूतस्य ग्र
हणं करोति अष्टाभ्य इति। इतरथा अष्टन इत्येव ब्रूयात्। औशश्चावश्यं लुक्तत्र षड्भ्योप्येवं प्रसज्यते।

कः समकक्ष्यत्वमभ्युपगम्योक्तम्। भिन्नकक्ष्यौ त्वितौ लुकौ। एकस्य सर्वत्र प्राप्त्याऽपरस्य क्वचित् प्राप्त्या। अथेहेति। अष्टाभ्य इति
विभक्तौ लक्षणवशादाकारेण निर्दिष्टौ शक्तौ औशं विषयविशेषे व्यवस्थापयितुम्। आत्वं तु यत्रेति। कृताकारस्यानुकरणमष्टा
शब्दः। ननु चेति। लक्षणवशाद्विभक्तावात्वं विधाय निर्देशः कृत इति चोद्य काशयः। एतदेवेति। लाघवार्थमष्टन इति वक्त
व्ये कृतात्वस्येदमनुकरणम्। तस्य चैतत्प्रयोजनं कृतात्वाद्यथा स्यादकृतात्वान्मा भूदिति। यदि च नित्यमात्वं स्यात्तदा व्यवच्छेद्या
भावात्कृतात्वानुकरणमनर्थकं स्यात्तस्मात्कृतात्वानुकरणनिर्देश आत्वविकल्पस्य ज्ञापकः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वमोरिति। उत्तरसूत्रोपस्थाप्यमानार्थसंग्रहः॥ स्वमोर्नपुंसकात्॥ नदिति। तदोःसःसाविति सत्वमप्यत्र प्राप्नोति। नित्यो लुगिति
।अत्वं तु लुकि कृते न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद्धि मत्त्वभावान्न प्राप्नोतीत्यनित्यम्। अनित्यो लुगिति। यस्य लक्षणान्त
रेण निमित्तं विहन्यते न तदनित्यमित्येतत्तु पाक्षिकम्। यदा द्वयोर्लक्षणयोः संप्रधारणं क्रियते तदा यल्लक्षणप्रवृत्तावपि यस्य द्वितीयस्य ल
क्षणस्य प्रवृत्तिर्व्याघातो नास्ति तत्प्रति न तस्य दौर्बल्यं लक्षणान्तरेण चैतत्प्रवृत्तिनिवारणात्। यथा वालिसुग्रीवयोर्युद्धे भगवता रा
मेण वालिनो वधेपि न सुग्रीवापेक्षं दौर्बल्य मभिदधाति सूरमोनिनः। एतद्दर्शनसंश्रयेणोच्यते। यस्य च लक्षणान्तरेणेति।
यदा त्वेष न्याय आश्रीयते लक्षणान्तरप्रवृत्तिनिमित्तमुपसंहरत् लक्षणं बलवद्भवति इतरत्तु तदुपसंहृतनिमित्तं लक्षणान्त

अपवादो यस्य दिषये यो वा तस्मादनन्तरः॥ आत्वं हि यत्र तत्रोक्तं तथा ह्यस्य ग्रहः कृतः। स्वमोर्लुक् च त्यदा
दीनां कृते ह्यत्वे न लुग्भवेत्॥ स्वमोर्नपुंसकात्॥ स्वमोर्लुक् त्यदादिभ्यश्चेति वक्तव्यम्। इहापि यथा स्यात्। त
द्ब्राह्मणकुलमिति। किं पुनः कारणं न सिध्यति॥ कृते ह्यत्वे न लुग्भवेत्॥ अत्वे कृते लुङ् न प्राप्नोति। इदमिह
संप्रधार्यम्। अत्वं क्रियतां लुगिति। किमत्र कर्तव्यम्। परत्वादत्वम्। नित्यो लुक्। कृतेप्यत्वे प्राप्नोत्यकृते
पि। अनित्यो लुक्। न हि कृते अत्वे प्राप्नोति। अतो मित्यम्भावेन भवितव्यम्। तस्मात्त्यदादिभ्यश्चेति वक्तव्यम्।
इदं विचार्यते। शिशीलुङ्लुग्विधिषु नपुंसकग्रहणं शब्दग्रहणं वा स्यादर्थग्रहणं वेति।

रोपणादिप्रवृत्तिविघातं दुर्बलमेव। यथा च भगवद्वासुदेवसहायत्वात्पाण्डवा बलिनो दुर्बलान्धार्तराष्ट्रान् विजिग्यिरे तदानास्ते
व यस्य च लक्षणान्तरेणेति। केचित्तु अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इत्यत्रापि ग्रहणं नित्यानां च परेषां च लुका बाधन-
मिच्छन्तस्तदा यदत्वं लुका बाध्यत इत्याहुः। तथा चोच्यते। सर्वविधिभ्यो लुग्विधिर्बलवानिति। शिशीति। अङ्गस्येत्यनुवर्तनादङ्गस्य
य ओङ् नपुंसकान्त्यरस्तस्य शीति विज्ञायमाने शब्दग्रहणं भवति। यदा त्वङ्गादिति विभक्तिविपरिणाम आश्रीयते नपुंसकेन चा-
ङ्गं विशेष्यते नपुंसकान्तादङ्गान्त्यरस्येति तदापि शब्दग्रहणम्। यदा तु नपुंसकार्थो विहित इत्याश्रीयते प्रधानं वा नपुंसकमङ्गेन
विशेष्यते नपुंसकादङ्गान्त्यरस्येति तदार्थग्रहणं शब्दद्वारकं चार्थेन पौर्वापर्यादिकमाश्रीयते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रियसक्थ्ने ति। नपुंसकस्य झलचइत्यतो नपुंसकग्रहणमस्थ्यादिसूत्रे नपुंसकसंज्ञाशब्दनिवृत्त्यर्थमनुवर्तते। यद्यपि अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः। शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिष्विति संज्ञाशब्दानामप्रसङ्गः। तथापि न्यायानुसरणे गौरवप्रसङ्गाद् नपुंसकानुवृत्तिराश्रीयते। उत्तरार्थं चाद्ईचद्विवचनइत्यत्र नपुंसकस्येति पुंवदिति चानुवर्तते तेन छन्दसि नपुंसकस्य पुंवद्भावान्मधोर्गृह्णातीत्यादौ नुमभावसिद्धिः। सिद्धं त्विति। विषयविभागाश्रयेणाभिमतार्थसिद्धिः। शिशीलुङ्नुम्विधिषु

कस्मात्र विशेषः। शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधः॥ शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधो वक्तव्यः। बहुत्रपुः। बहुत्रपू बहुत्रपवइति। अस्तु तर्ह्यर्थग्रहणम्। यद्यर्थग्रहणं प्रियसक्थ्ना ब्राह्मणेनेत्यत्रानङ् प्राप्नोति। अस्तु तर्हि शब्दग्रहणमेव। ननु चोक्तं शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधइति॥ सिद्धं तु प्रकृतार्थविशेषणत्वात्॥ सिद्धमेतत्। कथम्। प्रकृतस्यार्थो विशेष्यते। किं च प्रकृतम्। अङ्गम्। अङ्गस्य शिशीलुङ्नुमो भवन्ति नपुंसके वर्तमानस्य। कथं प्रियसक्थ्ना ब्राह्मणेन। अस्थ्यादिषु शब्दग्रहणम्। अस्थ्यादिषु नपुंसकग्रहणं शब्दग्रहणं द्रष्टव्यम्। युक्तं पुनरिदं विचारयितुम्। नन्वनेनासंदिग्धेनार्थग्रहणेन भवितव्यम्। न हि नपुंसकं नाम शब्दोऽस्ति। किं तर्ह्युच्यतेऽस्थ्यादिषु शब्दग्रहणमिति। अत्राप्यर्थग्रहणमेव।

र्थग्रहणमस्थ्यादिषु शब्दग्रहणमित्यर्थः। अस्थ्यादिष्विति। विशेषणविशेष्यभावे कामचारात् नपुंसकलिङ्गविशिष्टास्थ्यादिभिरङ्गं विशेष्यतइति नपुंसकास्थ्याद्यन्तस्याङ्गस्य नपुंसकस्याप्यनङ् भवति। पदाङ्गाधिकारे तस्य च ग्रहणं तदुत्तरस्य पदस्य चेति वचनात् केवलानामप्यस्थ्यादीनामनङ् भवति। इदानीं भाष्यकारो विचारमेव पूर्वोक्तमाक्षिप्यमाण आह। युक्तं पुनरिति। अर्थमनपेक्ष्य शब्दग्रहणपक्षासंभवइति भावः। किं तर्ह्युच्यतइति। नैवेदं वक्तव्यमित्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्मादिदानीं न वक्तव्यमित्याह। अन्नापीति। अर्थधर्मत्वाल्लिङ्गस्य नपुंसकार्थाभिधायित्वादस्थ्यादयो नपुंसकशब्देनाभिधीयन्त इत्यर्थग्रहणमेव भवति। तस्माद्विशेषणविशेष्यभावे कामचार एव युक्तः। ननु यथेष्टसिद्धानङ्गत्वादसंभवादेकतरपक्षग्रहणविचारः। अड्डतरादिभ्यः पञ्चभ्यः॥ अङ्गावदिति। सुस्थानिकेऽदादेशेऽयं दोषः। अमादेशे त्वदित्यानिवद्भावादमिपूर्वरूपं सिद्धमिति। सिद्धं त्विति। अनुनासिकत्वेन निर्दिष्टेन लक्ष्यते तेनोच्चारणार्थोऽकारोऽदकारमात्रं त्वादेशः। आदेः परस्येत्यनआदेर्भवति। मकारस्य तु

अत्रैतावानू संदेहः। क्व प्रकृतस्यार्थो विशेष्यते। क्व गृह्यमाणस्येति। शिशी लुङ्ग्विधिषु प्रकृतस्यार्थो विशेष्यते अस्थ्यादिषु गृह्यमाणस्य॥ अड्डतरादिभ्यः पञ्चभ्यः॥ अङ्गावे पूर्वसवर्णप्रतिषेधः॥ अङ्गावे पूर्वसवर्णस्य प्रतिषेधो वक्तव्यः। कतरत्तिष्ठति। कतरत्पश्यति। सिद्धं त्वनुनासिकोपधात्। सिद्धमेतत्। कथम्। अनुनासिकोपधोऽच्छब्दः करिष्यते॥ दुकरणं वा॥ दुकुड् तरादीनामिति वक्ष्यामि॥ डित्करणं वा॥ अथ वा डिच्छब्दः करिष्यते। सत हिडकारः कर्तव्यः। न कर्तव्यः। क्रियते न्यास एव। द्विडकारको निर्देशः। अड्डतरादिभ्यः पञ्चभ्यः। नेतराच्छन्दसि ॥इतराच्छन्दसि प्रतिषेधे एकतरात्सर्वत्र॥ इतराच्छन्दसि प्रतिषेधे एकतरात्सर्वत्रेति वक्तव्यम्। एकतरं तिष्ठति एकतरं पश्य। नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन॥ नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन। नपुंसकादेशानामवकाशः॥ त्रपु त्रपुणी त्रपूणि।

संयोगान्तलोपः। उच्चारणार्थानां त्वनुनासिकत्वप्रतिज्ञायां नु वे वा चिरिति वच्यादीनां नुम्प्रसङ्गः। एतस्मिन्पक्षे हे कतरदित्यत्र संबुद्धिलोपप्रसङ्गमत आह। दुकरणं द्वेति। कार्यिभेदाच्च दुकालुङ् बाध्यते। द्विडकारक इति। दकारस्य ष्टुत्वं स्वरूपविनाशप्रसङ्गात्। नकृतं नापि डकारस्य संयोगान्तलोपः॥ नेतरा॥ नपुंसकादेशेभ्य इति। अलिङ्गे युष्मदस्मदी इत्यनाश्रित्यायं विचारः। स्वौजसमौ लुक्शीशयः परत्वादमा बाध्यन्त इत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

युष्मदस्मद्भ्यां ङसोश्॥ किमर्थमिति। अकारस्याकारवचने प्रयोजनाभावादादेः परस्येत्यस्यानुपस्थानादलोन्त्यस्येति सकारस्याका
रः। अतो गुण इति पररूपेण सिद्धमिति भावः। इतरस्त्वकारस्याकारवचने प्रयोजनमिति मत्वाह। शित्सर्वस्येति। अन्तरेण

युष्मदस्मदोर्विभक्त्यादेशानामवकाशः। त्वं ब्राह्मणः। अहं ब्राह्मणः। युवां ब्राह्मणौ। आवां ब्राह्मणौ। यूयं ब्राह्मणाः।
वयं ब्राह्मणाः। इहोभयं प्राप्नोति। त्वं ब्राह्मणकुलम्। अहं ब्राह्मणकुलम्। युवां ब्राह्मणकुले। आवां ब्राह्मणकुले।
यूयं ब्राह्मणकुलानि। वयं ब्राह्मणकुलानि। युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन। अथेदानीं युष्मदस्म
दोर्विभक्त्यादेशेषु पुनः प्रसङ्गात् शिशीलुङ्नुम्विधयः कस्मान्न भवन्ति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधि
तमेव। युष्मदस्मद्भ्यां ङसोश्॥ किमर्थः शकारः। सर्वादेशार्थः। शित्सर्वस्येति सर्वादेशो यथा स्यात्। नैतदस्ति प्रयो
जनम्। अक्रियमाणेपि शकारेऽलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्याकारे कृते त्रयाणामकाराणामतो गुणे पररू
पत्वे सिद्धं रूपं स्यात्। तव स्वम्। मम स्वम्। यद्येतल्लभ्येत कृतं स्यात्। तत्तु न लभ्यम्। किं कारणम्। अत्र हि तस्मादि
त्युत्तरस्य आदेः परस्येत्यकारस्य प्रसज्येत। अत उत्तरं पठति। ङस आदेशे शित्करणानर्थक्यमकारस्याकारव
चनानर्थक्यात्॥ ङस आदेशे शित्करणमनर्थकम्। किं कारणम्। अकारस्याकारवचनानर्थक्यात्। अकारस्या
कारवचने प्रयोजनं नास्तीति कृत्वाऽन्तरेणापि शकारं सर्वादेशो भविष्यति॥ अर्थवत्त्वादादेशे लोपार्थम्॥ अर्थवत्त्वका
रस्याकारवचनम्। कोर्थः। आदेशे लोपार्थम्। यः सशेषे लोपः आदेशे स विज्ञायते।

पि शकारं सर्वादेशो भविष्यतीति। आद्यनुसंहाराभावे अन्त्यानुसंहारादिद्वयोरकारयोः पररूपमित्यर्थात्सर्वादेशः संपद्यते। यः सशे
षे लोप इति। अनादेशे आत्वयत्वविधानादादेशः शेषः। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कौ· ननुचेति।शेषेलोपइत्यत्रविभक्तावित्यनुवर्तते तद्विशेषणंचशेषग्रहणमित्यादेशोविभक्तिरितिविज्ञायते।नहितदादिविधिर १११
६० स्तियतआदेशादावितिविज्ञायेत।तस्मात्सत्यप्यादेशादित्वेविभक्तेरनादेशत्वान्नैवायंशेषः।ततोनास्त्यकारस्याकारवचनेप्रयो
जनम्।सर्वेसर्वपदादेशाइत्यादिविकारद्वारेणविभक्तेरेवादेशाविधीयन्तेइतिविभक्तेरेवादेशःस्यादितिशिक्षत्वंसर्वादेशार्थंक्रि
यते।सर्वपदादेशाइत्यत्रपदशब्देननसुप्तिङन्तमुच्यते।किंतर्हि।पद्यतेप्रतीयतेऽर्थोनेनेतिअन्वयव्यतिरेकाभ्यांकल्पिता–
भ्यांयस्यकल्पितार्थवत्तातदभिधीयतेतत्रानन्यार्थादकारविधानादेकदेशद्वारेणविभक्तेरेवादेशः।प्रश्लिष्टनिर्देशइति।त
तश्चाकारद्वयलक्षणःसमुदायोऽनेकाल्त्वात्सर्वादेशःप्रवर्तते।तस्मिन्प्रवृत्तेऽतोगुणइतिपररूपमितिसिद्धमिष्टम्।ङेप्रथम
योरम्।प्राधान्यलक्षणस्यप्रथमार्थस्येहासंभवात्संनिवेशापेक्षयाद्यस्यतावद्ग्रहणंविज्ञायतेतत्रविशेषज्ञानायपृच्छ

ननुचादेशोयाविभक्तिरित्येवमेतद्विज्ञायते।आदेशएषाविभक्तिः।कथम्।सर्वेसर्वपदादेशादाक्षीपुत्रस्यपाणि
नेः।एकदेशविकारेहिनित्यत्वंनोपपद्यते।तस्माच्छिक्करणम्।तस्माच्छकारःकर्तव्यः।नकर्तव्यः।क्रियतेन्यास
एव।कथम्।प्रश्लिष्टनिर्देशोयम्।अअइति।सोऽनेकाल्शित्सर्वस्येतिसर्वस्यभविष्यति॥ ॥ङेप्रथमयोरम्॥
॥प्रथमयोरित्युच्यते।कयोरिदंप्रथमयोर्ग्रहणम्।किंविभक्त्योराहोस्वित्प्रत्यययोः।विभक्त्योरित्याह।
कथंज्ञायते।

ति।कयोरिति। ॥यदिस्त्रीलिङ्गनिर्देशस्ततोविभक्त्योर्ग्रहणेनभाव्यम्।पुंल्लिङ्गेननिर्देशेतुप्रत्यययोः।तत्रयद्यन्तरङ्गंप्रा
थम्यमाश्रीयतेततःपुंल्लिङ्गेननिर्देशात्प्रत्ययग्रहणम्।वर्गस्यासमाप्तावेवप्रत्यययोःप्राथम्यसंप्रत्ययात्।अथतुसपूर्वा
याःप्रथमायाविभाषाप्रथमायाश्चद्विवचनेइत्यत्रप्रसिद्धिराश्रीयतेततःस्त्रीलिङ्गनिर्देशाद्विभक्तिग्रहणम्।प्रत्ययग्रहण
पक्षेत्वयुष्मदस्मदोःप्रातिपदिकत्वात्प्रातिपदिकप्रत्यययोःसुऔइत्यनयोर्ग्रहणेनभाव्यम्।ननुद्वयोःकथंप्राथम्यंयावता– राम:
द्यापेक्षयापरस्यद्वितीयत्वम्।नैषदोषः।राश्यपेक्षयासमुदायस्यप्राथम्याविरोधात्।प्रथमसाहचर्याद्धिद्वितीयस्यापिप्र– ६०
थमव्यपदेशः।यथार्धर्चाःपुंसिचेतिगोमयादीनामर्धर्चव्यपदेशः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अर्थरूपमिति। सत्यपि वस्तुनो लिङ्गवत्त्वे युष्मदस्मद्भ्यां न तत्प्रत्याययितुं शक्यत इत्यर्थः। युष्मदस्मदभिधेयं चार्थरूपं शब्देनोच्यते। न वस्तुरूपम्। तस्यैव वस्तुनो ब्राह्मणादिशब्दैर्लिङ्गयुक्तस्य प्रतिपादनात्। न चायं नियमः सत्त्वभूतोऽर्थोऽवश्यं लिङ्गयुक्तः प्रतीयत इति पञ्च सप्तेति लिङ्गानवगमात्। तथा च षट्संज्ञकेभ्यः स्त्रीप्रत्ययप्रतिषेधः प्रत्याख्यायते। केचिल्लिङ्गविशेषनिषेधं मन्यमाना लिङ्गं सर्वनामनपुंसकयोगं युष्मदस्मदोरिच्छन्ति। तथा च शिशीलुङ्मांयुष्मदस्मद्विभक्त्यादेशानां च विप्रतिषेधउक्तः। अन्ये तु दर्शनभेदेन शिशीलुङ्नुमां विप्रतिषेधः पुंस्त्रित्वं च लिङ्गवत्त्वापगमेन प्रदर्शितम्। सत्त्वभूतस्यार्थस्यावश्यं लिङ्गसंख्यायोगः। तथा च षट्संज्ञकेभ्यः स्त्रीप्रत्ययनिषेधः कृतः। इह त्वलिङ्गत्वेन टाप्परिहृत इति विरोधं परिहरन्ति। तस्मादिति। टाबभा

किं तर्हि। अर्थनिमित्तकेन नामशब्देन भवितव्यम्। तदेतदेवं दृश्यतामर्थरूपमेवैतदेवंजातीयकं येनात्र विशेषो न गम्यत इति। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते योऽसौ विशेषवाची शब्दः स्त्रीप्रत्ययष्टाप् शब्दस्तद सांनिध्यात्तत्र विशेषो न गम्यत इति। इहापि तस्य विशेषो गम्येत तदृषत्स्मिन्दिति। तस्मात्सुट्प्रतिषेधः॥ तस्मात्सुट्प्रतिषेधो वक्तव्यः। ससकारग्रहणं वा कर्तव्यम्। अथ क्रियमाणेऽपि ससकारग्रहणे कस्मादेवात्र सुट् न भवति। ससकारग्रहणसामर्थ्याद्भाविनः सुट आदेशो विज्ञायते॥ ॥आत औ णलः॥ ॥इह पपौ तस्थाविति। त्रीणि कार्याणि युगपत्प्राप्नुवन्ति। द्विर्वचनमेकादेश औत्वमिति। तत्र यदि सर्वेन औत्वं लभ्येत कृतं स्यात्।

वेटिलोपानाश्रयणादन्त्यलोपे सति सुटः प्राप्तस्य प्रतिषेधो विधेयः। लाघवात्सकारग्रहणं वा कर्तव्यम्॥ अथेति। आदेशप्रवृत्ति-काले संनिहित आदेशे न निवर्त्यो नान्यः। ससकारग्रहणसामर्थ्यादिति। न हि सत आदेशेन निवृत्तिः क्रियते। किं तर्हि। अत्यन्ताभावस्तस्मिन्विषये तस्यानेनोपायेनाख्यायते। शास्त्रेणानुप्रसङ्गवतो निवृत्तिराख्यायत इति भाविनः सुटो निवृत्तिः ससुट्कनिर्देशेन प्रतिपाद्यते॥ आत औ णलः। त्रीणि कार्याणीति। लित्स्वरस्तु प्रयोजनाभावान्नोपन्यस्तः। सर्वथान्तोदात्तत्वस्य सिद्धत्वात्। औत्वं लभ्येत कृतं स्यादिति। एकादेशे कृते औत्वाप्राप्तिदोषस्तावत्परिहृत इत्यभिसंधाय द्विर्वचनासिद्धावपि कृतमित्युक्तम्।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ द्वितीवचनंलभ्येतेति।एकादेशेकृतेव्यपवर्गाभावादाद्विर्वचनाप्राप्तिःसापरिहृताभवती।त्येतावताद्विर्वचनसिद्धावकृतमित्युक्तम्।पर ७११
उ॰। त्वादेकादेशइति।वर्णाश्रयत्वादन्तरङ्गत्वादपीतिद्रष्टव्यम्।नित्यएकादेशइति।यद्यप्यकृतेऔत्वेसवर्णदीर्घत्वंप्राप्नोति।कृते
तुवृद्धिःतथापिव्यक्तिभेदमनाश्रित्यैकादेशसामान्याश्रयंनित्यत्वमुच्यते।औत्वंतुकृतेएकादेशेनैवप्राप्नोतीत्यनित्यम्।अनव
काशमौत्वमिति।सावकाशस्यसवर्णदीर्घस्यबाधकमित्यर्थः।यद्यपीति।वार्णादाङ्गंबलीयइतिपूर्वंद्विर्वचनंभवति।अथाप्य
ङ्गाधिकारविहितमाङ्गमुच्यतेतथापिनदोषइतिभावः।स्थानिवद्भावादिति।द्विर्वचननिमित्तेऽचिपरतोऽजादेशःस्थानिवद्भव
तीतिसूत्रार्थमाश्रित्यैकादेशेकृतेऽच्परत्वाभावात्स्थानिवद्भावाभावआशङ्कितः।अचियोविहितोऽजादेशःसस्थानिवदिति

अथापिद्विर्वचनंलभ्येतएवमपिकृतंस्यात्।नतुनलभ्यम्।किंकारणम्।अत्रहिपरत्वादेकादेशोद्विर्वचनंबाध
ते।परत्वादौत्वम्।नित्यएकादेशःऔत्वंबाधेत।कंपुनर्भवानौत्वस्यावकाशंमत्वाहनित्यएकादेशइति।अ
नवकाशमौत्वमेकादेशंबाधिष्यते।औत्वेकृतेद्विर्वचनमेकादेशइति।यद्यपिपरत्वादेकादेशः।स्थानिवद्भावाद्
द्विर्वचनंभविष्यति॥विदेःशतुर्वसुः॥ ॥विदेर्वसोःकित्त्वम्।विदेर्वसोःकित्त्वंवक्तव्यम्।सुग्रहणेषुलिडादेशस्यापि
ग्रहणंयथास्यात्।किंकारणंनस्यात्।अननुबन्धकग्रहणेहिसानुबन्धकस्यग्रहणंनेत्येवंलिडादेशस्यनप्रा-
प्नोति।सानुबन्धकोहिसक्रियते।

सूत्रार्थाश्रयणेनतुस्थानिवद्भावउक्तः।नहिस्थानिवद्भावस्यपरभूतोऽचुनिमित्तभूतआश्रीयते।किंतर्हि।आदेशस्य।यदि
तर्हिस्थानिवद्भावाद्द्विर्वचनंततोनित्यंतदितिपूर्वमेवतेनप्रवर्त्यम्।नैतदस्ति।एकादेशोऽपिनित्योऽन्तरङ्गश्चेतिसएवपूर्वंप्र
वर्तते।क्रमप्रतिपत्त्यर्थंचानवकाशत्वमौत्वस्याश्रितम्।वृद्धिलक्षणंचैकादेशमौत्वंनबाधते नहितस्मिन्नप्राप्तऔत्वमारभ्यते।वि
देःशतुर्वसुः॥वसोःकित्त्वमिति।लिडादेशस्यकित्त्वमस्तीतितदनुरोधेनास्यकित्त्वमुच्यते।अनुबन्धान्तरेणापितस्यसानुबन्धकत्वंसं राम:
पद्यते।अननुबन्धकग्रहणइति।स्थानिवद्भावादुगित्कार्यस्यसिद्धत्वाद् उकारउच्चारणार्थोनानुबन्धइतिमन्यते।सत्यपिवास्य ६३
सानुबन्धत्वेतदनुबन्धकपरिभाषयाक्वसोरग्रहणप्रसङ्गः।परिभाषोपादानंत्वग्रहणोपलक्षणम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंपुनः कारणमिति। असंयोगाल्लिट् किदिति कित्त्वस्य सिद्धत्वाद्वसु रेव लिटो विधीयताम्। अयमिति। यथा नेरतुरित्यादौ गुणो भवति तथा वसाव पिस्यादिति तद्बाधनार्थं कित्त्वं क्रियते। एतच्च प्रयोजनोपलक्षणमिति संयोगान्तार्थमपि कित्त्वमित्याहुः। तेनाजिवानित्यत्र ञेः रेधिवानिति रधेर्नुमिति सिद्धं भवति। ननु संयोगान्तार्थत्वे कित्त्वस्य कथं प्रतिषेधविषय आरभ्यमाणो गुणो बाध्यः। उच्यते। ऋदकारान्तेभ्यः परस्य क्वसोरौपदेशिकातिदेशिककित्त्वद्वयसामर्थ्यात् क्ङिति चेति गुणनिषेधो ह्रिरुपतिष्ठते। तत्र पुनरुपस्थानं प्रतिषेधविषये गुणनिषेधं विधास्यति। केचिदाहुः। छान्दसः क्वसुः तत इच्छन्दसुभयथेति सार्वधातुकत्वाद्ङित्त्वान्नलोपस्य सिद्धत्वात्संयोगान्तार्थं कित्त्वं नोपयुज्यते। द्वि सकारक इति। वसुस इत्यादेशो निर्दिष्टः। तत्र सकारस्य रुत्वविसर्जनीयौ कृतौ ततः सकारेण सानुबन्धकत्वं वसोः संपद्यत इति वसुप्रदेशेषूभयोरविशेषेण ग्रहणं सिध्यति॥ समासेनञ्पूर्वे॥ ल्यबादेश इति। अनेकपदा

किंपुनः कारणं सानुबन्धकः क्रियते। अयमृकारान्तानां लिटि गुणः प्रतिषेधविषय आरभ्यते स पुनः कित्करणाद्बाध्यते। अतिनीवीन्। आपुपूर्वान्। निपुपूर्वोनिनि। स तर्ह्येवमर्थोनुबन्धः कर्तव्यः। न कर्तव्यः। क्रियते न्यास एव। द्विसकारको निर्देशः। विदेः शतुर्वसुस्समासेनञ्पूर्वे क्त्वो ल्यप्। समासेनञ्पूर्वे क्त्वो ल्यप्॥ ल्यबादेश उपदेशवचनम्॥ ल्यबादेश उपदेशिवद्भावो वक्तव्यः। उपदेशावस्थायां ल्यब्भवतीति वक्तव्यम्।

अयं समासनिमित्तो ल्यबादेशो बहिरङ्गो हि त्वादयस्त्वेकपदविषयप्रकृतिप्रत्ययापेक्षा अन्तरङ्गा इति ते पूर्वं प्राप्नुवन्तीति भावः। तत्रोपदेशे समास इति विरोधात्समासो विषयत्वेनाश्रीयते। समासे विषये कृत एव तस्मिन् क्त्व उपदेशावस्थायामेव ल्यप् भवति तस्मिन् कृते नत्विधावितिस्थानिवत्त्वनिषेधाद्धित्वाद्यभावः। पूर्वोक्तविरोधपरिहाराय भाष्यकारो तिदेशं व्याचष्टे। उपदेशिवद्भावो वक्तव्य इति। उपदेशावस्थायामिति। अत्राप्युपमानोपमेयसंबन्धो द्रष्टव्यः। कृतेपि समासे ल्यब्भवन्नुपदेशिवद्भवति। अकृतेषु हित्वादिषु भवतीत्यर्थः। अथवा समास इति विषयसप्तम्याश्रयमेव भाष्यमुपदेशावस्थायां ल्यब्भवतीत्युपदेशिवद्भावो वक्तव्य इत्येतत्तु वस्तुव्याख्यानम्। उपदेशावस्थायां ल्यब्भवन्नन्यैरुपदेशिभिस्तुल्यं भवतीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ कै॰ अनादिष्टार्थमिति। आदेशा आदिष्टं तस्याभावोऽनादिष्टमित्यव्ययीभावः। प्रखन्येति। ये विभाषेति विकल्पेनात्वमिष्यते। जनसनख ७११
६४ नां सञ्झलोरित्यनेन तु ल्यबादेशात्पूर्वं नित्यं प्राप्नोति। प्रदीव्येति। पूर्वं कृते हलि निर्दिश्यमानस्यादेशा भवन्तीति केवलस्य वलोल्यपि प्राप्तेरूठः
प्रवर्त्तनं नेति। अथापि कथंचित्सेट्कस्य ल्यप् स्यात्तथापि स्थानिवद्भावात् क्त्वा सेडिति कित्त्वप्रतिषेधाद्गुणः प्रसज्येत दीर्घत्वस्यासि
द्धत्वात् परत्वादिति। इष्टत्वादित्यर्थः। इतरस्त्विष्टानिष्टत्वविभागो न ज्ञायत इति व्यवस्थाशब्द एवानेन परशब्दः प्रयुक्त इति म
त्वाह। सन्ति चेति। बहिरङ्गलक्षणत्वादिति। समासापेक्षया बहिरङ्गं शास्त्रमस्येति समासः। अथवा बहिरङ्गः समासो लक्षणं नि
मित्तमस्येत्यर्थः। यदयमिति। निकितीत्येव जग्धिभावस्य ल्यबादेशात्प्रागेव सिद्धत्वात् ल्यब्ग्रहणं यथोक्तमर्थं ज्ञापयति। स्था

किंप्रयोजनम्। अनादिष्टार्थम्। अकृते ह्यादेशे ल्यब्यथा स्यात्। के पुनरादेशा उपदेशिवद्वचनं प्रयोजयन्ति। हि
त्वदत्वात्वेत्वदीर्घत्वम्। ऊडिटः। हित्वम्। हित्वा। प्रधाय। हित्वम्। दत्वम्। दत्वा। प्रदाय। दत्वम्। आत्वम्। खात्वा। प्र-
खन्य। आत्वम्। इत्वम्। स्थित्वा। प्रस्थाय। इत्वम्। ईत्वम्। पीत्वा। प्रपाय। ईत्वम्। दीर्घत्वम्। शान्त्वा। प्रशम्य। दीर्घत्वम्। श
त्वम्। पृष्ट्वा। आपृच्छ्य। शत्वम्। ऊठ्। द्यूत्वा। प्रदीव्य। ऊठ्। इट्। देवित्वा। प्रदीव्य। इट्। किं पुनः कारणमादेशास्तावद्भवन्ति
न पुनर्ल्यप्। नित्यत्वात्परत्वाच्च ल्यपा भवितव्यम्। सन्ति चैवात्र केचित्परे आदेशाः। अपि च बहिरङ्गलक्षणत्वात्। बहिर
ङ्गो ल्यप्। अन्तरङ्गा आदेशाः। असिद्धं बहिरङ्गमन्तरङ्गे। सतर्ह्युपदेशिवद्भावो वक्तव्यः। न वक्तव्यः। आचार्यप्रवृत्ति
र्ज्ञापयति अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधत इति। यदयमदो जग्धिर्ल्यप्ति किति। ति किति इत्येव सिद्धे ल्यब्ग्र
हणं करोति॥ स्नात्वाकालकादिषु प्रतिषेधः॥ स्नात्वाकालकादिषु च प्रतिषेधो वक्तव्यः। स्नात्वाकालकः। पीत्वास्थिर
कः। भुक्त्वासुहितक इति॥

निवृत्तसूत्रे सुप्रदलदोरनादेश इत्यनादेशग्रहणं तत्स्थानापत्त्या तद्धर्मलाभस्य स्वरूपविधिना निरस्तस्य ज्ञापकमुक्तम्॥ -
ल्यब्ग्रहणं त्वलाश्रयेषु कार्येषु तद्धर्मत्वाभावाभावस्य। यं यमर्थमन्तरेणास्यानुपपत्तिस्तस्य सर्वस्य ज्ञापकं तद्भवतीत्यने रामः
कोऽप्यर्थो ल्यब्ग्रहणेन ज्ञाप्यत इति विरोधाभावः। स्नात्वाकालकादिष्विति। मयूरव्यंसकादिषु समासप्रकरणात्समासार्थ ६४
वैषां पाठः। तत्र समासेन न्पूर्वे योऽवस्थितः क्त्वाप्रत्ययस्तस्य ल्यब्विधीयमानोऽत्रापि प्राप्नोति। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यत्रापीति। प्रसिद्धिमाह। अस्तिकारणमिति। यस्मात्कारणात्तत्र विभक्तिग्रहणं तदिह नास्ति। नचाजादी इति। प्रथमयोर्वि
शेष्यत्वमचीत्यस्य विशेषणात्वमिति भावः। नचाजादित्वं सोः संभवतीति सामर्थ्यात्तत्र विभक्तिग्रहणं विज्ञायते। अजादी यौ प्रथमा
विति। अजादी विशेष्यौ प्राथम्यं विशेषणं तेनचाजादित्वाभावात्तुः परिहृतः औजसोः प्राथम्यं न विहन्ति। यथा ब्राह्मणपङ्क्तौ ब्राह्म
णौ प्रथमावानयेत्युक्ते अब्राह्मणः प्रथमोपि चोदनायामनन्तर्भावाद्ब्राह्मणयोर्न प्रथमव्यपदेशविघातहेतुः। अजादीनांवेति।
अचीत्यनुवृत्तं निर्धारणसप्तम्यन्तं विज्ञायते॥ यद्ययं शसो नेति। ङे प्रथमयोरित्यम्भावस्यम्प्राप्तस्य शसो नेति प्रतिषेधः क्रियते। ननो

अन्यत्रापि हि प्रथमयोर्ग्रहणे विभक्त्योर्ग्रहणं विज्ञायते न प्रत्यययोः। कान्यत्र। प्रथमयोः पूर्वसवर्ण इति। अ
स्ति कारणं येन तत्र विभक्त्योर्ग्रहणं विज्ञायते। किंकारणम्। अचीति वर्तते। नचाजादी प्रथमौ प्रत्ययौ स्तः। ननु चै
वं विज्ञायते। अजादी यौ प्रथमौ अजादीनां वा यौ प्रथमाविति। यत्तर्हि तस्माच्छसो नः पुंसीत्यनुक्रान्तं पूर्वसव
र्णं प्रतिनिर्दिशति तज्ज्ञापयत्याचार्यो विभक्त्योर्ग्रहणमिति। इहाप्याचार्यप्रवृत्तिर्ज्ञापयति विभक्त्योर्ग्रहण
मिति। यद्ययं शसो नेति प्रतिषेधं शास्ति नैष प्रतिषेधः। नत्वमेतद्विधीयते। सिद्धमत्र नत्वं तस्माच्छसो नः पुंसी
ति। यत्र तेन न सिध्यति। तदर्थम्। क्व च तेन न सिध्यति। स्त्रियां नपुंसके च। युष्मान्ब्राह्मणीः पश्य। अस्मान्ब्राह्मणीः
पश्य। युष्मान्ब्राह्मणकुलानि पश्य। अस्मान्ब्राह्मणकुलानि पश्येति।

यो चीति यत्वे प्राप्ते द्वितीयायां चेत्यात्वे कृते प्रथमयोः पूर्वसवर्ण इति पूर्वसवर्णे तस्माच्छसो नः पुंसीति नत्वे युष्मानस्मानिति रूपं सि
ध्यति। इतरः प्रतिषेध आश्रीयमाणे पुंस्येव नत्वं स्यात् न स्त्रीनपुंसकयोरिति मत्वाह। नैष प्रतिषेध इति। आदेः परस्येत्यादेर्नका
रे कृते सकारस्य संयोगान्तत्वाल्लोपः। एतच्चाभ्युपगम्य लिङ्गवचमुक्तम्।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· ६१ यत्तर्हीति। यदिप्रत्यययोरिदं ग्रहणं स्यात्ततो द्वितीयायामनादेशत्वात्तस्यामात्वं सिद्धमेवेति द्वितीयायां चेत्यात्वविधानमनर्थकं स्यात्। ननु च योचीति यत्वे प्राप्ते तद्बाधनार्थमात्वविधानं स्यादिति कथं ज्ञापकम्। उच्यते। यद्येतावत्प्रयोजनं स्याद्योच्यनमोटोरिति ब्रूयात्। यत्वे प्रतिषिद्धे आत्वस्याभावात्। युष्मानस्मानित्यत्रापि शसो नकारे कृते शेषे लोपे सुपि चेति दीर्घत्वं भविष्यति॥ भ्यसो भ्यम्॥ किमयमिति॥ संहितायां निर्देशस्य साम्याद्विचारः। चत्वारोत्र पक्षाः संभवन्ति। भ्यमादेशः शेषेलोपोन्त्यलोपः। भ्यमादेशः शेषेलोपष्टिलोपः। अभ्यमादेशः शेषेलोपोन्त्यलोपः। अभ्यमादेशः शेषेलोपष्टिलोप इति। तत्र यदा भ्यमादेशः तदा शेषेलोपोन्त्यलोप एवाश्रयितव्यः टिलोपे रूपासिद्धिप्रसङ्गात्। अभ्यमादेशे शेषेलोपेन्त्यलोपे च द्वयोरकारयोः पररूपमेकादेश उदात्तेनोदात्त इत्युदात्तत्वं भवति। युष्मदस्मदोः प्रातिपदिकस्वरेण प्रत्ययस्वरेण वान्तोदात्तत्वात्। टिलोपपक्षे चाकारोच्चारणम ७।२१

यत्तर्हि युष्मदस्मदोरनादेशे द्वितीयायां चेत्याह। तज्ज्ञापयत्याचार्यो विभक्त्योर्ग्रहणमिति॥ भ्यसोभ्यम्॥ किमयं भ्यम्शब्द आहोस्विदभ्यम्शब्दः। कुतः संदेहः। समानो निर्देशः। किं चातः। यदि तावद्भ्यम्शब्दः शेषेलोपश्चान्त्यस्य एत्वं प्राप्नोति। अथाभ्यम्शब्दः शेषेलोपश्च टिलोपः। उदात्तनिवृत्तिस्वरः प्राप्नोति। यथेच्छसि तथास्तु। अस्तु तावद्भ्यम्शब्दः शेषेलोपश्चान्त्यस्य। ननु चोक्तमेत्वं प्राप्नोतीति। नैष दोषः। अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति। अथवा पुनरस्तु अभ्यम्शब्दः शेषेलोपष्टिलोपः। ननु चोक्तमुदात्तनिवृत्तिस्वरः प्राप्नोतीति। नैष दोषः। उक्तमेतद् दाद्यौ सिद्धमिति॥

र्थवद् अन्त्यलोपेप्येत्वनिवृत्त्यर्थमिति। अकारोच्चारणसामर्थ्यात्तस्य वर्णदीर्घत्वे न भाव्यमिति न चोदनीयम्। तदेवं द्वितीयपक्षोऽन्त्यन्तदुष्टस्तृतीयस्तु निर्दोष इति तत्परिहारेण पक्षद्वयाश्रयो भाष्ये विचारः। उदात्तनिवृत्तिस्वर इति। कर्षात्वतो घञोन्त उदात्त इत्यतोन्तग्रहणमनुदात्तस्य च यत्रोदात्तलोप इत्यत्रानुवर्तते न तस्मान्तोदात्तत्वं प्राप्नोति मध्योदात्तत्वं चेष्यते। अङ्गवृत्त राम: इति। एत्ववत्सुपि चेति दीर्घत्वमपि न भवति। आद्यौ सिद्धमिति। अन्तग्रहणं नानुवर्तते। उच्चारणक्रमप्रत्यासत्त्या चादेरेवोदा ६१ त्तत्वम्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

सामआकम्॥ किमर्थमिति। युष्मद् आमिति स्थिते आदेशे नात्र भाव्यमिति यत्वं न प्रवर्तते। आदेशश्चाशेष इति अकृते आदेशे शेष
त्वाभावाद्दोषाप्रसङ्गः। त्यदाद्यत्वमपि नास्ति द्विपर्यन्तानां विधानात् ततश्चानकारान्तत्वादादेशप्रवृत्तिकाले सुड्नास्तीति नार्थः
ससकारनिर्देशेन। कृते प्याकमादेशे शेषे लोपे टिलोपे च तथैव सुड्नास्तीति भावः। इतरः कृते आदेशे शेषे लोपे न्त्यलोपे च सुट्
प्राप्नोतीति भाविनः सुटो निवृत्त्यर्थं ससुट्कोपादानं कर्तव्यमिति मत्वाह। केनेदानीमिति। स एव परमतमाशङ्कते। आमो यमि
ति। सुड्यययमाम्भक्त इति यदि त्वं मन्यसे तन्न इदमुच्यते। साम्ग्रहणमिति। निर्दिश्यमानस्येति। यदि ससकारको न निर्दि

सामआकम्॥ किमर्थं सामः ससकारस्य ग्रहणं क्रियते। न आम आकमित्येवोच्येत। केनेदानीं ससकारस्य भवि
ष्यति। आमोयं भक्त आम्ग्रहणेन ग्राहिष्यते। अत उत्तरं पठति। साम्ग्रहणं यथा गृहीतस्यादेशवचनात्। साम्
ग्रहणं क्रियते। निर्दिश्यमानस्यादेशा भवन्तीति ससकारस्य न प्राप्नोति। इष्यते च स्यादिति। तच्चान्तरेणाय
त्नं न सिध्यतीति सामआकमेवमर्थमिदमुच्यते। न वा द्विपर्यन्तानामकारवचनादामि सकाराभावः। न वैतत्प्रयो
जनमस्ति। किं कारणम्। द्विपर्यन्तानामकारवचनात्। द्विपर्यन्तानां हि त्यदादीनामत्वमुच्यते। तस्मादामि सका
रो न भविष्यति॥ सुट्प्रतिषेधस्त्वादेशे लोपविज्ञानात्॥ सुट्प्रतिषेधस्तु वक्तव्यः। किं कारणम्। आदेशे लोपवि
ज्ञानात्। यः शेषे लोप आदेशे स विज्ञायते।

श्ये तत आदेशविधानकाले संनिहितः पश्चादन्त्यलोपे कृते प्राप्नुवन् सुडनेन निवर्त्यते। इष्यते च तन्निवृत्तिरित्येवमर्थं ससकारग्र
हणम्। अथवा त्यदाद्यत्वे कृते सुटि च निर्दिश्यमानस्यादेशा इति सुट्सहितस्य न प्राप्नोति। यस्तु निर्दिश्यते तस्य वचनसामर्थ्या
न्निर्दिष्टग्रहणपरिभाषानुपस्थानाद्व्यवहितस्याकमादेशः प्राप्नोति। ससुट्कनिर्देशात्ससुट्कस्य भवति। अत्र पक्षे आमोऽयं भक्त
आम्ग्रहणेन ग्राहीष्यत इति चोदकस्यैवमन्यः। इतरस्तु पूर्वां व्याख्यामबुध्वेतरां च दोषवतीमवगम्याह। नवेति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टिलोप इति। वक्ष्यमाणमपर्यन्तस्यान्यपेक्षया शेषे विज्ञायमाने टिरेव शेष इति तस्यैव लोपो विज्ञायते। शेष इति स्थानी-
विषयसप्तम्या निर्दिष्टः। लोपस्य चास्मिन्पक्षे उत्सर्गत्वादनादेशेऽप्यात्वयत्वविधानादादेश एव विभक्तावस्थितः। टाप्प्र-
तिषेधार्थमिति। टापोऽनुत्पत्त्यर्थमित्यर्थः। युष्मदस्मदोर्द्रव्यवाचित्वाद्द्रव्यस्य च लिङ्गसंख्यासंबन्धादन्त्यलोपे सत्यकारान्त-
त्वाट्टाप् प्राप्नोति। संनिपातपरिभाषा याश्च दोषः पठितस्य दाद्यकारस्थाविधेरिति टापि सा नाश्रीयते। अलिङ्गे इति। अभिधेय-
स्यालिङ्गत्वादलिङ्गे। शब्दशक्तिस्वाभाव्याल्लिङ्गरहित एव ताभ्यामर्थोऽभिधीयत इति तन्निवृत्तये टिलोपो नाश्रयितव्यः। योऽसौ विशे-
षवाचीति। ननु द्योतकाष्टाबादयस्तदुक्तम्। सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात्स्वार्थे टाबादय इति। नैष दोषः। इद-

न वा टिलोपवचनादादेशे टाप्प्रतिषेधार्थम्। न वा सुट्प्रतिषेधो वक्तव्यः। किं कारणम्। टिलोपवचनात्। आ-
देशे यः स शेषे लोपः स टिलोपो वक्तव्यः। किं प्रयोजनम्। टाप्प्रतिषेधार्थम्। टाप् मा भूदिति। स तर्हि टेर्लोपो व-
क्तव्यः। न वक्तव्यः। न वा लिङ्गाभावाट्टिलोपवचनानर्थक्यम्। न वा वक्तव्यम्। किं कारणम्। लिङ्गाभावात्।
अलिङ्गे युष्मदस्मदी। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। न ह्यस्ति विशेषो युष्मदस्मदोः
स्त्रियां पुंसि नपुंसके वा। अस्ति कारणं येनैतदेवं भवति। किं कारणम्। योऽसौ विशेषवाची शब्दः स्त्रीप्रत्यय-
ष्टाप्शब्दस्तत्सांनिध्यात्। अङ्ग हि भवांस्तं समुच्चारयतु गंस्यते स विशेषः। ननु च नैतेनैवं भवितव्यम्। न हि शब्द-
निमित्तकेन नामार्थेन भवितव्यम्।

मप्युक्तम्। अथवा पुनरस्तु स्त्रियामभिधेयायामिति। अथवा वचिर्द्योतने वर्तते। वाचकेन खल्वप्युत्पत्तव्यम्। वाचकश्चेत्प्रयो-
क्तव्यो वाचकश्चेत्प्रयुज्यतामित्यत्र वचिर्द्योतने प्रयुक्तः। न हि शब्दनिमित्तकेनेति। ननु शब्दनिमित्त एवार्थस्तथा चैकरूपोऽप्य-
र्थो भिन्नशब्दोच्चारणान्नानारूपः प्रतिभाति। यथा पचति पाकं करोति पाकक्रियायां निर्वर्तिकं करोतीति। तथा च बलाहकाद्वि-
द्योतते बलाहके विद्योतते बलाहको विद्योतत इति। कंसादीनां च साधनत्वं शब्दोपहितरूपाणां बुद्धिविषयाणां हेतुमति चेत्यत्र
प्रतिपादितम्। एवं तर्हि यः शब्दो लोकेऽत्यन्तमदृष्टप्रयोगस्तन्निमित्तोऽर्थो न भवतीत्युच्यते। शब्दं प्रयुयुक्षमाणेन लोकस्यानुस-
रणात्। स्वसामर्थ्येन हि शब्दोऽर्थं प्रत्याययति तच्च सामर्थ्यं लौकिकप्रयोगादवधार्यम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तदन्तनिर्देशादिति। क्त्वान्तः समास इह निर्दिश्यत इत्यर्थः। समास इति निर्धारणे सप्तमी सामान्यापेक्षं चैकवचनम्। अथवा छान्दसं
बहुवचनस्य स्थाने। निर्धारणं च समानजातीयस्य भवतीति क्त्वान्तः समासो गृह्यते निर्धार्यमाणस्य क्त्वाग्रहणेन विशेषणात्त
दन्तविधौ सत्ययमर्थो भवति समासेष्वनञ्पूर्वेषु क्त्वान्तस्य समासस्य ल्यप् भवति स च निर्दिश्यमानस्यादेशा भवन्तीति क्त्वाए
व भवति। समासनिपातनाद्वेति। समुदायानां साधुत्वमभ्यनुज्ञायते। प्राकरणिकाप्राकरणिककार्यभावाभावविधानद्वारेणेत्य
र्थः। येषु चात्र स्नात्वाकालकादिषूत्तरपदानुपात्तक्रियापेक्षः क्त्वाप्रत्ययः तेषां सापेक्षत्वेऽपि निपातनात्समासः। अनञो वा प
रस्येति। अनञ् चासौ पूर्वश्चेति समासो निपातनात्पूर्वशब्दस्य परनिपातः। विशेष्यत्वेन विवक्षितत्वाद्वा। अनञिति वा लुप्तसप्तमी

तदन्तनिर्देशात्सिद्धम्॥ तदन्तनिर्देशात्सिद्धमेतत्। क्त्वान्तस्य ल्यपा भवितव्यम्। न चैतत् क्त्वान्तम्॥ समासनिपात
नाद्वा॥ अथवावश्यमत्र समासार्थं निपातनं कर्तव्यम्। तेनैव यत्नेन ल्यबपि न भविष्यति॥ अनञो वा परस्य॥ अ
थवा अनञः परस्य ल्यपा भवितव्यम्। न चात्रानञं पश्यामः। ननु च धातुरेवानञ्। न धातोः परस्य भवितव्यम्।
किं कारणम्। नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः। नञ्युक्तमिवयुक्तं चान्यस्मिंस्तत्सदृशे कार्यं
विज्ञायते। कुत एतत्। तथा ह्यर्थो गम्यते। तद्यथा। अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं पुरुषमानयति
नासौ लोष्टमानीय कृती भवति। एवमिहाप्यनञिति नञ्प्रतिषेधादन्यस्मादनञः नञ्सदृशात्कार्यं विज्ञा
स्यते। किं चान्यदनञ् नञ्सदृशम्। पदमित्याह। अथवा प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति। एवं धा
तुरपि क्त्वाग्रहणेन ग्राहिष्यते। ननु चेयमपि परिभाषास्ति। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति।
सापीहोपतिष्ठेत।

कं पृथक्पदम्। लुप्तसप्तमी चेयम्। अनञि पूर्वे सति क्त्वो ल्यप् भवति। अर्थादनञः परस्येत्यर्थोऽवतिष्ठते। तदन्तविधिश्चात्र नाश्री
यते क्त्वाप्रत्ययस्य प्राधान्येन प्रक्रमाद्विशेषणत्वाभावाद्येन विधिस्तदन्तस्येति। प्रत्ययग्रहणपरिभाषाश्रयस्तु तदन्तविधिः प
रत्वाद्बाध्यते। येन नाव्यवधानमिति च धातुनाव्यवधानमाश्रीयते। ननु चेति। असत्त्वभूतार्थवाचित्वादिना धर्मेण धातुरपि नञ्
सदृशो भवति। न धातोः परस्येति पदत्वनिबन्धनं सादृश्यमाश्रीयते न तु धर्मान्तरनिबन्धनम्। नात्र प्रमाणमित्याशङ्क्या
ह। अथवेति॥ क्त्वाग्रहणेन धातुप्रत्ययसमुदायस्य परिग्रहात्तदवयवत्वाद्धातोः स्वावयवेन पौर्वापर्यासंभवाद्धातुरनञ्ग्रह
णेन न गृह्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृत्येति। गतेः क्तान्ते समुदाये तु प्रवेशात्पौर्वापर्याभावात्तद्व्यतिरिक्तनक्षत्रशब्दान्तराभावात्तुल्यपोप्राप्तिः। परमकृत्वेति। परमशब्दो न गतिर्न च कारकमिति क्तान्ते अनन्तर्भूतः पूर्वइति ततः परस्य क्तान्तस्य ल्यप्प्रसङ्गः। गतिकारकपूर्वस्यापीत्यपिशब्दात्केवलस्यापि कृत्वेत्यादेः क्त्वान्तस्य ग्रहणात्। आचार्य आह। न वा अत्रेष्यत इति। तस्मात्कृद्ग्रहणपरिभाषात्र नाश्रीयते। चोदक आह। अनिष्टं चेति। आचार्य आह। गतिकारकपूर्वस्यैवेष्यत इति। प्रकृत्य पार्श्वेनः कृत्येत्यादौ ल्यबादेशइष्यते। कृद्ग्रहणपरिभाषोपस्थाने च न सिध्यतीति नासौ परिभाषाश्रीयते। चोदक आह। कुतो न्विति। प्रत्ययग्रहणपरिभाषाया अवकाशः उपगोरपत्यमौपगव इत्यत्र तद्धितान्तस्य प्रातिपदिकत्वात्सुब्लुक् भवति। कृद्ग्रहणपरिभाषाया अवकाशः व्या

तत्र को दोषः। इह न स्यात्। प्रकृत्य प्रहत्य। इह तर्हि स्यात्। परमकृत्वा। उत्तमकृत्वा। न वा अत्रेष्यते। अनिष्टं च-प्राप्नोति इष्टं च न सिध्यति। गतिकारकपूर्वस्यैवेष्यते। कुतो नु खल्वेतत्। द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं भवति। कृद्ग्रहणे गतिकारकपूर्वस्येति। इयमिह परिभाषा भवति प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति। इयं न भवति। कृद्ग्रहणे गतिकारकपूर्वस्यापीति। आचार्यप्रवृत्तिर्ज्ञापयति। इयमिह परिभाषा भवति प्रत्ययग्रहण इति। इयं न भवति कृद्ग्रहण इति।

वलेखी व्यावचर्चीति णचः स्त्रियामञिति गतिपूर्वस्य राजन्तत्वादञ्सति वृद्धिस्वरौ भवतः। अत्र हि प्रत्ययग्रहणपरिभाषायाः स्त्रीप्रत्यये चानुपसर्जनेनेति प्रतिषेधात्तदुपस्थानाभावः। एवं सावकाशयोः परिभाषयोर्भिन्नफलयोर्विरोधात्पर्यायेणप्रतिपत्तिर्वा प्राप्नोति। प्रत्ययग्रहणपरिभाषायामाश्रीयमाणायां प्रकृत्येति गतेः क्तान्ते नन्तर्भावात्पौर्वापर्योपपत्तौ ल्यप् सिध्यति। न तु कृद्ग्रहणपरिभाषाश्रयण इति फलभेदः। कार्यकालं संज्ञापरिभाषमित्यत्र दर्शने समानदेशत्वात्परिभाषयोः परत्वेनापि व्यवस्था नास्ति। सांकूटिने त्वेवमव्यवस्थाप्रसङ्गादुयथोद्देशपक्ष आश्रयितव्यः। तत्र हि परत्वेन व्यवस्थासिद्धिः। प्रत्ययग्रहणपरिभाषाङ्गसंज्ञासूत्रे योगविभागेन व्यवस्थापिता। कृद्ग्रहणपरिभाषा तु गतिरनन्तर इत्यत्र अनन्तरग्रहणेन ज्ञापनात्परा भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदयमिति। कथं पुनरेतज्ज्ञापकं यावता सत्यामपि कृद्ग्रहणपरिभाषायामपि नञ्बद्धात्केवलस्यापि क्त्वान्तस्य ग्रहणादकृत्वेत्या
दौ नञो ऽगतित्वादकारकत्वाच्च क्त्वान्तेनान्तर्भावादसत्यनञ्पूर्वग्रहणे ल्यप्प्रसङ्गः। अप्रकृत्येत्यादौ च प्रतिषेधार्थमनञ्पूर्वस्य ग्र
हणं स्यात्। उच्यते। अपि ग्रहणे न प्रत्ययग्रहणपरिभाषा समुच्चीयते न त्वन्यपूर्वम्। तत्र समास इति वचनात्केवलस्य कृत्वा-
देर्ग्रहणाभावादपि नञ्बद्धसमुच्चेतव्यस्याभावाद्गतिकारकपूर्वस्यैव समासस्य ग्रहणं भविष्यतीति किमनञ्पूर्व इत्यनेन। तत्
क्रियमाणं कृद्ग्रहणपरिभाषाया अनुपस्थानं ज्ञापयति। तदुपस्थाने तु तूष्णींभूय नानाभूय द्विधाभूयेत्यादौ ल्यब्न स्यात्। तदेवं कृद्
ग्रहणपरिभाषानुपस्थानेन नञ्सदृशादव्ययात्परात्प्रत्यासत्तिन्यायात्समासावयवात्परस्य धात्वादेः क्त्वान्तस्य समासे क्त्वो ल्य-

यदयमनञिति प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्। अयं हि नञ् न गतिर्न च कारकम्। तत्र कः प्रसङ्गो यन्नञ्पूर्वे
स्य स्यात्। पश्यति त्वाचार्य इयमिह परिभाषा भवति प्रत्ययग्रहण इति। इयं न भवति कृद्ग्रहण इति। ततो नञि
ति प्रतिषेधं शास्ति। किं नञः प्रतिषेधेन न गतिर्न च कारकम्। यावता नञ्पूर्वे तुल्यस्वभावो न भविष्यति। प्रतिषेधात्तु जा
नीमस्तत्पूर्वं नेह गृह्यते। प्रत्ययग्रहणे यावत्तावद्भवितुमर्हति॥ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः॥
सुपां च सुपो भवन्तीति वक्तव्यम्। युक्ता मातासीद्धुरि दक्षिणायाः॥ दक्षिणायामिति प्राप्ते। तिङां च तिङो भवन्तीति व
क्तव्यम्। चषालं ये अश्वयूपाय तक्षति। तक्षन्तीति प्राप्ते। लुकि किमुदाहरणम्। आर्द्रे चर्मन्। लोहिते चर्मन्। नैतद
स्ति। पूर्वसवर्णेनाप्येतत्सिद्धम्। इदं तर्हि। यत्सुवीयस आवसन्तुत सप्त ऋषयः सप्त साकम्। ननु चैतदपि पूर्वसवर्णे
नैव सिद्धम्। न सिध्यति। यद्यत्र पूर्वसवर्णः स्यात्।

विधीयमानः स्यात्ताकालकः परमकृत्वेत्यादौ न भवति। परमकृत्वेति। सन्महदिति समासः। परमत्वस्य क्रियाविशेषणत्वात्सा
मानाधिकरण्यात्॥ नञ्पूर्वमिति गतिकारकपूर्वमित्यर्थः। प्रत्ययग्रहणपरिभाषया यावद्ग्राह्यं तावद्गृह्यते॥ सुपां सुलुक्पूर्व
सवर्ण॥ सुप्शब्दे आदेशा उच्यमानेन्ये सुपो न प्राप्नुवन्तीत्याह। सुपां चेति। एतच्च सर्वं व्यत्ययो बहुलमिति व्यत्ययेन सिद्ध्यति॥ पूर्वसव
र्णेनापीति। चर्मन्निति स्थिते इकारस्य पूर्वसवर्णो नकारः। तस्मिन्पूर्वस्य नकारस्य स्वादिष्विति पदसंज्ञायां सत्यां लोपः। एवं च न
ङिसंबुद्ध्योरित्यत्र ङिग्रहणमपि न कर्तव्यं भवति। प्रातिपदिकान्तत्वाभावाद्विभक्तिनकारस्य नलोपाप्रसङ्गात्। पूर्वस्य च नकारस्य
लोपस्येष्टत्वात्। यदिति। यच्छब्दात्परस्य सुपो लुक्। प्रत्ययलक्षणनिषेधात्त्यदाद्यत्वाभावः। येष्विति प्राप्ते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सदा यत्नमिति। सुत्राद्स्य पूर्वसवर्णो भवन्नलोन्त्यस्येत्युकारस्य दकारः प्राप्नोतीति तत्स्यदा यत्वे बहुवचने झल्येदित्यत्वे स्तोः संयोगाद्योरिति सकारलोपे च येद्विति स्यात्। अयात्येकवचनस्य स्थाने पूर्वसवर्णो दकारः क्रियते तथापि स्थानिवद्भावात्सिन्भावः प्राप्नोति। आन्तर्यतेन द्विति। निरनुनासिकस्येकारस्य सदृशो दकारः। संयोगान्तलोपेनेति। नङिसंबुध्योरिति नलोपप्रतिषेधात्संयोगान्तलोपः। अन्यथा नलोपे कर्तव्ये संयोगान्तलोपोऽसिद्धः स्यात्। एवं च नलोपप्रतिषेधे ङिद्ग्रहणं कर्तव्यमेवेति प्रक्रियालाघवाय चर्मन्नित्यत्र लुगेव विधेयइत्याहुः। दार्वियेति। दारुशब्दादियादेशः। सुक्षेत्रियेति। सुक्षेत्रेणेति प्राप्ते। सरसीइति। सरः ७११

त्यदा यत्वं प्रसज्येत। इदं चापि उदाहरणम्। आर्द्रे चर्मन्। लोहिते चर्मन्। ननु चोक्तं पूर्वसवर्णो न्याय्ये तत्सिद्धम्। न सिध्यति। यद्यत्र पूर्वसवर्णः स्याद् आन्तर्यतो दकारः प्रसज्येत। अस्तु। संयोगान्तलोपेन सिद्धम्। इयाडियाजीकाराणामुपसंख्यानं कर्तव्यम्। दार्विया परिजमन्। इया। डियाच्। सुक्षेत्रिया। सुगात्या। ईकारादेशे न सुक्षेत्रे सरसीं। यानम्। आङ्याजयारां चोपसंख्यानं कर्तव्यम्। आङ्। प्रबाहवा। अयाच्। स्वप्नया चावसेचनम्। अयाच्। अयारा। सनःसिन्धुमिव नावया॥ अमो मश्॥ किमर्थः शकारः। शित्सर्वस्येति सर्वादेशो यथा स्यात्। अक्रियमाणे हि शकारेऽलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत। अत उत्तरं पठति॥ अमो मश्। नमकारस्य। मकारस्य मकारवचने प्रयोजनं नास्तीति कृत्वा न शान्तरेण शकारं सर्वादेशो भविष्यति। वचनादन्यबाधनम्। अस्त्यन्यन्मकारस्य मकारवचने प्रयोजनम्। येन्ये मकारादेशाः प्राप्नुवन्ति तद्बाधनार्थम्। तद्यथा। मोराजि समः क्वाविति मकारस्य मकारवचनसामर्थ्यादनुस्वारादयो बाध्यन्ते॥

शब्दात्परस्य ङिशब्दस्येकारः। प्रबाहवेति। प्रबाहुशब्दात्परस्य टाप्रत्ययस्याङादेशः घेर्ङितीति गुणः। ननु ङित्वे विधातृवर्णनिर्देशमात्रं वर्णे यत्स्यान्न त्वविधायकत्वादाविन्युक्तम्। ततश्च गुणो न प्राप्नोति। ङित्करणसामर्थ्याद्भविष्यतीत्यदोषः। अथवा ङितीति बहुव्रीहिराश्रीयते तत्र परिहारान्तरमाश्रयणीयम्। वर्णश्चायन्तेन ङित्त्वेन दोषो निर्देशोयं पूर्वसूत्रेण वा स्यादिति। स्वप्नयेति॥ अयाचोऽकारोच्चारणं सुपि चेति दीर्घनिवृत्त्यर्थम्। नावयेति। उपो नमरितीति मध्योदात्तं पदं भवति॥ अमो मश्॥ अमो मश् नमकारस्येति। मकारस्य मकारः प्रयोजनाभावान्न भविष्यतीति शकारो न वक्तव्य इत्यर्थः। वचनादिति। वधीदृत्रमिसादौ मकारस्यानुस्वारनिवृत्त्यर्थो मकारः स्यादित्यर्थः। राम: ६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्विमकारकइति।अमोम्मितिकरिष्यतेभिन्नजातीयवर्णद्वयोच्चारणेप्रयत्नस्यगौरवंभवति।समानजातीयवर्णद्वयेतुलाघवंतत्रैकस्यम
कारस्यसंयोगान्तलोपःकरिष्यते।ईण्णनप्राप्नोतीति।ईटिकर्तव्येसंयोगान्तलोपस्यासिद्धत्वादएकत्वाभावात्।यकारादाविति।अमोमि
तिसूत्रंकर्तव्यंतत्रयकारस्यलुप्तनिर्दिष्टत्वादनेकाल्त्वात्सर्वादेशोयंमोभविष्यतीतिप्रत्याख्यातंशित्वम्।।आज्जसेरसुक्।।जसोग्रह

एवंतर्हिद्विमकारकोनिर्देशः करिष्यते।।द्विमकारईडएके।।यदिद्विमकारकः।अएकाश्रयईड्नप्राप्नोति।वधीत्तत्रं
मरुतइन्द्रियेण।।यकारादौनदुष्यति।।किंयकारोनश्रूयते।लुप्तनिर्दिष्टोयकारः।अमोमश्रुतमकारस्यवचनादन्य
बाधनम्।द्विमकारईडएकेयकारादौनदुष्यति।।आज्जसेरसुक्।।इह।येपूर्वासोयउपरासः।आज्जसेरसुगिति
असुकिकृतेजसोग्रहणेन ग्रहणाच्छीभावःप्राप्नोति।एवंतर्हिजसिपूर्वान्तःकरिष्यते।यदिपूर्वान्तःक्रियते।कारू
पसिद्धिः।ब्राह्मणासःपितरःसोम्यासः।सवर्णदीर्घत्वेनसिद्धम्।नसिद्ध्यति।अतोगुणइतिपररूपंप्राप्नोति।अकारोच्चार
णसामर्थ्याद्भविष्यति।यदितर्हिप्राप्नुवन्विधिरुच्चारणसामर्थ्याद्बाध्यतेसवर्णदीर्घत्वमपिनप्राप्नोति।नैषदोषः।यंविधिं
प्रत्युपदेशोनर्थकःसविधिर्बाध्यते।यस्यतुविधेर्निमित्तंनासौबाध्यते।पररूपंचप्रत्यकारोच्चारणमनर्थकंसवर्णदी
र्घत्वस्यपुनर्निमित्तमेव।अथवाअसुट्करिष्यते।एवमपियेपूर्वासोयउपरासइतिअसुटिकृतेजसोग्रहणेनग्रहणा
च्छीभावःप्राप्नोति।नैषदोषः।निर्दिश्यमानस्यादेशाभवन्तीत्येवमस्यनभविष्यति।यत्तर्हिनिर्दिश्यतेतस्यकस्मान्न
भवति।असुटाव्यवहितत्वात्।सिद्ध्यति।सूत्रंतर्हिभिद्यते।यथान्यासमेवास्तु।ननुचोक्तंयेपूर्वासोयउपरासः।असुकि
कृतेजसोग्रहणेनग्रहणाच्छीभावःप्राप्नोति।नैषदोषः।इदमिहसंप्रधार्यंशीभावःक्रियतामसुगिति।किमत्रकर्त
व्यम्।परत्वादसुक्।अथेदानीमसुकिकृतेपुनःप्रसङ्गविज्ञानाच्छीभावःकस्मान्नभवति।सकृद्गतौविप्रतिषेधेय
द्बाधितंतद्बाधितमेवेति।।

णेनेति।नह्यकस्यग्रहणेनगृह्यतइतिसागमकस्यशीभावप्रसङ्गः।।पूर्वान्तइति।अस्यजस्यसुगितिसूत्रन्यासेनपूर्वान्तेसुक्यकारान्ता
त्परोजस्तनभवतीतिशीभावाप्रसङ्गः।अथवाऽसुडिति।असुक्यकारोच्चारणंदध्यस्यतीत्याद्यर्थमितिपररूपंस्यादितिपक्षान्तरोप-
न्यासः।असुटिप्रथमयोःपूर्वसवर्णइतिदीर्घःसिद्ध्यति।।परत्वादिति।असुकोवकाशःब्राह्मणासइति।शीभावस्यभाषाविषयोवकाशः।।

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

भा.कौ. ६७ अश्वक्षीर। अश्वस्यतीति। मैथुनेच्छाप्रतिपादनपरत्वाद्योगस्याश्ववृषोपादानमतन्त्रमिति मनुष्यादावपि कवयः प्रयुञ्जते। लालसा अ ७११
तिशयेनाभ्यवजिहीर्षा। यस्तु लवणमैश्वर्यार्थमिच्छति तत्र लवणीयतीत्येव भवति॥ आमि सर्वनाम्नः॥ कस्येदमिति। किमिदं सर्वेषामा
मां ग्रहणमपि कस्यचिदेवेति प्रश्नः। ननु च सर्वनाम्न इत्युपादानाद् घादामो लिङ्गामस्य ग्रहणत्रड्डैव न युक्ता। उच्यते। इह तयोरसंभ
वेऽपि ह्रस्वनद्यापो नुडित्यत्र ह्रस्वात्परयोः संभवादिह विचारः क्रियते। तत्र हि सामान्यग्रहणे सति यथासंभवं प्रकरणे कार्यप्रतिपत्तिः।

अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि॥ अश्ववृषयोर्मैथुनेच्छायाम्। अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम्। अश्वस्यति वडवा। वृषस्यति गौः। मैथुनेच्छायामिति किमर्थम्। अश्वीयति वृषीयति। क्षीरलवणयोर्लालसायाम्। क्षीरलवणयोर्लालसायामिति वक्तव्यम्। क्षीरस्यति माणवकः। लवणस्यत्युष्ट्र इति। अपर आह सर्वप्रातिपदिकेभ्यो लालसायामिति वक्तव्यम्। दध्यस्यति मध्वस्यतीत्येवमर्थम्। अपर आह सुग्वक्तव्यो दधिस्यति मधुस्यतीत्येवमर्थम्॥ आमि सर्वनाम्नः सुट्॥ त्रेस्त्रयः। ह्रस्वनद्यापो नुट्। इमे बह्वच आम्शब्दाः पठ्यन्ते। कास्प्रत्ययादाममन्त्रे लिटि। ङस्। ओस्। आम्। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे। ङेराम्नद्याम्नीभ्यः इति। कस्येदं ग्रहणम्। षष्ठीबहुवचनस्य ग्रहणम्। अथास्य कस्मान्न भवति। कास्प्रत्ययादाममन्त्रे लिटीति। अननुबन्धकग्रहणे हि न सानुबन्धकस्येति। तर्हि एवमर्थोऽनुबन्धः कर्तव्यः। इहास्य ग्रहणं मा भूदिति। ननु चावश्यं मकारस्येत्संज्ञापरित्राणार्थोऽनुबन्धः कर्तव्यः। नार्थ इत्संज्ञापरित्राणार्थेन। इत्कार्याभावादत्रेत्संज्ञा न भविष्यति। इदमस्तीत्कार्यं मिदचोऽन्त्यात्पर इति। अचामन्त्यात्परो यथा स्यात्। प्रत्ययान्तादयं विधीयते। तत्र नास्ति विशेषः। मिदचोऽन्त्यात्पर इति वा परत्वे प्रत्ययः पर इति वा परत्वे। यस्तर्हि न प्रत्ययान्तादिजादेश्च गुरुमतोऽनृच्छ इति।

अथवा पूर्वोपात्तसूत्रावद्यान्तरानुमानपक्षे उत्तरसूत्रे तयोः संभवादिह विचारः। ननूत्तरसूत्रेऽपि यस्येवाम्नदीभ्यां परस्य संभवः
सरावह्रस्वादपि परस्तस्मादिह चर्यादिग्रहीष्यते। नैतदस्ति। व्याप्तिन्यायाश्रयेण सर्वस्य ग्रहणप्रसङ्गात्॥ प्रत्ययान्तादिति। ते चाज रामः
न्ताः। ननु हलन्तेभ्य आचारक्विबन्तेभ्य आमस्त्येव। नैतदस्ति। एकीयमतमेतत्। तत्रापि हलन्तेभ्यो नभिधानादाचारक्विबभा ६७
वः। यस्तर्हीति। ईहे रहे ध्व मध्ये आमि कृते यणादेशप्रसङ्गः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आस्कासोरिति। अन्त्यादचः परे आमि सवर्णदीर्घत्वे सति विशेषाभावः। सति न भवितव्यमिति। रूपान्तराद्यातुत्वाभावात्। आमदृति। अकृत एकादेश इदमुच्यते कृते त्वेकादेशे रूपान्तराभावः। अथापीति। प्रति धातुभेदाद्दामो यत्रेत्कार्यं न संभवति तत्र माभूदि त्संज्ञा। आसिकासिषु प्रत्ययान्तेषु च धातुषु। ईह्याद्येत्वित्कार्यसंभवात्स्यादेवेत्संज्ञा। अथवा आसादिषु विधानसामर्थ्यात्सवर्ण

अत्रापि आस्कासोराम्वचनं ज्ञापकं नायमन्त्यात्परो भवतीति। कथं कृत्वा ज्ञापकम्। न ह्यस्ति विशेषः। आम्यचाम न्त्यात्परे सत्यसति वा। अयमस्ति विशेषो सति आमि द्विर्वचनेन भवितव्यम्। सति न भवितव्यम्। सत्यपि भवितव्यम्। कथम्। आमस्तन्मध्यपतितत्वाद्धातुग्रहणेन ग्रहणात्। तदेतत्कासासोराम्वचनं ज्ञापकमेव नायमामचामन्त्यात्प रो भवतीति। अथापि कथंचिदित्कार्यं स्यात्। एवमपि न दोषः। क्रियते न्यास एव। आममन्त्रेदृति। यद्येवमामामन्त्र इति प्राप्नोति। शाकन्ध्वन्यायेन निर्देशः। अथवा ऽस्त्वस्य ग्रहणं को दोषः। इहकारयांचकार। हारयांचकार। चिकी र्षांचकार। जिहीर्षांचकार। ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत। लोपायादेशयोः कृतयोर्न भविष्यति। इदमिह सं प्रधार्यं लोपायादेशौ क्रियेतां नुडिति। किमत्र कर्तव्यम्। परत्वान्नुट्। नित्यौ लोपायादेशौ। कृतेपि नुटि प्राप्नुतः। अ कृतेपि। तत्र नित्यत्वाल्लोपायादेशयोः कृतयोर्विहतनिमित्तत्वान्नुट् न भविष्यति। अथास्य कस्मान्न भवति। किमेतिङव्ययघादाम्वद्रव्यप्रकर्षदृति। अननुबन्धकग्रहणे हि न सानुबन्धकस्येति। स तर्ह्येवमर्थोनुबन्धः कर्तव्यः। ननु चावश्यमुगित्कार्यार्थोनुबन्धः कर्तव्यः। नार्थ उगित्कार्यार्थेनानुबन्धेन। लिङ्ग विभक्तिप्रकरणे सर्वमुगित्कार्यम्। न चामो लिङ्ग विभक्ती स्तः। अव्ययमेषः।

दीर्घत्वं न स्यादित्संज्ञा तु स्यादेवा व्यञ्जनान्तेषु चाचारक्विबन्तेषु दुत्कार्यसंभवादित्संज्ञा प्राप्नोति। न हि व्यञ्जनान्तेभ्य आचारे क्विन्न भवती त्यत्र किंचित्प्रमाणमस्ति। कारयांचकारेति। नुटि कृते ऽयादेशाप्रसङ्गः॥ अव्ययमेषदृति। अव्ययत्वात्स्त्रीत्वेन योगाभावादुगितश्चेति ङीनास्ति। तदभावादुगिश्चेति घादिषु ह्रस्वविकल्पोपि नास्ति। विभक्तेर्लुकि प्रत्ययलक्षणप्रतिषेधान्नुमागम उगित्कार्यं नास्ति।

CC-0. In Public Domain. Digitization by eGangotri

इत्संज्ञापरित्राणार्थ इति। इत्संज्ञायाः परित्राणमिति साधनं कृतेति पञ्चमीसमासः। समुदायविशेषणं च मकार इति सापेक्षत्वात्स मासाभावेन चोदनीयः। परित्राणं वा प्रधानं मकारमपेक्षते। भवति च प्रधानस्य सापेक्षस्यापि समासः। अथापीति। मित्त्वमेवज्ञापकं स्यादन्यतोप्ययं भवतीति। ततश्चस्यादेवेत्संज्ञा। एवं तर्हीति। उभयोरनित्ययोः परत्वान्नुटि प्राप्ते ह्रस्वनद्यापो नुडित्यत्र यस्य लोपस्तद्धितइति चानुवर्तते तेन तद्धितआमि ह्रस्वस्य लोपो भवति पचतितरामिति। अन्यस्य त्वामो नुट् भवति वृक्षाणामि

मकारस्य तर्हीत्संज्ञापरित्राणार्थोनुबन्धः कर्तव्यः। इत्कार्याभावादत्रेत्संज्ञा न भविष्यति। इदमस्तीत्कार्यं मिदचोन्त्यात्पर इति। अचामन्त्यात्परो यथा स्यात्। नैतदस्ति। घान्तादयं विधीयते तत्र नास्ति विशेषः। मिदचोन्त्यात्पर इति परत्वे प्रत्ययः पर इति वा परत्वे। अथापि कथंचिदित्कार्यं स्यादेवमपि न दोषः। क्रियते न्यास एव। अथवाऽस्त्वस्य ग्रहणं को दोषः। इह पचतितराम्। जल्पतितराम्। ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत। लोपे कृते न भविष्यति। इदमिह संप्रधार्यं लोपः क्रियतां नुडिति। किमत्र कर्तव्यम्। परत्वान्नुट्। एवं तर्हि ह्रस्वनद्यापो नुडित्यत्र यस्येति लोपोनुवर्तिष्यते। अथास्य कस्मान्न भवति। ङेराम्नद्याम्नीभ्य इति। किं च स्यात्। कुमार्याम्। किशोर्याम्। खट्वायाम्। मालायाम्। तस्याम्। यस्यामिति ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत। आड्याट्स्याटोत्र बाधका भविष्यन्ति। इदमिह संप्रधार्यम्। आड्याट्स्याटः क्रियन्तां नुडिति। किमत्र कर्तव्यम्। परत्वादाड्याट्स्याटः। अथेदानीमाड्याट्स्याट्सु कृतेषु पुनः प्रसङ्गान्नुट् कस्मान्न भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति॥ श्रीग्रामण्योश्छन्दसि॥ अयं योगः शक्योऽवक्तुम्। कथम्। श्रीणामुदारो धरुणो रयीणाम्। अपि तत्र सूतग्रामणीनाम्। इह नावत्। श्रीणामुदारो धरुणो रयीणाम्। विभाषा आमि नदीसंज्ञा सा छन्दसि व्यवस्थितविभाषा भविष्यति। अपि तत्र सूतग्रामणीनामिति। सूताश्च ग्रामण्यश्च सूतग्रामणि। तत्र ह्रस्वनद्यापो नुट् इत्येव सिद्धम्॥ ॥इति श्रीभगवत्पतञ्जलिविरचिते भाष्ये सप्तमाध्यायस्य प्रथमपादे प्रथममाह्निकम्॥

ति। श्रीग्रामण्योः। विभाषेति। वामीत्यनेनानत्र दृष्टानुविधिश्छन्दसीति श्रीणामित्येव छन्दसि भविष्यतिन नुट्क्रियामिति। सूताश्च ग्रामण्यश्च सूतग्रामणीति समाहारद्वन्द्वं कृत्वे कत्वे दोषः क्रियत इति वोढव्यं न त्वेकत्वेषि कृते समाहारद्वन्द्वः क्रियते। एवं हि बहुवचनं न स्यात्। भाष्ये त्वत्रोभयं कार्यमित्येतावन्मात्रं दर्शितम्। क्रमस्तु लयमप्यूह्य इष्टस्यार्थस्य सिद्धये॥ ॥इत्युपाध्यायजैयटकृते महाभाष्यप्रदीपे सप्तमस्य प्रथमे पादे प्रथममाह्निकम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदितो नुम् धातोः॥ धातोरिति किमर्थमिति। किम धातुनिवृत्त्यर्थं धातुग्रहणमथ धातुसंज्ञाप्रवृत्त्यवस्थायामेव प्राक्प्रत्ययोत्पत्ते
र्नुम्विधानार्थमिति प्रश्नः॥ आचार्यदेशीयस्त्वधातुनिवृत्त्यर्थं धातुग्रहणं मत्वाह। अभैत्सीदिति। सिचइदितो नुम् न भवति। उप
देशिवद्भावद् इति। यथोन्दत्यादीनामुपदेशावस्थायां नकारः प्रत्ययविधिकाले संनिहितस्तथा नुमपीत्यर्थः। किं प्रयोजनमिति।
नन्दितानन्दकइत्यादि प्रत्यये परतो नुमि क्रियमाणेऽपि सिद्ध्यतीति मत्वा प्रश्नः। प्रत्ययविध्यर्थमिति। इष्टप्रत्ययविध्यर्थ-
मित्यर्थः॥ अनकार इति। असति नकारे यः प्रत्ययः प्राप्नोति स स्यादित्यर्थः। सांप्रतिकेषु शिक्षादिषु गुरुमत्सु संभवत्सु भा-
विगुरुमत्ताश्रयेण प्रत्ययविधानस्यायुक्तत्वात् तत्र को दोष इति। नुमि कृते ऽपवादः प्रवर्तमान उत्सर्गं निवर्तयिष्यतीति भा

इदितो नुम् धातोः॥ अथ धातोरिति किमर्थम्। अभैत्सीत्। अच्छैत्सीत्। नुम्विधावुपदेशिवद्वचनं प्रत्ययविध्य
र्थम्। नुम् विधावुपदेशिवद्भावो वक्तव्यः। उपदेशावस्थायां नुम्भवतीति वक्तव्यम्। किं प्रयोजनम्। प्रत्ययवि
ध्यर्थम्। उपदेशावस्थायां नुमि कृते इष्टः प्रत्ययविधिर्यथा स्यात्। कुण्डा हुण्डेति। इतरथा ह्यनकारे प्रत्ययः
॥ अक्रियमाणे हि उपदेशिवद्भावे ऽनकारे यः प्रत्ययः प्राप्नोति स नावस्थात् तस्मिन्नवस्थिते नुम्। तत्र को दोषः॥
तत्राऽयथेष्टप्रसङ्गः॥ तत्राऽयथेष्टं प्रसज्येत। अनिष्टे प्रत्ययेऽवस्थिते नुम्। अनिष्टस्य प्रत्ययस्य श्रवणं प्रसज्ये
त॥ धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुम्विधानम्। धातुग्रहणसामर्थ्याद्वा तदुपदेशे धातूपदेशे नुम् भविष्य
ति। न च अन्यद्धातुग्रहणस्य प्रयोजनमुक्तम्। किं तत्। अभैत्सीत्। अच्छैत्सीत्। नैतदस्ति प्रयोजनम्॥ प्रयोजनं ना
म तद्वक्तव्यं यत्प्रयोजनं नियोगतः स्यात्।

वः। तत्राऽयथेष्टप्रसङ्ग इति। उत्पन्न उत्सर्गे नुमि कृते सत्यामपि गुरुसंज्ञायामुत्सर्गेणैव प्रत्ययार्थस्य प्रत्ययोत्पत्तिनिमित्तस्याभिधानान्निमित्तवैक
ल्याद् अपवादाप्रवृत्तावुत्सर्गस्यैव श्रवणप्रसङ्गः। धातुग्रहणेति। अधातोरिदितोऽसंभवाद् धातुनिवृत्त्यर्थं धातुग्रहणं न भवतीति धातु
संज्ञाप्रवृत्त्यवस्थोपलक्षणार्थं विज्ञायते तेन सत्यप्यङ्गाधिकारे भाव्यङ्गत्वाश्रयः पूर्वमेव नुम्भवति ततः प्रत्यय इत्यर्थः संपद्यते।
प्रयोजनं नामेति। नियमेनावश्यंभावेन यदन्यथा साधयितुमशक्यं तत्प्रयोजनम्। अस्ति चाऽत्र नुमागमो धातुग्रहणमन्तरेणापि शक्यो ॥
निराकर्तुमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ वै॰ यस्यात्रेति। सकारस्योच्चारणार्थ इकारः क्रियते इत्यकारेणापि सृजि त्येवं सकारः शक्य उच्चारयितुम्। तदेतदुक्तं भवति। निरनु ८२१
६९ नासिक उच्चारणार्थः सिच इकार इतीदित्त्वाभावान्नुमभावः। अमंस्तेत्यादौ हनः सिजिति न लोपार्थात् कित्त्वविधानाज्ज्ञापका
दसत्यपीदित्त्वे न लोपाप्रसङ्गः। नन्वन्यत् कित्त्वविधानस्य प्रयोजनमस्ति सिजाश्रयो न लोपो यथा स्यात् सार्वधातुकाश्रयो मा भूत्
। सिजाश्रयो हि न लोपोऽतो लोपेऽसिद्धो न सार्वधातुकाश्रयः। समानाश्रयं ह्यसिद्धं न तु व्याश्रयम्। नैतदस्ति। असिद्धं बहिरङ्गम
न्तरङ्ग इति सार्वधातुकाश्रयस्य न लोपस्य बहिरङ्गस्यान्तरङ्गे अतो लोपे कर्तव्येऽसिद्धत्वादतो लोपाप्रसङ्गादुपदेशग्रहणानु
वृत्त्या आर्धधातुकोपदेशे यदकारान्तं तस्य लोपविधानाद्वा। तासेरपीकार उच्चारणार्थ इति नुमोऽप्रसङ्गः। मन्ता आहन्ता इत्या
दौ असिद्धवदत्राभादिति टिलोपस्यासिद्धत्वादनिदित्त्वेपि न लोपाप्रसङ्गः। शे मुचादीनाम्। शे तृम्फादीनामिति। आदिशब्दः प्र

यस्यात्रेकारेण क्रियते अकारेणापि तच्छक्यं कर्तुम्॥ ॥शे मुचादीनाम्॥ ॥शे तृम्फादीनाम्। शे तृम्फादीनामुपसं
ख्यानं कर्तव्यम्। तृम्पति। तृम्फति। किमर्थमिदम्। ननु मनुषक्ता एवैते पठ्यन्ते। लुप्तनकारत्वात्। लुप्यतेऽत्र नकारः।
अनिदितां हल उपधायाः क्ङितीति। यदि पुनरिमे इदितः पठ्येरन्। न। एवं शक्यम्। इह हि लोपो न स्यात्। तृपितो दृपित
इति। यदि पुनरिमे मुचादिष्वेव पठ्येरन्नदोषः स्यात्। अथवा नैवं विज्ञायते। इदितो नुम्धातोरिति।

कारे। तेन नोपधा गृह्यन्ते तेषां न लोपे कृते नुमागमः। तस्य विधानसामर्थ्यादसिद्धवदत्राभादिति वा न लोपस्यासिद्धत्वादुपधा-
त्वाभावाल्लोपाभावः। किमर्थमिति। यत एवोपदेशे नकारः पठ्यते तेनास्यैव श्रवणं भविष्यतीति प्रश्नः। ननु मनुषक्ता इति। नुम्ग्रहणं
नकारोपलक्षणार्थम्। यदीति। इदित्त्वेन नुमः सिद्धिर्न च लोपः प्रसज्यते। यदि पुनरिति। नोपधानां मुचादिषु पाठान्नुमः सिद्धिरि
त्यर्थः। अथवेति। मुचादिषु तावन्न पठितास्ते गौरवप्रसङ्गाच्च। नोपधानां मुचादिषु पाठेऽर्थनिर्देशः कर्तव्यः। अनोपधानामन्यत्र रामः
पाठे अर्थो निर्देष्टव्य इति मत्वा परिहारान्तरोपन्यासः। ६९

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदितो नुम् धातोः। ननु एवं धातूपदेशावस्थायां नुम् न लभ्यते। नैष दोषः। धिन्विकृण्व्योरचेति ज्ञापकाद्धातूपदेशावस्थायां नुम् भविष्यति। अत्र
हि आगन्तुरिकारउच्चारणार्थ इत्यङ्गत्वाभावे पि नुमनुषक्तपाठस्येदमेव प्रयोजनं धातूपदेशावस्थायामेव नुम् यथा स्यादिति।
यदि धातोरिति योगविभागः क्रियते तदा सर्वस्य सर्वत्र नुम्प्रसङ्गः। नैष दोषः। शेमुचादीनामिति शेग्रहणस्य धातोरित्यत्र सिं
हावलोकितन्यायेनापेक्षणाद् योगविभागस्येष्टसिद्ध्यर्थत्वाद्वा। अन्ये तु भाष्ये योगविभागो दिक्प्रदर्शनमित्याहुः। तेन शेमुचा
दीनामित्यत्र शे इति योगविभागः क्रियते। तत्र च धातोरिति वर्तते। ततो मुचादीनामिति। पूर्वयोगस्यासर्वविषयत्वज्ञापनार्थ
म्। तेनेष्टविषये नुमः सिद्धिः॥ नेट्यलिटि रधेः॥ लिट्येवेति। इड्ढ्येव लिटीत्येवं तु नियमो न भविष्यति। शास्त्रस्येष्टसिद्ध्यर्थत्वा
त्। रूकसौ रेधिवानिति भवति। द्विर्वचने सत्ये त्वाभ्यासलोपयोः कृतयोर्लिटि नुमागमस्तस्योपदेशिकत्वात्प्रयोगः। ये तु क्रमं
कथं तर्हि। इदितो नुम्। ततो धातोरिति॥ नेट्यलिटि रधेः॥ इमौ द्वौ प्रतिषेधावुच्येते। उभौ शक्याववक्तुम्। कथम्। एवं वक्ष्या
मि। इटि लिटि रधेर्नुम् भवतीति। तन्नियमार्थं भविष्यति। लिट्येवेडादौ नान्यस्मिन्निडादाविति॥ आङो यि॥ इह कस्मा
न्न भवत्यालम्यते। अस्तु। अनिदितां हल उपधायाः क्ङितीति लोपो भविष्यति। इहतर्ह्यालम्भ्या गौः। पोरदुपधादिति
यत्यवस्थिते नुम्। तत्र को दोषः। आलम्भ्या इत्येष स्वरः प्रसज्येत। आलम्भ्या इति चेष्यते। नैष दोषः। उक्तमेतद्धातुग्रहण
सामर्थ्यादुपदेशे नुम्विधानमिति। न सुदुर्भ्यां केवलाभ्याम्॥ अथ केवलग्रहणं किमर्थम्। नानसुदुर्भ्यामित्येवोच्ये
त। सुदुरोः केवलग्रहणमन्योपसर्गप्रतिषेधार्थम्। सुदुरोः केवलग्रहणं क्रियते। अन्योपसृष्टान्माभूदिति। प्रसुलम्भम्।

छान्दसमेवमन्यन्ते तेषां विचार एवायं नास्ति छन्दसि दृष्टानुविधानात्॥ आङो यि॥ यत्यवस्थित इति। यकारादेः प्रत्ययस्य निमित्तत्वेनोपा
दानात्पूर्वमेव तेनोत्पत्तव्यमिति भावः। एष स्वर इति। कृदुत्तरपदप्रकृतिस्वरेण यतो नावइत्याद्युदात्तत्वप्रसङ्गः। अन्तस्वरितत्वं चेष्य
त इत्यर्थः॥ धातुग्रहणसामर्थ्यादिति। यीति विषयसप्तमी तेन धातूपदेशावस्थायामेव यकारादौ प्रत्यये विषयभूते नुमागमस्ततोऽदु
पधत्वस्य विघातान्ण्यत्प्रत्यये सति तित्स्वरः सिध्यति। न सुदुर्भ्यां केवलाभ्याम्। उपसर्गात्खल्घञोरिति प्राप्तो नुम्प्रतिषिध्यते। केवलग्रह
णमिति। इह केवलग्रहणात्समानजातीय उपसर्ग एव निवर्तयितव्य इष्यते। स च सुदुर्भ्यां पूर्वो नास्त्यनभिधानात्प्रत्ययाभावात्सुदुर्भ्यां
परे तु तस्मिन्पञ्चमीनिर्देशादेव व्यवधाने प्रतिषेधो न भविष्यतीति प्रश्नः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैषोऽस्ति प्रयोग इति। प्रयुक्तानामिदमन्वाख्यानं तच्चनेनापूर्वः शब्दोपजनः क्रियते। अपि च प्रारम्भादिविशिष्टायाः क्रियायाः सुक
रत्वं दुष्करत्वं च प्रतिपाद्यमिति पूर्वं प्रेण धातोः संबन्धः पश्चात्तद्वि शिष्टस्य सुदुर्भ्याम्। अतिसुलभमिति। सौकर्यादिविशिष्टधा
त्वर्थस्य अतिर्विशेषणमिति पूर्वं सुदुर्भ्यां संबन्धः पश्चादतिना। इतरस्तु पूजाया अतिक्रमणस्य वा द्योतकोऽतिशब्द इति म
त्वाह। कर्मप्रवचनीयसंज्ञेति। ततश्चोपसर्गत्वाभावादतेः केवलावेवात्र सुदुराविति नुम्प्रतिषेधेन भाव्यम्। नहि विजा
तीयः केवलत्वं विहन्ति। यथा देवदत्तयज्ञदत्ताभ्यां केवलाभ्यां प्रवेष्टव्यमित्युक्ते पुरुषान्तरस्य प्रतिषिध्यते प्रवेशः। ननु
सुकादेरेवं सुदुरौ परस्परसहितौ विजातीयसहितावेकाकिनौ च केवलावेव भवतः। सुदुर्लभमतिसुलभं सुलभं दुर्लभमि-
ति। कृच्छ्राकृच्छ्रार्थौ च सुदुरौ क्रियाविशेषकत्वादुपसर्गावेव खलु निमित्ततां प्रतिपद्येते। यदा तर्हीति। पूजातिक्रमण

नैषोऽस्ति प्रयोगः। इदं तर्हि सुप्रलम्भम्। प्रेण व्यवहितत्वान्न भविष्यति। इदं तर्हि। अतिसुलभम्। कर्मप्रवचनीयसंज्ञात्र
बाधिका भविष्यति। सुः पूजायामतिरतिक्रमणे चेति। यदा तर्हि नातिक्रमणं न पूजा। इदं चाप्युदाहरणम्। सुप्रलभ
म्। ननु चोक्तं प्रेण व्यवहितत्वान्न भविष्यतीति। नैष दोषः। सुदुर्भ्यामिति नैषा पञ्चमी। का तर्हि तृतीया। सुदुर्भ्यामुपसृष्ट
स्येति। व्यवहितश्चाप्युपसृष्टो भवति। विभाषा चिण्णमुलोः। चिण्णमुलोरनुपसर्गस्य। चिण्णमुलोरनुपसर्गस्येति व
क्तव्यम्। इह माभूत्। प्रालम्भि। प्रलम्भं प्रलम्भं। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। इहोपसर्गादित्यपि प्रकृतं नेत्यपि। तत्रा
भिसंबन्धमात्रं कर्तव्यम्। विभाषा चिण्णमुलोः उपसर्गान्नेति॥ उगिदचां सर्वनामस्थानेऽधातोः॥ अधातोरिति किमर्थं
म्। उखास्रत्पर्णध्वत्। अधातोरिति शक्यमवक्तुम्। कस्मान्न भवति उखास्रत्पर्णध्वत्। उगित्यञ्चतिग्रहणात्सिद्धमधातोः। उगित्यञ्चतिग्रहणादधातोः सिद्धम्।

योरतेः कर्मप्रवचनीयसंज्ञाविधानादन्यत्रोपसर्गत्वात्तत्सहितयोः सुदुरोः केवलत्वाभावान्नुम्भवत्येवाक। तर्हीति। पञ्चमीपक्षेपि
केवलग्रहणमतिसुलभमित्येवमर्थं कर्तव्यमिति क्रमात्तुल्लङ्घनाय तृतीयैवाश्रयितव्येति भावः॥ वाक्यकारेण पठितं सुदुरोः प्रति
षेधो नुम्विधितलोपत्व णत्वेष्विति अतस्तन्मतेनातिसुलभमिति सोरुपसर्गत्वाभावान्नुम्न प्राप्नोति। भाष्यकारेण च अत्र नुमागमो
भ्युपगतस्तस्माद्वाक्यकारस्यापि केवलसुदुःशब्दविषय एव नुम्विधावुपसर्गसंज्ञानिषेधोऽभिमतः षत्वेपि पूजायामेव। तथा च सुषि
क्तं नाम किं न वात्रेति षत्वं च क्षेपे भवत्येव। विभाषा चिण्णमुलोः॥ लभेश्चेति नित्ये नुमि प्राप्ते विभाषा आरभ्यते चिण्णमुलोरिति। सोपस
र्गस्य तु नित्यमेव नुम्भवति। उपसर्गान्नेति। वाक्यभेदेन विकल्प एव प्रतिषिध्यत इति नित्यमेव नुम्भवति॥ उगिदचाम्॥ अधातोरिति
किमर्थमिति। अञ्चतिग्रहणान्नियमार्थाद्धातोर्निवृत्तिः सिद्धेति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोमानिति॥ क्विबन्ता धातुत्वं न जहतीति धातुरयमित्यञ्चतिग्रहणान्नियमार्थान्न स्यात्। अधातुग्रहणान्नुम् भवति। न स्यद्येतत्प्रयो
जनमवस्थान्तरेऽपि यस्याधातुत्वं दृष्टं तस्य संप्रति धातुत्वेऽपि नुम्न्यायः स्यादिति। अथात्र कथं दीर्घत्वं यावता त्वसन्तस्य चाधातोरि
त्यधातोरित्यनुवृत्तिरधीयते। उच्यते। अधातोरिति तत्र योगविभागः क्रियते। तत्र चासन्तस्येत्यनुवृत्त्याऽत्वन्तस्य पर्युदासाभावः॥ नपुंसक
स्य॥ गोमन्तीति। परत्वाज्झल्लक्षणे नुमि कृते पुनः प्रसङ्गविज्ञानादुगिल्लक्षणः प्राप्नोतीति तस्य प्रतिषेधो वक्तव्यः। ननु चेति। व्यक्तोपदार्थे
धे सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति भावः। इतर आकृतिपक्षमाश्रित्याह। कथमन्यस्येति। उभयोर्नुमोः प्रसङ्गे परस्परं प्र
तिबन्धाद्प्रतिपत्तौ प्राप्तायां विप्रतिषेधे परं कार्यमिति वचनेन परो नुम्विधीयमान उत्तरकालप्राप्तनिमित्तवन्तं पूर्वं नुमं नैव शक्नो
ति बाधितुम्। तथा चोच्यते पुनःप्रसङ्गविज्ञानात्सिद्धमिति। अन्यस्येति। अनुमः। अन्यस्येति। स नुमदित्यर्थः। स्यादेतत्। अन्यस्याप्युच्य

अञ्चतिग्रहणं नियमार्थं भविष्यति। अञ्चतेरेवोगितो धातोर्नान्यस्योगितो धातोरिति। इदं तर्हि प्रयोजनम्। अधा
तुभूतपूर्वादपि यथा स्यात्। गोमन्तमिच्छति गोमत्यति गोमत्यतेरप्रत्ययः गोमान्॥ नपुंसकस्य झलचः॥ झलचो
र्नुम्विधावुगित्प्रतिषेधः। झलचोर्नुम्विधावुगिल्लक्षणस्य प्रतिषेधो वक्तव्यः। गोमन्ति ब्राह्मणकुलानि श्रेयांसि भूयां
सि। ननु च झल्लक्षण उगिल्लक्षणं बाधिष्यते। कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात्। असति खल्वपि संभवे
बाधकं भवति। अस्ति च संभवो यदुभयं स्यात्। किं च स्यात्। यद्यत्रोगिल्लक्षणोऽपि स्याद्द्वयोर्नकारयोः श्रवणं
प्रसज्येत। न व्यञ्जनपरस्यानेकस्यैकस्य वा श्रवणं प्रति विशेषोऽस्ति। ननु च प्रतिज्ञाभेदो भवति। श्रुतिभेदे सति किं
प्रतिज्ञाभेदः करिष्यति। श्रुतिकृतोऽपि भेदोऽस्ति। इह तावत्। श्रेयांसि भूयांसि।

मानं कार्यमन्यस्य बाधकं भवति यथोक्तमपेरीत्वाद्गुणस्य वृद्धिर्विप्रतिषेधेनेत्यत आह। असति खल्वपीति। क्रमेण च नुमो विधानाद्
न्त्याद्चः परत्वं संभवति यथा पचतीति धात्वपेक्षं लट्त्रापोः। प्रतिज्ञाभेद इति। एकस्य प्रतिज्ञा एकोनकार इति। अपरस्य द्वौ नका
राविति। श्रुतिभेदे सतीति। कथं पुनः श्रुतिभेदाभावो यावतानेकहलुच्चारणे नाधिकः कालो व्याप्यते। एकहलुच्चारणे च स्तुत उच्य
ते। अच्कालव्यतिरेकेण व्यञ्जनानि कालान्तरं नासिफ़ीति दर्शनाश्रयेणेतदुक्तम्। यत्तु शास्त्रे व्यञ्जनानां कालः परिगण्यते तद्गुरु
लाघवनिरूपणाय। अनेकोच्चारणे हि प्रयत्नस्य गौरवं भवति। लौकिके तु प्रयोगे गुरुलाघवानादरात्तुल्य भेद उच्यते। अन्ये तु व्यञ्जनानां
कालभेदमिच्छन्त्येव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 परस्यानुस्वार इति। अयोगवाहानामट्सूपदेशाज्ञस्य लत्वाभावात्पूर्वस्य नकारस्यानुस्वारो नास्ति। ननु च वर्णग्रहणे जातिग्रहणाद्द्वयोर्नकारयोरेकोनुस्वार आदेशो विधास्यते। नैतदस्ति। स्थानिभेदादनुस्वारादेशद्वयप्रसङ्गात्। नद्ध इति वा गुणत्वादेकत्वसंख्याया अविवक्षितत्वादेकस्यैव नकारस्यानुस्वारः स्यान्नतु द्वयोः। णत्वमतिक्रामतीति। न प्राप्नोतीत्यर्थः। अनुस्वारे कर्तव्ये पूर्वत्रासिद्धमिति णत्वस्यासिद्धत्वादनुस्वारो नकारस्य भवति न तु णत्वं णत्वे च कर्तव्ये सिद्ध एवानुस्वार इति णत्वाभावः। असिद्धे च परसवर्णे-

परस्यानुस्वारे कृते पूर्वस्य श्रवणं प्राप्नोति तथा कुर्वन्ति कर्षन्तीति परस्यानुस्वार परसवर्णाभ्यां कृतयोः पूर्वस्य णत्वं प्राप्नोति। अथैकस्मिन्नपि नुमि णत्वं कस्मान्न भवति। अनुस्वारीभूतो णत्वमतिक्रामति। कृते तर्हि परसवर्णे कस्मान्न भवति। असिद्धे च परसवर्णः। विप्रतिषेधात्सिद्धम्। विप्रतिषेधात्सिद्धमेतत्। झल्लक्षणः क्रियतामुगिल्लक्षण इति। झल्लक्षणो भविष्यति विप्रतिषेधेन। झल्लक्षणस्यावकाशः। सर्पींषि। धनूंषि। उगिल्लक्षणस्यावकाशः। गोमान्। यवमान्। इहोभयं प्राप्नोति। गोमन्ति ब्राह्मणकुलानि यवमन्ति ब्राह्मणकुलानि। श्रेयांसि भूयांसि। झल्लक्षणो भविष्यति विप्रतिषेधेन। ननु च पुनः प्रसङ्गविज्ञानादुगिल्लक्षणः प्राप्नोति। पुनः प्रसङ्ग इति चेदमाद्दिमिसुल्यम्। पुनः प्रसङ्गादिति चेदमाद्दिमिसुल्यमेतद्भवति तद्यथा युष्मदस्मदोरमादिषु कृतेषु पुनः प्रसङ्गाच्छिशीलुङ्नुमो न भवन्ति। एवं झल्लक्षणे कृते पुनः प्रसङ्गादुगिल्लक्षणो न भविष्यति। यदप्युच्यतेऽसति खल्वपि संभवे बाधनं भवति। अस्ति च संभवो यदुभयं स्यादिति। सत्यपि संभवे बाधनं भवति। तद्यथा। दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति। एवमिहापि सत्यपि संभवे झल्लक्षण उगिल्लक्षणं बाधिष्यते। अथवा स्त्वत्र उगिल्लक्षणोपि। ननु चोक्तं द्वयोर्नकारयोः श्रवणं प्रसज्येतेति। परिहृतमेतद् नव्यञ्जने परस्येकस्यानेकस्य वा श्रवणं प्रति विशेषोस्तीति। ननु चोक्तं प्रतिज्ञाभेदो भवतीति। श्रुतिभेदे सति प्रतिज्ञाभेदः किं करिष्यति। ननु च श्रुतिकृतोपि भेद उक्तः। इह तावत् श्रेयांसि भूयांसीति।

इति। असिद्धप्रकरणे परसवर्णस्य विधानाद् णत्वे कर्तव्ये तस्यासिद्धत्वाण्णत्वाभावः॥ विप्रतिषेधादिति। व्यक्तिपदार्थाश्रयसहितात्। तद्यथा दधीति यद्यपि दृष्टान्ते सामान्यविशेषभावो बाधकहेतुर्दार्ष्टान्तिके तु विप्रतिषेधे परमेवेति नियमस्तथापि विनापि विरोधेन दृष्टं बाधकत्वमिति प्रदर्शनाय दृष्टान्तोपन्यासः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परस्येति॥ अयोगवाहानामविशेषेणोपदेशात् अट्ग्रहणादनुस्वारस्याट्त्वात्पूर्वस्याप्यनुस्वारो भवति ततो द्वयोरनुस्वारयोः श्रुतिं प्रति विशेषाभावः कुर्वन्तीत्यत्रापि पूर्वस्य नकारस्य अनुस्वारपरसवर्णयोः कृतयोः परसवर्णस्यासिद्धत्वाण्णत्वस्यातिक्रमः। न च द्वयोरिति॥ ननु च यद्यपि प्रयोगे पूर्वेण नुमा परस्य नुमोऽन्तरङ्गापेक्षमानन्तर्यं विहन्यते तथापि क्रमेण विधाने द्वयोः संभवत्येव परत्वमित्युक्तम्। नैष दोषः। प्रयोगाश्रयेणैतदुक्तम्। प्राधान्यात्प्रयोगस्यान्त्यादचः परो मित्प्रयोक्तव्य इत्यानन्तर्यमेवात्र संश्रितम्॥

परस्यानुस्वारे कृते पूर्वस्य श्रवणं प्रसज्येत। कुर्वन्ति कृषन्तीति परस्या नुस्वारपरसवर्णयोः कृतयोः पूर्वस्य णत्वं प्राप्नोतीति। नैष दोषः। अयोगवाहानामविशेषेणोपदेशश्चोदितः। तत्रेह तावत् श्रेयांसि भूयांसीति। परस्यानुस्वारे कृते तस्याट्त्वग्रहणेन ग्रहणात्पूर्वस्यानुस्वारो भविष्यति। कुर्वन्ति कृषन्तीति। परस्यानुस्वारे परसवर्णे च कृते तस्याट्त्वग्रहणेन ग्रहणात्पूर्वस्यानुस्वारपरसवर्णौ भविष्यतः। नैव वा पुनरत्र णिग्लक्षणः प्राप्नोति। किं कारणम्। मिदचोऽन्त्यात्पर इत्युच्यते। न च द्वयोर्मितोरचामन्त्यात्परत्वे संभवोऽस्ति। कथं तर्हि। इमौ द्वौ मितौ अचामन्त्यात्परौ स्तः। बहूनड्वांहि ब्राह्मणकुलानि इति। विनिमित्तावेतौ॥ तत्र बहूर्जि प्रतिषेधः॥ तत्र बहूर्जि प्रतिषेधो वक्तव्यः। बहूर्जि ब्राह्मणकुलानि। अन्त्यात्पूर्वं नुममेके। अन्त्यात्पूर्वं नुममेके इच्छन्ति। किमविशेषेण आहोस्विद्बहूर्जावेव। किं चातः। यद्यविशेषेण काष्ठतक्षीति भवितव्यम्। अथ बहूर्जावेव काष्ठतङ्क्षीति भवितव्यम्। एवं तर्हि बहूर्जावेव। बहूर्जि स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। अच इत्येषा पञ्चमी। अचउत्तरो योऽयं झल् तदन्तस्य नपुंसकस्य नुमा भवितव्यम्। यश्चात्र अचउत्तरो नासौ झल् नापि तदन्तं नपुंसकम्। यदन्तं च नपुंसकं नासावचउत्तरः। इहापि तर्हि न प्राप्नोति। काष्ठतङ्क्षीति। अत्र यः अचउत्तरो झल् न तदन्तं नपुंसकं यदन्तं नपुंसकं नासावच उत्तरः। नैतदस्ति। झल्जातिः प्रतिनिर्दिश्यते। अचउत्तराया झल्जातिरिति।

न च द्वयोर्नुमोरेकाजपेक्षमानन्तर्यं संभवति। पचतीत्यत्र तु सार्वधातुके परतः शब्विधानाद्विकरणव्यवधानमाश्रितमेव॥ विनिमित्ताविति भिन्ननिमित्तावित्यर्थः। उकारान्त्यर आम्। आमः परो नुम्। तत्रेति। झलच इति द्वन्द्वाश्रयणे दोषः। बहव ऊर्जो येषामिति बहुव्रीहिः। यद्यविशेषेणेति। काष्ठं तक्ष्णुवन्तीति क्विपि कृते जसः शिभावे चकारषकारयोर्मध्ये नुम्प्राप्नोति तस्य झल्परत्वादनुस्वारप्रसङ्गः। अच इत्येषेति। झलच इति न द्वन्द्वः। किं तर्हि। झलिति लुप्तषष्ठीकं पदम्। अच इति तु पञ्चम्यन्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुण्डानीति। इगन्तस्येति रसूत्रेण सिध्यतीत्यकारान्तस्यैव नुमो प्राप्तिरुच्यते। एवं तर्हीति॥ वाक्यभेदेनाजन्तस्य सर्वनामस्थाने नु विधीय
ते। सर्वनामस्थाने इत्येवेति। ननु पञ्चमीसप्तम्योरियोरपि सावकाशत्वात्परत्वात्पञ्चम्येव प्रकल्पिकया भाव्यम्। एवं तर्हीत्यत्र वाचीपर भा-
वः। अतः सप्तम्यपि क्वचित्प्रकल्पिका भवतीत्यदोषः। इकोचि॥ अज्ग्रहणमिति। हलादौ नुमो लोपविधानात्तन्निवृत्त्यर्थम
ज्ग्रहणं नोपयुज्यते इति प्रश्नः॥ स्वरेण प्राप्नोतीति। नुमेगन्ततायाविधानात्। लुप्ते किन्नेति। स्वरे कर्तव्ये नलोपस्यासिद्धत्वेन वा
सिद्धत्वं प्रतिपाद्यते न तु प्रयोगे नकारस्य सद्भावः। ततश्च नुमः सद्भावेऽपि यत्र स्वरो भवति तत्रासद्भावे कथं न स्यादित्यर्थः। संघात
भक्त इति। अङ्गस्य विधानादिह हि रङ्गलावनुमेन रङ्गः स्वरः पूर्वमेव प्रवर्तते। अतिराभ्यामिति॥ अतिरिभ्यामिति स्थिते नुमि कृते ने

यदि पञ्चमी कुण्डानि वनानि इत्यत्र न प्राप्नोति। एवं तर्हि इकोचि विभक्तावित्यत्राचः सर्वनामस्थाने इत्येतदनुव
र्तिष्यते। एवमपि षष्ठ्यभावान्न प्राप्नोति। सर्वनामस्थाने इत्येषा सप्तमी अच इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति।
तस्मिन्निति निर्दिष्टे पूर्वस्येति। इकोचि विभक्तौ॥ अज्ग्रहणं किमर्थम्। इकोवि व्यञ्जने माभूत्। इकः अचीत्युच्य
ते व्यञ्जनादौ माभूत्। त्रपुभ्यां त्रपुभिः। असत्यु लोपः। अस्त्वत्र नुम्। नलोपः प्रातिपदिकान्तस्येति नलोपो भविष्यति
। स्वरः कथम्। पत्पञ्च त्रपुभ्याम्। पञ्चत्रपुभ्यः। इगन्ते द्विगाविति एष स्वरो न प्राप्नोति। स्वरो वै श्रूयमाणेऽपि। श्रू
यमाणे पि नुमि स्वरो भवति। पञ्चत्रपुणा पञ्चत्रपुणे इति। लुप्ते किं न भविष्यति, लुप्ते इदानीं किं न भविष्यति। किं
पुनः कारणं श्रूयमाणे पि नुमि स्वरो भवति। संघातभक्तो सौ नोत्सहते ऽवयवस्येगन्ततां विहन्तुमिति कृत्वा। ततः श्रूय
माणे पि नुमि स्वरो भवति। इदं तर्हि अतिराभ्याम्। अतिराभिः। नुमि कृते रायो हलीत्यात्वं न प्राप्नोति। इदमिह संप्रधा
र्यं नुम् क्रियतामात्वमिति। किमत्र कर्तव्यम्। परत्वादात्वम्। इह तर्हि प्रियतिसृभ्याम्। प्रियतिसृभिः। नुमि कृते तिसृ
भावो न प्राप्नोति। इदमिह संप्रधार्यं नुम् क्रियतां तिसृभाव इति।

न व्यवधानादिति राङ्गस्यात्वं न प्राप्नोति। सुब्विधौ नलोपस्यासिद्धत्वाच्च। अथापि पदाङ्गाधिकारे तस्य च ग्रहणं भवति तदुत्तरपदस्य चेति
रैशब्दान्तस्याङ्गस्यात्वं विधीयत इति नास्ति नुमाङ्गस्य व्यवधानं तथापि नकारस्यात्वं प्राप्नोति तस्मिन्पूर्वस्य णि सति अतिर्याभ्या रामः
मिति प्राप्नोति॥ परत्वादात्वमिति॥ आत्वमनित्यं नुमि कृते तेन व्यवधानादप्रसङ्गादथवा रैशब्दान्तरप्राप्त्या नुमि कृते नकारस्य ७२
प्रसङ्गात्। अकृते त्विकारस्य। नुमप्यनित्यः। कृते आत्वे प्राप्त्यभावात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परत्वात्तिसृभाव इति। शब्दान्तरप्राप्त्या नुमनित्यः। तिसृभावे कृते तेन व्यवधानान्न प्राप्नोतीत्यनित्यः। स हि यद्यपि त्रिश
ब्दान्तस्याङ्गस्य विधीयते तदुक्तत्वाच्च नुमव्यवधायकस्तथापि निर्दिश्यमानस्यादेशा भवन्तीति त्रेरेव तिसृभावेन भाव्यं स
च नुमा व्यवहित इति तिसृभावस्याप्राप्तिस्तदेवमुभयोरनित्ययोः परत्वात्तिसृभावः। त्रपूणामिति॥ सत्यजग्रहणे द्वयोर
पि नुम्नुटोरनित्यत्वाद्धि प्रतिषेधे सति नुमचिरतृज्वद्भावेभ्यो नुडिति पूर्वविप्रतिषेधान्नुड्भवति। तस्मिंश्च नामीति दीर्घत्व
म्। असति त्वजग्रहणे कृताकृतप्रसङ्गित्वान्नित्यत्वान्नुमेव स्यात्। नुडर्थो यत्न इति। अजग्रहणं च कर्तव्यं पूर्वविप्रतिषे

धिश्चात्र कर्तव्यम्। परत्वात्तिसृभावः। अथेदानीं तिसृभावे कृते पुनःप्रसङ्गविज्ञानान्नुम् कस्मान्न भवति। सकृद्गतौ विप्र
तिषेधे यद्बाधितं तद्बाधितमेवेति। अत उत्तरं पठति। इकोऽचि विभक्तावजग्रहणं नुम्नुटोर्विप्रतिषेधार्थम्॥ इकोऽचि वि
भक्तावजग्रहणं क्रियते नुमो नुड् विप्रतिषेधेन यथा स्यात्। त्रपूणां जतूनाम्। इतरथा हि नुमो नित्यनिमित्तत्वान्नुड
भावः। अक्रियमाणेऽपि वै अजग्रहणेऽवश्यमत्र नुडर्थो यत्नः कर्तव्यः। पूर्वविप्रतिषेधो वक्तव्यः। इदं तर्हि प्रयोजनम्।
नुटि कृते नुम्मा भूदिति। किं च स्यात्। त्रपूणां जतूनां नामीति दीर्घत्वं न स्यात्। मा भूदेवं नोपधाया इत्येवं भविष्यति। इह
तर्हि त्रुचीनाम्। इन्हन्पूषार्यम्णां शौ। सो चेत्तस्मान्नियमान्न प्राप्नोति दीर्घत्वम्। अर्थवद्ग्रहणे नानर्थकस्येत्येवं न भवि
ष्यति। नैषा परिभाषा न्याय्या विज्ञातुम्। इह हि दोषः स्याद्वाग्मीति। एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति॥
उत्तरार्थं च॥ उत्तरार्थं तर्ह्यजग्रहणं कर्तव्यम्। अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः। अजादौ यथा स्यात्। इह मा भूत्। अ-
स्थिभ्यामस्थिभिः। यद्युत्तरार्थं स्यात्तत्रैवायमजग्रहणं कुर्वीत। इह हि क्रियमाणे यदि किंचित्प्रयोजनमस्ति तदुच्यताम्।

धश्च वक्तव्य इति यत्नद्वयमाश्रयणीयं तत्राजग्रहणमकृत्वैव एक एव नुडर्थो यत्नः कर्तव्य इत्यर्थः। नुटि कृत इति। यत्नान्तरेण नुटि कृ
ते नुम् प्राप्नोतीत्यर्थः। किं च स्यादिति। नलोपे कृते दोषाभावं मन्यते। नामीति नलोपस्य सुब्विधावसिद्धत्वादजन्तत्वाभावात्। इह तर्हीति।
इन्हन्निति नियमः सर्वस्योपधालक्षणस्य दीर्घत्वस्येति व्याख्यातम्। नैषेति। अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेनेति वचनात्। तथा
च वाग्मिन इत्यादावपि नियमाद्दीर्घाभावः। तत्रैवायमि ति। एवं हि स्वरितत्वं न प्रतिज्ञेयं भवति। प्रत्यक्षश्रुतिसंभवे चानुमानं नाश्रयि
तव्यं भवति॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ हे त्रपुहे त्रपो इति। हे त्रपु इति प्राप्ते हे त्रपो इति भवतीत्यर्थः। केचित्तु रूपद्वयमिच्छन्त इत्याहुः। क्वचित्प्रत्ययलक्षणं नुमनात्तुस्थायामपि ७ १२
७३ संबुद्धौ भवतीत्येतदज्ग्रहणेन ज्ञाप्यते न तु सर्वत्रेति ते वदन्ति॥ तृतीयादिषु॥ किमिहेति। अन्यत्र परप्रत्ययाणि कार्याणि अतिदिश्यन्ते
न तु स्वाश्रयकार्याभावः। इह तु विपर्ययो दृश्यत इति मत्वा प्रश्नः। कथं पुनरिति। पुंवदित्यनेन नुम्प्रतिषेधोऽत्र क्रियेति देष्टुं न हि पुंसि नु
म्प्रति षेधो विहितः। कामचारश्चेति। यत्र क्रियायाश्चेन नोपात्ता तत्र कामचारः। न तु ब्राह्मणवत्क्षत्रिये वर्तितव्यमित्यादावुपात्तक्रिये

इहापि क्रियमाणे प्रयोजनमस्ति। किम्। अजादौ यथा स्यात्। इह मा भूत्। त्रपुजतु। एतदपि नास्ति प्रयोजनम्। विभक्तावित्युच्यते। न चात्र विभक्तिं पश्यामः। प्रत्ययलक्षणेन। न लुमताङ्गस्येति प्रत्ययलक्षणस्य प्रतिषेधः। एवं तर्हि सिद्धे सति यदज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो भवतीह क्वचिदन्योऽपि प्रकारः प्रत्ययलक्षणं नामेति। किमेतस्य ज्ञापने प्रयोजनम्। हे त्रपु हे त्रपो। अत्र गुणः सिद्धो भवति। इकोऽचि व्यञ्जने मा भूदस्तु लोपः स्वरः कथम्। स्वरो वै श्रूयमाणेऽपि लुप्ते किं न भविष्यति। एयात्वं तिसृभावश्च व्यवधानान्नुमा अपि। नुड्वाच्य उत्तरार्थं तु इह किंचित्त्रपो इति॥ तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य॥ किमिह पुंवद्भावेनातिदिश्यते। नुम्प्रतिषेधः। कथं पुनः पुंवदित्यनेन नुम्प्रतिषेधः शक्यो विज्ञातुम्। आवतिनिर्देशोऽयम्। कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम्। तद्यथा। उशीनरवन्मद्रेषु यवाः सन्ति न सन्ति। मातृवदस्याः कलाः सन्ति न सन्तीति। एवमिहापि पुंवद्भवति पुंवन्न भवतीति वाक्यशेषं समर्थयिष्यामहे। यथा पुंसो न नुम्भवति एवं तृतीयादिषु भाषितपुंस्कस्यापि न भवतीति। किमुच्यते नुम्प्रतिषेध इति न पुनरन्यदपि पुंसः प्रतिपदं कार्यमुच्यते यत्तृतीयादिष्वजादिषु विभक्तिषु भाषितपुंस्कस्यातिदिश्येत। अनारम्भात्पुंसि। न हि किंचित्पुंसि प्रतिपदं कार्यमुच्यते यत्तृतीयादिष्वजादिषु विभक्तिषु भाषितपुंस्कस्यातिदिश्येत। नुम्प्रकृतस्तत्रापि किमन्यच्छक्यं विज्ञातुम्। अन्यदतो नुम्प्रतिषेधात्। पुंवदिति नुम्प्रतिषेधश्चेन्नुणनाभावनुडौत्वप्रतिषेधः॥ पुंवदिति नुम्प्रतिषेधश्चेन्नुणनाभावनुडौत्वानां प्रतिषेधो वक्तव्यः।

निर्देशे प्रतिपन्ना चोपमाने भावाभावयोरन्यतरमवगत्य वाक्यशेषं कल्पयति। तत्र पुंसि नुमभावदर्शनान्नपुंसके पुंवदतिदेशान्नुम-
भावः प्रतीयते। तत्रेह ग्रामे यथा लक्ष्यं क्वचिद्भवतीत्यस्याध्याहारः। क्वचिन्न भवतीत्यस्य। क्वचिदुभयस्य। यथा स्थानिवदतिदेशे। त एमः
था चवाय्वोरित्यादौ स्वाश्रयलोपाभावः। न हि किंचिदिति। तस्माच्छसो नः पुंसीति नत्वातिदेशात्तृतीयादिषु पुंवद्भावातिदेशान्न पूर्वस ७३
वर्णदीर्घाभावाच्चेह न संभवति। नुम्प्रकृत इति। अनेन प्रत्यासत्तिमाश्रयति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रस्वत्वमप्रतिषिद्धमिति। तस्याप्रकृतत्वात्। अर्थातिदेशात्सिद्धमिति। यद्यपि प्रकरणमनपेक्ष्य व्यासाश्रयेणापि ह्रस्वाभावः सिध्यति तथापि संभवात्परिहारान्तरमाश्रितम्। यदि कार्यातिदेशः स्यात्तदा प्रकृताप्रकृतत्वलक्षणो भेदः स्यादर्थात्वतिदिश्यमानेनास्य यं भेदः। नैवं विज्ञायत इति। यदा शब्देऽन्यपदार्थे कार्यातिदेशः स्यात्तदा प्रकृतस्यैव नुमः प्रतिषेधः स्यान्न ह्रस्वस्य। भाष्यते पुमानस्मिन्नर्थे इति। अर्थोऽन्यपदार्थ आश्रीयते स चार्थो नपुंसकलक्षणो विरोधान्नाश्रीयते। न हि नपुंसकेऽर्थे पुंसो भाषणमुपपद्यते। तस्माच्छब्दप्रवृत्तिनिमित्तलक्षणोऽर्थोऽन्यपदार्थत्वेनाश्रीयते। तद्योगाच्चाभिधेयं नपुंसकं तदपि भाषितपुंस्कमुच्यते। तस्यार्थस्य पुंस्त्वातिदेशाद्द्वावपि नुम्ह्रस्वौ न भवतः। पुंसि तयोरप्यभावात्। अर्थस्य चापौरुषेयत्वादतिदेशासंभवात्तदतिदेशद्वारेणानेककार्यो

गुणः ग्रामण्ये ब्राह्मणकुलाय। गुणः। नाभावः ग्रामण्या ब्राह्मणकुलेन। नाभावः। नुट्। ग्रामण्यां ब्राह्मणकुलानाम्। नुट्। औत्वम्। ग्रामण्यां ब्राह्मणकुले। ह्रस्वत्वम् अप्रतिषिद्धम्। ह्रस्वाश्रयाश्चैते विधयः प्राप्नुवन्ति। ह्रस्वाभावार्थं च। किं च। नुम्प्रतिषेधार्थं च। कथं पुनरत्राप्रकृतस्याऽसंज्ञाबद्धि तस्य ह्रस्वत्वस्य प्रतिषेधः शक्यो विज्ञातुम्। अर्थातिदेशात्सिद्धम्। नैवं विज्ञायते। भाष्यते पुमाननेन सोऽयं भाषितपुंस्कः। भाषितपुंस्कस्य शब्दस्य पुंशब्दो भवतीति। कथं तर्हि। भाष्यते पुमानस्मिन्नर्थे सोऽयं भाषितपुंस्कः। भाषितपुंस्कस्यार्थस्य पुंवदर्थो भवतीति। तद्धितलुक्प्रतिषेधश्च। तद्धितलुकि च प्रतिषेधो वक्तव्यः। पीलुर्वृक्षः। पीलु फलम्। पीलुना पीलुनेति। न वा समानायामाकृतौ भाषितपुंस्कविज्ञानात्। न वा वक्तव्यम्। किं कारणम्। समानायामाकृतौ भाषितपुंस्कविज्ञानात्। समानायामाकृतौ यद्भाषितपुंस्कम्।

निर्देश एवायं संपद्यते। तत्र यद्यप्यन्तरङ्गो ह्रस्वस्तथाप्यपवादविषयं प्रकल्प्योत्सर्गाणां प्रवर्तनान्नात्र प्रवर्तते। ह्रस्वाभावाच्च गुणादीनां निमित्ताभावादप्रवृत्तिः सिद्धा। तद्धितलुगिति। अर्थातिदेशस्यैव प्रयोजनान्तरं चोद्यमुखेनोपन्यस्यते। फले लुगित्यौरत्रो लुकि कृते पीलुशब्दो वृक्षाकृतौ पुंलिङ्गः। फलाकृतौ नपुंसकलिङ्ग इति पुंवद्भावान्नुमोऽप्रसङ्गः। न वेति। नन्वाकृतिरेवान्यपदार्थत्वेनाश्रिता। भाषितपुंस्कशब्दस्तु भाषितपुंस्कव्यपदेशो नैवाश्रितः। सत्यम्। साक्षाच्छब्दस्य भाषितपुंस्कव्यपदेशो नास्त्यभिधेयद्वारकस्तु केन निवार्यते। न च पीलुशब्दो वृक्षाकृतौ पुंल्लिङ्गः। फलाकृतौ नपुंसकलिङ्ग इति पुंवद्भावप्रसङ्गः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईचद्विवचने। पूर्वसवर्णेनेति। अक्षिणी इति स्थिते छन्दसि पुंवद्भावाच्छ्रीभावे नुमि चासति प्रथमयोः पूर्वसवर्ण इत्यनेन। नुमाव्यवहित त्वादिति। प्रथमयोः पूर्वसवर्ण इत्यत्राक इति वर्त्तते तेनाग्चोः स्थाने पूर्वसवर्णे दीर्घ उच्यमानो नुम्व्यवधानेनास्तीत्यक्षिणी इति प्राप्नोति परत्वाच्च नुम् प्राप्नोति। ईकारस्तु विधीयमानः परत्वान्नुमं बाधते तेन स्त्रीभावे कृते पूर्वसवर्णेनाक्षी इति सिध्यति। नुमि निवृत्ते इति। अप्रवृत्तिरेव निवृत्तिः। स्त्रीभावोपि पुंवद्भावान्न भवति। स्वरार्थ इति। उदात्तग्रहणानुवर्त्तनादीकार उदात्तः। नपुंसकस्वर इति। नविषयस्यानिसन्तस्येत्याद्युदात्तत्वम्। ननु चेति। अव्युत्पत्तिपक्षे चोद्यते। व्युत्पत्तिपक्षे त्वक्ष्णोर्निदिति नित्वादाद्युदात्त

आह कृत्यन्तरे चेन्नद्भाषितपुंस्कम्। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। एतदप्यर्थनिर्देशात्सिद्धम्॥ ईचद्विवचने॥ किमुदाहरणम्। अक्षीते इन्द्र पिङ्गले। नैतदस्ति। पूर्वसवर्णेनाप्येतत्सिद्धम्। इदं तर्हि अक्षीभ्यां ते नासिकाभ्याम्। इदं चाप्युदाहरणम्। अक्षी ते इन्द्र पिङ्गले। ननु चोक्तं पूर्वसवर्णेनाप्येतत्सिद्धमिति। नुमा व्यवहितत्वात् पूर्वसवर्णो न प्राप्नोति। छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यः। मधोर्गृभ्णामि। मधोस्तृप्ता इवासते। इत्येवमर्थम्। पुंवद्भावेन नुमो निवृत्तिः। नुमि निवृत्ते पूर्वसवर्णेनैव सिद्धम्। स्वरार्थस्तर्हीकारो वक्तव्यः। उदात्तस्वरो यथा स्यात्। नपुंसकस्वरो मा भूत्। ननु च पुंवद्भावातिदेशादेव स्वरो भविष्यति। अत्राक्यः पुंवद्भावातिदेशः सन्नाश्रयितुम्। इह हि दोषः स्यात् मधस्सिन्नस्ति। मधुर्मी सइति। सतर्हि पुंवद्भावो वक्तव्यः। न वक्तव्यः। प्रकृतं पुंवदिति वर्त्तते। नाभ्यस्ताच्छतुः॥ कस्यायं प्रतिषेधः। नुम इत्याह। तन्नुमो ग्रहणं कर्त्तव्यम्। न कर्त्तव्यम्। प्रकृतमनुवर्त्तते। क प्रकृतम्। इदितो नुम्धातोरिति। तद्वै अनेकग्रहणेन व्यवच्छिन्नमशक्यमनुवर्त्तयितुम्।

त्वेन भाव्यम्। मधुर्मीस इति। मत्वर्थे मासतन्वोर्मधोर्ञे चेति यत उत्पन्नस्य लुगकारेकारेरेफादेशाश्च वक्तव्या इति लुकि कृते मासे पुंसि मधुशब्दो वर्त्तत इत्याद्युदात्तत्वं न स्यात्। तस्माद्यस्यान्यत्र नपुंसकत्वं दृष्टं तस्यास त्यपि नपुंसकत्व आद्युदात्तत्वमिष्यत इति पुंवद्भावेपि स्वरानिवर्त्तनात्स्वरार्थ ईकारो विधेयः॥ सतर्हीति। मधोर्गृह्णामीत्येवमाद्यर्थः। प्रकृतमिति॥ वाक्यभेदेन संबन्धः क्रियते। छन्दसि नपुंसकं पुंवदित्येकं वाक्यम्। अस्थ्यादीनां छन्दसि द्विवचन ईकारो भवतीति द्वितीयं वाक्यम्। नाभ्यस्ताच्छतुः॥ कस्यायमिति॥ आच्छीनद्योर्नुमितिनुम् ग्रहणाद्व्यवहितस्यानुवृत्तिर्नास्तितानचानन्तरः प्रतिषेधार्ह इति प्रश्नः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवं तर्हीति। उगिदचां सर्वनामस्थानेऽधातोरित्यतः सर्वनामस्थानं निषेध्यलक्षणार्थं विज्ञायते। सर्वनामस्थाने यत्प्राप्नोति न तदस्य ल-
च्छतुर्न भवतीति नुम एव प्रतिषेधः संपद्यते। बहुतरकेणेति। नुमागमश्च तुर्भियोगैर्विच्छिन्नः। सर्वनामस्थानं तु पञ्चभिरि-
ति प्रकर्षप्रत्ययनिर्देशः। आच्छीनद्योर्नुम्। इह कस्मादिति॥ सर्वत्र एवावर्णस्य निवृत्त्याभाव्यम्। क्वचिल्लुका क्वचिच्छ्लुना। क्वचि-
देकादेशेनाक्व नित्युश्नाभ्यस्तयोरात इति लोपेन। तत्रावर्णसंभूतपूर्वे गतिराश्रयितव्या। अवर्णनिवृत्तिशास्त्रस्य चानुमागमविधाना-
त्पूर्वं प्रतिबन्धादप्रवृत्तिः ततश्चात्रापि प्रसङ्ग इति भावः। लोपे कृत इति। नित्यत्वादन्तरङ्गत्वाच्च। पूर्वोक्ते नैवाभिप्रायेण चोदय

एवं तर्हि सर्वनामस्थानमिति वर्तते। सर्वनामस्थाने यत्प्राप्नोति तस्य प्रतिषेधः। तद्धि बहुतरकेण ग्रहणेन व्यवच्छि-
न्नमशक्यमनुवर्तयितुम्। अथेदानीं व्यवहितमपि शक्यतेऽनुवर्तयितुम्। नुमेवानुवर्त्यं इहार्थमुत्तरार्थं च। इह
चैव प्रतिषेधः सिद्धो भवति। इह च आच्छीनद्योर्नुमिति नुम्ग्रहणं न कर्तव्यं भवति॥ आच्छीनद्योर्नुम्॥ इह कस्मा-
न्न भवति। अदती घ्नती लुनती पुनतीति। लोपे कृते चावर्णाभावात्। किं तर्ह्यस्मिन्योगे उदाहरणम्। याती यान्ती। अ-
त्रापि एकादेशो व्ययवर्गाभावान्न प्राप्नोति। अन्तादिवद्भावेन व्यपवर्गः। उभयत आश्रयेणान्तादिवद्भावः। नोभय-
त आश्रयः करिष्यते। नैवं विज्ञायते अवर्णान्तादङ्गादुत्तरस्य शतुर्नुम्भवतीति। कथं तर्हि। अवर्णान्नुम्भवति। तच्चेदवर्णं शतुरन-
न्तरमिति॥ शप्श्यनोर्नित्यम्॥ नित्यग्रहणं किमर्थम्। विभाषा मा भूत्। नैतदस्ति प्रयोजनम्। सिद्धोऽत्र पूर्वेणैव। तत्रा-
रम्भसामर्थ्यान्नित्यो विधिर्भविष्यति। तदेतन्नित्यग्रहणं सान्न्यासिकं तिष्ठतु तावत्। सावनडुहः॥ अनडुहः सावाम्प्र-
तिषेधो नुमोऽनवकाशत्वात्। अनडुहः सावाम्प्रतिषेधः प्राप्नोति। किं कारणम्। नुमोऽनवकाशत्वात्। अनवकाशो नुम्।
आमं बाधते।

॥ किं तर्हीति। इतरः सांप्रतिकमवर्णान्तं दर्शयितुमाह। यान्तीति। नैवं विज्ञायत इति। एवं विज्ञायमाने वर्णेनाता चोभयमाश्रितं स्यात्।
अवर्णान्नुम् भवतीति। अवर्णात्पर इत्यर्थः। अत्र च यवव्यतिरिक्तश्चावर्णो गृह्यते। आदित्युपादानसामर्थ्यात्। तच्चेदवर्णमिति।
अत्र च यद्यप्यलकारः शतृशब्देनोच्यते। न ह्यन्यथा एकादेशे कृते शतुरनन्तरमवर्णं भवति। उभयत आश्रये च नान्तादिवदित्युक्तम्। त-
त्राच्च यद्यप्यलकारः शत्रा तत्राद्देनोच्यते तत्र शपकारव्यतिरिक्तं चावर्णमेकादेशात्मकमाश्रीयत इति न कश्चिद्दोषः। सावनडुहः ॥
॥ आमागमः सर्वनामस्थानमात्रे विधीयमानः सोऽन्यत्र सावकाशो निरवकाशेन नुमा बाध्येतेति मत्वाह॥ अनडुहः साविति।

CC-0. In Public Domain. Digitization by eGangotri

अवर्णोपधस्येति। नचाभाविनावर्णोपधत्वसंभवदिति निमित्तमेवनुमआमिति बाध्यबाधक भावाभावः॥ अनडुहि यावत्तीति। अ नडुहोकारान्तत्वासंभवादनडुहावर्णोविशेष्यते नतवर्णेनानडुच्छब्दस्ततः सर्वावर्णानांनुम्प्रसङ्गः। यद्येवंसत्यामप्यादि त्यस्यानुवृत्तौयदेवसन्निहितमवर्णंतस्यैवनुम्स्यात्तथाचनुमाआम्बाध्येतानैषदोषः आगमिभेदात्। आमनडु होनुम्त्ववर्ण स्यतस्मात्सर्वावर्णानांनुम्प्रसङ्ग एवदोषः। मिदचोन्त्यादिति। मित्त्वलिङ्गाच्चमि त्परिभाषोपतिष्ठतेदुपस्थानादुकारात्परोनुम्प्रस क्तआदित्यधिकारादवर्णादन्त्यात्परः क्रियते। नचाप्यकृतेवर्णोन्त्योभवतीति सामर्थ्यादामिकृतेनुम्विधीयते। अथवोकारात्प

नवावर्णोपधस्यनुम्वचनात्। नवाएषदोषः। किंकारणम्। अवर्णोपधस्यनुम्वचनात्। अवर्णोपधस्यनुमंवक्ष्यामि। तदवर्णग्रहणंकर्तव्यम्। नकर्तव्यम्। प्रकृतमनुवर्तते। क्वप्रकृतम्। आच्छीनद्योर्नुमिति। यदितदनुवर्तते। अ नडुहि याकन्त्यवर्णानिसर्वेभ्यः परोनुम्प्राप्नोति। मिदचोन्त्यात्परइत्यनेनयत्सर्वोन्त्यमवर्णं तस्मात्परोभविष्यति। पुनःप्रसङ्ग विज्ञानाद्वासिद्धम्। अथवापुनःप्रसङ्गान्नुमिकृतेआम्भविष्यति। यथाआत्वादिषुद्विर्वचनम्। तद्यथाजग्लेमम्लेईजतुरीजुरिति। आत्वादिषुकृतेषुपुनःप्रसङ्गाद्द्विर्वचनंभवति। एवमत्रापिनुमिकृ तेआम्भविष्यति। नैषयुक्तःपरिहारः। विप्रतिषेधेपुनःप्रसङ्गः। विप्रतिषेधश्चद्वयोःसावकाशयोर्भवति। इहपु नरनवकाशोनुमामंबाधते। एवंतर्हिवृत्तान्तादेषपरिहारःप्रस्थितः। कस्माद्वृत्तान्तात्। इदमयंचोद्योभवति। अनडु हःसावाम्प्रतिषेधोनुमोनवकाशत्वादितितस्यपरिहारोनवावर्णोपधस्यनुम्वचनादिति। ततोयंचोद्योभवति। यत्र तर्ह्यवर्णप्रकरणंनास्तितत्रतेआमानुमोबाधनंप्राप्नोति। बहुनड्वांहिब्राह्मणकुलानि। ततउत्तरकालमिदंपठितंपु नःप्रसङ्ग विज्ञानाद्वासिद्धमिति॥ दिवओत्॥ दिवओत्वेधातोःप्रतिषेधः। दिवऔत्वेधातोःप्रतिषेधोवक्तव्यः।

रएवविधीयते। तत्रादित्यधिकारादयमर्थोभवति। यथावर्णात्परोनुम्भवतितथाकर्तव्यमेवंचावर्णात्परोभवति। यदिकृतेनुम्यामुक्रि यते। एवंचसत्यादित्याधिकारोनुगृहीतोभवति। परिभाषाचनन्यकाभवति॥ पुनःप्रसङ्ग विज्ञानादिति। चार्थेवाशब्दः। बहूनड्वांहीति। परत्वादामिकृतेपुनःप्रसङ्ग विज्ञानान्नपुंसकस्यझलचइतिनुम्क्रियतेइतिवाक्यार्थः। भाष्यकारस्तुन्यायव्युत्पादनार्थंविक- एमः
ल्पार्थेवाशब्दंव्याख्यायदूषयित्वासमुच्चयार्थमेवव्याचष्टे। वृत्तान्तादिति। प्रसङ्गोवृत्तान्तस्तस्माद्यप्रसङ्गादित्यर्थः। अथवावृत्तोऽतिक्रा ७५
न्तोयः प्रबन्धश्चोद्यसमाधानलक्षणः। तदन्तेव्यवस्थितंपश्चोद्यंतदपचाराद्वृत्तान्तशब्दवाच्यंतस्मादित्यर्थः॥ दिवओत्॥ दिवऔत्व इति। विशेषानुपादानाद्गतोरपिप्राप्नोति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अक्षय्यूरिति। कुठि कृते एकदेशविकृतस्यानन्यत्वाद्दोषप्रसङ्गः॥ अननुबन्धकग्रहण इति। अव्युत्पन्नं हि विति प्रातिपदिकमननुबन्धक
म्। व्युत्पत्तिपक्षेप्यवयवानां प्रत्ययादीनां सानुबन्धकत्वं न प्रातिपदिकस्य संबन्धमिति। उगिदचामित्यनेन। दि...वओदित्य त्रत्व धातोरि-
ति वर्तते। उगिदचामिति निवृत्तम्॥ इतोऽत्सर्वनामस्थाने॥ इतो वचनमिति। क्वचिदेकादेशविधानात्क्वचिद्दीर्घविधानाच्चह्रस्वस्यश्रवणे
न न भाव्यमित्याकारस्य प्रकृतत्वादितो विधेय इत्यर्थः। षपूर्वार्थमिति। वा षपूर्वस्य निगम इति दीर्घविकल्पेन रूपद्वयसिद्धिरकारविधौ
त्वेकमेव रूपं स्यादिति दीर्घविकल्पस्तु तक्षणं तक्षाणमित्याद्यर्थं स्यात्॥ पुंसोसुङ्॥ असुङीति॥ पातेर्डुम्सुन्नित्याद्युदात्तस्य पुंसः सकारस्याविध

अक्षय्यूरिति। अधात्वधिकारात्सिद्धम्। अधातोरिति वर्तते क। प्रकृतम्। उगिदचां सर्वनामस्थाने धातोरिति। अधात्वधि
कारात्सिद्धमिति चेन्नपुंसके दोषः अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषो भवति। काष्ठतक्षि कूटतक्षि नपुंसक-
स्य झलचः अधातोरिति प्रतिषेधः प्राप्नोति। उक्तं वा॥ किमुक्तम्। अननुबन्धकग्रहणे सानुबन्धकस्येति। अथवा
संबन्धमनुवर्तिष्यते॥ इतोत्सर्वनामस्थाने॥ इतो वचनमनर्थकमाकारप्रकरणात्। इतो वचनमनर्थकम्। किं कार
णम्। आकारप्रकरणात्। आदिति वर्तते। षपूर्वार्थं तु। षपूर्वार्थं तर्हीदं वक्तव्यम्। ऋभुक्षणमिन्द्रम्। ऋभुक्षाणमिन्द्र
दू म्॥ पुंसोसुङ्॥ असुङ्ङुपदेशिवद्वचनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वात्। असुङ्ङुपदेशिवद्भावो वक्तव्यः। उपदे
शावस्थायामेवासुङ् भवतीति वक्तव्यम्। किं प्रयोजनं स्वरसिद्ध्यर्थम्। उपदेशावस्थायामसुङि कृते इष्टः स्वरो य
था स्यात्। परमपुमानिति। अक्रियमाणे ह्युपदेशिवद्भावे समासान्तोदात्तत्वे सुङ् आन्तर्यतः अस्वरकस्यास्वरकः स्या
त्। किं पुनः कारणं समासान्तोदात्तत्वं तावद्भवति। न पुनरसुङ्। न पुनरसुङा भवितव्यम्। बहिरङ्गलक्षणत्वात्।
बहिरङ्गलक्षणो हि सुङ् अन्तरङ्गः स्वरः। असिद्धं बहिरङ्गमन्तरङ्गे।

मान्तोदात्तत्वादनुदात्तस्य स्थानेऽसुङि क्रियमाणे आन्तरतम्यादनुदात्तं पदमेकवर्जमिति वचनाद्वा अनुदात्त एवं भवतीति पुमानित्यादौ दो
षाभावः। परमपुमानित्यत्र बहिरङ्गत्वात्समासान्तोदात्तत्वे कृते सर्वनामस्थाने उत्पन्नेऽसुङ् क्रियमाणेऽनुदात्तः प्राप्नोति उदात्त इष्यते
ननु योदात्तस्य कृतमपि समासान्तोदात्तत्वमसुङि कृतेऽनन्यत्वान्न व्यवतिष्ठते नैतदस्ति। अन्तरङ्गे स्वरे कर्तव्ये बहिरङ्गस्यासुङोऽसिद्ध
त्वान्निर्वृत्तस्य दानिवर्तनादुपदेशिवद्वचनात्तु पूर्वमसुङ् भवति। पश्चात्तमासान्तोदात्तत्वम्। अस्वरकः स्यादिति। प्रवृत्तिकाले स्वरविशेष-
स्यानुपादानादनभिमतानुदात्तप्रसङ्गाच्चास्वरक इत्युच्यते। न त्वस्वरकस्याच उच्चारणं संभवति। अथवोदात्तत्वाभावादस्वरक इत्युच्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमपीति। यस्मादुदात्तनिपातने दोषस्तस्मात्तत्परित्यागेनेत्यर्थः। प्रकृतिस्वरमिति। पुमानित्यादौ आद्युदात्तत्वमित्यर्थः॥ प्रकृतिस्वरस्य- कोबकाशइति चेत्पर्यायः स्यात्॥ गोतो णित्॥ गाङ्कुटादिसूत्रे यावन्तः पक्षाउक्तास्ते सर्वे इह संभवन्ति। तत्र णकारस्येतः सर्वनामस्थाने अ भावाद्भावे वा तदनुवादे प्रयोजनाभावात्सित्वव्यपदेशाभावः। संज्ञाकरणेऽपि णिद्वद्दर्शने द्विनोऽसंप्रत्ययः शब्दभेदाद्भावनापक्षेण का रआदेशः प्राप्नोति। ण्वुलादिवा प्रसिद्धणित्वं प्राप्नोति। तद्वदतिदेशस्तु निर्दोषत्वादाश्रीयते। भाष्ये तु भावनापक्षएवाशङ्क्य निराकृतः पक्षा

सतर्हि उपदेशिवद्भावो वक्तव्यो न वक्तव्यः। असुङ आद्युदात्तनिपातनं करिष्यते। स निपातनः स्वरः समासस्वरस्य बा धको भविष्यति। एवमप्युपदेशिवद्भावो वक्तव्यः। यथैव हि निपातनस्वरः समासस्वरं बाधते। एवं प्रकृतिस्वरमपि बाधेत॥ पुमान्। तस्मात्सुष्ठूच्यते असुङि उपदेशिवद्वचनं स्वरसिद्ध्यर्थं . बहिरङ्गलक्षणत्वादिति॥ गोतो णित् ॥ किमिदं गोतः परस्य सर्वनामस्थानस्य णित्त्वमुच्यते। आहोस्वित्सर्वनामस्थाने परतो णित्कार्यमतिदिश्यते॥ कश्चात्र विशेषः। गोतः सर्वनामस्थाने णित्कार्यातिदेशः। गोतः सर्वनामस्थाने णित्कार्यमतिदिश्यते। सर्वनाम- स्थाने णिद्वचने ह्यसंप्रत्ययः। षष्ठ्यनिर्देशात्सर्वनामस्थानस्य णिद्वचने ह्यसंप्रत्ययः स्यात्। किं कारणम्। षष्ठ्यनि र्देशात्षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते। न चात्र षष्ठीं पश्यामः। एवं तर्हि वतिनिर्देशोऽयं गोतो णिद्वद्भवतीति। स तर्हि वति निर्देशः कर्तव्यः न ह्यन्तरेण वतिमतिदेशो गम्यते। अन्तरेणापि वतिमतिदेशो गम्यते। तद्यथा। एष ब्रह्मदत्तः अब्र ह्मदत्तं ब्रह्मदत्त इत्याह। ते मन्यामहे ब्रह्मदत्तवदयं भवतीति। एवमिहाप्यणितं णिदित्याह णिद्वदिति गम्यते। अथ वा पुनरस्तु गोतः परस्य सर्वनामस्थानस्य णित्वम्। ननु चोक्तं सर्वनामस्थाने णिद्वचने ह्यसंप्रत्ययः षष्ठ्यनिर्देशादिति। नै ष दोषः। गोत इत्येषा पञ्चमी सर्वनामस्थान इति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति।

तु स्थापितव्या। किमिदमिति। णकार इत्यस्य तण्णित् तस्य भावो णित्त्वम्। तेनायमर्थः। अणितः सर्वनामस्थानस्य स्थाने णित्सर्वनामस्थानमादे शो भवति। ण्वुलाद्यस्तु तदर्थाभिधानेऽसमर्थत्वान्न भवन्ति। एतद्व्याख्यायेन गाङ्कुटादिसूत्रेपि भावनापक्षे न कश्चिद्दोषः। गोत इत्येषेति। भावनापक्षे गोत इति पञ्चमी। तद्वदति--देशपक्षे तु षष्ठी॥ तपरकरणमिति। स्थानिवत्त्वनिषेधादानर्थक्यमिति प्रश्नः॥ ॥ राम: ७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्रगुरिति। नपरस्तत्कालस्येत्यत्राणितिनानुवर्तते इति अनणोपि तत्कालस्य ग्रहणम्। इतरथा हीति॥ यदि स्थानिवत्त्वनिषेधो नाश्रीय
ते तदा सत्यपि तपरकरणे संबुद्धौ जसि च गुणे कृते स्थानिवत्त्वात्तत्कालत्वाच्चणित्वं स्यादित्यर्थः। प्रतिषिद्धे तु स्थानिवत्त्वे गुणे कृते
गोरूपस्य लाक्षणिकत्वाण्णित्वाप्रसङ्गः॥ अव्युत्पत्तिपक्षाश्रयेणैतदुच्यते। व्युत्पत्तिपक्षे तु सर्व एव लाक्षणिकः। नहीदानीमिति। स्था
श्रयां प्राप्तिः सा लक्षणप्रतिपदोक्तपरिभाषावशान्मा भूत्। स्थानिवत्त्वनिमित्तानुस्यादेव प्राप्तिः। नहि सा पूर्वोक्तया परिभाषया निवार्य
ते। स्थानिवत्त्वस्य निर्विषयत्वप्रसङ्गात्॥ तृज्वत्क्रोष्टुः॥ अथात्र विभक्ताविति। तृज्वत्क्रोष्टुरित्यत्र सर्वनामस्थानाधिकाराद्धि भक्त्यधिका

अथ तपरकरणं किमर्थम्। इह मा भूत्। चित्रगुः शबलगुरिति। नैतदस्ति। ह्रस्वत्वे कृते न भविष्यति। स्थानिवद्भावात्प्राप्नोति।
अत उत्तरं पठति। तपरकरणमनर्थकं स्थानिवत्प्रतिषेधात्। तपरकरणमनर्थकम्। किं कारणम्। स्थानिवत्प्रतिषेधात्।
प्रतिषिध्यतेऽत्र स्थानिवद्भावः। गोः पूर्वत्वणित्वात्वस्वरेषु स्थानिवन्न भवतीति स चावश्यं प्रतिषेध आश्रयितव्यः। इतरथा हि सं
बुद्धिजसोः प्रतिषेधः॥ यो हि मन्यते तपरकरणसामर्थ्यादत्र न भविष्यतीति संबुद्धिजसोस्तेन प्रतिषेधो वक्तव्यः स्यात्। हे चि
त्रगो चित्रगव इति। अथेदानीं सत्यपि स्थानिवत्प्रतिषेधे गुणे कृते कस्मादेवात्र न भविष्यति। लक्षणप्रतिपदोक्तयोः प्र
तिपदोक्तस्यैवेति। ननु चेदानीं सत्यपि स्थानिवद्भावे एतया परिभाषया शक्यमुपस्थातुम्। नेत्याह। नहीदानीं क्वचिदपि
स्थानिवत्स्यात्॥ तृज्वत्क्रोष्टुः॥ स्त्रियां च॥ अथात्र विभक्तावित्यनुवर्तते उताहो न। किं चातः। तृज्वत् स्त्रियां विभक्तौ चेत् क्रो
ष्टुभक्तिर्न सिध्यति। तृज्वत्स्त्रियां विभक्तौ चेत् क्रोष्टुभक्तिरिति न सिध्यति। एवं तर्हि ईकार एव तृज्वद्भावं वक्ष्यामि। तदीकार
ग्रहणं कर्तव्यम्। न कर्तव्यम्। क्रियते न्यास एव।

रस्य न दोषो न प्रयोजनम्। विभाषा तृतीयादिष्वचीत्यत्राप्यादिशब्दस्य व्यवस्थावाचित्वाद्धि भक्त्य एव ग्रहणं तदिति तत्रापि न विचार इति स्त्रि
यां चेत्यत्रैवायं विचारः क्रियते इष्टतोऽधिकाराणां प्रवृत्तिनिवृत्तिभावात्। क्रोष्टुभक्तिरिति। क्रोष्टुभक्तिरस्येति बहुव्रीहिः। भक्तिशब्दस्य
प्रियादिषु पाठात्पुंवद्भावाभावः। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति लुकि कृते विभक्त्यभावान्न लुमताङ्गस्येति प्रत्ययलक्ष
णप्रतिषेधाच्च तृज्वद्भावो न प्राप्नोतीति तदभावादकारान्तत्वनिमित्तो ङीबपि न प्राप्नोति। एवं तर्हीति। विभक्तिर्निमित्तत्वेन नाश्रीयते किं तर्हि ईकारः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै·
७७

स्त्रीई स्त्रीति। स्त्रियाई स्त्रीत्वस्य द्योतक ईकार इत्यर्थः। षष्ठीसमासः। अर्थगतं च स्त्रीत्वं ईकारे आरोप्य नदीसंज्ञानिमित्ततामाश्रीयते। गौरा
दिपाठादिति। पृथिवी क्रोष्टु पिप्पल्यादयश्चेति छन्दोध्यायिनः पठन्ति। न हि किंचिदिति। संहिताध्यायिनो न पठन्ति। सर्वात्मना पाठं प्रति
पादयितुमेतदुच्यते। ङीपो ङीषो वेति। उदात्तयणो हल्पूर्वादिति ङीप उदात्तत्वविधानात् ङीनपीति। ततश्चाद्युदात्तत्वप्रसङ्गः। ननु
ईकारे तृज्वद्भावविधानात्सतिशिष्टश्चित्स्वरो नित्स्वरं बाधिष्यते न तस्योदात्तयणो हल्पूर्वादित्युदात्तविधानान्नास्ति विशेषः। नैतद
स्ति। क्रोष्टुशब्द आद्युदात्त एव। तत्र ङीनि कृते प्रयोजनाभावात्कृते तृज्वद्भावे नित्स्वरो न प्रवर्तते तद् इति पूर्वं तृज्वद्भावः परत्वाद्वा न
त्र कृते नित्स्वरः सतिशिष्टः चित्स्वरं बाधेत। यदि तु ज्ञापकेन पिप्पल्याद्यन्तर्भावः क्रोष्टुशब्दस्यानुमीयते तदा न कश्चिद्दोषः। अपूर्वस्य त्वीका

प्रश्लिष्टनिर्देशो यं स्त्रीई स्त्री स्त्रियामिति। ईकारे तन्निमित्तः सः। ईकारे चेत् उत्पन्ने। किं कारणम्। तन्निमित्तत्वात्। तृज्वद्भावनिमि
त्तः स ईकारः। नाकृते तृज्वद्भावे ईकारः प्राप्नोति। किं कारणम्। ऋन्नेभ्यो ङीबित्युच्यते। ईकारे च तृज्वद्भावः। तदितरेतराश्रयं
भवति इतरेतराश्रयाणि च न प्रकल्पन्ते। एवं तर्हि गौरादिपाठादीकारो भविष्यति। गौरादिषु न पठ्यते। न हि किंचिदुक्तं गौ
रादिषु पठ्यते। एवं तर्हि एतज्ज्ञापयत्याचार्यः भवत्यत्र ईकार इति यदयमीकारे तृज्वद्भावं शास्ति। तेनैवमाभावनं चेत्तृस्या
दनिष्टोपि प्रसज्यते। यद्यपि नास्ति विशेषो ङीपो वा ङीषो वा ङीन् अपि तु प्राप्नोति। इहचनप्राप्नोति।

(ने) रसानुमाश्रित्य श्लोकवार्तिककारेण दोष उपात्तः शार्ङ्गरवाद्यन्तर्भावानुमानमपि स्यादिति तदाशयः। पञ्चभिरिति। तद्धितार्थेति समासः। आ
र्हादिति ठक् उत्पन्नस्याध्यर्धपूर्वेति लुक्। लुक् तद्धितलुकीति स्त्रीप्रत्ययस्य लुकि कृते न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधादी राम:
कारनिमित्तस्तृज्वद्भावो न प्राप्नोति अन्तरङ्गाणां च विधीनां लुका बाधनात्पूर्वमेव तृज्वद्भावो न लभ्यते तत्राद्येन सर्वनामस्थाने तृ ७७
ज्वद्भावोन्त्येन तु अजादिषु तृतीयादिषु विकल्पेनेति हलादौ मध्यमेनाप्राप्तिरुच्यते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चक्रोष्टृभिरिति। केचिदाहुः। भस्याढे तद्धिते ठक्छसोश्चेति वा प्राप्तः पुंवद्भावो जातेश्चेति निषिध्यते। तदयुक्तं। भत्वाभावाच्छस्तद्धचरि तस्य ठकोऽग्रहणाच्चाप्राप्तेरेव पुंवद्भावस्य नास्ति। जातेश्चेति प्रतिषेध औपसंख्यानिकस्य पुंवद्भावस्य नास्त्येव यथा हस्तिनीनां समूहो हास्तिकमिति। अङ्गसंज्ञा चेति। लब्ध्याङ्गसंज्ञकस्य यत्कार्यं प्रत्ययलक्षणं तत्तलुमताङ्गस्येत्यनेन निषिध्यते। न चाङ्गसंज्ञा अङ्गस्य कार्यमिति प्रत्ययलक्षणेन भवत्येव॥ तत्र स्त्रियां वर्तमानस्य क्रोष्टुशब्दस्य लब्ध्याङ्गसंज्ञकस्य तृज्वद्भावे सति ङीप्प्रत्ययः कार्यः कार्यकालत्वे तु संज्ञापरिभाषस्याङ्गाश्रिते प्रत्यये प्याश्रितो भवति यथा वत्रश्चेति तदाङ्गस्येत्येन दत्र नापेक्ष्यम् किं पुनरिति। शास्त्रस्य शास्त्रं

पञ्चभिः क्रोष्टीभिः क्रीतैः रथैः पञ्चक्रोष्टृभी रथैरिति। एवं तर्हि नत्वा परं निमित्तं संज्ञा च प्रत्ययलक्षणम्। न वा परं निमित्तमाश्रीयते अस्मिन्परतः क्रोष्टुस्तृज्वद्भवतीति। किं तर्हि। अङ्गस्य क्रोष्टुस्तृज्वद्भवति। अङ्गसंज्ञा च भवति प्रत्ययलक्षणेन। किं पुनः अयं शास्त्रातिदेशः तृचो यच्छास्त्रं तदतिदिश्यते आहोस्विद्रूपातिदेशः तृचो यद्रूपं तदतिदिश्यत इति। कश्चात्र विशेषः। तृज्वदिति शास्त्रातिदेशश्चेद्यथा चिणि। तृज्वदिति शास्त्रातिदेशश्चेद्यथा चिणि तद्वत्प्राप्नोति। कथं चिणि। उक्तं तत्राङ्गस्येति तु प्रकरणादङ्गस्य शास्त्रातिदेशात्सिद्धमिति आङ्गं यत्कार्यं तदतिदिश्यते। एवमिहाप्यनङ्गुणदीर्घत्वान्यतिदिष्टानि। रपरत्वमनतिदिष्टम्। तत्र को दोषः। तत्र रपरवचनम्। तत्र रपरत्वं न सिध्यति तद्वक्तव्यम्। नैष दोषः। गुणोऽतिदिष्टे रपरत्वमपि अतिदिष्टं भवति। कथम्। कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम्। ऋतो ङिसर्वनामस्थानयोर्गुणो भवति। उपस्थितमिदं भवति उरण् रपर इति। एवं तर्हि अयमन्यो दोषो जायते।

प्रत्यासन्नमिति प्रत्यासत्त्या शास्त्रातिदेशः प्राप्नोति॥ प्राधान्यात्तु रूपातिदेशप्रसङ्गः रूपार्थत्वात् शास्त्रप्रवृत्तेः। कार्यातिदेशस्तु शास्त्रातिदेशादभिन्नत्वान्न पृथक्नोपन्यस्तः। तृज्वदित्यादि। रूपे निर्दिश्यमाने सूत्रसन्निवेशस्यानपेक्षणात्प्रकरणकृतव्यवस्थाभावः। शास्त्रातिदेशे तु प्रत्यासत्त्याङ्गप्रकरणसन्निकृष्टस्यैव शास्त्रस्यातिदेशः स्यात्। न विप्रकृष्टस्य यथा चिण्वद्भावेन वृद्ध्यादीन्येव भवन्ति न हनिणिङादेशाः। रपरत्वमिति। यथोद्देशपक्षे प्रकरणान्तरे संनिवेशादिति भावः। कार्यकालमिति। प्रधानदेशत्वाद्गुणानामङ्गाधिकारे रपरपरिभाषायाः संनिधानादित्यर्थः॥

एव र

आहत्येति। उच्चार्येत्यर्थः। शास्त्रशब्देनानुशासनक्रिया शास्त्रं करणिका तदपेक्ष्यपौर्वकाल्याश्रयः क्त्वाप्रत्ययः तत्त्रयदित्त्वच्छ
ब्दवच्छास्त्रमतिदिश्यतेनेतदाहत्य यच्छास्त्रमिति पक्षोऽथक्रकारावतत्त्वच्छब्दे विवक्ष्यतेचकारः स्वरार्थस्तकारस्त्वप्रसिद्धः शंकानि
स्यादृकारमात्रप्रतिबद्धशास्त्रातिदेशेनाहत्येषपक्षउद्भवति। अनङ्गुणारपरत्वानीति। क्रुधुशनसु रुदंसोनेहसां चेत्यनङ्।
ऋतोङि सर्वनामस्थानयोरिति गुणः उरण्रपरइतिरपरत्वम्। दीर्घत्वमनतिदिष्टमिति। नहितत्तदङ्त्युच्यते किं तर्हि अपृक्तनु
तचूइति तच्छब्दोच्चारसोनानचावयवसमुदाययोर्युगपद्विवक्षा। यतस्तचृप्रतिबद्धमृकारप्रतिबद्धं च शास्त्रमतिदिश्येत। नचाकृतेधि
ति। अचोदीर्घेणभाव्यम्। नचक्रोष्टुशब्दस्योकारान्तस्याजुपधासंभवति। तत्रक्रोष्टेत्यत्रानङि कृतेजुपधाभवति। क्रोष्टारौ इत्यादौतुगुण

आहत्यतत्चोयच्छास्त्रं तदतिदिश्यते। अनाहत्यवेति। किंचातः। यद्याहत्यदीर्घत्वमतिदिष्टम्। अनङ्गुणारपरत्वा
न्यनतिदिष्टानि। अथानाहत्यानङ्गुणारपरत्वान्यनतिदिष्टानि। दीर्घत्वमनतिदिष्टम्। अस्त्वाहत्य। ननुचोक्तंदीर्घत्वम
तिदिष्टमनङ्गुणारपरत्वान्यनतिदिष्टानीति। नैषदोषः। दीर्घत्वेऽतिदिष्टेऽनङ्गुणारपरत्वान्यनतिदिष्टानिभवन्ति। क
थंमुपधायाइतिवर्तते। नचाकृतेष्वेतेषुदीर्घत्वभाविन्युपधाभवति। कुतोनुखल्वेतत्तृणतेषुविधिषुकृतेषुयाउपधा
तस्याः उपधायाः दीर्घत्वंभविष्यति। नपुनःक्रोष्टुर्योन्तरतमोगुणस्तस्मिन्कृतेऽवादेशेचयाउपधातस्याःदीर्घत्वंभवि
ष्यति नैकमुदाहरणंयोगारम्भंप्रयोजयति। तत्रतृज्वद्वचनसामर्थ्यादेतेषुविधिषुकृतेषुयाउपधातस्यादीर्घत्वंभविष्यति।

रपरत्वयोः कृतयोः। नपुनरिति। क्रोष्टुशब्दस्यजसि चेत्युकारस्यगुणोऽस्त्येवतस्यावादेशेकृतेऽकारस्यदीर्घस्यात्। ततश्चक्रोष्टावइतिस्यात्। नैक
मिति। अन्यथादीर्घविधावेवक्रोष्टुशब्दंनिर्दिशेत्। ननुदीर्घविधौक्रोष्टुशब्दे उपादीयमाने स्त्रियांचविभाषात् तीयादिष्वचीत्येवमर्थंतृज्व
क्रोष्टुरितिवक्तव्यमितिगौरवंस्यात्। नैषदोषः। अचिरकृतइतिरादेशप्रकृतेक्रोष्टोः स्त्रियांचविभाषातृतीयादिष्वचीत्येवंरादेशविधानात्क्रो
रवाभावात्। ननुरादेशेक्रोष्टुः क्रोष्टरीतिनसिद्ध्यति। नाप्युदात्तयणोहल्पूर्वादितिस्वरः। एवंतर्हिद्विःक्रोष्टुग्रहणंयोगविभागाद्रुघु। तदुक्तं।
अक्षराधिक्यादपियोग———विभागोगरीयानिति। तदेवंतृज्वद्भावविधानसामर्थ्याद्यादृशीतृचउपधायादृशान्यनिमित्तानातादृश्याएवतादृ
श्यान्यनिमित्तायाः क्रोष्टुशब्दस्योपधायादीर्घोभवतीत्यनङ्गुणारपरत्वेषुकृतेषुदीर्घोभवति।

अस्मिन्परिहारे पूर्वोक्तगौरवप्रसङ्गात् असमाधानमन्यपरिहारान्तरमाह। अथवेति। तृज्वदिति समुदायएवाश्रीयते तत्र व्याप्तिन्यायाश्रयात् यत्किं-
चित् चोदृष्टं शास्त्रं तत्सर्वमतिदिश्यते। एवंभूयो लक्ष्यं लक्षणं चानुगृहीतं भवति। नन्वेवं ङ्प्रकरणोपात्तएव शास्त्रेति दिश्यमाने क्रोष्ट्रीतिय-
णादेशशास्त्रस्यानाङ्गत्वादतिदेशेन स्यात्। एवं तर्हि स्त्रियां आङ्गशास्त्रातिदेशासंभवादनाङ्गस्याप्यतिदेशः विभाषा तृतीयादिष्वचीत्यत्र तर्हि
क्रोष्टरीत्यत्र गुणविधावतिदेशस्य चरितार्थत्वात् क्रोष्ट्रा क्रोष्ट्रोरिति यणादेशाप्रसङ्गः। क्रोष्टुरित्यत्र ऋतउदिति शास्त्रं न प्रवर्तेत। तत्रापि तृती-
यादिग्रहणसामर्थ्यादनाङ्गस्याप्यतिदेशोन्यथा विभाषाङ्गावित्येव ब्रूयात्। स्यादेतत्। अभावातिदेशार्थं तृतीयादिग्रहणं स्यात्। ततश्च विल-
क्षणे गुणनाभावेन स्यातां क्रोष्टवे क्रोष्टुने इति तत्र वक्तुरधीनेवाक्यशेषे भावातिदेशस्यैवाश्रयणात्। एवं तर्हि क्रोष्ट्रीति स्त्रियामीकारेण न प्रा-
प्नोति। अनाङ्गमपि ईकारशास्त्रमतिदेशसामर्थ्याद् अतिदेक्ष्यत इति एषोपदोषः। अथवोत्तरयोर्योगयोराख्यसामर्थ्यात् रूपातिदेश एव

अथवा किं न एते नाहत्यानाहत्य चेति। आहत्य अनाहत्य च तत् चोयच्छास्त्रं तदतिदिश्यते। अथवा पुनरस्तु रूपातिदेशः।
अथैतस्मिन् रूपातिदेशे सति किं प्रागादेशेभ्यो यद्रूपं तदतिदिश्यते। आहोस्वित् कृते षादेशेषु ।किं चातः। यदि प्रागादेशे-
भ्यो यद्रूपं तदतिदिश्यते ऋकारणकोतिदिष्टः॥ अनङ्गुणरपरत्वदीर्घत्वान्यनतिदिष्टानि।

आश्रीयते पूर्वसूत्रे तु पक्षभेदविचारः। अथवेति। सूत्रत्रयेण कारसमहृतिर्भवति सर्वरूपसंग्रहश्चेति भावः प्रागादेशेभ्य इति। क्रोष्टृ इत्येतदकार-
न्तम्। कृते षिति। क्रोष्टारावितिरेफा तमूतत्र प्रागादेशेभ्यो यद्रूपं तत्प्रत्यक्षं तृज्वदित्युच्चारणाद्व्यापकं लघु च तस्मिन्नतिदिष्टे तन्निमित्तानां
अनङादीनां सर्वेषां स्वशास्त्रेण प्रवर्तना। कृतेषु चादेशेषु यद्रूपं लौकिकं तत्प्रधानं तदर्थत्वादितरस्य प्रक्रियालाघवं च भवतीति पक्षद्वय-
संभवः। ऋकारणक इति। तदतिदेशसामर्थ्याच्च कार्यान्तराणामप्रसङ्गः स्यादिति मन्यते। ॥

CC-0. In Public Domain. Digitization by eGangotri

ऋकारोऽनतिदिष्ट इति। किं पुनः ऋकारातिदेशस्य प्रयोजनं प्रयोगसमवायिरूपातिदेशेन गतत्वात्। अत्र केचिदाहुः। यत्र ऋकारस्य वि ७।१।२
कारभावः पञ्चक्रोष्टृभीरथैरिति तत्र ऋकारोऽनतिदिष्टः स्यादिति। तदयुक्तम्। नहीदं वचनं कृतेष्वादेशेष्विति लौकिकप्रयोगरूपोप
लक्षणार्थं तथा च क्वचित्कृतेष्वादेशेषु लौकिकं रूपं तथा च क्वचिदकृतेष्विति नास्ति विशेषः। अत्रोच्यते। यदि ऋकारमनतिदिश्य
कृतेष्वादेशेषु यद्रूपं तदतिदिश्यते तदा क्रोष्ट्रादावुदात्तयणो हल्पूर्वादिति स्वरो न स्याद् उदात्तयणोऽभावात्। सति हि ऋकारातिदे
शे तस्यानिकस्य यण उदात्तत्वात्स्वरः सिद्ध्यति। ननु स्वरदोषमनन्तरमेव वक्ष्यति तत्किमर्थमत्राभिधीयते अत्रैकतरपक्षाश्रयेण स्वरदोष
उच्यते परस्तात्तु पक्षद्वयेऽपि वक्ष्यते। न हि स्वरो रूपवानिति। ननु शब्दस्य श्रोत्रेन्द्रियग्राह्यस्वभावो रूपम्। स्वरोऽपि श्रोत्रेन्द्रियग्राह्यत्वाद्रूपमे
वापास्य व्यतिरिक्तं रूपं नास्तीति न हि स्वरो रूपवानित्युच्यते तदात्मरूपस्यापि रूपं नास्तीति तदपि न रूपवदिति नातिदिश्येत। रूपातिदेश-

अथ कृतेष्वादेशेषु ऋकारोऽनतिदिष्टः। अनङ्गुणारपरत्वदीर्घत्वान्यतिदिष्टानि। उभयथा च स्वरो नतिदिष्टः। किं कार
णम्। न हि स्वरो रूपवान्। अस्तु प्रागादेशेभ्यो यद्रूपं तदतिदिश्यते। ननु चोक्तं ऋकारोऽतिदिष्टः। अनङ्गुणारपरत्वदी
र्घत्वान्यनतिदिष्टानीति। नैष दोषः। ऋकारे अतिदिष्टे तदाश्रया अत्र एते विधयो भविष्यन्ति।

स्यमक्रान्तो न रूपवदतिदेशः। अत्रोच्यते। प्रागादेशेभ्यो यद्रूपमित्यत्र तावत्पक्षे स्वरोऽशक्योऽतिदेष्टुं न हि रूपं शास्त्रीयम्। न च स्वरो रूपत्वे
नाश्रितः शास्त्रे एवुल् तच्चावित्यस्मिन्नुच्चारणे स्वरस्य भेदहेतुत्वेनानाश्रयणात्। लुङ् लङ् लृङ्क्ष्वडुदात्त इत्यादौ उदात्तादिग्रहणात्। यद्यपि
चितोऽन्तउदात्त इति स्वरप्रतिपत्तिरस्माकमप्यनुमानान्नतूच्चारणात् कृतेष्वादेशेष्वित्यनन्तुपक्षे यद्यप्युच्चारणे उदात्तादिगुणानामभेदकत्वं
ज्ञापितं तथापि यथा आन्तरतम्यात्स्वर आश्रीयमाणो भेदकः। तथातिदेशादपि किं तूदात्तयण्व्यपदेशाभावात् स्वरासिद्धिः। यद्येवं रूप
वानिति किमुच्यते। रूपमिति हि वक्तव्यम्। तत्र केचिदाहुः। भाष्यकारवचनात्स्वार्थिको मतुप्। अथवा स्वरवानेव स्वरः अर्शआदित्वादच्। राम:
न हि स्वरवान् कार उदात्तादि नारूपेण रूपवान् शास्त्रे आश्रीयते तस्याभेदकत्वात्। ऋकारेऽतिदिष्ट इति। तदर्थत्वाद् ऋकारातिदेशस्ये ७९
ति भावः। तदाश्रया इति। स एव निमित्तं शास्त्रं वा आश्रयो येषामिति समासः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सचकारेति।अन्यथातवदितिब्रूयात्।नचतन्तृज्भ्यांमन्योर्थवानूस्त्क्रुशब्दोस्तियस्यग्रहणेदोषःस्यात्।तस्मादनुमेयोपिस्वरउच्चारणेन-
श्रीयमाणोपिचकारोच्चारणाद्भवति।सर्वादेशप्रसङ्ग इति।रूपातिदेशशब्दात्स्थान्यादेशभावोभ्युपगतोभवतीत्यनेकाल्त्वात्सर्वादेशः
तृशब्दःप्राप्नोतिसिद्धमिति।तृजन्तरूपातिदेशादित्यर्थः॥आन्तरतम्यादिति।अर्थेनस्वरूपेणचेत्यर्थः।तज्विषयइति।तृज्वद्भावविष
यइत्यर्थः।घरतिरिति।गॄघृसेचनेइतिभौवादिकः।जिघर्तीत्ययंतु।घृक्षरणदीप्त्योरित्यस्यबहुलंछन्दसीत्यभ्यासस्येत्वेकृतेरूपम्।र

यदप्युच्यतेउभयथास्वरोऽनतिदिष्टः।नहिस्वरोरूपवानिति।सचकारग्रहणसामर्थ्यात्स्वरोभविष्यति।रूपाति
देशइतिचेत्सर्वादेशप्रसङ्गः।रूपातिदेशइतिचेत्सर्वादेशःप्राप्नोति॥सर्वस्यतुन्नन्तस्यतृशब्दआदेशःप्राप्नोति।सि
द्धंतुरूपातिदेशात्।सिद्धमेतत्।कथम्।रूपातिदेशात्।रूपातिदेशोयम्।ननुचैवमेवकृत्वाचोद्यतेरूपातिदेशइ
तिचेत्सर्वादेशप्रसङ्ग इति॥सिद्धंतुप्रत्ययग्रहणेयस्मात्सतदादितदन्तविज्ञानात्।सिद्धमेतत्।कथम्।प्रत्ययग्रहणे
यस्मात्सविहितस्तदादेस्तदन्तस्यग्रहणंभवतीत्येवंतुन्नन्तस्यतृजन्तआदेशोभविष्यति।एवमपिकिंचिदेवतृजन्तंप्रा
प्नोतिइदमपिप्राप्नोति पक्तेति।आन्तरतम्यात्तुसिद्धम्।क्रोष्टुर्यदान्तरतमंतद्भविष्यति।किंपुनस्तत्।क्रुशेर्यस्तृज्विहि
तस्तदन्तम्।तृज्वद्वचनमनर्थकंतद्विषयेतच्चोमृगवाचित्वात्।तृज्विषयेणतत्तृजन्तंमृगवाचि।तुनोनिवृत्त्यर्थंत
र्हीदंवक्तव्यम्।तुनःसर्वनामस्थानेविनिवृत्तिर्यथास्यात्।तुनोनिवृत्त्यर्थमितिचेत्तत्सिद्धंयथान्यत्रापि।तुनोनिवृत्त्यर्थ
मितिचेत्तदन्तरेणवचनात्सिद्धंयथान्यत्राप्यविशेषविहिताःशब्दाःनियतविषयादृश्यन्ते।क्वान्यत्र।तद्यथा।घरतिरस्मा
यविशेषेणोपदिष्टःसघृतंघृणाघर्मइत्येवंविषयः।रश्मिरस्मायविशेषेणोपदिष्टःस राशिःरश्मिःरशनाइत्येवंवि
षयः।लुशिरस्मायविशेषेणोपदिष्टःसलोष्टइत्येवंविषयः।इदंतर्हिप्रयोजनम्।विभाषांवक्ष्यामीति।विभाषातृ
तीयादिष्वचीति।

यितुशीअपठितावपिभाष्यकारवचनाद्धातूबोद्धव्यौप्रयुक्तानामिदमन्वाख्यानंनतस्मादपूर्वशब्दप्रतिपत्तिरितिनियतविषयत्वमुच्यते।अ
नेनैवन्यायेनअस्तेर्भूरित्यादीन्यपिप्रत्याख्येयानि।अबुधबोधनार्थंतुकिंचिद्वचनेनप्रतिपाद्यते।न्यायव्युत्पादनार्थंचआचार्यःकिंचित्प्रत्या
चष्टेनह्यत्रैकःपन्थाःसमाश्रीयते।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै·
८०

अतिसखीनीति। अतिक्रान्तः सखायैरिति बहुव्रीहिः॥ कृशक्रोष्टुनेद्गति। क्रोष्टुशब्दः स्त्रीपुंसलिङ्ग इत्यन्यपदार्थस्य नपुंसकत्वं प्रदर्श्यते। क्रोष्टूनामिति। तज्वद्भावः छन्तेनुड्यनजादित्वान्न प्राप्नोतीत्यनित्यो नुडागमोपि कृतेतृज्वद्भावे सन्निपातपरिभाषया न प्राप्नोतीत्यनित्यः। वावचनानर्थक्यं च स्वभावसिद्धत्वात्। वावचनं चानर्थकम्। किं कारणम्। स्वभावसिद्धत्वात्। स्वभाव एव तृतीयादिषु अजादिषु विभक्तिषु तृजन्तं तुन्नन्तं च मृग वाचिद्गति। गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम्पूर्वविप्रतिषिद्धम्। गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम्भवति पूर्वविप्रतिषेधेन। तत्र गुणस्यावकाशः। अग्नये वायवे। नुमोवकाशः। त्रपुणी। जतुनी। इहोभयं प्राप्नोति। त्रपुणे। जतुने॥ वृद्धेरवकाशः। सखायौ सखायः। नुमः स एव। इहोभयं प्राप्नोति। अतिसखीनि ब्राह्मणकुलानीति। औत्वस्यावकाशः। अग्नौ वायौ। नुमः स एव। इहोभयं प्राप्नोति। त्रपुणि जतुनीति। तृज्वद्भावस्यावकाशः। क्रोष्ट्रा क्रोष्टुना। नुमः स एव। इहोभयं प्राप्नोति। कृशक्रोष्टुने अरण्याय। हितक्रोष्टुने वृषलकुलाय। नुम्भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यो न वक्तव्यः। इष्टवाची परशब्दो विप्रतिषेधे परं यदिष्टं तद्भवतीति। नुमचिरतृज्वद्भावेभ्यो नुट्पूर्वविप्रतिषेधेन वक्तव्यः। नुमोवकाशः। त्रपूणि। जतूनि। नुटोवकाशः। अग्नीनां वायूनाम्। इहोभयं प्राप्नोति। त्रपूणां जतूनाम्। अचिरादेशस्यावकाशः। तिस्रस्तिष्ठन्ति चतस्रस्तिष्ठन्ति। नुटः स एव। इहोभयं प्राप्नोति। तिसृणां। चतसृणां। तृज्वद्भावस्यावकाशः। क्रोष्ट्रा। क्रोष्टुना। नुटः स एव। इहोभयं प्राप्नोति। क्रोष्टूनां। नुड्भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वक्तव्यः। न वा नुड्विषयेरप्रतिषेधात्। न वैतद्विप्रतिषेधेनापि सिध्यति तिसृणां चतसृणामिति। कथं तर्हि सिध्यति नुड्विषयेरप्रतिषेधात्। नुड्विषयेरप्रतिषेधो वक्तव्यः। इतरथा हि सर्वापवादः। इतरथा हि सर्वापवादो रादेशः स यथैव गुणपूर्वसवर्णौ बाधत एवं नुटमपि बाधेत। तस्मान्नुड्विषयेरप्रतिषेधः। तस्मान्नुड्विषये रादेशस्य प्रतिषेधो वक्तव्यः। न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति न रादेशो नुटं बाधत इति॥

नवेति। नुड्रेफयोर्विप्रतिषेध उक्तस्तेनेत्यर्थः। स यथैवेति। मध्येपवादा इत्येतदनाश्रित्येतदुक्तं। तत्र ह्याश्रीयमाणे गुणं न बाधेत गुणपूर्वसवर्णग्रहणं उपलक्षणं कृत उदित्युत्वस्यापि बाधनाश्रियति सः स्वमित्यादौ॥

राम:
८०
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यमिति। नहि णादेशे कृते दीर्घस्य प्राप्तिः। अनजन्तत्वान्नुडभावाच्च। एवं च विप्रतिषेधोऽपि न वक्तव्यः। ज्ञापकादेव नुड्वा वानू॥ चतुरन
डुहोरामुदात्तः॥ गौरादिषु अनडुही अनड्वाही ति पाठोऽपौराणिकः। अनडुह शब्दाद् एव ङीषर्थः पठितं इतिमत्वा वार्तिकमारब्धम नडुहः स्त्रि
यांवेति॥ ऋत इद्धातोः॥ नित्यो गुण इति। कृताकृतप्रसङ्गित्वात् लक्षणान्तरेण प्राप्नुवन्विधिरनित्य इत्यनाश्रित्य कार्यप्राप्तिमात्रमंगीकृ
त्येदमुक्तम्। लक्षणभेदापेक्षायां तु लक्षणान्तरस्य प्रवृत्तावपि विप्रतिषेधविषयस्य लक्षणस्याप्रवृत्त्या अनित्यत्वमेव॥ इत्युपाध्यायजै
यटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमाध्यायस्य प्रथमे पादे द्वितीयमाह्निकं पादश्च समाप्तः॥ ॥सिचि वृद्धिः परस्मैपदेषु॥ सिचि वृद्धा
विति। इह ह्यनिर्दिष्टस्थानिकत्वात् इकुपरिभाषोपस्थानादोकारस्य न स्यात् प्राप्तिः। वदव्रजेत्यत्र तु च इति स्थानिनिर्देशादिक्परिभाषानु
पस्थानादोकारस्य वृद्धिप्रसङ्गे वचनम्। तत्र सिचि वृद्धावित्यनेन प्रकरणं प्रदर्श्यते। अथवा सिचि या वृद्धिर्वदव्रजहलन्तस्याचइत्यनेन तस्या

यदयं न तिसृचतसृ इति प्रतिषेधं शास्ति नामि दीर्घत्वस्य॥ चतुरनडुहोरामुदात्तः॥ आमनडुहः स्त्रियां वा॥ आमनडुहः स्त्रियां
वेति वक्तव्यम्। अनडुही। अनड्वाही॥ ऋत इद्धातोः॥ उपधायाश्च॥ उदोष्ठ्यपूर्वस्य॥ इत्वोत्वाभ्यां गुणवृद्धी भवतो विप्र
तिषेधेन। इत्वोत्वयोरवकाशः आस्तीर्णं निपूर्ताः पिण्डाः। गुणवृद्ध्योरवकाशः चयनं चायकः। लवनं लावकः। इहोभयं
प्राप्नोति। आस्तरणमास्तारकः। निपरणं निपारकः। गुणवृद्धी भवतो विप्रतिषेधेन। अयुक्तोऽयं विप्रतिषेधः। योऽयं गुणस्ये
त्वोत्वयोश्च। कथम्। नित्यो गुणः॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते महाभाष्ये सप्तमस्य प्रथमे द्वितीयमाह्निकं पादश्च स
माप्तः॥ ॥सिचि वृद्धिः परस्मैपदेषु॥ सिचि वृद्धावोकारप्रतिषेधः॥

मित्यर्थः॥ ननु च वृद्धौ कर्तव्यायां पूर्वत्रासिद्धमिति सिज्लोपादीनामसिद्धत्वात् पूर्वं वृद्ध्यभावात् ततः सिज्लोपेन ततो हल्ङ्यब्भ्य इत्यादिलोपेषु
कृतेष्वोत्वेनेति वृद्धिविधानकाले ओकारस्याभावान्नार्थः प्रतिषेधेन। उच्यते॥ वृद्धिरङ्गापेक्षत्वात् प्रत्ययविशेषापेक्षत्वाच्च बहिरङ्गाः सि
ज्लोपादयस्तु वर्णनिमित्तत्वादन्तरङ्गा इत्यसिद्धं बहिरङ्गमन्तरङ्ग इति वृद्धेरसिद्धत्वात् पूर्वत्रेति निर्दिष्टस्यासिद्धविषयस्याभावात् स
लोपादीनामसिद्धत्वं नास्ति। पूर्वत्रासिद्धमित्यनेन सलोपादीनामसिद्धत्वादन्तरङ्गलक्षणस्य विषयस्याभावात्तदपेक्षबहिरङ्गत्वस्या
पि बहिरङ्गस्याभावादसिद्धं बहिरङ्गमन्तरङ्ग इत्येषा परिभाषा न प्रवर्तते। तदेवं परस्परप्रतिबद्धस्य परिभाषाद्वयस्याप्रवृत्तौ परत्वात्स
लोपादेन्कृत्वा अन्तरङ्गत्वात् पूर्वमोत्वप्रवृत्तिमभ्युपगम्य चोदयति। वदव्रजेत्यत्र चान्तरेणान्तग्रहणं तदन्तविधौ सिद्धे अन्तग्रहणमौ
पदेशिकहलन्तप्रतिपत्त्यर्थमन्यते। अन्यथा तद्ग्रहणेन च सिच्यरत्वम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·से· ओकारादिति॥ नच अन्तरङ्ग ओकारः बव्हपेक्षत्वात्। उक्तं तत्रेति। ओदसेत्युच्यमानेनादपि परत्वपरत्वादकारस्य तपरत्वाद्भिन्नकालस्य-
८१ ग्रहणं न स्यादिति तस्यापि ग्रहणार्थं वर्णग्रहणं कृतमिति तत्सामर्थ्यात्कृतायामपि वृद्धावोत्वं प्रवर्तते। प्रवृत्तत्वाच्च लक्षणस्य पुनर्वृद्धेः प्रवृत्तिर्नभ
वति। सौढामित्रिरिति। सोढा अमित्रा येनेति बहुव्रीहिः। विभज्यान्वाख्याने सढ अमित्र इति स्थिते परत्वाद्वृद्धिं मन्यते। बहिरङ्गलक्षणत्वा
दिति। यत्र विप्रतिषेधः स्तत्र पुनः प्रसङ्गविज्ञानम्। इह तु वृद्धिनिमित्तेऽनुपजात एव अन्तरङ्गमोत्वं प्रवर्तते ततोऽर्थान्तराश्रयतद्धितनिमि-
त्ता वृद्धिः॥ अतो ल्रान्तस्य॥ अन्तग्रहणमिति। अवयववचनोन्तशब्दस्तदन्तविधिनैव च तदर्थो लब्ध इति मत्वा प्रश्नः। तद्यः सामीप्यद्व

क्षिचिद्वृद्धौ ओकारस्य प्रतिषेधो वक्तव्यः। उदवोढाम्। उदवोढम्। उदवोढेति। स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। ओका
राद्वृद्धिर्विप्रतिषेधेन। ओत्वं क्रियतां वृद्धिरिति। वृद्धिर्भविष्यति विप्रतिषेधेन। ओकाराद्वृद्धिर्विप्रतिषेधे नेति चेदोत्वाभावः। ओ
काराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्वस्याभावः। उदवोढामुदवोढमुदवोढेति। नैष दोषः। उक्तं तत्र वर्णग्रहणस्य प्रयोजनं वृ
द्धावपि कृतायामोत्वं यथा स्यात्। पुनः प्रसङ्गविज्ञानाद्वा सिद्धम्। अथवा पुनः प्रसङ्गादत्र वृद्धौ कृतायामोत्वं भविष्यति।
यथा प्रसारणादिषु द्विर्वचनम्। तद्यथा। जग्लौ। मम्लौ। ईजतुः। ईजुरिति। प्रसारणादिषु पुनः प्रसङ्गविज्ञानाद्द्विर्वचनं भ
वति। इहापि तर्हि पुनः प्रसङ्गविज्ञानादोत्वं स्यात्। सौढामित्रिरिति। सौढामित्रौ बहिरङ्गलक्षणत्वात्सिद्धम्। बहिरङ्ग
लक्षणा वृद्धिरन्तरङ्गमोत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे॥ अतो ल्रान्तस्य॥ अन्तग्रहणं किमर्थम्। न अतो ल्र इत्येवोच्येत। के
नेदानीं तदन्तस्य भविष्यति। तदन्तविधिना। इदं तर्हि प्रयोजनम्। अयमन्तशब्दोऽस्त्येवावयववाची। तद्यथा। वस्त्रान्तो वस
नान्तः। अस्ति सामीप्ये वर्तते। तद्यथा। उदकान्तं गतः। उदकसमीपं गत इति गम्यते। तद्यः सामीप्ये वर्तते तस्येदं ग्रहणं यथा
विज्ञायते। अङ्गान्तौ यौ रेफलकारौ तयोः समीपे योऽकारस्तस्य यथा स्यात्। इह मा भूत्। अश्वस्तीत्। अवम्नीत्॥

ति। अन्तशब्दोपादानादेव सामीप्यार्थस्य ग्रहणम्। अङ्गान्ताविति। लश्च रश्च ल्रौ अन्तौ ततः षष्ठ्याः सुपां सुलुगिति लुक्। तत्र ल्रौ णाङ्गस्य वि
शेषणात्तदन्तविधौ ल्रान्तस्याङ्गस्य योऽकारस्तस्य वृद्धिर्भवति। ततोऽन्तस्येत्युक्तकारो विशेष्यते। सन्निधानाच्च ल्रापेक्षं सामीप्यमकारस्य राम:
विज्ञायत इति सामर्थ्यादङ्गान्तरेफलकारसमीपस्याकारस्य वृद्धिरित्यर्थः संपद्यते॥ अश्वस्तीदवम्नीदिति। अत्राङ्गान्त्ययो रेफलका ८१
रयोः समीपे अकारो नेत्यनेन वृद्धिर्न भवति। हलन्तलक्षणा नेटीति प्रतिषिद्धा॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu·

CC-0. In Public Domain. Digitization by eGangotri

वदव्रजहलन्तस्याचः॥ हल्ग्रहणं किमर्थमिति। अज्ग्रहणादेव हलन्तस्य सिद्धा वृद्धिरिति प्रश्नः। अङ्गे न चाचो विशेषणाद्यत्र तत्र स्थितस्याचो वृद्धिर्विधीयमाना हलन्तस्य प्रवर्तते। अजन्तस्य मा भूदिति। असति हि हल्ग्रहणेऽचाङ्गस्य तदन्तविधिर्विज्ञायेत। ततश्चाल्लोपादीन्बाधित्वा वृद्धिः स्यात्। लोपोऽत्रेति। विशेषणविशेष्यभावे कामचारादङ्गेन अज्विशेष्यते। तत्रापाक्षीदित्यादौ सावकाशा वृद्धिरतो लोपेन पूर्वविप्रतिषेधेन बा- ध्यते एयल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्य इति। अचा तु अङ्गे विशेष्यमाणे वृद्धिरनवकाशाऽतो लोपं बाधेत। आकारस्य तर्हीति। स्थानेऽन्तर- तमपरिभाषाया अत्राप्रवृत्तिं मन्यते। तत्प्रवृत्तौ हि प्रधानं विफलत्वादुपरुध्येत॥ नास्त्यत्र विशेष इति। विशिष्टविषयव्यवस्थापनं प्रधानस्य गु-

वदव्रजहलन्तस्याचः॥ हल्ग्रहणं किमर्थम्। समुच्चयो यथा विज्ञायेत। वदिव्रज्योर्हलन्तस्य चाच इति। नैतदस्ति प्रयोजनम्। अज्ग्रहणादेवात्र समुच्चयो भविष्यति। वदिव्रज्योश्चाचश्चेति। अस्त्यन्यदज्ग्रहणे प्रयोजनम्। वदिव्रजिविशेषणं यथा विज्ञायेत। वदिव्रज्योरच इति। यद्येतावत्प्रयोजनं स्यात्। वदिव्रज्योरत इत्येव ब्रूयात्। अथवा एतदपि न ब्रूयात्। अत इति वर्तते। इदं तर्हि प्रयोजनम्। हलन्तस्य यथा स्यात्। अजन्तस्य मा भूत्। कस्य पुनरजन्तस्य प्राप्नोति। अकारस्य। अचिकीर्षीत्। अजिहीर्षीत्। लोपोऽत्र बाधको भविष्यति। आकारस्य तर्हि प्राप्नोति। अयासीत् अवासीत्। नास्त्यत्र विशेषः सत्यां वा वृद्धावसत्यां वा। संध्यक्षरस्य तर्हि प्राप्नोति। नैवं संध्यक्षरमन्त्यमस्ति। ननु चेदमस्ति ढलोपे कृते उदवोढाम् उदवोढम् उदवोढेति। असिद्धो ढलोपः। तस्यासिद्धत्वान्नैतदन्त्यं भवति। अत उत्तरं पठति। हल्ग्रहणमिट्प्रतिषेधार्थम्। हल्ग्रहणं क्रियते। इट्प्रतिषेधार्थम्। नेटीति प्रतिषेधं वक्ष्यति स हलन्तस्य यथा स्यात्। अजन्तस्य मा भूत्। अलावीद् यावीत्। न वानन्तरप्रतिषेधात्। न वैतत्प्रयोजनमस्ति। किं कारणम्। अनन्तरस्य प्रतिषेधात्। अनन्तरं यद्वृद्धिविधानं तत्प्रतिषिध्यते।

णेन कर्तव्यमिति प्रवृत्त्यप्रवृत्त्योर्वृद्धेर्विशेषाभावेऽपि नास्ति प्रधानोपरोध इति प्रवर्तत एवान्तरतमपरिभाषेति भावः॥ संध्यक्षरस्येति। ओकारस्य ओकारः प्राप्नोतीत्यस्ति विशेषः। तस्यासिद्धत्वान्नैतदन्त्यमिति। ननु मा भूदन्त्यमनन्त्यस्याप्यविशेषविधानात्प्राप्नोति। एवं तर्हि पराभ्युपगमनिवृत्तिपरमेतत्। परेण संध्यक्षरस्यान्त्यत्वमभ्युपगतं निवार्यते अनन्त्यत्वे लोकारस्य यथा वृद्धिर्न भवति तथाद्यसूत्रे प्रतिपादितम्। हल्ग्रहणमिति। असतीह हल्ग्रहणे नेटीत्यत्राज्ग्रहणानुवृत्तावपि याकाचिदचो वृद्धिः प्रतिषिध्येत। यदि त्वज्ग्रहणानुवृत्तिसामर्थ्यादच इत्येवं विहिता या वृद्धिस्तस्याः प्रतिषेधो विज्ञायेत तदा न स्याद्दोषः॥ परिहारान्तरसद्भावात्तु नेदमुक्तं तदाह॥ न चेति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्त्यस्य वचनानर्थक्यादिति। क्वचिदन्त्यो विधिभाङ् न सम्भवति। अयासीदित्यादौ तु विशेषाभावः। तदेवमिहार्थो हलुग्रहणस्य नास्तीति मत्वाह। अतो विभाषार्थमिति। असति हलुग्रहणेऽकाणीदकाणीदित्यादौ सावकाशा वृद्धिरचिकीर्षीदित्यादौ परत्वात्तल्लोपं बाधेत। अथवा अनाङ्गस्य विशेषणात्तदन्तस्यैव स्यात्तत्त्वकाणीदित्यादौ॥ कृतायामपीति। आतो लोप इटि चेत्यनेनेति भावः। अत्र शब्दान्तरप्राप्तिर्लक्षणान्तरप्राप्तिश्चना-श्रिता। कृताकृतप्रसङ्गित्वात्तु लोपस्य स्वकार्यस्यानाश्रितोपाधिभेदस्य नित्यत्वमाश्रितम् परत्वादिति॥ यस्य लक्षणान्तरेण निमित्तं विहन्य

कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। तच्चानन्त्यार्थम्। तच्चानन्तरं वृद्धिविधानमनन्त्यार्थं विज्ञायते। कथं पुनर्ज्ञायतेऽनन्तरं वृद्धिविधानमनन्त्यार्थमिति। अन्त्यस्य वचनानर्थक्यात्। अन्त्यस्य वृद्धिविधाने प्रयोजनं नास्तीति कृत्वानन्तरं वृद्धिविधानमनन्त्यार्थं विज्ञायते। अतो विभाषार्थं तर्हीदं वक्तव्यम्। अतो हलादेर्लघोरिति विभाषा वृद्धिं वक्ष्यति सा हलन्तस्य यथा स्यादजन्तस्य मा भूत्। अचिकीर्षीदजिहीर्षीदिति। अतो विभाषार्थमिति चेत्तन्न सिद्धम्। वृद्धेर्लोपबलीयस्त्वात्। अतो विभाषार्थमिति चेत्तदन्तरेणापि हलुग्रहणं सिद्धम्। कथम्। वृद्धेर्लोपबलीयस्त्वात्। वृद्धेर्लोपो बलीयान्भवतीति। इदमिह सम्प्रधार्यं वृद्धिः क्रियतां लोप इति। किमत्र कर्तव्यम्। परत्वाद्वृद्धिः। नित्यो लोपः। कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि। अनित्यो लोपः। नहि कृतायां वृद्धौ प्राप्नोति। परत्वात्सगिड्भ्यां भवितव्यम्। नात्र सगिटौ प्राप्नुतः। किं कारणम्। एकाचस्तौ वलीति वा। एकाचः सगिटावुच्येते। अथवा वलीति तत्रानुवर्तते। किं पुनः कारणमेकाचस्तौ वलीति वा। दरिद्रातेर्मा भूदिति। दरिद्रातेर्न सगिड्भ्यां भवितव्यम्। उक्तमेतत्। दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति। यश्चेदानीं प्रत्ययविधौ सिद्धः सिद्धोऽसौ सगिड्विधौ।

तेनेतदनित्यमिति नाश्रितम्। लोपेनात्र वृद्धेः कृतायां न भाव्यमिति तस्यानित्यत्वमित्येतावदाश्रित्योच्यते। वृद्धिरेवा पवाद निमित्ततामुपयान्ती लोपं विहन्तीति तदपेक्षया भवत्येव लोपस्यानित्यत्वम्॥ एकाचस्तौ वलीति। एकीयमतमेतत्। तथा च वाचाद्यतन्यामिति यदाकारलोपो दरिद्रातेर्नोक्तस्तदादरिद्रासीदिति सगिटावुदाहृतावेव। सिद्धश्चेति। आर्धधातुके विषयभूत एव लोपविज्ञानात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवमर्थमिति। अचिकीर्षीदिति। अत्रादेर्वृद्धौ कृतायां सगिटौ माभूतामतो लोपस्य नित्यत्वं यथा स्यादित्येवमर्थम्। तत्र नित्यत्वाल्लोपे कृते पारि
शेष्याद्धलन्त एव वृद्धेरवस्थानान्नार्थो हलग्रहणेन। अताङ्गस्य तदन्तविधिं मत्वाह। कं पुनरिति। नित्याद्यपि नवकाशं बलवदिति लोपं बा
धित्वा वृद्धिः स्यादित्यजन्तनिवृत्त्यर्थं हलग्रहणं कर्तव्यम्। इतरस्त्विह सिद्धये विशेषणविशेष्यभावे कामचाराल्लघुग्रहणसामर्थ्याच्चा
ङ्गेनात्र विशेष्यत इति प्रतिपादयितुमाह। भवेदिति। अदरिद्रासीदित्यादिसिद्धये सगिड्विधावेकाच इति यद्दानानुवर्त्यते तदा उभयोरनित्य

एवमर्थमेव तर्हि एकाज्ग्रहणमनुवर्त्यमत्र सगिटौ माभूतामिति। स एष नित्यो लोपः वृद्धिं बाधिष्यते। कं पुनर्भवानुवृद्धेरव
काशं मत्वाह नित्यो लोप इति। अनवकाशा वृद्धिर्लोपं बाधिष्यते। सावकाशा वृद्धिः। कोऽवकाशः। अनन्त्यः। अकार्षीत् अका
र्षीत्। कथं पुनः सत्यन्त्येऽनन्त्यस्य वृद्धिः स्यात्। भवेद्यो नाङ्गं विशेषयेत्। तस्यानन्त्यस्य न स्यात्। वयं तु खल्वङ्गेनाकारं
विशेषयिष्यामः। तत्रानन्त्यो वृद्धेरवकाशः। अन्त्यस्य लोपो बाधको भविष्यति। एवं वृद्धेर्लोपो बलीयस्त्वात्। एवं वृद्धेर्लोपो
बलीयान्। अथवा आरभ्यते पूर्वविप्रतिषेधः। पयल्लोपाविङ्यणगुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धम्। स तर्हि एषोऽन
न्त्यार्थो वृद्धिर्हलन्तस्य यथा स्यादजन्तस्य माभूत्। अपिपठिषीत्। एतदपि नास्ति प्रयोजनम्। कथम्। हलादेरिति नैषा बहु
व्रीहेः षष्ठी हल् आदिर्यस्य सोऽयं हलादिः हलादेरिति। का तर्हि। कर्मधारयात् पञ्चमी हल् आदिः हलादिः हलादेः पर
स्येति। यदि कर्मधारयात् पञ्चमी अचकासीदत्र प्राप्नोति। सिचा आनन्तर्ये विशेषयिष्यामः। हलादेः परस्य सिच्यनन्त
रस्येति। यदि सिचा आनन्तर्ये विशेष्यते अकार्षीदकासीदत्र न प्राप्नोति। वचनाद्भविष्यति। इहापि तर्हि वचनात्प्राप्नो
ति। अचकासीत्।

योः पूर्वविप्रतिषेधेन लोपे कृते हलन्त एव वृद्धिरवतिष्ठते। अथवा लक्षणभेदाच्छब्दान्तरप्राप्त्या वा लोपस्यानित्यत्वं यो मन्यते तं प्रत्यु
च्यते। अथवारभ्यत इति। अपिपठिषीदिति। अल्लोपस्य स्थानिवद्भावादजन्तमेतदङ्गं तत्र यशब्दाकारस्य वृद्धिः प्राप्नोति। हल्ग्रह
णान्न भवति। अचकासीदिति। चकाराद्धल आदेः परो कारो भवतीति वृद्धिप्रसङ्गः। बहुव्रीहावप्ययं दोषः। ननु चाटि कृते हल आदित्व
म्नास्तीति नैष दोषः। सिजन्तस्याङ्गस्याडागमः क्रियमाणस्तस्यैव हलादित्वं निवर्तयति। न तु सिचि यदङ्गं तस्य। ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रा·कौ· येननाव्यवधानमिति। ननुवचनादतोलोपोबाध्येतसिचाह्यानन्तर्यआश्रितेऽनन्त्योनैववृद्धेरवकाशः स्यात्। नैतदस्ति। लघुग्रहणमेवम
८३ नर्थकं स्याद्व्यवच्छेद्याभावात्। न तच्चानन्त्यस्य वृद्ध्यवकाशत्वादन्त्यस्यनित्यत्वपूर्वविप्रतिषेधाभ्यां लोपाद्व्यवधानएव वृद्ध्याभाव्यमि ७१२
तिनिर्दिष्टग्रहणादधिकव्यवधाननिवृत्त्यर्थो येननाव्यवधानमित्याश्रीयते। तदेवमुत्तरार्थं हल्ग्रहणं नकर्तव्यमिति स्थिते दूरमुच्यते।
एवं तर्हीति। प्रसक्तानुप्रसक्त्याप्रयोजनकथनप्रसङ्गेन हल्ग्रहणमतिसृतं दूरमपगतमित्यर्थः। क्वचिदनुसृतमिति पाठः। तत्रायमर्थो
दूरं यातं सदनुसृतं न परित्यक्तमूर्णनदुक्तं भवति। अत्रैव सूत्रे हल्ग्रहणस्यप्रयोजनमस्तीति दर्शयति। हल्ग्रहणमनन्त्यार्थमिति।
केचिदाहुः। सतिहल्ग्रहणे भवति। अगवीदिति। केचित्तु तद्भ्रान्तोरित्यतोधातुग्रहणानुवृत्त्या अगवीदित्यत्र अतोहलादेर्लघोरितिवृ
द्धिर्न भवतीत्याहुः। सिचाधातावाक्षिप्ते पुनर्धातुग्रहणंयस्यनित्यंधातुत्वं सगृह्यते। तस्मादयमर्थो येननाव्यवधानमित्येकेन हलाव्यवधा

येननाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात्। केन च नाव्यवधानम्। वर्णेनैकेना। संघातेन पुनर्व्यवधानं भ
वति न च भवति। यदि सिचा आनन्तर्ये विशेष्यते। अस्तु बहुव्रीहेः षष्ठी। कस्मान्न भवति। अपिपठिषीदिति। व्यवहि
तत्वात्। एवं तर्हि अतिदूरमेवेदं हल्ग्रहणमनुसृतम्। हल्ग्रहणमनन्त्यार्थम्। अज्ग्रहणमनिगर्थम्। ह्म्यन्त
क्षण ॥ किमर्थं जागर्तेर्वृद्धिप्रतिषेध उच्यते। सिचि वृद्धिर्मा भूदिति। नैतदस्ति प्रयोजनम्। जागर्तेर्गुण उच्यते। वृद्धिवि
षये प्रतिषेधविषये च स बाधको भविष्यति।

नेसिजचोर्वृद्धिः स्यात्। ननु संयोगे नाराङ्क्षीदभाङ्क्षीदित्यादौ। हल्ग्रहणे तु सति वर्णग्रहणेजातिग्रहणात्संयोगान्तस्यापि हल्ग्रहण
सामर्थ्याद्भवति। अनन्त्यार्थमित्यस्यायमर्थो नन्त्योपि हल्कथं नाम गृह्येत। अन्तग्रहणं तु विस्पष्टार्थम्। तदन्तेरेणापि तदन्तविधिला
भात्। किन्तु हलोऽच इत्युच्यमाने जन्तस्याङ्गस्य हलस्थाने वृद्धिरित्ययमप्यर्थः आशङ्क्येत। अज्ग्रहणमनिगर्थमिति। अन्यथेक्परिभा
षोपस्थानादभैत्सीदित्यादावेव स्यान्नत्वपाक्षीदित्यादौ॥ ह्म्यन्त॥ किमर्थमिति। गुणेन बाधिता वृद्धिर्न प्राप्नोतीति मन्यते। सिचि वृद्धिर्मा
भूदिति। अतो ल्लान्तस्येत्यनेनेति भावः। इतरस्तु सिचि वृद्धिरिति प्राप्तिरनेनोक्ता सा चायुक्तेति मत्वाह। नैतदस्तीति। वृद्धिप्रतिषेधविषयाद रामः
न्यत्र सामान्यलक्षणेन गुणस्यासिद्धत्वाज्जागरो विचिणल्ङित्स्विति गुणविधानं वृद्धिप्रतिषेधविषयार्थं संपद्यते। ॥ ८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणे तर्हीति। अङ्गवृत्त इत्येतत्तु निष्ठितत्वदुर्ज्ञानत्वादनाश्रितम्। यदि तर्हि गुणे रपरत्वे च कृते लक्षणान्तरेण वृद्धिर्भवति तदा जागरकद्
त्यादावजन्तलक्षणां वृद्धिं बाधित्वा गुणे प्रवृत्ते रपरत्वे चातउपधाया इति वृद्धिः प्राप्नोति। नैष दोषः। चिण्णलोर्गुणप्रतिषेधात् लिङ्गादुपधा
लक्षणा वृद्धिर्न भवतीत्यवसीयते। अन्यथा चिण्णलोर्गुणरपरत्वयोः कृतयोरुपधालक्षणाया वृद्ध्या सिद्धतिरूपमिति प्रतिषेधं न वि
दध्यात्। यदि च गुणे कृते वृद्धिमात्राप्रवृत्तेर्लिङ्गं चिण्णलोः प्रतिषेध आश्रीयते तदा जागृग्रहणं शक्यमकर्तुम्।। इयं तर्हीति। आर्थोऽय-
मुत्सर्गापवादयोः क्रमः नेटीति प्रतिषेधे प्राप्तेऽतो ल्रान्तस्येति वृद्धेरारम्भात् प्रतिषेधोत्तरकालेत्युच्यते। पाठक्रमेण पूर्वकालापि। अप
र आह इति। पूर्वोक्त एवार्थो वाचोयुक्त्यन्तरेणोच्यते। कक्ष्ययेति। कक्ष्यां विशिष्टदेशस्थं तुलासूत्रं वणिजो व्यवहरन्ति। अत्र तु कक्ष्येव क
क्ष्या। यथा कक्ष्या द्रव्याणां गुरुत्वं परिच्छिनत्ति तथा शास्त्रं कार्याणां सामान्यविशेषावस्थाभावेन बलाबलं व्यवस्थापयति। हर्म्यावस्था

गुणे तर्हि कृते रपरत्वे च हलन्तलक्षणा वृद्धिः प्राप्नोति। नेटीति तस्याः प्रतिषेधो भविष्यति। इयं तर्हि प्रतिषेधोत्तरकाला
वृद्धिरारभ्यते अतो ल्रान्तस्येति। अपर आह। कक्ष्यया कक्ष्या निमातव्या। सिचि वृद्धिश्च प्राप्नोति गुणश्च। गुणो भवति। गु
णे कृते रपरत्वे च हलन्तलक्षणा वृद्धिः प्राप्नोति। नेटीति च तस्याः प्रतिषेधो भवति। प्रतिषेधोत्तरकालमतो हलादेर्लघो
रिति विभाषा वृद्धिः प्राप्नोति। न च किंचित्। अतो ल्रान्तस्येति च वृद्धिः प्राप्नोति। न च किंचित्।। नेड्वशि कृति।। किमर्थं पुरस्ता
त्प्रतिषेध उच्यते। न विध्युत्तरकालः प्रतिषेधः क्रियते। न यथा। अन्यत्रापि विध्युत्तरकालाः प्रतिषेधा भवन्ति। क्वान्यत्र।
कर्तरि कर्मव्यतिहारे न गतिहिंसार्थेभ्य इति। देवताद्वन्द्वे च नेन्द्रस्य परस्य।।

वचनो वा कक्ष्याशब्द उपचारादिहावस्थावचनस्तत्र किं कार्यसामान्यावस्थं किं विशेषावस्थमित्येवं कक्ष्यया कक्ष्या निमातव्येत्यर्थः।। बलं वा
कक्ष्याया यथा तुल्यकक्ष्याविति। तत्र जागृ इ स् ई त् इति स्थिते वार्णादाङ्गं विधिर्बलीयानिति यणादेशं बाधि सार्वधातुकार्धधातुकयोरिति
गुणः प्राप्तस्तमपवादत्वाद्बाधित्वा सिचि वृद्धिरिति वृद्धिः प्राप्ता तामपवादत्वाद्बाधित्वा जागृ इति गुणः प्राप्नोति। भाष्यकारस्तु दुर्बलत्वादु
त्सर्गं परिहृत्य वृद्धेरारम्भं गणयति।। न च किंचिदिति। तस्याः पाक्षिक्या वृद्धेरपवादभूतं न किंचिद्गुणविधानमस्ति यतो जागृग्रहणमकर्त
व्यं स्यात्। गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम्।। पुनर्वृद्धिर्निषेधश्च यण्पूर्वाः प्राप्तयो नवेति संग्रहः श्लोकः।। नेड्वशि।। प्राप्तिपूर्वक
त्वात् निषेधस्यार्थात् पूर्वं विधिप्रकरणं पठितव्यं पश्चात् प्रतिषेधप्रकरणं क्रमव्यतिक्रमे प्रयोजनाभावादिति पृच्छति।। किमर्थमिति। ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रायमप्यर्थ इति। स्याद्यन्तमात्रस्य यणादुपचययोः प्रसज्यतीत्यर्थः। इडर्थमिति। रुदादिभ्यः सार्वधातुक इत्यत्र यत्सार्वधातुकग्रहणमिड्विधावुपा
त्तं तदानन्तर्यात् लिङः सलोपोऽनन्त्यस्येत्यत्र शक्यते अनुवर्तयितुम्। यदि चेड्विधेः परस्तादीडजनो र्ध्वे चेत्यस्यानन्तरं नेड्वशि कृतीत्यादि प्र
तिषेधप्रकरणं क्रियेत तत्तदा तेन विच्छिन्नत्वात्सार्वधातुकग्रहणं सलोपविधौ नानुवर्तेत। तुष्टो येति। यथा पपिथ पयिथ पयिथेत्यादौ आर्धधातुक-
स्येतीट् प्राप्तः एकाच इति प्रतिषिद्धः क्रादिनियमात्पुनः प्राप्तोऽचस्तास्वत्थ्यलीति प्रतिषिद्धस्तत्र ऋत एव भारद्वाजस्य प्रतिषेधो नान्येभ्य इति निय
मात्पक्षे इड्भवति। एवं स्तुद्रुस्रुश्रुभ्योऽपि प्राप्नोतीत्यर्थः। तथा हि। क्रादिनियमस्य बाधकं म चस्तास्वदिति प्रतिषेधमृतो भारद्वाजस्येति नियमो
बाधेत सकयं क्रादिप्रतिषेधं न बाधेत। अनन्तरस्य मध्येऽपवादा इति न्यायेन भारद्वाजनियमो अचस्तास्वदिति प्रतिषेधं बाधिष्यते न तु क्रादिप्रतिषेध

तत्रायमप्यर्थः। हीति। इड्ग्रहणं न कर्तव्यं भवति। प्रकृतमनुवर्तते। नैवं शक्यमिडर्थं सार्वधातुकग्रहणं लिङः सलोपे संनिहितं
तद्विच्छिद्येत। यदि पुनर्नेड्वशि कृतीत्यनन्तरमेवोच्येत। किं कृतं भवति। विध्युत्तरकालमेव प्रतिषेधः कृतो भवति। हि चे
ड्ग्रहणं न कर्तव्यम्। इडर्थं च सार्वधातुकग्रहणं लिङः सलोपे सन्निहितं भवति। तत्रायमप्यर्थः। हि। प्रतिषेधो न कर्तव्यो भ
वति। नैवं शक्यमिह हि तुष्टोयदुद्रोथेति। ऋतो भारद्वाजस्येत्येतस्मान्नियमादिट् प्रसज्येत। कृसृभृवृस्तुद्रुस्रुश्रुवो लिटीत्ययं
योगः प्रतिषेधार्थो भविष्यति। यद्येष योगः प्रतिषेधार्थः। य एतस्माद्योगादिट् परिप्राप्नोति नियमात्स न सिध्यति। पेचिव पेचिम।
शेकिव। शेकिम। एवं तर्हि कृसृभृ इत्येषां ग्रहणं नियमार्थं भविष्यति। स्तुद्रुस्रुश्रुवां प्रतिषेधार्थम्। वृङ्वृञोर्ज्ञापकार्थम्।

मूनेन तद्दिक्षिपालि क एष परिहारो भेदेन लक्षणापेक्षायाम्। कार्यमात्रे तु बाध्यत्वे नापेक्षिते नैष परिहारः। किंच न वृद्धश्च चतुर्भ्य इत्यस्मादूर्ध्वमि
दं प्रकरणं पठितव्यमिति प्रक्रान्तं न तु ऋतो भारद्वाजस्येत्यस्मात्परमिति। ततो भारद्वाजनियमात्पूर्वमिदं न तु परमिति कुतो मध्येऽपवादा इ
ति न्यायावतारः। व्याप्तिन्यायाश्रये च सर्वप्रतिषेधबाधेन भाव्यम्॥ यद्येष इति। यत्र भारद्वाजनियमादिटः प्राप्तस्य प्रतिषेधे विधेयसंभव
ति सति नियमार्थत्वस्यानुपपत्तिः॥ एवं तर्हीति। योगैकदेशः पूर्वं योगशब्देनोक्तः श्वात्रकेन तु समस्त एव योगः प्रतिषेधार्थोऽनेनोक्त इति मत्वा
चोदितं यद्येष इति। तत्र क्रादीनामकारान्तत्वान्नास्ति भारद्वाजनियमादिट्प्राप्तिरिति तेषां नियमार्थं ग्रहणम्। स्तुद्रुस्रुश्रुवां तु भारद्वाज
नियमात् क्रादिनियमाच्च प्राप्तस्येटः प्रतिषेधार्थम्। वृङ्वृञोरिति। एकयोगस्यापि नानावृत्त्यनेकधर्मार्णः तत्र प्रत्ययाश्रयोऽपीट्प्रति
षेधो नियम्यत इति वृङ्वृञ्ग्रहणेन ज्ञाप्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवमपीति। स्रुद्रुश्रुस्तुभ्यः प्रतिषेधो येन नाप्राप्तिन्यायेन क्रादिनियमप्राप्तमेवेटं निवर्तयेत्, न तु भारद्वाजनियमप्राप्तमित्यर्थः। स हि थल्येव प्रा
प्तः, न तन्वसोः सादेव। पुरस्तादिति। इड्मात्रमनाश्रितविषयविशेषमनारभ्याधीतेन प्रतिषेधेन बाध्यत इत्यर्थः। यदि तु भारद्वाजनियमात्परः प्र
तिषेधः क्रियेत, मध्येऽपवादा इति चाश्रीयेत, तदा विप्रतिषेधेन सिध्येदेव प्रतिषेधः। अथ कृञ्ग्रहणमिति। अकृतिक्रादिनियमात् इड् भविष्य
तीति मत्वा प्रश्नः। नात्रेति। भिन्नजातीयत्वादिति भावः। क्रादिनियमो हि प्रकृत्याश्रयप्रतिषेधविषयमेवेटं प्रापयेत्। बिभेदिथेति नेड्वशिकृ
तीति तु प्रत्ययाश्रयः प्रतिषेधः, तद्विषये क्रादिनियमाभावात् इड् न भवेत्। विभिदिवेतीति कृञ्ग्रहणमकृतिप्रतिषेधनिवृत्त्यर्थम्। वृङ्वृञोर्ग्र
हणादिति। सामान्यग्रहणं विशेषनिष्ठं संपद्यत इति प्रदर्शनार्थं वृङ्वृञोरिति भेदेनोपादानम्। वृग्रहणस्य प्रयोजनं ववृवहे इत्यादाविट्।

एवमपि सामान्यविहितस्येवेटः प्रतिषेधो विज्ञायेत। विशेषविहितस्याऽयं थलीति। पुरस्तात्तु नः प्रतिषेधे सति अनारभ्यापवा
दोऽयं भवति। तेन यावानिण्नाम तस्य सर्वस्य प्रतिषेधः सिद्धो भवति। यदि खल्वप्येषोऽभिप्रायस्तन्न क्रियत इति। पुरस्ताद
पि प्रतिषेधे सति तन्न करिष्यते। कथम्। इदमस्ति नेड्वशिकृतीति। ततो वक्ष्यामि आर्धधातुकस्य वलादेरिति। इडित्यनुवर्त
ते नेति निवृत्तम्। अथ कृञ्ग्रहणं किमर्थम्। इह माभूत्। बिभिदिव बिभिदिमेति। नैतदस्ति प्रयोजनम्। कृसृभृवृस्तुद्रुस्रु-
श्रुवो लिटीत्येतस्मान्नियमादत्रेड् भविष्यति। नात्र तेन परिप्रापणं प्राप्नोति। किं कारणम्। प्रकृतिलक्षणस्य प्रतिषेधस्य सम्प्र
त्यारम्भः। प्रत्ययलक्षणश्चायं प्रतिषेधः। उभयोः सम्प्रत्यारम्भः। कथं ज्ञायते। वृङ्वृञोर्ग्रहणात्। कथं कृत्वा ज्ञापकम्। इमौ
वृङ्वृञौ उदात्तौ, तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति। पश्यति तु आचार्य उभयोः सम्प्रत्यारम्भ इति, ततो वृङ्वृञोर्ग्रह
णं करोति।

भूदिति। यदि च क्रादिनियमः प्रकृत्याश्रयमेव प्रतिषेधं बाधेत, न प्रत्ययाश्रयं, तदा नेड्वशि श्र्युकः किति इति योगद्वयेन यथायोगं सिद्धत्वात्प्रतिषे
धस्यानार्थो वृग्रहणेन, ततः क्रियमाणं प्रत्ययाश्रयस्यापि प्रतिषेधस्य निवृत्तिं ज्ञापयति। ननु थल्यर्थं वृग्रहणं स्यात्, तत्र ह्युकित्वाद् ऋकारादि-
त्वाच्चेट्प्रतिषेधाप्राप्तिः, नैतदस्ति। ववर्थेति निगम इति निपातनं क्रियमाणं भाषायां ववरिथेति इटमभ्यनुजानाति। स्यादेतत्, तुल्यजा
तीयस्य प्रतिषेधो नियमेन बाध्यताम्।
॥

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ ८५ एकैकाश्रयत्वं कथं बाध्येत इत्याशङ्क्याह न खल्वपीति। कुसृभृभ्यो लिटि प्रकृत्याश्रय एव एकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः प्राप्नो ७१२
ति। केवलायाः प्रकृतेः शब्देनोपादानात्। अथोच्यते चकृषे इत्यादौ सृसुकः कितीतीट्प्रतिषेधः प्राप्नोति स चोभयवान् प्रकृतिप्रत्ययवि
शेषाश्रयणादिति। तन्न। अत्राप्यन्तरङ्गत्वात् प्रकृत्याश्रय एव प्रतिषेधः। तस्यैव नियमे विज्ञायमाने इड्ग्रहणमनर्थकं स्यात्। तस्मात्प्रत्य
याश्रयोपि प्रतिषेधो नियम्यत इत्यत्र इड्ग्रहणं लिङ्गम्। प्रकृतकृसृभृ अपेक्षया च न खल्वपीत्युच्यते। नन्वभयवान्नास्ति प्रतिषेधः रुदिवः
रुदिम इति। असति कृद्ग्रहणे रुदादिभ्यः सार्वधातुक इत्यस्येटोत्र प्रतिषेधः स्यात् नस्यात्व वशादिरत्र कार्यो रोदितीत्यादौ। यदेतदिति। प्रतिषे
धप्रकरणमित्यर्थः। ततः सार्वधातुक इट्प्रतिषेधाभावः। यदन्यार्थमार्धधातुकग्रहणं कर्त्तव्यं तद्योगविभागेन संसाध्यते। यदात्वस्या-

किंच। न खल्वपि कश्चिदुभयवान् प्रतिषेधः प्रकृतिलक्षणः प्रत्ययलक्षणश्च। ततः किम्। तुल्यजातीये असति यथैव प्रकृ
तिलक्षणस्य नियामको भवत्येवं प्रत्ययलक्षणस्यापि नियामको भविष्यति। इदं तर्हि प्रयोजनम्। इह माभूत्। रुदिवः रुदिमः।
एतदपि नास्ति प्रयोजनम्। उपरिष्टाद्योगविभागः करिष्यते। आर्धधातुकस्य। यदेतदनुक्रान्तं तदार्धधातुकस्य द्रष्टव्यम्।
ततः इड्वलादेरिति। तत्र त्वेतावद्द्रष्टव्यम्। यदि किंचित्तत्रान्यदपि आर्धधातुकग्रहणस्य प्रयोजनमस्ति। अथ न किंचिदाद्
ह वा कृद्ग्रहणं क्रियते तत्र वार्धधातुकग्रहणम्। कोन्वत्र विशेषः। नेड्वरमनादौ कृति। वरमनादौ कृति इट्प्रतिषेधं प्रयोज
यति। ईशिता ईशितुम्। ईश्वरः। वारः। दीपिता दीपितुम्। दीप्रः। भासिता भासितुम्। भास्मा। नायतिना। यतितुम्। यत्नः। अथान्ये
येवशादयः तत्र कथम्। उणादयोऽव्युत्पन्नानि प्रातिपदिकानि। तितुत्रतथसिसुसरकसेषु च। तितुत्रेष्वग्रहादीनाम्। तितुत्रेष्वग्रहा
दीनामिति वक्तव्यम्। इह माभूत्। निगृहीतिः। उपस्निहितिः। निकुचितिः। निपठितिरिति॥ एकाच उपदेशेनुदात्तात्॥ एकाज्ग्र
हणं किमर्थम्।

न्यप्रयोजनाभावः तदा लाघवार्थं कृद्ग्रहणमेव कर्त्तव्यम्। प्रत्याख्यास्यते च तत्रार्धधातुकग्रहणम्। भस्मेति। नन्वत्रैव वस्यत्युणादय
इति। न तस्याव्युत्पत्त्याश्रयणादेवेड् न भविष्यति। अन्येभ्योपि दृश्यत इत्यनेनात्र मनिन् प्रत्यय इत्यदोषः॥ तितुत्र॥ निकुचितिरिति। कु
त्वे क्तिन्नाबादिभ्य इति क्तिन्। कुच शब्दे तार इत्यस्माद्धात्वर्थांक्तिन्॥ एकाच उप॥ एकाज्ग्रहणमिति। एकाचामेवानुदात्तत्वप्रतिज्ञानादनु राम॰ ८५
दात्तग्रहणेनैवातिप्रसङ्गनिवारणात्प्रश्नः।
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरउत्तरार्थत्वमभिप्रेत्याह। एकाजग्रहणं जागर्त्यर्थमिति। सजागर्तेर्मा भूदिति। जागर्तेरेवोगन्तोऽनेकाच् संभवतीति तन्निवृत्त्यर्थमेका-
ज्ग्रहणम्। कुर्वीते सुनुवद्वा वान्प्रतिषेधो भवत्येव। चोदकः प्रतिषेधाप्राप्तिकारणमन्यद्दर्शयति। एतदपीति। सबाधक इति। इट्प्रति
षेधस्येत्यर्थः॥ उपदेशाधिकारादिति। अन्यार्थमुपदेशग्रहणमनुवर्त्यमुपदेशे च जागर्तिरुगन्तो भवतीति प्रतिषेधप्रसङ्गः। इतरउपदे-
शाधिकारस्य प्रयोजनान्तरमपश्यन्नाह। उपदेशग्रहणं निवर्तिष्यत इति। स्तीर्त्वा पूर्त्वेति। इत्वादिषु कृतेष्वनुगन्तत्वात् तूलत्वेऽन्यारो चसं
प्रतिको गन्तसंभवे भूतपूर्वगत्याश्रयणस्यायुक्तत्वादिट्प्रतिषेधो न स्यादुपदेशाधिकारात्तूपदेशउगन्तत्वात् संप्रत्यनुगन्तत्वेऽपि प्रतिषे
धः प्रवर्तते। आनुपूर्व्येति। स्तृत्वा इति स्थिते कित्वनिषेधाश्रय इट् [illegible] डाश्रयश्च कित्वनिषेध इति प्रागेव संनिहितं कित्वमाश्रित्येट्प्रतिषेधः प्रव

एकाजग्रहणं जागर्त्यर्थम्। एकाज्ग्रहणं क्रियते। जागर्तेरिट्प्रतिषेधो मा भूत्। जागरिता जागरितुम्। नैतदस्ति प्रयोज
नम्। उपदेशेऽनुदात्तादित्युच्यते। जागर्तिश्चोपदेशे उदात्तः। नन्वेवमिहार्थं जागर्त्यर्थमेकाज्ग्रहणं कर्तव्यमिति। किं त
र्ह्युत्तरार्थम्। श्र्युकः कितीतीट्प्रतिषेधं वक्ष्यति स जागर्तेर्मा भूदिति। जागरितः जागरितवानिति। एतदपि नास्ति प्रयोजन
म्। जागर्तेर्गुण इत्युच्यते। वृद्धिविषये प्रतिषेधविषये च स बाधको भविष्यति। तत्र गुणे कृते रपरत्वेऽनुगन्तत्वादिट्प्र
तिषेधो न भविष्यति। ननु च उपदेशाधिकारात्प्राप्नोति। उपदेशग्रहणं निवर्तयिष्यते। यदि निवर्तते। स्तीर्त्वा पूर्त्वा इत्वो
त्वयोः कृतयोः रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति। नैष दोषः। आनुपूर्व्यात् सिद्धमेतत्। नान्तरा कृत इट्प्रतिषे
धे इत्वोत्वे प्राप्नुतः। किं कारणम्। न क्त्वा सेडिति कित्त्वप्रतिषेधात्। इदं तर्हि आतिस्तीर्षति। निपुपूर्षति। इत्वोत्वयोः कृ
तयोः रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति।

र्तेनेतत् इत्वादीनीत्यर्थः। अत्र चोद्यते। कृतेष्वित्वादिषु प्रतिषेधनिमित्तो गन्तत्वापगमात्पुनरिट् प्राप्नोति। तस्मिंश्च सति न क्त्वा सेडिति कित्त्वप्र
तिषेधाद्गुणो सति स्तेरित्वे निप्राप्नोति॥ नैष दोषः। पूर्वमेव प्रसक्तस्येट उगन्तलक्षणप्रतिषेधेन बाधितत्वात्पुनस्तस्य संस्कृतत्वाद्वृष्ट्यावसरत्वा-
त्पुनः प्रवृत्त्यभावात्। आतिस्तीर्षतीति। श्र्युकः कितीत्यत्र विशिष्टानुबन्धोपलक्षितः प्रत्यय आश्रितः। सनिग्रहगुहोश्चेत्यत्र तु सा सादि
ति विशेषमाश्रित्यायमुपन्यासः। अत्रेत्वरपरत्वयोः कृतयोरनुगन्तत्वादिट्प्रतिषेधो न स्यादुपदेशाधिकारात्त्वनुगन्तावस्थायामपि
भवति। सनिग्रहगुहोश्चेत्यत्र च शब्देनोगनुकृष्यते श्र्युकः कितीत्यनेन त्वत्र प्रतिषेधो नास्ति। इट्प्रतिषेधाश्रयत्वाद् इस्तलादित्वस्य
इस्तलादित्वाश्रयत्वात्कित्वस्य कित्वाश्रयत्वादिट्प्रतिषेधस्येतीतरेतराश्रयप्रसङ्गात्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मा॰दै॰
८६

इट्सनि वेति। स्मृद्दृनिश्रिते ऋकारान्तावस्थायामेव पक्षे इडभावः॥ तथा हि इड्विकल्पस्य निरवकाशत्वात्संप्रतिकाभावे भूतपूर्वग-
त्याश्रयणादनित्यत्वाद्वा न तावद्गुणस्य प्रवृत्तिः। तत्र इट्पक्षे वृतो वेति दीर्घविकल्पे रूपद्वयम्। आतितरिषति। आतितरीषतीति
इडभावपक्षे तु आतितीर्षतीति। अत्र चोद्यते। इडभावपक्षे कित्त्वाद्गुणे निषिद्धे इत्त्वरपरत्वयोः कृतयोः पुनरिट् प्राप्नोति। न चेट्सनि वेति विकल्पविधानमन-
र्थकम्। ऋकारान्तावस्थायां पक्षे इडभावे कित्त्वे सति इत्त्वरपरत्वयोः कृतयोरिटि सति गुणे च सति आतितरि-
षतीति रूपसंपादनार्थत्वाद्विकल्पस्य। अत्र समाधिः। नित्यमिटि प्राप्ते विकल्पस्य विधानाल्लब्धावसरत्वात्तल्लक्ष्यस्य सिद्धत्वात्पुनरिट्-
लक्षणं न प्रवर्तते। आस्तीर्णमिति। कृते कृते चेटि किदेव निष्ठेत्यनेन विशेषेण स्योपन्यासः। यस्य विभाषेति। ननु ऋकारान्तस्य सनि वि-
कल्पविधानान्नित्यत्वादित्वोत्वयोः कृतयोरन्तकारान्तत्वाद्यस्य विभाषेति प्रतिषेधप्रसङ्गः। नैष दोषः। सनि विकल्पविधाने ऋकारान्तत्व-
सापेक्षणेऽपि यस्य विभाषेत्यत्र यस्य क्वचिदिड्विकल्पो दृष्टः स धातुराश्रीयते न तु विकल्पकारणमृकारान्तत्वम्। भवति चेत्वोत्वयोः कृ-

मा भूदेवं श्र्युकः कितीतीट्सनि वेत्येवं भविष्यति। इदं तर्हि प्रयोजनम्। आस्तीर्णो निपूर्तः पिण्डाः। इत्वोत्वयोः रपरत्वे
चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति। मा भूदेवम्। इट्सनि वेति सनि विभाषा। यस्य विभाषेति प्रतिषेधो भ-
विष्यति। इदं तर्हि वध्यर्थमेकाज्ग्रहणम्। वधइट्प्रतिषेधो मा भूत्। वधिषीष्टेति। एतदपि नास्ति प्र-
योजनम्। क्रियमाणेऽपि वै एकाज्ग्रहणे वधइट्प्रतिषेधः प्राप्नोति वधिषीष्टेति। किं कारणं वधइट्प्रतिषेधः।

तयोरपि सत्त्वधातुरिति प्रवर्तते प्रतिषेधः। तदेवमुपदेशग्रहणस्य उत्तरत्रानुपयोगादननुवर्तनाज्ज्ञापितमित्यत्र गुणरपरत्वयोः
कृतयोरनुगन्तत्वाच्छ्र्युकः कितीति प्रतिषेधाभावादुत्तरार्थमेकाज्ग्रहणं न कर्तव्यम्। वध्यर्थमिति। वधशब्दोऽकारान्तोऽनेकाजादेशः। इ-
तरउपदेशग्रहणमनुदात्तस्यैव विशेषणं न त्वेकाच इति मन्यमान आह। एतदपीति। वधिषीष्टेति। आशिषि लिङ्। कर्मण्यात्मनेपद-
म्। अतो लोप इत्यकारलोपे कृते वधिरेकाच्। अकारोच्चारणं त्ववधीदित्यादौ हलन्तलक्षणा वृद्धिनिवृत्त्यर्थं स्यात्। ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतेश्चानुदात्तत्वादिति। यस्मात्प्रकृतिर्हन्तिरनुदात्तात्तस्याश्चोपदेशावस्था गृह्यते। सैव चानेन रूपेणावस्थितेति संप्रत्ययस्ततः प्रतिषेधः प्रा
प्नोति। ननु च स्वकृतमप्येकाजग्रहणमनर्थकम्। किं पुनरिति। उभयविशेषणमुपदेशग्रहणमस्तु। ततो वधेरुपदेशेऽनेकाच्त्वात्प्रतिषेधाप्र
सङ्गः। बेभिदितेति। द्विः प्रयोगे द्विर्वचने भवति भिदिरुपदेशेऽनुदात्त उपदेशे एकाजित्यतो लोपे कृते न संप्रत्ययेनैकाच्त्वेऽपि प्रतिषेधप्रसङ्गः। श्रू
यमाणे त्वेकाच्या श्रीयमाणो आरत्तिसंख्येयैकत्वसंख्याया बाधनात्प्रतिषेधाभावः। समुदायस्य चैकाङ्गसंज्ञा न तु प्रत्येकमित्येकाचो ङ्गादित्या
श्रयणात्परभित्रूपाश्रयोऽपि प्रतिषेधो न भवति। अनुदात्तविशेषणं चेदिति। उभयविशेषणोऽप्यनुदात्तविशेषणं भवतीति सामर्थ्यादनुदात्त
स्यैव यदि विशेषणमित्यवधारणं द्रष्टव्यम्। असति नियम इति। क्रादिसूत्रं प्रतिषेधार्थमस्तु। एवमपि चकृषदूत्यादि सिध्यति चिभिदिवेत्या

सन्निपातएकाच्त्वात्प्रकृतेश्चानुदात्तत्वात्। संनिपाते चैव हि विधिरेकाच्श्रूयते प्रकृतिश्चास्यानुदात्ता। किं पुनः कारणमेवं वि
ज्ञायते उपदेशेऽनुदात्तादेकाचः श्रूयमाणादिति। यङ्लोपार्थम्। यङ्लोपे मा भूदिति। बेभिदिता। बेभिदितुम्। चेच्छिदिता।
चेच्छिदितुम्। एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्कृत्रादिभ्यो लिटि नियमानुपपत्तिरप्राप्त
त्वात्प्रतिषेधस्य। एकाच उपदेशेऽनुदात्तादिति उपदेशवचनमनुदात्तविशेषणमिति चेत्कृत्रादिभ्यो लिटि नियमानु
पपत्तिः। किं कारणम्। अप्राप्तत्वात्प्रतिषेधस्य। द्विर्वचने कृते उपदेशेऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्रा
प्नोति। असतीट्प्रतिषेधे नियमो नोपपद्यते। असति नियमे को दोषः। तत्र पचादिभ्य इड्वचनम्। तत्र पचादिभ्य इड्वक्तव्यः।
पेचिव। शेकिम। सनश्चेट्प्रतिषेधः। सनश्चेट्प्रतिषेधो वक्तव्यः। बिभित्सति। चिच्छित्सति। द्विर्वचने कृते उपदेशेऽनुदात्ता
देकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति। ग्रह चनीतः। तत्वेऽनच्कत्वादिट्प्रतिषेधो न प्राप्नोति। नैष दोषः।

द्वैच एकाच्त्वाभावात्प्रतिषेधाभावादिट्सिध्यतीति भावः। देचिवेति। एत्वाभ्यासलोपयोः कृतयोरेकाचः श्रूयमाणादितीट्प्रतिषेधप्रस
ङ्गः। नीत इति। ददातेः क्त प्रत्ययेऽचउपसर्गात्त इति तत्त्वे कृतेऽनच्कत्वादेकाच्त्वाभावादिट्प्रतिषेधाप्रसङ्गः। तत्वस्य द्विपदाश्र
यत्वाद्बहिरङ्गत्वादन्तरङ्गे इट्प्रतिषेधेऽसिद्धत्वादिति परिहारः। परिहारान्तरस्य सद्भावान्नाश्रितः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेव दर्शयति। आनुपूर्व्यात्सिद्धमिति। यल्ग्रहणस्येति। आरम्भसामर्थ्यादत एकहल्मध्येनादेशादेर्लिटीत्यनुवर्तनाच्चान्तरेणापि यल्ग्रहणं यल्येवस्येत्वाभ्यासलोपयोः सिद्धत्वात् यल्ग्रहणं क्ङिति समुच्चयार्थम्। ततश्चेटि कृते एत्वाभ्यासलोपयोर्विधानं पेचिवेत्यादीनि रूपाणि सिध्यन्तीति नार्थः क्रादिनियमेन। उभयविशेषणत्वादिति। एवं सत्युभयं विशेषणत्वेन संस्पर्शादनुगृहीतं भवति। एतदर्थं चोपदेशादिति मध्ये पठितम्। उभयविशेषणे च क्रादिनियमात्पचादिभ्य इटः सिद्धत्वात् थलि च सेटीत्यत्र यल्ग्रहणं विस्पष्टार्थम्। सन्यङन्तस्येति। सन्यङोरिति षष्ठी। तत्र भिदशब्दस्य प्रकृतिप्रत्ययसमुदायस्य सर्वे सर्वपदादेशादिति शब्दान्तर आदेशे कृते ऽयं धातुरयं प्रत्यय इति विभागाभावादिट्प्रतिषेधाभावः। नन्वेवं बिभित्सतीत्यत्रापि प्रतिषेधाप्रसङ्गः। इडप्यस्मिन्पक्षे न प्राप्नोतीत्यदोषः। अथ वात्रासमाम्नातत्पक्षान्तराश्रयेणाह। अथापीति। न ह्यस्येति। आचार्यस्य। भिदुपदेशाश्रये ह्येकाचत्वादनुदात्तत्वाच्चेट्प्रतिषेधः स्यात्। यङन्तस्य तूपदेशे गृह्यमाणे तस्यानेकाच्त्वादुदा

आनुपूर्व्यात्सिद्धमेतत्। नात्रा कृते इट्प्रतिषेधे तत्त्वं प्राप्नोति। किंकारणम्। उतिकितीत्युच्यते। यदप्युच्यते एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्क्रादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्येति। मा भून्नियमः। ननु चोक्तं तत्र पचादिभ्य इड्वचनमिति। नैष दोषः। उक्तं तत्र यल्ग्रहणस्य प्रयोजनम्। समुच्चयो यथा विज्ञायेत। थलि च सेटि क्ङिति च सेटीति। यदप्युच्यते सनश्चेट्प्रतिषेध इति। उभयविशेषणत्वात्सिद्धम्। उभयमुपदेशग्रहणेन विशेषयिष्यामः। उपदेशेऽनुदात्तादुपदेश एकाच इति। यङ्लोपे कथम्। यङ्लोपे च तदन्तद्विर्वचनात्। सन्यङन्तस्य स्थाने द्विर्वचनं तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः स भवति यः स एकाचुपदेशे अनुदात्तः। अथापि द्विःप्रयोगो द्विर्वचनमेवमपि न दोषः। न ह्यस्य भिदुपदेश उपदेशः। किं तर्हि बेभिदुपदेश उपदेशः।

तत्वाच्च प्रतिषेधाप्रसङ्गः। ननु च प्रत्यक्षमाख्यानमुपदेश इत्युक्तम्। यङादीनां च प्रत्ययानामुपदेशोऽस्ति तदन्तानां शब्दानामनुमेयरूपाणाम्। नैष दोषः। संकीर्णे तूद्देशोपदेशाविन्यपि तन्त्रोक्तमत एव बेत्सं ज्ञायां करणसाधन उपदेशशब्दः शास्त्रवाच्याश्रितः। इह तु भावसाधन आश्रीयते। तेन प्रतिपादनमात्रं गुणैर्वा प्रत्यक्षेण वोपदेश उच्यते। यङ्विधानद्वारेण च बेभिद्य इत्यस्य समुदायस्य क्रियाविशेषवचनस्याद्यप्रतिपत्तिरस्तीति बेभिद्युपदेश इत्युक्तम्। बेभिद्यशब्दादिकृषि पाविति इकू प्रत्ययेऽल्लोपयलोपयोर्बेभिदिइति भवति। अथ चेत्संज्ञा विधावुच्चारणवचन उपदिशिर्गृह्यते तदुक्तमुद्देशश्च प्रातिपदिकानां नोपदेश इति। इह तु प्रतिपादनवचन इति विरोधाभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथापिमिद्युपदेशादिति। उच्चारणवचनेप्युपदिश्यैर्ग्रहणमाणेप्रत्यक्षमाख्यानवचनेवानदोषइत्यर्थः। द्विप्रकारउपदेशउक्तोऽएच्छति। कः पुनरिति। किंमिद्युपदेशोऽथवेमिद्युपदेशइत्यर्थः। यः कृत्स्नइति। कृत्स्नकारित्वात्कृत्स्नः सचमिद्युपदेशएवासहिसर्वसाधारणेभेत्ताबेमियते इत्येवमादीनांप्रतिपत्तिहेतुत्वात्। उभयोरिति। केवलस्यमिदेर्वैमिद्यादेश्चनदवयवसमुदायस्यधातोर्ग्रहकइत्यर्थः। एतदुक्तंभवति। मिदादीनामेवोपदेशोऽस्तिनतुसनाद्यन्तानामवयवसमुदायानामु पदेशप्रस्वस्यसाक्षात्प्रतिपत्तिहेतुशास्त्रवाचिन आश्रयणात्। वधइट्प्रतिषेधइति। मिद्युपदेशस्थानीयोहन्त्युपदेशलत्रहन्तिरेकाजनुदात्तश्चेतिसत्यपिवधेरुपदेशेऽनेकाच्त्वेहन्त्युपदेशधर्माश्रयइट्प्रतिषेध

अथापिमिद्युपदेशउपदेशएवमपिनदोषः। अकारेणाव्यवहितत्वान्नभविष्यति। ननुचलोपेकृतेनास्तिव्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव। नसिध्यति। पूर्वविधौस्थानिवद्भावः। नचायंपूर्वविधिः। पूर्वस्मादपिविधिः पूर्वविधिः कः पुनरुपदेशोन्याय्यः। यः कृत्स्नः। कश्चकृत्स्नः। यउभयोः। यदितर्हियउभयोः सकृत्स्नः सचन्याय्यः वधइट्प्रतिषेधः प्राप्नोति। वधिषीष्टेति। नैषदोषः। आद्युदात्तनिपातनंकरिष्यते। सनिपातनस्वरः प्रकृतिस्वरस्यबाधकोभविष्यति। एवमपिउपदेशिवद्भावोवक्तव्यः। यथैवहिसनिपातनस्वरः प्रकृतिस्वरंबाधतएवंप्रत्ययस्वरमपिबाधेत। आवधिषीष्टेति। नैषदोषः। आर्धधातुकीयाः सामान्येनभवन्त्यनवस्थितेषुप्रत्ययेषु। तत्रार्धधातुकसामान्येवधिभावेकृतेसतिशिष्टत्वात्प्रत्ययस्वरोभविष्यति। अथकेपुनरनुदात्ताः। आदन्ताः। अदरिद्रः। इवर्णान्ताश्चश्रिश्विडीशीदीधीवेवीङः। उकारान्ताः। युरुणुक्षुक्ष्णुस्नूर्णुवर्जम्। ऋदन्ताश्चाजागृवृङ्वृञः। शकिः कवर्गान्तानाम्। पचिवचिसिचिमुचिरिचिविचिप्रच्छियजिभजिसञ्जित्यजिभुजिभ्रस्जिमस्जिरुजियुजिणिजिविजिसञ्जिस्वञ्जयः श्चवर्गान्तानाम्।

प्रसङ्गः। नचाकारलोपस्ययङन्तइवा त्रापिस्थानिवद्भावेनव्यवधानम्। सत्यपिस्थानिवत्त्वेप्रकृतिप्रत्यययोरानन्तर्यघटनेतुस्थानिवत्त्वादकारेणमिदिप्रत्यययोरानन्तर्यविच्छेदात्। आद्युदात्तनिपातनमिति। तत्सामर्थ्यादुपदेशविषयानुदात्तत्वाश्रयइट्प्रतिषेधोनभवति। नह्येतदाद्युदात्तत्वंप्रयोगसमवायि। प्रत्ययस्वरेणतस्यबाधनात्। आर्धधातुकीयादिति। आर्धधौकेभवादितिवृद्धाच्छः। यदितर्ह्यार्धधातुकविशेषनिमित्ताः अप्यनवस्थितेषुप्रत्ययेषुभवन्ति। तदायदुक्तंवधिभावात्सीयुटिचिणवद्भावोविप्रतिषेधेनेतितद्विरुध्यते। अन्तरङ्गत्वाद्वधेर्वहिरङ्गत्वाच्चिण्वद्भावस्यविप्रतिषेधायोगादितिचिन्त्योत्रसमाधिः। तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कौ॰ ॥कृसृभृवृ॥ कृञोऽसुट इति। कृतेऽपि सुटि करोतेर्नित्यत्वेनेति प्रतिषेधप्रसङ्गः। गुणे कृते इति। ऋतश्च संयोगादेर्गुण इत्यत्र संयोगादेर्गुणविधा-
८८ ने संयोगोपधग्रहणं कर्तव्यमिति वचनेन अनुगन्तत्वादिति। स्तु क्रः किती त्यत उगग्रहणमिहानुवर्तत इति मन्यते। एवमपीति। यद्यपि सं-
प्रति नोगन्तत्वं यथा स्तुप्रदेश उगन्त इति स्यात् प्रतिषेधः। किमर्थमुपदेश इत्यनुवर्तनम् इति चेत् न तु ष्टोघेत्यादौ कृतेऽपि गुणे द्रुत प्रतिषेधार्थम्। यद्ये-
वमुक इत्यपि नानुवर्त्यम्। एवं तर्हि नटने नोक्तं भवति। सत्यमिवोगधिकारे कृञोऽसुट इत्यवश्यं वाच्यमिति नन्वत उगधिकारेण॥ स्वीदितो-

सदिशादिहदिह्विदितुदिनुदिसिदिभिदिस्कन्दिक्षुदिस्विद्यतिविन्दतिविन्तिविद्यति राधिसुधिलुधिशुधिक्रुधिरुधिसाधिव्यधिबन्धि
सिध्यति हनिमन्यतयस्तवर्गान्तानाम्। तिपितपिवपिशपिक्षुपिलुपिलिपिस्वप्यापिक्षिपिसृपितृपिदृपियमिरमिलभिय
मिरमिनमिगमयः पवर्गान्तानाम्। रुशिरिशिदिशिविशिलिशिस्पृशि दृशिकुशिमृशिदंशिक्लिशिषिम्पिषिकृषिम्लिषिवि
षिपिषि तुषिद्विषिश्लिषिघसिवसिदहिदिहिवहिदुहिनहिरुहिलिहिमिह यभ्रेः षान्तानाम्। वसिः प्रसारणी॥ कृ
सृभृवृस्तुद्रुस्रुश्रुवो लिटि॥ कृञोऽसुटः॥ कृञोऽसुट इति वक्तव्यम्। इह माभूत्। संचस्करिव। संचस्करिम। तत्तर्हि वक्तव्यम्। न
वक्तव्यम्। गुणे कृते रपरत्वे चानुगन्तत्वादिट् प्रतिषेधो न भविष्यति। एवमप्युपदेशाधिकारात् प्राप्नोति। तस्मादसुट
इति वक्तव्यम्॥ स्वीदितो निष्ठायाम्॥ श्विग्रहणं किमर्थम्। तत्प्रसारणे कृते प्रसारणपूर्वत्वे च उगन्तादित्येव सिद्धम्।
अत उत्तरं पठति।

निष्ठायाम्॥ स्तीर्त्वा स्तीर्णमित्यादीनामुपदेशग्रहणानुवृत्तिमन्तरेण सिद्धेरभिधानादुपदेशाधिकारोऽत्र नास्तीति मत्वाह। श्विग्रहणं किम
र्थमिति। ननु च श्वित इति श्विते संप्रसारणात्परत्वादिट् प्राप्नोति। नित्यत्वात्संप्रसारणं भविष्यतीति मन्यते। यस्य लक्षणान्तरेणेति कश्चित्ना रामः
श्रीयत इति पूर्वमेवोक्तम्। संप्रसारणनिमित्तत्वादिडभावस्य तस्मिन्कृते इटोऽप्रवर्तनादनित्यत्वम्। संप्रसारणस्यनुक्तना कृतप्रसङ्गित्वान्नि ८८
त्यत्वम्॥ ॥

श्विग्रहणमिदन्तत्वादिति। एकाज्ग्रहणेनतरार्थता प्रत्याख्याता यानुपूर्व्या सिद्धमित्यादि तत्रोक्तम्। तच्चैकाज्ग्रहणमन्यार्थमास्थितं सदुत्त
रत्रापि प्रतिपत्तिगौरवपरिहाराया नुवर्त्यम्। ततश्च जागरितद्वत्यत्र ग्युकः किती तीट्प्रतिषेधो न भवति। ननु वध्यर्थमप्येकाज्ग्रहणम्प्र-
त्याख्यातमेवाद्युदात्तनिपातनाश्रयेण। हन्तु उपदेशे गृह्यमाणे तदुक्तम्। वध्युपदेशे त्वाश्रीयमाणे एकाज्ग्रहणेनैव वधेरिट् साध्यते। आ
द्युदात्तनिपातने त्वाश्रीयमाणे वधिषीष्टेत्याद्युदात्तत्वप्रसङ्गनिवारणाय लिङीति विषयसप्तम्याश्रयणीया। तथा च घानिषीष्टेति विप्रति
षेधाच्चिण्वद्भावानुपपत्तिरन्तरङ्गत्वाद्वधिभावप्रसङ्गात्। यङ्लुङ्निवृत्त्यर्थं चैकाज्ग्रहणं कर्तव्यम्। तस्मिन् हि कियमाणे यत्रैकाज्ग्रह
णं किं ˉ चित्यत्रैतानि न यङ्लुकीति वचनाद्विभिदितेत्यादावपीट् सिध्यति। उपदेशग्रहणमपि ग्युकः कितीत्यत्रानुवर्त्यम्। अन्यथास्तीर्वे

श्विग्रहणमिदन्तत्वादुपदेशस्य। श्विग्रहणं क्रियते इदन्तत्वादुपदेशस्य। उपदेशे उगन्तादित्युच्यते। श्वयति श्व उपदे
शे इदन्तः॥ यस्य विभाषा॥ यस्य विभाषाऽविदेः। यस्य विभाषाऽविदेरिति वक्तव्यम्। इह माभूत्। विदितः। विदितवानि
ति। न तर्हि वक्तव्यम्। न वक्तव्यम्। यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः। शब्विकरणस्य विभाषा लुग्विकरणश्चायम्॥
आदितश्च॥ विभाषाभावादिकर्मणोः॥ किमर्थो योगविभागः। न आदितो विभाषाभावादिकर्मणोरित्येवोच्येत। केनेदा
नीं कर्तरि प्रतिषेधो भविष्यति। यस्य विभाषेत्यनेन।

त्यादि सिद्धयेऽनन्तप्रकारपरिहाराश्रयणे प्रतिपत्तिगौरवानुषङ्गः। इदमेव श्विग्रहणमुपदेशाधिकारस्य तत्रज्ञापकम्। अन्ये त्विदं श्वि-
ग्रहणं सर्वविधिभ्य इड्विधिर्बलवानित्यस्य ज्ञापकमाहुः॥ यस्य वि॥ विभाषागमहनविदविशामिति क्वसौ विकल्पविधानाद्धेतोर्निष्ठायां प्रति
षेधः प्राप्नोतीति मत्वाह। यस्य विभाषाऽविदेरिति। वित्तिरत्र विवक्षितः। विद्लृ लाभे इत्यस्य तु प्रतिषेधो भवत्येवेति न इति। विद्यतिविन्त्योस्त
नुदात्तत्वादिट्प्रतिषेधः। यदुपाधेरिति। उपाधिरभिधेयादिर्भेदकः। शब्विकरणस्य विभाषेति। विशिना गौदादिकेन साहचर्याद् गौदादि
कस्यैव लाभार्थस्य विभाषेति ज्ञानार्थस्य सत्यपि विदिरूपत्वे अर्थस्य भेदकत्वेन रूपवदाश्रयणात् प्रतिषेधाभावः। यद्यपि हन्तिना साह
चर्याद्विदेरस्तितयाऽपि शब्द परविप्रतिषेधाद्विशिर्व्यवस्थाहेतुर्न हन्तिः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

आदितश्चे॰ एवंतर्हीति। हलामेदेपियद्युपाधीनांभेदकत्वंनस्याद् योगविभागोनर्थकः स्यात्। भेदकत्वेतुनेषांभावादिकर्मणोर्विकल्पविधानात्कर्तरि
निष्ठायांप्रतिषेधोनस्याद्भावादिकर्मणोरपिविकल्पप्रतिषेधयोर्विरोधान्प्रतिषेधोनस्यादितिकर्तृकर्मनिष्ठार्थोयोगविभागः। यदितर्हुपा-
धिर्भेदकस्तत उदितोवेति क्त्वाप्रत्ययेभाववाचिनिविकल्पविधानाद्भाववाचिन्यामेवनिष्ठायांप्रतिषेधः स्यान्नकर्तृकर्मवाचिन्याम्। नैष-
दोषः। तेननिर्वृत्तंनिर्दिष्टेनेसृयूतादिभ्यइतिलिङ्गात्प्रत्ययार्थोभेदकत्वेननाश्रीयते॥ क्षुब्ध ॥ क्षुब्धमिति। यदिधात्वर्थोपाधित्वेनमन्था
दयआश्रीयेरन्मन्थादिसाधनेधात्वर्थेक्षुब्धादयोनिपात्यन्तेइतितदाक्षुभितंमन्थेनेत्यत्राधिभावेकस्येट्प्रतिषेधः स्यादितिसमुदायान

एवंतर्हिसिद्धेसतियद्योगविभागंकरोतितज्ज्ञापयत्याचार्यः। यदुपाधेर्विभाषातदुपाधेःप्रतिषेधइति। किमेतस्यज्ञाप
नेप्रयोजनम्। यस्यविभाषाअविदेरित्युक्तंतन्नवक्तव्यंभवति॥ क्षुब्धस्वान्तध्वान्त॥ ॥ क्षुब्धंमन्थाभिधानेइति
वक्तव्यम्। क्षुभितंमन्थेनेत्येवान्यत्र। क्षुब्धा। स्वान्तंमनोभिधानइतिवक्तव्यम्। स्वनितंमनसे ̄ त्येवान्यत्र। स्वान्तः ध्वा
न्तंतमोभिधानइतिवक्तव्यम्। ध्वनितंतमसेत्येवान्यत्र॥ धृषिशसीवैयात्ये॥ किमिदंवैयात्यइति। विधातभावोवैयात्यम्।
दृढस्थूलबलयोः॥ दृढनिपातनंकिमर्थम्। नदृहेर्नेड्भवतीत्येवोच्येत। दृढनिपातनंनकारहकारलोपार्थंपरस्यचढत्वा
र्थम्। दृढनिपातनंक्रियतेनकारहकारलोपार्थम्। नकारहकारलोपोयथास्यात्। परस्यचढत्वंयथास्यात्।

मभिधेयभावेनमन्थादयइहोपात्ताइतिप्रदर्श्यते। द्रवद्रव्यसंपृक्ताः सक्तवोमन्थः॥ क्षुब्धागिरिनदीमिदेत्यादयस्तुप्रयोगाअसाधवइत्याहुः
। अन्येतूपमानमाश्रित्यसमर्थयन्ते। स्वान्तशब्देनबाह्येषुविषयेष्वविक्षिप्तमनाकुलंमनउच्यते॥ धृषिशसी॥ वियातभावइति। विरूपंयातं
गमनंचेष्टनंयस्यसवियातोऽविनीतः॥ दृढस्थूल॥ नदृहेरिति। दृहदृहिबृहबृहिवृद्धावितिधातुषुपठ्यते। तत्रदृहः स्थूलबलयोरितिइट्स्य
वप्रतिषेधोविधेयइतिमत्वाप्रश्नः। दृढनिपातनमिति। दादेर्धातोर्घइतिघत्वस्यप्रतिषेधोवक्तव्यः स्यात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनि डूचनेहीति। यदीटो घत्वस्य च प्रतिषेधो विज्ञायेत ततो ढत्वधत्वष्टुत्वढलोपेषु यद्यपि दृढ इति रूपं सिध्यति तथापि पूर्वत्रासिद्धमिति ढलोपस्यासिद्धत्वात् संयोगे गुर्विति गुरुसंज्ञायां सत्यां तन्निबन्धनकार्यप्रसङ्गो लघुसंज्ञाहेतुकार्याप्रसङ्गश्च। द्रढीयानिति। रविधोइष्ठेमसु(?) द्वित्यादि परिगणनमनपेक्ष्योच्यते। परिगणने हि विशेषणानां प्रत्याख्यानाद्रभावः सिध्यति। नलोपवचनं चेति। दृंहे रिदित्वान्नलोपो न प्राप्नोति। दृहेस्तु स्थूलबलयोरपि दृढमितीष्यते। दृहिर्बृहिरुद्धावितिद्वावेव धातू पठ्येते इति वार्तिककाराभिप्रायं केचिदाहुः। तथा च दृंहेरच्यनिटीति नलोपमुक्तवान्। भाष्यकारस्त्वेतद्वचनप्रत्याख्यानाद्धातु चतुष्टयमिच्छति। पारिदृढीति। इतो मनुष्यजातेरिति ङीष्॥ प्रभौ परि॥ परिवृढयेति। कथं पुनरत्र ल्यबादेशो यावता परिवृढमा

अनि डूचने हि रभावाप्रसिद्धिरलघुत्वात्। अनिड्वचने हि रभावस्याप्रसिद्धिः। द्रढीयान्। किं कारणम्। अलघुत्वात्। नलोपवचनं च। नलोपश्च वक्तव्यः। दृहं च परिवृढय्य गतः। ल्यपि लघुपूर्वस्येत्ययादेशो न स्यात्। दृहं च पारिदृढीकन्यादिति गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत॥ प्रभौ परिवृढः॥ परिवृढ इति किमर्थं निपात्यते। न परिपूर्वाद्बृहेः नेड्वशीत्येवो च्येत। परिवृढ निपातनं च। किम्। नकारहकारलोपार्थम्। परस्य च ढत्वार्थम्। अनिड्वचने हि रभावाप्रसिद्धिरलघुत्वात्। नलोपवचनं चेत्येव। परिवृढीयानिति। रऋतो हलादेर्लघोरिति रभावो न स्यात्। दृहं च परिवृढय्य गत इति ल्यपि लघुपूर्वस्येत्ययादेशो न स्यात्। दृहं च पारिवृढीकन्येति गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत॥ घुषिरविशब्दने॥ किमर्थमविशब्दन इत्युच्यते। न विशब्दने घुषेर्णिचा भवितव्यम्। एवं तर्हि सिद्धे सति यदविशब्दन इत्याह तज्ज्ञापयत्याचार्यो विशब्दने घुषेर्विभाषा णिज्भवतीति।

चष्ट इति णिचि कृते क्त्वाप्रत्यये च क्त्वान्तस्य कृदन्तत्वात्तत्रैव परे रन्तर्भावात्सुनः समासाभावः। नैष दोषः। संग्रामयतेरेव सोपसर्गात्स्वयो त्पत्तिनीत्यस्मादिति नियमात्परिशब्दं पृथक्कृत्वा वृढशब्दादेव णिच् क्रियते ततो वृढिशब्दस्य धातुत्वात् क्त्वाप्रत्यये कृते परेः क्त्वान्तेन कृदन्तेन समास इति सिद्धो ल्यबादेशः। णाविष्ठवद्भावाद्रभावः॥ घुषिरवि॥ किमर्थमिति। घुषिर विशब्दार्थ इति भूवादौ पठ्यते। स विशब्दनेनैव वर्तते। यस्तु घुषिर्विशब्दन इति चुरादौ पठ्यते तस्मात् णिचा भवितव्यम्। केवलश्चेह घुषिरुपात्त इति नार्थो विशब्दन प्रतिषेधेन। विशब्दनं स्वाभिप्रायस्य शब्देन प्रकाशनमुच्यते। एवं तर्हीति। अविशब्दन एवेड्भावे सिद्धे इत्यर्थः॥

CC-0. In Public Domain. Digitization by eGangotri

किमेतस्येति। किन्निशायामेवघुषितंघोषितमितिरूपद्वयसिद्धिःप्रयोजनमथान्यदपीतिप्रश्नः।जुघुषुरिति।घोषयांचक्रुरित्यपि
भवति।अन्येत्वनित्यण्यन्ताश्चुरादयइतिसामान्येनज्ञाप्यतइत्याहुः।केचित्त्वितितस्यामितिइदित्वंचुरादिणिचोनित्यत्वस्यज्ञापक
माहुः।इदित्वेननुम्विधानेप्रयोजनंचिन्तितइत्यादौनलोपाभावः।यदिचचुरादिणिच्नित्यःस्यात्तदाचिन्तस्तस्यामित्येवपठे
तणिचिसतिनलोपाप्रसङ्गात्॥णेर॥ किंपुनरिति।किमभिधेयत्वेनक्तान्तस्याध्ययनमाश्रीयतेअथधात्वर्थसाधनत्वेनेतिप्रश्नः।अ
ध्ययनेचेदिति।अध्ययनविषयेधात्वर्थइत्यर्थः।वृत्तोगुणइति।अध्ययनसामान्यंवृत्तशब्दस्याभिधेयंनतुतद्विशेषइतिविशेष
वाचिशब्दप्रयोगाविरोधः।गुणःपदक्रमसंहितारूपोऽध्ययनविशेषःवृत्तोनिष्पादितइत्यर्थः।वृत्तंगुणस्येति।भावेनिष्ठातस्याअ
ध्ययनंनाभिधेयमितिवृत्तशब्दप्रयोगाप्रसङ्गः।नसिध्यतीति।ण्यन्तस्येतिभावः।ण्यन्तस्यसकर्मकत्वाद्वृत्तंगुणस्येतिभावेनिष्ठायाअ
प्रसङ्गात्तयोरेवकृत्यक्तखलर्थाइत्यत्रभावेऽकर्मकेभ्यइत्यनुवर्तनात्॥वृतिरयमिति।केवलस्यसकर्मकत्वाशङ्कांनिराकृत्यण्यन्तस्यस

किमेतस्यज्ञापनेप्रयोजनम्।महीपालवचःश्रुत्वाजुघुषुःपुष्यमाणवाः।एषप्रयोगउपपन्नोभवति॥णेरध्ययनेवृत्तम्॥किं
पुनरिदमध्ययनाभिधायिकायांनिष्ठायांनिपातनंक्रियतेआहोस्विदध्ययनेचेद्वृत्तिर्वर्ततइति।किंचातः।यद्यध्यय
नाभिधायिकायांनिष्ठायांनिपातनंक्रियतेसिद्धंवृत्तोगुणःवृत्तंपारायणं।वृत्तंगुणस्य।वृत्तंपारायणस्येति।नसिध्यति।
अथविज्ञायतेअध्ययनेचेद्वृत्तिर्वर्ततइतिनदोषोभवति।यथानदोषस्तथास्तु।अध्ययनेचेद्वृत्तिर्वर्ततइत्यपिवैविज्ञा
यमानेननसिध्यति।किंकारणम्।वृतिरयमकर्मकः।अकर्मकाश्चापिण्यन्ताःसकर्मकाभवन्ति॥अकर्मकश्चात्रवृतिः।कथंपु
नर्ज्ञायतेअकर्मकोऽत्रवृतिरिति।अकर्मकाणांभावेक्तोभवतीत्येवमत्रभावेक्तोभवति ॥

कर्मकत्वंप्रतिपादयति।प्रयोज्यमन्तरेणणिचोऽभावात्तेनास्यसकर्मकत्वम्।तेनैतस्माद्भवतुसकर्मकत्वंकर्मण्येवात्रनिष्ठाभवत्वित्याह।अक
र्मकश्चात्रेति।वृत्तंगुणस्येत्यादावित्यर्थः।अकर्मकाणामिति।भावेक्तविधानादकर्मकत्वंप्रतीयतइत्यर्थः।कर्मणिक्तेवृत्तोगुणइतिसामाना
धिकरण्येनभाव्यंभावेतुक्तेशेषविवक्षायांषष्ठीभवति।तस्मान्नैतद्ण्यन्तस्यवृतेरूपमपितुकेवलस्यतस्यचयस्यविभाषेतीट्प्रतिषेधोऽस्ये
व।एवंचाध्ययनमभिधेयंभवतुविषयोवेतिनकश्चिद्दोषः।अत्राहुः।वृत्तंगुणस्येतिसकर्मकादपिण्यन्तान्नपुंसकेभावेक्तइतिभावेक्तोऽस्त्येव।
यस्तुनिष्ठेतिभूतेक्तःसएवाकर्मकेभ्योभावेभवतिवृत्तंगुणस्येत्यत्रचवर्तमानत्वंप्रतीयतेनभूतत्वम्।अत्रोच्यतेनपुंसकेभावेक्तइत्ययमपिक्तः
सकर्मकेभ्योनभवतितयोरेवकृत्यक्तखलर्थाइत्यत्रक्तमात्रग्रहणात्तत्रचभावेचाकर्मकेभ्यइत्यनुवर्तनादवश्यंचैतद्बोद्धव्यमन्यथानपुं
सकेभावउपसंख्यानमित्यस्मिन्क्षेपविज्ञानात्सिद्धमितिप्रत्याख्यातेसकर्मकाद्भावेक्तेविधीयमानेकर्मणोद्वितीयाप्रसज्येत।ग्रामंगत
मोदनंभुक्तमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथणिग्रहणमिति। केवलस्ययस्यविभाषेतिप्रतिषेधस्यसिद्धत्वात्सामर्थ्याद्ण्यन्तस्यनिपातनंविज्ञास्यते। दृत्तनिपातनइति। अ
सतिणिग्रहणेण्यन्तस्यैवेदंनिपातनंनतुसनन्तस्ययङन्तस्यवेतिनिश्चयाभावाद्विधिरशक्योऽभ्युपगन्तुमितिनियमोविज्ञायेत। णि
लोपार्थमिति। निष्ठायांसेटीतिवचनादनिटिनिष्ठायांणिलोपोनप्राप्नोति। णेरनिटीत्यनेनापितत्कृतौणिडन्यन्यायेनसेटिनिष्ठायांविधी
यमानेनणिलोपेनानिटिनिष्ठायांणिलोपस्यबाधनात्प्रत्ययलक्षणेनप्राप्तस्यगुणस्येटश्चाभावोनिपात्यते॥ वादान्त॥ उपधादीर्घत्व

तत्रउदितःक्त्विविभाषायस्यविभाषेतिइट्प्रतिषेधोभवति। अथणिग्रहणंकिमर्थम्। वृत्तनिपातनेणिग्रहणमण्य
न्तस्यावधारणप्रतिषेधार्थम्। वृत्तनिपातनेणिग्रहणंक्रियते। अण्यन्तस्यावधारणंमाभूदिति। कैमर्थक्यान्नियमोभ
वतिविधेयंनास्तीतिकृत्वा। इहचास्तिविधेयंण्यधिकाद्वृत्तेरिट्प्रतिषेधोविधेयः। तत्रापूर्वोविधिरस्तुनियमोस्त्विति
अपूर्वएवविधिर्भविष्यति। ननियमः। कुतोनुखल्वेतदधिकार्थआरम्भेसतिण्यधिकस्यभविष्यतिनपुनःसनधिक
स्यवास्याद्यङधिकस्यवेति। तस्माण्णिग्रहणंकर्तव्यम्। अथकिमर्थंनिपातनंक्रियते। निपातनंणिलोपेड्गुणप्रतिषे
धार्थम्। निपातनंक्रियतेणिलोपार्थमिड्गुणप्रतिषेधार्थंच॥ वादान्तशान्त॥ दान्तशान्तयोःकिंनिपात्यते। दान्तशान्तयोः
रुपधादीर्घत्वंच। किंच। णिलोपेट्प्रतिषेधौच। उपधादीर्घत्वमनिपात्यंवृद्ध्यासिद्धम्। नसिध्यति। मितांह्रस्वइतिह्रस्वत्वे
नभवितव्यम्। एवंतर्ह्यनुनासिकस्यक्विझलोःक्ङितीत्येवात्रदीर्घत्वंभविष्यति। नसिध्यति। किंकारणम्। णिचाव्यव
हितत्वात्। णिलोपेकृतेनास्तिव्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव। प्रतिषिध्यतेऽत्रस्थानिवद्भावोदीर्घविधिं
प्रतिनस्थानिवदिति। अथस्पष्टच्छन्नयोःकिंनिपात्यते। स्पष्टच्छन्नयोरुपधाह्रस्वत्वंच। किंच। णिलोपेट्प्रतिषे
धौच॥ रुष्यमत्वरसंघुषास्वनाम्॥ घुषिस्वनोर्वावचनमिट्प्रतिषेधाद्धिप्रतिषेधेन॥ घुषिस्वनोर्वावचनमिट्प्र
तिषेधाद्भवतिविप्रतिषेधेन। घुषेरिट्प्रतिषेधस्यावकाशः। असंपूर्वादविशब्दनम्। घुष्टारज्जुः। घुष्टोमार्गः। वावचन
स्यावकाशः। संपूर्वाद्विशब्दनम्। संघुष्टंवाक्यं। संघुषितंवाक्यम्। संपूर्वाद्विशब्दनेउभयंप्राप्नोति ॥

मिति। पूर्वत्रासिद्धेनस्थानिवदितिवक्तव्यम्। तस्मिंश्चोच्यमानेद्विर्वचना॰ दीनिवरेयलोपस्वरवर्जनवक्तव्यानीतिदीर्घविधौ
स्थानिवत्त्वनिषेधाभावादनुनासिकस्यक्विझलोःक्ङितीतिदीर्घत्वाप्रसङ्गः। सूत्रारम्भाश्रयेणतुदीर्घसिद्धिंभाष्यकृन्मन्यते ॥

CC-0. In Public Domain. Digitization by eGangotri

हृषेर्लोमसु॥ सूत्रकारो लोमशब्दं सामान्यशब्दं मत्वा केशग्रहणं न कृतवान्। तथा च लोमनखस्पृष्ठौ शौचं कर्तव्यमित्युक्ते केशस्पर्शेऽपि शौचं क्रियते। वार्तिककारस्तु मूर्ध्वजाः केशाः अङ्गान्तरेजातानि लोमानीति भेदं मत्वा आह। हृषेर्लोमके शकर्तृकस्येति। अपचितश्च॥ चिभावइति। एतच्चोपलक्षणमिट्प्रतिषेधस्यापि निपातनात्। क्तिनीति। क्तिन्नावादिभ्य इति क्तिन्प्रत्ययो यमन्यथा गुरोश्च हल

संघुष्टा रज्जुः। संघुषिता रज्जुः। वावचनं भवति विप्रतिषेधेन। स्वनइट्प्रतिषेधस्यावकाशः। अनाङ्पूर्वान्मनोऽभिधानम्। स्वान्तं मनः। वावचनस्यावकाशः। आङ्पूर्वादमनोऽभिधानम्। आस्वान्तो देवदत्तः आस्वनितो देवदत्तः। आङ्पूर्वान्मनोऽभिधान उभयं प्राप्नोति। आस्वान्तं मनः। आस्वनितं मनः। वावचनं भवति विप्रतिषेधेन॥ हृषेर्लोमसु॥ हृषेर्लोमकेशकर्तृकस्येति वक्तव्यम्। हृष्टानि लोमानि। हृषितानि लोमानि। हृष्टं लोमभिः। हृषितं लोमभिः। हृष्टाः केशाः। हृषिताः केशाः। हृष्टं केशैः। हृषितं केशैः। विस्मितप्रतिघातयोरिति वक्तव्यम्। हृष्टो देवदत्तः। हृषितो देवदत्तः। हृष्टा दन्ताः। हृषिता दन्ताः॥ अपचितश्च॥ अपचित इति किं निपात्यते। चायश्चिभावो निपात्यते। अपचितः। क्तिनि नित्यमिति वक्तव्यम्। अपचितिः॥ आर्धधातुकस्येड्वलादेः॥ आर्धधातुकग्रहणं किमर्थम्। वलादिग्रहणमार्धधातुकविशेषणं यथा विज्ञायेत। वलादेरार्धधातुकस्येति। अथाक्रियमाणे आर्धधातुकग्रहणे कस्य वलादिग्रहणं विशेषणं स्यात्। अङ्गस्येति वर्तते। अङ्गविशेषणम्। तत्र को दोषः। अङ्गस्य वलादेरादित इट् प्रसज्येत। अडाड्वत्। तद्यथा। अडाटावङ्गस्यादितो भवतस्तद्वत्। क्रियमाणेऽपि आर्धधातुकग्रहणेऽनिष्टः शक्यो विज्ञातुम्। वलादेरार्धधातुकस्याङ्गस्येति। अक्रियमाणे चेष्टमङ्गस्य यो वलादिरिति। किं चाङ्गस्य वलादि निमित्तम्। यस्मिन्नङ्गमित्येतद्भवति। कस्मिंश्चैतद्भवति। प्रत्यये। यावता क्रियमाणेऽपि चानिष्टं विज्ञायते अक्रियमाणे चेष्टं तत्राक्रियमाण एवेष्टं विज्ञास्यामः। इदं तर्हि प्रयोजनम्। इहमाभूत्। आस्ते। शेते। एतदपि नास्ति प्रयोजनम्। रुदादिभ्यः सार्वधातुक इत्येतन्नियमार्थं भविष्यति। रुदादिभ्य एव सार्वधातुक इड् भवति। नान्येभ्य इति। एवमपि रुक्षत्वं रुक्षता। अत्र प्राप्नोति। धातोरिति वर्तते। एवमपि लूभ्यां पूभ्यामत्र प्राप्नोति ।

इत्यकारः स्यात्॥ आर्धधातु॥ रुदादिभ्य एवेति। सार्वधातुक एवेति नियमो रुदविदेति क्त्वासनोः कित्त्वविधानान्न भविष्यत्यनिटः सेनो रुदेर्हलन्ताच्चेति कित्त्वस्य सिद्धत्वात् क्त्वोऽप्यनिट औपदेशिककित्त्वसद्भावात्। लूभ्यामिति। क्विबन्ता धातुत्वं न जहतिरूपार्थविवेकत्वात् ॥ रामः ८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहितविशेषणमिति। यद्यपि ऋतइद्धातोरित्यत्र धातुशब्दोऽर्थपदार्थकस्तथापि सदृशशब्दान्तरानुमानादिह धातोरित्येतत्स्वरूपपदा
र्थकमाश्रीयते। धातोरित्येवं विहितस्येति। पञ्चमीनिर्दिष्टेनेति। पञ्चम्यन्तानुकरणो धातोरिति। अस्मिन्धातोरित्येवं विहितस्येति लभ्यते। ना
न्यथा। अथेदानीमिति। धातुशब्दोऽत्र धातुशब्दस्यानुकरणं तेन धातुशब्दस्य यः संबन्धी प्रत्ययस्तस्येड् भवति। यश्च धातुशब्दव्यापारोत्पन्नः
स तत्संबन्धी भवति॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमाध्यायस्य द्वितीये पादे प्रथममाह्निकम्॥ स्नुक्रमोरना॥ स्नु
क्रमोः। रुदादित्वादिति। सिद्धे नियमार्थं वचनमनात्मनेपदनिमित्तत्वे एवेड् यथा स्यात्। आत्मनेपदनिमित्तत्वे मा भूत्। किति सनि च प्रस्नुतः प्र
सुस्नूषतीति क्रमेश्च निष्ठायां क्रान्त इति श्र्युकः किति सनि ग्रहगुहोश्चेत्यस्य विभाषेति प्रतिषेध एव भवति। पुरस्तात्प्रतिषेधस्य ह्येतदेव प्रयो
जनम्। इडमात्रस्य प्रतिषेधो यथा स्यादिति। तेन प्रतिषेधबाधनार्थमेतन्न भवति। अथवा आर्धधातुकस्येड्वलादेरित्यस्यानुवर्त्तनादय

एवं तर्हि विहितविशेषणं धातुग्रहणम्। धातोर्यो विहितः। न तु च धातोरेवायं विहितः। न चायं धातोरित्येवं विहितः।
कथं पुनर्धातुग्रहणं प्रकृतम्। ऋतइद्धातोरिति। तद्वै षष्ठीनिर्दिष्टं पञ्चमीनिर्दिष्टेन चेह विहितं शक्यते विशेषयितुम्। अ
थेदानीं षष्ठीनिर्दिष्टेनापि विहितं शक्यते विशेषयितुम्। शक्यमार्धधातुकग्रहणमकर्तुमिति॥ इति श्रीमद्भगवत्पत
ञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमाध्यायस्य द्वितीये पादे प्रथममाह्निकम्॥ स्नुक्रमोरनात्मनेपदनिमित्ते॥ स्नु
क्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसंख्यानम्। स्नुक्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसंख्यानं कर्तव्यम्। प्र
स्नविता। प्रस्नवितुम्। प्रस्नवितव्यम्। प्रक्रमिता। प्रक्रमितुम्। प्रक्रमितव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। अवि
शेषेण स्नुक्रमोरिडागममुक्त्वा आत्मनेपदपरे नेति वक्ष्यामि। आत्मनेपदपरप्रतिषेधे तत्स्वरपरसीयुडेकादेशे
षु प्रतिषेधः॥ आत्मनेपदपरप्रतिषेधे तत्स्वरपरसीयुडेकादेशेषु प्रतिषेधो वक्तव्यः ।

मर्थो भवति यत्र पूर्वेणेड् विहितस्तत्रैवानेन भवति। पूर्वसूत्रेण च प्रतिषेधविषयपरिहारेणेड्विधानात्तत्रैवायं विधिः प्रवर्तमानो निय
माय संपद्यते। अथवा आत्मनेपदनिमित्तत्वेन भवतीति प्रसज्यप्रतिषेध आश्रीयत इति किदादौ न दोषः। प्रस्नवितेति। य एवात्मनेपदवि
षयः स्नौतिः स एवात्रापि योग्यताश्रयणेन निमित्तव्यवहारदर्शनादात्मनेपदनिमित्तं भवतीति इण्न प्राप्नोतीति वचनम्। कर्मकर्तृविषय
श्चात्र स्नौतिरिति कर्मकर्तर्यात्मनेपददर्शनाद्भवति तद्योग्यः। एवं प्रस्नवितुं प्रस्नवितव्यमिति भावकर्मविषयत्वाद्भावकर्मणोरात्मनेपदोप
लम्भादात्मनेपदनिमित्तं स्नौतिः। प्रक्रमितेति। आदिकर्मणोऽन्यत्र प्रशब्दो विज्ञेयः। आदिकर्मणि तु कर्तरि चात्मनेपदविषयात् क्तेति प्रति
षेधेन भाव्यम्। प्रक्रमितुम् प्रक्रमितव्यमिति। भावकर्मविषयत्वात्सारम्भविषयत्वाद्वा आत्मनेपदनिमित्तत्वम् ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रस्नुस्नूषिष्यतइति। आत्मनेपदपरः स्यस्तस्य रः सन्निति स्येन व्यवधानात्तन्नइट्प्रतिषेधो न प्राप्नोति। ननु च व्यवहितेऽपि परशब्दस्य वर्तनात्प्रतिषेधो भविष्यति। नैतदस्ति। आत्मनेपदेषु परेष्विति न सूत्रन्यासः किं तर्ह्यर्थप्रदर्शनपरमेतत्। स्नुक्रमोरनात्मनेपदइति सूत्रन्यासः तत्र तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्व्यवहितस्य प्रतिषेधाप्रसङ्गः। ननु च सनि ग्रहगुहोश्चेति प्रतिषेधो भविष्यति। नह्ययमिड्विधिः पूर्वप्रतिषेधविषयइति प्रागेवोक्तम्। यद्यप्युक्तमविशेषेणेति। तस्यायमर्थः। पूर्वसूत्रेणयः स्नुक्रमोरविशेषेणोक्तस्तमनूद्यात्मनेपदपरे प्रतिषेधो विज्ञेयः। एवं तर्हि प्रचिक्रंसिष्यतइत्येतदेवात्रोदाहरणम्। स्नौतिस्तु साहचर्यादुदाहृतः। प्रस्नोषीष्टेति। आत्मनेपदमेवात्र सीयुडाद्यार्धधातुकं सीयुटस्तदुक्तत्वान्नलात्मनेपदपरमिति प्रतिषेधाप्रसङ्गः। प्रस्नोष्यन्तइति। अत्रान्तरङ्गत्वान्नित्यत्वाच्च पूर्वमेकादेशेन भाव्यमिट्प्रतिषेधस्तु बहिरङ्गोऽनित्यश्च। वार्णादाङ्गं बलीयइत्यनेन न लेकनिमित्ता प्रवृत्तिर्वार्णस्य प्रतिषिध्य

तत्वरपरे तावत्। प्रस्नुस्नूषिष्यते। प्रचिक्रंसिष्यते। सीयुटि। प्रस्नोषीष्ट। प्रक्रंसीष्ट। एकादेशे। प्रस्नोष्यन्ते। प्रक्रंस्यन्ते। एकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति। अन्तादिवद्भावेन व्यपवर्गः। उभयतआश्रयेनान्तादिवत्। एवं तर्ह्येकादेशः पूर्वविधिं प्रति स्थानिवद्भवतीति स्थानिवद्भावाद्व्यपवर्गः। तत्वरपरसीयुटोस्तर्हि प्रतिषेधो वक्तव्यः। सिद्धं तु स्नोरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात्। सिद्धमेतत्। कथम्। स्नोरात्मनेपदेन समानपदस्थस्य नेड्भवतीति वक्तव्यम्। यदि स्नोरात्मनेपदेन समानपदस्थस्य इड् न भवतीत्युच्यते प्रस्नवितेचावचरतिप्रस्नविन्तीय तेऽत्र न प्राप्नोति। बहिरङ्गत्वाच्च। बहिरङ्गलक्षणमत्रात्मनेपदम् ।

तेन तु भिन्ननिमित्तेति स्यादेवेडागमः। अतएवेड्विकर्तव्ये वार्णादाङ्गमित्यस्यानुपस्थानम्। एकादेशः पूर्वविधाविति। ननु चार्धधातुकस्येट्प्रतिषेधउच्यते। न चार्धधातुकमेकादेशात्पूर्वं व्यपवर्गाभावात्। अत्राहुः। पूर्वस्मादपि विधिः पूर्वविधिरिति समासाश्रयणाददोषः। प्रस्नविन्नीयतइति। तृजन्तात्क्यङ्। रीङ्ऋतइति रीङादेशः। बहिरङ्गलक्षणमिति। तृजन्तादाचारलक्षणे क्रियान्तरे क्यङ्। तत आत्मनेपदमिडागमस्तु पूर्वमेव तृजन्तावस्थायामुत्पन्नो न शक्यो निवर्तयितुमित्यर्थः। यद्येवं प्रचिक्रंसिष्यतइत्यत्राप्यात्मनेपदस्य बहिरङ्गत्वात्प्रतिषेधो न प्राप्नोति। नैष दोषः। समानपदस्थस्येति वचनादिडागमे न पदावस्थापेक्षणीया। तत्र तृचि विभक्तावुत्पन्नायां लब्धेऽपि पदत्वे आत्मनेपदस्यासन्निधानादिडागमः प्रवर्तते। प्रचिक्रंसिष्यतइत्यत्र तु पदावस्थायामेवात्मनेपदसंनिधानात्प्रतिषेधप्रवृत्तिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनेपदविषयादिति। तद्योग्यादित्यर्थः। प्रक्रन्तेति। प्रारम्भविषयत्वात् क्रमेः प्रोपाभ्यां समर्थाभ्यामित्यात्मनेपदविषयत्वम्। स्नु
क्रमी एवेति। आत्मनेपदनिमित्ते इति प्रथमाद्विवचनं न सप्तमी। सप्तम्यां हि भावादेरात्मनेपदनिमित्तस्याश्रयणात्प्रस्नवितव्यमि
त्यादावपि प्रतिषेधः स्यात्। कथं पुनरिति। वृत्यादिरर्थ आत्मनेपदस्य निमित्तं न धातुरिति भावः। धातुरेवेति। वृत्याद्यर्थविशिष्टः। भा
वकर्मवृत्तादिति। भवकर्मणी धातोरेव विषयभावेन विशेषणे इत्यर्थः। सत्यात्मनेपदे इति। तद्योग्यतामात्राश्रयमिह निमित्तत्वम्

क्रमेश्च॥ क्रमेश्चात्मनेपदेन समानपदस्थस्येड् न भवतीति वक्तव्यम्। अथ किमर्थं क्रमेः पृथग्ग्रहणं
क्रियते। न स्नुक्रमिभ्यामित्येवोच्येत। कर्तरि चात्मनेपदविषयात् कृतीति वक्ष्यति तत् क्रमेरेव यथा स्या
त्। स्नोर्मा भूत्। व्यतिप्रस्नविता। व्यतिप्रस्नवितारौ। व्यतिप्रस्नवितारः। कर्तरि चात्मनेपदविषयात् कृति प्र
तिषेधः। कर्तरि चात्मनेपदविषयात् कृति प्रतिषेधो वक्तव्यः। प्रक्रन्ता। उपक्रन्ता। तत्तर्हि इदं बहु वक्तव्य
म्। स्नोरात्मनेपदेन समानपदस्थस्येड् न भवतीति वक्तव्यम्। क्रमेश्चेति वक्तव्यम्। कर्तरि चात्मनेपदविष
यात्। कृतीति वक्तव्यम्। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं स्नुक्रमोरनात्मनेपदनिमित्ते चेत् कृ
त्युपसंख्यानमिति। नैष दोषः। स्नुक्रमी एवात्मनेपदनिमित्तत्वेन विशेषयिष्यामः। न चेत् स्नुक्रमी आत्मने
पदस्य निमित्ते इति। कथं पुनर्धातुर्नामात्मनेपदस्य निमित्तं स्यात्। धातुरेव निमित्तम्। आह हि भगवाननुदा
त्तङित आत्मनेपदम्। शेषात्कर्तरि परस्मैपदमिति। यत्र तर्हि धातुर्नाश्रीयते भावकर्मणोरिति। अत्रापि धा
तुरेवाश्रीयते। भावकर्मवृत्ताद्धातोरिति। कथं प्रक्रमितव्यम्। सत्यात्मनेपदे निमित्तशब्दो वर्तते। कथं प्रक्र
न्ता। उपक्रन्ता। तस्मादसत्यपि॥ कथं प्रक्रमितव्यम्। उपक्रमितव्यम्। तस्मात् सत्येव॥ कथं प्रक्रन्ता उपक्र
न्ता। वक्तव्यमेवैतत्। कर्तरि चात्मनेपदविषयात्कृतीति ॥

श्रीयते किं तु कार्यं कुर्वतः॥ यद्येवमर्थेऽपि निमित्तत्वेनाश्रीयमाणे दोषाभावात्कस्मात्स्नुक्रमी एवेत्युक्तम्। उच्यते। अर्थे निमित्तत्वेना
श्रीयमाणेऽनुपसर्गाद्वेत्यात्मनेपदमर्थनिरपेक्षत्वादसंगृहीतं स्यादिति धातुरेव निमित्तत्वेनाश्रितः॥ यदि सति कार्ये निमित्तमा
श्रीयते तदा निमित्तग्रहणं न कर्तव्यमनात्मनेपद इति सत्सप्तम्याश्रयणात्। नैतदस्ति। तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषा
यां सत्यां सत्सप्तम्याश्रयणस्याशक्यत्वात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाकृतीतिवर्तत इति। तच्च कृद्ग्रहणं वाक्यभेदेन कर्मिणैव संबध्यते नस्नोतिना। अनात्मनेपदनिमित्त इति च प्रसज्य प्रतिषेधस्तेनायमर्थो यदात्मनेपदयोग्यः कर्मिस्तदा ततः परस्य कृत इड् न भवति॥ ग्रहोलि॥ इड्ग्रहणमिति। आदेशस्य स्थानिनिर्देशार्थमिड्ग्रहणं कर्तव्यम्। एवमपीति। सत्येव प्रथमान्त इड्ग्रहणे षष्ठ्यन्तमन्यत्कर्तव्यमित्यर्थः। अक्रियमाणे हीति। प्रथमान्तमिड्ग्रहणमयोग्यत्वान्न संबध्यते अच्यरिभाषोपस्थानाच्चाजन्तस्य ग्रहेः परस्य दीर्घप्रसङ्गः। असंप्रत्यय इति। ग्रहेः परस्य इटो दीर्घ इत्ययमिष्टः संप्रत्ययो न स्यात्। क्रियमाण इति। प्राकरणिकमिटमनपेक्ष्येट इत्युच्यमाने सर्वस्येटो विशेषाभावाद्दीर्घप्रसङ्गा चिण्वदिटो दीर्घः प्रतिषेध्यः। जरीगृहितेति। जरीगृह्य शब्दात्तृच इट्। अल्लोपयलोपयोः कृतयोर्ह्रस्वः प्रयोगे द्विर्वचने

अथवाकृतीतिवर्तते॥ ग्रहोऽलिटि दीर्घः॥ ग्रहेर्दीर्घत्वे इड्ग्रहणम्। ग्रहेर्दीर्घत्वे इड्ग्रहणं कर्तव्यम्। इटो दीर्घ इति वक्तव्यम्। न वक्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। आर्धधातुकस्येड्वलादेरिति। एवमपि कर्तव्यमेव। अकरणे ह्यसंप्रत्ययः षष्ठ्यभावात्। अक्रियमाणे हि इड्ग्रहणे असंप्रत्ययः स्यात्। किं कारणम्। षष्ठ्यभावात्। षष्ठीनिर्दिष्टस्य आदेशा उच्यन्ते। न चात्र षष्ठीं पश्यामः। क्रियमाणे चापीड्ग्रहणे चिण्वदिटः प्रतिषेधो वक्तव्यः। ग्राहिष्यते। यङ्लोपे च प्रतिषेधो वक्तव्यः। जरीगृहिता जरीगृहितुम्। जरीगृहितव्यम्। यदि पुनरिड्दीर्घमागमान्तरं विज्ञायेत। इड्दीर्घ इति चेद्विप्रतिषिद्धम्। इड्दीर्घ इति चेद्विप्रतिषिद्धं भवति। यदि इण्न दीर्घः। अथ दीर्घो नेट्। इड्दीर्घश्चेति विप्रतिषिद्धम्। प्रतिषिद्धस्य पुनर्विधाने दीर्घत्वस्याभावः। प्रतिषिद्धस्य पुनर्विधाने दीर्घत्वस्याभावः। वुवूर्षते। विवरिषते ॥

स एव ग्रहिरिति इटो दीर्घप्रसङ्गः। दीर्घविधौ स्थानिवत्त्वनिषेधादकारेण व्यवधानाभावः। यदि पुनरिति। इडिति वर्तते दीर्घ इति च निर्दिश्यते तत्र दीर्घ इड् भवतीति सामर्थ्याद्व्यक्तिपरित्यागेनेकारजातिराश्रीयते दीर्घग्रहणाच्च दीर्घव्यक्तिसमवेता सा विधीयते। टकारो देशविध्यर्थ इति सामर्थ्याद्दीडागमविधिः। एवं च षष्ठीनिर्दिष्टमिड्ग्रहणं न कर्तव्यम्। चिण्वदिट् चास्यापवाद इति तत्र दोषाभावः। न च कस्य चित्स्थानिनो दीर्घत्वं विधीयत इति स्थानिवत्त्वनिषेधात्पूर्वस्मादपि विधौ स्थानिवत्त्वादकारेण व्यवधानाच्च यङ्लोपे दोषप्रसङ्गः। अथत्वागमान्तरेऽपि दीर्घत्वमस्तीत्येवायं दीर्घविधिस्तदा यङ्लोपे दोषो न परिहृतः। इतरो व्यक्तिपदार्थाश्रयेणाह। इड्दीर्घ इति चेदिति ॥ राम॰ ८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवरीषतइति। सनीटि प्राप्ते वृतोवेत्यनेनपक्षेईटि च प्रसक्ते सनिग्रहगुहोश्चेत्यनेनोभयस्मिन्नपिप्रतिषिद्धे इट् सनि वेतिपक्ष
इट् विधीयते ततः पुनरीटो विधानाभावाद्दीर्घईकारः पक्षे न श्रूयेत। इटस्तु पक्षे दीर्घविधौ दोषाभावः। अत्रापीति। इट् सनिवेत्यत्र
दीर्घ इति वृत इति चानुवर्तत इति सिद्धं नैरूप्यम्। विदेशस्थमिति। दीर्घग्रहणानुवृत्तेरत्रासंभवः। जरीलेति। उदात्तत्वादिट्प्रा
प्तौ वृतोवेत्यनेन पक्षे ईड्‌ श्युकः किती ति प्रतिषिद्धः। इकारजात्याश्रयणादीटोऽपि प्रतिषेधः प्रवर्तते। ततो जॄव्रश्च्योः क्त्वी त्यनेनेटि
विधीयमाने पक्षे दीर्घो न स्यात्। एतत्परिहरति। ईटो विधिरिटः प्रतिषेध इति। वृतो वेत्यनेन पक्षे ईडागमो विधीयते श्युकः कितीत्य
नेन तु नेडित्यधिकाराद्व्यक्तिपक्षाश्रयणाच्च निषेध इटो न त्वीटः। पाठान्तरं तु प्रकृतेऽर्थे दुर्योजत्वादस्माभिर्नोपन्यस्तम्। सन्मार्गस्थ

विवरीषते। अत्रापीड् दीर्घ इत्यनुवर्तिष्यते। यत्तर्हि विदेशस्थं प्रतिषिध्य पुनर्विधानं तन्न सिध्यति। जॄव्रश्च्योः
क्त्वि श्युकः कितीत्यनेन प्रतिषिद्धे दीर्घत्वं न प्राप्नोति। जरीत्वा। ईटो विधिरिटः प्रतिषेधो यथा प्राप्तमिड् दीर्घो भविष्य
ति। यदि तर्हि टोग्रहणे ईटो ग्रहणं न भवति। जरीत्वा। न क्त्वा सेडिति कित्त्वप्रतिषेधो न प्राप्नोति। इह चाग्रहीदिति इ
ट ईटीति सिज्लोपो न प्राप्नोति। इह चाग्रहीत्। नेटीति वृद्धिप्रतिषेधो न प्राप्नोति। माभूदेवं ह्म्यन्तानामित्येवं भविष्यति।
अत्रापि नेटीत्येवानुवर्तते। तच्चावश्यमिड्ग्रहणमनुवर्त्यम धासीदित्येवमर्थम्। तथाऽग्रहीध्वमग्रहीढ्वं विभाषे
ट इति मूर्धन्यो न प्राप्नोति। तस्मान्नैतच्छक्यं वक्तुमिटोग्रहणे ईटो ग्रहणं न भवतीति। भवति चेत्प्रतिषिद्धस्य पुन
र्विधाने दीर्घाभाव इत्येव। तस्मादशक्य इड् दीर्घ आगमान्तरं विज्ञातुम्। न चेद्विज्ञायत इटो ग्रहणं कर्तव्यम्। न क
र्तव्यम्। आर्धधातुकस्येति वर्तते। ग्रहः परस्यार्धधातुकस्य दीर्घत्वं वक्ष्यामि। इहापि तर्हि प्राप्नोति। ग्रहणम्। ग्रह
णीयम्। वलादेरिति वर्तते। एवमपि ग्रहीता ग्रहीतुमत्र न प्राप्नोति। भूतपूर्वगत्या भविष्यति ॥

वेको हि विमार्गे मतिमान्भजेत्। यदि तर्हीति। इट्प्रतिषेध ईटो यथा न भवत्येवं कार्यान्तरस्याप्यप्रसङ्गः। तस्मान्नैतदिति। इड्ग्रहणे इ
काराकृतिराश्रयणीया न तु व्यक्तिः। भवति चेदिति। जॄव्रश्च्योः क्त्वीति द्विधो दोष एवेत्यर्थः। नन्वनुवाद इव विधावपि इकाराकृत्याश्र
यणाज्जरित्वा जरीत्वेति रूपद्वयं भविष्यति। नैतदस्ति। विधौ जात्याश्रयेऽत्र वितेत्यादावपि दीर्घः स्यात्। तस्माद्धि हि तस्य दीर्घस्येड्ग्र
हणेन ग्रहणं न तु विधेयस्य। ग्रह इति। इडागमे कृते तदादेरार्धधातुकस्यादेः परस्येतीट एव दीर्घः। वलादेरिति। वलादि यद्दृष्टमित्याश्री
यते। इतरः सांप्रतिकं वलादित्वमाश्रितमिति मत्वाह। एवमपीति। भूतपूर्वगत्येति। सांप्रतिकाभावादलिटीति निषेधाच्च ॥

CC-0. In Public Domain. Digitization by eGangotri

इट् प्रतिघातेनेति। येननाप्राप्तिन्यायेनेदं बाधित्वाऽन्तरङ्गत्वाद्दीर्घत्वं प्राप्नोति। अन्तरङ्गस्यैवार्धधातुकस्य दीर्घत्वमन्यपरिभाषोपस्थानाद्यत्र तत्रास्थितस्या चः स्यात्। नचेति। जॄवृश्च्योः क्त्वीत्यनेन तु वलादिलक्षण एवेट् प्रतिप्रसूयत इति अप्राकरणिकत्वाभावाद्दीर्घः सिध्यति। यङ्लोपे चेति। सन्यङन्तस्य स्थाने द्विर्वचनमित्यत्र पक्षे प्रकृतिप्रत्ययसम्मोहान्नष्टः सग्रहिः। ननु चद्विः प्रयोगो द्विर्वचनमिति पक्षस्त त्रास्थितस्तत्कथमस्थितपक्षाश्रयेण परिहारः। अत्राहुः। यङ्लोपे चोक्तमित्य ― त्राप्ययमभिप्रायो वार्तिककारस्य द्विः प्रयोगो द्वि र्वचने पूर्वस्मादपि विधावल्लोपस्य स्थानिवत्त्वादकारेण व्यवधानाद्दीर्घाभावः। न पदान्तेत्यत्र पूर्वत्रासिद्धे न स्थानिवदिति व क्तव्यम्। तस्मिन्नुच्यमाने पदान्तवरेयलोपस्वरवर्ज्जं द्विर्वचनादीनि न वक्तव्यानीति साप्तमिके दीर्घविधौ स्थानिवत्त्वं भवत्ये

एवमपि ग्राहकः। अत्र प्राप्नोति। किं च। इट् प्रतिघातेन खल्वपि दीर्घत्वमुच्यमानमिदं बाधेत। तस्मादिटो ग्रहणं क र्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्॥ आर्धधातुकस्येड्वलादेरिति। ननु चोक्तमेवमपि कर्तव्यम् ग हणे ह्यसंप्रत्ययः षष्ठ्यनिर्देशादिति। नैष दोषः। ग्रहइत्येषा पञ्चमी इडिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति। त स्मादित्युत्तरस्येति। एवं च कृत्वा सोऽप्यदोषो भवति। यदुक्तं चिण्वदिटः प्रतिषेध इति। कथम्। प्रकृतस्येट इदं दीर्घत्वम्। न च चिण्वदिट् प्रकृतः। यङ्लोपे कथम्। यङ्लोपे चोक्तमिटि सर्वत्र। क्व सर्वत्र। यद्येवं प्रकृतस्येटो दीर्घ त्वमथापीड्दीर्घ आगमान्तरं विज्ञायते। यङ्लोपे चोक्तम्। किमुक्तम्। तदन्तद्विर्वचनादिति॥ स्वरतिसूतिसूयति धूञूदितो वा॥ अथ वेति वर्तमाने पुनर्वावचनं किमर्थम्। पुनर्वावचनं लिङ्सिचोर्निवृत्त्यर्थम्। पुनर्वावचनं क्रियते। लिङ्सिचोर्निवृत्त्यर्थम्। अथ किमर्थं सूतिसूयत्योः पृथग्ग्रहणं क्रियते। सुवतेर्माभूत् ॥

वा सूत्रकारमतेऽपि ग्रहेर्विहितस्येत्येवं विहितविशेषणाश्रयणाद्यङ्लोपे दीर्घाभावासिद्धिः। भाष्यकारेण त्वस्थितमपि पक्षमाश्रि त्य तदन्तद्विर्वचनादिति विवृतम्। अन्यत्राप्यस्य दोषस्य सम्यक्परिहाराभिधानादनादरात्॥ स्वर॥ अथ वेति। इट् सनि वेत्यतः। लिङ्सिचोर्निवृत्त्यर्थमिति। ननु स्वरतिग्रहणाल्लिङ्सिचोरनुवृत्तिर्न भविष्यति ऋतश्च संयोगादेरितीड्विकल्पस्य सिद्धत्वात्। नैतदस्ति। नित्यार्थस्वरतिग्रहणमित्यज्ञापकं लिङ्सिन्निवृत्तेः। अथ किमर्थमिति। सूग्रहणमेव क्रियतामिति भावः। सुवते रिति। अननुबन्धकग्रहणे न सानुबन्धकस्येति सुवतेरेव ग्रहणं स्यात्। सूङ्ग्रहणे तु क्रियमाणे लुग्विकरणालुग्विकरणयोरलु ग्विकरणस्यैव ग्रहणमिति सूयतेरेव ग्रहणं स्यात्। अस्याश्च परिभाषायाः सूङ्ग्रहणे कर्तव्ये सूतिसूयतीति भेदेनोपादानमेव ज्ञापकम्। रामः ८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धूञइति। धूञः कस्मान्न इति स्वादिषु क्र्यादिषु च पठ्यत इति द्वयोरपि सामान्येन ग्रहणम्। धूविधूनन इत्यस्मात्तु नित्यमिड् भव
ति। किं पुनरिति। स्वरत्युद्देशे नायं विचारोऽन्येषां तूदात्तत्वात्प्राप्तविभाषाया निश्चयाद्दोषाभावाच्च। स्वरतेस्तूदात्तानुदात्तप्रतिज्ञा
ने दोषदर्शनाद्विचारः। ऋतां च वृङ्वृञाविति परिगणनादस्योदात्तत्वं न प्रतिज्ञातम्। तत्र किमुदात्तत्वप्रतिज्ञाने दोषः परिह्रिय
ते अथानुदात्तत्वप्रतिज्ञाने न्यायेनेति प्रश्नः। यदि स्वरतिरुदात्त इति। ननु किति प्रत्यये श्र्युकः कितीति प्रतिषेधाच्चाप्राप्तविभा
षेयं स्यात्। नैतदस्ति। अल्पविषयत्वप्रसङ्गात्स्वरतेः प्राप्तविभाषायां तु महाविषयत्वं भवति। किमर्थमिति। यदि पक्षे इण्निवृत्त्य
र्थं तदा ऋद्धनोः स्ये इतीममपीटं पक्षे निवर्तयेदिति प्रश्नः। निवृत्त्यर्थमिति। निवृत्तिः किंचिदेव विधिं बाधते न सर्वमिति भावः। सवि

अथ किमर्थं धूञः सानुबन्धकस्य ग्रहणं क्रियते। धुवतेर्मा भूदिति। किं पुनरियं प्राप्ते विभाषा आहोस्विदप्राप्ते।
कथं च प्राप्ते कथं चाप्राप्ते। यदि स्वरतिरुदात्तस्ततः प्राप्ते। अथानुदात्तस्ततोऽप्राप्ते। स्वरतिरुदात्तः पठ्यते। किम
र्थं तर्हि वा वचनम्। वावचनं निवृत्त्यर्थम्। वावचनं क्रियते। निवृत्त्यर्थम्। अनुदात्ते हि किति वा प्रसङ्गः। प्रतिषि
ध्य पुनर्विधानात्। अनुदात्ते हि सति किति विभाषा प्रसज्येत। स्वृत्वा। किं कारणम्। प्रतिषिध्य पुनर्विधानात्। प्र
तिषिध्य किलायं पुनर्विधीयते। स यथैवैकाज्लक्षणं बाधत एवं श्र्युकः कितीत्येतमपि बाधेत। यदि तर्ह्युदात्तः
। पठिष्यति विप्रतिषेधं स्वरतेर्वेट्त्वादृद्धनोः स्ये विप्रतिषेधेनेति तन्नोपपद्यते। किं कारणम्। सविधिरयं प्रतिषे
धः। विधिप्रतिषेधयोश्चायुक्तो विप्रतिषेधः। सोऽपि विधिर्न मृदूनामिव कार्पासानां कृतः प्रतिषेधविषय आरभ्य
ते। स यथैवैकाज्लक्षणं प्रतिषेधं बाधत एवमिममपि बाधिष्यते॥

धिरिति। ऋद्धनोः स्य इत्येषः। अयं प्रतिषेध इति। प्राप्तविभाषापक्षे यथा वलादिलक्षण इट् प्रतिषिध्यते तथा स्यलक्षणोऽपि प्र
तिषिध्येत। अनुदात्तप्रतिज्ञाने तु द्वयोरपि विधित्वाद्विप्रतिषेधोपपत्तिः। सोऽपीति। वैधर्म्येण दृष्टान्तो यथा मृदुकार्पासकृतो रज्ज्वा
दिर्दुर्बलो नैवं ऋद्धनोः स्य इत्ययं विधिः। स यथैवेति। करिष्यतीत्यादौ। एवमिममपीति। न च स्वरतेरुदात्तत्वे येन नाप्राप्तिन्यायोऽ
स्ति येनैकाज्लक्षणमेव प्रतिषेधं बाधेत न स्वरतिलक्षणम्। यद्येवं विप्रतिषेधानुपपत्तिः स्यलक्षणस्य विधेरपवादत्वात्। अन्य
थापीट्स्य सिद्धत्वाद्द्मोपपादि विप्रतिषेधः। अथवा सविधिरयं प्रतिषेध इति विधेर्दुर्बलत्वं यदुक्तं तदनेन निराकृतम्। तत्र द्व
योस्तुल्यबलत्वादुपपद्यते विप्रतिषेधः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कौ॰ अथवेति। परिभाषाश्रयणादुत्सर्गापवादभावेऽपनीते द्वयोर्विप्रतिषेधोपपत्तौ परत्वेनाव्यवस्था। उदात्तत्वे दोषं प्रतिविधायाऽनु १२२
६५ दात्तत्वे प्रतिविधत्ते। अथवेति। न चाप्राप्ते एकाज्लक्षण इति। अयमेव पाठो युक्तः। केचित्तु वलादिलक्षण इति पठन्ति। वलादि
मात्रविषयत्वाद्वलादिलक्षणमिति व्याचक्षते। श्र्युकः किति। त्येतस्मिन्निति। तत्र स्वत्वे त्वत्रोभयप्रसङ्गे पूर्वविप्रतिषेधो भवतीति
वक्तव्यम्। येऽभ्यस्तानुदात्ते इत्यदूति। प्रतिषेधकाण्डस्य पुरस्तात्करणस्य संवेदू प्रतिषेधार्थत्वात्। यदयमिति। यद्युगलक्षणं प्रति
षेधमयं विकल्पो बाधेत ततः सनि ग्रहगुहोश्चेत्यस्य प्रतिषेधस्याभावादनेनैव सनि विकल्पस्य सिद्धत्वात्पुनस्तन्न विदध्यात्। इ

अथवा येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते वलादिलक्षणे इयं विभाषा आरभ्यते स्य लक्षणे पुनः प्राप्ते चाप्राप्ते
च। अथवा मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते इत्येवमियं विभाषा वलादिलक्षणमिटं बाधिष्यते स्य लक्षणं न बाधि
ष्यते। अथवा पुनरस्त्वनुदात्तः। ननु चोक्तमनुदात्ते हि कितिवा प्रसङ्गः प्रतिषिध्य पुनर्विधानादिति। नैष दोषः। येन
नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते एकाज्लक्षणे प्रतिषेधे इयं विभाषा आरभ्यते। श्र्युकः किति त्येतस्मिन्पुनः प्रा
प्ते चाप्राप्ते च। अथवा श्र्युकः किति त्येष योग उदात्तार्थश्च येऽभ्यस्तानुदात्ते इत्यदूप्राप्यते तद्बाधनार्थश्च। अथवा श्र्युकः
कितीतीहानुवर्तिष्यते। अथवा आचार्यप्रवृत्तिर्ज्ञापयति। नेयं विभाषा उगलक्षणस्य प्रतिषेधस्य विषये भवतीति।
यदयं सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनामिति स्वृग्रहणं करोति॥ इण्निष्ठायाम्। इडिति वर्तमाने पुन
रिड्ग्रहणं किमर्थम्। नित्यार्थोऽयमारम्भः। नैतदस्ति प्रयोजनम्। सिद्धात्र विभाषापूर्वेणैव। तत्रारम्भसामर्थ्यान्नित्यो
विधिर्भविष्यति। नात्र पूर्वेण विभाषा प्राप्नोति। किं कारणम्। यस्य विभाषेति प्रतिषेधात्। तत्रारम्भसामर्थ्याद्विभाषाल
भ्येत पुनरिड्ग्रहणादिडेवेति॥ तीषसहलुभरुषरिषः॥ इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः। इषेस्तकारे श्यन्प्र
त्ययात्प्रतिषेधो वक्तव्यः। इह माभूत्। प्रेषिता। प्रेषितुम्। प्रेषितव्यम्॥ वसतिक्षुधोरिट्। इडिति वर्तमाने पुनरिड्ग्र
हणं किमर्थम्। पुनरिड्ग्रहणं नित्यार्थम्। इडिति वर्तमाने पुनरिड्ग्रहणं क्रियते नित्यार्थम्। नित्यार्थोऽयमारम्भः॥

षिन। सिद्धेति। निरङ्कुशत्वमनेन॥ तीषा। इषुइच्छायामिति केचित्तौदादिकमुदितमधीयते। अन्ये तूदित्त्वस्य प्रयोजनमपश्यन्त इषइच्छायामिति
पठन्ति। ये त्विहतीषुसहेति पठन्ति तन्मते नेह विशेषणार्थमुकारस्तत्र वार्तिककारमते नत्रयोऽपीषयोऽननुबन्धकादिहचतीषसहेति पाठस्तदाह। इ
षेरिति। इषआभीक्ष्ण्य इत्यस्य क्रैय्यादिकस्य तु विकल्पमिच्छति वार्तिककारः। तौदादिकस्य तु उदित्त्वेऽभ्युपगम्यमाने तीषसहेति पाठेऽननुबन्ध रामः
कपरिभाषया क्रैयादिकस्यैव ग्रहणं स्यात्। इह माभूदिति। विकल्पः। तेन इषगता वित्यस्मान्तकारादौ नित्यमिड्भवति॥ ६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गमेः॥सिद्धंत्विति॥इहतुजिगमिषितेवाचरतिजिगमिषिरिति क्रीयतइतिबहिरङ्गत्वादात्मनेपदस्यप्रतिषेधाभावः।केचित्तुयोगविभा
गेनेष्टसिद्धिमाहुः।गमेः।सकारादाविड्भवतीत्येकोयोगः।ततः परस्मैपदेष्विति. द्वितीयोयोगोनियमार्थः।तुल्यजातीयापेक्षत्वाच्चनि
यमस्यात्मनेपदविषयएवेणिनवर्त्यतइतिकृतिपरस्मैपदलुकि चेड्भवत्येव।जिगमिषितुम्।जिगमिषितव्यम्।जिगमिषत्वमिति।

गमेरिट्परस्मैपदेषु।गमेरिट्परस्मैपदेषुचेत्कृत्युपसंख्यानम्॥गमेरिट्परस्मैपदेषुचेत्कृत्युपसंख्यानं
कर्तव्यम्।जिगमिषिता।जिगमिषितुम्।जिगमिषितव्यम्।तत्तर्ह्युपसंख्यानंकर्तव्यम्।नकर्तव्यम्।अविशेषेण
गमेरिडागममुक्त्वाआत्मनेपदपरेनेतिवक्ष्यामि।आत्मनेपदपरप्रतिषेधेउक्तम्।किमुक्तम्।आत्मनेपदपरप्र
तिषेधेतत्परपरसीयुडेकादेशेषुप्रतिषेधइति।इहाप्यात्मनेपदपरप्रतिषेधेतत्परपरसीयुडेकादेशेषुप्रतिषे
धोवक्तव्यः।तत्परपरेतावत्।संजिगंसिष्यते।सीयुटि।संगंसीष्ट।एकादेशे।संगंस्यन्ते।एकादेशेकृतेव्यपवर्गाभावा
न्नप्राप्नोति।सिद्धंतुगमेरात्मनेपदेनसमानपदस्थस्येट्प्रतिषेधात्।सिद्धमेतत्।कथम्।गमेरात्मनेपदेनसमान
पदस्थस्यइट्नभवतीतिवक्तव्यम्॥नवृद्भ्यश्चतुर्भ्यः॥वृतादिप्रतिषेधेच।किम्।कृत्युपसंख्यानंकर्तव्यम्।विव
र्त्तिता।विवृत्सितुम्।विवृत्सितव्यम्।तत्तर्ह्युपसंख्यानंकर्तव्यम्।नकर्तव्यम्।अविशेषेणवृतादिभ्यइट्प्रतिषेधमु
क्त्वाआत्मनेपदपरइड्भवतीतिवक्ष्यामि।आत्मनेपदपरवचनेतत्परपरसीयुडेकादेशेषुइड्वचनम्।आत्मनेपदप
रइड्वचनेतत्परपरसीयुडेकादेशेष्विड्वक्तव्यः।तत्परपरेतावत्।विवर्तिषिष्यते।सीयुटि।वर्तिषीष्ट।एकादेशे।वर्तिष्य
न्ते।वर्धिष्यन्ते।सिद्धंतुवृतादीनामात्मनेपदेनसमानपदस्थस्येड्वचनात्।सिद्धमेतत्।कथम्।वृतादीनामात्मनेप
देनसमानपदस्थस्येड्भवतीतिवक्तव्यम्।चतुस्तासिक्लृपिग्रहणानर्थकंच।चतुर्ग्रहणंचानर्थकम्।सर्वेभ्योवृताद
भ्यःप्रतिषेधइष्यते।तासिग्रहणंचानर्थकम्।किंकारणम्।निवृत्तत्वात्सकारस्य।निवृत्तंसकारादाविति।तासग्रहणेचेदानी
मक्रियमाणेक्लृपिग्रहणेनापिनार्थः।एषोऽपिहिवृतादिःपञ्चमः।भवेत्क्लृपिग्रहणंनकर्तव्यम्।तासग्रहणंतुकर्तव्यम् ॥

नवृद्भ्यः॥सिद्धंत्विति।तेनपरस्मैपदलुक्यपिप्रतिषेधोभवति।विवर्त्सत्वमिति।अन्यथानलुमताङ्गस्येतिप्रत्ययलक्षणप्रतिषेधःस्या
त्।विवृत्सिक्रीयतइत्यत्रतुपूर्ववदात्मनेपदस्यबहिरङ्गत्वादिडभावः।चतुर्ग्रहणंचेति।कृपूसामर्थ्यादित्यस्यानन्तरंवक्तरणंपठ्य
तेतत्रत्युतादीनांवृतादीनांचसमासार्थंभविष्यति।एकस्यानेकप्रयोजनाविरोधात्।सर्वेभ्यइति।संकल्प्स्यतीत्यादौरूपेऽप्यपीत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 भवेत्तासिग्रहणमिति। क्लृपिग्रहणाकरणपरमेतन्न तु तासिग्रहणाकरणपरम्। तथा चास्यापि प्रत्याख्यानं करिष्यते। परस्मैपदेष्विति व
र्तत इति। वृतादीनामनुदात्तेत्वात्सनो विहाय क्लृपेस्तासिं चार्धधातुकं वलादि परस्मैपदपरं नास्ति। एतच्च यथान्यासाश्रयेणोच्यते।
यदा त्वात्मनेपदेन समानपदस्य सेड्भवतीत्युच्यते तदा परस्मैपदेष्विति नानुवर्त्यमिति। सइत्येतद्वर्ष्य नुवर्त्यं तस्मिन्ननुवर्तमाने
तासि चेत्यपि कर्तव्यम्। क्लृपदत्येतत्तु न कर्तव्यं क्लृपेरन्येभ्यो वृतादिभ्यस्तासेरात्मनेपदपरत्वादिटो भावात्॥ उपदे॥ तासाविति। तासावि
ड्भावे सत्यत्वतस्थलि प्रतिषेधे विधीयमान इत्यर्थः। सिद्धं त्विति। उपदेशग्रहणेन द्वयं संबध्यते उपदेशे योऽत्वान् हलादिश्चेति। न च घ

यडित तत्सकारादाविति न तच्छक्यं निवर्तयितुम्। तद्ध्यपि हि प्रसज्येत। वर्तितावर्धिता। तासेग्रहणे चेदानीं क्रिय
माणे क्लृपिग्रहणमपि कर्तव्यम्। अन्येभ्योपि वृतादिभ्यस्तासौ माभूदिति। भवेत्तासिग्रहणं कर्तव्यम्। क्लृपिग्रहणं तु
नैव कर्तव्यम्। अन्येभ्योपि वृतादिभ्यः तासौ कस्मान्न भवति। परस्मैपदेष्विति वर्तते। क्लृपेरेव च तासू परस्मैपदपरः
नान्येभ्यो वृतादिभ्यः। यद्येवं तासेर्ग्रहणेनापि नार्थः। वृचि कस्मान्न भवति। परस्मैपदेष्विति वर्तते॥ उपदेशेऽत्वतः॥
तासावत्वत प्रतिषेधे घसेः प्रतिषेधप्रसङ्गोऽकारवत्त्वात्। तासावत्वतप्रतिषेधे घसेः प्रतिषेधः प्राप्नोति। जघसिथ।
किं कारणम्। अकारवत्त्वात्। सोऽपि ह्यकारवान्। सिद्धं तु हलादिग्रहणात्। सिद्धमेतत्। कथम्। हलादिग्रहणं कर्त
व्यम्। तच्चावश्यं कर्तव्यम्। अद्यशी प्रयोजयतः। अद्यशीतावन्न प्रयोजयतः। किं कारणम्। तासावनिडित्युच्यते। से
टौ चेमौ तासौ। अज्ज्वभूतर्हि प्रयोजयतः। अज्ज्वभूवापि न प्रयोजयतः। तासौ नित्यानिट् इत्युच्यते। विभाषितेटा वे
तौ। आदिस्तर्हि प्रयोजयति। आदिथ। क्रियमाणेपि वै हलादिग्रहणे अत्र प्राप्नोति। जघसिथ। एषोपि हलादिस्तस्य चाभा
वात्तासौ। तासावनिट् इत्युच्यते। न च घसिस्तासावस्ति। ननु च यस्तासौ नास्ति। अनिडप्यसौ तासौ भवति। नैवं विज्ञाय
ते यस्तासावनिडिति। कथं तर्हि। यस्तासावस्ति अनिट् चेति। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते॥

सिरा द्युपदेशे हलादिः। अज्ज्वभूतर्ही ति। अभूव्यापाविल्यस्यानुदात्तेत्वात्यत्यभावादुपन्यासोऽयुक्तः। क्रियमाणेऽपीति। यद्यपि
स्यात्तुपदेशे घसिर्हलादिर्न भवति तथापि स्थोपदेशे हलादिरेव। तस्य चाभावादिति। उपमाने दृष्टानां धर्माणामुपमेये भूतानां भाविनां
वा संप्रत्ययः। तत्र तास्वत्य लिनेट् भवतीत्युच्यमाने यदि घसिस्तासौ स्यात्ततस्थलि निषेधोऽतिदिश्येत। यतस्तु तासौ नास्ति ततोस्यता
सावनिट्त्वमशक्यं प्रतिपत्तुमिति थल्यतिदेशो न प्रवर्तते। अनिडप्यसाविति। असत्वादेवेड्भावात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सप्तम्यर्थ इति। तासाविव तासवदित्यौपश्लेषिकमाधिकरणमाश्रीयते। तासौ परतः पूर्वं स्मयेन भवति तथा थल्यपीत्यर्थः। ननु चास्य स्थान्यदिस्ति तासावस्ति स चानिडिति तदादेशस्यापि स्थानिवद्भावात्तत्वानिवृत्ते स्याताम्। नैतदस्ति। स्थानिवद्भावः शास्त्रीयेष्वेव कार्येषु प्रवर्तते। न च तासौ सत्त्वं शास्त्रीयं कार्यम्। अत एव ववयेस्थ स्तुष्टुवयियेति प्रतिषेधाभावः। क्रमेरपि चक्रमितेति भाव्यम्। न हि तासौ नित्यानिट् क्रमिः। आत्मनेपद इड्भावात् परस्मैपदे सेट्त्वात्। ऋतो॥ गुणे कृत इति। जहर्थेत्यादौ नह्ययमजन्तो नाप्युपदेशेऽत्वात्। असति नियम इति। जहर्थेत्यादाविट्प्रतिषेधार्थ एव योगोऽस्तु विभावः। तत्र पचादिभ्य इति। पूर्वयोगाभ्यां पचादिभ्यः स्थलि नित्ये प्रतिषेधे प्राप्ते पक्षे इड्विधेयः। जहर्थेत्यादौ च नित्यः प्रतिषेध इष्यते। तत्र भारद्वाजस्येति वचनात्। सत्वन्तरानुस्मानादिकस्यः

सप्तम्यर्थेऽपि वतिर्भवति। तद्यथा। मथुरायामिव मथुरावत्। पाटलिपुत्र इव पाटलिपुत्रवत्। एवं तासाविव तासवत्॥ ऋतो भारद्वाजस्य॥ किमर्थमिदमुच्यते। न अचस्तास्वत्थल्यनिटो नित्यमित्येव सिद्धम्। एवं तर्हि नियमार्थोऽयमारम्भः। ऋत एव भारद्वाजस्य नान्यतो भारद्वाजस्येति। क्व माभूत्। ययिथ वविथेति। ऋतो भारद्वाजस्येति नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य। ऋतो भारद्वाजस्येति नियमानुपपत्तिः। किं कारणम्। अप्राप्तत्वात्प्रतिषेधस्य। गुणे कृते रपरत्वे चानजन्तत्वात्प्रतिषेधो न प्राप्नोति। असति नियमे को दोषः। तत्र पचादिभ्य इड्वचनम्। तत्र पचादिभ्य इड्वक्तव्यः। पेचिथ शेकिथेति। यदि पुनरेवं भारद्वाजः पुरस्तादपकृष्येत अचस्तास्वत्थल्यनिटो नित्यं भारद्वाजस्य। उपदेशेऽत्वतः भारद्वाजस्य। ततः ऋतः। भारद्वाजस्येति निवृत्तम्। सिध्यत्येवमयं तु भारद्वाजः स्वस्मान्मतात्प्रच्यावितो भवति॥

प्राप्नोति। नियमफलमन्यथोपपादयितुमाह। यदि पुनरिति। पूर्वयोगे भारद्वाजग्रहणं कृत्वा तदेवदितीय योगेऽनुवर्त्यते। स्वस्मान्मतादिति। भारद्वाजस्य मतं पेचिथ पपियेतीड्भवत्येव। अन्येषां तु मतम्। पपक्थ पपाथेतीडभावः। न्यासविपर्यये तु मतविपर्ययः प्रदर्शितः स्यात्। ननु च नित्येषु शब्देषु विकल्पिते विधौ विकल्पमात्रं प्रदर्शयितव्यम्। तत्र कस्य किं मतं यत्प्रच्यावितं स्यात्। उच्यते। विकल्पप्रतिपादनाय वा ग्रहणएव कर्तव्ये पूजार्थमाचार्या उपादीयन्ते। सा चैवं पूजा भवति। यदि येनाचार्येण यः शब्दः स्मृतः स तेनैव स्मृतस्तेनोपदिश्यते। एवं हि तस्य स्मर्तृत्वेन प्रमाणत्वेन स्तुतिः कृता भवत्येवं चाङ्गार्ग्यगालवयोरित्यादावनेकाचार्योपादानमर्थवद्भवति। विकल्पस्यैकाचार्योपादानेनापि सिद्धत्वात्॥

CC-0. In Public Domain. Digitization by eGangotri

योगविभागादिति। ततश्चहरत्यादीनां गुणः परत्वयोरनजन्तत्वेऽप्युपदेशेजन्तत्वात्सिद्धे प्रतिषेधे अस्य नियमार्थत्वोपपत्तिः। आदेशोपदेशोऽप्याश्रीयते न तु स्थान्युपदेश एवेति अजन्तादेशस्य वीशब्दस्य च सिङादेशस्य च ल्यौविकल्पस्य फलिभवति। विवेय विवयिथ। आचख्याथ आचख्यिथ॥ बभूथ॥ ग्रहणमिति। एकदेशाक्षेपद्वारेणवचनर्थशब्दसमुदाय एवाक्षिप्यते॥ वस्वेका॥ किमर्थमिति। यदि क्रादिनियमः प्रकृत्याश्रयस्य प्रत्ययाश्रयस्य च प्रतिषेधस्य निवर्तकः ततइदं नियमार्थम्। अथ प्रकृत्याश्रयस्यैव ततो नेड्वशिकृतीति प्रतिषेधे प्राप्ते

एवं तर्हि योगविभागात्सिद्धम्। योगविभागः करिष्यते। अचस्तास्वत्थल्यनिटो नित्यमुपदेशे। ततः अत्वतः। अत्वतश्चोपदेश इति॥ बभूथ। ततन्थ जगृभ्मव वर्येति निगमे॥ ग्रहणं किमर्थम्। न कुसभृवस्तुद्रुस्तुश्रुवो लिटीत्येव सिद्धम्। एवं तर्हि नियमार्थोयमारम्भः। निगम एव यथा स्यात्। क मा भूत्। ववरिथ॥ वस्वेकाजाद्घसाम्॥ किमर्थमिदमुच्यते। वस्वेकाजाद्घसां वचनं नियमार्थम्। नियमार्थोयमारम्भः। वसावेकाजाद्घसामेव। क मा भूत्। बिभिद्वान्। किमुच्यते नियमार्थमिति। न पुनर्विध्यर्थमपि स्यात्। प्रतिषेधोऽपि ह्यत्र प्राप्नोति नेड्वशि कृतीति। कश्चैवायं वशादिश्च। एवं तर्हि कृसभृवस्तुद्रुस्तुश्रुवो लिटीत्येव स्मान्नियमादन्नेड्भविष्यति। नान्तरेण परिप्रापणं प्राप्नोति। किं कारणम्। प्रकृतिलक्षणस्य प्रतिषेधस्य सप्रत्यारम्भः प्रत्ययलक्षणश्चायं प्रतिषेधः। उभयोः सप्रत्यारम्भः कथं ज्ञायते। ऋद्व्रञोर्ग्रहणात्। कथं कृत्वा ज्ञापकम्। इमौ ऋद्व्रञौ उदात्तौ। तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति। पश्यति त्वाचार्य उभयोः सप्रत्यारम्भ इति। ततो ऋद्व्रञोर्ग्रहणं करोति। न खल्वपि कश्चिदुभयथा प्रतिषेधः। प्रकृतिलक्षणः प्रत्ययलक्षणश्च। तुल्यजातीये असति यथैव प्रकृतिलक्षणस्य नियामको भवति एवं प्रत्ययलक्षणस्यापि नियामको भविष्यति। अथ यावता वस्वेकाजाद्घसिभ्य इट् आभवितव्यम्। कोन्वत्र विशेषः। नियमार्थे वा सति विध्यर्थे वा। न खलु कश्चिद्विशेषः। आहोपुरुषिकामात्रं तु भवानाह विध्यर्थमिति। वयं तु ब्रूमो नियमार्थमिति ॥

विध्यर्थमित्युभयसंभवात्प्रश्नः। न खलु कश्चिदिति। उभयथैकाजाद्घसिभ्य इट् वसोर्भाव्यं नान्येभ्यो बिभिद्वानित्यादावित्यर्थः। आहोपुरुषिकामात्रमिति। अहोऽहंपुरुष इति यस्याभिमानः सोऽहोपुरुष उच्यते। यथायर्वाणस्त्वर्वाणो नामर्षयो बभूवुरित्युक्तम्। तस्य भावो मनोज्ञादित्वाद्वुञ्। स्त्रीत्वमपि प्रायेणैवमुच्यते। न खलु कश्चिद्विशेष इति। अन्यत्र विशेषोऽस्त्येव। यदि क्रादिनियमः प्रकृत्याश्रयस्य प्रतिषेधस्य स्यात्। ततो गुप्युविवेत्यादौ ग्रुकः कितीति प्रतिषेधः स्यात्। ऋग्रहणं च क्रादिसूत्रे नर्थकं स्यादिति प्रत्ययाश्रयोऽपि प्रतिषेधः क्रादिनियमेन निवर्त्यत इति सूत्रमिदं नियमार्थमेव ॥ रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथैकाज्ग्रहणमिति। क्रियमाणमप्येकाज्ग्रहणमनिष्टनिवृत्तये नालमिति मत्वा प्रश्नः। बिभिद्वानिति। कृतद्विर्वचनानामनेकाचां निवृत्त्यर्थमित्यभिप्रायः। एकाज्ग्रहणसामर्थ्यादिति। यद्यपि नित्यत्वाद् द्विर्वचने कृतेऽनेकाच्त्वादिण्न भवतीति परिहारोऽस्ति तथापि परिहारान्तरसद्भावान्नोक्तः। तथा हि। द्विर्वचनस्यावकाशः। पपाचेति। इटोऽवकाशो यत्र कृते द्विर्वचने एकाच्त्वं ये चिवानादिवानिति। बिभिद्वानित्यादौ तु नित्यत्वाद् द्विर्वचनं पूर्वम्। जागर्तिरिति। उषविद्जागृभ्योऽन्यतरस्यामिति विकल्पितत्वादाम्। जागर्तेः परः क्वसुः। चिरिजिरिचकास्यादिभ्यस्तु कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमिति आमाभाव्यमिति क्वसोः परस्यासंभवः। जागृवांस इति। द्विर्वचनप्रकरणे कृन्दसि वेति वक्तव्यमिति द्विर्वचनाभावः। नदरिद्रातेरिति। दरिद्रातेरनित्यआमित्यात औणल इति ओकारे विधातव्ये औकारविधानेन

अथैकाज्ग्रहणं किमर्थम्। इह माभूत्। बिभिद्वान्। चिच्छिद्वानिति। क्रियमाणेऽपि वै एकाज्ग्रहणे अत्र प्राप्नोत्येषोऽपि ह्येकाच्। एवं तर्हि कृते द्विर्वचने एकाच्। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। एकाज्ग्रहणसामर्थ्यात्। न हि कश्चिदकृते द्विर्वचने अनेकाजस्ति। यदर्थमेकाज्ग्रहणं क्रियते। ननु चायमस्ति जागर्तिः। जागृवांसो। अनुस्मन्यते ह्यकारग्रहणं करोति। न हि कश्चिदकृते द्विर्वचने आकारान्तोऽनेकाजस्ति। ननु चायमस्ति दरिद्रातिः। न दरिद्रातेरिटा भवितव्यम्। किं कारणम्। उक्तमेतत्। दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति। यश्चेदानीं प्रत्ययविधौ सिद्धः सिद्धोऽसाविड्विधौ। एवमपि भूतपूर्वगतिर्विज्ञायेत। आकारान्तो यो भूतपूर्व इति। एकाज्ग्रहणमेव तर्हि ज्ञापकम्। ननु चोक्तं जागर्त्यर्थमेतत्स्यात्। नैकमुदाहरणमेकाज्ग्रहणं प्रयोजयति ॥

ज्ञापितमोकारस्य प्रश्लिष्टावर्णत्वादुच्चारणे लाघवं भवत्यौकारस्य तु विश्लिष्टावर्णत्वादोकारादितरतरत्वाच्च गौरवमित्योकार एव विधेयः। तत्र वृद्धिरेचीति वृद्धौ रूपं यथा वित्साद् दिसिध्यति। ददरिद्रावितिवाकारलोपेन सिध्यति। तदर्थमोकारविधानमनित्यत्वमस्मादामो ज्ञापयति। सिद्धोऽसाविड्विधाविति। क्वचित्तु सिद्ध सिद्ध इति पाठः। सिद्धश्चासौ सिद्ध इति विशेषणसमासेऽस्यान्तसिद्ध इत्यर्थः। एकेन सिद्धशब्देन सामान्यसिद्धिः प्रतिपाद्यते द्वितीयेन तु विशेषसिद्धिः। एवमपीति। सांप्रतिकस्याकृतद्विर्वचनस्यानेकाच आकारान्तस्याभावाद् दरिद्राग्रहणे कर्तव्ये लाघवार्थमाद्ग्रहणं स्यादिति नैकमुदाहरणं माद्ग्रहणं प्रयोजयतीति नोक्तम्। नैकमुदाहरणमिति। ऊर्णोतेर्णुवद्भावादेकाच्त्वादेकाज्ग्रहणेनानिवृत्तिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जागर्तेर्नेति। सूत्रमिदं नियमार्थम्। तत्र यद्यस्य जागर्तेरेव निवर्त्यः स्यात्तस्यैव सास्रावविशेषं कुर्यात्। लघीयसी हि सास्राव्रतिपत्तिः। नच इरिद्राति र्द्वितीयो निवर्त्यः स्यात्। ह्यवस्तायमाद्ग्रहणस्य कृतद्विर्वचनानेकाजाकारान्तार्थत्वाद्भूतपूर्वान्ताकाराश्रयात्स्यादेव तत इडागमः। यदा त्वेकाज्ग्रहणेन कृतद्विर्वचनादेकाचो गत्यन्ते तदाद्ग्रहणं कृतद्विर्वचनानेकाजाकारान्तार्थमपि वानिति। संप्रति काकारान्तसद्भावेभूतपूर्वगतिरयुक्ताश्रयितुम्। अथ घसिग्रहणमिति। द्विर्वचनेऽचीति स्थानिवद्भावः पूर्वविप्रतिषेधाश्रयेण प्रत्याख्यायते। द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्य इति। तत्र घस्लृ इति स्थिते घसिभसोर्हलि चेति परस्यमप्युपधालोपं पूर्वविप्रतिषेधेन बाधित्वा द्विर्वचनं भवति। तत्र कृते पुनः प्रसङ्गविज्ञानादुपधालोपस्ततः कृतद्विर्वचनएकाज्भवतीति सिद्ध इडागम इति मत्वा पृष्टः। इतरस्तु स्थानिवद्भावस्य पूर्वविप्रतिषेधेनाश्रितस्ततः परत्वान्नित्यत्वाद्वोपधालोपे कृत एकाच्त्वाभावान्न द्विर्वचनं स्यान्नापी

यद्येतावत्प्रयोजनं स्याज्जागर्तेर्नेत्येव ब्रूयात्। अथ घसिग्रहणं किमर्थम्। नएकाच इत्येव सिद्धम्। घसिग्रहणमनच्कत्वात्। घसिग्रहणं क्रियते। लोपे कृतेऽनच्कत्वादिण्न प्राप्नोति। इदमिह संप्रधार्यमिट् क्रियतां लोप इति। किमत्र कर्तव्यम्। परत्वादिडागमः। नित्यो लोपः। कृतेपीटि प्राप्नोत्यकृतेऽपि। इडपि नित्यः। कृतेऽपि लोपे प्राप्नोत्यकृतेऽपि। अनित्य इट्। न हि कृते लोपे प्राप्नोति। किं कारणम्। अनच्कत्वात्। एवं तर्हि द्विर्वचने कृतेऽभ्यासे योकारस्तदाश्रय इड्भविष्यति। न सिध्यति। किं कारणम्। द्वित्वाल्लोपस्य परत्वाद्द्विर्वचनं क्रियतां लोप इति। किमत्र कर्तव्यम्। परत्वाल्लोपः। लोपेऽनच्कत्वाद्द्विर्वचनं न प्राप्नोति। घसिग्रहणे पुनः क्रियमाणे न दोषो भवति। कथम्। वचनादिड्भविष्यति। इट्कृते द्विर्वचनं क्रियतां लोप इति। यद्यपि परत्वाल्लोपः। स्थानिवद्भावाद्द्विर्वचनं भविष्यति ॥

डागम इति मत्वाह। घसिग्रहणमनच्कत्वादिति। नित्यो लोप इति। हल्यचि च विधानादिट्यनुलोपे कृतेऽनच्कत्वान्न प्राप्नोतीत्यनित्यः। पूर्वविप्रतिषेधवाद्याह। इडपि नित्य इति। कृते द्विर्वचने उपधालोपे चाभ्यासाकाराश्रयेणैकाच्त्वात्। स्थानिवद्भाववाद्याह। अनित्य इडिति। पूर्वविप्रतिषेधवाद्याह। एवं तर्हीति। पूर्वस्मादपि विधौ स्थानिवदिति सर्वत्र नाश्रीयत इति स्थानिवद्भावादनेकाच्त्वमिति निर्वचनीयम्। स्थानिवद्भाववाद्याह। न सिध्यतीति। परत्वादिति। नित्यत्वादित्यपि बोद्धव्यम्। वचनादिति। अपवादत्वादिति न बोद्धव्यम्। सत्यपि संभवे बाधनं भवतीति लोपद्विर्वचनयोरिटा बाधप्रसङ्गात्। किंतु क्रमः प्रदर्श्यते। घसिग्रहणे क्रियमाणे कृताकृतप्रसङ्गित्वादिडागमो नित्यः। कृतयोरपि लोपद्विर्वचनयोः प्रवर्तनात्सावकाशश्च लोपोऽपि नित्यः। तत्र परत्वादिडागमः ततो लोपः ततो द्विर्वचनमिति सिद्धं जक्षिवानिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभाषागमहनविद्विशाम्॥ दृशेरिति वर्तत इति। विभाषास्तृजिदृशोरित्यतः। इद्वृत्तिर्व्यर्थेतीनामिति योगं प्रयोजनाभावादुल्लङ्घ्य व
चेकाजाद्धसामित्यत्र विभाषाग्रहणसंबद्धं दृशिग्रहणमनुवर्तते॥ यमरमनमातां सक्च॥ किमुदाहरणमिति। वृत्तिकारैरेकवचनान्तान्युदा
हरणान्युपन्यस्तानि। तत्र विशेषं सगिटोरबुध्वा पृच्छति। इतरस्तु वृद्ध्यभावं स्वरे च विशेषं मत्वैकवचनमेवोदाहरति। अयंसीदिति। अयंसिष्टा
मिति। न केवलमत्र वृद्ध्यभावो विशेषो यावत्सगिटोः श्रवणमपि। माहियासीदिति। अयासीदित्यत्राट्स्वरो भवतीति तन्निवृत्त्यर्थो माङ्प्र

विभाषागमहन॥ दृशेश्चेति वक्तव्यम्। ददृश्वान्। ददृशिवान्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। दृशेरिति वर्त
ते॥ ऋद्धनोः स्ये॥ स्वरतेर्वेट्त्वादृतः स्ये विप्रतिषेधेन। स्वरतिलक्षणाद्धा वचनादृतः स्ये इत्येतद्भवति विप्र
तिषेधेन। स्वरतिलक्षणस्य वा वचनस्यावकाशः। स्वर्ता। स्वरिता। ऋतः स्य इत्यस्यावकाशः। करिष्यते। हरिष्यते।
इहोभयं प्राप्नोति। अस्वरिष्यत्। ऋतः स्ये इत्येतद्भवति विप्रतिषेधेन॥ यमरमनमातां सक्च॥ किमुदाहरणम्। अ
यंसीत्। व्यरंसीत्। अनंसीत्। अयासीत्। अवासीत्। नैतदस्ति। नास्त्यत्र विशेषः सति वा इटि असति वा। इदं तर्ह्ययंसिष्टा
मयंसिषुः। व्यरंसिष्टां व्यरंसिषुः। अनंसिष्टामनंसिषुः। अयासिष्टामयासिषुः। अवासिष्टामवासिषुः। इदं चाप्युदाहरण
म्। अयंसीत्। व्यरंसीत्। अनंसीत्। अयासीत्। अवासीत्। ननु चोक्तं नास्त्यत्र विशेषः सति वा इटि असति वेति। अयमस्ति वि
शेषः। असत्यत्रेण्णस्याद् वृद्धिः प्रसज्येत। इटि पुनः सति नेटीति प्रतिषेधः सिद्धो भवति। माभूदेवं ह्म्यन्तानामित्येवं भवि
ष्यति। अत्रापि नेटीत्यनुवर्तते। तच्चावश्यमिड्ग्रहणमनुवर्त्यम्। अधाक्षीदित्येवमर्थम्। आकारान्तस्यापि पदपूर्वमे
कवचनमुदाहरणम्। माहियासीत्। यद्यत्रेण्न स्यादनुदात्तस्येटः श्रवणं प्रसज्येत। इटि पुनः सत्युक्तमेतत्। अर्थ
वत्तुस्त्रिचश्चित्करणसामर्थ्यादिट उदात्तत्वमिति। तत्रैकादेश उदात्तेनोदात्त इत्युदात्तत्वं सिद्धं भवति॥ ईशः से॥ ईडज
नोर्ध्वे च॥ किमर्थो योगविभागः। नईशीडजनां स्ध्वे इत्येवोच्येत। ईशो ध्वे मा भूदिति॥

योगः। हिशब्दप्रयोगो गोदिह्येति निघातप्रतिषेधार्थः। इट्यसत्याद्युदात्तं पदं स्यात्। सति तु तस्य सिज्ञकत्वादुदात्तत्वादेकादेश उदात्तेनोदा
त्त इत्यन्तोदात्तं पदं भवति तत्रादिः सिचोऽन्यतरस्यामिति पक्षे आद्युदात्तं पदं पक्षे अन्तोदात्तं। एतच्चानिटः पित उपसंख्यानमित्युपसंख्या
नमनपेक्ष्य प्रयोजनमुक्तम्। तेन यथा माहिकार्षमित्यत्र पर्यायेणाद्यन्तयोरुदात्तत्वं भवत्येवं माहियासीदित्यत्रासत्यपीटि भविष्यतीती
टो भावाभावयोः स्वरे भेदाभावः॥ ईशः से॥ श्रीलक्ष्मीनृसिंहो जयतितराम्। श्रीवक्रतुण्डो जयतितराम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· इष्यतईशिध्वेइति। एतदर्थमेव चकारेणेशिरनुकृष्यते। ईडजनोस्त र्ही ति। कथंपुनरीडजनोस्ध्वे चेतिसूत्रपाठेयोगविभागेनेडजनोः
९९ सेशब्देइट्शक्यतेनिवर्तयितुम्। उच्यते। चकारेणेशेरनुकर्षणात्सकारादौसेशब्दइतिद्दिसिद्धेईशः सइतिनियमार्थंविज्ञायते। ई
शेरेवसेशब्दइण्नत्वीडजनोरिति। सइति। षासः सइत्यस्यानुकरणंसुपांसुलुगितिसप्तमीलुकानिर्दिष्टम्। इष्यतइति। नचानिष्टार्थो
योगविभागः। जनिषइति। व्यत्ययेनश्यनस्यबहुलंछन्दसीतिलुक्छान्दसत्वादुपधालोपाभावः। जायसइत्यत्रतुनित्यत्वाद्विकरणे
कृतेतेनव्यवधानादिडभावः। ईशेस्तर्हिस्वेमाभूदिति। चकारेणेशेरनुकर्षणात्। सकारादौध्वशब्देचेटः सिद्धे ईशः सइतिनियमः क्रि
यते। ईशेः सेशब्दएवसकारादाविण्नान्यस्मिन्सकारादाविति। यद्यप्येकदेशविकृतमनन्यवदितिस्वशब्दः सेशब्दएवभवतितथा
प्यन्यस्यसकारादेर्भावत्वस्याभावादन्यत्वमाश्रित्यस्वशब्दोव्यावर्त्यते। सेतर्ही ति। ईडजनोस्ध्वे चेत्यनेनसर्वसकारादेरिटिविहिते

इष्यते ईशिध्वेइति। ईडजनोस्तर्हिसेमाभूदिति। इष्यते ईडिषे। जनिषे ईशेस्तर्हिस्वेमाभूदिति। इष्यते। ईशिषेति।
सेतर्हियः स्वशब्दः तत्रयथास्यात् क्रियासमभिहारे यः स्वशब्दः तत्रमाभूदिति। अत्रापीष्यतेसमवानीशिषेशिषे
त्येवायमीष्टइति। आतश्चेष्यते। एवंह्याह सिद्धंतुलोण्मध्यमपुरुषैकवचनस्यक्रियासमभिहारेद्विर्वचनादिति॥
अतोयेयः॥ किंसार्वधातुकग्रहणमनुवर्ततउताहोन। किंचार्थोनुवृत्त्या। बाढमर्थः। यद्यकारात्परोयाशब्दः आर्धधा
तुकमस्ति। ननुचायमस्तिचिकीर्ष्याज्जिहीर्ष्यात्। लोपोत्रबाधकोभविष्यति ॥

ईशः सइत्यनेननियमः क्रियतेसेशब्दएवसकारादाविति तेनेशिषइत्यत्रभवति। ईशिषेत्यत्रापिस्थानिवद्भावाद्यस्तुलोटएवस्थानेस्व
शब्दोनासौसेशब्दइतिव्यावर्त्यते। अत्रापीति। लोट्धर्माणोहिस्वौलोटोभवतइत्युक्तम्। तेनयथान्यलोडादेशस्यस्वशब्दस्यसेग्रहणेन
ग्रहणादिट्भवत्येवंक्रियासमभिहारेसमुच्चयेचलोडादेशस्यस्वस्य। अत्रैवार्थेवार्तिककारवचनंसाक्षित्वेनाह। आतश्चेष्यतइतितदे
वंदोषवान्गुरुश्चयोगविभागइत्येकएवयोगः कर्तव्यः। ईडीशिजनीनांसेध्वयोरिति॥ अतो॥ केषांचिदतोयाइतिसकारान्तानुकरण
त्वात्पाठोऽन्येषांतुसौत्रत्वान्निर्देशस्ययलोपस्यासिद्धत्वानाश्रयणादतोयेयइति। किंचार्थइति। आचार्यदेशीयआह। प्रयोजनाभा
नात्स्वधिकारानुवृत्तिरितिमन्यते। आचार्यआह। बाढमर्थइति। चोदकआह। यद्यकारादिति। किंतुनास्तीतिभावः। चिकीर्ष्यादिति। लिङा सम:
शिषीत्यार्धधातुकसंज्ञा। लोपोत्रेति। कृताकृतप्रसङ्गित्वान्नित्योलोपः इयादेशस्तुलोपेकृतेऽनकारान्तत्वान्नप्राप्नोतीत्यनित्यः ॥ ९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्त्वियादेशस्यसावकाशत्वेलोपस्यनित्यत्वंवक्तुंशक्यंनान्यथेतिमत्वाह।किंतर्ह्यस्मिन्निति।सयथैवेति।नचयेननाप्राप्तिन्या
येनदीर्घस्यैवबाधकइतिशक्यंवक्तुम्।यस्मात्सार्वधातुकेविधीयतइतिसिद्धान्तः।तथाचज्ञाजनोर्जाइत्यत्रवक्ष्यते।जानातीत्यत्रा
प्यतोदीर्घोयञीत्येवदीर्घोभविष्यतीति।यदितिङि-दीर्घोविधीयेतकथंजानातीत्यत्रस्यात्।यत्तुवक्ष्यतेतिङीत्येवंतदितिनासौसि
द्धान्तःमध्येपवादाइत्यनाश्रित्यैतदुक्तंतस्मिन्नाश्रीयमाणेलोपमेवेयादेशोबाधेतनदीर्घम्।दीर्घस्तुपरत्वात्स्यादितिसर्वथासार्व
धातुकानुवृत्तिःसप्रयोजना॥आने॥मुकीति।पूर्वान्तकरणेदोषइत्यर्थः।अदुपदेशादितिस्वरोनसिध्यति।अग्निचित्वानित्यादौह्रस्व
नुड्भ्यांमतुबित्याद्युदात्तत्वंप्राप्नोतीतिस्वरविधौव्यञ्जनमविद्यमानवदितिदूषयित्वाहलस्वरप्राप्तौव्यञ्जनमविद्यमानवदितिपरि

किंतर्ह्यस्मिन्योगउदाहरणम्।पचेत।यजेत।अत्राप्यतोदीर्घोयञीतिदीर्घत्वंप्राप्नोति।सयथैवेयादेशोदीर्घत्वं
बाधतेएवंलोपमपिबाधेत।तस्मात्सार्वधातुकग्रहणमनुवर्त्यम्॥आनेमुक्॥मुकिस्वरेदोषः।मुकिसतिस्वरेदोषो
भवति।पचमानोयजमानः।मुकाव्यवहितत्वादनुदात्तत्वंनप्राप्नोति।ननुचायंमुगदुपदेशभक्तः।अदुपदेशग्र
हणेनग्राहिष्यते।नसिद्ध्यत्यङ्गस्यमुगउच्यतेविकरणान्तंचाङ्गम्।सोयंसंघातभक्तोऽशक्योऽदुपदेशग्रहणे
नग्रहीतुम्।एवंतर्ह्यभक्तःकरिष्यते।अभक्तेचकिंस्वरेदोषोभवति।पचमानोयजमानः।मुकाव्यवहितत्वादनुदात्त
त्वंनप्राप्नोति।एवंतर्हिपरादिःकरिष्यते।परादौदीर्घप्रसङ्गः।यदिपरादिःक्रियतेअतोदीर्घोयञीतिदीर्घत्वंप्राप्नोति।
नैषदोषः।तिङीत्येवंतन्नसिध्यति।सूत्रंतर्हिभिद्यते।यथान्यासमेवास्तु।ननुचोक्तंमुकिस्वरेदोषइति।परिहृतमेतत्।अ
दुपदेशभक्तःअदुपदेशग्रहणेनग्राहिष्यते।ननुचोक्तमङ्गस्यमुगुच्यतेविकरणान्तंचाङ्गंसोयंसंघातभक्तःअशक्यःअदुप
देशग्रहणेनग्रहीतुमिति।अथायमदुभक्तःस्याद्गृह्येतअदुपदेशग्रहणेन।बाढंगृह्येत।अङ्गकस्तर्हिभविष्यति।तत्कथम्॥

भाष्यकारेणव्यवस्थापितेतिव्यवधानेवमुगागमः।ननुचायमिति।अकारउपदेशइत्याश्रीयतेनत्वकारान्तउपदेशइतिमु
कृचाकारमात्रभक्तइतिव्यवधानाभावः।अङ्गस्येतिअङ्गाधिकारादङ्गस्यमुग्विधीयमानोऽङ्गमेवनव्यवधातिअवयवान्तरत्वव्य
वधात्येव।एवंतर्हीति।ककारमनुबन्धमकृत्वाविकरणवदकारान्तादङ्गात्परआनेपरतोमध्येमःकरिष्यते।मुकेति।यथान्यासा
श्रयेणोक्तमभक्तत्वात्तुमकारेणेतियुक्तंवक्तुम्।एवंतर्हीति।आनस्यमुडितिसूत्रन्यासेन।तिङि-इत्येवंतदिति।मुटिक्रियमा
णेसार्वधातुकमननुवर्त्यंतिङीत्यनुवर्त्यमेवेतिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमीनिर्दिष्टस्मिन्निति। पूर्वसूत्र एवातद्वस्यनेनाङ्गं न विशेषितमिति तदन्तविध्यभाव इत्युक्तं भवति। तेनाङ्गस्य यो कारस्तस्मात्परस्यास इत्यपूर्वयङ्गं यथा पूर्वसूत्रे विशेषणं तथेहापीत्यङ्गावयवस्याकारस्यानेसुम्भवति तत्प्रकृतमिति। विशेष्यं सत्प्रधानमेवेत्यर्थः। आनद्ब्येषेति। अकृतार्था सप्तमी पूर्वत्र कृतार्थायाः पञ्चम्याः षष्ठीं प्रकल्पयति न तु पञ्चमी सप्तम्याः। यद्येवमङ्गस्यातद्वृतिसमानविभक्तित्वात्तदन्तविधिप्रसङ्गः। नैष दोषः। विशेषणविशेष्यभावे कामचारादङ्गे नातो विशेषणात्तदन्तो सुगकारमात्रकत्वान्नव्यवधायकः। यद्यपि सुकिकृतेऽध्यर्धमात्रो कारस्तथाप्युपदेशग्रहणादुपदेशे मात्रिकत्वाश्रयः स्वरः प्रवर्तते। तथा च पचावद्दत्यादेर्दीर्घेऽपि कृते भवति पचमानद्वत्यादौ त्वातो ङि तद्वति द्व्यादेशाभावोऽतद्वृति तपरकरणात्। अष्टनः॥ सौत्रत्वान्निर्देशस्याल्लोपोऽनद्व्लकारलोपेन कृतः। समानविचारत्वात्प्रकरणान्तरविहितमपि अनुनासिकस्थानिकमाकारमिहैवोपन्यस्य

अतो येयद्वस्यत्र अकारग्रहणं पञ्चमीनिर्दिष्टं अङ्गस्येति च षष्ठीनिर्दिष्टं तत्राशक्यं विविभक्तित्वादतद्वृति पञ्चम्या अङ्गं विशेषयितुं तत्प्रकृतमिहानुवर्तिष्यते। एवमपि षष्ठ्यभावान्न प्राप्नोति। आनेद्ब्येषा सप्तम्यतद्वृति पञ्चम्याः षष्ठीं प्रकल्पयिष्यतितस्मिन्निति निर्दिष्टे पूर्वस्येति॥ अष्टन आ विभक्तौ। अष्टन्ज्ञनादिपथिमथ्यात्वेष्वान्तरतम्यादनुनासिकप्रसङ्गः। अष्टन्ज्ञनादिपथिमथ्यात्वेषु आन्तरतम्यादनुनासिकः प्राप्नोति। अष्टाभिः आष्टाभ्यः जातः जातवान् पन्थाः मन्थाः। सिद्धमनण्त्वात्। सिद्धमेतत्। कथम्। अनण्त्वात्। कथमनण्त्वम्। अणसवर्णान्गृह्णातीत्युच्यतेन च आकारः अण् ॥

ति। अष्टन्निति। यत्र तपरत्वमस्ति तत्र तपरस्तत्कालस्येति वचनाद्गुणान्तरयुक्तस्य तत्कालस्य ग्रहणात्स्थानेन्तरतम इति वचनात्तानुनासिकस्थानेऽनुनासिक एवाकारः प्राप्नोति। यत्रापि तपरत्वाभावः तत्राप्याकृतिनिर्देशाद्दीर्घोच्चारणसामर्थ्याच्च ह्रस्वप्लुतग्रहणात्सर्वदीर्घव्यक्तिप्रसङ्गेऽन्तरतमपरिभाषोपस्थानादनुनासिकप्रसङ्गः। सिद्धमनण्त्वादिति। अणुदित्सवर्णस्येत्यत्राणग्रहणेन प्रत्याहारसन्निविष्टा अकारादयो गृह्यन्ते न त्वाकारादयोऽसन्निविष्टत्वान्न च प्रत्याहारेऽकारादिभिराकारादयो गृह्यन्ते। नाप्यणुदित्सूत्रेऽङ्गेषु स्वात्मनि च ग्रहणकशास्त्रस्यानभिनिर्वर्तनात्स्वात्मनि क्रियाविरोधाद्ग्रहणकशास्त्रान्तराभावाच्च। कथमनण्त्वमिति। अकारेण गृह्यमाण आकारोऽण् भवतीति मत्वा प्रश्नः। पूर्वोक्तेनाभिप्रायेणाह। अणसवर्णानिति। अनण्त्वादेवभाव्यमानोऽण् सवर्णान्न गृह्णातीति परिहारो नोक्तः। ग्राह्यासद्भावाच्चान्तरतमपरिभाषा नोपतिष्ठते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उच्चारणसामर्थ्यादेवेति। यद्यत्रानुनासिकोऽभविष्यत्तत एवोदचारयिष्यत इति निरनुनासिक एवोच्चारणसामर्थ्यात्प्रवर्तते। तत्र पूर्वः परिहारोऽष्टन्शब्दाकाराभिप्रायेणोक्तः उत्तरस्तु जनाद्याकाराभिप्रायेण। चोदकस्तु विषयविभागमबुध्वाह। नैतौ स्त इति। कथं तर्हीति। अणितिच तत्रानानुवर्तते। उत्तरार्थमिति। इहानुनासिक उच्चार्यमाणेऽनुनासिक उत्तरत्र कर्तव्य इति लाघवाया नानुनासिकोच्चारणं स्यादित्यर्थः। इतरः स्वाभिप्रायमाह। एवं तर्हीति। अष्टन आत्वेन द्वौ परिहारौ नापि जनाद्यात्वे किं तु विषयविभागेन। एक इति। यद्यपि द्वावेतौ परिहारौ वाशब्दस्य समुच्चयार्थत्वात्तथापि समुदायापेक्षयासंभवापेक्षया चैवमुक्तम्। अथ वैको सहायः कश्चित्कश्चिदन्यनिरपेक्षः परिहार इत्यर्थः। स एवाह। यद्येवमिति। यदि भवान्संमन्यते परिहारसमुदाये यथासंभवमवयवौ परिहारत्वेन तदा

उच्चारणसामर्थ्याद्वा। अथ वा शुद्धोच्चारणसामर्थ्याद्भविष्यति। नैतौ स्तः परिहारौ यत्तावदुच्यतेऽनण्त्वादिति न ब्रूमः अणसवर्णान्गृह्णातीति कथं तर्हि तपरस्तत्कालस्येति। यदप्युच्यते। उच्चारणसामर्थ्यादेवेति। अस्त्यन्यदुच्चारणे प्रयोजनम्। किम्। उत्तरार्थं रायो हलीति। एवं तर्हि नेमौ पृथक् परिहारौ। एकपरिहारः। एकपरिहारोऽयं सिद्धमनण्त्वादुच्चारणसामर्थ्याद्वेति। इह तावदष्टाभिः अष्टाभ्य इति। अनण्त्वात्सिद्धम्। जातः जातवान्। पन्थाः मन्थाः उच्चारणसामर्थ्यात्सिद्धम्। यद्येवं पृथक्परिहारयोरपि न दोषः। यो यत्र परिहारः स तत्र भविष्यति॥ युष्मदस्मदोरनादेशे॥ अनादेशग्रहणं शक्यमकर्तुम्। कथम्। हलीत्यनुवर्तते। न चादेशो हलादिरस्ति। तदेतदनादेशग्रहणं तिष्ठतु तावत्सान्यासिकम्॥ यो ऽचि॥ अज्ग्रहणं शक्यमकर्तुम्। कथम्। अविशेषेण यत्वमुत्सर्गस्तस्य हलादावात्वमपवादः॥ शेषे लोपः॥ शेषग्रहणं शक्यमकर्तुम् ॥

समुदायकल्पनयानार्थः पृथगेवैतौ परिहारौ यथाविषयमवतिष्ठेते॥ युष्म॥ हलीति वर्तत इति। रायो हलीत्यतः। न चादेशो हलादिरिति। त्वं स्वम् युष्म त्वमादेशो न तु युष्ममिति भावः। तदेतदिति। उत्तरत्रोपयुज्यते। योऽचीति यत्वमादेशे जादौ मा भूत् त्वमहमित्यादौ शेषे लोप इति शेषकत्ववस्त्वर्थं च॥ योऽचि॥ यत्वमुत्सर्ग इति। अनादिष्टार्थो विभक्तौ विधीयमानं यत्वमुत्सर्गो हलादौ त्वात्वमपवादः आदेशे तु लोप इत्यसंकरेणात्वयत्वलोपाः सिध्यन्ति। अज्ग्रहणे क्रियमाणेऽप्यनादेशग्रहणं यत्वलोपयोर्विषयविभागार्थं कर्तव्यमित्यनादेशग्रहणाश्रयेणाज्ग्रहणमुत्तरत्र च शेषग्रहणं प्रत्याख्यातम्॥ शेषे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· अविशेषेणेति। विभक्ताविस्यधिकाराद्विभक्तिमात्रे लोपो विधीयमान उत्सर्गो भवति। तस्यानादेशो विभक्तौ यत्वमपवादो यत्व १२२
१०१ स्यापि हलादावात्वमिति शेषग्रहणं पूर्वेत्रवाज्ग्रहणमन्तरेणापि विषयविभागेन कार्यत्रयसिद्धिः। तस्याजादाविति। हलादावात्व
विधानात्सामर्थ्यलभ्यमेतत्॥ मप॥ अयमन्तशब्द इति। अन्यपदार्थविषयस्यान्तशब्दस्येदं व्याख्यानम्। क्वचिदन्तर्भूतान्तार्थो
न्यपदार्थो बहुव्रीहेरभिधेयः क्वचिदनन्तर्भूतान्तार्थ इत्यर्थः। मर्यादान्तमिति। मर्यादाया: क्षेत्रावयवत्वात्क्षेत्रे ऽन्यपदार्थे ऽनुप्रवेशः।
नद्यन्तमिति। नद्याः क्षेत्रानवयवत्वादन्यपदार्थे ऽनुप्रवेशाभावः पर्यन्तशब्दस्त्वन्यपदार्थविषयः सह तेन वर्तत इति परिग्रह
णं कृतं तेन युष्म् अस्म् इत्येतयोरादेशा भवन्ति त्यु बू अ स्मू इत्येतयोः। सर्वत्रेति। अन्तशब्दो ऽवयववाचीत्यवयवेन विग्रहः समु

कं यमविशेषेण लोपः उत्सर्गस्तस्य अजादौ यत्वमपवादः हलादावात्वम्॥ मपर्यन्तस्य॥ परिग्रहणं शक्यमक
र्तुं मान्तस्येत्येव सिद्धम्। न सिध्यति। किं कारणम्। अन्तशब्दस्योभयार्थत्वात्। कथम्। अयमन्तशब्दः अस्त्येव सह
तेन वर्तते। तद्यथा मर्यादान्तं देवदत्तस्य क्षेत्रं सह मर्यादयेति गम्यते। अस्ति प्राकृतस्माद्वर्तते। तद्यथा नद्यन्तं दे
वदत्तस्य क्षेत्रमिति प्राग् नद्या इति गम्यते। तद्यः सह तेन वर्तते तस्येदं ग्रहणं यथा विज्ञायेत। नैतदस्ति प्रयोज
नम्। सर्वत्रैवान्तशब्दः सह तेन वर्तते। अथ कथं नद्यन्तं देवदत्तस्य क्षेत्रमिति। नद्याः क्षेत्रत्वे संभवो नास्तीति कृ
त्वा प्राङ् नद्या इति गम्यते। अवधिद्योतनार्थं तर्हि परिग्रहणं कर्तव्यं मान्तस्ये त्युच्यमाने ॥

दायः समासार्थ इत्यवयवस्यावश्यमन्यपदार्थान्तर्भावः। नद्यन्तं क्षेत्रमित्यत्र त्वन्तशब्दः सामीप्यवाचीत्यन्यपदार्थे नद्या अन
न्तर्भावः। यत्तूच्यते सर्वत्रैवान्तशब्दः सह तेनेति वर्तत इति तत्संभवापेक्षम्। यस्यावयवत्वं सामीप्यं च संभवति तस्यावयवत्वमे
वाश्रीयते। अन्तशब्दस्यावयववाचित्वेन प्रसिद्धतरत्वाद्यस्य त्ववयवत्वासंभवस्तस्य सामीप्यमेवान्तशब्देन प्रतिपाद्यते यथा
नद्यन्तं क्षेत्रमिति। अन्ये त्वाहुः। सर्वत्रैवान्तशब्दो ऽवयववाची कस्यचिन्मुख्यमवयवत्वं कस्यचित्सामीप्यादुपचरितमित्यभि
प्रायेणेदं भाष्यम्। ततश्चान्तशब्दस्यावयववाचित्वान्मपर्यन्तस्यादेशलाभ न्नार्थः परिग्रहणेन। अवधिद्योतनार्थमिति। यदि युष्म एमः
दस्मदी मान्ते अथाप्यमान्ते सर्वथा आदेशा मा भूवन्नित्येवमर्थं परिग्रहणम् ॥ १०१

CC-0. In Public Domain. Digitization by eGangotri

यत्रेदेति। सामानाधिकरण्येन विशेषणविशेष्यभावः स्यात्। अथापि वैयधिकरण्यमाश्रीयते युष्मदस्मदोरवयवस्य मान्तस्येति तथापि यत्र मान्ते युष्मदस्मदी तत्र भेदाभावादादेशा न स्युः। न च व्यपदेशिवद्भावोऽस्य प्रातिपदिके नेति निषेधात्परिग्रहणे तु तदुपादानसामर्थ्याद्युष्मदस्मदवयवयोरपि युष्मदस्मच्छब्दौ वर्तेते इति सर्वत्रैवादेशसिद्धिर्वैयधिकरण्येन वा संबन्धे परिग्रहणोपादानसामर्थ्यादप्रातिपदिकेनेति प्रतिषेधाप्रवृत्त्या मान्तयोरपि युष्मदस्मदोरादेशसिद्धिः। युष्मयते रिति। प्रत्ययोत्तरपदयोश्चेत्यत्रैकवचनाधिकारात्त्वमौ न भवतः। इष्ठवद्भावाट्टिलोपः क्विपि णिलोपः क्वौ लुप्तं न स्थानिवदिति मान्ते युष्मदी ततः कृदन्तत्वात्स्वादयः। एकदेशविकृतस्यानन्यत्वाद्युष्मदस्मदाश्रयकार्यप्रवृत्तिः। तत्र सौ त्वमहमिति भवति द्विवचने प्रथमायां चद्विवचने भाभाम्यामिति मकारस्यात्वे प्राप्ते परत्वाद्युवावयोः कृतयोः पुनः प्रसङ्गविज्ञानादात्वे कृते युवामावामिति भवति। तृतीया

यत्रैव मान्ते युष्मदस्मदी तत्रैवादेशाः स्युः। क्वचमान्ते युष्मदस्मदी युष्मानाचष्टे अस्मानाचष्टे इति। णिचि युष्मयते अस्मयतेश्चाप्रत्यये॥ प्रत्ययोत्तरपदयोश्च॥ किमर्थमिदमुच्यते। न त्वमावेकवचन इत्येव सिद्धम्। न सिध्यति। किंकारणम्। एकवचनाभावात्। एकवचन इत्युच्यते न चात्रैकवचनं पश्यामः। प्रत्ययलक्षणेन। न लुमताङ्गस्येति प्रत्ययलक्षणस्य प्रतिषेधः। एवं तर्हि इदमिह संप्रधार्यं लुक् क्रियतामादेशा इति। किमत्र कर्तव्यम्। परत्वादादेशाः। नित्यो लुक् कृतेष्वादेशेषु प्राप्नोत्यकृतेष्वपि। अन्तरङ्गा आदेशाः। एवं तर्हि सिद्धे सति यत्प्रत्ययोत्तरपदयोस्त्वमौ शास्ति तज्ज्ञापयत्याचार्यः। अन्तरङ्गानपि विधीन् बाधित्वा बहिरङ्गो लुग् भवतीति ॥

द्विवचने युवाभ्यामावाभ्यामिति। भिसि युष्माभिरस्माभिरिति। ङे प्रत्यये तुभ्यं मह्यम् भ्यसि युष्मभ्यमस्मभ्यमिति शेषे लोप इति लोपः। पञ्चमीभ्यसि युष्मदस्मदिति मपर्यन्तापेक्षे तु शेषे आश्रीयमाणे मात्परस्यान्यस्याभावाल्लोपाभावाद्युष्मदस्मदिति भवति। इह त्वामाचष्टे मामाचष्टे इति णिचि प्रत्ययोत्तरपदयोरिति त्वमयोः प्रकृत्यैकाजिति प्रकृतिभावादसिति टिलोपे अत उपधाया इति वृद्ध्या भाव्यम्। अयत्वङ्गवृत्त इत्याश्रीयते तदा वृद्ध्यभावः। तत्र त्वद् मद् इति स्थिते मपर्यन्ताभावात्त्वाहौ सावित्यस्याप्रवर्तनाद्वृद्धिपक्षे त्वादम् मादमिति भवति तदभावे त्वदं मदमिति। केचित्तु मान्तयोर्युष्मदस्मदोरादेशान्नेच्छन्ति। मपर्यन्तग्रहणं हि यत्र परिशिष्टसद्भावस्तत्रादेशार्थमिति परिशिष्टाभावेन भाव्यमादेशैरिति ब्रुवन्ति॥ प्रत्ययोत्तरपदयोश्च॥ अन्तरङ्गानिति। नित्यादप्यन्तरङ्गो बलीयांस्तथा चोक्तम्। परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गोमत्प्रियइति।अत्रान्तरङ्गाएकपदाश्रयत्वात्सुलोपादयःस्युः।पदद्वयाश्रयत्वाद्बहिरङ्गोनुगितिगोमान्प्रियइतिस्यात्।अ
स्मिंस्तुज्ञापकेसत्यन्तरङ्गाण्यपिकार्याणिबाधित्वालुग्भवति।ततोनलुमताङ्गस्येतिप्रत्ययलक्षणप्रतिषेधान्नुम्दीर्घाभावे
गोमत्प्रियइतिसिध्यति।सुपोधातुप्रातिपदिकयोरित्यस्यैवबाधकत्वमनेनज्ञाप्यतेतस्यैवेहसंभवात्।केचित्तुसामान्यापे
क्षयाज्ञापकत्वाश्रयाल्लुङ्मात्रस्यबलवत्त्वाश्रयेणव्यवहारदर्शनाल्लुङ्मात्रंबाधकंज्ञाप्यतइत्याहुः।येऽन्यइति।एकवचना
धिकारादेकवचननिमित्तानामादेशान्तराणांत्वमौबाधकौस्यातांनतुज्ञापकावित्यर्थः।यत्तर्हीति।केचिद्व्याचक्षते।यद्यादे
शान्तराणांत्वमौबाधकौस्यातांतदामपर्यन्तग्रहणानुवृत्तिमन्तरेणोत्सर्गसमानदेशत्वादपवादानांमपर्यन्तस्यत्वमौसि
द्धावितिकिंतदनुवृत्त्या।अनुवृत्त्यातुज्ञाप्यतेप्रागेवलुकिकृतेविभक्त्यभावादसत्त्वादेशान्तरेषुत्वमौविधीयेतेइति।एतच्चा

किमेतस्यज्ञापनेप्रयोजनंगोमान्प्रियोयस्यगोमत्प्रियः।एवमत्प्रियः।गोमानिवाचरतिगोमत्यते।एव
मत्यते।अन्तरङ्गानपिनुमादीन्बहिरङ्गोलुग्बाधतइति।नैतदस्तिज्ञापकम्।अस्त्यन्यदेतस्यवचनेप्र
योजनम्।किम्।येऽन्येएकवचनादेशाःप्राप्नुवन्तितद्बाधनार्थमेतत्स्यात्।तद्यथातवपुत्रःत्वत्पुत्रःममपु
त्रोमत्पुत्रः।तुभ्यंहितंत्वद्धितंमह्यंहितंमद्धितमिति।यत्तर्हिमपर्यन्तग्रहणमनुवर्तयति।यद्यत्रान्ये
एकवचनादेशाःस्युःमपर्यन्तानुवृत्तिरनर्थिकास्यात् ॥

युक्तम्।नायंनियोगउत्सर्गसमानदेशोपवादइति।अन्मूबहुजकंचाभिन्नदेशानामप्यपवादत्वदर्शनात्।ततश्चासत्यांम
पर्यन्तानुवृत्तौआदेशान्तराणामपिबाधकौत्वमौसर्वादेशौस्याताम्।अनेकाल्त्वादितिसप्रयोजनामपर्यन्तानुवृत्तिः
तस्मादन्यथाव्याख्यायते।त्वममादयआदेशाःस्थानिप्रकृत्यर्थमिहानुवर्तन्ते।तत्रत्वादीनांप्रसङ्गेसिद्धयोस्त्वमयोर्म
पर्यन्तानुवृत्तिस्त्वयाकृतंत्वत्कृतमित्यादावप्यभवन्तौलुकोबाधकत्वंज्ञापयति।ततश्चत्वाद्यनुवृत्तिसहितामपर्यन्तानु
वृत्तिर्ज्ञापनायभवति।केवलाहिमपर्यन्तानुवृत्तिर्लाघवायस्यात्।गरीयसीहित्वाद्यनुवृत्त्यास्थानिप्रतीतिः।ततोज्ञाप
नायनप्रभवेत्तस्मात्त्वाद्यनुवृत्तिसहितामपर्यन्तानुवृत्तिर्यथोक्तप्रकारेणयथोक्तार्थज्ञापनायालम् ॥

CC-0. In Public Domain. Digitization by eGangotri

त्रिचतुरिति। स्त्रियां द्विवचन एकवचन इति ये ऽर्था निर्दिष्टास्तेषु श्रूयमाणानामेव शब्दानां विशेषणं न लङ्गस्येत्यर्थः। प्राप्तविशेषण संबन्धैस्त्रिचतुर्युष्मदस्मद्भिरङ्गं विशेष्यते। तत्र पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य ग्रहणं भवतीति केवलानां तदन्तस्य चादेशप्र वृत्तिर्द्विवचनैकवचनेच पारिभाषिके न गृह्येते किं तर्हि द्वयोर्वचनमभिधानं द्विवचनमेकस्य वचनमेकवचनमित्यर्थनिर्देशः। प्रि यतिसेति। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इत्यकृत एव तिसृभावे लुकि कृते समासाद्या विभक्तिस्तस्यां तिसृभावः। स च

त्रिचतुर्युष्मदस्मद्ग्रहणेष्वर्थग्रहणं शब्दविशेषणम्। त्रिचतुर्युष्मदस्मद्ग्रहणेषु अर्थग्रहणं शब्दविशेषणं द्रष्टव्यम्। त्रिचतुरोः स्त्रियां तिसृचतसृ। यद्यपि समासः पुंसि नपुंसके वा वर्तते त्रिचतुरौ च स्त्रियां वर्तेते भवत्येव तिसृचतसृभा वः। प्रियास्तिस्रो ब्राह्मण्यो यस्य ब्राह्मणस्य प्रियतिसा प्रियतिस्रौ प्रियतिस्रः। प्रियचतसा प्रियचतस्रौ प्रियचतस्रः। प्रि यास्तिस्रः ब्राह्मण्यो यस्य ब्राह्मणकुलस्य प्रियतिसृ प्रियतिसृणी प्रियतिसृणि। प्रियचतसृ प्रियचतसृणी प्रियचत सृणि। यदा हि समासः स्त्रियां वर्तते त्रिचतुरौ च पुंसि नपुंसके वा तदा मा भूतामिति। प्रियास्त्रयो ब्राह्मणा अस्याः ब्रा ह्मण्याः प्रियत्रिः। प्रियत्री प्रियत्रयः। प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः। प्रियाणि त्रीणि ब्राह्मणकुलानि अस्या ब्राह्म ण्याः प्रियत्रिः प्रियत्री प्रियत्रयः। प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः। युवावौ द्विवचने। यद्यपि समासः एकार्थो वा भवति बह्वर्थो वा भवति द्व्यर्थे च युष्मदस्मदौ भवत एव युवावौ। किमविशेषणेनेत्याह। यूयवयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसि इत्येतान्विधीन्वर्जयित्वा अतिक्रान्तो युवामतित्वमत्यहम्। अतिक्रान्तौ युवामति युवामत्यावाम्। अतिक्रान्ता युवामतियूयमतिवयम्। अतिक्रान्तं युवामतियुवामत्यावाम्। अतिक्रान्तौ युवामति युवामत्यावाम्। अतिक्रान्तान्युवामतियुवानत्यावान्। अतियुवयात्यावया। अतियुवाभ्यामत्यावाभ्याम्। अतियुवाभिरत्यावाभिः ॥

निर्दिश्यमानस्यादेशा भवन्तीति त्रिशब्दस्यैव भवति। प्रियतिसावितिं। अचि र ऋत इति रादेशः। प्रियतिसृ इति। कथं पुनरत्र तिसृ भावो यावता नित्यत्वात्स्वमोर्नपुंसकादिति लुकि कृते न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधेन भाव्यम्। उच्यते। इको ऽचि विभक्ताविति त्यत्राच्ग्रहणं ज्ञापकं क्वचिल्लुमतालुप्ते ऽपि प्रत्ययलक्षणस्य। तथा चहे त्रपोद्ग इति संबुद्धिगुणो भवति क्वचित्प्रियत्री ति पाठः। स प्रत्यय लक्षणप्रतिषेधाश्रयः। इतीति। एते विधयः परत्वाद्युवावयोर्बाधकाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 शेष इति वर्तत इति। अन्यथा अतिक्रान्तो युष्मानतित्वमत्यहम्। अतिक्रान्ता यूयुष्मानतितुभ्यमतिमह्यम्। अतिक्रान्तस्य युष्मा
नतितवातिममेत्यनेकार्थत्वे युष्मदस्मदोः समासे सावकाशाः त्वाहादयोः समासे समासेऽपि युष्मदस्मदोरेकार्थत्वे परत्वात्त्व
माभ्यां बाधनान्न प्राप्नुवन्ति। त्वमहं तुभ्यं मह्यं तव ममेति। शेषग्रहणानुवृत्तौ तु यत्र यूयादयो न भविता रस्तत्र त्वमौ भवतो न

अतितुभ्यमतिमह्यम्। अतियुवाभ्यामत्यावाभ्याम्। अतियुवभ्यमत्यावभ्यम्। अतियुवदत्यावत्। अतियु
वाभ्यामत्यावाभ्याम्। अतियुवदत्यावत्। अतितव अतिमम। अतियुवयोरत्यावयोः। अतियुवाकमत्यावाक
म्। अतियुवयि अत्यावयि। अतियुवयोरत्यावयोः। अतियुवासु अत्यावासु॥ त्वमावेकवचने। द्व्यपि समासः द्व्य
र्थो भवति बह्वर्थो वा एकार्थे च युष्मदस्मदी भवत एव त्वमौ किम विशेषणेनेत्याह। तानेव विधीन्वर्जयित्वा। अति
क्रान्तस्त्वां मतित्वमत्यहम्। अतिक्रान्तौ त्वामतित्वामतिमाम्। अतिक्रान्तास्त्वामतियूयमतिवयम्। अतिक्रान्तं
त्वामतित्वामतिमाम्। अतिक्रान्तौ त्वामतित्वामतिमाम्। अतिक्रान्तान् त्वामतित्वान् अतिमान्। अतित्वया अतिमया।
अतित्वाभ्यामतिमाभ्याम्। अतित्वाभिरतिमाभिः। अतितुभ्यमतिमह्यम्। अतित्वाभ्यामतिमाभ्याम्। अतित्वभ्य
मतिमभ्यम्। अतित्वदतिमत्। अतित्वाभ्यामतिमाभ्याम्। अतित्वदतिमत्। अतितवातिमम। अतित्वयोरतिम
योः। अतित्वाकमतिमाकम्। अतित्वयि अतिमयि। अतित्वयोरतिमयोः। अतित्वास्वतिमासु। यद्येवं यूयवयौ ज
सित्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसीत्येतेभ्यो विधिभ्यः परत्वात्त्वमावेकवचन इति प्राप्नोति। सावकाशा ह्ये
ते विधय इदानीं भवन्ति। कोऽवकाशः। अनेकार्थे युष्मदस्मदी त्वमावेकवचन इत्यस्यावकाशः। अन्यानि वचनानि।
एकार्थयोर्युष्मदस्मदोः। एतेषु वचनेषू   भयं प्राप्नोति। परत्वात्त्वमावेकवचन इति प्राप्नोति। नैष दोषः।
शेष इति वर्तते। कश्च शेषः। जसादिभिरव्याप्तं यदेकवचनं तस्मिन्शेषे शेषत्वान्न भविष्यति। अथवा त्वमावेकव
चन इत्यत्र यूयवयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसि इत्येतदनुवर्तिष्यते ॥

तु यूयादिविषये तत्र शेषग्रहणं लोपग्रहणसंबन्धानुवृत्त्या यूयादिभिर्न संबध्यते त्वमावेकवचन इत्यत्र तु लोपग्रहणं निवृत्तं शेषग्रहण
मनुवर्तत इति न कश्चिद्दोषः। अथवेति। वाक्यभेदेन त्वमयोर्विषये यूयादयो विधीयन्ते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिच॥ तिसृकेति। तिसृ एव तिसृका स्वार्थे कन्प्रत्ययः। ह्रस्वत्वे कृते त्त्वेऽवा विवक्षिते संज्ञायां कनिति वा। तत्र विभक्तेर्लुकि कृते
विभक्तौ विधीयमानस्तिसृभावो न प्राप्नोतीति वचनम्। तत्र केचिद्बहुवचनान्तः तिसृकाशब्दः संज्ञेत्याहुः। अपरे त्वेकवचनान्त इ
ति। ग्रामस्य ह्येकस्य तिसृकेति संज्ञेति नास्ति बहुवचनप्रसङ्गः। चतस्र इति। चतुरः शसीत्यनेन स्थानिवद्भावादन्तोदात्तत्वं प्रा
प्नोति। तत उदात्तयणो हल्पूर्वादिति शस उदात्तत्वप्रसङ्गः। चतसृणामिति। उपदेशावस्थायामाद्युदात्ते चतसृादेशे कृते षट्त्रिचतु
र्भ्यो हलादिरिति सति शिष्टस्वरः प्रवर्तते। यद्येवं चतस्रः पश्येत्यत्रापि चतुरः शसीति सतिशिष्टत्वात्प्राप्नोति। नैष दोषः। आन्तरत
म्यादाद्युदात्तत्वे सिद्धे पुनराद्युदात्तत्वं निपात्यमानं चतुरः शसीत्यनेन विधीयमानं स्थानिवद्भावात्प्राप्तमन्तोदात्तत्वं बाधते। त
त्र बाधितत्वात्पुनः प्रसङ्गाभावात्कुतः सतिशिष्टत्वम्। उक्तमिति। चतुरः शसीत्यत्र॥ हलादिग्रहणं चतस्रः पश्येत्येतद्यथा स्या

त्रिचतुरोः स्त्रियां तिसृचतसृ॥ तिसृभावे संज्ञायां कन्युपसंख्यानम्। तिसृभावे संज्ञायां कनि उपसंख्यानं कर्तव्यम्।
तिसृका नाम ग्रामः। चतसर्याद्युदात्तनिपातनं च। चतसर्याद्युदात्तं निपातनं कर्तव्यम्। किं प्रयोजनम्। चतस्रः प
श्य। शसि स्वरो मा भूदिति। किं चान्यद् उपदेशिवद्वचनं च। उपदेशिवद्भावश्च वक्तव्यः। किं प्रयोजनम्। स्वरसिद्ध्य
र्थम्। उपदेशावस्थायामेवाद्युदात्तनिपातने कृते विभक्तिस्वरेण बाधनं यथा स्याच्चतसृणामिति। स तर्ह्युपदेशिव
द्भावो वक्तव्यः। न वक्तव्यः। उक्तं वा॥ किमुक्तम्। विभक्तिस्वरभावश्च हलादिग्रहणात्। आद्युदात्तनिपातने हि हला
दिग्रहणानर्थक्यमिति ॥

र्थमेव क्रियते। यदि च निपातनस्वरेण विभक्तिस्वरो बाध्येत तदा हलादिग्रहणमन्तरेणापि विभक्तेः स्वरो न भविष्यतीति किं हलादि
ग्रहणेन तत्क्रियमाणं निपातनस्वरस्य विभक्तिस्वरो बाधक इति ज्ञापयति। अथवा हलादिग्रहणेनाद्युदात्तनिपातनमेव न कर्तव्यमि
ति प्रतिपाद्यते। यदि चतस्रः पश्येत्यत्र चतुरः शसीत्यनेनान्तोदात्तत्वं स्यात् तत उदात्तयणो हल्पूर्वादिति सादेर्विभक्तेराद्युदात्तत्व
मिति तद्वारणाय हलादिग्रहणमनर्थकं स्यात्तस्माद्धलादिग्रहणाच्चतस्रः पश्येत्यत्र चतुरः शसीत्यस्याप्रवृत्तिरध्यवसीयते। तत
श्चाद्युदात्तस्य चतुःशब्दस्याद्युदात्त एवान्तर्याच्चतसृादेशो भवति। चतुःशब्दो न्रः संख्याया इति वा चतेरुरन्निति नित्वादाद्युदात्तः।
चतसृणामित्यत्र तु षट्त्रिचतुर्भ्यो हलादिरिति विभक्तेरुदात्तत्वं भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अचिरकृतः॥ अचिरादेश इति। मध्येऽपवादा इति पूर्वसवर्णदीर्घस्य कृत उदित्तुल्लस्य च बाधः प्राप्नोति न तु जसि च कृतो ङि सर्वनामस्थानयोरिति गुणस्येति भावः। नवेति। मध्येऽपवादा इति परिभाषा नाश्रयिष्यते। विध्यन्तरपूर्वकत्वादस्य सर्वापवादत्वमित्यर्थः। गुणोऽप्यनवकाश इति। सोऽपि विध्यन्तरपूर्वकः कर्तारावित्यत्र पूर्वसवर्णदीर्घः प्राप्नोति कर्तार इत्यत्र जसि चेति गुणः सिद्धः। कर्तारमित्यत्रापि अमि पूर्व इति प्राप्नोति। तत्र द्वयोर्विध्यन्तरापवादयोरपवादविप्रतिषेधात्परत्वाद्गुणप्रसङ्गः। इतरोऽन्यविधिपूर्वकत्वाभावं गुणस्य दर्शयति। सावकाश इति। हे कर्तरिति। संबुद्धौ ह्रस्वस्य गुण इति गुणं परत्वादृतो ङीति गुणो बाधत इति मन्यते। तत्र कर्तारावित्यादौ यद्यपि परत्वात्पूर्वसवर्णादिकं बाधित्वा गुणो भवति तथापि विध्यन्तरपूर्वकेणादेशेन बलीयसा न स्पर्द्धत इति भावः। नैष इति। एतदर्थो गुणस्य नारम्भो लक्षणान्तरेण सिद्धत्वादित्यर्थः। हे मातरिति। संबु

अचिरकृतः॥ अचिरादेशे जस्युपसंख्यानं गुणपरत्वात्॥ अचिरादेशे जस्युपसंख्यानं कर्तव्यम्। तिस्रस्तिष्ठन्ति चतस्रस्तिष्ठन्ति। किं पुनः कारणं न सिध्यति। गुणपरत्वात्। परत्वाद्गुणः प्राप्नोति। तत्तर्हि कर्तव्यम्। न वानवकाशत्वादस्य। न वा कर्तव्यम्। किं कारणम्। अनवकाशत्वादस्य। अनवकाशोऽयमादेशः गुणं बाधिष्यते। सावकाशोऽयमादेशः। कोऽवकाशः। तिस्रः पश्य चतस्रः पश्य। नैषोऽस्त्यवकाशः। अत्रापि पूर्वसवर्णदीर्घः प्राप्नोति। स यथैव पूर्वसवर्णं बाधत एवं गुणमपि बाधिष्यते। गुणोऽप्यनवकाशः। सावकाशो गुणः। कोऽवकाशः। हे कर्तः। नैष सर्वनामस्थाने गुणः। कस्तर्हि संबुद्धिगुणः। अयं तर्हि हे मातः। एषोऽपि संबुद्धिगुण एव। नात्र संबुद्धिगुणः प्राप्नोति। किं कारणम्। अम्बार्थनद्योर्ह्रस्व इति ह्रस्वत्वेन भवितव्यम्। अचेर्दीर्घाणां ह्रस्ववचनसामर्थ्यान्न स्यात्। ह्रस्वानां तु खलु ह्रस्वत्वं क्रियतां संबुद्धिगुण इति। परत्वात्संबुद्धिगुणेन भवितव्यम्॥

द्धिनिमित्तो गुणोऽत्र नास्ति। अम्बार्थनद्योर्ह्रस्व इति ह्रस्वेन बाधनात्। एषोऽपीति गुणो ह्रस्वत्वं परत्वाद्बाधत इति भावः। अम्बार्थेति। अस्मिंश्चासति ऋतो ङीति गुणः प्रवर्तते। अचेर्दीर्घाणामिति। ननु दीर्घाणां ह्रस्वविधानं ह्रस्वस्य गुण इति गुणविधानार्थमेव स्यात्। ह्रस्वानां तु ह्रस्वविधानं गुणबाधनार्थं स्यात्। नैतदस्ति। एवं हि दीर्घाणामेव गुणं विदध्यात्। नदीह्रस्वयोर्गुण इति प्रक्रियागौरवमेवं परिहृतं भवति। परत्वात्संबुद्धिगुणेनेति। गुणस्यावकाशः अग्ने वायो। ह्रस्वस्यावकाशः। अम्ब अक्क। हे मातरिति परत्वाद्गुणः। एवं च सर्वनामस्थानगुणः पूर्वसवर्णापवाद एवेति अपवादविप्रतिषेधात्तिस्रस्तिष्ठन्तीति परत्वाद्गुणप्रसङ्गः। स च न जसि चेत्यनेन। किं तर्हि ऋतो ङीत्यनेन। जसि चेत्यस्मात्परत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथापीति। ह्रस्वस्य गुण इति यदि योगविभागः क्रियते। अम्बार्थस्य ह्रस्वान्तस्य ह्रस्वो भवति। ततो गुण इति। ततश्च हे मातरित्यत्र
ह्रस्वे कृते सर्वनामस्थानगुणः क्रियते। एतत्त्वाभ्युपगम्योच्यते न तु योगविभागस्य किंचिदस्ति प्रयोजनम्। सर्वनामस्थानगुण
मिति। यद्यप्यबाधिते सर्वनामस्थानगुणे जसि गुणः फलतो न बाधितस्तथापि लक्षणव्यवस्थानुसारेणैतदुच्यते। न ह्ययं यादे
शो नवकाशो यतः। ऋतो ङिसर्वनामस्थानयोरित्येतं गुणं बाधेत। जसि चेति गुणबाधनेन ऋत उदित्युत्वबाधनेन शसि पूर्वसव
र्णबाधनेन च सावकाशत्वात्। तस्मादिति। जसि ग्रहणं ङिसर्वनामस्थानोपलक्षणमित्याहुः। तथा च प्रियतिस्रावितिरादेशोभा
य उदाहृतः। तेन प्रियतिस्रि निधेहि इत्यत्रापि रादेशो भवति। केचित्त्वाहुः चतसर्याद्युदात्तनिपातनमित्यत्र वार्तिके रादेशस्य सङ्क
चकरणाज्जसोऽन्यत्र गुणविषये रादेशं वार्तिककारो नेच्छतीति नोपलक्षणं जसग्रहणम्॥ जराया॥ प्रियसक्थ्नेति। नपुंसके नाङ्गस्य
अथापि कथंचित्सावकाशो गुणः स्यात्। एवमपि न दोषः। पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त इति। एवम
यं रादेशः जसि गुणं बाधते। सर्वनामस्थानगुणं न बाधिष्यते। तस्मात्तु पृच्छ्यते अचि रादेशे जस्युपसंख्यानं गुणप
रत्वादिति॥ जराया जरसन्यतरस्याम्॥ नुमो नङ्जरसौ भवतो विप्रतिषेधेन॥ नुमोवकाशः। त्रपुणी जतुनी तुम्बु
रुणी। अनङोवकाशः। प्रियसक्थ्ना ब्राह्मणेन। इहोभयं प्राप्नोति। दध्यासक्थ्ना अनङ् भवति विप्रतिषेधेन। जरसो
वकाशः। जरसा जरसे। नुमोवकाशः। कुण्डानि वनानि। इहोभयं प्राप्नोति। अतिजरांसि ब्राह्मणकुलानि। अनङ्ज
रसौ नुमो विप्रतिषेधेन। अथेह लुक्कस्मान्न भवति। अतिजरसं पश्येति। किं पुनः कारणं द्वितीयैकवचनमेवोदाह्रि
यते न पुनः प्रथमैकवचनमपि। अतिजरसं तिष्ठतीति। अस्त्यत्र विशेषः। नात्राकृते ऽम्भावे जरस्भावः प्राप्नोति।
किं कारणम्। अचीत्युच्यते॥

विशेषणानुमोऽत्राप्राप्तिरनङि धौत्वस्यादीनी विशेषणं नपुंसके मित्यनङ् भवति। अतिजरांसीति। अतिजरसस इति स्थिते
यदि पूर्वं नुमागमः स्यात्स च पूर्वाङ्गभक्तो ऽङ्गमेवनन्यव दध्यात्। अवयवस्य तु जराशब्दस्यमवधायक इति निर्दिश्यमानस्यादे
शो विधीयमानो न प्राप्नोति। अथापि स्यात्तथापि सकारात्परस्य नुमः श्रवणं स्यात्। तस्मात्परत्वात्पूर्वं जरस्भाव एष्टव्यः। तत्र कृते झल
न्तलक्षणो नुमागमः। अतिजरसं पश्येति। अतिजरस् अम् इति स्थिते एकदेशविकृतस्यानन्यत्वाज्जरशब्दस्य जरसि कृते स्वमोर्नपुं
सकादिति स्वमोर्लुक् प्राप्नोति। ननु चातिजरशब्दस्यादन्तत्वादतोमित्यम्भावेन लुग्बाधितः कथं प्राप्नोति। नैतदस्ति। नात्राम्भावः प्रवृत्तः। परत्वा
न्नित्यत्वाद्वा जरसादेशेन बाधितत्वाज्जरसादेशे कृते ऽनकारान्तत्वादम्भावाप्रसङ्गाल्लुक्प्राप्तिश्चोद्यते। न पुनरिति। सोरपि हि लुक् नेष्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा-कै: यदाचजरसभाव इति। या पूर्वं लुक्प्राप्तिः साऽपवादेन बाध्यते। कृते तु जरसभावे सन्निपातपरिभाषया अजादिसन्निपातेन जर १२२
१०५ सभावो निष्पन्नो नोत्सहते अजादावनन्तर्यं विहन्तुम्। यद्येवमिति। सो भिस इत्याकारान्तसन्निपातेनाजादिरादेशोऽकारान्तविघा
तिनं जरसादेशं प्रति अनिमित्तं स्यात्। इष्टमिति। सन्निपातपरिभाषावशात् अतिजरसं पश्येत्यत्र तु नाकारान्तसन्निपातकृतमजा
दित्वं भवतीति भवत्येव जरसादेशः। स त्वजादिसन्निपातनिमित्तत्वादजादेर्लुकं प्रत्यनिमित्तमिति लुगभावः॥ त्यदादीनामः॥
युष्मदस्मदन्तानामिति। युष्मद् भवतु अस्मद् इति येषां गणपाठः तदपेक्षयैतदुक्तम्। यद्यप्यस्मच्छब्द एवान्तस्तथाप्यन्तसा
हचर्याच्चात्र युष्मदस्मदोर्मध्ये भवच्छब्दो निर्दिष्टः। भवदन्तानां वेति। युष्मद् अस्मद् भवतु इति पाठापेक्षमेतत्। किंशब्दस्य तु का

यदाच जरसभावः कृतस्तदा लुग् न भविष्यति। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति। यद्येवमति
जरसमतिजरसैरित्यत्र न प्राप्नोति। अतिजरमतिजरैरिति भवितव्यम्। गोनर्दीय आह। इष्टमेवैतत्संगृहीतं भ
वति। अतिजरमतिजरैरिति भवितव्यम्। सत्यामेव तस्यां परिभाषायां सन्निपातलक्षणो विधिरनिमित्तं तद्विघा
तस्येति॥ त्यदादीनामः॥ त्यदादीनां द्विपर्यन्तानामकारवचनम्। त्यदादीनां द्विपर्यन्तानामत्वं वक्तव्यम्। किं प्र
योजनम्। युष्मदस्मदन्तानां भवदन्तानां वा मा भूदिति। तत्तर्हि वक्तव्यम्। त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्म
दोः शेषे लोपस्य लोपेन ज्ञायते प्राकृततोदिति। यदयं त्यदादीनामत्वेन सिद्धे युष्मदस्मदोः शेषे लोपं शास्ति तज्ज्ञापय
त्याचार्यः प्राक्तनतः अत्वं भवतीति न सर्वेषामिति। अपि चोपसमस्तार्थमलाभावात्कृतं भवेत्। नैतदस्ति ज्ञापकम्। उपस
मस्तार्थमेतत्स्यात्। अतियूयमतिवयम्। उपसमस्तानां हि त्यदादीनामत्वं नेष्यते। अतितत् अतितदौ अतितदः॥

देशेन भवितव्यमिति त्यदादीनामन्तेऽपि किमः पाठे किमन्तानामिति नोक्तम्। केचित्तु द्विशब्दात्पूर्वं किंशब्दमधीयते। तेन किं सर्वना
मबहुस्योऽद्व्यादिभ्य इति किमो भेदेन ग्रहणं न कर्तव्यं भवति। तत्र भवच्छब्दस्यात्वापत्तिर्दोषो युष्मदस्मदोस्त्वात्वस्य लोपेऽत्वं बा
ध्यत इति दोषाभावः। शेषे लोपस्य लोपेनेति। यः शेषे लोपः प्रसिद्धस्तत्संबन्धिना लोपशास्त्रेणेत्यर्थः। क्वचित्तु शेषे रूपस्य लोपेनेति पा
ठः। तत्रायमर्थः। शेषे विषये रूपस्य लोपो विधीयते येन तेन। ततोऽदिति। वृत्तपूरणार्थस्तपरनिर्देशः। सूत्रे त्वतपर एवाकारो नि
र्दिष्टः। अपि चेति। ज्ञापकत्वं विघटयति। उपसर्जनानां त्यदाद्यत्वाभावादुपसर्जनयुष्मदस्मदर्थो लोपः स्यात्। अतियूयमिति। राम:
त्वामतिक्रान्तादिति प्रादिसमासः॥ १०५

CC-0. In Public Domain. Digitization by eGangotri

टिलोपइति। अत्वे सति टाप्प्रसङ्गात्तदभावार्थः शेषेलोपष्टिलोपः सति प्रयोजनेन ज्ञापकम्। अलिङ्गे युष्मदस्मदी इत्यनस्युपगम्यैत
दुच्यते। एकपदवाच्यस्यार्थस्य शब्दान्तराभिव्यङ्ग्यत्वं दृश्यते। अम्बुस्त्वं ग्राममिति लिङ्गवत्वं कैश्चित्तयोरभ्युपगतम्। अतएवन
पुंसकादेशेभ्यो युष्मदस्मदो विभक्त्यादेशादिति विप्रतिषेधः पठितो नपदस्वस्रादिभ्य इति च स्त्रीप्रत्ययनिषेधः षड्भ्यः कृतः। सतर्ही
ति। नन्वत्वेन सिद्धत्वाद्वचनाट्टिलोपो भविष्यति। नैतदस्ति। सर्वादेशः स्यादुपसर्जनस्य चात्वासिद्धिरुक्ता। अथवेति। उक्तमेतल्लोपस्तु
त्सर्गविधायानादेशे हलादावात्वमजादौ तु यत्वमपवादो विधास्यत इति शेषग्रहणं विभक्तिविशेषणार्थमनर्थकम्। तत्क्रियते लो
पस्य विषयार्थम पर्यन्तादेन्यः सशेषः स च टिरेव तस्य लोपस्थानी विषयस्य प्रस्यानिर्दिष्टः। नन्वेवं त्वममेत्यादावादेशे युष्म पर्यन्ता
भावात्तदपेक्षया अच्छब्दस्य शेषव्यपदेशाभावाल्लोपाभावप्रसङ्गः। नैषदोषः। प्रागादेशविधानाट्टच्छब्दः शेषत्वेन परिच्छिन्न इति प

टिलोपष्टाबभावार्थः कर्तव्य इति तस्मृतं। यस्तु शेषेलोप ष्टिलोपः स वक्तव्यः। किं प्रयोजनम्। टाप्प्रतिषेधार्थम्।
टाब्मा भूदिति। सतर्हि टिलोपो वक्तव्यः। न वक्तव्यः। अथवा शेषस्य प्रस्या शेषेलोपो विधीयते। इहयुष्मदस्मदोर्लो
पइति। इयता अन्त्यस्य लोपः सिद्धः सोयमेवं सिद्धे सति यच्छेषग्रहणं करोति तस्यैतत्प्रयोजनमवशिष्टस्य लोपो
यथा स्यादिति। लुप्तशिष्टेहि तस्याहुः कार्यसिद्धिं मनीषिणः। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न सर्वेषां त्यदादीनाम
त्वं भवतीति। यदयं किमः क इति कादेशं शास्ति। इतरथा हि किमः अद्भवतीत्येव ब्रूयात्। सिद्धे विधिरारभ्यमा
णो ज्ञापकार्थो भवति। न च किमोऽत्वेन सिध्यति। अत्वे हि सति अन्त्यस्य प्रसज्येत। सिद्धमन्त्यस्य पूर्वेणैव। तत्रार
म्भसामर्थ्यादिकारस्य भविष्यति। कुतो नु खल्वेतत्। अनन्त्यार्थ आरम्भे सति इकारस्य भविष्यति। न पुनः ककार
स्य स्यात्। यत्तर्हि किमो ग्रहणं करोति। इतरथा हि कादद्भवतीत्येव ब्रूयात् ॥

रिच्छेदासोपादानादतश्चात्वमपर्यन्तस्य। लुप्तशिष्टेहीति। लुप्तेभ्यः शिष्टस्तस्मिन् कार्यं स टाबभावस्य सिद्धिः। तवसमादिषु चादे
शेष कार उच्चारणार्थो हलन्ताएवत्वादेशादिति न क्वचिट्टाप्प्रसङ्गः। पदयमिति। किं सर्वनाम बहुभ्य इति किम् शब्दस्याभेदेनोपा
दानाद्द्विशब्दात्परः किम। शब्दो गणे पठ्यत इति निर्णयः। यदि च द्विशब्दात्परेषामत्वं स्यात्किमः कं न विदध्यात् किमद इत्येव ब्रूया
त्। पूर्वसूत्रादकारस्यानुवृत्त्या पूर्वेणान्त्यस्यात्वे कृते इकारस्य तु किमद इत्यनेन द्वयोरकारयोः पररूपेण कइत्यादेः सिद्धत्वा
त्। न पुनः ककारस्येति। अनन्त्यस्य विकारेऽन्त्यसदेशस्येति तु परिभाषा प्रयोजनाभावात्प्रत्याख्याता। कादद्भवतीति। ककारेऽका
र उच्चारणार्थः। कादित्येतावत्सूत्रं क्रियते। अकारस्तु पूर्वसूत्रादनुवर्तते। स चादेः परस्येति इकारस्य भवति। मकारस्य तु पूर्वेण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ककारमात्रादिति। कृकवाकुरित्यादावपि। नचान्यदिति। यद्यपि सर्वाणि त्यदादीन्यकचाककारवन्ति तथापि तेषां कात्परो ऽका र एवेति नास्ति विशेषः। द्विशब्दस्य तु त्यदाद्यत्वं भवत्येव। एवमपीति। विशेषस्य निश्चेतुमशक्यत्वात्प्रमाणाभावात्। साकच्का र्थ इति। सर्वस्य साकच्कस्य कादेशो यथा स्यादित्येवमर्थं किमः क इति कर्तव्यम्। तेनाज्ञातार्थविवक्षायां क इत्येव भवति न तु कक इति भवति। ननु निर्दिश्यमानस्यादेशा भवन्तीति साकच्कस्य कादेशो न प्राप्नोति। न च यक्योवक्तुं किमः क इति वचनसामर्थ्याद्भ वतीति। किम इति स्थानिनिर्देशस्योन्तरार्थत्वात्। एवं तर्हि तन्त्राश्रयणात्साकच्कस्यापि भवतीत्यदोषः। क्वाति॥ किमर्थमिति।

एवमपि ककारमात्रात्परस्य प्राप्नोति। त्यदादीनामिति वर्तते। न चान्यत्किमस्त्यदादिषु ककारवदस्ति। एव मप्यनेकान्तिकं ज्ञापकम्। एतावत्तु ज्ञाप्यते न सर्वेषां त्यदादीनामत्वं भवतीति। तत्र कुत एतद्द्विपर्यन्तानां भ विष्यति। न पुनर्युष्मदस्मदन्तानां वा स्याद्भवदन्तानां वा। किं च। अवश्यं खल्वप्युत्तरार्थं किमो ग्रहणं कर्तव्यम्। कुतिहोः क्वातीति। कादेशः खल्वप्यवश्यं साकच्कार्थो वक्तव्यः। कः। कौ के इत्येवमर्थम्। तस्माद्द्विपर्यन्तानामत्वं वक्तव्यम्। त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः शेषे लोपस्य लोपे न ज्ञायते प्राकृततो ऽदिति। अपि वोपस मस्तार्थमत्वाभावात्कृतं भवेत्। टिलोपश्चाबभावार्थः कर्तव्य इति तत्स्मृतम्। अथवा शेषसप्तम्याः शेषे लोपो विधी यते लुप्तशिष्टे हि तस्याद्धः कार्यसिद्धिं मनीषिणः॥ क्वाति॥ किमर्थं क्वादेश उच्यते। न कुतिहात्वित्येवोच्येत। का रूपसिद्धिः। क्व। यणादेशे न सिद्धम्। न सिध्यति। ओर्गुणः प्रसज्येत॥ तदोः सः सावनन्त्ययोः॥ किमर्थमन न्त्ययोरित्युच्यते। अन्त्ययोर्मा भूदिति। नैतदस्ति प्रयोजनम्। अत्वमन्त्ययोर्बाधकं भविष्यति। अनवकाशा विधयो बाधका भवन्ति। सावकाशं चात्वम्। को ऽवकाशः। द्विशब्दः। सत्वमपि सावकाशम्। को ऽवकाशः। अनन्त्यम्।

कुभावे कृते ऽङ्ग·वृत्त इति वचनाद्गुणो न भवति। यणादेशस्त्वनाङ्ग·त्वाद्भविष्यतीति भावः। न सिध्यतीति। निष्ठितस्यद्रूपज्ञा न त्वात्॥ तदोः॥ किमर्थमिति। विशेषणविशेष्यभावे कामचारात्त्यदादीनां च द्विपर्यन्तानामध्येतकारान्तस्य कस्यचिदसंभवात्त्य दादिमिर्विशेषितयोस्तदोः सत्वविधीयमानमनन्त्ययोः सावकाशं मन्त्ययोरत्वेन बाधिष्यत इति प्रश्नः। अन्त्ययोरिति पर त्वात्प्राप्नोति तकारस्यान्त्यस्यासंभवे ऽपि सूत्रे द्वयोरूपादानादन्त्ययोरित्युक्तम्। नैतदस्तीति। पूर्वविप्रतिषेधमाश्रित्य चोदयति। रामः द्विशब्द इति। उदाहरणमात्रमेतत्। अन्यत्रापि सर्व एव त्यदादयो ऽवकाशाः। सत्वमपीति। उभयोः सावकाशयोः परत्वात्सत्वप्रसङ्गः॥ १०६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंपुनरिति। आचार्यदेशीयः शिष्यबुद्धिपरिज्ञानायपृच्छति। समुदायावयवसन्निधौउभयोरनुग्रहायावयवेनसमुदायोवि
शेष्यते। एवंहिसमुदायस्यापिकार्येणसंबन्धःप्रतिपादितोभवति। अलोन्त्यस्येतिवचनादवयवस्यापिभवेदिति। व्याप्तिन्याया
श्रयणात्तकारान्तासंभवाच्च त्यदादिभिस्त "दोविशेष्यते। एवमपीति। सिद्धान्तवादी। अथवासत्वमपीतिचोदकस्यग्रन्थः। सचपू
र्वविप्रतिषेधंमन्यते। कथंपुनरिति। चोदकमाचार्योबुद्धिपरीक्षार्थंपर्यनुयुङ्क्ते। भवेदितिचोदकः। एवमपीत्याचार्यः। अथवाकथं
पुनरित्यस्यायमर्थः। अनन्त्यस्यैवकथंसत्वंलभ्यते यावताअन्त्यस्यापिपरत्वात्प्राप्नोति। चोदकस्त्वगृहीताभिप्रायआह। भवेदिति।
आचार्यःस्वाभिप्रायमाह। एवमपीति। किंचस्यादिति। अन्त्यस्यापिदस्यसत्वेहलङ्याद्लोपेनसिध्यतीतिमत्वाप्रश्नः। लोपोनस्या
दिति। सत्वेसतिह्रस्वान्तत्वाभावात्। ननुत्यदाद्यत्वेऽपिकृतेसन्निपातपरिभाषयासंबुद्धिलोपाप्रसङ्गः। अनित्यत्वादस्याःपरिभाषा

कथंपुनःसत्यन्त्येअनन्त्यस्यसत्वंस्यात्। भवेद्यस्तकारदकाराभ्यामङ्गं विशेषयेत्। तस्यानन्त्ययोर्नस्यात्। वयंतु
खल्वङ्गेनतकारदकारौविशेषयामः। एवमप्युभयोःसावकाशयोःपरत्वात्सत्वंप्राप्नोति। किंचस्यात्। यद्यन्त्ययोः
सत्वंस्याद्इहहेसइति एङ्ह्रस्वादितिसंबुद्धिलोपोनस्यात्। इहचयासा अतइतिटाबूनस्यात्। तस्मादनन्त्ययोरि
तिवक्तव्यम्। नवक्तव्यम्। एवंवक्ष्यामि। तदोःसःसौ। ततोऽदसः। अदसश्चदकारस्यसोभवतीति। इदमिदानीं
किमर्थम्। नियमार्थम्। अदसएवदकारस्यनान्यस्यदकारस्येति। यदिनियमः। द्यतेरप्रत्ययःद्यइतिप्राप्नो
ति। स्वइतिचेष्यते। यथालक्षणमप्रयुक्ते॥ अदसऔसुलोपश्च॥ अदसःसोर्भवेदौत्वंकिंसुलोपोविधीयते। अदसएवसो
र्भवेदौत्वंकिमर्थंसुलोपोविधीयते। ह्रस्वाल्लुप्येतसंबुद्धिःइहहेअसाविति एङ्ह्रस्वात्संबुद्धेरितिलोपःप्रसज्येत ॥

या नायंदोषः। इहचेति। नयासयोरितिलिङ्गआश्रीयमाणेअनेकार्थःकल्पनीयःस्यात्। ततोऽदसइति। तन्नतदोःसःसावितिवर्त
ते। नकारेःसंभवात्त्यज्यते। द्यतेरिति। द्याविच्छतीतिद्यीयति। ततः क्विप्। अकारयकारयोर्लोपास्ततःसावीकारस्यत्यदा
द्यत्वेसतिसइतिभवति। तदभावेतुद्यइतिप्राप्नोति। यथालक्षणमिति। उपसर्जनत्वान्नात्रत्यदादिकार्येणभाव्यमितिद्यीरित्येवभवति।
अथवाप्रयुक्तानामन्वाख्यानात्स्वाद्इदिशब्दस्यचक्यजन्तस्यक्विपिप्रयोगाभावान्नकेनचिल्लक्षणेनप्रवर्तितव्यम्। अदसः॥ अद
सइति। अदसःपरस्यसोरेवौत्वंविधीयताम्। तत्रत्यदाद्यत्वेवृद्धिरेचीतिवृद्धौचासाविति सिध्यति। ह्रस्वादिति। यदित्यदाद्यत्वं
क्रियतेतदाह्रस्वान्तत्वात्संबुद्धिलोपप्रसङ्गः। तस्मादौत्वसुलोपौविधीयेते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नहलइति। नायंदोषोयस्मादसौहलोलोपोविधीयते। तेनौकारस्यनभविष्यति। हेअसाविति। अत्वेटापिचसतिवार्णादाङ्गंबलीयइतिवृद्धिरेचीतिवृद्धिमेकादेशंबाधित्वाआङिचापइत्येत्त्वंप्राप्नोति। प्रश्लिष्टनिर्देशोयमिति। अकाररूपोयःश्रूयतेआपृतत्रेत्वंभवति। इहतुवृद्धौकृतायामोकाररूपस्। कारिकेति। औङआपइतिशीभावआदुणेचकृतेएकारःश्रूयतइतिइत्वन्नप्राप्नोति। संबुद्धौवाकारिकेइतिरूपम्। ननुचात्रान्तरङ्गत्वात्वाक्सुबुत्पत्तेरित्वंभविष्यति। अस्यकाविस्यन्त्रतुप्राक्सुबुत्पत्तेरिष्टास्ति। एवंतर्हिटापिकृतएकादेशात्पूर्वंवार्णादाङ्गंबलीयइतिइत्वंप्राप्नोतीत्याकाररूपएवाबितिकिंप्रश्लेषनिर्देशेनतस्मात्तासमर्थ्या

नहलः॥ हलोलोपःसंबुद्धिलोपः। तद्धल्ग्रहणंकर्तव्यम्। नकर्तव्यम्। प्रकृतंहितत्। प्रकृतंहल्ग्रहणम्। क्वप्रकृतम्। हलङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहलिति। तद्वैप्रथमानिर्दिष्टम्। षष्ठीनिर्दिष्टेनचेहार्थः। ह्रस्वादित्येषापञ्चमीहलितिप्रथमायाःषष्ठींप्रकल्पयिष्यति। तस्मादित्युत्तरस्येति। आपएत्वंभवेतास्मिन्। इहहेअसौब्राह्मणि। आङिचापःसंबुद्धौचेतिएत्वंप्रसज्येत। नझलीत्यनुवर्तनात्। झलीतितन्नानुवर्तते। क्वप्रकृतम्। सुपिचबहुवचनेझल्येदिति। प्रत्ययस्थात्ककादित्वम्। इहचअसकौब्राह्मणीतिप्रत्ययस्थात्कात्पूर्वस्येतिइत्वंप्रसज्येत। नैषदोषः। प्रश्लिष्टनिर्देशोयम्। आआप्आबिति। इहापितर्हिनप्राप्नोति। कारिके। हेहारिकेइति। शीभावश्चप्रसज्यते। इहचशीभावश्चप्राप्नोति। असौब्राह्मणी। आपउत्तरस्यऔङःशीभवतीतिशीभावःप्राप्नोति। तस्मात्सोर्लोपोवक्तव्यः। सौऔत्वप्रतिषेधःसाकच्कात्। सौऔत्वप्रतिषेधःसाकच्काद्वावक्तव्यः। साच्चपरस्यउत्वंवक्तव्यम्। असकौअसुकः। उत्तरपदभूतानामादेशउपदेशिवद्वचनम्। उत्तरपदभूतानांत्यदादीनामादेशउपदेशिवद्भावोवक्तव्यः। परमाहंपरमायंपरमानेन। किंप्रयोजनम्। अनादिष्टार्थम्। अकृतेष्वादेशेआदेशायथास्युरिति। किंपुनःकारणम्। एकादेशस्तावद्भवति। नपुनरादेशाः। नपरत्वादादेशैर्भवितव्यम्। बहिरङ्गलक्षणत्वात्॥

द्ययावार्णादाङ्गमितिबाधित्वाएकादेशोभवत्येवंकारिकेइत्यत्रापिअन्तरङ्गत्वात्पूर्वंविभक्तितन्निमित्तकार्यप्रसङ्गः। शीभावश्चेति। औङइतिवचनादौकारस्ययदाङिदादेशानुमानंवर्णमात्रनिर्देशोवाङकारस्तूच्चारणार्थस्तदाशीभावप्रसङ्गः। यदातुपूर्वसूत्रेणनिर्देशस्तदाप्रथमाद्वितीयाद्विवचनयोरेवशीभावेनभाव्यमितिदोषाभावः। इत्वमपिप्रश्लेषनिर्देशेनशक्यंपरिहर्तुम्। नचकारिकेइत्यत्रदोषः। समानकालप्राप्तिकमेवह्येकादेशमित्वंप्रतीक्षते। नतुभिन्नकालप्राप्तिकम्। साकच्कादिति। साकच्कात्सुर्विहितःतस्मिन्नित्यर्थः। प्रतिषेधसन्नियोगेनसात्परस्याकारस्योत्वंभवति॥

राम: १०७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहिरङ्गा आदेशा इति। समासाद्या विभक्तिरुत्पद्यते तदपेक्षत्वात्ततोऽन्तरङ्गत्वादेकादेशे कृते तस्यादिवद्भावादादेशेषु क्रियमाणेषु
परमहं परमपमित्यादिरनिष्टप्रसङ्गः॥ मृजे॥ कंसपरिमृड्भ्यामिति। विभक्तिमाश्रित्य वृद्धिः प्राप्नोति। क्ङिति चेति प्रतिषेधः क्ङिन्निमि
त्ताया एव वृद्धेरित्यत्र न प्रवर्तते। रज्जुसृड्भ्यामिति। प्रत्ययो झलादिरकिद्भवतीत्यमागमप्रसङ्गः। प्रणड्भ्यामिति। न शेर्वेति कुत्वम
प्यत्र न भवतीति केचिदाहुस्तदयुक्तम्। पदत्वनिबन्धनत्वादस्य प्रत्ययानपेक्षणादमस्जिनशोर्झलीति नुमागमस्तु प्रत्ययापेक्षत्वा

बहिरङ्गा आदेशाः। अन्तरङ्ग एकादेशः। असिद्धं बहिरङ्गमन्तरङ्गे। स तर्ह्युपदेशिवद्भावो वक्तव्यो न वक्तव्यः। आचार्यप्र
वृत्तिर्ज्ञापयति पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति। यदयं नेन्द्रस्य परस्येति प्रतिषेधं शास्ति। कथं कृ
त्वा ज्ञापकम्। इन्द्रे द्वाव चौ। तत्रैकोऽयस्येति लोपेनापह्रियते। अपर एकादेशेन। अनक्क इन्द्रः संवृत्तस्तत्र को वृद्धेः प्रस
ङ्गः। पश्यति त्वाचार्यः पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति। ततो नेन्द्रस्य परस्येति प्रतिषेधं शास्ति। अद
सः सोर्भवेदोत्वं किं सुलोपो विधीयते। ह्रस्वाल्लुप्येत संबुद्धिर्न हलः प्रकृतं हि तत्। आप एत्वं भवेत्तस्मिन्न झलीत्यनुवर्त
नात्। प्रत्ययस्थाच्च कादित्वं शीभावश्च प्रसज्यते॥ मृजेर्वृद्धिः॥ मृजेर्वृद्धिविधौ क्ङिति प्रतिषेधः। मृजेर्वृद्धिविधौ क्ङि[?]त्तस्य
प्रतिषेधो वक्तव्यः। कंसपरिमृड्भ्यां कंसपरिमृड्भिः। धातोः स्वरूपग्रहणे वा तत्प्रत्ययविज्ञानात्सिद्धम्। अथ धातोः स्व वा
रूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धम्। धातुप्रत्यये कार्यं भवतीति एषा परिभाषा कर्तव्या। कान्येतस्याः परिभाषा
याः प्रयोजनानि। प्रयोजनं सृजिदृशिमस्जिनशिहन्तिगिरत्यर्थम्। सृजि। रज्जुसृड्भ्याम्। रज्जुसृड्भिः। सृजि। दृशि। देव
दृग्भ्याम्। देवदृग्भिः। दृशि। मस्जि। उदकमग्भ्याम्। उदकमग्भिः। मस्जि। नशि। प्रणड्भ्यां प्रणड्भिः। नशि। हन्ति। वार्त्रघ्नः। भ्रौ
णघ्नः। हन्ति। गिरि। देवगिरौ। देवगिरः। गिरि। यदि स्वरूपग्रहणमित्युच्यते प्रसृड्भ्यां प्रसृड्भिः। अनुदात्तस्य चर्दुपधस्यान्यतर
स्यामिति अम् प्राप्नोति। एवं तर्हीयं परिभाषा कर्तव्या धातोः कार्यमुच्यमानं तत्प्रत्यये भवतीति। सा तर्ह्येषा परिभाषा कर्तव्या।
न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषा। यदयं भ्रौणहत्ये तत्वं शास्ति॥ अचो ञ्णिति॥ अज्ग्रहणं किमर्थम्॥

द्धातुप्रत्यये न भवति। वार्त्रघ्न इति। हनस्तोऽचिण्णलोरिति तत्वं न भवति। कुमति चेति णत्वं कुव्यवायेऽह्रादेशेषु प्रतिषेध इति
न भवति। देवगिरावित्ति। अचि विभाषेति लत्वं न भवति। अम् प्राप्नोतीति। तद्विधौ धातोः स्वरूपेणानुपादानात्॥ अचो ञ्णिति॥
अज्ग्रहणमिति। अन्तरेणाज्ग्रहणमिकः परिभाषोपस्थानादिगन्तस्य वृद्धिः सिध्यति। अकारस्य तु चिकीर्षक इत्यादाव …तो
लोप इति लोपेन भाव्यम्। आकारस्य तु विशेषो नास्ति सन्ध्यक्षराणामाले न भाव्यमिति प्रश्नः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कौ॰ गोऽर्थमिति। असत्यज्ग्रहणादकृपरिभाषोपस्थानाद्गौरित्यत्र वृद्धिर्न स्यात्। अथ योगविभाग इति। यद्यपि गौरित्युक्तेनोदा १२२
१०८ हरणेन योगविभागस्य प्रयोजनं ज्ञाप्यते तथाप्यनेकप्रयोजनोपन्यासाय प्रश्नप्रतिवचने। सखायाविति। सखिऔ इति स्थिते
वृद्धेरप्रसङ्गः णित्वं तु सखायइत्यत्र जसि गुणे यादेशे च कृते तं उपधाया इत्यर्थं स्यात् सखायइत्येतत्तु प्रसङ्गेनोदाहृतम्। णि
त्वावकाशदर्शनार्थं वा। अञ्जनाद्यर्थ इति। अञ्जनादिर्यः प्रत्ययः तत्र वृद्ध्यर्थः। जैत्रमिति। जियुभ्यां मौणादिकष्ट्रन्। च्यौत्नमिति। ज

वृद्धावज्ग्रहणं गोऽर्थम्। वृद्धावज्ग्रहणं क्रियते। गोतो वृद्धिर्यथा स्यात्। गौरिति। नैतदस्ति प्रयोजनम्। णित्करणसा
मर्थ्यादेवात्र वृद्धिर्भविष्यति। अस्त्यन्यणित्करणस्य प्रयोजनम्। किम्। गावौ। गाव इत्यत्रातउपधाया इति वृद्धि
र्यथा स्यात्। अथ योगविभागः किमर्थः नञ्णित्यतउपधाया इत्येवोच्येत। का रूपसिद्धिः। चायको लावकः कारकः
गुणे कृते यवोरपरत्वे चातउपधायाः इत्येव सिद्धम्। योगविभागः सख्यञ्जनाद्यर्थः। योगविभागः क्रियते सख्य
र्थोऽञ्जनाद्यर्थश्च। सख्यर्थस्तावत् सखायौ सखायः। अञ्जनाद्यर्थः। जैत्रं यौत्रं च्यौत्नम्। योगविभागे चेदानीं सखि
अञ्जनाद्यर्थे क्रियमाणेऽज्ग्रहणमपि कर्तव्यं भवति। किं प्रयोजनम्। गोऽर्थम्। ननु चोक्तं णित्करणसामर्थ्यादेवा
त्र वृद्धिर्भविष्यति। अस्त्यन्यण्णित्करणे प्रयोजनम्। किं। गावौ गावः। अवादेशे कृते तु तउपधाया इति वृद्धिर्यथा स्या
त्। यत्तु सोर्णित्करणं तदनवकाशं तस्यानवकाशत्वादेव वृद्धिर्भविष्यति। यथैव खल्वपि णित्करणसामर्थ्यादनि
को वृद्धिः प्राप्यते एवं तत्वमपि प्राप्नोति। तत्वमपि हि ञ्णित्सूच्यते तस्मादज्ग्रहणं कर्तव्यम्। तद्धितेषु॥ अज्ग्रह
णं कर्तव्यम्। ननु च क्रियत एव। द्वितीयं कर्तव्यम्। यथा चामादि ग्रहणमज्विशेषणं विज्ञायेत अचामादेरचइ
ति। अथाज्ग्रहणेऽक्रियमाणे कस्याचामादिग्रहणं विशेषणं स्यात् ॥

निदाघ इतित्वम्। तत्वमिति। हनस्तोऽचिण्णलोरिति हन्तेरुच्यमानं गोरपि स्यात्। नैष दोषः। प्रापदित्यज्ग्रहणं क्रियते॥ तद्धि॥ अ
ज्ग्रहणं कर्तव्यमिति। अचामित्यनेन निर्धारणषष्ठ्यन्तेन सामानाधिकरण्येनादेर्विशेषयितुमशक्यत्वादिकृपरिभाषोपस्थाना
दिक एवाचो वृद्धिप्रसङ्गः। अथाक्रियमाण इति। निर्धारणं तुल्यजातीयस्य भवति यथा कृष्णा गवां संपन्नक्षीरतमेत्युक्ते गौरेव प्रती रा॰म॰
यते तथा चाचामादिरजेव प्रत्येष्यत इति भावः ॥ १०८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इग्विशेषणमिति। तुल्यजातीयनिर्द्धारणेऽपि इकस्तुल्यस्योपस्थानेन न निवार्यते। अज्ग्रहणे तु नियमार्थे निर्दिष्टस्थानिकत्वादिकः परिभाषानुप
स्थानं यथाऽचो ञ्णितीत्यत्र। अज्मात्रस्येति। नन्वज्ग्रहणसामर्थ्यादज्मात्रस्य न भविष्यति। तत्सामर्थ्यात्तर्हि निवृत्तिरेवाज्ग्रहणस्य स्यान्नियमा
र्थं वाऽज्ग्रहणं स्यात्। अकारस्येव ह्रस्वस्य नान्यस्येति दीर्घस्य वीहकइत्यादावुपधायाः स्यादेव। अकारेणेति। विशेषणस्याजन्तरनिवृत्तिः
प्रयोजनम्। अथवैकयोग इति। एको भवतिरध्याह्रियते तेन तुल्यकालत्वाद्विधानस्य स्वकार्ये व्यापाराद्न्यत्रोपस्थानाभावः। क्रौष्टुरिति। क्रो
ष्टुर्विशेषणमित्याह। अचामादेरिकइति तत्र को दोषः इहैव स्यात्। औपगवः इह न स्यात्। गार्ग्यो वात्स्य इति। तन्नार्थोऽज्ग्रहणं कर्तव्यम्।
न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। अचो ञ्णितीति यदि तदनुवर्तते ऽत उपधाया अचश्चेति। अज्मात्रस्य उप-
धाया वृद्धिः प्रसज्येत भेदं छेदमिति। अकारेण तपरेण चं विशेषयिष्यामः अचः अत इति। इहेदानीमच इत्यनुव
र्तते अत इति निवृत्तम्। अथवा मण्डूकगतयोऽधिकाराः। तद्यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः। अथवै
कयोगः करिष्यते अचो ञ्णित्यत उपधायाः। ततस्तद्धितेष्वचामादेरिति। न चैकयोगेऽनुवृत्तिर्भवति। तद्धितेष्वचामादेर्वृ
द्धावन्त्योपधालक्षणप्रतिषेधः। तद्धितेष्वचामादेर्वृद्धौ अन्त्योपधालक्षणाया वृद्धेः प्रतिषेधो वक्तव्यः क्रौष्टुः। जागत इति। ननु चा
चामादिवृद्धिरन्त्योपधालक्षणां वृद्धिं बाधिष्यते। कथमन्यस्योच्यमानाऽन्यस्य बाधिका स्यात्। असति खल्वपि संभवे बा
धनं भवति अस्ति च संभवो यदुभयं स्यात्। लोकविज्ञानात्सिद्धम्। सत्यपि संभवे बाधनं भवति। तद्यथा। दधि ब्राह्मणेभ्यो
दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति एवमिहापि सत्यपि संभवेऽचामादिवृद्धि
रन्त्योपधालक्षणां वृद्धिं बाधिष्यते। विषम उपन्यासः। नाप्राप्ते दधिदाने तक्रदानमारभ्यते तत्प्राप्ते आरभ्यमाणं बा
धकं भविष्यति। इह पुनरप्राप्तायामन्त्योपधालक्षणायां वृद्धौ अचामादिवृद्धिरारभ्यते। सुस्रुत्। सौस्रुत इति।

इह शब्दात्तजन्तात्तस्येदमित्यण्। जागत इति। जगच्छब्दादण्। ननु चाचामादिवृद्धिरिति। अङ्का। येमन्यते तत्र तक्रकौण्डिन्यन्यायावतारस्त्वि
तरस्तु स्थानिभेदं मत्वाह। कथमन्यस्येति। आमलकीजइत्यादावन्यस्याऽपि स्वरो विधीयमानोऽन्यस्य स्वरं बाधत एवेत्याशङ्क्याह। असति-
खल्वपीति। लोकविज्ञानादिति। अङ्गीकार्यि तदेवावयवद्वारेण संक्षिप्यते। तत्रैकस्य कार्यद्वयं न प्रवर्तते। कौण्डिन्य इव दधितक्रं च
। नाप्राप्त इति। सामान्यविशेषभावो बाधहेतुः स चेह नास्ति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰वे॰ पुष्करसद्ग्रहणं द्वेति। वाशब्दस्त्वर्थे। पूर्वस्य हेतोरनवस्थितत्वात्। ननु च ठगर्थः पुष्करसदः पाठः स्यात्। पुष्करसद॑दाचरति पौष्करसादिक इति। ७२१
१०९ ज्ञायत उपधाया इति वृद्धेर्विधानाट्ठक्यप्रसङ्गात्। एवं तर्हि ठगतो ऽनभिधानान्न भवति। यद्वा प्रतिपदविहित इत्येव पुष्करसद उभयपदवृ
द्धिर्नान्यत्र केचिदाहुः। लोकविज्ञानात्सिद्धमिति वार्तिककारस्य विप्रतिषेधो विवक्षितो यथाश्वलचोर्नुम् विधावुगित्प्रतिषेधात्सिद्धमिति।
अन्त्योपधालक्षणाया वृद्धेरवकाशः गौः पाचक इति। अस्या अवकाशः सौश्रुत इति। कौष्ट्र जागत इत्यत्रोभयप्रसङ्गे परत्वादादिवृद्धिर्भ
वति सकृद्गतपरिभाषाश्रीयते न नु पुनः प्रसङ्गविज्ञानम्। एवं च पुष्करसद्ग्रहणं द्वेति विकल्पार्थ एव वाशब्दो बाधकत्वसामान्याभिप्रा
येण च शास्त्रविज्ञानमेव लोकविज्ञानमुक्तम्। अथ यत्रादिवृद्धिः प्रतिषिध्यते तत्रान्त्योपधालक्षणा कस्मान्न भवति। व्यसो र्भावो वैयसव

पुष्करसद्ग्रहणाद्वा। अथवा यदयमनुशतिकादिषु पुष्करसच्छब्दं पठति तज्ज्ञापयत्याचार्यो ऽचामादिवृद्धावन्त्यो
पधालक्षणा वृद्धिर्न भवतीति। इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमाध्यायस्य द्वितीये
पादे द्वितीयमाह्निकं पादश्च समाप्तः॥ देविका॥ देविकादिषु तदादिग्रहणम्। देविकादिषु तदादिग्रहणं कर्तव्यम्।
इहापि यथा स्यात् दाविकाकूलाः शालयः शांशपास्थला देवाः। किं पुनः कारणं न सिध्यति। अन्यत्र तदन्तग्रहणात्तदन्तग्रहणा
द्वा। अन्यत्र हि तस्य वाग्रहणं भवति तदन्तस्य वा। न चेदं तद् नापि तदन्तम्। आद्यज्विशेषणत्वात्सिद्धम्। आद्यज्विशेष
णं देविकादयः। नैवं विज्ञायते देविकादीनामङ्गानामचामादेराकारो भवतीति। कथं तर्हि ञ्णित्यङ्गस्याचामादेर
च आकारो भवति स चेद्देविकादीनामाद्यज्भवतीति।

मिति इगन्ताच्चेत्यण्। व्यापदिमवं वैयापदमिति। अत्राप्यैचौ परत्वाद्बाधकाविति सर्वेष्टसिद्धिः। इत्युपाध्यायजैयटपुत्रकैयटकृ
ते महाभाष्यप्रदीपे सप्तमाध्यायस्य द्वितीयपादे द्वितीयमाह्निकं पादश्च द्वितीयः। देविका। शिंशपादित्यवाट्दीर्घसत्रश्रेयसामात्
देविकादिष्विति। विशेषणविशेष्यभावे कामचाराद्यदाङ्गेन देविकादीनि विशेष्यन्ते तदा तेषामङ्गमन्ते न सम्भवतीति तदन्तविध्य
भावादङ्गानि देविकादीन्याश्रीयन्ते। यदा तु देविकादिभिरङ्गं विशेष्यते। तदा तदन्तविधिना देविकाद्यन्तमङ्गं गृह्यते। न तु कथंचित्तदादि
विधिसंभव इति तदादिग्रहणं कर्तव्यम्। तत्र केवलानां देविकादीनां तदादीनां चाकारो भवतीति वक्तव्यम्। अन्यथा केवलानां न स्यात्। रामः
दाविकमुदकं शांशपस्थमसदिति। न च व्यपदेशिवद्भावोऽस्ति। अप्रातिपदिकेनेति प्रतिषेधात्। यदि तु प्रत्ययविधिविषय एवायं निषेधस्तदा १०९
केवलानां व्यपदेशिवद्भावात्सिध्यति। आद्यज्विशेषणमिति। अङ्गस्य देविकादिभिः संबन्धाभावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तरतमनिवर्तकत्वादिति। ग्लाति कितीति वर्तते। तत्र स्थानेऽन्तरतम इति वचनादैकारो वृद्धिसंज्ञः प्राप्त आदिति वचनेन निवर्त्यते। नन्वपूर्व आकारो विधीयते। अनेन हि स्थानेऽन्तरतम इति नियमं बाधित्वा नियमान्तरं क्रियते देविकादीनामाकारो वृद्धिर्नान्या॥ परिहारान्तरमिति। परिभाषेयम्। देविकादीनां वृद्धिर्विधीयमानाकार एव भवतीति केवलानां तदादीनां च वृद्धिर्देविकादीनां भवतीति तत्रैव परिभाषाप्रवृत्तिः। सुदेविकायां तु या वृद्धिर्न सा देविकादिशब्दस्य किं तु तदन्तस्येति परिभाषानुपस्थानादैकार एव भवति। यथोद्देशं परिभाषाश्रीयते। न कार्यकाला अन्यथाऽङ्गप्रकरणे देविकादीनामादित्यस्योपस्थानाद्व्याप्स्यति व्याप्स्योः पूर्ववदन्यतरप्रसङ्गः स्यात्। इह तु प्रदेशे सूत्रे क्रियमाणे। विधिरेवाका

अन्तरतमनिवर्तकत्वादित्याह। अथवा नानेनानन्तरतमा वृद्धिर्निवर्त्यते किं तर्ह्यन्तरतमानेन निवर्त्यते। सिद्धात्र वृद्धिस्तद्धितेष्वचामादेरित्येव तत्रानेनान्तरतमा वृद्धिर्निवर्त्यते॥ परिहारान्तरमेवेदं मत्वा पठितं कथं चेदं परिहारान्तरं स्याद् यदि नाद्यज्विशेषणं देविकादयः। अवश्यं चैतदेवं विज्ञेयमाद्यज्विशेषणं देविकादय इति। यदि नाद्यज्विशेषणं देविकादयः सुदेविकायामपि प्राप्नोति सुदेविकायां भवः सौदेविक इति। अथात्राप्याद्यज्विशेषणत्वादित्येव सिद्धं परिहारान्तरं न भवति ननु नासौ यत्र क्रियमाणे दोषस्तत्र कर्तव्यमिति किं तर्हि यत्र क्रियमाणे न दोषस्तत्र कर्तव्यं क्व च क्रियमाणे न दोषः संज्ञाविधौ वृद्धिरादैजिति देविकादीनामाकार इति सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं देविकादिषु तदादिग्रहणमन्यत्र तदन्तग्रहणादिति तदन्तग्रहणे हि विपरिहृतमेतत्। आद्यज्विशेषणत्वात्सिद्धम्। न्यग्रोधे च केवलग्रहणात्। न्यग्रोधे च केवलग्रहणान्न्यामहे आद्यज्विशेषणं देविकादय इति। तस्य केवलग्रहणस्यैतत्प्रयोजनम् इह माभूत् न्याग्रोधमूलाः शालय इति। यदि चाद्यज्विशेषणं देविकादयस्ततः केवलग्रहणमर्थवद्भवति॥

रस्य भवति। अर्थात्त्वैकारस्य निवृत्तिरिति नायं परिहार उपपद्यते अन्तरतमनिवर्तकत्वादिति। सूत्रं तर्हीति। अष्टाध्यायीलक्षणं सूत्रं संनिवेशान्तराश्रयणेन भिद्यते। अथवा तस्यैव सूत्रस्य स्थानभेदाद्भेदो भवति। आद्यज्विशेषणत्वादिति। द्वितीयः परिहारो दूषितः पूर्व एव सुस्थितः। अत्रैवार्थे लिङ्गदर्शनम्। न्यग्रोधे चेति। केवलग्रहणमिह प्रकरणे गृह्यमाणमाद्यज्विशेषणमिति ज्ञापयति। अन्यथा तदनर्थकं स्यात्। न च तदन्तविधिनिरासार्थं अङ्गेन न्यग्रोधस्य विशेषणात्तदन्तविधेरप्रसङ्गात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदेतदिति। अव्युत्पत्तिपक्षे न्यग्रोधस्य केवलस्येति वृद्धिनिषेधस्यैचश्चविधायकमिति केवलग्रहणं ज्ञापकार्थं भवति। व्युत्पत्तिपक्षे तु नय्वाभ्यामिति सिद्धे केवलस्यैव न्यग्रोधशब्दस्य यथा स्यात्। न्यग्रोधमूलाः शालय इत्यादौ मा भूदिति नियमार्थं केवलग्रहणं न ज्ञापकं भवति। नहि न्यग्रोधस्येत्येतावताऽभिमतनियमसिद्धिः। नन्वङ्गस्यैव न्यग्रोधस्य नाङ्गादेरित्येवमिष्टो नियमः सिध्यत्येव। नैतदस्ति। अनिष्टोऽपि नियमः स्यात्। न्यग्रोधस्यैव निरवच्छिन्नात्परस्य वृद्धिप्रतिषेध इति। तथा च नैयायिको नैयासिक इत्यादौ न स्यात्। तस्मात् केवलग्रहणमभिमतनियमसाधनाय। श्वादेरित्ययं तु निषेधउक्तार्थे ज्ञापको भवति। वहीनरस्येति। वहोऽस्यास्तीति वहः स चासौ नरश्चेति कर्मधारयसमासोऽन्येषामपि दृश्यत इति दीर्घः। तस्यापत्यमतइञ् तत्रादिवृद्धेरपवाद इकारो विधीयते। इकारस्य वृद्धिर्भवत्येव न च तस्यां प्राप्तायामित्वं विधीयते। यतः सापि बाध्येत विहीनो नर इति। पृषोदरादित्वाल्लोपः। नय्वाभ्याम्। य्वाभ्यां पदान्ताभ्यां पूर्वौ वैजित्येवं सूत्रं कार्यं नार्थो वृद्धिनिषेधेन। अ

न्तरेतत्कथं कृत्वा ज्ञापकं यदि न्यग्रोधशब्दोऽव्युत्पन्नं प्रातिपदिकं भवति। अथ हि न्यग्रोहतीति न्यग्रोधः ततो नियमार्थं पदान्त इति कृत्वा न ज्ञापकं भवति। वहीनरस्येद्वचनम्। वहीनरस्येत्वं वक्तव्यम्। वहीनरस्यापत्यं वैहीनरिः। कुरारवाडवस्याहने यवहीनरः कस्तर्हि विहीनरएषः। विहीनो नरः कामभोगाभ्यां विहीनरः। विहीनरस्यापत्यं वैहीनरिः। नय्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्। य्वाभ्यां परस्य वृद्धित्वम्। य्वाभ्यां परस्य वृद्धित्वं सिद्धम्। कुतः। अपवादो हि वृद्धेर्हि तौ। अपवादो वृद्धेस्तावैचावुच्येते। नित्यावैचौ तयोर्वृद्धिः। अथवा नित्यावैचौ कृतायामपि वृद्धौ प्राप्नुतः अकृतायामपि। नित्यत्वादैचोः कृतयोः यद्यपि वृद्धिस्तयोरेव। किमर्थं ने निशिष्यते। अथ किमर्थं प्रतिषेध उच्यते। ऐचोर्विषयार्थं प्रतिषेधसन्नियुक्तं वचनम्। ऐचोर्विषयार्थं प्रतिषेधसन्नियोगेनैवैचावुच्येते यत्र य्वाभ्यां परा वृद्धिस्तत्राध्यश्वे यथा न तौ।

पवादावितिं। एकस्मिन्नङ्गविशेषे विधीयमानावैचौ सामान्यविहितायावृद्धेर्बाधकौ। सत्यपि संभवे सामान्यविशेषविषयत्वेन बाध्यबाधकभावदर्शनात्। इदानीं विषयभेदादसत्यप्यैज्वृद्ध्योर्बाध्यबाधकत्वे प्रतिविधातुमाह। यद्यपीति। अभ्युपगमवादेनोच्यते नहि वृद्धौ सत्यां सर्वेष्टसिद्धिः। वैयाकरणभार्य इत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधप्रसङ्गात्। तस्माच्छब्दान्तरप्राप्तां वृद्धिमनित्यां बाधित्वा नित्यावैचौ भविष्यतः। बाधितत्वाच्च पुनर्वृद्धिर्न भविष्यतीत्यभ्युपेयम्। ऐचोर्विषयार्थमिति। याभ्यां य्वाभ्यां परस्य वृद्धिः प्राप्ता निषिध्यते ताभ्यां पूर्वावैचौ यथा स्यातां नान्याभ्यामा भूतामित्येवमर्थं प्रतिषेधविधानम्। आध्यश्वेर्येथान तावितिं। स्यातामिति वाक्यशेषः। अध्यारूढोऽश्वमिति प्रादिसमासः। अतइञ्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असत्यपि निषेधविधाने दोषं परिहर्तुमाह। अचामादेरिति। अचामादेरचः स्थाने यौ यौ ताभ्यां पूर्वौ भवतः स्यात्। यथा यो आव्यश्विरित्यादा
वैचोरसङ्गः। द्व्याशीतिकद्रव्यमिति। द्वे अशीती भृत इति तद्धितार्थे समासः ततष्ठञ्। अध्यर्धपूर्वद्विगोरित्यत्राऽऽर्हादित्यधिकाराल्लुङ् न भवति। अ
चामादेरचो यकारस्य विधानात् ततः पूर्व ऐकारः प्राप्नोति। नाविति। द्विवर्षं द्व्याशीतिकस्योपलक्षणत्वादुपात्तम्। यद्यपि य्वोरचामादेरनावि
शेषणभावेऽप्यत्र दोषस्तथापि विशेषणे सर्वं न सिध्यतीति प्रतिपादनायेदमुच्यते। एतत्परिहरति। यत्रेति। अचामादेरिति या वृद्धिः प्राप्नोति तदप
वादावैचौ विधीयेते। अत्र तु संख्यायाः संवत्सरसंख्यस्येति वृद्धिर्विधीयते। अचामादेरिति वर्तते। तत्रेणानन्तरे अचामादेरित्येतदाश्री
यते। तत्रैकं स्वरूपपरम्। तेनाचामादेरित्येवं या वृद्धिस्तस्यां प्राप्तायां तदपवादावचामादेः स्थाने य्वाभ्यां पूर्वावैचौ भवत इत्यर्थः संपद्यते। उत्त

यत्र य्वाभ्यां परस्या वृद्धिरनुच्यते तत्रैचौ यथा स्यातामिह माभूतामिति। आव्यश्विः माव्यश्विरिति। नैतदस्ति प्रयोजनम्। अ
चामादेर्य्वाभ्यां हितौ। अचामादिनात्र य्वौ विशेषयिष्यामः अचामादेर्यौ य्वाविति। कथं द्व्याशीतिकेन तौ। द्व्याशीतिकइ
त्यत्र कस्मान्नैतौ भवतः। यत्र वृद्धिरचामादेस्तत्रैचावनयोर्हि सा। यत्राचामादेरित्येवं वृद्धिस्तत्रैचावुच्येते अत्र चोरित्येवं वृ
द्धिः। किमिदं चोरिति उत्तरपदस्येति। उत्तरपदाधिकारेऽप्यवश्यमेजागमोऽनुवर्त्यः। पूर्वत्र पूर्वत्रेयतिन्दइत्येवम
र्थम्। नैष दोषः। उत्तरपदेनात्राचामादिं विशेषयिष्यामः। अचामादिना चोत्तरपदस्याचामादेर्यौ य्वाविति। अथ कस्मात्प
दान्ताभ्याम्। अथ किमर्थं पदान्ताभ्यामित्युच्यते। यथेयोनभवेद्यणः इणो यणादेशे माभूत्। यतस्त्वात्रायाताविति। इह वै
याकरणः सौवश्वइति शाकलं प्राप्नोति यो य्वस्थानिवद्भावादयावौ प्राप्नुतः। शाकलायावादेशेषु चोक्तम्। किमुक्तम्। इग्यणः क
लेतावदुक्तम्। सिन्नित्यसमासयोः शाकलप्रतिषेध इति। आयावोः किमुक्तम्। अचः पूर्वविज्ञानादैचोः ... सिद्धमि
ति। य्वाभ्यां परस्या वृद्धित्वमपवादो वृद्धेर्हि तौ। नित्यावैचौ नयोर्वृद्धिः किमर्थं नेति शिष्यते।

रपदाधिकारेऽपीति। न यावद्व्याशीतिके दोषः। पूर्वत्रैयतिन्द इति। प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः प्राप्ता निषिध्यते नैष दोष इति। द्व्याशी
तिकइत्यत्र। नद्वेवनेतिप्रत्याख्यातम्। यातादिति। अचामादेरचः स्थाने भवत्ययं यकार इतिऐच्प्राप्नोति। ननु चान्तरङ्गत्वात्पूर्वमेव यणा भाव्य
म्। इहापि व्याकरणं सौवश्वइति पूर्वमेव यणा भवति। ततो यथाभूतपूर्वगत्यात्राचामादेर्यऐ भवतस्तया वणादेशो भवतीत्यदोषः। अचः पूर्व
विज्ञानादिति। योऽनादिष्टादचः पूर्वस्तस्य विधौ स्थानिवद्भावइत्यर्थः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का. कौ द्वार। पूर्वसूत्रे वृद्धिनिषेधः प्रतिपत्तिलाघवाय कृतो नत्वेदैर्नानामादेरित्यनेनोभयं विशेषयितुं शक्यम्। नापप्रतिषिध्यमानाद् वृद्धिरचामा ७ ३ १
१११ देरित्यनेन शक्या विशेषयितुमिति। यथान्यासं प्रतिषेधमाश्रित्य विचारितो। परस्येति। यदीति। यत्रैव वृद्धिप्रतिषेधस्तत्रैवेज्भ्यां भाव्यं नान्यत्रा
शौवमिति। शुनो विकार इति प्राणिरजतादिभ्योऽञित्यञ्। श्वनूशब्दस्य तु पाठस्तदाद्यर्थः। श्वाच्छौवहानमिति। यावन्तो यण इति। अपदान्ता
र्थत्वात्सर्वेभ्यो यण्भ्यः पूर्वावैचौ प्राप्नुतः। प्रतिषेधे तु विधीयमाने ताभ्यां य्वाभ्यां परस्य वृद्धिप्रतिषेधस्ताभ्यां पूर्वावैचाविति नास्ति स
र्वप्रसङ्गः। प्रकृत्यैकाजिति। दृष्टे मेयः सुप्रकृतिभावः। तथा च स्त्रा रेवतास्य त्र्र्त्यत्रन भवति। इह त्वविशेषेण प्रकृतिभावमाश्रित्यैतदुक्त
म्। परिहारदिक्प्रदर्शनार्थम्। अत्र हि परत्वाट्टिलोपेन्तावाचा वृद्धिः प्राप्ता प्रतिषिध्यत इति भवत्यैजागम इत्ययमत्र परिहारः। सुष्ठु वा अध्य

यत्र य्वाभ्यां परा वृद्धिस्तत्राध्यन्वेयथा न तौ। अचामादेर्य्वाभ्यां हि तौ कथं द्वाशीतिके न तौ। यत्र वृद्धिरचामादेस्तत्रैचा
वत्र सोद्दिष्टा। अथ कस्मात् तदानाभ्यां यथेरो न भवेद् यणः॥ द्वार॥ अथ परस्याद् वृद्धिरित्यनुवर्तते उताहो न। किं चातः। य
द्यनुवर्तते शौवमांसं टिलोपे कृते ऐजागमो न प्राप्नोति॥ अथ निवृत्तं स्वाध्यायशब्दो द्वारादिषु पठ्यते तत्र यावन्तो
यणः सर्वेभ्यः पूर्वे ऐजागमः प्राप्नोति। यथेच्छसि तथास्तु। अस्तु तावदनुवर्तते। कथं शौवमांसम्। आनुपूर्व्यात् सिद्धमेतत्। ना-
न्तस्य टेर्ऐजागमे टिलोपः प्राप्नोति। किं कारणम्। प्रकृत्यैकाजिति प्रकृतिभावेन भवितव्यम्। तदेतदानुपूर्व्यात् सिद्धम्। अथवा पुन
रस्तु निवृत्तम्। ननु चोक्तं स्वाध्यायशब्दो द्वारादिषु पठ्यते। तत्र यावन्तो यणः सर्वेभ्यः पूर्वे ऐजागमः प्राप्नोतीति। कः पुनरर्हति स्वा
ध्यायशब्दं द्वारादिषु पठितुम्। एवं किल पठ्येत स्वमध्ययनं स्वाध्याय इति। तच्च न। सुष्ठु वा अध्ययनं स्वाध्यायः। शोभनं वा अ
ध्ययनं स्वाध्यायः। अथापि स्वमध्ययनं स्वाध्यायः। एवमपि न दोषः। अचामादेरिति वर्त्तते॥ श्वादेः॥ श्वन्शब्दो द्वारादिषु पठ्य
ते। तत्र कः प्रसङ्गो यत्तदादेः स्यात्। नैव प्राप्नोतीति नार्थः प्रतिषेधेन तदादिविधिना प्राप्नोतीति न वैतदादिविधिरस्ति। अत उत्तरं पठति
प्रतिषेधे श्वादिग्रहणं ज्ञापकमन्यत्र श्वन्ग्रहणे तदादिग्रहणस्य शौवहानाद्यर्थम्।

यनमिति। अन्येषामपि दृश्यत इति दीर्घः। आङ् वा मध्यमक्षेप्तव्यः। अचामादेरिति निवर्तत इति। तत्रैवं संबन्धोऽचामादेरनन्तरयोर्य्वोस्ताभ्यां पूर्वावै
चौ भवत इति तेन स्वाध्यायशब्दे वकारात् पूर्व ऐज् भवति न तु यकाराभ्यामित्यर्थः। यद्यपि स्वोऽध्यायः स्वाध्याय इत्यस्यामपि व्युत्पत्तौ स्वाध्याय
शब्दो न पठितव्यः स्वशब्दस्येह पाठात्तदादिविधेश्चेष्टत्वात्तथाऽपि पाठेऽपि दोषो नास्तीति प्रदर्शनाय भाष्यकारेण पाठमभ्युपगम्य परिहारोऽ रामः
भिहितः॥ श्वादेः॥ तदादिविधिनेति। आद्यज्विशेषणत्वाद् द्वारादीनां तदादिविधिरस्ति। इतरस्त्वगृहीताभिप्राय आह। नैव तदादिविधिर १११
स्तीति। श्वन्ग्रहण इति। श्वन्ग्रहणस्योपलक्षणार्थत्वादेतत्प्रकरणनिर्दिष्टैदैविकादिभिर्द्वारादिभिः श्वादेरचो विशेषणात्तदादिविधिर्भ
वतीति ज्ञाप्यते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शौवहानमिति। जिहतेऽस्मिन्निति ल्युट्। श्वुनां हानमिति षष्ठीसमासः। श्वहानमस्मिन्नस्तीति तदस्मिन्नस्तीति देशे तन्नाम्नीत्यण्। वृद्धिनिषेधः। ऐजागमश्च द्वारादित्वात्। शौवादंष्ट्र इति। श्वुनोर्दंष्ट्रा श्वादंष्ट्रा। श्वुनोर्दन्तदंष्ट्रेति दीर्घः। तत्र भव इत्यण्। संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावो न भवति। इकारादिग्रहणमिति। श्वादेरितीति तत्त्वं कर्तव्यम्। तत्र यस्मिन्विधिस्तदादावल्ग्रहण इति तदादिविधिर्भवति। श्वागणिक इति। श्वगणाट्ठञ्चेति ठञ्। तदन्तस्येति। इञन्तस्य। श्वाभस्त्रमिति। इञश्चेत्यण्। बाह्यतद्धितनिमित्तो वृद्धिप्रतिषेध ऐजागमश्च बहिरङ्गत्वाद् शक्य इञाश्रयेण निषेधेन निवारयितुमिति वचनारम्भः॥ उत्तरपदस्य॥ किमर्थमिति। तस्मादित्युत्तरस्येति वचनादुत्तरपदस्यैव वृद्धिर्भ

प्रतिषेधे श्वादिग्रहणं क्रियते ज्ञापकार्थम्। किं ज्ञाप्यम्। एतज्ज्ञापयत्याचार्यः अन्यत्र श्वन्ग्रहणे तदादिविधिर्भवतीति॥ किमेतस्य ज्ञापने प्रयोजनम्। शौवहानाद्यर्थम्। शौवहानं नगरं शौवादंष्ट्रो मणिरिति। इकारादिग्रहणं च श्वागणिकाद्यर्थम्। इकारादिग्रहणं च कर्तव्यम्। किं प्रयोजनम्। श्वागणिकाद्यर्थम्। श्वगणेन चरति श्वागणिकः। तदन्तस्य चान्यत्र प्रतिषेधो वक्तव्यः। श्वाभस्त्रेः स्वं श्वाभस्त्रम्॥ उत्तरपदस्य॥ किमर्थमिदमुच्यते। अवयवादृतोरिति वक्ष्यति तदुत्तरपदस्य यथा स्यात्। अचामादेर्मा भूत्। नैतदस्ति प्रयोजनम्। अवयवादिति पञ्चमी तत्रान्तरेणाप्युत्तरपदग्रहणमुत्तरपदस्यैव भविष्यति। उत्तरार्थं तर्हि सुसर्वार्धाज्जनपदस्येति। सुसर्वार्धादिति पञ्चमी। दिशोऽमद्राणां दिश इति पञ्चमी॥ प्राचां ग्रामनगराणाम्। दिश इत्येव। संख्यायाः संवत्सरसंख्यस्य च। संख्याया इति पञ्चमी। वर्षस्याभविष्यति। संख्याया इत्येव। परिमाणान्तस्यासंज्ञाशाणयोरिति। संख्याया इत्येव। इदं तर्हि प्रयोजनम्। जे प्रोष्ठपदानामुत्तरपदस्य यथा स्यात् पूर्वपदस्य मा भूत्। प्रोष्ठपदासु जातः प्रोष्ठपादो ब्राह्मणः। तद्धितेष्वचामादिवृद्धेरुत्तरपदवृद्धिर्विप्रतिषेधेन द्व्याशीतिकाद्यर्थम्। तद्धितेष्वचामादेरुत्तरपदवृद्धिर्भवति विप्रतिषेधेन। किं प्रयोजनम्। द्व्याशीतिकाद्यर्थम्।

विष्यतीति प्रश्नः। आचार्यस्तु शिष्यबुद्धिपरीक्षार्थमाह। अवयवादृतोरिति। जे प्रोष्ठपदानामिति। पञ्चमीनिर्देशाभावादुत्तरपदस्य न स्यात्। वचनं त्वनादिजयर्थं विज्ञायमानं पूर्वपदस्यापि वृद्धिं विदध्यात्। नियमार्थं वा स्यात्। जातार्थ एव प्रोष्ठपदानां वृद्धिः प्रोष्ठपदानामेव वा जातार्थ इति। प्रोष्ठपाद इति। प्रोष्ठपदाभिर्युक्तः काल इत्यण्। लुबविशेष इति लुपि कृते संधिवेलादिसूत्रेण जातार्थेऽण्। अत्राङ्गस्याचामादेर्वृद्धिर्मा भूदित्येवमर्थमुत्तरपदाधिकारः। उत्तरपदवृद्धौ सर्वं चेत्यत्रोत्तरपदाधिकारविहितवृद्धिपरिग्रहार्थश्च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना·कै· द्विषाष्टिकमिति। नन्वत्राप्यचामादेर्वृद्धिः प्राप्नोतीति कथमयमवकाशः। अथात्र येन नाप्राप्तिन्यायेनादिवृद्धिर्बाध्यते। तदाष्टाशीतिके वि
११२ प्रतिषेधानुपपत्तिः उत्सर्गापवादयोरतुल्यबलत्वादिति वार्त्तिककारस्य विप्रतिषेधोपन्यासो न युक्त इति चिन्त्यमेतत्। यथा यत्रेति। सा च प्र ७२१
तिषिध्येत न तत्र प्रतिषेधवचने युक्त ऐजागमः स्यादित्यर्थः। उत्तरपदवृद्धेस्तु यथात्र प्रतिषेधो न भवति तथा वक्ष्यामित्यत्र प्रतिपा
दितम्। प्राचां ग्रामनगराणाम्। नगरग्रहणमिति। यद्यपि समुदायवचनोपि ग्रामशब्दोस्ति भूतग्रामइन्द्रियग्राम इति तथापि जनवि
कायनिवासार्थत्वेनातिप्रसिद्धः अभक्ष्यो ग्राम्यकुक्कुटः ग्रामे नाध्येयमिति तदर्थस्यैव ग्रहणमिति मत्वा प्रश्नः। अन्यो हि ग्राम इति। विशे
षणविशेष्यान्तरस्यासंग्रहणान्नगरग्रहणम्। साधीयस्त इति। नगरस्याशुचितरत्वात्। संस्त्यायविशेषमिति। सामान्यशब्दस्यापि

अचामादिवृद्धेरवकाशः ऐतिकायनः औपगवः। उत्तरपदवृद्धेरवकाशः द्विषाष्टिकम् त्रिषाष्टिकम्। इहोभयं प्राप्नोति। द्वा
शीतिकः उत्तरपदवृद्धिर्भवति विप्रतिषेधेन। कः पुनरत्र विशेषोऽचामादिवृद्धौ सत्यामुत्तरपदवृद्धौ वा। अयमस्ति विशेषः।
यद्यत्राचामादिवृद्धिः स्यात् ऐजागमः प्रसज्येत॥ प्राचां ग्रामनगराणाम्। नगरग्रहणं किमर्थम्। न प्राचां ग्रामाणामित्येव सिद्ध
म्। न सिध्यति। अन्यो हि ग्रामः अन्यन्नगरम्। कथं ज्ञायते। एवं हि कश्चित्कंचित्पृच्छति कुतो भवानागच्छति ग्रामात्। स आह
न ग्रामान्नगरादिति। ननु च भोः यदेव ग्रामः तन्नगरं कथं ज्ञायते ये हि ग्रामे विधयो नेष्यन्ते। साधीयस्ते नगरे न क्रियन्ते। तद्य
था। अभक्ष्यो ग्राम्यकुक्कुटः। अभक्ष्यो ग्राम्यसूकर इति उक्ते सुतरां नागरोऽपि न भक्ष्यते। तथा ग्रामे नाध्येयमिति साधीयो न
गरेपि नाधीयते। नत्वाद्य एव ग्रामस्तन्नगरम्। कथं यदुक्तम् एवं हि कश्चित्कंचित्पृच्छति कुतो भवानागच्छति ग्रामात्। स आ
ह न ग्रामान्नगरादिति। संस्त्यायविशेषमसावाचष्टे। संस्त्यायविशेषास्ते ग्रामो घोषो नगरं संवाह इति। एवं तर्हि सिद्धे सति य
द्ग्रामग्रहणे नगरग्रहणं करोति तज्ज्ञापयत्याचार्योऽन्यत्र ग्रामग्रहणे नगरग्रहणं न भवतीति। किमेतस्य ज्ञापने प्रयोज
नम्। विशिष्टलिङ्गो नदीदेशोऽग्रामा इत्यत्र नगरप्रतिषेधश्चोदितः स न वक्तव्यो भवति।

प्रकरणवशाद्विशेषावस्थानं दृश्यते संस्त्यायाच्चागमने निर्ज्ञाते विशेषपरिज्ञानाय कुत आगच्छतीति। प्रष्टव्ये ग्रामशब्दोच्चारणाद्विशेषवा
ची ग्रामशब्दोऽनेन प्रयुक्त इति प्रतीयते। संस्त्यायो निवासः ब्राह्मणकर्षकपुरुषप्रधानो देशो ग्रामः। गोमहिष्यादियुक्तो घोषः प्राकारपरि रामः
खान्वितम् श्रेणीधर्मयुक्तं संस्थानं नगरं प्राकारपरिखायुक्तः श्रेणिधर्मोपेतो देशः संवाहः। न च नगरशब्दसन्निधाने गोबलीवर्दन्यायेन वि ११२
शिष्टग्रामग्रहणाय संवाहादिनिवृत्तये नगरग्रहणं संवाहादिनिवृत्तेरनिष्टत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदीच्यग्रामाच्चेति। मानगरमित्यादावन्यर्थम्। वाहीकग्रामेभ्यश्चेति। शाकलिकइत्याद्यर्थम्। दिक्शब्दादिति। पाटलिपुत्रमित्यादौ पूर्वे
पदान्तोदात्तार्थम्। अतिनिर्बन्धइति। अतिगौरवमनलाभइति। लाघवम्॥ संख्यायाः॥ संवत्सरग्रहणमिति। कालःक्रियापरिच्छेदहेतु
त्वात्परिमाणंतद्विशेषवाचीसंवत्सरशब्दइतिभावः। द्वैरात्रिकइति। द्वेरात्रीअधीष्टइति तद्धितार्थेसमासेरात्र्यहःसंवत्सराच्चेति वा ख
विधानात्पक्षेठञ्। द्वैसमिकइति। अधीष्टादिषु समायाःखः द्विगोर्वेतिपक्षेठञ्। अचामादेर्वृद्धिर्नस्यादिति। सत्यपिसंभवेबाधनंभव

यद्येतज्ज्ञाप्यते उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तादित्यत्र नगरग्रहणं कर्तव्यम्। वाहीकग्रामेभ्यश्च। नगरग्रहणं कर्तव्यम्।
दिक्शब्दाग्रामजनपदाख्यानचानराटेषु नगरग्रहणं कर्तव्यम्। इदं चतुर्थं ज्ञापकार्थम्। तत्रातिनिर्बन्धो न लाभः।
तस्माद्यस्मिन्नेव ग्रामग्रहणेन नगरस्य ग्रहणं नेष्यते तस्य प्रतिषेधो वक्तव्यः। संख्यायाः संवत्सरसंख्यस्य च॥ संवत्सरग्रह
णमनर्थकं परिमाणान्तस्येति कृतत्वात्। संवत्सरग्रहणमनर्थकम्। किं कारणम्। परिमाणान्तस्येति कृतत्वात्। परिमाण
न्तस्यासंज्ञाशाणयोरित्येव सिद्धम्। ज्ञापकं तु कालपरिमाणानां वृद्धिप्रतिषेधस्य एवं तर्हि ज्ञापयत्याचार्यः कालपरिमा
णानां वृद्धिर्न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। द्वैरात्रिकः त्रैरात्रिकः। अत्र वृद्धिर्न भवतीति नैतदस्ति प्रयोजनम्।
नास्त्यत्र विशेषः सत्यां वोत्तरपदवृद्धावसत्यां वा। इदं तर्हि द्वैसमिकः त्रैसमिकः। इदं चापि प्रयोजनम्। द्वैरात्रिकः
त्रैरात्रिकः। ननु चोक्तं नास्त्यत्र विशेषः सत्यां वोत्तरपदवृद्धावसत्यां वेति। अयमस्ति विशेषः। यद्यत्रोत्तरपदवृद्धिः स्या
त्। अचामादेर्वृद्धिर्न स्यात्। अपर आह। ज्ञापकं तु कालपरिमाणानां परिमाणग्रहणस्य। एवं तर्हि ज्ञापयत्याचार्यः
कालपरिमाणग्रहणेन ग्रहणं न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धि
तलुकि। द्विवर्षा त्रिवर्षा। परिमाणपर्युदासेन पर्युदासो न भवति। प्रवाहणस्य ढे॥ परस्य वृद्धिर्नेत्यनुवर्तते उताहो न। किं चातः

तीतिन्यायात्। अपर आह नेति। पूर्वं विशेषविषयं ज्ञापनमाश्रितम्। इदानीं तु सामान्यविषयमिति भेदः। द्विवर्षेति। द्वे वर्षे भूतानमधी
ष्टइति ठञ्। तस्य वर्षाल्लुक्। चेति पक्षे लुक्। द्विगोरिति ङीप्। प्राप्तोऽपरिमाणेति प्रतिषिद्धः॥ प्रवा॥ पूर्वस्य तु वेति वर्तते तत्र यदा पूर्वपदस्य वृ
द्धिर्नास्ति तदोत्तरपदस्य वृद्धिभावाभावयोः श्रुतौ विशेषाभावाद्विशेषान्तरजिज्ञासया प्रश्नः। परस्येति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा॰कौ॰ प्रवाहणेयानि। शुभ्रादिभ्यश्चेति ढक्। ननु वृद्धेर्निमित्तं यत्तिन्नूणकारादिः स्ववृद्धिनिमित्तमित्याश्रितम्। ततोऽसत्यामपि वृद्धौ वृद्धिनिमित्तत्वा
११३ पदे प्रसङ्गाभावात्पुंवद्भावप्रतिषेधो भविष्यतीति नैतदस्ति। ञ्णकानां वृद्धिमुत्पादयतामेव वृद्धिं प्रति निमित्तत्वं नान्यदा। यथा स्रुक्रमोरनात्म
नेपदनिमित्त इत्यत्र सत्येवात्मनेपदे स्रुक्रमोरनात्मनेपदनिमित्तत्वादिडभावो नान्यस्मिन्। जातेरिति। गोत्रं च चरणैः सहेति जातिवाचित्वात्
अनुवर्तनेऽपि प्रयोजनाभावः। यथा। नयथातथेति। यथातथेत्ययं निपातो विपरीतार्थवृत्तिरिति केचिदाहुः। अन्ये तु यथातथाशब्दयोः सुप्
सुपेति समास एतदर्थ इत्याहुः तन्नो नञिति समासे कृते ब्राह्मणादिषु दर्शनात् ष्यञ् स्वरेऽपि नास्ति विशेषः। आयथातथ्यमित्यस्य नित्त्वादाद्यु

यद्यनुवर्तते प्रवाहणेयीभार्यस्येति प्रवाहणेयीभार्यः। वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो न प्राप्नोति। अथ निवृत्तं
न दोषो भवति। यथा न दोषस्तथास्तु। अथवा पुनरस्त्वनुवर्तते। ननु चोक्तं प्रवाहणेयीभार्यस्य प्रवाहणेयीभार्यः वृद्धि
निमित्तस्येति पुंवद्भावनिषेधो न प्राप्नोतीति। नैष दोषः। मा भूदेवं जानेरित्येवं भविष्यति॥ यथा तथयथापुरयोः पर्या
येण॥ अयं योगः शक्योऽवक्तुम्। कथम् याथातथ्यम् आयथातथ्यम् अयाथापुर्यम् आयथापुर्यम्। यदा तावत्पूर्वपदस्य वृ
द्धिः तदैवं विग्रहः करिष्यते। न यथातथा अयथातथा। अयथातथाभावः आयथातथ्यम्। यदोत्तरपदस्य वृद्धिस्त
दैवं विग्रहः करिष्यते। यथातथाभावः। याथातथ्यम् न याथातथ्यम् अयाथातथ्यम्॥ हनस्तो॥ हन्तेस्तकारे तद्धिते
प्रतिषेधः। हन्तेस्तकारे तद्धिते प्रतिषेधो वक्तव्यः। वार्त्रघ्नं भ्रौणघ्नम्। उक्तं वा। किमुक्तम्। धातोः स्वरूपग्रहणे तत्प्र
येकार्यविज्ञानात्सिद्धमिति। आतो युक्। कृद्ग्रहणं किमर्थम्। इह मा भूत् दद्यौ दधौ। नैतदस्ति प्रयोजनम्। अचिण्णलो
रिति वर्तते। यद्यचिण्णलोरिति वर्तते अदायि अधायि इत्यत्र न प्राप्नोति। वचनाच्चिणि भविष्यति। अचिण्णलोरिति वर्तते। ए
वमपि चौडिर्दोलाकिरित्यत्र प्राप्नोति लोपोऽत्र बाधको भविष्यति। इदमिह संप्रधार्यं लोपः क्रियतां युगिति। किमत्र कर्तव्यं परत्वाद्युक्

दात्तत्वाद्याथातथ्यमित्यस्याव्ययपूर्वपदप्रकृतिस्वरत्वात्। प्रत्ययान्तरार्थं चेत्तन्न भवति अनभिधानादेताभ्यां प्रत्ययान्तराभावात्॥ आ
तो॥ दद्विति। उत्तमस्य णलो णित्त्वाभावपक्षे सावकाशमौत्त्वं णित्त्वे परत्वाद्युक् बाधेत। अदायीति। सूत्रे चिणो निमित्तत्वेनोपादानाद राम॰
चिण्णलोरित्यनुवर्तनाच्च विधिनिषेधयोः पर्यायः स्यात्। वचनादिति। आतो युक् चिण्कृतोरिति चिणः साक्षादुपादानान्निषेधो न भविष्यति चिणि ११३
विधिः प्रत्यक्षशिष्टत्वादसंदिग्धः निषेधस्तु णलर्थ एवानुवर्तते। अथ चिणर्थोऽपीति संदिग्ध इत्यसंदिग्धो विधिरेव प्रवर्तते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अचामादेरितिवर्तनइति। नन्वेवं दरिद्रायके युङ् प्राप्नोति। एवं तर्हि दोषान्तरोपन्यासादयं दोषो नोक्त इत्याह। एवमपीति। आदिवद्भावादत्र प्रसङ्गो
यथा दायइत्यादौ। नेदाकामइति। आयादय आर्धधातुके वेति यदा णिङ् नास्ति तदा यान्तिवृद्धिनिषेधस्य पर्युदासः। विश्रामप्र इत्यत्र साधुरे
वो घमो परमौ संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावात्। श्राव्या। पातेर्लुगिति। यद्यपि पालरक्षणा इत्यस्य पालयतीति सिध्यति तथापि पाते र्युङ्िच
न ये लुगागमविधानम्। लुग्विकरणत्वान्नस्य युको प्रसङ्गः॥ प्रत्ययस्थात्स्यग्रहणमिति। कादितिवर्णग्रहणं न च वर्णमात्रं ककारः प्रत्ययोऽस्ती
ति सामर्थ्यात्प्रत्ययावयवे प्रत्ययशब्दो वर्तिष्यत इति प्रश्नः। इतरः पक्षान्तरे प्रयोजनमाख्यातुमाह। इदमिति। वक्ष्यमाणस्य बुद्ध्या प्रत्यक्षीकृ
त्य परामर्शः। इहापीति। अन्यथा दत्तिकेत्यादावेवस्यादत्ताता यदर्थविवक्षायामत्र प्रत्ययः। स्यग्रहणे तु क्रियमाणे सर्वत्र भवति प्रत्ययस्यापि व्यप
देशिवद्भावेन प्रत्ययस्थत्वात्। असुब्वत इति। न सुब्वदसुब्वदिति नञ्समासोऽसुप इत्यस्य बहुव्रीहित्व प्रदर्शनाय भाष्यकारेण लापवं नाश्रितंन-

एवं तर्ह्याचामादेरिति निवर्तते। यत्राचामादिणकारस्तत्र युगिति। एवमपि त्वादेवतास्य स्थालीपाकस्य त्वः स्थालीपाकः अ
त्र प्राप्नोति। तस्मात्तद्ग्रहणं कर्तव्यम्। नो दात्तोपदेश——स्यमान्तस्यानाचमेः॥ अत्य त्वमिदमुच्यते अनाचमे——रिति। अ
नाचमिकमिवमीनामिति वक्तव्यम्। आचामः कामः वामः। शण्ठा साहनाव्यावेपांशुकृ॥ णौ प्रकरणे धूञ्प्रीञोर्नुग्वचनम्। णौ
प्रकरणे भूञ्प्रीञोर्नुग्वक्तव्यः। धूनयति प्रीणयति। पातेर्लुग्वचनम्। पालयति॥ प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः।
स्यग्रहणं किमर्थम्। इदं विचारयिष्यते इत्वे कग्रहणं संघातग्रहणं वा स्यात्तु वर्णग्रहणं वेति। तद्यदा संघातग्रहणं तदा
स्यग्रहणं कर्तव्यम्। इहापि यथा स्यात् कारिका हारिका। यदा हि वर्णग्रहणं तदा केवलः ककारः प्रत्ययो नास्तीति कृत्वा
वचनाद्भविष्यति। अथासुप इति कथं इदं विज्ञायते असुबन्तोऽङ्गस्येति। आहोस्विन्न चेत्सुपः पर आबिति। किं चातः। यदि विज्ञा
यते असुबन्तोऽङ्गस्येति बहुचर्मिका अत्र न प्राप्नोति। अथ विज्ञायते न चेत्सुपः पर आबिति न दोषो भवति।

दाश्रयणे बहुव्रीहिरेवन्यास्येन तु मत्तुबन्तः समासः। तत्रायं प्रश्नः। किमसुप इति बहुव्रीहिराश्रीयते। न विद्यते सुप् यस्मिंस्तदसुबिति। अथ
तत्पुरुषः प्रसज्यप्रतिषेधश्च। न चेत्सुपः पर आबिति प्रत्ययग्रहणे तन्तदन्तविधेः सुबन्तादिति बोद्धव्यम्। बहुचर्मिकेति। बहूनि चर्माण्यस्यामि
ति बहुव्रीहिः प्रत्ययलक्षणेन सुब्वदेतदङ्गमिति इत्वं न प्राप्नोति। न लुमताङ्गस्येति निषेधोऽत्र नास्ति लुमता लुप्ते यदङ्गं तस्य कार्ये सप्रति
प्रतिषेधः। इदं तु टापङ्गम्। न दोषो भवतीति। चर्मशब्दः सुबन्तो न च तस्मात्पर आप् व्यवधानात्। बहवः परिव्राजका अस्यां सा बहुप
रिव्राजका इत्यत्र तु प्रत्ययलक्षणेन सुबन्तात्परिव्राजकशब्दात्पर आबिति प्रतिषेधः प्रवर्तते। पर्युदासाश्रयणे समासादसुबन्ता
त्पर आबिति स्यादेवात्रेत्वम्। तथासुप इत्यनर्थकं स्यादिति प्रसज्यनिषेध आश्रीयते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· इत्यादि। यद्यकारान्तस्य शब्दस्य कादिति निर्देशः ततः संघातग्रहणम्। अथाप्यनुकाकारेणोच्चारणार्थेन निर्देशः ततो वर्णग्रहणम्। ननु वर्ण
१२८ ग्रहणे स्थग्रहणस्यानर्थक्यात् स्थग्रहणात्संघातग्रहणेन भाव्यम्। नैतदस्ति। कोऽत्र निर्देशः पक्ष इति विचार्यते। यदि च संघातग्रहणपक्षो दो
षवान् तन्माकारस्य ग्रहणमुपचयो भविष्यति। एतिकादिति। एतदोऽकचि जसित्यदाद्यत्वे टापीत्वे च रूपम्। अकचोकार उच्चारणार्थो न श्रव
णार्थः। तेन धकि छिद्रकुदित्यादि सिध्यति। वचनादिति। यथैव कारिकेत्यादावेकादेशे कृतेऽनचेककारे संपन्ने भूतपूर्वगत्या भवत्येवमकज्वि
धिसूत्रेऽकशब्दः संघात उच्चारित इति तदाश्रयादत्वप्रवृत्तिः। अस्तीति। एकादेशस्य पूर्वविधौ स्थानिवद्भावात्। अथवा वचनादित्यस्यायम
र्थः। न यासयोरिति ज्ञापकात्तु वचनाद्भविष्यति। इतरस्त्वगृहीताभिप्राय आह। अस्तीति। ततस्त्वभिप्रायमप्रकाश्य पक्षान्तरमाश्रयति। अस्तु

यथा न दोषस्तथास्तु। इदं विचार्यते। इत्वे कग्रहणं संघातग्रहणं स्याद्वर्णग्रहणं वेति। कश्चात्र विशेषः। इत्वे कग्रहणं संघातग्रहणं चेत्। एतिकास्वप्राप्तिः।
इत्वे कग्रहणं संघातग्रहणं चेदेतिकास्वप्राप्तिः। एतिकाश्चरन्तीति वचनाद्भविष्यति। अस्ति ह्यन्यद्वचने प्रयोजनम्। किम्। कारिका हारि
केति। अस्तु तर्हि वर्णग्रहणम्। वर्णग्रहणं चेद्व्यवहितत्वादप्रसिद्धिः। वर्णग्रहणं चेद्व्यवहितत्वान्न प्राप्नोति। कारि
का हारिका। अकारेण व्यवहितत्वान्न प्राप्नोति। एकादेशे कृते नास्ति व्यवधानम्। एकादेशः पूर्वविधौ स्थानिवद्भवतीति
स्थानिवद्भावाद्व्यवधानमेव। एवं तर्ह्याहायं प्रत्ययस्थात्कात्पूर्वस्येति न च क्वचिद्व्यवधानं तत्र वचनाद्भविष्यति।
वचनप्रामाण्यादिति चेत् रथकट्यादिष्वतिप्रसङ्गः। वचनप्रामाण्यादिति चेद्रथकट्यादिषु दोषो भवति। रथकट्या
गर्गकाम्या। नैष दोषः।

तर्हीति। व्यवहितत्वादिति। ननु चापीत्यनेन कुकारेण विशेष्यते किं तर्ह्यकारः। आपि च परतोऽकारस्य कात्पूर्वस्येति व्यवहितस्यापि
पूर्वत्वादित्वं प्रवर्तिष्यते। नैतदस्ति। रथकट्यादावप्येवं प्रसङ्गात्। किं च कात्पूर्वस्येति पूर्वग्रहणं कृतं न त्वापि पूर्वस्येति। तत्र च निर्दिष्टप राम:
रिभाषोपस्थानान्न व्यवधानेन प्राप्नोति॥ तत्र वचनादिति। आनन्तर्यमसंभवान्नाश्रीयते। रथकट्येति। रथानां समूह इति इनित्रकट्य १२८
चश्चेति कट्यच्। गर्गकाम्येति। गर्गमिच्छत्यात्मन इति काम्यच् प्रत्ययान्तात्प्रत्ययादित्यकारप्रत्ययः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

येननाव्यवधानमिति। नानन्तर्यं परित्यज्यते किंतु यावत्संभवति तावदाश्रीयते। यद्येवमेतिकादित्यत्र द्वाभ्यामकाराभ्यां व्यवधानादि-
त्वं न प्राप्नोति। एकस्य संबन्ध्यकारो द्वितीयस्य दादीनामित्यकारः। नैष दोषः। द्वयोरकारयोरेकादेशे कृते टापा सहैकादेशस्य स्थानिव-
द्भावादेकेनैवाकारेण व्यवधानं न पुनः स्थानिवत्त्वप्रतिपत्तिर्यतो द्वावकारौ व्यवधायकौ स्याताम्। सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात्।
व्यपवर्गाभावादिति॥ वार्णादाङ्गं बलीय इत्येतदनाश्रित्योक्तम्। उभयत इति। आपि यः कप्रत्यय इत्येवमुभयमाश्रीयते। अथवापि परतो
कारस्य कापूर्वस्येत्याश्रयिष्यते तथाप्युभयमेवाश्रितं तुल्यकालं भवति। एवंजातीयकानामिति। प्रकारवचने जातीयर् प्रत्ययः। अकच्

येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्। केन च व्यवधानम्। वर्णेनैकेन। संघातेन पुनर्व्यवधानं भवति च न भ-
वति च। अथवा पुनरस्तु संघातग्रहणम्। ननु चोक्तमित्वे कग्रहणं संघातग्रहणं चेदविकारप्राप्तिरिति। परिहृतमेतत्। वचनाद्भ-
विष्यतीति। ननु चोक्तमसिद्धवचने प्रयोजनम्। किम्। कारिकेति। अत्राप्येकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति। अन्तादिवद्भावे-
न व्यपवर्गः। उभयत आश्रये नान्तादिवत्। एवं तर्हि एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यपवर्गः। ए-
वं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानामपीत्वमिति। यदयं नयासयोरिति प्रतिषेधं शास्ति। मामकनरक-
योरुपसंख्यानं कर्तव्यम्। मामिका नरिका। किं पुनः कारणं न सिध्यति। अप्रत्ययस्थत्वात्। त्यक्त्यपोश्च प्रतिषिद्धत्वा-
त्। त्यक्त्यपोश्चोपसंख्यानं कर्तव्यम्। दाक्षिणात्यिका। किं पुनः कारणं न सिध्यति। प्रतिषिद्धत्वात्। उदीचामातः स्था-
ने यकपूर्वाया इति प्रतिषिद्धत्वात्॥ नयासयोः॥ नयत्तदोरिति वक्तव्यम्। इहापि यथा स्यात्। यकामधीते।

दक्षिणा :

तामित्यर्थः। मामिकेति। ममेयं युष्मदस्मदोरन्यतरस्यां खञ्चेत्यन्यतरस्यांग्रहणात्प्राग्दीव्यतोऽणि अण्। तवकममकावेकवचन इति ममकादे-
शः। केवलमामकेत्यनेन संज्ञाछन्दसोर्ङीपो नियमादन्यत्र टाप्। नरं कायतीति नरिका। दाक्षिणात्यिकेति। दक्षिणास्मिन्देशे दक्षिणादाच्। तत्र
भवा दाक्षिणापश्चात्पुरसस्त्यगिति त्यक्। अज्ञातार्थविवक्षायां कः। इहभवेहत्यिका। अव्ययात्त्यप्। पूर्ववत्कः। उदीचामात इति पाक्षिकप्र-
तिषेधप्रसङ्गे वचनम्॥ नयासयोः॥ यासेति प्रथमैकवचनान्तयोरुपादानाद्विभक्त्यन्तरे प्रतिषेधाप्रसङ्गादाह। नयत्तदोरिति।

CC-0. In Public Domain. Digitization by eGangotri

उपत्यकेति। उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन्। नैवं जातीयकानामिति। येऽनेकाचो व्यञ्जनादयः प्रत्ययाः संज्ञाविषयास्ते षामि
त्यर्थः। पदत्वमिति। ननु च तद्धितलुगर्थमिकारोच्चारणं स्यात्। अन्यथा पञ्चभिर्मृत्तिकाभिः क्रीत इत्याद्यौ ह्यवध्वर्ध्वपूर्वेति लुकि
कृते लुक्तद्धितलुकीति टापो लुकि निमित्ताभावादित्वं न स्यात्। पञ्चमृत्तिक इति। अन्तरङ्गत्वाद्विधीन्बहिरङ्गो लुक् बाधते न सुब्लुगेव
तथा च सत्ती स्वं स इत्यादौ नल्लोपो न भवति पञ्चभिः खट्वाभिः क्रीतः पञ्चखट्व इत्यादौ टापा सह एकादेशो न भवति। अन्यथैकादेशस्यादिव
द्भावाद् बहूग्रहणेन ग्रहणाल्लुकि कृतेऽकारस्य श्रवणं न स्यात्। तदेवं सति प्रयोजनेन ज्ञापकमिकारोच्चारणमिति चिन्त्यमेतत्। त्यिकन्नि

तकां प्रचामहइति। प्रतिषेधे त्यकन उपसंख्यानं कर्तव्यम्। उपत्यका अधित्यका। तत्तर्हि कर्तव्यम्। न कर्तव्यम्। आ
चार्यप्रवृत्तिर्ज्ञापयति नैवं जातीयकानामित्वं भवतीति। यदयं मृदस्तिकन्निति तपरनिर्देशं करोति। पावकादीनां छन्द
स्युपसंख्यानं कर्तव्यम्। हिरण्यवर्णाः शुचयः पावकाः। ऋक्षकाः। अलोमकाः। छन्दसीति किमर्थम्। पाविका अ
लोमिका। आशिषि चोपसंख्यानं कर्तव्यम्। जीवतात् जीवका। नन्दतात् नन्दका। भवतात् भवका। उत्तरपदलोपे चोपसंख्यानं
कर्तव्यम्। देवदत्तिका देवका। यज्ञदत्तिका यज्ञका। क्षिपकादीनां चोपसंख्यानं कर्तव्यम्। क्षिपका ध्रुवका धुवका। चटका
॥ तारका ज्योतिष्युपसंख्यानं कर्तव्यम्। तारका। ज्योतिषीति किमर्थम्। तारयतीति तारिका। वर्णका तान्तवे उपसंख्यानं कर्त
दासी
व्यम्। वर्णका। तान्तव इति किमर्थम्।

ति प्रक्रियालाघवाय स्त्रीविषयत्वाद् वृत्त्यैव त्यकनि त्यकारोच्चारणमित्त्वाभावस्य न ज्ञापकम्। पञ्चभिरुपत्यकाभिः क्रीतः पञ्चोपत्यक इ
त्यादौ न द्धितलुकि अकारश्रवणार्थत्वात्तस्य॥ पावकादिति। पुनन्ति पावयन्तीति वा पावकाः। जीवकेति। आशिषि चेति वुन्। देवकेति। अनजा
दौ च विभाषा लोपो वक्तव्य इति दत्तशब्दस्य लोपः। क्षिपकेति। क्षिपेरिगुपधात्वात्के कृते अज्ञातादिषु कः। अथवा कुञ्छिल्पिसंज्ञयोरि
ति कुन्। ध्रुवकेति। ध्रु गतिस्थैर्ययोः। धुवकेति। धू विधूनने। वर्णकेति। वर्णयति महत्त्वादिकं गुणमिति। वर्णका प्रावरणविशेषः तन्तूनां
विकारस्तान्तवम्। ओरञित्यञ्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णिकेति। व्याख्यात्रीत्यर्थः भागुरी टीकाविशेषः। अष्टकेति॥ इष्टचश्रिभ्यां तकन्निति तकन्। पितरश्च देवताः पितृदेवताः तदर्थं कर्म पितृदैवत्यम्। देवतान्तात्तादर्थ्ये यदिति यत्। अष्टिकेति। अष्टौ परिमाणमस्याः संख्याया अतिशदन्तायाः कन्निति कन्। सूतकेति। न सामिवचन इति प्रतिषेधाज्ज्ञापकात्स्वार्थिकन्। पुत्रिकेति। पुत्रशब्दाच्छाङ्र्गरवादित्वात् ङीन्प्रत्ययस्ततः स्वार्थिकन्। केऽण इति ह्रस्वः तस्य पक्षे अकारो विधीयते। वृन्दारिकेति। वृन्दमस्यास्तीति शृङ्गवृन्दाभ्यामारकन्प्रत्ययो वक्तव्य इत्यारकन्। उदीचाम्। स्त्रीविषय इति। अर्थगतं स्त्रीत्वं शब्दे समारोप्य निर्देशः कृतः। शुभंयिकेति। शुभं यातीति भद्रं यातीति क्विप्। शुभंभद्रं शब्दौ निपातौ। अज्ञाताद्यर्थविवक्षायां कः केऽण इति ह्रस्वः। यकपूर्व इति। धात्वन्ताभ्यां यकारककाराभ्यां परस्यातः स्थानेऽकारस्येत्वप्रतिषेधस्य प्रतिषेधस्तेनेत्वं भवत्येव। शोभना नयोऽस्याः सुनया। नास्ति शोकोऽस्या अशोका पूर्ववत्कः

वर्तिका भागुरी लोकायतस्य। वर्तका शकुनौ प्राचामुपसंख्यानं कर्तव्यम्। वर्तका शकुनिः। शकुनाविति किमर्थम्। वर्तिका भागुरी लोकायतस्य। प्राचामिति किमर्थम्। वर्तिका। अष्टका पितृदैवत्ये उपसंख्यानं कर्तव्यम्। अष्टका। पितृदैवत्य इति किमर्थम्। अष्टिका खारी। वा सूतकापुत्रिकावृन्दारकाणामुपसंख्यानं कर्तव्यम्। सूतका सूतिका पुत्रका पुत्रिका। वृन्दारका। वृन्दारिका॥ उदीचामातः स्थाने यकपूर्वायाः॥ किमर्थं स्त्रीलिङ्गनिर्देशः क्रियते। न यकपूर्वस्येत्येवोच्येत। स्त्रीविषयो य आकारस्तस्य स्थाने योऽकारस्तस्य प्रतिषेधो यथा स्यादिह मा भूत्। शुभं यातीति शुभंयाः। शुभंयिका। भद्रंयाः भद्रंयिका। यकपूर्वे धात्वन्तप्रतिषेधो वक्तव्यः। किं प्रयोजनम्। सुनयिका सुशयिका। अशोकिका अपाकिका॥ भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि॥ अनुदाहरणे असुप इति प्रतिषेधात्। अथ भस्त्राग्रहणं किमर्थम्। न अभाषितपुंस्कादित्येव सिद्धम्। भस्त्राग्रहणमुपसर्जनार्थम्। उपसर्जनार्थोऽयमारम्भः।

॥भस्त्रै॥ पाक्षिकप्रतिषेधार्थ आरम्भः। एषाद्वे इति। न एषका नञ्के इति विगृह्यान्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इत्यकृतेषु त्यदाद्यत्वादिषु समासे कृते सुब्लुकि समासाद्या विभक्तिस्तस्यां त्यदाद्यत्वं तत एषा पूसश्च प्रत्ययलक्षणेन सुबन्ताभ्यां पर इत्यसुप इती त्वप्रति—षेधस्य व्यापारादनेषका इत्येव भवति। तस्मादनञ्पूर्वयोरेवैतयोः पाक्षिकप्रतिषेधः। एषका एषिका। द्वके द्विके इति। एषेति प्रथमैकवचननिर्देशादन्यत्र नित्यमित्वमेतिकाश्चरन्तीति। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰ कै॰ अभस्त्रिकेति। नास्ति भस्त्रा अस्या इति बहुव्रीहावुपसर्जनह्रस्वत्वे कृते यस्मात्प्रत्ययेनेत समाश्रितपुंस्काद्भस्त्राशब्दात्परत्वादुत्तरसूत्रेण पाक्षिकात् ७।३।२
११६ प्रतिषेधाप्रसङ्गादुत्वाग्रहणम्। नञ्पूर्वग्रहणमनर्थकमिति। अपिग्रहणेन केवलानां समुच्चयादन्यपूर्वाणामप्रसङ्गान्न कर्तव्यं नञ्पूर्वग्रह-
णम्। तत्र परत्वाद्विकारे तस्य च। तदुत्तरपदस्य च ग्रहणात्सर्वेष्टसिद्धिः॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमाध्यायस्य तृ-
तीयपादे प्रथममाह्निकम्॥ ठस्येकः॥ किमिदमिति। किं व्यञ्जनमात्रं प्रतिपिपादयिषितमागन्तूनामुच्चारणार्थेन अकारेण निर्देशोऽथ संघात ए-
वस्यानिनिर्दिष्ट इति प्रश्नः। धात्वन्तप्रतिषेध इति। संघातग्रहणे त्वेष न दोषः। पठतीत्यत्रापि ठस्यानर्थकत्वादर्थवद्ग्रहणपरिभाषयायं वत्संघा-
तग्रहणादप्रसङ्गः। वर्णग्रहणे त्वर्थवद्ग्रहणपरिभाषाया अव्यापारः। वर्णग्रहणपक्षे च ठमादिषु कारउच्चारणार्थो वर्णमात्रं प्रत्ययः। कण्ठ इति
। कणेष्ठः। शण्ठ इति। शमेर्जनिदाशुत्रिविनिठः। षण्ठ इति। षणोऽन्येभ्योऽपि दृश्यत इति ठः। वर्णपक्षेऽप्युणादीनां प्रसङ्गः सत्यपि संघातस्य प्रत्य

अभस्त्रका अभस्त्रिका। नञ्पूर्वग्रहणमनर्थकं चोत्तरपदमात्रस्येद्वचनात्। नञ्पूर्वग्रहणं चानर्थकम्। किं कारणम्। उत्तरप-
दमात्रस्येत्ववचनात्। उत्तरपदमात्रस्येत्वं वक्तव्यम्। निर्भस्त्रका निर्भस्त्रिका बहुभस्त्रका बहुभस्त्रिका। इति श्रीमहाभाष्ये सप्तमस्या-
ध्यायस्य तृतीयपादे प्रथममाह्निकं समाप्तम्॥ ठस्येकः॥ किमिदं ठादेशे वर्णग्रहणमाहोस्वित्संघातग्रहणम्। कश्चात्र विशे-
षः। ठादेशे वर्णग्रहणं चेद्धात्वन्तप्रतिषेधः। ठादेशे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधो वक्तव्यः। पठति। पठितुम्।
अस्तु तर्हि संघातग्रहणम्। संघातग्रहणं चेदुणादिमाथितिकानां प्रतिषेधः। संघातग्रहणं चेदुणादिमाथितिकानां
प्रतिषेधो वक्तव्यः। उणादीनां तावत्। कण्ठः शण्ठः षण्ठः। इह च मथितं पण्यमस्य माथितिक इति अकारलोपे कृते ता-
न्तादिति कादेशः प्राप्नोति। वर्णग्रहणे पुनः सत्यस्त्विविधिरयं भवति।

यत्त्वेदूह च संघातग्रहणे ठगादयः संघाता एव प्रत्ययाः प्रतिज्ञायन्ते। माथितिक इति। सन्निपातलक्षणपरिभाषामनाश्रित्य चोद्य-
ते। अन्यथा जादिसन्निपातेन तान्तता उपजाता कथं जादिविघातनिमित्तं स्यात्। वर्णग्रहणे त्वन त्विधावित्यस्यानिवृत्तनिषेधादिक राम॰
स्य कादेशाप्रसङ्गः। ननु तान्तादङ्गात्परस्य ठस्य कादेशो विधीयते न चैतत्तकारान्तमङ्गं तकारान्तात्प्रत्ययस्याविधानात्। नैतदस्ति। ए- ११६
कदेशविकृतस्यानन्यत्वादङ्गं भवति तकारान्तं चेति कादेशः प्राप्नोति॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्माद्विशिष्टग्रहणमिति। तद्धितस्यठादेरिकइतिकर्तव्यम्। एवंचमाथितिकइत्यत्रठादेरितिवचनाद्व्यविधित्वात्स्थानिवद्भावाभावा
त्कादेशस्याप्रसङ्गः। अङ्गादितिवर्ततइति। अर्थवशाद्विभक्तिविपरिणामइतिभावः। एवंतर्हीति। सामर्थ्यात्पञ्चम्यन्तमूह्यते। इतरो-
नकचित्षष्ठ्यन्तंप्रकृतमितिमत्वाह। क्वप्रकृतमिति। अर्थादिति। ठस्येतिषष्ठ्यन्तेनसंबन्धात्षष्ठ्यन्तत्वेनविपरिणामः। कर्मणि
घटतेकर्मणिघटोऽठजित्यठच्। अङ्गस्येति। संबन्धषष्ठीत्वेनोपादानाद्विशिष्टोनिमित्तनिमित्तिभावलक्षणःसंबन्धोविवक्षितः। तेन।

तस्माद्विशिष्टग्रहणम्। तस्माद्विशिष्टस्यठकारस्यग्रहणंकर्तव्यम्। नकर्तव्यम्। अस्तुतावद्वर्णग्रहणम्। ननुचोक्तंठा
देशेवर्णग्रहणंचेद्धात्वन्तप्रतिषेधइति। नैषदोषः। अङ्गादितिवर्तते। नवैअङ्गादितिपञ्चम्यस्ति। एवंतर्हिप्रत्यय
स्येतिवर्तते। क्वप्रकृतम्। प्रत्ययस्थात्कात्पूर्वस्यातइदाप्यसुपइति। तद्वैपञ्चमीनिर्दिष्टंषष्ठीनिर्दिष्टेनचेहार्थः।
अर्थाद्विभक्तिविपरिणामोभविष्यति। तद्यथा। उच्चानिदेवदत्तस्यगृहाण्यामन्त्रयस्वैनं। देवदत्तमितिगम्यते। देवदत्त
स्यगावोऽश्वाहिरण्यमाढ्योवैधवेयः। देवदत्तइतिगम्यते। पुरस्तात्षष्ठीनिर्दिष्टंसदर्थात्प्रथमानिर्दिष्टंद्वितीयानि
र्दिष्टंचभवति। एवमिहापिपुरस्तात्पञ्चमीनिर्दिष्टंसदर्थात्षष्ठीनिर्दिष्टंभविष्यति। एवमप्युणादीनांप्रतिषेधोवक्त
व्यः। नवक्तव्यः। उणादयोऽव्युत्पन्नानिप्रातिपदिकानि। एवमपिकर्मठइत्यत्रप्राप्नोति। एवंतर्ह्यङ्गस्येतिसंबन्ध
षष्ठीविज्ञास्यते। अङ्गस्ययष्ठकारः। कस्याङ्गस्यठकारःनिमित्तम्। यस्मिन्नङ्गमित्येतद्भवति। कस्मिंश्चैतद्भवति। प्र
त्यये। अथवापुनरस्तुसंघातग्रहणम्। ननुचोक्तंसंघातग्रहणंचेदुणादिमाथितिकादीनांप्रतिषेधइति। उणादी
नांतावत्प्रतिषेधोनवक्तव्यः। परिहृतमेतत्। उणादयोऽव्युत्पन्नानिप्रातिपदिकानीति। यदप्युच्यतेइहचमथि
तंपण्यमस्यमाथितिकइत्यकारलोपेकृतेतान्तादितिकादेशःप्राप्नोतीति।

ङ्गावयवस्याप्रसङ्गः। अङ्गव्यपदेशनिमित्तप्रत्ययग्रहणात्कर्मठइतिप्रत्ययावयवस्यनभवति। ननुसमुदायस्यनिमित्तत्वेनावयवस्या-
पिनिमित्तत्वमाश्रीयते। तथाचचक्रतुश्चक्रुरित्यत्रद्विर्वचननिमित्तेऽच्यजादेशःस्थानिवद्भवति। एवंतर्हिसाक्षान्निमित्तमिहगृह्यते। स्थानिवत्वे
तुलक्षणयाकथंचिन्निमित्तमाश्रीयते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ना॰ कौ॰ पूर्वस्मादपि विधिरिति सामान्यवचनपक्षस्य पूर्वशब्दस्य विशिष्टशब्देन समास आश्रीयते। अथवा वर्णग्रहणमात्रस्त्वेस ७३
११७ नास्तादित्वं गत्वस्य प्रत्ययोपदेशकालेनान्तग्रहणार्थमिति नापि तिके कादेशप्रसङ्गः। अपापीति। सर्पिषामनुमित्यादौ प-
न्यायार्थमनुमतिपत्तोऽपठ्यत किमर्थं यत्नेन्यास इत्येवेति। येषां ठस्याः नामिकदृष्यते नेपक्रमः स्वरितउच्चारितत्वादनुकरणेन स्व-
रितमेव ठस्येति नवोच्चारितस्य क्रमः स्वरितत्वादिस्याप्रसङ्गः। दृगु। आशिषेति। आङः शासुरस्या आमिषस्याशास्यमाना आशीरि
तिसंपदादित्वाद्भावे क्विप्। आशासः क्वावुपसंख्यानमित्यत्वम्। उपेति। वसेः क्विप्। वचिस्वपीति संप्रसारणम्। सत्यामिद्वत्वादिस्तु
रोऽभवनदिति कार्देशप्रसङ्गः। सामस्येति। सामसि कामनुमेयरूपम्। प्रतिपदोक्तमत्यस्य रूपम्। अयेति। दीर्घकादिदृष्ट्यनेन प्रा
नैषदोषः अकारलोपस्य स्थानिवद्भावान्न भविष्यति। न सिध्यति। पूर्वविधौ स्थानिवद्भावः। न चायं पूर्वविधिः। अ
यमपि पूर्वविधिः पूर्वस्मादपि विधिः पूर्वविधिरिति। अथापि गुणादयो न्यायान्तरमेवमपि न दोषः। क्रियते न्यासः
एव विशिष्टग्रहणं ठस्येति। दृगुर्ता न्यालकः। इह कस्मान्न भवति। आशिषा नरति आशिषिकः। उषा नरति औषि
कः। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। अथ इह कथं भवितव्यं दोष्णा तरति। दौष्कतिकं भवितव्यम्। कथम्।
यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते। होरन्तानि केन तु। किमिदं झलां ग्रहणं हलिति विशेषणम्। झलन्तकार
परस्य हन्तेर्योहकार इति। नाहोस्वित्कथं विशेषणम्। झलन्तकारपरस्य हकारस्य चेद्दन्तेरिति।

ओतीति प्रश्नः दोषकृति। नरनीतिठकू। उपसर्गस्थयोनकारोकार इति भावः। कचित्तु कथं यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इति पाठः। तत्रय
संज्ञितपदो न संदेहार्थ उपात्तः किं तर्हि परेषां स्वार्थकं वक्ति। ओकारे यउकारः सउकारग्रहणेन गृह्यते यत्र समुदायाश्रयं कार्यं नास्ति तत्रा
वयवाः समुदायस्य सम्भोजकाः। जपा चनुड्डिधिलादिशविनामाकारकारावयवान्न स्वः प्रवर्तन्ते। अस्मादस्य शिनु यथानुड्डिधिलादेशविनामे
घुप्रतिविधीयमानस्याहो न कश्चिदस्यानं कर्तव्यमिति संदेहार्थोऽपि यदि स्यात् व्याख्येयः। होहन्तेः। किमिदमिति। हलिति पोष्णसप्तो हकारेऽपि त रामः
श्रकिं हकारस्य प्राधान्यादिष्टो गुणरूपत्वादन्यो विभक्त्यन्तोपकारायगुणस्यापि हन्तेः प्रकृत्येऽविशेषदर्शनात्म न हन्तिनिर्दिष्टस्तु स्मिन्नकारक- ११७
योगक्षेमान्नास्याद्गृहीतमिति न सम्बन्धिना सम्बन्धं प्रतिपत्तुमनर्होऽस्मिन्निह सीमेकारो हकारस्येति।

CC-0. In Public Domain. Digitization by eGangotri

हन्तेरिति। तावयवेन यौ यौ योगात्। णिन्यप्राप्तिरिति। अक्षिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्धकारस्य च णत्वानन्तर्यासंभवा त्। वचनादिति। निर्दिष्टपरिभाषोपस्थानाद्येन नाव्यवधानमिति शब्दान्तरव्यवधानमिति वर्त्तते। इतरस्तु व्यवधानसंभवान्निर्दिष्टे अड्विक ल्परिभाषोपस्थानं मन्वानाह। इह तर्हीति। स्थानिवद्भावाच्चेति। अन्योपधालोपे कृते लोपस्य स्थानिवत्त्वे नकारस्य ग्रहणेति। सर्वत्र व्यवहितो न कारोऽहकारात्पर इति नकारग्रहणसामर्थ्यादिह्नो ह्नग्रहणसामर्थ्याच्च श्रुतिकृतमानन्तर्यमाश्रयिष्यते। सिद्धं त्विति। नकारग्रहणमपनी

कस्मात्र विशेषः। हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिः। घ्नन्ति घ्नन्तु अघ्नन्। अस्तु तर्हि हकारविशेषणम्। हकारस्येति चे द्धणित्यप्राप्तिः। घातयति घातकः। किं कारणम्। व्यवहितत्वान्न प्राप्नोति। वचनाद्भविष्यति। इहापि वचनात्प्राप्नोति। हननमिच्छति हननीयति हननीयतेर्ण्वुल् हननीयक इति। स्थानिवद्भावाच्चोनकारेऽप्रसिद्धिः। स्थानिवद्भावाच्चा चोनकारेऽप्रसिद्धिः घ्नन्ति घ्नन्तु। वचनाद्भविष्यति। वचनप्रामाण्यादिति चेद्धन्तेर्लोपे प्रतिषेधः। वचनप्रामाण्यादिति चेदल्लोपे प्रतिषेधो वक्तव्यः। हन्ता हन्तुम्। नकारग्रहणसामर्थ्यादल्लोपेन भविष्यति। अस्त्यन्यन्नकारग्रहणस्य प्रयो जनम्। किम्। श्रूयमाणविशेषणम्। यत्र नकारः श्रूयते तत्र यथा स्यात्। इह मा भूत्। वृत्रघ्न इति। सिद्धं तूपधालो प इति वचनात्। सिद्धमेतत्। कथम्। उपधालोपे चेति वक्तव्यम्। सिध्यति। सूत्रं न भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिरिति। वचनाद्भविष्यति। अथवा पुनरस्तु हकारविशेषणम्। ननु चोक्तं हका रस्येति चेद्धणित्यप्राप्तिरिति। वचनाद्भविष्यति। ननु चोक्तमिहापि वचनात्प्राप्नोति हननीयक इति। नैष दोषः। येन ना व्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्। केन च न व्यवधानम्। अवयवेनाव्यवधानम्। एतेन पुनः संघातेन व्यवधानं भवति च न च भवति। यदप्युच्यते स्थानिवद्भावान्नकारेऽप्रसिद्धिरिति।

यदुपधालोपग्रहणं कर्तव्यम्। वचनाद्भविष्यतीति। एकग्रहणे कर्तव्ये निबन्धनानि बहूनि व्याख्यानानि लक्ष्यस्य संस्कारकाण्युपपन्नवन्ति। हो ह न्तेर्ञ्णिन्नेष्विति हो हन्तेर्ञ्णिन्नेष्विति। तत्र विवक्षायां छन्दोऽपि यथा पार्वत्यर्थविशेषणविशेष्यभाव इति ञ्णित्यणिता च हन्तिर्विशेष्यते नकारे णह कारः। येन नाव्यवधानमिति। अक्षिन्निति निर्दिष्ट इति परिभाषोपस्थानेन धात्ववयवेन नित्यव्यवायाच्छब्दान्तरेणाव्यवधानं निवार्यते ॥

वचनादिति। सत्यपि स्थानिवद्भावकृतेऽव्यवधाने श्रुतिकृतानन्तर्याश्रयणान्नापि शास्त्रकृतमिति। यथा सन्निनं पूर्वमविद्यमानवदित्युक्तं तथा कारस्य शास्त्रेणाव्यवधायकत्वं न कश्चित्प्रतिपादितमित्यर्थः। कुतश्चिदिति। निर्दिष्टपरिभाषोपस्थानाद्वा। अभ्यासात्। असुपदिति। असुबन्तावयवस्य हन्तेरभ्यासात्परस्य कुत्वं न तु सुबन्तावयवस्येत्यर्थः। हन्तेरभ्यासादिति। अङ्गाधिकारेण चाभ्यासे न च प्रत्ययस्याक्षेपादभ्यासनिमित्ते प्रत्यये हन्तेरङ्गस्य योऽभ्यासस्तस्मात्कुत्वमिति भावः। इतरस्त्वगृहीताभिप्राय आह। हन्तेरिति। पूर्वोक्तेनाभिप्रायेणाह। हन्तेरङ्गस्येति। तथा चोक्तम्।

वचनाद्भविष्यति। ननु चोक्तं वचनप्रामाण्यादिति चेल्लोपे प्रतिषेध इति नैष दोषः। आनन्तर्यमिहाश्रीयते। हकारस्य नकार इति। क्वचिच्च संनिपातकृतमानन्तर्यं न शास्त्रकृतमानन्तर्यं क्वचिच्च न सन्निपातकृतं नापि शास्त्रकृतं लोपे सन्निपातकृतमानन्तर्यं न शास्त्रकृतमानन्तर्यम्। अलोपे नैव सन्निपातकृतं नापि शास्त्रकृतम्। यत्कुतश्चिदेवानन्तर्यं तदाश्रयिष्यामः। अभ्यासाच्च॥ अभ्यासात्कुत्वमसुपः। अभ्यासात्कुत्वमसुप इति वक्तव्यम्। इह मा भूत्। हननमिच्छति हननीयति हननीयतेः सन् जिहननीयिषतीति। न तर्हि वक्तव्यम्। न वक्तव्यम्। हन्तेरभ्यासादित्युच्यते न चैष हन्तेरभ्यासः। हन्तेरेवाभ्यासः। कथम्। एकाचो द्वे प्रथमस्येति। एवं तर्हि हन्तेरङ्गस्य योऽभ्यासस्तस्मादित्युच्यते। न चैष हन्तेरङ्गस्याभ्यासः। हन्तेरङ्गस्यैषोऽभ्यासः। कथम्। एकाचो द्वे प्रथमस्येति। एवं तर्हि यस्मिन् हन्तिरङ्गं तस्मिन्योऽभ्यासः तस्मादित्युच्यते यस्मिंश्चात्र हन्तिरङ्गं तस्मिन्नाभ्यासः यस्मिन्नभ्यासो न तस्मिन्हन्तिरङ्गं भवति॥ हेरचङि॥ अचङीति किमर्थम्। प्राजीहयद्दूतम्। हेश्चङि प्रतिषेधानर्थक्यमङ्गान्यत्वात्। हेश्चङि प्रतिषेधोऽनर्थकः। किं कारणम्। अङ्गान्यत्वात्। ण्यन्तमेतत्। अङ्गमन्यद्भवति। लोपे कृते नाङ्गान्यत्वम्। स्थानिवद्भावादङ्गान्यत्वम्। ज्ञापकं त्वन्यत्र ण्यधिकस्य कुत्वविज्ञानात्। एवं तर्हि ज्ञापयत्याचार्योऽन्यत्र ण्यधिकस्य कुत्वं भवतीति।

सिद्धं तु परस्परं प्रत्यङ्गप्रत्ययसंज्ञाभावादिति। न चैष हन्तेरङ्गस्येति। अभ्यासनिमित्ते प्रत्यये हन्तिरत्र नाङ्गमित्यर्थः। इतरोऽङ्गमात्रमाश्रित्याह। हन्तेरिति। आचार्यः स्वाभिप्रायं प्रकाशयति। एवं तर्हीति। यथा जघनिषेति घलि हन्तिरङ्गं तस्मिन्नेव चाभ्यासः॥ हेर॥ अचङीति किमर्थमिति। यस्मिन् हिनोतिरङ्गं तस्मिन्नभ्यासे विज्ञायमाने णौ हिनोतिरङ्गं चङ्यभ्यास इति कुत्वं न भविष्यतीति मत्वा प्रश्नः। अन्यत्रेति। सनादावित्यर्थः।

CC-0. In Public Domain. Digitization by eGangotri

सन्लिटो॥ जिज्यतुरिति। ज्याव योहानौ लिट्यतुसिग्रहिज्यादिसूत्रेण संप्रसारणे कृते पूर्वैकादेशे च यद्यपि हलइति दीर्घत्वं क्रियते तथा पि एकदेशविकृतस्यानन्यत्वात् यथा जयते र्जिगीषतीत्यत्र कुत्वं भवत्येवं जिनातेः प्राप्नोति॥ अभ्यासे इति। विभाषा पद्रत्ययारेश्वद्रूढादे शात्सुगन्तात्परस्य णोर्न भवति॥ न क्वादेः॥ क्वायजीति। चजोः कुघिण्यतोर्निष्ठायामनिट इति वक्तव्यं तेनैव क्वायजादीनां कुत्वनिवृत्तेः सिद्धत्वान्नार्थः प्रतिषेधेनेत्यर्थः। ननु ग्लुचुग्लुचुग्रुंचुकुंचुखुजूनां निष्ठायामनिट्त्वाभावात् ण्यतोः कुत्वं वार्तिककारमते न प्राप्नोति। सूत्रकारमतेन तु न क्वादेरिति प्रतिषेधप्रसङ्गः। तथा र्जिघर्जितर्जीनां निष्ठायां सेट्त्वात् कुत्वाप्रसङ्गः। उच्यते। वार्तिककारस्य सूत्रकारप्रमाणतरत्वात् तन्मतेन तु कुत्वस्याभावाभावावगन्तव्यौ। नन्वसत्यजेः प्रतिषेधे वीत इति निष्ठायामनिट्त्वात् समाज इति कुत्वं प्राप्नोति। नैतदस्ति। व्यादेशो निष्ठा·

किमेतस्य ज्ञापने प्रयोजनम्। प्रजिघायथिषतीत्यत्र कुत्वं सिद्धं भवति॥ सन्लिटोर्जेः॥ जिग्रहणेऽज्यः प्रतिषेधः। जिग्रहणे ज्यः प्रतिषेधो वक्तव्यः। जिज्यतुः जिज्युरिति। न वक्तव्यः। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। एवमेतस्य न भविष्यति। सा तर्ह्येषा परिभाषा कर्तव्या। अवश्यं कर्तव्या। अभ्यासगत इत्येवमर्थम्॥ न क्वादेः॥ क्वायजिव्रजिग्राविहृचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनात्। क्वायजिव्रजियाविहृचीनां प्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। कुत्वं कस्मान्न भवति। निष्ठायामनिटः कुत्ववचनात्। निष्ठायामनिटः कुत्वं वक्ष्यामि सेटश्चैते निष्ठायाम्। यदि निष्ठायामनिटः कुत्वमुच्यते कथं शोकः समुद्ग इति। युजिभुज्योर्घञि कुत्वं वक्तव्यम्। कथमर्कः। अर्चेः कविधानात् सिद्धम्। नैतद्घञन्तम्। औणादिक एष कशब्दः। तस्मिन्नाष्टमिकं कुत्वम्। भुजन्युब्जौ पाण्युपतापयोः॥

यामनिटश्च तजिः न च स्थानिवद्भावो निष्ठायामनिडिति लौकिके व्यपदेशेऽक्रियाव्यायेषु कार्येषु स्थानिवत्त्वात्। बलादावार्धधातुके विकल्पइत्यनेन इति भावाभावपक्षे अजित इति निष्ठायामजिः सेडेवा कथमिति। युजिभुजौ निष्ठायां सेटौ। ईदुपुचितू इति भाव इति यद्यपि निष्ठायामनिट्त्वं तथाप्यर्थभेदाश्रयः प्रश्नः। युजिभुजोर्घञीति। यथान्यासेऽपि वक्त्येव यथास्यात् एयति मा भूदिति नियमार्थं वाच्यं तदेवन्यासभेदे विध्यर्थमिति भावः। अभ्युपगमेऽप्युपसर्गाद्ड प्रत्यये समुद्ग इति सिध्यति तथा युजेर्घञि जकारनिवृत्त्ये कुत्वमभ्युपेयम्। औणादिक इति। कशधातोः विप्रत्ययः कः विप्रत्ययतो लघोः व्यमिति भवति। भुज। भुजेश्लोकादिकस्यौणादिकस्य वा घञि गुणकुत्वनिषेधो निपात्यते। ॥

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

भा॰ कै॰ भुजः पाणाविति। न्युब्जोपतापग्रहणं न कर्तव्यमित्यर्थः। लोके बाहौ भुजशब्दो भुजावयवत्वात्प्रयुज्यते। कर्तृप्रत्यय इति। पचाद्यच्। न्युब्ज ७।३।२
११९ तीति। न्युब्जन्त्यस्मिन्नित्यधिकरणं प्रदर्शनीयम्। भाष्ये तु वस्तुमात्रं कथितम्। एषोऽपीति। यस्मिन्व्याधौ न्युब्जिता अचेष्टा रहिताः शेरते स व्याधि
स्तान् न्युब्जयतीत्यच्। न चात्र घञचोः स्वरे विशेषः। थाथादिसूत्रेणान्तोदात्तत्वविधानात्। भुजशब्दस्तु घञ्याद्युदात्तो भवत्यचित्वन्तोदात्तः
स्यात्। यज। अविवाक्यस्येति। यद्ययं नियमः क्रियते तदाऽविवाक्यमित्येव स्यान्न त्वविवाच्यमिति। इयमपि चेत् द्विषयविभागेनेष्यत इति
यत्नान्तरं कार्यं न त्वयं नियमः। अन्योपसर्गपूर्वस्य च प्रतिषेध इष्यत एव। दशरात्रस्य यज्ञविशेषस्य दशममहरविवाक्यमुच्यते। यस्मि

भुजः पाणौ॥ भुजः पाणाविति वक्तव्यम्। कथं न्युब्ज उपताप इति। न्युब्जेः कर्तृत्वादप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रति
षेधः। कुतः कस्मान्न भवति। कर्तृत्वात्। नैतद् घञन्तम्। कर्तृप्रत्यय एषः। न्युब्जतीति न्युब्जः। अधिकरणसाधनो वै ल-
क्ष्यते। न्युब्जिताः शेरतेऽस्मिन् न्युब्ज उपताप इति। एषोऽपि हि कर्तृसाधन एव। कथं न्युब्जयतीति न्युब्जः। यजयाचरुचप्र
वचर्चश्च॥ प्रवचिग्रहणमनर्थकं वचोऽशब्दसंज्ञाभावात्। प्रवचिग्रहणमनर्थकम्। किं कारणम्। वचोऽशब्दसंज्ञाभावात्। व
चोऽशब्दसंज्ञायां प्रतिषेधः। उच्यते। प्रपूर्वश्च वचिरशब्दसंज्ञायां वर्तते। उपसर्गनियमार्थं तर्हीदं वक्तव्यम्। प्रपूर्वस्यैव वचे
रशब्दसंज्ञायां प्रतिषेधो यथा स्यादिह मा भूत्। अविवाक्यमहरिति। उपसर्गनियमार्थमिति चेदविवाकस्य विशेषवचना
त्सिद्धम्। विशेषन एव तद्वक्तव्यम विवाक्यमहरिति। क मा भूत्। अविवाच्यमेवान्यदिति। ण्यप्रतिषेधे त्यजेरुपसंख्यानं
कर्तव्यम्। त्याज्यम्॥ भोज्यम्॥ भोज्यमभ्यवहार्य इति वक्तव्यम्। इहापि यथा स्यात्। भोज्यः सूपः। भोज्या यवागूरिति। किं पु
नः कारणं न सिध्यति। भक्षिरयं खरविशदे वर्तते तेन द्रवेन प्राप्नोति। नावश्यं भक्षिः खरविशदे वर्तते किं तर्ह्यन्यत्रापि व
र्तते। तद्यथा। अब्भक्षो वायुभक्ष इति॥

न्नार्त्विका न विब्रुवते न नानावाक्यान्युच्चारयन्तीत्यर्थः। तत्र पृषोदरादित्वात्कुत्वमन्यत्र प्रतिषेध इति प्रवचिग्रहणं प्रत्याख्यातम्। त्यजेरिति।
पूज्यमिति तु णयन्तस्य पूजे रूपम्॥ भोज्यम्॥ नानभ्यमिति। भाष्यकारः सूत्रन्यासं समर्थयते। अब्भक्ष इति। न च शब्दान्तरसन्निधिगम्यं सामान्य रामः
वाचित्वमिति शक्यं वक्तुम्। न हि शब्दस्यानभिधेयं शब्दान्तरसन्निधानेनाभिधीयते नित्यत्वाच्छब्दार्थसंबन्धस्य। भोज्यं भक्ष्यं लेह्यं पेयमि ११९
त्यत्र गोबलीवर्दन्यायेन विशेषविषयत्वं भुजिभक्ष्योर्ज्ञेयम्॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घोर्तौ॥ भाष्यकारेणावेति प्रत्याख्यानम्। केचित्तु नित्यमागमशासनमित्यस्य ज्ञापकं वाग्रहणं वर्णयन्ति। अनित्यत्वात्तस्याग्रसतिदद्रादि तिनस्यादिति तस्मिद्ध्यै वाग्रहणं क्रियमाणमेनां परिभाषां ज्ञापयति॥ ओतः॥ ओत इति। न हि श्यनोऽन्य ओतः शिदस्ति। न त्वा यमप्यर्थ इति। न केवलं मात्रालाघवं यावदयमप्यर्थ इत्यर्थः। भ्रमत्विति। वाभ्राशेति वचनात्पक्षे शप्। भ्रमद् त्विति। व्यत्ययेन शप्। शमादिभ्यो यो विहित इति। श्यन्नेव सर्वेभ्यः शमादिभ्यो विहित इति स एव गृह्यते। एवमपीति। शिद्विशेषणे शमादीनामुपयोगात्कार्यिनिर्देशाभावात्। अष्टानामिति। अष्टानामित्यनेन संख्येयाः कार्यिणो निर्दिश्यन्ते तेन च सन्निधानाच्छमादय एव विज्ञायन्ते। ष्ठिवु॥ ष्ठिवुक्लमुचमां शिति।

घोर्तौ पोतेरिवावेति शक्यमवक्तुम्। कस्मान्न भवति तदग्निरग्नये ददात्। अस्त्वत्र लोपः। आटः श्रवणं भविष्यतीति तेनोभयं भविष्यति दधद्वत्तानि दाशुषे दधात्॥ ओतः॥ ओतः श्यनीति वक्तव्यम्। किं प्रयोजनम्। उत्तरत्र शिद्ग्रहणाभावायात्रायमप्यर्थः। ष्ठिवुक्लमुचमां शितीति शिद्ग्रहणं न कर्तव्यं भवति। ननु च शोश्यन्ग्रहणमपि तर्ह्युत्तरार्थं वक्तव्यम्। शमामष्टानां दीर्घः श्यनीति श्यन्ग्रहणं न कर्तव्यं भवति। अत्राप्युक्तं शितीत्येव। यदि शितीत्युच्यते। अनु त्वेन्द्रो भ्रमतु मदतु अत्रापि प्राप्नोति। शमादिभिरत्र शितं विशेषयिष्यामः। शमादीनां यः शिदिति। कश्च शमादीनां शित् शमादिभ्यो यो विहितः। एवमपि तस्यति यस्यति। अत्र प्राप्नोति। अष्टानामिति वचनान्न भविष्यति। ष्ठिवुक्लमुचमां शिति। दीर्घत्वमाङि चम इति वक्तव्यम्। आचामति। इह मा भूत्। उच्चमति विचमतीति॥ इषुगमियमां छः॥ इषेश्छत्वमहलि। इषेश्छत्वमहलीति वक्तव्यम्। इह मा भूत्। इष्टाति। इष्यति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। अचीति वर्तते। एवमपि प्राणोत्यत्र प्राप्नोति। अप्याहलीत्यप्युच्यमाने (अलूह) कस्मादेवात्र न भवति। नैवं विज्ञायते न हल् अहल् अहलीति। कथं तर्हि। अविद्यमानो हल् यस्मिन्सोऽयमहल् अहलीति। यद्येवमचीत्यपि वर्तमानेन दोषः। न ह्यत्राशिद्विशेष्यते शिति भवति कतरस्मिन्नचीति। कथं तर्हि शिता ज्विशेष्यते अचि भवति कतरस्मिञ्छितीति।

नित्सूत्रपाठादाह। दीर्घत्वमाङि चमेरिति। अथ वा सूत्रे तन्त्रमाङ् नतु यथोपेयिवानित्यत्रोपशब्दोऽतन्त्रमिति प्रदर्शनाय वार्तिकारम्भः॥ इषु॥ इषुगमीति पाठोऽनार्ष इत्याह। इषेश्छत्वमहलीति। इषाण इति। इष आभीक्ष्ण्य इत्यस्माद्धलः श्नः शानज्झाविति शानच्। रस्वाजादिरिति च्छत्वप्रसङ्गः। अथेति। अहलीति तस्तु रुषेश्शानज्जादिरिति भावः। नह्यत्र चेति। विशेषणविशेष्यभावे कामचारात्तदादिविधिस्तदन्तविधिर्वा विशेषणेन भवति न विशेष्येण॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पाघ्रा॥ धातोरन्त इति चेदिति। धातोरित्यत्र ह्रोपसावुक्तो अन्त इति वर्त्तते न वा। यद्यनुवर्त्तते न तदा अनुदात्ते चेति सूत्रं कर्त्तव्यं ददातीत्याद्युदा
त्तार्थं तथा पिबतीत्यादावाद्युदात्तत्वं मध्योदात्तनिवृत्त्यर्थं वान्तस्य धातोर्वक्तव्यमन्तग्रहणनिवृत्तौ तु कमप्राप्तत्वादादेरेवोदात्तत्वं सिध्य
ति। तत्रायं निर्णयः अन्त इति वर्त्तते ङ्णौ इत्याद्यर्थम्। अनुदात्ते चेति कृतमेव। पिबतेश्चाद्युदात्तनिपातनमिह कार्यम्। अथ वेति। सत्यपि
हलन्तत्वे गुणाभावः पिबादेशेनैवाङ्गस्य प्रयोगार्हत्वात्। ज्ञाजा॥ अतो दीर्घो यञीति। अत्र सार्वधातुकग्रहणं तु रुत्सुसूत्रादनुवर्त्तते न तु ति

पाघ्रा ध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः॥ पिबेर्गुणप्रतिषेधः
।पिबेर्गुणप्रतिषेधो वक्तव्यः। पिबति। लघूपधगुणः प्राप्नोति। स तर्हि प्रतिषेधो वक्तव्यो न वक्तव्यः। पिबतिरदन्तः। अद
न्त इति चेदुक्तम्। किमुक्तम्। धातोरन्त इति चेदनुदात्ते च बग्रहणमिति। अथवाङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्ये
त्येवं न भविष्यति। ज्ञाजनोर्जा॥ दीर्घोच्चारणं किमर्थम्। न ज्ञाजनोर्ज इत्येवोच्येत। का रूपसिद्धिः। जानाति जायते। अतो
दीर्घो यञीति दीर्घत्वं भविष्यति। एवं तर्हि सिद्धे सति यद् दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा अङ्गवृ
त्ते पुनर्वृत्तावविधिरिति। किमेतस्य ज्ञापने प्रयोजनम्। पिबतेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति॥ जुसि च॥
जुसि गुणे यासुट्प्रतिषेधः। जुसि गुणे यासुडादौ प्रतिषेधो वक्तव्यः। चिनुयुः सुनुयुरिति। न वक्तव्यः। नैवं विज्ञायते
मिदेर्गुणः जुसि चेति। कथं तर्हि मिदेर्गुणोऽजुसि चेति। किमिदमजुसीति। अजादावुसि अजुसीति। इहापि तर्हि प्रा
प्नोति चक्रुर्जहुरिति। एवं तर्हि श्नीति वर्त्तते। एवमप्यजुहवुरबिभयुरित्यत्र न प्राप्नोति।

ङीति। अत एवानेमुक्पूर्वो न्तः कृतो न परादिः दीर्घप्रसङ्गात्। अङ्गवृत्त इति। ज्यादादीयसः इत्याकारविधानस्य ज्ञापकत्वे जा इति दीर्घोच्चार
णं दीर्घश्रवणार्थं न तु दीर्घोच्चारणे तु ज्ञापके तदाकारविधाने माकारश्रवणार्थम्॥ जुसि च॥ चिनुयुरिति। तङ्कृतसङ्ग्रहणेन गृह्यत इति
गुणप्रसङ्गः। श्नीतीति वर्त्तत इति। श्नुवुक्तमनु चर्मा श्नीत्यतः। न च लिटि श्निरस्ति। एवमपीति। उसि श्नीतीति सामानाधिकरण्येन संबन्धो भण्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्तूसिपः स्थानं तस्मिन्निति सम्बन्धं मत्वाह। भूतपूर्वगत्येति। प्रत्ययलक्षणं तु नास्ति न लुमताङ्गस्येति निषेधात्। उकारादाविति। यासुडादेरुकारादित्वाद्ग्रहणाभावः। अनुबन्धनिर्देशाच्च लिङादेशस्योसो ग्रहणाभावः। अचीति वर्तत इति। क्ङस्याचीत्यतः॥ जाग्रोवि॥ इहेति। अङ्गवृत्त इत्यनाश्रित्योच्यते। गुणस्यावकाशः जागरित इति। अचो ञ्णितीति वृद्धेरवकाशः कारक इति। जागरयतीत्यादावुभयप्रसङ्गे परत्वाद्गुणे कृतेऽत उपधाया इति वृद्धिः प्राप्नोति। गुणभूतस्येति। गुणशब्दं स्वरूपपदार्थको गुणशब्देन भूतो निष्पन्नो गुणभूतस्य एवं गुणशब्देनाभिनिर्वृत्तो गुणाभिनिर्वृत्तः। यद्यनेन गुणे कृतेऽत उपधाया इति वृद्धिः स्याच्चिण्णलोर्गुणप्रतिषेधोऽनर्थकः स्यात्कृते गुणे वृ

भूतपूर्वगत्या भविष्यति। न सिध्यति। न हि उसः स्थानभूतपूर्वः। उसः स्थानभूतपूर्वो नास्तीति कृत्वा उसि यः स्थानभूतपूर्वस्तस्मिन्नु भविष्यति। अथवा क्रियते न्यास एव। अविभक्तिको निर्देशः। नैवं विज्ञायते मिदेर्गुणो जुसि चेति। कथं तर्हि। मिदेर्गुण उज्जुसि चेति। किमिदमुज्जुसीति। उकारादौ जुसि उज्जुसीति। अथवा अचीति वर्तते तेन जुसं विशेषयिष्यामः अजादौ जुसीति॥ जाग्रोविचिण्णल्ङित्सु॥ इह जागरयति जागरक इति गुणे कृते रपरत्वे चात उपधाया इति वृद्धिः प्राप्नोति तस्याः प्रतिषेधो वक्तव्यः। चिण्णलोः प्रतिषेधसामर्थ्यादत्र गुणभूतस्य वृद्धिप्रतिषेधः। यदयमचिण्णलोरिति प्रतिषेधं शास्ति। तज्ज्ञापयत्याचार्यो न गुणाभिनिर्वृत्तस्य वृद्धिर्भवतीति। किं पुनरयं पर्युदासः यदन्यद्विचिण्णल्ङिद्भ्य इति। आहोस्वित्प्रसज्यायं प्रतिषेधः विचिण्णल्ङित्सु नेति। कश्चात्र विशेषः। प्रसज्यप्रतिषेधे जुसि गुणप्रतिषेध उत्तमे च णलि। प्रसज्यप्रतिषेधे जुसि गुणप्रतिषेधः प्राप्नोति। अजागरुः। उत्तमे च णलि प्रतिषेधः प्राप्नोति। अहं जजागर। न वानन्तरस्य प्रतिषेधात्।

द्यारूपस्यासिद्धत्वान्न स्याच्चिण्णलोः प्रतिषेध उपधावृद्ध्यभावस्य ज्ञापको वृद्धिमात्राभावस्य तु न ज्ञापकः। तथा च ह्यन्तक्षणेत्यत्र जागृग्रहणं जागरीदित्यत्र वृद्धिनिषेधार्थं कृतम्। अन्यथा गुणे कृते अतो ल्रान्तस्येति अनेन वृद्धिर्न भविष्यतीति किं जागृग्रहणेन। अजागरुरिति। लङः सिजभ्यस्तविदिभ्यश्चेति झेर्जुसादेशः तस्य ङित्त्वाज्जुसि चेत्यनेनापि प्राप्तस्य निषेधः प्राप्नोति। तथा जजागरेत्यत्र णित्वाभावपक्षे सार्वधातुकार्धधातुकयोरित्यनेनापि प्राप्तस्य गुणस्य निषेधप्रसङ्गः। पर्युदासपक्षे तु न दोषः। तत्र विचिण्णल्ङिद्भ्योऽन्यत्र गुणो विधीयते न चैतेषु निषिध्यत इति लक्षणान्तरेण गुणः प्रवर्तत एव॥

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा° कै° जागृविरिति। इह जागृभ्यो विन्निति सूत्रपाठमाश्रयेण चोद्यते। यदा तु जृभ्रस्त्रजागृभ्यः क्विन्निति पाठस्तदा क्वित्वादेवार्धधातुकलक्षणगुण ७।३।२
१२२ प्रसङ्गः। यद्यपि प्रसज्यप्रतिषेधेऽप्ययं दोषोऽनन्तरस्य निषेधात्तथापि पर्युदासे दोषबाहुल्यमिति प्रतिपादनायेदमुच्यते। नवेति। यदि जागृवि
रित्यत्र लक्षणान्तरेण गुणः स्याद्वेः पर्युदासोऽनर्थकः स्यात्। क्विबर्थमिति। नहि लक्षणान्तरेण गुणप्रसङ्गः। न चात्र तदनुबन्धकपरि
भाषोपतिष्ठते। अनुबन्धस्यानिर्देशादिति विग्रहणेन क्विबपि गृह्यत इति भावः। शुद्धपरस्येति। विशब्दे इकारो निरनुनासिकः उच्चारि
त इति क्विपो ग्रहणं नास्ति। तस्य हीकारोऽनुनासिकः। वस्वर्थमिति। विशब्दः सप्तम्यन्तो निर्दिश्यते निपातनाच्च सप्तम्या अलुक् यथा वरेयत्तो

नवा एष दोषः। किं कारणम्। अनन्तरस्य प्रतिषेधात्। अनन्तरं यद्गुणविधानं तस्य प्रतिषेधः। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति जुसि पूर्वेण विधानम्। जुसि पूर्वेण गुणो विधीयते। जुसि चेति। णलि च। किम्। नवानन्तरप्रतिषेधादित्येव णलि च पूर्वेण गुणो विधीयते सार्वधातुकार्धधातुकयोरिति। अथवा पुनरस्तु पर्युदासः। अतोन्यत्र विधाने वावगुणत्वम्। अतोन्यत्र विधाने वा अगुणत्वं वक्तव्यम्। जागृविः। नवा पर्युदाससामर्थ्यात्। नवा वक्तव्यम्। किं कारणम्। पर्युदाससामर्थ्यादत्र गुणो न भविष्यति। अस्त्यन्यत्पर्युदासे प्रयोजनम्। किम्। क्विबर्थं पर्युदासः स्यात्। शुद्धपरस्य विशब्दस्य प्रतिषेधग्रहणम्। अनुनासिकपरश्च क्वौ विशब्दः। वस्वर्थं तर्हि पर्युदासः स्यात्। जागृवांसो अनुग्मन्। कथं पुनर्वेः पर्युदास उच्यमानो वस्वर्थः शक्यो विज्ञातुम्। सामर्थ्याद्वस्वर्थमिति चेन्न सार्वधातुकत्वात्सिद्धम्। वस्वर्थमिति चेत्तन्न। किं कारणम्। सार्वधातुकत्वात्सिद्धम्। कथं सार्वधातुकसंज्ञा। छान्दसः क्वसुः। लिट् च छन्दसि सार्वधातुकमपि भवति। तत्र सार्वधातुकमपिदिति ङित्त्वात्पर्युदासो भविष्यति।

वेति। अथवा इकार उच्चारणार्थ इति तत्र तदादिविधानात् क्वसोर्ग्रहणं भवतीति भावः। इतरस्तु यथोक्तमप्रतिपद्य विरिति समुदायो निर्दिष्ट
इति मत्वाह। कथं पुनरिति। इतरः पूर्वोक्तेनाभिप्रायेणाह। सामर्थ्यादिति। औणादिको न पर्युदस्यते लक्षणान्तरेण प्रसङ्गादिति सामर्थ्या एम:
इकारादेः क्वसोर्ग्रहणमित्यर्थः। छान्दस इति। भाषायां सदवसश्रुभ्य एव क्वसुर्नान्येभ्य इति भावः। केचित्तु भाषायामपि क्वसुमिच्छन्ति त एवं १२१
परिहरन्ति। असंयोगाल्लिट् किदिति सिद्धे कित्त्वे क्वसोः कित्त्वं प्रतिषेधविषयस्यापि गुणस्य प्रतिषेधार्थमिति क्वसौ गुणाभावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयवेति। अनकारस्य हलउच्चारयितुमशक्यत्वादुइकार उच्चारणार्थो निर्दिष्ट इति वकारादेर्ग्रहणं करोति च प्रतिविहितमिति औणादिकरावपर्यु
दस्यतेतत्सामर्थ्याह्लक्षणान्तरेणापि गुणो न भवति क्विपस्तु लोपादवर्णाश्रये प्रत्ययलक्षणनिषेधाच्च पर्युदासं नेच्छन्ति। अन्ये तु यथाऽतृणे
डिति प्रत्ययलक्षणेन इमागमो भवति वर्णस्य प्रत्ययविशेषणत्वादेवं क्विपोऽपि पर्युदास इत्याहुः॥ पुगन्ता। संयोग इति। धात्वन्तप्रत्ययाद्योर्ह
लोरानन्तर्ये संयोगे गुर्विति गुरुसंज्ञायां लघुसंज्ञाया बाधनादुक्तेति गुणो न भवति। अजादौ च भेदनमित्यादौ सावकाशो गुणः। विध्यपेक्षमि
ति। गुणविधानमिति शेषः। लघूपधाये विहिते सार्वधातुकार्धधातुके तयोरङ्गस्य गुण इत्यर्थः। ननु पञ्चम्यभावात्कथं विधानं भविष्यति
। उच्यते। षष्ठीपक्षेऽपि लघूपधस्य ये सार्वधातुकार्द्धधातुके च तस्य ये तस्माद्विधीयेते इत्युपपद्यते विधानविशेषणम्। ननु सांप्रतिकल
घूपधसंभवे कथं विधानं विशेष्यते व्याप्तिन्यायाश्रयादेवं हि हलादावजादौ च गुणः सिध्यति। कथं कुण्डिरिति। अङ्गाधिकारे तु नोवि-

अथवावकारस्यैवेदं मशक्तिजेने कारेण ग्रहणम्॥ पुगन्तलघूपधस्य॥ संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति। संयो
गे गुरुसंज्ञायां भेत्ता भेत्तुमिति गुणो न प्राप्नोति। विध्यपेक्षं लघोश्चासौ। विध्यपेक्षं लघुग्रहणं कृतम्। लघोश्चासौ विहितः
। कथं कुण्डि नं दुष्यति। कुण्डिना हुण्डिना। अत्र कस्मान्न भवति। धातोर्नुमः। धातोर्नुम्विधावुक्तं तत्र धातुग्रहणस्य प्रयो
जनम्। धातूपदेशावस्थायामेव नुम्भवतीति। कथं रञ्जेरुपधालक्षणा वृद्धिः आश्वयोरागः स्यन्दिश्रन्थ्योर्निपातनात्।
यदयं स्यन्दिश्रन्थ्योर वृद्ध्यर्थं निपातनं करोति तज्ज्ञापयत्याचार्यो भवत्येवंजातीयकानां वृद्धिरिति। विविज्ञोरागः।

धानादकृत एव नुमि प्रत्ययो लघूपधाद्विधीयते न तस्मिन्परतो नुमि गुणः प्राप्नोति। उक्तं तत्रेति। तेन कुण्डेति गुणोऽप्यहल्लघुत्यकारः सिध्यति अन्य-
थाकिन्त्स्यात्। कथं रञ्जेरिति। यदि षष्ठीनिर्देशेऽपि विधानं विशेष्यते तदान्यत्रापि प्रसङ्गः। ननु आकारे उपधा हिते प्रत्यये वृद्धिर्विधीयमाना रञ्जे
ः प्रत्ययोत्पत्तेः पुरस्तान्नकारेऽपगत्वा वृद्धिर्नप्राप्नोति। राग इति। रञ्जेश्च घञि च भावकरणयोरिति नलोपः। ननु चोपधाया अकारस्य वृद्धिरुच्य
ते न च ततः प्रत्ययविधिसंभव इति विध्यपेक्षत्वं नाश्रयिष्यत एवं मन्यते। आकारोऽपधायो विधीयते सोऽवयवादनुमानाद्विहितो भवति। स्यन्दि
श्रन्थ्योरिति। नलोपार्थं वृद्ध्यभावार्थं निपातनम्। यदि वृद्धिविधौ विधानं विशेष्यते तेन तो वृद्धिप्रसङ्गाभावान्नदभावार्थं निपातनं न क्रियेत न नलोप
सिद्धये विधिरेवाश्रीयेत अनेकप्रयोजनसिद्धये निपातनाश्रयणम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनङ्लोपेनि॥ अल्लोपोनइत्यत्र षष्ठीनिर्देशेऽनन्तादिहितेप्रत्ययेलोपोविधीयमानोराज्ञइत्यादावेवस्यान्नास्मादध्रेत्यादौशिदीर्घत्वंच सामानीत्यादावेवस्यान्नतुकुण्डानीत्यादौ तस्मात्षष्ठीनिर्देशेविधानविशेषणेदोषप्रसङ्गादुगुणोभेनुर्नसिध्यति। अभ्यस्तस्येति। अजग्रह-णस्यप्रयोजनंनेनेक्तीत्यादौगुणप्रतिषेधोमाभूत्। यदिचहलादावलघूपधत्वाद्गुणोनस्यात्तदागुणस्यप्राप्तिरेवनास्तीतिकिंतन्निषेधनि वारणार्थेनाज्ग्रहणेन। लङर्थमिति। लुक्तेप्रत्ययेगुणप्रतिषेधनिवारणायाज्ग्रहणंनज्ञापकम्। अनेनेगिति। णिजिरशौचपोषणयोरित्य-स्माल्लुङिति पुषादिप्रश्लुःद्विर्वचनंनिजांत्रयाणांगुणश्लावित्यभ्यासस्यगुणः हलूङ्याब्भ्यइतितिलोपः प्रत्ययलक्षणेनलघूपधागुणः ।क्नुसनोरिति। ननुसनःकित्वममभावार्थस्यात्सिस्क्षतिदिद्दक्षतइतिकथंज्ञापकम्। उच्यते। यद्येतावत्प्रयोजनंस्यात्तदाजिदृशोर्झल्य

अनङ्लोपशिदीर्घत्वेविध्यपेक्षेनसिध्यतः। अनङ्लोपःदधासक्थ्ना। शिदीर्घत्वंकुण्डानिवनानि। एवंतर्हि। अभ्यस्तस्ययदाहावि ।यदयंनाभ्यस्तस्याचिपिपितिसार्वधातुकइत्यजग्रहणंकरोतितज्ज्ञापयत्याचार्योभवत्येवंजातीयकानांगुणइति। लङ र्थेतत्स्यात्तंभवेत्। लङर्थमेतत्स्यात्। अनेनेक्। क्नुसनोर्यत्कितंकित्वंज्ञापकंस्याल्लघोर्गुणे। यदयंत्रसिग्धिधृषिक्षिपेःक्नुःइ कोझलहलन्ताच्चेतिक्नुसनौकितौकरोतितज्ज्ञापयत्याचार्योभवत्येवंजातीयकानांगुणइति। संयोगेगुरुसंज्ञायांगुणोभेनु र्नसिध्यति। विध्यपेक्षंलघोश्चासौकथंकुण्डिर्नदुष्यति। धातोर्नुमःकथंरञ्जेःस्यन्दिश्रन्थ्योर्निपातनात्। अनङ्लोपशिदीर्घ त्वेविध्यपेक्षेनसिध्यतः। अभ्यस्तस्ययदाहाविलङर्थेतत्स्यात्तंभवेत्। क्नुसनोर्यत्कितंकित्वंज्ञापकंस्याल्लघोर्गुणे॥ नाभ्यस्त ॥अभ्यस्तानामुपधाह्रस्वत्वमचिपस्पशानेचाकशीमिवावशातीरितिदर्शनात्। अभ्यस्तानामुपधाह्रस्वत्वमचिवक्तव्यम्। किंप्रयोजनम्।

मकित्सनोरित्येवब्रूयात् तस्माद्गुणप्रतिषेधार्थमपिकित्वंज्ञापकमेव किंतुधिप्सतिधीप्सतीत्यत्रनलोपार्थंसनःकित्वंस्यादितिक्नोरेवकित्वं ज्ञापकम्॥ नाभ्य॥ अभ्यस्तानामिति। गुणप्रतिषेधमविधायह्रस्वत्वमेवविधेयंसर्वेष्टसिद्धयइतिभावः। किंप्रयोजनमिति। गुणनिषेधेह्रस्वे-वाविशेषंमत्वाप्रश्नः। पस्पशानइति। स्पशिर्वार्तिककारवचनादपठितोऽपिधातुस्तस्माल्लिटोश्यत्ययेनात्मनेपदंटेरेत्वंलिटोडाटावि-त्यादेशपोबहुलंछन्दसीतिश्लुःद्विर्वचनम्॥ राम: १२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चाकशीमीति। काशृ दीप्तौ यङ्‌लुगन्ताल्लट्। मिपू अभ्युक्। यङोवेतीडागमः। वावशतीरिति। वाशृ शब्दे यङ्‌लुक्‌लट्‌ शतृ ङीप्। जुजोषदिति। जुषी-प्रीतिसेवनयोः। लेट्। व्यत्ययेन परस्मैपदं तिप्‌ इतश्च लोपः परस्मैपदेष्विति इकारलोपे लेटोडाटावित्यट्। व्यत्ययेन श्लुः। श्लुः द्विर्वचनं गुणोक्तेह्रस्वाभावः। यद्दित्तदीति। यद्दि गुणनिषेधं प्रत्याख्यायोपधाह्रस्वो विधीयते तदा नन्नर्तीतिगुणरपरत्वयोः कृतयोः ह्रस्वभाविन्युपधा नास्तीति रूपं न सिध्यतीति गुणनिषेध एव न्याय्यः। ननु परत्वाद्गुणं बाधित्वा ह्रस्वो भविष्यति सकृद्गतौ विप्रतिषेधइति पुनर्गुणो न भवि-ष्यति। एवं तर्हि पुनः प्रसङ्गविज्ञानाद्गुणः स्यात्। स्वशिकश्चिवशयइति। स्वश बाधनस्पर्शनयोः कश गतिशासनयोरिति केचित्पठन्ति। अन्ये तु कस गतिशासनयोरिति तन्मतेन कशिः सौत्रो धातुः कशेर्मुट्। प्रतिकशश्च कशेरिति पाठाद्वशकान्तौ। भूण्येकाज्ग्रहणमिति। द्विर्वचनेऽरू-

पस्य शाते चाकशीमि वावशतीरिति दर्शनात्। पस्यशाते चाकशीमि वावशतीरिति प्रयोगो दृश्यते। कपोतः शरदं पस्पशाते। अहं भुवनं चाकशीमि वावशती हृदा जरिति। बहुलं छन्दसि आ नुषक् जुजोषदिति दर्शनात्। बहुलं छन्दसीति वक्तव्यमुप धाह्रस्वत्वम्। किं प्रयोजनं आनुषक्‌जुजोषदिति दर्शनात्। यस्त आतिथ्यमानुषक्‌जुजोषत्। यद्युपधाह्रस्वत्वमुच्यते। प्रियां मयूरः प्रतिनर्न्दतीति। यङ्लुवंनरवरनर्न्दतीति विहह्रः। अत्र गुणः प्राप्नोति तस्मान्नार्थ उपधाह्रस्वत्वेन। कस्मान्न भवति पस्पशा ते चाकशीमि वावशतीरिति। स्वशिकशिवशयः प्रकृत्यन्तराणि॥ भूसुवोः भूसुवोः प्रतिषेध एकाज्ग्रहणं बोभवतीत्यर्थम्। भूसुवोः प्रतिषेध एकाज्ग्रहणं कर्तव्यम्। किं प्रयोजनम्। बोभवतीत्यर्थम्। इह माभूद्बोभवतीति। यद्येकाज्ग्रहणं क्रि यते अभूत्। अत्र न प्राप्नोति। क्व तर्हि स्यात्। माभूत्। तस्मान्नार्थ एकाज्ग्रहणेन। कस्मान्न भवति बोभवतीति। बोभूतिविन्ये तन्नियमार्थं भविष्यति। अत्रैव यङ्‌लुगन्तस्य गुणो न भवति नान्यत्रेति।

तेऽनेकाच्त्वे गुणनिषेधनिवृत्त्यर्थम्। बोभवतीति। यङ्‌लुगन्ताल्लेट्। इति बूलेटोडाटावित्यट्। माभूदिति। न माङ्योग इत्यट्प्रतिषेधादे काच्त्वम्। अत्रैवेति। सिद्धे गुणनिषेधे निपातनं नियमार्थम्। यद्येवं सोपवीतीति गुणनिषेधः प्राप्नोति। उच्यते। भाष्ययथा न यासवन्ये व योगापेसंज्ञापकमिति वक्तव्ये नियमार्थमिति वचनाद्यथा नियमार्थेन निपातनेन द्वयोरपि भूसुवोर्यङ्‌लुकि गुणनिषेधो नि-वार्यते। यद्वा छान्दसो यङ्‌लुक्। न च सुवो यङ्‌लुगन्तस्य छन्दसि प्रयोगः। भाषायां तु क्वचिद्यङ्‌लुग्भवति न सर्वत्र। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै· तृणह॥ किमर्थमिति। तृहइत्यस्य निवृत्त्यर्थो विकरणनिर्देशो भवति। ततः परस्य हलादेः पितः सार्वधातुकस्य विकरणेन व्यवधानादिति ७ ३ २
१२३ प्रश्नः। नह्यस्य तद्भूति। व्यवस्थार्थमित्येवं ब्रुवता पूर्वं श्नमो भावः पश्चादिमुक्तं भवति। श्नमो भावायेति तूच्यमाने क्रमो न प्रदर्शितः स्यात्॥ तृ
ह॥ अपिदर्थमिति। नाभ्यस्तस्याचि पिति सार्वधातुक इति सार्वधातुकग्रहणं पिद्विशेषणं सम्बद्धमिति तदनुवृत्तौ पितोऽप्यनुवृत्तिः स्यादिति तन्-
न्निवृत्त्यर्थमन्यत्सार्वधातुकग्रहणमित्यपितोऽपीड् भवति। हल्ग्रहणमनुवर्तते न हि तत्सार्वधातुकग्रहणेन सह निर्दिष्टं यतस्तन्निवृत्तौ

कमाभूदिवो भवतीति॥ तृणह। किमर्थं तृहिरागतश्नमूको गृह्यते। न तृहेरिम् भवतीत्येवोच्येत। तृणहिंग्रहणं श्नमिमोर्व्य-
वस्थार्थम्। तृणहिग्रहणं श्नमि कृते इमन्यथा स्यात्। तृहिग्रहणे हि श्नविषये श्नमभावो नवकाशत्वात्। तृहिग्रहणे हि सति इ-
मृविषये श्नमो भावः स्यात्। किं कारणम्। अनवकाशत्वात्। अनवकाश इम् श्नमं बाधेत। इदमयुक्तं वर्तते। किमत्रायु-
क्तम्। तृहिग्रहणं श्नमिमोर्व्यवस्थार्थमित्युक्त्वा तत उच्यते। तृहिग्रहणे हि विषये श्नमभावो नवकाशत्वादिति। तत्र वक्त-
व्यं तृणहिग्रहणं श्नमिमोर्भावाय तृहिग्रहणे हि विषये श्नमभावो नवकाशत्वादिति। न तर्हि वक्तव्यम्। न वक्तव्यम्। व्यव-
स्थार्थमित्येव सिद्धम्। न ह्यस्य तो व्यवस्थेति॥ तुरु॥ सार्वधातुक इति वर्तमाने पुनः सार्वधातुकग्रहणं किमर्थम्। पुनः सार्वधातु-
कग्रहणमपिदर्थम्। अपिदर्थोयमारम्भः। अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगो॥ बहुवचने॥ अतो दीर्घाद्ब-
हुवचन एत्त्वं विप्रतिषेधेन। अतो दीर्घाद्बहुवचन एत्त्वं भवति विप्रतिषेधेन। अतो दीर्घो यञि सुपि चेत्यस्यावकाशः वृक्षाभ्यां
प्लक्षाभ्याम्। बहुवचने झल्येदित्यस्यावकाशो वृक्षेषु प्लक्षेषु। वृक्षेभ्यः प्लक्षेभ्यः इहोभयं प्राप्नोति। एत्त्वं भवति विप्रतिषे-
धेन॥ अम्बार्थ॥ डलकवतीनां प्रतिषेधो वक्तव्यः। अम्बाडे। अम्बाले। अम्बिके। न लुह्रस्वत्वं वा डि संबुध्योः। न लो ह्रस्वत्वं
वा डि संबुध्योरिति वक्तव्यम्॥ देवत्।

हलो निवृत्तिः स्यात्। शमीध्वमिति। शमेरन्तर्भावितण्यर्थात् प्रैषे लोट् व्यत्ययेनात्मनेपदं शपस्तस्य बहुलं छन्दसीति लुक्॥ अम्बा॥ डल- राम:
कवतीनामिति। अर्थगतेन स्त्रीत्वेनाम्बार्थाः शब्दा निर्दिष्टाः। श्रुत्यपेक्षया वा स्त्रीत्वेन निर्देशः। असंयुक्तानां च डलकानां ग्रहणाद- १२३
काल्हेति ह्रस्वो भवत्येव। ॥

CC-0. In Public Domain. Digitization by eGangotri

देवतद्‌इति। ङो ह्रस्वे कृते इत्याबुग्रहणेऽदीर्घ इति स्थानिवत्त्वनिषेधाद् आम्याडागमौ न भवतः। अम्बार्थमिति। द्व्यच इत्यम्बार्थस्य ग्रहणाड्डु
लकवतामर्थात् प्रतिषेधः कृतो भवति। अवश्यमिति। व्यत्ययो बहुलमिति दीर्घस्य ह्रस्वः। मातॄणामिति। पूर्वपदे बहवो मातृशब्दाद्
ति बहुवचनं मातृशब्दस्य मातजादेशो वक्तव्यो यो मातृशब्दः पुत्रार्थं पुत्रमभिधातुमुपादीयते बहुव्रीहौ च वर्तिपदैरन्यपदार्थोऽ-
भिधीयत इति तत्रैवायं संबुद्धौ मातजादेशः। गार्गीमातेति। गार्गी माता यस्येति बहुव्रीहौ न द्यूतश्चेति कप्प्रतिषेधेन नाप्राप्त इति मातजा बाध्यते
यः पुत्रः श्लाघ्यगुणत्वात् कुलसंभूतया मात्रा व्यपदेशमर्हति तत्र मातजादेशो नान्यत्र। गर्गवत्साभ्यां गर्गादि यञ्यञश्चेति ङीप्प्र

देवते। देवता यां देवते। स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। स कथं न वक्तव्यो भवति। अम्बार्थं द्व्यक्षरं यदि। यद्यम्बा
र्थं द्व्यक्षरं गृह्यते। तत्तर्हि ह्रस्वत्वं वक्तव्यम्। न वक्तव्यम्। अवश्यं छन्दसि ह्रस्वत्वं वक्तव्यम्। उपगायन्तु मां पतयो
गर्भिणो युवतय इत्येवमर्थम्। मातॄणां मातच् पुत्रार्थमर्हते। मातॄणां मातजादेशो वक्तव्यः पुत्रार्थमर्हते। गा
र्गीमात वात्सीमात॥ ह्रस्व॥ इह कस्मान्न भवति नदि कुमारि किशोरि ब्राह्मणि ब्रह्मबन्धु। ह्रस्ववचनसामर्थ्यात्।
अस्त्यन्यद्‌ह्रस्ववचने प्रयोजनम्। पृथग्विभक्तिं मोच्चीचरन्निति। शक्यं पृथग्विभक्तिमनुच्चारयितुम्। कथमेवम
यं ब्रूयात्। अम्बार्थानां ह्रस्वः नदीह्रस्वयोर्गुण इति। यद्येवमुच्यते जसि चेत्यत्र नद्या अपि गुणः प्राप्नोति। एवं तर्हि योग
विभागः करिष्यते। अम्बार्थनद्योर्ह्रस्वः ततो ह्रस्वस्य। ह्रस्वस्य च ह्रस्वो भवति। किमर्थमिदं गुणं वक्ष्यति तद्बाधनार्थम्। त
तो गुणः गुणश्च भवति ह्रस्वस्येति। अथवा ह्रस्वस्य गुण इत्यत्राम्बार्थनद्योर्ह्रस्व इत्येतदनुवर्तिष्यते।

स्व॥ इह कस्मादिति। ह्रस्वविधानं नद्या गुणविध्यर्थमेतस्मात्। पृथगिति। यद्यम्बार्थानां ह्रस्व इत्युक्त्वा नद्या गुणो ह्रस्वस्य चेत्युच्यते तत्तदा-
पृथगुच्चारयितव्या भवति। एवमयं ब्रूयादिति। ह्रस्वं विधाय गुणो विधीयमाने प्रक्रियागौरवं भवतीति लाघवार्थं साक्षादेव गुणं विदध्या
त्। नद्या अपीति। एकसमासनिर्देशाद् द्वयोरपि नदीह्रस्वयोरनुवृत्तिप्रसङ्गात्। ह्रस्वस्य चेति। ह्रस्वस्येत्यत्राम्बार्थनद्योरिति वर्तते तेन नद्या
ह्रस्वे कृते तस्य गुणबाधनाय ह्रस्वग्रहणं क्रियते। अथवेति। सिद्धे ह्रस्वे पुनरनुवृत्त्यात् तद्विधानं गुणबाधनार्थम्। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जसि चा। जसादिषिति। आदिशब्दः प्रकारवाची प्रकारोऽस्मिन्येषु कार्यविधी वर्तते जसादयइति। पूर्वयोगनिर्दिष्टानामपि ग्रहणमादद्धीति। कृदिकारादक्तिनइति पक्षे ङीषि धानात्सिध्यति रूपद्वयम्। ङीषु विकल्पं त्वनपेक्ष्यैतदुक्तम्। शतक्रत्वइति। जसि चेति गुणाभावपक्षे प्रथमयोरिति पूर्वसवर्णदीर्घोऽपि वाछन्दसीति वचनान्न भवति यणादेशः प्रवर्तते। किकिदीविशब्दः कृविघृषिन्नुणादिषु निपातितः। घेः। कुरुतइति। शेषो घ्यसखीति यस्य नदीसंज्ञा नास्ति स घिसंज्ञ इति कुरुशब्दो घिः॥ याडा॥ अतिखट्वायेति। खट्वामतिक्रान्त

जसि चा। जसादिषु छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः। जसादिषु छन्दसि वेति वक्तव्यम्। किमविशेषेणेत्याह। प्राङ् णौ चङ्युपधायाः। किंप्रयोजनम्। अम्बे दर्विशतक्रत्वः पश्वे किकिदीव्या। अम्बे अम्ब। दर्वे दर्वि शतक्रत्वः। शतक्रतवः। पश्वे पशवे किकिदीव्या। किकिदीविना॥ घेर्ङिति॥ घेर्ङिति गुणादिधाने ङौ सार्वधातुके प्रतिषेधो वक्तव्यः। पट्वी। मृद्वी। कुरुतइति सुबधिकारात्सिद्धम्। सुपीति वर्तते। क्व प्रकृतम्। सुपि च बहुवचने झल्येदिति॥ याडापः॥ इहातिखट्वायाति मालायेति। ह्रस्वत्वे कृते स्थानिवद्भावाद्याडाप्नोति तस्य प्रतिषेधो वक्तव्यः। न वक्तव्यः। याड्विधाने तिखट्वायेत्यप्रतिषेधो ह्रस्वादेशत्वात्। याड्विधानेऽतिखट्वायातिमालायेत्यप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। याडू स्यान्न भवति। ह्रस्वादेशो यम्। उक्तं चैतत्। ङ्याब्ग्रहणेऽदीर्घइति। अथेदानीमसत्यपि स्थानिवद्भावे दीर्घत्वे कृते आबसौ भूतपूर्वइति कृत्वा याट्कस्मान्न भवति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। ननु चेदानीं सत्यपि स्थानिवद्भावे तयापरिभाषया शक्यमुपस्थातुम्। नेत्याह। न हीदानीं क्वचिदपि स्थानिवद्भावः स्यात्। ङेराम्॥ ॥

इद्वृद्धामाम्विधानमौत्वस्य परत्वात्। इद्वृद्धामाम्विधेयः।

इति प्रादिसमासे ह्रस्वे च कृते चतुर्थ्येकवचनस्य ङेर्यइति प्राप्नोति याडापइति वत्तत्र परत्वाद्याट् प्राप्नोति तत्र कृते दीर्घत्वे चातिखट्वायैदेवदत्तायेति प्रसङ्गः। ह्रस्वादेशत्वादिति। यतो ह्रस्वादेशः कृतस्ततो रूपभेदादापूग्रहणेन तस्य ग्रहणाभावात्। स्थानिवत्त्वं च नास्तीत्याह। उक्तं चैतदिति। लक्षणेति। अकारस्य दीर्घे सत्यादिति लाक्षणिकं रूपमिति न तस्य ग्रहणम्। ननु चेति। ङ्याब्ग्रहणेऽदीर्घइति न वक्तव्यमिति चोद्यतेनेत्याहेति। परिहारः। ङेः॥ ॥ रामः १२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शकट्यामिति। शकटिशब्दस्य ङिति ह्रस्वश्चेति वा नदीसंज्ञाविधानान्नदीभावपक्षे घिसंज्ञायां शकट्यामिति भवति। नदीसंज्ञापक्षे तु परत्वादैत्वं प्राप्नोति। आमेवकाशः। कुमार्यामिति। औत्वस्यावकाशः। सख्यौ पत्याविति। अत आह। इदुद्भ्यामिति। पूर्वविप्रतिषेध आश्रयणीय इत्यर्थः। ननु कृते औत्वे पुनः प्रसङ्गविज्ञानादाम् भविष्यति। पुनरौत्वं न भविष्यति। चक्रकेऽपि इष्टतो व्यवस्थापनात्। नैतदस्ति। द्रव्यपदार्थपक्षे सकृद्गतिपरिभाषया न स्यात्। योगविभागद्वेति। इदुद्भ्यामित्यत्र योगे नदीग्रहणानुवृत्त्या सख्यौ पत्यावित्यत्राम्प्रसङ्गः॥ औत्॥

शकट्यां पद्धत्यां धेन्वामिति। किं पुनः कारणं न सिध्यति। औत्वस्य परत्वात्। परत्वादैत्वं प्राप्नोति। योगविभागात्सिद्धम्। योगविभागः करिष्यते। ङेराम्नद्याम्नीभ्यः। ततः इदुद्भ्याम्। इदुद्भ्यामुत्तरस्य ङेराम् भवतीति। शकट्यां पद्धत्यां धेन्वामिति। तत औत्। अच्च घेः॥ औत्वे योगविभागः कर्तव्यः। औत्। औद्भवतीदुद्भ्याम्। ततः अच्च घेरिति। अकारश्च भवति घेरिति। किमर्थो योगविभागः। सखिपतिभ्यामौत्वार्थः। सखिपतिभ्यामौत्वं यथा स्यात्। सख्यौ पत्यौ। एकयोगे ह्यप्राप्तिरत्वसन्नियोगात्। एकयोगे हि सत्यौत्वस्याप्राप्तिः। किं कारणम्। अत्वसन्नियोगात्। अत्वसन्नियोगेनौत्वमुच्यते। तेन यत्रैवात्वं तत्रैवौत्वं स्यात्। न वाकारस्यान्वाचययवचनाद्यथा क्यङि सलोपः। न वार्थ औत्वे योगविभागेन। किं कारणम्। अकारस्यान्वाचययवचनात्। प्रधानशिष्टमौत्वमन्वाचयशिष्टमत्वम्। यथा क्यङि सलोपः। तद्यथा। प्रधानशिष्टः क्यङ् प्रातिपदिकमात्राद्भवति। यत्र च सकारस्तत्र लोपः।

औत्वेति। एकयोगे त्वत्वौत्वयोः सन्नियोगशिष्टत्वाद्यत्रात्वं तत्रौत्वं स्यात्। सख्यौ पत्याविति। असखीति प्रतिषेधात् पतिः समास एवेति नियमाच्चानयोर्नास्ति घिसंज्ञा। अस्त्र्याख्यत्वाच्च नदीसंज्ञा नास्ति। यदा सखिशब्दः स्त्रियां वर्तते तदा सख्यशिश्वीति भाषायामिति ङीषा भाव्यं पतिशब्दस्य तु स्त्रीत्वेऽपि यज्ञसंयोगादन्यत्र ङिति ह्रस्वश्चेति पक्षे नदीसंज्ञेति पत्यामिति भवति। नवेति। अन्वाचये चशब्दः। इदुद्भ्यां परस्य ङेरौद्भवतीत्यत्र तु घिसंज्ञास्ति तत्र तस्यात्वमिति अत्वानपेक्षमौत्वं प्रधानशिष्टम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा· कै· अत्वइति। टापि सत्योङ आपइति षष्ठीभावः प्राप्नोति। यद्यत्र सामान्यग्रहणार्थोङ· कारो वर्णनिर्देशो वा। यद्यानुपूर्व्याचार्यनिर्देशस्तदाप्र- ७ ३ २
१२५ थमाद्वितीयाद्विवचनयोरेव षष्ठीविधानादस्या प्रसङ्गः। अन्ये टापि याट्प्रसङ्गमाहुः। नवेति। यासेत्यादौ टाबू भवति। त्यदाद्यकारस्यात्रिधेरि
तिदोषेषु परिगणनात्। डित्करणादिति। अन्तोदात्तेषु स्वरभेदोऽपि नास्ति। डित्वउदात्तनिवृत्तिस्वरेणाभाव्यम्। अडित्वेत्वेकादेश उदात्तेनो
दात्तइति। ननु डित्वे सख्योपत्यावितिटिलोपप्रसङ्गः। नैतदस्ति। औत्ङिच्चघेरितिन्यासः क्रियते। पत्यावैश्वर्यइति निपातनाद्वाऽद्योघि-
लोपाभावः। विंशत्यावित्यत्र तिविंशतेर्डितीति तिलोपो न भवति। नस्तद्धितइति योगविभागात्तद्धितइत्यत्र तिविंशतेर्डितीति तिनइति चानुवर्त
तो टेरित्येतत्तु नानुवर्तते। अतद्धितानां डित्करणसामर्थ्यात्। अथवा टेरित्यनुवर्तताम्। तथाप्यतद्धितानां डित्करणसामर्थ्याद्यथैवह्य

अत्वेटापू प्रतिषेधः। अत्वे टापः प्रतिषेधो वक्तव्यः। शकटौ। पद्धतौ। धेनौ। अत्वे कृते ऽतइति टाप् प्राप्नोति। नवा सन्निपातल
क्षणस्यानिमित्तत्वात्। न वा वक्तव्यः। किं कारणम्। सन्निपातलक्षणस्यानिमित्तत्वात्। सन्निपातलक्षणो विधिरनिमि
त्तं तद्विघातस्येति। एवं न भविष्यति। डित्करणाद्वा। अथवा डिदौकारः करिष्यते। आङोनाऽस्त्रियाम्॥ किमर्थमस्त्रियामित्युच्य
ते। नाङो नापुंसीत्येवोच्येत। का रूपसिद्धिः। त्रपुणा। जतुना। नुमासिद्धं नैवं शक्यम्। इह स्यमुना ब्राह्मणकुलेनेति मुभा
वस्यासिद्धत्वान्नुम्स्यात्। अस्त्रियामिति पुनरुच्यमाने न दोषो भवति। वक्ष्यत्येतन्नमुटादेशइति॥ इति श्रीमद्भ
गवत्पतञ्जलिविरचिते सप्तमस्य तृतीये पादे द्वितीयमाह्निकम्। पादश्च समाप्तः॥

मस्य लोपो भवति एवमतद्धितेष्वपि॥ आङो॥ किमर्थमिति। आङो नापुंसीत्युच्यमाने मात्रालाघवं भवतीष्टं च सिध्यतीति प्रश्नः
॥ नुमेति। इकोचि विभक्ताविन्यनेन। अमुनेति। पुंसीत्युच्यमाने न पुंसके नाभावो न स्यात्। नुमपी गूलक्षणो मुत्वस्यासिद्धत्वान्नास्ति।
नमुटादेशइति। टायाआदेश त्यायामादेशइत्यनेक विभक्त्यन्तसमासाश्रयेण नाभावेकर्तव्ये नेच परत्वादीर्घमुत्वस्यसिद्धत्वाद् रामः
घिलक्षणो नाभावो भवत्यतो दीर्घायत्रि सुपिचेति दीर्घत्वं न भवतीति सर्वेष्टसिद्धिः॥ इत्युपाध्यायकैयटकृते महाभाष्यप्रदी- १२५
पे सप्तमस्य तृतीये पादे द्वितीयमाह्निकम्॥ पादश्च तृतीयः समाप्तः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णौ चङ्युपधाया ह्रस्वः॥ अथ णिग्रहणमिति। ह्रस्वग्रहणादुपधाग्रहणाच्च चङ्गाणिराक्षिप्तो न ह्यण्यन्तानां चङि ह्रस्वभागुपधास्ति। ह्रस्वमुरारच्चरि भाषोपस्थानाद् च उपधाया ह्रस्वेन भाव्यम्। न च्लिट्रुस्रुधेटूम्वीनामनुपधा। कमिगुप्योस्तु ह्रस्व एवोपधा। तत्र णावन्तरङ्गत्वाद्वृद्ध्यादिषु कृतेषु चङ्युपधाह्रस्वभाग् नास्तीति सामर्थ्याच्चङि यः प्रत्ययस्तस्मिन्नुपधाया ह्रस्वो विज्ञास्यत इति मन्य। इतरो यथाश्रुतसंभवाच्चङि-यः प्रत्यय इत्यध्याहारेण न युक्त इति वचनादन्तरङ्गमपि वृद्ध्यादि ह्रस्वो बाधेतेति मत्वाह। चङ्युपधाया इति। इतरस्तु चङि यः प्रत्ययस्त-स्मिन्नुपधाया ह्रस्व इत्यध्याहारेण सूत्रार्थसंभवाद्युक्तमन्तरङ्गं बाधेतेति मत्वाह। वृद्धिरत्रेति। इतरो ह्रस्वस्यानवकाशतां मत्वाह। औकारस्येति। नन्वेवं वृद्धिरनर्थिका स्यात्। एतदेव नह्युच्यते वृद्ध्यात्र न भाव्यमभ्युपगम्य तु वृद्धिमुच्यते॥ वृद्धौ तर्हि कृतायामिति। अपवादत्वाद्धि ह्रस्वो वृद्धेर्बाधक आवादेशस्य चेति भावः। इतरो वाक्याध्याहारेण ह्रस्वस्य सावकाशतां मत्वाह। नैतदस्तीति। इतरो यथाश्रुतसंबन्धसंभवाद

णौ चङ्युपधाया ह्रस्वः॥ अथ णिग्रहणं किमर्थम्। न चङ्युपधायाः ह्रस्व इत्येवोच्येत। चङ्युपधाया ह्रस्व इतीयत्युच्यमाने अलीलवत्। अपीपवत्। उकारस्यैव ह्रस्वत्वं प्रसज्येत। नैतदस्ति प्रयोजनम्। वृद्धिरत्र बाधिका भविष्यति। वृद्धौ तर्हि कृतायामौकारस्यैव ह्रस्वत्वं प्रसज्येत। नैतदस्ति। अन्तरङ्गत्वादत्रावादेशो भविष्यति। नहीदानीं ह्रस्वभाविन्युपधा भवति। तस्माण्णिग्रहणं कर्तव्यम्। अथ चङ्ग्रहणं किमर्थम्। न णावुपधाया इत्येव सिद्धम्। णावुपधाया ह्रस्व इतीयत्युच्यमाने कारयतीत्यत्रापि प्रसज्येत।

नवकाशतामेव मत्वाह। नहीदानीमिति। ननु वृद्धिं बाधित्वा भवन्नुकारस्य ह्रस्वस्तस्मिंल्लुकृते बाधितत्वान्माभूद्वृद्धिः। गुणस्तु केन वार्यते। ततो युणोवादेशे च सिद्धमलीलवदिति। नैतदस्ति। गुणस्य वृद्ध्या बाधितत्वाद्वृद्धेश्च ह्रस्वेन भ्रष्टावसरस्य गुणस्य कुतः पुनः प्रवृत्तिरिति उवङ् प्रसज्येत। अ-अदीदपदित्यत्र च ह्रस्वेन पुग्बाध्येत। अपीपवदित्यादौ च नैव ह्रस्वः स्यादिति णिग्रहणं क्रियते। यदा चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधस्तदा वृद्ध्यावादेशयोः कृतयोः पुकि च णिलोपस्य स्थानिवत्त्वाभावाच्चङि उपधा ह्रस्वभाविनी संभवतीति णिग्रहणं न कर्तव्यम्। सूत्रकारेण चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधो न कृत इति णिग्रहणं कृतम्। अथेति। मितां ह्रस्वविधानादनेन सर्वत्र ———— णौ ह्रस्वो भविष्यति। प्रयोगदर्शनाच्चेष्टा व्यवस्थाश्रयितव्येति मत्वा प्रश्नः। इतरो वचनमन्तरेणेष्टानिष्टविभागो दुर्ज्ञान इति मत्वाह। णावुपधाया इति।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मा॰ कै॰ अथोपधाग्रहणमिति। न्यायान्नाग्लोपिशास्वृदितामिति निषेधाच्च लिङ्गादुपधाया एव ह्रस्वो भविष्यतीति प्रश्नः। चङ्युपधाग्रहणमिति।
१२६ असत्युपधाग्रहणेऽच्परिभाषोपस्थानादचाङ्गस्य विशेषणादजन्तस्याङ्गस्य ह्रस्वो विधीयमानोऽलोऽन्त्यस्येत्यन्त्यस्य स्यात्। लृदित इति स्थि ७ ५ १
ते ऋकारस्य ह्रस्वत्वप्रसङ्गः। वृद्धिरत्र बाधिका भविष्यतीति पूर्वं वक्ष्यमाणानुपञ्जनीयं न्यायव्युत्पत्तये त्वन्यदभिधातुमाह। नेत्यादि। इतरेतरह्रस्व
त्वं निरवकाशत्वादन्तरङ्गाणां बाधकं मत्वाह। ननु हीदानीमिति। इतरो विशेषणविशेष्यभावे कामचारादङ्गेनाच्विशेष्यतेऽङ्गस्य यत्र त
त्र स्थितस्याचो ह्रस्वो भवतीत्येवं विध्यन्तराण्यपि न बाधितानि भवन्ति। ह्रस्वस्य सावकाशो भवतीति मत्वाह। अन्त्यो ह्रस्वभावीति। अङ्गस्ये
त्वं नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति। न णौ चवह्रस्वत्वं भवतीति। यदयं मितां ह्रस्वत्वं शास्ति। इहापि तर्हि न प्रा
प्नोति। अचीकरत् अजीहरत्। वचनाद्भविष्यति। इहापि तर्हि वचनात्प्राप्नोति। कारयति हारयति। तस्माच्चङ्ग्रहणं कर्तव्य
म्। अथोपधाग्रहणं किमर्थम्। णौ चङ्युपधाग्रहणमन्त्यप्रतिषेधार्थम्। णौ चङ्युपधाग्रहणं क्रियते। अन्त्यस्य ह्रस्वत्वं
मा भूत्। णौ चङि ह्रस्व इतीयत्युच्यमाने अलीलवत् अपीपवत् अन्त्यस्यैव ह्रस्वत्वं प्रसज्येत। नैतदस्ति प्रयोजनम्। अन्त
रङ्गत्वादत्रावादेशो भविष्यति। ननु हीदानीं ह्रस्वभाव्यस्ति। अन्त्यो ह्रस्वभावी नास्तीति कृत्वा वचनादनन्त्यस्य भविष्य
ति। इहापि वचनात्प्राप्नोति। अचकाङ्क्षत् अववाङ्क्षत्। येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्। केन च नाव्यवधा
नम्। न वर्णेनैकेन। एतेन पुनः सङ्घातेन व्यवधानं भवति च न भवति च। उत्तरार्थं तर्ह्युपधाग्रहणं कर्तव्यम्। लोपः पिबते
रीच्चाभ्यासस्य उपधाया यथा स्यात्।

ति चावयवषष्ठीविज्ञानादलोऽन्त्यस्येत्यस्योपस्थानाभावः। येन नाव्यवधानमिति। तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्येन प्र
ब्देन अवश्यं व्यवधानं तेन व्यवहितेऽपि कार्यं विज्ञायमानमन्यव्यवधाने न प्रवर्तते एयङ्गाभ्यां हल्विशेष्यते णौ परतोऽङ्गस्य योऽजिति सा
मर्थ्यादेकवर्णव्यवधानमवश्यंभावित्वादाश्रीयते। एकस्मिंस्तु विषयेऽन्त्यसदेशोऽसदेशयोर्ह्रस्वभाविनोरसंभवादनन्त्यविकारेऽन्त्यस राम:
देशस्यैव ग्रहणमिति परिहारो नोक्तः। १२६
नन्त्य

CC-0. In Public Domain. Digitization by eGangotri

अपीप्यदिति। अलोन्त्यस्येति युक्तो लोपप्रसङ्गः इत्युत्तरार्थमुपधाग्रहणम्। ननु ह्रस्वापवादो लोपो विज्ञायमान उत्सर्गदेशत्वादपवादानामुपधाया एव भविष्यति। नैतदस्ति। ह्रस्वश्रुत्या च्यरिणोपोपस्थानादङ्गे न चाचो विशेषणायुक्तं यदुपधा ह्रस्वः स्यात्। लोपविधौ तु पिबतेरिति स्थानषष्ठ्या अन्त्येऽलः इत्युपसंहारात्। अन्त्यस्यैव लोपः स्यात्। भिन्नदेशावप्युत्सर्गापवादौ दृश्येते यथा शपूर्नमो काकचौ सत्यपि संभवे बाधनं भवतीति न्यायाद्भिन्नदेशोऽप्यपवाद उत्सर्गं बाधते। यदि तर्ह्युत्तरार्थमुपधाग्रहणं तत्रैव वक्तव्यम्। आह्लोपः पिबतेरीच्चाभ्या-

अपीप्यत्। अपीप्यताम्। अपीप्यन्। अथेह कथं भवितव्यम्। माभवानाटिटद् आहोस्विन्माभवानटिटदिति। माभवानाटिटदिति भवितव्यम्। ह्रस्वत्वं कस्मान्न भवति। द्विर्वचने कृते परेण रूपेण व्यवहितमिति कृत्वा। इदमिह संप्रधार्यं द्विर्वचनं क्रियतां ह्रस्वत्वमिति। किमत्र कर्तव्यम्। परत्वाद्ध्रस्वत्वम्। नित्यत्वाद्द्विर्वचनम्। कृतेऽपि ह्रस्वत्वे प्राप्नोत्यकृतेऽपि। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति। द्विर्वचनाद्ध्रस्वत्वं बलीय इति। यदयमोणेर्ऋदितं करोति। कथं कृत्वा ज्ञापकम्। ऋदित्करण एतत्प्रयोजनम् ऋदितां नेति प्रतिषेधो यथा स्यात्। यदि चात्र पूर्वं द्विर्वचनं स्यादृदित्करणमनर्थकं स्यात्। द्विर्वचने कृते परेणाव्यवहितत्वाद्ध्रस्वत्वं न भविष्यति। पश्यति त्वाचार्यो द्विर्वचनाद्ध्रस्वत्वं बलीय इति तत ओणेर्ऋदितं करोति। तस्मान्माभवानटिटदिति भवितव्यम्। उपधाह्रस्वत्वे णौ णिच्युपसंख्यानम्। उपधाह्रस्वत्वे णेर्णिच्युपसंख्यानं कर्तव्यम्। वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन। किं पुनः कारणं न सिध्यति। णिचा व्यवहितत्वात्। णिलोपे कृते नास्ति व्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव। प्रतिषिध्यते स्थानिवद्भावः। चङ्परनिर्ह्रासे न स्थानिवदिति। एवमप्यग्लोपिनां नेति प्रतिषेधः प्राप्नोति। वृद्धौ कृतायां लोपः। तन्नाग्लोप्यङ्गं भवति। इदमिह संप्रधार्यं वृद्धिः क्रियतां लोप इति। किमत्र कर्तव्यम्। परत्वाद्वृद्धिः। नित्यो लोपः कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि। अनित्यो लोपोऽन्यस्य कृतायां वृद्धौ प्राप्नोत्यन्यस्याकृतायाम्। शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति। उभयोरनित्ययोः परत्वाद्वृद्धिः। वृद्धौ कृतायां लोपः। तन्नाग्लोप्यङ्गं भवति।

ह्रस्वेति। नैतदस्ति। अन्तरङ्गमपि युक्तमनवकाशत्वाद्दाच्छोपो बाधेत उपधाग्रहणे त्वन्तरङ्गत्वाद्युक्ते कृते आकारस्योपधाया लोप इति न कश्चिद्दोषः। अथेहेति। न्यायप्रयोगविरोधात्प्रश्नः। स एव प्रष्टा न्यायाश्रयेणाह। माभवानाटिटदित्येवमिति। इत एव ह्यमाणालिङ्गाद्वरं स्मेनेणच्छति। ह्रस्वत्वं कस्मान्न भवतीति। एवं तर्हीति। ज्ञापकात्पूर्वं ह्रस्वः पश्चाद्द्विर्वचनमिति क्रमः। कृतायामपीति। स्थानिवद्भावात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ एवं तर्हीति। सर्वत्राको वृद्धौ कृतायामिकारोकारयोर्लोपो न त्वकः। अत्यरराजदिति। राजानमतिक्रान्तवानिति प्रातिपदिकाद्धात्वर्थे इति णि ७४९
१२९ चि कृते ऽ त उपधाया इति वृद्धौ कृतायामगेव लुप्यते। यत्तर्हीति प्रत्याहारग्रहणाल्लिङ्गात्पूर्वविप्रतिषेधेन लोपो भवति। ननु प्रत्याहा
रग्रहणं स्वामिनमाख्यदसस्वामत्। गोमिनमाख्यदजुगोमदित्यादौ वृद्धिप्रसङ्गाभावाल्लोपे ह्रस्वनिषेधार्थं स्यादिति कथं ज्ञापकमि
ति चिन्त्यमेतत्। अत्राहुः। अनभिधानाण्णिजत्र नास्तीति भाष्यकारस्याभिप्रायः। एवं तु ज्ञापकेन लोपस्य बलीयस्त्वे यदुक्तं हलिक
ल्योरत्त्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति तद्विरुध्यते असत्यपि अत्त्वनिपातने वृद्धिं बाधित्वेकारस्य लोपे सति सन्वद्भावस्या
प्रसङ्गादनाश्रित्य ज्ञापकत्वमत्त्वनिपातनमुक्तम्। ज्ञापकाश्रयणं तु न्यायः। पटुमाख्यदपपटदित्यादावकृतायां वृद्धौ लोपे सति
एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति वृद्धेर्लोपो बलीयानिति। यदयमग्लोपिनां नेति निषेधं शास्ति तेन तदस्ति ज्ञापकम्। अस्यान्य
देतस्य वचनप्रयोजनम्। किम्। यत्र वृद्धावपि कृतायामगेव लुप्यते। अत्यरराजत्। यत्तर्हि प्रत्याहारग्रहणं करोति इतरथा ह्य
ल्लोपिनां नेति ब्रूयात्। एवं तर्हि वृद्धेर्लोपो बलीयानिति। अथवा आरभ्यते पूर्वविप्रतिषेधः। णयल्लोपावियङ्यण्गुणवृद्धि
दीर्घेभ्यः पूर्वविप्रतिषिद्धम् इति। तस्मादुपसंख्यानं कर्तव्यमिति॥ नाग्लो॥ अग्लोपिप्रतिषेधानर्थक्यं च स्थानिवद्भावात्। अग्लो
पिप्रतिषेधोऽनर्थकः। किं कारणम्। स्थानिवद्भावात्। स्थानिवद्भावादत्र ह्रस्वत्वं न भविष्यति। यत्र तर्हि स्थानिवद्भावो
नास्ति तदर्थमयं योगो वक्तव्यः।

सन्वद्भावस्य प्रसङ्गाभावार्थम्। अथवेति। हलिकल्योरत्त्वनिपातनमेव ज्ञापकं लोपात्पूर्वं वृद्धिर्भवतीति। णिलोपस्तु वाचनिको न पूर्वविप्रतिषे
धेन वृद्धेः पूर्वं भवति। एवं पटुमाख्यदपीपटदिति सन्वद्भावप्रसङ्गात्प्रत्याहारग्रहणमेव ज्ञापकमाश्रयणीयं तेन वृद्धेः प्राग्लोपो विधेयः। ना
ग्लो॥ अग्लोपीति। मालामाख्यदममालदित्यादौ टिलोपस्य स्थानिवत्त्वादनुपधात्वात् प्राप्तिरेव ह्रस्वस्य नास्तीति प्रतिषेधोऽनर्थकः। ननु प्रति
षिध्यते तत्र स्थानिवत्त्वं किं तु उपधात्वं चङ्परनिर्ह्रासकुत्वेष्विति। नैतदस्ति। यदर्थः स प्रतिषेधः तस्यैवार्थो ह्युपसंख्यानमित्यनेन साधित रामः
त्वान्न वक्तव्यः। १२९
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हलचोरादेश इति। यथा सुधातुरकङ्च्ेत्यादेशे समुदाये अवयवस्यानादेशत्वाद् णोर् परत्वं न भवतीति सोध्यानकिरिति। तथा समुदाये स्थानि
न्यवयवस्य स्थानित्वादजादेशत्वाभावान्नास्ति स्थानिवद्भावः। किं पुनरिति। अवयवात्मकत्वात्समुदायस्य तस्मिन्स्थानिन्यवयवाना-
मपि स्थानित्वादजादेशत्वादन्याय्य एव स्थानिवद्भावः। तथा च खट्वर्श्य इति ऋस्थानिकत्वाश्रयमणोर् परत्वं भवतीति भावः। इतरः पूर्वो
क्तं नैवाभिप्रायेणाह। अजादेश इति। इतरस्त्वनुमीयमानोऽवश्याश्रयितव्यः स्यान्यादेशभाव इति मत्वाह। अल्लोपिनामिति। इत उत्तरमिति।
पञ्चपाद्यामित्यर्थः। पूर्वत्रासिद्ध इति। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति वक्तव्यमेव। यद्वा ज्ञापकत्वात्पित्तविधयोऽनित्या इति संयो-
गादिलोपलत्वणत्वेषु स्थानिवद्भावो भवत्येव। अचः परस्मिन्नित्यत्र विचारितं हलचोरादेशः स्थानिवदिति चेद्द्रिंशत्ते स्तिलोपएकादेशद्
त्यादितत्र निर्णीतम्। हलचोरादेशो न स्थानिवदिति। इह तु प्रतिषेधवचनमर्यादं तरज्ञापनायोक्तमिति ग्रन्थविरोधस्तस्मादन्यायाश्रयेण

वा च स्थानिवद्भावो नास्ति यो हलचोरादेशः। अत्यरुजत्। किं पुनः कारणम्। हलचोरादेशो न स्थानिवदित्युच्यते। अ
जादेशः स्थानिवदित्युच्यते। न चायमचएवादेशः। किं तर्हि चश्चान्यस्य च। अल्लोपिनां नेत्यपि तर्हि प्रतिषेधो न प्राप्नो
ति। किं कारणम्। अल्लोपिनां नेत्युच्यते। न चात्राग एव लुप्यते किं तर्ह्यञ्चान्यश्च। योऽत्राग्लुप्यते तदाश्रयः प्रतिषेधो भ
विष्यति। यद्येवं तर्हि योऽत्राग्लुप्यते तदाश्रयः प्रतिषेधो भवति। एवं योऽत्राग्लुप्यते तदाश्रयः स्थानिवद्भावो भविष्यति।
एवं तर्हि सिद्धे सति यदल्लोपिनां नेति प्रतिषेधं शास्ति। तज्ज्ञापयत्याचार्यः। इत उत्तरं स्थानिवद्भावो न भवतीति। कि
मेतस्य ज्ञापने प्रयोजनम्। पूर्वत्रासिद्धे न स्थानिवदित्युक्तम्। तन्न वक्तव्यं भवति। यदेतज्ज्ञाप्यते आदीधयतेः। आ
दीधकः। आवेवयतेः। आवेवकः। यीवर्णयोर्दीधीवेव्योरिति लोपो न प्राप्नोति।

हलचोरादेशो न स्थानिवदित्ययं पक्षोऽग्राह्यः। इह त्वभ्युपेत्य स्थानिवत्त्वं ज्ञापकत्वमाश्रितम्। शिष्यबुद्धिव्युत्पादनाय। स्थितोऽपि पक्षः क्वचिदु
पन्यस्त इत्येवं विरोधः परिहार्यः। अल्लोपिग्रहणसामर्थ्याच्च समुदायलोपेऽप्यल्लोप आश्रीयते केवलाल्लोपे प्रतिषेधस्यानर्थक्याद् खट्वर्श्य इ
त्यत्र त्वेकः पूर्वपरयोरित्यवयवावेवमन्वेनचोदिताविति परत्वं प्रवर्तते। तदुक्तम्। यो ह्युभयोः षष्ठीनिर्दिष्टयोः स्थानी भवति लभतेऽसावन्यतर
व्यपदेशमिति। आदीधक इति। दीधीङ्णिच् दीधीवेव्योरिति गुणवृद्धिप्रतिषेधस्ततो ण्वुलि लोपे कृते। तस्य स्थानिवद्भावाभावादीवर्णयोरिति
लोपेन प्राप्नोति। यद्यप्यन्तरङ्गत्वाल्लोपः सिध्यति तथापि वर्णग्रहणस्यानन्यार्थस्य प्रयोजनाख्यानायोपक्षेपः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्म्लुनीह्यत्रेति। तिङ्ङ्तिङ इति निघातो निपातैर्यद्यदीति निषिद्धः। हेरपित्वादनुदात्तत्वान्न विकरणस्वरेण सार्वधातुकस्वरं बाधत इति प्र
स्वराभावस्तत्र यणादेशे कृते उदात्तत्वाभावात्स्थानिवत्त्वाभावाच्च निघातो न प्राप्नोति। वर्णग्रहणसामर्थ्यादिति। वर्णग्रहणाद्धि तत्पूर्वं गतिरा
श्रीयते। अन्तरङ्गत्वाल्लोपे सिद्धे वर्णग्रहणं शक्यमकर्तुम्। ननु केचिज्ज्ञापकं वर्णयन्ति। उत्तरत्र स्थानिवत्त्वाभावस्याग्लोपिग्रहणं तु स
तिप्रयोजनेन ज्ञापकमस्यार्थस्य। अन्तरङ्गः स्वर इति। यद्यप्युभयं पदद्वयाश्रयं तथापि पूर्वमुपसर्गेण सम्बन्धः पश्चादधिकरणवाचि
नात्र शब्देनेति यणादेशो बहिरङ्गः। भ्राजः। काण्यादीनां वेति। आदिशब्दः प्रकारे येषां ह्रस्वविकल्पो दृश्यते ते काण्यादयः। काणिश्राणिराणि

इह च यत्म्लुनीह्यत्रा निङिङ्चोदात्तवतीत्येषस्वरो न प्राप्नोति। नैष दोषः। यत्तावदुच्यते। आदीधयतेः। आदीधकः। आवे
वयतेः। आवेवकः। यीवर्णयोरिति लोपो न प्राप्नोतीति। यीवर्णयोरित्यत्र वर्णग्रहणसामर्थ्याद्भविष्यति। यदप्युच्यते यत्म
लुनीह्यत्रेति ङिञ्चोदात्तवतीत्येषस्वरो न प्राप्नोतीति बहिरङ्गो यणादेशः। अन्तरङ्गः स्वरः। असिद्धं बहिरङ्गमन्तरङ्गे।
भ्राजः। काण्यादीनां वेति वक्तव्यम्। के पुनः काण्यादयः। काणिराणिश्राणिभाणिहेठिलेठयः। अचकाणत्। अचीकणत्।
अरराणत्। अरीरणत्। अशश्राणत्। अबभाणत्। अबीभणत्। अजाहिठत्। अजिहेठत्। अलुलोपत्। अलूलुपत्।
॥ ह्वः॥ इह्वावदिध्ये। अवदिध्यातेऽवदिध्यिरे। दिध्यादेशे कृते द्विर्वचनं प्राप्नोति। तत्र साभ्यासस्येति वक्तव्यम्। ननु
च द्विर्वचने कृते साभ्यासस्य दिध्यादेशो भविष्यति।

हेठिलेठिप्रभृतयः॥ ह्वः। दिध्यादेशे कृत इति। यद्यपि प्राप्ते द्विर्वचने दिध्यादेश आरभ्यते तथापि बाध्यबाधकभावे द्वैतं लक्षणं वा लक्षणेन बाध्य
ते लक्ष्यं वा। तत्र यदा द्विर्वचनशास्त्रं दिध्यादेशशास्त्रेण बाध्यते तदा दिध्यादेशे कृते नास्ति द्विर्वचनप्रसङ्गः। यदा तु लक्ष्यं बाध्यते तस्य द्विर्वचनं-
दिगिना बाध्यते दिगेस्तु तत्प्राप्नोति शास्त्रस्याबाधितत्वात्। ततश्च यथा चख्यावित्यादौ ख्याञादेशे कृते द्विर्वचनं भवति। एवं दिध्यादेशे कृते प्राप्नो राम:
ति। साभ्यासस्येति। तेन कृते द्विर्वचने दिध्यादेशो न पुनर्द्विर्वचनं भवति सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात्साभ्यासग्रहणसामर्थ्याच्च। ननु चेति १२८
। पूर्वविप्रतिषेधाल्लुप्त्यसिद्धये सूत्रमाश्रयणाद्धेति भावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नसिध्यतीति। विप्रतिषेधे परं कार्यमित्यस्मिन्व्यवस्थाहेतौ सत्येव क्रमो दुर्लभः। तत्र द्विर्वचनस्यावकाशः पपाचेति। कृते द्विर्वचने इयतिसङ्गावादि-
ग्यादेशस्य। अकृते तु द्विर्वचने तूभयप्रसङ्गे परत्वाद्दिग्यादेशः। एवं तर्हीति। नाप्राप्ते द्विर्वचने दिग्यादेशस्यारम्भात्। इतरस्तु द्विपरीक्षार्थं विप्र-
तिषेधाश्रयेण स कृतः। तादृत्येवं दिग्यादेशो द्विर्वचनस्यात्वयाबाधक उक्त इत्यारोप्य कथयति। पुनःप्रसङ्गविज्ञानादिति। इतरोऽप्यस्तु पूर्वमप्यनाव-
द्विप्रतिषेधं सकृद्गतावित्याश्रित्याह। पुनःप्रसङ्गादिति चेदिति। यथा यूयं ब्राह्मणकुलानि युवां त्वमित्यमादेशे कृते शिशीलुको न भवन्तीद्-
ग्यादेशे कृते द्विर्वचनाभावः। इदानीं न्याय्यं परिहारमाह। अथवेति। कचित्पाठो नैव युक्तः परिहारो विप्रतिषेधे पुनःप्रसङ्ग इति। योयं मदुक्ता-
र्थस्य दिग्यादेशो द्विर्वचनं बाधिष्यत इत्यस्य त्वया परिहारोऽभिहितः पुनःप्रसङ्गविज्ञानाद्द्विर्वचनं प्राप्नोतीति स न युक्त इत्यर्थः। अनवका-

नसिध्यति। किं कारणम्। दिग्यादेशस्य परत्वात्साभ्यासस्यादेशवचनम्। दिग्यादेशः क्रियतां द्विर्वचनमिति। परत्वाद्दि-
ग्यादेशेन भवितव्यम्। तत्र साभ्यासस्येति वक्तव्यम्। एवं तर्हि दिग्यादेशो द्विर्वचनं बाधिष्यते। पुनःप्रसङ्गविज्ञानाद्द्विर्वचनं
प्राप्नोति। पुनःप्रसङ्गविज्ञानादिति चेदमादिषु तुल्यम्। पुनःप्रसङ्गविज्ञानादिति चेदमादिषु तुल्यमेतद्भवति। तद्यथा। अ-
मादिषु कृतेषु पुनःप्रसङ्गाच्छिशीलुङ्नुमो न भवन्ति। एवं दिग्यादेशे कृते पुनःप्रसङ्गाद्द्विर्वचनं न भविष्यति। अथवा विप्रति-
षेधे पुनःप्रसङ्ग इत्युच्यते। विप्रतिषेधश्च द्वयोः सावकाशयोः। इह पुनरनवकाशो दिग्यादेशो द्विर्वचनं बाधिष्यते। यदि तर्ह्यन-
वकाशा विधयो बाधका भवन्ति। बभूव। भूभावो द्विर्वचनं बाधेत। सावकाशो भूणादेशः। कोवकाशः। भविता। भवितुम्। इह
तर्हि चक्षिङः ख्याञ्। वा लिटीति ख्याञ् द्विर्वचनं बाधेत।

शो दिग्यादेश इति। पूर्वं सामान्यविशेषभावमनाश्रित्योभयोः सावकाशत्वमुक्तम्। इदानीं तु सामान्यविशेषाश्रयेण नाप्राप्ते द्विर्वचने आरभ्यमा-
णस्य दिग्यादेशस्यापवादत्वमुच्यते। यदि तर्हीति। नन्ववश्यमनवकाशेन बाधकेन भाव्यम्। अन्यथा न कश्चिद्बाधकः स्यात्। एवं तर्ह्यनवका-
शाभिमता अनवकाशा इत्यर्थो विवक्षितो नैवायमनवकाशः कृतेऽपि द्विर्वचने प्रवृत्त्यविघातात्। अथ पुनरेवमप्यनवकाशत्वमभ्यसेन-
दानस्य दोषप्रसङ्गः। बभूवेति। अस्तेर्भूरिति भूभावः। सावकाश इति। यत्र द्विर्वचनाभावः। इह तर्हीति। आचख्याविति अत्र कृतेऽपि द्विर्वचने
ख्याञः प्रवर्तनादनवकाशत्वाभावो यदा तु येन नाप्राप्तिन्यायेनानवकाशत्वमभ्युपगम्यते तदा ख्याञि कृते द्विर्वचनाप्रसङ्गः। ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰कै॰ सर्वादेश इति। स्थानिवद्भावाद् लिग्रहणेन ग्रहणात्कार्यकृतत्वाच्च पुनर्द्विर्वचनाभावादिष्टरूपासिद्धिः। पूर्वस्य श्रवणमिति। अयं दोषो नोत्स ७ ४१
१२९ र्गापवादपक्षे उपात्तो भूभावस्यावकाशदर्शने नोत्सर्गापवादभावनिराकरणात् द्वयोस्तुल्यावकाशयोः परत्वाद्द्विर्वचने कृते बभूवेति न सि-
ध्यतीति प्रतिपाद्यते। तत्रार्धधातुकसामान्य इति। द्विर्वचननिमित्तस्य लिटोऽनुपजातत्वाद् सति विप्रतिषेधे पूर्वं भूभावः पश्चाल्लिटि परतो द्वि
र्वचनमित्यदोषः। यो यतः प्राप्नोतीति। विषयसप्तमीफलं ज्ञापितं स्यात् विधावपि विषयसप्तम्याश्रीयत इति येन नाप्राप्त इत्यस्य न्याय
स्यानवतारात् कृते स्यासिद्धिर्द्विर्वचनं भवत्येव दिग्यादेशे तु लिटीति परसप्तम्याश्रयणान्नाप्राप्ते द्विर्वचने दिगिणरभ्यमार्गस्तं बाधते॥ कृते

इह चापि बभूवेति। यदि तावत् स्थाने द्विर्वचनम्। भूभावः सर्वादेशः प्राप्नोति। अथ द्विः प्रयोगो द्विर्वचनम्। परस्य भूभा
वे कृते पूर्वस्य श्रवणं प्राप्नोति। नैष दोषः। आर्धधातुकीयाः सामान्येन भवन्ति। अनवस्थितेषु प्रत्ययेषु। तत्रार्धधातुक
सामान्ये भूभावे कृते यो यतः प्राप्नोति स ततो भविष्यति। ऋतश्च संयोगादेर्गुणः॥ संयोगादेर्गुणविधाने संयोगोपधग्रह
णं कृञर्थम्। संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्तव्यम्। किमर्थम्। कृञर्थम्। इहापि यथा स्यात्। संचस्कर
तुः संचस्करुः। यदि संयोगोपधग्रहणं क्रियते नार्थः संयोगादिग्रहणेन। इहापि सस्वरतुः सस्वरुः। संयोगोपधस्येत्येव
सिद्धम्। भवेत्सिद्धम्। सस्वरतुः सस्वरुरिति। इदं तु न सिध्यति संचस्करतुः संचस्करुरिति। किं कारणम्। सुटो बहिरङ्गल
क्षणत्वात्। बहिरङ्गः सुड् अन्तरङ्गो गुणः। असिद्धं बहिरङ्गमन्तरङ्गे। संयोगादिग्रहणे तु क्रियमाणे संयोगोपधग्र
हणमनन्यार्थं विज्ञायते। ऋतो लिटि गुणाद् ञ्णिद्वृद्धिर्विप्रतिषेधेन।

श्च संयोगादेरिति। इहाङ्गाधिकारादङ्गं संयोगाद्याश्रीयते न च स्कृ इत्येतदङ्गं संयोगादि भवतीति भावः। उपधाग्रहणं संयोगस्यादेशवि
शेषोपलक्षणमत्मात्रस्योपधासंज्ञाविधानात् संयोगस्योपधात्वासंभवात्। अथवा संयोगावयवे संयोगशब्दो वर्तते तेन स्योपधात्वमस्त्ये
व बहिरङ्गः सुडिति। पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण। साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि न चासिद्धस्य विशेष राम॰
णेन संबन्धो भवति सुट्कात्पूर्वमित्यत्र तूक्तं पूर्वं धातुरुपसर्गेण युज्यत इत्येवं च सुटोऽन्तरङ्गत्वात्सिद्धो गुण इति नार्थ उपसंख्यानेन। संस्क १२९
षीष्ट संस्क्रियत इत्यत्र विङ्गुणयोः प्रतिविधेयम्। अनन्यार्थमिति। कृञर्थमेवेत्यर्थः। तत्र वचनादसिद्धत्वं बाध्यते। यथान्यत्रोक्तमाश्र
यात्सिद्धत्वं यथारोहत्वइति।

CC-0. In Public Domain. Digitization by eGangotri

पुनःप्रसङ्गविज्ञानाद्वेति। अस्तु परविप्रतिषेधेन गुणस्तस्मिन्कृते वृद्धिर्भविष्यति। अनाश्रित्य लक्षणमिदं च वृद्धिमात्रमेकत्वेनाश्रित्यैतदुक्तम्। पुनःप्रसङ्गो नामेति। वाचोयुक्तिरेवेयं न संगच्छते लक्षणद्वयस्य परस्परप्रतिषेधादप्रवृत्तौ प्राप्तायां विप्रतिषेधे परं कार्यमित्यनेन परस्मिन्कार्ये विहिते निमित्तसंभवात्पूर्वस्य लक्षणस्य पुनःप्राप्तिः पुनःप्रसङ्ग उच्यते न तु पूर्वलक्षणप्राप्तिः पुनःप्रसङ्गः। तस्मादिति। ननु यदि नाम पुनःप्रसङ्गवाचोयुक्तिर्न घटते किमेतावता गुणारपरत्वयोः कृतयोरुपधावृद्धिर्न हि न प्राप्नोति सत्यां च प्राप्तौ किं पूर्वविप्रतिषेधाश्रयणेनेत्यत्र चिन्त्यमेतत्(ति)आह॥ न गुणो वेत्युच्येतेति। गुण एव पूर्वसूत्रेण नित्यं प्राप्तो विकल्पनीयस्तत्र गुणपक्षे विशश्रतुरित्यादि

ऋतो लिटि गुणाद् ञ्णितीति वृद्धिर्भवति पूर्वविप्रतिषेधेन। ऋतो लिटि गुणस्यावकाशः सस्वरतुः सस्वरुः। ञ्णिति वृद्धेरवकाशः स्वारकः ध्वारकः। इहोभयं प्राप्नोति सस्वार दध्वार। ञ्णिति वृद्धिर्भवति पूर्वविप्रतिषेधेन। पुनःप्रसङ्गविज्ञानाद्वा सिद्धम्। अथवा पुनःप्रसङ्गाद् गुणे कृते रपरत्वे चातउपधाया इति वृद्धिर्भविष्यति। नैष युक्तः परिहारः पुनःप्रसङ्गो नाम सम्भवति यत्र तेनैव कृते प्राप्नोति तेनैव चाकृते। अत्र खलु गुणे कृते रपरत्वे चातउपधाया इति वृद्धिः प्राप्नोति। अकृते चाचो ञ्णितीति तस्मात्सुष्ठूच्यते ऋतो लिटि गुणाद् ञ्णिद्वृद्धिः पूर्वविप्रतिषेधेनेति। शृदृप्रां ह्रस्वो वा॥ किमर्थं ह्रस्वो वेत्युच्यते। न गुणो वेत्युच्येत तत्रायमप्यर्थः। गुणग्रहणं न कर्तव्यं भवति। प्रकृतमनुवर्तते। क्व प्रकृतम्। ऋतश्च संयोगादेर्गुण इति। ऋतो ह्रस्वत्वमित्वप्रतिषेधार्थम्। ऋतो ह्रस्वत्वमुच्यते। इत्वप्रतिषेधार्थमित्वं मा भूदिति गुणो वेतीयत्युच्यमाने गुणेन मुक्ते इत्वं प्रसज्येत ह्रस्वो वेति पुनरुच्यमाने ह्रस्वत्वेन मुक्ते यथाप्राप्तो गुणो भविष्यति।

भविष्यति। तदभावपक्षे तु यणादेशेन विशश्रतुरित्यादीति भावः। तत्रायमपीति न केवलं गुणविधानप्रकरणमनुसृतं भवति। यावल्लाघवमपीत्यर्थः। इत्वं प्रसज्येतेति। वार्णादाङ्गं बलीय इति वर्णाश्रयमन्तरङ्गमपि यणं बाधित्वेत्वं स्याद्ध्रस्वविधाने तु यणादेशः सिध्यति। विशश्रवान् विदद्दवान् विपप्रवानिति क्वसौ च सिध्यति गुणविकल्पे त्वेतद्रूपासिद्धिः। क्वसोः कित्वेन प्रतिषेधविषयस्यापि गुणस्य प्रतिषेधः प्रदेशान्तरे भाष्यकृता प्रदर्शितः। उत्तरार्थं च ह्रस्वग्रहणं कर्तव्यमिति लाघवमपि नास्ति ह्रस्वविधावपि उत्तरत्र ह्रस्वविधानादेकप्रकरणता भवतीति नास्ति पूर्वोक्तो विशेषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ उपसर्गे॥ प्रोह्यत इति। अकृते एकादेशे ह्रस्वभावाभावयोर्विशेषाभावादन्तरङ्गत्वाच्च प्रागेकादेशेन भाव्यम्। वार्णादाङ्गमित्येतत्तु समाना- ७५१
९९ श्रयाङ्गवार्णविषयं तस्मादेकादेशे कृतेऽन्तादिवद्भावेन ह्रस्वप्रसङ्गः प्रोह्यते। एकादेशे कृत इति। उपसर्गात्परस्योहतेर्ह्रस्वो विधीयमान एका-
कादेशे कृते भेदाभावाद्भेदनिबन्धनपौर्वापर्यानुपपत्तेरुभयत आश्रयेऽन्तादिवद्भावाभावाच्च ह्रस्वत्वाभावः। आऊह्यत इति। धातूपसर्ग-
योः संहिता नास्ति। तदुक्तम्। संहितैकपदे नित्या नित्या धातूपसर्गयोरिति। एवं च लौकिके प्रयोगे विग्रहाभावान्नित्ये नैकादेशेन भाव्यम्
। एवं च आ उह्यत इति ह्रस्वं पठन्ति तेन सम्यग्न्यायविदः लौकिकप्रयोगसंपादनाय हि ह्रस्वो विधीयते। तस्माद्लौकिकेन प्रक्रियावा-

केऽणः॥ केणो ह्रस्वत्वे तद्धितग्रहणं कन्निवृत्त्यर्थम्। केणो ह्रस्वत्वे तद्धितग्रहणं कर्त्तव्यम्। किं प्रयोजनम्। कन्निवृत्त्यर्थम्। कृति मा भूत् दारका। धाका इति। न तर्हि वक्तव्यम्। न वक्तव्यम्। उणादयोऽव्युत्पन्नानि प्रातिपदिकानि॥ उपा॥ इह कस्मान्न भवति। प्रोह्यते। उपोह्यते। एकादेशे कृते व्यपवर्गाभावात्। एवमपि आऊह्यते ओह्यते समोह्यत इत्यत्र प्राप्नोति। अणा इति वर्त्तते॥ एतेः॥ एतेर्लिङ्युपसर्गात्। एतेर्लिङ्युपसर्गादिति वक्तव्यम्। इह मा भूत्। ईयात्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। उपसर्गादिति वर्त्तते। एवं तर्ह्याचार्योऽन्वाचष्टे। उपसर्गादित्यनुवर्त्तत इति। नैतदन्वाख्येयमधि-
अ काराऽनुवर्त्तन्त इति। एष एव न्यायो यदुताधिकारा अनुवर्त्तेरन्। रीङृतः॥ दीर्घोच्चारणं किमर्थम्। न रिङृत इत्येवोच्येत। का रूपसिद्धिः। मात्रीयति पित्रीयति। अकृत्सार्वधातुकयोरिति दीर्घत्वं भविष्यति। एवं तर्हि सिद्धे सति यद्दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषाऽङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति।

कथं नाकृतह्रस्वेनाङ्गप्रश्लेषप्रदर्शनमात्रं क्रियते। अयत्र लौकिके प्रक्रियावाक्ये ह्रस्वत्वप्रतिपत्तिरुच्यते। तथापि न काचित्क्षतिः तत्रै-
कादेशस्यादिवद्भावाद्धि ग्रहणेन ग्रहणात्समः परस्य ह्रस्वत्वप्रसङ्गः। अणा इति वर्त्तत इति। एवं च रूपाश्रयोऽयं विधिरिति ताद्रूप्यान-
तिदेशाद्दणत्वाभावाद्ध्रस्वाभावः॥ एतेः॥ ईयादिति। आशिषि लिङ्। अकृत्सार्वधातुकयोर्दीर्घः। नैतदन्वाख्येयमिति वार्त्तिककारेणैतत- राम:
दन्वाख्येयं सर्वो धिकाराणामन्वाख्यानप्रसङ्गादिति कारस्त्वधिकाराणां प्रवृत्तिनिवृत्ती व्याचक्षते॥ रीङृतः॥ दीर्घत्वं भविष्यतीति। ननु- १३०
नाप्राप्ते दीर्घे रीङारभ्यमाणस्तस्य बाधकः स्यात्। नैतदस्ति। ऋवर्णस्य बाध्यतां रीङ् लुक् कथं बाध्यते न हि तस्य दीर्घप्रसङ्गे आरभ्यते तत-
श्च द्वयोः परयो रिङि कृते दीर्घः प्रवर्त्तत एव॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यङि च॥ यङ्प्रकरणादिति। हिंसायास्त्वन्यत्र जङ्घन्यत इत्येव भवति। अभ्यासरूपं न सिध्यतीति। उपधालोपस्य स्थानिवत्त्वाद्घ्निति द्विर्वचनं प्राप्नोति। एवं तर्हीति। ईको धातुभक्तत्वादिति द्विर्वचननिमित्तत्वाभावात्स्थानिवत्त्वाभावात्। एवमपीति। अजादौ प्रत्यये विधानात्। एवं तर्हीति। प्रक्रियालाघवाय घकारस्यादेशविधानादिति भावविधावभ्यासाच्चेति कुत्वे गौरवप्रसङ्गात्। व्यक्तिपदार्थाश्रयणे च घ्नीभावे कृते द्विर्वचनं प्रवर्तते। आकृतिपक्षे तु दिग्यादेशेनेव घ्नीभावेन द्विर्वचनबाधप्रसङ्गात्। न च्छन्दसि॥ जनीयन्त इति। जनमिच्छन्तीति क्यच्। लटः शत्रादेशः जस्। उगिदचामिति नुम्। छन्दसीति। आनन्तर्यादीत्वस्यैव प्रतिषेधः प्राप्नोतीति तन्नश्चापवादेऽपनीते उत्सर्गो दीर्घः प्राप्नोतीति तस्यापि प्रति

किमेतस्य ज्ञापने प्रयोजनम्। पिबेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति॥ यङि च॥ यङ्प्रकरणे हन्तेर्हिंसायामीट्। यङ्प्रकरणे हन्तेर्हिंसायामीड्वक्तव्यः। जेघ्नीयते। यदीट् अभ्यासरूपं न सिध्यति। एवं तर्हि यङ्प्रकरणे हन्तेर्हिंसायामीक्। एवमप्युपधालोपो न प्राप्नोति। एवं तर्हि यङ्प्रकरणे हन्तेर्हिंसायां घ्नी। न च्छन्द॥ अल्पमिदमुच्यते अपुत्रस्येति। अपुत्रादीनामिति वक्तव्यम्। इहापि यथा स्यात्। जनीयन्तोन्वग्रवः। पुत्रीयन्तः सुदानवः। छन्दसि प्रतिषेधे दीर्घत्वस्य प्रतिषेधो वक्तव्यः। संस्वेदयुः मित्रयुः। न वाश्वाघस्यात्वचनमवधारणार्थम्। न वा वक्तव्यम्। किं कारणम्। अश्वाघस्यात्वचनमवधारणार्थं भविष्यति। अश्वाघयोरेव छन्दसि दीर्घो भवति नान्यस्येति॥ शा॥ श्यतेरित्त्वं व्रते नित्यम्। श्यतेरित्त्वं व्रते नित्यमिति वक्तव्यम्। संशितं व्रतम्। तत्तर्हि वक्तव्यम्।

वेधा विधेयः। संस्वेदयुरिति। क्याच्छन्दसीत्युप्रत्ययः। नवेति। अश्वाघयोरनेनेत्वे प्रतिषिद्धेऽकृत्सार्वधातुकयोरित्याकारे सिद्धे पुनरात्वचनं नियमार्थमित्यन्येषामाकारो न भवति॥ शाच्छो॥ श्यतेरिति। व्रत इति विषयनिर्देशः तेन तत्र परं तेन संशितो ब्राह्मण इत्यत्रापि नित्यमित्त्वं भवति। यद्येवमित्त्वेन व्रतस्य द्योतितत्वात्संशितव्रत इति व्रतशब्दस्य प्रयोगो न प्राप्नोति। नैष दोषः। अन्यत्रापीत्वविधानात्संशितशब्दः सामान्यशब्द इति विशेषप्रतिपादनाय विरुद्धो व्रतशब्दप्रयोगः। व्रते तु नित्यमित्त्वं विधीयते। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· नवक्तव्यमिति। साधारणेन न्यायेन सिद्धत्वादेतदेव तुल्यधर्मणः शब्दानुपन्यस्यति। देवत्रात इति। तुदविदोन्दत्रैति नत्वं संज्ञायां न भव ७४१
१३९ ति। देवग्रहणं संज्ञाविषयोपलक्षणार्थं तेन भवत्रात इत्यादावपि संज्ञात्वान्नत्वाभावः। यदा तु क्रियाशब्दस्त्राणं त्रात इति तदा नत्वविकल्पः
गल इति। अचि विभाषेति लत्वं प्राण्यङ्गे नित्यं भवति विषे तु गर इति लत्वाभावः। क्रियाशब्दे तूभयं भवति गरो गल इति। ग्राह इति। विभाषा
ग्रह इति णप्रत्ययो जलचरे नित्यं भवति ज्योतिषि पचाद्यच्। ग्रह इति। इति योग इति लक्षणहेत्वोः क्रियाया इति शतृशानज्विधिर्ह-
न्तीति पलायते वर्षतीति धावतीत्यादावितिप्रयोगेन भवति। मिथ इति। एकस्मिन्विषये न विकल्प्यन्ते किं तु विषयभेदेन। एतच्चाकृतिप
क्षे उपपद्यते। तत्र हि सर्वे लक्ष्यमेकविध्यमापाद्य उभयमुपदिश्यते न तत्रोभयं भवतीत्येतावतैव लक्षणस्य व्यापारः। असंकीर्णत्वं तु प्रयोग

नवक्तव्यम्। देवत्रातो गलो ग्राह इति योगे च सद्विधिः। मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः॥ दोदद्घोः॥ अवदत्तं
विदत्तं च प्रदत्तं चादिकर्मणि। सुदत्तमनुदत्तं च निदत्तमिति चेष्यते॥ किं पुनरयं तकारान्त आहोस्विद्दकारान्त उत
धकारान्तः। अथवा थकारान्तः। कश्चात्र विशेषः। तान्ते दोषो दीर्घत्वं स्यात्। यदि तान्तः दत्तीति दीर्घत्वं प्राप्नोति। दान्ते
दोषो निष्ठानत्वम्। अथ दकारान्तः। रदाभ्यां निष्ठातो न इति नत्वं प्राप्नोति। धान्ते दोषो धत्वप्राप्तिः। अथ धान्तः। झषस्तथो
र्धोऽध इति धत्वं प्राप्नोति। थान्तेऽदोषस्तस्मात्थान्तः। अथ थकारान्तो न दोषो भवति॥

वशात्प्रतीयते। गवाक्ष इति। वातायने अवङ् स्फोटायनस्येति नित्यमवङ् भवति प्राण्यङ्गे तु गोरक्षि गोक्षीति भवत्यन्यत्र तु विकल्पेन। ए
तच्चोदाहरणं न तु व्यवस्थितविभाषाणां परिगणनमन्यासामपि संभवात्। दोदद्घोः॥ अवदत्तमिति। आदिकर्मग्रहणं प्रदत्तशब्दस्यैव संभ
वाद्विशेषणमवदत्तादिसिद्ध्यर्थत्वाद्वचनस्यावदत्तादयोऽपि भवन्ति तथा च उपसर्गादित्यस्यावकाशः प्रत्तमवत्तमिति वक्ष्यते। न स्या
न्निदत्तमिति चेष्यत इति चशब्देनावदत्तादयोऽपीष्यन्त इति सूच्यते॥ किं पुनरिति। यद्यपि दकारः श्रूयते तथापि संहितायां तकारादीनाम राम:
पि तस्य रूपस्य संभवात्प्रश्नः। तान्ते दोष इति। यदा द इत्येतस्य यस्तकारान्त आदेशस्तत्र दीर्घ इति सूत्रार्थस्तदायं दोषः। यदा तु तकार १३९
स्यैवादेशे दीर्घस्तदा न दोषः। तस्मात्थान्त इति संनिपातपरिभाषाश्रये तु दान्तधान्तयोर्न दोषः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अचउ।यदीति।दाशब्दाकारस्यदद्भावेदत्तमितिसंयोगादिःश्रूयेत।नासौसूत्रभेदइतिदोषायेतिशेषः।तदेवंसूत्रंलघुक्रियमाणंप्रत्युतगुणंसंपादयति।अथवेति।लघुकरणेपियदिन्यासान्तरत्वात्स्पष्टएव सूत्रभेदइतिमतंतदैवमुत्तरम्।अलोन्त्यस्यह्ययमपवादो।आदेःपरस्यानेकाल्शित्सर्वस्येतितयोर्विप्रतिषेधेपरंप्रवर्तते।अचइतिवर्ततइति।तेनापूशब्दस्ययोऽच्तस्मात्परस्ययकारस्यहित-कारआदेशस्तत्रान्त्यंझलांजशोन्तइतिजश्त्वंपूर्वस्यझलांजश्झशीति।लवाभ्यामिति।लूञ्कृदोरवित्यप्।अस्यापिभकारादेतःप्राप्नोतिअजग्रहणानुवृत्तौतुपूशब्दस्ययोच्तस्मात्परोभकारादौनकश्चिदस्तीतितत्त्वाभावः।अथवेति।तत्रतकारद्वयात्मकआ

अचउपसर्गात्तः॥अचउपसर्गात्तत्वेआकारग्रहणंकर्तव्यम्।अलोन्त्यविधयोभवन्तीत्यस्यभविष्यति।नसिध्यति।किंकारणम्।आदेर्हिपरस्य ।अत्रहितस्मादित्युत्तरस्यादेःपरस्येतिदकारस्यप्राप्नोति।नैषदोषः।अवर्णप्रकरणात्सिद्धम्।अस्येतिवर्तते।कमप्रकृतम्।अस्यच्वाविति।यद्यवर्णग्रहणमनुवर्ततेदद्भावेदोषोभवति।तत :।एवंतर्ह्येवंवक्ष्यामिदोदद्घोरिति।दोयआकारस्तस्याद्भवति।ततःअचउपसर्गात्तः।असेत्येव।एवमपिसूत्रभेदःकृतोभवति।नासौसूत्रभेदः।सूत्रभेदंतमुपाचरन्तियत्रतदेवान्यत्सूत्रंक्रियतेभूयोवा।यदितदेवोपसंहृत्यक्रियतेनासौसूत्रभेदः।अथवाहितकारकोनिर्देशःक्रियतेसोनेकाल्शित्सर्वस्येतिसर्वस्यभविष्यति।इहापितर्हिप्राप्नोतिअद्भिरग्रइति।अचइतिवर्तते।तस्मावश्यमजग्रहणमनुवर्त्यंलवाभ्यामित्येवमर्थम्।अथवाद्वितकारकोनिर्देशःकरिष्यतेइहार्थोद्वावुत्तरार्थश्चैकः।द्यतेरित्त्वादचस्तः।द्यतेरित्त्वादचस्तइत्येतद्भवतिविप्रतिषेधेन।द्यतेरित्त्वस्यावकाशः।निर्दितंनिर्दितवान्।अचस्तइत्यस्यावकाशः।प्रत्तमवत्तम्।

देशःपृथग्विभक्तिकरणार्थोयस्तुसानुबन्धकस्तकारःतस्याचःस्वरितत्वप्रतिज्ञानादुत्तरत्रानुवृत्तिः।लवाभ्यामित्यादौतुतत्त्वंनभवतिपकारलोपादपूशब्दाभावात्।सचभूतपूर्वगत्याश्रयोन्याय्यः।अद्भिरित्यादौसांप्रतिकापूशब्दसंभवेगौणस्याग्रहणादतएवसमकस्तत्त्वाभावोऽप्रत्ययवोःप्रत्यये(पा प्रत्यय)तंप्रत्ययइतिनावतिष्ठते।अद्भिःसंस्कृतमितिलिङ्गाद्वा।नहिप्रत्ययस्यैवग्रहणेऽद्भिरितिनिर्देशउपपत्तिः।द्यतेरित्त्वादिति।पुरस्तादपवादाइतिन्यायादित्त्वंदद्भावस्यैवबाधकंनतत्त्वस्य।ततश्चेत्त्वतत्त्वयोर्दद्भावापवादयोर्विप्रतिषेधेपरंतत्त्वंप्रवर्तते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अपो॥ माद्भिरिति। पदन्तो मासिनिमासशब्दस्य मासादेशस्यच्छन्दस्येव विधानान्मासश्छन्दसीति च्छन्दोग्रहणं न कर्तव्यं न क्रियमाणं भाषाया
मपि क्वचित्पदादयः प्रयुज्यन्त इति ज्ञापनायेत्याहुः॥ आपूज्ञान्नुपेरिति। इह ज्यग्रहणमनुवर्तते तेन ज्नुपो विशेष्यमाणो ऽजन्तस्य ज्नु
पेरीत्वं विधीयमानमलो ऽन्त्यस्येत्यन्त्यस्य प्राप्नोतीति भावः। लोपो ऽन्त्यस्येति। ज्नुपिना विशेष्यते यथा पृथिव्यामेवं चैकप्रस्थानो
विशेषणविशेष्यभावो भवतीति तत्रानन्त्यस्याचः सावकाशमीत्वं पूर्वविप्रतिषेधेन णिलोपो बाध्यते। इतरस्त्वगृहीताभिप्राय आह। अ
नवकाशत्वादिति। ईत्वमेव तत्वनवकाशत्वाद्बाधकं प्राप्नोति। एवमपीति। ति। नन्वप्युपरत्वादीत्वं तस्यस्यानिवङ्गा वा णिलोपो-

इहोभयं प्राप्नोति। नीतम्। वीतम्। अचलदित्येतद्भवति विप्रतिषेधेन॥ अपो भि॥ अपो भि मासश्छन्दसि। अपो भीत्यत्र मा
सश्छन्दस्युपसंख्यानं कर्तव्यम्। माद्भिरिष्टा इन्द्रो वृत्रहा। अत्यल्पमिदमुच्यते। स्ववस्स्वतवसोर्मास उषसश्च तइष्यते।
स्ववद्भिः स्वतवद्भिः समुषद्भिरजायथाः। माद्भिरिष्टा इन्द्रो वृत्रहा॥ सनि मी॥ इत्त्वं सनि राधो हिंसायाम्। इत्त्वं सनि राधो हिं
सायामिति वक्तव्यम्। प्रतिरित्सति। हिंसायामिति किमर्थम्। आरिरात्सति॥ आपूज्ञपू॥ ज्ञपेरीत्वमनन्त्यस्य। ज्ञपेरीत्वमनन्त्य
स्येति वक्तव्यम्। ज्ञीप्सति। नन्वहि वक्तव्यम्। न वक्तव्यम्। लोपो ऽन्त्यस्य बाधको भविष्यति। अनवकाशा विधयो बाधका
भवन्ति। सावकाशश्च णिलोपः। कोवकाशः। कारणा हारणा। एवमपीत्वमन्त्यस्य लोपस्य बाधकं स्यात्। अनवकाशा हि
विधयो बाधका भवन्ति। ईत्वमपि सावकाशम्। कोवकाशः। अनन्त्यः। कथं पुनः सत्यन्त्ये ऽनन्त्यस्येत्वं स्यात्। भवेद्यो ऽचा-
ङ्गं विशेषयेत्तस्यानन्त्यस्य न स्यात्। वयं तु खल्वङ्गेनाचं विशेषयिष्यामः। अङ्गस्याचो यत्र तत्रस्थस्येति। एवमप्युभयोः
सावकाशयोः परत्वादीत्वं प्राप्नोति। तस्मादनन्त्यस्येति वक्तव्यम्॥ अत्र लोपो॥ अभ्यासस्यानचि। अभ्यासस्येति यदु
च्यते तदनचि द्रष्टव्यम्। पतापतः चराचरः चलाचलः वदावदः॥

भविष्यति ईत्ववचनं त्वनन्त्यस्य श्रवणार्थं स्यात्। नैतदस्ति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमिति लोपप्रसङ्गात्॥ अत्र लोपो॥ चराचर इति।
चरिचलिपतिवदीनामच्याक्चाभ्यासस्येति द्विर्वचनमागागमश्चेति हलादिशेषो ऽत्र न भवति। तत्वागागमविधानसामर्थ्याद्धलादिः शेषो न
भविष्यति। नहि हलादिशेषे आगमदेशस्य वा विशेषो ऽस्ति तादेश एव अकारो विधेयः स्यात्। नैतदस्ति। सत्यपि हलादिः शेषे विगृहीतश्रव
णार्थमागविधानं स्यादित्यनचीत्युच्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हलादिः शेषः॥ हलामादिरिति। विग्रहद्वयदर्शनं विस्पष्टप्रतिपत्त्यर्थम्॥ अजादिष्विति। अजादिष्वभ्यासेषु हलन्तरापेक्षयादित्वे हल आश्रीयमा
णो शेषः प्राप्नोति। आनक्षेति। अश्नुव्याप्तौ संघाते चेत्यस्माल्लिट् अत्र ककारस्य शेषः प्राप्नोति। कर्मधारये त्वभ्यासापेक्षमादित्वं हलो विज्ञायत इ
ति शेषो न भवति। आदिशेषनिमित्तत्वादिति। शेषशब्दोऽन्यनिवृत्तियुक्तमवस्थानमाहेति यत्रैवाभ्यासे प्रपाचेत्यादावादेर्हलोऽवस्थानं तत्रैवा
न्यस्य निवृत्तिः स्यान्नान्यत्र। अवस्थानं हि शब्दार्थत्वात्प्रधानम्। न च प्रधानाभावे आनुषङ्गिककार्यप्रवृत्तिरानक्षेत्यत्रापि ककारषकारयोरस्या
मवस्थायां निवृत्त्यप्रसङ्गः। षष्ठीसमासेऽप्याटतुः आटुरित्यत्र टकारस्यादिवद्भावे शेषप्रसङ्गस्तच प्रयुक्त एव। तत्र यथा कृति पक्ष आश्रीयते तेन-

हलादिः॥ किमयं षष्ठीसमासः। हलामादिर्हलादिः हलादिः शिष्यत इति। आहोस्वित्कर्मधारयः हल् आदिर्हलादिः
हलादिः शिष्यत इति। कश्चात्र विशेषः। हलादिशेषे षष्ठीसमास इति चेदजादिषु शेषप्रसङ्गः। हलादिशेषे षष्ठीसमास इ
ति चेदजादिषु शेषः प्राप्नोति। आनक्ष आनक्षतुरानक्षुः। अस्तु तर्हि कर्मधारयः। कर्मधारय इति चेदादिशेषनिमित्त
त्वाल्लोपस्य तदभावे लोपवचनम्। कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभावे आद्यस्य हलोऽभावे लोपो
वक्तव्यः। आटतुः आटुः। तस्मादनादिलोपः। तस्मादनादिर्हल्लुप्यत इति वक्तव्यम्। उक्तं वा। किमुक्तम्। प्रतिविधास्य
ते हलादिशेष इति। अयमिदानीं स प्रतिविधानकालः। इदं प्रतिविधीयते। इदं प्रकृतम्। अत्र लोपोऽभ्यासस्येति। ततो व
क्ष्यामि। ह्रस्वः। ह्रस्वो भवत्यादेशः। अभ्यासस्य लोप इत्यनुवर्तते। तत्र ह्रस्वभाविनां ह्रस्वः। लोपभाविनां लोपो भविष्यति।
ततो हलादिः शेषश्चेति॥

दाभ्यासादन्तौ वर्तमानो हलादिः सर्वस्यामभ्यासव्यक्तावनादेर्निवृत्तिं करोतीति दोषाभावो व्यक्तिपक्षे तु यस्यामेवाभ्यासव्यक्तौ हल आदेर
वस्थानं तत्रैवानादेर्निवृत्तिर्नान्यत्रेति दोषप्रसङ्गः। ह्रस्वभाविनामिति। ह्रस्वश्रुत्या च परिभाषोपस्थानादजन्तस्याभ्यासस्य ह्रस्वो विधीयमा
नोऽलोऽन्त्यस्येति वचनादच एव दीर्घस्य ह्रस्वस्य च लोपबाधनार्थं विज्ञायत इति। हल्विषय एवादिशेषनिरपेक्षो लोपोऽवतिष्ठते। ततश्चा
देरपि हलो लोपे प्राप्ते तद्बाधनार्थं हलादिः शेष इति सूत्रमारब्धं तदेवत्त्रा पक्षे लोपविध्यावलोऽन्त्यपरिभाषा नोपतिष्ठत इत्यानक्षेत्यादावन
न्त्यस्यापि हलो लोपो भवतीति न कश्चिद्दोषः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा० कै० अहल्चेति। अविद्यमानहल्कोऽभ्यासो भवतीत्यर्थः॥ शर्पूर्वाः॥ उचिच्छिषतीति। उच्छी विवासे। छे चेत्यन्तरङ्गत्वात्तुकि सति तत्पूर्वत्रासिद्धमिति चु ७ ५१
१३३ त्वस्यासिद्धत्वात् तत् छ्शब्दो द्विरुच्यते तकारस्य शेषे प्राप्ते च्छ्शेषार्थं वार्त्तिकम्। ननु च पूर्वत्रासिद्धीयमद्विर्वचन इति श्चुत्वे कृते च्छिशब्दस्य द्विर्व
चनेन च कारशेषेणैव रूपं सिध्यति। न चेदमस्तिनिमित्तं भावे नैमित्तिकस्याप्यभाव इति येन चुत्वं निवर्तते। एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचन इत्ये
तदनित्यमुभौ साभ्यासस्येति वचनात्। अन्यथा कृतणत्वस्य द्विर्वचने प्राणिणदित्यादि सिध्यतीति किं सूत्रेण। तथा चोजढदित्यसिद्धत्वस्योदा-
हरणं प्रदर्शयिष्यते। इतरो व्यवस्थितस्य समुदायस्याविभज्यान्वाख्यानेऽन्तरङ्गत्वं तुको न पेक्ष्यात्कृत एव तुकि द्विर्वचनं मत्वाह। चर्त्वे कृत

अथ वै वं वक्ष्यामि ह्रस्वोऽहल्। ह्रस्वो भवत्यभ्यासस्येति। ततोऽहल् च भवत्यभ्यासः। तत आदिशेषः। आदिशेषश्च भवत्यभ्यासस्येति। अथवा योगविभागः करिष्यते। ह्रस्वादेशो भवत्यभ्यासस्य। ततः हल्। हल् च लुप्यतेऽभ्यासस्य। तत आदिशेषः। आदिशेषश्च भवत्यभ्यासस्य॥ शर्पूर्वाः॥ शर्पूर्वे शेषे खर्पूर्वग्रहणम्। शर्पूर्वे शेषे खर्पूर्वग्रहणं कर्तव्यम्। खर्पूर्वाः खयः शिष्यन्ते। खरो लुप्यन्त इति वक्तव्यम्। किं प्रयोजनम्। उचिच्छिषति। तुकः श्रवणं मा भूदिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। चर्त्वे कृते तुग्न भविष्यति। असिद्धं चर्त्वं तस्यासिद्धत्वात्तुक् प्राप्नोति। सिद्धकाण्डे पठितमभ्यासजश्त्वचर्त्वमेत्त्वतुकोरिति। एवमप्यन्तरङ्गत्वात्प्राप्नोति तस्मात्खर्पूर्वग्रहणं कर्तव्यम्। न कर्तव्यम्। एत्त्वतुग्ग्रहणं न करिष्यते। अभ्यासजश्त्वचर्त्वं सिद्धमित्येव। आदिशेषप्रसङ्गस्तु। आदिशेषस्तु प्राप्नोति। तिष्ठासति। ननु चानादिशेष आदिशेषं बाधिष्यते। कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात्। असति खल्वपि संभवे बाधनं भवतीति। अस्ति च संभवो यदुभयं स्यादिति। यद्यादिशेषोऽपि भवति शर्पूर्ववचनमिदानीं किमर्थं स्यात्। शर्पूर्ववचनं किमर्थमिति चेत्तवर्गलोपप्रतिषेधार्थम्। शर्पूर्ववचनं किमर्थमिति चेत्तवर्गलोपो मा भूदिति।

इति। अभ्यासे चर्चेति चर्त्वे कृतस्य कृते तुगभावाद्रूपं सिद्ध्यति। असिद्धमिति। तुकि कर्तव्ये। एवमप्यन्तरङ्गत्वादिति। शब्दनित्यत्वेऽप्युपाया रामः
नामव्यवस्थाश्रयणीयोऽन्तरङ्गबहिरङ्गभावः। एत्त्वतुग्ग्रहणमिति। तदकरणे हलादिशेषेऽपि कर्तव्ये तुत्वलक्षणस्य चर्त्वस्यासिद्धत्वा १३३
भावात्तकारस्य चकारे कृते हलादिशेषेण निवर्तिते छकारे रूपं सिध्यति॥ आदिशेषप्रसङ्गस्त्विति। विषयभेदाद्विरोधाभावाच्च बाध्यबाधकभावा
योगः। शर्पूर्ववचनमिति। अपवादाः वाक्यार्थद्वयं साधयन्त्यपवादं च विदधत्युत्सर्गं च निवर्तयन्ति। तत्रोत्सर्गाभ्युपगमे कार्थवत्त्वादिति-
यार्थस्य त्यागाद्वानर्थक्यप्रसङ्ग एवेत्यर्थः। हलादिः शेष इत्यनेन खयां निवृत्तौ प्राप्तायां यवस्थानविधानाद्वानर्थक्यं नास्ति।

व्यपकर्षविज्ञानादिति। व्यपकर्षणमुत्सर्गस्य निवर्तनं तस्य विज्ञानं तस्मादपवादविधानादित्यर्थः। एकाभ्यासविषयत्वादविरोधेऽप्युत्सर्गापवादभावः॥ दाधर्ति॥ श्लाविति। बहुलं छन्दसीति श्लः। पः श्लुः। तूतुजानवदिति। तुजादीनां दीर्घोऽभ्यासस्येति दीर्घत्वमित्यर्थः। पर्णाम्नुषिवदिति। य

व्यपकर्षविज्ञानात्सिद्धम्। व्यपकर्षविज्ञानात्सिद्धमेतत्। किमिदं व्यपकर्षविज्ञानादिति। अपवादविज्ञानात्। अपवादत्वादनादिशेष आदिशेषं बाधिष्यते। ननु चोक्तं कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादिति। इदं तावदयं प्रष्टव्यः। यदि तत्रोच्येत किमिह स्यात्। हलादिशेषः। हलादिशेषश्चेन्नाप्राप्ते हलादिशेष इदमुच्यते तद्बाधकं भविष्यति। यदप्युच्यते असति खल्वपि संभवे बाधनं भवति। अस्ति च संभवो यदुभयं स्यादिति। सत्यपि संभवे बाधनं भवति। तद्यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं बाधकं भवति। एवमिहापि सत्यपि संभवे अभ्यासानादिशेष आदिशेषं बाधिष्यते॥ दाधर्ति॥ दाधर्तीति किं निपात्यते। धारयतेः श्लौ अभ्यासस्य दीर्घत्वं णिलुक् च। अनिपात्यम्। तूतुजानवदभ्यासदीर्घत्वं पर्णाम्नुषिवत् णिलुक् च भविष्यति। धृङो वा श्लौ अभ्यासस्य दीर्घत्वं परस्मैपदं च। अनिपात्यम्। तूतुजानवदभ्यासदीर्घत्वं युध्यतिवत्परस्मैपदं भविष्यति। दर्धर्तीति किं निपात्यते। धारयतेः श्लौ अभ्यासस्य रुक् णिलुक् च। अनिपात्यम्। देवा अदुह्रवत् रुड् भविष्यति पर्णाम्नुषिवत् णिलुक् च भविष्यति। धृङो वा अभ्यासस्य च रुक् परस्मैपदं च। अनिपात्यम्। देवा अदुह्रवदुदुह्र युध्यतिवत् परस्मैपदं च भविष्यति। दर्धर्षीति किं निपात्यते। धारयतेः श्लौ अभ्यासस्य रुक् णिलुक् च। अनिपात्यम्। देवा अदुह्रवदुदुह्र पर्णाम्नुषिवत् णिलुक् च भविष्यति। धृङो वा अभ्यासरुक् परस्मैपदं च। अनिपात्यम्। देवा अदुह्रवदुदुह्र युध्यतिवत्परस्मैपदं भविष्यति। बोभूतु इति किं निपात्यते। भवतेर्यङ्लुगन्तस्यागुणत्वं निपात्यते। नैतदस्ति प्रयोजनम्। सिद्धमत्रागुणत्वं भूसुवोस्तिङीति।

या पर्णानि शोषयन्ति पर्णाम्नुषो वाताद्ग्रत्यादौ किपि बहुलमन्यत्रापि संज्ञाछन्दसोरिति णिलुक् भवत्येवं दाधर्तीत्यादौ भविष्यतीत्यर्थः। धृङ इति। धृङ अवस्थाने इत्यस्य श्लौ प्राप्ते व्यत्ययेन शप्। युध्यतिवदिति। व्यत्ययो बहुलमित्यनेनेत्यर्थः। रुडिति। श्रीङो रुट्। बहुलं छन्दसीत्यनेन।

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ बोभवीतीति। लिङर्थे लेट्। लेटोऽडाटावित्यट्। सिद्धमत्रेति। प्रत्ययलक्षणेन यद्यप्यनुदात्तङित इति ङित्त्वनिमित्तमात्मनेपदं न प्रत्ययनिमित्तं ७५१
१२७ तथापि लोलूयत इत्यादौ यद्यङन्तादात्मनेपदं तत्प्रत्ययस्य ङित्त्वात् प्रत्ययलक्षणं भवत्येव। एतन्नियमार्थमिति। एवं चाऽदादिषु चर्करीतं पर
स्मैपदमिति लिङ्गं सिद्धानुवादः परस्मैपदग्रहणं कर्तर्येव चेदात्मनेपदं नियम्यत इति भावकर्मणोर्यङ्लुगन्तादात्मनेपदं भवत्येव। शु
ति॥ किमर्थमिति। स्वपिरेव सोऽत्र त्वा निर्देशस्य दीर्घकृत्वा निर्दिष्ट इति पूर्वः पक्षः। तत्र चालिटि कितीति वचिस्वपीति संप्रसारणविधानात्तत्
संप्रसारणस्य द्विर्वचने सत्यभ्यासस्य संप्रसारणं श्रूयते अकितीति लिट्यभ्यासस्येति संप्रसारणं स नोरुदविदेति किन्त्वविधानाद् वचिस्वपीति

एवं तर्हि नियमार्थं भविष्यति। अत्रैव यङ्लुगन्तस्य गुणो न भवति। क्व मा भूत् बोभवीतीति। नेनिक्त इति किं निपात्यते। निजे
र्यङ्लुगन्तस्यात्मनेपदं निपात्यते। नैतदस्ति प्रयोजनम्। सिद्धमत्रात्मनेपदमनुदात्तङित आत्मनेपदमिति। नियमार्थं भवि
ष्यति। अत्रैव यङ्लुगन्तस्यात्मनेपदं भवति। नान्यत्रेति। क्व मा भूत् बेभिदीति चेच्छिदीति॥ स्वुतिस्वाप्योः संप्रसारणम्॥ कि
मर्थं स्वपेरभ्यासस्य संप्रसारणमुच्यते। यदा सर्वेषामभ्यासस्थाने ष्वस्वपेः संप्रसारणमुक्तम्। स्वापिग्रहणं व्यपेतार्थम्। स्वा
पिग्रहणं क्रियते व्यपेतार्थम्। व्यपेतार्थो यमारम्भः सुष्वापयिषतीति। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्र कृदन्तेऽतिप्रसङ्गः। तत्र कृदन्ते अ
तिप्रसङ्गो भवति। इहापि प्राप्नोति स्वापकमिच्छति स्वापकीयति। स्वापकीयतेः सन् सिस्वापकीयिषतीति। सिद्धं तु णिग्रहणात्। सिद्ध
मेतत्। कथम्। णिग्रहणं कर्तव्यम्। न कर्तव्यम्। निर्देशादेव हि व्यक्तं ण्यन्तस्य ग्रहणमिति। नात्र निर्देशः प्रमाणं शक्यं क
र्तुम्। यथा हि निर्देशस्तथेहापि प्रसज्येत। स्वापं करोति स्वापयति। स्वापयतेः सन् सिष्वापयिषतीति। तस्माण्णिग्रहणं
कर्तव्यम्।

संप्रसारणं स्वपिस्यमिव्येञां यङीति यङि च ङि स्वापेश्चङीति। व्यपेतार्थमिति। स्वपेः सनादिषु परतो विहितं संप्रसारणं णिचा व्यवधाने न प्राप्नो
तीति स्वापेरर्थेऽन्तस्याभ्यासस्य संप्रसारणं विधीयते। सुष्वापयिषतीति। स्वापयितुमिच्छतीति सन्। इट्गुणयादेशाः। शेषं कृतस्य स्थानिवत्त्वा
त्स्वापे द्विर्वचनमभ्यासस्य संप्रसारणं स्तौतिण्योरिति षत्वम्। इतरस्तु ण्यन्तस्य ग्रहणमबुध्वायेन केनचित्प्रत्ययेन व्यवहितस्य स्वपेरभ्यासस्य सं राम॰
प्रसारणमनेनोक्तमिति मत्वाह। अस्ति प्रयोजनमिति। स्वपिनीति स्वापकस्तमिच्छतीति क्यच्। निर्देशादेवेति। ण्यन्तस्यैव स्वपिः सूत्रे निर्दि १३४
ष्ट इत्यर्थः। स्वापं करोतीति। स्वपेर्घञन्तात्तत्करोतीति णिच्। तस्माण्णिग्रहणमिति। स्वपेर्णौ इति वक्तव्यम्। तेन स्वपेर्णौ विधीयते न त कृदन्तस्य ग्र
हणं तु घञन्तात्सेर्ग्रहणाभावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निजाम्॥ त्रिग्रहणमिति। इत्करणपरिच्छिन्नात्त्रय एव निजादय इत्यर्थः। एकारे विधातव्ये गुणग्रहणमिकूपरिभाषोपस्थानार्थं तेन न हलादिशेषे कृते गुणो भवत्यन्यथा तदपवादो हलः स्थान एकारः स्यात्। अथाभ्यासविकारेऽपवादा नोत्सर्गान्बाधन्त इत्याश्रीयते तदाविसष्टार्थं गुणग्रहणम्॥ अर्त्ति॥ अर्त्तिग्रहणमिति। ऋ सृ गताविति जुहोत्यादौ पठ्यते गा लुतौ च छन्दसीति छन्दो ग्रहणं पूर्वेषाम

निजां त्रयाणां गुणः श्लौ॥ त्रिग्रहणानर्थकं गणान्तत्वात्। त्रिग्रहणमनर्थकम्। किं कारणम्। गणान्तत्वात्। त्रय एव निजादयः। उत्तरार्थं तु। उत्तरार्थं तर्हि त्रिग्रहणं कर्तव्यम्। भृञा मित्त्रयाणां यथा स्यात्। इह माभूत्। जहाति॥ अर्त्तिपिपर्त्त्योश्च॥ अर्त्तिग्रहणं किमर्थम्। न बहुलं छन्दसीत्येव सिद्धम्। न ह्यन्तरेण छन्दोऽर्त्तेः श्लुर्लभ्यः। एवं तर्हि सिद्धे सति यदर्त्तिग्रहणं करोति तज्ज्ञापयत्याचार्यो भाषायामर्त्तेः श्लुर्भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। इयर्त्तीत्येतत् सिद्धं भवति॥ गुणो यङ्लुकोः॥ एचोर्यङि दीर्घप्रसङ्गो ह्रस्वाद्धि परं दीर्घत्वम्। एचोर्यङि दीर्घत्वं प्राप्नोति। डोढौक्यते तोत्रौक्यत इति। ननु च ह्रस्वत्वे कृते गुणो भविष्यति। दीर्घत्वं न भविष्यति। न सिद्ध्यति। किं कारणम्। ह्रस्वाद्धि परं दीर्घत्वम्। ह्रस्वत्वं क्रियतां दीर्घत्वमिति। परत्वाद्दीर्घत्वेन भवितव्यम्। न वाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात्। न वा एष दोषः। किं कारणम्। अभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात्। अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्त इत्येषा परिभाषा कर्तव्या। कान्येतस्याः परिभाषायाः प्रयोजनानि। प्रयोजनं सन्वद्भावस्य दीर्घत्वम्। अचीकरत्। अजीहरत्। सन्वद्भावमपवादत्वाद्दीर्घत्वं न बाधते। मान्प्रभृतीनामित्वस्य। मान्प्रभृतीनां दीर्घत्वमपवादत्वादित्वं न बाधते। गणोरीत्वं हलादिशेषस्य। गणोरीत्वमपवादत्वाद्धलादिशेषं न बाधते।

पिप्रभृतीनां शेष इति छान्दस एवार्त्तेः श्लुविषय इयर्त्तीति। तिपृपृपः श्लुः द्विर्वचनमुरदित्यत्वमित्वमभ्यासस्यासवर्णे इति इयङ्। गुणार परत्वे॥ गुणो॥ एचोरिति। ह्रस्वस्यावकाशः यथावित्यादि। दीर्घोऽकित इत्यस्यावकाशः कृतेऽकृते वा ह्रस्वत्वे पापच्यत इति। डोढौक्यत इत्यादौ तु परत्वादौकारस्य दीर्घ औकार एव प्राप्नोति। ऐकारस्योदाहरणं   पेपेण्यत इति। ह्रस्वत्वे कृत इति। वक्ष्यमाणोऽभिप्रायः। गुणाश्च दीर्घस्यापवाद इति दीर्घाभावः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदमयुक्तमिति। परत्वाद्दीर्घप्रसङ्गस्तु ह्रलोत्सर्गापवादयोर्बाध्यबाधकत्वाभावः प्रतिपाद्यत इत्ययुक्तं प्रयोजनमपि किंचिन्न वचनानुरूपमिति पौर्वापर्यविरोधादयुक्तम्। नच सन्वद्भावमिति। सन्वद्भावस्यावकाशोऽचिक्षणदिति। दीर्घस्यावकाशोऽदीदपदिति। इहोभयं प्राप्नोति। अचीकरदिति तत्र परत्वाद्दीर्घः प्राप्नोति। नखल्वपीति। सन्प्रत्ययोऽभ्यासदीर्घत्वं च संनियोगेन विधीयते इत्यन्तरङ्गं दीर्घत्वम्। इत्वं तु बहिरङ्गं सनि परतोऽङ्गाधिकारेऽभ्यासस्याकारान्तस्य विधानात्। नखल्वपीति। आदेः शेषो विधीयतेऽन्त्यस्य त्वीत्वमिति नास्त्युत्सर्गापवादभावो हलादिशेषे अभ्यासस्येत्यवयवषष्ठी। ई च गण इत्यत्राभ्यासस्येति स्थानषष्ठीति भिन्नविषयावीत्वहलादिशेषावन

इदमयुक्तं वर्तते। किमत्रायुक्तम्। एचोर्यङि दीर्घत्वप्रसङ्गो ह्रस्वाद्धि परं दीर्घत्वमित्युक्तानन्तउच्यते नवाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वादिति। तस्याश्च परिभाषायाः प्रयोजनानि नामोच्यन्ते। प्रयोजनं सन्वद्भावस्य दीर्घत्वं मान्म्भृतीनामित्वस्य गणोरीत्वं हलादिशेषस्येति। नच सन्वद्भावमपवादत्वाद्दीर्घत्वं बाधते किं तर्हि परत्वात्। नखल्वपि मान्म्भृतीनां दीर्घत्वमपवादत्वादित्वं बाधते किं तर्ह्यन्तरङ्गत्वात्। नखल्वपि गणोरीत्वमपवादत्वाद्धलादिशेषं बाधते। किं तर्ह्यनवकाशत्वात्। एवं तर्हीयं परिभाषा कर्तव्या अभ्यासविकारेषु बाधका न बाधन्त इति। सा तर्ह्येषा परिभाषा कर्तव्या। न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति। भवत्येषा परिभाषेति। यदयमकित इति प्रतिषेधं शास्ति। दीर्घो॥ अकित इति किमर्थम्। यंयम्यते रंरम्यते। अकित इति शक्यमकर्तुम्। कस्मान्न भवति यंयम्यते रंरम्यत इति। नुकि कृतेऽनजन्तत्वात्। अत उत्तरं पठति। अकिद्वचनमन्यत्र किदन्तस्यालोऽन्त्यनिवृत्त्यर्थम्। अकिद्वचनं क्रियते ज्ञापकार्थम्। किं ज्ञाप्यम्। एतज्ज्ञापयत्याचार्योऽन्यत्र किदन्तस्याभ्यासस्यालोऽन्त्यविधिर्न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। प्रयोजनं ह्रस्वत्वालत्वगुणेषु।

वकाशत्वात्तु बाधकमीत्वं हलादिशेषस्य निरवकाशा हि विधयः सावकाशान्विधीन्बाधन्त इति न्यायाद्यदा तु येन नाप्राप्त इति न्यायः तदास्येवोत्सर्गापवादभावः। अभ्यासविकारेषु बाधका इति। बाधकत्वमनपेक्षितनिमित्तविशेषमाश्रयणीयमित्यर्थः। यदयमिति। यथा चाकित इति ज्ञापकं तथोत्तरत्र वक्ष्यते। दीर्घो॥ नुकि कृत इति। दीर्घश्रुत्या च परिभाषोपस्थानाद् चाभ्यासस्य विशेषणादजन्तस्याभ्यासस्य दीर्घो विधीयते। स चालोऽन्त्यस्येति वचनादन्त्यस्याचो भवति। अकिद्वचनमिति। यद्यचाभ्यासो विशेष्यते। अकित इति प्रतिषेधोऽनर्थकः स्यात्तस्मादभ्यासेनाज्विशेष्यते ततोऽभ्यासस्येति विशेषणषष्ठीत्यलोऽन्त्यस्येति नोपतिष्ठत इत्येतज्ज्ञाप्यत इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अवचच्छतुरिति। छो छेदने आत्वं लिट् छाशब्दस्य द्विर्वचनमन्तरङ्गत्वात् नुकि कृते ऽनन्त्यस्याप्यचो ह्रस्वत्वम्। चच्छृदतुरिति। उच्छृदिर् दी
प्तिदेवनयोः। छृदो द्विर्वचनं छे चेति तुकि कृते उरदित्यत्वमभ्यासे न ऋवर्णस्य विशेषणात्। चिच्छादयिषतीति। छद संवरणे। परत्वादेते वि
धय इति। न ह्येतेषूदाहरणेषु तुगन्तरङ्गः। प्रत्ययविशेषनिमित्तत्वादभ्यासस्याभ्यासाश्रयत्वात् तुक्ह्रस्वादीनाम्। तदन्तग्रहणाद्वेति। ज्ञा
पकमन्तरेणापि विशेषणविशेष्यभावे कामचारात् कृते ऽपि तुकि एते विधयः सिध्यन्ति। एवं च कृत्वेति। ततश्चाकित इति वचनं दीर्घनिषेधाय

ह्रस्वत्वम्। अवचच्छतुः अवचच्छुः। अत्वं चच्छृदतुः चच्छृदुः। इत्वं चिच्छादयिषति चिच्छर्दयिषति। गुणः। चे
च्छिद्यते चोच्छूप्यते। तुकि कृते अनन्त्यत्वादेते विधयो न प्राप्नुवन्ति। विप्रतिषेधात् सिद्धम्। नैतानि सन्ति प्रयोजना
नि। विप्रतिषेधेनाप्येतानि सिद्धानि तुक् क्रियतामेते विधय इति। किमत्र कर्तव्यम्। परत्वादेते विधय इति। तदन्त
ग्रहणाद्वा। अथवा नैव विज्ञायते अभ्यासस्यान्तस्य ऋकारान्तस्याकारान्तस्येगन्तस्येति। कथं तर्हि अभ्यासे यो ऽच्। अभ्यासे य
ऋकारः अभ्यासे यो ऽकारः अभ्यासे य इगिति। एवं च कृत्वा दीर्घत्वं प्राप्नोति॥ एवं तर्हीदमिह व्यपदेश्यं सद् आचा
र्यो न व्यपदिशति। किम्। अपवादो नुक् दीर्घत्वस्येति। एवं तर्हि सिद्धे सति यदकित इति प्रतिषेधं शास्ति तज्ज्ञापय
त्याचार्यो भवत्येषा परिभाषा ऽभ्यासविकारेषु बाधका न बाधन्त इति। किमेतस्य ज्ञापने प्रयोजनम्। ऐचोर्येङि दी
र्घप्रसङ्गः ह्रस्वाद्धि परं दीर्घत्वमित्युक्तं स न दोषो भवति। नुग्॥ नुकि यंयम्यते रंरम्यत इति रूपासिद्धिः। नुकि सति यं
यम्यते रंरम्यत इति रूपं न सिध्यति। अनुस्वारागमवचनात् सिद्धम्। अनुस्वारागमो वक्तव्यः। एवमपीदमेव रू
पं स्यात् यंयम्यते इदं न स्यात् यँयम्यते। पदान्तवच्चेति वक्तव्यम्। वा पदान्तस्येति॥ रीग् ॥ दुपधस्य च॥ रीगृत्वतः सं
योगार्थम्। रीगृत्वत इति वक्तव्यम्। किं प्रयोजनम्। संयोगार्थम्। संयोगान्ताः प्रयोजयन्ति। वरीवृश्च्यते परीपृच्छ्यते वरीभ्रज्ज्यते॥

नतु ज्ञापकार्था। अपवादो नुगिति। नाप्राप्ते दीर्घे नुक आरम्भात्। एवं तर्हीति। ओहाक् त्यागे इत्यस्य तु निषेधाय अकित इति न भवति। धातु
र्ययं कित् न त्वभ्यासः। ककारो हि हश्वव्रीहिकालयोरित्यत्र हाङ्हाकोः सामान्यग्रहणार्थः। नुग्। तपरकरणं भूतपूर्वस्यापि दीर्घस्य नि
वृत्त्यर्थं तेन बाभ्राम्यत इति नुक् न भवति। नुकि यंयम्यत इति। अङ्गत्वात् परत्वादनुस्वारो न प्राप्नोति। एवमपीति। नित्यं परसवर्णः प्राप्नोति विक
ल्पेन चेष्यते। पदान्तवच्चेति। तेन वा पदान्तस्येति परसवर्णविकल्पः।

CC-0. In Public Domain. Digitization by eGangotri

ऋग्निकौ॥ मर्मृज्यत इति। ऋग्निकौ चलुङ्क्तीति हस्वविधीयमानो न प्राप्नोतीति वचनम्। ऋत स्था॥ अङ्गविशेषणमिति। यद्यप्यभ्यासविशेषणे भूत-
पूर्वदीर्घनिवृत्त्यर्थं तपरकरणं तथापि मुख्यकल्पनासंभवे गौणीकल्पना किमित्याशयः। तदिति मत्वा भाष्यकारेणाङ्गविशेषणम् तदित्याश्रि
तम्। पचतीति। लट उपलक्षणं तेन लटि चाकर्तीत्यादिरूपाणि किरतीति योनयेदित्यर्थः। प्राप्तिज्ञमिति। तपरकरणादङ्गविशेषणम् तदिति
तेन रुगादीनां विषयविभागेन प्राप्तिं जानातीत्यर्थः। प्रारब्ध इति। संग्रहणं संग्रहः साधुशब्दराशिः स तेन प्रारब्ध इति योग्यतानिश्चयो

ऋग्मि॥ मर्मृज्यते मर्मृज्यमानास इति चोपसंख्यानं कर्तव्यम्। मर्मृज्यते मर्मृज्यमानासः॥ ऋत स्था॥ किमिदमृकारग्रहणमङ्ग
विशेषणमृकारान्तस्याङ्गस्येति। आहोस्विदभ्यासविशेषणमृकारान्तस्याभ्यासस्येति। अङ्गविशेषणमित्याह। कथं ज्ञा
यते। यदयं तपरकरणं करोति। कथं कृत्वा ज्ञापकम्। न हि कश्चिदभ्यासे दीर्घोऽस्ति यदर्थं तपरकरणं क्रियते। अथाङ्गवि
शेषणे ऋकारग्रहणे सति तपरकरणे किं प्रयोजनम्। इह माभूत् चाकर्ति चाकीर्तः चाकिरति। किरतिं चर्करीतान्तं पचती
त्यत्र यो नयेत्। प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः॥ सन्वत्॥ इह कस्मान्न भवति। अजजागरत्। लघुनि चङ्परे इत्यु
च्यते व्यवहितं चात्र लघु चङ्परम्। इहापि तर्हि न प्राप्नोति। अचीकरत् अजीहरत्। वचनाद्भविष्यति। इहापि वचनात्प्राप्नोति
। अजजागरत्। येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्। केन च नाव्यवधानम्। वर्णेकेन। एतेन पुनः संघातेन व्य
वधानं भवति न भवति च। एवमप्यचिक्षणद् अत्र न प्राप्नोति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानामि
त्वमिति। यदयमत् स्मृदृत्वरप्रथम्रदस्तृस्पशामिति बाधनार्थं मत्वं शास्ति। सन्वद्भावदीर्घत्वे णेर्णिच्युपसंख्यानम्। सन्वद्भा
वदीर्घत्वे णेर्णिच्युपसंख्यानं कर्तव्यम्। वादितवन्तं प्रयोजितवान्। अवीवदद्वीणां परिवादकेन। किं पुनः कारणं न सिध्य
ति। णिचा व्यवहितत्वात्।

ज्ञापनेन नस्त्यसते॥ सन्वत्। चङ्पर इति बहुव्रीहिणान्यपदार्थो णिराश्रीयते तेनाचकमतेति केवले चङि सन्वद्भावो न भवति। न हि णिजूव्यतिरे
केणान्यश्चङ्परः संभवति तेन चङ्परे णौ यल्लघु तस्मिन्परतोऽभ्यासस्य सन्वत्कार्यं भवति। इह कस्मादिति। न कश्चिदभ्यासो लघोरनन्तरः संभ
वतीति सप्तमी विज्ञानादत्रापि प्रसङ्ग इति भावः। इतरः परस्य सप्तम्याश्रयेण नाव्यवधानमित्याश्रीयत इत्याह। लघुनीति। एवंजातीयकानामि
ति। संयोगव्यवहितानामित्यर्थः। णिचाव्यवहितत्वादिति। चङ्परे णौ यल्लघु तस्मिन्परतोऽभ्यासस्य सन्वद्भावः। यस्मिंश्चात्र णौ लघुर्नासौ चङ्प
रः यस्तु चङ्परः न तस्मिन्परतो लघु॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीर्घविधिं प्रतीति। ननु दीर्घे कर्तव्ये भवति स्थानिवत्त्वनिषेधः। सन्वद्भावे तु प्राप्नोति स्थानिवद्भावः। एवं तर्हि दीर्घभावित्वादिकारोऽप्युपचाराद्दी
र्घशब्देनोच्यत इति भाष्यकारस्याभिप्रायः। किं तु मुख्ये दीर्घे संभवति गौणग्रहणमयुक्तमिति चिन्त्यमेतत्। वृद्धौ कृतायां लोप इति। एतेनैव
ङीति सूत्रभाष्येण विरुध्यते तेन तत्र ह्यगिति प्रत्याहारग्रहणसामर्थ्यात् कृतायां वृद्धौ लोप इति प्रतिपादितम्। मीमादीनां त्विति। स नियत इष्टम
भ्यासकार्यं न त्वतिदिश्यते मीमादीनां च सन्यभ्यासस्य लोपो दृष्ट इति सन्वद्भावात्प्राप्नोति। सिद्धं त्विति। नेह कार्यमतिदिश्यते अपि तु रूपं लोप
स्याभावः रूपं लोपो न भवतीति नातिदिश्यते। किं चात्र लोपोऽभ्यासस्येति। अत्र ग्रहणं विषयावधारणार्थं तेन सादिविषय एवाभ्यासस्य लो

लोपे कृते नास्ति व्यवधानम्। स्थानिवद्भावाद्व्यवधानमेवाप्रतिषिध्यते तत्र स्थानिवद्भावः दीर्घविधिं प्रति न स्थानिव
दिति। एवमप्यनग्लोप इति प्रतिषेधः प्राप्नोति। वृद्धौ कृतायां लोपः तन्नाग्लोप्यङ्गं भवति। एवं तर्हीदमिह संप्रधार्यं वृद्धिः
क्रियतां लोप इति। किमत्र कर्तव्यम्। परत्वाद्वृद्धिः। नित्यो लोपः कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि। लोपोऽप्यनित्यः
अन्यस्य कृतायां वृद्धौ प्राप्नोत्यकृतायामन्यस्य शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति। उभयोरनित्ययोः परत्वाद्वृ
द्धिः वृद्धौ कृतायां लोपः तन्नाग्लोप्यङ्गं भवति। मीमादीनां तु लोपप्रसङ्गः। मीमादीनां तु लोपः प्राप्नोति। अमीमपत्। सि
द्धं तु रूपातिदेशात्। सिद्धमेतत्। कथम्। रूपातिदेशोऽयं सनियादिष्टमभ्यासरूपं तत्सन्वद्भावेनातिदिश्यते न च मी
मादीनां सन्यभ्यासरूपमस्ति। अङ्गान्यत्वाद्वा सिद्धम्। अथवा ण्यन्तमेतदङ्गमन्यत्। लोपे कृते नाङ्गान्यत्वम्। स्थानिवद्भा
वादङ्गमन्यत्। कथमजिज्ञपत्। अत्र सन्यपि ण्यन्तस्यैवोपादानमाप् ज्ञप्यृधामीदिति। तत्राङ्गान्यत्वाभावादभ्यास
लोपः स्यात्। तस्मात्पूर्व एव परिहारः। सिद्धं तु रूपातिदेशादिति। इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभा
ष्ये सप्तमस्य चतुर्थे पादे प्रथममाह्निकम्। पादश्च तुर्थोऽध्यायश्च समाप्तः॥ ॥

पो भवतीति तदभावे तु सन्वद्भावान्न भवति। अङ्गान्यत्वादिति। मीमादीनामङ्गानामभ्यासलोपो विहितः। अयं त्वभ्यासो ण्यन्तानामिति न लु
प्यते। अन्ये तु व्याचक्षते चङ्परे णौ यदङ्गं तदभ्यासस्य सन्वद्भावो विधीयते णौ मीमादीन्येवाङ्गानि युक्तलङ्कृत्वात्तन्नङ्ग्रहणेन ग्रहणात्त
स्मादङ्गान्यत्वादित्यस्यायमर्थः। येषामङ्गानां चङ्त्यादि विधीयते तदभ्यासस्यात्र ग्रहणाद्विषयावधारणाल्लोपो नान्येषामिति इसादि
रहितानाममीमयदित्यादौ च धातोः सन्वद्भावाभावादिसाधभावादभ्यासलोपाभावः। अथवा सकारादौ सन्यभ्यासलोपो विहितो न सन्मात्रे
सामान्यातिदेशे विशेषानतिदेशाल्लोपाभावः॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमाध्यायस्य चतुर्थे पादे प्रथममा
ह्निकम्। पादश्चतुर्थोऽध्यायश्च समाप्तः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ विद्योदयोनिराकुर्यादविद्यातिमिरंसदा ॥

॥ श्रीसंकष्टनाशिन्यैनमः ॥

॥ इतिसप्तमः ॥

॥ श्रीविश्वेश्वरायनमः ॥

॥ सहस्रांशुरिवाशेषमुद्राकिरणराजिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ विद्योदयोनिराकुर्याद्विद्यातिमिरं सदा ॥

॥ अथाष्टमाध्याय आरभ्यते ॥

॥ सहस्रांशुरिवाशेषंमुद्राकिरणराजिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ श्रीगणेशाय नमः॥ सर्वस्य द्वे॥ सर्वशब्दोऽत्र द्रव्यप्रकारावयवकार्त्स्न्यवृत्तिः। द्रव्यकार्त्स्न्ये यथा सर्वं स्वं ददातीति। प्रकारकार्त्स्न्ये ८११
१ यथा सर्वान्नं भक्षयतीति। सर्वप्रकारमन्नं भुङ्क्ते इति गम्यते। अवयवकार्त्स्न्ये यथा। सर्वः पटो दग्ध इति। इह तु पर्यादीनां विशिष्टार्था
नां कार्यित्वेनोपादानाद्द्रव्यप्रकारकार्त्स्न्यासंभवादवयवकार्त्स्न्यवृत्तिः सर्वशब्दः तस्योपादानमलोऽन्त्यनिवृत्त्यर्थं वा स्यात् द्वि
प्रयोगनिवृत्तये स्थानषष्ठ्यर्थं वा। तत्र वक्ष्यमाणैर्लिङ्गसामर्थ्यादिभिरलोऽन्त्यनिवृत्तिं षष्ठ्यर्थप्रक्लृप्तिं च सिद्धां मत्वा स्थाने द्विर्व
चनस्य द्विष्प्रयोगद्विर्वचनस्य च फलभेदमपश्यन् पृच्छति। सर्ववचनमिति। अलोऽन्त्यनिवृत्त्यर्थमिति। ननु सर्वस्येत्यस्मिन्नस
ति स्थानषष्ठ्यभावादनुसंहाराभावः स्थानेविज्ञातस्यानुसंहार इत्युक्तत्वात्। कथं चान्त्यस्य द्विर्वचनं प्राप्नोति। यावता अनेका
ल्त्वात्सर्वादेशेन तेन भाव्यम्। उच्यते। परेर्वर्जन इत्यादौ तावत्षष्ठी विद्यत एव। नित्यवीप्सयोरित्यत्रापि सामर्थ्याल्लभ्या षष्ठी। य

श्रीगणेशाय नमः॥ सर्वस्य द्वे। सर्ववचनं किमर्थम्। सर्ववचनमलोऽन्त्यनिवृत्त्यर्थम्। सर्वग्रहणं क्रियते अलोऽन्त्य
निवृत्त्यर्थम्। अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य द्विर्वचनं मा भूदिति। क्व पुनरलोऽन्त्यनिवृत्त्यर्थेनार्थः सर्वग्र
हणेन। नित्यवीप्सयोरिति। नित्यवीप्सयोरित्युच्यते न चान्त्यस्य द्विर्वचने नित्यता वीप्सा वा गम्यते। इह तर्हि
परेर्वर्जन इति अत्र अन्त्यस्यापि द्विर्वचने वर्ज्यमानता गम्येत षष्ठीनिर्देशार्थं च सर्वग्रहणं कर्तव्यं षष्ठीनिर्देशो
यथा प्रकल्पेत। अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः। अक्रियमाणे हि सर्वग्रहणे षष्ठ्यर्थस्याप्रसिद्धिः स्यात्॥ ॥ ॥

थोक्तमनेकाल्त्वात्सर्वादेशो भविष्यतीति। हलन्तेष्वेतत्स्यात्। अजन्तेषु तु पर्यादिष्विकारादेरन्त्यस्य प्राप्नोति। ननु द्वाविका
रौ सर्वस्य स्यातां यथा डा आडा इति प्रश्लेषनिर्देशात्सर्वादेशो डा भवति। उच्यते। द्वाविकारौ कृतैकादेशावादेशत्वं प्रतिपद्ये
ते इत्येकाल्त्वादादेशोऽलोऽन्त्यस्य प्राप्नोति। डास्तु प्रश्लेषनिर्देशसामर्थ्याद्विगृहीतरूपः सर्वादेशत्वं प्रतिपद्यते सवर्णदीर्घ राम
त्वं प्रतिपद्यते। क्व पुनरिति। नित्यादिरर्थोऽन्त्यद्विर्वचनेन न द्योतयितुं शक्यत इति भावः। अन्त्यस्यापीति। यथान्तरेण द्विर्व
चनं परिवर्जनार्थः प्रयुज्यते परित्रिगर्त्तेभ्य इति। अत एवोच्यते परेर्वर्जने वा वचनमिति। एवमन्त्यस्यापि द्विर्वचने परेर्वर्ज १
नं प्रतीयेत। षष्ठीनिर्देशार्थं चेति। इष्टस्य षष्ठ्यर्थस्य प्रक्लृप्त्यर्थमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्येति। नित्यवीप्सयोर्थः शब्दस्तस्यद्वे इति सामर्थ्यात् षष्ठ्यर्थो लभ्यत इति भावः। इतरः शब्दमन्तरेणानन्तयोरिरपि
संबन्धः सामर्थ्याद्धि ज्ञायेतेतिमत्वाह। स्थानेयोगत्वस्येति। क्वपुनरिति। षष्ठी सर्वत्र विद्यत इति भावः॥ ननु चैषैवेति। नि
त्यार्थवचनः शब्दो नित्यो वीप्सार्थवचनश्च वीप्सेत्याश्रीयत इति भावः। अर्थनिर्देश इति। प्रयोक्तृधर्मो वीप्सा यथाऽभा
वाधानत्वमभिधेयधर्मः। यद्व्यक्ष्यते वीप्सायां त्वकर्त्ता भवतीति। वीप्सायामर्थत्वे नित्यशब्दोऽप्यर्थवृत्तिरेवयाह्योर्द्वे न्द्व
निर्देशाद्भिन्नविभक्तिकत्वायोगात्। अलोऽन्त्यनिवृत्त्यर्थेनेति। ननु च नित्यवीप्सयोरित्यन्यार्थाश्रयणेन पूर्वमेवालो
ऽन्त्यविधिर्निवारितः। तत्किमर्थं नित्यवीप्सयोरित्युपादियते। परेर्वर्जन इत्यादिष्वपादेयं प्रकरणोपलक्षणार्थत्वात्सर्वे

कस्य। स्थानेयोगत्वस्य। क्वपुनरिह षष्ठी निर्देशार्थेनार्थः सर्वग्रहणेन॥ यावता सर्वत्रैव षष्ठ्युच्चार्यते। प
रेर्वर्जने। प्रसमुपोदः पादपूरणे। उपर्यध्यधसः सामीप्ये। वाक्यादेरामन्त्रितस्येति। इह न काचित् षष्ठी नि
त्यवीप्सयोरिति॥ ननु चैषैव षष्ठी। नैषा षष्ठी। किं तर्हि। अर्थनिर्देश एषः। नित्ये चार्थे वीप्सायां चेति। अलो
ऽन्त्यनिवृत्त्यर्थेन तावन्नार्थः सर्वग्रहणेन। इदं तावदयं प्रष्टव्यः। नित्यवीप्सयोर्द्वे भवत इत्युच्यते द्विश
ब्द आदेशः कस्मान्न भवति। आचार्यप्रवृत्तिर्ज्ञापयति न द्विशब्द आदेशो भवतीति। यदयं तस्य परमाम्रे
डितमनुदात्तं चेत्याह। कथं कृत्वा ज्ञापकम्। द्विशब्दो यमेकाच् न तस्य एकत्वात्तस्य परमाम्रेडितमनु
दात्तं चेत्येतन्नास्ति। पश्यति त्वाचार्यो न द्विशब्द आदेशो भवतीति ततस्तस्य परमाम्रेडितमनुदात्तं चे
त्याह। यदि तर्हि न द्विशब्द आदेशो भवति केतर्हीदानीं द्वे भवतः। द्विशब्देन यदुच्यते॥ ॥ ॥

पुवासूत्रेषु परिहारस्य तुल्यत्वाददोषः। कथं पुनर्द्विशब्द आदेशः संभाव्यते यावता ग्रामो ग्राम इत्यस्मिन्नर्थे प्रतिपाद्ये
द्विशब्दो न प्रवर्त्तते। पराभिप्रायेणैतदुच्यते। यथा भवान् सामर्थ्यादिन्यायत्यागेन शास्त्रसद्भावमात्रेणालोऽन्त्यविधिं
मन्यते तथा स्वं रूपं शब्दस्येति शास्त्रप्रामाण्याद्द्विशब्दः प्राप्नोति न्यायाश्रये तु स्वरूपविधिवदलोऽन्त्यविधिर्न भवि
ष्यति। आचार्यप्रवृत्तिरिति। न्यायसिद्धेऽर्थे लिङ्गदर्शनम्। न हि द्विशब्द आदेशो ग्रामादिशब्दस्यार्थं वक्तुं समर्थ इति न प्र
वर्त्तते। नाम्रेडितस्यान्त्यस्य तु वा नित्यमाम्रेडिते डाचीत्येतदपि लिङ्गं द्रष्टव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा·कै
२

यदि तर्हीति पृष्टे द्विशब्दे न यदुच्यत इत्युत्तर उक्ते ऽपि सामान्याभिधानाद्विशेषो दुर्ज्ञान इति पृच्छति॥१॥९॥ किंपुनस्तदिति। संख्येयमर्थ इति। अभिधेयमित्यर्थः। यदुच्यते। आदशभ्यः संख्या ः संख्येये वर्तन्ते ऽत ऊर्ध्वं संख्याने संख्येये चेति। पदे इति। शब्दानुशासनप्रस्तावाच्छब्दप्रकाशोपन्यासः। यदा तावन्मात्रे इति। यदुक्तम्। नाविकाशेष्ठते कादेशावेकालादेशो ऽन्त्यस्य प्राप्नोतीति। तदयुक्तम्। न ह्यप्रवृत्तयोरेकादेशशास्त्रप्रवृत्तिरस्ति प्रवृत्तिकाले चानेकाल्त्वात्सर्वादेशत्वमिति नास्त्यलो ऽन्त्यविधिः। यदा तर्हीति। परिशब्देकारस्य द्वे अर्धमात्रे। अल्ग्रहणेनार्द्धमात्राया अग्रहणादनेकाल्त्वाभावात्प्राप्नुतः। इहेति। विशिष्टमर्द्धमात्राद्वयमुच्चारणायोगाद्अशक्यमादेशः कर्त्तुम्। तस्यादितउदात्तमर्द्धह्रस्वमित्यने

किंपुनस्तत्। द्विशब्दो ऽयं संख्यापदम्। संख्या याश्च। संख्येयमर्थः। संख्येये द्वे भविष्यतः। के पुनस्ते। पदे। वाक्ये। मात्रे वा। तद्यदा तावत्पदे वाक्ये वा तदानेकाल्त्वात्सर्वस्यादेशः सिद्धः। यदा तावद् मात्रे अपि तदानेकालशित्सर्वस्येति सर्वादेशो भविष्यति। यदा तर्ह्यर्धमात्रे तदा सर्वादेशो न सिध्यति। नैष दोषः। तदापि सिद्धः। न चार्द्धमात्रे द्विरुच्येते। किंकारणम्। इह व्याकरणे यः सर्वेल्पीयान्स्वरव्यवहारः समात्रया भवति। नार्धमात्रयाव्यवहारोस्ति। तेनार्द्धमात्रेन भविष्यतः। एवमपि कुत एतत् पदे द्वे भविष्यत इति। न पुनर्वाक्ये स्याताम्। मात्रे वा। नित्यवीप्सयोर्द्वे भवत इत्युच्यते। न च वाक्यद्विर्वचनेन मात्राद्विर्वचनेन वा नित्यता वीप्सा वा गम्यते। षष्ठीनिर्दिष्टार्थमेव तर्हि सर्वग्रहणं कर्त्तव्यम्। न वा पदाधिकारात्। न वा वक्तव्यम्। किंकारणम्। पदाधिकारात्। पदस्येति प्रकृत्य द्विर्वचनं वक्ष्यामि। तच्चावश्यं पदग्रहणं कर्त्तव्यं समासतद्धितवाक्यनिवृत्त्यर्थं च। समासनिवृत्त्यर्थं तावत्। सप्तपर्णो ऽष्टापदम्। तद्धितनिवृत्त्यर्थम्।

१ न तु ह्रस्वादिवर्णस्याया अर्द्धमात्राया गुणाख्यानं क्रियते। न च वाक्यद्विर्वचनइति। नित्यत्वाद्यर्थप्रतिपादनायतत्प्रतिपादनसमर्थः शब्दः प्रयुज्यते स्थाने ऽन्तरतम इत्युपस्थानाच्च शब्दतो ऽर्थतश्चान्तरतमे एव द्वे पदे आदेशौ भवतः। परेर्वर्जन इत्यादौ तु पर्यादिशब्दसन्निधानाद्द्विशब्दः पर्यादीनेव संख्येयानाचष्ट इति वाक्ये मात्रे पदे अपि ये केचिन्न प्रवर्त्तन्ते। न वेति। शब्दान्तरं पक्ष्यन्तमुपादेयमाको विशेष इति चेदाह। तच्चेति· सप्तपर्ण इति। सप्तसंख्यानि पर्णानि वीप्स्यन्ते न तु तद्वान्वृक्ष इति वीप्साया मेकत्वस्यानन्तर्भावात्प्रागेव विभक्तेर्द्विवचनं प्राप्नोति। सप्तपर्णसप्तपर्ण इति। पदाधिकारात्तु न भवति·॥ राम·
२

CC-0. In Public Domain. Digitization by eGangotri

द्विपदिकेति। द्वित्वसंख्यायुक्तः पदार्थो वीप्स्यत इति वीप्सायां स्त्रीत्वैकत्वलक्षणयोर्लिङ्गसंख्ययोरनन्तर्भावात् प्राक्
तद्धितोत्पत्तेः समासे कृते पदत्वाभावाद् द्विर्वचनाभावः॥ ग्रामे ग्रामे शानीयमिति। वाक्यस्यापदत्वाद् द्विर्वचनाभावः। अ
र्थेति। सप्तपर्ण इत्यत्र संख्यायाः वीप्सा। अथ पर्णानाम्। अथ संख्याविशिष्टानां पर्णानाम्। तत्र यदि समुदायो वीप्स्यते तदा
समुदायस्याप्राप्तं द्विर्वचनं पदाधिकारेण निवर्त्यते। अथ त्ववयवार्थवीप्सा तदावयवस्याप्राप्तं द्विर्वचनमिति समासे विधा
नस्य निवृत्त्यर्थमित्यर्थः संपद्यते। एवं वाक्यतद्धितयोर्योज्यम्- यदि विज्ञायत इति। यदि समुदायो वीप्सायुक्त इति पक्षः। सिद्धं स

द्विपदिका। त्रिपदिका। माषशः। कार्षापणशः। वाक्यनिवृत्त्यर्थम्। ग्रामे ग्रामे पानीयम्। माषं माषं देहि इति।
अथ क्रियमाणेऽपि वै पदग्रहणे समासनिवृत्त्यर्थमिति कथमिदं विज्ञायते। समासस्य निवृत्त्यर्थं समास
निवृत्त्यर्थमाहोस्वित् समासे निवृत्त्यर्थं समासनिवृत्त्यर्थमिति। किं चातः। यदि विज्ञायते समासस्य निवृत्त्य
र्थं समासनिवृत्त्यर्थमिति। सिद्धं सप्तपर्णः सप्तपर्णौ सप्तपर्णा इति। सप्तपर्णाभ्यां सप्तपर्णेभ्य इत्यत्र प्राप्नोति
। अथ विज्ञायते समासे निवृत्त्यर्थं समासनिवृत्त्यर्थमिति। सप्तपर्णः सप्तपर्णौ सप्तपर्णा इत्यत्रापि प्राप्नोति
। तथा तद्धितनिवृत्त्यर्थमिति कथमिदं विज्ञायते तद्धितस्य निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति। आहोस्वित्तद्धि
ते निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति। किं चातः। यदि विज्ञायते तद्धितस्य निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति।
सिद्धं द्विपदिका इति। द्विपदिकाभ्यां त्रिपदिकाभ्याम्। माषशः। कार्षापणश इत्यत्र प्राप्नोति॥ अथ विज्ञायते
तद्धिते निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति। द्विपदिकाः त्रिपदिकाः इत्यत्रापि प्राप्नोति। तथा वाक्यनिवृत्त्यर्थमिति
कथमिदं विज्ञायते वाक्यस्य निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमिति। आहोस्विद्वाक्ये निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमि
ति। किं चातः। यदि विज्ञायते वाक्यस्य निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमिति॥

प्तपर्ण इति। विभक्तौ परतः समासस्यापदत्वात्। सप्तपर्णाभ्यामिति। स्वादिषु पूर्वस्य पदत्वाद् द्विर्वचनप्रसङ्गः। अथेति। यदावयवा
र्थवीप्सा तदा समासे प्रत्ययलक्षणेनावयवस्य पदत्वाद् द्विर्वचनप्रसङ्गः। उत्तरपदस्यातूत्तरपदत्वे चापदादिविधाविति प्रत्ययल
क्षणप्रतिषेधान्न पदत्वाभावः। सिद्धं द्विपदिका इति। हल्ङ्यादिलोपे तद्धितान्तस्य पदत्वाद् द्विपदिका इति बहुवचनान्तं पठितव्य
म्। द्विपदिकाभ्यामिति। एकादेशस्यान्तवद्भावात्तद्धितान्तं स्वादिष्विति पदं वा। माषश इति। प्रत्ययलक्षणेन सुबन्तं तद्धितान्तं च॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ कै॰ वाक्यं वीप्सायुक्तमिति। वाक्यार्थस्य वीप्सायोगाभावाद्वाक्ये ग्रहणं द्विर्वचननिमित्तोपलक्षणं तेन प्रपचति प्रपचतीति नित्य ८११
३ तायां वाक्यस्य द्विर्वचनं भवत्येव। अथेति। यदा ग्रामार्थस्य वीप्सा न तदा ग्रामे ग्रामे पानीयमिति भवति। यदा पानीयस्य त
दा ग्रामे पानीयं पानीयं स्वाद्विति भवति। तदेतदिति। अतिव्याप्तिर्न कथंचित्परिहर्त्तुं शक्यते। सगतिग्रहणं चेति। पदाधि
कारे क्रियमाणे सगतिग्रहणमधिकं कर्त्तव्यम्। भाष्यकारः पदाधिकारेण विनापि समासादिनि वृत्तिप्रतिपादनायाह। समा
सेनेति। सप्तपर्ण इति रूढिशब्दः परिगृहीतावयवार्थो विशेषो वृक्षविशेषे वर्त्तत इत्यर्थः। किंच भो इति। ननु न वचनाद्यर्थश
ब्दः प्रत्याययति किं तर्हि स्वसामर्थ्यात्। एवं मन्यते वाक्ये द्विर्वचनेन वीप्सा व्यज्यते सप्त सप्त पर्णान्यस्येति। एवं समासे पि

यदि वाक्यं वीप्सायुक्तं भवितव्यमेव तु द्विर्वचनेन॥ अथाप्यवयवः भवत्येव। तदेतत्क्रियमाणेऽपि पदग्रह
णे आलूनविशीर्णं भवति। किंचित्संगृहीतं किंचिदसंगृहीतं च। सगतिग्रहणं च कर्त्तव्यम्। प्रपचति प्रपच
ति प्रकरोति प्रकरोतीति। किं पुनः कारणं न सिध्यति। न हि सगतिकं पदं भवति। समासनिवृत्त्यर्थेन तावन्ना
र्थः पदग्रहणेन। समासेनोक्तत्वाद्वीप्सायाः द्विर्वचनं न भविष्यति। किंच भोः समासो वीप्सायामित्युच्यते
। न खलु वीप्सायामित्युच्यते। गम्यते तु सोऽर्थः। ततः किमुक्तः समासेनेति कृत्वा द्विर्वचनं न भविष्यति॥ य
त्र च समासेनानुक्ता वीप्सा भवति तत्र द्विर्वचनम्। तद्यथा एकैकविचिताः अन्योन्यसहाया इति। अथवा
यदत्र वीप्सायुक्तं नादः प्रयुज्यते। किं पुनस्तत् पर्वणि पर्वणि सप्त पर्णान्यस्य। पङ्क्तौ पङ्क्तौ अष्ट पदान्यस्येति॥ न हि
त निवृत्त्यर्थेन चापि नार्थः पदग्रहणेन॥

वीप्साप्रतिपादनाय द्विर्वचनस्य प्रसङ्गात् प्रतिषेधो विधेयो नित्यवीप्सयोरसमास इति। यथावस्थिते परे रसमास इति॥ न
स्त्विति। रूढिशब्दत्वादस्याक्षिप्तवीप्सोऽवयवार्थो यथा निरुद्धशा इत्यादावाक्षिप्तस्तु जर्थोन्ये हि वाक्यधर्मा अन्ये वृत्तिध
र्मास्ततः समासेनोक्तत्वादित्यस्यायमर्थः समासेनाभिव्यक्तत्वादिति। यत्र चेति। यो न रूढिशब्दः एकैकविचिता इति। राम
एकैकेन विचिताः अन्योन्यसहाया इति। अन्योन्यस्य सहाया इत्यर्थः। अत्र कर्मव्यतिहारो द्विर्वचनद्योत्यः। अथवेति। न
चाप्रयुज्यमानस्य द्विर्वचनसंभवः। गतार्थत्वाच्च पर्वादिशब्दस्याप्रयोगो रूढिशब्दत्वाच्च गतार्थत्वम्॥ ॥ ॥ ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्धितेनेति। तद्धितस्य स्वार्थिकत्वात् अभिव्यक्तिरेवोक्तिरवसेया। एकैकशब्द इति। केचिदाहुः ल्यार्थोप्येकशब्दोः स्तितस्य ॰
वीप्सायां द्विर्वचने बहुत्वार्थादिति शस्प्रत्ययोः न्ये त्वाहुरेकैकमेकैकस्मै ददातिकर्मसंप्रदानवीप्साद्वयप्रतिपादनाय
शसद्विर्वचने भवत इति। तदयुक्तम्। एकेन पदेन युगपत्कारकद्वयस्याभिधानाऽसंभवात्। पदद्विर्वचनेनोक्तत्वादिति
आधारवीप्साया धेयवीप्साया आक्षेपादाधेयवाचिपदद्विर्वचनाभावः। यत्र चेति। अडादिव्यवस्थार्थं धातूपसर्गयोः

तद्धितेनोक्तत्वात् वीप्सायां द्विर्वचनं भविष्यति। तद्धितः खल्वपि वीप्सायामित्युच्यते। यत्र तद्धितेनानुक्ता
वीप्सा भवति तत्र द्विर्वचनम्। तद्यथा। एकैकशो ददातीति। वाक्यनिवृत्त्यर्थे न चापि नार्थः पदग्रहणेन। प॰
दद्विर्वचनेनोक्तत्वात् वीप्सायां वाक्यद्विर्वचनं न भविष्यति। यत्र च पदद्विर्वचनेनानुक्ता वीप्सा भवति तत्र
द्विर्वचनम्। तद्यथा। प्रपचति प्रपचति प्रकरोति प्रकरोतीति। उत्तरार्थं तर्हि पदग्रहणं कर्त्तव्यम्। तस्य॰
परमाम्रेडितं मनुदात्तं चेति वक्ष्यते। तत्पदद्विर्वचने यथा स्यात्। वाक्यद्विर्वचने यथा स्यात्। वाक्यद्विर्वचने माभू
त्। महां ग्रहीष्यति महां ग्रहीष्यति मामभिव्याहरिष्यति मामभिव्याहरिष्यतीति। कथं चात्र द्विर्वचनम्। छान्द
सत्वात्। स्वरोपि तर्हि च्छान्दसत्वादेव न भविष्यति। उत्तरार्थमेव तर्हि पदग्रहणं कर्त्तव्यम्। पदस्य पदा॰
दिति वक्ष्यति तत्पदग्रहणं न कर्त्तव्यं भवति। सर्वग्रहणमपि तर्ह्युत्तरार्थमनुदात्तं सर्वमपादादाविति वक्ष्य
ति तत्सर्वग्रहणं न कर्त्तव्यं भवति। उभयं क्रियते तन्त्रे च॥

पृथक्कल्पनेपि परमार्थतः समुदायस्य क्रियाविशेषवाचित्वान्नित्यताप्रतिपादनाय पदसमुदायस्य द्विर्वचनमित्यर्थः
वीप्सायां त्र नित्यत्वं लक्ष्यते। महामिति। आबाधे चेति द्विर्वचनमित्याहुः। कथमिति। आबाधस्यासंप्रत्ययादर्थान्तर
स्य च द्विर्वचननिमित्तस्याभावात् द्विर्वचनाप्रसङ्गः। स्वरोपीति। अनुदात्तत्वाभावे प्रकृतिस्वरो भवति। उत्तरार्थ
मिति। सर्वस्येत्यपनीय पदस्येति क्रियमाणं मण्डूकप्लुतिन्यायेन द्विर्वचनप्रकरणमुल्लङ्घ्योत्तरत्रोपतिष्ठते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·के दुहार्थमेवेति॥ ननु सामीप्यादिसंबन्धप्रतीतिवारणमप्यन्यतरोपादानस्य प्रयोजनं कस्मान्न भवति॥ उच्यते। नित्यवी ८११
४ प्सयोरित्यर्थनिर्द्देशे न शब्दस्याक्षेपान्नित्यवीप्सयोर्यो वर्त्तते शब्दस्तस्य द्वे भवत इति प्रक्रियावाक्यस्योपप्लवनाद्धि शिष्ट
षष्ठ्यर्थावगमात्सामीप्यादिसंबन्धप्रतीत्यभावः सिद्धः। पक्षद्वयस्य भवे तु षष्ठीनिर्द्देशेन षष्ठी स्थानेयोगेति परिभा
षोपस्थानात् द्विः प्रयोगो निवर्त्तते। द्वे इत्येतावत्युच्यमाने संख्येयमुच्चारणं यद्यपेक्षते शब्दस्य द्वे उच्चारणे भवत इ
ति। तदा शब्दस्य क्रियायाश्च स्थान्यादेशभावायोगात् द्विःप्रयोगो द्विर्वचनमिति पक्षः। यदा तु शब्दरूपं संख्येयं
तदा द्वे शब्दरूपे एकस्य प्रसङ्गे भवत इति स्थाने द्विर्वचनं विज्ञायेत। अथैकाचो द्वे प्रथमस्येत्यत्र षष्ठीनिर्द्देशात् स्थाने
द्विर्वचनं कस्मान्न भवति। अभ्यासाच्चेत्यनेनाभ्यासादुत्तरस्य हन्तिहकारस्य कुत्वविधानाल्लिङ्गात्॥ न हि स्थाने द्वि
र्वचनेऽभ्यासादुत्तरो हन्तिः संभवति। शब्दान्तरत्वादादेशस्य स्थानिवद्भावादपि समुदायो हन्तिग्रहणेन गृह्यते न तु त

इहार्थमेव तर्हि षष्ठीनिर्द्देशार्थमन्यतरत् कर्त्तव्यम्। षष्ठीनिर्दिष्टस्य स्थाने द्विर्वचनं यथा स्यात्। द्विःप्र
योगो मा भूदिति। किं च स्यात्। आम् पचसि पचसि देवदत्ता२ आम एव कान्तरमामन्त्रितमनन्तिक इत्ये
कान्तरता न स्यात्। इह च पौनःपुन्यं पौनःपुनिक इति अप्रातिपदिकत्वात्तद्धितोत्पत्तिर्न स्यात्॥ ॥ ॥

द्वयवयवः एकान्तरतेति। आवृत्तिभेदनिबन्धनया द्वित्वसंख्यया स्वाश्रयस्यैकत्वस्य निवर्त्तनात्। तथा चोक्तम्। एकाज
नेकाज्ग्रहणेषु चावृत्तिसंख्यानादिति। ऋषिसहस्रमेकां कपिलां दत्वा सर्वे ते सहस्रदक्षिणाः संपन्नास्तत एकदक्षि
णा आनीयन्तामित्युक्ते सहस्रदक्षिणास्त्वान्नत आनीयन्ते। तत्र आम् शब्दो निपातत्वादाद्युदात्तः एकस्य पचसि श
ब्दस्य तिङ्ङतिङ इति निघातो द्वितीयस्यानुदात्तं चेति· आमन्त्रितस्य पदात्परस्य निघाते प्राप्ते मतिषिद्धे आम एकान्त
रेत्यनेन आमन्त्रितस्य चेत्याद्युदात्तत्वम्। प्लुतस्याप्युदात्तत्वम्। अथ स्थाने द्विर्वचने कथमेकान्तरता यावतैकस्य ऽऽ राम
स्थाने द्वौ शब्दावादेशौ विधीयेते। उच्यते। एकपदादेशत्वात् स्थानिवद्भावादेकपदत्वम्। पौनःपुन्यमिति। पुनःपुनर्भवि
तरि वर्त्तमानात् पुनःशब्दाङ्गवे प्रत्ययो यथा नानात्वमिति नानाभूतवृत्तेर्नानाशब्दात्। पौनःपुनिक इति। पुनःपुन ५
र्भव इति कालाठ्ठञ्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रद्विष्प्रयोगेपदस्यविज्ञायमानेऽभ्यस्यमानार्थवाचित्वादर्थवत्त्वेऽप्यर्थवतः समुदायस्यसमासग्रहणान्नियमा-
र्थाद्प्रातिपदिकत्वम्। स्यादेतदनुत्पन्न एवसुपिपुनः शब्दस्यनित्यतायुक्तक्रियाप्रधानस्याव्ययस्यद्विष्प्रयोगोवि-
धास्यतेततोऽसुबन्तसमुदायत्वादव्यावृत्तंप्रातिपदिकत्वंयथैकशेषेसरूपप्रातिपदिकसमुदायस्य। तच्चन। द्विर्व-
चनस्यनित्यत्वाद्यर्थापेक्षत्वाद्बहिरङ्गत्वात्कृदुत्पत्तेरव्ययार्थमात्रापेक्षयाअन्तरङ्गत्वात्स्थानेद्विर्वचनेतुस्यानिव-
द्भावात्प्रातिपदिकत्वम्॥ ननुस्थान्येवसुबन्तत्वादप्रातिपदिकम्। नैतदस्ति। लुप्तसुकिसस्यप्रत्ययान्तत्वात्। नचप्र-
त्ययलक्षणेनाप्रत्ययइतिप्रातिपदिकसंज्ञानिषेधोनङिसम्बुद्ध्योरितिनलोपनिषेधाल्लिङ्गादन्यथाप्रातिपदिकत्वा-
भावान्नलोपस्यप्राप्त्यभावान्निषेधोनकर्त्तव्यःस्यात्। राजाराजेति। पदस्यस्थानेसमुदायआदेशत्वात्पदंनतद-

यदितर्हिस्थानेद्विर्वचनम्। राजाराजा। वाक् वाक्। पदस्येतिनलोपादीनिनसिध्यन्ति॥ इदमिह-
संप्रधार्यंद्विर्वचनं क्रियतांनलोपादीनीति। किमत्रकर्त्तव्यम्। परत्वान्नलोपादीनि। पूर्वत्रासिद्धे
नलोपादीनि। सिद्धासिद्धयोश्चनास्तिसंप्रधारणा। एवंतर्हिपूर्वत्रासिद्धीयमद्विर्वचनइतिवक्ष्यामि
। तच्चावश्यंवक्तव्यम्। किंप्रयोजनम्। विभाषिताःप्रयोजयन्ति॥ द्रोग्धाद्रोग्धा। द्रोढाद्रोढेति। इहतर्हि।
बिसंबिसम्। मुसलंमुसलम्। आदेशप्रत्यययोरितिषत्वंप्राप्नोति। आदेशोयःसकारःप्रत्ययोयःस-
कारइत्येवमेतद्विज्ञायते। इहतर्हिनृभिर्नृभिः। रषाभ्यांनोणःसमानपदइतिणत्वंप्राप्नोति॥ ॥ ॥

वयवइतिपूर्वस्यनलोपाद्यसिद्धिः। अन्तरङ्गबहिरङ्गानपेक्षेचचोद्यसमाधाने। नलोपादीनिहिपदत्वमात्रनिबन्ध-
नत्वादन्तरङ्गाणिद्विर्वचनंतुवीप्साद्यपेक्षत्वाद्बहिरङ्गमेवंविभाषिताअपिविधयोऽन्तरङ्गाः। विभाषिताइति। न
नुनह्येकस्यामाकृतेश्चरितःप्रयोगइतिन्यायाद्यदापूर्वस्यघत्वादितदापरस्यापिलाघवाद्भविष्यति। एवंमन्यते-
धात्वाकृतिःप्रत्ययाकृतिश्चैवैवप्रकान्तार्थभेदाशङ्कापिनास्ति। यथागवांस्वाम्यश्वेषुचेति। नित्यत्वविरोधिनीचवि-
भाषाशक्याचात्रयुगपदेकत्रप्रयोगेसाविधातुमितितस्याःप्रसङ्गःएतन्न्यायानपेक्षयावैतदुच्यते। आदेशइति।
सकारस्यादेशस्यषत्वंनत्वादेशावयवस्य। प्रत्ययोयःसकारइति। आदेशात्तुरोधेनैतदुक्तंप्रत्ययावयवस्यतुसकारस्य
षत्वंव्यवस्थापयिष्यते। नृभिर्नृभिरिति। स्थानिवत्त्वात्समुदायस्यैकपदत्वाण्णत्वप्रसङ्गः॥ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानमेवेति। यत्रनिमित्तनिमित्तिनोरवियोगस्तत्रणत्वमिहतु वीप्साभावेद्विर्वचनाभावान्नुमिरिति रेफं पूर्वमन्तरेणापि
नकारस्य प्रयोगात्सर्वदासमानपदस्थत्वाभावः। अथवास्यानिवङ्गावादेकपदत्वंतत्त्वतस्तु पदद्वयात्मकआदेशः स
मानग्रहणमिति। रषाभ्यांनोणः पद इत्येव वक्तव्यं तत्रापदस्थयोर्निमित्तनिमित्तिनोरसम्भवाद्गुणेसंख्यायाविवक्षित
त्वान्नैकपदस्थत्वेसिद्धेसमानग्रहणंनियमार्थमाश्रीयत इत्यत्रणत्वं नभवति। यस्मात्सुप्तिङ्विधिरिति। अर्थस्वरूपसा
मान्यात्सएवपचशब्दः सएवचतिङितियः पूर्वस्मात्तिङ्विहितः सपरस्मादपियः परस्मात्सपूर्वस्मादपि तदादिग्रह
णं चानुवर्तते। तेनपचसिपचसीतिसमुदायः यच्छब्दादिः पदसंज्ञ इतिसिद्धमेकान्तरत्वम्। ननु चेति। ततो नैकप

समानपद इत्युच्यते।। समानमेव यन्नित्यम्। नचैतन्नित्यं समानमेव। किंवक्तव्यमेतत्। नहि। कथमनु
च्यमानंगंस्यते। समानग्रहणसामर्थ्यात्। यो समानेपदेद्विपत्समानेचतत्रस्यात्समानग्रहणमनर्थकंस्यात्।।
अथवापुनरस्तुद्विः प्रयोगोद्विर्वचनम्। ननु चोक्तं माभूत्पचसिपचसिदेवदत्ता३ आमएकान्तरमामन्त्रितमनं
न्तिकइत्येकान्तरतानप्राप्नोतीति। नैषदोषः। सुप्तिङ्भ्यां पदं विशेषयिष्यामः सुप्तिङन्तपदं यस्मा॰
त्सुप्तिङ्विधिस्तदादिसुप्तिङन्तंचपदम्।। ननु चैकैकस्मादेवान्तसुप्तिङ्विधिः। समुदायेयावाक्य
परिसमाप्तिस्तयापदसंज्ञा। कुतएतत्। शास्त्राहानेः।। एवंहिशास्त्रमहीनंभवति। यदप्युच्यते इहपौनः
पुन्यं पौनपुनिक इति अप्रातिपदिकत्वात्तद्धितोत्पत्तिर्नप्राप्नोति। माभूदेवं समर्थादित्येवं भविष्यति।। ।।

दम्। समुदाय इति। यथासमुदायस्यावयवानांचैकाचूत्वेतुल्येसमुदायस्यैवद्विर्वचनंभवतिनावयवानांपपाचेति तथेहा
पिपदसंज्ञा। एवंहिशास्त्रमिति। प्रत्यवयवंतुपदसंज्ञायांपदसमुदायस्यत्यागात्तद्विषयंशास्त्रं हीनंस्यात्। तदादिग्रहणा राम·
नुवृत्तिश्चानर्थिकास्यात्। माभूदेवं समर्थादिति। तद्धितोत्पत्तौहितंविभक्त्यन्ताद्योत्पत्तिः तदवयवात्प्रातिपदिकाद्वेतित
त्रविभक्त्यन्तादुत्पत्तिरिति पक्षआश्रीयते समुदायश्च पूर्वोक्तेनन्यायेनविभक्त्यन्त इतितत्रस्तद्धितोत्पत्तिरविरुद्धा।। ९ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति। यद्यपि प्रातिपदिकात्तद्धितोत्पत्तिस्तथाप्यप्रातिपदिकादपि हि रुक्ताज्ज्ञापकात् तद्धितोत्पत्तिः। कुतः कुत आगत इति कस्कादिषु पाठान्निपातनाद्व्ययलक्षणस्त्वभावे अण् प्रत्ययः॥ नित्यवीप्सा। इहेति। यदानाश्रितप्रवृत्तिनिमित्तविशेषो नित्यशब्दः परिगृह्यतेऽङ्गीकृतसामान्यप्रवृत्तिनिमित्तो वा तदात्रापि प्राप्नोति। निमित्तविशेषाङ्गीकरणे त्वाभीक्ष्ण्यमङ्गीकृतं न तु कूटस्थत्वमिति विशेषप्रमाणाभाव इति मत्वा प्रश्नः। अथवानित्यशब्दस्य कूटस्थत्वलक्षणो मुख्योऽर्थः शब्दान्तरसंनिध्यनपेक्षणादाभीक्ष्ण्यं तु क्रियापदप्रयोगसमधिगम्यं गौणोऽर्थः। विच्छेदोपलब्धिसामान्य॰ माश्रित्य तत्र प्रयोगात्। न तस्य गौणमुख्ययोर्मुख्ये संप्रत्यय इति कूटस्थवाचिना मे द्विर्वचनेन भाव्यम्॥ येषां च प्रयो

अथवाचार्यप्रवृत्तिर्ज्ञापयति। भवत्येवंजातीयकेभ्यस्तद्धितोत्पत्तिरिति। यदयं कस्कादिषु कौतस्कुतशब्दं पठति॥ नित्यवीप्सयोः॥ इह कस्मान्न भवति॥ हिमवान्। वाडवः। पारियात्रः। समुद्र इति। नि॰ त्येह भवत इति प्राप्नोति। नैष दोषः। अयं नित्यशब्दोऽस्त्येव कूटस्थेष्वविचालिषु वर्त्तते। तद्यथा। नि॰ त्या पृथिवी। नित्यमाकाशमिति॥ अस्त्याभीक्ष्ण्ये वर्त्तते॥

कृभिरुत्पादविनाशौ नोपलभ्येते तेन नित्यास्तत्रानित्यशब्दस्य तत्पर्यायाणां च नित्यं कौटिल्ये गतौ ध्रुवमपाय इत्यादिनिपातनाच्छब्दो द्विर्वचनाभावः प्रतिपत्तुमिति विशेषानुपन्यस्यति। हिमवानिति। कूटस्थेष्वविचालिष्विति। उभयोपादानं नित्यार्थाभिव्यक्त्यर्थं कूटस्थेष्वित्येतावत्युच्यमाने राशेरपि नित्यत्वं प्रतीयेत यस्माद्व्ययो न क्रियते। तथा चोच्यते। कूटस्थं राशिं कुरु नास्माद्व्ययः कर्त्तव्य इति। एवमविचालिष्वित्युच्यमाने यदा क्रियारहितं द्रव्यं भवति तदा तस्य नित्यत्वप्रसङ्गः। उभयोपादाने तु येऽर्था उत्पादविनाशरहितास्ते नित्या इत्युक्तं भवति। नित्या पृथिवीति। अवयवानां विचालित्वेऽप्यवयविस्वभावा पृथिवी स्वरूपान्न चलतीति नित्योच्यते॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· तदिति। आभीक्ष्ण्यवचन एवात्र नित्यशब्दो गृह्यते न कूटस्थवचनः। कूटस्थग्रहणे हि तद्वाचिनां सुबन्तानां स्वार्थ एव द्विर्वच ८११
६ नं स्यात्। न चैवं लोके प्रयोगोऽस्ति प्रयुक्तानां चेदमन्वाख्यानं हिमवान् हिमवानित्युक्ते वीप्सा प्रतीयते न तु स्वार्थः। सुबन्ता
नां मेव च नित्यवीप्सालक्षणद्विर्वचनविधाने न तिङन्तानि नानुगृहीतानि स्युः। आभीक्ष्ण्यलक्षणे तु नित्यत्वे गृह्यमा
णे तल्लक्षणं द्विर्वचनं तिङन्तानां वीप्सालक्षणं तु सुबन्तानामिति उभयानुग्रहः कृतो भवति। गौणोऽपि चार्थो लक्ष्यद
र्शनवशादिहाश्रीयते यथा शीतोष्णाभ्यां कारिणि पार्श्वेनाभिच्छ्रुतीत्यादौ। यद्याभीक्ष्ण्ये द्विर्वचनं विधीयते किमर
र्थं वार्तिककारः क्रियासमभिहारे द्वे भवत इति वक्तव्यमाभीक्ष्ण्ये द्वे भवत इति वक्तव्यमिति वक्ष्यति। क्रियासमभिहा
रे द्विर्वचनं विधीयमानं यथा लोडन्तस्य भवति लुनीहि लुनीहीत्येवायं लुनातीति। तथा पापच्यत इत्यादौ यङन्तस्य
कस्मान्न भवति। उच्यते। लोण्णमुलावाभीक्ष्ण्ये विषये विहिताविति ताभ्यामेव तस्य द्योतितत्वादशक्तं द्विर्वचनम्

तद्यथा। नित्यप्रहसितो नित्यप्रजल्पित इति। तद्य आभीक्ष्ण्ये वर्त्तते तस्येदं ग्रहणम्।

तातिङ्विधानम्। प्रत्ययद्विर्वचनाभ्यां सहिताभ्यामाभीक्ष्ण्यं द्योत्यत इति वार्तिककारः प्रदर्शयति। क्रियासमभिहारस्य द्विवि
धो भृशार्थः पौनःपुन्यं च। तत्र भृशार्थे द्विर्वचनस्याप्रसङ्ग एवाभीक्ष्ण्यमपि लोटाभिव्यक्तमिति तत्रापि तत्प्राप्नो
तीति विधीयते। तत्र यङः क्रियासमभिहारव्यभिचाराभावाद्यङैव स्वार्थिकेन क्रियासमभिहारद्योतनाद्यङन्तस्य
न भवति। यदा तु भृशार्थे यङ् तदा पौनःपुन्यप्रतिपिपादयिषायां द्विर्वचनं भवत्येव। पापच्यते पापच्यत इति। लोडपि भवति
पापच्यस्व पापच्यस्वेति। लोडन्तु विषयान्तरेऽपि विधानात् व्यभिचरति क्रियासमभिहारमिति। द्विर्वचनसहित एव तं द्योतयतीति
तदन्तस्यैव क्रियासमभिहारलक्षणद्विर्वचनप्रवृत्तिः। अथ नित्यतायां द्विर्वचनं विधीयमानं धातुमात्रस्य कस्मा राम·
न्न भवति धातुर्हि क्रियावाची क्रियाधर्मश्चाभीक्ष्ण्यम्। नैतदस्ति॥ गृहीतसाधना क्रिया व्यवहारोपयोगिनी तिङ
न्तस्यैव भवति। न च धातुमात्रद्विर्वचने नित्यत्वं द्योत्यत इति धातुमात्रस्य द्विर्वचनाभावः॥ ॥ ॥ ॥ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आप्नोतेरिति व्युत्पत्तिप्रदर्शनेन क्रियाविशेषे योगरूढिर्वीप्साशब्द इति दर्शयति। इतरो रूढत्वमबुध्वाह। यद्येवमिति। करोत्यादिक्रियाभिः कटादीनां याप्तुमिच्छा न तु चित्ता चिकीर्षतीत्यादेर्द्विर्वचनप्रसङ्गः। रूढत्वाश्रयेणाह। नैष दोष इति। चिकीर्षति चिकीर्षतीति द्विर्वचने आभीक्ष्ण्यमेव प्रतीयते न तु स्वार्थमात्रम्। नाभिधेयावीप्सा गृह्यते वीप्सा वा चिनो द्वे भवत इति। किं तर्हि प्रयोक्तृधर्मो यथा आबाधो गतगत इति ह्युक्ते प्रियस्य चिरगमने न पीडितो वा वाक्यं प्रयुङ्क्त इति प्रतिपत्तिः। वीप्सश्चेत्कर्तेति॥ अत्र प्रयोक्ता कर्ता विवक्षितः। यदा पृथक्संख्यया यु

अथ किमिदं वीप्सेति॥ आप्नोतेरयं विपूर्वात् इच्छायामर्थे सन् विधीयते। यद्येवं चिकीर्षति जिहीर्षतीत्यत्रापि प्राप्नोति। नैष दोषः॥ नैवं विज्ञायते वीप्सायामभिधेयायामिति। कथं तर्हि कर्तृविशेषणमेतत्। वीप्सतीति वीप्सः वीप्सश्चेत्कर्त्ता भवतीति। कः पुनर्वीप्सार्थः॥ अनवयवाभिधानं वीप्सार्थः॥ अनवयवेन द्रव्याणामभिधानमेव वीप्सार्थः॥ अनवयवाभिधानं वीप्सार्थ इति चेज्जात्याख्यायां द्विर्वचनप्रसङ्गः॥ अनवयवाभिधानं वीप्सार्थ इति चेज्जात्याख्यायां द्विर्वचनं प्राप्नोति। व्रीहिर्यव इति॥ ॥

क्तानितरेतरयोगमप्राप्तान्सर्वानर्थान्क्रियया गुणेन वा युगपद्व्याप्नुवन्वाक्यं वक्ति तदा स वक्तृस्थ इच्छाविशेषो द्विर्वचनेन द्योत्यते। कः पुनर्वीप्सार्थ इति। अर्थः प्रयोजनमेवंभूताया वीप्साया उपादाने किं प्रयोजनमिति प्रश्नः॥ अनवयवाभिधानमिति। साकल्येन द्रव्याणां क्रियागुणसम्बन्धप्रतिपादनं वीप्साफलमित्यर्थः। जात्याख्यायामिति। जातौ पदार्थे साकल्येन द्रव्याणां प्रतिपत्तिर्भवति। यथा ब्राह्मणो न हन्तव्य इति सर्वब्राह्मणहननप्रतिषेधः प्रतीयते॥

CC-0. In Public Domain. Digitization by eGangotri

नवैकार्थत्वादिति। यदिव्यक्तिव्यतिरिक्ता जातिरथन्त्यकभेदहेतवोव्यक्तय एव जातिरुभयथा भेदाभावाज्जातिल
क्षण एकोऽर्थः तत्र यथा स्थानयनेचोदिते चोदितमपि पात्रंनान्तरीयकत्वादस्थानयनस्योपादीयते तथा जातौ चोदि
तायां द्रव्यक्रियाद्यभावे नप्रतीयते तत्तानवयवाभिधानस्य भेदविषयत्वाज्जात्यभिधानेतदभावाद्विर्वचनाभावः ए
कशेषेऽप्यस्मिन्वनेशोभनावृक्षा इति कतिपयानामपि वृक्षाणां शोभनत्वेन प्रयोगदर्शनात् अनवयवाभिधानाभावात्
द्विर्वचनाभावः। ग्रामोग्रामो रमणीय इति तूक्तेनिःशेषग्रामगतरमणीयत्वप्रतीतिः। तस्मिन्नस्मिन्वने वृक्षो वृक्षः शो
भन इत्युक्ते सर्वेषामेव वृक्षाणां प्रत्येकं संनिवेशानिरपेक्षदर्शनीयत्वयोगप्रतीतिः। सर्वे वृक्षाः शोभनाः इत्यत्र तु स
र्वनाम्नावीप्साया द्योतनात् द्विर्वचनाभावः। इह तु सर्वेमाषाब्राह्मणेभ्योदत्ता इति यद्यपिकस्मैचित्रयोदत्ताः कस्मै

नवैकार्थत्वाज्जातेः। नवा एषदोषः। किंकारणम्। एकार्थत्वाज्जातेः। एकार्था हि जातिः। एकमर्थं प्रत्या
ययिष्यामीति जातिशब्दः प्रयुज्यते। अनेकार्थाश्रयत्वाच्च वीप्सायाः। अनेकार्थाश्रया च पुनर्वीप्सा। अने
कार्थसंप्रत्याययिष्यामीति। वीप्सा प्रयुज्यते॥ एकार्थत्वाज्जातेरनेकार्थाश्रयत्वाच्च वीप्सायाः जात्याख्या
यां द्विर्वचनं न भविष्यति। निवर्तकत्वाद्वा॥ अथवा नानेन द्विर्वचनं निर्वर्त्यते किं तर्हि अद्विर्वचनमनेन निवर्त्य
ते। यावन्तस्तेऽर्थास्तावतां शब्दानां प्रयोगः प्राप्नोति॥ तत्रानेन निवृत्तिः क्रियते। नित्यवीप्सयोरर्थयोर्द्वे एव शब्द॰
रूपे प्रयोक्तव्ये॥

चित्पञ्च तथापि प्रयोगाद्वीप्साभावो यदात्वेकैकोदत्तस्तदावीप्सासंभवान्माषो माषो दत्त इति द्विर्वचनं भवति। वृत्तिकारै
रप्युक्तम्। नानावाचिनामधिकरणानां क्रियागुणाभ्यां युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्सेति। नानाभूतमर्थं द्रव्यलक्षणं
ये शब्दा ब्रुवन्ति तेषां यान्यधिकरणान्यभिधेयानि तेषां सहाविवक्षितानां पृथक्संख्यायुक्तानां प्रत्येकं क्रियागुणयुक्तानां प्र
योक्तुः क्रियया गुणेन वा युगपदेककालाव्याप्तुमिच्छा सा वीप्सा। तत्र नानावाचिशब्देन जातिशब्दनिरासः। युगपद्ग्रहणेन
क्रमविवक्षायां द्विर्वचननिरासो यथाऽस्मिन्वनेऽयं वृक्षः शोभनोऽयं वृक्षः शोभन इति क्रमेण शोभनत्वप्रतिपादने बहूनपि श राम
ब्दान् प्रयुङ्क्ते। वीप्सा प्रयुज्यत इति। वीप्साविषयत्वाद्द्विर्वचनं वीप्साशब्देनोच्यते। निवर्तकत्वाद्वेति। नेदं द्विर्वचनस्य विधायक
मिति जातिशब्दानां द्विर्वचनाभावः। द्रव्यशब्दानां तु यावदर्थं प्रयोगे प्राप्ते द्वयोरेव प्रयोग इति नियमः क्रियते॥ ॥ ॥ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नातिबह्विति। बहुशब्दस्य वैपुल्यार्थत्वाद्बहुवचनाभावः। सर्वपदेति। यदा निवर्त्तकमिदं तदा सर्वादिग्रहणं न कर्त्तव्यमित्य
र्थः॥ येषां हि बहूनां प्रयोगः प्राप्तः तेषां हि द्विर्वचनेनासौ निवर्त्तते न चावयवस्यापदस्य गतिसन्निधावगतेर्वा आवृत्तिप्रस
ङ्गः। अथ परेर्वर्जने इत्यादिषु विधायकेषु कथमवयवद्विर्वचनाभावः। उच्यते। परेर्हि भवत इत्युक्ते समुदायसन्निधौ
हि शब्दः श्रुतः प्रत्यासत्त्या समुदायमेव संख्येयं प्रतिपादयतीति सर्वादेशः सिद्ध इति नार्थः सर्वग्रहणेन॥ किं पुनरिति।
अनवयवाभिधानं वीप्सार्थ इति यदुक्तं तन्नोपपद्यत इति मत्वा प्रश्नः। ग्रामो ग्राम इत्येकवचनं श्रूयते अर्थास्तु बहव
स्तत्र किंकृतं प्रामाण्यादेकत्वावसायोऽथार्थवशाद्वीप्साविषयस्य शब्दस्य बह्वर्थत्वं यथैकशेषशब्दस्य ह्यर्थत्वं

नातिबहु प्रयोक्तव्यमिति॥ सर्वपदगतिग्रहणानर्थक्यं चार्थाभिधाने द्विर्वचनविधानात्। सर्वग्रहणं
चानर्थकम्। किं कारणम्। सर्वस्यैव हि द्विर्वचनेनार्थोऽवगम्यते नावयवस्य॥ पदग्रहणं चानर्थकम्।
पदस्यैव हि द्विर्वचनेनार्थोऽवगम्यते नापदस्य॥ सगतिग्रहणं चानर्थकम्॥ सगतिकस्यैव हि द्विर्वचनेना
र्थोऽवगम्यते नागतिकस्य। किं पुनरिदं वीप्सायां सर्वमभिधीयते। आहोस्विदेकम्॥ कश्चात्र विशेषः। वी
प्सायां सर्वाभिधाने वचनाप्रसिद्धिः वीप्सायां सर्वाभिधाने वचनं न सिध्यति। ग्रामो ग्रामः। जनपदो जनप
द इति। बहवस्तेऽर्थास्तत्र बहुषु बहुवचनमिति बहुवचनं प्राप्नोति। अस्तु तर्ह्येकम्। एकाभिधाने सर्वद्र
व्यगतिः। एकाभिधाने सर्वद्रव्यगतिर्न सिध्यति॥ अस्तु तर्हि सर्वाभिधानम्। ननु चोक्तं वीप्सायां सर्वाभिधा
ने वचनाप्रसिद्धिरिति। न वा पदार्थत्वात्। न वा एष दोषः। किं कारणम्। पदार्थत्वात्॥

बह्वर्थत्वं वा। कश्चात्र विशेष इति। परिगृहीतैकत्वानां बहूनामर्थानां वीप्सायामभिधानात्सर्वाभिधान एकाभिधाने वा ना
स्ति विशेष इति भावः। वीप्सायामिति। सर्वं चेद्ग्रामशब्देनोच्यन्ते तदैकत्वविरोधि बहुत्वसंख्योपजननादेकवचनमि
ष्टं न सिध्यति। एकाभिधाने सर्वद्रव्यगतिरिति। यद्येकाभिधानमभ्युपगम्यते तदा सर्वद्रव्यगतिर्न प्राप्नोति॥ अस्तु त
र्हीति। परिगृहीतैकत्वस्य सर्वस्याभिधानमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पदस्यार्थइति। निर्ज्ञातसंख्यस्यार्थस्य वीप्सायोग इत्यर्थः। उत्तरकालं तु सत्यपि बहुत्वे प्रातिपदिकत्वाभावाद्बहुवचनाभावो यथा पश्य मृगो धावतीति दर्शनक्रियापेक्षे सत्यपि कर्मत्वे द्वितीयाभावः। न चैतदिति। सुबन्तत्वादप्रत्यय इति प्रतिषेधात्। एतदपीति। नङिसंबुद्ध्योरिति तु नलोपविषयमेव ज्ञापकं मन्यते॥ अपर आहेति। पूर्वमप्रातिपदिकत्वाद्बहुवचनाभाव उक्त इदानीमन्यथोच्यते संख्यान्तरेणानाविष्टस्य यत्तु बहुत्वं तस्य वाचकं द्योतकं वा बहुवचनमुत्पद्यते वीप्सायां तु परिगृहीतैकत्वानामर्थानां बहुत्वोपजनादन्तरङ्गत्वादेकवचनमुत्पन्नमिति स्वादिशास्त्रस्य कृतार्थत्वात्तु न पुनः प्रवृत्तिः॥ न तोन चेत प्रातिपदिकमित्यस्यायमर्थः। संख्यान्तरानाविष्टं प्रातिपदिकमत्र नास्तीति। यत्तर्हीति। अर्थाभावात्त्वभावतो निवृत्तस्य प्र

पदस्यार्थो वीप्सा सुबन्तं च पदं ङ्याप्प्रातिपदिकाच्चैकादिष्वर्थेषु स्वादयो विधीयन्ते॥ न चैतत्प्रातिपदिकम्। यत्तर्हि प्रातिपदिकम्। दृषद् दृषत्समित्समिदिति॥ एतदपि प्रत्ययलक्षणेन सुबन्तम्। न च प्रातिपदिकम्। अपर आह। न वा पदार्थत्वात्॥ न वा एष दोषः। किं कारणम्। पदार्थत्वात्। पदस्यार्थो वीप्सा॥ सुबन्तं च पदम्। ङ्याप्प्रातिपदिकाच्चैकत्वादिष्वर्थेषु स्वादयो विधीयन्ते॥ न चैतत्प्रातिपदिकम्॥ यत्तर्हि प्रातिपदिकम्। दृषद् दृषत् समित्समिदिति॥ एतदपि प्रत्ययलक्षणेन सुबन्तं न प्रातिपदिकम्॥ अथेह कथं भवितव्यम्। पचति पचतितरां निष्ठति। आहोस्वित् पचतितरां पचतितरां तिष्ठतीति॥ पचति पचतितरां तिष्ठतीति भवितव्यम्॥ कथम्। द्विर्वचनं क्रियतामातिशायिक इति। द्विर्वचनं भविष्यति विप्रतिषेधेन। इहापि तर्ह्यातिशायिकाद्द्विर्वचनं स्यात्॥ आढ्यतरमाढ्यतरमानयेति॥ अस्त्यत्र विशेषः। अन्तरङ्ग आतिशायिकः। कान्तरङ्गता। ङ्याप्प्रातिपदिकादातिशायिकः। पदस्य द्विर्वचनम्। आतिशायिकोपि नान्तरङ्गः॥ कथम्। समर्थात्तद्धितोऽसावुत्पद्यते सामर्थ्यं च सुबन्तेन॥

त्ययस्य लोपविधानद्वारेणानुत्पत्तिरेव प्रत्ययलक्षणया अन्वाख्यायत इत्येकत्वानाविष्टमेतत्प्रातिपदिकमिति भावः। एतदपीति। प्रत्ययो लक्षणं यस्य तत्प्रत्ययलक्षणं यामेकत्वं तेन सुबन्तमेतदेकत्वाविष्टमर्थं प्रतिपादयति निवृत्तो हि प्रत्यये प्रकृतिरेवैकत्वयुक्तमर्थं प्रतिपादयति। यथा राजा तक्षेति नास्त्येकत्वस्याप्रतीतिः। एकैकमित्यत्र सत्यपि बहुव्रीहिवद्भावात्प्रातिपदिकत्वे परिगृहीतैकत्वस्यार्थस्य वीप्सायोगादन्तरङ्गत्वादेकवचनं भवति· बहुत्वप्रतीतेस्तु बहिरङ्गत्वाद्बहुवचनाभावः। एतस्यैवार्थस्यैकैकस्य प्राचामिति निर्देशो लिङ्गम्। अथेहेति। विनापि चशब्देन पाकस्थानयोरत्र समुच्चय इति केचिदाहुः। । राम· ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्येतु तिष्ठतीति शत्रन्तमाहुः तिष्ठति देवदत्ते यज्ञदत्तः पक्वान्तरापेक्षया पचतितरामित्यर्थः। नित्यवीप्सयोश्चातिशयश्चेति। यद्य
प्येते त्रयोऽर्थाः तथापि प्रयोगभेदाश्रयेणैतदुक्तं तिङन्तेषु नित्यतातिशयौ द्वावर्थौ सुबन्तेषु वीप्सातिशयौ॥ नचैकस्येति। य
द्यपि वृक्षादृत्यादौ युगपदनेकार्थाभिधानमस्ति तथापि प्रकृतार्थापेक्षयैतदुच्यते। नित्यतातिशययोर्वीप्सातिशययोश्च
निमित्तभेदाद्युगपदभिधानासंभवः। प्रयोक्तृरर्थधीनमिति। नन्वध्युत्तरपदात्खविधानात्कथं केवलस्याधीनशब्दस्य प्रयो
गः। अवृत्तिजाः वृत्तिजसदृशा अधीनादय इत्यदोषः। इनशब्देन वाधिशब्दस्याव्ययीभावः पराधीनताप्रतिपादनपरः॥ क्व
चित्काचिदिति। क्रियाप्रकर्षः प्रतियोग्यपेक्षो बहिरङ्ग इति अन्तरङ्गं पौनःपुन्यं पूर्वं विवक्ष्यते। इद्धत्वाढ्यतरमाढ्यतर
मानयेति प्रकर्षयुक्ता एवाढ्या आनयनक्रियायामुपयुज्यन्त इति लब्धप्रकर्षा एव वीप्स्यन्ते। किंच। कृतद्विर्वचनात्तरपि

अथवा स्पर्द्धायामातिशायिको विधीयते। नचान्तरेण प्रतियोगिनं स्पर्धा गम्यते। एवं तर्हि द्वावर्थौ वक्तव्यौ
नित्यवीप्से चातिशयश्च। नचैकस्य प्रयोक्तुरनेकमर्थं युगपद्वक्तुं संभवोऽस्ति। तदेतत्प्रयोक्तुरर्थधीनं भवति ए
तस्मिंश्चापि प्रयोक्तुरर्थधीने क्वचित्काचित्प्रसृततरा गतिर्भवति। इह तावत् पचतिपचतितरां तिष्ठतीत्येषा प्र
सृततरा गतिर्यन्नित्यमुक्त्वातिशय उच्यते॥ इहेदानीमाढ्यतरमाढ्यतरमानयेत्येषा प्रसृततरा गतिः यदति
शयमुक्त्वा वीप्साद्विर्वचनमुच्यते॥ परेर्वर्जने॥ परेरसमासे परेः समासे इति वक्तव्यम्॥ इह मा भूत्। परित्रिग
र्तं वृष्टो देवः। न तर्हि वक्तव्यम्। न वक्तव्यम्। परेर्वर्जन इत्येव सिद्धम्। परेर्वर्जन इत्युच्यते। नचात्र परिर्वर्जने वर्तते॥ कस्तर्हि।
समासः॥

सत्याढ्यतरमानयेति भाष्यम्। तत्रच प्रकारोऽर्थो गम्येत। नतु वीप्सा। तस्मात् प्राक् प्रकर्षो विवक्ष्यते ततो वीप्सेति यथेष्टसि
द्धिः॥ परेर्वर्जने। परित्रिगर्तमिति। त्रिगर्तान्वर्जयित्वा वृष्टो देव इति वर्जनक्रियाकृतो वर्षत्रिगर्तानां संबन्ध इति परेः सन्निधाने
वाक्यवत्समासेऽपि प्रतीयत इति द्विर्वचनप्रसङ्गः। कस्तर्हि समास इति॥ जहत्स्वार्था वृत्तिरिति समास एव वर्ज्यमानोपसर्ज
ने वर्तते। अवयवौ त्वनर्थकौ यदाप्यजहत्स्वार्था वृत्तिरिति पक्षस्तदा वाक्ये केवलेवर्जने परिर्वर्तते इति तत्रैव द्विर्वचनं स
मासे तु वर्ज्यमानार्थोपसर्जनाद्यर्थः परिः केवलेवर्जने न वर्तत इति सिद्धो द्विर्वचनाभावः। अत्र पक्षे नचात्र परिर्वर्जने वर्तत इत्यस्या
यमर्थः। शुद्धवर्जने न वर्तते अन्य एव द्व्यर्थः परिः समासे। अन्यो वाक्ये शुद्धवर्जनविषयः कस्तर्हि समास इति। समासविषयत्वात्परिरे
व समासः। अन्य एव परिर्द्व्यर्थ इत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वाक्येनित्यद्विर्वचनमसङ्गादाह। परेरिति॥ वाक्य॥ असूयाकुत्सनयोरिति। यद्यप्यसूयादयः परस्परस्मादूभिन्नास्तथापि कार्यकारणभावेनैकविषयत्वमेकार्थत्वं द्वेयंतमेवकार्यकारणभावंदर्शयति॥ नह्यनसूयन्निति। तत्रकुत्सनभर्त्सनाभावेप्यसूयाकोपश्चभवतोनतुकोपासूयाभावेभर्त्सनकुत्सनेइतिकोपासूययोर्द्विर्वचनं विधीयमानंभर्त्सनकुत्सनयोरपितत्सद्भावात्सिध्यतीतिकुत्सनभर्त्सनग्रहणमनर्थकंभवतीत्यर्थः। ननुचेति। कोपमंतरेणापि भर्त्सनसद्भावात्पृथग्विधेयंद्विर्वचनमित्यर्थः॥ अत्राप्यस्तिकोपइतिदर्शयति। अन्ततइति। यद्यकुपिताभर्त्सयेरन्गुरवोनैवदारकास्तेभ्योबिभियुरितिकोपंप्रदर्शयन्तोभर्त्सयन्तेततः सर्वत्रभर्त्सनेकोपसद्भावात्पृथग्भर्त्सनग्रहणंनकर्तव्यम्। कुत्सनभर्त्सन

परेर्वर्जनेवावचनम्। परेर्वर्जनेवेतिवक्तव्यम्। परित्रिगर्तेभ्योवृष्टोदेवः परिपरित्रिगर्तेभ्योवृष्टोदेवः॥ वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु॥ असूयाकुत्सनयोः कोपभर्त्सनयोश्चैकार्थत्वात्पृथक्त्वनिर्देशानर्थक्यम्। असूयाकुत्सनमित्येकोर्थः। कोपोभर्त्सनमित्येकोर्थः। असूयाकुत्सनयोः कोपभर्त्सनयोश्चैकार्थत्वात्पृथक्त्वनिर्देशोऽनर्थकः। नह्यनसूयन्कुत्सयति नचाप्यकुपितोभर्त्सयते॥ ननुचभोः अकुपिताअपिदृश्यन्तेदारकान्भर्त्सयमानाः। अन्ततस्तेतांशारीराकृतिंकुर्वन्तियाकुपितस्यभवति॥ एवंतर्ह्याहसामृतैः पाणिभिर्घ्नन्तिगुरवोनविषोक्षितैः। लालनाश्रयिणोदोषास्ताडनाश्रयिणोगुणाः॥ एकंबहुव्रीहिवत्॥ इहकस्माद्बहुव्रीहिवद्भावोनभवति। एकइति॥

ग्रहणसमर्थनायाह। सामृतैरिति॥ गुरवोहिहितैषित्वादकुप्यन्तोपिभर्त्सनम्। कुर्वतेभर्त्स्यमानास्तुकुपितान्प्रतियन्तितान्। विनाप्यसूययाकुत्सांकुर्वन्तीतिपृथक्कृतयोः निर्देशः सूत्रकारेणविहितः सूक्ष्मबुद्धिना॥ एकम्। इहकस्मादिति। केवलोबहुव्रीहिवद्भावोऽनेनविधीयतेअनिर्दिष्टविषयइतिमत्वाप्रश्नः। किंपुनरत्रानिष्टंयावताकृतेपिसुब्लुकिबहुव्रीहिवद्भावात्परःसुब्भविष्यति। समासग्रहणंचनियमार्थंनतुविध्यर्थमितिप्रत्ययान्तत्वादेकइत्यस्याप्रातिपदिकत्वान्नैववासुब्लुक्प्राप्नोति। एवंतर्ह्युदाहरणदिक्प्रदर्शितादइदंतूदाहरणमेकेतिअत्रहिपुंवद्भावःप्राप्नोति॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

एकस्येति। द्वे इत्यधिकारात् द्विर्वचनसन्नियोगेन विधीयमानो बहुव्रीहिवद्भावस्तदभावे न भवति। द्विर्वचनमप्यनेन विधीयमानमत्र प्राप्नोतीतिमत्वाह। एकस्येति। नवेति। वीप्साशब्दः स्वरितत्वप्रतिज्ञानात्परेर्वर्जन इत्यादावर्थान्तरनिर्देशादाकाङ्क्षाया अभावात्तत्संबन्धमननुभूयैवैवोपतिष्ठते सत्यपि संभवे बाधनं भवतीतिन्यायाद्वीप्सायां विधीयमाने न बहुव्रीहिवद्भावेन द्विर्वचनस्य बाधाप्रसङ्गादनेनैवोभयं विधीयते॥ अथेति। किं बहुव्रीहौ दृष्टं सर्वकार्यमतिदिश्यते अथ किंचिदेवेति प्रश्नः॥ एकैकमिति॥ सुबन्तसमुदायस्य बहुव्रीहिवद्भावात् सुब्लुकि कृते पुनर्बहुव्रीहिवद्भावादेव सुबुत्पत्तिः। गतगतेति। उत्तरसूत्रेण द्विर्वचनबहुव्रीहिवद्भावौ। एकैकेत्यत्र तु पुंवद्भावे विशेषाभावः अवग्रहे त्वत्रापि विशेषोऽस्ति॥ न चात्र नित्या संहिता। एकैकया इत्येकइत्यवग्रहकरणात् अग्ने अग्ने स्मस्मदित्युदाहरणाच्च। ननसुसुद्गति। आबाधे चेति

एकस्य द्विर्वचनसंबन्धेन बहुव्रीहिवद्भाव उच्यते। न चात्र द्विर्वचनं पश्यामः। एकस्य द्विर्वचनसंबन्धेनेति चेदर्थनिर्देशः। एकस्य द्विर्वचनसंबन्धे नेति चेत्। अर्थनिर्देशः कर्तव्यः। द्विर्वचनमपि ह्यत्र कस्मान्न भवति॥ तस्माद्वाच्यमस्मिन्नर्थे द्वे भवतो बहुव्रीहिवत् चेति॥ नवावीप्साधिकारात्। नवावचनस्य किं कारणम्। वीप्साधिकारान्नित्यवीप्सयोरिति वर्तते॥ अथ बहुव्रीहिवत्त्वे किं प्रयोजनम्। बहुव्रीहिवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावौ॥ सुब्लोपः। एकैकम्। पुंवद्भावः। गतगता। यद्येवम्। सर्वनामस्वरसमासान्तेषु दोषः। सर्वनामस्वरसमासान्तेषु दोषो भवति॥ सर्वनामविधौ दोषो भवति। एकैकस्मै। न बहुव्रीहाविति प्रतिषेधः प्राप्नोति। सर्वनाम। स्वर-ननु। सुसु। नञ्सुभ्यामित्येष स्वरः प्राप्नोति। स्वर॥

द्विर्वचनम्। ननु करोति सुसु जागर्तीत्येवमादि वाक्यैकदेश उदाहृतः॥ अथ नञ्सुभ्यामित्यन्तोदात्तत्वे प्राप्ते सति केन स्वरेण भाव्यम्॥ अत्र हि चत्वारः स्वराः प्राप्नुवन्ति। समासान्तोदात्तत्वं पूर्वपदप्रकृतिस्वरो नञ्सुभ्यामित्यन्तोदात्तत्वमाम्रेडितानुदात्तत्वं च। तत्र कार्यातिदेश इद‍मेव कार्याणां विधायकमिति परत्वादाम्रेडितानुदात्तत्वमनेन न बाध्यते॥ शास्त्रातिदेशे विरुद्धस्य स्वाश्रयस्यातिदेशेन निवर्तनान्न भाव्यमाम्रेडितानुदात्तत्वेन॥ यथा च नञ्सुभ्यामित्यस्य समासग्रहणानुवृत्त्यानतिदेशादप्रवृत्तिरेवं पूर्वपदप्रकृतिस्वरस्यापीति समासान्तोदात्तत्वप्रसङ्गः॥ उच्यते। नञ्सुभ्यामित्यत्रैव बनसमास इत्यतः सिंहावलोकितन्यायेन समासग्रहणमनुवर्तते न तु बहुव्रीहौ प्रकृत्येत्यत्र तेन पूर्वपदप्रकृतिस्वरोऽतिदेशेन भवन् समासान्तोदात्तत्वं बाधते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· ऋक् ऋगिति। समासमात्रविधीयमानो बहुव्रीहेरपि दर्शनादकारो बहुव्रीहिवद्भावात् प्राप्नोति। उक्तं तत्रेति। विभाषा ८११
१० दिक्समास इत्यनो न बहुव्रीहावित्यत्र बहुव्रीहिग्रहणानुवर्तनाद् बहुव्रीहिरेव यो बहुव्रीहिर्मुख्यस्तस्य सर्वनामसंज्ञा
निषेध इत्यतिदेशान्न प्रवर्तते॥ स्वरसमासान्तयोरिति। स्वरे व्याख्यातम्। समासान्ते व्याख्यायते समासान्ता इत्यत्र
समासाच्च तद्विषयादित्यतः समासग्रहणमनुवर्तते तेन मुख्यसमासपरिग्रहादतिदेशात् समासान्ताप्रसङ्गः। समास
मात्रस्य समासग्रहणेन विशेषणादर्थाद् बहुव्रीहेरपि विशेषणात्तेन बहुव्रीहिं विशेषयिष्याम इत्येतज्ज्ञाप्यमुपपद्यते। अ
न्ये त्वाहुः बहुव्रीहौ संख्येये डजबहुगणादित्यतः ऋक्पूरब्धूरित्यत्र बहुव्रीहिग्रहणं समासाच्च तद्विषयादित्यतः सम
सग्रहणं च संबन्धानुवृत्त्यानन्तरैर्योगैः संबन्धमगच्छदनुवर्तते तदुभयं वाक्यभेदेन संबध्यते तेन ऋगाद्यन्तात् समासा

समासान्तः। ऋक् ऋक्। पूः पूः। ऋक्पूरब्धूः पथामानक्ष इति समासान्तः प्राप्नोति॥ सर्वनामविधौ तावन्न
दोषः। उक्तं तत्र बहुव्रीहिग्रहणस्य प्रयोजनम्। बहुव्रीहिरेव यो बहुव्रीहिस्तत्र प्रतिषेधो यथा स्यात् बहुव्रीहि
वद्भावेन यो बहुव्रीहिस्तत्र मा भूदिति। स्वरसमासान्तयोरपि प्रकृतं समासग्रहणमनुवर्तते तेन बहुव्रीहिं विशेष
यिष्यामः॥ समासो यो बहुव्रीहिरिति॥ कर्मधारयवदुत्तरेषु॥ कर्मधारयवत्त्वे कानि प्रयोजनानि। कर्मधारयवत्त्वे
प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि॥ सुब्लोपः। पटुपटुः। पुंवद्भावः। पटुपट्वी। अन्तोदात्तत्वम्। पटुपटुः।
॥प्रकारे गुणवचनस्य॥ गुणवचनस्येति किमर्थम्· अग्निर्माणवको गौर्वाहीकः॥ ॥ ॥

दकारप्रत्ययो भवति बहुव्रीहेस्तु समासादेवनत्वनिदेशादिस्वर्थः संपद्यते। अथ ननेत्यत्र बहुव्रीहिवद्भावान्न लोपः कस्मान्न
भवति· वनं समास इत्यतः समासग्रहणं संबन्धानुवृत्त्या पुंवद्भावमविशेषयन्न लोपेऽनुवर्तत इत्यदोषः॥ कर्म॥ कालकफा
लिके स्यादोनकोपधाया इति प्रतिषेधात् पुंवद्भावो बहुव्रीहिवद्भावेन न सिध्यति पूर्वपदप्रकृतिस्वरश्च प्राप्नोतीति कर्मधा
रयवद्भावाधिकारः॥ प्रकारे॥ गुणवचनस्येति किमर्थमिति। क्रियमाणेऽपि गुणवचनग्रहणेऽनिष्टप्रसङ्ग इति प्रश्नः। अ राम·
ग्निर्माणवक इति· अग्निशब्दो वह्नौ वृत्तः सोऽयमिति सादृश्यनिमित्तादभेदोपचारान्माणवके वर्तत इति द्रव्ये पूर्वं संवृत्तः संप्र
त्यपि द्रव्यवचन इति गुणवाचित्वाभावान्न द्विरुच्यते एवं गौर्वाहीक इति गोशब्दः सास्नादिमति वर्तित्वा पूर्वं वाहीके वर्तते॥ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकारे सर्वेषामिति। अग्निशब्दोऽग्निगतं तैक्ष्ण्यं माणवके प्रतिपादयितुं प्रयुज्यत इति गुणशब्दः। एवं गोशब्दः सास्नादिमत्तज्जाड्यप्रतिपादनाय वाहीके प्रयुज्यते गुणगुणिनोश्चात्र विषये नित्यमभेदोपचाराद्भेदनिबन्धन षष्ठ्यभावः। सिद्धं त्विति। द्विर्वचनस्य प्रकृतिः स्थानी इति तदर्थो विशेष्यते न तु प्रकारः तत्र सर्वस्य गुणवचनत्वाद्व्यभिचाराभावात्तद्ग्रहणाद्गुणवचनो यः शब्दो निर्ज्ञातस्तस्य सादृश्ये द्योत्ये द्वे भवत इति सूत्रार्थः। ननु वक्ष्यत्येतत् त एवं विज्ञास्यामः प्राक् प्रकाराद्यो गुणवचन इति तत्कोऽनयोरर्थयोर्भेदः। उच्यते। इह प्रतिज्ञामात्रं कृतं सिद्धं त्विति तत्रतूपपत्तिर्वक्ष्यते॥ तत्र प्रकर्षगतिरिति। सामर्थ्याद्गुणवचनत्वेल॰

प्रकारे सर्वेषां गुणवचनत्वात्सर्वप्रसङ्गः। प्रकारे सर्वेषां गुणवचनत्वात्सर्वप्रसङ्गः। सर्वे हि शब्दाः प्रकारे वर्तमानाः गुणवचनाः संपद्यन्ते। तेनेहापि प्राप्नोति। अग्निर्माणवकः। गौर्वाहीक इति। सिद्धं तु प्रकृत्यर्थविशेषणत्वात्। सिद्धमेतत्। कथम्। प्रकृत्यर्थविशेषणत्वात्। प्रकृत्यर्थो विशेष्यते। नैवं विज्ञायते। प्रकारे वर्तमानस्य गुणवचनस्येति। कथं तर्हि गुणवचनस्य शब्दस्य द्वे भवतः प्रकारे वर्तमानस्येति॥ अथवा प्रकारे गुणवचनस्येत्युच्यते सर्वश्च शब्दः प्रकारे वर्तमानो गुणवचनः संपद्यते॥ तत्र प्रकर्षगतिर्विज्ञास्यते। साधीयो यो गुणवचन इति। कश्च साधीयः। प्राक् प्रकारे चं प्रकारात्॥ अथवा प्रकारे गुणवचनस्येत्युच्यते॥ सर्वश्च शब्दः प्रकारे वर्तमानो गुणवचनः संपद्यते त एवं विज्ञास्यामः॥ प्राक् प्रकाराद्यो गुणवचन इति। आनुपूर्व्ये द्वे भवत इति वक्तव्यम्। मूले मूले स्थूलाः। अग्रे अग्रे सूक्ष्माः॥ स्वार्थेऽवधार्यमाणे नैकस्मिन्। स्वार्थेऽवधार्यमाणेऽनेकस्मिन् द्वे भवत इति वक्तव्यम्॥ ॥ ॥

ध्येपुनर्गुणवचनग्रहणं प्रकर्षप्रतिपत्त्यर्थमुपात्तमित्यर्थः प्राक् प्रकारादिति। गुणवचनग्रहणसामर्थ्याद्द्रव्यस्याविशेषः परिगृह्यते। इह च सादृश्यं प्रकार आश्रीयते न तु भेदः पटुपटुरिति ह्युक्ते पटुसदृशः प्रतीयते प्रकारवचने जातीयरित्यत्र सादृश्यं प्रकारः केषांचिन्मतेन गृह्यते ऽन्येषां तु भेदः प्रकारः। अत्र केचिदाहुः। गुणोपसर्जनद्रव्यवाचिनोपि द्विर्वचनं भवति शुक्लशुक्लः पट इति। गुणमात्रवाचिनोपि शुक्लशुक्लं रूपमिति। अन्ये तु गुणविशिष्टद्रव्यवाचिन एव द्विर्वचनं मन्यन्ते मूले मूल इति। अग्रमध्यमूलानि त्रयो भागाः तत्रैकमेव मुख्यमग्रं मूलं च अन्येषां तु भागानामपेक्षाकृतोऽग्रमूलव्यपदेशो ऽधःसंनिवेशापेक्षोऽग्रव्यपदेशः। उपरिसंनिवेशमपेक्ष्य मूलव्यपदेशः। न चैकरूपं भागानां स्थौल्यं सौक्ष्म्यं वा किं तर्हि यथा मूलमुपचीयते स्थौल्यं यथाग्रं च सौक्ष्म्योपचय इति वीप्साया अभावः॥ स्वार्थ इति। स्वार्थग्रहणमर्थान्तराभावप्रदर्शनार्थम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्मात्कार्षापणादिति॥ अनेकमाषसमुदायः कार्षापणः। तत्र सर्वे माषा दानक्रियया न व्याप्यन्ते किं तर्हि द्वावेवेति वीप्सा-भावः। भिन्नार्थत्वाच्चानेन द्विर्वचनेनैकशेषो न बाध्यते। इह भवद्भ्यां माषौ देहीति उक्ते एकैकं देहीत्यर्थो न गम्यते। माषं माषं देहीति तूक्ते एकैकदानप्रतीतिः। द्वौ देहीति। माषं माषौ माषान् देहीत्यस्यार्थस्य प्रदर्शनपरमेतत्। माषशब्दस्य हि द्विर्वचना-भावः प्रदर्शयितव्यः। तत्र यथेच्छं देहीत्यस्यार्थस्य प्रदर्शनादवधारणस्याभावः॥ माषमेव देहीति। अवधारणमत्रास्तीति प्र-तिपादयति। किं पुनरिति। यथा द्वावेव माषौ निर्ज्ञातौ यदा दानक्रियया व्याप्येते तदा माषं माषं देहीति वीप्सायां द्विर्वचनं भवति

अस्मात्कार्षापणादिह भवद्भ्यां माषं माषं देहि। अवधार्यमाण इति किमर्थम्। अस्मात्कार्षापणादिह भवद्भ्यां माषं देहि द्वौ देहि त्रीन् देहि ।अनेकस्मिन्निति किमर्थम्। अस्मात्कार्षापणादिह भवद्भ्यां माषं देहि। माषमेव देहि। किं पुनः कारणं न सिध्यति॥ अनवयवाभिधानं वीप्सार्थ इत्युच्यते। अवयवाभिधानं चात्र गम्यते॥ आ-तश्चावयवाभिधानम्। यो ह्युच्यतेऽस्मात्कार्षापणादिह भवद्भ्यां माषं माषं देहीति। स माषं माषमसौ दत्त्वा पुनः शेषं पृच्छतीति किमनेन क्रियतामिति। यः पुनरुच्यत इमं कार्षापणमिह भवद्भ्यां माषं माषं देहीति माषं माषमसौ द-त्त्वा तूष्णीमास्ते। चापले द्वे भवत इति वक्तव्यम्। अहिरहिर्बुध्यस्व बुध्यस्व नचावश्यं द्वे एव यावद्भिः शब्दैः सोऽर्थो गम्य-ते तावन्तः प्रयोक्तव्याः। अहिरहिरहिर्बुध्यस्व बुध्यस्व बुध्यस्वेति॥ क्रियासमभिहारे लोट्लोटो हिस्वौ वा च तध्वमोः॥ क्रिया-समभिहारे द्वे भवत इति वक्तव्यम्॥ स भवान् लुनीहि लुनीहीत्येवायं लुनाति। पुनीहि पुनीहीत्येवायं पुनाति॥

एवमनेकमाषसमुदायादपि कार्षापणाद्द्वयोरस्ति दानक्रियया व्याप्तिरिति सिद्धं द्विर्वचनमिति भावः॥ इतर आह॥ अनवयवा-भिधानमिति। एवं मन्यते वीप्सायां संनिहितस्यार्थस्य न कस्यचिद्वर्जनमस्ति इह तु वर्जनमस्तीति वीप्साया अभावः। इमं कार्षाप-णमिति। अत्र वीप्सायां द्विर्वचनमिति निःशेषमाषदानावगमः। चापल इति। आशुप्रतिपादनं चापलम्। अहिरहिरिति। यद्यहमेनं न बोधयामि तदा हन्यत एवायमहिनेति ज्ञात्वाशुप्रतिपादनाय वाक्यप्रयोगः। नचावश्यमिति। एवं च ब्रुवतानेन नेदं शास्त्रीयं द्वि-र्वचनं किं तर्हि परप्रत्यायनाय अनेकस्य नन्त्रप्रयोग इत्युक्तं भवति। एवं चाहिरहिरित्याम्रेडितानुदात्तत्वाभावाद्यथाप्राप्तः स्वरो भवतीत्याहुः॥ क्रियासमभिहार इति। लोडन्तस्यैवेदं द्विर्वचनं न यङन्तस्य लोटः समुच्चयेऽपि विधानात् क्रियासमभिहाराभि-व्यक्तौ केवलस्य सामर्थ्याभावात्। यङ् तु क्रियासमभिहारविषय एवेति न द्योतने स्वयं सामर्थ्यान्नापेक्षते द्विर्वचनम्॥ ॥ ॥ राम ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आभीक्ष्ण्य इति। ननु चाभीक्ष्ण्यं नित्यतेति नित्यवीप्सयोः इति सिद्धं द्विर्वचनम्। नैतदस्ति। पुनः पुनः क्रियाया उत्पत्तिराभीक्ष्ण्य
म्। तथाहि। भुक्त्वा भुक्त्वा व्रजतीत्युक्ते सत्यपि क्रियाविच्छेदे पुनर्भुङ्क्ते पुनर्व्रजतीति क्रियावृत्तिः प्रतीयते। नित्यता क्रियाया
अविच्छेदो यथा जीवति जीवतीत्युक्ते जीवत्येवायमिति प्रतीयते न त्वावृत्तिः न ह्यसौ जीवित्वा म्रियते मृत्वा वा जीवति जीवन
मेव दीर्घमविच्छिन्नं प्रतीयते। यत्तूक्तं भाष्ये तत्र आभीक्ष्ण्ये वर्तत इति। नित्यशब्दस्य विषयोपलक्षणार्थमाभीक्ष्ण्यविषयो यो
नित्यशब्दः तस्य ग्रहणमित्यर्थः। तथा च वृत्तिकारा आहुः। यां क्रियां कर्ता प्राधान्येनानुपरमन् करोति तन्नित्यम्। अन्ये त्वाहुः भुक्त्वा
भुक्त्वा व्रजतीत्यादौ क्त्वाणमुलन्तस्य द्विर्वचनं प्राप्नोति तिङन्तस्य च। तत्राभीक्ष्ण्यसंशब्दनेन यो विहितस्तदन्तस्य यथा स्यात्तिङ
न्तस्य मा भूदिति नियमार्थमिदम्। अन्ये तु प्रत्ययेनाभीक्ष्ण्यस्य द्योतनादप्राप्तं द्विर्वचनं विधीयत इत्याहुः। अथ क्रियासमभिहा
रे द्वे भवत इति सिद्धे आभीक्ष्ण्ये द्वे भवत इति किमर्थमुच्यते। क्रियासमभिहारसंशब्दनेन यो विधीयते तदन्तस्यैव द्विर्वचनमिति

आभीक्ष्ण्ये द्वे भवत इति वक्तव्यम्। भुक्त्वा भुक्त्वा व्रजति। भोजं भोजं व्रजति। डाचि च॥ डाचि च द्वे भवत इति वक्तव्यम्।
पटपटायति। मटमटायति। शरशरायति॥

कश्चित्तु पर्यस्येदिति वाक्यद्वयोपन्यासः। डाचीति। विषयसप्तमीयम्। तेनानुत्पन्न एव डाच्यकृतटिलोपस्य पटदित्यादेर्द्वि
र्वचनं ततोऽव्यक्तानुकरणादिति डाच्। ततष्टिलोपः। ततो नित्यमाम्रेडिते डाचीति पररूपत्वम्। केचित्तु पररूपविधानमच्छ
ब्दस्य डाचीति परसप्तम्यामपि टिलोपात्प्राक् द्विर्वचनमित्यस्यार्थस्य ज्ञापकमाहुः॥ तदयुक्तम्। पटदित्यादेः कृतटिलोप
स्याप्यच्छब्दस्य संभवात्तस्माद्डाचीति विषयसप्तम्येवाश्रयणीया। प्रयोगदर्शनवशाच्चाव्यक्तानुकरणाद्डाचीदं द्विर्वचनं
न तु सूत्रान्तरविहितद्वितीयाकरोतीत्यादौ द्विर्वचनाभावः। केचित्तु नित्यमाम्रेडिते डाचीति पररूपविधानमेवाव्यक्ता
नुकरणाद्डाचि द्विर्वचनमनुमापयतीत्याहुः॥ यदा तु पररूपमकारान्तानुकरणाद्वेतीति प्रत्याख्यायते तदा द्विर्वचनं
वक्तव्यमेव। बहुलग्रहणमत्रान्यैराश्रीयते तेन द्वितीयाकरोतीत्यादौ द्विर्वचनाभावो डाचीति परसप्तम्यामपि नित्याद
पि टिलोपात्पूर्वं द्विर्वचनं च सिध्यति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.कौ. पूर्वप्रथमयोरिति॥ केचिदाद्यादिविवक्षायामिति पठन्ति॥ अन्येत्वर्थातिशयविवक्षायामिति। तत्रभिन्नार्थत्वात् द्विर्वचनेनाति ८११
१२ शायिकोनबाध्यत इत्याहुः। तथाहि पूर्वतरंभुङ्क्ते इत्युक्ते किमात्मसाध्यक्रियान्तरापेक्षं भोजनस्य पूर्वत्वमथभोक्त्रन्त
रसाध्यभोजनापेक्षमिति संदेहः। एवंपूर्वतरंपुष्प्यतीत्ययमप्यर्थोगम्यते नतावदयं किसलयितोयावदेवपुष्प्यतीति। पू
र्वंपूर्वंपुष्प्यतीत्यस्मात्तु पुष्पितेभ्योन्येभ्यः पूर्वं पुष्प्यतीति अर्थः प्रतीयते। अतएवाद्यादिविवक्षायामित्युच्यते॥ आदे
रादिविवक्षायामादेर्वातिशयविवक्षायां द्विर्वचनमित्यर्थः॥ डतरडतमयोरिति। डतरडतमान्तस्य द्वे भवतः। आढ्यत्वा
दिनासमेनतुल्येनगुणेनसंप्रधारणायांनिरूपणायां विषये। तथाहि। उभाविमावाढ्यावित्युक्ते ऽनेकप्रकाराढ्यत्वसंभ

पूर्वप्रथमयोरर्थातिशयविवक्षायाम्॥ पूर्वप्रथमयोरर्थातिशयविवक्षायां द्वे भवत इति वक्तव्यम्। पूर्वंपूर्वं
पुष्प्यन्ति॥ प्रथमंप्रथमंपच्यन्ते॥ डतरडतमयोः समसंप्रधारणायां स्त्रीनिगदभावे। डतरडतमयोः सम
संप्रधारणायांस्त्रीनिगदभावे द्वे भवत इति वक्तव्यम्॥ उभाविमावाढ्यौ। कतराकतरानयोराढ्य
ता। सर्वइमेआढ्याः। कतमाकतमाएषामाढ्यतेति। कर्मव्यतिहारे सर्वनाम्नः समासवच्च बहुलं यदा न समासव
त्प्रथमैकवचनं तदा पूर्वपदस्य। कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यम्। समासवच्च बहुलम्। य
दा न समासवत्प्रथमैकवचनं भवति तदा पूर्वपदस्य॥ अन्योन्यमिमे ब्राह्मणा भोजयन्ति॥ अन्योन्यस्य भो
जयन्ति॥ इतरेतरं भोजयन्ति॥ इतरेतरस्य भोजयन्ति॥

वात्प्रतिपत्ता किंकृतमनयोराढ्यत्वमिति संदिहानः पृच्छति कतरा कतरानयोराढ्यतेति। स्वार्थे चैतत् द्विर्वचनम्। स्त्री
निगदो भावः। स्त्रीलिङ्गशब्दाभिधेयो भूतिः कृद्धिः संपत् आढ्यतेति। निगद्यत इति निगदः। नौगदेत्यप्। स्त्रियानिग
दः स्त्रीनिगदः॥ कर्मव्यतिहार इति। क्रियाव्यतिहार इत्यर्थः। तत्र द्विर्वचनं नित्यं भवति। समासवद्भावस्तु बहुलम्। तत्र राम
बहुलग्रहणादन्योन्यशब्दे समासवद्भावाभावात्सुब्लुङ्न भवति नापि समासान्तोदात्तत्वमित्याम्रेडितानुदात्तत्वं भव १२
ति। इतरेतरशब्दे तु नित्यः समासवद्भाव इति सुब्लुक् समासस्वरौ भवतः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीनपुंसकयोरिति। उत्तरपदस्य याविभक्तिस्तस्या आम्भावोऽन्यथाऽनेकाल्त्वात् सर्वस्योत्तरपदस्याम्भावः स्यात्। तत्र सर्वना
म्नो वृत्तिमात्रे पुंवद्भाव इति स्त्रीनपुंसकयोः पुंवद्भावे कृते पक्षे आम्विधिः। वार्तिकेषु कर्मधारयवदिति न संबध्यत इति सुब्लो
पादि न भवति॥ द्वन्द्वम्। अत्यन्तसहचरित इति। अभिव्यक्तिग्रहणादतिप्रसङ्ग इति वचनम्। द्वौ युधिष्ठिरार्जुनाविति। लोक
विज्ञानादभिव्यक्तावेतौ नत्वत्यन्तसहचरितौ। पूर्वपदस्येति। द्विऔद्विऔ इति स्थिते कर्मधारयवद्भावात् सुब्लुकि कृते
पूर्वपदावयवस्यैकारस्याम्भावः उत्तरपदावयवस्यात्वं समासान्तोदात्तत्वं च भवति॥ पदस्य॥ अथ किमर्थं पदस्येति अधि
क्रियते यावता वस्यमाणानि कार्याणि पदविषयाण्येवार्थं प्रयुक्तस्यैव वेदमन्वाख्यानं पदं चार्थे प्रयुज्यते। नच समर्थपरिभा

स्त्रीनपुंसकयोरुत्तरपदस्य वाम्भावः॥ स्त्रीनपुंसकयोरुत्तरपदस्य वाम्भावो वक्तव्यः॥ अन्योन्यमिमे ब्राह्मण्यौ
भोजयतः॥ अन्योन्यां भोजयतः॥ इतरेतरमिमे ब्राह्मण्यौ भोजयतः॥ इतरेतरां भोजयतः॥ अन्योन्यमिमे ब्राह्म
णकुले भोजयतः॥ अन्योन्यां भोजयतः॥ इतरेतरमिमे ब्राह्मणकुले भोजयतः॥ इतरेतरां भोजयतः॥ द्वन्द्वं रहस्य
मर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु॥ अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्युपसंख्यानम्॥
अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्युपसंख्यानं कर्तव्यम्। द्वन्द्वम्। स्कन्दविशाखौ। द्वन्द्वम्। नारदपर्व
तौ। अत्यन्तसहचरित इति किमर्थम्। द्वौ युधिष्ठिरार्जुनौ। लोकविज्ञात इति किमर्थम्। द्वौ देवदत्तयज्ञदत्तौ। अ
थ द्वन्द्वमिति किं निपात्यते॥ द्वन्द्वमिति पूर्वपदस्य चाम्भाव उत्तरपदस्य चात्वम्॥ पूर्वपदस्य चाम्भावो निपात्य
ते। उत्तरपदस्य चात्वम्। नपुंसकत्वं च॥ नपुंसकत्वं च वक्तव्यम्॥ उक्तं वा। किमुक्तम्। लिङ्गमशिष्यं लोकाश्र
यत्वाल्लिङ्गस्येति तत्र नपुंसकत्वमनिपात्यम्॥ पदस्य॥ पदात्॥

षोपस्थानार्थः पदाधिकार उपयुज्यते। यस्मात् पदद्वयनिबन्धनेषु कार्येषु समानवाक्ये निघातयुष्मदस्मदादेशा इति वक्ष्यते। कुत्ता
नि त्वेकपदनिबन्धनान्येव। नच भसंज्ञकस्य व्यावृत्त्यर्थः पदाधिकारोऽवयवस्य भत्त्वेपि समुदायपदावयवत्वाश्रयकुत्वादि प्रवृत्त्य
भ्युपगमाद्वक्तरि दोग्धरीति। उच्यते। नलोपाद्यर्थं पदाधिकारः। असति हि तस्मिन् यथा राजभ्यामित्यादौ प्रातिपदिकान्तस्य नका
रस्य लोपो भवत्येवं राजानावित्यादावपि स्यात्। पदाधिकारे तु प्रातिपदिकस्य पदस्य योऽन्तो नकारस्तस्य लोपः। न थासंयोगान्तस्य
लोपो भवति गोमानित्यादौ न तु गोमन्तावित्यादौ। मो नो धातोरिति नकारः प्रशानित्यादौ भवति। न तु प्रशामावित्यादौ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकुतइति। कस्यचित्कार्यस्यासिद्धिं मत्वा पृच्छति॥ प्रागिति। अपदान्तस्येति विरोध्युपादानात्प्रागतः पदाधिकारः। प्राक्सु
पि कुत्सनादिति। यदित्वत्र पदादित्यनुवर्तेत देवदत्तो यत्पचति पूतीत्यत्रैव तिङन्तस्य निघातः स्यान्नतु पचति पूती त्यत्र।
यणेकादेशस्वर इति॥ उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येति यणाश्रयः स्वर एकादेश उदात्तेनोदात्त इत्येकादेशस्वर
श्चेडायावेत्यस्मात्परो कर्तव्यो। इह वचने हीति। पदस्येति स्थानषष्ठी त्युदात्तस्वरितयोर्यो यण् ततः परो योऽनुदात्तस्तदन्त
स्य पदस्य स्वरितत्वमलोऽन्त्यस्य भवतीति वाक्यार्थः। एवमुदात्तानुदात्तयोर्य एकादेशस्तदन्तस्य पदस्यालोऽन्त्यस्योदा
त्त आदेश इति स्यात्। कुमार्य इति। हलः स्वरप्राप्तिरत्र नास्तीति व्यञ्जनस्याविद्यमानत्वाभावः॥ नवेति। इह पदस्येति संब

आकुतः पदाधिकारः॥ प्रागपदान्ताधिकारात्। अपदान्तस्य मूर्द्धन्य इति वक्ष्यत्यतः प्राक्पदाधिकारः। आकुतः प
दादिति॥ प्राक्सुपि कुत्सनात्पदादित्यधिकारः। प्राक्सुपि कुत्सनात् कुत्सने च सुप्यगोत्रादाविति वक्ष्यते प्रागेव
तस्मात्॥ यणेकादेशस्वरस्तूर्ध्वं पदाधिकारात्। यणेकादेशस्वरस्तूर्ध्वं पदाधिकारात्कर्तव्यः॥ इह वचने ह्यपदा
न्तस्याप्राप्तिः। इह क्रियमाणे अपदान्तस्याप्राप्तिः स्यात्। उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येति इहैव स्यात्।
कुमार्यौ। किशोर्यौ। इह न स्यात्। कुमार्यः। किशोर्यः। एकादेश उदात्तेनोदात्तः। इहैव स्यात्। वृक्षौ प्लक्षौ। इह न स्यात्। वृक्षाः
प्लक्षाः॥ न वा पदाधिकारस्य विशेषणत्वात्। न वा ऊर्ध्वं पदाधिकारात्कर्तव्यो यणेकादेशस्वरः। किं कारणम्। पदाधिकार
स्य विशेषणत्वात्। पदस्येति नैषा स्थानषष्ठी। का तर्हि। विशेषणषष्ठी। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते।
प्रत्याख्यायते स्थानषष्ठी।

न्धसामान्ये षष्ठी असाकुत्रेषु यथायोगं संबन्धविशेषे व्यवतिष्ठते। क्वचित्स्थाने षष्ठी क्वचिदवयवषष्ठी तत्र यणेकादेशस्वरयोः पदस्ये
त्यनुवृत्तं कार्यिविशेषणार्थं नतु कार्यिप्रतिपत्त्यर्थं तेन पदावयवयोरनुदात्तैकादेशयोः स्वरविधानादनन्त्ययोरपि भवति। किं व
क्तव्यमिति। षष्ठी स्थानेयोगेति नियमाल्लभ्या विशेषणषष्ठीति प्रश्नः। प्रत्याख्यायत इति। योगे प्रत्याख्याते यत्रान्यः संबन्धो
स्ति यथो दुपधाया गोह इति तत्र विशेषणविशेष्यभाव आश्रीयते गोहोऽङ्गस्य योपधा तस्या ऊद्भवतीति। यत्र तु विशिष्टः संबन्धो न
प्रतीयते तत्र स्थानसंबन्ध एवाश्रीयते। यथास्तेर्भूरिति। तदुक्तं भाष्ये शब्दस्य तु शब्देन कोऽन्यः संबन्धोऽन्यदतः स्थानादिति।
एवं यणेकादेशस्वरयोः स्थान्यन्तरोपादानात् पदस्यावयवषष्ठी मोनो धातोरित्यादौ स्थानषष्ठी। प्रयोगमूलत्वाद्व्याकरण
स्मृतेर्यथाप्रयोगं लक्षणव्यवस्थापनात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तग्रहणाद्धेति। पच्यमाने योगे विशेषणषष्ठी न लभ्यते इति लिङ्गेनासौ गतिपाद्यते यदि पदस्येति स्थानषष्ठ्येव स्यात् अ
लोन्त्यस्येत्यन्त्यस्य लोपस्य सिद्धत्वादन्तग्रहणमनर्थकं स्यात्तस्मादन्तग्रहणात् क्वचिद्विशेषणषष्ठ्यपि विज्ञायते॥ प्रा
तिपदिकान्तस्य चेत्यसमासनिर्देशः तेन प्रातिपदिकस्य पदस्य योन्त्यो नकारस्तस्य लोप इति सूत्रार्थः॥ अनुदात्तम्॥
सर्ववचनमिति। वक्ष्यमाणोऽभिप्रायः। सर्ववचनमनादेरिति॥ असति सर्वग्रहणे एवादित्यधिकारादादेः परस्येत्यनेन पद
स्येति स्थानषष्ठ्या आद्यावल्पानुसंहारादादेरेवोदात्तस्यानुदात्तत्वं स्यान्नत्वनादेः सर्वग्रहणे तु पदस्येति विशेषणषष्ठी
विज्ञानात् पदस्य सर्वोवयवोऽनुदात्तो भवतीत्यर्थः संपद्यते। पचतीति। धातुस्वरेणाद्युदात्तं पदं शप्तिपोः पित्वादनुदा

अन्तग्रहणाद्धा नलोपे॥ अथवा यदयं नलोपः प्रातिपदिकान्तस्येत्यन्तग्रहणं करोति तज्ज्ञापयत्याचार्यः।
विशेषणषष्ठ्येषा न स्थानषष्ठीति॥ अनुदात्तं सर्वमपादादौ॥ सर्ववच[illegible]नं किमर्थम्॥ सर्ववचनमनादेरनु
दात्तार्थम्। सर्ववचनं क्रियते अनादेरप्यनुदात्तत्वं यथा स्यादिति। तिङ्तिङः इति। इहैव स्यात्। देवदत्तः प
चतीति। इह न स्यात्। देवदत्तः करोतीति। सर्ववचनमनादेरनुदात्तार्थमिति चेल्लुटि प्रतिषेधात्सिद्धम्। स
र्ववचनमनादेरनुदात्तार्थमिति चेत्तन्न। किं कारणम्। लुटि प्रतिषेधात्सिद्धम्। यदयं लुटि प्रतिषेधं शास्ति
तज्ज्ञापयत्याचार्यः। अनादेरप्यनुदात्तत्वं भवतीति। कथं कृत्वा ज्ञापकम्। नहि लुडन्तमाद्युदात्तमस्
ति। अलोऽन्त्यप्रसङ्गस्तु। अलोन्त्यविधिस्तु प्राप्नोति॥ यत्र ह्यादिविधिर्न भवति अलोन्त्यस्य विधिना त
त्र भवितव्यम्। तत्र को दोषः। तिङ्तिङ इति इहैव स्याद्देवदत्त यज्ञदत्तौ कुरुतः। इह न स्याद्देवदत्तः करोति।

त्त्वात्॥ करोतीति। प्रत्ययस्वरेण मध्योदात्तं [illegible]त्वम्। नहि लुडन्तमिति। लुडन्तः कश्चिदन्तोदात्तः कश्चिन्मध्योदात्त इति स्वः
कर्त्रेत्याद्यो निघाताप्रसङ्गात् किं न लुटीति निषेधेन निषेधात्तु लिङ्गात्पदस्येति विशेषणषष्ठी विज्ञायते न स्थानषष्ठीति स्था
नषष्ठीशेषस्यादेः परस्येत्यस्यापस्यानाभावात् अनादेरप्यनुदात्तत्वं भविष्यति। अलोऽन्त्यप्रसङ्गस्त्विति। अलोऽन्त्यस्येत्य
स्यापवाद आदेः परस्येति तत्र लिङ्गादपवादेपनीते उत्सर्गेण प्रवर्त्यमिति भावः॥ कुरुत इति। लसार्वधातुकस्य प्रत्ययस्वरेणान्तोदा
त्तत्वं विकरणस्य तु शेषनिघातः। न विकरणस्वरो लसार्वधातुकस्वरं बाधते। तासेर्लसार्वधातुकानुदात्तत्वविधाने ज्ञापनात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रापि लिङ्गमुच्यते लृटीति। गत्यर्थलोटेत्यनेन लृडन्तस्य निघातः प्रतिषिध्यते सर्वं च लृडन्तं लसार्वधातुकानुदात्तत्वेन मध्योदात्तमिति निघातस्य प्रसङ्गाभावान्नार्थो निषेधेन तदेतस्माल्लिङ्गाद् लोन्त्य विध्यभावः॥ भोक्ष्यइति॥ एकादेशउदात्तेनोदात्तइत्यन्तोदात्तमेतत्। ततश्चात्र निघाताभावार्थत्वाद् लिङ् लृटि निषेधइत्यलोन्त्यनिवृत्त्यर्थं सर्वग्रहणं कर्तव्यम्॥ उक्तं वेति। असत्यपि सर्वग्रहणे भूयो लक्ष्यसिद्ध्ये अनुदात्तविधौ विशेषणषष्ठ्या श्रयिष्यते न तु स्थानषष्ठीत्यर्थः॥ सविभक्तिकस्येति। अन्यथा केवलयोर्युष्मदस्मदोरादेशाः स्युः तत्र षष्ठ्येकवचने ङसिङसोश्चेति अशिपूर्वे कादेशे दोषाभावेपि वचनान्तरेषु दोषप्रसङ्गः सर्वग्रहणे तु सति युष्मदस्मच्छब्दान्तदवयवः समुदायो लक्ष्यत इति युष्मदस्मदवयवस्य स

लृटि प्रतिषेधात्सिद्धम्। यदयं न लृडिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो ऽनन्त्यस्याप्यनुदात्तत्वं भवतीति। कथं कृत्वा ज्ञापकम्। नहि लृडन्तमन्तोदात्तमस्ति। ननु चेदमस्ति भोक्ष्य इति। उक्तं वा। किमुक्तम्। न वा पदाधिकारस्य विशेषणत्वादिति। इदं तर्हि प्रयोजनम्। युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वान्नावाविति वक्ष्यति। ते वांनावादयः सविभक्तिकस्य यथा स्युरिति। एतदपि नास्ति प्रयोजनम्। पदस्येति हि वर्तते। विभक्त्यन्तं च पदं तत्रान्तरेण सर्वग्रहणं सविभक्तिकस्यैव भविष्यति॥ भवेत्सिद्धं यत्र विभक्त्यन्तं पदम्। यत्र तु खलु विभक्तौ पदं तत्र न सिध्यति। ग्रामो वां दीयते। ग्रामो नौ दीयते॥ जनपदो वां दीयते। जनपदो नौ दीयते। ननु च स्थग्रहणं क्रियते तेन सविभक्तिकस्यैव भविष्यति॥ अस्त्यन्यत्स्थग्रहणस्य प्रयोजनम्। किम्। श्रूयमाणविभक्तिविशेषणं यथा विज्ञायेत॥

र्वस्य पदस्य वान्नावादय आदेशा भवन्ति॥ पदस्येति हि वर्तत इति। तेन युष्मदस्मद्भ्यां तः पदस्यादेशा भवन्तीत्यर्थः॥ भवेत्सिद्धमिति। यत्र केवले युष्मदस्मदी पदे तत्र तद्गतः प्रतिपत्तेरयोगादिति भावः॥ स्थग्रहणमिति। षष्ठ्यादिष्वादेशविधानाद्युष्मदस्मदोस्तत्स्थत्वे लब्धे स्थग्रहणनिमित्तसहितयुष्मदस्मत्प्रतिपत्त्यर्थं विज्ञायत इति सविभक्तिकयोरादेशसिद्धिः। यथाश्वस्य आनीयतामित्युक्ते सहैवाश्वेनानीयते। श्रूयमाणविभक्तिविशेषणमिति। यत्र श्रूयते विभक्तिः तत्र तत्स्थत्वं युष्मदस्मदोर्नतु तस्यां लुप्तायाम्। प्रत्ययलक्षणेन च कार्यं शास्त्रे यातिदिश्यते न तु तात्स्थ्यं तस्यापोरुषेयत्वात्। तदेवमन्यार्थत्वात् स्थग्रहणस्य सर्वग्रहणं सविभक्तिकादेशार्थं कर्तव्यम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतियुष्मत्सूत्रइति। इतिशब्दात्पदात्परयोः षष्ठ्यन्तयोर्युष्मदस्मदोर्वस्नसौन भवतः। समानवाक्यइति॥ अर्थैकत्वादेकं वाक्यंसाकाङ्क्षंचेद्विभागेस्यादितिलौकिकंवाक्यलक्षणम्। इहतुवाक्यंपरिभाषितम्। आख्यातंसाव्ययकारकविशेषणंवाक्यमिति। आख्यातमित्येकत्वंविवक्ष्यते। अयंदण्डोहरानेनेति वाक्यद्वयमेतत्। अयंदण्डोस्तिहरानेनेतितिङन्तद्वययोगात्। तत्रानेनेतिसर्वनाम्नादण्डस्यपरामर्शात्। करणत्वादस्तिसामर्थ्यमितिनिघातप्रसङ्गः॥ ओदनंपचेतित्व

यत्रविभक्तिःश्रूयतेतत्रयथास्युरिहमाभूवन्। इतियुष्मत्पुत्रोददातिइत्यस्मत्पुत्रोददातीति। समानवाक्येनिघातयुष्मदस्मदादेशाः। समानवाक्यइतिप्रकृत्यनिघातयुष्मदस्मदादेशावक्तव्याः। किंप्रयोजनम्। नानावाक्येमाभूवन्निति। अयंदण्डोहरानेन। ओदनंपचतवभविष्यतिममभविष्यति॥ पश्यार्थैश्चप्रतिषेधः॥ समानवाक्यइतिप्रकृत्यवक्तव्यः। इतरथाहियत्रैवपश्यार्थानांयुष्मदस्मदीसाधनंतत्रप्रतिषेधःस्यात्। ग्रामस्त्वांसंप्रेक्ष्यसंदृश्यसमीक्ष्यगतः। इहनस्यात्। ग्रामस्तवस्वंसंप्रेक्ष्यगतः॥ सपूर्वायाःप्रथमायाविभाषा॥ युष्मदस्मदोरन्यतरस्यामनन्वादेशे। युष्मदस्मदोरन्यतरस्यामनन्वादेशइतिवक्तव्यम्। ग्रामेकम्बलस्तवस्वम्। ग्रामेकम्बलस्तेस्वम्। ग्रामेकम्बलोममस्वम्। ग्रामेकम्बलोमेस्वम्। अनन्वादेशइतिकिमर्थम्। अथोग्रामेकम्बलस्तेस्वम्। अथोग्रामेकम्बलोमेस्वम्। अपरआह। सर्वएववान्नावादयोऽनन्वादेशेविभाषावक्तव्याः। कम्बलस्तेस्वम्। कम्बलस्तवस्वम्। कम्बलोमेस्वम्। कम्बलोममस्वम्। अनन्वादेशइतिकिमर्थम्। अथोकम्बलस्तेस्वम्। अथोकम्बलोमेस्वम्। नतर्हीदानीमिदंवक्तव्यंसपूर्वायाविभाषेति। वक्तव्यम्। किंप्रयोजनम्॥

त्वत्कर्तृकेणपाकेनत्वत्स्वामिकोमत्कर्तृकेणपाकेनमत्स्वामिकश्चौदनोभविष्यतिइत्येवंरूपपाकस्ययुष्मदस्मदर्थस्यचान्यपेक्षात्तीत्यादेशप्रसङ्गः। पश्यार्थैश्चेति। विधौसमानवाक्यग्रहणंकृतंप्रतिषेधश्चायमितिवाक्यान्तरारम्भः। तेनसमानवाक्येपश्यार्थैर्युक्तेयुक्तायुक्तेचयुष्मदस्मदर्थेआदेशप्रतिषेधः। संप्रेक्ष्यसंदृश्यसमीक्ष्येतिपर्यायत्वाद्विकल्पेनैषांप्रयोगः। भाष्येतुपश्यार्थैरित्यर्थग्रहणप्रयोजनकथनायैषामुपादानम्॥ सपू॥ युष्मदस्मदोरिति। सपूर्वायाःप्रथमायाविभाषेतियोविकल्पःसोऽनन्वादेशेभवतिअन्वादेशेतुनित्यआदेशविधिरित्यर्थः व्यवस्थितविभाषेयमित्युक्तंभवति॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै अन्वादेशार्थमिति। विरोधात्पूर्वेवाक्यंयुष्मदस्मदोरन्यतरस्यामनन्वादेशइतिबाध्यतेतेनान्वादेशानन्वादेशयोः सपूर्वायाः प्रथ ८ १ १
१५ मायाविभाषाभवति॥ तिङो॥ पाठविशेषणमिति-पठ्यतइतिपाठः संनिवेशविशेषोग्रन्थसंदर्भउच्यतेएतयोरेवार्थयोर्गोत्रादि
व्यपदेशंप्रतिपद्यन्तेनान्यत्रेत्यर्थः। अयंचार्थोयोगविभागेनलभ्यते। तिङोगोत्रादीनीत्येकोयोगोऽनुदात्तविध्यर्थः॥ कुत्स
नाभीक्ष्ण्ययोरितिद्वितीयोगोत्रादीनीत्यस्यानुवृत्त्यापरिभाषार्थः। इहशास्त्रेगोत्रादीनिकुत्सनाभीक्ष्ण्यविषयाण्येवग्राह्या

अन्वादेशार्थम्॥ अन्वादेशेविभाषायथास्यात्। अथोग्रामेकम्बलस्तेस्वम्। अथोग्रामेकम्बलस्तवस्वम्। अथोग्रामेकम्ब
लोमेस्वम्। अथोग्रामेकम्बलोममस्वम्॥ तिङोगोत्रादीनिकुत्सनाभीक्ष्ण्ययोः॥ किमिदंतिङोगोत्रादिषुकुत्सनाभीक्ष्ण्यग्रह
णंपाठविशेषणम्। कुत्सनाभीक्ष्ण्ययोरर्थयोर्गोत्रादीनिभवन्तितिङः पराण्यनुदात्तानिभवन्ति। आहोस्विदनुदा
त्तविशेषणंतिङः पराणिगोत्रादीनिकुत्सनाभीक्ष्ण्ययोरर्थयोरनुदात्तानिभवन्तीतितिङोगोत्रादिषुकुत्सना
भीक्ष्ण्यग्रहणं पाठविशेषणम्। तिङोगोत्रादिषुकुत्सनाभीक्ष्ण्यग्रहणंक्रियतेपाठविशेषणम्। पाठेविशेष्यते।
अनुदात्तविशेषणेह्यन्यत्रगोत्रादिग्रहणेकुत्सनाभीक्ष्ण्यग्रहणम्। अनुदात्तविशेषणेहिसत्यन्यत्रगोत्रादिग्र
हणेकुत्सनाभीक्ष्ण्यग्रहणंकर्तव्यंस्यात्। चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेरितिकुत्सनाभीक्ष्ण्ययोरिति
वक्तव्यंस्यात्॥ अनुदात्तग्रहणंवा॥ अथवायान्यनुदात्तानीतिवक्तव्यंस्यात्। तस्मात्सुष्ठूच्यते। तिङोगोत्रा
दिषुकुत्सनाभीक्ष्ण्यग्रहणंपाठविशेषणं। अनुदात्तविशेषणेहिअन्यत्रगोत्रादिग्रहणेकुत्सनाभीक्ष्ण्यग्रहणं
म्॥ अनुदात्तग्रहणंवेति॥ तिङ्तिङः॥ अतिङ्इतिकिमर्थम्। पचतिकरोति। अतिङ्वचनमनर्थकंसमानवाक्या
धिकारात्॥ अतिङ्वचनमनर्थकम्। किंकारणम्। समानवाक्यइतिवर्तते। नचसमानवाक्येद्वौतिङन्तौस्तः॥

णीति। तिङ्तिङः॥ पचतिकरोतीति। विनापिचशब्देनसमुच्चयावगमात्संबन्धसद्भावः॥ नचेति। आख्यातंसाव्ययका
रकविशेषणंवाक्यमितिनिघातादिव्यवस्थायेवाक्यस्यपरिभाषणादाख्यातमित्येकत्वस्यविवक्षितत्वादेकैकस्याख्या रा म
तस्यवाक्यत्वाद्द्वयोराख्यातयोरेकवाक्यताभावः॥ आख्यातमित्येकत्वस्याविवक्षाशङ्कास्यादितिद्वितीयंवाक्यलक्ष
णंवाक्यकारेणपठितमेकतिङ्वाक्यमितिअत्रैकशब्देनयत्नेनसंख्याप्रतिपाद्यते॥ ॥ ॥ १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निपातैः। यत्कूजतीति। इणः शतरि इणो यणिति यणि रूपम्। यतीति। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति प्रा
प्तिः॥ यन्निति। संयोगान्तलोपस्यासिद्धत्वात्तन्मध्यपतितस्य नुमस्तद्ग्रहणेन ग्रहणात्प्राप्तिः। लक्षणप्रतिपदोक्तयोरिति।
लाक्षणिकस्यानुमानेन रूपावधारणं प्रतिपदोक्तस्य तु प्रत्यक्षेण। प्रत्यक्षानुमानयोश्चाविलम्बितप्रतीतिरूपत्वात्तत्र प्रत्य
क्षं बलीयः॥ यावदिति। यत्परिमाणमस्येति वतुबन्तस्य यावच्छब्दस्य लाक्षणिकत्वात्कृणवदित्यस्य लेडन्तस्य निघात
प्रतिषेधो न स्यात्। निपातस्यैव तु ग्रहणं स्यात्॥ तत्र यदा प्रायोगिकं रूपमाश्रीयते तदा शास्त्रानपेक्षणाल्ल क्षणप्रतिपदोक्त
योरिति परिभाषा नोपतिष्ठते। शास्त्रापेक्षायां वा प्रत्यक्षानुमानयोः समकक्षत्वाश्रयणे॥ तत्र निपातग्रहणमिह प्रकरणे ए

निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्॥ निपातैरिति किमर्थम्। यत्कूजति शकटम्। यती कूजति शक
टी। यनूरथः कूजति॥ निपातैरिति शक्यमवक्तुम्। कस्मान्न भवति यत्कूजति शकटम्। यती कूजति शकटी। यन्कू
जति रथ इति॥ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। नैषा परिभाषेह शक्या विज्ञातुम्। इह हि दोषः स्यात्। या
वद्यथाभ्याम्। इह न स्यात्। यावदस्य न्नैषः सरोजनेभ्यः कृणवत्। चण्णिद्विशिष्टश्चेदर्थे द्रष्टव्यः॥ अयं च वै मरिष्यति
। अयं चेन्मरिष्यति। न च पितृभ्यः पूर्वेभ्यो दास्यति॥ अभायश्चित्तिकवौ च स्याताम्। छन्दस्यनेकमपि साकाङ्क्षम्॥ कि
मुदाहरणम्। यदा हि असौ मत्तो भवति। अथ यत्तपति। नैतदस्ति। एकमत्र हियुक्तमपरं यद्युक्तम्। तत उभयोरप्य॰
निघातः॥ इदं तर्हि अनृतं हि मत्तो वदति पाप्मा एनं पुनाति। एकं खल्वपि। अग्निर्हि पूर्वमुदजयत्तमिन्द्रो नूदजयदिति॥

तत्परिभाषानाश्रयणस्य लिङ्गम्। चेदर्थ इति॥ आशङ्कावधारणादिकश्चेदर्थः॥ अयं च वै मरिष्यतीत्याशङ्का गम्यते॥ अ
प्यर्थो वा अपि मरिष्यत्ययं न च दास्यतीति॥ छन्द॥ हेतुहेतुमद्भावस्य द्योतको हिरित्यनेकमपि तिङन्तं हियुक्तं भवति। उभ
योरप्यनिघात इति। लक्षणान्तरेण हि चेति निनिपातैर्यद्यदीति। यद्यपि द्वे हियुक्ते तथापि द्वितीयस्यानिघातकारणान्तरसद्भा
वादेकं हियुक्तम्॥ इदं तर्हीति॥ अनिघातकारणान्तराभावात्। पाप्मा एन उच्यते॥ यस्मान्मत्तोऽनृतं वदति तस्मादनृतवद
नदोषेण न युज्यते इत्यर्थः॥ उदजयदिति॥ एकमजयदिति पदमट्स्वरेणाद्युदात्त मपरमनुदात्तं तत्र पूर्वेणानेकस्य निघात
निषेधे प्राप्ते क्वचिदनेकस्य क्वचिदेकस्य यथा स्यादिति वचनम्। तत्र छन्दसि दृष्टानुविधानाद्यथाप्रयोगं व्यवस्था॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 तुपश्य॥ अनिघातेनेति। यावद्यथाभ्यामित्यनेनानिघातः प्राप्तः पूजायां नानन्तरमिति प्रतिषिद्धः। इह त्वनिघात इष्यत इति पुनः पू
 जाग्रहणम्। एहि। आङ्पूर्वादिणो लोट् सिपो हिरादेशः। एहि मन्य इति॥ अप्र हासे पि वै यधिकरण्यात् उत्तमप्रयोगः एहि
त्वं रथेन यास्यसीत्येवमहं मन्य इत्यर्थः। यास्यसीत्यस्य निघातो भवत्येव। उत्तमस्यातन्त्रत्वादेहि मन्ये से रथेन यास्यामीति
अत्रापि नियमादनिघाताभाव इति केचिदाहुः॥ जात्व॥ किमिदमिति। निमित्तनिमित्तिसन्निधौ सति संदेहात्प्रश्नः। कथंज्ञा

तुपश्य पश्यता हैः पूजायाम्॥ पूजायामिति वर्तमाने पुनः पूजाग्रहणं किमर्थम्॥ अनिघातप्रतिषेधाभिसंबद्धं तद्भू
त्। यदि तदनुवर्तते॥ इहाप्यनिघातप्रतिषेधः प्रसज्येत। इष्यते चात्रानिघातप्रतिषेधः॥ यथा पुनस्तत्र यावद्यथा
इत्येताभ्यामनिघाते प्राप्ते अनिघातप्रतिषेध उच्यते। इहेदानीं केनानिघाते प्राप्ते अनिघातप्रतिषेध उच्यते। इ
हापि यद्वृत्तान्नित्यमित्येवमादिभिः॥ एहि मन्ये प्रहासे लृट्॥ किमर्थमिदमुच्यते। नगत्यर्थलोटा लृडित्येव सिद्धम्। नियमा
र्थोऽयमारम्भः॥ एहि मन्ये प्रहास एव। क्व मा भूत्। एहि मन्ये रथेन यास्यसीति॥ जात्वपूर्वम्॥ किमिदमपूर्वग्रहणं
जातुविशेषणम्। जातुशब्दादपूर्वं तिङन्तमिति॥ आहोस्वित्तिङन्तविशेषणम्। जातुशब्दात्तिङन्तमपूर्व
मिति॥ जातुविशेषणमित्याह। कथं ज्ञायते। यदयं किंवृत्तं चचिदुत्तरमित्याह। कथं कृत्वा ज्ञापकम्॥ अत्राप्य
पूर्वमित्येतदनुवर्तते। न चास्ति संभवो यत्किंवृत्तं च चिदुत्तरं स्यात्तिङन्तं चापूर्वम्॥ अत्रापि तिङन्तविशेषण
मेव स्यात्। कथम्। किंवृत्ताच्चिदुत्तरात्तिङन्तमपूर्वमिति॥

यत इति। निमित्तस्याप्राधान्यात्सति प्रधाने विशेषणसंबन्धयोग्ये न युक्तो विशेषणसंबन्ध इति प्रश्नः। तिङन्तं चापूर्वमिति
। चिदुत्तरात्किंवृत्तात्परस्य तिङन्तस्य विद्यमानपूर्वत्वात्। अत्रापीति। कश्चिद्भुङ्क्ते इत्यादावेवानिघातो यथा स्यात् कश्चि
त्पुरुषो भुङ्क्ते इत्यादौ व्यवधाने मा भूदित्येवमर्थं तिङन्तविशेषणमपूर्वग्रहणं स्यात्॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

यत्तर्हीति। तिङन्तविशेषणेह्यपूर्वग्रहणेनन्तरमेवापूर्वं भवतीत्याहोदेवदत्तः पचतीतिसपूर्वत्वादेवानिघातोनभविष्यतीति
किमनन्तरग्रहणेनतस्मान्निमित्तविशेषणमपूर्वग्रहणमित्यनुमीयते· तथाचाहोदेवदत्तःपचतीतिसपूर्वत्वादनिघातः
स्यादितिकर्तव्यमनन्तरग्रहणम्॥ इत्युपाध्यायजैयटपुत्रकैय्यटकृतेमहाभाष्यप्रदीपेअष्टमस्याध्यायस्यप्रथमेपा
देप्रथममाह्निकम्॥ ॥गत्यर्थालृटइति। निघातप्रतिषेधएवप्रकृतिभावः। कर्तुरितिपञ्चमीकर्तुरन्यत्कारकंकर्मादि
तस्यान्यत्वइत्यर्थः। आगच्छेति॥भोजनगमनयोरेकोदेवदत्तः कर्ताकर्मतुग्रामोगमनस्यौदनोभोजनस्येतिकर्मभे

यत्तर्ह्याहोउताहोचानन्तरमित्यनन्तरग्रहणंकरोति॥ एतस्याप्यस्तिवचनेप्रयोजनम्। किम्। शेषप्रक्लृप्त्यर्थमेतत्स्या
त्। शेषेविभाषा। कश्चशेषः सान्तरेशेषइति। अन्तरेणाप्यनन्तरग्रहणंप्रक्लृप्तःशेषः। कथम्। अपूर्वइतिवर्तते। शे
षेविभाषा। कश्चशेषः सपूर्वःशेषइति॥ ॥इतिश्रीभगवत्पतञ्जलिविरचितेव्याकरणमहाभाष्येअष्टमाध्यायस्यप्रथमे
पादेप्रथमाह्निकम्॥ ॥गत्यर्थलोटालृण्नचेत्कारकंसर्वान्यत्॥ लृटः प्रकृतिभावेकर्त्रन्यत्वउपसंख्यानंकार
कान्यत्वात्। लृटःप्रकृतिभावेकर्त्तुर्यदन्यत्कारकंतस्यान्यत्वउपसंख्यानंकर्त्तव्यम्। आगच्छदेवदत्तग्राममोदनं
भोक्ष्यसे। किंपुनः कारणंनसिध्यति। कारकान्यत्वात्। नचेत्कारकंसर्वान्यदित्युच्यते। सर्वान्यच्चात्रका
रकम्॥ किंपुनःकारणंसर्वान्यत्प्रतिषेधेनाश्रीयतेनपुनरसर्वान्यद्विधानेनाश्रीयते कर्त्राचात्रासर्वान्य
त्कारकम्। तत्रकर्तृसामान्यात्सिद्धम्। कर्तृसामान्यात्सिद्धमितिचेत्तद्भेदेप्यन्यसामान्येप्रकृतिभावप्र
सङ्गः। कर्तृसामान्यात्सिद्धमितिचेत्तद्भेदेकर्तृभेदेअन्यस्मिन्कारकेसमानेप्रकृतिभावःप्राप्नोति। आहर
देवदत्तशालीन् यज्ञदत्तएतान्भोक्ष्यते। एवंतर्हिव्यक्तमेवपठितव्यम्। नचेत्कर्त्ता सर्वान्योभवतीति॥

दादनिघाताप्रसङ्गः। कारकशब्देनसूत्रेकारकव्यक्तिराश्रीयतेतेनकर्मत्वाभेदेऽपिग्रामौदनव्यक्तिभेदात्कारकभे
दः। किंपुनरितिति। कारकमत्रनसर्वमन्यत्कर्मभेदेऽपिकर्तुरेकत्वादित्यनिघातोभविष्यतीत्यर्थः। आहरेति। अत्रापिनस
र्वान्यत्कारकंशालिलक्षणकर्मैकत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा-कै॰ यह्वि। यह्वावेरिति॥ निपातैर्यद्यदीतिहि चेतितु पश्येतिसूत्रे॰जायेस्वोरोहावेहीति॥ आङ्पूर्वाद्दिणोलोटः सिपोहिः गत्यर्थले ८ १ २
१८ टायुक्तस्यरोहावेत्यस्यलोट्चेत्यनिघातःप्राप्तोऽनेननियमेननिवर्त्यतइतिस्वःशब्दाश्रयोनिघातोभवति। ननुपरमपि
छन्दसीतिवचनात् स्वःशब्दस्यपूर्वाङ्गवद्भावाज्जायेस्वरित्यस्यामन्त्रितंपूर्वमविद्यमानवदित्यविद्यमानवत्वान्नि
घातोनैवप्राप्नोति। नैषदोषः। अव्ययानाप्रतिषेधइतिवचनात्परस्यपूर्वाङ्गवत्वाभावादव्ययस्य। यद्वा। षष्ठ्यामन्त्रित
कारकवचनंतन्निमित्तवचनंवा अङ्गवद्भावेआश्रितमितिनास्तिपूर्वाङ्गवद्भावो नहिस्वःशब्दः षष्ठ्यन्तोनाप्यामन्त्रितकार
कंनापितन्निमित्तम्। स्वरेवापूर्वाङ्गवत्वविधिर्नाविद्यमानवत्वे॥ अथेदानीमिति। आङः परस्येहीत्यस्यनिघातइष्यते

यह्वितुपरंछन्दसि। किमर्थमिदमुच्यते। यदायैः सर्वैरेतैर्निघातकारणैर्योगेऽनिघातउच्यते। यथैवपूर्वैर्योगेएवंपरैरपि। अत
उत्तरंपठति॥ यह्वितुपरस्यच्छन्दस्यनिघातोन्यपरप्रतिषेधार्थः। यह्वितुपरस्यच्छन्दसिअनिघातउच्यते अ
न्यपरस्यप्रतिषेधार्थः। अन्यपरस्यप्रतिषेधोमाभूदिति। जायेस्वोरोहावेहि। अथेदानीरोहावेत्यनेनयुक्तेए
हीत्यस्यकस्मान्नभवति॥ लोट्चगत्यर्थलोटायुक्तइतिप्राप्नोति॥ नहिरुहिर्गत्यर्थः॥ कथंज्ञायते। यदयंग
त्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेतिपृथग्रुहिग्रहणंकरोति॥ ॥ ॥

नचप्राप्नोतिलोट्चेतिनिषेधात्केवलोपिरुहिश्छन्दसिगत्यर्थोदृश्यतइत्याङ्इणायोगोनरुहिणा। छन्दसिपरेऽपीति
वचनात्। यदितुरुहिणाङोयोगःस्यात्तदानानावाक्यत्वादाङोनिघातोनस्यात्। ननुनित्यत्वादेकादेशेकृतेव्यपवर्गाभा
वादुभयतआश्रयेऽन्तादिवद्भावनिषेधाच्चनिघातोनप्राप्नोति। एवंतर्ह्यस्मादेवभाष्यकारविचारादनुमीयतेप्राङ्निघातस्तत
एकादेशइति॥ नहिरुहिरिति। येषामुपसर्गयोगाद्विनागतिप्रतीतिहेतुत्वंतेगत्यर्थाः रुहिस्तूपसर्गयोगेगतिवाची।
यद्वावष्टम्भवाचीरुहिः गतिस्तुनद्रवद्रवक्रियेतिभावः। यदयमिति॥ अनुपसर्गस्यरुहेरकर्मकत्वात्कर्त्तरिक्तःसिद्धः राम॰
सोपसर्गस्यतुगत्यर्थत्वादितिकिंरुहिग्रहणेनतत्क्रियमाणमुपसर्गयोगेनविनायेगत्यर्थास्तेगत्यर्थग्रहणेनगृह्य
न्ते। अथवारुहिरवष्टम्भवाचीतद्रवद्रवस्तुगतिः सत्यपिवागत्यर्थत्वेगत्यर्थग्रहणेनरुहिर्नगृह्यतेइतिज्ञापयति॥ ॥ १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्तर्हीति। तिङन्तविशेषणे ह्यपूर्वग्रहणेनानन्तरमेवापूर्वं भवतीत्याहो देवदत्तः पचतीति सपूर्वत्वादेवा निघातो न भविष्यतीति
किमनन्तरग्रहणेन तस्मान्निमित्तविशेषणमपूर्वग्रहणमित्यनुमीयते· तथा चाहो देवदत्तः पचतीति सपूर्वत्वादनिघातः
स्यादिति कर्त्तव्यमनन्तरग्रहणम्॥ इत्युपाध्यायजैयटपुत्रकैय्यटकृते महाभाष्यप्रदीपे अष्टमस्याध्यायस्य प्रथमे पा
दे प्रथममाह्निकम्॥ ॥गत्यर्थो लृटद्इति। निघातप्रतिषेध एव प्रकृतिभावः। कर्तुरिति पञ्चमी कर्तुरन्यत्कारकं कर्मादि
तस्यान्यत्वइत्यर्थः। आगच्छेति॥ भोजनगमनयोरेको देवदत्तः कर्ता कर्म तु ग्रामो गमनस्यौदनो भोजनस्येति कर्मभे

यत्तर्ह्याहो उताहो चानन्तरमित्यनन्तरग्रहणं करोति॥ एतस्याप्यस्ति वचने प्रयोजनम्। किम्। शेषप्रक्लृप्त्यर्थमेतत्स्या
त्। शेषे विभाषा। कश्च शेषः सान्तरे शेपद्इति। अन्तरेणाप्यनन्तरग्रहणं प्रक्लृप्तः शेषः। कथम्। अपूर्वइतिवर्तते। शे
षे विभाषा। कश्च शेषः सपूर्वः शेषइति॥ ॥इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये अष्टमाध्यायस्य प्रथमे
पादे प्रथममाह्निकम्॥ ॥गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत्॥ लृटः प्रकृतिभावे कर्त्रन्यत्वउपसंख्यानं कार
कान्यत्वात्॥ लृटः प्रकृतिभावे कर्तुर्यदन्यत्कारकं तस्यान्यत्वउपसंख्यानं कर्त्तव्यम्। आगच्छ देवदत्त ग्राममोदनं
भोक्ष्यसे। किं पुनः कारणं न सिध्यति। कारकान्यत्वात्। न चेत्कारकं सर्वान्यदित्युच्यते। सर्वान्यच्चात्र का
रकम्॥ किं पुनः कारणं सर्वान्यत्प्रतिषेधेनाश्रीयते न पुनरसर्वान्यद्विधानेनाश्रीयते कर्त्रा चात्रासर्वान्य
त्कारकम्। तत्र कर्तृसामान्यात्सिद्धम्। कर्तृसामान्यात्सिद्धमिति चेत्तद्भेदेप्यन्यसामान्ये प्रकृतिभावप्र
सङ्गः। कर्तृसामान्यात्सिद्धमिति चेत्तद्भेदे कर्तृभेदे अन्यस्मिन्कारके समाने प्रकृतिभावः प्राप्नोति। आहर
देवदत्त शालीन् यज्ञदत्त एतान्भोक्ष्यते। एवं तर्हि व्यक्तमेव पठितव्यम्। न चेत्कर्त्ता सर्वान्यो भवतीति॥

राद निघाताप्रसङ्गः। कारकशब्देन सूत्रे कारकव्यक्तिराश्रीयते तेन कर्मत्वाभेदेऽपि ग्रामौदनव्यक्तिभेदात्कारकभे
दः। किं पुनरिति। कारकमत्र न सर्वमन्यत्कर्मभेदेऽपि कर्तुरेकत्वादित्यनिघातो भविष्यतीत्यर्थः। आहरेति। अत्रापि न स
र्वान्यत्कारकं शालिलक्षणकर्मैकत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ यद्धि। यदाद्येरिति॥ निपातैर्यद्यदीतिहिचेतितु पश्येतिसूत्रे॥ जायेस्वोरोहावेहीति॥ आङ्पूर्वाद्दिणोलोटः सिपोहिः गत्यर्थले ८ १ २
१८ टायुक्तस्यरोहावेत्यस्यलोट्चेत्यनिघातःप्राप्तोऽनेननियमेन निवर्त्त्यतइतिस्वःशब्दाश्रयोनिघातोभवति। ननुपरमपि
छन्दसीति वचनात् स्वःशब्दस्यपूर्वाङ्गवद्भावाज्जायेस्वरित्यस्यामन्त्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्वान्नि
घातोनैवप्राप्नोति। नैषदोषः। अन्यथानाप्रतिषेधइतिवचनात्परस्यपूर्वाङ्गवत्वाभावादव्ययस्य। यद्वा। षष्ठ्यामन्त्रित
कारकवचनंतन्निमित्तवचनंवा अङ्गवद्भावेआश्रितमितिनास्तिपूर्वाङ्गवद्भावोनहिस्वःशब्दःषष्ठ्यन्तोनाप्यामन्त्रितकार
कंनापितन्निमित्तम्। स्वरेवापूर्वाङ्गवत्वविधिर्नाविद्यमानवत्वे॥ अथेदानीमिति। आङःपरस्येहीत्यस्यनिघातइष्यते

यद्धितुपरंछन्दसि॥ किमर्थमिदमुच्यते॥ यदाद्यैःसर्वैरेतैर्निघातकारणैर्योगेऽनिघातउच्यते। यथैवपूर्वैर्योगएवंपरैरपि। अत
उत्तरंपठति॥ यद्धितुपरस्यच्छन्दस्यनिघातोन्यपरप्रतिषेधार्थः। यद्धितुपरस्यच्छन्दसिअनिघातउच्यते अ
न्यपरस्यप्रतिषेधार्थः। अन्यपरस्यप्रतिषेधोमाभूदिति। जायेस्वोरोहावेहि। अथेदानीरोहावेत्यनेनयुक्तेए
हीत्यस्यकस्मान्नभवति॥ लोट्चगत्यर्थलोटायुक्तइतिप्राप्नोति॥ नहिरुहिर्गत्यर्थः॥ कथंज्ञायते। यदयंग
त्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेति पृथग्रुहिग्रहणंकरोति॥ ॥ ॥

नचप्राप्नोतिलोट्चेतिनिषेधात्केवलोपिरुहिश्छन्दसिगत्यर्थोदृश्यतइत्याङ्इणायोगोनरुहिणा। छन्दसिपरेऽपीति
वचनात्। यदितुरुहिणाङोयोगःस्यात्तदानानावाक्यत्वादाङोनिघातोनस्यात्। ननुनित्यत्वादेकादेशेकृतेव्यपवर्गाभा
वादुभयतआश्रयेऽन्तादिवद्भावनिषेधाच्चनिघातोनप्राप्नोति। एवंतर्ह्यस्मादेवभाष्यकारविचारादनुमीयतेभाङ्निघातस्तत
एकादेशइति॥ नहिरुहिरिति। येषामुपसर्गयोगाद्धिनागतिप्रतीतिहेतुत्वंतेगत्यर्थाःरुहिस्तूपसर्गयोगेगतिवाची।
यद्वावष्टम्भवाचीरुहिःगतिस्तुनदवयवक्रियेतिभावः। यदयमिति॥ अनुपसर्गस्यरुहेरकर्मकत्वात्कर्त्तरिक्तःसिद्धः राम॰
सोपसर्गस्यतुगत्यर्थत्वा॥ दितिकिंरुहिग्रहणेनतत्क्रियमाणमुपसर्गयोगेनविनायेगत्यर्थास्तेगत्यर्थग्रहणेनगृह्य
न्ते। अथवारुहिरवष्टम्भवाचीतदवयवस्तुगतिःसत्यपिवागत्यर्थत्वेगत्यर्थग्रहणेनरुहिर्नगृह्यतेइतिज्ञापयति॥ ॥ १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदीति। उपसर्गयोगेपि ये यदर्थास्ते तदर्थग्रहणेन गृह्यन्ते यथा हरतिरभ्यवपूर्वः प्रत्यवसानार्थ इति तद्ग्रहणेन गृह्यते तथा च हृ
क्रोरन्यतरस्यामित्युभयत्र विभाषा प्रतिपादिता तस्माद्रुहेर्गत्यर्थग्रहणेनावश्याभ्युपेयं ग्रहणं केवलोऽपि रुहिश्छन्दसि ग
तौ प्रयुज्यत इति भागे वोक्तं गतिरेव रुहेरर्थोऽवष्टम्भस्तु तत्फलमित्यभ्युपेयं गत्यर्थाकर्मकेत्यत्र तु रुहिग्रहणं प्रपञ्चार्थम्॥ च
न॥ शुक्ली करोति च नेति॥ अगतेरिति प्रतिषेधाभावादत्रानिघातो भवत्येव॥ यत्काष्ठमिति॥ शुक्लीशब्दस्य तु निघातो न भ
वति॥ सर्वत्रेति॥ चादिषु च च वा योगे प्रथमेत्येतयोरगतिग्रहणमनुवर्तत इति तत्राप्युपसर्ग एव गतिः॥ यद्वृत्त॥ यद्वृत्तादि

यद्वि नगत्यर्थः आरोहन्ति हस्तिनं मनुष्याः। आरोहयति हस्ती स्थलं मनुष्यान्। गतिबुद्धिप्रत्यवसानार्थशब्दकर्मा
कर्मकाणामणि कर्ता स णाविति कर्मसंज्ञां न प्राप्नोति॥ तस्मान्नेन च्छक्यं वक्तुं न रुहिर्गत्यर्थ इति। कस्मात्तर्हि रोहावेस
नेन युक्ते एहीत्येतस्य न भवति। छान्दसत्वात्॥ च न चिदिव गोत्रादि तद्धिताम्रेडितेष्वगतेः॥ आम्रेडितेष्वगतेः सगतिरपि तिङ् इ
त्यत्र गतिग्रहणं उपसर्गग्रहणं कर्तव्यम्। इह मा भूत्। शुक्ली करोति च न। कृष्णी करोति च न। यत्काष्ठं शुक्ली करोति। अपर
आह सर्वत्रैवाष्टमिके गतिग्रहणे उपसर्गग्रहणं द्रष्टव्यं गतिर्गतौ तिङि चोदात्तवति वर्जमिति॥ यद्वृत्तान्नित्यम्॥ यद्वृत्ता
दित्युच्यते तत्रेदं न सिध्यति॥ यः पचति। यं पचति। येन पचतीति॥ वृत्तग्रहणेन तद्धि भक्तस्य नं प्रतीयात्॥ कथं
यतरः पचति यतमः पचतीति। डतरडतमौ च प्रतीयात्। कथं यदा ददातीति॥ एषोपि विभक्तिसंज्ञः। कथं
यावदस्य उषः सरोजनेभ्यः कृणवत्॥ यावद्यथाभ्यामित्येव भविष्यति। कथं यद्र्यङ् वायुः पवते यत्कामास्ते
जुहुमः॥

त्युच्यते इति॥ वृत्तमुच्चारणमुच्यते॥ यस्मात्परादिवृत्तमिति। ततश्चेहैव स्याद्यस्य न नीति॥ वृत्तग्रहणेनेति। वृत्तशब्दोऽधिकर
णसाधनो वर्तते ऽस्मिन्निति वृत्तं यदो वृत्तं यद्वृत्तमधिकरणवाचिना चेति प्रतिषेधे प्राप्ते ऽत एव निपातनात्समासः॥ यदाद
दातीति। स्वादय एव विभक्तित्वेन प्रसिद्धा इति प्रश्नः। एषोऽपीति॥ प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञाविधानात्॥ याव
द्यथाभ्यामिति। निपातैर्यद्यदीति निपातग्रहणाल्लिङ्गाल्लक्षणप्रतिपदोक्तयोरिति परिभाषानाश्रीयत इत्युक्तम्॥ य
द्र्यङिति। यदञ्चतीति क्विन्। विष्वग्देवयोश्चेति टेरद्र्यादेशः॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा कै यदस्मिन्निति। सर्वपदं यच्छब्दवद् वृत्तग्रहणेन गृह्यत इत्यर्थः॥ पञ्चमीनिर्देशेऽप्यत्र व्यवहितस्य कार्यं भवतीति पूजनात्तत् ८ १ २
१० पूजितमित्यत्र पूजनग्रहणस्य संबन्धिशब्दत्वात्पूजितग्रहणे सिद्धे पुनः पूजितग्रहणेन ज्ञाप्यते॥ वायाथाकाम्य इति। या
थाकाम्यं यथेच्छं प्रवृत्तिः। देशकालावनपेक्ष्य। तत्र गम्यमाने वा निघातप्रतिषेधः॥ पूजनात्॥ काष्ठादिग्रहणमिति। का
ष्ठादिभ्य इति सूत्रे वार्तिकदर्शनात्केश्चित्प्रक्षिप्तम्॥ दारुणाध्यापक इति। क्रियाविशेषणं दारुणशब्दो द्वितीयान्तो य
था ग्रामं गत इत्यादौ गुणभूता या अपि क्रियायाः साधनेन योगः तथा विशेषणेनापि। तत्रैव चाधिकरण्यात्समासाभा

एवं तर्हि यदस्मिन्वर्तते यद्वृत्तं यद्वृत्तादित्येवं भविष्यति॥ वायाथाकाम्ये॥ वायाथाकाम्य इति वक्तव्यम्। यत्र क्वचन
यजते तद्देव यजन एव यजते॥ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः॥ पूजितस्यानुदात्तत्वे काष्ठादिग्रहणम्॥ पू
जितस्यानुदात्तत्वे काष्ठादिग्रहणं कर्तव्यम्। काष्ठादिभ्यः पूजनादिति वक्तव्यम्॥ इह मा भूत्। शोभनोऽध्यापकः। म
लोपवचनं च। मलोपश्च वक्तव्यः॥ दारुणाध्यापकः। दारुणाभिरूपकः॥ सगतिरपि तिङ्॥ सगतिग्रहणं किमर्थ
म्। सगतिग्रहणमपदत्वात्। सगतिग्रहणं क्रियते॥ अपदत्वात्। पदस्येति वर्तते। न च सगतिकं पदं भवति॥
उत्तरार्थं च। उत्तरार्थं चापि सगतिग्रहणं क्रियते॥ कुत्सने च सुप्यगोत्रादौ॥ पचति पूति। प्रपचति पूति। अथापि ग्र
हणं किमर्थम्। अगतिकस्यापि यथा स्यात्। यत्काष्ठं पचतीति। नैतदस्ति प्रयोजनम्। सिद्धं पूर्वेणागतिक
स्य। न सिध्यति। मलोपाभिसंबद्धं ननु। पदिति तत्तु वर्तते। इहापि मलोपः प्रसज्येत। दारुणं पचतीति॥ ७॥

वाद् मलोपो विधीयते। दारुणाभिरूपक इति॥ आभिरूप्यं दारुणशब्देन विशेष्यत इति दारुणस्य नपुंसकत्वं पूर्ववत्स
मासाभावः॥ सगतिः॥ सहशब्दोऽत्र तुल्ययोगे तेन गतिरपि निहन्यते॥ अपदत्वादिति। नन्वतिङन्तत्वादिति वक्तव्यं न राम
हि सगतिस्तिङन्तो भवति। उच्यते॥ अतिङन्तत्वादित्युच्यमाने मा भूदनेन सगते निघातः पूर्वेण तु कस्मान्न भवतीति
स्यादेव चोद्यं तत्रेदमेवाभिधानीयं स्याद् अपदत्वादिति। तस्मात्पूर्वोत्तरयोरपि योगयोर्यत्साधारणमुत्तरं तदेवोक्त १९
मपदत्वादिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिङ्ङ्घातादिति। पूजनात्पूजितमिती ह्यनुवर्तत इत्यनेन सह विप्रतिषेधोपन्यासो न तु पूर्वेण सह तस्य स्वबन्तविषयत्वात् तत्रैवमसंलोपस्येष्टत्वात्। काष्ठाध्यापक इति। पूर्वोत्तरयोः सूत्रयोरेकवाक्यत्वात् पूजनात्पूजितमित्येतदभिसंबन्धाच्चाभेदमाश्रित्यावकाशः प्रदर्शितः। यत्काष्ठपचतीति। निपातैर्यद्यदीति तिङ्ङ्घाते प्रतिषिद्धे अनेन निघातः प्रवर्तते। ननु च तिङ्ङः तिङ इति निघातस्य प्रतिषेधोपवादस्तस्यापि समगतिरपीति तिङित्यपवादः। तत्रापवादापवादत्वाद्धि प्रतिषे

उत्तरार्थं चापि ग्रहणं क्रियते। कुत्सने च सुप्यगोत्रादौ। अगतिरपीति। पचति पूतीति। तिङ्ङ्निघातात्पूजनात्पूजितमनुदात्तं विप्रतिषेधेन। तिङ्ङ्निघातात्पूजनात्पूजितमित्येतद्भवति विप्रतिषेधेन। तिङ्ङ्निघातस्यावकाशः। देवदत्तः पचति। पूजनात्पूजितमित्यस्यावकाशः। काष्ठाध्यापकः। काष्ठाभिरूपकः। इहोभयं प्राप्नोति। काष्ठं पचति पूजनात्पूजितमित्येतद्भवति विप्रतिषेधेन। कः पुनरत्र विशेषः तेन वास्यनेन वा। सापवादकः सविधिः। अयं पुनर्निरपवादकः। यदि हि तेन स्यात्। इह न स्यात्। यत्काष्ठपचति॥ कुत्सने च सुप्यगोत्रादौ॥ सुपि कुत्सने क्रियायाः क्रियायाः कुत्सन इति वक्तव्यम्। कर्तुः कुत्सने मा भूत्॥

धात्वनुपपत्तिः। नैतदस्ति। गतेरप्राप्त एवानेन निघातो विधीयत इति नास्त्यपवादापवादत्वम्। अपि ग्रहणं तूत्तरार्थमपि स्यादित्यपि ग्रहणादपि नास्यापवादापवादत्वम्। यद्वा पूर्वोत्तरयोर्योगयोरेककार्यत्वादभेदं विवक्षित्वा विप्रतिषेधोपन्यासः। तत्र येन नाप्राप्त इति वा मध्येऽपवादा इति वा तिङ्ङः तिङ इत्यस्यैव न लुङि त्यादिः प्रतिषेधोऽपवादः नत्वस्येति सापवादकः सविधिरित्युक्तम्॥ कुत्सने॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आ॰ कै॰ पचतिपूतिरिति। पूतिः कर्तुर्विशेषणं न क्रियायाः। इतिक्रियाकुत्सनाभावः। ननु क्रियाप्रधानत्वादाख्यातस्य विशेषणे ८१२
२० न योगः साधनस्य नोपपद्यते। नैतदस्ति॥ यदुपसर्जनं न हि त्वस्वार्थमुपसर्जनीभूतस्वार्थं वा ऽर्थान्तरे वर्तते तस्य न भव
ति विशेषणेन योगो यथा राजपुरुष इति राजशब्दस्य वृत्तिविषयस्य। वाक्यविषयस्य त्वर्थान्तरानुपादानाद्भवति वि
शेषणयोगो यथा मद्राणां राज्ञः पुरुषः ऋद्धस्य राज्ञः पुरुष इति॥ एवं साधनं क्रियां प्रति अङ्गभावं गच्छदपि एका
र्थीभावाभावाद्विशेषणेन युज्यते। तथा हि दन्तेः क्रियाउपलक्षणभावेनोपात्तात थैव विशेषणे र्युज्यते शोभनमध्याप
क इति। यथा तर्हि साधनस्य विशेषणेन योगः एवं क्रियान्तरेणापि प्राप्नोति तत्र यदुक्तं न हि भवति पचति पठतीनि तर्हि
रुध्यते॥ अथ मतं क्रियावशीकृतं क्रियारूपतामापन्नमाख्यातवाच्यं साधनं क्रियान्तरेण न संबध्यत इति विशेषणे
नाप्येवं न संबध्येत संबध्यमानं वा क्रियारूपतामापन्नं नपुंसकेन विशेषणेन संबध्येत। नैष दोषः। यथा भार्यापत्यु

पचति पूतिर्गिरति पूतिः। पूतिश्च चानुबन्धः। पूतिश्च चानुबन्धो द्रष्टव्यः। पचति पूतिः विभाषितं चापि बह्वर्थम्
॥ विभाषितं चापि बह्वर्थं द्रष्टव्यम्। पचन्ति पूति। पचन्ति पूति सुपि कुत्सने क्रियायाम् कारलोपो ऽतिङीति चो
क्तार्थम्॥ पूतिश्च चानुबन्धो विभाषितं चापि बह्वर्थम्॥

र्वनितान्तरसंबन्धं न सहते स्नानादिसंस्कारं तु स्वार्थमनुमन्यते। तथा क्रियाविशिष्टं साधनमात्मन्यङ्गत्वं गमयितुं तस्य वि
शेषणेन संबन्धं न प्रतिबध्नाति। क्रियान्तराङ्गत्वापत्तिस्तु स्वार्थविरोधिनीति तां नानुजानाति॥ पूतिश्चेति॥ पूतिरयमिति
सामानाधिकरण्यदर्शनात्पूतिशब्दो न क्तिन्नन्तो नापि क्तिजन्तो संज्ञात्वात् तस्मात्स्युत्पन्नं प्रातिपदिकम्॥ तत्र प्रातिपदिक
स्वरेणान्तोदात्तत्वे सिद्धे निघातनिमित्तस्य तस्यान्तोदात्तत्वं यथा स्यादन्यत्र त्वाद्युदात्तत्वमिति वचनमित्याहुः। नन्वाद्यु
दात्तत्वलक्षणाभावात्कथं स्यात्। एवं तर्हि वसेस्तिबिति तिबन्तो बाहुलकादुत्पाद्यः। विभाषितमिति। बह्वर्थे तिङन्तं वि
भाषा निहन्यते यदा च तस्य निघातस्तदा पूतिरन्तोदात्तः। अतिङीति। तिङन्ते मलोपो न भवति दारुणं पचतीति॥ उ २०
क्तार्थमिति। आचार्यपरंपराकथितप्रयोजनमेतदित्यर्थः॥

CC-0. In Public Domain. Digitization by eGangotri

गतिः॥ गतेः प्रयुक्तेवा तिङन्ते प्रयोगे गतियुक्ते वा। एवं कृदन्ते। रूढिशब्देषु तु गवाश्वादिषु क्रियाया अभावान्नास्ति गतेः प्रयोगः। तत्र कृदन्ते स गतावगतौ च कृत्स्वरथाथादिस्वरगतिस्वरेषु कृतेषु शेषनिघातेन गतेर्निघातस्य भावात्तिङि चोदात्तवतीति नियमादनुदात्ते तिङन्ते तत्प्रसङ्गात्पारिशेष्याज्ज्ञातावेव भविष्यतीति मत्वाह। गताविति किमर्थमिति। तिङ्युदात्तवत्येवेति। विपरीतनियमस्तु न भवति। तिङ्श्चोदात्तवत्ति नान्यत्र प्रकारकद्‌त्या दावितीष्टसिद्धये शास्त्रारम्भादनन्तरस्य वा नियमाच्छेषनिघाताव्याघातात्। आमन्द्रैरिति। तेप्राग्धातोरित्यत्र द्वौ पक्षौ प्रयोगनियमः संज्ञानियमो वा तत्र यदा प्रयोगनियमः धातोः प्रागेव गत्युपसर्गाः प्रयोक्तव्या इति। तदा छन्दसि परेऽपि व्यवहिता

गतिर्गतौ॥ गताविति किमर्थम्। प्रपचति। प्रकरोति॥ गतेरनुदात्तत्वे गतिग्रहणानर्थक्यं तिङवधारणात्। गतेरनुदात्तत्वे गतिग्रहणमनर्थकम्। किं कारणम्। तिङवधारणात्॥ तिङि चोदात्तवतीत्येतन्नियमार्थं भविष्यति। तिङ्युदात्तवत्येव गतिरनुदात्तो भवतीति। छन्दोऽर्थं तर्हि गतिग्रहणं कर्तव्यम्। छन्दसि गतौ परतोऽनुदात्तत्वं यथा स्यात्। मन्द्रशब्दे मा भूत्॥ आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः। छन्दोऽर्थमिति चेन्नागतित्वात्। छन्दोऽर्थमिति चेत्। तन्न। किं कारणम्। अगतित्वात्। यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवेतः। न चात्राङो मन्द्रशब्दं प्रति क्रियायोगः। किं तर्हि याहिशब्दं प्रति इहापि तर्हि न प्राप्नोति अभ्युद्धरति। समुदानयति उपसमादधातीति॥ ॥

श्चेत्यारब्धव्यम्। तत्रैव चेदमुक्तं प्राग्वचनं प्रयोगनियमार्थं चेदनुकरणस्येति करणपरप्रतिषेधो निष्टशब्दनिवृत्त्यर्थः छन्दसि परव्यवहितवचनं चेति॥ अस्मिन्पक्षे याहीत्येतदपेक्षयाऽऽङो गतित्वान्निघातप्रसङ्गः। यदा तु संज्ञानियमो धातोः प्राक्प्रयुज्यमाना गत्युपसर्गसंज्ञा भवन्ति न तु परेणापि व्यवहितादिति तदात्राङो गतित्वाभावान्निघातप्रसङ्गः। न चात्राङ् इति। मन्द्रशब्दस्य रूढिशब्दत्वात्क्रियावाचित्वाभावात्। ननु परनिमित्तानुपादाने यत्क्रियायुक्तास्तं प्रतीति कथं लभ्यते। उच्यते। पदस्येति अधिकारात्पदविधित्वात्समर्थपरिभाषोपस्थानात्तद्विशेषलाभः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाभेरुदं प्रतीति। उच्छब्दस्य क्रियावाचित्वाभावात्। उदमिति। उपसर्गः क्रियायाः समानाधिकरणो विशेषकः तत्रा
न्वयव्यतिरेकाभ्यां धातुः क्रियावचनः उपसर्गास्तु विशेषस्य वाचका इति धातूपसर्गसमुदायं क्रियाविशेषवचनं प्र
त्यमेर्गतित्वादवयवव्यतिरेकेण समुदायाभावादवयवमुदं प्रतिगतित्वमित्यर्थः। इहापीति। मन्त्रादिकरणमिन्द्र
कर्तृकं यानमाङा विशेष्यत इति समुदायं क्रियाविशेषवाचिनं प्रत्याङो गतित्वमिति गत्ताविति वक्तव्यम्। पूर्वं धातु
रिति। यान क्रिया आङा विशिष्टा मन्त्रादिभिः साधनैः संबध्यते इति न समुदायं प्रत्याङो गतित्वमपि तु याहीत्येतत्य
दं प्रतीत्यर्थः। अभिनिर्वृत्तस्येति। सतो ह्यर्थस्य विशेषणे न संबन्धो दृश्यते। साधनायत्तं च क्रियायाः सत्त्वमिति तस्याः

अत्रापि न अभेः रुदं प्रति क्रियायोगः। किं तर्हि हरतिं प्रति क्रियायोगः। नैष दोषः। उदं प्रत्यत्र क्रियायोगः। क
थम्। उद्धरति क्रियां विशिनष्टि। उद्धा विशिष्टां अभिर्विशिनष्टि। तत्र यत्क्रियायुक्ता इति भवत्येव संघातं
प्रति क्रियायोगः। इहापि तर्हि मन्त्रसाधना क्रिया आङाभिव्यज्यते। आयाहि मन्त्रैरिति। ननु च पूर्वं धातु
रुपसर्गेण युज्यते पश्चात्साधनेनेति। नैतत्सारम्। पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण। किं कारण
म्। साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि। अभिनिर्वृत्तस्य चोपसर्गेण विशेषः शक्यो वक्तुम्।
सत्यमेवमेतत्। यस्त्वसौ धातूपसर्गयोरभिसंबन्धः तमभ्यन्तरीकृत्य धातुः साधनेन युज्यते॥ ८ ॥

प्राक्साधनेन योगः पश्चादुपसर्गेण। कथमसती साधने नाभिसंबध्यत इति चेत्। साधनेन तस्या उत्पाद एव संबन्धः। त
तश्च साधनादवाप्तजन्मा क्रियोपसर्गेण विशेष्यत इत्युक्तं भवति। यस्त्वसाविति। नहि साधनादुत्पन्ना क्रियाऽन्यतो
विशेषं लभते अपि तु विशिष्टैव क्रिया साधनेनोत्पाद्यते ततश्च प्रयोक्ता विशिष्टायाः क्रियायाः साधनेन संबन्धं प्रतिपाद राम·
यितुं धातूपसर्गसमुदायं प्रयुङ्क्ते यथैव यानस्येदं साधनं न पाकादेरिति प्रतिपादनाय यातेः प्रयोग एवमागमनस्येदं
साधनं न गमनस्येति प्रतिपादयितुं सोपसर्गस्य प्रयोगः ततश्च परमार्थतो धातूपसर्गसंघात एव क्रिया वाची पृथ २१
गुपदेशस्तु धातूपसर्गयोरङ्गादिव्यवस्थार्थः ततश्चान्तरङ्ग उपसर्गयोः बहिरङ्गः साधनयोगः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आस्यतइति॥केवलआसिरकर्मकइतितस्मात्कर्तृभावयोर्लकारउत्पद्यतेउपसर्गयोगेतुअर्थान्तरवृत्तित्वात्सकर्मकत्वात्कर्मणिलकारोत्पत्तिः।यदितुप्राक्साधनेनसंबन्धःस्यात्ततोऽकर्मकत्वान्नकर्मणिलकारोनोपपद्यते।तस्मात्क्रियाविशेषप्रतिपादनायपूर्वंधातुरुपसर्गेणयुज्यतइत्याडोमन्त्रंप्रत्यगतित्वात्गताविति नकर्त्तव्यम्॥गतिनेति॥ऊर्ध्वताविशिष्टाहरतिक्रियागतिनाविशेष्यतेअभ्युद्धरतीत्यत्रेत्यर्थः।साधनइति। गताविस्यस्मिन्नसत्यामन्त्रे रित्यत्रमन्त्रशब्देसाधनाभिधायिनिपरतोनिघातःकथंनस्यादितिचोद्यम्।उत्तरमाह।बाह्यमिति।साधनंबाह्यंतत्संबन्धस्यबहिरङ्गत्वात्।धातूपसर्गयोस्त्वन्तरङ्गइतिमन्त्रप्रत्यगतित्वान्निघाताभावः॥तिङिचोदात्त॥तिङ्ग्रहणमिति।या

अवश्यंचैतदेवंविज्ञेयम्।योहिमन्यतेपूर्वंधातुःसाधनेनयुज्यतेपश्चादुपसर्गेणेति॥आस्यतेगुरुणेत्यकर्मकःउपास्यतेगुरुरितिकेनसकर्मकःस्यात्॥गतिनातुविशिष्टस्यगतिरेवविशेषकः॥साधनेकेनतेनस्याद्बाह्यमाभ्यन्तरोहिसः॥तिङिचोदात्तावति॥तिङ्ग्रहणंकिमर्थम्।तिङ्ग्रहणमुदात्तवतःपरिमाणार्थम्।तिङ्युदात्तवतियथास्यात्।मन्त्रशब्देमाभूत्।आमन्त्रैरिन्द्रहरिभिर्याहि।यद्योगाद्गतिः।यत्क्रियायुक्तास्तंप्रतिगत्युपसर्गसंज्ञेभवतःनचाङःमन्त्रशब्दंप्रतिक्रियायोगः।किंतर्हि।याहिशब्दंप्रति।यद्योगाद्गतिरितिचेत्तत्प्रत्ययोदात्तत्वेऽप्रसिद्धिः।यद्योगाद्गतिरितिचेत्तत्प्रत्ययोदात्तत्वेअप्रसिद्धिःस्यात्।प्रयत्नकरोति।तस्मात्तिङ्ग्रहणकर्त्तव्यम्॥

क्रियायत्क्रियायत्क्रिययायुक्तायक्रियायुक्ताइत्याश्रयणादव्याप्तिर्नभविष्यतिक्रियमाणेचतिङ्ग्रहणेऽव्याप्तिःप्रपचतितरामित्यामन्त्रेनिघाताप्रसङ्गादितिप्रश्नः।परिमाणार्थमिति।असतितिङ्ग्रहणेसर्वस्मिन्नुदात्तवतिनिघातःस्यादितितत्परिच्छेदायतिङ्ग्रहणमित्यर्थः॥आमन्त्रैरिति।मन्त्रशब्दोरक्प्रत्ययान्तोन्तोदात्तः।यद्योगादिति।गतिशब्दःपित्रादिशब्दवत्संबन्धिशब्दत्वात्संबन्धिनमाक्षिपतीतिक्रियावाचिनएवोदात्तवतोग्रहणनान्यस्येत्यर्थः।प्रत्ययोदात्तत्वइति।धातुरेवक्रियावाचित्वाद्गतिसंज्ञानिमित्तमितिधातावेवोदात्तवतिगतेनिर्घातःस्यान्नतुप्रत्यये।तिङ्ग्रहणात्तुपरिमाणार्थात् प्रत्ययोदात्तेनाप्युदात्तवतितिङन्तनिघातोभवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ प्रपचतितरामिति। यदा गतिकारकोपपदानां कृद्भिरेव समासो नान्येन स च प्राक् सुबुत्पत्तेरिति दर्शनं तदाम: स्वरेणोदात्तव-
२२ त्यामन्ते गतेर्निघात इष्यमाणस्तिङ्ग्रहणे सति न प्राप्नोत्यतिङन्तत्वादामन्तस्य। यदा त्वविशेषेण गतीनां समास: प्राक् ८ १२
सुबुत्पत्तेरिति पक्ष: तदामन्तेन प्रशब्दस्य समासे व्ययपूर्वपदप्रकृतिस्वरेण शेषनिघाते न च भाव्यम्। यदा तु गतिकारको-
पपदात्कृदिति अत्र कृद्ग्रहणप्रत्याख्यानादुत्तरपदप्रकृतिस्वरेण प्रशब्दस्य शेषनिघातस्तदा तिङ्ग्रहणस्याव्याप्तिदो-
षो न चोदनीय:। कस्मादिति। पूर्वं धातु: साधनेन युज्यते पश्चादुपसर्गेणेति दर्शने संघातं प्रति अस्य गतित्वात्प्राप्नोति।
यद्योगादिति। पूर्वमुपसर्गेण धातोर्योग: पश्चात्साधनेनेति प्रतिपादनात्। यस्य क्रियते। अन्वयव्यतिरेकाभ्यां यस्य वाच्य-
यदि तिङ्ग्रहणं क्रियते आमन्तेन प्राप्नोति प्रपचतितरां प्रजल्पतितराम्। असति पुनस्तिङ्ग्रहणे क्रियाप्रधानमा-
ख्यातं तस्मादतिशये तरउत्पद्यते तरबन्तात्स्वार्थे आम् तत्र यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इ-
ति भवत्येव संघातं प्रति क्रियायोग:। तस्मान्नार्थस्तिङ्ग्रहणेन। कस्मान्न भवति। आमन्द्रैरिन्द्र हरिभिर्याहि म-
यूररोमभि:। यद्योगादिति रिति। यद्योगादिति स्तं प्रति गत्युपसर्गसंज्ञे भवत: न चाङो मन्द्रशब्दं प्रति क्रिया-
योग:। ननु चोक्तं यद्योगादिति रिति चेत् प्रत्ययोदात्तत्वे अप्रसिद्धिरिति। नैष दोष:। यत्क्रियायुक्तादिति नैवं वि-
ज्ञायते यस्य क्रिया यत्क्रिया यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति कथं तर्हि या क्रिया यत्क्रिया याक्रि-
यायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति॥ आमन्त्रितं पूर्वमविद्यमानवत्॥ वत्करणं किमर्थम्॥
क्रियाधातोरेवासौ क्रियावाच्येति तमेव प्रति गतित्वं स्यात्। यदा तु या क्रिया यत्क्रियेति क्रियालक्षणोऽर्थ आश्रीयते त-
दार्थं प्रति गतित्वं न शब्दं प्रति तत्रार्थे कार्यासंभवात्तद्वाचिनि शब्दे परत: कार्यं विज्ञायमानं क्रियाप्रधाने सर्वस्मिन् प्रत्ययो-
दात्तत्वेन धातूदात्तत्वेन चोदात्तवतीति सिध्यति॥ आमन्त्रि॥ वत्करणमिति। वतिमन्तरेणाप्यतिदेशो दृश्यते यथा गोतोणिदि- राम॰
ति प्रश्न:। नन्वसति वत्करणे पूर्वमामन्त्रितमविद्यमानमित्युच्यमाने पूर्वस्यामन्त्रितस्य निवृत्ति: स्यात्। नैष दोष:। अर्थत्र-
त्यायनायशब्दप्रयोगादनिवृत्तेऽर्थे शब्दनिरस्यभावात्। अथापि परप्रयोगो भवतु पूर्वप्रयोगो मा भूदित्यर्थ: कल्पेत २२
तथापि राजदत्तादिषु परमामन्त्रितं चेति वक्तव्यं स्यात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाश्रयमपीति। यत् स्वाश्रयं कार्यं मातिदेशिकेन विरुध्यते तद्बाध्यते यथा चण्डालवदस्मिन् ब्राह्मणे वर्तितव्यमित्यतिदेशे कृते ब्राह्मणा भोज्यन्नामित्युक्ते नासौ भोज्यते॥ तथा च पूर्वविधिग्रहणस्य नैधेय इति प्रत्युदाहरणमुक्तं सति स्थानिवत्त्वे ऽच्यज्व्यपदेशेन ह्यज्व्यपदेशस्य बाधनात् ढकोऽप्रसङ्गात्। एवमिहाप्येकान्तरताविद्यमानवत्त्वेन विरोधान्निवर्त्तेतवत्करणात्तु यत्नान्न निवर्तते॥ आँ भो देवदत्तेति। नामन्त्रितद्विति निषेधादेकान्तरता सिद्धेति चिन्त्यमेतत्। पूर्वं प्रतीति। पूर्वश्म स्वाश्रयमपि यथा स्यात्॥ आँ भो देवदत्त। आम एकान्तरमामन्त्रितमनन्तिक इत्येकान्तरता यथा स्यात्। पूर्वं प्रति

विद्यमानत्वादुत्तरत्रानन्तर्यप्रसिद्धिः॥ पूर्वं प्रति विद्यमानत्वादुत्तरत्रानन्तर्यस्याप्रसिद्धिः स्यात्॥ इमं मे गङ्गे य मुने सरस्वति शुतुद्रि। गङ्गाशब्दो यं यमुनाशब्दं प्रति अविद्यमानवद्भवति। तत्रामन्त्रितस्य पदात्परस्येति अनुदात्तत्वं न स्यात्॥ सिद्धं तु पदपूर्वस्येति वचनात्। सिद्धमेतत्॥ कथम्। पदपूर्वस्येति वचनात्। पदपूर्वस्य च आमन्त्रितस्याविद्यमानवद्भावो भवतीति वक्तव्यम्। कानि पुनरस्य योगस्य प्रयोजनानि। अविद्यमानवत्त्वे प्रयोजनमामन्त्रितयुष्मदस्मत्तिङ्निघाताः। आमन्त्रितस्य पदात्परस्यानुदात्तो भवतीतीहैव भवति पचसि देवदत्त। देवदत्त यज्ञदत्तेत्यत्र न भवेति। अविद्यमानवत्त्वादामन्त्रितस्य। युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ इतीहैव भवति। ग्रामो वां स्वम्। जनपदो नौ स्वम्। देवदत्त यज्ञदत्तौ युवयोः स्वमित्यत्र न भवत्यविद्यमानत्वादामन्त्रितस्य। तिङ्ङतिङ इतीहैव भवति देवदत्तः पचतीति। देवदत्त पचसीत्यत्र न भवति। अविद्यमानत्वादामन्त्रितस्य। पूजायामनन्तरप्रतिषेधः प्रयोजनम्। यावत्सचति शोभनम्। यावद्देवदत्त पचसि सत्रापि सिद्धं भवति। जात्वपूर्वं प्रयोजनम्। जातु पचति। देवदत्त जातु पचसीत्यत्रापि सिद्धं भवति। आहो उताहो चानन्तरविधौ प्रयोजनम्। आहो पचति। उताहो पचति। आहो देवदत्त पचसि। उताहो देवदत्त पचसीत्यत्रापि सिद्धं भवति॥ ॥

ब्दस्य संबन्धिशब्दत्वात् सरंभत्यामन्त्रितस्याविद्यमानवत्त्वं पूर्वं तु प्रति विद्यमानत्वमेवेति तेन व्यवधानात् सूर्वाश्रयकार्याप्रसङ्गः॥ सिद्धं त्विति॥ पूर्वं यत्पदं तदपेक्षयापि पूर्वस्यामन्त्रितस्याविद्यमानत्वाद्व्यवधायकत्वाभावः॥ अन्ये तु न्यायसिद्धएवायमर्थ इत्याहुः। पूर्वत्वस्य परापेक्षत्वात् परस्य कार्ये स्वनिमित्ते ऽन्यनिमित्ते वा कर्तव्ये आमन्त्रितस्याविद्यमानवत्त्वात् मेशब्दात्परो ऽनन्तरो भवति यमुनेशब्द इति निघातसिद्धिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामन्त्रिते॥ इहेति। नामन्त्रिते समानाधिकरणे इति सूत्रं पठितं ततः सामान्यवचनं विभाषितं विशेषवचन इति द्वितीयं तत्रस्व पर्यायशब्दानामपि सामानाधिकरण्यादविद्यमानवत्त्वनिषेधान्निघातप्रसङ्गः॥ योगविभाग इति। पर्यायत्वाच्च सामान्यवचनत्वाभावः। सामान्यस्य विशेषापेक्षत्वात्। एवं चामन्त्रिताद्युदात्तत्वं सर्वेषामेतेषां भवति॥ सामान्यवचनं विभाषितम्॥ इहेति। बहुवचनग्रहणमपाणिनीयमिति प्रश्नः॥ बहुवचनमिति॥ तेन ब्राह्मणा वैयाकरणा इति वा निघातः। ब्राह्मण

आमएकान्तरविधौ प्रयोजनम्। आँ पचसि देवदत्त। आम्भोः पचसि देवदत्त इत्यत्रापि सिद्धं भवति अविद्यमानत्वादामन्त्रितस्य॥ नामन्त्रिते समानाधिकरणे सामान्यवचनम्॥ इह कस्मान्न भवति अग्ने दैविसरस्वति इडे काम्ये विहव्ये एतानि ते अघ्न्ये नामानि॥ योगविभागः करिष्यते। नामन्त्रिते समानाधिकरणे सामान्यवचनम्॥ ततो विभाषितं विशेषवचन इति॥ सामान्यवचनं विभाषितं विशेषवचने॥ इह कस्मान्न भवति। ब्राह्मण वैयाकरण। बहुवचनमिति वक्ष्यामि॥ सामान्यवचनमिति शक्यमवक्तुम्। कथम्। विभाषितं विशेषवचन इत्युच्यते। तेन यत्र प्रति विशेषवचनमित्येतद्भवति तस्य भविष्यति। किं च प्रत्येतद्भवति सामान्यवचनम्। अपर आह। विशेषवचन इति शक्यमवक्तुम्। कथम्। सामान्यवचनं विभाषितमित्युच्यते। तेन यत्प्रति सामान्यवचनमित्येतद्भवति तस्य भविष्यति। किं च प्रत्येतद्भवति विशेषवचनम्। विभाषितं विशेषवचन इति॥ ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये अष्टमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥ ॥ पादश्च प्रथमः॥ ॥ ॥

वैयाकरणेत्यत्र नित्यम्। सामान्यवचनमिति। विशेषवचन इत्यस्य पूर्वेण संबन्धात् पर्यायस्य विशेषवाचित्वाभावात्पूर्वसूत्रार्थमपि सामान्यवचनग्रहणं न कर्तव्यम्। अग्ने दैवीत्यादौ सर्वेषामामन्त्रिताद्युदात्तत्वसिद्धये॥ ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे अष्टमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥ ॥ पादश्च प्रथमः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वत्रासिद्धम्॥ येयमिति। वृत्तिग्रन्थो पक्षेपेण शास्त्रासिद्धत्वमाश्रीयते न तु कार्यासिद्धत्वं शास्त्रस्य संनिवेशात् पौर्वापर्य संभवात् कार्याणां तु प्रयोगसमवायात् पौर्वापर्यायोगाच्छास्त्रद्वारेण वा कार्याणां पौर्वापर्ये शास्त्रस्य मुख्यं पौर्वापर्य मिति तस्य वग्रहणं न्याय्यमित्युत्सर्गलक्षणकार्यसिद्धिरपि भवतीति दर्शयति। एतच्च सूत्रमात्मानं विहाय सूत्रान्तराणामसिद्धत्वं प्रतिपादयति न त्वात्मनो बोधकस्य बोध्यत्वाभावादेतस्य चासिद्धत्वे सर्वेषां सिद्धत्वात् तत्सूत्रारम्भ एवानर्थकः स्यात्। यथा सर्वं मिथ्या ब्रवीमीति वाक्यं वाक्यान्तराणामेव मिथ्यात्वं प्रतिपादयति एतस्यापि मिथ्यात्वे वाक्यान्तराणां मिथ्यात्वं न स्यादित्यनर्थकमेवैतद्वाक्यं स्यात्। यदीति-यथोद्देशं संज्ञापरिभाषमाश्रित्य चोद्य

पूर्वत्रासिद्धम्॥ येयं सपादसप्ताध्याय्यनुक्रान्ता एतस्यामयं पादोनोऽध्यायोऽसिद्धो वेदितव्यः। यदि सपादसप्ताध्याय्यामयं पादोनोऽध्यायः असिद्ध इत्युच्यते यद् इह सप्तमीनिर्देशाः पञ्चमीनिर्देशाः षष्ठीनिर्देशा-श्चोच्यन्ते ते प्यसिद्धाः स्युः। तत्र को दोषः। झलो झलि। ह्रस्वादङ्गात्। संयोगान्तस्य लोप इत्येतेषां निर्देशानामसिद्धत्वात् तस्मिन्निति निर्दिष्टे पूर्वस्य तस्मादित्युत्तरस्य षष्ठी स्थानेयोगा इत्येताः परिभाषाः न प्रकल्पेरन्॥

ते॥ यदा प्रतिपत्ता यथाश्रवणग्राही तस्मिन्निति निर्दिष्टे पूर्वस्येत्यस्य सूत्रस्य यत्र सप्तमीनिर्दिष्टः शब्दः तत्र पूर्वस्य कार्यं भवतीत्येतमर्थं प्रतिपद्यते स तु सप्तमीनिर्देशः कस्यादिति विशेषं न पर्यालोचयति तदेको यणचीत्येवमादौ प्रदेशवाक्ये सप्तमीश्रवणात् पूर्वस्य कार्यं प्रतिपद्यते अस्मिन्पक्षे झलो झलीत्येवमादौ सप्तम्या निर्देशस्यासिद्धत्वात् परिभाषाफलाभावप्रसङ्गः। तथा संयोगान्तस्य लोप इत्यत्र षष्ठी स्थानेयोगेति एतत्फलाभावात् तच्छेषस्यालोन्त्यस्येत्यस्यापि फलाप्रवृत्त्यान्तरङ्गत्वात् स्यानसंबन्धविज्ञानेऽपि सर्वस्य पदस्य लोपप्रसङ्गः॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.कै. यद्यपीदमिति॥ यथोद्देशपक्षे॥ तत्त्विह सिद्धमिति। कार्यकालं संज्ञापरिभाषमित्यस्मिन्दर्शने संज्ञापरिभाषाणां ह्यत्यन्त ८१२
२४ पारार्थ्यान्नस्वातन्त्र्येण कार्यविगमहेतुत्वम्। केवलमाचार्येण लाघवायानेकप्रधानाङ्गभावप्रतिपत्तये पृथगुपदेशः कृत
। ततश्च तस्मिन्निति निर्दिष्टे पूर्वस्येत्यनेन केवलेन न किंचित्क्रियते नापि झलो झलीत्यनेन किं तर्हि संहत्य कार्यं क्रियते ततो
झल्यनन्तरे पूर्वस्य सकारस्य झलः परस्य लोप इति वाक्यार्थ इत्येकवाक्यतायां पौर्वापर्याभावादसिद्धत्वाभावः। पूर्वत्रा
सिद्ध इति॥ गुणे दीर्घस्यासिद्धत्वाद्युगपत्प्रसङ्गाभावाद्विप्रतिषेधस्य निमित्ताभावान्न परिभाषानुपस्थानाद्गुण एव

नैष दोषः॥ यद्यपीदं नत्रासिद्धं तत्त्विह सिद्धम्। कथम्। कार्यकालं संज्ञापरिभाषम्। यत्र कार्यं तत्रोपस्थितं
द्रष्टव्यम्। झलो झलि ह्रस्वादङ्गात्। संयोगान्तस्य लोपः। उपस्थितमिदं भवति। तस्मिन्निति निर्दिष्टे पूर्वस्य
। तस्मादित्युत्तरस्य। षष्ठी स्थानेयोगेति॥ यदि कार्यकालं संज्ञापरिभाषमित्युच्यते। इयमपि परिभाषा अस्ति
। विप्रतिषेधे परमिति। सा पीहोपतिष्ठेत। तत्र को दोषः। विस्कोर्यमवगोर्यमिति। गुणाद्दीर्घत्वं स्याद्विप्रतिषेधेन
॥ अत उत्तरं पठति। पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य। पूर्वत्रासिद्धे नास्ति विप्रतिषेधः। किं कार
णम्। अभावादुत्तरस्य। द्वयोर्हि सावकाशयोः समवस्थितयोर्विप्रतिषेधो भवति न च पूर्वत्रासिद्धे परं पूर्वं
प्रति भवति॥ यद्येवं दोग्धा दोग्धुं घत्वस्यासिद्धत्वाड्ढत्वं प्राप्नोति। काष्ठतट् संयोगादिलोपस्यासिद्धत्वात्
संयोगान्तलोपः प्राप्नोति। अपवादो वचनप्रामाण्यात्। अनवकाशावेतौ विधी तौ वचनप्रामाण्याद्भविष्यतः॥
तस्मात्कार्यकालं संज्ञापरिभाषमिति न दोषः॥ पूर्वत्रासिद्धमधिकारः। पूर्वत्रासिद्धमित्यधिकारोऽयं द्रष्टव्यः॥

प्रवर्तते॥ यद्येवमिति॥ अभावादुत्तरस्येति न्यायाद्ढत्वे घत्वस्यासिद्धत्वाद्ढत्वप्रसङ्गः॥ अपवाद इति। योऽपवादः स ए
व भवति वचनसामर्थ्यात् प्रकरणस्य श्रुत्याबाधनात्। पूर्वत्रासिद्धमधिकार इति। न तु विधिः। तथा हि। वक्ष्यमाणत्रिपादी
लक्षणात्समुदायाद्यत्पूर्वं तत्र स एव समुदायः सपादसप्ताध्याय्यपेक्षालब्धपरव्यपदेशो नपेक्षितान्तर्गतावयवपौर्वापर्योऽ राम
सिद्धो भवतीत्येतावानस्य विधिवाक्यस्यार्थो विज्ञायेत अधिकारे तु परस्य परस्य पूर्वत्र पूर्वत्रासिद्धत्वं संपद्यते। सकलशास्त्र
व्यापित्वनिरासार्थं तु परिभाषात्वं नाश्रितं तेन तैस्तस्येत्यादाविनादिष्वकर्तव्येषु त्वस्यासिद्धत्वादकारान्तनिमित्तादिनादयो न स्युः। २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत एव वार्त्तिककारः परिहारान्तरमाह। स्वरेऽवधारणाच्चेति। स्वरे लोपस्यासिद्धत्वमुक्तमेवेति स्वरार्थायां षट्संज्ञायामसिद्धत्वं न वक्तव्यम्। केचित्तु पञ्च ब्राह्मण्य इत्यादौ न षट्स्वस्रादिभ्य इति टाप्प्रतिषेधाय षट्संज्ञायां नलोपस्यासिद्धत्वमुच्यत इत्याहुः। तन्न नान्तत्वात्पूर्वं ङीप्प्राप्तः सोऽनिषिध्यते ततो जसो लुकि नलोपे चाकारान्तत्वाट्टाप्प्राप्तः सोऽपि निषिध्यते। स्त्रियां यदुक्तं तत् षट्स्वस्रादिभ्यो न भवतीति सामान्येन निषेधविधानात्। अत्रान्ये आहुः। स्त्रीसमानाधिकरणपक्षः स्त्रीसूत्रे नाश्रितः। अपि तु प्रकृत्यर्थविशेषणपक्षः प्रत्ययार्थविशेषणपक्षो वेति पञ्चादीनामलिङ्गत्वात् स्त्रीप्रत्ययस्य प्राप्तिर्नास्तीति नार्थस्तन्निषेधेन। अस्त्वापि तत्प्राप्तिः स्यात्तथापि नलोपस्य बहिरङ्गत्वादन्तरङ्गे टाप्यसिद्धत्वान्नास्ति टाप्प्राप्तिः। सत्यामपि टाप्प्राप्तावन्तरङ्गायां षट्संज्ञायां नलोपस्यासिद्धत्वात् सिद्ध एव तत्प्रतिषेधः। तुग्विधौ चोक्तमिति। ह्

स्वरेऽवधारणाच्च संज्ञाग्रहणमनर्थकम्। स्वरेऽवधारणं क्रियते स्वरविधिं प्रतीति। इदं तर्हि दण्डिहस्तौ दण्डिनौ। तुग्विधौ किमुदाहरणम्। वृत्रहभ्याम्। वृत्रहभिः। नलोपे कृते ह्रस्वस्य पिति कृति तुगिति तुक् प्राप्नोति। असिद्धत्वान्न भवति। तुग्विधौ चोक्तम्। किमुक्तम्। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य। इदं तर्हि प्रयोजनम्। कृतीति वक्ष्यामि। इह मा भूत्। ब्रह्महच्छत्रम्। भ्रूणहच्छाया। न ह्येष संनिपातलक्षणः॥ न लोपः॥ नमुने। इह नेयत्कार्यं प्राप्नोति तत्प्रति सुभावो नासिद्ध इत्युच्यते॥

यमत्रास्ति संनिपातलक्षणत्वं बहिरङ्गलक्षणत्वं च। विभक्तिनिमित्तो हि नलोपः किन्निमित्तस्तु तुक् संनिपातपरिभाषायास्तुगभावः प्रयोजनत्वेनोक्त इति भाष्यकारस्तथैव व्याचष्टे। सन्निपातेति। इदं तर्हीति। नियमार्थमिदं कृल्लक्षण एव तुग्मा भूत् च्छलक्षणस्तु यथा स्यादित्यर्थः। इह मा भूदिति। तुगभावः। न ह्येष इति। पदत्वमात्रनिबन्धनत्वान्नात्र बहिरङ्गे नलोपः॥ नमुने॥ नेयत्कार्यमिति। भूतस्य सप्तमीनिर्देशो युज्यते परसप्तमी च शास्त्रे प्रसिद्धेति निष्पन्ने नाशब्दे परतो यत्कार्यं प्राप्नोति तत्र मुभावस्यासिद्धत्वं न्याय्यमिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाभावश्चैवेति। नाभावे कर्त्तव्येसुभावस्यासिद्धत्वादूघिलक्षणो नाभावो न प्राप्नोतितत्तश्च सूत्रमेवैतदसंबद्धंनाभावस्यै वाभावात्तत्कुतस्तस्मिन्परतः कार्यंप्राप्नोति यत्रसुभावस्यसिद्धत्वमुच्येत। इहेङ्गितेनेति। ननिर्देशादेवार्थप्रतिपत्तिः किंतर्हिआचार्यएवंस्मरतीत्येतावत्सूत्रनिर्देशादवसीयते। ततश्चयदाचार्योनेयत्प्राप्नोति तत्रसुभावस्यसिद्धत्वंशास्ति तस्मान्नाभावेऽपिसुभावस्यसिद्धत्वंस्मरतीतिप्रतीयते अथवेति। तन्त्रेण योगद्वयमुच्चारितम्। अथवा एकस्याप्यने

नाभावश्चैवतावन्न प्राप्नोति। एवंतर्हिनसुटादशे। नसुटादेशइति वक्तव्यम्। किमिदंटादेशइति। टाया आदेशः टादेशः। यदितर्हिटाया आदेशइत्युच्यते टायामादेशेअप्रतिषिद्धं भवति। तत्रकोदोषः। असुनेत्यत्र सुभावस्यासिद्धत्वात् अतोदीर्घोयञि सुपिचेतिदीर्घत्वंप्रसज्येत। नैषदोषः। टादेशइति सर्वविभक्त्यन्तोयंसमासः। टाया आदेशः टादेशः। टायामादेशः टादेशइति। सिध्यति। सूत्रंतर्हिभिद्यते। यथान्यासमेवास्तु। ननु चोक्तंनेयत्कार्यं प्राप्नोतितस्मिन्सुभावोनासिद्धइत्युच्यते। नाभावश्चैवतावन्नप्राप्नोतीति। नैषदोषः। इहेङ्गितेनचेष्टितेन निमिषितेनमहताचसूत्रनिबन्धेनाचार्याणामभिप्रायोलक्ष्यते॥ तदेतदेवंज्ञापयत्याचार्योभवत्यत्रनाभावइतियदयंनेपरतःअसिद्धत्वप्रतिषेधंशास्ति। अथवाद्विगताअपिहेतवोभवन्ति। तद्यथा। आम्राश्चसिक्ताःपितरश्चप्रीणिताभवन्ति। तथावाक्यान्यपिद्विगतानिदृश्यन्ते। श्वेतोधावति॥ अलंबुसानांयातेति॥ अथवा वृद्धकुमारीवाक्यवदिदंद्रष्टव्यम्। तद्यथा। वृद्धकुमारीइन्द्रेणोक्तावरंवृणीष्वेतिसावरमवृणीतपुत्रामेबहुक्षीरघृतमोदनंकांस्यपात्र्यांभुञ्जीरन्निति। नचतावदस्याःपतिर्भवतिकुतःपुत्राःकुतोगावःकुतोधान्यम्। तत्रानयाएकेनवाक्येनपतिःपुत्रागावःधान्यमितिसर्वंसंगृहीतंभवति॥ एवमिहापिनेअसिद्धत्वप्रतिषेधंब्रूवतानाभावोपिसंगृहीतोभवति॥

कशक्तिसंभवादनेकार्थप्रत्यायनमविरुद्धमित्यर्थः। वाक्यान्यपीति। नकेवलमर्थस्यानेकप्रयोजनत्वमपितुशब्दस्यापीत्यर्थः। श्वेतोधावतीति। किंजातीयोधावतिकिंवर्णोधावतीत्येवमेकेनानेकेनवापृष्टः कौशल्यादेवंकश्चिदर्थद्वयंप्रतिपादयति। अथवेति। अशब्दार्थस्यापिनान्तरीयकत्वादुपादानंदृश्यते। यथाग्निरानीयतामित्युक्तेअचोदितमपिपात्रानयनमग्न्यानयनेऽन्तर्भवति। एवमिहापिनेपरतःप्राप्तकार्यंप्रतिसुभावस्यासिद्धत्वंब्रूवतार्थान्नेऽपिकर्तव्येसिद्धत्वमाश्रितम्। २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनधिकारेहीति। यदिस्वतन्त्रोविधिरयंस्यादित्यर्थः। यद्यप्यवयवाएवकार्येषुव्याप्रियन्तेनसमुदायः। तथाप्यवयवद्वारक स्तस्यापिव्यापारोस्तीतिवक्ष्यमाणस्यसमुदायस्यातिक्रान्तेसमुदायेऽसिद्धत्वंस्यात्। अधिकारेतुसर्वेष्टसंग्रहः। अयथेष्टमिति। अयथेष्टमपिप्राप्नोतिनतुयथेष्टमेवेत्यर्थः। गोधुङ्मानिति। गोदुहोस्यसन्तीतिमतुप्। दादेर्धातोर्घइतिघत्वंजश्त्वस्यासिद्धत्वादेकाचोबशइतिभष्भावः ततोजश्त्वंगकारः यरोनुनासिकत्वेप्रत्ययेभाषायांनित्यवचनमितिङकारः। असिद्धवचनमिति। किंशास्त्रस्यासिद्धत्वं मथकार्यस्येतिप्रश्नः। अथवायच्छास्त्रमुच्चारितंतस्यासिद्धत्वमशक्यंकर्तुमितिप्र

किंप्रयोजनम्। परस्यपरस्यपूर्वत्रपूर्वत्रासिद्धत्वज्ञापनार्थं परःपरःयोगः पूर्वंपूर्वंयोगंप्रतिअसिद्धोयथास्यात्। अनधिकारेहिसमुदायस्यसमुदायेऽसिद्धत्वविज्ञानम्। अनधिकारेहिसतिसमुदायस्यसमुदायेअसिद्धत्वंविज्ञायेत। तत्रकोदोषः। तत्रायथेष्टप्रसङ्गः। तत्रायथेष्टंप्रसज्येत। गोधुङ्मान्गुडलिण्मानिति। घत्वढत्वयोःकृतयोःझयइतिवत्वंप्रसज्येत। तस्मादधिकारः। तस्मादधिकारोयंद्रष्टव्यः। अथासिद्धवचनंकिमर्थम्। असिद्धवचनउक्तम्। तत्रतावदुक्तम्। षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थंचेति। एवमिहापिआदेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थंच। आदेशलक्षणप्रतिषेधार्थंतावत्। राजभिः। तक्षभिः। राजभ्याम्। तक्षभ्याम्। राजसु। तक्षसु। नलोपेकृतेअतइत्यैसभावादयः प्राप्नुवन्ति। असिद्धत्वान्नभवन्ति। उत्सर्गलक्षणभावार्थंच। अमुष्मै। अमुष्मात्। अमुष्य। अमुभिरिति। अत्रमुभावेकृतेःतेइतिस्मायादयोनप्राप्नुवन्तिअसिद्धत्वाद्भवन्ति। सुपर्वाणौ। सुपर्वाणः। णत्वेकृतेनोपधायाइतिदीर्घत्वंनप्राप्नोति। असिद्धत्वाद्भवति॥

श्नः। असिद्धवचनउक्तमिति। सिद्धस्यासिद्धवचनादतिदेशआश्रीयते शास्त्रस्यचासिद्धवद्भावआश्रीयतेनतुकार्यस्य। अन्यथोत्सर्गलक्षणकार्यंनसिध्येत्। षत्वतुकोरिति। कोस्येत्यादौषत्वंनभवति। अधीत्येत्यादौपूर्वंतुग्भवतिपश्चादेकादेशः। राजभिरिति। नलोपशास्त्रमैसादिषुकर्त्तव्येष्वसिद्धत्वात्स्वकार्यंनप्रदर्शयतिइत्यैसाद्यभावः। अमुष्मादिति। अदसोविभक्तौस्यदाद्यत्वेकृतेपरत्वान्नित्यत्वाच्चोत्वप्रसङ्गादकारान्तत्वनिबन्धस्मायाद्यप्रसङ्गः। उत्वशास्त्रस्यासिद्धत्वात्प्रवर्तनात्पूर्वंस्मायादयः पश्चादुत्वम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नलो॥सर्वविभक्त्यन्तइति। सर्वविभक्त्यन्तावयवत्वात्सर्वविभक्त्यन्तः। अथवाअर्शआदित्वाद्चूप्रत्ययः सर्वविभक्त्य
न्तोवयवोस्यास्तीति। सर्वग्रहणंचानेकोपलक्षणंहितीयाद्यसंभवात्। ननुचैकार्थेनशब्देनभाव्यमिति कथंसर्ववि भ
क्त्यन्तत्वमाश्रीयते। उच्यते। प्रवृत्तिनिमित्तविशेषानपेक्षया सुब्विधिशब्दवाच्योर्थः सुब्विधिरित्याश्रीयते। अथवासं
बन्धसामान्येषष्ठींविधाय षष्ठीसमासः क्रियते। नतुस्थान्यादेशसंबन्धएवाश्रीयतेतेनसुपियोविधिः ससुपः संबन्धी
भवति इतितत्राप्यसिद्धत्वंभवति। सर्वविभक्त्यर्थान्तर्भावाच्चसर्वविभक्त्यन्तउच्यते। नचात्रसुपः कार्यंविधीयते। तेनष
ष्ठीस्थानेयोगेत्यस्योपस्थानाभावः। उदीचामातः स्थानइति स्थानग्रहणाल्लिङ्गाद् अनुवादेः स्यात् परिभाषायाअप्रवृ
त्तिः यदात्वेषापरिभाषाप्रत्याख्याता तदापि संबन्धसामान्यस्योपादानात्तस्यचैकत्वादयंसंबन्धः संनिकृष्टोयंविप्रकृष्ट

नलोपःसुप्स्वरसंज्ञातुग्विधिषुकृति। सुब्विधिंप्रतिनलोपः असिद्धोभवतीत्युच्यते भ्यांदिहराजभिरितिनलोपेकृतेः तद्भिस्
भावोनस्यात्। इहतुखलुराजभ्यांनस्भ्यांराजसु तक्षस्वितिनलोपेकृतेदीर्घत्वेत्वेप्राप्नुतः। नैषदोषः। सुब्विधिरिति सर्व
विभक्त्यन्तः समासः। सुपोविधिः सुब्विधिः सुपिविधिः सुब्विधिरिति। अथसंज्ञाविधौकिमुदाहरणम्। पञ्च
सप्तेत्यत्रनलोपेकृतेष्णान्ताषडितिषट्संज्ञानप्राप्नोति। असिद्धत्वाद्भवति। संज्ञाग्रहणानर्थक्यंचतन्नि
मित्तत्वाल्लोपस्य। संज्ञाग्रहणंचानर्थकम्। किंकारणम्। तन्निमित्तत्वाल्लोपस्य। नाकृतायाषट्संज्ञायांज
स्शसोर्लुक् नचाकृतेलुकिपदसंज्ञानचाकृतायापदसंज्ञायांनलोपः प्राप्नोति। तदेतदानुपूर्व्यासिद्धंभवति।
इदंतर्हिप्रयोजनम्। पञ्चभिः सप्तभिरिति। षट्त्रिचतुर्भ्योहलादिः झल्युपोत्तममित्येषस्वरो यथास्यात्॥ ॥

इतिभेदनिबन्धनोव्यवहारोनास्ति। पञ्चेति। लौकिकात्प्रयोगात्नकारासंभवंशास्त्राच्चविभक्त्यभावंमन्यते। त
न्निमित्तत्वादिति। यथाविभक्तिलोपः शास्त्राधीनः। एवंनलोपः। ततश्चानुपूर्व्यासिद्धमेतदित्यर्थः। षट्त्रीति। अन्यथा
नलोपेकृतेनान्तत्वाभावात् असत्यांषट्संज्ञायांझल्युपोत्तममितिस्वरोनस्यात्। ततश्चनः संख्याया इत्याद्युदात्तं प
दंस्यात्। नचात्रभूतपूर्वगतिराश्रयितुंशक्यते। षट्त्रीत्यस्य षड्भिरित्यादौसावकाशत्वात् झल्युपोत्तममित्यस्यापि
तिसृभिश्चतुर्भिरित्यादौ। समुदायेह्यनुवर्त्तमानेकेषुचिदवयवेषुकृतार्थंशास्त्रं तद्द्वारेणसमुदायेप्रवृत्तमेवभवति। त
थाचवान्यस्यसंयोगादेरित्यत्रध्वादिनिवृत्त्यर्थमन्यग्रहणंकृतम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदात्त॥ यण्स्वरइति। यण्निमित्तत्वाद्यणःसंबन्धी स्वरो यण्स्वरः। खलप्वटतीति। खलंपुनातीति क्विप्। उपपदसमासः कृत्स्वरेणान्तोदात्तत्वम्। ङौपरतः ओः सुपीति यणादेशः। तस्मात्परस्यङे सुप्त्वादनुदात्तस्योदात्तयणो हल्पूर्वादित्युदात्तत्वे प्राप्ते नोङ्धात्वोरिति निषिद्धे ऽनेनस्वरितत्वं तस्य यणादेशे कर्तव्ये ऽसिद्धत्वात्स्वरितयणः परो ऽटतिशब्दस्य तिङ्ङतिङ इति निघातस्याकारोन भवतीति तस्यस्वरितत्वं न प्राप्नोतीति यण्स्वरस्यसिद्धत्वमुच्यते। केचिदाहुः एकपदाश्रयत्वादन्तरङ्गं स्वरितत्वं पदद्वयाश्रितस्तु यण्बहिरङ्गः ततो ऽसिद्धं वहिरङ्गमन्तरङ्ग इति यणो ऽसिद्धत्वात् पूर्वेणेति

उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य॥ यण्स्वरो यणादेशे स्वरितयणः स्वरितार्थम्। यण्स्वरः यणादेशे सिद्धो वक्तव्यः। किंप्रयोजनम्। स्वरितयणः स्वरितार्थं स्वरितयणः स्वरितत्वं यथास्यात्। खलप्वटति। खलप्वाति॥ तत्तर्हि वक्तव्यम्। न वक्तव्यम्। आह्वायं स्वरितयण इति। नचास्ति स्वरितः सिद्धस्तत्राश्रयात्सिद्धत्वं भविष्यति॥ आश्रयात्सिद्धत्वमिति चेदुदात्तात्स्वरिते दोषः॥ आश्रयात्सिद्धत्वमिति चेत्। उदात्तात्स्वरिते दोषा भवति। दध्याशाम्। मध्वाशाम्। एवं तर्हि योगविभागः करिष्यते। उदात्तयणः परस्य अनुदात्तस्य स्वरितो भवति। ततः स्वरितयणः स्वरितयणश्च परस्यानुदात्तस्य स्वरितो भवति। उदात्तयण इत्येव। अथवा स्वरितग्रहणं न करिष्यते। केनेदानीं स्वरितयणः परस्य अनुदात्तस्य स्वरितो भवति। उदात्तयण इत्येव। ननु च स्वरितयणा व्यवहितत्वान्न प्राप्नोति स्वरविधौ व्यञ्जनमविद्यमानवदिति नास्ति व्यवधानम्। अथवा नैवं विज्ञायते स्वरितस्य यणः स्वरितयण इति॥

निर्दिष्टविषयाभावाद् यण्यसिद्धत्वप्रसङ्गः स्वरितस्य नास्तीति। तदयुक्तम्। नाजानन्तर्ये बहिष्ट्वप्रकृतिरिति बहिरङ्गपरिभाषायाः निषेधादिको यणचीति द्वयोरचोरानन्तर्याश्रयेण यण्विधानात्। दध्याशामिति। दधिशब्दो नब्विषयस्यानिसंतस्येत्याद्युदात्तः उदात्तादनुदात्तस्य स्वरित इति इकारः स्वरितः आशाशब्द आशायाअदिगाख्या चेदित्यन्तोदात्तत्वादनुदात्तादिस्तत आकारस्य स्वरितत्वप्रसङ्गः। उदात्तयण इत्येवेति। तेनोदात्तयण इत्येवं योनिर्वृत्तः स्वरितः तस्य यणः परस्यानुदात्तस्य स्वरितो भवतीत्यर्थः ततश्चास्यैव स्वरितस्याश्रयात्सिद्धत्वं भवति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरितेयणीति। उदात्तस्वरितयोरितिसप्तमीउदात्तस्ययोयण्उदात्तेपिभवतितद्विषयत्वात्। स्वरितेयणित्येषानुपर सप्तमीतेनलौकिकेप्रयोगेयःस्वरितस्तस्मिन्परतोयोयण्ततःपरस्यलक्षणवशादनुदात्तस्यस्वरितःसाधुर्भवती त्ययमर्थोनचदध्याशामित्याकारोलौकिकेस्वरितइतिनकश्चिद्दोषः।लौकिकस्यस्वरितस्याश्रयणेयणिकर्त्तव्येतस्या सिद्धत्वाभावः॥ स्वरितो।गाङ्गे·नूपइति।गङ्गायाइदमितितस्येदमित्यण्प्रत्ययस्वरेणान्तोदात्तः।ततोङिःसुप्स्वादनु दात्तःतयोरेकादेशउदात्तः।अपोनुगतमनूपमितिप्रादिसमासःतत्पुरुषेतितुल्यार्थेतिपूर्वपदप्रकृतिस्वरेप्राप्तेअ नोरप्रधानकनीयसीइत्युत्तरपदमन्तोदात्तंशेषनिघातःएङःपदान्तादतीत्युदात्तानुदात्तयोरेकादेशःपक्षेस्वरितः

कथंतर्हिस्वरितेयण्स्वरितयण्स्वरितयणइति॥ स्वरितोवानुदात्तेपदादौ॥ स्वरितग्रहणशक्यमकर्तुम्। कथम्। अनुदात्तेपरतउदात्तइत्येवसिद्धम्। केनेदानींस्वरितोभविष्यति।गाङ्गेऽनुपेइति।आन्तर्यतः उदात्तानुदात्तयोरेकादेशःस्वरितोभविष्यति।इदंतर्हिप्रयोजनम्।तेनवर्ज्यमानतामाभूदिति। अ यक्रियमाणेऽपिस्वरितग्रहणेयःसिद्धःस्वरितस्तेनवर्ज्यमानताकस्मान्नभवति·कन्यानूपइति·ब हिरङ्ग·लक्षणत्वात्।असिद्धंबहिरङ्गमन्तरङ्गइत्येवंनभविष्यति। यथैवतर्हिक्रियमाणेयःसिद्धःस्वरित स्तेनवर्ज्यमानतानभवतिएवमक्रियमाणेपिनभविष्यति।तस्मान्नार्थःस्वरितग्रहणेन।असिद्धंबहिरङ्ग लक्षणमन्तरङ्ग·लक्षणइत्येवसिद्धम्।

पक्षेउदात्तः।तेनवर्ज्यमानतेति।आन्तरतम्याद्यत्स्वरितत्वंतत्सिद्धमितिशेषनिघातेनपेशब्दोनुदात्तःप्राप्नोत्युदात्तश्चे ष्यते।अस्यतुस्वरितस्यासिद्धत्वाद्ययोक्तदोषाभावः।कन्यानूपइति।कन्याशब्दःकन्याराजन्यमनुष्याणामन्तइत्य न्तःस्वरित·ततःस्वरितानुदात्तयोरेकादेशःआन्तर्यतःस्वरितःतस्यसिद्धत्वात्वर्ज्यमानस्वरेसत्युदात्तस्वरित योर्यौगपद्यंनप्राप्नोति।ततश्चात्रयःपरिहारःसएवगाङ्गेनूपइत्यत्रभविष्यतीतिभावः। असिद्धमिति।पदद्वयाश्र यत्वादेकादेशस्यबहिरङ्गत्वात्स्वरोऽपितदीयोबहिरङ्गः॥ रांम· २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादेशस्वर इति। एकादेशस्वरे चत्वारि दर्शनानि। उदात्तानुदात्तयोरेकादेश आन्तर्यात्स्वरितो भिनिर्वृत्तः। तस्यस्थान एकादेश उदात्तेनोदात्त इत्युदात्तगुण आदेशः क्रियत इत्येकं दर्शनम्। स्वरित्तगुणस्योदात्तगुणमात्रं क्रियत इति द्वितीयम्। एकादेश उदात्तेनोदात्त इति परिभाषायत्रैकादेशो विधीयते तत्रोपतिष्ठते। तत्रायमर्थो भवत्याद्गुणो भवत्युदात्तानुदात्तयो(?) रत्वाद्गुण उदात्त इत्येकादेशो विधीयमान एवोदात्तो भवतीति तृतीयम्। चतुर्थं दर्शनं तूदात्तानुदात्तयोरेकादेश उदात्तो भवति। स्वरितगुणः प्राप्तः तत्र येन नाप्राप्त इति स्वरितत्वापवाद उदात्तविधिः संपद्यते। तत्र परिभाषापक्षे सिद्धमुदात्तत्व

एकादेशस्वरोन्तरङ्गः। एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः। किं प्रयोजनम्। अयवायावेकादेशशतृस्वरैकानन्नुदात्तसर्वानुदा त्तार्थम्। अय्। वृक्ष इदम्। प्लक्ष इदम्। उदात्तानुदात्तयोरेकादेशस्तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति। तस्यसिद्धत्वं वक्तव्यम्। आन्तर्यतः उदात्तस्य उदात्तः अयादेशो यथा स्यात्। अवादेशो नास्ति। आय्। कुमार्या इदम्। किशोर्या इदम्॥ । उदात्तानुदात्तयोरेकादेशस्तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति तस्य सिद्धत्वं वक्तव्यम्। आन्तर्यतः उदात्तस्य उदात्त आयादेशो यथा स्यात्। नैतदस्ति प्रयोजनम्। एकादेशे कृते उदात्तयणो हल्पूर्वादित्युदात्तो भविष्यति। इदमिह संप्रधार्यम्। उदात्तत्वं क्रियतामेकादेश इति। किमत्र कर्त्तव्यम्। परत्वादुदात्तत्वम्। नित्य एकादेशः। कृते उदात्तत्वे प्राप्नोत्यकृतेपि प्राप्नोति। अनित्य एकादेशः। अन्यथा स्वरस्य कृते उदात्तत्वे प्राप्नोत्यन्यथा स्वरस्याकृते स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यो भवति। अन्तरङ्गस्तर्ह्येकादेशः। कान्तरङ्गता। वर्णावाश्रित्य एकादेशः। पदस्य उदात्तत्वम्॥

मपादिषु। इतरेषु पक्षेष्वसिद्धत्वे प्राप्ते सिद्धत्वमुच्यते। उदात्तोऽयादेश इति। अन्यथा स्वरितः स्यात्। कुमार्या इदमिति। कुमारीशब्द उदात्तनिवृत्तिस्वरेणान्तोदात्तः। कुमार्ये इति स्थिते आडागमे कृते यणादेशे चोदात्तयणो हल्पूर्वादित्यस्य उदात्तत्वे आडेकारयोरुदात्तानुदात्तयोर्वृद्धिरेकादेश उदात्तस्तस्यायादेशः। एकादेश इति। आडेकारयोरनुदात्तयोः प्रागेकादेशः पश्चाद्विभक्त्युदात्तत्वमित्यर्थः। पदस्योदात्तत्वमिति। विभक्तेरुदात्तत्वविधानात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आट्क्रियतामिति। एकादेशस्थानिनासहविभक्त्युदात्तत्वंविचार्यते। ननुचयणादेशेकृतेविभक्तिस्वरेण भाव्यंततस्थ नदीसंज्ञायाअभावात् आण्नप्राप्नोति। विहितविशेषणंनदीग्रहणंनद्यायोविहितोङिः तस्याद्विस्वदोषः। अन्तरङ्ग एकादेशइति। वर्णाश्रयैकादेशःपदस्योदात्तत्वमिति प्रतिपादनेन। तस्मान्नार्थः सिद्धत्ववचनेन। गाङ्गेनूपइति। एक

एवंतर्हिइदमिहसंप्रधार्यं माट्क्रियतामुदात्तत्वमिति। किमत्रकर्त्तव्यम्। परत्वादाडागमः। नित्यमुदात्तत्वम्। कृतेप्याटिप्राप्नोत्यकृतेपिप्राप्नोति। आडपिनित्यः। कृतेप्युदात्तत्वे प्राप्नोत्यकृतेपिप्राप्नोति। अनित्यआट्। अन्यथास्वरस्यकृतेउदात्तत्वेप्राप्नोत्यन्यथास्वरस्याकृते। स्वरभिन्नस्यच प्राप्नुवन्विधिरनित्योभवति। उदात्तत्वमप्यनित्यम्। अन्यस्यकृतेआटिप्राप्नोत्यन्यस्याकृतेप्राप्नोति। शब्दान्तरस्यच प्राप्नुवन् विधिरनित्योभवति। उभयोरनित्ययोः परत्वादाडागमः। आटिकृतेअन्तरङ्गएकादेशः। आवृ। वृसाविदम्। उदात्तानुदात्तयोरेकादेशः तस्यएकादेशउदात्तेनोदात्तइत्येतद्भवतितस्यसिद्धत्वंवक्तव्यम्। आन्तर्यंतउदात्तआवादेशोयथास्यात्। एकादेशस्वरः। गाङ्गेऽनूपइति। उदात्तानुदात्तयोरेकादेशः तस्यैकादेशउदात्तेनोदात्तइत्येतद्भवतितस्यसिद्धत्वंवक्तव्यंस्वरितोवानुदात्तेपदादावित्येषस्वरोयथास्यात्। शतृस्वरः। तुदती। उदात्तानुदात्तयोरेकादेशः। तस्यैकादेशउदात्तेनोदात्तइत्येतद्भवति। तस्यसिद्धत्वंवक्तव्यम्। शतुरनुमोनद्यजादीत्यन्तोदात्तादित्येषस्वरोयथास्यात्। नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयतिसिद्धएकादेशस्वरःशतृस्वरेइति। यदयमनुमइतिप्रतिषेधंशास्ति। कथंकृत्वाज्ञापकम्। नह्यन्तरेणोदात्तानुदात्तयोरेकादेशंशत्रन्तंसनुम्कं मन्तोदात्तमस्ति। ननुचेदमस्तियान्तीवान्तीति॥ ॥ ॥

रोदात्तत्वस्यासिद्धत्वात्स्वरितानुदात्तयोरेकादेशआन्तर्यात्स्वरितएवस्यान्नतुकदाचिदुदात्तः। तुदतीति। तास्यनुदात्तेदितिशतानुदात्तः। शप्रत्ययउदात्तःशतुरनुमइत्यत्रान्तोदात्तादितिवर्त्तते। नह्यन्तरेणेति। असिद्धत्वेचान्तोदात्तत्वाभावादेवतुदन्तीत्यादाउदात्तत्वंनभविष्यतीतिकिमनुमइति प्रतिषेधेन प्रतिषेधात्तुनुमिसिद्धत्वमनुमीयते। ननुचेति। अत्रलसार्वधातुकानुदात्तत्वस्यनिमित्ताभावाद्द्वयोरुदात्तयोरेकादेशउदात्तइतिभावः शेषनिघातःपदस्येतिमन्यते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदपीति। प्रत्ययस्वरे सति निघाते धातोरनुदात्तत्वात्। एवमनुमद्तिज्ञापकं स्थितमेव। एकाननुदात्तेति। एकाननुदात्तग्रहणे नानुदात्तं पदमेकवर्जमित्येवस्वरोभिधीयते तत्र ह्युक्तं सिद्धत्वेकाननुदात्तत्वादिति। तुदन्तीति। विकरणउदात्तो लसार्वधातुकमनुदात्तं तत्रोदात्तानुदात्तयोरेकादेशस्वरस्य धातुस्वरे ऽसिद्धत्वाच्छेषनिघाताप्रसङ्गाद्धातोरप्यन्तोदात्तत्वं स्यात्। ननु चोदात्तत्वासिद्धत्वेऽपि स्वरितेन वर्ज्यमानस्वरो भविष्यति। सत्यम्। सिध्यति। यदा स्वरितस्योदात्तता भवतीति पक्षः। यदा तु स्वरितापवाद उदात्त इति पक्षः तदैकादेशस्योदात्तत्वं विधीयते तस्य चासिद्धत्वे स्वरान्तराभावाद्वर्ज्यमानस्वरोनस्या

एतदपि निघाते कृते नान्तरेण उदात्तानुदात्तयोरेकादेशं शनन्तं सत्नुमकं मन्तोदात्तं भवति। इदमिह संप्रधार्यं निघातः क्रियतामेकादेश इति। किमत्र कर्त्तव्यम्। परत्वान्निघातः। नित्य एकादेशः। कृतेऽपि निघाते प्राप्नोत्यकृतेऽपि प्राप्नोति। एकादेशोऽप्यनित्यः। अन्यथास्वरस्य कृते निघाते प्राप्नोत्यन्यथास्वरस्याकृते निघाते। स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यो भवति। अन्तरङ्गस्तर्ह्येकादेशः। कान्तरङ्गता। वर्णावाश्रित्य एकादेशः पदस्य निघातः। निघातोऽप्यन्तरङ्गः। कथम्। उक्तमेतत्पदग्रहणं परिमाणार्थमिति। उभयोरन्तरङ्गयोः परत्वान्निघाते एतदपि नान्तरेण उदात्तानुदात्तयोरेकादेशमन्तोदात्तं भवति। शतृस्वरः एकाननुदात्त। तुदन्ति। लिखन्ति। उदात्तानुदात्तयोरेकादेशः तस्य एकादेश उदात्तेनोदात्त इत्येतद्भवति तस्य सिद्धत्वं वक्तव्यम्। तेन वर्ज्यमानता यथा स्यात्। सर्वानुदात्तं। ब्राह्मणास्तुदन्ति। ब्राह्मणा लिखन्ति। उदात्तानुदात्तयोरेकादेशः। तस्य एकादेश उदात्तेनोदात्त इत्येतद्भवति तस्य सिद्धत्वं वक्तव्यम्। किंप्रयोजनम्। तिङ्ङतिङ इति निघातो यथा स्यात्। किमुच्यते अन्तरङ्ग इति। यो हि बहिरङ्गः असिद्ध एवासौ भवति। प्रपचतीति ॥ ॥

ट इति सिद्धत्वमुच्यते॥ ब्राह्मणास्तुदन्तीति॥ अत्रापि स्वरितस्य स्थाने उदात्तः क्रियत इति दर्शने उदात्तस्यासिद्धत्वेऽपि स्वरितस्य निघातविधानाद्रूउदात्तस्याप्रयोगः सिद्ध एवेति स्वरितापवाद उदात्तत्वमिति दर्शनाभिप्रायेणासिद्धत्वमुच्यते। अन्यथोदात्तस्यानुदात्ताभावादुदात्तः प्रयोगे श्रूयेत। प्रपचतीतीति। बाह्यपदापेक्षत्वादेकादेशस्य बहिरङ्गत्वात्तत्स्वरो बहिरङ्गः तस्यासिद्धत्वात्तिङिचोदात्तवतीति गतेर्निघातो न भवति॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोमसुसचतीतीति।तिङ्ङतिङः इतिनिघातः ईकारस्यनभवति।सर्वत्रैवेति।लक्ष्यापेक्षयासामान्यविषयमनुमानमाश्री
तो अनुमानत्वाज्ज्ञापकस्य।तत्रैकपदाश्रयैकादेशस्वरः सिद्ध इत्यनुम इति प्रतिषेधेनज्ञाप्यते।अथवाएकादेशउदात्ते
नोदात्त इति परिभाषाश्रयितव्येतिज्ञाप्यते।यस्तुबहिरङ्ग एकादेशस्वरः तस्यासिद्धं बहिरङ्गमन्तरङ्गे इत्यसिद्धत्वंभव
त्येव।हरिवइति।हरयोस्यसन्तीतिमतुप्छन्दसीरइतिवत्वंसुत्नुम् संयोगान्तलोपरुत्वानि। यदातुछन्दसीवनिपावि
तिवनिप्प्रत्ययः क्रियतेवनउपसंख्यानमितितस्यचरुत्वं तदानार्थः सिद्धवचनेन। यदिपुनरिति।इट इटीत्यत्रात्स

सोमसुस्चतीति।तत्तर्हिवक्तव्यम्।नवक्तव्यम्।सर्वत्रैवानुम्प्रतिषेधोज्ञापकः।सिद्धएकादेशस्वरो, तरङ्ग इति॥सं
योगान्तलोपोरोरुत्वे।संयोगान्तलोपोरोरुत्वेसिद्धोवक्तव्यः।किंप्रयोजनम्। हरिवोमेदिनंत्वा। संयोगा
न्तलोपस्यासिद्धत्वात् हशीत्युत्वंनप्राप्नोति॥प्लुतिश्च। प्लुतिश्चउत्वेसिद्धावक्तव्या· सुस्रोता३अत्रत्व
मसीत्यत्रप्लुतेरसिद्धत्वात् अप्लुतादप्लुतइत्येतन्नवक्तव्य भवति। नैतदस्तिप्रयोजनम्।क्रियतेन्या
सएव॥सिज्लोपएकादेशेसिद्धोवक्तव्यः॥अलावीत्।अपावीत्।सिजलोपस्यासिद्धत्वात्सवर्णदीर्घत्वंनप्रा
प्नोति।यदिपुनरिडादेः जिज्लोपउच्येत।नैवंशक्यमिहहिमाहिलावीत्।माहियावीत्। यद्यत्रइण्नस्यात् अ
नुदात्तस्यईटः श्रवणंप्रसज्येत।इटिपुनः सत्युक्तमेतत्।अर्थवत्तुचित्करणसामर्थ्याद्धीट उदात्तत्वमिति
।तत्रैकादेशउदात्तेनोदात्त इत्युदात्तत्वंसिद्धंभवति।संयोगादिलोपः संयोगान्तलोपे।संयोगादिलोपःसंयो
गान्तस्यलोपेसिद्धोवक्तव्यः। काष्ठतट्।संयोगादिलोपस्यासिद्धत्वात्संयोगान्तलोपः प्राप्नोति।नैषदोषः।उ
क्तमेतत्।अपवादोवचनप्रमाण्यादिति।निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषुसिद्धोवक्तव्यः।वृक्णः। वृक्णवान्।

स्येत्यतः सस्येतिवर्ततेइटइतिषष्ठीनतुपञ्चमी।तेनेडादेःसस्यलोपोविधीयमानइटोभवति॥ यद्यत्रेति। यदिलोपेन राम·
निवर्त्ततेत्यर्थः।ननुचउदात्तनिवृत्तिस्वरेणोदात्तत्वमीटोभविष्यति।नैतदस्ति।उदात्तनिवृत्तिस्वरेकर्त्तव्येलोपस्यासि
द्धत्वात्। संयोगादिलोपइति। ननुचोक्तमपवादोवचनप्रामाण्यादिति।एवंमन्यतेप्रवर्ततांसंयोगादिलोपः। तस्मिं
स्तुकृतेतस्यासिद्धत्वात् संयोगान्तलोपःप्राप्नोति।उक्तमेतदिति।असिद्धश्चैवापवादः संयोगादिलोपः॥ ॥ २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इट्प्राप्नोतीति। यदा तकारमात्रस्य लोपो निपात्यते इति पक्षः तदेट् प्राप्नोति। ननु चेति। इडभावाश्रयत्वात् प्रत्ययविधेः प्रत्यय विधौ सिद्धत्वेनेडभाव आश्रित एवेति पृथगिड्ग्रहणं न कर्त्तव्यम्। सिद्ध इति। सुतरां सिद्ध इत्यर्थः। अथवा नासिद्धो वचनेन सिद्धः किं तर्हि अन्तरेण वचनं सिद्ध इत्यर्थः। क्रियते न्यास एवेति। येषां दत्वं नास्ति तदर्थं चर्मवस्ते चर्मवः पिण्डं ग्रसते पिण्ड

निष्ठादेशस्यासिद्धत्वाद् झलीति षत्वं प्राप्नोति। स्वर। क्षीबः। निष्ठादेशस्यासिद्धत्वात् इट्सहितस्य निष्ठान्तस्य निपातनं लोपरूपत्वाद् निष्ठा च द्व्यजनादित्येष स्वरो न प्राप्नोति। प्रत्ययः। क्षीबेन तरति क्षीबिकः। निष्ठादेशस्यासिद्धत्वाद् यच्चष्ठन्निति ठन्न प्राप्नोति। इड्विधिः। क्षीबः। निष्ठादेशस्यासिद्धत्वाद् हलादिलक्षण इट् प्राप्नोति। ननु च पः प्रत्ययविधौ सिद्धः सिद्धोऽसाविड्विधौ। इदं तर्हि प्रयोजनम्। ओलस्जी। लग्नः। निष्ठादेशः सिद्धो वक्तव्यः। निष्ठादेशस्यासिद्धत्वाद् नेड्वशि कृतीति इट्प्रतिषेधो यथा स्यात्। ईदित्करणं न वक्तव्यं भवति। एतदपि नास्ति प्रयोजनम्। क्रियते न्यास एव। वस्वादिषु दत्वं सौ दीर्घत्वे। वस्वादिषु दत्वं सौ दीर्घत्वे सिद्धं वक्तव्यम्। उखास्रत्। पर्णध्वत्। दत्वस्यासिद्धत्वाद् अत्वसन्तस्येति दीर्घत्वं प्राप्नोति। अधातोरिति न वक्तव्यं भवति। नैतदस्ति प्रयोजनम्। क्रियते न्यास एव॥ अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे। अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे सिद्धे वक्तव्ये। अमी आसते। अमी अत्र। अमू आसाते। अमू अत्र। ईत्वोत्वयोरसिद्धत्वाद् एच इति अयावेकादेशाः प्राप्नुवन्ति। किमुच्यते बहिष्पदलक्षण इति। यो ह्यन्यः सौ सिद्ध एवासौ भवति। अमुया अमुयोरिति। प्रगृह्यसंज्ञायां च सिद्धे वक्तव्ये। अमी अत्र। अमू आसाते। ईत्वोत्वयोरसिद्धत्वाद् अदसो मादिति प्रगृह्यसंज्ञा न प्राप्नोति। किमर्थमिदमुभयमुच्यते। न प्रगृह्यसंज्ञायामित्येव स्वरेऽपि बहिष्पदलक्षणे चोदितं स्यात्। पुरस्तादिदमाचार्येण दृष्टं स्वरे बहिष्पदलक्षण इति तत्पठितम्। तत उत्तरकालमिदं दृष्टं प्रगृह्यसंज्ञायां चेति तदपि पठितम्। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्त्तयन्ति॥ प्लुतिस्तुग्विधौ च्छे च। प्लुतिस्तुग्विधौ च्छे च सिद्धा वक्तव्या॥

णइति। अदस इति। स्वरो न्वू। तद्विशेषणं बहिष्पदलक्षण इति। बाह्यपदावयव इत्यर्थः॥ अथवा बहिष्पदलक्षणे कार्ये कर्त्तव्ये स्वरे परत इत्यर्थः। यो ह्यन्य इति। बाह्यपदावयवेन भवतीत्यर्थः। असिद्ध एवासौ भवतीति। असौ स्वरो सिद्धत्वविषये भवति। तत्रासिद्धत्वं भवतीत्यर्थः। अमुयेति। अदस् आ इति स्थिते त्यदाद्यत्वे टाप् एकादेशः उत्वस्यासिद्धत्वादाङि चाप इत्येत्व मयादेशः ततो मु न च्चेति। व्याख्यानसूत्रे प्लाघवानादरात॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्ना३इच्छत्रमिति। एचोप्रगृह्यस्येत्याकारः प्लुतः इदुतौ तु मात्रिकौ तत्र इदुतोरसिद्धत्वादेकाराश्रयो विकल्पेन तुक् प्राप्नोति। ह्रस्वाश्रयस्तु नित्य इष्यते। प्लुतिशब्देन तत्संहिताविदुतौ लक्ष्येते। अग्निची३ दिति प्लुतस्यासिद्धत्वाद्ध्रस्वस्येति तुग् भवति द्विविधं चात्रासिद्धत्वं बहिरङ्गत्वात्पूर्वत्रासिद्धमिति च। अट्श्च्योततीति श्च्युतिर् क्षरणे इति धातुः सकारादिः प्रतिज्ञायते मधु श्च्युतमाचष्टे इति णिचि टिलोपे क्विपि मधुगिति रूपं यथा स्यात्। शाकपारादौ मधुडिति स्यात्। उचिच्छिषतीति। उच्छीविवासे तु क्सन इट् अजादेर्द्वितीयस्येति च्छिशब्दस्य द्विर्वचनं शपूर्वाः खय इति शेषः छस्य अभ्यासे चर्चेति चका

अग्ना३इच्छत्रम्। पटा३उच्छत्रम्। प्लुतेरसिद्धत्वाच्छे चेति तुग् न प्राप्नोति। किमुच्यते छे चेति। यो ह्यन्यो ६
सिद्ध एवासौ भवति। अग्निची३त्। सोमसु३त्॥ प्लुतत्वं धुड्विधौ। प्लुतत्वं धुड्विधौ सिद्धं वक्तव्यम्। अट्श्च्योत
ति। पट्श्च्योततिः प्लुतस्यासिद्धत्वाड्डः सि धुडिति धुट् प्रसज्येत॥ अभ्यासजश्त्वचर्त्वमेत्वतुकोः॥ अभ्यास ८
जश्त्वचर्त्वमेत्वतुकोः सिद्धं वक्तव्यम्। बभणतुः बभणुः। अभ्यासादेशस्यासिद्धत्वा देत्वं प्राप्नोति। उचि ९
च्छिषति। अभ्यासादेशस्यासिद्धत्वाच्छे चेति तुक् प्राप्नोति। द्विर्वचने परसवर्णत्वम्। द्विर्वचने परसवर्णत्वं
सिद्धं वक्तव्यम्। सय्यन्ता। संवत्सरः। यल्लोकमिति परसवर्णस्यासिद्धत्वाद्य इति द्विर्वचनं न प्राप्नोति। प
दाधिकारश्चेल्लत्वघत्वढत्वनत्वरुत्वषत्वणत्वानुनासिकच्छत्वानि। पदाधिकारश्चेल्लत्वघत्वढत्वनत्वरुत्व
षत्वणत्वानुनासिकच्छत्वानि सिद्धानि वक्तव्यानि। लत्व। गलो गलः। गरो गरः। लत्व। घत्व। द्रोग्धा। घत्व। ढत्व
। द्रोढा। द्रोढा। ढत्व। नत्व। नुन्नो नुन्नः। नुत्तो नुत्तः। नत्व। रुत्व। अभिनो अभिनः। अभिनत् अभिनत्। रुत्व। ॥

रत्त्वस्यासिद्धत्वा च्छे चेति पूर्वस्य तुक् प्राप्नोति। सय्यन्तेति। अनुस्वारस्यायोगवाहानामविशेषेण प्रत्याहारउपदेशकरणचोदनाद्यर्थत्वाद्द्विर्वचने च सिध्यति रूपमेतदनपेक्ष्य सिद्धत्ववचनम्। पदाधिकारश्चेदिति। यदि लत्वादिषु पदस्येत्यपेक्ष्यते तद्लत्वादीनां द्विर्वचनस्य च समकत्वात्पूर्वं द्विर्वचने कर्तव्ये तेषामसिद्धत्वात्पूर्वं द्विर्वचने सत्यनिष्टोऽपि प्रयोगस्यात्। यदा तु लत्वादिषु पदस्येति नापेक्ष्यते तदा द्विर्वचनस्य बहिरङ्गत्वादसिद्धत्वादन्तरङ्गेषु लत्वादिषु कृते पुनर्द्विर्वचने सतीष्टं सिध्यतीति नार्थः सिद्धवचनेन। गल इति। अचि विभाषेति लत्वम्। द्रोग्धेति। वा द्रुहमुहेति वा घत्वपक्षे हो ढ इति ढत्वम्। नुन्न इति। नुदविदेति वा निष्ठानत्वम्। अभिनदिति। भिदेर्लङि सिपि श्नमि अटि हल्ङ्यादिलोपे सिपि धातो रुर्वा दश्च इति वा रुत्वम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातुःष्वसेति। मातुःपितुर्भ्यामन्यतरस्यामिति वा षत्वम्। माषवापाणीति। प्रातिपदिकान्तेति वा णत्वम्। वाङ्नयन
मिति। यरोऽनुनासिक इति वा गकारस्य ङकारः। वाक्छ्वयनमिति। शश्छोऽटीति शकारस्य वा च्छत्वम्। ललाटीनिनि
वर्त्तेरन्निति। द्विर्वचनात्प्राग् न प्रवर्त्तेरन्। कृते तु द्विर्वचनेऽनिष्टोऽपि तद्विकल्पः स्यात्। ततश्च गलोगरो गरोगलइत्या
द्यपि प्रसज्येत॥ नलोपः प्राति। अन्तग्रहणमिति। नलोपः प्रातिपदिकस्येत्येवास्तु पदस्येति वर्त्तते। तत्र नकारेण पदे
विशेष्यमाणे तदन्तविधिना नकारान्तस्य पदस्य प्रातिपदिकस्य लोपो विधीयमानोऽलोन्त्यस्येत्यन्त्यस्य भविष्य

षत्व। मातुःष्वसा मातुःष्वसा। मातुःस्वसा मातुःस्वसा। पितुःष्वसा पितुःष्वसा। पितुःस्वसा पितुःस्वसा षत्व
। णत्व। माषवापाणि माषवापाणि॥ माषवापानि माषवापानि। णत्व। अनुनासिक। वाङ्नयनं वाङ्नयनम्। वाग्नय
नं वाग्नयनम्। अनुनासिक। छत्व। वाक्शयनं वाक्शयनम्। वाक्च्छयनं वाक्च्छयनम्। उभयथाचार्यं दो
षः। यद्यपि स्थाने द्विर्वचनम्। अथापि द्विःप्रयोगः। कथम्। यदि तावत् स्थाने द्विर्वचनं संप्रमुग्धत्वात् लत्वकृति
प्रत्ययस्य लत्वाद्यभावः। तेनैष दोषः सिद्धः। अथ द्विःप्रयोगो द्विर्वचनमसिद्धत्वात् लत्वादीनि निवर्त्तेरन्॥ न
लोपः प्रातिपदिकान्तस्य। नलोपे अन्तग्रहणं किमर्थम्। नलोपे अन्तग्रहणं पदाधिकारस्य विशेषणत्वात्। न
लोपे अन्तग्रहणं क्रियते। किं कारणम्। पदाधिकारस्य विशेषणत्वात्। पदाधिकारो विशेषणम्। कथम्। पद
स्येति नैषा स्थानषष्ठी। का तर्हि विशेषणषष्ठी॥ अन्हो नलोपप्रतिषेधः। अन्हो नलोपस्य प्रतिषेधो वक्तव्यः। अ
होभ्याम्। अहोभिरिति। स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। रुरत्र बाधको भविष्यति। असिद्धो रुः तस्या
सिद्धत्वान्नलोपः प्राप्नोति। अनवकाशो रुर्नलोपं बाधिष्यते। सावकाशो रुः। कोऽवकाशः। अनन्त्यः अकारः॥
आचार्यप्रवृत्तिर्ज्ञापयति नानन्त्यस्य रुर्भवतीति॥

तीति प्रश्नः। नलोप इति। असत्यन्तग्रहणे प्रातिपदिकस्य पदस्य योऽवयवो नकारस्तस्य यत्र तत्र स्थितस्य
लोपः स्यात्। ततश्च नराभ्यामित्यत्र स्यात्। अन्ह इति। अहन्नुरोः सुपीति रुत्वरत्वयोः संबुद्धौ सावकाशत्वा
त्पूर्वत्रासिद्धमित्यसिद्धत्वान्नलोपः प्राप्तो निषिध्यते। अनन्त्य इति। अकृतनलोपापेक्षयाऽनन्त्यः। कृते तु नलोपे एक
देशविकृतस्यानन्यत्वात् स एव अहःशब्द इति प्रत्यभिज्ञानादलोन्त्यस्येति वचनादकारस्य रुत्वप्रसङ्गः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कौ॰ यदयमहन्नग्रहणमिति। नकारापरित्यागेननिर्द्देशस्यैतत्प्रयोजनंनकारान्तस्य स्थानित्वं यथास्यात्। अन्यथाहइतिब्रूया ८ २१
३१ न्। संबुद्ध्यर्थमिति। संबुद्धौनलोपस्य प्रतिषेधात्तदन्तानुकरणनिर्द्देशः स्यादितिनलोपाभावोनज्ञाप्येत। यत्तर्हि रुत्वमि
ति। हेअहरिति अत्ररोऽसुपीतिरादेशः क्रियते। अहन्नित्यनेनतुरुत्वंविधीयते। तत्राकृतनलोपनिर्द्देशोनलोपाभावस्यज्ञाप
कएवेतिभावः। हेदीर्घाहोऽत्रेति दीर्घाण्यहानियस्मिन्निति बहुव्रीहिः। हल्ङ्यादिलोपः। प्रत्ययलक्षणेनसुप्परत्वादु
त्वम्। यत्तद्वीति। वार्तिककारवचनंज्ञापकत्वेनोपन्यस्यति। नह्यस्तीति। अतःपरस्यरोरुत्वमुच्यतेअकारस्यतुरोरेके

यदयमहन्नग्रहणंकरोति। अहन्नग्रहणादितिचेत्संबुद्ध्यर्थंवचनम्। अहन्नग्रहणादितिचेत्संबुद्ध्यर्थमेतत्।
हेअहरिति। यत्तर्हिरुत्वंशास्ति। एतदपिसंबुद्ध्यर्थमेवस्यात्। हेदीर्घाहोऽत्र॥ यत्तर्हिरूपरात्रिरथन्तरेषूपसं
ख्यानंकरोति। तज्ज्ञापयत्याचार्यः। नानन्त्यस्यरुर्भवति। कथंकृत्वाज्ञापकम्॥ नह्यस्तिविशेषोरूपरात्रि
रथन्तरेषु अनन्त्यस्यरेवारेवा॥ नङिसंबुद्ध्योः॥ नङिसंबुद्ध्योरनुत्तरपदे। नङिसंबुद्ध्योरनु त्तरपदइतिवक्त
व्यम्। इहमाभूत्। चर्मणितिलाअस्यचर्मतिलइति। राजन्वृन्दारकराजवृन्दारकेति। वानपुंसकानामितिव
क्तव्यम्। हेचर्मन्॥ हेचर्म। तत्तर्हिअनुत्तरपदइतिवक्तव्यम्। नवक्तव्यम्। ङिसंबुद्ध्योरित्युच्यतेनचात्रङिसं
बुद्धीपश्यामः प्रत्ययलक्षणेन। नलुमतातस्मिन्निति प्रत्ययलक्षणप्रतिषेधः। नक्वचिद्ङिर्लोपेनलुप्यते। स
र्वत्रलुमतैव। सयथैवेहभवति। आर्द्रेचर्मन्लोहितेचर्मन्निति। एवमिहापिस्यात्। चर्मणितिलाअस्यचर्म
तिलः चर्मतिलइति। तस्मादुपसंख्यानंकर्त्तव्यम्। एवंतर्हिङ्यर्थेनतावन्नार्थः।

वाविशेषाभावाद्रादेशमेवविदध्यादितिरुत्वविधानान्नलोपाभावोऽनुमीयतइतिनकारस्यैवरुत्वरत्वाभ्यांतत्रभाव्यमि
तिसिद्धमिष्टम्॥ नङि॥ चर्मतिलइति। नलुमतातस्मिन्निति प्रत्ययलक्षणनिषेधाद्भसंज्ञायाअभावात्सुबन्तत्वात्सदत्त्वा रा॰म॰
न्नलोपः। राजन्वृन्दारकेति। अवयवार्थसंबोधनेनसमुदायार्थसंबोधनंप्रतीयतइतिसंबुद्ध्यन्तयोरेवसमासः। य ३१
थैवेहेति। वचनसामर्थ्यात्प्रत्ययलक्षणाश्रयात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भत्वादिति। अयस्मयादित्वात्। संबुद्ध्यन्तानामिति। पृथगवयवार्थयोरभिमुखीकरणे परस्परस्यैकार्थीभावलक्षण सामर्थ्यायोगात्। यद्यपि हे राजन्नित्यादौ लोपशब्देन संबुद्धेर्लोपात् प्रत्ययलक्षणेन संबुद्धिपरत्वात् नलोपनिषेधः प्रवर्त्तते समासे तु लुमता लोपान्न लुमता तस्मिन्निति संबुद्धिपरत्वं नास्तीति परिहारोऽस्ति तथापि न्यायव्युत्पादनाय परिहारान्तरं भाष्यकारेणाभिहितम्। वा नपुंसकानामिति - प्रत्ययलक्षणे सति नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं प्र

भत्वात्तु ङौ प्रतिषेधानर्थक्यम्। ङौ प्रतिषेधो नर्थकः। किं कारणम्। भत्वात्। भसंज्ञात्र भवति। यदि तर्हि भसंज्ञात्र भवति रथन्तरे साम न्नित्यत्र अल्लोपोनइत्यल्लोपः प्राप्नोति। नैष दोषः। उक्तं मुभयसंज्ञान्यपि च्छन्दांसि दृश्यन्ते। तद्यथा। सुष्टुभा स ऋक्वता गणेन। पदत्वात्कुत्वं भत्वाज्जश्त्वं न भवति। एवमिहापि पदत्वादल्लोपोन इति लोपो न भत्वान्नलोपो न भविष्यति। तस्मान्नार्थो ङिग्रहणेन। संबुद्ध्यर्थेनापि नार्थः। कथम्। संबुद्ध्यन्तानां न समासः राजवृन्दारकेति। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। इह तावत्समानार्थेन वाक्येन भवितव्यं समासेन च। यश्चेहार्थो वाक्येन गम्यते नासौ जातुचित् समासेन गम्यते। अवयवसंबोधनं वाक्येन गम्यते समुदायसंबोधनं समासेन। वा नपुंसकानामित्येतद्वक्तव्यमेव। मादुपधायाश्च मतोर्वोऽयवादिभ्यः॥ रदाभ्यां निष्ठातो नः पूर्वस्य च दः। अनन्त्ययोरपि निष्ठामतुपोरादेशः। निष्ठामतुपोरादेशस्तु अनन्त्ययोरपीति वक्तव्यम्। भिन्नवन्तौ। भिन्नवन्तः। वृक्षवन्तौ। वृक्षवन्तः। न वा वक्तव्यम्। वचनाद्भविष्यति। अस्ति वचने प्रयोजनम्। किम्। भिन्नवान्। वृक्षवान्। नार्मते प्रतिषेधः। नार्मते प्रतिषेधो वक्तव्यः। नृमतोऽपत्यं नार्मतइति। उक्तं वा। किमुक्तम्। निष्ठामतुपोस्तावदुक्तम्। न वा पदाधिकारस्य विशेषणत्वादिति। नार्मते प्युक्तम्। न वा बहिरङ्गलक्षणत्वादिति॥ संज्ञायामासंदीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती॥

त्ययलक्षणप्रतिषेधे त्वप्राप्ते प्रतिषेधे वचनम्॥ मादु॥ अनन्त्ययोरपीति। मतुन्निष्ठाभ्यां पदस्य विशेषणात्तदन्तस्यैव पदस्य संप्रत्ययः स्यादिति वचनम्। न वेति॥ पदेन मतुन्निष्ठे विशेष्येते न तु ताभ्यां पदमिति तदन्तविध्यभावः॥ संज्ञायाम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ किमयमिति। तत्रैकयोगेनिपातनादेवसंज्ञालाभात्संज्ञाग्रहणंविस्पष्टार्थंनानायोगत्वेसंज्ञायामितिवत्वेसिद्धेकार्यान्तरविधा प॰२१
नार्थमासन्दीवदादीनांनिपातनम्। यद्ययमिति। ननुचासंदीवदाद्यर्थमीवत्याइतिस्यादितिकथंज्ञापकम्। नैतदस्ति। स्त्रि
३२ यामेषांप्रयोगाभावादीवतीशब्दान्तत्वाभावात्। यवादिष्विति। आदिशब्दःप्रकारार्थः तत्राश्रीयतइत्यर्थः॥ छन्दसीरः॥

किमयमेकयोगः। आहोस्विन्नानायोगौ। किंचातः। यद्येकोयोगः॥ अहीवती कपीवती। अत्रनप्राप्नोति। अ
थनानायोगौ। दृसुमती। द्रुमती। अत्रापिप्राप्नोति। यथेच्छसितथास्तु। अस्तुतावदेकयोगः। कथमहीवतीक
पीवती। आचार्यप्रवृत्तिर्ज्ञापयति। भवत्येवंजातीयकानांवत्वमितियदयमन्तोवत्याइवत्याईत्याह। अथवा
पुनरस्तुनानायोगौ। ननुचोक्तम्सिसुमती द्रुमती अत्रापिप्राप्नोति। यवादिषुपाठः करिष्यते। छन्दसीरः॥ छन्द
सिइरइत्युच्यतेतत्रेदंनसिध्यति। तत्रतेविश्वकर्मणस्तेसप्तर्षिमन्तमित्यत्रापिप्राप्नोति। नैषदोषः। नैवंविज्ञा
यतेछन्दसिइरइति। कथंतर्हि छन्दसीईरइति। एवमपित्विषीमान्यतीमानित्यत्रापिप्राप्नोति। नैषदोषः।
विहितविशेषणमीकारग्रहणम्। ईकारान्तायोविहितइति। एवमपिस्तूर्यंतेदेवापृथिवीमन्तमित्यत्रापि
प्राप्नोति। इहचनस्यात्। त्रिवतीर्याज्यानुवाक्याभवन्तीति। एवंतर्हि परिगणनंकर्त्तव्यम्। त्रिहर्यधिपत्यग्नि
रेभ्यः। त्रि। त्रिवतीर्याज्यानुवाक्याभवन्ति। त्रि। हरि। हरिवोमेदिनंत्वा। हरि। अधिपति। अधिपतिवतीर्जुहो
ति। अधिपति। अग्नि। चतुरग्निवानिव। अग्नि। रे। आरेवानेतुनोविशइति। यदितर्हि परिगणनंक्रियते। सर
स्वतीवान्। अपूपवान्। दधिवान्चरुरित्यत्रनप्राप्नोति। एवंतर्हि छन्दसीरोबहुलमितिवक्तव्यम्॥ अ
नोनुट्॥ यदिपुनरयंनुट्पूर्वान्तःक्रियेत अनोनुगति। अनोनुकिविनामरुविधिप्रतिषेधः। अनोनुकिसतिविनामोविधेयः।

त्विषीमानिति। अन्येषामपिदृश्यतइतिदीर्घः। विहितविशेषणमिति। लक्ष्यदर्शनवशेनवाक्यशेषकल्पनात्। एवंतर्हि राम॰
ति। बहुलग्रहणाद्रेशब्दादपिविजन्ताद्भवति। अथवारयिशब्दस्यरयेर्मतौबहुलमितिकृतसंप्रसारणस्यरूपमारे ३२
वानिति॥ अनोनुट्॥ यदीति। यदिपूर्वान्तलिङ्गःपठ्येतेत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अक्षण्वानिति। अक्षिशब्दस्य मतुपि छन्दस्यपि दृश्यत इत्यनङादेशः। नुकोऽसिद्धत्वात् पूर्वेण लोपे भूते पूर्वगत्यानुक्। सुपथिन्तर इति। नाड्घस्येति नुकि सति पदान्तत्वान्नकारस्य रुत्वप्रसङ्गः। परादाविति। नुटो मतु भक्तत्वात्तद्ग्रहणेन ग्रहणाद् रुत्वप्रसङ्गः। भत्वादिति। अयस्मयादित्वात्॥ अल्लोप इति। एतच्चाल्लोपे नुकोऽसिद्धत्वमनाश्रित्योच्यते। नुकोऽसिद्धत्वाद्ध्यन्नन्तत्वाभावेन लोपस्तल्लोपे सिद्धो नलोपः सुप्स्वरेति नियमात्। नापि नलोपापवादत्वान्नुको नाऽनन्तत्वमि

अक्षण्वान्। पदान्तस्येति निषेधः प्राप्नोति। रुत्वप्रतिषेधश्च। सुपथिन्तरः। नश्छव्यप्रशानिति रुः प्राप्नोति। अस्तु तर्हि परादिः। परादौ वत्वप्रतिषेधोऽवग्रहश्च। यदि परादिर्वत्वस्य प्रतिषेधो वक्तव्यः। अक्षण्वानिति। मादुपधायाश्च मतोर्वोऽयवादिभ्य इति वत्वं प्राप्नोति। अवग्रहश्च अनिष्टदेशे प्राप्नोति। अक्षण्वान्। अस्तु तर्हि पूर्वान्तः। ननु चोक्तम्। अनोनुकि विनामरुविधिप्रतिषेध इति। भत्वात् सिद्धम्। भसंज्ञा वक्तव्या। यदि तर्हि भसंज्ञा अल्लोपो न इत्यल्लोपः प्राप्नोति॥ अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि। अनस्तु प्रकृतिभावे मतुप्ग्रहणं छन्दसि वक्तव्यम्। इह तर्हि सुपथिन्तरः। नान्तस्य टिस्तद्धिते लुप्यत इति लोपः प्राप्नोति॥ घग्रहणं च। घग्रहणं च कर्त्तव्यम्। तत्तर्हीदं बहु वक्तव्यम्। नुग्वक्तव्यः। भसंज्ञा च वक्तव्या। अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि कर्त्तव्यम्। घग्रहणं च कर्त्तव्यमिति। न कर्त्तव्यम्। यत्तावदुच्यते नुग्वक्तव्य इति। नुक एष परिहारः। भत्वात् सिद्धमिति। यदप्युच्यते भसंज्ञा वक्तव्येति। क्रियते न्यास एव। अयस्मयादीनि छन्दसीति। यदप्युच्यते। अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि। घग्रहणं च कर्त्तव्यमिति। न कर्त्तव्यम्। उभयसंज्ञान्यपि हि छन्दांसि दृश्यन्ते। तद्यथा। स सुष्टुभा स ऋक्वता गणेन। पदत्वात्कुत्वम्। भत्वाज्जश्त्वं न भवति। एवमिहापि पदत्वादल्लोपटिलोपौ न। भत्वाद्विनामरुविधिप्रतिषेधौ भविष्यतः। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तम्। परादौ वत्वप्रतिषेधोऽवग्रहश्चेति। नैताद्दुच्यते वत्वप्रतिषेध इति। निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यति। यत्तर्हि निर्दिश्यते तस्य न प्राप्नोति। किं कारणम्। नुटा व्यवहितत्वात्॥

तिशक्यते वक्तुम्। अक्षण्वानिति पूर्वस्य नकारस्य पदान्तत्वाण्णत्वे कृते परस्य ष्टुत्वेन सिद्धत्वाद्विनामविधानस्यायुक्तत्वप्रसङ्गात्। घग्रहणं चेति। घेनान्तस्य टिलोपप्रसङ्गे प्रकृतिभावो विधेयः। नुक एष इति। आश्रित्य नुकं भत्वात् सिद्धमिति परिहाराभिधानान्नुग्वक्तव्य इति चोद्यमयुक्तमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असिद्धोनुडिति। अतोःपिनुटोवत्वाभावः।नलक्षणेनेति।पौरुषेयत्वादवग्रहकरणस्ययथालक्षणंपदानिकर्त्तव्यानीत्यर्थः॥नाद्भस्य॥ईद्रथिनइति।नुडपवादईकारोविधीयतेसचनलोपेकृतेइकारस्यविधेयः।यदितुनलोपापवादोनकारस्यस्थानेविधीयेततदातस्यासिद्धत्वादेकादेशाभावाद्रूपंनसिध्येत्।भूरिदावत्तरइति।भूरिददातीतिक्वनिप्॥कृपो॥
कृपणइतिरुञ्जेःक्युन्निति बाहुलकात्क्युन्।कृपाणइति।युधिबुधिदृशेः किच्चेति बाहुलकादानच्। कृपीटमिति।कृकपिभ्यांकीटन्निति कीटन्।कृपेस्तत्तुकृपेःसम्प्रसारणंचेति भिदादिषुपाठाद्भवति॥ततोलाक्षणिकत्वाल्लत्वाभावः।अथकॢपसामर्थ्यइत्येवकस्मान्नपठ्यतेलत्वंहिनविधेयंभवति।नैतदस्ति।अचीकॢपदितिहिनसिध्येत्। ऋकारऌकारयोः

असिद्धोनुट् तस्यासिद्धत्वाद्भविष्यति·अवग्रहेऽपिनलक्षणेनपदकाराअनुवर्त्त्याःपदकारैर्नामलक्षणमनुवर्त्यम्।यथालक्षणंपदंकर्त्तव्यम्॥नाद्भस्य॥ईद्रथिनः॥रथिनईद्वक्तव्यः।रथीतरः भूरिदाव्नस्तुट्भूरिदाव्नस्तुड्वक्तव्यः।भूरिदावत्तरोजनः॥कृपोरोलः॥कृपणादीनांप्रतिषेधः।कृपणादीनांप्रतिषेधोवक्तव्यः।कृपणः।कृपाणः।कृपा।कृपीटम्। बालमूललघ्वलमङ्गुलीनांवालोरमापद्यते। बालमूललघ्वलमङ्गुलीनांबालोरमापद्यतइतिवक्तव्यम्।बाल।अश्ववालः।अश्ववारः।वाल।मूल।मूरदेव।मूलदेव।मूल।लघु।वरुणस्यलघुस्यदः।वरुणस्यरघुस्यदः।लघु।अलम्।अलंभक्ताय।अरंभक्ताय।अलम्।अङ्गुलि।सुवाहुःस्वङ्गुलिः।सुबाहुःस्वङ्गुरिः।संज्ञाच्छन्दसोर्वाकपिलकादीनाम्।संज्ञाच्छन्दसोर्वाकपिलकादीनामितिवक्तव्यम्।कपिलकाः।कपिरकाः।तिल्पिलिकम्।तिर्पिरिकम्।कल्मषम्।कर्मषम्।लोमानि।रोमाणि।पांसुलम्।पांसुरम्।कल्म।कर्म।शुक्लः।शुक्रः॥

सवर्णविधिरितिऌकारस्यऋकारेकृतेचीकृपदितिस्यात्।यदातुलत्वंक्रियतेतदापूर्वत्रासिद्धमितिलत्वस्यासिद्धत्वात्पूर्वमृकारस्ततोलत्वमितिदोषाभावः।तथाचलीकॢप्यतइतिरीकोपिलत्वसिद्धिः। बालेति। बलसंवरणेबल्यतइतिबालः।मूलप्रतिष्ठायामित्यस्मादिगुपधलक्षणःकः। लंघिबंह्योर्नलोपश्चेतिकुप्रत्ययेलघुशब्दः।अङ्गेःकृतन्यञ्जीत्युलिप्रत्ययेऽङ्गुलिशब्दः।अमेर्गुरिश्चलोवेतिनापेक्षितम्।कपिलकादिषुवारस्यलः।रोमाणीति।रुशब्दइत्यस्मान्मनिनिरोमन्।नामन्सीमन्नितिनिपातनमनाम्नित्योदाहरणोपन्यासः। पांसुरस्मिन्नस्तिनगपांसुपाण्डुभ्यश्चेतिरः।कर्मेति।कृञोमनिन्।शुक्लःशुक्रइति।ऋज्रेन्द्राग्रेतिनिपातनाद्रुक्तःपाठः॥

राम॰ ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसर्ग॥ किमिदमिति। रइतिवर्तते। तत्र किंशाधान्याद्रेफस्यायतिर्विशेषणमुतश्रुतस्योपसर्गस्येति प्रश्नः। पल्ययत इति। यकारेण व्यवधानाल्लत्वाप्राप्तिः। वचनादिति। सर्वत्र व्यवधानसञ्ज्ञावाद्येन नाव्यवधानमिति न्यायात्। नचनिर्दु रावकाश इति वक्तुं शक्यमेवं हि निर्दुरोरयताविति वक्तव्यं स्यात्। प्लायत इति। एकादेशस्य परस्यादिवत्त्वाद्यतिग्रहणे नग्रहणाद्यवधानाभावं मन्यते। अस्त्विति। प्रतेरयतिपरस्य प्रयोगो नास्तिइण एव तेन योग इत्याहुः। दोषा इति। तनोस्ति

उपसर्गस्यायतौ॥ किमिदमयतिग्रहणं रेफविशेषणम्। अयतिपरस्य रेफस्य लो भवति स चेदुपसर्गस्य भवतीति। आहोस्विदुपसर्गविशेषणम्। अयतिपरस्योपसर्गस्य यो रेफस्तस्य लो भवतीति। कश्चात्र विशेषः रेफस्यायताविति चेत्सरेरुपसंख्यानम्। रेफस्यायताविति चेत्सरेरुपसंख्यानं कर्तव्यम्। पल्ययत इति। वच नाद्भविष्यति। अस्तिवचने प्रयोजनम्। प्लायते। पलायते। अस्तु तर्हि उपसर्गविशेषणम्। उपसर्गस्येति चेदेकादेशे प्रसिद्धिः॥ उपसर्गस्येति चेदे कादेशे अप्रसिद्धिर्भवति। प्लायते। पलायते। एकादेशे कृते व्यपवर्गाभावादयताविति लत्वं न प्राप्नोति॥ अन्तादिवद्भावेन व्यपवर्गः॥ उभयत आश्रये नान्तादिवत्। एवं तर्ह्येकादेशः पूर्वविधौ स्थानिवद्भ वतीति स्थानिवद्भावाद्व्यपवर्गः। प्रतिषिध्यतेऽत्र स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति। दोषा एवैते तस्याः परिभाषायाः तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति। अथवा पुनरस्तु रेफविशेषणम्। ननु चोक्तं रेफस्यायताविति चे त्सरेरुपसंख्यानमिति। वचनाद्भविष्यति। ननु चोक्तमस्तिवचने प्रयोजनं प्लायते पलायत इति। अत्राप्ययकारेण व्यव हितत्वान्न प्राप्नोति। एकादेशे कृते नास्ति व्यवधानम्। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमे व। प्रतिषिध्यतेऽत्र स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति। दोषा एवैते तस्याः परिभाषायाः। तस्य दोषः संयोगा दिलोपलत्वणत्वेष्विति॥ अचि विभाषा॥ णावुपसंख्यानं कर्तव्यम्। इहापि यथा स्यान्निगार्यते निगाल्यते। किं पुनः कारणं न सिध्यति। अचीत्युच्यते न चात्राजादिं पश्यामः प्रत्ययलक्षणेन॥

स्थानिवद्भावादुत्युभयथाप्यदोषः॥ अचि॥ णाविति॥ पदस्य लत्वविधानाल्लत्वस्यातरङ्गत्वाभावात्पूर्वत्रासिद्धमित्यसि द्धत्वाल्लोपे कृते लत्वाप्रसङ्गः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णाश्रयइति। विशेष्यस्य प्रत्ययस्यासंनिधानाद्वर्णाश्रयं लत्वं न तु प्रत्ययाश्रयमिति भावः॥ परेश्च॥ सडीति। सनः सकारादारभ्याभामहिङो ङकारेण प्रत्याहारः। गिराविति। गिरतेः क्विबन्तादौजसौ। वक्ष्यत्येतदिति। इदं निरुद्धावेव वक्ष्यत्येन चकार्थीत्येव भवितव्यमिति। तस्मादिदं वक्तव्यमेकपदाश्रयत्वादन्तरङ्गे रुत्वे कर्तव्ये पदद्वयनिबन्धनत्वाद्बहिरङ्गस्य सलोपस्यासिद्धत्वात्पूर्वत्रेति निर्दिष्टविषयाभावाद्युक्तमेवासिद्धत्वाभावासवर्तते। अल्विधित्वाच्च स्थानिवत्ताभावाद्रोर्लोपाभावः

वर्णाश्रये नास्ति प्रत्ययलक्षणम्। एवं तर्हि स्थानिवद्भावाद्भविष्यति। प्रतिषिध्यते तत्र स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति। अत उत्तरं पठति। गिरतेर्लत्वेणावुक्तम्। किमुक्तम्। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति॥ परेश्च घाङ्कयोः॥ योगे च। योगे चेति वक्तव्यमिहापि यथा स्यात्। परियोगः। सडि लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वानि॥ सडीति प्रकृत्य लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वानि वक्तव्यानि। किं प्रयोजनम्। प्रयोजनम्। गिरौ। गिरः। पयोधावति। द्विष्टराम्। दृषत्स्थानम्। काष्ठशकुस्थाता। कुञ्चा। धुर्य इति। गिरौ गिर इत्यत्र अचि विभाषेति लत्वं प्राप्नोति। सडीति वचनान्न भवति। नैतदस्ति प्रयोजनम्। उक्तमेतत्। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धमिति। पयोधावतीत्यत्र धि चेति सलोपः प्राप्नोति। सडीति वचनान्न भवति। एतदपि नास्ति प्रयोजनम्। वक्ष्यत्येतत्। धि सकारे सिचो लोप इति। द्विष्टरामित्यत्र स्कोः संयोगाद्योरिति सुचो लोपः प्राप्नोति। सडीति वचनान्न भवति। एतदपि नास्ति प्रयोजनम्। अत्रापि सिच इत्येतदनुवर्तिष्यते। दृषत्स्थानमित्यत्र झलो झलीति सलोपः प्राप्नोति। सडीति वचनान्न भवति। एतदपि नास्ति प्रयोजनम्। अत्रापि सिच इत्येवानुवर्तिष्यते। काष्ठशकुस्थाता इत्यत्र स्कोः संयोगाद्योरन्ते चेति ककारलोपः प्राप्नोति। सडीति वचनान्न भवति। एतदपि नास्ति प्रयोजनम्॥

द्विष्टरामिति। द्वौ वारौ द्विः सुच्प्रत्ययः। परिपूर्णत्वाद्बहुरथस्य प्रकर्षप्रत्ययः तदन्तात्किमेत्तिङव्ययेस्यामु प्रत्ययः। दृषत्स्थानमिति। उदः स्थास्तम्भोः पूर्वस्येति पूर्वसवर्णविधानात्सिचोऽन्यस्य सकारस्य झलो झलीति सलोपो न भवतीति ज्ञापकमाहुः। अन्यथा सलोपेनैवोत्थानमित्यादेः सिद्धत्वात्पूर्वसवर्णविधानमनर्थकं स्यात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काष्ठशगेवेति। दृशिग्रहणात्सयोगानुसरणात्ककारान्तेभ्यो धातुभ्यः क्विबभावात्। पक्स्थातेत्यत्र तु पचेः कुत्वस्यासिद्धत्वा
ल्लोपाप्रसङ्गः। कुतोयः काष्ठशकीत्यनेन न सति समासे निमित्तनिमित्तिनोः समानपदस्थत्वे लोपप्रसङ्गो न तु वाक्य इति द
र्शयति। पदस्येत्यधिकारात्प्रत्यासत्तिन्यायाश्रयाच्चैकपदस्थयोर्निमित्तनिमित्तिनोर्ग्रहणम्। एवञ्च पयोधावतीत्यत्र स
लोपाभावः॥ संयोगान्तस्य लोपः॥ वाक्यार्थमिति। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति वचनात्तस्यानिवृत्ता वादपि लो

काष्ठशगेवनास्ति कुतोयः काष्ठशकिति ष्ठेत्। क्रुञ्चेत्यत्र चोः कुः झलीति कुत्वं प्राप्नोति। सङ्गीति वचनान्न भवति
।एतदपि नास्ति प्रयोजनम्। निपातनादेतत्सिद्धम्। किं निपातनम्। ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजि-
क्रुञ्चामिति। धुर्य इत्यत्र हलि चेति दीर्घत्वं प्राप्नोति। सङ्गीति वचनान्न भवति। एतदपि नास्ति प्रयोजनम्। न भकु-
र्छुरामिति प्रतिषेधो भविष्यति॥ संयोगान्तस्य लोपः॥ संयोगान्तलोपे यणः प्रतिषेधः। संयोगान्तस्य लोपे य
णः प्रतिषेधो वक्तव्यः। दध्यत्र मध्वत्रेति। संयोगादिलोपे च यणः प्रतिषेधो वक्तव्यः। किमर्थम्। वाक्यर्थम्। वा
स्यर्थम्। न वा झलो लोपात्। न वा वक्तव्यम्। किं कारणम्। झलो लोपात्। झलो लोपः संयोगान्तलोपो वक्तव्यः।
बहिरङ्गलक्षणत्वाद्वा। अथवा बहिरङ्गो यणादेशः। अन्तरङ्गो लोपः। असिद्धं बहिरङ्गमन्तरङ्गे। संयोगा-
न्तलोपे सग्रहणम्। संयोगान्तलोपे सग्रहणं कर्तव्यम्। संयोगान्तलोपः सस्य चेति वक्तव्यम्। इहापि यथा
स्यात्। श्रेयान्। भूयान्। ज्यायान्। किं पुनः कारणं न सिध्यति। परत्वाद्रुः प्राप्नोति। असिद्धो रुस्तस्यासिद्धत्वा
ल्लोपो भविष्यति। न सिध्यति। किं कारणम्। रुविधानस्यानवकाशत्वात्। अनवकाशो रुर्लोपं बाधेत। सा
वकाशो रुः। कोऽवकाशः। पयः शिरः। ननु चात्रापि जश्त्वं प्राप्नोति। स यथैव रुर्जश्त्वं बाधत एवं लोपम
पि बाधेत। न बाधते। किं कारणम्।

पः परिहर्तुं शक्यः। नवेति। झलो झलीत्यतः सिंहावलोकितन्यायेन झल्ग्रहणमिहानुवर्तते। तत्र षष्ठ्या विपरिणम्यत इति य
णो लोपाभावः। स्कोः संयोगाद्योरित्यत्र तु पञ्चम्यन्तमेव संबध्यते तेन झलः पूर्वयोः स्कोर्लोपविधानाद् यणः पूर्वयोर्लोपा
भावः। अन्तरङ्ग इति। एकपदाश्रयत्वात्। स यथैवेति। यदा लक्षणनिरपेक्षं कार्याणां बाधकत्वमिति दर्शनं तदा विध्य
न्तरैरनाक्रान्तो विषयो नास्तीत्यविशेषात्सर्वकार्यं बाध्यमिति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येननाप्राप्तइति। यदालक्षणं बाध्यतइति दर्शनं तदा येन सर्वो विषय आक्रान्तः तदेव बाध्यते न हि तद्बाधित्वा सर्वविषयं लभते। यस्य तु क्वचित्प्राप्तिस्तद्बाधेनापि विषयलाभान्न तद्बाध्यते॥ अरादिति। रात्परस्य संयोगान्तस्य लोपो न भवति। ऊर्क्। अमार्ट्। प्रतिषिद्धार्थं चेति। अरादिति प्रतिषेधस्य बाधनार्थम्। यथा। मातुः पितुरिति। श्रेयानित्यादौ रुत्वबाधनार्थम्। नन्वानन्तर्यात्प्रतिषेधस्यैव बाधनार्थं सस्येत्येतत्स्यान्न तु रुत्वस्येत्याशङ्क्याह। अथवेति। अथवा रात्सस्येत्यत्रेति। वाक्यभेदेन

येननाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते जश्त्वे रुरारभ्यते। लोपे पुनः प्राप्ते चाप्राप्ते च। अथवा योगविभागात्सिद्धम्। अथ वा योगविभागः करिष्यते। एवं वक्ष्यामि संयोगान्तस्य लोपः रात्॥ संयोगान्तस्य लोपो भवति रात्। ततः। सस्य। सस्य च लोपो भवति। संयोगान्तस्य। किमर्थमिदम्। प्रतिषिद्धार्थं रुबाधनार्थं च। अथवा यदेतद्रात्सस्येति सग्रहणं तत्पुरस्तादपकृष्यते। संयोगान्तस्य लोपः सस्य। सस्य च संयोगान्तस्य लोपो भवति। ततः। रात्। रात्सस्यैव संयोगान्तस्य लोपो भवतीति। अथवा रात्सस्येत्यत्र संयोगान्तस्य लोप इत्येतदनुवर्तिष्यते॥ धि च॥ धि सकारे सिचो लोपः॥ धि सकारे सिचो लोपो वक्तव्यः॥ किं प्रयोजनम्। चकाद्धीति प्रयोजनम्। इह मा भूत् सलोपः। चकाद्धि पलितं शिर इति। आशाध्वं तु कथं न स्यात्। यदि तर्हि सिचो लोप इत्युच्यते आशाध्वं तु कथम्। आशाध्वमित्यत्र लोपो न प्राप्नोति। जश्त्वं सस्य भविष्यति। जश्त्वमत्र सकारस्य भविष्यति। सर्वत्रैवं प्रसिद्धं स्यात्। सर्वत्रैवं जश्त्वेन सिद्धं स्यात्। इहापि आयन्ध्वमारन्ध्वमिति जश्त्वेनैव सिद्धम्। श्रुतिश्चापि न भिद्यते। श्रुतिकृतश्चापि न कश्चिद्भेदो भवति। लुङश्चापि न मूर्धन्ये ग्रहणम्। तत्रायमप्यर्थः। दुणः षीध्वंलुङ्लिटां धोऽङ्गादित्यत्र लुङ्ग्रहणं न कर्तव्यं भवति। इहापि अच्योढ्ढ्वम् अप्लोढ्ढ्वमिति षत्वे सिचो धस्य ष्टुत्वे च कृते जश्त्वेन सिद्धम्। सेटि दुष्यति। सेटि दोषो भवति। इदमेव रूपं स्यात्। अलविढ्ढ्वम्। इदं न स्यात्। अलविध्वमिति। तस्मात्सिचो ग्रहणं कर्तव्यम्। यदि तर्हि सिचो ग्रहणं क्रियेत॥ घसिभस्योर्न सिध्येत्तु। घसिभस्योर्न सिध्यति।

संबन्धः। रात्सस्यैव लोपो भवतीत्येकं वाक्यम्। संयोगान्तस्य लोप इति द्वितीयम्॥ धि च॥ धि सकार इति। स्थानिनो लोपं प्रति विषयत्वविवक्षया सकार इति सप्तमीनिर्देशः। चकाद्धीति। हे शिरः पलितं सच्चकाद्धि शोभस्वेत्यर्थः। जश्त्वमिति। झलां जश् झशीत्यनेन। श्रुतिश्चापीति। एकस्यानेकस्य वा व्यञ्जनपरस्य श्रुतौ विशेषो नावधार्यते। लुङश्चापीति। श्लोकवार्त्तिककारस्यायुक्तमिदं वचनम्। अलविढ्ढ्वम् भृ‌ ढ्ढ्वमित्यादौ इण्‌स्वादङ्गादिति सिज्लोपे सति मूर्धन्यस्याविधाने रूपं न सिध्येत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सग्धिरिति। अदेः क्तिनि बहुलं छन्दसीति घस्लादेशः घसिभसोर्हलि चेत्युपधालोपः तत्र झलो झलीति सलोपो न प्राप्नोतीति इ-
ष्यते चाबब्धामिति। भसेर्लोटि तामि श्लौ द्विर्वचने पूर्ववदुपधालोपः। सघेरिति। सघ हिंसायामित्यस्य स्वरभेदोऽपि नास्ति।
क्तिन्याद्युदात्तत्वात् तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरविधानाच्च अनेकार्थत्वाच्च धातूनां समानादनेन सधिर्वर्तत इत्यर्थ-
भेदोऽपि नास्ति। बन्धेरिति। बध बन्धन इत्यस्य भसेरर्थे वर्तमानस्य लोटि ताम् मिव्यत्ययेन शपो लुकि नलोपे वर्णव्यत्ययेन ध

सग्धिश्च मे सपीतिश्च मे। बब्धां ते हरी धाना इत्यत्र न प्राप्नोति। तस्मात्सिज्ग्रहणं न तत्। तस्माद् द्विचेत्यत्र सिचो
ग्रहणं न कर्तव्यम्। कथं च काङ्घि पलितं शिर इति। एवं तर्हि सिज्ग्रहणं कर्तव्यम्॥ कथं सग्धिश्च मे सपीति
श्च मे बब्धां ते हरी धाना इति। नैष दोषः। इह तावत् सग्धिरिति नैतद्घसेरूपं किं तर्हि सघेरेतद्रूपम्। बब्धां ते हरी-
धाना इति। नैतद्भसेरूपं किं तर्हि बन्धेरेतद्रूपम्। छान्दसो वर्णलोपो वा यथेष्कर्तारमध्वरे। अथवा छान्दसो वर्णलोपो
भविष्यति। यथेष्कर्तारमध्वरे। निष्कर्तारमध्वरस्येति प्राप्ते। यथा तुभ्येदमग्ने। तुभ्यमिदमग्न इति प्राप्ते॥ आम्बानां च
रुः नाम्बानां चरुरिति प्राप्ते आव्याधिनीरुगणाः आव्याधिनीः सुगणा इति प्राप्ते। शिवा उद्रस्य भेषजी शिवा रुद्रस्य भेषजीरिति प्राप्ते।
तस्मात्सिज्ग्रहणं कर्तव्यम्। न कर्तव्यम्। यदेतद्रात्सस्येति सकारग्रहणं तत्सिचो ग्रहणं विज्ञास्यते। क-
थम्। रात्सस्येत्युच्यते न चान्यो रेफात्परः सकारोऽस्ति अन्यदतः सिचः। ननु चायमस्ति मातुः पितुरिति। तस्मा-
त्सिचो ग्रहणं कर्तव्यम्। न कर्तव्यम्। कस्मान्न भवति चकाङ्घि पलितं शिर इति। इष्टमेवैतत्संगृहीतं चकाधीत्ये-
व भवितव्यम्। धि सकारे सिचो लोपश्चकाद्धीति प्रयोजनम्। आशाध्वं तु कथं ते स्यादुजश्वं सस्य भविष्यति
। सर्वत्रैवं प्रसिद्धं स्याच्छ्रुतिश्चापि न भिद्यते। लुङश्चापि न मूर्धन्यो ग्रहणं सेटि दुष्यति। घसिभसोर्न सिध्येत्तु त-
स्मात्सिज्ग्रहणं न तत्। छान्दसो वर्णलोपो वा यथेष्कर्तारमध्वरे। रादे धौ तो र्घः॥

कारस्य बकारे बब्धामिति भवति। क्वचिद्बधेरिति पाठः। स त्वयुक्तः बधेः सन्विषयत्वादित्याहुः। छान्दस इति। घसिभसोः स-
कारस्य लोपे वा स्वरूपसिद्धिरित्यर्थः। इष्कर्तारमध्वरस्येत्येकदेशानुकरणादिष्कर्तारमध्वरशब्दात्सप्तमी। यदेतदिति। तदे-
व चोत्तरत्रानुवर्तत इति भावः। मातुरिति। उभयोः स्थाने भवत एकादेशस्यान्यतरतो व्यपदेशादुःस्थानिकत्वाद्रपरत्वे स-
ति सकारस्य लोपः॥ रादेः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घत्वस्यासिद्धत्वादिति। पूर्वत्रासिद्धमित्यस्य प्रतियोगमुपस्थानादेतत्सूत्रारम्भाच्च ढत्वघत्वयोर्विकल्पप्रसङ्गः। उक्तमिति। न ह्युत्सर्गापवादयोर्विकल्पो युक्तः द्रुहेश्च विकल्पविधिरनर्थकः स्यात्। अदादेरिति। असमर्थसमासो दादेर्न भवतीति

इह दोग्धा दोग्धुमिति घत्वस्यासिद्धत्वाद् ढत्वं प्राप्नोति। नैष दोषः। उक्तमेतत्। अपवादो वचनप्रामाण्यादिति। अथवा एवं वक्ष्यामि हो ढो दादेः। हः ढो भवति। अदादेः। ततो धातोर्घः। दादेरिति वर्तते नेति निवृत्तम्। एवमपि घो दादेरित्युच्यते तन्नेदं न सिध्यति। अधोक्। क्व तर्हि स्यात्। मा स्म धोक्। नैष दोषः। धातोरिति नैषा दादिसमानाधिकरणषष्ठी दादेर्धातोरिति। का तर्हि। अवयवयोगे षा षष्ठी धातोर्यो दादिरवयव इति। सा चावश्यमवयवयोगा षष्ठी विज्ञेया। उत्तरार्था। किं प्रयोजनम्। एकाचो बशो भष् झषन्तस्य स्ध्वोरिति इहापि यथा स्यात्। गर्दभयतेरप्रत्ययः। गर्धबिति। यद्यवयवयोगा षष्ठी दोग्धा दोग्धुमित्यत्र न प्राप्नोति। एषोऽपि व्यपदेशिवद्भावेन धातोरवयवो भवति। हृग्रहोर्भश्छन्दसि हस्य। हृग्रहोर्भश्छन्दसि हस्य भत्वं वक्तव्यम्॥ गर्दभेन संभरति मरुदस्य गृभ्णाति। सामिधेन्यो जभ्रिरे। उद्ग्राभञ्च निग्राभञ्च ब्रह्म देवा अवीवृधन्। दधस्तथोश्च॥ किमर्थश्चकारः। स्ध्वोरित्येतदनुकृष्यते। नैतदस्ति प्रयोजनं सिद्धं स्ध्वोः पूर्वेणैव। न सिध्यति। किं कारणम्। अबशादित्वात्। ननु च जश्त्वे कृते बशादिः। असिद्धं जश्त्वं तस्यासिद्धत्वान्न बशादिः। एवं तर्हि सिद्धकाण्डे पठितं अभ्यासजश्त्वचर्त्वमेत्वतुकोरिति। एत्वतुकोर्ग्रहणं न करिष्यते। अभ्यासजश्त्वचर्त्वं सिद्धमित्येव। एवमप्यझषन्तत्वान्न प्राप्नोति। लोपे कृते झषन्तः। स्थानिवद्भावान्न झषन्तः। अत उत्तरं पठति दधस्तथोरनुकर्षणानर्थक्यं स्थानिवत्प्रतिषेधात्। दधस्तथोरनुकर्षणमनर्थकम्। किं कारणम्। स्थानिवत्प्रतिषेधात्। प्रतिषिध्यतेऽत्र स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति। स चावश्यं प्रतिषेध आश्रयितव्यः। इतरथा ह्यल्लोपे प्रतिषेधः। यो हि मन्यते अनुकर्षणसामर्थ्यात्तेत्र भवति। अल्लोपे तेन प्रतिषेधो वक्तव्यः स्यात्। दधाति। तथोश्चापि ग्रहणं शक्यमकर्तुम्। कथम्। ॥ ॥

धातोर्घ इत्यत्र दादिग्रहणमनुवर्तते न तु नञ्। एषोऽपीति। प्रयोगभेदाद्भिन्नस्य धातोरयमवयव इति बुद्ध्या परिकल्पनात्। दधस्त॥ एत्वतुकोर्ग्रहणमिति। फलिभजिग्रहणसामान्येन सिद्धत्वस्य ज्ञापकमिति भावः॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

झलिझषन्तस्येति। झषन्तग्रहणानुवृत्तौ सत्यांझषन्तत्वान्यथानुपपत्त्याकृतिकृतमानन्तर्यमाश्रीयते स्थानिवत्त्वकृतत्तुव्य
वधानं वचनादप्रतिबन्धकमित्यर्थः॥ झष॥ तत्र जश्त्वइति। पूर्वत्रासिद्धमिति भष्भावे जश्त्वस्यासिद्धत्वाद्झषन्तत्वं
धत्वे तु परस्मिन् सिद्धं जश्त्वमिति भावः॥ ॥इत्युपाध्यायजैय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे अष्टमस्याध्याय
स्य द्वितीयपादे प्रथममाह्निकम्॥ ॥रदा॥ विचारसद्भावादत्र प्रत्युदाहरणोपन्यासः॥ अत्र प्राप्नोतीति। निष्ठेत्यसमस्तं लुप्त

झलिझषन्तस्यत्युच्यते॥ तयोश्चायंझलिझषन्तो भवति नान्यत्र। अथाप्येतन्नास्ति पूर्वत्रासिद्धे न स्थानि
वदिति। एवमपि नार्थोऽनुकर्षणार्थेन चकारेण नापि तयोर्ग्रहणेन। आनन्तर्यमिहाश्रीयते झलिझषन्त
स्येति। क्वचिच्च सन्निपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यं क्वचिन्नैव सन्निपातकृतं नापि शास्त्रकृत
म्। लोपे सन्निपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यम्। अलोपे नैव सन्निपातकृतं नापि शास्त्रकृतम्।
यत्र कुतश्चिदेवानन्तर्यं तदाश्रयिष्यामः। झषस्तथोर्धोऽधः॥ अध इति किमर्थम्। धत्तः। धत्थ ॥अध इति
शक्यमवक्तुम्। कस्मान्न भवति धत्तः धत्थ इति। जश्त्वे योगविभागः करिष्यते। इदमस्ति दधस्तथोश्चेति
। ततो वक्ष्यामि झलां जशः झलां जशो भवन्ति दधस्तथोः। ततः। अन्ते। अन्ते च झलां जशो भवन्तीति। तत्र
जश्त्वे कृते अझषन्तत्वान्न भविष्यति॥ ॥इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये अष्ट
मस्याध्यायस्य द्वितीयपादे प्रथमाह्निकम्॥ ॥रदाभ्यां निष्ठातो नः पूर्वस्य च दः॥ रदाभ्यामिति किमर्थम्। चरि
तं मुदितम्। ननु च रदाभ्यामित्युच्यमानेऽप्यत्र प्राप्नोति॥ अत्रापि हि रेफदकाराभ्यां परा निष्ठा॥ न रेफदकारा
भ्यां निष्ठा विशेष्यते। किं तर्हि तकारो विशेष्यते॥ रेफदकाराभ्यामुत्तरस्य तकारस्य नो भवति स चेन्निष्ठा
या इति। अथ पूर्वग्रहणं किमर्थम्॥

ष्ठीकं पदं तेन रदाभ्यां परा या निष्ठा तस्यास्तकारस्य नत्वमिति सूत्रार्थाश्रयणात्। न रेफेति। निष्ठात इति समासनिर्देशः। त
त्र निष्ठाया उपसर्जनत्वाद्विशेषणेनासंबन्धः। प्रधानस्य तु तकारस्य संबन्धः। अथेति। भिन्नवद्भ्यामित्यादौ निष्ठादकार
स्य बहिरङ्गत्वाल्लाक्षणिकत्वाच्च नत्वाभावात्पूर्वस्यैव भविष्यतीति प्रश्नः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्ठादेश इति। असति पूर्वग्रहणे पाठक्रमे निष्ठा प्रत्यासन्नेति तदकारस्यैव नत्वेन भाव्यं नान्यस्येति बहिरङ्गलाक्षणिकत्वयोरहेतुत्वम्। किञ्च। पदस्येत्यधिकारात्पदावयवस्य दस्य नत्वविधानाद्बहिरङ्गत्वं नास्ति केवलस्य च वर्णस्यानुपदेशाद्वर्णग्रहणेषु लक्षणोक्तपरिभाषाया अव्यापारः। पञ्चमीनिर्दिष्टादिति। यद्यपि प्रत्यासत्तिर्नापेक्ष्यते तथापि रदाभ्यां परस्य दस्य नत्वेन भाव्यमिति सामर्थ्यान्निष्ठादकारस्यैव नत्वप्रसङ्गः। क्षैतिरिति। वृद्धिरेवात्र नत्वस्य निमित्तं क्षियो दीर्घादिति वचनात्। का

निष्ठादेशे पूर्वग्रहणं परस्यादेशप्रतिषेधार्थम्। निष्ठादेशे पूर्वग्रहणं क्रियते परस्यादेशो मा भूदिति। भिन्नवद्भ्याम्। भिन्नवद्भिः। छिन्नवद्भ्याम्। छिन्नवद्भिः। पञ्चमीनिर्दिष्टाद्धि परस्य। पञ्चमीनिर्दिष्टाद्धि परस्येति परस्य प्राप्नोति॥ वृद्धिनिमित्तात्प्रतिषेधः। वृद्धिनिमित्तात्प्रतिषेधो वक्तव्यः। किं प्रयोजनम्॥ प्रयोजनं कार्तिक्षैतिफौल्लयः। कार्तिरिति वृद्धौ कृतायां रदाभ्यामिति नत्वं प्राप्नोति॥ क्षैतिरिति वृद्धौ कृतायां क्षियो दीर्घादिति नत्वं प्राप्नोति। फौल्लिरिति वृद्धौ कृतायामुदुपधत्वसन्नियोगेन लत्वमुच्यमानं न प्राप्नोति। अथोच्यमानेऽपि प्रतिषेधे वृद्धिनिमित्तादिति कथमिदं विज्ञायते। वृद्धिरेव निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तादिति। आहोस्विद्वृद्धिर्निमित्तमस्य सोऽयं वृद्धिनिमित्तः वृद्धिनिमित्तादिति। किं चातः। यदि विज्ञायते वृद्धिरेव निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तादिति। क्षैतिः संगृहीतः। कार्तिरसंगृहीतः। अथ विज्ञायते वृद्धिर्निमित्तमस्य सोऽयं वृद्धिनिमित्तः वृद्धिनिमित्तादिति। कार्तिः संगृहीतः। क्षैतिरसंगृहीतः। उभयथा च फौल्लिरसंगृहीतः। यथेच्छसि तथास्तु। अस्तु तावद्वृद्धिरेव निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तादिति। ननु चोक्तं क्षैतिः संगृहीतः कार्तिरसंगृहीत इति। कार्तिश्च संगृहीतः। कथम्। वृद्धिर्भवति गुणो भवतीति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्त्यते। अथ वा पुनरस्तु वृद्धिर्निमित्तमस्य सोऽयं वृद्धिनिमित्तः वृद्धिनिमित्तादिति। ननु चोक्तं कार्तिः संगृहीतः क्षैतिरसंगृहीत इति। क्षैतिश्च संगृहीतः। कथम्।

र्तिरिति। नत्वस्याकारो न निमित्तं किं तु रेफ इति प्रतिषेधो न प्राप्नोति। उभयथेति। न हि वृद्धिर्लत्वस्य निमित्तं नापि वृद्धिहेतुकात्परो निष्ठातकारः न चात्र लत्वनिषेध दृश्यते। रेफशिरा इति। ननु चोक्तरूपस्याक्तपरिमाणस्य च वृद्धिसंज्ञाविधानात्कथमाकारस्य वृद्धिसंज्ञा। अथ पूर्वान्तत्वाद्रेफस्य वृद्धिग्रहणेन ग्रहणमित्युच्यते तदा किमनेनोक्तेन रेफशिरा गुणवृद्धिसंज्ञक इति। यद्यपि प्रसज्यमानो णप्परो न भवेदपि तूत्तरकालं रत्वं विधीयते। तथापि तद्भक्तत्वात्कार्तिः संगृहीत एव॥ ॥ ॥ राम· ३७°

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंतर्हि स्थितपक्षप्रदर्शनात्पूर्वोक्तदोषाभावः। यत्तदिति। एवंप्रतिषेधस्यव्यापकत्वाश्रयणादनुग्रहोभवतीतिगौणःश ९
ब्दार्थआश्रीयते। फौल्लिसाधारणंपरिहारंब्रवीति। नवेति॥ ल्वादिभ्यः॥ कीर्णिरिति। कॄगॄलूपूजांरूपाणि। दुग्वोरिति। दुग
तावित्यस्यदोर्ग्रहणं नतुटुदुउपतापइत्यस्य। सानुबन्धकत्वात्। पूनादिति। अनेकार्थत्वाद्धातूनांपूञ्विनाशार्थः। सि
नोग्रासइति। बन्धनक्रियायामानुकूल्यात्तत्कर्मापिग्रासः कर्तृत्वेनविवक्ष्यते॥ क्षियो॥ अक्षितमिति। क्षयःक्षितमिति भावे

यत्तद्वृद्धिशास्त्रंतस्मिन्वृद्धिशब्दोवर्तते। सतर्हिप्रतिषेधोवक्तव्यः। नवाबहिरङ्गलक्षणत्वात्। नवावक्तव्यः
। किंकारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गावृद्धिः॥ अन्तरङ्गंनत्वम्। असिद्धंबहिरङ्गमन्तरङ्गे। एवं चवृ
त्वाल्लत्वमपिसिद्धंभवति फौल्लिरिति॥ ल्वादिभ्यः॥ ॠकारल्वादिभ्यःक्तिन्निष्ठावत्। ॠकारल्वादिभ्यःक्ति
न्निष्ठावद्भवतीतिवक्तव्यम्। कीर्णिः। गीर्णिः। लूनिः। पूनिः। दुग्वोर्दीर्घश्च। दुग्वोर्दीर्घश्चेतिवक्तव्यम्। आदूनः।
विगूनः। पूञोविनाशे। पूञोविनाशइतिवक्तव्यम्। पूनायवाः विनाशइतिकिमर्थम्। पूतंधान्यम्। सिनोतेर्ग्रा
सकर्मकर्तृकस्य। सिनोतेर्ग्रासकर्मकर्तृकस्येति वक्तव्यम्। सिनोग्रासःस्वयमेव। ग्रासकर्मकर्तृकस्येतिकि
मर्थम्। सितापाशेनसूकरी॥ क्षियोदीर्घात्॥ दीर्घादितिकिमर्थम्॥ अक्षितमसिमामेक्षेष्ठाः। दीर्घादितिश
क्यमवक्तुम्। कस्मान्नभवति अक्षितमसिमामेक्षेष्ठाइति। निर्देशादेवेदमभिव्यक्तंदीर्घस्यग्रहणमिति। य
दिह्रस्वस्यग्रहणंस्यात् क्षेरित्येवब्रूयात्। नात्रनिर्देशःप्रमाणंशक्यंकर्तुम्। यथैवह्यत्राप्राप्ताविभक्तिः। ए
वमियङादेशोपि। नात्राप्राप्ताविभक्तिः। सिद्धात्रविभक्तिःप्रातिपदिकादिति। कथंप्रातिपदिकसंज्ञा। अर्थव
त्प्रातिपदिकमिति। ननुचाधातुरितिप्रतिषेधःप्राप्नोति। नैषधातुः। धातोरेषोनुकरणम्। यद्यनुकरणमि
यङादेशोनप्राप्नोति। प्रकृतिवदनुकरणंभवतीति इयङादेशोभविष्यति॥

क्तः भावस्याणपदर्थइतिदीर्घाभावान्नत्वाभावः। क्षेरिति। इयङादेशात्परत्वादृघेर्ङितीतिगुणस्यन्याय्यत्वात्। नात्रनिर्देश
इति। नहीयङादेशाद्दीर्घस्यग्रहणंप्रत्येतुंशक्यतेइयङ्निमित्तस्यविभक्तेर्दुर्लभत्वात्ततोप्राप्तायथाविभक्तिः सौत्रत्वान्नि
र्देशस्यभवत्येवंह्रस्वस्यापीयङादेशःस्यादितिदीर्घग्रहणमर्थवत्। नैषधातुरिति। क्रियावाचिनोधातुसंज्ञाविधानादनुनि
र्देशेचाक्रियावाचित्वात्। प्रकृतिवदिति। अर्थभेदादनुकार्यानुकरणयोर्भेदाद्वाचनिकः कार्यातिदेशः॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाद्युत्पत्तिर्नेति। अधातुरिति प्रकृतेः प्रातिपदिकसंज्ञानिषेधादनुकरणस्यापि तत्प्रसङ्गात्। आतिदेशिकानामिति। अतिदेशः प्रयोजनं येषां तान्यातिदेशिकान्यतिदेशभाञ्ज्युच्यन्ते। ननु यदतिदेशकार्येणाविरुद्धं स्वाश्रयं कार्यं तन्मा निवृतत्। यत्तु विरुद्धं तत्कथं न निवर्तेत। एवं तर्ह्यधातुरिति पर्युदासो न प्रसज्यप्रतिषेध इत्यातिदेशिकस्य कार्यस्याभावाद्धातोरन्यत्वात्स्वाश्रया प्रातिपदिकसंज्ञा प्रवर्तते प्रसज्यप्रतिषेधे तु निषेध एवातिदेशिकः स्यात्। इयङादेशस्त्वातिदेशिको धातोर्विधीयमानत्वाद् भवति स च दीर्घस्यैवेति दीर्घग्रहणमनर्थकम्॥ अथापीति। यद्यप्यधातुरिति प्रसज्यप्रतिषेध इत्यर्थः। अवश्यमिति। यस्मात्प्रातिपदिकसंज्ञानिषेधात्प्राप्ता यस्माच्चोत्पन्ना लुप्ता तस्मात्सर्वस्मादित्यर्थः। नेर्विश इति। नेरिति लुप्तविभक्तिकाव्ययानुकरणान्निर्देशार्थो विभक्तिर्विश इति निर्देशादेवा प्राप्ता विभक्तिरियङ् तु दीर्घानुकरणस्यैवेति दीर्घग्रहणमनर्थकम्। अ

यदि प्रकृतिवदनुकरणं भवतीत्युच्यते। स्वाद्युत्पत्तिर्न प्राप्नोति। एवं तर्ह्यातिदेशिकानां स्वाश्रयाण्यपि न निवर्तन्ते। अथाप्येतन्नास्ति आतिदेशिकानां स्वाश्रयाण्यपि न निवर्तन्त इति। एवमपि न दोषः। अवश्यमत्र सर्वतो नैर्देशिकी विभक्तिर्वक्तव्या। तद्यथा। नेर्विशः। परिव्यवेभ्यः क्रियः। विपराभ्यां जेरित्येवमर्थम्। अथाप्येतन्नास्ति प्रकृतिवदनुकरणं भवतीति। एवमपि न दोषः। धातोरजादौ यद्रूपं तदनुक्रियते॥ अञ्चोऽनपादाने॥ अञ्चेर्नत्वे व्यक्तप्रतिषेधः। अञ्चेर्नत्वे व्यक्तस्य प्रतिषेधो वक्तव्यः। व्यक्तमनृतं कथयतीति। अञ्जिनिज्ञानात्सिद्धम्। नैतदञ्चेरूपम्। अञ्जेरेतद्रूपम्। अञ्चत्यर्थो वै गम्यते। कः पुनरञ्चत्यर्थः। अञ्चतिः प्रकाशने वर्तते। अञ्चितं गच्छति। प्रकाशयत्यात्मानमिति गम्यते। न वै लोकेऽञ्चितं गच्छतीति प्रकाशनं गम्यते। किं तर्हि समाधानं गम्यते। समाहितो भूत्वा गच्छतीति॥

थापीति। इहानुकर्ता कदाचित्सामान्यमनुकरोति कदाचिद्विशेषम्। तत्र यदा सामान्यमनुक्रियते तदा विशेषनिबन्धनस्य कार्यस्य सामान्येऽभावात् प्रकृतावदृष्टत्वादनुकरणेऽप्यभावः। यदा तु विशेषोऽनुक्रियते तदा तन्निबन्धनं कार्यमनुकरणे प्रवर्तते। तत्र यदा धात्वधातुसामान्यं क्षिमात्रमनुक्रियते तदेयङो प्राप्तिरिति चिक्षियतुरित्यादौ कृते यङादेशस्येदमनुकरणमिति दीर्घादिति कर्तव्यम्॥ अञ्चो॥ अञ्चेरिति। प्रकाशनार्थे व्यक्तशब्देन त्वं प्राप्नोति न चेष्यत इति वचनम्। अञ्चितं गच्छतीति। गमनक्रियाविशेषणमेतत्। प्रकाशत्वेन च गमनं पूज्यत इति पूजानिबन्धनो नलोपप्रतिषेधः। न वै लोक इति। सर्वस्य गन्तुस्तत्समये तस्य च गमनस्य प्रकाशत्वादिति भावः। समाधानमिति। गमनस्याव्याकुलत्वमित्यर्थः॥ राम॰ २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचनागाश्चाञ्चितगामिनइतिप्रयोगोदृश्यते। गमनस्यचसमाधानमेवपूजा।अङ्कश्चेति।प्रकाश्यतेनेनेतिल्युट्।अङ्क इत्यत्रतु हलश्चेतिकरणे घञ्।अङ्कपदलक्षणयोरित्यस्याप्येतद्रूपंभवति।अञ्जेस्त्वङ्क इतिनसिध्यति।अङ्किताइति। अङ्कयुक्ताःकृताइत्यर्थः। मत्वन्तादङ्कशब्दात्तत्करोतीतिणिचिकृतइष्ठवद्भावान्मतुब्लुकिटिलोपेचरूपम्। अञ्जेरिति। ननुयद्यप्यञ्जिस्तदर्थस्तथाप्यञ्चतेःसोर्थोभवतीतितस्यव्यक्तमितिनसिध्यतिव्यक्तमितिप्राप्नोति। एवंतर्हिव्यक्तमित्युक्तेप्रकाशनंनगम्यतइतिव्यक्तशब्दप्रकृतिरञ्जिरेवप्रकाशने वर्ततेनत्वञ्चिरित्यदोषः। कथंपुनरिति।अर्थान्तरेरूढोऽन्योऽन्यस्यार्थान्तरवाचिनोऽर्थेकथंप्रवर्त्ततइत्यर्थः।अनेकार्थाइति। धातुपाठेतुक्रियावाचित्वप्रदर्शन

एवंतर्हि अञ्चेः अङ्कः।अङ्कश्चप्रकाशनम्। अङ्किताःगावइत्युच्यतेअन्याभ्योगोभ्यःप्रकाशन्ते। अञ्चत्यर्थे इतिचेत्स्ञ्जेस्तदर्थत्वात्सिद्धम्। अञ्चत्यर्थेइतिचेद् अञ्जिरपिअञ्चत्यर्थेवर्तते। कथंपुनरन्योनामान्यस्यार्थेवर्ततेकथमञ्जिरञ्चेरर्थेवर्तते ।अनेकार्थाअपिधातवोभवन्तीति ।अस्तिपुनःक्वचिदन्यत्रापिअञ्जिरञ्चत्यर्थेवर्तते ।अस्तीत्याह ।अञ्जेरञ्जनमञ्जनं चप्रकाशनम् ।अङ्क्ते अक्षिणी इत्युच्यते यत्तत्सितं चासितं चैतत्प्रकाशयति। तथाञ्जे र्व्यञ्जनंव्यञ्जनं चप्रकाशनम्। यत्तत्स्नेहेनमधुरेणचजडीकृतानामिन्द्रियाणास्वस्मिन्नात्मनिव्यवस्थापनंसरागः।तद्व्यञ्जनम्। अन्वर्थंखल्वपिनिर्वचनंव्यज्यतेऽनेनेतिव्यञ्जनमिति।।निर्वाणोवाते।।अवाताभिधाने।अवाताभिधानइतिवक्तव्यम्। इहापियथास्यात् ।निर्वाणोग्निर्वातेन।निर्वाणःप्रदीपोवातेन।।

परोर्थनिर्देशोनतुनियमार्थः।तथाचकुर्दखुर्दगुर्दगुदक्रीडायामेवेत्येवकारःपठितः। अस्तिपुनरिति।अन्यत्रदर्शनेव्यक्तशब्देपितदर्थत्वमञ्जेःशक्यतेसाधयितुंनान्यथेतिप्रश्नः। अञ्जनमिति। अज्यतेयेनाक्षिणीतदञ्जनम्।तत्रैतत्स्यादूरूढिशब्दोयम्।रूढिषुचव्युत्पत्तिनिमित्तमेवक्रियानतुशब्दप्रवृत्तिनिमित्तमित्याशङ्क्य रूढिशब्दमुदाहरति। अङ्क्त इति।व्यत्ययेनछन्दस्यात्मनेपदम्।यत्तत्सितंचेति।सितासितेसुतरांविभागेनप्रकाशयतीत्यर्थः। तथेति।व्यज्यते नेनरसइति व्यञ्जनम्।रागइतिरज्यतेऽनेनेतिरागोव्यञ्जनमेव।अन्वर्थमिति। यौगिकोव्यञ्जनशब्दइत्यर्थः।।निर्वाणोऽवाते।।अवाताभिधानइति। तेननिर्वातोवातइत्यत्रैवनत्वनिषेधोनतुभावेनिष्ठायामितिनिर्वाणंवातेनेतिभाव्यमितिवार्तिककारस्यदर्शनम्।अन्येतुवानकर्तृकेधात्वर्थेसर्वत्रनिषेधमिच्छन्ति।निर्वातोवातोनिर्वातंवातेनेति। निर्वाणःप्रदीपोवातेनेत्यत्रतुवातःकरणमितिप्रतिषेधाभावः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुपस॰। यद्यपि फुल्लादयः पचाद्यचीगुपधलक्षणेकेचसिध्यन्तितथापिनिष्ठाचद्व्यजनादित्यादिकार्यसिद्ध्येफुल्लितापनि
रूशब्दनिवृत्तयेचनिपातनम्। स्वरइति। तनूकरणवृत्तेःकर्मणिक्तेगतिरनन्तरइत्याद्युदात्तंपदंभवति। तनूभवनवृत्तेस्तु
कर्त्तरिक्तेन्तोदात्तंपदंस्यात्। पदस्येति। गम्यमानार्थत्वादप्रयोगएवलोपस्तत्रगमिंप्रतिपरिरुपसर्गोनतुकृशिमित्यनुपस
र्गत्वात्परेर्निष्ठान्तएवकृशशब्दः। अव्ययस्वरेणाद्युदात्तःपरिकृशशब्दःपरेर्गतित्वाभावात्। जगतीति। येयंपरिकृशशब्द

अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः॥ अनुपसर्गादित्युच्यते। तत्रेदंनसिध्यति। परिकृशमिति। कृशेःकएषविहि
तइगुपधात्। नैतन्निष्ठान्तम्। किंतर्हि कृशएषइगुपधात्कोविहितः। नैवंशक्यम्। स्वरेहिदोषोभवतिपरिकृशे।
नैवंशक्यम्। इहहिपरिकृशाइतिस्वरेदोषःस्यात्। अन्तःथाथघञ्क्ताजबित्रकाणामित्येषस्वरःप्रसज्येत। प
दस्यलोपोविहितइतिमतम्। एवंतर्हिपदस्यलोपोत्रद्रष्टव्यः। पर्यागतःकार्श्येनपरिकृशः। जगत्यनूनाभव
तिहिरुचिरा। फलेर्लत्वेउत्पूर्वस्योपसंख्यानम्॥ फलेर्लत्वेउत्पूर्वस्योपसंख्यानंकर्तव्यम्। उत्फुल्लोऽन्यतंकथय
ति। अत्यल्पमिदमुच्यते उत्पूर्वादिति। उत्फुल्लसंफुल्लयोरितिवक्तव्यम्। उत्फुल्लः। संफुल्लः। कृशःकएषहिवि
हितइगुपधात्। स्वरेहिदोषोभवतिपरिकृशे। पदस्यलोपोविहितइतिमतम्। जगत्यनूनाभवतिहिरुचिरा॥
नुदविदोन्दत्राघ्राह्रीभ्योन्यतरस्याम्॥ किमयंविधिराहोस्वित्प्रतिषेधः। किंचातः। यदितावद्विधिःनकारग्र
हणंकर्तव्यम्। नकर्तव्यम्। प्रकृतमनुवर्तते। क्वप्रकृतम्। रदाभ्यांनिष्ठातोनःपूर्वस्यचदइति। तद्वैअनेकेननि
पातेनव्यवच्छिन्नंनशक्यमनुवर्तयितुम्। अथप्रतिषेधःह्रीग्रहणमनर्थकंभवतिनह्येतस्माद्विधिरस्तीति।
यथेच्छसितथास्तु। अस्तुतावद्विधिः। ननुचोक्तंनकारग्रहणंकर्तव्यंनकर्तव्यंप्रकृतमनुवर्तते क्वप्रकृतंरदा
भ्यांनिष्ठातोनःपूर्वस्यचदइतितद्वैअनेकेनव्यवच्छिन्नंनशक्यमनुवर्तयितुमिति। संबन्धमनुवर्त्तिष्यते॥ ॥

स्यव्युत्पत्तिः प्रदर्शितासारुचिराअनूनापरिपूर्णरूपेस्वरेचदोषाभावात्॥ नुदविद॥ किमयमिति। कश्चिद्विधिनार्थःक
श्चिन्निषेधेनततोवक्ष्यमाणोऽभिप्रायः। नकारग्रहणमिति। प्रतिषेधेतुनुदादिभ्योयस्मात्प्राप्तोतितन्नभवतीत्यन्तरेणा राम॰
पिनकारग्रहणंसिध्यति। प्राकरणिकस्यप्रतिषेधविज्ञानादतिप्रसङ्गाभावः॥ ॥ ॥ ॥ ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विनकारकइति।वापदान्तस्येतिपरसवर्णाभावपक्षेएकोनकारआदेशोद्वितीयोनञः संबन्धीपरसवर्णपक्षेतुहलोयमांय
मिलोपइतिमध्यमनकारलोपः। ॥एतदेवेति॥नह्यप्रसक्तस्यप्रतिषेधः संभवति॥ वित्तोभोगप्रत्यययोः॥ यस्यविदेरि
ति।नुदविदेत्यत्रोन्दिनारोधादिकेनसाहचर्याद्विद्विचारणइत्यस्मान्नत्वविकल्पः यद्यपिनुदिनातौदादिकेनसाहच
र्यंतथापिशब्दपरविप्रतिषेधादुन्दिरत्रव्यवस्थाहेतुर्नतुनुदिः। विद्लृलाभइत्यस्मात्तुभोगप्रत्यययोर्नत्वनिषेधः न्यत्रेन
त्वम्।विदसत्तायामित्यस्मात्तुनत्वम्। विदज्ञानइत्यस्मात्त्विटाव्यवधानान्नत्वाभावः।तौदादिकात्तुविभाषागमहनेतिद्व

अथवाक्रियतेन्यासएवद्विनकारकोनिर्देशः॥नुदविदोन्दत्राघ्राह्रीभ्योन्यतरस्यान्नध्याख्यापॄमूर्छिमदा
मिति।अथवापुनरस्तुप्रतिषेधः।ननुचोक्तंह्रीग्रहणमनर्थकंनह्येतस्माद्विधिरस्तीति।नानर्थकम्।एतदेव
ज्ञापयत्याचार्योभवत्येतस्माद्विधिरिति।यदयंह्रीग्रहणंकरोति॥ वित्तोभोगप्रत्यययोः॥ बहवइमेविदयः
पठ्यन्तेतत्रनज्ञायतेकस्यनिष्ठानत्वंकस्यविभाषाकस्यप्रतिषेधःकस्यइडिति।अतउत्तरंपठति। यस्यवि
देःश्नशकौतपरत्वेतनवचनेतदुवाप्रतिषेधौ।श्नविकरणस्यविभाषाशविकरणस्यप्रतिषेधः।श्यन्विकर
णान्नविधिःछिदितुल्यः। श्यन्विकरणाद्विदेर्नविधिःछिदिनातुल्यः।लुग्विकरणोवलिपर्यवपन्नः।लुग्वि
करणोविदिर्वलादौपर्यवपन्नः। एषएवार्थः।ययोर्विदोःश्नशावुक्तौतयोर्नत्वस्यवानञौ।ययोस्तुश्यन्लुकौता
भ्यांछिदिवच्चेड्वलीष्यते। अपरआह।वेत्तेस्तुविदितोनिष्ठाविद्यतेर्विन्नइष्यते।विन्तेर्विन्नश्चवित्तश्चवित्तोभो
गेषुविन्दतेः॥भित्तंशकलम्।भित्तंशकलमित्युच्यतेतत्रेदंनसिध्यतिभित्तंभिन्नमिति।नैषदोषः। ॥ ॥

सौविकल्पविधानाद्यस्यविभाषेतिनिष्ठायामिट्प्रतिषेधः।तनवचनइति।तस्यनस्तनस्तस्यवचनमितिसमासः।तदुइ
ति।तदिति लुप्तषष्ठीकमुइत्यनर्थकोनिपातःपादपूरणार्थः। विन्तेरिति।वित्तइतितिङन्तानुकरणात्षष्ठी॥भित्तंभि
न्नमिति।शकलवाचिनाभित्तशब्देनसामानाधिकरण्याद्भिन्नशब्दस्यापिशकलार्थवृत्तित्वान्नत्वाप्रसङ्गः।ततश्चभि
त्तंभित्तमित्येवस्यात्रतुभित्तंभिन्नमितिचोद्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वत्रेति। शकले घटादौ च। विदारणसामान्य इति। ततश्च सामान्येऽर्थे पदे संस्क्रियमाणे शब्दान्तरप्रयोगसमधिगम्यः शकलार्थो बहिरङ्गत्वान्नत्वाभावस्यानिमित्तम्। तत्रावश्यमिति। सामान्योपक्रमे विशेषाभिधानमिति भावः। विशेषोपक्रमे त्वभिधाने भित्तशब्दः शकले रूढ इति भिदिक्रिया केवलं व्युत्पत्तिनिमित्तं न तु प्रवृत्तिनिमित्तम्। अथवा यया विदारणक्रियया शकलं निर्वर्तते तामेव भित्तशब्दोऽन्तर्भावयति या तु निष्पन्नस्य शकलस्यान्या विदारणक्रिया तत्र वर्तते पादनायाने कक्रियासंबन्धसम्भवे क्रियान्तरव्यवच्छेदाय भिन्नशब्दस्याप्यविरुद्धप्रयोगः। तत्त्वमिति। भित्तशब्दशकलशब्दयोः पर्यायत्वाद्युगपदप्रयोग इत्यर्थः॥ क्विन्। प्रत्ययग्रहणमिति। क्विनः प्रत्ययत्वाव्यभिचारात्प्रश्नः। वकारस्यैवेति। प्रत्ययग्रहणे ह्यस्मात्स

सर्वत्रैवात्र भिदिर्विदारणसामान्ये वर्तते तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः भिन्नं किं भित्तमिति। तत्वमभिधायकं चेत्। शकलस्यानर्थकः प्रयोगः स्यात्। शकलेन चाप्यभिहितेन भवति तत्त्वं निर्णयामः॥ क्विन्प्रत्ययस्य कुः॥ प्रत्ययग्रहणं किमर्थम्। न क्विनः कुरित्येवोच्येत। क्विनः कुरितीयत्युच्यमाने वकारस्यैव कुत्वं प्रसज्येत। ननु च लोपे कृते न भविष्यति। अनवकाशं कुत्वं लोपं बाधेत। सावकाशं कुत्वम्। कोऽवकाशः। अनन्त्यः। कथं पुनः सत्यन्तेऽनन्त्यस्य कुत्वं स्यात्। आचार्यप्रवृत्तिर्ज्ञापयति नान्त्यस्य कुत्वं भवतीति। यदयं क्विनः कुरिति कवर्गनिर्देशं करोति इतरथा हि तद्गुणमेवायं निर्दिशेत्॥ इदं तर्हि प्रयोजनं येभ्यः क्विन्प्रत्ययो विधीयते तेषामन्यप्रत्ययान्तानामपि कुत्वं यथा स्यात्। ॥ ॥ ॥

तदादेस्तदन्तस्येति वचनाल्लोपापवादो वकारस्यैव कुत्वं स्यात्। लोपे कृत इति। अन्तरङ्गो लोपः कुत्वं तु बहिरङ्गं पदस्येति विधानात्। अनवकाशमिति। क्विबादिषु सावकाशं लोपं विशेषविहितं कुत्वं बाधेतेति भावः। अनन्त्य इति। क्विन्प्रत्ययापेक्षयानन्त्यः पदस्य त्वन्त्य इति ज्ञेयम्। पदस्येति स्थानषष्ठ्या अन्त्येऽल्युपसंहाराद् अन्त्यस्यैव कुत्वेन भाव्यं यदि तु पदस्येत्यवयवषष्ठी स्यात्तदा घृतस्पृशेत्यादावपि कुत्वं स्यात्। कथं पुनरिति। सत्यपि संभवे बाधनं भवतीति लोपं बा- राम

धित्वा कुत्वेन भाव्यमिति भावः। यदयमिति। अनेकस्य स्थानिनोऽनेकादेशप्रतिपत्तये वर्गग्रहणं वकारस्यैव तु स्थानित्वे घकार एव निर्दिश्येत। वर्गाणां तृतीयचतुर्था इति शिक्षायां वकारघकारयोर्गुणसाम्यप्रतिपादनात्। इदं तर्हीति। क्विन्प्रत्ययस्त्सकृति धातूपलक्षणमिति तस्मिन्सत्यसति वा तत्प्रकृतेर्धातोः पदस्य कुत्वं भवति॥ ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्राग्गिति। सृजिदृशिभ्यांमाङि लुङ्। तिप्। सिच्। बहुलं छन्दसीति विधाना दीण्न भवति। हल्ङ्याब्भ्यादिलोपः सृजिदृशोर्झल्य
मकितीत्यमागमः। वदव्रजेति वृद्धिः। बहुलं छन्दस्यमाङ्योगेपीत्यडागमः॥ संयोगान्तस्यलोपः व्रश्चभ्रस्जेतिषत्वेप्राप्ते
कुत्वंजस्यगः शस्यखः। चावसानइति चर्त्वं ककारः। पूर्वत्रासिद्धमित्यसिद्धत्वं षत्वेकुत्वस्य नास्तिप्रत्ययग्रहणसामर्थ्या
त् षत्वाद्यपवादत्वात्कुत्वस्य॥ अहन्॥ रुत्वविधाविति। समासासमासयोर्लुमतालोपाद्वा देशेप्राप्ते रुत्वसुत्वार्थमुच्य
ते॥ अहोरूपमिति। अह्नोरूपमिति षष्ठीसमासः। गतमहोरूपं पश्येति असमासः। अहोरात्रइति। इकारलोपेकृते ष्ये क
देशविकृतस्यानन्यत्वादुत्वम्। रात्रग्रहणंतु नक्तंगतमहोरात्रिरागता इत्यत्रापि रुत्वार्थम्॥ रोसुपि॥ असुपिरादेशइ

मानोअस्राक्। मानोअद्राक्। क्विनः कुरिति सिद्धे प्रत्ययग्रहणं कृतम्। क्विन्प्रत्ययस्य सर्वत्र पदान्ते कुत्व
मिष्यते॥ अहन्॥ रुत्वविधावह्नोरूपरात्रिरथन्तरेषूपसंख्यानम्। रुत्वविधौ अह्नः रूपरात्रिरथन्तरेषु उ
पसंख्यानं कर्तव्यम्। अहोरूपम्। अहोरात्रः। अहोरथन्तरं साम॥ रोसुपि॥ असुपिरादेशे उपसर्जनसमासे
प्रतिषेधो लुकि। असुपिरादेश उपसर्जनसमासे अलुकि प्रतिषेधो वक्तव्यः॥ दीर्घाह्वा निदाघइति। सिद्धं तु
सुपि प्रतिषेधात्। सिद्धमेतत्। कथम्। सुपिप्रतिषेधात्। प्रसज्यायं प्रतिषेधः सुपि नेति। इहापि तर्हि न प्राप्नो
ति॥ अहर्ददाति। अहर्भुङ्क्त इति। लुकि चोक्तम्। किमुक्तम्॥ अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति
॥ अम्नरूधरवरित्युभयथा छन्दसि॥ छन्दसि भाषायां च प्रचेतसो राजन्युपसंख्यानम्। छन्दसि भा
षायां च प्रचेतसः राजन्युपसंख्यानं कर्तव्यम्॥ प्रचेतोराजन्। प्रचेताराजन्॥ अहरादीनां पत्यादिषु॥ अहरादी
नां पत्यादिषूपसंख्यानं कर्तव्यम्॥

त्रिपर्युदासं मत्वेदमुच्यते। दीर्घाह्वा निदाघ इति॥ अत्र च सुप्सदृशो हल्परोस्तीति रादेशप्रसङ्गो रुत्वं चात्र यत्वार्थमिष्यते
पर्युदासे चाहरित्यत्र रुत्वमेव भवति न तु रः। सिद्धं त्विति। प्रत्ययलक्षणेन दीर्घाह्वा निदाघ इत्यत्र सुपूपरत्वाद्रत्वाभावः
पूर्वत्रासिद्धमिति रुत्वस्यासिद्धत्वात्पूर्वं नोपधालक्षणो दीर्घः पश्चादुत्वमहरित्यत्र तु र एव भवति। इहापीति। प्रत्ययल
क्षणेन रप्रतिषेधप्रसङ्गः॥ अम्न॥ प्रचेताराजन्निति। सकारस्य रेफः तस्य रोरीति लोपः ढ्रलोपइति दीर्घः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहर्पतिरिति। रेफस्य रेफो विसर्जनीयबाधनार्थः पक्षे छन्दोभाष्ययोर्विधीयते॥ वसुस्रंसुध्वंसनडुहां दः॥ पपिवानिति। सस्येत्यस्यानुवृत्तौ नकारस्य दत्वं प्राप्नोति तदनुवृत्तौ तु लोपं बाधित्वा सकारस्य दत्वं प्राप्नोति। लोपे कृत इति। पूर्वत्रासिद्धमिति दत्वस्यासिद्धत्वाल्लोपः॥ अनवकाशमिति। कार्यान्तरेण सर्वस्य विषयस्याक्रान्तत्वात्। येन नाप्राप्त इति। सर्वविषयव्यापिलक्षणं दत्वेन बाध्यते न तु सर्वकार्यं सर्वं वा लक्षणम्। यदि तर्हीति। एकसमासनिर्दिष्टानां वस्वादीनां स

अहर्पतिः। अहः पतिः। अहꣳ पतिः। अहर्पुत्रः। अहः पुत्रः। अहꣳ पुत्रः। गीर्पतिः। गीः पतिः। गीꣳ पतिः। धूर्पतिः। धूः पतिः। धूꣳ पतिः॥ वसुस्रंसुध्वंसनडुहां दः॥ इह कस्मान्न भवति पपिवान् तस्थिवानिति। सस्येति वर्तते। एवमप्यत्र प्राप्नोति। लोपे कृते न भविष्यति। अनवकाशं दत्वं लोपं बाधेत। सावकाशं दत्वम्। कोऽवकाशः॥ पपिवद्भ्यां पपिवद्भिरिति। नैषोऽस्यावकाशः। अत्रापि रुः प्राप्नोति। तद्यथैव रुं बाधते एवं लोपमपि बाधेत। न बाधते। किं कारणम्। येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते रौ दत्वमारभ्यते लोपे पुनः प्राप्ते चाप्राप्ते च। यदि तर्हि सस्येति वर्तते अनडुद्भ्यामनडुद्भिरित्यत्र न प्राप्नोति। वचनादनडुहि भविष्यति। यद्येवमनडुहो दत्वे नकारप्रतिषेधः। अनडुहो दत्वे नकारस्य प्रतिषेधो वक्तव्यः। अनड्वान्॥ सिद्धं तु प्रतिपदविधानान्नुमः॥ सिद्धमेतत्। कथम्। नुमः प्रतिपदविधानात्। नुमः प्रतिपदविधानसामर्थ्याद्दत्वं न भविष्यति॥ यदि तर्हि यद्यदनडुहः प्राप्नोति तत्तन्नुमः प्रतिपदविधानसामर्थ्याद्बाध्यते रुरपि न प्राप्नोति। अनड्वांस्तत्रेति। नैष दोषः॥ यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते॥ दत्वं च प्रति नुमः प्रतिपदविधिरनर्थकः रोः पुनर्निमित्तमेव॥

र्वेषां विशेषणसंबन्धस्य न्याय्यत्वात्॥ वचनादिति। एकस्माद्ग्रहणकवाक्यादनेकस्य प्रक्रियावाक्यस्योपप्लवात्संभव व्यभिचाराभ्यां च विशेषणसंबन्धादनडुहोऽसंभवात् सस्येति विशेषणे नायोगः। सिद्धं त्विति। यदि नकारस्य दत्वं स्यात्तु नुमोऽनर्थकः स्याद्विधिरिति हकारस्यैव दत्वं विधीयते। यदि तर्हीति। विधानसामर्थ्यात्सर्वत्राविकृते न तु माभवितव्यमिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपधायांच॥ पूर्वस्मिन्निति। र्वोरुपधाया इत्यत्रेत्यर्थः। उत्तरत्रेति। हलिचेत्यत्र। कुर्कुर इति। पदावयवस्य रेफस्य उपधायाइकोदीर्घोविधीयमानोत्रापिप्राप्नोति। धात्वधिकारेतुरेफवकारान्तस्याधातुत्वान्नभवति। रेफवकारान्तस्येकइति। अन्तशब्दः समीपवाचीरेफवकारयोर्हल्परयोर्योपधेक्तस्यधात्ववयवस्यदीर्घोविधीयमानोमूर्च्छितेत्यादौभविष्यति न तुकुर्कुरइत्यादाविस्यर्थः॥ कुर्कुरीयतीति॥ क्यजन्तस्यधातोरवयवइगितिदीर्घप्रसङ्गः। तस्मादिति। रेफवकारान्तस्य

उपधायांच॥ किमर्थमिदमुच्यते न हलीत्येवसिद्धम्। नसिध्यति। धातोरितिवर्ततेतत्ररेफवकाराभ्यांधातुर्विशेष्यते। रेफवकारान्तस्यधातोरिति। किंपुनःकारणंपूर्वस्मिन्योगेरेफवकाराभ्यांधातुर्विशेष्यतेनपुनःपदंविशेष्यते। इहमाभूत्॥ अग्निर्वायुरिति। एवंतर्हिपूर्वस्मिन्योगेयद्धातुग्रहणंतइउत्तरत्रनिरत्तम्। एवमपिकुर्कुरःमुर्मुरइत्यत्रापिप्राप्नोति। एवंतर्ह्यनुवर्ततेधातुग्रहणंनतुरेफवकाराभ्यांधातुर्विशेष्यते। किंतर्हिइग्विशेष्यतेरेफवकारान्तस्यइकःधातोरिति। एवमपिकुर्कुरीयतिमुर्मुरीयतीत्यत्रापिप्राप्नोति। तस्माद्धातुरेवविशेष्यः। धातोचविशेष्यमाणेउपधायांचेतिवक्तव्यम्। उपधादीर्घत्वेऽभ्यासजिव्रिचतुर्णांप्रतिषेधः॥ उपधादीर्घत्वेऽभ्यासजिव्रिचतुर्णांप्रतिषेधोवक्तव्यः॥ अभ्यास। रिर्वतुः। रिर्वुः। संविव्यतुः। संविव्युः। अभ्यास। जिव्रिः। चतुर्यिता। चतुर्यितुम्। उणादीनांप्रतिषेधश्च। उणादीनांचप्रतिषेधोवक्तव्यः। किर्यिः। गिर्यिरिति। अभ्यासप्रतिषेधस्तावन्नवक्तव्यः। हलीत्युच्यतेनचात्रहलादिंपश्यामः। यणादेशेकृतेप्राप्नोति। स्थानिवद्भावान्नभवति। प्रतिषिध्यतेअत्रस्थानिवद्भावः। दीर्घविधिंप्रतिनस्थानिवदिति। नैषोस्तिप्रतिषेधः॥ उक्तमेतत्प्रतिषेधेस्वरदीर्घयलोपेषुलोपाजादेशइति। जिव्रिप्रतिषेधश्चनवक्तव्यः॥ उणादयोऽव्युत्पन्नानिप्रातिपदिकानि। चतुर्यिताचतुर्यितुमितिसुपि नेतिवर्तते। यद्येवंगीर्भिरित्यप्रसिद्धः॥

धातोर्हल्परस्योपधायाइकोदीर्घोविधीयमानोमूर्च्छितेत्यादौनप्राप्नोतीतिवचनम्। तेनधातोरुपधयोरेफवकारौतयोरुपधायाइकोदीर्घः॥ उपधादीर्घत्वइति। जिव्रिशब्दोजीर्यतेःक्रिन्रश्चवइतिव्युत्पन्नः। तत्रोणादिप्रतिषेधश्चेतिसिद्धेप्रपञ्चार्थःपाठः। चतुर्यितेति। चतुरइच्छतीतिक्यच्। तृच्। इट्। अतोलोपेकृतेधातोरुपधारेफइतिदीर्घत्वप्रसङ्गः। स्तरेति। पूर्वत्रासिद्धेनस्थानिवदितिस्थानिवत्त्वनिषेधाद्दीर्घःप्राप्नोतितस्मादभ्यासप्रतिषेधोवक्तव्यएवेत्याहुः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नसुपइति। सुपः परो यो हल् तत्परयोर्वा री घो न भवतीत्यर्थः॥ अदसोसे॥ ओकारात्परइति॥ सूत्रे तावत्पदानि निर्दिष्टान्युत्तर-
कालं तु यथेष्टमभिसंबन्धे लक्ष्यसंस्कारकवाक्यमुपप्लवमानमभिमतमर्थं संपादयति॥ असेरिति। यत्र सकारस्य त्य-
दाद्यत्वं क्रियते तत्रमुत्वं नान्यत्रेत्यर्थः॥ यद्येवमिति। त्यदाद्यत्वाभावान्मुत्वाप्रसङ्गः॥ अदमुयङिति॥ अः सेर्यस्येत्येवम
नाश्रयणेऽपि नैवामुमुयङिति भाव्यमित्यर्थः॥ अदसोऽद्रेरिति। ये न सिः अस्सिरिति सकारान्तप्रतिषेधमाश्रयन्ति नान्त्यस

ना। सुयोर्विभक्तिविपरिणामाद् गीर्भ्यां गीर्भिरित्यदोषः॥ उणादिप्रतिषेधो वक्तव्य इति परिहृतमेतत्। उणादयो
ऽव्युत्पन्नानि प्रातिपदिकानीति॥ अदसोसेर्दादुदोमः॥ अदसोनोस्रेः। अदसः अनोस्रेरिति वक्तव्यम्। किमिद
मनोस्रेरिति। अनोकारस्य असकारस्य अरेफस्येति। अनोकारस्य। अदोऽत्र। असकारस्य। अदस्यति। अरे
फस्य। अदः॥ तत्तर्हि वक्तव्यम्। न वक्तव्यम्। क्रियते न्यास एव॥ अविभक्तिको निर्देशः अदस् ओ असेरिति। ओ
कारात्परः प्रतिषेधः पूर्वभूतः। ततः सकारः। ततो रेफ इति॥ अथवा नैवं विज्ञायते अदसः असकारस्येति। कथं
तर्हि। अः अस्य सकारस्य सोऽयमसिः असेरिति। यद्येवममुमुयङिति न सिध्यति। अदद्र्यङिति प्राप्नोति। अद
मुयङिति भवितव्यम्। अनन्त्यविकारे न्त्यसदेशस्य कार्यं भवतीति॥ अदसोद्रेः पृथङ् मुत्वं केचिदिच्छ-
न्ति लत्ववत्। केचिदन्त्यसदेशस्य नेत्येकेसेर्हि दृश्यते। तत्र पदाधिकारादपदान्तस्याप्राप्तिः। तत्र पदाधिका
रादपदान्तस्य न प्राप्नोति। अमुया अमुयोरिति। सिद्धं तु सकारप्रतिषेधात्। सिद्धमेतत्। कथम्। सकारप्रतिषे
धात्। यदयमसेरिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः अपदान्तस्यापि भवतीति॥ अथ दाद्ग्रहणं किमर्थम्
। दाद्ग्रहणमन्त्यप्रतिषेधार्थम्। दाद्ग्रहणं क्रियते। अन्त्यस्य मा भूत्। अमुया अमुयोरिति॥ ॥ ॥

देशपरिभाषां तेऽमुमुयङिति इच्छन्ति। यथा चलीकॢप्यत इति रेफस्य लत्वम्॥ अन्त्यसदेशपरिभाषाश्रये त्वदमुयङि-
ति। ये तु त्यदाद्यत्वविषय एव मुत्वमिच्छन्ति ते अदद्र्यङिति मन्यन्ते। असेर्हीति। अः सेर्यस्य सोऽसिस्तस्येत्यर्थः। यदयमि
ति। अदस्यतीत्यत्र नः स्येदिति नियमाददसोऽपदत्वान्मुत्वं न भविष्यतीति किं निषेधेन निषेधात्तु अपदस्याप्यदसो मुत्वं भ
वत्यमुयेति पदस्याप्यमुष्या मूभ्यामिति॥ अन्त्यस्येति। अलोन्त्यस्येति वचनादमुयेत्यत्र यकारस्योत्त्वं स्यात्॥ ॥ ॥

राम ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतईद्बहुवचने॥ ईत्वमिति। कृत्रिमाकृत्रिमयोः कृत्रिमेसंप्रत्ययइतिवचनात्प्रत्ययस्यबहुवचनस्यग्रहणेनभाव्यंततश्चत
स्मिन्निति निर्दिष्टे पूर्वस्येतिपरिभाषोपस्थानाद् बहुवचने परत एकारस्येत्वेन भाव्यममीभिरित्यादौ नत्वमीइत्यत्रेतिभावः। ने
दमिति। उभयगतिरिह शास्त्रे भवतीति प्रतिपादितं तत्र न्यासिन्याया श्रयादिहार्थग्रहणम्॥ वाक्यस्यटेः॥ वाक्यस्यैवप द
स्यप्रयोगो न केवलस्येति मत्वाह। वाक्याधिकारइति। पदनिवृत्त्यर्थइति। पदस्येति यत्प्रस्तुतं तन्निवृत्त्यर्थइत्यर्थः। नहिकाक
इति। नहिवाक्यग्रहणस्य पदाधिकारनिवृत्तिर्वाच्या यथाकाकवाशितस्येत्यर्थः। विरोधाभावाच्चाशक्यः पदाधिकारो निवर्त

एतईद्बहुवचने॥ ईत्वंबहुवचनान्तस्य। ईत्वंबहुवचनान्तस्येतिवक्तव्यम्। बहुवचनइतीयत्युच्यमाने इहैव
स्यात्॥ अमीभिः। अमीषु। इहनस्यात्। अमीअत्र। अमीआसतेइति। तत्तर्हिवक्तव्यम्। नेदंपारिभाषिकस्य बहु
वचनस्यग्रहणम्। किंतर्ह्यन्वर्थग्रहणमेतत्॥ बहूनामर्थानां वचनं बहुवचनं बहुवचनइति॥ वाक्यस्यटेः॥ वा
क्याधिकारः किमर्थः॥ वाक्याधिकारः पदनिवृत्त्यर्थः। वाक्याधिकारः क्रियते पदनिवृत्त्यर्थः। पदाधिकारो निव
र्त्यते। नहिकाकोवाश्यतइत्यधिकारा निवर्त्यन्ते। दोषः खल्वपिस्यात्। यदिवाक्याधिकारः पदाधिकारं निव
र्तयेत् इष्यन्त एवोत्तरत्र पदकार्याणि तानि न सिध्यन्ति नश्छव्यप्रशान्इति। पदनिवृत्त्यर्थमिति नैवं विज्ञायते। प
दस्यनिवृत्त्यर्थं पदनिवृत्त्यर्थमिति। किंतर्हि पदेनिवृत्त्यर्थं पदनिवृत्त्यर्थमिति। वाक्येयावन्ति पदानि तेषां सर्वेषां
टेः प्लुतः प्राप्नोतीष्यते च वाक्यपदयोरन्त्यस्य स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थोवाक्याधिका
रः। अथटिग्रहणं किमर्थम्। टिग्रहणमलोन्त्यनियमे व्यञ्जनान्तार्थम्। टिग्रहणं क्रियते अलोन्त्यनियमे व्यञ्जना
न्तस्यापि यथास्यात्। अग्निची३त्। सोमसु३त्। अस्तिप्रयोजनमेतत्। किंतर्हीति। ॥ ॥ ॥

यितुं वाक्यस्थपदस्यैव कार्याभ्युपगमादित्याह। दोषइति। नश्छवीति। हन्तीत्यादावपदान्तस्य रुर्नभवति। नैवमिति। पदस्ये
त्यनुवर्तत एव पदस्यटेः प्लुतोमाभूत्पदवाक्ययोर्यष्टिस्तस्यैव यथास्यादित्येवमर्थं तु वाक्यग्रहणमित्यर्थः। टिग्रहणमि
ति। असतिटिग्रहणे प्लुतश्रुत्याच्परिभाषोपस्थानात् चातदन्तविधौसत्यजन्तस्यैव वाक्यस्यालोऽन्त्यस्येति क्वचनादन्त्य
स्याचोनपुंसकह्रस्वइव प्लुतः स्यात् टिग्रहणेतु तदुपादानसामर्थ्याट्टिनाजविशेष्यते न त्वचाटिरिति हलन्तस्यापि प्लुतः सि
ध्यति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वादेशप्रसङ्गस्त्विति॥ अचश्चेत्स्य यमलोन्त्यशेषइति भावः॥ अचइतिवचनादिति। इहतस्यानुपस्थानादिति भावः। सर्वा देशइति। हलन्तस्यटेः सर्वस्यस्थानइत्यर्थः॥ उक्तंवेति। द्वितीयाषष्ठ्य चइति प्रादुर्भाव्यते तत्रटिनाचो विशेषणाद्च ए वस्थाने प्लुतो भवति॥ प्रत्यभिवादे॥ गार्ग्यहंभोइति। केचिदाहुः न स्त्र्यभिवादयते पादोपसंग्रहणान्येव तु करोति। अन्ये त्वाहुः। अभिवादयते न तु स्वनाम गृह्णाति अभिवादप्रत्यभिवादौ च नामगोत्राभ्यामिति स्त्री प्रतिषेधो न विधेयः॥ येतु स्त्रिया नाम्नाभिवादप्रत्यभिवादाविच्छन्ति तन्मते नायं प्रतिषेधः। नैषा मम इति॥ असूयकः प्रत्याचष्टे प्रत्यभिवादवाक्य

सर्वादेशप्रसङ्गस्तु। सर्वादेशस्तु टेः प्लुतः प्राप्नोति। किंकारणम्। अचइतिवचनादन्त्यस्य न। अन्त्यस्येतिवचना दचो न। उच्यते प्लुतः स सर्वादेशः प्राप्नोति। उक्तं वा। किमुक्तम्। ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयादच इत्येतत्तत्रो पस्थितं द्रष्टव्यमिति॥ प्रत्यभिवादेऽशूद्रे॥ अशूद्रइति किमर्थम्। कुशल्यसि तुषजक॥ अस्त्यत्र्यमिदमुच्यते अशूद्रइति॥ अशूद्रस्त्र्यसूयकेष्विति वाच्यम्। तत्र शूद्र उदाहृतम्। स्त्रियां गार्गी अहं भोः॥ आयुष्मती भव गार्गि। असूयके। स्थाली अहं भोः। आयुष्मानेधि स्थाली ३न्। नैषा मम संज्ञा स्थालीति। किं तर्हि। दण्डिन्यायो मम विवक्षितः। स वक्तव्यः स्थाली अहं भोः आयुष्मानेधि स्थालिन्। न मम दण्डिन्यायो विवक्षितः। किं तर्हि सं ज्ञा ममैषा। असूयकस्त्वमसि जाल्म न त्वं प्रत्यभिवादनमर्हसि भिद्यस्व वृषल स्थालिन्॥ भो राजन्यविशां वा॥ भो राजन्यविशां वेति वक्तव्यम्। देवदत्तोहं भोः। आयुष्मानेधि देवदत्त भो ३ः। आयुष्मानेधि देवदत्त भोः॥ रा जन्य। इन्द्रवर्माहं भोः॥ आयुष्मानेधीन्द्रवर्मा ३न्। इन्द्रवर्मन्। राजन्य। विट्। इन्द्रपालितो हं भोः। आयुष्माने धीन्द्रपालिता ३। इन्द्रपालित। अपर आह सर्वस्यैव नाम्नः प्रत्यभिवादने भोः शब्द आदेशो वा वक्तव्यः॥ देवद त्तोऽहं भोः। आयुष्मानेधि भो ३ः। आयुष्मानेधि देवदत्ता ३ इति वा। इह कस्मान्न भवति देवदत्त कुशल्यसीति।

न्तस्य स्यनाम्नो गोत्रस्य च प्लुत इष्यते नान्यस्येति यौगिकस्य प्लुतो न विधेयः। तत्र प्रत्यभिवादयित्रा स्थाली शब्दं संज्ञां मत्वा प्लुतो विहितः॥ यदा तूपहासार्थमसूयकस्तमाक्षिपति तदासौ प्रत्यभिवादं नार्हत्याशीर्वचनं हि प्रत्यभिवादो गृह्यते प्रतिसम्भाषणमा त्रं तु प्रत्यभिवादं मत्वा वार्तिककृता असूयके प्रतिषेध उक्तः। शूद्रेऽप्याशीर्वचनरूपप्रत्यभिवादाभावात् प्रतिषेधो न विधेय इति राम केचिदाहुः स वक्तव्य इति॥ अभिवादयिता प्रत्यभिवादयित्रे वं वक्तव्य इत्यर्थः। भिद्यस्वेति॥ कर्मकर्तर्यात्मनेपदम्॥ भो राजन्यवि शांवेति। भोःशब्दो भवच्छब्दः संबुद्ध्यन्तो निपातो वा सर्वैति। नामगोत्रशब्दमन्तरेण प्रत्यभिवादो नास्तीति समाचारे भोःशब्दस्यासाधुत्वे ४३ प्राप्ते वचनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहकिंचिदिति। पदस्येति वर्तते तद्विशेषणं प्रत्यभिवादइतितेन प्रत्यभ्युद्यमानार्थवाचिनः पदस्यवाक्यान्तस्यटेः प्लुत्याभा
व्यं नान्यस्येत्यर्थः॥ प्रधानस्यस्येति। संस्क्रियमाणस्यप्राधान्यं कुशल्यसीति। साध्यायाअपिक्रियायाः संस्कारिकात्वेन
विवक्षितत्वादप्राधान्यम्। क्वचित्पाठः अप्रधानमुच्यते प्रधानं प्रत्युच्यतइति। तस्यार्थोऽभिवादवाक्येश्रुतो देवदत्तादिरेव
प्रत्युच्यते कुशल्यसीत्येतत्तु पूर्वमश्रुतत्वात् न प्रत्युच्यते किंत्वपूर्वमेवैतदुच्यते॥ इहापीति। द्रव्यस्यविचार्यमाणत्वा॰
त्प्राधान्यं मन्यते॥ नैतदिति। नह्याधानानाधानकर्मविशेषविषयोविचारोनाप्यग्निविशेषविषयः किमाहवनीयोथद

इहकिंचिदुच्यते किंचित्प्रत्युच्यते। प्रधानमुच्यते अप्रधानं प्रत्युच्यते। तत्रप्रधानस्यस्यचटिसंज्ञ॰
स्यप्लुत्याभवितव्यम्। नचात्रप्रधानस्यटिसंज्ञम्। इहापितर्हि नप्राप्नोतिआधेयोऽग्नि ३र्नाधेय ३ इति। नैतद्वि
चार्यतेआधेयोऽनाधेयः अग्निश्चेद्भवतीति। किंतर्हि। अग्निसाधनाक्रियाविचार्यतेआधेयोग्नि ३ र्नाधेय ३ इ
ति। यद्येवं द्वितीयोह्यग्निशब्दस्यप्रयोगः प्राप्नोति। उक्तार्थानामप्रयोगइतिनभविष्यति। आधेयशब्दस्यापि
तर्हि द्वितीयस्यप्रयोगोनप्राप्नोतिउक्तार्थानामप्रयोगोभवतीति। नैषदोषः। उक्तार्थानामपिप्रयोगोदृश्यते।
तद्यथा। अपूपौद्वावानयब्राह्मणौद्वावानयेति॥ ॥ दूराद्धूतेच॥ दूराद्धूतइत्युच्यते दूरशब्दश्चायमनवस्थितप
दार्थकः॥ तदेवहिकिंचित्प्रतिदूरं किंचित्प्रत्यन्तिकं भवति। एवं हि कश्चित्कंचिदाह एषपार्श्वतः करकस्तमान
येति। सआहउत्थायगृहाणदूरंनशक्ष्यामीति। अपरआह दूरं मथुरायाः पाटलिपुत्रमिति। सआह न दूरमन्ति
कमिति। एवमेषदूरशब्दोऽनवस्थितपदार्थकः तस्यानवस्थितपदार्थकत्वान्नज्ञायतेकस्यामवस्थायांप्लुत्या
भवितव्यमिति। एवंतर्हि ह्वयतिनायंनिर्देशः क्रियतेह्वयतिप्रसङ्गेयद्दूरम्। किंपुनस्तत्। यत्रप्राकृतात्प्रय॰
त्नाद्विशेषेनुपादीयमानेसंदेहोभवतिश्रोष्यतिनश्रोष्यतीतितद्दूरमिहावगम्यते॥ ॥ ॥

२६४

क्षिणाग्निरिति। किंतर्ह्याधानंकर्तव्यंनकर्तव्यमितितत्साधनक्रियाविचारःयद्येवमिति। नाधेयोग्निरित्येवमग्निशब्दोनिर्दे
श्यः॥ उक्तार्थानामिति। अग्निरेवप्रकृतत्वादपेक्ष्यतइत्यर्थः॥ उक्तार्थनामपीति॥ उक्तार्थाभिमताः उक्तार्थाः सादृश्यादुच्य
न्तेतत्वतस्तुयथावृषभशब्दौभिन्नौतथापूपावानयअपूपौद्वावानयेत्येतौसमुदायावेवार्थवन्तौलोकेप्रयुज्येतेप्रयोगानुसारे
णलक्षणव्यवस्थाश्रीयतेतेनोक्तार्थानांप्रयोगेऽव्यवस्थानोद्भावनीया॥ दूराद्धूतेच॥ ॥ तदेवेति। दूरस्यानवस्थितत्वात्सुतस्य
विषयविभागोनव्यवतिष्ठतइत्यर्थः। ह्वयतीति। ह्वानक्रियापेक्षं दूरत्वमाश्रीयतेनतुश्रोत्रादिपुरुषापेक्षमित्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हैहेप्रयोगेहेहयोः॥ पूर्वेणहूयमानार्थस्यपदस्यवाक्यान्तस्यटेः प्लुतविधानाद्धैहयोर्नप्राप्नोतीतिवचनम्। हैहयोः प्लु
त्यर्थमिति। अन्यथारम्भसामर्थ्यादनन्त्यस्यापिहूयमानवाचिनएवप्लुतःस्याद् देवदत्तहै ३ इत्यादौ। अनर्थकयोर॰
पीति। यदातुप्राक् संबोधनपदं प्रयुज्यतेतदाहैहयोर्द्योत्यार्थाभावादानर्थक्यं यदातुतयोः प्राक्प्रयोगः तदामन्त्रणाभि
व्यक्त्यर्थत्वादर्थवत्त्वम्। अनन्त्ययोरपीति। अन्यथावाक्यस्यटेरित्यधिकारादनन्त्ययोर्नस्यात्॥ गुरोः॥ गुरोःप्लुतवि

हैहेप्रयोगेहैहयोः॥ हैहेग्रहणंकिमर्थम्। हैहेप्रयोगेहैहेग्रहणं हैहयोःप्लुत्यर्थम्। हैहेप्रयोगेहैहेग्रहणंक्रियते। है
हयोःप्लुतिर्यथास्यात्। देवदत्तहै ३ देवदत्तहे ३ अक्रियमाणे तयोःप्रयोगेन्त्यस्यस्यात्। अथप्रयोगग्रहणंकिम
र्थम्। प्रयोगग्रहणमर्थवद्ग्रहणेनर्थकार्थम्॥ प्रयोगग्रहणंक्रियते। अर्थवद्ग्रहणेअनर्थकयोरपियथास्यात्। देवदत्त
है ३ देवदत्तहे ३॥ पुनर्हैहेग्रहणंकिमर्थम्। अनन्त्ययोरपि यथास्यात्। है ३ देवदत्त हे ३ देवदत्त इति॥ गुरोरनृतोऽन
न्त्यस्याप्येकैकस्य प्राचाम्॥ गुरोःप्लुतविधानेलघोरन्त्यस्यप्लुतप्रसङ्गोऽन्येनविहितत्वात्। गुरोःप्लुतविधाने॰
लघोरन्त्यस्यप्लुतःप्राप्नोति देवदत्त किंकारणम्। अन्येनविहितत्वात्। अन्येनहिलक्षणेनलघोरन्त्यस्यप्लुतो
विधीयतेदूराद्धूतेचेति। नवानन्त्यस्यापीतिवचनमुभयनिर्देशार्थम्। नवाएषदोषः। किंकारणम्। अनन्त्य॰
स्यापीतिवचनमुभयनिर्देशार्थंभविष्यति। अनन्त्यस्यापिगुरोः। अन्त्यस्यापिटेरिति। अथप्राग्वचनंकिम
र्थम्। प्राग्वचनंविभाषार्थम्। प्राग्वचनंक्रियते विभाषायथास्यात्॥

धानइति। अनन्त्यस्यापीत्यपिशब्देनगुरोः सन्निधानात्सएवान्त्यः समुच्चीयतेतेनयत्रगुरुरन्त्यस्तत्रैवपर्यायःस्याल्ल
घोस्त्वन्त्ये पूर्वेणतस्यस्यादनेनचानन्त्यस्यगुरोरित्यर्थः। नचेति। अपिशब्देनप्रकृतष्टिः समुच्चीयतेनगुरुरेवान्त्यइत्य
र्थः॥ विभाषार्थमिति। तेनपक्षेनकस्यचित्प्लुतोभवति। इतरस्तुपक्षेऽनन्त्यस्यप्लुतःपक्षेत्वन्त्यस्यटेरित्येवमर्थंप्राग्
ग्रहणमनेनोक्तमितिमत्वाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रागिति। यद्यपीदमिति। यथोद्देशपक्षे इहापीति आमन्त्रितस्यादिरुदात्त इत्युदात्तः प्लुतो दात्तत्वेन न समाविशेद्‌ वर्ज्य
मानस्वरप्रसङ्गात्। यत्ताचामएकान्तरमित्यनेन निघातैकश्रुतिनिषेधस्तदेतदुदाहरणम्। सिद्धासिद्धाविति। आमन्त्रि
तस्यादिरुदात्तः सिद्धः तस्मिंस्त्वपेक्षिते प्लुतो दात्तोऽसिद्ध इति तदाश्रयो निघातो न भवति॥ स्वरितेऽपीति। अनुदात्तं पद

प्राग्वचनानर्थक्यं चैकैकस्येति वचनात्। प्राग्वचनमनर्थकम्। किं कारणम्। एकैकस्येति वचनात्। एकैकग्रहणं
क्रियते तद्धि भाषार्थं भविष्यति। अस्त्यन्यदेकैकग्रहणस्य प्रयोजनम्। किम्। युगपत्प्लुतो मा भूदिति। अनुदात्तं प
दमेकवर्जमिति वचनान्नास्ति यौगपद्येन संभवः। असिद्धः प्लुतः तस्यासिद्धत्वान्नियमो न प्राप्नोति। नैष दोषः। य
द्यपीदं तत्रासिद्धं तत्त्विह सिद्धम्। कथम्। कार्यकालं संज्ञापरिभाषमिति यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्। गुरो
रनृतोनन्त्यस्याप्येकैकस्य प्राचामुपस्थितमिदं भवति अनुदात्तं पदमेकवर्जमिति। इहापि तर्हि प्राप्नोति देवद
त्ता३। सिद्धासिद्धावेतौ यौ हि सिद्धावेव असिद्धावेव वा तयोर्नियमः। यस्तर्हि स्वरितः प्लुतस्तेन समावेशः प्रा
प्नोति। स्वरितमाम्रेडिते सूयासंमतिकोपकुत्सनेष्विति। स्वरिते प्युदात्तोऽस्ति। यस्तर्ह्युदात्तः प्लुतस्तेन स
मावेशः प्राप्नोति। अनुदात्तं प्रश्नान्ताभिपूजितयोरिति। तस्मात्प्राग्वचनं कर्तव्यम्॥ ये यज्ञकर्मणि॥ ये यज्ञक
र्मणीत्यतिप्रसङ्गः। ये यज्ञकर्मणीत्यतिप्रसङ्गो भवति। इहापि प्राप्नोति। ये देवासो दिव्येकादश स्थ इति। सिद्धं तु
ये यजामह इति ब्रूह्यादिषूपसंख्यानात्। सिद्धमेतत्। कथम्। ये यजामहे शब्दो ब्रूह्यादिषूपसंख्येयः॥

मेकवर्जमित्यत्राविद्यमानोदात्तमनुदात्तमाश्रीयते न च पारिभाषिक उदात्तो गृह्यते किं तर्ह्युभयगतिरिह शास्त्र इति धर्मो गृ
ह्यते स च स्वरिते स्तीत्युदात्तस्वरितयोर्यौगपद्याभावः॥ यस्तर्हीति। उदात्तानुदात्तप्लुतयोः समावेशानवकाश्यर्थमेकैक
ग्रहणम्। प्राग्ग्रहणं तु पक्षे सर्वेषां प्लुताभावार्थम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रणवष्टेः॥ कः प्रणव इति। शास्त्रेऽस्मिन्न परिभाषितत्वात्प्रश्नः। पादस्येति। शास्त्रान्तरे प्रसिद्ध आश्रीयते देवतावत्। अक्षरमन्त्यं
अन्त्यमचं गृहीत्वेत्यर्थः। तदाद्यक्षरशेषस्येति। अक्षरं च शेषश्च द्वन्द्वः अक्षरशेषं तदन्त्यमक्षरमादिर्यस्य तत्तदादि तदा
दि च तदक्षरशेषं च तदाद्यक्षरशेषं टिसंज्ञकमित्यर्थः। अथेति। टिस्थानिकयोरेवौकारौंकारयोः शास्त्रान्तरे प्रणवसं
ज्ञाविधानात्प्रश्नः॥ ॐकार इति। असति टिग्रहणे अलोन्त्यस्येति वचनाद्योऽन्त्यो हल् तस्यौकारः स्यात्। प्लुतत्वेन प्रण
वस्य व्यभिचाराभावाद् अविशेषणात्संज्ञया च विधाने परिभाषोपस्थानात्। अथाप्यपरिभाषोपस्थानाट्टिनाऽविशेष्य
ते तथापि टेर्योऽच् तस्य स्यान्न तु सर्वस्य टेः। ॐकारस्तु अज्झल्समुदायत्वात्प्लुतो न भवतीति सर्वस्य टेरित्यधिकारात्ति

प्रणवष्टेः। प्रणव इत्युच्यते कः प्रणवो नाम। पादस्य वा अर्द्धर्चस्य वा अन्त्यमक्षरमुपसंहृत्य तदाद्यक्षरशेष
स्य स्थाने त्रिमात्रमोकारमोंकारं वा विदधति तत्प्रणवमित्याचक्षते॥ अथ टिग्रहणं किमर्थम्। टिग्रहणं सर्वा
देशार्थं यदा ओकारस्तदा सर्वादेशो यथा स्यात्। यदा हि ॐकारस्तदानेकाल्शित्सर्वस्येति सर्वादेशो भवि
ष्यति॥ याज्यान्तः॥ अन्तग्रहणं किमर्थम्। याज्या नाम ऋचः वाक्यसमुदायस्तत्र यावन्ति वाक्यानि सर्वेषां
टेः प्लुतः प्राप्नोति। इष्यते चान्त्यस्य स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमन्तग्रहणम्॥ अग्नीत्प्रे
षणे परस्य च॥ अग्नीत्प्रेषण इत्यति प्रसङ्गो भवति इहापि प्राप्नोति। अग्नीदग्नीन्विहर। सिद्धं त्वो श्रावयेपर
स्येति वचनात्। सिद्धमेतत्। कथम्। ओ श्रावयेपरस्य चेति वक्तव्यम्॥ ओ३ श्रा३वय। अपर आह ओ श्रा
वयाश्रावययोरिति वक्तव्यम्। ओ३ श्रा३वय। आ३ श्रा३वय। बहुलमन्यत्रापीति वक्तव्यम्।

ष्यति। केचित्तु टिस्थानिकस्यैवौकारस्य प्रणवसंज्ञाविधानाट्टिग्रहणमनर्थकमिति प्रतिपन्नाः॥ याज्यान्तः॥ अन्तग्रह
णमिति। वाक्यस्य टेरित्यधिकारादन्त्यस्यैव भविष्यतीति प्रश्नः। याज्या नामेति। ऋक्समुदायो याज्या तत्र प्रत्यृचं प्लुतः राम
प्राप्नोति ऋक्समुदायस्य योऽन्त्यस्तस्य प्लुतार्थमन्तग्रहणं तेनायमर्थो याज्या नाम मन्त्रो यष्टिस्तस्य योऽच् तस्य प्लुतः॥ अग्नी॥
बहुलमिति। तेनौ श्रावया श्रावयाभ्यामन्यत्राग्नीत्प्रेषणे बहुलं प्लुतो भवति बहुलवचनाच्च नादेर्न परस्य अपि त्वन्त्यस्यै ४५
व प्लुतः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्धर २ उद्धरेति॥ चापलेद्विर्वचनम्। योगविभागइति। व्यवस्थितविभाषाचाश्रीयतेइतिभावः। एवम् उद्धर उद्धरेत्यन्त्यस्य
प्लुतो न लभ्यतइतिकेचिदाहुः। व्यवहितेऽपिपरशब्दो वर्ततइतिभाष्यकाराभिप्रायमन्यआहुः। साहसमिति। शास्त्रत्यागः
साहसं तेनशास्त्रमत्यजताभियुक्तस्मरणात्सर्वः प्लुतो विभाषाविधेयइत्यर्थः॥ एतच्चप्राग्ग्रहणस्यसर्वत्रसंबन्धात्सि
ध्यतीतिमन्यन्ते॥ स्वरित॥ असूयादिष्विति। सर्वएवप्लुतइतिवचनमन्यदीयमितिवचनम्। प्लुतावैच॥ लक्षणान्तरेणैचः
प्लुतप्रसङ्गे तदवयवयोरिदुतोः प्लुतार्थं वचनम्। एचारिति। समाहारवर्णत्वादवर्णस्येदुतोश्चाविवृद्धिः प्राप्नोतीतिवच
नं तत्रवचनसामर्थ्याद्वर्णैकदेशयोरपीदुतोर्ग्रहणेनग्रहणम्। किमुच्यतइति। उभयविवृद्धिशब्दं तत्पुरुषं मत्वासिद्धान्त

उद्धर३ उद्धर। आहर३ आहर। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। योगविभागः करिष्यते॥ अग्नीत्प्रेषणेपरस्यच
विभाषा। ततः पृष्टप्रतिवचनेहेर्विभाषस्यैव॥ अपरआहसर्वएवप्लुतः साहसमनिच्छताविभाषावक्तव्यः॥
आम्रेडितंभर्त्सने॥ भर्त्सनेपर्यायेण। भर्त्सनेपर्यायेणेतिवक्तव्यम्। चौर ३ चौर। चौरचौर ३ कुशील ३ कुशील।
कुशीलकुशील ३॥ स्वरितमाम्रेडितेसूयासंमतिकोपकुत्सनेषु॥ असूयादिषुवावचनम्। असूयादिषुवेति
वक्तव्यम्। कन्ये ३ कन्ये। शक्तिके ३ शक्तिके। कन्येकन्ये ३। शक्तिकेशक्तिके ३॥ प्लुतावैचइदुतौ॥ किमर्थमि
दमुच्यते। एचोरुभयविवृद्धिप्रसङ्गादिदुतोः प्लुतवचनम्। एचोः उभयविवृद्धिप्रसङ्गादिदुतोः प्लुतउच्य
ते। किमुच्यतेउभयविवृद्धिप्रसङ्गादिति। यदा नित्याः शब्दाः नित्येषुचशब्देषुकूटस्थैरविचालिभिर्वर्णैर्भवि
तव्यमनपायोपजनविकारिभिः। नैषदोषः।

विरोधमुद्भावयतिविवृद्धिर्नित्यता च विरुध्यते तादवस्थ्यं हि नित्यता। यद्यप्यनित्येष्वपिवर्णेषुउच्चरितप्रध्वंसित्वाद्विवृ
द्धिर्नोपपद्यतेनापिरूपान्तरप्राप्तिस्तथापिसएवेमामवस्थांप्राप्तइतिशुज्यतेवक्तुं तथा च दीर्घीभूतइतिचिह्नानिर्देशः
क्रियतेनित्यत्वेतद्विरुध्यते। कूटस्थैरिति। कूटस्थादयः शब्दाः पृथगपिप्रयुज्यमानाः नित्यतामाचक्षतेयुगपत्तुप्रयो
गेकेनचिच्छब्देनकश्चिन्नित्यताविशेषउच्यते॥ तत्रकूटस्थशब्देनस्वभावापरित्यागउक्तः सचावयवविचालेऽप्य
स्तिनित्यापृथिवीत्यविचालिग्रहणेनावयवाविचालः प्रतिपाद्यते। अविचालित्वस्यहेतुकथनमनपायेति। इतरः शब्दा
न्तरमेवप्राप्नोतियस्मिन्विवृद्धिरेवोभयोर्लक्ष्यतइत्याह॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नैवमिति। तद्यथेति। यथा गर्भेनावस्थिता एवावयवा विवर्धन्ते किं तर्हि पूर्वमूर्तिविनाशे मूर्त्यन्तरोत्पत्तिरेवं शब्दान्तरमे ८२२
वोभयविवृद्धिः प्राप्नोतीत्युच्यते। चतुर्मात्र इति। प्लुतावयवत्वान्न प्लुत उच्यते नहि चतुर्मात्रस्य प्लुतसंज्ञास्ति ऊकालोऽजि
तिवचनात्॥ तदेतदिति॥ भाष्यकारो वार्त्तिककारं पर्यनुयुङ्क्ते ऐचोश्चोत्तरभूयस्त्वादिति वदता वार्त्तिककारेण समप्र॰

उभयविवृद्धिप्रसङ्गादिति नैवं विज्ञायते उभयोर्विवृद्धिः उभयविवृद्धिः। उभयविवृद्धिप्रसङ्गादिति। कथं तर्हि उभ
योर्विवृद्धिरस्मिन्सोऽयमुभयविवृद्धिः उभयविवृद्धिप्रसङ्गादिति। इमावैचौ समाहारवर्णौ मात्रा अवर्णस्य मा
त्रा इवर्णोवर्णयोरिति तयोः प्लुत उच्यमान उभयविवृद्धिः प्राप्नोति॥ तद्यथा गर्भो वर्धमानः सर्वाङ्गपरिपूर्णो
वर्धते॥ अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्रायथेष्टप्रसङ्गः॥ तत्रायथेष्टं प्रसज्येत। चतुर्मात्रः प्लुतः प्राप्नोति
। सिद्धं त्विदुतोर्दीर्घवचनात्। सिद्धमेतत्। कथम्। इदुतोर्दीर्घो भवतीति वक्तव्यम्॥ तदेतत्कथं कृत्वा सिद्धं भव
ति॥ यदि समः प्रविभागः मात्रा अवर्णस्य मात्रा इवर्णोवर्णयोः॥ अथ हि अर्द्धमात्रा अवर्णस्य अध्यर्धमात्रा इ
वर्णोवर्णयोः अर्द्धतृतीयमात्रः प्राप्नोति॥ अथ हि अध्यर्द्धमात्रा अवर्णस्य अर्द्धमात्रा इवर्णोवर्णयोः अर्द्धचतु
र्थमात्रः प्राप्नोति। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं तत्रायथेष्टप्रसङ्ग इति। तत्र सौर्यभगवतो
क्तम् अनिष्टिज्ञो वाडवः पठति इष्यत एव चतुर्मात्रः प्लुतः॥

विभागित्वं नेष्टमिति भावः। इष्यत एवेति। ऊकाल एवाजिति नियमो नाश्रीयते तेन चतुर्मात्रस्याप्यचूकार्यं भवति प्रत्यङ्ङिति
कायनेति ङमो ह्रस्वादिति ङमुट् भवति ग्लौ त्रातेस्य त्रा नचिचेति तकारस्य द्विर्वचनं भवति॥ सौर्यभगवतेति। सौर्यं ना रामः
मनगरं तत्रत्येनाचार्येणेदमुक्तम्॥ ४६

CC-0. In Public Domain. Digitization by eGangotri

एचो॥ गौ३रिति। अथ यदासावपि पदं भवति तदा कस्मान्न भवति। उक्तमेतद्वाक्यपदयोरन्त्यस्येति। विसर्जनीयश्चात्र वाक्य स्यान्तो न त्वेचः पदान्तग्रहणमिह सत्रपदशब्देन वाक्यमुच्यते पद्यते प्रतीयतेनेनार्थ इति पदमित्यन्वर्थग्रहणात्। एतच्च या ज्यान्त इत्यतोन्तग्रहणानुवृत्त्या लभ्यते। अग्निभूता३ यिति। अग्निभूतिशब्दस्य संबुद्धौ रूपम्॥ आमन्त्रित इति। अप्राप्त एव

एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ॥ एचः प्लुतविकारे पदान्तग्रहणम्। एचः प्लुतविकारे पदान्तग्रहणं कर्तव्यम्। इह मा भूत्। भद्रं करोषि गौ३रिति। विषयपरिगणनं च। विषयपरिगणनं च कर्तव्यम्। प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति वक्तव्यम्। प्रश्नान्त। अगमः पूर्वान्ग्रामान् अग्निभूता३इ पटा३उ। प्रश्नान्त। अभिपूजित। सिद्धोसि माणवक अग्निभूता३इ पटा३उ। अभिपूजित। विचार्यमाण। होतव्यं दीक्षितस्य गृहा३इ। विचार्यमाण। प्रत्यभिवाद। आयुष्मानेधि अग्निभूता३इ। प्रत्यभिवाद। याज्यान्त। उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे स्तोमैर्विधेमाग्नया३इ। आमन्त्रिते छन्दस्युपसंख्यानम्। आमन्त्रिते छन्दस्युपसंख्यानं कर्तव्यम्। अग्ना३इ पत्नीवा३ः सजूर्देवेन त्वष्ट्रा सोमं पिब॥ तयोर्य्वावचि संहितायाम्॥ अथ कयोरिमौ य्वावुच्येते। इदुतोः स्यात्। तदिदुतोर्ग्रहणं कर्तव्यम्॥ न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। पूर्वस्यार्धस्यादुत्तरस्येदुताविति। तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। अचीत्येषा सप्तमी इदुताविति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्येति। किमर्थमिदमुच्यते। न इको यणचीत्येव सिद्धम्। न सिध्यति। असिद्धः प्लुतः प्लुतविकारौ चेमौ। सिद्धः प्लुतः स्वरसंधिषु॥ कथं ज्ञायते। यदयं प्लुतप्रगृह्या अचीति प्लुतस्य प्रकृतिभावं शास्ति। कथं कृत्वा ज्ञापकम्। सतो हि कार्यिणः कार्येण भवितव्यम्। इदं तर्हि प्रयोजनं दीर्घशाकलप्रतिषेधार्थम्॥ दीर्घं च शाकलं मा भूत्। अग्ना३ यिन्द्रम्। पटा३वुदकम्। एतदपि नास्ति प्रयोजनम्। आरभ्यतेऽत्र प्लुतपूर्वस्य यणादेशः प्लुतपूर्वस्य दीर्घशाकलप्रतिषेधार्थमिति॥

प्लुते वचनम्॥ तयोः॥ कयोरिति। प्रश्नद्वारेण तयोरिति प्रत्याख्यायते तदन्तरेणाप्यधिकारात् स्थानिलाभात्। प्लुतविकारावि ति। प्लुतविषयत्वात् प्लुतविकारावुच्येते तौ चासिद्धकाण्डपाठाद्यणादेशे कर्तव्येऽसिद्धौ। सिद्धः प्लुत इति। ननु प्लुतस्य सिद्धत्वे क थमिदुतोः सिद्धत्वम्। उच्यते॥ प्लुतप्रकरणे यत्कार्यं तत्स्वरसंधिषु सिद्धमिति सामान्यविषयानुमानाश्रयणात्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ ओ ३ यिन्द्रेति। इशब्दस्य निपातत्वात् प्रगृह्यत्वात् प्रकृतिभावप्रसङ्गे तद्बाधनार्थोऽपि यण्विधिः वर्णव्यत्ययेनात्र छान्दसः प्लु- २२
८७ तः॥ स्वरार्थमिति। आकारो यथा विषयमुदात्तादियुक्तः प्लुतः इदुतौ तु सर्वत्रोदात्तौ तत्रानयोर्य्वौ कृतौ उदात्तस्वरितयोरिति स्वरि-
तिकर्तव्ये ऽसिद्धत्वात् स्वरितो न भवति। प्लुतप्रकरणे विहितं च कार्यं स्वरसंधिषु सिद्धमिति ज्ञापितं स्वरस्तु स्वरसंधिर्न भवती-
ति तत्रासिद्धत्वं य्वोर्भवत्येव। छान्दसमेतदिति। ततश्चोपसंख्यानमन्तरेण वर्णव्यत्ययेन यण् सिद्धः॥ यत्तर्हीति॥ अप्रतिपन्न-
विकारस्यानुकरणत्वाद् अच्छान्दसत्वाद्यण् न प्राप्नोति॥ एषोऽपीति। कृतयणादेशस्यैवेदमनुकरणमित्यर्थः। पूर्वोक्तार्थसं-

तन्न वक्तव्यं भवति। अवश्यं तद्वक्तव्यम्। यौ प्लुतपूर्वाविदुतौ अप्लुतविकारौ तदर्थम्। ओ ३ इ इन्द्र ओ ३ यिन्द्रेति। य-
दि तर्हि तस्य निबन्धनमस्ति तदेव वक्तव्यम्। इदं न वक्तव्यम्। इदमप्यवश्यं वक्तव्यम्। स्वरार्थम्। तेन हि सति उदा-
त्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येति एष स्वरः प्रसज्येत॥ अनेन पुनः सति असिद्धत्वान्न भविष्यति। यदि तर्ह्यस्य
निबन्धनमस्ति इदमेव वक्तव्यम्। तन्न वक्तव्यम्। ननु चोक्तं तदप्यवश्यं वक्तव्यम्। यौ प्लुतपूर्वाविदुतावप्लुतविका-
रौ तदर्थम्। हो ३ इ इन्द्र। हो ३ यिन्द्र। छान्दसमेतद्दृष्टानुविधिः छन्दसि भवति॥ यत्तर्हि न छान्दसम्। भो इन्द्रं सा-
म गायति। एषोऽपि छन्दसि दृष्टस्यानुप्रयोग इति॥ किं तु यणा भवतीह न सिद्धं य्वाविदुतोर्यदयं विदधाति॥ तौ च
मम स्वरसंधिषु सिद्धौ शाकलदीर्घविधी तु निवर्त्यौ॥ १॥ इक्तु यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवाद-
म्॥ तेन तयोश्च न शाकलदीर्घौ यण्स्वरबाधनमेव तु हेतुः॥ २॥ ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्या-
करणमहाभाष्ये अष्टमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकं पादश्च द्वितीयः॥

ग्रहश्लोकद्वयम्। किं तु यणेति। इको यणचीति यणादेशेन किं न सिद्धं रूपं यतदिदुतोर्य्वौ विदधात्याचार्यस्तौ चेदुतौ स्वरसंधि-
षु सिद्धौ प्लुतप्रगृह्या अचीति ज्ञापकात्। एवं तर्हि इकोऽसवर्णे इति शाकलप्रकृतिभावः प्राप्नोति सवर्णदीर्घश्च तन्निवृत्तये राम॰
य्वौ विधीयेते। एतदपि न प्रयोजनमिकः प्लुतपूर्वस्य वार्त्तिककारेण शाकलदीर्घस्यापवादस्य यणो विधानात्। एवं तर्ह्युदात्त-
स्वरितयोरिति यणाश्रयस्वरितप्रसङ्गनिवृत्तये य्वौ विधीयेते॥ ॥ इत्युपाध्यायजैय्यटपुत्रकैय्यटकृते भाष्यप्रदीपे अष्ट- ८७
मस्याध्यायस्य द्वितीयपादे द्वितीयमाह्निकम्॥ पादश्च द्वितीयः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥मतुवसो॥ वनइति। क्वनिब्वनिपोः सामान्यग्रहणमनुबन्धस्यानिर्देशात्तदनुबन्धकपरिभाषानुपस्थानात् क्वनिपोपिग्रहणम्। मातरिश्वइति। मातरेतीत्यन्येभ्योऽपिदृश्यन्तइतिक्वनिप्। भोब्राह्मणाइति। जसिरुत्वोत्वेनशङ्कुतोनापिरुत्वोत्वयो भेदइतिरूपंसिध्यति॥ तथाभोब्राह्मणीत्यत्रापिभवतिशब्देकारस्यरुत्वेअवस्यचोत्वेक्वतेसंयोगान्तलोपेकर्तव्येरुत्वस्या सिद्धत्वादूरूपासिद्धिः। विभक्तिस्वरेति। केचिदाहुःभूशब्दस्यविजन्तस्यसोयद्रूपंरेफान्तं तत्प्रतिरूपकोनिपातः तत्ररेफ

॥मतुवसोरु संबुद्धौछन्दसि॥ मतुवसोरादेशेवनउपसंख्यानम्। मतुवसोरादेशेवनउपसंख्यानंकर्तव्य म्। यस्त्वायन्तंवसुनामातरिश्वः। विभाषाभवद्भगवदघवतामोच्चावस्य। भवत्भगवत्अघवत्इत्येतेषां विभाषारुर्वक्तव्यः ओच्चावस्यवक्तव्यः। भोः। भवन्। भगोः। भगवन्। अघोः। अघवन्इति। संबुद्धावित्यु च्यतेतत्रेदंनसिध्यति। भोब्राह्मणाइति। तथाविभक्तौलिङ्गविशिष्टग्रहणंनेतिदृहनमाप्नोतिभोब्राह्मणि। नै षदोषः। अव्ययमेषभोःशब्दःनैषाभवतःप्रकृतिः। कथमव्ययत्वम्। विभक्तिस्वरप्रतिरूपकाश्चनिपाताभ वन्तीतिनिपातसंज्ञा। निपातोव्ययमित्यव्ययसंज्ञा॥ समःसुटि॥ पुमःखय्यम्परे॥ कानाम्रेडिते॥ संपुं कानांसत्वम्। संपुंकानांसत्वंवक्तव्यम्॥

स्ययत्वेलोपेचभोब्राह्मणाइत्यादि सिध्यति। भवच्छब्दस्यापिभोःशब्दसिद्धयेवार्तिकारम्भः तेनेतराभ्योऽपिदृश्यन्त इतिभवदादियोगेविधीयमानाः तसिलादयस्ततोभोस्तत्रभोइत्यादावपिभवन्ति। एवंचभवच्छब्दप्रकृतिकभोःशब्द प्रतिरूपकत्वमेवनिपातत्व माश्रयणीयंभवतेर्विजदर्शनादित्याहुः॥ समःसुटि॥ तुल्यविचारत्वात्भाष्येत्रिसूत्रीं पठित्वावाक्यंपठितम्। संपुंकानामिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्स्कर्त्तेति। मकारस्य सत्वे कृते यदा पूर्वस्यानुनासिकः तदा सत्वस्यासिद्धत्वाद् उत्वाभावाद् नचिचेति सकारस्य द्विर्वचं च
ने झरो झरि सवर्ण इति याक्षिके लोपे द्विसकारकः त्रिसकारको वा प्रयोगो यदा त्वनुस्वारो योगवाहानां च प्रत्याहारेषु वि
शेषेणोपदेशस्तस्मिन् पक्षे एकसकारको यदा त्वनुस्वारस्य हल्त्ववदत्त्वमपीष्यते तदा ततः परस्य सकारस्य द्विर्वचने स॰
कारत्रयमपि भवति। यदा त्वेकीयमतेन मकारलोपस्तदानुस्वारोनुनासिकौ केचिन्नेच्छन्ति। तत्त्वयुक्तं मन्यन्ते। एतत्प्रकर
णे विधीयमानसन्नियोगे न तयोर्विधानात् मकारलोपेपि सत्व इव ताभ्यां भाव्यमेवं च षट् रूपाणि भवन्ति॥ अनुनासिक
पक्षे त्रयः सकारा द्वौ वा एको वा॥ एवमनुस्वारपक्षेपि। षट्स्वपि रूपेषु शरः खय इति वा द्विर्वचने ककारस्य कृते द्वादश

संसस्कर्ता। पुंस्कामा॥ कांस्कानिति। रुविधौ ह्यनिष्टप्रसङ्गः॥ रुविधौ हि सत्वनिष्टं प्रसज्येत॥ इहतावत् संस्
स्कर्ता वा शरीति प्रसज्येत। पुंस्कामेति इदुदुपधस्येति षत्वं प्रसज्येत। कांस्कानिति कुप्वोः ᳲकᳲपाविति ᳲकः
प्रसज्येत॥ तत्तर्हि वक्तव्यम्। न वक्तव्यम्। क्रियते न्यास एव। समः सुसुटीति द्विसकारको निर्देशः। समः
सुटि सकारो भवति॥ तत्स्कृतमुत्तरत्रानुवर्तिष्यते। यदि तदनुवर्तते तेन नश्छव्यप्रशानित्यत्रापि प्राप्नो
ति भवांस्तत्र। संबन्धमनुवर्तिष्यते। समः सुटि। पुमः खय्यम्परे। सो भवति। नश्छव्यप्रशान्। रुर्भवति। पुमः ख
य्यम्परे सकारः। उभयथर्क्षु। दीर्घादटि समानपादे। नॄन्पे। स्वतवान्पायौ। रुर्भवति। पुमः खय्यम्परे सकारः।
कानाम्रेडिते सकारः पुमः खय्यम्पर इति निवृत्तम्॥ समो वा लोपमेक इच्छन्ति। संस्कर्ता। संस्कर्ता॥ ॥ ॥

रूपाणि भवन्ति॥ तत्स्कृतमिति॥ ननु चानच्कस्य निर्देशात् तत्र स्वरितत्वं प्रतिज्ञातुमशक्यम्। उच्यते॥ अचां स्वरितत्वं प्र
तिज्ञायते तत्र समुदायानुवृत्तिः सकारस्यानुवृत्त्यर्थं भविष्यति॥ यदीति॥ भवांस्तरतीत्यादौ सत्वे रुत्वे च विशेषो ना॰ राम.
स्ति दीर्घादटीत्यत्र तु विशेषो महान् दुद्ध इत्यत्र। तु सत्वे सति तस्यासिद्धत्वादुत्वाभावाद्रूपं न सिध्येत्। संबन्धमिति। संबन्धं न
हास्यतीत्यर्थः। अनुपूर्वस्य वृत्तेः सकर्मत्वात्संबन्धमिति द्वितीया॥ कर्मणि वा घञ् स च नपुंसकेपि बाधकाभावाद् ४८
भवति स्त्रियां तु क्तिन्नादिभिर्बाध्यमानत्वान्न भवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वचनान्तरबाधनादुभयत्रप्रसङ्गः। जश्त्वम
ढोढे॥ ढलोपइति। कचित्स्थानीनास्तिकचिन्निमित्तंनास्तीतिवचनसामर्थ्याद्वचनान्तरबाधनादुभयत्रप्रसङ्गः॥
त्रेति। एकपदाश्रयत्वादन्तरङ्गत्वात्पूर्वत्रासिद्धमितिवालोपस्यासिद्धत्वात्पूर्वंजश्त्वेप्रवृत्तेलोपस्याप्राप्तिरेवबाधः॥
जश्भावादितिचेदिति॥ उत्तरत्रढेयोलोपइष्यतेसनप्राप्नोतिलोपेकर्तव्येष्टुत्वस्यासिद्धत्वात्परस्यढत्वाभावादित्यर्थः
।जश्त्वइति। लोपेनतावदसिद्धत्वमवश्यंबाध्यंतत्रलीढमित्यादावेकमेवपूर्वत्रासिद्धत्वमतस्तदेवबाध्यतेश्वलिड्ढौ
कतइत्यत्रतुढलोपस्यजश्त्वापेक्षयाबहिरङ्गत्वात्परत्वाच्चद्विविधमसिद्धत्वमितिनतद्बाध्यते ततोजश्त्वेकृतेनश्रु
कतइत्यत्रतुढलोपस्यजश्त्वापेक्षयाबहिरङ्गत्वात्परत्वाच्चद्विविधमसिद्धत्वमितिनतद्बाध्यते

ढोढेलोपः॥ ढलोपअपदान्तग्रहणम्। ढलोपेअपदान्तग्रहणंकर्तव्यम्। इहमाभूत् श्वलिड्ढौकतेगुडलिड्ढौक
ते। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। जश्त्वमत्रबाधकंभविष्यति॥ जश्भावादि तिचेदुत्तरत्रढस्याभावादपवा
दप्रसङ्गः॥ जश्भावादिचेदुत्तरत्रढकारस्याभावादपवादोयंविज्ञायेत। कस्य। जश्त्वस्य। तस्मात्सिद्धव
चनम्॥ तस्मात्सिद्धत्वंवक्तव्यम्॥ कस्य। ष्टुत्वस्य। सङ्ग्रहणंवा। सङ्ग्रहणंवाकर्तव्यम्। सङ्ढइतिवक्तव्य
म्। तत्तर्हिवक्तव्यम्। नवक्तव्यम्। आनन्तर्यमिहाश्रीयतेढकारस्यढकारइति। कचिच्चसन्निपातकृतमानन्त
र्यंशास्त्रकृतमनानन्तर्यम्। कचिच्चनैवसंनिपातकृतंनापिशास्त्रकृतम्। ष्टुत्वेसन्निपातकृतमानन्तर्यंशा
स्त्रकृतमनानन्तर्यम्। जश्त्वेनैवसन्निपातकृतंनापिशास्त्रकृतम्। यत्तुकृतश्चिदेवानन्तर्यंतदाश्रयिष्यामः॥
॥खरवसानयोर्विसर्जनीयः॥ विसर्जनीयोऽनुत्तरपदे। विसर्जनीयः अनुत्तरपदइतिवक्तव्यम्॥ इहमाभूत्
।नार्कुटो नार्पत्यइति। तत्तर्हिवक्तव्यंविसर्जनीयोऽनुत्तरपदइति।

विकृतमानन्तर्यंनापिशास्त्रकृतंजश्त्वस्यासिद्धत्वाभावादितिलोपस्यायमविषयः॥ खरव॥ विसर्जनीयइति। उत्तरपदेसति
यो रेफोनिष्पन्नस्तन्निमित्तकस्तस्यविसर्जनीयोनभवतीतिवाक्यार्थःसंपद्यते। तेनदास्याःपुमादौभवत्येव। नह्यत्रसकार
स्यरेफउत्तरपदनिमित्तकः किंतर्हिपदत्वनिमित्तकः। नार्कुटइत्यादौतुतद्धितनिमित्तत्वेरेफस्योत्तरपदंनिमित्तंतदपेक्ष
त्वादकारस्यादित्वस्य। नार्कुटइति। नृकुद्धोभवइत्यण्॥ नार्पत्यइति। नृपतेरपत्यमितिदित्येतिण्यः तत्ररद्वौकृतायां
रपरत्वेचपूर्वभक्तत्वाद्रेफस्यपदान्तत्वाद्विसर्जनीयःप्राप्तःप्रतिषिध्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 नवेति। बहिरङ्गं लक्षणं निमित्तं स्वभावो वायस्य रेफस्य सतु यथोक्तः। अपत्यार्थविहिततद्धितापेक्षवृद्धिनिमित्तत्वाद्रेफो बहिरङ्गस्त
स्यासिद्धत्वात्तस्यान्यभावाद्विसर्जनीयाभावः। अन्तः अङ्गं यस्य बहिः अङ्गं यस्येति बहुव्रीहिस्ततः सर्वलिङ्गावन्तरङ्गबहिरङ्गश
ब्दावुपपन्नौ अङ्गशब्दस्यात्रोपकारकवाची। प्रतिद्वन्द्वभाविनावितिः। द्वन्द्वे युग्ममुच्यते। प्रतिकूलं परस्परविरुद्धं द्वन्द्वं प्रतिद्वन्द्वं
तत्र भवतो वश्यमित्यावश्यके णिनिः। सत्यन्तरङ्ग इति। अन्तरङ्गे बुद्ध्यापेक्षिते तदपेक्षया बहिरङ्गं भवति बहिरङ्गे चापेक्षिते
तदपेक्षयान्तरङ्गं भवत्यन्तरङ्गव्यपदेशं लभत इत्यर्थः। नचात्रेति। अत्रविषयेऽन्तरङ्गबहिरङ्गयोर्युगपदेकस्यां बुद्धावपे
क्षितपरस्परमवस्थानं नास्ति पूर्वस्यां परिभाषायां परस्य विसर्जनीयस्यासिद्धत्वादन्तरङ्गाभावाद्रेफस्य तदपेक्षबहिरङ्ग
त्वाभावाद् बहिरङ्गपरिभाषानुपस्थानात्प्राप्नोत्येव विसर्जनीयः। नानभिनिर्वृत्त इति। वस्तुतत्त्वकथनम्। तत्रनिमित्तमेवेति।

नवा बहिरङ्गलक्षणत्वात्। नवावक्तव्यम्। किंकारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गो रेफः। अन्तरङ्गो विसर्ज
नीयः। असिद्धं बहिरङ्गमन्तरङ्गे॥ नैषयुक्तः परिहारः। अन्तरङ्गबहिरङ्गमिति प्रतिद्वन्द्वभाविनावेतौ पक्षौ सत्य
न्तरङ्गे बहिरङ्गं सति बहिरङ्गे अन्तरङ्गं भवति। नचात्रान्तरङ्गबहिरङ्गयोर्युगपत्समवधानमस्ति। किंकारणम्।
असिद्धत्वात्। कथमसिद्धत्वम्। पूर्वत्रासिद्धमिति॥ नानभिनिर्वृत्ते बहिरङ्गे अन्तरङ्गं प्राप्नोति तत्र निमित्तमेव ब
हिरङ्गमन्तरङ्गस्य भवति। अनिमित्तं बहिरङ्गमन्तरङ्गस्य। किंकारणम्। असिद्धत्वात्। कथमसिद्धत्वं यावता
पूर्वत्रासिद्धमित्यसिद्धा परिभाषा। असिद्धं बहिरङ्गमन्तरङ्गे॥

पराभ्युपगमे नान्तरङ्गबहिरङ्गव्यपदेशः बहिरङ्गाभिमतं बहिरङ्गमन्तरङ्गाभिमतस्यान्तरङ्गस्येति भावः। असिद्धत्वादिति। बहि
रङ्गस्य रेफस्यान्तरङ्गे विसर्जनीयेऽसिद्धत्वाद्विसर्जनीयाभावः। कथमसिद्धत्वं यावता पूर्वत्रासिद्धमित्यसिद्धा परिभाषेति।
पूर्वत्रासिद्धमिति वचने न विसर्जनीयस्य पूर्वस्यां परिभाषायामसिद्धत्वात्तदनुपस्थानात् कथं रेफस्यासिद्धत्वमित्यर्थः। अप्र
वृत्तिरेव परिभाषाया असिद्धिः। बहिरङ्गपरिभाषा हि विप्रतिषेधे परं कार्यमित्यत्रोपसंख्यानात्तद्देशा वाह ऊठित्यत्र ज्ञापितत्वाद्वे
तद्देशा वेति पूर्वा। इतरः कार्यकालत्वमाश्रित्याह। असिद्धमिति। यथोद्देशत्वमाश्रित्य चोदयति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथमिति। इतर आह। कार्यकालमिति। तत्र काचित्परिभाषा विधिवाक्येनैकवाक्यत्वं गत्वा स्वकार्यं निष्पादयति यथेकूपरिभाषामिकेरिकोगुणं व्यवस्थापयति। काचित्तु विषये निमित्तापेक्षा वाक्यभेदेन प्रधानकार्ये न्याप्रियते यथा विप्रतिषेधे परं कार्यमिति। एषा हि वृक्षेष्वित्यादौ बहुवचने झल्येदित्यस्मिन् प्रवृत्ते वृक्षेभ्य इत्यादावेत्वदीर्घत्वयोर्विप्रतिषेधे परमेत्वं प्रवर्त्तयति। तद्वदसिद्धपरिभाषा वृक्षस्तिष्ठतीत्यादौ विसर्जनीयशास्त्रे प्रवृत्ते नार्कुटादौ रेफस्यासिद्धत्वं विदधती प्रधानं विसर्जनीयं विषयविशेषे व्यवस्थापयन्ती विषयं संस्कुरुते। न च पूर्वत्रासिद्धमित्यनेन योगेन बहिरङ्गपरिभाषा रेफे पूर्वस्मिन्नसिद्धा क्रियते॥ प्रधानसन्निधौ गुणानां परस्परेणासंबन्धात्। तदुक्तम्। गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यादिति। विध्यन्तरशेषभावाच्च वाक्यभेदेनाप्युपतिष्ठमाना वाक्यान्तरे विसर्जनीयेनैकवाक्यभावात् पौर्वापर्याभावात् पूर्वत्रासिद्धमित्यनेन विसर्जनीये कर्तव्ये नासिद्धा क्रियते पूर्वोक्ताद् गुणत्वाद्वा। कुतो नु खल्विति। असा आदित्य इत्यादि पूर्वत्रासिद्धमित्यस्यावकाशः। पचवेद् भित्यादि बहिरङ्गपरिभाषायाः।

कथम्। कार्यकालं संज्ञापरिभाषमिति खरवसानयोर्विसर्जनीयः उपस्थितमिदं भवति असिद्धं बहिरङ्गमन्तरङ्ग इति एवमेषा परिभाषासिद्धा भवति। कुतो नु खल्वेतद् द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः पूर्वत्रासिद्धमिति असिद्धं बहिरङ्गमन्तरङ्ग इति च पूर्वत्रासिद्धमित्येतामुपमृद्य असिद्धं बहिरङ्गमन्तरङ्ग इत्येतया व्यवस्था भविष्यति न पुनरसिद्धं बहिरङ्गमन्तरङ्ग इत्येतामुपमृद्य पूर्वत्रासिद्धमित्येतया व्यवस्था स्यात्॥ अतः किम्। अतो युक्तः परिहारः न वा बहिरङ्गलक्षणत्वादिति॥

नार्कुट इत्यादौ तु द्वयोः सन्निपातः। यद्यपि पूर्वत्रासिद्धमित्यधिकारः तथापि सपादसप्ताध्यायीं प्रति पादत्रयपठितस्य सर्वस्यासिद्धत्वापादनात् परिभाषासाधर्म्यात्परिभाषाव्यवहारः। तत्रैतयोः परिभाषयोः सावकाशत्वात्तुल्यबलयोरप्रतिपत्त्या वाश्रीयमाणायां नार्कुटादौ विसर्जनीयप्रसङ्गः। पर्यायेत्वाश्रीयमाणे पक्षे निष्टविसर्जनीयप्राप्तिः। अनयोश्च परस्परनिमित्तव्याघातात् परस्परस्योपमर्दकत्वम्। तथा हि। बहिरङ्गपरिभाषा रेफस्यासिद्धत्वं कुर्वती पूर्वलक्षणविषयाभावात् पूर्वत्रासिद्धमित्यस्या अप्रवृत्तिं साधयति। पूर्वत्रासिद्धमित्येषापि विसर्जनीयासिद्धिविधानेनान्तरङ्गाभावाद्रेफस्यापि तदपेक्ष बहिरङ्गत्वाभावाद् बहिरङ्गपरिभाषायाः प्रवृत्तिं विहन्ति। ततश्चायुक्तोऽयं परिहारो न वा बहिरङ्गलक्षणत्वादिति चोद्यान्तमेवेदं भाष्यम्। ततश्च विसर्जनीयो नुत्तरपद इति वक्तव्यमेव। यदा तु लक्ष्यदर्शनवशाद् बहिरङ्गपरिभाषाश्रीयते यथा चक्रे केचिद्दृष्टतो व्यवस्था तदा युक्त एव परिहारो न वा बहिरङ्गलक्षणत्वादिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥रोः सुपि॥ नियमार्थइति। अथसुपीतिप्रत्याहारग्रहणात् पयोभ्यामित्यादौविध्यर्थः कस्मादारम्भोनभवति। स्वरीत्यनुरस्या
स्वरादेः सुपोग्रहणात्। नचसप्तमीबहुवचनादन्यः स्वरादिः सुबस्तीतितस्यैवग्रहणाद्विध्यर्थानुपपत्त्यानियमार्थआरम्भः
रोरेवेति। रोःसुप्येवेतितुनियमोनभवति हलोनन्तराःसंयोगइत्यादेर्निर्देशात्॥ भोभगो॥ अन्यत्राभावादिति। यत्राशोऽन्यः रव
रभवति तत्रपूर्वत्रासिद्धमिति यत्वस्यासिद्धत्वाद्विसर्जनीयेनभाव्यमित्याशयेनैव रुरस्तीत्यर्थः। स्थानिवद्भावादिति। ननुच

॥रोः सुपि॥ किमर्थमिदमुच्यते। स्वरवसानयोर्विसर्जनीयइत्येवसिद्धम्। नियमार्थोयमारम्भः। रोरेवसुपिनान्य
स्यसुपि। क्वमाभूत्। गीर्षु। धूर्षु॥ भोभगोअघोअपूर्वस्ययोऽशि॥ अशग्रहणमनर्थकमन्यत्राभावात्। अशग्र
हणमनर्थकम्। किंकारणम्। अन्यत्राभावात्। नह्यन्यत्ररुरस्तिअन्यदतःअशः। ननुचायमस्ति। छन्दःसु। प
यःस्विति। किंपुनःकारणंसुकारपरएवोदाह्रियते नपुनरयंवृक्षस्त्वत्र। प्लक्षस्त्वत्रेति॥ अस्त्यत्रविशेषः। विस
र्जनीयेकृतेनभविष्यति। इहापितर्हिविसर्जनीयेकृतेनभविष्यति। छन्दः सुपयःस्विति। स्थानिवद्भावान्नाप्नो
ति। ननुचेहापिस्थानिवद्भावात्प्राप्नोति वृक्षस्त्वत्रेति। अनल्विधौस्थानिवद्भावः। अथायमल्विधिःस्यात्
शक्यमशग्रहणमवक्तुम्। बाढंशक्यम्। अल्विधिस्तर्हिभविष्यति। कथमिदमस्तिरोरीति। ततोवक्ष्यामि।
स्वरवसानयोर्विसर्जनीयः रः। ततोरोःसुपिविसर्जनीयः रइत्येव। उत्तरार्थंतर्हिअशग्रहणंकर्तव्यं हलिस
र्वेषांहलिअशिइतियथास्यात्।

रोरुकारस्यानुबन्धत्वाद्रेफः स्थानीत्यल्विधित्वात्स्थानिवद्भावेननभाव्यम्। उच्चारणकालेयःश्रुतः सस्थानित्वेनाश्री राम॰
यतेनतु प्रतिपत्तिकालेइतिमन्यते। अल्विधिस्तर्हीति। रुर्नैवस्थानी किंतुतद्विशेषणंरोर्योरेफस्तस्यविसर्जनीयइत्यर्थः॥ ५०
ततोवक्ष्यामीति। व्याख्यास्यामीत्यर्थः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृश्चवयतेरिति॥ केचित्तु वृश्चवन्तमाचष्ट इति णिचि टिलोपे चरूपमिच्छन्ति। तदयुक्तम्। दृष्टवद्भावान्मतुपो लुका भाव्यं न टिलोपेन। तस्मात् वृश्चतीति क्विपि संप्रसारणे कृते वृश्चं वृश्चमाचष्ट इति णिचि टिलोपे च विच् प्रत्ययः क्रियते। क्विपि तु सत्येकदेश विकृ तस्यानन्यत्वात् वृश्चतिग्रहणेन ग्रहणात् वृकारस्य संप्रसारणं स्यात्। लोपो व्योर्वलीति लोपो वा। न च णिलोपस्य स्थानिवद्भावः। क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानमिति प्रतिषेधात्। विचि तु णिलोपस्य स्थानिवत्त्वात् वलोपो नास्ति हलि सर्वेषामित्यनेन न तु वलोपे कर्तव्ये पूर्वत्रासिद्धे न स्थानिवदिति स्थानिवत्त्वनिषेधात् वलोपः स्यादिति हल्विशेषणार्थमश्ग्रहणं क्रियते। वेतेर्वा वृश्चं वेति वृश्चवीः वृश्चव्यमाचष्ट इति पूर्ववण्णिजादिः॥ अथ ककारे परतो लोपो व्योर्वलीति लोपः कस्मान्न भवति

वृह्माभूत वृश्चवयतेरप्रत्ययः वृश्चन्त्रकरोति॥ ओतो गार्ग्यस्य॥ किमर्थमिदमुच्यते। ना। लोपः शाकल्यस्येत्येव सिद्धम्। ओकाराल्लोपवचनं नित्यार्थम्॥ ओकाराल्लोपवचनं क्रियते। किमर्थम्। नित्यार्थम्। नित्यार्थोऽयमारम्भः॥ उञि च पदे॥ पद इति किमर्थम्। तन्त्रे उतं तन्त्रयुतं तन्त्रउतम्॥ पद इति शक्यमवक्तुम्। कस्मान्न भवति तन्त्रे उतं तन्त्रयुतं तन्त्रउतमिति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति॥ उत्तरार्थं तर्हि पदग्रहणं कर्तव्यं ङमो ह्रस्वादचि ङमुण्नित्यमिति अपदे माभूत्। दण्डिना। शकटिना॥ हे मपरे वा॥ यवलपरे यवला वा॥ यवलपरे हकारे यवला वेति वक्तव्यम्। किंह्यः। कियँ ह्यः। किं ह्वलयति॥ किवँ ह्वलयति। किंह्लादयति। किलँ ह्लादयति॥

। न च णिलोपस्य स्थानिवद्भावोऽस्ति। पदान्तविधौ तन्निषेधात्॥ नैष दोषः। पदान्ते विधीयमाने स्थानिवत्त्वनिषेधो न च लोपः पदान्तस्याभावरूपत्वाच्च। अश्ग्रहणानुरोधेन चैतद् भाष्यकारेणोदाहृतम्। तथाहि। लणित्यत्रोक्तं न पदान्ताः हलोणः सन्तीति॥ ओतो॥ किमर्थमिति। लोपः शाकल्यस्येत्यनेन पाक्षिकः सिद्ध एव लोपो नेनापि गार्ग्यस्य मते न लोपो नान्येषामिति विकल्पे नैव विशेष इति प्रश्नः। ओकारादिति। गार्ग्यः स्वस्यां स्म[illegible]वीतानि त्यमेव लोपं स्मरतीति पाणिनिरपि तथैवेच्छतीत्येवं च भो अत्रेति नित्यं भवति न तु भो यत्रेति॥ उञि च पदे॥ अयमपि नित्यार्थो योगः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ङः सिधुट्॥ योयमिह पूर्वान्तपरादिविचारः संस्थितलक्षणस्यार्थस्य लौकिकस्य विरोधाभावात्कृतः। ततो यदेके चोदयन्ति पूर्वान्तपक्षे हि तत्संहितेन पूर्वेणार्थः प्रत्याय्यः परादिपक्षे हि तत्संहितेन परेण पदेनेत्ययुक्तो विचार इति। तदसंबद्धम्। सत्यप्यस्मिन् भेदे संहितायां वाक्यार्थभेदात्। नियोगत इति॥ परादौ छत्वं न सिध्यतीति वचनादवश्यं पूर्वान्तः कर्तव्य इत्यर्थः। तत्र नकारस्या

ङः सिधुट्॥ नश्च। शि तुक्। ङ्णोः कुक्टुक्शरि। ङमो ह्रस्वादचि ङमुट्। इह धुडादिषु केचित् पूर्वान्ताः क्रियन्ते केचित्परादयः। यदि पुनः सर्व एव पूर्वान्ताः स्युः सर्व एव वा परादयः। कश्चात्र विशेषः। धुडादिषु ष्टुत्वणत्वप्रतिषेधः। धुडादिषु सत्सु ष्टुत्वणत्वयोः प्रतिषेधो वक्तव्यः। ष्टुत्वस्य तावत्। श्वलिट्त्साये। मधुलिट्त्साये। ष्टुना ष्टुरिति ष्टुत्वं प्राप्नोति॥ परादौ पुनः सति न पदान्ताट्टोरनामिति प्रतिषेधः सिद्धो भवति॥ णत्वस्य। कुर्वन्त्साते। हंसवन्त्साते। रषाभ्यां नो णः समानपद इति णत्वं प्राप्नोति। परादौ पुनः सति पदान्तस्येति प्रतिषेधः सिद्धो भवति॥ सन्तु तर्हि परादयः। परादौ छत्वविधिप्रतिषेधः। यदि परादयः छत्वं विधेयम्। षत्वं च प्रतिषेध्यम्। छत्वं विधेयम्। कुर्वञ्छेते। कृषञ्छेते॥ यद्धि तत् शश्छोटीति झयः पदान्तादित्येवं तत्। किं पुनः कारणं झयः पदान्तादित्येवं तत्॥ इह मा भूत्। पुराक्रूरस्य विसृपो विरप्शिन्निति॥ षत्वं प्रतिषेध्यम्। प्रत्यङ्क्सिञ्च। उदङ्क्सिञ्च। आदेशप्रत्यययोरिति षत्वं प्राप्नोति। पूर्वान्ते सति सात्पदाद्योरिति प्रतिषेधः सिद्धो भवति। तस्मात्सन्तु यथान्यासमेव केचित्पूर्वान्ताः केचित्परादयः। अयं तु खलु शि तुक् छत्वार्थं नियोगतः पूर्वान्तः कर्तव्यः। तत्र कुर्वञ्छेते कृषञ्छेत इति रषाभ्यां नो णः समानपद इति णत्वं प्राप्नोति। नैष दोषः॥ श्चुत्वे योगविभागः करिष्यते। इदमस्ति। स्तुभ्नादिषु च। न णकारो भवति॥ ततः। स्तोः श्चुना। स्तोः श्चुना सन्निपाते न णकारो भवति। ततः श्चुः। श्चुर्भवति स्तोः श्चुना सन्निपाते॥ ङमो ह्रस्वादचि ङमुण्नित्यम्॥ ङमुटि पदादिग्रहणम्। ङमुटि पदादिग्रहणं कर्तव्यम्। इह मा भूत्॥ दण्डिना शाकटिनेति॥ तत्तर्हि वक्तव्यम्। न वक्तव्यम्। पदादिति वर्तते। एवमपि परमदण्डिना परमच्छत्रिणेति प्राप्नोति। नैष दोषः। उक्तमेतत्। उत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति। एवमपि पदादिति वक्तव्यम्। यद्धि तत्प्रकृतं प्राक्सुपि कुत्सनादित्येवं तत्॥

पदान्तत्वात् णत्वमसङ्ख्येन च नश्चापदान्तस्य झलीति नकारस्यानुस्वारे परसवर्णे च रूपं सिध्यति। अनुस्वारे कर्तव्ये तुकोऽसिद्धत्वात्॥ श्चुत्व इति। णत्वप्रतिषेधे च श्चुत्वमाश्रयात् सिद्धम्॥ ङमो ह्रस्वादचि ङमुण्नित्यम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंतर्हीति। ङमा पदस्यविशेषणात्तदन्तविधिनाङमन्तस्यपदस्यागमोविधीयमानोदण्डिनेत्यादौङमन्तस्यापदत्वान्नभवति। यद्येवंपदस्यादिर्ङमुट्प्राप्नोति। नैषदोषः। ह्रस्वादित्यनेनङमाह्रियतेङमन्तस्यपदस्यह्रस्वात्परोयोङमुतस्यङमुट्भवति। नचेति। नहिपदस्यैतद्विशेष्यंकिंतर्हिविशेषणमिति तदन्तविध्यभावाद्दण्डिनेत्यादौङमुट्प्रसङ्गः॥ एवंतर्हीति। संबन्धानुवृत्त्याचपूर्वयोगेष्वसंबन्धाद्गुडलिट्त्वित्यादौधुडादयोपदेपिभवन्ति॥ मयउञोवोवा॥ किमर्थमिति॥ उञइतियोगविभागेनशाकल्यस्यमतेनप्रगृह्यसंज्ञाविधानात्पक्षेयणादेशःसिद्धइति प्रश्नः॥ प्रगृह्यइति। उञइत्यनेना

एवंतर्हिङमएवायंङमुट्क्रियते। कथम्। पदस्येतिवर्ततेङमइतिचनैषापञ्चमी। कातर्हि। संबन्धषष्ठीपदान्तस्यङमोङमुट्भवतीतिह्रस्वादुत्तरस्याचीति। यदिङमएवङमुट्क्रियतेकुर्वन्नास्ते। कृषन्नास्तेरषाभ्यांनोणःसमानपदेइतिणत्वंप्राप्नोति। पदान्तस्येतिप्रतिषेधोभविष्यति। पदान्तस्येत्युच्यतेनैषपदान्तः। पदान्तभक्तःपदान्तग्रहणेनग्राहिष्यते। एवमपिनसिध्यति। किंकारणम्। उक्तमेतत्नवापदाधिकारस्यविशेषणत्वादिति। तेनदण्डिनाशकटिनेतिअत्रप्राप्नोति। एवंतर्हिपदइतिवर्तते। क्वप्रकृतम्। उञिचपदेइति॥ मयउञोवोवा॥ किमर्थंमयउत्तरस्यउञःवोवेत्युच्यते। नाइकोयणचीत्येवसिद्धम्। नसिध्यति। प्रगृह्यःप्रकृत्येतिप्रकृतिभावःप्राप्नोति। यदिपुनस्तत्रैवोच्येतइकोयणचिमयउञोवेति। नैवंशक्यम्। इहहिदोषःस्यात्। किम्वावपनंमहत्। मोनुस्वारः हलीतिअनुस्वारःप्रसज्येत। वत्वेपुनःसतिअसिद्धत्वान्नभविष्यति॥

वित्यनुवर्तनादनितिपरस्योञोनिपातएकाजनाङितिनित्यंप्रगृह्यसंज्ञा। यदिपुनरिति। यण्ग्रहणानुवर्तनादग्रहणंनकर्तव्यंभवतीतिभावः। वत्वइति॥ अनुस्वारेकर्तव्येवत्वस्यासिद्धत्वादनुस्वाराभावोहल्परत्वाभावात्॥ यदात्विति परउञ्भवतितदा॥ किंविति। किम्विति। किमुइति। किमूँइति। इतिरूपचतुष्टयंभवति। प्रगृह्यसंज्ञाभावपक्षेवत्वस्यासिद्धत्वाद्यणादेशेसत्यनुस्वारोभवतिप्रगृह्यसंज्ञापक्षेलनेनवावत्वम्। ऊँआदेशस्यापिस्थानिवद्भावादान्तरतम्यादनुनासिके पक्षेवकारेसतिरूपपञ्चतयेनभाव्यमित्याहुः॥

CC-0. In Public Domain. Digitization by eGangotri

विसर्जनी यस्य॥ इहेति। स्थानिमात्रनिर्दिष्टंनतु निमित्तविशेष इति प्रश्नः॥ संहितायामिति। पौर्वापर्यमकालव्यवेतं संहिता
५२ न चात्र परमस्तीति संहिताया अभावो न्यथा दधि अत्रेती गचोर संहितायामपि इकः पूर्वेणाच्‌ः परेण च संहितास्तीति यण् प्र
सज्येत। एवमप्यत्रेति। विशेषानुपादानादिति भावः। इकोयण चीत्यत्र तु स्थानिनिमित्तयोरुपादानात्तयोरेव संहिता गृह्यते।
एवं तर्हीति। एकसंज्ञाधिकारात् सामान्यविहिता संहितासंज्ञा विशेषविहितया वसानसंज्ञया बाध्यते। ननु संज्ञिभेदा
न्नाधानुपपत्तिः परस्य सन्निकर्षस्य संहितासंज्ञा अवसानसंज्ञा तु विरामस्य वर्णस्य चिरं तेर्वा। उच्यते। संहितावसान
कार्ययोरेकवर्णविषयत्वात् कार्यार्थत्वाच्च संज्ञानां संज्ञयोरप्येकविषयत्वाद् बाध्यबाधकभावमन्यते॥ अथवेति। सन्नि

विसर्जनी यस्य सः॥ इह कस्मान्न भवति। वृक्षः। प्लक्ष इति॥ संहितायामिति वर्तते। एवमप्यत्र प्राप्नोति। किं का
रणम्। परः संनिकर्षः संहितेत्युच्यते सयथैव परेण परः सन्निकर्षः एवं पूर्वेणापि। एवं तर्हि अनवकाशा अव
सानसंज्ञा संहितासंज्ञां बाधिष्यते। अथवा संहितासंज्ञायां प्रकर्षगतिर्विज्ञास्यते साधीयो यः परः सन्निकर्ष इति
कश्च साधीयः। यः पूर्वपरयोः। यद्येवा नवकाशा अवसानसंज्ञा संहितासंज्ञां बाधते। अथापि संहितासंज्ञायां प्र
कर्षगतिर्विज्ञायते उभयथा दोषो भवति इष्यन्ते इत उत्तरमवसाने संहिताकार्याणि तानि न सिध्यन्ति। अणो
प्रगृह्यस्यानुनासिक इति। एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति न सर्वस्य विसर्जनी यस्य सत्वं भवतीति। यदयं
खरवसानयोर्विसर्जनी य इत्याह॥ इतरथा खरवसानयोः सो भवतीत्येव ब्रूयात्। तच्च लघु भवति। विसर्जनी
यस्य स इत्येतच्च न वक्तव्यं भवति॥

कर्षः संहिते तीयतासिद्धे परशब्दः प्रकर्षगत्यर्थ उपादीयते तेन पूर्वपरविषयः सन्निकर्षः संहितासंज्ञो भवति। यद्येवेति। संज्ञि
भेदात्संज्ञयोर्बाध्यबाधकभावो नुपपन्न इति भावः॥ अणोप्रगृह्यस्येति। वावसान इति तत्रानुवर्तते संहिताधिकारश्चोत्तरार्थो वि
ष्पानुवर्त्यस्तो लीति परसवर्णः संहितायां माभूदग्निचित् लुनातीति ततश्च संहितावसानाश्रयो नुनासिको दधिमधु इत्यत्र सिद्धो रम
भवति। यदि तु सत्यपि बाध्यबाधकभावे यत्रैवावसानाश्रयं कार्यं तत्रैव संहिताग्रहणेनासंबन्धः। उत्तरत्र त्वनुवृत्तिरेव तदा न कश्चि
द्दोषः किंतु शतियोगिना विच्छिन्नस्य संहिताग्रहणस्योत्तरत्रोपस्थाने संदिह्यते तेति भिन्नविषयत्वात्समावेश एवानयोः संज्ञयोरेष्ट ५२
व्य इति भाष्यकाराभिप्रायः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतिनिर्देशार्थमिति।। स्थानिनिर्देशार्थमित्यर्थः। अन्यथा कस्य शर्परे विसर्जनीयः स्यात्।। अथेदानीमिति। एवं सूत्रसन्निवेशः क्रियते रोरिखरवसानयोः सः शेः सुपि शर्परे विसर्जनीय इति।। तत्र शर्पर इत्यत्र र इति वर्तते न तु रोरिति।। एवमपीति। यदि रोः सुपीत्यस्यानन्तरं शर्परे विसर्जनीयः वा शरि कुप्वोः ᳵक ᳶपौ चेत्यादिरस्थानिकादेशविधानार्थं पठित्वा भो भगो इति यत्वं रस्य स्थाने विधीयते तदा स्वरन्त्रेत्यादावपि प्राप्नोतिरुग्रहणस्य विच्छिन्नत्वात् पुनरुपादानं कर्तव्यं भवतीत्यर्थः। एवमपीति। यथान्यासे त्रीणि ग्रहणानि भवन्ति द्वे विसर्जनीयग्रहणे तृतीयं सग्रहणमन्यथान्यासे तु द्वे ग्रहणे रुग्रहणं सग्र

अवश्यं शर्परे विसर्जनीय इत्यत्र प्रकृतिनिर्देशार्थं विसर्जनीयग्रहणं कर्तव्यम्। अथेदानीमेतदपि सान्निध्यार्थं पुरस्तादपकृष्यते खरवसानयोः स इत्यत्रैव।। एवमपि कुप्वोः ᳵक ᳶपौ चेत्येवमादिनानुक्रमणेन व्यवच्छिन्नं भो भगो अघो अपूर्वस्य योऽशीत्यत्र रुग्रहणं कर्तव्यं स्यात्। एवमप्येकं विसर्जनीयग्रहणं व्याजो भवति सोयमेवं लघीयसा न्यासेन सिद्धे यद् गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यः न सर्वस्य विसर्जनीयस्य सत्वं भवतीति। एवमपि अनैकान्तिकं ज्ञापकमेतावज्ज्ञाप्यते न सर्वस्य विसर्जनीयस्य सत्वं भवतीति।। तत्र कुत एतदिह भविष्यति वृक्षस्तत्र प्लक्षस्तत्रेति। इह न भविष्यति वृक्षः प्लक्ष इति। एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति नास्य विसर्जनीयस्य सत्वं भवतीति।।

ग्रहणं च। तत्र खरवसानयोः स इति सग्रहणं खरवसानयोर्विसर्जनीय इति विसर्जनीयग्रहणेन निमीयते रुग्रहणं विसर्जनीयस्य स इति सग्रहणेन तत्र विसर्जनीयस्येति विसर्जनीयग्रहणमधिकं त्वा व्याजो भवति। अजेः क्षेपार्थस्य घञि रूपे विक्षिप्यते तेन न पठितव्यं भवतीत्यर्थः। अथवा व्याजो नृतमुच्यते। आनर्थक्यादनृतं भवति न कर्तव्यं भवतीत्यर्थः।। तस्मात्सर्वस्य विसर्जनीयस्य सकारो न भवति।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यमिति। विपर्यये हि विज्ञायमाने पुरुषः त्सरुकः इत्यत्रौसत्वाभावाद्विसर्जनीयो स्येवेति किं तद्विधानेन। ननु ᳲकᳲप निवृत्त्यर्थं विसर्जनीयविधानं स्यात् वासः क्षौममद्भिः प्सातमिति। नैतदस्ति। यद्येतावत्प्रयोजनं स्यात् कुप्वोᳲकᳲपौ चाशरीति ब्रूयात्। अथ चेति। लोपसंबद्धं हल्ग्रहणमनुवर्तत इति पूर्वयोगेषु कार्यान्तरेण न संबध्यते इह तु हली॰ तिवर्तते लोप इति निवृत्तमित्यर्थः॥ कुप्वोᳲकᳲपौ च॥ सस्येति। ब्राह्मणः पचति ब्राह्मणः करोतीत्यादावुपध्मानीयजि ह्वामूलीयविसर्जनीया इष्यन्ते। वासः क्षौममद्भिः प्सातमित्यादौ तु शर्परयोः कुप्वोर्विसर्जनीय एवेष्यते। एतच्च स॰

यद्यं शर्परे विसर्जनीय इत्याह। अथवा हलीति वर्तते। क्व प्रकृतम्। हलि सर्वेषामिति। यदि तदनुवर्तते। ॰ मयउञो वो वा हलि चेति हल्यपि वत्वं प्राप्नोति। शसुनः शसुयोस्तु। एवं तर्हि विसर्जनीयस्य स इत्यत्र खरी त्यनुवर्तिष्यते॥ अथवा संबन्धमनुवर्तिष्यते॥ वा शरि॥ वा शर्प्रकरणे खर्परे लोपः। वा शर्प्रकरणे खर्परे लो पो वक्तव्यः। वृक्षास्थातारः॥ वृक्षाः स्थातारः॥ कुप्वोᳲकᳲपौ च॥ सस्य कुप्वोर्विसर्जनीयजिह्वामूलीयो प ध्मानीयौ वक्तव्याः विसर्जनीयादेशे हि शर्परयोरेवादेशप्रसङ्गः। विसर्जनीयादेशे हि शर्परयोरेव कुप्वो ᳲ कᳲपौ स्याताम्। अद्भिः प्सातम्। वासः क्षौमम्॥

स्येति स्थानिनिर्देशो सिध्यति। यो विसर्जनीयस्य सस्तस्य स्थाने कुप्वोरादेशत्रयविधानाच्छर्परयोः कुप्वोः सकारापवाद विसर्जनीयविधानात्सकाराभावादादेशाप्रसङ्गः। यदा तु विसर्जनीयस्थाने अनेन आदेशत्रयं विधीयते तदा शर्परयो रेव कुप्वोः प्राप्नोत्यश॰ र्परयोस्तु कुप्वोः पूर्वत्रासिद्धमिति ᳲकᳲपयोरसिद्धत्वात्सकार एव प्राप्नोति। न च सकारस्य स्थानिवद्भावोऽस्य योगवाहानामविशेषेण प्रत्याहार उपदेशचोदनादल्विधित्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वचनादिति। यदि शर्परे विसर्जनीयवद्भावस्य विसर्जनीयस्य ᳲकᳲपौ स्यातां तदेतद्विसर्जनीयविधानमनर्थकं स्यात्॥ अस्तीति। यत्र कुप्वोरन्यः शर्परः स्वरश्चास्ति तत्र सकारापवादविसर्जनीयविधानमर्थवत्। कुप्वोस्तु शर्परयोर्विसर्जनीयस्य ᳲकᳲपप्रसङ्गः। यदेतदिति। विसर्जनीयस्य सद्भावत्वात्र सकारस्य स्थानीयो विसर्जनीय उपात्तः सद्विविधः संभवति स्वरवसानलक्षणः शर्परलक्षणश्च तत्र पूर्वत्रासिद्धमिति सत्वे शर्परलक्षणस्यासिद्धत्वादितरः सस्य स्थानी विज्ञायते स एव चेहानुवर्तते तदर्थो वा शब्द इति स एवेह स्थानी गृह्यते तत्र वचनप्रामाण्यादुत्सर्गसत्वे कर्तव्ये ऽपवादयोः ᳲकᳲपयोरसिद्धत्वाभावात् प्रवृत्तौ सत्यां यथेष्टं सिध्यतीत्यर्थः। शर्परलक्षणश्च विसर्ज-

वचनात्र भविष्यतः॥ अस्ति वचने प्रयोजनम्। किम्। पुरुषः त्सरुकः। तत्तर्हि वक्तव्यम्॥ न वक्तव्यम्॥ यदेतद्विसर्जनीयस्य सद्भावत्वात्र विसर्जनीयग्रहणमेतदुत्तरत्रानुवर्तिष्यते तस्मिंश्च शर्परे विसर्जनीयो ऽसिद्धः। नासिद्धः। कथम्। अधिकारो नाम त्रिप्रकारः। कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति॥ अपरो यथा रज्वा ऽयसा वा बद्धं काष्ठमनुकृष्यते तद्वत्॥ अपरो ऽधिकारः

नीय आदेशो ऽपूर्वं विसर्जनीयस्य विधीयते न तु तस्यैव सत्वबाधनार्था प्रत्यापत्तिरिति दर्शनमाश्रित्यैतदुच्यते प्रत्यापत्तौ हि विसर्जनीयस्य भेदाभावाद् अयुक्तो ऽनन्तरो ऽर्थः स्यात्। ननु च वस्य त्वेतत् नयोगे योगो ऽसिद्धः किंतु प्रकरणे प्रकरणमसिद्धमिति तत्रैकप्रकरणत्वात् सत्वे शर्परे विसर्जनीयवद्भावस्यासिद्धत्वं नास्ति। नैष दोषः। कार्यभेदात्प्रकरणभेदाद् एकेन हि सकारो विधीयते अन्येन विसर्जनी[...]ः कश्चिदिति। यद्यपि सर्वशास्त्राव ज्वलनं परिभाषाधर्मस्तथापि परार्थत्वसामान्याद् भेदापरामर्शेनैतदुक्तम्। तद्वदिति। चकारेणेति भावः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·कै· प्रतियोगमिति। यस्य स्वरितत्वमासज्यते तत्स्थानिशब्दान्तराणि योगान्तरे ऽनुमीयन्ते सादृश्यात्तु तत्त्वाध्यवसायः ८ ३ १
५४ ॥ योगान्तरोपयोग्यर्थस्य वा तस्यैवानुमानमर्थभेदोऽस्मिन्नस्यापि भेदावसायस्तत्र विसर्जनीयस्य स इति लिङ्गाभ
वान्नपरिभाषानापि चकारेणोत्तरत्र स्थानिनोऽनुकर्षः स्वरितत्वात्त्विह संबध्यमानोऽपि विसर्जनीयशब्दः सिद्धः
विसर्जनीयं स्थानित्वेन प्रतिपादयतीति शर्परे विसर्जनीय इत्यस्यैव ᳵकᳶपयोः सङ्गः। स हि ᳵकᳶपयोः कर्तव्ययोः

प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते। नद्यदैषपक्षः प्रतियोगं तस्यानिर्देशार्थ इति तदा हि
यदेतद्विसर्जनीयस्य स इत्यत्र विसर्जनीयग्रहणमेतदुत्तरत्रानुवृत्तं सदन्यत्सं पद्यते। तस्मिंश्च शर्परे वि
सर्जनीयः सिद्धः। एवं च कृत्वा शर्परयोरेव कुप्वोः ᳵकᳶपौ स्याताम्। वासः क्षौमम् अद्भिः प्सातमिति। एवं त
र्हि योगविभागः करिष्यते। शर्परे विसर्जनीयः। वा शरि। ततः कुप्वोः। कुप्वोश्च शर्परयोर्विसर्जनीयस्य वि
सर्जनीयो भवतीति। किमर्थमिदम्। कुप्वोः ᳵकᳶपौ वक्ष्यति तद्बाधनार्थं ततः ᳵकᳶपौ च भवतः। कुप्वोरि
त्येव। शर्परयोरिति निवृत्तम्। अथ शर्परे विसर्जनीय इत्येतत् कुप्वोः ᳵकᳶपौ चेत्यत्रानुवर्तिष्यते॥ सो
पदादौ॥ सोपदादावनव्ययस्य। सोपदादावनव्ययस्येति वक्तव्यम्। इह मा भूत्। प्रातःकल्पम्। पुनः
कल्पम्॥ रोः काम्ये नियमार्थम्। रोः काम्य इति वक्तव्यम्। किं प्रयोजनम्। नियमार्थम्। रोरेव काम्ये ना
न्यस्य। पयस्काम्यति। इह मा भूत्। गीः काम्यति। पूः काम्यति॥ उपध्मानीयस्य च॥ सत्वं वक्तव्यम्। किं प्रयोजनम्।

सिद्धः। अथ वेति। योगविभागे प्रसक्तयोः ᳵकᳶपयोर्निवृत्तिरनुवृत्तौ तु प्रसङ्ग एव नास्तीति विशेषः॥ सोपदादौ॥ प्रातः राम·
कल्पमिति। यद्यपि प्रातःशब्दोऽधिकरणवाची तथापि वृत्तिविषये शक्तिमद्वाचीति ईषदसमाप्त्या योग उपपद्यते। य
था दोषाभूतमहर्दिवाभूता रात्रिरित्यादावभूततद्भावः॥ ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपध्मानीयोपधइति। उपध्मानीयस्य पकारमन्तरेणोच्चारयितुमशक्यत्वात् उब्जआर्जवेइत्येतदुच्चारणार्थः पकारः प
क्ष्यतेनतुश्रवणार्थः इत्युपधात्वमुपध्मानीयस्य। कुप्वोः ᳲकᳲपौ चेत्यत्रजकारस्यकुत्वंतत्रैवोपध्मानीयस्यसकारोन्यत्रप्र
सा(हा)रउपदेशचोदनात् झलांजशझशीतिजश्त्वंबकारः निपातनादिति। यत्रजकारःश्रूयतेतत्रदकारस्यस्तोश्चुनाश्
चुरितिचुत्वेप्राप्तेझलांजशझसीत्यनेनानन्तरतमोपिबकारोभवतीतिनिपातनेनकुत्वनिषेधार्थेनाप्यनुमीयतइ

अयमुब्जिरुपध्मानीयोपधःपठ्यतेतस्यसत्वेकृतेजश्भावेचअभ्युद्गःसमुद्गइत्येतद्रूपंयथास्यात्। यद्युप
ध्मानीयोपधः पठ्यतेउब्जिजिषतीतिउपध्मानीयस्यद्विर्वचनंप्राप्नोति॥ दकारोपधेपुनःसतिनन्द्राःसंयोगा
दयइतिप्रतिषेधः सिद्धोभवति। यदिदकारोपधः पठ्यतेकारूपसिद्धिः उब्जिताउब्जितुमिति॥ असिद्धेभउ
ब्जेः। इदमस्ति। स्तोश्चुनाश्चुः। ततोवक्ष्यामि। भउब्जेः। उब्जेश्चश्चुनासन्निपातेभोभवतीति। तत्तर्हिवक्तव्य
म्। नवक्तव्यम्। निपातनादेतत्सिद्धम्। किंनिपातनम्। भुजन्युब्जौपाण्युपतापयोरिति॥ इहापिप्राप्नो
ति। अभ्युद्गः॥ समुद्गः। अकुत्वविषयेनिपातनम्। अथवानैतद्उब्जेरूपम्। किंतर्हि। गमेः ह्युपसर्गात् डो विधीयते
। अभ्युद्गः। समुद्गः॥ इणः षः॥ किमविशेषेण सत्वमुक्त्वाइणउत्तरस्यसकारस्यषत्वमुच्यते॥ आहोस्वित्इ
णउत्तरस्यविसर्जनीयस्यैवषत्वंविधीयते। किञ्चातः। यद्यविशेषेणसत्वमुक्त्वाइणउत्तरस्यसका(र)स्यषत्वमुच्यते॥

तिभावः तेनपूर्वत्रासिद्धमितिनन्द्राःसंयोगादयइतिद्विर्वचननिषेधेबत्वस्यासिद्धत्वाद्दकारस्यद्विर्वचननिषेधः॥ गमेरि
ति। एवञ्चदकारोपदेशोद्विर्वचननिषेधार्थएवेतिद्विर्वचनेकृतेबत्वमितिरूपप्रक्रियायामानुपूर्व्याश्रीयते। नभिधाना
च्चघञभावादुब्गइतिनभवति। नचाभ्युद्गइत्यत्रगमेर्डे घञिचोब्जेः स्वरेविशेषः। डेकृत्स्वरेणान्तोदात्तत्वात् घञ्यपि
थाथादिस्वरेण॥ इणः षः॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्वस्यासिद्धत्वादिति। इणः ष इत्यनेन यदा सस्य षत्वं विधीयते तदा सो पदादावित्यस्यैव सस्य सर्पिष्कादौ षत्वं स्यात्। तत्प्र माणयोगे न विधीयमानस्य तु सस्य षत्वेऽसिद्धत्वात् षत्वं न प्राप्नोतीत्यर्थः॥ असमासेपि ग्रहणमिति। अन्तरेणाप्यसमासेपि ग्रहणं विशेषानुपादानात् समासासमासयोर्णत्वं सिध्यति। न च समासे पूर्वपदात्संज्ञायामगइति नियमेन णत्वस्याप्राप्तिः। नि

निष्कृतं निष्पीतमित्यत्र सत्वस्यासिद्धत्वात् षत्वं न प्राप्नोति॥ अथ इण उत्तरस्य विसर्जनीयस्यैव षत्वमुच्यते सत्वम प्यनुवर्त्तते। उताहो न। किं चातः॥ यद्यनुवर्त्तते सत्वमपि प्राप्नोति अथ निवृत्तं नमस्पुरसोर्गत्योरित्यत्र सकारस्य ग्रहणं कर्त्तव्यम्। तस्मिंश्च क्रियमाणे षत्वमप्यनुवर्त्तते। उताहो न। किं चातः। यद्यनुवर्त्तते षत्वमपि प्राप्नोति॥ अथ नि वृत्तम्। इदुदुपधस्य चाप्रत्ययस्येत्यत्र षकारग्रहणं कर्त्तव्यम्। तस्मिंश्च क्रियमाणे सत्वमप्यनुवर्त्तते। उताहो न। किञ्चातः। यद्यनुवर्त्तते सत्वमपि प्राप्नोति। अथ निवृत्तं तिरसोन्यतरस्यामित्यत्र सकारग्रहणं कर्त्तव्यम्। तस्मिं श्च क्रियमाणे षत्वमप्यनुवर्त्तते। उताहो न। किञ्चातः। यद्यनुवर्त्तते षत्वमपि प्राप्नोति। अथ निवृत्तम्। द्विस्त्रिश्च तुरिति कृत्वोर्थे इसुसोः सामर्थ्ये नित्यं समासेनुत्तरपदस्थस्येति षकारग्रहणं कर्त्तव्यम्। तस्मिंश्च क्रियमाणे सत्व मप्यनुवर्त्तते। उताहो न। किञ्चातः। यद्यनुवर्त्तते सत्वमपि प्राप्नोति॥ अथ निवृत्तम्। अतः कृकमिकंसकुंभपात्रकु शाकर्णीष्वनव्ययस्येति सकारग्रहणं कर्त्तव्यम्॥ यथेच्छसि तथास्तु॥ अस्तु तावदविशेषेण सत्वमुक्त्वा इण उत्तर स्य सकारस्य षत्वमुच्यते। ननु चोक्तं निष्कृतं निष्पीतमित्यत्र सत्वस्यासिद्धत्वात् षत्वं न प्राप्नोतीति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न योगे योगोसिद्धः किं तर्हि प्रकरणे प्रकरणमसिद्धमिति। यदयमुपसर्गादसमासेपि णोपदेशस्येत्यसमासेपि ग्रहणं करोति॥ अथवा पुनरस्तु इण उत्तरस्य विसर्जनीयस्य षत्वं विधीयते ननु चोक्तं सत्वमप्यनुवर्त्तते उताहो न यद्यनुवर्त्तते सत्वमपि प्राप्नोतीति। नैष दोषः॥

यमेकर्त्तव्ये उपसर्गादित्यस्य णत्वस्यासिद्धत्वान्नियमाभावात्तदेतदसमासेपि ग्रहणं यथोक्तमर्थं ज्ञापयति। यद्यपि स्यादा निभेद आदेशभेदश्च सस्य विसर्जनीयस्थानित्वात् षस्य सकारस्थानित्वात्तथापि कुप्वोरधिकारादेकनिमित्तत्वादेकप्रक रणत्वावसायः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संबन्धमिति। नचेणः परस्य सकारः प्राप्नोति षकारेण तस्य बाधनाच्चकाराकरणाच्च। तत्र स इति ष इति च स्वरितत्वादुत्तर
त्रानुवर्त्तते। उत्तरेऽपि योगाः स्वरितत्वप्रतिज्ञानाद्योगान्तरेषु केचित् षकारसंबद्धाः केचित्सकारसंबद्धाः अनुवर्त्तन्त इति य
थेष्टं सकारषकारादेशप्रवृत्तिः॥ इदुदुपधस्य चाप्रत्ययस्य॥ पुंमुहुसोरिति॥ अव्युत्पन्नावेतावितिप्रतिषेधस्योद्यते। संपुं
कानां सो वक्तव्य इति वचनात् षत्वं न भविष्य   तीति नार्थः पुंसः प्रतिषेधेन। सकारस्याप्ययं वक्त
व्यः। रुत्वे हि क्रियमाणे विसर्जनीयस्य प्रतिषिद्धेऽपि षत्वे ꣾकꣾप विसर्जनीयश्रवणप्रसङ्गः। ननु सकारस्यापि षत्वं प्राप्नो

संबन्धमनुवर्तिष्यते। सोपदादौ इणः षः नमस्पुरसोर्गत्योः सकारः इण उत्तरस्य षकारः। इदुदुपधस्य चाप्रत्ययस्य
षकारः। नमस्पुरसोर्गत्योः सकारः। तिरसोऽन्यतरस्यां सकारः इदुदुपधस्य चाप्रत्ययस्य षकारः। द्विस्त्रिश्चतुरि
ति कृत्वोऽर्थे इसुसोः सामर्थ्ये नित्यं समासेऽनुत्तरपदस्थस्येति षकारः तिरसोऽन्यतरस्यां सकारः। अतः कृकमिकं
सकुम्भपात्रकुशाकर्णीष्वनव्ययस्य सकारोऽनुवर्त्तते षकारग्रहणं निवृत्तम्॥ इदुदुपधस्य चाप्रत्ययस्य॥ इदुदु
पधस्य चाप्रत्ययस्येति चेत् पुंमुहुसोः प्रतिषेधः। इदुदुपधस्य चाप्रत्ययस्येति चेत् पुंमुहुसोः प्रतिषेधो वक्तव्यः
। पुंस्कामः। मुहुः काम इति। वृद्धिभूतानां षत्वं वक्तव्यम्। दौष्कुल्यम्। नैष्पुरुष्यम्। प्लुतानां तादौ च। प्लुतानां तादौ
कुप्वोश्चेति वक्तव्यम्। सर्पी३ष्टर। बर्ही३ष्टरनी३ष्कुल। दू३ष्पुरुष। न वा बहिरङ्गलक्षणत्वात्। नवा वक्तव्यम्। किं
कारणम्। बहिरङ्गलक्षणत्वात्। वृद्धेः। बहिरङ्गलक्षणा वृद्धिः। इह कस्मान्न भवति। मातुः करोति। अप्रत्ययवि
सर्जनीयस्येति षत्वं प्रसज्येत। अप्रत्ययविसर्जनीयस्येत्युच्यते। प्रत्ययविसर्जनीयश्चायम्। लुप्यते त्वप्रत्यय
विसर्जनीयः रात्स्यस्येति। एवं तर्हि भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात् षत्वप्रतिषेधस्य॥ ॥ ॥

ति सकारस्य षत्वमित्येषोऽपि स्थितः पक्षः। नैतदस्ति। सकारविधानसामर्थ्यात् षत्वं न भविष्यति। षत्वे हि सति तिरोः सस्य च
विशेषाभावात् किं सत्वविधानेन। मातुरिति। उभयादेशस्यान्यतरतो व्यपदेशाद्रपरत्वे सत्यप्रत्ययविसर्जनीयत्वात् ष
त्वप्रसङ्गः। प्रत्ययविसर्जनीयश्चायमिति। उभयादेशत्वान्नायमुः स्थान इति रपरत्वाभावात् सकारस्यैव रुत्वविसर्ज
नीयौ मन्यते। लुप्यत इति। पूर्वोक्तेन न्यायेन रपरत्वं भवत्येव॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ कस्कादिष्विति। एकादेशशास्त्रनिमित्तं यस्य तस्मात्परस्य विसर्जनीयस्य षत्वं न भवतीति ज्ञाप्यते॥ द्विस्त्रिश्चतुरि- २ १
५६ ति कृत्वोर्थे॥ द्विस्त्रिश्चतुर्ग्रहणमिति। वक्ष्यमाणेनाभिप्रायेण दूषणार्थः प्रश्नः। इतरस्त्वगृहीताभिप्रायः प्रत्युदाहरणमि
। पञ्च कृत्व इति। अत्र सकारः प्रसज्येत। अथेति। द्विस्त्रिःशब्दौ कृत्वोर्थावेवेति प्रश्नः। इतरश्चतुःशब्दार्थमेतद्विशे
षणमित्याह। चतुष्कपाल इति। इदुदुपधस्येति नित्यं षत्वं भवत्यव्युत्पन्नत्वादुणादीनामप्रत्ययविसर्जनीयत्वा द्य

यद्ययं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति तद् ज्ञापयत्याचार्यः नैकादेशनिमित्तात्षत्वं भवतीति॥ द्विस्त्रिश्चतुरिति कृ
त्वोर्थे॥ द्विस्त्रिश्चतुर्ग्रहणं किमर्थम्। इह मा भूत्। पञ्च कृत्वः करोति। अथ कृत्वोर्थग्रहणं किमर्थम्। इह मा भूत्
चतुष्कपालश्चतुष्कण्टक इति। नैतदस्ति॥ अस्त्वनेन विभाषा पूर्वेण नित्यो विधिर्भविष्यति। नाप्राप्ते पूर्वेणे
यं विभाषा आरभ्यते सा यथैवेह हबाधिका भवति। चतुष्करोति चतुःकरोतीति। एवं चतुष्कपालेपि बाधि
का स्यात्। नात्र पूर्वेण षत्वं प्राप्नोति। किं कारणम्। अप्रत्ययविसर्जनीयस्येत्युच्यते। प्रत्ययविसर्जनीयश्चायम्॥
लुप्यतेत्र प्रत्ययविसर्जनीयो रात्सस्येति। तस्मात्कृत्वोर्थग्रहणं कर्त्तव्यम्। द्विस्त्रिश्चतुर्ग्रहणं शक्यमवक्तुम्। क
स्मान्न भवति पंच कृत्वः करोतीति। इदुदुपधस्येति वर्त्तते॥ नैवं शक्यम्। अक्रियमाणे द्विस्त्रिश्चतुर्ग्रहणे कृत्वोर्थग्रह
णेन विसर्जनीयो विशेष्येत। तत्र को दोषः। इहैव स्यात् द्विष्करोति द्विःकरोति त्रिष्करोति। त्रिःकरोति। इह न स्याच्चतुःक
रोति। चतुष्करोतीति। द्विस्त्रिश्चतुर्ग्रहणे पुनः क्रियमाणे कृत्वोर्थग्रहणेन द्विस्त्रिश्चतुरो विशेष्यन्ते। द्वित्रिचतुर्णां कृ
त्वोर्थे वर्त्तमानानां यो विसर्जनीय इति। एतदपि नास्ति प्रयोजनम्। परस्येति वर्त्तते। तत्र कृत्वोर्थग्रहणेन विशेषयिष्यामः॥ ८

दातु साहचर्येणाव्यवस्याहेतुत्वेनाश्रीयते तदा चतुःशब्दार्थमपि कृत्वोर्थग्रहणं न कर्त्तव्यम्। प्रत्ययविसर्जनीय इति। सकारस्य राम॰
रुत्वे पूर्वस्य रो रीति लोपः क्रियत इति भावः। लुप्यत इति। रात्सस्येति लोपे कर्त्तव्ये रुत्वस्यासिद्धत्वाद्रो रीति लोपे चक्र लोप इति
दीर्घप्रसङ्गः॥ द्विस्त्रिश्चतुर इति। चतुःशब्दः सुजन्तस्यानुकरणमिति प्रकृतावेवादृष्टत्वादाम् न कृतः द्विस्त्रिश्चतुर्णामित्यत्र त्व ५६
सुजन्तस्यानुकरणत्वात्तदुद्धृतः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पदस्य कृत्वोऽर्थ इति। ननु पूर्वत्रासिद्धमिति विकल्पस्यासिद्धत्वाच्चतुष्करोतीति नित्यं षत्वप्रसङ्गः। नैष दोषः। प्रकरणे प्रकरणमसिद्धं न तु योगे योग इत्युक्तत्वात्।। अथ वा इदुदुपधस्य कृत्वोऽर्थं इत्ते नभाते नित्ये षत्वेऽस्यारम्भादस्यापवादत्वमिति अपवादो वचनप्रामाण्यान्नासिद्धो भवति।। नित्यं समासे।। अथेदानीमिति। इह समासग्रहणादेकार्थीभाव एव सामर्थ्यं गृह्यते पूर्वसूत्रे तु विशेषाश्रयणे प्रमाणाभावाद्द्विविधसामर्थ्यग्रहणस्य न्याय्यत्वादेतद्विधीयमाननित्यषत्वाभावे पूर्वेण विकल्पः प्राप्तेव। नानापदार्थयोरिति।। नानाभूतयोः पदार्थयोर्यौ शब्दौ वर्त्तेते तयोर्यो योगो व्यपेक्षालक्षणः स ख्यायते ज्ञायते न त्वेकार्थीभावो गृह्यते। तस्मिन्निति। व्यपेक्षालक्षणे संबन्ध इत्यर्थः। तद्युक्तमिति। व्यपेक्षालक्षणं सामर्थ्यमाश्रयितुं युक्तं ल

पदस्य कृत्वोऽर्थे वर्तमानस्य यो विसर्जनीय इति।। कृत्वसुजर्थे षत्वं ब्रवीति कस्माच्चतुष्कपाले मा। षत्वं विभाषया भून्न तु सिद्धं तत्र पूर्वेण।।१।। सिद्धे ह्ययं विधत्ते चतुरः षत्वं यदापि कृत्वोऽर्थे। लुप्ते कृत्वोऽर्थीये रेफस्य विसर्जनीयो हि।।२।। एवं सति त्विदानीं द्विस्त्रिश्चतुरित्यनेन किं कार्यम्। अन्यो हि नेदुदुपधः कृत्वोऽर्थे कश्चिदप्यस्ति।।३।। अक्रियमाणे ग्रहणे विसर्जनीयस्तदाविशेष्येत। चतुरो न सिध्यति तदा रेफस्य विसर्जनीयो हि।।४।। तस्मिंस्तु गृह्यमाणे युक्तं च तुरो विशेषणं भवति।। प्रकृतं पदं तदन्तं तस्यापि विशेषणं न्याय्यम्।।५।। नित्यं समासेऽनुत्तरपदस्थस्य।। अनुत्तरपदस्थस्येति किमर्थम्। परमसर्पिः कुण्डिका। अथेदानीमनेन मुक्ते पूर्वेण षत्वं विभाषा कस्मान्न भवति। इसुसोः सामर्थ्य इति।। नानापदार्थयोर्वर्तमानयोः ख्यायते यः स योगः।। तस्मिन् षत्वं कार्यं तद्युक्तं तच्च मेनेह। व्यपेक्षासामर्थ्ये पूर्वयोगः। न चात्र व्यपेक्षासामर्थ्यम्। किं पुनः कारणं पूर्वस्मिन्योगे व्यपेक्षासामर्थ्यमाश्रीयते न पुनरेकार्थीभावो यथान्यत्र।। ।।

स्यानुरोधात्। अथ वा पदविधित्वात्समर्थपरिभाषोपस्थाना त्सामर्थ्ये लब्धे पुनः सामर्थ्यग्रहणाद्द्विशिष्टसामर्थ्यपरिग्रहः। तच्चेति। व्यपेक्षालक्षणं सामर्थ्यमिह। परमसर्पिः कुण्डिकेत्यादौ नास्तीति षत्वाभावः।। यथान्यत्रेति। समासतद्धितसुब्धातुषु यथैकार्थीभाव आश्रीयते तथेह कस्मान्नाश्रीयत इत्यर्थः।।

A Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का०के० ऐकार्थ्यमिति। यद्येकार्थीभावलक्षणं सामर्थ्यं पूर्वत्राश्रीयेत तदा वाक्ये षत्वविकल्पो न स्यात्। ननु केवलमैकार्थ्यं पूर्वत्राश्रयाहि द्विविध २ १
५७ स्य सामर्थ्यस्य ग्रहणं कस्मान्न भवति। उक्तमत्रोत्तरम्। अथवेह समासग्रहणाज्ज्ञोबलीवर्दन्यायात् पूर्वत्रापेक्षितप्रवृत्तिनिमित्त
विशेषः समर्थशब्द आश्रीयते संप्रेक्षितार्थं समर्थमिति॥ अथ चेदिति। स्यादेतत्। द्विविधस्यापि सामर्थ्यस्य पूर्वत्र ग्रहणे ऽकृत्स
त्यययोरिसोर्ग्रहणात्स्स यग्रहण परिभाषया परमसर्पिःकुण्डिकेत्यादौ पास्सि कं षत्वं न भविष्यतीति। तदयुक्तम्। परमसर्पि
ष्करोतीत्यादावपि षत्वाप्रसङ्गात्। वाक्ये चेति। अनुत्तरपदस्थस्येति प्रतिषेधात् ज्ञापकाद्वाक्ये परमसर्पिष्करोतीत्यादौ षत्वं
भविष्यतीत्यर्थः॥ यदिहि षत्वे प्रत्ययग्रहणपरिभाषोपस्थास्यतानुत्तरपदस्थस्येति प्रतिषेधो न व्यधास्यत। केचित्तु नित्यं

ऐकार्थ्ये सामर्थ्ये वाक्ये षत्वं न मे प्रसज्येत। ऐकार्थ्ये सामर्थ्ये सति वाक्ये षत्वं न स्यात्‌ सर्पिष्करोति। सर्पिः करोतीति। त
स्मादिह व्यपेक्षां सामर्थ्यं साधु मन्यन्ते॥ अथ चेत्कृदन्तमेतत् ततो ऽधिकेनैव मे भवेत्प्राप्तिः॥ यदि कृदंतमेतत् ततो ऽधिक
स्य षत्वं न प्राप्नोति। किं कारणम्। प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति॥ वाक्ये ऽपि तर्हि न प्राप्नोति परमसर्पिष्क
रोति। वाक्ये च मे विभाषा प्रतिषेधो न प्रकल्प्येत॥ यदयमनुत्तरपदस्थस्येति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः भव
ति वाक्ये विभाषेति॥ अथ चेत्संविज्ञानं नित्ये षत्वे ततो विभाषेयम्। अथाव्युत्पन्नं प्रातिपदिकं ततो नित्ये षत्वे प्रा
प्ते विभाषा आरभ्यते॥ सिद्धं च मे समासे किमर्थं तर्हीदमुच्यते॥

समासइत्येको योगः। अनुत्तरपदस्थस्येति द्वितीय इति योगविभागेन समासे सर्वा षत्वप्राप्तिरुत्तरपदस्थस्य प्रतिषिध्यत इति
वर्णयन्तो द्विविधसामर्थ्याश्रये ऽपि न दोष इत्याहुः॥ अथ चेदिति। यद्यव्युत्पन्नं सर्पिरादिकं शब्दरूपं संविज्ञानं वा चकं तदा ऽप्र
त्ययविसर्जनीयत्वादिदुदुपधस्येति नित्ये षत्वे प्राप्ते इसुसोः सामर्थ्य इत्यनेन विकल्पः क्रियते तत्र प्रत्ययग्रहणाभावात् प्रत्यय राम-
ग्रहणपरिभाषानुपस्थानात्परमसर्पिष्करोतीत्यादावपि षत्वविकल्पः सिध्यति। किमर्थमिति। इसुसोः सामर्थ्य इत्यत्र व्यपे
क्षा लक्षणसामर्थ्यग्रहणात् समासे इदुदुपधस्येति नित्यं षत्वं सिद्धं तत्किमर्थं नित्यं समास इति सूत्रमिति प्रश्नः॥ ॥ ॥ ५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिषेधार्थमिति। उत्तरपदस्थस्य समासे षत्वनिवृत्त्यर्थं सूत्रमित्यर्थः। नित्यग्रहणं तु न कर्तव्यम्। समासेऽनुत्तरपदस्थस्येति प्रतिषेधार्थं सूत्रं पठितव्यम्। अव्युत्पत्तिपक्षे त्वाश्रीयमाणे सर्पिषा यजुषेत्यादि न सिध्यतीति षत्वाय व्युत्पत्तिपक्ष एवेसुसन्तस्याश्रयणीयः॥ अपदान्तस्य मूर्द्धन्यः॥ मूर्द्धन्यग्रहणं शुर्विति प्रश्नः। इणः षीध्वमिति। इहाक्रियमाणे मूर्द्धन्यग्रहणे इणः षीध्वमित्यत्र ढग्रहणं कर्तव्यं ततः समासेऽङ्गुलेरित्यत्र षग्रहणं कर्तव्यम्। अपदान्ताभिसंबद्धमिति। रषाभ्यामित्यत्रापदान्त

प्रतिषेधार्थस्तु यत्नोऽयम्॥ अनुत्तरपदस्थस्येति प्रतिषेधं वक्ष्यामीति॥ नानापदार्थयोर्वर्तमानयोः रव्यायतेयदायोगः॥ तस्मिन्षत्वं कार्यं तद्युक्तं तच्च मे नेह॥१॥ ऐकार्थ्ये सामर्थ्ये वाक्ये षत्वं न मे प्रसज्येत। तस्मादिह व्यपेक्षां सामर्थ्यं साधु मन्यन्ते॥२॥ अथ चेत्कृदन्तमेतत् ततोऽधिके नैव मे भवेत्प्राप्तिः। वाक्ये च मे विभाषा प्रतिषेधो न प्रकल्पेत॥३॥ अथ चेत्संविज्ञानं नित्ये षत्वे ततो विभाषेयम्। सिद्धं च मे समासे प्रतिषेधार्थस्तु यत्नोऽयम्॥४॥ अपदान्तस्य मूर्द्धन्यः॥ अथ मूर्द्धन्यग्रहणं किमर्थम्। नापदान्तस्य षो भवतीत्येवोच्येत। तत्रायमप्यर्थः॥ षकारग्रहणं न कर्तव्यं भवति प्रकृतमनुवर्तते॥ क्व प्रकृतम्। इणः षः इति॥ नैवं शक्यम्। अवश्यं मूर्द्धन्यग्रहणं कर्तव्यम्। इहार्थमुत्तरार्थं च॥ इहार्थं तावत्। इणः षीध्वंलुङ्लिटां धोऽङ्गादिति। अत्र मूर्द्धन्यग्रहणं न कर्तव्यं भवति। उत्तरार्थम्। रषाभ्यां नो णः समानपद इति॥ अत्र णकारग्रहणं न कर्तव्यं भवति। तत्रायमप्यर्थः। परान्तस्य नेति प्रतिषेधो न वक्तव्यो भवति॥ अपदान्ताभिसंबद्धं मूर्धन्यग्रहणमनुवर्तते इति॥ ॥इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये अष्टमस्याध्यायस्य तृतीयपादे प्रथममाह्निकम्॥ सहेः साडः सः॥ सग्रहणं किमर्थम्। न सहेः साडो मूर्द्धन्यो भवतीत्येवोच्येत॥ सहेः साडो मूर्द्धन्यो भवतीत्युच्यमाने अन्त्यस्य प्रसज्येत। ननु च अन्त्यस्य मूर्द्धन्यवचने प्रयोजनं नास्तीति कृत्वा सकारस्य भविष्यति॥

ग्रहणानुवर्तनाद् अपदान्तस्येति सूत्रं न कर्तव्यं भवतीति लाघवं संपद्यते॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे अष्टमस्याध्यायस्य तृतीये पादे प्रथमाह्निकम्॥ सहेः साडः सः॥ प्रयोजनं नास्तीति। ननु भिन्नरूपमूर्द्धन्यार्थं वचनं स्यात्। नेत्याह। स्थानेऽन्तरतम इत्यस्य बाधप्रसङ्गात् अपदान्तस्येत्यधिकाराद् अन्त्यस्य न भविष्यतीत्ययमप्यत्र परिहारोऽस्ति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शा·भा· कुतोनुखल्वेतदिति। ननुवचनसामर्थ्यादनुसंहारेबाधितेसर्वादेशोमूर्द्धन्यः प्राप्नोति। अयमपरोस्यदोषोस्तु। स्थानेन्तरतमइ- २२
५८ ति। षग्रहणमिहानुवर्त्ततइतिभावः। मूर्द्धन्यग्रहणानुवृत्तौतुऋकारआकारस्यप्राप्नोति। भवेदिति। यद्यन्तरतमइतिसप्तम्यार्थीय
ततदायंपरिहारः षग्रहणानुवृत्तौस्यात्सप्तमीपक्षस्तुदेशादर्शनात्त्यक्तः सप्तम्यांहीकोयणचीतियणोर्द्दुमात्राकारस्यमात्रिके
एवान्तरतमः स्थानीस्यान्नद्विमात्रः। चितमिति। मूर्द्धन्यानुवृत्तौतकारस्यटः प्रसज्येत। षकारानुवृत्तौतुषः॥ साडइति। दण्ड

कुतोनुखल्वेतत्॥ अनन्त्यार्थेआरम्भेसकारस्यभविष्यतिनपुनराकारस्यस्यात्॥ स्थानेन्तरतमोभवतीतिसका
रस्यभविष्यति॥ भवेत्सकृतितोन्तरतमनिर्वृत्तौसत्यांसिद्धंस्यात्। आदेशतस्तुअन्तरतमनिवृत्तौसत्यासाकारस्यप्र
सज्येत॥ तस्मात्सकारग्रहणंकर्तव्यम्॥ उत्तरार्थंचसकारग्रहणंक्रियते। आदेशप्रत्यययोस्सकारस्ययथास्यात्
॥इहमाभूत्। चितम्। स्तुतम्॥ अथसहिग्रहणंकिमर्थम्। नसाडः सोभवतीत्येवोच्येतसहेरेवसाड्रूपंभवतिनान्यस्य।
यद्येवंसाडः षत्वेसमानशब्दप्रतिषेधः। साडः षत्वेसमानशब्दानांप्रतिषेधोवक्तव्यः॥ साडोदण्डः साडोवृश्चिकइति
॥अर्थवत्ग्रहणात्सिद्धम्॥ अर्थवतः साडशब्दस्यग्रहणंनचैषोर्थवान्॥ अर्थवद्ग्रहणात् सिद्धमितिचेत् तद्धितलो
पेर्थवत्वात्प्रतिषेधः॥ अर्थवत्ग्रहणात्सिद्धमितिचेत्तद्धितलोपेर्थवत्वात्प्रतिषेधोवक्तव्यः। सहभडेनसाडः साड
स्यापत्यंसाडिः। अत्रप्राप्नोति। सतर्हिवक्तव्यः। नवक्तव्यः। षत्वतुकोरेकादेशस्यासिद्धत्वात् नैषसाड्शब्दः। एवम
पिसहडेनसडः सडस्यापत्यंसाडिः। अत्रप्राप्नोति। तस्मात्सहिग्रहणंकर्तव्यम्॥ इण्कोः॥ नुम्विसर्जनीयशर्व्यवाये
पि॥ नुम्विसर्जनीयशर्व्यवायेनिंसेः प्रतिषेधः। नुम्विसर्जनीयशर्व्यवायेनिंसेः प्रतिषेधोवक्तव्यः। निंस्सेनिंस्स्वेति।
ततर्हिवक्तव्यम्॥ नवक्तव्यम्॥

स्यवृश्चिकस्यवाअंडोवयवविशेषः॥ नुम्विसर्जनीयशर्व्यवायेपि॥ निंसेरिति॥ यथारूपलैर्नप्रवेष्टव्यमितिरूपलप्रवेशनिषेधप राम·
रत्वाद्वाक्यस्यप्रसेकंसहितानांचप्रवेशाभावस्वंनुमादीनांषत्वाप्रतिबंधहेतुत्वप्रतिपादनायोपादानात्प्रसेकंसमुदायेनच ५८
व्यवायेषत्वप्रसङ्गः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ नुमैवेति। एवमुच्यमानेऽनेकव्यवायेषत्वाप्रसङ्गः। ननु चायमिति। सर्वैश्च व्यवायासंभवाद् यथासंभवं क्वचित्प्रत्येकं क्वचिद् द्वाभ्यां व्यवाये षत्वप्रसङ्गः॥ एवं तर्हीति। योगविभागे सति द्वाभ्यां व्यवाये षत्वाभावः। इण्कोरिति पञ्चमीनिर्देशादानन्तर्ये षत्वप्रतिपादनाद्योगत्रयेण चैकैकव्यवाये षत्वाभ्यनुज्ञानात्। प्रत्येकमिति। लक्ष्यदर्शनवशाल्लक्षणव्यवस्थात तश्चैतद्वाक्योपायानिप्रक्रियावाक्यानि त्रीण्युपप्लवन्त इति योगविभागसाध्यफलसिद्धिः॥ आदेशप्रत्यय॥ रुसर इति। अर्शः सरन्नित्यतः सरन् प्रत्ययो रुधू

नुमैव व्यवाये विसर्जनीयेनैव व्यवाये शरैव व्यवाय इति। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते॥ प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति। तद्यथा गुणवृद्धिसंज्ञे प्रत्येकं भवतः। ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिः। तद्यथा गर्गाः शतं दण्ड्यन्तामर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति॥ एवं तर्हि योगविभागात् सिद्धम्। योगविभागः करिष्यते। नुम्व्यवाये। ततो विसर्जनीयव्यवाये। ततः शर्व्यवाये। सतर्हि योगविभागः कर्तव्यः। न कर्तव्यः। प्रत्येकं व्यवायशब्दः परिसमाप्यते॥ आदेशप्रत्यययोः॥ आदेशप्रत्यययोः षत्वे सरकः प्रतिषेधः। आदेशप्रत्यययोः षत्वे सरकः प्रतिषेधो वक्तव्यः। रुसरः। धूसरः। अत्यस्यमिदमुच्यते सरक इति। सरकादीनामिति वक्तव्यम्। इहापि यथा स्यात्। वर्सं तर्समिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। उणादयोऽव्युत्पन्नानि प्रातिपदिकानि। नवैएतत्स्मलेशक्यं विज्ञातुमुणादयो व्युत्पन्नानि प्रातिपदिकानीति। इह न स्यात्। सर्पिषो यजुष इति॥ एवं तर्हि बहुलवचनात्सिद्धम्। बहुलं प्रत्ययसंज्ञा भवति॥

मादिभ्यः किदित्यत्रानुवर्त्तते कित्वातिदेशाच्च कित्कार्यलाभाद्वा प्यवादिकियोः सरकृप्रतिः। सर्वमिति। वृतृवदिहनिसप्रत्ययः। उणादय इति। अबुधबोधनायव्युत्पाद्यमाना अप्युणादयोऽव्युत्पन्नानिमित्तं कार्यं न लभन्ते अतः रुकमिकंसेत्यत्र पृथक्संग्रहणात्। नवैएतदिति॥ षत्वव्युत्पत्तिहेतुकमुणादीनामवश्याभ्युपेयं सर्पिषा यजुषद्वा दिसिद्ध्यर्थमित्यर्थः॥ एवं तर्हीति। रुसरादिषु षत्वे कर्तव्ये प्रत्ययसंज्ञा न भवति॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति। अत्र यवयवषष्ठ्यामस्यां सद्ध्यस्यानुवृत्तस्य वचनविपरिणामो न कर्तव्यो भवति कार्येण त्वादेशप्रत्यययोरसंबन्धः सकारविशेषणत्वात्। सामानाधिकरण्ये त्वादेशप्रत्यययोः सकारयोरिति द्विवचनं विपरिणम्यं कार्येण त्वादेशप्रत्यययोर्द्वयोरन्वयाः अनुग्रहद्ृति साम्यात्पक्षद्वयसंभावना॥ विसं विसमिति। स्थाने द्विर्वचनमिति मत्वा दोषोपन्यासः। एषद्ृति। एतद् अम्। तकारस्य तदोः सः साव नन्त्ययोरिति सकारः आदेशो नादेशावयवद्ृति षत्वं न प्राप्नोति। एवं न कार्षीदित्यत्रादेशः प्रत्ययो वा सकारो न तु तदवयवः। सिषेचेति।

अथ किं पुनरियमवयवषष्ठी आदेशस्य यः सकारः प्रत्ययस्य यः सकार इति। आहोस्वित्समानाधिकरणा आदेशो यः सकारः प्रत्ययो यः सकार इति। कश्चात्र विशेषः॥ आदेशप्रत्यययोरित्यवयवषष्ठी चेद्द्विर्वचने प्रतिषेधः। आदेशप्रत्यययोरित्यवयवषष्ठी चेद्द्विर्वचने प्रतिषेधो वक्तव्यः। विसं विसम्। मुसलं मुसलम्। समानाधिकरणानां त्वाप्राप्तिः॥ समानाधिकरणानां षत्वस्य अप्राप्तिः। एवो कार्षीत्। अस्तु समानाधिकरणा। यदि समानाधिकरणा सिषेच सुष्वाप अत्र न प्राप्नोति। न धातुद्विर्वचने स्थाने द्विर्वचनं शक्यमास्थातुम्। इहापि तर्हि प्रसज्येत सरीसृप्यत इति। तस्मात्तत्र द्विःप्रयोगो द्विर्वचनम्। इह तर्हि करि॰ ष्यति हरिष्यति प्रत्ययो यः सकार इति षत्वं न प्राप्नोति। अस्तु तर्ह्यादेशो यः सकारः प्रत्ययस्य यः सकार इति। इह तर्हि अकार्षीत् प्रत्ययस्य यः सकार इति षत्वं न प्राप्नोति। मा भूदेवमादेशो यः सकार इत्येवं भविष्यति। इह तर्हि जोषिषत् मन्दिषदिति प्रत्ययस्य यः सकार इति षत्वं न प्राप्नोति॥

स्थाने द्विर्वचन आदेशावयवः सकारो न त्वादेश इति षत्वाप्रसङ्गो यथा विसमित्यादौ। सरीसृप्यत इति। ननु समानाधिकरणपक्षे षत्वस्याप्रसङ्गः। उच्यते। सिषेचादिसिद्धये यदि व्यधिकरणपक्ष आश्रीयते तदा स्थाने द्विर्वचने सरीसृप्यत इत्यत्रापि प्राप्नोति। द्विःप्रयोगे त्वत्र न दोषः॥ सिषेचेत्यादौ तु धात्वादेः षः स इति य आदेशस्तस्य सामानाधिकरण्याश्रयेण षत्वं सिध्यति॥ जोषिषदिति। लेट्व्यत्ययेन परस्मैपदं तिप् इतश्च लोप इत्यादिना कारलोपः लेटोडाटावित्यट् सिप् बहुलं लेटीति सिप्॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इटिड्कृतइति। सागमकस्यप्रत्ययत्वात्तदवयवः सकारः। वसःस्यसदिति। वचियजिभ्यां लेट्॥ नानाविभक्तीनामिति। आदेशस्येति ष
त्वापेक्षयास्यानषष्ठीप्रत्ययस्येतिसकारापेक्षयावयवषष्ठीतिसहविवक्षाऽभावात् द्वन्द्वानुपपत्तिः॥ व्यपदेशिवद्भावेनेति। ननु
सिप्‌सिचोरर्थवत्त्वादर्थस्यत्यागोपादानाभ्यां युक्तो व्यपदेशिवद्भावः इडागमभावाभावाभ्यामनेकरूपत्वाद्वा। एषइ्‌स्यत्रतु
सकारस्यानर्थक्यादयुक्तः। तथाचोक्तमर्थवता व्यपदेशिवद्भावइति। एवंतर्ह्यवयवसमुदायापेक्षो व्यपदेशिवद्भावः स्यःसः

एषोपीटिकृतेप्रत्ययस्यसकारः। इहतर्हि इन्द्रोमावक्षत्सदेवान्यक्षत्। नानाविभक्तीनांच समासानुपपत्तिः। नाना
विभक्तीनांचसमासोनोपपद्यते। आदेशप्रत्यययोरिति। योगविभागात्सिद्धम्॥ योगविभागः करिष्यते॥ आदेशस्यषो
भवतीति। ततः प्रत्ययस्य। सकारस्यषोभवतीति। सतर्हियोगविभागः कर्तव्यः। नकर्तव्यः। कथम्। अस्तुतावदवयव
षष्ठी। ननु चोक्तमादेशप्रत्यययोरित्यवयवषष्ठीचेद् द्विर्वचनेप्रतिषेधइति। नैषदोषः। द्विःप्रयोगो द्विर्वचनमूपद्यमुच्य
ते समानाधिकरणानां चाप्राप्तिरिति॥ व्यपदेशिवद्भावेन भविष्यति। अथवापुनरस्तुसमानाधिकरण। कथं करिष्यतिहरि
ष्यति॥ आचार्यप्रवृत्तिर्ज्ञापयति॥ भवत्येवंजातीयकानांषत्वमिति। यदयंसात्पदाद्योरितिसात्प्रतिषेधंशास्ति। अथवापुन
रस्त्वादेशोयः सकारः प्रत्ययस्ययः सकारइति। कथमिन्द्रोमावक्षत् सदेवान्यक्षत्। व्यपदेशिवद्भावेनभविष्यति॥ सतर्हि
व्यपदेशिवद्भावोवक्तव्यः। नवक्तव्यः। उक्तंवा। किमुक्तम्। तत्रव्यपदेशिवद्वचनमेकाचो द्वेप्रथमार्थषत्वेचादेशसंप्रत्य
यार्थम्। अवचनात् लोकविज्ञानात्सिद्धमिति। यदप्युच्यते नानाविभक्तीनां चसमासानुपपत्तिरिति। आचार्यप्रवृत्तिर्ज्ञापयति।
नानाविभक्त्योरेषसमासइति यदयं शासिवसिघसीनांचेति घसिग्रहणं करोति। कथंकृत्वाज्ञापकम्॥

एषोसावितिसकारसमुदायस्यादेशस्यैषइत्यत्रसकारोवयवो भवतीतिषत्वंप्रवर्तते॥ यदयमिति॥ प्रत्ययावयवस्यापिसकारस्य
षत्वंभवतिनकेवलंप्रत्ययस्यसकारस्येतिप्रतिषेधेनज्ञाप्यते। नानाविभक्त्योरिति। नन्वाचार्यस्यार्थेष्ववैभवात्कथंभिन्नप्रत्यय
योर्द्वन्द्वः। उच्यते। एकविभक्त्योरयं द्वन्द्वो नानाविभक्तितुल्यफलत्वात्तु नानाविभक्तिरुक्तः साद्ग्रहणाद्घसिग्रहणाच्चनोभयत्रसा
मानाधिकरण्यंवैयधिकरण्यंवा। तत्रप्रत्ययावयवइत्त्वात्प्रत्ययशब्दस्यसामानाधिकरण्येपिवैयधिकरण्यफललाभः॥

CC-0. In Public Domain. Digitization by eGangotri

 स्तौति॥ नियमार्थइति। विशिष्टेष्टनियमार्थइत्यर्थः। सुषुपिषइत्यमिति। स्वपेर्लिट्। छान्दसत्वाद्धत्वयेन थासृ थासः से। वस्यषत्वे
अयादेशेयलोपेचनियमाभावादभ्यासात्परस्य धातुसकारस्य षत्वंभवत्येव। अभिषिषिक्षतीति। स्थादिष्वभ्यासेनेति वर्तमान
उपसर्गात्सुनोतीति षत्वम् असिद्धमिति। प्रकरणेप्रकरणमसिद्धं नतुयोगेयोगइत्येतन्नाश्रितम्। सनियोऽभ्यासइति। यथातएक
हल्मध्यइत्यत्रलिटा आदेशोविशेष्यतेतथेह सनाभ्यासः सनियोऽभ्यासस्तस्मात् स्तौतिण्योरेवेति। तेनयङियोभ्यासस्तस्माद्धात्व

यदिहि आदेशस्ययः सकारइत्येवस्याद् घसिग्रहणमनर्थकंस्यात्। पश्यतित्वाचार्यः आदेशोयः सकारस्तस्य षत्वमि
ति। ततो घसिग्रहणंकरोति॥ स्तौतिण्योरेवषण्यभ्यासात्॥ स्तौतिणिग्रहणंकिमर्थम्। अस्तौतिण्यन्तानांमाभूत्। सि
सिक्षति। अथएवकारः किमर्थः। नियमार्थः। स्तौतिण्यन्तानामेवनान्येषामिति। नैतदस्तिप्रयोजनम्। सिद्धेविधिरारभ्य
माणोऽन्तरेणैवकारंनियमार्थोभविष्यति। इष्टतोवधारणार्थस्तर्हि। यथैवंविज्ञायेत स्तौतिण्योरेवषणीति। मैवंविज्ञा
यि। स्तौतिण्यन्तयोः षण्येवेति। इहनस्यात्। तुष्टाव। षणीति किमर्थम्। सेषिच्यते। कोविनतेऽनुरोधः। अविनतेनियमो
माभूत्। सुषुप्सतीति। कः सानुबन्धेऽनुरोधः। षशब्दमात्रेनियमोमाभूत्। सुषुपिषइत्यम्। सुषुपिषइहेति। अभ्यासा
दितिकिमर्थम्। अभ्यासाद्याप्राप्तिस्तस्यानियमोयथास्यात्। उपसर्गाद्याप्राप्तिस्तस्यानियमोमाभूत्। अभिषिषि
क्षति। नैतदस्ति। असिद्धमुपसर्गात् षत्वम्। तस्यासिद्धत्वान्नियमोनभविष्यति॥ इदंतर्हिप्रयोजनम्। सनियोऽभ्यास
स्तस्माद्याप्राप्तिस्तस्यानियमोयथास्यात्॥ यङियोभ्यासस्तस्माद्याप्राप्तिस्तत्रनियमोमाभूत्। सोषुप्यतेः सन्। सोषु
पिषते। अथवा अभ्यासाद्याप्राप्तिस्तस्यानियमोयथास्याद् धातोर्याप्राप्तिस्तस्यानियमोमाभूत्। अधीषिषति॥ ॥

तस्यापिषणिषत्वंभवति। सोषुपिषतइति॥ अत्रतुशक्यंवक्तुमन्तरङ्गं षत्वंबहिरङ्गोनियमस्ततोऽसिद्धंबहिरङ्गमन्तरङ्गइतिसि
द्धंषत्वम्। अथवासनः षत्वंबहिरङ्गत्वादसिद्धम्। यङ्निमित्तादभ्यासाद्धातुसकारस्य षत्वेकर्तव्येऽविनतेनियमाभावोयथासु
षुप्सतीति॥ अधीषिषतीति। इणोबोधनार्थत्वाद्गम्यादेशाभावः॥ अजादेर्द्वितीयस्येतिसशब्दस्यद्विर्वचनम्। सन्यतइती
त्वम्। धात्वाश्रयमभ्यासस्यषत्वमभ्यासाश्रयेप्रत्ययस्यषत्वेकृतेनियमाभावात्प्रवर्तते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु च षणि इति। षणीति परसप्तमी तत श्च षणि परतः स्तौति ण्योरेव षत्वमिति नियमः क्रियमाणः तुल्यजातीयस्य षणू परस्य सिसि
सतीत्यादौ षत्वं व्यावर्तयत्यधीषिषतीत्यादौ तु सन एव द्विर्वचन विधानात् षणू परत्वाभावात्तस्य नियमो न प्रवर्तिष्यत इति ना
र्थोऽभ्यासग्रहणेनेत्यर्थः॥ सन्यङन्तमिति। समुदाय एव सन्यङन्तो वयव द्वारेण द्विर्वचन भागित्यर्थः॥ सत्सप्तमीति। तुल्यजाती
यस्यापि नियमेन निवृत्तिः क्रियमाणा सन्नन्त समुदायावयवत्वेन धर्मेण तुल्यजीयस्याधीषिषतीत्यादावपि स्यादित्यभ्यासग्र

ननु च षणीत्युच्यते। षणीति नैषा परसप्तमी शक्या विज्ञातुम्। सन्यङन्तं हि द्विरुच्यते तस्मादेषा सत्सप्तमी षणि सतीति।
सत्सप्तमी चेत्सा प्नोति॥ स्थादिष्वभ्यासेन चाभ्यासस्य॥ किमर्थमिदमुच्यते। स्थादिष्वभ्यासवचनं नियमार्थम्। निय
मार्थोयमारम्भः। स्थादिष्वेवाभ्यासस्य यथा स्यात्। इह मा भूत्। अभिसुसूषति॥ अथ किमर्थमभ्यासेन चेत्युच्यते
। तद्व्यवाये चाषोपदेशार्थम्। तद्व्यवाये अभ्यासव्यवाये चाषोपदेशस्यापि यथा स्यात्॥ अभिषिषेणयिषति॥ अवर्णा
न्ताभ्यासार्थं षणि प्रतिषेधार्थं च। अवर्णान्ताभ्यासार्थं तावत्। अभितष्ठौ। षणि प्रतिषेधार्थम्। अभिषिषिक्षति॥
उपसर्गात्सुनोति सुवति स्यति स्तौति स्तोभ नति स्थासेनयसेधसिचसञ्जस्वञ्जाम्॥ उपसर्गात्षत्वे निसउपसंख्यानं म
निणन्तत्वात्॥ उपसर्गात्षत्वे निस उपसंख्यानं कर्तव्यम्। निष्षुणोति। निष्षिञ्चति। किं पुनः कारणं न सिध्यति। अनिण
न्तत्वात्। इणन्तादुपसर्गात्षत्वमुच्यते न च निसिणन्तः। न वा वर्णाश्रयत्वात्। षत्वस्य तद्विशेषक उपसर्गो धातुश्च॥

हणम्। यदि च सन्प्रदेशेषु परसप्तमी स्यात्तदा सन्यत इतीत्वमधीषिषतीत्यत्र न स्यात्समुदायस्य सन्रूपत्वात्पौर्वापर्याभावात्॥ स्थादिष्व
भ्यासेन चाभ्यासस्य॥ अभिसुसूषतीति। पूञ्प्रेरणे सन् सनिग्रहगुहोश्चेतीट्प्रतिषेधः॥ अत्र धातुसकारस्य स्तौतिण्योरिति नियमात्ष
त्वाभावः अभ्याससकारस्य त्वस्मान्नियमात्। अभिषिषेणयिषतीति। अव्युत्पन्नः सेनाशब्दः॥ अथवा सह इनेन सेना सहस्य सः संज्ञाया
मिति सादेशोपदात्वं तु कृत्वा पीति सिनोतेर्नक्प्रत्यये न सेनाशब्दो व्युत्पाद्यते तदास्येव षोपदेशत्वम्॥ उपसर्गात्। अनिणन्तत्वादिति। इण्प्रग्र
हणेन प्रकृते नोपसर्गो विशेष्यत इति तदन्तविधिनेणन्तादुपसर्गात् षत्वेन भाव्यम्। न वेति॥ उपसर्गेण इण् विशेष्यत इति तदन्तविध्यभा
वः। शर्व्यवायश्चाश्रित इति सिद्धं षत्वम्। वर्णाश्रयत्वादिति। वर्णो इवर्णसकारावाश्रयो यस्य तद्वर्णाश्रयम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्येवमिति॥ यद्युपसर्गेणेण् विशेष्यते ननु सुनोत्यादयस्तदातिप्रसङ्गः॥ सुनोत्यादिभिरिति॥ सुनोत्यादिभिः सकारेण विशेष्यते। अपि तूपसर्गः। सुनोत्याद्युपसर्गस्थाच्चेणः परः सकारः सामर्थ्यात् सुनोत्याद्यवयव एव भवति॥ उपसर्गस्थस्य तु सकारस्यापदान्तस्येत्यधिकारात् षत्वस्याप्रवर्तनम्। ननु चोपसर्गादिति पञ्चमीनिर्देशात् कथमिण् विशेष्यते। तात्स्थ्यात्ताच्छब्द्यं भविष्यतीत्यदोषः। सुनोत्यादीनां य उपसर्गस्तत्स्थादिणः परस्य सकारस्य षत्वे विज्ञायमाने न कश्चिद्दोषः। सुनोत्यादीनां षत्वइति। यथा विसेचक इत्यत्र गमेरुपसर्गो विशब्दो न सिचेरिति षत्वं न भवत्येवं ण्यन्तस्याभिषावयतीत्यादावभ्यादिरुपस

स्य नवा वक्तव्यम्। किं कारणम्। वर्णाश्रयत्वात् षत्वस्य। वर्णाश्रयं षत्वम्। तद्विशेषक उपसर्गो धातुश्च। नैवं विज्ञायते इणन्तादुपसर्गादिति। कथं तर्हि। इण उत्तरस्य सकारस्य चेदिणुपसर्गस्य स चेत् सकारः सुनोत्यादीनामिति। तत्र शार्व्यवायेइत्येव सिद्धम्। यद्येवं धातूपसर्गयोरभिसंबन्धोऽकृतो भवति। तत्र को दोषः। इहापि प्राप्नोति विगताः सेचका अस्मात् ग्रामात् विसेचको ग्रामः। धातूपसर्गयोश्चाभिसंबन्धः कृतः। कथम्। सुनोत्यादिभिरत्र उपसर्गं विशेषयिष्यामः। सुनोत्यादीनां य उपसर्गस्तस्य उपसर्गस्य य इणिति। सुनोत्यादीनां षत्वे ण्यन्तस्योपसंख्यानमधिकृत्वात्। सुनोत्यादीनां षत्वे ण्यन्तस्योपसंख्यानं कर्तव्यम्। अभिषावयति। किं पुनः कारणं न सिध्यति। अधिकत्वात्। व्यतिरिक्तः सुनोत्यादिरिति कृत्वा उपसर्गात्सुनोत्यादीनामिति षत्वं न प्राप्नोति॥ न वावयवस्यानन्यत्वात्। न वा वक्तव्यम्। किं कारणम्। अवयवस्यानन्यत्वात्। अवयवोत्र अनन्यः॥ नामधातोस्तु प्रतिषेधः। नामधातोस्तु प्रतिषेधो वक्तव्यः। सावकमिच्छति अभिसावकीयति। परिसावकमिच्छति परिसावकीयति॥ न वानुपसर्गत्वात्। न वा वक्तव्यम्। किं कारणम्। अनुपसर्गत्वात्। यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञे भवतः। न चात्र सुनोतिं प्रति क्रियायोगः॥

र्ग इति षत्वाप्रसङ्गः। हेतुमति चेत्यत्र प्रत्ययार्थविशेषणपक्षेर्थाधिक्यादधिकत्वमुच्यते॥ नवेति। ण्यन्तस्य योऽवयवो णिच्प्रकृतिस्तस्यानन्यत्वात्तदपेक्षत्वादुपसर्गत्वस्य सिद्धं षत्वम्। नामधातोरिति। तत्रापि स एव सुनोत्यादिरिति षत्वप्रसङ्गः॥ नवेति। अभिः क्यजर्थस्येच्छाया विशेषणत्वात्तदुपसर्गो न सुनोतेः सुनोस्तूपसर्गत्वे त्वभिषावकमिच्छति अभिषावकीयतीति भवत्येव षत्वम्॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नासावेवमिति। यदाण्यर्थस्याभिर्विशेषणत्वात्तदुपसर्गस्तदानास्तिषत्वं यदातूपसर्गविशिष्टायां क्रियायां प्रयोज्यो नियुज्य
ते तदा प्रतिबन्धकाभावात् षत्वं प्रवर्तत एवेत्यर्थः। सुनु अभीति। नायं लौकिकप्रयोगः केवलस्योपसर्गस्य प्रयोगाभावात् किंत
र्हि सुनोतिसंबन्धाभावप्रदर्शनाय कल्पितः प्रयोजकव्यापारेणाभेः संबन्धो न सुनोतिनेति ह्यनेन प्रतिपाद्यते॥ अनुवि॥ देवा इति
पण्डिताः पर्युदासं मन्यन्ते संभवत्येकवाक्यत्वे वाक्यभेदाश्रयणस्यायुक्तत्वात् प्रसज्यप्रतिषेधे हि वाक्यभेदो वक्ष्यंभावी॥ इण्

किं तर्हि। सावकीयतिं प्रति। इहापि तर्हि न प्राप्नोति। अभिषावयति। अत्रापि न सुनोतिं प्रति क्रियायोगः किं तर्हि सावय
तिं प्रति। सुनोतिं प्रत्यत्र क्रियायोगः। कथम्। नासावेवं प्रेष्यते सुनु अभीति। किं तर्हि। उपसर्गविशिष्टमसौ क्रियां
प्रेष्यते अभिषुणु इति॥ स्तन्भेः॥ अप्रतेरिति वर्तते उताहो निवृत्तम्। निवृत्तमित्याह॥ कथं ज्ञायते। योगविभा
गकरणसामर्थ्यात्। इतरथा हि सदिस्तन्भ्योरप्रतेरित्येव ब्रूयात्। अस्त्यन्यद्योगविभागकरणे प्रयोजनम्।
किम्। अवाच्चालम्बनाविदूर्ययोरिति वक्ष्यति तत्स्तन्भेरेव यथा स्यात्सदेर्मा भूत्। नैतदस्ति प्रयोजनम्॥
एकयोगेऽपि सति यस्यालम्बनाविदूर्ये स्तः तस्य भविष्यति। कस्य चालम्बनाविदूर्ये स्तन्भेरेव॥ अनुविपर्यभि
निभ्यः स्यन्दतेरप्राणिषु॥ अथ यः प्राणी अप्राणी च कथं तत्र भवितव्यम्॥ अनुष्यन्देते मत्स्योदके। आहो
स्विदनुस्यन्देते मत्स्योदके इति। यदि तावत्प्राणी विधिनाश्रीयते॥ अस्त्यत्राप्राणीति कृत्वा भवितव्यं षत्वेन।
अथ प्राणी प्रतिषेधेनाश्रीयते। अस्त्यत्र प्राणीति कृत्वा भवितव्यं प्रतिषेधेन। किं पुनरत्रार्थसतत्त्वं देवा एतज्ज्ञातु
मर्हन्ति॥ परेश्च॥ अथानिष्ठायामिति वर्तते। उताहो निवृत्तम्। निवृत्तमित्याह॥ कथं ज्ञायते। योगविभागकरण
सामर्थ्यात्। इतरथा हि विपरिभ्यां च स्कन्देरनिष्ठायामित्येव ब्रूयात्॥ इणः षीध्वंलुङ्लिटां धोऽङ्गात्॥ विभाषेटः॥ इ
ण्ग्रहणं किमर्थम्। इण्ग्रहणं ढत्वे कवर्गनिरासार्थम्॥ इण्ग्रहणं क्रियते कवर्गात्तु ढत्वं मा भूदिति। यक्षीध्वम्। प
क्षीध्वम्। किं पुनरिदमिण्ग्रहणं प्रत्ययविशेषणम्। इण उत्तरे ये षीध्वंलुङ्लिटां धकार इति। आहोस्विद्धकारवि
शेषणम्। इण उत्तरस्य धकारस्य स चेत् षीध्वंलुङ्लिटां धकार इति॥

वी॥ इण्ग्रहणमिति। इण्कोरित्यत इण्ग्रहणमनुवर्तत एवेति प्रश्नः। कवर्गनिरासार्थमिति। पूर्वयोगे षढयोरनुवर्तनात्केवलस्येण इ
हानुवृत्तिर्दुर्लभा॥ ॥किं पुनरिति॥ वार्तिकानुसारेणेड्ग्रहणमिति पाठो युक्तः। इण्ग्रहणमिति तु भाष्ये प्रायेण पाठः। किं षीध्वमादयो वि
शेषणेन प्राक् संबध्यन्ते पश्चात्प्रधानेन धकारेणाथ धकार एव विशेषणद्वयेन संबध्यत इति प्रश्नः॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययपरत्वे इति। इटः परेषां षीध्वंलुङ्लिटां धकारस्येति विज्ञायमाने इटो लिङ्ग्रहणात्सौर्वपर्यायोगाद्विकल्पाप्रसिद्धिः
लिङ्ग्रहणं चोपलक्षणं षीध्वमोऽपि द्रष्टापौर्वापर्यायोगात्॥ वचनादिति। लिङ्ग्रहणानुवृत्तिसामर्थ्यादित्यर्थः॥ अस्ति वचन इति
॥ समुदायानुवृत्तौ कश्चिदेकदेशे प्रवृत्तं कार्यं समुदाये प्रवृत्तं भवतीत्यर्थः॥ धकारपरत्वे इति॥ इटः परस्य धकारस्येति व्या-
ख्याने षीशब्देन व्यवधानात्सार्वत्रिकढत्वाप्रसङ्गः॥ वचनादिति। षीध्वमोऽनुवृत्तौ येन नाव्यवधानमाश्रियत इत्यर्थः॥ अस्ति
वचने प्रयोजनं किं लुलुविढ्वे लुलुविध्वे इत्यस्यानन्तरमिण्ग्रहणस्येति युक्तः पाठः। कश्चित्तु नेष दोषः इण उत्तरस्येत्यादि पठन्त्य

कस्मान्न विशेषः॥ तत्र प्रत्ययपरत्वे इटो लिटि ढत्वं परादित्वात्॥ तत्र प्रत्ययपरत्वे इटो लिटि ढत्वं न प्राप्नोति। लुलु
विढ्वे। लुलुविध्व इति। किं कारणम्। परादित्वात्। इट् परादिः। वचनाद्भविष्यति॥ अस्ति वचने प्रयोजनम्। अलविढ्
म्। अलविध्वम्। अस्तु तर्हि धकारविशेषणम्॥ धकारपरत्वे षीध्वमि अनन्तरत्वादिटो विभाषाभावः। धकारपरत्वे षी
ध्वमि अनन्तरत्वादिटो विभाषा न प्राप्नोति। लविषीध्वम्। लविषीढ्वम्। वचनाद्भविष्यति॥ अस्ति वचने प्रयोजनम्।
किम्। लुलुविध्वे लुलुविढ्वे इति। इण्ग्रहणस्य चाविशेषणत्वात्ष्यादिमात्रे ढत्वप्रसङ्गः॥ इण्ग्रहणस्य चाविशेष
णत्वात् ष्यादिमात्रे ढत्वं प्राप्नोति। पक्षीध्वमिति॥ नैष दोषः॥ अङ्गादिति वक्ष्यामि॥ अङ्गग्रहणाच्च दोषः। इह न प्रा
प्नोति। उपदिदीयिध्वे उपदिदीयिढ्वे इति। यो ह्यत्र अङ्गान्त्य इण् न तस्मादुत्तर इट्। यस्माच्चोत्तर इट् नासावङ्गान्त्य इ
णिति। यथेच्छसि तथास्तु॥ अस्तु तावत्प्रत्ययविशेषणम्। ननु चोक्तं तत्र प्रत्ययपरत्वे इटो लिटि ढत्वं परादित्वात्
॥ लुलुविध्वे। लुलुविढ्वे इति। वचनाद्भविष्यति। ननु चोक्तमस्ति वचने प्रयोजनं किम्। अलविढ्वम्। अलविध्वमिति॥

नैतद्युक्तम्। ग्रन्थसंगत्यभावात्। इण्ग्रहणेन यदा धकारो विशेष्यते न तु प्रत्ययस्तदा षीध्वमो धकार इणः परो न भवति
षीशब्देन व्यवधानादीकारेण षीशब्दावयवेन व्यभिचाराभावाद्धकारस्य विशेषणायोगः॥ अङ्गादिति वक्ष्यामीति। इण
न्तादङ्गादुत्तरस्य धकारस्य षीध्वमोऽवयवस्य ढत्वं भवतीत्यर्थः। तत्र येन नाव्यवधानमिति च्यो षीढ्वमित्यादौ ढत्वं भव
ति पक्षीध्वमित्यादौ त्वङ्गस्यानिणन्तत्वाड्ढत्वाभावः॥ उपदिदीयिढ्व इति। युटः परादित्वादिणन्तादङ्गात्परं इण् न भवति
युटा व्यवधानात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदेतस्मिन्निति। सर्वेषामवयवानामनुवर्त्तनसामर्थ्यात्कार्ययोग इति भावः॥ पूर्वस्मिन्निति॥ अङ्गग्रहणाननुवृत्तौ युट एवेण उ
त्तर इड्डिति ढत्वविकल्पः सिध्यति॥ अथवेति। इणः परो यो धकार इट् च तस्य षीध्वंलुङ्लिटां संबन्धिनो विभाषामूर्द्धन्य इत्यर्थः॥
तत्र येन नाव्यवधानमिति षीध्वमिषीशब्देन व्यवधानमाश्रीयते उपदिदीयिढ्व इत्यत्र यकारादिवेणः परो धकार इति सिद्धो ढत्व
विकल्पः॥ अग्नेः स्तुत्स्तोमसोमाः॥ अग्नेर्दीर्घादिति। देवताद्वन्द्वे षत्वं भवतीत्यर्थः॥ गौणमुख्ययोरिति। लौकिक एवायं न्यायः शा
स्त्रे आश्रीयते स्वं रूपं शब्दस्येति रूपग्रहणादर्थवद्रूपमाश्रीयते स चार्थो मुख्य एव गृह्यते न तु गौणः। तत्र प्रसिद्ध्यप्रसिद्धिभ्यां मु
ख्यगौणव्यवस्थेति माणवकसंज्ञात्वेन विनियुक्तावग्निसोमशब्दौ गौणार्थाविति षत्वाभावः॥ शब्दाश्रये चेति॥ प्रातिपदिकस्य रूढ्या

यदेतस्मिन्योगे लिड्ग्रहणं तदनवकाशं तस्यानवकाशत्वाद्वचनाद्भविष्यति॥ अथवा पुनरस्तु धकारविशेषणमिति। ननु
चोक्तं धकारविशेषणत्वे षीध्वम्यनन्तरत्वादिटो विभाषाभावः लविषीध्वं लविषीढ्वमिति। वचनाद्भविष्यति। ननु चो
क्तमस्ति वचने प्रयोजनं किं लुलुविढ्वे लुलुविध्वे इति। यदेतस्मिन्योगे षीध्वंग्रहणं तदनवकाशं तस्यानवकाशत्वाद्व
चनाद्भविष्यति॥ यदप्युच्यते इण्ग्रहणस्य चाविशेषणत्वात्प्यादिमान्ते ढत्वप्रसङ्ग इति॥ अङ्गादिति वक्ष्यामि॥ ननु
चोक्तमङ्गग्रहणाद्वदोष इति॥ पूर्वस्मिन्योगे यदङ्गग्रहणं तदुत्तरत्र निवृत्तम्॥ अथवा पूर्वस्मिन्योगे इण्ग्रहणं प्रत्ययविशे
षणमुत्तरत्र धकारविशेषणम्॥ अग्नेः स्तुत्स्तोमसोमाः॥ अग्नेर्दीर्घात्सोमस्य। अग्नेर्दीर्घात्सोमस्येति वक्तव्यम्॥ अग्नीषोमौ।
इतरथा ह्यनिष्टप्रसङ्गः॥ इतरथा ह्यनिष्टं प्रसज्येत। अग्निसोमौ माणवकाविति॥ तत्तर्हि वक्तव्यम्॥ न वक्तव्यम्। गौणमुख्ययोर्मु
ख्ये संप्रतिपत्तिः॥ तद्यथा गौरनुबन्ध्यः अजोऽग्नीषोमीय इति न वाहीकोऽनुबध्यते॥ कथं तर्हि वाहीके वृद्ध्यात्वे भवतः॥ गौस्तिष्ठ
ति गामानयेति॥ अर्थाश्रय एतदेवं भवति॥ यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति॥ शब्दाश्रये च वृद्ध्यात्वे॥

त्वे प्रातिपदिकं तु न लौकिकेनार्थेनार्थवत्किं त्वन्वयव्यतिरेकाभ्यां कल्पिताभ्यां कल्पितेन तस्यां चावस्थायां लौकिकार्थत्वा
भावाद्गौणमुख्याभावाद्रूपमात्राश्रयं कार्यं प्रवर्तते तस्मिन्प्रवृत्ते मुख्येऽर्थे गौणे वार्थे प्रयोगः॥ अथवा शब्दो न कदाचित्स्वार्थ
परित्यागेनार्थान्तरे प्रवर्तते स्वार्थे स्वर्थान्तरे समारोपितो यदा शब्दप्रवृत्तिनिमित्तं भवति तदा गौणव्यवहारस्तत्र प्रातिपदिकं स्वार्थे
एव वर्तमानं वृद्ध्यात्वे प्रतिपद्यते पश्चात्तु पदार्थान्तरारोपितस्वार्थस्य गौणत्वमिति पदाश्रयेष्वेव कार्येषु गौणमुख्यव्यवस्थाश्रयण
म्॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै ॥मातुः॥ सान्ताभ्यामिति। रेफान्तयोर्निर्देशान्न प्राप्नोति। एकदेशविकृतस्येति। स्वसृशब्दे परतो नास्ति रेफस्य श्रवणं वा शरी ८।३।३
६२ तिपक्षे विसर्जनीयस्य विसर्जनीयविधानात् पक्षे विसर्जनीयस्य सइति सकारविधानात्तस्माद्रेफनिर्देशस्तद्विकारप्रतिपत्त्य
र्थः॥ उपस॥ अस्तिग्रहणमिति॥ अस्तिसकार एवाकारलुप्तेः क्रियावाचित्वादुपसर्गप्रादुर्भ्यां परः संभवति नान्य इति प्रश्नः। न
ह्यस्तिरिति। परिस्पन्दनरूपस्यैवार्थस्य क्रियात्वादिति भावः॥ क्रियावचन इति। न परिस्पन्द एवैकः क्रियेति भावः। कर्मस्थ

मातुःपितुर्भ्यामन्यतरस्याम्॥ सान्ताभ्यां चेति वक्तव्यम्। इहापि यथा स्यात्। मातुः ष्वसा। मातुस्स्वसा। पितुः ष्व
सा। पितुस्स्वसा। मातुःपितुरिति सान्तग्रहणानर्थक्यमेकदेशविकृतस्यानन्यत्वात्। मातुःपितुरिति सान्तग्रहणं
मनर्थकम्। किं कारणम्। एकदेशविकृतस्यानन्यत्वात्। एकदेशविकृतमनन्यवद्भवतीति सान्तस्यापि भविष्यति॥ उ
पसर्गप्रादुर्भ्यामस्तिर्यच्परः॥ अस्तिग्रहणं किमर्थम्। इह मा भूत्। अनुसृतम्। विसृतमिति। नैतदस्ति प्रयोजनम्।
यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतः। न चैतं सकारं प्रति क्रियायोगः॥ इहापि तर्हि न प्राप्नोति। अभिषन्ति।
निषन्तीति। न ह्यस्तिः क्रियावचनः। कः पुनराह नास्तिः क्रियावचन इति॥ क्रियावचनोस्तिः। आतश्च क्रियावचनः।
व्यत्यनुषते। कर्तरि कर्मव्यतिहार इत्यनेनात्मनेपदं भवति। कर्मव्यतिहारश्चकः क्रियाव्यतिहारः। प्रादुःशब्दात्त
र्हि मा भूत्। प्रादुःशब्दश्चानियतविषयः कृभ्वस्तियोग एव वर्तते। उपसर्गात्तर्हि स्यतेर्मा भूदिति। इष्यत उपसर्गा
त्स्यतेः षत्वम्। आतश्चेष्यत एवं ह्याह। उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्ज
स्वञ्जामिति। प्रादुःशब्दात्तर्हि मा भूत्। प्रादुःशब्दश्चानियतविषयः कृभ्वस्तियोग एव वर्तते। इदं तर्हि प्रयोजनमि
ह मा भूत्। अनुसूतेरप्रत्ययः। अनुसूः। अनुसः अपत्यमानुसेयः॥

भावकानां कर्मस्थक्रियाणामित्यत्र तु भावक्रिययोर्भेदेनोपादानात्परिस्पन्दलक्षणविशिष्टक्रियावृत्तिः क्रियाशब्दो यत्क्रि राम॰
यायुक्ता इत्यादौ तु क्रियामात्रवृत्तिरित्यविरोधः। व्यत्यनुषत इति। व्यत्यनुभवत इत्यर्थः। प्रादुःशब्दश्चेति। केषांचिच्छब्दा
नामनियतविषयत्वदर्शनात्। अनुसूतेरिति। अनुसूत इत्यनुपूर्वात्सरतेर्द्विषेति क्विप्। चतुष्पाद्भ्यो ढञिति ढञ् ढे लोपोऽकद्र्वा ६२
इत्युकारलोपे कृते सकारमात्रं क्रियावाचीति सत्वप्रसङ्गः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुवि॥ विस्वप्नगिति। स्वपितृषोर्नजिङिति नजिङ् प्रत्ययः॥ ताच्छीलिके ष्वापि क्वचिदस्ति क्रियाणामुपसर्गयोगः। आगामुक॰
मित्यादौ। साधुकारिणि वा प्रत्ययविधानात्॥ विसुष्वापेति। लिट्यभ्यासस्योभयेषामिति संप्रसारणे कृते अकृत एव हलादिशे
षे धातूपसर्गाश्रयस्य कार्यस्यान्तरङ्गत्वात्षत्वप्रसङ्गः कृते वा हलादिःशेषे एकदेशविकृतस्यानन्यत्वात्। हलादिशेषादिति
॥ संप्रसारणात्प्रागेव परत्वाद्धलादिशेषः॥ इष्टं पूर्वमिति। विप्याधेत्यादिसिद्धये। स्थादिष्विति। स्थादीनामेवाभ्यासस्सकार॰
स्य षत्वं न धात्वन्तरस्येति नियमादत्र षत्वाभावः। स्थादीनामिति। स्थादीनां संबन्धी नियमो नात्र प्रवर्तते। यस्मात्स्थादिसूत्रे प्रा

सुविनिर्दुर्भ्यः सुपिसूतिसमाः॥ किमर्थं स्वपेः सुपिभूतस्य ग्रहणं क्रियते। सुपेः षत्वं स्वपेर्माभूत्। सुपेः षत्वमुच्यते। स्व
पेर्माभूदिति विस्वप्नो विस्वप्नगिति॥ विसुष्वापेति केन न। विसुष्वापेत्यत्र कस्मान्न भवति। हलादिशेषान्न सुपिः हला
दिशेषे कृते नैष सुपिर्भवति। इदमिह संप्रधार्यं हलादिशेषः क्रियतां संप्रसारणमिति। किमत्र कर्तव्यम्। परत्वाद्ध
लादिःशेषः। इष्टं पूर्वं प्रसारणम्। इष्यते हलादिशेषात्पूर्वं संप्रसारणम्। आतश्चेष्यते। एवं ह्याह॥ अभ्यास सं
प्रसारणं हलादिःशेषाद्विप्रतिषेधेनेति। एवं तर्हि स्थादिष्वभ्यासेन चाभ्यासस्येत्येतस्मान्नियमान्न भविष्यति॥॰
स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः॥ प्राक्सितसंशब्दनात्स नियमः॥ उत्तरश्चायं सुपिः पठ्यते। एवं तर्ह्यर्थव
द्ग्रहणे नानर्थकस्येत्येवमेतस्य न भविष्यति॥ अनर्थके विषुषुपुः। यद्यर्थवतो ग्रहणं विषुषुपुरिति न सिध्यति। नैष दोषः।
कथम्॥ सुपिभूतो द्विरुच्यते। सुपिभूतस्य द्विर्वचनम्। सुपेः षत्वं स्वपेर्माभूद्विसुष्वापेति केन न॥ हलादिशेषान्न सु
पिरिष्टं पूर्वं प्रसारणम्॥ स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः॥ अनर्थके विषुषुपुः सुपिभूतो द्विरुच्यते॥ ॥
षु

क्सितादिति वर्ततेतेन प्राक्सिताद्ये धातवः तेषां स्थादिष्वेवाभ्यासस्य षत्वमित्येवं नियमेन सुनोतिसुवतिस्यतय एव निवर्त्यन्ते सुपि
स्तु सितादुत्तर इति न निवर्त्यन्ते॥ अर्थवद्ग्रहणइति॥ स्थाने द्विर्वचने समुदाय एवार्थवान वयवयोश्चानर्थक्यं द्विष्प्रयोगे प्यर्थ॰
स्यानावर्तनाद् द्वाभ्यामर्थः प्रत्याय्यत इत्येकस्यानर्थक्यम्॥ सुपिभूत इति। परत्वात्संप्रसारणे कृते सुपेर्द्विर्वचनम्। नत्र स्थानिवत्वा॰
त्स्वपेरिति ग्रहणेन समुदायस्य ग्रहणात्सिद्धं षत्वम्। द्विष्प्रयोगेपि स एव सुपिर्द्विरुक्त इति समुदायाश्रयमेव षत्वम्। विसुष्वापेत्यत्र तु स्वपेर्द्वि
र्वचनं तत्र स्थानिवत्वात्स्वपेरिति षत्वाभावः। केचित्तु सुपिभूतो द्विरुच्यत इति पठन्ति। पूर्वत्रासिद्धीयमद्विर्वचन इति कृतषत्वस्य द्विर्व
चनमिति तेषां भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥कपिष्ठलो॥ कापिष्ठलइति॥ गोत्रमिहपारिभाषिकं पौत्रप्रभृतिगृह्यते तेन यत्र गोत्राभिधानं तत्र कपेः परस्य स्थलसकारस्य षत्वेन भाव्यं नतु परमप्रकृतौ नापि यूनीति वार्त्तिकारम्भः। यस्माद् गोत्रं प्रक्रियते प्रवर्त्तते गोत्रस्य वा या प्रकृतिः कारणं तदभिधाने षत्वं तेन सर्वमिष्टं सिद्ध्यति। नैवं विज्ञायतइति। न गोत्रं षत्वस्य विषयत्वेन निर्दिष्टं किं तर्हि दर्शनस्य गोत्रे यो दृष्टः कपिष्ठलशब्दः स साधुर्भवतीति। तेन कपिस्थानवाचिनः षत्वं न भवतीत्युक्तं भवति। अथवा प्रवराध्यायपठितं गोत्रं गृह्यतइति षत्वविषयत्वेनापि गोत्रस्याश्रयणे न दोषः॥अम्बा॥ किमिदमिति॥ यदि स्थशब्दः प्रथमया निर्दिश्यते स्थ शब्दः सकारस्य मूर्द्धन्यं प्रतिपद्यतइति

॥कपिष्ठलो गोत्रे॥ कपिष्ठलो गोत्रप्रकृतौ। कपिष्ठलो गोत्रप्रकृताविति वक्तव्यम्। गोत्र इत्युच्यमाने इहैव स्यात्। कापिष्ठलिः। इह न स्यात्। कपिष्ठलः॥ कापिष्ठलायनः। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नैवं विज्ञायते कपिष्ठलइति गोत्रे निपात्यतइति। कथं तर्हि गोत्रे यः कपिष्ठलशब्दस्तस्य षत्वं निपात्यते यत्र वा तत्र वेति॥ अम्बाम्ब गो भूमि सव्यापद्वित्रि कुशेकु शङ्क्वङ्गु मञ्जि पुञ्जि परमे बर्हिर्दिव्यग्निभ्यः स्थः॥ स्थ इति किमिदं धातुग्रहणम्॥ आहो स्विद्रूपग्रहणम्। किं चातः। यदि धातुग्रहणम्। गोस्थानमित्यत्र प्राप्नोति॥ अथ रूपग्रहणम्। सव्येष्ठाः परमेष्ठी। सव्येष्ठासारथिरित्यत्र न प्राप्नोति॥ यथेच्छसि तथास्तु। अस्तु तावद्धातुग्रहणम्। कथम्। गोस्थानमिति॥ सवनादिषु पाठः करिष्यते॥ अथ वा पुनरस्तु रूपग्रहणम्। कथं सव्येष्ठाः परमेष्ठी सव्येष्ठासारथिरिति॥ स्थः स्थास्थिन्स्थृणामिति वक्तव्यम्॥ सुषामादिषु च॥ अविहितलक्षणो मूर्द्धन्यः सुषामादिषु द्रष्टव्यः॥ ह्रस्वात्तादौ तद्धिते॥ ह्रस्वात्तादौ तिङः प्रतिषेधः। ह्रस्वात्तादौ तिङः प्रतिषेधो वक्तव्यः। भिन्द्युस्तराम्। छिन्द्युस्तरामिति॥ स्तुतस्तोमयोश्छन्दसि॥ स्तुतस्तोमयोश्छन्दस्यनर्थकवचनं पूर्वपदादिति सिद्धत्वात्॥

तदा रूपग्रहणम्। अथ स्थः षष्ठ्या निर्दिश्यते ततो धातुग्रहणमिति भावः। सवनादिष्विति। आदिशब्दस्य प्रकारार्थत्वाद् गोस्थान भूमिस्थानादयोऽनिष्पन्नाः सर्वे सवनादयः। स्थः स्थास्थिन्स्थृणामिति। स्था शब्दः क्विबन्तः ईत्त्वे वकारप्रतिषेध इति वचनात् प्रत्ययलक्षणेनेत्त्वं भवति। स्थिन्निती प्रत्ययान्तः। स्थृशब्दः कृप्रत्ययान्तः॥ स्तुतस्तो॥ पूर्वपदादिति सिद्धत्वादिति॥ पूर्वं पदं पूर्वपदमिति सामान्येन तत्राश्रीयते न तु समासावयव एवेति वाक्येऽपि षत्वं प्रवर्त्तते। तदत्र स्तुतस्तोमग्रहणं प्रत्याख्यायते छन्दोग्रहणं तूत्तरार्थं वक्तव्यमेव॥ राम
६४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनोतेरनः॥ सिस नीरिति॥ एतस्मिंश्च प्रयोजने सति सामर्थ्याभावात् ण्यन्तस्य नियमाभावात् सिषाणयिषतीति षत्वेन भा
व्यमित्याहुः॥ नरपर॥ माषदृति। मानं मा मां सनोतीति जनसनेति विट् विड्वनोरित्यात्वम्। विभक्तौ ङसिपरत आतो धातोरित्या

स्तुतस्तोमयोः छन्दसि वचनमनर्थकम्। किं कारणम्। पूर्वपदादिति सिद्धत्वात्॥ पूर्वपदादित्येव सिद्धम्॥ सनोतेर
नः॥ सनोतेरन इति च। किम्। वचनमनर्थकमित्येव। किं कारणम्। पूर्वपदादित्येव सिद्धत्वात्। नियमार्थं तर्हीदं व
क्तव्यम्। सनोतेरनकारस्यैव यथा स्यात्॥ इह माभूत्। गोसनिमिति॥ सनोतेरन इति नियमार्थमिति चेत्सवनादि
ष्कृतत्वात्सिद्धम्। सनोतेरन इति नियमार्थमिति चेत्सवनादिष्कृतत्वात्सिद्धम्। सवनादिषु पाठः करिष्यते॥ सन्नर्थं
तु॥ सन्नर्थं त्विदं वक्तव्यम्। सिसनिषति। एतदपि नास्ति प्रयोजनम्। स्तौतिण्योरेव षण्यभ्यासादिति एतस्मान्नि
यमान्न भविष्यति। ण्यर्थं तर्हीदं वक्तव्यम्। सिषानयिषतीति। कथं पुनरण्यन्तस्य प्रतिषेधे ण्यन्तः शक्यो विज्ञातुम्।
सामर्थ्यादण्यन्तस्य प्रतिषेधवचने प्रयोजनं नास्तीति कृत्वा ण्यन्ते विज्ञास्यते। अथवा अयमस्ति अण्यन्तः सिसनिषते
रप्रत्ययः सिसनीः। नरपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्॥ किमर्थं सवनादिषु अश्वसनिशब्दः पठ्यते। पूर्वपदादि
ति षत्वं प्राप्नोति तद्बाधनार्थम्। नैतदस्ति प्रयोजनम्। इणन्तादिति तत्रानुवर्तते। अनिणन्तश्चायं नैव प्राप्नोति नार्थः प्र
तिषेधेन। एवं तर्हि सिद्धे सति यत्सवनादिषु अश्वसनिशब्दं पठति तज्ज्ञापयत्याचार्यः। अनिणन्तादपि षत्वं भवतीति
। किमेतस्य ज्ञापने प्रयोजनम्। जलाषाहं माषदृत्येवं सिद्धं भवति। अथवा एकदेशविकृतार्थोऽयमारम्भः अश्वषाडिति॥ सि
चो यङि॥ अथ उपसर्गादिति या प्राप्तिः भवितव्यं तस्याः प्रतिषेधेन। उताहो न। न भवितव्यम्। किं कारणम्। उपसर्गात्
षत्वं प्रतिषेधविषये आरभ्यते॥ तद्यथैव पदादिलक्षणं प्रतिषेधं बाधते एवं सिचो यङीत्येतमपि बाधेत। न बाधते।
किं कारणम्। येन नाप्राप्ते तस्य बाधनं भवति॥ न चाप्राप्ते सात्पदादिलक्षणे प्रतिषेधे उपसर्गात्षत्वमारभ्यते। सिचो य
ङीत्येतस्मिन् पुनः प्राप्ते चाप्राप्ते च॥ अथवा पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त इत्येवमुपसर्गात्षत्वं पदादि
लक्षणं प्रतिषेधं बाधिष्यते। सिचो यङीत्येतन्न बाधिष्यते॥

लोपः॥ एकदेशविकृतार्थ इति॥ अश्वशब्दविषयमेव ज्ञापकमनिणन्तादप्यश्वशब्दात्षत्वं भवतीति मा पो जलाषाहमित्यत्र तु सु
षामादित्वात् षत्वसिद्धिः॥ सिचो यङि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ के॰ तस्मादभिसेसिच्यत इति। ननु पूर्वत्रासिद्धमिति प्रतिषेधस्यासिद्धत्वादुपसर्गादिति षत्वं प्राप्नोति॥ उच्यते॥ प्रकरणे प्रकरणमसि ५४१
१५ द्धं न तु योगे योगो विधिप्रतिषेधयोश्चैकं प्रकरणमिति सिद्धमिष्टम्॥ इत्युपाध्यायजैय्यटपुत्रकैय्यटकृते भाष्यप्रदीपे अष्टमस्या॰
ध्यायस्य तृतीयपादे द्वितीयमाह्निकम्॥ पादश्च तृतीयः समाप्तः॥ ॥रषाभ्यां नो णः समानपदे॥ रषाभ्यामुच्यमानं णत्वं वर्णा॰
न्तरान्न प्राप्नोतीति मत्वाह। रषाभ्यामिति। योऽसावरकार इति। येषां दर्शनमर्द्धमात्राकालो रेफ ऋकारेऽस्तीति तन्मतेन केवलस्या

तस्माद् अभिसेसिच्यते इति भवितव्यम्॥ सोढः॥ किमर्थं सहिः सोढभूतो गृह्यते यत्रास्यैतद्रूपं तत्र यथा स्यात्। इह माभू
त्। परिषहत इति॥ स्तम्भुसिवुसहां चङि॥ स्तम्भुसिवुसहां चङ्युपसर्गात्। स्तम्भुसिवुसहां चङ्युपसर्गादिति वक्तव्य
म्। किं प्रयोजनम्। उपसर्गाद्या प्राप्तिस्तस्याः प्रतिषेधो यथा स्यात्॥ अभ्यासाद्या प्राप्तिस्तस्याः प्रतिषेधो मा भूदिति
। पर्यसीषहत॥ सुनोतेः स्यसनोः॥ सनि किमुदाहरणम्। सुसूषति। नैतदस्ति प्रयोजनम्। स्तौतिण्योरेव षण्यभ्यासा
दित्येतस्मान्नियमान्न भविष्यति। इदं तर्हि। अभिसुसूषते। एतदपि नास्ति प्रयोजनम्। स्थादिष्वभ्यासेन चेत्येतस्मा॰
न्नियमान्न भविष्यति। इदं तर्हि प्रयोजनम्। अभिसुसूषतेरप्रत्ययः। अभिसुसूः। निसुसूः॥ सदेः परस्य लिटि॥ सदो लि
टि प्रतिषेधे स्वञ्जेरुपसंख्यानम्। सदो लिटि प्रतिषेधे स्वञ्जेरुपसंख्यानं कर्तव्यम्। परिषस्वजे॥ इति श्रीमद्भगवत्पत
ञ्जलिविरचिते व्याकरणमहाभाष्ये अष्टमाध्यायस्य तृतीयपादे द्वितीयमाह्निकम्॥ पादश्च तृतीयः समाप्तः॥ ॥रषा
भ्यां नो णः समानपदे॥ रषाभ्यां णत्वे ऋकारग्रहणम्॥ रषाभ्यां णत्वे ऋकारग्रहणं कर्तव्यम्॥ रषाभ्यां नो णः स॰
मानपदे ऋकाराच्चेति वक्तव्यम्। इहापि यथा स्यात्। मातॄणाम्। पितॄणामिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्।
योऽसावृकारे रेफस्तदाश्रयं णत्वं भविष्यति। न सिध्यति। किं कारणम्॥

प्रयोगादाच्छीर्णादिषु वर्णान्तरोपाश्रयाद्रेफाण्णत्वं भवत्येवं मातॄणामित्यादावपि भविष्यति। एषामपि दर्शने मात्राचतुर्भागो रे राम॰
फ ऋकार इति तन्मते ऽपि रषाभ्यामिति रेफो गृह्यमाणोऽणुत्वाद्भिन्नकालस्यापि ऋकारस्थस्य ग्राहक इति णत्वं सिध्यति।
यत्तूच्यते रेफोष्मणां सवर्णा न सन्तीति तद्भिन्नास्यप्रयत्नवर्णान्तरापेक्षया। अथवा रषाभ्यामिति रेफ इति निर्दिश्यत इति ६५
ऋकारस्थादपि रेफाण्णत्वं सिध्यतीति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नहि वर्णैकदेशा इति। नाव्यपवृक्तस्यावयवे तद्विधिर्यथा इष्येष्विष्युक्तं संध्यक्षरवार्त्तिके यथा च मांसं न विक्रेतव्यमितिस्यापिनि
षेधे गावो विक्रीयन्ते तत्र मांसबुद्धेरभावात्। यदप्युक्तं॥ अणत्वाद्रेफऋकारस्थं रेफं सावर्ण्याद्गृह्णातीति। तदयुक्तं। नहि ऋ
कारस्थरेफस्य स्थानप्रयत्नवत्त्वं तस्माद्सति सावर्ण्ये कुतो ग्राह्यत्वम्। यथा च नरसिंहावयवानां नरत्वसिंहत्वजातियोगा
भावात्पुरुषमृगराजाभ्यामेकाकृतियोगाभावः॥ एवं वर्णग्रहणे वर्णैकदेशयोरपीति भावः। तुडादिषु चोक्तमिति। अग्रहणप
क्षे तुडादिषु ऋकारग्रहणं कर्त्तव्यं भवेदिति ग्रहणपक्ष आश्रीयते। इह समुदायस्य कार्ये व्यापारे अवयवस्य स्वनिमित्ते कार्ये माभू
द्व्यापारः यथा अग्रइन्द्र इत्यादावेकारो ऽयादेशं प्रतिपद्यते न तु तदवयव इकारः सवर्णदीर्घत्वमिह तु मातॄणामिति समुदाय

नहि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते॥ एकदेशे तुडादिषु चोक्तम्। अग्रहणं चेन्नुड्विधिलादेशविनामेष्वृकारग्रहण
मिति। नस्मा गृह्यन्ते। एवमपि न सिध्यति। किं कारणम्। अनन्तरत्वात्। यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वान्न प्राप्नोति॥
अडुव्यवायेऽइत्येवं भविष्यति॥ न सिध्यति॥ किं कारणम्। वर्णैकदेशाः केवर्णग्रहणेन गृह्यन्ते ये व्यपवृक्ता अपि वर्णा भव
न्ति। यच्चात्र रेफात्परं भक्तेर्न तत्क्वचिदपि व्यपवृक्तं दृश्यते। एवं तर्हि योगविभागः करिष्यते॥ रषाभ्यां नो णः समानपदे।
ततो व्यवाये। व्यवाये च रषाभ्यां नो णो भवतीति। तत अट्कुप्वाङ्नुम्भिरिति। इदमिदानीं किमर्थम्। नियमार्थम्। ए
तैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैरिति॥ अथवा आचार्यप्रवृत्तिर्ज्ञापयति भवति ऋकारात्णत्वमिति॥ ॥

स्य न क्वचिद्विधौ निषेधे वा व्यापार इत्यवयवः स्वाश्रयकार्यं प्रति कस्मान्निमित्तत्वं न प्रतिपद्यते भेदेन चोपलम्भान्नाव्यपवृक्तस्ये
ति न्यायो नास्ति। यत्तद्रेफादिति। रेफ एव भक्तिस्तस्याः परम् इत्यर्थः। ऋकारभागं व्यवधायकमिच्छन्ति। न तत्क्वचिदि
ति॥ मात्राचतुर्थस्य पृथगभावात्। एतैरेवेति। येऽक्षरसमाम्नाये पठ्यन्ते ऽकारादयः ये च तैर्गृह्यन्ते आकारादयः सर्वे ते आ
क्षरसमाम्नायिकाः॥ अत्र च व हूचोः न्तोदात्तात्तु न्नितर्भावार्थं प्रयोजनमित्यनेन वा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यमिति। इदं ज्ञापकमृकारादपि नोणो भवतीतिनुमापयति॥ अथवा वर्णैकदेशोपीह रेफो गृह्यते॥ रेफाकृतिर्वा निर्दिश्यते भक्तिव्यवधानेपि वा णत्वं भवतीत्यनुमीयते॥ अट्कुप्वा॥ अड्व्यवाय इति। एतत्सूत्रारम्भाद्रषाभ्यामित्यत्राडादिव्यवायविषये तस्मादित्युत्तरस्येति परिभाषा निर्दिशङ्काविकलोपतिष्ठत इति पञ्चाडादिव्यवायोन्यव्यवायश्च तत्र णत्वप्रसङ्गः॥ ॥नवेति॥ रषाभ्यामित्यत्र तस्मादिति परिभाषोपस्थानाद्व्यवायेण ताप्रसङ्गादेतत्सूत्रमारभ्यमाणमडादिव्यवायेण त्वम

यद्ययंक्षुभ्नादिषु नृनमनशब्दं पठति। नैतदस्ति ज्ञापकम्। वृद्ध्यर्थमेतत्स्यान्नृनार्नमनिरिति॥ यत्तर्हि तृप्नोति शब्दं पठति। यच्चापि नृनमनशब्दं पठति। ननु चोक्तं वृद्ध्यर्थमेतत्स्यादिति। बहिरङ्गा वृद्धिः अन्तरङ्गं णत्वमसिद्धं बहिरङ्गमन्तरङ्गे। अथवा उपरिष्टाद्योगविभागः करिष्यते। इदमस्ति छन्दस्यृदवग्रहादिति। ऋतः। ऋत उत्तरस्य नोणो भवति। ततः छन्दस्यवग्रहात्। ऋत इत्येव॥ अट्कुप्वाङ्नुम्व्यवायेपि॥ अड्व्यवायेन त्वेऽन्यव्यवाये प्रतिषेधः। अड्व्यवायेण त्वेऽन्यव्यवाये प्रतिषेधो वक्तव्यः॥ आदर्शेन। अक्षदर्शनेन। न वान्येन व्यवेतत्वात्। न वा वक्तव्यम्। किं कारणम्। अन्येन व्यवेतत्वात्। अन्येनात्र व्यवायः॥ यद्यप्यन्येनात्र व्यवायः। अटापि तु अस्ति व्यवायः। तत्र अड्व्यवाय इति प्राप्नोति॥ अटैव व्यवाये भवति। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते॥ अड्ग्रहणसामर्थ्यात्॥ यदि हि अटा चान्येन च व्यवाये स्यादड्ग्रहणमनर्थकं स्यात्। व्यवाये नोणो भवतीत्येव ब्रूयात्॥ अस्त्यन्यदड्ग्रहणस्य प्रयोजनम्। किम्। यो अनिर्दिष्टैर्व्यवायः तत्र मा भूत्। कृत्स्नं मृत्स्नेति॥ यद्येतावत्प्रयोजनं स्यात्॥ शर्व्यवाये नेत्येव ब्रूयात्॥ तत्समुदायेण त्वाप्रसिद्धिर्यथान्यत्र॥ तत्समुदाये व्यवायसमुदायेण त्वस्याप्रसिद्धिः॥ अर्केण। अर्घेण। यथान्यत्रापि व्यवायसमुदाये कार्यं न भवति॥

नुजानाति नान्यव्यवाये तस्यानिर्दिष्टग्रहणेन निवर्तितत्वादिति भावः॥ अड्ग्रहणसामर्थ्यादिति। सामर्थ्येनाप्यनन्तरोक्तमर्थं प्रतिपादयति। अड्व्यवायमन्तरेणान्येन केवलेन व्यवायासंभवाद्व्यवायवृत्त्येवाड्व्यवायस्यासिद्धत्वादड्ग्रहणमटैव व्यवाय इत्यवधारणार्थं विज्ञायत इत्यर्थः॥ अनिर्दिष्टैरिति॥ अडादिव्यतिरिक्तैः व्यवाये नेति। अस्मादेव च निषेधादन्यव्यवायेण त्वमनुपास्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यद्येवमेकेनेति। द्वाभ्यामपि व्यवाये न प्राप्नोत्यर्केणेति॥ उभयथेति। व्यवायोपलक्षणा याडादीनां मुपादानादेकेन द्वाभ्यां बहुभि
श्च यथासंभवं व्यवायेण त्वं भवति॥ एत्र प्रद्विति। प्रातिपदिकान्तेति णत्वप्रसङ्गः। सुग्ण इति। स्नुचो हन्त्यन्तेस्मिन्निति घञर्थे
कविधानमिति कः। प्रेन्वनमिति। इजादेः सनुम इति णत्वप्रसङ्गः। नकारेऽनुस्वार इति। द्विनकारको निर्देश इति भावः॥ नुमो योऽ

कान्यत्र। नुम्विसर्जनीयशर्व्यवायेऽपि। निंस्से। निंस्स्वेति। किं पुनः कारणमन्यत्रापि व्यवाये समुदाये कार्यं न भव
ति॥ प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति। तद्यथा वृद्धिगुणसंज्ञे प्रत्येकं भवतः। ननु चायमप्यस्ति दृष्टान्तः समुदाये
वाक्यपरिसमाप्तिरिति॥ तद्यथा गर्गाः शतं दण्ड्यन्तामिति अर्थिनश्च राजानो हिरण्येन भवन्ति। न च प्रत्येकं दण्ड
यन्ति॥ यद्येवमेकेन व्यवाये न प्राप्नोति। किरिणा। गिरिणेति॥ उभयथापि वाक्यपरिसमाप्तिर्दृश्यते॥ तद्यथा। गर्गैः
सह भोक्तव्यमिति प्रत्येकं च न भुज्यते समुदिते च। कुव्यवायेहादेशेषु प्रतिषेधः। कुव्यवायेहादेशेषु प्रतिषेधो व
क्तव्यः। किं प्रयोजनम्। प्रयोजनं वृत्रघ्नः। स्नुघ्नः। प्राघानीति॥ हन्तेरत्पूर्वस्येति अत्पूर्वग्रहणे न कर्तव्यं भवति।
नुम्व्यवायेण त्वेऽनुस्वाराभावे प्रतिषेधः। नुम्व्यवायेण त्वेऽनुस्वाराभावे प्रतिषेधो वक्तव्यः। प्रेन्वनम्। प्रेन्व
नीयम्। अनागमे च णत्वम्। अनागमे च णत्वं वक्तव्यम्। तृम्फणम्। तृम्फणीयम्॥ अनुस्वारव्यवाये स्वचनात्सिद्ध
म्॥ अनुस्वारव्यवायेनो णो भवतीति वक्तव्यम्। तदनुस्वारग्रहणं कर्तव्यम्॥ न कर्तव्यम्॥ क्रियते न्यास एव। नका
रेऽनुस्वारः परसवर्णीभूतो निर्दिश्यते॥ इहापि तर्हि प्राप्नोति। प्रेन्वनम्॥ प्रेन्वनीयम्॥ अनुस्वारविशेषणं नुम्ग्रहण
म्। नुमो योऽनुस्वार इति। इहापि तर्हि न प्राप्नोति। तृम्फणं तृम्फणीयम्। एवं तर्हि अयोगवाहानामविशेषेणोपदेशश्चोदितः
तत्रानुस्वारे कृते अड्व्यवाय इत्येव सिद्धम्। यद्येवं नार्थो नुम्ग्रहणेन। अनुस्वारे कृतेऽड्व्यवाय इत्येव सिद्धम्॥ पूर्वप
दात्संज्ञायामगः॥ पूर्वपदात्संज्ञायामुत्तरपदग्रहणम्॥ पूर्वपदात्संज्ञायामुत्तरपदग्रहणं कर्त्तव्यम्। किं प्रयोजनम्। त
द्धितपूर्वपदस्य प्रतिषेधार्थम्॥ तद्धितस्य स्वपूर्वपदस्थस्य च प्रतिषेधो मा भूत्॥

ऽनुस्वार इति। सौत्रत्वान्निर्देशस्य षष्ठ्यन्तस्य परनिपातः॥ पूर्व। तद्धितेति। पूर्वपदे यौ रषौ ताभ्यां परस्य नकारस्य संज्ञायामेव ण
त्वमिति नियमात् संज्ञायां तद्धितपूर्वपरस्यस्यापि प्राप्नोतीत्युत्तरपदग्रहणं कर्तव्यम्॥

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ खारपायणइति॥ खरपस्यापत्यं गोत्रं नडादित्वात् फक्। संबन्धिशब्दाविति॥ पूर्वपदावयवो रेफः षकारश्च पूर्वपदशब्देनोच्य ८४१
६७ ते समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते। पूर्वपदत्वं चोत्तरपदापेक्षमिति तद्धितपूर्वपदस्य स्य णत्वं भवत्येव॥ समानप
दमेवेति। समासे च पूर्वपदोत्तरपदविभागापेक्षया भिन्नपदत्वमप्यस्तीति णत्वाप्रसङ्गः। एवं च विध्यर्थमेतत्सूत्रं न नियमा
र्थम्। अथ खारपायणइत्यत्र कथं णत्वं यावता खरशब्दस्यापि पदत्वमस्तीति न तस्थत्वाद्रेफस्य समानपदत्वमेव नास्ति॥ अ

खारपायणः करणप्रियः न नहि वक्तव्यम्। न वक्तव्यम्। पूर्वपदमुत्तरपदमिति संबन्धिशब्दावेतौ। सति पूर्वपदे उत्तरपदं भवति
॥ सति चोत्तरपदे पूर्वपदं भवति। तत्र संबन्धादेतद् वगन्तव्यम्। यस्य तत्पूर्वपदमित्येतद् भवति तत्स्थस्य स्य नियम
इति॥ किं च यत्स्यैतद् भवति॥ उत्तरपदं प्रति। संज्ञायां नियमवचने ऽगप्रतिषेधान्नियमप्रतिषेधः। संज्ञायां नियम
वचने ऽगप्रतिषेधान्नियमस्यायं प्रतिषेधो विज्ञायते। अगइति। तत्र को दोषः॥ तत्र नित्यं णत्वं प्रसङ्गः। तत्र पूर्वपासं
ज्ञायां चासंज्ञायां च नित्यं णत्वं प्राप्नोति। योगविभागात्सिद्धम्। योगविभागः करिष्यते। पूर्वपदात्संज्ञायाम्॥ त
तऽगः। मान्तात्पूर्वपदाद्या चयावती च णत्वप्राप्तिः तस्याः सर्वस्याः प्रतिषेधः। अप्रतिषेधो वा यथा सर्वनाम संज्ञाया
म्। न वार्थः प्रतिषेधेन। णत्वं कस्मान्न भवति। यथा सर्वनामसंज्ञायाम्॥ उक्तं च सर्वनामसंज्ञायां निपातनाण्णत्वा
भावः। यथा पुनस्तत्र निपातनं क्रियते सर्वादीनि सर्वनामानीति॥ इहेदानीं किं निपातनम्। इहापि निपातनमस्ति।
किम्। अणृगयनादिभ्य इति। नैव वा प्रुनरत्र णत्वं प्राप्नोति। किं कारणम्। समानपद इत्युच्यते॥ न चैतत्समानपदम्
समासे कृते समानपदम्। समानपदमेव यन्नित्यं न चैतन्नित्यं समानपदमेव। किं वक्तव्यमेतत्। न हि। कथमनुच्यमा
नं गंस्यते। समानग्रहणसामर्थ्यात्॥ यदि हि यत्समानं चासमानं च तत्र स्यात् समानग्रहणमनर्थकं स्यात्॥
विभाषौषधिवनस्पतिभ्यः॥ द्व्यक्षरत्र्यक्षरेभ्यइति वक्तव्यम्॥ इह मा भूत्॥ देवदारुवनम्। इरिकादिभ्यः प्रतिषेधो
वक्तव्यः। इरिकावनम्। तिमिरवनम्॥ राम

याहुः। यत्र द्वावपि निमित्तनिमित्तौ समानपदस्थत्वं व्यभिचरतस्तत्र णत्वाभावः॥ इह तु रेफस्य व्यभिचारे ऽपि नकारस्य समानपद
स्थत्वाव्यभिचाराण्णत्वं प्रवर्तते। समानग्रहणमिति। पदइत्येवा पदस्थयोर्निमित्तनिमित्तिनोरसंभवात् सामर्थ्यादेकत्वसङ्ख्या ६७
या विवक्षया समानत्वे लब्धे समानश्रुतिरङ्गीकृतावधारणा विज्ञायत इत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अह्नोदन्तात्॥ पूर्वसूत्रनिर्देशश्चेति। पूर्वाचार्यैः कार्यभाजः षष्ठ्या न निरदिक्षन्नित्यर्थः॥ अथवेति॥ अवश्यकर्तव्यश्च सुपादि
षुपाठः प्रातिपदिकान्तेति विकल्पेन णत्वं माभूत्॥ वाह॥ आहितोपस्थितयोरिति॥ आहितशब्देन भूतकालक्रियानिर्देशाद्यदा
वाह्यं नारोपितं केवलं सन्निहितं तदा न प्राप्नोतीति वचनम्। स्वस्वामिभावनिवृत्तिपरत्वाद् भूतकालस्येहाविवक्षेत्यन्ये आहुः।
वाहनं वाह्यादिति। वहनीयवाचिन इत्यर्थः। अपविद्धमिति। वहनशक्तिविकलं प्रनष्टमित्यर्थः। यदा गर्गा वाह्यास्तेन विवक्ष्यन्ते

अह्नोऽदन्तात्॥ अदन्तादह्नस्येति वक्तव्यम्। इह मा भूत्। दीर्घाह्नी शरदिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नैषा अहन्
शब्दात् षष्ठी। का तर्हि। अह्नशब्दात् प्रथमा। पूर्वसूत्रनिर्देशश्च॥ अथवा सुवादिषु पाठः करिष्यते॥ वाहनमाहितात्॥ आहि
तोपस्थितयोरिति वक्तव्यम्॥ इहापि यथा स्यात्। इक्षुवाहणम्। शरवाहणम्॥ अपर आह। वाहनं वाह्यादिति वक्त
व्यम्। यदा हि गर्गाणां वाहनमपविद्धं तिष्ठति तदा मा भूदिति गर्गवाहनमिति॥ वा भावकरणयोः॥ वाप्रकरणे गि
रिनद्यादीनामुपसंख्यानम्। वाप्रकरणे गिरिनद्यादीनामुपसंख्यानं कर्तव्यम्। गिरिणदी। गिरिनदी। चक्रणितम्बा।
चक्रनितम्बा॥ प्रातिपदिकान्तनुम्विभक्तिषु च॥ प्रातिपदिकान्तस्य णत्वे समासान्तग्रहणमसमासान्तप्रतिषेधार्थ
म्॥ प्रातिपदिकान्तस्य णत्वे समासान्तग्रहणं कर्तव्यम्। किं प्रयोजनम्। असमासान्तप्रतिषेधार्थम्। असमासा
न्तस्य मा भूत्। गर्गभगिनी॥ दक्षभगिनीति॥ न वा भवति। गर्गभगिणीति॥ भवति। यदास तद्वाक्यं गर्गाणां भगो गर्ग
भगः गर्गभगोऽस्या अस्तीति॥ यदा त्वेतद्वाक्यं भवति। गर्गाणां भगिनी गर्गभगिनीति। तदा न भवितव्यम्। तदा मा
भूत्। यदि समासान्तग्रहणं क्रियते। माषवापिणीति। अत्र न प्राप्नोति।

ननु स्वामित्वेन तदा णत्वं भवत्येव॥ प्राति प॥ समासान्तग्रहणमिति। समासस्य प्रातिपदिकस्य योऽन्त्यो नकारस्तस्य णत्वमित्यर्थः॥
गर्गभगिनीति॥ भगिन्नित्येतस्य प्रातिपदिकस्यान्त्यो नकार इति णत्वप्रसङ्गः। अन्तशब्दश्चावसानवर्त्येकदेशवाची। यथा वस्त्रा
न्त इति॥ गर्गभगोऽस्या अस्तीति। खारपायणवत्समानपदस्थत्वाद्रेफनकारयोः पूर्वेणैवात्र णत्वं न त्वनेन। माषवापिणीति। ईकारां
त्वेन समास इति पूर्वपक्षः। नकारान्तेन समासः पश्चादीकार इति सिद्धान्तः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ ९८

प्रपक्वानीति। अत्रकुम्मतिचेति नित्यं णत्वं प्राप्नोति॥ कुम्मतिच॥ अथेति। विचारो निष्प्रयोजन इत्याहुः। विग्रहद्वयेप्यर्थभेदाद्रूपद्वयसिद्धौ च विकल्पस्यैव समर्थनान्नित्यणत्वोपन्यासस्याजागलस्तनतुल्यत्वात्। नचात्रणत्वेनभाव्यम्। पदव्यवाय इति प्रतिषेधात्। केचिदाहुः। यदा माषाणांकुम्भो माषकुम्भस्तस्यवापइति प्रक्रिया तदोत्तरपदत्वेचापदादिविधाविति प्रत्ययलक्षणनिषे ८४१

लिङ्गविशिष्टग्रहणेचोक्तम्। किमुक्तम्॥ गतिकारकोपपदानांकृद्भिस्सह समासवचनं प्राक् सुबुत्पत्तेरिति। तत्रयुवादीनां प्रतिषेधोवक्तव्यः॥ आर्ययूना। क्षत्रिययूना॥ प्रपक्वानि। परिपक्वानि। दीर्घाह्नीशरदिति॥ कुम्मतिच॥ अथेह कथं भवितव्यं माषकुम्भवापेण। व्रीहिकुम्भवापेण। किंनित्यं भवितव्यम्। आहोस्विद्विभाषया॥ यदातावदेतद्वाक्यं भवति कुम्भस्यवापः कुम्भवापः माषाणांकुम्भवापः माषकुम्भवाप इति तदा नित्यं णत्वे न भवितव्यम्। यदा त्वेतद्वाक्यं भवति माषाणांकुम्भः माषकुम्भः माषकुम्भस्यवापः माषकुम्भवाप इति तदा विभाषया भवितव्यम्॥ उपसर्गादसमासेपिणोपदेशस्य॥ असमासग्रहणंकिमर्थम्। समास इति वर्त्तते। असमासेपि यथा स्यात्। प्रणमति। परिणमिति॥ क्वपुनः समासग्रहणंप्रकृतम्। पूर्वपदात्संज्ञायामग इति। कथंपुनस्तेन समासग्रहणं शक्यं विज्ञातुम्। पूर्वपदग्रहणसामर्थ्यात्॥ समासएतद्भवति। पूर्वपदमुत्तरपदमिति॥ अथापिग्रहणंकिमर्थम्॥ समासेऽपि यथास्यात्। प्रणामकः। परिणामकः। यदि तर्हि समासेचासमासेचेष्यतेनार्थोऽसमासेपिग्रहणेन। निवृत्तं पूर्वपदादिति। अविशेषेणोपसर्गादणत्वं वक्ष्यामि॥

धातुपदत्वाभावान्निषेधाप्रवृत्तिः। कुम्भस्यवापः कुम्भवापो माषाणांकुम्भवापो माषकुम्भवाप इत्यस्यां तु प्रक्रियायांणत्वप्रतिषेध इति॥ उपसर्गा॥ समास एतद्भवतीति। ननु सुबामन्त्रित इत्यत्रोक्तम्। अविशेषेणैव तद्भवति पूर्वपदमिति तेनच प्रेन्नन्नित्यत्रणत्वंनभविष्यतीति। उच्यते। स्वरग्रहणप्रत्याख्यानायतदुक्तंनत्वेषपक्षः स्थितः॥ राम॰ ९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समासेनियमादिति। यदापूर्वपदात्संज्ञायामगइतिसूत्रंनियमार्थमितिपक्षः तदैतदुच्यते। समासपदेहिसमानेनिमित्तनिमित्तिनो र्भावात्सिद्धंणत्वंनियम्यते। यदातुसमानग्रहणात् समानमेवयन्निमित्तपदं तदाश्रीयतेतदापूर्वपदादित्यस्यविध्यर्थत्वाद समासेपिग्रहणस्यज्ञापकत्वानुपपत्तिः। न्यायात्तुप्रकरणेप्रकरणस्यासिद्धत्वंव्यवस्थाप्यतेप्रकरणस्यार्थवत्त्वाख्यत्वात्तद न्तर्गतानांयोगानामानर्थक्याद्योगेयोगस्यासिद्धत्वायोगात्। असिद्धत्वेनकार्यासंपादनादनर्थकत्वमितिभावः। प्रकरणासि

समासेनियमान्नप्राप्नोति। असिद्धमुपसर्गाण्णत्वंतस्यासिद्धत्वान्नियमोनभविष्यति॥ एवंतर्हिसिद्धेसतियदस मासेपिग्रहणंकरोतितद्ज्ञापयत्याचार्यः नयोगोयोगेऽसिद्धः। किंतर्हिप्रकरणेप्रकरणमसिद्धमिति। किमेतस्यज्ञा पनेप्रयोजनम्। यत्तदुक्तंनिष्कृतंनिष्पीतमित्यत्रसत्वस्यासिद्धत्वात्षत्वंनप्राप्नोतीतिसनदोषोभवति। णोपदेशं प्रतिउपसर्गाभावादनिर्देशः॥ अगमकोनिर्देशः। अनिर्देशः। यत्क्रियायुक्ताःस्तंप्रतिगत्युपसर्गसंज्ञेभवतः॥ नचणोप देशंप्रतिक्रियायोगः॥ एवंतर्हिआह्रायंउपसर्गादसमासेपिणोपदेशस्यनचणोपदेशंप्रतिउपसर्गोऽस्ति। तत्रवचनाद्भ विष्यति। वचनप्रामाण्यादितिचेत्सदलोपेप्रतिषेधोवक्तव्यः। प्रगतानायकाअस्माद्ग्रामात्प्रनायकोग्रामइति। सि द्धंतुयंप्रत्युपसर्गस्तत्स्थस्येतिवचनात्। सिद्धमेतत्। कथम्। यंप्रत्युपसर्गः तत्स्थस्यनोणोभवतीतिवक्तव्यम्। सि ध्यति॥ सूत्रंतर्हिभिद्यते। यथान्यासमेवास्तु। ननुचोक्तंणोपदेशंप्रत्युपसर्गाभावादनिर्देशइति। नैषदोषः। नैवंविज्ञा यतेण. उपदेशःणोपदेशःणोपदेशस्येति। किंतर्हिण उपदेशोऽस्यसोऽयंणोपदेशःणोपदेशस्येति॥ हिनुमीना॥ हिनुमीनाग्रहणेविकृतस्योपसंख्यानम्। हिनुमीनाग्रहणेविकृतस्योपसंख्यानंकर्त्तव्यम्॥ प्रहिणोति। प्रमीणी ते। वचनाद्भविष्यति। अस्तिवचनेप्रयोजनम्। किम्। प्रहिणुतः। प्रमीणाति॥

द्धत्वेपितस्यार्थवत्त्वाख्यत्वाद्बहूनामानर्थक्यम्। अथवानिष्कृतमित्यादौविसर्जनीयस्यैवसत्वंविधेयंनतुसकारस्य। णोप देशंप्रतीति। उपदिश्यतइत्युपदेशोणश्चासाउपदेशोणोपदेशइतिकर्मधारयंमत्वाचोद्यते। नैवंविज्ञायतइति। उपसर्गग्रह णस्यमाभूद्गौणार्थत्वमितिमुख्यार्थग्रहणायबहुव्रीहिराश्रीयते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनिलोट्॥ आनिशब्दमिति। क्रियायोगग्रहणस्यैव यत्क्रियायुक्तास्तं प्रतीति व्याख्यानम्। योगश्चार्थलक्षणः तत्र प्रयोगविषयात् क्रियाश्रीयते साच नक्वचिदसंसृष्टास्तीति समुदायस्था आश्रीयत इति आनिशब्दान्तसमुदायं प्रति क्रियायोगः। तत्रायं सूत्रार्थः। उपसर्गात्परस्य समुदायस्य य आनिशब्दस्तन्नकारस्य णत्वमिति। नदेवं प्रत्याख्यातं लोड्ग्रहणम्॥ नेर्गद॥ तदिति॥

सिद्धमचः स्थानिवत्त्वात्। सिद्धमेतत्। कथम्। अचः स्थानिवत्त्वात्। स्थानिवद्भावादत्र णत्वं भविष्यति। प्रतिषिध्यतेऽत्र स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति। दोषा एवैतस्याः परिभाषायाः। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति॥ आनिलोट्॥ लोडिति किमर्थम्। प्रहिमानि कुलानि। प्रवपानि मांसानि॥ आनि लोड्ग्रहणानर्थक्यमर्थवद्ग्रहणात्॥ आनि लोड्ग्रहणमनर्थकम्। किं कारणम्। अर्थवद्ग्रहणात्। अर्थवतः आनिशब्दस्य ग्रहणम्। नैषोऽर्थवान्॥ अनुपसर्गाद्वा॥ अथवा यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञे भवतः। न चैतमानिशब्दं प्रति क्रियायोगः। इष्टापि तर्हि न प्राप्नोति। प्रयाणि परियाणीति। अत्रापि न आनिशब्दं प्रति क्रियायोगः। आनिशब्दं प्रत्यत्र क्रियायोगः। कथम्। नैवं विज्ञायते यस्य क्रिया यत्क्रियायत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति। कथं तर्हि। यात्क्रियायत्क्रियायत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति॥ नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च॥ नेर्गदादिषु अड्व्यवाय उपसंख्यानम्। नेर्गदादिषु अड्व्यवाय उपसंख्यानं कर्तव्यम्। प्रण्यगदत्। आडि चेति वक्तव्यम्। प्रण्यागदत्। ननु चायमड् गदादिभक्तः गदादिग्रहणेन ग्राहिष्यते। न सिध्यति॥ अङ्गस्य अडुच्यते। विकरणान्तं चाङ्गम्। सोऽसौ सङ्घातभक्तः अशक्यो गदादिग्रहणेन ग्रहीतुम्॥ एवं तर्हि अड्व्यवाय इति वर्तते। क्व प्रकृतम्। अट्कुप्वाङ्नुम्व्यवायेऽपीति। तद्वै कार्यिविशेषणं निमित्तविशेषणे न चेहार्थः। तत्रापि निमित्तविशेषणमेव॥ अनितेः॥ अन्तः॥ अन्तग्रहणं किमर्थम्।

तत्र हि निमित्तयो रेफषकारयो र्निमित्तिनश्च नकारस्याट्व्यवाय आश्रितः। इह तु नेः परे गदादयोऽव्यवहिता इति णत्वाप्रसङ्गः। तत्रापीति। यत्र यन्निमित्तं तत्राप्यडादिभिर्व्यवायेऽपि णत्वमिति गदादीनामपि निमित्तत्वसद्भावादव्यवायेन णत्वं सिध्यतीत्यर्थः॥ अनितेः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संबुद्ध्यर्थमिति। अनितेर्नकारोऽन्तए वेः त्यन्तग्रहणसामर्थ्यात् पदस्यान्तो विज्ञायतइति पदान्तस्येति प्रतिषेधो योगविभागे नबाध्यते। आपरआहेति। पाठभेदं दर्शयति। वस्तुतस्तु नास्ति भेदः। योवातस्मादिति। अस्मिन् पक्षेप्राणितिसंबुद्ध्यर्थमावर्त्तनीयमन्तग्रहणम्। तद्यः सामीप्यइति। एकवर्णव्यवधानंचसामर्थ्यादाश्रीयते। पर्यनितीत्यत्रतुवर्णद्वयव्यवधानाण्णत्वाभावः। उभौ॥ साभ्यासस्यद्वयोरिति। उभौग्रहणस्यप्रयोजनंदर्शयति। उभाविस्यस्मिन्नसतिसाभ्यासानितेर्णोभवतीत्युच्यमानेवचन॥

अनितरन्तग्रहणंसंबुद्ध्यर्थम्। अनितेरन्तग्रहणंक्रियते। संबुद्ध्यर्थम्। हेप्राण्। अपरआह। अनितेरन्तः पदान्तस्य। अनितेरन्तग्रहणंक्रियतेपदान्तस्यनेतिप्रतिषेधः प्राप्तस्तद्बाधनार्थम्। योवातस्मादनन्तरः। अथवाअयमन्तशब्दोस्त्येवावयववाची। तद्यथा। वस्त्रान्तो वसनान्तइति। अस्तिसामीप्येवर्त्तते। तद्यथा। उदकान्तंगतः। उदकसमीपंगतइतिगम्यते। तद्यः सामीप्येवर्त्ततेतस्यग्रहणंविज्ञायते। अनितेः समीपेयोरफस्तस्मान्नस्ययथास्यात्। प्राणितीति। इहमाभूत्। पर्यनितीति॥ उभौसाभ्यासस्य॥ साभ्यासस्यद्वयोरिष्टम्॥ साभ्यासस्यद्वयोर्णत्वमिष्यते। प्राणिणिषति॥ हन्तेरत्पूर्वस्य॥ अत्पूर्वस्येतिकिमर्थम्। प्रघ्नन्ति। हन्तेरत्पूर्वस्यवचनेउक्तम्। कुव्यवायेहादेशेषुप्रतिषेधइति॥ उपसर्गादनोत्परः॥ कथमिदंविज्ञायतेओकारात्परः ओत्परः नओत्परः अनोत्परः आहोस्विदोकारःपरः अस्मात्सोऽयमोत्परः नओत्परः अनोत्परइति। किंचातः। यदिविज्ञायतेओकारात्परः ओत्परः नओत्परः अनोत्परइति। प्रनोमुञ्चतम्। अत्रापिप्राप्नोति॥ अथविज्ञायतेओकारः परोऽस्मात्सोऽयमोत्परः नओत्परः अनोत्परइति। प्रणोवनिर्देवता अत्रापिनिषेधः प्राप्नोति। उभयथाचप्रक्रमेदोषोभवति। प्रनः मुञ्चतम्। प्रनोमुञ्चतम्। प्रउनः प्रोनः।

सामर्थ्यात्पूर्वत्रासिद्धीयमद्विर्वचनइत्यसनाश्रीयमाणेः कृतणत्वस्य द्विर्वचनेकृते। नन्तरस्यपूर्वेणणत्वस्यसिद्धत्वाद्व्यवहितायामिदंणत्वंस्यादनन्तरस्यतुनकोऽपिन्यन्यायेननस्यादित्युभाविस्युच्यते॥ उपसर्गादनोत्परः॥ उभयथाचप्रक्रमइति। प्रक्रमोग्रन्थपरिचयार्थः क्रमपाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाविन्यपीति। यद्यपि क्रमपाठे ओकारो नास्ति संहितापाठे तु भावीति णत्वं न प्रवर्त्तते। संप्रति कसङ्गावे तु भाविगतिर्दुर्लभेति पाठान्तरमाश्रितम्। अथवोभयथापि प्रक्रमे इत्यस्यायमर्थः। उभयथा चाश्रीयमाणे इह दोष इति। भाविनीति। ओकारार्थ उकार ओ शब्देनोच्यत इत्यर्थः। मुख्यार्थसंभवे गौणार्थग्रहणमयुक्तमिति पाठान्तरसमाश्रयः॥ कृत्यचः॥ निर्विणस्येति। अचः परः कृत्स्थो नकारो न भवतीति वचनम्। तत्र परस्य णत्वं पूर्वस्य ष्टुत्वम्॥ णेर्वि॥ णेरिति पञ्चमीनिर्देशादनन्तर एव स्यादिति णेरिति वार्त्तिकारम्भः। साधनव्यवाय इति। साधनाभिधायिनि सार्वधातुके विधानाद्विकरणः साधनशब्देनोच्यते।

भाविन्यपोतिणत्वं नेष्यते। भाविन्यप्योकारेण त्वं नेष्यते॥ एवं तर्ह्युपसर्गाद्बहुलमिति वक्तव्यम्॥ कृत्यचः॥ कृत्स्थस्य

सू॰ णत्वे निर्विण्णस्योपसंख्यानम्॥ कृत्स्थस्य णत्वे निर्विण्णस्योपसंख्यानं कर्त्तव्यम्। निर्विण्णोऽहमनेन वासेन॥ णेर्विभाषा॥ णेर्विभाषा साधनव्यवाये उपसंख्यानम्। णेर्विभाषायां साधनव्यवाये उपसंख्यानं कर्त्तव्यम्। प्राप्यमाणम्। प्राप्यमानम्। तद्विधानात्सिद्धम्। विहितविशेषणम्। ण्यन्ताद्यो विहित इति। अड्धिकाराद्वा। अथवा अड्व्यवाय इति वर्तते॥ इजादेः सनुमः॥ किमर्थमिदमुच्यते न कृत्यच इत्येव सिद्धम्। नियमार्थोऽयमारम्भः। इजादेरेव सनुमः स्यादिति। क्व माभूत्। प्रमङ्गनम्। सनुमो णत्वेऽवधारणाप्रसिद्धिर्विधेयाभावात्। सनुमो णत्वेऽवधारणस्याप्राप्तिः। किं कारणम्। विधेयाभावात्। किं मर्थक्यान्नियमो भवति विधेयं नास्तीति कृत्वा। इह चास्ति विधेयम्। किम्। ण्यन्ताद्विभाषा प्राप्ता। तत्र नित्यं णत्वं विधेयम्। तत्रापूर्वो विधिरस्तु नियमोऽस्त्विति। अपूर्वो विधिर्भविष्यति न नियमः। सिद्धं तु प्रतिषेधाधिकारे सनुम्ग्रहणात्। सिद्धमेतत्। कथम्। प्रतिषेधाधिकारे सनुम्ग्रहणात्। प्रतिषेधाधिकारे सनुम्ग्रहणं कर्त्तव्यम्। न भाभूपूकमिगमिप्यायीवेपि सनुमामिति॥

विकरणः साधनाभिधायीति केषांचिन्मते न वा। तद्विधानादिति। सूत्रे पुनरयथेष्टं वाक्यशेषाध्याहाराद् ण्यन्ताद्यो विहितः कृदित्याश्रीयते। अड्धिकाराद्वेति। ण्यन्तात्परो यः कृदित्येवमाश्रीयमाणे न दोषो ण्यन्तस्य कृतां चाड्व्यवायेऽपि णत्वाभ्यनुज्ञानात्॥ इजादेः॥ सनुमो णत्व इति। नियमे प्राप्तबाधः सिद्धस्य पुनरुपादानादनुवादो दोषश्च। विधौ तु न प्राप्तबाधो नाप्यनुवादो दोष इति विनियमसंभवे विधिरेव ज्यायानिति भावः। सिद्धं त्विति। तेन प्रमङ्गनमित्यादौ णत्वं न भवति। न त इजादेः सनुम इति योगो विध्यर्थः संपद्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रनार्थोन्तविशेषणेनेति। इजुपधस्य हलन्तत्वाव्यभिचारात्सामर्थ्यात्तत्रादिविशेषणं हल्ग्रहणम्॥ तत्रनार्थ इति। इजादेर्हैलादित्वासंभवादन्तविशेषणं हल्ग्रहणं संपद्यत इति। हलन्तादिजादेः सनुमो योविहितः कृत् तत्स्य स्येत्येवं विज्ञायमाने ण्यन्ताद्धि व्यर्थोयं योगे न भवतीतिनियमायसंपद्यते॥ नभाभूपूकमिगमि॥ ण्यन्तस्य चेति। ण्यन्तस्य धातुनन्तत्वान्निषेधो न प्राप्नोतीतिवचनम्॥ षात्॥ षात्पदादीति। पदादौ परत्तो यः षकारस्तस्मात्परस्य पदस्य यो नकारस्तस्य णत्वं भवती त्यर्थः। पदे अन्त इति।

इहापि तर्हि न प्राप्नोति। प्रेङ्खणीयम्। प्रेङ्खणम्। कृत्स्थस्य णत्वे इजादेः सनुमो ग्रहणं कर्त्तव्यम्। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं सनुमो णत्वे ऽवधारणाप्रसिद्धिर्विधेयभावादिति। नैष दोषः। हलइतिवर्त्ततोऽप्रकृतम्। हलश्चेजुपधादिति। नहि तत्रादिविशेषणमन्तविशेषणेन चेहार्थः। कथं पुनर्ज्ञायते तत्रादिविशेषणमिति। इजुपधादित्युच्यते। तत्रनार्थोन्तविशेषणेन तत्र आदिविशेषणं सद्धि हान्तविशेषणं भविष्यति। कथम्। इजादेरित्युच्यते। तत्रनार्थ आदिविशेषणेन॥ अथवा इजादेः सनुमइ सत्वणोर्विभाषेत्येतदनुवर्त्तिष्यते॥ नभाभूपूकमिगमिप्यायीवेपाम्। भादिषु पूञ्ग्रहणम्। भादिषु पूञ्ग्रहणं कर्त्तव्यम्। इह माभूत्। प्रपवणं सोमस्येति। ण्यन्तस्य चोपसंख्यानं कर्त्तव्यम्। किं प्रयोजनम्। प्रयोजनं पूज एव। नेत्याह॥ अविशेषेण। प्रभापनं परिभापनम्। षात् पदान्तात्॥ षात्पदादिपरवचनम्। षात्पदादिपरग्रहणं कर्त्तव्यम्॥ इहैव यथा स्यात्। निष्पानं दुष्पानम्। इह माभूत्। कुसर्पिष्केण। अयजुष्केण। नत्तर्हि वक्तव्यम्। नवक्तव्यम्। नैवं विज्ञायते पदस्यान्तः पदान्तः पदान्तादिति। कथं तर्हि पदे अन्तः पदान्तः पदान्तादिति॥ नशेर्वान्तस्य॥ नशेरन्तः। नशेरइतिवक्तव्यम्। इहापि यथा स्यात्। प्रनंक्ष्यति। परिनंक्ष्यति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। इह पुनः नशेः ष इतीयता सिद्धम्। सोयमेवं सिद्धे सति यदन्तग्रहणं करोति तस्यैतत्प्रयोजनं षान्तभूतपूर्वस्यापि यथा स्यात्॥

षात्पदादित्येवषकारेण पदस्य विशेषणात् षान्तात्पदादिति लब्धेर्थेन्तग्रहणात्सप्तमीसमास आश्रीयते॥ नशेः॥ प्रनंक्ष्यतीति। नशेः षत्वे षढोः कः सीति कत्वे कृते रूपं मस्जिनशोर्झलीति नुमागमः स च षत्वात्पूर्वमेव प्रवर्त्तते॥ पूर्वत्रासिद्धवचनात्। षान्तेति। अन्तग्रहणसामर्थ्याद् यश्च संप्रति षान्तो यश्च भूतपूर्वस्तस्य सर्वस्य णत्वनिषेधः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुम्नादिषु च॥ अविहितेति। नभाभूपूङ्कमिगमीत्यादयस्तु योगा अस्यैव प्रपञ्चार्थाः॥ अनचिच॥

पदव्यवायेपि॥ पदव्यवाये तद्धिते। पदव्यवाये भवद्धित इतिवक्तव्यम्। इह मा भूत्॥ आर्द्रगोमयेण। सुष्कगोमयेण। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नैवं विज्ञायते पदेन व्यवायः पदव्यवायः पदव्यवाय इति। कथं तर्हि पदे व्यवायः पदव्यवायः पदव्यवाय इति॥ स्तुम्नादिषु च॥ अविहितलक्षणो णत्वप्रतिषेधः स्तुम्नादिषु द्रष्टव्यः॥ स्तोः श्चुना श्चुः॥ किमर्थं तृतीया निर्देशः क्रियते। नश्चाविति षष्ठ्येवोच्येत। आनन्तर्यमात्रे श्चुत्वं यथा स्यात्। यज्ञः। राज्ञः। अथ संख्यातानुदेशः कस्मान्न भवति। आचार्यप्रवृत्तिर्ज्ञापयति संख्यातानुदेशो नेति। यदयं शात्प्रतिषेधं शास्ति॥ ष्टुना ष्टुः॥ किमर्थं तृतीया निर्देशः क्रियते। न षष्ठ्येवोच्येत। आनन्तर्यमात्रे ष्टुत्वं यथा स्यात्। पेष्टा। लेढा। अथ संख्यातानुदेशः कस्मान्न भवति। आचार्यप्रवृत्तिर्ज्ञापयति नेह संख्यातानुदेशो भवतीति। यदयं तोः षीति प्रतिषेधं शास्ति॥ न पदान्ताट्टोरनाम्॥ अनामिति किम्। षण्णां भवति काश्यपः। अत्यल्पमिदमुच्यते अनामिति। अनाम्नवतिनगरीणां चेति वक्तव्यम्। षण्णवतिः। षण्णगर्यः॥ यरोऽनुनासिकेऽनुनासिको वा॥ यरोऽनुनासिके प्रत्यये भाषायां नित्यवचनम्। यरोऽनुनासिके प्रत्यये भाषायां नित्यमिति वक्तव्यम्। वाङ्मयम्। त्वङ्मयम्॥ अनचि च॥ द्विर्वचने यणो मयः। द्विर्वचने यणो मय इति वक्तव्यम्। किमुदाहरणम्॥ यदि य इति पञ्चमी मय इति षष्ठी॥ उल्क्कावल्म्मीकमित्युदाहरणम्। अथ मय इति पञ्चमी यण इति षष्ठी। दध्य्यत्र मध्व्वत्रेति उदाहरणम्। शरः खयः। शरः खय इति वक्तव्यम्। किमुदाहरणम्। यदि शर इति पञ्चमी खय इति षष्ठी। स्थ्थाली स्थ्थातेत्युदाहरणम्। अथ खय इति पञ्चमी शर इति षष्ठी। वत्स्सरः क्षीरम्। अप्सराः इत्युदाहरणम्। अवसाने च। अवसाने च द्वे भवत इति वक्तव्यम्। वाक्क्। वाक्। त्वक्क्। त्वक्। स्रुक्क्। स्रुक्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्॥

राम ७१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नायंप्रसज्यप्रतिषेधइति। पाठोयंलेखकप्रमादान्नष्टः। पर्युदासेह्यचूसदृशस्यवर्णान्तरस्यनिमित्तत्वेनोपादानादवसानेद्विर्व
चनस्याप्रसंङ्गात्। तस्मान्नायंपर्युदासोयदन्यदचइति। किंतर्हि प्रसज्यप्रतिषेधोऽचिनेति अयंपाठस्तत्रप्रसज्यप्रतिषेधे
विधिरनुमीयते अचउत्तरस्ययरोनूनंद्विर्वचनंसर्वत्रास्तियतःप्रतिषिध्यते। एवंचानैमित्तिकंद्विर्वचनमवसानेपिभवति॥ वे
त्यधिकाराच्चवाभवति। नादि॥ वाहतजग्धपरइति। हतजग्धंचतत्परंचेतिविशेषणसमासोराजदन्तादित्वाच्चपरशब्दस्यप
रनिपातः। पुत्रहतीति। बहुव्रीहिः। अस्वाङ्गपूर्वपदाद्वेतिवाङीष्॥ झरोझरिसवर्णे॥ शिण्ढीति। डकारस्यढकारेपरतोलोपः

नायंप्रसज्यप्रतिषेधः अचिनेति। किंतर्हिपर्युदासोयंयदन्यदचइति॥ नादिन्याक्रोशेपुत्रस्य॥ नादिन्याक्रोशेपुत्र
स्येतिनतत्परेच॥ नादिन्याक्रोशेपुत्रस्येत्यत्रतत्परेचेतिवक्तव्यम्। पुत्रपुत्रादिनी। वाहतजग्धपरेच। वाहतजग्ध
परेइतिवक्तव्यम्। पुत्रहती। पुत्त्रहती। पुत्रजग्धी। पुत्त्रजग्धी। चयोद्वितीयाःशरिपौष्करसादेः। चयोद्वितीयाः
भवन्ति। शरिपरतःपौष्करसादेराचार्यस्यमतेन। वथ्सरः। अफ्सराः॥ उदःस्थास्तम्भोःपूर्वस्य॥ उदःपूर्वत्वे
स्कन्देश्छन्दस्युपसंख्यानम्॥ उदःपूर्वत्वेस्कन्देश्छन्दस्युपसंख्यानंकर्त्तव्यम्। अग्नेदूरमुत्कन्दः। रोगेचेतिवक्त
व्यम्॥ उत्कंदकोरोगः॥ शश्छोटि॥ छत्वममितच्छ्लोकेनतच्छ्मश्रुणेतिप्रयोजनम्॥ छत्वममीतिवक्तव्यम्॥
किंप्रयोजनम्। तच्छ्लोकेन। तच्छ्मश्रुणोति॥ अभ्यासे॥ प्रकृतिचरांप्रकृतिचरोभवन्ति। चिचीषति॥ प्रकृ
तिजशांप्रकृतिजसश्चभवन्ति॥ जिजनिषति॥ बुबुधे॥ ददौ॥ झरोझरिसवर्णे॥ सवर्णग्रहणंकिमर्थम्। झरोझ
रिसवर्णग्रहणंसमसंख्यप्रतिषेधार्थम्॥ झरोझरिसवर्णग्रहणंक्रियते। संख्यातानुदेशोमाभूदिति। किंचस्यात्। इ
हनस्यात्। शिण्ढि। पिण्ढि। अअइति॥ किमर्थमिदमुच्यते। अकारोयमक्षरसमाम्नायेविवृतउपदिष्टस्तस्यसंवृतना
प्रत्यापत्तिःक्रियते॥

यथासंख्याश्रयणेतुनस्यात्सवर्णग्रहणात्तुयथासंख्याभावोनह्ययथासंख्येसत्यसवर्णोझरस्तियद्यावृत्त्यर्थंसवर्णग्रहणंस्या
त्॥ अअइति॥ किमर्थमिति॥ अकारस्याकारवचनेप्रयोजनाभावात्प्रश्नः॥ अकारोयमिति॥ सवर्णार्थमिहशास्त्रेविवृतदोष
युक्तोऽकारउपदिष्टः तस्यप्रयोगेसंवृतस्यैवोच्चारणार्थमिदंप्रत्यापत्तिवचनम्। अक्षरसमाम्नायग्रहणसकलशास्त्रोपलक्ष
णम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰कै॰ किंपुनरिति। कस्मात्पुनः कारणादित्यर्थः। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति प्रथमा। श्लोकोपन्यासाय श्लोकः। प्र- ५१
७२ योजनं त्वकारस्य विवृतोपदेश आकारग्रहणार्थः तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थ इति वार्त्तिक-
कृता पूर्वमेव प्रतिपादितम्॥ आदेशार्थमिति॥ अत्रापि प्रयोजनं विवृतोपदेशस्योक्तम्। वृक्षाभ्यामिति। यद्यपीदं प्रयोजनमम-
कारवार्त्तिके भाष्यकृता प्रत्याख्यातं नैव लोकेन च वेदे दीर्घप्लुतौ संवृतौ स्तः किं तर्हि विवृतौ यौ स्तस्तौ भविष्यत इति तथापि

किंपुनः कारणं विवृत उपदिश्यते। आदेशार्थं सवर्णार्थं मकारो विवृतः स्मृतः। आकारस्य तथा ह्रस्वस्तदर्थं पाणि-
नेरअ॥ आदेशार्थं तावत्। वृक्षाभ्याम्। देवदत्ताऽ३। आन्तर्यतो विवृतस्य विवृतौ दीर्घप्लुतौ यथा स्यातामिति। सवर्णार्थं
चै॥ अकारः सवर्णग्रहणेनाकारमपि यथा गृह्णीयात्॥ आकारस्य तथा ह्रस्वः॥ तथा अतिखट्वः अतिमालः इत्य-
त्राकारस्य ह्रस्व उच्यमानो विवृतः प्राप्नोति संवृतः स्यादित्येवमर्थाप्रत्यापत्तिः॥ अस्ति प्रयोजनमेतत्॥ किं तर्हीं-
ति॥ अकारस्य प्रत्यापत्तौ दीर्घप्रतिषेधः। अकारस्य प्रत्यापत्तौ दीर्घस्य प्रतिषेधो वक्तव्यः॥ खट्वा माला। नैष दोषः
। तथैव प्रकृतितः सवर्णग्रहणं एवमादेशतोपि भवितव्यम्। तत्रान्तर्यतो ह्रस्वस्य ह्रस्वः दीर्घस्य दीर्घो भविष्य-
ति। आदेशस्य चानण्त्वान्न सवर्णग्रहणम्। आदेशस्य चानण्त्वात्सवर्णानां ग्रहणं न प्राप्नोति॥ केषाम्। उदात्ता-
नुदात्तस्वरितानुनासिकानाम्॥

प्रयोजनान्तरसद्भावाद्धि हि प्रत्याख्याना ~ शोनकृतः पूर्वमेवाप्रत्याख्यानात्॥ आकारस्येति। इदमपि प्रत्याख्यातं प्रयोजनम्।
नैव लोके न च वेदे अकारोस्ति विवृत इति। दीर्घप्रतिषेध इति। दीर्घस्योपलक्षणार्थत्वात्प्लुतस्यापि प्रतिषेधो वक्तव्यः। क्वचित्तु
दीर्घप्लुतप्रतिषेध इति पाठः। इह स्थान्यकारो विवृतो ऽण्त्वात्सवर्णानां ग्राहक इति दीर्घप्लुतयोरपि स्थाने संवृतोऽकारः प्राप्नो-
तीति प्रतिषेध उच्यते। आदेशस्येति॥ संवृताकारोऽण्न भवतीति सवर्णानां ग्रहणं प्राप्नोति। भाव्यमानत्वाच्च॥ उदात्तेति। तत्र रामः
श्च यद्गुणयुक्तः संवृत उच्चारितः तद्गुण एव तत्रयाणामपि ह्रस्वदीर्घप्लुतानां प्राप्नोतीत्यनिष्टप्रसङ्गः इष्टं च न सिध्यतीति सर्वगु- ७२
णस्य मात्रिकस्य प्रत्यापत्तेरिष्टत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धं त्विति॥ अद् इति सूत्रं कर्त्तव्यम्। तत्र तः परो यस्मादिति पूर्वोऽकारस्तपरः तस्मात्परस्तपर इति एवं द्वितीयस्तपरः न तः स्था
न्यकारो भिन्नकालो दीर्घप्लुतौ न ग्रहीष्यति। आदेशस्तु तत्कालान् गुणान्तरयुक्तान् ग्रहीष्यति॥ केचिद् द् इति द्वावपि तपरोपादि
तव्यावित्याहुः। एकशेषनिर्देशाद्वेति। षट्। मात्रिका अकाराः स्थानिनो निर्दिश्यन्ते। एवमादेशा अपि षड्वेव। ततश्चैकशेषस्तत्र

सिद्धं तु तपरनिर्देशात्। सिद्धमेतत्। कथम्। तपरनिर्देशात्। तपरनिर्देशः कर्त्तव्यः। अद् इति। अपर आह। अकार
स्य प्रत्यापत्तौ दीर्घप्रतिषेधः॥ अकारस्य प्रत्यापत्तौ दीर्घस्य प्रतिषेधो वक्तव्यः॥ खट्वामाला॥ नैष दोषः। दीर्घोच्चा
रणसामर्थ्यान्न भविष्यति॥ इदं तर्हि वृक्षाभ्याम्। प्लक्षाभ्याम्। अत्रापि दीर्घवचनसामर्थ्यान्न भविष्यति। इदं तर्हि
अपि काकः श्येनायते। ननु चात्रापि दीर्घवचनसामर्थ्यादेव न भविष्यति अस्त्यन्यद्दीर्घवचने प्रयोजनम्। किम्।
दधीयति। मधूयति॥ आदेशस्य चानण्त्वात्सवर्णाग्रहणम्॥ आदेशस्य चानण्त्वात्सवर्णानां ग्रहणं न प्राप्नोति।
केषाम्। उदात्तानुदात्तस्वरितानुनासिकानाम्। सिद्धं तु तपरनिर्देशात्। सिद्धमेतत्॥ कथम्। तपरनिर्देशात्। तपर
निर्देशः कर्त्तव्यः। अद् दिति। एकशेषनिर्देशाद्वा स्वरानुनासिकभिन्नानां भगवतः पाणिनेः सिद्धम्। एकशेषनि
र्देशाद्वा भगवतः पाणिनेराचार्यस्य सिद्धम्॥ एकशेषनिर्देशोऽयम्॥ अ अ इति॥ इति श्रीमद्भगवत्पतञ्जलिविर
चिते व्याकरणमहाभाष्ये अष्टमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम्॥ पादश्च समाप्तः॥ अध्यायश्चाष्टमः॥ १

षण्णां स्थानिनां निर्देशसामर्थ्याद्भिन्नकालौ दीर्घप्लुतौ स्थानिभिर्न गृह्येते। तत्र यथासंख्यं षण्णां विवृतानां स्थाने षडादेशाः
संवृता भवन्तीति सिद्धमिष्टम्॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे अष्टमस्याध्यायस्य चतुर्थे पादे प्रथ
ममाह्निकम्॥ पादश्चतुर्थः॥ अध्यायश्चाष्टमः समाप्तः॥ श्रीसीतारामचन्द्रार्पणमस्तु॥ शुभं भवतु॥ ७ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ विद्योदयो निराकुर्याद् अविद्यातिमिरं सदा ॥

॥ श्रीसंकष्टनाशिन्यै नमः ॥

॥ इत्यष्टमः ॥

॥ श्रीविश्वेश्वराय नमः ॥

॥ सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu